CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायः विषयनिर्देशः
२२ तत्त्वविरोधःपुंप्रकृत्योर्विवेकःजन्ममृत्युभेदाश्च
२३ कदर्याख्यानंतिरस्कारसहनोपदेशायमनःसैय नायचभिक्षुगीतं
२४ सांख्ययोगेनमनोमोहनिवारणम्
२५ चित्तप्रभवाःसत्त्वादिगुणाः
२६ ऐलगीतायांदुष्टसंगेनयोगनिष्ठानाशःसाधुसंगेन तत्प्राप्तिश्च
२७ सर्वकामाप्तिहेतुःक्रियायोगः

अध्यायः विषयनिर्देशः
२८ ज्ञानयोगसंक्षेपकथनम्
२९ भक्तियोगसंक्षेपः
३० मौसलेनयादवनाशः
३१ स्वधाम्निगतेहरौवसुदेवादिदेहत्यागः

द्वादशःस्कंधः
१ मागधान्वयेपापाचाराराजानः
२ कलेरन्तेकल्क्यवतारःकृतयुगारंभश्च

अध्यायः विषयनिर्देशः
३ भूमिगीतेनराज्ञामोहवर्णनंहरेःस्तुतिश्च
४ परीक्षितेतक्षकभीतिनिवारणायब्रह्मोपदेशः
५ परीक्षिन्मोक्षः । जनमेजयकृतं सर्पसत्रम्
६ व्यासेनवेदत्रयशाखाविभागःसूर्याराधनेनयाज्ञ वल्क्यस्यवेदप्राप्तिः
७ अथर्ववेदविस्तारः । पुराणविभागाःतल्लक्षणादि भागवतश्रवणफलम्
८ मार्कंडेयस्यतपः नरनारायणस्तुतिः

अध्यायः विषयनिर्देशः
९ मार्कंडेयस्यमायादर्शनंवटपत्रेशयानस्यभगवतो मुखेप्रवेशनिर्गमौच
१० मार्कंडेयायाशिवस्यवरःप्रीतिश्च
११ उपासनासिद्ध्यै महापुरुषवर्णनं प्रतिमासंरवि- वर्णनम् ।
१२ भागवतोक्तकथानांक्रमेणसंक्षेपः
१३ भगवन्तंनमस्यन्नष्टादशपुराणसंख्यावर्णनम् ।

इति भागवतविषयक्रमनिदर्शनम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायः विषयनिर्देशः

३५ वनंगतेकृष्णेगोप्योगानेनकालनयन्ति ।
३६ अरिष्टासुरवधः । नारदवाक्यात्कंसोक्रूरंगोकुलं प्रेषयति ।
३७ केशिव्योमासुरयोर्वधः ।
३८ गोकुलेऽक्रूरसत्कारः ।
३९ मथुरांगच्छतिकृष्णेगोपिकालापः । अक्रूरःकालिन्द्यांविष्णुंपश्यति ।
४० अक्रूरकृतास्तुतिः ।
४१ मथुरांप्रविशन्रजकवधः मालाकारेऽनुग्रहः ।
४२ कुब्जायामनुग्रहः । धनुर्भङ्गः
४३ कुवलयापीडवधः । सभायांचाणूरमुष्टिकादिभापणम् ।
४४ चाणूरादिवधः । कंसवधश्च ।
४५ नन्दसान्त्वनम् । उग्रसेनराज्याभिषेकः।विद्योपार्जनं गुरुदक्षिणापुत्रदानेन ।
४६ गोपीसांत्वनायोद्धवप्रेषणम् ।
४७ उपादिश्यगोपीरुद्धवःपुनर्मथुरामायाति ।
४८ कुब्जागृङ्गारः । अक्रूरंहस्तिनापुरंपाण्डववृत्तान्तज्ञानायप्रेषयति ।
४९ तद्वृत्तान्तंज्ञात्वाऽक्रूरागमनम् ।
५० जरासंधपराजयः। द्वारकानिर्मितिः ।
५१ कालयवनवधः । मुचुकुन्दानुग्रहश्च ।
५२ रुक्मिणीप्रेषितब्राह्मणात्सन्देशश्रवणम् ।

अध्यायः विषयनिर्देशः

५३ रुक्मिण्यपहारः ।
५४ रुक्मादिपराजयः । रुक्मिण्याःपाणिग्रहणम् ।
५५ रुक्मिणीपुत्रप्रद्युम्नाख्यानम् ।
५६ स्यमन्तकोपाख्यानम् । जाम्बवतीसत्यभामाविवाहः ।
५७ शतधन्वतःप्राप्तमणेरक्रूरादपिमाणिग्रहः
५८ कालिन्दीमित्रविन्दासत्याभद्रालक्ष्मणानांपाणिग्रहः
५९ भौमासुरवधः । षोडशसहस्रकन्याविवाहः । पारिजातापहारः ।
६० रुक्मिण्याप्रीतिकलहःतस्याःसांत्वनंच
६१ कृष्णसंततिवर्णनं । अनिरुद्धविवाहेरुक्मिणोवधः
६२ उखामंदिरेअनिरुद्धस्यबाणासुरेणरोधनम्
६३ बाणयादवसंगरः। उखयाअनिरुद्धोद्वाहः
६४ ब्रह्मस्वदोषदर्शनमिषेणनृगोद्धारः
६५ गोकुलेरामोगोपीभीरमयन्यमुनांचकर्ष
६६ पौंड्रकवधःसुदर्शनेनकाशीपतिकृतकृत्यायाःकाशिकायाश्चदाहः
६७ रैवतकेरामेणद्विविदवधः
६८ कौरवैरुद्धेसांबरामेणहस्तिनापुराकर्षणम्
६९ प्रत्येकंस्त्रीगृहेपुनारदायगार्हस्थ्यदर्शनम्
७० कृष्णस्याह्निकंजरासंधनिगृहीतराजदूतागमनं युधिष्ठिरनिमंत्रणम्

अध्यायः विषयनिर्देशः

७१ उद्धवमंत्रनिर्णयेनभगवतइंद्रप्रस्थागमनम्
७२ युधिष्ठिरराजसूयेभीमेनजरासंधवधः
७३ जरासंधनिगृहीतराज्ञांस्वस्वराज्येप्रेषणम्
७४ राजसूयवर्णनं । अग्रपूजाप्रसंगेचैद्यवधः
७५ यज्ञावभृथसंभ्रमेदुर्योधनमानभंगकथनम्
७६ शाल्ववृष्णिसंग्राम
७७ नानामायाविशाल्ववधः
७८ कृष्णेनविदूरथदंतवक्रवधःरामेणसूतवधः
७९ रामेणद्विजतुष्टयेबल्वलवधः । यात्रागमनम्
८० कृष्णगृहेसुदामागमनंतेनगुरुकुलवासकथाः
८१ सुदामपृथुकभक्षणंस्वतुल्यश्रीदानम्
८२ ग्रहणयात्रायांकुरुक्षेत्रगमनं । तत्रगोपगोपीः प्रतिआत्मज्ञानोपदेशः
८३ द्रौपद्यासहकथांकुर्वतीभिःकृष्णस्त्रीभिः स्वस्व विवाहवर्णनम्
८४ वसुदेवनारदसंवादानंतरंवसुदेवयज्ञोत्सववर्णनम्
८५ रामकृष्णौपित्रेज्ञानोपदेशंकृत्वामात्रेमृतपुत्रदर्शनंकृतवंतौ
८६ अर्जुनेनसुभद्राहरणं । भगवतोमिथिलागमनम्
८७ नारायणनारदकथाप्रस्तावाद्वेदस्तुतिः
८८ विष्णुभक्त मोक्षभाक् । अवर्द्देवताभक्तःसंपद्भाक्
८९ देवश्रैष्ठ्यनिर्णयेभृगुणाविष्णोरुत्कर्षवर्णनम्
९० संक्षेपेणकृष्णकथावर्णनंयादवकुलानंत्यवर्णनम्

अध्यायः विषयनिर्देशः

एकादशःस्कंधः

१ यदुकुलशापः । सांबात्मुशलप्रसवः
२ नारदेनवसुदेवायभागवतांतर्धर्मोपदेशः
३ माया, तत्तरणं, ब्रह्म, कर्म इति चतुर्णांनिर्णयः
४ अवतारकथावर्णनम्
५ भक्तिहीनानांपूजाधिकारार्थंपूजाविधिः
६ साकंनिजपदनयनार्थंभगवतेउद्धवप्रार्थना
७ उद्धवस्यआत्मज्ञानायअवधूतेतिहासवर्णनम्
८ उद्धवस्यज्ञानायनवगुरुभ्यःशिक्षितोपदेशः
९ कुररादिभ्यःशिक्षितंअवधूतात्नारदायश्रवणम्
१० देहसंबंधादात्मनःसंसृतिःस्वतोनेतिमतान्तरनिरासः
११ बद्धमुक्तभक्तानांतथाभक्तेर्लक्षणम्
१२ सत्संगमहिमा ।कर्मानुष्ठातारःतत्त्यागाधिकारिणः
१३ सत्त्वगुणेनज्ञानोदयः । हंसेतिहासः
१४ भक्तियोगश्रैष्ठ्यं । साधनैर्ध्यानयोगः
१५ मोक्षविघ्नभूताःआणिमाद्याःसिद्धयः
१६ उपासनार्थंभगवदंशभूताविभूतयः
१७ ब्रह्मचारिगृहस्थयोर्भक्तियुक्तोधर्मः
१८ वानप्रस्थयतिधर्मौ तदधिकारिणश्च
१९ पूर्वोक्तज्ञानादेर्भ्रमकारित्वात्त्यागः
२० यथाधिकारिभक्तिज्ञानक्रियात्मकोयोगः
२१ योगानधिकारिणांद्रव्यादीनांगुणदोषाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायः विषयनिर्देशः
११ देवानांदैत्यवधान्नारदेननिषेधःसंजीवन्याशुक्रेणतेषांजीवनम्
१२ मोहिनीरूपेणशंकरायमोहःपुनःसांत्वनम्
१३ अवशिष्टसप्तममन्वंतरवर्णनम्
१४ प्रतिमन्वंतराविर्भूतस्यअवतारादिषट्कस्यकर्मवर्णनम्
१५ बलिःविश्वजिद्यज्ञंकृत्वादेवानजयत्
१६ कश्यपस्यअदित्यैपयोव्रतोपदेशः
१७ पयोव्रतेतत्कामनापूरणायतत्पुत्रोहरिरभूत्
१८ वामनावतारः बलियज्ञगमनम्
१९ वामनायपादत्रयभूमिदानेशुक्रनिषेधः
२० गुरुणाशप्तोपिपादत्रयंददौ । हरिरवर्धत
२१ धर्मनिष्टांप्रथयितुंबलिंनागपाशैर्बबंध
२२ सुतलेतंसंस्थाप्यतद्द्वारपोभूत्
२३ उपेंद्रःइंद्रेणसहस्वर्गंगत्वादेवाननंदयत्
२४ प्रसंगात्मत्स्यावतारवर्णनम्

नवमःस्कंधः

१ मनुपुत्रसुद्युम्नस्त्रीत्वंतत्सुतपुरूरवसोराज्यप्रतिष्ठानाभागचरितम्
२ मनोर्दशपुत्राणांमध्येकरूषकादिपंचानांवंशानाह
३ शर्यातिःसुकन्ययाच्यवनपरिणयःरेवतीबलविवाहः
४ अंबरीषचरितंदूर्वासपृष्ठेसुदर्शनगमनम्
५ अंबरीषेदूर्वाससंविष्णुचक्रान्मोचितवान्
६ इक्ष्वाकुवंशस्थशशादस्यककुत्स्थस्ययौवनाश्वस्यतत्पंचाशत्कन्यकाभिर्वृतस्यमांधातुश्चाख्यानम्
७ तद्वंश्यस्यहरिश्चंद्राख्यानं । शुनःशेपमोक्षः
८ सगरयज्ञाख्यानेकपिलेनसगरसुतानांदाहः
९ भगीरथोगंगामानीयस्वपितृमोक्षंकृतवान् । ऋतुपर्णोत्पत्तिः । सौदासाख्यानं । खट्वांगस्यब्रह्मलोकगमनम्
१० दशरथाद्रामावतारःतच्चरितम्
११ रामराज्याभिषेकादिचरितम् ।
१२ रामपुत्रकुशवंशः इक्ष्वाकुतनयशशादस्यवंशश्च।
१३ निमेर्वंशः जनकादिवर्णनम् । वसिष्ठस्यनिमिशापः ।
१४ इन्दुनागुरुपत्न्यांबुधजन्म । पुरूरवसोर्वेश्यांषट्पुत्रोत्पत्तिः
१५ जह्नोरुत्पत्तिः । परशुरामावतारः । सहस्रार्जुनवधादिच ।
१६ अर्जुनसुतैर्हतेजमदग्नौ परशुरामतःक्षत्रवधः । विश्वामित्रवंशश्च ।
१७ पुरूरवसश्चतुःपुत्रेभ्यः क्षत्रोत्पत्तिः
१८ ययात्याख्यानम् । यत्र कनीयसापुत्रेणजराग्रहणम्
१९ ययातेर्देवयानींप्रत्यन्योक्त्या स्वकथाकथनेन विरक्त्यामोक्षः ।
२० पुरोर्वंशेशकुन्तलाख्यानम् । भरतयशः ।
२१ भरतवंशः । रन्तिदेवाजमीढवर्णनम् ।
२२ दिवोदासवंशः । ऋक्षवंशेजरासंधकुरुवंशोत्पत्तिः
२३ अनोर्द्रुह्युवसुयदूनांवंशकीर्तनम् ।
२४ विदर्भस्यवंशः । रामकृष्णोत्पत्तिः ।

दशमस्कन्धः

१ वसुदेवदेवकीविवाहः । देवक्याःकंसेनषड्गर्भवधश्च ।
२ ब्रह्मणाप्रार्थितस्यभगवतोवतारः । गर्भस्तुतिः ।
३ कंसाद्भीतेनवसुदेवेनश्रीकृष्णगोकुलप्रापणम् ।
४ कन्यकावाक्याद्भीतःकंसःसर्वबालकवधमाज्ञापयति ।
५ नंदस्यपुत्रोत्साहः । मथुरायांवसुदेवनन्दयोःसंगमः ।
६ पूतनावधः । वसुदेववाक्यानुभवेननन्दस्याश्चर्यम्
७ शकटासुरभञ्जनम् । तृणावर्तवधः । श्रीकृष्णमुखेविश्वदर्शनम् ।
८ गर्गःकृष्णजातकादिकथयाति । मृद्भक्षणदर्शनेविश्वदर्शनम् ।
९ दुग्धभाण्डभङ्गादि । उलूखलबन्धः ।
१० नलकूबरमणिग्रीवयोःशापमुक्तिः ।
११ वत्सासुरबकासुरवधः ।
१२ अघासुरवधः ।
१३ ब्रह्मणाहृतानांगोपवत्सानांरूपेणकृष्णक्रीडा ।
१४ ब्रह्मस्तुतिः ।
१५ धेनुकासुरवधः । कालीयविषात्धेनुगोपानांजीवनम् ।
१६ कालीयनिग्रहः ।
१७ दावाग्नेर्गोपरक्षणम् ।
१८ प्रलम्बासुरवधः ।
१९ दावाग्निपानंमुञ्जारण्ये ।
२० वर्षाशरदृतुक्रीडा ।
२१ गोपीकृतंवेणुगीतम् ।
२२ कात्यायनीव्रतेगोपीवस्त्रापहारः ।
२३ यज्ञपत्न्यनुग्रहेणतत्पतीनामनुतापः ।
२४ इन्द्रमखान्निवर्त्यगोवर्धनोत्साहः ।
२५ वृष्टितःगोवर्धनोद्धरणेनगोपरक्षणम् ।
२६ नन्देनकृष्णपराक्रमवर्णनम् ।
२७ इन्द्रस्तुतिः । कामधेन्वाभिषेकः ।
२८ वरुणलोकान्नन्दानयनम् । गोपानांवैकुण्ठदर्शनम् ।
२९ रासेभगवदन्तर्धानम् ।
३० गोपीभिःकृष्णमार्गणम् । तासां चेष्टाश्च ।
३१ यमुनापुलिनेगोपीगीतम् ।
३२ भगवदाविर्भावःरासक्रीडाच ।
३३ गोपीभिःसहजलस्थलवनक्रीडा ।
३४ सर्पतोनन्दरक्षणं शंखचूडवधश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यायः	विषयनिर्देशः
१९	यज्ञहयहारींद्रवधोद्यतस्यपृथोर्ब्रह्मणानिवारणम्
२०	यज्ञोद्भूतस्यविष्णोर्वरप्रदानम्
२१	स्वप्रजाभ्यःभगवद्धर्मशासनम्
२२	सनत्कुमारेणपृथवेज्ञानोपदेशः
२३	सभार्यस्यपृथोर्वैकुंठप्राप्तिः
२४	पृथोःप्रपौत्रात्प्राचीनवर्हिषोदशप्रचेतसांजन्मरुद्रगीतंच
२५	प्राचीनवर्हिषे नारदस्योपदेशः
२६	संसृतिप्रपंचनम्
२७	संसारसक्त्याजरारोगाद्यागमः
२८	स्त्रीत्वंप्राप्तस्यपुरंजनस्यमुक्तिः
२९	स्त्रीसंगाद्भवः ईशसंगान्मुक्तिश्च
३०	प्राचीनवर्हिषःवार्क्षीमुद्वाह्यराज्यंचक्रुः
३१	दक्षेराज्यंन्यस्यवनेगतानांतेषांमुक्तिः

पंचमः स्कंधः

अध्यायः	विषयनिर्देशः
१	प्रियव्रतस्यराज्यकर्तृत्वंमुक्तिश्च
२	आग्नीध्रस्यस्त्रैणंचरितंनाभेरुत्पत्तिः
३	नाभेर्यज्ञेभगवदाविर्भावःऋषभावतारश्च
४	ऋषभराज्येप्रजानांनिर्वृतिः
५	भरतादीनामुपदेशःस्वस्यपारमहंस्यधारणम्
६	पारमहंस्यादृषभस्यअग्निप्रवेशः
७	भरतेनभगवतःस्तुतिर्वनेतपआचरणंच
८	तपस्यतःएणसंगादेणत्वं
९	चौरैर्जडभरतस्यभद्रकाल्यैबलिदानम्
१०	रहूगणशिविकावाहनंतद्वाक्यंच
११	रहूगणायज्ञानोपदेशः
१२	राज्ञःसंदेहानिवारणंज्ञानप्राप्तिश्च
१३	ज्ञानदार्ढ्यायभवाटव्युपदेशः
१४	भवाटवीस्वरूपकथनम्
१५	भरतवंशसुमंतस्यवर्णनम्
१६	मेरोर्योजनप्रमाणादिविस्तरवर्णनम्
१७	चतुर्दिक्षुगंगागमनंइलावृत्तेरुद्रेणसंकर्षणस्तवनम्
१८	खंडत्रयवर्णनं सेव्यसेवकवर्णनम्
१९	भरतखंडश्रैष्ठ्यवर्णनम्
२०	षड्द्वीपवर्णनंलोकालोकस्थितिः
२१	रवेर्गतिमानंतद्रथवर्णनं
२२	सोमादिग्रहाणांस्थितिमानंगतिश्च
२३	ध्रुवपदादारभ्यविराड्देहकल्पनम्
२४	पातालादीनांलक्षणतोमानम्
२५	शेषसंस्थितिःतन्मुखज्वालादिभ्यःप्रलयप्रवृत्तिः
२६	नरकास्थितिवर्णनम्

षष्ठःस्कंधः

अध्यायः	विषयनिर्देशः
१	अजामिलकथायांविष्णुयमदूतसंवादः
२	विष्णुनाममाहात्म्यवर्णनं अजामिलस्यविष्णुलोकगमनं
३	यमेनस्वदूतसांत्वनम्
४	प्रचेतःसुतदक्षस्यवंशः
५	सुतोपदेशकायनारदायदक्षशापः
६	दक्षस्यषष्टिकन्यकानांवंशाःविश्वरूपजन्म
७	गुरुत्यक्तदेवैःविश्वरूपपौरोहित्यवरणम्
८	इंद्रायनारायणवर्मोपदेशः
९	इंद्रेणविश्वरूपोहतःतत्पित्रावृत्रासुरःउत्पादितः
१०	दधीच्यस्थिनिर्मितवज्रेणइंद्रवृत्रयोर्युद्धम्
११	युद्धेवृत्रस्यभक्तिज्ञानजुष्टवाग्वर्णनम्
१२	इंद्रेणवृत्रवधः
१३	ब्रह्महत्याभयाद्विष्णुनाइंद्ररक्षणम्
१४	वृत्रस्यपूर्वंचित्रकेतुजन्मकथनं तस्यपुत्रशोकः
१५	तस्यनारदांगिरोभ्यांशोकापनोदः
१६	मृतपुत्रभाषणेनतंविशोकीकृत्यनारदउपदिदेश ।
१७	ऋद्ध्युन्मत्तस्यशंप्रतिहसनं पार्वतीशापाद्दैत्यत्वम्
१८	दितिगर्भच्छेदनेनमरुतामुत्पत्तिः
१९	कश्यपेनदित्यैप्रोक्तस्यव्रतस्यविस्तरः

सप्तमःस्कंधः

अध्यायः	विषयनिर्देशः
१	हिरण्यकशिपोःविष्णुभक्तेसुतेविरोधः
२	हिरण्यकशिपुनाकपोताख्यानेनबंधूनांसांत्वनम्
३	ब्रह्मणाहिरण्यकशिपुवरदानम्
४	हिरण्यकशिपुर्दिग्वजयंकृत्वादेवान्पीडयति
५	गुरूपदेशमगृह्णानंप्रह्लादंघातयितुंयत्नः
६	प्रह्लादस्यदैत्यबालकान्भागवतोपदेशः
७	स्वस्मिन्गर्भस्थेइंद्रायनारदकृतोपदेशंःबालकानदिशत्
८	नृसिंहावतारःहिरण्यकशिपुवधः
९	ब्रह्मणाप्रणोदितःप्रह्लादोहरिमस्तौत्
१०	नृसिंहांतर्धानं प्रसंगात्रिपुरवधकथा
११	धर्मायनारदोक्ताःनृणांस्त्रीणांचधर्माः
१२	चतुर्णामाश्रमाणांसाधारणधर्माः
१३	यतेर्धर्मः सिद्धावस्थावर्णनम्
१४	देशकालभेदेनगृहस्थधर्माः
१५	सर्ववर्णाश्रमनिबंधनंमोक्षलक्षणम्

अष्टमःस्कंधः

अध्यायः	विषयनिर्देशः
१	चतुर्णांमन्वंतराणांवर्णनं यज्ञावतारश्च
२	ग्राहगृहीतस्यगजेन्द्रस्यहरिस्मृतिः
३	गजेंद्रकृतहरिस्तुतिःतन्मोक्षश्च
४	ग्राहस्यगंधर्वताप्राप्तिःगजेंद्रस्यहरिपदगमनम्
५	पंचमषष्ठमनुवर्णनं विप्रशप्तैर्देवैर्हरेःस्तुतिः
६	असुरैःसाकंदेवानांसमुद्रमथनोद्योगः
७	दैत्रैःस्तुतोःरुद्रःउद्भूतंविषंपपौ
८	लक्ष्म्याहरिर्वृतः । दैत्यैर्हृतेअमृतेमोहिनीरूपाविर्भावः
९	मोहितदैत्यैरर्पितेअमृतेतान्वञ्चित्वादेवानमृतंदत्तम् ।
१०	देवासुरयुद्धेदेवपराजयःतदर्थंहरिराविर्बभौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीमद्भागवतविषयानुक्रमः ।

अध्यायः विषयनिर्देशः

प्रथमः स्कंधः

१ कलेस्तरणोपायमृषयःसूतंपप्रच्छुः
२ कलेस्तरणोपायानिर्णयेभगवत्कथाश्रवणंकीर्तनंच
३ संक्षेपेणभगवतःपुरुषाद्यवतारवर्णनम्
४ व्यासस्यभागवतारंभकारणम्
५ व्यासंप्रतिनारदोपदेशः
६ नारदेनप्रत्ययार्थस्वपूर्वजन्मचरितवर्णनम्
७ परीक्षिज्जन्मप्रस्तावेसुप्तबालवधाद्यर्थमश्वत्थाम्नोदंडः
८ कृष्णेनद्रौणेरस्त्रात्परीक्षिद्रक्षणंकुंतीकृतातत्स्तुतिः धर्मस्यसुहृन्मरणेशोकः
९ भीष्मेणधर्मशोकापनोदो भीष्मनिर्याणंच
१० धर्मराजाभिषेकःभगवतोद्वारकागमनम्
११ भगवतोद्वारकाप्रवेशःतदुत्साहवर्णनम्
१२ द्रौणेर्दंडाद्रक्षितस्यपरिक्षितोजन्म
१३ विदुरोक्त्याधृतराष्ट्रनिःसरणंपरिक्षितोराज्याभिषेकः
१४ उत्पाताद्विशंकितस्यधर्मस्यअर्जुनाऽऽगमनम्
१५ अर्जुनाद्भगवन्निर्याणश्रवणंपाडवानांस्वर्गारोहणम्
१६ कलिखिन्नभूमिधर्मसंवादेपरिक्षित्प्राप्तिः
१७ परिक्षिता कलिनिग्रहः
१८ परिक्षिद्राज्ञे ब्रह्मशापः
१९ गंगायांस्थितेतत्रपरिक्षितिऋषिशुककागमनम्

अध्यायः विषयनिर्देशः

द्वितीयःस्कंधः

१ राज्ञेशुकस्यस्थूलविराड्रूपोपासनोपदेशः
२ अनंतरंसूक्ष्मेब्रह्मणिचित्तलयोपदेशः
३ विष्णुभक्तिश्रवणेनतत्कथासुपरिक्षिदादरः
४ तत्प्रश्नेशुकेनब्रह्मनारदसंवादप्रस्तावर्णनम्
५ विराड्रूपसृष्टिवर्णनम्
६ पुरुषसूक्तार्थेनविराड्देहवर्णनम्
७ वराहावतारादारभ्यकृष्णावतारपर्यंतंतच्चरितानि
८ जीवपरमात्मसंबंधाक्षेपपूर्वकंपुराणार्थप्रश्नाः
९ चतुःश्लोकीभागवतोपदेशः
१० राज्ञःप्रश्नोत्तरद्वारापुराणलक्षणादिवर्णनम्

तृतीयःस्कंधः

१ गतायुषोयदूंस्त्यक्त्वागतस्योद्धवस्यविदुरेणसंभाषणम्
२ उद्धवःकृष्णबालचरितानिक्षत्रेऽकथयत्
३ भगवतोमथुराकृतद्वारकाकृतकर्मवर्णनम्
४ उद्धवोपदेशेनविदुरोमैत्रेयमगमत्
५ महदादीनांसर्गःतैर्हरेःस्तुतिः
६ ईशशक्तिप्रवेशेनस्थूलभूतानांजगन्निर्माणशक्तिमत्वं
७ भगवन्मायासंबंधिविदुरप्रश्नाः
८ नाभिकमलोद्भूतस्यब्रह्मणोभगवत्स्तुतिः
९ भगवद्वरदानेनब्रह्मणःसृष्टिप्रवृत्तिः

अध्यायः विषयनिर्देशः

१० कालोत्पत्तिर्विसर्गसृष्टिश्च
११ कल्पयुगादिकालमानवर्णनम्
१२ ब्रह्मणोमानससृष्टेरनंतरंस्वायंभुवस्यमनोःशतरूपायाश्चोत्पत्तिः
१३ ब्रह्मणोनासिकोद्भूतस्यवराहस्यस्तुतिः
१४ संध्यायांदितेःकश्यपाद्गर्भसंभवः
१५ जयविजययोःसनत्कुमाराच्छापः
१६ हरिणाकुपितकुमारसांत्वनम्
१७ हिरण्याक्षहिरण्यकशिप्वोर्जन्म तयोर्दिग्विजयश्च
१८ धरोद्धारेहिरण्याक्षवराहयोर्युद्धम्
१९ वराहेणहिरण्याक्षवधः
२० सर्वसर्गादनंतरंस्वायंभुवमनोर्वंशवर्णनम्
२१ भगवतःकर्दमायविवाहोपदेशः
२२ मनुनाकर्दमायदेवहूतिदानम्
२३ तपोनिर्मितेविमानेतयोःक्रीडा
२४ कपिलस्यजन्म च कर्दमस्यप्रव्रज्या
२५ कपिलःमात्रेजीवस्यबंधमोक्षणभक्तियोगमाह
२६ पुंप्रकृत्योर्विवेकायसर्वसूक्ष्मभावानांजन्मलक्षणम्
२७ पुंप्रकृत्योर्विवेकेनमोक्षप्राप्तिः
२८ सगुणस्यभगवतःध्यानयोगः
२९ कालकृताजीवस्यघोरासंसृतिः
३० कामिनांजीवानांतामसीगतिः
३१ पुण्यपापयोःसाम्यान्मानुषीगतिः

अध्यायः विषयनिर्देषः

३२ सात्विकैःकर्मभिरूर्ध्वगतिःअज्ञानिनःपुनरावृत्तिः
३३ कपिलोपदेशेनमातुःजीवन्मुक्तिः, कपिलस्ययोगालंबनं

चतुर्थः स्कंधः

१ स्वायंभुववंशकीर्तनं, अत्रेर्दत्तावतारः
२ विश्वसृजांसत्रेदक्षशिवयोर्वैरकारणं शापविसर्जनंच
३ दाक्षायण्याःपितृसत्रगमनं
४ सत्याः पितृकृतावमानाद्देहन्यासः
५ वीरभद्रावतारः यज्ञविध्वंसनं दक्षवधश्च
६ कैलासेब्रह्मणाशिवसांत्वनं
७ यज्ञसंधानार्थेविष्णोरुद्भवः
८ ध्रुवस्यारण्यगमनं हरितोषणंच
९ ध्रुवायहरेर्वरप्राप्तिःपितूराज्यप्राप्तिश्च
१० यक्षाद्ध्रुवभ्रातृवधःतेषांध्रुवाद्वधश्च
११ यक्षक्षयेमनोरागमनंध्रुवसांत्वनंच
१२ ध्रुवस्यस्वनगरागमनंहरेःस्थानारोहणंच
१३ पुत्रवेनक्रौर्यात् अंगस्यअदर्शनगमनं
१४ अधर्मवर्तित्वादंगस्यवधः
१५ ऋषिभिर्मथनेन वेनबाहुतःपृथोर्जन्म
१६ ऋषिप्रेरितसूतबंदिभिस्तत्स्तवन
१७ पृथोःग्रस्तबीजमहीहननप्रवृत्तिःतत्स्तुतिश्च
१८ महीवचनात्सर्वैर्महीदोहनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ सटीकसचूर्णिकश्रीमद्भागवते प्रथमस्कन्धः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीमद्भागवतविषयानुक्रमः ।

अध्यायः विषयनिर्देशः

प्रथमः स्कंधः

१ कलेस्तरणोपायमृषयःसूतंपप्रच्छुः
२ कलेस्तरणोपायानिर्णयेभगवत्कथाश्रवणंकीर्तनंच
३ संक्षेपेणभगवतःपुरुषाद्यवतारवर्णनम्
४ व्यासस्यभागवतारंभकारणम्
५ व्यासंप्रतिनारदोपदेशः
६ नारदेनप्रत्ययार्थस्वपूर्वजन्मचरितवर्णनम्
७ परीक्षिज्जन्मप्रस्तावेसुप्तबालवधाद्यर्थमश्वत्थाम्नोदंडः
८ कृष्णेनद्रौणेरस्त्रात्परीक्षिद्रक्षणंकुंतीकृतातत्स्तुतिः धर्मस्यसुहृन्मरणेशोकः
९ भीष्मेणधर्मशोकापनोदो भीष्मनिर्याणंच
१० धर्मराजाभिषेकःभगवतोद्वारकागमनम्
११ भगवतोद्वारकाप्रवेशःतदुत्साहवर्णनम्
१२ द्रौणेर्दंडाद्रक्षितस्यपरीक्षितोजन्म
१३ विदुरोक्त्याधृतराष्ट्रनिःसरणंपरिक्षितोराज्याभिषेकः
१४ उत्पाताद्विशंकितस्यधर्मस्यअर्जुनाऽऽगमनम्
१५ अर्जुनाद्भगवन्निर्याणश्रवणंपाडवानांस्वर्गारोहणम्
१६ कलिखिन्नभूमिधर्मसंवादेपरिक्षित्प्राप्तिः
१७ परिक्षिता कलिनिग्रहः
१८ परिक्षिद्राज्ञे ब्रह्मशापः
१९ गंगायांस्थितेतत्रपरिक्षितिऋषिशुककागमनम्

द्वितीयःस्कंधः

१ राज्ञेशुकस्यस्थूलविराड्रूपोपासनोपदेशः
२ अनंतरंसूक्ष्मेब्रह्मणिचित्तलयोपदेशः
३ विष्णुभक्तिश्रवणेनतत्कथासुपरिक्षिदादरः
४ तत्प्रश्नेशुकेनब्रह्मनारदसंवादप्रस्ताववर्णनम्
५ विराड्रूपसृष्टिवर्णनम्
६ पुरुषसूक्तार्थेनविराड्देहवर्णनम्
७ वराहावतारादारभ्यकृष्णावतारपर्यंतंतच्चरितानि
८ जीवपरमात्मसंबंधाक्षेपपूर्वकंपुराणार्थप्रश्नाः
९ चतुःश्लोकीभागवतोपदेशः
१० राज्ञःप्रश्नोत्तरद्वारापुराणलक्षणादिवर्णनम्

तृतीयःस्कंधः

१ गतायुषोयदूंस्त्यक्त्वागतस्योद्धवस्यविदुरेणसंभाषणम्
२ उद्धवःकृष्णबालचरितानिक्षत्त्रेऽकथयत्
३ भगवतोमथुराकृतद्वारकाकृतकर्मवर्णनम्
४ उद्धवोपदेशेनाविदुरोमैत्रेयमगमत्
५ महदादीनांसर्गःतैर्हरेःस्तुतिः
६ ईशशक्तिप्रवेशेनस्थूलभूतानांजगन्निर्माणशक्तिमत्वं
७ भगवन्मायासंबंधिविदुरप्रश्नाः
८ नाभिकमलोद्भूतस्यब्रह्मणोभगवत्स्तुतिः
९ भगवद्वरदानेनब्रह्मणःसृष्टिप्रवृत्तिः
१० कालोत्पत्तिर्विसर्गसृष्टिश्च
११ कल्पयुगादिकालमानवर्णनम्
१२ ब्रह्मणोमानससृष्टेरनंतरंस्वायंभुवस्यमनोःशतरूपायाश्चोत्पत्तिः
१३ ब्रह्मणोनासिकोद्भूतस्यवराहस्यस्तुतिः
१४ संध्यायांदितेःकश्यपाद्गर्भसंभवः
१५ जयविजययोःसनत्कुमाराच्छापः
१६ हरिणाकुपितकुमारसांत्वनम्
१७ हिरण्याक्षहिरण्यकशिप्वोर्जन्म तयोर्दिग्विजयश्च
१८ धरोद्धारेहिरण्याक्षवराहयोर्युद्धम्
१९ वराहेणहिरण्याक्षवधः
२० सर्वसर्गादनंतरंस्वायंभुवमनोर्वंशवर्णनम्
२१ भगवतःकर्दमायविवाहोपदेशः
२२ मनुनाकर्दमायदेवहूतिदानम्
२३ तपोनिर्मितेविमानेतयोःक्रीडा
२४ कपिलस्यजन्म च कर्दमस्यप्रव्रज्या
२५ कपिलःमात्रेजीवस्यबंधमोक्षणभक्तियोगमाह
२६ पुंप्रकृत्योर्विवेकायसर्वसूक्ष्मभावानांजन्मलक्षणम्
२७ पुंप्रकृत्योर्विवेकेनमोक्षप्राप्तिः
२८ सगुणस्यभगवतःध्यानयोगः
२९ कालकृताजीवस्यघोरासंसृतिः
३० कामिनांजीवानांतामसीगतिः
३१ पुण्यपापयोःसाम्यान्मानुषीगतिः
३२ सात्विकैःकर्मभिरूर्ध्वगतिःअज्ञानिनःपुनरावृत्तिः
३३ कपिलोपदेशेनमातुःजीवन्मुक्तिः, कपिलस्ययोगालंबनं

चतुर्थः स्कंधः

१ स्वायंभुववंशकीर्तनं, अत्रेर्दत्तावतारः
२ विश्वसृजांसत्रेदक्षशिवयोर्वैरकारणं शापविसर्जनंच
३ दाक्षायण्याःपितृसत्रगमनं
४ सत्याः पितृकृतावमानाद्देहन्यासः
५ वीरभद्रावतारः यज्ञविध्वंसनं दक्षवधश्च
६ कैलासेब्रह्मणाशिवसांत्वनं
७ यज्ञसंधानार्थीविष्णोरुद्भवः
८ ध्रुवस्यारण्यगमनं हरितोषणंच
९ ध्रुवायहरेर्वरप्राप्तिःपितूराज्यप्राप्तिश्च
१० यक्षाद्ध्रुवभ्रातृवधःतेषांध्रुवाद्वधश्च
११ यक्षक्षयेमनोरागमनंध्रुवसांत्वनंच
१२ ध्रुवस्यस्वनगरागमनंहरेःस्थानारोहणंच
१३ पुत्रवेनक्रौर्यात्अंगस्यअदर्शनगमनं
१४ अधर्मवर्तित्वादंगस्यवधः
१५ ऋषिभिर्मथनेन वेनबाहुतःपृथोर्जन्म
१६ ऋषिप्रेरितसूतबंदिभिस्तत्स्तवन
१७ पृथोःग्रस्तबीजमहीहननप्रवृत्तिःतत्स्तुतिश्च
१८ महीवचनात्सर्वैर्महीदोहनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सटीकसचूर्णिकश्रीमद्भागवते प्रथमस्कन्धः

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नं० ५११५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्त्याविमुच्येन्नरः ८२ स्वर्गेसत्येचकैलासेवैकुंठेनास्त्ययंरसः । अतःपिबंतुसद्भाग्यामामामुंचतकर्हिचित् ८३ । सूतउवाच । एवंब्रुवाणेसतिबादराय
णेमध्येसभायांहरिराविरासीत् । प्रह्लादबलयुद्धवफाल्गुनादिभिर्वृतःसुरर्षिस्तमपूजयच्चतान् ८४ दृष्ट्वाप्रसन्नंमहदासनेहरिंतेचक्रिरेकीर्तनमग्रतस्तदा । भवो
भवान्याकमलासनस्तुतत्रागमन्कीर्तनदर्शनाय ८५ प्रह्लादस्तालधारीतरलगतितयाचोद्धवःकांस्यधारीवीणाधारीसुरर्षिःस्वरकुशलतयारागकर्त्ताऽर्जुनोऽभू
त् । इंद्रोऽवादीन्मृदंगंजयजयसुकराःकीर्तनेतेकुमारायत्राग्रेभाववक्तारसाविरचनयाव्यासपुत्रोबभूव ८६ ननर्तमध्येत्रिकमेवतत्रभक्त्यादिकानांनटवत्सुतेजसाम् ।
अलौकिकंकीर्तनमेतदीक्ष्यहरिःप्रसन्नोऽपिवचोऽब्रवीत्तत् ८७ मत्तोवरंभागवतावृणुध्वंप्रीतःकथाकीर्तनतोऽस्मिसांप्रतम् । श्रुत्वेतितद्वाक्यमतिप्रसन्नाःप्रे
मार्द्रचित्ताहरिमूचिरेते ८८ नगाहगाथासुचसर्वभक्तैरेभिस्त्वयाभाव्यमतिप्रयत्नात् । मनोरथोऽयंपरिपूरणीयस्तथेतिचोक्त्वांतरधीयताच्युतः ८९ ततोऽनम
त्तच्चरणेषुनारदस्तथाशुकादीनपितापसांश्च । अथप्रहृष्टाःपरिनष्टमोहाःसर्वेययुःपीतकथामृतास्ते ९०· भक्तिःसुताभ्यांसहरक्षितासाशास्त्रेस्वकीयेपितदाशुकेन
। अतोहरिर्भागवतस्यसेवनाच्चित्तंसमायातिहिवैष्णवानाम् ९१ दारिद्र्यदुःखज्वरदाहितानांमायापिशाचीपरिमर्दितानाम् । संसारसिंधौपरिपातितानांक्षे
मायवैभागवतंप्रगर्जति ९२ शौनकउवाच । शुकेनोक्तंकदाराज्ञेगोकर्णेनकदापुनः । सुरर्षयेकदाब्राह्मौश्छिंधिमेसंशयांत्विमम् ९३ । सूतउवाच । आकृष्ण
निर्गमात्त्रिंशद्वर्षाधिकगतेकलौ । नवमीतोनभस्येचकथारंभंशुकोऽकरोत् ९३ परीक्षिच्छ्रवणांतेचकलौवर्षशतद्वये । शुद्धेशुचौनवम्यांचधेनुजोऽकथयत्
कथाम् ९५ तस्मादपिकलौप्राप्तेत्रिंशद्वर्षगतेसति । ऊचुरूर्जेसितेपक्षेनवम्यांब्रह्मणःसुताः ९६ इत्येतत्तेसमाख्यातंयत्पृष्टोऽहंत्वयाऽनघ । कलौभागवती
वार्ताभवरोगविनाशिनी ९७ कृष्णप्रियंसकलकश्मलनाशनंचमुक्त्येकहेतुमिहभक्तिविलासकारि । संतःकथानकमिदंपिबतादरेणलोकेहितार्थपरिशीलन
सेवयाकिम् ९८ स्वपुरुषमभिवीक्ष्यपाशहस्तंवदतियमःकिलतस्यकर्णमूले । परिहरभगवत्कथासुमत्तान्प्रभुरहमन्यनृणांनवैष्णवानाम् ९९ असारेसंसारेविष
यविषसंगाकुलधियःक्षणार्द्धंक्षेमार्थंपिबतशुकगाथाऽतुलसुधाम् । किमर्थंव्यर्थंभोव्रजतकुपथेकुत्सितपथेपरीक्षित्साक्षीयच्छ्रवणगतमुक्त्युक्तिकथने १००
रहःप्रवाहसंस्थेनश्रीशुकेनेरिताकथा । कंठेसंबध्यतेयेनसवैकुंठप्रभुर्भवेत् १०१ इतिचपरमगुह्यंसर्वसिद्धांतसिद्धंसपदिनिगदितंतेशास्त्रपुंजंविलोक्य । जगति
शुककथातोनिर्मलंनास्तिकिंचित्पिबपरसुखहेतोर्द्वादशस्कंधसारम् १०२ एतांयोनियततयाशृणोतिभक्त्यायश्चैनांकथयतिशुद्धवैष्णवाग्रे । तौसम्यग्विधिक
रणात्फलंलभेतेयाथार्थ्यान्नहिभुवनेकिमप्यसाध्यम् ॥ १०३ ॥ ॥ इतिश्रीपद्मपुराणे उत्तरखंडे श्रीमद्भागवतमाहात्म्ये श्रवणविधिकथनं ना
मषष्ठोऽध्यायः ॥ ६ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५११५

श्रीगणेशायनमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ ॥ श्रीगुरुभ्योनमः ॥ ॥ यंप्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव । पुत्रेतितन्मयतया
तरवोऽभिनेदुस्तंसर्वभूतहृदयंमुनिमानतोऽस्मि १ नैमिशेसूतमासीनमभिवाद्यमहामतिम् । कथामृतरसास्वादकुशलःशौनकोऽब्रवीत् २ शौनकउवाच । अ
ज्ञानध्वांतविध्वंसकोटिसूर्यसमप्रभ । सूताऽऽख्याहिकथासारंममकर्णरसायनम् ३ भक्तिज्ञानविरागाप्तविवेकोवर्धतेकथम् । मायामोहनिरासश्चवैष्णवैःक्रियतेकथ
म् ४ इहघोरेकलौप्राप्तेजीवश्चासुरतांगतः । क्लेशक्रांतस्यतस्यैवशोधनेकिंपरायणम् ५ श्रेयसांयद्भवेच्छ्रेयःपावनानांचपावनम् । कृष्णप्राप्तिकरंशश्वत्साधनंतद्वदाधु
ना ६ चिंतामणिर्लोकसुखंसुरेंद्रःस्वर्गसंपदम् । प्रयच्छतिगुरुःप्रीतोवैकुंठंयोगिदुर्लभम् ७ । सूतउवाच । प्रीतिःशौनकचित्तेतेयतोवच्मिविचार्यच । सर्वसिद्धांतनि
ष्पन्नंसंसारभयनाशनम् ८ भक्त्योघवर्धनंयच्चकृष्णसंतोषहेतुकम् । तदहंतेऽभिधास्यामिसावधानतयाशृणु ९ कालव्यालमुखग्रासत्रासनिर्नाशहेतवे । श्री
मद्भागवतंशास्त्रंकलौकीरेणभाषितम् १० एतस्मादपरंकिंचिन्मनःशुद्ध्यैनविद्यते । जन्मांतरेभवेत्पुण्यंतदाभागवतंलभेत् ११ परीक्षितेकथांवक्तुंसभायांसंस्थि
तेशुके । सुधाकुंभंगृहीत्वैवदेवास्तत्रसमागमन् १२ शुकंनत्वाऽवदन्सर्वेस्वकार्यकुशलाःसुराः । कथासुधांप्रयच्छस्वगृहीत्वैवसुधामिमाम् १३ एवंविनिमयेजा
तेसुधाराज्ञाप्रपीयताम् । प्रपास्यामोवयंसर्वेश्रीमद्भागवतामृतम् १४ क्वसुधाक्वकथालोकेक्वकाचःक्वमणिर्महान् । ब्रह्मरातोविचार्येतितदादेवाञ्जहासह १५ अभ
क्तांस्तांश्चविज्ञायनददौसकथामृतम् । श्रीमद्भागवतीवार्तासुराणामपिदुर्लभा १६ राज्ञोमोक्षंतथावीक्ष्यपुराधाताऽपिविस्मितः । सत्यलोकेतुलांबद्ध्वातोलय
त्साधनान्यतः १७ लघून्यन्यानिजातानिगौरवेणइदंमहत् । तदाऋषिगणाःसर्वेविस्मयंपरमंययुः १८ मेनिरेभगवद्रूपंशास्त्रंभागवतंक्षितौ । पठनाच्छ्रवणा
त्सद्योवैकुंठफलदायकम् १९ सप्ताहश्रवणेनैवसर्वथामुक्तिदायकम् । सनकाद्यैःपुराप्रोक्तंनारदायदयापरैः २० यद्यपिब्रह्मसंबंधाच्छ्रुतमेतत्सुरर्षिणा । सप्ताहश्र
वणविधिःकुमारैस्तस्यभाषितः २१ । शौनकउवाच । लोकविग्रहयुक्तस्यनारदस्यास्थिरस्यच । विधिश्रवेकुतःप्रीतिःसंयोगःकुत्रतैःसह २२ । सूतउ
वाच । अत्रतेकीर्तयिष्यामिभक्तिपुष्टंकथानकम् । शुकेनममयत्प्रोक्तंरहःशिष्यंविचार्यच २३ एकदातुविशालायांचत्वारऋषयोऽमलाः । सत्संगार्थंसमाया
तादद्दृशुस्तत्रनारदम् २४ । कुमाराऊचुः । कथंब्रह्मन्दीनमुखःकुतश्चिंतापरोभवान् । त्वरितंगम्यतेकुत्रकुतश्चागमनंतव २५ इदानींशून्यचित्तोऽसिगत
वित्तोयथाजनः । तवेदंमुक्तसंगस्यनोचितंवदकारणम् २६ । नारदउवाच । अहंतुपृथिवींयातोज्ञात्वासर्वोत्तमामिति । पुष्करंचप्रयागंचकाशींगोदावरीं
तथा २७ हरिक्षेत्रंकुरुक्षेत्रंश्रीरंगंसेतुबंधनम् । एवमादिषुतीर्थेषुभ्रममाणइतस्ततः २८ नापश्यंकुत्रचिच्छर्मभमनःसंतोषकारकम् । कलिनाऽधर्ममित्रेणधरेयंबा
धिताऽधुना २९ सत्यंनास्तितपःशौचंदयादानंनविद्यते । उदरंभरिणोजीवावराकाःकूटभाषिणः ३० मंदाःसुमंदमतयोमंदभाग्याह्युपद्रुताः । पाखंडनिर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ताःसंतोविरक्ताःसपरिग्रहाः ३१ तरुणीप्रभुतागेहेशालकोबुद्धिदायकः । कन्यायाविक्रयोलोभाद्दंपतीनांचकल्कनम् ३२ आश्रमायवनैरुद्धास्तीर्थानिसरित
स्तथा । देवतायतनान्यत्रदुष्टैर्नष्टानिभूरिशः ३३ नयोगीनैवसिद्धोवानज्ञानीसत्क्रियोनरः । कलिदावानलेनाद्यसाधनंभस्मतांगतम् ३४ अट्टशूलाजनपदाः
शिवशूलाद्विजातयः । कामिन्यःकेशशूलिन्यःसंभवंतिकलाविह ३५ एवंपश्यन्कलेर्दोषान्पर्यटन्नवनीमहम् । यामुनंतटमापन्नोयत्रलीलाहरेरभूत् ३६ त
त्राश्चर्यंमयादृष्टंश्रूयतांतन्मुनीश्वराः । एकातुतरुणीतत्रनिषण्णाखिन्नमानसा ३७ द्वौवृद्धौपतितौपार्श्वेनिश्वसंतावचेतनौ । शुश्रूषंतीप्रबोधंतीरुदंतीचतयोः
पुरः ३८ दशादिक्षुनिरीक्षंतीरक्षितारंनिजंवपुः । वीज्यमानाशतस्त्रीभिर्बोध्यमानामुहुर्मुहुः ३९ दृष्ट्वादूराद्गतःसोऽहंकौतुकेनतदंतिकम् । मांदृष्ट्वाचोत्थिताबा
लाविह्वलाचाब्रवीद्वचः ४० । बालोवाच । भोभोःसाधोक्षणंतिष्ठमच्चिंतामपिनाशय । दर्शनंतवलोकस्यसर्वथाऽघहरंपरम् ४१ बहुधातववाक्येनदुःख
शांतिर्भविष्यति । यदाभाग्यंभवेद्भूरिभवतोदर्शनंतदा ४२ । नारदउवाच । कासित्वंकाविमौचेमानार्यःकाःपद्मलोचनाः । वददेविसविस्तारंस्वस्यदुः
खस्यकारणम् ४३ । बालोवाच । अहंभक्तिरितिख्याताइमौमेतनयौमतौ । ज्ञानवैराग्यनामानौकालयोगेनजर्जरौ ४४ गंगाद्याःसरितश्चेमामत्सेवार्थंस
मागताः । तथापिनचमेश्रेयःसेवितायाःसुरैरपि ४५ इदानींशृणुमद्वार्त्तांसचिंतस्त्वंतपोधन । वार्त्तामेविततासऽप्यस्तितांश्रुत्वासुखमावह ४६ उत्पन्नाद्रवि
डेसाहंवृद्धिंकर्नाटकेगता । क्वचित्क्वचिद्महाराष्ट्रेगुर्जरेजीर्णतांगता ४७ तत्रघोरकलेर्योगात्पाखंडैःखंडितांगका । दुर्बलाहंचिरंजातापुत्राभ्यांसहमंदताम् ४८
वृंदावनंपुनःप्राप्यनवीनेवसुरूपिणी । जाताहंयुवतीसम्यक्प्रेष्ठरूपातुसांप्रतम् ४९ इमौतुशयितावत्रसुतौमेक्लिश्यतःश्रमात् । इदंस्थानंपरित्यज्यविदेशं
गम्यतेमया ५० जरठत्वंसमायातौतेनदुःखेनदुःखिता । साहंतुतरुणीकस्मात्सुतौवृद्धाविमौकुतः ५१ त्रयाणांसहचारित्वाद्वैपरीत्यंकुतःस्थितम् । घ
टतेजरठामातातरुणौतनयाविति ५२ अतःशोचामिचात्मानंविस्मयाविष्टमानसा । वदयोगनिधेधीमन्कारणंचात्रकिंभवेत् ५३ । नारदउवाच । ज्ञाने
नात्मनिपश्यामिसर्वमेतत्तवानघे । नविषादस्त्वयाकार्योहरिःशंतेकरिष्यति ५४ । सूतउवाच । क्षणमात्रेणतज्ज्ञात्वावाक्यमूचेमुनीश्वरः । । नार
दउवाच । शृणुष्वाऽवहिताबालेयुगोऽयंदारुणःकलिः ५५ तेनलुप्तःसदाचारोयोगमार्गस्तपांसिच । जनाअघासुरायंतेशाठ्यदुष्कर्मकारिणः ५६ इहसंतो
विषीदंतिप्रहृष्यंतिह्यसाधवः । धत्तेधैर्यंतुयोधीमान्सधीरःपंडितोऽथवा ५७ अस्पृश्याऽनवलोक्येयंशेषभारकरीधरा । वर्षेवर्षेक्रमाज्जातामंगलंनापिदृश्यते
५८ नत्वामपिसुतैःसाकंकोपिपश्यतिसांप्रतम् । उपेक्षिताऽनुरागांधैर्जर्जरत्वेनसंस्थिता ५९ वृंदावनस्यसंयोगात्पुनस्त्वंतरुणीनवा । धन्यंवृंदावनंतेनभ

१ अट्टमन्नं शिवो वेदः शूलोविक्रय उच्यते । केशोभगमिति प्रोक्तमृषिभिस्तत्त्वदर्शिभिः २ देशेइतिचपाठः

CC-0. In Public Domain. Digitization by eGangotri

क्तिर्नृत्यतियत्रच ६० अत्रेमौग्राहकाभावान्नजरामपिमुंचतः । किंचिदात्मसुखेनेहप्रसुप्तिर्मन्यतेऽनयोः ६१ । श्रीभक्तिरुवाच । कथंपरीक्षिताराज्ञास्थापि
तोह्यशुचिःकलिः । प्रवृत्तेतुकलौसर्वसारःकुत्रगतोमहान् ६२ करुणापरेणहरिणाप्यधर्मःकथमीक्ष्यते । इमंमेसंशयंछिंधित्वद्वाचासुखितास्म्यहम् ६३ । ना
रदउवाच । यदिपृष्टस्त्वयाबालेप्रेमतःश्रवणंकुरु । सर्वंवक्ष्यामितेभद्रेकश्मलंतेगमिष्यति ६४ यदामुकुंदोभगवान्क्ष्मांत्यक्त्वास्वपदंगतः । तद्दिनात्कलि
रायातःसर्वसाधनबाधकः ६५ दृष्टोदिग्विजयेराज्ञादीनवच्छरणंगतः । नमयामारणीयोऽयंसारंगइवसारभुक् ६६ यत्फलंनास्तितपसानयोगेनसमाधिना ।
तत्फलंलभतेसम्यक्कलौकेशवकीर्तनात् ६७ एकाकारंकलिंदृष्ट्वासारसत्सारनीरसम् । विष्णुरातःस्थापितवान्कलिजानांसुखायच ६८ कुकर्माचरणात्सारः
सर्वतोनिर्गतोऽधुना । पदार्थाःसंस्थिताभूमौबीजहीनास्तुषायथा ६९ विप्रैर्भागवतीवार्तागेहेगेहेजनेजने । कारिताकणलोभेनकथासारस्ततोगतः ७० अत्युग्रभूरि
कर्माणोनास्तिकारौरवाजनाः । तेपितिष्ठंतितीर्थेषुतीर्थसारस्ततोगतः ७१ कामक्रोधमहालोभतृष्णाव्याकुलचेतसः । तेऽपितिष्ठंतितपसितपःसारस्ततोगतः
७२ मनसश्चाजयाल्लोभाद्दंभात्पाखंडसंश्रयात् । शास्त्रानभ्यसनाच्चैवध्यानयोगफलंगतम् ७३ पंडितास्तुकलत्रेणरमंतेमहिषाइव । पुत्रस्योत्पादनेदक्षाअद
क्षामुक्तिसाधने ७४ नहिवैष्णवताकुत्रसंप्रदायपुरःसरा । एवंप्रलपतांप्राप्तोवस्तुसारःस्थलेस्थले ७५ अयंतुयुगधर्मोहिवर्ततेकस्यदूषणम् । अतस्तुपुंडरी
काक्षःसहतेनिकटेस्थितः ७६ । सूतउवाच । इतितद्वचनंश्रुत्वाविस्मयंपरमंगता । भक्तिरूचेवचोभूयःश्रूयतांतच्चशौनक ७७ । श्रीभक्तिरुवाच । सुरर्षेत्वंचध
न्योऽसिमद्भाग्येनसमागतः । साधूनांदर्शनंलोकेसर्वसिद्धिकरंपरम् ७८ जयतिजयतिमायांयस्यकायाधवस्तेवचनरचनमेकंकेवलंचाकलय्य । ध्रुवपदमपि
यातोयत्कृपातोध्रुवोऽयंसकलकुशलपात्रंब्रह्मपुत्रंनताऽस्मि ७९ । इतिश्रीपद्मपुराणेउत्तरखंडेश्रीभागवतमाहात्म्येभक्तिनारदसमागमोनामप्रथमोऽध्यायः १
॥ नारदउवाच ॥ वृथाखेदायसेबालेअहोचिंतातुराकथम् । श्रीकृष्णचरणांभोजंस्मरदुःखंगमिष्यति १ द्रौपदीचपरित्रातायेनकौरवकश्मलात् । पालिता
गोपसुंदर्यःसकृष्णःक्वापिनोगतः २ त्वंतुभक्तेप्रियातस्यसततंप्राणतोधिका । त्वयाहूतस्तुभगवान्यातिनीचगृहेष्वपि ३ सत्यादित्रियुगेबोधवैराग्यौमुक्ति
साधकौ । कलौतुकेवलंभक्तिर्ब्रह्मसायुज्यकारिणी ४ इतिनिश्चित्यचिद्रूपःसुरूपांत्वांससर्जह । परमानंदचिन्मूर्तिःसुंदरींकृष्णवल्लभाम् ५ बद्धांजलिंत्वयापृष्टं
किंकरोमीतिचैकदा । त्वांतदाज्ञापयत्कृष्णोमद्भक्तान्पोषयेतिच ६ अंगीकृतंत्वयातद्वैप्रसन्नोऽभूद्धरिस्तदा । मुक्तिंदासींददौतुभ्यंज्ञानवैराग्यकाविमौ ७
पोषणंस्वेनरूपेणवैकुंठेत्वंकरोषिच । भूमौभक्तिविपोषायछायारूपंत्वयाकृतम् ८ मुक्तिंज्ञानंविरक्तिंचसहकृत्वागताभुवि । कृतादिद्वापरस्यांतंमहानंदेनसं
स्थिता ९ कलौमुक्तिःक्षयंप्राप्तापाखंडामयपीडिता । त्वदाज्ञयागताशीघ्रंवैकुंठंपुनरेवसा १० स्मृतात्वयापिचात्रैवमुक्तिरायातियातिच । पुत्रीकृत्यत्वयेमौच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पार्श्वेस्वस्यैवरक्षितौ ११ उपेक्षातःकलौमंदौवृद्धौजातौसुतौतव। तथापिचिंतांमुंचत्वमुपायंचिंतयाम्यहम् १२ कालेनासदृशःकोपियुगोनास्तिवरानने। त
स्मिंस्त्वांस्थापयिष्यामिगेहेगेहेजनेजने १३ अन्यधर्मांस्तिरस्कृत्यपुरस्कृत्यमहोत्सवान्। तदानाहंहरेर्दासोलोकेत्वांनप्रवर्तये १४ तदान्विताश्चयेजीवाभविष्यं
तिकलाविह। पापिनोऽपिगमिष्यंतिनिर्भयाःकृष्णमंदिरम् १५ येषांचित्तेवसेद्भक्तिःसर्वदाप्रेमरूपिणी। नतेपश्यंतिकीनाशंस्वप्नेप्यमलमूर्तयः १६ नप्रे
तोनपिशाचोवाराक्षसोवाऽसुरोपिवा। भक्तियुक्तमनस्कानांस्पर्शनेनप्रभुर्भवेत् १७ नतपोभिर्नवेदैश्चनज्ञानेनापिकर्मणा। हरिर्हिसाध्यतेभक्त्याप्रमाणंतत्र
गोपिकाः १८ नृणांजन्मसहस्रेणभक्तौप्रीतिर्हिजायते। कलौभक्तिःकलौभक्तिर्भक्त्याकृष्णःपुरःस्थितः १९ भक्तिद्रोहकरायेचतेसीदंतिजगत्त्रये। दुर्वासा
दुःखमापन्नःपुराभक्तिविनिंदकः २० अलंव्रतैरलंतीर्थैरलंयोगैरलंमखैः। अलंज्ञानकथालापैर्भक्तिरेकैवमुक्तिदा २१। सूतउवाच। इतिनारदनिर्णीतंस्वमा
हात्म्यंनिशम्यसा। सर्वांगपुष्टिसंयुक्तानारदंवाक्यमब्रवीत् २२ । श्रीभक्तिरुवाच। अहोनारदधन्योऽसिप्रीतिस्तेमयिनिश्चला। नकदाचिद्विमुंचामि
चित्तेस्थास्यामिसर्वदा २३ कृपालुनात्वयासाधोमद्बाधाध्वंसिताक्षणात्। पुत्रयोश्चेतनानास्तिततोबोधयबोधय २४। सूतउवाच। तस्यावचःसमाकर्ण्य
कारुण्यंनारदोगतः। तयोर्बोधनमारेभेकराग्रेणविमर्दयन् २५ मुखंसंयोज्यकर्णांतेशब्दमुच्चैःसमुच्चरन्। ज्ञानप्रबुध्यतांशीघ्रंरेवैराग्यप्रबुध्यताम् २६ वेदवेदांत
घोषैश्चगीतापाठैर्मुहुर्मुहुः। बोध्यमानौतदातेनकथंचिच्चोत्थितौबलात् २७ नेत्रैरनवलोकंतौजृंभंतौसालसावुभौ। बकवत्पतितौप्रायःशुष्ककाष्ठसमांगकौ
२८ क्षुत्क्षामौतौनिरीक्ष्यैवपुनःस्वापपरायणौ। ऋषिश्चिंतापरोजातःकिंविधेयंमयेतिच २९ अहोनिद्राकथंयातिवृद्धत्वंचमहत्तरम्। चिंतयन्नितिगोविंदंस्मार
यामासभार्गव ३० व्योमवाणीतदैवाभून्माऋषेखिद्यतामिति। उद्यमःसफलस्तेतुभविष्यतिनसंशयः ३१ एतदर्थंतुसत्कर्मसुरर्षेत्वंसमाचर। तत्तेकर्मा
भिधास्यंतिसाधवःसाधुभूषणाः ३२ सत्कर्मणिकृतेतास्मिन्सनिद्रावृद्धताऽनयोः। गमिष्यतिक्षणाद्भक्तिःसर्वतःप्रसरिष्यति ३३ इत्याकाशवचःस्पष्टंतत्स
र्वैरपिविश्रुतम्। नारदोविस्मयंलेभेनेदंज्ञातमितिब्रुवन् ३४ । नारदउवाच। अनयाऽऽकाशवाण्याऽपिगोप्यत्वेननिरूपितम्। किंवातत्साधनंकार्यं
येनकार्यंभवेत्तयोः ३५ क्वभविष्यंतिसंतस्तेकथंदास्यंतिसाधनम्। मयात्रकिंप्रकर्तव्यंयदुक्तंव्योमभाषया ३६। सूतउवाच। तत्रतावपिसंस्थाप्यनिर्गतोनारदो
मुनिः। तीर्थंतीर्थंविनिष्क्रम्यपृच्छन्मार्गेमुनीश्वरान् ३७ वृत्तांतःश्रूयतेसर्वैःकिंचिन्निश्चित्यनोच्यते। असाध्यंकेचनप्रोचुर्दुर्ज्ञेयमितिचापरे ३८ मूकीभूतास्तथा
ऽन्येतुकियंतस्तुपलायिताः। हाहाकारोमहानासीत्त्रैलोक्येविस्मयावहः ३९ वेदवेदांतघोषैश्चगीतापाठैर्विबोधितम्। भक्तिज्ञानविरागाणांनोदतिष्ठत्त्रिकंयदा
४० उपायोनापरोऽस्तीतिकर्णेकर्णेऽजपज्जनाः। योगिनानारदेनापिस्वयंनज्ञायतेतुयत् ४१ तत्कथंशक्यतेवक्तुमितरैरिहमानुषैः। एवंऋषिगणैःपृष्टंनिर्णीयोक्तंदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रासदम् ४२ ततश्चिंतातुरःसोऽथबदरीवनमागतः । तपश्चरामिचात्रेतितदर्थंकृतनिश्चयः ४३ तावद्ददर्शपुरतःसनकादीन्मुनीश्वरान् । कोटिसूर्यसमाभा
सानुवाचमुनिसत्तमः ४४ । नारदउवाच । इदानींभूरिभाग्येनभवद्भिःसंगमःस्थितः । कुमारावदतांशीघ्रंकृपांकृत्वाममोपरि ४५ भवंतोयोगिनःसर्वेबु
द्धिमंतोबहुश्रुताः । पंचहायनसंयुक्ताःपूर्वेषामपिपूर्वजाः ४६ सदावैकुंठनिलयाहरिकीर्तनतत्पराः । लीलामृतरसोन्मत्ताःकथामात्रैकजीविनः ४७ हरिः
शरणमेवंहिनित्यंयेषांमुखेवचः । अतःकालसमादिष्टाजरायुष्मान्नबाधते ४८ येषांभ्रूभंगमात्रेणद्वारपालौहरेःपुरा । भूमौनिपतितौसद्योयत्कृपातःपरंग
तौ ४९ अहोभाग्यस्ययोगेनदर्शनंभवतामिह । अनुग्रहस्तुकर्तव्योमयिदीनेदयापरैः ५० अशरीरगिरोक्तंयत्तत्किंसाधनमुच्यताम् । अनुष्ठेयंकथंतावत्
प्रब्रुवंतुसविस्तरम् ५१ भक्तिज्ञानविरागाणांसुखमुत्पद्यतेकथम् । स्थापनंसर्ववर्णेषुप्रेमपूर्वंप्रयत्नतः ५२ । कुमाराऊचुः । माचिंतांकुरुदेवर्षेहर्षंचित्तेसमावह।
उपायःसुखसाध्योऽत्रवर्त्ततेपूर्वएवहि ५३ अहोनारदधन्योऽसिविरक्तानांशिरोमणिः । सदाश्रीकृष्णदासानामग्रणीर्योगभास्करः ५४ त्वयिचित्रंनमंतव्यंभ
क्त्यर्थमनुवर्तिनि । घटतेकृष्णदासस्यभक्तेःस्थापनतासदा ५५ ऋषिभिर्बहवोलोकेपंथानःप्रकटीकृताः । श्रमसाध्याश्चतेसर्वेप्रायःस्वर्गफलप्रदाः ५६ वैकुं
ठसाधकःपंथासतुगोप्योहिवर्तते । तस्योपदेष्टापुरुषःप्रायोभाग्येनलभ्यते ५७ सत्कर्मतवनिर्दिष्टंव्योमवाचातुयत्पुरा । तदुच्यतेशृणुष्वाद्यस्थिरचित्तः
प्रसन्नधीः ५८ द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथाऽपरे । स्वाध्याययज्ञानयज्ञाश्चतेतुकर्मविसूचिकाः ५९ सत्कर्मसूचकोनूनंज्ञानयज्ञःस्मृतोबुधैः । श्रीमद्भा
गवतालापःसतुगीतःशुकादिभिः ६० भक्तिज्ञानविरागाणांतद्घोषेणबलंमहत् । व्रजिष्यतिद्वयोःकष्टंसुखंभक्तेर्भविष्यति ६१ प्रलयंहिगमिष्यंतिश्रीमद्भाग
वतध्वनेः । कलिदोषाइमेसर्वेसिंहशब्दाद्वृकाइव ६२ ज्ञानवैराग्यसंयुक्ताभक्तिःप्रेमरसावहा । प्रतिगेहंप्रतिजनंततःक्रीडांकरिष्यति ६३ । नारदउवाच ।
वेदवेदांतघोषैश्चगीतापाठैःप्रबोधितम् । भक्तिज्ञानविरागाणांनोदतिष्ठच्चिकंयदा ६४ श्रीमद्भागवतालापात्तत्कथंबोधमेष्यति । तत्कथासुतुवेदार्थःश्लोकेश्लो
केपदेपदे ६५ छिंदंतुसंशयंह्येनंभवंतोऽमोघदर्शनाः । विलंबोनात्रकर्तव्यःशरणागतवत्सलाः ६६ । कुमाराऊचुः । वेदोपनिषदांसाराज्जाताभागवतीकथा ।
अत्युत्तमाततोभातिपृथग्भूताफलोन्नतिः ६७ आमूलाग्रंरसस्तिष्ठन्नास्तेनस्वादतेयथा । संभूयसपृथग्भूतःफलेविश्वमनोहरः ६८ यथादुग्धेस्थितंसर्पिर्न
स्वादायोपकल्पते । पृथग्भूतंहितद्दिव्यंदेवानांरसवर्धनम् ६९ इक्षूणामपिमध्यांतंशर्कराव्याप्यतिष्ठति । पृथग्भूताचसामिष्टातथाभागवतीकथा ७० इदंभाग
वतंनामपुराणंब्रह्मसंमितम् । भक्तिज्ञानविरागाणांस्थापनायप्रकाशितम् ७१ वेदांतवेदसुस्नातेगीतायाअपिकर्तरि । परितापवतिव्यासेमुह्यत्यज्ञानसागरे ७२
तदात्वयापुराप्रोक्तंचतुःश्लोकसमन्वितम् । तदीयश्रवणात्सद्योनिर्बाधोबादरायणः ७३ तत्रतेविस्मयःकेनयतःप्रश्नकरोभवान् श्रीमद्भागवतंश्रावेशोकदुःख

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·मा· पार्श्वेस्वस्यैवरक्षितौ ११ उपेक्षातःकलौमंदौवृद्धौजातौसुतौतव । तथापिचिंतांमुंचत्वमुपायंचिंतयाम्यहम् १२ कालेनासदृशःकोपियुगोनास्तिवरानने । त अ० १
स्मिंस्त्वांस्थापयिष्यामिगेहेगेहेजनेजने १३ अन्यधर्मांस्तिरस्कृत्यपुरस्कृत्यमहोत्सवान् । तदानाहंहरेर्दासोलोकेत्वांनप्रवर्तये १४ तदन्विताश्चयेजीवाभविष्यं
॥ २ ॥ तिकलाविह । पापिनोऽपिगमिष्यंतिनिर्भयाःकृष्णमंदिरम् १५ येषांचित्तेवसेद्भक्तिःसर्वदाप्रेमरूपिणी । नतेपश्यंतिकीनाशंस्वप्नेप्यमलमूर्त्तयः १६ नप्रे ॥ २ ॥
तोनपिशाचोवाराक्षसोवाऽसुरोपिवा । भक्तियुक्तमनस्कानांस्पर्शनेनप्रभुर्भवेत् १७ नतपोभिर्नवेदैश्चनज्ञानेनापिकर्मणा । हरिर्हिसाध्यतेभक्त्याप्रमाणंतत्र
गोपिकाः १८ नृणांजन्मसहस्रेणभक्तौप्रीतिर्हिजायते । कलौभक्तिःकलौभक्तिर्भक्त्याकृष्णःपुरःस्थितः १९ भक्तिद्रोहकरायेचतेसीदंतिजगत्त्रये । दुर्वासा
दुःखमापन्नःपुराभक्तिविनिंदकः २० अलंव्रतैरलंतीर्थैरलंयोगैरलंमखैः । अलंज्ञानकथालापभक्तिरेकैवमुक्तिदा २१ । सूतउवाच । इतिनारदनिर्णीतंस्वमा
हात्म्यंनिशम्यसा । सर्वांगपुष्टिसंयुक्तानारदंवाक्यमब्रवीत् २२ । श्रीभक्तिरुवाच । अहोनारदधन्योऽसिप्रीतिस्तेमयिनिश्चला । नकदाचिद्विमुंचामि
चित्तेस्थास्यामिसर्वदा २३ कृपालुनात्वयासाधोमद्बाधाध्वंसिताक्षणात् । पुत्रयोश्चेतनानास्तिततोबोधयबोधय २४ । सूतउवाच । तस्यावचःसमाकर्ण्य
कारुण्यंनारदोगतः । तयोर्बोधनमारेभेकराग्रेणविमर्दयन् २५ मुखंसंयोज्यकर्णांतेशब्दमुच्चैःसमुच्चरन् । ज्ञानप्रबुध्यतांशीघ्रंरेवैराग्यप्रबुध्यताम् २६ वेदवेदांत
घोषैश्चगीतापाठैर्मुहुर्मुहुः । बोध्यमानौतदातेनकथंचिच्चोत्थितौबलात् २७ नेत्रैरनवलोकंतौजृंभंतौसालसावुभौ । बकवत्पतितौप्रायःशुष्ककाष्ठसमांगकौ
२८ क्षुत्क्षामौतौनिरीक्ष्यैवपुनःस्वापपरायणौ । ऋषिश्चिंतापरोजातःकिंविधेयंमयेतिच २९ अहोनिद्राकथंयातिवृद्धत्वंचमहत्तरम् । चिंतयन्नितिगोविंदंस्मार
यामासभार्गव ३० व्योमवाणीतदैवाभून्माऋषेखिद्यतामिति । उद्यमःसफलस्तेतुभविष्यतिनसंशयः ३१ एतदर्थंतुसत्कर्मसुरर्षेत्वंसमाचर । तत्तेकर्मा
भिधास्यंतिसाधवःसाधुभूषणाः ३२ सत्कर्मणिकृतेतस्मिन्सनिद्रावृद्धताऽनयोः । गमिष्यतिक्षणाद्भक्तिःसर्वतःप्रसरिष्यति ३३ इत्याकाशवचःस्पष्टंतत्स
र्वैरपिविश्रुतम् । नारदोविस्मयंलेभेनेदंज्ञातमितिब्रुवन् ३४ । नारदउवाच । अनयाऽऽकाशवाण्याऽपिगोप्यत्वेननिरूपितम् । किंवातत्साधनंकार्यं
येनकार्यंभवेत्तयोः ३५ क्वभविष्यंतिसंतस्तेकथंदास्यंतिसाधनम् । मयात्रकिंप्रकर्त्तव्यंयदुक्तंव्योमभाषया ३६ । सूतउवाच । तत्रतावपिसंस्थाप्यनिर्गतोनारदो
मुनिः । तीर्थंतीर्थंविनिष्क्रम्यपृच्छन्मार्गेमुनीश्वरान् ३७ वृत्तांतःश्रूयतेसर्वैःकिंचिन्निश्चित्यनोच्यते । असाध्यंकेचनप्रोचुर्दुर्ज्ञेयमितिचापरे ३८ मूकीभूतास्तथा ॥ २ ॥
ऽन्येतुकियंतस्तुपलायिताः । हाहाकारोमहानासीत्त्रैलोक्येविस्मयावहः ३९ वेदवेदांतघोषैश्चगीतापाठैर्विबोधितम् । भक्तिज्ञानविरागाणांनोदतिष्ठत्त्रिकंयदा
४० उपायोनापरोऽस्तीतिकर्णेकर्णेऽजपज्जनाः । योगिनानारदेनापिस्वयंनज्ञायतेतुयत् ४१ तत्कथंशक्यतेवक्तुमितरैरिहमानुषैः । एवंऋषिगणैःपृष्टंनिर्णीयोक्तंदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रासदम् ४२ ततश्चिंतातुरःसोऽथबदरीवनमागतः । तपश्चरामिचात्रेतितदर्थंकृतनिश्चयः ४३ तावद्ददर्शपुरतःसनकादीन्मुनीश्वरान् । कोटिसूर्यसमाभा
सानुवाचमुनिसत्तमः ४४ । नारदउवाच । इदानींभूरिभाग्येनभवद्भिःसंगमःस्थितः । कुमारावदतांशीघ्रंकृपांकृत्वाममोपरि ४५ भवंतोयोगिनःसर्वेबु
द्धिमंतोबहुश्रुताः । पंचहायनसंयुक्ताःपूर्वेषामपिपूर्वजाः ४६ सदावैकुंठनिलयाहरिकीर्तनतत्पराः । लीलामृतरसोन्मत्ताःकथामात्रैकजीविनः ४७ हरिः
शरणमेवंहिनित्यंयेषांमुखेवचः । अतःकालसमादिष्टाजरायुष्मान्नबाधते ४८ येषांभ्रूभंगमात्रेणद्वारपालौहरेःपुरा । भूमौनिपतितौसद्योयत्कृपातःपरंग
तौ ४९ अहोभाग्यस्ययोगेनदर्शनंभवतामिह । अनुग्रहस्तुकर्त्तव्योमयिदीनेदयापरैः ५० अशरीरगिरोक्तंयत्तत्किंसाधनमुच्यताम् । अनुष्ठेयंकथंतावत्
प्रब्रुवंतुसविस्तरम् ५१ भक्तिज्ञानविरागाणांसुखमुत्पद्यतेकथम्। स्थापनंसर्ववर्णेषुप्रेमपूर्वंप्रयत्नतः ५२। कुमाराऊचुः। मार्चिंतांकुरुदेवर्षेहर्षंचित्तेसमावह।
उपायःसुखसाध्योऽत्रवर्त्ततेपूर्वएवहि ५३ अहोनारदधन्योऽसिविरक्तानांशिरोमणिः । सदाश्रीकृष्णदासानामग्रणीर्योगभास्करः ५४ त्वयिचित्रंनमंतव्यंभ
क्त्यर्थमनुवर्तिनि । घटतेकृष्णदासस्यभक्तेःस्थापनतासदा ५५ ऋषिभिर्बहवोलोकेपंथानःप्रकटीकृताः । श्रमसाध्याश्चतेसर्वेप्रायःस्वर्गफलप्रदाः ५६ वैकुं
ठसाधकःपंथासतुगोप्योहिवर्तते । तस्योपदेष्टापुरुषःप्रायोभाग्येनलभ्यते ५७ सत्कर्मतवनिर्दिष्टंव्योमवाचातुयत्पुरा । तदुच्यतेशृणुष्वाद्यास्थिरचित्तः
प्रसन्नधीः ५८ द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथाऽपरे । स्वाध्यायज्ञानयज्ञाश्चतेतुकर्मविसूचिकाः ५९ सत्कर्मसूचकोनूनंज्ञानयज्ञःस्मृतोबुधैः । श्रीमद्भा
गवतालापःसतुगीतःशुकादिभिः ६० भक्तिज्ञानविरागाणांतद्घोषेणबलंमहत् । व्रजिष्यतिद्वयोःकष्टंसुखंभक्तेर्भविष्यति ६१ प्रलयंहिगमिष्यंतिश्रीमद्भाग
वतध्वनेः । कलिदोषाइमेसर्वेसिंहशब्दाद्वृकाइव ६२ ज्ञानवैराग्यसंयुक्ताभक्तिःप्रेमरसावहा । प्रतिगेहंप्रतिजनंततःक्रीडांकरिष्यति ६३ । नारदउवाच ।
वेदवेदांतघोषैश्चगीतापाठैःप्रबोधितम् । भक्तिज्ञानविरागाणांनोदतिष्ठत्त्रिकंयदा ६४ श्रीमद्भागवतालापात्तत्कथंबोधमेष्यति । तत्कथासुतुवेदार्थःश्लोकेश्लो
केपदेपदे ६५ छिंदंतुसंशयंह्येनंभवंतोऽमोघदर्शनाः । विलंबोनात्रकर्तव्यःशरणागतवत्सलाः ६६ । कुमाराऊचुः । वेदोपनिषदांसाराज्जाताभागवतीकथा ।
अत्युत्तमाततोभातिपृथग्भूताफलोन्नतिः ६७ आमूलाग्रंरसस्तिष्ठन्नास्तेनस्वादतेयथा । संभूयसपृथग्भूतःफलेविश्वमनोहरः ६८ यथादुग्धेस्थितंसर्पिर्न
स्वादायोपकल्पते । पृथग्भूतंहितद्दिव्यंदेवानांरसवर्धनम् ६९ इक्षूणामपिमध्यांतंशर्करान्याप्यतिष्ठति । पृथग्भूताचसामिष्टातथाभागवतीकथा ७० इदंभाग
वतंनामपुराणंब्रह्मसंमितम् । भक्तिज्ञानविरागाणांस्थापनायप्रकाशितम् ७१ वेदांतवेदसुस्नातेगीताया अपिकर्तरि । परितापवतिव्यासेमुह्यत्यज्ञानसागरे ७२
तदात्वयापुराप्रोक्तंचतुःश्लोकसमन्वितम् । तदीयश्रवणात्सद्योनिर्बाधोबादरायणः ७३ तत्रतेविस्मयःकेनयतःप्रश्नकरोभवान् श्रीमद्भागवतश्रावेशोकदुःख

CC-0. In Public Domain. Digitization by eGangotri

विनाशनम् ७४ । नारदउवाच । यद्दर्शनंचविनिहंत्यशुभानिसद्यःश्रेयस्तनोतिभवदुःखदवार्दितानाम् । निःशेषशेषमुखगीतकथैकपानाःप्रेमप्रकाशकृतये
शरणंगतोऽस्मि ७५ भाग्योदयेनबहुजन्मसमार्जितेनसत्संगमंचलभतेपुरुषोयदावै । अज्ञानहेतुकृतमोहमदांधकारनाशंविधायहितदोदयतेविवेकः ७६
॥ इतिश्रीपद्मपुराणेउत्तरखंडेश्रीभागवतमाहात्म्येकुमारनारदसंवादोनामद्वितीयोऽध्यायः ॥ २ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
। नारदउवाच । । ज्ञानयज्ञंकरिष्यामिशुकशास्त्रकथोज्ज्वलम् । भक्तिज्ञानविरागाणांस्थापनार्थंप्रयत्नतः १ यत्रकार्योमहायज्ञःस्थलंतद्वाच्यतामिह ।
महिमाशुकशास्त्रस्यवक्तव्योवेदपारगैः २ कियद्भिर्दिवसैःश्राव्याश्रीमद्भागवतीकथा । कोविधिस्तत्रकर्तव्योममेदंवदतामितः ३ । कुमाराऊचुः । शृणु
नारदवक्ष्यामोविनम्रायविवेकिने । गंगाद्वारसमीपेतुतटमानंदनामकम् ४ नानाऋषिगणैर्जुष्टंदेवसिद्धनिषेवितम् । नानातरुलताकीर्णंनवकोमलवालुकम् ५
रम्यमेकांतदेशस्थंहैमपद्मसुशोभितम् । यत्समीपस्थजीवानांवैरंचेतसिनस्थितम् ६ ज्ञानयज्ञस्त्वयातत्रकर्तव्योह्यप्रयत्नतः । अपूर्वारसरूपाचकथातत्रभ
विष्यति ७ पुरस्थंनिर्बलंचैवजराजीर्णकलेवरम् । तद्वयंचपुरस्कृत्यभक्तिस्तत्रगमिष्यति ८ यत्रभागवतीवार्त्तातत्रभक्त्यादिकंव्रजेत् । कथाशब्दंसमाक
र्ण्यतत्त्रिकंतरुणायते ९ । सूतउवाच । एवमुक्त्वाकुमारास्तेनारदेनसमंततः । गंगातटंसमाजग्मुःकथापानायसत्वराः १० यदायातास्तटंतेतुतदाको
लाहलोऽप्यभूत् । भूर्लोकेदेवलोकेचब्रह्मलोकेतथैवच ११ श्रीभागवतपीयूषपानायरसलंपटाः । धावंतोप्याऽययुःसर्वेप्रथमंयेचवैष्णवाः १२ भृगुर्वसिष्ठ
श्च्यवनश्चगौतमोमेधातिथिर्देवलदेवरातौ । रामस्तथागाधिसुतश्चशाकलोमृकंडपुत्राऽत्रिजपिप्पलादाः १३ योगेश्वराव्यासपराशरौचछायाशुकोजाजलि
जह्नुमुख्याः । सर्वेऽप्यमीमुनिगणाःसहपुत्रशिष्याःस्वस्त्रीभिराययुरतिप्रणयेनयुक्ताः १४ वेदांतानिचवेदाश्चमंत्रास्तंत्राःसमूर्तयः । दशसप्तपुराणानिषट्शास्त्रा
णितथाऽऽययुः १५ गंगाद्याःसरितस्तत्रपुष्करादिसरांसिच । क्षेत्राणिचादिशःसर्वादंडकादिवनानिच १६ नगादयोययुस्तत्रदेवगंधर्वकिन्नराः । गुरुत्वात्तत्रनाया
तान्भृगुःसंबोध्यचानयत् १७ दीक्षितानारदेनाथदत्तमासनमुत्तमम् । कुमारावंदिताःसर्वेनिषेदुःकृष्णतत्पराः १८ वैष्णवाश्चविरक्ताश्चन्यासिनोब्रह्मचारिणः ।
मुख्यभागेस्थितास्तेचतदग्रेनारदःस्थितः १९ एकभागेऋषिगणास्तदन्यत्रदिवौकसः । वेदोपनिषदोऽन्यत्रतीर्थान्यत्रस्त्रियोऽन्यतः २० जयशब्दोनमःशब्दः
शंखशब्दस्तथैवच । चूर्णलाजाप्रसूनानांनिक्षेपःसुमहानभूत् २१ विमानानिसमारुह्यकियंतोदेवनायकाः । कल्पवृक्षप्रसूनानिसर्वांस्तत्रसमाकिरन् २२
। सूतउवाच । एवंतेष्वेकचित्तेषुश्रीमद्भागवतस्यच । माहात्म्यमूचिरेस्पष्टंनारदायमहात्मने २३ । कुमाराऊचुः । अथतेसंप्रवक्ष्यामोमहिमाशुकशास्त्र
जः । यस्यश्रवणमात्रेणमुक्तिःकरतलेस्थिता २४ सदासेव्यासदासेव्याश्रीमद्भागवतीकथा । यस्याःश्रवणमात्रेणहरिश्चित्तंसमाश्रयेत् २५ ग्रंथोऽष्टादशसाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रोद्वादशस्कंधसंमितः । परीक्षिच्छुकसंवादःश्रृणुभागवतंचतत् २६ तावत्संसारचक्रेऽस्मिन्भ्रमतेऽज्ञानतःपुमान् । यावत्कर्णगतानास्तिशुकशास्त्रकथाक्षण
म् २७ किंश्रुतैर्बहुभिःशास्त्रैःपुराणैश्चभ्रमावहैः । एकंभागवतंशास्त्रंमुक्तिदानेनगर्जति २८ कथाभागवतस्यापिनित्यंभवतियद्गृहे । तद्गृहंतीर्थरूपंहिवसतां
पापनाशनम् २९ अश्वमेधसहस्राणिवाजपेयशतानिच । शुकशास्त्रकथायाश्चकलांनार्हंतिषोडशीम् ३० तावत्पापानिदेहेऽस्मिन्निवसंतितपोधनाः । यावन्न
श्रूयतेसम्यक्श्रीमद्भागवतंनरैः ३१ नगंगानगयाकाशीपुष्करंनप्रयागकम् । शुकशास्त्रकथायाश्चफलेनसमतांनयेत् ३२ श्लोकार्द्धंश्लोकपादंवानित्यंभागवतो
द्भवम् । पठस्वस्वमुखेनैवयदीच्छसिपरांगतिम् ३३ वेदादिर्वेदमाताचपौरुषंसूक्तमेवच । त्रयीभागवतंचैवद्वादशाक्षरएवच ३४ द्वादशात्माप्रयागश्चकालःसं
वत्सरात्मकः । ब्राह्मणाश्चाग्निहोत्रंचसुरभिर्द्वादशीतथा ६५ तुलसीचवसंतश्चपुरुषोत्तमएवच । एतेषांतत्त्वतःप्राज्ञैर्नपृथग्भावइष्यते ३६ यश्चभागवतंशास्त्रं
वाचयेदर्थतोऽनिशम् । जन्मकोटिकृतंपापंनश्यतेनात्रसंशयः ३७ श्लोकार्द्धंश्लोकपादंवापठेद्भागवतंचयः । नित्यंपुण्यमवाप्नोतिराजसूयाश्वमेधयोः ३८ उ
क्तंभागवतंनित्यंकृतंचहरिचिंतनम् । तुलसीपोषणंचैवधेनूनांसेवनंसमम् ३९ अंतकालेतुयेनैवश्रूयतेशुकशास्त्रवाक् । प्रीत्यातस्यैववैकुंठंगोविंदोऽपिप्रयच्छ
ति ४० हेमसिंहयुतंचैतद्वैष्णवायददातिच । कृष्णेनसहसायुज्यंसपुमाँल्लभतेध्रुवम् ४१ आजन्ममात्रमपियेनशठेनकिंचिच्चित्तंविधायशुकशास्त्रकथानपीता
चांडालवच्चखरवद्बततेननीतंमिथ्यास्वजन्मजननीजानिदुःखभाजा ४२ जीवच्छवोनिगदितःसतुपापकर्मायेनश्रुतंशुककथावचनंनकिंचित् । धिक्तंनरंपशु
समंभुविभाररूपमेवंवदंतिदिविदेवसरोजमुख्याः ४३ दुर्लभैवकथालोकेश्रीमद्भागवतोद्भवा । कोटिजन्मसमुत्थेनपुण्येनैवतुलभ्यते ४४ तेनयोगनिधेधीम
न्श्रोतव्यासाप्रयत्नतः । दिनानांनियमोनास्तिसर्वदाश्रवणंमतम् ४५ सत्येनब्रह्मचर्येणसर्वदाश्रवणंमतम् । अशक्यत्वात्कलौबोध्योविशेषोऽत्रशुकाज्ञया ४६
मनोवृत्तिजयश्चैवनियमाचरणंतथा । दीक्षांकर्तुमशक्यत्वात्सप्ताहश्रवणंमतम् ४७ श्रद्धातःश्रवणेनित्यंमाघेतावद्धियत्फलम् । तत्फलंशुकदेवेनसप्ताहश्रवणेकृत
म् ४८ मनसश्चाऽजयाद्रोगात्पुंसांचैवायुषःक्षयात् । कलेर्दोषबहुत्वाच्चसप्ताहश्रवणंमतम् ४९ यत्फलंनास्तितपसानयोगेनसमाधिना । अनायासेनतत्सर्वं
सप्ताहश्रवणेलभेत् ५० यज्ञाद्गर्जतिसप्ताहःसप्ताहोगर्जतिव्रतात् । तपसोगर्जतिप्रोच्चैस्तीर्थान्नित्यंहिगर्जति ५१ योगाद्गर्जतिसप्ताहोध्यानाज्ज्ञानाच्चगर्जति ।
किंब्रूमोगर्जनंतस्यरेरेगर्जतिगर्जति ५२ । शौनकउवाच । साश्चर्यमेतत्कथितंकथानकंज्ञानादिधर्मान्विगणय्यसांप्रतम् । निःश्रेयसेभागवतंपुराणंजातंकु
तोयोगविदादिसूचकम् ५३ । सूतउवाच । यदाकृष्णोधरांत्यक्त्वास्वपदंगंतुमुद्यतः । एकादशंपरिश्रुत्वाप्युद्धवोवाक्यमब्रवीत् ५४ । उद्धवउवाच । त्वंतुया
स्यसिगोविंदभक्तकार्यंविधायच । मच्चित्तेमहतींचिंतातांश्रुत्वासुखमावह ५५ आगतोऽयंकलिर्घोरोभविष्यंतिपुनःखलाः । तत्संगेनैवसंतोऽपिगमिष्यंत्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ग्रता यदा ५६ तदाभारवतीभूमिर्गोरूपेयंकमाश्रयेत् । अन्योनदृश्यतेत्रातात्वत्तःकमललोचन ५७ अतःसत्सुदयांकृत्वाभक्तवत्सलमाव्रज । भक्तार्थंसगुणो
जातोनिराकारोऽपिचिन्मयः ५८ त्वद्वियोगेनतेभक्ताःकथंस्थास्यंतिभूतले । निर्गुणोपासनेकष्टमतःकिंचिद्विचारय ५९ इत्युद्धववचःश्रुत्वाप्रभासेऽचिंतय
 द्धरिः । भक्तावलंबनार्थायकिंविधेयंमयेतिच ६० स्वकीयंयद्भवेत्तेजस्तच्चभागवतेऽदधात् । तिरोधायप्रविष्टोऽयंश्रीमद्भागवतार्णवम् ६१ तेनेयंवाङ्मयी
मूर्तिःप्रत्यक्षावर्ततेहरेः । सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापनाशिनी ६२ सप्ताहश्रवणंतेनसर्वेभ्योऽप्यधिकंकृतम् । साधनानितिरस्कृत्यकलौधर्मोयमीरितः
६३ दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनायच । कामक्रोधजयार्थंहिकलौधर्मोयमीरितः ६४ अन्यथावैष्णवीमायादेवैरपिसुदुस्त्यजा । कथंत्याज्याभवेत्पुंभिः
सप्ताहोऽतःप्रकीर्तितः ६५ । सूतउवाच । एवंनगाहश्रवणोरुधर्मेप्रकाश्यमानेऋषिभिःसभायाम् । आश्चर्यमेकंसमभूत्तदानींतदुच्यतेसंशृणुशौनकत्वम् ६६
भक्तिःसुतौतौतरुणौगृहीत्वाप्रेमैकरूपासहसाऽविरासीत् । श्रीकृष्णगोविंदहरेमुरारेनाथेतिनामानिमुहुर्वदंती ६७ तांचागतांभागवतार्थभूषांसुचारुवेषांदद
शुःसदस्याः । कथंप्रविष्टाकथमागतेयंमध्यंमुनीनामितितर्कयंतः ६८ ऊचुःकुमारावचनंतदानींकथार्थतोनिष्पतिताऽधुनेयम् । एवंगिरःसाससुतानिशम्यस
नत्कुमारंनिजगादनम्रा ६९ । भक्तिरुवाच । भवद्भिरद्यैवकृतास्मिपुष्टाकलिप्रनष्टाऽपिकथारसेन । क्वाहंतुतिष्ठाम्यधुनाब्रुवंतुब्राह्माइदंतांगिरमूचिरेते ७०
भक्तेषुगोविंदसुरूपधर्त्रींप्रेमैककर्त्रींभवरोगहंत्री । सात्वंचतिष्ठस्वसुधैर्यसंश्रयानिरंतरंवैष्णवमानसानि ७१ ततोऽपिदोषाःकलिजाइमेत्वांद्रष्टुंनशक्ताःप्रभवो
ऽपिलोके । एवंतदाज्ञाऽवसरेऽपिभक्तिस्तदानिषण्णाहरिदासचित्ते ७२ सकलभुवनमध्येनिर्धनास्तेऽपिधन्यानिवसतिहृदियेषांश्रीहरेर्भक्तिरेका । हरिर
पिनिजलोकंसर्वथाऽतोविहायप्रविशतिहृदितेषांभक्तिसूत्रोपनद्धः ७३ ब्रूमोऽद्यतेकिमधिकंमहिमानमेवंब्रह्मात्मकस्यभुविभागवताभिधस्य । यत्संश्रयान्नि
गदितेलभतेसुवक्ताश्रोतापिकृष्णसमतामलमन्यधर्मैः ७४ इतिश्रीपद्मपुराणउत्तरखंडेश्रीभागवतमाहात्म्येभक्तिकष्टनिवर्तनंनामतृतीयोऽध्यायः ३ ।
। सूतउवाच । । अथवैष्णवचित्तेषुदृष्ट्वाभक्तिमलौकिकीम् । निजलोकंपरित्यज्यभगवान्भक्तवत्सलः १ वनमालीघनश्यामःपीतवासामनोहरः । कांचीक
लापरुचिरोल्लसन्मुकुटकुंडलः २ त्रिभंगललितश्चारुकौस्तुभेनविराजितः । कोटिमन्मथलावण्योहरिचंदनचर्चितः ३ परमानंदचिन्मूर्तिर्मधुरोमुरलीधरः
आविवेशस्वभक्तानांहृदयान्यमलानिच ४ वैकुंठवासिनोयेचवैष्णवाउद्धवादयः । तत्कथाश्रवणार्थंतेगूढरूपेणसंस्थिताः ५ तदाजयजयारावोरसपुष्टिरलौकिकी
चूर्णप्रसूतवृष्टिश्चमुहुःशंखरवोऽप्यभूत् ६ तत्सभासंस्थितानांचदेहगेहात्मविस्मृतिः । दृष्ट्वाचतन्मयावस्थांनारदोवाक्यमब्रवीत् ७ अलौकिकोऽयंमाहि
मामुनीश्वराःसप्ताहजन्योऽद्यविलोकितोमया । मूढाःशठायेपशुपक्षिणोऽत्रसर्वेपिनिष्पापतमाभवंति ८ अतोनृलोकेननुनास्तिकिंचिच्चित्तस्यशोधायकलौप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विन्नम् । अघौघविध्वंसकरंतथैवकथासमानंभुविनास्तिचान्यत् ९ केकेविशुध्यंतिवदंतुमह्यंसप्ताहयज्ञेनकथामयेन । कृपालुभिर्लोकहितंविचार्यप्रकाशितः
कोपिनवीनमार्गः १० । कुमाराऊचुः । येमानवापापकृतस्तुसर्वदासदादुराचाररताविमार्गगाः । क्रोधाग्निदग्धाःकुटिलाश्चकामिनःसप्ताहयज्ञेनकलौ
पुनंतिते ११ सत्येनहीनाःपितृमातृदूषकास्तृष्णाकुलाश्चाश्रमधर्मवर्जिताः । येदांभिकामत्सरिणोऽपिहिंसकाःसप्ताहयज्ञेनकलौपुनंतिते १२ पंचोग्रपापा
श्छलछद्मकारिणःक्रूराःपिशाचाइवनिर्दयाश्चये । ब्रह्मस्वपुष्टाव्यभिचारकारिणःसप्ताहयज्ञेनकलौपुनंतिते १३ कायेनवाचामनसापिपातकंनित्यंप्रकुर्वंतिश
ठाहठेनये । परस्वपुष्टामलिनादुराशयाःसप्ताहयज्ञेनकलौपुनंतिते १४ अत्रतेकीर्तयिष्यामइतिहासंपुरातनम् । यस्यश्रवणमात्रेणपापहानिःप्रजायते १५
तुंगभद्रातटेपूर्वमभूत्पत्तनमुत्तमम् । यत्रवर्णाःस्वधर्मेणसत्यसत्कर्मतत्पराः १६ आत्मदेवःपुरेतस्मिन्सर्ववेदविशारदः । श्रौतस्मार्तेषुनिष्णातोद्वितीयइवभा
स्करः १७ भिक्षुकोवित्तवाँल्लोकेतत्प्रियाधुंधुलीस्मृता । स्ववाक्यस्थापिकानित्यंसुंदरीसुकुलोद्भवा १८ लोकवार्त्तारताक्रूराप्रायशोबहुजल्पिका । शूराच
गृहकृत्येषुकृपणाकलहप्रिया १९ एवंनिवसतोःप्रेम्णादंपत्योरममाणयोः । अर्थाःकामास्तयोरासन्नसुखायगृहादिकम् २० पश्चाद्धर्माःसमारब्धास्ताभ्यां
संतानहेतवे । गोभूहिरण्यवासांसिदीनेभ्योयच्छतःसदा २१ धनार्धंधर्ममात्रेणताभ्यांनीतंतथाऽपिच । नपुत्रोनापिवापुत्रीततश्चिंतातुरोभृशम् २२ एकदा
सद्विजोदुःखाद्गृहंत्यक्त्वावनंगतः । मध्याह्नेतृषितोजातस्तडागंसमुपेयिवान् २३ पीत्वाजलंविषण्णस्तुप्रजादुःखेनकर्शितः । मुहूर्त्तादपितत्रैवसंन्यासीकश्चि
दागतः २४ दृष्ट्वापीतजलंतंतुविप्रोयातस्तदंतिकम् । नत्वाचपादयोस्तस्यनिःश्वसन्संस्थितःपुरः २५ । यतिरुवाच । कथंरोदिषिविप्रत्वंकातेचिंताबलीय
सी । वदत्वंसत्वरंमह्यंस्वस्यदुःखस्यकारणम् २६ । ब्राह्मणउवाच । किंब्रवीमिऋषेदुःखंपूर्वपापेनसंचितम् । मदीयाःपूर्वजास्तोयंकवोष्णमुपभुंजते २७
मद्दत्तंनैवगृह्णंतिप्रीत्यादेवाद्विजातयः । प्रजादुःखेनशून्योऽहंप्राणांस्त्यक्तुमिहागतः २८ धिग्जीवितंप्रजाहीनंधिग्गृहंचप्रजांविना । धिग्धनंचानपत्यस्य
धिक्कुलंसंततिंविना २९ पाल्यतेयामयाधेनुःसावंध्यासर्वथाभवेत् । योमयारोपितोवृक्षःसोऽपिवंध्यत्वमाश्रयेत् ३० यत्फलंमद्गृहायातंशीघ्रंतच्चविशुष्य
ति । निर्भाग्यस्यानपत्यस्यकिमतोजीवितेनमे ३१ इत्युक्त्वासरुरोदोच्चैस्तंत्पार्श्वेदुःखपीडितः । तदातस्ययतेश्चित्तेकरुणाऽभूद्गरीयसी ३२ तद्भाललाक्षरमा
लांचवाचयामासयोगवान् । सर्वंज्ञात्वायतिःपश्चाद्विप्रमूचेसविस्तरम् ३३ । यतिरुवाच । मुंचाज्ञानंप्रजारूपंबलिष्ठाकर्मणोगतिः । विवेकंतुसमासाद्य
त्यजसंसारवासनाम् ३४ शृणुविप्रमयातेऽद्यप्रारब्धंतुविलोकितम् । सप्तजन्मावधितवपुत्रोनैवचनैवच ३५ संततेःसगरोदुःखमवापांगःपुरातथा । रेमुंचा
द्यकुटुंबाशांसंन्यासेसर्वथासुखम् ३६ । ब्राह्मणउवाच । विवेकेनभवेत्किंमेपुत्रंदेहिबलादपि । नोचेत्त्यजाम्यहंप्राणांस्त्वदग्रेशोकमूर्च्छितः ३७ पुत्रादिसु

CC-0. In Public Domain. Digitization by eGangotri

भा मा· खहीनोऽयंसंन्यासःशुष्कएवाहि । गृहस्थःसरसोलोकेपुत्रपौत्रसमन्वितः ३८ इतिविप्राग्रहंदृष्ट्वाप्राब्रवीत्सतपोधनः । चित्रकेतुर्गतःकष्टंविधिलेखाविमार्जनात् अ०
३९ नयास्यसिसुखंपुत्राद्यथादैवहतोद्यमः । अतोहठेनयुक्तोऽसिह्यर्थिनंकिंवदाम्यहम् ४० तस्याग्रहंसमालोक्यफलमेकंसदत्तवान् । इदंभक्षयपत्न्यात्वंततः
॥ ५ ॥ पुत्रोभविष्यति ४१ सत्यंशौचंदयादानमेकभक्तंतुभोजनम् । वर्षावधिस्त्रियाकार्यंतेनपुत्रोतिनिर्मलः ४२ एवमुक्त्वाययौयोगीविप्रस्तुगृहमागतः । पत्न्याःपा ॥ ४ ॥
णौफलंदत्त्वास्वयंयातस्तुकुत्रचित् ४३ तरुणीकुटिलातस्यसख्यग्रेचरुरोदह । अहोचिंताममोत्पन्नाफलंचाहंनभक्षये ४४ फलभक्ष्येणगर्भःस्याद्गर्भे
णोदरवृद्धिता । स्वल्पभक्ष्यंततोऽशक्तिर्गृहकार्यंकथंभवेत् ४५ दैवाद्धाटीव्रजेद्ग्रामेपलायेद्गर्भिणीकथम् । शुकवन्निवसेद्गर्भस्तंकुक्षेःकथमुत्सृजेत् ४६ तिर्यक्
चेदागतोगर्भस्तदामेमरणंभवेत् । प्रसूतौदारुणंदुःखंसुकुमारीकथंसहे ४७ मंदायांमयिसर्वस्वंननांदासंहरेत्तदा । सत्यशौचादिनियमोदुराराध्यःसदृश्यते ४८
लालनेपालनेदुःखंप्रसूतायाश्चवर्त्तते । वंध्यावाविधवानारीसुखिनीचेतिमेमतिः ४९ एवंकुतर्कयोगेनतत्फलंनैवभक्षितम् । पत्याप्रष्टंफलंभुक्तंभुक्तंचेतितये
रितम् ५० एकदाभगिनीतस्यास्तद्गृहंस्वेच्छयाऽऽगता । तदग्रेकथितंसर्वंचिंतेयंमहतीहिमे ५१ दुर्बलातेनदुःखेनह्यनुजेकरवाणिकिम् । साऽब्रवीन्ममग
र्भोऽस्तितंदास्यामिप्रसूतितः ५२ तावत्कालंसगर्भेवगुप्तातिष्ठगृहेसुखम् । वित्तंत्वंमत्पतेर्यच्छसतेदास्यतिबालकम् ५३ षाण्मासिकोमृतोबालइतिलोको
वदिष्यति । तंबालंपोषयिष्यामिनित्यमागत्यतेगृहे ५४ फलमर्पयधेन्वैत्वंपरीक्षार्थंतुसांप्रतम् । तत्तदाचरितंसर्वंतथैवस्त्रीस्वभावतः ५५ अथकाले
नसानारीप्रसूताबालकंतदा । आनीयजनकोबालंरहस्येधुंधुलींददौ ५६ तयाचकथितंभर्त्रेप्रसूतःसुखगर्भकः । लोकस्यसुखमुत्पन्नमात्मदेवप्रजोदयात्
५७ ददौदानंद्विजातिभ्योजातकर्मविधायच । गीतवादित्रघोषोऽभूत्तद्द्वारेमंगलंबहु ५८ भर्तुरग्रेऽब्रवीद्वाक्यंस्तन्यंनास्तिकुचेमम । अन्यस्तन्येननिर्दुग्धाक
थंपुष्णामिबालकम् ५९ मत्स्वसायाःप्रसूतायामृतोबालस्तुवर्त्तते । तामाकार्यगृहेरक्षसातेऽर्भंपोषयिष्यति ६० पतिनातत्कृतंसर्वंपुत्ररक्षणहेतवे । पुत्रस्य
धुंधुकारीतिनाममात्राप्रतिष्ठितम् ६१ त्रिमासेनिर्गतेचाथसाधेनुःसुषुवेऽर्भकम् । सर्वांगसुंदरंदिव्यंनिर्मलंकनकप्रभम् ६२ दृष्ट्वाप्रसन्नोविप्रस्तुसंस्कारान्स्वय
मादधे । मत्वाश्चर्यंजनाःसर्वेदिदृक्षार्थंसमागताः ६३ भाग्योदयोऽधुनाजातआत्मदेवस्यपश्यत । धेन्वाबालःप्रसूतस्तुदेवरूपीतिकौतुकम् ६४ नज्ञातंतद्रहस्यं ॥ ५ ॥
तुकेनापिविधियोगतः । गोकर्णंचसुतंदृष्ट्वागोकर्णंनामचाकरोत् ६५ कियत्कालेनतौजातौतरुणौतनयावुभौ । गोकर्णःपंडितोज्ञानीधुंधुकारीमहाखलः ६६
स्नानशौचक्रियाहीनोदुर्भक्षीक्रोधसंयुतः । दुष्परिग्रहकर्त्ताचशवहस्तेनभोजनः ६७ चोरःसर्वजनद्वेषीपरवेश्मप्रदीपकः । लालनायार्भकान्धृत्वासद्यःकूपेन्यपा
तयत् ६८ हिंसकःशस्त्रधारीचदीनांधानांप्रपीडकः । चांडालाभिरतोनित्यंपाशहस्तश्वसंगतः ६९ तेनवेश्याकुसंगेनपित्र्यंवित्तंतुनाशितम् । एका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दापितरौताडयपात्राणिस्वयमाहरत् ७० तत्पिताकृपणःप्रोच्चैर्धनहीनोरुरोदह । वंध्यत्वंतुसमीचीनंकुपुत्रोदुःखदायकः ७१ क्वतिष्ठामिक्वगच्छामिकोमे
दुःखंव्यपोहयेत् । प्राणांस्त्यजामिदुःखेनहाकष्टंममसंस्थितम् ७२ तदानींतुसमागत्यगोकर्णोज्ञानसंयुतः । बोधयामासजनकंवैराग्यंपरिदर्शयन् ७३ असा
रःखलुसंसारोदुःखरूपीविमोहकः । सुतःकस्यधनंकस्यस्नेहवाञ्ज्वलतेऽनिशम् ७४ नचेंद्रस्यसुखंकिंचिन्नसुखंचक्रवर्तिनः । सुखमास्तिविरक्तस्यमुनेरेकांत
जीविनः ७५ मुंचाज्ञानंप्रजारूपंमोहतोनरकेगतिः । निपतिष्यतिदेहोयंऽसर्वंत्यक्त्वावनंव्रज ७६ तद्वाक्यंतुसमाकर्ण्यगंतुकामःपिताऽब्रवीत् । किंकर्त्तव्यंव
नेतातत्त्वंवदसविस्तरम् ७७ अंधकूपेस्नेहपाशैर्बद्धःपंगुरहंशठः । कर्मणापतितोनूनंमामुद्धरदयानिधे ७८ । गोकर्णउवाच । देहेऽस्थिमांसरुधिरेऽभिमतिं
त्यजत्वंजायासुतादिषुसदाममतांविमुंच । पश्याऽनिशंजगदिदंक्षणभंगनिष्ठंवैराग्यरागरसिकोभवभक्तिनिष्ठः ७९ धर्मंभजस्वसततंत्यजलोकधर्मान्सेवस्वसाधु
पुरुषान्जहिकामतृष्णाम् । अन्यस्यदोषगुणचिंतनमाशुमुक्त्वासेवाकथारसमहोनितरांपिबत्वम् ८० एवंसुतोक्तिवशतोऽपिगृहंविहाययातोवनंस्थिरमति
र्गतषष्टिवर्षः । युक्तोहरेरनुदिनंपरिचर्ययाऽसौश्रीकृष्णमापनियतंदशमस्यपाठात् ८१ इतिश्रीपद्मपुराणेउत्तरखंडेश्रीभागवतमाहात्म्येविप्रमोक्षोनामचतुर्थो
ध्यायः ॥ । सूतउवाच । पितर्युपरतेतेनजननीताडिताभृशम् । क्ववित्तंतिष्ठतेब्रूहिहनिष्येलत्तयानचेत् १ इतितद्वाक्यसंत्रासाज्जनन्यापुत्रदुःखतः । कूपेपातःकृ
तोरात्रौतेनसानिधनंगता २ गोकर्णस्तीर्थयात्रार्थीनिर्गतोयोगसंस्थितः । नदुःखंनसुखंतस्यनवैरीनापिबांधवः ३ धुंधुकारीगृहेऽतिष्ठत्पंचपण्यवधूवृतः । अत्युग्र
कर्मकर्त्ताचतत्पोषणविमूढधीः ४ एकदाकुलटास्तास्तुभूषणान्यभिलिप्सवः । तदर्थंनिर्गतोगेहात्कामांधोमृत्युमस्मरन् ५ यतस्ततश्चसंहृत्यवित्तंवेश्मपुनर्गतः
ताभ्योऽयच्छत्सवस्त्राणिभूषणानिकियंतिच ६ बहुवित्तचयंदृष्ट्वारात्रौनार्योऽविचारयन् । चौर्यंकरोत्यसौनित्यमतोराजागृहीष्यति ७ वित्तंहृत्वापुनश्चैनंमार
यिष्यतिनिश्चितम् । अतोऽर्थगुप्तयेगूढमस्माभिःकिंनहन्यते ८ निहत्यैनंगृहीत्वाऽर्थंयास्यामोयत्रकुत्रचित् । इतितानिश्चयंकृत्वासुप्तंसंबध्यरश्मिभिः ९ पा
शंकंठेनिधायास्यतन्मृत्युमुपचक्रमुः । त्वरितंनममारासौचिंतायुक्तास्तदाऽभवन् १० तप्तांगारसमूहांश्चतन्मुखेहिविचिक्षिपुः । अग्निज्वालातिदुःखेनव्याकुलो
निधनंगतः ११ तंदेहंमुमुचुर्गर्तेप्रायःसाहसिकाःस्त्रियः । नज्ञातंतद्रहस्यंतुकेनापीदंतथैवच १२ लोकैःपृष्टावदंतिस्मदूरंयातःप्रियोहिनः । आगमिष्यतिव
र्षेऽस्मिन्वित्तलोभविकर्षितः १३ स्त्रीणांनैवतुविश्वासंदुष्टानांकारयेद्बुधः । विश्वासेयःस्थितोमूढःसदुःखैःपरिभूयते १४ सुधामयंवचोयासांकामिनांरसवर्ध
नम् । हृदयंक्षुरधाराभंप्रियःकोनामयोषिताम् १५ संहृत्यवित्तंतायाताःकुलटाबहुभर्तृकाः । धुंधुकारीबभूवाऽथमहान्प्रेतःकुकर्मतः १६ वात्यारूपधरो
नित्यंधावन्दशदिशोऽतरम् । शीतातपपरिक्लिष्टोनिराहारःपिपासितः १७ नलेभेशरणंकुत्रहादैवेतिमुहुर्वदन् । कियत्कालेनगोकर्णोमृतंलोकादबुध्यत १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अनाथंतंविदित्वैवगयाश्राद्धमचीकरत् । यस्मिंस्तीर्थेतुसंयातितत्रश्राद्धंप्रवर्तयन् १९ एवंभ्रमन्सगोकर्णःस्वपुरंसमुपेयिवान् । रात्रौगृहांगणेस्वप्तुमागतोल
क्षितःपरैः २० तत्रसुप्तंसविज्ञायधुंधुकारीस्वबांधवम् । निशीथेदर्शयामासमहारौद्रतरंवपुः २१ सकृन्मेषःसकृद्धस्तीसकृच्चमहिषोऽभवत् । सकृदिंद्रःसकृच्चा
 ग्निःपुनश्चपुरुषोऽभवत् २२ वैपरीत्यमिदंदृष्ट्वागोकर्णोधैर्यसंयुतः । अयंदुर्गतिकःकोऽपिनिश्चित्याथतमब्रवीत् २३ । गोकर्णउवाच । कस्त्वमुग्रतरोरात्रौ
कुतोयातोदशामिमाम् । किंवाप्रेतःपिशाचोवाराक्षसोऽसीतिशंसनः २४ । सूतउवाच । एवंपृष्टस्तदातेनरुरोदोच्चैःपुनःपुनः । अशक्तोवचनोच्चारेसंज्ञामात्रं
चकारह २५ ततोंऽजलौजलंकृत्वागोकर्णस्तमुदीरयन् । तत्सेकाद्गतपापोऽसौप्रवक्तुमुपचक्रमे २६ । प्रेतउवाच । अहंभ्रातात्वदीयोऽस्मिधुंधुकारीति
नामतः । स्वकीयेनैवदोषेणब्रह्मत्वंनाशितंमया २७ कर्मणोनास्तिसंख्यामेमहाऽज्ञानेविवर्तिनः । लोकानांहिंसकःसोऽहंस्त्रीभिर्दुःखेनमारितः २८ अतःप्रे
तत्वमापन्नोदुर्दशांचवहाम्यहम् । वाताहारेणजीवामिदैवाधीनफलोदयात् २९ अहोबंधोकृपासिंधोभ्रातर्मामाशुमोचय । गोकर्णोवचनंश्रुत्वातस्मैवाक्यम
थाऽब्रवीत् ३० । गोकर्णउवाच । त्वदर्थंतुगयापिंडोमयादत्तोविधानतः । तत्कथंनैवमुक्तोऽसिममाश्चर्यमिदंमहत् ३१ गयाश्राद्धान्नमुक्तिश्चेदुपायोनापरस्त्विह
किंविधेयंमयाप्रेततत्त्वंवदसविस्तरम् ३२ प्रेतउवाच । गयाश्राद्धशतेनापिमुक्तिर्मेनभविष्यति । उपायमपरंकिंचितद्विचारयसांप्रतम् ३३ इतितद्वाक्य
माकर्ण्यगोकर्णोविस्मयंगतः । शतश्राद्धैर्नमुक्तिश्चेदसाध्यंमोचनंतव ३४ इदानींतुनिजस्थानमातिष्ठप्रेतनिर्भयः । त्वन्मुक्तिसाधकंकिंचिदाचरिष्येविचार्यच
३५ धुंधुकारीनिजस्थानंतेनादिष्टस्ततोगतः । गोकर्णश्चिंतयामासतांरात्रिंनतदध्यगात् ३६ प्रातस्तमागतंदृष्ट्वालोकाःप्रीत्यासमागताः । तत्सर्वंकथितंतेनय
ज्जातंचयथानिशि ३७ विद्वांसोयोगनिष्ठाश्चज्ञानिनोब्रह्मवादिनः । तन्मुक्तिंनैवपश्यंतिपश्यंतःशास्त्रसंचयान् ३८ ततःसर्वैःसूर्यवाक्यंतन्मुक्तौस्थापितंपरम् ।
गोकर्णःस्तंभनंचक्रेसूर्यवेगस्यवैतदा ३९ तुभ्यंनमोजगत्साक्षिन्ब्रूहिमेमुक्तिहेतुकम् ४० तच्छ्रुत्वादूरतःसूर्यःस्फुटमप्यभ्यभाषत । श्रीमद्भागवतान्मुक्तिःसप्ता
हेवाचनंकुरु ४१ इतिसूर्यवचःसर्वैर्धर्मरूपंतुविश्रुतम् । सर्वेऽब्रुवन्प्रयत्नेनकर्त्तव्यंसुकरंत्विदम् ४२ गोकर्णोनिश्चयंकृत्वावाचनार्थंप्रवर्तितः । तत्रसंश्रवणार्था
यदेशग्रामाज्जनाययुः ४३ पंग्वंधवृद्धमंदाश्चतेपिपापक्षयायवै । समाजस्तुमहान्जातोदेवविस्मयकारकः ४४ यदैवासनमास्थायगोकर्णोऽकथयत्कथाम् । सप्रेतो
पितदायातःस्थानंपश्यन्नितस्ततः ४५ सप्तग्रंथियुतंतत्रापश्यत्कीचकमुच्छ्रितम् । तन्मूलच्छिद्रमाविश्यश्रवणार्थंस्थितोह्यसौ ४६ वातरूपीस्थितिंकर्तुमशक्तो
वंशमाविशत् । वैष्णवंब्राह्मणंमुख्यंश्रोतारंपरिकल्प्यसः ४७ प्रथमस्कंधतःस्पष्टमाऽऽख्यानंधेनुजोऽकरोत् । दिनांतेरक्षितागाथातदाचित्रंबभूवह ४८ वंशै
कग्रंथिभेदोऽभूत्सशब्दंपश्यतांसताम् । द्वितीयेऽह्नितथासायंद्वितीयग्रंथिभेदनम् ४९ तृतीयेऽह्नितथासायंतृतीयग्रंथिभेदनम् । एवंसप्तदिनैर्वंशसप्तग्रंथिविभेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम् ५० कृत्वापिद्वादशस्कंधश्रवणात्प्रेततांजहौ । दिव्यरूपधरोजातस्तुलसीदाममंडितः ५१ पीतवासाघनःश्यामोमुकुटीकुंडलान्वितः । ननामभ्रातरंसद्यो
गोकर्णमितिचाब्रवीत् ५२ त्वयाहंमोचितोबंधोकृपयाप्रेतकश्मलात् । धन्याभगवतीवार्ताप्रेतपीडाविनाशिनी ५३ सप्ताहोऽपितथाधन्यःकृष्णलोकफल
प्रदः । कंपंतेसर्वपापानिसप्ताहश्रवणेस्थिते ५४ अस्माकंप्रलयंसद्यःकथाचेयंकरिष्यति । आर्द्रंशुष्कंलघुस्थूलंवाङ्मनःकर्मभिःकृतम् ५५ श्रवणंविदहेत्पा
पंपावकःसमिधोयथा । अस्मिन्वैभारतेवर्षेसूरिभिर्वेदसंसदि ५६ अकथाश्राविणांपुंसांनिष्फलंजन्मकीर्तितम् । किंमोहतोरक्षितेनसुपुष्टेनबलीयसा ५७ अध्रुवेण
शरीरेणशुकशास्त्रकथांविना । अस्थिस्तंभंस्नायुबद्धंमांसशोणितलेपितम् ५८ चर्मावनद्धंदुर्गंधंपात्रंमूत्रपुरीषयोः । जराशोकविपाकार्तंरोगमंदिरमातुरम् ५९
दुष्पूरंदुर्धरंदुष्टंसदोषंक्षणभंगुरम् । कृमिविड्भस्मसंज्ञांतंशरीरमितिवर्णितम् ६० अस्थिरेणस्थिरंकर्मकुतोऽयंसाधयेन्नहि । यत्प्रातःसंस्कृतंचान्नंसायंतच्चविन
श्यति ६१ तदीयरससंपुष्टेकायेकानामनित्यता । सप्ताहश्रवणाल्लोकेप्राप्यतेनिकटेहरिः ६२ अतोदोषनिवृत्त्यर्थमेतदेवहिसाधनम् । बुद्बुदाइवतोयेषुमशकाइ
वजंतुषु । जायंतेमरणायैवकथाश्रवणवर्जिताः ६३ जडस्यशुष्कवंशस्ययत्रग्रंथिविभेदनम् । चित्रंकिमुतदाचित्तग्रंथिभेदःकथाश्रवात् ६४ भिद्यतेहृदयग्रंथि
श्छिद्यंतेसर्वसंशयाः । क्षीयंतेचास्यकर्माणिसप्ताहश्रवणेकृते ६५ संसारकर्दमालेपप्रक्षालनपटीयसी । कथातीर्थेस्थितेचित्तेमुक्तिरेवबुधैःस्मृता ६६ एवंब्रु
वतिवैतस्मिन्विमानमगमत्तदा । वैकुंठवासिभिर्युक्तंप्रस्फुरद्दीप्तिमंडलम् ६७ सर्वेषांपश्यतांभेजेविमानंधुंधुलीसुतः । विमानेवैष्णवान्वीक्ष्यगोकर्णोवाक्यम
ब्रवीत् ६८ । गोकर्णउवाच । अत्रैवबहवःसंतिश्रोतारोममनिर्मलाः । आनीतानिविमानानिनतेषांयुगपत्कुतः ६९ श्रवणंसमभागेनसर्वेषामिहदृश्यते ।
फलभेदःकुतोजातःप्रब्रुवंतुहरिप्रियाः ७० । हरिदासाऊचुः । श्रवणस्यविभेदेनफलभेदोपिसंस्थितः । श्रवणंतुकृतंसर्वैर्नतथामननंकृतम् ७१ फलभेदस्त
तोजातोभजनादपिमानद । सप्तरात्रमुपोष्यैवप्रेतेनश्रवणंकृतम् ७२ मननादितथातेनस्थिरचित्तेकृतंभृशम् । अदृढंचहतंज्ञानंप्रमादेनहतंश्रुतम् ७३ संदिग्धोहि
हतोमंत्रोव्यग्रचित्तोहतोजपः । अवैष्णवोहतोदेशोहतंश्राद्धमपात्रकम् ७४ हतमश्रोत्रियेदानमनाचारहतंकुलम् । विश्वासोगुरुवाक्येषुस्वस्मिन्दीनत्वभाव
ना ७५ मनोदोषजयश्चैवकथायांनिश्चलामतिः । एवमादिकृतंचेत्स्यात्तदावैश्रवणेफलम् ७६ पुनःश्रवांतेसर्वेषांवैकुंठेवसतिर्ध्रुवम् । गोकर्णतवगोविंदोगोलोकं
दास्यतिस्वयम् ७७ एवमुक्त्वाययुःसर्वेवैकुंठंहरिकीर्तनाः । श्रावणेमासिगोकर्णःकथामूचेतथापुनः ७८ सप्तरात्रवतींभूयःश्रवणंतैःकृतंपुनः । कथासमाप्तौयज्ज्ञा
तंश्रूयतांतच्चनारद ७९ विमानैःसहभक्तैश्चहरिराविर्बभूवह । जयशब्दानमःशब्दास्तत्रासन्बहवस्तदा ८० पांचजन्यध्वनिंचक्रेहर्षात्तत्रस्वयंहरिः । गोकर्णंतुस
मालिंग्याकरोत्स्वसदृशंहरिः ८१ श्रोतॄनन्यान्घनश्यामान्पीतकौशेयवाससः । किरीटिनकुंडलिनस्तथाचक्रेहरिःक्षणात् ८२ तद्ग्रामेयेस्थिताजीवाआश्वचांडा

१ अध्रुवेणशरीरेणेति पाठश्चेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातयः। विमानेस्थापितास्तेऽपिगोकर्णकृपयातदा ८३ प्रेषिताहरिलोकेतेयत्रगच्छंतियोगिनः। गोकर्णंनसगोपालोगोलोकंगोपवल्लभम् ८४ कथाश्रवणतः
प्रीतोनिर्ययौभक्तवत्सलः। अयोध्यावासिनःपूर्वंयथारामेणसंगताः ८५ तथाकृष्णेनतेनीतागोलोकंयोगिदुर्लभम्। यत्रसूर्यस्यसोमस्यसिद्धानांनगतिःकदा।
तंलोकंहिगतास्तेतुश्रीमद्भागवतश्रवात् ८६ ब्रूमोऽद्यतेकिंफलवृंदमुज्ज्वलंसप्ताहयज्ञेनकथासुसंचितम्। कर्णेनगोकर्णकथाक्षरंयैःपीतंचतेगर्भगतानभूयः ८७
वातांबुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः। योगैश्चसंयांतिनतांगतिंवैसप्ताहगाथाश्रवणेनयांतियाम् ८८ इतिहासमिमंपुण्यंशांडिल्योऽपिमु
नीश्वरः। पठतेचित्रकूटस्थोब्रह्मानंदपरिप्लुतः ८९ आख्यानमेतत्परमंपवित्रंश्रुतंसकृद्वैविदहेदघौघम्। श्राद्धेप्रयुक्तंपितृतृप्तिमावहेन्नित्यंसुपाठादपुनर्भवंच
९०। इतिश्रीपद्मपुराणेउत्तरखंडेश्रीभागवतमाहात्म्येगोकर्णवर्णनंनामपंचमोध्यायः ५॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
। कुमाराऊचुः। । अथतेसंप्रवक्ष्यामःसप्ताहश्रवणेविधिम्। सहायैर्वसुभिश्चैवप्रायःसाध्योविधिःस्मृतः १ दैवज्ञंतुसमाहूयमुहूर्तंपृच्छचयत्नतः। विवाहेयादृशं
वित्तंतादृशंपरिकल्पयेत् २ नभस्यआश्विनोर्जौचमार्गशीर्षःशुचिर्नभाः। एतेमासाःकथारंभेश्रोतॄणांमोक्षसूचकाः ३ मासानांविग्रहेयानितानित्याज्यानि
सर्वथा। सहायाश्चेतरेचात्रकर्त्तव्याःसोद्यमाश्चये ४ देशेदेशेतथासेयंवार्ताप्रेष्याप्रयत्नतः। भविष्यतिकथाचात्रआगंतव्यंकुटुंबिभिः ५ दूरेहरिकथाःकेचि
द्दूरेचाच्युतकीर्त्तनाः। स्त्रियःशूद्रादयोयेचतेषांबोधोयतोभवेत् ६ देशेदेशेविरक्तायेवैष्णवाःकीर्तनोत्सुकाः। तेष्वेवपत्रंप्रेष्यंचतल्लेखनमितीरितम् ७ सतांस
माजोभवितासप्तरात्रंसुदुर्लभः। अपूर्वरसरूपैवकथाचात्रभविष्यति ८ श्रीभागवतपीयूषपानायरसलंपटाः। भवंतश्चतथाशीघ्रमायातप्रेमतत्पराः ९ ना
वकाशःकदाचिच्चेद्दिनमात्रंतथापितु। सर्वथागमनंकार्यंक्षणोऽत्रैवसुदुर्लभः १० एवमाकारणंतेषांकर्त्तव्यंविनयेनच। आगंतुकानांसर्वेषांवासस्थानानिकल्प
येत् ११ तीर्थेवापिवनेवापिगृहेवाश्रवणंमतम्। विशालावसुधायत्रकर्त्तव्यंतत्कथास्थलम् १२ शोधनंमार्जनंभूमेर्लेपनंधातुमंडनम्। गृहोपस्करमुद्धृ
त्यगृहकोणेनिवेशयेत् १३ अर्वाक्पंचाहतोयत्नादास्तीर्णानिप्रमेलयेत्। कर्त्तव्योमंडपःप्रोच्चैःकदलीखंडमंडितः १४ फलपुष्पदलैर्विष्वग्वितानेनविराजि
तः। चतुर्दिक्षुध्वजारोपोबहुसंपद्विराजितः १५ ऊर्ध्वंसप्तैवलोकाश्चकल्पनीयाःसविस्तरम्। तेषुविप्राविरक्ताश्चस्थापनीयाःप्रबोध्यच १६ पूर्वंतेषामास
नानिकर्त्तव्यानियथोत्तरम्। वक्तुश्चापितदादिव्यमासनंपरिकल्पयेत् १७ उदङ्मुखोभवेद्वक्ताश्रोतावैप्राङ्मुखस्तदा। प्राङ्मुखश्चेद्भवेद्वक्ताश्रोताचोदङ्मु
खस्तदा १८ अथवापूर्वदिग्ज्ञेयापूज्यपूजकमध्यतः। श्रोतॄणामागमेप्रोक्तादेशकालादिकोविदैः १९ विरक्तोवैष्णवोविप्रोवेदशास्त्राभिशुद्धिकृत्। दृष्टांतकुश
लोधीरोवक्ताकार्योऽतिनिस्पृहः २० अनेकधर्मविभ्रांताःस्त्रैणाःपाखंडवादिनः। शुभशास्त्रकथोच्चारेत्याज्यास्तेयदिपंडिताः २१ वक्तुःपार्श्वेसहायार्थमन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थाप्यस्तथाविधः । पंडितःसंशयच्छेत्तालोभबोधनतत्परः २२ वक्राक्षौरंप्रकर्त्तव्यंदिनादर्वाग्व्रताप्तये । अरुणोदयेऽसौनिर्वर्त्यशौचंस्नानंसमाचरेत् २३
नित्यंसंक्षेपतःकृत्वासंध्याद्यंसंप्रयत्नतः । कथाविघ्नविघातायगणनाथंप्रपूजयेत् २४ पितॄन्संतर्प्यशुद्ध्यर्थंप्रायश्चित्तंसमाचरेत् । मंडलंचप्रकर्त्तव्यंतत्रस्थाप्यो
हरिस्तथा २५ कृष्णमुद्दिश्यमंत्रेणचरेत्पूजाविधिंक्रमात् । प्रदक्षिणानमस्कारान्पूजांतेस्तुतिमाचरेत् २६ संसारसागरेमग्नंदीनंमांकरुणानिधे । कर्ममोह
गृहीतांगंमामुद्धरभवार्णवात् २७ श्रीमद्भागवतस्यापिततःपूजाप्रयत्नतः । कर्तव्याविधिनाप्रीत्याधूपदीपसमन्विता २८ ततस्तुश्रीफलंधृत्वानमस्कारंस
माचरेत् । स्तुतिःप्रसन्नचित्तेनकर्तव्याकेवलंतदा २९ श्रीमद्भागवताख्योयंप्रत्यक्षःकृष्णएवहि । स्वीकृतोऽसिमयानाथमुक्त्यर्थंभवसागरे ३० मनोरथोम
दीयोऽयंसफलःसर्वथात्वया । निर्विघ्नेनैवकर्तव्योदासोहंतवकेशव ३१ एवंदीनवचःप्रोक्त्वावक्तारंचाथपूजयेत् । संभूष्यवस्त्रभूषाभिःपूजांतेतंचसंस्तवेत् ३२
शुकरूपप्रबोधज्ञसर्वशास्त्रविशारद । एतत्कथाप्रकाशेनमदज्ञानंविनाशय ३३ तदग्रेनियमःपश्चात्कर्त्तव्यःश्रेयसेमुदा । सप्तरात्रंयथाशक्त्याधारणीयःसएव
हि ३४ वरणंपंचविप्राणांकथाभंगनिवृत्तये । कर्त्तव्यंतैर्हरेर्जाप्यंद्वादशाक्षरविद्यया ३५ ब्राह्मणान्वैष्णवांश्चान्यांस्तथाकीर्तनकारिणः । नत्वासंपूज्यदत्ता
ज्ञःस्वयमासनमाविशेत् ३६ लोकवित्तधनागारपुत्रचिंतांव्युदस्यच । कथाचित्तःशुद्धमतिःसलभेत्फलमुत्तमम् ३७ आसूर्योदयमारभ्यसार्द्धत्रिप्रहरांतिकम्
वाचनीयाकथासम्यक्धीरकंठंसुधीमता ३८ कथाविरामःकर्त्तव्योमध्याह्नेघटिकाद्वयम् । तत्कथामनुकार्यंवैकीर्तनंवैष्णवैस्तदा ३९ मलमूत्रजयार्थंहिल
घ्वाहारःसुखावहः । हविष्यान्नेनकर्त्तव्योह्येकवारंकथार्थिना ४० उपोष्यसप्तरात्रंवैशक्तिश्चेच्छृणुयात्तदा । घृतपानंपयःपानंकृत्वावैशृणुयात्सुखम् ४१ फलाहारे
णवाश्राव्यमेकभुक्तेनवापुनः । सुखसाध्यंभवेद्यत्तुकर्त्तव्यंश्रवणायतत् ४२ भोजनंतुवरंमन्येकथाश्रवणकारणम् । नोपवासोवरःप्रोक्तःकथाविघ्नकरोयदि
४३ सप्ताहव्रतिनांपुंसांनियमाञ्शृणुनारद । विष्णुदीक्षाविहीनानांनाधिकारःकथाश्रवे ४४ ब्रह्मचर्यमधःसुप्तिःपत्रावल्यांचभोजनम् । कथासमाप्तौभुक्तिं
चकुर्यान्नित्यंकथाव्रती ४५ द्विदलंमधुतैलंचगरिष्ठान्नंतथैवच । भावदुष्टंपर्युषितंजह्यान्नित्यंकथाव्रती ४६ कामंक्रोधंमदंमानंमत्सरंलोभमेवच । दंभंमोहंत
थाद्वेषंदूरयेच्चकथाव्रती ४७ वेदवैष्णवविप्राणांगुरुगोव्रतिनांतथा । स्त्रीराजमहतांनिंदांवर्जयेद्यःकथाव्रती ४८ रजस्वलांत्यजम्लेंच्छपतितव्रातकैस्तथा ।
द्विजद्विड्वेदबाह्यैश्चनवदेद्यःकथाव्रती ४९ सत्यंशौचंदयामौनमार्जवंविनयंतथा । उदारमानसंतद्वदेवंकुर्यात्कथाव्रती ५० दरिद्रश्चक्षयीरोगीनिर्भाग्यःपापक
र्मवान् । अनपत्योमोक्षकामःशृणुयाच्चकथामिमाम् ५१ अपुष्पाकाकवंध्याचवंध्यायाचमृतार्भका । स्रवद्गर्भाचयानारीतयाश्राव्यःप्रयत्नतः ५२ एतेषुवि
धिनाश्रावेतदक्षय्यतरंभवेत् । अत्युत्तमाकथादिव्याकोटियज्ञफलप्रदा ५३ एवंकृत्वाव्रतविधिमुद्यापनमथाचरेत् । जन्माष्टमीव्रतमिवकर्तव्यंफलकांक्षिभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५४ आकिंचनेषुभक्तेषुप्रायोनोद्यापनाग्रहः । श्रवणेनैवपूतास्तेनिष्कामावैष्णवायतः ५५ एवंनगाहयज्ञेऽस्मिन्समाप्तेश्रोतृभिस्तदा । पुस्तकस्यचवक्तु
श्चपूजाकार्यातिभक्तितः ५६ प्रसादतुलसीमालाःश्रोतृभ्यश्चाथदीयताम् । मृदंगताललुलितंकर्त्तव्यंकीर्त्तनंततः ५७ जयशब्दंनमःशब्दंशंखशब्दंचकारये
त् । विप्रेभ्योयाचकेभ्यश्चवित्तमन्नंचदीयताम् ५८ विरक्तश्चेद्भवेच्छ्रोतागीतावाच्यापरेऽहनि । गृहस्थश्चेत्तदाहोमःकर्त्तव्यःकर्मशांतये ५९ प्रतिश्लोकंचजुहु
याद्विधिनादशमस्यच । पायसंमधुसर्पिश्चतिलान्नादिकसंयुतम् ६० अथवाहवनंकुर्याद्गायत्र्यासुसमाहितः । तन्मयत्वात्पुराणस्यपरमस्यचतत्वतः ६१
होमाशक्तौबुधोहैम्यंदद्यात्तत्फलसिद्धये । नानाच्छिद्रनिरोधार्थंन्यूनताधिकताख्ययोः ६२ दोषयोःप्रशमार्थंचपठेन्नामसहस्रकम् । तेनस्यात्सफलंसर्वं
नास्त्यस्मादधिकंयतः ६३ द्वादशब्राह्मणान्पश्चाद्भोजयेन्मधुपायसैः । दद्यात्सुवर्णधेनुंचव्रतपूर्णत्वहेतवे ६४ शक्तौपलत्रयमितंस्वर्णसिंहंविधायच ।
तत्रास्यपुस्तकंस्थाप्यंलिखितंललिताक्षरम् ६५ संपूज्यावाहनाद्यैस्तदुपचारैःसदक्षिणम् । वस्त्रभूषणगंधाद्यैःपूजिताययतात्मने ६६ आचार्यायसुधीर्दत्त्वामुक्तः
स्याद्भवबंधनैः । एवंकृतेविधानेचसर्वपापनिवारणे ६७ फलदंस्यात्पुराणंतुश्रीमद्भागवतंशुभम् । धर्मकामार्थमोक्षाणांसाधनंस्यान्नसंशयः ६८ कुमारा
ऊचुः । । इतितेकथितंसर्वंकिंभूयःश्रोतुमिच्छसि । श्रीमद्भागवतेनैवभुक्तिमुक्तीकरेस्थिते ६९ । सूतउवाच । इत्युक्त्वातेमहात्मानःप्रोचुर्भागवतींकथाम्
सर्वपापहरांपुण्यांभुक्तिमुक्तिप्रदायिनीम् ७० शृण्वतांसर्वभूतानांसप्ताहंनियतात्मनाम् । यथाविधिततोदेवंतुष्टुवुःपुरुषोत्तमम् ७१ तदंतेज्ञानवैराग्यभक्तीनांपु
ष्टतापरा । तारुण्यंपरमंचाभूत्सर्वभूतमनोहरम् ७२ नारदश्चकृतार्थोऽभूत्सिद्धेस्वीयेमनोरथे । पुलकीकृतसर्वांगःपरमानंदसंभृतः ७३ एवंकथांसमाकर्ण्यनारदो
भगवत्प्रियः । प्रेमगद्गदयावाचातानुवाचकृतांजलिः ७४ नारदउवाच । धन्योऽस्म्यनुगृहीतोऽस्मिभवद्भिःकरुणापरैः । अद्यमेभगवाँल्लब्धःसर्वपापहरो
हरिः ७५ श्रवणंसर्वधर्मेभ्योवरंमन्येतपोधनाः । वैकुंठस्थोयतःकृष्णःश्रवणाद्यस्यलभ्यते ७६ सूतउवाच । एवंब्रुवतिवैतत्रनारदेवैष्णवोत्तमे । परिभ्रमन्
समायातःशुकोयोगेश्वरस्तदा ७७ तत्रायग्रौषोडवार्षिकस्तदाव्यासात्मजोज्ञानमहाब्धिचंद्रमाः । कथावसानेनिजलाभपूर्णःप्रेम्णापठन्भागवतंशनैःशनैः ७८
दृष्ट्वासदस्याःपरमोरुतेजसंसद्यःसमुत्थायददुर्महासनम् । प्रीत्यासुरर्षिस्तमपूजयत्सुखंस्थितोऽवदत्संशृणुतामलांगिरम् ७९ । श्रीशुकउवाच । निगम
कल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतम् । पिबतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः ८० धर्मःप्रोज्झितकैतवोऽत्रपरमोनिर्मत्सराणांसतांवे
द्यंवास्तवमत्रवस्तुशिवदंतापत्रयोन्मूलनम् । श्रीमद्भागवतेमहामुनिकृतेकिंवापरैरीश्वरःसद्योहृद्यवरुध्यतेऽत्रकृतिभिःशुश्रूषुभिस्तत्क्षणात् ८१ श्रीमद्भाग
वतंपुराणतिलकंयद्वैष्णवानांधनंयस्मिन्पारमहंस्यमेकममलंज्ञानंपरंगीयते । यत्रज्ञानविरागभक्तिसहितंनैष्कर्म्यमाविष्कृतंतच्छृण्वन्प्रपठन्विचारणपरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

श्रीगणपतयेनमः ॥ श्रीसरस्वत्यैनमः ॥ नमःश्रीमत्परमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरामचंद्राय ॥ वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्षसि । यस्याऽऽ
स्तेहृदयेसंवित्तंनृसिंहमहंभजे॥१॥विश्वसर्गविसर्गादिनवलक्षणलक्षितम्।श्रीकृष्णाख्यंपरंधामजगद्धामनमामतत्॥२॥माधवोमाधवावीशौसर्वसिद्धिविधायिनौ।वंदेपरस्परात्मानौपरस्परंनुतिप्रियौ
॥३॥[1]संप्रदायानुरोधेनपौर्वापर्यानुसारतः।श्रीभागवतभावार्थदीपिकेयंप्रतन्यते॥४॥क्वाहंमंदमतिःक्वेदंमंथनंक्षीरवारिधेः।किंतत्रपरमाणुर्वैयत्रमज्जतिमंदरः॥५॥मूकंकरोतिवाचालंपंगुंलंघयतेगिरिम्।
यत्कृपातमहंवंदेपरमानंदमाधवम् ॥ ६ ॥ श्रीमद्भागवताभिधःसुरतरुस्तारांकुरःसज्जनिःस्कंधैर्द्वादशभिस्ततःप्रविलसद्भक्त्यालवालोदयः । द्वात्रिंशत्त्रिशतंचयस्यविलसच्छाखाःसहस्राण्यलंप
र्णान्यष्टदशेष्टदोऽतिसुलभोवर्वर्तिसर्वोपरि॥ ७ ॥ अथनानापुराणशास्त्रप्रबंधैश्चित्तप्रसत्तिमलभमानस्तत्रतत्रापरितुष्यन्नारदोपदेशतःश्रीमद्भगवद्गुणवर्णनप्रधानंभागवतशास्त्रंप्रारिप्सुर्वेदव्यासस्तत्प्र
त्यूहनिवृत्त्यादिसिद्धयेतत्प्रतिपाद्यपरदेवताऽनुस्मरणलक्षणंमंगलमाचरति।जन्माद्यस्येति।परंपरमेश्वरम् धीमहीति ध्यायतेर्लिंङिछांदसम् ध्यायेमेत्यर्थः।बहुवचनंशिष्याभिप्रायं।तमेवस्वरूपतट
स्थलक्षणाभ्यामुपलक्षयति तत्रस्वरूपलक्षणंसत्यमिति सत्यत्वेहेतुः यत्रयस्मिन्ब्रह्मणित्रयाणांमायागुणानांतमोरजःसत्त्वानांसर्गोभूतेंद्रियदेवतारूपोऽमृषासत्यः यत्सत्यतयामिथ्यासर्गोऽपिसत्यव

श्लोकाः

१ ॐनमोभगवतेवासुदेवाय।जन्माद्यस्ययतोऽन्वयादितरतश्चार्थेष्वभिज्ञःस्वराट्तेनेब्रह्महृदायआदिकवयेमुह्यं
तियत्सूरयः॥तेजोवारिमृदांयथाविनिमयोयत्रत्रिसर्गोमृषाधाम्नास्वेनसदानिरस्तकुहकंसत्यंपरंधीमहि॥१॥

चूर्णिका

श्रीगणेशायनमः श्रीकुलदेवतायैनमः श्रीगोपीजनवल्लभायनमः मूकंकरोतिवाचालंपंगुंलंघयतेगिरिम् यत्कृपातमहंवंदेपरमानंदमाधवम् १ अथनानापुराणशास्त्रप्रबंधैःकृत्वाचि
त्तप्रसादमलभमानस्तत्रतत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्यदेवतानुस्मरणलक्षणंमंगलमाचरति जन्माद्यस्येति
अस्य जगतो जन्मस्थितिनाशा यतो भवंति तथाकार्याकार्येपुक्रमशोऽन्वयव्यतिरेकाभ्यां योस्ति ततः स्वतःसिद्धज्ञानवान्यो यस्मिन्वेदे सूरयोपि मुह्यंति तं वेदं ब्रह्मणेमनसैवप्र
काशितवान् किंच यथातेजोवारिमृदामन्यस्मिन्नन्यावभासः तेजसिवारिबुद्धिर्मृगजलेमृगतृष्णायांमृदिकाचादौजलबुद्धिरित्यादि तथाभगवत्स्वरूपेमायागुणसंगो भूतेंद्रियदे
वतारूपः सत्यः यत्सत्यतयामिथ्यासर्गोपिसत्यवत्प्रतीयते किंच स्वतेजसासदानिरस्तंकपटंयस्मिन्नेवंभूतोयः सत्यरूपः परमेश्वरः तं वयं सशिष्याः ध्यायेम १ ॥ १ ॥

---

१ नतिप्रियौ इतिमहेश्वरीये । २ गुणानुवर्णनेति मुद्रितेपाठः । ३ अत्र छान्दसप्रयोगोऽस्यशास्त्रस्यवेदतुल्यत्वादुपपन्नः इतिमहेश्वरः । ४ सत्यंज्ञानमनन्तंब्रह्मेतिश्रुत्युक्तं इतिम॰ ।

CC-0. In Public Domain. Digitization by eGangotri

त्प्रतीयतेतंपरंसत्यमित्यर्थः। अत्रदृष्टांतः तेजोवारिमृदांयथाविनिमयइति । विनिमयोव्यत्ययोऽन्यस्मिन्नन्यावभासः सयथाऽधिष्ठानसत्तयासद्वत्प्रतीयतइत्यर्थः तत्रतेजसिवारिबुद्धिर्मरीचितोयेप्र
सिद्धा मृदिकाचादौवारिबुद्धिर्वारिणिचकाचादिबुद्धिरित्यादियथायथमूह्यम् यद्वा तस्यैवपरमार्थसत्यत्वप्रतिपादनायतदितरस्यमिथ्यात्वमुक्तम्। यत्रमृषैवायंत्रिसर्गोनवस्तुतःसन्निति। यत्रेत्यनेन
प्रतीतमुपाधिसंबंधंवारयति । स्वेनैवधाम्नामहसानिरस्तंकुहकंकपटंयस्मिंस्तम् । तटस्थलक्षणमाह जन्मादीति अस्यविश्वस्यजन्मस्थितिभंगंयतोभवंतितंधीमहीति । तत्रहेतुः अन्वयादितरश्चार्थे
ष्वाकाशादिकार्येषुपरमेश्वरस्यस्वरूपेणान्वयादकार्येभ्यश्चखपुष्पादिभ्यस्तद्व्यतिरेका१ । यद्वा अन्वयशब्देनानुवृत्तिरितरशब्देनव्यावृत्तिः अनुवृत्तत्वात्सद्रूपंब्रह्मकारणंमृत्सुवर्णादिवत् व्यावृत्त
त्वाद्विश्वंकार्यंघटकुंडलादिवदित्यर्थः। यद्वासांवयवत्वादन्वयव्यतिरेकाभ्यांयद्विश्वस्यजन्मा दितद्यतोभवतीतितंसत्यमितिसंबंधः। तथाचश्रुतिः 'यतोवाइमानिभूतानिजायंते येनजातानिजीवंति
यत्प्रयंत्यभिसंविशंती'त्याद्या।स्मृतिश्च "यतःसर्वाणिभूतानिभवंत्यादियुगागमे यस्मिंश्चप्रलयंयांतिपुनरेवयुगक्षये"इत्याद्या।तर्हिकिंप्रधानंजगत्कारणत्वाद्ध्येयमभिप्रेतं नेत्याह अभिज्ञोयस्तम्
'सईक्षतलोकान्नुसृजाइतिसइमाँल्लोकानसृजते'तिश्रुतेः 'ईक्षतेर्नाशब्द'मितिन्यायाच्च।तर्हिकिंजीवोध्येयःस्यान्नेत्याह।स्वराट्स्वेनैवराजतेयस्तं।स्वतः सिद्धज्ञानमित्यर्थः।तर्हिकिंब्रह्माध्येयः'हिरण्यग
र्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकआसीदि' तिश्रुतेः नेत्याह तेनइति।आदिकवयेब्रह्मणेऽपिब्रह्मवेदंयस्तेनेप्रकाशितवान् 'योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै तंहदेवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वैशरणमहंप्रपद्य'इतिश्रुतेः।ननुब्रह्मणोऽन्यतोवेदाध्ययनप्रसिद्धमसत्त्वम् तत्राह्हृदामनसैवतेनेविस्तृतवान् अनेनबुद्धिवृत्तिप्रवर्त्तकत्वेनगायत्र्यर्थोदर्शितः।वक्ष्यतिहि'प्रचोदितायेनपुरासरस्वतीवि
तन्वताऽजस्यसतींस्मृतिंहृदिस्वलक्षणाप्रादुरभूत्किलास्यतःसमेऋषीणामृषभःप्रसीदता'मिति।ननुचब्रह्मास्वयमेवसुप्तप्रतिबुद्धन्यायेनवेदमुपलभतांनेत्याहयद्यस्मिन्ब्रह्मणिसूरयोऽपिमुह्यंतीतितस्मा
द्ब्रह्मणोऽपिपराधीनज्ञानत्वात्स्वतःसिद्धज्ञानःपरमेश्वरएवजगत्कारणम्।अतएवसत्योऽसतःसत्ताप्रदत्वाच्चपरमार्थसत्यःसर्वज्ञत्वेनचनिरस्तकुहकस्तंधीमहीतिगायत्र्याप्रारंभेणचगायत्र्याख्यब्रह्म
विद्यारूपमेतत्पुराणमितिदर्शितम् यथोक्तंमत्स्यपुराणेपुराणदानप्रस्तावे'यत्राधिकृत्यगायत्रींवर्ण्यतेधर्मविस्तरःवृत्रासुरवधोपेतंतद्भागवतमिष्यते लिखित्वातच्चयोदद्याद्धेमसिंहसमन्वितं प्रौष्ठपद्यां
पौर्णमास्यांसयातिपरमंपदं अष्टादशसहस्राणिपुराणंतत्प्रकीर्तितम्'।पुराणांतरेच'ग्रंथोऽष्टादशसाहस्रोद्वादशस्कंधसंमितःहयग्रीवब्रह्मविद्यायत्रवृत्रवधस्तथा गायत्र्याचसमारंभस्तद्वैभागवतंविदुः'
पद्मपुराणेंऽवरीषंप्रतिगौतमोक्तिः"अंबरीषशुकप्रोक्तंनित्यंभागवतंशृणु पठस्वस्वमुखेनापियदीच्छसिभवक्षयमि"ति अतएवभागवतंनामान्यदित्यपिनशंकनीयं॥१॥इदानींश्रोतृप्रवर्त्तनायश्रीभागव
तस्यकांडत्रयविषयेभ्यःसर्वशास्त्रेभ्यःश्रैष्ठ्यंदर्शयति।धर्मइति। अत्रश्रीमतिसुंदरेभागवतेपरमोधर्मोनिरूप्यतेपरमत्वेहेतुः प्रकर्षेणोज्झितंकैतवंफलाभिसंधिलक्षणंकपटंयस्मिन्सः प्रशब्देनमोक्षाभिसं
धिरपिनिरस्तः। केवलमीश्वराराधनलक्षणोधर्मोनिरूप्यतइतिअधिकारितोऽपिधर्मस्यपरमत्वमाह निर्मत्सराणांपरोत्कर्षासहनंमत्सरस्तद्रहितानाम् सतांभूतानुकंपिनाम् एवंकर्मकांडविषयेभ्यः
शास्त्रेभ्यःश्रैष्ठ्यमुक्तम्। ज्ञानकांडविषयेभ्योऽपिश्रैष्ठ्यमाह। वेद्यमिति वास्तवंपरमार्थभूतंवस्तुवेद्यंनतुवैशेषिकाणामिवद्रव्यगुणादिरूपम् यद्वा वास्तवशब्देनवस्तुनोंऽशोजीवोवस्तुनःशक्तिर्मायाव
स्तुनःकार्यंजगच्चतत्सर्वंवस्त्वेवनततःपृथगितिवेद्यम् अयत्नेनैवज्ञातुंशक्यमित्यर्थः ततःकिमतआह शिवदंपरमसुखदम् (इतीष्टप्राप्तिः) किंच आध्यात्मिकादितापत्रयोन्मूलनंच (इत्यनिष्टनि
वृत्तिः) अनेनज्ञानकांडविषयेभ्यःश्रै

१ असंगमित्यर्थः । २ यत्सावयवंतज्जन्मादिमत् यज्जन्मादिमन्नभवति नतत्सावयवमित्यन्वयव्यतिरेकाभ्यामित्यर्थः । ३ ज्ञानघनइत्यर्थः । ४ प्राप्तंयत्प्रधानस्य जगत्कारणत्वं तत्र कुतः अशब्दं हि तत् वैदिकशब्दैरवाच्यमित्यर्थः तत्कुतः ईक्षतेः ईक्षितृत्वश्रवणात् कारणस्य तच्च श्रवणं 'सऐक्षते'त्यादि । ५ तद्बुद्धौ प्रकाशितवानित्यर्थः । ६ विपश्चितो ब्रह्मादयः । ७'वैशेषिकइव'इतिमहेश्वरपाठः । ८'ब्रह्मैव' म० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्ठ्यंदर्शितम् कर्त्ततोऽपिश्रैष्ठ्यमाह महामुनिःश्रीनारायणस्तेनप्रथमंसंक्षेपतःकृतेदेवताकांडगतंश्रैष्ठ्यमाह किंवेति ।परैःशास्त्रैस्तदुक्तसाधनैर्वेश्वरोहृदिकिंवासद्यएवावरुध्यतेस्थिरीक्रीयते वाशब्दः कटाक्षे । किंतु विलंबेनकथंचिदेव । अत्रतुशुश्रूषुभिःश्रोतुमिच्छद्भिरेवतत्क्षणादेवावरुध्यते इदमेव।तर्हिकिमितिसर्वेनशृण्वंतितत्रा ऽऽह कृतिभिरिति श्रवणेच्छातुपुण्यैर्विनानोत्पद्यतइत्यर्थः तस्मादत्रकांडत्रयार्थस्यापियथावत्प्रतिपादनादिदमेवसर्वशास्त्रेभ्यःश्रेष्ठमतोनित्यमेतदेवश्रोतव्यमितिभावः २ इदानींतुनकेवलंसर्वशास्त्रेभ्यःश्रेष्ठत्वादस्यश्रवणंविधीयतेऽपितुसर्वशास्त्रफलरूपमिदमतःपरमादरेणसेव्यमित्याह .निगमेति निगमोवेदःसएवकल्पतरुःसर्वपुरुपार्थोपायत्वात्तस्यफलंभागवतंनाम तत्तुवैकुंठगतंनारदेनानीयमह्यंदत्तम् मयाचशुकस्यमुखेनिहितम् तच्चतन्मुखाद्गुविगलितं शिष्यप्रशिष्यादिरूपपल्लवपरंपरयाशनैरखंडमेवावतीर्णं नतूच्चनिपातेनस्फुटितमित्यर्थः।एतच्चभविष्यदपिभूतवन्निर्दिष्टं अनागताख्यानेभैवास्यशास्त्रस्यप्रवृत्तेः। अतएवामृतरूपेणद्रवेणसंयुतम् लोकेहिशुकमुखस्पृष्टंफलममृतमिवस्वादुभवतीतिप्रसिद्धं अत्रतुशुकोमुनिः अमृतंपरमानंदःसएवद्रवोरसः ' रसोवैसः रसं ह्येवायंलब्ध्वानंदीभवती'तिश्रुतेः अतोहेरसिकाहेरसज्ञास्तत्रापिभावुकाहेरसविशेषभावनाचतुराः अहोभुवि गलितमित्यलभ्यलाभोक्तिः इदंभागवतंनामफलंमुहुःपिवत ननुत्वगष्ट्यादिकंविहायफलाद्रसःपीयतेकथंफलमेवपातव्यंतत्रा ऽऽह रसंरसरूपम् अतस्त्वगष्ट्यादेर्हेयांशस्याभावात्फलमेवकृत्स्नंपिवत अत्रचरसतादात्म्याविवक्षयारसवत्त्वस्यविवक्षितत्वाद्गुणवचनेऽपिरसशब्देमतुपःप्राप्त्यभावात्तेनविनैवरसंफलमितिसामानाधिकरण्यमत्रफलमित्युक्तेपानासंभवोहेयांशप्रसक्तिश्चभवेदितितन्निवृत्त्यर्थंरसमित्युक्तम् रसमित्युक्तेऽपिभुविगलितस्यरसस्यपातुमशक्यत्वात्फलमितिद्रष्टव्यम्।नचभागवतामृतपानंमोक्षेऽपित्याज्यमित्याह आलयं लयोमोक्षः अभिविधावाकारःलयमभिव्याप्य नहीदंस्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतुसेव्यतएव।वक्ष्यतिहि"आत्मारामाश्चमुनयोनिर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरि"रिति ३

धर्मःप्रोज्झितकैतवोऽत्रपरमोनिर्मत्सराणांसतांवेद्यंवास्तवमत्रवस्तुशिवदंतापत्रयोन्मूलनम् ॥श्रीमद्भागवतेमहामुनिकृतेकिंवापरैरीश्वरःसद्योहृद्यवरुध्यतेऽत्रकृतिभिःशुश्रूषुभिस्तत्क्षणात् २ निगमकल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतम् ॥ पिबतभागवतंरसमालयंमुहुरहोरसिकाभुविभावुकाः ३

श्लोकाः २/३

चूर्णिका

इदानींश्रोतॄणांभागवतश्रवणप्रवृत्त्यर्थंत्रिकांडविपयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यमाह धर्मःप्रोज्झितेति अत्रसुंदरेश्रीनारायणेनसंक्षेपतःकृतेभागवतेनिर्मत्सराणांसतांफलेच्छारहितःपरमोधर्मःकेवलंईश्वराराधनलक्षणःनिरूप्यते अत्रपरमार्थभूतं वस्तुवेद्यम् किंभूतंवस्तु शिवदं तापत्रयनाशकंच ननुअन्यशास्त्रसत्त्वेकिमनेनइतिचेत्परैः शास्त्रैः ईश्वरः विलंबेनहृद्यारूढोभवति अत्रतुश्रवणेच्छामात्रेणतत्क्षणादेवावरुध्यते तर्हीदमेवकुतः सर्वेनशृण्वंति श्रवणेच्छातुपुण्यैर्विनानोत्पद्यते अतोवश्यमिदमेवश्रोतव्यमिति २ अतः सर्वशास्त्रफलरूपमिदमितिपरमादरेणसेव्यमितिआह वेदरूपोयःकल्पवृक्षः तस्येदंभागवतनामकंफलम् तत्तु वैकुंठगतं नारदेनानीयमह्यंदत्तम् मयाचशुकमुखेनिहितं तस्माद्गुविशिष्यादिपरंपरयाअवतीर्णम् अतोपूर्वमेवेदंशास्त्रं अतः अमृतद्रवसंयुतंरसरूपंभागवतं हेरसज्ञाः अतोभक्तिमंतः पुरुषाः मुहुर्मुहुः पिबत ३

१ काण्डविषयगतमितिमुद्रितपाठः । २ सचवृक्षेतिष्ठतितन्मुखात्पल्लवपरंपरयाभूमाववतरतीत्यपिप्रसिद्धम् । महे० । ३ रसएवफलाकारेण भातीत्यर्थः । महे० । ४ मुहुरित्यनेनरसस्यापरिमितत्वं सूचितम् । महे० । '

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवमनेनश्लोकत्रयेणविशिष्टेष्टदेवतानुस्मरणपूर्वकंप्रारिप्सितस्यशास्त्रस्यविषयप्रयोजनादिवैशिष्ट्येनसुखसेव्यत्वेनचश्रोतॄनभिमुखीकृत्यशास्त्रमारभते नैमिशइति। ब्रह्मणाविसृष्टस्यमनोमयस्य चक्रस्यनेमिःशीर्यतेकुंठीभवतियत्रतत्नेमिशंनेमिशमेवनैमिशम् तथाचवायवीये "एतन्मनोमयंचक्रंमयासृष्टंविसृज्यते यत्रास्यशीर्यतेनेमिःसदेशस्तपसःशुभः इत्युक्त्वासूर्यसंकाशंचक्रंसृष्ट्वामनोम यम् प्रणिपत्यमहादेवंविससर्जपितामहः तेऽपिहृष्टतमाविप्राःप्रणम्यजगतांप्रभुं प्रययुस्तस्यचक्रस्ययत्रनेमिर्व्यशीर्यत तद्वनंतेनविख्यातंनैमिशंमुनिपूजितमि"ति नैमिषइतिपाठेवराहपुराणो क्तंद्रष्टव्यम् तथाहि गौरमुखम्प्रतिभगवद्वाक्यं "एवंकृत्वाततोदेवोमुनिंगौरमुखंतदा उवाचानिमिषेणेदंनिहतंदानवंबलम् अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् भविष्यतियथार्थंवैब्राह्म णानांविशेषकंमि"ति अनिमिषःश्रीविष्णुरलुप्तदृष्टित्वात्तस्यक्षेत्रे तथाचात्रैवशौनकादिवचनम् "क्षेत्रेऽस्मिन्वैष्णवेवयमि"ति स्वःस्वर्गःगीयतइतिस्वर्गायोहरिःसएवलोकोभक्तानांनिवासस्थानं तस्मैतत्प्राप्तयइत्यर्थः सहस्रंसमाःसंवत्सराअनुष्ठानकालोयस्यतत्सत्रंसत्रसंज्ञकंकर्मोद्दिश्यआसतउपविविशुः यद्वा आसताऽकुर्वतेत्यर्थः 'आलभेतनिर्वपतिउपयंतीत्यादिवत्प्रत्ययोच्चारणमात्रार्थ त्वेनाऽऽस्तेर्धात्वर्थस्याविवक्षितत्वात् ४ प्रातःकाले हुताएवहुताअग्नयोयैस्ते अनेननित्यनैमित्तिकहोमसाकल्यंदर्शितम् इदंवक्ष्यमाणमादरात्पप्रच्छुः ५ विविदिषितानर्थान्प्रष्टुंसूतस्यसर्व शास्त्रज्ञानातिशयमाहुः त्वयेतित्रिभिःश्लोकैः। इतिहासोमहाभारतादिस्तत्सहितानि। नकेवलमधीतान्यपित्वाख्यातान्यपिव्याख्यातानिच उतअपि यानिधर्मशास्त्राणितान्यपि ६ किंच यानीत्यादि। विदांविदुषांमध्येश्रेष्ठोव्यासोयानिवेद परावरेसगुणनिर्गुणेब्रह्मणीविदंतीतितथा ७ वेत्थजानासिसौम्यहेसाधोतेषामनुग्रहात्। तत्त्वतोज्ञानेहेतुमाह ब्रूयुरिति। स्निग्धस्यप्रेमवतः उतएव गुह्यंरहस्यमपिब्रूयुरेव ८ हे आयुष्मंस्तत्रतत्रशास्त्रेषुअंजसाग्रंथार्जवेन एकांततःश्रेयोऽव्यभिचारिश्रेयःसाधनम् ९

नैमिशेऽनिमिषक्षेत्रेऋषयःशौनकादयः ॥ सत्रंस्वर्गायलोकायसहस्रसममासत ४ तएकदातुमुनयःप्रातर्हुतहुताग्नयः ॥ सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ५ ऋषयऊचुः ॥ त्वयाखलुपुराणानिसेतिहासानिचानघ ॥ आख्यातान्यप्यधीतानिधर्मशास्त्राणियान्युत ६ यानिवेदविदांश्रेष्ठोभगवान्बादरायणः ॥ अन्ये चमुनयःसूतपरावरविदोविदुः ७ वेत्थत्वंसौम्यतत्सर्वंतत्त्वतस्तदनुग्रहात् ॥ ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ८ तत्रतत्रांजसाऽऽयुष्मन्भवतायद्विनि श्चितम् ॥ पुंसामेकांततःश्रेयस्तन्नःशंसितुमर्हसि ९

श्लोकाः ४/९

चूर्णिका

एवंश्लोकत्रयेणश्रोतॄनभिमुखीकृत्यभागवतशास्त्रमारभते नैमिषारण्येविष्णुक्षेत्रेशौनकादयऋषयः श्रीहरिप्राप्तयेसहस्रसंवत्सरसाध्यंसत्रंकृतवंतः ४ एकदातेऋषयः प्रातर्हु तहुताग्नयः संत आसीनंरोमहर्षणपुत्रंसूतंसत्कृत्यपप्रच्छुः ५ ऋषयऊचुः भोसूतत्वयासेतिहासपुराणानिधर्मशास्त्राणिचयानिव्यासादयोमुनयश्चविदुस्तानिसर्वाण्यधीतानि व्याख्यातानिच ६ ७ हेसौम्यतेषामनुग्रहात्तत्सर्वंत्वंवेत्थ यतः स्निग्धस्यशिष्यस्यगुरवोगुह्यमपिब्रूयुः ८ अतः सर्वज्ञेनत्वयातत्रतत्रशास्त्रेपुंसांश्रेयोयन्निश्चितंतन्नो वद ९

१ 'विशेषत' इतिवापाठः। २ 'निमिषोऽनिमिषःस्रग्वी'तिनामसाहस्राच्च। मंहे०। ३ मनुस्मृत्यादीनि। मंहे०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥ ९ ॥

अन्येऽपिबहुनाकालेनबहुशास्त्रश्रवणादिभिर्विनिश्चिन्वंतुनेत्याहुः प्रायेणेति हेसभ्यसाधोअस्मिन्युगेकलावल्पायुषोजनास्तत्रापिमंदाअलसास्तत्रापिसुमंदमतयस्तत्रापिमंदभाग्याविघ्नाकुलास्तत्राप्युपद्रुतारोगादिभिः १० नचबहुशास्त्रश्रवणेऽपि(सारश्रवणंविना)तावतैवफलसिद्धिरित्याहुः भूरीणीति।भूरीणिकर्माण्यनुष्ठेयानियेषुतानिसमुद्धृत्ययथावदुद्धृत्य येनोद्धृतवचनेनाऽऽत्माबुद्धिःसंप्रसीदतिसम्यगुपशाम्यति ११ प्रश्नांतरंसूतजानासीतिपंचभिःभद्रंतइत्यौत्सुक्येनाशीर्वादः भगवान्निरतिशयैश्वर्यादिगुणः सात्वतांसच्छब्देनसत्त्वमूर्तिर्भगवान्सउपास्यतयाविद्यतेयेषामितिसत्त्वंतोभक्ताःस्वार्थेऽण्राक्षसवायसादिवत् तस्यचाश्रवणमार्षम् तदेवंसात्वंतइतिभवति तेषांपतिःपालकः यस्यार्थविशेषस्यचिकीर्षयावसुदेवस्यभार्यायांदेवक्यांजातः १२ अंगहेसूततन्नः(अस्मान्प्रति)अनुवर्णयितुमर्हसि सामान्यतस्तावद्यस्यावतारोभूतानांक्षेमायपालनायभवायसमृद्धये १३ तत्प्रभावमनुवर्णयंतस्तद्यशःश्रवणौत्सुक्यमाविष्कुर्वंति आपन्नइतित्रिभिःसंसृतिमापन्नः प्राप्तःविवशोऽपिगृणन् ततःसंसृतेः अत्रहेतुः यद्यतोनाम्नोभयमपिस्वयमेवबिभेति(मृत्युरपिपलायतेइत्यर्थः) १४ किंच यस्यपादःसंश्रयोयेषामतएवप्रशमोऽयनंवर्त्माश्रयोवायेषांतेमुनयउपस्पृष्टा सन्निधिमात्रेणसेविताःसद्यःपुनंतिस्वर्धुनीगंगातस्याआपस्तुतत्पादान्निःसृतानतुतत्रैवतिष्ठंत्यतस्तत्संबंधेनैवपुनंत्योऽप्यनुसेवयापुनंतिनतुसद्यइतिमुनीनामुत्कर्षोक्तिः १५ पुण्यश्लोकैरीड्यानिस्तव्यानिकर्माणियस्यतस्ययशः कलिमलापहंसंसारदुःखोपशमनम् १६ प्रश्नांतरंतस्येति उदाराणिमहांतिविश्वसृष्ट्यादीनि सूरिभिर्नारदादिभिःकलाःब्रह्मरुद्रादिमूर्तीः(दधतस्तस्यतानिकीर्तितानितद्वर्णय) १७ अथेति प्रश्नांतरे अवतारकथाःस्थित्यर्थमेवतत्तदवसरेयेमत्स्याद्यवतारास्तदीयाःकथाः (आख्याहि) लीलाविदधतःस्वैरंलीलाःकुर्वतः श्रीकृष्णावतारप्रयोजनप्रश्नेनैवतच्चरितप्रश्नोऽपिजातएवेति ज्ञातव्यम् १८

श्लोकाः १०–१८

प्रायेणाल्पायुषःसभ्यकलावस्मिन्युगेजनाः ॥ मंदाःसुमंदमतयोमंदभाग्याह्युपद्रुताः १० भूरीणिभूरिकर्माणिश्रोतव्यानिविभागशः ॥ अतःसाधोऽत्रयत्सारंसमुद्धृत्यमनीषया ॥ ब्रूहिनःश्रद्दधानानांयेनात्मासंप्रसीदति ११ सूतजानासिभद्रंतेभगवान्सात्वतांपतिः ॥ देवक्यांवसुदेवस्यजातोयस्यचिकीर्षया १२ तन्नःशुश्रूषमाणानामर्हस्यंगानुवर्णितुम् ॥ यस्यावतारोभूतानांक्षेमायचभवायच १३ आपन्नःसंसृतिंघोरांयन्नामविवशोगृणन् ॥ ततःसद्योविमुच्येतयद्बिभेतिस्वयंभयम् १४ यत्पादसंश्रयाःसूतमुनयःप्रशमायनाः ॥ सद्यःपुनंत्युपस्पृष्टाःस्वर्धुन्यापोऽनुसेवया १५ कोवाभगवतस्तस्यपुण्यश्लोकेड्यकर्मणः ॥ शुद्धिकामोनशृणुयाद्यशःकलिमलापहम् १६ तस्यकर्माण्युदाराणिपरिगीतानिसूरिभिः ॥ ब्रूहिनःश्रद्दधानानांलीलयादधतःकलाः १७ अथाख्याहिहरेर्धीमन्नवतारकथाःशुभाः ॥ लीलाविदधतःस्वैरमीश्वरस्यात्ममायया १८

चूर्णिका ॥ ९ ॥

यतःकलौ जना अलसा अल्पायुषो ऽ ल्पबुद्धयश्च १० श्रोतव्यानितुबहूनिसंति अतो हेसाधोअत्रयत्सारंतन्मनीषयाउद्धृत्यनोवद येनात्मासंप्रसीदति ११ हेसूत यदर्थंभगवान्विष्णुर्वसुदेवस्यदेवक्यांजातस्तद्वद १२ तस्यावतारःभूतानांक्षेमाययन्नामगृणन्नरःसंसारान्मुच्यते यन्नाम्नोभयमपिबिभेति १३ १४ यत्पादसंश्रयाःमुनयो दर्शनादेवपुनंति गंगोदकानितुसेवयापुनंति १५ एवंभूतस्यकलिमलापहंयशःशुद्धिकामःकोवानशृणुयात् १६ किंचश्रद्धावतांनोलीलयाकलादधतस्तस्यउदाराणिकर्मादिवद १७ मत्स्याद्यवतारकथाश्चब्रूहि १८ .

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अत्यौत्सुक्येनपुनरपितच्चरितान्येवश्रोतुमिच्छंतस्तत्राऽऽत्मनस्तृप्त्यभावमावेदयंति वयंत्विति योगयागादिषुतृप्ताःस्म उद्गच्छतितमोयस्मात्सउत्तमास्तथाभूतःश्लोकोयशोयस्यतस्यविक्रमेतुविशेषेणनतृप्यामोऽलमितिनमन्यामहे तत्रहेतुः यद्विक्रमंशृण्वताम् यद्वा अन्येतृप्यंतुनाम वयंतुनेतितुशब्दस्यान्वयः। अयमर्थः त्रेधाह्यलंबुद्धिर्भवति उदरादिभरणेनवारसाज्ञानेनवास्वादुविशेषाभावाद्वा तत्रशृण्वतामित्यनेन(कर्णशष्कुल्यावच्छिन्नंहिनभःश्रोत्रमतस्तस्य)श्रोत्रस्याऽऽकाशत्वादभरणमित्युक्तम् रसज्ञानामित्यनेनचाज्ञानतःपशुवत्तृप्तिर्निराकृता इक्षुभक्षणवद्रसांतराभावेनतृप्तिंनिराकरोतिपदेपदेप्रतिक्षणंस्वादुतोऽपिस्वादु १९अतःश्रीकृष्णचरितानिकथयेत्याशयेनाऽऽहुः कृतवानिति अतिमर्त्यानिमर्त्यानतिक्रांतानिगोवर्धनोद्धरणादीनि मनुष्येष्वसंभावितानीत्यर्थः(गूढत्वेहेतुः कपटमानवः परमार्थतस्तुकेशवः) २० ननुयाजनाध्यापनादिव्यग्राणांकुतएतच्छ्रवणावकाशःस्यादतआहुः कलिमिति कलिमागतंज्ञात्वातद्भियाविष्णुपदंगंतुकामादीर्घसत्रेणनिमित्तेनात्रवैष्णवक्षेत्रेआसीनाः। हरेःकथायांसक्षणालब्धावसराः २१ अस्मिंश्चसमयेत्वद्दर्शनमीश्वरेणैवसंपादितमित्यभिनंदंति त्वमिति कलिंसंसारंनिस्तर्तुमिच्छताम्अर्णवंतितीर्षतांकर्णधारोनाविकइव २२ पुनःप्रश्नांतरंब्रूहीति धर्मस्यवर्मणिकवचवद्रक्षके स्वांकाष्ठांमर्यादांस्वस्वरूपमित्यर्थः अस्यचोत्तरंकृष्णेस्वधामोपगमेधर्मज्ञानादिभिःसहेत्ययंश्लोकः २३ ॥ ॥ इतिश्रीभागवतेप्रथमस्कंधेभावार्थदीपिकायांप्रथमोध्यायः १ ॥ ॥ छ ॥ ॥ तदेवंप्रथमेऽध्यायेषट्प्रश्नामुनिभिःकृताः द्वितीयेतूत्तरंसूतश्चतुर्णामाहतेष्वथ॥१ ॥विप्राणामित्येवंभूतैःसम्यक्प्रश्नैःसम्यग्हृष्टोरोमहर्षणस्यपुत्रउग्रश्रवास्तेषांवचःप्रतिपूज्यसत्कृत्यप्रवक्तुमुपचक्रमेउपक्रांतवान् १

॥ ६ ॥

वयंतुनवितृप्यामउत्तमश्लोकविक्रमे ॥ यच्छृण्वतांरसज्ञानांस्वादुस्वादुपदेपदे १९ कृतवान्किलवीर्याणिसहरामेणकेशवः ॥ अतिमर्त्यानिभगवान्गूढःकपटमानुषः २० कलिमागतमाज्ञायक्षेत्रेऽस्मिन्वैष्णवेवयम् ॥ आसीनादीर्घसत्रेणकथायांसक्षणाहरेः २१ त्वन्नःसंदर्शितोधात्रादुस्तरंनिस्तितीर्षताम् ॥ कलिंसत्त्वहरंपुंसांकर्णधारइवार्णवम् २२ ब्रूहियोगेश्वरेकृष्णेब्रह्मण्येधर्मवर्मणि ॥ स्वांकाष्ठामधुनोपेतेधर्मःकंशरणंगतः २३॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेनैमिषेयोपाख्यानेप्रथमोध्यायः १ ॥ ॥ छ ॥ ॥ व्यासउवाच ॥ इतिसंप्रश्नसंहृष्टोविप्राणांरौमहर्षणिः॥ प्रतिपूज्यवचस्तेषांप्रवक्तुमुपचक्रमे १

श्लोकाः १९ / १

चूर्णिका

वयंतुउत्तमश्लोकस्यविक्रमेनवितृप्यामः यच्छृण्वतांरसज्ञानां पदेपदेस्वादु १९ कपटमानुषो भगवान्केशवोबलरामेणसहयानिवीर्याणिकृतवान्तानिवद २० ननुकर्मव्यग्राणांकुतः श्रवणावकाशःस्यादतआहुः कलिंप्राप्तंज्ञात्वातद्भयाद्विष्णुपदंगंतुकामा दीर्घसत्रमिषेणहरेः कथायांलब्धावकाशावयमत्रउपविष्टाःस्मः अहोदुस्तरंकलिंतर्तुमिच्छतांनोधात्रात्वंदर्शितः यथापुंसांसमुद्रतरणेनाविकः २२ धर्मरक्षकेश्रीकृष्णेअधुनास्वस्वरूपंप्रातेसतिधर्मःकंप्रतिशरणंगतस्तंब्रूहि २३ ॥ इतिश्रीमद्भागवतप्रथमस्कन्धचूर्णिकायां प्रथमोऽध्यायः १॥ ॥छ॥ व्यासउवाच पूर्वोक्तसंप्रश्नसंहृष्टःसूतस्तेषांशौनकादीनांवचःसत्कृत्यप्रतिवक्तुमुपक्रांतवान् १

॥ ६ ॥

१ साधुसाध्वितिसत्कृत्य । मह० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रवचनस्योपक्रमोनामात्रगुरुदेवतानमस्कारइतितमाह यमितित्रिभिः तत्रस्वगुरोःशुकस्यैश्वर्यंतच्चरितेनैवद्योतयन्नाह । यमिति । यंप्रव्रजंतंसंन्यस्यगच्छंतम् अनुपेतंमामुपनयस्वेत्युपनयनाथ
माचार्यमनुपसन्नम् यद्वा केनाप्यनुपेतमननुगतमेकाकिनमित्यर्थः । तत्रहेतुः अपेतकृत्यंकृत्यशून्यंकर्ममार्गेऽप्रवर्त्तमानंनैष्ठिकत्वात् । द्वैपायनोव्यासोविरहात्कातरोभीतःसन्पुत्रा ३ इतिप्लु
तेनाजुहावाऽऽहूतवान् दूरादाह्वानेप्लुतेसत्यपिसंधिरार्षः । तदातन्मयतयाशुकरूपतयातरवोऽभिनेदुःप्रत्युत्तरमुक्तवंतः पितुःस्नेहानुबंधपरिहारायवृक्षरूपेणोत्तरंदत्तवानित्यर्थः । तंमुनिमानतो
ऽस्मि । तन्मयत्वोपपादनायविशेषणम् । सर्वभूतानांहृन्मनः । अयतेयोगबलेनप्रविशतीतिसर्वभूतहृदयस्तम् २ तत्कृपालुतांदर्शयन्नाह यइति । अंधंगाढंतमःसंसाराख्यमतिततुमिच्छताम्
पुराणानांमध्येगुह्यंगोप्यम् । तत्रहेतुत्वेनचत्वारिविशेषणानि स्वोनिजोऽसाधारणोऽनुभावः प्रभावोयस्यतत्स्वानुभावम् अखिलश्रुतीनांसारम् एकमद्वितीयमनुपममित्यर्थः आत्मानंकार्य
॥ ७ ॥ कारणसंघातमधिकृत्यवर्त्तमानमात्मतत्त्वमध्यात्मंतस्यदीपंसाक्षात्प्रकाशकम् । उपयामिशरणंव्रजामि ३ जयत्यनेनसंसारमितिजयोग्रंथस्तमुदीरयेदितिस्वयंतथोदीरयन्नन्यान्पौराणिका
नुपशिक्षयति ४ तेषांवचःप्रतिपूज्येतियदुक्तंतत्प्रतिपूजनंकरोति । हेमुनयः साधुयथाभवतितथाऽहंपृष्टः यतोलोकानांमंगलमेतत् । यद्यतःकृष्णविषयःसंप्रश्नःकृतः सर्वशास्त्रार्थसारोद्धारप्रश्न
स्यापिकृष्णेपर्यवसानादेवमुक्तम् (आत्मासुप्रसीदतिबुद्धिःसमुपशाम्यति) ५ तत्रयत्प्रथमंपृष्टंसर्वशास्त्रसारमैकांतिकंश्रेयोब्रूहीतितत्रोत्तरम् सवैपुंसामिति अयमर्थधर्मोद्विविधः प्रवृ
त्तिलक्षणोनिवृत्तिलक्षणश्च तत्रयःस्वर्गाद्यर्थःप्रवृत्तिलक्षणःसोऽपरः यतस्तुधर्माच्छ्रवणादरादिलक्षणाभक्तिर्भवतिसपरोधर्मः सएवैकांतिकंश्रेयइति कथंभूता अहैतुकीहेतुःफलानुसंधानंतद्रहिता
अप्रतिहताविघ्नैरनभिभूता ६ननु "तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेने"त्यादिश्रुतिभ्योधर्मस्यज्ञानांगत्वंप्रसिद्धं तत्कुतोभक्तिहेतुत्वमुच्यते सत्यम् तत्तु(ज्ञानांगं)
भक्तिद्वारेणेत्याहवासुदेवइति अहैतुकंशुष्कतर्काद्यगोचरमौपनिषदमित्यर्थः (प्रयोजितःप्रकर्षेणअव्यभिचारेणयोजितः) ७

श्लोकाः २/७

॥ सूतउवाच ॥ यंप्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव ॥ पुत्रेतितन्मयतयातरवोऽभिनेदुस्तंसर्वभूतहृदयंमुनिमानतोऽस्मि २ यःस्वानु
भावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतांतमोऽधम् ॥ संसारिणांकरुणयाऽऽहपुराणगुह्यंतंव्याससूनुमुपयामिगुरुंमुनीनाम् ३ नारायणंनमस्कृ
त्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतींव्यासंततोजयमुदीरयेत् ४ मुनयःसाधुपृष्टोऽहंभवद्भिर्लोकमंगलं ॥ यत्कृतःकृष्णसंप्रश्नोयेनात्मासुप्रसीदति ५ सवैपुं
सांपरोधर्मोयतोभक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहतायथाऽऽत्मासंप्रसीदति ६ वासुदेवेभगवतिभक्तियोगःप्रयोजितः॥जनयत्याशुवैराग्यंज्ञानंयत्तदहैतुकं ७

चूर्णिका

तत्रसूतः कथारंभेगुरुनमस्कारपूर्वकंमंगलमाचरति सूतउवाच सन्यस्यगच्छंतंशुकंव्यासः प्लुतेनपुत्र ३ इतियदाआहूतवान् तदाशुकरूपत्वेनसर्वेवृक्षा उत्तरंददुः ए
तादृशंसर्वहृदिस्थितंमुनिमानतोऽस्मि यःशुकः संसारसमुद्रंतर्तुमिच्छतांपुंसां करुणयाऽध्यात्मप्रकाशकं वेदसारंगुह्यंश्रीभागवतमाह तंमुनीनांगुरुंशरणंव्रजामि २ गुरो
रैश्वर्यमुक्त्वापौराणिकान्शिक्षति नरनारायणौसरस्वतींदेवींचनमस्कृत्यसंसारतारकंग्रंथंव्यासःउदीरितवान् ४हेमुनयः लोकमंगलंयथातथाभवद्भिः सम्यक्पृष्टोहंयतोमनः
प्रसादकः कृष्णविषयकः प्रश्नः कृतः५सएवपुंसांपरोधर्मः यतः अधोक्षजेभक्तिर्भवति ययाऽऽत्मासुप्रसीदति६भगवतिवासुदेवेप्रयोजितोभक्तियोगोऽहैतुकंज्ञानंवैराग्यंचजनयति७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ८ ॥

व्यतिरेकमाह धर्मइति । योधर्मइतिप्रसिद्धःसयदिविष्वक्सेनस्यकथासुरतिंनोत्पादयेत्तर्हिस्वनुष्ठितोऽपिसन्नयंश्रमोज्ञेयः । ननुमोक्षार्थस्यापिधर्मस्यश्रमत्वमस्त्येवातआह केवलम् विफलः श्रमइत्यर्थः । नन्वास्तितत्रापिस्वर्गादिफलमित्याशंक्यैवकारेणानिकरोति क्षयिष्णुत्वान्नतत्फलमित्यर्थः। न"न्वक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवती"त्यादिश्रुतेर्नतत्फलस्यक्षयिष्णुत्वमित्या शंक्यहिशब्देनसाधयति "तद्ययथेहकर्मचितोलोकःक्षियतेएवमेवामुत्रपुण्यचितोलोकःक्षीयत" इतितर्कानुगृहीतयाश्रुत्याक्षयिष्णुत्वप्रतिपादनात् ८ तदेवंहरिभक्तिद्वारातादितरवैराग्यात्म ज्ञानपर्यंतःपरोधर्मइत्युक्तम् अन्येतुमन्यंते धर्मस्यार्थःफलंतस्यचकामःफलंतस्यचेंद्रियप्रीतिस्तत्प्रीतेश्चपुनरपिधर्मार्थादिपरंपरेति। यथाऽऽहुः "धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यत"इत्यादि तन्निराकरोति धर्मस्येतिद्वाभ्याम्। आपवर्ग्यस्योक्तन्यायेनापवर्गपर्यंतस्यधर्मस्यार्थायफलत्वायार्थोनोपकल्पतेयोग्योनभवति। (निवृत्तिलक्षणएवधर्मःसेव्यतां नतस्यफलमर्थइत्यर्थः) तथा ऽर्थस्याप्येवंभूतधर्माव्यभिचारिणःकामोभोगोलाभायफलत्वायनहिस्मृतोमुनिभिः ९ कामस्यचविपयभोगस्येंद्रियप्रीतिर्लाभःफलंनभवति किंतु यावताजीवेततावानेवकामस्यलाभः जीवनपर्याप्तएवकामःसेव्यइत्यर्थः । जीवस्यजीवनस्यचपुनःकर्मानुष्ठानद्वाराकर्मभिर्यइहप्रसिद्धःसोऽर्थोनभवति किंतुतत्त्वजिज्ञासैवेति १० ननुचतत्त्वजिज्ञासानामधर्मजिज्ञासैव। धर्मएवहितत्त्वमितिके चित्तत्राऽऽह वदंतीति। तत्त्वविदस्तुतदेवतत्त्वंवदंति । किंतत् यज्ज्ञानंनाम अद्वयमितिक्षणिकविज्ञानपक्षंव्यावर्त्तयति । ननुतत्त्वविदोऽपिविगीतवचाएव मैवम् तस्यैवतत्त्वस्यनामांतरैराभि धानादित्याह 'औपनिपदैर्ब्रह्मेतिहैरण्यगर्भैःपरमात्मेतिसात्वतैर्भगवानि'त्यभिधीयते ११ तच्चतत्त्वंसपरिकरयाभक्त्यैवप्राप्यतइत्याह । तच्चेत्यन्वयः । ज्ञानवैराग्ययुक्तयेत्यत्रज्ञानंपरोक्षम् तच्चत त्वमात्मनिक्षेत्रज्ञेपश्यंति । किंतत्तत्त्वम् आत्मानंपरमात्मानम्। श्रुतेनवेदांतादिश्रवणेनगृहीतयाप्राप्तयेतिभक्तेर्दार्ढ्यमुक्तम् ('एवमत्रश्रद्दधाना'इत्यनेनश्रद्धोक्ता सातु वेदांतवाक्येषुविश्वासः ज्ञानंनित्यानित्यवस्तुविवेकः वैराग्यमिहामुत्रार्थभोगविरागः एतद्युक्तयापरमेश्वरानुरागलक्षणयाभक्त्या जीवब्रह्मैक्यरूपंतत्त्वं साक्षाद्विदंतीत्यर्थः) १२ धर्मस्यफलंभक्तिर्नार्थकामादिकमिती ममर्थमुपपाद्योपसंहरति अतइतिं हेद्विजश्रेष्ठाः(वर्णाश्रमविभागनुरूपनिहितस्य) हरितोषणंहरेराराधनम् संसिद्धिःफलम् १३

श्लोकाः ८/१३

धर्मःस्वनुष्ठितःपुंसांविष्वक्सेनकथासुयः ॥ नोत्पादयेद्यदिरतिंश्रमएवहिकेवलम् ८ धर्मस्यह्यापवर्ग्यस्यनार्थोऽर्थायोपकल्पते ॥ नार्थस्यधर्मैकांतस्यकामो लाभायहिस्मृतः ९ कामस्यनेंद्रियप्रीतिर्लाभोजीवेतयावता ॥ जीवस्यतत्त्वजिज्ञासानार्थोयश्चेहकर्मभिः १० वदंतितत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयम् ॥ ब्र ह्मेतिपरमात्मेतिभगवानितिशब्द्यते ११ तच्छ्रद्दधानामुनयोज्ञानवैराग्ययुक्तया ॥ पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतगृहीतया १२अतःपुंभिर्द्विजश्रेष्ठावर्णा श्रमविभागशः ॥ स्वनुष्ठितस्यधर्मस्यसंसिद्धिर्हरितोषणम् १३

चूर्णिका ॥ ८ ॥

योऽनुष्ठितोधर्मोभगवत्कथासुप्रीतिंनोत्पादयेत् तर्हि सःश्रमएव ८ केचनएवमाहुः धर्मस्यफलमर्थस्तस्यकामस्तस्यचेंद्रियप्रीतिरितितन्निराकरोति मोक्षपर्यंतधर्मस्य अर्थःफलंन अर्थस्यनकामः ९ कामस्यनेंद्रियप्रीतिः किंतु जीवनमेवजीवनस्यतुफलंतत्त्वजिज्ञासैव नतुकर्मसाध्योधर्मइति १० तदेवतत्वविदस्तत्त्वंवदंति किंतत् ब्रह्मेतिपरमात्मेतिभगवानितिशब्दयते ११ इतियत्तदेवतत्त्वंमुनयःभक्त्याह्रदिपश्यंति १२ अतःस्वनुष्ठितस्यधर्मस्यफलंहरेःआराधनमेव १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. प्र.

टीका

॥ ९ ॥

यस्माच्चभक्तिहीनोधर्मःकेवलंश्रमएव तस्माद्भक्तिप्रधानएवधर्मोऽनुष्ठेयइत्याह तस्मादिति एकेनैकाग्रेणमनसा १४ भक्तिरहितोधर्मःकेवलंश्रमएवेतिप्रपंचितम् । इदानींतु भक्तेर्मुक्तिफलत्वं
प्रपंचयति यदिति । यस्यांनुध्याअनुध्यानं सैवासिःखड्गस्तेनयुक्ताविवेकिनोग्रंथिमहंकारंनिबध्नातियत्कर्मतच्छिंदंतितस्यकथायांरतिंकोनकुर्यात् १५ ननुसत्यमेवकर्मनिर्मूलनीहरिकथारतिस्त
थाऽपितस्यांरुचिर्नोत्पद्यतेकिंकुर्मस्तत्राऽऽह शुश्रूषोरिति । पुण्यतीर्थनिषेवणान्निष्पापस्यमहत्सेवास्यात्तयाचतद्धर्मश्रद्धाततःश्रवणेच्छाततोरुचिःस्यादित्यर्थः १६ ततश्च शृण्वतामिति पु
ण्येश्रवणकीर्त्तनेयस्यसः । सतांसुहृद्धितकारी हृदियान्यभद्राणिकामादिवासनास्तानि अंतस्थोहृदयस्थःसन् १७ ततश्च नष्टप्रायेष्विति सर्वाभद्रनाशस्यज्ञानोत्तरकालत्वात्प्रायग्रहणं भा
गवतानांभागवतशास्त्रस्यवासेवया नैष्ठिकीनिश्चलाविक्षेपकाभावात् १८ रजश्चतमश्चयेचतत्प्रभवाभावाःकामादयः एतैरनाविद्धमनभिभूतम् प्रसीदत्युपशाम्यति १९ भगवद्भक्तियोगतः
प्रसन्नमनसोऽतएवमुक्तसंगस्य २० विज्ञानफलमाह भिद्यतइति हृदयमेवग्रंथिश्चिज्जडग्रथनरूपोऽहंकारोभिद्यते अतएवसर्वेसंशयाअसंभावनादिरूपाः कर्माण्यनारब्धफलानि आत्मनिस्वरूपभू
तेईश्वरेदृष्टेसाक्षात्कृतेसति एवकारेणविज्ञानानंतरमेवेतिदर्शयति २१अत्रचसदाचारंदर्शयन्नुपसंहरति अतइति आत्मनःप्रसादनींमनःशोधनीं वासुदेवेभक्तिंकुर्वंतीतिभजनीयविशेषोदर्शितः २२
तदेवोपपादयितुंब्रह्मादीनांत्रयाणामेकात्मकत्वेऽपिवासुदेवस्याधिक्यमाह सत्त्वमिति इहयद्यप्येकएवपरःपुमानस्यविश्वस्यास्थित्यादयेस्थितिसृष्टिप्रलयार्थंहरिविरिंचिहरेतिसंज्ञाःकेवलंभिन्नाःधत्ते
हरिविरिंचिहराइतिवक्तव्येसंधिरार्षःतत्रतेषांमध्येश्रेयांसिशुभफलानिसत्त्वतनोर्वासुदेवादेवस्युः (सत्त्वतनोरितिहेतुगर्भमुक्तंतस्यविशुद्धसत्त्वात्मकतनुत्वात्तद्भक्तानांस्वाभाविकीमोक्षप्राप्तिरिति)२३

अ०

॥ १ ॥

तस्मादेकेनमनसाभगवान्सात्वतांपतिः ॥ श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा १४ यदनुध्यासिनायुक्ताःकर्मग्रंथिनिबंधनम् ॥ छिंदंतिकोविदास्त
स्यकोनकुर्यात्कथारतिम् १५ शुश्रूषोःश्रद्दधानस्यवासुदेवकथारुचिः ॥ स्यान्महत्सेवयाविप्राःपुण्यतीर्थनिषेवणात् १६ शृण्वतांस्वकथांकृष्णःपुण्यश्रवणकी
र्तनः ॥ हृद्यंतस्थोह्यभद्राणिविधुनोतिसुहृत्सताम् १७ नष्टप्रायेष्वभद्रेषुनित्यंभागवतसेवया ॥ भगवत्युत्तमश्लोकेभक्तिर्भवतिनैष्ठिकी १८ तदारजस्तमो
भावाःकामलोभादयश्चये ॥ चेतएतैरनाविद्धंस्थितंसत्त्वेप्रसीदति १९ एवंप्रसन्नमनसोभगवद्भक्तियोगतः ॥ भगवत्तत्त्वविज्ञानंमुक्तसंगस्यजायते २० भिद्यते
हृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणिदृष्टएवाऽऽत्मनीश्वरे २१ अतोवैकवयोनित्यंभक्तिंपरमयामुदा ॥ वासुदेवेभगवतिकुर्वंत्यात्मप्रसादनीम्
२२ सत्त्वंरजस्तमइतिप्रकृतेर्गुणास्तैर्युक्तःपरःपुरुषएकइहास्यधत्ते ॥ स्थित्यादयेहरिविरिंचिहरेतिसंज्ञाःश्रेयांसितत्रखलुसत्त्वतनोर्नृणांस्युः २३

श्लोकाः

१४/२३

चूर्णिका

तस्माद्धेतोः अव्यग्रमनसाभगवान्सदाश्रोतव्यः कीर्तितव्यः ध्येयःपूज्यश्च १४ यस्यध्यानरूपखड्गेनाहंकारग्रंथिंयोगिनःछिंदंति तत्कथायांरतिंकोनकुर्यात् १५
तदेवंतीर्थसेवनादिभिःसत्सेवास्यात् तयाकृष्णकथारुचिः १६ कृष्णोपिस्वकथांशृण्वतांहृदिस्थःपापानिधुनोति १७ भागवतसेवयानष्टप्रायेष्वभद्रेषुपुंसोभगवतिनिश्चलाभ
क्तिर्भवति १८ भक्तौसत्यांकामलोभादिभिरनाविद्धंचेतःसत्त्वेस्थितंसत् उपशाम्यति १९ ततः एवंमुक्तसंघस्यपुंसस्तत्वज्ञानंभवति २० ततोऽहंकारनाशः ततः असं
भावनादिसंशयनाशः ततः अनारब्धकर्मफलनाशः एतत्सर्वं आत्मदर्शनेसतिभवति २१ अतःकवयोमुदावासुदेवेभक्तिंकुर्वंति २२ इदानींहरेःश्रेष्ठत्वंदर्शयति प्रकृ
तेःसत्त्वादिगुणैर्युक्तः एकएवईश्वरःस्थित्याद्यर्थंहरिविरिंचिहरेतिसंज्ञाःधत्ते तेषांमध्ये वासुदेवादेवनृणांश्रेयांसिभवंति २३

॥ ९ ॥

---

१ परमेश्वरस्य।महे० । २भगवानेवतत्त्वंभगवत्तत्त्वंतस्यविज्ञानमनुभवः ! महे०

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१०॥

उपाधिवैशिष्ट्येनफलवैशिष्ट्यंसदृष्टांतमाह पार्थिवात्स्वतःप्रवृत्तिप्रकाशरहिताद्दारुणःकाष्ठात्सकाशाद्धूमः प्रवृत्तिस्वभावस्त्रयीमयोवेदोक्तकर्मप्रचुरः । ईषत्कर्मप्रत्यासत्तेः तस्मादप्यग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात् ।एवंतमसःसकाशाद्रजोब्रह्मदर्शनंब्रह्मप्रकाशकम् तुशब्देनलयात्मकात्तमसःसकाशाद्रजसःसोपाधिकज्ञानहेतुत्वेनकिंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्रमुक्तं।नतुसर्वथातत्प्रकाशकत्वंविक्षेपकत्वात् । यत्सत्त्वंतत्साक्षाद्ब्रह्मदर्शनम् । अतस्तद्गुणोपाधीनांब्रह्मादीनामपियथोत्तरंवैशिष्ट्यमितिभावः २४ वासुदेवभक्तौपूर्वाचारंप्रमाणयति भेजिरइति अथातोहेतोरग्रेपुरा विशुद्धंसत्त्वंसत्त्वमूर्तिंभगवंतमधोक्षजम् अतोयेताननुवर्त्ततेतइहसंसारेक्षेमायकल्पंते २५ नन्वन्यानपिकेचिद्भजंतोदृश्यंते सत्यम् मुमुक्षवस्त्वन्यान्नभजंतिकिंतुसकामाएवेत्याह । मुमुक्षवइतिद्वाभ्यां भूतपंतीनितिपितृप्रजेशादीनामुपलक्षणम् । अनसूयवोदेवतांतरानिंदकाःसंतः २६ रजस्तमसीप्रकृतिःस्वभावोयेषांते अतएवपितृभूतादिभिःसमंशीलंयेषाम् । श्रियासहैश्वर्यंप्रजाश्चेप्संतीतितथाते ।(इयङ्आर्षःयद्वाश्रियासहऐश्वर्यप्रजेप्सवः)२७मोक्षप्रदत्वाद्वासुदेवोभजनीयइत्युक्तंम्।सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याहद्वाभ्यां । वासुदेवएवपरस्तात्पर्यगोचरोयेषांते।ननुवेदामखपराद्दृश्यंतइत्याशंक्यतेऽपितदाराधनार्थत्वात्तत्पराएवेत्युक्तम् (मखाइति)। योगायोगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्यतासामपितत्प्राप्त्युपायत्वात्तत्परत्वमुक्तम् २८ ज्ञानंज्ञानशास्त्रम्ननुचतज्ज्ञानपरमेवेत्याशंक्यज्ञानस्यापितत्परत्वमुक्तम् । तपोऽत्रज्ञानम् । धर्मोधर्मशास्त्रंदानव्रतादिविषयम् । ननुतत्स्वर्गपरमित्याशंक्यगम्यतइतिगतिःस्वर्गादिफलंसाऽपितदानंदांशरूपत्वात्तत्परैवेत्युक्तं।यद्वा वेदाइत्यनेनैवतन्मूलत्वात्सर्वाण्यपिवासुदेवपराणीत्युक्तम् । तत्रननुतेषांमखयोगक्रियादिनानार्थपरत्वान्नतदेकपरत्वमित्याशंक्यमखादीनामपितत्परत्वमित्युक्तमितिद्रष्टव्यम् २९ननुजगत्सर्गतत्प्रवेशनियमनादिविलासयुक्तेवस्तुनिसर्वशास्त्रसमन्वयोदृश्यतेकथंवासुदेवपरत्वंसर्वस्यतत्राह सएवेतिचतुर्भिः । एतैरेवश्लोकैस्तस्यकर्माण्युदाराणिब्रूहीतिप्रश्नस्योत्तरमुक्तं । सदसद्रूपयाकार्यकारणात्मिकयाअगुणश्चेत्यन्वयः स्वतोनिर्गुणोऽपिसन्नित्यर्थः ३०

श्लोकाः २४/३०

पार्थिवाद्दारुणोधूमस्तस्मादग्निस्त्रयीमयः॥ तमसस्तुरजस्तस्मात्सत्त्वंयद्ब्रह्मदर्शनम् २४ भेजिरेमुनयोऽथाग्रेभगवंतमधोक्षजम् ॥ सत्त्वंविशुद्धंक्षेमायकल्पंतेयेनु तानिह २५ मुमुक्षवोघोररूपान्[1]हित्वाभूतपतीनथ ॥ नारायणकलाःशांताभजंतिह्यनसूयवः २६ रजस्तमःप्रकृतयःसमशीलाभजंतिवै ॥ पितृभूतप्रजेशादीन्श्रियैश्वर्यप्रजेप्सवः २७ वासुदेवपरावेदावासुदेवपरामखाः ॥ वासुदेवपरायोगावासुदेवपराःक्रियाः २८ वासुदेवपरंज्ञानंवासुदेवपरंतपः ॥ वासुदेवपरोधर्मोवासुदेवपरागतिः २९ सएवेदंससर्जाग्रेभगवानात्ममायया ॥ सदसद्रूपयाचासौगुणमय्याऽगुणोविभुः ३०

चूर्णिका ॥१०॥

उपाधिवैशिष्ट्येनफलवैशिष्ट्यंदर्शयति यथाकाष्ठाद्धूमः प्रवृत्तिस्वभावःतस्मात् अग्निःएवंतमसःसकाशात् रजोगुणःश्रेष्ठस्तस्मात्सत्त्वगुणश्च अतस्तत्तद्गुणोपाधीनांब्रह्मादीनां श्रैष्ठ्यमुत्तरोत्तरमुक्तम् २४ २५ अतः मुमुक्षवोमुनयः भगवंतंक्षेमायभजंति २६ रजस्तमः प्रकृतयः श्रियैश्वर्यप्रजेप्सवःसंतः पितृभूतादीन् भजंति २७ वासुदेवपरावेदावासुदेवपरामखाः वासुदेवपरायोगावासुदेवपराःक्रियाः २८ वासुदेवपरंज्ञानंवासुदेवपरंतपः वासुदेवपरोधर्मोवासुदेवपारागतिः २९ एवंभूतोभगवानात्ममाययेदं विश्वमग्रेससर्ज ३०

---

१ ‘ घोररूपानीति ’ इतिपाठोमहे० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवतोजगत्कारणत्वमुक्तम् प्रवेशनियमनलक्षणांलीलामाह तयेति । विलसितेषूद्भूतेषुगुणेष्वाकाशादिष्वंतःप्रविष्टःसन्गुणवानिवमदधीनाएतेगुणाइत्यभिमानवानिवनतुवस्तुतस्तथा । यतोवि
ज्ञानेनचिच्छक्त्याविजृंभितोऽत्यूर्जितः ३१ बहुरूपत्वलीलामाह यथेति । स्वयोनिषुस्वाभिव्यंजकेषु (काष्ठेषु) अवहितोनिहितः । विश्वात्मापुमान्परमेश्वरः । भूतेषुप्राणिषु । अंतर्यामिणोऽ
पिप्रतियोनिनानात्वेननानात्वमिवोच्यते क्षेत्रज्ञरूपेणवा ३२ भोगरूपांलीलामाह असाविति । असौहरिर्भूतसूक्ष्माणिचेंद्रियाणि श्रोत्रादीनि चाऽऽत्मामनश्चतैःस्वयंनिर्मितेषुभूते
षुचतुर्विधेष्विविभोगेस्वातंत्र्यंद्योत्यते तद्गुणांस्तत्तदनुरूपान्विषयानिच्छयाभुंक्ते(स्वनिर्मितेष्वित्यनेनभोगेस्वातन्त्र्यंद्योत्यते) भोजयतीतिणिजर्थोवाज्ञेयःभुंक्तेपालयतीतिवा तदात्वात्मनेपदमा
र्षम्‘भुजोनवने’इतिस्मरणात् ३३ इदानींसूतजानासीतिप्रश्नस्योत्तरमाह भावयतिपालयति एतत्तुसर्वावतारसाधारणंप्रयोजनम् विशेषतःकृष्णावतारस्यकुंतीस्तुतौवक्ष्यते लोकभावनोलोककर्त्ता
देवादिषुयेलीलावतारास्तेष्वनुरतोऽनुरक्तः ३४ ॥ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेभावार्थदीपिकाख्यटीकायांद्वितीयोऽध्यायः२॥ ॥अवतारकथाप्रश्नेतृतीयेतूत्तराभिधा॥ पुरुषाद्यवतारो
क्त्यातत्तच्चारित्रवर्णनैः १ यदुक्तम्“अथाख्याहिहरेर्धीमन्नवतारकथाःशुभा”इतितदुत्तरत्वेनावतारानुक्रमिष्यन्प्रथमंपुरुषावतारमाह जगृहइतिपंचभिः महदादिभिर्महदहंकारपंचतन्मात्रैःसंभू
तंसुनिष्पन्नम् एकादशेंद्रियाणिपंचमहाभूतानीतिषोडशकलाअंशायस्मिन् । यद्यपिभगवद्विग्रहोनैवंभूतस्तथाऽपिविराड्जीवांतर्यामिणोभगवतोविराड्रूपेणोपासनार्थमेवमुक्तमितिद्रष्टव्यम् १
कोऽसौभगवानित्यपेक्षायांतंविशिनष्टि । यस्यांभसिएकार्णवेशयानस्यविश्रांतस्यतत्रचयोगःसमाधिस्तद्रूपांनिद्रांविस्तारयतोनाभिरेवह्रदस्तस्मिन्यदंबुजंतस्मात्सकाशाद्ब्रह्माऽऽसीदभूत्पाद्मेकल्पे
सपौरुषंरूपंजगृहे २ कीदृशंरूपंतदाह यस्येति ननुकीदृशोविग्रहस्तस्ययोंऽभसिशेतेस्मतदाह तत्तस्यभगवतोरूपंतुविशुद्धंरजआदिगुणांतरेणासंभिन्नमतएवोर्जितंनिरातिशयंसत्त्वम् ३
एतच्चयोगिनांप्रत्यक्षमित्याह पश्यंतीति अदभ्रमनल्पंज्ञानात्मकंयच्चक्षुस्तेन सहस्रमपरिमितानियानिपादादीनितैरद्भुतम् सहस्रंमूर्धादयोयस्मिंस्तत् सहस्रंयानिमौल्यादीनितैरुल्लसच्छोभमानम्४

तयाविलसितेष्वेषुगुणेषुगुणवानिव ॥ अंतःप्रविष्टआभातिविज्ञानेनविजृंभितः ३१ यथाह्यवहितोवह्निर्दारुष्वेकःस्वयोनिषु ॥ नानेवभातिविश्वात्माभूतेषुच
तथापुमान् ३२ असौगुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः ॥ स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान् ३३ भावयत्येषसत्त्वेनलोकान्वैलोकभावनः ॥ लीलाव
तारानुरतोदेवतिर्यङ्नरादिषु ३४ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेद्वितीयोऽध्यायः २ ॥छ॥ सूतउवाच॥जगृहेपौरुषंरूपंभगवान्महदादिभिः ॥ संभूतं
षोडशकलमादौलोकसिसृक्षया १ यस्यांभसिशयानस्ययोगनिद्रांवितन्वतः॥नाभिह्रदांबुजादासीद्ब्रह्माविश्वसृजांपतिः२ यस्यावयवसंस्थानैःकल्पितोलोकविस्त
रः॥तद्वैभगवतोरूपंविशुद्धंसत्त्वमूर्जितम् ३ पश्यंत्यदोरूपमदभ्रचक्षुषासहस्रपादोरुभुजाननाद्भुतम् ॥सहस्रमूर्द्धश्रवणाक्षिनासिकंसहस्रमौल्यंबरकुंडलोल्लसत् ४

चूर्णिका

तस्मिन्प्रविष्टःसन्गुणवानिवभाति ३१ दारुषुअग्निर्यथा तथाहरिर्भूतेषुनानेवभाति ३२ स्वोत्पादितेषुभूतेषुप्रविष्टःसन्विषयान्भुंक्ते ३३ सएवभगवान् देवतिर्यङ्न
रादिषुयेस्वस्यलीलावताराःतेष्वनुरक्तः सन्सत्वगुणेनलोकान्पालयति ३४ इतिप्रथमेद्वितीयः २ सूतउवाच तस्यावतारकथाःशृणुत सएवभगवानादौपौरुषंरूपंमहदहंका
रपंचतन्मात्रैःसंभूतमेकादशेंद्रियपंचमहाभूतषोडशकलंलोकसिसृक्षयाजगृहे १ कोऽसौभगवान् अंभसिशयानस्ययस्यनाभिपद्मादब्रह्माऽभूत् २ यस्यविष्णोरवयवैःसर्वेलोकाः
कल्पिताः तद्भगवतो विशुद्धंरूपं ३ सहस्रपादोरुभुजाननैरद्भुतम् सहस्रमूर्द्धश्रवणाक्षिनासिकं ज्ञानदृष्ट्यामुनयःपश्यंति ४

महे॰टि॰–१ जरायुजादिषु २ । भूतगुणानुरूपान् । ३ लोकपालनम् ४ । पादाद्यवयवविन्यासैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्तुकूटस्थंनत्वन्यावतारवदाविर्भावतिरोभाववदित्याह एतदिति। एतदादिनारायणरूपं निधीयतेऽस्मिन्निति निधानम्। कार्यावसानेप्रवेशस्थानमित्यर्थः बीजमुद्गमस्थानम् बीजत्वेऽपिनान्य बीजतुल्यंकिंत्वव्ययम्। नकेवलमवताराणामेवबीजं किंतु सर्वप्राणिनामपीत्याह यस्यांशोब्रह्मातस्यांशोमरीच्यादिस्तेन ५सनत्कुमाराद्यवतारंतच्चरित्रंचाऽऽहसएवेति।कौमारआर्षः प्राजापत्यो मानवइत्यादीनिसर्गविशेषनामानियःपौरुषंरूपंप्रजगृहेसएवदेवःकौमाराख्यंसर्गमास्थितःसन्ब्रह्माब्राह्मणोभूत्वाब्रह्मचर्यंचचार प्रथमद्वितीयादिशब्दानिर्देशमात्रापेक्षया ६ वराहावतारमाह द्वितीयमिति अस्यविश्वस्यभवायोद्भवायमहीमुद्धरिष्यन्नितिकर्मोक्तिः। एवंसर्वत्रावतारस्तत्कर्मचोक्तमित्यनुसंधेयम् ७ नारदावतारमाह तृतीयमिति ऋषिसर्गमुपेत्य तत्रचदेवर्षित्वमुपेत्येत्यर्थः सात्वतंवैष्णवंतंत्रंपंचरात्रागममाचष्टोक्तवान् यतस्तंत्रात् निर्गतंकर्मत्वंबंधहेतुत्वंयेभ्यस्तानिनिष्कर्माणितेषांभावोनैष्कर्म्यम् कर्मणामेवमोचकत्वंयतोभवतितदाचष्टेत्यर्थः ८ नरनारायणावतारमाह तुर्येइति तुर्येचतुर्थेऽवतारे धर्मस्यकलाअंशःभार्येत्यर्थः"अर्धोवाएपआत्मनोयत्पत्नी"तिश्रुतेः तस्याःसर्गे ऋषीभूत्वेत्येकावतारत्वंदर्शयति९कपिलावतारमाह पंचमइति आसुरयेतन्नाम्ने ब्राह्मणाय तत्त्वानांग्रामस्यसंघस्यविनिर्णयोयस्मिन्शास्त्रेतत्सांख्यम् १० दत्तात्रेयावतारमाह। षष्ठमिति अत्रेरपत्यत्वंतेनैववृतःसन्प्राप्तः। अत्रेरपत्यमभिकांक्षतआह तुष्टइतिवक्ष्यमाणत्वात् कथंप्राप्तः अनसूययामत्सदृशापत्यमिषेणमामेवापत्यंवृतवानितिदोषदृष्टिमकुर्वन्नित्यर्थः।आन्वीक्षिकीमात्मविद्याम्। प्रह्लादादिभ्यश्च आदिपदाद्यदुहैहयाद्याग्रह्यंते ११ यज्ञावतारमाह ततइति (रुचेःसकाशादाकूत्यांजज्ञे) सयज्ञोयामाद्यैःस्वस्यैवपुत्रायामानामदेवास्तदाद्यैःसहस्वायंभुवमंन्वंतरंपालितवान् तदास्वयमिंद्रोऽभूदित्यर्थः १२ ऋषभावतारमाह अष्टमइति सर्वाश्रमनमस्कृतमं त्याश्रमंपारमहंस्यंवर्त्मधीराणांदर्शयन्नाभेराग्नीध्रपुत्रादृषभोजातः १३

श्लोकाः ९/१३

एतन्नानाऽवताराणांनिधानंबीजमव्ययम् ॥ यस्यांशांशेनसृज्यंतेदेवतिर्यङ्नरादयः ५ सएवप्रथमंदेवःकौमारंसर्गमास्थितः ॥ चचारदुश्चरंब्रह्माब्रह्मचर्यमखंडि तम् ६ द्वितीयंतुभवायास्यरसातलगतांमहीम् ॥ उद्धरिष्यन्नुपादत्तयज्ञेशःसौकरंवपुः ७ तृतीयमृषिसर्गंचदेवर्षित्वमुपेत्यसः ॥ तंत्रंसात्वतमाचष्टनैष्कर्म्यंक र्मणांयतः ८ तुर्येधर्मकलासर्गेनरनारायणावृषी ॥ भूत्वाऽऽत्मोपशमोपेतमकरोद्दुश्चरंतपः ९ पंचमःकपिलोनामसिद्धेशःकालविप्लुतम् ॥ प्रोवाचासुरयेसांख्यं तत्त्वग्रामविनिर्णयम् १० षष्ठमत्रेरपत्यत्वंवृतःप्राप्तोऽनसूयया ॥ आन्वीक्षिकीमलर्कायप्रह्लादादिभ्यऊचिवान् ११ ततःसप्तमआकूत्यांरुचेर्यज्ञोऽभ्यजायत॥ सयामाद्यैःसुरगणैरपात्स्वायंभुवांतरम् १२ अष्टमोमेरुदेव्यांतुनाभेर्जातउरुक्रमः ॥ दर्शयन्वर्त्मधीराणांसर्वाश्रमनमस्कृतम् १३

चूर्णिका ॥१२॥

एतद्रूपंनानावताराणांकारणं यस्यांशोब्रह्मा तस्यअंशोमरीच्यादिः तेनदेवादयःसृज्यंते ५ सएवभगवान्सनकादिरूपंकौमारंसर्गमाश्रित्यब्राह्मणोभूत्वाब्रह्मचर्यव्रतंचचार सप्रथमोऽवतारः ६ द्वितीयं सौकरं वपुर्धृत्वारसातलगतांमहीमुद्धृतवान् ७ तृतीयं नारदरूपंदेवर्षित्वंगृहीत्वापंचरात्रागमंतंत्रंकृतवान् ८ चतुर्थे धर्मभार्यायांनरनारायणौ भूत्वादुश्चरंतपश्चचार ९ पंचमे कपिलोभूत्वाऽऽसुरिनाम्नेब्राह्मणायसांख्यशास्त्रंप्रोवाच १० षष्ठेऽत्रिपत्न्यामनसूयायांदत्तात्रेयःसंभूयप्रह्लादालर्कादिभ्यःआत्मविद्यांऊ चिवान् ११ सप्तमे रुचिपत्न्यामाकूत्यांयज्ञोभूत्वादेवगणैःसहस्वायंभुवंमन्वंतरंपालितवान् १२ अष्टमे आग्नीध्रपुत्रान्नाभेर्मेरुदेव्यांमृषभोभूत्वापारमहंस्यंवर्त्माऽदर्शयत् १३

१ वाराहम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथ्ववतारमाह ऋषिभिरिति पार्थिवंवपुःराजदेहंपृथुरूपम् । पाठांतरेपृथोरिदंपार्थवम् ओषधीरित्युपलक्षणम् इमांपृथ्वीसर्वाणिवस्तूनिदुग्धअदुग्ध । अडागमाभावस्त्वार्षः।हेविप्रास्तेनपृथ्वीदो
हनेनसोऽयमवतारउशत्तमःकमनीयतमः वशकांतावित्यस्मात् १४ मत्स्यावतारमाह रूपमिति चाक्षुपमन्वंतरेयउदधीनांसंप्लवःसंश्लेषस्तस्मिन् यद्यपिमन्वंतरावसानेप्रलयोनास्तितथापिके
नाचित्कौतुकेनसत्यव्रतायमायाप्रदर्शिता यथाऽऽकांडेमार्कंडेयायेतिद्रष्टव्यम् महीमय्यांनावि नौकारूपायांमह्यामित्यर्थः अपाद्रक्षितवान् वैवस्वतमितिभाविनीसंज्ञा १५ कूर्मावतारमाह कमठः
कूर्मस्तद्रूपेणैकादशेऽवतारेविभुर्दध्रेदधार १६ धन्वंतर्यवतारमाह धान्वंतरंधन्वंतरिरूपम् द्वादशमादिप्रयोगस्त्वार्षः त्रयोदशममेवरूपं(मोहिनीसंज्ञं)तच्चरितेनसहदर्शयति अपाययदित्यत्रसुधा
मित्यध्याहारःमोहिन्यास्त्रियातद्रूपेणान्यानसुरान्मोहयन् धन्वंतरिरूपेणामृतमानीयमोहिन्याऽपाययदित्यर्थः १७नृसिंहावतारमाह नारसिंहंरूपं बिभ्रत्एरकांत्रिधारंनिर्ग्रंथितृणम् १८ वामनाव
तारमाह पंचदशमिति दुष्टानांमदंवामयति(त्याजयति)इतिवामनकंरूपम् ह्रस्वंवा(रूपंकृत्वात्रिविष्टपंत्रिभुवनंस्वर्गंवा)प्रत्यादित्सुस्तस्मादाच्छिद्यगृहीतुमिच्छुः १९ परशुरामावतारमाह अवतार
इति त्रिस्त्रिगुणं यथाभवतितथासप्तकृत्वःसप्तवारानेकविंशतिवारानित्यर्थः २० व्यासावतारमाह ततइति अल्पमेधसोऽल्पप्रज्ञान्पुंसोदृष्ट्वातदनुग्रहार्थंवेदवृक्षस्यशाखाश्चक्रे २१ रामावतारमाह
नरेति नरदेवत्वंनृपत्वंराघवरूपेणप्राप्तःसन् अतःपरमष्टादशे (अवतारेइत्यर्थः सेतुबन्धादिनिचरित्राणिकृतवान्) २२ रामकृष्णावतारमाह एकोनेति विंशतितमइतिवक्तव्येतका
रलोपश्छंदोनुरोधे नरामकृष्णावित्येवंनामनीजन्मनीप्राप्य उभयरूपेणभूभरहरणरूपंकर्मकृतवानित्यर्थः) २३

ऋषिभिर्याचितोभेजेनवमंपार्थिवंवपुः ॥ दुग्धेमामोषधीर्विप्रास्तेनायंसउशत्तमः १४ रूपंसजगृहेमात्स्यंचाक्षुषोदधिसंप्लवे ॥ नाव्यारोप्यमहीमय्यामपाद्वै
वस्वतंमनुम् १५ सुरासुराणामुदधिंमथ्नतांमंदराचलम् ॥ दध्रेकमठरूपेणपृष्ठएकादशेविभुः १६ धान्वंतरंद्वादशमंत्रयोदशममेवच ॥ अपाययत्सुरानन्या
न्मोहिन्यामोहयन्स्त्रिया १७ चतुर्दशंनारसिंहंबिभ्रद्दैत्येंद्रमूर्जितम् ॥ ददारकरजैर्वक्षस्येरकांकटकृद्यथा १८ पंचदशंवामनकंकृत्वाऽगादध्वरंबलेः ॥ पदत्र
यंयाचमानःप्रत्यादित्सुस्त्रिविष्टपम् १९ अवतारेषोडशमेपश्यन्ब्रह्मद्रुहोनृपान् ॥ त्रिःसप्तकृत्वःकुपितोनिःक्षत्रामकरोन्महीम् २० ततःसप्तदशेजातःसत्यव
त्यांपराशरात् ॥ चक्रेवेदतरोःशाखादृष्ट्वापुंसोऽल्पमेधसः २१ नरदेवत्वमापन्नःसुरकार्यचिकीर्षया ॥ समुद्रनिग्रहादीनिचक्रेवीर्याण्यतःपरम् २२ एकोनविं
शेविंशतिमेवृष्णिषुप्राप्यजन्मनी ॥ रामकृष्णावितिभुवोभगवानहरद्भरम् २३

चूर्णिका

नवमेऋषिभिर्याचितःसन्पृथुर्भूत्वापृथ्वींदुदोह १४ दशमेमात्स्यंरूपंधृत्वाचाक्षुषमन्वंतरेमहीमय्यांनाविवैवस्वतंमनुमारोप्यअपात् १५ एकादशेकूर्मोभूत्वादेवासुराणामु
दधिंमथ्नतांसतांमंदराद्रिंपृष्ठेदधौ १६ द्वादशेधन्वंतरिःसन्आयुर्वेदंप्रकाशितवान् त्रयोदशेमोहिनीरूपंधृत्वाअसुरान्वंचयित्वादेवानमृतमपाययत् १७ चतुर्दशेनृसिंहोभूत्वान
खैर्हिरण्यकशिपुंवक्षसिविददार १८ पंचदशेवामनोभूत्वात्रिपादभूमियाच्ञाछलेनबलिंवंचयित्वास्वर्गमिंद्रायददौ १९ षोडशेपरशुरामोभूत्वाएकविंशतिवारंनिःक्षत्रांमही
मकरोत् २० सप्तदशेपराशरात् सत्यवत्यांव्यासोभूत्वाऽल्पप्रज्ञान्पुंसोदृष्ट्वावेदतरोःशाखाःकृतवान् २१ अष्टादशेदाशरथिरामोभूत्वासमुद्रनिग्रहादीनिकर्माणिकृतवान्
२२ एकोनविंशेविंशेचवृष्णिपुरामकृष्णौभूत्वाभुवःभारमहरत् २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धावतारमाह ततइतिअजनस्यसुतः जिनसुतइतिपाठेजिनोऽपिसएव कीकटेपुमध्येगयाप्रदेशे २४ कल्क्यवतारमाह अथेति युगसंध्यायाम् कलेरंतेविष्णुयशसोब्राह्मणात्सकाशाज्जनि
ताजनिष्यते २५ अनुक्तसर्वसंग्रहार्थमाह अवताराइति असंख्येयत्वेदृष्टांतःयथेति अविदासिनउपक्षयशून्यात् दसुउपक्षयइत्यस्मात् णिनिः सरसःसकाशात्कुल्याःक्षुद्रप्रवाहाः २६ विभूती
राह ऋषयइति(ऋष्यादयःसर्वेपिहरेःकलाविभूतयइत्यर्थः) २७ तत्रविशेषमाह एतेचेति पुंसःपरमेश्वरस्यकेचिदंशाःकेचित्कलाविभूतयश्चतत्रमत्स्यादीनामवतारत्वेनसर्वज्ञत्वसर्वशक्तिमत्त्वे
ऽपियथोपयोगमेवज्ञानक्रियाशक्त्याविष्करणम् कुमारनारदादिष्वाधिकारिकेषुयथोपयोगमंशकलावेशः तत्रकुमारादिषुज्ञानावेशः पृथ्वादिषुशक्त्यावेशः कृष्णस्तुभगवान्साक्षान्नारायणएव
आविष्कृतसर्वशक्तित्वात् सर्वेषांप्रयोजनमाहइंद्रारयोदैत्यास्तैर्व्याकुलमुपद्रुतंलोकंमृडयंतिसुखिनंकुर्वंति २८ एतत्कीर्तनफलमाह जन्मेति गुह्यमतिरहस्यंजन्म प्रयतःशुचिःसन् दुःखग्रामा
त्संसारात् २९ विमुच्यतइतियदुक्तंतत्रकथंदेहद्वयसंबंधेसतितद्विमुक्तिरित्याशंक्यदेहद्वयसंबंधस्यभगवन्मायोत्थाविद्याविलसितत्वादेतच्छ्रवणादिजनितविद्ययातन्निवृत्तिरुपपद्यतइत्याशये
नाऽऽह एतदितिपंचभिः अरूपस्यचिदेकरसस्याऽऽत्मनोजीवस्यैतत्स्थूलंरूपंशरीरंभगवतोयामायातस्यागुणैर्महदादिरूपैर्विरचितम् क्व आत्मनिआत्मस्थाने शरीरंकृतमित्यर्थः ३० कथ
मित्यपेक्षायांस्वरूपावरणेनतदध्यासतइतिसदृष्टांतमाह यथेतियथावाय्वाश्रितोमेघौघोनभस्याकाशेऽबुद्धिभिरज्ञैरारोपितः (अदोनीलंनभोधावतीति) यथावापार्थिवोरेणुस्तद्वत्धूस रत्वाद्यनिले
(वायुर्धूसरइति)एवंद्रष्टर्यात्मनिदृश्यत्वंदृश्यत्वादिधर्मकंशरीरमारोपितम् (अविवेकिभिः) इत्यर्थः ३१

ततःकलौसंप्रवृत्तेसंमोहायसुरद्विषाम् ॥ बुद्धोनाम्नाऽजनसुतःकीकटेषुभविष्यति २४ अथासौयुगसंध्यायांदस्युप्रायेषुराजसु ॥ जनिताविष्णुयशसोनाम्नाक श्लोकाः
ल्किर्जगत्पतिः २५ अवताराह्यसंख्येयाहरेःसत्त्वनिधेर्द्विजाः ॥ यथाऽविदासिनःकुल्याःसरसःस्युःसहस्रशः २६ ऋषयोमनवोदेवामनुपुत्रामहौजसः ॥
कलाःसर्वेहरेरेवसप्रजापतयस्तथा २७ एतेचांशकलाःपुंसःकृष्णस्तुभगवान्स्वयम् ॥ इंद्रारिव्याकुलंलोकंमृडयंतियुगेयुगे २८ जन्मगुह्यंभगवतोयएतत्प्र २४/३१
यतोनरः ॥ सायंप्रातर्गृणन्भक्त्याडुःखग्रामाद्विमुच्यते २९ एतद्रूपंभगवतोह्यरूपस्यचिदात्मनः ॥ मायागुणैर्विरचितंमहदादिभिरात्मनि ३० यथानभसि
मेघौघोरेणुर्वापार्थिवोऽनिले ॥ एवंद्रष्टरिदृश्यत्वमारोपितमबुद्धिभिः ३१

चूर्णिका

एकविंशेकलौसंप्रवृत्तेदैत्यमोहनायबुद्धनामाकीकटेषुभविष्यति २४ ततःद्वाविंशेःकलेरंतेदस्युप्रायेपुराजसुसत्सु विष्णुयशसोब्राह्मणात्कल्किर्भविष्यति २५ हेद्विजाः
हरेरसंख्येयाःअवताराः यथासरोवरात्सहस्रशःक्षुद्रप्रवाहाःनिर्गच्छंति २६ तथाऋषिमनुदेवमनुपुत्रप्रजापतिप्रभृतयो हरेरंशाःकलाश्चस्युः २७ श्रीकृष्णस्तुसाक्षात् ॥१४॥
नारायणएव अथैषांप्रयोजनमाह एतेसर्वेयदादैत्यपीडितंजगद्भवति तदासुखयंति २८ एतद्भगवतोगुह्यंजन्म यःसायंप्रातःपठेत् सः दुःखसंघाद्विमुच्यते २९ एततद्भग
वतोरूपंमायागुणैर्महदादिभिः ब्रह्मणि अज्ञैःकल्पितम् ३० यथानभसिमेघौघस्तथैवंलिंगशरीरमपिजीवोपाधितयाकल्पितमास्ति ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच अतःस्थूलाद्रूपात्परमन्यदपिरूपमारोपितमित्यनुषंगः कथंभूतंतत्यदव्यक्तंसूक्ष्मम् तत्रहेतुः अव्यूढगुणव्यूहितम् व्यूहःकरचरणादिपरिणामः तथाअव्यूढाअपरिणतायेगुणास्तैर्व्यूहितंरचितम् आकारविशेषरहितत्वादव्यक्तमित्यर्थः एतदेवकुतस्तत्राऽऽह अदृष्टाश्रुतवस्तुत्वात् यन्नाऽऽकारविशेषवद्वस्तुतदस्मदादिवद्दृश्यते श्रूयतेवाइंद्रादिवत् इदंतुनतथा तर्हितस्यसत्त्वेकिंप्रमाणंतत्राऽऽह सजीवोजीवोपाधिः'जीवोजीवेननिर्मुक्तोजीवोजीवंविहाये'त्यादौजीवोपाधौलिंगदेहेजीवशब्दप्रयोगात् जीवोपाधितयाकल्प्यतइत्यर्थः ननुस्थूलमेवभोगायतनत्वाज्जीवस्योपाधिरस्तु(स्ति)किमन्यकल्पनयेत्यतआह यद्यस्मात्सूक्ष्मात्पुनर्भवःपुनर्जन्म 'उत्क्रांतिगत्यागतीनां'तेनविनाऽसंभवादितिभावः ३२ तदेवमुपाधिद्वयमुक्त्वातदपवादेनजीवस्यब्रह्मतामाह यत्रेति यत्रयदाइमेस्थूलसूक्ष्मेरूपेस्वसंविदाश्रवणमननादिभक्त्यास्वरूपसम्यग्ज्ञानेनप्रतिपिद्धेभवतः ज्ञानेनप्रतिषेधार्हत्वेतमेवहेतुमाह अविद्ययाऽज्ञानेनाऽऽत्मनिस्वस्वरूपेकृतेकल्पितेइतिहेतोःतद्ब्रह्म (कल्पितयोःप्रतिषेधे तदकल्पितंब्रह्मशिष्यते) तदाजीवोब्रह्मैवभवतीत्यर्थः कथंभूतम् दर्शनंविज्ञानैकस्वरूपम् ३३ तथाऽपिभगवन्मायायाःसंसृतिकारणभूतायाविद्यमानत्वात्कथंब्रह्मतातत्राऽऽह यदीति यदीत्यसंदेहेसंदेहवचनम् यदिवेदाःप्रमाणंस्युरितिवत् वैशारदीविशारदःसर्वज्ञईश्वरस्तदीयादेवीसंसारचक्रेणक्रीडंतीएषामायायद्युपरताभवति किमित्युपरताभवेत्तत्राऽऽह मतिर्विद्या अयंभावः यावदेषाऽविद्यात्मनाऽऽवरणविक्षेपौकरोतितावन्नोपरमति यदातुसैवविद्यारूपेणपरिणतातदासदसद्रूपंजीवोपाधिं(स्वविरुद्धाज्ञानकल्पितं)दग्ध्वानिरिंधनाग्निवत्स्वयमेवोपरमेदितितदासंपन्नोब्रह्मस्वरूपंप्राप्तएवेतिविदुस्तत्त्वज्ञाः किमतः यद्येवंस्वेमहिम्निपरमानंदस्वरूपेमहीयतेपूज्यतेविराजतइत्यर्थः ३४ यथाजीवस्यजन्मादिमायाएवमीश्वरस्यापिजन्मादिमायेत्याहएवमिति अकर्तुःकर्माणि अजनस्यजन्मानि(अनन्तत्वादतर्क्यत्वाद्वेदेपिगुह्यानि)हृत्पतेरंतर्यामिणः३५तर्हिजीवादीश्वरस्यकोविशेषः स्वातंत्र्यमेवविशेषइत्याह सवाइति षाड्वर्गिकमिंद्रियषड्वर्गविषयंजिघ्रतिदूरादेवगंधवद्गृह्णाति नतुसज्जतइत्यर्थः कुतःषड्गुणेशःषडिंद्रियनियंता ३६ ननुकिमीश्वरस्यसृष्ट्यादिकर्मभिर्विषयभोगैर्वातत्राऽऽह नचेति धातुर्जगद्विधातुरीश्वरस्यऊतीर्लीलाःकुमनीषःकुबुद्धिर्निपुणेनतर्कादिकौशलेननवैतिनजानाति मनसा (संकल्पेनैव) रूपाणिवचसानामानिसंतन्वतःसम्यग्विस्तारयतः वचोभिरितिबहुत्वंश्रुत्यभिप्रायेण मनोवचोभिःसहेतिवा ३७

श्लोकाः ३२/३७

अतःपरंयदव्यक्तमव्यूढगुणव्यूंहितम्[1] ॥ अदृष्टाश्रुतवस्तुत्वात्सजीवोयत्पुनर्भवः ३२ यत्रेमेसदसद्रूपेप्रतिषिद्धेस्वसंविदा ॥ अविद्ययाऽऽत्मनिकृतेइतितद्ब्रह्मदर्शनम् ३३ यद्येषोपरतादेवीमायावैशारदीमतिः ॥ संपन्नएवेतिविदुर्महिम्निस्वेमहीयते ३४ एवंजन्मानिकर्माणिह्यकर्तुरजनस्यच ॥ वर्णयंतिस्मकवयोवेदगुह्यानिहृत्पतेः ३५ सवाइदंविश्वममोघलीलः[2]सृजत्यवत्यत्तिनसज्जतेऽस्मिन् ॥ भूतेषुचांतर्हितआत्मतंत्रःषाड्वर्गिकंजिघ्रतिषड्गुणेशः३६ नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुःकुमनीषऊतीः ॥ नामानिरूपाणिमनोवचोभिःसंतन्वतोनटचर्यामिवाज्ञः ३७

चूर्णिका

३२ इमेस्थूलसूक्ष्मेरूपेज्ञानेनयदाप्रतिपिद्धेभवतः तदाजीवो ब्रह्मैवभवति ३३ एवंभगवतः जन्मकर्माणिकवयः वर्णयंति ३४ ३५ सभगवान् विश्वंप्रविश्य विषयान् गृह्णन् जगत्पालनादि करोति ३६ तस्यजन्मकर्मलीलाः कोऽपिनवेत्ति ३७

---

१ बृंहितमित्यपिपाठः। २ अमोघाईश्वरस्य सत्यसंकल्पत्वात्सफलालीलायस्यसः अस्मिन्विश्वसर्गादौनसज्जतेनमज्जते तत्रहेतुरात्मतंत्रः । मा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

भक्तस्तुकथंचिज्जानातीत्याह सवेदेति अमाययाऽकुटिलभावेन संततयानिरंतरया अनुवृत्त्याआनुकूल्येनभजेत (सधातुःपदवींगतिंवेद रथाङ्गंचक्रंपाणौयस्यतस्य) ३८ भक्तिमार्गेप्रवृत्तान्स्तौपीना
भिनंदतिअथेति यतोभक्तएवभगवत्तत्त्वंजानाति अथअतोभगवंतःसर्वज्ञाभवंतोधन्याः कृतार्थाः कुतः यद्यस्मादित्थंप्रश्नैर्वासुदेवेआत्मभावंमनोवृत्तिंकुर्वंति सर्वात्मकमैकांतिकम् यत्रयस्मिन्भावेस
तिभूयः उग्रोगर्भवासादिदुःखरूपःपरिवर्त्तोजन्ममरणाद्यावर्त्तोनभवति३९ भोसूतकिमेतच्छास्त्रमपूर्वंकथयसितत्राऽऽह ब्रह्मसम्मितंसर्ववेदतुल्यमुत्तमश्लोकस्यचरितंयस्मिंस्तत् ऋषिर्व्यासः४० त
त्संप्रदायप्रवृत्तिमाह तदिदमिति(निश्रेयसायमोक्षसुखायआत्मवतांजितेन्द्रियमनसामज्ञानिनांवरंमुख्यं) सुतंशुकम्४१(सर्वेषांवेदानांसर्वेषांइतिहासानांचसतुपुत्रः)४२ प्रायोपविष्टंप्रायेणमृत्युपर्य
तानाशकेनोपविष्टमितिपरमवैराग्योक्तिः (परीतंपरिवेष्टितंधर्मज्ञानादिभिःशक्तिभिःसह) हेविप्राःविप्रर्षेःसकाशात् ४३ अध्यगमंज्ञातवानस्मि तत्रकीर्तयतस्तत्रनिविष्टइतिचान्वयभेदात्तत्रप
दावृत्तिरदोषः यथाऽधीतंनतुस्वमतिविलसितम् तत्राऽपियथामतिस्वमत्यनुसारेणसंक्षेपतःकथितंविस्तरतःश्रावयिष्यामि ४४ ४५॥ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेभावार्थदीपिकायांटी
कायांतृतीयोऽध्यायः ३ ॥ ॥ छ॥ ॥ तुर्येभागवतारंभकारणत्वेनवर्ण्यते ॥व्यासस्यापरितोषस्तुतपःप्रवचनादिभिः ॥ इत्येवंप्रसन्नतयाश्रावयिष्यामीतिब्रुवाणम् मुनीनांबहूनांमध्येएकेनवक्त
व्येयोवृद्धोवृद्धेष्वपिबहुषुयःकुलपतिर्गणमुख्यस्तेष्वपिबहुषुयोबह्वृचः ऋग्वेदीतेनवक्तव्यं अतएवंभूतत्वाच्छौनकोऽब्रवीत् १

सवेदधातुःपदवींपरस्यदुरंतवीर्यस्यरथांगपाणेः ॥ योमाययासंततयाऽनुवृत्त्याभजेततत्पादसरोजगंधम् ३८ अथेहधन्याभगवंतइत्थंयद्वासुदेवेऽखिललो
कनाथे ॥ कुर्वंतिसर्वात्मकमात्मभावंनयत्रभूयःपरिवर्त्तउग्रः ३९ इदंभागवतंनामपुराणंब्रह्मसंमितम् ॥ उत्तमश्लोकचरितंचकारभगवानृषिः ४० निःश्रे
यसायलोकस्यधन्यंस्वस्त्ययनंमहत् ॥ तदिदंग्राहयामाससुतमात्मवतांवरम् ४१ सर्ववेदेतिहासानांसारंसारंसमुद्धृतम् ॥ सतुसंश्रावयामासमहाराजं
परीक्षितम् ४२ प्रायोपविष्टंगंगायांपरीतंपरमर्षिभिः ॥ तत्रकीर्त्तयतोविप्राविप्रर्षेर्भूरितेजसः ४३ अहंचाध्यगमंतत्रनिविष्टस्तदनुग्रहात् ॥ सोऽहंवः
श्रावयिष्यामियथाऽधीतंयथामति ४४ कृष्णेस्वधामोपगतेधर्मज्ञानादिभिःसह ॥ कलौनष्टदृशामेषपुराणार्कोऽधुनोदितः ४५ ॥ ॥ इतिश्रीभागवतेमहापु
राणेप्रथमस्कंधेतृतीयोध्यायः ३ ॥ ॥ छ ॥ ॥ व्यासउवाच॥इतिब्रुवाणंसंस्तूयमुनीनांदीर्घसत्रिणां ॥ वृद्धःकुलपतिःसूतंबह्वृचःशौनकोऽब्रवीत् १

श्लोकाः $\frac{३८}{१}$

चूर्णिका

यस्तुतत्पादसरोरुहंसर्वभावेनभजते सएवतत्पदवींजानाति३८अतोभवंतोधन्याः यतोहरौभक्तिंकुर्वंति ३९इदंवेदतुल्यंभागवतंपुराणं लोकहिताय व्यासःकृत्वा स्वपुत्रंशुकं अ
ध्यापयत् ४० ४१ सशुकः गंगायांप्रायोपविष्टं ऋषिभिःपरिवृतंपरीक्षितंश्रावयामास ४२ कृष्णेस्वधामोपगते धर्मज्ञानादिभिःसह कलौनष्टदृशामेषापुराणार्कोऽधुनो
दितः४३ ४४तत्रसभायांशुकस्यकीर्तयतःसतः तदनुग्रहात् तत्रअध्यगमम् सोऽहंयथाअधीत यथामति युष्मान् श्रावयिष्यामि४५ ॥ इतिप्रथमेतृतीयः३ ॥ ॥व्यासउ
वाच एवंब्रुवाणंसूतंस्तुत्वाऋषीणांमध्येवृद्धःऋग्वेदीशौनक उवाच १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(नोस्मान्प्रति)यत्वयांकथामाह(सूतेत्यादेर्द्विरुक्तिः)२कस्मिन्वास्थाने केनहेतुनेतिमहाभारतादिधर्मशास्त्राणिकृतवतःपुनरेतत्संहिताकरणेकिंकारणमित्यर्थः कुतइतिसार्वविभक्तिकस्तसिः केनप्रव
र्त्तितइत्यर्थः। कृष्णो व्यासः ३ यद्युक्तंसतुसंश्रावयामासेतितच्छुकस्यव्याख्यानादिकंकथंघटितमितिप्रष्टुंतस्यासंगोदासीनतामाहद्वाभ्याम् तस्येति समदृक्समंब्रह्मपश्यति अतोनिर्विकल्पकः स्वा
र्थैकःनिरस्तभेदःकिंच एकस्मिन्नेवांतःसमाप्तिर्यस्यास्तथाभूतामतिर्यस्यसःयतउन्निद्रोमायाशयनादुद्बुद्धः"यानिशासर्वभूतानांतस्यांजागर्तिसंयमी"तिस्मृतेः।अतएवगूढोऽप्रकटःमूढइवप्रतीयते४नि
र्विकल्पकत्वंप्रपंचयति दृष्ट्वेति। आत्मजंशुकंप्रव्रजंतमनुगच्छंतमृषिंव्यासमनग्नमपिदृष्ट्वाजलेक्रीडंत्योदेव्योऽप्सरसोह्रियालज्जयापरिदधुर्वस्त्रपरिधानंकृतवत्यः अनग्नमपीत्यनेनार्थात्तत्सुतोनग्नइत्यु
क्तम् नग्नस्यपुरतोगच्छतःसुतस्यतुह्रियानपरिदधुः तच्चित्रंवीक्ष्य (पृच्छतिव्यासे) इयंस्त्रीअयंपुमानितिभिदाभेदस्तवास्ति विविक्तापूता (सर्वंब्रह्मेतिनिश्चयेन) दृष्टिर्यस्य (तस्यनभेदइति)
५ एवंभूतोऽसौकथमालक्षितोज्ञातः कुरवोजांगलाश्चदेशविशेषास्तान्संप्राप्तः प्रथमंततोगजसाह्वयेविचरन् गजेनसहितआह्वयोनामयस्यतस्मिन्हस्तिनापुरे हस्तीनामराजातेननिर्मितत्वात्
६ एवंभूतेनमुनिनासह यत्रसंवादेएषासात्वतीभागवतीश्रुतिःसंहिता ७ एतद्व्याख्यानंबहुकालावस्थानापेक्षंतस्यत्वेकत्रावस्थानंदुर्लभमित्याह सइति (समुनिः) गोदोहनमात्रंकालंप्रती
क्षतेतदपिन (केवलं) भिक्षार्थं। किंतु तेषामाश्रमंगृहंतीर्थीकुर्वन्पवित्रीकुर्वंस्तस्मादेवंभूतोऽत्रवक्तेत्याश्चर्यम् ८ श्रोतुस्तुचरितमतीवाऽऽश्चर्यमतः(तयोःसंवादोऽवश्यंश्रोतव्यइत्याभिप्रायेणतावत्त
स्यतच्चरितं) कथयेत्याह अभिमन्युसुतमितिपंचभिः (अभिमन्युसुतंपरीक्षितम्) गृणीहिकथय ९

शौनकउवाच ॥ सूतसूतमहाभागवदनोवदतांवर ॥ कथांभागवतींपुण्यांयदाहभगवाञ्छुकः २ कस्मिन्युगेप्रवृत्तेयंस्थानेवाकेनहेतुना ॥ कु श्लोकाः
तःसंचोदितःकृष्णःकृतवान्संहितांमुनिः ३ तस्यपुत्रोमहायोगीसमदृङ्निर्विकल्पकः ॥ एकांतमतिरुन्निद्रोगूढोमूढइवेयते ४ दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं
देव्योह्रियापरिदधुर्नसुतस्यचित्रम् ॥ तद्वीक्ष्यपृच्छतिमुनौजगदुस्तवास्तिस्त्रीपुंभिदानतुसुतस्यविविक्तदृष्टेः ५ कथमालक्षितःपौरैःसंप्राप्तःकुरुजांगलान् ॥ २/९
उन्मत्तमूकजडवद्विचरन्गजसाह्वये ६ कथंवापांडवेयस्यराजर्षेर्मुनिनासह ॥ संवादःसमभूत्तातयत्रैषासात्वतीश्रुतिः ७ सगोदोहनमात्रंहिगृहेषुगृहमेधिनाम् ॥
अवेक्षतेमहाभागस्तीर्थीकुर्वंस्तदाश्रमम् ८ अभिमन्युसुतंसूतप्राहुर्भागवतोत्तमम् ॥ तस्यजन्ममहाश्चर्यंकर्माणिचगृणीहिनः ९

चूर्णिका

हेसूतसूत यांपुण्यांभागवतींकथांआहतांकथय २ इयंसंहिताकस्मिन्युगेकस्मिन्देशेकेनहेतुनाप्रवृत्ताकेनपुरुषेणप्रेरितोव्यासः इमांसंहितांकृतवान् ३ किंचव्यासपुत्रो ॥१७॥
महायोगीशुकःसमदृष्टिःनिरस्तभेदोपिमूढइवप्रतीयते ४ निरस्तभेदत्वंप्रपंचयति नग्नंपुत्रमनुगच्छंतमनग्नमपिव्यासंदृष्ट्वाजलेक्रीडंत्योऽप्सरसःवस्त्राणिपरिदधुः तद्वीक्ष्य
व्यासेपृच्छतिसतिस्त्रियऊचुः तवस्त्रीपुरुषभेदोऽस्तिसुतस्यतुनास्ति ५ एवंभूतःशुकःकुरुजांगलदेशानतिक्रम्यपौरैःरुन्मत्तमूकजडवत्ज्ञातःसन्गजाह्वयंप्राप्तः ६ योगृहमे
धिनांगृहेषुआश्रमंपवित्रीकुर्वन्गोदोहनकालंप्रतीक्षते तेनसहकथंपरीक्षितःसंवादोऽभूत् ७ ८ किंच तस्यपरीक्षितोजन्मकर्माणिचनःकथय ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्राट्चक्रवर्ती वेतिवितर्के कस्यवाहेतोः कस्मात्कारणात् अधिराट्श्रियंअधिराजांश्रियंसंपदमनादृत्य (अनशनव्रतेनोपविष्टः) १० यस्यपादनिकेतंचरणपीठम् हस्फुटम् धनान्यानी यशत्रवोनमंति अंगहेसूतयुवातरुणएवऐपतऐच्छत् अत्रार्षमात्मनेपदम् असुभिःप्राणैःसह (निष्कंटकं राज्यं प्राणांश्च युवैवयस्त्यक्तुमैच्छत्तस्य तद्वैराग्यमहो आश्चर्यकरमित्यर्थः ।) ११ विरक्तस्यकिंधनादिभिरितिचेत्तत्राऽऽह शिवायेति (ये भागवतास्ते) लोकस्याशिवायसुखायभवायसमृद्धयैभूतयेऐश्वर्यायचतेजीवंतिनत्वात्मार्थम् एवंसत्यसौराजानिर्विद्यविरज्या पिपरेषामाश्रयंकलेवरंकुतोहेतोर्मुमोच नहिपरोपजीवनंस्वयंत्यक्तुमुचितमित्यर्थः १२ यत्किंचनपृष्टोऽसितत्सर्वंनोऽस्मभ्यंसमाचक्ष्वयद्यस्माद्वाचांविषयेगिरांगोचरेऽर्थेस्नातंपारंगतंत्वांमन्ये छां दसादन्यत्रवैदिकव्यतिरेकेण अत्रैवर्णिकत्वात् १३ कस्मिन्युगइत्यादिप्रश्नानांव्यासजन्मकथनपूर्वकमुत्तरमाह द्वापरइति द्वापरेसमनुप्राप्ते कदेत्यपेक्षायामाह तृतीयेयुगस्यपर्ययेपरिवर्ते वासव्यामुपरिचरस्यवसोर्वीर्याज्जातायांसत्यवत्यांयोगीज्ञानीव्यासोजातः १४ (सव्यासः कस्मिंश्चित्काले) जलमुपस्पृश्यजलेस्नानादिकंकृत्वेत्यर्थः आसीनोबभूवेतिशेषः विविक्तेदेशइ त्यादिचित्तैकाग्र्यार्थमुक्तम् अनेनैवबदरिकाश्रमस्थानंसूचितम् १५ तत्रचसऋषिर्युगधर्मव्यतिकरादिकंवीक्ष्यसर्ववर्णाश्रमाणांयद्धितंतद्दध्यौ (चिंतितवान्) इतितृतीयेनान्वयः परावरज्ञो ऽतीतानागतवित् अव्यक्तंरंहोवेगोयस्यतेनकालेनयुगधर्माणांव्यतिकरंसंकरंप्राप्तंवीक्ष्यज्ञात्वा तथाभुवियुगेयुगे १६ भौतिकानांभावानांशरीरादीनां तत्कृतंकालकृतम् निःसत्त्वान्धैर्यशून्या न् दुर्मेधान्मंदमतीन् (शक्तिक्षयम्) १७ (दुर्भगान्दरिद्रान् अमोघदृक्यथार्थदर्शी) १८

श्लोकाः १०/१८

सम्राट्कस्यवाहेतोःपांडूनांमानवर्धनः॥प्रायोपविष्टोगंगायामनादृत्याधिराट्श्रियम् १० नमंतियत्पादनिकेतमात्मनःशिवायहानीयधनानिशत्रवः॥कथंसवीरः श्रियमंगदुस्त्यजांयुवैषतोत्स्रष्टुमहोसहासुभिः ११ शिवायलोकस्यभवायभूतयेयउत्तमश्लोकपरायणाजनाः॥जीवंतिनाऽऽत्मार्थमसौपराश्रयंमुमोचनिर्विद्यकुतः कलेवरम् १२तत्सर्वंनःसमाचक्ष्वपृष्टोयदिहकिंचन॥मन्येत्वांविषयेवाचांस्नातमन्यत्रछांदसात् १३॥सूतउवाच॥द्वापरेसमनुप्राप्तेतृतीयेयुगपर्यये ॥जातःपराशरा द्योगीवासव्यांकलयाहरेः १४सकदाचित्सरस्वत्याउपस्पृश्यजलंशुचि॥विविक्तएकआसीनउदितेरविमंडले१५ परावरज्ञःसऋषिःकालेनाव्यक्तरंहसा ॥युगधर्मव्य तिकरंप्राप्तंभुवियुगेयुगे १६ भौतिकानांचभावानांशक्तिह्रासंचतत्कृतम् ॥अश्रद्दधानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः १७ दुर्भगांश्चजनान्वीक्ष्यमुनिर्दिव्येन चक्षुषा ॥ सर्ववर्णाश्रमाणांयद्दध्यौहितममोघदृक् १८

चूर्णिका

अपिचसःपरीक्षित् राज्यलक्ष्मींत्यक्त्वा कस्यहेतोः गंगायांप्रायोपविष्टः १० शत्रवोधनादीन्दत्वायत्पादंनमंति ११ सराजाभागवतःसन् परोपकारकंशरीरंनिर्विद्यकुतो मुमोच १२ तत्सर्वंनःकथययतोवेदंविनासर्वशास्त्रविदंत्वांमन्ये १३ सूतउवाच तृतीयेयुगपर्ययेद्वापरेपराशरात् सत्यवत्यांहरेरंशोव्यासोजातः १४ सएकदासूर्यो दये एकांतेआसीनःसन् सरस्वत्याःजलंउपस्पृश्यज्ञानचक्षुषायुगधर्मसंकरंप्रजानांशक्तिह्रासंच भक्तिहीनान्मंदभाग्यानल्पायुषो मंदबुद्धीन्जनांश्चवीक्ष्यसर्वेषांहितंकथं स्यात् इतिदध्यौ १५ १६ १७ १८

१ अल्पायुषः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ततश्चहोत्रोपलक्षिताश्चत्वारऋत्विजश्चतुर्होतारस्तैरनुष्ठेयंकर्मचातुर्होत्रम् शुद्धंशुद्धिकरम् यज्ञसंतत्यैयज्ञानामविच्छेदाय१९चातुर्विध्यमेवाऽऽह ऋगिति उद्धृताःपृथक्कृताः(इतिहासोभारतम्) २०
(तत्रचतुर्षुदेवेषुऋग्वेदस्यधरःपैलः यजुषांप्रवर्तकतयानिष्णातः) वैशंपायनः २१ (अथर्वांगिरसांनिष्णातःसुमंतुः)दारुणःक्रूरः अथर्वोक्ताभिचारादिप्रवृत्तेः २२ (शाखाविभागमाह तएतइति
पैलादयःस्वंस्वंवेदमनेकधा) व्यस्यन्विभक्तवंतः (एवंशिष्यप्रशिष्यादिभिर्निमित्तैरवांतरशाखायोमात्तेऽपिऋगादयोवेदाः शाखिनोऽभवन्) २३ वेदविभागप्रयोजनमाह तएवेति येपूर्वमति
मेधाविभिर्धार्यंतेस्मतएव (संप्रतिदुर्मेधैरपियथाधार्यंतेतथावेदांश्चकारेति) २४ किंच स्त्रीशूद्रेति द्विजबंधवस्त्रैवर्णिकेष्वधमाः (स्त्र्यादीनांत्रयीऋगादयःश्रवणविषयो नभवतीति) तेषाम्
कर्मरूपेश्रेयसिश्रेयःसाधने(मूढानामिह)एवं(श्रेयो)भवेदनेनैवप्रकारेण(श्रेयो) भवतु इतिअतएवतेषांकृपयाभारताख्यानंमुनिना(व्यासेन)कृतम् २५(हेद्विजाः) एवमनेनप्रकारेण भूतानांश्रेय
सिहितेसर्वात्मकेनापिकर्मणा(प्रवृत्तस्ययदाहृदयंनातुष्यदलंबुद्धिनागमत्) २६(तदा) नअतिप्रसीदत्हृदयंयस्यसः चित्ताप्रसत्तौहेतुंवितर्कयन्निदमुवाचस्वगतं (धर्मविद्वेदशास्त्रार्थकुशलः) २७
निर्व्यलीकेननिष्कपटबुद्ध्यामानिताःपूजिताः (तेषामनुशासनंचगृहीतं) २८

श्लोकाः १९/२८

चातुर्होत्रंकर्मशुद्धंप्रजानांवीक्ष्यवैदिकम् ॥ व्यदधाद्यज्ञसंतत्यैवेदमेकंचतुर्विधम् १९ ऋग्यजुःसामाथर्वाख्यावेदाश्चत्वारउद्धृताः ॥ इतिहासःपुराणंचपंचमोवे
दउच्यते २० तत्रर्ग्वेदधरःपैलःसामगोजैमिनिःकविः ॥ वैशंपायनएवैकोनिष्णातोयजुषामुत २१ अथर्वांगिरसामासीत्सुमंतुर्दारुणोमुनिः ॥ इतिहासपुरा
णानांपितामेरोमहर्षणः २२ तएतऋषयोवेदंस्वंस्वंव्यस्यन्ननेकधा ॥ शिष्यैःप्रशिष्यैस्तच्छिष्यैर्वेदास्तेशाखिनोऽभवन् २३तएववेदादुर्मेधैर्धार्यंतेपुरुषैर्यथा ॥
एवंचकारभगवान्व्यासःकृपणवत्सलः २४ स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरा ॥ कर्मश्रेयसिमूढानांश्रेयएवंभवेदिह ॥ इतिभारतमाख्यानंकृपयामुनिना
कृतम् २५ एवंप्रवृत्तस्यसदाभूतानांश्रेयसिद्विजाः ॥ सर्वात्मकेनापियदानातुष्यद्धृदयंततः २६ नातिप्रसीदद्हृदयःसरस्वत्यास्तटेशुचौ ॥ वितर्कयन्विविक्त
स्थइदंप्रोवाचधर्मवित् २७ धृतव्रतेनहिमयाछंदांसिगुरवोऽग्नयः॥मानितानिर्व्यलीकेनगृहीतंचानुशासनम् २८

चूर्णिका

एवंविचार्ययज्ञसंतत्यैएकंवेदंचतुर्धाव्यभजत् १९ तथाहिऋग्यजुःसामाथर्वाख्यावेदाश्चत्वारउद्धृताः इतिहासपुराणंचपंचमोवेदउच्यते २० तत्रऋग्वेदधरःपैलमुनिः
सामगोजैमिनिः वैशंपायनोयजुर्वेदी २१ आथर्वणःसुमंतुः इतिहासपुराणानांज्ञातामममपितारोमहर्षणः २२ तेचपैलादयःस्वंस्वंवेदमनेकधाविभक्तवंतोशिष्यादिभेदेनतेवेदाःशा
खावंतोऽभवन् २३ २४ श्रुत्यनधिकारिणांस्त्रीशूद्रादीनांश्रेयसेकृपालुःव्यासःभारताख्यानंकृतवान् २५ तथापिसर्वहितायप्रवृत्तस्य यदाव्यासस्यहृदयंनातुष्यत् २६ तदाऽप्र
सन्नमनाव्यासःसरस्वतीतीरे इदंप्रोवाच २७ मयावेदाश्चगुरवश्च अग्नयश्चमानिताःतेषामाज्ञाचपालिता २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(भारतव्याजेनवेदार्थश्चदर्शितः दृश्यतेज्ञायते यत्रभारते) २९ (अथापि एवंसत्यपि) दैह्यःदेहेभवआत्माजीवोवस्तुतोविभुःपरिपूर्णएव । आत्मनास्वेनरूपेणासंपन्नस्तादात्म्यमप्रा
प्तइवाऽऽभाति । ब्रह्मवर्चसंवेदश्रवणाध्यापनोत्कर्षजंतेजस्तत्रसाधवोब्रह्मवर्चस्यास्तेषुसत्तमोऽतिश्रेष्ठोऽपि यद्वा नकेवलमसंपन्नइवाऽऽभातिप्रत्युतब्रह्मवर्चसीब्रह्मवर्चसवानप्यसत्तमइवाऽऽभाति
पाठांतरे (उशत्तमइतिपाठे) कमनीयतमोऽपीति ३० असंपत्तौहेतुंस्वयमेवाऽऽशंकते किंवेति प्रायेणभूयस्त्वेनैहियस्मात्तएवधर्माअच्युतस्य (भगवतः) प्रियाः ३१ (एवमात्मानं)
खिलंन्यूनम् (मन्यमानस्य तस्य) खिद्यतः (खेदंप्राप्नुवतः) कृष्णस्यव्यासस्य प्रागुदाहृतंसरस्वतीतीरस्थं (आश्रमं) ३२ (मुनिर्व्यासः) तंनारदमागतमभिज्ञायसहसाप्र
त्युत्थायविधिवत्पूजयामास सुरपूजितमितिब्रह्मलोकादागतमित्यर्थः ३३ ॥ इतिश्रीभागवतेप्रथमस्कंधेभावार्थदीपिकायांटीकायांचतुर्थोऽध्यायः ४ ॥ ॥ छ ॥ ॥ पंचमेसर्वधर्मेभ्यो
हरिकीर्तनगौरवम् ॥ व्यासचित्तप्रसादायनारदेनोपदिश्यते ॥ १॥ उपसमीपेआसीनंविप्रर्षिर्व्यासम् बृहच्छ्रवामहायशाः स्मयन्नीषद्धसन्निवेत्यनेनमुखप्रसत्तिर्द्योत्यते यद्वा इवेत्यनधिकारार्थ
म् । अहोमहानपिमुह्यतीतिस्मयमानः १ (हेपराशरपुत्र भवतः) शारीरःशरीराभिमान्यात्माऽऽत्मनातेनशरीरेणकच्चित्किंपरितुष्यति मानसआत्मामनोऽभिमानीतेनमनसापरितुष्य
तिकच्चिन्नोवा (भवतःशरीरेमनसिचस्वास्थ्यमस्तिकच्चिदित्यभिप्रायः)२ (तेत्वया) जिज्ञासितंज्ञातुमिष्टंधर्मादियत्तत्सर्वंसुसंपन्नंसम्यक्ज्ञातम् अपिशब्दादनुष्ठितंचेत्यर्थः अधीतिपाठेसंबोध
नम् सुसंपन्नत्वेहेतुः महदद्भुतमित्यादि सर्वैरर्थैर्धर्मादिभिः (पुरुपार्थैः) परिबृंहितंपरिपूर्णम् (महद्ग्रंथतः अद्भुतमर्थतः) ३

श्लोकाः २९ / ३

भारतव्यपदेशेनह्याम्नायार्थश्चदर्शितः॥दृश्यतेयत्रधर्मादिःस्त्रीशूद्रादिभिरप्युत २९ अथापिबतमेदैह्योह्यात्माचैवाऽऽत्मनाविभुः ॥ असंपन्नइवाऽऽभातिब्रह्मव
र्चस्यसत्तमः ३० किंवाभागवताधर्मानप्रायेणनिरूपिताः॥ प्रियाःपरमहंसानांतएवह्यच्युतप्रियाः ३१ तस्यैवंखिलमात्मानंमन्यमानस्यखिद्यतः ॥ कृष्णस्य
नारदोऽभ्यागादाश्रमंप्रागुदाहृतम् ३२ तमभिज्ञायसहसाप्रत्युत्थायाऽऽगतंमुनिः ॥ पूजयामासविधिवन्नारदंसुरपूजितं ३३ ॥ इतिभा०म०प्र०चतुर्थोध्या
यः ४ ॥छ॥ ॥ सूतउवाच॥अथतंसुखमासीनउपासीनंबृहच्छ्रवाः॥ देवर्षिःप्राहविप्रर्षिंवीणापाणिःस्मयन्निव १॥ नारदउवाच ॥ पाराशर्यमहाभागभवतःकच्चि
दात्मना ॥ परितुष्यतिशारीरआत्मामानसएववा २ जिज्ञासितंसुसंपन्नमपितेमहदद्भुतम् ॥ कृतवान्भारतंयस्त्वंसर्वार्थपरिबृंहितम् ३

चूर्णिका

भारतमिषेणवेदार्थोपिदर्शितः २९ तथापिमेजीवःअसंपन्नइवाऽऽभाति ३० असंपन्नत्वेहेतुंस्वयमेवशंकते परमहंसधर्माःभगवत्प्रियाःतेमयाबहुशोनवर्णिताःकिं ३१ एवंन्यूनमा
त्मानंमन्यमानस्यव्यासस्यसरस्वतीतीरस्थमाश्रमंनारदोऽगात् ३२तमभिज्ञायसहसाप्रत्युत्थायागतंमुनिः पूजयामासविधिवन्नारदंसुरपुजितम्३३ ॥ इतिप्रथमेचतुर्थः ४ ॥
सूतउवाच अथवीणापाणिर्नारदःसुखमासीनःसन्समीपेआसीनंव्यासमाह १ नारदउवा०हेमहाभागव्यासमुने तवाऽऽत्माअनेनशरीरेणमनसाचतुष्यतिकिं नोवा २ ज्ञातुमिष्टं
यद्धर्मादितत्सर्वंत्वयाज्ञातंअनुष्ठितंच सर्वार्थपरिपूर्णभारतंचकृतम् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

किंच यत्सनातनंनित्यंपरंब्रह्मतच्चत्वयाजिज्ञासितंविचारितमधीतमधिगतंप्राप्तंचेत्यर्थः। अथापि (आत्मानं) शोचसितत्किमर्थमितिशेषः ४ (हेमुनेत्वयोक्तंसर्वमेऽस्त्येव तथापिमे)आत्मा शारीरोमानसश्च। तन्मूलंतस्यापरितोषस्यकारणं। अव्यक्तमस्फुटं। हेनारद त्वात्वांपृच्छाम। आत्मभवोब्रह्मातस्याऽऽत्मनोदेहादुद्भूतस्तम् अतएवागाधोऽतिगंभीरोबोधोयस्यतंत्वाम्५अगाधबोधतांप्रपंचयन्नाह सवाइतिद्वाभ्याम् (वेदवेत्ति) सर्वगुह्यज्ञानेहेतुः यद्यस्मात्पुराणःपुरुषउपासितस्त्वया कथंभूतः परावरेशःकार्यकारणनियंता(यो) मनसैवसंकल्पमात्रेणगुणैःकृत्वाविश्वंसृजतीत्यादि ६ किंच त्वंत्रिलोकींपर्यटन्नर्कइवसर्वदर्शी योगबलेन(च)प्राणवायुरिवसर्वप्राणिनांमंतश्चरःसन्नात्मसाक्षीबुद्धिवृत्तिज्ञः। अतःपरेब्रह्मणिधर्मतोयोगेननिष्णातस्य। तदुक्तंयाज्ञवल्क्येन"इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्। अयंतुपरमोधर्मोयद्योगेनाऽऽत्मदर्शनमि"ति। अवरेचब्रह्मणिवेदाख्येव्रतैःस्वाध्यायनियमैर्निष्णातस्यमेऽलमत्यर्थंयन्यूनंतद्विचक्ष्ववितर्कय ७ अनुदितप्रायमनुक्तप्रायम् अमलं(शुद्धं)भगवद्यशोविनायेनैवधर्मादिज्ञानेनासौभगवान्नतुष्येत। तदेवदर्शनंज्ञानंखिलंन्यूनंमन्येऽहम् (यद्वा येनयशसः अनुदितत्वेनासौभगवान्नैवतुष्येत तद्दर्शनंतस्ययशसःप्रतिपादकंशास्त्रंखिलंमन्ये भवतारचितेषुग्रंथेषुन्यूनंमन्येइत्यर्थः) ८ ननुभगवद्यशएवतत्रतत्रानुवर्णितंत्राऽऽह यथेति चंशब्दाद्धर्मादिसाधनानिचतथा (तद्वत्) धर्मादिवत्प्राधान्येनवासुदेवस्यमहिमानह्युक्तइत्यर्थः९वासुदेवव्यतिरिक्तान्यविपयज्ञानवदेवान्यविषयंवाक्चातुर्यंचखिलमेवेत्याह। नेति। चित्रपदमपियद्वचोहरेर्यशोनप्रगृणीतद्वायसंतीर्थंकाकतुल्यानांकामिनांरतिस्थानमुशंतिमन्यंते कुतः मानसाः सत्त्वप्रधानेमनसिवर्त्तमानाहंसायतयोयत्रननिरमंतिकर्हिचिदपिनितरांनरमंते उशिक्क्षया उशिक्गमनीयंब्रह्मक्षयोनिवासोयेषांते यथाप्रसिद्धाहंसामानसेसरसिचरंतःकमनीयपद्मखंडनिवासास्त्यक्तविचित्रान्नादियुक्तेप्युच्छिष्टगर्त्तेकाकक्रीडास्थानेननिरमंतइतिश्लेषः १०

||२१||

श्लोकाः ४/१०

जिज्ञासितमधीतंचयत्तद्ब्रह्मसनातनम् ॥ अथापिशोचस्यात्मानमकृतार्थइवप्रभो ४ ॥व्यासउवाच ॥ अस्त्येवमेसर्वमिदंत्वयोक्तंतथापिनाऽऽत्मापरितुष्यतेमे॥ तन्मूलमव्यक्तमगाधबोधंपृच्छामहेत्वात्मभवात्मभूतम् ५ सवैभवान्वेदसमस्तगुह्यमुपासितोयत्पुरुषःपुराणः ॥ परावरेशोमनसैवविश्वंसृजत्यवत्यत्तिगुणैरसंगः ६ त्वंपर्यटन्नर्कइवत्रिलोकीमंतश्चरोवायुरिवाऽऽत्मसाक्षी ॥ परावरेब्रह्मणिधर्मतोव्रतैःस्नातस्यमेन्यूनमलंविचक्ष्व ७ श्रीनारदउवाच ॥ भवताऽनुदितप्रायंयशोभगवतोऽमलम् ॥ येनैवासौनतुष्येतमन्येतद्दर्शनंखिलम् ८ यथाधर्मादयश्चार्थामुनिवर्यानुकीर्तिताः ॥ नतथावासुदेवस्यमहिमाह्यनुवर्णितः ९ नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृणीतकर्हिचित् ॥ तद्वायसंतीर्थमुशंतिमानसानयत्रहंसानिरमंत्युशिक्क्षयाः १०

चूर्णिका

किंच यन्नित्यंब्रह्मतत्विचारितंप्राप्तंच एवंसतिअपूर्णइवशोचसि ४ व्यासउवाच हेनारदत्वंयोक्तंसर्वमस्त्येव तथापिमेआत्मानतुष्यति अतःअसंतोषस्यकारणंत्वांपृच्छामि ५ यतस्त्वयापुराणपुरुष उपासितः ६ किंच त्रिलोकींवायुरिव सर्वप्राणिनामतश्चरसि अतःमेन्यूनंयत्द्विचक्ष्व७नारदउवाच त्वयाकेवलंभगवद्यशअनुक्तप्रायं तदेवअसंतोषेकारणमहंमन्ये ८ यथाधर्मादयोर्था वर्णितास्तथाभगवन्माहिमानवर्णितः ९ किंच हरेर्यशःप्रतियद्वचःनगृणीततद्वचःवायसंतीर्थमन्यंते १०

---

१ हेमुनिवर्य यथाधर्मादयोऽर्थाःप्रतिपाद्याःपदार्थाःप्रायशोनुवर्णितास्तथातद्वत्प्राधान्येनवासुदेवस्यमहिमानोक्तइति इतिमहेश्वरपुस्तके टीका। २ चित्राणिरसालंकारादिविशिष्टानि पदानियत्र।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विनाऽपि(तु)पदचातुर्यंभगवद्यशःप्रधानंवचःपवित्रमित्याह । तदिति । तद्वाग्विसर्गःसचासौवाग्विसर्गोवाचःप्रयोगः । जनानांसमूहोजनतातस्या अघंविप्लावयतिनाशयतीतितथासः यस्मिन्वाग्विसर्गेअबद्धवत्यप्यपशब्दादियुक्तेऽपिप्रतिश्लोकमनंतस्ययशसांऽकितानिनामानिभवंति (संति) तत्रहेतुः । यद्यानिनामानिसाधवोमहांतोवक्तरिसतिशृण्वंति श्रोतरिसतिगृणंति अन्यदातुस्वयमेवगायंतिकीर्तयंति (इति) ११ भक्तिहीनंकर्म(तु)शून्यमेवेति (बंधनमेवेति) कैमुत्यन्यायेनदर्शयति नैष्कर्म्यमिति निष्कर्मब्रह्म तदेकाकारत्वान्निष्कर्मतारूपंनैष्कर्म्यम् (निष्कर्मणोमोक्षस्यसाधनंवानैष्कर्म्यं) अज्यतेऽनेनेत्यंजनमुपाधिस्तन्निवर्तकंनिरंजनम् एवंभूतमपिज्ञानमच्युतेभावोभक्तिस्तद्वर्जितंचेदलमत्यर्थंनशोभते सम्यगापरोक्ष्यायनकल्पतइत्यर्थः । तदाशश्वत्साधनकालेफलकालेचाभद्रंदुःखरूपंयत्काम्यंकर्मयदप्यकारणमकाम्यंतच्चेतिचकारस्यान्वयः । तदपिकर्मईश्वरेनार्पितंचेत्कुतःपुनःशोभते बहिर्मुखत्वेनसत्त्वशोधकत्वाभावात् १२ तदेवंभक्तिशून्यानिज्ञानवाक्चातुर्यकर्मकौशलानिव्यर्थान्येव। यतोऽतोहरेश्चरितमेवानुवर्णयेत्याह । अथोअतःकारणात् अमोघायथार्थादृक्(वीर्यं)धीर्यस्यशुचि शुद्धंश्रवोयशोयस्य(सः) सत्येरतोधृतानिव्रतानि (परोपकारादिनियमाः) येनसभवानेवंमहागुणस्तावत् । अतउरुक्रमस्य । (बहुपराक्रमस्यभगवतस्तत्प्रसिद्धं) विविधंचेष्टितंलीलांसमाधिनाचित्तैकाग्र्येणाखिलस्यबंधमुक्तये (हेमहाभाग्यनिधे) त्वमनुस्मरस्मृत्वा(च)वर्णयेत्यर्थः । एतच्चवाक्यांतरमितिमध्यमपुरुषप्रयोगोनानुपपन्नः १३ विपक्षेदोषांतरमाहत । तइति । ततउरुक्रमचेष्टितात्पृथक्दृशः (भिन्नदृष्टेः) अत एवान्यथाप्रकारांतरेणयत्किंचिदर्थांतरंविवक्षतः (वक्तुमिच्छतस्तव) तयाविवक्षया कृतैःस्फुरितैःरूपैः (लावण्यादिभिः) नामभिः(उर्वशीत्यादिभिः) चवक्तव्यत्वेनोपस्थितैर्दुःस्थिताऽनवस्थितासतीमतिःकदाचित्क्वापिविषयेआस्पदंस्थानंनलभेत । वातेनाऽऽहताआघूर्णितानौरिव । तदुक्तंगीतासु " व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनामि"त्यादि १४

॥२२॥

श्लोकाः ११/१४

तद्वाग्विसर्गोजनताऽघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्ययशोंऽकितानियच्छृण्वंतिगायंतिगृणंतिसाधवः ११ नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनम् ॥ कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यकारणम् १२ अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः ॥ उरुक्रमस्याखिलबंधमुक्तयेसमाधिनाऽनुस्मरतद्विचेष्टितम् १३ ततोऽन्यथाकिंचनयद्विवक्षतःपृथग्दृशस्तत्कृतरूपनामभिः ॥ नकुत्रचित्क्वापिचदुःस्थितामतिर्लभेतवाताहतनौरिवास्पदम् १४

चूर्णिका ॥२२॥

प्रतिश्लोकं अपशब्दयुक्तेऽपि वाचःप्रयोगेऽपिभगवद्यशःअस्तिचेत् सएववाग्विसर्गः तमेवसाधवःशृण्वंतिगायंतिगृणंतिहसंतिच ११ नैष्कर्म्यमपि ज्ञानंभक्तिहीनंचेदत्यर्थंनशोभते कुतः पुनरीश्वरेनार्पितंदुःखरूपंकाम्यंकर्मशोभेत १२ अतोहेमहाभागत्वंयथार्थधीरसितस्मादखिलस्यबंधमुक्तये भगवल्लीलांचित्तैकाग्र्येणस्मृत्वावर्णय १३ अन्यथाहरिचेष्टितात्पृथक्दृशःपुंसःमतिःक्वापिविषयेस्थानंनलभेत यथावातेनआहतानौः १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवंहरियशोविनाभारतादिषुकृतंधर्मादिवर्णनमकिंचित्करमित्युक्तं। प्रत्युतविरुद्धमेवजातमित्याह।जुगुप्सितमिति।जुगुप्सितंनिंद्यंकाम्यकर्मादितत्रस्वभावतएवरक्तस्यानुरागिणःपुरुषस्यधर्मकृ
तेधर्मार्थमनुशासतःप्रेरयतस्तवमहानयंव्यतिक्रमोऽन्यायः कुतइत्यतआह यस्य (तव) वाक्यतोऽयमेवमुख्योधर्मइति (निश्चित्य) स्थितइतरःप्राकृतोजनः (तस्यनिवारणंनमन्यते) त
स्यकाम्यकर्मादेरन्येनतत्त्वज्ञेनक्रियमाणंनिवारणंस्वयमेववात्वयाक्रियमाणं यद्वा 'नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशु'रिति(इत्यादि)श्रुत्याक्रियमाणंनिवारणंयथार्थमेतदितिनमन्य
ते किंतु प्रवृत्तिमार्गानधिकृतविषयंतदितिकल्पयति तदुक्तंमतांतरोपन्यासेभट्टैः " तत्रैवंशक्यतेवक्तुंयेऽधपंग्वादयोनराः गृहस्थत्वंनशक्ष्यंतिकर्तुंतेषामयंविधिः नैष्ठिकंब्रह्मचर्यंवापरिव्राजकता
पिवा तैरवश्यंग्रहीतव्यातेनादावेतदुच्यते " इत्यादि १५ ननुयद्येवंप्रवृत्तिमार्गोनिंद्यते तर्हि निवृत्तिमार्गेसर्वक्रियात्यागेनैवपारमेश्वरसुखस्वरूपानुभूतेःकिंतद्यशःकथनेनापितत्राऽऽह ॥
विचक्षणइतिविचक्षणो (ऽति) निपुणः । कश्चिदेवनिवृत्तितःसर्वक्रियांनिवृत्त्याऽस्यविभोःसुखंनिर्विकल्पकसुखात्मकंस्वरूपंवेदितुंज्ञातुमर्हतिनपुनरविचक्षणःप्रवृत्तिस्वभावः । विभुत्वेहेतुः ।
नअंतःकालतःपारंचदेशतोयस्य ततःकारणात्हेविभोतस्यविभोश्चेष्टितं अनात्मनोदेहाद्यभिमानिनोऽतएवगुणैःसत्त्वादिभिः प्रवर्त्तमानस्यजनस्यदर्शयभवानिति त्वमित्यर्थः । पाठां
तरेहेभवन्निनितिसबोधनम् १६ एवंतावत्काम्यधर्मादेरनर्थहेतुत्वात्तंविहायहरेर्लीलैववर्णनीयेत्युक्तमिदानींतुनित्यनैमित्तिकस्वधर्म (कर्म)निष्ठामप्यनादृत्यकेवलंहरिभक्तिरेवोपदेष्टव्येत्याशयेनाह ।
ननु (तत्र) स्वधर्मत्यागेनभजनभक्तिपरिपाकेनयदिकृतार्थोभवेत्तदानकाचिच्चिंता यदिपुनरपक्वएवम्रियेतततोभ्रश्येद्वा तदास्वधर्मत्यागनिमित्तोऽनर्थःस्यादित्याशंक्याऽऽह ।त्यक्त्वेति।ततो
भजनात्कथंचित्पतेद्भ्रश्येन्म्रियेतवा यदितदाऽपिभक्तिरसिकस्यकर्मानधिकारान्नानर्थशंका । अंगीकृत्याप्याह । वाशब्दःकटाक्षे । यत्रक्ववानीचयोनावप्यमुष्यभक्तिरसिकस्याभद्रं (अकल्या
णं) अभूत्किं नाभूदेवेत्यर्थः । भक्तिवासनासद्भावादितिभावः । अभजद्भिस्तुकेवलंस्वधर्मतःकोवाअर्थआप्तः (प्राप्तः) अभजतामितिषष्ठीतुसंबंधमात्रविवक्षया १७

श्लोकाः १५/१७

**जुगुप्सितंधर्मकृतेऽनुशासतःस्वभावरक्तस्यमहान्व्यतिक्रमः ॥ यद्वाक्यतोधर्मइतीतरःस्थितोनमन्यतेतस्यनिवारणंचनः १५ विचक्षणोऽस्यार्हतिवेदितुंवि
भोरनंतपारस्यनिवृत्तितःसुखम् ॥ प्रवर्त्तमानस्यगुणैरनात्मनस्ततोभवान्दर्शयचेष्टितंविभो १६ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोऽथपतेत्ततोयदि ॥ यत्र
क्ववाऽभद्रमभूदमुष्यकिंकोवाऽर्थआप्तोभजतांस्वधर्मतः १७**

चूर्णिका

तद्वत् किंच भारतादिपुकाम्येकर्मणिस्वभावेनआसक्तस्यपुंसःधर्मार्थतदेवकाम्यकर्मादिकथयतस्तवमहानन्यायोयतस्त्वदुक्तं धर्मइतिमन्वानोजनस्तत्वज्ञेनत्वया क्रियमाणं
निवारणंनमन्यते १५ विचक्षणःपुरुषस्तुकर्मनिवृत्त्याभत्वस्वरूपं ज्ञातुंअर्हति नप्रवृत्तिस्वभाववान् अतएवगुणैःप्रवर्तमानस्यजनस्यहरेश्चेष्टितंदर्शय १६ किंच
स्वधर्मंत्यक्त्वाहरेश्चरणांबुजंभजन्सन् यत्रकुत्रापिपतेच्चेत् तर्हि किंतस्याभद्रंस्यात् नअभजतांपुंसांस्वधर्मतःकोवाअर्थःप्राप्तःनकोपि १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२४॥

नन्तु'स्वधर्ममात्रादपिकर्मणापितृलोक'इतिश्रुतेः पितृलोकप्राप्तिःफलमस्त्येवतत्राऽऽह तस्यैवेति । तस्यैवहेतोस्तदर्थं (एवप्रयतेत) यत्नंकुर्यात् (कोविदोकुशलः तस्यकस्य) यत्उपरि ब्रह्म(लोक)प र्यंतमधःस्थावरपर्यंतंचभ्रमद्भिर्जीवैर्नलभ्यते पष्ठीतुपूर्ववत् । भगवद्भक्तिसुखार्थमेवप्रयतेतस्यदुर्लभत्वादित्यर्थः तत्तुविषयसुखमन्यतएवप्राचीनकर्मणासर्वत्रनरकादावपिलभ्यते दुःखवत् । यथादुः खंप्रयत्नंविनापिलभ्यतेतद्वत् । तदुक्तम्"अप्रार्थितानिदुःखानियथैवायांतिदेहिनाम् ।सुखान्यपितथामन्येदैन्यमत्रातिरिच्यत"इति१८यदुक्तंयत्रक्वाऽभद्रमभूदितितदुपपादयति।नवाइति । मुकुंदसे वीजनोजातुकदाचित्कथंचनकुयोनिगतोऽपिसंसृतिंनाव्रजेन्नाविशेत् अंग(हेमुने)अहोअन्यवत्केवलकर्मनिष्ठवदितिवैधर्म्यैदृष्टांतः।कुतइत्यतआह।मुकुंदांघ्रेरुपगूहनमालिंगनंपुनःस्मरन्विहातुंनैच्छेत् यतोऽयंजनोरसग्रहःरसेनरसनीयेनगृह्यतेवशीक्रियते यद्वा रसेरसनीयेग्रहआग्रहोयस्यतदुक्तंभगवता"यततेचततोभूयःसंसिद्धौकुरुनंदन पूर्वाभ्यासेनतेनैव ह्रियतेह्यवशोऽपिस" इति १९ तदेवंभ गवल्लीलांप्राधान्येन (अनु)वर्णयेत्युक्तंतत्रकोभगवान्काश्चतस्यलीलाइत्यपेक्षायामाह । (इदमिति) इदंविश्वंभगवानेव सत्त्वस्माद्विश्वस्मादितरः ईश्वरात्प्रपंचोनपृथगीश्वरस्तुप्रपंचा त्पृथगित्यर्थः तत्रहेतुर्यतोभगवतोहेतोर्जगतःस्थित्यादयोभवंति अनेनैवलीलाअपिदर्शिताः यद्वा इदंविश्वंभगवान् इतरइव (इतरः) यःसजीवोऽपिभगवान् चेतनाचेतनःप्रपंचस्तद्व्य तिरेकेणनास्तिसएवैकस्तत्त्वमित्यर्थः । हिशब्देन 'सर्वंखल्विदंब्रह्म' त्यादिप्रमाणंसूचितम् तद्धि (सर्वं) स्वयमेवभवान्वेद (तथापि) 'प्रादेशमात्रमेकदेशमात्रमाचार्यवान्पुरुषोवेद' त्यादिश्रुत्यर्थसंपादनाय(भवतः)प्रदर्शितम् (मयेति)२० नचतवाचार्यापेक्षाईश्वरावतारत्वादित्याह । त्वमिति । हेअमोघदृक्(हेअवंध्यदृष्टे)त्वमात्मनास्वयमात्मानमजमेवसंतंजगतःशिवाय (कल्याणाय)प्रजातमवेहि । (शिवायेति)कुतः परस्यपुंसः कलामंशभूतम्।तत्तस्मान्महानुभावस्यहरेरभ्युदयःपराक्रमःअधिअधिकंगण्यतांनिरूप्यताम्२१अनेनेवतपआदिसर्वंतवसफलंस्यादित्या ह।इदंहीति । श्रुतादयोभावेनिष्ठान्ताः। इदमेवहितपःश्रवणादेरविच्युतोनित्योऽर्थःफलम् । किंतत् उत्तमश्लोकस्यगुणानुवर्णनामितियत् (तत्रश्रुतंशास्त्रश्रवणंस्विष्टंशोभनंयजनं सूक्तंप्रवचनं अध्य यनंच बुद्धंज्ञानं दत्तंदानम्) २२

श्लोकाः १८/२२

तस्यैवहेतोःप्रयतेतकोविदोनलभ्यतेयद्भ्रमतामुपर्यधः ॥ तल्लभ्यतेदुःखवदन्यतःसुखंकालेनसर्वत्रगभीररंहसा १८ नवैजनोजातुकथंचनाव्रजेन्मुकुंदसेव्यन्यवदं गसंसृतिम् ॥ स्मरन्मुकुंदांघ्र्युपगूहनंपुनर्विहातुमिच्छेन्नरसग्रहोयतः १९ इदंहिविश्वंभगवानिवेतरोयतोजगत्स्थाननिरोधसंभवाः ॥ तद्धिस्वयंवेदभवांस्तथाऽ पिवैप्रादेशमात्रंभवतःप्रदर्शितं २० त्वमात्मनाऽऽत्मानमवेह्यमोघदृक्परस्यपुंसःपरमात्मनःकलाम् ॥ अजंप्रजातंजगतःशिवायतन्महानुभावाभ्युदयोऽधि गण्यताम् २१ इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः ॥ अविच्युतोऽर्थःकविभिर्निरूपितोयदुत्तमश्लोकगुणानुवर्णनम् २२

चूर्णिका ॥२४॥

अतएवंनिपुणःसन्भक्त्यर्थमेवयतेत विषयसुखंतुदुःखवत् अयत्नसिद्धमेव १८ उतच हेव्यासमुकुंदसेवीजनःसंसृतिंनप्राप्नोति अतःप्राधान्येनभगवल्लीलांवर्णय १९ कोऽ सौभगवान् यतोविश्वस्यस्थित्यादयोभवंतिसः तद्धिस्वयमेवभगवान्वेद२०यतः परमात्मनःत्वमंशोऽसितथापिआचार्यवान्पुरुषोवेदेतिश्रुत्यर्थदिग्दर्शिता तस्मात्हरेर्विक्रमो गण्यताम् २१ इदंसर्वानुष्ठानस्यउत्तमंफलं २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सत्संगतो(हि)हरिकथाश्रवणादिफलं (लभ्यतइति) स्ववृत्तांतेनप्रपंचयति।अहमिति)। (हेमुनेअहंपुरापूर्वकल्पेऽतीतभवेपूर्वजन्मनिवेदवादिनां (कस्याश्चित) दास्याःसकाशादभवंजातोऽस्मि(तैः) निरूपितोनियुक्तः । क्व योगिनांशुश्रूषणे । प्राट्टषिवर्षोपलक्षितेचातुर्मास्येनिर्विविक्षतांनिर्वेशमेकत्रवासंकर्तुमिच्छतां २३ (ते मुनयः) अपेतानिगतान्यखिलानिचापलानियस्मात्तस्मिन्दांतेनियतेंद्रिये अधृतक्रीडनकेत्यक्तक्रीडासाधने अनुवर्तिन्यनुकूले (शुश्रूषमाणेपरिचर्यांकुर्वाणेमयियद्यपिसर्वत्रसमंपश्यंतितथापिकृपांचक्रुःअहोमेभाग्यफलितमित्यर्थः) २४ (तत्कृतांकृपांदर्शयति) उच्छिष्टस्यलेपान्पात्रलग्नांस्तैर्द्विजैरनुज्ञातःसन्भुंजेस्म। तेनभोजनेनापास्तकिल्बिषोजातोऽस्मि।तेषांधर्मेपरमेश्वरभजनेएवाऽऽत्मनोमनसोरुचिःप्रजायतेस्मेत्यनुषंगः २५ (तत्रतत्सकाशेऽनुदिनंप्रगायतांतेषामनुग्रहेणाहंताः)अशृणवंश्रुतवानस्मि।मेश्रद्धयाममैवस्वतःसिद्धयानत्वन्येनबलाज्जनितया अतोममेत्यस्यापौनरुक्त्यम्।अनुपदंप्रतिपदम्।प्रियंश्रवोयशोयस्यतस्मिन् २६ (हेमुहामुने प्रियश्रवसि) तस्मिन्भगवतिलब्धरुचेर्ममास्खलिताऽप्रतिहतामतिरभवदित्यनुषंगः।ययामत्यापरेप्रपंचातीतेब्रह्मरूपेमयिसदसत्स्थूलंसूक्ष्मंचैतच्छरीरंस्वमाययास्वाविद्ययाकल्पितं नतुवस्तुतोऽस्तीति (तदा) तत्क्षणमेवपश्यामि २७ एवंशुद्धेत्वंपदार्थेज्ञातेदेहादिकृतविक्षेपनिवृत्तेस्तत्कारणभूतरजस्तमोनिवर्त्तिकादृढाभक्तिर्जातेत्याह।इत्थमिति (शरत्प्राट्टषिकौऋतूवार्षिकांश्चतुरोमासान्संकीर्त्यमानं) हरेर्यशः अनुसवंत्रिकालम् (विशेषेणशृण्वतोमम) २८ तस्येति(एवं)तस्यज्ञातशुद्धत्वंपदार्थस्यदृढभक्तिमतोमेप्रश्रितस्यविनीतस्य (ज्ञानमन्ववोचन्नित्यन्वयः) २९

॥२९॥

श्लोकाः २३/२९

अहंपुरातीतभवेऽभवंमुनेदास्यास्तुकस्याश्चनवेदवादिनाम् ॥ निरूपितोबालकएवयोगिनांशुश्रूषणेप्राट्टषिनिर्विविक्षताम् २३ तेमय्यपेताखिलचापलेऽर्भकेदांतेऽधृतक्रीडनकेऽनुवर्तिनि ॥चक्रुःकृपांयद्यपितुल्यदर्शनाःशुश्रूषमाणेमुनयोऽल्पभाषिणि २४ उच्छिष्टलेपाननुमोदितोद्विजैःसकृत्स्मभुंजेतदपास्तकिल्बिषः॥एवंप्रवृत्तस्यविशुद्धचेतसस्तद्धर्मएवात्मरुचिःप्रजायते २५ तत्रान्वहंकृष्णकथाःप्रगायतामनुग्रहेणाशृणवंमनोहराः ॥ ताःश्रद्धयामेऽनुपदंविशृण्वतःप्रियश्रवस्यंगममाभवद्रुचिः २६ तस्मिंस्तदालब्धरुचेर्महामुनेप्रियश्रवस्यस्खलितामतिर्मम ॥ ययाहमेतत्सदसत्स्वमाययापश्येमयिब्रह्मणिकल्पितंपरे २७ इत्थंशरत्प्राट्टषिकावृतूहरेर्विशृण्वतोमेऽनुसवंयशोऽमलं ॥ संकीर्त्यमानंमुनिभिर्महात्मभिर्भक्तिःप्रवृत्तात्मरजस्तमोऽपहा २८ तस्यैवंमेऽनुरक्तस्यप्रश्रितस्यहतैनसः ॥ श्रद्दधानस्यबालस्यदांतस्यानुचरस्यच २९

चूर्णिका

स्ववृत्तांतेनतदेवाह हेमुनेअहंप्राग्जन्मनिवेदवादिनांदास्याःपुत्रोऽभवम् ततःप्राट्टषिएकत्रवासंकर्त्तुमिच्छतांयोगिनांशुश्रूषणेयोजितः २३ तेयोगिनोबालकेमयिकृपांचक्रुः २४ तैरुच्छिष्टभोजनेअनुज्ञातस्तेनभोजनेननिष्पापोजातोहम् एवंप्रवृत्तस्यमेतद्धर्मेरुचिर्जाता २५ तेषांकृष्णकथाःगायतामनुग्रहेणममकृष्णेभक्तिर्मतिश्चाभवत् २६ ययामत्याब्रह्मरूपेमयीदंमायाकल्पितंपश्यामि २७ इत्थंहरेर्यशस्त्रिकालंशृण्वतोमेरजस्तमोपहाभक्तिर्जाता २८ एवंबालस्यश्रद्दधानस्य ममतत्स्थानात् गंतुमिच्छंतऋषयःभगवदुक्तंगुह्यंज्ञानंकृपयोपदिष्टवंतः २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गुह्यतममिति । साधनभूतधर्मतत्त्वज्ञानंगुह्यम् तत्साध्यंविविक्तात्मज्ञानंगुह्यतरम् तत्प्राप्येश्वरज्ञानंगुह्यतमम् । भगवतोदितंभागवताख्यंशास्त्रमन्ववोचदुपदिष्टवंतः ३० तदेवज्ञानंपूर्वोक्तत्वंपदार्थ ज्ञानाद्विवेकेनदर्शयति यनैवेति (येनज्ञानेनैवमायानुभावंमायायामाहात्म्यं) अविदंज्ञातवानहम् ३१ तत्साधनंधर्म(कर्म)रहस्यंचसूचितमित्याह एतदिति तापत्रयस्याध्यात्मिकादेश्चिकित्सितंभेषजं निवर्त्तकंसत्त्वशोधकमितियावत् । किंतत् भगवतिभावितंसमर्पितंयत्कर्मतत् । कथंभूतेभगवतिईश्वरेसर्वनियंतरि । एवमपिचब्रह्मण्यप्रच्युतेपूर्णरूपे ३२ ननुसंसारहेतोः कर्मणःकथंतापत्रयनिवर्त्तकत्वम् सामग्रीभेदेनघटतइतिसदृष्टांतमाह द्वाभ्यां(आमयइति)यआमयोरोगोयेनघृतादिनाजायतेतदेवकेवलमामयकारणभूतंद्रव्यं (घृतादि) तमामयंनपुनाति ननिवर्त्तयतीत्यर्थः । किंतु चिकित्सितं द्रव्यांतरैर्भावितंसत् (तदेवतंरोगं) पुनात्येवयथा ३३ (एवंयेनृणांसंसृतिहेतवस्तएव) आत्मविनाशायकर्मनिवृत्तयेकल्पंतेसमर्थाभवंति परेईश्वरेकल्पिताअर्पिताःसंतः अत्रचप्रथमंमहत्सेवा ततश्चतत्कृपा ततस्तद्धर्मश्रद्धा ततोभगवत्कथाश्रवणं ततोभगवतिरतिस्तयाच (तदा) देहद्वयविवेकात्मज्ञानं ततोदृढाभक्तिस्ततोभगवत्तत्त्वज्ञानं ततस्तत्कृपयासर्वज्ञत्वादिभगवद्गुणाविर्भावइतिक्रमोदर्शितः ३४ ननुचज्ञानेनाज्ञानप्राप्तकर्मनाशस्तच्चज्ञानंभक्तियोगाद्भवति कथंकर्मणाकर्मनाशःस्यात्तत्राऽऽह । यदत्रेति (अत्रकर्मभूमौभगवदर्पणेन भगवत्परितोषणंभगवत्प्रीतिकरंयत्कर्म क्रियतेयद्भक्तियोगसमन्वितंज्ञानंतत्तदधीनंतस्यकर्मणोधीनं हि) ३५ भगवदर्पणेनक्रियमाणंकर्मभक्तियोगंजनयतीतिसदाचारेणदर्शयति (कुर्वाणाइति) यत्रयदाभगवतःशिक्षयाकर्माणिकुर्वाणाभवंतितदाश्रीकृष्णस्यगुणनामानि (असकृत्) गृणंत्यनुस्मरंतिचकृष्णमित्यर्थः । तत्रइयंचभगवच्छिक्षा "यत्करोषियदश्नासियज्जुहोषिददासियत् । यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणमि"ति ३६ (एवंभगवदर्पणेनक्रियमाणस्य) कीर्तनस्मरणरूपभक्तिहेतुत्वमुक्तं ज्ञानहेतुत्वमाहद्वाभ्याम् । नगइति । नमोधीमहिमनसानमनंकुर्वीमहि (इत्यर्थः) ३७ (इत्येवंमूर्त्यभिधानेनमूर्तिवाचकेनमंत्रेणमंत्रमूर्तिंमंत्रप्रतिपाद्यमूर्तिं) आमूर्तिकंमंत्रोक्तव्यतिरिक्तमूर्तिशून्यम् (यज्ञपुरुषंभगवंतं) यजतेपूजयति सपुमान्सम्यग्दर्शनः(अपरोक्षज्ञानवान्) भवति ३८

॥२६॥

श्लोकाः ३०—३८

ज्ञानंगुह्यतमंयत्तत्साक्षाद्भगवतोदितम् ॥ अन्ववोचन्गमिष्यंतःकृपयादीनवत्सलाः ३० येनैवाहंभगवतोवासुदेवस्यवेधसः ॥ मायाऽनुभावमविदंयेनगच्छंति तत्पदम् ३१ एतत्संसूचितंब्रह्मंस्तापत्रयचिकित्सितम् ॥ यदीश्वरेभगवतिकर्मब्रह्मणिभावितम् ३२ आमयोयश्चभूतानांजायतेयेनसुव्रत ॥ तदेवह्यामयंद्रव्यंनपुनातिचिकित्सितम् ३३ एवंनृणांक्रियायोगाःसर्वेसंसृतिहेतवः ॥ तएवाऽऽत्मविनाशायकल्पंतेकल्पिताःपरे ३४ यदत्रक्रियतेकर्मभगवत्परितोषणम् ॥ ज्ञानंयत्तदधीनंहिभक्तियोगसमन्वितम् ३५ कुर्वाणायत्रकर्माणिभगवच्छिक्षयाऽसकृत् ॥ गृणंतिगुणनामानिकृष्णस्यानुस्मरंतिच ३६ नमोभगवतेतुभ्यंवासुदेवायधीमहि ॥ प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ३७ इतिमूर्त्यभिधानेनमंत्रमूर्तिममूर्तिकम् ॥ यजतेयज्ञपुरुषंससम्यग्दर्शनःपुमान् ३८

चूर्णिका

३० येनज्ञानेनाऽहंभगवन्मायानुभावमविदम् ३१ एतत्सत्वशोधकंकर्मयत्भगवतिसमर्पितम् तत्तेसूचितं ३२ यथारोगजनकंद्रव्यंद्रव्यांतरमिश्रितंसद्रोगनाशकंभवति ३३ एवंकर्माऽपिभगवदर्पितंसत् कर्मनाशायभवति ३४ अपिच भगवत्तोषकारकंकर्मयत्क्रियते तद्भक्तियोगयुक्तंज्ञानंजनयति यदाभगवच्छिक्षया कर्माणिकुर्वंति ३५ तदाश्रीकृष्णस्यगुणनामानिगृणंतिस्मरतिच ३६ भक्तिहेतुत्वमुक्त्वाज्ञानहेतुत्वमाहनमोभगवतेतुभ्यंवासुदेवायधीमहि प्रद्युम्नायानिरुद्धायनमःसंकर्षणायच ३७ इतिजपतः पुंसः सम्यक्ज्ञानंजायते ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवं (च) कृतवतिमयिहरिःस्वसदृशंज्ञानादिकंदत्तवानित्याह । इमंस्वनिगमंस्वोपदेशंमदनुष्ठितंमयाऽनुष्ठितमवेत्यज्ञात्वा (हेब्रह्मन्स्वस्मिन्) भावंप्रीतिंच (केशवोमह्यमदात्) ३९ अतस्त्वमप्येवंकुर्वित्याह त्वमिति अदभ्रमनल्पंश्रुतंयस्य (तत्संबोधनं) हेअदभ्रश्रुत विभोर्विश्रुतंयशःप्रख्याहिकथय । येनविश्रुतेनवुद्धेनविदांविदुषांबुभुत्सितंबोद्धुमिच्छासमाप्यते । यद्यतोदुःखैःपीडितात्मनांक्लेशशांतिंप्रकारांतरेणनमन्यंते ४० ॥ इतिश्रीभागवतेप्रथमस्कंधेभावार्थदीपिकायांटीकायांपंचमोऽध्यायः ५ ॥ ॥ छ ॥ ॥ व्यासस्यप्रत्ययार्थंचषष्ठेप्राग्जन्मसंभवम्।स्वभाग्यंनारदःप्राहकृष्णसंकथनोद्भवम् ॥१॥(हेब्रह्मन्शौनक)स्वयमपितथाचिकीर्षुर्गुरूपदेशानंतरभावितच्चरितंपृच्छति । भिक्षुभिरिति(भिक्षुभिर्यतिभिः)विप्रवसितेदूरदेशगमनेकृतेसति विज्ञानस्यादेष्टृभिरुपदेशकर्तृभिः २ (हेस्वायंभुव) परंवयउत्तरमायुःतेत्वया (कथं) वर्तितंनीतम् इदमितिदासीपुत्रभूतंकलेवरं (कथं) उदस्राक्षीरुत्सृष्टवानासि ३ (हेसुरसत्तमदेवर्षे) एषकल्पांतलक्षणःकालस्तेस्मृतिंकथंनव्यवधान्नखंडितवान् । अडागमाभावस्त्वार्षः । हियतएषकालःसर्वस्यनिराकृतिरपलापोयस्मात्सः ४ अकारषंकृतवानहम् (अकार्षमितिवक्तव्ये) रेफषकारयोर्विश्लेषश्छंदोऽनुरोधेन ५ तत्रतावत्कंचित्कालंतत्रैवमातृस्नेहयंत्रितोन्यवसमित्याहत्रिभिः । एकएवाहमात्मजोयस्याःसा योषिदितिंमूढेतिचस्नेहानुबंधेहेतुः ६

श्लोकाः ३९/६

इमंस्वनिगमंब्रह्मन्नवेत्यमदनुष्ठितम् ॥ अदान्मेज्ञानमैश्वर्यंस्वस्मिन्भावंचकेशवः ३९ त्वमप्यदभ्रश्रुतविश्रुतंविभोःसमाप्यतेयेनविदांबुभुत्सितम्॥प्रख्याहिदुःखैर्मुहुरर्दितात्मनांयत्क्लेशनिर्वाणमुशंतिनान्यथा ४० ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेव्यासनारदसंवादेपंचमोऽध्यायः ५ ॥छ॥ ॥सूतउवाच॥एवंनिशम्यभगवान्देवर्षेर्जन्मकर्मच॥भूयःपप्रच्छतंब्रह्मन्व्यासःसत्यवतीसुतः १॥व्यासउवाच॥भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिस्तव॥वर्तमानोवयस्याद्येततःकिमकरोद्भवान्२ स्वायंभुवकयावृत्त्यावर्तितंतेपरंवयः ॥ कथंचेदमुदस्राक्षीःकालेप्रातेकलेवरम् ३ प्राक्कल्पविषयमेतांस्मृतिंतेसुरसत्तम ॥ नह्येवव्यवधात्कालएषसर्वनिराकृतिः ४ नारदउवाच ॥ भिक्षुभिर्विप्रवसितेविज्ञानादेष्टृभिर्मम ॥ वर्तमानोवयस्याद्येततएतदकारषम् ५ एकात्मजामेजननीयोषिन्मूढाचकिंकरी ॥ मय्यात्मजेऽनन्यगतौचक्रेस्नेहानुबंधनम् ६

चूर्णिका

एवंमयास्वोपदेशमाचरितंज्ञात्वाकेशवोमह्यंज्ञानंभावंचादात् ३९ हेव्यास विभोर्यशःकथय येनश्रुतेनविदुषांबोद्धुंइच्छासमाप्यते यतोदुःखशांतिःप्रकारांतरेणनभवति ४० ॥ इतिप्रथमेपंचमः ५ ॥ ॥ छ ॥ ॥ सूतउवाच एवंनारदस्यजन्मादिनिशम्य व्यासःपप्रच्छ १ व्यासउवाच भिक्षुषुगतेषुसत्सुत्वंबालकःसन्किमकार्षीः २ हेनारदशेषंवयःकयावृत्त्यानीतम् कालेतच्छरीरंकथंत्यक्तम् ३ कथंवातेप्राग्जन्मस्मृतिंसर्वविनाशकःकालःनखंडितवान् ४ नारदउवाच ममविज्ञानादेष्टृभिर्भिक्षुभिर्गमनेकृतेसति आद्येवयसि वर्तमानोऽहमेतदकार्षम् ५ मेमाताअज्ञामयिस्नेहंचक्रे ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

किंकरीत्यस्यार्थंप्रपंचयति सेति। अस्वतंत्रासा (ममयोगक्षेममप्राप्तस्यान्नवस्त्रादेःप्राप्त्युपायंयोगं प्राप्तस्यसंरक्षणलक्षणंक्षेमंचेच्छति) अतोनकल्पानसमर्थाआसीत् (कुतःहियस्माल्लोकःसेवकजनः ईशस्यस्वामिनोवशेतिष्ठति यद्वा ईशस्यजगदीशस्यलोकःसर्वोपिजनः) दारुमयीयोषित्यतिपारवश्येदृष्टांतः ७ तदेवंसास्नेहंचक्रेऽहंचदिगादिष्वनभिज्ञोऽतस्तत्रैवन्यवसमित्याह। अहंचत स्मिन्ब्रह्मकुले (ब्राह्मणगृहे) तस्यामातुःस्नेहानुबंधस्यावेक्षयाकदाविरमेदितिप्रतीक्षयेत्यर्थः। ऊषिवान्वासंकृतवान्। पंचहायनःपंचवर्षः ८ गेहान्निर्गतांगांदुहंतीम्। हेतौशतृप्रत्ययः। दोग्धुं निर्गतामित्यर्थः। पदापादेनाऽऽस्पृष्टईषदाक्रांतः अदशदखादत् ९ तन्मातुर्मरणंभक्तानांशंकल्याणमभीप्सतईशस्यानुग्रहंमन्यमानः (अहं) प्रातिष्ठंप्रस्थितोऽस्मि १० स्फीतान्जनपदादीनति यातःसन्महद्विपिनमद्राक्षमितिचतुर्थेनान्वयः। जनपदादिषुनानागुणदोषयुक्तेषु समदृष्टिःसन्गतोऽहमितितात्पर्यार्थः स्फीतान्समृद्धान् जनपदान्देशान्। तत्रतस्यांदिशि पुरग्रामव्रजाकरान्। तत्र पुराणिराजधान्यःग्रामाभृगुप्रोक्ताः "विप्राश्चविप्रभृत्याश्चयत्रचैववसंतिते सतुग्रामइतिप्रोक्तःशूद्राणांवासएवचे"ति। व्रजागोकुलानि। आकरारत्नाद्युत्पत्तिस्थानानि तान्। खेटाःकर्षकग्रामाः। खर्वटा गिरितटग्रामाः। भृगुप्रोक्तावा "एकतोयत्रतुग्रामोनगरंचैकतःस्थितम् मिश्रंतुखर्वटंनामनदीगिरिसमाश्रयमि"ति वाट्यःपूगपुष्पादीनांवाटिकास्ताः। वनानिस्वतःसिद्धवृक्षाणांसमूहाः। उपवनानिरो पितवृक्षाणांसमूहाः तानिच ११ चित्रैः (अनेकविधैः) धातुभिःस्वर्णरजताद्यैर्विचित्रान् (आश्चर्यरूपान्) अद्रींश्च। इभैर्भग्नाभुजाःशाखायेषांतेद्रुमायेषुतान्। शिवानिभद्राणिजलानियेषांतान् (जलाशयान्) नलिनीःसरसीः १२ चित्राःस्वनायेषांतैःपत्ररथैःपक्षिभिस्तन्नादप्रबुद्धैरित्यर्थः (अतएव) विभ्रमद्भिर्भ्रमरैःश्रीःशोभायासांताःनलिनीरतियातोऽतिक्रम्यगतःसन्महद्विपिनंवन मद्राक्षम् (दृष्टवान्)। कीदृशम् (वनं) नलवेणुशराणांस्तंबैःकुशैःकीचकैश्चगह्वरंदुर्गमम्। तत्रवेणुजातयएवविपुलांतरालगर्भाःकीचकाः १३

साऽस्वतंत्रानकल्पाऽऽसीद्योगक्षेमंममेच्छती ॥ ईशस्यहिवशेलोकोयोषादारुमयीयथा ७ अहंचतद्ब्रह्मकुलऊषिवांस्तदवेक्षया ॥ दिग्देशकालाव्युत्पन्नोबाल कःपंचहायनः ८ एकदानिर्गतांगेहाद्दुहंतींनिशिगांपथि ॥ सर्पोऽदशत्पदास्पृष्टःकृपणांकालचोदितः ९ तदातदहमीशस्यभक्तानांशमभीप्सतः ॥ अनुग्रहंम न्यमानःप्रातिष्ठंदिशमुत्तराम् १० स्फीताञ्जनपदांस्तत्रपुरग्रामव्रजाकरान्॥ खेटखर्वटवाटीश्चवनान्युपवनानिच ११ चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् ॥ जलाशयाञ्शिवजलान्नलिनीःसुरसेविताः १२ चित्रस्वनैःपत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ नलवेणुशरस्तंबकुशकीचकगह्वरम् १३

श्लोकाः ७/१३

चूर्णिका

ममक्षेममिच्छंतीसत्यसमर्थाचआसीत् ७ अहंचपंचहायनोबालस्तेषांमाश्रमेआसम् ८ ततएकदामेमातागोदोहनार्थंबाहिर्गतासतीसर्पेणदष्टा ततोमृता ९ ततःहरेःसएवानुग्रह इतिमन्यमानोऽहमुत्तरांदिशमगच्छम् १० तत्रजनपदपुरग्रामव्रजाकरखेटवाटीवनोपवनानि ११ चित्रधातुविचित्राद्रीन्शिवजलान्सरोवरादीन् १२ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

घोरदुंःसहम्। प्रतिभयाकारंभयंकररूपम् । व्यालादीनामजिरंक्रीडास्थानम् (तत्राशिवागोमायवः) १४ परिश्रांतानींद्रियाण्यात्मादेहश्चयस्य तृषा (पिपासया) परीतोव्याप्तः उपस्पृष्टआ
चांतः १५ पिप्पलोपस्थेअश्वत्थमूले आश्रितउपविष्टः। आत्मनाबुद्धयामनसावा । आत्मस्थंहृदिस्थम् । आत्मानंपरमात्मानम् (अचिंतयंध्यातवान् यथाश्रुतंभिक्षुमुखतःश्रुतमनतिक्रम्य)
१६ भावेनभक्त्यानिर्जितंवशीकृतंयच्चेतस्तेन (ध्यायतः) औत्कंठचेनाश्रुकलायुक्तेअक्षिणीयस्य (तस्यमेहृदि) १७ प्रेम्णोऽतिभरेण (अतिशयेन) निर्भिन्नपुलकानि (उद्गतरोमांचानि) अं
गानियस्यआनंदानांसंप्लवेमहापूरेपरमानंदे (लीनोहेमुने) उभयमात्मानंपरंच (नापश्यम्) १८ मनसःकांतमभीष्टम्। शुचाशोकस्तामपहंतीतितथातत् (अदर्शनकृतात्वैक्लव्यात्) उत्तस्थेव्यु
त्थितोऽस्मि १९ हृदिमनःप्रणिधायस्थिरीकृत्याविदृप्तोऽहमातुरइवाभवमितिशेषः २० गिरामगोचरःसंवेदनस्याविषयभूतईश्वरः (यतन्तंदर्शनाययत्नंकुर्वन्तंमांप्रत्याह) २१ हंतेतिसा
नुकंपसंबोधने । माइतिमां द्रष्टुंनार्हति । यतःनविपक्वादग्धाःकषायामलाःकामादयोयेषांतेषांकुयोगिनामनिष्पन्नयोगानाम्। (दुर्दर्शःद्रष्टुमशक्यः) २२ कुतस्तर्हिदृष्टोसितत्राऽऽह । सकृद्द
र्शितं (रूपं) मयेतियदेतत्(ते)कामाय (तव)मय्यनुरागाय त्वत्कामेनकिमित्यतआह मत्कामःमय्यनुरक्तःपुमान्। हृच्छयान्कामान् (विषयानुरागानित्यर्थः) २३ अदीर्घयाऽपिसतांसे
वया (मयिदृढामतिर्जातामच्चिन्तनंदृढमासीदित्यर्थः अतइमम्) अवद्यंनिंद्यम् इमंलोकंदेहंहित्वामज्जनतांमत्पार्षदतांगंताऽसि (यद्वाअजातेतिछेदः । दृढानजाताअतऔत्कंठ्येनदृढी
भवनार्थमयासकृद्रूपंप्रदर्श्यतिरोहितमितिभावः) २४

॥२९॥

श्लोकाः १४/२४

एकएवातियातोऽहमद्राक्षंविपिनंमहत् ॥ घोरंप्रतिभयाकारंव्यालोलूकशिवाऽजिरम् १४ परिश्रांतेंद्रियात्माऽहंतृट्परीतोबुभुक्षितः॥ स्नात्वापीत्वाह्रदेनद्याउप
स्पृष्टोगतश्रमः १५ तस्मिन्निर्मनुजेऽरण्येपिप्पलोपस्थआश्रितः॥ आत्मनाऽऽत्मानमात्मस्थंयथाश्रुतमचिंतयम् १६ ध्यायतश्चरणांभोजंभावनिर्जितचेतसा॥
औत्कंठ्याश्रुकलाक्षस्यहृद्यासीन्मेशनैर्हरिः १७ प्रेमातिभरनिर्भिन्नपुलकांगोऽतिनिर्वृतः ॥ आनंदसंप्लवेलीनोनापश्यमुभयंमुने १८ रूपंभगवतोयत्तन्मनः
कांतंशुचाऽपहम् ॥ अपश्यन्सहसोत्तस्थेवैक्लव्याद्दुर्मनाइव १९ दिदृक्षुस्तदहंभूयःप्रणिधायमनोहृदि ॥ वीक्षमाणोऽपिनापश्यमवितृप्तइवातुरः २० एवंय
तंतंविजनेमामाहागोचरोगिराम् ॥ गंभीरश्लक्ष्णयावाचाशुचःप्रशमयन्निव २१ हंताऽस्मिन्जन्मनिभवान्नमाद्रष्टुमिहार्हति॥अविपक्वकषायाणांदुर्दर्शोऽहंकुयो
गिनाम् २२ सकृद्यद्दर्शितंरूपमेतत्कामायतेऽनघ ॥ मत्कामःशनकैःसाधुःसर्वान्मुंचतिहृच्छयान् २३ सत्सेवयादीर्घयातेजातामयिदृढामतिः ॥ हित्वाऽवद्य
मिमंलोकंगंतामज्जनतामसि २४

चूर्णिका

अतीत्यनलवेणुशरस्तंबादिभिर्व्यालोलूकशिवाभिश्चघोरंवनमेकएवाहंबुभुक्षितःसन्विवेश १४ ततस्तत्रनद्यांस्नात्वाऽऽचम्यजलंचपीत्वा १५ पिप्पलमूलेस्थितःसन् मनसिआ
त्मानमचिंतयम् १६ एवंध्यायतोमेहृदिहरिःप्रादुर्बभूव १७ ततआनंदमग्नःसन्नात्मानंपरंचनापश्यम् १८ ततोभगवतस्तद्रूपंपश्यन्सन्सहसोत्थितोस्मि १९ पुनस्तद्रूपंपश्यमा
नोपिनापश्यम् २० एवंवनेयतंतमामाकाशवागाह १९ अस्मिन्जन्मनिमांद्रष्टुंनार्हसि २२ तेमयिप्रीतयेइदंरूपंसकृद्दर्शितम् २३ सत्सेवयातवमयिदृढामतिर्जाता किंचइ
मंदेहंहित्वामत्पार्षदोभविष्यसि २४

॥२९॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रजानांसर्गेसृष्टौनिरोधेसंहारेऽपि प्रजासर्गस्यनिरोधइतिवा (नविपद्येतननश्येत) २५ तत्प्रसिद्धंमहद्भूतम् 'अस्यमहतोभूतस्यानिःश्वसितमेतद्यदृग्वेद'इत्यादिश्रुतेः । कीदृशम् ईश्वरंसर्वनियंतृनभसिलिंगंमूर्त्तिर्यस्यतन्नभोलिंगंसन्निहितमपिनलिंग्यतइत्यलिंगंतस्मैअदृष्टायभगवतेऽवनामंप्रणामंविदधेकृतवानहं । तेनानुकंपितःसन् २६ अनंतस्यनामानिपठन्ननवरतंगृणन् (हरेर्जगत्पतेर्नारायणेत्यादिकीर्तयन्भद्राणिमंगलानिकृतानिचरितानिस्मरन्) हतत्रपस्त्यक्तलज्जोविमत्सरोजातोऽस्मीतिशेषः २७ (हेब्रह्मन्एवंकृष्णेमतिर्यस्यतस्यअसक्तस्यविषयसक्तिरहितस्य) कालेस्वावसरेकालोमृत्युःप्रादुरभूदाविर्बभूव । अकस्मात्प्रादुर्भावेदृष्टांतः।तडिदिवेति सौदामनीतिविशेषणंस्फुटत्वप्रदर्शनार्थम्।तथाहि सुदामामालातत्रभवासौदामनीमालाकारत्यर्थः।यद्वा सुदामानामाकश्चित्स्फटिकपर्वतः ततः 'तेनैकदिगि' तिसूत्रेणाण्। स्फटिकादिमयपर्वतप्रांतेभवाहिविद्युदतिस्फुटाभवति तद्वदित्यर्थ।यद्वाः। (सौदामिनीव) तडिदित्यंतिकेइत्यर्थः ' तडिदित्यंतिकवधयो'रितिनैरुक्तस्मरणात् २८ प्रयुज्यमानेमयितामिति । अयमर्थः "हित्वाऽवद्यमिमंलोकंगंतामज्जनतामसी"तियाभागवतीभगवत्पार्षदरूपाशुद्धासत्त्वमयीतनुःप्रतिश्रुता तांप्रतिभगवतामयिप्रयुज्यमानेनीयमाने (सति) आरब्धंयत्कर्मतन्निर्वाणंसमाप्तंयस्यआरब्धकर्मणोनिर्वाणमेवनिर्वाणं (समाप्तिः)यस्येतिवा सः(पांचभौतिकः) पंचभूतात्मकोदेहोन्यपतत् अनेनपार्षदतनूनामकर्मारब्धत्वंशुद्धत्वंनित्यत्वमित्यादिसूचितंभवति २९ इदंत्रैलोक्यमादायोपसंहृत्योदन्वतएकार्णवस्यांभसिशयानेश्रीनारायणेशिशयिषोःशयनंकर्त्तुमिच्छोर्विभोर्ब्रह्मणोंऽतर्मध्यमनुप्राणंनिश्वासेनसहविविशेप्रविष्टोऽहं"ततोवतीर्यविश्वात्मादेहमाविश्यचक्रिणः । अवापवैष्णवींनिद्रामेकीभूयाथविष्णुने"तिकौर्मोक्तेः । स्वायनेंऽभसीतिपाठेस्वायने (भूते) स्वस्यायनेआश्रयेंऽभसिशिशयिषोर्ब्रह्मणइतिश्रीनारायणेन (सह) अभेदविवक्षयोक्तमित्यवगतव्यम् ३० (सहस्रयुगपर्यन्ते दिव्ययुगसहस्रपरिमिताब्रह्मणोरात्रिस्तदवसानेउत्थायेदंसिसृक्षतोब्रह्मणः) प्राणेभ्यइंद्रियेभ्यःअहंमरीचिमिश्रास्तन्मुख्याऋषयश्चजज्ञिरे ३१

॥३०॥

मतिर्मयिनिबद्धेयंनविपद्येतकर्हिचित् ॥ प्रजासर्गनिरोधेऽपिस्मृतिश्चमदनुग्रहात् २५ एतावदुक्त्वोपरराम तन्महद्भूतंनभोलिंगमलिंगमीश्वरम् ॥ अहंचतस्मैमहतांमहीयसेशीर्ष्णाऽवनामंविदधेऽनुकंपितः २६ नामान्यनंतस्यहतत्रपःपठन्गुह्यानिभद्राणिकृतानिचस्मरन् ॥ गांपर्यटंस्तुष्टमनागतस्पृहःकालंप्रतीक्षन्विमदोविमत्सरः २७ एवंकृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः ॥ कालःप्रादुरभूत्कालेतडित्सौदामनीयथा २८ प्रयुज्यमानेमयितांशुद्धांभागवतींतनुम् ॥ आरब्धकर्मनिर्वाणोन्यपतत्पांचभौतिकः २९ कल्पांतइदमादायशयानेंऽभस्युदन्वतः ॥ शिशयिषोरनुप्राणंविविशेंऽतरहंविभोः ३० सहस्रयुगपर्यंतउत्थायेदंसिसृक्षतः ॥ मरीचिमिश्राऋषयःप्राणेभ्योऽहंचजज्ञिरे ३१

श्लोकाः २५/३१

चूर्णिका

मदनुग्रहात्तेस्मृतिःप्रलयेऽपिननंक्ष्यति २५ इदमुक्त्वांऽतर्हितः तस्मैमनोविदधे २६ ततोऽहंतंध्यायन्गांपर्यटन्कालंप्रतीक्षमाणआसम् २७ ततःकालेमृत्युकालःप्रादुरभूत् २८ ततोमद्देहोऽपतत् २९ कल्पांतेशिशयिषोर्ब्रह्मणःमध्यंतच्छ्वासेनसहाहंप्राविशम् ३० पुनःकल्पादौइदंस्रष्टुमिच्छतःब्रह्मणःप्राणेभ्योमरीच्यादयऋषयोःहंचजातः ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

येकर्मिणस्तेवहिर्नयांति। येतपआदिभिर्ब्रह्मलोकंगतास्तेंऽतर्नयांति । अहंतुमहाविष्णोरनुग्रहादखंडितब्रह्मचर्यव्रतःसन्नंतर्बहिश्चपर्येमिपर्यटामि । क्वचिदप्यविघाताऽप्रतिहतागतिर्यस्यसः ३२
किमितिपर्यटसि। ईश्वराज्ञयालोकमंगलार्थमित्याह(देवेति)चतुर्भिः।देवेनेश्वरेणदत्ताम् स्वरा'निषादर्षभगांधारषड्जमध्यमधैवतपंचमा'इतिसप्त तएवब्रह्म ब्रह्माभिव्यंजकत्वात् (वेदरूपत्वाद्वा)
तेनविभूषिताम्।स्वतःसिद्धसप्तस्वरामित्यर्थः। मूर्छयित्वामूर्छनालापवतींकृत्वा ३३ स्वप्रयोजनमाह । प्रगायतइति (तीर्थपादेयस्यप्रियंश्रवःकीर्तिर्यस्यसः स्वचरितानिप्रगायतोममचेतसि । आ
हूतइवआकारितइव) ३४ परप्रयोजनमाह । एतद्धीति । मात्राविषयास्तेषांस्पर्शाभोगास्तेषामिच्छयाआतुराणिचित्तानियेषांतेषांहरिचर्याऽनुवर्णनंयदेतदेवभवसिंधौप्लवःपोतः । नकेवलंश्रुति
प्रामाण्येन(श्रुतः)किंत्वन्वयव्यतिरेकाभ्यांदृष्टएवेत्यर्थः ३५ एतदेवेत्युक्तमवधारणमनुभवेनद्रढयति । यमादिभिरिति यमादिभिस्तथानशाम्यति यद्वन्मुकुंदसेवयाऽद्धासाक्षादात्मामनःशा
म्यति । कथंचिन्मुकुंदसेवामात्रेणशाम्यतिकिंपुनस्तद्गुणवर्णनेनेतिभावः ३६ भवतः (आत्मतोषणं) मनःपरितोषकं (ममजन्मकर्मरहस्यं) चाख्यातं ३७ आमंत्र्यानुज्ञाप्यायादृच्छि
कःस्वप्रयोजनसंकल्पशून्यः ३८ हरिकथागायकनारदभाग्यंश्लाघते अहोइति । माद्यन्हृष्यन् । तंत्र्यावीणया ३९ ॥इतिश्रीभागवतेप्रथमस्कंधेभावार्थदीपिकायांटीकायांषष्ठोऽध्यायः ६ ॥छ॥
अथभागवतश्रोतुर्जन्मवक्तुंपरीक्षितः ॥ सुप्तबालवधाद्द्रौणेर्दंडःसप्तमउच्यते॥ १ ॥ तस्यनारदस्याभिप्रेतंश्रुतवान्सन् १

श्लोकाः ३२/१

अंतर्बहिश्चलोकांस्त्रीन्पर्येम्यस्कंदितव्रतः ॥ अनुग्रहान्महाविष्णोरविघातगतिःक्वचित् ३२ देवदत्तामिमांवीणांस्वरब्रह्मविभूषिताम् ॥ मूर्छयित्वाहरिकथां
गायमानश्चराम्यहम् ३३ प्रगायतःस्ववीर्याणितीर्थपादःप्रियश्रवाः ॥ आहूतइवमेशीघ्रंदर्शनंयातिचेतसि ३४ एतद्ध्यातुरचित्तानांमात्रास्पर्शेच्छयामुहुः ॥
भवसिंधुप्लवोदृष्टोहरिचर्याऽनुवर्णनम् ३५ यमादिभिर्योगपथैःकामलोभहतोमुहुः॥मुकुंदसेवयायद्वत्तथाऽऽत्माऽद्धानशाम्यति ३६ सर्वंतदिदमाख्यातंयत्पृष्टोऽ
हंत्वयाऽनघ ॥ जन्मकर्मरहस्यंमेभवतश्चात्मतोषणम् ३७ सूतउवाच ॥ एवंसंभाष्यभगवान्नारदोवासवीसुतम् ॥ आमंत्र्यवीणांरणयन्ययौयादृच्छिकोमुनिः
३८ अहोदेवर्षिर्धन्योऽयंयत्कीर्तिंशार्ङ्गधन्वनः ॥ गायन्माद्यन्निदंतंत्र्यारमयत्यातुरंजगत् ३९ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेव्यासनारदसंवादेषष्ठोऽ
ध्यायः ६ ॥ छ ॥ शौनकउवाच ॥ निर्गतेनारदेसूतभगवान्बादरायणः॥श्रुतवांस्तदभिप्रेतंततःकिमकरोद्विभुः १

चूर्णिका

सोऽहंश्रीहरेरनुग्रहात्क्वचिदप्यकुंठगतिःसन् ३२ देवदत्तांवीणांवादयन्हरिकथांगायमानःब्रह्मांडंभ्रमामि ३३ एवंगायतोममहृदिभगवान् आहूतइवदर्शनंयाति ३४ विष
यिणांसंसारसिंधुतरणेहरिभजनमेवप्लवोदृष्टः ३५ किंचहरिसेवयायथामनःशाम्यति तथायमादिभिर्न ३६ हेव्यासत्वयायत्पृष्टंतत्सर्वंव्याख्यातम् ३७सूतउवाच एवमाभाष्य
वीणांरणयन्नारदोययौ ३८ अहो अयंदेवर्षिर्धन्यः यतोवीणयाहरेःकीर्तिंगायन्नातुरंजगद्रमयति ३९॥इतिप्रथमेषष्ठः६ ॥ ॥छ॥ ॥ शौनकउवाच नारदेगतेसति व्यासः
किमकरोत् १

॥३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ब्रह्मनद्यांब्रह्मदैवत्यायांब्राह्मणैराश्रितायांच (वासरस्वत्यां) सत्रंकर्मवर्धयतीतितथा २ बदरीणांखंडेनसमूहेनमंडिते (जलमुपस्पश्य) मनःप्रणिदध्यौस्थिरीचकार । समाधिनाऽनुस्मरतद्विचेष्टितमितिनारदोपदिष्टंध्यानंकृतवानित्यर्थः ३ प्रणिहितेनिश्चले अत्रहेतुः । भक्तियोगेनामले पूर्वंप्रथमंपुरुषमीश्वरमपश्यत् । पूर्णमितिवापाठः । तदुपाश्रयामीश्वराश्रयांतदधीनांमायांचापश्यत् ४ ईशमायाकृतांजीवानांसंसृतिंचापश्यदित्याह । ययेति । ययासंमोहितःस्वरूपावरणेनविक्षिप्तः । परोऽपिगुणत्रयाद्व्यतिरिक्तोऽपितत्कृतं त्रिगुणत्वाभिमानकृतमनर्थंचकर्तृत्वादिकंप्राप्नोति ५ अनर्थमुपशमयतियोऽधोक्षजेसाक्षाद्भक्तियोगस्तंचापश्यत् । एतत्सर्वंस्वयंदृष्ट्वाएवमजानतोलोकस्यार्थेसात्वतसंहितांश्रीभागवताख्यांचक्रे तदनेनश्लोकत्रयेणभागवतार्थःसंक्षेपतोदर्शितः । एतदुक्तंभवति विद्याशक्त्यामायानियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञःसर्वशक्तिरीश्वरस्तन्माययासंमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्माजीवस्तस्यचेश्वरभक्त्यालब्धज्ञानेनमोक्षइति । तदुक्तंविष्णुस्वामिना " ह्लादिन्यासंविदाश्लिष्टःसच्चिदानंदईश्वरः । स्वाविद्यासंवृतोजीवःसंक्लेशनिकराकरः " तथा " सईशोयद्वशेमायासजीवोयस्तयाऽर्दितः । स्वाविर्भूतपरानंदःस्वाविर्भूतसुदुःखभूः । स्वादृगुत्थविपर्यासभवभेदजभीशुचः । यन्माययाजुषन्नास्तेतमिमंनृहरिंनुमः " इत्यादि ६ संहितायाअनर्थोपशामकत्वंदर्शयति । यस्यामिति । यस्यांवैश्रूयमाणायामेव किंपुनःश्रुतायामित्यर्थः ७ अनुक्रम्यशोधयित्वा (निवृत्तैनितरांरतमपिशुकमध्यापितवान्) ८ (सर्वत्रेहाऽमुत्रच)कस्यवाहेतोः बृहतींविततांम् ९

श्लोकाः २/९

सूतउवाच ॥ब्रह्मनद्यांसरस्वत्यामाश्रमःपश्चिमेतटे॥शम्याप्रासइतिप्रोक्तऋषीणांसत्रवर्द्धनः २ तस्मिन्स्वआश्रमेव्यासोबदरीखंडमंडिते॥आसीनोपउपस्पृश्य प्रणिदध्यौमनःस्वयम् ३ भक्तियोगेनमनसिसम्यक्प्रणिहितेऽमले ॥ अपश्यत्पुरुषंपूर्वंमायांचतदुपाश्रयाम् ४ ययासंमोहितोजीवआत्मानंत्रिगुणात्मकम् ॥ परोऽपिमनुतेऽनर्थंतत्कृतंचाभिपद्यते ५ अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजानतोविद्वांश्चक्रेसात्वतसंहिताम् ६ यस्यांवैश्रूयमाणायांकृष्णे परमपूरुषे ॥ भक्तिरुत्पद्यतेपुंसःशोकमोहजराऽपहा ७ ससंहितांभागवतींकृत्वाऽनुक्रम्यचात्मजम् ॥ शुकमध्यापयामासनिवृत्तिनिरतंमुनिः ८ शौनकउवाच ॥ सवैनिवृत्तिनिरतःसर्वत्रोपेक्षकोमुनिः ॥ कस्यवाबृहतीमेतामात्मारामःसमभ्यसत् ९

चूर्णिका

सूतउवाच सरस्वत्याःपश्चिमेतटेस्वेशम्याप्रासे आश्रमे २ व्यासःआचम्योपविष्टःसन्मनःदध्यौ ३ ततःमनसिप्रथमंपुरुषंतन्मायांचअपश्यत् ४ ययामोहितोजीवःअनर्थं प्राप्नोति ५ ततःअधोक्षजेभक्तियोगंचअपश्यत् एतत्सर्वंदृष्ट्वाएवंअजानतोलोकस्यहितायभागवतींसंहितांचक्रे ६ यस्यांवैश्रूयमाणायांकृष्णेपरमपूरुषे भक्तिरुत्पद्यते ७ पुंसःशोकमोहजरापहाएवंसंहितांकृत्वाशुकमध्यापयामास ८ शौनकउवाच हेसूतसःशुकःसर्वत्रोपेक्षकःआत्मारामोऽपिइमांबृहतींसंहितांकस्यहेतोरभ्यसत् ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

॥३३॥

निर्ग्रंथाःग्रंथेभ्योनिर्गताः तदुक्तंगीतासु "यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति । तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यचे"ति । यद्वा ग्रंथिरेवग्रंथःनिवृत्तहृदयग्रंथइत्यर्थः । ननुमुक्तानां किंभक्त्येत्यादिसर्वाक्षेपपरिहारार्थमाह । इत्थंभूतगुणइति (मुक्तैरप्यपेक्ष्यमाणागुणायस्यताद्दशः । हरिगुणरहस्यंपरमभक्तैरनुभवैकवेद्यंनतुवाच्यमिति) १० ननुभक्तिंकुर्वंतुनामएतच्छास्त्राभ्यासेशुकस्यकिंकारणमित्यतआह । हरेरिति (गुणैरक्षिप्ताआकृष्टामतिर्यस्य) अध्यगादधीतवान् । विष्णुजनाःप्रियायस्येति व्याख्यानादिप्रसंगेनतत्संगतिकामइतिभावः ११ एतेन 'तस्यपुत्रोमहा योगी' त्यादिनाशुकस्यव्याख्यानेप्रवृत्तिःकथमितियत्पृष्टंतस्योत्तरमुक्तम् । यदन्यत्पृष्टंपरीक्षितःप्रायोपवेशेनश्रवणंकथमितितस्यजन्ममहाश्चर्यमित्यादिनातस्योत्तरंवक्तुमाह। परीक्षितइति। विलायनंमुक्तिमृत्युंवा संस्थांमहाप्रस्थानम्। श्रीकृष्णकथानामुदयोयथाभवतितथा (वक्ष्ये) १२ तत्रपरीक्षितोजन्मनिरूपयिष्यन्नादौतावद्गर्भस्थएवाश्वत्थाम्नोब्रह्मास्त्रात्कृष्णेनरक्षितइतिवक्तुंकथांप्रस्तौति यदेत्यादिना । यदाद्रौणिरश्वत्थामाकृष्णासुतानांद्रौपदीपुत्रा णांशिरांस्युपाहरत्तदातन्माताऽरुदत्तांचसांत्वयन्किरीटमाल्यर्जुनआहेतितृतीयेनान्वयः । किमिति बालानांशिरांस्यानीतवानित्यपेक्षायामाह। मृधेयुद्धे यद्यपिपांडवाअपिकौरवाएवतथाऽपिसृंजयवंशजोधृष्टद्युम्नःपांडवानांसेनापतिरितिसृंजयानामित्युक्तम्। वीरगतिंस्वर्गम् । अथोअनंतरम् वृकोदरेणाऽविद्धायाःक्षिप्तायागदायाअभिमर्शेनाभिघातेनभग्नावूरुदंडौयस्यतथाभूतेधृतराष्ट्रपुत्रेदुर्योधनेसति १३ भर्तुर्दुर्योधनस्य स्मेतिवितर्के इत्येवंस्यादितिपश्यन् (स्वपतांसुप्तानामित्यर्थः तत्कर्म) तस्य (दुर्योधनस्य) तद्विप्रियमेवेतिवाक्यांतरम् । विप्रियत्वेहेतुः । जुगुप्सितमिति १४ घोरंदुःसहंयथाभवति (तथापरितप्यमाना) बाष्पस्यकलाभिः (अश्रूणां) बिंदुभिराकुलेअक्षिणी यस्याः(साऽरुदत्) किरीटस्यैकत्वेऽपितदग्राणांबहुत्वात्किरीटमालीत्युक्तम् (किरीटशब्देनतदग्राणिलक्ष्यंतेतन्मालास्तियस्येत्यर्थः) १५

श्लोकाः १०/१५

सूतउवाच॥आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे ॥ कुर्वंत्यहैतुकींभक्तिमित्थंभूतगुणोहरिः १० हरेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानंनित्यंविष्णुजनप्रियः ११ परीक्षितोऽथर ाजर्षेर्जन्मकर्मविलायनम् ॥ संस्थांचपांडुपुत्राणावक्ष्येकृष्णकथोदयं १२ यदामृधेकौरवसृंजयानांवीरेष्वथोवीरगतिंगतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरुदंडेधृतराष्ट्रपुत्रे १३ भर्तुःप्रियंद्रौणिरितिस्मपश्यन्कृष्णासुतानांस्वपतांशिरांसि ॥ उपाहरद्विप्रियमेवतस्यतज्जुगुप्सितंकर्मविगर्हयंति १४ माताशिशूनांनिधनंसुतानांनिशम्यघोरंपरितप्यमाना ॥ तदाऽरुदद्बाष्पकलाकुलाक्षीतांसांत्वयन्नाहकिरिटमाली १५

चूर्णिका ॥३३॥

सूतउवाच आत्मारामाअपिमुनयःहरौभक्तिंकुर्वंति यतःहरिःएवंप्रभावः १० अतएवहरेर्गुणाकृष्टमतिःशुकःमहदाख्यानमिदमधीतवान् ११ अथहेशौनक परीक्षितोजन्म कर्म मुक्तिंचपांडवानांमहाप्रस्थानंचकृष्णकथोदयंयथास्यात्तथावक्ष्ये १२ यदायुद्धेकौरवपांडवानांवीरेषुस्वर्गतेषुभीमगदयाभग्नोरौदुर्योधनेसति १३ तस्यप्रियंकुर्वन्नश्वत्थामानिंद्यमपिकर्मअकृत तथाहि शयानानांद्रौपदीपुत्राणांशिरांसिउपाहरत् १४ तच्छ्रुत्वाशोकेनरुदंतींद्रौपदींसांत्वयन् अर्जुनआह १५

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हेभद्रेतदातव) शुचःशोकाश्रूणि प्रमृजामिपरिमार्जयामि (मारोदीरित्यादिनातदात्वांसांत्वयामिनेदानींव्यर्थत्वादियर्थः । कदातदाह) यद्यदाब्रह्मबंधोर्ब्राह्मणाधमस्य आततायिनइति
“ अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैवषडेतेह्याततायिनइतिस्मरणादत्राततायीशस्त्रपाणिस्तेनचपुत्रहंतृत्वंलक्ष्यते” गांडीवाद्धनुषोमुक्तैर्विशिखैर्बाणैरुपाहरेत्वत्समीपमानया
मियच्छिरआक्रम्याऽऽसनंविधाय दग्धपुत्रासती(स्नास्यसितस्यशिरःछित्वैवतेनतवशोकापनयनंकरोमीत्यभिप्रायः) १६वल्गवोरम्याविचित्राजल्पाभाषणानितैःसोऽर्जुनः अच्युतएवमीत्रंसूतः
(यंता)चयस्यदंशितोव द्धकवचः उग्रंधनुश्चापंयस्य कपिर्हनुमान्ध्वजेयस्यसः गुरोःपुत्रं(अश्वत्थामानं)रथेनान्वाद्रवदन्वधावत् १७ आपतंतमाधावंतंसद्रौणिः(विलक्ष्य) कुमारहाबालघाती
उद्विग्नमनाःकंपितहृदयः प्राणपरीप्सुःप्राणान्लब्धुमिच्छुःनतुकीर्तिम् यावद्गंमयावद्गंतुंशक्यंतावदुर्व्यां पराद्रवदपलायत कोब्रह्मामृगोभूत्वासुतांरोहिद्भूतां(दुहितरं)गंतुमुद्यतःसन्रुद्रस्यभयाद्यथा
पलायतेस्म अर्कइतिपाठेवामनपुराणकथासूचिता । तथाहि।विद्युन्मालीनामकश्चिद्राक्षसोमाहेश्वरस्तस्मैरुद्रेणसौवर्णविमानंदत्तम् ततोऽसावर्कस्यपृष्ठतोभ्राम्यन्विमानदीप्त्याराविंविलोपितवान्
ततोऽर्केणनिजतेजोभिर्द्रावयित्वाताद्विमानंपातितम् तच्छ्रुत्वाकुपितेरुद्रेभयादर्कःपराद्रवत् ततोरुद्रस्यक्रूरदृष्ट्यादंदह्यमानःपतन्वाराणस्यांपतितोलोलार्कनाम्नाविख्यातः(जातः) इति १८ अशर
णंरक्षकरहितं(ऐक्षतापश्यत)ननुपलायनमेवरक्षकमस्ति । नतस्यापिकुंठितत्वादित्याह। श्रांतावाजिनोयस्यतम् । ब्रह्मशिरोऽस्त्रंब्रह्मास्त्रम् । द्विजात्मजइत्यदीर्घदर्शितामाह १९ (उपस्पृश्यापआ
चम्य) तद्ब्रह्मास्त्रम् समाहितःकृतध्यानःउपसंहारमजानतोऽपिसंधानेहेतुः प्राणकृच्छ्रइति २० ततोऽस्त्रात्सर्वतोदिशंप्रादुष्कृतंप्रकटीभूतंतेजोऽभिप्रेक्ष्य(समन्ताद्विलोक्य)ततःप्राणापदंचाभि
प्रेक्ष्य(अर्जुनःकृष्णमुवाच)२१

॥३४॥

श्लोकाः १६/२१

तदाशुचस्तेप्रमृजामिभद्रेयद्ब्रह्मबंधोःशिरआततायिनः ॥ गांडीवमुक्तैर्विशिखैरुपाहरेत्वाक्रम्ययत्स्नास्यसिदग्धपुत्रा १६ इतिप्रियांवल्गुविचित्रजल्पैःसःसांत्व
यित्वाऽच्युतमित्रसूतः ॥ अन्वाद्रवद्दंशितउग्रधन्वाकपिध्वजोगुरुपुत्रंरथेन १७ तमापतंतंसविलक्ष्यदूरात्कुमारहोद्विग्नमनारथेन ॥ पराद्रवत्प्राणपरी
प्सुरुर्व्यांयावद्गमंरुद्रभयाद्यथाकः १८ यदाशरणमात्मानमैक्षतश्रांतवाजिनम् ॥ अस्त्रंब्रह्मशिरोमेनआत्मत्राणंद्विजात्मजः १९ अथोपस्पृश्यसलिलंसंदधे
तत्समाहितः ॥ अजानन्नुपसंहारंप्राणकृच्छ्रउपस्थिते २० ततःप्रादुष्कृतंतेजःप्रचंडंसर्वतोदिशं ॥ प्राणापदमभिप्रेक्ष्यविष्णुंजिष्णुरुवाचह २१

चूर्णिका

हेभद्रेअहंयदाअश्वत्थाम्नःशिरोबाणैर्हरिष्ये तदातेशोकाश्रूणिमार्जयामि १६ इत्युक्त्वाकृष्णेनसहरथमारुह्यतंद्रौणिंअन्वधावत् १७ तदादूरादागच्छंतमर्जुनंदृष्ट्वाप्राणपरी ॥३४॥
प्सुरश्वत्थामाप्राद्रवत् १८ यदा स्वरक्षकः अन्योनास्तीतिऐक्षत तदा स्वरक्षणकर्तृब्रह्मास्त्रमेवेतिमेने १९ अथआचम्यप्राणसंकटेप्राप्तेसति अस्त्रोपसंहारमजानन्नपिब्रह्मास्त्रं
संदधे २० ततः तत्तेजःप्रेक्ष्य सभयोऽर्जुनःश्रीकृष्णमाह २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३६॥

प्रस्तुतंविज्ञापयितुंप्रथमंस्तौति कृष्णेतिचतुर्भिः । संसृतेर्हेतोर्दह्यमानानांतस्याः(त्वं संसृतेः) अपवर्गोऽपवर्जयिता नाशकइत्यर्थः २२ यतस्त्वमीश्वरःसाक्षात् । कुतः यतः प्रकृतेःपरःपुरुषः । तत्कुतः यतआद्यःकारणम् । कारणत्वेप्यविकारितामाह (चिच्छक्त्या) मायांव्युदस्याभिभूयकैवल्यरूपेआत्मन्येवस्थितइति २३ त्रिवर्गदाताऽपित्वमेवेत्याह । सइति । यस्त्वंमायामभिभूयस्थितःसएवमायाभिभूतस्यजनस्यधर्मादिफलमुपासितःसन्विधत्से वीर्येणप्रभावेन २४ तथाचानेनावतारेणतवसाधुपक्षपातोलक्ष्यतइत्याह । तथेति । किंभूभारहरणंसदिच्छामात्रेणभवतितत्राह । स्वानां ज्ञातानां (भक्तानां)अनुध्यानायच तथाऽनन्यभावानामेकांतभक्तानांच २५ एवंस्तुत्वाप्रस्तुतंविज्ञापयति । किमिति । किमात्मकमिदंकुतोवाआयातीति स्विद्वितर्के २६ इदंद्रोणपुत्रस्यब्राह्मस्त्रम् । तेनचप्राणबाधेप्राप्तेप्रदर्शितंकेवलम् । न(तु)तत्प्रयोगेकुशलइत्यर्थः । यतोऽसावुपसंहारंनवेद एतच्चत्वंतुवेत्थजानासि २७ प्रत्यवकर्शनंकृशत्वकरम् । निवर्तकमित्यर्थः। अतस्तदस्त्रतेजउन्नद्धमुत्कटंत्वंब्रह्मास्त्रतेजसैवजहिघातय । त्वत्प्रयुक्तंचास्त्रंतदुपसंहृत्यस्वयमुपशाम्येत् । यतस्त्वमस्त्रज्ञोऽसि २८ परेशत्ववस्तएववीरास्तान्रहंतीतितथाविधः फाल्गुनोऽर्जुनोऽपस्पृष्ट्वाऽऽचम्यतंश्रीकृष्णंपरिक्रम्यप्रदक्षिणीकृत्य ब्राह्मायब्रह्मास्त्रंनिवर्त्तयितुम् २९ ततश्चोभयोर्ब्रह्मास्त्रयोस्तेजसीशरैःसंवृतेसंवेष्टितेपरस्परंमिलित्वावबृधातेअवर्धेताम् । किंकृत्वा रोदसीद्यावापृथिव्यौखमंतरिक्षंचावृत्त्य यथाप्रलयेसंकर्षणमुखाग्निरुपरिस्थितोऽर्कश्चसंहत्यवर्धेतेतद्वत् ३० तयोर्द्रौणिफाल्गुनयोः (अस्त्रतेजःप्रदहद्दृष्ट्वा) तेनदह्यमानाःसांवर्तकंप्रलयाग्निमंसतमेनिरे ३१

श्लोकाः २२/३१

अर्जुनउवाच ॥ कृष्णकृष्णमहाभागभक्तानामभयंकर ॥ त्वमेकोदह्यमानानामपवर्गोऽसिसंसृतेः २२ त्वमाद्यःपुरुषःसाक्षादीश्वरःप्रकृतेःपरः ॥ मायांव्युदस्य चिच्छक्त्याकैवल्येस्थितआत्मनि २३ सएवजीवलोकस्यमायामोहितचेतसः ॥ विधत्सेस्वेनवीर्येणश्रेयोधर्मादिलक्षणम् २४ तथाऽयंचावतारस्तेभुवोभारजिहीर्षया ॥ स्वानांचानन्यभावानामनुध्यानायचासकृत् २५ किमिदंस्वित्कुतोवेतिदेवदेवनवेद्म्यहम् ॥ सर्वतोमुखमायातितेजःपरमदारुणम् २६ श्रीभगवानुवाच ॥ वेत्थेदंद्रोणपुत्रस्यब्राह्ममस्त्रंप्रदर्शितम् ॥ नैवासौवेदसंहारंप्राणबाधउपस्थिते २७ नह्यस्यान्यतमंकिंचिदस्त्रंप्रत्यवकर्शनम् ॥ जह्यस्त्रतेजउन्नद्धमस्त्रज्ञोह्यस्त्रतेजसा २८ सूतउवाच ॥ श्रुत्वाभगवताप्रोक्तंफाल्गुनःपरवीरहा ॥ स्पृष्ट्वाऽपस्तंपरिक्रम्यब्राह्मंब्राह्मायसंदधे २९ संहत्यान्योऽन्यमुभयोस्तेजसीशरसंवृते ॥ आवृत्यरोदसीखंचववृधातेऽर्कवह्निवत् ३० दृष्ट्वाऽस्त्रतेजस्तुतयोस्त्रीँल्लोकान्प्रदहन्महत् ॥ दह्यमानाःप्रजाःसर्वाःसांवर्तकममंसत ३१

चूर्णिका ॥३६॥

अर्जुनउवाच ॥ हेकृष्णकृष्णत्वंभक्तानामभयंकरः २२ प्रकृतेःपरःसर्वेषांहितकर्तासि २३ २४ अयंतेऽवतारोभुवोभारजिहीर्षयास्वभक्तानामनुध्यानायचास्ति २५ अतः सर्वतोमुखंदारुणंतेजइदंकिंकुतोवाआयाति तदहंनवेद्मि अतस्तद्वद २६ श्रीभगवानुवाच हेअर्जुनअश्वत्थाम्नइदंब्रह्मास्त्रंविद्धि २७ एतद्विघातकमन्यदस्त्रंनास्ति अतः ब्रह्मास्त्रेणैवेदंघातय २८ सूतउवाच अर्जुनःभगवदुक्तंश्रुत्वा आचम्यब्राह्मंब्राह्मायसंदधे २९ ततस्तयोस्तेजसीसंहत्य आकाशंभूमिंचावृत्त्यववृधाते ३० ततः तत्तेजसादह्यमानाःप्रजाःप्रलयंमेनिरे ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प्रजायाःजनस्योपप्लवंप्रलयं) लोकानां (भुवनानां)व्यतिकरंव्यत्ययंनाशमित्यर्थः । वासुदेवस्यमतंचालक्ष्यब्रह्मास्त्रद्वयमुपसंहृतवान् (नतुतदुपसंहृत्यस्त्रंपुनःप्रयुक्तवानिति) ३२ गौतमवशजागौतमीकृपीतस्याःसुतं (अश्वत्थामानं) अमर्षेणकोपेनताम्रेअक्षिणीयस्यसः निष्कृपत्वेदृष्टांतः।पशुंयथेति । तस्यबंधनंधर्मइत्यत्र(चसएव दृष्टांतः पशुमिति। यथाय ाज्ञिकः (पशुं) रशनयारज्ज्वा (बध्नाति) ३३ शोकरोषादियुक्तस्याप्यर्जुनस्यधर्मनिष्ठाख्यापनायश्रीकृष्णवाक्यंतदाहपङ्क्तिः। शिबिरायराजनिवेशाय (रिपुंनिनीषंतं) नेतुमिच्छंतं (अर्जुनं) प्रकुपितइवेति ३४ (ब्रह्मबंधुंद्विजाधमं)अनागसोनिरपराधान् ३५ रिपोरपिसुप्तस्यबालस्यचवधोनधर्मइत्यन्यार्थैर्दर्शयति। मत्तमिति । मत्तंमद्यादिना प्रमत्तमनवहितम् उन्मत्तंग्रहवातादिना जडमनुद्यमम् प्रपन्नंशरणागतम् विरथंभग्नरथम्(भीतंभयशीलं) ३६ तद्वधोदंडरूपः (अतः)तस्यैवश्रेयःपुरुषार्थः।यद्यतोदंडप्रायश्चित्तरहिताद्दोषात्सपुमानघोयातीति।तथाचस्मरंति " राजभिर्धृतदंडास्तुकृत्वापापानिमानवाः । विधूतकल्मषायांतिस्वर्गंसुकृतिनोयथे"ति३७(शृण्वतःसतःप्रतिश्रुतं प्रतिज्ञातंतदेवदर्शयति आहरिष्येइति) ३८ (भर्तुर्दुर्योधनस्यापिविप्रियंअपकीर्तिकरत्वात् ३९(परीक्षतापरीक्षमाणेनधर्मनीतिंआचारंवापार्थस्य)यद्यपिचोदितस्तथापिहंतुंनैच्छत् । आत्महनंपुत्रहंतारमपियतोमहान् ४० गोविंदःप्रियःसारथिर्यस्यसः , (स्वशिबिरंस्वनिवेशं) आत्मजान्शोचंत्यै(प्रियायै) ४१

श्लोकाः ३२/४१

प्रजोपप्लवमालक्ष्यलोकव्यतिकरंचतम् ॥ मतंचवासुदेवस्यसंजहारार्जुनोद्वयम् ३२ ततआसाद्यतरसादारुणंगौतमीसुतम् ॥ बबंधामर्षताम्राक्षःपशुंरशनयायथा ३३ शिबिरायनिनीषंतंरज्ज्वाबध्वारिपुंबलात् ॥ प्राहार्जुनंप्रकुपितोभगवानंबुजेक्षणः ३४ मैनंपार्थाऽर्हसित्रातुंब्रह्मबंधुमिमंजहि॥ योऽसावनागसःसुप्तानवधीन्निशिबालकान् ३५ मत्तंप्रमत्तमुन्मत्तंसुप्तंबालंस्त्रियंजडम् ॥ प्रपन्नंविरथंभीतंनरिपुंहंतिधर्मवित् ३६ स्वप्राणान्यःपरप्राणैःप्रपुष्णात्यघृणःखलः॥ तद्वधस्तस्यहिश्रेयोयद्दोषाद्यात्यधःपुमान् ३७ प्रतिश्रुतंचभवतापांचाल्यैशृण्वतोमम ॥ आहरिष्येशिरस्तस्ययस्तेमानिनिपुत्रहा ३८ तदसौवध्यतांपापआतताय्यात्मबंधुहा ॥ भर्तुश्चविप्रियंवीरकृतवान्कुलपांसनः ३९ एवंपरीक्षताधर्मंपार्थःकृष्णेनचोदितः॥ नैच्छद्धंतुंगुरुसुतंयद्यप्यात्महनंमहान् ४० अथोपेत्यस्वशिबिरंगोविंदप्रियसारथिः ॥ न्यवेदयत्तंप्रियायैशोचंत्याआत्मजान्हतान् ४१

चूर्णिका ॥३६॥

तदाप्रजानाशंदृष्ट्वाश्रीकृष्णमतंचज्ञात्वा अर्जुनोऽस्त्रद्वयंसंजहार ३२ ततःक्रुद्धोऽर्जुनःरशनयापशुमिवतंबध्वा ३३ ततःस्वशिबिरंप्रतिनेतुमिच्छंतमर्जुनंभगवानाह ३४ हेपार्थ असौयतःसुप्तान्बालानवधीत् अतएनंजहि ३५ मत्तंप्रमत्तमुन्मत्तंसुप्तंबालंस्त्रियंजडम् शरणागतंविरथंभीतंरिपुमपिधर्मवित्नहंति ३६ किंच यःपरप्राणैःस्वप्राणान्पुष्णाति तस्यवधःतस्यैवश्रेयः यतः तद्दोषेणनरकंयाति३७ त्वया च अस्यशिरोहरामीतिद्रौपद्यैप्रतिश्रुतं ३८ अतः ऽसौपापोवध्यताम् ३९ एवंकृष्णेनचोदितोप्यर्जुनःद्रौणिंहंतुंनैच्छत् ४० अथस्वशिबिरमेत्यशोचंत्यैद्रौपद्यैद्रौणिंन्यवेदयत् ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तथापरिभवेनाहृतमानीतम् । कर्मणोजुगुप्सितेनदोषेण (भावेनिष्टा) अवाङ्मुखम् अधोवदनं(अपकरोतीत्यपकृत्तं)अपकृतमपकारिणम् कृपयानिरीक्ष्य वामःशोभनःस्वभावोयस्याःसा कृष्णाद्रौपदीननाम ननामचोवाचचेतिचकाराभ्यांसंभ्रमःसूचितः ४२ (अस्य) बंधनेनानयनं (असहंती) असहमाना (मुच्यतांमुच्यतामित्याद्युवाच) ४३ सरहस्योगोप्यमंत्रसहित विसर्गोऽस्त्रप्रयोगः । उपसंयमउपसंहारः ताभ्यांसहितोऽस्त्रसमूहश्च ४४ (प्रजारूपेणवर्तते'आत्मावैपुत्रनामासी'तिश्रुतेः) किंच तस्यद्रोणस्यात्मादेहस्तस्यार्धंकृपीआस्ते । अर्धत्वेहेतुः। पत्नी 'अर्धोवाएपआत्मनोयत्पत्नी'तिश्रुतेः 'जायापतीअग्निमादधीयाता मि'तिश्रुतेरुभयोरेककारत्वावगमाच्च । ननुभर्तरिमृतेसाकथंजीवतितत्राह । नान्वगाद्भर्तारम् यतोवीरसूःपुत्रवती ४५ (हेधर्मज्ञ) तत्तस्माद्गौरवंगुरोः(इदं)कुलंभवद्भिःकर्तृभिर्वृजिनंदुःखंप्राप्तुंनार्हति । किंतुपूज्यंवंद्यंच ४६ (पतिरेवदेवतायस्याःसायथा) मृतवत्सामृतपुत्रा (अहंरोदिमितथासामारोदीत्) ४७ विपक्षेदोपमाह । यैरिति । (यैःकोपितंकोपंप्रापितं) तेपांराजन्यानांकुलंकर्म । कथंभूतम् सानुबंधंसपरिवारम् (कथंभूतं) शुचाशोकेनार्पितंव्याप्तंच । ब्रह्मकुलंकर्तृप्रदहति ४८ धर्म्यामि त्यादयोवचसःपड्गुणाःपूर्वश्लोकषट्केद्रष्टव्याः । तत्रधर्म्यंधर्मादनपेतंमुच्यतांमुच्यतामिति न्याय्यंन्यायादनपेतंसरहस्यइत्यादि सकरुणंतस्यात्मनोऽर्द्धमिति निर्व्यलीकं (निष्कपटं) तद्धर्मज्ञेति समं (पक्षपातशून्यं) मारोदीदितिदुःखसाम्योक्तेः महत् कोपितमितिनिष्ठुरोक्त्याहितोपदेशात् । एवंभूतंराज्ञ्याः (द्रौपद्याः) वचोहेद्विजाःराजाप्रत्यनंददनुमोदितवान् ४९ नकुलादयश्चप्रत्यनंदन् । युयुधानःसात्यकिः ५०

तथाऽऽहृतंपशुवत्पाशबद्धमवाङ्मुखंकर्मजुगुप्सितेन ॥ निरीक्ष्यकृष्णाऽपकृतंगुरोःसुतंवामस्वभावाकृपयाननामच ४२ उवाचचासहंत्यस्यबंधनानयनंसती ॥ मुच्यतांमुच्यतामेषब्राह्मणोनितरांगुरुः ४३ सरहस्योधनुर्वेदःसविसर्गोपसंयमः ॥ अस्त्रग्रामश्चभवताशिक्षितोयदनुग्रहात् ४४ सएषभगवान्द्रोणःप्रजारूपेणवर्त्तते ॥ तस्यात्मनोऽर्द्धंपत्न्यास्तेनान्वगाद्वीरसूःकृपी ४५ तद्धर्मज्ञमहाभागभवद्भिर्गौरवंकुलम्॥वृजिनंनार्हतिप्राप्तुंपूज्यंवंद्यमभीक्ष्णशः ४६ मारोदीदस्यजननी गौतमीपतिदेवता ॥ यथाऽहंमृतवत्सार्त्तारोदिम्यश्रुमुखीमुहुः ४७ यैःकोपितंब्रह्मकुलंराजन्यैरकृतात्मभिः॥तत्कुलंप्रदहत्याशुसानुबंधंशुचाऽर्पितम् ४८ सूतउवाच ॥ धर्म्यंन्याय्यंसकरुणंनिर्व्यलीकंसमंमहत् ॥ राजाधर्मसुतोराज्ञ्याःप्रत्यनंदद्वचोद्विजाः ४९ नकुलःसहदेवश्चयुयुधानोधनंजयः ॥ भगवान्देवकीपुत्रोयेचान्येयाश्चयोषितः ५०

तदाद्रौपदीतथाआनीतमश्वत्थामानंदृष्ट्वाप्रणम्य ४२ एषमुच्यतांमुच्यतामितिआह ४३ किंच यतस्त्वयाअस्यपितुःसकाशादस्त्रग्रामःशिक्षितः ४४ सएवद्रोणःप्रजारूपेणाऽऽस्ते तस्यस्त्रीकृपीआस्ते यतःवीरसूः ४५तद्गुरोःकुलंपूज्यंदुःखयितुंनार्हसि ४६ अपिचयथाऽहंमृतवत्सार्तारोदिमि तथाऽस्यमाताकृपीमारोदीत् ४७ यैःराजभिःब्रह्मकुलंकोपितं तत्तेषांसानुबंधंकुलंदहति ४८ सूतउवाच एवंधर्म्यंन्याय्यंचतस्याःवचःश्रुत्वाधर्मादयःश्रीकृष्णश्चतांप्रशशंसुः ४९ ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(धनंजयोऽर्जुनः) तस्यतथाविधस्यद्रौणेर्वधएवश्रेष्ठः । अन्यथाऽस्यनरकपातप्रसंगात् ! तदाह । नभर्तुरिति । अहन्जघान ५१ चतुर्भुजोक्तेरयंभावः । भीमेतंहंतुंप्रवृत्तेद्रौपद्यांचसहसातन्नि
वारणेप्रवृत्तायामुभयोःसंवारणायाविष्कृतचतुर्भुजइति । संदिहनास्यसख्युरर्जुनस्य (वदनंविलोक्याह) ५२ वधार्हणोवधार्हः मयैवशास्त्रकृताब्राह्मणोनहंतव्यः तथा “आततायिनमा
यांतमपिवेदांतपारगम् । जिघांसंतंजिघांसीयान्नतेनब्रह्महाभवेदि ” तिचवदता तदुभयमप्यनुशासनंपरिपालय ५३ तवचप्रतिज्ञांपूरयेत्याह । कुर्विति । प्रियांसांत्वयतात्वयायत्प्रतिश्रुतंहननं
तच्चसत्यंकुरु (अस्माकंच) प्रियंचकुरु । मह्यंमम तत्रवधेभीमस्यप्रियंभवति । अवधेद्रौपद्याद्वयेमह्यंममश्रीकृष्णस्य ५४ हार्दमभिप्रायमाज्ञायज्ञात्वा नह्यशक्यमुभयंविदध्यादतोस्याय
मभिप्रायइतिज्ञात्वेत्यर्थः । असिनाखड्गेन मूर्द्धन्यंमूर्द्धनिजातम् सहमूर्द्धजंसकेशंमणिम् ५५ (तेजसा) मणिनाचहीनं निरयापयन्निःसारितवान् ५६ अनेनश्रीकृष्णोक्तंसर्वसंपादितमित्या
॥३८॥ ह । वपनमिति।अन्योदैहिकोवधोब्रह्मबंधूनांनविहितः किंतुवपनादिलक्षणइति ५७ (स्वानां ज्ञातीनांयुद्धेमृतानां) निर्हरणंदाहार्थनयनम् ५८ ॥ ॥ इतिप्रथमस्कंधे भावार्थ
दीपिकायांटीकायां सप्तमोऽध्यायः ७ ॥ ॥ छ ॥ ॥

श्लोकाः ५१/५८

तत्राऽऽहाऽमर्षितोभीमस्तस्यश्रेयान्वधःस्मृतः ॥ नभर्तुर्नात्मनश्चार्थेयोऽहन्सुप्तान्शिशून्वथा ५१ निशम्यभीमगदितंद्रौपद्याश्चचतुर्भुजः ॥ आलो
क्यवदनंसख्युरिदमाहहसन्निव ५२ ॥ श्रीभगवानुवाच ॥ ब्रह्मबंधुर्नहंतव्यआततायीवधार्हणः ॥ मयैवोभयमाम्नातंपरिपाह्यनुशासनम् ५३ कुरुप्रतिश्रु
तंसत्यंयत्तत्सांत्वयताप्रियाम् ॥ प्रियंचभीमसेनस्यपांचाल्यामह्यमेवच ५४ सूतउवाच ॥ अर्जुनःसहसाऽऽज्ञायहरेर्हार्दमथासिना ॥ मणिंजहारमूर्धन्यंद्विज
स्यसहमूर्धजम् ५५ विमुच्यरशनाबद्धंबालहत्याहतप्रभम् ॥ तेजसामणिनाहीनंशिबिरान्निरयापयत् ५६ वपनंद्रविणादानंस्थानान्निर्यापणंतथा ॥ एषहिब्र
ह्मबंधूनांवधोनान्योऽस्तिदैहिकः ५७ पुत्रशोकातुराःसर्वेपांडवाःसहकृष्णया ॥ स्वानांमृतानांयत्कृत्यंचक्रुर्निर्हरणादिकम् ५८॥इतिश्रीभा०म०प्र०द्रौणिनिग्र
होनामसप्तमोऽध्यायः ७ ॥ छ ॥ ॥

चूर्णिका

ततःक्रुद्धोभीमआह अहोअनेनव्यर्थबालवधःकृतः अतोऽस्यवधएवश्रेयान् ५१ इतिभीमस्यद्रौपद्याश्चवचनंश्रुत्वाऽर्जुनस्यमुखमालोक्यश्रीकृष्णआह ५२ श्रीकृष्णउवा
च हेअर्जुनवधार्होऽपिब्राह्मणोनहंतव्यइतिमयैवकथितंतत्प्रतिपालय ५३ उतचस्वप्रतिज्ञांममपांचाल्याःभीमसेनस्यचप्रियंथातथाकुरु ५४ सूतउवाच अर्जुनःभगवद
भिप्रायंज्ञात्वाऽश्वत्थाम्नःसकेशंशिरोगतंमणिंजहार ५५ ततोबद्धमश्वत्थामानंमुक्त्वातेजोहीनंतंशिबिरात्निःसारितवान् ५६ वपनंद्रविणादानंस्थानान्निर्यापणंतथा ब्राह्मणा ॥३८॥
धमानांअयमेववधः नदैहिकइति ५७ ततःपांडवाःद्रौपद्यासहशोकार्ताःसंतःमृतबालानांऔर्ध्वदेहिकंचक्रुः५८॥ इतिप्रथमेसप्तमः ॥ ॥छ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अष्टमेकुपितद्रौणेरस्त्राद्रक्षापरीक्षितः ॥ श्रीकृष्णेनस्तुतिःकुंत्याराज्ञःशोकश्चकीर्त्यते ॥ १ ॥ तेपांडवाःसंपरेतानांमृतानांगंगायामुदकंदातुंसकृष्णाःश्रीकृष्णेनसहिताःस्त्रियःपुरस्कृत्याऽग्रतः कृत्वा तस्मिन्कार्येस्त्रीपुरःसरत्वविधानात् (ययुः)१(तेसर्वे) निनीयदत्वा हरिपादाब्जरजोभिःपूता(पवित्राः) यासरिद्गंगातस्याजले पुनर्ग्रहणादादावपिस्नाताइतिगम्यते २ कुरुपतिं युधिष्ठिरम् सहानुजंभीमादिभिःसहितम्(तथाधृतराष्ट्रगांधारींचतत्पत्नींपृथांकुंतींकृष्णांच)पुत्रशोकार्त्तामितितिसृणांविशेषणं ३ (हताबंधवोदायादादुर्योधनादयोयेषांतान्शोकेव्याप्तान्) मुनिभिःसहितोमाधवः (नास्तिप्रतिक्रियाप्रतिकारोनिवारणंयस्यास्तां) ४ कितवैर्धूर्त्तैर्दुर्योधनादिभिः द्रौपद्याः (कचस्पर्शेन) कचग्रहणादिनाक्षतंनष्टमायुर्येषांतान् या जयित्वेत्यादिभाविकथासंक्षेपः (उत्तमकल्पकैःमुख्यकल्पकैः प्रधानविधिनेत्यर्थः) शतमन्योःशतक्रतोरिव ६ शैनेयःशिनेर्नप्तासात्यकिस्तेनचोद्धवेनचसंयुतः ७ (हेब्रह्मन् शौन क द्वारकांगंतुंकृतनिश्चयोभगवान्) रथमास्थितःसन्नुत्तरांपरीक्षिन्मातरम् भयेनविह्वलांव्याकुलां अभिमुखंधावंतीमुपलेभेददर्श ८ उत्तराश्रीकृष्णंप्रार्थयते स्मपाहिपाहीतिद्वाभ्यांअन्य स्तुप्रार्थनायोग्योनास्तीत्याह । त्वत्त्वत्तोऽन्यमभयंभयरहितं (नास्ति भयंयस्मादितिवा । भयहरमित्यर्थः) नपश्यामि यत्रलोकेपरस्परम् (कुतः) अन्योऽन्यमृत्युर्भवति ९

॥३९॥

श्लोकाः १/९

सूतउवाच॥अथतेसंपरेतानांस्वानामुदकमिच्छताम्॥दातुंसकृष्णागंगायांपुरस्कृत्यययुःस्त्रियः१तेनिनीयोदकंसर्वेविलप्यचभृशंपुनः॥आप्लुताहरिपादाब्जरजः पूतसरिज्जले २तत्रासीनंकुरुपतिंधृतराष्ट्रंसहानुजम्॥गांधारींपुत्रशोकार्त्तांपृथांकृष्णांचमाधवः३सांत्वयामाससमुनिभिर्हतबंधूंश्छुचाऽर्पितान्॥भूतेषुकालस्यगतिं दर्शयन्नप्रतिक्रियाम्४साधयित्वाऽजातशत्रोःस्वंराज्यंकितवैर्हृतम्॥घातयित्वाऽसतोराज्ञःकचस्पर्शक्षतायुषः५याजयित्वाऽश्वमेधैस्तंत्रिभिरुत्तमकल्पकैः॥त द्यशःपावनंदिक्षुशतमन्योरिवातनोत् ६ आमंत्र्यपांडुपुत्रांश्चशैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैःपूजितैःप्रतिपूजितः ७ गंतुंकृतमतिर्ब्रह्मन्द्वारकांरथ मास्थितः ॥ उपलेभेऽभिधावंतीमुत्तरांभयविह्वलाम् ८ पाहिपाहिमहायोगिन्देवदेवजगत्पते ॥ नान्यंत्वदभयंपश्येयत्रमृत्युःपरस्परम् ९

चूर्णिका

सूतउवाच अथतेपांडवाःस्त्रियःपुरस्कृत्यमृतानामुदकदानार्थंकृष्णेनसहगंगांजग्मुः १ ततः उदकंदत्वाविलापंचकृत्वास्नात्वाचस्थितवंतः २ तत्रधृतराष्ट्रंगांधारींद्रौपदींपृथांभी मादिसाहितंयुधिष्ठिरंच ३ ऋषिभिःसहकृष्णःकालस्यचगतिंदर्शयन्सांत्वयामास ४ ततोऽसतोनृपान्घातयित्वायुधिष्ठिरस्यराज्यंसंसाध्य ५ त्रिभिरश्वमेधैर्धर्मराजंयाज यित्वातद्यशःशतमन्योरिवदिक्षुविस्तार्य ६ पांडवान्पृष्ट्वाउद्धवसात्यकियुतःद्वैपायनादिभिःपूजितश्चश्रीकृष्णोद्वारकांगंतुंरथमारुरोह ७ एतस्मिन्नवसरंधावंतीउत्तराभी तासतीआह ८ हेकृष्णकृष्ण मांपाहि ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रप्रस्तुतंभयमावेदयति अभिद्रवत्यभिमुखमायाति । तप्तमायसंलोहमयंशल्यंयस्यसः अतिकार्पण्येनाह । काममिति । कामंयथेच्छम् १० (उपधार्यश्रुत्वा पार्थकृतेन) पराभवेनातिकु
पितस्यद्रौणेरपांडवंपांडवशून्यमिदंविश्वंकर्तुंप्रवृत्तंब्रह्मास्त्रमबुध्यत ११ अतएववहुमुखंतदागतमित्याह ।तर्ह्येवेति । तर्ह्येवतदानीमेव (हेमुनिश्रेष्ठआत्मनोऽभिमुखानालक्ष्यतत्प्रतीकारार्थं
मस्त्राणिजगृहुः) १२ (तथाऽपि तस्य) ब्रह्मास्त्रस्यास्त्रांतरैरनिवर्त्यत्वात् (तेषां) दुष्परिहरंव्यसनं (आपत्तिं) वीक्ष्य अनन्यविषयआत्मा (अंतःकरणं) येषां (तेषां) स्वैक
निष्ठानां (रक्षणंव्यधात्) इत्यर्थः१३ (तथा) वैराट्याउत्तरायाअंतस्स्थःसन्गर्भमावृतवान्तत्रहेतुः यतआत्माऽंतर्यामी योगेश्वरइति(तु)बहिस्स्थस्यापिप्रवेशघटनार्थमुक्तं । कुरूणांतं
तवेसंतानाय पांडवानामपिकुरुवंशजत्वादेवमुक्तं १४ अमोघमप्रतिक्रियंच (तथापिविष्णोस्तेजःप्राप्य)समशाम्यत्संशांतमासीत् (हेभृगूद्वहशौनक) १५ एतद्ब्रह्मास्त्रशमनमाश्चर्यमामंस्था
नमन्यस्व इदंजगत् १६ (ब्रह्मतेजसोब्रह्माद्विनिर्मुक्तैः) कृष्णयाचसह (पृथाकुंती) १७ त्वात्वांनमस्येनमस्करोमि ननुकनिष्ठंमांकथंनमस्करोपितत्राह । आद्यंपुरुषंकु
तः प्रकृतेःपरं । तत्कुतः । ईश्वरंप्रकृतेरपिनियंतारं अतएवसर्वभूतानामंतर्बहिश्चपूर्णत्वेनावस्थितं तथाऽप्यलक्ष्यं १८ तत्र(अलक्ष्यत्वे)हेतुः मायैवजवनिकातिरस्कारिणीतयाआच्छन्नंप्र
तिच्छन्नंअतोऽहमज्ञाभक्तियोगानभिज्ञाकेवलंनमस्यामि अधः अक्षजमिंद्रियजंज्ञानंयस्मात्तं(स्वतःसिद्धज्ञानं)अव्ययमपरिच्छिन्नं तत्प्रपंचः मूढदृशादेहाभिमानिनापुंसात्वंनलक्ष्यसे (नाट्यधरः
स्त्र्यादिवेषधारीनटोयथा) १९

अभिद्रवतिमामीशशरस्तप्तायसोविभो॥कामंदहतुमांनाथमामेगर्भोनिपात्यताम् १०सूतवाच॥उपधार्यवचस्तस्याभगवान्भक्तवत्सलः ॥अपांडवमिदंकर्तुंद्रौणेर
स्त्रमबुध्यत११ तर्ह्येवाथमुनिश्रेष्ठपांडवाःपंचसायकान् ॥ आत्मनोऽभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः १२ व्यसनंवीक्ष्यतत्तेषामनन्यविषयात्मनाम्॥सुदर्श
नेनस्वास्त्रेणस्वानांरक्षांव्यधाद्विभुः १३ अंतस्थःसर्वभूतानामात्मायोगेश्वरोहरिः॥स्वमाययावृणोद्गर्भंवैराट्याःकुरुतंतवे १४ यद्यप्यस्त्रंब्रह्मशिरस्त्वमोघंचाप्र
तिक्रियम् ॥ वैष्णवंतेजआसाद्यसमशाम्यद्भृगूद्वह १५ मामंस्थाह्येतदाश्चर्यंसर्वाश्चर्यमयेऽच्युते॥यइदंमाययादेव्यासृजत्यवतिहंत्यजः १६ ब्रह्मतेजोविनिर्मुक्तै
रात्मजैःसहकृष्णया ॥ प्रयाणाभिमुखंकृष्णमिदमाहपृथासती १७ कुंत्युवाच ॥ नमस्येपुरुषंत्वाद्यमीश्वरंप्रकृतेःपरम् ॥ अलक्ष्यंसर्वभूतानामंतर्बहिरवस्थि
तं १८ मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम्॥नलक्ष्यसेमूढदृशानटोनाट्यधरोयथा १९

श्लोकाः १०/१९

चूर्णिका

अयंतप्तायसइवशरःमांदग्धुमभियाति सतुमांकामंदहतु परंमेगर्भोमापततु १०सूतउवाच इतितस्यादीनंवचःश्रुत्वाइदंद्रौणेरस्त्रमपांडवंभूतलंकर्तुंप्राप्तामतिज्ञातिवान्
११ तदैवपांडवाःस्वोपरिआपततःपंचशरानालक्ष्य अस्त्राणिआददुः १२ भक्तवत्सलःश्रीकृष्णःस्वानांतेषांसंकटंवीक्ष्यसुदर्शनेनतद्रक्षामकरोत् १३ कुरुवंशवृद्ध्यर्थं
स्वमाययाउत्तरायाःगर्भमावृणोत् १४ हेशौनक ब्रह्मास्त्रममोघमपितद्विष्णुतेजसाशांतिमगमत् १५ एतत्सृष्ट्यादिकर्तरिश्रीकृष्णेआश्चर्यंन १६ ततोब्रह्मास्त्रवि
निर्मुक्तैःपांडवादिभिःसहकुंतीप्रयाणाभिमुखंकृष्णंस्तौति १७ कुंत्युवाच हेभगवन् ईश्वरंअव्ययंयोगिनामपिदुर्ज्ञेयंत्वांनमस्ये १८ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किंच परमहंसानामात्मानात्मविवेकिनांततोमुनीनांमननशीलानामपिततश्चामलात्मनांनिवृत्तरागादीनामपितथा (तादृशेन) तेननिजमहिम्नानलक्ष्यसेऽतोभ[illegible]गंविधातुंत्वांव यंस्त्रियःकथंहिपश्येम । यद्वा परमहंसादीनामपिभक्तियोगविधानार्थत्वां आत्मारामाणाम् (मुनीनां) अचिंत्यनिजगुणैराकृष्यभक्तियोगंविधातुंकारयितुमवतीर्णमित्यर्थः (भ[illegible]योगविधानमे वार्थः।प्रयोजनंयस्यतमितिवा२०ज्ञानभक्त्योरशक्यत्वमुक्त्वापुनःकेवलंनमस्करोति कृष्णायेतिद्वाभ्यां२१पंकजंनाभौयस्य(तस्मै)पंकजानांमालाऽस्तियस्य।पंकजवत्प्रसन्नेनेत्रेयस्य। पंकजांकितावं घ्रीयस्यतस्मै२२तत्कृतोपकारानानुस्मरति।यथेतिद्वाभ्यां।अयमर्थः।मातृतोऽपिमय्यधिकातवप्रीतिः तथाहि।हेहृषीकेश यथादेवकीकंसेनरुद्धात्वयाविमोचिता।अहंचतथैवकिंविमोचितेतिकाकामहा न्विशेषउक्तः।तंदर्शयति सा(च)अतिचिरंरुद्धासतीतस्मादेवसकृद्विमोचिता तथाशुचाऽर्पिताचसती नचतस्याःपुत्रारक्षिताःअस्तिचान्योनाथस्तस्याः अहंतुविपद्गणात्तत्रापिमुहुः शीघ्रंचसात्मजाच त्वयैवचनाथेनेति२३ विपद्गणमेवदर्शयति विषाद्वीमस्यविषमोदकदानात् महाग्नेर्जतुगृहदाहात् । पुरुषादाहिडिंबादयोराक्षसास्तेषांदर्शनात्।असत्सभायाद्यूतस्थानात् अभितोरक्षिताआस्म अभवाम । (बहुवचनमात्मजाभिप्रायेण) २४ (नोऽस्माकंविपदआपत्तयः । यत्रयत्र) यत्यासुविपत्सु कीदृशंदर्शनं नास्तिपुनरपिभवदर्शनं (संसारसंबन्धो) य स्मात् २५ संपदस्तुश्रेयःपरिपंथिन्यइत्याह । जन्मसत्कुले (श्रुतंशास्त्रश्रवणं ऐश्वर्यंनियंतृत्वं श्रीःसंपत्) जन्मादिभिरेधमानः (अभिवर्धमानः) मदोयस्यसः । अभि धातुंश्रीकृष्णगोविंदेतिवक्तुमपि ।अकिंचनानांएकांतगोचरंविषयभूतम्२६प्रस्तुतमनोरथपूरणायपुनःप्रणमति।अकिंचनाभक्ताएववित्तंसर्वस्वंयस्यतस्मै।ततःकिंनिवृत्तागुणवृत्तयोधर्मार्थकामविषयाः (त्रिगुणात्मकधीवृत्तयः)यस्मात्तस्मै।तत्कुतःआत्मारामाय।तत्कुतः शांतायरागादिरहिताय।किंच कैवल्यपतयेकैवल्यंदातुंसमर्थाय २७

श्लोकाः २०/२७

तथापरमहंसानांमुनीनाममलात्मनां ॥ भक्तियोगविधानार्थंकथंपश्येमहिस्त्रियः २० कृष्णायवासुदेवायदेवकीनंदनायच ॥ नंदगोपकुमारायगोविंदायनमो नमः २१ नमःपंकजनाभायनमःपंकजमालिने ॥ नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २२ यथाहृषीकेशखलेनदेवकीकंसेनरुद्धाऽतिचिरंशुचाऽर्पिता ॥ विमो चिताऽहंचसहात्मजाविभोत्वयैवनाथेनमुहुर्विपद्गणात् २३ विषान्महाऽग्नेःपुरुषाददर्शनादसत्सभायावनवासकृच्छ्रतः ॥ मृधेमृधेनेकमहारथास्त्रतोद्रौण्यस्त्रत श्चस्महरेऽभिरक्षिताः २४ विपदःसंतुनःशश्वत्तत्रतत्रजगद्गुरो ॥ भवतोदर्शनंयत्स्यादपुनर्भवदर्शनम् २५ जन्मैश्वर्यश्रुतश्रीभिरेधमानमदःपुमान् ॥ नैवा र्हत्यभिधातुंवैत्वामकिंचनगोचरम् २६ नमोऽकिंचनवित्तायनिवृत्तगुणवृत्तये ॥ आत्मारामायशांतायकैवल्यपतयेनमः २७

चूर्णिका ॥४१॥

२०कृष्णायवासुदेवायदेवकीनंदनायच नंदगोपकुमारायगोविंदायनमोनमः २१ २२ हेभगवन् यथाकंसेनरुद्धाद्देवकीत्वयासकृद्विमोचिता तथाऽहंन किंतु पांडवैःसहदुःखा न्मुहुर्मुहुर्विमोचिता २३ तथाहिविषादग्नेःराक्षसेभ्योवनवासतश्चवयंरक्षिताः २४ हेजगद्गुरो नःशश्वद्विपदःसंतु यतः तासुभवतोदर्शनंभवति २५ किंच श्रियादिभिर्गर्वितः पुमांस्त्वांकृष्णइतिवक्तुंनार्हति २६ एवंभूतनिष्किंचनवित्तायतेनमः २७

CC-0. In Public Domain. Digitization by eGangotri

भा. प्र. ननुदेवकीपुत्रंमांकथमेवंस्तौषि तत्राह । मन्येत्वांकालंनतुदेवकीपुत्रम् ।यत्रहेतवः ईशानंनियंतारम् । अनादिनिधनमाद्यंतशून्यं विभुंप्रभुं समंयथाभवतितथासर्वत्रचरंतं।ननुपार्थसारथेःकथंममसाम्यं अ०

तत्राह । यद्यतस्त्वत्तोनिमित्तभूताद्भूतानामेवमिथःकलिःकलहोभवति नतुस्वतस्त्वयिवैषम्यं २८ ननुनिग्रहानुग्रहरूपंमयिप्रसिद्धंवैषम्यमतआह । नवेदेति (हेभगवन्) नृणांविडंबनमनुकरणमी

टीका हमानस्यकुर्वतः (तव)यस्मिंस्त्वयि (नृणां) विषमामतिरनुग्रहनिग्रहरूपाभवति २९ ते (यत्) अजस्यजन्म अकर्तुःकर्म तिर्यक्षुवराहादिरूपेण नृषुरामादिरूपेण ऋषिषुवामनादिरूपे ॥ ८ ॥

ण यादस्सुमत्स्यादिरूपेण(तदत्यंतविडंबनंकेवलमनुकरणम्) ३० (तत्रैतत्) नरविडंबनमत्याश्चर्यमित्याह । गोपीति । गोपीयशोदात्वयिकृताऽऽगसिदधिभांडस्फोटनं(अपराधं)कृतवतियाव

॥४२॥ द्दामरज्जुमाददेजग्राह तावत्तत्क्षणमेवयातेदशाऽवस्थासामांविमोहयति । किंभूतस्य।अश्रुभिःकलिलंव्यामिश्रमंजनंययोस्तेचतेसंभ्रमेव्याकुलेअक्षिणीयस्मिंस्तद्वक्त्रंनिनीयाऽधःकृत्वाताडयिष्य

तीतिभयस्यभावनयास्थितस्य यद्यतस्त्वत्तोभीरपिस्वयंबिभेति तस्यतेदशा ३१ अतएवजगन्मोहनतयादुर्ज्ञेयत्वात्तवजन्मादिबहुधावर्णयंतीत्याह केचिदितिचतुर्भिः। पुण्यश्लोकस्ययुधिष्ठिरस्य

(प्रियस्य) कीर्तये (यशःसंपादनाययदोरन्वयायेवंशेवस्तुतोजमपिजातमाहुः) यदोरेवकीर्त्यै (तद्वंशेजातं)इतिवा मलयस्यकीर्तयेवंशेवाचंदनंयथा ३२ तथावसुदेवस्यभार्यायांदेवक्या

मजएवत्वमभ्यगात् (अस्मिन्पक्षेकथंभूतस्ययदोः पुण्यश्लोकस्य) ।पुत्रत्वमितिशेषः । प्रथमपुरुषस्त्वार्षः । अर्भत्वमितिपाठःसुगमः । ताभ्यामेवपूर्वंसुतपःपृश्निरूपाभ्यांयाचितःसन् ।

अस्यजगतःक्षेमाय ३३ (उदधौ नावइवभूरिभारेणसीदंत्याभुवोभारापनयनाय) आत्मभुवेतिब्रह्मप्रार्थनस्यप्राधान्यविवक्षया मतांतरं ३४ परमानंदस्वरूपाज्ञानमविद्या । ततोदेहाद्यभि

मानात्कामस्ततःकर्माणितैःक्लिश्यमानानांतन्निवृत्तयेश्रवणाद्यर्हाणिकर्माणिकरिष्यन् (कर्तुंकामोजातइतिकेचनमुनयः) ३५

श्लोकाः मन्येत्वांकालमीशानमनादिनिधनंविभुम् ॥ समंचरंतंसर्वत्रभूतानांयन्मिथःकलिः २८ नवेदकश्चिद्भगवंश्चिकीर्षितंतवेहमानस्यनृणांविडंबनं ॥

नयस्यकश्चिद्दयितोऽस्तिकर्हिचिद्द्वेष्यश्चयस्मिन्विषमामतिर्नृणाम् २९ जन्मकर्मचविश्वात्मन्नजस्याकर्तुरात्मनः ॥ तिर्यङ्नृषिषुयादस्सुतदत्यंतविडं २८/३५

बनम् ३० गोप्याददेत्वयिकृताऽऽगसिदामतावद्यातेदशाऽश्रुकलिलांजनसंभ्रमाक्षम्॥वक्त्रंनिनीयभयभावनयास्थितस्यसामांविमोहयतिभीरपियद्बिभेति ३१ के

चिदाहुरजंजातंपुण्यश्लोकस्यकीर्तये॥ यदोःप्रियस्यान्ववायेमलयस्येवचंदनम् ३२ अपरेवसुदेवस्यदेवक्यांयाचितोऽभ्यगात् ॥अजस्त्वमस्यक्षेमायवधायच

सुरद्विषां ३३ भारावतारणायान्येभुवोनावइवोदधौ ॥ सीदंत्याभूरिभारेणजातोह्यात्मभुवाऽर्थितः ३४ भवेऽस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः॥ श्रव

णस्मरणार्हाणिकरिष्यन्नितिकेचन ३५

चूर्णिका हेकृष्ण त्वामनादिनिधनंकालंमन्ये २८ किंच तवईहितंकोऽपिनवेत्ति २९ एवंभूतस्यतवतिर्यगादिषुयज्जन्म तद्विडंबनमात्रम् ३० किंच यशोदयादाम्नावद्धस्यअ ॥४२॥

धोमुखंकुर्वतस्तवयादशासामांमोहयति ३१ अपिच प्रियस्ययदुवंशस्यकीर्तयेतत्कुलेत्वंजातइतिकेचिदाहुः ३२ अन्येतु विश्वस्यक्षेमायजातइत्याहुः ३३ अपरे

भूभारहरणायजातइतिवदंति ३४ किंच इतरेतु अस्मिन्संसारेक्लिष्टानांजनानामविद्यानिवृत्तयेश्रवणस्मरणाद्यर्हाणिकर्माणिकुर्वन्जातइति ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

अस्यपक्षस्यसिद्धांततामभिप्रेत्यश्रवणादिफलमाह । शृण्वंतीति (वक्तरिसतिशृण्वंति श्रोतरिसतिगायंतिअन्यदागृणंतिस्मरंतिच) नदंत्यन्यैःकीर्त्यमानमभिनंदंतियेजनाः ईहितंच रितं तावकंत्वदीयंपदांबुजंतएवपश्यंत्येव अचिरेणैवेतिचसर्वत्रावधारणं । कीदृशं भवप्रवाहस्यजन्मपरंपरायाउपरमोयस्मिंस्तत् ३६ इदानींतवाऽस्मत्परित्यागोऽनुचितइत्याशयेनाह । अपीतिचतुर्भिः।हेप्रभोसुहृदोऽतिस्निग्धाननुजीविनश्चनः (अस्मान्) अद्यापिस्वित्किंस्वित्त्वंजिहाससि (हातुमिच्छसिकिंस्विदित्यर्थः) येषामस्माकमन्यत्परायणंनैवास्ति । तत्कुतःराजसुयोजितमंहोदुःखंयैस्तेषां (राजानोह्यस्माभिर्दुःखंप्रापिता अतस्त्वत्तोह्यन्यआश्रयोनास्त्येवेत्यर्थः) स्वानांकृतमीहितमपेक्षितंयेनतस्यसंबोधनं । विसर्गांतपाठेत्वंपदविशेषणं ३७ ननुतववंधवोयदवःपुत्राश्चपांडवाःशूराःसमर्थाश्चतर्त्किकार्पण्यंभापसेऽतआह । केवयमिति । यर्हि भवतोऽदर्शनंयदात्वमस्मान्नपश्यसि तदा नामरूपाभ्यांनाम्नाविख्यात्या।रूपेणसमृद्ध्याचयदुभिःसहिताःप।डवानामकेवयं नकेऽपि । अतितुच्छाइत्यर्थः । हृपीकाणामिंद्रियाणामीशितुर्जीवस्यादर्शनेयथानकिंचिन्नामचरूपंचतद्वत् ३८ किंच यथेदानीमियमस्मत्पाल्याभूमिः स्वैरसाधारणैर्वज्रांकुशादिभिर्लक्षणैर्विलक्षितैः(विशेषणलक्षितैः)चिह्नितैस्त्वत्पदैरंकितासतीभाति तत्रतदात्वयिनिर्गतेसतिनशोभिष्यते ३९ अपिचइमेजनपदादेशाःस्वृद्धाःसुसमृद्धाःसंतः सुपक्का ओपधयो व्रीह्याद्या वीरुधोलताश्चयेषुते एधंतेवर्धंते) ४० गमनेपांडवानामकुशलमगमनेचयादवानामित्युभयतोव्याकुलचित्तासतीतेषुस्नेहनिवृत्तिंप्रार्थयते । अथेति। विश्वेशेत्यादिसंबोधनानिस्नेहपाशच्छेदेसामर्थ्यख्यापनाय । दृढंसंतम्(पांण्डुवु पांण्डवेषु) ४१ ततःकिमतआह।त्वयीति । (नास्त्यन्योविषयोयस्याःसा) अनन्यविषयासतीमेमतिः(असकृत)रतिमुद्वहतात्अनवच्छिन्नांप्रीतिंकरोत्वित्यर्थः ओघंपूरं(इव) यथागंगाप्रतिबंधंनगणयत्येवंमतिरपिविघ्नान्मागणयत्वितिभावः ४२

॥४३॥

श्लोकाः ३६/४२

शृण्वंतिगायंतिगृणंत्यभीक्ष्णशःस्मरंतिनंदंतितवेहितंजनाः ॥ तएवपश्यंत्यचिरेणतावकंभवप्रवाहोपरमंपदांबुजम् ३६ अप्यद्यनस्त्वंस्वकृतेहितप्रभोजिहाससिस्वित्सुहृदोनुजीविनः॥ येषांनचान्यद्भवतःपदांबुजात्परायणंराजसुयोजितांऽहसाम् ३७ केवयंनामरूपाभ्यांयदुभिःसहपांडवाः ॥ भवतोऽदर्शनंयर्हिहृषीकाणामिवेशितुः ३८ नेयंशोभिष्यतेतत्रयथेदानींगदाधर ॥ त्वत्पदैरंकिताभातिस्वलक्षणविलक्षितैः ३९ इमेजनपदाःस्वृद्धाःसुपक्कौषधिवीरुधः ॥ वनाद्रिनद्युदन्वंतोह्येधंतेतववीक्षितैः ४० अथविश्वेशविश्वात्मन्विश्वमूर्त्तेस्वकेषुमे ॥ स्नेहपाशमिमंछिंधिदृढंपांडुषुवृष्णिषु ४१ त्वयिमेऽनन्यविषयामतिर्मधुपतेऽसकृत् ॥ रतिमुद्वहतादद्धागंगेवौघमुदन्वति ४२

चूर्णिका ॥४३॥

एवंभूतस्यतेचरितंयेशृण्वंतिगायंतिच तेसंसारनाशकंत्वदीयंपादपद्मंपश्यंति ३६ किंच हेभक्तपालक नः सुहृदःअद्यत्यजसिकिम् यतस्त्वत्पादांबुजाद्विनाऽन्यआश्रयो नास्ति ३७ अपिच यदात्वंअस्मान्नपश्यसि तदामत्पुत्राःशूराअपिअतितुच्छाएव ३८ किंच इयंभूस्त्वत्पदैरंकिताइदानींयथाभातितथात्वयिनिर्गतेसतिनशोभिष्येत ३९ अपिच इमेदेशसमुद्रादयःतववीक्षणादेधंते ४० अथ हेविश्वेश यादवेपुपांडवेपुचमेस्नेहपाशंछिंधि ४१ उतच त्वयिमेमतिःअखंडांप्रीतिंकरोतु ४२

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवमभ्यर्थ्यपुनःप्रणमति । हेश्रीकृष्णतेनमः । उपकाराननुस्मरंतीबहुधासंबोधयति (हे)कृष्णसखाऽर्जुनस्यसखेवृष्णीनामृषभश्रेष्ठ अवन्यैभूम्यैद्रुह्यंतियेराजन्यास्तेपांवंशस्यदहन (यथावायुरारण्येवंशेषुपरस्परसंघर्षेणवह्निमुत्पाद्य तेनतान्नाशयति एवंराजन्यवंशेषुपरस्परकलहवशाद्वैरमुत्पाद्य तेनतन्नाशकस्त्वमिति वंशदहनपदेनसूचितम्) एवमप्यनपवर्गवीर्याक्षीणप्रभाव गोविंदप्राप्तकामधेन्वैश्वर्य गोद्विजसुराणामार्तिहरोऽवतारोयस्येति ४३ कलानिमधुराणिपदानियेषुतैर्वाक्यैःपरिणूतःस्तुतोऽखिलउदयोमहिमायस्यसः । णुस्तुताविर्यस्मात् । परिणुतेतिवक्तव्येदीर्घश्छंदोऽनुरोधेन । मंदमीपत्तस्यहासएवमाया वक्ष्यतिहि"हासोजनोन्मादकरीचमाये"ति ४४ त्वयिमेऽनन्यविषयामतिरितियत्प्रार्थितंतद्बाढमित्यंगीकृत्यरथस्थानाद्गजसाह्वयमागत्यपश्चात्तांचान्याश्चसुभद्राप्रमुखाःस्त्रियउपामंत्र्याऽनुज्ञाप्यस्वपुरंयास्यन्राज्ञायुधिष्ठिरेणप्रेम्णाऽत्रैवकिंचित्कालंनिवसेतिसंप्रार्थ्यनिवारितः ४५ अथभीष्मनिर्याणोत्सवंवक्तुमुपोद्घातकथांप्रस्तौति।व्यासाद्यैःप्रबोधितोऽपि(राजायुधिष्ठिरः)शुचा(अर्पितः)व्याप्तःसन्नाऽबुद्ध्यताविवेकंनप्राप।कुतः ईश्वरेहायाअज्ञैःस्वभक्तभीष्मनिर्याणमहोत्सवायराज्ञासहकुरुक्षेत्रंगंतव्यं तत्रतन्मुखेनैवायंप्रबोधनीयइतीश्वराभिप्रायः।कार्यद्वयविधायकस्तमजानद्भिरित्यर्थः।श्रीकृष्णेनाऽपिप्रबोधितोःअपि)नाबुद्ध्यत।अत्रहेतुः अद्भुतकर्मणेति।यथाकुरुपांडवसंधानार्थंगतोऽपियथोचितमेववदन्नपिविग्रहमेवदृढीकृतवानेवमत्रापिप्रबोधयन्नबोधमेवदृढीचकार(इतिकर्मणोऽद्भुतत्वंभगवतः)इत्यर्थः४६अबोधमेवप्रपंचयति।आहेतिपद्भिः । प्राकृतेनाविवेकव्याप्तेनात्मनाचित्तेन(स्नेहमोहवशंगतः)हेविप्राः(शौनकादयः)४७(किमाहतद्दर्शयति अहोइति)पारक्यस्यश्वसृगालाद्याहारभूतस्यदेहस्यार्थे मेमया अक्षौहिणीरक्षौहिण्यः अक्षौहिणीप्रमाणंतुव्यासेनोक्तं।"अक्षौहिणीप्रसंख्याता रथानांद्विजसत्तमाः। संख्यागणनतत्त्वज्ञैःसहस्राण्येकविंशतिः । शतान्युपरिचैवाष्टौतथाभूयश्चसप्ततिः । गजानांचप्रसंख्यानमेतदेवप्रकीर्तितम् । ज्ञेयंशतसहस्रंतुसहस्राणिनवैवतु । नराणामपिपंचाशच्छतानित्रीणिचैवहि । पंचषष्टिसहस्राणितथाऽश्वानांशतानिच । दशोत्तराणिषट्प्राहुःसंख्यातत्त्वविदोजनाः । एतामक्षौहिणींप्राहुर्यथावदिहसंख्ये"ति ४८

श्लोकाः ४३/४८

श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंदगोद्विजसुरार्त्तिहरावतारयोगेश्वराखिलगुरोभगवन्नमस्ते ४३ सूतउवाच ॥ पृथयेत्थंकलपदैःपरिणूताखिलोदयः ॥ मंदंजहासवैकुंठोमोहयन्निवमायया ४४ तद्बाढमित्युपामंत्र्यप्रविश्यगजसाह्वयम् ॥ स्त्रियश्चस्वपुरंयास्यन्प्रेम्णाराज्ञानिवारितः ४५ व्यासाद्यैरीश्वरेहाज्ञैःकृष्णेनाद्भुतकर्मणा ॥ प्रबोधितोऽपीतिहासैर्नाबुद्ध्यतशुचाऽर्पितः४६आहराजाधर्मसुतश्चिंतयन्सुहृदांवधम् ॥ प्राकृतेनात्मनाविप्राःस्नेहमोहवशंगतः ४७ अहोमेपश्यताऽज्ञानंहृदिरूढंदुरात्मनः ॥ पारक्यस्यैवदेहस्यबह्व्योमेऽक्षौहिणीर्हताः ४८

चूर्णिका

हे कृष्ण हेगोविंदयोगेश्वर तेनमोऽस्तु ४३ सूतउवाच हेशौनक एवंकुंत्यास्तुतोवैकुंठःमंदंजहास ४४ ततः कुंत्युक्तंस्वीकृत्यरथस्थानात्पुनर्गजाह्वयंप्रविश्यसुभद्रादिस्त्रियअनुज्ञाप्यचयास्यन्सन् धर्मेणनिवारितः ४५ ततः अथेतिकथांतरम् व्यासाद्यैःकृष्णेनचबोधितोपिशोकयुक्तोधर्मःविवेकंनप्राप ४६ किंच हेविप्राः सुहृद्वधंचिंतयन् मोहंप्राप्तोधर्मआह ४७ अहोहृदिरूढंममाऽज्ञानंपश्यत किंतत् श्वादिनांभक्ष्यदेहस्यार्थेमयाऽक्षौहिण्योहताः ४८

॥४४॥

---

१ तांबाढमितिपाठेतांपृथामित्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥४९॥ सुहृदः संबंधिनः। मित्राणिसखायः। पितरःपितृव्याः(गुरवोद्रोणाद्याएतेभ्योद्रुह्यतितस्यमेनरकान्मुक्तिरसंख्यैरपिवर्षैर्नस्यात्)४९। स्मृत्याद्यनुशासनाद्धर्मयुद्धेनदोपइतिचेत्तत्राह। नैनोराज्ञइति। द्विषांवधः(राज्ञः)एनःपापंनभवतीतियच्छासनांशिक्षारूपंवचः(मेवोधायनैवकल्पते)कुतोनकल्पते यतस्तद्वचःप्रजाभर्तुरेव।अयंभावः। स्वप्रजानांमन्यतोवाधेप्रसक्तेतद्वधोऽनुज्ञातःदुर्योधनेनतुप्रजा यांपाल्यमानायांमयाकेवलंराज्यलोभेनहतत्वात्पापमेवेदमिति५० किंचयुद्धेपुंसांवधोभवतुनामधर्मः।स्त्रीणांतुमयाहताबंधवः(भर्तारः)यासांतासांयोऽसौद्रोहोऽनुद्दिष्टोऽप्युत्थितस्तंव्यपोहितुमपाकर्तुं कल्पःसमर्थोनाऽहं। गृहमेधीयैर्गृहाश्रमविहितैः ५१ ननु'सर्वंपाप्मानंतरतितरतिब्रह्महत्यांयोऽश्वमेधेनयजतेयउचैनमेवंवेदे'तिश्रुतेःपापमश्वमेधेननश्येदेवेत्याशंक्याविवेकविजृंभितंहेतुवादमाश्रित्य निराकरोति यथेति यथाघनपंकेनपंकांभोनमृज्यते यथावा सुरालेशंकृतमपावित्र्यंबह्वयासुरयानमृज्यतेतथैवभूतहत्यामेकांप्रमादतोजातांबुद्धिपूर्वनानाविधहिंसाप्रायैर्यज्ञैर्मार्ष्टुंशोधयितुंनार्हतीति ५२इतिश्रीभा०म०प्रथमस्कंधेभावार्थदीपिकायामष्टमोऽध्यायः८॥छ॥ युधिष्ठिरायभीष्मेणसर्वधर्मनिरूपणं। कृष्णस्तुतिश्चमुक्तिश्चनवमेतस्यवर्ण्यते॥ १॥ यदर्थंतस्याविवेकःश्रीकृष्णेनसंवार्द्धत स्तद्दर्शयति। इतीति। सर्वेषांधर्माणांविवित्सयावेदितुमिच्छया। विनशनंकुरुक्षेत्रं। (यत्र)देवव्रतोभीष्मः १ संतःश्रेष्ठाअश्वायेषुतैरथैः (अन्वगच्छन्व्यासादयोविप्राश्चान्वगच्छन्) २ (हेविप्रर्षेशौनक अर्जुनेनसहितोभगवानप्यन्वगच्छत्) ३

बालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः॥ नमेस्यान्निरयान्मोक्षोह्यपिवर्षायुतायुतैः ४९ नैनोराज्ञःप्रजाभर्तुर्धर्मयुद्धेवधोद्विषाम्॥ इतिमेनतुबोधायकल्पतेशासनंवचः ५० स्त्रीणांमद्धतबंधूनांद्रोहोयोऽसाविहोत्थितः॥ कर्मभिर्गृहमेधीयैर्नाऽहंकल्पोव्यपोहितुं ५१ यथापंकेनपंकांभःसुरयावासुराकृतम्॥ भूतहत्यांतथैवैकांनयज्ञैर्मार्ष्टुमर्हति ५२ ॥ इतिश्रीभा०म०प्रथमस्कंधेकुंतीस्तुतियुधिष्ठिरानुतापोनामाऽष्टमोऽध्यायः ८ ॥ छ॥ सूतउवाच॥ इतिभीतःप्रजाद्रोहात्सर्वधर्मविवित्सया॥ ततोविनशनंप्रागाद्यत्रदेवव्रतोऽपतत् १ तदातेभ्रातरःसर्वेसदश्वैःस्वर्णभूषितैः॥ अन्वगच्छन्रथैर्विप्राव्यासधौम्यादयस्तथा २ भगवानपिविप्रर्षेरथेनसधनंजयः॥ सतैर्व्यरोचतनृपःकुबेरइवगुह्यकैः ३

श्लोकाः ४९/३

चूर्णिका

अपिचबालगुर्वादिद्रुहःमेनरकाद्बहुवत्सरैरपिमोक्षोनस्यात् ४९ किंच युद्धेद्विषांवधःपापंनेतियच्छास्त्रंतत्प्रजाभर्तुरेव मयातुकेवलंराज्यलोभेनइमेहताः अतःपापमेवेदम् अन्यच्च मद्धतपतीनांस्त्रीणांयद्रोहःउत्पन्नस्तन्नाशयितुंगृहस्थकर्मभिरहंसमर्थोन ५० ५१ किंचयथामद्यलेशकृतंअपावित्र्यंबहुमद्येनशुद्धंनभवतिएवंएकामपिभूतहत्यांहिंसाप्रायैर्यज्ञैःमार्ष्टुनार्हतीति ५२ ॥ इतिप्रथमेअष्टमः ॥ सूतउवाच एवंप्रजाद्रोहाद्भीतोधर्मोयत्रभीष्मोऽपतत् तस्मिन्कुरुक्षेत्रेधर्मजिज्ञासयाऽगमत् १ तदा सर्वेभ्रातरस्तथाव्यासादयोभगवानपितमन्वगच्छत् २ ३

CC-0. In Public Domain. Digitization by eGangotri

टीका

(दिवःस्वर्गात्पतितममरंदेवमिवदिवआकाशादमरंरविमिववातत्रनिपतितंभीष्मम्) सानुगाःपरिवारसहिताः ४ तत्रतदा तत्रासन् । तत्क्षणमेवागताइत्यर्थः । भरतपुंगवंभीष्मम् ५
रेणुकासुतःपरशुरामः ६ (कौशिकोविश्वामित्रः) ७ ब्रह्मरातःशुकःआंगिरसोबृहस्पतिः ८ वसूत्तमोभीष्मः।देशकालविभागविदित्युत्थातुमशक्यत्वाच्छयानएवमनसावाचाचपूजयामासेत्यभिप्रायः
(देशविभागान्कालविभागांश्चवेत्तीतियस्मिन्कालेयथापूजनंयुक्तंतज्जानातीत्यर्थः) ९ हृदिस्थंसंतंपुरतश्चासीनंपूजयामास १० उपासीनान्समीपेउपविष्टान्प्रश्रयोविनयःप्रेमस्नेहस्ता
भ्यांसंगतानुपसन्नान् । पाठांतरेताभ्यामवनतान् अभ्याचष्टाऽभ्यभाषत । अनुरागास्त्रैःस्नेहाश्रुभिरंधीभूतेनचक्षुषोपलक्षितः ददर्शेतिवा ११ अभिभाषणमाह । अहोइत्येकादशभिः ।
हेधर्मनंदनाः (युधिष्ठिरादयः) क्लिष्टंयथाभवत्येवंजीवितुंनाहर्थ यूयमितियदेतदहोकष्टंजुगुप्सितम् अहोअन्याय्यंचैतत् यतोयूयंविप्राधर्मोऽच्युतश्चाश्रयोयेषांते (एवंसत्यपियत्क्लेशे
नजीवनंएतदहोकष्टंजुगुप्सितं) १२ किंच (पांडौ) संस्थितेमृतेबालाःप्रजाःपुत्रायस्याःसा वधूश्चेतिदैन्यंप्रदर्शितम् । तोकान्यपत्यानितद्वतीअपत्यैःसहक्लेशान्प्राप्तेत्यर्थः (एकोदशसहस्राणियोधये
द्यस्तुधन्विनां । सोतिरथस्ताद्दशे) १३ कालकृतत्वेनशोकंवारयतिसर्वमितिद्वाभ्यां । भवतामपि (यदप्रियंक्लेशः तस्मात्कालोबलीयानित्यर्थः । ननुकोऽसौकालस्तदाह) यद्वशेयस्यवशवर्ती
(वायोर्वशेघनावलिरिव) १४

श्लोकाः ४/१४

दृष्ट्वानिपतितंभूमौदिवश्च्युतमिवाऽमरम् ॥ प्रणेमुःपांडवाभीष्मंसानुगाःसहचक्रिणा ४ तत्रब्रह्मर्षयःसर्वेदेवर्षयश्चसत्तम ॥ राजर्षयश्चतत्राऽऽसन्द्रष्टुंभरतपुंगवं
५ पर्वतोनारदोधौम्योभगवान्बादरायणः ॥ बृहदश्वोभरद्वाजःसशिष्योरेणुकासुतः ६ वसिष्ठइंद्रप्रमदस्त्रितोगृत्समदोसितः ॥ कक्षीवान्गौतमोऽत्रिश्चकौशि
कोऽथसुदर्शनः ७ अन्येचमुनयोब्रह्मन्ब्रह्मरातादयोऽमलाः ॥ शिष्यैरुपेताआजग्मुःकश्यपांऽऽगिरसादयः ८ तान्समेतान्महाभागानुपलभ्यवसूत्तमः ॥ पूज
यामासधर्मज्ञोदेशकालविभागवित् ९ कृष्णंचतत्प्रभावज्ञआसीनंजगदीश्वरम् ॥ हृदिस्थंपूजयामासमाययोपात्तविग्रहम् १० पांडुपुत्रानुपासीनान्प्रश्रयप्रे
मसंगतान् ॥ अभ्याचष्टाऽनुरागास्त्रैरंधीभूतेनचक्षुषा ११ अहोकष्टमहोऽन्याय्यंयद्यूयंधर्मनंदनाः ॥ जीवितुंनार्हथक्लिष्टंविप्रधर्माऽच्युताश्रयाः १२ संस्थितेऽ
तिरथेपांडौपृथाबालप्रजावधूः ॥ युष्मत्कृतेबहून्क्लेशान्प्राप्तातोकवतीमुहुः १३ सर्वंकालकृतंमन्येभवतांचयदप्रियम् ॥ सकालोयद्वशेलोकोवायोरिवघनावलिः १४

चूर्णिका

ततः भूमौपतितंभीष्मंदृष्ट्वाभगवतासहसर्वेपांडवाःप्रणेमुः ४ तदादेवर्षयोब्रह्मर्षयोराजर्षयश्च ५ तथा पर्वतोनारदोधौम्योव्यासःबृहदश्वाभरद्वाजःपरशुरामः ६ वसिष्ठःइंद्रप्र
मदःत्रितःगृत्समदःकक्षीवान्गौतमःअत्रिःकौशिकः ७ कश्यपःशुकः अन्येचऋषयःशिष्यैःसहभीष्मंद्रष्टुमागताः ८ तान्प्रतिशरतल्पस्थोभीष्मःपूजयामास ९ समीप
स्थंश्रीकृष्णंचवचसाऽपूजयत् १० ततः समीपेआसीनान्पांडवानपश्यत् आहच ११ हेपांडवाः यूयंकष्टेनजीवितुंनार्हथ यतः यूयंविप्रधर्माच्युताश्रयाःस्थ १२ पांडौ
मृतेकुंतीयुष्मत्कृतेबहून्क्लेशान्प्राप्ता १३ भवतांचदुःखंजातं तत्सर्वंकालतत्कृतमित्यहंमन्ये अतोऽअयंलोकःकालाधीनोऽस्ति १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

अहोदुर्घटघटनापटुःकालइत्याह । यत्रेति । कृष्णोऽर्जुनः अस्त्रीधन्वी ततस्तत्रापिविपत् पुण्यशारीरबलास्त्रनैपुण्यशस्त्रदैवतसंपत्तावपि (दुर्वाराविपत्) इत्यर्थः १५ ननुकृष्णंकथंकालोऽतिक्रमेदित्यपेक्षायामाह । नह्यस्यश्रीकृष्णस्येत्यंगुल्यानिर्दिशति (कर्हिचित्कदाचिदपि) विधित्सितंकर्तुमिष्टंयत् यस्यविधित्सितस्यजिज्ञासया (युक्तायोगंकृतवंतःकवयोऽपिमुह्यंति) १६ इदंसुखदुःखादिदैवतंत्रमीश्वराधीनं व्यवस्यनिश्चित्यतस्येश्वरस्यानुविहितोऽनुवर्तीसन् । कर्त्तरिक्तः । हेनाथकुलपरंपरागतस्वामिन् युधिष्ठिरप्रभोसमर्थाऽनाथाःप्रजाःपाहि १७ अनुविधेयःपरमेश्वरश्चश्रीकृष्णएवेत्याह (एपइति) एपएवभगवान्सर्वेश्वरः । यतआद्यःपुमान् । तच्चकुतः यतोनारायणःसाक्षात् १८ तदुपपादयति । अस्येति अनुभावंप्रभावम् (गुह्यतममपिभगवान्शिवोवेत्ति)१९त्वमज्ञानाद्यमेवंमन्यसे मातुलेयंदेवक्याःसुतम्।प्रियंप्रीतिविपयम्।मित्रंप्रीतिकर्तारं।सुहृत्तममुपकारानपेक्ष्योपकारकंच। सौहृदाद्विश्वासात् अकरोःकृतवानसि। सचिवंमंत्रिणं २० नन्वीश्वरश्चेत्कथंनीचेसारथ्यादौप्रवृत्तस्तत्राह।सर्वेति। अस्यतत्कृतं(सारथ्यसाचिव्यादि)नीचोच्चकर्मकृतं(मतिवैषम्यं)ममयोग्यमयोग्यमितिमतेर्वैपम्यंक्वचिदपिनास्ति। कुतः निरवद्यस्यरागादिशून्यस्य।तत्कुतः अनहंकृतेः।तच्चकुतःअद्वयस्य।तदपिकुतःसमदृशः।तत्रापिहेतुःसर्वस्यात्मनःयथेष्टंवाहेतुर्हेतुमद्भावः २१ तथापिसमत्वेपिहेभूपअनुकंपितमनुकंपाम् (असून्प्राणान्) २२ इदानींस्वदेहत्यागपर्यंतंश्रीकृष्णावस्थानंप्रार्थयते । भक्त्येतिद्वाभ्याम् (कामकर्मभिःसंसारहेतुभूतैर्मुच्यते २३

श्लोकाः १५/२३

यत्रधर्मसुतोराजागदापाणिर्वृकोदरः ॥ कृष्णोऽस्त्रीगांडिवंचापंसुहृत्कृष्णस्ततोविपत् १५ नह्यस्यकर्हिचिद्राजन्पुमान्वेदविधित्सितं ॥ यद्विजिज्ञासयायुक्तामुह्यंतिकवयोऽपिहि १६ तस्मादिदंदैवतंत्रंव्यवस्यभरतर्षभ ॥ तस्यानुविहितोऽनाथानाथपाहिप्रजाःप्रभो १७ एषवैभगवान्साक्षादाद्योनारायणःपुमान् ॥ मोहयन्माययालोकंगूढश्चरतिवृष्णिषु १८ अस्यानुभावंभगवान्वेदगुह्यतमंशिवः ॥ देवर्षिर्नारदःसाक्षाद्भगवान्कपिलोनृप १९ यंमन्यसेमातुलेयंप्रियंमित्रंसुहृत्तमम् ॥ अकरोःसचिवंदूतंसौहृदादथसारथिम् २० सर्वात्मनःसमदृशोह्यद्वयस्याऽनहंकृतेः॥ तत्कृतंमतिवैषम्यंनिरवद्यस्यनक्वचित् २१ तथाऽप्येकांतभक्तेषुपश्यभूपानुकंपितम् ॥ यन्मेऽसूंस्त्यजतःसाक्षात्कृष्णोदर्शनमागतः २२ भक्त्यावेश्यमनोयस्मिन्वाचायन्नामकीर्तयन् ॥ त्यजन्कलेवरंयोगीमुच्यतेकामकर्मभिः २३

चूर्णिका

अहो यत्रधर्मसुतोराजागदापाणिर्वृकोदरः कृष्णोस्त्रीगांडिवंचापंसुहृत्कृष्णस्ततोविपत् १५ तस्मादिदंदैवाधीनंमन्ये १६ अतस्त्वंकृष्णानुवर्ती सन् प्रजाःपाहि १७ एषःश्रीकृष्णःमाययालोकंमोहयन्गूढःयदुपुचरति १८ अस्यप्रभावंशिवादयोविदुः १९ यंप्रतित्वंमातुलेयंमित्रंसचिवंसारथिंचेतिमन्यसे २० तस्यसमदृशईश्वरस्य नीचोच्चकर्मकृतंमतिवैषम्यंक्वापिनास्ति २१ तथापि एकांतभक्तेपुतस्यदयांपश्य एवंभूतोभगवान्प्राणत्यागंकुर्वतोमेदर्शनमागतः २२ यस्मिन्नच्युतेमनःस्थाप्यवाचातन्नामकीर्तयन्यःयोगीकलेवरंत्यजति स कर्मभिर्मुच्यते २३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यावदितिविलंबंद्योतयति । अहंहिनोमित्यजामीतिस्वातंत्र्यं इदमित्यनात्मत्वेनज्ञातम् । प्रसन्नहासेनारुणलोचनाभ्यांचोल्लसद्रुचिरंमुखांबुजंयस्य(सः) ।ध्यानस्यपंथाविषयःयोऽन्यैः(योगिभिः) चिंत्यतेकेवलंसोग्रतःस्थितःसन्मांप्रतीक्षतामित्यर्थः २४ तत्सानुकंपंवाक्यमाकर्ण्य २५ पुरुषस्वभावेनविहितान्नरजातिसाधारणानत्रवर्णयामासेतितृतीयेनान्वयः । यथावर्णंवर्णधर्मान् यथाश्रममाश्रमधर्मांश्च वैराग्यरागाभ्यामुपाधिभ्यांक्रमेणाम्नातमुभयंनिवृत्तिप्रवृत्तिरूपंलक्षणंयेषांतान् (निष्कामान्सकामांश्चेत्यर्थः) २६ पुनस्तत्रैवविशेषमाह । दानेति । मोक्षधर्मान्शमदमादीन् भगवद्धर्मान् । हरितोषणान्द्वादश्यादिनियमरूपान् । समासव्यासौसंक्षेपविस्तारौतावेवयोगावुपायौततस्ताभ्यां २७ धर्मादींश्चयथाऽधिकारंप्रतिनियतोपायसहितान् यथायथावत् नानाख्याने (आख्यानग्रंथेषु) येइतिहासास्तेषुयथासंतितथावर्णयामासेति २८ छंदेनेच्छयामृत्युर्यस्य तस्य २९ (उपसंहृत्यनिवर्त्य) सहस्रणीःयुद्धेसमीपस्थान्सहस्रंरथिनोनयतिपालयतीतिसहस्रणीर्भीष्मः । सहस्त्रिणीरितिपाठसहस्रार्थवतीर्गिरः लसंतौपीतौपटौयस्यतस्मिन् अमीलितदृगेवमनोव्यधारयत्(विमुक्तसंगमनन्यविषयं) ३० अनयैवविशुद्धयाधारणयाहतमशुभंयस्यसः तस्यश्रीकृष्णस्येक्षयाकृपादृष्ट्यैवगतआयुधश्रमोयस्यसः अतएवनिवृत्तः सर्वेंद्रियवृत्तीनांविभ्रमोविविधंभ्रमणंयस्मात्सः जन्यंदेहंविसृजन्(सन्)जनार्दनमस्तौत् ३१

श्लोकाः २४/३१

सदेवदेवोभगवान्प्रतीक्षतांकलेवरंयावदिदंहिनोम्यहम् ॥ प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजोध्यानपथश्चतुर्भुजः २४ सूतउवाच ॥ युधिष्ठिरस्तदाकर्ण्य शयानंशरपंजरे ॥ अपृच्छद्विविधान्धर्मानृषीणांचानुशृण्वताम् २५ पुरुषस्वभावविहितान्यथावर्णंयथाश्रमम् ॥ वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् २६ दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः॥स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः २७ धर्मार्थकाममोक्षांश्चसहोपायान्यथामुने ॥ नानाख्यानेतिहासेषुवर्णयामासतत्त्ववित् २८ धर्मंप्रवदतस्तस्यसकालःप्रत्युपस्थितः ॥ योयोगिनश्छंदमृत्योर्वांछितस्तूत्तरायणः २९ तदोपसंहृत्यगिरःसहस्रणीर्विमुक्तसंगंमनआदिपूरुषे ॥ कृष्णेलसत्पीतपटेचतुर्भुजेपुरस्थितेमीलितदृग्व्यधारयत् ३० विशुद्धयाधारणयाहताशुभस्तदीक्षयैवाशुगतायुधश्रमः ॥ निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टावजन्यंविसृजन्जनार्दनम् ३१

चूर्णिका

अतः सभगवान् यावदहमिदंकलेवरंत्यजामि तावत्प्रतीक्षताम् २४ सूतउवाच एवंभीष्मवचःश्रुत्वायुधिष्ठिरःशरपंजरस्थंतंराजदानमोक्षस्त्रीभगवद्धर्मान् धर्मार्थकाममोक्षांश्चाऽपृच्छत् २५ ततः इतिहासोक्तधर्मान् कथयतःसतः भीष्मस्ययोयोगिनांइष्टः स उत्तरायणःकालःप्राप्तः २६ २७ २८ २९ तदावाचं नियम्यनिःसंगंमनः पुरस्थितेकृष्णेव्यधारयत् ३० भगवद्दर्शनाद्गतायुधश्रमः स्वशरीरंमुंचन्कृष्णंतुष्टाव ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. प्र. परमफलरूपांश्रीकृष्णेरतिंप्रार्थयितुंप्रथमंस्वकृतमर्पयति (इतीति) इतिनानाधर्माद्युपायैः (शुद्धा) मतिर्मनोधारणलक्षणाउपकल्पितासमर्पिता समीपस्थेसमर्पिता । सादरदृष्टि अ०
द्वाराप्रवेशितेत्यर्थः क सात्वतानांपुंगवे (यदूनांमध्ये) श्रेष्ठभगवति वितृष्णानिष्कामा अवितृष्णेतिवाच्छेदः (दर्शनेऽलंबुद्धिराहित्यात्) अवितृप्तेत्यर्थः । विगतोभूमा (बाहु
टीका ल्यं) यस्मात्तस्मिन् । यमपेक्ष्यान्यत्रमहत्त्वंनास्तीत्यर्थः । तदेवपरमैश्वर्यमाह । स्वसुखंस्वस्वरूपभूतंपरमानंदमुपगतेप्राप्तवत्येव । क्वचित्कदाचिद्विहर्तुंक्रीडितुंप्रकृतिंयोगमायामुपेयुषि ॥ ९ ॥
स्वीकृतवति (अनेनस्वसुखमुपगतेइत्यनेनचप्रकृतियोगेऽपि) नतुस्वरूपतिरोधानेनजीववत्पारतंत्र्यम् (संपूर्णसुखत्वंच) इत्यर्थउक्तः विहर्तुमितियदुक्तंतत्प्रपंचयति । यद्यतः ।
॥४९॥ प्रकृतेर्भवप्रवाहः सृष्टिपरंपराभवति ३२ इदानींश्रीकृष्णमूर्तिं (वर्णयन्रतिं) प्रार्थयते । त्रिभुवनकमनंत्रिलोक्यामेकमेवकमनीयंयत्तद्वपुर्दधानेऽस्मिन्रतिर्मेअस्तु । कथंभूतंवपुः
तमालवन्नीलोवर्णोयस्यतत् प्रातःकालीनारवेःकराइव स्वतएवगौरेपीतेवरेनिर्मलेचांबरेयस्मिंस्तत् (यद्वाऽस्मदीययुद्धसमयेरविकरयोगेनदेदीप्यमानत्वाद्गौरवरेवाससीयत्रतत्) अ
लककुलैरुपर्यावृतमाननाऽब्जंयस्मिंस्तत् । विजयसखेपार्थसारथौ । अनवद्या (निर्दोषा) अहैतुकीफलाभिसंधिरहितारतिरस्तु ३३ विजयसखित्वमेवानुवर्णयन्रतिंप्रार्थयते । युधियुद्धे तुरगा
णांखुररजस्तुरगखररजस्तेनविधूम्राधूसरास्तेचतेविष्वंचइतस्ततश्चलंतः कचाःकुंतलास्तैर्लुलितंविकीर्णंश्रमवारिस्वेदबिंदुरूपंतेनभक्तवात्सल्यद्योतकेनालंकृतमास्यंयस्यतस्मिन्श्रीकृष्णेममात्माम
नोऽस्तु रमतामित्यर्थः । पुनःकिंभूते (मम) मदीयैर्निशितैस्तीक्ष्णैः शरैर्विभिद्यमानात्वग्यस्यतस्मिन् (स्वभक्तयशोविजृंभतामितिवात्सल्येनत्वग्भेदमंगीकृतवतीतिभावः) शरैरेव
विलसत्त्रुट्यत्कवचंयस्यतस्मिन् ३४

भीष्मउवाच ॥ इतिमतिरुपकल्पितावितृष्णाभगवतिसात्वतपुंगवेविभूम्नि ॥ स्वसुखमुपगतेक्वचिद्विहर्तुंप्रकृतिमुपेयुषियद्भवप्रवाहः ३२ त्रिभुवनकमनंतमा श्लोकाः
लवर्णंरविकरगौरवरांबरंदधाने ॥ वपुरलककुलावृताननाब्जंविजयसखेरतिरस्तुमेऽनवद्या ३३ युधितुरगरजोविधूम्रविष्वक्चलुलितश्रमवार्यलंकृतास्ये ॥ मम ३२/३४
निशितशरैर्विभिद्यमानत्वचिविलसत्कवचेऽस्तुकृष्णआत्मा ३४

॥४९॥

चूर्णिका भीष्मउवाच अहोसात्वतश्रेष्ठेभगवतिनिष्कामामतिर्मयाऽर्पिता ३२ किंच त्रिभुवनसुंदरंनीलपीतांबरयुतं अलकावृताननाब्जंवपुःदधानेअर्जुनसारथौभगवतिमेरतिरस्तु
३३ किंच युधिमच्छरैर्विभिद्यमानत्वचितुरगरजोविधूम्रविष्वक्चलुलितश्रमवार्यलंकृतास्ये श्रीकृष्णेमनअस्तु ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ प्र॰ टीका ॥९०॥ अ॰ ॥१॥

किंचसपदीति "सेनयोरुभयोर्मध्येरथंस्थापयमेऽच्युत । यावदेतान्निरीक्षेऽहंयोद्धुकामानवस्थितानि"तिसख्युरर्जुनस्यवचोनिशम्यसपदितत्क्षणमेवस्वपरयोर्बलयोःसैन्ययोर्मध्येरथंनिवेश्य
स्थितेपार्थसखेमभरतिरस्तु । तत्रस्थित्वाकृतंसख्यंदर्शयति । परस्य (शत्रोः) दुर्योधनस्यसैनिकानामायुरक्षणाकालदृष्ट्याहृतवति । असौभीष्मोऽसौद्रोणोऽसौकर्णइत्यादितत्तत्प्रदर्शनव्या
जेनदृष्ट्यैवसर्वेषामायुराकृष्यार्जुनस्यजयंकृतवति ३५ नकेवलमर्जुनस्यसपत्नायुर्हरणेनैवजयमावहत् । किंत्वविद्याहरणेनापीत्याह । व्यवहितादूरेस्थितायापृतनातस्यामुखमिवमुखमग्रे
स्थितान्भीष्मादीन्निरीक्ष्येत्यर्थः। स्वजनवधाद्विमुखस्यनिवृत्तस्य। तदुक्तंगीतासु "एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत् । विसृज्यसशरंचापंशोकसंविग्नमानस"इति । कुमतिमहंहंतेत्यादि
कुबुद्धिम्(आत्मविद्यया"अशोचानन्वशोचस्त्वमि"त्यादिकयाऽहरत्तस्यास्यपरमेश्वरस्यचरणरतिर्ममास्तु) ३६ ममतुमहांतमनुग्रहंकृतवानित्याह द्वाभ्याम् । स्वनिगममशस्त्रएवाहंसाहाय्यमा
त्रंकरिष्यामीत्येवंभूतांस्वप्रतिज्ञां (अपहाय) हित्वाश्रीकृष्णंशस्त्रंग्राहयिष्यामीत्येवंरूपांमत्प्रतिज्ञामृतंसत्यंयथाभवतितथाअधिअधिकांकर्तुंयोरथस्थःसन्नवप्लुतःसहसैवावतीर्णःसन्योऽभ्यया
दभिमुखमधावत् इभं (गजं) हंतुंहरिःसिंहइव । किंभूतः । धृतोरथचरणश्चक्रंयेनसः तदाचसंरंभेणमानुष्यनाट्यविस्मृतेः(इव) उदरस्थसर्वभूतभुवनभारेणप्रतिपदंचलद्गुश्चलंती
गौःपृथ्वीयस्मात्सः तेनैवसंरंभेणपथिगतंपतितमुत्तरीयंवस्त्रंयस्यसमुकुंदोमेगतिर्भवत्वित्युत्तरेणान्वयः ३७ एवंयदाऽभ्ययात्तदास्मयमानस्याततायिनः धन्विनः मेशितैस्तीक्ष्णैर्वि
शिखैर्हतोऽतोविशीर्णदंशोविध्वस्तकवचः। क्षतजेनरुधिरेणपरिप्लुतोव्याप्तःसन् प्रसभंबलाद्वारयंतमर्जुनमपि (अनादृत्य) अतिक्रम्यमद्वधार्थमभिससाराऽभिमुखंजगाम । एवंयोलो
कप्रतीत्याऽर्जुनपक्षपातीवलक्षितोवस्तुतस्तुममैवानुग्रहंकृतवान्यन्मद्भक्तेनोक्तंवचः (शस्त्रंग्राहयिष्यामीतितत्) मामृषास्त्विति (तस्मात्सर्वभूतसुहृत्) सभगवान्मेगतिर्भवत्वित्यर्थः ३८

श्लोकाः ३५/३८

सपदिसखिवचोनिशम्यमध्येनिजपरयोर्बलयोरथंनिवेश्य ॥ स्थितवतिपरसैनिकायुरक्ष्णाहृतवतिपार्थसखेरतिर्ममास्तु ३५ व्यवहितपृतनामुखंनिरीक्ष्यस्वज
नवधाद्विमुखस्यदोषबुद्ध्या ॥ कुमतिमहरदात्मविद्ययायश्चरणरतिःपरमस्यतस्यमेऽस्तु ३६ स्वनिगममपहायमत्प्रतिज्ञामृतमभिकर्तुमवप्लुतोरथस्थः ॥ धृ
तरथचरणोऽभ्ययाच्चलद्गुर्हरिरिवहंतुमिभंगतोत्तरीयः ३७ शितविशिखहतोविशीर्णदंशःक्षतजपरिप्लुतआततायिनोमे ॥ प्रसभमभिससारमद्वधार्थंसभवतुमेभग
वान्गतिर्मुकुंदः ३८

चूर्णिका ॥९०॥

किंच अर्जुनवचोनिशम्यस्वपरबलयोर्मध्येरथंसंस्थाप्यस्वचक्षुषापरसैनिकायुर्हृतवतिभगवतिममप्रीतिरस्तु ३५ अपिच यःयुद्धेस्वजनवधाद्विमुखस्याऽर्जुनस्यआत्मवि
द्ययाकुमतिमहरत् तस्यचरणेमेरतिरस्तु ३६ उतच यःस्वप्रतिज्ञांत्यक्त्वाममप्रतिज्ञांसत्यांकर्तुंकरेरथचक्रंधृत्वारथादवप्लुत्यमांहंतुमभ्ययात् ३७ किंच ममतीक्ष्णबाणैर्हताः विध्व
स्तकवचःरुधिराक्तश्चभगवानाततायिनःमेवधार्थंप्रातः समेगतिरस्तु ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

तद्देवमन्यायैरपिभृत्यरक्षाव्यग्रेकृष्णेरतिमाशास्ते । विजयोऽर्जुनस्तस्यरथएवकुटुंबवदकृत्यशतैरपिरक्षणीयोयस्यतस्मिन् आत्ततोत्रंप्रतोदोयेनतस्मिन्। धृताश्चतेहयानांरश्मयः प्रग्रहाः (च) तेसंतियस्यतस्मिन् 'व्रीह्यादिभ्यश्चे'त्यनकारांतादपिरश्मिशब्दादिनिः । तच्छ्रियातयासारथ्यश्रियाईक्षणीयेशोभमानेमुमूर्षोर्मर्तुमिच्छोः (रतिरस्तु) नन्वन्यायवर्तिनिकिमितिरतिः प्रार्थ्यतेऽतआह । भगवत्यचिंत्यैश्वर्येतदाह।इहयुद्धेहताः सर्वेयंनिरीक्ष्यसरूपंतत्समानंरूपंगताःप्राप्ताइतिदिव्यदृष्ट्यापश्यन्नाह ३९ क्षत्रधर्मेणयुध्यमानास्तत्सरूपंप्रापुरित्येतन्नचित्रंयतोम दांधाअपि (गोप्यः) प्रापुरित्याह । ललितगतिश्चविलासश्च (रासादिः) वल्गुहासादिश्च (सुंदरंहसितंप्रणयनिरीक्षणंप्रेम्णाऽवलोकनंएवं) मंजुगत्यादिभिरात्मीयैस्तदीयैर्वाक्लिपतउरुमानः अतउत्कटेनमदेनांधाविवशाः (महतीपूजायासांताः)अतएवतदेकचित्तत्वेनतस्यकृतंकर्मगोवर्धनोद्धरणादिकमनुकृतवत्योगोपवध्वोयस्यप्रकृतिंस्वरूपमगन्नगमन् । मकारलोपस्त्वार्षः । किलप्रसिद्धम् । तस्मिन्मेरतिरस्त्वितिपूर्वेणैवान्वयः ४० जगत्पूज्यतामनुस्मरन्नाह । मुनिगणैर्नृपवर्यैश्चसंकुलेव्याप्तेंऽतःसदसिसभामध्येयुधिष्ठिरस्यराजसूयेएषांमुनिगणादीनामीक्षणीयः ' अहोरूपमहोमहिमे ' त्येवमाश्चर्येणविलोकनीयःसन्नर्हणंपूजामुपपेदे (अग्रतः) प्राप (इत्यर्थः) एषजगतामात्मासमदृशिगोचरोदृष्टिविषयःसन्नाविःप्रकटोवर्त्तते (स्पष्टंमेदर्शनंददौ) अहोमेभाग्यमितिभावः ४१ सोऽहंकृतार्थोऽस्मीत्याह । तमिममजंसम्यगधिगतः प्राप्तोऽस्मि । सम्यक्त्वमाह । विधूतभेदमोहः ।तदर्थंभेदस्यौपाधिकत्वमाह । आत्मकल्पितानांस्वयंनिर्मितानांशरीरभाजांप्राणिनांहृदिहृदिप्रतिहृदयंधिष्ठितमधिष्ठितमधिष्ठायस्थितमितियावत् । अकारलोपस्त्वार्षः । नैकधाऽनेकधा अधिष्ठानभेदादनेकधाभातमित्यर्थः अत्रदृष्टांतः।सर्वप्राणिनांदृशंदृशंप्रत्येकमेवार्कमनेकधाप्रतीतमिवेति४२(एवंभगवतिकृष्णेएवाऽऽभिः) मनोवाग्दृष्टीनांवृत्तिभिः (उपारमत् आत्मनि) परमात्मनिश्रीकृष्णे (आत्मानमावेश्य) अंतरेवविलीनःश्वासोयस्यसः ४३

श्लोकाः ३९/४३

विजयरथकुटुंबआत्ततोत्रेधृतहयरश्मिनितच्छ्रियेक्षणीये ॥ भगवतिरतिरस्तुमेमुमूर्षोर्यमिहनिरीक्ष्यहतागताःसरूपम् ३९ ललितगतिविलासवल्गुहासप्रणय
निरीक्षणकल्पितोरुमानाः ॥ कृतमनुकृतवत्यउन्मदांधाःप्रकृतिमगन्किलयस्यगोपवध्वः ४० मुनिगणनृपवर्यसंकुलेंऽतःसदसियुधिष्ठिरराजसूयएषाम् ॥ अ
र्हणमुपपेदईक्षणीयोममदृशिगोचरएषआविरात्मा ४१ तमिममहमजंशरीरभाजांहृदिहृदिधिष्ठितमात्मकल्पितानां ॥ प्रतिदृशमिवनैकधार्कमेकंसमधिगेताऽ
स्मिविधूतभेदमोहः ४२॥ सूतउवाच ॥ कृष्णएवंभगवतिमनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्यसोंऽतःश्वासउपारमत् ४३

चूर्णिका

किंच विजयरथकुटुंबेआत्तप्रतोदेधृतहयरश्मिनिसारथ्यश्रियाशोभमानेचभगवतिमुमूर्षोमेरतिरस्तु ३९ किंचयस्यगतिविलासादिभिः प्राप्तमानाः गोपिकाःयस्यभगवतः स्वरूपंप्राप्ताः ४० तथाच युधिष्ठिरराजसूयेमुनिगणादीनामिक्षणीयोयःश्रीकृष्णोऽग्रपूजांप्राप सविश्वात्माममदृष्टिगोचरोऽस्ति अहोमेभाग्यम् ४१ एवंभूतंयोगिनांहृदिस्थितं श्रीकृष्णंविधूतभेदः प्राप्तोऽस्मि ४२ सूतउवाच एवमात्मभूतेईश्वरेसर्ववृत्तिभिर्मनःस्थाप्य सभीष्मउपारमत् ४३

CC-0. In Public Domain. Digitization by eGangotri

टीका

निष्कले (ब्रह्मणि) निरुपाधौपरात्मनिसंपद्यमानंमिलितमाज्ञायाऽऽलक्ष्य (दिनात्ययेरवावस्तंगते) वयांसिपक्षिणइव ४४ देवैर्मानवैश्चवादिताः । राज्ञांमध्येयेसाधवोऽनसूयवः (तेशशंसुः धन्योऽयधन्योऽयंमित्यादिपरस्परंकथितवंतः) ४५ (भार्गवहेशौनक) निर्हरणादीनिदाहसंस्कारादीनिसम्यक्परेतस्य मुक्तस्यापीत्यर्थः (मुहूर्तंक्षणम्) ४६ तस्यगुह्यनामभिः (रहस्याभिधानैः) वेदोक्तैः कृष्णएवहृदयंयेषांतेकृष्णहृदयाः ४७ (कृष्णासहितोहस्तिपुरंप्रविश्य) पितरंधृतराष्ट्रम् तपस्विनींसंतापवतीम् ४८ राजायुधिष्ठिरः (धृतराष्ट्रेण)अनुमतोऽनुज्ञातः पितृपैतामहंकुलपरंपरयाप्राप्तमित्यर्थः) ४९ ॥ इतिभागवतेप्रथमस्कंधेभावार्थदीपिकायांटीकायांनवमोऽध्यायः ॥ ॥छ ॥ ॥ दशमेकृत कार्यस्यहस्तिनापुरतोहरेः ॥ स्त्रीभिःसंस्तूयमानस्यवर्ण्यतेद्वारकागमः ॥ १ ॥ राज्यंचकारेत्युक्तंतत्रपृच्छति।हत्वेति।स्वस्यरिक्थेधनेस्पर्द्धतेस्मयेतेतथा । यद्वा । स्वारिक्थायस्पृत्संग्रामोयेषां (तान्)अतएवधनादिहरणादाततायिनस्तान्हत्वा प्रत्यवरुद्धभोजनोवंधुवधदुःखेनसंकुचितभोगोराज्यलाभेनप्राप्तभोगोवाकथंराज्येप्रवृत्तः। प्रवृत्तावाततःकिमकार्षीत् १ राज्यप्रवृत्तौश्रीकृष्णस्यप्रीतिंपर्यालोच्याप्रवृत्तइत्याशयेनोत्तरमाह । वंशंकुरोःसंरोहयित्वापरीक्षिद्रक्षणेनसंरोह्यांऽकुरितंकृत्वा । कथंभूतं वंशदवाग्निनिर्दृतंवंशएवदवोवनंतस्मादुद्भुतोयः क्रोधरूपोऽग्निस्तेननिर्दृतंदग्धं । निजराज्ये निवेश्य (स्थापयित्वा) च २ प्रवृत्तौहेतुमुक्त्वाकिमकार्षीदित्यस्योत्तरमाह (निशम्येति । भीष्मोक्तंधर्मतथाअच्युतोक्तंचशेषंधर्मनिशम्य)प्रवृत्तंयद्विज्ञानंपरमेश्वराधीनंजगन्नस्वतंत्रमित्येवंभूतंतेनविधूतोविभ्रमोऽहंकर्त्तेत्येवंभूतोमोहोयस्यसः । अनुजैरनुवर्तितः (आनुकूल्येन) सवितःसन्अजितःश्रीकृष्णएवाश्रयोयस्यसः परिधिः (परिधिभूतः) समुद्रस्तत्पर्यंतांगांपृथ्वींपालयामास३

॥९२॥

संपद्यमानमाज्ञायभीष्मंब्रह्मणिनिष्कले ॥ सर्वेबभूवुस्तेतूष्णींवयांसीवदिनात्यये ४४ तत्रदुंदुभयोनेदुर्देवमानववादिताः ॥ शशंसुःसाधवोराज्ञांखात्पेतुःपुष्पवृष्टयः४५तस्यनिर्हरणादीनिसंपरेतस्यभार्गव॥युधिष्ठिरःकारयित्वामुहूर्तंदुःखितोऽभवत्४६तुष्टुवुर्मुनयोहृष्टाःकृष्णंतद्गुह्यनामभिः॥ ततस्तेकृष्णहृदयाःस्वाश्रमान्प्रययुःपुनः ४७ ततोयुधिष्ठिरोगत्वासहकृष्णोगजाह्वयम्॥पितरंसांत्वयामासगांधारींचतपस्विनीम् ४८ पित्राचानुमतोराजावासुदेवानुमोदितः॥चकारराज्यंधर्मेणपितृपैतामहंविभुः४९॥इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेयुधिष्ठिरराज्यप्रलंभोनामनवमोऽध्यायः ९॥छ॥शौनकउवाच॥हत्वास्वरिक्थस्पृधआततायिनोयुधिष्ठिरोधर्मभृतांवरिष्ठः॥सहानुजैःप्रत्यवरुद्धभोजनःकथंप्रवृत्तःकिमकारषीततः१सूतउवाच॥वंशंकुरोर्वंशदवाग्निनिर्हृतंसंरोहयित्वाभवभावनोहरिः॥निवेशयित्वानिजराज्यईश्वरोयुधिष्ठिरंप्रीतमनाबभूवह २ निशम्यभीष्मोक्तमथाच्युतोक्तंप्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशासगामिंद्रइवाजिताश्रयःपरिध्युपांतामनुजानुवर्तितः ३

श्लोकाः ४४/३

चूर्णिका

ततः ब्रह्मणिप्राप्तंभीष्मंज्ञात्वा तेऋषयस्तूष्णींबभूवुः ४४ तदा देवमानववादिताःदुंदुभयोनेदुः साधवःशशंसुः खात्पुष्पवृष्टयश्चपेतुः ४५ ४६ ततः युधिष्ठिरस्तस्यभीष्मस्यऔर्ध्वदेहिकंकारयित्वाक्षणंदुःखितोऽभूत् ततः हृष्टाः मुनयःश्रीकृष्णंस्तुत्वास्वाश्रमंययुः ४७ ततः युधिष्ठिरः कृष्णेनसहहास्तिनपुरंगत्वाधृतराष्ट्रंगांधारींच सांत्वयित्वा ४८ धृतराष्ट्रकृष्णाभ्यांअनुज्ञातःसन्धर्मेणराज्यंचकार ४९ इतिप्रथमेनवमः १ ॥ छ ॥शौनकउवाच अथयुधिष्ठिरः स्वरिपून्हत्वाराज्यंप्राप्यकिंचकार १ सूतउवाच नष्टंकुरुवंशंपरीक्षिद्रक्षणेनअंकुरितंकृत्वा धर्मराज्येस्थाप्य श्रीकृष्णःप्रसन्नोबभूव २ ततो धर्मःभीष्मोक्तंभगवतोक्तंच धर्मंश्रुत्वाइंद्रइवपृथ्वींशशास ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यराज्यमनुवर्णयति काममितित्रिभिः (कामामिच्छानुसारं) महीसर्वकामदोग्ध्रीबभूव (पयसाक्षीरेण) व्रजान्गोष्ठानि ऊधस्वतीऊधस्वत्यः ऊधःक्षीराशयस्तद्वत्यःस्थूलोधसः (घटोध्न्यः) इत्यर्थः सिषिचुरभ्यषिंचन् ४ (कामंतस्ययुधिष्ठिरस्येच्छानुसारंनद्यःसमुद्राश्चस्थिताःअनुकूलाइत्यर्थः । सवनस्पतिवीरुधःवृक्षलतासहितागिरयश्च अन्वृतुऋतावृतौ (सर्वकालमित्यर्थः । फलंतिओषधयोव्रीह्यादयः) ५ आधयोमनोव्यथाःव्याधयोरोगाःक्लेशाःशीतोष्णादिकृताःदैवंचभूतानिचात्माचहेतुर्येषामाधिदैविकादीनांतेजंतूनांनाभवन् (अजातशत्रौयुधिष्ठिरे) ६ इदानींद्वारकागमनंनिरूपयितुमाह । उषित्वेति । (विशोकापशोकपरिहाराय) स्वसुःसुभद्रायाः ७ तंयुधिष्ठिरम् (आमंत्र्य आलिंग्याभिवाद्यचतेनानुज्ञातःसन्) ८ (विराटतनयाउत्तरा) युयुत्सुर्धृतराष्ट्राद्वैश्यायांजातः गौतमःकृपःयमौनकुलसहदेवौ ९ अन्याश्चस्त्रियः मत्स्यसुताउत्तरा तस्याःपुनर्ग्रहणंगर्भरक्षकश्रीकृष्णविरहेमोहाधिक्यात् । यद्वा (मोहाधिक्यदर्शनार्थं) मत्स्यसुतासत्यवती १० तेषांकृष्णविरहासहनंकैमुत्यन्यायेनाह । सत्संगादितिद्वाभ्याम् । सतांसंगाद्धेतोर्मुक्तःपुत्रादिविषयोदुःसंगोयेनसः सद्भिःकीर्त्यमानं (रोचनं) रुचिकरं यस्ययशःसकृदप्याकर्ण्यसत्संगंत्यक्तुंनशक्नोति ११ दर्शनादिभिस्तस्मिन्श्रीकृष्णेन्यस्ताअध्यस्ताधीर्येषांते(तत्रसंलापोभाषणंमिथः) १२ अतएवानिमिषैर्नेत्रैस्तमेववीक्षमाणास्तत्रतत्रार्हणानयनाद्यर्थंचलंतिस्म । यतःस्नेहेनसम्यग्बद्धाः अतएवतमनुद्रुतानिगतानिचेतांसियेषांते १३

श्लोकाः ४ / १३

कामंववर्षपर्जन्यःसर्वकामदुघामही ॥ सिषिचुःस्मव्रजान्गावःपयसोधस्वतीर्मुदा४नद्यःसमुद्रागिरयःसवनस्पतिवीरुधः॥ फलंत्योषधयःसर्वाःकाममन्वृतुतस्यवै ५ नाधयोव्याधयःक्लेशादैवभूतात्महेतवः ॥ अजातशत्रावभवन्जंतूनांराज्ञिकर्हिचित् ६ उषित्वाहस्तिनपुरेमासान्कतिपयान्हरिः ॥ सुहृदांचविशोकायस्वसुश्चप्रियकाम्यया ७ आमंत्र्यचाभ्यनुज्ञातःपरिष्वज्याभिवाद्यतं ॥ आरुरोहरथंकैश्चित्परिष्वक्तोऽभिवादितः ८ सुभद्राद्रौपदीकुंतीविराटतनयातथा ॥ गांधारीधृतराष्ट्रश्चयुयुत्सुर्गौतमोयमौ ९ वृकोदरश्चधौम्यश्चस्त्रियोमत्स्यसुतादयः ॥ नसेहिरेविमुह्यंतोविरहंशार्ङ्गधन्वनः १० सत्संगान्मुक्तदुःसंगोहातुंनोत्सहतेबुधः॥ कीर्त्यमानंयशोयस्यसकृदाकर्ण्यरोचनम् ११ तस्मिन्न्यस्तधियःपार्थाःसहेरन्विरहंकथम् ॥ दर्शनस्पर्शसंलापशयनासनभोजनैः १२ सर्वेतेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः ॥ वीक्षंतःस्नेहसंबद्धाविचेलुस्तत्रतत्रह १३

चूर्णिका

धर्मेराज्यपालकेसतिपर्जन्यःकामंववर्ष महीकामदुघाआसीत् गावःवहुपयांसिददुः ४ नद्यःसमुद्रागिरयः सवनस्पतिवीरुधः फलंत्योषधयःसर्वाःकाममन्वृतुतस्यवै ५आधयोव्याधयोऽपिनासन्६ततः श्रीकृष्णःहास्तिनपुरेकतिचिन्मासान्सुहृदांविशोकायस्थित्वाधर्मादीन्पृष्ट्वा ७ तैरनुज्ञातःसन्द्वारकांगतुंरथमारुरोह ८ तदा सुभद्राद्रौपद्युत्तराकुंतीगांधारीअर्जुनः कृपः नकुलः सहदेवः ९ भीमः धौम्यश्चसत्यवत्यादयःस्त्रियश्चभगवतोविरहं न सेहिरे १० अहो यस्ययशःश्रुत्वाबुधःसन् तंहातुंनोत्सहते ११ तस्मिन्भगवतिदर्शनादिभिर्न्यस्तधियः पार्थाः तद्विरहंकथंसहेरन् किंच तेपार्थाः १२ भगवंतंवीक्षंतःसंतः अर्हणानयनाद्यर्थंचलंतिस्म १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. प्र. अ० ॥१०॥

टीका

अगारान्निर्यातिनिर्गच्छतिसति औत्कंठ्यादासत्त्यतिशयाद्धेतोरुद्गलत्स्रवद्बाष्पमश्रून्यरुंधन्नेत्रेष्वेवस्तंभितवत्यः । तत्रहेतुः अभद्रंनोस्यादमंगलंमाभूदित्येतदर्थः १४ मृदंगादयोदश वाद्यभेदाः १५ (प्रासादोराजगृहाणितच्छिखरारूढः) प्रेमव्रीडास्मितपूर्वकमीक्षणंयासांताः १६ गुडाकानिद्रातस्याईशोजितनिद्रोऽर्जुनः (मुक्तादामभिर्मुक्तालम्बैर्विभूषितंरत्नघटितो दण्डोयस्यतत्एवंभूतंश्वेतच्छत्रम्) १७ (व्यजनेचामरेजगृहतुःपथिपुष्पवर्षैर्विकीर्यमाणः) मधुपतिःश्रीकृष्णः १८ सत्याःश्रीकृष्णेतासामव्यभिचारात् किंतुनानुरूपाश्च (तथाऽनुरूपाश्च) निर्गुणस्यपरमानंदस्यसुखीभवेत्यादयोनानुरूपागुणात्मनोमानुष्यनाट्यावतारेऽनुरूपाश्चेत्यर्थः । संधिरार्षः १९ सर्वासांश्रुतीनांमनोहरः उपनिषदोऽपिमूर्तिमत्यःसत्यस्तंसंजल्पमभ्यनंद न्नित्यर्थः (उत्तमःसर्वोत्कृष्टःश्लोकोयशोयस्यतस्मिन्नेवचेतोयासांतासाम्) २० तत्रतेजःसौंदर्याद्यतिशयेनविस्मिताभ्यःसखीभ्योऽन्याःस्त्रियःकथयंतिनात्रविस्मयःकार्यः साक्षादीश्वरत्वाद स्येति । सवाइतिचतुर्भिः । वैस्मरणे किलेतिप्रसिद्धद्याप्रमाणद्योतकम् यएकएवाद्वितीयःपुरुषआसीत्सएवायंश्रीकृष्णः कुत्रासीत् । अविशेषे आत्मनिनिष्प्रपंचेनिजस्वरूपे । कदा अग्रेगुणेभ्योगुणक्षोभात्पूर्वम् तथानिशिप्रलयेचतस्यलक्षणंजगतामात्मनिजीवेनिमीलितात्मनि । निमीलितात्मन्निति लुप्तसप्तम्यंतंपदंजातावेकवचनं । ईश्वरेलीनरूपेषुजीवेषुसत्स्वित्यर्थः । ननु जीवानांब्रह्मत्वात्कथंलयस्तत्राह।सुप्तासुशक्तिषुसतीषु । जीवोपाधिभूतसत्त्वादिशक्तिलयएवजीवलयइत्यर्थः २१ तदेवंसंसृतेरादौप्रलयानंतरंचनिःप्रपंचावस्थानमुक्त्वासृष्टिप्रलययोर्मध्येसप्रपंचाव स्थानमाह।सएवअप्रच्युतस्वरूपस्थितिरेवप्रकृतिंअनुससारअधिष्ठितवान्।भूयःपुनःसृष्टिप्रवाहस्यानादित्वात् । कीदृशीं निजवीर्यचोदितांस्वकालशक्तिप्रेरितांस्वांशभूतानांजीवानांमायांमोहिनीं अतएवसिसृक्षतींस्रष्टुमिच्छंतीं।किमर्थमनुससार ।अनामरूपेआत्मनिजीवेरूपनामनीविधातुमिच्छन्।उपाधिसृष्ट्याजीवानांभोगायेत्यर्थः।कर्माणिचविधातुंवेदान्कृतवानित्याह।शास्त्रकृदिति २२ ॥९४॥

श्लोकाः १४/२२

न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते ॥ निर्यात्यगारान्नोभद्रमितिस्याद्बांधवस्त्रियः १४ मृदंगशंखभेर्यश्चवीणापणवगोमुखाः ॥ धुंधुर्यानकघंटाद्यानेदुर्दुंदुभय स्तथा १५ प्रासादशिखरारूढाःकुरुनार्योदिदृक्षया ॥ ववृषुःकुसुमैःकृष्णेप्रेमव्रीडास्मितेक्षणाः १६ सितातपत्रंजग्राहमुक्तादामविभूषितम् ॥रत्नदंडंगुडाकेशः प्रियःप्रियतमस्यह १७ उद्धवःसात्यकिश्चैवव्यजनेपरमाद्भुते ॥ विकीर्यमाणःकुसुमैरेजेमधुपतिःपथि १८ अश्रूयंताशिषःसत्यास्तत्रतत्रद्विजेरिताः ॥ नानुरू पानुरूपाश्चनिर्गुणस्यगुणात्मनः १९ अन्योऽन्यमासीत्संजल्पउत्तमश्लोकचेतसाम् ॥ कौरवेंद्रपुरस्त्रीणांसर्वश्रुतिमनोहरः २० सवैकिलायंपुरुषःपुरातनोयए कआसीदविशेषआत्मनि ॥ अग्रेगुणेभ्योजगदात्मनीश्वरेनिमीलितात्मन्निशिसुप्तशक्तिषु २१ सएवभूयोनिजवीर्यचोदितांस्वजीवमायांप्रकृतिंसिसृक्षतीं ॥ अनामरूपात्मनिरूपनामनीविधित्समानोऽनुससारशास्त्रकृत् २२

चूर्णिका

तथाभगवतिनिर्गतेसति बांधवस्त्रियः अभद्रंस्यादितिमत्वाबाष्पाण्यरुंधन् १४ तदा मृदंगभेर्यादयः नेदुः १५ तथाप्रासादारूढाःकुरुस्त्रियःश्रीकृष्णंकुसुमैर्ववृषुः १६ तदा अर्जुनश्छत्रंजग्राह १७ उद्धवसात्यकीचामरेजगृहतुः १८ विप्राः आशिषोददुः १९ किंच कौरवस्त्रीणांपरस्परमालापाः बभूवुः २० तेच यः अग्रेएकएवाऽऽसीत् २१ किंचयः इदंसिसृक्षतीमायामनुसृतवान् २२ ॥९४॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अस्यदर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः । सवैअयं (यत्पदं)यस्यपदंस्वरूपमंघ्रिंवा निर्जितोमातरिश्वाप्राणोयैः । ह्रस्वत्वमार्षं । तेसूरयएवपश्यंति।केन भक्त्योत्कलितउत्कंठितःअमलोय
आत्माबुद्धिस्तेन । 'दृश्यतेत्वग्र्ययाबुद्ध्या' तिश्रुतेः । बुद्धिवैमल्यस्याप्ययमेवहेतुरित्याहुः । ननु हेसखि एषएवसत्त्वंबुद्धिंपरिमार्ष्टुंसम्यक्शोधयितुमर्हति । नतुयोगादयइत्यर्थः । य
द्वा नुअहोएपसत्वंज्ञानंपरिमार्ष्टुंनाशयितुंदूरगमनेनाप्रत्यक्षीभवितुंनार्हति । किंत्वनेनसहैवगंतव्यमित्यर्थः २३ पुण्यश्लोकतामाहुः (सवाइति) हेसखि योवेदेषु(गुह्येषु) चरहस्यागमेषु(गुह्य
वादिभिः) रहस्यनिरूपकैःअनुगीतसत्कथः अन्वनुगीताःसत्यःकथाःयस्यसएवायं । गानप्रकारमाहुः । यएकईशइत्यादि (आत्मलीलयैवजगत्सृजतिपातिसंहरतिचतथाप्यकर्तेत्यर्थः)
२४ एवंभूतस्यनानावतारेषुकारणमाहुः । यदाहीति । तमोव्याप्ताधीर्येषांतेनृपायदाऽधर्मेणजीवंतिकेवलंप्राणान्पुष्णंतितत्रतदैपएवभवायस्थित्यैसत्त्वतः विशुद्धरूपेणसत्त्वेनरूपाणि
दधत् भगादीनिधत्ते प्रकटयति । युगेयुगेतत्तदवसरे भगमैश्वर्यं सत्यंसत्यप्रतिज्ञत्वं ऋतंयथार्थोपदेशकत्वं दयाभक्तकृपा यशोऽद्भुतकर्मत्वं (च) २५ विशेपतः श्रीकृष्णावतारसौ
भाग्यंवर्णयंति । अहोइतिपंचभिः।यद्यस्मादेपः(पुंसामृषभः)पुरुपोत्तमः श्रियः(प्रियः लक्ष्मी-)पतिः स्वजन्मनायदोःकुलंअंचतिपूजयतिसत्करोति । अतः श्लाघ्यतमं (अतिशयेनस्तुत्यंतत्)
चंक्रमणेन(मुहुःपद्भ्यांगमनेन)चमधोर्वनंमथुरांसत्करोति अतस्तत्पुण्यतममिति।तमबर्थस्याप्यत्यंतातिशयेऽलमिति(उक्तिरत्यंतातिशयद्योतनार्थ)तत्राप्याश्चर्येअहोइत्युक्तं २६ द्वारकांश्लाघंतेअ
होबतात्याश्चर्यं । किंतत् कुशस्थलीद्वारकास्वर्गउत्कृष्टइतियद्यशस्तस्यातिरस्करीपरिभवकर्त्री भुवश्चपुण्ययशस्करी (पुण्यकीर्तेःकर्त्री) भवति । यद्यतः तत्रत्याःसर्वाःप्रजाःस्वानुग्रहेणेपि
तंप्रेपितंस्मितपूर्वोऽवलोकोयस्यतं । यद्वा अनुग्रहार्थमिपितमिष्टं । अनुग्रहोषितमितिपाठेस्वानुग्रहार्थमुपितंकृतनिवासम् । ऐकपद्यपाठेत्वनुग्रहेणेपितंप्रेषितंयत्स्मितंतत्पूर्वकोवलोकोयस्यतम् ।
स्वस्यआत्मनः पतिंश्रीकृष्णंनतुपित्रादिवद्देहमात्रपतिं नित्यंपश्यंतिस्म । (उपितमितिपाठेस्वानुग्रहार्थमुपितंकृतनिवासं) नैतत्स्वर्गेस्तीत्यर्थः २७

॥९९॥

श्लोकाः २३/२७

सवाअयंयत्पदमत्रसूरयोजितेंद्रियानिर्जितमातरिश्वनः॥पश्यंतिभक्त्युत्कलितामलात्मनानन्वेषसत्त्वंपरिमार्ष्टुमर्हति २३सवाअयंसख्यनुगीतसत्कथोवेदेषुगुह्ये
षुचगुह्यवादिभिः॥यएकईशोजगदात्मलीलयासृजत्यवत्यत्तिनतत्रसज्जते २४ यदाह्यधर्मेणतमोधियोनृपाजीवंतितत्रैषहिसत्त्वतःकिल॥ धत्तेभगंसत्यमृतंदयांय
शोभवायरूपाणिदधद्युगेयुगे २५ अहोअलंश्लाघ्यतमंयदोःकुलंअहोअलंपुण्यतमंमधोर्वनम् ॥ यदेषपुंसामृषभःश्रियःप्रियःस्वजन्मनाचंक्रमणेनचांचति २६
अहोबतस्वर्यशसस्तिरस्करीकुशस्थलीपुण्ययशस्करीभुवः ॥ पश्यंतिनित्यंयदनुग्रहेषितंस्मितावलोकंसपतिंस्मयत्प्रजाः २७

चूर्णिका

किंचयोगिनो यत्पदममलबुद्ध्यापश्यंति २३ किंच य इदं जगल्लीलयासृजत्यवत्यत्ति नतत्रसज्जते २४ किंच यदादुष्टाराजानोभवंति तदाजगत्क्षेमायरूपाणि
धत्ते सएवायंश्रीकृष्णः २५ किल अहोयदोःकुलंधन्यंमधुवनंच यस्मात्श्रीकृष्णः स्वजन्मनागमनेनचपूजयति २६ किंच अहोद्वारकाऽपिधन्या यतः यस्यांप्रजाः
स्मितावलोकंभगवंतंपश्यंति २७

॥९९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेसखि अस्यगृहीतपाणिभिः पत्नीभिरीश्वरोऽयमेवनूनंजन्मांतरेषु (व्रतस्नानहोमादिना) समर्चितः (हियस्मादस्याधरामृतंयाःमुहुःपिबंति) यस्मिन्नधरामृतेआशयश्चित्तंयासांताः संमोहंप्रापाइति(अधरामृतस्य)मनोहरत्वमुक्तम् २८एतत्प्रपंचयंतियाइति द्वाभ्यां । वीर्यप्रभावएवशुल्कंमूल्यंतेन(स्वयंवरेहृताः) शुष्मिणोबलिष्ठान् (प्रमथ्य) प्रद्युम्नश्चसांबश्चअंबश्चसुताः (पुत्राः)यासांतारुक्मिणीजांबवतीनाग्नजित्यः आदिर्यासांसत्यभामादीनांताः याश्चापराः (भौमासुरंनिहत्यषोडशसहस्राण्यानीताः) अस्यश्लोकस्योत्तरश्लोकेनान्वयः २९ एताः स्त्री त्वमेवपरंकेवलंसाधुशोभनंकुर्वते । किंभूतंस्त्रीत्वं । अपास्तंगतंपेशलंभद्रंस्वातंत्र्यं(सूज्ञत्वादि)यस्मात्तत् निरस्तंशौचंशुचित्वंयस्मात्ततथाभूतं (स्वभावतःस्वातंत्र्यादिरहितं)अपि (आसांस्त्रीत्वमुत्कृष्टमित्यर्थः) तत्रहेतुः जातुकदाचिदपि(यासांगृहात्कमलनयनःश्रीपतिः)नापैतिनानिर्गच्छति । आहृतिभिर्व्याहारैः प्रियोक्तिभिर्हृदिस्पृशन् । यद्वा पारिजातादिप्रियवस्त्वाहरणैः हृदिस्पृशन्नानंदयन् ३० एवंविधाविचित्रागिरः सस्मितेननिरीक्षणेनाऽभिनंदन् सहरिर्ययौ (गदंतीनांभाषमाणानां) ३१ मधुद्विषोऽपिगोपीथायरक्षणायस्नेहात् परेभ्यःशत्रुभ्यःशंकितःसन् प्रायुंक्त । "हस्त्यश्वरथपादातंसेनांगंस्याच्चातुर्विध"मित्येवंचतुरंगिणींपृतनांसेनां ३२ पंडोःकुरुवंशजत्वात्पांडवाअपिकौरवाएवतान् (दृढंअत्यंतंस्निग्धान्अतएवदूरागतान्संनिवर्त्य)प्रियैरुद्धवादिभिःसह ३३ कुरुक्षेत्रंकुरुदेशांतर्गतमेव । क्रमोऽत्रनविवक्षितः ३४ मरुर्निरुदकोदेशः धन्वोऽल्पोदकः (तौसौवीरमाभीरंचातिक्रम्यततःपरानानर्तान्द्वारकादेशान्) सविभुरुपागात्प्राप्तः । तदा हेभार्गव (हेशौनक) मनागीपत्श्रांतावाहायस्यसः ३५

॥९६॥

श्लोकाः २८/३५

नूनंव्रतस्नानहुतादिनेश्वरःसमर्चितोह्यस्यगृहीतपाणिभिः ॥ पिबंतियाःसख्यधरामृतंमुहुर्व्रजस्त्रियःसंमुमुहुर्यदाशयाः २८ यावीर्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः ॥ प्रद्युम्नसांबांबसुतादयोऽपरायाश्चाहृताभौमवधेसहस्रशः २९ एताःपरंस्त्रीत्वमपास्तपेशलंनिरस्तशौचंबतसाधुकुर्वते ॥ यासांगृहात्पुष्करलोचनःपतिर्नजात्वपैत्याहृतिभिर्हृदिस्पृशन् ३० एवंविधागदंतीनांसगिरःपुरयोषितां ॥ निरीक्षणेनाऽभिनंदन्सस्मितेनययौहरिः ३१ अजातशत्रुःपृतनांगोपीथायमधुद्विषः ॥ परेभ्यःशंकितःस्नेहात्प्रायुंक्तचतुरंगिणीम् ३२ अथदूरागतान्शौरिःकौरवान्विरहातुरान् ॥ सन्निवर्त्यदृढंस्निग्धान्प्रायात्स्वनगरींप्रियैः ३३ कुरुजांगलपांचालान्शूरसेनान्सयामुनान् ॥ ब्रह्मावर्तंकुरुक्षेत्रंमत्स्यान्सारस्वतानथ ३४ मरुधन्वमतिक्रम्यसौवीराभीरयोःपरान् ॥ आनर्त्तान्भार्गवोपागाच्छ्रांतवाहोमनाग्विभुः ३५

चूर्णिका

अपिच चैद्यादीन्प्रमथ्यवीर्यशुल्केनाऽऽनीताः २८ रुक्मिण्यादयःस्त्रियःधन्याः २९ यतः तासांगृहाद्भगवान्नगच्छति ३० एवंगदंतीस्त्रीः प्रत्यवलोकनेनआनंदयन्हरिर्ययौ ३१ किंच धर्मः शत्रुभ्यः शंकितः सन् हरये सेनां ददौ ३२ अथदुरादागतान्पांडवान्निवर्त्य ३३ ततः कुरुजांगलपांचालशूरसेनब्रह्मावर्तकुरुक्षेत्रमत्स्यसारस्वतमरुसौवीराभीरान् देशानतीत्य आनर्तसमीपेप्राप्तः ३४ ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रतत्रदेशेतत्रत्यैर्जनैःप्रत्युद्यतानिनिवेदितानिअर्हणानिउपायनानियस्मैसः। सायमपराह्णेपश्चाद्दिशंपाश्चिमांदिशंभेजेप्राप्तः तदाचगविष्ठःस्वर्गस्थःसूर्योगांउदकंगतःप्रविष्टः । अस्तंगतइत्यर्थः ।
'अद्भ्योवाएषप्रातरुदेत्यपःसायंप्रविशती'तिश्रुतेः । यद्वा तदासायंकालेजातेरथादवतीर्यगविष्ठोभूमौस्थितस्ततोगांजलाशयंगतःसन्पश्चाद्दिशंसायंसंध्यांभेजे । उपासितवानित्यर्थः ।
(श्लेषेणार्थद्वयमपिप्रकृतमुक्तमितिवा)३६ ॥इतिप्रथमस्कंधेटीकायांदशमोध्यायः १०॥ आनर्तैःस्तूयमानस्यपुरींनिर्विश्यबंधुभिः । एकादशेरतिःसम्यग्यादवेंद्रस्यवर्ण्यते ॥ १॥ उत्सवैरुच्चलत्पौ
रमुदंचध्वजतोरणं । उल्लसद्रत्नदीपालिस्वपुरंप्रभुराविशत् ॥२॥ स्वृद्धान्समृद्धान् । दरवरंपांचजन्यंशंखं दध्मौवादितवान् (विषादंविरहजन्यंखेदं) १ (सइतिदाध्मायमानो भृशंवा
द्यमानः)दरःशंखः भगवताआपूर्यमाणः करकंजसंपुटेकमलमुकुलसदृशांजलौउच्चकाशेशुशुभे । किंभूतः । धवलमुदरंयस्य सः । तथाप्युरुक्रमस्यश्रीकृष्णस्याऽधराशोणवर्णेनशोणिमार
क्तिमायस्यसः । करकंजेकरकमलेतयोःसंपुटेमध्येवर्तमानःकथमुच्चकाशे अब्जखंडेरक्तकमलद्वयवृंदेऊद्गतस्वनःकलहंसोराजहंसइव २ जगतोयद्भयंतस्यभयावहं । प्रत्युद्ययुःप्रत्युज्जग्मुः ।
भर्तुर्दर्शनेलालसमौत्सुक्यंयासांताः ३ तत्रतस्मिन्श्रीकृष्णेउपनीताःसमर्पिताःबलयउपायनानियाभिस्ताः । निरपेक्षेपितस्मिन्नादरेणसमर्पणेदृष्टांतःरवेर्दीपमिवेति । पितरमर्भकाइवतंसर्वसुहृ
दमवितारम् प्रोचुरित्युत्तरेणान्वयः । सुहृत्त्वेनैवावितारंनतुकामेन । तत्रहेतुः । आत्मारामं। तत्रापिहेतुः परमानंदनिजस्वरूपलाभेनैवपूर्णकामं ४ ५ किमूचुस्तदाह । नताःस्मेति ।
विरिंच्योब्रह्मावैरिंच्याःसनकादयः (सुरेंद्राश्चशक्रादयस्तैर्वंदितम्) इहसंसारेपरंक्षेममिच्छतांपरायणंपरमंशरणं । कुतःपरेषांब्रह्मादीनांप्रभुरपिकालोयत्रप्रभुर्नभवेत् ६ अतोभवायो
द्भवायनोऽस्माकंत्वंभव । हेविश्वभावन (यस्यतवानुवृत्त्यासेवया) कृतिनःकृतार्थाबभूविमजातावयं ७

॥८७॥

श्लोकाः ३६ ७

तत्रतत्रहतत्रत्यैर्हरिःप्रत्युद्यतार्हणः ॥ सायंभेजेदिशंपश्चाद्गविष्ठोगांगतस्तदा ३६॥इतिश्रीभा०म०प्र०दशमोऽध्यायः१० ॥छ॥ सूतउवाच ॥आनर्तान्सउ
पव्रज्यस्वृद्धान्जनपदान्स्वकान् ॥ दध्मौदरवरंतेषांविषादंशमयन्निव १ सउच्चकाशेधवलोदरोदरोऽप्युरुक्रमस्याधरशोणशोणिमा ॥ दाध्मायमानः
करकंजसंपुटेयथाऽब्जखंडेकलहंसउत्स्वनः २ तमुपश्रुत्यनिनदंजगद्भयभयावहम् ॥ प्रत्युद्ययुःप्रजाःसर्वाभर्तृदर्शनलालसाः ३ तत्रोपनीतबलयोरवेर्दीपमि
वादृताः ॥आत्मारामंपूर्णकामंनिजलाभेननित्यदा ४ प्रीत्युत्फुल्लमुखाःप्रोचुर्हर्षगद्गदयागिरा ॥ पितरंसर्वसुहृदमवितारमिवार्भकाः ५ नताःस्मतेनाथसदां
घ्रिपंकजंविरिंचिवैरिंच्यसुरेंद्रवंदितम् ॥ परायणंक्षेममिहेच्छतांपरंनयत्रकालःप्रभवेत्परप्रभुः ६ भवायनस्त्वंभवविश्वभावनत्वमेवमाताऽथसुहृत्पतिःपिता ॥
त्वंसद्गुरुर्नःपरमंचदैवतंयस्याऽनुवृत्त्याकृतिनोबभूविम ७

चूर्णिका

तत्रत्यैःजनैतत्रतत्रपूजितःसन् रथादवतीर्य सायंसंध्यामुपासितवान् तावत्सूर्योऽप्यस्तंगतइति ३६ ॥ इतिप्रथमेदशमः १० ॥ छ ॥ सूतउवाच ततः भगवानानर्तदे
शान्प्राप्य तत्रत्यानांविषादंशमयन्शंखंदध्मौ १ सदाध्मायमानःशंखःभगवतःकरकंजसंपुटेसशब्दोहंसइवशुशुभे २ तन्निनादंश्रुत्वाभगवद्दर्शनोत्सुकाःप्रजाःप्रत्युज्जग्मुः
३ ततः भगवतेउपायनानिदत्वाप्रीत्युत्फुल्लमुखाःसत्यस्तमात्मारामममूचुः ४ ५ तद्यथा हेनाथ तेचरणारविंदंनताःस्म ६ हेभगवन् नःमातासुहृत्पतिःपितागुरुश्चत्वमेवासि ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कृतार्थत्वमेवाहुः । अहोभवतावयंसनाथाःस्म यद्यस्मात्तवरूपंपश्येम । त्रैविष्टपानां (देवानां) अपिदूरेदर्शनंयस्यतत् । देवानामपिदुर्लभदर्शनमित्यर्थः । प्रेम्णायत्स्मितंतद्युक्तंस्निग्धंनिरीक्षणंयस्मिंस्तदाननंयस्मिन्रूपेतत् । सर्वेषुचांगेषुसौभगं(सौंदर्य)यस्मिंस्तत् ८ अर्भकाइवसकरुणमाहुः । यर्हिंयदाभोअंबुजाक्ष । नोभवानितिपाठे नइत्यनादरेषष्ठी । अस्माननादृत्याऽपससारअपहायजगाम।कुरून्हस्तिनापुरं मधून्मथुरांवा।तत्रतदा रविंविनाआंध्यादक्ष्णोर्यथातथातवनस्त्वदीयानामस्माकमपिएकोऽपिक्षणोऽब्दकोटितुल्योभवेत् (रविदर्शनंविनानेत्राणांसर्वत्रांऽध्यं एवंत्वद्दर्शनंविनावयंकेवलमंघाअभूमेत्यर्थः) ९ इतिचएवंविधाश्चान्याश्चोच्चारितावाचःशृण्वन्दृष्टयासाभिनंदावलोकेनाऽनुग्रहंकुर्वन् पुरींद्वारकांप्राविशत् १० तांद्वारकांस्तौतिपंचभिः । स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तांरक्षितां (मधवश्चभोजाश्चदशार्हाश्चअर्हाश्चकुकुराश्चअंधकाश्चवृष्णयश्चेतिवंशभेदास्तैः) ११ सर्वेष्वृतुषुसर्वे (अपि) विभवाःपुष्पादिसंपदोयेषांतेपुण्यवृक्षालताश्रमालतामंडपाश्चयेषुतैरुद्यानादिभिर्वृतायेपद्माकराःसरांसितैःश्रीःशोभायस्यास्तां । उद्यानंफलप्रधानं उपवनंपुष्पप्रधानं आरामःक्रीडार्थवनम् १२ गोपुरंपूर्द्वारं द्वारंगृहद्वारं कृतानिकौतुकेनोत्सवेनतोरणानियस्यांतां । गरुडादिचिह्नैरंकिताध्वजाः जयप्रदयंत्रांकिताःपताकाः । चित्राणां (रक्तपीतादिविचित्रवर्णानां) ध्वजपताकानांअग्रैरंतःप्रतिहतआतपोयस्यांतां । १३ सम्मार्जितानिनिस्सारितरजस्कानिमहामार्गादीनियस्यांतां । महामार्गाराजमार्गाः रथ्याइतरेमार्गाः आपणकाःपण्यवीथयः चत्वराण्यंगणानि । फलादिभिरुप्तामवकीर्णां १४ (दध्यक्षतादिभिर्मंगलपदार्थैरलंकृतां) १५ प्रेष्ठंप्रियतममंतरात्मजकृष्णमायांतंनिशम्यश्रुत्वावसुदेवादयःप्रत्युज्जग्मुरितिचतुर्थेनान्वयः १६

॥९८॥

श्लोकाः ८/१६

अहोसनाथाभवतास्मयद्वयंत्रैविष्टपानामपिदूरदर्शनम् ॥ प्रेमस्मितस्निग्धनिरीक्षणाऽऽननंपश्येमरूपंतवसर्वसौभगम् ८ यर्ह्यंबुजाक्षाऽपससारभोभवान्कुरून्मधून्वाऽथसुहृद्दिदृक्षया ॥ तत्राऽब्दकोटिप्रतिमःक्षणोभवेद्रविंविनाऽक्ष्णोरिवनस्तवाच्युत ९ इतिचोदीरितावाचःप्रजानांभक्तवत्सलः ॥ शृण्वानोऽनुग्रहंदृष्ट्यावितन्वन्प्राविशत्पुरीम् १० मधुभोजदशार्हार्हकुकुरांधकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तांनागैर्भोगवतीमिव ११ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियं १२ गोपुरद्वारमार्गेषुकृतकौतुकतोरणाम् ॥ चित्रध्वजपताकाग्रैरंतःप्रतिहतातपाम् १३ सम्मार्जितमहामार्गरथ्यापणकचत्वराम् ॥ सिक्तांगंधजलैरुप्तांफलपुष्पाक्षतांकुरैः १४ द्वारिद्वारिगृहाणांचदध्यक्षतफलेक्षुभिः ॥ अलंकृतांपूर्णकुंभैर्बलिभिर्धूपदीपकैः १५ निशम्यप्रेष्ठमायांतंवसुदेवोमहामनाः ॥ अक्रूरश्चोग्रसेनश्चरामश्चाद्भुतविक्रमः १६

चूर्णिका

अहोदेवानामपिदर्शनंदुर्लभं तदस्माकंजातं अतोवयंकृतार्थाःस्म ८ यदा त्वंनःहित्वासुहृद्दिदृक्षयागजाह्वयंमथुरांवागतवान् तदा क्षणःअब्दकोटितुल्योऽभूत् ९ इति प्रजानांवचःशृण्वन् दृष्ट्या ताःअनुग्रहंकुर्वन्द्वारकांविवेश १० कथंभूतांतां स्वतुल्यबलैर्यादवैःरक्षिताम् ११ सर्वर्तुसंपद्भिर्युक्तां १२ गोपुरादिषुकृततोरणां १३ गंधजलैःसिक्तमार्गां १४ द्वारिद्वारि पूर्णकुंभबलिदीपादिभिरलंकृताम् १५ एवंभूतांनगरींप्राप्तंश्रीकृष्णंश्रुत्वा वसुदेवः अक्रूरः उग्रसेनः रामः १६

॥९८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रहर्षवेगेनोच्छशितानिउल्लंघितानिशयनादीनियैस्ते (प्रहर्षातिशयेनशयनादीन्युत्सृज्येत्यर्थः (उच्छ्वशितं) शशप्लुतगतौ (इतिधातोर्निष्ठा) १७ गजेंद्रंमंगलार्थंपुरतःकृत्वासस्सुमंगलैः सुमंगलानिपुष्पादीनितद्युक्तपाणिभिः (इत्यर्थः । ब्रह्मघोषेणमंत्रपाठेनचसह) । प्रणयेनस्नेहेनाऽऽगतंसाध्वसंसंभ्रमोयेषांते १८ वारमुख्यानटादयश्चप्रत्युज्जग्मुः । लसत्कुंडलैर्निर्भाता नियानिकपोलानितैर्वदनेषुश्रीःशोभायासांताः (तत्र) वारमुख्यानर्तक्यःवेश्याइतियावत् १९ अद्भुतानिचेतिचकारस्यवंदिनश्चेत्यन्वयः । नटानवरसाभिनयचतुराः । तालाद्यनुसारे णनृत्यंतोनर्तकाःगंधर्वागायकाः । “सूताःपौराणिकाःप्रोक्तामागधावंशशंसकाः । वंदिनश्चामलप्रज्ञाःप्रस्तावसदृशोक्तय”इतितेसर्वेगायंतिचेत्यर्थः अद्भुतानि (आश्चर्याणि) उत्तमश्लोक स्यचरितानिगायंतिच २० यथाविधि (उत्तममध्यमादिभिः) यैःसहयथाउचितंतैःसहतथासंगमंकृत्वासर्वेषांमानमादधे कृतवानित्यर्थः२१तदाहमह्वेति । प्रह्वत्वंशिरसानतिः अभिवादनं वाचानतिः आश्वास्याऽभयंदत्त्वा श्वपाकानभिव्याप्यवरैः(अभिमतैः)अभीष्टदानैः(एवंब्राह्मणादिश्वपाकांतानांयथायोग्यंप्रह्वत्वादिभिरभयाभिमतदानैश्च) मानंकृतवान् २२ (सरथैरथारूढै रित्यर्थः । सदारैरितिपाठेसपत्नीकैः स्थविरैर्वृद्धैः प्रत्युद्गतैः) अन्यैश्चवंदिभिश्च (सहपुरमाविशत्) २३ (हर्म्याणिधनिनांगृहाणि) हेविप्रशौनक तस्येक्षणेनमहानुत्सवो यासांताः २४ यद्यस्मात् नित्यंसदाऽच्युतंनिरीक्षमाणानामपिदृशोनैवतृप्यंति । अतआरुरुहुः । कथंभूतं श्रियःशोभायाधामस्थानंअंगमस्यतं । २५

॥९१॥

श्लोकाः १७/२५

प्रद्युम्नश्चारुदेष्णश्चसांबोजांबवतीसुतः॥प्रहर्षवेगोच्छ्वशितशयनासनभोजनाः १७ वारणेंद्रंपुरस्कृत्यब्राह्मणैःससुमंगलैः॥शंखतूर्यनिनादेनब्रह्मघोषेणचाऽऽदृताः १८ प्रत्युज्जग्मूरथैर्हृष्टाःप्रणयागतसाध्वसाः ॥ वारमुख्याश्चशतशोयानैस्तद्दर्शनोत्सुकाः ॥ लसत्कुंडलनिर्भातकपोलवदनश्रियः १९ नटनर्तकगंधर्वाः सूतमागधवंदिनः ॥ गायंतिचोत्तमश्लोकचरितान्यद्भुतानिच २० भगवांस्तत्रबंधूनांपौराणामनुवर्तिनाम् ॥ यथाविध्युपसंगम्यसर्वेषांमानमादधे २१ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः॥आश्वास्यचाश्वपाकेभ्योवरैश्चाभिमतैर्विभुः२२स्वयंचगुरुभिर्विप्रैःसदारैःस्थविरैरपि ॥ आशीर्भिर्युज्यमानोन्यैर्बंदिभि श्चाविशत्पुरम् २३ राजमार्गंगतेकृष्णेद्वारकायाःकुलस्त्रियः ॥ हर्म्याण्यारुरुहुर्विप्रतदीक्षणमहोत्सवाः २४ नित्यंनिरीक्षमाणानांयदपिद्वारकौकसां॥नवितृ प्यंतिहिदृशःश्रियोधामांगमच्युतं २५

चूर्णिका ॥९१॥

प्रद्युम्नः चारुदेष्णः सांबादयः १७ हस्तिश्रेष्ठंपुरस्कृत्यब्राह्मणैःशंखतूर्यादिवाद्यघोषेणचसहरथैरभिजग्मुः १८ तथावारमुख्याःस्त्रियाः १९ नटनर्तकादयश्चप्रत्युज्जग्मुः सूतमागधवंदिनः भगवच्चरितानिगायंतिस्म २० श्रीकृष्णोऽपिप्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैर्यथान्यायंसर्वेषांमानंचक्रे २१ २२ ततः गुरुविप्रस्थविरादिभिराशी र्भिर्युज्यमानेश्रीकृष्णेराजमार्गंगतेसतिहर्म्यारूढाःपुरस्त्रियस्तंददृशुः २३ २४ अहोतंनित्यंपश्यंतीनामपिपुरस्त्रीणांदृष्टिर्नाऽतृप्यत् २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवाभिनयेनाह । श्रियोलक्ष्म्याः यस्योरोवक्षेनिवासः । यस्यमुखं सर्वप्राणिनांदृशांसौंदर्यामृतपानायपात्रं । यस्यबाहवोलोकपालानांनिवासः । सारंश्रीकृष्णंगायंतीतिसा रंगाभक्तास्तेषांयस्यपादांबुजंनिवासः । तंनिरीक्षमाणानांदृशइतिपूर्वेणान्वयः २६ सितैरातपत्रव्यजनैः (छत्रचामरैः) उपस्कृतोमंडितः अर्कश्चोडुपोनक्षत्रसहितश्चंद्रश्चचापमिंद्रधनुश्चवैद्यु तंविद्युत्तेजश्चतैः (घनोयथा । अत्र) अर्कश्छत्रस्योपमानं नक्षत्राणिपुष्पवृष्टेः । चंद्रः परिभ्रमकृतमंडलाकारयोश्चामरवद्दितव्यजनयोः । चापंवनमालायाः । विद्युत्तेजः पिशंगवाससोः । अभूतोपमेयं यदिघनस्योपरिसूर्यबिंबमुभयतश्चंद्रौ । सर्वतोनक्षत्राणिमध्येच (अन्योन्याभिमुखं) मिलितंचापद्वयं । स्थिरंचविद्युत्तेजः एवंभवेत्तर्हिसघनोयथाभातितथाहरिर्बभावित्यर्थः २७ सकृष्णोमातृभिर्देवक्यादिभिरालिंगितस्ताःदेवकीप्रमुखाः सप्तववंदेइतिमातृसौदर्यादादरविशेषज्ञापनार्थमुक्तं । अष्टादशाऽपिवसुदेवभार्यामातृतुल्यत्वान्नमस्कृताएव(इति)बोध्यं २८ नेत्रजै र्जलैर्हर्षाश्रुभिः २९ स्वगृहप्रवेशमाह(सर्वकामंसर्वाभीष्टार्थयुक्तंअनुत्तमंसर्वोत्कृष्टं)सहस्राणिचपोडशेतिचकारादष्टोत्तरशताधिकानीतिज्ञेयं ३० प्रोष्यदेशांतरेउषित्वा (गृहान्प्रत्यागतं) आराद्दू रादेवविलोक्यसंजातोमनसिमहानुत्सवोयासांताआसनादाशयाच्चआसनाद्देहेनोत्तस्थुःआशयोंतःकरणं तस्मादप्यात्मनाउत्तस्थुः । श्रीकृष्णेनाऽऽत्मनः संश्लेषेअंतःकरणव्यवधानमपिनासहंते त्यर्थः(क्षणमात्मनःकेवलंतदैक्यंगताइतिभावः) व्रीडितानिलोचनान्याननानिचयासांताः । अपांगैरेववीक्षणात्व्रीडितलोचनाः । अवनतमुखत्वात्व्रीडिताननाः । साकंव्रतैरिति हास्यक्रीडाव र्जनादिनियमाअपिताभ्यः(सकाशात्)उत्तस्थुरित्यर्थः । धृतव्रताएवोत्तस्थुरितिवा । व्रतानिचयाज्ञवल्क्योक्तानि । "क्रीडांशरीरसंस्कारंसमाजोत्सवदर्शनं । हास्यंपरगृहेयानंत्यजेत्प्रो षितभर्तृ"केति ३१

श्रियोनिवासोयस्योरःपानपात्रंमुखंदृशाम् ॥ बाहवोलोकपालानांसारंगाणांपदांबुजम् २६ सितातपत्रव्यजनैरुपस्कृतःप्रसूनवर्षैरभिवर्षितःपथि ॥ पिशंगवासावनमालयाबभौघनोयथाऽर्कोडुपचापवैद्युतैः २७ प्रविष्टस्तुगृहंपित्रोःपरिष्वक्तःस्वमातृभिः ॥ ववंदेशिरसासप्तदेवकीप्रमुखामुदा २८ ताः पुत्रमंकमारोप्यस्नेहस्नुतपयोधराः ॥ हर्षविह्वलितात्मानःसिषिचुर्नेत्रजैर्जलैः २९ अथाविशत्स्वभवनंसर्वकाममनुत्तमम् ॥ प्रासादायत्रपत्नीनांसहस्राणिचषो डश ३० पत्न्यःपतिंप्रोष्यगृहानुपागतंविलोक्यसंजातमनोमहोत्सवाः॥उत्तस्थुरारात्सहसाऽऽसनाऽऽशयात्साकंव्रतैर्व्रीडितलोचनाननाः ३१

श्लोकाः २६/३१

चूर्णिका

यतः यस्योरःश्रियःस्थानम् बाहवो लोकपालानांस्थानं अनेनसौंदर्यंसूचितम् २६ ततःसितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितःपथि पिशंगवासावनमालया ब भौघनोयथाऽर्कोडुपचापवैद्युतैः२७एवंभूतःकृष्णःपितृगृहंप्रविष्टोमातृभिरालिंगितःसन्देवकीप्रमुखाःमातॄः ववंदे २८ ततस्ताःपुत्रमंकमारोप्यनेत्रोदकैःसिषिचुः २९ अथ यत्रषोडशसहस्रस्त्रीणांप्रासादास्तत्स्वगृहंप्राविशत् ३० ततः आगतंस्वपतिंविलोक्य व्रतैःसहआसनादुत्तस्थुः ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

आयांतंतंपतिंदर्शनात्पूर्वमात्मनाबुद्धयांऽतर्हृदयेपरिरेभिरे । ततोदृष्टिभिः (परिरेभिरे सादरंगाढमपश्यन्नित्यर्थः) ततःसमीपमागतमात्मजैः (परिरेभिरे) पुत्रैर्गृहीतकंठं (पतितान्)
आलिंगयंत्यइव (तन्मिषात्) स्वयमालिंगितवंइत्यर्थः । अत्रहेतुः दुरंतभावाः (उद्दाममनोविकाराः) गंभीराभिप्रायाः (इतिवा) तदाचतासांनेत्रयोर्निरुद्धमंप्यंबुबाष्पंवैक्लव्यात्
वैवश्यादास्रवदीपत्सुस्राव । अतएवधैर्यहान्याविलज्जतीनां (इतिशृंगाररसस्यपरिपूर्णत्वंदर्शितं) हेभृगुवर्यचित्रंशृण्विति ३२ (नैतच्चित्रमित्याह । यद्यपीति) पार्श्वगतःसमीप
स्थस्तत्रापिरहोगतएकांतेप्रवर्ततेस्म । (तथापि) पदेपदेप्रतिक्षणंनवंनवमेव (तत्पदात्काविरमेत क्षणमप्यरुमितिकामन्येत) अत्रकैमुत्यन्यायः । चलापिचंचलस्वभावाऽपि (श्रीः
॥६१॥ कदाचिदपियन्नजहातिअन्यानजह्यादितिकिमुतेत्यर्थः) ३३ उक्तंश्रीकृष्णचरितंसंक्षिप्याह । एवमितिद्वाभ्यां । क्षितेर्भारायजन्मयेषां । अक्षौहिणीभिःकृत्वापरिवृत्तंसर्वतःप्रसृतंतेजः
प्रभावोयेषां । श्वसनोवायुर्वेणूनामन्योन्यसंघर्षेणानलंविधायमिथोदाहेनयथोपशाम्यतितद्वत् (तेषांवैरंविधार्यमियोवधेनस्वयंनिरायुधउपरतः) ३४ स्त्रीरत्नकूटस्थउत्तमस्त्रीकदंबस्थः
(प्राकृतोयथास्त्रैणइव) ३५ नन्वेवंस्त्रीकदंबादिभिःसंसारित्वंप्रतीतेःकथंभगवानवतीर्णइत्युच्यतेतत्राह उद्दामेतिद्वाभ्यां । यासांउद्दामोगंभीरोयोभावोऽभिप्रायः (शृंगारचेष्टावाऽतस्य
पिशुनःसूचकःअमलोवल्गुःसुंदरोहासोव्रीडावलोकश्चताभ्यांनिहतस्ताडितोअमदनः (मदनांतकः) महादेवोऽपिसंमुह्यलज्जयाचापंपिनाकमदहात् (जह्यादित्यर्थः) एवंप्रभावाःयाःस्त्रि
यइत्येतावद्विवक्षितं । यद्वा । भगवतोमोहिनीरूपेणमहेशोऽपिमोहितएव । एताश्चतादृग्विलासाएवेत्यतस्तथोक्तं (यद्वा यासांतादृशहासावलोकाभ्यां) निहतोमदनोऽपिकामोपिज
गद्विजयीसंमुह्यतत्तत्कर्तव्यतामूढःविवशःसन् कौसुमंचापंधनुर्लज्जयाऽजहात्जहौ (गलितशस्त्रोभूत्तत्रान्येषांकाकथा । रतेरप्यरधिकोयासांप्रभावइतिभावः अतः) प्रमदोत्तमाअपिताः
कुहकैःकपटैःविभ्रमैरितियावत्यस्येंद्रियंमनःविमथितुंक्षोभयितुंनशेकुःनशक्ताः ३६

श्लोकाः ३२—३६

तमात्मजैर्दृष्टिभिरंतरात्मनादुरंतभावाःपरिरेभिरेपतिं ॥ निरुद्धमप्यास्रवदंबुनेत्रयोर्विलज्जतीनांभृगुवर्यवैक्लवात् ३२ यद्यप्यसौपार्श्वगतोरहोगतस्तथाऽपि
तस्यांऽघ्रियुगंनवंनवं॥ पदेपदेकाविरमेततत्पदाच्चलाऽपियच्छ्रीर्नजहातिकर्हिचित् ३३ एवंनृपाणांक्षितिभारजन्मनामक्षौहिणीभिःपरिवृत्ततेजसाम् ॥ विधाय
वैरंश्वसनोयथाऽनलंमिथोवधेनोपरतोनिरायुधः ३४ सएषनरलोकेस्मिन्नवतीर्णःस्वमायया ॥ रेमेस्त्रीरत्नकूटस्थोभगवान्प्राकृतोयथा ३५ उद्दामभावपिशुना
मलवल्गुहासव्रीडावलोकनिहतोमदनोऽपियासां ॥ संमुह्यचापमजहात्प्रमदोत्तमास्तायस्येंद्रियंविमथितुंकुहकैर्नशेकुः ३६

चूर्णिका

तदानींदृष्ट्यातंपरिरेभिरे ३२ यतः चचंलाऽपिलक्ष्मीः यत्पदंनत्यजति अन्यासांतुकाकथा ३३ एवंक्षितिभारभूतानांराज्ञांमध्येकलहमुत्पाद्यमिथोघातयित्वा स्वयमुपरराम
वायुःवेणुस्तंबेऽग्निमुत्पाद्ययथाशाम्यतितद्वत् ३४ एवंविधःश्रीकृष्णः स्वमाययाऽवतीर्णःसन्प्राकृतवत्स्त्रीभिःसहरेमे ३५ ताःस्त्रियः भगवतो मनःविलासैः क्षोभयि
तुंनशेकुः ३६ ॥६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंश्रीकृष्णअयंप्राकृतोलोकमात्मौपम्येनस्वसादृश्येनसंगिनंमनुजंमन्यते (असंगमपि) । अत्रहेतुः । व्यापृण्वानंव्याप्रियमाणंयतोयमबुधःअतत्वज्ञः ३७ कुतइत्यपेक्षायामैश्वर्यलक्षणमाह । एतदिति । ईशस्यईशनंऐश्वर्यंनामएतदेव । किंतत् प्रकृतिस्थोऽपितस्याः(प्रकृतेः)गुणैःसुखदुःखादिभिःसदा (एव) नयुज्यतेइतियत् । यथाआत्मस्थैरानंदादिभिरात्माश्रयापिबुद्धिर्नयुज्यतेतद्वत् । वैधर्म्येदृष्टांतोवा आत्मस्थैःसत्ताप्रकाशादिभिर्यथाबुद्धिर्युज्यतेइति । एवंवा असदात्मादेहस्तत्रस्थैर्गुणैस्तदाश्रयाबुद्धिस्तदुपाधिर्जीवोयथायुज्यते । एवंप्रकृतिस्थोऽपितद्गुणैर्नयुज्यते । इतियदेतदीशनमीशस्येति ३८ तत्पत्न्योपितस्यतत्त्वंनजानंतीत्याह । तंस्त्रैणमात्मवश्यंरहस्येकांतेअनुव्रतंअनुवृत्तंचमेनिरे । भर्तुरप्रमाणविदः । प्रमाणमियत्तां महिमानमजानंत्यइत्यर्थः । ईश्वरंक्षेत्रज्ञंमतयोऽहंवृत्तयोयथास्वाधीनंस्वधर्मयोगिनंमन्यंतेतद्वत् । यद्वायथायथातासांमतयःकल्पनास्तथातथातमीश्वरंस्त्रैणादिरूपं (तथातामूढाः) मेनिरेइत्यर्थः ३९ ॥ इतिश्रीभा०महापु० प्रथमस्कंधेभावार्थदीपिकायांटीकायांमेकादशोऽध्यायः ११ ॥ ॥ ७ ॥ ॥ पुरोक्तंयत्प्रसंगायद्रौणिदंडादिविस्तरात् । द्वादशेतुतदेवाथपरिक्षिज्जन्मवर्ण्यते । " परिक्षितोऽथराजर्षेर्जन्मकर्मविलापनं । संस्थांचपांडुपुत्राणांवक्ष्येकृष्णकथोदयमि "तिप्रतिज्ञायपांडवानांराज्यस्थितिरुपोद्घातभूतासप्रसंगंसप्तमाध्यायमारभ्यनिरूपिता इदानीमौपोद्घातिकमुक्तानुवादपूर्वकंपृच्छति अश्वत्थाम्नेति । उपसृष्टेनप्रयुक्तेन (ब्रह्मशीर्षसंज्ञकेनास्त्रेण) १ तस्यजन्मादीनिब्रूहीत्युत्तरेणान्वयः । (महतीबुद्धिर्भागवतश्रवणेश्रद्धारूपायस्य । महान्आत्माधृतिर्यस्यतस्यनिधनंमृत्युश्च)सपरिक्षित् (यथायेनप्रकारेण) प्रेत्यदेहंत्यक्त्वागतवान् २ प्रार्थयेऽहंनत्वाक्षापयामीत्याह (तदिति) तद्गदितुं (वक्तुंयदिमन्यसेतर्हिअनुग्रहेणब्रूहीति । "यस्यज्ञानमदाच्छुक " इतिश्रवणेच्छायांहेतुः ३

श्लोकाः ३७/३

तमयंमन्यतेलोकोह्यसंगमपिसंगिनम् ॥ आत्मौपम्येनमनुजंव्यापृण्वानंयतोऽबुधः ३७ एतदीशनमीशस्यप्रकृतिस्थोऽपितद्गुणैः ॥ नयुज्यतेसदाऽत्मस्थैर्यथाबुद्धिस्तदाश्रया ३८ तंमेनिरेऽबलामूढाःस्त्रैणंचाऽनुव्रतंरहः ॥ अप्रमाणविदोभर्तुरीश्वरंमतयोयथा ३९ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेश्रीकृष्णद्वारकाप्रवेशोनामैकादशोऽध्यायः ११ ॥७॥ शौनकउवाच ॥ अश्वत्थाम्नोपसृष्टेनब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तरायाहतोगर्भईशेनाजीवितःपुनः १ तस्यजन्ममहाबुद्धेःकर्माणिचमहात्मनः ॥ निधनंचयथैवासीत्सप्रेत्यगतवान्यथा २ तदिदंश्रोतुमिच्छामिगदितुंयदिमन्यसे ॥ ब्रूहिनःश्रद्दधानानांयस्यज्ञानमदाच्छुकः ३

चूर्णिका

ईदृशंभगवंतंलोकः विपर्ययेणमन्यते यतोऽबुधः ३७ किंच भगवतःऐश्वर्यमेतदेवकिंतत् प्रकृतिस्थोऽपितद्गुणैर्नयुज्यतेइतियत् ३८ तंमूढाःस्त्रियःस्त्रैणंमेनिरे अहंकारवृत्तयःक्षेत्रज्ञंस्वाधनियंथामन्यंते तद्वत् ३९ ॥ इतिप्रथमेएकादशः ११ ॥ ७ ॥ शौनकउवाच हेसूत अश्वत्थाम्नामुक्तेनब्रह्मास्त्रेणपीडितउत्तरायाः गर्भोभगवताकृष्णेनजीवितः १ तस्यपरीक्षितःजन्मकर्मनिधनानि २ तथा यस्यशुको ज्ञानंयथाअदात् तत्सर्वंश्रोतुमिच्छामितन्नोवद ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विपयेभ्यो:निस्टहस्यापिराज्ञ:श्रीकृष्णानुग्रहात्तादृक्पौत्र:समजनीतिवकुंतस्यश्रीकृष्णेभक्त्युद्रेकमाह । अपीपलदितित्रिभि: । (सर्वेभ्योविपयेभ्योनिस्टह:कृष्णपादानुसेवयायुक्त: प्रजा:) पितृवदपीपलत्पालयामास ४ कृतवस्तदुपार्जितालोकाश्च (महिपीराज्ञीस्वर्गगताकीर्तिश्च) ५ तेसंपदादय:कामा:विपया: सुरस्पार्हा:सुराणांस्टहणीया: तेपामपिदुर्लभाइत्यर्थ: एवंभूताअपिराज्ञ:किंप्रीतिंअधिजहु:कृतवत: । नैवकृतवंतइत्यर्थ: । अत्रहेतु: । मुकुंदएवमनोयस्येति । क्षुधितस्यअन्नैकमनसोयथेतरेस्रक्चंदनादयोन (प्रीतिं) कुर्वंतितथा ६ प्रस्तुतमाह । मातुरिति । सपरिक्षित् (सवीरउत्तरायागर्भेस्थित: तदाकंचित्पुरुपंददर्श । अस्त्रस्यब्रह्मशीर्ष्णस्तेजसा) ७ पुरटंसुवर्णं । स्फुरत्पुरटमौलिर्यस्यास्तितंव्रीह्यादित्वादिनिप्रत्यय: । अपीच्यंअतिसुंदरंदृश्यतइतिदर्शनंरूपंयस्यतं । तडिद्वत्वाससीयस्येतिश्यामममितिचपदाभ्यांविद्युद्रूपितमेवोपमासूचिता । अच्युतंअविकारम् ८ तप्तंदाहोत्तीर्णंयत्कांचनंतन्मयेकुंडलेयस्य । (तंतप्तकांचनवर्णाभकुंडलद्वयमंडितमित्यर्थ:) क्षतजाक्षंसंरंभादत्यारक्तनेत्रं । (अहोमद्भक्तस्यापिब्रह्मास्त्रपीडेतिक्रोधेनेतिभाव:।उल्काभांज्वलदुल्मुकद्युतिंगदांभ्रामयंतं) ९ (स्वगदातेजसा) अस्त्रतेजोविधमंतंविनाशयंतंनिहारंहिमंगोपति:सूर्यइव । (सूर्योयथागोभिर्हिमंविधमतितद्वदित्यर्थ:) संनिकर्षेसमीपेददर्श । दृष्ट्वाचाऽसौकइतिपर्यैक्षत (परीक्षांचक्रे) वितर्कितवानित्यर्थ: १० अमेयात्मा (अमेय:) कथंतद्विधूतवानित्यतआह (आत्मास्वरूपंयस्यसतदस्त्रतेजोविधूयविनाश्य) धर्मंगोपायतीतिधर्मगुप् यद्वा धर्मंगोपायंतीतिधर्मगुपोराजानस्तत्प्रभुस्तेपामपिपालकत्वात् दशमासपरिछेद्यस्यतस्यैवमिपत:पश्यतोयत्रदृष्टस्तत्रैवांतर्हित: नत्वन्यत्रगत: । यतोविभु:सर्वग: ११

अपीपलद्धर्मराज:पितृवद्रंजयन्प्रजा: ॥ निस्पृह:सर्वकामेभ्य:कृष्णपादाब्जसेवया ४ संपद:क्रतवोलोकामहिषीभ्रातरोमही ॥ जंबुद्वीपाधिपत्यंचयशश्चत्रिदिवंगतं ५ किंतेकामा:सुरस्पार्हामुकुंदमनसोद्विजा: ॥ अधिजहुर्मुदंराज्ञ:क्षुधितस्ययथेतरे ६ मातुर्गर्भगतोवीर:सतदाभृगुनंदन ॥ददर्शपुरुषंकंचिद्दह्यमानोऽस्त्रतेजसा ७ अंगुष्ठमात्रममलंस्फुरत्पुरटमौलिनम् ॥ अपीच्यदर्शनंश्याममंतडिद्वाससमच्युतम् ८ श्रीमद्दीर्घचतुर्बाहुंततप्तकांचनकुंडलम् ॥ क्षतजाक्षंगदापाणिमात्मन:सर्वतोदिशम् ॥ परिभ्रमंतमुल्काभांभ्रामयंतंगदांमुहु: ९ अस्त्रतेज:स्वगदयानीहारमिवगोपति: ॥ विधमंतंसन्निकर्षेपर्यैक्षतकइत्यसौ १० विधूयतदमेयात्माभगवान्धर्मगुब्विभु: ॥ मिपतोदशमास्यस्यतत्रैवांतर्दधेहरि: ११

श्लोका: ४/११

चूर्णिका

सूतउवाच कृष्णपादाब्जसेवयानिस्पृह:सन्युधिष्ठिर:पितृवत्प्रजा:पालयामास ४ तस्यमुकुंदमनस:संपद: यज्ञोपार्जितलोका: महिषीभ्रातर:महीजंबुद्वीपाधिपत्यंस्वर्गंव्याप्तंयशश्च ५ एतेमुदंनददु: क्षुधितस्यस्रक्चंदनादयोतथा ६ अथप्रस्तुतमाह गर्भगत:परिक्षित्श्याममंचतुर्भुजंपरित: ब्रह्मास्त्रतेज:विधमंतंमगुष्ठप्रमाणंकंचित्पुरुषंदृष्ट्वा असौकइतिवितर्कितवान् ७ ८ ९ १० तत:दशमासपरिच्छेद्यस्यराज्ञ:परीक्षित:पश्यत:सत: ब्रह्मास्त्रंविधूय हरिस्तत्रैवांतर्हित: ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(सर्वगुणाः) उदर्कउत्तरफलं (यत्रतस्मिन्) सर्वगुणानांउत्तरोत्तराधिक्यसूचकेलग्ने तत्रहेतुः । (अनुकूलैर्ग्रहैःसीहतःसानुकूलग्रहस्ताद्दशोदयेलग्ने) । यद्वा अनुकूलैरन्यैर्ग्रहैःसहितानां शुभग्रहाणामुदयोयस्मिन्(तादृशेसमये । भूयःपुनःपांडुरिवजज्ञे) १२ जातकंजातकर्म । मंगलंपुण्याहं१३ (गांधेनुं) वरान् श्रेष्ठान् स्वन्नंशोभनमन्नंच । तीर्थवित्दानकालज्ञः । " यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकं ! छिन्नेनालेततःपश्चात्सूतकंतुविधीयत " इतिवचनात् ततःपूर्वंप्रादादित्यर्थः । आमान्नंवा प्रजातीर्थेपुत्रोत्पत्तिपुण्यकाले " पुत्रेजातेव्यतीपातेदत्तंभवतिचाक्षयमि " तिस्मृतेः । " देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनाम् । आयांतिर्तिहनृपश्रेष्ठपुण्याहमितिचाब्रुवन्नि" तिच (अतस्तस्मिन्पर्वणिहिरण्यादिदेयम्) १४ प्रश्रयावनतांविनयेननम्रंतंराजानं (हेपौरवर्षभ कुरूणांकुरुवंश्यानांशुक्लेशुद्धेऽस्मिन्प्रजातंतौ (वंशे) अप्रतिघातेनदुर्वारेणदैवेनसंस्थां नाशमुपेयुषिप्राप्तवतिसति वःयुष्माकंअनुग्रहार्थाययस्मात्प्रभवनशीलेनश्रीविष्णुनारातोदत्तस्तस्माल्लोकेविष्णुरातइतिनाम्नाभविष्यति (महायशाः) महाभागवतश्चगुणैश्चमहान्भविष्यति नात्रसंदेहइतिब्राह्मणातंराजानंऊचुरितित्रयाणामन्वयः १५ १६ १७ महाभागवतोभविष्यतीत्युक्तेहृष्टःपृच्छति । अपिस्वित्किंस्वित् साधुवादेनयशसासत्कीर्त्याच (पुण्यश्लोकान्) अनुवर्तिताभविष्यवतीतिपूर्वस्यैवातःपरमप्यनुषंगः १८ हेपार्थ प्रजानामवितारक्षकःमानवोमनोःपुत्रः (ब्रह्मण्यः) ब्राह्मण्येभ्योहितःसत्यप्रतिज्ञश्चश्रीरामोयथा १९ उशीनरदेशाधिपतिःशिबिर्येनस्वमांसंश्येनायदत्त्वाशरणागतःकपोतोरक्षितः । स्वानांज्ञातीनांयज्वनांचयशोविस्तारकोदौष्यंतिर्भरतइव २०

॥६४॥

श्लोकाः १२/२०

ततःसर्वगुणोदर्केसानुकूलग्रहोदये।।जज्ञेवंशधरःपांडोर्भूयःपांडुरिवौजसा १२ तस्यप्रीतमनाराजाविप्रैर्धौम्यकृपादिभिः ॥ जातकंकारयामासवाचयित्वाचमंगलम् १३ हिरण्यंगांमहींग्रामान्हस्त्यश्वान्नृपतिर्वरान् ॥ प्रादात्स्वन्नंचविप्रेभ्यःप्रजातीर्थेसतीर्थवित् १४ तमूचुर्ब्राह्मणास्तुष्टाराजानंप्रश्रयान्वितम् ॥ एषह्यस्मिन्प्रजातंतौकुरूणांपौरवर्षभ १५ दैवेनाप्रतिघातेनशुक्लेसंस्थामुपेयुषि ॥ रातोवोऽनुग्रहार्थायविष्णुनाप्रभविष्णुना १६ तस्मान्नाम्नाविष्णुरातइतिलोकेबृहच्छ्रवाः ॥ भविष्यतिनसंदेहोमहाभागवतोमहान् १७ ॥ युधिष्ठिरउवाच ॥ अप्येषवंश्यान्राजर्षीन्पुण्यश्लोकान्महात्मनः ॥ अनुवर्तितास्विद्यशसासाधुवादेनसत्तमाः १८॥ ब्राह्मणाऊचुः ॥ पार्थप्रजाऽवितासाक्षादिक्ष्वाकुरिवमानवः ॥ ब्रह्मण्यःसत्यसंधश्चरामोदाशरथिर्यथा १९ एषदाताशरण्यश्चयथाह्यौशीनरःशिबिः ॥ यशोवितनितास्वानांदौष्यंतिरिवयज्वनाम् २०

चूर्णिका

ततःसर्वगुणयुक्तेसानुकूलग्रहलग्नेकालेपांडोर्वंशधरःपरीक्षिज्जज्ञे १२ तदाप्रीतमनाःधर्मराजो धौम्यादिभिर्मंगलंवाचयित्वातस्यजातकंकृत्वा १३ सुवर्णं गावः महीं ग्रामान् हस्तिनः अश्वान् स्वान्नंच विप्रेभ्योददौ १४ ततस्तुष्टाब्राह्मणाःराजानमूचुः १५ तद्यथा एषःपुरुवंशेनाशंगतेसतिश्रीविष्णुनारातः १६ अतः लोकेनाम्नाविष्णुरातइतिभविष्यति १७ युधिष्ठिरउवाच हेविप्राअयंपरीक्षित् वंश्यान्राजर्षीन्सुयशसाऽनुवर्तिताभविष्यातिकिम् १८ विप्राऊचुः हेपार्थ अयंपरीक्षिदिक्ष्वाकुरिवप्रजारक्षकः श्रीरामइवब्रह्मण्यः १९ सत्यसंघश्च शिबिरिवदाताशरण्यश्च भरतइवज्ञातीनांयशोविस्तारकः २०

॥६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अर्जुनयोःपार्थकार्तवीर्ययोः (प्रतापेनदुर्धर्षःगांभीर्येणदुस्तरः) २१ विक्रांतःपराक्रमवानित्यर्थः । हिमवानिवसतांनिषेव्यः । अनन्यगतिकत्वेनवसुधेवतितिक्षुःक्षंता । प्रीत्यामा तापितराविवसहिष्णुः २२ पितामहोब्रह्मातेनसमः । साम्येसमत्वे रमाश्रयोहरिः २३ सर्वैःसद्गुणैर्माहात्म्यंयत्तस्मिन्श्रीकृष्णतुल्यः २४ धृत्याधैर्येण । सद्ग्रह सन्भद्रोग्रहोऽभि निवेशोयस्यसःप्रह्लादइव । (एषः) आहर्ताकर्ता २५ राजर्षीणांजनमेजयादीनां । (भुवोगोरूपायाधर्मस्यवृषरूपस्यकारणात्कलेर्निग्रहंकरिष्यति) २६ द्विजपुत्रेणप्रेरितात्तक्षका दात्मनोमृत्युमुपश्रुत्यविरक्तःसन्हरेःपदंप्रपत्स्यतेभजिष्यति २७ ततश्चजिज्ञासितमात्मनोयाथात्म्यंयेनसः (हेनृप) इदंशरीरंगंगायांहित्वाअकुतोभयंपदंयास्यतीति अद्धानिश्चयेन २८

॥६९॥ (इतिराज्ञःसमीपेकथयित्वा) लब्धाअपचितिःपूजायैस्ते २९ परिक्षिदितिनामनिर्वक्ति सएषइति । यद्यस्मात्प्रभुःसमर्थःसन्गर्भेदृष्टंपुरुषमनुध्यायन्निहदृश्यमानेषुनरेषुमध्येसर्वम पिनरंपरीक्षेताऽयमसौभवेदितिनोवेतिवितर्कयेत् । तस्मात्परिक्षिदितिविख्यातः पूर्वदृष्टमितिवापाठः तदामातृगर्भेपूर्वदृष्टमित्यर्थः. ३० शुक्लेशुक्लपक्षेसप्रसिद्धउडुपोऽन्वहंयथाकाष्ठाभिःपंचदश कलाभिरापूर्यमाणोवर्धते एवंपितृभिर्युधिष्ठिरादिभिःकामैश्चतुःषष्टिकलाभिश्चापूर्यमाणःववृधे ३१

श्लोकाः २१/३१

धन्विनामग्रणीरेषतुल्यश्चार्जुनयोर्द्वयोः ॥ हुताशइवदुर्धर्षःसमुद्रइवदुस्तरः २१ मृगेंद्रइवविक्रांतोनिषेव्योहिमवानिव ॥ तितिक्षुर्वसुधेवाऽसौसहिष्णुःपितरा विव २२ पितामहसमःसाम्येप्रसादेगिरिशोपमः ॥ आश्रयःसर्वभूतानांयथादेवोरमाश्रयः २३ सर्वसद्गुणमाहात्म्यएषकृष्णमनुव्रतः ॥ रंतिदेवइवोदारो ययातिरिवधार्मिकः २४ धृत्याबलिसमःकृष्णेप्रह्लादइवसद्ग्रहः ॥ आहर्तैषोऽश्वमेधानांवृद्धानांपर्युपासकः २५ राजर्षीणांजनयिताशास्ताचोत्पथगामिनाम् ॥ निग्रहीताकलेरेषभुवोधर्मस्यकारणात् २६ तक्षकादात्मनोमृत्युंद्विजपुत्रोपसर्जितात् ॥ प्रपत्स्यतउपश्रुत्यमुक्तसंगःपदंहरेः २७ जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ॥हित्वेदंनृपगंगायांयास्यत्यद्धाकुतोभयम् २८ इतिराज्ञउपादिश्यविप्राजातककोविदाः ॥ लब्धोपचितयःसर्वेप्रतिजग्मुःस्वकान्गृहान् २९ सएषलोकविख्यातःपरिक्षिदितियत्प्रभुः ॥ गर्भदृष्टमनुध्यायन्परीक्षेतनरेष्विह ३० सराजपुत्रोववृधआशुशुक्लइवोडुपः ॥ आपूर्यमाणःपितृभिःकाष्ठाभि रिवसोऽन्वहम् ३१

चूर्णिका

अर्जुनकार्तवीर्याविवधन्वी अग्निरिवाऽसह्यः समुद्रइवगंभीरः२१सिंहइवपराक्रमी हिमवानिवसतांसेव्यः भूरिवक्षमावान् पितराविवसहिष्णुः२२साम्येब्रह्मसमः प्रसादेशिव समः सर्वभूतानांआश्रयेविष्णुसमः २३ किंच गुणैर्विष्णुरिव औदार्येरंतिदेवइव ययातिरिवधार्मिकः२४धैर्येबलिसमः भक्त्याप्रह्लादइव किंच अश्वमेधत्रयकर्ता वृद्धानांसेवकः २५ राजर्षीणांजनयिता कुमार्गिणांशास्ता कलेर्निग्रहीता धर्मस्यरक्षकःएवंविधोभविष्यति २६ किंच द्विजपुत्रप्रेरिततक्षकात्स्वमृत्युंश्रुत्वामुक्तसंगःसन् २७ श्रीशु कात्ज्ञानंप्राप्यगंगायांदेहंत्यक्त्वा साक्षाद्धरेःपदंयास्यति २८ इतिराज्ञेउक्त्वालब्धपूजाःज्योतिर्विदःविप्राःस्वगृहान्जग्मुः २९ ततः सनरेषुगर्भदृष्टंपुरुषंपरीक्षेत अतः परीक्षिदितिनाम्नालोकेप्रसिद्धोभविष्यतिसः ३० सपितृभिःपाल्यमानःशुक्लपक्षस्थचंद्रइवववृधे ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पूर्वमपकृष्योक्तानश्वमेधान्स्वावसरेसप्रकारंकथयति । ज्ञातिद्रोहस्यहानेच्छयायक्ष्यमाणःकरदंडयोरन्यत्रताभ्यांविनाअलब्धधनः (नलब्धंधनंयेनसः) दध्यौचिंतयामास । करदंडधन स्यपरिजनभरणमात्रोपक्षीणत्वात् ३२ (उदीच्यांदिशि बहुशः) प्रहीणंमरुत्तस्ययज्ञेब्राह्मणैस्त्यक्तं (धनं) सुवर्णपात्रादिकमानीतवंतः ३३ (तेनधनेन) संभृतसंभारःसंपादितयज्ञो पकरणः भीतोज्ञातिद्रोहात् ३४ ३५ ३६ ॥ ॥इतिप्रथमस्कंधेभावार्थदीकायांद्वादशोऽध्यायः १२ ॥ ॥ छ॥ ॥ निर्गमोधृतराष्ट्रस्यविदुरोक्त्यात्रयोदशे।उक्तःपौत्राभिषेकेणवकुंराज्ञो महापथं १ इदानींपरीक्षितः कलिनिग्रहादिकर्माणिकथयिष्यन्विदुरागमनेनधृतराष्ट्रप्रस्थानंततोऽर्जुनागमनंततःश्रीकृष्णांतर्धानंनिशम्यपांडवप्रस्थानंचनिरूपयतित्रिभिरध्यायैः । गतिंहरिं मैत्रेयाद्दपे ज्ञात्वातयात्मगत्याऽवाप्तंविविदिषितंज्ञातुमिष्टंसर्वयेन (सः) १ तदेवाह । यावतःकर्मयोगव्रतादिविषयान्प्रश्नान्प्रथमंकृतवान्कौषारवस्यमैत्रेयस्यपुरतः (क्षत्ताविदुरः) पश्चात्त्रिचतु रप्रश्नार्थज्ञानमात्रेणगोविंदेजातैकभक्तिः कृतार्थःसन् तेभ्यः प्रश्नेभ्यउपरराम ततः परंनविजिज्ञासितवान् २ सूतःसंजयः । शारद्वतः कृपः । पृथाकुंती ३ कृपीद्रोणभार्या । जामयो ज्ञातिभार्याः । अन्याश्चस्त्रियः ४ प्राणंतन्वइवेतिकुतश्चिन्मूर्छादिदोषतः प्राणेगतसत्वेगतितन्वः करचरणादयः (अवयवाः) निश्चेष्टाभवंतिपुनस्तस्मिन्नाविर्भूतेयथोत्तिष्ठंतितद्वत् ५ विरहेणयदौत्कंठ्यंतेनकातराविवशाः ६

श्लोकाः ३२/६

यक्ष्यमाणोऽश्वमेधेनज्ञातिद्रोहजिहासया ॥ राजालब्धधनोदध्यावन्यत्रकरदंडयोः ३२ तदभिप्रेतमालक्ष्यभ्रातरोऽच्युतचोदिताः ॥ धनंप्रहीणमाजहुरुदी च्यांदिशिभूरिशः ३३ तेनसंभृतसंभारोधर्मपुत्रोयुधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतोयज्ञैःसमयजद्धरिम् ३४ आहूतोभगवान्राज्ञायाजयित्वाद्विजैर्नृपं ॥ उवा सकतिचिन्मासान्सुहृदांप्रियकाम्यया ३५ ततोराज्ञाभ्यनुज्ञातःकृष्णयासहबंधुभिः ॥ ययौद्वारवतींब्रह्मन्सार्जुनोयदुभिर्वृतः ३६ ॥ इतिश्रीभागवतेमहा पुराणेप्रथमस्कंधेपरिक्षिज्जन्माद्युत्कर्षोनामद्वादशोऽध्यायः १२ ॥ ॥ छ ॥ ॥ सूतउवाच ॥विदुरस्तीर्थयात्रायांमैत्रेयादात्मनोगतिम् ॥ ज्ञात्वाऽ गाद्धस्तिनपुरंतयावाप्तविवित्सितः १ यावतःकृतवान्प्रश्नान्क्षत्ताकौषारवाग्रतः ॥जातैकभक्तिर्गोविंदेतेभ्यश्चोपरराम ह २ तंबंधुमागतंदृष्ट्वाधर्मपुत्रःसहानुजः ॥ धृतराष्ट्रोयुयुत्सुश्चसूतःशारद्वतःपृथा ३ गांधारीद्रौपदीब्रह्मन्सुभद्राचोत्तराकृपी ॥ अन्याश्चजामयःपांडोर्ज्ञातयःससुताःस्त्रियः ४ प्रत्युज्जग्मुःप्रहर्षे णप्राणंतन्वइवागतं ॥ अभिसंगम्यविधिवत्परिष्वंगाभिवादनैः ५ मुमुचुःप्रेमबाष्पौघंविरहौत्कंठ्यकातराः ॥ राजातमर्हयांचक्रेकृतासनपरिग्रहम् ६

चूर्णिका

अथ पूर्वमपकृष्य उक्तानश्वमेधान्स्वावसरेसप्रकारंकथयति ज्ञातिद्रोहंदूरीकर्तुमश्वमेधेनयक्ष्यमाणः करदंडाभ्यांविनाऽलब्धधनोराजाधर्मःचिंतयामास ३२ ततः धर्मस्याऽ भिप्रेतमालक्ष्यकृष्णचोदिताः भ्रातरः उत्तरदिशिमरुत्तयज्ञेत्यक्तंसुवर्णपात्रादिकंधनमानीयददुः ३३ तेनयज्ञेनसंपादितयज्ञोपकरणोयुधिष्ठिरः त्रिभिर्वाजिमेधैर्हरिंसमयजत् ३४ ३५ ३६ ॥इतिप्रथमेद्वादशः१२॥ छ॥सूतउवाच तीर्थयात्रायांगतोविदुरःमैत्रेयात्स्वगतिंहरिंज्ञात्वाहास्तिनपुरमगात् १ ततः मैत्रेयस्यपुरतःयावतःप्रश्नान्प्रथमंकृतवान् पश्चात्त्रिचतुरप्रश्नार्थज्ञानमात्रेणकृतार्थःसन् तेभ्यःप्रश्नेभ्यःउपारराम २ ततः तंविदुरमागतंदृष्ट्वाबंधुभिःसहधर्मः धृतराष्ट्रोयुयुत्सुःसंजयःकृपःपृथा ३ गांधारीद्रौपदी सुभद्रादयश्च ४ हर्षेणसंमुखंजग्मुःततः आलिंगनादिभिरभिसंगम्य ५ प्रेम्णाऽश्रूणिमुमुचुः ततः धर्मःआसनेउपविष्टंभुक्तवंतंविदुरंपूजयित्वाप्राह ६

१ राज्ञोयक्तुं महोदयमिति पुस्तकेऽन्यत्र.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(प्रश्रयावनतोविनयनम्रस्तेषामनुजादीनां) तंविदुरं ७ पक्षिणोह्यपत्यानियथाऽतिस्नेहेनपक्षछाययावर्धयंतितद्वत्युष्मत्पक्षपातच्छाययासमेधितान्वर्धितान् अस्मान्किंस्मरथ । समेधितत्वम
वाह । विपद्गणाद्यस्मान्मोचिताःस्म ८ वोयुष्माभिः कयावृत्त्यावर्तितंदेहवृत्तिः कृता कानिचतीर्थादीनिसेवितानीति ९ भवतांचतीर्थाटनंनस्वार्थकृतं । किंतुतीर्थानुग्रहार्थमित्याह । भवद्वि
धेति । मलिनजनसंपर्केणतीर्थानिमलिनानि (संति) संतः पुनः स्वयंतीर्थीकुर्वंति स्वांतंमनस्तत्रस्थेनस्वस्यांतःस्थितेनेतिवात्गदाभृतातीर्थीकुर्वंतिपवित्रयंतीत्यर्थः) १० (यदवोऽ
स्माकंसुहृदोमित्राणिबांधवाः संबंधिनश्चते) अपिकिंसुखमासतेभवद्भिः क्वापिदृष्टाःश्रुतावा (हेतात) ११ १२ । यदुकुलक्षयावर्णनेकारणमाह । नान्विति (स्वयंनावेदयेतनकथ
येदित्यर्थः) १३ (भ्रातुर्धृतराष्ट्रस्य) श्रेयस्कृतत्तत्त्वमुपदिशन् १४ ननुशूद्रोऽसौकथमुपदिशेत् । नह्यसौशूद्रः किंतु यमस्तद्रूपेणाऽऽसीत् किंतत्रकारणं । यमेचात्रागतेअमुत्रकोवादंडधरइत्य
पेक्षायामाह । अबिभ्रदिति (यमःयावच्छूद्रत्वंदधारतावद्दंडाऽऽधिकारिषुअर्यमादंडमबिभ्रत्) धृतवानित्यर्थः।शापात्(मांडव्यस्येतिशेषः)तथाहि । क्वचिच्चोराननुधावंतोराजभटामांडव्यस्यऋषे
स्तपश्चरतः समीपे (ते) तानसंप्राप्यतेनसहनिबद्ध्यानीयराज्ञेनिवेद्यतदाज्ञयासर्वान्शूलमारोपयामासुः । ततोराजातमृषिंज्ञात्वाशूलादवतार्यप्रसादयामास । ततोमुनिर्यमंगत्वाकुपितउ
वाच । कस्मादहंशूलमारोपितइतितेनोक्तंत्वंबाल्येशलभंकुशाग्रेणाविध्यक्रीडितवान् (तेनकर्मणाशूलमारोपितइति) तच्छुत्वामांडव्यस्तंशशाप । बाल्येअजानतः (तत्कृतवतः)
मेमहांतंदंडंयतस्त्वंकारितवानतःशूद्रोभवेति १५

श्लोकाः ७/१५

तंभुक्तवंतमासीनंविश्रांतंसुखमासने ॥ प्रश्रयावनतोराजाप्राहतेषांचशृण्वताम् ७॥युधिष्ठिरउवाच ॥ अपिस्मरथनोयुष्मत्पक्षच्छायासमेधितान् ॥ विपद्गणाद्वि
षाग्न्यादेर्मोचितायत्समातृकाः ८ कयावृत्त्यावर्तितंवश्चरद्भिःक्षितिमंडलम् ॥ तीर्थानिक्षेत्रमुख्यानिसेवितानीहभूतले ९ भवद्विधाभागवतास्तीर्थीभूताःस्वयंवि
भो ॥ तीर्थीकुर्वंतितीर्थानिस्वांतस्थेनगदाभृता १० अपिनःसुहृदस्तातबांधवाःकृष्णदेवताः ॥ दृष्टाःश्रुतावा यदवःस्वपुर्यांसुखमासते ११ इत्युक्तोधर्मराजे
नसर्वंतत्समवर्णयत् ॥ यथाऽनुभूतंक्रमशोविनायदुकुलक्षयं १२ नन्वप्रियंदुर्विषहंनृणांस्वयमुपस्थितं ॥ नावेदयत्सकरुणोदुःखितान्द्रष्टुमक्षमः १३ कंचित्का
लमथावात्सीत्सत्कृतोदेववत्सुखं ॥ भ्रातुर्ज्येष्ठस्यश्रेयस्कृत्सर्वेषांप्रीतिमावहन् १४ अबिभ्रदर्यमादंडंयथावदघिकारिषु ॥ यावद्दधारशूद्रत्वंशापाद्वर्षशतंयमः १५

चूर्णिका

७ युधिष्ठिरउवाच हेविदुर विपद्गणान्मुहुर्मोचितान्नःस्मरथकिम् ८ किंच तीर्थयात्रांकुर्वतात्वयादेहवृत्तिः कथंकृता कानिचतीर्थानिसेवितानि९किंच भगवद्भक्ताःस्वयंशुद्धाः
संतः स्वांतस्थेनगदाभृतातीर्थानिपवित्रीकुर्वंतश्चरंति १० अपिच नःसुहृदःकृष्णदेवताःयदवः स्वपुर्यांसुखिनःसंतिकिम् उतचत्वयाक्वापिदृष्टाःश्रुतावाकिम् ११ एवं रा
ज्ञापृष्टःविदुरःयदुकुलक्षयंविनासर्वमवर्णयत् १२ अहोदुःखयुतान्पांडवान्द्रष्टुं अक्षमः अतोयदुकुलक्षयंनाऽवर्णयत् १३ अथ पांडवैःसत्कृतःविदुरःधृतराष्ट्रायतत्त्वमुपदिशन्कं
चित्कालंतत्राऽवात्सीत् १४ ननु शूद्रोःसौकथमुपदिशेत् नायंशूद्र किंतुशूद्ररूपेणयमआसीत् । तत्रहेतुः मांडव्यऋषेःशापाच्छतवर्षपर्यंतंशूद्रत्वंदधार तावद्यमलोकेपातकि
पुअर्यमादंडंदधार १५

१ अघकारिषु इति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इदानींराज्यस्यापकर्षंनिरूपयितुमुत्कर्षंनिगमयति । युधिष्ठिरइति । कुलंधरंवंशधरं (लोकपालभैरिंद्रादितुल्यैः) १६ तदीहयागृहव्यापारणेप्रमत्तानां (अनवहितात्मनामविज्ञातए वः) अत्यक्रामदायुपःकालोऽतिक्रांतः । यद्वाकालस्तानभ्यभवदित्यर्थः १७ (तत्कालातिक्रमणं) अभिप्रेत्यज्ञात्वा १८ ननुतत्प्रतिकारः कर्तव्यः किंनिर्गमनेनतत्राह । प्रति क्रियेति । सर्वेषामितियैः प्रतिकर्तव्यंतेपामपीत्यर्थः १९ कथंधनादिवियोगःसोढुंशक्योऽतआह । येनचेति (अयंजनः येनकालेन) अभिपन्नोऽभिग्रस्तः २० अत्रावस्थानमति दैन्यमितिदर्शयन्वैराग्यमुत्पादयति पितृभ्रातृइतिसप्तभिः । (तेतवपित्रादयाः कालेनहताः) आत्माचदेहः (उपाससेसेवसे) २१ येनपुत्राहतास्तेनभीमेन (आवर्जितं) दत्तंपिंडम न्नंगृहपालइव गृहपालःश्वा (तद्वत्) २२ निसृष्टःप्रक्षिप्तः (युष्माभिर्येषां) गरोविषं (दत्तं) दूपिताअवमताः (तद्दत्तैस्तैर्भीमादिभिर्दत्तैः) अन्नादिभिर्लब्धैरसुभिः (प्राणैः) कियत्प्रयोजनंनकिंचिदित्यर्थः (यद्वाप्राणनहेतुत्वादसुभिःप्राणतुल्यैरन्नादिभिः) २३ तस्याऽपितेवैवंदैन्यमनुभवतोऽपि (अनिच्छतोपितवदेहोयंऽपरैतिक्षीयते) जीर्णंवस्त्रंयथा अतएव धीरोभवेति२४किंलक्षणोधीरइत्यपेक्षायामाह । गतस्वार्थयशोधर्मादिशून्यं (देहं) मुक्तबंधनस्त्यक्ताभिमानः क्वगतइतिअविज्ञातागतिर्यस्यसधीरः प्राप्तदुःखस्यस्वयंसहनेनमु क्तिप्राप्तेः (साधकत्वात्) २५

॥६८॥

श्लोकाः १६/२५

युधिष्ठिरोलब्धराज्योदृष्ट्वापौत्रंकुलंधरम् ॥ भ्रातृभिर्लोकपालाभैर्मुमुदेपरयाश्रिया १६ एवंगृहेषुसक्तानांप्रमत्तानांतदीहया ॥ अत्यक्रामदविज्ञातःकालःपरमदु स्तरः १७ विदुरस्तदभिप्रेत्यधृतराष्ट्रमभाषत ॥ राजन्निर्गम्यतांशीघ्रंपश्येदंभयमागतम् १८ प्रतिक्रियानयस्येहकुतश्चित्कर्हिचित्प्रभो ॥ सएवभगवान्कालः सर्वेषांनःसमागतः १९ येनचैवाऽभिपन्नोऽयंप्राणैःप्रियतमैरपि ॥ जनःसद्योवियुज्येतकिमुतान्यैर्धनादिभिः २० पितृभ्रातृसुहृत्पुत्राहतास्तेविगतंवयः ॥ आत्माचजरयाग्रस्तःपरगेहमुपाससे २१ अहोमहीयसीजंतोर्जीविताशायथाभवान्॥भीमेनावर्जितंपिंडमादत्तेगृहपालवत् २२ अग्निर्निसृष्टोदत्तश्चगरोदाराश्चदू षिताः ॥ हृतंक्षेत्रंधनंयेषांतद्दत्तैरसुभिःकियत् २३ तस्याऽपितवदेहोऽयंकृपणस्यजिजीविषोः ॥परैत्यनिच्छतोजीर्णोजरयावाससीइव २४ गतस्वार्थमिमंदे हंविरक्तोमुक्तबंधनः ॥ अविज्ञातगतिर्जह्यात्सवैधीरउदाहृतः २५

चूर्णिका

अथलब्धराज्योयुधिष्ठिरोवंशधरंपौत्रंदृष्ट्वाभ्रातृभिःसहश्रियामुमुदे १६ एवंगृहेषुसक्तानांतेषामायुःकालोगतः १७ तत्ज्ञात्वाविदुरःधृतराष्ट्रमभाषत हेधृतराष्ट्र गृहात्शीघ्रंनि र्गम्यताम् । अयंदुरंतःकालःप्राप्तःतंपश्यपश्य १८ अरे अस्यप्रतिक्रियाप्रियैःप्राणैरपिन १९ येनकालेनाऽयंजनःप्राणादिभिर्वियुज्यते २० तवपितृभ्रातृसुहृत्पुत्राहताःवय श्चापिगतंदेहश्चजरयाग्रस्तः सांप्रतंपरगेहेवससि २१ अहोजंतोर्जीविताशाबलीयसी कुतः त्वंययास्वपुत्रहंत्राभीमेनदत्तमन्नंश्वानइवअत्सि २२ किंच येषांपांडवानामग्निः प्रक्षिप्तः विषंदत्तं स्त्रियश्चदूषिताः तद्दत्तान्नलब्धप्राणैःकिं अपितुनकिंचित् २३ एवंदैन्यमनुभवतस्तवाऽयंदेहोवस्त्रमिवक्षीयते अतएवधीरोभव २४ धीरलक्षणमाह स्वतःपुरो पदेशेनवाजातवैराग्यःसन् हृदिहरिंकृत्वागेहाद्योगच्छत्सधीरइति २५

॥६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नरोत्तमस्तुततः प्रागेवकृतप्रतीकारः (इत्याह) यःस्वकात्स्वतएवपरतः परोपदेशतोवा(जातनिर्वेदः आत्मवान्वशीकृतमनाः हरिंहृदिकृत्वागेहात्प्रव्रजेत्सपुरुषश्रेष्ठः) २६ त्वंतुनरोत्तमो
नाभूः अतइदानींधीरोभवेत्याह अथेति । (भवान्स्वैरात्मीयैरज्ञातगतिर्यायात्) अर्वागर्वाचीनः एष्यन्नित्यर्थः (नतुपूर्वतनः गुणविकर्षणः) गुणान्धैर्यदयादीन्विकर्षतिआ
छिनत्तीतितथा २७ आजमीढोऽजमीढवंशजःप्रज्ञाचक्षुरंधः एवंबोधितःसन्दृढभिन्नःचित्तदार्ढ्यात्निश्चक्राम । भ्रात्रासंदर्शितोऽध्वाबंधमोक्षयोर्मार्गः (वनमार्गोमोक्षमार्गश्च) यस्यसः २८
सुबलस्यपुत्रीगांधारीसाध्वीसुशीलाहिमालयंप्रयांतंपतिमनुजगाम । ननुकथंसासुकुमारीराज्ञीहिमादिदुःखबहुलंहिमवंतंगताअतआह । न्यस्तदंडानां (न्यस्तोदंडोभूतद्रोहलक्षणोयैस्तेषां
विरक्तानां)प्रहर्षोयस्मिंस्तं । दुःखदमपि (किंचित्) केषांचित्प्रहर्षहेतुर्भवतीत्यत्रदृष्टांतः । मनस्विनांशूराणांयुद्धेसंप्रहारःतीव्रप्रहारोयथा । पाठांतरेसत्संप्रहारंयुद्धंयथेति
२९ (अजातशत्रुर्युधिष्ठिरः) कृतंमैत्रंमित्रदेवताकं (कर्म) संध्यावंदनाख्यंयेन । (तिलादिदानैर्विप्रान्) नत्वासंपूज्य (धृतराष्ट्रादिवंदनायप्रविष्टः) पितरौविदुरधृतराष्ट्रौ
३० हेगावल्गणेगवल्गणस्यपुत्रसंजय (अस्माकंतातोधृतराष्ट्रोनेत्रयोर्नेत्राभ्यां अंबागांधारी हताःपुत्रायस्याअतएवआर्ता । पितृव्योविदुरः) ३१ (हतबंधुर्हतपुत्रः) अकृतप्रज्ञे
मंदमतौ (मयि) शमलमपराधं पापंआशंकमानः (सर्वानपिबंधून्हत्वाराज्यमादायभुंजानोसौपुर्ववैरंस्मरन्किमपिशमलमाचरेदितिकल्पयन्दुःखितोगंगायामपतत्किमित्यर्थः)
सभार्यंयाभार्ययासह ३२ (स्वस्याकृतप्रज्ञत्वंदर्शयति ।पितरीति । सुहृदःभ्रातुःपुत्रानित्यर्थः । नोऽस्मान्) व्यसनतःयौअरक्षतांतौ (पितृव्यौ) इतःस्थानात् (एतादृशयोरनवर
तपरामर्शाभावादकृतप्रज्ञत्वमितिभावः) ३३

श्लोकाः २६/३३

यःस्वकात्परतोवेहजातनिर्वेदआत्मवान् ॥ हृदिकृत्वाहरिंगेहात्प्रव्रजेत्सनरोत्तमः २६ अथोदीचींदिशंयातुस्वैरज्ञातगतिर्भवान् ॥ इतोऽर्वाक्प्रायशःकालःपुं
सांगुणविकर्षणः २७ एवंराजाविदुरेणानुजेनप्रज्ञाचक्षुर्बोधितोह्याजमीढः ॥ छित्त्वास्वेषुस्नेहपाशान्द्रढिम्नोनिश्चक्रामभ्रातृसंदर्शिताध्वा २८ पतिंप्रयातंसुबल
स्यपुत्रीपतिव्रताचानुजगामसाध्वी ॥ हिमालयंन्यस्तदंडप्रहर्षमनस्विनामिवसत्संप्रहारं २९ अजातशत्रुःकृतमैत्रोहुताग्निर्विप्रा न्नत्वातिलगोभूमिरुक्मैः ॥ गृ
हंप्रविष्टोगुरुवंदनायनचापश्यत्पितरौसौबलींच ३० तत्रसंजयमासीनंपप्रच्छोद्विग्नमानसः ॥ गावल्गणेक्कनस्तातोवृद्धोहीनश्चनेत्रयोः ॥ अंबाचहतपुत्राऽर्ता
पितृव्यःक्कगतःसुहृत् ३१ अपिमय्यकृतप्रज्ञेहतबंधुःसभार्यया ॥ आशंसमानःशमलंगंगायांदुःखितोऽपतत् ३२ पितर्युपरतेपांडौसर्वान्नःसुहृदःशिशून् ॥ अ
रक्षतांव्यसनतःपितृव्यौक्कगतावितः ३३

चूर्णिका

२६ त्वंतुधीरोनाभूः अतस्त्वमुदीचींदिशंगच्छ इतोऽर्वाक्प्रायशःकालःपुंसांगुणविकर्षणः २७ एवंविदुरेणबोधितःधृतराष्ट्रस्तेनसहस्वेषुस्नेहपाशंछित्वागृहान्निश्चक्राम २८
गच्छंतंपतिंदृष्ट्वागांधारीहिमाचलमनुजगाम २९ ततोधर्मराजःसंध्यावंदनादिकृत्वागुरुवंदनार्थगृहंप्रविष्टःसन् तौपितरौगांधारींचनापश्यत् ३० तत्रासीनंसंजयंपप्रच्छ
हेसंजय नस्तातोधृतराष्ट्रोविदुरोगांधारीचइतःक्कगताः ३१ मय्यपराधंशंकमानोगंगायांनापतत्किम् ३२ अस्मात्पितरिपांडौमृतेनः शिशून्यौअरक्षताम् तौक्कगतावितिवद ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

क्रपयास्नेहवैक्लव्याद्यातिपीडितःआत्मेश्वरंस्वस्यस्वामिनंधृतराष्ट्रमपश्यन्नविरहकर्पितश्चसूतःसंजयःनप्रत्युत्तरमाह ३४ आत्मनाबुद्ध्याआत्मानंमनोविष्टभ्यधैर्ययुक्तंकृत्वाप्रभोर्धृतराष्ट्रस्य गांधार्याश्चपादावनुस्मरन्संजयःप्रत्यूचे) ३५ (विदुरधृतराष्ट्रयोः) गांधार्याश्चव्यवसितंनिश्चयंयतोमुषितोवंचितोऽस्मीति ३६ एवंतस्मिन्कंचित्कालंशोचति (सति) अथनारदः (तुंबुरुणासह) आजगामतं अत्राऽस्तिकचित्पुस्तकेपाठांतरंतदुल्लंघ्ययथासांप्रदायंव्याख्यायतेशोकावेशादभ्यर्चयन्निवाह राजानत्वभ्यर्चयन् ३७ नाहंवेदनवेद्मि (पित्रोःपितृव्ययोः) तपस्विनी (आर्ता) दुःखयुक्ता (अंबागांधारी) अपारेशोकार्णवेभगवान्त्वमेवपार दर्शकःअतोब्रूहीतिशेषः ३८ आदावेवयथावृत्तकथनेशोकेनमूर्छितःपतेदितिप्रथमंतावच्छोकमुपशमयति । मेति हेराजन्कंचनमाशुचःमाशोचः नकेवलंतानेव । यद्यस्मादीश्वराधीनंजगत् ३९ तदेवाह लोकाइति (इमेयस्यबलिंकरंपूजोपहारंवाकर्मलक्षणं सईशिता भूतानि) संयुनक्ति (तत्कर्मानुसारेण) संयोजयति (सएवकर्मावसाने) वियुनक्तिवियोजयतिच ४० गावोबलिवर्दानसिनासिकायांप्रोता (स्यूताःस्वदामभिःस्वस्वह्रस्वदामभिः) तंत्यां (आधारभूतायां) दीर्घायांरज्जौबद्धाःस्वामिनोबलिंवहंतियथा तथावाक्तंत्यांकर्तव्याकर्तव्यविधिनिषेधात्मकवेदलक्षणायांब्राह्मणोब्रह्मचारीत्यादिवर्णाश्रमलक्षणैःनामभिर्बद्धः परमेश्वरस्यबलिंतेन प्रेरिताःसर्वेवहंतीत्यर्थः ४१ प्रवृत्तौपारतंत्र्यमुक्त्वासंयोगवियोगयोरप्याह।यथेतिक्रीडोपस्कराणांक्रीडासाधनानाम्(क्रीडितुःपुरुषस्येच्छयासंयोगविगमौस्यातांतथैवेश्वरेच्छयानृणांमिति) ४२

॥७०॥

श्लोकाः ३४/४२

सूतउवाच ॥ कृपयास्नेहवैक्लव्यात्सूतोविरहकर्शितः ॥ आत्मेश्वरमचक्षाणोनप्रत्याहातिपीडितः ३४ विमृज्याश्रूणिपाणिभ्यांविष्टभ्यात्मानमात्मना ॥ अजातशत्रुंप्रत्यूचेप्रभोःपादावनुस्मरन् ३५ संजयउवाच ॥ नाहंवेदव्यवसितंपित्रोर्वःकुलनंदन ॥ गांधार्यावामहाबाहोमुषितोऽस्मिमहात्मभिः ३६ अथाजगामभगवान्नारदःसहतुंबुरुः ॥ प्रत्युत्थायाऽभिवाद्याहसानुजोऽभ्यर्चयन्निव ३७ युधिष्ठिरउवाच॥ नाहंवेदगतिंपित्रोर्भगवन्क्कगतावितः ॥ अंबावाहतपुत्रार्ताक्वगताचतपस्विनी ॥ कर्णधारइवापारेभगवान्पारदर्शकः ३८ अथाऽऽबभाषेभगवान्नारदोमुनिसत्तमः ॥ माकंचनशुचोराजन्यदीश्वरवशंजगत् ३९ लोकाःसपालायस्येमेवहंतिबलिमीशितुः ॥ ससंयुनक्तिभूतानिसएववियुनक्तिच ४० यथागावोनसिप्रोतास्तंत्यांबद्धाःस्वदामभिः वाक्तंत्यांनामभिर्बद्धावहंतिबलिमीशितुः ४१ यथाक्रीडोपस्कराणांसंयोगविगमाविह ॥ इच्छयाक्रीडितुःस्यातांतथैवेशेच्छयानृणाम् ४२

चूर्णिका

सूतउवाच धृतराष्ट्रमपश्यन्नतिपीडितःसंजयःप्रत्युत्तरंनदत्तवान् ३४ ततः बुद्ध्यामनसिधैर्यंधृत्वाधर्मराजमुवाच ३५ संजयउवाच हेधर्मराज तेषांव्यवसितंनजानेतैरहंवंचितोऽस्मि ३६ एतस्मिन्कालेतुंबुरुणासहनारदआगतः तमभिवाद्ययुधिष्ठिरआह ३७ युधिष्ठिरउवाच हेनारद नःपित्रोर्गांधार्याश्चगतिंनवेद्मि भवान्सर्वज्ञोऽसिअतोवद ३८ अथनारदआह हेराजन्शोकंमाकुरु यतइदंजगदीश्वराधीनं ३९ इमेलोकावाक्तंत्यांबद्धाःसंतईश्वरायबलिंवहंति यथादामभिर्बद्धावृषभाः ४० ४१ यथाक्रीडोपस्कराणांयोगवियोगौ क्रीडाकर्तुरिच्छयाभवतः तद्वदीश्वरेच्छयानृणांयोगवियोगौस्याताम् ४२

॥७०॥

१ स्नेहपावशादितिमाहेश्वरीये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥७१॥

ईश्वराधीनत्वान्नशोकःकार्यइत्युक्तं । लोकतत्त्वेचविचार्यमाणेनिर्विषयोयंशोकइत्याह यदिति यत्यदिलोकंजनंध्रुवंजीवरूपेण । अध्रुवंदेहरूपेण नचेति । नध्रुवंनाप्यध्रुवं (उभयरूपमपिनेतियावत्) शुद्धब्रह्मरूपेणअनिर्वचनीयत्वेनवा । उभयं (इतिउभयरूपं) वाचिज्जडांशतःसर्वथाचतुर्ष्वपिपक्षेषुतेपित्रादयोनैवशोच्याः (नित्यस्यनाशाभावादनित्यस्यअवस्तुत्वाच्च । तर्हिशोकेकिंकारणमितितत्राह) स्नेहादन्यत्र (स्नेहंविना) स्नेहएवकेवलंशोकहेतुरित्यर्थः । सचस्नेहोअज्ञानमूलइत्याह मोहजादिति ४३ तस्मान्मांविनाकथंतेवर्तेरन्नित्यात्मनो मनसो वैक्लव्यंचव्याकुलतांत्यज ४४ तत्रत्वद्देहतस्तेषांवृत्तिरिततावन्नास्तीत्याह । कालोगुणक्षोभकःकर्मजन्मनिमित्तं । गुणाउपादानंतदधीनः । पांचभौतिको जडस्तद्विभागेननाशवांश्चसर्पग्रस्तोऽजगरगिलितोयथाअन्यंनरक्षतितद्वत् ४५ ईश्वरेणविहितावृत्तिश्चसर्वतःसुलभैवेत्याह । अहस्तानिपश्वादीनि अपदानितृणादीनि (अहस्तानिसहस्तानामित्यस्यगोमनुष्यव्याघ्रादौवैपरीत्यस्यापिदर्शनादाह । फल्गुनीति तत्रतेषुअहस्तादिष्वपिफलल्गूत्यान्पानि । एवंजीवःसर्वोपिजीवस्यसर्वस्यजीवनंजीविका । एतेनैवसर्वतोमृत्युग्रासंत्वचोक्तं (अतोनासौकस्यचिद्वृत्तिविधायकः । वृत्तिविधायकस्तुसर्वेषामीश्वरएवेति) ४६ (स्नेहकारणभूत) मोहनिवृत्त्यर्थंद्वैतस्यावस्तुत्वमाह । तदिदंअहस्तसहस्तादिरूपंजगत्स्वदृक् (स्वप्रकाशः) भगवानेव । नततःपृथक् सचएकएवनतुनाना । ननुसजातीयविजातीयभेदेप्रत्यक्षेकुतएतत्राह । आत्मनांभोक्तॄणांआत्मास्वरूपं अतोनसजातीयभेदः । अंतरोऽनंतरश्चअंतर्बहिश्चअभोग्यरूपश्चभाति । अतोनविजातीयभेदोऽपि नन्वेकःकथंतथाप्रतीयते । अतआह । माययाबहुधातंपश्येति ४७ क्वासावस्तीदृशोमहामायावीद्वारकायामित्याह सोऽयमिति । अस्यांभूमावभवायनाशाय ४८ तर्हिश्रीकृष्णोऽत्रास्तीत्यत्रैवास्थांमाकृथाइत्याह । तच्चदेवानां (कृत्यं) कार्यंतेननिष्पादितंकेवलमवशेषंप्रतीक्षते । यदुकुलक्षयमात्रमितिदृष्टदिस्थितं ततोनिजंधामयास्यतिततोयूयमपिगच्छतेत्यर्थः । तच्चभूतमपिविदुरवदेवनाऽवर्णयत् ४९

श्लोकाः ४३/४९

यन्मन्यसेध्रुवंलोकमध्रुवंवानचोभयं ॥ सर्वथाहिनशोच्यास्तेस्नेहादन्यत्रमोहजात् ४३ तस्माज्जह्यंगवैक्लव्यमज्ञानकृतमात्मनः ॥ कथंत्वनाथाःकृपणावर्त्तेरंस्तेनमांविना ४४ कालकर्मगुणाधीनोदेहोऽयंपांचभौतिकः ॥ कथमन्यांस्तुगोपायेत्सर्पग्रस्तोयथापरं ४५ अहस्तानिसहस्तानामपदानिचतुष्पदाम् ॥ फल्गूनितत्रमहतांजीवोजीवस्यजीवनं ४६ तदिदंभगवान्राजन्नेकआत्मात्मनांस्वदृक् ॥ अंतरोऽनंतरोभातिपश्यतंमाययोरुधा ४७ सोऽयमद्यमहाराजभगवान्भूतभावनः ॥ कालरूपोऽवतीर्णोऽस्यामभवायसुरद्विषां ४८ निष्पादितंदेवकृत्यमवशेषंप्रतीक्षते ॥ तावद्यूयमवेक्षध्वंभवेद्यावदिहेश्वर ४९

चूर्णिका

तस्मादस्मिन्लोकेस्नेहाद्विनाशोकहेतुर्नास्ति ४३ अतोमत्पितरोवनंगताःसंतःकथंवर्त्तेरन्नितिचिंतांत्यज ४४ अहोऽयंदेहःकलाधीनःसन्नन्यान्कथंरक्षेत् सर्पग्रस्तोयथाऽन्यंनरक्षति तद्वत् ४५ अथसर्वेषांईश्वरकल्पितावृत्तिरस्त्येव तथाहि सहस्तानांजीवनमहस्तानि चतुष्पदांजीवनमपदानि फल्गूनितत्रमहतां जीवोजीवस्यजीवनम् ४६ हेराजन् इदंजगदेकएवनारायणोमाययाबहुधाभाति ४७ सएवभगवान्दैत्यानांनाशायभूम्यामवतीर्णोऽस्ति ४८ स देवकार्यंनिष्पादितवान् किंचित्शेषंप्रतीक्षते तावद्यूयंप्रतीक्षध्वं ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंशोकमास्थांचानिवार्यजिज्ञासवेतस्मैयथावृत्तंकथयति । धृतराष्ट्रइतिपङ्क्तिः हिमवतः (दक्षिणेन) दक्षिणेभागे (इत्यर्थः । भ्रात्राविदुरेण) ५० (आश्रमस्यसप्तस्रोतइतिनाम) तद
पिकुत्रेत्याहस्रोतोभिरिति।यावैप्रसिद्धास्वर्धुनी (गंगा) सा आत्मानंयत्रसप्तधाव्यधात् । किमर्थं नानापृथक् सप्तभिःस्रोतोभिःप्रवाहैःसप्तानामृषीणांप्रीतये । अतएवतत्तीर्थंचसप्तस्रोतोवदंति
५१ तत्र तेनकृतमष्टांगयोगमाह । स्नात्वेतिचतुर्भिः । तत्रस्नानंहोमोभक्षणंचेतिनियमाउक्ताः (अनुसवनंत्रिकालं) भक्षणस्थानेअपांस्वीकारादब्भक्षः उपशांतआत्मायस्यसः
विगताःपुत्राद्येषणायस्मादितियमाउक्ताः ५२ जितासनइत्यादिनाआसनप्राणायामप्रत्याहाराउक्ताः हरिभावनयेतिधारणोक्ता । ध्वस्तारजःसत्त्वतमोरूपामलायस्येतिफलतोध्यानमुक्तं ५३
समाधिमाह विज्ञानेतिद्वाभ्यां । आत्मानंमनोऽहंकारास्पदंस्थूलदेहाद्वियोज्यविज्ञानात्मनिबुद्धौसंयोज्यैकीकृत्यतंचविज्ञानात्मानंदृश्यांशाद्वियोज्यक्षेत्रज्ञेद्रष्टरिप्रविलाप्यतंचक्षेत्रज्ञंद्रष्टृंशाद्वि
योज्याऽऽधारेआश्रयसंज्ञेब्रह्मणिप्रविलाप्यघटांबरंघटोपाधेर्वियोज्ययथा (अंबरे) महाकाशेप्रविलाप्यतेतद्वत् ५४ व्युत्थानाभावमाह ध्वस्तेति । अंतरगुणक्षोभाद्वाबहिरिंद्रियवि
क्षेपाद्वाव्युत्थानंभवेत् तदुभयंतस्यनास्तियतोध्वस्तोमायागुणानामुदर्कउत्तरफलंवासनायस्यसः । निरुद्धानिकरणानिचक्षुरादीन्याआश्रयोमनश्चयस्यसः । अतएवनिवर्तितोऽखिलआ
हारोभोग्यमिंद्रियैर्विषयाहरणंवायेनसः । स्थाणुरिवनिश्चलआस्ते ५५ तथाभूतमप्यानेतुमुद्यतंप्रत्याह । तस्येति । अंतरायोविघ्नःमैवाभूरित्यडागमश्छांदसः (विघ्नसंकल्पोमास्त्विव
त्यर्थः) दर्शनमपितावत्कुर्यामित्युद्यतंप्रत्याह । सवैअद्यतनादह्नःपरतउत्तरत्र स्वंस्वाधीनं (हास्यतित्यक्ष्यति) तर्हितद्दाहार्थंगमिष्यामिनेत्याह । तत्रेति ५६ तर्हिगांधारीं (सां
त्वयित्वाअत्र) आनयिष्यामीत्यतआह दह्यमानइति पत्युर्देहेसहोटजेपर्णशालासहितेयोगाग्निनासहगार्हपत्यादिभिर्दह्यमानेतस्यपत्नीबहिःस्थितासतीतंपतिमन्वग्निंवेक्ष्यतिप्रवेक्ष्यति ५७

॥७२॥

धृतराष्ट्रःसहभ्रात्रागांधार्याचस्वभार्यया ॥ दक्षिणेनहिमवतऋषीणामाश्रमंगतः ५० स्रोतोभिःसप्तभिर्यावैस्वर्धुनीसप्तधाव्यधात् ॥ सप्तानांप्रीतयेनानासप्त
स्रोतःप्रचक्षते ५१ स्नात्वाऽनुसवनंतस्मिन्हुत्वाचाग्नीन्यथाविधि ॥ अब्भक्षउपशांतात्मासआस्तेविगतैषिणः ५२ जितासनोजितश्वासःप्रत्याहृत
षडिंद्रियः ॥ हरिभावनयाध्वस्तरजःसत्त्वतमोमलः ५३ विज्ञानात्मनिसंयोज्यक्षेत्रज्ञेप्रविलाप्यतम् ॥ ब्रह्मण्यात्मानमाधारेघटांबरमिवांबरे ५४
ध्वस्तमायागुणोदर्कोनिरुद्धकरणाशयः ॥ निवर्तिताखिलाहारआस्तेस्थाणुरिवाचलः ५५ तस्यांतरायोमैवाभूःसन्यस्ताखिलकर्मणः ॥ सवाअद्यतन
ाद्राजन्परतःपंचमेहनि ॥ कलेवरंहास्यतिस्वंतच्चभस्मीभविष्यति ५६ दह्यमानेऽग्निभिर्देहेपत्युःपत्नीसहोटजे ॥ बहिःस्थितापतिंसाध्वीतमग्निमनुवेक्ष्यति ५७

श्लोकाः ५०/५७

चूर्णिका

प्रस्तुतमाह गांधार्यासहधृतराष्ट्रोविदुरश्चहिमवतोदक्षिणेनर्षीणामाश्रमंगतः ५० यत्रगंगाऽऽत्मानंऋषिप्रीतयेसप्तधाव्यधात्तत्तीर्थंसप्तस्रोतइतिवदंति ५१ तत्रत्रिकालंस्ना
त्वाऽग्नीन्हुत्वास्वस्थचित्तः ५२ हरिभावनया ध्वस्तरजःसत्त्वतमोमलःधृतराः ५३ मनोबुद्धावेकीकृत्यबुद्धिंजीवेप्रविलाप्य घटाकाशंमहाकाशेयथाविलाप्यतेतद्वज्जीवं
ब्रह्मणिप्रविलाप्य ५४ निरुद्धेंद्रियः सन्स्थाणुरिवनिश्चलोऽधुनाऽऽस्ते तस्यगत्वाअंतरायोमाभूः ५५ सधृतराष्ट्रइतःपंचमेहनिदेहंत्यक्ष्यतिसचभस्मीभविष्यति ५६
ततोगांधार्यपिअग्निंप्रवेक्ष्यति ५७

॥७२॥

१ तर्हितत्रस्थित्वातत्सेवांकुर्यामित्युद्यतंप्रत्याहेतिमाहेश्वरीये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तर्हिविदुरानयनार्थंगंतव्यंमेव नेत्याह । विदुरस्तुतन्निशाम्यदृष्ट्वाभ्रातुः उत्तमगत्याहर्षःतन्मृत्युनाशोकश्चताभ्यांयुक्तस्तस्मात्स्थानात्तीर्थानिसेवितुंगंतागमिष्यति ५८ शुचःशोकान् ५९ ॥ ॥ इतिभा०प्रथमस्कंधेटीकायांत्रयोदशोऽध्यायः १३ ॥ छ ॥ ॥ चतुर्दशेत्वरिष्टानिदृष्ट्वाराजाविशंकितः । अशृणोदर्जुनात्कृष्णतिरोधानमितीर्यते ॥ १ ॥ (जिष्णौअर्जुने) श्रीकृष्णस्य चेतिचकारेणाभिप्रायंचज्ञातुं (संप्रस्थितेगते) १ कतिचित्सप्त (मासाव्यतीताः) तदाकालातिक्रमेऽपिततोद्वारकायाःनायात्नागतः । निमित्तानिउत्पातान्कुरूद्वहोयुधिष्ठिरः २ रौद्रांघोरां तदेवाह । विपर्यस्ताः (व्यत्यस्ताः) ऋतुधर्माः (पुष्पोद्गमादयःसंति) यस्मिन्तस्यवार्ताजीविकां । क्रोधलोभानृतैर्युक्तआत्मा(बुद्धिः)येषां ३ जिह्मप्रायंकपटबहुलंव्यवहृतंव्यवहारं शाठ्यंवंचनं तन्मिश्रंसौहृदंसख्यं । पित्रादीनां (पुत्रादिभिः) स्वप्रतियोगिभिःकल्कनंकलहादि ४ अत्यरिष्टानिअत्यंतमशुभानिदृष्ट्वानृणांलोभाद्यधर्मरूपांप्रकृतिं (स्वभावं) चदृष्ट्वाअनुजंभीमं ५ ६ वेतिवितर्के कस्माद्धेतोर्नायातीत्यहंनवेद्मि ७ अपिकिंयदा(यस्मिन्काले) आत्मनआक्रीडंक्रीडासाधनमंगंमनुष्यनाट्यंउत्स्रष्टुमिच्छति(देवर्षिणाचतावद्यूयमवेक्षध्वमित्यादिनायआदिष्टः) सकालःप्राप्तः ८

॥७३॥

श्लोकाः ५८/८

विदुरस्तुतदाश्चर्यंनिशाम्यकुरुनंदन ॥ हर्षशोकयुतस्तस्माद्गंतातीर्थनिषेवकः ५८ इत्युक्त्वाऽथाऽरुहत्स्वर्गंनारदःसहतुंबरुः ॥ युधिष्ठिरोवचस्तस्य हृदिकृत्वाऽजहाच्छुचः ५९ ॥ इतिश्रीभा०म०प्रथमस्कंधेत्रयोदशोऽध्यायः १३ ॥ छ ॥ सूतउवाच ॥ संप्रस्थितेद्वारकायांजिष्णौबंधुदिदृक्षया ॥ ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितम् १ व्यतीताःकतिचिन्मासास्तदानायात्ततोऽर्जुनः ॥ ददर्शघोररूपाणिनिमित्तानिकुरूद्वहः २ कालस्यचगतिंरौद्रांविपर्यस्तर्तुधर्मिणः ॥ पापीयसींनृणांवार्तांक्रोधलोभानृतात्मनाम् ३ जिह्मप्रायंव्यवहृतंशाठ्यमिश्रंचसौहृदम् ॥ पितृमातृसुहृद्भ्रातृदंपतीनांचकल्कनम् ४ निमित्तान्यत्यरिष्टानिकालेत्वनुगतेनृणाम् ॥ लोभाद्यधर्मप्रकृतिंदृष्ट्वोवाचाऽनुजंनृपः ५ युधिष्ठिरउवाच ॥ संप्रेषितोद्वारकायांजिष्णुर्बंधुदिदृक्षया ॥ ज्ञातुंचपुण्यश्लोकस्यकृष्णस्यचविचेष्टितम् ६ गताःसप्ताऽधुनामासाभीमसेनतवानुजः ॥ नायातिकस्यवाहेतोर्नाऽहंवेदेदमंजसा ७ अपिदेवर्षिणादिष्टःसकालोऽयमुपस्थितः ॥ यदाऽऽत्मनोऽङ्गमाक्रीडंभगवानुत्सिसृक्षति ८

चूर्णिका

विदुरश्चतदाश्चर्यंदृष्ट्वाहर्षशोकयुतःसंस्तीर्थस्नानार्थंगमिष्यति ५८ इत्युक्त्वातुंबुरुणासहनारदःस्वर्गमारुहत् युधिष्ठिरोनारदवचोहृदिकृत्वाशोकंजहौ ५९ ॥ इतिप्रथमेत्रयोदशः १३ ॥ छ ॥ सूतउवाच हेशौनक द्वारकायांकृष्णचेष्टितंज्ञातुमर्जुनेगतेसति १ कतिचिन्मासागताः कालातिक्रमेऽपिअर्जुनोऽनायातः तदा धर्मउत्पातान्कालस्यघोरांगतिंचददर्श तदेवाह नृणांपापांवृत्तिं २ ३ कपटप्रायंव्यवहारं वंचनप्रायंसख्यं पितृमातृसुहृद्भ्रातृदंपतीनांपरस्परकलहम् ४ लोभादिनाधर्मप्रवृत्तिंचदृष्ट्वाधर्मोभीममाह ५ युधिष्ठिरउवाच हेभीम बंधुदिदृक्षयाद्वारकायांमयाप्रेषितोऽर्जुनः ६ अद्यापिकस्यहेतोर्नायाति तदहंनवेद्मि ७ नारदेनकथितःकालःसएवप्राप्तःकिं ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अस्माकंसर्वपुरुपार्थत्वेहेतुःश्रीकृष्णः अतस्तद्वियोगंविनाऽनिष्टंनस्यादित्याशयेनाह । यस्माच्छ्रीकृष्णाद्धेतोः एतच्चोपरिष्टादर्जुनःस्पष्टीकरिष्यति । लोकाश्चयज्ञकरणानुरूपायस्यानुग्रहात् (सभगवानुत्सिसृक्षतीत्यन्वयः) ९ अदूरात्संनिहितंनोऽस्माकंभयमाशंसतःउत्पातान् (पश्य । हेनरव्याघ्रदैहिकैःसहिताःसदैहिकास्तानेवंत्रिविधान्कथंभूतंभयंबुद्धिमोहनंबुद्धिभ्रमकरं) १० (तत्र) दैहिकानाह ऊर्वीति । ऊरुनेत्रादयःवामाःस्फुरंतिवेपथुःकंपश्चहृदयेवर्तते (अंगहेभीम) एतेमह्यंआरात्संनिहितंविप्रियंदास्यंति ११ भौमानाह सार्धैस्त्रिभिः । शिवाक्रोष्टीउद्यंतंआदित्यमभिरौतिउद्यत्सूर्याभिमुखंक्रोशति । अनलाननामुखेनाग्निज्वालांवमंती । अंगहेभीममामभिलक्ष्यसारमेयःश्वाभुतंरौतिभपति । अभीरुवन्निःशंकं १२ शस्तागवादयोमांसव्यंवामंकुर्वंति । अपरेगर्दभाद्याःप्रदक्षिणंकुर्वंति (मम) वाहानश्वान् १३ अयंकपोतोमृत्युदुतोमृत्युसूचकइत्यर्थः । उलूकोघूकः प्रत्युलूकउलूकप्रतिपक्षःघूकःकाकोवाकुह्वानैःकुत्सितशब्दैर्विश्वंशून्यंकर्तुमिच्छतः (सर्वनाशेयथातथाक्षीणत्वंसूचयतइत्यर्थः) १४धूम्राधूसराः (परिधयोऽग्निमिव) इमांल्लोकानावृण्वंति (यद्वा परिधयःपरिवेपास्ते यथासूर्याचंद्रमसौवष्टयंतितद्वद्भुवंदिशइत्यर्थः) दिव्यानाह सार्धाभ्यां । निर्घातोनिरभ्रवज्रपातः । स्तनयित्नवोत्रगर्जितानि तैःसह (महानासीत्) १५ (रजसा धूल्या) तमःविशेपेणसृजन् (वायुर्वाति) असृक्रक्तं(बिभत्संजुगुप्सास्पदमिव) १६ ग्रहाणांमर्दयुद्धम् । भूतारुद्रानुचराः तेपांगणैःससंकुलैःसंकुलाव्यामिश्राःप्राणिनःतत्सहितैः रोदसीद्यावापृथिव्यौज्वलितेप्रदीप्तेइवचपश्येति १७ पुनर्भौमानाह नद्यइतिसार्धैस्त्रिभिः । प्राणिनांमनांसिच (क्षुभितानि) १८

श्लोकाः ९/१८

यस्मान्नःसंपदोराज्यंदाराःप्राणाःकुलंप्रजाः ॥ आसन्सपत्नविजयोलोकाश्चयदनुग्रहात् ९ पश्योत्पातान्नरव्याघ्रदिव्यान्भौमान्सदैहिकान् ॥ दारुणाञ्छंसतोऽदूराद्भयंनोबुद्धिमोहनम् १० ऊर्वाक्षिबाहवोमह्यंस्फुरंत्यंगपुनःपुनः ॥ वेपथुश्चापिहृदयआराद्दास्यंतिविप्रियम् ११ शिवैषोद्यंतमादित्यमभिरौत्यनलानना ॥ मामंगसारमेयोऽयमभिरौतिह्यभीरुवत् १२ शस्ताःकुर्वंतिमांसव्यंदक्षिणंपशवोऽपरे ॥ वाहांश्चपुरुषव्याघ्रलक्षयेरुदतोमम १३ मृत्युदूतःकपोतोऽयमुलूकःकंपयन्मनः ॥ प्रत्युलूकश्चकुह्वानैरनिद्रौशून्यमिच्छतः १४ धूम्रादिशःपरिधयःकंपतेभूःसहाद्रिभिः ॥ निर्घातश्चमहानासीत्साकंचस्तनयित्नुभिः १५ वायुर्वातिखरस्पर्शोरजसाविसृजंस्तमः ॥ असृग्वर्षंतिजलदाबीभत्समिवसर्वतः १६ सूर्यंहतप्रभंपश्यग्रहमर्दंमिथोदिवि ॥ ससंकुलैर्भूतगणैर्ज्वलितेइवरोदसी १७ नद्योनदाश्चक्षुभिताःसरांसिचमनांसिच ॥ नज्वलत्यग्निराज्येनकालोऽयंकिंविधास्यति १८

चूर्णिका

यस्मात्श्रीकृष्णात्संपदःराज्यंस्त्रियःप्राणाःप्रजाःशत्रुविजयश्च एतेऽस्माकंआसन् सभगवान्स्वस्थानंगतःकिम् ९ हेभीमदिव्यान्भौमान्दैहिकांश्चभयसूचकानुत्पातान्पश्य १० तेचममवामोर्वक्षिबाहवःस्फुरंति हृदिकंपोवर्तते ११ एषाक्रोष्ट्रीसूर्याभिमुखारौति अयंश्वामामाभिमुखंरौति १२ गवादयोमांसव्यंकुर्वंति गर्दभादयःदक्षिणंकुर्वंति ममाश्वान्रुदतोलक्षये १३ अयमुलूकःशब्दैर्विश्वंशून्यमिच्छति १४ भूःकंपतेवायुःतीक्ष्णोवाति १५ मेघारक्तंवर्षंति सूर्यंहतकांतिंग्रहयुद्धंचपश्य १६ १७ आज्येनाऽग्निर्नज्वलति १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥७९॥

(मातरोगावःनदुह्यंति) नप्रस्नुवंतीत्यर्थः । दुह्यंतीतिकर्मकर्तर्यार्षं (ऋषभाव्रषाःव्रजेगोष्ठे) १९ दैवतानिप्रतिमाः । (. पुराणिचउद्यानान्याक्रीडाश्चआकराःखन्यःआश्रमाऋषिस्था नानि) अघंदुःखं २० एतैर्महोत्पातैःकृत्वानूनंभगवतःपदैर्हीनाभूरित्यहंमन्ये । कथंभूतैःपदैः नविद्यतेअन्येषुपुरुषेषुश्रीर्वज्रांकुशादिशोभायेषांतैः २१ तस्यराज्ञःइत्येवंदृष्टान्यरिष्टा नियेनतेनचेतसाचिंतयतःसतः (अर्जुनोद्वारकायाःसकाशादागमत्) २२ अयथापूर्वंनिपतितंतंदेवाहआतुरमित्यादि । अपांबिंदून् अश्रूणि (नेत्राब्जयोः) नेत्राभ्यांविसृजंतमित्य र्थः २३ उद्विग्नं (भयेन) कंपितंहृदयंयस्यसः विच्छायंविगतकांतिं २४ (आनर्तपुर्यांद्वारकायाम् मधवश्चभोजाश्चदशार्हाश्चअर्हाश्चसात्वताश्चअंधकाश्चवृष्णयश्चेतिवंशभेदायदूनां) स्वजनाबांधवाः २५ (कच्चिच्छन्दःप्रश्नार्थे) किंवक्ष्यतीतिशंकयाव्यवहितक्रमेणपृच्छति । शूरइत्यादिनामारिषः मान्यःमातामहाशरोनामयादवःकुत्याःपिता । आनकदुंदुभिर्वसुदेवः (कुशलीसुखीआस्तेकिं) २६ स्वसारःपरस्परं(भगिन्यः)वसुदेवक्षेमेणतासामपिक्षेमंपृष्टप्रायंतथापिपृथक्पृच्छतिस्वयमिति २७ आहूकउग्रसेनःअसत् (असाधुः)पुत्रोयस्य । अतएवजी वनमात्रमेवपृष्टं(नतुकुशलं) अनुजश्चदेवकः । हृदीकसुतःकृतवर्मा । जयंतादयः कृष्णभ्रातरः २८ २९ सर्ववृष्णीनांमध्येमहारथः । गंभीररयःयुद्धेमहावेगः । वर्धतेमोदतइत्यर्थः ३०

श्लोकाः १९/३०

नपिबंतिस्तनंवत्सानदुह्यंतिचमातरः ॥ रुदंत्यश्रुमुखागावोनहृष्यंत्यृषभाव्रजे १९ दैवतानिरुदंतीवस्विद्यंतिह्युच्चलंतिच ॥ इमेजनपदाग्रामाःपुरो द्यानाकराश्रमाः ॥ भ्रष्टश्रियोनिरानंदाःकिमघंदर्शयंतिनः २० मन्यएतैर्महोत्पातैर्नूनंभगवतःपदैः ॥ अनन्यपुरुषश्रीभिर्हीनाभूर्हतसौभगा २१ इतिचिंतय तस्तस्यदृष्टारिष्टेनचेतसा ॥ राज्ञःप्रत्यागमद्ब्रह्मन्यदुपुर्याःकपिध्वजः २२ तंपादयोर्निपतितमयथापूर्वमातुरम् ॥ अधोवदनमब्बिंदून्मुंचंतंनयनाब्जयोः २३ विलोक्योद्विग्नहृदयोविच्छायमनुजंनृपः ॥ पृच्छतिस्मसुहृन्मध्येसंस्मरन्नारदेरितम् २४ युधिष्ठिरउवाच ॥ कच्चिदानर्त्तपुर्यांनःस्वजनाःसुखमासते ॥ मधुभोजदशार्हार्हाःसात्वतांधकवृष्णयः २५ शूरोमातामहःकच्चित्स्वस्त्यास्तेवाथमारिषः ॥ मातुलःसानुजःकच्चित्कुशल्यानकदुंदुभिः २६ सप्तस्वसारस्त त्पत्न्योमातुलान्यःसहात्मजाः ॥ आसतेसस्नुषाःक्षेमंदेवकीप्रमुखाःस्वयम् २७ कच्चिद्राजाहुकोजीवत्यसत्पुत्रोऽस्यचानुजः ॥ हृदीकःससुतोऽक्रूरोजयंतग दसारणाः २८ आसतेकुशलंकच्चिद्येचशत्रुजिदादयः ॥ कच्चिदास्तेसुखंरामोभगवान्सात्वतांप्रभुः २९ प्रद्युम्नःसर्ववृष्णीनांसुखमास्तेमहारथः ॥ गंभीररयो ऽनिरुद्धोवर्धतेभगवानुत ३०

चूर्णिका

वत्साःस्तनंनपिबंति १९ दैवतानिरुदंति सर्वेजनाःभ्रष्टश्रियोनिरानंदाःदृश्यंते २० अतएतैरुत्पातैःकृत्वाभगवतःपदैर्हीनाभूःइत्यहंमन्ये २१ एवंधर्मस्यचिंतयतःसतोऽर्जुनः आगत्य २२ पादयोःपतितः तंअधोमुखंरुदंतंहतप्रभमर्जुनंविलोक्यकंपितहृदयोधर्मःनारदोक्तंस्मरन्नर्जुनंपप्रच्छ २३ २४ युधिष्ठिरउवाच हेअर्जुन द्वारकायांसर्वेयद वःसुखमासतेकिं २५ अस्मन्मातामहःशूरःमातुलोवसुदेवः २६ २७ तत्पत्न्योदेवकीप्रमुखाःउग्रसेनःहृदीकः २८ कृतवर्माऽक्रुरजयंतगदसारणशत्रुजितः बलरा मः २९ प्रद्युम्नानिरुद्धौ ३० ॥७९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कृष्णस्यापत्यानिकार्ष्णयःतेषुप्रवराः (ऋषभादयः) ३१ सुनंदनंदौशीर्षण्यौमुख्यौयेषांते (श्रुतदेवोद्धवादयःभगवतोऽनुचराः) ३२ (रामकृष्णयो र्भुजाआश्रयायेषां) ३३ भग
वान्गोविंदःसुखमास्तइतिप्रश्नस्यानौचित्यमाशंक्याह। पुरइत्यादि । (सुधर्मायांसभायांब्रह्मणावेदेनगम्यतेब्राह्मणेभ्योहितोवाब्रह्मण्यः) ३४ भगव तोत्रावस्थानेहिलोकानांमंगलंनान्यथे
त्याशयेनाह चतुर्भिः । मंगलायशुभाय । क्षेमायलब्धपालनाय । भवायोद्भवायअनंतसखोबलभद्रसहायः (यदुकुलमेवांभोधिस्तस्मिन्) ३५ अर्चिताःसर्वैःपूजिताः परमानंदंयथा
भवतितथा (परमानंदंप्राप्येत्यध्याहार्यंवा) । महापुरुषोविष्णुस्तदीयाःमहापौरुषिकावैकुंठनाथानुचराइव ३६ यस्य (भगवतः) पादयोःशुश्रूषणमेवमुख्यंतपआदिभ्यःश्रेष्ठं
यत्कर्मतेन (साधनेन) सत्यभामादयः संख्येयुद्धेश्रीकृष्णबलद्वारात्रिदशान्देवान्निर्जित्यतदाशिषोदेवभोग्यान्पारिजातादीन् (विषयान्) वज्रायुधस्यवल्लभाशचीतस्याउचिताः
(हरंत्याछिद्यभुंजंतीत्यर्थः) ३७ यद्बाहुदंडप्रभावोपजीविनः(अतएवाकुतोभयाःइंद्रस्योचितांबलादाहृतां) सुधर्माख्यांसभांअंघ्रिभिरधिक्रमंतिसगोविंदःसुखमास्तेइतिगतपंचमश्लोकेनान्व
यः ३८ इदानींतस्यैवकुशलंपृच्छति कच्चिदितिपङ्क्तिः (हेताततव) अनामयमारोग्यं (कच्चिदनामयप्रश्नेहेतुभ्रेष्टतजोइातभ्रंष्टतेजस्त्वेहेतून्पृच्छति) नलब्धोमानोयेनबंधुभ्यःसकाशात्किं
वातैःप्रत्युतअवज्ञातःतिरस्कृतः । यतश्चिरोपितोबहुकालंतत्रस्थितः ३९

श्लोकाः ३१/३९

सुषेणश्चारुदेष्णश्चसांबोजांबवतीसुतः ॥ अन्येचकार्ष्णिप्रवराःसपुत्राऋषभादयः ३१ तथैवाऽनुचराःशौरेःश्रुतदेवोद्धवादयः ॥ सुनंदनंदशीर्षण्यायेचान्येसा
त्वतर्षभाः ३२ अपिस्वस्त्यासतेसर्वेरामकृष्णभुजाश्रयाः ॥अपिस्मरंतिकुशलमस्माकंबद्धसौहृदाः ३३ भगवानपिगोविंदोब्रह्मण्योभक्तवत्सलः ॥ कच्चित्पुरे
सुधर्मायांसुखमास्तेसुहृद्वृतः ३४ मंगलायचलोकानांक्षेमायचभवायच ॥ आस्तेयदुकुलांऽभोधावाद्योऽनंतसखःपुमान् ३५ यद्बाहुदंडगुप्तायांस्वपुर्यांयदवोऽ
र्चिताः ॥ क्रीडंतिपरमानंदंमहापौरुषिकाइव ३६ यत्पादशुश्रूषणमुख्यकर्मणासत्यादयोद्व्यष्टसहस्रयोषितः ॥ निर्जित्यसंख्येत्रिदशांस्तदाशिषोहरंतिव
ज्रायुधवल्लभोचिताः ३७ यद्बाहुदंडाभ्युदयानुजीविनोयदुप्रवीराह्यकुतोभयामुहुः ॥ अधिक्रमंत्यंघ्रिभिराहृतांबलात्सभांसुधर्मांसुरसत्तमोचिताम् ३८ कच्चि
त्तेऽनामयंतातभ्रष्टतेजाविभासिमे ॥ अलब्धमानोऽवज्ञातःकिंवाताताचिरोषितः ३९

चूर्णिका

सुषेणचारुदेष्णसांबश्रुतदेवोद्धवाः ३१ सुनंदनंदादयश्च एतेसर्वेसुखमासतेकिम् ३२ तथाभक्तवत्सलःसुहृद्वृतःलोकमंगलोऽनंतसखःश्रीकृष्णःस्वपुर्यामास्तेकिं ३३ ३४ ३५
एतेसर्वेऽस्मान्स्मरंतिकिं किंच कृष्णभुजगुप्तायांद्वारकायांयदवःनंदंतिकिम् ३६ अपिच यस्यचरणसेवयायुद्धेदेवान्निर्जित्यदेवभोग्यान्पारिजातादीन्सत्यभामादयःसेवंतेकिं ३७
किंच यद्बाहुगुप्तायदुवीराःबलादानीतांसुधर्मासभांचरणैराक्रमंतिसगोविंदःसुखमास्तेकिम् ३८ किंच हेअर्जुनतवाऽऽरोग्यमस्तिकिम् किंच तवतत्राऽवमानोनजातःकिं ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अभावैरितिच्छेदः।प्रेमशून्यैरमंगलैःपरुपैःशव्दादिभिर्नाभिहतःनताडितोसिकिं । यद्वाअर्थिभ्यः किमपिदास्यामीतिनोक्तंकिं ।(। यद्वा आशयासहयथाआशाभवतितथादास्यामीतिप्रतिश्रुतंस
त्यत्तत्नदत्तंकिं ४० अन्यद्वा।शरणागतंसत्त्वंप्राणिमात्रंनत्यक्तवानसिकिं।यतस्त्वंपूर्वंशरणप्रदः आश्रयप्रदः४१अगम्यामितिच्छेदः।निंदितांस्त्रियंनागमः किंनगतवानासि (गम्यांवा)असत्कृतां
मलिनवस्त्रादिना (स्नानादिसंस्काररराहित्येनवाअगमः किं) नोत्तमैः (नविद्यंतेउत्तमायेभ्यस्तैः) अनुत्तमैःसमैरित्यर्थः । असमैरधमैर्वा (पथि)नपराजितोऽसीत्यर्थः ४२ (सं
भोज्यान्) संभोजनार्हान्वृद्धान्वालकांश्च (अपि) किंस्वित्पर्यभुंक्थाःपरित्यज्यभुक्तवानसिकिं।परिरत्रवर्जनार्थः (बालकादीन्वर्जयित्वातत्पूर्वंस्वयंभुक्तवान्किमित्यर्थः।जुगुप्सितंशास्त्र
निषिद्धं)अक्षमंकर्तुमयोग्यं (पलांडुभक्षणादि) यत्तन्नकृतवानसिकिं ४४ नित्यंसदाप्रेष्ठतमेनहृदयेनांतरंगेणस्वबंधुनाश्रीकृष्णेनरहितःशून्योऽस्मीति (आत्मानं) मन्यसेकच्चिदि
ति । अन्यथाते (तव) रुक् मनःपीडानघटेतेति ४३ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेभावार्थदीपिकायांटीकायांचतुर्दशोऽध्यायः १४ ॥ ॥ छ ॥ ॥ कलिप्रवेशमा
लक्ष्यधुरंन्यस्यपरिक्षिति । आरुरोहन्नृपःस्वर्गमितिपंचदशेब्रवीत् ॥१॥कृष्णोऽर्जुन आविकल्पितइतिच्छेदः नानाशंकास्पदंरूपमालक्ष्यविकल्पितइत्यर्थः । प्रतिभापितुंनाशक्रोदित्युत्तरेणान्व
यः । तत्रहेतवः । कृष्णविश्लेषेणकर्शितःकृशःकृतः १ शोकेनहेतुनावदनंचहृत्चतेएवसरोजे शुष्यतीवदनहृत्सरोजेयस्यसः । हताप्रभातेजोयस्यसः २ शुचःशोकाश्रूणियान्युद्गच्छंति
तानिनेत्रयोरेवसंस्तभ्यगलितानिचपाणिनाआमृज्य परोक्षेणदर्शनागोचरेणश्रीकृष्णेनहेतुनासमुन्नद्धंअधिकंयत्प्रेमौत्कंठ्यंतेनकातरोव्याकुलःसन्नृपमित्याहेत्युत्तरेणाऽन्वयः ३

श्लोकाः ४०/३

कच्चिन्नाभिहतोभावैःशब्दादिभिरमंगलैः ॥ नदत्तमुक्तमर्थिभ्यआशयायत्प्रतिश्रुतम् ४० कच्चित्त्वंब्राह्मणंबालंगांवृद्धंरोगिणंस्त्रियम् ॥शरणोपसृतंसत्त्वंनात्याक्षीः
शरणप्रदः ४१ कच्चित्त्वंनागमोऽगम्यांगम्यांवाऽसत्कृतांस्त्रियम् ॥ पराजितोवाथभवान्नोत्तमैर्नासमैःपथि ४२ अपिस्वित्पर्यभुंक्थास्त्वंसंभोज्यान्वृद्धबालकान् ॥
जुगुप्सितंकर्मकिंचित्कृतवान्नयदक्षमम् ४३ कच्चित्प्रेष्ठतमेनाथहृदयेनात्मबंधुना ॥ शून्योऽस्मिरहितोनित्यंमन्यसेतेऽन्यथानरुक् ४४॥ इतिश्रीभा०म०प्र०
युधिष्ठिरवितर्कोनामचतुर्दशोऽध्यायः १४ ॥छ॥ सूतउवाच।एवंकृष्णसखःकृष्णोभ्रात्राराज्ञाविकल्पितः ॥ नानाशंकास्पदंरूपंकृष्णविश्लेषकर्शितः १ शोकेन
शुष्यद्वदनहृत्सरोजोहतप्रभः॥विभुंतमेवाऽनुध्यायन्नाशक्नोत्प्रतिभाषितुं२कृच्छ्रेणसंस्तभ्यशुचःपाणिनाऽऽमृज्यनेत्रयोः ॥परोक्षेणसमुन्नद्धप्रणयौत्कंठ्यकातरः३

चूर्णिका

किंच त्वयाआर्थिनेदास्यामीतिप्रतिज्ञायनदत्तंकिम् ४० किंच ब्राह्मणंबालंवृद्धंगांरोगिणंस्त्रियंचशरणागतानेतान्नरक्षितवान्किम् ४१ किंच अगम्यांस्त्रियंगतःकिम् किंच त्व
मन्यैःपराभूतःकिम् ४२ किंच वृद्धान्वालांश्चविहायत्वयापूर्वंभोजनंकृतंकिम् ४३ किंच प्रियतमेनश्रीकृष्णेनरहितोऽस्मीतिमन्यसेकिम् अन्यथातेमनःपीडानघटेत४४॥ इति
प्रथमेचतुर्दशः १४ ॥ ॥ सूतउवाच एवंधर्मराजेनविकल्पितोऽर्जुनःशोकेनशुष्यद्वदनःसन्प्रतिभापितुंनाऽशक्नोत् १ २ ततः पार्थःकृच्छ्रेणनेत्रजलंविमृज्य ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सख्यंहितैपित्वं मैत्रीमुपकारितांसौहृदंसंवधितांच । बाष्पेणकंठावरोधाद्गद्गदयास्खलंत्या ४ येनमांवंचयता देवान्विस्मापयतियत् ५ यस्यक्षणवियोगेनेत्यादियच्छन्दानां "तेनाहमद्यमुषित" इतिसप्तमश्लोकस्थेनतच्छब्देनसंबंधः । प्रियस्याऽप्यप्रियत्वदृष्टांतः । उक्थेनप्राणेनएषपित्रादिः (देहः) ६ श्रीकृष्णोपकाराननुस्मरति यत्संश्रयादितिदशभिः । यस्यसंश्रयात्वलात्स्मरेणकामेनदुर्मदानामतिमत्तानांतेजःप्रभावोहृतंधनुर्ग्रहणेनैव । पश्चात्तद्धनुःसज्जीकृतंच । तेनचमत्स्योयंत्रोपरिभ्रमन् विद्धः । ततस्तान् सर्वान्विजित्य (स्वयंवरमुखेस्वयंवरश्रेष्ठतदारंभेवाकृष्णा) दौपदी (अधिगता) प्राप्ताच ७ (नकेवलंराज्ञांतेजोहृतंकिंतुयद्बलाद्देवानामपीत्याह यत्संनिधाविति). उइतिविस्मये (तरसावेगेनवलेनवाअमरगणसहितमिंद्रंविजित्य) खांडवसंज्ञंइंद्रस्यवनंअदांदत्तवानस्मि (तत्र) खांडवदाहेरक्षितेनमयेन (शिल्पिना) कृताचसभालब्धा । अद्भुतशिल्परूपामाया यस्यांसातेअध्वरेयागेराजसूये ८ अनंतरःश्लोकोविगीतस्तथापिव्याख्यायते नृपशिरस्स्वंघ्रिर्यस्यतंजरासंधं (यस्यवलेन) तवानुजोभीमःमखार्थं (महाक्रतुमुद्दिश्य) अहन्हतवान् । तन्निर्जितंविनाराजसूयमखानुपपत्तेः । गजानामयुतस्येवसत्त्वमुत्साहशक्तिर्वीर्यवलंचयस्यसः तंहत्वाप्रमथनाथोमहाभैरवस्तस्यमखाययेराजानस्तेनाहृतास्तेयद्यस्मान्मोचितास्तत्तस्मात्तेतवाध्वरे राजसूयेवलिं (करमुपानयनमित्यर्थः) आनीतवंतः ९ यैःकितवैर्दुःशासनादिभिस्तवपत्न्याःकवरं (केशवंधनं) विकीर्यउन्मुच्यस्पृष्टमाकृष्टंतेपांस्त्रियोहतेशाः (हतभर्तृकाः) अतएववैधव्याद्विमुक्तकेशाअकृतचकार । कथंभूतंकवरंअधिमखंराजसूयमधिकृत्यक्लृप्तोरचितोयोमहाभिषेकस्तेन (श्लाघिष्ठं) श्लाघ्यतमंचारुरम्यंयत्स्मरणात्तदानीमेवअस्मत्कृपयाप्राप्तस्य श्रीकृष्णस्यनमनेपादयोःपतितान्यश्रूणिमुखाद्वदनाद्यस्याःपत्न्याः । पदशब्दसापेक्षस्याऽपिपतितशब्दस्याश्रुपदेनसमासोनित्यसापेक्षितत्वात् । अधिमखमितिसप्तम्यर्थेव्ययीभावः १०

श्लोकाः ४/१०

सख्यंमैत्रींसौहृदंचसारथ्यादिषुसंस्मरन् ॥ नृपमग्रजमित्याहबाष्पगद्गदयागिरा ४ ॥ अर्जुनउवाच ॥ वंचितोऽहंमहाराजहरिणाबंधुरूपिणा ॥ येनमेऽपहृतंतेजो देवविस्मापनंमहत् ५ यस्यक्षणवियोगेनलोकोह्यप्रियदर्शनः ॥ उक्थेनरहितोह्येषमृतकःप्रोच्यतेयथा ६ यत्संश्रयाद्द्रुपदगेहमुपागतानांराज्ञांस्वयंवरमुखेस्मरदुर्मदानाम् ॥ तेजोहृतंखलुमयाऽभिहतश्चमत्स्यःसज्जीकृतेनधनुषाऽधिगताचकृष्णा ७ यत्सन्निधावहमुखांडवमग्नयेदामिंद्रंचसामरगणंतरसाविजित्य ॥ लब्धासभामयकृताऽद्भुतशिल्पमायादिग्भ्योऽहरन्नृपतयोबलिमध्वरेते ८ यत्तेजसान्नृपशिरोंऽघ्रिमहन्मखार्थेआर्योऽनुजस्तवगजायुतसत्त्ववीर्यः ॥ तेनाऽऽहृताःप्रमथनाथमखायभूपायन्मोचितास्तदनयन्बलिमध्वरेते ९ पत्न्यास्तवाधिमखक्लृप्तमहाभिषेकश्लाघिष्ठचारुकवरंकितवैःसभायाम् ॥ स्पृष्टंविकीर्यपदयोःपतिताश्रुमुख्यायैस्तत्स्त्रियोऽकृतहतेशविमुक्तकेशाः १०

चूर्णिका

कृष्णकृतसख्यादीनिसारथ्यादिषुस्मृत्वाऽऽह४अर्जुनउवाच हेमहाराज श्रीकृष्णेनवंचितोऽहं तथादेवाश्चर्यकरंमेतेजःहृतम् ५ किंच यस्यवियोगेनाऽयंलोकःअप्रियदर्शनोभवतिप्राणरहितोदेहोयथातद्वत् ६ यस्याश्रयात्स्वयंवरेराज्ञांतेजो हृत्वाद्रौपदीप्राप्ता ७ तथाभगवत्सान्निध्यादग्नयेखांडववनमदाम् ततः मयकृतासभाचलब्धा ८ किंच यत्तेजसाभीमःजरासंधंहतवान् ततस्तेनानीयरुद्धाराजानोविमोचिताः तएवभूपास्तवयज्ञेबलीनानीतवंतः ९ किंच सभायांयैःदुःशासनादिभिर्द्रौपद्याःकेशबंधःस्पृष्टः तेषांस्त्रियःहतनाथाःयत्कृपयामयाकृताः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

शिष्याणामयुतस्याग्रेतत्पंक्तौभुंक्तेयस्तस्माद्दुर्वाससोहेतोःअरिणादुर्योधनेनरचितंयद्दुरंतंकृच्छ्रंशापलक्षणंतस्मात्सकाशान्नोऽस्मान् (यः) वनमेत्यजुगोप । किंकृत्वा शाकमेवान्नंतस्मिन्नेव पात्रेऽवशिष्टंउपभुज्यजग्ध्वा यतउपभोगात्सलिलेविनिमग्नोमुनीनांसंघस्त्रिलोकींतृप्तामसंस्त एवंहिभारतेकथा । कदाचिद्दुर्वाससोदुर्योधनेनाऽऽतिथ्यंकृतं तेनचपरितुष्टेनवरंवृणीष्वेत्युक्ते दुर्वाससःशापात्पांडवानश्येयुरितिमनसिनिधायदुर्योधनेनोक्तं । युधिष्ठिरोऽस्मत्कुलमुख्योऽतस्तस्यापिभवतैवमेवशिष्यायुतसहितेनातिथिनाभवितव्यं । किंतुद्रौपदीयथाक्षुधानसीदेत्तथातस्यांभुक्तवत्यांतद्गृहंगंतव्यमिति । ततश्चतथैवदुर्वाससिप्राप्तेपरमादरेणयुधिष्ठिरेणमाध्याह्निकंकृत्वाआगम्यतामितिविज्ञापितोमुनिसंघोऽघमर्षणायजलेनिममज्ज । तत्रचिंतातुरयाद्रौपद्यास्मृतमात्रःश्रीकृष्णःअंकस्थांरुक्मिणींहित्वा तत्क्षणमेवभक्तवात्सल्यवशादागतः तयाचावेदितव्येवृत्तांतेभगवतोक्तं हेद्रौपद्यहंबुभुक्षितोऽस्मिप्रथमंमांभोजयेति तयाचातिलज्जयोक्तं स्वामिन्मद्रोजनपर्यंतमक्षयमप्यन्नंसूर्यदत्तस्थाल्यां (तिष्ठति) मयाचसर्वान्संभोज्यभुक्तं अतोनाऽस्त्यन्नमिति । तथाप्यतिनिर्बंधेनस्थालीमानय्यतत्कंठलग्नंकिंचिच्छाकान्नंप्राश्योक्तं 'अनेनविश्वात्माभगवान्प्रीयतां' अथमोक्तुंमुनिसंघमाह्वयेतिभीमंप्रहितवान् । सचतावताऽतितृप्तःवृथापाकभयेनपलाय्यगतइति ११ (यस्यतेजसायुधिसूकरनिमित्तेयुद्धे) गिरिजासहितोविस्मापितः (विस्मयंगमितःशूलपाणिः) निजंपाशुपतमस्त्रं (मेमह्यमदात्) अन्येऽपिलोकपालानिजान्यस्त्राणिअदुः । अन्यदप्याश्चर्यमाह । अमुनैवेति । (अहमर्जुनोऽमुनैवदेहेननान्येनअमरावत्यां) महतइंद्रस्यासनार्धंप्राप्तः १२ तत्रैवस्वर्गेक्रीडतः (मम) गांडीवंलक्षणंचिह्नंयस्यतत् (गांडीवविशिष्टंगांडीवज्याघातलाञ्छनमितिवाभुजदण्डयुग्मं) अरातयोनिवातकवचादैत्यास्तेषांवधार्थं (सेंद्रादेवाः) आश्रितवंतः यदनुभावितंयेनप्रभावयुक्तंकृतं हेआजमीढयुधिष्ठिर तेनमुषितोवंचितोऽस्मि । कथंभूतेन । भूम्नानिजमहिमावस्थानेन १३ यद्बांधवइत्यादिश्लोकत्रयस्यापितेनमुषितोहमितिपूर्वेणैवसंबंधः (यस्य) श्रीकृष्णस्यबांधवएकएवाऽहंकौरवसैन्याब्धिनास्त्यंतोगांभीर्येणपारंचदेशतोयस्यतं (तादृशं) ततरेतीर्णवान्उत्तरगोग्रहे । अतीर्याणिदुस्तराणिसत्त्वानितिमिंगिलादीनिभीष्मादिरूपाणियस्मिन्तं (किंच) परैर्नीतं (विराटस्य) गोधनंप्रत्याहृतं । परेषांशिरोभ्यःसकाशात्तेजास्पदंप्रभावास्पदंउष्णीषरूपंमणिमयंमुकुटरत्नरूपंचवहुधनंतान्मोहनास्त्रेणमोहयित्वाहृतं यद्बांधवेनमया १४

॥७९॥

श्लोकाः ११/१४

योनोजुगोपवनमेत्यदुरंतकृच्छ्राद्दुर्वाससोऽरिविहितादयुताग्रभुग्यः ॥ शाकान्नशिष्टमुपयुज्ययतस्त्रिलोकींतृप्तामसंस्तसलिलेविनिमग्नसंघः ११ यत्तेजसाऽथ भगवान्युधिशूलपाणिर्विस्मापितःसगिरिजोऽस्त्रमदान्निजंमे ॥ अन्येऽपिचाऽहममुनैवकलेवरेणप्राप्तोमहेंद्रभवनेमहदासनार्द्धम् १२ तत्रैवमेविहरतोभुजदंडयुग्मं गांडीवलक्षणमरातिवधायदेवाः ॥ सेंद्राःश्रितायदनुभावितमाजमीढतेनाऽहमद्यमुषितःपुरुषेणभूम्ना १३ यद्बांधवःकुरुबलाब्धिमनंतपारमेकोरथेनततरेऽहमतीर्यसत्त्वम् ॥ प्रत्याहृतंवहुधनंचमयापरेषांतेजास्पदंमणिमयंचहृतंशिरोभ्यः १४

चूर्णिका

किंच योभगवान्दुर्वाससोदुःखादस्मान्वनमेत्यजुगोप ११ किंच यत्तेजसाशूलपाणिःशिवःयुधिविस्मयंप्रापितःसन्मह्यंपाशुपतास्त्रमदात् तथाऽन्येऽपिलोकपालाः निजास्त्राणिददुः किंचइंद्रस्याऽर्द्धासनमपिप्राप्तोऽहं १२ किंचस्वर्गेक्रीडतोमेइंद्रादयोदेवाःयस्यप्रसादाद्गांडीवंददुः हेधर्म तेनश्रीकृष्णेनाऽद्यवंचितोऽस्मि १३ यस्यप्रसादान्निवातकवचादीन्स्वर्गेजितवानस्मि तथोत्तरगोग्रहेचभीष्मादीन्विजित्यतेषांधनंशिरोभूषणमुष्णीषंचमयाहृतम् १४

॥७९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अदभ्रा अनल्पाये राजन्यवर्यास्तेषां रथमंडलैर्मंडितासु भीष्मादीनां चमूषु सारथिरूपेण ममाग्रेचरः सन् हे विभो तेषां रथयूथपानां आयुरादीनि योद्दशा दृष्ट्यैव आछेत् हृतवान् । मनांसीत्युत्साहादि शक्तिःसहो बलं ओजः शस्त्रादिकौशल्यं १५ यस्य दोष्षु भुजेषु मामां प्रणिहितं स्थापितं तेनैव । गुर्वादिभिर्निरूपितानि प्रयुक्तानि अस्त्राणि (नोपस्पृशुः) न स्पृशंति स्म । (स्पृश उपतापे लिट्) गुरुर्द्रोणः (द्रौणिरश्वत्थामा) त्रिगर्तस्त्रिगर्तदेशाधिपतिः सुशर्मा शलः शल्यः सैंधवः सिंधुदेशाधिपतिर्जयद्रथः बाह्लीकः शंतनोर्भ्राता अमोघो महिमा (सामर्थ्यं) येषां तथाभूतान्यपि पाठांतरेऽपि स एवार्थः । प्रतीकाराकरणेप्यस्पर्शे दृष्टांतः । नृहरिदासं प्रह्लादमिवेति १६ स्वापराधमनुस्मरन् संतप्यमान आह । सौत्ये सारथ्ये (कर्मणि) कुमतिना मे मया सः वृत्तः कुमतित्वमेवाह । आत्मद इत्यादिना । अभवाय मोक्षाय भव्याः श्रेष्ठाः (भजंति) श्रांता वाहा अश्वा यस्य तं मां । जयद्रथवधे हि जलपानं विना अश्वाः श्रांतास्ततो रथादवतीर्य बाणैर्भुवं भित्त्वा जलं संपादितं (मया) तदा यस्यानुभावेन निरस्तचित्ता अरयो मां न प्रहृतवंतः । स सौत्ये वृत इति कुमतित्वं १७ हे नरदेव उदारं गंभीरं रुचिरं (सुंदरं) यत्स्मितं (मंदहास्यं) तेन शोभितानि नर्माणि परिहासवाक्यानि तथा कार्यप्रस्तावेषु हे पार्थेत्यादीनि मधुराक्षराणि संजल्पितानि च हृदि स्पृशानि मनोज्ञानि माधवस्य यान्येतानि तानीदानीं स्मर्तुर्मम हृदयं लुठंति लोठयंति क्षोभयंति णिजभाव आर्षः १८ विकत्थनं स्वगुणश्लाघनादि । शय्यादिषु ऐक्यादव्यतिरेकाद्धेतोः कदाचिद्व्यभिचारं दृष्ट्वा हे वयस्य सखे ऋतवान् सत्ययुक्तस्त्वमिति वक्रोक्त्या विप्रलब्धस्तिरस्कृतोऽपि ऋभुमानिति पाठे ऋभवो देवाः सेवकाः संति यस्य सः असौ महानपि मया वयस्य इति मत्वा विप्रलब्धस्तिरस्कृत इत्यर्थः । ऋतमानिति पाठे वत्वाभाव आर्षः मे अघं अपराधं (सेहे) असहत । एकपदपाठे अतिमहत्त्वेनेत्यर्थः । सख्युर घं सखेव तनयस्याघं पितेव १९

योभीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमंडलमंडितासु ॥ अग्रेचरो मम विभो रथयूथपानामायुर्मनांसि च दृशा सह ओज आच्छैत् १५ यद्दोष्षु मा प्रणि
हितं गुरुभीष्मकर्णद्रौणित्रिगर्तशलसैंधवबाह्लिकाद्यैः ॥ अस्त्राण्यमोघमहिमानि निरूपितानि नोपस्पृशुर्नृहरिदासमिवासुराणि १६ सौत्ये वृतः कुमतिनात्मद ई
श्वरो मे यत्पादपद्ममभवाय भजंति भव्याः ॥ मां श्रांतवाहमरयो रथिनो भुविष्ठं न प्राहरन्यदनुभावनिरस्तचित्ताः १७ नर्माण्युदाररुचिरस्मितशोभितानि हे पार्थ हेऽ
र्जुन सखे कुरुनंदनेति ॥ संजल्पितानि नरदेव हृदिस्पृशानि स्मर्तुर्लुठंति हृदयं मम माधवस्य १८ शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्य ऋतवानिति
विप्रलब्धः ॥ सख्युः सखेव पितृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे १९

श्लोकाः १५/१९

चूर्णिका

तथा कुरुयुद्धे यो मम सारथिर्भूत्वा दृष्ट्या परसैनिकानां तेजो हृतवान् १५ यस्य प्रसादात्तेषामस्त्राणि मम अंगं न पस्पृशुः दैत्यास्त्राणि भगवद्भक्तं यथा तद्वत् १६ अहो यत्पादपद्मं भक्ता भजंति स भगवान् सारथ्ये मया वृतः १७ हे धर्मराज माधवस्य पार्थार्जुनेत्यादि नर्मभाषणानि स्मर्तुर्मे हृदयं क्षोभयंति १८ किंच शय्यासनाटनविकत्थनभोजनादिषु ऐक्याद्धेतोः कदाचिद्व्य भिचारं दृष्ट्वा हे वयस्य सत्ययुक्तस्त्वमसीति वक्रोक्त्या तिरस्कृतोऽपि सख्युः सखेव पितृवत्पुत्रस्य मेऽपराधं सेहे तेन पुरुषोत्तमेनाऽहं वंचितः १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वयाशंकितंपराजयंचाऽपिप्राप्तोऽहमित्याह (सोहमिति हेनृपेंद्रसुहृदासाधुना) तेनसख्यारहितःअतोहृदयेनशून्यः अंगहेराजन् उरुक्रमस्यपरिग्रहंषोडशसहस्रस्त्रीलक्षणं असद्भिर्नीचैः अवला
योषेव (अहंविनिर्जितः) २० श्रीकृष्णवियोगएवात्रहेतुर्नान्यइत्याह । तदिति (धनुर्गांडीवंतदेवशरास्तादृशाः रथोऽपितादृशएव) यतोयेभ्यःहेतुभ्यः (धनुरादिभ्यः) नृपतयः(सर्वे) आनमं
ति (धन्यंधन्यमितिशिरसाश्लाघंतेइत्यर्थः । यद्वा यतोयस्मैरथिनेमह्यंनमंति) ईशेनरिक्तंशून्यं(तत्सर्वं)असत्कार्याक्षमं (अप्रयोजकमितियावत्) सन्मंत्रविधानैरपिभस्मनिहुतमिव ।
अतिप्रीतादपिकुहकान्मायाविनः (वंचकात्) सकाशात्राद्धंलब्धमिव । सम्यक्कर्णादिनाऊपरभूमौउप्तंबीजमिव (स्यादुषः क्षारमृत्तिकत्येमरः । भस्मनिहुतस्येष्टफलाभावेऽपिमं
त्राभ्यासादिकिंचिदानुषंगिकंफलंस्यात् । ऐंद्रजालिकेनकुटुंबभरणमुद्दिश्यद्रव्याहरणात्तज्जीवनेन । स्यात्किंचित्फलंचमत्कारोवा । क्षारभूमावुप्तस्यनैहिकंनामुष्मिकंप्रत्युतश्रमएवतद्वदित्य
र्थः) २१ (हेराजन्कच्चिदानर्तपुर्यामित्यादिना) त्वयापृष्टानांसुहृत्पुरे (द्वारवत्यां) नः (अस्मदीयानां) सुहृदांमध्येचत्वारःपंचवाऽवशेषिताः । तत्रहेतुः । विप्रशा
पेत्यादि २२ वारुणीं (वरुणनिर्मितां)अन्नमयीं (मदिरांमदकरींसुरांपीत्वा)अन्योन्यमजानतामिवएरकामुष्टिभिर्मिथोनिघ्नताम् २३ अवशेषिताइतिणिजंतेनोक्तंहेतुकर्तारमाहत्रिभिः ।
प्रायेणेति । भावयंतिपालयंति(चेतियत्एतत्प्रायेणेश्वरस्यविचेष्टितम्) २४ जलौकसांमत्स्यादीनां (यादसां)मध्येमहांतःस्थूलाः अणीयसःसूक्ष्मान् (मत्स्यादीन्) यथाभक्षयंति (व
लिनोदुर्बलान्भक्षयंति । येमहांतःयेचसर्वेबलिनस्तेमिथोभक्षयंतियथा) २५ एवंबलिष्ठैः (यदुभिरितरान्दुर्बलान्) महद्भिःपांडवैःसूक्ष्मान्घातयित्वायदुभिरेवयदून्नन्योन्यंघातयित्वाभु
वोभारभूतान्संहृतवान् २६ अतःपरंवक्तुंनशक्नोमीतिसूचयन्नाह । देशकालोचितार्थयुक्तानिमनःपीडोपशमकराणिचगोविंदस्यवचनानिस्मरतोमेममचित्तंहरंतिआकर्षंति २७

श्लोकाः २०/२७

सोऽहंनृपेंद्ररहितःपुरुषोत्तमेनसख्याप्रियेणसुहृदाहृदयेनशून्यः ॥ अध्वन्युरुक्रमपरिग्रहमंगरक्षन्गोपैरसद्भिरबलेवविनिर्जितोऽस्मि २० तद्वैधनुस्तइषवःसर
थोहयास्तेसोऽहंरथीनृपतयोयतआनमंति ॥ सर्वंक्षणेनतदभूदसदीशरिक्तंभस्मन्हुतंकुहकराद्धमिवोप्तमूष्याम् २१ राजंस्त्वयाभिपृष्टानांसुहृदांनःसुहृत्पुरे ॥
विप्रशापविमूढानांनिघ्नतांमुष्टिभिर्मिथः २२ वारुणींमदिरांपीत्वामदोन्मथितचेतसाम् ॥ अजानतामिवान्योऽन्यंचतुष्पंचावशेषिताः२३ प्रायेणैतद्भगवतई
श्वरस्यविचेष्टितम् ॥ मिथोनिघ्नंतिभूतानिभावयंतिचयन्मिथः २४ जलौकसांजलेयद्वन्महांतोऽदंत्यणीयसः ॥ दुर्बलान्बलिनोराजन्महांतोबलिनोमिथः
२५ एवंबलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः ॥ यदून्यदुभिरन्योऽन्यंभूभारान्संजहारह २६ देशकालार्थयुक्तानिहृत्तापोपशमानिच ॥ हरंतिस्मरतश्चित्तंगोविं
दाभिहितानिमे २७

चूर्णिका

किंच पथिश्रीकृष्णस्यस्त्रीसमूहंरक्षन्गोपैर्जितोऽस्मि २० सोऽहंरथी तदेवधनुः तेचशराः सएवरथः तेएवहयाः एतत्सर्वंयद्वियोगाद्भस्मनिहुतमिवव्यर्थमभूत् २१ हेराजन्
त्वयाक्षेमंपृष्टानांसुहृदांमद्यप्राशनेनमत्तानांमध्येचतुःपंचाऽवशिष्टाःसंति २२ २३ प्रायेणेदंभगवतोविचेष्टितम् २४ यथामहांतोजलचराःक्षुद्रान्भक्षयंति २५ तथाबलिष्ठैर्यदु
भिरितरन्यदून्संहृत्यभूभारंसंजहार २६ अतःपरंवक्तुंनशक्नोमीतिसूचयन्नाह मनःशांतिकराणिभगवद्वाक्यानिस्मरतःमेचित्तमाकर्षंति २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमितिसूतोक्तिः (एवमर्जुनस्य) अतिदृढेनस्नेहेनकृष्णांघ्रिकमलंस्मरतोर्जुनस्यमतिःशांताविमलाविशोकाविरक्ताचासीत् २८ मतिवैमल्येफलमाह । वासुदेवांघ्र्यनुध्यानेनपरिबृंहितंरंहोवेगो यस्यास्तथाभक्त्यानिर्मथिताउन्मूलिताअशेषाःकषायाःकामादयोयस्याःसाधिषणाबुद्धिर्यस्यसः ज्ञानंपुनरध्यगमदित्युत्तरेणान्वयः २९ (संग्राममूर्धनिभगवता'अशोच्यानन्वशोचस्त्वमि'त्यादिगीताभिर्यत्ज्ञानंगीतमुपदिष्टंतत्) कालेनकर्मभिस्तमसाभोगाभिनिवेशेनचरुद्धमावृतंसत् (पुनर्विधुरर्जुनोऽध्यगमदवगतवानावर्तितवानित्यर्थः) ३० ज्ञानफलमाहविशोकइति । एतदेवशोकहेत्वभावेनोपपादयति । शोकस्यहिहेतुर्द्वैतभ्रमः तस्यदेहःतस्यचलिंगं तस्यचगुणाः तेषामविद्या । तत्रब्रह्मसंपत्त्यावेदांतश्रवणेनब्रह्माऽहमितिज्ञानेलीनाप्रकृतिरविद्यायस्मिंस्तत्रैर्गुण्यंभवतिनतुसुप्तिप्रलययोरिवाविद्याशेषः । तस्मान्नैर्गुण्याद्गुणकार्यलिंगनाशः । अलिंगत्वाच्चासंभवः । सम्यग्भोगायभवतिपुनःपुनरितिसंभवःस्थूलशरीरंतद्रहितः (संभवः) ततश्च तत्परिच्छेदाभावात्संछिन्नोद्वैतलक्षणःसंशयोभ्रमोयस्यसःविशोकोजातइति ३१ (युधिष्ठिरः) भगवतोमार्गं (गतिं) आलक्ष्ययदुकुलस्यसंस्थांनाशं (च) श्रुत्वानारदोक्तंचानुस्मृत्यस्वःपथायस्वर्गमार्गायनिभृतात्मानिश्चलचित्तः ३२ तां (भगवद्गतिं) दुर्विज्ञां वक्ष्यतिहिएकादशे । "सौदामिन्यायथाकाशेयांत्याहित्वाऽभ्रमंडलं । गतिर्नलक्ष्यतेमर्त्यैस्तथाकृष्णस्यदैवतै" रिति । निवेशितआत्माययासा) संसृतेरुपरराम जीवन्मुक्ताबभूवदेहंजहाविति वा ३३ तदेवमुक्तमपियादवेभ्योभगवतोवैलक्षण्यमबुद्ध्वातत्साम्यंवदतोमंदमतीन्प्रतिवैलक्षण्यंस्पष्टयतिद्वाभ्यां । ययायादवरूपयातन्वाभुवोभारंकंटकेनकंटकमिवाहरत् (यथापादादौनिविष्टःकंटकःकंटकेननिष्कास्यतेतथाययाभूभारःसंहृतइत्यर्थः) यादवतनुर्भूभारतनुश्चेतिद्वयमपि (कंटकद्वयमिव) ईश्वरस्यसंहार्यत्वेनसममेवमेतत् ३४

श्लोकाः २८/३४

एवंचिंतयतोजिष्णोःकृष्णपादसरोरुहम् ॥ सौहार्देनातिगाढेनशांतासीद्विमलामतिः २८ वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा ॥ भक्त्यानिर्मथिताशेषकषायधिषणोऽर्जुनः २९ गीतंभगवताज्ञानंयत्तत्संग्राममूर्द्धनि ॥ कालकर्मतमोरुद्धंपुनरध्यगमत्प्रभुः ३० विशोकोब्रह्मसंपत्त्यासंछिन्नद्वैतसंशयः ॥ लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः ३१ निशम्यभगवन्मार्गंसंस्थांयदुकुलस्यच ॥ स्वःपथायमतिंचक्रेनिभृतात्मायुधिष्ठिरः ३२ पृथाप्यनुश्रुत्यधनंजयोदितंनाशंयदूनांभगवद्गतिंचताम् ॥ एकांतभक्त्याभगवत्यधोक्षजेनिवेशितात्मोपररामसंसृतेः ३३ ययाऽहरद्भुवोभारंतांतनुंविजहावजः॥कंटकंकंटकेनेवद्वयंचापीशितुःसमम् ३४

चूर्णिका

[1]एवंभगवतःपादपद्मंस्मरतोऽर्जुनस्यमतिःशांतासीत् २८ ततःवासुदेवचरणचिंतयानष्टविषयवासनोऽर्जुनःकुरुयुद्धेभगवदुक्तंगीतोक्तज्ञानंपुनःप्राप २९ ३० किंच ब्रह्मसंपत्त्याछिन्नद्वैतभ्रमःसन्विशोकोजातः ३१ एवंभगवन्मार्गंज्ञात्वायदुकुलस्यनाशंचश्रुत्वा युधिष्ठिरःस्वर्गंगंतुंमनश्चक्रे ३२तस्मिन्नेवकालेधनंजयोदितंयदूनांनाशंभगवद्गतिंचश्रुत्वाऽधोक्षजंध्यायंतीसतीपृथादेहंजहौ ३३ यदा हरिःकंटकंकंटकेनैवभूभारंदूरीकृत्यनटवदंतरधात् ३४ ॥८२॥

---

१ एवमितिसूतस्यवाक्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीकृष्णमूर्तेर्विशेषमाह । यथेति (यथाभगवान्मत्स्यादिरूपैरपिविहर्तुमिच्छन्) तान्यपियथाधत्तेजहातिच तदाह यथानटोनिजरूपेणस्थितोऽपि (यथा) रूपांतराणिधत्तेअंतर्धत्तेच तथातदपिकलेवरंजहौ अंतरधादित्यर्थः ३५ युधिष्ठिरस्यस्वर्गारोहप्रसंगायकलिप्रवेशमाह यदेति । स्वतन्वा (महीं) जहौ । स्वतनोरेववैकुंठारोहात् । श्रवणार्हासतीकथाय स्य । तदायदहस्तस्मिन्नैवाह्नि । अहरितिलुप्तसप्तम्यंतंपदं । अप्रतिबुद्धचेतसामविवेकिनामितिविवेकिनांतुनप्रभुरित्युक्तं । अन्ववर्ततेतिपूर्वमेवांशेनप्रविष्टस्यतेनरूपेणानुवृत्तिरुक्ता ३६ बुधोयुधिष्ठिरः तस्यकलेःपरिसर्पणंप्रसरणंविलोक्य । कथंभूतं । लोभाद्यधर्मचक्रंयस्मिन् । जिह्मंकौटिल्यं पर्यधात्तदुचितंपरिधानमकरोत् (निश्चितवानितिवा) ३७ आत्म

॥८३॥ नःस्वस्यगुणैःसुतरांसमं । अतिसदृशं (इत्यर्थः) तोयंपरिवेषाकारेणसर्वतःस्थितंसमुद्रोदकमेवनीवीपरिधानविशेषोयस्यास्तस्याः(समुद्रवलयांकितायाइत्यर्थः) भूमेःपतित्वेनाभिषिक्तवान् ३८ (तथामथुरायांशूरसेनदेशाधिपतिं) वज्रमनिरुद्धस्यपुत्रं (अभ्यषिंचत् ततःप्राजापत्यांप्रजापतिदेवताकांइष्टिं) निरूप्य कृत्वेत्यर्थः (अग्नीन्) अपिबत्आत्मनिसमारोपयामास । ईश्वरःसमर्थः (सर्वस्वत्यागेशक्तः) ३९ संछिन्नान्यशेषाणिबंधनानिउपाधयोयेनसः ४० तदेवदर्शयतिद्वाभ्यां । वाचमित्युपलक्षणंसर्वेंद्रियाणिमनसिप्रविलापितवानित्यर्थः । तच्चमनः प्राणाधीनवृत्तित्वात्प्राणे । तंचप्राणंइतरेअपाने तस्यापानेनाकर्षणात् अपानव्यापारउत्सर्गस्तत्सहितमपानंमृत्यौतदधिष्ठातृदेवतायां । अनेनैववागादिष्वपितत्तत्कर्मसाहित्यंज्ञेयं । तंमृत्युं पंचत्वेपंचभूतानामैक्येदेहेदेहस्यैवमृत्युर्नाऽऽत्मनइतिभावितवानित्यर्थः । अजोहवीदितियङ्लुगंताल्लुङिरूपम् ४१ अथपंचत्वंदेहं त्रित्वेगुणत्रयेतच्चत्रित्वमेकत्वेअविद्यायां सर्वसर्वारोपहेतुम विद्यांआत्मनिजीवे (मुनिर्मौनी) अजोहवीदितिवक्तव्येअजुहवीदितिगुणाभाव आर्षः । एवंशोधितमात्मानंब्रह्मणिअव्ययेकूटस्थे नतस्यान्यत्रलयइत्यर्थः ४२

श्लोकाः ३५/४२

यथामत्स्यादिरूपाणिधत्तेजह्याद्यथानटः ॥ भूभारःक्षपितोयेनजहौतच्चकलेवरम् ३५ यदामुकुंदोभगवानिमांमहींजहौस्वतन्वाश्रवणीयसत्कथः ॥ तदाऽहरे
वाप्रतिबुद्धचेतसामधर्महेतुःकलिरन्ववर्त्तत ३६ युधिष्ठिरस्तत्परिसर्पणंबुधःपुरेचराष्ट्रेचगृहेतदात्मनि ॥ विभाव्यलोभानृतजिह्महिंसनाद्यधर्मचक्रंगमनायपर्य
धात् ३७ स्वराट्पौत्रंविनयिनमात्मनःसुसमंगुणैः ॥ तोयनीव्याःपतिंभूमेरभ्यषिंचद्गजाह्वये ३८ मथुरायांतथावज्रंशूरसेनपतिंततः ॥ प्राजापत्यांनिरूप्येष्टि
मग्नीनपिबदीश्वरः ३९ विसृज्यतत्रतत्सर्वंदुकूलवलयादिकम् ॥ निर्ममोनिरहंकारःसंछिन्नाशेषबंधनः ४० वाचंजुहावमनसितत्प्राणइतरेचतम् ॥ मृत्यावपा
नंसोत्सर्गंतंपंचत्वेह्यजोहवीत् ४१ त्रित्वेहुत्वाऽथपंचत्वंतच्चैकत्वेऽजुहोन्मुनिः ॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ४२

चूर्णिका

३५तस्मिन्नेवसमयेअज्ञानांमनसिकलिःप्रादुरभूत् ३६ ततःसर्वत्रकलिप्रवृत्तिंज्ञात्वा३७ स्वपौत्रंपरिक्षितंस्वराज्येऽभिषिच्य३८तथाऽनिरुद्धपुत्रंवज्रंमथुरायांशूरसेनपतिंकृत्वा प्राजापत्येष्टिंचविधाय अग्नीनात्मनिसमारोपितवान् ३९ ततः तत्रैवदुकूलवलयादिविसृज्य अहंममतारहितःधर्मराजः ४० इंद्रियाणिमनसिविलाप्य तन्मनःप्राणेप्राणं अपानेअपानं मृत्यौमृत्युं देहेदेहं ४१ गुणत्रयेगुणत्रयं अविद्यायांतांजीवेशुद्धजीवंब्रह्मणिविलाप्य ४२ ॥८३॥

१ अमद्रहेतुरितिमाहेश्वरीयेपुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवमात्मप्रतिपत्तिमुक्त्वाबाह्यस्थितिमाह । चीरवासाइतिद्वाभ्याम् । बद्धवाङ्मौनी ४३ अनवेक्षमाणःअनुजादिप्रतीक्षामकुर्वन् (उदीचीं) आशांदिशंगतपूर्वांपूर्वप्रविष्टांमहात्मभि विवेकवद्भिः यतोयांदिशंगतः ४४ (सर्वेभ्रातरोभीमादयः) अधर्मोमित्रंयस्यतेन (स्पृष्टाः) ४५ साधुसम्यक्कृताः (अनुष्ठिताः) सर्वेऽर्थाधर्मादयोयैस्ते अतएववैकुंठस्यचरणांबुज मेव (आत्मनः) आत्यंतिकंशरणंज्ञात्वा ४६ (तस्यचरणांबुजस्यध्यानेनोद्रिक्तयाविशेषेणशुद्धबुद्धयस्तेतस्मिन्गतिमवापुः) ४७ कथंभूतेपदे।विधूतकल्मषाणामास्थानं (सम्य क्)निवासस्थानंयत्तस्मिन् । विरजेनात्मनैवगतिंप्रापुःनतुषोडशकलेनलिंगेन । गतेर्वाविशेषणं । विरजेनात्मनैवावस्थानंअवस्थानरूपांगतिंतेविधूतकल्मषाःप्रापुरिति ४८ विदुरो ऽपितीर्थान्यटन्प्रभासेकृष्णावेशेनश्रीकृष्णेचित्तमावेश्यदेहंपरित्यज्यतच्चित्तएवसन्तदानींनेतुमागतैःपितृभिःसहस्वक्षयंस्वाधिकारस्थानंययौ ४९ आत्मानंप्रतिअनपेक्षतां (निस्पृहतां) तदाज्ञात्वा (भगवतिवासुदेवेसर्वांतर्यामिणिपरमात्मनिनिश्चितमतिःसतीतमाप) ५० इति एवंयत्संप्रयाणंअलंअतिशयेनस्वस्त्ययनंमंगलास्पदंअलंपवित्रंच (यःशृणोतिसःसिद्धिं मुक्तिम्) ५१ ॥ इति श्रीभा०म०प्रथमेस्कंधेटीकायांपंचदशोऽध्यायः ॥ १५ ॥ ततश्चषोडशेभूमिधर्मयोःकलिखिन्नयोः । संवादेवर्ण्यतेप्राप्तिःपालकस्यपरिक्षितः ॥ १ ॥ द्विजवर्याणां शिक्षयासदुपदेशेनसूत्यांजन्मनिअभिजातकोविदाःजातकर्मविदः हेविप्र (शौनक) महतांयुधिष्ठिरादीनांगुणायस्मिन्सः १

चीरवासानिराहारोबद्धवाङ्मुक्तमूर्द्धजः ॥ दर्शयन्नात्मनोरूपंजडोन्मत्तपिशाचवत् ४३ अनवेक्षमाणोनिरगादशृण्वन्बधिरोयथा ॥ उदीचींप्रविवेशाऽऽशांगत पूर्वांमहात्मभिः ॥ हृदिब्रह्मपरंध्यायन्नावर्त्तेतयतोगतः ४४ सर्वेतमनुनिर्जग्मुर्भ्रातरःकृतनिश्चयाः ॥ कलिनाऽधर्ममित्रेणदृष्ट्वास्पृष्टाःप्रजाभुवि ४५ तेसाधुकृ तसर्वार्थाज्ञात्वात्यंतिकमात्मनः ॥ मनसाधारयामासुर्वैकुंठचरणांबुजम् ४६ तद्ध्यानोद्रिक्तयाभक्त्याविशुद्धधिषणाःपरे ॥ तस्मिन्नारायणपदेएकांतमतयोग तिम् ४७ अवापुर्दुरवापांतेअसद्भिर्विषयात्मभिः ॥ विधूतकल्मषास्थानंविरजेनात्मनैवहि ४८ विदुरोऽपिपरित्यज्यप्रभासेदेहमात्मवान् ॥ कृष्णावेशेनतच्चि त्तःपितृभिःस्वक्षयंययौ ४९ द्रौपदीचतदाज्ञायपतीनामनपेक्षताम् ॥ वासुदेवेभगवतिह्येकांतमतिरापतम् ५० यःश्रद्धयैतद्भगवत्प्रियाणांपांडोःसुतानामि तिसंप्रयाणम्॥शृणोत्यलंस्वस्त्ययनंपवित्रंलब्ध्वाहरौभक्तिमुपैतिसिद्धिम् ५१ ॥ इतिश्रीभा०प्र०पांडवस्वर्गारोहणंनामपंचदशोऽध्यायः१५ ॥छ ॥ ॥सूतउवा च ॥ ततःपरीक्षिद्द्विजवर्यशिक्षयामहींमहाभागवतःशशासह ॥ यथाहिसूत्यामभिजातकोविदाःसमादिशन्विप्रमहद्गुणस्तथा १

श्लोकाः ४३/१

चूर्णिका

चीरवासानिराहारोबद्धवाक्मुक्तमूर्द्धजःधर्मःजडोन्मत्तपिशाचवल्लोकंदर्शयन् ४३ हृदिब्रह्मध्यायन् उदीचींदिशंनिरगात् ४४ तमनुसर्वेभीमादयोभ्रातरःमनसावैकुंठचरणांबुजं ध्यायंतःसंतः४५ ४६ ४७ तस्मिन्नारायणपदेगतिंप्रापुः ४८ ततोविदुरोऽपिप्रभासेदेहंविसृज्यस्वस्थानंगतवान्४९ ततः द्रौपदीचभगवतिमतिंकृत्वाभगवंतमाप५०यःश्रद्धया पांडुसुतानांप्रयाणंशृणोतिसःहरौभक्तिंलब्ध्वासिद्धिंउपैति ५१ ॥ इतिप्रथमेपंचदशः १५ ॥ छ ॥ सूतउवाच ततःपरीक्षित्महींशशास १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनमेजयादीनित्यक्षराधिक्यंछांदसं । (उत्पादयदुदपादयत) उत्पादयन्निति पाठे हेतौशतृप्रत्ययः । सुतानुत्पादयितुमिरावतीमुपयेमइतिवाक्ययोजना (उत्तरस्यविराटपुत्रस्य) २ आजहारकृतवानित्यर्थः । शारद्वतंकृपं । यत्रयेष्वश्वमेधेषु । देवा इंद्रादयःप्रत्यक्षाः ३ निजग्राहनिग्रहीतवान् । कलिमेवनिर्दिशतिनृपेति ४ कस्यहेतोरिति । अयमर्थः कलिंकस्माद्धेतोःकेवलंनिजग्राहनतुहतवान् । यतोऽसौशूद्रः (कर्मणा)अतिकुत्सितःयोगांपदाअहन्निति (वेपेणनृदेवस्यनृपस्यचिह्नंधारयतीतितथा) ५ (हेमहाभागयदस्माभिःपृष्टंतद्यदिकृष्णकथाआश्रयोयस्यअथवा) अस्यविष्णोःपदांभोजयोर्मकरंदंलिहंतिआस्वादयंतिये तेषांसतांमहतांकथाश्रयमितिसमासान्निकृष्टस्यानुषंगः तर्हिकथ्यतां ६ नोचेत्किमन्यैरसद्भिरालापैः । यत्यैरायुषो(असद्व्ययःवृथाक्षयः)अस्माकमयंसत्रप्रयत्नेऽपिहरिकथामृतपानार्थएवेत्याहसार्धद्वाभ्यां । क्षुद्रमल्पमायुर्येषांअतोमर्त्यानांमरणधर्मवतांतथापिकृतंसत्यंमोक्षमिच्छताम् ७ योमृत्युःसइहसत्रेशामित्रकर्मणिपशुसंज्ञपनकर्मकर्ताशमितातस्येदंशामित्रंकर्मपशुहिंसनंतदर्थंउपहूतः (तादर्थ्येसप्तमी) ततोऽपिकिमतआह नकश्चिदिति (अंतकःमृत्युः)८ ततोऽपिकिमतआह (एतदर्थमिति) अहोनृलोकेहरिलीलामृतंवचःपीयेतेत्येतदर्थं (हिपरमर्षिभिःसआहूतः) हरिलीलैवामृतंयस्मिंस्तत् ९ तदभावेवृथैवजीवनमित्याह मंदस्यअलसस्य (मंदप्रज्ञस्यमूढबुद्धेःअल्पायुषश्च)नक्तंरात्रौयद्व्ययआयुस्तन्निद्रया । दिवाअह्निचयद्व्ययःतत्व्यर्थकर्मभिरपह्रियते १०

सउत्तरस्यतनयामुपयेमइरावतीम् ॥ जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् २ आजहाराऽश्वमेधांस्त्रीन्गंगायांभूरिदक्षिणान् ॥ शारद्वतंगुरुंकृत्वादेवायत्राऽक्षगोचराः ३ निजग्राहौजसावीरःकलिंदिग्विजयेक्वचित् ॥ नृपलिंगधरंशूद्रंघ्नंतंगोमिथुनंपदा ४ शौनकउवाच ॥ कस्यहेतोर्निजग्राहकलिंदिग्विजयेनृपः॥ नृदेवचिह्नधृक्शूद्रःकोऽसौगांयःपदाऽहनत् ५ तत्कथ्यतांमहाभागयदिकृष्णकथाश्रयम् ॥ अथवाऽस्यपदांभोजमकरंदलिहांसताम् ६ किमन्यैरसदालापैरायुषोयदसद्व्ययः ॥ क्षुद्रायुषांनृणामंगमर्त्यानामृतमिच्छताम् ७ इहोपहूतोभगवान्मृत्युःशामित्रकर्मणि ॥ नकश्चिन्म्रियतेतावद्यावदास्तइहांतकः ८ एतदर्थंहिभगवानाहूतःपरमर्षिभिः ॥ अहोनृलोकेपीयेतहरिलीलाऽमृतंवचः ९ मंदस्यमंदप्रज्ञस्यवयोमंदायुषश्चवै ॥ निद्रयाह्रियतेनक्तंदिवाचव्यर्थकर्मभिः १०

सउत्तरस्यकन्यांइरावतींनामउपयेमे तस्यांजनमेजयादीन्चतुरःपुत्राञ्जनयामास २ ततः कृपंगुरुंकृत्वागंगातीरेभूरिदक्षिणांस्त्रीनश्वमेधाश्चकार ३ ततःदिग्विजयेनृपलिंगधरंगोमिथुनंपदाघ्नंतंकलिंनिगृहीतवान् ४ शौनकउवाच हेसूत परीक्षित्कस्यहेतोःकलिंनिजग्राह यःपदागामहन् सकःशूद्रः ५ इदंकृष्णकथाश्रयमस्तिचेत् तर्हिकथय ६ अन्यैरसदालापैःकिम् यैःवृथाआयुर्नश्यति ७ अस्माकंसत्रप्रयत्नोऽपिहरिकथाश्रवणार्थएव अस्मिन्सत्रेमृत्युराहूतः अतःसत्रसमाप्तिपर्यंतंकोपिजनःनम्रियेतअनेनभगवत्कथाश्रवणावकाशःसूचितः ८ ९ अहोहरिकथापानंविनाअस्यअल्पायुषोजनस्यआयुःरात्रौनिद्रया दिवाचव्यर्थकर्मभिर्नश्यतिअतोहरिकथांकथय १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१६॥

तत्रतावत्कलिनिग्रहप्रसंगमाह यदानिजचक्रवर्तितेस्वसेनयापालितेदेशेकलिंप्रविष्टंशुश्राव तदातांअनतिप्रियां(अतिशयेनप्रियानभवतितथाभूतां)वार्तांकिंचित्प्रियांचयुद्धकौतुकसंपत्तेः (तां)
निशम्यततःशरासनंदुष्टनिग्रहार्थमाददे । संयुगेशौंडिर्युद्धेप्रगल्भःपाठांतरेयुद्धेशौरिःकृष्णतुल्यः ११ ततश्चदिग्विजयायनिर्गतः (कथंभूतःश्यामैर्नीलवर्णैर्गतिविशेषशिक्षितैर्वातुरंगैर्योजितंमृ
गेंद्रध्वजंसिंहलांछनांकितध्वजंरथमास्थितःचतुरंगसेनयावृतश्च) १२ भद्राश्वादीनि (चत्वारिक्रमेण) पूर्वपश्चिमदक्षिणोत्तरतःसमुद्रलग्नानिवर्षाणि । मेरोःसर्वतइलावृत्तं । तदुत्तरतोरम्यकं
हिरण्मयंच । दक्षिणतोहरिवर्षंकिंपुरुषंच । तानिविजित्य(करं जगृहेइत्यर्थः)१३(स्वपूर्वेषांयुधिष्ठिरादीनां)प्रगीयमानंचयशः(कृष्णमाहात्म्यस्यसूचकं) शृण्वन्तेभ्यः(वासांसिहारांश्च)ददा
वितितृतीयेनान्वयः १४ (किंचिन्महात्म्यसूचनमाह । आत्मानमिति । परित्रातंपरिरक्षितंशृण्वन्) १५ (प्रीत्योज्जृंभितेविकसितेलोचनेयस्य) १६ किंच स्निग्धेषुपांडवेषुविष्णोर्यानिसार
॥८६॥ थ्यादीनिकर्माणितानिशृण्वन् । तथाविष्णोर्जगत्कर्तृकांप्रणतिंचशृण्वन्नृपतिःपरिक्षित्विष्णोश्चरणारविंदेभक्तिंकरोतिस्म । पारषदमितिरेफपकारयोर्विश्लेषश्छांदसः । तत्रपारषदंसभा
पतित्वं सेवनं चित्तानुवृत्तिः (सारथ्यंसारथेःकर्म । सख्यंमैत्र्यं । दौत्यंदूतकर्म)वीरासनंरात्रौखड्गहस्तस्यतिष्ठतोजागरणं(गच्छतःपृष्ठतोगमनमनुगमनं)१७(पूर्वेषांपित्रादीनां)वृत्तिं(आचरण
मन्वहं)अनुवर्तमानस्य (आचरतःसतइत्यर्थः) नातिदूरेशीघ्रमेव (दृष्टिगोचरेवायदाश्चर्यमासीत्तन्मेमत्तः) १८

श्लोकाः ११/१८

सूतउवाच ॥ यदापरीक्षित्कुरुजांगलेवसन्कलिंप्रविष्टंनिजचक्रवर्तिते ॥ निशम्यवार्तामनतिप्रियांततःशरासनंसंयुगशौंडिराददे ११ स्वलंकृतंश्यामतुरंगयो
जितंरथंमृगेंद्रध्वजमाश्रितःपुरात् ॥ वृतोरथाश्वद्विपपत्तियुक्तयास्वसेनयादिग्विजयायनिर्गतः १२ भद्राश्वंकेतुमालंचभारतंचोत्तरान्कुरून् ॥ किंपुरुषादी
निवर्षाणिविजित्यजगृहेबलिम् १३ तत्रतत्रोपशृण्वानःस्वपूर्वेषांमहात्मनाम् ॥ प्रगीयमानंचयशःकृष्णमाहात्म्यसूचकम् १४ आत्मानंचपरित्रातमश्वत्था
म्नोऽस्त्रतेजसः ॥ स्नेहंचवृष्णिपार्थानांतेषांभक्तिंचकेशवे १५ तेभ्यःपरमसंतुष्टःप्रीत्युज्जृंभितलोचनः ॥ महाधनानिवासांसिददौहारान्महामनाः १६ सार
थ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामम् ॥ स्निग्धेषुपांडुषुजगत्प्रणतिंचविष्णोर्भक्तिंकरोतिनृपतिश्चरणारविंदे१७तस्यैवंवर्तमानस्यपूर्वेषां
वृत्तिमन्वहम् ॥ नातिदूरेकिलाऽऽश्चर्यंयदासीत्तन्निबोधमे १८

चूर्णिका ॥८६॥

सूतउवाच यदास्वदेशेकलिंप्रविष्टंशुश्राव तदारथमास्थायधनुर्गृहीत्वा ११ सेनयावृतःपरीक्षित्दिग्विजयार्थंपुरान्निर्गतःसन् १२ भद्राश्वंकेतुमालंभारतंवर्षंउत्तरान्कु
रूंश्चविजित्यकरंजगृहे १३ तत्रतत्रजनैर्गीयमानंस्वपूर्वेषांयशः १४ अश्वत्थाम्नोऽस्त्रतःस्वरक्षणंवृष्णिपार्थानांकेशवेभक्तिंचश्रुत्वा १५ संतुष्टःसन्तेभ्यःधनानिवासांसि
हारांश्चददौ १६ किंच पांडवेषुश्रीकृष्णस्यसारथ्यादिकर्माणिशृण्वन्विष्णोश्चरणारविंदेभक्तिंकृतवान् १७ तदैवंवर्तमानस्यराज्ञःसतःयद्वृत्तंतत्शृणु १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मोवृषभरूपः विच्छायांहतप्रभांगांगोरूपांपृथ्वींविवत्सांनष्टापत्यां (पृच्छतिस्म । कथंभूतोधर्मःएकेनसत्याख्येनपदाचरन्) १९ (हेभद्रेअनामयमारोग्यंकच्चित्) तेआत्मनोदेहस्ययद्यपिब हिरामयोनलक्ष्यतेतथापिअंतर्मध्येआधिःपीडायस्यास्तथाभूतांत्वामालक्षये।केन । यतोविच्छायासिअतईषन्म्लायतावैवर्ण्यंभजतामुखेनलिंगेन । तत्रकारणानिकल्पयन्पृच्छति । दूरेबंधुमित्या दिपंचभिः । हेअंबकंचनदूरेस्थितंबंधुम् २० त्रिभिःपादैर्न्यूनंअतएवैकपादंमामांमल्लक्षणंजनमित्यर्थः (शोचसिउतपक्षांतरे)वृषलैः(शूद्रप्रायैःराजाभासैः)अतऊर्ध्वंभोक्ष्यमाणंपुंस्त्वमात्मपद विशेषणत्वात् (आत्मानंशोचसि) हृतायज्ञभागायेषांतान्यज्ञाद्यकरणात् (सुरादीन्वाआहोस्विद्यज्ञाभावादवर्षतिसतिप्रजाःशोचसीति) २१ हेउर्विपृथ्वि(भर्तृभिररक्ष्यमाणाःस्त्रियःअथो) पितृभिररक्ष्यमाणान्बालान्प्रत्युततैरेवपुरुषादैरिवनिर्दयैःआर्तान्क्लिष्टान् । वाचंदेवींसरस्वतींकुकर्मणिदुराचारेस्थितां (अथवा) कुलाग्र्यान्ब्राह्मणोत्तमान्सेवकान् (भाविनःशोचसि) २२ (कलिना)उपसृष्टान्व्याप्तान् (तैःक्षत्रबंधुभिः)अवरोपितानिउद्वासितानि (राष्ट्राणि)इतस्ततः (अनियमेन) निषेधानादरेणचसर्वतोऽशनादिषुउन्मुखंप्रवर्तमानंजीवलोकंवाशोचसि।तत्रव्य वायोमैथुनम् २३ हेअंबमातःधरित्रितेतवयोभूरिभारःतस्यावताराय (अवरोपणार्थं) कृतावतारस्य (हरेः) कर्माणिस्मरंतीतेनविसृष्टासतीशोचसिकिं (कथंभूतानिकर्माणि) निर्वाणं (मोक्षः) विलंबितंआश्रितंयेषुतानि । पाठांतरेनिर्वाणंविडंबितंउपहसितंयैस्तानि । मोक्षादप्यधिकसुखानीत्यर्थः २४ (येनआधिनाविकर्शितासिकृशतराकृतासि तस्याधे र्मूलमिदंममआख्याहि) हेअंब(बलिनांमध्येबलीयसाकालेनवा)तेसौभाग्यंहृतम् २५

धर्मः पदैकेनचरन्विच्छायामुपलभ्यगां ॥ पृच्छतिस्माऽश्रुवदनांविवत्सामिवमातरम् १९ ॥ धर्म उवाच ॥ कच्चिद्भद्रेऽनामयमात्मनस्तेविच्छायासिम्लायतेष न्मुखेन ॥ आलक्षयेभवतीमंतराधिंदूरेबंधुंशोचसिकंचनांऽब २० पादैर्न्यूनंशोचसिमैकपादमात्मानंवावृषलैर्भोक्ष्यमाणम् ॥आहोसुरादीन्हृतयज्ञभागान्प्रजा उतस्विन्मघवत्यवर्षति २१ अरक्ष्यमाणाःस्त्रियउर्विबालान्शोचस्यथोपुरुषादैरिवार्त्तान् ॥ वाचंदेवींब्रह्मकुलेकुकर्मण्यब्रह्मण्येराजकुलेकुलाग्र्यान् २२ किंक्षत्र बधून्कलिनोपसृष्टान्राष्ट्राणिवातैरवरोपितानि ॥ इतस्ततोवाऽशनपानवासःस्नानव्यवायोन्मुखजीवलोकम् २३ यद्वांऽबतेभूरिभरावतारकृतावतारस्यहरेर्ध रित्रि ॥ अंतर्हितस्यस्मरतीविसृष्टाकर्माणिनिर्वाणविलंबितानि २४ इदंममाऽऽचक्ष्वतवाधिमूलंवसुंधरेयेनविकर्शिताऽसि॥ कालेनवातेबलिनांबलीयसासुरा र्चितंकिंहृतमंबसौभगम् २५ ॥

चूर्णिका

एतस्मिन्कालेएकेनपदाचरन्वृषरूपधरोधर्मोगोरूपांपृथ्वींरुदंतीमालक्ष्यउवाच १९हेभद्रे तेअनामयंकच्चित् यतःम्लानवदनाऽसि अतोभवतींअंतराधिंआलक्षये २० किंच पादैर्न्यूनंएकपादंमांतथाशूद्रैःभोक्ष्यमाणांआत्मानंवाशोचसिकिम् २१अथवा असुरैःहृतयज्ञभागान्देवान्शोचसि किंवाभर्तृभिरलक्ष्यमाणाःस्त्रियःपितृभिररक्ष्यमाणान्बाला न्वाकुकर्मणिब्रह्मकुलेस्थितांसरस्वतीं २२ कलिव्याप्तान्क्षत्रबंधून्वाजारकर्मादिधर्मनिरतंजीवलोकंवा २३ भूभारनाशार्थंकृतावतारस्यहरेःअंतर्धानतोत्र शोचसिकिं २४ हेवसुंधरे येनत्वंकर्शितासितत्कारणंकथय २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवान्जानात्येवतथापिवक्ष्यामीत्याह (हेधर्मसर्वंतद्भवान्वेदहि तथापिवक्ष्येइतिशेषः) येनहेतुभूतेनत्वंचतुर्भिः (तपःशौचदयासत्याख्यैः)पादैःवर्तसे यत्रचसत्यशौचादयोमहागुणानवियं तितेनश्रीनिवासेनरहितंलोकंशोचामीतिपष्ठेनान्वयः २६ सत्यंयथार्थभाषणं । शौचंशुद्धत्वं । दयापरदुःखासहनं । क्षांतिःक्रोधप्राप्तौचित्तसंयमनम् । त्यागोऽर्थिषुमुक्तहस्तता । संतोषोऽलंबुद्धिः । आर्जवमवक्रता । शमोमनोनैश्चल्यं । दमोबाह्येंद्रियनैश्चल्यं । तपःस्वधर्मः । साम्यंअरिमित्रादिभावाभावः । तितिक्षापरापराधसहनं । उपरतिर्लाभप्राप्तावौदासीन्यं । श्रुतंशास्त्रविचारः २७ ज्ञानमात्मविषयं । विरक्तिर्वैतृष्ण्यं । ऐश्वर्यंनियंतृत्वं । शौर्यंसंग्रामोत्साहः । तेजःप्रभावः । बलंदक्षत्वं । स्मृतिःकर्तव्यार्थानुसंधानं । स्वातंत्र्यमपराधीनता । कौशलंक्रियानिपुणता । कांतिःसौंदर्यं। धैर्यमव्याकुलता । मार्दवंचित्ताकाठिन्यम् २८ प्रागल्भ्यंप्रतिभातिशयः । प्रश्रयोविनयः । शीलंसुस्वभावः । सहओजोबलानिमनसः ज्ञानेंद्रियाणांकर्मेंद्रियाणांचपाटवानि । भगोभोगास्पदत्वं । गांभीर्यमक्षोभ्यत्वं । स्थैर्यमचंचलता । आस्तिक्यंश्रद्धा । कीर्तिर्यशः । मानःपूज्यत्वं । अनहंकृतिर्गर्वाभावः । २९ (हेभगवन्) एतेएकोनचत्वारिंशत् अन्येचब्रह्मण्यत्वशरण्यत्वादयोमहांतोगुणायस्मिन्नित्याःसहजानवियंतिनक्षीयंतेस्म(प्रार्थ्याःप्रार्थनीयाः) ३० तेनगुणपात्रेणगुणालयेन (रहितं)पाप्मनापापहेतुना(कलिनेक्षितंलोकं) ३१ (आत्मानंमांत्वांदेवादींश्चकलिनोपद्रुतत्वाच्छोचामीत्यर्थः) ३२ तस्य(भगवतःविरहोदुःसहइत्याहचतुर्भिः।ब्रह्मादयोयस्याःश्रियःअपांगमोक्षःस्वस्मिन्दृष्टिपातस्तत्कामाःसंतः वहुतिथंवहुकालंतपःसमचरन्सम्यक्चरंतिस्म (कथंभूताःब्रह्मादयः) भगवद्भिरुत्तमैःप्रपन्नाःआश्रिताअपिसाश्रीर्यस्यपादलावण्यंअलमनुरक्तासतीसेवते (किंकृत्वा । स्वनिवासभूतंपद्मवनंविहाय) ३३

धरण्युवाच ॥ भवान्हिवेदतत्सर्वंयन्मांधर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसेयेनपादैर्लोकसुखावहैः २६ सत्यंशौचंदयाक्षांतिस्त्यागःसंतोषआर्जवम् ॥ शमोदमस्तपःसाम्यंतितिक्षोपरतिःश्रुतम् २७ ज्ञानंविरक्तिरैश्वर्यंशौर्यंतेजोबलंस्मृतिः ॥ स्वातंत्र्यंकौशलंकांतिर्धैर्यंमार्दवमेवच २८ प्रागल्भ्यंप्रश्रयःशीलंसहओजोबलंभगः ॥ गांभीर्यंस्थैर्यमास्तिक्यंकीर्तिर्मानोऽनहंकृतिः २९ एतेचान्येचभगवन्नित्यायत्रमहागुणाः ॥ प्रार्थ्यामहत्त्वमिच्छद्भिर्नवियंतिस्मकर्हिचित् ३० तेनाहंगुणपात्रेणश्रीनिवासेनसांप्रतम् ॥ शोचामिरहितंलोकंपाप्मनाकलिनेक्षितम् ३१ आत्मानंचानुशोचामिभवंतंचामरोत्तमम् ॥ देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान् ३२ ब्रह्मादयोवहुतिथंयदपांगमोक्षकामास्तपःसमचरन्भगवत्प्रपन्ना ॥ साश्रीःस्ववासमरविंदवनंविहाययत्पादसौभगमलंभजतेऽनुरक्ता ३३

चूर्णिका धरण्युवाच हेधर्मयन्मांपृच्छसितत्सर्वंत्वंवेद यस्याश्रयेणत्वंचतुष्पदोसीः २६ यस्मिन्भगवति सत्यंशौचंदयाक्षांतिस्त्यागःसंतोषआर्जवम् शमोदमस्तपःसाम्यंतितिक्षोपरतिश्रुतम् २७ ज्ञानैश्वर्यशौर्यस्वातंत्र्यधैर्यप्रागल्भ्यौजगांभीर्यास्तिक्यकीर्तिमानानहंकाराः २८ २९ एतेअन्येचगुणाःनित्यंसंतितेनश्रीवासेनरहितंपाप्मनाकलिनाअवलोकितंचलोकंशोचामि ३० ३१ तथाआत्मानंभवंतंपितॄन्ऋषीन्देवान्साधून्वर्णान्आश्रमांश्चशोचामि ३२ किंच यस्याःप्रसादंब्रह्मादयोवांच्छंति सालक्ष्मीःस्वगृहंकमलवनंहित्वायत्पादपद्मंभजते ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तस्यभगवतःश्रीमाङ्घ्रिःपदैः अब्जंपद्मं कुलिशंवज्रं केतुर्ध्वजः अब्जादयः (रेखारूपाः) केताश्चिह्नानियेषांतैः । यद्वा अब्जादीनामाश्रयैःसम्यगलंकृतमंगंयस्याःसाऽहंततोभगवतोविभूतिंसंप
दमुपलभ्यप्राप्य त्रींल्लोकानतिक्रम्यअरोचेशोभितवत्यस्मि । पश्चात्तस्याविभूतेरंतेनाशकालेप्राप्तेसतिउत्स्मयंतींगर्वंकुर्वाणांमांसव्यसृजत्त्यक्तवान् ३४ किंच योवैआसुरोवंशोयेषांतेषांराज्ञांअ
क्षौहिणीशतरूपंममातिभरं (अत्यंतं) भारमपनीतवान् । त्वांचऊनपदं (त्रिभिःपदैरूनं) अतएवदुस्थंसंतंपौरुषेणपुरुषकारेणआत्मनिस्वस्मिन्संपूर्णपदंसुस्थंसंपादयन् 'लक्षणहेत्वोःक्रियाया'
इतिहेतौशतृप्रत्ययः । संपादयितुमित्यर्थः (यद्दुरम्यंरमणीयंअंगं) अबिभ्रत्धृतवानित्यर्थः ३५ तस्यविरहंकावासहेत । प्रेमावलोकश्चरुचिरंस्मितंचवल्गुजल्पश्चतैर्मधुमानिनीनांसत्यभा
मादीनांसमानंगर्वसहितंस्थैर्यंस्तब्धत्वंयोऽहरत् (समानंएकदैववा) यस्यांघ्रिणारजसिसंलग्नेनविटंकितायाअलंकृतायाः(मम)सस्यादिमिषेणरोमोत्सवोभवति ३६ कथयतोःसतोः । प्राचीं
पूर्ववाहिनींसरस्वतीं कुरुक्षेत्रे(प्राप्तः)३७॥इतिश्रीभा०महा०प्रथमस्कंधेटीकायांपोडशोऽध्यायः १६॥छ॥ततःसप्तदशेराज्ञःकलेर्निग्रहउच्यते । तस्यैवंवीर्यभाजोऽपिवैराग्यंवक्तुमद्भुतं ॥१॥ हन्यमा
नंताड्यमानं(वृषलंचशूद्रंगोमिथुनस्यताडयितारं) १ (मिथुनंविविच्याहवृषमिति)मृणालंपद्मकंदस्तद्वद्धवलं।मेहंतंभयान्मूत्रयंतं इवेत्यनेनपादावशेषोधर्मोहिभयान्मूत्रयन्निवप्रतिक्षणंक्षीयमाणांऽ
शःतस्याप्यनिर्वाहात्कंपमानइवेतिदर्शितम् २ धर्मदुघांहविर्दोग्ध्रींक्षामांकृशां । यवसंतृणं अत्रापिसस्यादिप्रसवक्षयाद्विवत्सेव यज्ञाद्यभावात्कृशा । अतएवयज्ञभागमिच्छंती
पृथ्वीतिसूचितम् ३

॥८९॥

श्लोकाः ३४/३

तस्याऽहमब्जकुलिशांकुशकेतुकेतैःश्रीमत्पदैर्भगवतःसमलंकृतांगी ॥ त्रीनत्यरोचउपलभ्यततोविभूतिंलोकान्समांव्यसृजदुत्स्मयतींतदंते ३४ योवैममाऽति
भरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्मतंत्रः ॥ त्वांदुःस्थमूनपदमात्मनिपौरुषेणसंपादयन्यदुषुरम्यमबिभ्रदंगम् ३५ कावासहेतविरहंपुरुषोत्तमस्यप्रे
मावलोकरुचिरस्मितवल्गुजल्पैः ॥ स्थैर्यंसमानमहरन्मधुमानिनीनांरोमोत्सवोममयदंघ्रिविटंकितायाः ३६ तयोरेवंकथयतोःपृथिवीधर्मयोस्तदा ॥ परीक्षि
न्नामराजर्षिःप्राप्तःप्राचींसरस्वतीम् ३७ ॥ इतिश्रीभा०महापु०प्रथमस्कंधेपृथ्वीधर्मसंवादोनामषोडशोऽध्यायः १६ ॥ छ ॥ सूतउवाच ॥ तत्रगोमि
थुनंराजाहन्यमानमनाथवत् ॥ दंडहस्तंचवृषलंददृशेनृपलांछनम् १ वृषंमृणालधवलंमेहंतमिवबिभ्यतम् ॥ वेपमानंपदैकेनसीदंतंशूद्रताडितम् २ गांचध
र्मदुघांदीनांभृशंशूद्रपदाहताम् ॥ विवत्सांसाश्रुवदनांक्षामांयवसमिच्छतीम् ३

॥८९॥

चूर्णिका

तस्यभगवतःश्रीमत्पदैश्चिह्नितांअतएवगर्वितांमांयस्त्यक्तवान् ३४ किंच यःयदुषुअवतीर्यभूभारंजहार एवंभूतस्यभगवतःविरहंकावासहेत ३५ एवंप्राचीसरस्वतीतीरेपृथ्वी
धर्मयोःकथयतोःसतोस्तत्रपरीक्षिन्नामराजर्षिःप्राप्तः ३६ ॥ इतिप्रथमेषोडशोऽध्यायः १६ ॥ छ ॥ सूतउवाच तत्रसरस्वत्यांराजापरीक्षिद्दंडहस्तंनृपचिह्नधरंशूद्रं १
तथाभयान्मूत्रयंतंश्वेतंएकपादंशूद्रताडितंवृषं २ तथाशूद्रपदाहतांसाश्रुवदनांतृणमिच्छंतींगांचददर्श ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कार्तस्वरंसुवर्णतत्कृतःपरिच्छदःपरिकरोयस्यतं सुवर्णनिबद्धमित्यर्थः । सज्जीकृतकार्मुकः ४ हंसिवातयसि राजाहमितिचेत्तत्राह । नटवद्वेषमात्रेणनरदेवोऽसि कर्मणातुअद्विजः शूद्रः ५ (गांडीवधन्वनाऽर्जुनेन) । अशोच्यान्निरपराधान्नहसियस्त्वंप्रहरन्प्रहरसिसशोच्यःसापराधोऽसिअतोवधमर्हसि ६ वृषंप्रत्याह । त्वंत्वाकः (पादैस्त्रिभिर्न्यूनःएकेनपदाचरन्) स्वयमेवसंभावयतिकिंकश्चिद्देवोवृषरूपेणअस्मान्परिखेदयन्न्यूनांगतयाऽस्मद्बुद्धेःपरिखेदंकुर्वन् ७ दोर्दंडैःपरिरंभितवत्सुरक्षिते (भूतले) तेशुचःअश्रूणिविनाअन्येषामश्रूणिनानुपतंतीतिच खेदहेतुत्वंदर्शितं ८ एवमुक्तेपुनरपिशोचंतमाह मेति । भोसौरभेयसुरभिवंशोद्भव (हेवृषेत्यर्थः) माशुचःशोकंमाकुरु (तेतववृषलाद्भयं) व्येतुअपयातु । गांप्रत्याह । हेअंबमातःशास्तरिमयिजीवतिसतितेतवभद्रंकल्याणमेव अतोमारोदीः ९ ममहितार्थमेवैनंहनिष्यामिनतवोपकारायेत्याह । यस्येतिद्वाभ्यां । हेसाध्वि सर्वाःयाःकाश्चिदपीत्यर्थः । असाधुभिस्त्रस्यंतेपीड्यंतइत्यर्थः । तस्यराज्ञोभगोभाग्यंगतिःपरलोकः १० (अतःआर्तिनिग्रहस्यस्वधर्मत्वादेनंवृषलं) ११ पुनरपिशोचंतंवृषभंप्रत्याह (हेसौरभेयचतुष्पदस्तवपादान्) कः अवृश्चत्अच्छिद । त्वादृशास्त्वद्विधादुःखिताः १२ वोयुष्माकंभद्रमस्तु । आत्मनस्तवपादच्छेदेनवैरूप्यंकृतवंतं (पार्थानामस्माकं)कीर्तिंदूषयतीतितथातं आख्याहि १३

श्लोकाः ४ / १३

पप्रच्छरथमारूढःकार्त्तस्वरपरिच्छदम् ॥ मेघगंभीरयावाचासमारोपितकार्मुकः ४ कस्त्वंमच्छरणेलोकेबलाद्धंस्यबलान्बली ॥ नरदेवोऽसिवेषेणनटवत्कर्मणाऽद्विजः ५ कस्त्वंकृष्णेगतेदूरंसहगांडीवधन्वना ॥ शोच्योऽस्यशोच्यान्रहसिप्रहरन्वधमर्हसि ६ त्वंवामृणालधवलःपादैर्न्यूनःपदाचरन् ॥ वृषरूपेणकिंकश्चिद्देवोनःपरिखेदयन् ७ नजातुपौरवेंद्राणांदोर्दंडपरिरंभिते ॥ भूतलेऽनुपतंत्यस्मिन्विनातेप्राणिनांशुचः ८ मासौरभेयानुशुचोव्येतुतेवृषलाद्भयम् ॥ मारोदीरंबभद्रंतेखलानांमयिशास्तरि ९ यस्यराष्ट्रेप्रजाःसर्वास्त्रस्यंतेसाध्व्यसाधुभिः ॥ तस्यमत्तस्यनश्यंतिकीर्तिरायुर्भगोगतिः १० एषराज्ञांपरोधर्मोह्यार्त्तानामार्तिनिग्रहः ॥ अतएनंवधिष्यामिभूतद्रुहमसत्तमम् ११ कोऽवृश्चत्तवपादांस्त्रीन्सौरभेयचतुष्पदः ॥ माभूवंस्त्वादृशाराष्ट्रेराज्ञांकृष्णानुवर्तिनाम् १२ आख्याहिवृषभद्रंवःसाधूनामकृतागसां ॥ आत्मवैरूप्यकर्तारंपार्थानांकीर्तिदूषणम् १३

चूर्णिका

स्वयंरथारूढःधृतकार्मुकःसन्गंभीरयावाचापप्रच्छ४अस्मिन्मच्छरणेलोकेबलादीनान्हंसि एवंभूतोनृपवेषधरःकर्मणाशूद्रःत्वंकोऽसि ५किंच अर्जुनेनसहश्रीकृष्णेअंतर्हितेसतिनिरपराधान्रहसिप्रहरसिअतस्त्वंवधमर्हसि ६ ततोवृषंप्रत्याह हेवृषश्वेतवर्णःपादैर्न्यूनःत्वंकोसि कश्चिद्देवःत्वंवृषरूपेणाऽस्मान्खेदयन्वर्तसेकिम् ७ किंच पांडवरक्षितेभूतलेतेअश्रूणिविनाइतरेषांप्राणिनामश्रूणिनानुपतंति ८ त्वमपिशोकंमाकुरु अस्माच्छूद्रात्तेभयमपयातुगांप्रत्याह हेअंबखलानांमयिशास्तरिसतित्वंमारोदीः ९ किंच अहोयस्यराज्येदुष्टैःप्रजाःत्रस्यंते तस्यराज्ञःकीर्त्यायुर्भाग्यपरलोकाःनश्यंति १० किंच दीनानांदुःखहरणमेवराज्ञांपरोधर्मः अतएनंशूद्रंवधिष्यामि ११ हेवृषतेपादान्कःअवृश्चत् १२ तमस्मत्कीर्तिनाशकर्तारंवद १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतदाख्यानेकृतेकथंभद्रंस्यादित्यतआह । यस्मादनागसिजनेयोऽयंदुःखंयुंजन्कुर्वन्भवति अस्यएवंभूतस्य (दुःखदस्य) मत्तःसकाशाद्भयंसर्वत्राऽपिभवति । ततःसाधूनांभद्रंस्या देवेति १४ एतस्यदंडेऽहमसमर्थइतिमाशंकीरित्याह । अनागस्विति आगस्कृत् अपराधकर्तातस्यामर्त्यस्यदेवस्याऽपिभुजमाहर्तास्मि आहरिष्यामि । सांगदमित्यनेनमूलतउत्पाट्या हरिष्यामीतिदर्शितम् १५ नन्वेकस्यनिग्रहेणान्यस्यानुग्रहेतत्रकिंप्रयोजनंतत्राहराज्ञोहीति (स्वविहितधर्ममनुतिष्ठतांअनुपानं । इहआपदभावेपिउत्पथान् मार्गमुत्सृज्यवर्तमानान्) अ न्यान् अधर्मिष्ठान् शासतःदंडयतः १६ आर्तानामभयंयस्मात्तद्वचः वोयुष्माकं (पांडवेयानांपांडववंशोद्भवानां) युक्तंउचितमेव १७ वयंतुयतःपुरुषात्प्राणिनांक्लेशहेतवोभवेयुः तंपुरु षंनविजानीमः । यतोवादिनांवाक्यभेदैर्विमोहिताः १८ वाक्यभेदानेवाह । विकल्पभेदंवसतेआच्छादयंतियेयोगिनस्तेआत्मानंस्वमेवआत्मनःप्रभुं (स्वस्य) सुखदुःखप्रदंआहुः । तदुक्तं । "आत्मैवह्यात्मनोबंधुरात्मैवरिपुरात्मन"इति । यद्वा विकल्पैःकुतर्कैःप्रावृतानास्तिकाः एवंहितेवदंतिनतावद्देवतादीनांप्रभुत्वंकर्माधीनत्वात्।नचकर्मणःस्वाधीनत्वादचेतनत्वाच्च।अतः स्वयमेवप्रभुर्नचान्यःकश्चिदिति अन्येदैवज्ञाःदैवंग्रहादिरूपांदेवतां परेतुमीमांसकाःकर्म अपरेलोकायीतकाःस्वभावं१९केष्वपिसेश्वरेषुमध्येकेष्वपीतिदुर्लभत्वंसूचितं निश्चयइतिसिद्धांतत्वं।अप्र तर्क्यान्मनोऽगोचरादनिर्देश्यात्वचनागोचरात्परमेश्वरात्सर्वंभवतीति । विमृशविचारय(स्वमनीषया)स्वबुध्या२०विखेदःगतमोहः पर्यचष्टप्रत्यभाषत । ज्ञातवानितिवा (हेद्विजसत्तम) २१ (किंप्रत्यभाषतत्राहधर्ममिति), अनिर्द्धारितमिवब्रुवन् घातकंजानन्नपिनवदेदित्येवंरूपंधर्मंब्रवीषिअतोधर्मोऽसि (ननुघातकस्य)सूचनेकोदोषइत्यतआह । यदिति (अधर्मोघाता दिस्तस्यकर्तुः यत्) स्थानंनरकादि (तदयमधर्मकृदितियःसुचयतितस्यापिभवेदिति) २२

जनेऽनागस्यघंयुजन्सर्वतोऽस्यचमद्भयम् ॥ साधूनांभद्रमेवस्यादसाधुदमनेकृते १४ अनागस्विहभूतेषुयआगस्कृन्निरंकुशः ॥आहर्ताऽस्मिभुजंसाक्षादमर्त्य स्याऽपिसांगदम् १५ राज्ञोहिपरमोधर्मःस्वधर्मस्थानुपालनम्॥शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह १६ ॥ धर्मउवाच ॥ एतद्वःपांडवेयानांयुक्तमार्ता भयंवचः ॥ येषांगुणगणैःकृष्णोदौत्यादौभगवान्कृतः १७ नवयंक्लेशबीजानियतःस्युःपुरुषर्षभ ॥ पुरुषंतंविजानीमोवाक्यभेदविमोहिताः १८ केचिद्विकल्पव सनाआहुरात्मानमात्मनः ॥ दैवमन्येऽपरेकर्मस्वभावमपरेप्रभुम् १९अप्रतर्क्यादनिर्देश्यादितिकेष्वपिनिश्चयः ॥ अत्रानुरूपंराजर्षेविमृशस्वमनीषया २० एवंधर्मेप्रवदतिससम्राड्द्विजसत्तम ॥ समाहितेनमनसाविखेदःपर्यचष्टतम् २१ ॥ राजोवाच ॥ धर्मंब्रवीषिधर्मज्ञधर्मोऽसिवृषरूपधृक् ॥ यदधर्मकृतःस्थानं सूचकस्याऽपितद्भवेत् २२

किंच निरपराधभूतेषुअपराधकर्त्तुः १४ देवस्याऽपिभुजंहरिष्यामि इतरस्यकिंवक्तव्यम् १५ यतः प्रजापालनमेवराज्ञांपरोधर्मः १६ धर्मउवाच एतद्वःपांडवेयानांयुक्तमार्ता भयंवचः१७किंच यस्मात्प्राणिनांदुःखंभवति तंपुरुषंनजानीमः यतःवादिनांवाक्यैर्दैवकर्मस्वभावादिभिर्वयंविमोहिताः १८ १९ अतः हेराजन्त्वंस्वबुद्ध्यादुःखदातारंविचा रय २० एवमुक्तेसतिगतमोहःसन्निश्चित्यउवाच २१ राजोवाच त्वंवृषरूपीधर्मोऽसि यतःस्त्वंघातकंजानन्नपिनसूचये देवरूपंधर्मंब्रवीषि सूचनेदोषमाह अधर्मकृतस्थान सूचकस्यापिभवति २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्वा अज्ञानादप्यकथनंभवतीत्याह अथवेति । देवस्यमायायागतिर्वध्यघातकलक्षणाहृत्तिर्भूतानांचेतसोवचसश्चागोचरे (अविषये) सुज्ञेयानभवतीतिनिश्चयइत्यर्थः २३ धर्मोऽसाविति ज्ञात्वातस्यपादानुवादेनव्यवस्थामाह तपइतिद्वाभ्यां । अधर्मपादैस्त्रिभिरंशैस्तवत्रयःपादाभग्नाःस्मयोविस्मयः२४इदानींकलौहेधर्मतेपादश्चतुर्थांशःतत्रापिसत्यमेवास्ति यतःसत्याद्भवानात्मानं निर्वर्तयेत्कथंचिद्धारयेत् । यद्वाएरुपस्त्वांसाधयेत् । तमपिपादंअनृतेनैधितःसंवर्धितःकलिःकलिरूपोऽयमधर्मःग्रहीतुमिच्छति। तत्रेयंस्थितिः । कृतयुगेप्रथमंसंपूर्णश्चतुष्पाद्धर्मः । त्रेतायांचतुर्णामपिपादानांमध्येस्मयेनतपःसंगेनशौचंमदेनदयाअनृतेनसत्यमित्येवंचतुर्थांशोहीयते। द्वापरेत्वर्धं । कलौचतुर्थांशोऽवशिष्यतेसोऽप्यंतेविनंक्ष्यतीति २५ न्यासितःअन्योन्यद्वारेणअवतारितः(क्षपितः)उरुर्भरोभारोयस्याः (तस्यभगवतःपदन्यासैः) कृतंकौतुकंमंगलंयस्याःसा २६ अश्रूणिकलयतिमुंचतीत्यश्रुकलातेनोज्झितात्यक्तासतीशूद्राभोक्ष्यंतिमामितिशोचति (दुर्भगेवदैवहीनेव । नृपव्याजाःनाममात्रेणनृपाइत्यर्थः) २७ निशातंनिशितं (अधर्महेतवेकलये) अधर्मस्यहेतुर्यःकलिस्तंहंतुमित्यर्थः २८ (जिघांसुंहंतुमिच्छुं) अभिप्रेत्य ज्ञात्वा (समगात्साष्टांगंननामेत्यर्थः) २९ शरण्यआश्रयार्हः । श्लोक्यःसत्कीर्त्यर्हः ३० गुडाकेशोऽर्जुनस्तस्ययशोधरायेत्वयंतेपांतान्प्रतिबद्धोंऽजलिर्येनतस्यते। किंतुकथंचनकेनाऽप्यंशेननवर्तितव्यं यस्मात्त्वमधर्मस्यबंधुः ३१

श्लोकाः २३/३१

अथवादेवमायायानूनंगतिरगोचरा ॥ चेतसोवचसश्चाऽपिभूतानामितिनिश्चयः २३ तपःशौचंदयासत्यमितिपादाःप्रकीर्तिताः ॥ अधर्मांशैस्त्रयोभग्नाःस्मयसंगमदैस्तव २४ इदानींधर्मपादस्तेसत्यंनिर्वर्तयेद्यतः ॥ तंजिघृक्षत्यधर्मोऽयमनृतेनैधितःकलिः २५ इयंचभूर्भगवतान्यासितोरुभरासती ॥ श्रीमद्भिस्तत्पदन्यासैःसर्वतःकृतकौतुका २६ शोचत्यश्रुकलासाध्वीदुर्भगेवोज्झिताऽधुना ॥ अब्रह्मण्यान्नृपव्याजाःशूद्राभोक्ष्यंतिमामिति २७ इतिधर्मंमहींचैवसांत्वयित्वा महारथः ॥ निशातमाददेखड्गंकलयेऽधर्महेतवे २८ तंजिघांसुमभिप्रेत्यविहायनृपलांछनम् ॥ तत्पादमूलंशिरसासमगाद्भयविह्वलः २९ पतितंपादयोर्वीक्ष्य कृपयादीनवत्सलः ॥ शरण्योनावधीच्छ्लोक्यआहचेदंहसन्निव ३० ॥राजोवाच ॥ नतेगुडाकेशयशोधराणांबद्धांजलेर्वैभयमस्तिकिंचित् ॥ नवर्त्तितव्यंभवता कथंचनक्षेत्रेमदीयेत्वमधर्मबंधुः ३१

चूर्णिका अथवा भगवन्मायायाःगतिरगोचरा अतःनोक्तवान् २३ किंच तपःशौचंदयासत्यंइतिचत्वारस्तवपादाः तन्मध्येअधर्मांशैःस्मयसंगमदैःत्रयोभग्नाः २४ इदानींसत्यरूपः एकएवपादःउर्वरितः तमपिअधर्मःकलिःहर्तुमिच्छति २५ किंच इयंउरुभराक्रांताभगवताउज्झिताचभूःमांशूद्राभोक्ष्यंतीतिहेतोःशोचति २६ २७ इतिधर्मंमहींचसांत्वयित्वाकलिंहंतुंपरीक्षित्खड्गमाददे २८ एतादृशंपरीक्षितंदृष्ट्वानृपचिह्नंविहायकलिःतच्चरणयोःपतितः २९ ततःतथाविधंदृष्ट्वादयालुःराजानाऽवधीत् आहच ३० राजोवाच हेकलेबद्धांजलेःहेतोः तवमत्तः भयंनास्तिपरंत्वयामद्देशेनवर्तितव्यम् यतस्त्वमधर्मबंधुरसि ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१७॥

॥९३॥

तदेवाह(त्वामिति) । राजदेहेषुवर्तमानंत्वामनुसर्वतःप्रवृत्तोभवति (अधर्मसमूहंदर्शयतिलोभइति) ज्येष्ठाअलक्ष्मीः । मायाकपटं । अनार्यंदौर्जन्यं । अंहः(पापं) स्वधर्मत्यागः(वा) ३२ तत्तस्मात् (अधर्मोबंधुर्यस्यतत्संबोधनंहेकले) धर्मेणसत्येनवर्तितव्येवर्तितुमर्हेब्रह्मावर्तेदेशे । यज्ञस्यवितानंविस्तारःतत्रविज्ञानिपुणाः ३३ ईज्यायागस्तद्रूपामूर्तिर्यस्यशंक्षेमंकामांश्च । नन्विंद्रादयोदेवाइज्यंते नतुहरिस्तत्राह । स्थिरेति । एषस्थावरादीनामात्मेति । तथापिजीववन्नपरिछिन्नइत्याह । अंतर्बहिरिति । यथावायुःप्राणरूपेणांतस्थोपिबहिरप्यास्ति त द्वत्सर्वांतर्यामीसर्वेश्वरोपीति ३४ उद्यतासिंउद्धृतखड्गम् । दंडपाणिंयमंउद्यतंउद्युक्तं ३५ अत्रनवस्तव्यमितियातवाज्ञातयायत्रक्वाऽपिवत्स्यामि । किंतुतत्रतत्रापिआत्तःगृहीतःइषुःश रासनंधनुश्चयेनतंत्वामवलक्षये (तत्रतत्रतवसत्तांपश्यामीत्यर्थः) ३६ तत्तस्मात् (धर्मभृतांशरणागतरक्षणादिधर्मपालकानांमध्येश्रेष्ठस्थानंनिर्देष्टुंवक्तुं) नियतोनिश्चलोवत्स्यामि ३७ पानंमद्यादेः सूनाःप्राणिवधाः (चतुर्विधाः अनृतमदसंगक्रौर्यलक्षणाः)द्यूतेऽनृतंपानेमदः स्त्रीषुसंगः पूर्वंमदोदयानाशकत्वेनोक्तः । अत्रतुगर्वद्वारातपोनाशकत्वेन हिंसायांक्रौर्यंदया नाशकमितिज्ञेयं । यद्यपिसर्वंसर्वत्रसंभवति । तथापिप्राधान्येनानृतादीनांद्यूतादिषुयथासंख्यंसंभवोज्ञेयः । द्वादशस्कंधेतु"सत्यंदयातपोदानमि"तिपादाविभोर्नृपेतिअत्रदानशब्देनशौचमेवोक्तं । मनःशुद्धरूपत्वाद्भूताभयप्रदानस्य । "त्रेतायांधर्मपादानांतुर्यांशोहीयतेशनैः ॥ अधर्मपादैरनृतहिंसाऽसंतोपविग्रहैरि"ति । अत्रचअसंतोषशब्देनतस्यहेतुर्गर्वोलक्ष्यते विग्रहशब्देनचत द्धेतुःस्त्रीसंगइत्यविरोधः ३८

श्लोकाः ३२/३८

त्वांवर्त्तमानंनरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः ॥ लोभोऽनृतंचौर्यमनार्यमंहोज्येष्ठाचमायाकलहश्चदंभः ३२ नवर्तितव्यंतदधर्मबंधोधर्मेणसत्येनचवर्तितव्ये ॥ ब्रह्मावर्तेयत्रयजंतियज्ञैर्यज्ञेश्वरंयज्ञवितानविज्ञाः ३३ यस्मिन्हरिर्भगवानिज्यमानइज्यामूर्तिर्यजतांशंतनोति ॥ कामानमोघान्स्थिरजंगमानामंतर्बहिर्वायुरि वैषआत्मा ३४ ॥ सूतउवाच ॥ परीक्षितैवमादिष्टःसकलिर्जातवेपथुः ॥ तमुद्यतासिमाहेदंदंडपाणिमिवोद्यतम् ३५॥ कलिरुवाच ॥ यत्रक्वचनवत्स्यामिसा र्वभौमतवाज्ञया ॥ लक्षयेतत्रतत्राऽपित्वामात्तेषुशरासनं ३६ तन्मेधर्मभृतांश्रेष्ठस्थानंनिर्देष्टुमर्हसि ॥ यत्रैवनियतोवत्स्यआतिष्ठंस्तेऽनुशासनं ३७ ॥ सूत उवाच ॥ अभ्यर्थितस्तदातस्मैस्थानानिकलयेददौ ॥ द्यूतंपानंस्त्रियःसूनायत्राधर्मश्चतुर्विधः ३८

चूर्णिका ॥९३॥

तदेवाह राजदेहेषुत्वयिवर्तमानेसतिलोभानृतचौर्यदौर्जन्यस्वधर्मत्यागालक्ष्मीःकपटकलहदंभरूपोऽधर्मोभवति ३२ अतः हेअधर्मबंधोयत्रईश्वरंयज्ञैर्यजंतिसईश्वरःयज्ञकर्तॄणां शंतनोति एवंभूतेधर्मरूपेब्रह्मावर्तेमद्देशेत्वयानवर्तितव्यम् ३३ ३४ सूतउवाच एवंपरीक्षिताउक्तःकलिःजातकंपःसन्दडपाणिमिवहंतुमुद्यतंराजानंआह ३५ हेसार्वभौ म तवाज्ञयायत्रक्वापिनवत्स्यामि तत्रतत्रआत्तेषुशरासनंत्वामेवलक्षये३६तस्मात्त्वदाज्ञाधारकःसन् यत्रैवनिश्चलोवत्स्यामिइतिस्थानंदर्शय ३७ हेशौनक एवंप्रार्थितोराजात स्मैकलयेद्यूतंमद्यपानंस्त्रियःप्राणिवधश्चइतिस्थानानिददौ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चतुर्विधस्याप्येकत्रैवावस्थानं (तादृशंस्थानं) देहीतिपुनर्याचमानायजातरूपंसूवर्णंदत्तवान् । ततःसुवर्णदानादनृतंमदंकाममितिस्त्रीषुसंगं रजइतिरजोमूलांहिंसां । एतानिचत्वारिपंचमं वैरंचादादिति ३९ औत्तरेयेणपरीक्षिता (दत्तानि) अमूनि (न्यवसत्) अमूषुस्थानेषुनिवसातिस्मेत्यर्थः । तस्यराज्ञोनिदेशकृदाज्ञाकृत् ४० अथातोहेतोःबुभूषुरुद्भवितुमिछुः (पुरुषार्थकामइत्यर्थतोलोकपतिःप्रजापालकः । गुरुरुपदेष्टाधर्मस्य) स्त्रीसुवर्णयोरसेवनंनामतयोरनासक्तिः (इतरेषांस्वरूपतात्यागः) ४१ एवंकलिंनिगृह्यवृषस्यपादान्प्रतिसंदधे । तपआदीनिप्रवर्तितवानित्यर्थः ४२ युष्मदीयसत्रप्रवृत्तिरपितत्प्रभावादेवेत्याहत्रिभिः । एतर्हिइदानींयुधिष्ठिरेणारण्यं (विविक्षता) प्रवेष्टुमिच्छताउपन्यस्तंसमर्पितमासनमध्यास्ते ४३ (कौरवेंद्राणांश्रियाराज्यलक्ष्म्यावृहच्छ्रवामहायशाः) ४४ (इत्थंभूतोऽनुभावःसामर्थ्यंयस्य) अधुनास्तेपालयतइतिचवर्तमानसामीप्येवर्तमानवन्निर्देशःस्मेत्यध्याहारोवा (पालयतःस तः) सत्रायसत्रंकर्तुंदीक्षिताःदीक्षांकृतवंतइत्यर्थः ४५ ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेटीकायांसप्तदशोऽध्यायः १७ ॥ छ ॥ राज्ञस्त्वष्टादशेतस्यब्रह्मशापोनिरूप्यते । सचा नुग्रहएवास्यजातोवैराग्यमावहन् ॥ १ ॥ परीक्षितोनिर्याणमत्याश्चर्यंवक्तुंतत्संभावनायजन्माश्चर्यमनुस्मारयतियोवाइति । विप्लुष्टोनिर्दग्धःसन् १ ब्रह्मकोपादुत्थितात्तक्षकात्यःप्राणविप्लवः प्राणनाशःतस्माद्यदुरुभयंतस्मान्नसंमुमोह (नवैक्लव्यंप्रापोरुभयादपि) अत्रहेतुः । यस्तुभगवत्येवअर्पितआशयोंतःकरणंयेनसइति २

॥१४॥

श्लोकाः ३९/२

पुनश्चयाचमानायजातरूपमदात्प्रभुः ॥ ततोऽनृतंमदंकामंरजोवैरंचपंचमम् ३९ अमूनिपंचस्थानानिह्यधर्मप्रभवःकलिः ॥औत्तरेयेणदत्तानिन्यवसत्तन्निदेशकृ त् ४० अथैतानिनसेवेतबुभूषुःपुरुषःक्वचित् ॥ विशेषतोधर्मशीलोराजालोकपतिर्गुरुः ४१ वृषस्यनष्टांस्त्रीन्पादांस्तपःशौचंदयामिति ॥ प्रतिसंदधआश्वा स्यमहींचसमवर्द्धयत् ४२ सएषएतर्ह्यध्यास्तआसनंपार्थिवोचितम् ॥ पितामहेनोपन्यस्तंराज्ञाऽरण्यंविविक्षता ४३ आस्तेऽधुनासराजर्षिःकौरवेंद्रश्रियोल्ल सन् ॥ गजाह्वयेमहाभागश्चक्रवर्तीबृहच्छ्रवाः ४४ इत्थंभूतानुभावोऽयमभिमन्युसुतोनृपः ॥ यस्यपालयतःक्षोणींयूयंसत्रायदीक्षिताः ४५ ॥ इतिश्रीभागव तेमहापुराणेप्रथमस्कंधेकलिनिग्रहोनामसप्तदशोऽध्यायः १७ ॥ छ ॥ सूतउवाच॥योवैद्रौण्यस्त्रविप्लुष्टोनमातुरुदरेमृतः ॥ अनुग्रहाद्भगवतःकृष्णस्याद्भुतकर्म णः १ ब्रह्मकोपोत्थितायस्तुतक्षकात्प्राणविप्लवात् ॥ नसंमुमोहोरुभयाद्भगवत्यर्पिताशयः २

चूर्णिका

पुनःयाचमानायतस्मैसुवर्णमदात् तद्दानात्अनृतंमदंस्त्रीसंगंहिंसांवैरंचाऽदात् ३९ एवमेषुस्थानेषुराजाज्ञाधारकःकलिःन्यवसत् ४० अतःश्रेष्ठत्वमिच्छुःपुरूषःतत्रापि विशेषतःराजा एतानिनसेवेत ४१ ततः सःमहींधर्मंचसांत्वयित्वाधर्मस्यनष्टान्पादान्संदधे ४२ सराजाधर्मेणदत्तंसिंहासनमाश्रित्य ४३ अधुनागजाह्वयेवर्तते ४४ यस्य राज्येयूयंसत्रंकर्तुंदीक्षांकृतवंतः ४५ ॥ इतिप्रथमेसप्तदशः १७ ॥छ ॥ सूतउवाच यःपरीक्षित्अश्वत्थाम्नोस्त्रतेजसादग्धःतथापिमातुरुदरेभगवदनुग्रहान्नमृतः १ किंचब्रह्म कोपोत्थितात्प्राणनाशकात्तक्षकान्नसंमुमोह २

॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंतु उत्सृज्येति (सर्वतःसंगराज्यादिषुस्नेहमित्यर्थः) वैयासकेःशुकस्याशिष्यःसन्विज्ञाताअजितस्यहरेःसंस्थितिस्तत्त्वंयेनसः ३ नचैतच्चित्रमित्याहनेति । उत्तमश्लोकस्यैववार्तायेषुतेषां
अतएवनित्यंतत्कथारूपमम्टतंजुपतांसंभ्रमोमोहोनस्यात् ४ तस्मिन्राज्ञिसुतरांनतच्चित्रमित्याशयेनाह तावदिति । आभिमन्यवः (अभिमन्योःपुत्रः) एकराट्चक्रवर्तिमहानीशः पतिः(उर्व्याः)
यावत् (आस्तेतावत्) ५ ननुतदाकलेरप्रवेशएवास्तुइहप्रविष्टोपिनप्राभवदितिकुतः तत्राह । यस्मिन्नहनियर्हियस्मिन्नेवक्षणेगांपृथ्वींतदैवेह (भगवान्श्रीकृष्णःअनुवृत्तःप्रविष्टःअधर्मस्यप्रभवोय
स्मिन् (परीक्षितानवर्तितव्यंभवतेत्यादिनातत्सामर्थ्यानिग्रहएवकृतइत्यर्थः) ६ नन्वधर्महेतुंकलिंसर्वथाकिंनहतवान् तत्राह नानुद्वेष्टीति । सारंगोभ्रमरइवसारग्राही । सारमाह । य
द्यस्मिन्कुशलानिपुण्यानिआशुसंकल्पमात्रेणफलंति । इतराणिपापानिआशुनासिध्यंतियतस्तानिकृतान्येवसिध्यंतिनतुसंकल्पितमात्राणीति ७ ननुदोषाधिक्यात्द्वेषएवयुक्तः । नधीरे
षुतस्याकिंचित्करत्वादित्याह । किंन्विति । किंनुतेनभवेत् । बालेष्वधीरेषु (शूरेणधीरेषुभीरुणाभयशीलेन । प्रमत्तेष्वनवहितेषु) अप्रमत्तोऽवहितःसन्योवृकइववर्तते ८ पारीक्षित
माख्यानं । अपृच्छतपृष्टवंतोयूयं ९ किंबहुनानरैरेतावदेवकर्तव्यमितिसर्वशास्त्रार्थसारंकथयति । यायाइति । कथनीयान्युरूणिकर्माणियस्यतस्यगुणकर्मविषयाः (कथाः) बुभूषुभिः
सद्भावमिच्छद्भिःमोक्षकामैरित्यर्थः)१०पुनर्विस्तरेणकथनार्थसूतोक्तितत्संगंचाभिनंदंति सूतेतित्रिभिः।(हेसौम्य)शाश्वतीःसमाःअनंतान्वत्सरान्जीव।अत्यंतसंयोगेद्वितीया।विशुद्धंयशःकीर्तयासि
तच्चास्माकंमर्त्यानाममृतंमरणनिवर्तकं (जन्ममरणलक्षणसंसारनिवर्तकमित्यर्थः) ११

श्लोकाः ३/११

उत्सृज्यसर्वतःसंगंविज्ञाताजितसंस्थितिः ॥ वैयासकेर्जहौशिष्योगंगायांस्वंकलेवरं ३ नोत्तमश्लोकवार्तानांजुषतांतत्कथामृतं ॥ स्यात्संभ्रमोंऽतकालेऽपिस्मर
तांतत्पदांबुजं ४ तावत्कलिर्नप्रभवेत्प्रविष्टोऽपीहसर्वतः ॥ यावदीशोमहानुर्व्यामाभिमन्यवएकराट् ५ यस्मिन्नहनियर्ह्येवभगवानुत्ससर्जगाम् ॥ तदैवेहानुवृ
त्तोऽसावधर्मप्रभवःकलिः ६ नानुद्वेष्टिकलिंसम्राट्सारंगइवसारभुक् ॥ कुशलान्याशुसिध्यंतिनेतराणिकृतानियत् ७ किंनुबालेषुशूरेणकलिनाधीरभीरुणा ॥
अप्रमत्तःप्रमत्तेषुयोवृकोनृषुवर्त्तते ८ उपवर्णितमेतद्वःपुण्यंपारीक्षितंमया ॥ वासुदेवकथोपेतमाख्यानंयदपृच्छत ९ यायाःकथाभगवतःकथनीयोरुकर्मणः ॥
गुणकर्माश्रयाःपुंभिःसंसेव्यास्ताबुभूषुभिः १० ॥ ऋषयऊचुः ॥ सूतजीवसमाःसौम्यशाश्वतीर्विशदंयशः ॥ यस्त्वंशंससिकृष्णस्यमर्त्यानाममृतंहिनः ११

चूर्णिका

ततःसर्वत्रसंगंत्यक्त्वाशुकशिष्योभूत्वाज्ञाततत्त्वःसन्गंगायांस्वदेहंजहौ ३ अहोभगवच्चरणारविंदंस्मरतांअंतकालेऽपिभ्रमोनभवति ४ यावत्परिक्षिद्राज्यंचकारतावद्भगवदं
तर्धानानंतरमेवप्रविष्टोऽपिकलिःनसमर्थोऽभूत् ५ ६ यस्मिन्कलौपुण्यानिसंकल्पमात्रेणासिद्ध्यंति पापानितुकृतान्येवासिद्ध्यंतिअतःराजाकलिंनजघान ७ ८एवंहेशौनकइदंपुण्यंप
रिक्षिदाख्यानंयुष्मभ्यंवर्णितम् ९ किंच भगवतोयायाःकथास्तास्ताःपुंभिःसेव्याःइदमेवसर्वसारमस्ति १० ऋषयऊचुः हेसूत यतस्त्वंहरेर्यशोवर्णयासिअतःचिरकालंजीव ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच । अस्मिन्कर्मणिसत्रेअनाश्वासेअविश्वासनीयेवैण्यगबाहुल्येनफलनिश्चयाभावात् ('कोहितद्वेदयदमुष्मिंल्लोकेस्तिवानवेतिदिक्ष्वतीकाशान्करोती'तिश्रुतेश्च) धूमेनधूम्रःविवर्णआत्माशरीरंयेषांतानस्मान्कर्मणिपष्ठी । आसवंमकरंदंपादपद्मसंबंधियशोलक्षणं(मधुमधुरं) १२ (ननुयज्ञादिकर्मणासकामस्यराज्यादि निष्कामस्यतुशुद्धांतःकरणस्यज्ञानान्मोक्षोनिश्चितइत्यत्राह। तुलयामेति) भगवत्संगिनोविष्णुभक्ताः । तेषांसंगस्ययोलवःअत्यल्पःकालस्तेनापिस्वर्गंनतुलयामसमंनपश्याम । नचापवर्गे संभावनायांलोट् । मर्त्यानांतुच्छाआशिषोराज्याद्याःनतुलयामेतिकिमुतवक्तव्यं १३ एवंसत्संगमभिनंद्यश्रवणौत्सुक्यमाविष्कुर्वंतिकोनामेति । रसवित्रसज्ञःमहत्तमानामैकांतेनपरंअयनंआश्रयोयस्तस्यकथायां (कथंभूतस्य) अगुणस्यप्राकृतगुणरहितस्य (यस्य) कल्याणगुणानांअंतंयेयोगेश्वरास्तेपिनजग्मुरेतावंतइतिनपरिगणयांचक्रुः (अनंतत्वात्) भवःशिवःपाद्मोब्रह्माचमुख्येयेषांते १४ नोऽस्माकंमध्येभगवान्प्रधानंसेव्योयस्यसःभवान्नःशुश्रूषतां (श्रोतुमिच्छतां) हरेश्चरितंविस्तारयतु (हेविद्वन्) १५ तच्चशुकपरीक्षित्संवादेनकथयेत्याह । सवाइतिद्वाभ्यां । वैयासकिनाशुकेनशब्दितेनकथितेनयेनज्ञानेनज्ञानसाधनेन (सोऽदभ्रबुद्धिर्महामतिः) अपवर्गइत्याख्यायस्यतत्खगेंद्रध्वजस्यहरेःपादमूलं (चरणपीठं) भेजे (तदाख्याहीत्युत्तरेणान्वयः) १६ तदसंवृतार्थं (स्पष्टार्थं) यथातथाआख्याहि । तदेवनिर्दिशति । परीक्षितेकथितंपारीक्षितमाख्यानंश्रीभागवतंनामपुराणंपरंपुण्यंसत्वशोधकंअत्यद्भुतेयोगे (ब्रह्मैक्यलक्षणे) निष्ठायस्यअनंतस्याऽऽचरितैरुपपन्नंयुक्तंअतएवभागवतानां (भगवद्भक्तानां) अभिरामंप्रियं । एतैर्विशेषणैःकर्मज्ञानभक्तियोगप्रकाशकत्वंदर्शितं १७ श्रीभागवतव्याख्यानेलब्धप्रसंगंमहतामादरपात्रमात्मानंश्लाघतेद्वाभ्यां। अहोइत्याश्चर्ये हइतिहर्षे वयमितिबहुवचनंश्लाघायां । प्रतिलोमजाअपिअद्यजन्मभृतःसफलजन्मानआस्मजाताः । वृद्धानामनुवृत्त्याआदरेण ज्ञानवृद्धःशुकस्तस्यसेवयेतिवा यतोदुष्कुलत्वंतन्निमित्तमाधिंचमनःपीडांमहत्तमानामभिधानयोगःलौकिकोऽपिसंभाषणलक्षणःविधुनोतिअपनयति १८

कर्मण्यस्मिन्ननाश्वासेधूमधूम्रात्मनांभवान् ॥ आपाययतिगोविंदपादपद्मासवंमधु १२ तुलयामलवेनापिनस्वर्गंनापुनर्भवम् ॥ भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः १३ कोनामतृप्येद्रसवित्कथायांमहत्तमैकांतपरायणस्य ॥ नांतंगुणानामगुणस्यजग्मुर्योगेश्वरायेभवपाद्ममुख्याः १४ तन्नोभवान्वैभगवत्प्रधानोमहत्तमैकांतपरायणस्य ॥ हरेरुदारंचरितंविशुद्धंशुश्रूषतान्नोवितनोतुविद्वन् १५ सवैमहाभागवतःपरीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ॥ ज्ञानेनवैयासकिशब्दितेनभेजेखगेंद्रध्वजपादमूलम् १६ तन्नःपरंपुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठम् ॥ आख्याह्यनंताचरितोपपन्नंपारीक्षितंभागवताभिरामम् १७ ॥ सूतउवाच ॥ अहोवयंजन्मभृतोऽद्यहास्मवृद्धानुवृत्त्याऽपिविलोमजाताः ॥ दौष्कुल्यमाधिंविधुनोतिशीघ्रंमहत्तमानामभिधानयोगः १८

किंच अस्मिन्सत्रेगोविंदकथारूपंमधुनःपाययसि १२ साधुसंगलवेनाऽपिस्वर्गंमोक्षंचसमं नतुलयाम किंपुनःराज्यादयः १३ किंच रसवित्पुरुषःकोनामभगवत्कथायांतृप्येत् १४ तस्मात्हरेरुदारचरितंशुश्रूषतांनःकथय १५ अपिच सःपरिक्षित्राजाशुकोक्तज्ञानेनदेहंत्यक्त्वाभगवत्पदंप्राप १६ तस्यराज्ञःपुण्यंभगवत्कथाश्रयंआख्यानंकथय १७ सूतउवाच हेशौनक युष्मत्पादसेवयावयंविलोमजाअपिधन्याःस्म यतःसाधूनांनामयोगःलौकिकोऽपिभाषणरूपःसंबंधःदुष्कुलत्वनिमित्तांमनःपीडामपनयति १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. प्र. कुतःपुनःकिंपुनर्वक्तव्यंतस्याऽनंतस्यनामगृणतःपुंसोमहत्तमानामभिधानयोगोदौष्कुल्यं (आधिं) विधुनोतीति। यद्वानामगृणतःकुतःपुनर्दौष्कुल्यमिति । यद्वागृणतःपुंसस्तस्यनामदौष्कु अ०
ल्यंविधुनोतीतिकिंवक्तव्यमितिकैमुत्यन्यायमेवाह (महत्तमानामेकांतेनपरमयनंयस्तस्य) अनंताःशक्तयोयस्यस्वतोऽप्यनंतः किंच महत्सु (ब्रह्मादिषु) गुणायस्यसमहद्गुणः तस्यभाव
टीका स्तस्मात्अयंगुणतोऽप्यनंतमाहुः १९ एतत्प्रपंचयतित्रिभिरेतावतेति । तस्ययदसाम्यमनतिशायनंचगुणैस्तत्साम्यंतदाधिक्यंचान्यस्यनास्तीत्यस्यार्थस्यज्ञानमेतावतासूचनेनैवेत्यर्थः। अलं
पर्याप्तंकस्तद्विस्तरतोवक्तुंशक्नोति । तदेवाह । इतरान्ब्रह्मादीन्प्रार्थयमानान्हित्वाविभूतिःश्रीःअनभीप्सोः (अनिच्छतः) अपियस्यांघ्रिरेणुंसेवतइति २० अथेत्यर्थांतरे । यस्यपाद ॥१८॥
नखादवसृष्टंनिःसृतमपिविरिंच्येन (ब्रह्मणा) उपहृतंसमर्पितंअर्हणांभःअर्घोदकं (पादावनजनेजलमितियावत्) ईशसहितंजगत्पुनाति। विरिंच्योपहृतंसेशमितिचतयोरप्युपासकत्वमुक्तं।
॥९७॥ तस्मान्मुकुंदव्यतिरिक्तःकोनामभगवत्पदस्यार्थः सएवसर्वेश्वरइत्यर्थः २१ धीराःसंतःऊढंधृतं (देहादिषुसंगंव्यपोह्यनिरस्ययत्रैवानुरक्ताःपारमहंस्यंपरमहंसैःप्राप्यं) अंत्यंपरमकाष्ठापन्नं
("यद्गत्वाननिवर्तत" इतिस्मृतेः यद्वा पारमहंस्यंपरमहंसस्वरूपत्वं) तदाह । यस्मिन् (परमहंसाश्रमे) अहिंसाउपशमश्चस्वाभाविकोधर्मः २२ एवंस्वभाग्यमभिनंद्यपा
रिक्षितोपाख्यानंवक्तुमाह अहंहीति । हेअर्यमणःसूर्याः त्रयीमूर्तयऋषयः अत्रयावानात्मावगमः ममज्ञानंतावत्आचक्षेप्रवक्ष्यामि । तथाहि यथा (पतत्रिणः) पक्षिणः नभः
आत्मसमंस्वशक्त्यनुरूपमेवउत्पतंति । नकृत्स्नं । तथाविपश्चितः (विद्वांसः) अपिविष्णोर्गतिंलीलांस्वसमंस्वमत्यनुरूपमेववदंतीत्यर्थः २३ संप्रतिकथामुपक्षिपतिएकदेति (उद्यम्यसज्जंकृ
त्वाप्रगृह्यमृगयामुद्दिश्यवनेविचरन्) २४

कुतःपुनर्गृणतोनामतस्यमहत्तमैकांतपरायणस्य ॥ योऽनंतशक्तिर्भगवाननंतोमहद्गुणत्वाद्यमनंतमाहुः १९ एतावताऽलंननुसूचितेनगुणैरसाम्यानतिशायन श्लोकाः
स्य ॥ हित्वेतरान्प्रार्थयतोविभूतिर्यस्यांघ्रिरेणुंजुषतेऽनभीप्सोः २० अथापियत्पादनखावसृष्टंजगद्विरिंचोपहृतार्हणांभः ॥ सेशंपुनात्यन्यतमोमुकुंदात्को १९
नामलोकेभगवत्पदार्थः २१ यत्राऽनुरक्ताःसहसैवधीराव्यपोह्यदेहादिषुसंगमूढम् ॥ व्रजंतितत्पारमहंस्यमंत्यंयस्मिन्नहिंसोपशमःस्वधर्मः २२ अहंहिपृष्टोऽर्य २४
मणोभवद्भिराचक्षआत्मावगमोऽत्रयावान् ॥ नभःपतंत्यात्मसमंपतत्रिणस्तथासमंविष्णुगतिंविपश्चितः २३ एकदाधनुरुद्यम्यविचरन्मृगयांवने ॥ मृगाननुग
तःश्रांतःक्षुधितस्तृषितोभृशम् २४

चूर्णिका अहोपुनःअनंतस्यनामगृणतःपुंसःदौष्कुल्यंअपनयतीतिकिंवक्तव्यम् १९ किंच ब्रह्मादीनहित्वा लक्ष्मीःयत्पादरेणुंसेवते एवंभूतस्यभगवतएतावतामाहात्म्यसूचनेनाऽलम्
२० अथापियत्पादांगुष्ठनिर्गतंगंगारूपंजलंसेशंजगत्पुनाति तस्माद्भगवतःकोनामलोकेश्रेष्ठोऽस्ति २१ किंच यत्रईश्वरेप्रीतिंकुर्वंतःपुरुषाःदेहादिषुसंगंहित्वापरंपदंयांति २२ ॥९७॥
इत्युक्त्वाऽख्यानमाह हे ऋषयःभवद्भिःपृष्टोऽहंयथामतिआख्यानंप्रवक्ष्यामि यथापक्षिणःस्वशक्त्यनुरूपंनभःगच्छंतिनसर्वं तथाविद्वांसोऽपियथामतिविष्णुलीलांवदंति २३ अथ
एकदापरिक्षित्मृगयांकर्तुंवनेगतः तत्रमृगाननुगतःसन्श्रांतःक्षुधितःतृषितः २४

CC-0. In Public Domain. Digitization by eGangotri

अचक्षाणोऽपश्यन् तंप्रसिद्धमाश्रमंतास्मिंश्चमुनिंशमीकनामानम् २५ प्रतिरुद्धाःप्रत्याहृताइंद्रियादयोयेनतं। अतएवोपरतंस्थानत्रयाज्जाग्रदादिलक्षणात्परंतुरीयंपदंप्राप्तं अतएवब्रह्मभूतत्वाद विक्रियं २६ विप्रकीर्णाभिर्जटाभिराच्छन्नं। रुरुर्मृगविशेषः तस्यचर्मणाचाच्छन्नम् । विशेषेणशुष्यत्तालुयस्यसः (राजा) तथाभूतंमुनिमुदकमयाचत २७ नलब्धंतृणंतृणासनंभूम्या मुपवेशार्थस्थानंचयेनसः । नसंप्राप्तोऽर्घःसूनृतंप्रियवचनंचयेनसः (अर्घशब्देनहस्तपादप्रक्षालनाद्यर्थंजलंलक्ष्यते । "तृणानिभूमिरुदकंवाक्चतुर्थीचसूनृते"तिस्मृतेः) २८ (अर्दि तात्मनःपीडितमानसस्यराज्ञःसहसादैववशादित्यर्थः अविवेकवशादितिवा) मत्सरस्तदुत्कर्षासहनं (मन्युःक्रोधः कीदृशःअभूतपूर्वः । इतःपूर्वमेवंक्वाप्यस्यानुत्पन्नइत्यर्थः) २९ (अंसेस्कंधे) गतासुंमृतंधनुष्कोट्याचापाग्रेण ३० सर्पनिधानेराज्ञोऽभिप्रायमाह। एषकिंप्रत्याहृतसर्वेंद्रियःसन्मीलितेक्षणःस्थितः यद्वाक्षत्रबंधुभिरागतैर्वाकिंनुस्यादित्यवज्ञयामृषासमाधिः सन्निति जिज्ञासयेत्यर्थः ३१ तस्यपुत्रःशृंगीनामअतितेजस्वीतपोबलसंपन्नः (अर्भकैःसहविहरन्) अघंदुःखं (अशुचितांवाप्रापितं) तत्रार्भकमध्ये ३२ पालानांराज्ञांपीनांपुष्टानां (मत्तानामित्यर्थः) अहोअधर्मःतमेवनिर्दिशति । स्वामिनिदासानांयदघंपापाचरणंबलिभुजांकाकानामिव (बलिंभुंजानाहिकाकाःकदाचित्स्पष्ट्वादातारमशुचिंकुर्वंतितद्वदित्यर्थः) द्वार पालानां । शुनामिवचेति ३३ दासत्वंदर्शयति ब्राह्मणैरिति। (स्वरक्षणार्थंद्वारपालइवनिरूपितःसराजाद्वास्थःश्वेव) सभांडंभांडेएवस्थितं (शुनाहिभांडादुद्धृत्यपुरतःक्षिप्तमन्नादिभो क्तव्यं नतुभांडस्थंएवंराज्ञामर्यादयावर्तितव्यमित्यर्थः) ३४

जलाशयमचक्षाणःप्रविवेशतमाश्रमम् ॥ ददर्शमुनिमासीनंशांतंमीलितलोचनम् २५ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतम् ॥ स्थानत्रयात्परंप्राप्तंब्रह्मभूतम विक्रियम् २६ विप्रकीर्णजटाच्छन्नंरौरवेणाजिनेनच ॥ विशुष्यत्तालुरुदकंतथाभूतमयाचत २७ अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः ॥ अवज्ञातमिवात्मा नंमन्यमानश्चुकोपह २८ अभूतपूर्वःसहसाक्षुत्तृड्भ्यामर्दितात्मनः ॥ ब्राह्मणंप्रत्यभूद्ब्रह्मन्मत्सरोमन्युरेवच २९ सतुब्रह्मऋषेरंसेगतासुमुरगंरुषा ॥ विनिर्गच्छ न्धनुष्कोट्यानिधायपुरमागमत् ३० एषकिंनिभृताशेषकरणोमीलितेक्षणः ॥ मृषासमाधिराहोस्वित्किंनुस्यात्क्षत्रबंधुभिः ३१ तस्यपुत्रोऽतितेजस्वीविहर न्बालकोऽर्भकैः ॥ राज्ञाऽघंप्रापितंतातंश्रुत्वातत्रेदमब्रवीत् ३२ अहोअधर्मःपालानांपीव्नांबलिभुजामिव ॥ स्वामिन्यघंयद्दासानांद्वारपानांशुनामिव ३३ ब्रा ह्मणैःक्षत्रबंधुर्हिद्वारपालोनिरूपितः ॥ सकथंतद्गृहेद्वास्थःसभांडंभोक्तुमर्हति ३४

चूर्णिका जलाशयमपश्यन्नृष्याश्रमंविवेश तत्रमीलिताक्षं२५समाधौस्थितंरुरुचर्मणाआच्छन्नंशमीकंमुनिंदृष्ट्वाउदकमयाचत२६ २७ततःअप्राप्तसत्कारःराजाआत्मानमवज्ञातमिवम त्वामत्सरयुतःसन्चुकोप २८ २९ ततःक्रुद्धोराजाऋषेःस्कंधेमृतसर्पंधनुष्कोट्यानिधायपुरंययौ ३० ततःअस्यऋषेःसमाधिःसत्यःमिथ्यावाइतिजिज्ञासयासर्पःस्था पितः ३१ ततःतस्यपुत्रःशृंगीनामबालकैःसहक्रीडन्सन्राज्ञोऽपराधंश्रुत्वाबालकमध्येइदमब्रवीत् ३२ अहोराज्ञामधर्मःअयंकाकानामिव ३३ किंच ब्राह्मणैःक्षत्रियः द्वारपालोनिरूपितःसःतद्गृहस्थंसर्वंभोक्तुंकथमर्हति ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ननुभगवान्गतः कोस्तिसंप्रतिदंडकर्तेत्यतआह कृष्णइति) तत्तदनंतरंअहंशास्मिदंडयामि (भिन्नसेतून्लंघितमर्यादान्) ३५ इतिवयस्यानुच्चारोपेणताम्रेआक्षिणियस्यसः ।
कौशिकीनदीतस्याअपइतिसंधिरार्षः । (उपस्पृश्यआचम्य) वाग्वज्रंशापमित्यर्थः ३६ इत्येवं (कंठे) सर्पनिःक्षेपेण(लंघितामर्यादायेनतंअद्यतनादह्नःसप्तमेहनिमेमयाचोदितो
वाचाप्रेरितः) दंक्ष्यतिभक्षयिष्यति । धक्ष्यतीतिपाठेभस्मीकरिष्यति । स्मेतिपादपूरणे । कुलस्यांगारतुल्यं नाशकमित्यर्थः । मेमया (ततद्रुहं ममपितृद्रुहं) ततेतिह्रस्वत्वमार्षम् ३७
गलेसर्पकलेवरं (सर्पशरीरं) यस्येत्यलुक्समासः । मुक्तकंठः उच्चैरित्यर्थः ३८ (आंगिरसःअंगिरसःकुलोत्पन्नःसःशमीकः) ३९ तंसर्पंविसृज्य (परिहृत्यकस्माद्धेतोःरोदिषी
तिपुत्रंपप्रच्छ) केनवाविप्रकृतंअपकारःकृतः (इत्युक्तःएवंपृष्टः) ४० (तस्यशापस्यार्होनभवतीत्यतदर्हस्तं) । अनभिनंदनवाक्यंअहोइत्यादि । बतकष्टं । तेत्वयामहत् (अंहःपापं
कृतं (हेअज्ञ अत्यल्पे) द्रोहेअपराधे दमोदंडः ४१ परोविष्णुरित्याख्याख्यातिर्यस्यतंनरदेवंनृभिःसंमातुंसमंद्रष्टुं (नार्हसि यस्यराज्ञःनकुतोऽपिभयंयासांताःभद्राणिश्रेयांसि) ४२
(अंगहेपुत्र) अलक्ष्यमाणेअदृश्यमानेअविवरूथवत्मेपसंववत् (यद्वा विवरूथवत्रक्षारहितसेनावत् । सेनारक्षावरूथःस्यादित्यभिधानं । यद्वा वरुथोरथगुप्तिस्तद्रहितरथवदित्यर्थः) ४३

श्लोकाः ३५/४३

कृष्णेगतेभगवतिशास्तर्युत्पथगामिनाम् ॥ तद्भिन्नसेतूनद्याऽहंशास्मिपश्यतमेबलम् ३५ इत्युक्त्वारोषताम्राक्षोवयस्यानृषिबालकान् ॥ कौशिक्यापउपस्पृ
श्यवाग्वज्रंविससर्जह ३६ इतिलंघितमर्यादंतक्षकःसप्तमेऽहनि ॥ दंक्ष्यतिस्मकुलांगारंचोदितोमेततद्रुहम् ३७ ततोऽभ्येत्याऽऽश्रमंबालोगलेसर्पकलेवरम् ॥
पितरंवीक्ष्यदुःखार्तोमुक्तकंठोरुरोदह ३८ सवाआंगिरसोब्रह्मन्श्रुत्वासुतविलापनम् ॥ उन्मील्यशनकैर्नेत्रेदृष्ट्वास्वांसेमृतोरगम् ३९ विसृज्यपुत्रंपप्रच्छवत्स
कस्माद्धिरोदिषि ॥ केनवातेप्रतिकृतमित्युक्तःसन्यवेदयत् ४० निशम्यशप्तमतदर्हंनरेंद्रंसब्राह्मणोनात्मजमभ्यनंदत् ॥ अहोबतांहोमहदज्ञतेकृतंस्वल्पीयसि
द्रोहउरुर्दमोधृतः ४१ नवैनृभिर्नरदेवंपराख्यंसंमातुमर्हस्यविपक्वबुद्धे ॥ यत्तेजसादुर्विषहेणगुप्ताविंदंतिभद्राण्यकुतोभयाःप्रजाः ४२ अलक्ष्यमाणेनरदेवनाम्निर
थांगपाणावयमंगलोकः ॥ तदाहिचारप्रचुरोविनंक्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात् ४३

चूर्णिका ॥९९॥

किंच अधर्मवर्तिनांशास्तरिश्रीकृष्णेदूरंगतेसतितान्भिन्नसेतून्अद्याहंशास्मिपश्यतमेबलम् ३५ इत्युक्त्वाक्रोधताम्राक्षःशृंगीकौशिक्याउदकमाचम्यशापंविससर्ज ३६ एवंलं
घितमर्यादंतक्षकःसप्तमेऽहनिभक्षयिष्यतीति ३७ ततःस्वाश्रममेत्यसर्पग्रस्तंपितरंदृष्ट्वारुरोद३८शमीकःपुत्रविलापंश्रुत्वानेत्रेउन्मील्यस्वांसेमृतसर्पंचदृष्ट्वा ३९ तंविसृज्यपुत्रंप
प्रच्छ हेवत्स कस्मात्त्वंरोदिषि केनतेअपराधःकृतः ततःपुत्रःसर्वंन्यवेदयत्४० ततः शापंश्रुत्वामुनिरुवाच हेपुत्रत्वयाभद्रंनकृतं स्वल्पापराधेमहान्दंडःकृतः४१ किंच यस्य
राज्ञःप्रभावेनप्रजाःसुखंविंदंति ४२ तस्मिन्राज्ञिमृतेसतिअयंलोकःचौरादिभिःनंक्ष्यति ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नष्टोनाथोयस्यलोकस्यतस्यवसोर्वसुनोधनस्यविलुंपकादपहर्तुश्चोरादेर्हेतोर्यत्पापंभविष्यतितदस्मन्निमित्तत्वादस्मानुपैष्यति । अनन्वयंसंबंधशून्यमेव (यतोऽल्पीयसिद्रोहउरुर्दमोधृतस्त
स्मादस्माकमेवतत्संबंधइत्यर्थः) तदेवपापंदर्शयतिपरस्परमिति । शपंतिपरुषंवदंति । पश्वादीन्घ्नंजतेअपहरंतीति (अर्थान्धनानि) पुरुदस्यवश्चोरबहुलाः ४४ (त्रय्यामी
यतेज्ञायतेत्रयीमयोवेदप्रतिपाद्यः) आर्यधर्मःसदाचारःशुनांकपीनामिवचार्थकामयोरेवाभिनिवेशितचित्तानां (वर्णसंकरभोगादौअव्यवस्थेत्यर्थः) ४५ एवंराजमात्रस्यशापानर्हत्वमुक्त्वा
प्रस्तुतेपरिक्षितिविशेषमाह । धर्मपालइतिसार्धेनहयमेधयाडश्वमेधयाजी (बृहच्छ्रवामहायशाःअस्मत्अस्मत्तःशापंनार्हति) नन्वेवंभूतश्चेत्तत्कुतोऽपकृतवांस्तत्राह क्षुत्तृडितिस्वागतप्र
श्नाद्यभावेनावज्ञातःप्रत्युतशापंकथमर्हतीत्यर्थः४६अस्यमहापापस्यअन्यत्प्रायश्चित्तमदृष्ट्वापापमावेदयन्भगवंतंप्रार्थयते अपापेष्विति ४७ राजाचेत्प्रतिशापंदद्यात्तर्हिनिष्कृतिर्भवेदपि तत्तुनसंभव
ति । तस्यमहाभागवतत्वादित्याह तिरस्कृताःनिंदिताः । विप्रलब्धावंचिताः क्षिप्ताअवज्ञाताः (किंबहुना)हतास्ताडिताअपिअस्यतिरस्कारादिकर्तुःनतत्प्रतीकारंकुर्वंतितद्भक्ताविष्णुभक्ताः
प्रभवः (प्रतिकर्तुं) समर्थाअपि ४८ (राज्ञा) विप्रकृतःअपकृतः । अघं (मृतसर्पनिधानरूपम्) अपराधम् ४९ युक्तंचैतदित्याह प्रायशइति । द्वंद्वेषुसुखदुःखादिषु (योजिताः
संगमिताःसाधवोऽद्वैतात्मदर्शित्वाद्रागद्वेषरहिताः) अगुणाश्रयःसुखदुःखाद्याश्रयोनभवति ५० ॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेभावा०टीकायामष्टादशोऽध्यायः १८॥ ॥ छ ॥ ॥

श्लोकाः ४४ / १८

तदद्यनःपापमुपेत्यनन्वयंयन्नष्टनाथस्यवसोर्विलुंपकात् ॥ परस्परंघ्नंतिशपंतिवृंजतेपशून्स्त्रियोऽर्थान्पुरुदस्यवोजनाः ४४ तदार्यधर्मश्चविलीयतेनृणांवर्णाश्र
माचारयुतस्त्रयीमयः ॥ ततोऽर्थकामाभिनिवेशितात्मनांशुनांकपीनामिववर्णसंकरः ४५ धर्मपालोनरपतिःसतुसम्राड्बृहच्छ्रवाः ॥ साक्षान्महाभागवतोराज
र्षिर्हयमेधयाट् ॥ क्षुत्तृट्श्रमयुतोदीनोनैवास्मच्छापमर्हति ४६ अपापेषुस्वभृत्येषुबालेनापक्वबुद्धिना ॥ पापंकृतंतद्भगवान्सर्वात्माक्षंतुमर्हति ४७ तिरस्कृ
ताविप्रलब्धाःशप्ताःक्षिप्ताहताऽपिवा ॥ नास्यतत्प्रतिकुर्वंतितद्भक्ताःप्रभवोऽपिहि ४८ इतिपुत्रकृताघेनसोऽनुतप्तोमहामुनिः ॥ स्वयंविप्रकृतोराज्ञानैवाघंत
दचिंतयत् ४९ प्रायशःसाधवोलोकेपरैर्द्वंद्वेषुयोजिताः ॥ नव्यथंतिनहृष्यंतियतआत्माऽगुणाश्रयः ५० ॥ इतिश्रीभा०म०प्र०विप्रशापोपलंभनंनामाऽष्टाद
शोऽध्यायः १८ ॥ छ ॥

चूर्णिका

अस्माकंचअधर्मःस्यात् सद्धर्मोनंक्ष्यति वर्णसंकरोभवेत् ४४ ४५ किंच अयंराजाअस्मत्तःशापंनार्हति ४६ किंच अपक्वबुद्धिनाबालेनमहाभागवतेराज्ञिपापंकृतमेतत् भग
वान्क्षंतुमर्हति ४७ किंच एवंभूताःभागवताःअपराधकर्तुःप्रतिशापंनकुर्वंति ४८ इतिअनुतप्तोमुनिःराज्ञाकृतमपराधंनाचिंतयत् ४९ किंच अस्मिन्लोकेसुखदुःखादिषुअ
न्यैर्योजिताअपिसाधवःनव्यथंतिनहृष्यंति इत्युक्त्वाराज्ञेशिष्यंप्राहिणोत् ५० ॥इतिप्रथमेऽष्टादशः १८॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रायोपविष्टेगंगायांराज्ञियोगिजनावृते ॥ शुकस्यागमनंतत्रप्रोक्तमेकोनविंशके ॥ १ ॥ (अथमहीपतिः) स्वकृतंतत्कर्मसुनिस्कंधेसर्पप्रक्षेपणरूपंगर्ह्यंनिंद्यंचिंतयन्‌सुदुर्मनाजातः ।
चिंतामेवाह अहोइतिसार्धाभ्यां (मयानिरागसिनिरपराधे) ब्रह्मणिब्राह्मणेगूढंगुप्तंतेजोयस्यतस्मिन् (अनार्यवत्‌मूर्खवत्) । नीचंपापंअमीवमितिपाठेपिसएवार्थः (कृतमाचरितम्)
१ कृतंयद्देवहेलनंईश्वरावज्ञानंपापमित्यर्थः । तस्मान्मेव्यसनं (दुःखंध्रुवंअवश्यं) भविष्यति । तत्तुनातिदीर्घात्कालात्‌अचिरादेवास्तु । तत्रापिअद्धासाक्षान्ममैवनपुत्रादिद्वारे
णेतिप्रार्थना । काममसंकोचतः एवंप्रार्थनायाःप्रयोजनं । अवनिष्कृताय (पापस्य-) प्रायश्चित्ताय । यथापुनरेवंनकुर्यामितिच २ एवंसाक्षात्स्वस्यैवव्यसनंसंप्रार्थ्यततःप्रागेवकिं
चित्प्रार्थयते । अद्यैवमेराज्यादिदहतु (कः) प्रकोपितंब्रह्मकुलमेवअनलोवह्निः । पुनर्द्विजादीन्‌पीडयितुंधीर्मेमाभूत् । येननभवेदित्यर्थः ३ इत्थंचिंतयन्‌सराजामुनेःसुतेनोक्तः (प्रे
रितः) सप्तमेऽह्नि (तक्षकाख्यः) निर्ऋतिर्मृत्युर्यथाभविष्यतितथाशृणोत् । शमीकप्रेषितात्‌शिष्याच्छ्रुत्वाचसतक्षकस्यविषाग्निंसाधुमेने । यतोविषयेषुप्रसक्तस्यविरक्तिकारणं । (विर
क्तेर्हेतुम्)४ (ससम्राड्कस्यवाहेतोरितिशौनकप्रश्नंपरिहरति । अथोइति) अथोअनंतरंउभौलोकौपुरस्ताद्राज्यमध्यएवहेयतयाविचारितौ (तौ) विहाय (तत्कामनांपरित्यज्य) श्री
कृष्णांघ्रिसेवामेवाधिमन्यमानःसर्वपुरुषार्थाधिकांजानन्‌प्रायमनशनंतस्मिन्नित्यर्थः । तत्संकल्पेनोपाविशदितियावत् । यद्वाप्रायंप्रकृष्टमयनंशरणंयथाभवतितथा (अमर्त्यनद्यांगंगातीरे)
५ अमर्त्यनद्यामितिविशेषणस्यफलमाह येति । यागंगालसंतीश्रीर्यस्यास्तुलस्यास्तयाविमिश्रायेकृष्णांघ्रिरेणवःतैरभ्यधिकंसर्वोत्कृष्टंयदंबुतस्यनेत्रीतद्वाहिनीउभयत्रअंतर्बहिश्चइहपरत्रे
तिवासेशान्‌लोकपालैःसहितान्‌लोकान्‌पुनाति (एवममर्त्याअपिलोकपालाअपियांसेवतेतत्र) मरिष्यमाणः आसन्नमरणः मरणस्यानियतकालत्वात्‌सर्वोऽपितथा । तांकोनसेवे
त(सर्वोपिसेवेतैवेत्यर्थः) ६

॥१०१॥

श्लोकाः १९/६

सूतउवाच ॥ महीपतिस्त्वथतत्कर्मगर्ह्यंविचिंतयन्नात्मकृतंसुदुर्मनाः॥अहोमयानीचमनार्यवत्कृतंनिरागसिब्रह्मणिगूढतेजसि १ध्रुवंततोमेकृतदेवहेलनाद्दुरत्ययं
व्यसनंनातिदीर्घात्॥तदस्तुकामंत्वघनिष्कृतायमेयथानकुर्यांपुनरेवमद्धा२अद्यैवराज्यंबलमृद्धकोशंप्रकोपितब्रह्मकुलानलोमे॥दहत्वभद्रस्यपुनर्नमेभूत्पापीयसी
धीर्द्विजदेवगोभ्यः ३ सचिंतयन्नित्थमथाशृणोद्यथामुनेःसुतोक्तोनिर्ऋतिस्तक्षकाख्यः ॥ ससाधुमेनेनचिरेणतक्षकानलंप्रसक्तस्यविरक्तिकारणम् ४ अथोविहा
येममसुंचलोकंविमर्शितौहेयतयापुरस्तात् ॥ कृष्णांघ्रिसेवामधिमन्यमानउपाविशत्प्रायममर्त्यनद्याम् ५ यावैलसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुने
त्री ॥ पुनातिलोकानुभयत्रसेशान्कस्तांनसेवेतमरिष्यमाणः ६

चूर्णिका

सूतउवाच अथराजास्वकृतंगर्ह्यकर्मचिंतयन्‌आह अहोनिरागसिब्राह्मणेमयाऽपराधःकृतः १ अतोमेअचिरादपराधजंव्यसनंभवतु यथापुनःएवंनकुर्याम् २ किंचब्रह्मकोपो
त्थितोऽग्निःमेसमृद्धंराज्यादिकंदहतु ३ इत्थंचिंतयन्‌सराजाशमीकप्रेषितशिष्यमुखेनतक्षकान्मृत्युंश्रुत्वासाधुमेने ४ अथकृष्णांघ्रिसेवामधिकंमन्यमानःराजाभगवच्चरण
निर्गतायांगंगायांप्रायोपवेशंकृतवान् ५ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इत्येवंविष्णुपद्यांगंगायांप्रायोपवेशं (अनशनव्रतं) प्रतिव्यवच्छिद्यनिश्चित्य।पांडवेयइतितत्कुलौचित्यंदर्शयति। नास्त्यन्यस्मिन्भावोयस्यसः। कुतः मुनिव्रतः उपशांत-(चित्तः वाचालत्वरहितइतिवा) तत्कुतःमुक्तःसमस्तसंगोयेनसः ७ तत्रतदातद्दर्शनार्थंमुनयःउपागताः नतुतीर्थस्नानार्थं कृतार्थत्वात्। ननुतादृशानामपितीर्थयात्रादृश्यते तत्राह। प्रायेणेति (तीर्थाभिगमापदेशैः) तीर्थयात्राव्याजैः (पुनंतिलोकमलक्षालनेनमलिनीभूतानितीर्थान्यपिशोधयंतीत्यर्थः) ८ (गाधिसुतोविश्वामित्रः। रामोभार्गवः) ९ (कुंभयोनिरगस्त्यः) १० अरुणादयःकांडर्षित्वविशेषेणपृथङ्निर्दिष्टाः नानायान्यार्षेयाणिऋषीणांगोत्राणि (ऋषिसमूहावा) तेषुप्रवरान्श्रेष्ठान्शिरसासुखंस्पृष्ट्वाववंदे ११ विज्ञापनार्थंपुनःकृतप्रणामःविविक्तंविशुद्धंचेतोयस्य। अभिगृहीतौसंयोजितौपाणीयेनसःस्वचिकीर्षितंप्रायोपवेशनादियुक्तमयुक्तंवेतिविज्ञापयामास (अग्रेपुरतःउपस्थितःसन्) १२ अनुमोदनेनानुग्रहमालक्ष्यआत्मानंश्लाघते। अहोइति। नृपाणांमध्ये। महत्तमैरनुग्रहणीयंशीलंवृत्तंयेषांते। एतच्चराज्ञामतिदुर्लभमित्याह। ब्राह्मणानांपादशौचात्पादक्षालनोदकान्। "दूरादुच्छिष्टविण्मूत्रपादांभांसिसमुत्सृजेदि" तिस्मृतेः। दूरेहितैस्तद्विसृज्यते। ततोप्याराद्[1] दूरादेवविसृष्टंक्षिप्तं (तत्साम्येन) तत्रापिस्थातुमयोग्यमित्यर्थः। गर्ह्यंकर्मयस्येत्यात्मानमुद्दिश्योक्तम् १३

॥१०२॥

श्लोकाः ७/१३

इतिव्यवच्छिद्यसपांडवेयःप्रायोपवेशंप्रतिविष्णुपद्याम् ॥ दध्यौमुकुंदांघ्रिमनन्यभावोमुनिव्रतोमुक्तसमस्तसंगः ७ तत्रोपजग्मुर्भुवनंपुनानामहानुभावामुनयःसशिष्याः ॥ प्रायेणतीर्थाभिगमापदेशैःस्वयंहितीर्थानिपुनंतिसंतः ८ अत्रिर्वसिष्ठश्च्यवनःशरद्वानरिष्टनेमिर्भृगुरंगिराश्च ॥ पराशरोगाधिसुतोऽथरामउतथ्यइंद्रप्रमदेध्मवाहौ ९ मेधातिथिर्देवलआर्ष्टिषेणोभारद्वाजोगौतमःपिप्पलादः ॥ मैत्रेयऔर्वःकवषःकुंभयोनिर्द्वैपायनोभगवान्नारदश्च १० अन्येचदेवर्षिब्रह्मर्षिवर्याराजर्षिवर्याअरुणादयश्च ॥ नानार्षेयप्रवरान्समेतानभ्यर्च्यराजाशिरसाववंदे ११ सुखोपविष्टेष्वथतेषुभूयःकृतप्रणामःस्वचिकीर्षितंयत् ॥ विज्ञापयामासविविक्तचेताउपस्थितोग्रेऽभिगृहीतपाणिः १२ ॥ राजोवाच ॥ अहोवयंधन्यतमानृपाणांमहत्तमानुग्रहणीयशीलाः ॥ राज्ञांकुलंब्राह्मणपादशौचाद्दूराद्विसृष्टंबतगर्ह्यकर्म १३

चूर्णिका

तत्रमुक्तसमस्तसंगःसन्मुकुंदांघ्रिंदध्यौ ७ एतस्मिन्नंतरेतद्दर्शनार्थंसशिष्याःमुनयःप्राप्ताः ८ तेचअत्रिः वसिष्ठः च्यवनः शरद्वान् अरिष्टनेमिः भृगुः अंगिराः पराशरः विश्वामित्रः परशुरामः उतथ्यःइंद्रप्रमदःइध्मवाहः ९ मेधातिथिः देवलआर्ष्टिषेणः भारद्वाजः गौतमः पिप्पलादः मैत्रेयः और्वः कवषः अगस्तिःव्यासः नारदः १० अन्येचराजर्षिदेवर्षिब्रह्मर्षयः एतान्सर्वान्अभ्यर्च्यराजाववंदे ११ ततःसुखोपविष्टेषुतेषुपुनःप्रणम्यांजलिंबध्वास्वचिकीर्षितंविज्ञापयामास १२ राजोवाच अहोवयंभवद्भिरनुग्रहीताः अतएवधन्याः १३ ॥१०२॥

१ आरादितिपाठोमाहेश्वरीयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

आस्तांतावदनुग्रहःब्रह्मशापोऽपिभगवत्प्रसादादेवजातइत्याह । तस्यगर्ह्यकर्मणएव । अतोऽवस्यपापात्मनःगृहेष्वासक्तचित्तस्यमेस्वप्राप्तयेपरावराणामीशएवद्विजशापरूपोबभूव(द्विजशापरूपतयाविप्रकटआसीत्)यत्रयास्मिन्शापेसतिगृहेषुप्रसक्तः (पुमान्) भयंधत्तेनिर्विण्णोभवति । यतोनिर्वेदमूलःनिर्वेदोवैराग्यंमूलंप्राप्तिकारणंयस्मिन्सः । स्वस्यवैराग्यप्राप्यत्वात्तस्यचभयमूलत्वात्तदर्थंद्विजशापंकारितवान् (भगवान्-) इत्यर्थः १४ तान्प्रार्थयते । तमितिद्वाभ्यां । तंमामांउपयातंशरणागतं (विप्राः) प्रतियंतुजानंतु । देवीदेवतारूपागंगाचप्रत्येतु (द्विजोपसृष्टःद्विजकुमारेणप्रेरितः कुहकःकपटीवेषांतरधारीवाभक्षयतु) वाशब्दःप्रतिक्रियानादरे । गाथाःकथाः (अलंदेहावसानपर्यंतमित्यर्थः । अलंदशत्विवितिवान्वयः) १५ (अनंतेरतिरनुरागः) सोऽनंतआश्रयोयेषांतेषुमहत्सुप्रकृष्टःसंगोभूयात् । तस्यांतस्यांसृष्टौजन्मनि (मैत्रीसुहृद्भावः) १६ (इत्येवं) अध्यवसायोनिश्चयः(तेनयुक्तःयद्वाऽध्यवसायानिश्चित्ययोगयुक्तः) प्राचीनानिप्रागग्राणिमूलानियेषांतेषुप्रागग्रेषुकुशेषुआस्तेस्म । स्वसुतेजनमेजयेन्यस्तोभारोराज्यंयेनसः (समुद्रपत्न्यागंगायादक्षिणेतीरेउदङ्मुखआस्ते) १७ (प्रसूनैः) मुदाव्यकिरन् (वर्षितवंतः) देवसंघैर्वादितादुंदुभयोनेदुः १८ प्रजानुग्रहे (भूतदयायां) शीलंस्वभावःसारोबलंचयेषांते (नृपस्यव्यवसायंप्रशस्य) उत्तमश्लोकगुणैरभिरूपंसुंदरम्(इवोचुः) १९ भवत्सुपांडोर्वंश्येषु (हेराजर्षिश्रेष्ठ) येजहुरिति (बहुवचनं) युधिष्ठिराद्यभिप्रायेण (सद्यःकालक्षेपमंतरेणेत्यर्थः) २०

॥१०३॥

तस्यैवमेऽवस्यपरावरेशोव्यासक्तचित्तस्यगृहेष्वभीक्ष्णम् ॥ निर्वेदमूलोद्विजशापरूपोयत्रप्रसक्तोभयमाशुधत्ते १४ तंमोपयातंप्रतियंतुविप्रागंगाचदेवीधृतचित्तमीशे ॥ द्विजोपसृष्टःकुहकस्तक्षकोवादशत्वलंगायतविष्णुगाथाः १५ पुनश्चभूयाद्भगवत्यनंतेरतिःप्रसंगश्चतदाश्रयेषु ॥ महत्सुयांयामुपयामिसृष्टिंमैत्र्यस्तुसर्वत्रनमोद्विजेभ्यः १६ इतिस्मराजाऽध्यवसाययुक्तःप्राचीनमूलेषुकुशेषुधीरः ॥ उदङ्मुखोदक्षिणकूलआस्तेसमुद्रपत्न्याःस्वसुतेन्यस्तभारः १७ एवंचतस्मिन्नरदेवदेवेप्रायोपविष्टेदिविदेवसंघाः ॥ प्रशस्यभूमौव्यकिरन्प्रसूनैर्मुदामुहुर्दुंदुभयश्चनेदुः १८ महर्षयोवैसमुपागतायेप्रशस्यसाध्वित्यनुमोदमानाः ॥ ऊचुःप्रजानुग्रहशीलसारायदुत्तमश्लोकगुणाभिरूपम् १९ नवाइदंराजर्षिवर्यचित्रंभवत्सुकृष्णंसमनुव्रतेषु ॥ येऽध्यासनंराजकिरीटजुष्टंसद्योजहुर्भगवत्पार्श्वकामाः २०

श्लोकाः १४/२०

चूर्णिका

आस्तांतावदनुग्रहःब्रह्मशापोऽपिअनुग्रहायभवति यतःपापात्मनःगृहेषुसक्तचित्तस्यमेस्वरूपप्राप्तयेभगवान्द्विजशापतयाबभूव यस्मिन्शापेसतिअयंनिर्विण्णोभवति १४ हेविप्राःईशेधृतचित्तंशरणागतंमांजानंतु द्विजेरितःतक्षकःअलंदशतुपरंतुविष्णुगाथाःगायत १५ किंच अहंयांयांसृष्टिंउपयामि तस्यांतस्यांपुनर्भगवद्रतिःसाधुसंगश्चअस्तु वः द्विजेभ्योनमः १६ राजाइतिनिश्चययुक्तःपृथ्व्याःस्वसुतेन्यस्तभारःसन्गंगायाःदक्षिणकूलेप्रागग्रकुशेषुउदङ्मुखःआस्तेस्म १७ एवंराज्ञिप्रायोपविष्टेसतिदेवाःपुष्पवृष्टिंचक्रुःमुहुःदुंदुभयश्चनेदुः १८ महर्षयःसाधुसाध्वितिप्रशस्यअनुमोदमानाःसंतःऊचुः १९ हेराजर्षिवर्य श्रीकृष्णभक्तेषुभवत्सुइदंचित्रंन येभगवत्पार्श्वकामाःराजासनंजहुः २०

॥१०३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

परस्परंसंमंत्रयंते । सर्वेइति । (वयमास्महेअस्माभिःस्थातव्यमित्यर्थः । परंश्रेष्ठंलोकं तत्रहेतुः विरजस्कंनिर्मायंविशोकंच । यास्यतीतिकुतस्तत्राह । अयमिति २१ आश्रुत्यआ
कर्ण्य समंपक्षपातशून्यं मधुच्युतमधुस्रावि गुरुगंभीरार्थं अव्यलीकंसत्यं २२ (सर्वेयूयं) त्रयाणांलोकानांश्रेष्ठेउपरिसत्यलोकेवेदायथामूर्तिधराभवंति । तत्तुल्याः ज्ञानातिशय
मुक्त्वाकृपालुतामाह । नेहेति । भवतांप्रयोजनंपरानुग्रहंविनानास्ति । तर्हिसएवार्थःस्यात् । न । आत्मशीलंस्वस्वभावं (भूतानुकंपाहिभवतांस्वभावएवेत्यर्थः) २३ (ततःकारणा
त्वोयुष्मान्) पृच्छ्यंप्रष्टव्यमिदंविपृच्छेपृच्छामि । विश्रभ्यविश्वासंकृत्वाएवंकर्तव्यमित्यस्यभावःइतिकर्तव्यतातस्मिन्विषयेसर्वात्मनासर्वावस्थासुयत्कृत्यंविशेषतश्चम्रियमाणैः (आसन्नमर
णैरित्यर्थः) तच्चशुद्धंपापासंपर्करहितं (यद्वासर्वात्मनाशुद्धंसर्वप्रकारेणनिर्दोषंएवंभूतंतत्रकृत्यशतेषु) आमृशतविचारयत २४ तत्रतेषुयागयोगतपोदानादिभिर्विवदमानेषुसत्सुयदृच्छ
यागांपर्यटन्व्यासपुत्रस्तत्राभवत्प्राप्तः नलक्ष्यंआश्रमादिलिंगंयस्य । अवधूतःअवज्ञायजनैस्त्यक्तोयस्तस्येववेषोयस्यसः २५ तमित्यादीनांप्रत्युत्थिताइतितृतीयश्लोकेनान्वयः । द्विगुणा
न्यष्टौ (षोडश) वर्षाणियस्य । सुकुमारौकोमलौपादौकरौऊरूबाहूअंसौकपोलौगात्रंचयस्यतं । चारुणीआयतेअक्षिणीयस्मिन्उन्नतानासायस्मिन् । लंबह्रस्वादिवैषम्यंविनातुल्यौ
कर्णौयस्मिन् । शोभनेभ्रुवौयस्मिन् । एवंभूतमाननंयस्य । ॥ ३ ॥ वद्रेखात्रयांऽकितःसुष्ठुजातः (शंखवत्सुंदरइतिवा) कंठोयस्यतम् २६

श्लोकाः २१/२६

सर्वेवयंतावदिहास्महेऽथकलेवरंयावदसौविहाय ॥ लोकंपरंविरजस्कंविशोकंयास्यत्ययंभागवतप्रधानः २१ आश्रुत्यतदृषिगणवचःपरीक्षित्समंमधुच्युद्गुरुचा
व्यलीकम् ॥ आभाषतैतानभिनंद्ययुक्तंशुश्रूषमाणश्चरितानिविष्णोः २२ समागताःसर्वतएवसर्वेवेदायथामूर्तिधरास्त्रिपृष्ठे ॥ नेहाथवाऽमुत्रचकश्चनार्थऋतेप
रानुग्रहमात्मशीलम् २३ ततश्चवःपृच्छ्यमिमंविपृच्छेविश्रभ्यविप्राइतिकृत्यतायाम् ॥ सर्वात्मनाम्रियमाणैश्चकृत्यंशुद्धंचतत्रामृशताभियुक्ताः २४ तत्राभव
द्भगवान्व्यासपुत्रोयदृच्छयागामटमानोऽनपेक्षः ॥ अलक्ष्यलिंगोनिजलाभतुष्टोवृतःस्त्रिबालैरवधूतवेषः २५ तंद्व्यष्टवर्षंसुकुमारपादकरोरुबाह्वंसकपोलगात्र
म् ॥ चार्वायताक्षोन्नसतुल्यकर्णसुभ्र्वाननंकंबुसुजातकंठम् २६

चूर्णिका

किंच असौराजादेहंविहायविशोकंपरलोकंयावत्यास्यतितावत्वयंसर्वेइहस्थास्यामः २१ परीक्षित्तदृषिगणवचःआश्रुत्यतानभिवंद्यविष्णोश्चरितानिशुश्रूषमाणःसन्
अभाषत २२ यूयंसर्वेअत्रागताः युष्माकंइहपरत्रवापरानुग्रहंविनाअर्थोनास्ति २३ अतोवःइमंप्रष्टव्यंपृच्छे हेविप्राःयूयमेकमतयःसंतःसर्वावस्थासुम्रियमाणैश्चयत्कृतंतद्वि
चारयत २४ ततःतेषुयागयोगतपोदानादिभिर्विवदमानेषुसत्सुयदृच्छयागांपर्यटन्स्त्रीबालैर्वृतःअवधूतवेषःनिजलाभतुष्टःव्यासपुत्रस्तत्रप्राप्तः २५ तंषोडशवर्षंसुकुमारपादा
वयवंचारुनेत्रंउन्नतनासंतुल्यकर्णसुभ्र्वाननं २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कंठस्याधोभागयोःस्थितेअस्थिनीजत्रुणी । मांसेनानिगूढेजत्रुणीयस्यतं । पृथुविस्तीर्णंतुंगमुन्नतंवक्षोयस्यतं । आवर्तवन्नाभिर्यस्य । वलिभिस्तिर्यङ्ग्निरेखाभिर्वल्गुरम्यमुदरंयस्य । दिशएवांवरंयस्य । वक्त्रेविकीर्णाःकेशायस्य । प्रलंबौबाहूयस्य । स्वमरेषुश्रेष्ठेषुदेवेषुउत्तमोहरिस्तद्वत्आभायस्य २७ सदाअपीच्यंअत्यंतोत्तमंयद्वयोयौवनंतेनयाअंगलक्ष्मीर्देहकांति स्तयारुचिरस्मितेनच (मनोहरं) गूढवर्चसमपिप्रत्युत्थिताः । तंदृष्ट्वाप्रत्युद्गमंकृतवंतइत्यर्थः(यतस्तल्लक्षणज्ञाः)२८ शिरसैवसपर्यामाजहारआत्मनिवेदनंकृतवान् । तेनसहागताः स्त्र्यादयोनिवृत्ताः । सचोपविवेशसंधिरार्षः २९ सभगवान्ब्रह्मर्पिसंघादिभिःसंवृतःसन्नलंव्यरोचत । ग्रहाःशुक्रादयः । ऋक्षाण्यश्विन्यादीनिअन्यास्तारा: ३० नकुंठासर्वार्थेषुमेधायस्यतं (सर्वज्ञमित्यर्थः)प्रणम्यप्रश्नार्थंपुनर्नत्वा (सूनृतयाप्रियया) ३१ सूनृतांगिरमाह । अहोइतिपंचभिः (क्षत्रबंधवोऽपि) सतांसेव्याजाताः । अतिथिरूपेणहेतुनातीर्थकायोग्याः कृताः (तीर्थभूतैर्भवद्भिःस्वागमनेनवयमपितीर्थवत्पवित्रीकृताःअहोभाग्यमित्यर्थः । अत्रकृपैवकारणमित्यतःकृपयेत्युक्तं)३२ तीर्थीकरणमेवविशिनष्टि । येषामिति । येषांभवतांस्मर णात्गृहाःशुध्यंति किंपुनर्दर्शनादिभिरस्मदादयःपुमांसः ३३ (हेमहायोगिन्वैयासके) विष्णोःसांनिध्यादसुराइव ३४

श्लोकाः २७/३४

निगूढजत्रुंपृथुतुंगवक्षसमावर्तनाभिंवलिवल्गूदरंच ॥ दिगंवरंवक्त्रविकीर्णकेशंप्रलंबबाहुंस्वमरोत्तमाभम् २७ श्यामंसदाऽपीच्यवयोंऽगलक्ष्म्यास्त्रीणांमनोज्ञंरुचि
रस्मितेन ॥ प्रत्युत्थितास्तेमुनयःस्वासनेभ्यस्तल्लक्षणज्ञाअपिगूढवर्चसम् २८ सविष्णुरातोऽतिथयआगतायतस्मैसपर्यांशिरसाजहार ॥ ततोनिवृत्ताह्यबुधाः
स्त्रियोऽर्भकामहासनेसोपविवेशपूजितः २९ ससंवृतस्तत्रमहान्महीयसांब्रह्मर्षिराजर्षिदेवर्षिसंघैः ॥ व्यरोचतालंभगवान्यथेंदुर्ग्रहर्क्षतारानिकरैःपरीतः ३० प्र
शांतमासीनमकुंठमेधसंमुनिंनृपोभागवतोऽभ्युपेत्य ॥ प्रणम्यमूर्ध्नाऽवहितःकृतांजलिर्नत्वागिरासूनृतयाऽन्वपृच्छत् ३१ अहोअद्यवयंब्रह्मन्सत्सेव्याःक्षत्रबं
धवः ॥ कृपयाऽतिथिरूपेणभवद्भिस्तीर्थकाःकृताः ३२ येषांसंस्मरणात्पुंसांसद्यःशुध्यंतिवैगृहाः ॥ किंपुनर्दर्शनस्पर्शपादशौचासनादिभिः ३३ सान्निध्या
त्तेमहायोगिन्पातकानिमहांत्यपि ॥ सद्योनश्यंतिवैपुंसांविष्णोरिवसुरेतराः ३४

चूर्णिका

कंबुकंठंनिगूढजत्रुंपृथुवक्षसंदिगंबरम् वक्त्रविकीर्णकेशंप्रलंबबाहुंस्मरोत्तमाभं २७ श्यामंगूढवर्चसमपिशुकंदृष्ट्वा तल्लक्षणज्ञाःमुनयः आसनेभ्यःप्रत्युत्थिताः २८ ततःपरीक्षि त्आगतायतस्मैशिरसासपर्यामाजहार ततःस्त्रियोर्भकाःनिवृत्ताः सःपूजितःसन्महासनेउपविवेश २९ सःदेवर्षिराजर्षिब्रह्मर्षिसंघैःसंवृतःचंद्रइवव्यरोचत ३० ततःपरीक्षि द्वासनिंतंमूर्ध्नाप्रणम्यसूनृतयागिराअन्वपृच्छत् ३१ अहोवयंक्षत्रबंधवःभवद्भिःकृपयायोग्याःकृताः ३२ येषांवःस्मरणात्पुंसांगृहाःसद्यःशुध्यंति किंपुनःदर्शनादिभिः शु ध्यंतीतिवक्तव्यम् ३३ हेयोगिन् तेसान्निध्यात्पुंसांमहापापान्यपिसद्यःनश्यंतिविष्णुसान्निध्यात्दैत्यायथा ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पांडुसुतानांप्रियस्ते (प्रियः यस्येतिवा सः श्रीकृष्णः अद्यमेप्रसन्नोजातः) अतः(पितावसुदेवस्तस्यस्वसाकुंतीतदपत्यानिपैतृष्वस्रेयायुधिष्ठिरादयः)तेषांप्रीत्यर्थंतद्गोत्रस्यमेआत्तंस्वीकृतंबांधवंबंधुकृ
त्यंयेनसः(अस्मत्पूर्वजपुण्यवशाद्वयंभवद्दर्शनयोग्यतांप्राप्ताइतिभावः) ३५ अन्यथाश्रीकृष्णप्रसादंविना (तवदर्शनंकथमस्मदादीनांतत्रापिनितरां)म्रियमाणानांस्यात् । अव्यक्तागति
र्यस्यसः । वनयितायाचयितावनायितृतमोवनीयान्तस्यवनीयसःअत्युदारतयामांयाचस्वेतिप्रवर्तकस्येत्यर्थः (स्वयंतुसंसिद्धस्यकृतकृत्यस्य) ३६ सम्यक्संसिद्धिर्यस्मात्तं (त्वां)
इहपुरुषस्ययत्कार्यंकर्तुयोग्यंकर्तव्यंतु(कर्तुंक्षमं)आवश्यकंचेतिभेदः ३७ यच्छ्रोतव्यंयज्जाप्यंयत्कर्तव्यंयत्स्मर्तव्यंयदाराध्यंतत्ब्रूहिविपर्ययंअश्रोतव्यादि ३८ तद्दर्शनस्यपुनर्दुर्लभत्वादिदानी
मेवकथनीयमित्याशयेनाह । नूनमिति । गोदोहनमात्रकालमपि (अस्माकंभाग्यवशात्त्वद्दर्शनंजातमितिभावः (गृहमेधिभिर्नलक्ष्यते । गृहमेधिनांगृहेष्वितिवान्वयः) ३९ एवं

॥१०६॥

(राज्ञापरीक्षिता)अहोइत्यादिकयाश्लक्ष्णयामधुरयागिराआभाषितःअभिमुखीकृतःपृष्टश्च(राजानंप्रत्यभाषत)४० ॥ आर्यधर्मंजमाहतारिमवनौकृत्वापरिक्षिन्नृपंब्रह्मास्त्रादभिरक्षितंकलिजय
ख्यातंचकृत्वाभुवि । अंतेयःशुकरूपतःस्वपरमज्ञानोपदेशेनतंशापादावदमुंनमामिपरमानंदाकृतिंमाधवम् ॥ १ ॥ इतिश्रीमद्भागवतेमहापुराणेभावार्थदीपिकाख्यायांश्रीधरयतिकृतायांटी
कायांप्रथमस्कंधेएकोनविंशोध्यायः१९॥ ॥समाप्तोऽयंस्कंधः ॥(श्रीधरस्वामिरचितशब्दरत्नावलौमयामहेश्वरेणविन्यस्ताःशब्दाःकेचनकाचवत्)१ श्रीशांतादुर्गामहालसाचप्रीयताम् ॥ ७ ॥

श्लोकाः ३५/४०

अद्यमेभगवान्प्रीतःकृष्णःपांडुसुतप्रियः ॥ पैतृष्वस्रेयप्रीत्यर्थंतद्गोत्रस्यात्तबांधवः ३५ अन्यथातेऽव्यक्तगतेर्दर्शनंनःकथंनृणाम् ॥ नितरांम्रियमाणानांसंसिद्ध
स्यवनीयसः ३६ अतःपृच्छामिसंसिद्धिंयोगिनांपरमंगुरुम् ॥पुरुषस्येहयत्कार्यंम्रियमाणस्यसर्वथा ३७ यच्छ्रोतव्यमथोजाप्यंयत्कर्तव्यंनृभिःप्रभो ॥ स्मर्तव्यं
भजनीयंवाब्रूहियद्वाविपर्ययम् ३८ नूनंभगवतोब्रह्मन्गृहेषुगृहमेधिनाम् ॥ नलक्ष्यतेह्यवस्थानमपिगोदोहनंक्वचित् ३९ सूतउवाच ॥ एवमाभाषितःपृष्टःस
राज्ञाश्लक्ष्णयागिरा ॥ प्रत्यभाषतधर्मज्ञोभगवान्बादरायणिः ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेऽष्टादशसाहस्र्यांपारमहंस्यांसंहितायांप्रथमस्कंधेशुकागमनं
नामैकोनविंशोऽध्यायः १९ ॥ ७ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ समाप्तोऽयंप्रथमस्कंधः ॥

चूर्णिक

पांडवानांप्रियःकृष्णःतत्प्रीत्यर्थंतद्गोत्रस्यमेप्रीतिःखलु ३५ अन्यथाम्रियमाणानांनःतेदर्शनंकथंस्यात् ३६ अतःयोगिनांगुरुंत्वांपृच्छामि इहम्रियमाणस्ययत्कार्यम् ३७ ॥१०६॥
यच्छ्रोतव्यंजाप्यंस्मर्तव्यंभजनीयंब्रूहि ३८ विपर्ययंचब्रूहि यतःतवअवस्थानंगृहाश्रमिणांगृहेषुगोदोहनकालमपिनलक्ष्यते ३९ सूतउवाच राज्ञाएवंपृष्टःधर्मज्ञोभगवान्शुकःप्र
त्यभाषत ४० ॥ इतिश्रीमद्भागवतप्रथमस्कंधचूर्णिकायांएकोनविंशोध्यायः १९ ॥७॥ श्रीकृष्णार्पणमस्तु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति सटीक-सचूर्णिक-श्रीमद्भागवते प्रथमस्कंधः समाप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ सटीकसचूर्णिकश्रीमद्भागवत-द्वितीयस्कंधः प्रारभ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीगणेशायनमः ॥ ॥ द्वितीयेतुदशाध्यायैःश्रीभागवतमादितः । उद्देशलक्षणोक्तिभ्यांसंक्षेपेणोपवर्ण्यते ॥१॥ तत्रतुप्रथमेऽध्यायेकीर्तनश्रवणादिभिः । स्थविष्ठेभगवद्रूपेमनसोधारणोच्यते २ यन्नामकीर्तनंदानतपोयोगादिसत्फलम् तंनित्यंपरमानंदंहरिंनरनमस्मर ३ अथद्वितीयस्कंधव्याख्या उक्तःपूर्वमुपोद्धातःसप्रसंगःशुकागमः । राज्ञाप्टष्टंनृणांकृत्यमथाहशुकसन्मुनिः ॥४ राज्ञःप्रश्न मभिनंदति वरीयानिति (हेनृप) तेत्वयापुंसांश्रोतव्यादिषुमध्येयःपरःश्रेष्ठगोचरःप्रश्नःकृतएषवरीयान् यतोलोकहितमेतत् मोक्षहेतुत्वात् आत्मविदांमुक्तानांचसंमतोयतः १ तत्रतावत्स्वा भाविकक्रियाणामनर्थहेतुत्वंवदन्ब्रूहियद्वाविपर्ययमित्यस्योत्तरमाह श्रोतव्यादीनीतित्रिभिः गृहेषुसक्तानामतएवगृहमेधिनांतद्व्रतपंचसूनापराणाम् मेधतिर्हिंसार्थः (यद्वागृहमेधागृहाश्रम एव कर्तुयोग्याःपंचमहायज्ञास्तान् कर्तुं शीलं येषामस्तीति गृहमेधिनस्तेषां श्रोतव्यकीर्तितव्यादीनि संति) २ तैश्चवृथैवायुर्व्ययोभवतीत्याह नक्तंरात्रौयद्वयआयुस्तन्निद्रयाव्यवायेनरत्यावाह्रिय ते दिवाअह्नियद्वयस्तत्अर्थेहयाअर्थार्थमुद्यमेन सिद्धेऽर्थेकुटुंबपोषणेनवा चकारावनुक्तसमुच्चयार्थौ ३ ननु नश्वरकुटुंबाद्यर्थंकथमायुर्व्ययंकुर्यात्तत्राह देहादिषुआत्मनःसैन्येषुपरिकरेषुअसत्सुमि थ्याभूतेष्वपि प्रमत्तःप्रसक्तस्तेषांपित्रादिदृष्टांतेननाशंपश्यन्नपिनानुसंधत्ते ४ एवंविपर्ययप्रश्नोत्तरमुक्त्वाश्रोतव्यादिप्रश्नस्योत्तरमाह तस्मादिति हेभारतभरतवंश्य सर्वात्मेतिप्रेष्ठत्वमाह भगवानिति सौंदर्यं ईश्वरइत्यावश्यकत्वं हरिरितिबंधहारित्वं अभयंमोक्षमिच्छता ५ अतःपरमन्यच्छ्रेयोनास्तीत्याह एतावानेवजन्मनोलाभःफलंतमाह नारायणस्मृतिरिति सांख्यादिभिःसाध्यइतिते षांस्वातंत्र्येणलाभत्वंवारयाति (तत्र) सांख्यमात्मानात्मविवेकः योगोऽष्टांगः (स्वधर्मपरिनिष्ठास्ववर्णाश्रमविहितधर्मानुष्ठानं) अंतेतुस्मृतिःपरोलाभः नतन्महिमावक्तुंशक्यइत्यर्थः ६ तत्रसदाचारंप्रमाणयाति प्रायेणेति विधिषेधतःविधिनिषेधाभ्यांनिवृत्ताः नैर्गुण्येब्रह्मणिस्थिताअपि स्मप्रसिद्धम् (यद्वायत्रमुक्ता अपिरमंतेतन्मुमुक्षुभिःसर्वदा सेव्यमिति किमुवक्तव्यमित्यर्थः)७

ॐनमोभगवतेवासुदेवाय ॥ ॥ श्रीशुकवाच ॥ ॥ वरीयानेषतेप्रश्नःकृतोलोकहितंनृप ॥ आत्मवित्संमतःपुंसांश्रोतव्यादिषुयःपरः १ श्रोतव्यादीनि राजेंद्रनृणांसंतिसहस्रशः ॥ अपश्यतामात्मतत्त्वंगृहेषुगृहमेधिनाम् २ निद्रयाह्रियतेनक्तंव्यवायेनचवावयः ॥ दिवाचार्थेहयाराजन्कुटुंबभरणेनवा ३ देहाप त्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषांप्रमत्तोनिधनंपश्यन्नपिनपश्यति ४ तस्माद्भारतसर्वात्माभगवान्हरिरीश्वरः ॥ श्रोतव्यःकीर्तितव्यश्चस्मर्तव्यश्चे च्छताऽभयम् ५ एतावान्सांख्ययोगाभ्यांस्वधर्मपरिनिष्ठया ॥ जन्मलाभःपरःपुंसामंतेनारायणस्मृतिः ६ प्राणेयमुनयोराजन्निवृत्ताविधिषेधतः ॥ नैर्गुण्य स्थारमंतेस्मगुणानुकथनेहरेः ७

श्लोकाः १/७

चूर्णिका

श्रीगणेशायनमः ॥ ॥ श्रीकुलदेवतायैनमः ॥ ॥ श्रीशुकउवाच ॥ ॥ हेनृपपुंसांश्रोतव्यादिषुश्रेष्ठः आत्मविदांसंमतः एषःतेप्रश्नः वरीयान् यतःलोकहितंभवति १ हे राजेंद्रनृणांश्रोतव्यानितुबहूनिसंति तथापि आत्मतत्त्वंअपश्यतांगृहमेधिनांतेषांआयुःवृथैवगच्छति २ निद्रयाह्रियतेनक्तंव्यवायेनचवावयः दिवाचार्थेहयाराजन्कुटुंबभरणेन वा ३ एवंदेहापत्यकलत्रादिषुअसत्स्वपितेषांनिधनंपश्यन्नपि आत्महितंनपश्यति ४ तस्मात्हेराजन् अभयंइच्छतापुंसासर्वात्माहरिः श्रोतव्यः कीर्तितव्यः स्मर्तव्यः ५ पुं सांअंतेनारायणस्मृतिः अयमेवपरोलाभः ६ किंच प्रायः मुनयः विधिनिषेधातीताःब्रह्मनिष्ठाअपिहरिगुणानुकथनेरमंते ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२॥

ननु किमिदमपूर्वंकथयासि सत्यमत्यपूर्वमेवेदमित्याह इदं (भागवतं) भगवत्प्रोक्तं तन्नामैकप्रधानंपुराणं ब्रह्मसंमितंसर्ववेदतुल्यं यद्वा ब्रह्मसम्यक्मितंयेन कुतस्त्वयाप्राप्तमतआहअधी
तवानिति द्वैपायनात्पितुः कदा द्वापरादौद्वापरआदिर्यस्यकालस्यतस्मिन्द्वापरांतइत्यर्थः शंतनुसमकालेव्यासावतारप्रसिद्धेः ८ सिद्धस्यतवकुतोऽध्ययनेप्रवृत्तिस्तत्राह परिनिष्ठितोऽपीति (नै
र्गुण्ये मुक्तौपरिनिष्ठितोपि विनिश्चयवानपिमुक्तोपीत्यर्थः) गृहीतचेताआकृष्टचित्तः (यदहमधीतवान्) ९ महापुरुषोविष्णुस्तदीयः यस्ययस्मिन् श्रद्धांकुर्वतां सतीअहैतुकी १० साधकानां
सिद्धानांचनातःपरमन्यच्छ्रेयोस्तीत्याह एतदिति इच्छतांकामिनां तत्तत्फलसाधनमेतदेव निर्विद्यमानानांमुमुक्षूणां मोक्षसाधनमेतदेव योगिनांज्ञानिनां, फलंचैतदेवनिर्णीतं नात्रप्रमाणंप्रवक्त
व्यमित्यर्थः (कथंभूतं नामानुकीर्तनं नकुतश्चिद्भयंयत्रतत्) ११ अल्पमेवायुरवशिष्टंकिमहंसाधयेयमितिमाशुचइत्याह किमितित्रिभिः परोक्षैरलक्षितैर्हायनैर्वर्षैर्विदितंवृथायातीतिज्ञातम् य
तोयेनज्ञानेनघटेतयत्नंकुर्यात् १२ खट्वांगोहिदेवपक्षेस्थित्वादैत्यानजयत् ततःप्रसन्नैर्देवैर्वरंवृणीष्वेत्युक्तोऽतस्तेनोक्तंप्रथमंतावन्ममायुःकथ्यतामितिततोदेवैरुक्तंतत्तुमुहूर्तमात्रमस्तीति ततोऽतिशी
घ्रंविमानेनभुवमागत्यहरिंशरणंगतइति यतइयंस्वर्गभूमीरजोधिका कर्मभूमिःपृथ्वी १३ तवतुएतर्ह्यपीदानीमपि (सप्तानामह्नां समाहारः सप्ताहंजीवितस्यायुषो ऽवधिरियत्तास्ति) तावदि
ति तावताकालेनसांपरायिकंपारलौकिकंसाधनंसंपादय १४ तत्रवैराग्यंतावदाह अंतकालइति गतसाध्वसोमृत्युभयशून्यः (पुरुषः) असंगोनामानासक्तिः तेनशस्त्रेण (देहे) स्पृहांसुखे
च्छां तंदेहमनुयेपुत्रकलत्रादयस्तेष्वपिस्पृहांछिंद्यात् १५ किंच गृहात्प्रव्रजितोनिर्गतः गृहेस्थितस्यपुनरप्यासक्तिसंभवात् तत्राष्टांगयोगमाह धीरइतिब्रह्मचर्यादियमोपलक्षणं पुण्यतीर्थेतिस्ना
नादिनियमोपलक्षणं आसनमाह शुचाविति (शुचौशुद्धौ) विविक्तेएकांतेविधिवकुशाजिनचैलैःक्रमेणनिर्मिते (आसने आसीनः) १६

श्लोकाः ८/१६

इदंभागवतंनामपुराणंब्रह्मसंमितम् ॥ अधीतवान्द्वापरादौपितुर्द्वैपायनादहम् ८ परिनिष्ठितोऽपिनैर्गुण्येउत्तमश्लोकलीलया ॥ गृहीतचेताराजर्षेआख्यानंय
दधीतवान् ९ तदहंतेऽभिधास्यामिमहापौरुषिकोभवान् ॥ यस्यश्रद्दधतामाशुस्यान्मुकुंदेमतिःसती १०एतन्निर्विद्यमानानामिच्छतामकुतोभयम् ॥ योगिनां
नृपनिर्णीतंहरेर्नामानुकीर्त्तनम् ११ किंप्रमत्तस्यबहुभिःपरोक्षैर्हायनैरिह ॥ वरंमुहूर्तंविदितंघटेतश्रेयसेयतः १२ खट्वांगोनामराजर्षिर्ज्ञात्वेयत्तामिहायुषः ॥
मुहूर्त्तात्सर्वमुत्सृज्यगतवानभयंहरिम् १३ तवाप्येतर्हिकौरव्यसप्ताहंजीवितावधिः ॥ उपकल्पयतत्सर्वंतावद्यत्सांपरायिकम् १४ अंतकालेतुपुरुषआगतेगतसा
ध्वसः ॥ छिंद्यादसंगशस्त्रेणस्पृहांदेहेऽनुयेचतम् १५ गृहात्प्रव्रजितोधीरःपुण्यतीर्थजलाप्लुतः ॥ शुचौविविक्तआसीनोविधिवत्कल्पितासने १६

चूर्णिका ॥२॥

तादिदंभगवद्गुणानुकथनरूपंश्रीभागवतंनामपुराणंब्रह्मसंमितम् ८ अहंनैर्गुण्येपरिनिष्ठितोऽपिहरिलीलयागृहीतचेताः सन्द्वापरादौपितुःद्वैपायनात्अधीतवान् ९ तत्अहंतेअ
भिधास्यामि १०हेनृपमुमुक्षूणांअकुतोभयंइच्छतांनृणांएतदेवसाद्भिःनिर्णीतम् ११ १२ अल्पमेवमेआयुःअवशिष्टंकिमहंसाधयेयंइतिमाशुचइत्याहरेखट्वांगोनामराजामुहूर्त
मितंस्वायुःज्ञात्वासर्वंउत्सृज्यअभयंहरिंप्राप्तः १३ हेनृपतवतुसप्ताहंजीवितावधिरस्ति तावत् पारलौकिकंसाधनंसंपादय १४ अंतकालेप्राप्तेअसंगशस्त्रेणदेहादिसुखेच्छांछित्त्वा
१५ गृहात्प्रव्रज्याविविक्तेआसीनःसन् १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

जपगर्भप्राणायामंवक्तुंजप्यमाह त्रिवृदब्रह्माक्षरं त्रिवृत्‌त्रिभिरकारादिभिर्वर्तितग्रीथितंब्रह्माक्षरप्रणवे मनसाऽभ्यसदावितर्यत् मनसेन्द्रियप्रत्याहारंवक्तुंप्राणायामनेमनानियमनमाह मनोयच्छेद्वशी कुर्यात् ब्रह्मबीजंप्रणवमविस्मरन्नेव जितश्वासःसन् (रेचकादिक्रमेणजितप्राणःसन्) १७ प्रत्याहारमाह नियच्छेन्निगृह्णीयात् अक्षानिंद्रियाणि निश्चयात्मिकाबुद्धिःसारथिर्यस्यसः (अतोवि वेकयुक्तेनतेनमनसाप्रत्याहरेत्) धारणमाह मनइतिपुनश्चकर्मभिस्तद्वासनाभिराक्षिप्तमाकृष्टं शुभार्थे। (परममंगलार्थे) भगवद्रूपे। (धारयेत्) ध्यानमाह तत्रेति एकमेकंपादाद्यवयव अव्युच्छिन्नेनसमग्ररूपादवियुक्तेन आश्रयविशेषणसामन्यतश्चित्तस्थिरीकरणंधारणा अवयवविभावनयातद्दाढर्यंध्यानमितिभेदः समाधिमाह निर्विषयंमनोयुक्त्वासमाधायस्थिरीभूतेमनासि स्फुरत्परमानंदमात्राकारंकृत्वेत्यर्थः प्रसीदत्युपशाम्यति(तत् विष्णोःपरमंपदम्) १९ गुणवशात्पुनरपिक्षोभेसतिधारणामेवस्थिरीकुर्यादित्याह रजसाआक्षिप्तंतमसाविमूढंस्वीयंमनो (यच्छेत्) निरुंध्यात्तत्कृतंरजस्तमोभ्यांकृतं (रागादिमलं याधारणाहंति) २० (नकेवलं मलनाशोधारणायाःफलं किंतु भक्तिलक्षणोयोगश्चेत्यतआह) यतःयस्यांक्रियमाणायांभद्रंसुखात्मकमा श्रयंविषयं पश्यतस्तत्रैवप्रीतिर्भवति २१ यथायत्रयादृशीचेतिकर्तव्यताविषयतत्तद्विशेषाणांप्रश्नाः। (कथंकर्तव्याकाकीदृशीत्यर्थः) २२ यथेत्यस्योत्तरंजितासनइति विषयमाह स्थूलइतिसा धेन २३ विशेषोविराड्देहः अतिस्थूलानामपिस्थूलतरः सत्कार्यमात्रम् २४ अस्यचोपलक्षणत्वेनविषयत्वं वस्तुतस्तुविराड्जीवनियंताभगवानेवविषयइत्याह आंडकोशांतर्वर्तिनिकटाहएवपृथि व्यावरणंततअप्तेजोवाय्वाकाशाहंकारमहत्तत्वानीतिसप्त (तत्संयुतेयोवैराजपुरुषोभगवानसौधारणाविषयः) २५

॥ ३ ॥

श्लोकाः १७/२५

अभ्यसेन्मनसाशुद्धंत्रिवृद्ब्रह्माक्षरंपरम् ॥ मनोयच्छेज्जितश्वासोब्रह्मबीजमविस्मरन् १७ नियच्छेद्विषयेभ्योऽक्षान्मनसाबुद्धिसारथिः ॥ मनःकर्मभिराक्षिप्तं शुभार्थेधारयेद्धिया १८ तत्रैकावयवंध्यायेदव्युच्छिन्नेनचेतसा ॥ मनोनिर्विषयंयुक्त्वाततःकिंचननस्मरेत् ॥ पदंतत्परमंविष्णोर्मनोयत्रप्रसीदति १९ रजस्त मोभ्यामाक्षिप्तंविमूढंमनआत्मनः ॥ यच्छेद्धारणयाधीरोहंतियातत्कृतंमलम् २० यतःसंधार्यमाणायांयोगिनोभक्तिलक्षणः ॥ आशुसंपद्यतेयोगआश्रयंभद्र मीक्षतः २१ ॥ ॥ राजोवाच ॥ ॥ यथासंधार्यतेब्रह्मन्धारणायत्रसंमता ॥ यादृशीवाहरेदाशुपुरुषस्यमनोमलम् २२ ॥ श्रीशुकउवाच ॥ जिता सनोजितश्वासोजितसंगोजितेंद्रियः ॥ स्थूलेभगवतोरूपेमनःसंधारयेद्धिया २३ विशेषस्तस्यदेहोऽयंस्थविष्ठश्चस्थवीयसाम् ॥ यत्रेदंदृश्यतेविश्वंभूतंभव्यं भवच्चसत् २४ आंडकोशेशरीरेऽस्मिन्सप्तावरणसंयुते ॥ वैराजःपुरुषोयोऽसौभगवान्धारणाश्रयः २५

चूर्णिका

मनसाप्रणवंअभ्यसेत् किंच जितश्वासःसन् मनोवशीकुर्यात् १७ मनसाविषयेभ्यः इंद्रियाणिनियम्यबुद्ध्यामनः भगवद्रूपेधारयेत् १८ तत्रएकैकंपादाद्यवयवंध्यात्वाततः किंचननस्मरेत् यत्रमनःप्रसीदति तत्विष्णोःपदं १९ किंचरजस्तमोभ्यां आक्षिप्तंमनःधारणयानियच्छेत् २० यस्यांक्रियमाणायांभक्तियोगाःआशुसंपद्यते २१ राजोवाच ॥ हेब्रह्मन्हरेः यादृशभावनाकर्तव्यातांवद २२ श्रीशुकउवाच ॥ जितासनोजितश्वासोजितसंगोजितेंद्रियः इत्यादिनाभगवतः विराड्रूपेधियामनःसंधारयेत् २३ तद्राची यत्रत्रैकालिकंविश्वंदृश्यते२४ सःविराड्देहःतस्मिन्धारणाश्रयःभगवान् २५

॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विराड्देहतज्जीवतदंतर्यामिणाममेदमारोप्योपासनंकर्तव्यमित्याशयेनाह पातालंपादमूलंपादस्याधोभागं पातालादीनांतदवयवताविधीयतेपातालादीन्यतलांतान्यधस्तनादारभ्यसप्तभूविवराणि पठंतिगृणंतीत्यादिप्रमाणप्रदर्शनं पार्ष्णिप्रपदेपादस्यपश्चात्पुरोभागौ २६ ऊरुद्वयस्याधोभागेवितलमुत्तरभागेअतलमितिज्ञेयं नाभिरेवसरः २७ ज्योतिरनीकंज्योतिषांसमूहं स्वर्गंमहर्लोकंग्रीवेतिगृणंति (जनोलोकः वदनमितिगृणंति अस्यादिपुंसः) तपोलोकंररराटींललाटं सत्यंसत्यलोकम् (तुशिरांसिविदुः) २८ (इन्द्रादयः) उस्रादेवाः तेजोमयशरीरत्वात् (उस्रशब्द उपपन्नः) तेबाहवइत्याहुः दिशोऽस्मदादिश्रोत्राधिष्ठात्र्योदेवताः कर्णौश्रोत्रस्याधिष्ठानं शब्दस्तुश्रोत्रविषयः सतस्यश्रोत्रेंद्रियं एवंनासिकादिष्वपि नासत्यदस्रौअश्विनौनासेनासापुटे इद्धोदीप्तः २९ द्यौरंतरिक्षं अक्षिणीनेत्रगोलकेचक्षुरिंद्रियं पतंगःसूर्यःअहनीरात्र्यहनी (पक्ष्माणिनेत्रलोमानि) परमेष्ठिधिष्ण्यंब्रह्मपदम् (तस्यभ्रूविजृंभः) तालुअधिष्ठानं जिह्वाइंद्रियम् ३० छंदांसिवेदाः शिरोब्रह्मरंध्रं स्नेहकलाःपुत्रादिस्नेहलेशाः द्विजानिदंताः षंढत्वमार्षं (स्नेहोहिछेदसाधनंअतस्तस्यदन्तरूपत्वमुक्तं जनोन्मादकरीमायामोहनशक्तिः सतस्यहासः) दुरंतोऽपारःसर्गइतियत्सतस्य (अपांगमोक्षः) कटाक्षः ३१ (व्रीडालज्जाऊर्ध्वोष्ठः लोभस्त्वधरोष्ठः) अधर्ममार्गोऽस्यपृष्ठभागः कःप्रजापतिः मित्रौमित्रावरुणौ ३२ अनंतंवीर्यंयस्य (समातरिश्वावायुः) वयःकालस्तस्यगमनम् गुणप्रवाहः प्राणिनांसंसारःकर्म तस्यक्रीडा ३३ (अम्बुवाहान्मेघान्हेकुरुवर्य) भूम्नोविभोः अव्यक्तंप्रधानम् सप्रसिद्धश्चंद्रमास्तदीयं मनःसर्वेषांविकाराणांकोशइवाश्रयभूतम् ३४ विज्ञानशक्तिंचित्तम् महिंमहत्तत्त्वं (आमनंतिपठंति) अंतःकरणमहंकारम् गिरित्रंश्रीरुद्रं (अश्वादयोनखानितत्र) गर्दभाद्वडवायामुत्पन्नाश्वतरी ६५

श्लोकाः २६/३५

पातालमेतस्यहिपादमूलंपठंतिपार्ष्णिप्रपदेरसातलम् ॥ महातलंविश्वसृजोथगुल्फौतलातलंवैपुरुषस्यजंघे २६ द्वेजानुनीसुतलंविश्वमूर्तेरूरुद्वयंवितलंचातलंच ॥ महीतलंतज्जघनंमहीपतेनभस्तलंनाभिसरोगृणंति २७ उरस्थलंज्योतिरनीकमस्यग्रीवामहर्वदनंवैजनोऽस्य ॥ तपोररराटींविदुरादिपुंसःसत्यंतुशीर्षाणिसहस्रशीर्ष्णः २८ इंद्रादयोबाहवआहुरुस्राःकर्णौदिशःश्रोत्रममुष्यशब्दः॥ नासत्यदस्रौपरमस्यनासेघ्राणोऽस्यगंधोमुखमग्निरिद्धः २९ द्यौरक्षिणीचक्षुरभूत्पतंगःपक्ष्माणिविष्णोरहनीउभेच ॥ तद्भ्रूविजृंभःपरमेष्ठिधिष्ण्यमापोस्यतालूरसएवजिह्वा ३० छंदांस्यनंतस्यशिरोगृणंतिदंष्ट्रायमःस्नेहकलाद्विजानि ॥ हासोजनोन्मादकरीचमायादुरंतसर्गोयदापांगमोक्षः ३१ व्रीडोत्तरोष्ठोऽधरएवलोभोधर्मस्तनोऽधर्मपथोऽस्यपृष्ठः ॥ कस्तस्यमेढ्रंवृषणौचमित्रौकुक्षिःसमुद्रागिरयोऽस्थिसंघाः ३२ नद्योऽस्यनाड्योथतनूरुहाणिमहीरुहाविश्वतनोर्नृपेंद्र ॥ अनंतवीर्यःश्वसितंमातरिश्वागतिर्वयःकर्मगुणप्रवाहः ३३ ईशस्यकेशान्विदुरंबुवाहान्वासस्तुसंध्यांकुरुवर्यभूम्नः ॥ अव्यक्तमाहुर्हृदयंमनश्चसचंद्रमाःसर्वविकारकोशः ३४ विज्ञानशक्तिंमहिमामनंतिसर्वात्मनोंऽतःकरणंगिरित्रम् ॥ अश्वाश्वतर्युष्ट्रगजानखानिसर्वेमृगाःपशवःश्रोणिदेशे ३५

चूर्णिका

तस्यपादमूलंपातालं पार्ष्णिप्रपदेरसातलं गुल्फौमहातलं जंघेतलातलं २६ जानुनीसुतलं ऊरुद्वयंवितलंअतलंच जघनंमहीतलं नाभिर्नभस्तलं २७ उरःस्वर्गःग्रीवामहर्लोकः वदनंजनलोकः ललाटं तपोलोकः शीर्षाणिसत्यलोकः २८ इंद्रादयोबाहवः कर्णौदिशः श्रोत्रंशब्दःनासत्यौनासे घ्राणंगंधः अग्निःमुखं २९ अंतरिक्षं अक्षिणी चक्षुःसूर्यः रात्र्यहनीपक्ष्माणि भ्रूविजृंभः ब्रह्मपदं तालुः आपःरसोजिह्वा ३० शिरोवेदाः दंष्ट्रेयमः दंताःस्नेहलेशः हासोमाया सर्गःकटाक्षः ३१ उत्तरोष्ठोलज्जा अधरः लोभः धर्मःस्तनः पृष्ठःअधर्मः प्रजापतिःशिश्नं मित्रौवृषणौ समुद्राःकुक्षिः अस्थिसंघाःगिरयः ३२ नाड्यःनद्यः रोमाणिवृक्षाः श्वासः वायुः गतिःकालः संसारः कर्म ३३ केशाःमेघाः संध्यावासःप्रधानंहृदयम् मनःइंदुः ३४ चित्तंमहत्तत्वं अहंकारोरुद्रः नखानिअश्वादयःश्रोणिदेशेमृगादयः ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वयांसिपक्षिणस्तस्यव्याकरणं 'नामरूपेव्याकरवाणी' तिश्रुत्युक्तंशिल्पनैपुण्यं यथाहुः 'येनशुक्लीकृताहंसाःशुकाश्चहरितीकृताः मयूराश्चित्रितायेनसतेवृत्तिंविधास्याति'इति मनुः
स्वायंभुवः मनीषाबुद्धिः मनुजः पुरुषः निवासआश्रयः 'पुरुषत्वेचाविस्तरामात्मे' तिश्रुतेः गंधर्वादीनांद्वंद्वैक्यम् गंधर्वादयःस्वरस्मृतीः षड्जादिस्वरस्मृतयइत्यर्थः । असुरानीकंवीर्यंयस्यसः
स्वरः स्मृतिरसुरानीकवर्यइतिपाठेगंधर्वादयः स्वरःअसुरसमूहश्रेष्ठःप्रह्लादःस्मृतिस्तस्येति ३६ ब्रह्माविप्रस्तस्याननंमुखम् क्षत्रंक्षत्रियोभुजौयस्य विट्वैश्यः ऊरूयस्य अंघ्रिश्रितः कृष्णवर्णः
शूद्रोयस्य नानाभिधानामानियेषांतेचतेऽभीज्यादेवास्तेषांगणैर्वसुरुद्रादिभिरुपपन्नोयुक्तः द्रव्यात्मकोहविः साध्यः वितानयोगोयज्ञप्रयोगः तस्यकर्मकार्यं आवश्यकोऽभिप्रेतइत्यर्थः ३७ इयाने
तावान्सान्निवेशोऽवयवसंस्थानम् अस्मिन्स्वबुद्ध्यामनःसंधार्यतेमुमुक्षुभिः यतोव्यतिरिक्तंकिंचिन्नास्तिततस्मिन् ३८ तदेवंचित्तस्थैर्यार्थंविराड्देहजीवेश्वराणामभेदेनोपासनमुक्तम् तत्रतुदेहजीवावी
श्वरेप्रविलाप्यसएवध्येयइतिनिर्धारयति सइति सर्वेषांधीवृत्तिभिरनुभूतंसर्वंयेनसएकएवसर्वांतरआत्मातमेवसत्यंभजेत अन्यत्रोपलक्षणेनसज्जेत् यतआसंगादात्मनःपातःसंसारोभवति एकस्यत
त्तदिंद्रियैःसर्वानुभूतौदृष्टांतः स्वप्नजनानामीक्षितायथेति स्वप्नेहिकदाचिद्बहून्देहान्प्रकल्प्यजीवस्तत्तदिंद्रियैःसर्वंपश्यतितद्वत् ईश्वरस्यतुविद्याशक्तित्वान्नबंधः ३९ इतिद्वितीयस्कंधेटीकायांप्र०
ध्यायः ॥१॥ द्वितीयेतुततःस्थूलधारणातोजितंमनः ॥सर्वसाक्षिणिसर्वेशेविष्णौधार्यमितीर्यते १ दृश्यालंबनरूपैवमुक्तावैराजधारणा इहोच्यतेतुतत्साध्यासर्वांतर्यामिधारणा २ तत्रतावत्पूर्वोक्त
धारणायाअवांतरफलमाह एवंयाधारणातयातुष्टाद्धरेःपुराप्रलयसमयेनष्टांसृष्टिस्मृतिंप्रत्यवरुद्धयलब्ध्वाब्रह्माअप्ययात्प्रागिदंविश्वंयथासीत्तथाससर्ज व्यवसायात्मिकाबुद्धिर्यस्यसः (धारणायां
निश्चितबुद्धिरित्यर्थः) अतएवामोघादृष्टिर्यस्येति अतस्तयाधारणयाविश्वसृष्टिसामर्थ्यंभवति ॥ १ ॥

श्लोकाः ३६/१

वयांसितद्व्याकरणंविचित्रंमनुर्मनीषामनुजोनिवासः ॥ गंधर्वविद्याधरचारणाप्सरःस्वरस्मृतीरसुरानीकवीर्यः ३६ ब्रह्माननंक्षत्रभुजोमहात्माविडूरुरंघ्रि
श्रितकृष्णवर्णः ॥ नानाऽभिधाऽभीज्यगणोपपन्नोद्रव्यात्मकःकर्मवितानयोगः ३७ इयानसावीश्वरविग्रहस्ययःसन्निवेशःकथितोमयाते ॥ संधार्यतेऽस्मि
न्वपुषिस्थविष्ठेमनःस्वबुद्ध्यानयतोऽस्तिकिंचित् ३८ ससर्वधीवृत्त्यनुभूतसर्वआत्मायथास्वप्नजनेक्षितैकः ॥ तंसत्यमानंदनिधिंभजेतनान्यत्रसज्जेद्यतआ
त्मपातः ३९ इतिश्रीम०द्वितीयस्कंधेमहापुरुषसंस्थानुवर्णनेप्रथमोऽध्यायः ॥ १ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंपुराधारणयाऽऽत्मयोनिर्नष्टांस्मृ
तिंप्रत्यवरुध्यतुष्टात् ॥ तथाससर्जेदममोघदृष्टिर्यथाऽप्ययात्प्राग्व्यवसायबुद्धिः १

चूर्णिका ॥ ९ ॥

शिल्पेनैपुण्यंपक्षिणः बुद्धिर्मनुःनिवासोमनुजः गंधर्वादयः स्वराः प्रह्लादः स्मृतिः३६ब्राह्मणाःमुखम् भुजाः क्षत्रियाः ऊरूवैश्याः पादाःशूद्राः ३७इयानीश्वरविग्रहस्यसन्नि
वेशः मयातेकथितम् अस्मिन्बुद्ध्यामनः संधार्यते ३८ तंसत्यम् आनंदनिधिंभजेत नान्यत्रसज्जेत ३९ इतिद्वितीयेप्रथमः १ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवं
धारणायाआत्मयोनिःपुरानष्टंस्मृतिंलब्ध्वायथापूर्वंइदंसर्वंससर्ज १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपासनाफलादपिविरक्तस्यशुद्धात्मधारणायामधिकारोऽतोवैराग्यार्थंसर्वकर्मफलंनिंदति शाब्दंशब्दमयंब्रह्मवेदः तस्यएषपंथाःकर्मफलबोधप्रकारः कोऽसौ अर्थशून्यैरेवस्वर्गादिनामभिः साधकस्यधीर्ध्यायितितत्तदिच्छांकरोतीतियत् अपार्थत्वमेवाह तत्रमायामयेपथिसुखमितिवासनयाशयानः स्वप्नान्पश्यन्निवपरिभ्रमन्नर्थान्नविंदति तत्तल्लोकंप्राप्तोऽपिनिरवद्यंसुखंनलभतइत्यर्थः २ तर्हिसर्वथाकर्मफलत्यागेसद्यएवदेहपातःस्यादित्याशंक्याह अतःकविर्नामसुनाममात्रेषुभोग्येषुयावतार्थेनार्थोदेहनिर्वाहोयस्यसतथाभूतःस्यात् अप्रमत्तस्तावन्मात्रेप्यनासक्तः व्यवसायबुद्धिर्नेदंसुखमितिनिश्चयवान् तदापितत्रतस्मिन्नर्थेऽन्यथैवसिद्धेसतितत्रयत्नेपरिश्रमंपश्यन्नयतेत (तल्लाभाययत्नंनकुर्यात्) ३ अन्यथासिद्धिमाहद्वाभ्याम् सत्यामिति (क्षितौभूमौस्वतःसिद्धायांसत्यां) कशिपोःशय्यायाः (सम्पादनप्रयासैः किंनकिमपिप्रयोजनं) स्वतःसिद्धबाहौसतिउपबर्हणैरुच्छीर्षकैः (अञ्जलीरूपेपात्रेसति) पुरुधाबहुप्रकारयान्नपात्र्याभोजनपात्रेण (दिगितिदिगंबरेणपरिहितवल्कलेनवाभाव्यंकिंवित्तसाध्यैर्दुकूलादिभिरित्यर्थः) ४ ननु दिक्सद्भावोनामनग्नत्वमेव वल्कलमन्नंतोयंवासःस्थानंतुर्याचाप्रयत्नंविनाकथंप्राप्येतत्राह चीराणिवस्त्रखंडानि (पथिगृहस्थैर्विहितानि तथाचस्मृति ‘ पट्टचीराणिगृहिभिर्देयानिपथितोरणे दरिद्राणांचभिक्षूणामाच्छादनकराणिचे’ तिअंघ्रिपावृक्षाः) परान्नबिभ्रतिपुष्णंतिफलादिभिर्ये (भिक्षांफलादिरूपांनदिशंतिकिंकिंवासरितस्यंदमानानद्यः (किमशुष्यन्) गुहाःगिरिदर्यः ननुकदाचिदेषामलाभेकिंकार्यंतत्राह अजितो (विश्वंभरो) हरिरुपसन्नान्शरणागतान्किंनावति नरक्षति किंशब्दस्यपूर्वत्रापिसंबंधः धनेनयोदुर्मदस्तेनांधान्नष्टविवेकान् ५ तदातेनकिंकर्तव्यंहरिस्तुसेव्यइत्याह एवंविरक्तःसस्तंभजेत भजनीयत्वेहेतवः स्वचित्तेस्वतएवसिद्धः यतःआत्मा अतएवप्रियः प्रियस्यचसेवासुखरूपैव (किंच) अर्थःसत्योनत्वनात्मवन्मिथ्या भगवान्भजनीयगुणश्चअनंतश्चनित्यः यएवंभूतस्तंभजेत नियतार्थःनिश्चितस्वरूपः (स्वात्मत्वेनावधृतभमवद्भावइत्यर्थः अतएव) तदनुभवानंदेननिर्वृतःसन्निति स्वतःसुखात्मत्वंदर्शितम् किंच यत्रयस्मिन्भजनेसतिसंसारहेतोरविद्यायाउपरमोनाशोभवति ६

श्लोकाः २/६

शाब्दस्यहिब्रह्मणएषपंथायन्नामभिर्ध्यायतिधीरपार्थैः ॥ परिभ्रमंस्तत्रनविंदतेऽर्थान्मायामयेवासनयाशयानः २ अतःकविर्नामसुयावदर्थःस्यादप्रमत्तोव्यवसायबुद्धिः ॥ सिद्धेऽन्यथाऽर्थेनयतेततत्रपरिश्रमंतत्रसमीक्षमाणः ३ सत्यांक्षितौकिंकशिपोःप्रयासैर्बाहौस्वसिद्धेह्युपबर्हणैःकिम् ॥ सत्यंजलौकिंपुरुधाऽन्नपात्र्यादिग्वल्कलादौसतिकिंदुकूलैः ४ चीराणिकिंपथिनसंतिदिशंतिभिक्षांनैवांघ्रिपाःपरभृतःसरितोऽप्यशुष्यन् ॥ रुद्धागुहाःकिमजितोऽवतिनोपसन्नान्कस्माद्भजंतिकवयोधनदुर्मदांधान् ५ एवंस्वचित्तेस्वतएवसिद्धआत्माप्रियोर्थोभगवाननंतः ॥ तन्निर्वृतोनियतार्थोभजेतसंसारहेतूपरमश्चयत्र ६

चूर्णिका

हेराजन्साधकस्यधीःव्यर्थैःस्वर्गादिनामभिः तत्तदिच्छंकरोतिइतियत्सः वेदस्यकर्मफलबोधनप्रकारः परंतुतत्तल्लोकंप्राप्तोऽपिनिरवद्यंसुखंनलभते २ अतःकविःभोग्येर्थेअन्यथासिद्धेसति यत्नश्रमंपश्यन् नयतेत ३ तदाह सत्यांक्षितौकिंकशिपोःप्रयासैर्बाहौस्वसिद्धेह्युपर्हबर्हणैःकिं ॥ सत्यंजलौकिंपुधान्नपात्र्यादिग्वल्कलादौसतिदुकूलैः ४ चीराणि किंपथिनसंतिदिशंतिं भिक्षांनैवांघ्रिपाः परभृतः सरितोऽप्यशुष्यन् ॥ रुद्धागुहाःकिमजितोवतिनोपसन्नान्कस्माद्भजंतिकवयोधनदुर्मदांधान् ५ एवंविरक्तःसन् स्वचित्तेस्वतएवंसिद्धंआत्मानंभजेत् यद्भजनेनअविद्यानाशोभवति ६ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवान्यचिंतानिंदयाद्रढयति कइति तांतथाभूतांपरस्यहरेरनुचिंतांधारणामनादृत्यपशून्कर्मजडान्विना 'यथापशुरेवायंसदेवानामि'तिश्रुतेः असतींविपयचिंतांकोनामकुर्यात् त्रया।चिंतयावै
तरण्यांपतितम् तत्रचस्वकर्मजानाध्यात्मिकादिक्लेशान्सेवमानंजनंपश्यन् वैतरणीयमस्यद्वारस्थानदीतत्तुल्यत्वासंसृतिर्वैतरणी (साहिवैतरणविदेहरूपानविण्मूत्रशोणितादिमलपिंडान्वहाति)
७ तामेवधारणांसविशेषणामाह केचिदितिपड्भिः स्वदेहस्यांतमध्येयद्धृदयंतत्रयोवकाशस्तस्मिन्वसंतम् प्रादेशस्तर्जन्यंगुष्ठयोर्विस्तारः सएवमात्राप्रमाणंयस्येति हृदयपरिमाणंतत्रोपचर्यंते कंजं
पद्मम् रथांगंचक्रम् (धारणया समग्रमूर्तौचित्तस्थिरीकरणेन) ८नलिनंपद्मंतद्वत्प्रसन्नेआयतेदीर्घेईक्षणेयस्य कदंबकुसुमस्यकिंजल्काःकेसरास्तद्वत्पिशंगेपीतेवाससीयस्यः लसंतिमहारत्नानियेषु
तानिसुवर्णमयान्यंगदानियस्य स्फुरंतिचतानिमहारत्नानिचतन्मयानिकिरीटकुंडलानियस्य ९ उन्निद्रंविकासितंयद्धृत्पंकजंतस्यकर्णिकैवालयःस्थानंतस्मिन् योगेश्वरैरास्थापितौपादपल्लवौयस्य
श्रीरेवलक्ष्माचिह्नंतद्युक्तं।पामादिविहितोमत्वर्थीयोनप्रत्ययः।कौस्तुभरत्नंकंधरायांयस्य अम्लानालक्ष्मीःशोभायस्यास्तयावनमालयाऽऽचितंव्याप्तम् १०स्निग्धत्वाद्विशिष्टैःकुंतलैर्विरोचमानेआन
नेयोहासस्तेनपेशलंसुंदरम् (तत्राकुंचितत्वमीषद्वक्रत्वम्) ११ अदीनमुदारंयल्लीलाहसितंतेनयदीक्षणंतस्मिन्नुल्लसंतोयेभ्रूभंगाभ्रूविक्षेपास्तैःसंसूचितोभूरिरनुग्रहोयेन चिंतामयंचिंतयाआविर्भवं
तम् (ईक्षेतचिंतयेत्) किंयंतंकालमीत्यत्राह यावत्समग्रांगेमनोवतिष्ठतेस्थिरीभवतितावत् १२ अस्यैवध्यानमाह एकैकशइति (पादादियावद्धसितम् अंगानिअवयवान्) अनुभावयेद्ध्यायेत्
यद्यज्जितमयत्नतस्फुरितंपादगुल्फादिस्थानमवयवस्तत्तदपोह्यत्यक्त्वापरंपरंजंघाजान्वादिधारयेद्ध्यायेत् (यथायथाधीः) शुध्यतितस्मिन्निश्चलाभवति १३ पूर्वोक्तवैराजधारणायाएतद्द्वार
णांगत्वमाह यावदितिपरेब्रह्मादयोऽवरेयस्मात् कुतः विश्वेश्वरेद्रष्टरि नतुदृश्ये चैतन्यघनत्वात् (एतादृशेयावत्) भक्तियोगःप्रेमलक्षणः क्रियावसानेआवश्यककर्मानुष्ठानानंतरं अनेनकर्मा
पिभक्तियोगपर्यंतमेवेत्युक्तं प्रयतोनियमतत्परः (शुद्धःप्रयत्नवानितिवा)१४

श्लोकाः ७/१४

कस्तांत्वनादृत्यपरानुचिंतामृतेपशूनसतींनामयुंज्यात् ॥ पश्यञ्जनंपतितंवैतरण्यांस्वकर्मजान्परितापाञ्जुषाणाम् ७ केचित्स्वदेहांतर्हृदयावकाशेप्रादेशमात्रं
पुरुषंवसंतम् ॥ चतुर्भुजंकंजरथांगशंखगदाधरंधारणयास्मरंति ८ प्रसन्नवक्त्रंनलिनायतेक्षणंकदंबकिंजल्कपिशंगवाससम् ॥ लसन्महारत्नहिरण्मयांगदंस्फुर
न्महारत्नकिरीटकुंडलम् ९ उन्निद्रहृत्पंकजकर्णिकालयेयोगेश्वरास्थापितपादपल्लवम् ॥ श्रीलक्ष्मणंकौस्तुभरत्नकंधरमम्लानलक्ष्म्यावनमालयाचितम् १०
विभूषितंमेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमानाननहासपेशलम् ११ अदीनलीलाहसितेक्षणोल्लसद्भ्रूभं
गसंसूचितभूर्यनुग्रहम्॥ईक्षेतचिंतामयमेनमीश्वरंयावन्मनोधारणयाऽवतिष्ठते १२एकैकशोऽगानिधियानुभावयेत्पादादियावद्धसितंगदाभृतः ॥जितंजितंस्थान
मपोह्यधारयेत्परंपरंशुध्यतिधीर्यथायथा १३यावन्नजायेतपरावरेऽस्मिन्विश्वेश्वरेद्रष्टरिभक्तियोगः ॥ तावत्स्थवीयःपुरुषस्यरूपंक्रियावसानेप्रयतःस्मरेत १४

चूर्णिका

तांधारणांत्यक्त्वापशून्विनाविषयचिंतांकोनामकुर्यात् ७ केचित्स्वदेहांतर्हृदयावकाशेप्रादेशमात्रंचतुर्भुजंशंखादियुक्तं ८ पीतवाससं किराटांगदकुंडलं ९ कौस्तुभश्रीवत्सवन
मालायुक्तं प्रसन्नवक्त्रंनलिनायतेक्षणं १०मेखलहारविभूषितंनूपुरकंकणादिभिरलंकृतंईश्वरंईक्षते यावन्मनोधारणयावतिष्ठते ११ १२ किंच गदाभृतः पादादियावद्धासितं
एकैकशः अंगानिध्यायेत् तत्राजितंजितंस्थानंत्यक्त्वापरंपरंअवयवंध्यायेत् १३ एवंविश्वेश्वरेयावद्भक्तियोगः नजायतेतावत्प्रयतःसन् क्रियावसनेपुरुषस्यरूपंस्मरेत् १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंतावदासन्नमृत्योःपुंस कृत्यमुक्तमिदानींतस्यैवस्वयंदेहंत्यक्तुमिच्छतः कृत्यमाह स्थिरमितिसार्द्धैश्चतुर्भिः अंगहेराजन् एवंभूतोयतिः (प्रयत्नवान्) यदेमंलोकंदेहंजिहासुर्हा
तुमिच्छतितदादेशेपुण्यक्षेत्रेकालेचोत्तरायणादौमनोनसज्जयेत् संगंनप्रापयेत् नहिदेशकालौयोगिनःसिद्धिहेतू किंतु योगएवेतिदृढनिश्चयोभूत्वास्थिरंसुखकरंचासनमास्थितःप्राणांनियच्छे
दित्यर्थः १९ तत्गृहीताविपर्ययंमनः बुद्धया (अमलयाशुद्धया) निश्चयरूपयानियम्यतन्मात्रंकृत्वा एतांबुद्धिंक्षेत्रज्ञेबुद्ध्यादिद्रष्टरिनिनयेत्प्रविलापयेत् तंचक्षेत्रज्ञमात्मनिशुद्धेतंचशुद्धमात्मा
नमात्मैवाहमित्यात्मनिशुद्धेब्रह्मण्यवरुद्धचैकीकृत्यलब्धोपशांतिः प्राप्तनिर्वृतिःसन् कृत्याद्विरमेत्ःततःपरंप्राप्याभावात् १६ तदेवाह नयत्रेति यत्रात्मस्वरूपेकालोनप्रभुः किमपिकर्तुंनसमर्थः
अतएवदेवानप्रभवइत्याह अनिमिषांदेवानांपरःप्रभुः कालोऽपियत्रनप्रभुस्तत्रकुतोनुदेवाःप्रभवेयुःदेवानियम्यानांतुजगतांप्राणिनांकावार्तेत्याह जगतामिति कुतोनप्रभवंतीत्यपेक्षायांनिरुपाधित्वा
दित्याह नयत्रेति यद्वा जगत्कारणान्यपिनयस्यसृष्टयादौप्रभवंतीत्याह नयत्रेति विकारोऽहंकारः (महान्महत्तत्त्वंप्रधानंप्रकृतिः) १७ निरुपाधित्वंकुतइत्यतआह परमिति यद्यस्मादततआ
त्मव्यातिरिक्तंनेतिनेतीत्येवमुत्स्रष्टुमिच्छवोदौरात्म्यंदेहाद्यात्मत्वंविसृज्याहस्यपूज्यस्यश्रीविष्णोःपदंपदेपदेक्षणेक्षणेहृदाउपगुह्यआश्लिष्यनान्यस्मिन्सौहृदंयेषांतथाभूताः संतस्तद्वैष्णवंपदमत
एवपरंसर्वतःश्रेष्ठमामनंतीत्यन्वयः १८(ततःकिमतआहइ त्थमिति) तस्मादित्थंब्रह्मत्वेनव्यवस्थितोमुनिरुपरमेत् तुशब्देनयदिप्रयास्यन्निति वक्ष्यमाणात्सकामाद्विशेषउक्तः तमाह विज्ञायतेऽने
नेतिविज्ञानंशास्त्रंतेनजातादृग्ज्ञानंतस्यवीर्यंबलंतेनसुरंधिताः विहिंसिताआशयाविषयवासनायस्यसः इदानींतस्यदेहत्यागप्रकारमाह स्वपार्ष्णिनापादमूलेनगुदंमूलाधारमापीड्यनिरुद्धयानिरु
द्धयानिलंप्राणं (आधाराच्चतुर्दलात्) उन्नमयेत् ऊर्ध्वंनयेत् जितक्लमोयेन षट्सुस्थानेषुनाभ्यादिषु १९ नाभ्यांमणिपूरकेस्थितं (उदानगत्याब्रह्मनाड्या) हृद्यनाहतचक्रेऽधिरोप्य उरसि
कंठादधोदेशेस्थितेविशुद्धिचक्रे मनस्वीजितचित्तः (ततश्चक्राद्यथानाड्यन्तरंनगच्छेत्तथाधियानुसंधाय) स्वतालुमूलंतस्यैवचक्रस्याग्रदेशम् ततोवहुधागमनसंभवाच्छनकैरित्युक्तम् २० तस्माद्
भ्रुवोरंतरमाज्ञाचक्रम् निरुद्धानिश्रोत्रेनेत्रेनासिकेमुखंचेत्येवंसप्तायतनानिप्राणमार्गायेनसः अनपेक्षश्चेत्परंब्रह्मगतःसन् मूर्द्धन्मूर्धनिब्रह्मरंध्रेनिर्भिद्यदेहमिंद्रियाणिचविसृजेत् २१

श्लोकाः १९/२१

स्थिरंसुखंचासनमाश्रितोयतिर्यदाजिहासुरिमंगलोकं ॥ कालेचदेशेचमनोनसज्जयेत्प्राणंनियच्छेन्मनसाजितासुः १९ मनःस्वबुद्धयाऽमलयानियम्यक्षेत्रज्ञ
एतांनिनयेत्तमात्मनि ॥ आत्मानमात्मन्यवरुध्यधीरोलब्धोपशांतिर्विरमेतकृत्यात् १६ नयत्रकालोऽनिमिषांपरःप्रभुःकुतोनुदेवाजगतांयईशिरे ॥ नयत्रस
त्त्वंनरजस्तमश्चनवैविकारोनमहान्प्रधानं १७ परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः ॥ विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्याऽर्हपदम्प
देपदे १८ इत्थंमुनिस्तूपरमेद्व्यवस्थितोविज्ञानदृग्वीर्यसुरंधिताशयः ॥ स्वपार्ष्णिनाऽऽपीड्यगुदंततोऽनिलंस्थानेषुषट्सून्नमयेज्जितक्लमः १९नाभ्यांस्थितं
हृद्यधिरोप्यतस्मादुदानगत्योरसितंनयेन्मुनिः ॥ ततोऽनुसंधायधियामनस्वीस्वतालुमूलंशनकैर्नयेत २० तस्माद्भ्रुवोरंतरमुन्नयेतनिरुद्धसप्तायतनोऽनपेक्षः
॥ स्थित्वामुहूर्तार्द्धमकुंठदृष्टिर्निर्भिद्यमूर्द्धन्विसृजेत्परंगतः २१

चूर्णिका

अथयतिः इमंलोकंजिहासुः स्थिरआसनआश्रितः मनसमासहप्राणांनियच्छेत् १९ मनः क्षेत्रज्ञेबुद्धयानियम्यतंआत्मनिनियम्यआत्मैवाहमितिलब्धशांतिःसन् कृत्या
द्विरमेत १६ तदेवाह यत्रकालसत्त्वादिगुणादयः समर्थाःन १७तद्वैष्णवंपदंहृदोपगुह्यमुनिरुपरमेत् १८इदानींतस्यदेहत्यागप्रकारमाह पुरुषः स्वपार्ष्णिनागुदंपीड्यजितश्रमः
सन्वायुंषट्सुस्थानेषुउन्नमयेत् १९ तदाह नाभ्यांमणिपूरकचक्रेस्थितंप्राणंहृदि अनाहतचक्रेअधिरोप्यततःउरसिविशुद्धिचक्रेनीत्वा ततःस्वतालुमूलंनीत्वा २०ततःशनैःभ्रुवोरं
तरंनीत्वाब्रह्मरंध्रंनिर्भिद्यदेहंविसृजेत् २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सद्योमुक्तिमुक्त्वाक्रममुक्तिप्रकारमाह यदीतिदशभिः यदितुपारमेष्ठ्यंपदंप्रयास्यन्भवति (ब्रह्मलोकंप्रयातुकामोभवेदित्यर्थः) उतवैहायसांखेचराणांसिद्धानांयाद्विहारंक्रीडास्थानम् कीदृशम् अष्टावाधिपत्यान्याणिमाद्यैश्वर्याणियस्मिंस्तदपिप्रयास्यन् (उतशब्दोऽप्यर्थे)[१] गुणसन्निवायेगुणसमुदायरूपेब्रह्मांडे सर्वत्रेत्यर्थःतर्हिदेहत्यागावसरेमनश्चेंद्रियाणिचनत्यजेत् किंतुतैः सहैवतत्तल्लोकभोगार्थंगच्छेत् २२यतःकर्मगतिवन्नयोगगतिः परिच्छिन्नेत्याह योगेश्वराणांत्रिलोक्याअंतर्बहिश्चमहर्लोकादिषुब्रह्मांडाद्बहिश्चगतिमाहुःअत्रहेतुःपवनस्यांतः आत्मालिंगशरीरंयेषामितिविद्याउपासना तपोभगवद्धर्मः योगोऽष्टांगः समाधिर्ज्ञानं तान्येवभजंतितेषांयागतिस्ताम्(कर्मभिः कर्मठानप्राप्नुवंति)२३ताम्(योगिनांगतिं)आहवैश्वानरमित्यष्टभिः विहायसाआकाशेन तत्रचब्रह्मलोकपथेनगतःसन्प्रथमंवैश्वानरमग्न्यभिमानिनींदेवतांयाति केनोपायेन सुषुम्नयानाड्या साचदेहाद्बहिरपिवितितास्तीत्याह शोचिषाज्योतिर्मय्याविधूतस्त्यक्तः कल्कोमलोयेनसः क्वाप्यसज्जमानइत्यर्थः उदस्तादुपरिष्टाद्वर्तमानंहरेः संबंधितारारूपम् नारायाणाधिष्ठितमित्यर्थः शैशुमारंचक्रंपंचमस्कंधेवक्ष्यमाणंशिशुमाराश्रयंज्योतिश्चक्रम् चक्रस्थान्यादित्यादिध्रुवांतानिपदानिप्रयातीत्यर्थः २४ तद्विष्णोश्चक्रंविश्वस्यनाभिंसूर्याद्याश्रयभूतम् आविष्टलिंगत्वान्नाभिशब्दस्यनपंढत्वम् अतिवर्त्यअतिक्रम्य परतःस्वर्गिणांगत्यभावादेकएवनिर्मलेनलिंगशरीरेणब्रह्मविदांस्थानमन्यैर्नमस्कृतंमहर्लोकमुपैति यस्मिन्विबुधामहाकल्पायुषोभृग्वादयः २५ अथोअनंतरंकल्पांतेसविश्वंत्रैलोक्यमातिशयेनदह्यमानंनिरीक्ष्य तत्राप्यूष्मप्राप्तेः यत्द्विपरार्द्धस्थायि तत्पारमेष्ठ्यंपदंप्रतिनिर्याति सिद्धेश्वरैर्जुष्टानिधिष्ण्यानिविमानानियस्मिंस्तत् उइतिश्रैष्ठ्यंसूचितम् (द्वयोः परार्धयोः संबंधिद्वैपरार्ध्यंब्रह्मणआयुषोर्धपरार्धम्) २६ तदेवाह नयत्रेति आर्तिर्दुःखम् उद्वेगोभयम् (आधिरितिपाठेव्यसनंचित्तदुःखंवाएतानियत्रनसंति) किंतु चित्ततोहेतोः यद्दुःखमदकृतेतदेकंविना तत्कुतोभवति अनिदंविदामिदंभगवतोध्यानमजानतांप्राणिनां दुरंतदुःखोयः प्रभवोजन्मतस्यान्वनुदर्शनात् तेषांकृपया यद्वा चित्ततोदोमनःपीडेतियत्ताद्विनाकुतश्चिदपियत्रशोकादयोनसंतीति तत्रब्रह्मलोकंगतानांत्रिविधागतिःयेपुण्योत्कर्षेणगतास्तेकल्पांतरेपुण्यतारतम्येनाधिकारिकाभवंति येतुहिरण्यगर्भाद्युपासनाबलेनगतास्तेब्रह्मणासहमुच्यंते येतुभगवदुपासकास्तेस्वेच्छयाब्रह्मांडंभित्वावैष्णवंपदमारुहंति २७

यदिप्रयास्यन्नृपपारमेष्ठ्यंवैहायसानामुतयाद्विहारम् ॥ अष्टाधिपत्यंगुणसन्निवायेसहैवगच्छेन्मनसेंद्रियैश्च २२ योगेश्वराणांगतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मनाम् ॥ नकर्मभिस्तांगतिमाप्नुवंतिविद्यातपोयोगसमाधिभाजाम् २३ वैश्वानरंयातिविहायसागतःसुषुम्नयाब्रह्मपथेनशोचिषा ॥ विधूतकल्कोऽथहरेरुदस्तात्प्रयातिचक्रंनृपशैशुमारम् २४ तद्विश्वनाभिंत्वतिवर्त्यविष्णोरणीयसाविरजेनात्मनैकः ॥ नमस्कृतंब्रह्मविदामुपैतिकल्पायुषोयद्विबुधारमंते २५ अथोअनंतस्यमुखानलेनदंदह्यमानंसनिरीक्ष्यविश्वम् ॥ निर्यातिसिद्धेश्वरजुष्टधिष्ण्यंयद्द्वैपरार्द्ध्यंतदुपारमेष्ठ्यम् २६ नयत्रशोकोनजरानमृत्युर्नार्तिर्नचोद्वेगऋतेकुतश्चित् ॥ यच्चित्ततोदःकृपयाऽनिदंविदांदुरंतदुःखप्रभवानुदर्शनात् २७

चूर्णिका एवंसद्योमुक्तिंउक्त्वाक्रममुक्तिमाह हेनृपयदिपारमेष्ठ्यादिपदानिगंतुमिच्छति तर्हिमनसेंद्रियैश्चसहतत्तल्लोकभोगार्थंगच्छेत् २२ योगेश्वराणांगतिः त्रिलोक्याःअंतःबहिश्चभवति कर्मिणः तांगतिंनाप्नुवंति २३ सः योगीसुषुम्नयाशैशुमारंचक्रंयाति २४ ततःतद्भित्वा एकएव लोकनमस्कृतंमहर्लोकमुपैति २५ ततः प्रलयेइदंविश्वदह्यमानंवीक्ष्यपारमेष्ठ्यंयाति २६ तत्रशोकादयोनतत्रब्रह्मलोकगतानांत्रिविधागतिः येपुण्योत्कर्षेणगताः तेऽधिकारिकाभवंति येतुहिरण्यगर्भाद्युपासनाबलेनगतास्तेब्रह्मणासहमुच्यंते येतु भगवदुपासकाःतेस्वेच्छयाब्रह्मांडंभित्त्वावैष्णवंपदंयांति २७

१ उशब्देन सूचितं श्रैष्ठ्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रप्रस्तुतस्यभगवद्भक्तस्यब्रह्मांडभेदनप्रकारमाह ततइत्यादिना तत्रेयंप्रक्रिया ईश्वराधिष्ठितायाःप्रकृतेःकेनचिदंशेनमहत्तत्त्वंभवति तस्यांशेनाहंकारः तस्यांशेनशब्दतन्मात्रद्वारानभः तस्यांशेनस्पर्शतन्मात्रद्वारावायुः तस्यांशेनरूपतन्मात्रद्वारातेजःतस्यांशेनरसतन्मात्रद्वाराआपःतदंशेनगंधतन्मात्रद्वारापृथ्वी तैश्चमिलितैश्चतुर्दशभुवनात्मंविराट्शरीरम् तस्यपंचाशत्कोटियोजनविशालस्यपृथिव्येवांडकटाहविशेषशब्दवाच्याकोटियोजनविशालंप्रथमावरणम् पंचाशत्कोटियोजनविशालमित्येके ततश्चाबादीनांयेपरिणताअंशास्तान्येवोत्तरोत्तरंदशगुणान्यावरणानि अष्टमंतुप्रकृत्यावरणंव्यापकमेव तदेवंस्थितेपृथिव्याद्यावरणभेदप्रकारःकथ्यते ततोविशेषंप्रतिपद्य लिंगदेहेनपृथिव्यात्मतांप्राप्येत्यर्थः एवमुत्तरत्रापिद्रष्टव्यम् निर्भयः कथंयास्यामीतिशंकाशून्यः तेनात्मनापृथिवीरूपेण तन्निरंतराआपः प्रतिपद्यात्वरस्त्वरामकुर्वन् तत्तदात्मत्वेनक्लेददाहादिशंकाभावाद्यथेष्टंभोगान्भुंजानइत्यर्थः एवंज्योतिर्मयःसन् कालेभोगावसाने बृहदात्मलिंगंपरमात्ममूर्तित्वेनोपासनेषूक्तम् यद्वा वेदशब्दात्मनातस्यप्रमापकमितिः२८ इंद्रियार्थानांभूतसूक्ष्माणांअतिक्रममाह (घ्राणेनेतियोगी) घ्राणेनाधिष्ठितेनगंधमुपेत्य (गंधात्मतांप्राप्यएवंरसनादिभिरभिष्ठितैरसादिभूतसूक्ष्मतांतत्र) श्वसनंस्पर्शम् नभोगुणत्वंशब्दात्मताम् प्राणेनतत्तत्कर्मेंद्रियेणआकूतिंतत्तत्क्रियाम् २९ तदेवंस्थूलसूक्ष्मभूतातिक्रममुक्त्वातदावरणभूताहंकारप्राप्त्यामहदादिप्राप्तिमाह सयोगीविकार्यंसंसाद्यविज्ञानतत्त्वंयाति विविधंकार्यमस्येतिविकार्योऽहंकारः सत्रिविधःतामसोराजसःसात्विकइति तत्रतामसाज्जडानिभूतसूक्ष्माणिजायंते राजसाद्बहिर्मुखानिदशेंद्रियाणि सात्विकान्मनइंद्रियदेवताश्चतेपांलयश्चतत्तदहंकारे तत्रभूतसूक्ष्माणामिंद्रियाणांचसन्निकर्पलयस्थानम् तामसंराजसंचमनोमयंदेवमयंचसात्विकंप्राप्य गत्याएवंगमनेन तेनाहंकारेणसह विज्ञानतत्त्वंमहत्तत्त्वंयाति ततःगुणानांसन्निरोधोलयोयस्मिंस्तत्प्रधानंयाति ३० तेनात्मनाप्रधानरूपेणानंदमयःसन्नुपाधीनामवसानेशांतमविकृतमानंदंपरमात्मानमुपैति (अंगहेराजन्सपुनरिह) नविपज्जतेनावर्ततइत्यर्थः ३१ सृतीमार्गौ प्रकारावित्यर्थःहेन्टप अनपेक्षोनिर्भिद्यमूर्धन्विसृजेत्परंगतइतियासद्योमुक्तिःसैकासृतिः यदिप्रयास्यन्नित्यादिनाक्रममुक्तिश्चद्वितीयासृतिंएतेसृतीवेदेनगीतेउक्तेनतुस्वोत्प्रेक्षिते तत्रः'यदासर्वेप्रमुच्यंतेकामायेऽस्यहृदिश्रिताः अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुत' इतिसद्योमुक्तिः' तेऽर्चिरभिसंभवंती' त्यादिनाक्रममुक्तिश्चवेदेनोक्ताः यद्वा नकर्मभिस्तांगतिमाप्नुवंतीतिदक्षिणमार्गस्यापिसूचितत्वादेतेसृतीइतिद्विवचनम् त्वयाऽभिपृष्टे यच्छ्रोतव्यमित्यादिप्रश्नेनार्थान्मुक्तिविषयेद्वेअपिसृतीपृष्टे ब्रूहियद्वाविपर्ययमितिदक्षिणमार्गोऽप्यर्थात्पृष्टः एवंत्वयाचयेपृष्टेएतेसृतीइत्यन्वयः ३२

श्लोकाः २८/३२

ततोविशेषंप्रतिपद्यनिर्भयस्तेनात्मनाऽपोऽनलमूर्तिरत्वरन् ॥ ज्योतिर्मयोवायुमुपेत्यकालेवाय्वात्मनाखंबृहदात्मलिंगम् २८ घ्राणेनगंधंरसनेनवैरसंरूपंतुदृष्ट्याश्वसनंत्वचैव ॥ श्रोत्रेणचोपेत्यनभोगुणत्वंप्राणेनचाकूतिमुपैतियोगी२९ सभूतसूक्ष्मेंद्रियसन्निकर्षंमनोमयंदेवमयंविकार्यम्॥संसाद्यगत्यासहतेनयातिविज्ञानतत्त्वंगुणसन्निरोधम् ३० तेनात्मनाऽत्मानमुपैतिशांतमानंदमानंदमयोऽवसाने ॥ एतांगतिंभागवतींगतोयःसवैपुनर्नेहविषज्जतेंऽग ३१ एतेसृतीतेनृपवेदगीतेत्वयाऽभिपृष्टेहसनातनेच ॥ येवैपुराब्रह्मणआहपृष्टआराधितोभगवान्वासुदेवः ३२

चूर्णिका

प्रस्तुतस्यभक्तस्यब्रह्मांडभेदनप्रकारमाह भक्तस्तुपृथिव्यादीनांशरीरेयेअंशाः तेपृथिव्यादिषुविलाप्य २८ २९ ३० अनेनक्रमेणआनंदमयःसन्शांतंआत्मानंउपैति ३१ हेनरदेवतेएतौमार्गौगीतौ ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संतिसंसरतःपुंसोबहवोमोक्षमार्गास्तपोयोगादयः तत्रसमीचीनस्त्वयमेवेत्याह नहीति यतोऽनुष्ठितात् (भगवति) भक्तियोगोभवेदतो(मार्गात्) अन्यः शिवःसुखरूपोनिर्विघ्नश्च (पन्था) नास्त्येव ३३ कुतएतदतआह भगवान्ब्रह्मा कूटस्थोनिर्विकारः एकाग्रचित्तःसन्नित्यर्थः त्रिस्त्रीन्वारान् कात्स्न्येनसाकल्येनब्रह्मवेदमन्वीक्ष्यविचार्य यतः (आत्मन्) आत्मनिहरौरतिर्भवेत्तदेवमनीषयाध्यवस्यत्निश्चितवान् ३४ नन्वनुभूतेऽर्थेरतिर्भवति अननुभूतेतुभगवतिकथंरतिःस्यात्तत्राह भगवान्(सर्वेषुभूतेषु) लक्षितःदृष्टःकथम् स्वात्मनाक्षेत्रज्ञांतर्यामितया कैर्दृश्यैर्बुद्ध्यादिभिः तदेवद्वेधादर्शयति दृश्यानांजडानांदर्शनंस्वप्रकाशंद्रष्टारंविनानघटतइत्यनुपपत्तिमुखेन लक्षणैःस्वप्रकाशांतर्यामिलक्षणैः तथाबुद्ध्यादीनिकर्तृप्रयोज्यानि करणत्वात् वास्यादिवत् इतिव्याप्तिमुखेनानुमापकैः अनुमितिजनकैः स्वतंत्रश्चकर्त्तेत्येवमीश्वरसिद्धिः ३५ यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति तस्मादिति (सर्वदेशेषुसर्वकालेषुचसर्वप्रकारेणश्रवणकीर्तनादिभिर्हरिरेवसेव्यइत्यर्थः) ३६ श्रवणादिफलमभिनयेनाह पिबंतीति सतामात्मत्वेनप्रकाशमानस्य (भगवतः) कथैवामृतम् विषयैर्विदूषितंमलिनीकृतमाशयं (अन्तःकरणम्) पुनंतिशोधयंति तस्यचरणपद्मांतिकंश्रीविष्णुपदं (-प्रतीत्यर्थः) व्रजंति ३७ ॥ ॥ इतिद्वितीयस्कंधेटीकायांद्वितीयोऽध्यायः २ ॥ छ ॥ ॥ तृतीयेविष्णुभक्तेस्तुवैशिष्ट्यंशृण्वतोमुनेः भक्त्युद्रेकेणतत्कर्मश्रवणादरईर्यते १ इदानीमन्यदेवताभजनस्यापिपुत्रादिभजनवदेवतुच्छफलत्वेनहेयत्वंवक्तुंपूर्वोक्तमनुवदाति एवमिति समेतिमांकदाचिद्दैवयोगेनमनुष्यत्वंप्राप्तेषुजीवेषुयेमनीषिणस्तेषां (कर्तव्यंयद्भवान्पृष्टवान्) तत्रापियेम्रियमाणास्तेषां विशेषतः (यत्पृष्टवान्) तत् एवमेतद्धरिकथाश्रवणादिकंनिगदितं विहितमित्यर्थः १ (अथसकामानांतत्तत्कामनावशेनदेवतांतरवचनंविधत्ते ब्रह्मवर्चसकामःश्रुताध्ययनसंपत्कामः) ब्रह्मणस्पतिंवेदस्यपतिंब्रह्माणम् यजेततत्तत्तंत्रोक्तत्तद्द्रव्यैरितिशेषः) इंद्रियपाटवकामस्त्विंद्रम् प्रजाकामः (संततिकामोजनकामोवा) प्रजापतीन्दक्षादीन् २ मायांदुर्गाम् विभावसुमग्निम् वसुकामोधनार्थी वीर्यप्रभावस्तत्कामोवीर्यवान् (यत्नवान्सन्नित्यर्थः) रुद्रान्यजेत ३

नह्यतोऽन्यःशिवःपंथाविशतःसंसृताविह ॥ वासुदेवेभगवतिभक्तियोगोयतोभवेत् ३३ भगवान्ब्रह्मकात्स्न्येंनत्रिरन्वीक्ष्यमनीषया ॥तदध्यवस्यत्कूटस्थोरतिरात्मन्यतोभवेत् ३४ भगवान्सर्वभूतेषुलक्षितःस्वात्मनाहरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टालक्षणैरनुमापकैः ३५ तस्मात्सर्वात्मनाराजन्हरिःसर्वत्रसर्वदा ॥ श्रोतव्यः कीर्तितव्यश्चस्मर्तव्योभगवान्नृणाम् ३६ पिबंतियेभगवतआत्मनःसतांकथामृतंश्रवणपुटेषुसंभृतम् ॥ पुनंतितेविषयविदूषिताशयंव्रजंतितच्चरणसरोरुहांतिकम् ॥ ३७ ॥ ॥ इतिश्रीमद्भागवतेद्वितीयस्कंधेपुरुषसंस्थावर्णनंनामद्वितीयोऽध्यायः २ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवमेतन्निगदितंपृष्टवान्यद्भवान्मम ॥ नृणांयन्म्रियमाणानांमनुष्येषुमनीषिणाम् १ ब्रह्मवर्चसकामस्तुयजेतब्रह्मणस्पतिम् ॥ इंद्रमिंद्रियकामस्तुप्रजाकामःप्रजापतीन् २ देवींमायांतुश्रीकामस्तेजस्कामोविभावसुम् ॥ वसुकामोवसून्रुद्रान्वीर्यकामोऽथवीर्यवान् ३

श्लोकाः ३३/३

चूर्णिका

इहसंसारे वासुदेवभक्तिंविनाअन्यःशिवःपंथाःन ३३ ३४ ३५ हेराजन् तस्मात् सर्वात्मनाहरिः श्रोतव्यः कीर्तितव्यः स्मर्तव्यः ३६ येहरिकथामृतंपिबंतितेपूतात्मानः तच्चरणसरोरुहांतिकंव्रजंति ३७ ॥ ॥ इतिद्वितीयेद्वितीयः २ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् भवान् यत् पृष्टवान् तत्म्रियमाणानांनृणामेतत्निगदितम १ अथब्रह्मवर्चसकामःब्रह्माणंयजेत इंद्रियकामःइंद्रम् प्रजाकामःदक्षादीन् २ श्रीकामःदुर्गाम् तेजस्कामःअग्निम् द्रव्यकामःवसून् वीर्यकामः रुद्रान् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अन्नाद्यंभोज्यंभक्ष्यंच आदितेः सुतान्द्वादशादित्यान् (राज्ञः कर्मराज्यंतत्कामोविश्वान्देवान्) विशांदेशेस्थप्रजानां (संसाधकः)स्वाधीनतामिच्छन् साध्यान्यजेत् ४ इलांपृथ्वीम् प्रतिष्ठा स्थानादप्रच्युतिः (तत्कामो) रोदसीद्यावाभूमी(मातरौलोकस्यमातापितरावित्यर्थः तत्रद्यौः पिता 'तन्मातापृथिवीतत्पिताद्यौ'रितिश्रुतिदर्शनाद्यद्यप्यद्यौश्चवृष्ट्यादिनामाप्यवल्लोकंपालयतीति मातैव) ९(रूपामिकामः सौन्दर्याभिलाषी) अप्सराश्चासौउर्वशीचताम् ६ यज्ञंयज्ञोपाधिंविष्णुम् कोशोवसुसंचयः वसुकामइत्यत्रधनमात्रमितिभेदः (कोशोनिधिर्वा) दांपत्यंदंपत्योरन्योन्यप्रीतिस्तदेवार्थोयस्यसः ७ धर्मार्थोधर्मकामः उत्तमश्लोकोपाधिंविष्णुम् तंतुंतन्वन्संतानवृद्धिमन्विच्छन् रक्षाबाधानिवृत्तिस्तत्कामः पुण्यजनान्यक्षान् ओजोबलंतत्कामोमरुद्गणान्देवान् ८ राज्यं राजत्वंतत्कामोमनून्देवान्मन्वंतरपालकान्देवान् राज्ञःकर्मराज्यंतत्कामोविश्वान्देवानितिविशेषः अभिचरन्शत्रुमरणमिच्छन्निर्ऋतिंराक्षसम् कामकामःभोगेच्छुः अकामोवैराग्यकामःपुरुषंपरंप्रकृतिव्यतिरेकोपाधिमीश्वरम् ९ अकामएकांतभक्तःउक्तानुक्तसर्वकामोवा पुरुषंपूर्णंनिरुपाधिम्(परमेश्वरंउदारामहतीविवेकवतीधीरस्य) १०पूर्वोक्तनानादेवतायजनस्यापिसंयोगपृथक्त्वेनभक्तियोगफलत्वमाह एतावानिति इंद्रादीनापियजतामिहतत्तद्यजनेनभागवतानांसंगतो (सहवासात्) भगवत्यचलोभावोभक्तिर्भवतीति(यत् देवतांतरभजनपुण्येन भागवतसमागमस्तेनचभगवत्येकांतभक्तियोगइतियदित्यर्थः) एतावानेवनिःश्रेयसस्यपरमपुरुषार्थस्योदयोलाभः अन्यत्तुस्वर्गादिसर्वंतुच्छमित्यर्थः ११ भागवतसंगतइत्यनेनसूचितां (तेषांसदसिप्रसक्तां) हरिकथारतिंस्तौति ज्ञानमिति यत्यासुकथासुज्ञानंभवति कीदृशम् आसर्वतः प्रतिनिवृत्तमुपरतंगुणोर्मीणांरागद्वेषादीनांचक्रंसमूहोयस्मात्तत् उतअनंतरंतद्धेतुरात्मप्रसादश्च (मनसः प्रसन्नतेत्यर्थः) यत्रयासुमनःप्रसादहेतुर्गुणेषुविषयेष्वसंगोवैराग्यंच उभयत्रेतिपाठेइहामुत्रचगुणेष्वसंगः अथ कैवल्यमित्येवसंमतःपंथा एतादृशो) योभक्तियोगः (सोपियत्रभवति) तासुहरियथासुनिर्वृतः श्रवणसुखेन (शांतिप्राप्तः सन्) अन्यत्रानिर्वृतइतीतवा कोरतिंनकुर्यात् १२

श्लोकाः ४/१२

अन्नाद्यकामस्त्वदितिंस्वर्गकामोदितेःसुतान् ॥ विश्वान्देवान्राज्यकामःसाध्यान्संसाधकोविशाम् ४ आयुःकामोऽश्विनौदेवौपुष्टिकामइलांयजेत् ॥ प्रतिष्ठाकामःपुरुषोरोदसीलोकमातरौ ५ रूपाभिकामोगंधर्वान्स्त्रीकामोऽप्सरउर्वशीम् ॥ आधिपत्यकामःसर्वेषांयजेतपरमेष्ठिनम् ६ यज्ञंयजेद्यशस्कामःकोशकामःप्रचेतसम् ॥ विद्याकामस्तुगिरिशंदांपत्यार्थउमांसतीम् ७ धर्मार्थउत्तमश्लोकंतंतुंतन्वान्पितॄन्यजेत् ॥ रक्षाकामःपुण्यजनानोजस्कामोमरुद्गणान् ८ राज्यकामोमनून्देवान्निर्ऋतिंत्वभिचरन्यजेत् ॥ कामकामोयजेत्सोममकामःपूरुषंपरम् ९ अकामःसर्वकामोवामोक्षकामउदारधीः ॥ तीव्रेणभक्तियोगेनयजेतपुरुषंपरम् १० एतावानेवयजतामिहनिःश्रेयसोदयः ॥ भगवत्याचलोभावोयद्भागवतसंगतः ११ ज्ञानंयदाप्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसादउतयत्रगुणेष्वसंगः ॥ कैवल्यसंमतपथस्त्वथभक्तियोगःकोनिर्वृतोहरिकथासुरतिंनकुर्यात् १२

चूर्णिका

अन्नादिकामो अदितिम् स्वर्गकामः आदित्यान् राज्यकामःविश्वान्देवान् देशस्थप्रजानांस्वाधीनतांइच्छन् साध्यान् ४आयुःकामःअश्विनौ पुष्टिकामः इलां प्रतिष्ठाकामोद्यावापृथिवी ५ रूपकामोगंधर्वान्स्त्रीकामःउर्वशींसर्वेषांआधिपत्यकामः परमेष्ठिनम् ६ यशःकामः यज्ञम् कोशस्कामोवरुणम् विद्याकामःशंभुम् दांपत्यप्रीतिकामः उमाम् ७ धर्मकामः विष्णुम् पुत्रकामःपितॄन् बाधानिवृत्तिकामः यक्षान् ८राज्यकामोमनून् शत्रुवधकामःराक्षसं विषयकामः सोमं वैराग्यकामः विष्णुं बलकामोमरुद्गणान् ९ अकामःसर्वकामोवामोक्षकामोवाभक्तियोगेनपरंपुरुषंयजेत १० इहयजतांयद्भगवतिभावः सत्संगश्च एतावान्एवनिःश्रेयसोदय ११ अतःहरिकथासुरतिंकोनकुर्यात् १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द्वि. अभिव्याहृतमुक्तम् (व्यासपुत्रं) ऋषिंपरब्रह्मदर्शिनम् कविंशब्दब्रह्मनिष्णातम् १३ श्रवणेच्छायांहेतुः हरिकथाएवउदर्कउत्तरफलंयासुताःकथाःसतांभागवतानांसदसिसभायांस्युः (ध्रुवंनिश्चि अ०
तंतत्रनेतरकथाप्रसंगइत्यर्थः) अतएतच्छ्रोतुकामानांनः (अस्माकंवक्तुमर्हसि) १४ एवत्प्रपंचयति सवाइतिद्वाभ्याम् (बालक्रीडाभिःक्रीडन्नितरक्रीडांविहाय) कृष्णपूजादिरूपां
कृष्णविषयांक्रीडांयः(आददे)स्वीकृतवान् १५ (उरुभिर्महद्भिर्गीयते) उरुगायस्तस्यगुणैरुदारामहत्यःकथाःस्युरेव १६ किंच वृथैववक्षीयमाणमायुर्हरिकथयासफलंकुर्वित्याशयेनाहत्रिभिःआयुरिति
टीका असौसूर्यउद्यन्नुद्गच्छन्अस्तमदर्शनंचयन्गच्छन् (सन्) यत्येनपुंसाउत्तमश्लोकस्यवार्तय।क्षणोनीतस्तस्यआयुर्ऋतेवर्जयित्वाऽन्येषांवृथैवहरति१७ननु जीवनमेवतेषामायुषःफलमस्तितत्राह तरव ॥ ३ ॥
इति ननु तेषांश्वासोनास्तितर्हिभस्त्राश्चर्मकोशाः (श्वसंतिलोहसंतापनाद्यर्थंफूत्कारंकुर्वंति) ननु तासामाहारादिकंनास्तितत्राह नखादंतिनाश्नंति नमेहंतिरेतःसेकंमैथुनंनकुर्वंतिकिम् उतअ
॥१३॥ पिनराकारंपशुंमत्वा (तद्विलक्षणपशुत्वात्) आह अपरेइति१८ तदेवाह (यस्यकर्णपथंकदाचिदपिश्रीकृष्णोनागतःसपुरुषाकारः पशुः) श्वादिभिसंस्तुतःसदृशोनिरूपितइत्यर्थः यस्यकर्ण
पथंकदाचिदपिनागतःसः अवज्ञास्पदत्वाच्छ्वभिःकश्मलविषयासक्तत्वाद्विड्वराहैर्ग्राम्यशूकरैःकंटकवद्दुःखदविषयासक्तत्वादुष्ट्रैर्भारवाहित्वात्खरैस्तुल्यइत्यर्थः १९ तस्यांगानिच (श्रोत्रादीनिभग
वत्सेवारहितानिचेत) निष्फलानीत्याह बिलेइतिपंचभिः बतेतिखेदे (उरुक्रमस्य उत्तमश्लोकस्यहरेर्विक्रमान्) नशृण्वतोऽशृण्वतोनरस्ययेकर्णपुटेतेबिले (पर्वतादेरिव) वृथारंध्रे। नचेदुपगा
यतितस्यजिह्वाअसतीदुष्टादर्दुरोभेकस्तद्वीयाजिह्वेव २० (पट्टेन) पट्टवस्त्रोष्णीषेणकिरीटेनचजुष्टमपिशिरोयदिननमेत्तर्हिकेवलंभारएव शवोमृतकस्तत्करतुल्यौ लसंतीकांचनकंकणे
ययोस्तौ अप्यर्थेवाशब्दः ॥ २१ ॥

शौनकउवाच ॥ इत्यभिव्याहृतंराजानिशम्यभरतर्षभः ॥ किमन्यत्पृष्टवान्भूयोवैयासकिमृषिंकविम् १३ एतच्छुश्रूषतांविद्वन्सूतनोऽर्हसिभाषितुं ॥ कथाहरि श्लोकाः
कथोदर्काःसतांस्युःसदसिध्रुवम् १४ सवैभागवतोराजापांडवेयोमहारथः ॥ बालक्रीडनकैःक्रीडन्कृष्णक्रीडांयआददे १५ वैयासकिश्चभगवान्वासुदेवपरा
यणः ॥ उरुगायगुणोदाराःसतांस्युर्हिसमागमे १६ आयुर्हरतिवैपुंसामुद्यन्नस्तंचयन्नसौ ॥ तस्यर्तेयत्क्षणोनीतउत्तमश्लोकवार्तया १७ तरवःकिन्नजीवंति १३/२१
भस्त्राःकिन्नश्वसंत्युत ॥ नखादंतिनमेहंतिकिंग्रामपशवोऽपरे १८ श्वविड्वराहोष्ट्रखरैःसंस्तुतःपुरुषःपशुः ॥ नयत्कर्णपथोपेतोजातुनामगदाग्रजः १९ बिले
बतोरुक्रमविक्रमान्येनशृण्वतःकर्णपुटेनरस्य ॥ जिह्वाऽसतीदार्दुरिकेवसूतनचोपगायत्युरुगायगाथाः २० भारःपरंपट्टकिरीटजुष्टमप्युत्तमांगंननमेन्मुकुंदम् ॥
शावौकरौनोकुरुतःसपर्यांहरेर्लसत्कांचनकंकणौवा २१

चूर्णिका ॥ ॥ शौनकउवाच ॥ ॥ राजाइतिश्रुत्वाशुकंप्रतिकिंअन्यत् पृष्टवान् तद्वद १३ १४ १५ १६ किंच असौसूर्यः अस्तंउदयंचगच्छन्प्राणिनांआयुर्वृ
थाहरति हरिकथयायत्क्षणोनीतःतंऋते १७ ननुजीवनमेवतेषांआयुषः फलमितिचेत्तर्हि तरवःकिंनजीवंति भस्त्राः किंनश्वसंत्युत नखादंतिनमेहंतिकिंग्रामपशवो परे १८ ॥१३॥
नयत्कर्णपथोपैतोजातुनामगदाग्रजः श्वविड्वराहोष्ट्रखरैः संस्तुतःपुरुषःपशुः १९ किंच नरस्यकर्णपुटे उरुक्रमविक्रमान् येनशृण्वतःतेबिलेएव याहरिगाथाः नगायति
सादार्दुरिकेवजिह्वा २० यत् मुकुंदंननमेत् तत् शिरः परंभारः हरेःपूजांयौनकुरुतःतौकरौशवतुल्यौ २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनयेनविष्णोर्मूर्तीर्नैनिरीक्षतोनिरीक्षेतेतेवर्हायितेमयूरपिच्छनेत्रतुल्ये (इत्यर्थः क्षेत्राणिपुण्यस्थानानियत्रसन्निहितोहरिस्तानिनानुव्रजतः) द्रुमवज्जन्मभजतइतितथा वृक्षमूलतुल्यावित्यर्थः २२ (भागवतस्यभगवद्भक्तस्यांघ्र्योर्भगवत्संबंधिनोरंघ्र्योर्वारेणुं) नाभिलभेतअभितोनस्पर्शेनधारयेत् (सजीवन्नपिशवोमृततुल्यइत्यर्थः) श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाः (तुलस्यागंधं) नवेदेति (निःश्वासेन) अवघ्रायनाभिनंदेदित्यर्थः (सश्वसन्नपिमृतकतुल्यः)२३ (विष्णोर्नामभिर्यद्धृदयंनविक्रियेतततत्) अश्मवत्सारोबलंकाठिन्यंयस्य (अयसासदृशमित्यर्थः) विक्रियालक्षणमाह अथेति गात्ररुहेषुरोमसु हर्षःउद्गमः २४ (अङ्गहेसूत) यस्मादभक्तस्यसर्वमेतद्व्यर्थम् यस्मात्मनसोऽनुकूलंप्रियंचब्रूषे अथअतःकारणात् नृपतिनासाधुपृष्टःसन्वैयासकिर्नृपतिंप्रतियदाहतदभिधेहीति (आत्मविद्यायांविशारदःपटुतरःभागवतप्रधानःभगवद्भक्तेषुमुख्यः अनेनशुश्रूषायांहेतुरुक्तः) २५ ॥ ॥ इतिद्वितीयस्कंधेटीकायांतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ ॥ तुर्येपरीक्षिताप्रृष्टंसृष्ट्यादिहरिचेष्टितम् । शुकेनब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते १ ॥ राज्ञःप्रश्नंकथयितुंतस्यप्राक्तनींस्थितिमाहचतुर्भिः वैयासकेःशुकस्य इतिएवंभूतमात्मनस्तत्त्वस्यनिश्चयोयस्मात्तद्वचउपधार्याकलय्य सतींकृष्णएवसेव्योनान्यइत्येवंभूताम् (साध्वींऔत्तरेयःपरिक्षित्) १ आत्मादेहः पशवोगजादयः (अविकलेसर्वांगसंपूर्णेनिरूढाम पिममताम्) २ इममेवार्थंहरिलीलालक्षणम् (कृष्णस्यानुभावः प्रभावस्तच्छ्रवणे) ३ संस्थांमृत्युं विज्ञाय त्रैवर्गिकंधर्मार्थकामप्रधानं (कर्म)संन्यस्यत्यक्त्वाआत्मभावंपरमप्रेम्णाभगवदात्मत्वंगतःप्राप्तःसन्पप्रच्छ ४

बर्हायितेतेनयनेनराणांलिंगानिविष्णोर्ननिरीक्षतोये ॥ पादौनृणांतौद्रुमजन्मभाजौक्षेत्राणिनानुव्रजतोहरेर्यौ २२ जीवञ्छवोभागवतांघ्रिरेणुंनजातुमर्त्योऽभिलभेतयस्तु ॥ श्रीविष्णुपद्यामनुजस्तुलस्याःश्वसञ्छवोयस्तुनवेदगंधम् २३ तदश्मसारंहृदयंबतेदंयद्गृह्यमाणैर्हरिनामधेयैः ॥ नविक्रियेताथयदाविकारोनेत्रेजलंगात्ररुहेषुहर्षः २४ अथाभिधेह्यंगमनोनुकूलंप्रभाषसेभागवतप्रधानः ॥ यदाहवैयासकिरात्मविद्याविशारदोनृपतिंसाधुपृष्टः २५॥ ॥ इतिश्रीमद्भाग० महा० द्विती० तृतीयोऽध्यायः ३ ॥ ॥ ७ ॥ ॥ सूतउवाच ॥ ॥ वैयासकेरितिवचस्तत्त्वनिश्चयमात्मनः ॥ उपधार्यमतिंकृष्णऔत्तरेयःसतींव्यधात् १ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ राज्येचाविकलेनित्यंविरूढांममतांजहौ २ पप्रच्छचेममेवार्थंयन्मांपृच्छथसत्तमाः ॥ कृष्णानुभावश्रवणेश्रद्दधानोमहामनाः ३ संस्थांविज्ञायसंन्यस्यकर्मत्रैवर्गिकंचयत् ॥ वासुदेवेभगवतिआत्मभावंदृढंगतः ४

चूर्णिका ॥१४॥

येविष्णोःमूर्तिंननिरीक्षतःतेनयनेवर्हायिते हरेःक्षेत्राणियौनगच्छतःतौपादौद्रुमाविव २२ साधूनांअंघ्रिरेणुंयःनलभेत्सःजीवन्शवः यःतुलस्याःगंधंनवेद सःश्वसन्शवः २३ यद्धरिनामभिःनविक्रियेतत‍द्धृदयं अश्मसारमित्यादि २४ हेसूतवैयासकिःनृपतिंप्रार्तयत्आत्मावद्यांआहतांनःअभिधेहि २५ ॥ ॥ इतिद्वितीयेतृतीयः ॥ ३ ॥ ॥ ७ ॥ ॥ सूतउवाच परीक्षित् आत्मतत्त्वनियामकंशुकवचोनिशम्यकृष्णेसतींमतिंव्यधात् १ देहजायासुतागारपशुद्रविणबंधुषु राज्येचममतांत्यक्त्वा २ कृष्णानुभावश्रवणेश्रद्दधानः त्रैवर्गिकंकर्मफलंहित्वाइममेवार्थंपुनःपप्रच्छ ३ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(स्वाभीष्टंप्रष्टुंतावच्छुकवचनंस्तौतिसमीचीनमिति) मह्यंममतमोऽज्ञानंविशीर्यतेनश्यति तवकथयतःसतः अतःसमीचीनम् (वचस्तवेति) ५ (भूयःएवविवित्सामि) पुनश्चवेदितु मिच्छामि इदंदुर्विभाव्यमवितर्क्यंविश्वंयथासृजाति ६ गोपायतिपालयति संयच्छतेसंहरते पुरुशक्तिर्बहुशक्तिमान् क्रीडन्यथाकरोति आत्मानंब्रह्मादिरूपिणंक्रीडयन् (स्वयंचक्रीडन्नुपाश्रि त्यअधिष्ठायविश्वस्ययदपेक्षितं तदपिसर्वसाधनजातं करोति) विकरोतिविविधंकरोति (तंप्रकारंविवित्सामीति) ७ (भगवच्चेष्टाविषयस्यज्ञानस्यदुर्लभत्वात् त्वयैवसर्वज्ञेनवक्तुंयोग्यं तदि त्यभिप्रायेणाह नूनमिति कविरपिदुर्विभाव्यम् किमन्यैरित्यर्थः)८एकःपुरुषरूपेणयुगपत् जन्मभिर्ब्रह्माद्यवतारैः क्रमशोवा (जन्मभिःभूरिशःकर्माणिसृष्ट्यादीनिकुर्वन्) यथाप्रकृतेर्गुणान्गृह्णाति ९ (एतन्मम) विचिकित्सितंसंदिग्धम् (यथायथावत्) शाब्देब्रह्मणिविचारेणनिष्णातःपरस्मिन्ननुभवेन १० उपामंत्रितः प्रार्थितः प्रचक्रमे देवतागुरुनमस्कारादिरूपमुपक्रमंकृतवानित्यर्थः ११ तदेवाह त्रयोदशभिः (नमइति) परस्मैसर्वोत्तमाय तत्रहेतुः भूयसेऽपरिमितमहिम्ने तद्दर्शयति सतःप्रपंचस्यउद्भवादिषुनिमित्तभूतायालीलातयागृहीतंब्रह्मादिरूपेणरजआदिशक्तित्रितयंये नतस्मैअंतर्भवायांतर्यामिणे अतएवसर्वांतरत्वादनुपलक्ष्यंवर्त्मयस्य १२ विचित्रफलदातृत्वमनुस्मरन्प्रणमति भूयःपुनश्चनमः सतांधर्मवर्तिनां वृजिनच्छिदेदुःखहंत्रे असतामधर्मशीलानां असंभवाया नुद्भवहेतवे (अत्रहेतुः) अखिलसत्त्वमूर्तयेतत्तद्देवतादिरूपेणतत्तत्फलदात्रेत्यर्थः समग्रसत्त्वमूर्तयेइतिवा । पुनरपिपूर्वोक्तमयवैलक्ष्यण्यमाह । पारमहंस्येप्रत्यक्निष्ठारूपेआश्रमेव्यवस्थितानांपुं सामनुमृग्यमतन्निरसनेनपुनः पुनर्मृग्यंयदात्मतत्त्वंतस्यदाशुषेदात्रे ‘ दाशृदाने’इतिधातुः १३

श्लोकाः ५/१३

॥ ॥ राजोवाच ॥ ॥ समीचीनंवचोब्रह्मन्सर्वज्ञस्यतवानघ ॥ तमोविशीर्यतेमह्यंहरेःकथयतःकथाम् ५ भूयएवविवित्सामिभगवानात्ममायया ॥ य थेदंसृजतेविश्वंदुर्विभाव्यमधीश्वरैः ६ यथागोपायतिविभुर्यथासंयच्छतेपुनः ॥ यांयांशक्तिमुपाश्रित्यपुरुशक्तिःपरःपुमान् ॥ आत्मानंक्रीडयन्क्रीडन्करो तिविकरोतिच ७ नूनंभगवतोब्रह्मन्हरेरद्भुतकर्मणः ॥ दुर्विभाव्यमिवाभातिकविभिश्चापिचेष्टितम् ८ यथागुणास्तुप्रकृतेर्युगपत्क्रमशोपिवा ॥ बिभर्तिभूरि शस्त्वेकःकुर्वन्कर्माणिजन्मभिः ९ विचिकित्सितमेतन्मेब्रवीतुभगवान्यथा ॥ शाब्देब्रह्मणिनिष्णातःपरस्मिंश्चभवान्खलु १० ॥ ॥ सूतउवाच ॥ ॥ इत्युपामंत्रितोराज्ञागुणानुकथनेहरेः ॥ हृषीकेशमनुस्मृत्यप्रतिवक्तुंप्रचक्रमे ११ ॥ ॥ श्रीशुकउवाच ॥ ॥ नमःपरस्मैपुरुषायभूयसेसदुद्भवस्थाननिरो धलीलया ॥ गृहीतशक्तित्रितयायदेहिनामंतर्भवायानुपलक्ष्यवर्त्मने १२ भूयोनमःसद्वृजिनाच्छिदेऽसतामसंभवायाऽखिलसत्त्वमूर्त्तये ॥ पुंसांपुनःपारमहंस्य आश्रमेव्यवस्थितानामनुमृग्यदाशुषे १३

चूर्णिका

॥ राजोवाच ॥ ॥ हेब्रह्मंस्तेवचः समीचीनं येनमम अज्ञानंनश्यति ५ अतअहंपृच्छामि यथाभगवान् आत्ममाययाइदंविश्वंसृजति ६ गोपायाति सं यच्छति स्वयंक्रीडन् एवंशक्त्याकरोति ७ हरेश्चेष्टितंकविभिर्दुर्ज्ञेयमिवाभाति ८ किंच प्रकृतेःगुणान्एकः परमात्मायुगपत्क्रमशोबिभर्ति तत्मेवद ९ भवान् शाब्देपरे चब्रह्मणिनिष्णातोस्ति १० ११ श्रीशुकउवाच परस्मैप्रपंचस्यउद्भवस्थाननिरोधेषुनिमित्तभूतलीळयागृहीतशक्तित्रितयायपुरुषायनमः १२ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सात्वतांभक्तानामृषभायपालकाय कुयोगिनांभक्तिहीनानांविदूराकाष्ठादिग्मपियस्य दुर्ज्ञेयावेत्यर्थः तदेवंवैषम्यप्रतीतावपिनिर्दोषत्वायाचिंत्यमैश्वर्यमाह निरस्तंसाम्यमतिशयश्चयस्य यदपेक्षयान्य
स्यसाम्यमतिशयश्चनास्तितेनराधसाऐश्वर्येण स्वधामनि (स्वयंप्रकाशे) स्वस्वरूपेब्रह्मणि (रंस्यते) रममाणाय (नमोस्तु) १४ सर्वसाधनेभ्योभक्तेःश्रैष्ठ्यमनुस्मरन्प्रणमति यत्कीर्तं
नमितिद्वाभ्याम् अर्हणंपूजनम् सुभद्रंमंगलंश्रवोयशोयस्यतस्मै (सुमंगलकीर्तये) १५ विचक्षणा विवेकिनोयस्यचरणयोरुपसादनादुपसत्तेर्भजनात् अंतरात्मनोमनसः उभयत्रेहचपरत्रचसंगं
(तं)व्युदस्यनिरस्य गतक्लमाःप्रयासरहिताः (ब्रह्मस्वरूपमनुभवंति) १६ भक्तिशून्यानां(तु)सर्वसाधनैवफल्यंदर्शयन्नमोत तपस्विनइति (तपःकृच्छ्रादिदानंतुलापुरुषादियशोयज्ञादिज
न्याकीर्तिस्तद्वंतः) मनस्विनोयोगिनः (मंत्रविदःवैदिकतांत्रिकमंत्राणांवेत्तारः) सुमंगलाःसदाचाराःयस्मिंस्तपआद्यर्पणंविना सुभद्रश्रवसेइत्यस्यावृत्तिर्यशःश्रवणादेःप्राधान्यज्ञापनाय
१७ भक्तेःपरमशुद्धिहेतुत्वंदर्शयन्नाह किरातादयोयेपापजातयः अन्येचयेकर्मतःपापरूपास्तेयदुपाश्रयाभागवतास्तदाश्रयाःसंतः शुध्यंति (किंपुनर्भगवदाश्रयाद्विजादयः) असंभावनाशं
कांपरिहरति प्रभविष्णवेप्रभवनशीलायेति (तत्र किराताःशबराः। वैदेहीजात्पुल्कस्यांजाता हूणाःवैश्याद्ब्रह्मण्यांजाता वैदेहकःवैदेहकपुत्रविशेषा आंध्राः।निष्टयात्किरातीजाताःपुलिंदाश्चंडाल
पुत्रविशेषाःपुल्कसाः । ब्राह्मणादम्बष्ठस्यकन्यायांजाताःआभीराः एवंकंकादयोजातिविवेकाभिधानग्रंथतोनीचजातिभेदाज्ञेयाः) १८ सर्वोपास्यत्वमनुस्मरन्प्रार्थयते सएषआत्मवतांधी
राणामात्माआत्मत्वेनोपास्यइत्यर्थः त्रयीमयत्वादिविशेषणैस्तत्तन्मार्गेणोपास्यत्वंविवक्षितम् (यतोधीश्वरोयम्) गतव्यलीकैर्निष्कपटैर्भक्तैः (ब्रह्मरुद्रादिभिः) वितर्क्यंमत्याश्चर्येणवी
क्षणीयंलिंगंमूर्तिर्यस्यसःप्रसीदतु १९ सर्वपालकत्वमनुस्मरन्नाह श्रियइति (अन्धकवृष्णिसात्वतांपतिः) गतिश्चसर्वापत्सुरक्षकः (श्रियःपतिरित्यादिनातत्तदभीष्टसिद्धये तत्तद्गुणविशि
ष्टस्यहरेरेवप्रसादःप्रार्थनीयोनतुदेवतांतरस्येतिसूचितम्) ॥ २० ॥

॥१६॥

श्लोकाः १४/२०

नमोनमस्तेऽस्त्वृषभायसात्वतांविदूरकाष्ठायमुहुःकुयोगिनाम् ॥ निरस्तसाम्यातिशयेनराधसास्वधामनिब्रह्मणिरंस्यतेनमः १४ यत्कीर्तनंयत्स्मरणंयदीक्षणं
यद्वंदनंयच्छ्रवणंयदर्हणम् ॥ लोकस्यसद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमोनमः १५ विचक्षणायच्चरणोपसादनात्संगंव्युदस्योभयतोऽन्तरात्मनः ॥ विंदं
तिहिब्रह्मगतिंगतक्लमास्तस्मैसुभद्रश्रवसेनमोनमः १६ तपस्विनोदानपरायशस्विनोमनस्विनोमंत्रविदःसुमंगलाः ॥ क्षेमंनविंदंतिविनायदर्पणंतस्मैसुभद्रश्रव
सेनमोनमः १७ किरातहूणांध्रपुलिंदपुल्कसाआभीरकंकायवनाःखसादयः ॥ येऽन्येचपापायदुपाश्रयाश्रयाःशुध्यंतितस्मैप्रभविष्णवेनमः १८ सएषआत्मा
ऽऽत्मवतामधीश्वरस्त्रयीमयोधर्ममयस्तपोमयः ॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगोभगवान्प्रसीदताम् १९ श्रियःपतिर्यज्ञपतिःप्रजापतिर्धियांपतिर्लो
कपतिर्धरापतिः ॥ पतिर्गतिश्चांधकवृष्णिसात्वतांप्रसीदतांमेभगवान्सतांपतिः ॥ २० ॥

चर्णिका

सतांसंकटाच्छिदेकुयोगिनांदूरकाष्ठायभक्तपारगायनमः १४ यत्कीर्तनंयत्स्मरणंयदीक्षणम् यद्वंदनंयच्छ्रवणंयदर्हणम् लोकस्यसद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमो
नमः १५ विवेकिनःयच्चरणसेवनात्ब्रह्मगतिंविंदंतितस्मैनमः १६ तपस्विनःदानादिपराअपियदर्पणंविनाक्षेमंक्षेमंनविंदंतितस्मैनमः १७ किंच किरातहूणाद्याःपा
पिष्ठाअपियदाश्रयाःसन्तः शुध्यंतितस्मैविष्णवेनमः१८सःअजशंकरादिभिः वितर्क्योलिंगः भगवान्आत्मानःप्रसीदताम् श्रियःपतिः यज्ञपतिःप्रजापतिः यदिसात्वतांपतिः
मुकुंदःनःप्रसीदताम् ॥ २० ॥

॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानप्रदत्वमनुस्मरन्नाह यदंघ्रीतिद्वाभ्यां यस्यांघ्र्योरनुध्यानमेवसमाधिस्तेनधौतयाशोधितयाधिया (कवय आत्मनस्तत्त्वं अनुभवंति) यथारुचंरुच्यनुसारेणसगुणनिर्गुणादिभेदैः यद्वा रुक्प्रतिभा यथामतीत्यर्थः २१ किंच पुराकल्पादावजस्यहृदिसतींसृष्टिविषयांस्मृतिंवितन्वता (विस्तारयता) येन (भगवतो) प्रचोदितासतीसरस्वती वेदरूपावाक्) तस्यमुखतःकिं लप्रादुर्भूता स्वानि (असाधारणानि स्वरूपनिर्णायकानि) लक्षणानिशिक्षाद्युक्तानियस्याःसा ऋषीणांज्ञानप्रदानां (मध्ये) ऋषभः श्रेष्ठः (परमेश्वरोमेप्रसीदताम्) २२ इदानींस्ववाचं श्रोतृजनाह्लादिनींशृंगारकरुणादिशोभां (भक्तिवैराग्यादियुतांस्वान्तर्यामिणं) प्रार्थयते भूतैरिति समेवचांसिअलंकृषीष्ट (स्वप्रीतिजनकशृंगारादिशोभया) अलंकारोतु अन्यस्यवच सामन्येनालंकारासंभवमाशंक्यतस्यांतर्यामितामाविष्करोति योमहाद्भिर्भूतैरिमाःपुरःशरीराणिसृष्ट्वाऽमूषुपूर्ष्वंतर्यामितयाशेतेवसतिअत्रपुरुषसमाख्यांप्रमाणयाति यद्यस्मात्पूरुषइति अतए वयएकादशेंद्रियपंचभूतरूपान्षोडशगुणान्कलाःभुंक्तेप्रकाशयतिपालयतीतिवा तदात्वात्मनेपदमार्षम् अत्रहेतुः यतःषोडशाना (तेषां) आत्माचेतायिता स्वार्थेकः नत्वत्रजीवत्वमुच्यते प्रार्थ नाविरोधात् २३ श्रीव्यासं (स्वगुरुंशुद्देवायव्यासायभगवतेवेधसेपुराणसंहिताकर्त्रेगुरवे) नमस्कारोति नमइति सौम्यावैशंपायनादयोभक्ताः यस्यमुखांबुरुहेआसवोमकरंदस्तम् (ज्ञानमयं ज्ञानरूपंपपुः पिबंतिस्म यद्वा प्रीत्यतिशयेनदेवकीनन्दनमवकटाक्षीकृत्यनमति सौम्याभक्तिज्ञानवैराग्यात्मकसोमार्हाःसौम्या उद्धवार्जुनादयोभक्तावासुदेवायवसुदेवात्मजायविश्वकर्त्रेयद्वावेधसे ब्रह्मणेवासुदेवायनारायणात्मजायनमः सौम्यानारदादयः) २४ इदानींप्रश्नोत्तरतयाब्रह्मनारदसंवादंप्रस्तौति एतदिति(एतदेव विपृच्छतेप्रश्नंकुर्वतेनारदाय आत्मभूर्ब्रह्मा) उत्पत्तिसमयएव वेदागर्भेयस्य (सोभ्यधात्) साक्षाद्धरिः (आत्मनो) यदाह २५ ॥ ॥ इतिद्वितीयेटीकायांचतुर्थोऽध्यायः ४ ॥ ॥ छ ॥ ॥ पंचमेनारदेनाथपृष्टःसृष्टयादिवक्त्यनः ॥ हरेर्लीलांविराट्सृष्टिंकालकर्मादिशक्तिभिः ॥ १ ॥ नारदायविपृच्छतेवेदगर्भोऽभ्यधादित्युक्तं तत्रनारदप्रश्नमाह देवदेवेति हेभूतभावनअतएवसर्वेषांपूर्वजअनादे ज्ञायतेऽनेनेविज्ञानंतत्साधनं यत्तद्विजानीहि विशेषेणज्ञापयेत्यर्थः कथंभूतमात्मतत्त्वं नितरांदृश्यतेयेनतत् १

श्लोकाः २१/१

यदंघ्र्यनुध्यानसमाधिधौतयाधियाऽनुपश्यंतिहितत्त्वमात्मनः ॥ वदंतिचैतत्कवयोयथारुचंसमेमुकुंदोभगवान्प्रसीदतां २१ प्रचोदितायेनपुरासरस्वतीवितन्वताऽजस्यसतींस्मृतिंहृदि ॥ स्वलक्षणाप्रादुरभूत्किलाऽऽस्यतःसमेऋषीणामृषभःप्रसीदतां २२ भूतैर्महद्भिर्यइमाःपुरोविभुर्निर्मायशेतेयदमूषुपूरुषः ॥ भुंक्तेगुणान्षोडशषोडशात्मकःसोऽलंकृषीष्टभगवान्वचांसिमे २३ नमस्तस्मैभगवतेव्यासायामिततेजसे ॥ पपुर्ज्ञानमयंसौम्यायन्मुखांबुरुहासवं २४ एतदेवात्मभूराजन्नारदायविपृच्छते ॥ वेदगर्भोऽभ्यधात्साक्षाद्यदाहहरिरात्मनः २५ इतिश्रीभागवतेमहा०द्वितियस्कंधेचतुर्थोऽध्यायः ४ ॥ नारदउवाच देवदेवनमस्तेऽस्तुभूतभावनपूर्वज ॥ तद्विजानीहियज्ज्ञानमात्मतत्त्वनिदर्शनम् १

चूर्णिका

कवयः यदंघ्रिध्यानेन आत्मतत्त्वं अनुपश्यंतिसः नः प्रसीदताम् २१ किंच येनपुराप्रेरितासरस्वतीब्रह्मणोमुखेभ्यः प्रादुरभूत् सः ऋषभः नः प्रसीदताम् २२ यः पुरुषः इमान्देहान्निर्मायतेपुशेतेसः मेवचांसि अलंकरोति २३ तस्मैवासुदेवायनमः २४ हेराजन् एतदेवब्रह्मानारदायहरिणोक्तं अकथयत् २५ इतिद्वितीयेचतुर्थः ॥ ॥ नारदउवाच हेदेवदेवतेनमः मह्यंतत्ज्ञानंकथय येनआत्मतत्त्वंविजानीयाम् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द्वि. उपलक्षणभूतंविश्वमेवात्मज्ञानसाधनमतस्तद्विशेषंपृच्छति यद्रूपंयेनरूप्यतेप्रकाश्यते यदधिष्ठानंयदाश्रयम् यतोयेनसृष्टं यत्संस्थंयस्मिन्लीयते यत्परंयदधीनम् यच्चेतियदात्मकम् स्वतः अ०
सत्कारणतोवेत्यर्थः तस्यतत्त्वंयाथार्थ्यंतत्त्वतोवद (यथावत्कथयेति) २ नजानामीतिनचवक्तव्यमित्याह सर्वमिति भूतंजातम् भव्यंजनिष्यमाणं भवद्जायमानं तेषांप्रभुर्यतोऽतोविशिष्टे
टीका नज्ञानेनावसितंनिश्चितम् ३ आस्तामिदं आदौतावत्त्वामेवकथयेत्याह यतोविज्ञानंयस्य (सः) कस्तवविज्ञानदइत्यर्थः यदाधारःकस्तवाश्रयः यत्परोयदधीनः यदात्मकोयत्स्वरूपः ॥९॥
ममतुत्वमेवस्वतंत्रः परमेश्वरइतिबुद्धिः तवतपश्चरणेनतुपरशंकयापृच्छामीत्याह सार्धैश्चतुर्भिः एकोऽसहायः (त्वमेवस्वशक्त्याभूतानिचराचराणिपृथिव्यादिभूतैः सृजसि) ४ (आत्मन्)
॥१८॥ आत्मनिभावयसेपालयासि स्वयमेवपराभवमप्रापयन्नक्रमःश्रमरहितः यथोर्णनाभिरात्मनएवशक्तिमवष्टभ्यसृजातितद्वत् ५ तस्मादहंत्वऽस्मिन्विश्वस्मिन्परमुत्तममपरमधमंसमंमध्यमंच तत्रा
पिनामममनुष्यादि रूपंद्विपदत्वादि गुणःशुक्लत्वादि तैर्भाव्यंसाध्यम्। तत्रापिसदसत्स्थूलंसूक्ष्मंच किंचिदप्यन्यतोनवेद (त्वत्तोऽन्यस्माद्भवतीत्यहंनजाने) किंतु त्वत्तएवसर्वंभवतीतिम
न्ये ६ सतथाविधोऽपिभवांस्तपोऽचरदितियत्तेन (हेतुना) नोऽस्मान्खदेयसेमोहयसि यतःपरशंकईश्वरांतरशंकांप्रयच्छसि त्वत्तपोदृष्ट्वात्वंददपेक्षयाऽन्योमहानस्तीति शंकाभवतीत्यर्थः
७ यथैवाहंत्वयाऽनुशासितःशिक्षितःसन्बुध्येबुध्येयम् तथाविजानीहिविशेषेणज्ञापय ८ प्रश्नमभिनंदति वत्सहेपुत्र तवेदंविचिकित्सितंसंदेहः तत्पूर्वकःप्रश्नोऽयंसम्यगित्यर्थः यतःकारु
णिकस्यतवायंप्रश्नः अत्रहेतुः यद्यतो (परमधर्मे) भगवद्वीर्यप्रकाशनेअहंप्रवर्त्तितोऽस्मि अतस्त्वंजिज्ञासुरपिमयि (लोकेच) कृपामेवकृतवानित्यर्थः ९ ननु त्वमेवभगवानित्युक्तंत्वया एकःसृज
सिभूतानीत्यादिना सत्यम् यथामामीश्वरत्वेनप्रभाषसेतदपितवमाषणंनात्यंतमनृतं यतःकारणादेतावत्प्रभावस्यभावएतावत्त्वंमेस्ति किंतु मत्तःपरमीश्वरमविज्ञायब्रूपे अतःसादृश्याच्चवेयंभ्रां
तिर्नतुबुद्धिपूर्वमनृतमित्यर्थः यतईश्वरान्मेएतावत्त्वंतमविज्ञायेतिवान्वयः १०

यद्रूपंयदधिष्ठानंयतःसृष्टमिदंप्रभो ॥ यत्संस्थंयत्परंयच्चतत्तत्त्वंवदतत्त्वतः २ सर्वंह्येतद्भवान्वेदभूतभव्यभवत्प्रभुः ॥ करामलकवद्विश्वंविज्ञानावसितंतव ३ श्लोकाः
यद्विज्ञानोयदाधारोयत्परस्त्वंयदात्मकः ॥ एकःसृजसिभूतानिभूतैरेवात्ममायया ४ आत्मन्भावयसेतानिनपराभावयन्स्त्वयम् ॥ आत्मशक्तिमवष्टभ्यऊर्णना
भिरिवाक्लमः ५ नाहंवेदपरंत्वस्मिन्नापरंनसमंविभो ॥ नामरूपगुणैर्भाव्यंसदसत्किंचिदन्यतः ६ सभवानचरद्घोरंयत्तपःसुसमाहितः ॥ तेनखेदयसेनस्त्वं २/१०
पराशंकांप्रयच्छसि ७ एतन्मेपृच्छतःसर्वंसर्वज्ञसकलेश्वर ॥ विजानीहियथैवेदमहंबुद्ध्येऽनुशासितः ८ ॥ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदंवत्सतेविचिकि
त्सितम्॥ यदहंचोदितोधर्मेभगवद्वीर्यदर्शने ९ नानृतंतवतच्चापियथामांप्रब्रवीषिभोः ॥ अविज्ञायपरंमत्तएतावत्त्वंयतोहिमे १०

चूर्णिका किंच एतत्विश्वंयदाश्रयंयेनसृष्टंयस्मिन्लीयतेतत्सर्वंभवान् वेद २ ३ सृष्ट्यादित्वंकरोषि ४ ५ ६ सः त्वंघोरंतपश्चरसि अतः ईश्वरांतरशंकांप्रयच्छसि ७ एतन्मेवद८ ॥१८॥
॥ ब्रह्मोवाच ॥ हेवत्सतवप्रश्नः समीचीनः यतः अहंभगवद्वीर्यदर्शनेप्रेरितः ९ त्वयामत्तःपरं अविज्ञायपृष्टम् १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हिंकोऽसावीश्वरइत्यपेक्षायांभक्त्यानमस्कुर्वन्नेवतंकथयति त्रिभिः येन(स्वरोचिषा)स्वप्रकाशेनरोचितंप्रकाशितमेवप्रकाशयामि सृष्ट्वाऽभिव्यक्तंकरोमि यथाऽर्कादयश्चैतन्यप्रकाश्यमेवप्रकाशयंति (ऋक्षाणिअश्विन्यादीनि अन्यास्तारकाःग्रहा भौमादयः)तथाचश्रुतिः'नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोऽयमग्निः तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभाती'ति ११तस्मै नमोधीमहि (चिन्तयेम मनसैव नमस्कुर्महेइत्यर्थः) यस्यमाययाविमोहिताः संतोयुष्मदादयोमांजगद्गुरुंजगत्कारणंवदंतितस्मै१२यन्माययेतिमायासंबंधोक्तेस्तस्यदुर्जयत्वोक्तेश्चतस्यापिकिम स्तिसंसारोनैवेत्याह मत्कपटमसौजानातीतियस्यदृष्टिपथेस्थातुंविलज्जमानयैवतस्मिन्स्वकार्यमकुर्वत्यामुयामाययाविमोहिताअस्मदादयोदुर्धियोऽविद्यावृतज्ञानाएव केवलंविकत्थंतेश्लाघंते अ नेनयद्रूपमित्यस्यप्रश्नस्योत्तरमुक्तंभवति १३ तदेवंस्वस्मादन्यंपरमेश्वरंनिरूप्येदानींयदधिष्ठानमित्यादिनवप्रश्नानांसएवाधिष्ठानादिकंसर्वमित्युत्तरंवक्तुंतद्व्यतिरेकेणान्यस्यासत्त्वमाह द्रव्यमिति द्रव्यंमहाभूतान्युपादानरूपाणि कर्मजन्मनिमित्तं कालस्तत्क्षोभकः स्वभावस्तत्परिणामहेतुः जीवोभोक्ता वासुदेवात्परोऽधिकोऽन्योर्थोनास्ति (किंतुसएवसर्वाधिकः सर्वस्वरूप श्च) कारणाव्यतिरेकात्कार्यस्य ॥ १४ तत्प्रपंचयतिद्वाभ्यां नारायणःपरःकारणंयेषांते नारायणःपरस्तात्पर्यविषयोयेषामितिवा अनेनैवशास्त्रयोनित्वप्रतिपादनेनेश्वरेप्रमाणंसर्वज्ञत्वादि कं चोक्तं देवाश्चतदंगाज्जाताः अतोनतद्व्यतिरिक्ताः लोकाः स्वर्गादयः तदानंदांशाः (अतो नारायणपराः) मखास्तत्साधनभूताः (यज्ञाः) १५ योगःप्राणायामादिः तप स्तत्साध्यंचित्तैकाग्र्यं ज्ञानंतत्साध्यं गतिस्तत्फलं (मोक्षः) अनेनैवसर्वंतदधीनमित्युक्तं १६ तर्हित्वंकिंकरोपीत्यपेक्षायामाह तस्यसृज्यमपितेनसृष्टोहंसृजामि ईक्षयाकटाक्षेण (अभिचोदि तः) तत्रहेतवः द्रष्टरित्यादयः (कूटस्थस्यनिर्विकारस्य) १७ ननुकुतोयंजीवेश्वरविभागः यतस्त्वंप्रेर्यःसचप्रेरकःस्यादित्यपेक्षायांजीवेश्वरविभागहेतुमाहत्रिभिः सत्त्वमिति निर्गु णस्यापि (विभोः) ईश्वरस्यैतेत्रयोगुणाबध्नंतीत्युत्तरेणान्वयः कथंभूताःतेनैवस्वातंत्र्येणस्थित्याद्यर्थंमाययागृहीताः १८

श्लोकाः

येनस्वरोचिषाविश्वंरोचितंरोचयाम्यहम् ॥ यथाऽर्कोऽग्निर्यथासोमोयथर्क्षग्रहतारकाः ११ तस्मैनमोभगवतेवासुदेवायधीमहि ॥ यन्माययादुर्जययामांब्रुवं तिजगद्गुरुम् १२ विलज्जमानयायस्यस्थातुमीक्षापथेऽमुया ॥ विमोहिताविकत्थंतेममाहमितिदुर्धियः १३ द्रव्यंकर्मचकालश्चस्वभावोजीवएवच ॥ वासुदे वात्परोब्रह्मन्नचान्योऽर्थोऽस्तितत्त्वतः १४ नारायणपरावेदादेवानारायणांगजाः ॥ नारायणपरालोकानारायणपरामखाः १५ नारायणपरोयोगोनारायणप रंतपः ॥ नारायणपरंज्ञानंनारायणपरागतिः १६ तस्यापिद्रष्टुरीशस्यकूटस्थस्याखिलात्मनः ॥ सृज्यंसृजामिसृष्टोऽहमीक्षयैवाभिचोदितः १७ सत्त्वंरजस्तम इतिनिर्गुणस्यगुणास्त्रयः ॥ स्थितिसर्गनिरोधेषुगृहीतामाययाविभोः १८

११/१८

चूर्णिका

येनभगवतास्वप्रकाशेनप्रकाशितंविश्वंअहंसृष्ट्वाव्यक्तंकरोमि ११ तस्मैवासुदेवायधीमहि १२ १३ हेपुत्रतत्त्वतःवासुदेवात्परः अन्यःअर्थोन १४ नारायणपरावेदा देवाना रायणांगजाः नारायणपराः लोकाः नारायणपरामखाः १५ योगः तपःज्ञानंगतिः सर्वंनारायणपरं १६ तस्यदृष्ट्याप्रेरितो ऽहंसृजामि १७ विभुनासत्त्वरजस्तमोगुणाः स्थितिसर्गनिरोधेषुगृहीताः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वस्तुतः सर्वदामुक्तमपिमायिनंमायाविषयंपुरुषंजीवंबध्नंति । क । कार्यमधिभूतं कारणमध्यात्मं । कर्ताधिदैवतंतेषांभावस्तत्त्वंतस्मिन् द्रव्यंमहाभूतानि । ज्ञानशब्देनदेवताः । क्रियाइंद्रियाणि तदाश्रयाः तेषांकारणभूताः तत्तदभिमानेनबध्नंति १९ अतःसएववश्यमायः एभिर्गुणैर्लिंगैर्जीवानामावरकैरुपाधिभिः सुष्ठुअलक्षितागतिस्तत्त्वंयस्यसः स्वैर्भक्तैरेवलक्षितागतिर्यस्येतिवा (अस्मिन्पक्षेलिंगैस्तटस्थलक्षणैः । तथाचसूत्रं"जन्माद्यस्ययत"इति) २० तस्यसृष्टिप्रकारमाहकालमिति । कालंक्षोभकंसृष्टिकालइतिव्यवहारहेतुं । कर्मजीवादृष्टम् । स्वभावंतत्परिणामहेतुं

आत्मन् आत्मनियदृच्छयास्वैरितयाप्राप्तं विभुभूषुः विविधं भवितुमिच्छन् २१ गुणानांव्यतिकरःक्षोभःसाम्यत्यागः । स्वभावतः परिणामोरूपांतरापत्तिः । महतोमहत्तत्त्वस्य । पुरुषईश्वरस्तेनाधिष्ठितत्वं (कालादि–) त्रयाणांविशेषणं२२ महत्तत्त्वाद्विकुर्वाणात् विक्रियमाणात् (परिणममानादित्यर्थः)। तस्यचक्रियाज्ञानशक्तित्वात् त्रिगुणत्वेपिरजःसत्त्वाभ्यामुपबृंहितत्वं (प्रवृद्धत्वं)। अहंकारस्यत्वावरकत्वात् तमःप्रधानत्वं ।अतएवाहंकारकार्येषुतामसमाकाशादिकंबहु।राजसंसात्त्विकंचाल्पं एवंतदुपाधिकेषुजीवेष्वपितथैवतामसयोन्याधिक्यं।द्रव्यज्ञानक्रियात्मकः महाभूताधिदैवतेंद्रियात्मकः २३ (किंनामकोसौपदार्थइतितत्राह । सोहंकारइति)। सचविकुर्वन्रूपांतरंगच्छन् । त्रैविध्यमेवाह । वैकारिकःसात्विकः तैजसोराजसः । यद्भिदायस्यभेदः । द्रव्यशक्तिरित्यादीनिप्रातिलोम्येनलक्षणानित्रयाणाम् । द्रव्येमहाभूताख्येशक्तिर्यस्य । क्रियासुइंद्रियेषुशक्तिर्यस्यज्ञानेषुदेवेषुशक्तिर्यस्येतिविग्रहः हेप्रभोबोद्धुंशक्त २४ भूतादेरितितामसस्यविशेषणम् । ननुतामसात्प्रथमंशब्दोभवतीतिप्रसिद्धम् । सत्यं । सतुशब्दः तस्यनभसोमात्रासूक्ष्मंरूपम् । गुणश्चअसाधारणोव्यावर्तकोधर्मः । शब्दद्वारानभउत्पद्यतइत्यर्थः । एवमेवस्पर्शादिष्वपिद्रष्टव्यम् । शब्दस्यलक्षणंलिंगामिति । कुड्याद्यंतरितेनकेनचिदुच्चैर्गजोगजइत्युक्तेयोगजद्रष्टायश्चतेनदृश्योगजःतयोर्लिंगंबोधकं लिंगविशेषणत्वाद्यच्छब्दस्यक्लीबत्वम् २५ (स्पर्शो गुणोयस्यसोऽनिलः) परस्यनभसः कारणत्वेनान्वयात् शब्दवांश्चतस्यैवलक्षणं प्राणोदेहधारणं ओजःसहोबलानि इंद्रियमनःशरीराणां पाटवानि तेषांहेतुरित्यर्थः २६उदपद्यतउत्पन्नं (कालकर्म)–स्वभावतोविकुर्वाणात्स्वयंरूपवत्तेजः वायुनभसोःकारणभूतयोरन्वयात्स्पर्शवत्शब्दवच्च एवमंभसःपृथिव्याश्चपरान्वयाधिक्याद्गुणाधिक्यम्२७घोषःशब्दः(तद्वच्च। अंभोजलम्) २८

श्लोकाः १९/२८

कार्यकारणकर्तृत्वेद्रव्यज्ञानक्रियाश्रयाः ॥ बध्नंतिनित्यदामुक्तंमायिनंपुरुषंगुणाः १९ सएषभगवाँल्लिंगैस्त्रिभिरेभिरधोक्षजः॥ स्वलक्षितगतिर्ब्रह्मन्सर्वेषांममचेश्वरः २० कालंकर्मस्वभावंचमायेशोमायमास्वया ॥ आत्मन्यदृच्छयाप्राप्तंविबुभूषुरुपाददे २१ कालाद्गुणव्यतिकरःपरिणामःस्वभावतः ॥ कर्मणोजन्ममहतःपुरुषाधिष्ठितादभूत् २२ महतस्तुविकुर्वाणाद्रजःसत्त्वोपबृंहितात् ॥ तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः २३ सोऽहंकारइतिप्रोक्तोविकुर्वन्समभूत्त्रिधा ॥ वैकारिकस्तैजसश्चतामसश्चेतियद्भिदा ॥ द्रव्यशक्तिःक्रियाशक्तिर्ज्ञानशक्तिरितिप्रभो २४ तामसादपिभूतादेर्विकुर्वाणादभून्नभः ॥ तस्यमात्रागुणःशब्दोलिंगंयद्द्रष्टृदृश्ययोः २५ नभसोऽथविकुर्वाणादभूत्स्पर्शगुणोऽनिलः ॥ परान्वयाच्छब्दवांश्चप्राणओजःसहोबलं २६ वायोरपिविकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यततेजोवैरूपवत्स्पर्शशब्दवत् २७ तेजसस्तुविकुर्वाणादासीदंभोरसात्मकं ॥ रूपवत्स्पर्शवच्चांभोघोषवच्चपरान्वयात् २८

चूर्णिका

तेमुक्तमपिजीवंबध्नंति १९ सः भगवान् सर्वेषांममचईश्वरः २० तस्यसृष्टिप्रकारमाह सः विविधंभवितुंइच्छन्कालादीन्उपाददे २१ ततः पुरुषाधिष्ठितात्कालात्गुणक्षोभोजातःस्वभावाद्रूपांतरापत्तिः कर्मणः महत्तत्वम् २२ महतः २३ अहंकारः सः त्रिधा २४ तत्रतामसात् शब्दवन्नभः अभवत् २५ नभसः स्पर्शवान्वायुः २६ तस्मात् रूपवत्तेजः २७ तस्माद्रसवत् जलम् २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विशेषः पृथिवी पृथिव्याश्चपरान्वयाधिक्याद्गुणाधिक्यम् २९ (वैकारिकात्सात्विकाहंकारात्) मनःशब्देनैवतदधिष्ठाताचंद्रोपिद्रष्टव्यः अन्येचदशदेवावैकारिकाःसात्विकाहंकारकार्यांः तानाह दिग्गश्चवातश्चअर्कश्चप्रचेताश्चअश्विनौच एतेपंच(क्रमेण)श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः वह्निश्चइंद्रश्चउपेंद्रश्चमित्रश्चकश्चप्रजापतिः एतेपंचवाक्पाणिपादपायूपस्थानामधिष्ठातारः ३० (तैजसाद्राजसाहंकारात्) यतोज्ञानशक्तिर्बुद्धिः क्रियाशक्तिःप्राणश्चतैजसाहंकारकार्यौ अतोज्ञानक्रियाविशेषरूपाणींद्रियाण्यपितैजसादभवन्नित्यर्थः तान्याहश्रोत्रमिति दोःपाणिः मेढ्रमुपस्थः क्रमस्त्वत्रनविवक्षितः (क्रमस्तुश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि वाक्पाणिपादपायूपस्थाः) ३१ एवंकारणसृष्टिमुक्त्वाकार्यसृष्टिमाह यदाएते(भावाःपदार्थाः) असंगताअमीलिताआसन् अतएवयदाआयतनस्यशरीरस्यनिर्माणेनशेकुः ३२ तदासदसत्त्वंप्रधानगुणभावंउपादायस्वीकृत्य उभयंसमष्टिव्यष्ट्यात्मकंशरीरं(ससृजुः) ३३ कालकर्मस्वभावानधिष्ठायस्थितः जीवयतीतिजीवःपरमात्मा (असंसारित्वाज्जीवइतिव्यच्छेदः उदकेशयं अप्सुस्थितंतदंडं) अजीवमचेतनम् अजीवयत्चेतयतिस्म ३४ निर्भिद्य (तस्मादंडान्निर्गतः) पृथक्कृत्यस्थितइत्यर्थः (पुरुषत्वेपिलोकविलक्षणोयमितिभावेनविशिनष्टि । सहस्रेति । अत्रसहस्रशब्दस्यास्वार्थपरत्वम् सहस्रमूरवोंऽघ्रयोबाहवोऽक्षीणिचयस्य सहस्रमाननानिशीर्षाणिचयस्य संतिसः) ३५ तदवयवैर्लोकरचनामाहयस्येति कटीरितिऊरुमूलयोः पश्चाद्भागः जघनंतुपुरोभागः अधः सप्तलोकान्अतलादीन् ऊर्ध्वंभूरादीन्सप्त (ऊर्वादिपादतलांतैरवयवैरतलादिपातालांताःसप्तलोकानिर्मिताः जघनादिमूर्धांतैः पृथिव्यादिसत्यांताःसप्तलोकाइत्यर्थः) ३६ वर्णानांततउत्पत्तिंदर्शयतिपुरुषस्येति ब्रह्मब्राह्मणःमुखमितिकार्यकारणयोरभेदविवक्षयोक्तम् बाहवइतिच । क्षत्रंक्षत्रियः । (उर्वोरूरुभ्याम्) ३७

श्लोकाः २९ / ३७

विशेषस्तुविकुर्वाणादंभसोगंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः २९वैकारिकान्मनोजज्ञेदेवावैकारिकादश ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः ३० तैजसात्तुविकुर्वाणादिंद्रियाणिदशाभवन् ॥ ज्ञानशक्तिःक्रियाशक्तिर्बुद्धिःप्राणस्तुतैजसौ ॥ श्रोत्रंत्वग्घ्राणदृग्जिह्वावाग्दोर्मेढ्रांघ्रिपायवः ३१ यदैतेऽसंगताभावाभूतेंद्रियमनोगुणाः ॥ यदाऽऽयतननिर्माणेनशेकुर्ब्रह्मवित्तम ३२ तदासंहत्यचान्योऽन्यंभगवच्छक्तिचोदिताः ॥ सदसत्त्वमुपादायचोभयंससृजुर्ह्यदः ३३ वर्षपूगसहस्रांतेतदंडमुदकेशयम् ॥ कालकर्मस्वभावस्थोजीवोऽजीवमजीवयत्३४सएवपुरुषस्तस्मादंडंनिर्भिद्यनिर्गतः ॥ सहस्रोर्वंघ्रिबाह्वक्षःसहस्राननशीर्षवान् ३५ यस्येहावयवैर्लोकान्कल्पयंतिमनीषिणः ॥ कट्यादिभिरधःसप्तसप्तोर्ध्वंजघनादिभिः ३६ पुरुषस्यमुखंब्रह्मक्षत्रमेतस्यबाहवः ॥ ऊर्वोर्वैश्योभगवतःपद्भ्यांशूद्रोऽभ्यजायत ॥ ३७ ॥

चूर्णिका ॥२१॥

तस्मात् गंधवती पृथ्वी २९ सात्त्विकाहंकारात् मनः इंद्रियाधिष्ठात्र्योदेवताश्चअभवन् ३० राजसात्दशइंद्रियाणिबुद्धिःप्राणश्च ३१ एतेभावाः अमीलिताःसंतः शरीरनिर्माणेनशेकुः ३२ तदाअन्योन्यंमिलित्वासमष्टिव्यष्ट्यात्मकंशरीरं ससृजुः ३३ ततउदकेशयम् अचेतनंब्रह्मांडंवर्षपूगसहस्रांतेपरमात्माचेतयतिस्म ३४ ततः सएव पुरुषः अंडंनिर्भिद्यनिर्गतः सहस्रोर्वंघ्रिबाह्वक्षः सहस्राननशीर्षवान् ३५ ३६ तस्यमुखंब्राह्मणाः बाहुभ्यःक्षत्रियाः ऊर्वोः वैश्याः पद्भ्यांशूद्राः ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमुपासनार्थंलोककल्पनाभेदान्दर्शयन्सप्तलोकपक्षमाहद्वाभ्याम्। भूर्लोकः पातालमारभ्यपद्भ्यां(भूमिपर्यंतः पद्भ्यां)कटिपर्यंताभ्याम् (भूरित्यव्ययम्। भुवःइत्यव्ययंअंतरिक्षलोकस्यनाम) ३८ स्तनद्वयादितिउपासनार्थत्वाल्लोकयोरूर्ध्वाधोभाववैपरीत्यंनदोषः यद्वास्तनत्वशब्दंकुर्वत्तयदोद्वयंतस्मादित्यर्थः (ननुवैकुंठस्यक्कांतर्भावइत्यतआह) ब्रह्मलोकः वैकुंठाख्यः सतुसनातनःनित्यः नतुसृज्यप्रपंचांतर्वर्तीइत्यर्थः ३९इदानींचतुर्दशलोकपक्षंदर्शयति तत्रजघनानाभ्यादिभिर्भूरादयः पूर्वोक्ताएवकट्यादिभिरधःसप्तलोकानाह तत्कट्यामितिद्वाभ्याम्।(प्रपदाभ्यापादाग्राभ्यां)शुद्धं (इतिविशेषणं) हरिभक्त (बलि) निवासत्वात् ४०(इत्येवंलोकनिर्मातृत्वावलोकाधारत्वाच्चलोकमयः पुमान्पुरुषउपास्यइतिशेषः ४१ त्रैलोक्यपक्षमाह भूर्लोकः पातालादिसहितः (स्वर्लोकः महर्लोकादिसहितः। एवंपक्षत्रयमपिअधिकारिभेदेन ध्यानार्थत्वात्उपपन्नामिति ॥ ॥ इतिद्वितीयेपंचमः ५ ॥ ॥ ॥ षष्ठेविराड्विभूतिश्चप्रोक्ताऽध्यात्मादिभेदतः। दृढीकृतंचपूर्वोक्तंसर्वं पुरुषसूक्ततः॥१॥ इदानींवैराजस्यविभूतिः सप्रपंचमनुवर्ण्यते वाचांअस्मदादिवागिंद्रियाणांतदधिष्ठातुर्वह्नेश्चतस्य (वैराजस्य) मुखंक्षेत्रंउत्पत्तिस्थानम् छंदसांगायत्र्यादीनांसप्तानांतस्यसप्तधातवः त्वगादयः क्षेत्रम्। हव्यं देवानामन्नं कव्यंपितॄणाम्। अमृतं तदुभयशेषोमनुष्याणांतेषामन्नानांतथासर्वरसस्यमधुरादेः षड्विधस्य चकारादस्मादादिरसनेंद्रियस्य तदधिष्ठातुर्वरुणस्य चएतस्यजिह्वाक्षेत्रमुत्पत्तिस्थानम्। एवंसर्वत्रानुक्तमुन्नेयम् १ सर्वासूनामस्मदादिप्राणानांतस्यनासेनासारंध्रेपरमायनेउत्तमक्षेत्रे मोदप्रमोदयोश्चसामान्यविशेषगंधयोः घ्राणोघ्राणेंद्रियंपरमायनम् २ रूपाणां(अस्मच्चक्षुर्विषयाणां)तेजसांरूपप्रकाशकानांचक्षुरिंद्रियं(क्षेत्रंदिवोद्युलोकस्यतद्वतस्यसूर्यस्यच)अक्षिणीनेत्रगोलके सर्वत्रपष्ठ्यंतानांप्रथमांतंक्षेत्रंद्रष्टव्यम्। (दिशांश्रोत्राधिदेवतानांतीर्थानांक्षेत्राणांच)कर्णौ (तदीयश्रोत्राधिष्ठाने।) तस्यश्रोत्रमिंद्रियं (आकाश दं:क्षेत्रम्) तस्यगात्रंशरीरंवस्तूनांयेसारांशास्तेषां (सौंदर्यस्यच) भाजनंस्थानम् ३ अस्यत्वक्स्पर्शस्यवायोश्चेत्यर्थः सर्वस्यमेधस्ययज्ञस्यच (क्षेत्रम्)। उद्भिज्जजातीनांसर्ववृक्षणांजातीनांयैर्वृक्षैर्यज्ञः सम्यक् (भृतः) साधितस्तेषामेववा ४

भूर्लोकःकल्पितःपद्भ्यांभुवर्लोकोऽस्यनाभितः ॥ हृदास्वर्लोकउरसामहर्लोकोमहात्मनः ३८ ग्रीवायांजनलोकश्चतपोलोकःस्तनद्वयात् ॥ मूर्धभिःसत्यलोकस्तुब्रह्मलोकःसनातनः ३९तत्कट्यांचातलंक्लृप्तमूरुभ्यांवितलंविभोः ॥ जानुभ्यांतुतलंशुद्धंजंघाभ्यांतुतलातलम् ४० महातलंतुगुल्फाभ्यांप्रपदाभ्यांरसातलम् ॥ पातालंपादतलतइतिलोकमयःपुमान् ४१ भूर्लोकःकल्पितःपद्भ्यांभुवर्लोकोऽस्यनाभितः ॥ स्वर्लोकःकल्पितोमूर्ध्नाइतिवालोककल्पना ४२ ॥ इतिश्रीभा०म०द्वि०पंचमोऽध्यायः ॥ ५ ॥ ॥ ६ ॥ ॥ ब्रह्मोवाच ॥ ॥ वाचांवह्नेर्मुखंक्षेत्रंछंदसांसप्तधातवः ॥ हव्यकव्यामृतान्नानांजिह्वासर्वरसस्यच १ सर्वासूनांचवायोश्चतन्नासेपरमायने ॥ अश्विनोरोषधीनांचघ्राणोमोदप्रमोदयोः २ रूपाणांतेजसांचक्षुर्दिवःसूर्यस्यचाक्षिणी ॥ कर्णौदिशांचतीर्थानांश्रोत्रमाकाशशब्दयोः ॥ तद्गात्रंवस्तुसाराणांसौभगस्यचभाजनम् ३ त्वगस्यस्पर्शवायोश्चसर्वमेधस्यचैवहि ॥ रोमाण्युद्भिज्जजातीनांयैर्वायज्ञस्तुसंभृतः ४

तस्यपद्भ्यांभूर्लोकः कल्पितः नाभितः भुवर्लोकः हृदास्वर्लोकः उरसामहर्लोकः ३८ग्रीवायांजनलोकः स्तनयोः तपोलोकः मूर्द्धभिः सत्यलोकः २०तत्कट्यां अतलंऊरुभ्यां वितलम् जानुभ्यांसुतलम् जंघाभ्यांतलातलम् ४० गुल्फाभ्यांमहातलम् प्रपदाभ्यांरसातलम् पादतलतः पातालं४१ भूर्लोकः पद्भ्यांकल्पितः भुवर्लोकोनाभिःस्वर्लोकोमूर्द्ध्नाइतिवालोककल्पना इदंउपासकानां ध्यानयोगार्थंउक्तं ४२ ॥ इतिद्वितीयेपंचमः ५ ॥ ब्रह्मोवाच ॥ तस्यविराड्रूपिणःभगवतःमुखम् वाचांवह्नेश्चउत्पत्तिस्थानंतस्यत्वगादयःसप्तधातवः गायत्र्यादिछंदसांक्षेत्रम् हव्यकव्यामृतान्नानांषड्रसस्यवरुणस्यक्षेत्रंतांजिह्वा १ तन्नासेसर्वासूनांवायोःगंधस्य अश्विनोश्चक्षेत्रम् २ तस्यचक्षुःरूपप्रकाशनांस्थानम् तस्यअक्षिणीदिवःसूर्यस्यचस्थानम्दिशामाकाशशब्दयोश्चतत्कर्णौक्षेत्रं३ तस्यशरीरंवस्तुसाराणांसौभगस्यस्थानंस्पर्शंवायोःवृक्षादीनांचतस्यत्वकरोमाणिक्षेत्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केशा (अभ्राणां) मेघानांक्षेत्रं पूर्वंतथोक्तेः । श्मश्रूणिविद्युताम् । पादकरनखानिशिलालोहानांइतिसादृश्याद्बूह्यं क्षेमकर्मणांपालनकर्तॄणां ५ विक्रमः पादन्यासोभूरादिलोकानामास्पदमाश्रयः । भूरादिशब्दानामव्ययत्वात्षष्ठ्यालुक् । क्षेमोलब्धरक्षणम् । शरणंभयाद्रक्षणंसर्वेषांकामानांवरोवरणंतस्यापिहरेरंघ्रिरास्पदम् ६ (अपांजलस्य) वीर्यस्यशुक्रस्य (सर्गस्यलोकसृष्टेः प्रजापतेरधिदैवतस्यच) शिश्नोधिष्ठानं । उपस्थस्त्विंद्रियं । प्रजात्यानंदः संतानार्थसंभोगः तेनयानिर्वृतिस्तापहानिस्तस्याः ७ (मित्रनामकस्यदेवतस्य) परिमोक्षस्यमलत्यागस्यपायुरिंद्रियं । गुदःस्थानं (तगुहिंसादीनांक्षेत्रमित्यर्थः) निर्ऋतेरलक्ष्म्याः ८ (पराभूतेःपराजयस्य) तमसोऽज्ञानस्यपश्चिमःपृष्ठभागः गोत्राणांगिरिणांअस्थिसंघातः ९ अव्यक्तंप्रधानंरसोऽन्नादिसारः सिंधवः समुद्राः तेषां (भूतानांजीवानां) निधनस्यलयस्यउदरंपदंस्थानंविदितं ज्ञानिभिः मनसः अस्मदादिलिंगशरीरस्य (पदंहरेर्हृदयं)१०(धर्मस्यसुकृतस्यतदभिमानिदेवतस्यवा)तुभ्यंतव (ममब्रह्मणः) कुमाराणांसनकादीनांभवस्यश्रीरुद्रस्य(विज्ञानस्यतत्त्वानुभवस्यसत्त्वस्यशुद्धस्यचित्तस्यपरस्यहरेः)आत्माचित्तंपरमयनं११एवंतावत्परमेश्वराज्जातंविश्वंततोनभिन्नं यथा (सुवर्णाज्जातं) कुंडलंसुवर्णान्नपृथक् सतुसर्वनियंतासर्वप्रकाशकोनित्यमुक्तइत्यर्थादुक्तं । एतदेवपुरुषसूक्तार्थकथनेनद्रढयति । तत्रसहस्रशीर्षेत्यर्घर्चस्यब्राह्मणोस्यमुखमासीदित्यादेश्चऋक्चतुष्टयस्यार्थःपूर्वाध्यायएवदर्शितः । पुरुषएवेदंसर्वमित्यस्यार्थंदर्शयति । अहंभवानितिसार्धैस्त्रिभिः । तेतवअग्रजाइमेसनकादयोमरीच्यादयश्च (सुराश्चअसुराश्चनराश्चेति मृगाश्चसरीसृपाः सर्पाश्च)नागागजाः १२ १३ जलंचस्थलंचनभश्चओकांसियेषांते । नभौकसइतिसंधिरार्षः (नभमित्यदंतंवाद्रष्टव्यं ग्रहाश्चरव्यादयः) ऋक्षाणिचाश्विन्यादीनिकेतवश्चधूमकेतुप्रभृतयऔत्पातिकाः (ग्रहविशेषाः ताराश्च स्तनयित्नवोमेघाः) सर्वमिदं (पुरुषएवनततः पृथगित्यर्थः)१४

केशश्मश्रुनखान्यस्याशिलालोहाभ्रविद्युताम् ॥बाहवोलोकपालानांप्रायशःक्षेमकर्मणाम् ५ विक्रमोभूर्भुवःस्वश्चक्षेमस्यशरणस्यच ॥ सर्वकामवरस्यापिहरेश्चरण आस्पदम् ६ अपांवीर्यस्यसर्गस्यपर्जन्यस्यप्रजापतेः ॥ पुंसःशिश्नउपस्थस्तुप्रजात्यानंदनिर्वृतेः ७ पायुर्यमस्यमित्रस्यपरिमोक्षस्यनारद ॥ हिंसायानिर्ऋते र्मृत्योर्निरयस्यगुदःस्मृतः ८ पराभूतेरधर्मस्यतमसश्चापिपश्चिमः ॥ नाड्योनदनदीनांतुगोत्राणामस्थिसंहतिः ९ अव्यक्तरससिंधूनांभूतानांनिधनस्यच ॥ उदरंविदितंपुंसोहृदयंमनसःपदम् १० धर्मस्यममतुभ्यंचकुमाराणांभवस्यच ॥ विज्ञानस्यचसत्त्वस्यपरस्यात्मापरायणम् ११ अहंभवान्भवश्चैवतइमे मुनयोऽग्रजाः ॥ सुरासुरनरानागाःखगामृगसरीसृपाः १२ गंधर्वाप्सरसोयक्षारक्षोभूतगणोरगाः ॥ पशवःपितरःसिद्धाविद्याध्राश्चारणाद्रुमाः १३ अन्ये चविविधाजीवाजलस्थलनभौकसः ॥ ग्रहर्क्षकेतवस्तारास्तडितःस्तनयित्नवः १४

श्लोकाः ५/१४

चूर्णिका

केशश्मश्रुनखान्यस्यशिलालोहाभ्रविद्युताम् इंद्रादिलोकपालानांतस्यबाहवः क्षेत्रम् ५ तस्यविक्रमः भूर्भुवःस्वः क्षमस्यशरणस्यचस्थानम् सर्वकामानांतच्चरणौक्षेत्रम् ६
अपांवीर्यस्यसर्गस्यपर्जन्यस्यप्रजापतेः तच्छिश्नःस्थानम् तदुपस्थस्तुसंतानार्थसंभोगसुखस्यस्थानम् ७ यमस्यमित्रस्यमलत्यागस्य तत्पायुः क्षेत्रम् हिंसायाः निर्ऋतेः
मृत्योः निरयस्यतद्गुदस्थानम् पराभूतेः अधर्मस्यतमसः तत्पृष्ठभागः नदनदीनांनाड्यःअद्रीणां अस्थीनिप्रधानस्यअन्नादिरसानांसिंधू नांभूतानांलयस्यचउदरम् १०
लिंगशरीरस्यतद्धृदयंपदम् धर्मस्यममतवकुमाराणांभवस्यच ११ विज्ञानस्यसत्त्वस्यचतच्चित्तं क्षेत्रम् अहंभवान्भवःइत्याद्याःदेवाःअसुराःनराःनागाःखगाःमृगाः १२
गंधर्वाप्सरसःयक्षाःरक्षोभूतगणोरगाः पशवःपितरःसिद्धाविद्याधराश्चारणाद्रुमाः १३ अन्येजलस्थलनभौकसः ग्रहर्क्षकेतवस्तारास्तडितस्तनयित्नवः १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रपंचेनतस्यापरिच्छेदंवक्तुंसभूमिमित्यस्यार्थमाह।तेनपुरुषेणविश्वमितिभूमिपदस्यार्थः वितास्तिमितिदशांगुलपदस्यअधीत्यतिशब्दस्यआवृरा।मिनिवृत्वेत्यस्यसचवितास्तिमधिकंव्याप्यतिष्ठतीतिआ
धिक्यमात्रंविवक्षितंनतुप्रमाणं। अनुपयोगादपरिछिन्नत्वाच्च।१५एतत्सदृष्टांतमाह।(स्वेति)।असौप्राणआदित्यः'असौवाआदित्यःप्राण'इतिश्रुतेः स्वधिष्ण्यंमंडलं(प्रतपन्)प्रकाशयन्यथाबहिश्चप्र
काशयत्येवंविराड्देहंप्रकाशयन्ब्रह्मांडमंतर्बहिश्चप्रकाशयाति (पुरुषः) १६ नित्यमुक्तत्वंदर्शयितुंउतामृतत्वस्येशानइत्यस्यार्थमाह । सइति । (अमृतस्येत्यनेनमंत्रगतममृतपदमुद्दिश्य)अभय
स्येतितस्यव्याख्या(कृता । मंत्रगतं)अंन्नेनेतिपदंविभक्तिव्यत्ययेनव्याचष्टे । मर्त्यंमरणधर्मकंअन्नंकर्मफलंयस्मादत्यगात्अतिक्रांतवान् अतोनकेवलंसर्वात्मकः किंतुअमृतत्वस्यनिजानंद(—रूपमो
क्ष—)स्यापीश्वरइत्यर्थः । ननुप्रपंचात्मकस्यकुतोनित्यमुक्तत्वमित्याशंक्यतत्परिहारायएतावानस्येत्यस्यार्थमाह । महिमेति । प्रपंचात्मकस्याप्यमृतेशत्वमित्येषमहिमादुरत्ययःअपारः प्रपंचान
भिभूतत्वादितिभावः । मंत्रेणचएतावानस्यमहिमाविभूतिः सतुज्यायान्महत्तरः इतिवदताऽयमेवार्थउक्तः १७ तदेवमीश्वरोनित्यमुक्तइत्युक्तं।तदाश्रितानांभूतानांबंधमोक्षौव्यवस्थयेतिदर्शयन्
पादोस्यविश्वाभूतानीत्यस्यार्थमाह । पादेष्विति । तिष्ठत्यत्रेतिस्थितयोभूरादिलोकास्तेपादाइवपादाअंशायस्यसः स्थितिपात् तस्यस्थितिपदः । पादेषुअंशभूतेषुलोकेषुसर्वा
णिभूतानिजीवान्विदुः मंत्रेतुपादोस्यविश्वाभूतानीतिसामानाधिकरण्यमधिष्ठानाधिष्ठेयाभेदविवक्षया । पादइत्येकवचनंचसामान्याभिप्रायेणोति भूतेषुफलवैचित्र्यंदर्शयन्त्रिपादस्यामृतंदिवी
त्यस्यार्थमाह । (अमृतमिति । मंत्रगतपदार्थस्तु) अस्येश्वरस्यसंबंधित्रिपादमृतंनित्यसुखंदिविऊर्ध्वलोकेषुनतुत्रिलोक्यामीति । तदेवत्रिपाच्छब्दोक्तंत्रैविध्यंदर्शयन्नाह त्रयाणांलोकानांमूर्धामह
र्लोकस्तस्यमूर्धानस्तदुपरितनलोकाःजनस्तपःऽसत्यमिति तेषुयथाक्रमंअमृतादिकंअधायिनिहितं।तत्रत्रिलोक्यांनश्वरमेवसुखंमहर्लोकस्यक्रममुक्तिस्थानत्वेपिकल्पांतेतत्रत्यानांस्थानत्यागात्नावि
नाशिसुखं । जनलोकेत्वमृतमविनाशिसुखं यावज्जीवंस्वस्थानापरित्यागात् किंतुमहर्लोकवासिनां(तेषां)कल्पांतेत्रिलोकदाहोष्मपीडितानांतदातत्रगमनादक्षेमदर्शनमस्ति।तपोलोकेतुतस्याप्यमा
वात्क्षेममेव । वक्ष्यतिहि । "त्रिलोक्यांदह्यमानायांशक्तयासंकर्षणाग्निना । यांत्यूष्मणामहर्लोकाज्जनंभृग्वादयोर्दिताः "इति सत्यलोकेभूत्वायंमोक्षः तत्प्रत्यासत्तेः १८ एतदेववैचित्र्यम
धिकारिभेदेनोपादयन्त्रिपादूर्ध्वइत्यस्यार्थमाह । नप्रजायंतेपुत्रादिरूपेणेत्यप्रजानैष्ठिकब्रह्मचारिवानप्रस्थयतयः । तेषामाश्रमास्त्रिलोक्यावहिरासन् । गृहमेधे(गृहाश्रम)स्त्वंतः यस्मा
द बृहद्व्रतोब्रह्मचर्यव्रतरहितः १९ अयंचाधिकारभेदएकस्यैवावस्थाभेदेन । नत्वत्यंतभिन्नविषयइतिदर्शयंस्ततोविष्वङ्ङित्यस्यार्थमाह । सृतीइति । विविधंसुष्ठुअंचतिगच्छतीतिविष्वङ्पुरुषः
क्षेत्रज्ञः सृतीमार्गौदक्षिणोत्तरौविचक्रमेचलतिस्मकथंभूतेसृती । साशनानशने भोगापवर्गप्राप्तिसाधनभूते । अत्रहेतुत्वेनपुनर्विशेषणं । यद्यतः अविद्याकर्मरूपाएका । विद्या (चो
चरमार्ग—)—साधनोपासनारूपान्या । (तस्मात्तेतादृश्यौ) २०

श्लोकाः १५/२०

सर्वंपुरुषएवेदंभूतंभव्यंभवच्चयत्॥तेनेदमावृतंविश्वंवितस्तिमधितिष्ठति१५स्वधिष्ण्यंप्रतपन्प्राणोबहिश्चप्रतपत्यसौ॥एवंविराजंप्रतपंस्तपत्यंतर्बहिःपुमान् १६ सो
मृतस्याभयस्येशोमर्त्यमन्नंयदत्यगात्।महिमैषततोब्रह्मन्पुरुषस्यदुरत्ययः१७पादेषुसर्वभूतानिपुंसःस्थितिपदोविदुः।अमृतंक्षेममभयंत्रिमूर्ध्नोऽधायिमूर्धसु१८पादा
स्त्रयोबहिश्चासन्नप्रजानांयआश्रमाःअंतस्त्रिलोक्यास्त्वपरोगृहमेधोबृहद्व्रतः१९सृतीविचक्रमेविष्वक्साशनानशनेउभे॥यदविद्याचविद्याचपुरुषस्तूभयाश्रयः २०

चूर्णिका

सर्वंपुरुषएवेदंभूतंभव्यंभवच्चयत् तेनपुरुषेणइदंविश्वंव्याप्तम् सःसर्वंव्याप्यवितस्तिंऽअधितिष्ठति १५ यथासूर्यऽमंडलंबहिश्चयथाप्रकाशयति एवंपुरुषः विराट्देहंप्रकाशयन्
ब्रह्मांडंप्रकाशयति १६ सःअमृतस्यभयास्यचईशः १७ अस्यअंघ्रिषुभूतानिविदुः १८ किंच गृहाद्याश्रमाः अस्यदा आसन् १९ सः दक्षिणोतरौभोगापवर्ग
प्राप्तिसाधनभूमौमार्गौचलतिस्म २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंविराजंतर्वर्तिनांफलवैचित्र्यमुक्त्वातत्कारणेश्वरस्यतद्वैलक्षण्यंदर्शयितुंतस्माद्विराळजायतेत्यस्यार्थमाह । यस्मादंडंजज्ञेतत्रचभूतेंद्रियगुणात्मकोविराट्चजज्ञेसईश्वरस्तद्विश्वंविराड्देहंद्रव्य
मंडंच(अत्यगात्)अतिक्रांतवान् सूर्यइवेतिपूर्वोक्तएवदृष्टांतः ।(स्वस्मात्प्रकाशमानंमंडलंविश्वंचमंडलमध्यवर्तीसूर्यः किरणैः सर्वतः प्रकाशयंस्तदुभयमत्येतियथेत्यर्थः) २१ नन्वेवंपुरुषएवचे
त्सर्वंतर्हियज्ञस्यतत्साधनानांचापृथगाभावात्यज्ञैःपुरुषाराधनंनसिध्येदित्याशंक्यतत्परिहारायत्पुरुषेणहविषेत्यादिमंत्रार्थसंगृह्यदर्शयाति यदेत्यादिनाअस्येतिविराडंतर्यामिणस्तस्यैवप्रकृ
तत्वात्।नाभौभवंनाभ्यंतस्मात्(कमलात्अहमासं)यज्ञस्यसंभारान्साधनानि(पशुयूपादीनिपुरुषावयवंविना)नापश्यम् २२तदातेषुसंभारेषुसाध्येषुसत्सुपुरुषावयवैरेतेसंभाराःसंभृताः(मया)इतिचतु
र्थेनान्वयः । (तत्रपशवश्छागाद्याः) वनस्पतयोयूपाः देवयजनंयज्ञभूमिः । इदंचेतिवचनात्यज्ञार्हेस्थानेउपविष्टः कथयतीतिगम्यते । बहुगुणान्वितः (कालो)वसंतादिः २३ वस्तूनिपात्रादी
नि ।ओषधयोव्रीह्यादयः । स्नेहाघृतादयः ।रसामधुरादयः। लोहानिसुवर्णादीनि मृदश्च२२ हौत्रादिकं चातुर्होत्रं (अध्वर्युप्रभृतिभिश्चतुर्भिर्होतृभिःक्रियमाणं)कर्म २४नामधेयानिज्योतिष्टोमादी
नि।ऋगादीनामुक्तत्वात्मंत्राः स्वाहाकारादयः।(व्रतानिब्रह्मचर्यादीनि) ।देवतानां(अग्न्यादीना)मनुक्रमउद्देशः कल्पोबौधायनादिकर्मपद्धतिग्रंथः।अनेनाहंयक्ष्येइतिसंकल्पः। तंत्रमनुष्ठानप्रकारः
२५गतयोविष्णुक्रमाद्याः।मतयोदेवताध्यानानि।प्रायश्चित्तं (अंतरालावाप्तांतरायपरिहारेणयथोक्तकर्मफलसाधकंकर्म। कृतस्यकर्मणो) भूर्भुवःस्वराकृतस्यभगवत्यर्पणंसमर्पणम् २६(इत्येवं)संभृताः
संपादिताःसंभारा(यज्ञसाधनानि)येनसोहं(यज्ञसंभाराणांपुरुषावयवात्मकत्वात्यज्ञरूपं तमेवपुरुषं)तेनैवयज्ञेनैव(अयजम्।अनेनयज्ञेनयज्ञमयजंतेतिमंत्रार्थःसूचितः२७तेनदेवाअयजंतेतिमंत्रार्थसप्र
पंचंदर्शयति । ततइतिद्वाभ्याम् । (तेतवभ्रातरः"मरीचिरत्र्यंगिरसौ पुलस्त्यःपुलहःक्रतुः । भृगुर्वसिष्ठोदक्षश्चे"तिनव)। व्यक्तमिंद्रादिरूपेण । अव्यक्तंस्वतः। अनेनपुरुषंजातमग्रतइत्यस्यार्थोद
र्शितः २८ कालेस्वस्वावसरे । (अपरेमरीच्यादिव्यतिरिक्ताः) २९ यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहराति । नारायणइति । आहितं(तेन)अधिष्ठितं (तदाधारमवस्थितमित्यर्थः)। भगवत्त्वे
हेतुः । यःस्वतोऽगुणःसर्गादौगृहीतामाययाउरवोगुणायेन (सः) । तस्मिन् (इत्यर्थः) ३०

॥ २९॥

यस्मादंडंविराड्जज्ञेभूतेंद्रियगुणात्मकः ॥ तद्द्रव्यमत्यगाद्विश्वंगोभिःसूर्यइवातपन् २१ यदाऽस्यनाभ्यांनलिनादहमासंमहात्मनः ॥ नाविदंयज्ञसंभारान् श्लोकाः
पुरुषावयवादृते २२ तेषुयज्ञस्यपशवःसवनस्पतयःकुशाः॥ इदंचदेवयजनंकालश्चोरुगुणान्वितः २३ वस्तून्योषधयःस्नेहारसलोहमृदोजलम् ॥ ऋचोयजूं
षिसामानिचातुर्होत्रंचसत्तम २४ नामधेयानिमंत्राश्चदक्षिणाश्चव्रतानिच ॥ देवतानुक्रमःकल्पःसंकल्पस्तंत्रमेवच २५ गतयोमतयश्चैवप्रायश्चित्तसमर्पणम् ॥ २१
पुरुषावयवैरेतेसंभाराःसंभृतामया २६ इतिसंभृतसंभारःपुरुषावयवैरहम् ॥ तमेवपुरुषंयज्ञंतेनैवायजमीश्वरम् २७ ततस्तेभ्रातरइमेप्रजानांपतयोनव ॥ अ ३०
यजन्व्यक्तमव्यक्तंपुरुषंसुसमाहिताः २८ ततश्चमनवःकालेईजिरेऋषयोऽपरे ॥ पितरोविबुधादैत्यामनुष्याःक्रतुभिर्विभुम् २९ नारायणेभगवतितदिदंविश्वमा
हितम् ॥ गृहीतमायोरुगुणःसर्गादावगुणःस्वतः ३०

चूर्णिका

यस्मात् अंडंविराट्चजज्ञे २१ तस्यईश्वरस्यनाभिकमलादहंजातः सन्पुरुषावयवंविनायज्ञसंभारान्नापश्यम् २२ ततःपुरुषावयवैःएतेसंभाराःमयासंभृताःतेचपशवः
यूपाःकुशाःभूमिःकालः २३ पात्रादीनिव्रीहयःघृतादयःरसाः सुवर्णादीनि मृदःजलं वेदाः होत्रादिकर्म२४यज्ञनामानि मंत्राःदक्षिणाव्रतानि देवतोद्देशःपद्धतिग्रंथःसंकल्पः
तंत्रं २५ गतयःध्यानानि प्रायश्चित्तसमर्पणम् २६ एवंसंपाद्य एतैरेवईश्वरं अयजम् २७ ततःमरिच्यादयः अयजन् २८ ततोमनवः ऋषयःपितरःदेवाःदैत्यामनुष्याः
विभुंईजिरे २९ भगवति नारायणेइदंविश्वं आहितम् ३० ॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यत्परस्त्वमित्येतत्प्रश्नोत्तरंयदुक्तम् सएषभगवान्सर्वेषांममचेश्वरइतितदुपसंहरति सृजामीति (तन्नियुक्तः नारायणेनप्रेरितः) पालनंतुस्वयमेवकरोतीत्याह विश्वमिति पुरुषरूपेणविष्णुरूपेण (तद्वशस्तदाज्ञाधीनइत्यर्थः हरोरुद्रः) त्रिशक्तिर्मायातां (घृष्णाति)धरतीतितथासः ३१ यच्चेदंविश्वंयदात्मकश्चत्वंइत्येवमादिसर्वप्रश्नानांसामान्योत्तरं यदुक्तं 'वासुदेवात्परोब्रह्मन् नचान्योर्थोस्तितत्त्वत' इति "पुरुषएवेदं सर्वमिति श्रुत्याचयत्दृढीकृतं तदुपसंहरति इतीति।सदसदात्मकं कार्यकारणात्मकं भाव्यंसृज्यं(यत्किंचित्तत्)भगवतः सकाशादन्यत्पृथङ्नभवतीति तेऽभिहितं ३२ यदुक्तंएतावत्त्वं यतोहिमे तमविज्ञायमामीश्वरम् प्रब्रवीषितदुपपाद्योपसंहरति । नभारतीति । यत्यस्मान्मेमया औत्कंठ्यं मत्त्युद्रेकः तद्युक्तेनहृदाहरिर्धृतः ध्यातः अंगहेनारदअतोमेवाङ्मनइंद्रियाणांवृत्तयःसत्यार्थाः । नतुमत्प्रभावेनेत्यर्थः ३३ अत्रस्वानुभवमेवान्वयव्यतिरेकाभ्यांप्रमाणयतिद्वाभ्यां । सोहंसमाम्नायादिभिः सर्वोत्कृष्टोपि (निपुणं) योगमाश्रित्यापिसमाहित (एकाग्रचित्तोपि)यत्आत्मनोममसम्भवो जन्म तमेवमे ज्ञातवान् (तदधिगमे)कुतोन्यस्यवार्ता एतच्चतृतीयस्कन्धेपद्मोद्भवेवक्ष्यति(समाम्नायोवेदस्तत्प्रधानस्तन्मयः प्रजापतीनांदक्षादीनांपतिस्तैरभिवंदितश्च) ३४ तदाअहंसमीयुषांशरणागतानांभवछिच्दं संसारनिवर्तकं स्वस्त्ययनं मंगलावहं सुमंगलं सुसेव्यं तस्यचरणं नतोस्मि यतोऽचिंत्यमहिमत्वेननज्ञातवानस्मीति कैमुत्यन्यायेनाह योहीति स्वमायाविस्तारंयो (भगवान्) स्वयमपि पर्यगात् परिशब्दोनिषेधे एतावानितिनज्ञातवानित्यर्थः अपरे (अस्मदादयोन्ये) कुतोजानीयुः (कुतः) तस्यचरणंनतोस्मीति पूर्वेणसम्बंधः ननुसर्वज्ञः कथंनजानाति।(इत्याशंक्य)अन्ताभावादितिदृष्टांतेनाह यथास्वस्यांतंनभोनाप्नोति (अनंतत्वात्) तद्वत् नहिखपुष्पादर्शनंसार्वज्ञंविहंतीतिभावः तथाचवक्ष्यति ' द्युतपयएवतेनययुरंतमनंततयात्वमपियदंतरांडनिचयाननुसावरणा' इत्यादि । श्रुतिश्च 'योस्याध्यक्षः परमेव्योमन्सोअंगवेदयदिवानवेदे 'ति ३५ एतत्प्रपंचयतिनाहमितिद्वाभ्यां वामदेवोरुद्रोपि (नवेद) यस्यकृतांगतिंपरमार्थस्वरूपाम् (अपरेनविदुरितिकिमुतवक्तव्यं) किंतुइदंप्रपंचरूपम् तस्यमाययाविनिर्मितम् विचक्ष्महेविद्मः तदप्यात्मरूपम् स्वज्ञानानुरूपमेव नतुकृत्स्नम् । मोहितबुद्धयइत्ययं तदज्ञानेप्रपंचज्ञानेचहेतुः ३६ ननुसर्वेपितंवर्णयंतोदृश्यंतेतत्राह । यस्येति ।(तत्त्वेनवस्तुत्वेन) ३७

॥२६॥

श्लोकाः ३१/३७

सृजामितन्नियुक्तोऽहंहरोहरतितद्वशः ॥ विश्वंपुरुषरूपेणपरिपातित्रिशक्तिधृक् ३१ इतितेऽभिहितंतातयथेदमनुपृच्छसि ॥ नान्यद्भगवतःकिंचिद्भाव्यं सदसदात्मकम् ३२ नभारतीमेंगमृषोपलक्ष्यतेनैवक्वचिन्मेमनसोमृषागतिः ॥ नमेहृषीकाणिपतंत्यसत्पथेयन्मेहृदौत्कंठ्यवताधृतोहरिः ३३ सोहंसमाम्नायमयस्तपोमयःप्रजापतीनामभिवंदितःपतिः ॥ आस्थाययोगंनिपुणंसमाहितस्तन्नाध्यगच्छंयतआत्मसंभवः ३४ नमोऽस्म्यहंतच्चरणंसमीयुषांभवच्छिदं स्वस्त्ययनंसुमंगलम् ॥ योह्यात्ममायाविभवंस्मपर्यगाद्यथानभःस्वांतमथापरेकुतः ३५ नाहंनयूयंयदृतांगतिंविदुर्नवामदेवःकिमुताऽपरेसुराः ॥ तन्माययामोहितबुद्धयस्त्विदंविनिर्मितंचात्मसमंविचक्ष्महे ३६ यस्यावतारकर्माणिगायंतिह्यस्मदादयः ॥ नयंविदंतितत्त्वेनतस्मैभगवतेनमः ३७

चूर्णिका

तेननियुक्तःअहंसृजामितद्वशःहरःहरति पुरुषरूपेणसःपाति ३१ हेतातइतितेकथितम् ३२ हेनारदयस्मात्मयाहृदाहरिर्धृतः अतःमेवाणीमृषान मेमनसःगतिर्मृषानमे इंद्रियाणिअसन्मार्गेनपतंति ३३ सोहंयोगमास्थाययतःआत्मसंभवः तन्नाध्यगच्छन् ३४ सोहंभवच्छिदंसुमंगलंतच्चरणंनतोस्मि ३५ यस्यगतिंअहंयूयंशिवं नविदुः ६६ अस्मदादयः ययसवतारकर्माणिगायंतिपरंचतंविदंति तस्मैभगवतेनमः ३७

॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अवतारकर्माणितुसंक्षेपतोदर्शयति । सएवआद्योभगवान्यःपुरुषावतारः सन्सृष्ट्यादिकरोति । आत्मात्मन्यात्मनात्मानमिति । कर्ताअधिकरणंसाधनंकर्मचस्वयमेवेत्यर्थः । पुरुषाख्यो वतारः सृष्ट्यादीनि(तस्य)कर्माणीतिसंक्षेपोक्तिः ३८ नयंविदंतितत्त्वेनेत्युक्तंकिंतत्तत्त्वमित्यपेक्षायामाह । ज्ञानंकेवलंसत्यंतत्त्वम् । घटाद्याकारवृत्तिज्ञानव्यवच्छेदार्थविशेषणानि । विशुद्धंविषयाकारशून्यम् यतःप्रत्यक्सर्वांतरम् । अतएवसम्यक्संदेहादिरहितं अवस्थितंस्थिरंयतोनिर्गुणम् । गुणकार्यंहिगुणव्यतिकराच्चंचलंभवति । यद्यपिवृत्तिज्ञानमपिस्वरूपज्ञानमेवेतिनचांचल्यादिदोषयुक्तंतथाप्यंतःकरणवृत्तिदोषैस्तथातथाभवतीतिव्यवच्छिद्यते।एभिरेवविशेषणैः सत्यत्वमपिसमर्थितं।किंच।यद्विकारवत्तदसत्यंदृष्टम्।नचास्यजन्मादयःषड्विकाराःसंतीत्याहअनाद्यंतं जन्मनाशरहितं।अतएवजन्मानंतराऽस्तित्वलक्षणोपिविकारोनास्ति।वृद्धिविपरिणामापक्षयाश्चनसंति।यतःपूर्णं।तत्रहेतुः नित्यमद्वयं।नित्यंसर्वदाद्वैतप्रतीतिसमयेपि(अद्वयं)परमार्थतोऽद्वैतमिति ३९ अत्रविद्वदनुभवंप्रमाणयति । हेऋषेनारदप्रशांतात्मेंद्रियाशयाःप्रसन्नदेहेंद्रियमनसः यदाभवंतितदाविदंति । अन्यदातदज्ञानेकारणमाह । प्रदातुतदेवप्रकाशमानमेवअसतांतर्कैर्विप्लुतंस्यात्तदातिरोधीयेतेति ४० कल्पेकल्पेआत्मानंसृजतीत्युक्तंकेतेस्यसृज्यमानास्तान् अवतारान्विस्तरेणाहआद्यइत्यादियावत्समाप्ति । परस्यभूम्नः पुरुषः प्रकृतिप्रवर्तकः यस्यसहस्रशीर्षेत्युक्तोलीलाविग्रहः सआद्योवतारः । वक्ष्यतिहि । ‘ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतास्मिन् । स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवः ’ यथोक्तं । ‘ विष्णोस्तुत्रीणि रूपाणिपुरुषाख्यान्यतोविदुः । प्रथमंमहतःसृष्टिर्द्वितीयंत्वंडसंस्थितम् । तृतीयंसर्वभूतस्थंतानिज्ञात्वाविमुच्यत ’ इति । यद्यपिसर्वेषामविशेषेणावतारत्वमुच्यते । तथापिकालश्च (क्षोभकः) स्वभावश्च (परिणामहेतुः) सदसदितिकार्यकारणात्मिकाप्रकृतिश्चएताःशक्तयः मनआदीनिकार्याणिब्रह्मादयोगुणावताराः दक्षादयोविभूतयइतिविवेक्तव्यं । मनोमहत्तत्त्वं । द्रव्यंमहाभूतानि । क्रमोत्रनविवक्षितः । विकारोऽहंकारः गुणः सत्त्वादिः विराट्समष्टिशरीरं । स्वराड्वैराजः । स्थास्नुस्थावरं । चरिष्णुजंगमंचव्यष्टिशरीरम् ४१ अहंब्रह्मा । भवोरुद्रः । यज्ञोविष्णुः । दक्षादयोयइमेप्रजेशाः (येचभवान्आदिर्येषांतेदेवर्षयः खगलोकपालाः खेचरलोकाधिपतयः) तललोकपालाः पातालाधिपतयः ४२ गंधर्वादीनामीशाः (येच) यक्षादीनां नाथाः रक्षोरगेतिसंधिरार्षः । ऋषीणांपितॄणांच(ऋषभाः) श्रेष्ठाः (येचान्ये) प्रेतादीनामधीशाः (तत्रयादांसिजलजंतवः तदधीशास्तिमिंगिलादयः पिशाचेशाः घंटाकर्णादयः । भूतेशाभैरवादयः । कूष्मांडेशाभृंग्यादयः मृगाधीशाः सिंहादयः पक्ष्यधीशागरुडादयः) ४३

श्लोकाः ३८/४३

सएषआद्यःपुरुषःकल्पेकल्पेसृजत्यजः ॥ आत्माऽऽत्मन्यात्मनात्मानंसंयच्छतिचपातिच ३८ विशुद्धंकेवलंज्ञानंप्रत्यक्सम्यगवस्थितम् ॥ सत्यंपूर्णमनाद्यंतंनिर्गुणंनित्यमद्वयम् ३९ ऋषेविदंतिमुनयःप्रशांतात्मेंद्रियाशयाः ॥ यदातदेवासत्तर्कैस्तिरोधीयेतविप्लुतम् ४० आद्योवतारःपुरुषःपरस्यकालःस्वभावःसदसन्मनश्च ॥ द्रव्यंविकारोगुणइन्द्रियाणिविराट्स्वराट्स्थास्नुचरिष्णुभूम्नः ४१ अहंभवोयज्ञइमेप्रजेशादक्षादयोयेभवदादयश्च ॥ स्वर्लोकपालाःखगलोकपालान्नृलोकपालास्तललोकपालाः ४२ गंधर्वविद्याधरचारणेशायेयक्षरक्षोरगनागनाथाः ॥ येवाऋषीणामृषभाःपितॄणांदैत्येंद्रसिद्धेश्वरदानवेंद्राः ॥अन्येचयेप्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः ४३

चूर्णिका

सःएषकल्पेकल्पेसृजतिहरतिपाति ३८ ३९ ४० तस्यभूम्नः पुरुषआद्यावतारः कालःस्वभावःप्रकृतिः एताः तस्यशक्तयःमहान्महाभूतानिअहंकारःसत्त्वादिगुणः इन्द्रियाणिविराट्वैराजः स्थावरंजंगमम् एतानिकार्याणि ४१ अहंशिवःविष्णु इमेगुणावताराः दक्षादयःभवदादयः स्वर्गलोकखगलोकनृलोकतललोकानांपतयः ४२ गंधर्वविद्याधरचारणयक्षरक्षोरगनागानांनाथाःऋषिपितृदैत्यासिद्धदानवानांईशाःप्रेतपिशाचभूतकुष्मांडयादोमृगपक्ष्यधीशाः ४३

१ सर्वत्रहेतुरितिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंवहुनायत्किंचिद्भगवदादितत्सर्वपरमेवतत्त्वामित्यन्वयः । (भगऐश्वर्यतद्युक्तंभगवत्)। महस्तत्तेजोयुक्तं । ओजःसहसइंद्रियमनःशक्तीतद्युक्तं (ओजस्वत्सहस्वत्) बलंदाक्ष्यं श्रीः शोमा । ह्रीरकर्मसुजुगुप्सा । विभूतिः संपत्तिः आत्माबुद्धिस्तद्युक्तं । अर्णोवर्णः अद्भुतार्णं (अद्भुतवर्णं) आश्चर्यवचनमित्यर्थः । रूपमेवस्वरूपं । रूपवत्प्रशस्तरूपयुक्तं । अस्वरूपंअरूपंचयत्तत्सर्वपरंतत्त्वंतद्विभूतिरित्यर्थः ४४ शुद्धसत्त्वावतारान्वक्तुमाह । प्राधान्यतइति । हेऋपे (भूम्नःमहतःपुरुषस्ययान्लीलावतान्आमनंतिपठंतितान्) तेतुभ्यंअनुक्रमिष्ये(गणयिष्यामीत्यन्वयः) । प्राधान्यतः (संक्षेपतइत्यर्थः तदनुक्रमणाम्रतंत्वयापायितांकर्णपुटेनेतिशेषः । सादरंश्रोतव्यमित्यर्थः कथंभूतान्) । असत्कथाश्रवणैर्यैकर्णयोः कषायाःमलास्तान्शोषयंतीतितथातान् । (पेयत्वेगुणमाह) । सुपेशान्अतिमधरान्सकारलोपआर्षः । यद्वाआपीयतामितिशत्रंतं । आपिबतां(जनानां) कर्णकषायशोषानित्यर्थः ४५ ॥ इतिद्वितीयेषष्ठोध्यायः ६ ॥ ॥ ॥ ॥ सप्तमेभगवल्लीलावताराब्रह्मणोदिताः । नारदायतत्कर्मप्रयोजनगुणैःसह १ यत्रयदाक्षितितलोद्धारणार्थंवाराहींतनुंबिभ्रत्सन्उद्यतः (समुद्रेनिमज्यरसातलगतांमहीमुद्धृत्यदंष्ट्राग्रेनिधायार्ध्वेगतइत्यर्थः तदा (अंतर्महार्णवेतद्रोधायउपागतं) सुप्रसिद्धंहिरण्याक्षंदंष्ट्र्यादददार (सकलयज्ञमयींस्रुक्स्रुवादिसर्वयज्ञोपकरणभूतावयवामित्यर्थः वज्रधरोइंद्रोवज्रेणाद्रिंयथा) १ यज्ञावतारमाह । रुचेः प्रजापतेः सकाशात्तद्भार्यायाआकूतेः सुतः सुयज्ञोनामजातः सचस्वभार्यायांदक्षिणायांसुयमाख्यान्देवान्अजनयत् सएवेंद्रःसन्यदा (लोकत्रयस्य) आर्तिमहरत्तदापूर्वंसुयज्ञइत्युक्तोपिअनुपश्चात्मनुनामातामहेन(आर्तिहरणात्)हरिरित्युक्तः अनेनदेवोत्पादनंलोकत्रयार्तिहरणंचतस्यकर्मदर्शितं । एवंसर्वत्रावतारस्तत्कर्मचज्ञेयं २ कपिलावतारमाह । कर्दमस्यप्रजापतेर्गृहेचतद्भार्यायांदेवहूत्यांजज्ञेनवभिःस्त्रीभिर्भगिनीभिःसह । सचस्वमात्रेआत्मगतिंब्रह्मविद्यां (तत्त्वसंख्यानरूपां) उक्तवान् । ययाआत्मगत्यासाआत्मनःशमलंमलिनीकरणंगुणसंगरूपंपंकंअस्मिन्नेवजन्मनिविधूयकपिलस्यगतिंमुक्तिंप्राप्तवती ३

यत्किंचलोकेभगवन्महस्वदोजःसहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णंतत्त्वंपररूपवदस्वरूपम् ४४ प्राधान्यतोयान्नृषआमनंतिलीलावतारान्पुरुषस्यभूम्नः ॥ आपीयतांकर्णकषायशोषाननुक्रमिष्येतइमान्सुपेशान् ४५ ॥ इतिश्रीभा०महा०द्वि०स्कंधेषष्ठोऽध्यायः ॥ ६ ॥ ॥ छ ॥ श्लोकाः ४४/३

॥ ब्रह्मोवाच ॥ यत्रोद्यतःक्षितितलोद्धरणायबिभ्रत्क्रौडींतनुंसकलयज्ञमयीमनंतः ॥ अंतर्महाऽर्णवउपागतमादिदैत्यंतंदंष्ट्र्याद्रिमिववज्रधरोददार १ जातोरुचेरजनयत्सुयमान्सुयज्ञआकूतिसूनुरमरानथदक्षिणायाम् ॥ लोकत्रयस्यमहतीमहरद्यदाऽऽर्तिंस्वायंभुवेनमनुनाहरिरित्यनूक्तः २ जज्ञेचकर्दमगृहेद्विजदेवहूत्यांस्त्रीभिःसमंनवभिरात्मगतिंस्वमात्रे ॥ ऊचेययाऽऽत्मशमलंगुणसंगपंकमस्मिन्विधूयकपिलस्यगतिंप्रपेदे ३

चूर्णिका लोकेयत् ऐश्वर्यतेजओजःसहोबलक्षमाश्रीह्रीसंपत्तिबुद्धियुक्तम्एतत्सर्वभगवद्विभूतयः हेऋषेअथपुरुषस्यअवतारान्प्राधान्यतस्तुभ्यंअनुक्रमिष्ये ४४ ॥ ॥ इतिद्वितीयेषष्ठः ६ ॥ ॥ छ ॥ ॥ ब्रह्मोवाच ॥ ॥ यदानंतःक्षितितलोद्धरणार्थंवाराहींतनुंबिभ्रत्सन् उद्यतःतदाअंतःसमुद्रेप्राप्तंहिरण्याक्षंदंष्ट्र्याददार १ रुचेराकूत्यांसुयज्ञोनामजातःसन्स्वस्त्रियांदक्षिणायांसुयमान्देवानजनयत् सएवइंद्रः सन्लोकत्रयस्यआर्तिंयदाअहरत् तदास्वायंभुवमनुनाहरिरित्युक्तः २ कर्दमगृहेदेवहूत्यांकपिलोभूत्वास्वमात्रेब्रह्मविद्यांउक्तवान् ययासामुक्तिंप्राप्तवती ३ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दत्तात्रेयावतारमाह (पुत्रमिच्छतोत्रेः) मयाहमेवतुभ्यंदत्तइतियद्यतआहततःसनाम्नादत्तोजातःस्वभक्तेभ्योयोगैश्वर्यदानंतच्चरितंदर्शयति यस्यपादपंकजयोःपरागस्तेनपवित्रादेहायेषांतेउभ
यींऐहिकींआमुष्मिकींचभुक्तिमुक्तिरूपांवा(हैहयः कार्तवीर्यःसचयदुश्चतदाद्याआपुः) ४ कुमारावतारमाह मेमयाआदौयत्तपस्तप्तंतस्मात्स्वतपसः मत्तपसोहेतोःसहरिः चतुःसनोभूत् सनत्कुमारः
सनकः सनंदनः सनातनइतिचत्वारः सनशब्दानाम्नियस्यसः कथंभूतात्स्वतपसः सनात्अखंडितात् (अव्ययमेतत्) यद्वास्वतपसः सनात्दानात्समर्पणादित्यर्थः 'षणुदाने'धातुः । सचपूर्वक
ल्पस्यसंप्लवेप्रलयेविनष्टंउच्छिन्नसंप्रदायंआत्मतत्त्वंइहअस्मिन्कल्पेसम्यक्जगाद उक्तवान् । सम्यक्त्वंदर्शयति । यत्गदितमात्रमेवमुनयः आत्मन्आत्मनिमनसिअचक्षतसाक्षादपश्यन् ५
नरनारायणावतारमाह धर्मस्य (यमधर्मस्य) पत्न्यांदक्षदुहितरिमूर्तिसंज्ञायांनारायणोनरइतिमूर्तिद्वयेनजातः। कथंभूतः। स्वः असाधारणस्तपःप्रभावोयस्य ।तदेवाह अनंगस्यप्टतना(सेनास्था
नीयाः)देव्योअप्सरसोभगवतः सकाशात्आत्मनः (आत्मरूपाः) स्वप्रतिरूपाउर्वश्याद्याःस्त्रीर्दृष्ट्वातस्यनियमावलोपंव्रतभंगंघटितुंसाधयितुंनशेकुः यद्वाआत्मनःस्वस्ययोनियमः तपोनाशनरू
पः तस्यअवलोपंतत्रदृष्ट्वाभगवतस्तंघटयितुंनशेकुरिति । एतद्वाख्यानमेकादशेभविष्यति । ६ । यत्रकामविजयीक्रोधोपिविभेतितत्र (वराकः) कामोनप्रभवतीतिकिंवक्तव्यमित्याह काममिति
कृतिनः श्रीरुद्रप्रमुखाः (कुशलाः) रोषयुक्तयादृष्ट्याकामंदहंति रोषंत्वात्मानंदहंतमपितेपिनदहंतिक्रोधेनाभिभूयंतइत्यर्थः ननुअहोसोयंरोषोयदंतरंयन्मध्यंप्रविशन्अलंबिभेति । यद्वायस्यअं
तः मनः कथंभूतंअमलंनिर्मलंशुद्धसत्त्वात्मकंप्रविशन्निति (अस्यनारायणस्यमनः कामः पुनः कथंनुश्रयेत) ७ चरित्रेणैवकमप्यवतारंसूचयति (विद्धइति) । मातुः सपत्न्याः उदितान्युक्ता
निवाक्यान्येवपतत्रिणोबाणास्तैर्विद्धोध्रुवोराज्ञउत्तानपदोतिसमीपे (बालोपिसन्) तपसेतपस्तप्तुं (वनान्युपगतःगृणतेस्तुवतेतस्मैप्रसन्नो) ध्रुवगतिंध्रुवपदं(अदात्) यत्यांउपरिस्थितां (गतिं)
अधस्तात्स्थिता दिविभवादिव्याः सप्तर्षयः स्तुवंतियद्वाउपरि (स्थिताः) भृग्वादयः अधस्तात्सप्तर्षयइति ८

अत्रेरपत्यमभिकांक्षतआहतुष्टोदत्तोमयाऽहमितियद्भगवान्सदत्तः ॥ यत्पादपंकजपरागपवित्रदेहायोगर्द्धिमापुरुभयींयदुहैहयाद्याः ४ तप्तंतपोविविधलोकसिसृ
क्षयामेआदौसनात्स्वतपसःसचतुःसनोऽभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वंसम्यग्जगादमुनयोयदचक्षतात्मन् ५ धर्मस्यदक्षदुहितर्यजनिष्टमूर्त्यांनाराय
णोनरइतिस्वतपःप्रभावः ॥ दृष्ट्वाऽत्मनोभगवतोनियमावलोपंदेव्यस्त्वनंगपृतनाघटितुंनशेकुः ६ कामंदहंतिकृतिनोननुरोषदृष्ट्यारोषंदहंतमपितेनदहंत्यसह्यं
॥ सोऽयंयदंतरमलंनिविशन्बिभेतिकामःकथंनुपुनरस्यमनःश्रयेत ७ विद्धःसपत्न्युदितपत्रिभिरंतिराज्ञोबालोऽपिसन्नुपगतस्तपसेवनानि ॥ तस्माआदाद्ध्रु
वगतिंगृणतेप्रसन्नोदिव्याःस्तुवंतिमुनयोयदुपर्यधस्तात् ८

श्लोकाः ५/८

चूर्णिका अपत्यंइच्छतः अत्रेः तुष्टः सन् मयाअहमेवतुभ्यंदत्तं इतियतः आहततः सः दत्तोजातः यत्पादपंकजयोः परागेनपवित्रदेहाः यदुहैहयाद्याः भुक्तिंमुक्तिंचआपुः ४ आदौ
मयालोकसिसृक्षयायत्तपः तप्तं तस्यसमर्पणात्सः चतुःसनोभूत्वापूर्वकल्पस्यप्रलयेऽच्छिन्नसंप्रदायंआत्मतत्त्वंआस्मिन्कल्पेजगाद ५ धर्मस्यस्त्रियांमूर्त्यां नारायणोनरइ
तिद्विमूर्त्याजज्ञे यस्मात् उत्पन्नाः स्वसदृशीः स्त्रीर्दृष्ट्वा अप्सरसः तस्यतपोनाशंकर्तुंनशेकुः ७ उत्तानपदःसमीपेसापत्नमातुर्वाग्बाणैर्विद्धःध्रुवः बालोपितपस्तप्तुंवनंगतः त
स्मैध्रुवपदंअदात् यत्मुनयः स्तुवंति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथ्ववतारमाह । यत्यदाऋषिभिःअर्थितःअवतरितुंप्रार्थितःतदावेनदेहादवतीर्णःतंत्रात्वाअन्वर्थंतत्पुत्रइतिपदंनामलेभे । ‘ पुंनाम्नोनरकाद्यस्मात्पितरंत्रायतेसुतः । तस्मात्पुत्रइतिप्रोक्तःस्वयमेवस्वयंभुवे’तिहिपुत्रपदव्युत्पत्तिः (अतोऽन्वर्थत्वं) कथंभूतं (वेनं) द्विजानांशापवाक्यमेववज्रंतेनविप्लुष्टंदग्धंपौरुषंभगमैश्वर्यंचयस्यतम् । (अत्रहेतुः । उत्पथगतं । मामेवयजध्वंमत्तोन्यद्दैवतंनास्तीतिउन्मार्गवर्तिनम् ।) चरित्रांतरमाह। (दुग्धेति ।) येनचजगतिजगदर्थेवसूनिअन्नादिद्रव्याणि (वसुधापृथ्वी) दुग्धा । (दुदुहे) ९ ऋषभावतारमाह । (नाभेरिति ।) असौहरिः नाभेराग्नीध्रपुत्रात्सुदेव्याःसूनुरास । नाभेर्भार्यायामेरुदेव्याएवसुदेवीत्यपिसंज्ञा । (जडवद्योगचर्या) जडवत्योगेननित्यसमाधिनाचर्यां (चचार) यद्वयांचर्यांपारमहस्यंपरमहंसप्राप्यंपदं ।) तत्रहेतुः समदृक् । तत्रापिहेतुः स्वस्थः स्वस्वरूपेस्थितः । यतः प्रशांतेंद्रियः । तत्कुतः । यतः परितोमुक्तसंगः । १० हयग्रीवावतारमाह । सत्रइति अथोइत्यर्थांतरेसएवसाक्षाद्भगवान्ममब्रह्मणःसत्रेयज्ञेहयशीर्षाआस । तपनीयंसुवर्णंतद्वद्वर्णोयस्य(सः ।) छंदोमयः वेदमयः तद्विधेयायेमखास्तन्मयः । अमृतमयइतिवापाठः । मखैर्यजनीयाअखिलादेवतास्तदात्माचअस्यश्वसतः श्वासंमुंचतः नस्तः नासापुटात् । उशतीः उशत्यः कमनीयावेदलक्षणावाचोबभूवुः ११ मत्स्यावतारमाह । मत्स्यो (युगांतसमये) माविनावैवस्वतेनमनुनादृष्टः क्षोणीमयः पृथ्वीप्रधानः तदाश्रयइत्यर्थः (क्षोणीमयींनावंहिस्वशृंगेनिहितवान् ।) अतएवनिखिलजीवनिकायानामाश्रयः । मे (मम ब्रह्मणो) मुखाद्विस्रंसितात्अधःपतितान्वेदमार्गान्वेदानादाय (उरुभयेमहाभयंकरे) तत्रयुगांतसलिलेविजहारहहर्षेण (क्रीडितवान्)१२ कूर्मावतारमाह। क्षीरोदधौकच्छपवपुः (कूर्ममूर्तिः) सन् गोत्रंमंथनार्थंमंदरगिरिंपृष्ठेनविधृतवान् । कदाअमृतलब्धयेक्षीराब्धिमुन्मथ्नतांसतां । निद्रायाःक्षणःअवसरउत्सवोवायस्यसः । (तदा) निद्रावसरः कुतस्तत्राह । अद्रेः परिवर्तः परिभ्रमएवकषाणः (विलेखनकरः) घर्षणंसुखप्रदोयस्यांसाकंडूर्यस्यसः यद्वाअद्रिपरिवर्तएवकषः कषणं (विलेखनं) तेन अणतिअपयातीति (तथाअद्रिपरिवर्तकषाणा) कंडूः (कंडूतिः) यस्य १३

श्लोकाः ९/१३

यद्वेनमुत्पथगतंद्विजवाक्यवज्रविप्लुष्टपौरुषभगंनिरयेपतंतम्॥त्रात्वाऽर्थितोजगतिपुत्रपदंचलेभेदुग्धावसूनिवसुधासकलानियेन ९नाभेरसावृषभआससुदेविसूनुर्योवैचचारसमदृग्जडयोगचर्याम् ॥ यत्पारमहंस्यमृषयःपदमामनंतिस्वस्थःप्रशांतकरणःपरिमुक्तसंगः १० सत्रेममासभगवान्हयशीरषाऽथोसाक्षात्सयज्ञपुरुषस्तपनीयवर्णः ॥ छंदोमयोमखमयोऽखिलदेवतात्मावाचोबभुवुरुशतीःश्वसतोऽस्यनस्तः ११ मत्स्योयुगांतसमयेमनुनोपलब्धःक्षोणीमयोनिखिलजीवनिकायकेतः ॥ विस्रंसितानुरुभयेसलिलेमुखान्मेआदायतत्रविजहारहवेदमार्गान् १२क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धयआदिदेवः ॥ पृष्ठेनकच्छपवपुर्विदधारगोत्रंनिद्राक्षणोऽद्रिपरिवर्त्तकषाणकंडूः १३

चूर्णिका ॥३०॥

यदाऋषिभिः प्रार्थितः भगवान् तदानिरयेपततंवेनंरक्षित्वापुत्रनामलेभे येनपृथुना जगदर्थेपृथ्वीदुग्धा ९ नाभिराज्ञःसुदेव्यांऋषभोभूत्वाजडयोगचर्यांचचार यांऋषयः पारमहंस्यंपदंआमनंति १० सएवभगवान्ममब्रह्मणःयज्ञेहयशीर्षाआस यस्यनासापुटात्वेदलक्षणावाचोबभूवुः ११ युगांतसमयेभाविनावैवस्वतमनुनामत्स्योदृष्टःसःमन्मुखगलितान् वेदान् आदाययुगांतसलिलेमुदाविजहार १२ अमृतलब्धयेअमरदानवयूथपानांक्षीराब्धिमथ्नतांसतांभगवान्कूर्मवपुःसन्मन्दरगिरिंपृष्ठेनधृतवान् १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीनृसिंहावतारमाह । त्रैविष्टपादेवास्तेषामुरुभयं (दैत्येभ्योयन्महद्भयंतत्) हंतीति (त्रैविष्टपोरुभयहा) । तथा (भूतः) सभगवान् यद्वात्रैविष्टपादेवास्तेषामप्युरुभयंयस्मात्तादृशोहोसा यस्यतंनृसिंहरूपंअथवाहिरण्यकशिपोराज्यकालेत्रैविष्टपादैत्यास्तेषामुरुभयजनकोहासोयस्मिंस्तत्रैविष्टपोरुभयहासं तच्चतन्नृसिंहरूपंकृत्वाकथंभूतंभ्रमंत्योभृकुट्यौदंष्ट्राश्चयस्मिन्तत्तत् तत्करालंवक्त्रं यस्मिन्तत् । दैत्येंद्रं (हिरण्यकशिपुंआरात्समीपएव) स्फुरंतंगदयाउपलक्षितंअभिपतंतंनखैर्विददार १४ हरिसंज्ञकावतारमाह । अंतरितियुगलेन गजयूथस्यपतिः (गजेंद्रः सरोमध्येमहा बलेननक्रेणपदेधृतः सन्अंबुजंहस्तेयस्यसः) तीर्थरूपंश्रवोयशोयस्यसतीर्थश्रवाः (तत्संबोधनं) हेतीर्थश्रवः नामधेयस्य श्रवणेनैवमंगलं (कल्याणप्रदं नामधेयंयस्यसः १५ तद्वचनंश्रुत्वाशरणा र्थिनंतंहस्तेशुंडायांप्रगृह्य किंकृत्वानक्रस्यग्राहस्यवदनंविनिष्पाट्यविदार्यतस्माद्वदनात् (उद्धृतवान् कथंभूतः अप्रमेयः इयत्तारहितः पतगराजोगरुडस्तत्स्कंधारूढः।) १६वामनावतारमाह।(ज्या यानिति) अदितेःसुतानांद्वादशादित्यानांमध्येअधियज्ञः यज्ञाधिष्ठाताविष्णुः अवरजः कनीयानपिगुणैर्ज्यायान्ज्येष्ठः गुणानेवाह।यद्यतइमान्लोकान्विचक्रमेपादन्यासैः क्रांतवान् अथप्रतिश्रु तानंतरमेव । तत्रहेतुः । बलेःक्ष्मांवामनरूपेण (ह्रस्वेनरूपेणत्रिपदच्छलेन) जगृहे (पदत्रयमितांभूमिंवृणेइतिछलेनगृहीतवान् । नन्वीश्वरः स्वयंकिमितिदुर्बलवत्तथाचक्रे । तत्राह । या च्ञांविना(पथिचरन्) धर्ममार्गेवर्तमानः (प्रभुरपि) नचाल्यः ऐश्वर्यान्नभ्रंशनीयइति (याच्ञयैवबलिरैश्वर्याद्भ्रंशतइत्यर्थः) १७ ननुतर्हियाच्ञया।पिचालनमनुचितमेवे त्याशंक्यततोप्यधिकंस्वसालोक्यादिदास्यामीत्याशयेनहृतवानित्याह । नार्थइति । यद्विबुधाधिपत्यंइदानींबलात्प्राप्तंअग्रे (भगवता) दीयमानंचअयंबलेःपुरुषार्थोनभवति । कुतइत्य त्राह । आपइति । आअपइतिच्छेदः उरुक्रमस्यपादशौचंचरणक्षालनरूपाः अपः आसर्वतोधृतवतः । क्व । शिखाशिखायांमूर्ध्नीत्यर्थः । (शिखायां धृतवान्शिखाधृतवान्तस्य ।) किंच शुक्रे णवारितोऽपिशप्तोपिअंमहेनार दयप्रतिश्रुतंविनाअन्यन्नचिकीर्षत्कर्तुंनैच्छत् । (अडागमाभावस्त्वार्षः। किंतुप्रतिश्रुतंदातुमेवैच्छत्अतएव) यस्तृतीयपादपूरणार्थंहरयेआत्मानंदेहमप्यभिमेने अंगीकृतवान् (समर्पितवानित्यर्थः ।) एवंसदेहंत्रैलोक्यंश्रद्धतादत्तवतोविबुधाधिपत्य–(–लक्षणंयत्फलंअयं) अर्थोनभवतीत्यर्थः १८ हंसावतारमाह । तुभ्यमिति । भृशंविवृद्धेनभावेन अत्युद्रिक्तयाभक्त्यापरितुष्टःसन्भक्तियोगंसाधुयथातथा (तुभ्यमस्मभ्यंच) उवाच । ज्ञानंचेति । ज्ञानंज्ञानसाधनं । किंतत्भागवतंनाम । कथंभूतं । तत्त्वमेवसतत्त्वंआत्मतत्त्वदीपकं (आत्मतत्त्वप्रकाशकमित्यर्थः) विवृद्धभावेनेतिविशेषणस्यफलमाह । यदिति । (वासुदेवः शरणमाश्रयोरक्षितावायेषाम्) १९

श्लोकाः १४/१९

त्रैविष्टपोरुभयहासनृसिंहरूपंकृत्वाभ्रमद्भ्रुकुटिदंष्ट्रकरालवक्त्रम् ॥दैत्येंद्रमाशुगदयाऽभिपतंतमारादूरौनिपात्यविददारनखैःस्फुरंतम् १४अंतःसरस्युरुबलेनपदेगृही तोग्राहेणयूथपतिरंबुजहस्तआर्तः॥आहेदमादिपुरुषाखिललोकनाथतीर्थश्रवःश्रवणमंगलनामधेय १५श्रुत्वाहरिस्तमरणार्थिनमप्रमेयश्चक्रायुधःपतगराजभुजाधि रुढः॥चक्रेणनक्रवदनंविनिपाट्यतस्माद्धस्तेप्रगृह्यभगवान्कृपयोज्जहार १६ ज्यायान्गुणैरवरजोऽप्यदितेःसुतानांलोकान्विचक्रमइमान्यदथाधियज्ञः॥क्ष्मांवामने नजगृहेत्रिपदच्छलेनयाच्ञामृतेपथिचरन्प्रभुभिर्नचाल्यः१७नार्थोबलेरयमुरुक्रमपादशौचमापःशिखाधृतवतोविबुधाधिपत्यम्।योवैप्रतिश्रुतमृतेनचिकीर्षदन्यदा त्मानमंगशिरसाहरयेऽभिमेने १८ तुभ्यंचनारदभृशंभगवान्विवृद्धभावेनसाधुपरितुष्टउवाचयोगम् ॥ ज्ञानंचभागवतमात्मसतत्त्वदीपंयद्वासुदेवशरणाविदुरंजसैव

चूर्णिका

देवभयहंतासईशः नृसिंहरूपंकृत्वा आपतंतंहिरण्यकशिपुंऊरौनिपात्यनखैर्विददार १४ सरसिग्राहेणपदेगृहीतः गजेंद्र आर्तःसन् हेआदिपुरुषेत्याह १५ तद्वचः श्रुत्वाच क्रेणनक्रमुखंविदार्यतंशुंडायांप्रगृह्यउज्जहार १६ आदित्यानांमध्येकनिष्ठोपिविष्णुः गुणैर्ज्येष्ठः यतः इमान्लोकान्पादन्यासै. क्रांत्वाबलेःक्ष्मांत्रिपदयाच्ञाच्छलेन वामन रूपेणजगृहे १७ १८ हेनारद हंसोभूत्वा भक्त्यातुष्टःसन् भागवतंनामज्ञानं भक्तियोगंचतुभ्यमाह १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्तन्मन्वंतरावतारमाह चक्रमिति स्वतेजः निजंप्रभावमेवचक्रंसुदर्शनंबिभार्ति चक्रवदप्रातिहतंप्रभावंबिभर्तीत्यर्थः।तदेवाह मनुवंशपालकःसन्त्रयाणांलोकानांपृष्ठेउपरिस्थितेसत्यलोकेपिक्रमनियांच कीर्तिंविस्तारयन्राजसुदंडंविधत्ते२०धन्वंतर्यवतारमाह।(धन्वंतरिरिति।) लोकेअवतीर्यधन्वंतरिःसन्पुरुरुजांमहारोगिणांस्वनाम्नैवरुजोरोगान्हंति।स्वयमेवकीर्तिरितिकीर्त्यतिशयोक्तिः।अमृतं मरणशून्यमायुर्यस्मात्सः(अमृतायुः)अवअवसन्नंपूर्वंदैत्यैः प्रतिबद्धंयज्ञेभागंचअवरुंधेलभतेअवापरुद्धमितिपाठेप्ययमेवार्थः आयुर्विषयंवेदंचानुशास्तिप्रवर्तयाति२१परशुरामावतारमाह।(क्षत्रमिति।) जगतःक्षयायविधिनादैवेनउपभृतंसंवर्द्धितं(क्षयायोपभृतं)मृत्यवेसमर्पितमितिवा।ब्राह्मणेभ्योद्रुह्यतीतितथा।अतउज्झितः (त्यक्तः)पंथावेदमार्गोयेन(तत्)।अतएवनरकार्तिलिप्सतीव।एवंभूतमवनेः कं टकतुल्यंक्षत्रंअसौमहात्माहरिः उद्धंतिउत्पाट्याति । दीर्घतीक्ष्णधारेणपरशुना । (त्रिः सप्तकृत्वः एकविंशतिवारम्) २२ श्रीरामावतारमाहात्रीभिरस्मादिति। अस्माकंब्रह्मादीनांप्रसादेसुमुखः कलयाभरतादिरूपयासहकलामायातस्याईशः गुरोः (पितुः) दशरथस्यआज्ञायांतिष्ठन्सीतालक्ष्मणाभ्यांसहितोवनमाविशत् । यस्मिन्विरोधंकृत्वारावणोनाशंप्राप्तः(इक्ष्वाकुवंशअवतीर्येति प्रयोगश्छांदसत्वादुपपन्नः) २३ यस्मैरामायउदधिर्मार्गंददौसपदिशीघ्रंहरोयथात्रिपुरंदिधक्षुस्तथाअरिपुरंलंकांदग्धुमिच्छोः षष्ठीचतुर्थ्यर्थे । यद्वापंचमीयं । दिधक्षोःरामात्यद्भयंप्राप्तंतेनांगेकं पोयस्येति । कथंभूतउदधिः ऊढंप्राप्तंयद्भयंतेनांगेषुवेपः कंपोयस्य(सः)अत्रहेतुः। दूरेवर्तमानासुहृत्सीतातयानिमित्तभूतयामथितः क्षुभितो(यो)रोषस्तेनसुशोणाअत्यरुणादृष्टिस्तयात्यंततंप्यमा नंमकराणामुरगाणांनक्राणांचचक्रंयस्मिन् २४किंच।युद्धेरावणस्यवक्षःस्थलस्पर्शेनरुग्णाभग्नायेमहेंद्रवाहस्यऐरावतस्यदंतास्तैर्विडंबिताः स्वधवलिम्नाधवलीकृतास्तत्तद्दिक्षुपतितैःप्रकाशिताइत्यर्थः। याएवंभूताःककुभोदिशस्ताजुषतेसेवतेपालयतीतिवातथातस्यदारहर्तुः रावणस्यअहोमत्समः कोन्योस्तीतिमहागर्वेणऊढंप्राप्तंहासंअसुभिःप्राणैः सहसद्यःशीघ्रंविनेष्यतिअपनेष्यति कैःधनुषोवि स्फूर्जितैः टंकारघोषैरेव । कथंभूतस्यअधिसैन्येस्वपरसैन्यमध्येउच्चरतः उत्कर्षेणविचरतः। ककुब्जयरूढहासामितिपाठेदंतैरुज्ज्वलितानांककुभांजयेनयोरूढहासः संजातगर्वःतमपनेष्यतीत्यर्थः२९

॥३२॥

॥ १९ चक्रंचदिक्ष्वविहतंदशसुस्वतेजोमन्वंतरेषुमनुवंशधरोबिभर्त्ति ॥ दुष्टेषुराजसुदमंव्यदधात्स्वकीर्तिंसत्येत्रिपृष्ठउशतींप्रथमंश्चरित्रैः २० धन्वंत रिश्चभगवान्स्वयमेवकीर्तिर्नाम्नानृणांपुरुरुजांरुजआशुहंति ॥ यज्ञेचभागममृतायुरवावरुंधआयुश्चवेदमनुशास्त्यवतीर्यलोके २१ क्षत्रंक्षयायविधिनोप भृतंमहात्माब्रह्मध्रुगुज्झितपथंनरकार्त्तिलिप्सु ॥ उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्वउरुधारपरश्वधेन २२ अस्मत्प्रसादसुमुखःकलयाकलेशइक्ष्वाकुवंश अवतीर्यगुरोर्निदेशे ॥ तिष्ठन्वनंसदयितानुजआविवेशयस्मिन्विरुद्धचदशकंधरआर्त्तिमार्च्छत् २३ यस्माअदादुदधिरूढभयांगवेपोमार्गंसपद्यरिपुरंहरवद्दिध क्षोः ॥ दूरेसुहृन्मथितरोषसुशोणदृष्ट्यातातप्यमानमकरोरगनक्रचक्रः २४ वक्षस्थलःस्पर्शरुग्णमहेंद्रवाहदंतैर्विडंबितककुब्जुषऊढहासम्॥सद्योऽसुभिःसहवि नेष्यतिदारहर्तुर्विस्फूर्जितैर्धनुषउच्चरतोऽधिसैन्ये २९

श्लोकाः २०/२९

चूर्णिका

मन्वंतरेषुमनुवंशधरः भगवान्स्वकीर्तिविस्तारयन् दुष्टराजसुदंडंधत्ते २० भगवान् लोके अवतीर्य धन्वंतरिः सन् नृणांरोगान्स्वनाम्नैवहंति यज्ञेभागंचलभतेआयुर्वेदं चप्रवर्तयति २१ असौहरिः परशुरामो अवनिकंटकं क्षत्रंपरशुनाएकविंशतिवारानुत्पाटयति २२ सःहरिः इक्ष्वाकुवंशेरामनाम्नाअवतीर्यदशरथस्याज्ञायांतिष्ठन् सी तालक्ष्मणाभ्यांसहितः वनंप्रवेक्ष्यति यस्मिन्विरोधंकृत्वारावणःनाशंप्राप्स्यति २३ यस्मैसमुद्रः मार्गंदास्यति २४ ततः स्वस्त्रीहर्तूरावणस्यगर्वंप्राणैःसहअपनेष्यति २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीकृष्णावतारमाहभूमेरितिदशभिः सुरेतराअसुरांशसंभूताराजानस्तेषांवरूथैः सैन्यैर्विमर्दितायाभारेणपीडितायाः कलयारामेणसहजातःसन्ननुकोऽसौजातः सितकृष्णौ केशौयस्यभगवतः स एवसाक्षात् सितकृष्णकेशत्वंशोभैवनतुवयःपरिणामकृतंअविकारित्वात् यत्तूक्तंविष्णुपुराणे "उज्जहारात्मनःकेशौसितकृष्णौमहामुने" इत्यादि यच्चभारते "सचापिकेशौहरिरुच्चजर्हेशु क्लमेकमपरंचापिकृष्णं तौचापिकेशावाविशेतांयदूनांकुलेस्त्रियौरोहिणींदेवकींच । तयोरेकोबलभद्रोबभूवयोसौश्वेतस्तस्यदेवस्यकेशः कृष्णोद्वितीयःकेशवःसंबभूवकेशोयोसौवर्णतःकृष्णउक्त "इति तत्तुनकेशमात्रावताराभिप्रायं । किंतुभूभारावतारणरूपंकार्यंकियदेतत् । मत्केशावेवतत्कर्तुंशक्ताविति द्योतनार्थं । रामकृष्णयोर्वर्णसूचनार्थंचकेशोद्धरणमितिगम्यते अन्यथातत्रैवपूर्वापर विरोधापत्तेः कृष्णस्तुभगवान्स्वयमित्येतद्विरोधाच्च । कथंभूतः परमेश्वरतयाजनैरनुपलक्ष्योमार्गोयस्य तर्हीश्वरत्वेकिंप्रमाणं । अतिमानुषकर्माण्यथानुपपत्तिरेवेत्याह । आत्मनोमहिमाउपनि बध्यतेअभिव्यज्यतेयेषुतानि । २६ एतदेवप्रपंचयति । तोकेनेत्यादिना । बालेन (उलूकिकायाः) पूतनायाजीवहरणंयत् (तथात्रयोमासानिवृत्तास्यतस्यत्रैमासिकस्यचरणेनउत्क्षिप्तेनापवृ त्तः विपरीतः पतितइत्यर्थः । अंतरगतेनमध्यंप्राप्तेन) रिंगताजानुभ्यांगच्छतांतरंगतेनमध्यंप्राप्तेनदिविस्पृशोरत्युच्चयोःइतरथाअनीश्वरत्वेतन्नभवितव्यं । २७ विषतोयपीथान्विषतोयस्यपी थंपानंयेषांतान्पालान्गोपांश्चकृपादृष्टिसुधावृष्ट्याजीवयिष्यतीतियमुनायांक्रीडन्उरगंकालियंउच्चाटयिष्यत्उच्चाटयिष्यति तच्छुद्धयेतस्याह्रदिन्यानिर्विषत्वायअतिविषवीर्येणविलोलातिचंचला जिह्वायस्य (तम्)२८(तत्) दिव्यंअलौकिकंइवेतिलोकोक्तिः (व्रजं) उन्नेष्यतिउद्धरिष्यति (क्वसति) शुचिर्ग्रीष्मः तत्संबंधिनिवनेशुष्कइत्यर्थः (दावाग्निनापरिदह्यमानेसति कथंभूतं) अतोदावाग्नेर्हेतोः अवसितोनिश्चितोंऽतकालोयस्य (हरिणा) तंसबलःसरामः अनधिगम्यंदुर्ज्ञेयंवीर्यंयस्य । तत्रनिशिनिःशयानमितिकालियदमनेरात्र्यांयमुनातीरे । नेत्रेपिधाय्यपिहिते कारयित्वेति (तु) मुंजाटव्यामितिज्ञेयं २९उपबध्यतेअनेनेतिउपबंधंतत्साधनं शुल्वंदामअमुष्यमातायशोदाअग्रहीत्(तत्तत्)अमुष्य(सुतस्य)उदरेनमातिबधनसंमितंनभवतिनपूर्यतइत्यर्थः(अ स्यकृष्णस्यजृंभतोजृंभणमिषेणमुखंप्रसारयतः) गोपीयशोदासंवीक्ष्यदृष्ट्वाप्रतिबोधितानिजैश्वर्यंज्ञापितआसीदितियत् तच्चकर्मदिव्यमिवेतिसर्वत्रपूर्वेणैवान्वयः ३०

श्लोकाः २६/३०

भूमेःसुरेतरवरूथविमर्दितायाःक्लेशव्ययायकलयासितकृष्णकेशः ॥ जातःकरिष्यतिजनानुपलक्ष्यमार्गःकर्माणिचात्ममहिमोपनिबंधनानि २६ तोकेनजीवहरणं यदुलूकिकायास्त्रैमासिकस्यचपदाशकटोऽपवृत्तः ॥ यद्रिंगतान्तरगतेनदिविस्पृशोर्वाउन्मूलनंत्वितरथाऽर्जुनयोर्नभाव्यम् २७ यद्वैव्रजेव्रजपशून्विषतोयपी थान्पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ॥ तच्छुद्धयेतिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगंविहरन्ह्रदिन्याम् २८ तत्कर्मदिव्यमिवयन्निशिनिःशयानंदावा ग्निनाशुचिवनेपरिदह्यमाने ॥ उन्नेष्यतिव्रजमतोऽवसितांतकालंनेत्रेपिधाप्यसबलोऽनधिगम्यवीर्यः २९ गृह्णीतयद्यदुपबंधममुष्यमाताशुल्वंसुतस्यनतुतत्तदमु ष्यमाति ॥ यज्जृंभतोऽस्यवदनेभुवनानिगोपीसंवीक्ष्यशंकितमनाःप्रतिबोधिताऽसीत् ३०

चूर्णिका

सः हरिः दैत्यांशभूतराजसैन्यभारेणपीडितायाः भूमेःक्लेशव्ययायरामेणसहकृष्णाभूत्वाअतिमानुषाणिकर्माणिकरिष्यति अतःसःईश्वरः २६ अन्यथाबालेनपूतनाप्राणहरपदा शकटोपवर्तनंजानुभ्यांगच्छताअर्जुनयोरुन्मूलनंनभाव्यम् २७ किंच अयंविषतोयपीथान्गोपान्जीवयिष्यति यमुनाजलशुद्धयेकालियंउच्चाटयिष्यति २८ दावग्निनादह्यमा नंव्रजंउद्धरिष्यति यशोदासुतस्यबंधार्थंयत्दामगृहीष्यति तत्तत्अस्यनपूर्यते ततः साअस्यमुखेभुवनानिवीक्ष्यशंकितमनाभविष्यति ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वरुणस्यपाशातयद्भयंतस्मान्मोचयिष्यति । मयसूनुनाव्योमनाम्रा (पिहितान्गोपांश्चमोचयिष्यति । दिव) आपृतंव्याप्तंव्यापारयुक्तंनिशिशयानमितिचवैकुंठप्राप्तिसाधनानुष्ठानाभावोद
र्शितः । (एतादृशमपि) गोकुलवासिनंजनंउपनेष्यतिप्रापयिष्यतिस्मेत्याश्चर्ये ३१ देवेइंद्रे (व्रजनाशायाभिवर्षति) पशूनरिरक्षुःरिरक्षिषुरित्यर्थः अनघेश्रमरहितेएकस्मिन्नेवकरेसलीलं
(सक्रीडं) यथातथामहीध्रंगोवर्धनंधर्ताधारयिष्यति उच्छिलींध्रंउद्गतंछत्राकमिव सप्तवर्षाणिवयोयस्यसः३२ निशिरात्रौनिशाकररश्मिभिर्गौर्यांधवलायांवनेक्रीडन्(रासक्रीडाभिमुखःश्रीकृष्णः)
कलानिमंजुलानिपदानियस्मिन्तच्चततआयतंदीर्घमूर्छितंआलापविशेषयुक्तंगीतंतेनउद्दीपितःस्मरएवरुक्रोगोयासांतासांगोपीनांहर्तुःशंखचूडस्यशिरोहरिष्यति ३३ येचप्रलंबादयस्तेसर्वेहरिणा
हेतुभूतेनतदीयंनिलयंवैकुंठं(अदर्शनं) दर्शनायोग्यमपि अलंयास्यंतीत्युत्तरेणान्वयः । (अदर्शनमिताइतिपाठेमरणंप्राप्ताइत्यर्थः) । खरोधेनुकःदर्दुरइवदर्दुरोबकः । इभःकुवलयापीडः । कुजो
॥३४॥ नरकः । कपिर्द्विविदः । ३४ येचमृधेआत्तचापाः । समितौसंग्रामेशालंतेश्लाघंतेतेसमितिशालिनः ननुप्रलंबखरकपिबल्वलरुक्मिप्रमुखाः बलभद्रेणनिहताः कांबोजादयश्चभीमार्जुनादिभिः
शंबरःप्रद्युम्नेनयवनोमुचुकुंदेननतुहरिणातत्राह । बलोभीमःपार्थइत्यादयोव्याजाह्वयाःकपटनामानियस्यतेन । सप्तोक्षाणस्तुतेनदमिताः कालांतरे (मरणानंतरं) यास्यंतीतिभावः । एतच्चसर्व
मपिकर्मदिव्यमिवतच्चान्यथानभाव्यमितिपूर्वेणैवसंबंधः ३५ व्यासावतारमाह । अनुयुगं (कालेन मीलिधियां) मीलितासंकुचिताधीर्येषां ।स्तोकमल्पमायुर्येषांतेषांस्वनिगमःस्वकृतोवेदराशिः
बतअहोदूरेपारंयस्येति(सदूरपारो)दुर्गमइत्यवमृश्यसत्यवत्यामाविर्हितःप्रादुर्भूतःसन्सएवहरिःविटपशः शाखाभेदेनवेदमार्गे (शाखोपशाखाभेदेनवेदवृक्षविभजिष्यतीति) ३६

श्लोकाः ३१/३६

नंदंचमोक्ष्यतिभयाद्वरुणस्यपाशाद्गोपान्बिलेषुपिहितान्मयसूनुनाच ॥ अह्न्यापृतंनिशिशयानमतिश्रमेणलोकेविकुंठउपनेष्यतिगोकुलंस्म ३१ गोपैर्मखेप्राति
हतेव्रजविप्लवायदेवेभिवर्षतिपशून्कृपयारिरक्षुः ॥ धर्त्तोच्छिलींध्रमिवसप्तदिनानिसप्तवर्षोमहीध्रमनघैककरेसलीलम् ३२ क्रीडन्वनेनिशिनिशाकररश्मिगौर्यांरा
सोन्मुखःकलपदायतमूर्च्छितेन॥उद्दीपितस्मररुजांव्रजभृद्वधूनांहर्तुर्हरिष्यतिशिरोधनदानुगस्य ३३ येचप्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाःकुजपौंड्रकाद्याः
॥ अन्येचशाल्वकपिबल्वलदंतवक्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः ३४ येवामृधेसमितिशालिनआत्तचापाःकांबोजमत्स्यकुरुकैकयसृंजयाद्याः ॥ यास्यंत्य
दर्शनमलंबलभीमपार्थव्याजाह्वयेनहरिणानिलयंतदीयम् ३५ कालेनमीलितधियामवमृश्यनृणांस्तोकायुषांस्वनिगमोबतदूरपारः ॥ आविर्हितस्त्वनुयुगंसहि
सत्यवत्यांवेदद्रुमंविटपशोविभजिष्यतिस्म ३६

चूर्णिका

अयंवरुणपाशात् नंदंमोक्ष्यति व्योमासुरेणबिलेपिहितान् गोपान् मोक्ष्यति गोकुलंवैकुंठेउपनेष्यति ३१ इंद्रेवर्षतिसति सप्तदिनानिएककरेणगोवर्द्धनं धारयिष्यति ३२ किंच
रासोन्मुखःसन् रात्रौवनेक्रीडन्व्रजवधूनांहर्तुः शंखचूडस्यशिरःहरिष्यति ३३ किंच प्रलंबखरबककेश्यरिष्टमल्लेभयवननरकपौंड्रकशाल्वाद्विविदबल्वलदंतवक्रसप्तोक्षशंबरवि ॥ ३४॥
दूरथरुक्मिमुख्याः ३४ कांबोजमत्स्यादयःमृधेअनेनमृत्युंयास्यंति एतत्सर्वं अन्यथानभाव्यम् ३५ सत्यवत्यांजातः व्यासःवेदद्रुमंशाखाभेदेनविभजिष्यति ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धावतारमाह देवद्विषां(दैत्यानांनिगमेनविहिताभिःक्रियाभिः)निगमवर्त्मनिवेदमार्गेनिष्ठितानांनितरांस्थितानांतद्बलेनचपूर्भिःपुरीभिःअदृश्यतूर्भिरलक्ष्यवगाभिः (मायाविनामयेनरचिताभिःलो
कान्नाशयतांमतेः) विमोहोयोग्यतात्यागोयस्मात्मतेःप्रलोभोअयुक्तस्वीकारोयस्मात्तंपाखंडवेषंविधायतेनऔपधर्म्यंपाखंडधर्मस्वार्थेष्यञ्।बहुभाष्यते(बहुविधंभाषिष्यते)इत्यर्थः३७कल्क्यवता
रमाह । यर्हियदासतामप्यालयेषुगृहेषु (द्विजजना) हरेःकथानस्युस्त्रैवर्णिकाःपाषंडिनःस्युः (वृपलाः)शूद्राश्चराजानःस्युः तदाकल्किरूपेणकलेःशास्ताभविष्यति अत्रचब्रह्मनारदसंवादात्प्रा
ग्भाविनोवराहादयः मन्वंतरावतारास्तुभूताभाविनश्च धन्वंतरिपरशुरामौतदावर्तेते श्रीरामादयस्तुभाविनः तत्रतुक्वचिद्भुतादिनिर्देशस्तुछांदसइतिद्रष्टव्यं ३८ सृष्ट्यादिकार्यभेदेनमायागुणावतार
विभूतीराह सर्गइति (सर्गेसृष्टौअहंचतुर्मुखःऋषयःकर्दमाद्याःयेचनप्रजेशामरीच्यादयः) । स्थानेस्थितौमखोविष्णुः धर्मश्चमखश्चमनवश्चअमराश्चावनीशाश्च (राजानः) अंतेसंहारे
हरोरुद्रःमन्युवशाःसर्पाः (असुराद्याश्च) बहुशक्तिधारिणोभगवतइमाविभूतयः ३९ इदंमयासंक्षेपेणोक्तंविस्तरेणवक्तुंहिनकोपिसमर्थइत्याह पृथिव्याःपरमाणूनपियोविममेगणितवान् ताह
शोपिकोपिविष्णोर्वीर्यगणनां (विभूतिलक्षणमाहात्म्यप्रसंख्यानं) कर्तुमर्हति (नकोपि) कथंभूतस्य योविष्णुःत्रिपृष्ठंसत्यलोकंचस्कंभधृतवान् किमितिचस्कंभ यस्मात्रैविक्रमेअस्खल
ताप्रतिघातशून्येनस्वरंहसास्वपादवेगेन (त्रिसाम्यासदनात्) त्रिसाम्यं (गुणसाम्य-)-रूपं (प्रधानंतदेव) सदनमधिष्ठानंतस्मादारभ्यउरुअधिकंकंपयानंकंपमानंकंपेनयानंयस्य (सत्य
लोकस्य)इतिवा । अतःकारणाच्चस्कंभ । आत्रिपृष्ठमितिवाछेदः । सत्यलोकमभिव्याप्ययः (प्रधानादि) सर्वं (कार्यकारणात्मकं) धृतवानित्यर्थः । तथाचमंत्रः 'विष्णोर्नुकमि'ति । अ
स्यार्थः विष्णोर्नुवीर्याणिकंप्रवोचंकःप्रावोचदित्यर्थः यःपार्थिवानिरजांस्यपिविममे (गणितवान्) सोपि योविष्णुस्त्रेधाविचक्रमाणःत्रिविक्रमंकुर्वन्उत्तरंलोकंअस्कभायत्अवष्टब्धवान् कथंभूतं
सधस्थंसहस्यसधादेशःतिष्ठंतीतिस्थाःतत्रस्थैःदेवैःसहवर्तमानमित्यर्थः ४० एतत्प्रपंचयतिनांतामितिपुरुषस्ययन्मायावलंतस्यांतंनविदामिनवेद्मि दशशतानिआननानियस्यसशेषोप्यस्य
णान्गायन्पारंनसमवस्यति (ननिश्चिनोति) नप्राप्नोतीत्यर्थः ४१

देवद्विषांनिगमवर्त्मनिनिष्ठितानांपूर्भिर्मयेनविहिताभिरदृश्यतूर्भिः ॥लोकान्घ्नतांमतिविमोहमतिप्रलोभंवेषंविधायबहुभाष्यतऔपधर्म्यम् ३७यर्ह्यालयेष्वपिस
तांनहरेःकथाःस्युःपाखंडिनोद्विजजनावृषलानृदेवाः ॥ स्वाहास्वधावषडितिस्मगिरोनयत्रशास्ताभविष्यतिकलेर्भगवान्युगांते ३८ सर्गेतपोहमृषयोनवयेप्रजे
शाःस्थानेचधर्ममखमन्वमरावनिशाः ॥ अंतेत्वधर्महरमन्युवशासुराद्यामायाविभूतयइमाःपुरुशक्तिभाजः ३९ विष्णोर्नुवीर्यगणनांकतमोर्हतीहयःपार्थिवा
न्यपिकविर्विममेरजांसि ॥ चस्कंभयःस्वरहसाऽस्खलतात्रिपृष्ठंयस्मात्रिसाम्यसदनादुरुकंपयानम् ४० नांतंविदाम्यहममीमुनयोग्रजास्तेमायाबलस्यपुरु
षस्यकुतोऽपरेये ॥ गायन्गुणान्दशशताननआदिदेवःशेषोऽधुनाऽपिसमवस्यतिनास्यपारम् ४१

श्लोकाः ३७/४१

चूर्णिका

ततःसःईशःलोकान्घ्नतांदैत्यानांमोहायबुद्धवेषंकृत्वापाखंडधर्मंभाषिष्यते ३७ यदात्रैवर्णिकाःपाखंडिनःस्युःशूद्राःराजानःस्युःतदाकल्किरूपेणहरिःकलेःशास्ताभविष्यति
३८ ततःजगत्सृष्टौतपःअहं नवप्रजेशाःस्थितौधर्ममखमनुदेवराजानःअंतेहरसर्पासुराद्याः इमाः भगवतोविभूतयः३९हेनारदविष्णोः वीर्यगणनांकर्तुंकः अर्हति४०यस्य
अंतं अहंमुनयश्चनविद्मः शेषोपिअस्यपारंनप्राप्नोति४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यदिनकेपिविदंतितर्हिकथंमुच्येरन् । तत्कृपयैवेत्याह । येषामिति । दययेत्दयांकुर्यात् । तेचयदि (सर्वात्मनाआश्रितपदः) निष्कपटमाश्रितचरणाभवंतितेदुस्तरामपिदेवमायामतितरं
तिं चकारान्मायावैभवंविदंतिच । अथेतिवापाठः । प्रत्यक्षमेवतेषांमायातितरणमित्याह । नैषामिति । श्वसृगालानांभक्ष्येदेहे (ममाहमित्यभिमानाभावः) ४२ अंतर्ज्ञानाभावेपिमायेयमि
तिज्ञानंतत्कृपयाबहूनामस्तीत्याह वेदाहमितित्रिभिः यूयमितिसनकादीनंतर्भाव्यबहुत्वं । दैत्यवर्यः प्रल्हादः मनुःस्वायंभुवःतस्यपत्नीशतरूपाच ।तदात्मजाःपुत्रौकन्याश्च(तिस्रः)प्राचीनबर्हिषो
विसर्गलोपश्छांदसः । (अंगोवेनस्यपिता) ४३ (ऐलःपुरूरवाःनाहुषोययातिः) शतधनुःअनुश्च संधिरार्षः । रंतिदेवाइतिपाठःसुगमःऐकपद्येएतैःसहितोदेवव्रतः (भीष्मः) इत्यर्थः
४४ उपेंद्रदत्तःशुकः । विभीषणादयोवर्यामुख्यायेषांते ४५ किंबहुनासत्संगेनतुसर्वेपिविदंतीत्याह तेवाइति । अद्भुताःक्रमाःपादन्यासायस्यहरेस्तत्परायणास्तद्भक्तास्तेषांशीले (सद्वृत्ते)
शिक्षायेषांतेतथायदिभवंतितर्हितेस्त्रीशूद्रादयःपापजीवास्तेअपिविदंतीत्यर्थः (तिर्यग्जनाःपश्वादयःदेवमायांविदंतितरंतिचसंसारंसत्संगात्) तत्रश्रुतेभगवतोरूपे धारणामनोनियमनंये
पांतेविदंतीतिकिमुवक्तव्यं ४६ किंतद्भगवतःस्वरूपंयस्मिन्मनोधारणांविधायमायां(विदंति) तरंतिचेत्यपेक्षायामाह । शश्वदितिद्वाभ्यां । यद्ब्रह्मेतिविदुर्मुनयःतद्वैभगवतःपदंस्वरूपं
किंतद्ब्रह्मतदाह । अजस्रंनित्यंचतत्सुखंचविशोकंचेति । अजस्रसुखत्वेहेतुःशश्वत्सदाप्रशांतंअतोनित्यसुखरूपं । विशोकत्वेहेतुःअभयं कुतःयतः समंभेदशून्यंअतोऽभयं ‘ द्वितीयाद्वैभयंभवती’
तिश्रुतेः । तत्कुतः यतः प्रतिबोधमात्रंज्ञानैकरसं । ननुज्ञानस्यापिनीलपीताद्याकारेणचक्षुरादिकरणभेदेनचभेदोदृश्यते । न । शुद्धंनिर्मलं । ननुदर्शितोविषयकरणोपरागरूपोमलइत्यतआह
। सदसतः परं । विपयकरणसंगशून्यं । वृत्तेरेवतदुपरागोनज्ञानस्येतिभावः । ननुतथापिज्ञात्रासहभेदः स्यात् । न । आत्मतत्त्वं । आत्मनोज्ञातुःस्वरूपमेवतत्तुनततोमिन्नं । ननुच‘तंत्वौपनिषदं
पुरुषंपृच्छामी’तिशब्दबोध्यत्वप्रतीतेः कुतोबोधरूपत्वं । तत्राह । शब्दोनयत्रेति । आरोपितनिवृत्तावेवशब्दस्यव्यापारोनतुतद्बोधइत्यर्थः । ननुचभवतुनामनिरस्तभेदज्ञानरूपत्वाद्विशोकत्वं ।
सुखस्यतुनानाकारकसाध्यक्रियाफलत्वात्कथमजस्रसुखत्वंतस्येत्यतआह । यत्र (पुरुकारकवान्) बहुकारकसाध्यःक्रियार्थ उत्पाद्याप्यविकार्यसंस्कार्यरूपंचतुर्विधंक्रियाफलंचनास्तिइंद्रियै
र्ज्ञानांशाभिव्यक्तिरिव क्रियाभिरानंदांशाभिव्यक्तिमात्रंक्रियतेनोत्पत्त्यादिकामितिभावः । ननूत्पत्त्याद्यभावेपिमायामलापकरणेनविकार्यत्वंस्यादेवव्रीहीणामिवतुषापाकरणेनेत्याशंक्याह। माया
ऽभिमुखेस्थातुंविलज्जमानेवयस्मात्परैतिदूरतोपसरति । ४७

॥३६॥

श्लोकाः

येषांसएवभगवान्दययेदनंतःसर्वात्मनाश्रितपदोयदिनिर्व्यलीकं ॥ तेदुस्तरामतितरंतिचदेवमायांनैषांममाहमितिधीःश्वसृगालभक्ष्ये ४२ वेदाहमंगपरमस्यहि
योगमायांयूयंभवश्चभगवानथदैत्यवर्यः ॥ पत्नीमनोःसचमनुश्चतदात्मजाश्चप्राचीनबर्हिऋभुरंगउतध्रुवश्च४३इक्ष्वाकुरैलमुचुकुंदविदेहगाधीरघ्वंबरीषसगरागयना
हुषाद्याः ॥ मांधात्रलर्कशतधन्वनुरंतिदेवदेवव्रतोबलिरमूर्त्तरयोदिलीपः४४सौभर्युतंकशिबिदेवलपिप्पलादाःसारस्वतोद्धवपराशरभूरिषेणाः॥येऽन्येविभीषणहनू
मदुपेंद्रदत्तपार्थार्ष्टिषेणविदुरश्रुतदेववर्याः ४५ तेवैविदंत्यतितरंतिचदेवमायांस्त्रीशूद्रहूणशबराअपिपापजीवाः ॥ यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जनाअ
पिकिमुश्रुतधारणायेे४६शश्वत्प्रशांतमभयंप्रतिबोधमात्रंशुद्धंसमंसदसतःपरमात्मतत्त्वम्॥शब्दोनयत्रपुरुकारकवान्क्रियार्थोमायापरैत्यभिमुखेचविलज्जमाना४७

४२/४७

॥३६॥

चूर्णिका

सएवभगवान् येषांदययेत् तेदेवमायांतरंति ४२ किंच अंहभवःप्रन्हादः मनुःतत्पत्नीपुत्रकन्याः प्राचीनबर्हिः ऋभुःअंगः ध्रुवः४३ इक्ष्वाकुः ऐलःमुचुकुंदः जनकः गाधिः
रघुःअंबरीषः सगरः गयः नाहुषः मांधाता अलर्कः शतधन्वा रंतिदेवः भीष्मः बालिःअमूर्तरयः दिलीपः ४४ सौभरिः उतंकः शिबिःदेवलः पिप्पलादः सारस्वतः
उद्धवः व्यासः भूरिषेणः हनुमान् शुकः पार्थः आर्ष्टिषेणः विदुरः श्रुतदेवः ४५ एतेभगवन्मायांविंदंतितरंतिच स्त्रीशूद्रादयोपितिर्यक्जनाअपि तद्भक्ताश्चेत्मायांतरंति४६ ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तस्मादेवंभूतेभगवतिनियमितमनसांकृतार्थानांनकिमपिकृत्यमस्तीत्याह । सहांचतीतिसध्र्यङ् । सहचरंमनः यंप्रतिनियम्ययस्मिन् (भगवति) स्थिरीकृत्ययतयोयत्नशीलाःकर्तोर्भेदे तन्निरासोऽकर्तः तत्रहेतिंसाधनं जह्युःत्यजेयुः अनुपयोगात्तन्नाद्रियंतइत्यर्थः । उपयोगाभावेनसाधनानादरेदृष्टांतः । निपीयतेस्मिन्निनिपानंकूपः तस्यखनित्रं खननसाधनंयथास्वरा ट् स्वयमेवपर्जन्यरूपेणविराजमानः इंद्रोनादत्ते तद्वदिति यद्वा स्वेनैवराजतइतिस्वराड्दरिद्रः सयथा इंद्रःसमृद्धःसन् कर्मकार(त्व)दशायांगृहीतंनिपानखनित्रंजहाति तद्वदित्यर्थः ४८ एवंता वदजस्रसुखंविशोकंब्रह्मैवभगवतःस्वरूपंतत्प्राप्तानांचनप्राप्यं कृत्यंवार्किंचिदस्तीत्युक्तम् । इदानींततःप्राक्सएवसर्वफलदातासर्वकर्मप्रवर्तकश्चेत्याह सएवश्रेयसांफलानांविभुर्दातापि । त त्रहेतुः । भावानांब्राह्मणादीनांस्वभावैः शमदमादिभिर्विशेषणैर्विहितस्यसतःशुभस्य (अस्य) कर्मणः यतःप्रवर्तकात्प्रसिद्धिः यद्वा भावानांमहदादीनांस्वभावेनपरिणामेनविहितस्यसतः कार्यस्य (रूपस्य अस्य यतः) प्रसिद्धिः सएवस्वर्गादीनां (श्रेयसां) दातेत्यर्थः ननुकर्मकर्तुर्मृतस्यकथंस्वर्गादिफलंस्यात्तत्राह स्वारंभकधातूनांभूतानांविगमेवियोगेसतिअन्वनुविशीर्यमाणेपिदे हेतत्रस्थंव्योमेवयः (पुरुषः) तेनसहनविशीर्यते यतःअजः तेनसहनजातः तस्यपुरुषस्यश्रेयसांप्रभुरित्यर्थः४९ अध्यायत्रयस्यार्थमुपसंहरति (सोयंतइति विश्वंभावयतितथाभूतोयं) सोयं (भगवान्) तेसमासेनसंक्षेपेणाभिहितः । तमेवाह । सदसत्कार्यकारणंचहरेरन्यन्नभवति ननुहरेस्तदव्यतिरेकेतद्गतविकारप्रसंगःस्यात् । न अन्यस्मात् । कारणभूतोहरिःकार्याद्व्यति रिक्तइत्यर्थः ५० (मेमह्यंभगवताहरिणायदुदितंतदिदंभागवतंनामतुभ्यमुदितमित्यर्थः) अयंचविभूतीनांसंग्रहउदितः ५१ यथावर्णितेननृणांभक्तिर्भविष्यति एवंसंकल्प्यसंचिंत्यतथाहरि लीलाप्राधान्येनश्रीभागवतंवर्णय । ननुभक्तिरसविघातेनकेवलंतत्त्वमित्यर्थः ५२ ननुलीलामायाश्रयाकिंतद्वर्णनेनेत्यतआह मायामिति । (ईश्वरस्यभगवतोमायांश्रद्धयावर्णयतिअनु मोदतेशृणोतिवानित्यंतस्यबुद्धिर्माययानमुह्यति) ५३ ॥ ॥ इतिश्रीभागवतेद्वितीयस्कंधेसप्तमोध्यायः ७

॥३७॥

श्लोकाः ४८/५३

तद्वैपदंभगवतःपरमस्यपुंसोब्रह्मेतियद्विदुरजस्रसुखंविशोकम् ॥ सध्र्यङ्नियम्ययतयोयमकर्तृहेतिंजह्युःस्वराडिवनिपानखनित्रमिंद्रः ४८ सश्रेयसामपिविभुर्भ गवान्यतोऽस्यभावस्वभावविहितस्यसतःप्रसिद्धिः ॥ देहेस्वधातुविगमेऽनुविशीर्यमाणेव्योमेवतत्रपुरुषोनविशीर्यतेऽजः ४९ सोऽयंतेऽभिहितस्तातभवान्गवि श्वभावनः ॥ समासेनहरेर्नान्यदन्यस्मात्सदसच्चयत् ५० इदंभागवतंनामयन्मेभगवतोदितम् ॥ संग्रहोऽयंविभूतिनांत्वमेतद्विपुलीकुरु ५१ यथाहरौभगवति नृणांभक्तिर्भविष्यति ॥ सर्वात्मन्यखिधारेइतिसंकल्प्यवर्णय ५२ मायांवर्णयतोऽमुष्यईश्वरस्यानुमोदतः ॥ शृण्वतःश्रद्धयानित्यंमाययात्मानमुह्यति ५३ इतिश्रीमद्भाग०द्वितीयस्कंधेब्रह्मनारसंवादेसप्तमोऽध्यायः ॥ ७ ॥

चूर्णिका

किंतत् भगवतः स्वरूपं तदाहमुनयःयद्ब्रह्मेतिविदुः तत्परमस्यपुंसःस्वरूपम् ४८ ४९ सः भगवान्तेअभिहितः ५० हेनारद मेभगवतोदितंभागवतंसंक्षेपेणोक्तंतत्त्वांवि पुलीकुरु ५१ किंच नृणांहरौभक्तिर्यथाभविष्यति तथावर्णय ५२ भगवतोमायांवर्णयतःशृण्वतश्चपुंसःआत्मामाययानमुह्यति ५३ ॥ ॥ इतिद्वितीयेसप्तमः ७ ॥छ ॥ ॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अष्टमेदेहसंबंधमाक्षिपन्नीशजीवयोः । बहून्परिक्षिद्राष्टच्छत्पुराणार्थान्बुभुत्सितान् १ त्वमेतद्विपुलीकुर्वित्युक्तंतदेवविपुलीकरणंपृच्छति ब्रह्मणेतित्रिभिः । (हेब्रह्मन्) अगुणस्यचगुणातीत
स्यापि (नोदितः प्रेरितः) देववद्दर्शनंयस्यसः १ (अद्भुतंवीर्यंप्रभावोयस्यतस्यहरेः लोकसुमंगलरूपाःकथाएवतत्त्वं अतस्तदेतद्वेदितुमिच्छामि) २ (यथायेनकथनेनेत्यर्थः) ३ निःसं
गमनः श्रीकृष्णेनिवेश्येतिस्वप्रयत्नोदर्शितः । सोपिश्रद्धयाशृण्वतोनावश्यकइत्याह । शृण्वतइति । स्वप्रयत्नंविनाभगवान्स्वयमेवहृदिविशति ४ भावसरोरुहंहृदयकमलंप्रविष्टः तद्गतंसर्वं
(शमलं) मलंधुनोति । सलिलस्येति । द्रव्यांतरव्यामिश्रणादिनाकुंभस्थेजलेशोधितेतदेवकेवलंशुध्यति । नतुनदीतडागादिगतम् । सचमलःकुंभास्यांतस्तिष्ठत्येवनतुसर्वथाविलीयते
अतएवकिंचिच्चलनेनपुनः क्षुभ्यतिच । एवंतपोदानादिप्रायश्चित्तंनसर्वथासर्वेषांसर्वपापं धुनोति किंतुसावशेषं तच्चकस्यचिदेव किंचिदेव । हृदिप्रविष्टमात्रस्तुश्रीकृष्णःपापंनिःशेषंहरती
त्यनेनदृष्टांतेनोक्तं सलिलस्यमलंययाशरदिति ५ ततश्चकृतार्थोभवतीत्याह । धौतात्मानिःपापः (इत्यर्थः) मुक्ताःसर्वेरागद्वेषादयः परिक्लेशायेन । पांथःप्रवासादागतः स्वशरणंगृहं
यथानमुंचतितद्वत् (कृष्णस्यपादतलंनत्यजति) ६ तदेवंश्रवणौत्सुक्यमाविष्कृत्यसंदिग्धानर्थान्पृच्छति । (यदिति) अधातुमतःधातवोमहाभूतानितत्संबंधशून्यस्यालौकिकस्यात्मनः
जीवस्यधातुभिर्देहारंभइतियदेतत्किंयदृच्छयानिर्निमित्तंतुनावाकर्मादिनाभवंतोयथावज्जानंतिअतःकथयंत्वितिशेषः ७यश्चासावीश्वरः सोप्येतत्तुल्यदेहवान्प्रोक्तः अतस्तस्यकोविशेषइत्याशये
नपृच्छतिआसीदितिसार्धेन ।लोकानांसंस्थानंरचनातदेवलक्षणंस्वरूपंयस्यतत्त्रैलोक्यात्मकपद्मंयस्योदरादासीत् असावीश्वरः इयत्तायुक्तैःस्वपरिमितैरवयवैरयंलौकिकःपुरुष यावान्यत्संख्याका
वयवस्तुकस्तावान् संस्थावान्प्रोक्तअवयववानिवचप्रोक्तः । (स्थितिमान् ।) अतःकोविशेषस्तस्येति ८ अवश्यंचविशेषोवाच्यइत्याह । अजोब्रह्माभूतानांव्यष्टयुपाधीनामात्मानियंतासमष्टयुपाधि
त्वात् येनचअनुगृह्णतातस्यरूपंदृदृशेदृष्टवान् । एतच्च ' तस्यापिद्रष्टुरीशस्यकूटस्थस्याखिलात्मनः । सृज्यंसृजामिसृष्टोहमीक्षयैवाभिनोदित ' इत्यादिनोक्तमनूद्यते अग्रेतुस्पष्टंभविष्यति ९
प्रश्नांतरमाह सचापीति यत्रशेतेयेनरूपेणावतिष्ठते विश्वस्यस्थित्योदयायस्माव एवमादिप्रश्नानांतत्त्वतोऽर्हस्युदाहर्तुमितिसर्वांतेक्रियायाःसंबंधः १० प्रश्नांतरमाह पुरुषस्यावयवैः
पूर्वकल्पिताः यस्येहावयवैर्लोकान्कल्पयंतीत्यादौ लोकैश्चामुष्यावयवाइति पातालमेतस्यहिपादमूलमिच्छुत्यादौचत्वन्मुखाच्छ्रुतवंतोवयम् (सपालैरिंद्रादिसहितैः) ११

श्लोकाः १/११

॥ राजोवाच ॥ ब्रह्मणाचोदितोब्रह्मन्गुणाख्यानेऽगुणस्यच ॥ यस्मैयस्मैयथाप्राहनारदोदेवदर्शनः १ एतद्वेदितुमिच्छामितत्त्ववेदविदांवर ॥ हरेरद्भुत
वीर्यस्यकथालोकसुमंगलाः २ कथयस्वमहाभागयथाहमखिलात्मनि ॥ कृष्णेनिवेश्यनिःसंगंमनस्त्यक्ष्येकलेवरम् ३ शृण्वतःश्रद्धयानित्यंगृणतश्चस्वचेष्टितम् ॥
कालेननातिदीर्घेणभगवान्विशतेहृदि ४ प्रविष्टःकर्णरंध्रेणस्वानांभावसरोरुहम् ॥ धुनोतिशमलंकृष्णःसलिलस्ययथाशरत् ५ धौतात्मापुरुषःकृष्णपादमूलंन
मुंचति ॥ मुक्तसर्वपरिक्लेशःपांथःस्वशरणंयथा ६ यदधातुमतोब्रह्मन्देहारंभोस्यधातुभिः ॥ यदृच्छयाहेतुनावाभवंतोजानतेयथा७ आसीद्यदुदरात्पद्मंलोकसंस्था
नलक्षणं ॥ यावानयंवैपुरुषइयत्तावयवैःपृथक् ॥ तावानसावितिप्रोक्तःसंस्थावयववानिव ८ अजःसृजतिभूतानिभूतात्मायदनुग्रहात् ॥ ददृशेयेनतद्रूपंनाभि
पद्मसमुद्भवः ९ सचापियत्रपुरुषोविश्वस्थित्युद्भवाप्ययः ॥ मुक्तात्ममायांमायेशःशेतेसर्वगुहाशयः १० पुरुषावयवैर्लोकाःसपालाःपूर्वकल्पिताः ॥
लोकैरमुष्यावयवाःसपालैरितिशुश्रुम ॥ ११ ॥

चूर्णिका

राजोवाच हेब्रह्मन्अगुणस्यभगवतः गुणाख्यानेब्रह्मणाप्रेरितः नारदः यथाप्राह १ एतद्वेदितुमिच्छामि २ हेमहाभागयथाअहंकृष्णेमनःनिवेश्यकलेवरंत्यक्ष्येतथाहरेःकथाःक
थय ३ कृष्णः स्वचेष्टितंशृण्वतांहृदिकर्णरंध्रेणप्रविष्टःसन्पापहरंति ४ ५ अतः निष्पापः पुरुषः मुक्तसर्वक्लेशः कृष्णपादमूलंनमुंचति ६ ७ ८ ब्रह्मायदनुग्रहात् भूतानिसृ
जति९ १० एतेलोकाः पुरुषावयवैः कल्पिताः इतिशुश्रुम ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंसंदेहविपर्ययाभ्यांपृष्टं । इदानीमज्ञातान्बहूनर्थान्पृच्छति । यावानित्यादिना । कल्पोमहान्विकल्पोऽवांतरः (ब्रह्मकल्पोऽवांतरकल्पश्चकियत्परिमाणइत्यर्थः ।) भूतइत्यादिशब्दोय
स्मात् । यस्यवाचकइतिवा । (भूतादिशब्दैर्व्यवह्रियमाणइत्यर्थः सकालोयेनप्रकारेणानुमीयते ।) सतःस्थूलदेहाभिमानिनोमनुष्यपितृदेवतादेरायुषःप्रमाणं (यत्)१२ अनुमानप्रकारःपृष्टः
विशेषंपृच्छतिकालस्येति । अनुगतिःप्रवृत्तिः (अण्वीअणुप्रमाणा । सापिकथंलक्ष्यते) कर्मगतयःकर्मप्राप्यानिस्थानानियादृशीर्यादृशयः (हेब्रह्मन्) १३ गुणानांसत्वादीनांपरिणामंदेवादिरू
पंइच्छतांगुणिनांजीवानांमध्ये (येन) यस्मिन्परिणामेकर्मणांपुण्यपापानांसमावायःसमुदायः (उपगृह्यते) केनकर्मसमुदायेनकथंकृतेनकोधिकारीदेवादिभावंप्राप्नोतीत्यर्थः। १४ भूपातालादी
नांसंभवः एतानिओकांसियेषांप्राणिनांतेषांचसंभवः (तत्रभूभृतामद्रीणां) यथेतिसर्वत्रानुषंगः १५ (महतांमरीचिकर्दमादिनां)वर्णानामाश्रमाणांचविनिश्चयःतत्तत्स्वभावैर्निर्धारः १६ युगेयुगेप्र
तियुगंयोधर्मःयच्चहरेरवतारानुचरितं १७ (साधारणोजातिमात्रनिबंधनोऽहिंसादिलक्षणः) विशेषोवर्णाश्रमनिबंधनः (तत्सहितः) श्रेणीनांतत्तद्व्यवसायोपजीविनां (पौरविशेषाणां) व्य
वहारानियमलक्षणोधर्मः राजर्षीणांप्रजापालनाधिकारिणांकृच्छ्रेषुआपत्सुजीवतांसर्वेषां १८ सर्वेषां तत्त्वानांप्रकृत्यादीनांपरिसंख्यानंसंख्या । (तेषां) लक्षणंस्वरूपं । हेतुतोलक्षणंतत्तत्कार्यहे
तुत्वेनचलक्षणमित्यर्थः । पुरुषाराधनस्यचविधिः देवपूजाप्रकारः । (आध्यात्मिकस्यअध्यात्मशास्त्रोक्तस्य) अष्टांगयोगस्यचविधिः १९ योगेश्वराणांऐश्वर्येणाणिमादिनाअर्चिरादिगतिः
(योगिनां) लिंगशरीरस्यभंगःप्रलयः वेदाऋग्वेदादयः उपवेदाआयुर्वेदादयः धर्माधर्मशास्त्राणि । तेषांइतिहासपुराणयोश्चगतिःस्वरूपं २०

श्लोकाः १२/२०

यावान्कल्पोविकल्पोवायथाकालोनुमीयते॥भूतभव्यभवच्छब्दआयुर्मानंचयत्सतः १२ कालस्यानुगतिर्यातुलक्ष्यतेऽण्वीबृहत्यपि॥यावत्यःकर्मगतयोयादृशी
र्द्विजसत्तम१३यस्मिन्कर्मसमावायोयथायेनोपगृह्यते ॥ गुणानांगुणिनांचैवपरिणाममभीप्सताम् १४ भूपातालककुब्व्योमग्रहनक्षत्रभूभृतां ॥ सरित्समुद्रद्वी
पानांसंभवश्चैतदोकसाम् १५ प्रमाणमंडकोशस्यबाह्याभ्यंतरभेदतः ॥ महतांचानुचरितंवर्णाश्रमविनिश्चयः १६ अवतारानुचरितंयदाश्चर्यतमंहरेः ॥ युगा
नियुगमानंचधर्मोयश्चयुगेयुगे१७नृणांसाधारणोधर्मःसविशेषश्चयादृशः॥श्रेणीनांराजर्षीणांचधर्मःकृच्छ्रेषुजीवताम् १८ तत्त्वानांपरिसंख्यानंलक्षणंहेतुलक्षणम्
॥ पुरुषाराधनविधिर्योगस्याध्यात्मिकस्यच १९ योगेश्वरैश्वर्यगतिर्लिंगभंगस्तुयोगिनाम् ॥ वेदोपवेदधर्माणामितिहासपुराणयोः २०

चूर्णिका

तस्मात् कल्पः विकल्पः कालानुमानंदेवादीनांआयुर्मानम् १२ कालस्यगतिःकर्मगतयः १३सत्वादीनांपरिणामम् १४भूपातालककुब्व्योमग्रहनक्षत्रभूभृताम् सरित्समुद्रद्वीपानांसं
भवपूर्वोक्तस्थानोत्पन्नप्राणिनांचसंभवः १५अंडकोशप्रमाणम् महतांचरितम् वर्णाश्रमधर्माः १६ हरेरवतानुचरितम् युगानियुगमानम् युगधर्माः १७ राजर्षीणांधर्मःआपद्धर्मः
१८तत्त्वानांसंख्यानम् पुरुषाराधनविधिः १९ योगविधिः वेदोपवेदधर्माणांइतिहासपुराणयोश्चस्वरूपम् २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्लवः अवांतरप्रलयः यद्वासम्यक्पुष्टवनंउद्भवः । विक्रमःस्थितिःप्रतिसंक्रमोमहाप्रलयः । इष्टंवैदिकंकर्म । पूर्तंस्मार्तम् 'वापीकूपतडागादिदेवतायतनानिच । अन्नप्रदानमारामःपूर्तमित्यभिधीयते' तत्रचकाम्यानांअग्निहोत्रादीनांविधिःअविरोधप्रकारः(त्रिवर्गस्यधर्मार्थकामलक्षणस्य।)२१ अनुशायिनां(प्रकृतौ)लीनोपाधीनांजीवानां(पाषंडधर्मस्यचसंभवउत्पत्तिः)आत्मनोजीवस्यव्यवस्थानं बंधमोक्षातिरिक्तस्वरूपेणावस्थानं २२ (स्वतंत्रो भगवान्यथायेनप्रकारेणजगत्सृष्ट्यादिनाविक्रीडति । मायांविसृज्यमुक्त्वा) उदास्तेप्रलये २३ (हेभगवन्) चशब्दादपृष्टमपि (प्रपन्नायश रणागताय) २४ (यथात्मभूःपरमेष्ठीब्रह्मासर्वशास्त्रार्थेषुप्रमाणंतथाभवानत्र) प्रमाणंसम्यक्ज्ञाता । यतस्तवब्रह्मनारदव्यासक्रमेणसंप्रदायोस्तीतिसामान्यन्यायेनाह । परेचेति । (पूर्वजैः यत्कृतंतदेवपरेऽन्येपि) यद्वात्वदन्येप्रायशोगतानुगतिकाएवनतत्त्वविदइत्याहपरेचेति । (परेअनुतिष्ठंतिनतत्त्वतोविदंति।)२५ ननुतवानशनद्विजकोपाभ्यांव्याकुलस्यकुतःश्रवणंतत्राहनेति । (असवः प्राणाः) नपरायंतिनापगच्छंतिनव्याकुलीभवंतीत्यर्थः ।(कुपितात्द्विजादन्यत्रेति । अयंभावःद्विजकोपात्प्राणापगममात्रंभविष्यतिनतुतद्भयाद्व्याकुलीभावइति) ।अच्युतकीर्तिपीयूषं (पिबतोमम)२६(विष्णुरातेनविष्णुदत्तेनराज्ञा) उपामंत्रितःपृष्टः (ब्रह्मरातःशुकः)संश्वासौपतिश्चतस्य (कथायां) २७ ब्रह्मकल्पेसृष्ट्युपक्रमकल्पे (भगवताप्रोक्तंभागवतंप्राह) भागवताख्यानै वप्रश्नानांउत्तरंदातुंउपक्रांतवानित्यर्थः २८ पांडूनामृषभःश्रेष्ठःआनुपूर्व्येणेतिप्रस्तावक्रमोत्रविवक्षितःनप्रश्नक्रमः २९ ॥ इतिद्वितीयेऽष्टमः८ ॥ राजप्रश्नोत्तरंवक्ष्यन्ब्रह्मणेहरिणोदितं कथयामास नवमेशुकोभागवतंपुनः १ तत्रयत्तावदुक्तंयदधातुमतइत्यनेनजीवस्यकथंदेहसंबंधइति । तत्रोत्तरमाह । आत्ममायेति आत्मनोहरेर्मायामंतरेणअनुभवरूपस्यआत्मनःअर्थेनदृश्येनदेहादिना संबंधःअंजसातत्त्वतोनघटेतअत्रहेतुः परस्येति । स्वप्नद्रष्टुर्यथास्वाप्नदेहसंबंधोनघटतेतद्वत् १

संप्लवःसर्वभूतानांविक्रमःप्रतिसंक्रमः ॥ इष्टापूर्तस्यकाम्यानांत्रिविर्गस्यचयोविधिः २१ यश्चानुशायिनांसर्गःपाषंडस्यचसंभवः ॥ आत्मनोबंधमोक्षौचव्यव स्थानंस्वरूपतः २२ यथात्मतंत्रोभगवान्विक्रीडत्यात्ममायया ॥ विसृज्यवायथामायामुदास्तेसाक्षिवद्विभुः २३ सर्वमेतच्चभगवन्पृच्छतेमेऽनुपूर्वशः ॥ तत्त्व तोऽर्हस्युदाहर्तुंप्रपन्नायमहामुने २४ अत्रप्रमाणंहिभवान्परमेष्ठीयथात्मभूः ॥ परेचेहानुतिष्ठंतिपूर्वेषांपूर्वजैःकृतं २५ ॥ नमेऽसवःपरायंतिब्रह्मन्ननशना दमी । पिबतोऽच्युतपीयूषमन्यत्रकुपिताद्विजात् २६ ॥ सूतउवाच ॥ ॥ सउपामंत्रितोराज्ञाकथायामितिसत्पतेः ॥ ब्रह्मरातोभृशंप्रीतोविष्णुराते नसंसदि २७ प्राहभागवतंनामपुराणंब्रह्मसंमितं ॥ ब्रह्मणेभगवत्प्रोक्तंब्रह्मकल्पउपागते २८ यद्यत्परिक्षिदृषभःपांडूनामनुपृच्छति ॥ आनुपूर्व्येणतत्सर्वमा ख्यातुमुपचक्रमे ॥ इतिश्रीभागवतेमहा०द्वितियस्कंधेऽष्टमोध्यायः ८ ॥ श्रीशुकउवाच ॥ ॥ आत्ममायामृतेराजन्परस्यानुभवात्मनः ॥ नघटेतार्थसंबंधःस्वप्नद्रष्टुरिवांजसा १

श्लोकाः २१/१

चूर्णिका

भूतानांअवांतरप्रलयः महाप्रलयः इष्टापूर्तकाम्यानांत्रिवर्गस्यचविधिः २१ जीवस्यबंधमोक्षातिरिक्तस्वरूपावस्थानम् पाखंडस्यसंभवः आत्मनः बंधमोक्षौ २२ यथास्व तंत्रःभगवान् माययायथाक्रीडति २३ हेभगवन् एतत् सर्वअनुपूर्वशः पृच्छतेमेवक्तुमर्हसि २४ हेब्रह्मन् मेप्राणाः अनशनात् नव्याकुलीभवंति कुतः अच्युतकथापीयूष प्राशनात् २६ सूतउवाच राज्ञाएवंसंसदिपृष्टः ब्रह्मरातःप्रीतः सन् २७ ब्रह्मसंमितंभागवतंपुराणंराज्ञेप्राह २८ परीक्षिताकृतप्रश्नान् आनुपूर्व्येणवक्तुंउपचक्रमे २९ इति द्वितीयेऽष्टमः ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ जीवस्यदेहसंबंधःआत्ममायांविनानघटते १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारोपि(अस्य)माययैवेत्याह । बहुरूपः बालयुवादिरूपः देवनरादिरूपश्च आभातिगुणेषुदेहादिषु २ अतएवभक्तियोगेनतन्निरासेसतिमोक्षोपिघटतइत्याह । यर्हीति । वावशब्दएवार्थे । स्वएवम
हिम्नि(भूम्निपरमानंदे) यदारमेत । तदेवाह कालमाययोः पुरुषप्रकृत्योः परस्मिन् । (तत्संसर्गरहिते) तदाउभयंअहंममेतिचत्यक्त्वाउदास्तेपूर्णस्वरूपेणावतिष्ठते । तदुक्तं। "ययासंमोहितोजी
वआत्मानंत्रिगुणात्मकं । परोपिमनुतेऽनर्थंतत्कृतंचाभिपद्यते । अनर्थोपशमंसाक्षाद्भक्तियोगमधोक्षजे । लोकस्याजानतोव्यासश्चक्रेसात्वतसंहिता"मिति ३ यच्चोक्तंपरमेश्वरस्यापिदेहसंबंधाविशे
षात्कथंतद्भक्त्यामोक्षःस्यादितिआसीद्यदुदरात्पद्ममित्यादिनातत्राह(आत्मेति)।आत्मनोनोजीवस्यतत्त्वविशुद्धचर्थंतत्त्वज्ञानार्थंतद्भवत्येव । किंतत् । यत्तपआदिनाभजनंस्वंभजते भगवान्ब्रह्मणे
द्आह।किंकुर्वन्ऋतंसत्यंचिद्घनंरूपंदर्शयन् दर्शनेहेतुः अव्यलीकेन(प्रियेण निष्कपटेनवा) व्रतेनतपसाआदृतः सेवितःसन् अयंभावः जीवस्यअविद्यामिथ्यारूपदेहसंबंधः ईश्वरस्यतुयोगमाययाचि
द्घनलीलाविग्रहाविर्भावइतिमहान्विशेषः । अतस्तद्भजनान्मोक्षोपपत्तिरिति ४ भगवद्भजनादेवतत्त्वज्ञानमित्येतत्प्रपंचयिष्यन्ब्रह्मणोपितत्त्वज्ञानंतत्प्रसादादेवेतिदर्शयितुंइतिहासमाह । सइत्या
दिना ।(सआदिदेवोब्रह्मा) परोगुरुः भक्तिरहस्योपदेष्टास्वधिष्ण्यंपद्ममास्थायअधिष्ठायतस्याधिष्ठानान्वेषणायपूर्वंजलेनिमग्नः परावृत्यस्वधिष्ण्येस्थित्वेत्यर्थः (सिसृक्षया) ऐक्षततत्कथंस्रष्ट
व्यमित्यालोचितवान् । तांदृशंप्रज्ञां अत्रसृष्टिविषयेसंमतांअव्यभिचारिणीं (ययादृशाप्रपंचनिर्माणस्य) विधिः प्रकारः ५ सृष्टिं (सृष्टिप्रकारं) चिंतयन् (सविभुर्ब्रह्मा) कदाचिद्द्व्यक्षरंवचः अं
भसि (जले) उपाशृणोत्उपसमीपेश्रुतवान् । तेअक्षरेदर्शयति । कादयोमावसानाः स्पर्शाः तेषुयत्षोडशंतकारः यच्चैकविंशंपकारः वचसः (स्पष्ट) निर्देशार्थंतदर्थमाह । हेनृपनिष्किंचना
नांत्यक्तधनानांधनंयद्विदुः येनतपोधनाइतिप्रसिद्धाः तच्चद्विर्गदितंतपतपेतिलोण्मध्यमपुरुषैकवचनंतस्यवीप्सांसादरविधिरूपामशृणोदित्यर्थः ६ एवंनिशम्यतस्यवचसोवक्तुर्दिदृक्षयाततः प्रचलि
तः सन्दिशोविलोक्यपुनः स्वधिष्ण्यमास्थाय (उपादिष्टइव) केनचित्प्रत्यक्षंनियुक्तइवतच्चआत्मनोहितंविसृश्यतपसिमनोधृतवानित्यर्थः ७

श्लोकाः २/७

बहुरूपइवाभातिमाययाबहुरूपया ॥ रममाणोगुणेष्वस्याममाहमितिमन्यते २ यर्हिवावमहिम्निस्वेपरस्मिन्कालमाययोः ॥ रमेतगतसंमोहस्त्यक्त्वोदास्तेतदो
भयम् ३ आत्मतत्त्वविशुद्ध्यर्थंयदाहभगवान्ऋतं॥ब्रह्मणेदर्शयन्रूपमव्यलीकव्रतादृतः ४ सआदिदेवोजगतांपरोगुरुःस्वधिष्ण्यमास्थायसिसृक्षयैक्षत॥ तांनाध्य
गच्छद्दृशमत्रसंमतांप्रपंचनिर्माणविधिर्ययाभवेत् ५ सचिंतयन्द्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितंवचोविभुः ॥ स्पर्शेषुयत्षोडशमेकविंशंनिष्किंचनानांनृपयद्धनं
विदुः ६ निशम्यतद्वक्तृदिदृक्षयादिशोविलोक्यतत्रान्यदपश्यमानः ॥ स्वधिष्ण्यमास्थायविमृश्यतद्धितंतपस्युपादिष्टइवादधेमनः ७

चूर्णिका

संसारोऽपिमाययैवअहंममेत्यभिमानाद्भवति २ सएवजीवः यदानिरहंकारोभवति तदाभक्त्यामोक्षंएति ३ ४ पुराब्रह्माकमलेस्थितःसन् सृष्टिंकर्तुमैक्षत तांसृष्टिंनाध्यगच्छ
त् ५ सः एकदाअंभसिचिंतयन् तपतपेतिउपाशृणोत् ततः दिव्यंवर्षसहस्रंअतपत् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ततश्चब्रह्माऽखिलानांलोकानांतापनंप्रकाशकंतपः अतप्यतस्मकृतवान् । तपतपेत्येतस्यवचसोर्यंअमोघंदर्शनं (ज्ञानं) यस्य । जितः अनिलः (प्राणः)आत्मामनश्चयेन । विजितान्युभयादिद्रयाणि
ज्ञानकर्मात्मकानियेन । तपतांतपश्चरतांमध्येतपीयान्अतिशयेनतपस्वी ८ (सभाजितः तपसापूजितः) तस्मैब्रह्मणेस्वलोकंवैकुंठाख्यंपरंश्रेष्ठं नयत्परं यतःपरंउत्कृष्टंअन्यन्नास्ति त
मेवलोकमनुवर्णयतिपंचभिः । व्यपेताः संक्लेशादयोयतः । (साध्वसंभयं ।) स्वदृष्टवद्भिः (शोभनादृष्टवद्भिः) सत्पुण्यवद्भिःइत्यर्थः यद्वा स्वस्यदृष्टंदर्शनंआस्तियेषांतैरात्मविद्भिरित्यर्थः
९ (यत्रस्वलोके रजस्तमश्च) तयोस्ताभ्यां मिश्रंसत्त्वं नप्रवर्तते किंतुशुद्धमेवसत्त्वम् । कालविक्रमोनाशः । अपरे (मायागुणविकारा) रागलोभादयोनसंतीतिकिमुत वक्तव्यं । (यत्र
सुरासुरार्चिताः) अनुव्रताःपार्षदाः (संति) १० (ताननुवर्णयति) श्यामाश्वतेअवदाताउज्ज्वलाश्च (निर्मलाः । इंद्रनीलकांतयइत्यर्थः) पद्मनेत्राः । पीतांबराः सुरुचः अतिकमनीयाः सुपे
शसः अतिसुकुमाराः । (रश्मिभिः) उन्मिषंतइव (चक्षुष्मंतइव) प्रभावंतोमणिप्रवेकामण्युत्तमायेषुतानि निष्कानिपदकानिआभरणानियेषांते । सुवर्चसः अतितेजस्विनः प्रवालादिवत्
वर्चोवर्णोयेषांते(तथा) परिस्फुरंतिकुंडलानिमौलयः (किरीटानि) मालाश्चसंतियेषांते ११ पार्षदाननुवर्ण्यपुनरपिलोकमनुवर्णयति । भ्राजिष्णुभिर्देदीप्यमानाभिः (लसतांशोभमानानांवि
मानानांपंक्तिभिः योलोकः) प्रमदोत्तमानां दिवः कांतयः ताभिर्विद्योतमानः सहविद्युद्भिर्वर्तमानाः स्वविद्युतः ताभिरभ्रावलीभिः । तत्रविद्युतइवास्त्रियः अभ्रपंक्तयइवविमानावलयः । नभ
इवलोकः १२ (यत्रलोके) श्रीःसंपत्रूपिणीमूर्तिमती (हरिचरणयोः) मानंपूजां (बहुधा) विभूतिभिर्नानाविभवैः (करोति । या) प्रेंखमांदोलं संश्रिता (सती) कुसुमाकरोवसं
तस्तस्यानुगैर्भ्रमरैः (कुसुमगंधलुब्धैः) विविधं गीयमाना स्वयंतुप्रियस्यहरेः कर्मगायतीव (एवंभूता) भवति १३ यएवंभूतोलोकस्तत्रतस्मिन् (श्रियः पतिंलक्ष्मीकांतंददर्श सात्व
तांभागवतानांपतिं) १४ भृत्यानां प्रसादेऽभिमुखम् । दृगेवआसवइव(सुधेव) द्रष्टॄणांहर्षकरीयस्यतम् । प्रसन्नहासं अरुणलोचनंचआननंयस्य(तं) वक्षसिस्थितयाचश्रियालक्षितम् अलंकृ
तमित्यर्थः १५ अध्यर्हणीयंवरिष्ठं सिंहासनं (तदास्थितं तत्रासीनमित्यर्थः) चतस्रःप्रकृतिपुरुषमहदहंकाररूपाः । षोडशएकादशेंद्रियपंचमहाभूताख्याः पंचतन्मात्ररूपाः याः शक्तय
स्ताभिर्वृतं । स्वैर्भगैः स्वाभाविकैरैश्वर्यादिभिः । इतरत्रयोगिषुअध्रुवैः आगंतुकैः साधारणैरित्यर्थः (युक्तं) एवंसत्यपिस्वएवधामन्स्वस्वरुपेएवरममाणं । अतएवईश्वरम् १६

श्लोकाः ८/१६

दिव्यंसहस्राब्दममोघदर्शनोजितानिलात्माविजितोभयेंद्रियः ॥ अतप्यतस्माखिलकोकतापनंतपस्तपीयांस्तपतांसमाहितः ८ तस्मैस्वलोकंभगवान्सभाजि
तःसंदर्शयामासपरंनयत्परम् ॥ व्यपेतसंक्लेशविमोहसाध्वसंस्वदृष्टवद्भिर्विबुधैरभिष्टुतं९प्रवर्ततेयत्ररजस्तमस्तयोःसत्त्वंचमिश्रंनचकालविक्रमः ॥नयत्रमायाकिमु
तापरेहरेरनुव्रतायत्रसुरासुरार्चिताः १० श्यामावदाताःशतपत्रलोचनाःपिशंगवस्त्राःसुरुचःसुपेशसः ॥ सर्वेचतुर्बाहवउन्मिषन्मणिप्रवेकनिष्काभरणाः
सुवर्चसः ॥ प्रवालवैडूर्यमृणालवर्चसःपरिस्फुरत्कुंडलमौलिमालिनः ११ भ्राजिष्णुभिर्यःपरितोविराजतेलसद्विमानावलिभिर्महात्मनाम् ॥ विद्योतमानःप्र
मदोत्तमाद्युभिःसविद्युदभ्रावलिभिर्यथानभः १२ श्रीर्यत्ररूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूतिभिः ॥ प्रेंखंश्रितायाकुसुमाकरानुगैर्विगीयमानाप्रि
यकर्मगायती १३ ददर्शतत्राखिलसात्वतांपतिंश्रियःपतिंयज्ञपतिंजगत्पतिम् ॥ सुनंदनंदप्रबलार्हणादिभिःस्वपार्षदमुख्यैःपरिसेवितंविभुम् १४ भृत्यप्रसादा
भिमुखंदृगासवंप्रसन्नहासारुणलोचनाननम् ॥ किरिटिनंकुंडलिनंचतुर्भुजंपीतांबरंवक्षसिलक्षितंश्रिया १५ अध्यर्हणीयासनमास्थितंपरंवृतंचतुःषोडशपंचश
क्तिभिः ॥ युक्तंभगैःस्वैरितरत्रचाध्रुवैःस्वएवधामन्रममाणमीश्वरम् १६

चूर्णिका

८तदाभगवान्ब्रह्मणेस्वलोकंदर्शयामास९ १० ११ १२ ब्रह्मातदाभक्तपतिंश्रियःपतिंयज्ञपतिंजगत्पतिं सुनंदनंदादिभिः पार्षदमुख्यैः सेवितं १३ १४ भृत्यप्रसादाभिमुखम्
किरीटिनंकुंडलिनंचतुर्भुजंपीतांबरंवक्षसिश्रियाअलंकृतं १५ सिंहासनस्थंपंचविंशतितत्वैर्युक्तंअणिमाद्यष्टैश्वर्ययुक्तंप्रभुंददर्श १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४३॥

तस्यदर्शनेनयआह्लादः तेनपरिप्लुतं व्याप्तं (आर्द्रीभूतं) अंतरमंतःकरणंयस्यहृष्यंतीरोमांचितातनुर्यस्य प्रेमभरेणअश्रूणिलोचनेषुयस्य विश्वसृक्ब्रह्मापारमहंस्येनपथाज्ञानमार्गेण १७ तत्र
ह्माणंभगवान्बभाषे। प्रजाविसर्गेकार्येनिजशासनार्हणंस्वनियोगार्हंप्रजाविसर्गे समुपस्थितमितिवान्वयः । ईषत्स्मितेनरोचिर्दीप्तिःशोभायस्यास्तयागिरा (करेस्पृशन्नित्यनेनप्रीतमनस्त्वंप्र
काशितं)१८ (हेवेदगर्भत्वया) सिसृक्षयाहेतुनाचिरंसंभृतेनतपसाऽहंसम्यक्तोषितः (अहंनतपोमात्रेणतुष्यामिकिंतुत्वादृशांश्रद्धावतामेवेतिभावेनाह) दुस्तोषः तोषयितुमशक्यः१९ माइतिमां
(अभिवांछितंवरं ।) श्रेयसांफलानांपरिश्रामःपरिश्रमः साधनप्रयासः ममदर्शनमवधिर्यस्यसतथा अतोधिकंतुपुनः फलंनास्तीत्यर्थः २० एतच्चमत्कृपयैवत्वयाप्राप्तमित्याह । मनीषितमि
च्छा तुभ्यमिदंदातव्यमितियाममेच्छातस्यानुभावोयं । कोसौतमाह। ममलोकस्यावलोकनंयत्। नचेदंममैवतपोबलेनप्राप्तमितिस्वातंत्र्यमन्यस्वतत्प्रवृत्तेरपिमत्कृतत्वादित्याह रहसितपतपेतियद्व
चनमुपश्रुत्यपरमंतपश्चकर्थंकृतवानसि २१ तदपित्वांप्रतिमयैवादिष्टंउपदिष्टं (तपः कुर्विंतिप्रेरितमित्यर्थः) कदा । तत्रतदासृष्टयारंभे । त्वयिकर्मणिकार्येर्थेविमोहितेसति किंच । तपोनाममम
वशक्तिरित्याह । तपोतेहृदयंअंतरंगाशक्तिः । (तपसः) आत्मास्वरूपं(अहं) ‘‘यस्यज्ञानमयंतप’’इतिश्रुतेः २२ ग्रसामिसंहरामिबिभर्मिपलायामि वीर्यंशक्तिः २३ अध्यक्षःअधिष्ठाता
गुहांगुहायांबुद्धाववस्थितः सन् (भवान्अप्रतिरुद्धेनअकुंठितेनज्ञानेनसर्वेषांचिकीर्षितं) यद्यपिवेदतथापीत्युत्तरेणान्वयः २४ नाथमानस्ययाचमानस्यउपतप्यमानस्येतिवा । हे नाथनाथय
आशंसयप्रयच्छनाथितंयाचितं‘नाथृनाधृयाच्ञोपतापैश्वर्याशीषुः’नाथितमेवाह परंसूक्ष्मंअवरंस्थूलंचते (अरूपिणोपि)रूपंयथाजानीयां२५यथाचत्वंक्रीडसि(तथा)तद्विषयांमनीषां(मतिं)मयिधेही
त्युत्तरेणान्वयः नानाशक्तिभिरुपचितंविश्वंविलुंपन्संहरन्विविधंसृजन्बिभ्रत्पालयन् आत्मनास्वयमेवआत्मानंब्रह्मादिरूपंगृह्णन्अनुगृह्णन् क्रीडसि२६(यथोर्णनाभिः) उर्णतंतुभिरात्मानंआच्छा
दयति (किंचउर्णा स्वयमेवसृजतिबिभर्तिचऊर्णामंडलमध्येक्रीडतिअथचात्मन्येवतांलुंपतितथेत्यर्थः । सविषयोयस्यास्तांसृष्ट्यादिक्रीडाविषयांचेत्यर्थः) २७

श्लोकाः १७/२७

तद्दर्शनाह्लादपरिप्लुतांतरोहृष्यत्तनुःप्रेमभराश्रुलोचनः ॥ ननामपादांबुजमस्यविश्वसृग्यत्पारमहंस्येनपथाधिगम्यते १७ तंप्रीयमाणंसमुपस्थितंतदाप्रजाविस
र्गेनिजशासनार्हणं ॥ बभाषईषत्स्मितरोचिषागिराप्रियःप्रियंप्रीतमनाःकरेस्पृशन् १८ ॥ श्रीभगवानुवाच ॥ त्वयाहंतोषितःसम्यक्वेदगर्भसिसृक्षया ॥ चिरं
भृतेनतपसादुस्तोषःकूटयोगिनां १९ वरंवरयभद्रंतेवरेशंमाभिवांछितम् ॥ ब्रह्मन्श्रेयःपरिश्रामःपुंसोमद्दर्शनावधिः २० मनीषितानुभावोयंममलोकावलोकन
म् ॥ यदुपश्रुत्यरहसिचकर्थपरमंतपः २१ प्रत्यादिष्टंमयातत्रत्वयिकर्मविमोहिते ॥ तपोमेहृदयंसाक्षादात्माहंतपसोनघ २२ सृजामितपसैवेदंग्रसामितपसापु
नः ॥ बिभर्मितपसाविश्वंवीर्यंमेदुस्तरंतपः २३ ॥ ब्रह्मोवाच ॥ ॥ भगवन्सर्वभूतानामध्यक्षोऽवस्थितोगुहां ॥ वेदह्यप्रतिरुद्धेनप्रज्ञानेनचिकीर्षितं २४
तथापिनाथमानस्यनाथनाथयनाथितं ॥ परावरेयथारूपेजानीयांतेत्वरूपिणः २५ यथात्ममायायोगेननानाशक्त्युपबृंहितं ॥ विलुंपन्विसृजन्गृह्णन्बिभ्रदा
त्मानमात्मना २६ क्रीडस्यमोघसंकल्पउर्णनाभिर्यथोर्णुते ॥ तथातद्विषयांधेहिमनीषांमयिमाधव २७

चूर्णिका

तद्दर्शनेनहृष्यत्तनुः १७ ब्रह्मातत्पादांबुजंननाम तदाभगवान् प्रीतमनाः ब्रह्माणं करेस्पृशन्उवाच १८ हेब्रह्मन् तेभद्रमस्तु वांच्छितंवरंवरय १९ २० २१ २२ २३ ब्र
ह्मोवाच हे भगवन् सर्वेषांहृदाकाशेवस्थितस्त्वंसर्वंवेद २४ तथापितवसूक्ष्मंस्थूलंचरूपंयथाअहंजानीयां २५ तद्विषयांमनीषांधेहि २६ २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(स्वस्यपितरंतुष्टं) निशम्यदृष्ट्वाज्ञात्वेत्यर्थः । मामां ४२ भगवता (नारायणेन) चतुःश्लोक्यासंक्षेपेणप्रोक्तं (अतइदंभागवतंनामपुराणंतस्मैनारदायभूतकृत्ब्रह्मा) विस्तरेणप्राह । दशलक्षणानिलक्षणीयाअर्थाविद्यंतेयस्मिंस्तत् ४३ तत्संप्रदायतोभागवतंमयाज्ञातमित्याशयेनाह । नारदइति ४४ भागवतव्याख्यानेनैवत्वत्प्रश्नानामुत्तरंदास्यामीत्याहयदुतेति । " पुरुषावयवैर्लोकाःसपालाःपूर्वंकल्पिता" इत्यादिनावैराजात्पुरुषादिदंविश्वंकथमासीदितियदहंत्वयापृष्टः तद्यथावदुपाख्यास्यामिशृण्विति ४५ ॥ इतिश्रीभागवतेद्वितीयस्कंधेनवमोध्यायः ॥ ९ ॥

॥४६॥ ततोभागवतव्याख्याद्वारैवदशमेस्फुटं । राजप्रश्नोत्तरंवक्तुमारेभेबादरायणिः १ दशलक्षणंपुराणंप्राहेत्युक्तंतानिदशलक्षणानिदर्शयति । अत्रेति । मन्वंतराणिईशानुकथाश्चेतिद्वंद्वः । सर्गादयोऽत्रदशार्थालक्ष्यंते१नन्वेवमर्थभेदाच्छास्त्रभेदःस्यात्तत्राह दशमस्यआश्रयस्यविशुद्ध्यर्थंतत्त्वज्ञानार्थंनवानांलक्षणंस्वरूपं(इहवर्णयंति)एकस्यैव (दशमस्यविषयस्यैह)प्राधान्यान्नायंदोषइत्यर्थः । नन्वत्रनैवंप्रतीयतेअतआह । श्रुतेनश्रुत्यैव स्तुत्यादिस्थानेषुअंजसासाक्षाद्वर्णयंति । अर्थेनतात्पर्यवृत्त्याचतत्तदाख्यानेषु २ सर्गादीनांप्रत्येकंलक्षणमाह । भूतानिआकाशादीनिमात्राणिचशब्दादीनि इंद्रियाणिच । धीशब्देनमहदहंकारौ । गुणानांवैषम्यात्परिणामात्ब्रह्मणःपरमेश्वरात्कर्तुःभूतादीनांयद्विराड्रूपेणस्वरूपतश्चजन्मसंसर्गः । विसर्गमाह पुरुषोवैराजःतत्कृतःपौरुषः चराचरसर्गोविसर्गइत्यर्थः ३

श्लोकाः

तुष्टंनिशम्यपितरंलोकानांप्रपितामहम्॥देवर्षिःपरिपप्रच्छभवान्यन्माऽनुपृच्छति४२तस्माइदंभागवतंपुराणंदशलक्षणम्॥प्रोक्तंभगवताप्राहप्रीतःपुत्रायभूतकृत् ४३ नारदःप्राहमुनयेसरस्वत्यास्तटेनृप ॥ ध्यायतेब्रह्मपरमंव्यासायामिततेजसे ४४ यदुताहंत्वयापृष्टोवैराजात्पुरुषादिदम् ॥ यथासीत्तदुपाख्यास्येप्रश्नानन्यांश्चकृत्स्नशः ४५ ॥ इतिश्रीभागवतेमहापु० द्वि० नवमोध्यायः ९ ॥ ॥छ॥ ॥श्रीशुकउवाच॥ ॥अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयः ॥ मन्वंतरेशानुकथानिरोधोमुक्तिराश्रयः १दशमस्यविशुद्ध्यर्थंनवानामिहलक्षणम् ॥ वर्णयंतिमहात्मानःश्रुतेनार्थेनचांजसा२भूतमात्रेंद्रियधियांजन्मसर्गउदाहृतः॥ ब्रह्मणोगुणवैषम्यात्विसर्गःपौरुषःस्मृतः ३

४२ / १

चूर्णिका

४२ ४३ नारदःब्रह्मध्यायते व्यासायतत् आह सः मह्यंप्रोवाच ४४ अहंत्वयापृष्टःवैराजात् पुरुषात्इदंयथाअसीत् तत्व्याख्यास्ये अन्यांश्चकृत्स्नशःतवप्रश्नान्व्याख्यास्यामि ४५ इतिद्वितीयेनवमः ॥९॥ श्रीशुकउवाच अतःपरंलक्षणानिशृणु अत्रसर्गोविसर्गश्चस्थानंपोषणमूतयःमन्वंतरेशानुकथानिरोधोमुक्तिराश्रयः १ दशमस्यविशुद्ध्यर्थं नवानामिहलक्षणं वर्णयंति महात्मानः २ तदर्थःपंचभूतादीनांजन्मसर्गःविसर्गोनाममायागुणवैषम्यात् चराचरसर्गः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

वैकुंठस्यभगवतोविजयःसृष्टानांतत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानं । स्वभक्तेषुतस्यानुग्रहः पोषणंतदनुगृहीतानांसतांमन्वंतराधिपतीनांधर्मःसद्धर्मः (मन्वंतराणीतिप्रोक्तः) कर्मणां वासनाः वेञ्तंतुसंताने ऊयंतेकर्मभिःसंतन्यंतेइत्यूतयः यद्वाऽऽवृद्धयर्थात्संश्लेषार्थाद्वाऽवतेर्धातोरिदंरूपं ऊयंतेकर्मभिर्वर्द्धंतेसंश्लिष्यंतइतिवाऊतयइत्यर्थः४हरेरवतारानुचरितंअस्यहरेरनुवर्तिनांच(पुंसां) सत्कथाईशानुकथाःप्रोक्ताइत्यर्थः(नानाख्यानैरुपबृंहिताःपूर्णाः)५निरोधमाह अस्यात्मनोजीवस्यहरेर्योगनिद्रामनुपश्चात्शक्तिभिश्चौपाधिभिःसहशयनंलयःनिरोधः।अन्यथारूपंअविद्ययाऽध्यस्तंकर्तृत्वादिहित्वास्वरूपेणब्रह्मतयाव्यवस्थितिर्मुक्तिः६आभासःसृष्टिःनिरोधोलयश्चयतोभवतिअध्यवसीयतेप्रकाशतेचसःपरंब्रह्मेतिपरमात्मेतिप्रसिद्धःआश्रयःकथ्यते७आश्रयरूपमपरोक्षानुभवेन स्पष्टंदर्शयितुमध्यात्मादिविभागमाह।योयमाध्यात्मिकःपुरुषःचक्षुरादिकरणाभिमानीद्रष्टाजीवःसएवाधिदैविकःचक्षुराद्यधिष्ठातासूर्यादिः तत्रैकस्मिन्नेवउभयःद्विरूपःविच्छेदोयस्मात्सआधिभौतिकःचक्षुर्गोलकाद्युपलक्षितोदृश्योदेहःपुरुषइतिपुरुषस्यजीवस्योपाधिः "सवाएषपुरुषोऽन्नरसमय"इत्यादिश्रुतेः८एकमेकतराभावइत्येतेषामन्योन्यसापेक्षासिद्धित्वेनानात्मत्वंदर्शयति। तथाहि। दृश्यंविनातत्प्रतीत्यनुमेयंकरणंनसिद्ध्यति । नापिद्रष्टा । नचतद्विनाकरणप्रवृत्त्यनुमेयस्तदधिष्ठातासूर्यादिः नचतंविनाकरणंप्रवर्तते । नचतद्विनादृश्यमित्येवमेकतरस्याभावेएकंनोपलभामहे (यदा) तत्रतदातत्त्रितयंआलोचनात्मकेनप्रत्ययेनयोवेदसाक्षितयापश्यतिसपरमात्माआश्रयःतेषामपिपरस्परमाश्रयत्वमस्त्येवेतितद्व्यवच्छेदार्थंविशेषणं । स्वाश्रयःअनन्याश्रयःसचासावन्येषामाश्रयश्चेतितथाचभगवान्वक्ष्यति । "दृग्रूपमार्कंवपुरत्ररंध्रेपरस्परंसिध्यतियःस्वतःखे आत्मायदेषामपरोयआद्यःस्वयानुभूत्याखिलसिद्धसिद्धि"रिति एतेनैवव्यभिचारित्वात्तेषांमायामयत्वमप्युक्तं अतएव"पुरुषावयवैर्लोकाः सपालाःपूर्वकल्पिताः ॥ लोकैरमुष्यावयवाःसपालैरि"त्यनेनोक्तोविरोधःपरिहृतः ९

श्लोकाः ४/९

स्थितिर्वैकुंठविजयःपोषणंतदनुग्रहः ॥ मन्वंतराणिसद्धर्मऊतयःकर्मवासनाः ४ अवतारानुचरितंहरेरस्यानुवर्तिनां ॥ पुंसामीशकथाःप्रोक्तानानाख्यानोपबृंहिताः ५ निरोधोऽस्यानुशयनमात्मनःसहशक्तिभिः ॥ मुक्तिर्हित्वान्यथारूपंस्वरूपेणव्यवस्थितिः६आभासश्चनिरोधश्चयतश्चाध्यवसीयते॥सआश्रयःपरंब्रह्मपरमात्मेतिशब्द्यते ७ योऽध्यात्मिकोयंपुरुषःसोसावेवाधिदैविकः ॥ यस्तत्रोभयविच्छेदःसस्मृतोह्यादिभौतिकः ८ एकमेकतराभावेयदानोपलभामहे ॥ त्रितयंतत्रयोवेदसआत्मास्वाश्रयाश्रयः ९

चूर्णिका

भगवतःविजयत्वेनास्थितिः तत्स्थानं पोषणंनामभक्तानुग्रहः ऊतयोनामकर्मवासनाः मन्वंतराणि ४ ईशानुकथाः नामएकम् ५ लयोनामप्रलयः मुक्तिर्नामब्रह्मत्वेनस्थितिः ६ आश्रयोनामयतः सृष्टिनिरोधास्यैताम् तत्परब्रह्मआश्रयः ७ यःआध्यात्मिकःचक्षुरादिकरणाभिमानीसजीवःसोसावेवअधिदैविकः सूर्यादिः तत्रएकस्मिन्नेवद्विरूपभेदः यस्मात्सः आधिभौतिकोदेहः ८ एतत्त्रितयम् यः वेदसः आश्रयः इत्यभिधीयते ९

CC-0. In Public Domain. Digitization by eGangotri

टीका

उक्तमेवाध्यात्मादिविभागंप्रपंचयन्“यदुताहंत्वयापृष्टोवैराजात्पुरुषादिदं । यथासीत्तदुपाख्यास्ये”इतियत्प्रतिज्ञातंतदुत्पत्तिप्रकारमाह पुरुषइत्यादिना । पुरुषोवैराजः अंडंविनिर्भिद्यपृथक्कृत्यविनिर्गतःपृपथक्स्थितइत्यर्थः अयनंस्थानंअन्विच्छन्विमृशन्यतःशुचिःस्वयंअतःशुचीःशुद्धाःअपःगर्भोदकसंज्ञाःअस्राक्षीत्ससर्ज १० अप्सुवासंनारायणनामानिरुक्त्यास्पष्टयति । (अवात्सीत्वासमकार्षीत् ।) तेनअप्सुवासेनयद्यस्मात्पुरुषोनरःतस्मादुद्भवोयासांतानाराआपोअयनमस्येतिनारायणइत्यर्थः । तदुक्तं “ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः । अयनंतस्यताःपूर्वंतेननारायणःस्मृत”इति११तस्यप्रभावमाह । द्रव्यमुपादानंकर्मादीनिनिमित्तानिजीवोभोक्तायस्यानुग्रहात्संतिकार्यक्षमाभवंतीत्यर्थः१२योगएवतल्पंशय्यातस्मात् । वीर्यंगर्भरूपंदेहंहिरण्मयमिवप्रकाशबहुलं १३ तस्यैवप्रपंचःअथेत्यादिना (एकंमुख्यंपौरुषंपुरुषस्येदं) १४ अंतःशरीरेयआकाशःतस्मात्क्रियाशक्त्यातत्रविविधंचेष्टमानस्यसतःओजइंद्रियशक्तिःसहोमनःशक्तिःबलंदेहशक्तिःततःशक्त्यात्मकात्सूक्ष्मात्रूपात्प्राणाः सूत्राख्याः । महान्मुख्यःअसुः (आध्यात्मिकः) प्राणः सर्वेषां १५ महत्त्वंदर्शयति । प्राणाइंद्रियाणियंप्राणंतंचेष्टांकुर्वंतंअनुपश्चात्प्राणंतिचेष्टांकुर्वंति अपानंतंचेष्टांत्यजंतंअनुअपानंतिचेष्टांत्यजंतिराजानमनुभृत्याइव १६ क्षिपताचालयतानिमित्तेनक्षुत्तृडादिकंप्रभोरितिविराड्जीवाभेदेनोपासनार्थमुक्तम् (अंतर्मध्ये) आजायतेस्म ततःजक्षतःभक्षयितुमिच्छतइत्यर्थः प्राक्प्रथमं निरभिद्यतविभक्तमभूत् १७ तालुअधिष्ठानं । जिह्वाइंद्रियं नानारसोविषयः वरुणश्चदेवताज्ञातव्या एवंसर्वत्र अधिष्ठानमिंद्रियंदेवताविषयइत्येतच्चतुष्टयमनुक्तमप्यूह्यम् १८

श्लोकाः १० / १८

पुरुषोंडंविनिर्भिद्ययदादौसविनिर्गतः ॥ आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिःशुचीः १० तास्ववात्सीत्स्वसृष्टासुसहस्रपरिवत्सरान् ॥ तेननारायणोनाम यदापःपुरुषोद्भवाः ११ द्रव्यंकर्मचकालश्चस्वभावोजीवएवच ॥ यदनुग्रहतःसंतिनसंतियदुपेक्षया १२एकोनानात्वमन्विच्छन्योगतल्पात्समुत्थितः ॥ वीर्यंहिरण्मयंदेवोमाययाव्यसृजत्त्रिधा१३अधिदैवमथाध्यात्ममधिभूतमितिप्रभुः ॥ अथैकंपौरुषंवीर्यंत्रिधाऽभिद्यतत च्छृणु१४अंतःशरीरआकाशात्पुरुषस्यविचेष्टतः ओजःसहोबलंजज्ञेततःप्राणोमहानसुः १५ अनुप्राणंतियंप्राणाःप्राणंतंसर्वजंतुषु॥अपानंतमपानंतिनरदेवमिवानुगाः १६प्राणेनाक्षिपताक्षुत्तृडंतराजायतेप्रभोः॥ पिपासतोजक्षतश्चप्राङ्मुखंनिरभिद्यत १७ मुखतस्तालुनिर्भिन्नंजिह्वातत्रोपजायते ॥ ततोनानारसोजज्ञेजिह्वयायोऽधिगम्यते १८

चूर्णिका

सः पुरुषः अंडंनिर्भिद्यनिर्गतः सन् आत्मनः स्थानं इच्छन् आदौअपः ससर्ज १० तासुस्थितत्वात् नारायण इत्याभिधीयते ११ तस्यानुग्रहात्सर्वंसंपद्यते उपेक्षयानश्यति १२ एकएवसः नानात्वंइच्छन्गर्भरूपंविराट्देहं भूतेंद्रियदेवतारूपेणात्रिधाविभक्तवान् १३ १४ विचेष्टतः तस्यपुरुषस्यहृदयाकाशेइंद्रियमनोदेहानांशक्तयोजाताःततःसूत्राख्यःप्राणः १५ तेनचालयताक्षुतृषौउत्पन्ने भक्षयितुंइच्छोः तस्यमुखंनिरभिद्यत १६ १७ तत्रतालुअधिष्ठानंजिह्वाइंद्रियंरसोविषयः वरुणोदेवता (एवंसर्वत्रअधिष्ठानम् इंद्रियं देवता विषयइतिचतुष्टयम् ज्ञातव्यम्) १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विवक्षोर्वक्तुमिच्छोर्मुखतएववह्निर्देवतावाक्इंद्रियं (तयोः) व्याहृतंभाषणंतयोरितिइंद्रियदेवताधीनत्वंकर्मणोदर्शयति १९ नभस्वतिप्राणवायौदोधूयतिदोधूयमानेत्यंतंप्रचलतिसति (जलेवर्तमानस्यतस्यवायुनिर्गमरंध्राभावेनकंचित्कालंनिरोधोऽतःक्लेशविशेषःसमजायत ततः नासिकेश्वासोच्छ्वासनिर्गमागमरंध्रे) तत्रचनासिकायांवायुर्दैवता गंधंवहतीति तथाअनेनगंधोविषयोदर्शितः । घ्राणइंद्रियंजिघ्रक्षतःगंधंग्रहीतुमिच्छतः २० निरालोकं (आलोकाभावः) प्रकाशशून्यत्वमासीदितिशेषः निर्मक्षिकमितिवद्व्ययीभावः । तदाआत्मानंदेहंचकारादन्यच्चवस्तुदिदृक्षतः अक्षिणीस्थानंज्योतिः आदित्योदेवता चक्षुरिंद्रियंततोगुणस्यरूपस्यग्रहोग्रहणंअनेनरूपंविषयोदर्शितः २१ ऋषिभिर्वेदैर्बोध्यमानस्यततआत्मनः प्रबोधनंग्रहीतुमिच्छतः (दिशोदेवताः श्रोत्रमिंद्रियं) ततोगुणग्रहःशब्दग्रहणम् २२ मृदुत्वंचकाठिन्यंचलघुत्वंचगुरुत्वंचओष्णत्वंईषदुष्णत्वंचशीततांचेत्यर्थः यद्यप्युष्णत्वमपींद्रियविषयएवतथापितस्यजिघृक्षाभावादोष्णमित्युक्तम् । गुर्वुष्णेतिपाठेयणादेशश्छांदसः । वस्तुनएतान्धर्मान्जिघृक्षतस्त्वक्निर्भिन्ना त्वगिंद्रियाधिष्ठानंचर्मजातमित्यर्थः तस्यांरोमाणिइंद्रियं । महीरुहाश्चदेवताजाताः । वस्तुनिहस्तेनातोलितेलघुत्वगुरुत्वज्ञानावतयोरपित्वगिंद्रियविषयत्वमितिपौराणिकाः तत्रत्वचिअंतर्बहिश्चवातोवृतः आवृत्यस्थितः । कर्तरिनिष्ठा कथंभूतः त्वचालब्धोगुणस्पर्शोयेनसः । अयमर्थः । त्वगिंद्रियमेववहिःकंडूतिसहितंस्पर्शग्रहत्वलोमशब्देनोच्यते तत्रमहीरुहाणांदेवत्वंअंतर्बहिश्चस्पर्शग्रहत्वतदेवत्वक्शब्देनोच्यते । तत्रवातोदेवता । तथाचतृतीयेवक्ष्यति । "त्वचमस्यविनिर्भिन्नांविविशुर्धिष्ण्यमोषधीः । अंशेनलोमाभिःकंडूयैरसौप्रतिपद्यते निर्भिन्नान्यस्यचर्माणिलोकपालोनिलोऽविशत् प्राणेनांशेनसंस्पर्शयेनासौप्रतिपद्यत" इति । तत्रचर्माणीतिचर्मोपलक्षितात्वगित्यर्थः प्राणेनांशेनेतिप्राणवायुव्याप्तेनत्वगिंद्रियेणेत्यर्थः । बह्वृचश्रुतौत्वेकएवांशोनिर्दिष्टः । त्वग्भिरभिद्यततत्वचोलोमानिलोमभ्यओषधिवनस्पतयइति २३ रुरुहतुः निर्भिन्नौ । बलमिंद्रियं । इंद्रोदेवताततडुभयाश्रयमादानं (उपादानंहानादि) कर्म (च) ॥ २४ ॥ अभिकामिकांअभीष्टांविहितामित्यर्थः । पद्भ्यांसहयज्ञोविष्णुरवस्वयंतदधिष्ठातृरूपेणस्थितः । कर्मभिरितिगत्याख्याकर्मशक्तिरिंद्रियमुक्तं । हव्यंक्रियतइतिगतिप्राप्यंयज्ञार्थद्रव्यविषयइत्युक्तं । नृभिरितिव्यष्टिजीवेष्वपिइयमेवरीतिरितिदर्शयन्नराधिकारित्वंयज्ञादीनांदर्शयति २५

श्लोकाः १९/२५

विवक्षोर्मुखतोभूम्नोवह्निर्वाग्व्याहृतंतयोः ॥ जलेवैतस्यसुचिरंनिरोधःसमजायत १९ नासिकेनिरभिद्येतांदोधूयतिनभस्वति ॥ तत्रवायुर्गंधवहोघ्राणोनसिजिघृक्षतः २० यदात्मनिनिरालोकमात्मानंचदिदृक्षतः ॥ निर्भिन्नेह्यक्षिणीतस्यज्योतिश्चक्षुर्गुणग्रहः २१ बोध्यमानस्यऋषिभिरात्मनस्तज्जिघृक्षतः ॥ कर्णौचनिरभिद्येतांदिशःश्रोत्रंगुणग्रहः २२ वस्तुनोमृदुकाठिन्यलघुगुर्वोष्णशीतताम् ॥ जिघृक्षतस्त्वग्निर्भिन्नातस्यांरोममहीरुहाः ॥ तत्रचांतर्बहिर्वायुस्त्वचालब्धगुणोवृतः २३ हस्तौरुरुहतुस्तस्यनानाकर्मचिकीर्षया ॥ तयोस्तुबलवानिंद्रआदानमुभयाश्रयम् २४ गतिंजिगीषतःपादौरुरुहातेभिकामिकां ॥ पद्भ्यांयज्ञःस्वयंहव्यंकर्मभिःक्रियतेनृभिः २५

चूर्णिका

एवंविवक्षोः मुखात् वन्हिवाक्वचनानिजातानि प्राणवायौप्रचलतिनासिकेजाते वायुर्देवतागंधो विषयः घ्राणंइंद्रियं २० दिदृक्षतस्तस्यअक्षिणीजाते तत्र अर्कः देवता चक्षुः इंद्रियंरूपंविषयः २१ श्रोतुंइच्छतः कर्णौदिशः श्रोत्रं शब्दः २२ वस्तुनोमृदुकाठिण्यांजिघृक्षतः त्वक् रोमाणि वृक्षाः स्पर्शः जातः २३ कर्मचिकीर्षयाहस्तौ बलंइंद्रः आदानं जिगमिषोः पादौःविष्णुः गतिः गमनं २४ २५

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रजाअपत्यंआनंदोरातिः अमृतंस्वर्गादितत् (अर्थयितुंशीलमस्यतस्य । यद्वाप्रजानिमित्तोयआनंदोरातिः सएवामृतंतदर्थिनः पुरुषस्य) शिश्नः अधिष्ठानं उपस्थइंद्रियंप्रजापतिश्च (दैवतम्)
आसीदितिज्ञेयं । तदुभयाश्रयं (शिश्नोपस्थाश्रयं) कामानां (स्त्रीसंभोगानां) संबंधिप्रियंसुखं (चासीत्) २६ धातुमलंमुक्तान्नादीनांअसारांशं । (मलमूत्रसंज्ञं) त्य
क्तुमिच्छोःगुदपायुमित्रोत्सर्गाः अधिष्ठानेंद्रियदेवताविषयाः उभयाश्रयःपायुमित्राश्रयः २७ पुर्याः देहात् पुरः देहांतराणिआसिसृप्सोः सर्वतोगंतुमिच्छोः नाभिद्वारंनिरभिद्यतेत्यनुषंगः ।
अपानतःअपगच्छतः । पृथक्त्वंमरणं । नाभ्यादीन्यधिष्ठानादीनि । नाभ्यांहिप्राणापानयोर्बंधविश्लेषेमृत्युरितिप्रसिद्धं । (उभयाश्रयंइंद्रियदेवताश्रयं) २८ अन्नपानानामादित्सोः
संग्रहेच्छोः कुक्षिश्चअंत्राणिचनाड्यश्चासन् । तत्रकुक्षिरधिष्ठानं । अंत्राण्यन्नसंग्रहेकरणमिंद्रियस्थानीयं । नाड्यस्तुपानसंग्रहे । तयोर्नाड्यंत्रवर्गयोः क्रमेणनद्यः समुद्राश्चदेवते । तु
ष्टिरुदरभरणं । पुष्टिस्तुरसपरिणामतः स्थौल्यं तदाश्रयेतदुभयनिमित्ते । (अंत्रसमुद्राश्रयातुष्टिः । नाडिनद्याश्रयापुष्टिः ।) तत्रान्नसंग्रहेच्छोः कुक्ष्यंत्रसमुद्रतुष्टयइतिचतुष्टयं । पेयसंग्रहेच्छोः
कुक्षिनाडिनदीपुष्टयइतिविवेकः २९ निदिध्यासोः नितरांचिंतयितुमिच्छोः कामोभिलाषः । हृदयमनश्चंद्रसंकल्पाअधिष्ठानादयः । (कामश्चविषयः) ३० तदेवमाधिदैवादिभेदंविभज्योक्त्वा
तदंशभूतानांधात्वादीनांस्वरूपमाह । त्वगितिद्वाभ्यां त्वक्स्थूलं (चर्म) चर्मतदुपरिस्थितंसूक्ष्मं । त्वगादयोस्थ्यंताः द्वंद्वैकभावेननिर्दिष्टाः सप्तयेधातवः तेभूम्यप्तेजोमयाः तेषांचपांचभौ
तिकत्वेपिवाय्वाकाशयोराहारादिरूपेणसंवर्धकत्वाभावादेवमुक्तम् ३१ गुणात्मकानिगुणेषुशब्दादिष्वात्मा (स्वभावो) येषां । विषयाभिमुखस्वभावानीत्यर्थः गुणाः शब्दादयः भूतादि
रहंकारः ततःप्रकर्षेणभवंतीत्यर्थः अहंकारकल्पितशोभनस्वभावाः नवस्तुतस्तथेतितात्पर्यं । अत्रहेतुः यतोमनएवसर्वविकाराणात्मास्वरूपं । बुद्धिस्तुतथाभूतार्थविज्ञानरूपिणीनतुपरमर्थे
ग्राहिणीतिवैराग्यार्थमुक्तं । अनेनैवबुद्धिमनसोःस्वरूपंचोक्तं ३२ उपसंहरति ! एतदिति । (मह्यादिभिः पृथिव्यप्तेजोवाय्वाकाशैरहंकारेणमहता) चप्रकृत्या (च)सहाष्टभिः ३३ स्थूलमु
क्त्वासूक्ष्मंसमष्टिलिंगशरीरमाह । अतःपरंअस्यकारणभूतंसूक्ष्मंअतींद्रियं । यतःअव्यक्तं । तत्कुतः यतोनिर्विशेषणं । (तत्कुतः।) अनादिमध्यनिधनंउत्पत्तिस्थितिलयशून्यं । नित्यंस
दैकरूपं । अपक्षयादिशून्यमित्यर्थः । अतएववाक्मनश्चेतिद्वंद्वैक्यं । तस्मात्परम् ३४

श्लोकाः २६/३४

निरभिद्यतशिश्नोवैप्रजानंदामृतार्थिनः ॥ उपस्थआसीत्कामानांप्रियंतदुभयाश्रयं२६उत्सिसृक्षोर्धातुमलंनिरभिद्यतवैगुदं ॥ ततःपायुस्ततोमित्रउत्सर्गउभया
श्रयः २७ आसिसृप्सोःपुरःपुर्यानाभिद्वारमपानतः ॥ तत्रापानस्ततोमृत्युः पृथक्त्वमुभयाश्रयं २८ आदित्सोरन्नपानानामासन्कुक्ष्यंत्रनाडयः ॥ नद्यःसमु
द्राश्चतयोस्तुष्टिपुष्टिस्तदाश्रये२९ निदिध्यासोरात्ममायांहृदयंनिरभिद्यत ॥ ततोमनस्ततश्चंद्रःसंकल्पःकामएवच ३०त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधात
वः ॥ भूम्यप्तेजोमयाः सप्तप्राणोव्योमांबुवायुभिः ३१ गुणात्मकानींद्रियाणिभूतादिप्रभवागुणाः ॥ मनःसर्वविकारात्माबुद्धिर्विज्ञानरूपिणी ३२ एतद्भगव
तोरूपंस्थूलंतेव्याहृतंमया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ३३ अतःपरंसूक्ष्मतममव्यक्तंनिर्विशेषणं ॥ अनादिमध्यनिधनंनित्यंवाङ्मनसःपरं ३४

चूर्णिका

प्रजानंदार्थिनः शिश्नः उपस्थः प्रजापतिः मूत्रोत्सर्गकामसुखेमलंत्यक्तुमिच्छोः गुदं पायुः मित्रः उत्सर्गः २७ शरीरांतरंजिगमिषोः नाभिद्वारंअपानं मृत्युः मरणं २८अ
न्नपानआदित्सोः कुक्षः अंत्राणि नाड्यः आसन् २९ तत्रअन्नसंग्रहेच्छोः कुक्ष्यंतत्रसमुद्रचतुष्टयइति पेयसंग्रहेच्छोः कुक्षिनाडिनदीपुष्टयःचिंतयितुमिच्छोःहृदयंमनः
चंद्रसंकल्पाः३०तथात्वक्चमांसरुधिरमेदोमज्जास्थिधातवःजाताः (एवंव्यष्टिजीवशरीरेष्वपिबोध्यम्)३१ ३२एतत् भगवतःस्थूलंरूपंतेव्याहृतम् ३३द्वितयिंअनादिमध्यनि
धनं वाङ्मनसः परंनित्यंसूक्ष्मरूपंचउक्तम् ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपासनार्थंभगवत्यारोपितंरूपद्वयमपवदाति । अमुनीइति । नगृह्णंतिवस्तुतोनांगीकुर्वंति । यतोमायासृष्टे । (विपश्चितःसूरयः ।) ३५ यद्रूपगुणकर्मकइतियदुक्तंभगवताब्रह्माणंप्रतितत्प्रपंचार्यितुंब्रह्मादिरूपाणितत्कर्माणिचाह । सइत्यादिना । इत्थंभावेनेत्यतःप्राक्तनेनग्रंथेन । समगवान्ब्रह्मरूपधृक्सन्वाच्यवाचकतया (नामादिकंधत्ते) वाचकतयानामानिवाच्यतयारूपाणिक्रियाश्चधत्तेसृजतीत्यर्थः । माययासकर्मासव्यापारःसन्वस्तुतस्त्वकर्मकः ३६ एतत्प्रपंचयति । प्रजापतीनितिसार्धैस्त्रिभिः । द्वितीयांतानांधत्तेइत्यनेनान्वयः । तत्रप्रजापतिरित्यादीनिनामानितत्तद्वाच्यानिरूपाणि । तत्तत्कर्माणिचज्ञेयानि । पृथक्तत्तदवांतरभेदेन ३७ ३८ गिरीनित्यस्यानंतरंनृपेतिसंबोधनं ३९ द्विविधाःस्थावरजंगमरूपेण । तत्रचतुर्विधाजरायुजांडजस्वेदजोद्भिज्जरूपेण(तत्र)जलस्थलनभांसिओकांसियेषांतानापिधत्तेइतिपूर्वेणान्वयः । यच्चराज्ञापृष्टं “ यावत्यःकर्मगतयोयादृशीर्द्विजसत्तम ”ति तस्यापिप्रसंगादनेनैवोत्तरमाह । कुशलाउत्तमाःअकुशलानीचाःमिश्राइतिपदांतरं मिश्रामध्यमाः । कर्मणांपुण्यापुण्यमिश्राणांगतयःफलानि । ४० सत्त्वादिभेदेनकर्मगतिवैचित्र्यंप्रपंचयाति । सत्त्वमितिसार्धेन । सत्त्वादयस्तिस्रोगतयःसुरादिशब्दाऋष्यादीनामुपलक्षणार्थाः । (तत्तदवांतरभेदोपित्रिधेत्याह । तत्रापीति ।) अन्याभ्यांगुणाभ्यांस्वभावोगुणःउपहन्यतेअनुविध्यते (यथामनुष्याणांस्वभावतोराजसत्वेपिगुणांतरानुवेधावसात्विकत्वंतामसंचप्रातयिते । तत्राप्यनुवेधतारतम्यात्गतितारतम्यंज्ञेयं) ४१ ब्रह्मरुपेणस्रष्टृत्वमुक्त्वाविष्णुरूपेणपालकत्वमाह । सएवभगवान् (धाता) तिर्यगादि (रुपै) रवतारैरिदंविश्वंस्थापयन्पालयन्धर्मरूपेणपुष्णातिभोगैः संवर्धयति (यद्वाधर्मरूपधृक्वर्णाश्रमादिर्धर्मप्रवर्तकरूपधरइत्यर्थः) ४२ रुद्ररूपेणसंहर्तृत्वमाहततइति (कालाग्निरुद्ररूपोभगवान्) आत्मनः सकाशावयदिदंसृष्टंतत्संनियच्छतिसंहरति ४३ (सृष्टयादि)-कर्तृत्वाद्यपवादेनदशमस्यशुद्धिमाह (भगवत्तमःब्रह्मादिभ्योऽतिशयेनोत्तमोपि) इत्थंभावेनस्रष्टृत्वादिरूपेण (कथितः) “ तस्माद्वाएतस्मादात्मनआकाशःसंभूतः । सोकामयतबहुस्यांप्रजायेय ” इत्यादिश्रुत्याप्रतिपादितः सूरयस्तुपरंकेवलंएवंरूपेणैवद्रष्टुंनार्हंति ४४

श्लोकाः ३६/४४

अमुनीभगवद्रूपेमयातेह्यनुवर्णिते ॥ उभेअपिनगृह्णंतिमायासृष्टेविपश्चितः ३५ सवाच्यवाचकतयाभगवान्ब्रह्मरूपधृक् ॥ नामरूपक्रियाधत्तेसकर्माऽकर्मकः
परः ३६ प्रजापतीन्मनून्देवानृषीन्पितृगणान्पृथक् ॥ सिद्धचारणगंधर्वान्विद्याध्रासुरगुह्यकान् ३७ किन्नराप्सरसोनागान्सर्पान्किंपुरुषोरगान् ॥ मातृ
रक्षःपिशाचांश्चप्रेतभूतविनायकान्३८कूष्मांडोन्मादवेतालान्यातुधानान्ग्रहानपि ॥ खगान्मृगान्पशून्वृक्षान्गिरीन्नृपसरीसृपान् ३९द्विविधाश्चतुर्विधायेन्ये
जलस्थलनभौकसः॥कुशलाकुशलामिश्राःकर्मणांगतयस्त्विमाः ४० सत्त्वंरजस्तमइतितिस्रःसुरनृनायकाः ॥ तत्राप्येकैकशोराजन्भिद्यंतेगतयस्त्रिधा ॥ यदैकै
कतरोऽन्याभ्यांस्वभावउपहन्यते ४१ सएवेदंजगद्धाताभगवान्धर्मरूपधृक् ॥ पुष्णातिस्थापयन्विश्वंतिर्यङ्नरसुरात्मभिः ४२ ततःकालाग्निरुद्रात्मायत्सृष्ट
मिदमात्मनः ॥ संनियच्छतिकालेनधनानीकमिवानिलः ॥ ४३ इत्थंभावेनकथिताभगवान्भगवत्तमः ॥ नेत्थंभावेनहिपरंद्रष्टुमर्हंतिसूरयः ४४

चूर्णिका

ज्ञानिनःउभेअपिमायासृष्टेइतिमत्वानगृह्णंति ३५ स ब्रह्मरूपधृक् भगवान् वाच्यवाचकतयासकर्माकर्मकः सन् नामरूपाक्रियाः धत्ते ३६ प्रजापतीन्मनून्देवानृषीन्पितृगणान्पृथक् सिद्धचारणगंधर्वान् विद्याध्रासुरगुह्यकान् ३७ किन्नराप्सरसोनागान्सर्पान्किंपुरुषान्गणान् मातृरक्षःपिशाचांश्चप्रेतभूतविनायकान् ३८ इत्याद्येवंचतुर्विधजीवाः कर्मणांगतिरूपाः ३९ ४० ४१ एतान्भगवान् ब्रह्मरूपेणसृजति विष्णुरूपेणपाति शिवरूपेणहरति ४२ ४३ इत्थंभावेनभगवान् तेकथितः ४४

CC-0. In Public Domain. Digitization by eGangotri

त्वात्क । यतः अस्यविश्वस्यजन्मादौकर्मणिपरस्येश्वरस्यइत्थंभावः कर्तृत्वंनास्ति । श्रुत्यापितात्पर्येण (कर्तृत्वं) नप्रतिपाद्यतेकिंतुअनुविधीयतेअनुवर्त्यते । किमर्थं । कर्तृत्वप्रतिषेधार्थं (अधिष्ठानज्ञानेहितत्रारोपितस्यप्रतिषेधः ।) हियतोमायया (तदा) रोपितंप्रकाशितं । तथाचश्रुतिः “ निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनं । इंद्रोमायाभिःपुरुरूपईयत” इत्याद्या ४५ उक्तमर्थमुपसंहरति । अयंत्विति । ब्रह्मणः संबंधीकल्पोमहाकल्पः । विकल्पोऽवांतरः तत्सहितः (उदाहृतः) उदाहरणत्वेनसंक्षेपतउक्तः । कथंभूतः यत्रमहाकल्पेप्राकृताः महदादिसर्गाः अवांतरकल्पेचवैकृताःस्थावरादिसर्गाः इत्ययंविधिः प्रकारः अन्यैर्महाकल्पादिभिः साधारणः (अन्येष्वपिमहाकल्पादिषुएवमेवसृष्टिप्रकारोस्तीत्यर्थः) ४६ (श्रोतृप्रवृत्त्यर्थं) वक्ष्यमाणंविस्तारंप्रतिजानीते । परिमाणंस्थूलंसूक्ष्मंच । कल्पस्यलक्षणंइयान्एवंरूपइति । तद्विग्रहंअवांतरकल्पंमन्वंतरादिरूपंविभागंच । यथावत्विस्तरेणपुरस्तात्तृतीयस्कंधेव्याख्यास्यामि । तत्रपाद्मंकल्पंअथोइतिकात्स्न्र्येनव्याख्यायमानंशृणु ४७ यदित्थंसृष्ट्यादिनिरूपणंतदेवसाक्षात्श्रोतुकामःकथांतरंपृच्छति यदाहेति । (हेसूत क्षत्ता विदुरः) भुवः संबंधीनितीर्थानि । यद्वा (भुवइतिद्वितीयावहुवचनं) भुवः क्षेत्राणिच (चचार) इति (विदुरस्तीर्थयात्रायांमैत्रेयादात्मनोगतिमित्यादिनायदाह) ४८ तस्यक्षत्तुः कौषारवेर्मैत्रेयस्यच । अध्यात्मज्ञानसंश्रितः संवादः (यच्चतत्वंपृष्टः सभगवान्मैत्रेयस्तस्मैविदुरायोवाचतदिदंब्रूहि) ४९ (तथैव) पुनरागतवान्तत्रचनिमित्तंब्रूहि ५० राज्ञाप्रष्टइतिअयमर्थः यत्यूयंपृच्छथइदमेवराजापिशुकंपृष्टवान् । शुकोपिविदुरमैत्रेयसंवादंपुरस्कृत्ययेपूर्वंराज्ञाकृताः प्रश्नास्तदनुसारेणैवसर्वंपुराणार्थमवोचत् तदेवाहंवोभिधास्यामितथैवशृणुतेति ५१ ॥ ॥ इतिश्रीभागवतेमहापुराणेश्रीधरस्वामिविरचितायांभावार्थदीपिकायांटीकायांद्वितीयस्कंधेदशमोध्यायः १० ॥ ॥ ॥ श्रीमद्भागवतंयेनस्वब्रह्मसुखतोमितं । ब्रह्मनारदयोःप्रोक्तंतंवंदेगुरुमीश्वरम् ॥१॥यत्सूत्रयंत्रितंविश्वंनरीनर्तिजगत्त्रयं । संतस्तमेवपृच्छंतुयदत्रस्खलितंमम ॥२॥द्वितीयस्कंधसंबंधिपदभावार्थदीपिका। उद्दीप्यतामियंसद्भिर्यथास्यात्तत्त्वदीपिका ॥३॥ ईक्षंतामिच्छयासंतःक्षमंतांममसाहसं । मयाहिस्वीयबोधायकृतमेतन्नसर्वतः ॥ ४ ॥ ॥ इतिद्वितीयस्कंधः समाप्तः ॥ (श्रीधरस्वामिरचितेव्याख्यानेऽस्मिन्पयोनिभे जलवद्भातियत्किंचित्तत्तुमाहेश्वरंवचः १)

श्लोकाः ४९ / ९१

नास्यकर्मणिजन्मादौपरस्यानुविधीयते ॥ कर्तृत्वप्रतिषेधार्थंमाययारोपितंहितत् ४९ अयंतुब्राह्मणःकल्पःसविकल्पउदाहृतः ॥ विधिःसाधारणोयत्रसर्गाःप्राकृतवैकृताः४६परिमाणंचकालस्यकल्पलक्षणविग्रहं॥यथापुरस्ताद्व्याख्यास्येपाद्मंकल्पमथोशृणु४७॥शौनकउ० ॥यदाहनोभवान्सुतक्षत्ताभागवतोत्तमः॥चचारतीर्थानिभुवस्त्यक्त्वाबंधून्सुदुस्त्यजान् ४८ कुत्रकौषारवेस्तस्यसंवादोध्यात्मसंश्रितः ॥ यद्वासभगवांस्तस्मैपृष्टस्तत्त्वमुवाचह ४९ ब्रूहिनस्तदिदंसौम्यविदुरस्यविचेष्टितं ॥ बंधुत्यागनिमित्तंचतथैवागतवान्पुनः ९० ॥ सूतउवाच ॥ ॥ राज्ञापरिक्षितापृष्टौयदवोचन्महामुनिः ॥ तद्वोऽभिधास्येशृणुतराज्ञःप्रश्नानुसारतः९१ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टादशसाहस्र्यांसंहितायांद्वितीयस्कंधेदशमोध्यायः १० ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ छ ॥

चूर्णिका यस्मिन्इदंजगत्माययाआरोपितं ४९ हि अयंतु ब्राह्मःकल्पःउक्तः ४३ वक्ष्यमाणंपाद्मंकल्पंशृणु ४७॥ शौनकउवाच॥ हेसूतमैत्रेयःविदुरंप्रतितत्त्वंउवाच ४८विदुरमैत्रेयसंवादः कुत्राभूत् ४९ विदुरस्यबंधुत्यागनिमित्तंचेष्टितंचकथय ९० ॥ ॥ सूतउवाच ॥ एवंपरीक्षितापृष्टः शुकः विदुरमैत्रेयसंवादयंत् अचोचत् ततु्वः अभिधास्ये ९१ ॥ ॥ इतिश्रीमद्भाभगवतचूर्णिकायांद्वितीयस्कंधेदशमोध्यायःसमाप्तः १० ॥ ॥छ॥ ॥श्रीकृष्णार्पणमस्तु॥ ॥समाप्तोऽयंद्वितीयस्कंधः ॥ ॥ छ॥ ॥९२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत–द्वितीयस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत-तृतीयस्कंधः प्रारभ्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीगणेशायनमः ॥ नमोभगवतेवासुदेवाय ॥ ॥ तृतीयेतुत्रयस्त्रिंशदध्यायैःसर्गवर्णनम् ॥ ईशेक्षयागुणक्षोभात्सर्गोब्रह्मांडसंभवः ॥ १ ॥ तत्रतुप्रथमेऽध्यायेबंधून्हित्वागतायुषः ॥ निर्गतस्योद्धवेनादौसंवादः क्षत्तुरुच्यते ॥ २ ॥ भगवद्ब्रह्मसंप्रोक्तंसंक्षिप्तंवर्णितंपुरा ॥ प्राहभागवतंशेषप्रोक्तंविस्तरतःपुनः ॥ ३ ॥ द्वेधाहिश्रीमद्भागवतसंप्रदायप्रवृत्तिः एकतःसंक्षेपतःश्रीनारायणब्रह्मनारदादिद्वारेण अन्यतस्तुविस्तरतःशेषसनत्कुमारसांख्यायनादिद्वारेण तत्रद्वितीयेश्रीनारायणब्रह्मसंवादेनसंक्षेपतोऽहमेवासमित्यादिचतुःश्लोक्याश्रीभागवतंनिरूपितम् तदेवब्रह्मनारदसंवादेनदशलक्षणतयाकिंचिद्विस्तरेणोक्तम् तदेवशेषोक्तमतिविस्तरतोवक्तुंतृतीयाद्यारंभः तत्रतृतीयेप्रथमंक्षत्तुर्मैत्रेयसंगमश्चतुर्भिरध्यायैः ततोऽष्टभिःसाविसर्गःसर्गप्रपंचः ततोविसर्गप्रस्तावेनसप्तभिर्वराहावतारः ततएकेनविसर्गसमाहारः तत्प्रसंगेनचतुर्भिःकपिलावतारः ततोनवभिःकपिलाख्यानमितित्रयस्त्रिंशद्भिरध्यायैस्तृतीयस्कंधप्रवृत्तिः तत्रद्वितीयस्कन्धान्ते "परिमाणं च कालस्यकल्पलक्षणविग्रहम् । यथापुरस्ताद्व्याख्यास्येपाद्मंकल्पमथोशृणु" इतिप्रतिज्ञातमर्थं विस्तरेणनिरूपयितुमितिहासंप्रस्तौतिभगवाञ्छुकः एवमितिद्वाभ्याम् ऋद्धिमत्सर्वसंपद्भिःपरिपूर्णम् (एवंभूतमपि स्वगृहं हित्वा वनं प्रविष्टेन विदुरेण एवं यथा भवता पृष्टमनेन प्रकारेण एतत्पुरा पृष्टः) ॥ १ ॥ किंच अतिश्लाघ्य (—स्वाच्च तद्गृहं) त्यागानर्हमित्याह यद्वैप्रसिद्धंगृहं वःपांडवानांमंत्रकृद्दौत्यकर्तासिन्नयंश्रीकृष्णः बुद्धिसान्निधानादयामितिनिर्देशः पौरवेंद्रोदुर्योधनस्तस्यगृहंहित्वाऽनाहूतएवविदुरगृहं प्रविवेशतत्रहेतुः आत्मसात्कृतमात्मीयत्वेनगृहीतम् ॥ २ ॥ कुत्र संगम आस बभूव ॥३॥ वरीयसिश्रेष्ठे (तस्मिन्मैत्रेयेशुद्धचित्तस्यतस्यप्रश्नः) अल्पस्यार्थस्योदयोयस्मात्तथाभूतोनभवाति साधुवादेनसतां (भवादृशां) अनुमोदनेनोपबृंहितःसंवर्धितः यद्वा साधोर्मैत्रेयस्यवादेनोत्तरेणश्लाघितइत्यर्थः ॥ ४ ॥ (सोयंऋषिवर्यःशुकः) ॥ ५ ॥ त्यागानर्हस्यापिगृहस्यत्यागेहेतुत्वेनकौरवापराधानाह यदेत्येकादशभिः एतेषांचतदासक्षत्ता अयादित्येकादशेक्रियासंबंधः (राजाधृतराष्ट्रःविशेषेणनष्टादृष्टिर्विवेकलक्षणाचक्षुर्वायस्यसस्वसुतान्दुर्योधनादीनधर्मेण धर्मविरुद्धकर्मणापुष्णन्) यविष्ठस्यकनिष्ठस्यपांडोः विबंधून्पितृहीनान् (लाक्षोपगूढगृहे) ॥ ६ ॥

श्लोकाः १ — ६

श्रीगणेशायनमः ॥ ॥ श्रीशुकउवाच ॥ ॥ एवमेतत्पुरापृष्टोमैत्रेयोभगवान्किल ॥ क्षत्त्रावनंप्रविष्टेनत्यक्त्वास्वगृहमृद्धिमत् ॥ १ ॥ यद्वाअयंमंत्रकृद्वो भगवानखिलेश्वरः ॥ पौरवेंद्रगृहंहित्वाप्रविवेशात्मसात्कृतम् ॥ २ ॥ ॥ राजोवाच ॥ ॥ कुत्रक्षत्तुर्भगवतामैत्रेयेणाससंगमः ॥ कदावासहसंवादएतद्वर्णयनःप्रभो ॥ ३ ॥ नह्यल्पार्थोदयस्तस्यविदुरस्यामलात्मनः ॥ तस्मिन्वरीयसिप्रश्नःसाधुवादोपबृंहितः ॥ ४ ॥ सूतउवाच ॥ ॥ सएवमृषिवर्योऽयंपृष्टोराज्ञापरीक्षिता ॥ प्रत्याहतंसबहुवित्प्रीतात्माश्रूयतामिति ॥ ५ ॥ ॥ श्रीशुकउवाच ॥ ॥ यदातुराजास्वसुतानसाधून्पुष्णन्नधर्मेणविनष्टदृष्टिः ॥ भ्रातुर्यविष्ठस्यसुतान्विबंधून्प्रवेश्यलाक्षाभवनेददाह ॥ ६ ॥

चूर्णिका ॥ १ ॥

श्रीगणेशायनमः ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंपुराविदुरःमैत्रेयंप्रतिएतत्पृष्टवान् ॥ १ ॥ २ ॥ राजोवाच ॥ ॥ भगवतामैत्रेयेणसहक्षत्तुःसंगमः संवादश्चकुत्रअभूत् हेप्रभोतत्नःवर्णय ॥ ३ ॥ ४ ॥ श्रीशुकउवाच ॥ यदाधृतराष्ट्रःअसाधून्सुतान्पुष्णन्पांडवान् लाक्षाभवनेददाह ॥५॥ यदास्नुषायाःद्रौपद्याःकेशाभिमर्शनंनवारयामास ॥६॥

१ क्षत्तुर्विदुरस्य ।

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥ २ ॥

कुरुदेवस्ययुधिष्ठिरस्यदेव्याः (पट्टाभिषिक्तायाः) द्रौपद्याः आत्मनःस्नुषायाः (सदसिकेशाकर्षणलक्षणं सुतस्यदुःशासनस्य कर्म धृतराष्ट्रेन न्यवारयत्) स्वीयैरस्त्रैरश्रुभिःस्वकुचकुंकुमानिरिपुस्त्रीणांवातद्वदृर्त्तैव धेनहरंत्याः ॥ ७ ॥ सत्यावलंबस्यसत्याश्रयस्य (सत्यपरस्येत्यर्थः) वनात्प्रत्यागतस्य (अजातशत्रोर्युधिष्ठिरस्य) समयेनपूर्वकृतेन (संभाषणेन) दायमंशंयाचमानस्ययच्चदानादान्नददौ (तत्रहेतुः) तमोमोहंजुषाणःपुत्रंसेवमानः अविवेकंवा ॥ ८ ॥ (पार्थैःप्रेरितः) यानिवचनानिपुंसांभीष्मादीनाममृतायनान्यमृतस्रावीणि राजाधृतराष्ट्रोदुर्योधनोवा उरुबहुनमेनेक्षतोनष्टःपुण्यलेशोयस्यसः नसुखकीर्तिधर्मादिहेतुःकिंतुराज्यप्राप्तिमात्रहेतुःपुण्यलेशएवासीत् तस्यापिनष्टत्वादनादृतवानित्यर्थः (गुरुमात्रस्यापि वाक्यं न त्याज्यं किमु जगद्गुरोः इत्यभिप्रायेण जगद्गुरुरित्युक्तम्) ॥ ९ ॥ इदानींविदुरस्यैवकृतंपराभवंदर्शयाति यदेत्यादिषड्भिः यदापूर्वजेनधृतराष्ट्रेणमंत्रायचोपहूतोंऽतर्गृहंप्रविष्टोमंत्रंपृष्टःसन्नथानंतरं तदाह किं मंत्रिणोऽद्यापियद्वैदुरिकंविदुरवाक्यमितिप्रसिद्धंवदंति (विदुरर्नीतिरियमिति सदसिदृष्टांती कुर्वंतीत्यर्थः) ॥ १० ॥ तदेवाह अजातशत्रोरितित्रिभिः (सोढुमशक्यमपि) तवागोऽपराधंसहमानस्यदायंप्रतियच्छदेहि यत्र (यस्मिन्) अपराधेऽनुजैःसहवर्तमानोवृकोदररूपोऽहिःक्रोधेनश्वसन्वर्तते यद्यस्मात्त्वमलमत्यर्थंबिभेषि ॥ ११ ॥ ननु ममतादृशाःपुत्राबहवःसंतीतिगर्वमाकृथाइत्याह पार्थांस्तुमुकुंदआत्मीयत्वेनगृहीतवान् सचदेवः तत्रापिभगवान्नतुप्राकृतः किंच सहक्षितिदेवैर्विप्रैर्देवैश्चेंद्रादिभिर्वर्तमानः यतोऽसौतत्रैवविप्रादेवाश्चेत्यर्थः सचस्वपुर्यामेवसुखमास्तेनत्वन्यत्रगतः किंच यदुदेवानां यदुश्रेष्ठानांदेवःपूज्यः यतोऽसौतत्रैवयदुप्रवीराइत्यर्थः किंच नृदेवेषुमंडलेश्वरेषुदीव्यंतिप्रकाशंतइतिनृदेवदेवा राजानोविनिर्जिताअशेषानृदेवदेवायेन यतोऽसौतत्रैवसर्वेराजानः अतःपार्थानांदायंदेहीति ॥ १२ ॥ दुर्योधनस्तत्रमन्यतइतिचेदतआह सएषमूर्तोदोषएवगृहान्प्रविष्टआस्ते दोषत्वेहेतुः पुरुषद्विट्श्रीकृष्णद्वेष्टा कोऽसौ यंत्वमपत्यमत्यापुत्रबुद्ध्यापुष्णासि नत्वपत्यमसौ नपतत्यस्मादितिह्यपत्यंप्राहुः (यतःकृष्णाद्विमुखः) गताश्रीर्यस्मात्सत्वमित्याक्रोशति अतएनमशैवममंगलमाशु (कालक्षेपमंतरेण) त्यज कथंपुत्रस्त्याज्यस्तत्राह कुलस्यकौशलाय "त्यजेदेकंकुलस्यार्थेग्रामस्यार्थेकुलंत्यजेत् । ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्यजेत्" इतिहिन्यायः ॥ १३ ॥

यदासभायांकुरुदेवदेव्याःकेशाभिमर्शंसुतकर्मगर्ह्यम् ॥ नवारयामासनृपःस्नुषायाःस्वास्रैर्हरंत्याःकुचकुंकुमानि ॥ ७ ॥ द्यूतेत्वधर्मेणजितस्यसाधोःसत्यावलं- श्लोकाः
बस्यवनागतस्य ॥ नयाचतोऽदात्समयेनदायंतमोजुषाणोयदजातशत्रोः ॥ ८ ॥ यदाचपार्थप्रहितःसभायांजगद्गुरुर्यानिजगादकृष्णः ॥ नतानिपुंसाममृता- ७
यनानिराजोरुमेनेक्षतपुण्यलेशः ॥ ९ ॥ यदोपहूतोभवनंप्रविष्टोमंत्रायपृष्टःकिलपूर्वजेन ॥ अथाहतन्मंत्रदृशांवरीयान्यन्मंत्रिणोवैदुरिकंवदंति ॥ १० ॥ १३
अजातशत्रोःप्रतियच्छदायंतितिक्षतोदुर्विषहंतवाऽऽगः ॥ सहानुजोयत्रवृकोदराहिःश्वसन्रुषायत्त्वमलंबिभेषि ॥ ११ ॥ पार्थांस्तुदेवोभगवान्मुकुंदोगृहीत-
वान्सक्षितिदेवदेवः ॥ आस्तेस्वपुर्यांयदुदेवदेवोविनिर्जिताशेषनृदेवदेवः ॥ १२ ॥ सएषदोषःपुरुषद्विडास्तेगृहान्प्रविष्टोऽयमपत्यमत्या ॥ पुष्णासिकृष्णा-
द्विमुखोगतश्रीस्त्यजाश्वशैवंकुलकौशलाय ॥ १३ ॥

चूर्णिका ॥ ७ ॥ द्यूतेजितस्यधर्मस्यसमयेभागंयाचतःसतःनअदात् ॥ ८ ॥ सामार्थंआगतस्यश्रीकृष्णस्यवचनानिसाधुनमेने ॥ ९ ॥ १० ॥ यदाधृतराष्ट्रेणपृष्टः विदुरःधर्मायदायंदेहीत्यकथयत् ॥ ११ ॥ किंचकुलकौशलायइमंदुष्टंपुत्रंत्यज ॥ १२ ॥ १३ ॥

१ क्षालयन्त्याः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

(स्वस्मिन्वनप्रविष्टे तदुपरिवृत्तां) तत्रप्रभासेपरस्परस्पर्धयानिमित्तभूतयासुहृदांकौरवाणांविनष्टिंविनाशमशृणोत् परस्परनाशेदृष्टांतः वेणुजं (परस्परसंघर्षणात् वेणुषु उद्भूतम्) वह्निंसंश्रयतेयद्वनंतद्य
थादग्धंभवतितथा प्रत्यगुदङ्गाभिमुखम् (गतवान्) ॥ २१ ॥ (तस्यां सरस्वत्यां) त्रितादीनामेकादशतीर्थानितत्तन्नाम्नाप्रसिद्धान्यासेवितवान् ॥ २२ ॥ द्विजदेवैर्ऋषिभिर्देवैश्चकृतानि अंगमंगंप्रतिवर्ततइ
तिप्रत्यंगान्यायुधानितेषुमुख्यं चक्रंतेनांकितानि मूर्धनिहेमकुंभेषुचिह्नितानिमंदिराणियेषुतानिनानाविधानिविष्णोरायतनानिक्षेत्राणितीर्थानिचासिषेवे येषांचक्रांकितमंदिरवतांदर्शनाच्छ्रीकृष्णस्मरणंभवति
॥ २३ ॥ (ततःसुराष्ट्रादीन्) अतिव्रज्यातिक्रम्य यावदुद्धवःप्राप्तस्तावत्स्वयमपियमुनामुपेत्य ॥ २४ ॥ सविदुरः प्राक्तनयंपूर्वशिष्यंनीतिशास्त्रे पाठांतरेप्राप्तोनयोनीतिशास्त्रंयेनतम् प्रतीतंप्रख्यातं स्वानांज्ञा
तीनांभद्रमपृच्छत् प्रश्नेहेतुः भगवतः प्रजानांपोष्याणाम् (बुध्या भगवच्छिष्यत्वेन च वासुदेवानुचर इत्यादिभिः उद्धवस्य भक्तिवैराग्यनीतिज्ञानाधिक्यं च सूचितम्) ॥ २५ ॥ प्रथमंतावद्रामकृष्ण
योःकुशलंपृच्छति कच्चिदितिप्रश्ने स्वनाभौभवःस्वनाभ्यःपाद्मोब्रह्मातस्यानुवृत्त्याप्रार्थनयेहावतीर्णौ कुशलमासातेवर्तेते कृतक्षणौदत्तावसरौसर्वेषांकृतोत्सवावितिवा तयोर्नित्यकुशलत्वेऽप्युक्तविशेषणविशिष्टौ
शूरसेनस्यगृहेकच्चिदासातेइतिप्रश्नः ॥ २६ ॥ यदूनांकुशलंपृच्छतिनवभिः भामःपूज्यः शौरिर्वसुदेवः यद्वा भामोभगिनीभर्ता कुंतीवसुदेवस्यभगिनी अतोदेवकीपांडोर्भगिनीतिलोकव्यवहारः (अंगहे
उद्धव ससुखमास्ते कच्चित् कुरूणामस्माकं परम आप्तः) वरानर्थान् वदान्योऽत्युदारः वराणांतत्पतीनांतर्पणेनसंतर्पणेनसह ॥ २७ ॥ वरूथाधिपतिःसेनानीः आदिसर्गेपूर्वजन्मनिस्मरंकामंसंतं (विप्रा
नाराध्यतत्प्रसादेन भगवतः सकाशात्) अभिलेभेपुत्रंलब्धवती ॥ २८ ॥ सात्वतादीनामधिपउग्रसेनः शतपत्रनेत्रःश्रीकृष्णः नृपासनाशांराज्याभिलाषंपरिहृत्यप्राणभयेनदूरात्स्थितमित्यर्थः ॥ २९ ॥

श्लोकाः २१ — २९

तत्राथशुश्रावसुहृद्विनष्टिंवनंयथावेणुजवह्निसंश्रयम् ॥ संस्पर्धयादग्धमथानुशोचन्सरस्वतींप्रत्यगियायतूष्णीम् ॥ २१ ॥ तस्यांत्रितस्योशनसोमनोश्चपृथो
रथाग्नेरसितस्यवायोः ॥ तीर्थंसुदासस्यगवांगुहस्ययच्छ्राद्धदेवस्यसआसिषेवे ॥ २२ ॥ अन्यानिचेहद्विजदेवदेवैःकृतानिनानायतनानिविष्णोः ॥ प्रत्यंगमुख्यां
कितमंदिराणियद्दर्शनात्कृष्णमनुस्मरंति ॥ २३ ॥ ततस्त्वतिव्रज्यसुराष्ट्रमृद्धंसौवीरमत्स्यान्कुरुजांगलांश्च ॥ कालेनतावद्यमुनामुपेत्यतत्रोद्धवंभागवतंददर्श
॥ २४ ॥ सवासुदेवानुचरंप्रशांतंबृहस्पतेःप्राक्तनयंप्रतीतम् ॥ आलिंग्यगाढंप्रणयेनभद्रंस्वानामपृच्छद्भगवत्प्रजानाम् ॥ २५ ॥ कच्चित्पुराणौपुरुषौस्वना
भ्यपाद्मानुवृत्त्येहकिलाऽवतीर्णौ ॥ आसातउर्व्याःकुशलंविधायकृतक्षणौकुशलंशूरगेहे ॥ २६ ॥ कच्चित्कुरूणांपरमःसुहृन्नोभामःसआस्तेसुखमंगशौरिः ॥
योवैस्वसृणांपितृवद्ददातिवरान्वदान्योवरतर्पणेन ॥ २७ ॥ कच्चिद्वरूथाधिपतिर्यदूनांप्रद्युम्नआस्तेसुखमंगवीरः ॥ यंरुक्मिणीभगवतोऽभिलेभेआराध्यवि
प्रान्स्मरमादिसर्गे ॥ २८ ॥ कच्चित्सुखंसात्वतवृष्णिभोजदाशार्हकाणामधिपःसआस्ते ॥ यमभ्यषिंचच्छतपत्रनेत्रोनृपासनाशांपरिहृत्यदूरात् ॥२९ ॥

चूर्णिका तत्रसुहृद्विनाशंश्रुत्वाशोचन्सरस्वतीमभिमुखंययौ ॥ २१ ॥ ततःक्रमेणतीर्थानि ॥ २२ ॥ भ्रमन् ॥ २३ ॥ यमुनामेत्यउद्धवंदृष्ट्वा ॥ २४ ॥ स्वानांकुशलमपृच्छत् ॥२५॥ ॥ ४ ॥
हेउद्धवरामकृष्णौकुशलौकिम् वसुदेवप्रद्युम्नोग्रसेनसांबसात्यक्यक्रूरदेवक्यनिरुद्धहृदीकाद्याःपृथासहिताःपांडवाश्चस्वस्तिकिम् ॥ २६ ॥ २७ ॥ २८ ॥ ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥ ३ ॥ इत्यूचिवानेवमुक्तवान् असौक्षत्ताविदुरः सतांस्पृहणीयं (अभिलषणीयं) शीलंयस्यसकर्णदुःशासनशकुनिसहितेनदुर्योधनेनासत्कृतस्तिरस्कृतः ॥ १४ ॥ तिरस्कारमाह कइति दासीसुतोऽत्राह्वानानर्हः जिह्मश्चकुटिलः (तमेनमुपजुहाव आहूतवान्) जिह्मतामाह यस्यबलिनाऽन्नेनपुष्टस्तस्मिन्नेवप्रतीपःप्रतिकूलःपरेषांकार्येवर्तते अतःपुरान्निर्वास्यतां (निष्कास्यताम्) श्वसानःश्वसन् जीवमात्रशेषइत्यर्थः पाठांतरेश्मशानवदमंगलः ॥ १५ ॥ अत्युल्वणैःकर्णयोर्बाणवत्प्रविशद्भिःपरुषवाक्यैर्मर्मसुताडितोऽपिगतव्यथः तत्रहेतुः मायामुरुबहुमानयन्नहोमायायामाहात्म्यमितितामेवतत्रहेतुंमन्यमानस्तन्निःसारणा त्पूर्वंस्वयमेवायान्निर्जगाम किंकृत्वा एतेनूनंमरिष्यंतिकिंधनुषेतितस्यद्वारिधनुर्निधाय यद्वा भीमादिभिःसंगत्यास्माभिर्योत्स्यतीतिमाशंकितव्यमितिधनुर्निधानम् ॥ १६ ॥ ततोनिर्गतस्यतीर्थाटनप्रकारमाह सइत्यष्टभिः सविदुरोगजाह्वयान्निर्गतःसन्तीर्थंपादौयस्यतस्यहरेःपदानिक्षेत्राणिपुण्यचिकीर्षयान्वाक्रमत्प्रत्यपद्यत कौरवाणांपुण्येनलब्धइतितेषांभाग्यमेवतेनरूपेणगतमितिसूचितम् उर्व्यांसहस्रमूर्तिर्ब्रह्मरु द्राद्यनेकमूर्तिःसंस्तीर्थपाद्यानियान्यधिष्ठायस्थितस्तानितानिजगामेत्यर्थः ॥ १७ ॥ पुण्यानियान्युपवनादीनितेषुकुंजलतादिगूढस्थानं अपंकानितोयानियेषांतेषुसरित्सरस्सुचतीर्थेष्वायतनेषुक्षेत्रेषुच कीदृशेषु अनंतस्यलिंगैर्मूर्तिभिःसम्यगलंकृतेषु अनन्यएकाकी ॥१८॥ किंच गांपर्यटन्व्रतानिचेरेआचरत् मेध्यापवित्राविविक्ताऽसंकीर्णावृत्तिर्जीविकायस्य सदाप्लुतःप्रतितीर्थंस्नातः अधःशयनंयस्य अवधूतोऽसंस्कृ तदेहः अवधूतवेषोवल्कलादिधारी अतएवस्वैरलक्षितः ॥ १९ ॥ (यद्वामेध्ये शुद्धे विविक्ते एकान्ते वृत्तिर्वर्तनं यस्य) (कर्मभूमित्वाद्भारतमेव वर्षं पुण्येच्छयाव्रजन् कालवशेनप्रभासं यदागतवान् तदापार्थोयुधिष्ठिरः) एकस्यैवचक्रंसैन्यंयस्याम् एकमेवराजचिह्नंश्वेतातपत्रंयस्यांताम् अजितेनश्रीकृष्णेनसहायेन (तदुक्तप्रकारेणेत्यर्थः) ॥ २० ॥

श्लोकाः १४/२०

इत्यूचिवांस्तत्रसुयोधनेनप्रवृद्धकोपस्फुरिताधरेण ॥ असत्कृतःसत्स्पृहणीयशीलःक्षत्तासकर्णानुजसौबलेन ॥ १४ ॥ कएनमत्रोपजुहावजिह्मंदास्याःसुतंय द्बलिनैवपुष्टः ॥ तस्मिन्प्रतीपःपरकृत्यआस्तेनिर्वास्यतामाशुपुराच्छ्वसानः ॥ १५ ॥ सइत्थमत्युल्बणकर्णबाणैर्भ्रातुःपुरोमर्मसुताडितोऽपि ॥ स्वयंधनु र्द्वारिनिधायमायांगतव्यथोऽयादुरुमानयानः ॥ १६ ॥ सनिर्गतःकौरवपुण्यलब्धोगजाह्वयात्तीर्थपदःपदानि ॥ अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यांस्वधिष्ठितो यानिसहस्रमूर्तिः ॥ १७ ॥ पुरेषुपुण्योपवनाद्रिकुंजेष्वपंकतोयेषुसरित्सरस्सु ॥ अनंतलिंगैःसमलंकृतेषुचचारतीर्थायतनेष्वनन्यः ॥ १८ ॥ गांपर्यटन्मे ध्यविविक्तवृत्तिःसदाप्लुतोऽधःशयनोवधूतः ॥ अलक्षितःस्वैरवधूतवेषोव्रतानिचेरेहरितोषणानि ॥ १९ ॥ इत्थंव्रजन्भारतमेववर्षंकालेनयावद्गतवान्प्रभा सम् ॥ तावच्छशासक्षितिमेकचक्रामेकातपत्रामजितेनपार्थः ॥ २० ॥

चूर्णिका इत्युक्तेसतिकर्णदुःशासनशकुनिदुर्योधनादिभिःकोपात्क्षत्तातिरस्कृतः ॥ १४ ॥ एनंदासीपुत्रमत्रकआजुहाव पुरादाशुनिर्वास्यताम् ॥ १५ ॥ इतिदुर्वचःश्रुत्वाक्षत्तासभाद्वा रिधनुर्निधायततोनिर्गत्य ॥ १६ ॥ पुण्येच्छयातीर्थायतनानिभ्रमन् इत्थंगांपर्यटन् ॥ १७ ॥ अधःशयानःअवधूतवेषः हरितोषणव्रतानिचेरे ॥ १८ ॥ १९ ॥ एवंभारतमेवव र्षंव्रजन्कालेनप्रभासंगतवान् तावद्धर्मः क्षितिंशशास ॥ २० ॥ ॥ ३ ॥

१ युधिष्ठिरस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

हेसौम्य हरेः सुतस्तेनसदृक्षःसदृशः साधुसुखमास्तेकच्चित् गुहंस्वामिकार्तिकेयं अग्रेपूर्वजन्मनियोभवान्यागर्भेधृतस्तं ॥ ३० ॥ युयुधानःसात्यकिः क्षेमंकुशलमास्ते फाल्गुनादर्जुनाल्लब्धंधनुषोरहस्यंयेन
तदीयामधोक्षजसंबंधिनीम् (भागवतीं वृत्तिमित्यर्थः) ॥ ३१ ॥ श्वफल्कपुत्रोऽक्रूरः बुधोविद्वान् अतोभगवंतंप्रपन्नोऽनुसृतः अतएवानमीवोनिष्पापः भक्तौलिंगंयः (कंसेनकृष्णानयनार्थंप्रेषितो) अचे
ष्टतव्यलुठत् प्रेम्णाविभिन्नांविदीर्णंधैर्यंयस्यसः स्वस्तिक्षेममास्ते ॥ ३२ ॥ देवकनामायोभोजस्तस्यपुत्र्यादेवक्याः (विष्णुप्रजायाः । विष्णुःप्रजापुत्रोयस्यास्तस्यादेवमातुरदितेरिवकच्चित्शिवम् (यावैस्व
गर्भेण) यज्ञवितानरूपमर्थं (अभिधेयं) त्रयी (ऋग्यजुःसामरूपा) यथाप्रकाशकतयाबिभर्तितथा (देवं) दधार ॥ ३३ ॥ (सात्वतां) सात्वतानामुपासकानांकामान्दोग्धिपूरयतीतिकामदुघः भग
वत्त्वेहेतुः यंशब्दस्यशास्त्रस्ययोनिंकारणमामनंतिवेदाः कुतः मनोमयंमनसःप्रवर्त्तकम् तत्कुतः सत्त्वस्यांतःकरणस्यचतुर्विधस्यतुरीयंतत्त्वंचतुर्थमाधिदैवम् चित्ताहंकारबुद्धिमनसामंतःकरणभेदानांक्रमेणवा
सुदेवसंकर्षणप्रद्युम्नानिरुद्धाह्याधिष्ठातारः मनसश्चशब्दयोनित्वंप्रसिद्धम्वेदे "मनःपूर्वरूपंवागुत्तररूपम्" इतितथा "अन्योऽतरआत्मामनोमय" इतिप्रस्तुत्य "तस्ययजुरेवशिरः ऋग्दक्षिणःपक्षःसामोत्तरःपक्ष"
इत्यादिश्रुतेः तथाचशिक्षायां "आत्माबुद्ध्यासमेत्यार्थान्मनोयुक्तेविवक्षया मनःकायाग्निमाहंतिसप्रेरयतिमारुतं मारुतस्तूरसिचरन्मंद्रंजनयतिस्वरं" इत्यादि ॥ ३४ ॥ अपिस्वित्किंस्वित् अन्येचस्वस्तिच
रंति (सुखंविहरंति) निजस्यदेहादिव्यतिरिक्तस्यात्मनोदैवश्रीकृष्णमनन्यवृत्त्याएकांतभक्तिभावेनयेसम्यगनुव्रताअनुसृताः हृदीकश्चसत्यभामायाआत्मजश्चचारुदेष्णश्चगदश्चादिर्येषांतेऽपि ॥ ३५ ॥ इदा
नींकुरून्पृच्छतिषड्भिः अपिकिम्स्वदोर्भ्यांस्वबाहुवद्वर्तमानाभ्यांविजयाच्युताभ्यामर्जुनकृष्णाभ्यां धर्ममार्गेण धर्मोयुधिष्ठिरः सेतुंधर्ममर्यादांपरिपाति यस्यसभायांविजयानुवृत्त्याजयपरंपरयार्जुनस्यसेवये
तिवाअतप्यत एवंभूतंयस्यैश्वर्यं (दृष्टाऽसूयातप्यतिस्मे-)त्यर्थः ॥ ३६ ॥ कृताघेषुकृतापराधेषु स्वकर्तृकमघंदीर्घतमंबहुकालानुचिंतितमहिवदमर्षीसर्पवदतिशायितक्रोधीभीमः किंव्यमुंचन्नोवा (आभृत्यो
रिहहिवैरानुबन्धः अतस्तमुत्सृष्टवान्किमुइत्यर्थः तस्यपराक्रममाह यस्येति) गदायाविचित्रंविविधंमार्गंचरतः ॥ ३७ ॥

॥ ५ ॥

श्लोकाः ३०/३७

कच्चिद्धरेःसौम्यसुतःसदृक्षआस्तेऽग्रणीरथिनांसाधुसांबः ॥ असूतयंजांबवतीव्रताढ्यादेवंगुहंयोंऽबिकयाधृतोऽग्रे ॥ ३० ॥ क्षेमंसकच्चिद्युयुधानआस्तेयःफा
ल्गुनाल्लब्धधनूरहस्यः ॥ लेभेंऽजसाधोऽक्षजसेवयैवगतिंतदीयांयतिभिर्दुरापाम् ॥ ३१ ॥ कच्चिद्बुधःस्वस्त्यनमीवआस्तेश्वफल्कपुत्रोभगवत्प्रपन्नः ॥ यःकृ
ष्णपादांकितमार्गपांसुष्वचेष्टतप्रेमविभिन्नधैर्यः ॥ ३२ ॥ कच्चिच्छिवंदेवकभोजपुत्र्याविष्णुप्रजायाइवदेवमातुः ॥ यावैस्वगर्भेणदधारदेवंत्रयीयथायज्ञविता
नमर्थम् ॥३३॥ अपिस्विदास्तेभगवान्सुखंवोयःसात्वतांकामदुघोऽनिरुद्धः ॥ यमामनंतिस्महशब्दयोनिंमनोमयंसत्त्वतुरीयतत्त्वम् ॥ ३४ ॥ अपिस्विद
न्येचनिजात्मदैवमनन्यवृत्त्यासमनुव्रताये ॥ हृदीकसत्यात्मजचारुदेष्णगदादयःस्वस्तिचरंतिसौम्य ॥ ३५ ॥ अपिस्वदोर्भ्यांविजयाच्युताभ्यांधर्मेणधर्मः
परिपातिसेतुम् ॥ दुर्योधनोऽतप्यतयत्सभायांसाम्राज्यलक्ष्म्याविजयानुवृत्त्या ॥ ३६ ॥ किंवाकृताघेष्वघमत्यमर्षीभीमोऽहिवद्दीर्घतमंव्यमुंचत् ॥ यस्यां
घ्रिपातंरणभूर्नसेहेमार्गंगदायाश्चरतोविचित्रम् ॥ ३७ ॥

॥ ५ ॥

चूर्णिका ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

रथयूथपानांमध्ये (यशोधत्तेधारयतीति) यशोधाः कीर्तिधारी यद्वा स्वीयानांतेषांकीर्तिप्रदः (गांडीवधन्वाऽर्जुनः उपरतारिः) उपरताअरयोयस्मात् यस्यशरकूटेनवाणसमूहेनगूढआच्छन्नः (माययाकिरातोगृहीतशवरवेषः) ॥ ३८ ॥ उतस्वित्किंस्वित् यमौनकुलसहदेवौरेमाते क्रीडितेइत्यर्थः माद्र्याःसुतावपिपृथायास्तनयौतयासुतवद्रक्षितत्वात्पक्ष्माभिवृत्तेअक्षिणीइव पार्थैर्वृतौ पृथायाः पुत्रैर्वृतौ (पृथापुत्रैरक्षिताविति्यर्थः) सुपर्णाविवरेमाते किंकृत्वा पराद्दुर्योधनात्स्वरिक्थंस्वीयंराज्यमुद्दायआच्छिद्य वज्रिवक्त्रादिंद्रस्यमुखात्स्वरिक्थममृतंगरुडइवेति यद्वा सुपर्णाविवेति यदिद्वौगरुडावमृत मानयेतांतर्हितद्वत् अक्षिणीवेतिमणीवादिगणत्वात्संधिः (इवार्थेवशब्दोवा) ॥ ३९ ॥ पृथायाःकिंनुकुशलंपृच्छेयम् यतस्तस्याःपांडुनाविनाप्राणधारणमेवाश्चर्यमित्याह अहोइति (पृथापितादृशपतिव्रता पि) ध्रियतेजीवति (धृङ्अवस्थानेधातुः) नचात्याश्चर्यम् यतोऽर्भकार्थेध्रियतेनभोगार्थं तथापित्वाश्चर्यमेवेत्याह तेनतथाभूतेनाविना तदेवाह यस्त्विति धनुरेवाद्वितीयंसहायोयस्य (सः ककुभोदिशः ॥४०॥ पृथार्भकार्थेजीवतीतियुक्तमेवेत्याह हेसौम्यतंधृतराष्ट्रंजीवंतमनुशोचामि तत्किं अधःपतंतं तत्रहेतुः परेतायमृतायभ्रात्रेपांडवेतत्पुत्रद्रोहेणयोविदुद्रुहेद्रोहंकृतवान् 'क्रुधद्रुहेतिचतुर्थी किंच जीवतोऽपिभ्रातुर्म मापकृतवानित्याह येनसुहृद्भ्राताहंस्वपुर्याःसकाशान्निर्यापितोविवासितः (ननुतत्पुत्रैर्निर्यापितस्तत्राह सपुत्रान्समनुव्रतेनानुवर्तमानेन) ॥४१॥ अहोखलुविस्मयः जानतोऽपितस्यैवंदुश्चेष्टितं यतस्त्वंसाधुर पिदुःखंप्रापितोऽसीत्यतआह सोऽहंहरेःप्रसादात्तस्यपदवींमहात्म्यंपश्यन्गतविस्मयोत्रभूतलेनान्योपलक्ष्योगूढःसन्सुखंविचरामि कथंभूतस्यहरेर्मर्त्यविडंबनेनैश्वर्याच्छादकेन (मायया)मानुष्यानुकरणेननृणां दृशश्चित्तवृत्तीश्चालयतोभ्रामयतः ॥ ४२॥ ननुहरेःकिमेवंलीलयायेनस्वभृत्यानांवनवासादिक्लेशाभवंतिस्वस्यचदौत्येबंधनोद्यमादिपराभवस्तद्वरंतेषामपराधानंसरमेवहननंनापराधेपेक्षेत्यतआह नूनंनिश्चितंत्रिभि र्मदैरुत्पथानामुद्धतानांवधाद्धेतोः प्रपन्नानामार्तिजिहीर्षयैशोऽद्यसमयएवहंतुंसमर्थोऽपिकुरूणामघमुपैक्षत तदानीमेवतेषांवधेसर्वदुष्टराजवधोनस्यादित्याशयेनेत्यर्थः (एवमनादिजीवादृष्टानुसारिणीहरेःप्रवृत्ति रितिनाकिंचिदस्यवैषम्यम्) "विद्यामदोधनमदस्तथैवाभिजनोमदः एतेमदामदांधानांतएवहिसतांदमा"इतित्रयोमदाः ॥ ४३ ॥ सर्वदुर्वृत्तवधार्थमेवभगवतोजन्मकर्मणीनान्यथेतिकैमुत्यन्यायेनाह अजस्या पिजन्म अकर्तुरपिकर्माणि पुंसांग्रहणायकर्मसुप्रवृत्तये अन्यथानचेदेवंतर्हिभगवतोजन्मादिकथातावदास्ताम् कोवाऽन्योऽपिगुणानांपरोगुणातीतोदेहयोगंकर्मविस्तारंवाऽर्हतीति ॥ ५४ ॥

॥ ६ ॥

श्लोकाः ३८/४४

कश्चिद्यशोधारथयूथपानांगांडीवधन्वोपरतारिरास्ते ॥ अलक्षितोयच्छरकूटगूढोमायाकिरातोगिरिशस्तुतोष ॥ ३८ ॥ यमावुतस्वित्तनयौपृथायाःपार्थै र्वृतौपक्ष्मभिराक्षिणीव ॥ रेमातउद्दायमृधेस्वरिक्थंपरात्सुपर्णाविववज्रिवक्त्रात् ॥ ३९ ॥ अहोपृथाऽपिध्रियतेऽर्भकार्थेराजर्षिवर्येणविनाऽपितेन॥यस्त्वेकवी रोऽधिरथोविजिग्येधनुर्द्वितियःककुभश्चतस्रः ॥ ४० ॥ सौम्यानुशोचेतमधःपतंतंभ्रात्रेपरेतायविदुद्रुहेयः ॥ निर्यापितोयेनसुहृत्स्वपुर्याअहंस्वपुत्रान्समनुव्र तेन ॥४१॥ सोऽहंहरेर्मर्त्यविडंबनेनदृशोनृणांचालयतोविधातुः ॥ नान्योपलक्ष्यःपदवींप्रसादाच्चरामिपश्यन्गतविस्मयोऽत्र ॥ ४२ ॥ नूनंनृपाणांत्रिमदो त्पथानांमहींमुहुश्चालयतांचमूभिः ॥ वधात्प्रपन्नार्तिजिहीर्षयेशोऽप्युपैक्षताघंभगवान्कुरूणाम् ॥ ४३ ॥ अजस्यजन्मोत्पथनाशनायकर्माण्यकर्तुर्ग्रहणाय पुंसाम् ॥ नन्वन्यथाकोऽर्हतिदेहयोगंपरोगुणानामुतकर्मतंत्रम् ॥ ४४ ॥

चूर्णिका

॥३८॥३९॥४०॥ हेसौम्यतंधृतराष्ट्रमनुशोचेयःमृतायपांडवेद्रुद्रुहेयेनअहंपुर्याःनिर्यापितः ॥ ४१ ॥ सोहंहरेःप्रसादात्तन्माहात्म्यंपश्यन्भूतलेगूढःसन्चरामि ॥ ४२ ॥ नूनमुन्मत्तरा ज्ञांवधायभूमेःभारहरणार्थंचकुरूणामपराधान्सेहे ॥४३॥ किंचशरणागतदेवादीनांपृथिव्याश्चपालनायदुष्टनिग्रहार्थंयदुपुजातस्यतीर्थकीर्तेःभगवतःअजस्यवार्ताहिउद्धवकीर्तय ४४ ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तस्मादेवंभूताचिंत्यमायाविनोदस्यकथांकथय (सैवास्माकंमहत्तीर्थं)इत्याह तस्यप्रपन्नायेऽखिललोकपालास्तेषामन्येषांचस्वीयेऽनुशासनेस्थितानामर्थायप्रयोजनाययदुषुजातस्य तीर्थंसंसारतारिणीर्कीर्तिर्य
स्येति ॥ ४५ ॥ ॥ इतितृतीयेटीकायांप्रथमोऽध्यायः १ ॥ ॥ ७ ॥ ॥ द्वितीयेकृष्णविश्लेषादनुशोचन्नथोद्धवः ॥ क्षत्रेबालचरित्राणिकृष्णस्यावर्णयच्छ्वसन् ॥ १ ॥ तदेवंभियवार्तांपृष्टस्योद्धवस्य
श्रीकृष्णविरहौत्कंठ्यावेशेनप्रतिवचनासामर्थ्यमाह षड्भिः इतीति (प्रियआश्रयोविषयोयस्यास्ताम्) स्मारितईश्वरोयस्य (सःऔत्कंठ्यंचित्तप्रद्रवेहेतुभूतमौत्सुक्यंतस्मान्नोत्सेहेनक्षमइत्यर्थः) ॥ १ ॥
एतदेवकैमुत्यन्यायेनप्रपंचयति यइतिद्वाभ्याम् यः (उद्धवः) पंचवर्षोऽपिबाललीलयेतिकृष्णंकंचित्परिकल्प्यकल्पितैरेवसाधनैःपरिचर्यांकुर्वन्प्रातर्भोजनार्थंप्रार्थितोऽपितद्भोजनंनैच्छत् ॥ २ ॥ (तस्यहरेःसे
वयैवकालवशात्) जरसंवृद्धत्वंगतःप्राप्तः (पादावनुस्मरन्पादयोरनुस्मरणेनरुद्धकण्ठः सन्नित्यर्थः) ॥ ३ ॥ श्रीकृष्णांघ्रिसुधयासाधुनिर्वृतः (सम्यगानन्दं प्राप्तः) तस्यामेवतीव्रेणविवशत्वापादकेनभ
॥ ७ ॥ क्तियोगेनभृशंनिमग्नश्च ॥ ४ ॥ पुलकैरुद्भिन्नान्युज्जृंभितानिसर्वाण्यंगानियस्य मीलंत्याहशाशुचोऽश्रूणिमुंचंस्तदातेनविदुरेणपूर्णार्थःकृतार्थोलक्षितः यतोभगवतियःस्नेहस्तस्यप्रसरःपूरस्तस्मिन्संप्लुतोनिमग्नः
॥ ५ ॥ भगवानेवलोकस्तस्मान्नृलोकंदेहानुसंधानं (प्रत्यागतः)उत्स्मयन् यदुकुलसंहारादिभगवच्चातुर्यस्मरणेनविस्मयंप्राप्नुवन् ॥ ६ ॥ श्रीकृष्णविरहेणसंतप्यमानःप्रत्याह श्रीकृष्णएवद्युमणिःसूर्यस्तस्य
निम्लोचेऽस्तमयेसत्यजगरेणकालमहासर्पेणगीर्णेषुनिगिलितेषुनोग्रहेषुत्वत्पृष्टानांतत्रत्यानांबंधूनांकिंनुकुशलंब्रूयाम् ॥ ७ ॥

तस्यप्रपन्नाखिललोकपानामवस्थितानामनुशासनेस्वे ॥ अर्थाययजातस्ययदुष्वजस्यवार्त्तांसखेकीर्तयतीर्थकीर्तेः ॥ ४५ ॥ ॥ इतिश्रीमद्भागवतेतृ०वि श्लोकाः
दुरोद्धवसंवादेप्रथमोऽध्यायः ॥ १ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिभागवतःपृष्टःक्षत्त्रावार्त्तांप्रियाश्रयाम् ॥ प्रतिवक्तुंनचोत्सेहऔत्कंठ्या
त्स्मारितेश्वरः ॥ १ ॥ यःपंचहायनोमात्राप्रातराशाययाचितः ॥ तन्नैच्छद्रचयन्यस्यसपर्यांबाललीलया ॥ २ ॥ सकथंसेवयातस्यकालेनजरसंगतः ॥ ४५/७
पृष्टोवार्त्तांप्रतिब्रूयाद्भर्तुःपादावनुस्मरन् ॥ ३ ॥ समुहूर्त्तमभूत्तूष्णींकृष्णांघ्रिसुधयाभृशम् ॥ तीव्रेणभक्तियोगेननिमग्नःसाधुनिर्वृतः ॥ ४ ॥ पुलकोद्भिन्न
सर्वांगोमुंचन्मीलद्दृशाशुचः ॥ पूर्णार्थोलक्षितस्तेनस्नेहप्रसरसंप्लुतः ॥ ५ ॥ शनकैर्भगवल्लोकान्नृलोकंपुनरागतः ॥ विमृज्यनेत्रेविदुरंप्रत्याहोद्धवउत्स्मय
॥ ६ ॥ ॥ उद्धवउवाच ॥ ॥ कृष्णद्युमणिनिम्लोचेगीर्णेष्वजगरेणह ॥ किंपुनःकुशलंब्रूयांगतश्रीषुगृहेष्वहम् ॥ ७ ॥

चूर्णिका ॥ ४५ ॥ इतितृतीयेप्रथमः ॥ १ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्थंविदुरेणपृष्टःउद्धवः प्रियाश्रयांवार्तांप्रतिवक्तुंनचोत्सेहे ॥ १ ॥ कुतोयःपंचहायनःमात्रा
प्रातर्भोजनायआहूतःसन् बाललीलयातस्यसपर्यांरचयन् भोजनमपिनैच्छत् ॥ २ ॥ सतस्यसेवयावृद्धःसन्प्रभोःपादौस्मरन् श्रीकृष्णवार्ताकथंब्रूयात् ॥ ३ ॥ सःमुहूर्तंतूष्णीमभ ॥ ७ ॥
वत् ॥ ४ ॥ तेनभक्तियोगेनपूर्णार्थोलक्षितः ॥ ५ ॥ ततःशनैःभगवल्लोकात्देहानुसंधानमागतःसन् नेत्रेविमृज्यविदुरमाह ॥ ६ ॥ ॥ उद्धवउवाच ॥ ॥ कृष्णद्युमणौ
अस्तमितेसतिकालमहासर्पेणगिलितेषुनोगृहेषुबंधूनांकुशलंकिंनुब्रूयाम् ॥ ७ ॥

भा. तृ. अनुशोचन्नाह दुर्भगोभाग्यहीनः (तत्रयदवस्तुनितरांदैवहीनाः) येसहसंवसंतोऽपिश्रीहरिरयमितिनविदुःयथाक्षीरसमुद्रेजातमुडुपंचंद्रंतदातत्रत्यामीनाःकेवलंकमनीयःकश्चिज्जलचरइत्येवंविदुर्नत्वमृतमयइति तद्वत् यद्वा जलेप्रतिबिंबितंचंद्रंयथेति ॥ ८ ॥ भाग्यहीनत्वादेवनविदुर्नतुज्ञानसामग्र्यभावादित्याह इंगितंचित्तस्थंजानंतीतितथा पुरुअतिशयेनप्रौढानिपुणाःएकस्मिन्नेवस्थानेआरमंतीतितथा (एकाग्रचित्ताइत्यर्थः) एवंभूताअपिभूतानामावासमीश्वरंसंतंसात्वंतामृषभंसात्वतश्रेष्ठममन्यत ॥९॥ येकेपिभाग्यवंतस्तमिंगितादिनेश्वरतयाजानंतोप्यतद्विदांप्रवृत्त्यावामुह्येयुरिति किंभाग्यवत्तयापितत्राह देवस्येति येयादवादेवस्यमाययास्पृष्टाव्याप्तायादवोऽयमस्मद्बंधुरितिवदंतियेचशिशुपालादयोऽसदेवान्यद्वैरमाश्रितानिंदंतितेषांवाक्यैरात्मनिहरौउप्तात्मनोनिक्षिप्तचित्तस्यमादृशस्यबुद्धिर्नभ्राम्यतेमोहंनप्राप्यते अन्येतु (सहवासिनो) मूढाएवेत्यर्थः ॥१०॥ कोऽसौहरिरित्यपेक्षायामाह प्रदर्श्येति नतप्तंतपोयैरतोऽवितृप्तादृशोयेषांतेषांस्वबिंबंश्रीमूर्तिमेतावंतंकालंदर्शयित्वायोंऽतर्हितवात् लोकस्यलोचनमादयाच्छिद्यतादृशस्यान्यस्यविलोकनीयस्याभावात् ॥ ११ ॥ तदेवबिंबंवर्णयतित्रिभिःयन्मर्त्यलीलास्वौपयिकंयोग्यम् स्वस्यापिविस्मयजनकम् यतः सौभगर्द्धेःसौभाग्यातिशयस्यपरमंपदंपराकाष्ठा (यतःस्वयोगमायायाःबलंसामर्थ्यंदर्शयताहरिणा गृहीतं) भूषणानांभूषणान्यंगानियस्मिन् ॥ १२ ॥ (पुनरपिकीदृशंबिंबंधर्मसूनोर्युधिष्ठिरस्यराजसूयेपश्यतोजनस्यच) दृशांस्वस्त्ययनंपरमानंदकरम् त्रिभुवनस्थोलोकः प्राणिमात्रम् अद्येदानीमिहबिंबेऽर्वाक्सृतावर्वाचीनसंसारानिर्माणेमनुष्यनिर्माणेवायत्कौशलंनैपुण्यंतत्कार्त्स्न्येनगतमुपक्षीणंनातः परंतस्यकौशलमस्तीत्येवंमेने तन्मूर्तेर्विधातुःसृज्यत्वाभावेऽपिलोकदृष्टिरियमुक्ता ॥ १३ ॥ (यस्यबिंबस्य) अनुरागेणप्लुतोव्याप्तोहासोरासोविनोदश्चलीलाऽवलोकश्चतैः स्वकृतहासाद्यनंतरंप्रतिलब्धोमानोयाभिस्ताः दृग्भिःसहानुप्रवृत्तागच्छंतंतमेवानुगताधियोयासांताः कृत्येशेषोयासांताः असमापितकृत्याएवतस्थुः (अन्तःकरणस्यतमनुगतत्वाद्विस्मृतकृत्याआसन्नित्यर्थः) ॥ १४ ॥ एवंभूतबिंबप्रदर्शनेकारणमाह (स्वेति) स्वीयान्येवशांतान्यशांतानिचरूपाणि तत्रशांतरूपेष्वितरैरशांतैर्दैत्यादिभिः पीड्यमानेष्वनुकंपितः कृतानुकंपआत्मायस्य अजोपिजातआविर्भूतः महाभूतरूपेणनित्यसिद्धएवाग्निर्यथाकाष्ठेष्वाविर्भवतितद्वत् अजस्यजन्मनिहेतुः महान्महत्तत्त्वमंशः कार्यलेशोयस्याव्यक्तस्यतन्महदंशंतद्युक्तइति ॥ १५ ॥ अ०

टीका ॥ २ ॥

॥ ८ ॥

दुर्भगोबतलोकोऽयंयदवोनितरामपि ॥ येसंवसंतोनविदुर्हरिंमीनाइवोडुपम् ॥ ८ ॥ इंगितज्ञाःपुरुप्रौढाएकारामाश्चसात्वताः ॥ सात्वतामृषभंसर्वेभूतावासममंसत ॥ ९ ॥ देवस्यमाययास्पृष्टायेचान्यदसदाश्रिताः ॥ भ्राम्यतेधीर्नतद्वाक्यैरात्मन्युप्तात्मनोहरौ ॥ १० ॥ प्रदर्श्यातप्ततपसामवितृप्तदृशांनृणाम् ॥ आदायांतरधाद्यस्तुस्वबिंबंलोकलोचनम् ॥ ११ ॥ यन्मर्त्यलीलौपयिकंस्वयोगमायाबलंदर्शयतागृहीतम् ॥ विस्मापनंस्वस्यचसौभगर्द्धेःपरंपदंभूषणभूषणांगम् ॥१२ ॥ यद्धर्मसूनोर्बतराजसूयेनिरीक्ष्यदृक्स्वस्त्ययनंत्रिलोकः ॥ कार्त्स्न्येनचाद्येहगतंविधातुरर्वाक्सृतौकौशलमित्यमन्यत ॥ १३ ॥ यस्यानुरागप्लुतहासरासलीलावलोकप्रतिलब्धमानाः ॥ व्रजस्त्रियोदृग्भिरनुप्रवृत्तधियोऽवतस्थुःकिलकृत्यशेषाः ॥ १४ ॥ स्वशांतरूपेष्वितरैःस्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा ॥ परावरेशोमहदंशयुक्तोह्यजोऽपिजातोभगवान्यथाऽग्निः ॥ १५ ॥ श्लोकाः ८/१५

॥ ८ ॥

चूर्णिका अयंलोकोदुर्भगः यादवास्तुनितरांदुर्भगाः येसंवसंतःमीनाः उडुपमिवहरिंनविदुः ॥ ८ ॥ इंगितज्ञाअपियादवाः अस्मासुश्रेष्ठइतिअमन्यंत ॥ ९ ॥ १० ॥ योनॄणांस्वबिंबंदर्शयित्वाअंतरधात् ॥ ११ ॥ १२ ॥ धर्मसूनोःराजसूयेत्रिलोकःयंनिरीक्ष्यविधातुःकौशलंइहकार्त्स्न्येनउपक्षीणंइतिअमन्यत ॥ १३ ॥ १४ ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुकुतोऽसौपरावराणामीशः पारतंत्र्यप्रतीतेस्तत्राहद्वाभ्याम् मामप्येतद्दुर्वितर्क्यंदुर्घटंचखेदयति तदेवाह वसुदेवगेहेबंधनागारेयज्जन्मनोविडंबनमनुकरणं नतुनृसिंहवदकस्मादाविर्भावः कंसभयादेवानि
लीयव्रजेवासश्च कालयवनादिरिपुभयादिवपुरान्मथुरायाव्यवात्सीदपलायत् (अनन्तं वीर्यपराक्रमोयस्यसोपि) ॥१६॥ एतच्चहरेश्चरितंस्मरतोममचेतःकर्मभूतंदुनोतिव्यथयति तदेवदर्शयति यदाहोति हेतात हे
अंब युवांप्रसीदतंप्रसादंकुरुतं नकृतानिष्कृतिः शुश्रूषणंयैस्तेषांनोऽस्माकमिति बहुवचनंतुरामाद्यभिमायम् (कंसात्उरुअत्यर्थं शंकितानांभीतानां इतिनिष्कृत्यकरणेहेतुः)॥१७ ॥ ननु तर्ह्यनीश्वरएवकिं
नस्यात्तवतुश्रद्धामात्रमेतत्तत्राहात्रिभिः कोवाअंघ्रिसरोजेयोरेणुस्तमपिविजिघ्रन्सेवमानःपुमान्विस्मर्तुमीशीतशक्नुयात् (नकोपितमनीश्वरं मत्वाविस्मरेत् तदुपकारं जानन्नित्यर्थः तत्रहेतुः) विस्फु
रन्भ्रूविटपोभ्रूलतासएवकृतांतः (कालः) तेन (भुवोभारमपनीतवान्) ॥ १८ ॥ नचतस्येश्वरत्वंसाधनीयं (राजसूये) भवद्भिरपिदृष्टत्वादित्याह दृष्टेति (द्विषतोपिसिद्धिर्भगवतिसायु
ज्यं) यांसिद्धिंसम्यग्योगेनप्राप्तुमिच्छंति ॥ १९ ॥ आहवेयुद्धेपार्थस्यास्त्रैःपूतानिष्पापाःसंतः (अन्येपिकर्णादयोनयनाभिरामंनेत्रोत्सवजनकं कृष्णमुखकमलं सादरं पश्यन्तोस्य कृष्णस्य पदं चैद्यवदे
॥ ९ ॥ वापुरिति) ॥ २० ॥ तदेवंपरमैश्वर्येसत्यपियदुग्रसेनानुवर्त्तित्वंतत्पुनरस्मानत्यंतंव्यथयतीत्याह स्वयंतुयएवंभूतस्तस्यतत्कैंकर्यंनोऽस्मान्विग्लापयतीत्युत्तरेणान्वयः नसाम्यातिशयौयस्य यमपेक्ष्यान्यस्य
साम्यमतिशयश्चनास्तीत्यर्थः(यत्समःकोपिनास्तिकुतोयदधिकइतिभावः) तत्रहेतवः त्र्यधीशस्त्रयाणांपुरुषाणांलोकानांगुणानांवाईशः स्वाराज्यलक्ष्म्यापरमानंदस्वरूपसंपत्त्यैवप्राप्तसमस्तभोगःबलिंकरम
ईणंवाहरद्भिःसमपर्यद्भिश्चिरकालीनैर्लोकपालैःकिरीटाग्रेणईडितंस्तुतंपादपीठंयस्य प्रणमतांकिरीटसंघट्टध्वनिरेवस्तुतित्वेनोत्प्रेक्ष्यते ॥ २१ ॥ अंगविदुर भृतान्भृत्यान् उग्रसेनेयत्किंकरत्वंतदेवाह परमेष्ठिधि
ष्ण्येराज्यासनेनिषण्णमासीनंस्वयंतिष्ठन्हेदेवनिधारयविधारयेतिन्यबोधयद्विज्ञापितवान् ॥ २२ ॥ एवंभगवतोनुवृत्तिःकृपयैवेतिसूचयन्नपकारिष्वपितस्यकृपालुतांदर्शयन्नाह अहोआश्चर्यंकृपालुतायाः हंतुमि
च्छयाऽपिस्तनयोःसंभृतंकालकूटंविषंयमपाययत् बकीपूतनाऽसाध्वीदुष्टाऽपिधात्र्यायशोदायाउचितांगतिंलेभे भक्तवेषमात्रेणयःसद्गतिंदत्तवानित्यर्थः ततोऽन्यंकंवाभजेम ॥ २३ ॥

मांखेदयत्येतदजस्यजन्मविडंबनंयद्वसुदेवगेहे ॥ व्रजेचवासोऽरिभयादिवस्वयंपुराद्व्यवात्सीद्यदनंतवीर्यः ॥ १६ ॥ दुनोतिचेतःस्मरतोममैतद्यदाहपादाव श्लोकाः
भिवंद्यपित्रोः ॥ तातांबकंसादुरुशंकितानांप्रसीदतन्नोऽकृतनिष्कृतीनाम् ॥ १७ ॥ कोवाअमुष्यांघ्रिसरोजरेणुंविस्मर्त्तुमीशीतपुमान्विजिघ्रन् ॥ योविस्फुर
द्भ्रूविटपेनभूमेर्भारंकृतांतेनतिरश्चकार ॥ १८ ॥ दृष्टाभवद्भिर्ननुराजसूयेचैद्यस्यकृष्णंद्विषतोऽपिसिद्धिः ॥ यांयोगिनःसंस्पृहयंतिसम्यग्योगेनकस्तद्विरहंस १६/२३
हेत ॥ १९ ॥ तथैवचान्येनरलोकवीरायआहवेकृष्णमुखारविंदम् ॥ नेत्रैःपिबंतोनयनाभिरामंपार्थास्त्रपूताःपदमापुरस्य ॥ २० ॥ स्वयंत्वसाम्यातिशय
स्त्र्यधीशःस्वाराज्यलक्ष्म्याप्तसमस्तकामः ॥ बलिंहरद्भिश्चिरलोकपालैःकिरीटकोट्येडितपादपीठः ॥ २१ ॥ तत्तस्यकैंकर्यमलंभृतान्नोविग्लापयत्यंगयदुग्र
सेनम् ॥ तिष्ठन्निषण्णंपरमेष्ठिधिष्ण्येन्यबोधयद्देवनिधारयेति ॥ २२ ॥ अहोबकीयंस्तनकालकूटंजिघांसयाऽपाययदप्यसाध्वी ॥ लेभेगतिंधात्र्युचितांततो
ऽन्यंकंवादयालुंशरणंव्रजेम ॥ २३ ॥ ॥ ९ ॥

चूर्णिका

यत् वसुदेवगेहेअजस्यजन्म अनंतवीर्योपिअरिभयात्अपलायत ॥ १६ ॥ व्रजेवासंचकृतवान् एतत्मांखेदयति ॥१७॥ अमुष्यअंघ्रिसरोजरेणुंविस्मर्तुंकःसमर्थोभवेत् ॥१८॥
॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ अहोइयंपूतनायंजिघांसयास्तनकालकूटमपाययत्साधात्र्युचितांगतिंलेभेततःकंवादयालुंअन्यंशरणंव्रजेम ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुभागवतानेवभगवाननुगृह्णातीतिप्रसिद्धम् सत्यम् असुरानप्यहंभागवतानेवमन्ये यतोभागवताइवतेऽपिभगवद्ध्यानाभिनिवेशेनभगवंतमपरोक्षंपश्यंतीत्याह संरंभःक्रोधावेशस्तेनमार्गेणाभिनिविष्टंचित्तंयेषां तान् अतएवयेसंग्रामेताक्ष्यःकश्यपस्तस्यपुत्रंगरुडमंसेस्कंधेसुनाभायुधश्चक्रायुधोहरिर्यस्यतम् सप्तम्या अलुक् आगच्छंतमचक्षतापश्यन् तस्मात्तेष्वप्यनुग्रहोयुक्तएवेत्यर्थः वक्ष्यतिच " तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेत् " इति ॥ २४ ॥ इदानींतस्यांतर्धानप्रकारंवक्तुमादितआरभ्यतच्चरितंसंक्षेपतःकथयतिवसुदेवस्यभार्यायांजातोभोजेंद्रःकंसस्तस्यबंधनागारे अस्याःपृथिव्याःशंसुखंस्वयंचिकीर्षुः अजेनब्रह्मणाचयाचितःसन् ॥ २५ ॥ (कंसाद्बिभ्यता) पित्राहेतुभूतेननंदव्रजमितोगतः समाःसंवत्सरान् गूढार्चिर्गुप्ततेजाः ॥ २६ ॥ (वत्सपैः परिवृतोवत्सांस्तृणंचारयन्) व्याहरदाक्रीडत् कूजद्भिर्द्विजैःपक्षिभिःसंकुलिताव्याप्ताअंघ्रिपायास्मिन् ॥ २७ ॥ रुदन्निवेतीवशब्दस्ययथायोगंसर्वत्राप्यन्वयः मुग्धोबालश्चयःसिंहस्तद्वदवलोकनंयस्यसः ॥ २८ ॥ सएवाधिकंवयः प्राप्तःसन्गोधनंचारयन् कथंभूतं गोधनं लक्ष्म्याः शोभादिसंपदोनिकेतनंस्थानं सिताःशुभ्रागावोवृषायस्मिन्नानावर्णेगोसंघे (तात्सितंगोवृषंगोधनंतृणानिचारयन्) रणन्शब्दंकुर्वन्वेणुर्यस्यसगोपान्अरीरमद्रमयामास ॥ २९ ॥ (प्रयुक्तान्प्रहितान्मायाविनोनिजेच्छयारूपान्तरधारिणः तांस्तानागतान्) व्यनुदज्जघान क्रीडनकान्क्रीडासाधनभूतांस्तृणादिनिर्मितान्सिंहादीन्यथा ॥ ३० ॥ विपन्नान्मृतान्गोपान् गावइतिगाश्चोत्थाप्य (भुजगाधिपंकालियंनिगृह्य) तदेवतोयं प्रकृतिस्थितंनिर्विषम् (पुनर्गाअपाययत्) ॥ ३१ ॥ इंद्रपूजाभंगेनकृतागवांपूजैवगोसवस्तेन गोपराजनंदं(द्विजश्रेष्ठैरयाजयदुरुभारस्यातिसमृद्धस्य) वित्तस्यचेतिचकारादिंद्रस्यमानभंगंकर्तुमिच्छन् संश्चासौव्ययश्चतंप्रशस्तंत्यागंसत्सुव्ययमितिवा ॥ ३२ ॥

॥१०॥

श्लोकाः २४—३२

मन्येऽसुरान्भागवतांस्त्र्यधीशेसंरंभमार्गाभिनिविष्टचित्तान् ॥ येसंयुगेऽचक्षतताक्ष्यपुत्रमंसेसुनाभायुधमापतंतम् ॥२४॥ वसुदेवस्यदेवक्यांजातोभोजेंद्रबंधने ॥ चिकीर्षुर्भगवानस्याःशमजेनाभियाचितः ॥ २५ ॥ ततोनंदव्रजमितःपित्राकंसाद्बिबिभ्यता ॥ एकादशसमास्तत्रगूढार्चिःसबलोऽवसत् ॥ २६ ॥ परीतोवत्सपैर्वत्सांश्चारयन्व्याहरद्विभुः ॥ यमुनोपवनेकूजद्द्विजसंकुलितांघ्रिपे ॥ २७ ॥ कौमारींदर्शयंश्चेष्टांप्रेक्षणीयांव्रजौकसाम् ॥ रुदन्निवहसन्मुग्धबालसिंहावलोकनः ॥ २८ ॥ सएवगोधनंलक्ष्म्यानिकेतंसितगोवृषम् ॥ चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् ॥ २९ ॥ प्रयुक्तान्भोजराजेनमायिनःकामरूपिणः ॥ लीलयाव्यनुदत्तांस्तान्बालःक्रीडनकानिव ॥ ३० ॥ विपन्नान्विषपानेननिगृह्यभुजगाधिपम् ॥ उत्थाप्यापाययद्गावस्तत्तोयंप्रकृतिस्थितम् ॥ ३१ ॥ अयाजयद्गोसवेनगोपराजंद्विजोत्तमैः ॥ वित्तस्यचोरुभारस्यचिकीर्षन्सद्व्ययंविभुः ॥ ३२ ॥

चूर्णिका

अहमसुरान्भागवतान्मन्येयेयुद्धेगरुडारूढंसुनाभायुधंअवलोकयंतःदेहंजहुः ॥ २४ ॥ योब्रह्मणार्थितःसन्भूमेर्भारहरणायवसुदेवस्यदेवक्यांजातः ॥ २५ ॥ ततःकंसाद्बिभ्यतापित्रानंदव्रजंनीतःतत्रसबलःएकादशसमाःअवसत् ॥ २६ ॥ किंचकौमारींचेष्टांदर्शयामासगाःपालयामास ॥ २७ ॥ २८ ॥ २९ ॥ किंचकंसेनप्रेषितान्दैत्यान्लीलयाव्यनुदत् ॥ ३० ॥ कालियंनिगृह्यविषोदप्राशनेनमृतान्गोगोपान्जीवयामास ॥ ३१ ॥ गोवर्धनोत्सवंकारयामास ॥ ३२ ॥

१ कैशोरीं दर्शयन्निति वा पाठः । तदा कैशोरीं किशोरवयःसम्बन्धिनीचेष्टामित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(भग्नोमानः पूजायस्यतस्मिन्नतएव) कोपाद्वर्षति (वर्षमारुतादतिविह्वलोव्रजःव्रजमिंद्रंवानुगृह्णताहरिणा) गोत्रःपर्वतएवलीलातपत्रंलघुच्छत्रं तेन त्रातः हेभद्र ॥ ३३ ॥ (शरदृतावुदितस्यशशिनः
करैः) मृष्टमुज्ज्वलं (प्रदोषसमयं बहुमानयन्कलपदं यथास्यात्तथागायन्) स्त्रीणांमंडलंमंडयतिभूषयतीतितथा (रासरंगेरेमे) ॥ ३४ ॥ इतितृतीयेटीकायांद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥
तृतीयेमथुरामेत्यव्रजात्कंसवधादिकम् ॥ यत्कृतंद्वारकायांचकृष्णेनतदवर्णयत् ॥ शमित्यव्ययं पित्रोःसुखस्यचिकीर्षयेत्यर्थः (ततोव्रजात्परंमथुरांसहारिः) तुंगाद्राजमंचात् रिपुयूथानांनाथंकंसं निपात्य
हतंव्यसुंगतप्राणमप्युर्व्यांव्यकर्षत् व्यसोरपिविकर्षणंपित्रोःसुखार्थम् १ (सांदीपनेःगुरोःसकाशात्) ब्रह्मवेदंसविस्तरंषडंगादिसहितम् तस्मैगुरवे पंचजनोदरविदारणद्वारापुत्रमानीयगुरुदक्षिणारूपंसमर्प
यामासेत्यर्थः २ भीष्मककन्ययारुक्मिण्यायेराजानःसमाहूताः ह्रस्वत्वमार्षम् समाहृताइतिपाठेआकृष्टाइत्यर्थः केनसाधनेन श्रियोलक्ष्म्याःसवर्णेनसमानेनरूपेण समानोवर्णःसवर्णस्तेनयद्यपितयाकेवलंश्रीकृ
॥११॥ ष्णएवाहूतोनसर्वेतथापितस्यालावण्यंतेषामागमनेहेतुरितितयैवाहूताइत्युच्यते एषांमिषतांपश्यतांमूर्ध्निपदंदधत् तयासहगांधर्ववृत्त्यापरस्परसमयरूपयाबुभूषयाभावितुमिच्छयाजहार कथंभूतां स्वभागंलक्ष्म्यं
शत्वात्तयास्वात्मनोऽर्पितत्वाच्च सुपर्णःसुपतनः यद्वा सुपर्णइवस्वभागंसुधामित्यर्थः यद्वा श्रियोरुक्मिण्याःसमानंवर्णद्वयंवाचकंयस्यसः श्रियःसवर्णोरुक्मी तेनसमाहूताःशिशुपालादयः किमर्थं भीष्मकक
न्ययासहतेषांबुभूषयाभूतिर्भवत्वित्येतदर्थम् तत्रशिशुपालस्याह्वानंवरत्वेनबुभूषयाजरासंधादीनांतद्विवाहोत्सवेन शेषंपूर्ववत् ३ ककुद्मतोवृषभानविद्धनासिकान्विद्धनासिकान्कृत्वेतिवा तैर्वृषभैरुच्चैःखलैस्तद्द
मनेनचभग्नोमानोयेषां तथापितान्गृध्यतःकामयमानानतएवाज्ञान् शस्त्रभृतोराज्ञस्तच्छस्त्रैरक्षतएवजघान (स्वशस्त्रैः) ४ यदादित्याःकुंडलेदातुंस्वर्गंगतस्तदाप्रभुः स्वतंत्रोऽपिग्राम्यःस्त्रीपरतंत्रइवप्रियायाः
सत्यभामायाःप्रियंविधातुमिच्छुर्द्युतरुंपारिजातमाच्छेत् आनीतवान् यदर्थेयन्निमित्तंतंकृष्णंवज्रीवज्रहस्तःशक्रः स्त्रीप्रेरितोयोद्धुमन्वधावत् स्वकार्यसाधकेनतेनयुद्धोद्यमस्तस्यायुक्तएवेत्याह क्रीडामृगइति
अयंवज्री वधूनां शच्यादीनाम् ५ सुनाभेन (वपुषा आकाशंग्रसंतं पिबंतं शरीरेण महांतमित्यर्थःमृधेसंग्रामेभगवता) चक्रेणोन्मथितंहसंसुतंभौमं (नरकं) दृष्ट्वातस्यमात्राधरित्र्याभूम्या आमंत्रितःप्रार्थितः
संस्तस्यतनयायभगदत्तायहृतशेषंराज्यंदत्त्वा ६

श्लोकाः ३३/६

वर्षतींद्रेव्रजःकोपाद्भग्नमानेऽतिविह्वलः ॥ गोत्रलीलातपत्रेणत्रातोभद्रानुगृह्णता ३३ शरच्छशिकरैर्मृष्टंमानयन्रजनीमुखम् ॥ गायन्कलपदंरेमेस्त्रीणांमंडल
मंडनः ३४ ॥ इतिश्रीभा० तृतीय० द्वितीयोध्यायः २ ॥ ७ ॥ ॥ उद्धवउवाच ॥ ॥ ततःसआगत्यपुरंस्वपित्रोश्चिकीर्षयाशंबलदेवसंयुतः ॥
निपात्यतुंगाद्रिपुयूथनाथंहतंव्यकर्षद्व्यसुमोजसोर्व्याम् १ सांदीपनेःसकृत्प्रोक्तंब्रह्माधीत्यसविस्तरम् ॥ तस्मैप्रादाद्वरंपुत्रंमृतंपंचजनोदरात् २ समहुताभी
ष्मककन्ययायेश्रियःसवर्णेनबुभूषयैषाम् ॥ गांधर्ववृत्त्यामिषतांस्वभागंजह्रेपदंमूर्ध्निदधत्सुपर्णः ३ ककुद्मतोविद्धनसोदमित्वास्वयंवरेनाग्नजितीमुवाह ॥ तद्भ
ग्नमानानपिगृध्यतोऽज्ञान्जघ्नेऽक्षतःशस्त्रभृतःस्वशस्त्रैः ४ प्रियंप्रभुर्ग्राम्यइवप्रियायाविधित्सुरार्च्छद्द्युतरुंयदर्थे ॥ वज्र्याऽद्रवत्तंसगणोरुषांऽधःक्रीडामृगो
नूनमयंवधूनाम् ५ सुतंमृधेखंवपुषाग्रसंतंदृष्ट्वासुनाभोन्मथितंधरित्र्या ॥ आमंत्रितस्तत्तनयायशेषंदत्त्वातदंतःपुरमाविवेश ६

चूर्णिका

कोपादिंद्रेवर्षतिसतिगोवर्धनोद्धरणंकृत्वागोपादीन्संरक्षितवान् ३३ स्त्रीमंडलंरमयन्स्वयंगायन्रेमे ३४ ॥ इतितृतीयेद्वितीयोध्यायः २ ॥ ७ ॥ ॥ उद्धवउवाच ॥ ॥११॥
ततःस्वपित्रोःशंचिकीर्षयाबलदेवसंयुतःकंसंराजमंचात्निपात्यतंव्यकर्षत् १ सांदीपनिनाप्रोक्तंब्रह्मअधीत्यतस्मैमृतंपुत्रंप्रादात् २ गांधर्वेणरुक्मिणीमुवाह ३ सप्तवृषभान्
दमित्वानाग्नजितीमुवाह ४ सत्यभामायाःप्रियार्थेइंद्रंजित्वापारिजातमानयत् ५ युद्धेभौमंहत्वातत्पुत्रंराज्येस्थापयित्वातेनआहृताःनरदेवकन्याःहरिर्वव्रुः ६

CC-0. In Public Domain. Digitization by eGangotri

तत्रांतःपुरेकुजेनभौमेनयाआहृतास्ताः प्रहर्षश्चव्रीडाचानुरागश्चतैःप्रहिताःप्रेरितायेऽवलोकास्तैर्जगृहुःस्वीकृतवत्यः ७ आसांयोषितांपाणींस्तत्तदनुरूपःसन् (गृहीतबहुरूपःसन्नित्यर्थः) सविधिंविवाहोचितप्रकारसहितंयथाभवति ८ (तासुयोषित्सुएकैकस्यां योषिति) सर्वतःसर्वैर्गुणैःस्वतुल्यानिप्रकृतेर्मायायाविबुभूषयाविविधंभवनंविस्तारस्तदिच्छया यद्वा प्रकृतेर्हेतोर्विविधंभवितुमिच्छया ९ कालःकालयवनः (तदादीन् सेनाभिःपुरं) रुंधतआवृण्वतः मुचुकुंदभीमादिभिर्निमित्तमात्रैःस्वयमेवाजीघनद्घातितवान् तेनचस्वपुंसांतेजःप्रभावंकीर्तिंवादत्तवान् १० शंबरद्विविदबल्वलानन्यानपिकांश्चित्प्रद्युम्नरामादिभिर्निमित्तमात्रैर्घातयदघातयत् घातयन्नितिवापाठः दंतवक्रादीन्स्वयमवधीत् ११ (अथदंतवक्रादिवधानंतरं ते तव भ्रात्रोः पुत्राणांकुरूणां पांडवानांच पक्षयोः संगतान्) नृपानघातयदित्यनुषंगः कथंभूतान् कुरुक्षेत्रमापततांगच्छतांयेषांबलैःसैन्यैर्भूःसर्वाऽपिचचालचकंपे १२ सकृष्णः (कर्णादीनांयः कुमंत्रस्तस्य पाकेन) हताश्रीरायुश्चयस्य भग्नावूरूयस्यतं उर्व्यांशयानंपश्यन्नपिननंदसंतोषंनप्राप १३ अनभिनंदनप्रकारमेवाह कियानिति द्रोणादिभिर्मूलैःकारणभूतैः यदिति योष्टादशाक्षौहिणियुक्तः ह्रस्वत्वमार्षम् क्षपितोयउरुभारोभुवःअयंकियानत्यल्पइत्यर्थः यस्मान्मदंशैःप्रद्युम्नादिभिर्हेतुभूतैर्दुर्विषहंसोढुमशक्यंबलंयदूनामास्ते १४ नचात्रान्यउपायःप्रभवति किंतु मधुनायआमदःसर्वतोमदस्तेनाताम्रविलोचनानामेषांविवादोयदाभविष्यतितदेयानंवैषांवधोपायोन्योनास्ति एकात्मानोपिमय्युद्यतेसंहाराय उद्युक्तेसतिस्वयमेवविवादेनांतर्दधीरन्नित्यर्थः १५ एवंश्लोकद्वयेनोक्तंक्रमेणसंचिंत्य स्वराज्ये (स्वकीये राज्ये धर्मजंयुधिष्ठिरं) स्थापयित्वा १६ (यःपूरोर्वंशोऽभिमन्युनोत्तरायां साधुधृतःसद्रौणेरस्त्रेणसंछिन्नोभगवतापुनः) धृतोरक्षितः (अभूत्) १७ (अयाजयत् यजनंकारितवान् सोपि धर्मराजः) अनुजैःसह १८

श्लोकाः ७ / १८

तत्राहृतास्तानरदेवकन्याःकुजेनदृष्ट्वाहरिमार्तबंधुम् ॥ उत्थायसद्योजगृहुःप्रहर्षव्रीडाऽनुरागप्रहितावलोकैः ७ आसांमुहूर्तएकस्मिन्नानागारेषुयोषिताम् ॥ सविधंजगृहेपाणीननुरूपःस्वमायया ८ तास्वपत्यान्यजनयदात्मतुल्यानिसर्वतः ॥ एकैकस्यांदशदशप्रकृतेर्विबुभूषया ९ कालमागधशाल्वादीननीकैरुंधतःपुरम् ॥ अजीघनत्स्वयंदिव्यंस्वपुंसांतेजआदिशत् १० शंबरंद्विविदंबाणंमुरंबल्वलमेवच ॥ अन्यांश्चदंतवक्रादीनवधीत्कांश्चघातयत् ११ अथतेभ्रातृपुत्राणांपक्षयोःपतितान्नृपान् ॥ चचालभूःकुरुक्षेत्रंयेषामापततांबलैः १२ सकर्णदुःशासनसौबलानांकुमंत्रपाकेनहतश्रियायुषम् ॥ सुयोधनंसानुचरंशयानंभग्नोरुमुर्व्यांननंदपश्यन् १३ कियान्भुवोऽयंक्षपितोरुभारोयद्द्रोणभीष्मार्जुनभीममूलैः ॥ अष्टादशाक्षौहिणिकोमदंशैरास्तेबलंदुर्विषहंयदूनाम् १४ मिथोयदैषांभविताविवादोमध्वामदाताम्रविलोचनानाम् ॥ नैषांवधोपायइयानतोन्योमय्युद्यतेऽतर्दधतेस्वयंस्म १५ एवंसंचिंत्यभगवान्स्वराज्येस्थाप्यधर्मजम् ॥ नंदयामाससुहृदःसाधूनांवर्त्मदर्शयन् १६ उत्तरायांधृतःपूरोर्वंशःसाध्वभिमन्युना ॥ सवैद्रौण्यस्त्रसंछिन्नःपुनर्भगवताधृतः १७ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः ॥ सोऽपिक्ष्मामनुजैरक्षन्रेमेकृष्णमनुव्रतः १८

चूर्णिका ७ हरिःएकस्मिन्मुहूर्तेआसांपाणिंयथाविधिजगृहे ८ एकैकस्यांदशदशपुत्रान्अजनयत् ९ कालयवनमागधशाल्वशंबरद्विविदबाणमुरदंतवक्रादीन्घातितवान्कांश्चअन्यैःअघातयत् १० ११ अथकुरुक्षेत्रेभग्नोरुंसुयोधनंउर्व्यांपतितंपश्यन्नपिननंद १२ १३ यतःभीष्मभीममूलैःक्षपितःभारःकियान्कुतःयदूनांदुर्विषहंबलमास्ते १४ एषांवधोपायःअन्यतोनइतिसंचिंत्ययुधिष्ठिरंराज्येस्थाप्यअश्वमेधत्रयेणयाजयित्वा १५ १६ १७ १८ ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(विश्वात्मापिलौकिकवैदिकमार्गानुसारीद्वारवत्यां द्वारकायां विषयान्बुभुजे असक्तः अनासक्तःयतः) सांख्यंप्रकृतिपुरुषविवेकम् १९ स्निग्धोयःस्मितसहितोऽवलोकस्तेन पीयूषकल्पयासुधातुल्यया पाठांतरेसुधाप्रवाहरूपया आत्मनादेहेन (श्रियःस्थानभूतेनानवद्येन निर्दोषेण) २० (अमुंलोकंस्वर्वासिनोदेवानित्यर्थः) क्षणदयारात्र्यादत्तःक्षणोवसरउत्सवोवायासांस्त्रीणांतासुक्षणंसौहृदंयस्यसः २१ गृहमेधेषुगृहधर्मेषु योगेषुकामभोगोपायेषुविरागऔदासीन्यंजातमित्यर्थः २२ यदास्वाधीनेष्वपिभगवतोविरागस्तदादैवाधीनेकोविस्रंभेतविश्वासंप्रीतिंवाकुर्यात् (दैवाधीनःपुरुषः) योगेन (ध्यानलक्षणेन) चेद्योगेश्वरंश्रीकृष्णमनुव्रतः (अपितु नैवविश्रंभेत्) २३ शेपुःशापंददुः (ननु भगवत्कुलंकथं शेपुस्तत्राह) भगवतोमतेऽभिप्रायेकोविदाअभिज्ञाः (अनेन मुनशब्दार्थोपि दर्शितः) २४ २५ वयःशीलादिबहुगुणोपेतायाः गावस्ताः (यानं अश्वान् शिबिकां वा) २६ कन्याश्च वृत्तिकरींजीविकापर्याप्ताम् (धरांददुः) २७ (उरुरसं बहुरसोपेतं एतत्सर्वं) भगवदर्पणंयथाभवति (तथादत्त्वा) गोविप्रार्थाअसवोयेषाम् २८ ॥ इतितृतीयेटीकायांतृतीयोध्यायः ३ ॥ चतुर्थेबंधुनिधनंश्रुत्वाऽत्मज्ञानलब्धये ॥ उद्धवस्योपदेशेनक्षत्तामैत्रेयमागमत् ॥ तैर्ब्राह्मणैरनुज्ञाताःवारुणींपैष्टींमदिराम् (पीत्वा तया विस्रंशितं विभ्रंशितं ज्ञानं येषांतेपस्पृशुः उद्घाटयामासुरित्यर्थः) १ वारुण्येवमैरेयंतस्यदोषेणमादकत्वेन रवौनिम्लोचत्यस्तंगच्छतिसति वेणूनांयथापरस्पर संघर्षेणतथा मर्दनंकदनम् २

श्लोकाः १९/२

भगवानापिविश्वात्मालोकवेदपथानुगः ॥ कामान्सिषेवेद्वार्वत्यामसक्तःसांख्यमास्थितः १९ स्निग्धस्मितावलोकेनवाचापीयूषकल्पया ॥ चरित्रेणानवद्येन श्रीनिकेतेनचात्मना २० इमंलोकममुंचैवरमयन्सुतरांयदून् ॥ रेमेक्षणदयादत्तक्षणस्त्रीक्षणसौहृदः २१ तस्यैवंरममाणस्यसंवत्सरगणान्बहून् ॥ गृहमेधेषु योगेषुविरागःसमजायत २२ दैवाधीनेषुकामेषुदैवाधीनःस्वयंपुमान् ॥ कोविस्रंभेतयोगेनयोगेश्वरमनुव्रतः २३ पुर्यांकदाचित्क्रीडद्भिर्यदुभोजकुमारकैः ॥ कोपितामुनयःशेपुर्भगवन्मतकोविदाः २४ ततःकतिपयैर्मासैर्वृष्णिभोजांधकादयः ॥ ययुःप्रभासंसंहृष्टारथैर्देवविमोहिताः २५ तत्रस्नात्वापितॄन्देवान्ऋषींश्चैवतदंभसा ॥ तर्पयित्वाऽथविप्रेभ्योगावोबहुगुणाददुः २६ हिरण्यंरजतंशय्यांवासांस्यजिनकंबलान् ॥ यानंरथानिभान्कन्याधरांवृत्तिकरीमपि । २७ अन्नंचोरुरसंतेभ्योदत्त्वाभगवदर्पणम् ॥ गोविप्रार्थासवःशूराःप्रणेमुर्भुविमूर्द्धभिः २८ ॥ ॥ इतिश्रीभा०तृतीयस्कंधेतृतीयोध्यायः ३ ॥ ॥ उद्धवउवाच ॥ ॥ अथतेतदनुज्ञाताभुक्त्वापीत्वाचवारुणीम् ॥ तयाविभ्रंशितज्ञानादुरुक्तैर्मर्मपस्पृशुः १ तेषांमैरेयदोषेणविषमीकृतचेतसाम् ॥ निम्लोचतिरवावासीद्वेणूनामिवमर्दनम् २

चूर्णिका

भगवान्द्वारवत्यांआसक्तःसन्कामान्सिषेवे १९ किंचयदून्नितरांरमयन्स्वयंरेमे २० २१ ततःभगवान्गृहेषुऔदासिन्यमकरोत् २२ २३ कदाचित्पुर्यांक्रीडद्भिःयदुकुमारकैःकोपिताःमुनयःभगवन्मतकोविदाःशापंददुः १४ ततःकतिपयैःमासैःयदुभोजाद्याःशापमुक्तयेप्रभासंययुः २५ तत्रस्नात्वादेवादीन्तर्पयित्वाब्राह्मणेभ्यःगावःहिरण्यंरजतंशय्यावासांसिअजिनकंबलान्अन्नादिचदत्त्वामूर्द्धभिःप्रणेमुः २६ २७ २८ ॥ इतितृ०तृतीयः ३ ॥ छ ॥ ॥ उद्धवउवाच ॥ ॥ अथभगवदनुज्ञातास्तेभुक्त्वामदिरांपीत्वातयाविभ्रंशितधियःअन्योन्यंमर्मदुरुक्तैःपस्पृशुः १ तेषांमदिरादोषेणरवौअस्तंगतेसतिवेणूनामिवकदनंआसीत् २

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपस्पृश्यसरस्वत्यामाचम्य ३ अहंचोक्तःपूर्वमेवद्वारकायाम् (त्वं बदरिकाश्रमं प्रयाहीति) ४ (एवमनु ज्ञातोऽप्यहं) तदभिप्रेतंकुलसंहारादिकम् (जानन्पाद विश्लेषणं चरणविरहं सोढुमक्षम इत्यर्थः) ५ (विचिन्वन् मृगयन् सरस्वत्यां तत्तीरे) कृतकेतंकृतावासम् अकेतनमनाश्रयम् (श्रीनिवासं) ६ (श्यामश्चासाववदातश्च निर्मलस्तम्) विरजंसंशुद्धसत्त्वमयं विदितंलक्षितम् (पीतवर्णं यस्य) कौशंकौशेयम् (तेनांबरेणच विदितम्) ७ अधिश्रित्योपरिस्थापयित्वा अपाश्रितःपृष्ठतोऽवष्टब्धोऽर्भकोबालः कोमलोऽश्वत्थोयेनतम् त्यक्तंपिप्पलंविषयसुखंयेनतं तथाऽप्यकृशमानंदपूर्णम् ८ द्वैपायनः व्यासःसुहृत्सखाचयस्यसः स्वगुरुपुत्रत्वात् पराशरशिष्योमैत्रेयइत्यर्थः (तस्मिन्नवसरे स्वच्छंदतयाससाद प्राप्तः) ९ प्रमोदेन हर्षेणभावेनचानताकंधरायस्य पाठांतरे प्रमोदस्यभारेणानुरागेणसहहासोयस्यांतयासमीक्षयाविश्रमयन् विगतश्रमंकुर्वन् (उवाच) १० हेउद्धव तेमनसीप्सितमहमंतःस्थितोवेदवेद्मि दानेहेतुः विश्वसृजांवसूनांचमिलितानांसत्रे हेवसो इतिपुरापूर्वजन्मनित्वंवसुरभूस्तदामत्प्राप्तिकामेनत्वयाऽहमिष्टोऽतस्तत्साधनंददामिदास्यामि अन्यैर्मत्पराङ्मुखैर्दुष्प्रापम् ११ तस्यभाग्यमभिनंदति सएषभावोजन्मतेभवानां (जन्मनां) मध्येचरमः यद्यस्मिन्मदनुग्रह आसादितोलब्धः यत्पुनर्मांरहएकांतेविशदानुवृत्त्याएकांतभक्त्यादद्दश्वान्दृष्टवानसिएतद्दिष्ट्या भद्रंजातमित्यर्थः नृलोकान्नृशब्देनजीवास्तेषांलोकानुत्सृजंतं वैकुंठंगच्छंतमित्यर्थः १२ ददामीतियदुक्तंतदेवनिर्दिशति पुरापूर्वस्मिन्पाद्मेकल्पे आदिसर्गोपक्रमे मम (नाभ्येनाभिभवेपद्मे मम) महिमालीलाऽवभास्यतेयेनतत् (यच्चसूरयोभागवतं भगवदेकविषयत्वाद्वदंति) १३ इत्येवमादृतश्चासावुक्तश्चाहंप्रतीक्षणंकृपाऽवलोकएवानुग्रहस्तस्यभाजनः पात्रभूतः पाठांतरे ह्रस्वपाठे प्रतिक्षणमनुग्रहस्यपात्रमिति शुचोऽश्रूणिमुंचन्नाबभाषेउक्तवानस्मि १४

॥१४॥

श्लोकाः ३/१४

भगवान्स्वात्ममायायागतिंतामवलोक्यसः ॥ सरस्वतीमुपस्पृश्यवृक्षमूलमुपाविशत् ३ अहंचोक्तोभगवताप्रपन्नार्तिहरेणह ॥ बदरींत्वंप्रयाहीतिस्वकुलंसंजिहीर्षुणा ४ अथाऽपितदभिप्रेतंजानन्नहमरिंदम ॥ पृष्ठतोऽन्वगमंभर्तुःपादविश्लेषणाक्षमः ५ अद्राक्षमेकमासीनंविचिन्वन्दयितंपतिम् ॥ श्रीनिकेतंसरस्वत्यांकृतकेतमकेतनम् ६ श्यामावदातंविरजंप्रशांतारुणलोचनम् ॥ दोर्भिश्चतुर्भिर्विदितंपीतकौशांबरेणच ७ वामऊरावधिश्रित्यदक्षिणांघ्रिसरोरुहम् ॥ अपाश्रितार्भकाश्वत्थमकृशंत्यक्तपिप्पलम् ८ तस्मिन्महाभागवतोद्वैपायनसुहृत्सखः ॥ लोकाननुचरन्सिद्धआससादयदृच्छया ९ तस्यानुरक्तस्यमुनेर्मुकुंदःप्रमोदभावानतकंधरस्य ॥ आशृण्वतोमामनुरागहाससमीक्षयाविश्रमयन्नुवाच १० ॥ ॥ श्रीभगवानुवाच ॥ ॥ वेदाहमंतर्मनसीप्सितंतेददामियत्तद्दुरवापमन्यैः ॥ सत्रेपुराविश्वसृजांवसूनांमत्सिद्धिकामेनवसोत्वयेष्टः ११ सएषभावश्चरमोभवानामासादितस्तेमदनुग्रहोयत् ॥ यन्मांनृलोकान्रहउत्सृजंतंदिष्ट्यादद्दश्वान्विशदानुवृत्त्या १२ पुरामयाप्रोक्तमजायनाभ्येपद्मेनिषण्णायममादिसर्गे ॥ ज्ञानंपरंमन्महिमावभासंयत्सूरयोभागवतंवदंति १३ इत्यादृतोक्तःपरमस्यपुंसःप्रतीक्षणानुग्रहभाजनोऽहम् ॥ स्नेहोत्थरोमास्खलिताक्षरस्तंमुंचञ्छुचःप्रांजलिराबभाषे १४

चूर्णिका

भगवान्स्वमायागतिंवीक्ष्यसरस्वत्यामाचम्याश्वत्थमूलेउपाविशत् ३ अहंबदरींप्रयाहीतिभगवताउक्तोपितत्पृष्ठतःअन्वगमम् ४ ५ तत्रएकंवामेउरौकृतदक्षिणांघ्रिसरोरुहमासीनंकृष्णंअद्राक्षम् ६ ७ ८ तदैवभगवान्मैत्रेयःयदृच्छयातत्रैवआगमत् ९ मुकुंदःअनुरक्तस्यतस्यशृण्वतःमांविश्रमयनउवाच १० ॥ श्रीभगवानुवाच ॥ हेउद्धवतेमनसियत्ईप्सितंतत्अहं वेद्मियत्अन्यैःदुरवापंतत्ज्ञानंतेददामि ११ इत्याद्योविदितहार्दायमह्यंसभगवान्परंस्वात्मरहःप्रकाशंआत्मनःपरमांस्थितिरूपंज्ञानंप्रोवाच १२ १३ १४

॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नहिस्वाज्ञाननिवृत्तिमात्रकामोऽहंकिंतुत्वन्निषेवणोत्सुकस्त्वयिचाघटमानाचरणंदृष्ट्वामेमोहोभवत्यतस्त्वंतत्त्वज्ञानंदेहीतिप्रार्थयितुमाह कोन्विति चतुर्षुधर्मादिषु तथाऽपिहेभूमन् भगवत्पदांभोजनिषेवणोत्सुकोऽहं
तान्नप्रवृणोमि (यतस्त्वं चरणसरोजयोर्निरंतरसेवनयोत्सुकः) १५अघटमानाचरणंदर्शयति कर्माण्यनीहस्यनिःस्पृहस्यनिष्क्रियस्यवा तथा अभवस्याजन्मनोभवोजन्म कालात्मनस्तवारिभयाद्दुर्गाश्रयः पलायनंच
स्वात्मनिरतिर्यस्य (नलोपाभाव आर्षः) तस्य (प्रमदानामयुत आश्रयः) बह्वीभिःस्त्रीभिर्गृहस्थाश्रमइतियदिहास्मिन्संसारेविदुषामपिधीःसंशयेनखिद्यति १६ किंच मंत्रेषुचप्रस्तुतेषुसत्सुमामाहूयवैअहोपृ
च्छेरपृच्छः अकुंठितःकालादिनाऽखंडःसंततःसदात्मासंशयादिरहितोबोधोविद्याशक्तिर्यस्य मुग्धवदज्ञवत् अप्रमत्तोऽवहितःसन् १७ स्वात्मनस्तवरहोरहस्यंतत्त्वंतस्यप्रकाशकम् कस्मैब्रह्मणे सर्वनामत्वमा
र्षम् नोऽस्माकंग्रहणायापिक्षमंयदियोग्यंतर्हिवद भर्त्तःस्वामिन् यद्यतोवृजिनंसंसारदुःखमनायासेनतरिष्यामः १८ आवेदितो (विज्ञापितो) हार्दोहृदिस्थितोऽभिप्रायोयेनतस्मै (मह्यमादिदेशआदिष्टवान्)
१९ आराधितपादोभगवान्सएवतीर्थंगुरुस्तस्मादधीतोधिगतस्तत्त्वात्मविबोधस्यपरमार्थात्मज्ञानस्यमार्गोयेनसोऽहंदेवंपरिवृत्यप्रदक्षिणीकृत्य २० तस्यदर्शनेनाह्लादोवियोगेनार्तिश्चताभ्यांयुतोबदर्याश्रमस्था
नंगमिष्यामि २१ (यत्राश्रमेऋषिर्नारायणोनरश्च) मृदुपरोपद्रवशून्यं तीव्रंदुश्चरं दीर्घमाकल्पांतं तेपातेतपश्चरतइत्यर्थः लोकभावनौलोकानुग्रहकारकौ २२ ज्ञानेनाविवेकेन (उत्पतितमुत्पन्नम्) २३
कृष्णस्यपरिग्रहेपरिवारेमुख्यं विश्रंभाद्विश्वासात्-कौरवर्षभहेपरीक्षिते २४(स्वात्मतत्त्वप्रकाशंज्ञानंयदाहतद्वक्तुं) यद्यस्माद्विष्णोर्भृत्याःस्वभृत्यप्रयोजनसाधकाःसंतश्चरंति नहिकृतार्थानामन्यत्कृत्यमस्तीत्यर्थः२५

श्लोकाः १५/२५

कोन्वीशतेपादसरोजभाजांसुदुर्लभोऽर्थेषुचतुर्ष्वपीह ॥ तथापिनाहंप्रवृणोमिभूमन्भवत्पदांभोजनिषेवणोत्सुकः १५ कर्माण्यनीहस्यभवोऽभवस्यतेदुर्गाश्र
योऽथारिभयात्पलायनम् ॥ कालात्मनोयत्प्रमदायुताश्रयःस्वात्मन्रतेःखिद्यतिधीर्विदामिह १६ मंत्रेषुमांवाउपहूययत्त्वमकुंठिताखंडसदात्मबोधः ॥ पृच्छेः
प्रभोमुग्धइवाऽप्रमत्तस्तन्नोमनोमोहयतीवदेव १७ ज्ञानंपरंस्वात्मरहःप्रकाशंप्रोवाचकस्मैभगवान्समग्रम् ॥ अपिक्षमंनोग्रहणायभर्त्तर्वदांजसायद्वृजिनंतरेम
१८इत्यावेदितहार्दायमह्यंसभगवान्परः ॥ आदिदेशाऽरविंदाक्षआत्मनःपरमांस्थितिम् १९ सएवमाराधितपादतीर्थादधीततत्त्वात्मविबोधमार्गः ॥ प्रणम्य
पादौपरिवृत्यदेवमिहागतोऽहंविरहातुरात्मा २० सोऽहंतद्दर्शनाह्लादवियोगार्तियुतःप्रभो ॥ गमिष्येदयितंतस्यबदर्याश्रममंडलम् २१ यत्रनारायणोदेवोनरश्च
भगवानृषिः ॥ मृदुतीव्रंतपोदीर्घंतेपातेलोकभावनौ २२ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्युद्धवादुपाकर्ण्यसुहृदांदुःसहंवधम् ॥ ज्ञानेनाऽशमयत्क्षत्ताशो
कमुत्पतितंबुधः २३ सतंमहाभागवतंव्रजंतंकौरवर्षभ ॥ विश्रंभादभ्यधत्तेदंमुख्यंकृष्णपरिग्रहे २४ ॥ ॥ विदुरउवाच ॥ ॥ ज्ञानंपरंस्वात्मरहःप्रकाशं
यदाहयोगेश्वरईश्वरस्ते ॥ वक्तुंभवान्नोर्हतियद्धिविष्णोर्भृत्याःस्वभृत्यार्थकृतश्चरंति २५ ॥

चूर्णिका
१५ १६ १७ १८ १९ सोहंबदरींप्रयाहीत्याज्ञप्तःसन्तत्पादौप्रणम्ययत्रनारायणोदेवःनरश्चदीर्घंतपस्तेपाते तंबदरिकाश्रमंगमिष्ये २० २१ २२ श्रीशुकउवाच उद्धवात्
एवंसुहृदांवधंनिशम्यविदुरःउत्पतितंशोकंज्ञानेनशमयन्उवाच २३ २४ हेउद्धवयोगेश्वरःकृष्णस्तुभ्यंयत्ज्ञानंआहतन्नोवक्तुमर्हसि २५

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१६॥ तत्त्वायसंराध्यइति (कौषारवोमैत्रेयः मे अंति अंतिके) अयंभावः भगवतैवस्मरणमात्रेणतवापितत्त्वमुपदिष्टप्रायम् अथकेवलमसंभावनादिनिवृत्तयेज्ञानीकश्चिदाराध्यःसचतवाराध्योमैत्रेयोनत्वहं ममांति कएवत्वदुपदेशेतस्यादिष्टत्वादिति (जिहासतात्यक्तुकामेन) २६ प्लावितोपनीतउरुस्तापोयस्यसः यमस्वसुर्यमुनायाः पुलिनेतीरे तांनिशांक्षणमिवसमुषितः औपगविरुद्धवः (ततःपुलिनादागाद्बदरिकाश्रमं प्रति) २७ ब्रह्मशापेननिधनंप्राप्तेषु (स तुकथमवशिष्टः ननुयोद्धार एव युद्धवशान्मृतानत्वयंयोद्धेत्यतआह अधिरथयूथपानां यूथं समूहं पांतिपालयंति इतितेषुमुख्यः ननुभगवतःश्रेष्ठत्वात्तं भगवान्नरक्षेत्तत्राह) यद्यस्मात्त्रयाणांब्रह्मादीनामीशोहरिरप्याकृतिंमनुष्याकारंत्यक्तवान् २८ ब्रह्मशापोऽपदेशोमिषंयस्यतेनकालेनस्वशक्तिरूपेणामोघवांछितंयस्य नह्यत्रशापःप्रभुः किंतु भगवदिच्छैवेत्यर्थः (देहं मानवाकृतिम्) २९ मय्युपरतेसतिमद्विषयं ज्ञानमर्हतिज्ञानंलोकंग्राहयितुं योग्योभवति (इत्यर्थः न चान्यः आत्मवतां स्वाधीनचेतसाम्) ३० मत्तःसकाशादीषदपिन्यूनोनभवति यद्यस्माद्गुणैर्विषयैर्नक्षोभितः (योहि कनककामिन्यादिविषयैर्नाकृष्टः सईश्वरः विभूतिर्यस्माद्गुणै विषयैर्नार्दितो न क्षोभितः योहि कनक कामिन्यादि विषयैर्नाकृष्टः सईश्वरविभूतिर्यस्मादित्यर्थः अतो) मद्वयुनंमद्विषयं ज्ञानंलोकस्योपदिशन्निहतिष्ठतु ३१ एवमनेनाभिप्रायेणशब्दयोनिनावेदकर्त्रा (सत्यसंकल्पेन संदिष्टः कथितो बदर्याश्रमंगत्वा समाधिनाचित्तैकाग्र्येण) ईजेपूजयामास ३२ श्लाघितानिप्रेम्णा संस्तुतानि ३३ देहन्यासं मनुष्याकृतित्यागम् अन्येषांपशूनां विक्लवात्मनामधीरचित्तानां ३४

श्लोकाः २६/३४ ॥ उद्धवउवाच ॥ ॥ ननुतेतत्त्वसंराध्यऋषिःकौषारवोंऽतिमे ॥ साक्षाद्भगवताऽऽदिष्टोमर्त्यलोकंजिहासता २६ ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिसहविदुरेणविश्वमूर्तेर्गुणकथयामुधयाप्लावितोरुतापः ॥ क्षणमिवपुलिनेयमस्वसुस्तांसमुषितऔपगविर्निशांततोऽगात् २७ ॥ ॥ राजोवाच ॥ ॥ निधनमुपगतेषुवृष्णिभोजेष्वधिरथयूथपयूथपेषुमुख्यः ॥ सतुकथमवशिष्टउद्धवोयद्धरिरपितत्त्यजआकृतिंत्र्यधीशः २८ ॥ ॥ श्रीशुकउवाच ॥ ॥ ब्रम्हशापापदेशेनकालेनामोघवाञ्छितः ॥ संहृत्यस्वकुलंनूनंत्यक्ष्यन्देहमचिंतयत् २९ अस्माल्लोकादुपरतेमयिज्ञानंमदाश्रयम् ॥ अर्हत्युद्धवएवाद्धासंप्रत्यात्मवतांवरः ३० नोद्धवोऽण्वपिमन्न्यूनोयद्गुणैर्नार्दितःप्रभुः ॥ अतोमद्वयुनंलोकंग्राहयन्निहतिष्ठतु ३१ एवंत्रिलोकगुरुणासंदिष्टःशब्दयोनिना ॥ बदर्याश्रममासाद्यहरिमीजेसमाधिना ३२ विदुरोप्युद्धवाच्छ्रुत्वाकृष्णस्यपरमात्मनः ॥ क्रीडयोपात्तदेहस्यकर्माणिश्लाघितानिच ३३ देहन्यासंचतस्यैवंधीराणांधैर्यवर्धनम् ॥ अन्येषांदुष्करतरंपशूनांविक्लवात्मनाम् ३४

चूर्णिका उद्धव० ॥ रेमर्त्यलोकंजिहासताभगवताआदिष्टःमैत्रेयःतेज्ञानंवक्ष्यति २६ ॥ श्रीशुकउवाच ॥ इतिविदुरेणसहहरेर्गुणान्कथयन्यमुनायाःपुलिनेएकांरात्रिंस्थित्वाउद्धवःवनमगात् २७ ॥ परीक्षिदुवाच ॥ सर्वेयादवाःशापात्नष्टाःहरिरपिआकृतिंतत्यजेउद्धवस्तुकथमवशिष्टः २८ ॥ श्रीशुकउ० ॥ ब्रह्मशापनिमित्तेनहरिःस्वकुलंसंहृत्यदेहंत्यजन्इदं अचिंतयत् २९ मयिअस्मात्लोकात्उपरतेसतिमदाश्रयंज्ञानंलोकानामुपदिशन्इहउद्धवःतिष्ठतु ३० ३१ इतित्रिलोकगुरुणाआज्ञप्तःउद्धवःकिंचित्कालंअत्रस्थितःततोवदर्याश्रममासाद्यसमाधिनाहरिमीजे ३२ विदुरोपिउद्धवात्सर्ववृत्तंश्रुत्वा ३३ ३४ ॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

(भागवते भगवद्भक्ते उद्धवे) मनसेक्षितंचिंतितं (ध्यायन्स्मरन् विदुरोरुरोद) ३५ कालिंद्याःसकाशात् सिद्धएव (नतुसाधकः) विदुरःकतिपयैर्दिनैः स्वःसरितंगंगांप्रापद्यतप्राप्तः (यत्र मित्रासुतो मैत्रेयः)
३६ इतिसृतीयेटीकायांचतुर्थोऽध्यायः ४ ॥ ७ ॥ ॥ पंचमेभगवल्लीलांक्षत्त्रापृष्टोमहामुनिः ॥ प्रोवाचमहदादीनांसर्गंतैश्चहरेस्तुतिम् १ उक्तश्चतुर्भिरध्यायैःक्षत्तुमैत्रेयसंगमः ॥ संवादस्तुतयोःस्कं
धद्वयेनाथनिगद्यते २॥ द्युनद्यागंगायाद्वारिहरिद्वारे आसीनंनतुकर्मव्यग्रं तत्रेहेतुः अगाधोऽपरिच्छिन्नोबोधोयस्येति मैत्रेयस्यसौशील्यमार्जवादिगुणाश्चकरणादयस्तैरभितृप्तः पाठांतरेक्षत्तुःसौशील्यादिभिरभि
तृप्तंसंतुष्टंमैत्रेयम् (पप्रच्छ) १ प्रश्नानेवाह सुखायेतिपंचदशभिः तैःकर्मभिः सुखंवा (अन्यदुपारमं) अन्यस्यदुःखस्योपशमंवेत्यर्थः अथवाऽन्यद्वानाविंदेत किंतदित्यपेक्षायांतस्यैवनिर्देशः उपारमंवेति (सुखप्राप्तये
दुःखनिवृत्तयेच कर्माणि कुर्वाणो लोकस्ततः सुखाप्तिंदुःखविनाशं च न प्राप्नोतीत्यर्थः किंच) ततस्तैःकर्मभिर्भूयःपुनःपुनर्दुःखमेवविंदेत अत्रैवंविधेसंसारेनोऽस्माकंयद्युक्तंकर्तुंयोग्यंतत्सर्वज्ञोभगवान्वदेन्निरूप
॥१७॥ यतु २ दैवात्प्राचीनकर्मणोनिमित्तभूतात्कृष्णाद्विमुखस्य (विष्णुभक्तिरहितस्येत्यर्थः) अतोऽधर्मशीलस्यातःसुदुःखितस्यजनस्यानुग्रहाय भव्यानिमंगलानि (विष्णोः) भूतानिचरंतिभवंतःपरोपकारस्व
भावाएवेत्यर्थः ३ तस्मात् (जनानुग्राहकत्वात्) हेसाधुवर्य शंसुखरूपंवर्त्म (सुखप्राप्तिसाधनमित्यर्थः) नः (अस्माकं) आदिशकथय येनवर्त्मनासंराधितोहृदिस्थितःसन् सतत्त्वाधिगमआत्मापारो
क्ष्यंतत्सहितंपुराणमनादिवेदप्रमाणकम् ४ करोतिकर्माणीत्यादीनांवर्णयेतिपंचप्रश्नोकेक्रियासंबंधः यथायेनप्रकारेणपुरुषरूपेणकृतावतारःसंह्यधीशःत्रिगुणमायानियंता अतःस्वतंत्रएवयानिकर्माणिकरोति
कर्माण्येवविशेषतःपृच्छतियथेत्यादिना निरीहोनिष्क्रियोनिःस्पृहोवा संस्थाप्यसुस्थितंकृत्वा वृत्तिंजीविकाम् ५ स्वेस्वीयेस्वेहृदयाकाशे (इदंविश्वं) निवेश्यस्थापयित्वा निवृत्तावृत्तयो जगत्सृष्ट्यादिरूपा
यस्यसः गुहायांयोगमायायां (शेते पुनश्चासहायैतज्जगत्सृष्ट्वाऽनुप्रविष्टो) बहुधाब्रह्मादिरूपेण (यथासीत् योगेश्वरोऽधीश्वरोऽतर्क्यैश्वर्यइत्यर्थः) ६

श्लोकाः

आत्मानंचकुरुश्रेष्ठकृष्णेनमनसेक्षितम् ॥ ध्यायन्गतेभागवतेरुरोदप्रेमविह्वलः ३५ कालिंद्याःकतिभिःसिद्धअहोभिर्भरतर्षभः ॥ प्रापद्यतस्वःसरितंयत्रामित्रासु
तोमुनिः ३६ इतिश्रीभा० तृ ०स्कंधेचतुर्थोध्यायः ४ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ द्वारिद्युनद्याऋषभःकुरूणांमैत्रेयमासीनमगाधबोधम् ॥ क्षत्तोप ३५
सृत्याच्युतभावशुद्धःपप्रच्छसौशील्यगुणाभितृप्तः १ ॥ विदुरउवाच ॥ सुखायकर्माणिकरोतिलोकोनतैःसुखंवाऽन्यदुपारमंवा ॥ विंदेतभूयस्ततएवदुःखंयदत्र ६
युक्तंभगवान्वदेन्नः २ जनस्यकृष्णाद्विमुखस्यदैवादधर्मशीलस्यसुदुःखितस्य ॥ अनुग्रहायेहचरंतिनूनंभूतानिभव्यानिजनार्दनस्य ३ तत्साधुवर्यादिशवर्त्मशं
नःसंराधितोभगवान्येनपुंसाम् ॥ हृदिस्थितोयच्छतिभक्तिपूतेज्ञानंसतत्त्वाधिगमंपुराणम् ४ करोतिकर्माणिकृतावतारोयान्यात्मतंत्रोभगवांस्त्र्यधीशः ॥ यथा
ससर्जाग्रइदंनिरीहःसंस्थाप्यवृत्तिंजगतोविधत्ते ५ यथापुनःस्वेखइदंनिवेश्यशेतेगुहायांसनिवृत्तवृत्तिः ॥ योगेश्वराधीश्वरएकएतदनुप्रविष्टोबहुधायथाऽसीत् ६

चूर्णिका

भगवताचआत्मस्मरणंकृतमितिश्रुत्वाकालिंद्याःसकाशात्कतिभिर्दिवसैः यत्रमैत्रेयस्तिष्ठतितत्गंगाद्वारंययौ ३५ इतितृतीयेचतुर्थः ४ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ गंगाद्वा
रेआसीनंमैत्रेयंप्रतिविदुरोगत्वापप्रच्छ १ विदुरउवाच ॥ लोकःसुखायकर्माणिकरोति तैःसुखंदुःखोपशमंवानाप्नोतिभूयोदुःखमेवविंदेतअतःएवंविधेसंसारेनःयत्कर्तुंयोग्यंतत्
भगवान्नःवदेत् २ भवादृशाःइहजनानांअनुग्रहायचरंति ३ हेसाधुवर्ययेनभगवान्भक्तिपूतेहृदिस्थितःसन्ज्ञानंयच्छतितत्वर्त्मनःआदिश ४ हरिरिदंअग्रेयथाससर्जअवतारा
न्गृहीत्वायत्यत्अकरोत्तत्वद ५ ६

CC-0. In Public Domain. Digitization by eGangotri

टीका

मत्स्याद्यवतारभेदैः क्रीडन्यानिकर्माणिविधत्ते यथापुनर्विशेषंप्रष्टुमौत्सुक्यमाविष्करोति मनइतिसुश्लोकाःपुण्यकीर्तयस्तेषांमौलिरिवाधिक्येन (मुकुटवत्सुश्लोको) परिविराजमान तस्येत्यर्थः ७ अधिलोक नाथोलोकनाथाधिपतिः अलोकाल्लोकालोकपर्वताद्वहिर्भागान् अचीक्लृपत्कल्पयामास यत्रयेषुसर्वाणियानिसत्त्वानितेषांनिकायास्तेषांभेदः अधिकृतस्तत्तत्कर्माधिकारीआश्रितइतिवा (प्रतीतःप्रत्यक्षादिप्रमाणैरवगतइत्यर्थः) ८ उतापिच येनप्रकारेणजीवानामात्मास्वभावस्तत्कृतंकर्मतत्कृतंरूपंतत्कृताअभिधास्तासांभेदंकृतवान् विश्वस्रष्टा स्वयमात्मयोनिःस्वतःसिद्धः ९ ननु महाभारतेत्वयासर्वंश्रुतमेवकिंपुनः प्रश्नैस्तत्राह परेत्रैवर्णिका अवरेशूद्रादयस्तेषांव्रतानिधर्माः मेमया अभीक्ष्णंपुनःपुनः तेषांश्रवणेनातृप्नुमःतृप्ताःस्म (तत्रहेतुःक्षुल्लसुखावहानामिति) तेषांतुच्छसुखावहत्वात् (अलंबुद्धिंगताइत्यर्थः) यस्तु तत्रकृष्णकथाऽमृतौघःसूचितस्तस्माद्दते तत्रत्वलंबुद्धिर्नास्तीत्यर्थः १० तत्रहेतुः कइति तीर्थपदःकृष्णस्यअभिधानात्कथाऽमृतौघात् सत्रेषुसमाजेषु सूरिभिर्नारदादिभिः (स्तूयमानात्कीर्त्यमानादित्यर्थः कोरसज्ञस्तृप्तिंगच्छेत् यस्तीर्थपात्कर्णद्वारंयातो गेहरतिंगृहासक्तिम्) ११ महाभारतस्याप्यत्रैवतात्पर्यमित्याह मुनिःश्रीकृष्णोवेदव्यासोभगवद्गुणान् मोक्षधर्मांतेनारायणीयाख्यानेवक्तुमिच्छुःसन् भारतमाह तत्रार्थकामादिवर्णनंतुहरिकथायांमतिप्रवेशार्थमेवेत्याह यस्मिन्निति (यत्रभारते) नृणांमतिर्ग्राम्यसुखानुवादैर्द्वारभूतैर्नुर्निश्चितंहरेःकथायांगृहीतानीता तदुक्तमितिहाससमुच्चये "कामिनोवर्णयन्कामंलोभंलुब्धस्यवर्णयन् नरःकिंफलमाप्नोतिकूपेंऽधामिवपातयन् लोकचित्तावताराार्थंवर्णयित्वाऽत्रतेनतौ इतिहासैःपवित्रार्थैःपुनरत्रैवानिंदितौ अन्यथाघोरसंसारबंधहेतूजनस्यतौ वर्णयेत्सकथंविद्वान्महाकारुणिकोमुनिः" इति १२ श्रीहरिकथायांमतिप्रवेशस्यफलमाह साकथामतिर्वा (विवर्धमानासतीकथामेवश्रद्दधानस्यपुंसः) अन्यत्रग्राम्यसुखे विरक्तिमुत्पादयति ततःकिमतआह हरेरिति (हरेःपादानुस्मृतिंतयानुस्मृत्या सुखसंपन्नस्यतत्क्षणमेवसमस्तदुःखनाशंचकरोतीत्यर्थः) १३ एवंभूतायांकथायांयेनरमंतेतान्शोचति (तानिति ये अज्ञाः शोच्यास्तेषामपि) शोच्यायेतांश्च (विवेकिनोपि अनुशोचामिता नेव दर्शयन्विशिनष्टिअविदः हरेः कथायामघेनविमुखानितिच) तत्राविदोभारततात्पर्यानभिज्ञान्शोच्यान् येतुज्ञात्वापिहरेः कथायांविमुखास्तांस्तेषामपिशोच्याननितियोज्यम् अनिमिषःकालोयेषामायुःक्षिपति अत्रैवहेतुः वृथैववादगतिस्मृतयोवाग्देहमनोव्यापारायेषाम् १४

श्लोकाः ७/१४

क्रीडन्विधत्तेद्विजगोसुराणांक्षेमायकर्माण्यवतारभेदैः ॥ मनोनतृप्यत्यपिशृण्वतांनः सुश्लोकमौलेश्चरितामृतानि ७ यैस्तत्त्वभेदैरधिलोकनाथोलोकानलोकान्सहलोकपालान् ॥ अचीक्लृपद्यत्रहिसर्वसत्त्वनिकायभेदोऽधिकृतःप्रतीतः ८ येनप्रजानामुतआत्मकर्मरूपाभिधानांचभिदांव्यधत्त ॥ नारायणोविश्वसृगात्मयोनिरेतच्चनोवर्णयविप्रवर्य ९ परावरेषांभगवन्व्रतानिश्रुतानिमेव्यासमुखादभीक्ष्णम् ॥ अतृप्नुमःक्षुल्लसुखावहानांतेषामृतेकृष्णकथामृतौघात् १० कस्तृप्नुयात्तीर्थपदोऽभिधानात्सत्रेषुवःसूरिभिरीड्यमानात् ॥ यःकर्णनाडींपुरुषस्ययातोभवप्रदांगेहरतिंछिनत्ति ११ मुनिर्विवक्षुर्भगवद्गुणानांसखापितेभारतमाहकृष्णः ॥ यस्मिन्नृणांग्राम्यसुखानुवादैर्मतिर्गृहीतानुहरेःकथायाम् १२ साश्रद्दधानस्यविवर्धमानाविरक्तिमन्यत्रकरोतिपुंसः ॥ हरेःपदानुस्मृतिनिर्वृतस्यसमस्तदुःखात्ययमाशुधत्ते १३ तान्शोच्यशोच्यानविदोनुशोचेहरेःकथायांविमुखानघेन॥ क्षिणोतिदेवोऽनिमिषस्तुयेषामायुर्वृथावादगतिस्मृतीनाम् १४

चूर्णिका ७ ८ ९ मयाव्यासमुखात्बहूनिव्रतानिश्रुतानिपरंतुकृष्णकथाश्रवणेनतृप्यामि १० ११ १२ १३ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

॥१९॥

तत्तस्माद्धेकौषारवास्यविश्वस्यशिवायकथासुसारभूतांहरेः (सुखप्रदस्य) कथामेवोद्धृत्यनःकीर्त्तय यथापुष्पेभ्योमधुमधुपउद्धरतितद्वदुद्धृत्य (इत्यर्थः कथंभूतस्य बाह्याभ्यंतरता पापनोदिनी कीर्तिर्यस्य) १५
विशेषतःश्रीकृष्णकथाकथनीयेत्याशयेनाह सइति योविश्वसर्गाद्यर्थंपूर्वंगृहीतशक्तिःसएवपुरुषेषुकृतावतारःसन्पुरुषानतिक्रम्यवर्तमानानियानिकर्माणिचकार तानिविस्तराद्वद १६ पुंसांनिःश्रेयसमेवार्थःप्रयो
जनंतेनहेतुनापृष्टः १७ बहुमानमेवाह साध्वितिपंचभिः अधोऽक्षजेएवात्मामनोयस्यतस्यात्मनःस्वस्यकीर्तिंचप्रसंगाद्वितन्वता (त्वया समीचीनं पृष्टम्) १८ हेक्षत्तः । हरिर्यद्गृहीतएतत् (त्वयि) चित्रंनभ
वति कुतः बादरायणवीर्यजे (ननु बादराणवीर्यजो धृतराष्ट्रोपि भवति सत्यं परंतु त्वयिविशेष इत्याह अनन्यभावेन गृहीत इति) १९ ननुतर्हिकथं शूद्रत्वंकथंचलोकानुग्राहकत्वं (इत्याशंकां परिहर
न्नैतच्चित्रमित्यत्रहेत्वंतरम्) आह मांडव्यशापादितिभ्रातुर्विचित्रवीर्यस्यक्षेत्रेक्षेत्रत्वेनस्वीकृतायांभुजिष्यायांदास्यां (भगवान्) यमएवत्वं (मांडव्यशापात्) जातोऽसि २० किंच भवानिति (भगव
तः तद्भक्तानांच संमतः) कुतः यस्यतवज्ञानोपदेशायमामामादिष्टवान् चकारात्स्वयमपिस्मृत्यैवोपदिष्टवानिति २१ विश्वस्थित्यादयोर्थाविषयायासांताः (योगमायया उपबृंहिता विरचिता इति भावः)
२२ तत्रसृष्टिलीलांवर्णयितुंततःपूर्वावस्थामाह इदंविश्वमग्रेसृष्टेःपूर्वंपरमात्माभगवानेकएवासआसीत् आत्मनांजीवानामात्मास्वरूपंविभुःस्वामीचनान्यद्द्रष्टृदृश्यात्मकंकिंचिदासीत् कारणात्मनासत्त्वेऽपिपृथक्
प्रतीत्यभावादित्याह अनानामत्युपलक्षणोनानाद्रष्टृदृश्यादिमतिभिर्नोपलक्ष्यतइतितथा यद्वा अकारप्रश्लेषंविनैवायमर्थः यः सृष्टौनानामतिभिरुपलक्ष्यतेसतदाएकएवासीदिति कुतः आत्मेच्छामायातस्याअनु
गतौलयेसति यद्वा आत्मनएकाकित्वेनावस्थानेच्छायामनुवृत्तायामित्यर्थः २३तत्रप्रथमंमायोद्भवप्रकारमाह द्वाभ्याम् सवैएषद्रष्टासन्दृश्यंनापश्यत् यतः सएकराडेकएवतदाप्रकाशते (तदा)आत्मानमसं
तमिवमेने दृश्याभावेद्रष्टृत्वाभावात् तदाह, सुप्तामायाद्याःशक्तयोयस्यसः नत्वसंतमेवमेने यतोऽलुप्तादृक्चिच्छक्तिर्यस्येति २४

श्लोकाः १५/२४

तदस्यकौषारवशर्मदातुर्हरेःकथामेवकथासुसारम् ॥ उद्धृत्यपुष्पेभ्यइवार्तबंधोशिवायनःकीर्तयतीर्थकीर्तेः १५ सविश्वजन्मस्थितिसंयमार्थेकृतावतारःप्र
गृहीतशक्तिः ॥ चकारकर्माण्यतिपूरुषाणियानीश्वरःकीर्तयतानिमह्यम् १६ ॥ ॥ श्रीशुकउवाच ॥ ॥ सएवंभगवान्पृष्टःक्षत्राकौषारविर्मुनिः ॥
पुंसांनिश्श्रेयसार्थेनतमाहबहुमानयन् १७ ॥ ॥ मैत्रेयउवाच ॥ ॥ साधुपृष्टंत्वयासाधोलोकान्साध्वनुगृह्णता ॥ कीर्तिंवितन्वतालोकेआत्मनोऽधो
क्षजात्मनः १८ नैतच्चित्रंत्वयिक्षत्तर्बादरायणवीर्यजे ॥ गृहीतोऽनन्यभावेनयत्त्वयाहरिरीश्वरः १९ मांडव्यशापाद्भगवान्प्रजासंयमनोयमः ॥ भ्रातुःक्षेत्रे
भुजिष्यायांजातःसत्यवतीसुतात् २० भवान्भगवतोनित्यंसंमतःसानुगस्यच ॥ यस्यज्ञानोपदेशायमादिशद्भगवान्व्रजन् २१ अथतेभगवल्लीलायोगमायो
पबृंहिताः ॥ विश्वस्थित्युद्भवांतार्थावर्णयाम्यनुपूर्वशः २२ भगवानेकआसेदमग्रआत्मात्मनांविभुः ॥ आत्मेच्छानुगतावात्मानानामत्युपलक्षणः २३ स
वाएषतदाद्रष्टानापश्यद्दृश्यमेकराट् ॥ मेनेऽसंतमिवात्मानंसुप्तशक्तिरलुप्तदृक् २४

चूर्णिका

सःविश्वस्यजन्मस्थितिसंयमार्थेकृतावतारःसन्कर्माणिचकारतानिमह्यंकीर्तय १५ १६ १७ मैत्रेयउवाचहेसाधोत्वयासाधुपृष्टं १८ भवान्यमःमांडव्यशापात्व्यासात्दास्यांजातोसि
१९ २० तवज्ञानोपदेशायभगवान्मामाआदिशत् २१ अथतेभगवल्लीलाःआनुपूर्व्येणवर्णयामि २२ आदौसृष्टेःपूर्वंआत्माएकएवआसीत् २३ ततःसदसदात्मिकांमायांससर्ज २४

१ आत्यान्तिकंश्रेयः निश्रेयसम् ।

CC-0. In Public Domain. Digitization by eGangotri

टीका

सावैद्रष्टृदृश्यानुसंधानरूपासदसदात्मिकाकार्यकारणरूपा यद्वा सदृश्यमसदृश्यमात्मस्वरूपंचतयोरात्मायस्याः तदुभयानुसंधानरूपत्वात् (इदंविश्वम्) २५ कालवृत्त्याकालशक्त्या गुणमय्यां क्षुभितगुणायाम् अधोक्षजःपरमात्मा आत्मांशभूतेनपुरुषेणप्रकृत्यधिष्टातृरूपेणवीर्यंचिदाभासमाधत्त वीर्यवान्चिच्छक्तियुक्तः २६ कालप्रेरितादव्यक्तान्मायातः (महत्तत्त्वमभूत्) तत्त्वपदंपरित्यज्यमहतोलक्षणमतःपुंलिंगनिर्देशोविज्ञानात्मेति (विज्ञानमात्मास्वरूपमस्येतिअयम्) सत्त्वप्रधानत्वात्स्वदेहस्थंविश्वमुच्छूनबीजगतमंकुरादिरूपंवृक्षमिवव्यंजन्व्यंजयन्प्रकाशयन् यतोऽसौतमोनुदतीतितमोनुदः तदुक्तं सात्त्वततंत्रे "विष्णोस्तुत्रीणिरूपाणिपुरुषाख्यान्यथोविदुः प्रथमंमहतःस्रष्टृद्वितीयंत्वंडसंस्थितं तृतीयंसर्वभूतस्थंतानिज्ञात्वाविमुच्यते " इति २७ अहंकारोत्पत्तिमाह सार्धाभ्याम् सोऽपीति अंशश्चिदाभासो निमित्तंगुणाउपादानंकालःक्षोभकःतदात्मातदधीनः भगवान्सर्वाध्यक्षस्तदृष्टिगोचरःसन् (सोपिमहानात्मा) स्वयमात्मानंव्यकरोद्रूपांतरमनयत् २८ (विक्रियमाणान्महत्तत्त्वादहंकाररूपंतत्त्वंजातम्) अहंकारस्यलक्षणमाह कार्यमधिभूतंकारणमध्यात्मंकर्तृआधिदैवम् तेषामात्माआश्रयः अत्रहेतुः भूतेंद्रियमनोमयस्तद्विकारवान्(तत्र)मनइतिदेवानामप्युपलक्षणम् एतदेवविभागतःप्रपंचयति वैकारिकइत्यादिना वैकारिकःसात्विकस्तैजसोराजसः २९ (तत्रवैकारिकादहंकारान्मनः) देवाश्चवैकारिकाः सात्त्विकाहंकारकार्यभूताइत्यर्थः यतोयेभ्यइंद्रियाधिष्ठातृभ्योदेवेभ्योहेतुभूतेभ्योर्थाभिव्यंजनंशब्दादिप्रकाशोभवति ३० (ज्ञानमयानिकर्ममयानिइंद्रियाणि) तैजसान्येवेत्यन्वयः (राजसाहंकारभूतान्येवेत्यर्थः) ज्ञानेंद्रियाणांज्ञानमयानांसात्विकत्वशंकामाभूदित्येवकारः तामसोभूतसूक्ष्मस्यशब्दस्यादिःकारणम् यतः शब्दात्खमाकाशोभवति आत्मनोलिंगंस्वगुणशब्दरूपेणप्रकाशकंहृदयाकाशतयावा यद्वा लिंगंशरीरम् " आकाशशरीरंब्रह्म " इतिश्रुतेः ३१ कालांशौप्राग्व्याख्यातौमायाउपादानंतद्योगेननभोनभसः स्वस्मादनुसृतमुद्भूतंस्पर्शंविकुर्वद्रूपांतरंनयदानिलंवायुम् (निर्ममे) एवंसर्वत्रतन्मात्रद्वाराभूतोत्पत्तिरितिज्ञातव्यम् ३२ नभसासहितःस्वयंचोरुबलान्वितः (रूपंससर्ज) ततोज्योतिस्तेजः (ससर्ज) लोचनंप्रकाशकम् ३३ (परेणपरमात्मनावीक्षितमाधत्तससर्जअंभोजलम्) ३४ (तेजसाऽनुसृष्टंसंयुक्तमायान्निर्ममे) ३५

॥२०॥

श्लोकाः २५/३५

सावाएतस्यसंद्रष्टुःशक्तिःसदसदात्मिका ॥ मायानाममहाभागययेदंनिर्ममेविभुः २५ कालवृत्त्यातुमायायांगुणमय्यामधोक्षजः ॥ पुरुषेणात्मभूतेनवीर्यमाधत्त वीर्यवान् २६ ततोभवन्महतत्त्वमव्यक्तात्कालचोदितात् ॥ विज्ञानात्मात्मदेहस्थंविश्वंव्यंजंस्तमोनुदः २७ सोऽप्यंशगुणकालात्माभगवद्दृष्टिगोचरः ॥ आत्मानंव्यकरोदात्माविश्वस्यास्यसिसृक्षया २८ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वंव्यजायत ॥ कार्यकारणकर्त्रात्माभूतेंद्रियमनोमयः २९ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिधा ॥ अहंतत्त्वाद्विकुर्वाणान्मनोवैकारिकादभूत् ॥ वैकारिकाश्चयेदेवाअर्थाभिव्यंजनंयतः ३० तैजसानींद्रियाण्येवज्ञानकर्ममयानिच ॥ तामसोभूतसूक्ष्मादिर्यतःखंलिंगमात्मनः ३१ कालमायांशयोगेनभगवद्वीक्षितंनभः ॥ नभसोऽनुसृतंस्पर्शंविकुर्वन्निर्ममेऽनिलम् ३२ अनिलोपिविकुर्वाणोनभसोरुबलान्वितः ॥ ससर्जरूपतन्मात्रंज्योतिर्लोकस्यलोचनम् ३३ अनिलेनान्वितंज्योतिर्विकुर्वन्परवीक्षितम् ॥ आधत्तांभोरसमयंकालमायांशयोगतः ३४ ज्योतिषांभोनुसंसृष्टंविकुर्वन्ब्रह्मवीक्षितम् ॥ महींगंधगुणामाधात्कालमायांशयोगतः ३५

चूर्णिका

२५ तस्यांआत्मांशभूतेनपूरुषेणचिदंशंआधत्त २६ ततःमहत्तत्वंजातं २७ ततःअहंकारःअभूत् २८ २९ सःत्रिविधःसत्त्वरजस्तमात्मकः सत्त्वात्मकात्मनः देवाश्चअभवन् ३० राजसात्ज्ञानकर्मेंद्रियाणितामसात्भूतसूक्ष्माणि ३१ तेषुकालमायांशयोगेनभगवतावीक्षितेषुआकाशंआसीत्ततःवायुः ३२ ततोऽग्निःततआपःततःपृथ्वी ३३ ३४ ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. तृ. हेभव्यविदुर पाठांतरेभाव्यंकार्यम् (तत्र) यद्यदवरमवरंकार्यम् तेषांकार्याणांपरैःकारणैरनुसंसर्गाद्यन्वयाद्यथासंख्यंयथाक्रममुत्तरोत्तरमधिकान्गुणान्विदुः तथाहि नभसःशब्दएवगुणोऽन्यान्वया (भावा) अ० भावात् वायोस्तुस्पर्शःआकाशान्वयाच्छब्दश्च एवंतेजसस्तौचरूपंच अंभसस्तानिरसश्च मह्याःसर्वे ३६ देवामहदाद्यभिमानिनः विष्णोःकलाअंशाः काललिंगंविकृतिः मायालिंगंविक्षेपः अंशोलिंगंचेतना तानि

टीका विद्यंतेयेषु अतःसमत्वेननानात्वात्परस्परासंबंधात्स्वक्रियायांब्रह्मांडरचनायामनीशाअशक्ताःसंतोविभुंपरमेश्वरंप्रोचुः ३७ " मिथःस्पर्धिष्णवोदेवानामिलंतःपरस्परम् विश्वकर्मण्यनीशानानिर्विण्णाहरिमीडिरे" ॥ ५ ॥ नमामेति प्रपन्नानांतापोपशमेआतपत्रंछत्रम् तत्रहेतुः यस्यपादारविंदस्यमूलंतलंकेतआश्रयोयेषांते (यतयोनिर्जितेंद्रिया महत्) संसाराख्यदुःखंबहिर्दूरतउत्क्षिपंतिपारित्यजंति पांथाःस्वगृहंप्राप्यमार्गश्र ममिव ३८ श्रमंविनिवेदयंतआहुः हेधातःपितः यद्यस्माद्भवेसंसारे आत्मन्नात्मनिसंबोधनंवा शर्मसुखं (नलभंते) ऋतेयदितिपाठेयत्पादभजनंविनाशर्मनलभंते (अतस्त्वांघ्रिच्छायामाश्रयेम) ननुज्ञानाद

॥२१॥ ज्ञानकृतस्तापोनिवर्त्तते किमदंघ्रिच्छायाश्रयणेन तत्राहुः सविद्यांज्ञानमयींतदाश्रयणमेवविद्याप्रापकमित्यर्थः ३९ अज्ञातस्याश्रयणायोगात्तज्ज्ञानसाधनमाहुः मार्गंत्यन्वेषयंति यत्तत्तीर्थपदस्तवपदंवयंप्रपन्नाः कैर्मार्गंति छंदःसुपर्णैर्वेदपक्षिभिः तवैवमुखपद्मंनीडंयेषां तैः यथापक्षिणोनीडादुद्गतास्ततस्ततःपरिभ्रम्यपुनस्तत्रैवाविशंति तथावेदाअपित्वत्तउद्गता (अनेकमार्गेषु परिभ्रम्य) त्वय्येवपर्यवस्यंतिअतोवेदाना श्रित्यत्वत्पदंमृगयंत (ऋषय) इति कविविक्तेअसंगेमनसि किंचाघमर्षमघनाशकमुदमुदकंयासांसरितांतासुवरायाःश्रेष्ठायाः गंगायाःपदमुद्गमस्थानम् अतोगंगामनुसेवमानाअपितदुद्गमस्थानंत्वत्पदंप्राप्नुवंती त्यर्थः (गंगासेवनापेक्षयात्वत्पदसेवनंतु अंतरंगसाधनमितिभावः) ४० ननुविषयाकृष्टचित्तानांकुतस्तदन्वेषणंतत्राहुः यच्छ्रद्धयेति यत् (ते पदंश्रद्धया) हृदयेऽवधायध्यात्वा वैराग्यंबलंयस्यतेनज्ञाने नधीराभवंति सरागेचित्तेध्यानमेवकुतस्तत्राहुः श्रद्धयाश्रवणपूर्विकयाभक्त्याचसंमृज्यमानेसंशोध्यमाने (चरणानुस्मरणमात्रेण विषयवैराग्यं भवति न केवलं वैराग्यं अपितु ज्ञानंवैराग्यंभक्तिश्चेति तत्तवचर णांबुपीठं शरणंव्रजेम) ४१ भक्तानुग्रहंस्मरंतआहुः विश्वस्येति (हे ईशयत्पदांबुजंस्मृतंसत् अभयं मोक्षम्) ४२ अंतर्यामितयानित्यंसन्निहितेऽनर्थकंव्रजनमित्याशंक्याहुः यदिति सानुबंधेसोपकरणे असतितुच्छे (गेहे ममेति देहे अहमितिचोढदुराग्रहाणां निरूढाभिमानानां) पुर्यांस्वदेहेएववसतोपि (तवयत्पदाब्जं) यत्सुदूरंदुष्प्रापम् (हे भगवंस्तत्तेभजेमइति) ४३

श्लोकाः भूतानांनभआदीनांयद्यद्भव्यावरावरम् ॥ तेषांपरानुसंसर्गाद्यथासंख्यंगुणान्विदुः ३६ एतेदेवाःकलाविष्णोःकालमायांशलिंगिनः ॥ नानात्वात्स्वक्रियाऽ नीशाःप्रोचुःप्रांजलयोविभुम् ३७ ॥ ॥ देवाऊचुः ॥ ॥ नमामतेदेवपदारविंदंप्रपन्नतापोपशमातपत्रम् ॥ यन्मूलकेतायतयोऽजसोरुसंसारदुःखंबहिरु ३६/४३ त्क्षिपंति ३८ धातर्यदस्मिन्भवईशजीवास्तापत्रयेणोपहतानशर्म ॥ आत्मँल्लभंतेभगवंस्तवांघ्रिच्छायांसविद्यामतआश्रयेम ३९ मार्गंतियत्तेमुखपद्मनीडै श्छंदःसुपर्णैर्ऋषयोविविक्ते ॥ यस्याघमर्षोदसरिद्वरायाःपदंपदंतीर्थपदःप्रपन्नाः ०४ यच्छ्रद्धयाश्रुतवत्याचभक्त्यासंमृज्यमानेहृदयेऽवधाय ॥ ज्ञानेनवैराग्य बलेनधीराव्रजेमतत्तेंऽघ्रिसरोजपीठम् ४१ विश्वस्यजन्मस्थितिसंयमार्थेकृतावतारस्यपदांबुजंते । व्रजेमसर्वेशरणंयदीशस्मृतंप्रयच्छत्यभयंस्वपुंसाम् ४२ यत्सानुबंधेऽसतिदेहगेहेममाहमित्यूढदुराग्रहाणाम् ॥ पुंसांसुदूरंवसतोऽपिपुर्यांभजेमतत्तेभगवन्पदाब्जम् ४३ ॥२१॥

चूर्णिका ३६ एतेविष्णवंशादेवाः ब्रह्मांडरचनायांअशक्ताः संतःविभुंतुष्टुवुः ३७ ॥ देवा ऊचुः ॥ हेदेवतेपदारविंदंनमाम ३८ हेपितः त्वत्पादभजनंविनातापत्रयहताः जीवाः शर्म नलभेत ३९ किंच गृहासक्तानांत्वच्चरणारविंदंदुःप्रापंततवयंप्रपन्नाः ४० ४१ ४२ ४३

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥२२॥

ननुयदिहृदिस्थस्यापिपदाब्जंकेषांचित्सुदूरंतर्ह्यन्येषामपितथैवस्यादविशेषादित्याशंक्याहुः तानिति असद्वृत्तिभिः (असतितुच्छेविषयेवृत्तिर्येषांतानितैः) बहिर्मुखैरक्षिभिरिंद्रियैःपराहृतंदूरमपहृतमंतस्थंमनोयेषां ते अथोअतएवतेनूनंतान्नपश्यंति वैप्रसिद्धं कुतःपुनस्तेषांतत्संगःस्यात् तान् कान् तेतवपदन्यासोगमनंतस्यविलासोविभ्रमस्तस्यलक्ष्मीःशोभातस्या ये त्वल्लीलाकथादिभिःशोभमानान् (येत्वत्पदकथादिभिःयेत्वत्पदगतिविभ्रमशोभासंबंधिनः) तांस्त्वद्भक्तानित्यर्थः पथइतिलक्ष्यानितिचपाठेत्वत्पदन्यासविलासोलक्ष्योयेषांतान् पथस्त्वन्मार्गभूतान्सतोमार्गान्वाश्रवणादीन्नपश्यंतीत्यर्थः यद्वा येएवंभूताभागवतास्तेतानुन्मत्तान्नूनंनैवपश्यंतीत्यन्वयः सत्संगाभावेनहरिकथाश्रवणाभावाद्धृदिस्थितमपितेषांसुदूरं (तेपदाब्जम् इतिभावः) ४४ एतदेवस्फुटयति पानेनेतिद्वाभ्याम् (हेदेवतेकथासुधायाःपानेनसादरश्रवणेनप्रवृद्धयाभक्त्यानिर्मलांतःकरणाः) वैराग्यंसारोबलंयस्यबोधस्यतंलब्ध्वान्वीयुःप्राप्नुयुः अकुंठधिष्ण्यंवैकुंठलोकम् (त्वत्कथापानमात्रेणभक्तिज्ञानवैराग्यसम्पन्नाःसंतोंऽजसातरंतीत्यर्थः) ४५ (तथान्येपि) आत्मनिसमाधिर्मनःस्थैर्यंसएवयोगउपायस्तस्यबलेन (प्रकृतिंजित्वाधीराःसंतःत्वामेवविशंति परंतुतेषांश्रमःस्यात्) ज्ञानयोगतःश्रमेणमोक्षःसत्संगतस्त्वत्कथाश्रवणादिनात्वनायासेनैव अहंममताविष्टानांतुनकथंचिदितिभावः ४६ तदेवंस्तुत्वाप्रार्थयंते चतुर्भिः तत्तस्मात् हेआद्य तेत्वदीयावयंयस्माल्लोकानांसिसृक्षयात्वयाऽनुसृष्टाः क्रमेणोत्पादिताः त्रिभिरात्मभिःसत्त्वादिस्वभावैरतएवविरुद्धस्वभावत्त्वाद्वियुक्ताःसंतोयदर्थंसृष्टास्तत्स्वविहारतंत्रंत्वत्क्रीडोपकरणंब्रह्मांडंतेतुभ्यंप्रतिहर्तवेप्रतिहर्तुं सृष्ट्वासमर्पयितुंनशक्नुमः (तुमर्थेतवेन्प्रत्ययः) अतस्त्वंनःस्वचक्षुःपरिदेहीतित्रयाणांश्लोकानांचतुर्थेनान्वयः ४७ असामर्थ्यमेवप्रपंचयितुंकार्यस्यातिवैचित्र्यमाहुः भोअज कालेतत्तदवसरे बलिंभोगंयावत्साकल्येनतेतुभ्यंहरामसमर्पयाम यथायेनप्रकारेणान्नमदामभक्षयाम (यथालोकाअन्नलक्षणं बलिंसमर्पयंतितथातुभ्यंभोगलक्षण बलिंहरामेत्यर्थःअन्नमदाम) इत्येनान्नमात्रंचास्माकमैश्वर्येणतुभोगस्तवैवेत्युक्तं उभयेषांतवचास्माकं (बलिंहरंतःयत्रतद्दत्तचक्षुषाराचितआयतने) स्थित्वा इमेजीवाअनूहाअप्रत्यूहानिर्विघ्नाः यद्वा अनूहा अवितर्का निःसंशयाइत्यर्थः तथाचश्रुतिः " ताएनमब्रुवन्नायतनंनःप्रजानीहि यस्मिन्प्रतिष्ठिताअन्नमदाम"इति ४८ अवश्यंचत्वयाऽस्माकमेषांचकार्योपाधीनांजीवानांवृत्तिःपरिकल्पनीयाजनकत्वादित्याहुः नोऽस्माकंसान्वयानांसकार्याणां यद्वा अन्वेतीत्यन्वयः (परिणामि) कारणंतत्सहितानांत्वमेवाद्यःकारणम् अत्रहेतवः कूटस्थोऽविक्रियः पुरुषोऽधिष्ठाता पुराणःपुरातनः एतदुपपादयंति त्वमिति हेदेव अजएवत्वंगुणानांसत्त्वादीनांकर्मणांजन्मादीनांचयोनौकारणभूतायांशक्त्यांमायायांप्रथमंरेतआदधेनिहितवानसीत्यर्थः कीदृशम् कविंसर्वज्ञंमहत्तत्त्वरूपम् ४९

श्लोकाः

तान्वाअसद्वृत्तिभिरक्षिभिर्येपराहृतांतर्मनसःपरेश ॥ अथोनपश्यंत्युरुगायनूनंयेतेपदन्यासविलासलक्ष्म्याः ४४ पानेनतेदेवकथासुधायाःप्रवृद्धभक्त्याविशदाशयाये ॥ वैराग्यसारंप्रतिलभ्यबोधंयथांऽजसाऽन्वीयुरकुंठधिष्ण्यम् ४५ तथाऽपरेचात्मसमाधियोगबलेनजित्वाप्रकृतिंबलिष्ठाम् ॥ त्वामेवधीराःपुरुषंविशंतितेषांश्रमःस्यान्नतुसेवयाते ४६ तत्तेवयंलोकसिसृक्षयाऽद्यत्वयाऽनुसृष्टास्त्रिभिरात्मभिःस्म ॥ सर्वेवियुक्ताःस्वविहारतंत्रंनशक्नुमस्तत्प्रतिहर्तवेते ४७ यावद्बलिंतेऽजहरामकालेयथावयंचान्नमदामयत्र ॥ यथोभयेषांतइमेहिलोकाबलिंहरंतोऽन्नमदंत्यनूहाः ४८ त्वन्नःसुराणामसिसान्वयानांकूटस्थआद्यःपुरुषःपुराणः ॥ त्वंदेवशक्त्यागुणकर्मयोनौरेतस्त्वजायांकविमादधेऽजः ४९

४४
४५

॥२२॥

चूर्णिका

४४ ४५ ४६ अतोस्मान्पाहिइत्यादिस्तुत्वाप्रार्थयंते हेदेवयथास्माभिःब्रह्मांडरचनास्यात्तथाअनुग्रहोविधीयताम् ४७ ४८ ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

तथा ततस्तस्याःशक्तेः हेआत्मन्देव सत्प्रमुखामहदादयोवयंयदर्थंबभूविम (जाताः) तत्किंतेकार्यंकरवाम सृष्टिमितिचेत्तत्राहुः तर्हिनोऽस्माकंत्वंस्वचक्षुःस्वीयंज्ञानंशक्त्यासहपरिदेहिप्रयच्छ (क्रियार्थे सृष्ट्यर्थे इत्यर्थः) यस्मात्त्वत्तएवानुग्रहोयेषांतेयदनुग्रहास्तेषामस्माकंक्रियार्थे इयानेवएतावाननुग्रहोयेषामित्येकंवापदम् त्वदीयज्ञानक्रियाशक्तिभ्यामेववयंसृष्टौक्षमा नान्यथेत्यर्थः ५० इतितृतीयेटीकायां पंचमोऽध्यायः ५ ॥ ७ ॥ ॥ षष्ठेतैरीश्वराविष्टैःसृष्टिमाहविराट्तनोः ॥ अधिदैवादिभेदंचतत्रैवभगवत्कृतम् ॥ स्वशक्तीनांमहदादीनामसमेत्यामिलित्वासतीनांस्थितानाम् प्रसुप्तंलोकतंत्रंविश्वरचनायासाम् यद्वा प्रसुप्तजीवोपकरणानांगतिंस्थितिंदृष्ट्वाअविशदित्युत्तरेणान्वयः १ कालेनसंज्ञाउद्बोधोयस्याः (ताम्) कालयतिक्षोभयतिस्वकार्याणीतिवाकालसंज्ञाप्रकृतिस्तांशक्तिं प्रकृत्यासहप्रवेशात्त्रयोविंशतितत्त्वानामित्युक्तं (तानितुमहदाद्याः सप्तप्रकृतयः षोडशविकाराश्चेति तेषांगणं) अंतर्यामितयाप्राविशत् २ चेष्टारूपेणक्रियाशक्त्या सुप्तं कर्म तेषांक्रियांजीवानामदृष्टंवा (प्रलये सुप्तंप्रबोधयन्कार्योन्मुखं कुर्वन्) ३ प्रबुद्धंकर्मक्रियाशक्तिर्यस्यसत्रयोविंशतेः (तत्त्वानां) गणः दैवेनेश्वरेणप्रेरितः मात्राभिरंशैः अधिपूरुषंविराट्देहम् ४ जननमेवाह परेणेश्वरेण विश्वसृजांतत्त्वानांगणः मात्रया चुक्षोभ परिणतोनसर्वात्मना यस्मिल्लोकाःस्थिताः ५ सपुरुषोऽधिपुरुषइत्युक्तः (योविराड्देहः) आंडकोशेब्रह्मांडमध्ये सर्वैःसत्त्वैरनुशायिभिर्जीवैःसहितः अप्सुगर्भोदके ६ (विश्वसृजांतत्त्वानां) गर्भःकार्यरूपोविराट् देवशक्तिर्ज्ञानशक्तिस्तयैकधाहृदयावच्छिन्नचैतन्यरूपेण कर्मशक्तिःक्रियाशक्तिस्तयादशधाप्राणरूपेण (तत्र) प्राणादयःपंच " नागःकूर्मश्चकृकलोदेवदत्तोधनंजयः " इत्येतेपंचैवंवृत्तिभेदेनदशविधः प्राणः आत्मशक्तिर्भोक्तृशक्तिस्तयाध्यात्मादिभेदेनत्रिधाऽत्मानंविभक्तंकृतवान् ७ एवंविभागसामर्थ्यायतस्योत्कर्षमाह एषहीति अशेषसत्त्वानां (समस्त-) प्राणिनामात्मा-व्यष्टीनांतदंशत्वात् अंशोजीवः अवतारत्वोक्तिस्तस्मिन्नारायणाविर्भावाभिप्रायेण (यत्र यस्मिन्पुरुषाख्येऽवतारे) ८

ततोवयंसत्प्रमुखायदर्थेबभूविमात्मन्करवामकिंते॥त्वन्नःस्वचक्षुःपरिदेहिशक्त्यादेवक्रियार्थेयदनुग्रहाणाम् ५०इतिश्रीमद्भागवतेमहा०तृतीयस्कंधेपंचमोऽध्यायः ५ ॥ ॥ ऋषिरुवाच ॥ ॥ इतितासांस्वशक्तीनांसतीनामसमेत्यसः ॥ प्रसुप्तलोकतंत्राणांनिशाम्यगतिमीश्वरः १ कालसंज्ञांतदादेवींबिभ्रच्छक्तिमुरुक्रमः ॥ त्रयोविंशतितत्त्वानांगणंयुगपदाविशत् २ सोऽनुप्रविष्टोभगवांश्चेष्टारूपेणतंगणम् ॥ भिन्नंसंयोजयामाससुप्तंकर्मप्रबोधयन् ३ प्रबुद्धकर्मादैवेनत्रयोविंशतिकोगणः ॥ प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपूरुषम् ४ परेणविशतास्वस्मिन्मात्रयाविश्वसृग्गणः ॥ चुक्षोभान्योऽन्यमासाद्ययस्मिँल्लोकाश्चराचराः ५ हिरण्मयःसपुरुषःसहस्रपरिवत्सरान् ॥ आंडकोशउवासाप्सुसर्वसत्त्वोपबृंहितः ६ सवैविश्वसृजांगर्भोदेवकर्मात्मशक्तिमान् ॥ विबभाजात्मनात्मानमेकधादशधात्रिधा ७ एषह्यशेषसत्त्वानामात्मांशःपरमात्मनः ॥ आद्योऽवतारोयत्रासौभूतग्रामोविभाव्यते ८

श्लोकाः ५० / ८

चूर्णिका

इतितृतीयेपंचमः ५ ॥ ७ ॥ ॥ मैत्रेयउवाच ॥ इतिस्वशक्तीनांतासांगतिंदृष्ट्वाकालसंज्ञांशक्तिंगृहीत्वाप्रकृत्यादित्रयोविंशतितत्त्वानांगणंभगवान्युगपत्आविशत् तदासगणःस्वांशैःविराट्देहंजनयामास १ २ ३ ४ ५ सःविराट्अंतर्यामीआंडकोशेअप्सुवहुकालंवसन् ६ आत्मानंएकधाहृदयावच्छिन्नचैतन्येनत्रिधाअध्यात्मादिनादशधाप्राणरूपेणव्यभजत् ७ ८

CC-0. In Public Domain. Digitization by eGangotri

टीका

पूर्वश्लोकार्थंविवृणोति साध्यात्मः अध्यात्मानींद्रियाणितत्सहितः विराडितिसर्वत्र (प्राणादिनागादि भेदेन प्राणोदशधा) ९ अध्यात्मादिभेदंप्रपंचयितुमाह स्मरन्निति विज्ञापितं यावद्बलितेऽजहरामेत्या दि (तत्स्मरन्) स्वेनतेजसाचिच्छक्त्या विराजं अतपदेवंकरिष्यामीत्यालोचितवान् " यस्यज्ञानमयंतप " इतिश्रुतेः विवृत्तयेविविधवृत्तिलाभाय १० (अभितप्तस्यालोचितवतःसकाशाद्देवानामायत नानि निरभिद्यंतविवृतानि) मेमत्तःशृणु ११ आयतनान्येवाह तस्याग्निरित्यादिचतुर्दशभिः (तस्यविराजः) आस्यंनिर्भिन्नं पृथक्जातंपदंस्वस्थानं स्वांशेनस्वशक्त्यावाचासह (लोकपालोऽग्निः) आवि शत् असौजीवः (यया वाचा) वक्तव्यंप्रतिपद्यते शब्दमुच्चारयतीत्यर्थः सर्वत्रयन्निर्भिन्नं (मुखादि) तदधिष्ठानं अग्न्यादिप्रथमांतमधिदैवम् वागादींद्रियंतृतीयांतमध्यात्मम् प्रतिपत्तव्यमधिभूतम् १२ हरेःविराजः (प्रतिपद्यते जानाति) १३ (विष्णोर्विराजः नासेनासापुटद्वयमधिष्ठानं यतोघ्राणात्) १४ त्वष्टाआदित्यः १५ प्राणेनेति प्राणवद्देहव्यापिनात्वगिंद्रियेणेत्यर्थः (चर्माणित्वगिंद्रियस्थानानि) १६ (स्वंधिष्ण्यं स्थानं कर्णशष्कुलीरूपं) शब्दस्यसिद्धिंज्ञानम् १७ त्वचंचर्म ओषधीरोषधयः त्वगिंद्रियस्यैवस्थानभेदेनविषयद्वयंकंडूः स्पर्शश्च तत्रचायंनामभेदोदेवताभदश्चेतिद्वितीयस्कंधएवव्याख्यातम् १८ कःप्रजापतिः (मेढ्रं गुह्यं रेतसाउपस्थेंद्रियेणेत्यर्थः) १९ (विसर्गं मलमूत्रोत्सर्गम्) २० स्वर्पतिःस्वर्गस्यपतिः वार्तयाक्रयविक्रयादिशक्त्या प्राणेंद्रियरूपया वृत्तिंजीविकाम् (आदानाख्याम्) २१

॥२४॥

श्लोकाः ९ — २१

साध्यात्मःसाधिदैवश्चसाधिभूतइतित्रिधा ॥ विराट्प्राणोदशविधएकधाहृदयेनच ९ स्मरन्विश्वसृजामीशोविज्ञापितमधोक्षजः ॥ विराजमतपत्स्वेनतेजसैषांविवृत्तये १० अथतस्याभितप्तस्यकतिचायतनानिह ॥ निरभिद्यन्तदेवानांतानिमेगदतःशृणु ११ तस्याग्निरास्यंनिर्भिन्नंलोकपालोऽविशत्पदम् ॥ वाचास्वांशेनवक्तव्यंययाऽसौप्रतिपद्यते १२ निर्भिन्नंतालुवरुणोलोकपालोऽविशद्धरेः ॥ जिह्वयांशेनचरसंययासौप्रतिपद्यते १३ निर्भिन्नेअश्विनौनासेविष्णोराविशतांपदम् ॥ घ्राणेनांशेनगंधस्यप्रतिपत्तिर्यतोभवेत् १४ निर्भिन्नेअक्षिणीत्वष्टालोकपालोऽविशद्विभोः ॥ चक्षुषांऽशेनरूपाणांप्रतिपत्तिर्यतोभवेत् १५ निर्भिन्नान्यस्यचर्माणिलोकपालोनिलोऽविशत् ॥ प्राणेनांशेनसंस्पर्शंयेनासौप्रतिपद्यते १६ कर्णावस्यविनिर्भिन्नौधिष्ण्यंस्वंविविशुर्दिशः ॥ श्रोत्रेणांशेनशब्दस्यसिद्धिंयेनप्रपद्यते १७ त्वचमस्यविनिर्भिन्नांविविशुर्धिष्ण्यमोषधीः ॥ अंशेनरोमभिःकंडूंयैरसौप्रतिपद्यते १८ मेढ्रंतस्यविनिर्भिन्नंस्वधिष्ण्यंकउपाविशत् ॥ रेतसांशेनयेनासावानंदंप्रतिपद्यते १९ गुदंपुंसोविनिर्भिन्नंमित्रोलोकेशआविशत् ॥ पायुनांऽशेनयेनासौविसर्गंप्रतिपद्यते २० हस्तावस्यविनिर्भिन्नाविंद्रः स्वःपतिराविशत् ॥ वार्तयांशेनपुरुषोययावृत्तिंप्रपद्यते २१

चूर्णिका

९ १० अथतस्यआयतनानिंनिरभिद्यंततानिशृणु ११ आदौतस्यआस्यंनिर्भिन्नम् तत्रअग्निर्देवतावाक्इंद्रियम् वक्तव्यंविषयः १२ ततः तालुअधिष्ठानम् वरुणःदेवता जिह्वा इंद्रियम् रसोविषयः १३ ततःनासिका अधिष्ठानंअश्विनौदेवतेघ्राणंइंद्रियंगंधोविषयः १४ अक्षिणीअधिष्ठानंसूर्यःदेवता चक्षुःइंद्रियंरूपंविषयः १५ चर्मअधिष्ठानंअनिलोदेवता त्वक्इंद्रियंस्पर्शोविषयः १६ कर्णौअधिष्ठानंदिशःदेवताश्रोत्रंइंद्रियंशब्दोविषयः १७ १८ मेढ्रं अधिष्ठानंप्रजापतिःदेवतारेतःइंद्रियसुखंविषयः १९ गुदंअधिष्ठानंमित्रःदेवता पायुः इंद्रियं विसर्गःविषयः २० हस्तौअधिष्ठानं इंद्रःदेवता वार्ताइंद्रियं जीविकाविषयः २१

---

१ ' न वृत्तये इत्येकस्मिन्पुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (गत्यापादेंद्रियेणेत्यर्थः प्राप्यंगमनक्रिययासाध्यम्) २२ विक्रियांसंकल्पादिरूपाम् २३ आत्मानमहंकारम् अभिमन्यतेऽनेनेत्यभिमानोरुद्रःकर्मणाऽहंवृत्त्या कर्तव्यमितिक्रियाम् २४ सत्त्वमितिबुद्धिचित्तयोरभेदेननिर्देशः महानितिब्रह्मा चित्तेनचेतनया (विज्ञानमनुसंधानं निश्चयो वा) २५ त्रिलोकोत्पत्तिमाह शीर्ष्णइति (अस्यविभोःद्यौः स्वर्गःखमंतरिक्षं येषुस्वर्गादिषु गुणानां सत्त्वादीनां) वृत्तयः परिणामाः (सुरादयः प्रतीयंते दृश्यंते) २६ एतदेवप्रपंचयतिद्वाभ्याम् आत्यंतिकेनोर्जितेन पणव्यवहारे पणंतेयागादिनाव्यवहरंतीतिपणयोमनुष्यास्ताननुएतदुपकरणभूतायेगवादयस्तेपिधरांप्रपेदिरे २७ तृतीयंतमस्तदीयेनतामसेन (स्वभावेन) उभयोर्द्यावापृथिव्योरंतरंमध्यंव्योमांतरिक्षंतदेवभगवतोनाभिस्तामाश्रितारुद्रपार्षदारुद्रस्यपार्षदानांभूतादीनांगणाः २८ अवर्त्ततप्रवृत्तम् ब्रह्मवेदः यस्तून्मुखत्वान्मुखोद्भवत्वाद्वर्णानांमुख्योमुखमिवप्रथमोगुरुश्च (वर्णानां) अभूत् सोऽपिमुखतोऽवर्ततेत्यनुषंगः अध्यापनादिनाब्राह्मणस्यवेदोवृत्तिः तयावृत्त्यासहब्राह्मणोमुखतोजातइत्यर्थः एवमुत्तरत्रवर्णत्रयेऽपि ज्ञातव्यम् २९ क्षत्रं पालनरूपावृत्तिस्तत्क्षत्रमनुव्रतोऽनुसृतःक्षत्रियोऽपिबाहुभ्योवर्त्ततइत्यर्थः तदनुव्रतत्वमेवाह यइति पौरुषःपुरुषस्यविष्णोरंशः कंटकाश्चोरादयस्तेभ्योयत्क्षतमुपद्रवस्तस्मात्रायतेरक्षति ३० विशःकृष्यादिव्यवसायाः लोकस्यवृत्तिकरीर्जीविकाहेतवः तस्यविभोरूर्वोःप्रवृत्ताः तदुद्भवऊरुजोवार्त्तांजीविकांयःस्ववृत्त्यासंपादितवान् ३१ (ब्राह्मणादीनां याशुश्रूषा सल्लक्षणस्य धर्मस्य सिद्धये) तस्यां शुश्रूषायां निमित्तभूतायांयस्यवृत्त्याहरिःस्वयमेवतुष्यते ३२ यद्यस्माज्जाताः (तं हरिं स्वगुरुमंतःकरणविशुद्ध्यर्थं यजंति) गुरुत्वाज्जनकत्वाद्वृत्तिप्रदत्वाच्च हरेराराधनंतेषांपरोधर्मइत्यर्थः ३३ भोक्षत्तःदैवकर्मात्मरूपिणःकालकर्मस्वभावशक्तिमतोभगवतोयोगमायाबलेनोज्जृंभितमेताद्विराड्रूपमुपाकर्त्तुंसाकल्येननिरूपयितुंकःश्रद्दध्यादिच्छेत् इच्छाऽप्यशक्या निरूपणंतुदूरतइत्यर्थः ३४

॥२५॥ पादावस्यविनिर्भिन्नौलोकेशोविष्णुराविशत्॥गत्यास्वांशेनपुरुषोययाप्राप्यंप्रपद्यते २२ हृदयंचास्यनिर्भिन्नंचंद्रमाधिष्ण्यमाविशत्॥ मनसांशेनयेनासौविक्रियांप्रतिपद्यते२३आत्मानंचास्यनिर्भिन्नमभिमानोऽविशत्पदम्॥कर्मणांशेनयेनासौकर्तव्यंप्रतिपद्यते२४सत्त्वंचास्यविनिर्भिन्नंमहान्धिष्ण्यमुपाविशत् ॥ चित्तेनांशेनयेनासौविज्ञानंप्रतिपद्यते २५ शीर्ष्णोऽस्यद्यौर्धरापद्भ्यांखंनाभेरुदपद्यत॥गुणानांवृत्तयोयेषुप्रतीयंतेसुरादयः२६आत्यंतिकेनसत्त्वेनदिवंदेवाःप्रपेदिरे ॥ धरांरजःस्वभावेनपणयोयेचताननु २७ तार्त्तीयेनस्वभावेनभगवन्नाभिमाश्रिताः॥ उभयोरतरंव्योमयेरुद्रपार्षदांगणाः२८मुखतोऽवर्त्ततब्रह्मपुरुषस्यकुरूद्वह ॥ यस्तून्मुखत्वाद्वर्णानांमुख्योऽभूद्ब्राह्मणोगुरुः २९ बाहुभ्योवर्त्ततक्षत्रंक्षत्रियस्तदनुव्रतः॥ योजातस्त्रायतेवर्णान्पौरुषःकंटकक्षतात् ३० विशोवर्त्ततस्योर्वोर्लोकवृत्तिकरीर्विभोः॥ वैश्यस्तदुद्भवोवार्त्तांनृणांयःसमवर्तयत् ३१ पद्भ्यांभगवतोजज्ञेशुश्रूषाधर्मसिद्धये ॥ यस्यांजातःपुराशूद्रोयद्वृत्त्यातुष्यतेहरिः ३२ एतेवर्णाःस्वधर्मेणयजंतिस्वगुरुंहरिम्॥श्रद्धयाऽत्मविशुद्ध्यर्थंयज्जाताःसहवृत्तिभिः ३३ एतत्क्षत्तर्भगवतोदैवकर्मात्मरूपिणः ॥कःश्रद्दध्यादुपाकर्तुंयोगमायाबलोदयम् ३४

श्लोकाः २२/३४

चूर्णिका पादौ अ० विष्णुःदे० गतिःइं०प्राप्यं वि० २२ हृदयं अ० चंद्रः दे० मनः इं० संकल्पादिविक्रिया वि० २३ त्वक् अधिष्ठानं ओषधयः दे०रोम इं०कंडूतिः वि०अहंकारः अ० रुद्रः दे० अहंवृत्तिः इं० क्रिया वि०२४ बुद्धिः अ० ब्रह्मा दे०चित्तं इं०विज्ञानं वि० २५ २६ २७ २८ अस्यविराट्रूपस्यशिरसःद्यौःउत्पन्नापद्भ्यांधरानाभेःखंमुखतः ब्रह्म २९ ॥२५॥
बाहुभ्यांक्षत्रियः ३० ऊरुभ्यांवैश्यः ३१ पद्भ्यांशूद्रः ३२ ३३ हेक्षत्तःएतत् भगवतःविराट्रूपं साकल्येनकथयितुंकःसमर्थःभवेत् ३४

---

१ बुद्धिंचास्यविनिर्भिन्नांवागीशोधिष्ण्यमाविशत् । बोधेनांशेनबोद्धव्यंप्रतिपत्तिर्यतोभवेत् ॥ नायंश्लोकः सर्वत्रपुस्तकेषु परंच द्वाविंशाग्रतएकस्मिन्मुद्रितपुस्तके भाति ।

CC-0. In Public Domain. Digitization by eGangotri

अंगविदुरअथापिहरेःकीर्तिंकीर्तयामि यथाश्रुतंगुरुमुखात्तदपिनसर्वात्मना किंतु यथामतिस्वमत्यनुसारेण (तत्किमर्थं) अन्याभिधाहरिव्यतिरिक्तार्थाभिधानंतयाऽसतीं (दुष्टां) मलिनांस्वीयांवाचंसत्कर्त्तुं पवित्रीकर्तुम् ३५ (नकेवलंवाचःसत्कारइत्येवफलं किंतु) अज्ञात्वापियथामतिकीर्तनेश्रवणेवाऽऽवश्यकंकैवल्यमित्याह (एकान्तेति सुश्लोकमौलेः हरेःगुणानुवादं पुंसांवचसः) एकांततोलाभं (अव्यभिचारिफलं) तुनिश्चितमाहुः श्रुतेःश्रोत्रस्य च (विद्वद्भिः) उपाकृतायांनिरूपितायाम् उपसंप्रयोगं (उप) सन्निधौ (संप्रयोगंसम्यक्) अर्पणम् (एकाग्रतयाश्रवणमितियावत् तमेकांतलाभमाहुः) ३६ नचातीवज्ञानेनिर्बंधःकर्तव्योब्रह्मणोऽपिदुर्ज्ञेयत्वादित्याह आत्मनोहरेर्महिमायोगविपक्वयाऽपिधियासंवत्सरसहस्रांतेऽपिआदिकविनाब्रह्मणाऽपिकिमवसितःकिंज्ञातः इतिकाक्वाएतावानितिनज्ञातएवेत्युक्तम् ३७ यद्यस्मात्स्वयमप्यात्माहरिरात्मवर्त्मस्वमायागतिमेतावदितिनवेद अनंतत्वात् (नह्यनंतस्यांताज्ञानेसार्वज्ञविघातखपुष्पाज्ञानेपितथात्वापत्तेः) ३८ अतोदुर्ज्ञेयत्वात्केवलंनमस्करोति यतइति यस्यज्ञानायप्रवृत्तावाचोऽपिमनसासहतमप्राप्यैवन्यवर्ततदुर्ज्ञेयत्वात्नकेवलंवाङ्मनसीअहमहंकारस्याधिष्ठातारुद्रोऽपि इमेइंद्रियाधिष्ठातारोदेवाअन्येच ३९ ॥ ॥ इतिश्रीमद्भागवते महापुराणे तृतीयस्कंधेटीकायांषष्ठोऽध्यायः ६ ॥ ७ ॥ ॥ सप्तमेसंशयच्छेदिप्रतिनंद्यमुनेर्वचः ॥ पुनःक्षत्त्राकृतानानाप्रश्नाःसम्यगुदीरिताः ॥ अथतेभगवल्लीलायोगमायोपबृंहिताः इत्यादिनामायागुणैर्लीलया भगवान्सृष्ट्यादिकरोतीत्येवंब्रुवाणंभारत्याप्रार्थनारूपयाप्रीणयन्निवेत्यभिप्रायाज्ञानेनाक्षेपात् १ (अविकारिणः) निर्विकारस्यक्रियानिर्गुणस्यचगुणाःकथम् (अविकारित्वेहेतुः चिन्मात्रस्येति) लीलयेत्युक्तिः प्रयोजनाभावंपरिहरतिनवस्तुविरोधमितिभावः२ अर्भकवल्लीलाऽपिनयुज्यतेवैषम्यादित्याह (क्रीडायामिति) उद्यमयतिप्रवर्तयतीत्युद्यमः (प्रवर्तकः) अर्भकस्यक्रीडायांप्रवृत्तिहेतुःकामोऽस्ति अन्यतस्तुवस्त्वंतरेणवालांतरप्रवर्तनेनवातस्यक्रीडेच्छाभवति ईश्वरस्यतुस्वतस्तृप्तस्यकथंकामोन्यतः सदा (अन्यतो) निवृत्तस्यचासंगाद्वितीस्यकथमन्यताश्चिक्रीडिषेत्यर्थः ३

श्लोकाः

अथापिकीर्त्तयाम्यंगयथामतियथाश्रुतम् ॥ कीर्तिंहरेःस्वांसत्कर्त्तुंगिरमन्याभिधाऽसतीम् ३५ एकांतलाभंवचसोऽनुपुंसांसुश्लोकमौलेर्गुणवादमाहुः ॥ श्रुतेश्चविद्वद्भिरुपाकृतायांकथासुधायामुपसंप्रयोगम् ३६ आत्मनोऽवसितोवत्समहिमाकविनाऽदिना ॥ संवत्सरसहस्रांतेधियायोगविपक्वया ३७ अतोभगवतोमायामायिनामपिमोहिनी ॥ यत्स्वयंचात्मवर्त्मात्मानवेदकिमुतापरे ३८ यतोऽप्राप्यन्यवर्त्तंतवाचश्चमनसासह ॥ अहंचान्यइमेदेवास्तस्मैभगवते नमः ३९॥ इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कंधेषष्ठोऽध्यायः ६ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एवंब्रुवाणंमैत्रेयंद्वैपायनसुतोबुधः ॥ प्रणियन्निवभारत्याविदुरःप्रत्यभाषत १ ॥ विदुरउवाच ॥ ॥ ब्रह्मन्कथंभगवतश्चिन्मात्रस्याविकारिणः ॥ लीलयाचापियुज्येरन्निर्गुणस्यगुणाःक्रियाः २ क्रीडायामुद्यमोऽर्भस्यकामश्चिक्रीडिषाऽन्यतः ॥ स्वतस्तृप्तस्यचकथंनिवृत्तस्यसदाऽन्यतः ३

३६/३

चूर्णिका

अथापियथागुरुमुखात्श्रुतंतथाहरेःकीर्तिंकथयामि ३५ ३६ अहोभागवतीमायामायिनामपिमोहिनी यस्मात् हरिःस्वमायागतिंएतावत् इतिनवेद अनंतत्वात् ३७ ३८ अपरेकिमुत तस्मैभगवतेनमः ३९ इतितृतीयेषष्ठोऽध्यायः ६ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ विदुरःमैत्रेयात्विराडुत्पत्तिंश्रुत्वाप्रत्यभाषत १ ॥ ॥ विदुरउवाच ॥ हेब्रह्मन्निर्विकारस्यक्रियाःनिर्गुणस्यगुणाः लीलयापिकथंयुज्येरन् २ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यच्चोक्तम् "स्मरन्विश्वसृजामीशोविज्ञापितमधोऽक्षजः" इत्यादिनाऽविद्योपाधेर्जीवस्यभोगार्थमीश्वरःसृष्ट्यादिकरोतीतितदप्याक्षेप्तुमनुवदति अस्राक्षीदिति गुणमयीआत्मनोजीवस्यकर्तृत्वभोक्तृत्वादिमोहोत्पादि
कायामायातयासृष्टवान् तदुक्तंप्रथमे "ययासंमोहितोजीवअत्मानंत्रिगुणात्मकम् । परोऽपिमनुतेनर्थंतत्कृतंचाभिपद्यते" इत्यादिना अत्रच "अतोभगवतोमायामायिनामपिमोहिनी" इतिसंस्थापयतिपाल
यति भत्यभिधास्यतिप्रातिलोम्येनतिरोहितंकरिष्यति पाठांतरेप्रातिलोम्येनात्मन्यभितोधारयिष्यति (इत्यर्थः) ४ एतच्चजीवस्याविद्याश्रयत्वेघटेतनतुतत्संभवतीत्याह देशतइति योऽसौदेशादिभिरवि
लुप्तावबोधः (अविनष्टात्मज्ञानस्वरूपः) आत्माजीवः ब्रह्मस्वरूपत्वात् सकथमजयाऽविद्ययायुज्यते तत्रदेशतोदीपप्रभायाइवलोपोनास्तिसर्वगतत्वात् नकालतोविद्युतइवनित्यत्वात् नावस्थातःस्मृतिवदवि
क्रियत्वात् नस्वतःस्वप्नवत्सत्यत्वात् नान्यतोघटादिवदद्वितीयत्वात् एवमेतैर्यस्यबोधोनलुप्यतेसकथमजयायुज्येत अजाचात्राविद्यैव न (कृष्ण–) माया तस्याअवबोधेनविरोधाभावात् ५ किंच ब्रह्मरूप
त्वादेवजीवस्यसंसारोपिनविद्यतइत्याक्षिपति (भगवानिति) सर्वक्षेत्रेष्ववस्थितोभोक्ताऽपिवस्तुतोभगवानेव चिद्रूपत्वेनतद्व्यतिरेकाभावात् एवंचसत्यमुष्यजीवस्यदुर्भगत्वमानंदादिभ्रंशःकर्मभिर्हेतुभूतैःक्ले
शोवाकुतः कर्मसंबंधाभावात् अन्यथाईश्वरस्यापितत्प्रसंगःस्यादितिभावः ६ अज्ञानमेवसंकटंदुर्गंतस्मिन् तन्मानसंकश्मलंमोहंपराणुदापाकुरु ७ चोदितआक्षिप्तः स्मयन्निवप्रौढिमाविष्कुर्वन्निव वस्तुतस्तुगत
स्मयः (यद्वास्मयन्मन्दंहसन्) ८ भगवतोऽचिंत्यशक्तेरीश्वरस्यसेयंमाया नयेनतर्केणविरुध्यतइतियत् तर्कविरोधमेवानुवदति विमुक्तस्यैवपुंसोऽविद्ययाबंधनंकार्पण्यंचेति ९ अत्रोदाहरणमाह यद्यथाअर्थे
नाशिरश्छेदादिनाविनाऽप्युपद्रष्टुःस्वप्नसाक्षिणो ममेदंशिरश्छिन्नमित्यात्मविपर्ययःकेवलंमृषैवप्रतीयते (शिरश्छेदेन मृतस्य तादृशप्रतीत्यसंभवात्) १० तर्हीश्वरस्यापिकिंनप्रतीयेतेत्यत्राह यथाजलेप्रतिबिं
बितस्यैवचंद्रमसोजलोपाधिकृतःकंपादिधर्मोदृश्यते नत्वाकाशेस्थितस्य तथाऽनात्मनोदेहादेर्धर्मोऽसन्नपितदभिमानिनोद्रष्टुरात्मनोजीवस्यैव नत्वीश्वरस्येत्यर्थः ११ तन्निवृत्त्युपायमाह सवैअनात्मनोगुणो
निवृत्तिधर्मेण (शमदमादिना) वासुदेवस्यानुकंपातयाचतस्मिन्भक्तियोगस्तेनातिरोधत्तेऽदृश्योभवति शनैरित्यनेनसाधनानुसारेणेत्युक्तम् १२

श्लोकाः ४/१२

अस्राक्षीद्भगवान्विश्वंगुणमय्यात्ममायया ॥ तयासंस्थापयत्येतद्भूयःप्रत्यभिधास्यति ४ देशतःकालतोयोसाववस्थातःस्वतोऽन्यतः ॥ अविलुप्तावबोधा
त्मासयुज्येताजयाकथम् ५ भगवानेकएवैषसर्वक्षेत्रेष्ववस्थितः ॥ अमुष्यदुर्भगत्वंवाक्लेशोवाकर्मभिःकुतः ६ एतस्मिन्मेमनोविद्वन्खिद्यतेऽज्ञानसंकटे ॥ त
न्नःपराणुदविभोकश्मलंमानसंमहत् ७ ॥ श्रीशुकउवाच ॥ ॥ सइत्थंचोदितःक्षत्रातत्त्वजिज्ञासुनामुनिः ॥ प्रत्याहभगवच्चित्तःस्मयन्निवगतस्मयः ८
मैत्रेयउवाच ॥ ॥ सेयंभगवतोमायायन्नयेनविरुद्ध्यते ॥ ईश्वरस्यविमुक्तस्यकार्पण्यमुतबंधनम् ९ यदर्थेनविनाऽमुष्यपुंसआत्मविपर्ययः ॥ प्रतीयतउ
पद्रष्टुःस्वशिरश्छेदनादिकः १० यथाजलेचंद्रमसःकंपादिस्तत्कृतोगुणः ॥ दृश्यतेऽसन्नपिद्रष्टुरात्मनोऽनात्मनोगुणः ११ सवैनिवृत्तिधर्मेणवासुदेवानुकंप
या ॥ भगवद्भक्तियोगेनतिरोधत्तेशनैरिह १२

चूर्णिका

यःस्वमाययाविश्वंअस्राक्षीत् ४ यःदेशतः कालतः स्वतः अवस्थातः स्वतः अन्यतः अविलुप्तात्मबोधःसः माययाकथंयुज्येत एतत्वद ५ ६ ७ ८ ॥ मैत्रेयउवाच ॥
सेयंभगवतोमायायातर्केणनज्ञायते ९ यथास्वप्नेममशिरः छिन्नंइतिमृषासत् सत्यमेवप्रतीयतेतद्वत् १० ११ सामायानिवृत्तिधर्मेणवासुदेवकृपयाभगवद्भक्तियोगेनचशनैः
तिरोधत्ते तदाक्लेशाः विलीयंते १२

॥२७॥ ॥२७॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

तर्हिसर्वानर्थनिवृत्तिःकदेत्यपेक्षायामाह यदेंद्रियाणामुपरामोनैश्चल्यं कद्रष्टुरात्मन्यंतर्यामिरूपे अथानंतरमेवकृत्स्नक्लेशविलयमात्रेदृष्टांतः संसुप्तस्यैवेति नतुपुनरुत्थाने १३ भक्तियोगेनक्लेशनिवृत्तिंदर्शयति अशेषेति गुणानामनुवादश्चश्रवणंच आत्मनिमनसिलब्ध्वा (तस्य चरणारविंदयोः परागाणां सेवनेरतिः शर्मंविधत्ते इतिकुतः पुनः) श्रवणकीर्त्तनापेक्षयासप्रेमध्यानेकिंपुनर्न्यायोक्तिः १४ उत्तरमभिनंदन्नात्मनःकृतार्थतामाविष्करोति संछिन्नइतिषड्भिः चिद्रूपत्वाविशेषेऽपिकथमीश्वरस्यजगत्कर्तृत्वादिकथंवाजीवस्यसंसारइतियःसंशयो (मह्यं) ममासीत्सतवसूक्तंसोपपत्तिकंवाक्यमेवासिःखड्गस्तेनसंछिन्नः अतइदानींमेमनउभयत्रापीश्वरस्वातंत्र्येजीवपारतंत्र्येचसंप्रधावतिसम्यक् (असंशयं) प्रविशति एवंवा (ज्ञेयम्) अविलुप्तावबोधरूपस्यात्मनःकथमविद्ययाबंधःकुतोवातन्निवृत्तिरितिसंशयः (स छिन्नः) उभयत्रेतिबंधेमोक्षेचेत्यर्थः १५ यस्मात्त्वयासाधुव्याहृतं किंतत्तद्धरेःशक्तिर्याआत्ममायाजीवविषयामायातदयनंतदाश्रयमेतद्दुर्भगत्वादिकंभातीति यद्यस्मात्स्वशिरश्छेदादिवदपार्थमवस्तुभूतंनिर्मूलंमूलशून्यं च यस्मादस्य (विश्वस्य) मूलंविश्वस्यमूलंस्वाज्ञानंविनाबहिर्नास्ति १६ अल्पज्ञत्वात्पूर्वंममसंशयोजातइत्याह यश्चेति मूढतमोदेहाद्यासक्तोयश्चबुद्धेःप्रकृतेःपरमीश्वरंप्राप्तस्तौसुखंयथाभवतितथाएधेते जीवतइत्यर्थः संशयक्लेशाभावात् यस्तु (अंतरितो मध्यवर्ती) दुःखानुसंधानेनप्रपंचंजिहासतिस्वानंदसंवेदनाभावाद्धातुंनशक्नोति सतुक्लिश्यतीत्यर्थः १७ इदानींतुकृतार्थोऽस्मियतस्त्वयासंशयश्छिन्नःकेवलंबाधितानुवृत्तिरेवावशिष्टासाऽपियुष्मत्प्रसादान्निवर्त्तिष्यतइत्याह (अर्थेति) नात्मनः (आत्मनि न विद्यते अनात्मा तस्य) अनात्मनःप्रपंचस्यप्रतीतस्याप्यर्थाभावमर्थोत्रनास्ति किंतु प्रतीतिमात्रमितियुष्मच्चरणसेवयाविनिश्चित्यतांप्रतीतिमप्यहंपराणुदेऽपनेष्यामीत्यर्थः १८ (एषांयुष्माकंसेवया कूटस्थस्यांतर्यामिणोनिर्विकारस्य वा) मधुद्विषःपादयोरतिरासःप्रेमोत्सवस्तीव्रोदुर्वारः स्वाभाविकः व्यसनं संसारमर्दयतिनाशयतीतितथा १९ अहोदुर्लभंप्राप्तंमयेत्याह दुरापादुर्लभा (का) वैकुंठस्यविष्णोस्तल्लोकस्यवावर्त्मसुमार्गभूतेषुमहत्सु सेवा यत्रयेषु (महत्सु) महत्सेवयाहरिकथाश्रवणंततोहरौप्रेमतो नचदेहाद्यनुसंधानमपिनिवर्ततइतितात्पर्यम् २०

श्लोकाः १३/२०

यदेंद्रियोपरामोऽथद्रष्टात्मनिपरेहरौ ॥ विलीयंतेतदाक्लेशाःसंसुप्तस्येवकृत्स्नशः १३ अशेषसंक्लेशशमंविधत्तेगुणानुवादःश्रवणंमुरारेः ॥ कुतःपुनस्तच्चरणारविं
दपरागसेवारतिरात्मलब्धा १४ विदुरउवाच ॥ संछिन्नःसंशयोमह्यंतवसूक्तासिनाविभो ॥ उभयत्राऽपिभगवन्मनोमेसंप्रधावति १५ साध्वेतद्व्याहृतंविद्वन्ना
त्ममायायनंहरेः ॥ आभात्यपार्थंनिर्मूलंविश्वमूलंनयद्बहिः १६ यश्चमूढतमोलोकेयश्चबुद्धेःपरंगतः ॥ तावुभौसुखमेधेतेक्लिश्यत्यंतरितोजनः १७
अर्थाभावंविनिश्चित्यप्रतीतस्यापिनात्मनः ॥ तांचापियुष्मच्चरणसेवयाऽहंपराणुदे १८ यत्सेवयाभगवतःकूटस्थस्यमधुद्विषः ॥ रतिरासोभवेत्ती
व्रःपादयोर्व्यसनार्दनः १९ दुरापाह्यल्पतपसःसेवावैकुंठवर्त्मसु ॥ यत्रोपगीयतेनित्यंदेवदेवोजनार्दनः २०

चूर्णिका

१३ १४ ॥ विदुरउवाच ॥ ॥ हेमैत्रेयईशस्यकर्तृत्वादिजीवस्यसंसारः इदंकथम् एवंमेसंशयःपूर्वमासीत् सः तेसूक्तासिनाछिन्नःपरंतुअधुनाईशस्वातंत्र्येजीवपारतंत्र्येमेमनः धावति १५ किंचएतत् दुर्भगत्वादिमायाश्रयंत्वयाउक्तंतत्साधु १६ किंच यःमूढः यश्च ईशंप्राप्तः तौसुखंजीवेतेअंतरितःक्लिश्यति १७ अपिच अत्रभवेअर्थोनास्तिकिंतु प्रतीतिर्वर्ततेसापिभवच्चरणसेवयागच्छेत् १८ १९ २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अर्थांतरंप्रस्तुतदुक्तमनुवदतित्रिभिः सृष्ट्वेति (अग्रेजगदादौ) विकारैरिंद्रियादिभिः सहितानि उद्धृत्यतदंशैर्विराजंसृष्ट्वा २१ प्रविष्टस्यस्वरूपमाह यमिति विराजंविशिनष्टि यत्रेति तइमेविश्वेसर्वेलोकाः सविकाशमसं कोचेन २२ प्राणादयः पंच नागादयः पंचेत्येवंदशविधः इंद्रियाणिचअर्थाश्च इंद्रियाणिचेतिपुनरुक्तिस्तद्देवतालक्षणार्था तत्सहितः (इंद्रियाणामर्थैरिंद्रियैश्चसहितः) सर्वोपबृंहकत्वात्प्राणस्यतत्साहित्यम्एवं त्रिविधः प्राणस्त्वयेरितउक्तः तस्यविभूतीर्ब्रह्माद्याविसर्गशब्दवाच्याः (वर्णाविप्रादयश्चयतः नःअस्माकंवदस्वतत्सर्वम्) २३ यत्रयासु (विभूतिषुनप्तृभिःप्रपौत्रैर्दौहित्रैर्वासहिताः प्रजाआसन्याभिःप्रजाभिः) इदंविश्वंततंव्याप्तम् २४ "एवमेतत्पुरापृष्टोमैत्रेयोभगवान्किल" इतिपरीक्षित्प्रश्नोत्तरतयाविदुरमैत्रेयसंवादःप्रस्तावितोऽतस्तानेवविदुरेणकृतान्प्रश्नानाह यावदध्यायसमाप्ति प्रजापतीनांपतिः (सब्रह्मा कांश्चित्क्ष्पेऽकल्पयत्) इत्यादीनांप्रश्नानांवर्णयेतिवक्ष्यमाणेनान्वयः सर्गान्नवविधाननुसर्गांस्तद्भेदान् २५ हेमित्रायाआत्मज (एतेषांप्रजापत्यादीनांवंशान्वंशजानामनुचरितानिचयेआसतेतिष्ठंति) २६ (तेषांलोकानांभूर्लोकस्यच) संस्थांसंनिवेशं (सरीसृपाः सर्पादयः पतत्रिणःपक्षिणःतेषांच) सर्गाणांसंव्यूहंसंविभागं गार्भस्वेदद्विजोद्भिदांगार्भाजरायुजाः स्वेदाच्चद्वाभ्यांचजाताः स्वेदद्विजाउद्भिदश्चतेषाम् (तत्रस्वेदजामत्कुणादयः द्विजाअंडजाःउद्भिदोद्रुमादयः अस्माकंवद) २७(अनुग्रहादिगुणयुक्तैरवतारैर्विश्वस्य) सर्गादीनाश्रयंचसृजतः २८ रूपंलिंगम्शीलमाचारः स्वभावः शमादिस्ततो (रूपतःशीलतस्वभावतश्चयेवर्णादिविभागास्तान्) विकर्षणंविभागं २९ वितानानिविस्तारान् नैष्कर्म्यस्यचज्ञानस्यतदुपायस्यचसांख्यस्यपथोमार्गान् (भगवतास्मृतंप्रणीतं) तंत्रं (चतदुक्तमार्गं) चेत्यर्थः ३० पाखंडानांपंथाः प्रवृत्तिस्तदेववैषम्यम् (तत्प्रीतिलोमनिवेशनंप्रतिलोमविवाहादिलक्षणवतीःयत्संख्याकाः) ३१

॥२९॥

श्लोकाः २१—३१

सृष्ट्वाग्रेमहदादीनिसविकाराण्यनुक्रमात् ॥ तेभ्योविराजमुद्धृत्यतमनुप्राविशद्विभुः २१ यमाहुराद्यंपुरुषंसहस्राङ्घ्र्यूरुबाहुकम् ॥ यत्रविश्वइमेलोकाःसविकाशं समासते २२ यस्मिन्दशविधःप्राणःसेंद्रियार्थेंद्रियस्त्रिवृत् ॥ त्वयेरितोयतोवर्णास्तद्विभूतीर्वदस्वनः २३ यत्रपुत्रैश्चपौत्रैश्चनप्तृभिःसहगोत्रजैः ॥ प्रजाविचित्राकृतयआसन्याभिरिदंततम् २४ प्रजापतीनांसपतिश्चक्लृपेकान्प्रजापतीन् ॥ सर्गांश्चैवानुसर्गांश्चमनून्मन्वंतराधिपान् २५ एतेषामपिवंश्यांश्चवंशानुचरितानिच ॥ उपर्यधश्चयेलोकाभूमेर्मित्रात्मजासते २६ तेषांसंस्थांप्रमाणंचभूर्लोकस्यचवर्णय ॥ तिर्यङ्मानुषदेवानांसरीसृपपतत्रिणाम् ॥ वदनःसर्गसंव्यूहंगार्भस्वेदद्विजोद्भिदाम् २७ गुणावतारैर्विश्वस्यसर्गस्थित्यप्ययाश्रयम् ॥ सृजतःश्रीनिवासस्यव्याचक्ष्वोदारविक्रमम् २८ वर्णाश्रमविभागांश्चरूपशीलस्वभावतः ॥ ऋषीणांजन्मकर्मादिवेदस्यचविकर्षणम् २९ यज्ञस्यचवितानानियोगस्यचपथःप्रभो ॥ नैष्कर्म्यस्यचसांख्यस्यतंत्रंवाभगवत्स्मृतम् ३० पाखंडपथवैषम्यंप्रतिलोमनिवेशनम् ॥ जीवस्यगतयोयाश्चयावतीर्गुणकर्मजाः ३१

चूर्णिका

अपिचयः विराजंसृष्ट्वातदनुतंप्राविशत् २१ यंसहस्रांघ्र्यादिविशिष्टंआहुः यत्रेमेलोकाः सविकाशंतिष्ठंति २२ तद्विभूतीःवर्णय सःब्रह्माप्रजापतीन् सर्गान् अनुसर्गान् मनून् मन्वंतराधिपान् कान् अकल्पयत् २३ २४ २५ तेषांवंशान् वंशानुचरितंचलोकत्रयप्रमाणं तिर्यक् मनुष्यदेवसरीसृपपतत्रिणांसर्गंचतुर्विधप्राणिनांउत्पत्तिंवद २६ २७भगवदवताराणांविक्रमं २८वर्णाश्रमविभागान् ऋषीणांजन्मकर्मवेदविभागान् २९ यज्ञविस्तारान् योगज्ञानसांख्यमार्गान्३०पाखंडप्रवृत्तिंजीवस्यगतीःधर्मार्थकाममोक्षोपायान् ३१

CC-0. In Public Domain. Digitization by eGangotri

टीका

निमित्तान्युपायान् (अविरोधतः) परस्पराविरोधेन (वार्तायावाणिज्यादेर्दंडनीतेरर्थशास्त्रोक्तस्यराजधर्मस्यश्रुत्युक्तस्यविधिं) ३२ ग्रहादीनांकालचक्रेसंस्थितिं (तत्रनक्षत्राण्यश्विन्यादीनि) ३३ (इष्टंयागादिपूर्तंतडागादितयोः) ३४ येनमार्गेणधर्मस्ययोनिःकारणं) संतुष्येत् येषामितियादृशानां ३५ (अनुव्रतानामनुसृतानां) अनापृष्टमप्यपृष्टमपियद्योग्यं (ममतया) तद्वक्तव्यमितिभावः ३६ प्रतिसंक्रमःप्रलयः तत्रप्रलयेइमंपरमेश्वरंशयानंराजानमिवचामरग्राहिणः (केसेवेरन्) केवानुशेरतेश्रयानमनुस्वपंति ३७ पुरुषस्यसंस्थानंजीवस्यतत्त्वं (स्वरूपं) परेमश्वरस्य (च) स्वरूपं येनांशे नतयोरैक्यंतथाज्ञानंच नैगममौपनिषदं (गुरुशिष्यौ प्रयोजयतितादृशम्) ३८ यानिसूरिभिःप्रोक्तानितस्यज्ञानस्यसाधनानिचब्रूहि गुरुंविनैतन्नभवतीत्याहस्वतइति ३९ मेप्रश्नान्मेमित्रत्वात्स्निग्धत्वादि

॥३०॥ त्यन्वयभेदान्नमेपदस्यपौनरुक्त्यं (हरेःकर्मणांविवित्सयाज्ञातुमिच्छयापृच्छतः अनेनसर्वेषामपिप्रश्नानांतत्रैवतात्पर्यम् अतस्तदनुसारेणैववक्तव्यमितिसूचितम् अजयाविद्ययामित्रत्वान्निरपेक्षसुहृद्भावादित्यर्थः सूर्यरूपत्वाद्भासहितंतमसानष्टचक्षुषः प्रयोजकः) ४० तत्त्वोपदेशेन जीवाभयप्रदानस्य (कलामपिषोडशींनकुर्वीरन्तत्कलयापिनतुल्यानीत्यर्थः) ४१ पुराणेकल्पते प्रकाशतइतिपुराणकल्पोबुभुत्सितोऽर्थः आपृष्टःपुराणकल्पोऽयं (सः) समुनिप्रधानः (संचोदितः प्रवर्तितः अतः प्रवृद्धहर्षः अतएव प्रहसन्निवाह) ४२ इतितृतीयेटीकायांसप्तमोऽध्यायः ७॥ ॥ ७ ॥ ॥ अष्टमेसमभूद्ब्रह्मानाभेस्तुजलशायिनः ॥ तमजानञ्जलेबिभ्यत्तपसाऽतोषयद्विभुम् ॥ १॥ श्रोतारमभिनंदति सतांसेवितुंयोग्यः बतअहो यद्यस्मादिहास्मिन्वंशेलोकपालोधर्मराजस्त्वंबभूविथजातोऽसि कथंभूतःभगवानेवप्रधानभूतोयस्यसः अत्रहेतुःअजितेति प्रतिक्षणंनूतनयसिनवीनांकरोषि १

श्लोकाः

धर्मार्थकाममोक्षाणांनिमित्तान्यविरोधतः । वार्त्तायादंडनीतेश्चश्रुतस्यचविधिंपृथक् ३२ श्राद्धस्यचविधिंब्रह्मन्पितृणांसर्गमेवच ॥ ग्रहनक्षत्रताराणांकालाव यवसंस्थितिम् ३३ दानस्यतपसोवाऽपियच्चेष्टापूर्तयोःफलम् ॥ प्रवासस्थस्ययोधर्मोयश्चपुंसउतापदि ३४ येनवाभगवांस्तुष्येद्धर्मयोनिर्जनार्दनः ॥ संप्रसीद तिवायेषामेतदाख्याहिचानघ ३५अनुव्रतानांशिष्याणांपुत्राणांचद्विजोत्तम ॥ अनापृष्टमपिब्रूयुर्गुरवोदीनवत्सलाः३६ तत्त्वानांभगवंस्तेषांकतिधाप्रतिसंक्रमः $\frac{३२}{१}$

तत्रेमंकउपासीरन्कउस्विदनुशेरते ३७ पुरुषस्यचसंस्थानंस्वरूपंवापरस्यच ॥ ज्ञानंचनैगमंयत्तद्गुरुशिष्यप्रयोजनम् ३८ निमित्तानिचतस्येहप्रोक्तान्यनव सूरिभिः ॥ स्वतोज्ञानंकुतःपुंसांभक्तिर्वैराग्यमेववा ३९ एतान्मेपृच्छतःप्रश्नान्हरेःकर्मविवित्सया ॥ ब्रूहिमेऽज्ञस्यमित्रत्वादजयानष्टचक्षुषः ४० सर्वेवेदा श्चयज्ञाश्चतपोदानानिचानघ ॥ जीवाभयप्रदानस्यनकुर्वीरन्कलामपि ४१ ॥ श्रीशुकउवाच ॥ सइत्थमापृष्टपुराणकल्पःकुरुप्रधानेनमुनिप्रधानः ॥ प्रवृद्ध हर्षोभगवत्कथायांसंचोदितस्तंप्रहसन्निवाह ४२ इतिश्रीमद्भाग० तृतीयस्कंधेविदुरमैत्रेयसंवादेसप्तमोऽध्यायः ७ ॥ मैत्रेयउवाच ॥ सत्सेवनीयोबतपूरुवं शोयल्लोकपालोभगवत्प्रधानः ॥ बभूविथेहाजितकीर्तिमालांपदेपदेनूतनयस्यभीक्ष्णम् १

चूर्णिका ३२ श्राद्धविधिंग्रहादीनांस्थितिं ३३ दानस्यतपसःइष्टापूर्तयोःफलंप्रवासधर्मं ३४ तत्त्वानांप्रलयंपुरुषसंस्थानम् जीवतत्वं औपनिषदंज्ञानं एतान्प्रश्नान् हरेःकर्मविवित्सया मयाकृतान् त्वंब्रूहि ३५ ३६ ३७ ३८ ३९ सर्वेवेदाश्चयज्ञाश्चतपोदानानिचानघ जीवाभयप्रदानस्यनकुर्वीरन्कलामपि ४० ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिविदुरे णपृष्टःसन्मैत्रेयःसर्वंअकथयत् ४१ ४२ ॥ ॥ इतितृतीयेसप्तमः ॥ ७ ॥ ॥ ७ ॥ ॥ मैत्रेयउवाच ॥ ॥ हेविदुरअहोअयंपुरुवंशःसद्भिःसेव्यः यत्रलोकपालः त्वंभूत्वाभगवत्कीर्तिं पदेपदे नूतनयसि १ ॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अल्पसुखायमहद्दुःखंप्राप्तानां (यत्तदग्रेऽमृतमिवपरिणामेविषोपममितिस्मृतेः) तस्यदुःखस्यविरमाय (निर्मूलनाय यद्भागवतमृषिभ्योभगवानाहतदहंत्वत्प्रश्नपरिहाराय) प्रवर्त्तयेप्रारभे २ कोऽसौभगवान्के
भ्यश्चऋषिभ्यआहकथंचत्वयाप्राप्तमित्यपेक्षायामाह आसीनमितिसप्तभिः उर्व्यांपातालतले अकुंठसत्त्वमप्रतिहतज्ञानं अतःसंकर्षणात्परस्यश्रीवासुदेवस्य (तत्त्वंज्ञातुकामाः सनत्कुमारादयोऽपृच्छन्) ३ तमेव
विशिनष्टि स्वमेवधिष्ण्यंस्वीयमाश्रयंवासुदेवसंज्ञंपरमानंदरूपंध्यानपथेऽनुभूयबहुमानयंतंसर्वोत्कर्षेणपूजयंतम् प्रत्यग्धृतमंतर्मुखीकृतम् (अक्षाम्बुजकोशं) नेत्रांबुजमुकुलंकिंचिदुन्मीलयंतं (किमर्थं) कृपाऽवलो
कनेनसनत्कुमारादीनामभ्युदयार्थम् (यंवासुदेवाभिधंकवयआमनंतितंस्वमेवधिष्ण्यम्) ४ मुनीनांविशेषणंसार्धेन स्वर्धुन्याउदकेनार्द्रैरिति श्रीभागवतश्रवणार्थंसत्यलोकात्पातालंप्रत्यवतरंतोनिरंतरंगंगामध्यत
एवावतीर्णाइतिभावः (अतएवं विधैः) चरणावुपधीयेतेयस्मिन्पद्मेतदुपस्पृशंतोनमंतः कथंभूतंतदाह यत्पद्मंप्रेमसाहितंयथाभवत्येवंनानोपहारैः (सर्पराजस्यकन्याः) पूजयंति वरार्थाः पतिकामाः (अस्यसंक

र्षणस्य) ५ कृतानिकर्माणिगृणंतः केन अनुरागेणस्खलंतिपदानियस्मिस्तेनवचसा तानिजानंतीतितज्ज्ञाः सहस्रमेवसाहस्रंकिरीटानांसाहस्रेयेमणिप्रवेकारत्नोत्तमास्तैः प्रद्योतितमुद्दामफणानांसाहस्रंयस्य
तम् अन्वपृच्छन्नितिपूर्वेणान्वयः ६ तेनसंकर्षणेन (निवृत्तिधर्मनिष्ठाय) सनत्कुमारायप्रोक्तम् (अंगहेविदुर सचसनत्कुमारोनिवृत्तिनिष्ठायसांख्यायनायाह) ७ पारमहंस्येधर्मेमुख्यः विवक्षमाणइत्या
त्मनेपदंब्रूञादेशस्यवचेरुभयपदित्वात् (भगवद्विभूतीर्वक्तुमिच्छन्ससांख्यायनोअन्वितायानुगतायतथावृहस्पतेश्चजगाद) ८ (सपराशरः) पुलस्त्येनोक्तइत्यत्रैवमाख्यायिकापितरंराक्षसभक्षितंश्रुत्वाप
राशरोराक्षससत्रेप्रवत्तोवसिष्ठवचनान्निवृत्तस्ततः पुलस्त्येनस्वसंततिरक्षणात्तुष्टेनवरोदत्तः पुराणप्रवक्ताभविष्यसीति ९ तदेवंसंकर्षणात्संप्रदायप्रवृत्तिंप्रदर्श्यविभूतिकथनायपद्मोद्भवंवक्तुमाह उदाप्लुत
मेकार्णवोदकेनिमग्नंयद्यदासीत्तदाअमीलितदृगतिरोहिताचिच्छक्तिरेवश्रीनारायणोनेत्रेनिमीलितवानित्यर्थः मायाविनोदंपरित्यज्यस्वात्मरतौस्वरूपानंदएवकृतोत्सवः अतएवनिरीहोनिष्क्रियःसन् १०

श्लोकाः २/१०

सोऽहंनृणांक्षुल्लसुखायदुःखंमहद्गतानांविरमायतस्य ॥ प्रवर्त्तयेभागवतंपुराणंयदाहसाक्षाद्भगवानृषिभ्यः २ आसीनमुर्व्यांभगवंतमाद्यंसंकर्षणंदेवमकुंठ
सत्त्वम् ॥ विवित्सवस्तत्त्वमतःपरस्यकुमारमुख्यामुनयोन्वपृच्छन् ३ स्वमेवधिष्ण्यंबहुमानयंतंयंवासुदेवाभिधमामनंति ॥ प्रत्यग्धृताक्षांबुजकोशमी
षदुन्मीलयंतंविबुधोदयाय ४ स्वर्धुन्युदर्द्रैःस्वजटाकलापैरुपस्पृशंतश्चरणोपधानम् ॥ पद्मंयदर्चंत्यहिराजकन्याःसप्रेमनानाबलिभिर्वरार्थाः ५ मुहुर्गृ
णंतोवचसानुरागस्खलत्पदेनास्यकृतानितज्ज्ञाः ॥ किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रम् ६ प्रोक्तंकिलैतद्भगवत्तमेननिवृत्तिधर्माभिरता
यतेन ॥ सनत्कुमारायसचाहपृष्टःसांख्यायनायांगधृतव्रताय ७ सांख्यायनःपारमहंस्यमुख्योविवक्षमाणोभगवद्विभूतीः ॥ जगादसोऽस्मद्गुरवेऽन्विता
यपराशरायाथबृहस्पतेश्च ८ प्रोवाचमह्यंसदयालुरुक्तोमुनिःपुलस्त्येनपुराणमाद्यम् ॥ सोऽहंतवैतत्कथयामिवत्सश्रद्धालवेनित्यमनुव्रताय ९ उदाप्लुतंविश्व
मिदंतदाऽसीद्यन्निद्रयामीलितदृङ्न्यमीलयत् ॥ अहींद्रतल्पेऽधिशयानएकःकृतक्षणःस्वात्मरतौनिरीहः १०

चूर्णिका

अतःसोहंनृणांदुःखविरमायमहत्सुखप्राप्तयेभागवतंपुराणंप्रवर्तये यत् संकर्षणोभगवान् कुमारान्अकथयत् २ ३ ४ तेसांख्यायनायसः ५ ६ ७ अस्मद्गुरवेपराशरायबृह
स्पतेश्चसःमह्यंअकथयत्अहंतत् भागवतंहेवत्सतेश्रद्धालवेकथयामि ८ ९ यदाविश्वंएकार्णवोदकेनिमग्नंआसीत् तदाशेषशय्यायां १०

CC-0. In Public Domain. Digitization by eGangotri

टीका

कालात्मकशक्तेःप्रेरणंपुनःसृष्ट्यवसरेप्रबोधनार्थं (अंतःशरीरेस्वशरीरांतरे अर्पितानिभूतसूक्ष्माणियेनसःउदीरयाणः उदीरयमाणः) स्वेपदेऽधिष्ठाने वहिर्वृत्त्यभावेदृष्टांतः यथाऽनलइति ११ स्वया चिच्छक्त्यासहवर्तमानएवयोगनिद्रयास्वपन्पूर्वमेवप्रबोधनार्थं (उदीरितया) नियुक्तया (कालाख्यया) स्वशक्त्याऽऽसादितंप्रापितंकर्मतंत्रंक्रियाकलापोयस्यसः अपीतान्लीनान्ददर्श (आलोचितवान्) १२ लोकसृष्ट्यर्थमर्थसूक्ष्मेऽभिनिविष्टादृष्टिर्यस्य कालानुसारिणारजोगुणेनविद्धःसंक्षोभितःसंस्तनीयानतिसूक्ष्मोऽर्थः सूष्यन्प्रसोष्यन्नुद्भविष्यन् नाभिदेशात् (अभिद्यत) उद्भूतइत्यर्थः १३ सतनीयानर्थःपद्मकोशःसन्नुदतिष्ठत् कर्माणिजीवादृष्टानिप्रतिबोधयतियःकालस्तेन (ईरित इतिशेषः) आत्माश्रीविष्णुर्योनिर्यस्य (पद्मकोशस्य स तथा तत्सलीलं स्वप्रभयाविद्योतयतीति तथा) १४ तल्लोकात्मकंपद्मंसर्वान्गुणाञ्जीवभोग्यानर्थानवभासयतीतितथा तद्यस्माज्जातंसएवविष्णुः उइतिसंबोधने प्रावीविशत्प्रकर्षेणालुप्तशक्तिरेवांतर्यामितयाप्रविवेश तस्मिन्विष्णुनाधिष्ठितेपद्मेविधाताब्रह्माऽभूत् कथंभूतःस्वयमेववेदमयोनत्वध्ययनेनप्राप्तवेदः कोऽसौ अदृष्टपितृत्वेनयंस्वयंभुवंवदंति समाकल्पांतेनारायणेनसहनिद्रयैकीभूतआसीत् तस्मिंश्चप्रबुद्धेततएवपाद्मेकल्पेपद्मद्वारेणाभिव्यक्तिं प्राप्तइत्यर्थः १५ सचतस्मिन्कल्पेचतुर्मुखोऽभूदित्याह तस्यामिति (स चविधातातस्यां कर्णिकायांलोकमपश्यन्) परिक्रमंस्तत्रस्थएवग्रीवांचालयँल्लोकनिरीक्षणार्थंविवृत्तेविचलितेनेत्रेयस्य (स प्रतिदिशमेकैकं मुखंलब्ध्वा चतुर्मुखोजातः) १६ तस्यचश्रीनारायणोपासनयैवाविर्भूतज्ञानक्रियाशक्तेर्लोककर्तृकत्वंनस्वतइतिवक्तुंप्रथमंतस्यविमोहमाह तस्मात्सलिलाद्विरूढमुद्गतंकंजमुपाश्रितोऽपिसाकल्येनतत्कंजंलोकतत्त्वंचात्मानंचसाक्षान्नज्ञातवान् उइतिविस्मये कथंभूतात् युगांतश्वसनःप्रलयवायुस्तेनावघूर्णंतत्रतत्रप्रकंपितंयज्जलंतस्मात्सर्वतऊर्मिचक्रं (तरंगमाला) यस्मिंस्तस्मात् १७ अविदुषस्तस्य वितर्कमाह योऽसावहमब्जपृष्ठेएषकः अनन्यदेकमेवैतदब्जंकुतोवाजातं यत्रैतदब्जमधिष्ठितंतेनाधिष्ठानेनाधस्तात्सतावर्तमानेनननुनिश्चितंभाव्यं. (हि यस्मात्तस्मादिहास्ति किंचित्) सब्रह्माइत्थमुद्वीक्ष्येत्युत्तरेणान्वयः तथाचश्रुतिः “ सोऽपश्यत्पुष्करपर्णेतिष्ठन्सोऽमन्यतअस्तिवैतद्यस्मिन्निदमधितिष्ठति ” इति १८

॥३२॥

सोंऽतःशरीरेऽर्पितभूतसूक्ष्मःकालात्मिकांशक्तिमुदीरयाणः ॥ उवासतस्मिन्सलिलेपदेस्वेयथानलोदारुणिरुद्धवीर्यः ११ चतुर्युगानांचसहस्रमप्सुस्वपन्स्वयोदीरितयास्वशक्त्या ॥ कालाख्ययाऽऽसादितकर्मतंत्रोलोकानपीतान्ददृशेस्वदेहे १२ तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरंतर्गतोऽर्थोरजसातनीयान् ॥ गुणेनकालानुगतेनविद्धःसूष्यंस्तदाऽभिद्यतनाभिदेशात् १३ सपद्मकोशःसहसोदतिष्ठत्कालेनकर्मप्रतिबोधनन ॥ स्वरोचिषातत्सलिलंविशालंविद्योतयन्नर्कइवात्मयोनिः १४ तल्लोकपद्मंसउएवविष्णुःप्रावीविशत्सर्वगुणावभासम् ॥ तस्मिन्स्वयंवेदमयोविधातास्वयंभुवंयंस्मवदंतिसोऽभूत् १५ तस्यांसचांभोरुहकर्णिकायामवस्थितोलोकमपश्यमानः ॥ परिक्रमन्व्योम्निविवृत्तनेत्रश्चत्वारिलेभेऽनुदिशंमुखानि १६ तस्माद्युगांतश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढम् । अपाश्रितःकंजमुलोकतत्त्वंनात्मानमद्धाऽविददादिदेवः १७ कएषयोऽसावहमब्जपृष्ठएतत्कुतोवाऽब्जमनन्यदप्सु ॥ अस्तिह्यधस्तादिहकिंचनैतदधिष्ठितंयत्रसतानुभाव्यम् १८

श्लोकाः ११—१८

॥३२॥

चूर्णिका

११ चतुः सहस्रयुगंस्वपन् स्वशक्तिभिःआस्ते १२ यदा चभगवतःलोकसिसृक्षाजाता तदातन्नाभितःकमलंआसीत् १३ १४ सएवविष्णुः तस्मिन्कमलेविधातृरूपः बभूव १५ तस्यप्रतिदिशंईक्षणेनचत्वारिमुखानिवभूवुः १६ सब्रह्माअहंकस्माज्जातइतिचिंतयन् १७ तत्कमलनालनाडीद्वाराअंतर्गत्वाबहुकालंवर्षशतंविचिन्वन्स्वस्याधिष्ठानंनज्ञातवान् १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. वृ. टीका ॥३३॥

तस्यचबहिर्मुखप्रवृत्त्यामहताऽपिकालेनतदप्राप्तिमाह सइतिद्वाभ्यां तस्याब्जस्ययन्नालंतस्यनाडीभिरंतश्छिद्रैः तस्यखरनालस्यपद्मस्ययन्नालंतस्यनाभिमधिष्ठानंविचिन्वन्नर्वागगतोऽपि (अजोब्रह्मा) तत्त दानाविंदत १९ हेविदुर (अपारेतमसि मोहे आत्मनःसर्गो यस्मात्तम्) आत्मसर्गंस्वकारणं (विचिन्वतः तिस्रोनेमयश्चातुर्मासलक्षणायस्य सः) त्रिणेमिःकालः (सुमहानभूत् यः) अजस्यविष्णोर्हे तिःसुदर्शनरूपंशस्त्रं देहभाजांनराणांभयमुत्पादयन्नितिसंवत्सरशतमतिक्रांतामित्युक्तंभवति२० अंतर्मुखतयातुभगवंतंदृष्टवानित्याहद्वाभ्याम् ततोन्वेषणान्निवृत्तः नप्रतिलब्धःकामोमनोरथोयेन स्वधिष्ण्यं पद्मम् (पुनरासाद्य सदेवोब्रह्मा) जितेनश्वासेननिवृत्तंसंयतंचित्तंयस्य अतएवारूढआश्रितःसमाधियोगोयेनतथाभूतःसन्न्यषीददुपविवेश २१ पुरुषायुषासंवत्सरशतेनकालेनाभिप्रवृत्तः सुनिष्पन्नोयोगस्तेन विरूढउत्पन्नोबोधोयस्य (सोजः) यत्पूर्वंविचिन्वन्नपिनापश्यत्तत्स्वयेमवांतर्हृदयेऽवभातमपश्यत् (दृष्टवान्) २२ यदपश्यत्तद्वर्णयतिमृणालेतिनवभिः नवस्वप्यपश्यदित्यस्यैवानुषंगः मृणालवद्गौरश्चा सावायतश्च (दीर्घः) यः शेषस्तस्यभोगोदेहःसएवपर्यंकस्तस्मिन् (शयानं) कुत्रस्थितेपर्यंके फणातपत्रैः (फणारूपैश्छत्रैः) आयुताःसर्वतोयुक्तायेमूर्धानस्तेषांरत्नानिकिरीटस्थानितेषांद्युभिःप्रभाभिर्हतध्वां ते (निरस्तांधकारे) युगांततोये (प्रलयोदके) २३ कथंभूतंपुरुषं हरितोपलाद्रेर्मरकतशिलामयपर्वतस्यप्रेक्षांशोभांक्षिपंतंस्वलावण्यातिशयेनतिरस्कुर्वंतं (कथंभूतस्य) संध्याभ्रंनीवीपरिधानंयस्यतस्यशो भांपीतांबरेणक्षिपंतं (उरूणिरुक्माणियस्मिंस्ताद्दृशोमूर्धायस्यतस्य) उरुरुक्ममूर्ध्नेनिकस्वर्णशिखरस्यतस्यस्वकिरीटैः रत्नानिचउदधाराश्चओषधयश्चसौमनस्यानिचपुष्पसमूहाःसुमनसएववातेषांवनस्रजोवन मालायस्य वेणवएवभुजायस्यांघ्रिपाएवांघ्रयोयस्यसचासौसचतस्य अयमर्थः यदितस्मिन्मालाइवस्थितारत्नादयोभवंति वेणवश्चभुजाइववृक्षाश्चपादाइव तर्हितस्यशोभांस्त्रीयरत्नमुक्तातुलसीपुष्पदामभिर्भुजैरंघ्रि भिश्चक्षिपंतमिति २४ किंच आयामतोदैर्घ्येणविस्तरतश्चस्वमानदेहेनमीयतेनेनेतिमानमुपमाशोभनश्चासावमानोनिरुपमोदेहस्तेन यद्वा सुष्ठुअमानोपरिच्छिन्नस्तेन यद्वा ताभ्यां (आरामविस्ताराभ्यां) स्वा नुरूपप्रमाणेन (देहेनेति) अतएवलोकत्रयं (शोभा) संगृह्णतेयस्मिंस्तथा विचित्राणिनानाविधानिदिव्यान्यपूर्वाणिचाभरणान्यंशुकानिच (वस्त्राणि) तेषांकृताऽऽसमंताच्छ्रीःशोभायेन तेनदेहेनवि शिष्टम् एवंस्वतएवातिरम्यत्वेऽप्यपाश्रितवेषः स्वीकृतालंकारांदेहोयस्यतमपश्यत् यद्वा केनप्रेक्षांक्षिपंतमित्यपेक्षायामेवंभूतेनदेहेनेतिसंबंधः २५

अ० ८ ॥८॥

श्लोकाः १९/२५

सइत्थमुद्वीक्ष्यतदब्जनालनाडीभिरंतर्जलमाविवेश॥नार्वाग्गतस्तत्खरनालनालनाभिंविचिन्वंस्तदविंदताजः १९तमस्यपारेविदुरात्मसर्गंविचिन्वतोऽभूत्सुम हांस्त्रिणेमिः ॥ योदेहभाजांभयमीरयाणःपरिक्षिणोत्यायुरजस्यहेतिः २० ततोनिवृत्तोऽप्रतिलब्धकामःस्वधिष्ण्यमासाद्यपुनःसदेवः॥ शनैर्जितश्वासनिवृत्तचि त्तोन्यषीददारूढसमाधियोगः २१ कालेनसोऽजःपुरुषायुषाऽभिप्रवृत्तयोगेनविरूढबोधः॥ स्वयंतदंतर्हृदयेऽवभातमपश्यताऽपश्यतयंनपूर्वम् २२ मृणालगौ रायतशेषभोगपर्यंकएकंपुरुषंशयानम् ॥ फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोये २३ प्रेक्षांक्षिपंतंहरितोपलाद्रेःसंध्याभ्रनीवेरुरुरुक्ममूर्ध्नः ॥ रत्नोदधारौषधिसौमनस्यवनस्रजोवेणुभुजांघ्रिपांघ्रेः २४ आयामतोविस्तरतःस्वमानदेहेनलोकत्रयसंग्रहेण ॥ विचित्रदिव्याभरणांशुकानांकृतश्रियाऽपा श्रितवेषदेहम् २५

॥३३॥

चूर्णिका १९ ततःनिवृत्यकमलेस्थित्वासमाधिस्थःअभवत्२० २१ २२ तदास्वहृदयेशेषपर्यंकेशयानंमरकतश्यामंपीतांबरं २३ २४ विचित्रदिव्याभरणं २५

CC-0. In Public Domain. Digitization by eGangotri

(स्वकामाय) स्वाभिलषितफलायविविक्तैः शुद्धैर्वेदोक्तैर्मार्गैरभ्यर्चतांपुंसांकामदुघं (कामान्दोग्धिपूरयतीतितथाभूतम्) अंघ्रिपद्मंप्रदर्शयंतंकिंचिदुन्नमय्यसमर्पयंतम् नखाइंवइंदवस्तेषांमयूखारश्मयस्तैर्भिन्नाःसं भिन्नाः (संबद्धाः) अंगुलयएवचारूणिपत्राणियस्य (अंघ्रिपद्मस्यतथाभूतं) तत् २६ लोकार्तिहरंस्मितंयस्मिंस्तेन परिस्फुरद्भ्यांकुंडलाभ्यांमंडितेन अधरबिंबदीप्त्या (घननीलमपि) शोणवदाचरितेन शो णवदाचरितेन शोभननासायुक्तेन (शोभनेभ्रुवौयस्यतेन) सुभ्रूशोभनयाभ्रुवाच (इति वा) प्रत्यर्हयंतंपूजकान्प्रतिपूजयंतंसंमानयंतम् २६ कदंबकिंजल्कवत्पिशंगं (पीतम्) यद्वासस्तेनमेखलयाचनितंबे स्वलंकृतम् हेवत्स (अनंतधनेनार्घ्येण) श्रीवत्सयुक्तंयद्वक्षस्थलंतस्यवल्लभेन (प्रियेण) वक्षस्यनर्घेणहारेणस्वलंकृतमित्यर्थः २८ महाचंदनवृक्षरूपकेणानिरूपयितुंतंविशिनष्टि परार्ध्यानिश्रेष्ठानिकेयूराण्यं गदानिमणिप्रवेकाश्चमण्युत्तमास्तैःपर्यस्ताव्याप्तादोर्दंडाएवसहस्रमनंताःशाखायस्य चंदनवृक्षोऽपिकेयूरादितुल्यैःफलपुष्पादिभिर्व्याप्तशाखोभवति अव्यक्तंप्रधानंमूलमधोभागोयस्य यद्वा अव्यक्तंब्रह्ममूलंयस्य ब्रह्माभिव्यक्तिरूपत्वात् वृक्षस्यापिमूलंनव्यक्तम् भुवनांघ्रिपेंद्रं (चतुर्दशभुवनात्मकानामंघ्रिपानामिन्द्रम् सर्वलोकेश्वरमित्यर्थःचंदनवृक्षोपिसर्ववृक्षश्रेष्ठः) अहींद्रस्यानंतस्यभोगैःफणैर्देहावयवैर्वाऽधिवीताः संवेष्टिताःस्पृष्टावल्शाःस्कंधायस्य"वनस्पतेशतवल्शोविरोह"इतिश्रुतेः सोऽपिसर्पैर्वेष्टितोभवति २९ प्रेक्षांक्षिपंतमित्यत्रैवपर्वतरूपेणनिरूपितमपिविशेषणांतरैःपुनर्निरूपयति भगवानेवमहीध्रस्तम् चराचराणा मोकःस्थानम् सोऽपितथा अहींद्रस्यबंधुं सोऽप्यहींद्राणांबंधुःसलिलेनोपगूढमावृतम् पर्वतोऽपिमैनाकादिस्तथा किरीटसाहस्रमेवहिरण्यशृंगाणियस्य सोऽपिमेर्वादिस्तथा यथापर्वतस्यगर्भेक्वचिद्रत्नमाविर्भव तितथाविर्भवत्स्पष्टंदृश्यमानंकौस्तुभरत्नंगर्भेमूर्तिमध्येयस्यतम् ३० किंच वनमालयानिवीतंकंठलंबिन्याव्याप्तम् आम्नायावेदाएवमधुव्रतास्तैः श्रीर्यस्यास्तया हरिमितिपर्वतादिरूपमपश्यत् हरिरसावितिज्ञात वानित्यर्थ सूर्यादिभिरगममगम्यं स्वव्यापारैराकलयितुमशक्यमित्यर्थः किंच त्रिष्वपिलोकेषुधामस्फूर्तिर्येषांतैरक्षणार्थंपरिक्रमद्भिःपरितोधावद्भिः प्राधनिकैःप्रधनंसंग्रामस्तत्प्रयोजनैःसुदर्शनादिभिर्हेतुभूतैर्दुरास दंदुष्प्रापम् ३१ यदैवहरिमपश्यत्तर्ह्येवतदैवलोकविसर्गदृष्टिः (लोकानांविविधसृष्टौदृष्टिर्यस्यतथाभूतः) संस्तस्यनाभिसंरसिसरोजंश्वसनंप्रलयवायुंवियदाकाशंचददर्श ३२ (अतःपरंनाभिसरोजादिभ्योन्यत्) सविधाता रजसोपरक्तोरजोगुणयुक्तः अतः प्रजाः स्रष्टुमिच्छन् (कर्मबीजंलोकसृष्टेःकारणम्) इयदेवनाभिसरोजादिपंचकमेव विसर्गेऽप्यभिमुखोदत्तचित्तः (स्तुत्यंतंभगवंतमस्तौत् कथंभूतः) अव्यक्तव त्मनिभगवतिनिवेशितचित्तः ३३ ॥ इतितृतीयेटीकायामष्टमोऽध्यायः ८ ॥

श्लोकाः २६/३३

पुंसांस्वकामायविविक्तमार्गैरभ्यर्चतांकामदुघांघ्रिपद्मम् ॥ प्रदर्शयंतंकृपयानखेंदुमयूखभिन्नांगुलिचारुपत्रम् २६ मुखेनलोकार्तिहरस्मितेनपरिस्फुरत्कुं डलमंडितेन ॥ शोणायितेनाधरबिंबभासाप्रत्यर्हयंतंसुनसेनसुभ्र्वा २७ कदंबकिंजल्कपिशंगवाससास्वलंकृतंमेखलयानितंबे ॥ हारेणचानंतधनेनवत्सश्री वत्सवक्षस्थलवल्लभेन २७ परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्रशाखम् ॥ अव्यक्तमूलंभुवनांघ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शम् २९ चराचरौकोभग वान्महीध्रमहींद्रबंधुंसलिलोपगूढम् ॥ किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भम् ३० निवीतमाम्नायमधुव्रतश्रियास्वकीर्तिमय्यावनमालया हरिम् ॥ सूर्येंदुवाय्वग्न्यगमंत्रिधामभिःपरिक्रमत्प्राधनिकैर्दुरासदम् ३१ तर्ह्येवतन्नाभिसरस्सरोजमात्मानमंभःश्वसनंवियच्च ॥ ददर्शदेवोजगतोविधाता नातःपरंलोकविसर्गदृष्टिः ३२ सकर्मबीजंरजसोपरक्तःप्रजाःसिसृक्षन्नियदेवदृष्ट्वा ॥ अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ३३ इतिश्रीमद्भा० तृतीयस्कंधेअष्टमोऽध्यायः ८

चूर्णिका कौस्तुभवनमालादियुतंहरिंददर्श २६ २७ २८ २९ ३० ३१ ३२ भगवन्निवेशितचित्तःसन्विभुंअस्तौत् ३३ ॥ इतिश्रीमद्भागवतचूर्णिकायांतृतीयस्कन्धेअष्टमोऽध्यायः ८ ॥३४॥

१ एवेति पाठो महे० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३५॥

नवमेतपसातुष्टंदृष्ट्वानारायणंत्वजः ॥ अस्तौदेकार्णवेसीदँल्लोकसर्गचिकीर्षया १ भगवज्ज्ञानेनात्मनःकृतार्थतामाविष्कुर्वन्नज्ञांश्चशोचन्नाह ज्ञातोऽसीति सुचिराद्बहुकालोपासनेनाद्यममयाज्ञातोऽसि नन्वहोदे
हभाजामेतदवद्यंदोषः किंतत् यद्भगवतस्तवगतिस्तत्त्वंनज्ञायतइतियतस्त्वमेवज्ञातुंयोग्यःसत्यत्वान्नान्यदसत्यत्वादित्याह त्वत्त्वत्तोऽन्यन्नास्ति यदप्यस्तीतिप्रतिभातितदपिशुद्धंसत्त्वंनभवति कथमसतःप्रती
तिस्तत्राह यद्यतोमायागुणक्षोभात्त्वमेवोरुर्वहुरूपोविभासि (त्वत्सत्तयैव सद्वत्प्रतीयत इतिभावः) १ ननु त्वमपिसम्यङ्नजानासि यत्त्वयादृष्टंरूपमेतदपिगुणात्मकमेव निर्गुणंब्रह्मैवतुसत्यंतत्राह रूपमिति
द्वाभ्यां अवबोधरसोदयेनचिच्छक्त्याविर्भावेनशश्वत्सदानिवृत्तंतमोयस्मात्तस्यतवयदेतद्रूपंत्वयैवस्वातंत्र्येणसतामुपासकानामनुग्रहायगृहीतमाविष्कृतमवतारशतस्यशुद्धसत्त्वात्मकस्ययदेकंबीजंमूलं तत्प्रदर्श
नार्थंगुणावतारबीजत्वंदर्शयति यन्नाभीति २ हेपरम अविद्धवर्चोनावृतप्रकाशं अतोऽविकल्पंनिर्भेदं अतएवानंदमात्रं एवंभूतंयद्भवतःस्वरूपंतदतोरूपात्परंभिन्नंनपश्यामिकिंत्विदमेवतत् (यत्सच्चिदानंदरूपं
ब्रह्मतदेवेदंमया दृष्टमित्यर्थः) अतःकारणात्तेतवादःइदंरूपमुपाश्रितोऽस्मि योग्यत्वादपीत्याह एकमुपास्येषुमुख्यं यतोविश्वसृजंविश्वंसृजतीत्यतएवाविश्वंविश्वस्मादन्यत् किंच भूतेंद्रियात्मकंभूतानामिंद्रि
याणांचात्मानं (प्रकाशकं) कारणमित्यर्थः ३ नन्वेवमपिसोपाधिकमेतदर्वाचीनमेवेत्याशंक्याह तद्वैतदेवेदं हेभुवनमंगल यतस्तेत्वयानोऽस्माकमुपासकानांमंगलायध्यानेदर्शितम् नह्यव्यक्तवर्त्माभिनिवेशि
तचित्तानामस्माकं (त्वया) सोपाधिकदर्शनंयुक्तमितिभावः अतस्तुभ्यंनमोऽनुविधेमानुवृत्त्याकरवाम सर्हिकिमितिकेचिन्मांनाद्रियंतेतत्राह योऽनादृतइति असत्प्रसंगैर्निरीश्वरकुतर्कनिष्ठैः ४ आदरेणतु
त्वांभजंतःकृतार्थाइत्याह येत्विति श्रुतिर्वेदःसएववातस्तेननीतंप्रापितं (त्वदीयचरणकमलमुकुलगंधं कर्णरंध्रैर्जिघ्रंति परयासुदृढयाभक्तिलक्षणयारज्ज्वागृहीतौ चरणौ सत्त्वं तेषांस्वभक्तानां) नापैषि
नापयासि येत्वत्कथाश्रवणमत्यादरेणकुर्वंतितेषांहृदिनित्यंप्रकाशसेइत्यर्थः ५ ततःकिमतआह तावदिति द्रविणादौविद्यमानेभयं (तस्करादिभ्यः) गतेशोकःपुनश्चस्पृहाततःपरिभवः (तिरस्क्रिया) त
थाऽपिविपुलोलोभस्तृष्णापुनःकथंचित्प्राप्तेममेत्यसदाग्रहः (किं भूतः) आर्तिमूलंपुनर्भयशोकादेःकारणंनप्रवृणीतनाश्रयेत् त्वत्पदाश्रयणमात्रेणभयादिनिवृत्तिःकिंपुनस्त्वत्प्रकाशेसतीतिभावः ६

श्लोकाः १/६

॥ ब्रह्मोवाच ॥ ॥ ज्ञातोसिमेऽद्यसुचिरान्ननुदेहभाजांनज्ञायतेभगवतोगतिरित्यवद्यम् ॥ नान्यत्त्वदस्तिभगवन्नपितन्नशुद्धंमायागुणव्यतिकराद्यदुरुर्विभा
सि १ रूपंयदेतदवबोधरसोदयेनशश्वन्निवृत्ततमसःसदनुग्रहाय ॥ आदौगृहीतमवतारशतैकबीजंयन्नाभिपद्मभवनादहमाविरासम् २ नातःपरंपरमय
द्भवतःस्वरूपमानंदमात्रमविकल्पमविद्धवर्चः ॥ पश्यामिविश्वसृजमेकमविश्वमात्मन्भूतेंद्रियात्मकमदस्तउपाश्रितोऽस्मि ३ तद्वाइदंभुवनमंगलमं
गलायध्यानेस्मनोदर्शितंतउपासकानाम् ॥ तस्मैनमोभगवतेऽनुविधेमतुभ्यंयोऽनादृतोनरकभाग्भिरसत्प्रसंगैः ४ येतुत्वदीयचरणांबुजकोशगंधंजिघ्रं
तिकर्णविवरैःश्रुतिवातनीतम् ॥ भक्त्यागृहीतचरणःपरयाचतेषांनापैषिनाथहृदयांबुरुहात्स्वपुंसाम् ५ तावद्भयंद्रविणगेहसुहृन्निमित्तंशोकःस्पृहापरिभवो
विपुलश्चलोभः ॥ तावन्ममेत्यसदवग्रहआर्त्तिमूलंयावन्नतेऽङ्घ्रिमभयंप्रवृणीतलोकः ६

चूर्णिका ॥ ब्रह्मोवाच ॥ ॥ हेभगवन् वहुकालोपासनेनमयाअद्यत्वंज्ञातोसि १ २ ३ इदंभुवनमंगलंरूपंउपासकानांमंगलायध्यानेदर्शितं तस्मैभगवतेनमः ४ हेभगवन्त्वद ॥३५॥
तिरिक्तंसर्वमायामयं तवएतत्रूपंतुप्रकृतेःपरम्अवतारशतैकबीजमिदंउपासनार्थमाविष्कृतम् यन्नाभिपद्मादहंआविरासम् ५ किंचतावत्द्रविणगेहसुहृन्निमित्तंभयंशोकः
स्पृहापरिभवःलोभःममेत्यसद्ग्रहःआर्तिमूलंचयावल्लोकः अभयंतेअंघ्रिमूलंनप्रवृणीत ६

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

येनिष्कामाअपिसंतस्त्वांनाद्रियंते तेनरकभाजइत्युक्तम् (योनाद्दतोनरकभाग्भिरित्यनेन) येतुत्वत्कथाश्रवणादिविमुखाःसंतःकाम्यकर्मपरास्तेऽतिमंदाइत्याह दैवेनतेहतधियोनष्टमतयः प्रसंगाच्छ्रवण
कीर्तनादिरूपात्सर्वदुःखनिवर्तकाद्विमुखानींद्रियाणियेषाम् (तथाभूता येकामसुखलेशलवाय अल्पादल्पतरविषयसुखायेत्यर्थः) अकुशलान्यक्षेमकराणि (काम्यकर्माणि) ७ अकुशलत्वमेवदर्शयति
क्षुच्चतृट्चत्रिधातवश्चवातपित्तश्लेष्माणस्तैः (मुहुरर्द्यमानाः पीड्यमानाः) इमाःप्रजाःसुदुर्भरेण (सुदुष्पूरेण) सुदुःसहेनकामाग्निनाऽच्युतयारुषाऽविच्छिन्नक्रोधेनचपीड्यमानाःसंपश्यतोमेमनःसीदति (क
रुणयेतिशेषः तत्र क्षुदादि आध्यात्मिकं शीतोष्णादि आधिदैविकं इतरेतरादन्योन्यनिमित्तादित्याधिभौतिकम्) ८ नन्वेवंभूतायाःसंसृतेरपरमार्थत्वात्किमर्थंविषादःक्रियतेतत्राह यावदिति आत्मनइदं
पृथक्त्वंदेहादिभावं भगवतस्तवेंद्रियार्थरूपायामायातयाबलमाधिक्यंयस्यतत् (हे ईशयावज्जनः पश्येदभिमन्येत तावत्संसृतिः) नप्रतिसंक्रमेतनोपरमेत् दुःख (–निवहं क्षुदादिदुःख–) समूहंप्रापयन्ती
ति (तत्रहेतुः) क्रियाणामर्थःफलंयस्यांसा त्वदिदमितिपाठे इदंदेहादित्वत्त्वत्तःपृथक्पश्येद्यावत्तावदसौव्यर्थापिनोपरमेत् ९ ननु भवत्वेवमविवेकिनांविवेकिनस्तुमुक्ताएवेतिकिंतेषांभक्त्याकृत्यमतआह अ
ह्निआपृतानि (विषयेषु) व्यापृतानिचतानिआर्तानिक्लिष्टानिकरणानींद्रियाणियेषां रात्रौतुविषयसुखलवोऽपिनास्तियतोनिशिनिःशयानाःस्वप्नदर्शनेनचक्षणेक्षणेभग्ननिद्रादैवेनाहताःसर्वतःप्रतिहताअर्थरचना
अर्थार्थोद्यमायेषाम् (ते ऋषयोपि हेदेव युष्माकं तवभगवतो भागवतानां प्रसंगात्कथाश्रवणादिरूपाद्विमुखाः संसरंति) १० तदेवमभक्तानांसंसारान्निवृत्तिमुक्त्वाभक्तानांतन्निवृत्तिमाह त्वमिति
भक्तियोगेन (भावो भक्तिस्तद्योगेन) शोधितेहृत्सरोजेआस्सेतिष्ठसि श्रुतेनश्रवणेनेक्षितः पंथायस्यसः किंच (हे उरुगाय) श्रवणंविनापित्वद्भक्तामनसायद्यत्तववपूरूपंस्वेच्छयाध्यायंतितत्तत्प्रणयसेप्रकट
यसि सतांभक्तानामनुग्रहाय ११ (ननु हेनाथ) भक्तानांचानिष्कामानांत्वमतिसुलभोनेतरेषामित्याह नेति उपचितैरूर्जितैरुपचारैःपुष्पोपहारादिभिः यद्यथा असतामभक्तानामलभ्ययासर्वभूतदयया (अति
प्रसीदति अतिशयेन प्रीयतेभवान्) प्रसादेहेतुः एकइत्यादि (नानाविधेषु जनेषु स्थित एकः सुहृदनिमित्तबंधुः) १२

श्लोकाः ७/१२

दैवेनतेहतधियोभवतःप्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रियाये ॥ कुर्वंतिकामसुखलेशलवायदीनालोभाभिभूतमनसोऽकुशलानिशश्वत् ७ क्षुत्तृट्त्रिधातुभि
रिमामुहुरर्द्यमानाःशीतोष्णवातवर्षैरितरेतराच्च ॥ कामाग्निनाच्युतरुषाचसुदुर्भरेणसंपश्यतोमनउरुक्रमसीदतेमे ८ यावत्पृथक्त्वमिदमात्मनइंद्रियार्थमायाब
लंभगवतोजनईशपश्येत् ॥ तावन्नसंसृतिरसौप्रतिसंक्रमेतव्यर्थापिदुःखनिवहंवहतीक्रियार्था ९ अह्न्याप्टतार्तकरणानिशिनिःशयानानानामनोरथधियाक्षणभ
ग्ननिद्राः ॥ दैवाहतार्थरचनाऋषयोऽपिदेवयुष्मत्प्रसंगविमुखाइहसंसरंति १० त्वंभावयोगपरिभावितहृत्सरोजआस्सेश्रुतेक्षितपथोननुनाथपुंसाम् ॥ यद्य
द्धियातउरुगायविभावयंतितत्तद्वपुःप्रणयसेसदनुग्रहाय ११ नातिप्रसीदतितथोपचितोपचारैराराधितःसुरगणैर्हृदिबद्धकामैः ॥ यत्सर्वभूतदययासदलभ्ययै
कोनानाजनेष्ववहितःसुहृदंतरात्मा १२

चूर्णिका यस्यतवअवतारगुणकर्मविडंबनानिनामानिप्राणप्रयाणेविवशाःसंतःयेगृणंतितेअनेकजन्मपातकंसहसैवहित्वाब्रह्मप्राप्नुवंति तंअजंशरणंप्रपद्ये ७ ८ ९ १० ११ १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यतःसकामानांभवान्नातिप्रसीदत्यतःकामप्राप्तिःक्रियाणामुत्तमंफलंनभवतिकिंतुत्वत्प्रीणनमेव कामसंयोगस्त्ववांतरफलेनप्ररोचनार्थमित्याह पुंसामिति भगवतस्तवाराधनमेवसंश्चासौक्रियार्थश्चश्रेष्ठंक्रियाफलं
श्रेष्ठत्वेहेतुः यत्रत्वय्यर्पितोधर्मोनकदाचिद्ध्रियतेननश्यति कामार्थस्तुधर्मः कामंदत्त्वानश्यतीत्यर्थः १३ अतस्त्वामेववयंनताइत्याह शश्वत्सर्वदास्वरूपचैतन्येनैवनिरस्तभेदभ्रमाय पुनश्चबोधएवधिषणाविद्या
शक्तिर्यस्य यद्वा बोधएवधिषणमाश्रयः अतएवपरस्मै अत्रहेतुः विश्वोद्भवादिषु निमित्तंयामायातस्यालीलाविलासस्तयारासःक्रीडायस्य तस्मै तेतुभ्यमिदंनमोनमनंचकृमकृतवंतोवयम् १४ नामग्रहणमात्र
तःकैवल्यप्रदत्वेनैश्वर्यंव्यंजयन्नमस्करोति यस्येति अवतारादीनांविडंबनमनुकरणमस्तियेषु तानि तत्रावतारविडंबनानिदेवकीनंदनइत्यादीनि गुणविडंबनानिसर्वज्ञोभक्तवत्सलइत्यादीनि कर्मविडंबनानि
गोवर्धनोद्धरणकंसारातिरित्यादीनि असुविगमेपि (प्राणप्रयाणसमयेपि) विवशाअपिगृणंत्युच्चारयंतिकेवलं (ते अनेकजन्मसंबंधि) शमलंपापं अपावृतंनिरस्तावरणं ऋतंब्रह्मप्राप्नुवंति १५ तत्रगुणा
वतारकर्माणिदर्शयन्प्रणमाति योवैएकस्त्रिपात्त्रयोब्रह्मादयःपादाःस्कंधायस्य प्रत्येकंचउरवःप्ररोहाःशाखोपशाखामरीच्यादिमन्वादिरूपायस्यतथाभूतःसन्ववृधे तस्मैभुवनाकारायद्रुमायनमः किंकृत्वाववृधे
आत्मास्वयमेवमूलमाधिष्ठानंयस्य तत्प्रधानंभित्त्वागुणत्रयरूपेणविभज्य त्रिपात्त्वमेवाह अहंब्रह्मागिरिशश्चस्वयंविभुर्विष्णुश्चेतिस्थित्युद्भवप्रलयहेतवोयेवयं एवंत्रिपाद्भूत्वायोववृधइत्यर्थः १६ एवंगुणावतारकर्म
विडंबनमुक्त्वातस्यैवतत्कालाख्यंरूपंतत्कर्मचदर्शयन्प्रणमाति लोकइतिद्वाभ्याम् विकर्मनिरतोविरुद्धकर्मनिष्ठः कुशलेहिते स्वेआत्मीये त्वदुदितेत्वयैवसाक्षादुक्तेभवदर्चनरूपेकर्मणि उक्तंहिगीतासु “ यत्क
रोषियदश्नासियज्जुहोषिददासियत् यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पणम् ’ इति तस्मिन्प्रमत्तोदत्तचित्तोयावद्वर्ततेतावदस्यलोकस्य (जीविताशां सद्यः कालक्षेपमंतरेण यश्छिनत्ति तस्मै) अनिमिषा
यकालाय (तुभ्यं नमोस्तु) १७ आस्तांतावल्लोकस्यकथा यस्मात्कालाख्यात्त्वत्तोयद्विपरार्धावस्थायिधिष्ण्यं (सत्यलोकाख्यं) स्थानंतदारूढोऽपिबिभेमिभीतश्चसंस्त्वामेवावरुरुत्समानःप्राप्तुमिच्छंस्त
पस्तप्तवान् कथंभूतः बहुसवोबहवःसवायागाःसंवत्सरावायस्य बहून्यागान्कृत्वाऽपिबहून्संवत्सरान् वातपस्तप्तवानित्यर्थः अधिमखायमखादिकर्माधिष्ठात्रे १८

श्लोकाः १३/१८

पुंसामतोविविधकर्मभिरध्वराद्यैर्दानेनचोग्रतपसाव्रतचर्ययाच ॥ आराधनंभगवतस्तवसाक्रियाऽर्थोधर्मोर्पितःकर्हिचिद्ध्रियतेनयत्र १३ शश्वत्स्वरूपमहसैव
निपीतभेदमोहायबोधधिषणायनमःपरस्मै ॥ विश्वोद्भवस्थितिलयेषुनिमित्तलीलारासायतेनमइदंचकृमेश्वराय १४ यस्यावतारगुणकर्मविडंबनानिनामा
नियेसुविगमेविवशागृणंति ॥ तेनैकजन्मशमलंसहसैवहित्वासंयांत्यपावृतमृतंतमजंप्रपद्ये १५ योवाअहंचगिरिशश्चविभुःस्वयंचस्थित्युद्भवप्रलयहेतवआत्म
मूलम् ॥ भित्त्वात्रिपाद्ववृधएकउरुप्ररोहस्तस्मैनमोभगवतेभुवनद्रुमाय १६ लोकोविकर्मनिरतःकुशलेप्रमत्तःकर्मण्ययंत्वदुदितेभवदर्चनेस्वे ॥ यस्तावदस्य
बलवानिहजीविताशांसद्यश्छिनत्त्यनिमिषायनमोऽस्तुतस्मै १७ यस्माद्बिभेम्यहमपिद्विपरार्धधिष्ण्यमध्यासितःसकललोकनमस्कृतंयत् ॥ तेपेत
पोबहुसवोवरुरुत्समानस्तस्मैनमोभगवतेऽधिमखायतुभ्यम् १८

चूर्णिका

१३ १४ १५ तस्मैभुवनद्रुमायअनिमिषाययज्ञाधिष्ठात्रेपुरुषोत्तमायनमःसःत्वंनःविषादंमाध्व्यागिराअपनयतात् १६ १७ १८

CC-0. In Public Domain. Digitization by eGangotri

इदानींतत्तत्कालभाविलीलाऽवतारकर्माणिदर्शयन्नाह तिर्यगादिपुजीवयोनिपुस्वेच्छयास्वीकृतमूर्तिःसन्स्वकृतसेतोर्धर्ममर्यादापालनेच्छयारेमे वस्तुतःस्वानंदानुभवेनैव (निरस्तरतिः) निरस्तविषयसुखोऽपियोऽतएवपुरुषोत्तमः तत्तदुपाधिधर्मासंस्पर्शात् तदुक्तंगीतासु " यस्मात्क्षरमतीतोऽहमक्षरादपिचोत्तमः अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः " इति १९ इदानींदृश्यमानामेवमूर्तिंप्रणमति योऽविद्यये तिद्वाभ्याम् दशार्धाः (पंच 'तामिस्रमंधतामिस्रं तमोमोहो महातमइति वक्ष्यमाणाः) पंचवृत्तयोयस्यास्तयाऽविद्ययानिद्राहेतुभूतयाऽनभिभूतोऽपियोगनिद्रामुवाह तस्मैतेनमइत्युत्तरेणान्वयः जठरीकृतोदरेप्रविलापितालोकयात्रालोकास्थितिर्येन अहिरेवकशिपुःशय्यातस्याःस्पर्शोऽनुकूलोयस्यास्तांनिद्राम् (क्व) भीमानामूर्मीणांमालाविद्यंतेयस्मिन्नंतर्जले (प्रलयकालीनोदकमध्ये) निद्राणस्याविवेकिनोजनस्यनिद्रासुखमीदृगितिविवृण्वन्प्रदर्शयन्नुपहसन्नित्यर्थः अतएवांतर्जलादिविशेषणानि यद्वा पूर्वकल्पेश्रांतस्यजनस्यविश्रामसुखंविवृण्वन्स्फोरयम् तदातुपरोपकारायस्वयंदुःसहमपिदुःखंसोढव्यमितिद्योतनार्थंविशेषणानि २० किंच यस्यनाभिपद्ममेवभवनंतस्मात् (अहमासम्) लोकत्रयमुपकरणंयस्य यद्वा लोकत्रयस्यसृष्ट्यादिद्वारेणोपकरोतीतितथा तादृशोऽहंयदनुग्रहेणासम् उदरेस्थितोभवःसंसारप्रपंचोयस्य योगनिद्राऽवसानेकिंचिद्विकसन्नलिनवदीक्षणंयस्य (तस्मैनमः) २१ एवंस्तुत्वाप्रार्थयते सोऽयमितिचतुर्भिः यद्येनसत्त्वेनज्ञानेन (मोक्षसाधनेन) भगेनैश्वर्येणच (भोगसाधनेन) मृडयतेसुखयतिविश्वं (तेनैव ज्ञानेनैश्वर्येणच मे) दृशंप्रज्ञामनुस्पृशताद्योजयतु यथाऽहंस्रक्ष्यंक्षमोभविष्यामि (पूर्ववद्यथापूर्वमित्यर्थः प्रार्थनीयत्वेहेतुः) यतः प्रणतप्रियोऽसावहंचप्रणतोनचान्यःप्रार्थनीयोस्ति यतो भगवान् सएवसमस्तजगतांसुहृत् यतोऽसावेकोऽनुस्यूतआत्मांतर्यामी (सुहृत्त्वात्सुहृदंतररहितस्वात्परमार्थत्वाच्चेदं प्रार्थय इतिभावः) २२ (प्रपन्नानांवरद) आत्मशक्त्यारमयासह (गृहीता गुणावतारायेन सतैरवतारैः) यद्यत्कर्मकरिष्यति स्वविक्रमंस्वस्यविष्णोरेवविक्रमःप्रभावोयस्मिंस्तदिदंविश्वंतदाज्ञयास्रजतोऽपिमेचेतःसएवयुंजीतप्रवर्त्तयतु कर्मासक्तितत्कृतंशमलंचवैषम्यादिपापंयथाविजह्यांत्यक्ष्यामि २३ इह अंभसिसतोयस्यनाभिन्हदादिहासम् विज्ञानेशक्तिर्यस्यमहत्तत्त्वात्मकस्यचित्तस्यतदभिमानी अस्यरूपमिदंविस्तारयतोमेनिगमस्यावयवभूतानांगिरांविसर्गउच्चारणंमारीरिषीष्ट (सृष्टिकर्मणिनिमग्नचित्तस्य ममवेदाभ्यासो) हलांतंब्रह्मवर्चसमितिन्यायेनमालुप्यतामित्यर्थः २४

श्लोकाः १९/२४

तिर्यङ्मनुष्यविबुधादिषुजीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सयायः ॥ रेमेनिरस्तरतिरप्यवरुद्धदेहस्तस्मैनमोभगवतेपुरुषोत्तमाय १९ योऽविद्ययाऽनुपहतोऽपिदशार्धवृत्त्यानिद्रामुवाहजठरीकृतलोकयात्रः ॥ अंतर्जलेहिकशिपुस्पर्शानुकूलांभीमोर्मिमालिनिजनस्यसुखंविवृण्वन् २० यन्नाभिपद्मभवनादहमासमीड्यलोकत्रयोपकरणोयदनुग्रहेण ॥ तस्मैनमस्तउदरस्थभवाययोगनिद्रावसानविकसन्नलिनेक्षणाय २१ सोऽयंसमस्तजगतांसुहृदेकआत्मासत्त्वेनयन्मृडयतेभगवान्भगेन ॥ तेनैवमेदृशमनुस्पृशताद्यथाऽहंस्रक्ष्यामिपूर्ववदिदंप्रणतप्रियोऽसौ २२ एषप्रपन्नवरदोरमयात्मशक्त्यायद्यत्करिष्यतिगृहीतगुणावतारः ॥ तस्मिन्स्वविक्रममिदंसृजतोऽपिचेतोयुंजीतकर्मशमलंचयथाविजह्याम् २३ नाभिहृदादिहसतोंऽभसियस्यपुंसोविज्ञानशक्तिरहमासमनंतशक्तेः ॥ रूपंविचित्रमिदमस्यविवृण्वतोमेमारीरिषीष्टनिगमस्यगिरांविसर्गः २४

चूर्णिका १९ २० २१ २२ २३ २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अदभ्रामहतकिरुणायस्मिन्सः) विवृद्धप्रेम्णायत्स्मितंतेनविजृंभयन् (समुन्मीलयन्) विश्वस्याविजयायोद्भवाय चकारादस्मदनुग्रहायच (शेषपर्यंकात्) उत्थायमाध्व्याहर्षयंत्यावाचास्माकंखेदमपन यतु २५ स्वस्यसंभवोयस्मात्तं तपःशारीरम् विद्याउपासना समाधिरैकाग्र्यम् तैर्निशाम्यदृष्ट्वायथाशक्तिस्तुत्वाश्रांतवद्विरराम २६ आत्मनोलोकसंस्थानविज्ञानेपरिखिद्यतोब्रह्मणोऽभिप्रेतमालक्ष्यतमाहेतिद्व योरन्वयः तेन (कल्पव्यतिकरांभसा) प्रलयोदकेनविषण्णचेतसम् २७ (किंकुर्वन् अगाधयागंभीरया) कश्मलंमोहं शमयन्निवइवेतिसमस्तमोहाशमनंदर्शयति २८ हेवेदगर्भ तंद्रींविषादकृतमालस्यंमा गाः तेनैवमेदृशमनुस्पृशतादित्यादियत्प्रार्थयतेतदग्रेपूर्वमेवसंपादितम् २९ तर्हिकथमहंनजानामीत्यतआह भूयइति (मदाश्रयांविद्यांभक्तियुक्तं ज्ञानं ताभ्यांतपोविद्याभ्यांअपावृतान्स्पष्टान्)३० भक्तियुक्तःस माहितश्चसन्नात्मनिस्वस्मिँल्लोकेचमांततंव्याप्यस्थितंमांद्रष्टाऽसिद्रक्ष्यसि आत्मनोजीवांश्च ३१ सर्वत्रमद्दर्शनेमोहोनिवर्ततइत्याह यदात्विति प्रतिचक्षीतपश्येत् ३२ तदाचमिथ्याज्ञाननिवृत्तौमुच्यतइत्याह यदेति (गुणाःसत्त्वादयःआशयोंतःकरणं) भूतादिभिर्विरहितमात्मानंजीवंशुद्धत्वंपदार्थंस्वरूपेणस्वस्यात्मभूतेनमयातत्पदार्थेनोपेतमेकीभूतंपश्यन्भवतितदास्वाराज्यंमोक्षंप्राप्नोति ३३ (नानाविधकर्मणांविता नेनाविस्तारेण जीवादृष्टानुसारेणेत्यर्थः तेआत्माबुद्धिः) यतोवर्षीयान्वृद्धतरः अत्यधिकोस्तीत्यर्थः ३४ अनुग्रहमेवाह ऋषिमितिचतुर्भिः यच्चतस्तेमनोमयि (शुद्धसत्त्वोपाधिकेब्रह्मणि) निर्बद्धम् (एकनिष्ठं कृतम्) ३५ यच्चस्माद्भूतैरिंद्रियैर्गुणैःसत्त्वादिभिरात्मनाऽहंकारेणचायुक्तंमन्यसे ३६

श्लोकाः २५ / ३६

सोऽसावदभ्रकरुणोभगवान्विवृद्धप्रेमस्मितेननयनांबुरुहंविजृंभन् ॥ उत्थायविश्वविजयायचनोविषादंमाध्व्यागिराऽपनयतात्पुरुषःपुराणः २५ ॥ मैत्रेयउवाच ॥
स्वसंभवंनिशाम्यैवंतपोविद्यासमाधिभिः ॥ यावन्मनोवचस्तुत्वाविररामसखिन्नवत् २६ अथाभिप्रेतमन्वीक्ष्यब्रह्मणोमधुसूदनः ॥ विषण्णचेतसंतेनकल्प
व्यतिकरांभसा २७ लोकसंस्थानविज्ञानआत्मनःपरिखिद्यतः ॥ तमाहागाधयावाचाकश्मलंशमयन्निव २८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ मावेदग
र्भगास्तंद्रीं[1]सर्गउद्यममावह ॥ तन्मयापादितंह्यग्रेयन्मांप्रार्थयतेभवान् २९ भूयस्त्वंतपआतिष्ठविद्यांचैवमदाश्रयाम् ॥ ताभ्यामंतर्हृदिब्रह्मँल्लोकान्द्रक्ष्यस्य
पावृतान् ३० ततआत्मनिलोकेचभक्तियुक्तःसमाहितः ॥ द्रष्टाऽसिमांततंब्रह्मन्मयिलोकांस्त्वमात्मनः ३१ यदातुसर्वभूतेषुदारुष्वग्निमिवस्थितम् ॥ प्रति
चक्षीतमाँल्लोकोजह्यात्तर्ह्येवकश्मलम् ३२ यदारहितमात्मानंभूतेंद्रियगुणाशयैः ॥ स्वरूपेणमयोपेतंपश्यन्स्वाराज्यमृच्छति ३३ नानाकर्मवितानेनप्रजाब
ह्वीःसिसृक्षतः ॥ नात्मावसीदत्यस्मिंस्तेवर्षीयान्मदनुग्रहः ३४ ऋषिमाद्यंनबध्नातिपापीयांस्त्वांरजोगुणः ॥ यन्मनोमयिनिर्बद्धंप्रजाःसंसृजतोऽपिते
३५ ज्ञातोऽहंभवतात्वद्यदुर्विज्ञेयोऽपिदेहिनाम् ॥ यन्मांत्वंमन्यसेऽयुक्तंभूतेंद्रियगुणात्मभिः ३६

चूर्णिका

२५॥ मैत्रेयउवाच ॥ ब्रह्माएवंस्तुत्वाविरराम २६ ॥ ॥ तदा भगवान्उवाच ॥ २७ २८ हेवेदगर्भत्वंआलस्यंमाकुरु सर्गोद्यमंआवह त्वंयत्प्रार्थयसेतत् मयाअग्रेसंपादितं २९ त्वंभूयःतपःमदाश्रयांविद्यांचआतिष्ठ ताभ्यांस्वहृदिअपावृतान् लोकान्पश्यसि ३० ततोभक्तियुक्तःसन्आत्मनिलोकेचव्याप्तंमांद्रक्ष्यसि ३१ सृष्टौतवमोहो नभविष्यति अहंतेप्रीतोस्मियःपुमान् त्वत्कृतस्तोत्रेणस्तुत्वामांभजेत् तस्यआशु अहंप्रसन्नःस्याम् हेब्रह्मन् याःप्रजाःमयिलीनाःबभूवुःताःयथापूर्वंसृज ३२ ३३ ३४ ३५ ३६ ॥३९॥

[1] तन्द्रामितिपाठः म० टीकायामपि।

CC-0. In Public Domain. Digitization by eGangotri

टीका

तुभ्यंतव नालेनमार्गेणपुष्करस्य (पद्मस्य) मूलमधिष्ठानंसलिलेविचिन्वतःमयिविचिकित्सायांभवितव्यमस्याश्रयेणनचदृश्यते ततोऽस्तिनास्तीतिसंदेहेसत्यात्मास्वरूपंमेमयाऽबहिरंतर्हृदिदर्शितः ३७ अंग
हेब्रह्मन् चकर्थंकृतवानसि मत्कथैवाभ्युदयस्तेनांकितं सएष (मदनुग्रहः) बंधाभावोमयिमनोनिर्बंधोमज्ज्ञानंमद्रूपस्यहृदिदर्शनंमत्स्तुतिस्तपोनिष्ठाचेतियदेषसर्वोऽपिमदनुग्रहः (इत्यर्थः) ३८ (अहंप्रीतो
स्मितेतुभ्यंभद्रंकल्याणमस्तुविजयेच्छयाउद्भवेच्छयेत्यर्थः) गुणमयत्वेनप्रतीयमानमपिनिर्गुणमेवानुवर्णयन् यदस्तौषीः ३९ तवप्रीतइतिकिंवक्तव्यमित्याह यइति (सर्वकामवरेश्वरः सर्वेषामभिल
षितवराणांदानेसमर्थ इत्यर्थः संप्रसीदेयंप्रसन्नोभवेयम्) ४० नचमत्प्रीतेरप्यधिकंकिंचिदस्तीत्याह पूर्तादिभीराद्धंसिद्धंयन्निःश्रेयसं (मोक्षरूपं) फलंतन्मत्प्रीतिरेवेतितत्त्वविदांमतम् (योगेनयःसमाधिस्ते
न) ४१ अत्रहेतुमाह अहमिति (हेधातः) आत्मनामहंकारोपाधीनांजीवानामात्मा अतःप्रेयसामतिप्रियाणामपिमध्येप्रेष्ठःप्रियतमः सान्निरवद्यः (अतोरतिमनुरागं) यत्कृतेयदर्थम् (आत्मार्थमेवेत्यर्थः 'आ

॥४०॥

त्मनस्तुकामायसर्वंप्रियंभवती'तिश्रुतेः) ४२ अतस्त्वंकृतार्थएवतथाऽपिमत्प्रियार्थं सृष्टिंकुर्वित्याह सर्वेति आत्मात्वमिदंत्रैलोक्यंयामय्यनुशेरतेताःप्रजाश्चसृज केनात्मनैवान्यनिरपेक्षेण (स्वदेहेनेत्यर्थः)
तत्रज्ञापकापेक्षाऽभावमाह सर्ववेदमयेनेति आत्माहंयोनिः कारणंयस्येतिज्ञानक्रियाशक्त्यातिशयंसूचयातियथापूर्वमिति तवात्राभ्यासोऽप्यस्तीत्युक्तम् मय्यनुशेरतइतिस्थितानामभिव्यक्तिमात्रमेवकर्तव्यमित्यना
यासत्वमुक्तम् ४३ (तस्मैजगत्स्रष्ट्रेब्रह्मणेएवं) इदंसृज्यंव्यज्यप्रकाश्य (प्रकृतिपुरुषयोरपिनियंतापरमेश्वरः) पद्मनाभः (स्वेन) श्रीनारायणरूपेणतिरोदधेऽदृश्योभवत् ४४ ॥ ॥ इतितृ०टी०
नवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ दशमेकालसंप्रश्नंप्रतिवक्तुंतदुद्भवः । प्राकृतादिविभागेनसर्गस्तुदशधोच्यते (दैहिकीर्मानसीर्देहमनोभ्यांसृष्टाः) १ मेमया वदस्ववद भासयस्वेतिवा (आनुपू
र्व्येण क्रमेण) २ संचोदितःप्रार्थितः हृदिस्थानेवाह नतुतेप्रश्नास्तेनविस्मृताइत्यर्थः (हेभार्गवशौनक) ३

श्लोकाः

तुभ्यंमद्विचिकित्सायामात्मामेदर्शितोबहिः ॥ नालेनसलिलेमूलंपुष्करस्यविचिन्वतः ३७ यच्चकर्थाऽगमत्स्तोत्रंमत्कथाभ्युदयांकितम् ॥ यद्वातपसिते
निष्ठासएषमदनुग्रहः ३८ प्रीतोहमस्तुभद्रंतेलोकानांविजयेच्छया ॥ यदस्तौषीर्गुणमयंनिर्गुणंमानुवर्णयन् ३९ यएतेनपुमान्नित्यंस्तुत्वास्तोत्रेणमांभजेत् ॥
तस्याशुसंप्रसीदेयंसर्वकामवरेश्वरः ४० पूर्तेनतपसायज्ञैर्दानैर्योगसमाधिना ॥ राद्धंनिःश्रेयसंपुंसांमत्प्रीतिस्तत्त्वविन्मतम् ४१ अहमात्मात्मनांधातःप्रेष्ठःसन्प्रे ३७/३
यसामपि ॥ अतोमयिरतिंकुर्याद्देहादिर्यत्कृतेप्रियः ४२ सर्ववेदमयेनेदमात्मनाऽऽत्मात्मयोनिना ॥ प्रजाःसृजयथापूर्वंयाश्चमय्यनुशेरते ४३ ॥ मैत्रेयउवाच ॥
तस्माएवंजगत्स्रष्ट्रेप्रधानपुरुषेश्वरः ॥ व्यज्येदंस्वेनरूपेणकंजनाभस्तिरोदधे ४४ ॥ ॥ इतिश्रीमद्भागवतेतृतीयस्कंधेनवमोऽध्यायः ९ ॥ ७ ॥ ॥ विदुरउ
वाच ॥ ॥ अंतर्हितेभगवतिब्रह्मालोकपितामहः ॥ प्रजाःससर्जकतिधादैहिकीर्मानसीर्विभुः १ येचमेभगवन्पृष्टास्त्वय्यर्थाबहुवित्तम ॥ तान्वदस्वानुपू
र्व्येणछिंधिनःसर्वसंशयान् २ ॥ ॥ सूतउवाच ॥ ॥ एवंसंचोदितस्तेनक्षत्राकौषारवोमुनिः ॥ प्रीतःप्रत्याहतान्प्रश्नान्हृदिस्थानथभार्गव ३

चूर्णिका

३७ ३८ ३९ ४० ४१ ४२ ४३ ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंजगत्स्रष्ट्रेस्वेनरूपेणइदंसृज्यंप्रकाश्यपद्मनाभःतिरोदधे ४४ ॥ ॥ इतितृतीयेनवमः ९ ॥ ७ ॥ ॥४०॥
॥ विदुरउवाच ॥ ॥ भगवतिअंतर्हितेसति ब्रह्मादैहिकीःमानसीश्चप्रजाः कतिधाससर्ज १ हेभगवन्मयायेन्येप्रश्नाःकृताःतांश्चवद २ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

आत्मनिश्रीनारायणेआत्मानंमनआवेश्य ४ अव्जसंभूतोब्रह्मायदधिष्ठायस्थितः कर्तरिक्तः तत्पद्मंमंभश्चविलोक्य कथंभूतंपद्ममंभश्च तेनप्रलयकालेनकृतंवीर्यंयस्यतेनवायुनाकंपितंन्यपादित्युत्तरेणान्वयः ५ (आत्मनि संस्थास्थितिर्यस्यास्तया) विवृद्धंविज्ञानंवलंचयस्य न्यपात्सर्वंपीतवान् ६ पुष्करंपद्मं (यत्स्वयमधिष्ठितं तत्) प्राग्लीनांस्त्रींल्लोकान्कल्पितास्मिस्त्रक्ष्यामि ७ (भगवत्कर्मचोदितः) भगवतास्वयंकरणीयेकर्मणिचोदितोनियुक्तःसंस्तदापद्मकोशंप्रविश्यतमेकमेवत्रिधालोकत्रयरूपेणव्यभांक्षीद्विभाज एकेनकमलमुकुलेनकथंलोकत्रयसृष्टिरित्यसंभावनांवारयितुंतस्याविशालतामाह द्विसप्तधाचतुर्दशलोकरूपेण उरुधाततोऽपिबहुप्रकारेणभाव्यंभावयितुं योग्यं अतोनतेनात्रिलोकीकरणंचित्रमित्यर्थः ८ त्रिलोकीरूपेणैवविभागेहेतुमाह एतावांस्त्रिलोकीरूपोजीवलोकस्यजीवानांभोगस्थानस्यप्रत्यहंसृज्यस्यसंस्थाभेदोरचनाविशेषउक्तः ननु परमेष्ठिनोपिजीवत्वाविशेषाद्ब्रह्मलोकस्यापिकिमितिप्रत्यहंसृष्टिर्नभवतितत्राह हियस्मादनिमित्तस्यनिष्कामस्यधर्मस्यविपाकः फलरूपोऽसौ उपलक्षणमेतत् सत्यलोकस्य

॥४१॥ महःप्रभृतिलोकानांतद्वासिनांच त्रैलोक्यस्यकाम्यकर्मफलत्वात्प्रतिकल्पमुत्पत्तिविनाशौभवतः महःप्रभृतीनामुपासनासमुचितनिष्कामधर्मफलत्वाद्द्विपरार्धपर्यंतंननाशः तत्रस्थानांचततःपरंप्रायेणमुक्तिरितिभावः ९ कालभेदेनलोकसृष्टिभेदंश्रुत्वातमेवकालंजिज्ञासुःपृच्छति(यदिति बहुरूपस्यअनंतरूपस्यविष्णोः)यत्कालाख्यंलक्षणंस्वरूपमात्थअब्रवीः कथंकालःकल्पतेकिंवातस्यसूक्ष्मंस्थूलंचरूपमिति यथावद्वर्णयेत्यर्थः १० तत्रसामान्यतःकालस्यस्वरूपमत्रोच्यतेउत्तराध्यायेतुविशेषतः गुणानांव्यतिकरोमहदादिपरिणामस्तेनैवाक्रियतेयःसकालइतिशेषः वक्ष्यतेचैकादशे 'गुणव्यतिकरःकालःस्वभावःसूत्रमेवच'इति स्वतस्तु निर्विशेषः अप्रतिष्ठितःक्वाप्यपर्यवसितः आद्यंतशून्यइत्यर्थः एतदेवदर्शयितुमीश्वरःसृष्ट्यादितेनानिमित्तभूतेनकरोतीत्याह पुरुषइति उपादीयतेनिमित्ततयास्वीक्रियतइत्युपादानम् सकालउपादानंनिमित्तंयस्मिंस्तमात्मानमेवविश्वरूपेणासृजत् स्वव्यतिरेकेणसृज्यस्याभावात् एतच्चवस्तुकथनमात्रम् कालेननिमित्तेनचासृजदित्येतावदेवविवक्षितम् ११ स्वव्यतिरिक्तस्यसृज्याभावंदर्शयन्कालस्यसृष्टिनिमित्ततांदर्शयति विश्वमिति विष्णुमाययासंस्थितंसंहृतंब्रह्मतन्मात्रंसद्विश्वं ईश्वरेणकर्त्राकालेननिमित्तेनपरिच्छिन्नंपृथक्प्रकाशितम् अव्यक्तामूर्तिःस्वरूपंयस्येतिस्वतोनिर्विशेषतादर्शिता १२

श्लोकाः ४ १२

॥ मैत्रेयउवाच ॥ ॥ विरिंचोऽपितथाचक्रेदिव्यंवर्षशतंतपः ॥ आत्मन्यात्मानमावेश्ययदाहभगवानजः ४ तद्विलोक्याब्जसंभूतोवायुनायदधिष्ठितः ॥ पद्ममंभश्चतत्कालकृतवीर्येणकंपितम् ५ तपसाह्येधमानेनविद्ययाचात्मसंस्थया ॥ विवृद्धविज्ञानबलोन्यपाद्वायुंसहांभसा ६ तद्विलोक्यवियद्व्यापिपुष्करं यदधिष्ठितम् ॥ अनेनलोकान्प्राग्लीनान्कल्पितास्मीत्यचिंतयत् ७ पद्मकोशंतदाविश्यभगवत्कर्मचोदितः ॥ एकंव्यभांक्षीदुरुधात्रिधाभाव्यंद्विसप्तधा८एतावाञ्जीवलोकस्यसंस्थाभेदःसमाहृतः ॥ धर्मस्यह्यनिमित्तस्यविपाकःपरमेष्ठ्यसौ ९ विदुरउवाच ॥ यदात्थबहुरूपस्यहरेरद्भुतकर्मणः ॥ कालाख्यंलक्षणंब्रह्मन्यथावर्णयनःप्रभो १० मैत्रेयउवाच ॥ गुणव्यतिकराकारोनिर्विशेषोऽप्रतिष्ठितः ॥ पुरुषस्तदुपादानमात्मानंलीलयासृजत् ११ विश्वंवैब्रह्मतन्मात्रंसंस्थितंविष्णुमायया ॥ ईश्वरेणपरिच्छिन्नंकालेनाव्यक्तमूर्तिना १२

चूर्णिका

॥ मैत्रेयउवाच ॥ ॥ ततःब्रह्मापिदिव्यवर्षशतंतपःतेपे ४ तपसाविद्ययायुक्तः अंभसासहवायुंपीतवान् ५ ततःपद्मकोशंप्रविश्य ६ तंचतुर्दशलोकरूपेणकल्पयामास ७ ८ ९ ॥ ॥ विदुरउवाच ॥ ॥ हेब्रह्मन् बहुरूपस्यहरेः कालाख्यंलक्षणंनःवर्णय १० ॥ ॥ मैत्रेयउवाच ॥ ॥ गुणानांव्यतिकरःआद्यंतशून्यःतकालइत्यभिधीयते ईश्वरः तेननिमित्तभूतेनात्मानंविश्वरूपेणासृजत् ११ १२ ॥४१॥

CC-0. In Public Domain. Digitization by eGangotri

अप्रतिष्ठितत्वंदर्शयितुंतत्कार्यविश्वप्रवाहस्याप्रतिष्ठामाह यथेदानीमस्तितथाऽग्रेपूर्वमप्यासीत्पश्चादपिभविष्यति एवंसामान्यतः कालंनिरूप्य विशेषतोनिरूपयिष्यंस्तन्निमित्तस्यसर्गस्यपूर्वोक्तानेवभेदाननुवदाति सर्गइति यस्तुप्राकृतोवैकृतश्च (इत्युभयात्मकःकौमारादिसर्गः) स (तस्य) दशमः १३ तन्निमित्तमेवत्रिविधंप्रलयमाह कालेनैवकेवलेननित्यःप्रलयः द्रव्येणसंकर्षणाग्न्यादिनानैमित्तिकः गुणैःस्वस्वकार्यंग्रसद्भिःप्राकृतिकः (एवमस्यविश्वस्य प्रतिसंक्रमोलयः) तानेवसर्गान्प्रपंचयाति आद्यइत्यादिनायावदध्यायसमाप्ति महतोलक्षणमात्मनोहरेःसकाशाद्गुणानांवैषम्यं(साम्यत्यागः) इति १४ अहमोऽहंकारस्य तस्य लक्षणम् यत्रोति । द्रव्यादयोवक्ष्यमाणास्त्रयः सर्गाः (तेषामुदयउत्पत्तिः) तृतीयस्तन्मात्रोभूतसर्गः भूतसूक्ष्मसर्गइत्यर्थः (तल्लक्षणं) द्रव्यशक्तिमान्महाभूतोत्पादकः १५ (ज्ञानक्रियात्मकः) ज्ञानेंद्रियकर्मेंद्रियात्मकश्चतुर्थः (वैकारिकाहंकाराज्जातोवैकारिकनामाज्ञानशक्तिमानधिदैवतसर्गः) पंचमोवैकारिकः (मनश्चवैकारिकमित्यर्थः) इंद्रियाधिष्ठातारोदेवामनश्च १६ षष्ठस्तुतमसःपंचपर्वाऽविद्यायाः अबुद्धिर्जीवानामावरणंविक्षेपश्चतांकरोतीत्यबुद्धिकृत्तस्य मेमत्तःशृणु १७ अनुद्वेगेनश्रोतव्यतामाह यद्विषयामेधासंसारंहरति (सहरिमेधास्तस्य) तस्यहरेर्लिला यद्वा इयमितितमआदिसर्गरूपा रजोभाज इतिब्रह्मरूपस्येत्यर्थः अस्मिन्पक्षेअबुद्धिकृतइतिप्रथमांतम् अनवधानकृतइत्यर्थः मुखमिवप्रथमंकृतोमुख्यः सर्गः तस्थुषांस्थावराणाम् १८ षड्विधत्वमेवाह येपुष्पंविनाफलंतितेवनस्पतयः (औदुंबरादयः) ओषधयःफलपाकांताः (व्रीह्यादयः) लताआरोहणापेक्षाः त्वक्सारावेण्वादयः (त्वचिसारोयेषांतेतथा) लताएवकाठिन्येनारोहणानपेक्षावीरुधः (जातीप्रभृतयः) येपुष्पैःफलंतितेद्रुमाः (चूतादयः) तेषांसाधारणंलक्षणमाह उर्ध्वंस्रोतआहारसंचारोयेषाम् तमःप्रायाअव्यक्तचैतन्याः अंतस्पर्शाःस्पर्शमेवजानंतिनान्यत् तदप्यंतरेवनबहिः विशेषिणोव्यवस्थितपरिणामाद्यनेकभेदवंतः १९ तिर्यक्स्रोतसांसर्गमाह तिरश्चामिति सचाष्टाविंशतिधः तिरश्चांलक्षणं अविदःश्वस्तनादिज्ञानशून्याः भूरितमसः आहारादिज्ञानमात्रनिष्ठाः (तदितरविषयेज्ञानरहिताःघ्राणज्ञाः)घ्राणेनैवेष्टमर्थंजानंति हृदिअवेदिनोदीर्घानुसंधानशून्याः तथाचश्रुतिः'अथेतरेषांपशूनामशनापिपासेएवाभिविज्ञानंनविज्ञातंवदंतिनाविज्ञातंपश्यंतिनविदुःश्वस्तनंनलोकालोकौ'इति २० अष्टाविंशतिभेदानेवाह गवादयउष्ट्रांताद्विशफाद्विखुरानव २१

श्लोकाः १३ — २१

यथेदानींतथाऽग्रेचपश्चादप्येतदीदृशम् ॥ सर्गोनवविधस्तस्यप्राकृतोवैकृतस्तुयः १३ कालद्रव्यगुणैरस्यात्रिविधःप्रतिसंक्रमः ॥ आद्यस्तुमहतःसर्गोगुणवैषम्यमात्मनः १४ द्वितीयस्त्वहमोयत्रद्रव्यज्ञानक्रियोदयः ॥ भूतसर्गस्तृतीयस्तुतन्मात्रोद्रव्यशक्तिमान् १५ चतुर्थऐंद्रियःसर्गोयस्तुज्ञानक्रियात्मकः ॥ वैकारिकोदेवसर्गःपंचमोयन्मयंमनः १६ षष्ठस्तुतमसःसर्गोयस्त्वबुद्धिकृतःप्रभो ॥ षडिमेप्राकृताःसर्गावैकृतानपिमेशृणु १७ रजोभाजोभगवतोलीलेयंहरिमेधसः ॥ सप्तमोमुख्यसर्गस्तुषड्विधस्तस्थुषांचयः १८ वनस्पत्यौषधिलतात्वक्सारावीरुधोद्रुमाः ॥ उत्स्रोतसस्तमःप्रायाअंतःस्पर्शाविशेषिणः १९ तिरश्चामष्टमः सर्गःसोऽष्टाविंशतिधोमतः ॥ अविदोभूरितमसोघ्राणज्ञाहृद्यवेदिनः २० गौरजोमहिषःकृष्णःसूकरोगवयोरुरुः ॥ द्विशफाःपशवश्चेमेअविरुष्ट्रश्चसत्तम २१

चूर्णिका ॥४२॥

यथाइदानींविश्वंअस्तितथापूर्वंआसीत् तथाप्राकृतादिसर्गान्शृणु तत्रसर्गोनवविधः प्राकृताः षट् ६ वैकृताः त्रयः प्राकृतवैकृतोयः सः दशमः १३ तत्राद्योमहतः सर्गः १४ १ अहंकारस्य २ महाभूतानांतृतीयः ३ १५ इंद्रियाणां ४ देवतानां पंचमः ५ १६ पंचपर्वाविद्यायाः तमसः षष्ठः ६ एतेप्राकृताः १७ वृक्षाणां सप्तमः सः षाड्विधः १८ वनस्पतिः १ औषधिः २ लता ३ त्वक्साराः ४ वीरुधः ५ द्रुमाः ६ इति १९ तिरश्चां अष्टमः सः अष्टाविंशतिधः २० गौरजोमहिषःकृष्णःसूकरोगवयोरुरुः द्विशफाःपशवश्चेमेअविरुष्ट्रश्चसत्तम २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खरादयएकशफाःषट् २२ श्वादयोगोधांताःपंचनखाद्वादश एवमेतेभूचराःसप्तविंशतिः मकरादयोजलचराः २३ कंकादयःखगाः अभूचरत्वेनैकीकृत्यगृहीताः तदेवमष्टाविंशतिभेदाभवंति तेषुकृष्णरुरुगौरा मृगविशेषाः अन्येषामपितिर्यक्प्राणिनांयथायथमेतेष्वेवांतर्भावः २४ (अर्वाक्) अधआहारसंचारोयस्यसोऽर्वाक्स्रोताः ऽहस्वमार्षम् नृणांसर्गोनृणांलक्षणं रजोऽधिकंयेषुते २५ एतेत्रयोवैकृताएवनकौमारवदुभयात्मकाः देवसर्गश्चवैकृतइत्यनुषंगः वैकारिकस्तुदेवसर्गःप्राकृतेषुपूर्वमेवप्रोक्तः (अतो न स वैकृतः) अयंतुततोन्यूनत्वाद्वैकृतोदेवसर्गत्वात्तदंतर्भूतश्च सनत्कुमारादीनांसर्गस्तुप्राकृतोवैकृतश्च देवत्वेनमनुष्यत्वेनचसृज्यइत्यर्थः २६ वैकृतश्चदेवसर्गोऽष्टविधः तत्रविबुधादयस्त्रयोभेदाः गंधर्वाप्सरसएकः यक्षरक्षांस्येकः २७ भूतप्रेतापिशाचाएकः सिद्धचारणविद्याधराएकः किन्नरादयएकः आदिशब्दात्किंपुरुषाश्वमुखादयः एतद्विंशेऽध्यायेस्पष्टंभविष्यति २८ २९ ३० ॥ ॥ इतिश्रीभागवतेतृतीयस्कंधेटीकायांदशमोऽध्यायः १० ॥ ॥ ७ ॥ ॥ ततएकादशेकालपरमाण्वादिलक्षणैः ॥ युगमन्वंतरादिभ्यःकल्पमानादिवर्ण्यते १ तदेवंसामान्यतःकालस्योपलक्षणभूतंगुणव्यतिकरंदशविधंनिरूप्येदानींतस्यैवविशेषंनिरूपयितुंतत्परिच्छेद्यंवस्तुलक्षयति द्वाभ्याम् सतःकार्यस्यविशेषाणामंशानांयश्चरमोंत्योयस्यांशोनास्ति अनेकःकार्यावस्थामप्राप्तः (कार्यंह्यनेकावयवानामेकीभवनाद्भवति) असंयुतःसमुदायावस्थांचाप्राप्तः अतएवसदाकार्यसमुदायावस्थयोरपगमेऽप्यस्तिसपरमाणुर्विज्ञेयः किंतत्रप्रमाणमतआह यतोयेभ्यःसमुदितेभ्योनृणांव्यवहर्तॄणामैक्यभ्रमोऽवयविबुद्धिः तथाचपंचमेऽवयविनिराकरणेवक्ष्यति " येषांसमूहेनकृतोविशेष " इति कार्यानुपपत्त्याकल्प्यतइतिभावः १ सूक्ष्ममुक्त्वास्थूलमाह सतएवेति यस्यचरमोंऽशःपरमाणुस्तस्यैवसतःकार्यमात्रस्यस्वरूपावस्थितस्यपरिणामांतरमप्राप्तस्ययत्कैवल्यमैक्यंसपरममहान् पुंस्त्वंतुपरमाणुप्रतियोगित्वात् ननु नानाविशेषवान्परस्परंभिन्नश्चसर्वःपदार्थःकथमैक्यंतस्यतत्राह अविशेषोविशेषविवक्षारहितोनिरंतरोभेदविवक्षारहितश्च सर्वोऽपिप्रपंचःपरममहानित्यर्थः २

खरोऽश्वोऽश्वतरोगौरः शरभश्चमरीतथा ॥ एतेचैकशफाःक्षत्तःशृणुपंचनखान्पशून् २२ श्वासृगालोवृकोव्याघ्रोमार्जारःशशशल्लकौ ॥ सिंहःकपिर्गजःकूर्मो श्लोकाः
गोधाचमकरादयः २३ कंकगृध्रवटश्येनभासभल्लुकबर्हिणः ॥ हंससारसचक्राह्वकाकोलूकादयःखगाः २४अर्वाक्स्रोतस्तुनवमःक्षत्तरेकविधोनृणाम् ॥ रजोधि
काःकर्मपरादुःखेचसुखमानिनः २५ वैकृतास्त्रयएवैतेदेवसर्गश्चसत्तम ॥ वैकारिकस्तुयःप्रोक्तःकौमारस्तूभयात्मकः २६ देवसर्गश्चाष्टविधोविबुधाःपितरो २२/२
ऽसुराः ॥ गंधर्वाप्सरसःसिद्धायक्षरक्षांसिचारणाः २७ भूतप्रेतपिशाचाश्चविद्याध्राःकिन्नरादयः ॥ दशैतेविदुराख्याताःसर्गास्तेविश्वसृक्कृताः २८ अतःपरंप्र
वक्ष्यामिवंशान्मन्वंतराणिच ॥ एवंरजःप्लुतःस्रष्टाकल्पादिष्वात्मभूर्हरिः २९ सृजत्यमोघसंकल्पआत्मैवात्मानमात्मना ३० इतिश्रीमद्भा ० तृ ० दशमो
ऽध्यायः १० ॥ ७ ॥ ॥ मैत्रेयउवाच ॥ चरमःसद्विशेषाणामनेकोऽसंयुतःसदा ॥ परमाणुःसविज्ञेयोनृणामैक्यभ्रमोयतः १ सतएवपदार्थ
स्यस्वरूपावस्थितस्ययत् ॥ कैवल्यंपरममहानविशेषोनिरंतरः २

चूर्णिका

खरोश्वोश्वतरोगौरःशरभश्चमरीतथा एतेचैकशफाःक्षत्तःशृणुपंचनखान्पशून् २२ श्वासृगालोवृकोव्याघ्रोमार्जारःशशशल्लकौ सिंहःकपिर्गजःकूर्मोगोधाचमकरादयः ऐतेपंचनखाः २३ कंकगृध्रवटश्येनभासभल्लूकबर्हिणः हंससारसचक्राह्वकाकोलूकादयःखगाः एवंअष्टाविंशतिभेदाः २४ नृणां नवमः एकविधः २५ उभयात्मकः कुमाराणां दशमः वैकृतएवसर्गः २६ देवानांसः अष्टविधः देवाः पितरःअसुराः गंधर्वाप्सरसः यक्षरक्षांसि भूतप्रेतपिशाचाः सिद्धचारणविद्याधराः किन्नरादयः ८ इमेदशसर्गाः ब्रह्मणाकृताः २७ २८ अतःपरंवंशान्मन्वंतराणिचकथयामि श्रीहरिः एवंआत्मानंसृजति२९ ३० ॥ ॥ इतितृतीयेदशमः १० ॥ ॥ मैत्रेयउवाच ॥ ॥ १ २ ॥४३॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

यथासूक्ष्मःस्थूलश्चायंपदार्थः एवं (सौक्ष्म्ये परमाणुत्वे स्थौल्ये परममहत्त्वे वर्तमानः) कालोऽप्यनुमितः चकारान्मध्यमावस्थागृह्यते संस्थानंपरमाण्वाद्यवस्थातस्यभुक्तिर्व्याप्तिस्तयाभगवानितिहरेःशक्तिःस्वतोऽव्यक्तः (कालः) व्यक्तं (व्याप्यं परमाण्वादि परममहत्पर्यंतम्) भुंक्तेव्याप्नोतिपरिच्छिनत्तीतितथा विभुरुत्पत्त्यादिषुदक्षः ३ एतदेवप्रपंचयति सइत्यादिना सतःप्रपंचस्यपरमाणुतांपरमाण्ववस्थांयोभुंक्तेसकालःपरमाणुः तस्यैवाविशेषंसाकल्यंयोभुंक्तेसपरममहान् अयमर्थः ग्रहर्क्षताराचक्रस्थइत्यादिनायत्सूर्यपर्यटनंवक्ष्यतेतत्रसूर्योयावतापरमाणुदेशमतिक्रामतितावान्कालःपरमाणुः यावताचद्वादशराश्यात्मकंसर्वंभुवनकोशमतिक्रामति सपरममहान्संवत्सरात्मकःकालः तस्यैवावृत्त्यायुगमन्वंतरादिक्रमेणद्विपरार्धांतत्वमिति तथाचपंचमेसूर्यगत्यैवकालादिविभागंवक्ष्यति ४ इदानींद्व्यणुकादिलक्षणपूर्वकंमध्यमकालावस्थांकथयति द्वौपरमाणूअणुःस्यात् त्रयोऽणवस्त्रसरेणुः सतुप्रत्यक्षइत्याह जालार्केति गवाक्षप्रविष्टेष्वर्करश्मिष्ववगतः कोऽसौ योऽतिलघुत्वेनखमेवानुपतन्नगाद्गतः पाठांतरे खमेवानुपतन्नवगतोनतुगांपृथ्वीम् ५शतंभागास्त्रुटिरूपायस्मिन्सवेधस्तैर्वेधैः ६ तेनिमेषास्त्रयःक्षणइत्याम्नातः काष्ठाःपंचदशएकंलघु ७ (पंचदशलघूनि एकानाडिका कथिता द्वेनाडिके मुहूर्तः) नाडिकाःषट्सप्तवाप्रहरः सएवयामोदिनस्यरात्रेश्चचतुर्थोभागः ह्रासेषट् वृद्धौसप्त संध्यांशमुहूर्तद्वयंविनेतिज्ञातव्यम् तत्राप्यनियमार्थोवाशब्दः प्रत्यहंतद्भेदानांगणयितुमशक्यत्वात् ८ नाडिकायाउन्मानमाह उन्मीयतेनेनेत्युन्मानंपात्रम् (तत्तु) षट्पलताम्रविरचितम् पंचगुंजामाषस्तैः (चतुर्भिः स्वर्णमाषैः) श्चतुरंगुलायामशलाकारूपेणविरचितैःकृतमूलच्छिद्रंतेनच्छिद्रेणयावत्प्रस्थपरिमितंजलंप्रविशतितेनचप्लुतंनिमग्नंभवतितावान्कालोनाडिका अत्रपलच्छिद्रयोराधिक्येशीघ्रंनिमज्जेदल्पत्वेचविलंबेनेतिपलशलाकयोर्नियमः (पलं कर्षचतुष्टयं आढकचतुर्थांशः प्रस्थः) ९ (उभेउभयविधे) अहनीअहोरात्रम् १०

॥४४॥

श्लोकाः

एवंकालोप्यनुमितःसौक्ष्म्येस्थौल्येचसत्तम ॥ संस्थानभुक्त्याभगवानव्यक्तोव्यक्तभुग्विभुः ३ सकालःपरमाणुर्वैयोभुंक्तेपरमाणुताम् ॥ सतोविशेषभुग्यस्तुसकालःपरमोमहान् ४ अणुर्द्वौपरमाणूस्यात्त्रसरेणुस्त्रयःस्मृतः ॥ जालार्करश्म्यवगतःखमेवानुपतन्नगात्[1] ५ त्रसरेणुत्रिकंभुक्तेयःकालःसत्रुटिःस्मृतः ॥ शतभागस्तुवेधःस्यात्तैस्त्रिभिस्तुलवःस्मृतः ६ निमेषस्त्रिलवोज्ञेयआम्नातस्तेत्रयःक्षणः ॥ क्षणान्पंचविदुःकाष्ठांलघुतादशपंचच ७ लघूनिवैसमाम्नातादशपंचचनाडिका ॥ तेद्वेमुहूर्तःप्रहरःषड्यामःसप्तवान्नृणाम् ८ द्वादशार्धपलोन्मानंचतुर्भिश्चतुरंगुलैः ॥ स्वर्णमाषैःकृतच्छिद्रंयावत्प्रस्थजलप्लुतम् ९ यामाश्चत्वारश्चत्वारोमर्त्यानामहनीउभे ॥ पक्षःपंचदशाहानिशुक्लःकृष्णश्चमानद १०

३/१०

चूर्णिका

३ कालमानंशृणु सूर्यःयावताकालेनपरमाणुदेशमतिक्रम्ययाति तावान् परमाणुः कालः ४ तौद्वौअणुःतेत्रयःत्रसरेणुः सः जालार्केदृश्यते ५ तेत्रयःत्रुटिःतासांशतंवेधःतैःत्रिभिःलवः ६ तेत्रयःनिमेषःतेत्रयःक्षणःतेपंचकाष्ठाताःपंचदशलघु ७ तेपंचदशनाडिका तेद्वेमुहूर्तः सप्तनाडिकाः नृणांयामः ८९ अष्टौयामाः मर्त्यानांदिवारात्री ताः पंचदक्षपक्षःसःशुक्लकृष्णसंज्ञः १०

॥४४॥

[1] ‘न गा’मि ति कस्मिंश्चित्पुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पंचदशाहोरात्राःपक्षःतयोः शुक्लकृष्णयोःसमुच्चयोमनुष्याणांमासःसतुपितृणामहोरात्रं'तौमासावृतुः)षण्मासाअयनं दिवीत्यस्योत्तरेणान्वयः११ (उत्तरंदक्षिणंचेतिद्वेअयने)दिवीतिदेवानामहोरात्रेप्राहुःद्वादशमा
साः(वत्सरःस्मृतः)१२ अनेनक्रमेणासौसूर्योनित्यमायुःक्षपयतीत्याह ग्रहाश्चंद्रादयःऋक्षाण्यश्विन्यादीनि ताराअन्यानिनक्षत्राणि तदुपलक्षितंयत्कालचक्रंतत्रस्थितोऽनिमिषःकालात्माविभुरीश्वरः सूर्योजगद्द्वाद
शराश्यात्मकंभुवनकोशं (परमाण्वादि संवत्सरपर्यंतेनकालेन)पर्येतिपर्यटति १३ संवत्सरादिभेदश्चसौरबार्हस्पत्यसावनचांद्रनाक्षत्रमासभेदेनद्रष्टव्यः (तत्रसौरद्वादशमासाःसंक्रमणावसानाःसंवत्सरःद्वादशरा
शिपुबृहस्पतेरावृत्त्यायःकालस्तस्यद्वादशांशःपरिवत्सरःचंद्रस्यसप्तविंशतिनक्षत्रभोगेनचांद्रोमासःतेद्वादशमासा इडावत्सरःचांद्रोब्दश्चैत्रादिःसोनुवत्सरःअह्नांषष्ट्युत्तरशतत्रयात्मासावनोब्दोवत्सरनामकः)
केचित्पुनरेवमाहुःयदाशुक्लपक्षप्रतिपदिसंक्रांतिर्भवतितदासौरचांद्रमासयोर्युगपदुपक्रमोभवतिससंवत्सरः ततः सौरमानेनवर्षेषट्दिनानिवर्धंतेचांद्रमानेनवर्षेषट्दिनानिह्रसंतीतिद्वादशदिनव्यवधानादुभयोरप्रप
॥४५॥ श्चाद्भावोभवति एवंव्यवधानतारतम्येनपंचवर्षाणिगच्छंति तन्मध्येद्वौमलमासौभवतः (ततः)पुनःषष्ठःसंवत्सरोभवतीति(हेविदुर) १४ एवंभूतः कालात्मानित्यमप्रमत्तैःपूजनीयइत्याह यइति सृज्यं
कार्यमंकुरादितद्विषयांबीजादीनांशक्तिंकालरूपयास्वशक्त्याबहुधोच्छ्वसयन्कार्याभिमुखींकुर्वन्दिव्यंतरिक्षेधावति कोऽसौ भूतभेदोमहाभूतविशेषस्तेजोमंडलरूपीसूर्यः किमर्थंधावति पुंसःपुरुषस्याभ्रमाय
भ्रमोमोहस्तन्निवृत्तये आयुरादिव्ययेनविषयासक्तिंनिवर्त्तयन्नित्यर्थः (स्वयंभ्रमन्पुंसोभ्रमंनिवर्तयतीत्याश्चर्यम्) सकामानांतुगुणमयंस्वर्गादिफलंक्रतुभिर्विस्तारयन् तस्मैसंवत्सरपंचकप्रवर्त्तकाय (भूतभे
दायबलिंहरत) पूजांकुरुत १५ इदंस्वमानेनवर्षशतंगणितमायुर्मानं मत्यहंकल्प्यतेसृज्यतइतिकल्पस्त्रैलोक्यंतस्माद्बाह्यतः विदोज्ञानिनः १६ (भगवान्भवान्भगवतःकालस्यगतिंवेदकुतःयोगिनो) योगराद्धेन
योगसिद्धेन १७ द्वादशभिर्वर्षसहस्रैरित्युत्तरश्लोकसामर्थ्याज्ज्ञातव्यम् (सावधानं) अवधीयतइत्यवधानंसंध्यासध्यांशश्चतत्सहितम् १८ कृतयुगेचत्वारिसहस्राणि संध्यासंध्यांशयोश्चत्वारिचत्वारीत्यष्टौशता
निच एवंत्रेतादिष्वपियोज्यम् १९

श्लोकाः ११/१२

तयोःसमुच्चयोमासःपितृणांतदहर्निशम् ॥ द्वौतावृतुःषडयनंदक्षिणंचोत्तरंदिवि ११ अयनेचाहनीप्राहुर्वत्सरोद्वादशस्मृतः ॥ संवत्सरशतंनृणांपरमायुर्निरू
पितम् १२ ग्रहर्क्षताराचक्रस्थःपरमाण्वादिनाजगत् ॥ संवत्सरावसानेनपर्येत्यनिमिषोविभुः १३ संवत्सरःपरिवत्सरइडावत्सरएवच ॥ अनुवत्सरोवत्सरश्च
विदुरैवंप्रभाष्यते १४ यःसृज्यशक्तिमुरुधोच्छ्वसयन्स्वशक्त्यापुंसोऽभ्रमायदिविधावतिभूतभेदः ॥ कालाख्ययागुणमयंक्रतुभिर्वितन्वंस्तस्मैबलिंहरतवत्सरपं
चकाय १५ विदुरउवाच ॥ पितृदेवमनुष्याणामायुःपरमिदंस्मृतम् ॥ परेषांगतिमाचक्ष्वयेस्युःकल्पाद्बहिर्विदः १६ भगवान्वेदकालस्यगतिंभगवतोन
नु ॥ विश्वंविचक्षतेधीरायोगराद्धेनचक्षुषा १७ मैत्रेयउवाच ॥ ॥ कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगम् ॥ दिव्यैर्द्वादशभिर्वर्षैःसावधानंनिरूपितम् १८
चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमम् ॥ संख्यातानिसहस्राणिद्विगुणानिशतानिच १९

चूर्णिका

तौद्वौएकोमासः तत्रपितृणांअहर्निशम् तौद्वौऋतुःतैःत्रिभिःअयनं तत् दक्षिणंउत्तरंच११ तेअयनेदेवानांअहोरात्रं तत् नृणांवत्सरम् एवंनृणामायुः संवत्सरशतं १२ १३ ॥४५॥
१४ १५ ॥ ॥ विदुरउवाच ॥ ॥ पितृदेवमनुष्याणांआयुः त्वयोक्तंश्रुतंयेतुत्रैलोक्याद्बहिःतेषांगतिंवद १६ १७ ॥ ॥ मैत्रेयउवाच ॥ ॥ कृतंत्रेताद्वापरंचकलि
श्चेतिचतुर्युगम् देवानांद्वादशसहस्रवर्षैःभवति १८ कृतेधर्मः चतुष्पात् अन्येपुक्षीयतेचतुर्युगसहस्रंब्रह्मणोदिनं तावतीनिशा १९

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥११॥

(संध्याचांशश्चतयोस्तत्र) युगस्यादौसंध्याअंतेसंध्यांशः उक्तानिशतानिसंख्याययोस्तयोरंतरेणमध्येतज्ज्ञाः कालज्ञाः तस्यविशेषमाह यत्रेति गवालंभादिधर्मविशेषोयत्रविधीयतइत्यर्थः साधारणधर्म स्तुसंध्यांशयोरप्यस्त्येव २० चतुष्पात्संपूर्णस्त्रेतादिषुपादेनपादेनव्येतिह्रसति पादेनपादेनवर्धमानेनाधर्मेणहेतुना एतच्चस्वरूपकथनमात्रंवैराग्यार्थं नतुधर्मसंकोचनार्थम् २१ त्रिलोक्याबहिर्महर्लोकप्रभृतिब्र ह्मलोकमभिव्याप्यचतुर्युगसहस्रं (दिव्यानां युगानां सहस्रं) एकंदिनं (यदस्मदीयं चतुर्युगं तद्दिव्ययुगमुक्तं तावत्येवयुगसहस्रमिता तत्रत्यानिशाहेतात) यद्यस्यां (निशायां) विश्वसृक्ब्रह्मानिमी लतिस्वापिति २२ तत्रदिनस्थितिमाह निशाऽवसानइत्यादिसार्धैश्चतुर्भिः (ब्रह्मणा आरब्धोलोकानांसृष्ट्यादिलक्षणःकल्पः) चतुर्दशमनून्भुंजन्पालयन्व्याप्नुवन्नित्यर्थः भगवतोब्रह्मणो यावद्दिनमनुवर्तते २३ किंचिदधिकांयुगानामेकसप्ततिं (तावन्मितं स्वं स्वं कालंमनुर्भुंक्ते अत्रयुगशब्दोदिव्ययुगपरः मन्वंतरं तु दिव्यानांयुगानामेकसप्ततिरित्यभिधानात्) मनुवंश्याःपृथ्वीपालकाःक्रमेणभवंति सप्त र्षिप्रभृतयस्तुयुगपत्समकालमेवभवंति सुरेशाइंद्राःताननुवर्ततेयेगंधर्वादयस्तेऽपि २४ (ब्राह्मःब्रह्मणाकृतः दैनंदिनं प्रतिदिनं क्रियमाणः) त्रैलोक्यंवर्त्तयतीतितथा (यत्रसर्गे तिर्यगादीनां संभवउत्पत्तिः २५ (सत्त्वं सत्त्वगुणं बिभ्रत् श्रीहरिः) स्वमूर्तिभिर्मन्वंतर (-संबंधा -) वतारै (- र्यज्ञादिनामकैः-) र्मन्वादिभिः (स्वायंभुवादिभि-) र्द्वारभूतैराविष्कृतपुरुषकारः सन्विश्वंरक्षति २६ रात्रिगतांस्थि तिमाह पंचभिः तमसोमात्रांलेशम् प्रतिसंरुद्धः प्रत्याहृतोविक्रमोयेन अनुगतमनुप्रविष्टमशेषंयस्मिन् (सहरिःब्रह्मदिनांतेतूष्णींनिर्व्यापारः) २७ तदेवस्पष्टयति तमेवेति अन्वपिधीयंतइतिकर्मकर्तरिप्रयो गः तिरोहिताभवंतीत्यर्थः कथम् निर्मुक्तोरहितःशशीभास्करश्चयथाभवतितथा २८ भगवच्छक्तिरूपोयःसंकर्षणमुखाग्निस्तेन (दह्यमानायाम्) ऊष्मणार्दिताःसंतो (महर्लोकस्थाभृग्वादयस्तस्मात्) जन लोकंयांति २९ कल्पांतेनैधिताःसिंधवःसमुद्राः उत्कटआटोपःक्षोभोयेषांतेचंडवातैरीरितोर्मयश्च (दग्धंत्रिभुवनंप्लावयंति) ३०

॥४६॥

श्लोकाः २०/३०

संध्यांऽशयोरंतरेणयःकालःशतसंख्ययोः ॥ तमेवाहुर्युगंतज्ज्ञायत्रधर्मोविधीयते २० धर्मश्चतुष्पान्मनुजान्कृतेसमनुवर्तते ॥ सएवान्येष्वधर्मेणव्येतिपादे नवर्धता २१ त्रिलोक्यायुगसाहस्रंबहिराब्रह्मणांदिनम् ॥ तावत्येवनिशातातयन्निमीलतिविश्वसृक् २२ निशावसानआरब्धोलोककल्पोऽनुवर्तते ॥ याव द्दिनंभगवतोमनून्भुंजंश्चतुर्दश २३ स्वंस्वंकालंमनुर्भुंक्तेसाधिकांह्येकसप्ततिम् ॥ मन्वंतरेषुमनवस्तद्वंश्याऋषयःसुराः ॥ भवंतिचैवयुगपत्सुरेशाश्चानुयेचता न् २५ एषदैनंदिनःसर्गोब्राह्मस्त्रैलोक्यवर्त्तनः ॥ तिर्यङ्नृपितृदेवानांसंभवोयत्रकर्मभिः २५ मन्वंतरेषुभगवान्बिभ्रत्सत्त्वंस्वमूर्तिभिः ॥ मन्वादिभिरिदंवि श्वमवत्युदितपौरुषः २६ तमोमात्रामुपादायप्रतिसंरुद्धविक्रमः ॥ कालेनानुगताशेषआस्तेतूष्णींदिनात्यये २७ तमेवान्वपिधीयंतेलोकाभूरादय स्त्रयः ॥ निशायामनुवृत्तायांनिर्मुक्तशशिभास्करम् २८ त्रिलोक्यांदह्यमानायांशक्त्यासंकर्षणाग्निना ॥ यांत्यूष्मणामहर्लोकाज्जनंभृग्वादयोऽर्दिताः २९ तावत्त्रिभुवनंसद्यःकल्पांतैधितसिंधवः ॥ प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ३०

॥४६॥

चूर्णिका २० २१ २२ ब्रह्मदिनेमनवः चतुर्दश भवंति २३ २४ २५ प्रतिमन्वंतरेभगवान् अवतरति २६ ब्रह्मदिनात्ययेस्वपिति २७तदाभूराद्याःत्रयोलोकाः प्रलयायकल्पंते २८ तदाभृग्वादयः जनलोकंयांति २९ ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(योगनिद्रयामीलितेआक्षिणीयस्य) जनलोकआलयोयेषांमहर्लोकगतानामन्येषांचतैः ३१ वैराग्यार्थमाह एवंविधैः (त्रिलोक्यायुगसाहस्रमित्याद्युक्तप्रकारैः) अहोरात्रैः (वयःशतंवर्षशतरूपामित्यर्थः) सर्वेषांप्राणिनामायुषः परमाधिकमस्यब्रह्मणोयदायुस्तदप्यपाक्षितामिवक्षीणामिवेतिलोकोक्तिः गतप्रायमित्यर्थः ३२ तदेवाह यदिति (यस्यब्रह्मणआयुषोऽर्धंयत्तत्परार्धमित्युच्यतेतत्रप्रथमंपरार्धंवृत्तंद्विती यंवर्तते) ३३ पूर्वस्यपरार्धस्यादाविति त्रिभिर्वस्तुकथनमात्रम् (ब्राह्मोनाममहानुत्कृष्टःकल्पोभूत् ब्राह्मत्वेहेतुःयत्रयस्मिन्कल्पेब्रह्माप्रथममभवत् यंब्रह्माणंवेदरूपत्वाच्छब्दब्रह्मेतिविदुः) ३४ (तस्यप्रथमपरार्धस्याव साने) पाद्मत्वेहेतुः यदितियत्यद्यस्मिन्कल्पे ३५ अयंतु (वर्तमानःकल्पः) द्वितीय (-स्यपरार्ध-) स्यादौकथितः (वाराहत्वेहेतुःयत्रेति) ३६ तदेवंकालेनानिमित्तेनसृज्यानामायुःपरिमाणमुक्त्वाकालपरिच्छेदरहितंत त्त्वमाह कालोऽयमितिपंचभिः उपचर्यतेकेवलंनत्वनेनापिक्रमेणायुर्गणनंतस्येत्याह अव्याकृतस्यकार्योपाधिशून्यस्यातएवानंतस्यानादेश्चजगदात्मनोजगत्कारणस्य ३७ तत्परिच्छेदेकालस्यासामर्थ्यात् (निमि षोक्तिरौपचारिकी) इत्याह कालोऽयमीश्वरःसमर्थोऽपिभूम्नःपारिपूर्णस्य (अपरिच्छिन्नस्वरूपस्यभगवतः) ईशितुंनैवप्रभुःसमर्थः यतोधाममानिनांदेहगेहाभिमानिनामेवेत्यर्थः ईश्वरः (ईशितुंप्रभुरित्यर्थः) ३८ भूम्नइत्युक्तंतत्प्रपंचयन्नाह विकारैःषोडशभिर्युक्तैरष्टप्रकृतिसंयुक्तैःसाहितस्तदारब्धइत्यर्थः अयमाण्डकोशोयत्र (भगवति) प्रविष्टःपरमाणुवल्लक्ष्यतइत्युत्तरेणान्वयः कीदृशः अंतःपंचाशत्कोटियोजनवि स्तृतोबहिश्चावशेषादिभिःपृथिव्यादिभिःसप्तभिरावृतः ३९ कीदृशैः (विशेषादिभिः) आंडकोशप्रमाणाद्दशगुणमुत्तरोत्तरोऽधिकोयेषुतैः नकेवलमयमेकएवापित्वन्योपि (अंतर्गताःपरमाणुवत्) लक्ष्यंते ४० सर्वेषांकारणानांकारणं (विष्णोः) धामस्वरूपम् ४१ ॥ ॥ इतितृतीयेटीकायामेकादशोऽध्यायः ११

॥४७॥

श्लोकाः ३१/४१

अंतःसतस्मिन्सलिलआस्तेऽनंतासनोहरिः॥योगनिद्रानिमीलाक्षःस्तूयमानोजनालयैः३१एवंविधैरहोरात्रैःकालगत्योपलक्षितैः॥अपक्षितमिवास्यापिपरमा युर्वयःशतम् ३२ यदर्धमायुषस्तस्यपरार्धमभिधीयते॥पूर्वःपरार्द्धोऽपक्रांतोह्यपरोऽद्यप्रवर्त्तते ३३ पूर्वस्यादौपरार्धस्यब्राह्मोनाममहानभूत्॥ कल्पोयत्राभव द्ब्रह्माशब्दब्रह्मेतियंविदुः ३४ तस्यैवचांतेकल्पोऽभूद्यंपाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरसआसील्लोकसरोरुहम् ३५ अयंतुकथितःकल्पोद्वितीयस्यापिभारत॥ वाराहइतिविख्यातोयत्रासीत्सूकरोहरिः ३६ कालोऽयंद्विपरार्द्धाख्योनिमेषउपचर्यते ॥ अव्याकृतस्यानंतस्यअनादेर्जगदात्मनः ३७ कालोऽयंपर माण्वादिर्द्विपरार्धांतईश्वरः ॥ नैवेशितुंप्रभुर्भूम्नईश्वरोधाममानिनाम् ३८ विकारैःसहितोयुक्तैर्विशेषादिभिरावृतः ॥ आंडकोशोबहिरयंपंचाशत्कोटिविस्तृ तः ३९ दशोत्तराधिकैर्यत्रप्रविष्टःपरमाणुवत् ॥ लक्ष्यतेंऽतर्गताश्चान्येकोटिशोह्यंडराशयः ४० तदाहुरक्षरंब्रह्मसर्वकारणकारणम् ॥ विष्णोर्धामपरंसाक्षा त्पुरुषस्यमहात्मनः ४१ ॥ ॥ इतिश्रीमद्भागवतेतृतीयस्कंधेएकादशोध्यायः ११

चूर्णिका

तदासलिलेशेषासनः हरिः शेते ३१ एवंअहोरात्रैः ब्रह्मणः आयुः शतंगतमिव ३२ तस्यआयुषः अर्द्धंपरार्द्धमभिधीयते तत्रपूर्वः अपक्रांतः ३३ पूर्वपरार्द्धादौब्राह्मकल्पोभू त् ३४ तदंतेपाद्मः ३५ इदानींतुवाराहः कल्पः सः द्वितीयादौकथितः ३६ एवंद्विपरार्द्धाख्यकालः अनंतस्यनिमेषवत् उपचर्यते ३७ एवंपरमाण्वादिद्विपरार्धांतःकालः पूर्णस्यसंख्यातुं नकोपिसमर्थः ३८ अयंमंडकोशः पंचशत्कोटियोजनविशालः ३९ अष्टप्रकृतिभिः देशोत्तराधिकैः युतः सः ईश्वरेपरमाणुवत्लक्ष्यते यस्मिन् अनंतेएवं कोटिशः अंडराशयः प्रतिरोमंसंति ४० तत् अक्षरंब्रह्मआहुः ४१ ॥ ॥ इतितृतीयेएकादशः ॥ ११ ॥

॥४७॥

१ अण्डकोशइत्यपिपाठः ।

टीका

द्वादशेतुकुमारादिमनःसर्गसमेधनात् ॥ कायद्वैधेनयौनस्तुमनुसर्गोऽनुवर्ण्यते (वेदगर्भोब्रह्माअस्त्राक्षीत्ससर्जमेमत्तः) १ अग्रइति ब्रह्मास्वसृष्टौप्रथममविद्यावृत्तीःससर्ज तत्रतमोनामस्वरूपाप्रकाशः मोहोदेहाद्यहं बुद्धिः महामोहोभोगेच्छा तामिस्रंतत्प्रतिघातेक्रोधः अंधतामिस्रंतन्नाशेऽहमेवमृतोऽस्मीतिबुद्धिः तदेवोक्तंवैष्णवे 'तमोविवेकोमोहःस्यादंतःकरणविभ्रमः महामोहस्तुविज्ञेयोग्राम्यभोगसुखेषणा मरणंह्यंधतामिस्रंतामिस्रःक्रोधउच्यते अविद्यापंचपर्वैषाप्रादुर्भूतामहात्मनः'इति पातंजलेऽप्येतएवोक्ताः 'अविद्यास्मितारागद्वेषाभिनिवेशाःपंचक्लेशाः'इति श्रीविष्णुस्वामिप्रोक्तावा अज्ञानविपर्यासभेदभयशोकाः तदुक्तम् स्वादृगुत्थविपर्यासेत्यादि २ नबह्वमन्यतनाभ्यनंदत् ३ यद्यपिप्रतिकल्पंसनकादिसृष्टिर्नास्तितथापिब्राह्मसर्गत्वादिहोच्यते वस्तुतस्तुमुख्यसर्गादयएवप्रतिकल्पंभवंति सनकादयस्तुब्राह्मकल्पसृष्टाएवानुवर्त्तंते ४ स्वभूर्ब्रह्मा (तत्सृष्टिकर्म) ५ अवध्यातोऽवज्ञातः प्रत्याख्यातमनंगीकृतमनुशासनंयैः ६ सचासौमन्युश्चतन्मन्युः (सक्रोधोभ्रुवोर्मध्यान्मूर्तिमान्सन्कुमारोऽजायतेत्यर्थः) ७ (सकुमारः इन्द्रादिदेवानांपूर्वजः ॥) ८ (तस्यभवस्य) पाद्मोब्रह्मा ९ बालकइव (बालकइवअरोदीर्यस्मात्ततोरुद्रइति) १० (हृन्मनः असुःप्राणः) अग्रेपूर्वमेवमेमयाकृतानि ११ १२

॥४८॥

श्लोकाः १ / १२

॥ मैत्रेयउवाच ॥ इतितेवर्णितःक्षत्तःकालाख्यःपरमात्मनः ॥ महिमावेदगर्भोऽथयथाऽस्राक्षीन्निबोधमे १ ससर्जाग्रेऽधतामिस्रमथतामिस्रमादिकृत् ॥ महामोहंचमोहंचतमश्चाज्ञानवृत्तयः २ दृष्ट्वापापीयसींसृष्टिंनात्मानंबह्वमन्यत ॥ भगवद्ध्यानपूतेनमनसाऽन्यांस्ततोऽसृजत् ३ सनकंचसनंदंचसनातनमथात्मभूः ॥ सनत्कुमारंचमुनीन्निष्क्रियानूर्ध्वरेतसः ४ तान्बभाषेस्वभूःपुत्रान्प्रजाःसृजतपुत्रकाः ॥ तन्नैच्छन्मोक्षधर्माणोवासुदेवपरायणाः ५ सोऽवध्यातःसुतैरेवंप्रत्याख्यातानुशासनैः ॥ क्रोधंदुर्विषहंजातंनियंतुमुपचक्रमे ६ धियानिगृह्यमाणोऽपिभ्रुवोर्मध्यात्प्रजापतेः ॥ सद्योऽजायततन्मन्युःकुमारोनीललोहितः ७ सवैरुरोददेवानांपूर्वजोभगवान्भवः ॥ नामानिकुरुमेधातःस्थानानिचजगद्गुरो ८ इतितस्यवचःपाद्मोभगवान्परिपालयन् ॥ अभ्यधाद्भद्रयावाचामारोदीस्तत्करोमिते ९ यदरोदीःसुरश्रेष्ठसोद्वेगइवबालकः ॥ ततस्त्वामभिधास्यंतिनाम्नारुद्रइतिप्रजाः १० हृदिंद्रियाण्यसुर्व्योमवायुरग्निर्जलंमही ॥ सूर्यश्चंद्रस्तपश्चैवस्थानान्यग्रेकृतानिमे ११ मन्युर्मनुर्महिनसोमहाञ्छिवःऋतुध्वजः ॥ उग्ररेताभवःकालोवामदेवोधृतव्रतः १२

चूर्णिका

॥ मैत्रेयउवाच ॥ परमात्मनःकालरूपंतेउक्तम् अथब्रह्मायथाअस्त्राक्षीत् तत्निबोध १ प्रथमंअंधतामिस्रंतामिस्रंमहामोहंमोहंतमश्चएवंपंचपर्वांविद्यांससर्ज २ तांपापीयसींसृष्टिंदृष्ट्वामनसासनकादिचतुरः ससर्ज ३ ४ तान् सृष्टिंकुरुतेति अकथयत् तेमोक्षधर्माणः तन्नैच्छन् ५ तदातान्प्रतिक्रुद्धः ब्रह्मातंक्रोधंनियंतुंउपचक्रमे ६ सःधियानिगृह्यमाणोपिप्रजापतेर्भ्रुवोर्मध्यात् मन्युःकुमारःसद्योजातः७ सः रुदन्मेनामानिस्थानानिचकुरुइतिउवाच ८ तदाब्रह्मातवनाम रोदनात्रुद्रइतिउवाच९ १०तस्यनामानिएकादश मन्युः १ मनुः २ महिनसः ३ महान् ४ शिवः ५ ऋतुध्वजः ६ उर्ध्वरेताः ७ भवः ८ कालः ९ वामदेवः १० धृतव्रतः ११ इति तत्स्थानानिहृत् १ इंद्रियाणि२ असुः ३ व्योम ४ वायुः ५ अग्निः ६ जलम् ७ मही ८ सूर्यः ९ चंद्रः १० तपः ११ इति ११, १२

॥४८॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(हेरुद्रएताएकादशास्त्रियस्तेरुद्राण्यस्तवरुद्रस्यभार्या इत्यर्थः) १३ सयोषणःसस्त्रीकः एभिःस्थानैर्नामभिश्चयुक्तः (यत्यस्मात्प्रजानांपतिरसितस्मात्) प्रजाःसृज (तदभावेतत्पतित्वंवृथास्यादितिभावः) १४ सत्त्वंबलम् आकृतिर्नीललोहितता स्वभावस्तीव्रतातेन (आत्मसमाः) १५ रुद्राणांयूथानिदृष्ट्वाऽशंकततत्राशंकांप्राप्तः १६ (अलमितिवारणेउल्बणैरुग्रैर्मयासहदिशः दहंतीभिः) १७ (भवांस्तपसैवइदंयथापूर्वं) स्रष्टास्रक्ष्यति १८ (परंसूर्यादीनामपिप्रकाशकं सर्वभूतहृदिस्थितंविंदतेलभते) १९ (गिरांपतिंब्रह्माणम्) २० (सर्गमभिध्यायतः सृष्टिंचिंतयतोब्रह्मणः) २१ २२ (उत्संगादूरोःत्वचित्वचः) २३ (कर्णयोःकर्णाभ्याम्) २४ यत्रधर्मे २५ अधरदच्छदादधरोष्ठात् (अधाश्रयोदुःखाभिमानी) २६ २७ देहांतरेणकृतंसर्गंवक्तुंतद्देहत्यागेकारणमाह वाचमित्यादिना २८

॥४९॥ धीर्वृत्तिरुशनोमाचनियुत्सर्पिरिलांबिका ॥ इरावतीसुधादीक्षारुद्राण्योरुद्रतेस्त्रियः १३ गृहाणैतानिनामानिस्थानानिचसयोषणः ॥ एभिःसृजप्रजाबह्वीः प्रजानामसियत्पतिः १४ इत्यादिष्टःसगुरुणाभगवान्नीललोहितः ॥ सत्त्वाकृतिस्वभावेनससर्जात्मसमाःप्रजाः १५ रुद्राणांरुद्रसृष्टानांसमंताद्ग्रसतांजगत् निशम्यासंख्यशोयूथान्प्रजापतिरशंकत १६ अलंप्रजाभिःसृष्टाभिरीदृशीभिःसुरोत्तम ॥ मयासहदहंतीभिर्दिशश्चक्षुभिरुल्बणैः १७ तपआतिष्ठभद्रंतेसर्वभू॥ तसुखावहम् ॥ तपसैवयथापूर्वंस्रष्टाविश्वमिदंभवान् १८ तपसैवपरंज्योतिर्भगवंतमधोक्षजम् ॥ सर्वभूतगुहावासमंजसाविंदतेपुमान् १९ ॥ ॥ मैत्रेयउवाच ॥ ॥ एवमात्मभुवादिष्टःपरिक्रम्यगिरांपतिम् ॥ बाढमित्यमुमामंत्र्यविवेशतपसेवनम् २० अथाभिध्यायतःसर्गंदशपुत्राःप्रजज्ञिरे ॥ भगवच्छक्तियुक्तस्यलोकसंतानहेतवः २१ मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः ॥ भृगुर्वसिष्ठोदक्षश्चदशमस्तत्रनारदः २२ उत्संगान्नारदोजज्ञेदक्षोंऽगुष्ठात्स्वयंभुवः ॥ प्राणाद्वसिष्ठःसंजातोभृगुस्त्वचिकरात्क्रतुः २३ पुलहोनाभितोजज्ञेपुलस्त्यःकर्णयोर्ऋषिः ॥ अंगिरामुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवत् २४ धर्मःस्तनाद्दक्षिणतोयत्रनारायणःस्वयम् ॥ अधर्मःपृष्ठतोयस्मान्मृत्युर्लोकभयंकरः २५ हृदिकामोभ्रुवःक्रोधोलोभश्चाधरदच्छदात् ॥ आस्याद्वाक्सिंधवोमेंढ्रान्निर्ऋतिःपायोरघाश्रयः २६ छायायाःकर्दमोजज्ञेदेवहूत्याःपतिःप्रभुः ॥ मनसोदेहतश्चेदंजज्ञेविश्वकृतोजगत् २७ वाचंदुहितरंतन्वींस्वयंभूर्हरतींमनः ॥ अकामांचकमेक्षत्तःसकामइतिनःश्रुतम् २८

चूर्णिका तत्पत्न्यः धीः १ धृतिः २ उशना ३ उमा ४ नियुत् ५ सर्पिः ६ इला ७ अंबिका ८ इरावती ९ सुधा १० दीक्षा ११ इति १३ एवंएतानिदत्त्वा आभिः प्रजाःसृज १४ इत्युक्ते तेन अनेकरुद्राणायूथानिसृष्टानि १५ तत्दृष्ट्वाहेरुद्रप्रजाभिःअलं १६ १७ तपःआतिष्ठ १८ एवंश्रुत्वातपसेइलावृतंनामवनंविवेश १९ २० ततःब्रह्मा दशपुत्रान् अजनयत् २१ तेच ब्रह्मणउत्संगात् नारदोजातः १ अंगुष्ठात्दक्षः २ प्राणात् वसिष्ठः३ त्वचःभृगुः ४ करात्क्रतुः ५. २२. २३ नाभितःपुलहः ६ कर्णयोःपुलस्त्यः ७ मुखात् अंगिराः ८ अक्ष्णःअत्रिः ९ मनसःमरीचिरिति १० २४ ततःस्तनात् धर्मःपृष्ठतःअधर्मः २५ हृदिकामः भ्रुवः क्रोधः अधरात् लोभः मुखाद्वाणी मेंढ्रात्समुद्राः पायोः निर्ऋतिः २६ छायायाः कर्दमप्रजापतिः इत्यादिसृष्ट्वा २७ स्वकन्यांवाचंरंतुंमनश्चक्रे २८

CC-0. In Public Domain. Digitization by eGangotri

टीका

(विस्रंभात्प्रणयात्) २९ त्वत्त्वत्तोयेपूर्वेब्रह्मादयोऽन्येवातैरेतन्नकृतं अपरेत्वत्तोऽर्वाचीनास्तेपिनकरिष्यांति अंगजंकामम् ३० तेजीयसामातितेजस्विनामपिसुश्लोक्यंसत्कीर्तिदंनभवति येषांतेजीय सांवृत्तम् (आचरणम्) ३१ (क्रोधाद्वीतानमंतितस्मैनमइतिस्वेनस्वयंप्रतिभासमानेनरोचिषाज्ञानेनइदंविश्वंव्यंजयामासप्रकाशितवान्) ३२ (प्रजापतीनांमरिचादीनांपतिः) तन्वंतनुम् ३३ (लोकान्यथा पूर्वं) कथंस्रक्ष्यामीत्यभिध्यायतःस्रष्टुर्ब्रह्मणश्चतुःसंख्यायुक्तान्मुखात् समवेतान्सुसंगतान्' यथापुराप्राक्कल्पे ३४ चातुर्होत्रंहोत्रादीनांचतुर्णांकर्म कर्मतंत्रंयज्ञविस्तारः उपवेदैन्यायैश्चसह आश्रमास्तद्वृत्तयश्चासन् ३५ मुखतोमुखेभ्यः (येनयेनमुखेनयद्यद्वेदादिः) ३६ चातुर्होत्रसृष्टिक्रममाह शस्त्रमप्रगीतमंत्रस्तोत्रंहोतुःकर्म इज्यामध्वर्योःकर्म स्तुतिस्तोमं स्तुतिः संगीतंस्तोमंतदर्थमृक्समुदायं "त्रिवृत्स्तोमोभवती"त्यादि विहितमुद्गातृप्रयोज्यम् प्रायश्चित्तंब्राह्मंकर्म (एतच्चतुष्टयंक्रमादृग्वेदादिगतम्ऋगादीन्वेदांश्चपूर्वदक्षिणपश्चिमोत्तरदिग्भेदभिन्नैर्मुखैर्व्यधात्) ३७ उपवेदक्रममाह आयुर्वेदमिति (आयुर्वेदंभिषक्शास्त्रंधनुर्वेदमायुध विद्यांगांधर्वंगायनविद्याम्) आत्मनोमुखैःस्थापत्यं (वेदं) विश्वकर्मशास्त्रम् ३८ (इतिहासोभारतं पुराणानिब्राह्मादीनितद्रूपंपंचमंवेदम्) ३९ कर्मतंत्रक्रममाह षोडश्युक्थ्यावीति पुरीषीचयनम् अग्नि ष्टुदग्निष्टोमः (पुरीष्यादिद्वयंद्वयंदक्षिणादिवक्त्रेभ्यः) ४० विद्येतिशौचं 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिःपरमामता' इतिस्मृतेः दानमितिदया ' भूताभयप्रदानस्यकलांनार्हंतिषोडशीं' इतिवचनात् एवंच "तपःशौचंदयासत्यमितिपादाःकृतेकृताः" इतिप्रथमस्कंधोक्तेरविरोधः (धर्मस्यचत्वारिपदानिब्रह्मचर्याद्याश्रमान्तद्वृत्तीश्चक्रमेणपूर्वादिभिर्मुखैःअसृजदित्यर्थः) ४१

॥५०॥

श्लोकाः २९—४१

तमधर्मेकृतमतिंविलोक्यपितरंसुताः ॥ मरीचिमुख्यामुनयोविश्रंभात्प्रत्यबोधयन् २९ नैतत्पूर्वैःकृतंत्वद्येनकरिष्यंतिचापरे॥ यत्त्वंदुहितरंगच्छेरनिगृह्यांगजं प्रभुः ३० तेजीयसामपित्येतन्नसुश्लोक्यंजगद्गुरो ॥ यद्वृत्तमनुतिष्ठन्वैलोकःक्षेमायकल्पते ३१ तस्मैनमोभगवतेयइदंस्वेनरोचिषा ॥ आत्मस्थंव्यंजयामासस धर्मंपातुमर्हति ३२ सइत्थंगृणतःपुत्रान्पुरोदृष्ट्वाप्रजापतीन् ॥ प्रजापतिपतिस्तन्वंतत्याजव्रीडितस्तदा ॥ तांदिशोजगृहुर्घोरांनीहारंयद्विदुस्तमः ३३ कदा चिद्ध्यायतःस्रष्टुर्वेदाआसंश्चतुर्मुखात् ॥ कथंस्रक्ष्याम्यहंलोकान्समवेतान्यथापुरा ३४ चातुर्होत्रंकर्मतंत्रमुपवेदनयैःसह ॥ धर्मस्यपादाश्चत्वारस्तथैवा श्रमवृत्तयः ३५ ॥ विदुरउवाच ॥ सवैविश्वसृजामीशोवेदादीन्मुखतोऽसृजत् ॥ यद्यद्येनासृजद्देवस्तन्मेब्रूहितपोधन ३६ ॥ मैत्रेयउवाच ॥ ऋग्यजुः सामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः ॥ शस्त्रमिज्यांस्तुतिस्तोमंप्रायश्चित्तंव्यधात्क्रमात् ३७ आयुर्वेदंधनुर्वेदंगांधर्वंवेदमात्मनः ॥ स्थापत्यंचासृजद्वेदंक्रमा त्पूर्वादिभिर्मुखैः ३८ इतिहासपुराणानिपंचमंवेदमीश्वरः ॥ सर्वेभ्यएववक्त्रेभ्यःससृजेसर्वदर्शनः ३९ षोडश्युक्थ्यौपूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ ॥ आप्तो र्यामातिरात्रौचवाजपेयंसगोसवम् ४० विद्यादानंतपःसत्यंधर्मस्येतिपदानिच ॥ आश्रमांश्चयथासंख्यमसृजत्सहवृत्तिभिः ४१

चूर्णिका

तदामरीच्यादयः निषेधंचक्रुः २९ ३० ३१ ३२ तदालज्जितः ब्रह्मातांतनुंतत्याज तत्तमः जातम् तद्दिशःजगृहुः ३३ एकदाब्रह्मणोमुखेभ्यः ऋग्यजुःसामाथर्वा ख्याःवेदाःपूर्वादिक्रमेणजाताः ३४ ३५ ३६ ३७ तथाआयुर्वेदंधनुर्वेदंगांधर्ववेदंशिल्पाख्यंवेदमितिउपवेदान् ३८ इतिहासपुराणानिपंचमंवेदंचससर्ज ३९ सोमादि यज्ञान् विद्यादानंतपःसत्यमितिधर्मस्यपदानिआश्रमान् तद्वृत्तीः ४० ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ब्रह्मचर्याद्याश्रमेष्वेकैकस्यचातुर्विध्यमाह सावित्रंब्रह्मचर्यमुपनयनादारभ्यगायत्रीमधीयानस्यत्रिरात्रं प्राजापत्यंव्रतान्याचरतःसंवत्सरं ब्राह्मंवदग्रहणांतं बृहन्नैष्ठिकं वार्ताअनिषिद्धकृष्यादिवृत्तिः संचयोयाजना दिवृत्तिः शालीनंअयाचितवृत्तिः शिलोंच्छाःपतितकणिशकणादानवृत्तिः एकवचनमार्षं इत्येसा गृहेवृत्तयइति यद्वा शिलोंच्छइतिद्वंद्वैक्येसप्तमी एवंवृत्तिभेदेसतिगृहेस्थिताभवंतीत्यर्थः ४२ वनेस्थिताश्च त्वारः तत्रवैखानसाअकृष्टपच्यवृत्तयः वालखिल्यानवेऽन्नलब्धेपूर्वसंचितान्नत्यागिनः औदुंबराःप्रातरुत्थाययांदिशंप्रथमंपश्यंतिततआहृतैःफलादिभिर्जीवंतः फेनपाःस्वयंपतितैःफलादिभिर्जीवंतः(यद्वा"वैखानसामूलभक्षाःफलभक्षा उदुंबराः वालखिल्याःसर्वभक्षाःफेनपावत्सफेनपा"इति न्यासेचतुर्थाश्रमे) कुटीचकःस्वाश्रमकर्मप्रधानः बह्वोदःकर्मोपसर्जनीकृत्यज्ञानप्रधानः हंसोज्ञानाभ्यासनिष्ठः निष्क्रियःप्राप्ततत्त्वः एतेचसर्वेयथोत्तरंश्रेष्ठाः ४३ न्यायादीनांपूर्वादिक्रमेणोत्पत्तिमाह आन्वीक्षिकीति आन्वीक्षिक्याद्यामोक्षधर्मकामार्थविद्याः भूर्भुवःस्वरितिव्यस्तास्तिस्रःसमस्ताचतुर्थी यथाहाश्वलायनः "एवंव्याहृतयःप्रोक्ताव्यस्ताःसमस्ताः" इति यद्वा महइतिचतुर्थी तथाचश्रुतिः "भूर्भुवःसुवरीतिवाएतास्तिस्रोव्याहृतयस्तासामुहस्मैतांचतुर्थीमाहावमस्यप्रवेदयतेमह इति" इति हृत्खतःहृदयाकाशात् (प्रणव आसीत्) ४४ स्नुतःस्नायुतः " अनुष्टुप्स्नावानि " इतिश्रुतेः (अस्थ्नःअस्थितः) ४५ महाकल्पे ब्रह्माशब्दरूपोऽभवदित्युक्तंतदेवदर्शयन्वर्णानामुत्पत्तिमाह स्पर्शइतिसार्धेन स्पर्शःकादिवर्गपंचकं स्वरोऽकारादिः ४६ ऊष्माणंशषसहचतुष्कम् अंतस्थायरलवाः (आत्मनोब्रह्मणः) सप्तस्वराःषड्जादयः (' निषादर्षभगांधारषड्जमध्यमधैवताः पंचमश्चेत्यमीसप्तस्वराः ' इत्युक्ताः) विहारेणक्रीडया (भवंति) ४७ अतएवशब्दतनुत्वाद्ब्रह्मणःपरमेश्वरोनित्यंप्रकाशतइत्याह व्यक्तावैखरी अव्यक्तःप्रणवः तदात्मनस्तस्यब्रह्मणःपरःपरमेश्वर अवभाति कीदृशः ब्रह्मपरिपूर्णः तत्राव्यक्तात्मनोब्रह्मरूपोविततोऽवभाति व्यक्तात्मने नानाशक्त्युपबृंहितइंद्रादिरूपोऽवभाति ४८ यापूर्वंविसृष्टासतीनीहारंतमोऽभवत् ततोऽपरामनिषिद्धकामासक्तांतनुम् शब्दब्रह्मतनुस्तुसदाऽस्त्येव तन्वंतरग्रहणेकारणमाह ऋषीणामित्यादिना ४९ (एधते वर्धते व्यापृतस्य सृष्टिव्यापारयुक्तस्य) ५० युक्तकृतःयथोचितंकुर्वतः ५१ अतएवकस्यब्रह्मणइदंद्विधाभूतमित्याश्चर्यात्कायमद्याप्याभिचक्षते ५२

॥५१॥

श्लोकाः ४२—५२

सावित्रंप्राजापत्यंचब्राह्मंचाथबृहत्तथा ॥ वार्त्तासंचयशालीनशिलोंच्छइतिवैगृहे ४२ वैखानसावालखिल्यौदुंबराःफेनपावने ॥ न्यासेकुटीचकःपूर्वंबह्वो
दोहंसनिष्क्रिया ४३ आन्वीक्षिकीत्रयीवार्त्तादंडनीतिस्तथैवच ॥ एवंव्याहृतयश्चासन्प्रणवोह्यस्यहृत्खतः ४४ तस्योष्णिगासील्लोमभ्योगायत्रीचत्वचो
विभोः ॥ त्रिष्टुम्मांसात्स्नुतोऽनुष्टुब्जगत्यस्थ्नःप्रजापतेः ४५ मज्जायाःपंक्तिरुत्पन्नाबृहतीप्राणतोऽभवत् ॥ स्पर्शस्तस्याऽभवज्जीवःस्वरोदेहउदाहृतः ४६
ऊष्माणमिंद्रियाण्याहुरंतस्थाबलमात्मनः ॥ स्वराःसप्तविहारेणभवंतिस्मप्रजापतेः ४७ शब्दब्रह्मात्मनस्तातव्यक्ताव्यक्तात्मनःपरः ॥ ब्रह्माऽवभातिवि
ततोनानाशक्त्युपबृंहितः ४८ ततोऽपरामुपादायससर्गायमनोदधे ॥ ऋषीणांभूरिवीर्याणामपिसर्गमविस्तृतम् ४९ ज्ञात्वातद्धृदयेभूयश्चिंतयामासकौरव॥
अहोअद्भुतमेतन्मेव्यापृतस्यापिनित्यदा ५० नह्येधंतेप्रजानूनंदैवमत्रविघातकम् ॥ एवंयुक्तकृतस्तस्यदैवंचावेक्षतस्तदा ५१ कस्यरूपमभूद्द्वेधायत्कायमभि
चक्षते ॥ ताभ्यांरूपविभागाभ्यांमिथुनंसमपद्यत ५२ ॥५१॥

चूर्णिका व्याहृतयः अक्षरसमुदायम् स्वरादीनिमनसैवससर्ज ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ तथापिब्रह्मास्वसृष्टिवृद्धिअदृष्ट्वास्वदेहात्पुरुषस्त्रियौससर्ज ५० ५१ ५२

१ ज्ञानादीनामितिमहेश्वरीयः पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

टीका

(मिथुनं स्त्रीपुंसौ) यास्त्रीसाऽस्यमनोर्महिष्यासीत् ५३ एधांबभूविरेवृद्धिंप्राप्ताः तदेवाह सचापीति (स मनुः) ५४ ५५ यतःयासांसंततिभिः ५६ इतितृतीयेटीकायांद्वादशोऽध्यायः १२ ॥ ७ ॥
त्रयोदशेसिसृक्षायांमनोराकस्मिकाद्भुताम् ॥ धरामुद्धर्त्तुमुद्भूतात्क्रोडाद्दैत्यानुसूदनम् १॥ १ स्वयंभुवःपुत्रस्तद्देहांशत्वात्सः २(हियतः) विष्वक्सेनोहरिरेवाश्रयोयस्यसः ३ अतस्तस्यचारितंश्रोतव्यमित्याह
सुचिरंश्रमोयस्मिंस्तस्यपुंसांश्रुतस्यांजसामुख्यत्वेनायमेवार्थईडितःस्तुतः ननुमुकुंदपादारविंदंयेषांहृदयेष्वास्तितेषांभागवतानांगुणानुश्रवणम् (यत्) ४ सहस्रशीर्षाश्रीकृष्णस्तस्यचरणावुपधीयेतेयस्मि
न् श्रीकृष्णःप्रीत्यायस्योत्संगेचरणौप्रसारयतीत्यर्थः तमभ्यचष्टअभ्यभाषत मुनिर्मैत्रेयः प्रणीयमानस्तेनप्रवर्त्यमानः ५ वेदगर्भंब्रह्माणम् ६ त्वमेवैकःपितासर्वेषांयतोजन्मकृत्वृत्तिदः पोषकश्चत्वमेव अतस्त
वयद्यप्यन्यापेक्षानास्त्यथाप्यस्माकंतेशुश्रूषाकेनकर्मणाभवेत्ताद्विधेहीत्युत्तरेणान्वयः ७ हेईड्य (आत्मनःशक्तिर्येषुतेषु) आत्मशक्तिष्वस्मच्छक्तिष्वस्मच्छक्येषुकर्मसुमध्येकेनकर्मणाभवेत्ताद्विधेहीदंकर्तव्यमिति
कथय यत्कृत्वायास्मिन्कृतेसाति विष्वक्सर्वतः अमुत्रपरलोके ८ वांयुवाभ्यांस्वस्तिभद्रंस्ताद्भूयात् यद्यतो मामांशाध्यनुशिक्षयेति आत्मनास्वयमेवार्पितंनिवेदितमतःप्रीतोऽस्मि ९

॥५२॥ ॥१३॥

यस्तुतत्रपुमान्सोऽभून्मनुःस्वायंभुवःस्वराट् ॥ स्त्रीयासीच्छतरूपाख्यामहिष्यस्यमहात्मनः ५३ तदामिथुनधर्मेणप्रजाह्येधांबभूविरे ॥ सचापिशतरूपाया
पंचापत्यान्यजीजनत् ५४ प्रियव्रतोत्तानपादौतिस्रःकन्याश्चभारत ॥ आकूतिर्देवहूतिश्चप्रसूतिरितिसत्तम ५५आकूतिंरुचयेप्रादात्कर्दमायतुमध्यमाम् ॥ द
क्षायादात्प्रसूतिंचयतआपूरितंजगत् ५६ ॥ ॥ इतिश्रीमद्भा०तृतीय०द्वादशोऽध्यायः १२ ॥ ॥ श्रीशुकउवाच ॥ ॥ निशम्यवाचंवदतोमुनेःपुण्य
तमांनृप ॥ भूयःपप्रच्छकौरव्योवासुदेवकथादृतः १ ॥ ॥ विदुरउवाच ॥ ॥ सवैस्वायंभुवःसम्राट्प्रियःपुत्रःस्वयंभुवः ॥ प्रतिलभ्यप्रियांपत्नींकिंचका
रततोमुने २ चरितंतस्यराजर्षेरादिराजस्यसत्तम ॥ ब्रूहिमेश्रद्दधानायविष्वक्सेनाश्रयोह्यसौ ३ श्रुतस्यपुंसांसुचिरश्रमस्यनन्वंजसासूरिभिरीडितोऽर्थः ॥
तत्तद्गुणानुश्रवणंमुकुंदपादारविंदंहृदयेषुयेषाम् ४ ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिब्रुवाणंविदुरंविनीतंसहस्रशीर्ष्णश्चरणोपधानम् ॥ प्रहृष्टरोमाभगव
त्कथायांप्रणीयमानोमुनिरभ्यचष्ट ५ ॥ मैत्रेयउवाच ॥ यदास्वभार्ययासाकंजातःस्वायंभुवोमनुः ॥ प्रांजलिःप्रणतश्चेदंवेदगर्भमभाषत६ त्वमेकःसर्वभूतानां
जन्मकृद्वृत्तिदःपिता ॥ अथापिनःप्रजानांतेशुश्रूषाकेनवाभवेत् ७ तद्विधेहिनमस्तुभ्यंकर्मस्वीड्यात्मशक्तिषु ॥ यत्कृत्वेहयशोविष्वगमुत्रचभवेद्गतिः ८
॥ ब्रह्मोवाच ॥ ॥ प्रीतस्तुभ्यमहंतातस्वस्तिस्ताद्वांक्षितीश्वर ॥ यन्निर्व्यलीकेनहृदाशाधिमेत्यात्मनाऽऽर्पितम् ९

श्लोकाः ५३ / ९

चूर्णिका

सःस्वायंभुवः मनुः सास्त्रीशतरूपा ५३ ताभ्यांमिथुनधर्मेण प्रजावृद्धिरभवत् ५४ मनोःपुत्रौप्रियव्रतोत्तानपादौजातौ आकूतिः देवहूतिः प्रसूतिरितितिस्रःकन्याः तासुरुचये
आकूतिंददौ कर्दमायदेवहूतिम् दक्षायप्रसूतिम् यतः जगत् आपूरितम् ५५ ५६ ॥ इतितृतीयेद्वादशः १२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ मैत्रेयस्य
पुण्यतमांवाचंनिशम्यक्षत्तापुनः पप्रच्छ १ ॥ ॥ विदुरउवाच ॥ ॥ स्वायंभुवःमनुःप्रियांपत्नींप्राप्यततःकिंचकार २ ३ ४ ५ ॥ ॥ मैत्रेयउवाच ॥ ॥ मनुःसभा
र्यःप्रांजलिःसन् ब्रह्माणंउवाच ६ हेभगवन्नःत्वंपिता तेशुश्रूषाकेनभवेनभवेत्तद्वद तुभ्यंनमः ७ ८ ॥ ॥ ब्रह्मोवाच ॥ ॥ हेतातअहंतुभ्यंप्रीतः ९

॥५२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अपचितिःपूजागृह्येत आज्ञेतिशेषः सनकादयोनकुर्वंति वयंकिमितिकरिष्यामइत्येवंभूतोगतोमत्सरोयेभ्यः १० (आज्ञामाह सेति अस्यांशतरूपायां) गांशास (पृथ्वीं) शाधि पालयेत्यर्थः पुरुषंहरिम् ११ (मदाज्ञयाधर्मेणयत्प्रजापालनंतेनममशुश्रूषणंभवेत् भगवान्) प्रजापालकस्यतेतुष्टोभविष्यति १२ यज्ञलिंगोयज्ञमूर्तिःअपगतोऽर्थोयस्मात् (तस्मै) केवलंश्रमायैवेत्यर्थः यद्यस्मादा त्मैवस्वयंनाहतःतस्मिन्नतुष्टेस्वार्थस्यैवासिद्धेः सर्वात्मत्वाच्चतस्य (भगवतः) १३ (आदेशेआज्ञायां) वर्तेयवर्तिष्ये अमीवसूदनपापनाशन अनुजानीह्यत्रस्थातव्यमित्यनुज्ञांदेहि १४ महीतिचेदतआ ह यदोकःस्थानंसामही हेदेव अस्यादेव्याः १५ पूर्वंपानेकृतेऽपिपुनरकांडएवोद्भूतानामपांमध्येसन्नामवसन्नांनिमग्नाम् (एनांपृथ्वींकथं) समुन्नेष्येउद्धरिष्यामि १६ चिंतामेवाह सृजतःसतःवार्भिरद्भिः प्लाव्य मानां रसांरसातलम् ईश्वरेणसर्गेनियुक्तैःमेऽनुष्ठेयंसएवविदधातुसंपादयतु १७ (इतिचिंतयतःब्रह्मणः) वराहतोकःसूक्ष्मोवराहः १८ खस्थआकाशेस्थितःसन् (गजमात्रं हस्तिप्रमाणं) १९ (तद्दृष्ट्वामरी च्यादिभिः सहब्रह्मा) चित्रधाअनेकधा २० (तर्कमेवाह किमेतदिति सौकरव्याजंवाराहापदेशं सत्त्वंजंतुः) २१ पूर्वमंगुष्ठाग्रप्रमाणोदृष्टःगंडशिलास्थूलपाषाणस्तत्समः यज्ञोविष्णुः निजरूपतिरोधानेनमेमनः खेदयन् २२ इतिमीमांसमानस्यसतः जगर्जागर्जत् गिरींद्रतुल्यः २३ गर्जनप्रयोजनमाह ब्रह्माणमिति (द्विजोत्तमान्मरीच्यादीन्) २४ ॥१३॥

॥५३॥

एतावत्यात्मजैर्वीरकार्याह्यपचितिर्गुरौ ॥ शक्त्याऽप्रमत्तैर्गृह्येतसादरंगतमत्सरैः १० सत्वमस्यामपत्यानिसदृशान्यात्मनोगुणैः ॥ उत्पाद्यशासधर्मेणगांय ज्ञैःपुरुषंयज ११ परंशुश्रूषणंमह्यंस्यात्प्रजारक्षयान्नृप ॥ भगवांस्तेप्रजाभर्त्तुर्हृषीकेशोऽनुतुष्यति १२ येषांनतुष्टोभगवान्यज्ञलिंगोजनार्दनः ॥ तेषांश्रमोह्य पार्थाययदात्मानादृतःस्वयम् १३ ॥ ॥ मनुरुवाच ॥ ॥ आदेशेहंभगवतोवर्त्तेयामीवसूदन ॥ स्थानंत्विहानुजानीहिप्रजानांममचप्रभो १४ यदोकः सर्वसत्त्वानांमहीमग्नामहांभसि ॥ अस्याउद्धरणेयत्नोदेवदेव्याविधीयताम् १५ ॥ ॥ मैत्रेयउवाच ॥ ॥ परमेष्ठीत्वपांमध्येतथासन्नामवेक्ष्यगाम् ॥ कथमेनांसमुन्नेष्यइतिदध्यौधियाचिरम् १६ सृजतोमेक्षितिर्वार्भिःप्लाव्यमानारसांगता ॥ अथात्रकिमनुष्ठेयमस्माभिःसर्गयोजितैः १७ यस्याहंहृदयादा संसईशोविदधातुमे ॥ इत्यभिध्यायतोनासाविवरात्सहसाऽनघ ॥ वराहतोकोनिरगादंगुष्ठपरिमाणकः १८ तस्याभिपश्यतःखस्थःक्षणेनाकिलभारत ॥ ग जमात्रःप्रववृधेतदद्भुतमभून्महत् १९ मरीचिप्रमुखैर्विप्रैःकुमारैर्मनुनासह ॥ दृष्ट्वातत्सौकरंरूपंतर्कयामासचित्रधा २० किमेतत्सौकरव्याजंसत्त्वंदिव्यमवस्थि तम् ॥ अहोबताश्चर्यमिदंनासायामेविनिःसृतम् २१ दृष्टोंऽगुष्ठशिरोमात्रःक्षणाद्गंडशिलासमः ॥ अपिस्विद्भगवानेषयज्ञोमेखेदयन्मनः २२ इतिमीमांसत स्तस्यब्रह्मणःसहसूनुभिः ॥ भगवान्यज्ञपुरुषोजगर्जागेंद्रसन्निभः २३ ब्रह्माणंहर्षयामासहरिस्तांश्चद्विजोत्तमान् ॥ स्वगर्जितेनककुभःप्रतिस्वनयताविभुः २४

श्लोकाः १० / २४

चूर्णिका

पुत्रैःपितुःआज्ञाकर्तव्या इयमेवगुरोःपूजा १० अतः त्वंअस्यांअपत्यानिउत्पाद्य धर्मेणपृथ्वींपालयन् यज्ञैःहरिंयजइत्यादि ११ १२ १३ ॥ ॥ मनुरुवाच ॥ ॥ हेभ गवन् तेआज्ञांवर्ते १४ प्रजानांयत् वासस्थानंसामही अंभसिमग्ना अस्याःउद्धरणेयत्नःविधीयताम् १५ ॥ ॥ मैत्रेयउवाच ॥ ॥ परमेष्ठीअपांमध्येमग्नांभुवंवीक्ष्य कथंए नांउन्नेष्ये इतिध्यायतः १६ १७ ब्रह्मणः नासाविवरात् अंगुष्ठपरिमाणः वराहतोकः निरगात् १८ १९ तदामरीचिप्रमुखैःकुमारैश्चसहाकिमेतादितितर्कयामास २० २१ सः क्षणात्गंडशिलासमोभूत्वाजगर्ज २२ २३ २४

CC-0. In Public Domain. Digitization by eGangotri

टीका

घर्घरितंतज्जात्यनुकरणध्वनिम् अनिश्चयेनयः स्वखेदस्तस्यक्षयिष्णुक्षपयिष्णुनाशकम् तेइतिपुनरुक्तिःप्रसिद्धिख्यापनार्था त्रिभिःपवित्रैर्ऋग्यजुःसाममंत्रैरगृणन्नस्तुवन् २५ वेदैर्वितन्यतेस्तूयतेमूर्तिर्यस्यसः अतएवात्मनोगुणाननुवदतितथातत्तेषांब्रह्मउच्चारितंवेदमवधार्यज्ञात्वा (देवानामभ्युदयायभूयो विनद्यगजेंद्रस्यलीलेवलीलाजलक्रीडयस्यसजलंप्रलयोदकम्) २६ कथंभूतःसन्नाविवेशेत्यपेक्षायामाह द्वाभ्याम् उच्चैःक्षिप्तोवालः पुच्छंयेन खचरआकाशचारी कठोरःकठिनः सटाःस्कंधवालान् खराणितीक्ष्णानिरोमाणि (संति) यस्याःसात्वग्यस्य खुरैराहतान्यभ्राणियेन सितदंष्ट्रोऽतिशुक्लदंष्ट्रः ईक्षानिरीक्षणमेवज्योतिरालोकोयस्य तदाप्रकाशांतराभावात् बभासेऽशोभत महीध्रःपृथिव्याउद्धर्ता २७ क्रोडापदेशोवराहच्छद्मा अतःस्वयमध्वरांगोऽपिपशुरिवघ्राणेनविजिघ्रन् गृणतःस्तोतॄन्विप्रानुद्वीक्ष्योर्ध्वंवीक्ष्य कंजलमाविशत् २८ तदानींतनसमुद्रध्वनिमुत्प्रेक्षते सउदन्वान्समुद्रआर्तइवस्तनयन्शब्दंकुर्वन्भोयज्ञेश्वरमामांपाहिमामवेत्येवंचुक्रोश आर्तसादृश्यमाह उत्सृष्टाः प्रसारितादीर्घाऊर्मयएवभुजास्तैर्विशिष्ट: आर्तत्वेहेतुः वज्रकूटोवज्रमयःपर्वतस्तद्वदंगंयद्भगवतस्तस्यनिपातवेगेनविशीर्णा (विदीर्णा) कुक्षिर्यस्य २९ तदारसायांरसातलेगांपृथ्वींददर्श कः त्रिपरुत्त्रीणिपरूंषिसवनात्मकानिपर्वाणियस्य यज्ञमूर्तिरि[1]त्यर्थः किंकुर्वन् क्षुरप्राआयताग्राःशरास्तत्सदृशैःखुरैरपोदरयन् कथं उत्पारपारंउत्पाराणां पारशून्यानामप्यपांपारमवसानंयथाभवतितथाविदारयन् कथंभूतांगां अग्रेप्रलयसमये तत्रतास्वप्सुसुषुप्सुःशिशयिषुःसन्जीवाधीयंतेयस्यांसर्वजीवाधारभूतांयांस्वयमभ्यधत्ताभिमुख्येनदधार जठरेधृतवानित्यर्थः अनेनतदुद्धरणेऽनायासंद्योतयति ३० रसायाःसकाशादुत्थितः संरुरुचेसम्यगशोभत तत्राप्यंभसिगदामुद्यम्यागच्छंतंरुंधानंप्रतिघ्नंतं नसह्यः सहनानर्होविक्रमोयस्यतंदैत्यंसुनाभंचक्रंतद्वत्संदीपितस्तीव्रोमन्युर्यस्य यद्वा मयिविद्यमानेकिमितिपरिभवंसहसइतिसुनाभेनसंदीपिततीव्रमन्युःसभगवान्सिंहोगजमिवलीलयाजघानेत्युत्तरेणान्वयः ३१ गजेंद्रोजगतीं (महीं) क्रीडयाविदारयन् गैरिकयायथाअरुणगंडतुंडोभवतितथातस्यरक्तमेवपंकस्तेनांकितौगंडौतुंडंचयस्यसः ३२ प्रज्ञायालक्ष्य अनुवाकोवैदिकंसूक्तंतत्सदृशैर्वाक्यैस्तुष्टुवुः ३३

श्लोकाः २५ — ३३

निशम्यतेघर्घरितंस्वखेदक्षयिष्णुमायामयसूकरस्य ॥ जनस्तपःसत्यनिवासिनस्तेत्रिभिःपवित्रैर्मुनयोऽगृणन्स्म २५ तेषांसतांवेदवितानमूर्तिर्ब्रह्मावधार्यात्मगुणानुवादम् ॥ विनद्यभूयोविबुधोदयायगजेंद्रलीलोजलमाविवेश २६ उत्क्षिप्तवालःखचरःकठोरःसटाविधुन्वन्खररोमशत्वक् ॥ खुराहताभ्रःसितदंष्ट्रईक्षाज्योतिर्बभासेभगवान्महीध्रः २७ घ्राणेनपृथ्व्याःपदवींविजिघ्रन्क्रोडापदेशःस्वयमध्वरांगः ॥ करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्यविप्रान्गृणतोऽविशत्कम् २८ सवज्रकूटांगनिपातवेगविशीर्णकुक्षिःस्तनयन्नुदन्वान् ॥ उत्सृष्टदीर्घोर्मिभुजैरिवार्त्तश्चुक्रोशयज्ञेश्वरपाहिमेति २९ खुरैःक्षुरप्रैर्दरयंस्तदापउत्पारपारंत्रिपरूरसायाम् ॥ ददर्शगांतत्रसुषुप्सुरग्रेयांजीवधानींस्वयमभ्यधत्त ३० स्वदंष्ट्रयोद्धृत्यमहींनिमग्नांसउत्थितःसंरुरुचेरसायाः ॥ तत्रापिदैत्यंगदयापतंतंसुनाभसंदीपिततीव्रमन्युः ३१ जघानरुंधानमसह्यविक्रमंसलीलयेभंमृगराडिवांभसि ॥ तद्रक्तपंकांकितगंडतुंडोयथागजेंद्रोजगतींविभिंदन् ३२ तमालनीलंसितदंतकोट्याक्ष्मामुत्क्षिपंतंगजलीलयांग ॥ प्रज्ञायबद्धांजलयोऽनुवाकैर्विरिंचिमुख्याउपतस्थुरीशम् ३३

चूर्णिका

तत् श्रुत्वा जनस्तपःसत्यनिवासिनः अयंयज्ञवराहइतिनिवेद्त्रयेणअस्तुवन् २५ सःमहद्रूपंकृत्वाप्रलयोदकंप्रविश्य२६ पृथिव्याः स्थानंघ्राणेनजिघ्रन् प्रलयोदकंसंक्षोभ्यरसातलात्पृथ्वींदंतेकृत्वा आगच्छंतं २७ २८ २९ ३० ३१ ३२ तदैवगदयाभिपतंतं हिरण्याक्षंहत्वा तद्रक्तपंकांकितगंडतुंडःऊर्ध्वंनिर्गतः ३२ तदाऋषयः तुष्टुवुः ३३

१ यज्ञमूर्तिःसइत्यर्थःइतिम०पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोअजिततेत्वयाजितंजितमितिसंभ्रमेवीप्सा यज्ञैर्भाव्यतेआक्रियतइतितथा त्रयींवेदमयीम् निलिल्युर्लीनप्रायाः कारणंपृथिव्युद्धरणंतेनसूकराय ३४ यज्ञात्मतांप्रपंचयंतःस्तुवंति रूपमित्यादिचतुर्भिःछंदांसिगाय त्र्यादीनि यज्ञांगभूतच्छंदआद्यनुवादेनभगदवयवताविधीयते बर्हिःशब्देदीर्घाभावआर्षः (बर्हिर्दर्भःआज्यंघृतं) दृशिचक्षुषिचातुर्होत्रंहोत्रादिकर्मचतुष्टयम्(आंघ्रिषु)३५ स्रुक्जुहूस्तुंडेमुखाग्रे स्रुवोनासिकयोः इडाभक्ष णपात्रीचमसाग्रहाश्चसोमपात्राणि प्राशित्रंब्रह्मभागपात्रम् ग्रस्यतेऽनेनेनिग्रसनंमुखांतर्वर्तिच्छिद्रम् चर्वणंभक्षणम् (यत्तेतवतदग्निहोत्रं) ३६ दीक्षादीक्षणीयेष्टिः अनुजन्मवारंवारमभिव्यक्तिः उपसदस्तिस्रइष्टयः शिरोधरंग्रीवा प्रायणीयादीक्षाऽनंतरेष्टिःउदयनीयासमाप्तीष्टिः तेएवदंष्ट्रेयस्य प्रवर्ग्योमहावीरःप्रत्युपसदंपूर्वंक्रियते (सतवजिह्वा) सभ्योहोमरहितोऽग्निः आवसथ्यमौपासनाग्निः तयोर्द्वंद्वैक्यम् तत्तवक्रतुरू पस्यशीर्षंशिरःचितयइष्टकाचयनानिपंचासवःप्राणाः ३७ (सोमोलताविशेषस्तववीर्यं) प्रातःसवनादीन्यवस्थितिरासनंबाल्याद्यवस्थावा अग्निष्टोमोऽत्यग्निष्टोमउक्थ्यःषोडशीवाजपेयोऽतिरात्रआप्तोर्यामइ तिसप्तसंस्थाविभेदास्त्वङ्मांसादिसप्तधातवः सत्राणिद्वादशाहादीनिबहुयागसंघातरूपाणि असोमायज्ञाःससोमाःक्रतवस्तद्रूपस्त्वम् इष्टिर्यजनमनुष्ठानंतदेवबंधनंयस्यसः ३८ पूर्वोक्तमेवसपरिकरंकीर्तयंतः प्र णमंति नमोनमइति अखिलमंत्रादिरूपायक्रियात्मनेसामान्यव्यापाररूपाय किंच वैराग्ययुक्तकर्मसाध्यासत्त्वशुद्धिस्ततोभक्तिः (परेशानुरक्तिः) ततआत्मजयाश्चित्तस्थैर्यंतेनानुभावितंसाक्षात्कृतंयज्ज्ञानंतस्मै (तद्रूपाय) एवंभूतज्ञानप्रदायगुरवेच ३९ हेभूधर सभूधरासपर्वता वनादुदकान्निर्गच्छतोगजेंद्रस्य दतादंतेन ४० त्वयाधृताभूर्विराजतइत्युक्तमिदानींभूमंडलेनत्वद्रूपंविराजतइत्याहुः त्रयीति अथेत्यर्थांत रे तेइदंरूपंदंतेनधृतंयद्भूमंडलंतेनचकास्तिशोभते शृंगेणोढोधृतोयोघनस्तेनभूयसाऽतिमहता (यथाकुलाचलेंद्रस्य) विभ्रमोविलासः ४१

॥ ऋषयऊचुः ॥ ॥ जितंजितंतेऽजितयज्ञभावनत्रयींतनूंस्वांपरिधुन्वतेनमः ॥ यद्रोमगर्तेषुनिलिल्युरध्वरास्तस्मैनमःकारणसूकरायते ३४ रूपंतवै तन्ननुदुष्कृतात्मनांदुर्दर्शनंदेवयदध्वरात्मकम् ॥ छंदांसियस्यत्वचिबर्हिरोमस्वाज्यंदृशित्वंघ्रिषुचातुर्होत्रम् ३५ स्रुक्तुंडआसीत्स्रुवईशनासयोरिडोदरेचम साःकर्णरंध्रे ॥ प्राशित्रमास्येग्रसनेग्रहास्तुतेयच्चर्वणंतेभगवन्नग्निहोत्रम् ३६ दीक्षानुजन्मोपसदःशिरोधरंत्वंप्रायणीयोदयनीयदंष्ट्रः ॥ जिह्वाप्रवर्ग्यस्तवशी र्षकंक्रतोःसभ्यावसथ्यंचितयोऽसवोहिते ३७ सोमस्तुरेतःसवनान्यवस्थितिःसंस्थाविभेदास्तवदेवधातवः ॥ सत्राणिसर्वाणिशरीरसंधिस्त्वंसर्वयज्ञक्रतुरि ष्टिबंधनः ३८ नमोनमस्तेऽखिलमंत्रदेवताद्रव्यायसर्वक्रतवेक्रियात्मने ॥ वैराग्यभक्त्यात्मजयानुभावितज्ञानायविद्यागुरवेनमोनमः ३९ दंष्ट्राग्रकोट्याभ गवंस्त्वयाधृताविराजतेभूधरभूःसभूधरा ॥ यथावनान्निःसरतोदताधृतामतंगजेंद्रस्यसपत्रपद्मिनी ४० त्रयीमयंरूपमिदंचसौकरंभूमंडलेनाथदताधृतेनते ॥ चकास्तिशृंगोढघनेनभूयसाकुलाचलेंद्रस्ययथैवविभ्रमः ४१

श्लोकाः ३४/४१

चूर्णिका हेयज्ञभावनत्वयाजितांजितंस्वांतनुंधुन्वतेतेनमः ३४ तवांगानियज्ञपात्राणि तवसर्वंशरीरंयज्ञरूपं ३५ ३६ ३७ सर्वमंत्रदेवताद्रव्यक्रतुक्रियात्मनेजगद्गुरवेतेनमइति ३८ ३९ ४० ४१

१ (उपसदःउपसन्नामानस्त्रयइष्टिविशेषाः) इतिम० ।

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१३॥

लोकायवासस्थानार्थम् ते (तव) पत्नीम् (सस्थावराणां) जगतांमातरम् यतस्त्वंपितासिएवंसतितत्रस्थिताःसंतस्त्वयापित्रासहास्यैमात्रेनमसाविधेमनमनंकरिष्यामः नमस्कारेणपरिचरेमेतिवा स्व
तेजोधारणशक्तियाज्ञिकामंत्रतोऽग्निमरणाविवाधाःनिहितवानसि (अनेनमातृत्वंस्फुटीकृतम्) ४२ इदंचत्वयातिदुष्करंकृतमित्याहुः कइति हेप्रभो तवत्वयाकृतंभुवउद्धिबर्हणमुद्धरणंत्वदन्यःकःश्रद्दधीतस्पृ
हयेत् अध्यवस्येदित्यर्थः त्वयिपुनरसौविस्मयोनभवतियतोविश्वेसर्वैर्वविस्मयार्यस्मिन् (तस्मिन्) कुतः योभवान् अतिविस्मयमत्यद्भुतमिदंविश्वम् क्रियाविशेषणंवा (अतिविस्मयंयथास्यात्तथा) ससृजेसृष्ट
वान् ४३ विस्मयंदर्शयंतःप्रार्थयंते विधुन्वतेतिद्वाभ्याम् सटानांशिखाभिरग्रैरुद्भूताउच्छलितायेशिवाअंबुबिंदवस्तैःसिच्यमानावयंपवित्रीकृताः ४४ तवकर्मणांपारंयएषतेऽवलोकयतिज्ञातुमिच्छतीत्यर्थः (स
॥५६॥ वैभ्रष्टमतिःयतोऽपाराणिकर्माणियस्यतस्य) यस्यतवयोगमाययायोगुणैःसहयोगस्तेनमोहितम् (समस्तंविश्वं) अतोविश्वस्यशंमंगलंविधेहि यथात्वामचिंत्यानंतशक्तिंज्ञात्वाभजेत्तथाऽनुग्रहाणेत्यर्थः ४५
उपस्थीयमानःस्तूयमानः स्वखुराक्रांतइतिजलेऽपिधारणशक्त्याधानंदर्शयति अविताराक्षकः (उपाधत्तस्थापितवान्) ४६ ४७ (हरिःसंसारहारिणीमेधायस्यसहरिमेधास्तस्यकथां) कथनीयानिमायीनि
मायावंतिचरित्राणियस्य श्रवयेतश्रावयेत ह्रस्वत्वमार्षम् उशतींकमनीयाम् हृदिप्रसीदतिस्वमनसिसंतुष्यतीत्यर्थः (यद्वाभक्तस्यहृदितदंतर्यामीसन्प्रसीदाति) ४८ (सकलाशिषांसवासांकामनानांप्रभौपूरयि
तुंसमर्थे)आशिषोयद्यपिसुलभास्तथापिनप्रार्थनीयाइत्याह ताभिराशीर्भिरलम् (यतो)ऽलवात्मभिस्तुच्छाभिः नचतदाभजनस्यवैफल्यंशंकनीयमित्याह भगवद्भजनव्यतिरेकेणफलांतरदृष्टिंविनाभजतांस्वपदप्राप्तिं
स्वयमेवविधत्ते गुहाशयत्वादहैतुकींभक्तिंजानन् ४९ अतःकोनामपुराकथानांपूर्ववृत्तानांमध्ये कथंचिदापीयविरज्येताविरमेत् नरेतरंपशुंविना५० इतिश्रीभा०महापु०तृतीयस्कंधेटीकायांत्रयोदशोऽध्यायः १३

श्लोकाः ४२ ५०

संस्थापयैनांजगतांसतस्थुषांलोकायपत्नीमसिमातरंपिता ॥ विधेमचास्यैनमसासहत्वयायस्यांस्वतेजोऽग्निमिवारणावधाः४२ कःश्रद्दधीताऽन्यतमस्तवप्र
भोरसांगतायाभुवउद्विबर्हणम् ॥ नविस्मयोऽसौत्वयिविश्वविस्मयेयोमाययेदंससृजेऽतिविस्मयम् ४३ विधुन्वतावेदमयंनिजंवपुर्जनस्तपःसत्यनिवासिनोव
यम् ॥ सटाशिखोद्धूतशिवांबुबिंदुभिर्विमृज्यमानाभृशमीशपाविताः ४४ सवैबतभ्रष्टमतिस्तवैषतेयःकर्मणांपारमपारकर्मणः ॥ यद्योगमायागुणयोगमोहि
तंविश्वंसमस्तंभगवन्विधेहिशम् ४५ ॥ ॥ मैत्रेयउवाच ॥ इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः ॥ सलिलेस्वखुराक्रांतउपाधत्ताऽविताऽवनिम् ४६
सइत्थंभगवानुर्वींविष्वक्सेनःप्रजापतिः ॥ रसायालीलयोन्नीतामप्सुन्यस्ययययौहरिः ४७ यएवमेतांहरिमेधसोहरेःकथांसुभद्रांकथनीयमायिनः॥ शृण्वीतभ
क्त्याश्रवयेतवोशतींजनार्दनोऽस्याऽऽशुहृदिप्रसीदति ४८ तस्मिन्प्रसन्नेसकलाशिषांप्रभौकिंदुर्लभंताभिरलंलवात्मभिः ॥ अनन्यदृष्ट्याभजतांगुहाशयःस्वयं
विधत्तेस्वगतिंपरःपराम् ४९ कोनामलोकेपुरुषार्थसारवित्पुराकथानांभगवत्कथासुधाम् ॥ आपीयकर्णांजलिभिर्भवापहामहोविरज्येतविनानरेतरम् ५०
इतिश्रीभा० तृ० स्कं० वराहप्रादुर्भावेत्रयोदशोध्यायः १३ ॥५६॥

चूर्णिका ४२ ४३ ४४ ४५ स्तुवत्सुसत्सु रसायाः आनीतांपृथ्वींअप्सुन्यस्य स्वशक्त्यास्थिरांकृत्वाहरिःययौ४६ ४७ यः एतांहरेः कथांशृणुयात् श्रावयेद्वातस्यजनार्दनः आशुप्रसी
दति ४८ तस्मिन्प्रसन्नेसतिकिंदुर्लभम् इमांभवापहांभगवत्कथासुधांकर्णांजलिभिरापीयकः नमुच्येत् ४९ ५० ॥ ॥ इतितृतीयेत्रयोदशः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

चतुर्दशेनिदानंतुतद्वधेवक्तुमुच्यते ॥ संध्यायांकश्यपाद्गर्भसंभवःकामतोदितेः १॥(कौषारविणामैत्रेयेणधरोद्धरणादिकारणतःसूकरमूर्तेः)१ तेनैवयेनभूमिरुद्धृता अनुशुश्रुमत्वन्मुखात् (श्रुतवंतः)२ मृधोयुद्धम्
३ (हेवीरत्वयासाधुपृष्टं) साधुत्वेहेतुः यद्यस्मात्त्वंहरेरवतारकथांपृच्छसीति मृत्योःपाशंविशातयतिमोचयतीतितथा ४ तदेवदर्शयतियथाकथया उत्तानपदःपुत्रोध्रुवः मुनिनानारदेन अर्भकएव यदाध्रुवायसुनं
दादिभिर्विमानमानीतंतदाऽस्यदेहत्यागोऽपेक्षितःस्यादितिमत्त्वामृत्यावासन्नेऽपिदेहंनतत्याजकिंतुसोपानइवतस्यमूर्ध्निपदंदत्त्वाविमानमारुह्यविष्णुपदमारूढः वक्ष्यतिहि"परीत्याभ्यर्च्यधिष्ण्याग्र्यंकृतस्वस्त्यय
नोद्द्विजैः इयेषतदधिष्ठातुंविभ्रद्रूपंहिरण्मयम् इति ५ तयोःसंग्रामेहेतुंवक्तुमितिहासंप्रस्तौति अथेति अनुपृच्छतांदेवानांब्रह्मणावर्णितइतिहासोमयाश्रुतः (सोत्रारभ्यतइतिआरंभार्थोथशब्दः)६ देवप्रश्नप्रस्तावा
यप्रथमंहिरण्याक्षहिरण्यकशिपूत्पत्तिप्रसंगमाह दितिरित्यादिनायावदध्यायपरिसमाप्ति (हेक्षत्तः) मरीचेःपुत्रंकश्यपम् हृच्छयःकामस्तेनार्दिता (पीडिता) अतःसंध्यायामेवकामितवती ७ तदप्यग्निहो
॥५७॥ त्रशालायांतत्रापिसमाहितम् अग्निर्जिह्वायस्य (तम्) यजुषांयज्ञानांपतिं (यजुर्वेदगतमंत्राणांवाविषयत्वेनपतिं) पुरुषंश्रीविष्णुम् ८ कृपणांबहुभाषिणीमितिवक्ष्यतितत्रएषमांमितिद्वाभ्यां कार्पण्यंभर्तरी
तिचतुर्भिश्चबहुभाषणंवर्ण्यते (त्वत्कृतेत्वामुद्दिश्यगृहीतचापः) दुनोतिपीडयति विक्रम्यशौर्यमाविर्भाव्य रंभांकदलीम् ९ (मयिअनुग्रहं) आयुङ्क्ष्वांसर्वतोयुनक्तुसम्यक्करोतु १० भर्तरिप्राप्तबहुमानानांस्त्रीणांय
शोलोकानाविशतेव्याप्नोति (सप्तमीपंचम्यर्थेभर्तुःसकाशादित्यर्थः) प्रजयापुत्ररूपेण 'तज्जायाजायाभवतियदस्यांजायतेपुनः' इतिश्रुतेः ११ नोऽस्माकंपितानोस्मान्पृथगपृच्छत् १२

श्लोका १/१२

॥ श्रीशुकउवाच ॥ ॥ निशम्यकौषारविणोपवर्णितांहरेःकथांकारणसूकरात्मनः ॥ पुनःसपप्रच्छतमुद्यतांजलिर्नचातितृप्तोविदुरोधृतव्रतः १ ॥ विदु
रउवाच ॥ ॥ तेनैवतुमुनिश्रेष्ठहरिणायज्ञमूर्तिना ॥ आदिदैत्योहिरण्याक्षोहतइत्यनुशुश्रुम २ तस्यचोद्धरतःक्षोणींस्वदंष्ट्राग्रेणलीलया ॥ दैत्यराजस्य
चब्रह्मन्कस्माद्धेतोरभून्मृधः ३ ॥ ॥ मैत्रेयउवाच ॥ ॥ साधुवीरत्वयापृष्टमवतारकथांहरेः ॥ यस्त्वंपृच्छसिमर्त्यानांमृत्युपाशविशातनीम् ४ ययो
त्तानपदःपुत्रोमुनिनागीतयार्भकः ॥ मृत्योःकृत्वैवमूर्ध्न्यंघ्रिमारुरोहहरेःपदम् ५ अथात्रापीतिहासोऽयंश्रुतोमेवर्णितःपुरा ॥ ब्रह्मणादेवदेवेनदेवानामनुपृच्छताम्
६ दितिर्दाक्षायणीक्षत्तर्मारीचंकश्यपंपतिम् ॥ अपत्यकामाचकमेसंध्यायांहृच्छयार्दिता ७ इष्ट्वाग्निजिह्वंपयसापुरुषंयजुषांपतिम् ॥ निम्लोचत्यर्कआसी
नमग्न्यगारेसमाहितम् ८ ॥ ॥ दितिरुवाच ॥ ॥ एषमांत्वत्कृतेविद्वन्कामआत्तशरासनः ॥ दुनोतिदीनांविक्रम्यरंभामिवमतंगजः ९ तद्भवान्दह्यमा
नायांसपत्नीनांसमृद्धिभिः ॥ प्रजावतीनांभद्रंतेमय्यायुंक्तामनुग्रहम् १० भर्तर्याप्तोरुमानानांलोकानाविशतेयशः ॥ पतिर्भवद्विधोयासांप्रजयाननुजायते
११ पुरापितानोभगवान्दक्षोदुहितृवत्सलः ॥ कंवृणीतवरंवत्साइत्यपृच्छतनःपृथक् १२

चूर्णिका ॥ श्रीशुकउवाच ॥ ॥ मैत्रेयेणसूकरात्मनःहरेःवर्णितांकथांनिशम्यनातितृप्तःपुनःप्रपच्छ १ ॥ ॥ विदुरउवाच ॥ ॥ हेमुनिश्रेष्ठयज्ञमूर्तिनाक्षोणींउद्धरतातेन दैत्यराज
स्यमृधःकुतोऽभूत् २ ३ ॥ ॥ मैत्रेयउवाच ॥ ॥ हेवीरत्वयासाधुपृष्टम् ४ पूर्वंदेवानांपृच्छतांब्रह्मणाइतिहासः कथितःसःमयाश्रुतः तंशृणु ५ ६ एकदादक्षकन्यादितिः
अपत्यकामासती संध्यायांअग्निंइष्ट्वाहोमशालायांस्थितंपतिं कश्यपंचकमे ७ ८ ॥ ॥ दितिरुवाच ॥ ॥ हेविद्वन् त्वत्कृते कामःमांदुनोति ९ प्रजावतीनांसपत्नीनांस
मृद्धिभिःदह्यमानायाः ममकल्याणंकुरुइति श्रुत्वातां कश्यपउवाच ॥ ॥ १० ११ १२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. टी. (भावंहृद्गताभिप्रायम्) अयंभावः त्रयोदशानामप्यस्माकंत्वयिभावसाम्येवैषम्याचरणंतवानुचितमिति (संतानंभावयतीतिसंतानभावनः संतानाभिवृद्धिकामनयातुभ्यमदादित्यर्थः) १३ (अथतस्मात्हेकल्या अ०
णमूर्तेमंगलमूर्तेममकामंसफलीकुरु) महीयसित्वादृशेमहत्तमे (आर्तानामुपसर्पणं रक्षेति उपगमनं) मोघंनभवतिहि १४ (हेवीरजितेंद्रिय) प्रवृद्धानंगेनकश्मलंमोहोयस्यास्ताम् १५ संध्याकालवंचनायभा
टीका र्याप्रशंसा एषइतिपंचभिः यतोयस्याःसकाशात् (त्रैवर्गिकीधर्मार्थकामसंबंधिनी) १६ सर्वाश्रमान् (ब्रह्मचर्यादीन्) उपादायेति तानप्यन्नादिदानेनकृच्छ्रतस्तारयन्स्वयंतरतीत्यर्थः १७ आत्मनोदेह
स्यार्धम् कर्मसुद्वयोःसहाधिकारात् यच्छब्दानांतांत्वामितितृतीयश्लोकेनसंबंधः स्वधुरंदृष्टादृष्टकर्मभारम् (यस्यांनिक्षिप्य) विज्वरोनिश्चिंत :१८ हेलाभिर्लीलाभिः जयेमेति सभार्यस्येंद्रियाणिप्रायेणेतस्त ॥१४॥
तोनसर्पंति (किंतुभार्यामाश्रित्यास्थिरीभवंति) इतिभावः (दस्यून्शत्रून्) १९ तामनेकोपकारकर्त्रींत्वांकात्स्न्येंनानुकर्तुंप्रत्युपकारैस्त्वत्सदृशाभवितुंनप्रभवोनसमर्थाः (भवंतोनप्रभवश्चेदन्येप्रभवेयुर्नहिसर्वेभवा
॥५८॥ दृशाइत्यत्राह) येचान्येगुणगृध्नवोगुणप्रियास्तेऽपिनसमर्थाः संपूर्णेनाप्यायुषा (यावज्जीवंप्रत्युपकुर्वंतोपीत्यर्थः) वाशब्दाज्जन्मांतरैरपिनप्रभवइत्युक्तम् २० यद्यपित्वदनुकरणमशक्यम् प्रजात्यैपुत्रोत्प
त्त्यैनातिवोचंतिनानिंदंति प्रतिपालयप्रतीक्षस्व २१ स्वनिंदामगणयंतींभीषयन्श्रीरुद्रमनुवर्णयति एषेतिसप्तभिः घोराणामेषावेलास्वयंचघोरदर्शना २२ भूतपर्षद्भिर्भूतगणैः (वृषेणाटतिवृषमारुह्यसंचरति) २३
तर्हितत्संमुखत्वमात्रंवर्जनीयमितिचेत्तत्राह श्मशानेयश्चक्रानिलोवातमंडलीतस्मिन्याधूलिस्तयाधूम्रोविकीर्णोविक्षिप्तोविद्योतोद्युतिमान्जटाकलापोयस्य भस्मनाऽवगुंठः प्रावृतोऽमलोरुक्मवद्देहोयस्य सदेवस्त्रि
भिः सोमार्काग्निनेत्रैःपश्यतीत्यस्योत्तरश्लोकत्रयेप्यनुषंगः एकस्यजामातरःपरस्परंभ्रातरोव्यवह्रियंते अतोममभ्राताअसौतवदेवरइतिलज्जार्थमुक्तम् २४

सर्विदित्वाऽऽत्मजानांनोभावंसंतानभावनः ॥ त्रयोदशाददात्तासांयास्तेशीलमनुव्रताः १३ अथमेकुरुकल्याणकामंकंजविलोचन ॥ आर्त्तोपसर्पणंभूमन्न श्लोकाः
मोघंहिमहीयसि १४ इतितांवीरमारीचःकृपणांबहुभाषिणीम् ॥ प्रत्याहानुनयन्वाचाप्रवृद्धानंगकश्मलाम् १५ एषतेऽहंविधास्यामिप्रियंभीरुयदिच्छसि ॥
तस्याःकामंनकःकुर्यात्सिद्धिस्त्रैवर्गिकीयतः १६ सर्वाश्रमानुपादायस्वाश्रमेणकलत्रवान् ॥ व्यसनार्णवमत्येतिजलयानैर्यथार्णवम् १७ यामाहुरात्मनोह्य १३
र्धंश्रेयस्कामस्यमानिनि ॥ यस्यांस्वधुरमध्यस्यपुमांश्चरतिविज्वरः १८ यामाश्रित्येंद्रियारातीन्दुर्जयानितराश्रमैः॥वयंजयेमहेलाभिर्दस्यून्दुर्गपतिर्यथा १९ २४
नवयंप्रभवस्तांत्वामनुकर्तुंगृहेश्वरि ॥ अप्यायुषावाकात्स्न्येंनयेचान्येगुणगृध्नवः २० अथापिकाममेतंतेप्रजात्यैकरवाण्यलम् ॥ यथामांनातिवोचंतिमुहूर्त्तं
प्रतिपालय २१ एषाघोरतमावेलाघोराणांघोरदर्शना ॥ चरंतियस्यांभूतानिभूतेशानुचराणिह २२ एतस्यांसाध्विसंध्यायांभगवान्भूतभावनः ॥ परीतो
भूतपर्षद्भिर्वृषेणाटतिभूतराट् २३ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः ॥ भस्मावगुंठामलरुक्मदेहोदेवस्त्रिभिःपश्यतिदेवरस्ते २४

चूर्णिका १३ १४ १५ हेभीरुतेकामंविधास्यामि किंच तवप्रजारूपंकामंकरवाणि मुहूर्तंप्रतीक्षस्व १६ १७ हेसाध्वि अस्यांसंध्यायांभगवान् भूतैः परीतः वृषेणअटति ब्रह्मादयः
यदाज्ञाधारकाः तस्यपिशाचवदाचरणं अनुकरणम् १८ १९ २० २१ २२ २३ २४ ॥५८॥

१ कृष्णलोहितः । म० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुतथाऽपिमहत्त्वेनादरणीयस्यस्वजनस्यचतवससर्वंक्षमेतैवतत्राह यस्यस्वजनादिर्नास्तिसमत्वादीश्वरस्य ऐश्वर्यमेवाह येनचरणेनापविद्धांनिर्माल्यवद्दूरतस्त्यक्तांतेनभुक्तभोगामजांमायांतन्मयींविभूतिंमहाप्र
सादइत्याशास्महे व्रतैस्तमाराध्य २५ अनिषिद्धसुखत्यागादसौपिशाचइत्युपहासोनकार्यइत्याह द्वाभ्याम् यस्यानवद्यंविषयासक्तिशून्यमाचरितम् बिभित्सवोभेत्तुमिच्छवः (निरस्तसाम्यातिशयोपिसर्वेश्वरो
पि) २६ (स्वात्मन् स्वात्मन्येवरतस्ययस्य) समीहितमभिप्रेतंलोकशिक्षारूपं अविदुषोऽविद्वांसः (अजानंतः) यद्वा नविद्वानन्योयस्मादितितस्य सर्वज्ञस्येत्यर्थः दुर्भगानेवाह यैरिति श्वभोजनंशुनां
भोज्यंशरीरं स्वात्मतयाऽयमेवात्मेतिबुध्या २७ अहोअतर्क्यंतस्याचरणामित्याह ब्रह्मादयोयेनकृतान्सेतून्स्वस्वाधिकारान्पालयंति यःकारणंयस्य (तद्यत्कारणं) येनकृतमिदंविश्वम् मायाचयस्याज्ञाक
री तस्यपिशाचचर्येति विभूम्नःपरमेश्वरस्य विडंबनमतर्क्यमित्यर्थः २८ भर्त्रानिरूपकेणैवंसंविदितेज्ञापितेऽपिसति वृषलीववेश्येव (परिधानंजग्राहाकृष्टवतीत्यर्थः) २९ विकर्मणिनिषिद्धेकर्मणि दिष्टायदैव
रूपायेश्वराय उपविवेशेतिमैथुनंलक्ष्यते ३० उपस्पृश्यस्नात्वाभर्गशब्दवाच्यंविरजंज्योतिर्ध्यायन्सनातनंब्रह्मगायत्रींप्रणवंवाजजाप ३१ कर्मावद्येनकर्मदोषेण ३२ मावधीन्माहंत्वित्यर्थः (भूतानांऋषभो
रुद्रः) वधशंकाबीजमाह रुद्रइति (यस्यरुद्रस्य) अंहसमंहोऽपराधमकरवंकृतवत्यस्मि ३३ रुत्दुःखंतद्द्रावयतीतिरुद्रस्तस्मै उग्रायानतिलंघ्याय मीढुषेसकामेषुफलसेचनकर्त्रे निष्कामेषुशिवाय (परम
सुखाय) वस्तुतोन्यस्तदंडाय दुष्टेषुधृतदंडाय संहारेमन्यवे (क्रोधात्मनेमहतेदेवायनमः) ३४ भामोभगिनीभर्ता उरुरनुग्रहोयस्य व्याधस्यनिर्दयस्यापि (अतिनिष्ठुरस्यापिस्त्रियोदयनीयाः-अतस्तासाम
स्माकंसदयालुः प्रसीदत्वित्यर्थः) सतीपतिरित्यनेनस्त्रीणांस्वभावंस्वयमपिवेत्तीतिसूचयति ३५ स्वसर्गस्यस्वसंतानस्याऽऽशिषंशुभम् लोक्यांलोकद्वयार्हांसंध्यायांयोनियमःसनिवृत्तोयस्य ३६

श्लोकाः २५ — ३६

नयस्यलोकेस्वजनःपरोवानात्याहृतोनोतकश्चिद्विगर्ह्यः ॥ वयंव्रतैर्यच्चरणापविद्धामाशास्महेऽजांबतभुक्तभोगाम् २५ यस्यानवद्याचरितंमनीषिणोगृणंत्यवि
द्यापटलंबिभित्सवः ॥ निरस्तसाम्यातिशयोऽपियत्स्वयंपिशाचचर्यामचरद्गतिःसताम् २६ हसंतियस्याचरितंहिदुर्भगाःस्वात्मन्रतस्याविदुषःसमीहितम् ॥
यैर्वस्त्रमाल्याभरणानुलेपनैःश्वभोजनंस्वात्मतयोपलालितम् २७ ब्रह्मादयोयत्कृतसेतुपालायत्कारणंविश्वमिदंचमाया ॥ आज्ञाकरीतस्यपिशाचचर्याअहोवि
भूम्नश्चरितंविडंबनम् २८ ॥ मैत्रेयउवाच ॥ ॥ सैवंसंविदितेभर्त्रामन्मथोन्मथितेंद्रिया ॥ जग्राहवासोब्रह्मर्षेर्वृषलीवगतत्रपा २९ सविदित्वाऽथभार्यायास्तं
निर्बंधंविकर्मणि ॥ नत्वादिष्टायरहसितयाऽथोपविवेशह ३० अथोपस्पृश्यसलिलंप्राणानायम्यवाग्यतः ॥ ध्यायञ्जजापविरजंब्रह्मज्योतिःसनातनम् ३१
दितिस्तुव्रीडितातेनकर्मावद्येनभारत ॥ उपसंगम्यविप्रर्षिमधोमुख्यभ्यभाषत ३२ ॥ दितिरुवाच ॥ ॥ मामेगर्भमिमंब्रह्मन्भूतानामृषभोवधीत् ॥ रुद्रःपति
र्हिभूतानांयस्याकरवमंहसम् ३३ नमोरुद्रायमहतेदेवायोग्रायमीढुषे ॥ शिवायन्यस्तदंडायधृतदंडायमन्यवे ३४ सनःप्रसीदतांभामोभगवानुर्वनुग्रहः ॥ व्या
धस्याप्यनुकंप्यानांस्त्रीणांदेवःसतीपतिः ३५ ॥ मैत्रेयउवाच ॥ स्वसर्गस्याशिषंलोक्यामाशासानांप्रवेपतीम् ॥ निवृत्तसंध्यानियमोभार्यामाहप्रजापतिः ३६

चूर्णिका

२५ २६ २७ २८ ॥ ॥ मैत्रेयउवाच ॥ ॥ दितिःएवंश्रुत्वापिवेश्येवभर्तुर्वासः जग्राह २९ तदाकश्यपःभार्यायाःविकर्मणिनिर्बंधंज्ञात्वादिष्टायनत्वातयासहरहसिउपवि
वेश ३० अथस्नात्वाप्राणानायम्यगायत्रींजजाप ३१ दितिःतेनकर्मणाव्रीडितासतीअधोमुखीपतिंअभाषत ३२ हेब्रह्मन्रुद्रःमदपराधात्मेगर्भंमावधीत् यस्यअहंअपराधंकृत
वती ३३ शिवायनमः ३४ सःभामःनःप्रसीदताम् ३५ इतिश्रुत्वानिवृत्तसंध्यानियमःकश्यपःआह ३६

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका

ते (तव) आत्मनश्चित्तस्याप्रायत्यादशुचित्वात् मौहूर्तिकात्संध्यारूपात् उतअपिममनिदेशस्याऽऽज्ञायाअतिचारेणातिक्रमेण देवानांरुद्रानुचराणाम् (हेलनादवगणनात्) ३७ एतैश्चतुर्भिर्हेतुभिर्जाठरा धमौपुत्रापसदौ (भविष्यतइत्यन्वयः) हेचंडिकोपने (जाठराधमत्वमुपपादयतिलोकानिति आक्रंदयिष्यतःरोदयिष्यतः) ३८ (अकृतागसांनिरपराधानाम्) हन्यमानानांसताम् (निगृह्यमाणानांबलाद्गृह्यमा णानांसतीनांसाधुपुचकोपितेषुसत्सु) ३९ शतपर्वधृक्वज्रधरइंद्रः (पर्वतान्यथा) ४० सुनाभेन (सुदर्शनेनयुक्तः) उदारोबाहुर्यस्य मह्यंममकोपितेष्वित्युक्तत्वाच्छंकितांच[illegible]सतीप्रार्थयते ब्राह्मणा न्माभूदिति ४१ (ब्रह्मशापदग्धस्यकोदोषइतितत्राह नब्रह्मेति) नारकाअपि (नानुगृह्णंति) तथायांयांयोनिमसौगतोभवतितत्रस्थाश्चनानुगृह्णंतिकृपांनकुर्वंति ४२ कृतोयोऽपरा[illegible]स्तेनशोकस्ततोऽनुताप स्तेन (सद्यएव) प्रत्यवमर्शनाद्युक्तायुक्तविचारात् भगवतिहरौ वधंभगवताज्ञापिताद्बहुमानान् भवेश्रीरुद्रे एतैःपंचभिःकारणैः ४३ पुत्रस्यहिरण्यकशिपोःपुत्राणांमध्येएकःसतांमतोभविष्यति तमेववर्णयति गास्यंतीतिसार्धैःपंचभिः (भगवतोयशसा) समंसहसदृशंवा (पवित्रम्) ४४ दुर्वर्णं हीनवर्णं हेमयथायोगैर्दाहादिभिरुपायैःशोध्यतेतथायस्यशीलंस्वभावमनुवर्तितुमनुगंतुंप्राप्तुंनिर्वैरादिभिर्योगैरात्मानं भावयिष्यंतिशोधयिष्यंति (साधवोपिसाधुश्रेष्ठाइत्यर्थः) ४५ विश्वप्रसादेहेतुर्यदात्मकंस्वदृगात्मसाक्षी यस्यानन्ययाभगवानेवसत्यइत्येवंभूतयादृशातोष्यतेतोषंप्राप्स्यते ४६ तत्रहेतुः सवाइति (महाभाग वतोवैष्णवाग्र्यः) महात्माऽपरिच्छिन्नदृष्टिः महानुभावोमहाप्रभावः महतामपिमध्येमहिष्ठोऽतिशयेनमहान् प्रवृद्धयाभक्त्यानुभावितेशोधितेचित्तेवैकुंठंहरिंनिवेश्यदेहाद्यभिमानंत्यक्ष्यति ४७

श्लोकाः ३७ — ४७

॥ कश्यपउवाच ॥ ॥ अप्रायत्यादात्मनस्तेदोषान्मौहूर्तिकादुत ॥ मन्निदेशातिचारेणदेवानांचातिहेलनात् ३७ भविष्यतस्तवाभद्रावभद्रेजाठराधमौ ॥ लोकान्सपालांस्त्रींश्चंडिमुहुराक्रंदयिष्यतः ३८ प्राणिनांहन्यमानानांदीनानामकृतागसाम् ॥ स्त्रीणांनिगृह्यमाणानांकोपितेषुमहात्मसु ३९ तदाविश्वेश्वरः क्रुद्धोभगवाँल्लोकभावनः ॥ हनिष्यत्यवतीर्यासौयथाद्रीन्शतपर्वधृक् ॥४०॥ दितिरुवाच ॥ ॥ वधंभगवतासाक्षात्सुनाभोदारबाहुना ॥ आशासेपुत्रयो र्मह्यंमाक्रुद्धाद्ब्राह्मणाद्विभो ४१ नब्रह्मदंडदग्धस्यनभूतभयदस्यच ॥ नारकाश्चानुगृह्णंतियांयांयोनिमसौगतः ४२ ॥ ॥ कश्यपउवाच ॥ ॥ कृतशो कानुतापेनसद्यःप्रत्यवमर्शनात् ॥ भगवत्युरुमानाच्चभवेमय्यपिचादरात् ४३ पुत्रस्यैवतुपुत्राणांभवितैकःसतांमतः ॥ गास्यंतियद्यशःशुद्धंभगवद्यशसासमम् ४४ योगैर्हेमेवदुर्वर्णंभावयिष्यंतिसाधवः ॥ निर्वैरादिभिरात्मानंयच्छीलमनुवर्त्तितुम् ४५ यत्प्रसादादिदंविश्वंप्रसीदतियदात्मकम् ॥ सस्वदृग्भगवा न्यस्यतोष्यतेऽनन्ययादृशा ४६ सवैमहाभागवतोमहात्मामहानुभावोमहतांमहिष्ठः ॥ प्रवृद्धभक्त्याह्यनुभाविताशयेनिवेश्यवैकुंठमिमंविहास्यति ४७

चूर्णिका

हेअभद्रेचित्तस्यअशुचित्वात्मुहूर्तातिक्रमदोषात्ममाज्ञालंघनात् देवहेलनाच्च ३७ तवजठरे अधमौद्वौपुत्रौभविष्यतः तौसर्वान्दुःखंदास्यतः ३८ किंच प्राणिनांहन्यमाना नांदीनानामकृतागसाम् स्त्रीणांनिगृह्यमाणानांकोपितेषुमहात्मसु तदाविश्वेश्वरःअवतीर्यतौहनिष्यति ३९ ४० ॥ ॥ दितिरुवाच ॥ ॥ पुत्रवधंभगवतःआशासे क्रुद्धा त्ब्राह्मणात्माभवतु ४१ नरकस्थाअपिब्रह्मदंडदग्धंनगृण्हंति ४२ ॥ ॥ कश्यपउवाच ॥ ॥ तवपश्चात्तापोजातःअतःतेपौत्रःसाधुर्भविष्यति ४३ तंमहाभागवतंत्वं द्रक्ष्यसि ४४ ४५ ४६ ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभागवतत्वमाह अलंपटइति (अलंपटोविरक्तः) शीलधरःसुस्वभावः गुणानांधैर्यादीनामाकरोजन्मभूमिः परेषांसमृध्याहृष्टः परेषुदुःखितेषुसत्सुनभूतोजातःशत्रुर्यस्य निदाघेभवंतापंचंद्रोयथाहरत्येवंजग
तःशोकहर्ताभविष्यति ४८ अपरिच्छिन्नदृष्टित्वमाह अंतरिति स्वपुरुषाणामिच्छयापुनःपुनर्गृहीतानिरूपाणियेन श्रीरेवललनासुंदरीतस्यालला‌मंमंडनम् द्रष्टाद्रक्ष्यति ४९ महामनाःसोत्साहाचित्ता हरिणास
हयुद्धेनमरणेपुत्रयोःकीर्तिःसद्गतिश्चभवेदिति (वधंभगवतासाक्षादितिभर्तृवचनेननिश्चित्यासीदित्यर्थः) ५० ॥ ॥ इतितृतीयस्कंधेटीकायांचतुर्दशोऽध्यायः १४ ॥ ॥ छ ॥ ॥ हतप्रभैःसुरैःपृ
ष्टःप्राहपंचदशेविधिः ॥ तद्बीजविप्रशापादिवैकुंठेविष्णुभृत्ययोः १ तदेवंदेवानांब्रह्मणश्चसंवादप्रस्तावमुक्त्वेदानीं‌तंसंवादंवक्तुमाह प्राजापत्यंकाश्यपंतेजोवीर्यंपरेषांतेजोहंतीतितथा आर्षः स्वपुत्राभ्यांकरिष्यते
यत्सुराणामर्दनंपीडनंतस्माच्छंकमाना (दधारनसुषुवेइत्यर्थः) १ तेनगर्भतेजसा हतालोकेनिरस्तसूर्यादिप्रकाशे हतौजसोहतप्रभावाः दिशां ध्वांतेनव्यतिकरंसंकरम् (ब्रह्मणेनिवेदितवंतः) २ वे
त्थजानासिकिंविचारयसि यद्यतोवयंसंविग्नाभीताः भगवतस्तव अव्यक्तमज्ञातम् किमापिनयतःकालेन नस्पृष्टंवर्त्मज्ञानप्रचारोयस्य ३ ब्रह्माणंपरमेश्वरत्वेनस्तुवंतःप्रार्थयंते देवदेवेतिसप्तभिःलो
कनाथानांशिखामणे (परेषांउत्कृष्टानांअपरेषांनिकृष्टानांसर्वेषां) भावविदभिप्रायज्ञोऽसि केनाभिप्रायेणदितेर्गर्भोवर्धतइतिजानासीत्यर्थः ४ विज्ञानंवीर्यंबलंयस्यइदंब्रह्मदेहमुपेयुषेप्राप्तवते गृहीतोगुणभेदोर
जोगुणोयेन व्यक्तस्यप्रपंचस्ययोनयेकारणाय नव्यक्ताकेनापिप्रमाणेनविज्ञातायोनिर्यस्येतिवा ५ सकामतयाप्रतिक्षणंदुःखमनुभवंतोनिष्कामभक्तान्स्तुवंतआहुर्द्वाभ्याम् येत्वात्वामनन्येननिष्कामेनभावेनभ
क्त्याध्यायंति आत्मनोजीवान्भावयति सृजतीतिआत्मभावनस्तं तथा स्वस्मिन्प्रोतानिग्रथितानिभुवनानियेन चेतनाचेतनप्रपंचकारणमित्यर्थः तत्रहेतुः सदसदात्मकंकार्यकारणरूपंवस्तुतस्ताभ्यां
परम् ६ जितःश्वासइंद्रियाण्यात्मामनश्चयैः अतःसुपक्वयोगाःअतएवप्राप्तोयुष्मत्प्रसादोयैस्तेषाम् (कुतोपिपराभवोन) ७

अलंपटःशीलधरोगुणाकरोहृष्टःपरर्द्धर्याव्यथितोदुःखितेषु ॥ अभूतशत्रुर्जगतःशोकहर्त्तानैदाघिकंतापमिवोडुराजः ४८ अंतर्बहिश्चामलमब्जनेत्रंस्वपूरुषे
च्छानुगृहीतरूपम् ॥ पौत्रस्तवश्रीललनाललामंद्रष्टास्फुरत्कुंडलमंडिताननम् ४९ ॥ ॥ मैत्रेयउवाच ॥ ॥ श्रुत्वाभागवतंपौत्रममोदतदितिर्भृ
शम् ॥ पुत्रयोश्चवधंकृष्णाद्विदित्वासीन्महामनाः ५० ॥ ॥ इतिश्रीभा०तृ०दितिकश्यपसंवादेचतुर्दशोध्यायः १४ ॥ ॥ छ ॥ ॥ मैत्रेयउवाच ॥
प्राजापत्यंतुतत्तेजःपरतेजोहनंदितिः ॥ दधारवर्षाणिशतंशंकमानासुरार्दनात् १ लोकेतेनहतालोकेलोकपालाहतौजसः ॥ न्यवेदयन्विश्वसृजेध्वांतव्य
तिकरंदिशाम् २ देवाऊचुः ॥ ॥ तमएतद्विभोवेत्थसंविग्नायद्वयंभृशम् ॥ नह्यव्यक्तंभगवतःकालेनास्पृष्टवर्त्मनः ३ देवदेवजगद्धातर्लोकनाथशिखामणे ॥
परेषामपरेषांत्वंभूतानामसिभावावित् ४ नमोविज्ञानवीर्यायमाययेदमुपेयुषे ॥ गृहीतगुणभेदायनमस्तेऽव्यक्तयोनये ५ येत्वाऽनन्येनभावेनभावयंत्यात्म
भावनम् ॥ आत्मनिप्रोतभुवनंपरंसदसदात्मकम् ६ तेषांसुपक्वयोगानांजितश्वासेंद्रियात्मनाम् ॥ लब्धयुष्मत्प्रसादानांनकुताश्चित्पराभवः ७

श्लोकाः ४८ / ७

चूर्णिका

४८ ४९ ॥ ॥ मैत्रेयउवाच ॥ ॥ भागवतंपौत्रंभाव्यं पुत्रयोश्चकृष्णात्वधंश्रुत्वादितिः भृशंआनंदंप्राप ५० ॥ ॥ इतितृतीयेचतुर्दशः १४ ॥ ॥ छ ॥
॥ मैत्रेयउवाच ॥ ॥ हेविदुरदितिःतत्काश्यपंवीर्यंउदरेशतवर्षंदधार १ तेनवीर्येणब्रह्मांडेअंधकारः अभूत् तदालोकपालाः संविग्नाःसंतः ब्रह्माणंगत्वाप्रार्थयामासुः २
हेभगवन् तवएतत् अज्ञातंन तथापिवयंभीताः निवेदयाम ३ हेदेवइदंकाश्यपंतेजः दितेर्गर्भः दिशः अंधीकुर्वन् वर्तते अस्मात् नः शं त्वं विधत्स्व ४ ५ ६ ७

CC-0. In Public Domain. Digitization by eGangotri

अन्येतुनित्यंकर्मक्लेशिनइत्याहुः (वाचावेदलक्षणयामंत्रितावद्धाः अतः) आयत्ताअधीनाः यस्येति तंत्यादामन्या (यंत्रितागावोवृषभाइव) मुख्यायनियंत्रेप्राणरूपायेतिवा (बलिंकर्मरूपंसमर्पयंति) तथाचश्रुतिः "तस्यवाक्तंतिर्नामानिदामानि,,इत्यादि ८ (हेभूमन्सभगवान्त्वं) तमसाअहोरात्रविभागाभावेनलुप्तानिकर्माणियेषाम् (तेषांशंकल्याणं) आपन्नानापद्गतानस्मान् (अदभ्राबहुलादयाय स्यांतया) ९ आपत्कारणमाहुः (एषइतिहेदेव) एषः (दितेः) गर्भःतस्यविशेषणम् अर्पितंनिक्षिप्तंकाश्यपमोजोवीर्यंदिशस्तिमिरयंस्तमोव्याप्ताःकुर्वन् (एधासिइंधने) १० दितेःकुचेष्टितंज्ञात्वाप्रहस्यदे वानांयेशब्दाविज्ञप्तिवाक्यानितेषांगोचरोविषयभूतः (प्रीणन्प्रीतिमाप्नुवन्रुचिरयावाचादेवान्) प्रत्यभाषत ११ युष्मत्सकाशात् (पूर्वजाः) पूर्वंजाताः (लोकान् भुवनानि किंकामा इत्यत आहलोके पुजनेपुस्पृहारहितायादृच्छिकाइत्यर्थः) १२ (वैकुंठस्यविष्णोः) वैकुंठाख्यंलोकंययुः १३ तंवर्णयतिवसंतीत्यादिद्वादशभिः वैकुंठस्यहरेरिवमूर्तिर्येषांते निमित्तंफलंननिमित्तंप्रवर्तकंयस्मिन् निष्कामे नधर्मेणेत्यर्थः आराधयन्नाराधितवंतः १४ यत्रेति शब्दगोचरोवेदांतैकवेद्यः विरजंशुद्धंसत्त्वमूर्तिंविष्टभ्यधृत्वा (अतः) वृषोधर्ममूर्तिः स्वानांस्वान् (सुखयन्) १५ तत्रत्यंवनंविशिनष्टि यत्रेतिचतुर्भिः सर्वेष्वप्यृतुषुश्रीः पुष्पादिसंपद्येषांतैः (विभ्राजत् मूर्तिमत्कैवल्यंब्रह्मैवनैश्रेयसंनाम) १६ (विमानैश्चरंतिवैमानिकादेवाः विशेषाःसस्त्रीकाः) चरितानिचरित्राणि भर्तुःप्रभोः (जलसमीपे)अनुविकसंत्योमधुमकरंद स्तद्युक्तामाधव्योवासंत्योलताः यद्वा अनुविकसन्मधवःप्रसरन्मकरंदामाधव्योमधुकालीनाःसुमनसस्तासांगंधेनखंडितानिविघ्निताधीर्येषांतेऽपितद्बंधप्रापकर्मनिलंक्षिपंतस्तिरस्कुर्वंतोगायंति अनेनभगवत्पार्षदानां निरतिशयविषयसुखेऽपिभगवद्भजनानंदासक्तिर्दर्शिता १७ अन्यभृताःकोकिलाः दात्यूहश्चातकः अचिरमात्रंक्षणमात्रंविरमति (हरिकथामिवगायमानेसति) अनेनतत्रत्यपक्षिणामपिहरिकथाश्रवणादिप रमानंदोदर्शितः १८ मंदारपारिजातौसुरतरुविशेषौ कुरवस्तिलकवृक्षः उत्पलंरात्रिविकासि अंब्जुजंदिनविकासि (ऊर्णंकरवीरपुष्पम्) नागोनागकेसरः एताः सुमनसःपुष्पजातयः सुगंधाअपितुलसिकाभ रणेनश्रीहरिणातुलस्यागंधेऽर्चितेसतियस्मिन्वनेतस्यास्तपोबहुमानयंति अनेनतत्रत्यागुणग्राहिणएवनमत्सरिणइत्युक्तम्एवंभूतंवनंयत्रतद्वैकुंठंययुरितिपूर्वेणान्वयः १९

श्लोकाः ८/१९

यस्यवाचाप्रजाःसर्वागावस्तंत्येवयंत्रिताः ॥ हरंतिबलिमायत्तास्तस्मैमुख्यायतेनमः ८ सत्वंविधत्स्वशंभूमंस्तमसालुप्तकर्मणाम् ॥ अदभ्रदययादृष्ट्याआ पन्नानर्हसीक्षितुम् ९ एषदेवदितेर्गर्भओजःकाश्यपमर्पितम् ॥ दिशस्तिमिरयन्सर्वावर्धतेऽग्निरिवैधसि १० ॥ ॥ मैत्रेयउवाच ॥ ॥ सप्रहस्यमहावा होभगवाञ्शब्दगोचरः ॥ प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरयागिरा ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ मानसामेसुतायुष्मत्पूर्वजाःसनकादयः ॥ चेरुर्विहायसालो कांल्लोकेषुविगतस्पृहाः १२ तएकदाभगवतोवैकुंठस्यामलात्मनः ॥ ययुर्वैकुंठनिलयंसर्वलोकनमस्कृतम् १३ वसंतियत्रपुरुषाःसर्वेवैकुंठमूर्त्तयः ॥ येऽनिमि त्तनिमित्तेनधर्मेणाराधयन्हरिम् १४ यत्रचाद्यःपुमानास्तेभगवाञ्शब्दगोचरः ॥ सत्त्वंविष्टभ्यविरजंस्वानांनोमृडयन्वृषः १५ यत्रनैःश्रेयसंनामवनंकामदुघैर्द्रु मैः ॥ सर्वर्त्तुश्रीभिर्विभ्राजत्कैवल्यमिवमूर्त्तिमत् १६ वैमानिकाःसललनाश्चरितानियत्रगायंतिलोकशमलक्षपणानिभर्त्तुः ॥ अंतर्जलेऽनुविकसन्मधुमाधवीनां गंधेनखंडितधियोप्यनिलंक्षिपंतः १७ पारावतान्यभृतसारसचक्रवाकदात्यूहहंससशुकतित्तिरिबर्हिणांयः ॥ कोलाहलोविरमतेऽचिरमात्रमुच्चैर्भृंगाधिपेहरिक थामिवगायमाने १८ मंदारकुंदकुरबोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः ॥ गंधेऽर्चितेतुलसिकाभरणेनतस्यायस्मिंस्तपःसुमनसोबहुमानयंति १९

चूर्णिका

८ ९ १० ॥ ॥ मैत्रेयउवाच ॥ ॥ तदाब्रह्माप्रहस्यदेवान्उवाच ११ ॥ ॥ हेदेवाः युष्मत्पूर्वजाः मेमानसाः सनकादयः पुत्राः निरिच्छाःसंतःलोकेषुचे रुः १२ एकदातेवैकुंठंययुः १३ यत्रपुरुषाःसर्वेवैकुंठमूर्तयः हरिंआराधयंति १४ यत्रभगवान्आस्ते १५ यत्रनैःश्रेयसंनामवनं १६ १७ १८ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनर्वैकुंठमेवविशिनष्टि तत्संकुलंव्याप्तंभवति कैः हरिपदयोरानतिःप्रणामस्तावन्मात्रेणदृष्टैर्भक्तानांविमानैर्नैकर्मादिप्राप्यैर्वैदूर्यमारकतैर्हैममयैश्चविमानैः बृहंति महांति कटितटानियासाम् स्मितशोभीनिमुखा नियासांताअपि कृष्णेआत्मायेषां तेषांपुंसां रजःकाममुत्स्मयाद्यैः परिहासादिभिर्नआदधुर्नजनयामासुः २० श्रीर्लक्ष्मीःरूपिणीमनोहरमूर्तिंधारिणीसतीश्रीहरेःसद्मनि (संमार्जतीलीलांबुजेनमार्जनीस्थानीयेन संमार्जनंकुर्वंतीवयस्मिन्लोकेसंलक्ष्यते चरणारविंदंक्वणयतीनूपुरेणशब्दयंती मुक्तोदोषश्चांचल्यंयया यद्वा मुक्तेनदोषाप्रसारितेनबाहुना कीदृशेसद्मनिस्फटिकमयानिकुड्यानियस्मिन् मध्येमध्येचशोभार्थं स्फटिकसंधिषुसंयोजनार्थंवा उपेतंसंयुक्तंहेमयस्मिन् यस्याअनुग्रहणेश्रीरनुग्रहंकरोत्वित्येतदर्थमन्येषांब्रह्मादीनांयत्नःसा अयंभावः यद्यपितत्ररजोनास्त्येवतथाऽपिस्वर्णपट्टिकाऽवच्छिन्न (-स्फटिकमय-) भित्तिभागेषुबहुधाप्रतिबिंबितासती (प्रसारितबाहुना) लीलांबुजंभ्रामयंतीविनयभक्तिभ्यांतथालक्ष्यतइति २१ अंगहेदेवाः यद्यस्मिंल्लोकेश्रीरेवंअमतश्रमंस्तमेने किंकुर्वती विद्रुममयानितटानियासाम् अमलाअमृततुल्यांआपोयासांतासुवापीषुनिजवनेलक्ष्मीवनेपरिचारिकाभिरन्वितातुलसीभिःश्रीविष्णुंपूजयंतीतदोदकेप्रतिबिंबितंशोभनालकयुक्तमुत्कृष्टनासिकायुक्तंचस्ववक्त्रंवीक्ष्यभगवताउच्छेषितंचुंबितमित्यमन्यत अनेनलक्ष्म्याअपिसौभाग्यसुखंभगवदनुग्रहेणैवेतिद्योतितम् (स्वमुखलावण्यंभगवत्कृतचुम्बनेनैवनान्यथेत्यमन्यतइत्यर्थः) २२ पुनःकथंभूतंतत् यद्वैकुंठंनव्रजंति के ये कुकथाः शृण्वंति कास्ताः अघंभिनत्तीत्यघभित्तस्यहरेःरचनासृष्ट्यादिलीलातस्याअनुवादादन्यविषया अर्थकामादिवार्ता रूपाः मतिभ्रंशिकाः वेषामव्रजनेहेतुः यास्तुहतभाग्यैर्नरैः श्रुताःसत्यस्तांस्तान्श्रोतॄनशरणेषुनिराश्रयेषुतमःसुनरकेषुक्षिपांत हंतखेदे कथंभूताः आत्तः (गृहीतः) सारःश्रोतॄणांपुण्यंयाभिस्ताः २३ प्रसंगात्तान्शोचंति नोऽस्माभिर्ब्रह्मादिभिरप्यभ्यर्थितां (प्रार्थितां) नृगतिमनुष्यजातिंप्रपन्नाःप्राप्ताःसंतोऽपिहरेराराधनंनकुर्वंति कीदृशींनृगतिम् यत्रयस्यांधर्मसहितंतत्त्वज्ञानंभवति तदुभयसाधकत्वात्तस्याः ते (नराः) अमुष्यभगवतोविस्मृतयामाययानुसंमोहिताः बतेतिखेदे यदिवैवंसंबंधः केवलंतएवनव्रजंतिकिंतुयेभगवदाराधनंनकुर्वंतितेऽपितेषांमायामोहितत्वादिति२४ पुनःकथंभूतम् यच्चनःउपरिस्थितंव्रजंति के अनिमिषांदेवानामृषभः श्रेष्ठोहरिस्तस्यानुवृत्त्या दूरेयमोयेषाम् यद्वा दूरीकृतयमनियमाः पाठांतरेदूरीकृताहंकाराइत्यर्थः स्पृहणीयंकरुणादिशीलंयेषाम् किंच भर्तुर्हरेर्यत्सुयशस्तस्यमिथःकथनेयोऽनुरागस्तेनवैक्लव्यंवैवश्यंतेन बाष्पकलातयासहपुलकीकृतमंगंयेषाम् यद्वा नःउपरीतिव्रजतांविशेषणम् निरहंकारत्वादस्मत्तोऽपियेऽधिकास्तेयद्व्रजंतीत्यर्थः २५

श्लोकाः २०/२५

तत्संकुलंहरिपदानतिमात्रदृष्टैर्वैदूर्यमारकतहेममयैर्विमानैः ॥ येषांबृहत्कटितटाःस्मितशोभिमुख्यःकृष्णात्मनांनरजआदधुरुत्स्मयाद्यैः २० श्रीरूपिणी
क्वणयतीचरणारविंदंलीलांबुजेनहरिसद्मनिमुक्तदोषा ॥ संलक्ष्यतेस्फटिककुड्यउपेतहेम्निसंमार्जतीवयदनुग्रहणेऽन्ययत्नः २१ वापीषुविद्रुमतटास्वमलामृ
ताप्सुप्रेष्यान्वितानिजवनेतुलसीभिरीशम् ॥ अभ्यर्चतीस्वलकमुन्नसमीक्ष्यवक्त्रमुच्छेषितंभगवतेत्यमतांऽगयच्छ्रीः २२ यन्नव्रजंत्यघभिदोरचनानुवादाच्छृण्वं
तियेऽन्यविषयाःकुकथामतिघ्नीः ॥ यास्तुश्रुताहतभगैर्नृभिरात्तसारास्तांस्तान्क्षिपंत्यशरणेषुतमस्सुहंत २३ येऽभ्यर्थितामपिचनोनृगतिंप्रपन्नाज्ञानंचतत्त्व
विषयंसहधर्मयत्र ॥ नाराधनंभगवतोवितरंत्यमुष्यसंमोहितावितत‍यावतमायया ते २४ यच्चव्रजंत्यनिमिषामृषभानुवृत्त्यादूरेयमाह्युपरिनःस्पृहणीयशीलाः ॥
भर्तुर्मिथःसुयशसःकथनानुरागवैक्लव्यबाष्पकलयापुलकीकृतांगाः २५

चूर्णिका

यत्रवैदूर्यमारकतहेममयैः अनेकविमानैः स्त्रीभिःसह देवाः पर्यटंति २० यत्रलक्ष्मीःभगवत्पदांबुजंलालयति २१ २२ यत्र अघभिष्ठाः नगच्छंति भक्ताएवव्रजंति २३ २४ तत्रयोगमायाबलेनसनकादयः गत्वावैकुंठं अवलोक्यपरांमुदंआपुः २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

तत्तदातदपूर्वंविकुंठंअथोअनंतरमुपेत्यमुनयःपरामुत्कृष्टांमुदमापुः अपूर्वत्वेहेतवः विश्वगुरुणाहरिणाधिकृतमधिष्ठितम् भुवनानामेकमेववंद्यम्दिव्यमलौकिकम् विचित्राणिविबुधाग्र्याणांविमानानितेषांशो चिर्दीप्तिर्यस्मिन् योगमायाबलेनेतिअष्टांगयोगप्रभावेणोपेत्य परमेश्वरेतुयोगमायेतिचिच्छक्तिविलासइतिद्रष्टव्यम् २६ तस्मिन्वैकुंठे षट्कक्षाःप्राकारद्वाराणि (अतीत्यअतिक्रम्य) असज्जमानाःभगवद्दर्शनो त्कंठयातत्तदद्भुतदर्शनआसक्तिमकुर्वाणाः (एवअथसप्तमायांकक्षायां) द्वारपालौदेवावपश्यन् समानंवयोययोः गृहीतेगदेयाभ्याम् परार्ध्यैःकेयूरादिभिर्विटंकःसुंदरोवेषोययोः २७ तावेववर्णयति मत्ताद्विरेफा (भ्रमराः) यस्यांतयावनमालयानिवीतौ (आपाद-) कंठलंबिन्या (मालया) अलंकृतौ (इत्यर्थःकथंभूतया) असितानीलाश्चतुष्टयंचतुःसंख्याकाबाहवस्तेषांमध्ये (वक्षसि) विन्यस्तया वक्रंचम नाग्रभसंकिंचित्क्षुब्धंदधानौ स्फुटावुत्फुल्लौनिर्गमौश्वासमार्गौनासापुटेताभ्याम् (मनाग्रभसम्) २८ एतयोर्मिषतोःपश्यतोस्तावनादृत्यापृष्ट्वैवयाःपूर्वाःषट्द्वारःपुरटालंकृतवज्रमय्यःकपाटिकायासुतायथाविवि शुस्तथासप्तमायामपिद्वारितेनिविविशुः अप्रश्नेहेतुः सर्वत्रयेअविहताअनिवारिताःसंचरंति निःशंकत्वेहेतुःअविषमयास्वदृष्ट्येति २९ वातरशनान्नग्नान्वृद्धानपिपंचवर्षबालकवत्प्रतीयमानान् (वेत्रेणयष्ट्या) चकारादाज्ञयाच अस्खलयतांनिवारितवंतौ नतत्स्खलनमर्हंतीतितथातान्अहोअत्रापिधाष्ट्यमित्येवंतेषांतेजोविहस्य भगवतोब्रह्मण्यदेवस्यप्रतिकूलंशीलंययोः ३० हरेर्द्वारपालपतिभ्यांदेवेषुपश्यत्सुवार्य माणास्तेमुनयःकोवामित्यादिश्लोकत्रयीमूचुः सुहृत्तमःश्रीहरिस्तस्यदिदृक्षितंदर्शनेच्छातस्यभंगेसतिकामस्यानुजःक्रोधस्तेनसहसाऽकस्मादेवोपप्लुतानिक्षुभितान्यक्षीणियेषांते सुष्ठुपूज्यतमाअपीतिनिषेधानर्ह त्वेक्रोधानर्हत्वेवाहेतुः ३१ उच्चैर्महत्याभगवत्परिचर्ययाएत्यप्राप्यइहवैकुंठेनिवसतांतद्धर्मिणांभगवद्धर्मिणांसमदर्शिनांमध्येवांयुवयोरेवकोऽयंविषमःस्वभावःकैश्चित्प्रवेष्टव्यंकैश्चिन्नेत्येवंभूतः ननुस्वामिनोरक्षार्थं द्वारपालयोरेषस्वभावोगुणएवेतिचेदतआहुः तस्मिन्निति कुहकयोःकपटयोःआत्मवत्स्वदृष्टांतेन यथाआवांकपटौतथान्योऽपिकश्चित्कपटःप्रवेक्ष्यतीति अयंभावः नह्यत्रभगवद्दत्तंविनाकश्चिदागच्छति नचे श्वरेप्रशांतत्वादविद्यमानविरोधेभयशंका अतोयुवांकेवलंधूर्तावेवेति ३२

॥६४॥

श्लोकाः २६–३२

तद्विश्वगुर्वधिकृतंभुवनैकवंद्यंदिव्यंविचित्रविबुधाग्र्यविमानशोचिः ॥ आपुःपरांमुदमपूर्वमुपेत्ययोगमायाबलेनमुनयस्तदथोविकुंठम् २६ तस्मिन्नतीत्यमु नयःषडसज्जमानाःकक्षाःसमानवयसावथसप्तमायाम् ॥ देवावचक्षतगृहीतगदौपरार्ध्यकेयूरकुंडलकिरीटविटंकवेषौ २७ मत्तद्विरेफवनमालिकयानिवी तौविन्यस्तयासितचतुष्टयबाहुमध्ये ॥ वक्रंभ्रुवाकुटिलयास्फुटनिर्गमाभ्यांरक्तेक्षणेनचमनाग्रभसंदधानौ २८ द्वार्येतयोर्निविविशुर्मिषतोरपृष्ट्वापूर्वायथापुरट वज्रकपाटिकायाः ॥ सर्वत्रतेऽविषमयामुनयःस्वदृष्ट्याविश्वंचरंत्यविहताविगताभिशंकाः २९ तान्वीक्ष्यवातरशनांश्चतुरःकुमारान्वृद्धान्दशार्धवयसोविदि तात्मतत्त्वान् ॥ वेत्रेणचास्खलयतामतदर्हणांस्तौतेजोविहस्यभगवत्प्रतिकूलशीलौ ३० ताभ्यांमिषत्स्वनिमिषेषुनिषिध्यमानाःस्वर्हत्तमाह्यपिहरेःप्रति हारपाभ्याम् ॥ ऊचुःसुहृत्तमदिदृक्षितभंगईषत्कामानुजेनसहसातउपप्लुताक्षाः ३१ ॥ ॥ मुनयऊचुः ॥ ॥ कोवामिहैत्यभगवत्परिचर्ययोच्चैस्तद्धर्मिणां निवसतांविषमःस्वभावः ॥ तस्मिन्प्रशांतपुरुषेगतविग्रहेवांकोवात्मवत्कुहकयोःपरिशंकनीयः ३२

चूर्णिका

२६ तस्मिन्षट्कक्षाः अतीत्यसप्तमे सगदौउत्कृष्टवेषौ जयविजयौअचक्षत तौचतुरःकुमारान् वातरशनान्वीक्ष्य वेत्रेणनिवारितवंतौ २७ २८ २९ ३० तदाहरेः द्वारपालाभ्यांनिषिध्यमानाः ईषत् क्रुद्धाःकुमाराः ऊचुः ३१ अहोइहवसतांकोवांअयंविषमस्वभावः ३२

१ ‘ अदर्हणा’ पाठान्तरम् । म० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

भयशंकाबीजंचभेदःसचकस्याप्यस्मिन्नास्तीत्याहुःनहीति समस्तंविश्वंकुक्षौयस्ययत्रयदेहभगवतिधीराविद्वांसआत्मनोंऽतरंभेदंनपश्यंतिकिंत्वस्मिन्परमात्मन्यात्मानमंतर्भूतंपश्यंतिमहाकाशेघटाकाशमिवतदाय थाऽन्यस्यराजादेरुदरभेद्युदरभेदयुक्तंभयंभवतितथाऽस्यश्रीहरेस्तादृग्भयंयतोयेनकारणेनसुरवेषधारिणोर्युवयोर्विशेषेणोत्पादितंतत्किम् नकिंचित्यर्थः (यद्वा उदरभेदीतिउद्गताअरादोषा यस्मात्तदुदरम् ब्रह्मत स्यभेददर्शननिमित्तंभयंव्युत्पादितंकिम्) ३३ तत्तस्मादमुष्यवैकुंठनाथस्यभृत्याभ्यांयुवाभ्यांप्रकृष्टभद्रमेवकर्तुमिहास्मिन्नपराधेयद्युक्तंतद्धीमहिचिंतयेम तदेवाहुः अंतरस्यभेदस्यभावः सत्तातद्दर्शनेन इतोवैकुंठलो काद्व्रजतम् यत्रयेषुलोकेष्वस्यपापीयसोंऽतरभावद्रष्टुरिमे 'कामःक्रोधस्तथालोभ' इतिगीतोक्तास्त्रयोरिपवोभवंति इतोवैकुंठात्पापीयसोलोकानितिवा ३४ इतितेषामीरितंभाषणंघोरमवधार्यतंचब्रह्मदंडंब्रह्मशापमव धार्यतंचास्त्रसमूहैरप्यनिवार्यमवधार्यहरेरनुचरावतिकातरणादीकातर्येणभयेनतत्पादग्रहणंकुर्वंतौसंतौदंडवदपतताम् कथंभूतस्यहरेः एवंभूतेभ्योमुनिभ्यस्ताभ्यामप्युरुअधिकंबिभ्यतोभयंभावयतः ३५ अहोअपरा

॥६५॥ द्धमस्माभिरित्यनुतप्यमानान्प्रत्यूचतुः अघोन्यघवतियउचितोदंडःसएवभगवद्भिरकारि नात्रभवतामपराधःकश्चित् अतोऽसौनौआवयोर्भूयात् योऽशेषमपिसुरहेलनमीश्वराज्ञाऽतिक्रमरूपंपापंहरेत् किंतुयुष्माकं यःकृपानिमित्तोऽनुतापस्तस्यलेशेननौअधोऽधोमूढयोनीर्व्रजतोरपिभगवत्स्मृतिप्रतिघातकोमोहोमाभवेत् किंतु मोहोपिस्मृतिमेव प्रवहतादितिप्रार्थना ३६ एवंस्वानांमहत्स्वतिक्रममपराधंतत्क्षणमेवविबुध्यतस्मि न्यत्रतेरुद्धास्तंदेशंययौआर्याणांहृद्योमनोज्ञः चरणौचलयन्निति अयंभावः मच्चरणदर्शनप्रतिघातजंक्रोधंतौदर्शयन्शमयिष्यामीतित्वराव्याजेनपद्भ्यामेवययौ श्रीसाहित्यंचनिष्कामानामपिविभूतिभिःपूरयित्वाक्षमा पयितुम् ३७ तत्रतैर्दृष्टंदेवमनुवर्णयंतिपंचभिः तंत्वागतंतेऽचक्षतअपश्यन् आपंचमादिदमेवक्रियापदम् स्वपुंभिःशीघ्रंप्रतिहृतमानीतमौपायिकंगमनोचितंछत्रपादुकादियस्य कथंभूतम् स्वसमाधिनाभाग्यंभजनीयं फलंयद्ब्रह्मतदेवाक्षविषयम् (इन्द्रियगोचरम्) हंसवच्छ्रीर्ययोस्तयोरुभयतश्चलतोर्व्यजनयोर्यःशिवोऽनुकूलोवायुस्तेनलोलंतश्चलंतः शुभ्रातपत्रशशिकेसराः शुभ्रंयदातपत्रंतदेवशशिसादृश्याच्छशीतस्यकेसरा मुक्ताहारविलंबास्तेभ्यो गलंतिसीकरांबूनियस्मिंस्तम् सीकरोंऽबुकणः ३८

नह्यंतरंभगवतीहसमस्तकुक्षावात्मानमात्मनिनभोनभसीवधीराः ॥ पश्यंतियत्रयुवयोःसुरलिंगिनोःकिंव्युत्पादितंह्युदरभेदिभयंयतोऽस्य ३३ तद्वाममुष्य श्लोकाः
परमस्यविकुंठभर्तुःकर्तुंप्रकृष्टमिहधीमहिमंदधीभ्याम् ॥ लोकानितोव्रजतमंतरभावदृष्ट्यापापीयसस्त्रयइमेरिपवोऽस्ययत्र ३४ तेषामितीरितमुभाववधार्य
घोरंतंब्रह्मदंडमनिवारणमस्त्रपूगैः ॥ सद्योहरेरनुचरावुरुबिभ्यतस्तत्पादग्रहावपततामतिकातरेण ३५भूयादघोनिभगवद्भिरकारिदंडोयोनौहरेतसुरहेलनमप्य ३३/३८
शेषम् ॥ मावोऽनुतापकलयाभगवत्स्मृतिघ्नोमोहोभवेदिहतुनौव्रजतोरधोधः ३६ एवंतदैवभगवानरविंदनाभःस्वानांविबुध्यसदतिक्रममार्यहृद्यः ॥ तस्मि
न्ययौपरमहंसमहामुनीनामन्वेषणीयचरणौचलयन्सहश्रीः ३७ तंत्वागतंप्रतिहृतौपयिकंस्वपुंभिस्तेऽचक्षताऽक्षविषयंस्वसमाधिभाग्यम् ॥ हंसश्रियोर्व्य
जनयोःशिववायुलोलच्छुभ्रातपत्रशशिकेसरशीकरांबुम् ३८

चूर्णिका इहअनंतवसतौयुवाभ्यामेवभेदः उत्पादितःअतः ३३ इहवस्तुंनार्हौअतः इमेकामक्रोधलोभाः यत्रसंति तंलोकंगच्छतं ३४ इतिउभौतौअनिवारंब्रह्मशापंश्रुत्वाहरेः अनुच ॥६५॥
रावपि उरुबिभ्यतः तेषांपादग्रहणंकुर्वंतौदंडवत् अपतताम्ऊचतुश्च ३५ नौभवद्भिः दंडः कृतः सः अधः व्रजतोः नौभगवत्स्मृतिघ्नः माभूत् ३६ एवंतदैवभगवान्स्वा
नांसदतिक्रमंज्ञात्वाश्रियासहतत्रययौ ३७ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कृत्स्नस्यद्वारपालमुनिवृंदस्यप्रसादेसुमुखम् स्पृहणीयानांगुणानांधामस्थानम् स्नेहावलोककलयासप्रेमकटाक्षेणहृदिसंस्पृशंतंसुखयंतम् त्रैलोक्यविवक्षापक्षेसत्यलोकपर्यंतःस्वर्गस्तस्यचूडामणिवत्स्थितंस्वधिष्ण्यंवैकुंठंसुभगयंतंशोभयंतम् ३९ पृथुर्नितंबआश्रयत्वेनविद्यतेयस्यतास्मिन्पीतांशुके (पीतांबरे) आलिभिः (भ्रमरै-)र्नादितयावनमालयाचयुक्तम् सुभगयंतमितिपूर्वेणैववासंबंधः वल्गुषुप्रकोष्ठेषुवलयानियस्य गरुडस्यस्कंधेविन्यस्तएकोहस्तोयेन इतरेणान्येनाब्जंलीलाकमलंधुनानंभ्रामयंतम् विन्यस्येतिपाठेचवल्गिवत्यादिहस्तस्यविशेषणम् ४० स्वकांत्याविद्युतः क्षिपतीयेमकराकारेकुंडलेतयोर्मंडनस्या (-लंकरणस्या-) र्हे (योग्ये) गंडस्थलेयस्मिंस्तच्चतदुन्नसंचमुखंयस्य मणियुक्तंकिरीटंयस्य दोर्दंडानांखंडंसमूहस्तस्यविवरेमध्येस्थितेनहरतामनोहरेणाविहरतेतिवा परार्ध्यउत्कृष्टस्तेनहारेण कंधरायांस्थितेन (कौस्तुभेनचयुक्तम्) ४१ किंबहुना इंदिरायाउत्स्मितमहमेवसर्वसौंदर्यनिधिरित्यहंकरणमत्रभगवत्सौंदर्येउपसृष्टमस्तंगतमितिस्वानांभक्तानांधियाविरचितम् भृत्यैःस्वमनस्येवंवितर्कितमित्यर्थः कुतः बहुसौष्ठवेनसौंदर्येणाऽऽढ्यंयुक्तम् किंच मह्यंममभवस्येश्वरस्यभवतांचकृतेऽगंभजंतंमूर्तिमकटयंतमचक्षत निरीक्ष्यचकैःशिरोभिर्मुदानेमुर्नमश्चक्रुः नविशेषेणतृप्ताहशोनेत्राणियेषांते ४२ स्वरूपानंदादर्पितेषांभजनानंदाधिक्यमाह तस्य (कमलनयनस्य) पदारविंदयोःकिंजल्कैःकेसरैर्मिश्रायातुलसीतस्यामकरंदेनयुक्तोवायुः स्वविवरेणनासाछिद्रेणअक्षरजुषांब्रह्मानंदसेविनामपि संक्षोभंचित्तेऽतिहर्षंतनौरोमांचम् ४३ हर्षकारितंसंभ्रममाह द्वाभ्याम् तेवैकिलामुष्यवदनमेवासितपद्मस्यकोशोंतर्भागस्तम् असितपद्मकोशमित्यभूतोपमा सुंदरतरेअरुणेअधरोष्ठेकुंदवद्धासोयस्मिंस्तम् उत्ऊर्ध्ववीक्ष्यलब्धमनोरथाः संतोनखाएवारुणमणयस्तेषांश्रयणमाश्रयभूतमंघ्रिद्वंद्वंपुनरवेक्ष्याधोदृष्ट्यावीक्ष्यपुनःपुनरेवंनिरीक्ष्ययुगपत्सर्वांगलावण्यग्रहणाशक्तेः पश्चान्निदध्युर्ध्यातवंतः ४४ योगमार्गैर्गतिं (आत्मतत्त्वम्) मृगयतांपुंसांध्यानस्य (चित्तैकाग्र्यस्य) विषयभूतम् बहुमतमत्यादरास्पदम् बहूनांतत्त्वदृशांसंमतमितिवा (नयनान्यभिरमतीतितथातत्) पौंस्नंपौरुषंवपु- (र्दर्शयानं) दर्शयंतम् अन्येष्वसिद्धैरसाधारणैरौत्पत्तिकैर्नित्यैरणिमाद्यष्टैश्वर्यैर्युतम् समगृणन्सम्यगस्तुवन् ४५ नित्यंब्रह्मरूपेणप्रकाशसेनतच्चित्रम् इदानींतुपरममंगलविशुद्धसत्त्वश्रीमूर्त्याप्रत्यक्षोऽसि अहोभाग्यमस्माकमित्याहुः हेअनंतयस्त्वंहृद्गतोऽपिदुरात्मनामंतर्हितोनस्फुरसिसनोऽस्माकमंतर्हितोनभवसि नयनमूलंत्वचैवराद्धः प्राप्तोऽसि अंतर्धानाभावेहेतुः भवतःसकाशादुद्भवोयस्यतेनास्मत्पित्रायर्हियदैवानुवर्णितरहाउपादिष्टरहस्यस्तदैवनःकर्णमार्गेणगुहांबुद्धिंगतःप्राप्तोऽसीति ४६

श्लोकाः ३९ ४६

कृत्स्नप्रसादसुमुखंस्पृहणीयधामस्नेहावलोककलयाहृदिसंस्पृशंतम् ॥ श्यामेपृथावुरसिशोभितयाश्रियास्वश्चूडामणिंसुभगयंतमिवात्मधिष्ण्यम् ३९ पीतांशुकेपृथुनितंबिनिविस्फुरंत्याकांच्यालिभिर्विरुतयावनमालयाच ॥ वल्गुप्रकोष्ठवलयंविनतासुतांसेविन्यस्तहस्तमितरेणधुनानमब्जम् ४० विद्युत्क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखंमणिमत्किरीटम् ॥ दोर्दंडखंडविवरेहरतापरार्ध्यहारेणकंधरगतेनचकौस्तुभेन ४१ अत्रोपसृष्टमितिचोत्स्मितमिंदिरायाः स्वानांधियाविरचितंबहुसौष्ठवाढ्यम् ॥ मह्यंभवस्यभवतांचभजंतमंगंनेमुर्निरीक्ष्यनवितृप्तदृशोमुदाकैः ४२ तस्यारविंदनयनस्यपदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः ॥ अंतर्गतःस्वविवरेणचकारतेषांसंक्षोभमक्षरजुषामपिचित्ततन्वोः ४३ तेवाअमुष्यवदनासितपद्मकोशमुद्वीक्ष्यसुंदरतराधरकुंदहासम् ॥ लब्धाशिषःपुनरवेक्ष्यतदीयमंघ्रिद्वंद्वंनखारुणमणिश्रयणंनिदध्युः ४४ पुंसांगतिंमृगयतामिहयोगमार्गैर्ध्यानास्पदंबहुमतंनयनाभिरामम् ॥ पौंस्नंवपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैःसमगृणन्युतमष्टभोगैः ४५ ॥ ॥ कुमाराऊचुः ॥ ॥ योंऽतर्हितोहृदिगतोऽपिदुरात्मनांत्वंसोऽद्यैवनोनयनमूलमनंतराद्धः ॥ यर्ह्येवकर्णविवरेणगुहांगतोनःपित्राऽनुवर्णितरहाभवदुद्भवेन ४६

चूर्णिका सर्वैश्वर्ययुक्तंहरिंदृष्ट्वाकुमाराऊचुः ३९ ४० ४१ ४२ ४३ ४४ ४५ हेभगवन् भवदुद्भवेननः पित्रापूर्वंत्वंवर्णितः तथापिसः त्वंनयनैः अद्यदृष्टः ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुपित्रोपदिष्टंभवतामन्यादृशमदृश्यमात्मतत्त्वमहंत्वन्यएवस्यांदृश्यत्वात् नैवम् अस्मत्प्रत्यभिज्ञयाभेदनिरासादित्याहुःतमिति हेभगवन्नात्मतत्त्वमेवपरंतंत्वांविदामविज्ञःप्रत्यभिजानीमः (यदात्मतत्त्वं तदेव ब्रह्म तदेव त्वमितिजानीमहे) ननुनिरुपाधेरात्मतत्त्वस्यकथमीदृशमैश्वर्यंस्यादतआहुः सत्त्वेनविशुद्धसत्त्वमूर्त्या एषांभक्तानांसम्यक्प्रतिक्षणंसंप्रतिरातिःप्रीतिस्तांरचयंतम् आत्मतत्त्वमेवाहुः तेऽनुतापःकृपातेनाविदितैर्ज्ञातैर्दृढैर्भक्तियोगैः श्रवणादिभिर्मुनयो (मननशीलाः) हृदियद्विदुः कीदृशाः उद्ग्रंथयोनिरहंमानाअतएवविगतरागाः ४७ स्वयमपिभक्तिंप्रार्थयितुंभक्तानांसुखातिशयमाहुः आत्यंतिकंमोक्षाख्यमपितवप्रसादंतेनगणयंतिनाद्रियंते किंतु किमुतान्यदिंद्रादिपदम् तेभ्रुवउन्नयैरुज्जृंभैः (कालात्मकैः) रर्पितंनिहितंभयंयस्मिंस्तत् (येषांमोक्षेप्यादराभावस्तेषांविषयेष्वनादरइतिकिमुवक्तव्यमित्यर्थः) तेकेअंगहेभगवन् येभवतःकथायारसज्ञाः कथंभूतस्य रमणीयत्वेनपावनत्वेनचकीर्तन्यंकीर्तनार्हंतीर्थंपवित्रंचयशोयस्य ४८ इदानींस्वीयापराधंद्योतयंतोभक्तिंप्रार्थयंते काममिति हेभगवन्नितःपूर्वमस्माकंवृजिनंनाभवत् इदानींसर्वाण्यपिजातानि यत्रस्त्वद्भक्तौशप्तौ अतस्तैःस्ववृजिनैर्निरयेषुकामंनोऽस्माकंभवोजन्मस्तात्स्यात् नुवितर्के यदितुनश्चेतस्तेपदयोरमेत (कथमलिवत्) अलिर्यथाकंटकैराविध्यमानोऽपिपुष्पेषुरमतेतद्वद्विघ्नानविगणय्ययदिरमेत अंघ्रिभ्यांशोभायासाम् यथाचतुलसीगुणनैरपेक्ष्येणत्वदंघ्रिसंबंधेनैवशोभते तथायदिमोवाचःशोभेरन् यदिचतेगुणगणैरापूर्येतकर्णरंध्रइत्यल्पस्यपूरणमेवयाचकरीत्याप्रार्थयंते अयंतुगूढोऽभिप्रायः कर्णरंध्रस्याकाशत्वाद्गुणगणानांचामूर्त्तत्वान्नकदाचित्पूरणमतोनित्यमेवश्रवणंफलिष्यतीति ४९ अद्यवयंकृतार्थाःस्मेत्याहुः हेपुरुहूतविपुलकीर्ते यदिदंप्रादुश्चकर्थप्रकटितवानसि दृशोनेत्राणि अनात्मनामजितेंद्रियाणांदुरुदयोऽप्रकटोऽपिइतइत्थंयःप्रतीतोसि तस्मैतुभ्यमिदंनमोविधेम ५० ॥ ॥ इतितृतीयस्कंधेटीकायांपंचदशोऽध्यायः १५ ॥ ॥ ७ ॥ ॥ हरिणासांत्वितैर्विप्रैरनुतप्तैस्तुषोडशे ॥ तयोरसुरभावेऽपिकृतोऽनुग्रहईर्यते १ इतिगृणतांतेषांतद्वाक्यंप्रतिनंद्येदंजगादएतावित्येकादशभिः (श्रीभगवान् योगोभक्तियोगएवधर्मो येषामस्तीतियोगधर्मिणः) १ यद्यस्मान्मांकदर्थीकृत्य तुच्छीकृत्य बहुयथाभवतितथाअतिक्रमंवः कृतवंतौ २ तस्मात्सएवदंडोऽगीकृतः ३

श्लोकाः ४७/३

तंत्वाविदामभगवन्परमात्मतत्त्वंसत्त्वेनसंप्रतिरतिंरचयंतमेषाम् ॥ यत्तेऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयोहृदिविदुर्मुनयोवीतरागाः ४७ नात्यंतिकंविगणयंत्यपितेप्रसादंकिंत्वन्यदर्पितभयंभ्रुवउन्नयैस्ते ॥ येंऽगत्वदंघ्रिशरणाभवतःकथायाःकीर्त्तन्यतीर्थयशसःकुशलारसज्ञाः ४८ कामंभवःस्ववृजिनैर्निरयेषुनःस्ताच्चेतोऽलिवद्यदिनुतेपदयोरमेत ॥ वाचश्चनस्तुलसिवद्यदितेंऽघ्रिशोभाःपूर्येततेगुणगणैर्यदिकर्णरंध्रः ४९ प्रादुश्चकर्थयदिदंपुरुहूतरूपंतेनेशनिर्वृतिमवापुरलंदृशोनः ॥ तस्माइदंभगवतेनमइद्विधेमयोऽनात्मनांदुरुदयोभगवान्प्रतीतः ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेपंचदशोऽध्यायः १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतितद्गृणतांतेषांमुनीनांयोगधर्मिणाम् ॥ प्रतिनंद्यजगादेदंविकुंठनिलयोविभुः १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एतौतौपार्षदौमह्यंजयोविजयएवच ॥ कदर्थीकृत्यमांयद्वोबह्वक्रातामतिक्रमम् २ यस्त्वेतयोर्धृतोदंडोभवद्भिर्मामनुव्रतैः ॥ सएवानुमतोऽस्माभिर्मुनयोदेवहेलनात् ३

चूर्णिका तंत्वापरमात्मानंविदाम ४७ अद्यवयंकृतार्थाःतुभ्यंनमःविधेम ४८ ४९ ५० ॥ ॥ इतितृतीयेपंचदशः १५ ॥ ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ इतिगृणतांमुनीनांवचः प्रतिनंद्यविभुः जगाद १ ॥ ॥ श्रीभगवानुवाच ॥ एतौजयविजयौमत्पार्षदौमांतुच्छीकृत्यवः अतिक्रमंकृतवंतौ २ भवद्भिः एतयोः योदंडःकृतः सएवअस्माभिः अनुमतः ३

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका

हियस्माद्ब्रह्मब्राह्मणाएवमेपरमंदैवंदैवतंतत्तस्मादद्यवःप्रसादयामि तवकोऽपराधइतिचेत्तत्राह तद्धीति मदीयैःपुंभिरसत्कृतास्तिरस्कृताइतियत्तदात्मकृतमेवमन्ये ४ किंच ममैवैताभ्यामनिष्टंकृतमित्याह यस्यस्वामिनोनामानि (गृह्णातिअमुकस्यभृत्येनावज्ञंकृतमिति) तस्यकीर्तिम् आमयोऽत्रश्वेतकुष्ठम् ५ यस्यमेऽमृतरूपेऽमलेयशसिश्रवणेनावगाहः प्रवेशः श्वपचमभिव्याप्यजगत्सद्यस्तत्क्षणमेवपुनातिसोऽहंविकुंठो (विष्णुः) भवद्भ्योहेतुभूतेभ्यउपलब्धाप्राप्तासुशोभनातीर्थभूता (जगत्पावनी) कीर्तिर्येनसः स्वबाहुस्थानीयंलोकेश्वरमपिहन्यांकाऽन्यस्यकथेत्यर्थः स्वगुणावनुवर्णनंतुब्राह्मणोत्कर्षार्थमेव ६ चरणपद्मयोः स्थितः पवित्रोरेणुर्यस्य अतएवक्षतोनिरस्तोऽखिलस्यलोकस्य मलोयेन यद्वा चरणपद्माल्लग्नः पवित्रोरेणुर्यस्मिंन्निति क्षतोऽखिलोमलोयस्येतिचविग्रहः प्रतिलब्धंप्राप्तंशीलंयेन येषांसेवयाएतेगुणाममअतएवश्रीर्मांनविजहाति प्रेक्षालवार्थेऽवलोकनलेशार्थम् इतरेब्रह्मादयः तेषांवः प्रतिकूलवृत्तिंछिंद्यामितिपूर्वेणैवसंबंधः ७ किंच ब्राह्मणोममैवश्रेष्ठंमुखमतोयुष्मदवज्ञयामन्मुखतिरस्कारएवकृतइत्याह नाहमिति वितानेयज्ञे यजमानस्यहविश्चरुपुरोडाशादिहुतभुगग्निस्तेनमुखेनादन्नश्नन्नपि तथानाद्मिनाश्नामियद्यथाश्च्योततक्षरताघृतेनप्लुतंविलोडितंपायसादिप्रतिग्रासंरसास्वादपूर्वकंचरतोभुंजानस्यज्ञानिनोब्राह्मणस्यमुखतोऽश्नामिमयिसमर्पितैः कर्मफलैस्तुष्टस्यनिष्कामस्येत्यर्थः ८ किंच येषाममलमंघ्रिरजोऽहंकिरीटैर्बिभर्मितान्विप्रानपकुर्वतोऽपिकोऽन्योनविषहेत कथंभूतोऽहम् अखंडाऽनवच्छिन्नाविकुंठाऽप्रतिहताचयोगमायाविलासभूताविभूतिर्यस्यसः तथा यस्यममार्हणांभःपादोदकंचंद्रललामेनेश्वरेणसहिताल्लोकान्सद्यः पुनाति एवंपरमेश्वरःपरमपावनोऽपिसन्नहंबिभर्मीति ९ किंच मेतनूरधिष्ठानानि कास्ताः द्विजवरान्दुहतीर्दोग्ध्रीः गाइत्यर्थः दुहितॄरितिपाठेपिगाएव विष्णुरूपात्सुर्याद्गुत्पन्नत्वात् सुर्यसूताश्चगाव इतिवचनात् अलब्धशरणानिरक्षकहीनानिभेदबुद्ध्यामदधिष्ठानंनभवंतीतिपृथग्दृष्ट्यायेद्रक्ष्यंति अघेनक्षतानष्टादृष्टिर्येषांतान् मदीयोऽधिकृतोदंडनेतायोयमस्तस्यगृध्राकारायेदूताः अहिवत् (सर्पवत्) मन्युर्येषाम् रुषाक्रोधेनकुषंतिचंचुभिश्छिंदंति १० एवंभूतास्तुमांवशीकुर्वंतीत्याह येक्षिपतः परुषंभाषमाणानपिब्राह्मणान्संबोधयंति (किं कुर्वंतः) मयियाधीस्तयावासुदेवदृष्ट्याऽर्चयंतःसंतः तुष्यद्धृदःप्रीयमाणचित्ताः स्मितमेवसुधातयोक्षितंसिक्तंपद्मतुल्यंवक्त्रंयेषां अनुरागकलया (अनुरागेणकलाशोभायस्यांतया) प्रेमशोभया (प्रेमबद्धयेतिवा ' कल्बन्धने ' इत्यिस्मातोः वाण्या) वाचागृणंतःस्तुवंतः (आत्मजवत्) यथाकुपितमात्मजंस्निग्धः पितासःपुत्रोवापितरम् अहमिवभृगुंयुष्मान्वा तैरहमुपाहृतोवशीकृतः ११

॥६८॥

तद्वःप्रसादयाम्यद्यब्रह्मदैवंपरंहिमे ॥ तद्धीत्यात्मकृतंमन्येयत्स्वपुंभिरसत्कृताः४यन्नामानिचगृह्णातिलोकोभृत्येकृतागसि ॥ सोऽसाधुवादस्तत्कीर्तिंहंतित्वचमिवामयः ५ यस्यामृतामलयशःश्रवणावगाहःसद्यःपुनातिजगदाश्वपचाद्विकुंठः ॥ सोऽहंभवद्भ्यउपलब्धसुतीर्थकीर्तिश्छिंद्यांस्वबाहुमपिवःप्रतिकूलवृत्तिम् ६ यत्सेवयाचरणपद्मपवित्ररेणुंसद्यःक्षताखिलमलंप्रतिलब्धशीलम् ॥ नश्रीर्विरक्तमपिमांविजहातियस्याःप्रेक्षालवार्थइतरेनियमान्वहंति ७ नाहंतथाऽद्मियजमानहविर्वितानेश्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन ॥ यद्ब्राह्मणस्यमुखतश्चरतोऽनुघासंतुष्टस्यमय्यवहितैर्निजकर्मपाकैः ८ एषांबिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजःकिरीटैः ॥ विप्रांस्तुकोनविषहेतयदर्हणांभःसद्यःपुनातिसहचंद्रललामलोकान् ९ येमेतनूर्द्विजवरान्दुहतीर्मदीयाभूतान्यलब्धशरणानिचभेदबुद्ध्या ॥ द्रक्ष्यन्त्यघक्षतदृशोह्यहिमन्यवस्तान्गृध्रारुषाममकुषंत्यधिदंडनेतुः १० येब्राह्मणान्मयिधियाक्षिपतोऽर्चयंतस्तुष्यद्धृदःस्मितसुधोक्षितपद्मवक्त्राः ॥ वाण्यानुरागकलयात्मजवद्गृणंतःसंबोधयंत्यहमिवाहमुपाहृतस्तैः ११

श्लोकाः ४ / ११

॥६८॥

चूर्णिका

कुतःमेब्राह्मणाःपरंदैवतं अतः वः प्रसादयामि दूतैः यः कृतः अपराधः सः मयैवकृतइतिमन्ये ४ वःप्रतिकूलवृत्तिंस्वबाहुमपिछिंद्यां ५ ६ किंचब्राह्मणसेवयापवित्रंमांश्रीःनजहाति ७ अहंयज्ञेअग्निमुखेनतथानअद्मि यथाब्राह्मणमुखेन ८ येब्राह्मणान्मद्बुद्ध्याअर्चयंतितैःअहंवशीकृतः ९ १० ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्तस्मान्मेऽवसायमभिप्रायमलक्षमाणावजानंतौयुष्मदपराधोचितांगतिंसद्यःप्राप्यमत्समीपइतांप्राप्तुताम् तदितिसमेऽनुग्रहः तमेवाह यत्भृतयोर्विवासोऽचिरतःशीघ्रंकल्पतांसंपद्यतांसमाप्यतामिति १२ उशतींकमनीयांप्रियांदेवींद्योतमानामृषिकुल्यांऋषयोमंत्रास्तत्प्रवाहरूपामृषिकुलयोग्यामितिवा सरस्वतींवाचमास्वाद्यतन्माधुर्यमनुभूयसर्पप्रायेणमन्युनादष्टानामपि क्रोधविषव्याप्तानांहिमनः प्रियभाषणमपि रसानुभवाभावात् नसहते तेषांत्वात्मामनोनातृप्यदलमितिनामन्यत (किंतुसरसतयातत्रसोत्कंठमेवासीत्) १३ सतींश्रेष्ठां (सरस्वतीं) व्यादायप्रसार्यकर्णंदत्त्वेत्यर्थः लघ्वींमिताक्षरां गुरुभिरर्थैर्गह्वरांदुष्प्रवेशां अगाधामभिप्रायतः गंभीरामर्थतः (बाहुल्यतः) विगाह्यविचार्यापिकिमस्मानाभिनंदति निंदति वाऽस्मत्कृतंदंडंवासंकोचयतीतिनविदुः १४ ततश्चाभिनंदतीतिज्ञात्वातिप्रहृष्टाःसंतःप्रोचुः क्षुभितारोमांचितात्वक्येषां कुपितेतिपाठेसंजातरोमकूपोत्त्यारोमांचितत्वमेवोक्तंआरब्धआविष्कृतःपारमेष्ठ्यस्यपरमैश्वर्यस्यमहोदयःपरमोत्कर्षोयेनतम् अधिराजत्वमाविष्कृत्यराजाशिक्षार्थंब्राह्मणान्मानयतीतिज्ञात्वा (तंप्रोचुरि) त्यर्थः १५ अध्यक्षःसर्वेश्वरःसंस्तद्वीत्यात्मकृतंमन्यइत्युक्त्यामयापराधःकृतइतितथातदनुग्रहोमेइत्यादिवचनेनममानुग्रहश्चेतियत्प्रभाषसेतेनतवयच्चिकीर्षितंतन्नविद्मः १६ (हेप्रभोब्रह्मण्यस्यतवब्राह्मणाःपरमंदैवतम्) किलेतिलोकशिक्षार्थंसूचितंपरमार्थमाहुः विप्राणामिति देवदेवानांदेवपूज्यानामपिभगवांस्त्वमात्माचदैवतंच १७ लोकशिक्षार्थतांप्रपंचस्त्वत्तइत्यष्टभिः धर्मस्त्वत्तएवभवतिरक्ष्यतेचत्वदवतारैः (धर्मस्य) परमःफलरूपोऽतएवगुह्योगोप्यः नचस्वर्गादिफलवद्विकारीभवान्किंतुनिर्विकारोमतः अतएवंभूतस्यतवेदंलोकशिक्षामात्रमितिभावः १८ विपरीतंचेदमित्याहुः तरंतीति यस्यानुग्रहादेवनिवृत्ताविरक्तायोगिनश्चसंतोमृत्युंतरंतिसभवान्परैरनुगृह्येतेतिकिंस्वित् नकिंचिदित्यर्थः १९ यच्चोक्तं " यत्सेवयाचरणपद्मपवित्ररेणुंसद्यःक्षताखिलमलंप्रतिलब्धशीलं " इत्यादितदत्यंतमसंभावितमित्याहुर्द्वाभ्याम् यंवैविभूतिर्लक्ष्मीरनुवेलमवसरेऽवसरेउपयातिसेवते धृतःपादरेणुर्यस्याः धन्यैःसकृतिभिरर्पितमंघ्रौयत्तुलस्यानवंदाममालातद्धामस्थानंयस्यतस्य मधुव्रतपतेर्भ्रमरमुख्यस्यलोकंस्थानमंघ्रिंकामयमानेव २०

श्लोकाः १२/२०

तन्मेस्वभर्तुरवसायमलक्षमाणौयुष्मद्व्यतिक्रमगतिंप्रतिपद्यसद्यः ॥ भूयोममांतिकमितांतदनुग्रहोमेयत्कल्पतामचिरतोभृतयोर्विवासः १२ ॥ ब्रह्मोवाच ॥
अथतस्योशतींदेवीमृषिकुल्यांसरस्वतीम् ॥ नास्वाद्यमन्युदष्टानांतेषामात्माप्यतृप्यत १३ सतींव्यादायशृण्वंतोलघ्वींगुर्वर्थगह्वराम् ॥ विगाह्यागाधगंभीरांनविदुस्तच्चिकीर्षितम् १४ तेयोगमाययारब्धपारमेष्ठ्यमहोदयम् ॥ प्रोचुःप्रांजलयोविप्राःप्रहृष्टाःक्षुभितत्वचः १५ ॥ ॥ ऋषयऊचुः ॥ ॥ नवयंभगवन्विद्मस्तवदेवचिकीर्षितम् ॥ कृतोमेऽनुग्रहश्चेतियदध्यक्षःप्रभाषसे १६ ब्रह्मण्यस्यपरंदैवंब्राह्मणाःकिलतेप्रभो ॥ विप्राणांदेवदेवानांभगवानात्मदैवतम् १७
त्वत्तःसनातनोधर्मोरक्ष्यतेतनुभिस्तव ॥ धर्मस्यपरमोगुह्योनिर्विकारोभवान्मतः १८ तरंतिह्यंजसामृत्युंनिवृत्तायदनुग्रहात् ॥ योगिनःसभवान्किंस्विदनुगृह्येतयत्परैः १९ यंवैविभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिःस्वशिरसाधृतपादरेणुः ॥ धन्यार्पितांघ्रितुलसीनवदामधाम्नोलोकंमधुव्रतपतेरिवकामयाना २०

चूर्णिका

इमौममाभिप्रायं अजानंतौयुष्मदपराधंकृतवंतौइमौपुनः अल्पकालेनैवममांतिकंयातंएवंअनुग्रहःकर्तव्यः १२ ॥ ॥ ब्रह्मोवाच ॥ ॥ अथभगवद्वाक्यंश्रुत्वाप्रांजलयः कुमाराःऊचुः १३ १४ १५ हेभगवन्तवचिकीर्षितंवयंनविद्मः सर्वेश्वरस्त्वंमयिअनुग्रहः क्रियतामितिभाषसे १६ किंच विप्राणांदेवानांचआत्मदैवतंत्वमेव तेब्राह्मणाः परंदैवतंमेइतिवदसि अस्तु १७ अहोधर्मःतेअवतारैःरक्ष्यते १८ तवानुग्रहाद्योगिनःअंजसामृत्युंतरंति तस्मैतुभ्यंनमः १९ २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विविक्तचरितैर्विशुद्धैःपरिचरणैरनुवर्तमानांसेवमानामपियोनात्याद्रियन्नातीवाहतवान् सएवंभूतस्त्वम् अयंभावः इत्थंनामातिलंपटतयालक्ष्मीस्त्वांसेवते कथम् एवंहि सामेने अयंहिसारग्राहीमधुव्रतश्चचंलश्चस चांघ्रिगतायांतुलस्यांसपरिवारोनिश्चलःसन्रमतेऽतोंघ्रिलावण्यमत्यधिकंस्यात्ततोऽहंवक्षसिस्थितापि (चरणरत-) योगिजनादिबहुसेवकसंघर्षमंगीकृत्यापितुलस्यासहसापत्न्येनापिचरणौसेविष्यामीतितदे वमत्यौत्सुक्येनानुवर्तमानामपितांत्वंनातीवाद्रियसे यतःपरमभागवतेष्वेवप्रकृष्टसंगवान् सएवंपरमसौभाग्यनिधिस्त्वम् अतोब्राह्मणप्रसादान्मांश्रीर्नविजहातीत्यलभ्यलाभत्वेननिर्देशोनसमंजसइति किंच स्वत एवत्वंभगभाजनो (भगवानसि) भजनीयानांगुणानामाश्रयःपरमशुद्धश्चतंत्वांद्विजानामनुपथंपाथिपथिलग्नं (द्विजानामनुगमनेनवालग्नम्) यत्पुण्यंरजस्तथाश्रीवत्सलक्ष्मचकिंपुनीतःपवित्रीकुरुतः किंकिमर्थंच तेउभेअगाःप्राप्तोभूषणत्वेनस्वीकृतवानसिअतोयत्सेवयाचरणपद्मपवित्ररेणुमित्यादिवचनंलोकसंग्रहमात्रमित्यर्थः २१ धर्ममूर्तेश्च(ते)तवेदमुचितमेवेत्याहुःधर्मस्येतित्रिभिः त्रिष्वेवयुगेष्वाविर्भवतीतित्रियुगःयद्वात्रीणि युगानियुगलानित्रियुगाःषड्गुणाभगशब्दवाच्याःसंत्यस्येतित्रियुगःहेत्रियुग धर्मरूपस्यतवत्रिभिःपद्भिःस्वैरसाधारणैस्तपःशौचदयाभिः सत्यस्यधर्मविप्लुवेपिकालावनुवर्तमानत्वात्त्रिभिरित्युक्तम् भृतंपालितम् किं कृत्वा नोऽस्माकंवरदयासत्त्वेनतनुवातन्वा (शुद्ध) सत्त्वमूर्त्या (इत्यर्थः) तदभिघातितेषांपादानामभिघातकंरजश्चतमश्चनिरस्यनिराकृत्यद्विजानांदेवतानांचप्रयोजनायनूनंभृतम् यद्वा हिलोपेरूपंनिरस्ये ति अस्माकंतन्निवर्तयेत्यर्थः २२ आत्मगोपं (आत्मागोपोरक्षकोयस्यतत्) त्वयैवरक्षणीयंद्विजोत्तमानांकुलम् यदिहस्फुटं (स्वर्चनेनप्रियवचनसहितेन) त्वंनगोप्तानरक्षिता तृन्प्रत्ययांतवन्नषष्ठीप्रयोगः वृ षःश्रेष्ठः हेदेव पंथावेदमार्गोनंक्ष्यतिनाशंयास्यति ऋषभस्यश्रेष्ठस्य हियस्मात्तदनर्हणमसूनृतंचाग्रहीष्यत् तदुक्तंगीतासु यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते ' इति २३ न श्यत्वितिचेत्तत्राहुः तद्वेदमार्गनाशनम् (तवानभीष्टमिव) इवेतिलोकोक्तिः सत्त्वनिधित्वाज्जनायक्षेमंशंविधातुमिच्छोरतएवनिजशक्तिभीराजादिभिरुत्पाटितधर्मप्रतिपक्षस्य अतस्तवब्रह्मकुलेऽनवतिर्युक्तैव नतुमहतोऽन्येष्ववनतिस्तेजोहानिकरीतत्राहुः एतावतातुधर्मत्राणप्रयोजनेनावनतस्यनमनंकृतवतस्तवतेजःप्रभावोनक्षतंनक्षीणं यतः सनमनादिस्तेविनोदः (विलासः) २४ शापाग्रहंपरित्यज्यविज्ञापयंति (हेअधीश) यंवाऽन्यं (दमं) दंडं (अन्ययोः) विधास्यतिभवान्वृत्तिंतुअधिकांजीविकांवा (अधिकमधिकारंवेत्यर्थः) तत्सर्वं (निष्कपट) मनुमन्यामहे येवयंनिरपराधौ (स्वामिकार्यतत्परौ) एतौकिल्बिषेणशापेनायुंक्ष्महियोजितवंतः २५

॥७०॥

श्लोकाः २१ — २५

यस्तांविविक्तचरितैरनुवर्तमानांनात्याद्रियत्परमभागवतप्रसंगः ॥ सत्वंद्विजानुपथपुण्यरजःपुनीतःश्रीवत्सलक्ष्माकिमगाभगभाजनस्त्वम् २१ धर्मस्यतेभगवत स्त्रियुगत्रिभिःस्वैःपद्भिश्चराचरमिदंद्विजदेवतार्थम् ॥ नूनंभृतंतदभिघातिरजस्तमश्चसत्त्वेननोवरदयातनुवानिरस्य २२ नत्वंद्विजोत्तमकुलंयदिहात्मगोपंगो प्तावृषःस्वर्हणेनससूनृतेन ॥ तर्ह्येवनंक्ष्यतिशिवस्तवदेवपंथालोकोऽग्रहीष्यदृषभस्यहितत्प्रमाणम् २३ तत्तेऽनभीष्टमिवसत्त्वनिधेर्विधित्सोःक्षेमंजनायनि जशक्तिभिरुद्धृतारेः ॥ नैतावतात्र्यधिपतेर्बतविश्वभर्तुस्तेजःक्षतंत्ववनतस्यसतेविनोदः २४ यंवानयोर्दममधीशभवान्विधत्तेवृत्तिंनुवातदनुमन्महिनिर्व्यलीकम् ॥ अस्मासुवायउचितोध्रियतांसदंडोयेऽनागसौवयमयुंक्ष्महिकिल्बिषेक्ष २५

॥७०॥

चार्णिका २१ २२ २३ २४ अस्माभिः अनयोः दंडः कृतः सः भवता अनुमंतव्यः अथवातंनिराकुर्वन् अस्मासुउचितदंडःध्रियतां तत्सर्वंवयमन्यामहे २५

१ नुह्यातिमहेश्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मत्कारितत्वाच्छापस्ययुष्माकंनापराधइत्याश्वासयन्नाह एतौसद्यएवासुरयोनिंप्राप्यभूयोप्याशुमत्समीपमागमिष्यतः संरंभेणक्रोधावेशेनसंभृतः संवृद्धोयः समाधिरेकाग्रतातेनानुबद्धोदृढीकृतोयोगोययोः हेविप्रायो
वःशापोयुष्मत्कृतः शापस्तदितिसमयैवनिमितोनिर्मितइत्यवैतजानीत २६ नेत्रोत्सवजनकंविकुंठंहारिंतन्निवासंचवैकुंठलोकम् स्वयंप्रकाशंप्रकाशांतरानपेक्षम् सत्त्वपरिणामत्वात् २७ अनुमान्यानुज्ञाप्य (तदनु
ज्ञांगृहीत्वेत्यर्थः) परिक्रम्यप्रदक्षिणीकृत्य वैष्णवींश्रियंवैकुंठेवर्णिताम् २८ (अनुगौसेवकौमे) ममैवतुमतंसंमतम् इदमत्रतत्त्वम् यद्यपिसनकादीनांक्रोधोनसंभवति नचभगवत्पार्षदयोर्ब्राह्मणप्रातिकूल्यम्
नचभगवतःस्वभक्तोपेक्षा नचवैकुंठगतानांपुनर्जन्म तथापिभगवतःसिसृक्षादिवत्कदाचिद्युयुत्सासमजनितदाऽन्येषामल्पबलत्वात्स्वपार्षदानांतुल्यबलत्वेऽपिप्रातिपक्ष्यानुपपत्तेरेतावेवब्राह्मणनिवारणेप्रवर्त्यते
षुचक्रोधमुद्दीप्यतच्छापव्याजेनप्रतिपक्षौविधाययुद्धकौतुकं (लोकोद्धारायलीलांवितन्वतामया) संपादनीयमितिभगवतैवव्यवसितमतःसर्वंसंगच्छते तदिदमुक्तंशापोमयैवनिर्मितइतिमाभैष्टमितिअस्तुशमि
॥७१॥ तिहंतुंनेच्छेमतंतुमइत्यादिच २९ यदामयिउपारतेयोगनिद्रांगतवतिसतिद्वारिविशंतीयुवाभ्यांपुरापवारितातदाक्रुद्धयारमयाएतद्यद्ब्राह्मणैरिदानीमुक्तंतत्पुरैवनिर्दिष्टम् ३० प्रत्येष्यतंप्रत्येष्यथ (आगमिष्यथ
संरंभयोगेनवैरानुबंधेनेत्यर्थः) निकाशंसमीपम् ३१ (सर्वातिशययासर्वोत्कृष्टयाशोभया) ३२ (तौसुरर्षभौ) दुस्तराद्ब्रह्मशापात् हरिलोकतःपततावितिशेषः हरिलोकतएवहतश्रियावभूतामितिवा विग
तस्मयौनष्टगर्वौच (अभूतां) ३३ विकुंठस्य (हरेः) धिषणात्स्थानात् (निपततोःसतोः) पुत्रकाहेदेवाः ३४ (तावेवाधुना) काश्यपंतेजोवीर्यंप्राप्तौ३५

श्लोकाः

॥ श्रीभगवानुवाच ॥ ॥ एतौसुरेतरगतिंप्रतिपद्यसद्यःसंरंभसंभृतसमाध्यनुबद्धयोगौ ॥ भूयःसकाशमुपयास्यतआशुयोवःशापोमयैवनिमितस्तदवैतांवि
प्राः २६ ॥ ॥ ब्रह्मोवाच ॥ ॥ अथतेमुनयोदृष्ट्वानयनानंदभाजनम् ॥ वैकुंठंतदधिष्ठानंविकुंठंचस्वयंप्रभम् २७ भगवंतंपरिक्रम्यप्रणिपत्यानुमान्यच ॥ २६/३५
प्रतिजग्मुःप्रमुदिताःशंसंतोवैष्णवींश्रियम् २८ भगवाननुगावाहयातंमाभैष्टमस्तुशम् ॥ ब्रह्मतेजःसमर्थोऽपिहंतुंनेच्छेमतंतुमे २९ एतत्पुरैवनिर्दिष्टंरमया
क्रुद्धयायदा ॥ पुरापवारिताद्वारिविशंतीमय्युपारते ३० मयिसंरंभयोगेननिस्तीर्यब्रह्महेलनम् ॥ प्रत्येष्यतंनिकाशंमेकालेनाल्पीयसापुनः ३१ द्वास्थावा
दिश्यभगवान्विमानश्रेणिभूषणम् ॥ सर्वातिशययालक्ष्म्याजुष्टंस्वंधिष्ण्यमाविशत् ३२ तौतुगीर्वाणऋषभौदुस्तराद्धरिलोकतः ॥ हतश्रियौब्रह्मशापादभू
तांविगतस्मयौ ३३ तदाविकुंठधिषणात्तयोर्निपतमानयोः ॥ हाहाकारोमहानासीद्विमानाग्र्येषुपुत्रकाः ३४ तावेवह्यधुनाप्राप्तौपार्षदप्रवरौहरेः ॥ दितेर्ज
ठरनिर्विष्टंकाश्यपंतेजउल्बणम् ३५

चूर्णिका ॥ श्रीभगवानुवाच ॥ ॥ एतौसद्यःअसुरयोनिंप्राप्यक्रोधसमाधिनामयिबद्धवैरौभूयःजन्मत्रयेणमत्सकाशंआशुएष्यतःहेविप्राःअयंशापःमयैवनिर्मितइतिजानीत २६ ॥ ॥
॥ ब्रह्मोवाच ॥ ॥ अथतंमुनयःवैकुंठलोकंदृष्ट्वाभगवंतंप्रणम्यवैष्णवींश्रियंशंसंतःप्रतिजग्मुः २७ २८ भगवान्अनुगौआहहेपार्षदौमयिसंरंभयोगेनब्रह्महेलनंनिस्तीर्यमेस
मीपंअल्पकालेनप्रत्येष्यत २९ ३० ३१ युवयोःशंअस्तुइत्याादिश्यहरिःस्वस्थानंययौ ३२ ३३ ततःवैकुंठात्सद्यःपतमानयोःसतोःविमानेषुहाहाकारःआसीत् ३४ अधुना ॥७१॥
हेदेवाःतौदितेःजठरंप्राप्तौ ३५

१ दण्डः म० । २ इतोनास्यश्लोकस्यटीकामाहेश्वरीये । ३ एतदित्ययंश्लोकोऽस्यटीकाचमुम्बयीमुद्रितपुस्तकेऽतएवास्माभिर्मूलेउपक्षिप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥७२॥

सहैवगर्भेप्रविष्टैयमौतयोस्तेजसावस्तेजआक्षिप्तंतिरस्कृतम् नचात्रप्रतिविधिः (कर्तुं) शक्यः यतएतर्हिदानींभगवानेवतदेवंविधातुमिच्छति ३६ तथापिकोप्युपायोविचार्यतामितिचेत्तत्राह विश्वस्येति त्रयाणांगु
णानामीशःसएवसत्त्वोत्कर्षकालेनःक्षेमंविधास्यति विमृशेनविमर्शनेन (विचारेण)३७ ॥ ॥ इतिश्रीभा०तृ०टी०षोडशोऽध्यायः १६ ॥ ॥ ७ ॥ ॥ ततःसप्तदशेजन्मतयोर्लोकभयंकरम् ॥
हिरण्याक्षप्रभावश्चवर्ण्यतेदिग्जयेऽद्भुतः १ (आत्मभुवा) क्षेमंविधास्यतीतिब्रह्मवचनानंतरंशंकयात्यक्ताः (उज्झितात्यक्तभयाइत्यर्थः त्रिदिवायस्वर्गंप्रत्येतुं) १ भर्तुरादेशात् " लोकान्सपालांस्त्रींश्चंडिमुहुरा
क्रंदयिष्यत " इतिवाक्यात् (अपत्यपरिशंकिनी) स्वापत्याभ्यांपरिशंकिनीदेवोपद्रवंशंकमाना २ तत्रतदानिपेतुरुद्धभूवुः उरुभयमासमंताद्वहंतीति ३ अचलैःसहिताभुवःप्रदेशाः केतवश्चोदयंचक्रुरिति
शेषः ४ (सुदुस्पर्शःखरस्पर्शः) फूत्कारानितितीव्रवायुशब्दानुकरणम् नगपतीन्महावृक्षान् वात्या (वातसमूहः) एवानीकं (सेना) यस्य रजएवध्वजोयस्य ५ उच्चैर्हसंत्यइवतडितोयेषुतेषामंबुदानांघ
टयासमूहेननष्टोभागणः सूर्यादिप्रभासमूहोयस्मिन् (तस्मिन्व्योम्निप्रविष्टेनतमसा) पदंस्थानं नव्यादृश्यतेस्मईषदपिनादृश्यत ६ वार्धिः समुद्रोविमनाइव उद्गताऊर्मयोयस्मात् क्षुभिताउदरस्थामकरादयोय
स्मिन् उदपानैर्वापीकूपादाभिः सहिताः शुष्काणिपंकजानियासु ७ परिधयः परिवेषाः सराह्वोःराहुग्रस्तयोः निर्घातानिरभ्रगर्जितानि रथनिर्ह्रादतुल्याध्वनयः विवरेभ्योगिरिगुहाभ्यः ८ सृगालानामुलूकानां
चटंकारैर्ध्वनिभिःसह (अशिवममंगलं) शिवाःसृगाल्यः ९ (ग्रीवामुन्नमय्योर्ध्वीकृत्य) ग्रामसिंहाःश्वानः (तत्रतत्रस्वरान्व्यमुञ्चन्) १०

श्लोकाः ३६ / १०

तयोरसुरयोरद्यतेजसायमयोर्हिवः ॥ आक्षिप्तंतेजएतर्हिभगवांस्तद्विधित्सति ३६ विश्वस्ययःस्थितिलयोद्भवहेतुराद्योयोगेश्वरैरपिदुरत्ययोगमायः ॥ क्षे
मंविधास्यतिसनोभगवांस्त्र्यधीशस्तत्रास्मदीयविमृशेनकियानिहार्थः ३७ ॥ ॥ इतिश्रीभा०तृतीयस्कंधेषोडशोध्यायः १६ ॥ ॥ छ ॥ ॥
॥ मैत्रेयउवाच ॥ ॥ निशम्यात्मभुवागीतंकारणंशंकयोज्झिताः ॥ ततःसर्वेन्यवर्त्ततत्रिदिवायदिवौकसः १ दितिस्तुभर्तुरादेशादपत्यपरिशंकिनी ॥ पूर्णे
वर्षशतेसाध्वीपुत्रौप्रसुषुवेयमौ २ उत्पाताबहवस्तत्रनिपेतुर्जायमानयोः ॥ दिविभुव्यंतरिक्षेचलोकस्योरुभयावहाः ३ सहाचलाभुवश्चेलुर्दिशःसर्वाःप्रजज्वलुः ॥
सोल्काश्चाशनयःपेतुःकेतवश्चार्तिहेतवः ४ ववौवायुःसुदुःस्पर्शःफूत्कारानीरयन्मुहुः ॥ उन्मूलयन्नगपतीन्वात्याऽनीकोरजोध्वजः ५ उद्धसत्तडिदंभोदघट
यानष्टभागणे॥व्योम्निप्रविष्टतमसानस्मव्यादृश्यतेपदम् ६ चुक्रोशविमनावार्द्धिरुदूर्मिःक्षुभितोदरः ॥ सोदपानाश्चसरितश्चुक्षुभुःशुष्कपंकजाः ७मुहुःपरिधयोऽ
भूवन्सराह्वोःशशिसूर्ययोः ॥ निर्घातारथनिर्ह्रादाविवरेभ्यःप्रजज्ञिरे ८ अंतर्ग्रामेषुमुखतोवमंत्योवह्निमुल्बणम् ॥ सृगालोलूकटंकारैःप्रणेदुरशिवंशिवाः ९
संगीतवद्रोदनवदुन्नमय्याशिरोधराम् ॥ व्यमुंचन्विविधावाचोग्रामसिंहास्ततस्ततः १०

चूर्णिका ॥७२॥

तयोःतेजसावःतेजःआक्षिप्तम् ३६ भगवान्शंविधास्यतितत्रअस्मद्विचारेणकियान्अर्थः ३७ ॥ ॥ इतितृतीयेषोडशः १६ ॥ ॥ छ ॥ ॥ मैत्रेयउवाच ॥
देवाःब्रह्मवाक्यंनिशम्यस्वस्थानंययुः १ दितिःपूर्णेवर्षशतेयमौपुत्रौप्रसुषुवे २ तयोर्जायमानयोःदिविभुविअंतरिक्षेचउत्पाताः बभूवुः ३ पर्वतैःसहभुवःचेलुः दिशःजज्वलुः ४
५ उलूकस्वनकेतूदयरक्तवृष्ट्यादिअभवत् ६ ७ ८ ९ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (खरागर्दभाः) कर्कशैस्तीक्ष्णैः हेक्षत्तः स्वार्कारोगर्दभजातिशब्दस्तस्मिन्रभसःसंभ्रमोयेषाम् (तेमत्ताःसन्तः) वरूथशःसंघशः (परितोऽधावन्) ११ रासभशब्दात्त्रस्ताः सर्वतः क्रोशंतः (भीताःपक्षिणो रुदन्तःघोषेआभीरपल्यांशकृद्गोमयंमूत्रंचाकुर्वन्) १२ गावोऽत्रसन्त्रस्ताःअसृग्दोहाश्वबभूवुः देवलिंगानिव्यरुदन् प्रतिमानामश्रुस्रावआसीदित्यर्थः १३ पुण्यतमान्गुरुबुधादीन्भगणान् बहूनिनक्षत्राणि चान्येक्रूरग्रहामंगलादयोऽतिचेरुरतिक्रम्यजग्मुर्वक्रगत्याप्रत्यावृत्ययुयुधुश्च (ग्रहाणामतिचारोयुद्धंचासीदित्यर्थः) १४ ब्रह्मपुत्रानृतेविना तेषांस्वशापादि (रूपकारण) ज्ञानात् (तयोर्जयविजययोस्त त्त्वंशापादिनिमित्तंतेषामुत्पातानांतत्त्वंवानविंदतीतितथा) १५ व्यज्यमानमात्मपौरुषंपूर्वसिद्धंस्वपौरुषंययोः (अश्मसारेणाश्मवद्दृढेनलोहसदृशेनदेहेन) १६ (हिरण्मयकिरीटाग्रैर्गगनचुम्बिनौ) नि रुद्धाव्याप्ताःकाष्ठादिशोयाभ्याम् स्फुरंत्यंगदानियेषुतेभुजाययोः अंगदेतिटाबंतत्वमार्षम् (गांभूमिं) शोभनाकांचीयस्यांतयाकट्या (अर्कोपरिप्राप्तयाऽर्कमतीत्य) १७ यमयोर्मध्येयःस्वदेहात्प्रथममजायत (दितेर्देहेकश्यपजठरात्पूर्वमुत्पन्नइत्यर्थः) तंयथाहिरण्यकशिपुंविदुःसादितिःप्रथमंयमसूततांहिरण्याक्षंयथाविदुस्तथानामकृतवानित्यर्थः अयंभावः यदाहिगर्भाधानसमयेयोनिपुष्पंविशद्वीर्यंद्विधाविभक्तमादि पश्चाद्वाक्येनप्रविशतितदायमौभवतस्तयोश्चपितृतःप्रवेशक्रमविपर्ययेणमातृतःप्रसूतिः " यदाविशेद्द्विधाभूतंबीजंपुष्पंपरिक्षरत् ॥ द्वौतदाभवतोगर्भौसूतिर्वेशविपर्ययात् ॥ " इतिपिंडसिद्धिस्मरणात् अतःस्वदेहा त्पूर्वंयोजातस्तस्याहिरण्यकशिपुरितिदितिःप्रथमंयमसूततस्यहिरण्याक्षइतिनामकृतवानिति १८ दोर्भ्यां (बाहुबलेन) उद्धतोब्रह्मवरेणाकुतोमृत्युःच (अतोलोकान्वशेचक्रे) १९ (तस्याहिरण्यकशिपोः प्रियःप्रीतिकृदितिसोप्यस्याप्रियइत्यर्थःयुयुत्सुर्योद्धुकामः) रणंयुद्धम् २०

॥७३॥ ॥१७॥

श्लोकाः ११/२० खराश्वकर्कशैःक्षत्तःखुरैर्घ्नंतोधरातलम् ॥ स्वार्काररभसामत्ताःपर्यधावन्वरूथशः ११ रुदंतोरासभत्रस्तानीडादुदपतन्खगाः ॥ घोषेऽरण्येचपशवःशकृन्मूत्रमकुर्वत १२ गावोऽत्रसन्नसृग्दोहास्तोयदाःपूयवर्षिणः ॥ व्यरुदन्देवलिंगानिद्रुमाःपेतुर्विनानिलम् १३ ग्रहान्पुण्यतमानन्येभगणांश्चापिदीपिताः ॥ अतिचेरुर्वक्रगत्यायुयुधुश्चपरस्परम् १४ दृष्ट्वाऽन्यांश्चमहोत्पातानतत्तत्त्वविदःप्रजाः ॥ ब्रह्मपुत्रानृतेभीतामेनिरेविश्वसंप्लवम् १५ तावादिदैत्यौसहसाव्यज्यमानात्मपौरुषौ ॥ ववृधातेऽश्मसारेणकायेनाद्रिपतीइव १६ दिविस्पृशौहेमकिरीटकोटिभिर्निरुद्धकाष्ठौस्फुरदंगदाभुजौ ॥ गांकंपयंतौचरणैःपदेपदेकट्यासुकांच्याऽर्कमतीत्यतस्थतुः १७ प्रजापतिर्नामतयोरकार्षीद्यःप्राक्स्वदेहाद्यमयोरजायत ॥ तंवैहिरण्यकशिपुंविदुःप्रजायंतंहिरण्याक्षमसूतसाग्रतः १८ चक्रेहिरण्यकशिपुर्दोर्भ्यांब्रह्मवरेणच॥वशेसपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः१९हिरण्याक्षोऽनुजस्तस्याप्रियःप्रीतिकृदन्वहम् ॥गदापाणिर्दिवंयातोयुयुत्सुर्मृगयन्रणम्२०

चूर्णिका ११ १२ १३ १४ प्रजाःअन्यांश्चमहोत्पातान्दृष्ट्वाभीताःसत्योब्रह्मपुत्रान्ऋतेविश्वप्रलयंमेनिरे १५ तौआदिदैत्यौसहसाव्यज्यमानात्मपौरुषौलोहवत्कायेनअद्रिपतीइववदृधाते १६ हेमकिरीटकोटिभिःदिविस्पृशौसंतौकट्याअर्कमतीत्यतस्थतुः १७ कश्यपस्तयोर्नामअकार्षीत्ज्येष्ठंहिरण्यकशिपुंअनुजंहिरण्याक्षमिति १८ ततः हिरण्यकशिपुःब्रह्मवरेणत्रैलोक्यंवशंचक्रे १९ हिरण्याक्षः गदापाणिःयुयुत्सुःरणंमृगयन् स्वर्गंवभ्राम २० ॥७३॥

१ त्रिम्युरितिपाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दुःसहोजवोवेगोयस्य रणंतौकांचनमयौनूपुरौयस्य अंसेन्यस्तामहतीगदायेन ' पुष्पैश्चतुर्गुणांमालांवैजयन्तींविदुर्बुधाः ' इतितयामालयाजुष्टम् २१ मनसाशौर्येणवीर्येणबलेनवरेणचोत्सिक्तंगर्वितम् असृण्यंनिरंकुशम् निलिल्यिरेलीनाबभूवुः (गरुडाद्भीताअहयइव) २२ स्वेनमहसातेजसा (स्वीयंबलंदृष्ट्वेत्यर्थः) तिरोहिता (-निलीना-) न्सदृष्ट्वाज्ञात्वाक्षीवान्मत्तान् (स्वशरणार्थित्वमन्तरेणतिरोहितत्वात्) पश्यन्सन् क्लीवानितिपाठेपौरुषहीनान् (भृशंव्यनदत्) २३ (गंभीरमगाधंवार्धिंसमुद्रम्) २४ सन्नाअवसन्नाधीर्येषाम् (साध्वसाःसभयाः) वर्चसातेजसाप्रधर्षिताअभिभूताःसंतः (यादसांगणाःपलायनंचक्रुः) २५ महोर्मीन् (कल्लोलान्) अभिजघ्ने मौर्व्यामारयतीतिमौर्वंकार्ष्णायसंतन्मय्या यद्वा मूर्वानामतृणविशेषःतन्मयरज्ज्वा दृढनिबद्धयेत्यर्थः (हेतातक्षत्तः) विभावरीसंज्ञाम् (प्रचेतसोवरुणस्यपुरीं) आसेदिवान्प्राप्तः २६ असुराणांलोकःपातालंतत्पालकम् प्रलब्धुमुपहसितुंप्रणिपत्य (हेअधिराजसंयुगंयुद्धंदेहीति) २७ (उपहसन्नेवस्तौतित्वमितिबृहच्छ्रवालोकत्रयगीतकीर्तिःदुर्मदानांवीरमायिनांवीर्याणांमायाविनांचवीर्यापहः) यद्यस्माद्राजसूयेनभवानयजत् २८ (उद्रिक्तगर्वेणविद्विषाएवंप्रलब्धउपहासितःसमुत्थितमपिक्रोधंविचारेणशमयन् अंगहेदैत्येन्द्र) उपशमंयुद्धादिकौतुकादुपरमम् २९ (हेअसुरर्षभ) युद्धमार्गेनिपुणंत्वांय (आराधयिष्पति) स्तोषयिष्यति (तथाभूतंपुरुषादन्यंनपश्यामिअतस्त्वं) तमिहिगच्छ (मनस्विनोवीराअपिभवादृशायं) गृणतेस्तुवंति ३०

||७४||

तंवीक्ष्यदुःसहजवंरणत्कांचननूपुरम् ॥ वैजयंत्यास्रजाजुष्टमंसन्यस्तमहागदम् २१ मनोवीर्यवरोत्सिक्तमसृण्यमकुतोभयम् ॥ भीतानिलिल्यिरेदेवा स्तार्क्ष्यत्रस्ताइवाहयः २२ सवैतिरोहितान्दृष्ट्वामहसास्वेनदैत्यराट् ॥ सेंद्रान्देवगणान्क्षीबानपश्यन्व्यनदद्भृशम् २३ ततोनिवृत्तःक्रीडिष्यन्गंभीरंभीमनिःस्वनम् ॥ विजगाहेमहासत्त्वोवार्धिंमत्तइवद्विपः २४ तस्मिन्प्रविष्टेवरुणस्यसैनिकायादोगणाःसन्नधियःससाध्वसाः ॥ अहन्यमानाअपितस्यवर्चसाप्रधर्षितादूरतरंप्रदुद्रुवुः २५ सवर्षपूगानुदधौमहाबलश्चरन्महोर्मीञ्छ्वसनेरितान्मुहुः ॥ मौर्व्याऽभिजघ्नेगदयाविभावरीमासेदिवांस्तातपुरींप्रचेतसः २६ तत्रोपलभ्यासुरलोकपालकंयादोगणानामृषभंप्रचेतसम् ॥ स्मयन्प्रलब्धुंप्रणिपत्यनीचवज्जगादमेदेह्यधिराजसंयुगम् २७ त्वंलोकपालोऽधिपतिर्बृहच्छ्रवावीर्यापहोदुर्मदवीरमानिनाम् ॥ विजित्यलोकेऽखिलदैत्यदानवान्यद्राजसूयेनपुराऽयजत्प्रभो २८ सएवमुत्सिक्तमदेनविद्विषादृढंप्रलब्धोभगवानपांपतिः ॥ रोषंसमुत्थंशमयन्स्वयाधियाव्यवोचदंगोपशमंगतावयम् २९ पश्यामिनान्यंपुरुषात्पुरातनाद्यःसंयुगेत्वांरणमार्गकोविदम् ॥ आराधयिष्यत्यसुरर्षभेहितंमनस्विनोयंगृणतेभवादृशाः ३०

श्लोकाः २१/३०

चूर्णिका

देवास्तंदृष्ट्वाभीताः संतःनिलिल्यिरे २१ २२ सःदेवान्अदृष्ट्वाभृशंव्यनदत् २३ ततःक्रीडिष्यन्वार्धिंप्रविवेश २४ तंदृष्ट्वावरुणदूताः जलचराःअपलायन् २५ सःअनेकवर्षंजलधौक्रीडन् वरुणपुरींगदयाजघ्ने २६ तत्रवरुणंदृष्ट्वाहिरण्याक्षः उवाच हेलोकपालत्वंपुराअखिलदैत्यादीन्विजित्यराजसूयेनअयजत् तस्मात्मेयुद्धंदेहि ॥ वरुणउवाच ॥ ॥ हेदैत्यवयंयुद्धात् इदानींउपरमंप्राप्ताः २७ २८ २९ त्वांयुद्धेतोष्टुंपुराणपुरुषात्अन्यंनपश्यामि ३०

१ नष्टाइतिवापाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥७५॥ आराच्छीघ्रम् (अभिपद्यप्राप्य) विस्मयो (विगतस्मयः) नष्टगर्वः वीरशयेरणांगणे (श्वभिःखादद्भिर्वृतः) रूपाणिवराहाद्यवतारान् ३१ ॥ ॥ इतिश्रीभागवतेतृतीयस्कंधेटीकायांसप्तदशोऽध्यायः १७
अष्टादशेहिरण्याक्षधरोद्धर्तृवराहयोः ॥ निर्विशेषंमहायुद्धंदेवक्षोभिनिरूप्यते १ प्रतियोद्धारंश्रुत्वामहामनाः (चरसातलंप्रतिहरेर्गतिंनारदमुखाद्विज्ञायनिर्विविशेप्रविष्टः) शयिष्यसइतियदुक्तंतद्विगणय्यागण
यित्वा यतोदुर्मदः १ अभितोजयतीत्यभिजित्तंश्रीहरिम् अग्रदंष्ट्रयादंष्ट्राग्रेण प्रकर्षेणोर्ध्वंनीयमानाऽवनिर्येन (तंधराधरंपर्वतमिवद्दष्ट्वापश्चात्) स्वरुचोहिरण्याक्षतेजांस्यरुणश्रियायुक्तंयत्तेनाक्ष्णानेत्रेणमुष्णं
तांतिरस्कुर्वंतम् (वराहंनिश्चित्य) अहोचित्रंवनगोचरोमृगोवारिचरोवराहः (इतिजहास) २ एह्यागच्छ ससौकसांपातालवासिनांनोऽस्माकंसमर्पिता अन्यथापातालावतरणमस्यानघटतइतिभावः हिरण्याक्षेणा
धिक्षेपार्थंप्रयुक्ताऽपिभारतीवस्तुतोभगवंतंस्तौति तथाहिवनगोचरोजलेशयानःश्रीनारायणःसएवयोगिभिर्मृग्यतेदुष्टान्वाहंतुंमृगयतइतिमृगः अज्ञनास्तिज्ञोयस्मात्सर्वज्ञइत्यर्थः सुराअधमायस्मात्हेसुरोत्तम. ममेक्षमा
णस्यापिससतोमामनाहत्यापित्वमनयासहवर्तमानोनोऽस्मदीयंस्वस्तिसमस्तंमंगलंराज्यंयास्यसिप्राप्स्यसिनात्रसंदेहस्तथाप्यस्मत्कृपयाविमुंचेत्यर्थः आसादितालीलयास्वीकृतासूकराकृतिर्येन ३अभवायनाशाय
भृतःपुष्टःवस्तुतस्तुमोक्षायभृतोधृतआश्रितइत्यर्थः योभवान्परोक्षेणचौर्येणजयतीतितथा वस्तुतस्तुदूरतएवास्थित्वाजयतीति संस्थाप्यहत्वा वस्तुतस्तुयोगमायारूपमचिंत्यंबलंयस्य अल्पंपौरुषंयस्मात् तंत्वां
सम्यक्स्थापयित्वाभक्त्याहृदिस्थिरीकृत्येत्यर्थःहेमूढप्रमूढान्प्राप्याययतीतितथा प्रापूर्त्ताविति धातुः सुहृदांशुचःसंसारदुःखानिमृजेनाशयामि यतस्त्वंस्मर्त्तुर्बांधवानपिमोचयसीतिभावः ४ अस्मद्भुजच्युतया
पिगदयाऽशीर्णंशीर्षंयस्यतथाभूतेत्वयिससंस्थितेसतियेतुभ्यमधुनाबलिंहरंतिनवीनाभक्तायेचपूर्वेभक्ताऋषयोदेवाश्चतेसर्वेस्वयमेवोद्यमंविनैवामूलानभविष्यंति किंतुदृढमूलाएवभविष्यंतीत्यर्थः ५

॥१८॥

श्लोकाः ३१/५

तंवीरमारादभिपद्यविस्मयःशयिष्यसेवीरशयेश्वभिर्वृतः ॥ यस्त्वद्विधानामसतांप्रशांतयेरूपाणिधत्तेसदनुग्रहेच्छया ३१ ॥ ॥ इतिश्रीभागवतेतृ०हि
रण्याक्षदिग्विजयेसप्तदशोऽध्यायः ॥ १७ ॥ ॥ छ ॥ ॥ मैत्रेयउवाच ॥ ॥ तदेवमाकर्ण्यजलेशभाषितंमहामनास्तद्विगणय्यदुर्मदः ॥ हरे
र्विदित्वागतिमंगनारदाद्रसातलंनिर्विविशेत्वरान्वितः १ ददर्शतत्राभिजितंधराधरंप्रोन्नीयमानावनिमग्रदंष्ट्रया ॥ मुष्णंतमक्ष्णास्वरुचोऽरुणश्रियाजहास
चाहोवनगोचरोमृगः २ आहैनमेह्यज्ञमहींविमुंचनोरसौकसांविश्वसृजेयमर्पिता ॥ नस्वस्तियास्यस्यनयाममेक्षतःसुराधमासादितसूकराकृते ३ त्वंनःसपत्नै
रभवायकिंभृतोयोमायायाहंत्यसुरान्परोक्षजित् ॥ त्वांयोगमायाबलमल्पपौरुषंसंस्थाप्यमूढप्रमृजेसुहृच्छुचः ४ त्वयिसंस्थितेगदयाशीर्णशीर्षण्यस्मद्भुज
च्युतयायेचतुभ्यम् ॥ बलिंहरंत्यृषयोयेचदेवाःस्वयंसर्वेनभविष्यंत्यमूलाः ५

चूर्णिका

हेवीरतंप्राप्यरणांगणेश्वभिःवृतःशयिष्यसेयःत्वद्विधानांप्रशांतयेसदनुग्रहेच्छयारूपाणिधत्तेतंप्राप्यरणांगणेशयिष्यसे ३१ ॥ ॥ इतितृतीयेसप्तदशः १७ ॥ ॥ छ ॥ ॥
॥ मैत्रेयउवाच ॥ ॥ एवंजलेशभाषितंआकर्ण्यतत् अविगणय्यनारदात् हरेःगतिंविदित्वात्वरयारसातलंविवेश १ तत्रपृथ्वींदंष्ट्रयाउन्नीयमानंवराहंदृष्ट्वाअहोवनगोचरःमृगः ॥७५॥
उच्चैः जहास आहच २ हेसूकराकृते ब्रह्मणाइयंपृथ्वीरसौकसांनः अर्पिताइमांमुंचमुंचमेईक्षतःसतःअनयासहत्वंसुखंनयास्यसि ३ त्वंपरोक्षंअसुरान्हंसिगदयात्वांहत्वासुहृ
दांशुचःप्रमृजे ४ त्वयिसंस्थितेसतिसर्वेदेवाःनिर्मूलाःनभविष्यंति ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सहारिररेर्दुरुक्तान्येवतोमराःशस्त्रविशेषास्तैस्तुद्यमानोव्यथ्यमानोदंष्ट्राग्रगतांपृथ्वींभीतामालक्ष्यतोदंदुरुक्तव्यथांमृषन्सहमानएवनिर्गतःकरेणुर्हस्तिनी वस्तुतस्त्वरिदुरुक्ततोऽमरैर्निमित्तभूतैस्तुद्यमानःयथाश्रुता
र्थग्राहिणांब्रह्मादीनांव्यथांदृष्ट्वाऽनुकंपयापीड्यमानइत्यर्थः तोदंमृषन्नित्यस्याप्ययमेवार्थः ६ सलिलान्निर्गच्छंतमनुगतःसन् हिरण्यवत्कपिशाःकेशायस्यदैत्यस्य झषोमकरः करालास्तुंगादंष्ट्रायस्यअशनिवन्निः
स्वनोयस्य निर्लज्जानामसतांकिंविगर्हितमस्तिनिंदाभयाभावात्पलायनमपिनायुक्तमित्यर्थः वस्तुतस्तुगतह्रियःप्राप्तह्रियः नसंतोयेभ्यस्तेषांकृपालूनांकिंविगर्हितंनाकिंचित् अतःकृपालुत्वाद्दंष्ट्राश्रितभूरक्षणार्थंकिं
चित्पलायनमपिनर्निंदितमित्यर्थः यद्वा लोकोपकारायभुवमुद्धरतोऽनुद्रवणमनुचितंमन्वानोदैत्यआत्मानमेवाधिक्षिपति गतह्रियांस्वार्थैकपराणामसतामस्माकंकिंविगर्हितगणनास्त्यपितुनास्त्येवाधिगस्मानित्य
ब्रवीदित्यर्थः ७ सभगवान्विश्वसृजाऽभिष्टुतोविबुधैश्चप्रसूनैरापूर्यमाणः पाठांतरेविश्वसृजांप्रसूनैर्विबुधैरभिष्टुतइतिसलिलस्योदस्तादुपरिव्यवहारगोचरेदेशेगांपृथ्वींविन्यस्यतस्यांस्वसत्त्वमाधारशक्तिनिहितवा
न्अरेस्तस्यपश्यतएव ८ परापराक्पृष्ठतोऽनुषक्तंलग्नम् तपनीयोपकल्पंसुवर्णाभरणम् कांचनमयाश्चित्रोदंशःकवचंयस्यतंदैत्यम् प्रचंडमन्युत्वमधिक्षेपादिकंचानुकरणमात्रंदैत्यवाक्यभीतानांदेवानांभयनिवत्त
ये वस्तुतस्तेनतथाऽनुक्तत्वेनकोपादिहेत्वभावात् ९ ग्रामसिंहान्शुनः प्रतिमुक्तस्यबद्धस्य विकत्थनंश्लाघाम् १० न्यासहरानिक्षेपहराः द्राविताःपलायनंकारिताः अथाप्यसमर्थाअपितिष्ठामः तत्किम् यतः
स्थेयंस्थातव्यमेवास्माभिः तत्किमित्यतआह क्वयामःगंतव्यदेशाभावात् ११ पद्रथानांपदातीनांयेयूथपास्तेषामधिपः मुख्यइत्यर्थः अस्वस्तयेपराभवार्थमाशुघटस्वयतस्व अनूहोनिर्वितर्कः योनातिपिपर्ति
नपूरयतिपालयतिवाअसावसभ्यःसभायामनर्हः १२ सोऽधिक्षिप्तःसत्यंवयमितिश्लोकेनरुषाप्रलब्धउपहसितश्चएतेवयमितिद्वाभ्याम्क्रीडांकार्यमाणोऽहिराण्महासर्पइव १३

॥७६॥

श्लोकाः ६/१३

सतुद्यमानोऽरिदुरुक्ततोमरैर्दंष्ट्राग्रगांगामुपलक्ष्यभीताम् ॥ तोदंमृषन्निरगादंबुमध्याद्ग्राहाहतःसकरेणुर्यथेभः ६ तंनिःसरंतंसलिलादनुद्रुतोहिरण्यकेशोद्विरदं
यथाझषः ॥ करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद्गतह्रियांकिंत्वसतांविगर्हितम् ७ सगामुदस्तात्सलिलस्यगोचरेविन्यस्यतस्यामदधात्स्वसत्त्वम् ॥ अभिष्टुतो
विश्वसृजाप्रसूनैरापूर्यमाणोविबुधैःपश्यतोऽरेः ८ परानुषक्तंतपनीयोपकल्पंमहागदंकांचनचित्रदंशम् ॥ मर्माण्यभीक्ष्णंप्रतुदंतंदुरुक्तैःप्रचंडमन्युःप्रहसंस्तंबभाषे
९ ॥ श्रीभगवानुवाच ॥ ॥ सत्यंवयंभोवनगोचरामृगायुष्मद्विधान्मृगयेग्रामसिंहान् ॥ नमृत्युपाशैःप्रतिमुक्तस्यवीराविकत्थनंतवगृह्णंत्यभद्र १० एतेवयं
न्यासहरारसौकसांगतह्रियोगदयाद्राविताास्ते ॥ तिष्ठामहेऽथापिकथंचिदाजौस्थेयंक्वयामोबलिनोत्पाद्यवैरम् ११ त्वंपद्रथानांकिलयूथपाधिपोघटस्वनोऽ
स्वस्तयआश्वनूहः ॥ संस्थाप्यचास्मान्प्रमृजाश्रुस्वकानांयःस्वांप्रतिज्ञांनातिपिपर्त्यसभ्यः १२ ॥ ॥ मैत्रेयउवाच ॥ ॥ सोऽधिक्षिप्तोभगवताप्रलब्ध
श्चरुषाभृशम् ॥ आजहारोल्बणंक्रोधंक्रीड्यमानोऽहिराडिव १३

चूर्णिका

सःइत्याद्युक्तोपिभगवान्पृथ्वींगृहीत्वासलिलोपरिआगत्य ६ स्वशक्त्यापृथ्वींन्यस्यदेवैःस्तुतःप्रचंडमन्युःहिरण्याक्षंबभाषे ७ ८ ९ ॥ वराहउवाच ॥ भोवयंवनगोचराःसत्यं
युष्मद्विधान्ग्रामसिंहान् मृगये १० बलिनावैरंउत्पाद्यवयंक्वयामः ११ अतःत्वंमांसंस्थाप्यस्वकानांशुचःआशुप्रमृज यःस्वप्रतिज्ञांत्यजतिसःअसभ्यः १२ ॥ ॥ मैत्रेयउवाच ॥
एवं श्रुत्वाहिरण्याक्षःगदयाहरिंअभ्यहनत् वराहःप्रहारंअवंचयत् सःपुनःअभ्यधावत् तौमिथःगदाभ्यांजघ्नतुः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

(अमर्षः संजातोयस्मिन्सः क्रुद्धइत्यर्थः) मन्युनाप्रचलितानिक्षुभितानींद्रियाणियस्य १४ अंतकंमृत्यु (-मिवतिरश्चीनःसन्नवंचयत) १५ (संरंभात्क्रोधात्दष्टोदच्छदोअधरोष्ठोयेनतं) १६ सौम्यविदुर (प्रभुर्ह रिःआजघ्नेआहतवान्) तांगदामप्राप्तामेवदैत्यःस्वगदयाहनत् (यतःकोविदोयुद्धकुशलः) १७ हर्यक्षोहिरण्याक्षः (सुसंरब्धौक्रोधाविष्टौ) १८ स्पृधोःस्पर्धमानयोःतिग्माभ्यां (तीक्ष्णाभ्यां) गदाभ्यामाहता न्यंगानिययोःक्षतादास्रवतीतिक्षतास्रवंरुधिरंतस्यघ्राणमवघ्राणंतेनविवृद्धोमन्युर्ययोस्तयोः विचित्रमार्गान् (विचित्रान्) गदायुद्धभ्रमणभेदान् इलागौस्तस्यांनिमित्तभूतायांशुष्मिणोर्मत्तयोर्वृषभयोः (इव) प्रस्तुतेऽपिइलापृथ्वीतदर्थम् वृषभौहिखलुकांतिचिद्दिनानिसंग्रथितोत्तुंगशृंगसंघर्षविदीर्णांगगलद्रुधिरौपरस्परोपमर्दव्यग्रोग्रसंरंभौचमत्कारितगजयूथपौयुध्यमानौतिष्ठतइतिप्रसिद्धम् (तथामृधःसंग्रामोऽ भात्विभातिस्म) १९ यज्ञाएवावयवायस्यतस्यचमह्यांमहीनिमित्तंद्विषतोः एवंविधंविमर्दनंयुद्धंदिदृक्षुःस्वराट्ब्रह्मातत्रागात् (हेकौरव्यविदुर) २० आगत्यचनारायणमाह किंकृत्वा दैत्यंविलक्ष्य कथंभूतम् आसन्नंप्राप्तंशौंडीरंशौर्य्यंमदोवायेन (तं) अपेतंसाध्वसंभयंयस्मात् (तं) कृतःप्रतीकारो (गदाघातपरिहारो) येन (तं) अहार्यःअप्रतिकार्योविक्रमोयस्यसहस्रणीःसहस्राणां ऋषि सहस्राणांनेता २१ हेदेवतेंऽघ्रिमूलंप्राप्तानांदेवादीनाम् (तत्रसौरभेयीणांगवां) एषोऽसुरः २२ आगस्कृद्दृथैवापराधारोपकःतत्परिहारायप्रवृत्तौ (तेषां) भयकृत् भीतंज्ञात्वादुष्कृदर्थप्राणादिहर्ता अस्म चोराद्धोलब्धोवरोयेन अन्वेषन्प्रतिरथमवलोकयन् अप्रतिरथःप्रतिपक्षशून्यः (लोकानटतीतिद्वयोरन्वयः) २३ यद्यस्मादेवंभूतोयंतस्मादेनंमाक्रीडमाक्रीडय हेदेवयथोत्थितंक्षुभितमाशीविषंसर्पंबालःपुच्छा कर्षणादिनाक्रीडयतितद्वत् २४ स्वामासुरीम् (वेलां) हेदेव (तावत्) स्वांमायाम् अघंपापरूपम् २५

श्लोकाः १४/२५

सृजन्नमर्षितःश्वासान्मन्युप्रचलितेंद्रियः ॥ आसाद्यतरसादैत्योगदयाऽभ्यहनद्धरिम् १४ भगवांस्तुगदावेगंविसृष्टंरिपुणोरसि ॥ अवंचयत्तिरश्चीनो योगारूढइवांतकम् १५ पुनर्गदांस्वामादायभ्रामयंतमभीक्ष्णशः ॥ अभ्यधावद्धरिःक्रुद्धःसंरंभाद्दष्टदच्छदम् ॥ १६ ॥ ततश्चगदयाऽरातिंदक्षिणस्यांभ्रु विप्रभुः ॥ आजघ्नेसतुतांसौम्यगदयाकोविदोऽहनत् १७ एवंगदाभ्यांगुर्वीभ्यांहर्यक्षोहरिरेवच ॥ जिगीषयासुसंरब्धावन्योऽन्यमभिजघ्नतुः १८ तयोः स्पृधोस्तिग्मगदाहतांगयोःक्षतास्रवघ्राणविवृद्धमन्य्वोः ॥ विचित्रमार्गांश्चरतोर्जिगीषयाव्यभादिलायामिवशुष्मिणोर्मृधः १९ दैत्यस्ययज्ञावयवस्यमाय याग्रहीतवाराहतनोर्महात्मनः ॥ कौरव्यमह्यांद्विषतोर्विमर्दनंदिदृक्षुरागादृषिभिर्वृतःस्वराट् २० आसन्नशौंडीरमपेतसाध्वसंकृतप्रतीकारमहार्यविक्रमम् ॥ विलक्ष्यदैत्यंभगवान्सहस्रणीर्जगादनारायणमादिसूकरम् २१ ॥ ॥ ब्रह्मोवाच ॥ ॥ एषतेदेवदेवानामंघ्रिमूलमुपेयुषाम् ॥ विप्राणांसौरभेयीणां भूतानामप्यनागसाम् २२ आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः ॥ अन्वेषन्नप्रतिरथोलोकानटतिकंटकः २३ मैनंमायाविनंदृप्तंनिरंकुशमसत्तमम् ॥ आ क्रीडबालवद्देवयथाशीविषमुत्थितम् २४ नयावदेषवर्धेतस्वांवेलांप्राप्यदारुणः ॥ स्वांदेवमायामास्थायतावज्जह्यघमच्युत २५

चूर्णिका

१४ १५ १६ १७ १८ उभयोःशरीरात्रुधिरंसुस्राव १९ एवंयुद्ध्यतोःसतोःतत्र ॥ ब्रह्माएत्यउवाच ॥ २० २१ हेभगवन् एषःत्वच्छरणागतानांदेवविप्रसौरभेयीणां २२ आगस्कृत् एनंबालवत्माक्रीड २३ २४ एषः यावत्संध्यांप्राप्यनवर्धेत तावत् हेअच्युतएनंजहि २५

१ बहूनीतिमु०पुस्तके ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वेलामेवाह एषेति लोकानांछंबट्करीविनाशकरी छंबडित्यव्ययंविनाशेवर्तते (उपसर्पतिउपैति) २६ अभिजित्मध्याह्नः (' मध्याह्नस्त्वभिजित्प्रोक्तइतिवचनात् ') सएवमौहूर्तिकोयोगःसन् सुमुहूर्तात्मकःशुभदःकालः अगात्गतप्रायअतोयावन्मुहूर्तशेषोऽस्तितावदेव (सुहृदांनःकल्याणाय) सुदुस्तरमेनंनिस्तरजहि २७ त्वांमृत्युंत्वयैवशापानुग्रहकालेविहितंनिर्मितम् आसादितः प्राप्तःशर्मणिसुखे आधेहिस्थापय २८ ॥ ॥ इतिश्रीभागवतेमहापुराणेतृतीयेटीकायामष्टादशोऽध्यायः १८ ॥ ॥ ७ ॥ ॥ ऊनविंशेविरिंच्यादिप्रार्थितेनमहामृधे ॥ वराहेणहिरण्याक्षवधःश्लाघ्योऽनुवर्ण्यते १ निर्व्यलीकंचतदमृतंच (सत्यंप्रियंचेत्यर्थः) पाठांतरेनिष्कपटाभिप्रायंचततद्वचंच कालात्मनोऽपिममुहूर्तबलमुपदिशतीतिप्रहस्य (प्रेमयुक्तेन) अपांगालोकनेनस्वीकृतवान् १ मुखतःअभिमुखे (चरंतंनिःशंकंसपत्नंअरिं) हनौकपोलस्याधोभागे अक्षजोब्रह्मणोघ्राणेंद्रियादाविर्भूतः (भगवाञ्जघान) २ (तेनदैत्येन) सास्वगदयातेनहताअंतो (भगवत्करात्) विहताविच्युतासतीविघूर्णिताभूत्वा (विभ्रमंप्राप्येत्यर्थः) अपतद्रेजेच तद्भगवत्करात्पतनम् (परमाश्चर्यमिवाभवत्) यद्वा तत्पदस्यावृत्त्यारेजइत्यनेनापिसंबंधः तद्दैत्यपौरुषंरेजइति ३ (तदासदैत्यः) लब्धतीर्थःलब्धावसरोपितंनबबाधेनप्राहरत् (कुतःनिरायुधं) स (धर्मं) मानयन्बभूवेतिवाक्यभेदात्सइत्यस्यापौनरुक्त्यम् ४ (अपविद्धायांपातितायां विनिर्गतेप्रवृत्ते विभुस्तस्यतंधर्मंमानयामास अथसुनाभंसुदर्शनम्) ५ व्यग्रंससंभ्रमं (अकस्मादागतम्) चक्रंयस्ययद्वा व्यग्रंशत्रुहननायविभ्रमत्चक्रंयस्य दैत्येष्ववधमेनदुष्टेनहिरण्याक्षेणविषज्जमानंविशेषेणसंगंप्राप्नुवंतं (तं) प्रतिअतद्विदांतत्प्रभावमजानताम् (तुभ्यंस्वस्तिअमुंदैत्यंजहीतिवाचः) आसंमंतादासन्स्म ६ सदैत्यस्तमात्तचक्रंनिशाम्यदृष्ट्वाअग्रतोव्यवस्थितंचविलोक्यअमर्षेणक्रोधेनपरिप्लुतानिक्षुभितानींद्रियाणियस्य (सः) आदशत्दष्टवान् ७

॥७८॥

श्लोकाः

एषाघोरतमासंध्यालोकच्छंबट्करीप्रभो ॥ उपसर्पतिसर्वात्मन्सुराणांजयमावह २६ अधुनैषोऽभिजिन्नामयोगोमौहूर्त्तिकोह्यगात् ॥ शिवायनस्त्वंसुहृदामाशुनिस्तरदुस्तरम् २७ दिष्ट्यात्वांविहितंमृत्युमयमासादितःस्वयम् ॥ विक्रम्यैनंमृधेहत्वालोकानाधेहिशर्मणि २८ ॥ ॥ इतिश्रीमद्भागवतेतृतीयस्कंधेहिरण्याक्षवधेऽष्टादशोऽध्यायः १८ ॥ ॥ ७ ॥ ॥ मैत्रेयउवाच ॥ ॥ अवधार्यविरिंचस्यनिर्व्यलीकामृतंवचः ॥ प्रहस्यप्रेमगर्भेणतदपांगेनसोऽग्रहीत् १ ततःसपत्नंमुखतश्चरंतमकुतोभयम् ॥ जघानोत्पत्यगदयाहनावसुरमक्षजः २ साहतातेनगदयाविहताभगवत्करात् ॥ विघूर्णिताऽपतद्रेजेतदद्भुतमिवाऽभवत् ३ सतदालब्धतीर्थोऽपिनबबाधेनिरायुधम् ॥ मानयन्समृधेधर्मंविष्वक्सेनंप्रकोपयन् ४ गदायामपविद्धायांहाहाकारेविनिर्गते ॥ मानयामासतद्धर्मंसुनाभंचास्मरद्विभुः ५ तंव्यग्रचक्रंदितिपुत्राधमेनस्वपार्षदमुख्येनविषज्जमानम् । चित्रावाचोऽतद्विदांखेचराणांतत्रास्माऽऽसन्स्वस्तितेऽमुंजहीति ६ सतंनिशम्यात्तरथांगमग्रतोव्यवस्थितंपद्मपलाशलोचनम् ॥ विलोक्यचामर्षपरिप्लुतेंद्रियोरुषास्वदंतच्छदमादशच्छ्वसन् ७

२६ ७

चूर्णिका

२६ अधुनाअभिजिन्नामयोगः किंचित्शेषोस्तिनः शिवायएनंहत्वा २७ लोकान्शर्मणिआधेहि २८ ॥ ॥ इतितृतीयेऽष्टादशः १८ ॥ ॥ ७ ॥ ॥ मैत्रेयउवाच ॥ ॥ हरिःब्रह्मणः वचः अवधार्यप्रहस्यअपांगेन अवलोक्य तद्वचः अग्रहीत् १ ततः अग्रेस्थितंदैत्यंहरिःगदयाजघान २ ततःदैत्येनस्वगदयाहताभगवद्धाहस्तात् अपतत् तदद्भुतमिवाभवत् ३ ४ हाहाकारश्चअभूत् ततः भगवान्चक्रंसस्मार ५ तदाखेचराणांवाचः तेस्वस्तीतिअमुंजहीति आसन् ६ ७

१ ततो इति मु०पुस्तकेपाठः । २ लब्धावसरोपि तं बबाधे इति मु०पु० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चक्षुर्भ्यांदहन्निवसंचक्षाणःपश्यन् इवेतिवस्तुतःक्रोधाभावमाह हतोसि (मारितोसि हंतेर्गत्यर्थत्वाच्च) ज्ञातोसीतिवास्तवोर्थः ८ वातरंहसंवायुवेगां (तांवामेनपदाप्राहरत् मिषतःपश्यतःसतः) ९ (आहच हिरण्याक्षं हेशत्रोआयुधंगृहाण) घटस्वयुद्धोद्यमंकुरु यतस्त्वंजेतुमिच्छसि (इत्युक्तःसदैत्यस्त्वयागदया) १० (भगवानपियुद्धलाघवमदर्शयदित्याहतामिति) ११ हतोमानोगर्वोयस्य (विगतप्रभःम्लानः) १२ ज्वलन्योज्वलनः (अग्निः) तद्वल्लोलुपंग्रसनव्यग्रंयज्ञायविष्णुमालक्ष्य (जग्राह) अकार्यंकरत्वेदृष्टांतः विप्रमुद्दिश्याभिचारंकुर्वन्यथा १३ (स्मरणादागतंमांभगवान्वैरिवधायकिंनप्रयुंक्तेतिसुदर्शनस्यहार्दंजानन्निवतेनतच्छूलमच्छिनदित्याहतादिति ओजसाबलेनदैत्येषुमहान्भटोयोद्धातेनार्पितं) अंतःखेआकाशमध्येचकासत्प्रकाशमानंउदीर्णाउत्कटादीधितिर्दीप्तिर्यस्य (तच्छूलं) निशातनेमिनानिशितधारेण हरिरिंद्रोयथाताक्ष्र्यस्य (गरुडस्य) पतत्रंउज्झितं (उत्सृष्टं) चिच्छेद देवान्विनिर्जित्यअमृतकलशंनयतागरुडेनइंद्रप्रयुक्तवज्रस्यामोघस्यमानंदातुंपिच्छमेकंत्यक्तंतद्यथाइंद्रश्चिच्छेदछिन्नंचतत् यथाखेचकासत्तद्वत्प्रकाशमानमित्यभिसंबंधः १४ अराःसंत्यस्येतिअरिचक्रंतेनबहुधावृक्णेछिन्नेसतिप्रत्येत्यअभिमुखमागत्य (विभूतिःश्रीरस्त्यस्मिन्नितिविभूतिमत्) हरेरुरःवक्षःप्रहृत्य (अंतरधीयतांतिरोहितोभूत्) १५ (हेक्षत्तः) मनाक्ईषदपिक्वाप्यंशे (पुष्पमालयाताडितोगजइव) १६ अस्यजगतःउपसंयमंप्रलयं (मेनिरे) १७ (प्रववुःप्रकर्षेणवांतिस्म पांसवं) पांसुकृतं (धूलिमयं) तमश्चप्रेरितवंतः क्षेपणैः (रज्जुमयैः) यंत्रैःप्रेरिताः १८ नष्टो (अदृश्यो) भगणोनक्षत्रसमूहोयस्यां (सातथामेघौघैरभवत्) अनेनदैत्यबलातिरेकात्ब्रह्मदत्तमुहूर्तातिक्रमोगम्यतेअह्निनक्षत्रदर्शनस्यासंभवात् (कथंभूतैरभ्रौघैः विद्युतस्ताडितःस्तनयित्नवोगर्जनानितत्सहितैः पूयादिचासकृद्वर्षद्भिः) १९

श्लोकाः ८/१९

करालदंष्ट्रश्चक्षुर्भ्यांसंचक्षाणोदहन्निव ॥ अभिप्लुत्यस्वगदयाहतोऽसीत्याहनद्धरिम् ८ पदासव्येनतांसाधोभगवान्यज्ञसूकरः ॥ लीलयामिषतःशत्रोःप्राहरद्वातरंहसम् ९ आहचायुधमाधत्स्वघटस्वत्वंजिगीषसि ॥ इत्युक्तःसतयाभूयस्ताडयन्व्यनदद्भृशम् १० तांसआपततींवीक्ष्यभगवान्समवस्थितः ॥ जग्राहलीलयाप्राप्तांगरुत्मानिवपन्नगीम् ११ स्वपौरुषेप्रतिहतेहतमानोमहासुरः ॥ नैच्छद्गदांदीयमानांहरिणाविगतप्रभः १२ जग्राहत्रिशिखंशूलंज्वलज्ज्वलनलोलुपम् ॥ यज्ञायधृतरूपायविप्रायाभिचरन्यथा १३ तदोजसादैत्यमहाभटार्पितंचकासदंतःखउदीर्णदीधिति ॥ चक्रेणचिच्छेदनिशातनेमिनाहरिर्यथाताक्ष्र्यपतत्रमुज्झितम् १४ वृक्णेस्वशूलेबहुधाऽरिणाहरेःप्रत्येत्यविस्तीर्णमुरोविभूतिमत् ॥ प्रवृद्धरोषःसकठोरमुष्टिनानदन्प्रहृत्यांतरधीयतासुरः १५ तेनेत्थमाहतःक्षत्तर्भगवानादिसूकरः ॥ नाकंपतमनाक्क्वापिस्रजाहतइवद्विपः १६ अथोरुधासृजन्मायांयोगमायेश्वरेहरौ ॥ यांविलोक्यप्रजास्त्रस्तामेनिरेऽस्योपसंयमम् १७ प्रववुर्वायवश्चंडास्तमःपांसवमैरयन् ॥ दिग्भ्योनिपेतुर्ग्रावाणःक्षेपणैःप्रहिताइव १८ द्यौर्नष्टभगणाऽभ्रौघैःसविद्युत्स्तनयित्नुभिः ॥ वर्षद्भिःपूयकेशासृग्विण्मूत्रास्थीनिचासकृत् १९

चूर्णिका तदाक्रुद्धः दैत्यःहतोसि हतोसिइत्युक्त्वाहरिंगदयाअहनत् ८ भगवान् तांगदांवामपादेनप्राहरत् ९ १० ११ १२ तदादैत्यः शूलंचिक्षेप १३ भगवान् चक्रेणतत् चिच्छेद १४ पुनः दैत्यःमुष्टिनाहरिंप्रहृत्यअंतर्धाय १५ १६ बहुधामायाःअसृजत् १७ चंडाः वायवः प्रववुःदिग्भ्यः ग्रावाणः पेतुः १८ मेघाःकेशासृग्विण्मूत्रास्थीनिववर्षुः १९ ॥७९॥

१ -संधिरितिपाठः मु० पु० । २ नक्षत्राणामसंभवात् मु० पु० पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

टीका

(गिरयःपर्वताः) प्रत्यदृश्यंतनानायुधानिमुंचंतीतितथायातुधान्यश्च (राक्षस्योदिग्वाससोनग्नाः) २० हिंस्राःछिंधिभिंधीत्येवंभूताःअतिवैशसाअत्युग्रावाचो (यक्षादिभिर्वधोद्यतैः) उत्सृष्टा(-रुत्सृज्यंतेस्म) इत्यत्रैववाक्यसमाप्तिः २१ प्रादुष्कृतानां (मायानामिति) प्रकटितामाया (इत्यर्थः) विनाशयत् विनाशनमितिपाठेयथाश्रुतैवषष्ठी (त्रिपात्) त्रीणिसवनानिपादायस्यसयज्ञमूर्तिरित्यर्थः' त्रयोअस्य पादाइतिश्रुतेः २२ भर्तुरादेशंत्वत्पुत्रौभगवान्हनिष्यतीत्येवंभूतम् २३ (विनष्टासुसतीषु) उपगूहमानोबाह्वोरंतर्निधायसंघट्टयन् (अमुंबाहुकृतवेष्टनाद्बहिरवस्थितम्) २४ (वज्रसारैर्वज्रतुल्यदृढैः) अहन्जघान (त्वाष्ट्रंवृत्रं) मरुत्पतिरिंद्रः २५ परितोभ्रमत्गात्रंशरीरंयस्य उदस्तेबहिर्निर्गतेलोचनेयस्य विकीर्णा(विक्षिप्ताः) बाह्वादयोयस्यनगेंद्रोमहाद्रुमःलुलितउन्मूलितःनभस्वतावायुना २६ (तत्रा गताब्रह्मादयः तंवीक्ष्यशशंसुः) संस्थितिंमृत्युम् २७ असतआरोपिताल्लिंगाल्लिंगशरीरात्मोक्तुमिच्छया (योगिनोयंयोगेनयःसमाधिश्चित्तैकाग्र्यंतेनध्यायंतितस्यप्रत्यक्षेणपदाहतएषतन्मुखंपश्यन्तनुंत्यक्त वान्) वराहस्यपूर्वपदयोरेवकरत्वात्करेणाहन्नितिपदाहतइतिचाविरुद्धम् २८ (एतौदैत्यौतौवैकुंठस्थावस्यहरेःपार्षदौ शापादसद्गतिंआसुरींयोनिंस्थानंवैकुंठंहइतिस्फुटम्) २९ अखिलयज्ञानांतंतवेविस्ता रायकारणायेतिवा अरुंतुदोमर्मभेत्ता ३०

श्लोकाः २०—३०

गिरयःप्रत्यदृश्यंतनानायुधमुचोऽनघ ॥ दिग्वाससोयातुधान्यःशूलिन्योमुक्तमूर्धजाः २० बहुभिर्यक्षरक्षोभिःपत्त्यश्वरथकुंजरैः ॥ आततायिभिरुत्सृष्टाहिं स्रावाचोऽतिवैशसाः २१ प्रादुष्कृतानांमायानामासुरीणांविनाशयत् ॥ सुदर्शनास्त्रंभगवान्प्रायुंक्तदयितंत्रिपात् २२ तदादितेःसमभवत्सहसाहृदिवेपथुः ॥ स्मरंत्याभर्त्तुरादेशंस्तनाच्चासृक्प्रसुस्रुवे २३ विनष्टासुस्वमायासुभूयश्चाव्रज्यकेशवम् ॥ रुषोपगूहमानोमुंददृशेवस्थितंबहिः २४ तंमुष्टिभिर्विनिघ्नंतंवज्र सारैरधोक्षजः ॥ करेणकर्णमूलेऽहन्यथात्वाष्ट्रंमरुत्पतिः २५ सआहतोविश्वजिताह्यवज्ञयापरिभ्रमद्गात्रउदस्तलोचनः ॥ विकीर्णबाह्वंघ्रिशिरोरुहोऽपत द्यथानगेंद्रोलुलितोनभस्वता २६ क्षितौशयानंतमकुंठवर्चसंकरालदंष्ट्रंपरिदष्टदच्छदम् ॥ अजादयोवीक्ष्यशशंसुरागताअहोइमांकोऽनुलभेतसंस्थितिम् २७ यंयोगिनोयोगसमाधिनारहोध्यायंतिलिंगादसतोमुमुक्षया ॥ तस्यैषदैत्यऋषभःपदाहतोमुखंप्रपश्यंस्तनुमुत्ससर्जह २८ एतौतौपार्षदावस्यशापाद्यातावसद्गतिम् ॥ पुनःकतिपयैःस्थानंप्रपत्स्येतेहजन्मभिः २९॥देवाऊचुः ॥ नमोनमस्तेऽखिलयज्ञतंतवेस्थितौगृहीतामलसत्त्वमूर्त्तये॥ दिष्ट्याहतोऽयंजगतामरुंतुदस्त्वत्पादभक्त्यावयमीशनिर्वृताः ३०

चूर्णिका

गिरयः नानायुधमुचः अदृश्यंत २० किंच नग्नाः राक्षस्यः अदृश्यंततथायक्षरक्षोभिः छिंधिभिंधिएवंवाचःउत्सृष्टाः इत्यादि २१ तदाभगवान्सुदर्शनास्त्रेणसर्वमायाः अनाशयत् २२ तदादितेः हृदिवेपथुः अभवत् स्तनात् असृक्सुस्राव २३ दैत्यस्यमायासुनष्टासुसत्सुपुनः केशवंएत्यमुष्टिभिः निजघान २४ तदाभगवान् करेणकर्ण मूलेजघान २५ तेनप्रहारेणहिरण्याक्षः भूमौपतितः सन् तनुंउत्ससर्ज २६ तत्र अजादयः देवाः एत्यशशंसुः हेहरेअखिलयज्ञतंतवेतेनमः अहोइमांसंस्थितिंकोनुलभेत अस्यभाग्यंकिंवर्णनीयम् २७ २८ २९ ३०

१ विशीर्ण बाह्वमिति मु०पु० पाठः टीकायामप्येवम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादयित्वाहत्वेत्यर्थः पुष्करविष्टरादिभिर्ब्रह्मादिभिःसंस्तुतः३१यथानूक्तंगुरूक्तिमनतिक्रम्यमयाभवादितवकथितंहेसुमित्रविदुर यथायेनप्रकारेण (महासंग्रामेक्रीडनवत्द्यूतोपकरणवत्)३२हेद्विजशौनक (कौषारवेणमैत्रेयेणकथिताम्) ३३ (कैमुत्येनक्षत्तुःपरमानंदंसंपादयतिअन्येषामिति) कथांउपश्रुत्य (आनंदोभवेत्श्रीवत्सांकस्यहरेरुपश्रुत्यकिंपुनर्वक्तव्यम्)३४ भक्तिमात्रेणपशूनामपिसुलभःअन्यथादेवानामपिदुर्लभइतितत्कथाश्रवणेकस्यकृतज्ञस्यानंदोनस्यादित्याह यइतिद्वाभ्याम् झषोग्राहःक्रोशंतीनांससीनामितिकृपालुत्वमुक्तम् संकटादमोचयत् ३५ (ऋजुभिःसरलचित्तैःसाधुभिःसुखेनआराध्यम् असाधुभिरभक्तैः) ३६ कारणेनपृथिव्युद्धरणादिनासूकररूपस्यहरेः ३७ एतद्धरेर्विक्रीडितंशृण्वतामंतेश्रीनारायणोगतिर्भवति महापुण्यंस्वर्गादिगतिप्रदम् अलंपवित्रंअतिशयेनशोधकंधन्यंधनावहम् यशस्यंकीर्तिकरम्आयुषश्चआशिषांचपदंस्थानंपरित्राणंवा प्राणानामिंद्रियाणांचपदम् अंगहेशौनक ३८ ॥ ॥ इतितृतीयेटीकायांएकोनविंशः १९ ॥ ॥ ७ ॥ ॥ विंशेवराहजन्मादिव्यवधानादथादितः सर्गोनुस्मार्यतेवक्तुमन्वयंप्रस्तुतंमनोः ॥१॥प्रतिष्ठांस्थानं (महीरूपं) अध्यस्यप्राप्यहेसौतेसूतस्यरोमहर्षणस्यपुत्र अवरंअर्वाचीनंजन्मयेषांतषांईश्वरेलीनानांमार्गायनिर्गमायकानिद्वाराणिकृतवान्अर्वाचीनान्प्राणिनःकैरुपायैःसृष्टवानित्यर्थः १ विदुरमैत्रेयसंवादेनैवैतत्ज्ञास्यतइतितमेवसंवादंप्रष्टुमाह क्षत्तेतिपंचभिः (ऐकांतिकःएकोऽतोहरिरेवसेव्यइतिनिर्णयोऽस्यास्तीतितथा) श्रीकृष्णसुहृत्त्वेहेतुःयइति दुर्योधनादिभिरपत्यैःसहितंअग्रजंघृतराष्ट्रं (कृष्णे) अघवान्कृवापराधइविहेतोःश्रीकृष्णोक्तमंत्रानादरात्यस्तत्याज २महित्वेमहिम्नि (विषये) अनवरःअन्यूनः (तत्समइत्यर्थः तत्परान्कृष्णभक्तान्) ३

श्लोकाः ३१-३

॥ मैत्रेयउवाच ॥ एवंहिरण्याक्षमसह्यविक्रमंससादयित्वाहरिरादिसूकरः ॥ जगामलोकंस्वमखंडितोत्सवंसमीडितःपुष्करविष्टरादिभिः ३१ मयायथाऽनूक्तमवादितेहरेःकृतावतारस्यसुमित्रचेष्टितम् ॥ यथाहिरण्याक्षउदारविक्रमोमहामृधेक्रीडनवन्निराकृतः॥ ३२ ॥ सूतउवाच ॥ इतिकौषारवाख्यातामाश्रुत्यभगवत्कथाम् ॥ क्षत्तानंदंपरंलेभेमहाभागवतोद्विज ३३ अन्येषांपुण्यश्लोकानामुद्दामयशसांसताम् ॥ उपश्रुत्यभवेन्मोदःश्रीवत्सांकस्यकिंपुनः ३४ योगजेंद्रंझषग्रस्तंध्यायंतंचरणांबुजम् ॥ क्रोशंतीनांकरेणूनांकृच्छ्रतोमोचयद्द्रुतम् ३५ तंसुखाराध्यमृजुभिरनन्यशरणैर्नृभिः ॥ कृतज्ञःकोनसेवेतदुराराध्यमसाधुभिः ३६ योवैहिरण्याक्षवधंमहाद्भुतंविक्रीडितंकारणसूकरात्मनः ॥ शृणोतिगायत्यनुमोदतेंजसाविमुच्यतेब्रह्मवधादपिद्विजाः ३७ एतन्महापुण्यमलंपवित्रंधन्यंयशस्यंपदमायुराशिषाम् ॥ प्राणेंद्रियाणांयुधिशौर्यवर्धनंनारायणोऽंतेगतिरंगशृण्वताम् ३८ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेहिरण्याक्षवधोनामएकोनविंशोऽध्यायः १९॥शौनकउवाच ॥ महींप्रतिष्ठामध्यस्यसौतेस्वायंभुवोमनुः॥ कान्यन्वतिष्ठद्द्वाराणिमार्गायावरजन्मनाम् १ क्षत्तामहाभागवतःकृष्णस्यैकांतिकःसुहृत् ॥ यस्तत्याजाग्रजंकृष्णेसापत्यमघवानिति २ द्वैपायनादनवरोमहित्वेतस्यदेहजः ॥ सर्वात्मनाश्रितःकृष्णंतत्परांश्चाप्यनुव्रतः ३

चूर्णिका ॥ मैत्रेयउवाच ॥ ॥ एतौविष्णुपार्षदौशापादसद्वर्तिंयातौ पुनः कतिपयैः जन्मभिः स्थानंप्रपत्स्येते एवंआदिसूकरः हिरण्याक्षंहत्वाअंतर्हितः ३१ ३२ ३३ ३४ ३५ ३६ इदंआख्यानंयःशृणोति श्रावयेत् सः ब्रह्मवधादपिमुच्यते ३७ एतत् महापुण्यंधन्यंयशस्यंशृण्वतामंतेनारायणः स्वगतिंददाति ३८ ॥ ॥ इतितृतीयेएकोनविंशः १९ ॥ ॥ ७ ॥ ॥ शौनकउवाच ॥ ॥ मनुः महींस्थानं प्राप्य प्राणिनः कैरुपायैः सृष्टवान् १ २ ३

१ 'हेविदुर'इतिमुद्रितपु०पा० ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका

(विरजाःनिर्मलः एवंभूतः क्षत्ता) कुशावर्त्तेगंगाद्वारे (आसीनंमैत्रेयं) ४ यत्किमपिपृच्छत्तुकिंतवेतिचेत्तत्राह तयोरिति (गांगाः गांग्यः) अघघ्नीः अघघ्न्यः कथाः नूनं प्रवृत्ताः ५ कीर्तन्यानिकीर्तनार्हाणिउदाराणिकर्माणियस्य (तस्य) हरेः (ताः कथाः ननुप्रायेणकीर्तिताएवेतिचेत्तत्राह रसज्ञइत्यादि) ६ एवमितिव्यासवाक्यं उग्रश्रवारोमहर्षणपुत्रः नैमिषमयनमाश्रयोयेषाम् अर्पितमध्यात्मंमनोयेन ७ गोः (भुवः) उद्धरणम् लीलांहिरण्याक्षंचावज्ञयाहतंनिशम्यभारतोविदुरः ८ (प्रजायाः सृष्टिविषयेमरीच्यादीन् सृष्ट्वाततः किमारभतहेब्रह्मन्) यस्मात् त्वमव्यक्तमार्गवित् (परोक्षप्रकारंवेत्सीत्यर्थः) ब्रह्मणोवाविशेषणम् (अव्यक्तस्यप्रपंचस्यप्रकारंवेत्तीति) ९ एतज्जगत्अभावयन्उत्पादयामासुः १० सद्वितीयाः सभार्याः (स्वतंत्राः) भार्यानपेक्षाः कर्मसुप्रजासर्गादिषु संहताः परस्परापेक्षाः (सर्वेपि) इदंजगत् ११ब्रह्माकिमारभतेतिप्रश्नस्यपक्षादीन्सृष्टवानित्युत्तरंवक्तुंपूर्वोक्तांसृष्टिमनुस्मारयतिदैवेनेतिसप्तभिः मन्वादिप्रश्नानांतूत्तराध्यायमारभ्योत्तरंभाविष्यति दुर्वितर्क्येणदैवेनजीवादृष्टेनपरेण प्रकृत्याधिष्ठात्रा महापुरुषेणअनिमिषेणकालेनचहेतुनाभगवतोनिर्विकारात्जातक्षोभंयद्गुणत्रयंप्रधानंतस्मान्महानासीत् तदुक्तंतंत्रे "विष्णोस्तुत्रीणिरूपाणिपुरुषाख्यान्यथोविदुः प्रथमंमहतः स्रष्टृद्वितीयंत्वंडसंस्थितम् तृतीयंसर्वभूतस्थंतानिज्ञात्वाविमुच्यत" इति । १२ महतोजातोभूतादिरहंकारस्त्रिलिंगः त्रिगुणः रजःप्रधानादिति स्वतःसत्त्वप्रधानस्यापिमहतोऽहंकारोत्पत्तिकालेकार्यानुरूपरजःप्रधानत्वंभवतीतिभावः पंचशः तन्मात्राणिमहाभूतानि ज्ञानेंद्रियाणि कर्मेंद्रियाणि तत्तद्देवताचेतिपंचपंचससर्जेत्यर्थः १३ भौतिकं हैममंडं एकैकशः प्रत्येकंस्रष्टुमसमर्थानिसंतिसंहत्यससृजुः १४ (अशयिष्टशिश्ये) अन्ववात्सीत्अधिष्ठितवान् १५ सहस्रार्काणामिवऊरुर्दीधितिर्दीप्तिर्यस्यतत् सर्वजीवनिकायानां (सर्वेषांजीवसमूहानां) ओकःस्थान- (भूतं) पद्मम् स्वराट्ब्रह्मा १६

श्लोकाः ४/१६

किमन्वपृच्छन्मैत्रेयंविरजास्तीर्थसेवया ॥ उपगम्यकुशावर्त्तआसीनंतत्त्ववित्तमम् ४ तयोःसंवदतोःसूतप्रवृत्ताह्यमलाःकथाः ॥ आपोगांगाइवाघघ्नीर्हरेःपादांबुजाश्रयाः ५ तानःकीर्तयभद्रंतेकीर्तन्योदारकर्मणः ॥ रसज्ञःकोनुतृप्येतहरिलीलाऽमृतंपिबन् ६ एवमुग्रश्रवाःपृष्टऋषिभिर्नैमिषायनैः ॥ भगवत्यर्पिताध्यात्मस्तानाहश्रूयतामिति ७॥ सूतउवाच ॥ हरेर्धृतक्रोडतनोःस्वमाययानिशम्यगोरुद्धरणंरसातलात् ॥ लीलांहिरण्याक्षमवज्ञयाहतंसंजातहर्षोमुनिमाहभारतः ८ ॥ विदुरउवाच ॥ प्रजापतिपतिःसृष्ट्वाप्रजासर्गेप्रजापतीन् ॥ किमारभतमेब्रह्मन्प्रब्रूह्यव्यक्तमार्गवित् ९ येमरीच्यादयोविप्रायस्तुस्वायंभुवोमनुः ॥ तेवैब्रम्हणआदेशात्कथमेतदभावयन् १० सद्वितीयाःकिमसृजन्स्वतंत्राउतकर्मसु ॥ आहोस्वित्संहताःसर्वइदंस्मसमकल्पयन् ११ ॥ मैत्रेयउवाच ॥ दैवेनदुर्वितर्क्येणपरेणाऽनिमिषेणच ॥ जातक्षोभाद्भगवतोमहानासीद्गुणत्रयात् १२ रजःप्रधानान्महतस्त्रिलिंगोदैवचोदितात् ॥ जातःससर्जभूतादिर्वियदादीनिपंचशः १३ तानिचैकैकशःस्रष्टुमसमर्थानिभौतिकम् ॥ संहत्यदैवयोगेनहैममंडमवासृजन् १४ सोऽशयिष्टाब्धिसलिलेआंडकोशोनिरात्मकः ॥ साग्रंवैवर्षसाहस्रमन्ववात्सीत्तमीश्वरः १५ तस्यनाभेरभूत्पद्मंसहस्रार्कोरुदीधिति ॥ सर्वजीवनिकायौकोयत्रस्वयमभूत्स्वराट् १६

चूर्णिका

तथाविदुरः मैत्रेयंगंगाद्वारेस्थितंकिमपृच्छत् ४ तयोः संवदतोः प्रवृत्ताः याः हरिकथाः ताःनः कीर्तय ५ ६ एवं पृष्टः सूतः आह ७ हेशौनक आदिवराहस्यचरितंश्रुत्वाजातहर्षोविदुरः मैत्रेयंप्राह ८ ॥ विदुरउवाच ॥ ब्रह्मामरीच्यादीन्सृष्ट्वाकिमारभत ९ किंच येमरीच्यादयः मनुश्चतेइदंकथमुत्पादयामासुः १० ११॥ मैत्रेयउवाच ॥ गुणत्रयाद्भगवतो महानासीत् १२ रजःप्रधानान्महतः पंचभूतानिउत्पन्नानि १३ नउत्पन्नाःमहदादयःहैमंअंडंअसृजन् १४ तन्मध्यविराड्रूपस्यविष्णोः नाभिपद्मात् ब्रह्माअभूत् १५ १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. तृ. यः सलिलाशयेगर्भोदकस्यांतः (शेषपर्यंके) शेतेतेनभगवताऽनुविष्टोऽधिष्ठितःसन्‌सस्वराट्स्वयासंस्थयानामरूपादिक्रमेण (लोकसंस्थां) लोकव्यवस्थां (निर्ममे) १७ छायाप्रभाप्रतियोगिनीतयाअबुध्ये अ०
त्यर्थः यस्त्वबुद्धिकृतःप्रभोरित्युक्तत्वात् महातमइतिमहामोहः स्वरूपनिर्देशमात्रविवक्षयामोहइतिप्रथमाप्रयोगः १८ तदेवंप्रथमोक्तांसाधारणांसृष्टिमनूद्यकेनचिद्विशेषेणासाधारणांसृष्टिमाह विससर्जेत्या
टीका दिनायावत्समाप्ति (तमोमयंतमोगुणक्षोभात्प्राप्तंमनसितद्विकारामित्यर्थः विससर्जजहौ) तांद्विसृष्टंकायंरात्रिरूपंततएवजातानियक्षरक्षांसिजगृहुःक्षुत्तृषोःसमुद्भवोयस्यांतांअत्रचयास्यसातनूरासीत्तामपोहत्सा ॥२०॥
तामिस्राभवदित्यादिश्रुतिरनुसंधेया १९ (क्षुधातृषाच) उपसृष्टाअभिभूताः जग्धुंअत्तुं (पितरमेव) भक्षयितुम् यतोवयंक्षुत्तृड्भ्यामर्दिताः अतएनंपितेति (कृपया) मारक्षतेत्येके अन्येतुजक्ष
ध्वंभक्षयतेतिब्रुवंतः जक्षभक्षहिंसनयोरितिधातुः २० देवोब्रह्मासंविग्नोभीतःसन् मां माजक्षतमाभक्षयताकिंतुरक्षत अहोहेयक्षरक्षांसियूयंमेप्रजाः सुता बभूविथजाताः स्थ (अत) एवमुग्रस्वभावायक्षराक्षसा
॥८३॥ जाताइत्यर्थः तत्रयेजक्षध्वमित्यूचुस्तेयक्षाः येतुमारक्षतेतितेराक्षसाः इतिज्ञेयं एतच्चतिर्यगादितामससर्गस्याप्युपलक्षणम् २१ प्रभयादीव्यन् द्योतमानो (ब्रह्मा) यायादेवताद्युतिमत्यः सात्विक्यः तास्ताः
प्रमुखतः (सर्वसृष्टिभ्यः) प्राधान्येनअसृजत्तेदेवाः देवताइतिस्त्रीत्वेननिर्दिष्टानामप्यर्थमात्रविवक्षयातेइतिपुंस्त्वेनप्रतिनिर्देशः एवंयक्षरक्षांसीत्यत्रापिज्ञेयम् तेनविसृष्टांत्यक्तांप्रभांअह्नःदिवसरूपांसतींदेवयंतः
क्रीडयंतः अहार्षुःजगृहुः २२ अदेवानितिच्छेदः 'सजघनादसुरानसृजते' तिश्रुतेः (जघनंकट्याःपुरोभागः ततः) अतिलोलुपान्स्त्रीलंपटान् अभिपेदिरेप्राप्ताः २३ परापतत्अपलायत २४ भक्तेच्छानुरूप
मात्मानंदर्शयतीतितथा तंउपव्रज्य (शरणंगत्वा) २५ पाहीतिद्वाभ्यांप्रार्थितवान् (तवप्रेरणयासृष्टवानस्मि ताः प्रजाः मां) यभितुंमैथुनेनधर्षयितुं २६ लोकानांजनानां (तवअनासन्नौअनाश्रितौपादौ
यैस्तेषाम्) २७ विविक्तंअसंदिग्धंअध्यात्मदर्शनंपरचित्तज्ञानंयस्यहरेः सोस्यब्रह्मणः कार्पण्यंदृष्ट्वाघोरांकामकश्मलांस्वतनुंविमुंचेतिउक्तवानितिशेषः (तेन) इत्युक्तश्चब्रह्मातांतनुंविमुमोच सर्वत्रतनुत्यागो
नामतत्तन्मनोभावत्यागोविवक्षितः ग्रहणंचतत्तद्भावापत्तिरितिद्रष्टव्यम् २८

सोनुविष्टोभगवतायःशेतेसलिलाशये ॥ लोकसंस्थांयथापूर्वंनिर्ममेसंस्थयास्वया १७ ससर्जच्छाययाऽविद्यांपंचपर्वाणमग्रतः ॥ तामिस्रमंधतामिस्रंतमोमो श्लोकाः
होमहातमः १८ विससर्जात्मनःकायंनाभिनंदंस्तमोमयम् ॥ जगृहुर्यक्षरक्षांसिरात्रिंक्षुत्तृट्समुद्भवाम् १९ क्षुत्तृड्भ्यामुपसृष्टास्तेतंजग्धुमभिदुद्रुवुः ॥ मार
क्षतैनंजक्षध्वमित्यूचुःक्षुत्तृडर्दिताः २० देवस्तानाहसंविग्नोमामांजक्षतरक्षत ॥ अहोमेयक्षरक्षांसिप्रजायूयंबभूविथ २१ देवताःप्रभयायायादीव्यन्प्रमुखतोऽ १७
सृजत् ॥ तेअहार्षुर्देवयंतोविसृष्टांतांप्रभामहः २२ देवोऽदेवाञ्जघनतःसृजतिस्मातिलोलुपान् ॥ तएनंलोलुपतयामैथुनायाभिपेदिरे २३ ततोहसन्सभ २८
गवानसुरैर्निरपत्रपैः ॥ अन्वीयमानस्तरसाक्रुद्धोभीतःपराऽपतत् २४ सउपव्रज्यवरदंप्रपन्नार्त्तिहरंहरिम् ॥ अनुग्रहायभक्तानामनुरूपात्मदर्शनम् २५ पाहि
मांपरमात्मंस्तेप्रेषणेनासृजंप्रजाः ॥ ताइमायभितुंपापाउपाक्रामंतिमांप्रभो २६ त्वमेकःकिललोकानांक्लिष्टानांक्लेशनाशनः ॥ त्वमेकःक्लेशदस्तेषामनास
न्नपदांतव २७ सोऽवधार्यास्यकार्पण्यंविविक्ताध्यात्मदर्शनः ॥ विमुंचात्मतनुंघोरामित्युक्तोविमुमोचह २८

चूर्णिका १७ आदौसः स्वच्छाययाअविद्यांससर्ज १८ तांतनुंअत्यजत् सारात्रिः अभवत्तांयक्षरक्षांसिजगृहुः १९ ततःब्रह्मा स्वप्रभयादेवान्असृजत् तेनविसृष्टांप्रभांदिवसः ॥८३॥
अभवत् तंदेवाजगृहुः २० २१ २२ ब्रह्माजघनात् असुरान् असृजत् तेमैथुनायप्राप्ताः ततोब्रह्माभीतः पलायित्वा २३ २४ हरिंशरणंजगाम २५ २६ २७
हरिणाउक्तः ब्रह्मातांतनुंविससर्ज २८

Nepal Sanskrit University, Balmeeki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

साहोरात्रयोः संधिरभवदितिश्रुतेः सातेनविसृष्टातनुःसायंतनीसंध्याबभूव साचकामोद्रिकवेलाअसुराश्चराजसत्वात्स्त्रीलंपटाः अतस्तां संध्यामेवस्त्रियंकल्पयित्वातेसंमोहंप्राप्ताइत्याह तामितितिभिः नूपुराभ्यांक्वणंतीचरणांभोजेयस्याः मदेनविह्वलेलोचनेयस्याः कांचीकलापेनविलसत् दुकूलंतेनाच्छन्नं (परिहितं) रोधः कटितटंयस्याः ताम् २९ आन्योन्यश्लेषयापरस्परोपमर्देनहेतुनाउत्तुंगौनिरंतरौपयोधरौयस्याः सुद्विजांसुदतीं स्निग्धोहासोलीलायुक्तमवलोकनंचयस्याः ३० व्रीडयाहेतुनागूहंतींवस्त्रांचलेनआवृण्वानांनीलानांअलकानांवरूथःस्तोमोविद्यतेयस्याः हेधर्मविदुर तांस्त्रियमुपलभ्यमत्वा (असुराःसंमुमुहुः) ३१ संमूढानांविभावनाक्रममाहअहोइति (धैर्यमेवदर्शयंतआहुः कामयमानानामस्माकंमध्ये अकामेवविसर्पतिसंचरति) ३२ (वितर्कयंतः संशयंकुर्वंतः) अभिसंभाव्यसत्कृत्यविश्रंभात् विश्वासात् कु- (-मेधसः अल्प-) -बुद्धयः (मूढधियः) ते तांपप्रच्छुः ३३ कासीतितिभिः (आहुः) कासिजात्या कस्यवाकन्या (असि हेरंभोरुअत्रतेकिंवाप्रयोजनं) हेभामिनिकोपनेरूपमेवद्रविणमनर्घ्यंवस्तुतदेवपण्यं क्रयार्हंतेनतदसमर्पणेन (दुर्भगान्तत्संभोगभाग्यरहितान्) नोऽस्मान्बाधसे ३४ किंजातिकुलादिप्रश्नेन त्वंयावाकाचिद्भव दिष्ट्याइदंतावद्भद्रंजातंयत्तवदर्शनम् किंतुकेवलं (ईक्षमाणानां) नःमनःउत्सुनोपिविमथ्नासि ३५ क्षुभितचित्तानांवाक्यमिदम् नैकत्रेति हेशालिनिश्लाघ्ये (पादपद्मं) एकत्रनजयतिनस्थिरीभवति यद्वा (नैकत्रैतिनैकधेतिवत्समस्तम्) नैकत्रअनेकगतिविलासेषुजयतिसर्वोत्कर्षेणवर्तते (कथंभूतायास्ते) पतत्पतंगंउच्चलंतंकंदुकं (घ्नंत्याः) बृहतोः स्तनयोः माराद्भीतंतवक्रुशंमध्यंविषीदतिश्राम्यति (भंगंगच्छतीत्यर्थः दृष्टिः) भ्रांतामंथरेवप्रसरति (अनुकंदुकम्) सुशिखासमूहः शोभनःकेशकलापस्ते (दृश्यतइतिशेषः) पाठांतरेसुशिखान् शोभनान् केशान् अवकीर्यमाणान्समूहबधानेत्यर्थः३६ इत्येवंसायंतनींसंध्यांअत्रचअस्तंगच्छन्सूर्यएव पतत्पतंगः मेघविच्छेदोमध्यविषादः तारकारूपादृष्टिः तमएवकेशाः इत्याद्यूह्यं (प्रमदायतीं) प्रमदेवाचरंतीं तांस्त्रियंमत्वाजगृहुः ३७ प्रहस्यआत्मानमात्मनाजिघ्रंत्याकांत्यासौंदर्येण (ससर्ज भावः शृंगारचेष्टातद्गंभीरमितिप्रहसनाघ्राणयोर्विशेषणं) प्रहसनमात्मावघ्राणंचसौंदर्यानुभावलक्षणोविकारः ३८

श्लोकाः

तांक्वणच्चरणांभोजांमदविह्वललोचनाम् ॥ कांचीकलापविलसद्दुकूलच्छन्नरोधसम् २९ अन्योन्यश्लेषयोत्तुंगनिरंतरपयोधराम् ॥ सुनासांसुद्विजांस्निग्धहासलीलाऽवलोकनाम् ३० गूहंतींव्रीडयात्मानंनीलालकवरूथिनीम् ॥ उपलभ्यासुराधर्मसर्वेसंमुमुहुःस्त्रियम् ३१ अहोरूपमहोधैर्यमहोअस्यानवंवयः ॥ मध्येकामयमानानामकामेवविसर्पति ३२ वितर्कयंतोबहुधातांसंध्यांप्रमदाकृतिम् ॥ अभिसंभाव्यविश्रंभात्पर्यपृच्छन्कुमेधसः ३३ काऽसिकस्यासिरंभोरुकोवाऽर्थस्तेऽत्रभामिनि ॥ रूपद्रविणपण्येनदुर्भगान्नोविबाधसे ३४ यावाकाचित्त्वमबलेदिष्ट्यासंदर्शनंतव ॥ उत्सुनोषीक्षमाणानांकंदुकक्रीडयामनः३५ नैकत्रतेजयतिशालिनिपादपद्मंघ्नंत्यामुहुःकरतलेनपतत्पतंगम् ॥ मध्यंविषीदतिबृहत्स्तनभारभीतंशांतेवदृष्टिरमलासुशिखासमूहः ३६ इतिसायंतनींसंध्यामसुराःप्रमदायतीम् ॥ प्रलोभयंतींजगृहुर्मत्वामूढधियःस्त्रियम् ३७ प्रहस्यभावगंभीरंजिघ्रंत्यात्मानमात्मना ॥ कांत्याससर्जभगवान्गंधर्वाप्सरसांगणान् ३८

२९ / ३८

चूर्णिका

सासंध्यास्त्रीरूपिणीअभवत् तेअसुराः क्वणच्चरणांभोजांसुनासांसुदतींदृष्ट्वाअहोरूपमहोधैर्यं कात्वंकस्यासीत्याद्युक्त्वातांस्त्रियंमत्वाजगृहुः २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ब्रह्माप्रहस्यकांत्यागंधर्वाप्सरसःससर्ज ३८

१ प्रणयात् मु०पु० पा० । २ -चातुर्यो विकारइतिपाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ज्योत्स्नांचंद्रिकारूपाम् (प्रियांमनोनेत्राल्हादकरींकांतिमतींसौंदर्यसंपन्नाम्) तएवगंधर्वादिगणाः विश्वावसुः पुरोगमोमुख्योयेषु३९ (भूतादीनामपिदेवयोनित्वाद्गंधर्वादिसृष्ट्यनंतरंतत्सृष्टिप्रसंगः) आत्मन
स्तांद्रिणाआलस्येन (भूतादीन्सृष्ट्वा) तांश्चमुक्तकेशान् (दिग्वाससोनग्नान्) वीक्ष्यनेत्रेनिमीलितवान् ४० इंद्रियाणांविक्लेदो (मलरूपः) स्रावोययातांनिद्रांप्रचक्षते येनेंद्रियविक्लेदेनहेतुनाउच्छिष्टान् (म
लिनान्) सतःध र्षयंतिभ्रांतान्कुर्वंति तंभूतादिगणंउन्मादंप्रचक्षते तंद्राजृंभिकानिद्रोन्मादहेतुत्वेनभूतादीनांतनूनांचावांतरभेदरूपंचातुर्विध्यमुक्तम्४१ऊर्जस्वंतंबलवंतंपरोक्षेणअदृश्यरूपेण४२आत्मनः सर्गो
यस्मात्तं (कायंअदृश्यरूपम् अतएवाद्यापिमांसदृष्ट्यगोचरेभ्यःपित्रादिभ्यः तत्तुष्ट्यै) यत्येनसंप्रदानत्वनिमित्तेनकवयः कर्मकोविदाः वितन्वते (विस्तृत्यददाति) साध्येभ्योहव्यंपितृभ्यःकव्यंचश्राद्धादिविधि
नाददतीत्यर्थः४३तिरोधानेनदृश्यत्वेसत्यप्यंतर्धानशक्त्या (आत्मानंदेहम्)४४प्रत्यात्म्येनप्रतिबिंबेन (देहेन किंनरान्नराभासान्) किंपुरुषान्पुरुषाभासान् असृजत् आत्माभासंप्रतिबिंबं(विलोकयन्स्वयमात्मा
नंबिंवभूतंमानयन्सन्) आत्मनात्मनोमानस्तुप्रतिबिंबदर्शिनः सुंदरस्यशिरःकंपादिचेष्टा (-रूपः) अतएवतत्सृष्टानां (किंनरादीनांमिथः) संमानेननित्यंमिथुनीभावः ४५ (तेकिंनरादयः) तत्प्रतिबिंब
रूपंरूपं (देहंजगृहुः उषसिप्रत्यूषसमये) कर्मभिस्तत्पराक्रमवर्णनैः (तंपरमेष्ठिनंगायंतः) ४६ भोगआभोगोविस्तारः पादादिप्रसारणंतद्वतादेहेन (शयानोब्रह्माप्रजासर्गेअनुपचितेवृद्धिमप्राप्ते बहुचिंतया
जातक्रोधात् (तद्वपुः भोगक्रोधादियुक्तं (उत्ससर्ज) ४७ अमुतः अमुष्मात्देहात् येकेशाअहीयंतप्रच्युताः तेअहयोजाताः प्रसर्पतः पादाद्याकुंचनैः प्रचलतोऽमुष्मात्सर्पाःअतएवअगाः स्थिरानभवंती
तिनागाः अतिवेगवंतइत्यर्थः भोगवतोजातत्वात् भोगेनफणेनउर्वीविस्तीर्णाकंधरायेषाम् सेर्वेचतेक्रोधयोगात्क्रूराः तेषांअवांतरजातिभेदः सर्पसिद्धांतेप्रसिद्धः (अंगहेविदुर) ४८ यदा (सआत्मानंकृतक
त्यमिव) मन्यमानोऽभूत्तदा (अंतेकायसृष्टेरवसानसमयेमनसा) मनून्ससर्ज (लोकभावनान्प्रजावृद्धिकरान्) ४९

॥८५॥

श्लोकाः ३९/४९

विससर्जतनुंतांवैज्योत्स्नांकांतिमतींप्रियाम् ॥ तएवचाददुःप्रीत्याविश्वावसुपुरोगमाः ३९ सृष्ट्वाभूतपिशाचांश्चभगवानात्मतंद्रिणा ॥ दिग्वाससोमु
क्तकेशान्वीक्ष्यचामीलयद्दृशौ ४० जगृहुस्तद्विसृष्टांतांजृंभणाख्यांतनुंप्रभोः ॥ निद्रामिंद्रियविक्लेदोययाभूतेषुदृश्यते ॥ येनोच्छिष्टान्धर्षयंतितमुन्मादं
प्रचक्षते ४१ ऊर्जस्वंतंमन्यमानआत्मानंभगवानजः ॥ साध्यान्गणान्पितृगणान्परोक्षेणासृजत्प्रभुः ४२ तआत्मसर्गंतंकायंपितरःप्रतिपेदिरे ॥ साध्येभ्य
श्चपितृभ्यश्चकवयोयद्वितन्वते ४३ सिद्धान्विद्याधरांश्चैवतिरोधानेनसोऽसृजत् ॥ तेभ्योऽददात्तमात्मानमंतर्धानाख्यमद्भुतम् ४४ सकिन्नरान्किंपुरुषान्प्र
त्यात्म्येनासृजत्प्रभुः ॥ मानयन्नात्मनात्मानमात्माभासंविलोकयन् ४५ तेतुतज्जगृहूरूपंत्यक्तंयत्परमेष्ठिना ॥ मिथुनीभूयगायंतस्तमेवोषसिकर्मभिः ४६
देहेनवैभोगवताशयानोबहुचिंतया ॥ सर्गेऽनुपचितेक्रोधादुत्ससर्जहतद्वपुः ४७ येऽहीयंतामुतःकेशाअहयस्तेंगजज्ञिरे ॥ सर्पाःप्रसर्पतःक्रूरानागाभो
गोरुकंधराः ४८ सआत्मानंमन्यमानःकृतकृत्यमिवात्मभूः ॥ तदामनून्ससर्जांतेमनसालोकभावनान् ४९

चूर्णिका

तेनत्यक्तातनुःज्योत्स्नाअभवत् तांविश्वावसुपुरोगमाःजगृहुः ३९ ब्रह्मास्वालस्येनभूतपिशाचान् असृजत् दिगंबरान्तान्वीक्ष्यदृशौअमीलयत् ४० तेनत्यक्तांजृंभमाणाख्यांतनुं
तेजगृहुःययाजनेपुनिद्राइंद्रियस्रावश्चदृश्यते ४१ ब्रह्मास्वबलेनपरोक्षयेणसाध्यान् पितृगणांश्चअसृजत् तेतांजगृहुः ४२ तिरोधानेनसिद्धान्विद्याधरान्असृजत् तेतांजगृहुः
४३ प्रतिबिंबेनकिन्नरान् किंपुरुषान् असृजत्तेतांजगृहुः ४४ ४५ ४६चिंतयाशयानःब्रह्मासृष्टिवृद्धिअदृष्ट्वाक्रोधात्वपुःउत्ससर्जतदाकेशपादाद्याकुंचनतःसर्पाहिनागाःजाताः
४७ ४८ अथब्रह्माएकदाआत्मानंकृतकृत्यंमन्यमानःमनून्ससर्ज ४९

CC-0. In Public Domain. Digitization by eGangotri

तेभ्यःस्वीयं पुरुषं पुरुषाकारंपुरंदेहं अत्यसृजत् ददौ (येपुरासृष्टादेवास्ते) तान्मनून् ५० (प्रशंसामेवदर्शयतिअहोइतिहेजगद्विधातः) तेत्वयाकृतमेतत्सुकृतं (सुष्ठुकृतंइतोधिकंनास्तीत्यर्थः) तंदेवाहुः यस्मिन्मनुसर्गेक्रियाअग्निहोत्राद्याः अतोस्मिन्सर्वेवयंसाकंसहअन्नंहविर्भागादिअदामभक्षयाम हेब्रह्मन् ५१ कार्यसृष्टिमुक्त्वाऋषीणांसृष्टिमाह तपसेति विद्याउपासना योगोत्रासनादिःसुसमाधिःवैराग्यैश्वर्यादियुक्तः समाधिः तेनचयुक्तःहृषीकेशः स्ववशेंद्रियः सन्नृषिर्ब्रह्मा ऋषीन्प्रजाः ससर्ज ५२ (तेभ्यऋषिभ्योब्रह्मादेहस्यैकैकमंशमदात्) किंतद्देहंयस्यांशमदादित्यतआह यदिति समाधिश्चयोगर्द्धिश्चतपश्चविद्याचविरक्तिश्चविद्यंतेयस्मिंस्तत् ५३ ॥ ॥ इतितृतीयेविंशोध्यायः २० ॥ ॥ ७ ॥ ॥ एकविंशेतपोविद्यातोषितेनतुविष्णुना कर्दमस्यमनोःपुत्र्याविवाहघटनोच्यते ॥ एधिरेएधांचक्रिरे १ धर्मंमहींचयथाजुगुपतुःरक्षतुः तन्मेवदेतितृतीयेनान्वयः २ तस्यस्वायंभुवस्य[1] ३ योगलक्षणैर्यमादिभिर्युक्तायांकतिधावीर्यंससर्जकतिपुत्रानुत्पादयामासेत्यर्थः ४ मानवींमनोःकन्यांआकूतिंप्रसूतिंचभार्यांलब्ध्वायथाभूतानिससर्ज तच्चवदेतिचकारस्यार्थः ५ सहस्राणांसमादश दशसहस्राणिसंवत्सराणीत्यर्थः ६ ततस्तस्मिंस्तपसिक्रियायोगेनपूजाप्रकारेण (चित्तैकाग्र्ययुक्तेन) संप्रपेदेसिषेवे प्रपन्नेभ्योभक्तेभ्योवराणांदातारं ७

तेभ्यःसोऽस्यसृजत्स्वीयंपुरंपुरुषमात्मवान् ॥ तान्दृष्ट्वायेपुरासृष्टाःप्रशशंसुःप्रजापतिम् ५० अहोएतज्जगत्स्रष्टःसुकृतंबततेकृतम् ॥ प्रतिष्ठिताःक्रियायस्मिन्साकमन्नमदामहे ५१ तपसाविद्ययायुक्तोयोगेनसुसमाधिना॥ऋषीनृषिर्हृषीकेशःससर्जाभिमताःप्रजाः ५२ तेभ्यश्चैकैकशःस्वस्यदेहस्यांशमदादजः॥ यत्तत्समाधियोगर्द्धितपोविद्याविरक्तिमत्५३ ॥ ॥ इतिश्रीभा० तृती० विंशतितमोध्यायः २० ॥ विदुरउवाच ॥ स्वायंभुवस्यचमनोर्वंशःपरमसंमतः ॥ कथ्यतांभगवन्यत्रमैथुनेनैधिरेप्रजाः १ प्रियव्रतोत्तानपादौसुतौस्वायंभुवस्यवै ॥ यथाधर्मंजुगुपतुःसप्तद्वीपवतींमहीम् २ तस्यवैदुहिताब्रह्मन्देवहूतीतिविश्रुता ॥ पत्नीप्रजापतेरुक्ताकर्दमस्यत्वयानघ ३ तस्यांसवैमहायोगीयुक्तायांयोगलक्षणैः ॥ ससर्जकतिधावीर्यंतन्मेशुश्रूषवेवद ४ रुचिर्योभगवान्ब्रह्मन्दक्षोवाब्रह्मणःसुतः ॥ यथाससर्जभूतानिलब्ध्वाभार्यांचमानवीम् ५ ॥ मैत्रेयउवाच ॥ प्रजाःसृजेतिभगवान्कर्दमोब्रह्मणोदितःसरस्वत्यांतपस्तेपेसहस्राणांसमादश ६ ततःसमाधियुक्तेनाक्रियायोगेनकर्दमः ॥ संप्रपेदेहरिंभक्त्याप्रपन्नवरदाशुषम् ७

श्लोकाः ५० — ७

चूर्णिका

तेभ्यःपौरुषींतनुंददौ ५० ५१ एकदाब्रह्मातपोयोगविद्यासमाधिभिःऋषीन्ससर्ज ५२ तेभ्यःतपआदिअदात् ५३ ॥ ॥ इतितृतीयेविंशः २० ॥ ॥ ७ ॥ ॥ ॥ विदुरउवाच ॥ ॥ स्वायंभुवस्यमनोःवंशःकथ्यताम् यत्रमैथुनेनप्रजाःएधिरे १ तस्यप्रियव्रतोत्तानपादौपुत्रौसप्तद्वीपवतींमहींधर्मेणरक्षतुः २ तस्यदुहितादेवहूतीताकर्दमस्यपत्नीत्वयाउक्ता ३ तस्यांसःकतिधावीर्यंससर्ज ४ रुचिःआकूत्यांदक्षःप्रसूत्यांचयथासृष्टिंचक्रतुः तद्वद ५ ॥ मैत्रेयउवाच ॥ ब्रह्मणा प्रजाःसृजइत्युक्तःकर्दमःसरस्वत्यांदशसहस्रवर्षाणिभक्त्याहरिंध्यायन् तपस्तेपे ६ ७

---

१ सुकृतत्वम् २ मनोरिति मु० पुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पुष्कराक्षःश्रीहरिःतावत्प्रसन्नःसन्शाब्दं) शब्दैकवेद्यंयद्ब्रह्मतन्मयंवपुर्दधत्तं (कर्दमं) प्रतिआत्मानंदर्शयामास ८ सकर्दमस्तंखेअवस्थितंदृष्ट्वामूर्ध्नाक्षितावपतत् गीर्भिश्चाभ्यगृणादितिचतुर्णामन्वयः (विरजंपवित्रंकर्मयस्य) पद्मंदिनविकाशि उत्पलंरात्रिविकाशि सितानांपद्मानामुत्पलानांचस्रक्यस्यतम् स्निग्धानीलाश्चयेअलकास्तेषांव्रातः (समूहो) वक्त्राब्जेयस्य (विरजसीअंबरेयस्यतम्) ९ श्वेतोत्पलंक्रीडनकंयस्य मनःस्पर्शःमनस्यानंदजनकंस्मितमीक्षणंचयस्यतम् १० वक्षसिश्रीर्यस्यकौस्तुभः कंधरायांयस्य ११ प्रीतिरेवस्वभावःस्वतःसिद्धोधर्मोयस्यतथाविधआत्मामनोयस्य (सः) १२ 'त्वामृतेपरमानंदंधिगन्यवरकामुकं अथापिकृपणंमानुगृहाणवरदानतः, बतेतिहर्षे हेईड्यनोस्माभिःसमग्रसत्त्वनिधेस्तवदर्शनात्अद्यनेत्रयोः सांसिद्ध्यंसाफल्यंजुष्टंसेवितम् त्वद्दर्शनमेवमहाफलमित्युप पादयति यस्यतवदर्शनंसद्भिरुत्तरोत्तरमापादितप्रकर्षैर्जन्मभीरूढोविरुढोयोगोयैस्तेपि (आशासतेइच्छंतीत्यर्थः) १३ सकामभक्तान्विगर्हयन्नाह यइति हेईश (येकामा) निरयेपिस्युः (सुलभाइत्यर्थः) तेषांकामानांलवायलेशाययेत्वन्माययानष्टबुद्धयस्तएवोपासते त्वंतुतेषांतान्कामानपिरासिददासि १४ यःसकामान्निंदामिसोहमपितादृशएवेत्याह तथेति गृहमेधोगृहाश्रमः तत्रधेनुंत्रिवर्गदोग्ध्रींभार्यांपरिवोढुकामःपरिणेतुमिच्छन्कामदुघश्चासावंघ्रिपश्चतस्यकल्प (द्रुमस्यतवमूलमंघ्रिमुपेयिवान्उपगतोस्मि अनुकामाद्यर्थमन्यत्किमपिदैवतमुपास्यतामतआह अशेषमूलमिति) अशेषस्यपुरुषार्थस्यमूलमेतदेव. (देवतांतरद्वारार्थलाभोपियतस्त्वन्मूलकएवततः सकामोपित्वामेवभजेदित्यर्थः) १५ ननुतर्हिमुक्त्यर्थमेवाकिंनभजासि अनधिकारादित्याह हेअधीश यस्त्वंप्रजापतिस्तस्यतववचसातंत्यादाम्नाअयंकामहतोलोकःपशुवद्बद्धः हेशुक्लधर्ममूर्तेअहंचाकिललोकानुगतःअतस्तुभ्यंबालिं (इवहरामिकरं) वहामिकर्ममयींत्वदाज्ञामनुवर्तेअनिमिषायकालात्मने तदर्थंभार्यांचेच्छामीतिचकारस्यार्थः नकेवलंलोकानुगतोबालिंवहामि किंतुऋणत्रयापाकरणार्थमपीतिकिलेत्युक्तम् १६

॥८७॥

श्लोकाः ८/१६

तावत्प्रसन्नोभगवान्पुष्कराक्षःकृतेयुगे ॥ दर्शयामासतंक्षत्तःशाब्दंब्रह्मदधद्वपुः ८ सतंविरजंकर्माणंसितपद्मोत्पलस्रजम् ॥ स्निग्धनीलालकव्रातवक्त्राब्जंविरजोंबरम् ९ किरीटिनंकुंडलिनंशंखचक्रगदाधरम् ॥ श्वेतोत्पलक्रीडनकंमनस्पर्शस्मितेक्षणम् १० विन्यस्तचरणांभोजमंसदेशेगरुत्मतः ॥ दृष्ट्वाखेऽवस्थितंवक्षःश्रियंकौस्तुभकंधरम् ११ जातहर्षोऽपतन्मूर्ध्नाक्षितौलब्धमनोरथः ॥ गीर्भिस्त्वभ्यगृणात्प्रीतिस्वभावात्माकृतांजलिः १२ ॥ ऋषिरुवाच ॥ जुष्टंबताद्याखिलसत्त्वराशेःसांसिध्यमक्ष्णोस्तवदर्शनान्नः ॥ यद्दर्शनंजन्मभिरीड्यसद्भिराशासतेयोगिनोरूढयोगाः १३ येमाययातेहतमेधसस्त्वत्पादारविंदंभवसिंधुपोतम् ॥ उपासतेकामलवायतेषांरासीशकामान्निरयेऽपियेस्युः १४ तथासचाहम्परिवोढुकामःसमानशीलांगृहमेधधेनुम् ॥ उपेयिवान्मूलमशेषमूलंदुराशयःकामदुघांघ्रिपस्य १५ प्रजापतेस्तेवचसाधीशतंत्यालोकःकिलायंकामहतोनुबद्धः ॥ अहंचलोकानुगतोवहामिबलिंचशुक्लानिमिषायतुभ्यम् १६

चूर्णिका

भगवान् कृतयुगेप्रसन्नःसन् तं प्रत्यक्षःअभूत् ८ कर्दमःहरिंदृष्ट्वा ९ १० ११ लब्धमनोरथःक्षितौमूर्ध्नापतन् तुष्टाव १२ ॥ ॥ कर्दमउवाच ॥ ॥हेभगवन्तेदर्शनात्मेअक्ष्णोःसांसिद्ध्यंजातम् १३ येकामार्थंतेचरणारविंदंभजंते तेमूढाएव १४ तथापिअहंस्त्रीकामःतेकामपूरकंअंघ्रिंनमामि १५ इत्यादि १६

१ 'विरजमकर्मि' मिति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

अनिमिषायेत्यनेनकालात्मकात्त्वत्तोभीतःकर्मकरोमीत्युक्तम् तदेदत्तुभयंत्वद्भक्तानांनास्तीत्याहद्वाभ्यां लोकान्कामाभिभूतान्तानुगतान्पशूंश्चविवेकेसत्यपिपुनःकर्मजडान्मादृशान्हित्वाअनादृत्ययेत्व चरणरूपमातपत्रं (छत्रं) श्रिताःतानेवाह त्वद्गुणानांवादःकथातदेवसीधुमदिरासंसारविस्मारकत्वात्पीयूषंरुचिकरत्वात्तेननिर्यापितावि‌लापितादेहधर्माःक्षुत्पिपासादयोयैःएषामित्युत्तरेणान्वयः १७ त वयत्रिनाभिचक्रंकालरूपंतज्जगदाच्छिद्यआकृष्यधावदपिएषांत्वद्भक्तानामायुराच्छिद्यधावन्नभवति कथंभूतंअजरंब्रह्मतस्मिन्नक्षरूपेभ्रमदितिवक्तव्येअतिभ्रमणशीलत्वात्उपचारेणभ्रमिरित्यभेदोदर्शितः अधिक मासेनसहत्रयोदशमासाअराधारायस्य त्रिशतंषष्टिश्चाहोरात्राःपर्वाणि (ग्रंथिविशेषा) यस्य शतशब्देविभक्तेरलुगार्षः षड्ऋतवोनेमय- (-श्चक्रमांता) यस्य अनंताः क्षणलवादयः (सूक्ष्मकालावयवाः) छ दाःपत्राणिपत्राकाराधाराविशेषायस्यसंततितत् त्रीणिचातुर्मास्यानिनाभयः आधारभूतानिवलयानियस्य करालस्रोतः तीव्रवेगम् एतैर्विशेषणैरेवंसंवत्सरात्मकं चक्रमुक्तमितिद्रष्टव्यम् १८ ननुनिरुपाधिकमुदासी नंमांकिंयाचसे (सत्यं) तथापिमाययाविश्वसृष्ट्यादिकर्तृत्वात्त्वमेवयाच्यइत्याह (एकइति) स्वयमेकएवसन्नपिआत्मन् आत्मन्यधिकृतयायोगमाययाहेतुना याः स्वीकृताः शक्तयःसत्त्वाद्यास्ताभिःअदो विश्वं (सृजसिरक्षसिसंहरिष्यसिच) स्वव्यतिरिक्तसाधनानपेक्षत्वेदृष्टांतःयथेति (तथाचश्रुतिः ' यथोर्णनाभिःसृजतेगृह्णतेचे ' ति) १९ यद्यपिमायिकत्वाद्भक्तेभ्योविषयसुखंदातुंनेच्छासि तथाप्यस्मदभिप्रा यानुसारेणतत्संपादयेत्याह नैतदिति हेअधीशनोस्माकंमजतां भूतसूक्ष्मरूपंपदं शब्दादिविषयसुखमित्यर्थः माययातनुषेविस्तारयसि (ददासि) इतियत् एतत्तवयद्यपीप्सितंनभवतितथाप्यस्मदनुग्रहायास्तु ऋणत्रयापाकरणानंतरमेवापवर्गायभवतु (भवान्) इत्यर्थः यर्हियतः माययापरिच्छिन्नइवलसंत्पातुलस्यायुक्तस्त्वंविलक्षितोसि एवंभूतस्यतवदर्शनंयतोभुक्तिमुक्तिप्रदमित्यर्थः २० तंत्वात्वांभुक्तिमुक्तिप्रदंन मामि मुक्तिप्रदत्वेहेतुः अनुभूत्याज्ञानेनउपरतः (विरतिंप्राप्तः) क्रियार्थः कर्मफलभोगोयस्मिन् भोगप्रदत्वेहेतुः स्वमाययाआवर्तितंलोकतंत्रंविश्वोपकरणंयेन अतः सकामैः निष्कामैश्चनमनीयंपादसरो जयुगंयस्यतम् तत्रअल्पीयसिसकामेपुंसिभजनेवाकामान्वर्षतीतितथा (तम्) २१ (इत्येवंअव्यलीकं निष्कपटंस्तुतः) अमृतेनसुखकरेण (प्रेमस्मिताभ्यां यदुत्कृष्टमीक्षणंतेन) विभ्रमंतीभ्रूर्यस्य २२ चैत्यंहार्दंभावंमेमया (पुरैवविदित्वा) समयोजिसंघटितम् यदर्थमेवाहंसमर्चितः (त्वया) तत् २३ (हेप्रजाध्यक्ष) मयिसंगृभीतः संगृहीतः एकाग्रीकृतः आत्माचित्तंयैस्तेषांयन्मदर्हणं (तत्) त्वादृ शेषुअतितरांसर्वथामृषानिष्फलंनस्यादेव (मदर्चनंसर्वेषां भक्तानां सफलमेवत्वद्विधानांतुझटितिसर्वथापिसफलमित्यर्थः) २४

श्लोकाः १७/२४

लोकांश्चलोकानुगतान्पशूंश्चहित्वाश्रितास्तेचरणातपत्रम्॥परस्परंत्वद्गुणवादसीधुपीयूषनिर्यापितदेहधर्माः १७ नतेऽजराक्षभ्रमिरायुरेषांत्रयोदशारंत्रिशतंष ष्टिपर्व॥षण्नेम्यनंतच्छदियत्रिणाभिकरालस्रोतोजगदाच्छिद्यधावत् १८ एकःस्वयंसन्जगतःसिसृक्षयाद्वितीययात्मन्नधियोगमायया ॥ सृजस्यदःपासिपुन र्ग्रसिष्यसेयथोर्णनाभिर्भगवान्स्वशक्तिभिः १९नैतद्बताधीशपदंतवेप्सितंयन्माययानस्तनुषेभूतसूक्ष्मम् ॥ अनुग्रहायास्त्वपियर्हिमाययालसत्तुलस्यातनुवावि लक्षितः २० तंत्वाऽनुभूत्योपरतक्रियार्थंस्वमाययावर्तितलोकतंत्रम् ॥ नमाम्यभीक्ष्णंनमनीयपादसरोजमल्पीयसिकामवर्षम् २१ ॥ ऋषिरुवाच ॥ इ त्यव्यलीकंप्रणुतोऽब्जनाभस्तमाबभाषेवचसामृतेन ॥ सुपर्णपक्षोपरिरोचमानःप्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः २२॥ श्रीभगवानुवाच ॥ ॥ विदित्वातवचैत्यं मेपुरैवसमयोजितत् ॥ यदर्थमात्मनियमैस्त्वयैवाहंसमर्चितः २३ नवैजातुमृषैवस्यात्प्रजाध्यक्षमदर्हणम् ॥ भवद्विधेष्वतितरांमयिसंगृभितात्मनाम् २४

चूर्णिका १७ १८ १९ २० २१ २२ तद्वचः श्रुत्वाभगवानुवाच ॥ २३ हेकर्दमतवेच्छांज्ञात्वाएतत्पुरैवसमयोजि २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प्रजापतेर्ब्रह्मणः पुत्रः) विख्यातं मंगलं अभ्युदयःसदाचारलक्षणं यस्य २५ हेविप्रमहिष्या (राज्या) सह (परश्वआगमिष्यति) २६ (असितापांगीं असितौ नीलद्युती नेत्रांतौ यस्यास्तां मृग लोचनाम् वयस्तारुण्यं शीलंसद्वृत्तं गुणाः सौंदर्यादयस्तैरन्विताम्) २७ यत्रयस्यांभार्यायां (अनुकूलायां) समाहितंअभिसंधानेनस्थितं (ममानुकूलाभार्यास्यादितिसंकल्पमित्यर्थः) सा नृपवधूः राजक न्या (त्वांवरिष्यति) २८ तेवीर्यंआत्मनि (स्वस्यांभृतं) धृतंयानवधाप्रसविष्यति (कन्यानवकंजनयिष्यतीत्यर्थः) सा (त्वां) भजिष्यति (त्वदीये) वीर्येवीर्यप्रसूतासुकन्यासुअंजसाआत्मनः पुत्रा न् 'आत्मावैपुत्रनामासी' तिश्रुतेः ऋषयोमरीच्यादयः आधास्यंति २९ निदेशमाज्ञांउशत्तमः शुद्धचित्तः तीर्थंपात्रंतेनदानंलक्ष्यते मयिसमर्पितसर्वकर्मफलइत्यर्थः ३० गार्हस्थ्येन (सर्वभूतेषु) दयांकृत्वा संन्यासेनच (सर्वेभ्यः) अभयंदत्त्वामयि (परमात्मनि) आत्मानं (प्रतीचं) जगच्चसहएकीभूतंद्रक्ष्यासि (आत्मनिचमामप्यखंडतयाद्रक्ष्यसि) ३१ त्वद्वीर्येणसहदेवहूत्यांतवभार्यायांस्वांशकलया अ वतीर्येतिशेषः ३२ प्रत्यग्भूतेषुअक्षेषुइंद्रियेषुजायतेआविर्भवतीतिप्रत्यगक्षजः सरस्वत्यानद्यापरिश्रितात् परिवेष्टितात् (बिंदुसरसःसकाशात्गतः) ३३ अशेषैस्तपोमंत्रादिसिद्धेश्वरैरभिष्टुतः सिद्धमार्गोवै कुंठमार्गोयस्य यद्वा (सिद्धैः सनकादिभिर्मृग्यते अन्विष्यत इतिसिद्धमार्गः) अशेषसिद्धेश्वराभिष्टुतश्चासौ सिद्धैर्मृग्यतइति सिद्धमार्गश्च (एवंभूतः) स (भगवान्) ययौ (तस्यकर्दमस्यपश्यतः सतः) पत्ररथानांपक्षिणामिंद्रो गरुडस्तस्यपक्षैरुदीर्णंअभिव्यक्तंसामआकर्णयन् 'बृहद्रथंतरेपक्षावि' तिश्रुतेः उच्चारितंस्तोमंचसामाधारभूतानामृचांसमुदायंशृण्वन् ' स्तोमआत्मे' तिश्रुतेः समासपाठेउच्चारितः स्तोत्रीयसमुदायोयस्यसाम्नइति ३४ (शुक्रेहरौगतेसति) तंकालंपरश्वइत्युक्तंप्रतिपालयन्प्रतीक्षमाणः ३५ मनुः (स्वायंभुवः) शातकौंभाःसौवर्णाःपरिकरायस्मिन्तंरथमास्थायदुहितरंचारोप्यवरा न्वेषणार्थंपर्यटन्सन् ३६

श्लोकाः २५/३६

प्रजापतिसुतःसम्राण्मनुर्विख्यातमंगलः ॥ ब्रह्मावर्तंयोधिवसन्शास्तिसप्तार्णवांमहीम् २५ सचेहविप्रराजर्षिर्महिष्याशतरूपया ॥ आयास्यतिदिदृक्षुस्त्वां परश्वोधर्मकोविदः २६ आत्मजामसितापांगींवयःशीलगुणान्विताम् ॥ मृगयंतींपतिंदास्यत्यनुरूपायतेप्रभो २७ समाहितंतेहृदयंयत्रेमान्परिवत्सरान् सात्वांब्रह्मन्नृपवधूःकाममाशुभजिष्यति २८ यातआत्मभृतंवीर्यंनवधाप्रसविष्यति ॥ वीर्येत्वदीयेऋषयआधास्यंत्यंजसाऽऽत्मनः २९ त्वंचसम्यग नुष्ठायनिदेशंमउशत्तमः ॥ मयितीर्थीकृताशेषक्रियार्थोमांप्रपत्स्यसे ३० कृत्वादयांचजीवेषुदत्त्वाचाभयमात्मवान् ॥ मय्यात्मानंसहजगद्द्रक्ष्यस्यात्म निचापिमाम् ३१ सहाहंस्वांशकलयात्वद्वीर्येणमहामुने ॥ तवक्षेत्रेदेवहूत्यांप्रणेष्येतत्त्वसंहिताम् ३२ मैत्रेयउवाच ॥ ॥ एवंतमनुभाष्याथभगवान्प्र त्यगक्षजः ॥ जगामबिंदुसरसःसरस्वत्यापरिश्रिताद् ३३ निरीक्षतस्तस्यययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः ॥ आकर्णयन्पत्ररथेंद्रपक्षैरुच्चारितंस्तोममु दीर्णसाम ३४ अथसंप्रस्थितेशुक्लेकर्दमोभगवानृषिः ॥ आस्तेस्मबिंदुसरसितंकालंप्रतिपालयन् ३५ मनुःस्यंदनमास्थायशातकौंभपरिच्छदम् ॥ आरोप्य स्वांदुहितरंसभार्यःपर्यटन्महीम् ३६

चूर्णिका

२५ २६ मनुः परश्वः स्वस्त्रियाशतरूपयासहत्वत्समीपंएत्यदेवहूतिंस्वांकन्यांतवदास्यति २७ त्वत्तःतस्यांनवकन्याःभविष्यंति २८ ऋषयःतवकन्यासुसृष्टिंकरिष्यंति २९ ३० ३१ अहंकलयात्वद्वीर्येणतवक्षेत्रेदेवहूत्यांभूत्वातत्त्वसंहितांप्रणेष्ये ३२ ॥ ॥ मैत्रेयउवाच ॥ ॥ इत्युक्त्वाभगवान् अंतर्हितःकर्दमश्चबिंदुसरोवरेतंकालंप्रतीक्षन् तस्थौ ३५ तदामनुःपत्नीकन्याभ्यांसहस्यंदनमास्थायभगवदाज्ञयाबिंदुसरोवरसमीपेकर्दमस्यआश्रमंअगात् ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हेसुधन्वन् विदुर यत् अहः (संदिष्टवान्तस्मिन्उपायात् उपाययौ शांतव्रतस्यपूर्णनियमस्यकर्दमस्य) ३७ तत्प्रवेशमात्रेणपरमानंदंप्राप्तइतिदर्शयितुंआश्रमंवर्णयातियस्मिन्नित्यादिसप्तभिःश्लोकैः प्रपन्नेकर्दमे (अर्पितयाकृपयासंपरीतस्यव्याप्तस्यभगवतोनेत्रात्हर्षाश्रुबिंदवोयस्मिन्नाश्रमेन्यपतन्अतोहर्षकरंतद्बिंदुसरइतिप्रसिद्धम्) ३८ शिवं आरोग्यं अमृतवत्स्वादुजलंयस्मिन् (सरस्वत्यानद्यापरिप्लुतंपरिवेष्टितम्) ३९ कूजंतः पुण्यामृगाद्विजाश्चपक्षिणोयेपुतैः पुण्यद्रुमलतानांजालैःसमूहैर्युक्तम् ४० (मत्तैर्द्विजगणैः कपोतादिसमूहैः) घुष्टंनादितंमत्तभ्रमराणांविभ्रमोविनोदोयस्मिन् मत्तार्बाहणएवनटास्तेषामाटोपोनृत्यसंभ्रमोयस्मिन् आह्वयंतःमिथः (पांथान्वाआमंत्रयंतइव) मत्ताःकोकिलायस्मिन् ४१ कदंबादिभिर्वृक्षैरलंकृतम् (चूतपोतैः कोमलैराम्रैः) ४२ कारंडवादिभिः पक्षिभिः वल्गुयथातथाकूजितम् ४३ हरिणादिभिर्वृतम् तत्रक्रोडः सूकरः श्वावित्शल्लकः मर्कोमर्कटः तद्विशेषोगोपुच्छः हरिर्वानरः सिंहोवा नाभिः कस्तूरिकामृगः ४४ हुतः हुताशनोत्रब्रह्मचारियोग्योयेनतं (कृतसमिदाधानमित्यर्थः) ४५ (तपसिविषये) उग्रायुक्योगोयस्यतेनवपुषाविद्योतमानम् (ननुतीव्रतपस्त्वेनशरीरकार्कश्येकथमियंराजकन्याप्रीयेततत्राह नातिक्षाममिति भगवत्कर्तृकस्नेहयुक्तकटाक्षनिरीक्षणेन तथा) तस्यभगवतोव्याहृतंभाषणमेवअमृतकलाअमृतमयस्यचंद्रस्यकलातन्मयंपीयूषं तस्यश्रवणेनचनातिक्षामं तपसापूर्वक्रशं संतमपि (भगवत्कृतावलोकनसंभाषणजनितसुखेनतदानीम्) अक्रशमित्यर्थः ४६ प्रांशुमुन्नतंउपसंसृत्यसमीपंगत्वामलिनंददर्शेतिपूर्वैवाक्रिया (मलिनत्वेपिवरणीयत्वमाह यथेति) अर्ह्यतेपूज्यतेअनेनेति अर्हणंमहारत्नंतत् असंस्कृतंअनिर्णिक्तंयथामलिनंदृश्यतेतद्वत् ४७ उटजंपर्णशालांप्राप्तंपुरः पादसमीपेप्रणतंआशीर्भिरभिनंद्यअनुरूपया (पूज्यपूजकयोग्यया) पूजयाप्रत्यगृह्णात्सत्कृतवान् ४८ (संयतंस्वस्थाचित्तम्) ४९

श्लोकाः ३७—४९

तास्मिन्सुधन्वन्नहनिभगवान्यत्समादिशत् ॥ उपायादाश्रमपदंमुनेःशांतव्रतस्यतत् ३७ यस्मिन्भगवतोनेत्रान्न्यपतन्नश्रुबिंदवः ॥ कृपयासंपरीतस्यप्रपन्ने
ऽर्पितयाभृशम् ३८ तद्वैबिंदुसरोनामसरस्वत्यापरिप्लुतम् ॥ पुण्यंशिवामृतजलंमहर्षिगणसेवितम् ३९ पुण्यद्रुमलताजालैःकूजत्पुण्यमृगद्विजैः ॥ सर्वर्तु
फलपुष्पाढ्यंवनराजिश्रियान्वितम् ४० मत्तद्विजगणैर्घुष्टंमत्तभ्रमरविभ्रमम् ॥ मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलम् ४१ कदंबचंपकाशोककरंजबकु
लासनैः ॥ कुंदमंदारकुटजैश्चूतपोतैरलंकृतम् ४२ कारंडवैःप्लवैर्हंसैःकुररैर्जलकुक्कुटैः ॥ सारसैश्चक्रवाकैश्चचकोरैर्वल्गुकूजितम् ४३ तथैवहरिणैःक्रोडैःश्वा
विद्गवयकुञ्जरैः ॥ गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतम् ४४ प्रविश्यतत्तीर्थवरमादिराजःसहानुगः ॥ ददर्शमुनिमासीनंतस्मिन्हुतहुताशनम् ४५ विद्यो
तमानंवपुषातपस्युग्रयुजाचिरम् ॥ नातिक्षामंभगवतःस्निग्धापांगावलोकनात् ॥ तद्व्याहृतामृतकलापीयूषश्रवणेनच ४६ प्रांशुंपद्मपलाशाक्षंजटिलं
चीरवाससम् ॥ उपसंसृत्यमलिनंयथार्हणमसंस्कृतम् ४७ अथोटजमुपायातंनृदेवंप्रणतंपुरः ॥ सपर्यया पर्यगृह्णात्प्रतिनंद्यानुरूपया ४८ गृहीतार्हणमासी
नंसंयतंप्रीणयन्मुनिः ॥ स्मरन्भगवदादेशमित्याहश्लक्ष्णयागिरा ४९

चूर्णिका ३७ कीदृशंतं ऋषिसेवितंनानापक्षिमृगाकीर्णकदंबबकुलाशोककुंदमंदारकुटजचूतपनसादिभिरन्वितंकारंडवहंसादिभिरन्वितंतत्र सरोवरंचदृष्ट्वातत्रासीनंमुनिंचददर्श ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ अथमुनिःआयातंमुनिंदृष्ट्वासपर्ययातंपूज्यआसीनंमनुंउवाच ४८ ४९

१ सहात्मज इति पाठो मु०पु० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२२॥

॥९१॥ तेतवचंक्रमणं (मुहुः) पर्यटनं (हेदेवहेराजन्) हियस्मात् (त्वंपालिनीपालनकर्त्रीहरेः शक्तिर्विभूतिः ५० मनुस्थंविष्णुंप्रणमति यइति स्थानेतत्तत्कार्यावसरे (अर्कादीनांरूपाणिधारयसितस्मैते) शुक्लायविष्णवे ५१ नयदेतिपंचानामयमर्थः यद्यपिधर्मसंरक्षणार्थंसर्वतः पर्यटतस्तवप्रसंगादप्यत्रागमनंसंभवतितथापिविशेषकार्यंचेदस्ति (तर्हि) तत्कथ्यतामिति जैत्रंजयप्रदंमणिगणाअर्पिताः (संयोजिता) यस्मिन्तंरथमारुह्यत्वंयदाभुवोमंडलंनपर्यटसितदासेतवो (धर्ममर्यादाः भिद्येरन्इतित्रयाणामन्वयः विस्फूर्जत्नादंकुर्वत्चंडंकोदंडंधनुर्यस्य (सःरथेनरथघोषेणेत्यर्थः अघान्दुष्कृतिनः त्रासयन्नुद्वेजयन्) ५२ स्वसैन्यस्यचरणैः क्षुण्णंसंघट्टितम् (अंशुमान्सूर्यइव बृहतींमहतींविकर्षन्) ५३ तदैवसेतवः सवर्णाश्रमाणांनिबंधनंनियमनं यैस्तेबतअहो (दस्युभिः हिंस्रैःपुरुषैः) ५४ निरंकुशैःअमर्यादैर्नृभिर्निमित्तभूतैः (समेधेतअभिवर्धेत) शयानेनिश्चिंते (त्यक्तपर्यटनेइत्यर्थः) २९ निर्व्यलीकेन (हृदा) सहर्षेण (मनसा) प्रतिपद्यामहेज्ञातुमिच्छामइत्यर्थः ५६ ॥ ॥ इतिश्रीमद्भा०तृतीयेटीका० एकविंशः २१ ॥ ॥७॥ ॥ द्वाविंशेकर्दमायादाद्यथादिष्टांहिविष्णुना मनुर्दुहितरंदेवहूतिमित्यनुवर्ण्यते एवमाविष्कृतोऽभिष्टुतः अशेषाणांगुणानांकर्मणांचउदयउत्कर्षोयस्यससम्राट्मनुः सव्रीडः (सलज्जः) इवस्वकीर्तिश्रवणात् प्रत्याख्यानशंकयावा तंमुनिं (कर्दमं) उवाच उपारतंनिवृत्तिनिरतम् १ मदीयाकन्यात्वयापरिणेयेतिविज्ञापयिष्यन् युष्मदस्मत्संबंधस्तावदीश्वरेणपूर्वमेवघटितइत्याह ब्रह्मेति सार्धाभ्याम् (आत्मपरीप्सया) आत्मनः पर्याप्तुमिच्छया छंदोमयस्यात्मनः पर्याप्तिःपालनं तच्चवेदप्रवर्तनरूपंतस्येच्छयायुष्मान्ब्राह्मणान् (कर्मज्ञानोपासनायुक्तान्)२ तत्त्राणायब्राह्मणसंरक्षणाय (सहस्रपात्पुरुषोबाहुसहस्रादसृजत्) ब्रह्मब्राह्मणजातिः (तस्यस्रष्टुः हृदयम्) क्षत्रंक्षत्रजातिः (तत्तस्यांगंप्रचक्षते एवमंगांगित्वादुभयमपितारतम्येनतस्यातिप्रियमित्यर्थः) ३

श्लोकाः ५०/३

नूनंचंक्रमणंदेवसतांसंरक्षणायते ॥ वधायचासतांयस्त्वंहरेःशक्तिर्हिपालिनी ५० योर्केंद्वग्नींद्रवायूनांयमधर्मप्रचेतसाम् ॥ रूपाणिस्थानआधत्सेतस्मैशुक्लायतेनमः ५१ नयदारथमास्थायजैत्रंमणिगणार्पितम् ॥ विस्फूर्जच्चंडकोदंडोरथेनत्रासयन्नघान् ५२ स्वसैन्यचरणक्षुण्णंवेपयन्मंडलंभुवः ॥ विकर्षन्बृहतीं सेनांपर्यटस्यंशुमानिव ५३ तदैवसेतवःसर्वेवर्णाश्रमनिबंधनाः ॥ भगवद्रचिताराजन्भिद्येरन्बतदस्युभिः ५४ अधर्मश्चसमेधेतलोलुपैर्व्यंकुशैर्नृभिः ॥ शयानेत्वयिलोकोयंदस्युग्रस्तोविनंक्ष्यति ५५ अथापिपृच्छेत्वांवीरयदर्थंत्वमिहागतः ॥ तद्वयंनिर्व्यलीकेनप्रतिपद्यामहेहृदा ५६ इतिश्रीभा० तृती० एकविंशतितमोध्यायः २१ ॥ ॥ छ॥ ॥ मैत्रेयउवाच ॥ ॥ एवमाविष्कृताशेषगुणकर्मोदयोमुनिम् ॥ सव्रीडइवतंसम्राडुपारतमुवाचह १ ॥ मनुरुवाच ॥ ॥ ब्रह्मासृजत्स्वमुखतोयुष्मानात्मपरीप्सया ॥ छंदोमयस्तपोविद्यायोगयुक्तानलंपटान् २ तत्त्राणायासृजच्चास्मान्दोःसहस्रात्सहस्रपात् ॥ हृदयंतस्यहिब्रह्मक्षत्रमंगंप्रचक्षते ३

चूर्णिका हेदेवतवागमनं सतांरक्षणाय असतांवधायत्वंहरेःपालिनीशक्तिरसि ५० ५१ ५२ ५३ ५४ ५५ हेवीरत्वांपृच्छेत्वंयदर्थंइहआगतःतत्हर्षेणस्वीकुर्महे[1] ५६ ॥ ॥ इति तृतीयेएकाविंशः २१ ॥ ॥ छ ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंउक्त्वाउपरतंमुनिंउवाच १ हेमुनेब्रह्मावेदप्रवर्तनेच्छयायुष्मान्ब्राह्मणानसृजत् २ तत्त्राणायबाहुतः अस्मान्क्षत्रियान्असृजत् तस्यत्हृदयंब्रह्मक्षत्रंअंगंइतिवदंति ३ ॥९१॥

१ स्वीकुर्महे इ०मु०पाठः ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एवमंगांगिभावेनचोभयोरस्तिसंबंधः अतएवब्रह्मक्षत्रंचान्योन्यमात्मानंरक्षतः ब्राह्मणोधर्मोपदेशादिनाक्षत्रंरक्षतिक्षत्रियश्चदस्युदमनादिनाब्राह्मणामित्यर्थः) एवं (अन्योन्यद्वारा) सदेवएवरक्षतिस्म कोसौ यः सदसदात्मकःसर्वात्मक (सर्वांतर्यामीत्यर्थः) तथापिअव्ययोनिर्विकारः ४ तंविज्ञापयितुमेवतद्दर्शनादिकमभिनंदतितवेतित्रिभिः (सर्वसंशयाः किमयंनिवृत्तिपरएवप्रवृत्तिपरश्चवाप्रवृत्तिपरत्वेपिअस्मत्प्रार्थनांप्रत्याचक्षीतवास्वीकुर्याद्वास्वीकारेपिदेवहूत्यैरोचेतवानवेत्यादयः छिन्नाः रक्षितुमिच्छोर्नृपस्यधर्मप्रजापालनादीलक्षणम्) ५ मेमयाभगवान्भवान् दिष्ट्यापूर्वपुण्येनेत्यर्थः) अंक्रतबुद्धीनांदुर्दर्शः अकृतपुण्यानां (द्रष्टुमशक्यइत्यर्थः)६ अनुग्रहोनुशासनादिरूपएवउशती उशत्यः (शुद्धाः अपावृतैः विवृतैः)७ विज्ञापयतिसभवानितिसप्तभिः दुहितुः स्नेहेनपरिक्लिष्टआत्माअंतःकरणंयस्य श्रावितंविज्ञापितम् ८ प्रियव्रतोत्तानपदोः स्वसेतिपुत्रिकाकरणशंकानिरस्ता ममसुतेतिक्षत्रकन्यातवयोग्येतिदर्शितम् ९ (शीलंसद्वृत्तम् श्रुतंशास्त्रम् रूपंलावण्यम् वयस्तारुण्यंगुणादयोदाक्षिण्यादयः) एषादेवहूतिः १० (हेद्विजश्रेष्ठउपहृतांअर्पितांगृहमानीयेतियत् तत्तस्मात्) प्रतीच्छस्वीकुरु (इतोपिगुणान्गृहाणेत्याशयेनाह सर्वात्मनायुक्तायुक्तविचारमंतरेणसर्वप्रकारेणवाअनुरूपांअनुकूलस्वभावाम् गृहमेधेषुगृहाश्रमयोग्येष्वित्यर्थः) ११ उद्यतस्यस्वतः प्राप्तस्य (कामस्य) विषयस्यप्रतिवादः प्रत्याख्यानम् (विषयानुरक्तस्यनशस्यतइति किंपुनर्वक्तव्यम्) १२ कीनाशंकृपणम् अवज्ञयापरापमानेन (मानश्चहतोभवति) १३ यस्यसावधिब्रह्मचर्यंसउपकुर्वाणः मेप्रत्तांमयादत्ताम् १४ (बाढमित्युक्तंविवृणोतिउद्वोढुकामइति) अप्रत्ताचेतिमय्येवकृतनिश्चयत्वात् कस्मैचित्प्रतिश्रुताचनभवतीत्यर्थः (अनेनसर्वथानिर्दोषासावित्युक्तम्) आद्यः प्रथमः ततः पूर्वं विवाहाभावात् (आद्यो) मुख्यइतिवा १५

॥९२॥

श्लोकाः ४/१५

अतोह्यन्योऽन्यमात्मानंब्रह्मक्षत्रंचरक्षतः ॥ रक्षतिस्माव्ययोदेवःसयःसदसदात्मकः ४ तवसंदर्शनादेवछिन्नामेसर्वसंशयाः ॥ यत्स्वयंभगवान्प्रीत्याधर्ममाहरिरक्षिषोः ५ दिष्ट्यामेभगवान्दृष्टोदुर्दर्शोयोऽकृतात्मनाम्[1] ॥ दिष्ट्यापादरजःस्पृष्टंशीर्ष्णामेभवतःशिवम् ६ दिष्ट्यात्वयाऽनुशिष्टोहंकृतश्चानुग्रहोमहान् ॥ अपावृतैःकर्णरंध्रैर्जुष्टादिष्ट्योशतीर्गिरः ७ सभवान्दुहितृस्नेहपरिक्लिष्टात्मनोमम ॥ श्रोतुमर्हसिदीनस्यश्रावितंकृपयामुने ८ प्रियव्रतोत्तानपदोःस्वसेयंदुहितामम ॥ अन्विच्छतिपतिंयुक्तंवयःशीलगुणादिभिः ९ यदातुभवतःशीलश्रुतरूपवयोगुणान् ॥ अशृणोन्नारदादेषात्वय्यासीत्कृतनिश्चया १० तत्प्रतीच्छद्विजाग्र्येमांश्रद्धयोपाहृतांमया ॥ सर्वात्मनानुरूपांतेगृहमेधेषुकर्मसु ११ उद्यतस्यहिकामस्यप्रतिवादोनशस्यते ॥ अपिनिर्मुक्तसंगस्यकामरक्तस्यकिंपुनः १२ यउद्यतमनादृत्यकीनाशमभियाचते ॥क्षीयतेतद्यशःस्फीतंमानश्चावज्ञयाहतः १३ अहंत्वाऽशृणवंविद्वन्विवाहार्थसमुद्यतम् ॥ यतस्त्वमुपकुर्वाणःप्रत्तांप्रतिगृहाणमे १४ ॥ ऋषिरुवाच ॥ ॥ बाढमुद्वोढुकामोहमप्रत्ताचतवात्मजा ॥ आवयोरनुरूपोसावाद्योवैवाहिकोविधिः १५

चूर्णिका

अतःअन्योन्यंब्रह्मक्षत्रंचरक्षतः ४ तवदर्शनादेवमेसर्वसंशयाःछिन्नाःशिवंतत्पादरजःमेशीर्ष्णास्पृष्टं ५ ६ एतत्दिष्ट्यात्वंमेश्रावितंकृपयाश्रोतुमर्हसि ७ ८ प्रियव्रतोत्तानपदोः स्वसामेकन्याइयं ९ नारदात्तवगुणादीन् श्रुत्वात्वयिकृतनिश्चयाआसीत् १० हेद्विजाग्र्यमयाश्रद्धयाउपाहृतांत्वंस्वीकुरु ११ उपस्थितस्यत्यागोविरक्तस्यापिनोचितः किंपुनःकामरक्तस्य १२ त्वंचउद्वोढुकामःइतिअशृणवम् १३१४ ॥ ॥ कर्दमउवाच ॥ ॥ अहंउद्वोढुकामःइतित्वदुक्तंबाढम् १५

॥९२॥

१ अकृतात्मनामवशीकृतचित्तानाम् । इ०मु०पु०पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(हेनरदेवतवपुत्र्याः कामः समाम्नायविधौ) प्रतीतः 'गृभ्णामितेसौभगत्वाहस्तंमयापत्ये'तिमंत्रे ('दशास्यांपुत्रानाधेहिपतिमेकादशंकृधी' तिमंत्रेच) प्रसिद्धो (विवाहलक्षणः संतानलक्षणश्चभूयात् भ
वेत्)स्वयाअंगकांत्यैवाश्रियंभूषणादिशोभां (तिरस्कुर्वतीमिव) १६ यांविलोक्य (विश्वावसुर्गंधर्वः) न्यपतत् संमोहेन (दर्शनाज्जातेनपारवश्येन सौंदर्येणवा) विमूढंव्याकुलंचेतोयस्य क्वणद्भ्या
मंघ्रिभ्यांशोभायस्यास्तां (हर्म्यस्यपृष्ठभागेअट्टालकेविक्रीडतीं कंदुकक्रीडावशात्विह्वलेचंचलेअक्षिणीयस्यास्तांविलोक्य) १७ तांललनानांललामंभूषणभूतां असेवितौश्रियश्चरणौयैस्तैरदृष्टांद्रष्टुमप्ययो
ग्यांउच्चपदः उत्तानपादस्य अभियातांस्वयंप्राप्ताम् १८ भजिष्येस्वीकरिष्ये (अत्रसमयोनाम) यावदपत्योत्पत्तिस्तावद्गार्हस्थ्यंततःपरंसन्यासइतिभाषाबंधः तमेवाह यावत्आत्मनोममतेजोगर्भंबिभृया
त् यद्वाभमात्मनोदेहात्च्युतंतेजोवीर्यंबिभृयादिति अतःपरंपारमहंस्यंज्ञानंतस्मिन्मुख्यान्शुक्लेनविष्णुनासाक्षात्प्रकर्षेणोक्तान्अविहिंस्रान्हिंसारहितान्शमादीन्बहुयथाभवतिएवमनुष्ठेयान्मन्ये १९ ननु
तवपितुःप्रजापतेराज्ञासृष्टावेवनतुसंन्यासेतत्राहयतइति संस्थास्यतेचलयंयास्यति वा वेतिएवार्थे (यत्रैवतिष्ठति एषप्रजापतीनांपतिर्भगवान्अस्मिन्नर्थेपरंप्रमाणम्)ऋणत्रयापाकरणानंतरंसंन्यासएवमादृशा
नांभगवतोक्तइत्यर्थः २० हेउग्रधन्वन्विदुर (इयदेवएतावदेवततोरविंदनाभंध्यायन्तूष्णीमासीच्च) लुलुभेमुनेर्मुखेनप्रलोभ्यतेस्म यद्वामुखेनलुलुभेप्रलोभितवान् २१ समनुःअनुअनंतरं (भाषाबंधंश्रुत्वेत्य
र्थःदेवहूत्याः) महिष्याश्चव्यवसितंनिश्चयंज्ञात्वा (तुल्यांगुणगणाढ्यामित्यर्थः) २२ पारिबर्हान्विवाहकालेप्रदेयान्भूषाःभूषणानिचवासांसिचपरिच्छदान्गृहोपकरणानिच (प्रीत्यापरिददातिस्म) २३
प्रत्तांदत्तांसदृक्षायसदृशायगताव्यथाचिंतायस्य औत्कंठ्येनउन्मथितःक्षुभित आशयश्चित्तंयस्य सउपगुह्यआश्लिष्य२४तस्याविरहंसोढुमशक्नुवन्हेअंबहेवत्सेइतिब्रुवन्संधिरार्षःशिखाःकेशानासिंचन् २५ २६

कामःसभूयान्नरदेवतेऽस्याःपुत्र्याःसमाम्नायविधौप्रतीतः ॥ कएवतेतनयांनाद्रियेतस्वयैवकांत्याक्षिपतीमिवश्रियम् १६ यांहर्म्यपृष्ठेक्वणदंघ्रिशोभांविक्रीड
तींकंदुकविह्वलाक्षीम् ॥ विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्यसंमोहविमूढचेताः १७ तांप्रार्थयंतींललनाललाममसेवितश्रीचरणैरदृष्टाम् ॥ वत्सां
मनोरुच्चपदःस्वसारंकोनानुमन्येतबुधोऽभियाताम् १८ अतोभजिष्येसमयेनसाध्वींयावत्तेजोबिभृयादात्मनोमे ॥ अतोधर्मान्पारमहंस्यमुख्याञ्छुक्लप्रो
क्तान्बहुमन्येविहिंस्रान् १९ यतोऽभवद्विश्वमिदंविचित्रंसंस्थास्यतेयत्रचवाऽवतिष्ठते ॥ प्रजापतीनांपतिरेषमह्यंपरंप्रमाणंभगवाननंतः २० ॥ मैत्रेयउवाच॥
सउग्रधन्वन्नियदेवाबभाषआसीच्चतूष्णीमरविंदनाभम् ॥ धियोपगृह्णन्स्मितशोभितेनमुखेनचेतोलुलुभेदेवहूत्याः २१ सोनुज्ञात्वाव्यवसितंमहिष्यादुहितुः
स्फुटम् ॥ तस्मैगुणगणाढ्यायददौतुल्यांप्रहर्षितः २२शतरूपामहाराज्ञीपारिबर्हान्महाधनान् ॥ दंपत्योःपर्यदात्प्रीत्याभूषावासःपरिच्छदान् २३ प्रत्तांदुहितरं
सम्राट्सदृक्षायगतव्यथः ॥ उपगुह्यचबाहुभ्यामौत्कंठ्योन्मथिताशयः २४ अशक्नुवंस्तद्विरहंमुंचन्बाष्पकलांमुहुः ॥ आसिंचन्नंबवत्सेतिनेत्रोदैर्दुहितुःशि
खाः २५ आमंत्र्यतंमुनिवरमनुज्ञातःसहानुगः ॥ प्रतस्थेरथमारुह्यसभार्यःस्वपुरंनृपः २६

श्लोकाः १६-२६

चूर्णिका अहंइमांसमयेनभाजिष्ये यावत्मेवीर्यंबिभृयात् तावत् पश्चात् पारमहंस्यान् १६ १७ १८ १९ २० ॥ ॥ मैत्रेयउवाच ॥ ॥ एवमुक्त्वातूष्णींभूतं मुनिंदृष्ट्वादेवहूत्याम
नोलुलुभे २१ तदामनुःगुणगणाढ्यायकर्दमायतुल्यांकन्यांदत्त्वाहर्षितोबभूव २२ शतरूपादंपत्योःभूषावासःपरिच्छदान्पारिबर्हान् ददौ २३ एवंविवाहंकृत्वा २४ तद्विरहं
अशक्नुवन्बाष्पकलांमुंचन् अंबवत्सेतिवदन् २५ मुनिमामंत्र्यसभार्यःसानुगःसरस्वतीतीरस्थऋषीणांआश्रमसंपदःपश्यन्सर्वसंपत्समृद्धांबर्हिष्मतींनामस्वपुरींययौ २६

१ आसिंचदंबवत्सेतीतिमु०पु०पाठः । टीकायामप्येवम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ऋषिकुल्यायाः) ऋषिकुलहितायाः (सरस्वत्या) उभयोःसुरोधसोःशोभनतटयोः २७ अभिमेत्यज्ञात्वाब्रह्मावर्तदेशात्प्रजाःपतिंप्रत्युज्जग्मुः २७ कोसौब्रह्मावर्तइत्यपेक्षायामाह यत्रबर्हिष्मतीनामपुरीति सापिकुत्र यत्रयज्ञस्ययज्ञवराहस्यरोमाणिन्यपतन्निति यत्रेतिसर्वत्रसंबध्यते २९ बर्हिष्मतीनामनिरुक्तिंब्रुवन्प्रसंगादेशस्यश्रैष्ठ्यमाहद्वाभ्यां कुशाःकाशाश्चासन् (तेरोमनिपाताः) शश्वत्नित्यंहरितंचवर्चोवर्णोयेषां (यैःकुशादिभिः) यज्ञघ्नान्राक्षसादीन्पराभाव्यपराभवंनीत्वायज्ञंविष्णुम् ३० यतइतियत्रअयजत् भुवंस्थानंलब्धेतितृन्प्रत्ययांतम् लब्धवान्सन्नित्यर्थः यतो (भुवं) लब्धवान्तंयज्ञपुरुषमितिवा यत्रकुशादिभिरसुराणांपराभवःविष्णोर्यजनंचप्रायेणयतस्तस्मात् (एतेन) स्वर्गादपिभूमिःश्रेष्ठातत्रापितत्स्थानं श्रेष्ठमित्युक्तंभवति ३१ प्रस्तुतमाह यांबर्हिष्मतींनामपुरींसमावसत्पूर्वंयस्यामुषितःतस्यांनिर्विश्यभवनंप्रविष्टःसन्भोगान्बुभुजेइत्यन्वयः अन्येषांधर्मादीनांअविरोधेनयथाकालंधर्मादीनपिसंपादयन्नित्यर्थः ३२ प्रत्यूषेषुउषस्सुसस्त्रीकैःसुरगायकैःसंगीयमानासत्कीर्तिर्यस्य तथापिस्नेहसलंग्नेनहृदास्वयंहरेरेवकथाःशृण्वन्भोगान्बुभुजे ३३ योगमायासुऐच्छिकभोगरचनासु (निष्णातमपिसुनिमननशीलंमनुं) यद्यतःआभ्रंशयितुंईषदपिभ्रंशयितुंअभिभावितुं (नशेकुः) ३४ अतःयातोयामोयस्यपक्वस्यान्नस्यतद्गतसारंभवति अतोन्यदपिगतसारंयातयाममुच्यते (तस्य) अयातयामाअगतसाराआसन् (के) स्वांतरंतदीयमन्वंतरंयापयंतियेयामाःकालावयवाः (कथंभूतस्यसतः विष्णोःकथाः कुर्वतःस्ववाक्यैरुपनिबध्नतः ३५(स्वांतरंस्वकालावधिंनिन्येयापयामास युगानांदिव्यानां वासुदेवस्यप्रसंगेनप्रकृष्टसंबंधेन) परिभूतंगतित्रयंजाग्रदादिसात्विकादिवायेन ३६ दिव्यास्त्वांतरिक्षाःमानुषाःशत्रुप्रभवाःभौतिकाःशीतोष्णादिप्रभवाः हेवैयासेविदुर (एवंयामानामयातयामत्वंव्याख्यातम्) ३७ तस्यज्ञानातिशयमाह यइति नृणांसाधारणान्धर्मान् (यथार्थभाषणादीन् वर्णधर्मान्इज्याध्ययनादीन् आश्रमधर्मान्गुरुकुलवासादीन्प्राह यतःसर्वभूतहितः) ३८ तस्ययदपत्यंदेवहूतिःतस्योदयंप्रभावम् ३९ ॥ ॥ इतितृतीयस्कंधेटीकायांद्वाविंशः २२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः २७ — ३९

उभयोर्ऋषिकुल्यायाःसरस्वत्याःसुरोधसोः ॥ ऋषीणामुपशांतानांपश्यन्नाश्रमसंपदः २७ तमायांतमभिप्रेत्यब्रह्मावर्तात्प्रजाःपतिम् ॥ गीतसंस्तुतिवादित्रैःप्रत्युदीयुःप्रहर्षिताः २८ बर्हिष्मतीनामपुरीसर्वसंपत्समन्विता ॥ न्यपतन्यत्ररोमाणियज्ञस्यांगंविधुन्वतः २९ कुशाःकाशास्तएवासञ्छश्वद्धरितवर्चसः ॥ ऋषयोयैःपराभाव्ययज्ञघ्नान्यज्ञमीजिरे ३० कुशकाशमयंबर्हिरास्तीर्यभगवान्मनुः ॥ अयजद्यज्ञपुरुषंलब्धास्थानंयतोभुवम् ३१ बर्हिष्मतींनामविभुर्यांनिर्विश्यसमावसत् ॥ तस्यांप्रविष्टोभवनंतापत्रयविनाशनम् ॥ सभार्यःसप्रजःकामान्बुभुजेऽन्याविरोधतः ३२ संगीयमानसत्कीर्तिःसस्त्रीभिःसुरगायकैः ॥ प्रत्यूषेष्वनुबद्धेनहृदाशृण्वन्हरेःकथाः ३३ निष्णातंयोगमायासुमुनिंस्वायंभुवंमनुम् ॥ यदाभ्रंशयितुंभोगानशेकुर्भगवत्परम् ३४ अयातयामास्तस्यासन्यामाःस्वांतरयापनाः ॥ शृण्वतोध्यायतोविष्णोःकुर्वतोब्रुवतःकथाः ३५ सएवंस्वांतरंनिन्येयुगानामेकसप्ततिम् ॥ वासुदेवप्रसंगेनपरिभूतगतित्रयः ३६ शारीरामानसादिव्यावैयासेयेचमानुषाः ॥ भौतिकाश्चकथंक्लेशाबाधंतेहरिसंश्रयम् ३७ यःपृष्टोमुनिभिःप्राहधर्मान्नानाविधाञ्छुभान् ॥ नृणांवर्णाश्रमाणांचसर्वभूतहितःसदा ॥ ३८ एतत्तआदिराजस्यमनोश्चरितमद्भुतम् ॥ वर्णितंवर्णनीयस्यतदपत्योदयंशृणु ३९ इतिश्री भा० तृ० स्कंधेद्वाविंशतितमोध्यायः ॥ २२ ॥

चूर्णिका

२७ तस्यांधर्माविरोधेनसभार्यःप्रजाःपालयन्यथेच्छंकामान्बुभुजे २८ २९ ३० ३१ सःवासुदेवप्रसंगेनयुगानामेकसप्ततिंकिंचिदधिकांस्वांतरंनिन्ये ३२ ३३ ३४ ३५ ३६ हरिसंश्रयंजनंक्लेशाःनबाधंते ३७ यःमुनिभिःपृष्टःसन् नानाविधान् धर्मान् प्राह ३८ आदिराजस्यअद्भुतंचरितंतेकथितंतदपत्योदयंशृणु ३९ ॥ इतितृतीयेद्वाविंशः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्रयोविंशेतपोयोगनिर्मितेसर्वसंपदि विमानेकामगेचित्रात्तयोरतिरुदीर्यते १ प्रस्थितेगमनेकृतेसति (इंगितकोविदाचित्तस्थाभिप्रायज्ञाननिपुणा पींतीनत्यीसषेवेभवं/शिवम्) १ (भोविदुरविश्रंभेणपत्युः
सेवयैवाभीष्टसिद्धिरितिनिश्चयलक्षणेनाविश्वासेन आत्मशौचेनअंतःकरणशुद्धयागौरवेणबहुमानेनेत्यर्थःशुश्रूषयानियोगादिश्रवणेच्छयासौहृदेनअनिमित्तस्नेहेनच) २ (कामोविषयाभिलाषस्तं) दंभंकपटंअघंनि
षिद्धाचरणं (त्यक्त्वाअप्रमत्तासावधानाउद्यतासेवायामुद्युक्ताचसती) तेजीयांसंअतितेजस्विनं (समतोषयत्संतुष्टंचकार) ३ (सकर्दमाख्यः दैवाद्गरीयसः) दैवादपिगुरुतरात्दैवमप्यन्यथाकर्तुं सम ॥२३॥
र्थादित्यर्थः ४ व्रतचर्ययाकर्शितां तत्रापिभूयसाकालेनातिक्षामामित्यर्थः (तत्कार्श्यंतावद्व्रतचर्याहेतुःअतिक्षामत्वेतुव्रतचर्यायादीर्घकालत्वमितिभावः) ५ (हेमानवि) सुहृत्प्रियःमदर्थेक्षपितुंक्षपयितुंनावे
क्षितःनगणितःसमुचितःश्लाघ्योपि मत्सेवासक्तयात्वयादेहोयमुपेक्षितइत्यर्थः ६ तपश्चसमाधिश्चविद्याचउपासनातासुयआत्मयोगश्चित्तैकाग्र्यंतेनविजिताःप्राप्ताःभगवत्प्रसादाःदिव्याभोगाःतानेव (ममनिरं
॥९५॥ तरोपासनया) तेअवरुद्धान्त्वयापिवशीकृतान्प्रपश्य (अवलोकय) तेदिव्यांदृष्टिंवितरामिययादृष्ट्याद्रक्ष्यसि (दिव्यानपिविषयान्) ७ (भगवत्प्रसादरूपेभ्यःअभयेभ्यएतेभ्योभोगेभ्यः) अन्ये
पुनर्भोगाःकिं नकिमपिअतितुच्छाइत्यर्थः तत्रहेतुःभगवतउरुक्रमस्ययाभ्रूः तस्याउद्विजृंभःवक्रीभावःतेनविस्रंसिताअर्थरचनामनोरथायेषुते (कालभयव्याप्ताइत्यर्थः) निजधर्मेणपातिव्रत्येनदुह्यंतइति
वथातान्नरैर्दुरधिगान्दुःप्रापान् (काभिःकृत्वा) नृपावयामितियाविक्रियास्तत्तद्भोगजन्यविकृतयःताभिः ८ अखिलायोगमायाश्चविद्याश्चतत्तदुपासनास्तासुविचक्षणंनिपुणंएवंब्रुवाणंपतिमवेक्ष्य (त
त्प्रसन्नतया) गताधिर्निश्चिंताजाता (तत्कृतसमयजन्याचिंतातत्याजेत्यर्थः अतएव) संप्रश्रयोविनयःप्रणयःप्रेमताभ्यांविह्वलागद्गदातयागिरा (आहजगादकिंभूतासती) ईषद्व्रीडासहितोयोऽ
वलोकस्तेनविलसद्विकसितंहसितंजातहासंचाननंयस्याःसा ९

श्लोकाः

॥ मैत्रेयउवाच ॥ ॥ पितृभ्यांप्रस्थितेसाध्वीपतिमिंगितकोविदा ॥ नित्यंपर्यचरत्प्रीत्याभवानीवभवंप्रभुम् १ विश्रंभेणात्मशौचेनगौरवेणदमेनच ॥ शुश्रू
षयासौहृदेनवाचामधुरयाचभो २ विसृज्यकामंदंभंचद्वेषंलोभमघंमदम् ॥ अप्रमत्तोद्यतानित्यंतेजीयांसमतोषयत् ३ सवैदेवर्षिवर्यस्तांमानवींसमनुव्र १/९
ताम् ॥ दैवाद्गरीयसःपत्युराशासानांमहाशिषः ४ कालेनभूयसाक्षामांकर्शितांव्रतचर्यया ॥ प्रेमगद्गदयावाचापीडितःकृपयाऽब्रवीत् ५ ॥ ॥ कर्दमउ
वाच ॥ ॥ तुष्टोऽहमद्यतवमानविमानदायाःशुश्रूषयापरमयापरयाचभक्त्या ॥ योदेहिनामयमतीवसुहृत्स्वदेहोनावेक्षितःसमुचितःक्षपितुंमदर्थे ६
येमेस्वधर्मनिरतस्यतपःसमाधिविद्यात्मयोगविजिताभगवत्प्रसादाः ॥ तानेवतेमदनुसेवनयाऽवरुद्धान्दृष्टिंप्रपश्यवितराम्यभयानशोकान् ७ अन्येपुन
र्भगवतोभ्रुवउद्विजृंभाविभ्रंशितार्थरचनाःकिमुरुक्रमस्य ॥ सिद्धाऽसिभुंक्ष्वविभवान्निजधर्मदोहान्दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ८ एवंब्रुवाणमबलाऽखि
लयोगमायाविद्याविचक्षणमवेक्ष्यगताधिरासीत् ॥ संप्रश्रयप्रणयविह्वलयागिरेषद्व्रीडाऽवलोकविलसद्धसिताननाऽऽह ९

चूर्णिका

॥ मैत्रेयउवाच ॥ ॥ सादेवहूतिःपितृभ्यांप्रस्थितेपतिमनोवृत्तंजानतीभवंप्रभुंभवानीवपतिंपर्यचरत् १ २ दंभादिविसृज्यतं अतोषयत् ३ एवंबहुकालेगतेसतिव्रताचरणेनकृशां ॥९५॥
तांविलोक्यकृपापूर्णःऋषिःतांअब्रवीत् ४ ५ हेमानविअद्याहंतवतुष्टोऽस्मि ६ मयास्वधर्माचरणेनयेभगवत्प्रसादाःप्राप्ताःतेमत्सेवयात्वयापिवशीकृताःतेदिव्यांदृष्टिंवितरामि
तयादृष्ट्यात्वंसर्वंद्रक्ष्यसि ७ त्वंपातिव्रत्येनसिद्धासिदिव्यान्भोगान्भुंक्ष्व ८ एवंब्रुवाणंमुनिंप्रतिदेवहूतिरुवाच ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वर्तेतिहर्षे द्विजवृषहेद्विजश्रेष्ठहेभर्तः त्वयिएतत्सर्वंराद्धंसिद्धमेवतदहमवैमिजानामि किंतु यस्तेत्वयासमयोऽभिहितःसतावद्भूयात्सकृदितिगर्भसंभवमात्रपर्यंतइत्यर्थः यस्माद्गरीयसिश्रेष्ठभर्तरिहतुभूतेस्त्रीणांप्रसे वोगुणःमहान्लाभः समासपाठेगरीयसिपत्यौसतिसतीनांयतोगुणप्रसवःगुणविस्तारो भवतिअतःपुत्रोत्पत्त्याममगुणविस्तारेजातेपश्चात्त्वदुक्तं सर्वंभवत्वितिभावः (यद्वासकृदंगसंगेनकिंमहत्फलंस्यादितित त्राह वरीयसीति पतिव्रतानांस्त्रीणांगुणोत्तमेपत्यौसकृदंगसंगोपिगुणप्रसवःगुणयुक्तंपुत्रंप्रसूतइतिगुणवत्पुत्रोत्पत्त्यासफलइति) १० अंगसंगार्थंचप्रथममितिकर्तव्यतांचसंपादयेत्याह (तत्रेति) हेईशत त्रअंगसंगेइतिकृत्यंसाधनंयथोपदेशंकामशास्त्रानुसारेणउपशिक्षसंजानीहि उपकल्पयेत्यर्थः येनसाधनेनअभ्यंगभोजनपानादिनाअतीवरंतुमिच्छयाकर्शितोदीनश्चममैषआत्मादेहःसिद्ध्येतरतिसमर्थोभवेत् क थंभूतायाःतेत्वयैवकृतःक्षोभितोयोमनोभवस्तेनधर्षितायाःतत्ततोनुरूपंभवनंचविचक्ष्ववितर्क्यविचारयेतियावत् ११ तर्हितत्क्षणमेवआविरचीकरत्आविर्भावयांबभूव १२ तदेवाविशिनष्टि सर्वकामदुघमितिनव भिः (सर्वकामान्दोग्धीतिसर्वकामदुघंसर्वेषांकामानांप्रपूरकम्) सर्वैश्वरत्नादिभिःसमन्वितं सर्वर्द्धीनांसर्वसंपदांयउपचयः (समाहारः) तस्यउदर्कउत्तरोत्तराभिवृद्धिर्यस्मिन् उपस्कृतंशोभितं१३ (दिव्यैरुप करणैःपरिकरैर्भांडादिभिरुपेतम्) पट्टिकाअल्पविस्ताराःपट्टवस्त्रविशेषाःपताकाविस्तृताःताभिः१४विचित्राणिमाल्यानिपुष्पाणियासु मंजुयथाभवत्येवंसिंजंतःध्वनिंकुर्वंतःषडंघ्रयोमधुपायासुताभिःस्रग्भिः १५ उपर्युपरिविरचितगृहेषुनिहितैःकशिपुभिःआस्तरणविशेषैःपर्यंकादिभिश्चकांतंकमनीयम् (पर्यंकामंचाःआसनानिकंबलादिरचितानिप्रसिद्धानि)१६(तत्रतत्रविनिहितैर्नानाविधैःक्रियाकौशलैःउपशोभितंमहाम रकतमय्यास्थल्याविद्रुममयीभिर्वेदिकाभिश्चजुष्टम्)१७द्वास्सुद्वारेषुविद्रुमनिर्मितादेहलीउदुंबरःतयाभातंशोभितंवज्रमणिखचितकपाटयुक्तम् इंद्रनीलमयेषुशिखरेषुप्रासादाग्रभागेषु (हेमकलशैरधिष्ठितम्) १८

श्लोकाः १०/१८

॥ देवहूतिरुवाच ॥ ॥ राद्धंबतद्विजवृषैतदमोघयोगमायाऽधिपेत्वयिविभोतदवैमिभर्त्तः ॥ यस्तेऽभ्यधायिसमयःसकृदंगसंगोभूयाद्गरीयसिगुणःप्रसवः सतीनाम् १० तत्रेतिकृत्यमुपशिक्षयथोपदेशंयेनैषमेकर्शितोऽतिरिरंसयात्मा ॥ सिध्येतते कृतमनोभवधर्षितायादीनस्तदीशभवनंसदृशंविचक्ष्व ११
॥ मैत्रेयउवाच ॥ ॥ प्रियायाःप्रियमन्विच्छन्कर्दमोयोगमास्थितः ॥ विमानंकामगंक्षत्तस्तर्ह्येवाविरचीकरत् १२ सर्वकामदुघंदिव्यंसर्वरत्नसमन्वि तम् ॥ सर्वर्द्ध्युपचयोदर्कंमणिस्तंभैरुपस्कृतम् १३ दिव्योपकरणोपेतंसर्वकालसुखावहम् ॥ पट्टिकाभिःपताकाभिर्विचित्राभिरलंकृतम् १४ स्रग्भिर्विचि त्रमाल्याभिर्मंजुसिंजत्षडंघ्रिभिः ॥ दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् १५ उपर्युपरिविन्यस्तनिलयेषुपृथक्पृथक् ॥ क्षिप्तैःकशिपुभिःकांतंपर्यंकव्यज नासनैः १६ तत्रतत्रविनिक्षिप्तनानाशिल्पोपशोभितम् ॥ महामरकतस्थल्याजुष्टंविद्रुमवेदिभिः १७ द्वास्सुविद्रुमदेहल्याभातंवज्रकपाटवत् ॥ शिखरेष्विं द्रनीलेषुहेमकुंभैरधिश्रितम् १८

चूर्णिका

हेभगवन्यःत्वयासमयःअभिहितःसःसकृत्भूयात् १० हेईशरंतुंइच्छयामयाआत्माकर्शितःसःदेहःयथारतिसमर्थोभवेत्तथाकुरुकिंचसंभोगार्हंभवनंसंपादय ११ ॥ ॥ मैत्रेयउवाच ॥ ॥ कर्दमःप्रियायाःप्रियमन्विच्छन्योगबलेनतर्ह्येवकामगंविमानंअचीकरत् १२ कथंभूतंतत् सर्वकामदुघंमणिस्तंभैःशोभितं १३ पट्टिकादिभिःअलंकृतं १४ नानावस्त्रैःविराजितं १५ १६ मरकतस्थल्याजुष्टं १७ वज्रखचितकपाटयुक्तं १८

१ 'शय्याभि, रित्येवपाठो मु०पु० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(वज्रखचितभित्तिषुरचितैः) चक्षुष्मंतइवदीप्तिमत्त्वात्येपद्मरागाग्र्यास्तैः चक्षुष्मदिवेतिवा कैः पद्मरागाग्र्यैः (जुष्टंसेवितम्) विचित्रैर्वैतानैर्वितानसमूहैः (महामूल्यैर्हैमतोरणैश्चयुक्तम्) १९ कृत्रिमान् (शोभार्थंनिर्मितान्) अपिहंसादीन् स्वान् स्वसजातीयान् (अकृत्रिमान्) मन्यमानैः (हंसादिसमूहैः) तत्रतत्राधिरुह्याधिरुह्यचनिकूजितम् २० विहारस्थानंक्रीडाप्रदेशः विश्रामः शयनगृहम् संवेशउपभोगस्थानम् प्रांगणंगृहाद्बहिः[1] (संस्कृतभूमिः) अजिरं गृहद्वारेसंस्कृतभूमिः यथोपजोषंयथासुखंआत्मनः स्वस्यमायाविनोपि (विस्मापनं) विस्मयजनकमिव (किंपुनरन्येषांविस्मापनमिति २१ नातिप्रीतेनमलिनत्वात्परिचारिकाभावाच्च (तदभिप्रायंजानातिस्मेत्याह सर्वेति) २२ अस्मिन्ह्रदेबिंदुसरसिआरुहअधिरोह शुक्लेनविष्णुनाकृतंआनंदबिंदुनिपातेन (तीर्थंआशिषामभीष्टानां) यापकंप्रापकम् २३ समादायआदृत्य सरजंमलिनम् वेणीभूतान्मलिनान् २४ (मलेनस्वेदादिनापंकेनकर्दमेनचसंछन्नंआवृतं) शबलौविवर्णौस्तनौयस्मिन् तत् सरस्वत्याःशिवानिजलानिआशेरतेयस्मिन् शिवाः (अहिंस्राः) जलाशयाजलचरायस्मिन्निति वा (तत्सरः प्रविष्टवती) २५ सातत्रनिमग्नासतीविस्मयंददर्श तमाह सांतःसरसीतिदशभिः (वेश्मगृहंतत्रस्थाःदशशतानिसहस्रंकन्यकाः किशोरवयसःतरुणीःददर्श ताः उत्पलानांगंधइवगंधोयासांताः) उत्पलगंधयः कमलगंधीः (स्त्रियः प्रोचुरित्यन्वयः) २६ तुभ्यंतवकर्मकरीः (कर्मकर्यः) परिचारिकावयंनः अस्मान्आज्ञापयेति स्त्रियःप्रोचुः२७ (स्नात्यनेनस्नानंतेन) स्नानेन स्नानयोग्यतैलादिना (मनस्विनींप्रशस्तमनसंतां नूत्नेनवीने) २८ परार्ध्यानिउत्कृष्टानि वरीयांसि (वरणीयतमानि) तत्प्रियाणिद्युमंतिदीप्तिमंतिच (सर्वगुणैर्मधुरादिषड्रसैः भक्ष्यभोज्यचोष्यलेह्यलक्षणैर्वोपितम्) पानंपेयंचअमृतंस्वादु आसवंमादकम् २९

श्लोकाः १९/२९

चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषुनिर्मितैः ॥ जुष्टंविचित्रवैतानैर्महार्हैर्हेमतोरणैः १९ हंसपारावतव्रातैस्तत्रतत्रनिकूजितम् ॥ कृत्रिमान्मन्यमानैःस्वानधिरुह्याधिरुह्य च २० विहारस्थानविश्रामसंवेशप्रांगणाजिरैः ॥ यथोपजोषंरचितैर्विस्मापनमिवात्मनः २१ ईदृग्गृहंतत्पश्यंतीनातिप्रीतेनचेतसा ॥ सर्वभूताशयाभिज्ञःप्रावोचत्कर्दमःस्वयम् २२ निमज्ज्यास्मिन्ह्रदेभीरुविमानमिदमारुह ॥ इदंशुक्लकृतंतीर्थमाशिषांयापकंनृणाम् २३ सातद्भर्तुःसमादायवचः कुवलयेक्षणा ॥ सरजंबिभ्रतीवासोवेणीभूतांश्चमूर्धजान् २४ अंगंचमलपंकेनसंछन्नंशबलस्तनम् ॥ आविवेशसरस्वत्याःसरःशिवजलाशयम् २५ साऽतःसरसिवेश्मस्थाःशतानिदशकन्यकाः ॥ सर्वाः किशोरवयसोददर्शोत्पलगंधयः२६ तांदृष्ट्वासहसोत्थायप्रोचुःप्रांजलयःस्त्रियः ॥ वयंकर्मकरीस्तुभ्यंशाधिनः करवामकिम् २७ स्नानेनतांमहार्हेणस्नापयित्वामनस्विनीम् ॥ दुकूलेनिर्मलेनूत्नेदद्दुरस्यैचमानदाः २८ भूषणानिपरार्ध्यानिवरीयांसिद्युमंतिच ॥ अन्नंसर्वगुणोपेतंपानंचैवामृतासवम् २९

चूर्णिका

विचित्रवैतानैःहेमतोरणैःजुष्टं १९ हंसपारावतैःतत्रतत्रकूजितं २० २१ यस्मिन्विमानेइंद्रादिलोकपालैःप्रार्थनार्हासर्वासंपत्तिःआसीत्ईदृक्गृहंदृष्ट्वानातिप्रीतमनाआसीत् तदातस्याःचित्तज्ञःकर्दमःतांआह २२ हेभीरुअस्मिन्बिंदुसरोवरेनिमज्ज्यविमानमारुह २३ सातत्श्रुत्वासरस्वतीमध्यस्थंसरःआविवेश २४ २५ तत्रसहस्रकन्याः उत्पलगंधयःदेवहूतिंएत्यप्रांजलयःऊचुःवयंतवदास्यः २६ २७ त्वंनःशाधिइत्युक्त्वातांस्नापयित्वादुकूलेपरार्ध्यभूषणानिसर्वगुणोपेतंअन्नंअमृतमिवपानंचददुः २८

[1] 'प्राकाराद्बहि' रिति मु॰पा॰ ।

CC-0. In Public Domain. Digitization by eGangotri

टीका

आदर्शे स्वमात्मानंदेहंददर्शेतिशेषः आत्मानांविशिनष्टिचतुर्भिः कृतंस्वस्त्ययनंमंगलंयस्य (तम्) पुंस्त्वमात्मशब्दसामानाधिकरण्यात् (विरजंनिर्मलमंबरंयस्य विरजंमलरहितम्) ३० विरजमित्यस्यप्रपंचः स्नातंउद्वर्त्यप्रक्षालितम् कृतंशिरः स्नानमभ्यंगोयेन भूषितत्वमेवाह निष्कंपदकंग्रीवायांयस्य (वलयानिकटकानिकरादिषुसंतियस्य कूजतीशब्दंकुर्वतीनूपुरेयस्य) ३१ (पूर्वपश्चिमभागापेक्षयाश्रोण्योरितिद्विवचनम् तत्राध्यस्तयानिक्षिप्तया) बहूनिरत्नानियस्यांतया (सौवर्ण्याकांच्या) रुचकेनमंगलद्रव्येणकुंकुमादिना तदुक्तंविश्वप्रकाशे "रुचकंमंगलद्रव्येग्रीवाभरणदंतयो"रिति ३२ सुदता (शोभनैर्दंतैः) सुदतासुभ्रुवाचक्षुषेतिचजातावेकवचनानि एतैर्लसत्शोभमानंमुखंयस्यकथंभूतेनचक्षुषा श्लक्ष्णोमनोहरः स्निग्धःस्नेहयुक्तोऽपांगोनेत्रप्रांतोयस्य पद्मकोशेनस्पर्धतेपद्मकोशस्पृत् तेन (पद्मकोशतुल्येनेत्यर्थः) ३३ दृष्ट्वाचयदापतिंसस्मारतदायत्रासौ (प्रजापतिःआस्ते) तत्रैवस्वयमप्यास्ते (स्त्रीभिःपरिचारिकाभिःसहदयितंप्रेष्ठम् ऋषीणांमध्येऋषभंश्रेष्ठम्) ३४ आत्मानं निशाम्यदृष्ट्वातांचतस्ययोगगतिंयोगप्रभावं दृष्ट्वा संशयंकिमिदमितिविस्मयं (प्राप) ३५ समुनिःविवाहात्प्राक् यदात्मनोनिर्मलंरूपंतदेवपुनर्बिभ्रतीं (यतः कृतमलस्नानंयया) संवीतौ (स्तनपट्टिकया) प्रावृतौरुचिरौ (शोभनौ) स्तनौ यस्याः पाठांतरेतुरूपस्यविशेषणम् ३६ शोभनेवाससीयस्याः जातोभावः प्रेमयस्यसआरोहयत् हेअमित्रहन्जितकाम ३७ तस्मिन्विमानेमुनिर्बभ्राजे (बभौ) नलुप्तोमहिमास्वातंत्र्यंयस्य (सकामस्यापिस्वातंत्र्यभंगोनाभूदित्यर्थः अनुरक्तः अनुषक्तइत्यर्थः) उपचीर्णंशुश्रूषितंवपुर्यस्य विकसितकुमुद्गणवान् अपीच्योतिसुंदरः पूर्णश्चंद्रइवमुनिः नभइवविमानम् ताराइवताःस्त्रियः (तत्ररोहिणीवदेवहूतिरितिज्ञेयम्) कुमुदानीवतासांनेत्राणीतिचज्ञेयम् ३८ तेनविमानेनअष्टलोकपालानांविहारोयस्मिन् कुलाचलेंद्रेमेरौ तस्यद्रोणीषुदरीषु अनंगस्यसखामित्रंयोमारुतः शीतसुगंधमंदानिलः तेनसौभगं (सौभाग्यं) सौंदर्यं (सुखदायकत्वं) यासुतासु सिद्धैर्नुतःस्तुतः सन् द्युधुनिर्गंगातस्याः पातेन (पतनेनशिवःस्वनो) यासुतासुरेमे ललनावरूथीस्त्रीरत्नसमूहवान् ३९ वैश्रंभकादिषुदेवोद्यानेपुमानसेचसरसिरतःप्रीतःसन् (रामयादेवहूत्यासहरेमे एवंश्लोकद्वयेनविमानस्यकामगत्वंविवृतम्) ४०

श्लोकाः ३०/४०

अथादर्शेस्वमात्मानंस्रग्विणंविरजांबरम् ॥ विरजंकृतस्वस्त्ययनंकन्याभिर्बहुमानितम् ३० स्नातंकृतशिरःस्नानंसर्वाभरणभूषितम् ॥ निष्कग्रीवंवलयिनंकूजत्कांचननूपुरम् ३१ श्रोण्योरध्यस्तयाकांच्याकांचन्याबहुरत्नया॥ हारेणचमहार्हेणरुचकेनचभूषितम् ३२ सुदतासुभ्रुवाश्लक्ष्णस्निग्धापांगेनचक्षुषा । पद्मकोशस्पृधानीलैरलकैश्चलसन्मुखम् ३३ यदासस्मारऋषभमृषीणांदयितंपतिम् ॥ तत्रचास्तेसहस्त्रीभिर्यत्रास्तेसप्रजापतिः ३४ भर्तुःपुरस्तादात्मानंस्त्रीसहस्रवृतंतदा ॥ निशाम्यतद्योगगतिंसंशयंप्रत्यपद्यत ३५ सतांकृतमलस्नानांविभ्राजंतीमपूर्ववत् ॥ आत्मनोबिभ्रतींरूपंसंवीतरुचिरस्तनीम् ३६ विद्याधरीसहस्रेणसेव्यमानांसुवाससम् ॥ जातभावोविमानंतदारोहयदमित्रहन् ३७ तस्मिन्नलुप्तमहिमाप्रिययाऽनुरक्तोविद्याधरीभिरुपचीर्णवपुर्विमाने ॥ बभ्राजउत्कचकुमुद्गणवानपीच्यस्ताराभिरावृतइवोडुपतिर्नभःस्थः ३८ तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु ॥ सिद्धैर्नुतोद्युधुनिपातशिवस्वनासुरेमेचिरंधनदवल्ललनावरूथी ३९ वैश्रंभकेसुरसनेनंदनेपुष्पभद्रके ॥ मानसेचैत्ररथ्येचसरेमेरामयारतः ४०

चूर्णिका

२९ अथदेवहूतिःआदर्शेसर्वालंकारयुक्तंतुष्टंस्वात्मानंदृष्ट्वासास्मृतिमात्रेणदासीभिःसहपतिसमीपंआस्ते ३० ३१ ३२ ३३ ३४कर्दमःविद्याधरीसहस्रेणयुक्तयास्त्रियासहविमानंआरुह्यअष्टलोकपालस्थानेषुवैश्रंभादिवनेषुसिद्धैर्नुतःतयासहचिरंरेमे ३५ ३६ ३७ ३८ ३३ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(लोकान्चरन्वैमानिकान्देवानपि) अत्यशेतअतिक्रम्यस्थितः (अनिलइतिअनावृतगतौदृष्टांतः) ४१ (एतादृशमैश्वर्यंभगवद्भक्तानांनैवदुर्लभमित्याशयेनाह किमिति) उद्दामचेतसां (अगाधबुद्धीनां) धीराणां (तीर्थपदोभगवतः) व्यसनंसंसारःतस्यात्ययोयस्मात्सः ४२ प्रेक्षयित्वादर्शयित्वा (भुवो) गोलंमंडलंस्वसंस्थयास्वीयद्वीपवर्षादिरचनयायावान्तावंतंबहून्याश्चर्याणियस्मिन्तम् ४३ विभज्यनवधात्मानंनवप्रभेदेनआत्मानंकृत्वा (योगशक्त्यानवसंख्याकानिशरीराणिगृहीत्वेत्यर्थः तत्रहेतुंदर्शयतिसुरतोत्सुकामिति नितरांरमयन्रेमे) ४४ (अपीच्येनसुंदरेणतंकालंवर्षपूगात्मकमापिनज्ञातवती) ४५ (तंकालंसंख्याति) शरदःसंवत्सराः (शतमपि) मनाक्ईषदिवव्यतीयुः ४६ आत्मनास्वदेहार्धरूपेणअतिप्रीत्याभावयन्तथासतिसदपत्यंभवेदिति नोधानवधा (इत्यर्थः) सर्वसंकल्पाविदितितस्याः बह्वपत्यसंकल्पंजानन्नित्यर्थः विभुस्तथाकर्तुंसमर्थश्च आत्मविदितिच तस्यामनासक्तत्वात्स्त्रियोजाताःइतिभावः " पुमान्पुंसोधिकेशुक्रेस्त्रीभवत्यधिकेस्त्रिया " इतिस्मृतेः (शुक्रस्याधिक्यानाधिक्येआसक्त्यानासक्तिभ्यांज्ञेये) ४७ अतःअनंतरमेवसद्यःएकस्मिन्नेवाहनिचारूणिसर्वाण्यंगानियासां (एतादृश्यआसन्) ४८ (पतिं) प्रव्रजिष्यंतमालक्ष्यवितर्क्यस्मयमाना (मंदंहसंतीबहिः) अंतस्तुविक्लवेनव्याकुलेनविदूयतासंतप्यमानेनहृदाउवाचेत्युत्तरेणान्वयः ४९ नखाएवमणयःतैःश्रीःशोभायस्यतेनपदाभुवंलिखंतीविदुरंतचिंतालक्षणं (तथाधोमुखीत्यपि) ५०(यन्मह्यंप्रतिश्रुतंतत्सर्वं) मुपोवाहसंपादितवान् अभयमितिभाविनोदैन्यात्संसाराच्चयद्भयंतन्निवर्तयेत्यर्थः ५१ तत्रदैन्यंनिवेदयति (हेब्रह्मन्) तुभ्यंतवदुहितृभिःस्वयमेवात्मनःसमायोग्याःपतयोविमृग्याइतिदैन्यंप्राप्तं संसारभयमुररीकृत्याह कश्चिदिति (त्वयिवनंप्रव्रजितेसतिमेमम) विशोकायज्ञानोपदेशाय (स्यादपिसंभवेत्किं) स्त्रीभिः ऋणानपाकरणात्कंचित्कालंत्वदवस्थानेनब्रह्मवित्पुत्रःकश्चित्स्यात्किमित्यर्थः (तस्मिन्सतिऋणापाकरणंममशोकापनोदश्चभवेदितिभावः) ५२

श्लोकाः ४१—५२

भ्राजिष्णुनाविमानेनकामगेनमहीयसा ॥ वैमानिकानत्यशेतचरँल्लोकान्यथाऽनिलः ४१ किंदुरापादनंतेषांपुंसामुद्दामचेतसाम् ॥ यैराश्रितस्तीर्थपदश्चरणोव्यसनात्ययः ४२ प्रेक्षयित्वाभुवोगोलंपत्न्यैयावान्स्वसंस्थया ॥ बह्वाश्चर्यंमहायोगीस्वाश्रमायन्यवर्तत ४३ विभज्यनवधात्मानंमानवींसुरतोत्सुकाम् ॥ रामांनिरमयन्रेमेवर्षपूगान्मुहूर्तवत् ४४ तस्मिन्विमानउत्कृष्टांशय्यांरतिकरींश्रिता ॥ नचाबुध्यततंकालंपत्याऽपीच्येनसंगता ४५ एवंयोगानुभावेनदंपत्योरममाणयोः ॥ शतंव्यतीयुःशरदःकामलालसयोर्मनाक् ४६ तस्यामाधत्तरेतस्तांभावयन्नात्मनात्मवित् ॥ नोधाविधायरूपंस्वंसर्वसंकल्पाविद्विभुः ४७ अतःसासुषुवेसद्योदेवहूतिःस्त्रियःप्रजाः ॥ सर्वास्ताश्चारुसर्वांग्योलोहितोत्पलगंधयः ४८ पतिंसाप्रव्रजिष्यंतंतदालक्ष्योशतीसती ॥ स्मयमानाविक्लवेनहृदयेनविदूयता ४९ लिखंत्यधोमुखीभूमिंपदानखमणिश्रिया ॥ उवाचललितांवाचंनिरुध्याश्रुकलांशनैः ५० ॥ ॥ देवहूतिरुवाच ॥ ॥ सर्वंतद्भगवान्मह्यमुपोवाहप्रतिश्रुतम् ॥ अथापिमेप्रपन्नायाअभयंदातुमर्हसि ५० ब्रह्मन्दुहितृभिस्तुभ्यंविमृग्याःपतयःसमाः ॥ कश्चित्स्यान्मेविशोकायत्वयिप्रव्रजितेवनम् ५२

चूर्णिका

पत्न्यैभूगोलंसर्वंदर्शयित्वापुनःस्वाश्रमंएत्य ४१ ४२ ४३ तस्यांनवधावीर्यंआदधे ४४ सासद्यःनवकन्याःसुषुवे ४५ ४६ ४७ ४८ साएकदापतिंप्रव्रजिष्यंतंआलक्ष्य उवाच ४९ ५० त्वयायत्प्रतिश्रुतंतत्संपादितम्अथापित्वंप्रपन्नायाःमेअभयंदातुंअर्हसि ५१ त्वयिवनंप्रव्रजितेसतिमेविशोकायब्रह्मवित्पुत्रःअस्तुत्वयाकन्यानांपतयःविमृग्याः ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विषयान्भुंक्ष्वकिंब्रह्मविद्ययेतिचेत्तत्राह एतावता (विषयप्रसंगेनवृथापगतेनकालेना-)लंपूर्यतां परित्यक्तःपरआत्माययातस्याःमम ५३ स्वकृतमनुशोचंत्याह इंद्रियार्थेष्वितिचतुर्भिः मेमया परंभावंत्वं ब्रह्मविदिति ५४ प्रसंगःकथमभयायास्तुतत्राह संगइति अधियाअज्ञानेन (निःसंगत्वायवैराग्याय) ५५ स्वभावतःप्रवृत्तंयस्यकर्मधर्मायनकल्पतेधर्माभिमुखंनभवेत् तत्रापिनिष्कामधर्मद्वाराविरागा यनकल्पते तद्वाराचतीर्थपदस्यहरेःसेवायैनपर्यवस्येदित्यर्थः (सद्दिश्वसन्नपिमृततुल्यः) ५६ नमुमुक्षेयमोक्तुमिच्छांनकृतवत्यस्मि ५७ ॥ ॥ इतितृतीयेत्रयोविंशः २३ ॥ ॥ ७ ॥ ॥ चतुर्विंशेततोजन्मकपिलस्याहतत्पितुः प्रव्रज्यांतमनुज्ञाप्यऋणत्रयविमोक्षतः १ शालिनींश्लाघ्यांशुक्लेनाभिव्याहृतं सहाहंस्वांशकलयेत्यादि १ (हेअनिंदितेस्तुत्ये) इत्थंमाखिदः खेदंमाकार्षीः आ त्मानंप्रतिभाग्यहीनेत्यादि अदूरात्शीघ्रं (तेतवगर्भंसंप्राप्स्यते) २ दमेनदंद्रियसंयमेननियमेनस्वधर्मेण तपांसिद्रविणदानानिचतैः ३ हृदयग्रंथिंचिज्जडात्मकमहंकारलक्षणंबंधंछेत्ताछेत्स्याति औदर्यः पु

॥१००॥ त्रःसन् ब्रह्मभावयतिउपदिशतीतितथा ४ (देवहूतिरपिगौरवेणमहत्त्वेन) श्रद्धायाविश्वस्य (कूटस्थंनिर्विकारम्)५ बहुतिथेबहुतरेकालेऽतिक्रांतेसति कार्दमंकर्दमसंबंधि (जज्ञे प्रकाशतेस्म यथाअग्निर्दारु णिस्थितोदारुतश्चाभिव्यक्तोभवतितथातस्यामंतर्यामिरूपेणसन्नपिप्रादुर्बभूवेति) ६ घनाघनाइत्येकंपदवर्षंतोमेघाः (तंगंधर्वाः) गायंतिस्म (तदा) नृत्यंतिस्म ७ अपवर्जिता मुक्ताः ८

श्लोकाः

एतावतालंकालेनव्यतिक्रांतेनमेप्रभो ॥ इंद्रियार्थप्रसंगेनपरित्यक्तपरात्मनः ५३ इंद्रियार्थेषुसज्जंत्याप्रसंगस्त्वयिमेकृतः ॥ अजानंत्यापरंभावंतथाऽप्यस्त्वभ यायमे ५४ संगोयःसंसृतेर्हेतुरसत्सुविहितोधिया ॥ सएवसाधुषुकृतोनिःसंगत्वायकल्पते ५५ नेहयत्कर्मधर्मायनविरागायकल्पते ॥ नतीर्थपदसेवायैजीवन्न पिमृतोहिसः५६साहंभगवतोनूनंवंचितामाययादृढम् ॥यत्त्वांविमुक्तिदंप्राप्यनमुमुक्षेयबंधनात्५७॥इतिश्रीभागवतेस०तृतीयस्कंधेकापिलेयोपाख्यानेत्रयो विंशतितमोऽध्यायः २३ ॥ ॥ मैत्रेयउवाच ॥ निर्वेदवादिनीमेवंमनोर्दुहितरंमुनिः ॥ दयालुःशालिनीमाहशुक्लाभिव्याहृतंस्मरन् १ ॥ ऋषिरुवाच ॥ माखिदोराजपुत्रीत्थमात्मानंप्रत्यनिंदिते ॥ भगवांस्तेऽक्षरोगर्भमदूरात्संप्रपत्स्यते २ धृतव्रतासिभद्रंतेदमेननियमेनच ॥ तपोद्रविणदानैश्चश्रद्धया चेश्वरंभज ३ सत्वयाऽऽराधितःशुक्लोवितन्वन्मामकंयशः ॥ छेत्तातेहृदयग्रंथिमौदर्योब्रह्मभावनः ४ ॥ ॥ मैत्रेयउवाच ॥ ॥ देवहूत्यपिसंदेशंगौरवेणप्र जापतेः ॥ सम्यक्श्रद्धायपुरुषंकूटस्थमभजद्गुरुम् ५ तस्यांबहुतिथेकालेभगवान्मधुसूदनः ॥ कार्दमंवीर्यमापन्नोजज्ञेऽग्निरिवदारुणि ६ अवादयंस्तदा व्योम्निवादित्राणिघनाघनाः ॥ गायंतितंस्मगंधर्वान्नृत्यंत्यप्सरसोमुदा ७ पेतुःसुमनसोदिव्याःखेचरैरपवर्जिताः ॥ प्रसेदुश्चदिशःसर्वाअंभांसिचमनांसिच ८

५३/८

चूर्णिका

तेसामर्थ्यंअजानतीअहंभगवन्माययावंचितास्मि ५३ ५४ मुक्तिदंत्वापतिंप्राप्यबंधनात्मोक्तुंइच्छांनकृतवत्यस्मि ५५ ५६ ५७ ॥ ॥ इतितृतीयेत्रयोविंशोध्यायः २३ ॥ मैत्रेयउवाच ॥ दयालुःकर्दमःखिन्नांतांअवलोक्यभगवदुक्तंस्मरन्नाह १ ॥ ॥ ऋषिरुवाच ॥ ॥ हेराजपुत्रित्वंमाखिदःभगवान्तेगर्भंशीघ्रंप्राप्स्यति २ तेहृदयग्रंथिंछेत्ताभ विष्यति ३ ४ ॥ ॥ मैत्रेयउवाच ॥ ॥ भगवान्कार्दमंवीर्यंप्राप्तःसन्तस्यांदारुणिअग्निरिवजज्ञे ५ ६ तदाव्योम्निवादित्राणिअवादयन्पुष्पवृष्टिःपपात गंधर्वाप्स रसोजगुःननृतुश्चइत्यादि ७ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

परिश्रितंवेष्टितं (स्वयंभूर्ब्रह्मा) ९ आगत्यकिंकृतवान् तदाह भगवंतमितिद्वाभ्याम् तत्त्वानांसंख्यानंयस्मिन् तस्यसांख्यस्यविज्ञप्त्यैविशेषेणज्ञापनायभगवंतंजातंविद्वान्अजोब्रह्मास्वराट्स्वतःसिद्धज्ञा
नः १० तस्यशुक्लस्यचिकीर्षितंसभाजयन् पूजयन् प्रहृष्यमाणैरसुभिरिंद्रियैरुपलक्षितःकर्दमंचेदमभ्यधादितिद्वयोरन्वयः चकाराद्देवहूतिंच ११ तत्रत्वयेतिपंचाभिः कर्दमंप्रत्याह अपचितिःपूजाकृता यद्यस्मा
न्निर्व्यलीकतःनिष्कपटंमेवाक्यंसम्यक् (जगृहे) गृहीतवान् १२ अनुमन्येतअंगीक्रियेतइतियत् एतावत्येव (शुश्रूषा) १३ (सत्यः साध्व्यः) अनेकधाअनेकविधैः प्रभावैः वंशैः बृंहयिष्यंतिवर्धयि
ष्यंति १४ ऋषिषुमुख्येभ्योमरीच्यादिभ्यः (यथारुचिस्वरुच्यनुसारेणकन्यादेहीति यद्वा यथारुचियथाशोभमित्यर्थः) १५ पुत्रस्तुसाक्षादीश्वरइत्याह वेदाहमिति शेवधिंनिधिंसर्वाभीष्टदमित्यर्थः (कपिलसंज्ञ
म्)१६देवहूतिंप्रत्याहत्रिभिः ज्ञानंशास्त्रोक्तंविज्ञानमपरोक्षंचतेएवयोगउपायः तेन (शास्त्रोपदेशेनस्वानुभवेनचेत्यर्थः) कर्मणांजटाः मूहात्रिभिःलानिवासनाउद्धरन्उत्पाटयिष्यन् पद्मसुद्रापद्मचिह्नंतद्युक्तंपदांबुजं
यस्य (यश्चहिरण्यकेशादिलक्षणसक्षितः“हिरण्यश्मश्रुर्हिरण्यकेश”इत्यादिश्रुतेः पद्माक्षःकमलनयनः)१७(एषकैटभार्दनोविष्णुः)हेमानवि (तवोदरंप्रविष्टः) अविद्यास्वरूपाज्ञानंसंशयामिथ्याज्ञानानितन्मयंतव
हृदयग्रंथिं (गांपृथ्वीं)१८ सुसंमतः सपूजितः सन् गंताप्राप्स्यति १९सहनारदः नारदसहितः कुमारैः (सनकादिभिश्चतुर्भिः) सहेतिशेषः मरीच्यादीन्विवाहार्थमवस्थाप्यनैष्ठिकैरेतैः पंचभिः सहितोहंसोब्रह्मा
त्रिधामपरमंतृतीयंधामस्वर्गःतस्यपरांकाष्ठांसत्यलोकंययौ (तौदेवहूतिकर्दमौआश्वास्य)२० शतधृतौ ब्रह्मणि (गतेविश्वसृजांमरीच्यादीनांयथोदितंप्रादात्)२१(अयच्छत्अदात् हविर्भुवहांविर्भूसंज्ञिकाम्) २२

श्लोकाः ९/२२

तत्कर्दमाश्रमपदंसरस्वत्यापरिश्रितम् ॥ स्वयंभूःसाकमृषिभिर्मरीच्यादिभिरभ्ययात् ९ भगवंतंपरंब्रह्मसत्त्वेनांशेनशत्रुहन् ॥ तत्त्वसंख्यानविज्ञप्त्यैजातंवि
द्वानजःस्वराट् १० सभाजयन्विशुद्धेनचेतसातच्चिकीर्षितम् ॥ प्रहृष्यमाणैरसुभिःकर्दमंचेदमभ्यधात् ११ ॥ ॥ ब्रह्मोवाच ॥ ॥ त्वयामेऽपचितिस्ता
तकल्पितानिर्व्यलीकतः ॥ यन्मेसंजगृहेवाक्यंभवान्मानदमानयन् १२ एतावत्येवशुश्रूषाकार्यापितरिपुत्रकैः ॥ बाढमित्यनुमन्येतगौरवेणगुरोर्वचः ॥
१३ इमादुहितरःसत्यस्तववत्ससुमध्यमाः ॥ सर्गमेतंप्रभावैःस्वैर्बृंहयिष्यंत्यनेकधा १४ अतस्त्वमृषिमुख्येभ्योयथाशीलंयथारुचि ॥ आत्मजाःपरिदेह्यद्य
विस्तृणीहियशोभुवि १५ वेदाहमाद्यंपुरुषमवतीर्णंस्वमायया ॥ भूतानांशेवधिंदेहंबिभ्राणंकपिलंमुने १६ ज्ञानविज्ञानयोगेनकर्मणामुद्धरन्जटाः ॥ हि
रण्यकेशःपद्माक्षःपद्ममुद्रापदाम्बुजः १७ एषमानवितेगर्भंप्रविष्टःकैटभार्दनः ॥ अविद्यासंशयग्रंथिंछित्त्वागांविचरिष्यति १८ अयंसिद्धगणाधीशःसांख्या
चार्यैःसुसंमतः ॥ लोकेकपिलइत्याख्यांगंतातेकीर्तिवर्धनः १९ ॥ ॥ मैत्रेयउवाच ॥ ॥ तावाश्वास्यजगत्स्रष्टाकुमारैःसहनारदः ॥ हंसोहंसेनयानेनत्रि
धामपरमंययौ २० गतेशतधृतौक्षत्तःकर्दमस्तेनचोदितः ॥ यथोदितंस्वदुहितॄःप्रादाद्विश्वसृजांततः २१ मरीचयेकलांप्रादादनसूयामथात्रये ॥ श्रद्धामंगि
रसेऽयच्छत्पुलस्त्यायहविर्भुवम् २२

चूर्णिका

ब्रह्मासांख्यशास्त्रप्रवर्तनायअंशेनजातंभगवंतंविद्वान्मरीच्यादिभिःतत्रएत्य ॥ कर्दममुवाच ९ १० ११ हेपुत्रमेवचःसम्यक्कृतम् १२ १३ इमाःकन्याःएतेभ्यःऋषिभ्यःत्वंदेहि
१४ १५ आद्यंपुरुषंकपिलंतवगृहेअवतीर्णंअहंवेद्मि १६ १७ हेमानविकैटभारिःतेगर्भंप्रविष्टःअयंतवअविद्यासंशयग्रंथिंछित्त्वागांविचरिष्यति १८ इत्युक्त्वाब्रह्माययौ १९ २०
ततःकर्दमःमरीचयेकलांकन्यांअत्रयेअनुसूयाम्अंगिरसेश्रद्धां पुलस्त्यायहविर्भुवम्पुलहायगतिम् क्रतवेक्रियाम् भृगवेख्यातिं वसिष्ठायअरुंधतीम् अथर्वणेशांतिम् अदात् २१ २२

१ सम्यतवेतिसंबोधनान्तः पाठः मु० पु० वर्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१०२॥

युक्तांयोग्याम् अयच्छददात् (क्रियांक्रियाख्यांसतींसाध्वीम्) २३ वितन्यतेसमृद्धः क्रियते (तादृशींशांतिं) शांत्यधिष्ठात्रींदेवतामित्यर्थः समलालयत् (दानमानाभ्यां) संतोषितवान् २४ निमंत्र्यपृष्ट्वानंदिंहर्षंप्राप्ताःसंतः (प्रातिष्ठन्अगमन् कृतदाराविहितभार्याः कृतोद्वाहाइत्यर्थः)२५ सचमुनिः त्रियुगं (युगत्रयेआविर्भवंतं) विष्णुं (आविर्भूतंविज्ञाय) विविक्तेरहसि२६ पापच्यमानानांभृशंदह्यमानानाम् निरये (नरकतुल्ये) संसारेस्वीयैरमंगलैः पापैः (केनचिन्महताकालेनप्रसीदंतिदयांकुर्वंतीत्यर्थः देवताः सर्वाणिदैवतानि)२७कुतः सर्वाः देवताः (बहुनाकालेन) प्रसन्नाइतिज्ञातंअलभ्यलाभादित्याहद्वाभ्यां बहुपुजन्मसु विपक्वेनसुसिद्धेनसम्यग्योगोभक्तियोगस्तस्मिन्समाधिरैकाग्र्यंतेनशून्यागारेषुविविक्तस्थानेषुयस्यतवपदं (द्रष्टुंयत्नंकुर्वंति) २८ (ग्राम्याणांअज्ञानांनोऽस्माकं) हेलनंअवज्ञांलाघवंनगणय्यअगणयित्वा (गृहेषुजातः) उचितमेवतवैतदित्याह यस्त्वांस्वानांभक्तानांपक्षंपुष्णासीतितथा (भूतः)सः २९ एतत्प्रपंचयतिद्वाभ्याम् स्वीयमिति स्वयमेवावतीर्णोसि स्वीयंवाक्यं तवपुत्रोभविष्यामीतियत्तत्सत्यंकर्तुंज्ञानंज्ञानसाधनंसांख्यंचचिकीर्षुःसन्३० (हेभगवन्) यानितवअलौकिकानिचतुर्भुजादिरूपाणितान्येवतेऽभिरूपाणियोग्यानियानिच स्वजनानां (स्वजनेभ्यो) रोचंतेमनुष्यसरूपाणितान्यपितेरोचंते (भक्तेच्छानुसारित्वात्तवेत्यर्थः) अरूपिणः प्राकृतरूपरहितस्य ३१ (तत्त्वानांबुभुत्सयाबोद्धुमिच्छयासूरिभिरपि) अभिवादार्हंपादपीठंयस्य ऐश्वर्यादिभिः पूर्तंपूर्णं (अवबोधोज्ञानंवीर्यशब्देनधर्मोज्ञेयः षड्विधैश्वर्यसंपन्नमित्यर्थः) ३२ ऐश्वर्यादिकंविवृण्वन्नाह परंपरमेश्वरम् तत्रहेतुः स्वच्छंदास्वाधिनाः शक्तयोयस्य ताएवाह प्रधानंप्रकृतिरूपम् पुरुषंतदधिष्ठातारम् महांतंमहत्तत्त्वरूपम् कालंतेषांक्षोभकम् त्रिवृतंअहंकाररूपम् लोकात्मकंतत्पालात्मकंचतदेवंमाययाप्रधानादिरूपतामुक्त्वाचिच्छक्त्यानिष्प्रपंचतामाह आत्मातुभूत्याचिच्छक्त्याअनुगतः स्वस्मिन्लीनः प्रपंचोयस्यतम् कविंसर्वज्ञंप्रधानाद्याविर्भावलयसाक्षिणमित्यर्थः ३३ संन्यासानुज्ञांप्रार्थयते आस्माभिपृच्छेयत्किंचिदभिपृच्छामीत्यर्थः त्वयापुत्ररूपेण (निमित्तेन) अवतीर्णानिनिवृत्तानि ऋणानि दैवादिरूपाणियस्यसः आप्तकामश्चाहम् परिव्रजतांसंन्यासिनांपदवींमार्गंआश्रितः सन्त्वांयुंजन् स्मरन् (अतएवत्वद्विरहनिमित्तशोकरहितः सन्) विचरिष्यामि ३४

श्लोकाः २३/३४

पुलहायगतिंयुक्तांक्रतवेचक्रियांसतीम् ॥ ख्यातिंचभृगवेऽयच्छद्वसिष्ठायाप्यरुंधतीम् २३ अथर्वणेऽददाच्छांतिंययायज्ञोवितन्यते ॥ विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत् २४ ततस्तऋषयःक्षत्तःकृतदारानिमंत्र्यतम् ॥ प्रातिष्ठन्नंदिमापन्नाःस्वंस्वमाश्रममंडलम् २५ सचावतीर्णंत्रियुगमाज्ञायविबुधर्षभम् ॥ विविक्तउपसंगम्यप्रणम्यसमभाषत २६ अहोपापच्यमानानांनिरयेस्वैरमंगलैः ॥ कालेनभूयसानूनंप्रसीदंतीहदेवताः २७ बहुजन्मविपक्वेनसम्यग्योगसमाधिना ॥ द्रष्टुंयतंतेयतयःशून्यागारेषुयत्पदम् २८ सएवभगवानद्यहेलनंनगणय्यनः ॥ गृहेषुजातोग्राम्याणांयःस्वानांपक्षपोषणः २९ स्वीयंवाक्यमृतंकर्तुमवतीर्णोऽसिमेगृहे ॥ चिकीर्षुर्भगवान्ज्ञानंभक्तानांमानवर्धनः ३० तान्येवतेऽभिरूपाणिरूपाणिभगवंस्तव ॥ यानियानिचरोचंतेस्वजनानामरूपिणः ३१ त्वांसूरिभिस्तत्त्वबुभुत्सयाऽद्धासदाऽभिवादार्हणपादपीठम् ॥ ऐश्वर्यवैराग्ययशोऽवबोधवीर्यश्रियापूर्त्तमहंप्रपद्ये ३२ परंप्रधानंपुरुषंमहांतंकालंकविंत्रिवृतंलोकपालम् ॥ आत्मानुभूत्यानुगतप्रपंचंस्वच्छंदशक्तिंकपिलंप्रपद्ये ३३ आस्माभिपृच्छेऽद्यपतिंप्रजानांत्वयावतीर्णर्णउताप्तकामः ॥ परिव्रजत्पदवीमास्थितोऽहंचरिष्येत्वांहृदियुंजन्विशोकः ३४

चूर्णिका

२३ २४ ऋषयःतंआमंत्र्यसस्त्रीकाःस्वाश्रमंययुः २५ कर्दमःभगवंतंअवतीर्णंज्ञात्वाएकांतेसंगम्यतंप्रणम्यअभाषत २६ अहोसंसारेस्वपातकैःपच्यमानानांदेवताःवहुकालेन प्रसीदंति २७ सर्वेयोगिनःयंत्वांध्यायंतिसःत्वंस्ववाक्यंऋतंकर्तुंममगृहेअवतीर्णोसि २८ २९ तंत्वांज्ञानिभिःस्तुतंपूर्णंअहंशरणंप्रपद्ये३० ३१ ३२ इतःत्वांहृदिकृत्वापूर्णकामःअहंसन्न्यस्यगांविचरिष्येइतिपृच्छे ३३ ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२४॥

अहंतावज्ज्ञानोपदेशायैवत्वद्गृहेऽवतीर्णःअतस्तवगृहेवसतोपिमुक्तिःसुलभैवयद्यवश्यंगंतव्यमेवेत्याग्रहःतथापिमामेवानुस्मरन्गच्छेत्याशयेनाह मयेतिषड्भिः सत्यलौकिकेसत्येवैदिकेलौकिकेचकृत्ये (प्रमाणंप्रमा
करणंश्रुतिस्मृतिरूपंमयैवमोक्तम् स्वस्याप्ततमत्वात्) स्वोक्तस्यप्रामाण्यमभिदर्शयति यत्यस्मात्तुभ्यंतवपुत्रोभविष्यामीत्यवोचं अथअतएवतत्ऋतं सत्यं यथाभवतितथामया (सत्यसंकल्पेनपरमात्मना) अजानि
जन्मस्वीकृतम् (अज्ञानविप्रलंभादिदोषराहित्यमाप्तत्वंतदस्माकंस्वाभाविकमित्याप्ततमोहमितिभावः) ३५ दुराशयात्‌लिंगात्मुमुक्षूणांमुनीनामात्मदर्शनेसंमतंयत्तत्त्वानांप्रसंख्यानंतस्मैविद्धीत्युत्तरस्या
नुषंगः ३६ नन्वयमात्मज्ञानमार्गः पूर्वसिद्धएवनेदानीमपूर्ववत्प्रवर्तनीयः तत्राहएषइति अव्यक्तः सूक्ष्मः (आत्मज्ञानमार्गः इमंकापिलसंज्ञंभृतंधृतम्) ३७ कामंयथेच्छंआपृष्टः अनुज्ञातः यद्वा यथात्वंगं
तुंमांपृष्टवान्तथात्रावस्थातुंमयापित्वामापृष्टइत्यर्थः मयिसंन्यस्तेनसमर्पितेनकर्मणा "अविद्ययामृत्युंतीर्त्वाविद्ययामृतमश्नुते"इतिश्रुतेः ३८ ततश्चमांपरमात्मानं आत्मनिस्वस्मिन्आत्मना (शुद्धेन)
मनसा अन्वीक्षमाणः (एकत्वेनानुपश्यन्) अभयंमोक्षंप्राप्स्यसि (स्वयंज्योतिः स्वयंप्रकाशम्) ३९ मात्रेदेवहूत्यै (आध्यात्मिकीं आत्मतत्त्वविषयांसर्वकर्मणां) शमनींउन्मूलनीं (वितरिष्येउपदे
क्ष्यामीत्यर्थः ययाविद्यया) भयं (संसारं) अतिशयेनतरिष्यतिपरमानंदंचप्राप्स्यतीतिचकारार्थः ४० समुदितः सम्यगुक्तः सन् (कर्दमः) तं (कपिलं) प्रदक्षिणीकृत्य ४१मुनीनांव्रतंमौनमहिंसालक्षणम्
(आत्मैवएकः शरणमाश्रयोयस्य अतएवनिःसंगः अग्नीनामात्मसमारोपणादनग्निः अनिकेतनः गृहाद्याश्रमरहितः) ४२ सदसतः परं (कार्यकारणाभ्यांपरं) यत्तस्मिन्ब्रह्मणिगुणावभासकेनिर्गुणेएक
भक्त्याअव्यभिचारिण्याभक्त्यअनुभाविते अपरोक्षीकृते (मनोयुंजानः मनोयोगंकुर्वाणः) ४३ अतोदेहादिष्वहंकाररहितः अतएवनिर्द्वंद्वः शीतोष्णाद्यनाकुलः समदृक्भेदाग्राहकःकिंतुस्वदृक्स्वमेवपश्यन्
प्रत्यक्प्रवणाप्रशांताविक्षेपरहिताधीर्यस्य ४४

॥१०३॥

श्लोकाः ३५/४४

॥ ॥श्रीभगवानुवाच ॥ ॥ मयाप्रोक्तंहिलोकस्यप्रमाणंसत्यलौकिके ॥ अथाजनिमयातुभ्यंयदवोचमृतंमुने ३५ एतन्मेजन्मलोकेऽस्मिन्मुमुक्षूणां
दुराशयात् ॥ प्रसंख्यानायतत्त्वानांसंमतायात्मदर्शने ३६ एषआत्मपथोऽव्यक्तोनष्टःकालेनभूयसा ॥ तंप्रवर्तयितुंदेहमिमंविद्धिमयाभृतम् ३७
गच्छकामंमयाऽऽपृष्टोमयिसंन्यस्तकर्मणा ॥ जित्वासुदुर्जयंमृत्युममृतत्वायमांभज ३८ मामात्मानंस्वयंज्योतिःसर्वभूतगुहाशयम् ॥ आत्मन्येवात्मनावी
क्ष्यविशोकोऽभयमृच्छसि ३९ मात्रेआध्यात्मिकींविद्यांशमनींसर्वकर्मणाम् ॥ वितरिष्येययाचासौभयंचातितरिष्यति ४० ॥ ॥ मैत्रेयउवाच ॥
एवंसमुदितस्तेनकपिलेनप्रजापतिः ॥ दक्षिणीकृत्यतंप्रीतोवनमेवजगामह ४१ व्रतंसआस्थितोमौनमात्मैकशरणोमुनिः ॥ निःसंगोव्यचरत्क्षोणी
मनग्निरनिकेतनः ४२ मनोब्रह्मणियुंजानोयत्तत्सदसतःपरम् ॥ गुणावभासेविगुणएकभक्त्याऽनुभाविते ४३ निरहंकृतिर्निर्ममश्चनिर्द्वंद्वःसमदृक्स्वदृक् ॥
प्रत्यक्प्रशांतधीर्धीरःप्रशांतोर्मिरिवोदधिः ४४

चूर्णीकं

॥ श्रीभगवानुवाच ॥ ॥ मयास्ववचःऋतंकर्तुं तत्त्वसंख्यानायचइमंदेहंधृतंविद्धि ३५ ३६ ३७ हेऋषेकामंगच्छपरंतुमोक्षार्थंमांभज ३८ अहंमात्रेविद्यांवितरिष्येययामा
ताभवाब्धिंतरिष्यति ३९ ४० ॥ ॥मैत्रेयउवाच ॥ ॥ एवंकपिलेनउदितःमुनिःतंप्रदक्षिणीकृत्यवनंगतः ४१ ४२ वासुदेवेभक्तिंकुर्वन्मुक्तबंधनःकालेनभगवद्गतिंप्राप ४३ ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंविविधकल्पितोपाधीनिवृत्तिमुक्तापरमेश्वरपदप्राप्तिमेवाह वासुदेवइतित्रिभिः प्रतीचोजीवस्यात्मानि लब्धआत्माचित्तंयेन यतःमुक्तंबंधनंअज्ञानंयस्य ४५ लब्धात्मतामेवाह आत्मानमिति (भगवंतं आत्मानंकारणतयासर्वभूतेष्ववस्थितंपश्यन्आत्मनिचकारणभूतेभगवतिसर्वभूतानिअपश्यत्) ४६ तदेवं (सर्वत्ररागद्वेषरहितेनअतएवसमंचेतोयस्य) तेनभागवतीगतिः प्राप्तापाठांतरेसएवतांगतिंप्राप्तइति ४७ ॥ ॥ इतितृतीयेटीकायांचतुर्विंशः २४ ॥ ॥ ७ ॥ ॥ पंचविंशेजनन्यातुपृष्टोबंधविमोचनम् ॥ आदावाहपरंभक्तिलक्षणंकपिलःसुतः १ कपिलेनापितामात्रेगूढभावनियंत्रिता ॥ योगमाणिक्य मंजूषास्फुटमुद्घाट्यतेधुना २उक्तानुवादपूर्वकंकापिलंयोगंपृच्छति कापिलइतीत्रिभिः तत्त्वानांसंख्यातागणकः सांख्यप्रवर्तकइत्यर्थः अतएवस्वयंजातः आत्मप्रज्ञप्तये अत्मतत्त्वज्ञापनाय १ पुंसांमध्येवर्ष्मणःवृद्धस्यउत्तमस्येत्यर्थः सर्वयोगिनांमध्येवरिम्णः वरस्यभावोवरिमाभवितृप्रधानोयंनिर्देशः वरिष्ठस्येत्यर्थः यद्वा वरीयस्त्वादित्यर्थः विश्रुतौकीर्तौअसवइंद्रियाणिभूरिअलंनतृप्यंतिश्रुतेनश्रवणेनदीव्यतिद्योतते (हृदिप्रकाशते) इतितथातस्ययद्वा भूरिबहुशः श्रुतोदेवोयेनतस्यापिमेअसवइतिसंबंधः २ स्वानांछंदेनइच्छयाआत्मादेहस्वीकारोयस्यसः यद्यत्कर्मविधत्तेतानिकर्माणिकीर्तनार्हाणिअनुकीर्तय३यथात्वंमां प्रचोदयसिएवंप्रचोदितः सन्तथातत्प्रश्नानुसारेण (प्राह क्रमप्रचोदितः) आन्वीक्षिक्यांआत्मविचायाम् ४ बिंदुसरेबिंदुसरसि (अवात्सीत्वसतिस्म) ५ (अकर्माणंकर्मरहितमासीनं) तत्त्वमार्गस्यअग्रं पारंदर्शयतीतितथाभूतं 'एषमानवि तेगर्भंप्रविष्टःकैटभार्दनइत्यादिधातुर्वचः ६ असतांइंद्रियाणांतर्पणात्विषयाभिलाषात् (नितरां) निर्विण्णाश्रांतास्मि (असत्त्वंकथंतत्राह) येन (इंद्रियतर्पेण) संभाव्यमानेनपूर्यमाणेन (अंधंतमः अत्यंतंमोहम्) ७

॥१०४॥

श्लोकाः ४५/७

वासुदेवेभगवतिसर्वज्ञेप्रत्यगात्मानि ॥ परेणभक्तिभावेनलब्धात्मामुक्तबंधनः ४५ आत्मानंसर्वभूतेषुभगवंतमवस्थितम् ॥ अपश्यत्सर्वभूतानिभगवत्यपि चात्मनि ४६ इच्छाद्वेषविहीनेनसर्वत्रसमचेतसा ॥ भगवद्भक्तियुक्तेनप्राप्ताभागवतीगतिः ४७ इतिश्रीभा० तृ० स्कंधेकापिलेयेचतुर्विंशतितमोध्यायः २४ ॥ ॥ शौनकउवाच ॥ ॥ कपिलस्तत्त्वसंख्याताभगवानात्ममायया ॥ जातःस्वयमजःसाक्षादात्मप्रज्ञप्तयेनृणाम् १ नह्यस्यवर्ष्मणःपुंसांवरिम्णः सर्वयोगिनाम् ॥ विश्रुतौश्रुतदेवस्यभूरितृप्यंतिमेऽसवः २ यद्यद्विधत्तेभगवान्स्वच्छंदात्माऽऽत्ममायया ॥ तानिमेश्रद्दधानस्यकीर्त्तन्यान्यनुकीर्त्तय ३ सूतउवाच ॥ द्वैपायनसखस्त्वेवंमैत्रेयोभगवांस्तथा ॥ प्राहेदंविदुरंप्रतिआन्वीक्षिक्यांप्रचोदितः ४ ॥ ॥ मैत्रेयउवाच ॥ ॥ पितरिप्रस्थितेऽरण्यंमातुः प्रियचिकीर्षया ॥ तस्मिन्बिंदुसरेऽवात्सीद्भगवान्कपिलःकिल ५ तमासीनमकर्माणंतत्त्वमार्गाग्रदर्शनम् ॥ स्वसुतंदेवहूत्याहधातुःसंस्मरतीवचः ६ ॥ ॥ देवहूतिरुवाच ॥ ॥ निर्विण्णानितरांभूमन्नसदिंद्रियतर्षणात् ॥ येनसंभाव्यमानेनप्रपन्नांऽधंतमःप्रभो ७

चूर्णिका

४५ ४६ ४७ ॥ ॥ इतितृतीयेचतुर्विंशः २४ ॥ ॥ ७ ॥ ॥ शौनकउवाच ॥ ॥ हेसूतआत्मतत्त्वज्ञापनार्थंजातः १ कपिलःयद्यत्कर्माणिकरोतितानिकर्माणि कीर्तय २ ३ ॥ ॥ सूतउवाच॥ एवमेवप्रेरितःमैत्रेयःप्रीतःसन् विदुरमाह ४ ॥ ॥ मैत्रेयउवाच ॥ ॥ पितरिअरण्यंप्रस्थितेसति भगवान्कपिलःमातुःप्रियचिकीर्षया तस्मिन्बिंदुसरोवरेअवात्सीत् ५ देवहूतीधातुर्वचःस्मरंतीस्वसुतंआह ६ हेभूमन्विषयाभिलाषात् अहंश्रांतास्मि येनअंधंतमःप्राप्ता ७

॥१०४॥

१ 'एवंविधेति' मु० पु० पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

(दुष्पारस्यापि) पारंगमयंतीतिपारगंत्वं (त्वल्लक्षणं) एवश्रेष्ठंचक्षुर्मेमयालब्धंत्वदनुग्रहात्जन्मनामंते (अभावे) भाव्येसति (यद्वा अतीतानांजन्मनामंतभूतेचरमेजन्मनि)८तत्प्रपंचयति (यइति)सभग
वान् (एव) भवान् (तमसामोहेनांधस्यलोकस्य) चक्षूरूपः उदितः (प्रकाशाभावेनांधीभूतस्य) सूर्योयथा ९ (हेदेव) अपाक्रष्टुं अपनेतुं कोसौसंमोहस्तमाह एतस्मिन्देहगेहादौत्वयैवयोजितोयोऽ
हंममेत्यवग्रहः आग्रहः द्वितीयइतिशब्दःतत्कार्यरागादिग्रहणार्थः १० प्रकृतेः पुरुषस्यचाजिज्ञासया (तंत्वा) त्वांअहंशरणंगतासतीनमामीत्यन्वयः कुठारंछेत्तारम् (शरणेसाधुंआश्रयप्रदमित्यर्थः) ११
(निरवद्यंनिर्दोषंयतःपुंसां) अपवगर्वर्धनंमोक्षेरतिजनकं (मातुरीप्सितम्) ईषत्स्मितेनशोभितमाननंयस्य (सचेतसैवाभिनंद्यतांबभाषे आत्मवतांनिगृहीतमनसाम्)१२ आध्यात्मिकः आत्मनिष्ठः (पुंसांनिश्रे
यसायेतिमेमतः) यत्रयस्मिन् (अत्यंतोपरतिः साकल्येननाशःसुखस्यकृत्रिमानंदस्य)१३(सर्वांगानांयमनियमादीनांनैपुणंपाटवंयत्ताद्दग्रूपं)१४तत्तुसर्वांगनैपुणंचित्तसंयमाधीनमितिदर्शयन्नाह चेतइति अ
स्यात्मनोजीवस्य १५ (बंधायमुक्तयेचमतंखल्वितिनिश्चये) गुणेषुविषयेषु पुंसिपरमेश्वरे (रतंतुमुक्तये) वाशब्दस्तुशब्दार्थः१५यथाचित्तसंयमेपुरुषार्थसिद्धिस्तद्दर्शयति अहमितित्रिभिः मलैर्दोषैर्वीतंविरहि
तं (सत्) यदाशुद्धंमनोभवति मनःशुद्धेर्ज्ञापकमाह अदुःखमिति (यतःसमंरागादिरहितम्) १६ (तदापुरुषःकेवलंशुद्धं) निरंतरंनिर्भेदंअणिमानंसूक्ष्मंअखंडितंअपरिच्छिन्नं १७(उदासीनांस्वकार्यानभि
मुखीं) हतौजसंक्षीणबलां (परिपश्यति आत्मनामनसा) १८ मनःशुद्धौचभक्तिरेवांतरंगसाधनमित्याह नेति (सर्वात्मनिभगवतियुज्यमानयाक्रियमाणयाभक्त्यासद्दशोन्योमार्गोनास्ति) १९

श्लोकाः ८ — १९

तस्यत्वंतमसोंधस्यदुष्पारस्याऽद्यपारगम् ॥ सच्चक्षुर्जन्मनामंतेलब्धंमेत्वदनुग्रहात् ८ यआद्योभगवान्पुंसामीश्वरोवैभवान्किल ॥ लोकस्यतमसांऽ
धस्यचक्षुःसूर्यइवोदितः ९ अथमेदेवसंमोहमपाक्रष्टुंत्वमर्हसि ॥ योवग्रहोऽहंममेतीत्येतस्मिन्योजितस्त्वया १० तंत्वागताऽहंशरणंशरण्यंस्वभृत्यसंसारत
रोःकुठारम् ॥ जिज्ञासयाऽहंप्रकृतेःपूरुषस्यनमामिसद्धर्मविदांवरिष्ठम् ११ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिस्वमातुर्निरवद्यमीप्सितंनिशम्यपुंसामपवर्ग
वर्धनम् ॥ धियाऽभिनंद्यात्मवतांसतांगतिर्बभाषईषत्स्मितशोभिताननः १२ ॥ ॥ श्रीभगवानुवाच ॥ योगआध्यात्मिकःपुंसांमतोनिःश्रेयसायमे ॥
अत्यंतोपरतिर्यत्रदुःखस्यचसुखस्यच १३ तमिमंतेप्रवक्ष्यामियमवोचम्पुरानघे ॥ ऋषीणांश्रोतुकामानांयोगंसर्वांगनैपुणम् १४ चेतःखल्वस्यबंधायमुक्तये
चात्मनोमतम् ॥ गुणेषुसक्तंबंधायरतंवापुंसिमुक्तये १५ अहंममाभिमानोत्थैःकामलोभादिभिर्मलैः ॥ वीतंयदामनःशुद्धमदुःखमसुखंसमम् १६ तदा
पुरुषमात्मानंकेवलंप्रकृतेःपरम् ॥ निरंतरंस्वयंज्योतिरणिमानमखंडितम् १७ ज्ञानवैराग्ययुक्तेनभक्तियुक्तेनचात्मना ॥ परिपश्यत्युदासीनंप्रकृतिंचहतौज
सम् १८ नयुज्यमानयाभक्त्याभगवत्यखिलात्मनि ॥ सद्दशोऽस्तिशिवःपंथायोगिनांब्रह्मसिद्धये १९

चूर्णिका

तस्यतमसःपारगंसत्चक्षुःमेअद्यलब्धम् ८ ९ हेदेव अहंममेतिदेहेसंमोहःतंअपनेतुंत्वंअर्हसि १० अहंत्वांशरणंगता ११ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिस्वमातुःपुंसांअ
पवर्गवर्धनंवचःनिशम्यसतांगतिःभगवान्बभाषे १२ ॥ कपिलउवाच ॥ हेमातःआत्मनिष्ठःयोगःपुंसांनिःश्रेयसायमतः १३ तंतेप्रवक्ष्यामि १४ अहोपुंसांचेतःविषयेषुसक्तं
बधायभवति परमेश्वरेसक्तंमुक्तयेभवति १५ अहंममाभिमानोत्थैःकामलोभादिभिःरहितंयदामनःभवति १६ तदाज्ञानवैराग्ययुक्तेनभक्तियोगेनआत्मानंप्रकृतिंचपश्यति १७
१८ अखिलात्मनिमयियोगिनांब्रह्मसिद्धयेभक्त्याविनाअन्यःशिवः पंथाःन १९

CC-0. In Public Domain. Digitization by eGangotri

टीका

अस्यसर्वस्यापिसत्संगोमूलमित्याह प्रसंगमिति (विषयेषुकृतंप्रसंगंअतिस्नेहंआत्मनःपाशंविदुः सएवप्रसंगः) अपावृतंनिरावरणं (मोक्षद्वारंभवति) २० साधूनांलक्षणमाह तितिक्षवइतिचतुर्भिः साध
वःशास्त्रानुवर्तिनःसाधुसुशीलंतदेवभूषणंयेषांते (कारुणिकाःभूतदयासंपन्नाइत्यर्थः अजातशत्रवःकामक्रोधादिशत्रुरहिताइत्यर्थःयतःशांताः) २१ (अनन्येनएकनिष्ठेनभावेनभावनयादृढांस्थिरां मदर्थं
त्यक्तधर्माणःसर्वधर्मान्त्यक्तवंतः) २२ (अहंआश्रयोयासांताःअतएवमृष्टाःशुद्धाः) एतानूउक्तलक्षणान्साधून्तापाआध्यात्मिकादयोनतपंतिनव्यथयंति कुतः मद्गतंचेतोयेषांतान् २३ येतापैर्नाभिभूयंतेतेसाध
वइत्यर्थः (अथअतःकारणात्तेत्वयातेषुसाधुषुसंगःप्रार्थनीयः तेहिअन्यसंगदोषंहरंति) २४ सत्संगस्यभक्त्यंगतामुपपादयाति सतामिति (प्रसंगात्प्रकृष्टसंगात्) वीर्यस्य (प्रभावस्यसंवित्) सम्यक्वेदनंयासु
ताःवीर्यसंविदः हृत्कर्णयोःरसायनाःसुखदाः (कथाभवंति) तासांजोषणात्सेवनात्अपवर्गोऽविद्यानिवृत्तिःवर्त्मयस्मिन्तस्मिन्हरौप्रथमंश्रद्धाततोरतिःततोभक्तिःअनुक्रमिष्यतिअनुक्रमेणभविष्यतीत्यर्थः २५
ततःकिमतआह भक्त्येति ममयारचनासृष्ट्यादिलीलातस्याअनुचिंतयायाभक्तिःतयाऐहिकात्सुखात्जातविरागःसन्दृष्टश्रुतात्ऐंहिकामुष्मिकात्ततोयत्तःउद्युक्तःसन्चित्तस्यग्रहणे (विषयेभ्योव्यावर्तने)
यतिष्यते ऋजुभिर्भक्तिप्रधानत्वादनायासैः २६ तदेवंप्रकृतेर्गुणानामसेवयाज्ञानादिभिश्चअयंजीवइहैवदेहे (प्रत्यगात्मरूपं) मामेवअवरुंधेप्राप्नोति २७ काचिदितिकास्विदित्यर्थः उचितायोग्यातत्रापिमम
त्रियाःकीदृशींगोचरायोग्या (ज्ञातुंशक्येत्यर्थः) निर्वाणंमोक्षात्मकंतवपदंस्वरूपंअन्वाश्नवैअनंतरमेवसर्वात्मनाप्राप्स्यामि अंजसात्विसिपाठेअहंत्विितिसंबंधः २८ भगवद्बाणः (भगवतिबाणसदृशःप्रवर्तते)
योभगवंतंलक्षीकरोतीत्यर्थः यतःयस्माद्योगात् २९ विजानीहिविशेषेणज्ञापय (यथाहंमंदधीरपियोषापिदुर्बोधमपि) सुखमनायासेन (जानीय) ३०

श्लोकाः २० / ३०

प्रसंगमजरंपाशमात्मनःकवयोविदुः ॥ सएवसाधुषुकृतोमोक्षद्वारमपावृतम् २० तितिक्षवःकारुणिकाःसुहृदःसर्वदेहिनाम् ॥ अजातशत्रवःशांताःसाधवः
साधुभूषणाः २१ मय्यनन्येनभावेनभक्तिंकुर्वंतियेदृढाम् ॥ मत्कृतेत्यक्तकर्माणस्त्यक्तस्वजनबांधवाः २२ मदाश्रयाःकथामृष्टाःशृण्वंतिकथयंतिच ॥ तपं
तिविविधास्तापानैतान्मद्गतचेतसः २३ तएतेसाधवःसाध्विसर्वसंगविवर्जिताः ॥ संगस्तेष्वथतेप्रार्थ्यःसंगदोषहराहिते २४ सतांप्रसंगान्ममवीर्यसंविदो
भवंतिहृत्कर्णरसायनाःकथाः ॥ तज्जोषणादाश्वपवर्गवर्त्मनिश्रद्धारतिर्भक्तिरनुक्रमिष्यति २५ भक्त्यापुमान्जातविरागऐंद्रियादृष्टश्रुतान्मद्रचनानुचिं
तया ॥ चित्तस्ययत्तोग्रहणेयोगयुक्तोयतिष्यतेऋजुभिर्योगमार्गैः २६ असेवयाऽयंप्रकृतेर्गुणानांज्ञानेनवैराग्यविजृंभितेन ॥ योगेनमय्यर्पितयाचभक्त्यामां
प्रत्यगात्मानमिहावरुंधे २७ ॥ ॥ देवहूतिरुवाच ॥ ॥ काचित्त्वय्युचिताभक्तिःकीदृशीममगोचरा ॥ ययापदंतेनिर्वाणमंजसाऽन्वाश्नवाअहम् २८
योयोगोभगवद्बाणोनिर्वाणात्मंस्त्वयोदितः ॥ कीदृशःकतिचांगानियतस्तत्त्वावबोधनम् २९ तदेतन्मेविजानीहियथाऽहंमंदधीर्हरे ॥ सुखंबुद्ध्येयदुर्बोधं
योषाभवदनुग्रहात् ३०

चूर्णिका

कवयःप्रसंगंआत्मनःअजरंपाशंविदुःसएवसाधुषुकृतश्चेत्मोक्षद्वारंअपावृतम् २० साधुषुतुसंगःप्रार्थ्यः २१ २२ २३ २४ साधुमुखात्मत्कथाश्रवणेनश्रद्धारतिर्भक्तिश्चभवति
ज्ञानवैराग्ययुक्तेनभक्त्याचइहैवदेहेमांप्राप्नोति २५ २६ २७ ॥ ॥ देवहूतिरुवाच ॥ ॥ त्वयियोग्याभक्तिःका योगश्चकः २८ २९ तन्मेवदयथायोषिदहंभवदनुग्रहात्
सुखंबुध्येयं तथानुगृहाण ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इत्थंमातुरर्थंप्रयोजनंविदित्वाजातस्नेहः जातस्नेहत्वेहेतुःयत्रपस्यांतन्वादेहेनाविर्भूतः तत्त्वानिआम्नायंतेअनुक्रम्यंतेयस्मिन् कितत्यत्सांख्यंप्रवदंतितत्प्रोवाचभक्तिवितानंच (योगंचप्रोवाच) ३१ का
चित्त्वय्युचिताभक्तिरितिपृष्टामुत्तमांभक्तिंलक्षयति गुणाविषयालिंग्यंतेज्ञायंतेयैस्तेषांदेवानांद्योतनात्मकानामिंद्रियाणांतदधिष्ठातॄणांवासत्त्वेसत्त्वमूर्तौहरौ (भगवति) एव यावृत्तिःसाभक्तिःसिद्धेर्मुक्तेरपिगरीय
सीत्युत्तरेणान्वयः कथंभूता अनिमित्ता निष्कामा स्वाभाविकीअयत्नसिद्धा तेषामेवंविधवृत्तौहेतुमाह गुरोरुच्चारणमनुश्रूयते इत्यनुश्रवोवेदः तद्विहितंआनुश्राविकंतदेवकर्मयेषांतेषां (इहजन्मनिजन्मांत
रेवावेदविहितकर्माचरणशीलत्वादिंद्रियाणां एवंविधावृत्तिरित्यर्थः) अतएवएकरूपमविकृतंमनोयस्यपुंसःतस्यशुद्धसत्त्वस्येत्यर्थः ३२ मुक्तिश्चप्रासंगिकीभवत्येवेतिमाह । याभक्तिःकोशंलिंगशरीरंजरय
तिक्षपयतिस्वप्रयत्नंविनैवासिद्धौदृष्टांतः निगीर्णंभुक्तमन्नंअनलोजाठरोग्निर्यथाजरयति तद्वदिति) १३ भक्तेर्गरिष्ठत्वमेवोपपादयति नैकात्मतामितिपंचभिः एकात्मतांसायुज्यंमोक्षं मदर्थमीहाक्रियायेषांते
॥१०७॥ (मदीहाः) प्रसज्यआसक्तिंकृत्वापौरुषाणिवीर्याणि (सभाजयंति) ३४ प्रसन्नानिवक्त्राणिअरुणानिलोचनानिचयेषु (तानिपश्यंति) तैर्मद्रूपैःसाकंसह (अभिलषणीयांवाचंवदंतिच स्वेच्छंमांप्रतिवद
तीत्यर्थः) नित्यंपरमेश्वरानुभवसुखंभक्तावधिकमितिभावः ३५ आत्मानंदस्त्ववश्यंभावीत्याह तैरिति दर्शनीयामनोहराअवयवामुखनेत्रादयोयेषुतैः (मद्रूपैः) हृतआत्माचित्तंयेषांहृताआकृष्टाः प्राणाश्चेंद्रि
याणियेषांतान्भजतःअनिच्छतःइच्छाहीनानपिअण्वींगतिंमुक्तिंप्रयुंक्तेप्रापयति कैःसाधनैःहृतात्मनः उदारैर्विलासादिभिः तत्रविलासोलीलावामंमनोहरंसूक्तंमधुरभाषणम् ३६ विभूत्यादिकंचतत्राधिकमित्याह
अथोअविद्यानिवृत्त्यनंतरंविभूतिंसत्यलोकादिगतांभोगसंपत्तिंअणिमाद्यष्टांगमैश्वर्यंअनुप्रवृत्तंभक्तिमनुस्वतएवप्राप्तमपिभागवतींचाश्रियंवैकुंठस्थांचसंपत्तिंअस्पृहयंति (अकारःप्रतिषेधार्थः) तेयद्यपिनस्पृहयं
तीत्यर्थः तथापितुमेलोकेवैकुंठेअश्नुवतेप्राप्नुवंत्येव ३७ नन्वेवंतर्हिलोकत्वाविशेषात्स्वर्गादिवत्भोक्तृभोग्यानांकदाचिद्विनाशःस्यात्तत्राह हेशांतरूपेयद्वाशांतंशुद्धसत्त्वंतद्रूपेवैकुंठेमत्पराःकदाचिदपिननंक्ष्यं
ति भोग्यहीनानभवंति अनिमिषोमेममहेतिःकालचक्रंचनोलेढितान्नग्रसति तत्रहेतुःयेषामिति सुतइवस्नेहविषयःसखेवविश्वासास्पदम् गुरुरिवोपदेष्टा सुहृदिवहितकारी इष्टंदैवतमिवपूज्यः एवंसर्वभाव
नमांयेभजंतितान्मदीयंकालचक्रंनग्रसतीत्यर्थः ३८

श्लोकाः

॥ मैत्रेयउवाच ॥ ॥ विदित्वाऽर्थंकपिलोमातुरित्थंजातस्नेहोयत्रतन्वाभिजातः ॥ तत्त्वाम्नायंयत्प्रवदंतिसांख्यंप्रोवाचवैभक्तिवितानयोगम् ३१
॥ श्रीभगवानुवाच ॥ ॥ देवानांगुणलिंगानामानुश्राविककर्मणाम् ॥ सत्त्वएवैकमनसोवृत्तिःस्वाभाविकीतुया ३२ अनिमित्ताभागवतीभक्तिःसि ३१
द्धेर्गरीयसी ॥ जरयत्याशुयाकोशंनिगीर्णमनलोयथा ३३ नैकात्मतांमेस्पृहयंतिकेचिन्मत्पादसेवाऽभिरतामदीहाः ॥ येऽन्योन्यतोभागवताःप्रसज्यस ३८
भाजयंतेममपौरुषाणि ३४ पश्यंतितेमेरुचिराण्यंबसंतःप्रसन्नवक्त्रारुणलोचनानि ॥ रूपाणिदिव्यानिवरप्रदानिसाकंवाचंस्पृहणीयांवदंति ३५
तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तैः ॥ हृतात्मनोहृतप्राणांश्चभक्तिरनिच्छतोमेगतिमण्वींप्रयुंक्ते ३६ अथोविभूतिंममभायाविनस्तामैश्वर्य
मष्टांगमनुप्रवृत्तम् ॥ श्रियंभागवतींचास्पृहयंतिभद्रांपरस्यमेतेऽश्नुवतेतुलोके ३७ नकर्हिचिन्मत्पराःशांतरूपेनंक्ष्यंतिनोमेनिमिषोलेढिहेतिः ॥ येषा
चूर्णिका महांप्रियआत्मासुतश्चसखागुरुःसुहृदोदैवमिष्टम् ३८ ॥१०७॥

३१ ॥ ॥ श्रीभगवानुवाच ॥ ॥ हरौसर्वेंद्रियाणांयावृत्तिःसाभक्तिःमुक्तेरपिश्रेष्ठासालिंगदेहंक्षपयति ३२ ३३ येसर्वांविसृज्यविश्वतोमुखंमांभक्त्याभजंतितान्मृत्योःसक
शात्पारये ३४ ३५ ३६ ३७ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभूतांतुमुक्तिंएकांतभक्तेभ्योददामीत्याह इमामतिद्वाभ्याम् (इमंभूलोकंअमुंपरलोकंचलोकद्वयभोगकामनामित्यर्थः तथा) उभयाथिनंलोकद्वयगामिनंआत्मानंसोपाधिकं आत्मानमनुयेपुत्रकलत्रादयः येचपश्वादयः रायोधनानि ३९ अन्यांश्चपरिग्रहान् (विसृज्यविश्वतोमुखंमामेवंयेभजंति ताम्) मृत्योःसंसारात् अतिपारयेअतितारयामि ४० अभक्तानांतुनकथंचिदपिमोक्षइत्याह नेति मद्भगवतोन्यत्रभगवतोमत्तोविना सर्वभूतानामात्मनः भगवदादिविशेषणत्रयेण सामर्थ्यं निरपेक्षत्वंहितकारित्वंचोक्तम् ४१ ऐश्वर्यंस्फुटयति मद्भयादिति श्रुतिश्च "भीषास्माद्वातःपवते भीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचम"इति ४२ मद्भजनादेवमोक्षइत्यत्रसदाचारंप्रमाणयति ज्ञानेति (क्षेमायमोक्षाय) ४३ उपसंहरतिएतावानिति मय्यर्पितंसन्मनःस्थिरंभवतीतियत् एतावानेवनिःश्रेयसोदयः मोक्षसुखावाप्तिः ४४ ॥ ॥ इतितृतीयेटीकायांपंचविंशः २५ ॥ ॥ ७ ॥ ॥ षड्विंशेपुंप्रकृत्योस्तुविवेकायोपवर्ण्यते सांख्येनसर्वभावानांजन्मलक्षणभेदतः धात्रापुत्राययत्प्रोक्तं क्षत्रेमित्रासुतेनयत् मात्रेसांख्यंतदध्यात्मप्राधान्येनाहतत्त्ववित् ॥ तत्त्वाम्नायंयत्प्रवदंतिसांख्यंभक्तिर्योगश्चेतित्रयमुपाक्षिप्तम् तत्रभक्तिमुक्त्वाइदानींसांख्यमाह अथ भक्तिनिरूपणानंतरंगुणैः सत्त्वादिभिः १ ननुमुक्तिरात्मज्ञानादेवनतुतत्त्वलक्षणज्ञानात् "तमेवविदित्वातिमृत्युमेती"त्यादिश्रुतेः अतआह ज्ञानमिति आत्मदर्शनरूपंज्ञानं अतएवहृदयग्रंथिभेदनंअहंकारनिवर्तकंपुरुषस्यनिःश्रेयसप्रयोजनाययदाहुःतत्तेवर्णयामितत्त्वलक्षणादेवविविक्तात्मज्ञानंभवतीतिभावः २ तत्रपुरुषंलक्षयति अनादिरिति आत्मैवपुरुषः कोसावात्मा प्रत्यक्प्रतिलोमंधामस्फूर्तिर्यस्य क्षणिकपक्षंव्यावर्तयतिअनादिरिति संसारित्वपक्षंव्यावर्तयतिप्रकृतेः परः अन्यः असंगः ज्ञानादिगुणवत्त्वंवारयति निर्गुणः मीमांसकाद्यभिमतंज्ञानविषयत्वंवारयति स्वयंज्योतिः अनेनैवप्राभाकराभिमतं ज्ञानाधारत्वेनस्फुरणमपिनिरस्तम् स्वयंज्योतिष्ट्वेहेतुः विश्वंयेनसमन्वितं प्रकाशतइतिशेषः एतैरेवहेतुभिः पुरुषस्यप्रकृतेःपरत्वमपिसिद्धम् ३ अत्रावरणविक्षेपशक्तिभेदेन प्रकृतिर्द्विविधा तत्रावरणशक्त्यासैवजीवोपाधिरविद्या विक्षेपशक्त्यासैवमायापारमेश्वरी पुरुषश्चजीवेश्वररूपेणाद्विविधः तत्रयःप्रकृत्यविवेकेनसंसरति सजीवः यस्तुप्रकृतिंवशीकृत्यविश्वसृष्ट्यादिकरोतिसपरमेश्वरः तत्रप्रकृत्यविवेकेनजीवस्यसंसारप्रकारमाहसएषइतिपंचभिः सूक्ष्मांअव्यक्तांदैवींदेवस्यविष्णोःशक्तिंलीलयाउपगतांयदृच्छयैवापद्यतेत्यन्वयः ४

श्लोकाः ३९/४

इमंलोकंतथैवामुमात्मानमुभयायिनम् ॥ आत्मानमनुयेचेहयेरायःपशवोगृहाः ३९ विसृज्यसर्वानन्यांश्चमामेवंविश्वतोमुखम् । ।भजंत्यनन्ययाभक्त्यातान्मृत्योरतिपारये ४० नान्यत्रमद्भगवतःप्रधानपुरुषेश्वरात् ॥ आत्मनःसर्वभूतानांभयंतीव्रंनिवर्त्तते ४१ मद्भयाद्वातिवातोऽयंसूर्यस्तपतिमद्भयात् ॥ वर्षतींद्रोदहत्यग्निर्मृत्युश्चरतिमद्भयात् ४२ ज्ञानवैराग्ययुक्तेनभक्तियोगेनयोगिनः ॥ क्षेमायपादमूलंमेप्रविशंत्यकुतोभयम् ४३ एतावानेवलोकेऽस्मिन्पुंसांनिःश्रेयसोदयः । तीव्रेणभक्तियोगेनमनोमय्यर्पितंस्थिरम् ४४ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेकापिलेयोपाख्यानेपंचविंशतितमोऽध्यायः २५ ॥ श्रीभगवानुवाच ॥ ॥ अथतेसंप्रवक्ष्यामितत्त्वानांलक्षणंपृथक् ॥ यद्विदित्वाविमुच्येतपुरुषःप्राकृतैर्गुणैः १ ज्ञानंनिःश्रेयसार्थायपुरुषस्यात्मदर्शनम् ॥ यदाहुर्वर्णयेतत्तेहृदयग्रंथिभेदनम् २ अनादिरात्मापुरुषोनिर्गुणःप्रकृतेःपरः ॥ प्रत्यग्धामास्वयंज्योतिर्विश्वंयेनसमन्वितम् ३ सएषप्रकृतिंसूक्ष्मांदैवींगुणमयींविभुः ॥ यदृच्छयैवोपगतामभ्यपद्यतलीलया ४

चूर्णिका

३९ ४० ४१ ४२ ४३ मद्भयात्सर्वंभवतिभक्तियोगेनमयिमनसःस्थिरीकरणंएतावानेवअस्मिन्लोकेपुंसांनिःश्रेयसोदयःअस्ति ४४ ॥ ॥ इतितृतीयेपंचविंशः २५ ॥ श्रीभगवानुवाच ॥ ॥ हेमातःतेतत्त्वानांलक्षणंमोक्षदंज्ञानंचवर्णये १ २ ३ ४

१ ईश्वरइतिमु.पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. तृ. तस्यालीलामाह गुणैरिति (सत्त्वादिगुणैर्देवनृतिर्यगादिभेदैर्विचित्राः वैचित्र्येपिकरचरणादिमत्त्वेनसमानरूपाः प्रजाःसृजतीं विलोक्य)ज्ञानंगूहतिआवृणोतीतिज्ञानगूहातया तथाचश्रुतिः ''अजामेकां अ०
लोहितशुक्लकृष्णांबह्वींप्रजांजनयंतींसरूपाम् अजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्य''इति मुमुहेआत्मानंविस्मृतवान् ५ पराभिध्यानंप्रकृत्यध्यासः तेनप्रकृतेर्गुणैः कर्मसुक्रियमाणेषुकर्तृत्व
टीका मात्मनिमन्यते (अहंकर्तेत्यभिमन्यतइत्यर्थः) ६ तदितिकर्तृत्वमननमेवअस्यपुरुषस्यसाक्षिमात्रत्वादकर्तुरेवसतःकर्मभिःबंधः ईशस्यअपरतंत्रस्यैवकर्मबंधकृतंभोगपारतंत्र्यंनिर्वृतात्मनः सुखात्मकस्यै ॥२६॥
वसंसृतिःजन्ममृत्युप्रवाहः प्रकृत्यविवेककृतमेतत्सर्वंभवतीत्यर्थः ७ ननुचैतन्यसामानाधिकरण्येनैवकर्तृत्वादिप्रतीतेस्तस्यैवतदंगीक्रियतांनेत्याह कार्यंशरीरंकारणमिंद्रियंकर्तादेवतावर्गः तद्भावापत्तौ
पुरुषस्यप्रकृतिंकारणंविदुः कूटस्थस्यस्वतोविकाराभावात् प्रकृतिपरिणामभूतदेहाद्यहंकारकृतमेवकर्तृत्वादिकमित्यर्थः भोक्तृत्वेपुरुषंकारणंविदुरितिअस्यायंभावः यद्यप्यहंकारगतमेवकर्तृत्वादिकं
॥१०९॥ भोक्तृत्वंचतथापिविकारस्यजडावसानत्वादुपाधिप्राधान्यम् भोगस्यचिदवसानत्वादुपहितप्राधान्यमिति ८ तदेवंसंसारिणंपुरुषंतद्धेतुंप्रकृतिंचज्ञात्वाइदानीं जगत्कारणमीश्वरंतत्प्रकृतिंचपृच्छति प्रकृते
रिति अस्यविश्वस्य सदसच्चस्थूलंसूक्ष्मंचकार्यं यदात्मकंतयोःप्रकृतिपुरुषयोः ९ तत्रप्रकृतिंलक्षयति यत्प्रधानंतदेवप्रकृतिंप्राहुः किंतत्प्रधानं स्वतःअविशेषम् विशेषवत् विशेषा
णामाश्रयः तर्हिकिंब्रह्म न त्रिगुणंमहत्तत्त्वादि न अव्यक्तंअकार्यं किंकालादि न सदसदात्मकंकार्यकारणरूपम् किंजीवप्रकृतिः न नित्यम् १० अन्येषांतत्त्वानांलक्षणंवक्तुं तानिगणयति पंच
भिरित्यादि संख्याभेदेनएतच्चतुर्विंशतिकं एतानिचतुर्विंशतिर्यस्मिन्गणेतंगणं प्राधानिकंप्रधानकार्यात्मकंसगुणंब्रह्मविदुः ११ एतद्विवृणोतिमहाभूतानीतित्रिभिः तावंतिपंचैव (एवंपंचभिःपंचभिरि
तियत्तद्व्याख्यातम्) १२ (दशभिरित्यस्यव्याख्यानंइंद्रियाणीति) १३ (चतुर्भिरित्यस्यव्याख्यानम् मनइति) अंतरात्मकं अंतःकरणम् लक्षणरूपयाव्यवच्छेदिकया (वृत्त्यावृत्तिभेदेन) १४
यावान्मयाप्रोक्तस्तावानेवसंख्यातःगणितः तत्त्वज्ञैः । कालेतुमतद्वयमाह यःकालःसपंचविंशकः अल्पार्थेकप्रत्ययः प्रकृतेरवावस्थाविशेषइत्यर्थः । (संनिवेशःसंस्थानविशेषः)१९

गुणैर्विचित्राःसृजतींसरूपाःप्रकृतिंप्रजाः । विलोक्यमुमुहेसद्यःसइहज्ञानगूहया ५ एवंपराभिध्यानेनकर्तृत्वंप्रकृतेःपुमान् । कर्मसुक्रियमाणेषुगुणैरा श्लोकाः
त्मनिमन्यते ६ तदस्यसंसृतिर्बंधःपारतंत्र्यंचतत्कृतम् ॥ भवत्यकर्तुरीशस्यसाक्षिणोनिर्वृतात्मनः ७ कार्यकारणकर्तृत्वेकारणंप्रकृतिंविदुः ॥ भोक्तृत्वे
सुखदुःखानांपुरुषंप्रकृतेःपरम् ८ ॥ ॥ देवहूतिरुवाच ॥ ॥ प्रकृतेःपुरुषस्यापिलक्षणंपुरुषोत्तम ॥ ब्रूहिकारणयोरस्यसदसच्चयदात्मकम् ९ ५/१५
॥ श्रीभगवानुवाच ॥ यत्तत्त्रिगुणमव्यक्तंनित्यंसदसदात्मकम् । प्रधानंप्रकृतिंप्राहुरविशेषंविशेषवत् १० पंचभिःपंचभिर्ब्रह्मचतुर्भिर्दशभिस्तथा । ए
तच्चतुर्विंशतिकंगणंप्राधानिकंविदुः ११ महाभूतानिपंचैवभूरापोऽग्निर्मरुन्नभः ॥ तन्मात्राणिचतावंतिगंधादीनिमतानिमे १२ इंद्रियाणिदशश्रोत्रंत्वक्
दृग्रसननासिकाः ॥वाक्करौचरणौमेढ्रंपायुर्दशमउच्यते १३ मनोबुद्धिरहंकारश्चित्तमित्यंतरात्मकम् । चतुर्धालक्ष्यतेभेदोवृत्त्यालक्षणरूपया १४ एता
वानेवसंख्यातोब्रह्मणःसगुणस्यह । सन्निवेशोमयाप्रोक्तोयःकालःपंचविंशकः १५

चूर्णिका ५ ६ ७ ८ ९ १० परमात्मनःसकाशात् प्रकृत्यादीनिपंचविंशतितत्त्वानिउत्पन्नानि ११ तेभ्यःब्रह्मांडमुत्पन्नं १२ तस्मिन्विराट्जज्ञे १३ तद्देहेज्ञानकर्मेंद्रियाणिमनो ॥१०९॥
बुद्ध्यादीनिदेवताभिःसहउत्पन्नानि १४ तानिसलिलेस्थितंविराट्रूपमुत्थापयितुंनाशकन् १५

Nepal Sanskrit University, Balmeek Campus

CC-0. In Public Domain. Digitization by eGangotri

एकेतुपौरुषंपुरुषस्येश्वरस्यप्रभावंविक्रमंकालमाहुः तमेवकालंद्वेधालक्षयति यतोभयंभवति कस्य प्रकृतिमीयुषःप्राप्तस्य अतएवदेहेअहंकारेणविमूढस्यकर्तुर्जीवस्य । अनेनसंहारकत्वेनलक्षितः १६ सृष्टिहेतुत्वेनचतंलक्षयति प्रकृतेरिति (निर्विशेषंनिर्भेदंयत्गुणानांसाम्यंअवैषम्यंतद्रूपायाःप्रकृतेः)१७कोसौभगवांस्तमाह(सत्त्वानां) सर्वप्राणिनामंतःपुरुषरूपेणनियंतृत्वेनसमन्वेतिसम्यक्तद्विकाररहितएवानुस्यूतोवर्तते बहिश्चकालरूपेणएषभगवान्यद्वायः पुरुषइतिप्रसिद्धःकालःसपंचविंशः एकेतुपुरुषस्यप्रभावंकालमाहुः प्रभावस्यैवलक्षणंयतइतिपुरुषस्यैवकालत्वेहेतुः प्रकृतेरिति उभयथाविवक्षायांहेतुः अंतरिति । शेषंसमानं तदेवंप्रकृतेश्चतुर्विंशतिर्भेदाः जीवेश्वरयोश्चैक्यविवक्षया अतःपंचविंशतिस्तत्त्वानिभवंति तयोर्भेदविवक्षायांषड्विंशतिर्भवंति १८ इदानींतत्त्वानामुत्पत्तिपूर्वकंलक्षणान्याह दैवादित्यादिना एतान्यसंहत्येत्यतः प्राक्तनेनग्रंथेन तत्रचित्तस्योत्पत्तिपूर्वकंलक्षणमाहचतुर्भिः दैवात्जीवादृष्टात्क्षुभिताधर्मागुणायस्या-(-स्तस्यांअत्मीयायां)योनौअभिव्यक्तिस्थानेप्रकृतौवीर्यंचिच्छक्तिंआहितवान् साप्रकृतिमर्हत्तत्त्वंअसूत महतः स्वरूपमाहहिरण्मयंप्रकाशबहुलं १९विश्वंअहंकारादिप्रपंचं आत्मगतं स्वास्मिन्सूक्ष्मरूपेणस्थितंव्यंजन्व्यक्तंकुर्वन्महान्तमोऽपिवत् कूटस्थःलयविक्षेपशून्यः आत्मानंप्रस्वापयतीतिप्रच्छादयतितथायत्पूर्वंप्रलयसमयेमहांतंप्रकृतौविलापयामासतत्तमइत्यर्थः २० प्रसंगाच्चतुर्व्यूहोपासनमाह यत्तदिति सर्वागमप्रसिद्धत्वमाह स्वच्छंविशदं शांतंरागादिरहितं भगवतःपदंउपलब्धिस्थानम् अतएववासुदेवाख्यंयदाहुः अयमर्थः अधिभूतरूपेणतस्यैवमहानितिसंज्ञा अध्यात्मरूपेणचित्तमिति उपास्यरूपेणवासुदेवइति अतिष्ठातातुतस्यक्षेत्रज्ञः एवमहंकारेसंकर्षणउपास्यः रुद्रोधिष्ठाता मनस्यनिरुद्धउपास्यःचंद्रोधिष्ठाता बुद्धौप्रद्युम्नउपास्यः ब्रह्माधिष्ठातेति ज्ञातव्यम् २१ स्वच्छत्वंभगवद्बिंबग्राहित्वम् अविकारित्वंलयविक्षेपराहित्यम् (शांतत्वंरागादिराहित्यंइत्येवंचित्तस्यवृत्तिभिः स्वभावैः लक्षणंप्रोक्तम्) अपांप्रकृतिः फेनतरंगादिरहितावस्थापराभूसंसर्गात्प्राक्तनी सायथा मधुरा स्वच्छा शांताच तद्वदित्यर्थः २२ अहंकारस्योत्पत्तिपूर्वकंलक्षणमाह महत्तत्वादितिचतुर्भिः (भगवतोवीर्यात् संभवोयस्य तस्मात् विकुर्वाणात् विक्रियांप्राप्तादित्यर्थः) क्रियासुशक्तिर्यस्यसः क्रियाशक्तिः २३ त्रैविध्यमाह वैकारिकइति तस्यकार्यमाह यतः यस्मात् मनआदीनांभवउत्पत्तिः २४ तस्मिन्नुपास्यव्यूहमाह सहस्रशिरसमिति (भूतेंद्रियमनोमयं भूतेंद्रियमनसांमुख्यंप्रवर्तकमित्यर्थः प्राधान्येमयट्) २५ कर्तृत्वंदेवतादिरुपेण करणत्वमिंद्रियरूपेण कार्यत्वंभूतरूपेणशांतत्वदिकंतुतत्कारणभूतसत्त्वादिगुणत्रयरूपेण २६

चूर्णिका श्लोकाः १६/२६

प्रभावंपौरुषंप्राहुःकालमेकेयतोभयम् । अहंकारविमूढस्यकर्तुःप्रकृतिमीयुषः १६ प्रकृतेर्गुणसाम्यस्यनिर्विशेषस्यमानवि ॥ चेष्टायतःसभगवान्कालइत्युपलक्षितः १७ अंतःपुरुषरूपेणकालरूपेणयोबहिः ॥ समन्वेत्येषसत्त्वानांभगवानात्ममायया १८ दैवात्क्षुभितधर्मिण्यांस्वस्यांयोनौपरःपुमान् ॥ आधत्तवीर्यंसाऽसूतमहत्तत्त्वंहिरण्मयम् १९ विश्वमात्मगतंव्यंजन्कूटस्थोजगदंकुरः॥स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनंतमः२०यत्तत्सत्त्वगुणंस्वच्छंशांतंभगवतःपदम्॥यदाहुर्वासुदेवाख्यंचित्तंतन्महदात्मकम् २१ स्वच्छत्वमविकारित्वंशांतत्वमितिचेतसः ॥ वृत्तिभिर्लक्षणंप्रोक्तंयथाऽपांप्रकृतिःपरा २२ महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यसंभवात् । क्रियाशक्तिरहंकारस्त्रिविधःसमपद्यत २३ वैकारिकस्तैजसश्चतामसश्चयतोभवः ॥मनसश्चेंद्रियाणांचभूतानांमहतामपि २४ सहस्रशिरसंसाक्षाद्यमनंतंप्रचक्षते। संकर्षणाख्यंपुरुषंभूतेंद्रियमनोमयम्॥कर्तृत्वंकरणत्वंचकार्यत्वंचेतिलक्षणम्॥शांतघोरविमूढत्वमितिवास्यादहंकृतेः २६

१६ १७ १८ १९ २० २१ २२ २३ २४ २७ २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१११॥

मनसउत्पत्तिपूर्वकंलक्षणमाह वैकारिकादितिद्वाभ्याम् संकल्पश्चितनंविकल्पोविशेषचिंनतम् यस्यमनसः संकल्पविकल्पाभ्यांकामसंभवोवर्ततइतिकामरूपावृत्तिर्लक्षणत्वेनोक्ता नतुप्रद्युम्नव्यूहोत्पत्तिस्तस्यसं
कल्पादिकार्यत्वाभावात् उपास्यव्यूहस्यचानिरुद्धस्योक्तेः २७ (उपास्यरूपेण अनिरुद्धइत्याख्या यस्यतत्) शारदंशरत्कालीनंइंदीवरंनीलोत्पलंतद्वत्श्यामंयत् (योगिभिः मनोनिग्रहशी
लैः) शनैः संराध्यंवशीकर्तुंयोग्यंदुर्ग्रहत्वात् २८ बुद्धेरुत्पत्तिपूर्वकंलक्षणमाह तैजसादिति द्वाभ्यां हेसति द्रव्यस्फुरणरूपविज्ञानमिति(बुद्धितत्त्वस्यविशेषणं)चित्तव्यावृत्त्यर्थमुक्तम् इंद्रियाणामनुग्रहइति
सविकल्पकज्ञाने हृषीकाणामधीश्वरमितियदुक्तं तत्तुनिर्विकल्पकज्ञाने (अनुग्रहइतीत्यनुग्रहः) २९ द्रव्यस्फुरणस्यैवप्रपंचःसंशयादिः विपर्यासोमिथ्याज्ञानं निश्चयःप्रमाणंज्ञानं स्वापोनिद्रा "प्रमाण
विपर्ययविकल्पनिद्रास्मृतयः" इतिपातंजलोक्तेः (इतिपृथग्वृत्तिकथनेनलक्षणमुक्तं) ३० इंद्रियाणामुत्पत्तिमाह तैजसानितेजसाहंकाराज्जातानि ज्ञानेंद्रियाणांवैकारिकत्वशंकानिवृत्त्यर्थमेवकारः ।
द्विविधान्यपींद्रियाणि तैजसान्येवेत्यन्वयः तत्रहेतुः प्राणस्येति हियस्मात्प्राणस्य क्रियाशक्तिः बुद्धेश्चविज्ञानशक्तिता अतः प्राणस्यतैजसत्वात् तत्कृतक्रियाशक्तिमतांइंद्रियाणांतैजसत्वं
तथाबुद्धेस्तैजसत्वात्तदीयज्ञानशक्तिमतामपींद्रियाणांतैजसत्वमित्यर्थः ३१ तन्मात्रोत्पत्तिपूर्वकमाकाशादिमहाभूतोत्पत्तिंतल्लक्षणंचाह तामसादितिपंचदशभिः श्रोत्रंतुशब्दगमित्यादिभिर्विषयोत्पत्त्यनं
तरं तत्संबंधमात्रंकथ्यते नतूत्पत्तिःप्रागेवोत्पन्नत्वात् शब्दंगच्छतिप्राप्नोतीतिशब्दगंशब्दस्यलक्षणमाह अर्थाश्रयत्वंअर्थवाचकत्वं द्रष्टुर्लिंगत्वंकुड्याद्यंतरितस्यवक्तुर्ज्ञापकत्वं तदुक्तं"लिंगंयद्द्रष्टृदृश्ययो"
रिति नभसस्तन्मात्रत्वंसूक्ष्मत्वंशब्दस्यलक्षणमित्यन्वयः ३३ नभसोलक्षणमाहभूतानामिति छिद्रदातृत्वंअवकाशदातृत्वंबहिरंतरव्यवहारास्पदत्वं आत्मामनःप्राणादीनांधिष्ण्यत्वमाश्रयत्वंनाड्या
दिछिद्ररूपेण वृत्तिः कार्यमेवलक्षणं । एवमुत्तरत्राप्येकेनश्लोकेनतन्मात्रमहाभूतयोरुत्पत्तिः । द्वितीयेनतन्मात्रलक्षणं तृतीयेनमहाभूतलक्षणमित्यनुसंधेयं ३४ (शब्दाख्यातन्मात्रायस्यतस्मात्वि
कुर्वाणात् ततः स्पर्शात्वायुरभूत्) कासात्वक् (यामाकूसूचितातत्राह । त्वगिति) स्पर्शस्यसंग्रहः सम्यग्ग्रहणंयया । पुंस्त्वंनियतलिंगत्वात् । यद्वास्पर्शस्यसंग्रहस्ततोभवतीतिशेषः
शब्दतन्मात्रादितिउत्तरोत्तरान्वयार्थमुक्तम् ३५ (स्पर्शस्यएतत्) स्पर्शत्वंस्वरूपलक्षणमित्यर्थः । नभस्वतोवायोस्तन्मात्रत्वंचसूक्ष्मत्वम् ३६

श्लोकाः २७/३६

वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ॥ यत्संकल्पविकल्पाभ्यांवर्त्ततेकामसंभवः २७
यद्विदुर्ह्यनिरुद्धाख्यंहृषीकाणामधीश्वरम् । शारदेंदीवरश्यामंसंराध्यंयोगिभिःशनैः २८
तैजसात्तुविकुर्वाणाद्बुद्धितत्त्वमभूत्सति ॥ द्रव्यस्फुरणविज्ञानमिंद्रियाणामनुग्रहः २९
संशयोऽथविपर्यासोनिश्चयःस्मृतिरेवच स्वापइत्युच्यतेबुद्धेर्लक्षणंवृत्तितःपृथक् ३०
तैजसानींद्रियाण्येवक्रियाज्ञानविभागशः॥प्राणस्यहिक्रियाशक्तिर्बुद्धेर्विज्ञानशक्तिता ३१
तामसाच्चविकुर्वाणाद्भगवद्वीर्यचोदितात्॥शब्दमात्रमभूत्तस्मान्नभःश्रोत्रंतुशब्दगम् ३२
अर्थाश्रयत्वंशब्दस्यद्रष्टुर्लिंगत्वमेवच ॥ तन्मात्रत्वंचनभसोलक्षणंकवयोविदुः ३३
भूतानांछिद्रदातृत्वंबहिरंतरमेवच ॥ प्राणेंद्रियात्मधिष्ण्यत्वंनभसोवृत्तिलक्षणम् ३४
नभसःशब्दतन्मात्रात्कालगत्याविकुर्वतः ॥ स्पर्शोऽभवत्ततोवायुस्त्वक्स्पर्शस्यचसंग्रहः ३५
मृदुत्वंकठिनत्वंचशैत्यमुष्णत्वमेवच ॥ एतत्स्पर्शस्यस्पर्शत्वंतन्मात्रत्वंनभस्वतः ३६

चूर्णिका

२७ २८ २९ ३० ३१ ३३ ३४ ३५ ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

चालनंवृक्षशाखादेः व्यूहनंमेलनंतृणादेः । प्राप्तिः संयोगः द्रव्यस्यगंधवतोघ्राणंप्रति तथाशैत्यादिमतः स्पर्शनंप्रति । शब्दस्यश्रोत्रंप्रति नेतृत्वं सर्वेंद्रियाणामात्मत्वं उपोद्बलकत्वम् कर्मणाकार्येणाभिलक्षणं भावेल्युट् कर्मैवाभिलक्षणमितिविग्रहेतुकरणेल्युट् ३७ (स्पर्शएवतन्मात्रागुणोयस्यतस्माद्वायोरूपंततोरूपात्तेजःसमुत्थितंरूपस्योपलभनंज्ञानंयस्मात्तत्तुचक्षुः ३८ द्रव्याकृतित्वंद्रव्यस्यआकारसमर्पकत्वम् गुणताद्रव्योपसर्जनतयाप्रतीतिः शब्दस्यतुस्वातंत्र्येणैवप्रतीतिः । अप्रत्यक्षद्रव्यस्यस्पर्शादेरपिस्वातंत्र्येणैवप्रतीतिःरूपस्यतुनैवमितितस्यायं (अप्राधान्यलक्षणो) विशेषउक्तः व्यक्तिसंस्थात्वंव्यक्तेर्द्रव्यस्ययासंस्थासंनिवेशः सैवसंस्थायस्यपरिणामतयाप्रतीतिरित्यर्थः तेजसस्तेजस्त्वंअसाधारणत्वं (हेसाध्विएतारूपमात्रस्यरूपतन्मात्रायाःवृत्तयःस्वभावलक्षणानीत्यर्थः) ३९ द्योतनंप्रकाशनं पचनंतंडुलादेः (पानंरसादानम् अदनंभक्षणं हिमपर्दनंशीतनिवारणं शोषणंशुष्कीकरणं) क्षुत्तृट्अशनापिपासाचएतद्द्वारेणपानमदनंच (ज्ञेयं) ४० रूपंतन्मात्रायस्यतद्रूपमात्रंतस्मात्रसमात्रंरसस्तन्मात्राऽभूत् तस्मादंभोजलम् जिह्वारसनेंद्रियंरसोगृह्यतेऽनयेतिरसग्रहः यद्वारसग्रहस्ततोभवतीतिशेषः ४१ कट्वम्लादिषुलवणोपिद्रष्टव्यः भौतिकानांसंसर्गिद्रव्याणांविकारवशात्यएकोमधुरएवसन्नपिएवमनेकधाभिद्यतेसरसइत्यर्थः ४२ क्लेदनंआर्द्रीकरणं पिंडनंस्निग्धमृदादेःपिंडीकरणम् तृप्ति तृप्तिदातृत्वं (अलंबुद्धिजनकत्वमित्यर्थः) प्राणनंजीवनं ' आपोमयःप्राण ' इतिश्रुतेः (चेष्टाहेतुत्वमित्यर्थः) आप्यायनंतृड्वैक्लव्यनिवर्तनम् उंदनंमृदूकरणंऔदनमितिपाठेपिसएवार्थः (उंदनांबिंदुभावोवा उदिबिंदुभावेइतिधातोः । तापापनोदःतापनिवारकत्वम्) भूयस्त्वंकूपादावुद्धृतस्यापिपुनरुद्गमनम् ४३ (रसएवमात्रायस्यतत्तथातस्मात्जीवाद्दष्टप्रेरितात् घ्राणोघ्राणाख्यमिंद्रियं) गंधगःगंधंप्राप्नोति ४४ करंभोमिश्रगंधःयथाव्यंजनादीनांहिंग्वादिसंस्कारैः पूतिर्दुर्गंधः सौरभ्यंकर्पूरादेः शांतः अनुग्रःसुरभिश्चशतपत्रादेः उग्रोलशुनादेः अम्लश्चिंचिण्यादेः संसर्गिणांद्रव्यावयवानांवैषम्यात्यएकएवसन्नपिविभिद्यतेसगंधइत्यर्थः ४५ ब्रह्मणोभावनंप्रतिमादिरूपेणसाकारतापादनम् स्थानंजलादिविलक्षणतयानैरपेक्ष्येणस्थितिः धारणंजलाद्याधारत्वम् सतामाकाशादीनांविशेषणमवच्छेदकत्वं सर्वेषांसत्वानांप्राणिनांतद्गुणानांचपुंस्त्वादीनांउद्भेदः परिणामविशेषैःप्रकटीकरणम् (पृथिव्यावृत्तिलक्षणंस्वभावलक्षणमित्यर्थः) ४६ श्रोत्रादीनांशब्दादिग्राहकत्वमुक्तंतेषांचलक्षणंतद्वेत्याहपंचभिःश्लोकार्धैःनभसोगुणविशेषःशब्दोयस्य (श्रोत्रस्या-)-र्थोविषयः (एवंवायोर्गुणविशेषःस्पर्शःसोर्थोयस्यतत्स्पर्शनंत्वागिंद्रिमम्) ४७ ४८

॥११२॥

श्लोकाः ३७/४८

चालनंव्यूहनंप्राप्तिर्नेतृत्वंद्रव्यशब्दयोः ॥ सर्वेंद्रियाणामात्मत्वंवायोःकर्माभिलक्षणम् ३७ वायोश्चस्पर्शतन्मात्राद्रूपंदैवेरितादभूत् ॥ समुत्थितंततस्तेजश्चक्षूरूपोपलंभनम् ३८ द्रव्याकृतित्वंगुणताव्यक्तिसंस्थात्वमेवच ॥ तेजस्त्वंतेजसःसाध्विरूपमात्रस्यवृत्तयः ३९ द्योतनंपचनंपानमदनंहिममर्दनम् ॥ तेजसोवृत्तयस्त्वेताःशोषणंक्षुत्तृडेवच ४० रूपमात्राद्विकुर्वाणात्तेजसोदैवचोदितात् ॥ रसमात्रमभूत्तस्मादंभोजिह्वारसग्रहः ४१ कषायोमधुरस्तिक्तःकट्वम्लइतिनैकधा ॥ भौतिकानांविकारेणरसएकोविभिद्यते ४२ क्लेदनंपिंडनंतृप्तिःप्राणनाप्यायनोंदनम् ॥तापापनोदोभूयस्त्वमंभसोवृत्तयस्त्विमाः ४३ रसमात्राद्विकुर्वाणादंभसोदैवचोदितात् ॥ गंधमात्रमभूत्तस्मात्पृथ्वीघ्राणस्तुगंधगः ४४ करंभपूतिसौरभ्यशांतोग्राम्लादिभिःपृथक् ॥ द्रव्यावयववैषम्याद्गंधएकोविभिद्यते ४५ भावनंब्रह्मणःस्थानंधारणंसद्विशेषणम् ॥ सर्वसत्त्वगुणोद्भेदःपृथिवीवृत्तिलक्षणम्४६नभोगुणविशेषोऽर्थोयस्यतच्छ्रोत्रमुच्यते ॥वायोर्गुणविशेषोऽर्थोयस्यतत्स्पर्शनंविदुः ४७तेजोगुणविशेषोऽर्थोयस्यतच्चक्षुरुच्यते॥अंभोगुणविशेषोऽर्थोयस्यतद्रसनंविदुः॥भूमेर्गुणविशेषोऽर्थोयस्यसघ्राणउच्यते४८

चूर्णिका

३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥११३॥ गुणविशेषशब्दव्यावर्त्यंदर्शयति परस्येतिपरस्यकारणस्य (आकाशादेः)धर्मःशब्दादिःअपरस्मिन्कार्येवाय्वादौकारणान्वयात्दृश्यतेअतोभावानामाकाशादीनांविशेषोगुणःसर्वोपिशब्दादिर्भूमावेवो पलभ्यते।चतुर्णामपितत्रान्वयात् । जलादिषुयथान्वयमेवनसर्वः आकाशेत्वन्यान्वयाभावादेकएवेति ४९ एवंकारणोत्पत्तिमुक्त्वाकार्योत्पत्तिमाह सार्धैस्त्रिभिः एतान्यसंहत्यअमिलित्वायदा स्थितानितदाजगदादिरीश्वरःप्राविशत् सप्तेतिचप्राधान्याभिप्रायेणोक्तंप्रवेशस्तुसर्वेष्वपिविवक्षितएव ५० (तेनईश्वरोपवेशेन) अनुविद्धेभ्यःक्षुभितेभ्यः (अथमिलितेभ्यश्चतत्त्वेभ्योंऽडमुत्थितं) यस्मादंडादसौविराट्पुरुषउदतिष्ठत् ५१ (पृथिव्यंशानांभूयस्त्वात्विशेषाख्यम् क्रमवृद्धैर्दशोत्तरैरिति तोयंजलंआदिशब्दादग्निर्वायुर्नभोहंकारोमहांश्चेतितैःप्रकृत्यावृतैरावृतंय स्मिन्नंडेऽयंलोकवितानःपातालादिलोकविस्तारः) भगवतोरूपमितिपुरुषाभेदाभिप्रायेण ५२ तस्मिन्नध्यात्मादिविभागमाह हिरण्मयादितिनवभिः उत्थायऔदासीन्यंविहायतमाविश्यअधि ष्ठायमहांश्चासौदेवश्च खंच्छिद्रं (निर्बिभेदव्यक्तमकरोत्) ५३ (अस्यविराजःपुरुषस्यमुखंनिरभिद्यतव्यक्तमभूत्) वाण्यासहवह्निरभवत्प्राविशादित्यर्थः नासेनिरभिद्येतां प्राणोतःप्राणेनो तःस्यूतःसन्घ्राणःएतयोर्नासिकयोरभवदित्यनुषंगः ५४ घ्राणानंतरंवायुश्च प्राणोतइतिविशेषणंसर्वेंद्रियेष्वापद्रिष्टव्यम् (एतयोरक्ष्णोःचक्षुःतस्माच्चक्षुरिंद्रियानंतरंसूर्यःप्राविशदित्यर्थः) न्य भिद्येतामन्वभिद्येतामितिचपाठद्वयेप्येकएवार्थः ततोदिशःप्राविशन् ५५ (निर्बिभेदानिराभिद्यतेत्यर्थः) आदिशब्देनकेशाः (ततस्तदनंतरंऔषधयआसन् प्राविशन्नित्यर्थःशिश्नंलिंगंरेतउप स्थेंद्रियमित्यर्थः) ५६ (अपानःपायुः अपानात्पाय्वनंतरमित्यर्थः) ५७ (ताभ्यांहस्ताभ्यांबलमिंद्रियं) स्वराडिंद्रः (ताभ्यांपादाभ्यांगतिरिंद्रियं) हरिर्विष्णुः ५८ आभृतंजातम् ५९ (भिन्नंव्यक्तं) ६० (बुद्ध्यादिष्वपिहृदयमेवाधिष्ठानम्) (अतोहृदयादेवबुद्धिरुत्थिता ततो गिरांपतिर्ब्रह्मा चैत्यःक्षेत्रज्ञः) ६१

परस्यदृश्यतेधर्मोह्यपरस्मिन्समन्वयात् ॥ अतोविशेषोभावानांभूमावेवोपलक्ष्यते ४९ एतान्यसंहत्ययदामहदादीनिसप्तवै ॥ कालकर्मगुणोपेतोजगदादि रुपाविशत् ५० ततस्तेनानुविद्धेभ्योयुक्तेभ्योंऽडमचेतनम् ॥ उत्थितंपुरुषोयस्मादुदतिष्ठदसौविराट् ५१एतदंडंविशेषाख्यंक्रमवृद्धैर्दशोत्तरैः ॥ तोयादिभिः परिवृतंप्रधानेनावृतैर्बहिः ॥ यत्रलोकवितानोऽयंरूपंभगवतोहरेः ५२ हिरण्मयादंडकोशादुत्थायसलिलेशयात् ॥ तमाविश्यमहादेवोबहुधानिर्बिभेदखं ५३ निरभिद्यतास्यप्रथमंमुखंवाणीततोऽभवत् ॥ वाण्यावह्निरथोनासेप्राणोतोघ्राणएतयोः ५४ घ्राणाद्वायुरभिद्येतामक्षिणीचक्षुरेतयोः ॥ तस्मात्सूर्यो न्यभिद्येतांकर्णौश्रोत्रंततोदिशः ५५ निर्बिभेदविराजस्त्वग्रोमश्मश्र्वादयस्ततः ॥ ततओषधयश्चासन्शिश्नंनिर्बिभिदेततः ५६ रेतस्तस्मादापआसन्निरभिद्य तवैगुदम् ॥ गुदादपानोपानाच्चमृत्युर्लोकभयंकरः ५७ हस्तौचनिरभिद्येतांबलंताभ्यांततःस्वराट् ॥ पादौचनिरभिद्येतांगतिस्ताभ्यांततोहरिः ५८ नाड्यो ऽस्यनिरभिद्यंतताभ्योलोहितमाभृतम् नद्यस्ततःसमभवन्नुदरंनिरभिद्यत ५९ क्षुत्पिपासेततःस्यातांसमुद्रस्त्वेतयोरभूत् । अथास्यहृदयंभिन्नंहृदयान्म नउत्थितम् ६० मनसश्चंद्रमाजातोबुद्धिर्बुद्धेर्गिरांपतिः । अहंकारस्ततोरुद्रश्चित्तंचैत्यस्ततोभवत् ६१

श्लोकाः १९ ६

चूर्णिका ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अन्वयव्यतिरेकाभ्यांक्षेत्रज्ञंविवेक्तुंसर्वेषांपुनःप्रवेशमाहएतइतिनवभिः (एतेवक्ष्यमाणायोदेवाःअस्यविराजःखानिमुखादीन्यधिष्ठानानि) ६२ ६३ ६४ ६५ ६६ ६७ ६८ (अभिमत्याअहंकारेण)
६९ (चित्ताभिमानीक्षेत्रज्ञःयदाहृदयंप्राविशत्तदैवविराट्पुरुषउत्थितः) ७० विराड्देहस्य (समष्टिरूपस्य) व्यष्टिदेहंदृष्टांतत्वेनदर्शयन्सांख्यानुकथनस्यप्रयोजनमाहद्वाभ्यांयथेति (पुरुषंव्य
ष्टिरूपंदेहंयेनक्षेत्रज्ञेनाविनानप्रभवंति) ७१ प्रथमंपरमेश्वरेभक्तिःततोऽन्यत्रविरक्तिः ततोयोगप्रवृत्ताधीरेकाग्रंचित्तंततोयत्ज्ञानंतेनप्रत्यगात्मानंक्षेत्रज्ञंअस्मिन्नात्मनिकार्यकारणसंघातेविविच्यचिंतयेत्
७२ ॥ ॥ इतितृतीयेषड्विंशः २६ ॥ ॥ ७ ॥ ॥ सप्तविंशेततःसम्यक्बहुसाधनयोगतः पुंप्रकृत्योर्विवेकेनमोक्षरीतिर्निरूप्यते ॥ १ ॥ विवेकज्ञानेनमोक्षमुपपादयितुंशुद्धस्ये
वपुरुषस्यप्रोक्तंप्रकृत्यविवेकतःसंसारमनुस्मारयति प्रकृतिस्थोपीतित्रिभिः देहस्थोपिपुरुषोनाज्यतेनलिप्यते (कैः) गुणैःतत्कृतैःसुखदुःखादिभिः (प्राकृतैःप्रकृतिनिर्मितशरीरगतैरित्यर्थः
कुतोनाज्यते) निर्गुणत्वादकर्तृत्वंततोऽविकारित्वंतस्मादित्यर्थः (यथाजलगतःसूर्योजलगतैःकंपादिभिर्नाज्यतेतद्वत्) १

एतेह्यभ्युत्थितादेवानैवास्योत्थापनेऽशकन् । पुनराविविशुःखानितमुत्थापयितुंक्रमात् ६२ वह्निर्वाचामुखंभेजेनोदतिष्ठत्तदाविराट् ॥ घ्राणेननासिकेवायु
र्नोदतिष्ठत्तदाविराट् ६३ अक्षिणीचक्षुषादित्योनोदतिष्ठत्तदाविराट् ॥ श्रोत्रेणकर्णौचदिशोनोदतिष्ठत्तदाविराट् ६४ त्वचंरोमभिरोषध्योनोदतिष्ठत्तदा
विराट् ॥ रेतसाशिश्नमापस्तुनोदतिष्ठत्तदाविराट् ६५ गुदंमृत्युरपानेननोदतिष्ठत्तदाविराट् ॥ हस्ताविंद्रोबलेनैवनोदतिष्ठत्तदाविराट् ६६ विष्णुर्गत्यैवचरणौ
नोदतिष्ठत्तदाविराट् ॥ नाडीर्नद्योलोहितेननोदतिष्ठत्तदाविराट् ६७ क्षुत्तृड्भ्यामुदरंसिंधुर्नोदतिष्ठत्तदाविराट् ॥ हृदयंमनसाचंद्रोनोदतिष्ठत्तदाविराट् ६८
बुद्ध्याब्रह्मापिहृदयंनोदतिष्ठत्तदाविराट् ॥ रुद्रोऽभिमत्याहृदयंनोदतिष्ठत्तदाविराट् ६९ चित्तेनहृदयंचैत्यःक्षेत्रज्ञःप्राविशद्यदा ॥ विराट्तदैवपुरुषःसलि
लादुदतिष्ठत ७० यथाप्रसुप्तंपुरुषंप्राणेंद्रियमनोधियः ॥ प्रभवंतिविनायेननोत्थापयितुमोजसा ७१ तमस्मिन्प्रत्यगात्मानंधियायोगप्रवृत्तया ॥ भक्त्या
विरक्त्याज्ञानेनविविच्यात्मनिचिंतयेत् ७२ ॥ ॥ इतिश्रीभा०वृ०कापिलेयेतत्त्वसमाम्नायेषड्विंशतितमोऽध्यायः २६ ॥ ॥ ७ ॥ ॥ श्री
भगवानुवाच ॥ ॥ प्रकृतिस्थोऽपिपुरुषोनाज्यतेप्राकृतैर्गुणैः ॥ अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् १

श्लोकाः ॥१॥

चूर्णिका

६२ पुनःतानिदेवताभिःसहतंउत्थापयितुंप्रविविशुःतदेवाहवह्निर्वाचामुखंभेजेनोदतिष्ठत्तदाविराट् ६३ घ्राणेननासिकेवायुर्नोदतिष्ठत्तदाविराट् ६४ अक्षिणीचक्षुषा
दित्योनो० ६५ श्रोत्रेणकर्णौचदिशोनो० त्वचंरोमभिरोषध्योनो० रेतसाशिश्नमापस्तुनो० गुदंमृत्युरपानेननो० हस्ताविंद्रोबलेनैवनो० ६६ विष्णुर्गत्यैवचरणौनो० ६७ नाडीर्न
द्योलोहितेननो० रुद्रोभिमत्याहृदयंनो० ६८ चित्तेनहृदयंचैत्यःक्षेत्रज्ञःप्राविशद्यदा विराट्तदैवपुरुषःसलिलादुदतिष्ठत ७० ७१ तमस्मिन्प्रत्यगात्मानंधियायोगप्रवृत्तयाभक्त्या
विरक्त्याज्ञानेनविविच्यात्मनिचिंतयेत् ७२ ॥ ॥ इतितृतीयेषड्विंशः २६ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ पुरुषःदेहस्थोपिदेहकृतैःसुखदुःखादिगुणैःनलिप्य
तेअविकारात्कइवजलार्कवत् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

(यर्हियदासएषपुरुषःअभिविषज्जेतआसक्तोभवतितदा) २ (तेनाभिमानेन) अनिर्वृतः (सुखहीनः) सन्प्रासंगिकैःप्रकृतिसंगकृतैः (कर्मदोषैः) सदसन्मिश्रयोनिषुदेवतिर्यङ्नरादिषु संसारपदवीं (अभ्येति) प्राप्नोति ३ ननुतर्हिअवास्तवत्वात्संसृतेः किंतन्निवृत्तिप्रयासेनतत्राह अर्थेहीति (अर्थेवास्तवत्वरूपेअस्यजीवस्यसंसारोननिवर्तते तत्रहेतुःध्यायतइति यथास्वप्नमध्ये अनर्थागमोपिननिवर्तते किंतुजाग्रदवस्थायामेवनिवर्ततेतद्वत्) ४ यतोविषयध्यानमनर्थहेतुःअतोमनोनियंतव्यमित्याह अतएवेति असतांइंद्रियाणांपथिविषयमार्गे (प्रसक्तं) तीव्रेणदृढेनविरक्त्याचतीव्रया ५ भक्तिविरक्त्योस्तीव्रत्वकारणानिवर्णयन् ज्ञानेनमोक्षप्रकारमाह षड्भिः । यमादिभिर्योगमार्गैश्चित्तमभ्यसन् (अभ्यस्यन्) पुनःपुनरेकाग्रीकुर्वन् आत्मानमुपलभ्यसर्वानुस्यूतमद्वयंपरमात्मानं प्रतिपद्यते इतिषष्ठेनान्वयःसत्येनर्निष्कपटेन (मयि) भावेनप्रेम्णा ६ (सर्वेषुभूतेषुसमत्वेन रागद्वेषराहित्येन निर्वैरेण अपकारिष्वपि द्वेषराहित्येन) अप्रसंगतः (स्त्रैणादि-) संगत्यागेन बलीयसा ईश्वरेर्पितेन (स्वधर्मेण वर्णाश्रमविहितेनकर्मणा) ७ (यदृच्छयोपलब्धेन दैववशात्प्राप्तेन वस्त्रादिना) विविक्तशरणः एकांतवासी (शांतः स्वस्थचित्तः उत्कृष्टेषुमत्सररहितइत्यर्थः मैत्रः समेषुमित्रतयावर्तमानः करुणः दीनेषु दयालुरित्यर्थः आत्मवान्यतमानसः) ८ (पुत्राद्यनुबंधसहितेऽस्मिन्देहे) असदाग्रहं दुराग्रहंअहंममतांअकुर्वन् प्रकृतेः पुरुषस्यचदृष्टंतत्त्वंयेनतेनज्ञानेन ९ (निवृत्तानिबुद्ध्यवस्थानानिजाग्रदादीनियस्यसः अतएवदूरीभूतमन्यदर्शनं (भेदाज्ञानंदुःशास्त्रं) वायस्य आत्मनाअहंकारावच्छिन्नआत्मानं शुद्धं उपलभ्य एकस्यैवावच्छेदानवच्छेदाभ्यां करणत्वकर्मत्वेदृष्टांतमाह चक्षुषा चक्षुरिंद्रियावच्छिन्नेनार्केण गगनस्थं (शुद्धं) अर्कमिव एवमात्मदृक्शुद्धमात्मानंपश्यन् १० मुक्तलिंगंनिरुपाधिकं असतिमिथ्याभूतेअहंकारेसदाभासंसद्रूपेणभासमानं ब्रह्मप्राप्नोति शुद्धजीवस्वरूपात् विशेषमाह सतः कारणस्यप्रधानस्य बंधुमधिष्ठानंअसतः कार्यस्यचक्षुरविप्रकाशकं सर्वेषुकार्यकारणेष्वनुस्यूतंअद्वयंपारिपूर्णं ११

॥११५॥

सएषयर्हिप्रकृतेर्गुणेष्वभिविषज्जते । अहंक्रियाविमूढात्माकर्त्तास्मीत्यभिमन्यते २ तेनसंसारपदवीमवशोऽभ्येत्यनिर्वृतः ॥ प्रासंगिकैःकर्मदोषैःसदसन्मिश्रयोनिषु ३ अर्थेह्यविद्यमानेऽपिसंसृतिर्ननिवर्त्तते ॥ ध्यायतोविषयानस्यस्वप्नेऽनर्थागमोयथा ४ अतएवशनैश्चित्तंप्रसक्तमसतांपथि । भक्तियोगेनतीव्रेणविरक्त्याचनयेद्वशम् ५ यमादिभिर्योगपथैरभ्यसन्श्रद्धयान्वितः ॥ मयिभावेनसत्येनमत्कथाश्रवणेनच ६ सर्वभूतसमत्वेननिर्वैरेणाप्रसंगतः ॥ ब्रह्मचर्येणमौनेनस्वधर्मेणबलीयसा ७ यदृच्छयोपलब्धेनसंतुष्टोमितभुङ्मुनिः ॥ विविक्तशरणःशांतोमैत्रःकरुणआत्मवान् ८ सानुबंधेचदेहेऽस्मिन्नकुर्वन्नसदाग्रहम् ॥ ज्ञानेनदृष्टतत्त्वेनप्रकृतेःपुरुषस्यच ९ निवृत्तबुद्ध्यवस्थानोदरीभूतान्यदर्शनः ॥ उपलभ्यात्मनाऽऽत्मानंचक्षुषेवार्कमात्मदृक् १० मुक्तलिंगंसदाभासमसतिप्रतिपद्यते ॥ सतोबंधुमसच्चक्षुःसर्वानुस्यूतमद्वयम् ११

चूर्णिका

सएवप्रकृतेःगुणेषुसक्तोभूत्वाकर्तास्मीतिमन्यते २ तेनप्रासंगिकैःकर्मदोषैःसदसन्मिश्रयोनिषुसंसारंएति ३ अविद्यमानेपिअर्थेजीवस्यसंसृतिर्ननिवर्तते ४ अतएवअसतांपथितंकंचित्तंभक्तियोगेनवैराग्येणचशनैर्वशंनयेत् ५ मत्कथाश्रवणेन ६ सर्वभूतसमत्वेन ७ शान्त्या ८ अहंकारनाशेन ९ यमादिमार्गैःआत्मवान्सन्ज्ञानदृष्ट्याप्रकृतेःपुरुषस्यचविचारेणआत्मानंउपलभेत् ११

भा. तृ. अहंकारोपहितेनयाशुद्धब्रह्मप्रतिपत्तिस्तांसदृष्टांतमाह यथेति जलेस्थितआभासः सूर्यप्रतिबिंबोयदागृहांतर्वर्तीभित्तौस्फुरति तदागृहकोणस्थितैः पुरुषैः भित्त्यादौस्थलेस्थितेनस्वाभासेनसूर्यप्रतिबिं अ०
बेनयथा प्रथमंजलस्थः आभासः अवदृश्यते लक्ष्यते गगनस्थस्यगृहमध्येप्रतिबिंबायोगात् चार्थेतथाशब्दः यथाचेत्यर्थः यथाचजलस्थेन (आभासेन) दिविस्थितः सूर्यो लक्ष्यते १२
टीका एवंभूतेंद्रियमनोमयैः देहेंद्रियमनोभिरवच्छिन्नैः स्वाभासैः आत्मप्रतिबिंबैः त्रिवृत्त्रिगुणोऽहंकारः (सदाभासेन) सतोब्रह्मणआभासोयस्मिन् तेनरूपेण लक्षितः (अहंकारस्थआभासोलक्षित ॥२७॥
इत्यर्थः) अहंकारस्थाभासंविना विषयाभासानुत्पत्तेः अनेनचाहंकारेणसदाभासवतासत्यदृक्परमार्थज्ञप्तिरूपआत्मालक्षितइत्यर्थः १३ इदानींसुषुप्तिसाक्षित्वेनशुद्धात्मप्रतिपत्तिमनुभवतोदर्शयतित्रिभिः
भूतसूक्ष्मादिषुअसतिअसत्तुल्येऽव्याकृतेनिद्रयालीनेषुसत्सुयस्तत्रतदाविनिद्रोनिरहंक्रियश्चतमात्मानंप्रतिपद्यतइतितृतीयेनान्वयः १४ ननुयदितदाविनिद्रोसावस्तितर्हिजाग्रत्स्वप्नयोरिवस्फुटः किंनावभास
॥११६॥ तेतत्राह (मन्यमानइति) पूर्वंसद्रष्टाअतोद्रष्टृत्वेनसविकल्पकतयास्फुटंप्रतीतः सुषुप्तौतुभूतसूक्ष्मेंद्रियादेरहंकारविषयस्यलीनत्वात् तद्विषयेऽहंकारेनष्टेसति स्वयमनष्टोपिमृषैवात्मानंनष्टवन्मन्यमानोयः
अन्यस्यनाशेअन्यस्यनष्टतुल्यत्वेदृष्टांतः नष्टवित्तोयथाआतुरोविवशः स्वयंनष्टवद्भवतीत्यर्थः १५ ननुसुषुप्तोनाकिंचिदनुभूयते 'मैवंसुखमहमस्वाप्संनांकिंचिदवेदिषमि'तिविशेषज्ञानंविनाकेवलस्यसुख
रूपस्यात्मनः प्रतिसंधानादित्याह एवमिति (एवमुक्तप्रकारेणप्रत्यवमृश्ययुक्त्यालोच्यअसौआत्मानंप्रतिसंधत्ते) ननुप्रतिसंधानेसाहंकारस्यप्रतीतेः कथं निरहंक्रियत्वं तत्राह साहंकारस्यद्रव्यस्य
कार्यकारणसंघातस्यअनुग्रहः प्रकाशकः अवस्थानंच (स्थितिहेतुः) द्रव्यविशेषणतयाहंकारस्यापिदृश्यत्वाचतद्द्रष्टात्मातद्व्यतिरिक्तः तमात्मानमित्यन्वयः १६ भक्तिविरक्तिभ्यांसत्यपिविवेके प्रकृति
पुरुषयोः परस्परत्यागाभावात्कथंमुक्तिरितिपृच्छतिपुरुषमितिचतुर्भिः' (अन्योन्यापाश्रयत्वात् इतरेतरोपकारित्वादित्यर्थः) नित्यत्वाच पुरुषं प्रकृतिः कदाचिन्नमुंचति १७ व्यतिरेकाभा
वमात्रेदृष्टांतः यथा व्यतिरेकतःभावःसत्तानास्ति (गंधंविनाभूमेर्भूमिंविनाचगंधस्यसद्भावोनास्तीत्यर्थः) गंधस्य कदाचिदपक्षयदर्शनात् दृष्टांतांतरं अपामितिबुद्धेःप्रकृतेःपरस्यचपुरुषस्य
१८ ततः किमतआह अकर्तुरिति येगुणाआश्रयोयस्य (कर्मबंधस्य सयदाश्रयः) तेषुप्रकृतेर्गुणेषुसत्सु पुरुषस्य (अतःगुणेभ्यः) कैवल्यं मुक्तिलक्षणंकथं १९ अतएवक्वचिन्निवृत्त
प्रायस्यापिसंसारभयस्यपुनरुद्भवोदृश्यतइत्याहक्वचिदिति (तत्त्वावमर्शेनतत्त्वज्ञानेन न निवृत्तं निमित्तंगुणसंबंधरूपंयस्यतस्यभावस्तऽत्त्वंतस्मात्) २०

यथाजलस्थआभासःस्थलस्थेनावदृश्यते ॥ स्वाभासेनतथासूर्योजलस्थेनदिविस्थितः १२एवंत्रिवृदहंकारोभूतेंद्रियमनोमयैः ॥ स्वाभासैर्लक्षितोऽनेनसदा श्लोकाः
भासेनसत्यदृक् १३ भूतसूक्ष्मेंद्रियमनोबुद्ध्यादिष्विहनिद्रया ॥ लीनेष्वसतियस्तत्रविनिद्रोनिरहंक्रियः १४ मन्यमानस्तदात्मानमनष्टोनष्टवन्मृषा ॥ नष्टे
ऽहंकरणेद्रष्टानष्टवित्तइवातुरः १५एवंप्रत्यवमृश्यासावात्मानंप्रतिपद्यते ॥ साहंकारस्यद्रव्यस्ययोऽवस्थानमनुग्रहः १६ ॥ देवहूतिरुवाच॥ पुरुषंप्रकृतिर्ब्रह्मन्न १७/४८
विमुंचतिकर्हिचित् ॥ अन्योन्यापाश्रयत्वाच्चनित्यत्वादनयोःप्रभो १७यथागंधस्यभूमेश्चनभावोव्यतिरेकतः॥अपांरसस्यचयथातथाबुद्धेःपरस्यच १८अकर्तुः
कर्मबंधोऽयंपुरुषस्ययदाश्रयः॥गुणेषुसत्सुप्रकृतेःकैवल्यंतेष्वतःकथम् १९क्वचित्तत्त्वावमर्शेननिवृत्तंभयमुल्बणम् ॥ अनिवृत्तनिमित्तत्वात्पुनःप्रत्यवतिष्ठते२०

चूर्णिका १२ १३ १४ १५ १६ ॥ ॥ देवहूतिरुवाच ॥ ॥ हेकपिलअन्योन्याश्रयत्वात्प्रकृतिःपुरुषंनमुंचति १७ यथागंधस्यभूमेश्चव्यतिरेकोन १८ तस्मात् अकर्तुःकर्मबं ॥१२॥
धःप्रकृतेःगुणैःभवति तस्मात्तयोःव्यतिरेकःकथंभवतीतिवद १९ २०

१ 'पुरुषव्यतिरेकेणप्रकृतेःस्वरूपलाभाभावात्प्रकृतिव्यतिरेकेणपुरुषस्याभिव्यक्त्यभावादिति'इत्याधिकंमुद्रितपुस्तकेअन्योन्याश्रयः ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नप्रकृतिसंबंधमात्रंबंधहेतुः किंतुगुणबुद्ध्यातदासक्तिः तन्निवृत्तौसत्यांमोक्षोघटते क्वचिदुद्भवस्तुसाधनवैकल्यादित्यभिप्रेत्यसाधनातिशयं कथयन् परिहरतितित्रिभिः निमित्तंफलंतत् न निमित्तं प्रवर्तकं यस्मिन्तेनानिष्कामेनस्वधर्मेण (अमलश्चासावात्माचतेन) अमलात्मनानिर्मलेनमनसाश्रुतेनकथाश्रवणेनसंभृतयापुष्टया (तीव्रयाअव्यभिचारिण्या) २१ (दृष्टमपरोक्षीकृतंतत्त्वंयेनतेनज्ञानेन आत्मसमाधिनामनसएेकाग्र्येण) २२ (एवमुक्तसाधनसंपन्नज्ञानेन) दह्यमानाअभिभूयमानातिरोभवित्रीतिरोहिताभवति (योनिरुत्पत्तिस्थानम्) २३ एवंवसतिपुनरुद्भवोनास्तीत्याह । भुक्तोभोगोयस्या; नित्यशः सदा दृष्टो दोषो यस्याः अतएवपरित्यक्तासतीईश्वरस्यअपरंतंत्रस्यस्वेमहिम्निस्थितस्यस्वानंदंप्राप्तस्य (अशुभंसंसृतिभयं) २४ अविवेकावस्थायामनर्थहेतुरपिविवेकानंतरं (तादृशी) नभवतीतिसदृष्टांतमाह यथेतिद्वाभ्यां प्रस्वापःस्वप्नः बहूनर्थान् (चोरव्याघ्रादिनिमित्तत्रासलक्षणान्) विभर्तिपुष्णाति प्रतिबुद्धस्यतुसंस्कारवशेनस्फुरन्नपि २५ (विदितमपरोक्षीकृतंतत्त्वंस्वस्वरूपंयेनतस्यमयिपरमेश्वरेचित्तंयुंजतोअपकारंनकरोति) २६ उपसंहरतियदैवमितित्रिभिः (एवमुक्तप्रकारेण) बहूनिजन्मानियस्मिन्काले (तेनअध्यात्मरतः ब्रह्मलोकमभिव्याप्यसर्वत्रजातनिर्वेदः) २७ प्रतिबुद्धार्थः विदितात्मतत्त्वः कैवल्याख्यंस्वसंस्थानदेहादिव्यतिरिक्तस्वरूपंमदाश्रयं (अहमेवाश्रयोयस्य) निश्रेयसं निरतिशयानंदं (प्राप्नोति) २८ स्वदृशाआत्मज्ञानेनछिन्नाः संशयामिथ्याज्ञानानियस्य लिंगाद्विनिर्गमेलिंगशरीरनाशेसतीत्यर्थः २९ तदातुअणिमादिसिद्धयोअंतरायरूपाभवंति । तासुयोगेनोपचितासुसमृद्धासु (सुलभास्वित्यर्थः) नयोगादन्योहेतुर्यासांतासुयदासिद्धस्य चेतोनविषज्जते । अंबहेमातः अथतदा अंतमतिक्रांतोत्यंतोयोऽहंतत्संबंधिनी (गतिः स्यात्) यत्रयस्यांगतौ मृत्योर्हासोनभवति सिद्धिषुविषक्तोतुसिद्धोपिमयायंवशीकृतइतिमृत्योर्हासोगर्वोभवतीत्यर्थः (समीपस्थमात्मानं सिद्धोपि नवेत्तीतितंमृत्युर्हसतीत्यर्थ इतिवा) ३० ॥ ॥ इतितृतीयेसप्तविंशोध्यायः २७ ॥ ॥ ७ ॥

श्लोकाः

॥ श्रीभगवानुवाच ॥ ॥ अनिमित्तनिमित्तेनस्वधर्मेणामलात्मना ॥ तीव्रयामयिभक्त्याचश्रुतसंभृतयाचिरम् २१ ज्ञानेनदृष्टतत्त्वेनवैराग्येणबलीयसा तपोयुक्तेनयोगेनतीव्रेणात्मसमाधिना २२ प्रकृतिःपुरुषस्येहदह्यमानात्वहर्निशम् ॥ तिरोभवित्रीशनकैरग्नेर्योनिरिवारणिः २३ भुक्तभोगापरित्यक्तादृष्टदोषाचनित्यशः ॥ नेश्वरस्याशुभंधत्तेस्वेमहिम्निस्थितस्यच२४यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत् ॥ सएवप्रतिबुद्धस्यनवैमोहायकल्पते२५एवंविदिततत्त्वस्यप्रकृतिर्मयिमानसम् । युंजतोनापकुरुतआत्मारामस्यकर्हिचित् २६ यदैवमध्यात्मरतःकालेनबहुजन्मना ॥ सर्वत्रजातवैराग्यआब्रह्मभुवनान्मुनिः २७ मद्भक्तःप्रतिबुद्धार्थोमत्प्रसादेनभूयसा । निःश्रेयसंस्वसंस्थानंकैवल्याख्यंमदाश्रयम् २८ प्राप्नोतीहांजसाधीरःस्वदृशाछिन्नसंशयः ॥ यद्गत्वाननिवर्तेत योगीलिंगाद्विनिर्गमे २९ यदानयोगोपचितासुचेतोमायासुसिद्धस्यविषज्जतेऽग ॥ अनन्यहेतुष्वथमेगतिःस्यादात्यंतिकीयत्रनमृत्युहासः ३० ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टादशसाहस्र्यांसंहितायांवैयासिक्यांतृतीयस्कंधेकापिलेयोपाख्यानेसप्तविंशतितमोध्यायः २७ ॥ छ ॥ ॥ छ॥

चूर्णिका

॥ ॥ श्रीभगवानुवाच ॥ ॥ तीव्रयाभक्त्या २१ वैराग्यज्ञानादिनाच एतैरुपायैः अहर्निशंदह्यमानापुरुषस्यप्रकृतिः शनैः तिरोहिताभवति २२ २३ २४ यथाप्रतिबुद्धस्य निद्रामोहायनकल्पते २५ एवंविदिततत्त्वस्यमयिमानसंयुंजतः प्रकृतिः नापकुरुते २६ प्रतिबुद्धार्थः मद्भक्तः सर्वत्रजातवैराग्यः छिन्नसंशयः कैवल्याख्यंमदाश्रयं संप्राप्नोति २७ २८ २९ यत्रमृत्युगर्वः न तांआत्यंतिकींगतिमाप्नोति ३० ॥ ॥ इतितृतीयेसप्तविंशः २७ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अष्टाविंशेततोष्टांगयोगेनध्यानशोभिना सर्वोपाधिविनिर्मुक्तस्वरूपज्ञानमीर्यते ॥ ॥ भक्तिसंक्षेपतः प्रोच्यसांख्यमाख्यायविस्तृतम् अथाहवैष्णवंयोगमष्टांगंकपिलोमुनिः ॥ ॥ सबीजस्यसावलंबनस्य (ननु निरालंबस्यदुष्करत्वात् । अवलंबनमत्रविष्णुः) प्रसन्नंसत् सत्पथंब्रह्ममार्गं १ तत्रयमनियमानाहत्रिभिरक्षरद्वयाधिकैः शक्त्यास्वधर्माचरणं (विधर्मान्निषिद्धान् आत्मविदां आत्मज्ञानिनांपादपूजनम्) २ग्राम्यस्त्रैवर्गिकोधर्मः तस्मान्निवृत्तिः (प्रवृत्तिधर्मत्यागइत्यर्थः मोक्षधर्मरतिः निवृत्तिधर्मसेवा)मितंचतन्मेध्यंशुद्धंचतस्यादनं (भक्षणम्)तत्रमितंनाम 'द्वौभागौपूरयेदन्नैस्तोयेनैकंप्रपूरयेत् मारुतस्यप्रचारार्थं चतुर्थमवशेषये ' दितिस्मृतिप्रसिद्धम् विविक्तंविजनंक्षेमंनिर्बाधंतस्यस्थानस्यसेवनम् ३ (अहिंसाशास्त्रनिषिद्धहिंसामात्रवर्जनंभूतहितकथनंवा सत्यंयथार्थभाषणं अस्तेयंस्वाम्यननुज्ञातस्यतृणादेरप्यग्रहणम्) यावताअर्थःप्रयोजनंतावन्मात्रस्यपरिग्रहः (ब्रह्मचर्यमष्टांगमैथुनत्यागः । तपःकृच्छ्रादि शौचंबाह्याभ्यंतरभेदेनद्विविधमपि । स्वाध्यायोब्रह्मयज्ञः पुरुषस्यविष्णोरर्चनम्)४ आसानादीन्यंगान्याहत्रिभिः सतः (स्वस्तिकादे-)-रासनस्यजयेनस्थैर्यं (प्राणायामैःप्राणजयः इंद्रियाणांश्रोत्रादीनांशब्दादिविषयात्मनसाहृदिप्रत्याहारःप्रत्याहरणंआनीयस्थापनमित्यर्थः) ५ स्वधिष्ण्यानां प्राणस्थानानांमूलाधारादीनांमध्येएकदेशेएकस्मिन्स्थानेमनसासहप्राणस्यधारणम् आत्मनोमनसःसमाधानमात्माकारता (वैकुंठस्यहरेर्लीलायाःस्मरणम्) ६ अन्यैश्चव्रतदानादिभिःपथिभिरुपायैः (मनोयुंजीत निरुंधीत मनोजयस्यमुख्यंसाधनंसूचयति जितप्राणोजितश्वासः अतंद्रितोऽनलसः दुष्टंचंचलम् यतःअसत्पथंविषयमार्गवर्ति) ७ आसनादीनिप्रपंचयति शुचाविति यावत्स माप्तिआसनंकुशाजिनंचैलोत्तरंप्रतिष्ठाप्य (तत्रस्वस्तिसमासीनः) स्वस्तिकासनेनयथासुखमितिवा (समासीनःजितासनः) समभ्यसेत्प्राणमितिशेषः " ऊरुजंघांतराधायपादाग्रेजानुमध्यगे योगिनोयदवस्थानंस्वस्तिकंतद्विदुर्बुधाः " ८

॥११८॥

॥ श्रीभगवानुवाच ॥ ॥ योगस्यलक्षणंवक्ष्येसबीजस्यनृपात्मजे ॥ मनोयेनैवविधिनाप्रसन्नंयातिसत्पथम् १ स्वधर्माचरणंशक्त्याविधर्माच्चनिवर्तनम् ॥ दैवाल्लब्धेनसंतोषआत्मविच्चरणार्चनम् २ ग्राम्यधर्मनिवृत्तिश्चमोक्षधर्मरतिस्तथा ॥ मितमेध्यादनंशश्वद्विविक्तक्षेमसेवनम् ३ अहिंसासत्यमस्तेयंयावदर्थपरिग्रहः ॥ ब्रह्मचर्यंतपःशौचंस्वाध्यायःपुरुषार्चनम् ४ मौनंसदासनजयःस्थैर्यंप्राणजयःशनैः ॥ प्रत्याहारश्चेंद्रियाणांविषयान्मनसाहृदि ५ स्वधिष्ण्यानामेकदेशेमनसाप्राणधारणम् ॥ वैकुंठलीलाऽभिध्यानंसमाधानंतथात्मनः ६ एतैरन्यैश्चपथिभिर्मनोदुष्टमसत्पथम् ॥ बुद्ध्यायुंजीतशनकैर्जितप्राणोह्यतंद्रितः ७ शुचौदेशेप्रतिष्ठाप्यविजितासनआसनम् ॥ तस्मिन्स्वस्तिसमासीनऋजुकायःसमभ्यसेत् ८

श्लोकाः १–८ ४८

चूर्णिका

॥ श्रीभगवानुवाच ॥ ॥ हेनृपात्मजे तवयोगस्यलक्षणंवक्ष्येशृणु योगस्तुद्विविधः सबीजोनिर्बीजश्च तत्रगीतोक्तनिर्बीजयोगस्यदुष्करत्वात् सबीजयोगस्यलक्षणं वक्ष्ये येनप्रसन्नंमनः सत्पथंयाति १ शक्त्यास्वधर्माचरणम् विधर्मात् निवर्तनम् दैवात्लब्धेनसंतोषः आत्मविदांचरणार्चनम् २ ग्राम्यधर्मनिवृत्तिः मोक्षधर्मरतिः मितमेध्यभोजनम् एकांतसेवनम् ३ अहिंसासत्यमस्तेयंयावदर्थपरिग्रहः ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनम् ४ मौनंआसनजयःस्थैर्यं प्राणजयः ५ इत्याद्युपायैःमनः बुद्ध्यायुंजीत ६ ७ ततः आसनेस्थित्वा ८

॥११२॥

१ हरिरितिवापाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्राल्ववायोरंतःप्रवेशनंपूरकः प्रवेशितस्यधारणं कुंभकः धृतस्यबहिर्निःसारणंरेचकः प्रतिकूलेनरेचकपूरककुंभकैः यद्वा इडयाआपूर्यपिंगलयारेचनम् पिंगलयाआपूर्य इडयारेचनमित्येवंप्र
तिकूलेनच वाशब्दश्चार्थे चित्तंस्थिरंसत् पुनरपिचंचलंयथानभवतितथा (शनकैः) शोधयेत् ९ ध्मातंसंतप्तमित्यर्थः लोहंसुवर्णंयथामलंत्यजाति तथा मनो विरजं (निर्मलं) स्या
त् ततश्चंचलंनस्यादिति भावः १० प्राणायामादीनांसमाधौद्धारकार्याण्याह प्राणायामैरिति दोषान् वातश्लेष्मादीन् (किल्बिषान्पापानि) संसर्गान् विषयसंबंधान् अनीश्वरान्
(ऐश्वर्यविरोधिनोरागादीन्) वायुनासहमनसःस्थिरीकरणंधारणा स्थिरस्यवृत्तिसंततिर्ध्यानम् वृत्तिनिरोधः समाधिरितिभेदः ११ (स्वंमनः) सुसमाहितंस्थिरंजातम् काष्ठांकलांमूर्ति
मित्यर्थः स्वनासाग्रेऽवलोकनंयस्य एतच्चलयविक्षेपयोः परिहाराय १२ ध्येयंहरिमाहसप्तभिः प्रसन्नंवदनांभोजंयस्य तम् ध्यायेदितिषष्ठेनान्वयः पद्मगर्भवदरुणेईक्षणेनेत्रेयस्य नीलोत्पलदलवत् श्यामम्
॥११९॥ १३ लसत्पंकजस्य किंजल्कवत् (केशरवत्) पीतेकौशेये (कृमिकोशोत्थे) वाससी यस्य श्रीवत्सोलांछनं (विशेषो) वक्षसियस्य भ्राजत्कौस्तुभेन आमुक्तासंश्लिष्टाकंधरा (ग्रीवा) यस्य १४
मत्तभ्रमराणां कलो मधुरो ध्वनिर्यस्यां तयापरीतंव्याप्तं पराध्यानिअमूल्यानिहारादीनि यस्य १५ कांचीगुणेनउल्लसंती श्रोणिर्यस्य भक्तानांहृदयांभोजमेव विष्टरमासनंयस्य दर्श
नीयतमं प्रेक्षणीयतमम् शांतमव्यग्रम् भक्तानांमनांसिनयनानि चवर्धयतिहर्षयतीतितथा (तम्) १६ अपीच्यमतिसुंदरं (भक्तानां विषयभूतं) भक्तविषयंदर्शनंयस्य कैशोरे ता
रुण्येवयसिसंतंस्थितम् भृत्यानामनुग्रहेकातरंव्यग्रम् १७ कीर्तन्यंकीर्तनार्हं तीर्थपावनंयशोयस्य पुण्यश्लोकाबलिप्रमुखास्तेषांयशस्करम् समग्राण्यंगानियस्मिन् (ध्येये तम्) नच्य
वतेनापयाति नपर्येतिवा १८ प्रेक्षणीयंईहितंलीलायस्य (गुहाशयंहृदयगतम् शुद्धोभावः स्वभावोयस्यतेन) १९

श्लोकाः

प्राणस्यशोधयेन्मार्गंपूरकुंभकरेचकैः ॥ प्रतिकूलेनवाचित्तंयथास्थिरमचंचलम् ९मनोचिरात्स्याद्विरजंजितश्वासस्ययोगिनः॥वाय्वग्निभ्यांयथालोहंध्मातं
त्यजतिवैमलम् १० प्राणायामैर्दहेद्दोषान्धारणाभिश्चकिल्बिषान् ॥ प्रत्याहारेणसंसर्गान्ध्यानेनानीश्वरान्गुणान् ११ यदामनःस्वंविरजंयोगेनसुसमा
हितम् ॥ काष्ठांभगवतोध्यायेत्स्वनासाऽग्रावलोकनः १२ प्रसन्नवदनांभोजंपद्मगर्भारुणेक्षणम् ॥ नीलोत्पलदलश्यामंशंखचक्रगदाधरम् १३ लसत्पंकज
किंजल्कपीतकौशेयवाससम् ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभामुक्तकंधरम् १४ मत्तद्विरेफकलयापरीतंवनमालया ॥ परार्ध्यहारवलयकिरीटांगदनूपुरम् ॥
१५ कांचीगुणोल्लसच्छ्रोणिंहृदयांभोजविष्टरम् ॥ दर्शनीयतमंशांतंमनोनयनवर्धनम् १६ अपीच्यदर्शनंशश्वत्सर्वलोकनमस्कृतम् ॥ संतंवयसिकैशोरेभृ
त्यानुग्रहकातरम् १७ कीर्तन्यतीर्थयशसंपुण्यश्लोकयशस्करम् ॥ ध्यायेद्देवंसमग्रांगंयावन्नच्यवतेमनः१८स्थितंव्रजंतमासीनंशयानंवागुहाशयम् ॥ प्रेक्षणी
येहितंध्यायेच्छुद्धभावेनचेतसा १९ ॥११९॥

चूर्णिका

पूरकुंभकरेचकैः प्राणमार्गंशोध्यचित्तंस्थिरीकृत्य ९ १० ११ स्वनासाग्रावलोकनः प्रसन्नवदनांभोजंश्यामंचतुर्भुजंपीतवाससं वनमालादिभिः भूषितंश्रीकृष्णंध्यायेत्
१२ १३ १४ १५ १६ १७ १८ स्थितं व्रजंतंआसीनंशयानंवातंध्यायेत् १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंसमग्रध्यानमुक्त्वातदशक्तौ एकैकावयवध्यानमाह तस्मिन् (ध्येये) लब्धपदंस्थितिर्येनतच्चित्तम् (समग्रध्यानाशक्तौ भगवद्ध्यानेकृतनिश्चयमितिनिष्कर्षार्थः अतएवसर्वेषुअवयवेषुसंस्थितम् एकमवयवं विचिंत्यतंसम्यक्त्तेनस्वविषयमकृत्वैवाऽवयवांतरेप्रवृत्तमित्यर्थः सकलावयवविशिष्टभगवन्मूर्त्यभिध्यानाशक्तमितियावत् अथवासर्वावयवसंस्थितंयथास्यात्तथेतिक्रियाविशेषणम्) विलक्ष्य विशेषेणलक्षीकृत्यएकत्रएकस्मिन्नेकस्मिन्नंगेइत्यर्थः २० तदेवपादादिक्रमेणाहत्रयोदशभिः सम्यक् चिंतयेत् (ध्यायेत्) पादतलेरेखात्मकानिवज्रादीनिलांछनानितैराढ्यंयुक्तम् उत्तुंगाश्चतेरक्ताश्चयेविलसंतोनखास्तेषांचक्रवालंमंडलं तस्यज्योत्स्नाभिराहतो महतां ध्यातॄणांहृदयांधकारोयेन एतच्चसर्वमुपादेयविशेषणंध्येयत्वेनैवोच्यते २१ किंच यस्यशौचेन क्षालनेन निःसृताया (निर्गतायाः) सरित्प्रवरायागंगायाउदकेनतीर्थेनसंसारात्तारकेणमूर्ध्निअधिकृतेनधृतेन शिवोपिशिवोभूत् अत्यधिकंसुखंप्रापेत्यर्थः ध्यातुर्मनसियः शमलशैलः पापपर्वतः तस्मिन्निसृष्टंक्षिप्तं वज्रमिव (दंभोलिरिवयत्) यद्वाशमलशैलेनिसृष्टं स्वलांछनरूपंवज्रंयेनतत् २२ विभोर्जानुद्वयंतत्पर्यंतंजंघाद्वयम् अखिलस्यविधातुः (स्रष्टुः) ब्रह्मणोजनन्या (अखिलस्यविधातुश्चजनन्येतिवा) लक्ष्म्या (रमयायद्वाऽखिलस्यलक्ष्म्या शोभयेत्यन्वयः यत्ऊर्वोर्निधाय करपल्लवयोरोचिषैव) संलालितं स्पर्शचातुर्येण संसेवितम् संसारित्वमिवप्रतीतंवारयाति अभवस्येति हृदिकुर्यात्ध्यायेत् २३ सुपर्णस्य (गरुत्मतः)भुजयोः स्कंधयोः अधिउपारि (शोभमानौ) ओजसोबलस्यनिधीआधारौ अतसिकायाः कुसुमवत्कांत्याऽवभासमानौ व्यालंबिआगुल्फंलंबमानं (वर्णेन) यत्पीतंचवरंश्रेष्ठं वासस्तस्मिन् वर्तमानोयः कांचीकलापः तेनपरिरंभःसंश्लेषो विद्यतेयस्यतद्विभोर्नितंबबिंबंचहृदिकुर्यादितिपूर्वेणैवान्वयः २४ अमुष्यहरेः–(नाभिरेवह्रदोगंभीरत्वात्तं)नाभिह्रदं ध्यायेत् कथंभूतम् भुवनानांकोशस्यसमूहस्य गुहाअधिष्ठानंयदुदरंतत्रस्थितम् यत्रनाभिह्रदे आत्मयोनेर्ब्रह्मणोधिषणंधिष्ण्यंअखिललोकात्मकंपद्मंव्यूढंउत्थितम् तथाहरिन्मणिवृषौइंद्रनीलरत्नश्रेष्ठाविवयौस्तनौतयोर्द्वयं ध्यायेत् (कथंभूतम्) विशदहाराणांमयूखैर्गौरम्श्वेतम् २५ ऋषभस्यश्रेष्ठस्य (हरेर्वक्षः कंठंचमनसिकुर्यात् कथंभूतंवक्षः) महाविभूतेर्महालक्ष्म्याअधिवासस्थानम् कंठंचमनसिकुर्यात् कथंभूतंकंठम् कौस्तुभमणिर्यो भूषणार्थं धृतस्तस्य अधिकंभूषणमर्थःप्रयोजनंयस्य कौस्तुभमणिमेवस्वयमलंकुर्वंतमित्यर्थः पुंसांस्मर्तॄणांद्रष्टॄणांचमनोनयनानांनिर्वृति (–मानंद)—मादधानमित्युभयोर्विशेषणम् २६

श्लोकाः

तस्मिँल्लब्धपदंचित्तंसर्वावयवसंस्थितम् ॥ विलक्ष्यैकत्रसंयुज्यादंगेभगवतोमुनिः २० संचिंतयेद्भगवतश्चरणारविंदंवज्रांकुशध्वजसरोरुहलांछनाढ्यम् । उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारम् २१ यच्छौचनिःसृतसरित्प्रवरोदकेनतीर्थेनमूर्ध्न्यधिकृतेनशिवःशिवोभूत् ॥ ध्यातुर्मनःशमलशैलनिसृष्टवज्रंध्यायेच्चिरंभगवतश्चरणारविंदम् २२ जानुद्वयंजलजलोचनयाजनन्यालक्ष्म्याऽखिलस्यसुरवंदितयाविधातुः॥ ऊर्वोर्निधायकरपल्लवरोचिषायत्संलालितंहृदिविभोरभवस्यकुर्यात् २३ ऊरूसुपर्णभुजयोरधिशोभमानावोजोनिधीअतसिकाकुसुमावभासौ ॥ व्यालंबिपीतवरवाससिवर्तमानकांचीकलापपरिरंभिनितंबबिंबम् २४ नाभिह्रदंभुवनकोशगुहोदरस्थंयत्रात्मयोनिधिषणाखिललोकपद्मम् ॥ व्यूढंहरिन्मणिवृषस्तनयोरमुष्यध्यायेद्द्वयंविशदहारमयूखगौरम् २५ वक्षोऽधिवासमृषभस्यमहाविभूतेःपुंसांमनोनयननिर्वृतिमादधानम् ॥ कंठंचकौस्तुभमणेरधिभूषणार्थंकुर्यान्मनस्यखिललोकनमस्कृतस्य २६

चूर्णिका

२० तत्रपादादिध्यानंकार्यम् २१ संचिंतयेद्भगवतश्चरणारविंदं० २२ जानुद्वयं० २३ ऊरू नितंबं २४ नाभि ह्रदंवक्षः २५ कंठं बाहून् २६

१ एकैकस्मिन्नंगइत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(परिवर्तनेनपरिभ्रमणेन) निर्णिक्तानि उज्ज्वलाकृतीनि बाहुवलयान्यंगदानियेषु (तान्) अधिश्रितालोकपाला (इंद्रादयो) येषु (तान्) दशशतारंचक्रं नसह्यं तेजोयस्य (तस्य) करसरोरुहेराजहंसमिव २७ अरातयोये भटा योद्धारः तेषांशोणितेमवकर्दमः (पंक)—स्तेनदिग्धांलिप्तांगदां अस्यकंठेमालांमणिंचस्मरेत् मधुव्रतानां बरूथस्यगिरा (रवेण) उपघुष्टां नादिताम् चैत्यस्यजीवस्यतत्त्वम् तदुक्तंवैष्णवे 'आत्मानमस्यजगतो निर्लेपमगुणामलम् बिभर्तिकौस्तुभमणिस्वरूपंभगवान् हरिरि'ति २८ भृत्येष्वनुकंपिताकृतानुकंपा याधीः तयागृहीताम् र्तिर्येनतस्य विस्फुरंती येमकरकुंडलेतयोर्वलितेनप्रचलनेनविद्योतितौ अमलौकपोलौ यस्मिन्तत् उदाराउन्नतानासायस्मिन्तत् २९ यच्चस्वयाभूत्याशोभया अलिभिः परिसेव्यमानं मीनद्वया श्रयं चश्रीनिकेतनं शोभालयं पद्ममधिक्षिप-(–त्तिरस्कुर्व–)–द्वर्तते (तद्वदनारविंदम्) ध्यायेत् तत्रकुंतलैरलीनामधिक्षेपः नेत्रद्वयेनमीनद्वयस्येतिद्रष्टव्यम् अब्जेइवनेत्रेयस्मिन्नित्युपमानांतरम् उल्लसंत्यौ भ्रुवौयस्मिन् मनोमयं मनस्याविर्भवत् ३० (तस्यावलोकमपिध्यायेत्) कृपयाअधिकंअत्यर्थं (अधिकयाकृपयाव्याप्तमित्यर्थः) अक्षिभ्यांनिसृष्टंप्रत्युक्तंस्निग्धस्मितेन अनुगुणितंसंयुक्तम् विपुलः अधिकः प्रसादोयस्मिन् गुहायांहृदि ३१ अवनतायेअखिललोकास्तेषां तीव्रशोकेन (संसारतापजनितेन) यान्यश्रूणितेषां सागरं विशोषयति (समूलंनाशयतीति) तथातंमंदहासंअस्यअ त्युदारं भ्रूमंडलंचध्यायेत् कथंभूतं (हासं) भ्रूमंडलंच निजमाययामकरध्वजस्यापिसंमोहनायरचितम् मुनिकृतेमुनीनामुपकाराय मुनीनांसंमोहनेप्रवृत्तं काममेव संमोहितुमित्यर्थः ३२ मंदहास ध्यानमुक्तास्फुटहासध्यानमाह विष्णोः प्रहसितंउच्चैर्हसितंध्यायेत् कीदृशं ध्यानायनम् अतिसुंदरतयाप्रयत्नंविनैवध्यानस्य विषयभूतम् सौंदर्यमेवाह बहुलयाअधिकया अधरोष्ठस्यभासाकांत्या अत्यरुणीभूतास्तनवः सूक्ष्मा द्विजाएवकुंदमुकुलानि तेषांपंक्तिः स्फुरति यस्मिन्तत् (स्व—)—देहकुहरे हृदयाकाशेअवसितस्य ज्ञातस्यप्रेमरसेनार्द्रयाभक्त्यातस्मिन्नेवार्पितमनाः सन्पृथक्तद्व्यतिरिक्तं द्रष्टुंनेच्छेत् नचित्तंविचालयेदित्यर्थः ३३

बाहूंश्चमंदरगिरेःपरिवर्तनेनानिर्णिक्तबाहुवलयानधिलोकपालान् ॥ संचिंतयेद्दशशतारमसह्यतेजःशंखंचतत्करसरोरुहराजहंसम् २७ कौमोदकींभगवतो दयितांस्मरेतदिग्धामरातिभटशोणितकर्दमेन ॥ मालांमधुव्रतवरूथगिरोपघुष्टांचैत्यस्यतत्त्वममलंमणिमस्यकंठे २८ भृत्यानुकंपितधियेहगृहीतमूर्तेः संचिंतयेद्भगवतोवदनारविंदम् ॥ यद्विस्फुरन्मकरकुंडलवल्गितेनविद्योतितामलकपोलमुदारनासम् २९ यच्छ्रीनिकेतमलिभिःपरिसेव्यमानंभूत्यास्वया कुटिलकुंतलवृंदजुष्टम् ॥ मीनद्वयाश्रयमधिक्षिपदब्जनेत्रंध्यायेन्मनोमयमतंद्रितउल्लसद्भ्रु ३० तस्यावलोकमधिकंकृपयाऽतिघोरतापत्रयोपशमनायनि सृष्टमक्ष्णोः ॥ स्निग्धस्मितानुगुणितंविपुलप्रसादंध्यायेच्चिरंविपुलभावनयागुहायाम् ३१ हासंहरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम् संमोहनायरचितंनिजमाययाऽस्यभ्रूमंडलंमुनिकृतेमकरध्वजस्य ३२ ध्यानायनंप्रहसितंबहुलाधरोष्ठभासाऽरुणायिततनुद्विजकुंदपंक्ति ॥ ध्यायेत्स्वदेहकु हरेऽवसितस्यविष्णोर्भक्त्यार्द्रयाऽर्पितमनानपृथग्दिदृक्षेत् ३३

श्लोकाः १९/२६

चूर्णिका चक्रंशंखं २७ कौमोदकीं २८ वनमालांकौस्तुभंवदनारविंदंकुटिलकुंतलकेशयुक्तं विपुलप्रसादंअवलोकंहासम् २९ ३० ३१ एतादृशंविष्णोः रूपंस्वहृदिध्यायन् ३२ तस्मिन्चित्तंनचालयेत् ३३

१. हरेर्हासम् मु॰ पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२२॥

(एवंध्यानमुक्तातदारूढस्य) समाधिमाह एवमितिद्वाभ्याम् निर्बीजः सबीजश्चेति द्विविधोयोगः तत्रनिर्बीजयोगे 'यतोयतोनिश्चरतिमनश्चंचलमस्थिरम् ततस्ततो नियम्यैतदात्मन्येव वशंनयेदितिगीताद्युक्तमार्गेण क्रियमाणोपिदुष्करः समाधिः सबीजेतुसुकरः तत्रहिपरमानंदमूर्तौ हरौध्यायमाने अयत्नतएवचित्तोपरमोभवति तदुक्तं 'हृतात्मनो हृतप्राणांश्चभक्तिरनिच्छतोमे गतिमण्वीं प्रयुङ्क्ते' इति अतः सएवोपक्षिप्तः योगस्यलक्षणं वक्ष्ये सबीजस्येति तदेवायत्नसिद्धत्वंदर्शयति एवंध्यानमार्गेणहरौप्रतिलब्धो भावःप्रेम येनतयाभक्त्याद्रवत् हृदयंयस्य प्रमोदादुद्गता निपुलकानियस्य औत्कंठ्यप्रवृत्ताश्रुकलयाच मुहुरर्द्यमानः आनंदसंप्लवोनिमज्जमानः दुर्ग्रहस्यभगवतोग्रहणे बडिशंमत्स्यवेधनमिवोपायभूतंचित्तमपिध्येयाद्वियुंक्ते तद्धारणेशिथिलप्रयत्नोभवती त्यर्थः ३४ यर्हियदामनएवंनिर्विषयंभवति अतएवमुक्ताश्रयंच ध्येयसंबंधंविनाध्यातर्यवस्थानासंभवात् नचपूर्ववत् शब्दादिर्विषयः स्यात् यतस्तत्रविरक्तंपरमानंदानुभवेनअतोनिर्वाणंलयमृच्छति वृत्तिरूपतांपरित्यज्यब्रह्माकारेणपरिणमतेइत्यर्थः यथार्चिर्ज्वालाआश्रयविषयापगमेमहाभूतज्योतीरूपेणपरिणमते अत्रअस्यांदशायांअव्यवधानं ध्यातृध्येयविभागशून्यं एकं अखंडं आत्मानमनुगतमीक्षते अत्रहेतुः प्रतिनिवृत्तोऽपगतो गुणप्रवाहोदेहाद्युपाधिर्यस्य ३५ नचसुप्तोत्थितइवपुनःसंसरतीत्याह सोपिसएवपुरुषः तस्मिन्महिम्नि (भूम्नि) ब्रह्मरूपे अवसित अवसानं निष्ठांप्राप्तः कया मनसोनिवृत्त्या चरमया अविचाररहितयेतिसुषुप्ताद्विशेषः तत्रह्यविद्यास्तिनात्विदानींतत्रहेतुः एतया योगाभ्यासकृतयेत्यर्थः नन्वेवमपिसुखदुःखयोरात्मधर्मत्वेकुतोब्रह्मैक्यं तत्राह दुःखयोः सुखदुःखयोर्हेतुत्वंभोक्तृत्वंयत्पूर्वमासीत् तदपिअसतिआविद्याकृतेकर्तरि अहंकारेविधत्ते तन्निष्ठमेवपश्यतीत्यर्थः यतः उपलब्धपरात्मकाष्ठः अपरोक्षीकृतात्मतत्त्वः ३६ तस्यजीवन्मुक्तिमाह देहंचेतिद्वाभ्याम् चरमःउक्तलक्षणः सिद्धोदेहमपिन विपश्यति कुतः सुखदुःखे आसनादुत्थितमुत्थायतत्रैवस्थितंततस्थानादपेतंततो दैववशात्पुनरप्युपेतंवानविपश्यति यतः स्वरूपंप्राप्तः यतोदेहात्स्वरूपमध्यगमत्तंदेहमितिवा सतोप्यननुसंधानेदृष्टांतः वासः परिकृतंकटितटेपरिवेष्टितंस्थितंगतंवामदिरामदेनांधो यथा नपश्यतीति ३७ ननुतर्हि देहस्यकथंप्रवृत्तिनिवृत्तीजीवनंचतत्राह देहोपीति देहं पूर्वसंस्कारः तद्वशेनगच्छन् यावत् स्वारंभकंकर्मास्तितावत्प्रतिसमीक्षतेजीवत्येव सासुः सेंद्रियः ननुतर्हितस्मिन् पुनः संगः स्यात् तत्राह (तंदेहंस्वाप्नं) स्वाप्नदेहादितुल्यंसप्रपंचंपुत्रादिप्रपंचसाहितंपुनर्नभजते अहंममेतिनाभिमन्यते (कुतः) आरूढःप्राप्तः समाधिपर्यंतोयोगायेने अतएवप्रतिबुद्धं वस्तुआत्मतत्त्वंयेनसः ३८

श्लोकाः ३४–३८

एवंहरौभगवतिप्रतिलब्धभावोभक्त्याद्रवद्धृदयउत्पुलकःप्रमोदात् ॥ औत्कंठ्यबाष्पकलयामुहुरर्द्यमानस्तच्चापिचित्तबडिशंशनकैर्वियुंक्ते ३४ मुक्ताश्रयंयर्हिनिर्विषयंविरक्तंनिर्वाणमृच्छतिमनःसहसायथाऽर्चिः ॥ आत्मानमत्रपुरुषोऽव्यवधानमेकमन्वीक्षतेप्रतिनिवृत्तगुणप्रवाहः ३५ सोप्येतयाचरमयामनसोनिवृत्त्यातस्मिन्महिम्न्यवसितःसुखदुःखबाह्ये ॥ हेतुत्वमप्यसतिकर्तरिदुःखयोर्यत्स्वात्मन्विधत्तउपलब्धपरात्मकाष्ठः ३६ देहंचतंनचरमःस्थितमुत्थितंवासिद्धोविपश्यतियतोऽध्यगमत्स्वरूपम् ॥ दैवादुपेतमथदैववशादपेतंवासोयथापरिकृतंमदिरामदांधः ३७ देहोपिदैववशगःखलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवसासुः ॥ तंसप्रपंचमधिरूढसमाधियोगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः ३८

चूर्णिका ॥१२॥

एवंस्वलब्दयाकाशेध्यात्वाप्रतिलब्धभावः सन् ध्यातृध्येयविभागशून्यं एकंअखंडंआत्मानंयः ईक्षतेसः सुखदुःखादिकं अहंकारनिष्ठंपश्यति ३४ ३५ ३६ एवंकृतेसति देहाद्युपाधिनिर्मुक्तोभूत्वाजीवन्मुक्तोभवति किंच स्वदेहंस्थितंउत्थितंगतंप्राप्तंवानपश्यति ३७ किंच देहोपिदैववशगइति ३८

१. वाहेतिपाठः मु० पु० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रतिबोधप्रकारमाहषड्भिः यथेति अतिस्नेहवशादात्मत्वेनाभिमतादपिपुत्रादेर्मर्त्यःपित्रादिः (पृथक्प्रतीयतेज्ञायतेतथा) पुरुषोदेहादेर्द्रष्टा ३९ पृथगवस्थानाभावेपिभेदंसदृष्टांतमाह यथोल्मुकात् ईदा नींज्वलतः काष्ठात्स्वसंभवात् अग्नेःसंभूतात् आत्मत्वेनअग्नेः स्वरूपत्वेनाभिमतादपि (विस्फुलिंगात्अग्निकणात्धूमाद्वा) अत्यंताविवेकिनोहिधूमेप्यग्न्याभिमानोस्तिउल्मुकात् पूर्वोसद्धादपि (तदग्निः) तद्दाहकः तत्प्रकाशकश्चाग्निः पृथगेव ४० भूतादेर्द्रष्टातेभ्यो (दृश्येभ्यः) पृथक्द्रष्टृत्वात् तस्मादपिजीवसंज्ञितात् (व्यावहारिकात्) द्रष्टाब्रह्मसंज्ञितआत्मापृथक् निरुपाधिकत्वात् तथाप्रधा नादपितत्प्रवर्तको भगवान् पृथगित्यर्थः ४१ उपाधितोविवेकमुक्त्वातस्यैक्यमाहसर्वभूतेष्विति सर्वेषु भूतेषु (संतमात्मानं अनन्यभावेन नास्ति अन्यस्यभावःसत्ता अतःसर्वमात्मैव "सर्वंखल्विदं ब्रह्मे"ति श्रुतेः तेनप्रकारेणेक्षेतेत्यर्थः) भूतेषु चतुर्विधेषु तदात्मतां महाभूतात्मतां ४२ धर्मभेदस्यौपाधिकतां सदृष्टांतमाह स्वयोनिषु दारुषु ज्योतिरग्निः (वस्तुतएकमपि दारूणां) गुणवैषम्यात् दीर्घह्रस्वा

॥१२३॥ दिभेदात् प्रकृतौदेहे ४३ स्वांशस्यजीवस्य बंधहेतुं दैवीं देवस्यविष्णोः शक्तिं पराभाव्यतत्प्रसादेनैवजित्वास्वरूपेण ब्रह्मत्वेनावतिष्ठते ४४ ॥ ॥ इतितृतीयेअष्टाविंशः २८ ॥ ॥ ७ ॥

एकोनत्रिंशके भक्तियोगस्तु बहुधोच्यते । कालस्य च बलं घोरासंसृतिश्चविरक्तये ॥ उक्तानुवादपूर्वकं भक्तिमार्गभेदान्पृच्छतिद्वाभ्यां लक्षणं महदादीनां यथासांख्येषु तथाऽत्रकथितं । येनलक्षणे नामीषां महदादीनां तत्पारमार्थिकं परस्परविभक्तमित्यर्थः १ यो भक्तियोगोमूलं प्रयोजनं यस्यतद्यन्मूलं तत्कथितं । तस्य (मूलभूतस्य) भक्तियोगस्य मार्गंप्रकारं विस्तरतोमेब्रूहि २ येनसं सृतीनां आख्यानेनसर्वतो विरागः विगतरागोभवेत् ३

॥२९॥

यथापुत्राच्चवित्ताच्चपृथङ्मर्त्यःप्रतीयते ॥ अप्यात्मत्वेनाभिमताद्देहादेःपुरुषस्तथा ३९ यथोल्मुकाद्विस्फुलिंगाद्धूमाद्वाऽपिस्वसंभवात् ॥ अप्यात्मत्वेनाभि मतांद्यथाग्निःपृथगुल्मुकात् ४० भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् ॥ आत्मातथापृथग्द्रष्टाभगवान्ब्रह्मसंज्ञितः ४१ सर्वभूतेषुचात्मानंसर्वभूतानिचा त्मनि ॥ ईक्षेतानन्यभावेनभूतेष्विवतदात्मताम् ४२ स्वयोनिषुयथाज्योतिरेकंनानाप्रतीयते ॥ योनीनांगुणवैषम्यात्तथात्माप्रकृतौस्थितः ४३ तस्मादिमां स्वांप्रकृतिंदैवींसदसदात्मिकाम् ॥ दुर्विभाव्यांपराभाव्यस्वरूपेणावतिष्ठते ४४ ॥ ॥ इतिश्रीभागवतेमहापुराणेऽष्टादशसाहस्र्यांसंहितायांवैय्यासिक्यांतृ तीयस्कंधेकापिलेयेसाधनानुष्ठाननामाष्टाविंशतितमोऽध्यायः २८ ॥ ॥ ७ ॥ ॥ ॥ देवहूतिरुवाच ॥ लक्षणंमहदादीनांप्रकृतेःपुरुषस्यच ॥ स्वरू पंलक्ष्यतेऽमीषांयेनतत्पारमार्थिकम् १ यथासांख्येषुकथितंयन्मूलंतत्प्रचक्षते ॥ भक्तियोगस्यमेमार्गंब्रूहिविस्तरशःप्रभो २ विरागोयेनपुरुषोभगवन्सर्व तोभवेत् ॥ आचक्ष्वजीवलोकस्यविविधालोकसंसृतीः ३

श्लोकाः १९/२६

चूर्णिका

यथापुत्राच्चवित्ताच्च पृथक्मर्त्यः प्रतीयते तथाआत्मापिदेहात्भिन्नः ३९ एवंदुर्विभाव्यांइमांजीवप्रकृतिंयः पराभाव्यवर्ततेसःस्वरूपेणअवतिष्ठते ४० ४१ ४२४३४४ ॥१२८॥ ॥ इतितृतीयेऽष्टाविंशः २८॥ ॥ ७ ॥ ॥ देवहूतिरुवाच ॥ ॥ हेभगवन्प्रकृतेःपुरुषस्यमहदादीनांचयथालक्षणंकथितम् १ तथाभक्तियोगस्यमार्गंवि स्तरेणवद २ जीवस्यविविधाः संसृतीःईश्वररूपस्यकालस्यतेस्वरूपंवद ३

१ तदग्निःपृथगुल्मुकादितिलिखितपुस्तकेपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरस्य महाप्रभावस्यतेत्वदात्मकस्यकालस्यस्वरूपमाचक्ष्वेत्यन्वयः यद्धेतोः यद्भयात् कुशलं पुण्यं कुर्वंति ४ अचक्षुषः अज्ञस्यअतोमिथ्याभिमतेः मिथ्याभूतेदेहादावभिमतिरहंकारोयस्य अतः कर्मस्वनुविद्धया आसक्तया धियाश्रांतस्य अतएव अनाश्रयेअपारे तमसि संसारे चिरंप्रसुप्तस्य मोहंप्राप्तस्य लोकस्य प्रबोधायत्वं योगप्रकाशकोभास्करः किलाविर्भूतोसि ५ श्लक्ष्णंसुंदरं ६ हेभामिनि मार्गैः प्रकारविशेषैः (भाव्यतेनिरूप्यते) तानेवाह स्वभावभूतायेगुणास्तेषां मार्गेनवृत्तिभेदेन (पुंसां) भावोभिप्रायः संकल्पः विभिद्यते । फलसंकल्पभेदाद्भक्तिभेदइत्यर्थः ७ हिंसादिकमभिसंधाय संकल्प्य संरंभीक्रोधीभिन्नदृक्भेददर्शी योभावंभाक्तंकुर्यात् सात्रिविधोपितामसः ८ (विषयान् शब्दादीन् यशः कीर्तिं ऐश्वर्यं प्रभावं च संकल्प्य प्रतिमादावर्चयेत् पृथग्भावो भेददर्शी ९ कर्मनिर्हारंपापक्षयं परस्मिन्परमेश्वरे कर्मार्पणं (वोद्दिश्य) भगवत्प्रीतिमुद्दिश्येत्यर्थः यष्टव्यमितिविधिसिद्धिमुद्दिश्येत्यर्थः भेददर्शित्वं अर्चादावर्चनंचत्रिष्वपिसमानं तदेवं तामसादिभक्तिपुत्रयत्रयोभेदाः तासुयथोत्तरंश्रैष्ठ्यं एवंचश्रवणकीर्तनादयोनवापिप्रत्येकं नवनवभेदाः तदेवं सगुणाभक्तिरेकाशीतिभेदाभवंति १० निर्गुणातुभक्तिरेकविधैवतामाह मद्गुणश्रुतिमात्रेणेति द्वाभ्यां । मयिपुरुषोत्तमे मनोगतिरितियाभक्तिःसा निर्गुणस्य भक्तियोगस्य लक्षणमित्यन्वयः अविच्छिन्नासंतता (यथासमुद्रेगंगाजलस्य प्रवाहरूपा) ११ अहैतुकीफलानुसंधानरहिता अव्यवहिताभेददर्शनरहिताच लक्षणं नामस्वरूपं १२ (एषां) भक्तानां निष्कामतां कैमुत्यन्यायेनाह सालोक्यं मयासहैकस्मिन् लोकेवासं सार्ष्टिं समानैश्वर्यं सामीप्यं निकटवर्तित्वं सारूप्यं समानरूपत्वं । एकत्वं सायुज्यं । उतअपि । दीयमानमपिनगृह्णंतिकुतस्तत्कामनेत्यर्थः १३ किमितितर्हिभजंतेनिष्कामाइत्याशंक्यभक्तेरेवपरमफलत्वादित्याह सएवेति (स भक्तियोगाख्यएव आत्यंतिकः परमपुरुषार्थउक्तः) ननुत्रैगुण्यं हित्वाब्रह्मप्राप्तिः परमं फलं प्रसिद्धं सत्यं तत्तुभक्तावानुषंगिकमित्याह । येनभक्तियोगेनमद्भावाय ब्रह्मत्वाय १४

कालस्येश्वररूपस्यपरेषांचपरस्यते॥ स्वरूपंबतकुर्वंतियद्धेतोःकुशलंजनाः ४ लोकस्यमिथ्याभिमतेरचक्षुषश्चिरंप्रसुप्तस्यतमस्यनाश्रये॥ श्रांतस्यकर्मस्वनुविद्धयाधियात्वमाविरासीःकिलयोगभास्करः ५ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिमातुर्वचःश्लक्ष्णंप्रतिनंद्यमहामुनिः ॥ आबभाषेकुरुश्रेष्ठप्रीतस्तांकरुणाऽर्दितः ६ ॥ ॥ श्रीभगवानुवाच ॥ भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यते ॥ स्वभावगुणमार्गेणपुंसांभावोविभिद्यते ७ अभिसंधाययोहिंसांदंभंमात्सर्यमेवच ॥ संरंभीभिन्नदृग्भावंमयिकुर्यात्सतामसः ८ विषयानभिसंधाययशऐश्वर्यमेववा ॥ अर्चादावर्चयेद्योमांपृथग्भावःसराजसः ९ कर्मनिर्हारमुद्दिश्यपरस्मिन्वातदर्पणम् ॥ यजेद्यष्टव्यमितिवापृथग्भावःससात्त्विकः १०मद्गुणश्रुतिमात्रेणमयिसर्वगुहाशये॥मनोगतिरविच्छिन्नायथागंगांऽभसोबुधौ ११ लक्षणंभक्तियोगस्यनिर्गुणस्यह्युदाहृतम् ॥ अहैतुक्यव्यवहितायाभक्तिःपुरुषोत्तमे १२ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत ॥ दीयमानंनगृह्णंतिविनामत्सेवनंजनाः १३ सएवभक्तियोगाख्यआत्यंतिकउदाहृतः ॥ येनातिव्रज्यत्रिगुणंमद्भावायोपपद्यते १४

श्लोकाः ४-८

चूर्णिका

४ हेकपिलतिमासिपातितस्यअज्ञजनस्यप्रबोधायत्वं योगभास्करः आविर्भूतोसि ५ ६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ हेभामिनिभक्तियोगः बहुविधोस्ति ७सयथा हिंसादिकम् अभिसंधायभेददर्शीमयिभक्तिंकरोतिसःतामसः ८ ऐश्वर्यादिविषयान् संकल्प्यमांअर्चयेत्सराजसः ९ पापक्षयार्थंकर्मकृत्वा ईश्वरेतदर्पणंकुर्वन् ससात्त्विकः १० एवंश्रवणकीर्तनादिभेदेन एकाशीतिभेदाः भवंति ११ निर्गुणाभक्तिस्तुफलानुसंधानशून्याएकएवतांकुर्वतः १२ जनाः मत्सेवनंविनासालोक्यादिमयादीयमानमपितेनगृह्णंति १३ सआत्यंतिकोभक्तियोगः तेउक्तः येन गुणत्रयंहित्वाजीवःब्रह्मत्वायकल्पते १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंभूतायाभक्तेः साधनान्याहपंचभिः । निषेवितेनसम्यगनुष्ठितेनअनिमित्तेनस्वधर्मेण नित्यनैमित्तिकेनमहीयसाश्रद्धादियुक्तेन क्रियायोगेनपंचरात्राद्युक्तपूजाप्रकारेण शस्तेन निष्कामेन (नातिहिंस्रेणप्राण्युपद्रवरहितेन) १५ मद्धिष्ण्यंमत्प्रतिमादि तस्य दर्शनादिभिः सत्त्वेनधैर्येणअसंगमेनवैराग्येण १६ (महतांस्वोत्तमानांदीनानांस्वाधमानां अनुकंपयाकरुणया) १७ (आध्यात्मिकस्यवेदांतशास्त्रस्यानुश्रवणात्) आर्जवेनअवक्रतया (आर्यसंगेन भागवतानां समागमेन निरहंक्रियया देहादिष्वहंममताराहित्येन) १८ मद्धर्मणःभगवद्धर्मानुष्ठातुःपुरुषस्य (एतैःस्वधर्मादिभिः) आशयश्चित्तं (मामभ्येति श्रुतेति गुणश्रवणमात्रेणेत्यर्थः) १९ प्रयत्नैर्विनैवप्राप्तौदृष्टांतः वातोरथःप्रापकोयस्यगंधस्य आशयात्स्थानात् (पुष्पादेः) आवृंक्तेआत्मसात्करोति (वशीकरोतीत्यर्थः) (एवं अविकारिसमंयच्चेत-(स्तदात्मानमभ्येति) २० चित्तशुद्धिश्चसर्वभूतात्मदृष्ट्यैवभवतीतिवक्तुं केवलप्रतिमादिनिष्ठान्निंदन्नाह अहमितिसप्तभिः (योहंभूतेष्वस्थितःयतोभूतात्मा तंमांभूतावज्ञयाऽवज्ञाय) अर्चैव (प्रतिमैव) विडंबनमनुकरणंअर्चायांपूजाविडंबनमितिवा २१ अवज्ञोपेक्षाद्वेषनिंदाक्रमेणचतुर्भिर्निषिध्यते (तत्रावज्ञानिषेधस्तावदुक्तः अथोपेक्षांनिषेधति यइति) हित्वाउपेक्ष्यअर्चांप्रतिमां २२ २३ द्रव्यैरुत्पन्नयाक्रियया (प्रतिमायामर्चितोहं) भूतग्रामावमनिनः तन्निंदकस्य (न तुष्ये) (हेअनघेशुद्धचित्तेमातः) २४ तर्हिकिमर्चादावर्चनमनर्थकमेवनेत्याह अर्चादाविति सर्वभूतेष्ववस्थितंमांस्वहृदियावन्नवेद स्वकर्मकृत् कर्माविरोधेनयथावकाशं । अनेन कर्मनिष्ठायाअपिसएवावधिरित्युक्तंभवति २५ अंतरान्तरं भेदं उत्अपिअरंअल्पं अल्पमपिभेदंयःपश्यतीत्यर्थः यद्वाअंतरामध्ये उदरंशरीरं (तल्लक्षणंव्यवधानमित्यर्थः) मृत्युरहंतस्यभयंविदधेकरोमि २६

॥१२५॥

श्लोकाः १९/२६

निषेवितेनानिमित्तेनस्वधर्मेणमहीयसा ॥ क्रियायोगेनशस्तेननातिहिंस्रेणनित्यशः १५ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः॥ भूतेषुमद्भावनयासत्त्वेनासंगमेनच १६ महतांबहुमानेनदीनानामनुकंपया ॥ मैत्र्याचैवात्मतुल्येषुयमेननियमेनच १७ आध्यात्मिकानुश्रवणान्नामसंकीर्तनाच्चमे ॥ आर्जवेनार्यसंगेननिरहंक्रिययातथा १८ मद्धर्मणोगुणैरेतैःपरिसंशुद्धआशयः ॥ पुरुषस्यांजसाऽभ्येतिश्रुतमात्रगुणंहिमाम् १९ यथावातरथोघ्राणमावृंक्तेगंधआशयात् ॥ एवंयोगरतंचेतआत्मानमविकारियत् २० अहंसर्वेषुभूतेषुभूतात्माऽवस्थितःसदा ॥ तमवज्ञायमांमर्त्यःकुरुतेऽर्चाविडंबनम् २१ योमांसर्वेषुभूतेषुसंतमात्मानमीश्वरम् ॥ हित्वार्चांभजतेमौढ्याद्भस्मन्येवजुहोतिसः २२ द्विषतःपरकायेमांमानिनोभिन्नदर्शिनः । भूतेषुबद्धवैरस्यनमनःशांतिमृच्छति २३ अहमुच्चावचैर्द्रव्यैःक्रिययोत्पन्नयाऽनघे ॥ नैवतुष्येऽर्चितोऽर्चायांभूतग्रामावमानिनः २४ अर्चादावर्चयेत्तावदीश्वरंमांस्वकर्मकृत् ॥ यावन्नवेदस्वहृदिसर्वभूतेष्ववस्थितम् २५ आत्मनश्चपरस्यापियःकरोत्यंतरोदरम् ॥ तस्यभिन्नदृशोमृत्युर्विदधेभयमुल्बणम् २६

चूर्णिका

स्वधर्मेणक्रियायोगेन १५ अहिंस्रेणमद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषुमद्भावनया १६ महतांबहुमानेनदीनानांअनुकंपयाआत्मतुल्येषुमैत्र्यायमेननियमेन १७ वेदांतश्रवणात् मेनामसंकीर्तनात् आर्जवेनआर्यसंगेननिरहंक्रियया १८ एतैः उपायैः भक्तस्यशुद्धंचित्तंमांएति १९ २० सर्वभूतेषुसंतंमांहित्वायप्रतिमांभजतेसः मौढ्यात् भस्मन्येवजुहोति २१ २२ २३ यावत् स्वहृदिसर्वभूतेषुस्थितंमांनवेद तावत् अर्चादौमांअर्चयेत् २४ २५ २६

२ अकौटिल्येनेतिवापाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथअतः सर्वभूतेपुकृतालयंकृतावासं तत्रहेतुः भूतानामात्मानमंतर्यामिगं (अर्हयेत्पूजयेत्) अभिन्नेनचक्षुषासमदर्शनेन २७ तत्रापियथोत्तरं मानाद्यातिशयः कर्तव्यइतिवक्तुंतारतम्यमाहजीवाइतिसा धैःपद्भिः अजीवानां अचेतनेभ्यः जीवाः (सचेतनाः) ततस्तेष्वपिप्राणभृतः (प्राणवृत्तिमंतः सचित्ताः ज्ञानवंतः इंद्रियाणांवृत्तयोयेषु इंद्रियवृत्तयोवृक्षाणामपिसूक्ष्माः संत्येव तथाहिमहाभारतेमोक्ष धर्मेषुस्मर्यते " तस्मात्पश्यंतिपादपाः तस्माज्जिघ्रंति पादपा " इत्यादि प्रसिद्धा स्तरुषु (प्रभूतातु) स्पर्शनेंद्रियवृत्तिरेव २८ अतस्तएव्वपिस्पर्शवेदिनः श्रेष्ठास्तेभ्यः स्पर्शवेदिभ्योरसवेदिनोमत्स्या दयः श्रेष्ठाः गंधविदोभ्रमरादयः शब्दविदः सर्पादयः २९ रूपभेदविदः काकादयः उभयतोदंतोयेषां अपादेभ्यस्तेभ्योबहुपादाः तेभ्यश्चतुष्पादाइत्यर्थः ततोद्विपात्मनुष्यः ३० ततस्तेषु (मनुष्येषु) वर्णाः (ब्राह्मणादयः) ३१ संशयछेत्तामीमांसकः ततोपिकेवलात्स्वधर्मकृत मुक्तसंगस्यलक्षणं आत्मनोधर्मंदोग्धा । धर्मंनदोग्धि (स्वर्गादिफलमिति) निष्कामइत्यर्थः ३२ अर्पिताअशेषाःक्रियाः अर्थास्तत्फलानिआत्मादेहश्चयेन अतएवनिरंतरः अव्यवहितः (अर्पितआत्मामनादेहश्चयेनतस्मात्) अकर्तुःकर्तृत्वाभिमानशून्यात्परंश्रेष्ठम् ३३ एषुजीवानांकलयापरिकलनेनअंतर्यामितयाप्रविष्टइति दृष्ट्वा (बहुमानयन्) इत्यर्थः ३४ उक्तंभक्तियोगंपूर्वोक्तेनाष्टांगयोगेनसहोपसंहराति भक्तियोगश्चेति हेमानविपुरुषंपरमेश्वरम् ३५ यदन्यत्पृष्टंजीवस्यसंसृतीः कालस्यस्वरूपंचाचक्ष्वेतितदाहएतदितिसार्धेन एतत्सर्वस्यनियंतृयद्भगवतोरूपं कीदृशं प्रधानपुरुषात्मकं परंतद्व्यतिरिक्तंच एतदेवदैवमित्यभिधीयते कीदृशं कर्मणोविचेष्टितं नानासंसृतिलक्षणंयस्मात्तत् (कर्मविचेष्टितं) दैवप्रेरितकर्मकृताः संसृतयोवि चित्राइत्यर्थः ३६ एतदेवभगवतोरूपंकालइतिचाभिधीयते कीदृशंरूपभेदस्यवस्तूनामन्यथात्वस्यआस्पदं आश्रयः कारणं उक्तंहि कालाद्गुणव्यतिकरइति वक्ष्यतेच गुणव्यतिकरः कालइति दिव्यम द्भुतप्रभावं तदेवाहभूतानामितियावत्समाप्ति महदादीनांतत्तदभिमानिजीवानां (भेददर्शिनां यतःकालात्) ३७ भयहेतुत्वमाह यइति भूतानामंतःप्रविश्यभूतैरेवभूतान्यत्तिसंहराति अधियज्ञःफलदात कलयतांवशीकुर्वताम् ३८

अथमांसर्वभूतेषुभूतात्मानंकृतालयम् ॥ अर्हयेद्दानमानाभ्यांमैत्र्याऽभिन्नेनचक्षुषा २७ जीवाःश्रेष्ठाह्यजीवानांततःप्राणभृतःशुभे ॥ ततःसचित्ताःप्रवरा स्ततश्चेंद्रियवृत्तयः २८ तत्रापिस्पर्शवेदिभ्यःप्रवरारसवेदिनः ॥ तेभ्योगंधविदःश्रेष्ठास्ततःशब्दविदोवराः २९ रूपभेदविदस्तत्रततश्चोभयतोदतः ॥ ते षांबहुपदाःश्रेष्ठाश्चतुष्पादस्ततोद्विपात् ३० ततोवर्णाश्चचत्वारस्तेषांब्राह्मणउत्तमः ॥ ब्राह्मणेष्वपिवेदज्ञोह्यर्थज्ञोऽभ्यधिकस्ततः ३१ अर्थज्ञात्संशयच्छे त्ताततःश्रेयान्स्वधर्मकृत् ॥ मुक्तसंगस्ततोभूयानदोग्धाधर्ममात्मनः ३२ तस्मान्मय्यर्पिताशेषक्रियाऽर्थात्मानिरंतरः ॥ मय्यर्पितात्मनःपुंसोमयिसंन्य स्तकर्मणः ॥ नपश्यामिपरंभूतमकर्तुःसमदर्शनात् ३३ मनसैतानिभूतानिप्रणमेद्बहुमानयन् ॥ ईश्वरोजीवकलयाप्रविष्टोभगवानिति ३४ भक्तियोगश्च योगश्चमयामानव्युदीरितः ॥ तयोरेकतरेणैवपुरुषःपुरुषंव्रजेत् ३५ एतद्भगवतोरूपंब्रह्मणःपरमात्मनः ॥ परंप्रधानंपुरुषंदैवंकर्मविचेष्टितम् ३६ रूपभे दास्पदंदिव्यंकालइत्यभिधीयते ॥ भूतानांमहदादीनांयतोभिन्नदृशांभयम् ३७ योंतःप्रविश्यभूतानिभूतैरत्त्यखिलाश्रयः । सविष्णवाख्योऽधियज्ञोऽसौ कालःकलयतांप्रभुः ३८

यदातुसर्वत्रस्थितंमांजानीयात् तदातुसर्वत्र मांअर्चयेत् २७तत्रापिसचेतनाचेतनवृक्षचतुष्पदादिभ्यः पूजार्थं नरः श्रेष्ठः २८ २९ ३० ततोमुक्तसंगः श्रेष्ठः ३१ ३२ तस्मात् अन्यंश्रेष्ठंनपश्यामि ३३ ३४ हेमानवि मयाभक्तियोगः योगश्चतेकथितः ययोः एकतरेणैवपुरुषः पुरुषंव्रजेदिति ३५ कालरूपमाह ३६ ३७ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(दयितःप्रियः बांधवः स्वः) ३९ (भगणः कृत्तिकादिसमूहः) ४० यत् यस्माद्भीताः (ओषधीभिर्व्रीह्यादिभिः) ४१ यतोभीताःसरितःस्रवंति स्यंदंते (नोत्सर्पति वेलामतीत्यनगच्छति) इंधेदीप्यते (सह गिरिभिर्भूः नमज्जतिनाधिगच्छतीत्यर्थः) ४२ अदानेभः यन्नियमात् यस्याज्ञया (श्वसतांप्राणभृतां पदंस्थानं अवकाशमित्यर्थः) महान्महत्तत्त्वंअंकुरात्मकंस्वदेहं सप्तभिरावरणैरावृतंलोकंतनुतेलोकत्वेनविस्तारयतीत्यर्थः ४३ गुणाभिमानिनोगुणनियंतारोदेवाब्रह्मादयः अस्यविश्वस्यसर्गादिषु (यद्भया)-द्वर्ततेअनुयुगंवारंवारमित्यर्थः ४४ जनेनापित्रादिनाजनं पुत्रादिकंजनयन्आदिकृत्मृत्युना अंतकमपिमारयन्अंतकरः स्वयंत्वनादिरनंतोऽव्ययश्च ४५ ॥ ॥ इतितृतीयेएकोनत्रिंशः २९ ॥ त्रिंशतुकायकांतादिलालनाकुलचेतसां कामिनांतामसी पापादधोगतिरुदीर्यते ॥ ॥ कालप्रभाववर्णनपूर्वकं वैराग्यायविचित्रकर्मकृतांसंसृतिमध्यायत्रयेणप्रपंचयाति तस्यैतस्यबालिनः कालस्यबलिनेतिवापाठः (तदाकालेनेतिविशेष्यंज्ञातव्यं) काल्यमानः द्राव्यमाणोपिवायोर्विक्रमयथामेघपंक्तिर्नवेद १ विक्रममेवाह यंयमर्थंदुःखेनप्रयासेनोपादत्तेआपादयति तंतं अर्थंभगवान्कालोधुनोतिविनाशयाति यत्कृतेयन्निमित्तं (अथोनष्टइतिअर्थनिमित्तंशोचतीत्यर्थः २ शं.केहेतुः यद्यस्मात्सानुबंधस्यकदिसाहितस्यदेहस्यसंबंधीनिगृहादीनि वसुद्रव्यं अनुक्तसमुच्चयार्थश्चकारः ३ दुर्मतित्वंदर्शयन् दुःखंप्रपंचयातिजंतुरितिचतुर्दशभिः (भवेसंसारे निर्वृतिंसौख्यं) ४ नारक्या नारकाहारादिभिजातायांलत्रा (नरकस्थोपिकिंपुनर्देवादिशरीरस्थः अत्रहेतुः देवमायेति) ५ आत्मादेहस्तत्रजायादिषुच निरूढमूलंप्रसृतमनोरथंहृदयंयस्य बहुमन्यतेकृतार्थोहमितिश्लाघते ६

श्लोकाः ३९/६

नचाऽस्यकश्चिद्दयितोनद्वेष्योनचबांधवः ॥ आविशत्यप्रमत्तोसौप्रमत्तंजनमंतकृत् ३९ यद्भयाद्वातिवातोऽयंसूर्यस्तपतियद्भयात् ॥ यद्भयाद्वर्षतेदेवोभगणोभातियद्भयात् ४० यद्वनस्पतयोभीतालताश्चौषधिभिःसह ॥ स्वेस्वेकालेभिगृह्णंतिपुष्पाणिचफलानिच ४१ स्रवंतिसरितोभीतानोत्सर्पत्युदधिर्यतः ॥ अग्निरिंधेसगिरिभिर्भूर्नमज्जतियद्भयात् ४२ नभोददातिश्वसतांपदंयन्नियमाददः ॥ लोकंस्वदेहंतनुतेमहान्सप्तभिरावृतम् ४३ गुणाभिमानिनोदेवाःसर्गादिष्वस्ययद्भयात् ॥ वर्त्ततेऽनुयुगंयेषांवशएतच्चराचरम् ४४ सोऽनंतोंऽतकरःकालोऽनादिरादिकृदव्ययः ॥ जनंजनेनजनयन्मारयन्मृत्युनांतकम् ४५ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेएकोनत्रिंशत्तमोऽध्यायः २९ ॥ ॥ कपिलउवाच॥तस्यैतस्यजनोनूनंनायंवेदोरुविक्रमम्॥काल्यमानोऽपिबलिनोवायोरिवघनावलिः १ यंयमर्थमुपादत्तेदुःखेनसुखहेतवे ॥ तंतंधुनोतिभगवान्पुमान्शोचतियत्कृते २ यदध्रुवस्यदेहस्यसानुबंधस्यदुर्मतिः ॥ ध्रुवाणिमन्यतेमोहाद्गृहक्षेत्रवसूनिच ३ जंतुर्वैभवएतस्मिन्यांयांयोनिमनुव्रजेत् ॥ तस्यांतस्यांसलभतेनिर्वृतिंनविरज्यते ४ नरकस्थोऽपिदेहंवैनपुमांस्त्यक्तुमिच्छति ॥ नारक्यांनिर्वृतौसत्यांदेवमायाविमोहितः ५ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ निरूढमूलहृदयआत्मानंबहुमन्यते ६

चूर्णिका कालस्यप्रियः द्वेष्यःकश्चिन्न ३९ यद्भयात् वायुःवाति सूर्यस्तपति ४० अग्निः ज्वलति ४१ भूर्नमज्जति ४२ ४३ ४४ एवंभूतः अनतः कालः सर्वेषां अंतकरः जनंजनेनजनयति मृत्युनाअंतकमपिमारयति४५ ॥ ॥ इतितृतीयेएकोनत्रिंशः २९ ॥॥ छ ॥ ॥ कपिलउवाच ॥ ॥ तस्यअनंतस्यकालस्यउरुविक्रमंकोपिनवेद १ २ अर्थं दुर्मतिःजनःअध्रुवस्यदेहस्य ध्रुवत्वंमन्यते गृहक्षेत्रवसूनांचस्थिरत्वंमन्यते ३ अस्मिन्संसारे जंतुः यांयांयोनिंव्रजेत् तस्यांतस्यांसुखं मन्यते विरक्तोनभवति ४ नरकस्थोपिदेहंत्यक्तुंनेच्छति तत्रापिसुखंमन्यते ५ किंच आत्मजायासुतागारपशुद्रविणबंधुषु प्रसृतमनोरथः मन्मायामोहितः जनः अहंकृतार्थोस्मीतिमन्यते ६

---

१ विचाल्यमानोपीतिच मु॰ पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एषांआत्मजायादीनां) उद्वहनाधिनापोषणादिचिंतया (संदह्यमानसर्वांगोदुरितानिदुष्कृतानिचौर्यादीनि) ७ दुराशयत्वमाह आक्षिप्तआत्माइंद्रियाणिच यस्य कया असतीनां पुंश्चलीनामपिरहसिरचितया संभोगादिरूपयामायया (मोहकशक्त्या) मधुरभाषिणां शिशूनां आलापैश्चसुखवन्मन्यतइत्युत्तरेणान्वयः ८ कूटाः वित्तशाठ्यादिबहुलाः धर्मायेषु (तेषुदुःखतंत्रेषु) दुःखप्रधानेषु (अतंद्रितः अनलसः) ९ (महत्याहिंसयापरपीडयासंपादितैरर्थैः) तान्पुष्णातियेषांपोषणेनाधोयाति शेषभुगितिभोगोपितस्य दुर्लभइत्यर्थः १० वार्तायां जीविकायां (पुनःपुनरप्यारब्धायां लुप्यमानायां) निःसत्त्वः अशक्तः परेद्रव्ये (स्पृहां कुरुते) ११ अकल्पः असमर्थः (मंदभाग्योदैवहीनः अतएववृथोद्यमः) १२ पूर्वं यथा आद्रियंते तथा आदरं नकुर्वंति कीनाशाः कृपणाः कृषीवलाः गोजरं वृद्धं वलीवर्दं १३ (तत्रापितस्यामवस्थायामपि) भ्रियमाणः पुष्यमाणः१४अवमत्याअवज्ञयाउपन्यस्तं समीपेप्रक्षिप्तं (अन्नादि) गृहपालःश्वा (तद्वत्) आहरन् भुंजानः आमयावीरोगी

॥१२८॥ १५ (उत्क्रमताउद्गच्छता) उत्तारः वहिर्निर्गतनेत्रः कफेनसंरुद्धानाड्योमार्गभूतायस्य (अतएव) कासश्वासाभ्यां कृतआयासोयस्य (घुरघुरायते) घुरघुरइति शब्दं करोति १६ परिवीतः परिवेष्टितः वाच्यमानः हेबंधोतातेत्याहूयमानः १७ अस्तधीर्नष्टमतिः (रुदतांसतां) १८ मृतस्य पुण्यपापाभ्यां द्वेगती तत्रपापगतिमाहयमदूतावित्यादियावत्समाप्ति (यदा भ्रियमाण आस्तेतदा) सरभसंक्रोधमीक्षणं ययोरतौदृष्ट्वा (शकृत् पुरीषं) १९

श्लोकाः ७/१९

संदह्यमानसर्वांगएषामुद्वहनाधिना । करोत्यविरतंमूढोदुरितानिदुराशयः ७ आक्षिप्तात्मेंद्रियःस्त्रीणामसतीनांचमायया । रहोरचितयाऽऽलापैःशिशूनांकलभाषिणाम् ८ गृहेषुकूटधर्मेषुदुःखतंत्रेष्वतंद्रितः ॥ कुर्वन्दुःखप्रतीकारंसुखवन्मन्यतेगृही ९ अर्थैरापादितैर्गुर्व्याहिंसयेतस्ततश्चतान् । पुष्णातियेषांपोषेणशेषभुग्यात्यधःस्वयम् १० वार्तायांलुप्यमानायामारब्धायांपुनःपुनः । लोभाभिभूतोनिःसत्त्वःपरार्थेकुरुतेस्पृहाम् ११ कुटुंबभरणाकल्पोमंदभाग्योवृथोद्यमः ॥ श्रियाविहीनःकृपणोध्यायञ्छ्वसितिमूढधीः १२ एवंस्वभरणाकल्पंतत्कलत्रादयस्तथा ॥ नाद्रियंतेयथापूर्वंकीनाशाइवगोजरम् १३ तत्राप्यजातनिर्वेदोभ्रियमाणःस्वयंभृतैः ॥ जरयोपात्तवैरूप्योमरणाभिमुखोगृहे १४ आस्तेऽवमत्योपन्यस्तंगृहपालइवाहरन् ॥ आमयाव्यप्रदीप्ताग्निरल्पाहारोल्पचेष्टितः १५ वायुनोत्क्रमतोत्तारःकफसंरुद्धनाडिकः ॥ कासश्वासकृतायासःकंठेघुरघुरायते १६ शयानःपरिशोचद्भिःपरिवीतःस्वबंधुभिः ।वाच्यमानोऽपिनब्रूतेकालपाशवशंगतः १७ एवंकुटुंबभरणेव्यापृतात्माऽजितेंद्रियः ॥ म्रियतेरुदतांस्वानामुरुवेदनयाऽस्तधीः १८ यमदूतौतदाप्राप्तौभीमौसरभसेक्षणौ ॥ सदृष्ट्वात्रस्तहृदयःशकृन्मूत्रंविमुंचति १९

चूर्णिका

निरंतरंतेषांपोषणचिंतयापातकानिकुरुते ७ कपटधर्मेषुगृहेषुदुःखपरिणामेषुदुःखप्रतीकारंकुर्वन् सुखवत्मन्यते ८ ९ किंच जीविकायांलुप्यमानायांअशक्तः सन्परार्थेस्पृहांकुरुते १० ११ ततःकुटुंबपोषणासमर्थःश्रीविहीनः सन्श्वसिति १२ एवंस्वभरणाकल्पंजनं तत्कलत्रादयःगोजरमिवनाद्रियंते १३ तत्रापिअजातनिर्वेदः मरणाभिमुखः १४ अवज्ञयादत्तं अन्नादिश्वानइवभुंजानः रोगीनिराहारोल्पचेष्टितः सन् गृहे आस्ते १५ वायुनाबहिर्निर्गतनेत्रः किंचअंते कासश्वासकृतायासः कफसंरुद्धनाडिकःकंठेघुरघुरायते १६ कालपाशवशंगतः स्वीयैः वाच्यमानोऽपिउरुवेदनयानब्रूते किंतु म्रियते १८ सः जनः तदा यमदूतौ दृष्ट्वा शकृन्मूत्रंमुंचति १९ ॥१२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(नरकदुःखभोगेक्षमोदेहोयातनादेहः तस्मिन्) आवृत्यानिरुध्य२०तयोस्तर्जनैर्निर्भर्त्सनैः निर्भिन्नं हृदयं यस्य आर्तःसन्चलतीतिद्वितीयेनान्वयः २१ क्षुत्तृड्भ्यांपरीतोव्याप्तः तप्तावालुकायस्मिन् निर्गतआश्रमोविश्राभस्थानमुदकं च यस्मिन् २२ (पापीयसा अकरुणेन दूतेन तमसा अंधकारेण पथामार्गेण)यमसादनं (यमगृहं) नीतो भवति २३ तत्रैवं विशेषमाह अध्वनः संबंधिनां योजनानां नवतिंनवचसहस्राणिपापाधिक्येद्वाभ्यांमेवनीतः सन् (यातनास्तीव्रवेदनाः अनुभवति) २४ (स्वानुष्ठितदुष्कृतानुसारेणानुभूयमाना) यातनाः संक्षेपतोदर्शयतिचतुर्भिः आदीपनंप्रज्वलनं प्राप्नोति स्वेन कृतं (परतोपिवा) अन्येनवा कृत्तं छिन्नं यत्स्वस्यमांसंतस्य भक्षणमित्यर्थः २५ (जीवतएवांत्राणामभ्युद्धारउत्पाटनं श्वादिभिः सर्पादिभिश्चदशद्भिः) आत्मनोवैशसंपीडा २६ (कृंतनं छेदनं) भिदापनं भेदप्रापणं (अंधुःकूपः तत्रगर्तेचरोधनं)२७ (मिथःसंगेन स्त्रीपुंसयोः परस्पराभिवेशेन)२८ नचैतदसंभावितं अत्रापि दृश्यमानत्वादित्याह अत्रैवेति (तदुपपादयतियाइति इहापि चोरादिषुउपलक्षितादृष्टाइत्यर्थः) २९ (उदरंभरः स्वदेहमेवबिभ्राणः) उभयं कुटुंबंस्वदेहंच (ईदृशं उक्तयातनारूपं) ३० पापार्जितं धनमिहभुंजतेबहवः कर्तैवनरकंयातीत्याह एकइति भूतद्रोहेणयद्भृतं (पोषितं तदिदं स्वकुटुंबं) स्थूलं कलेवरं (वा) इहैवहित्वाकुशलादितरत् पापं तदेवपाथेयं भोग्यं यस्य (ध्वांतं नरकम्) ३१

श्लोकाः २० ३१

यातनादेहआवृत्यपाशैर्बद्ध्वागलेबलात् ॥ नयतोदीर्घमध्वानंदंड्यंराजभटायथा २० तयोर्निर्भिन्नहृदयस्तर्जनैर्जातवेपथुः ॥ पथिश्वभिर्भक्ष्यमाणआर्तोऽघंस्वमनुस्मरन् २१ क्षुत्तृट्परीतोऽर्कदवानलानिलैःसंतप्यमानःपथितप्तवालुके ॥ कृच्छ्रेणपृष्ठेकशयाचताडितश्चलत्यशक्तोऽपिनिराश्रमोदके २२ तत्रतत्रपतञ्छ्रांतोमूर्छितःपुनरुत्थितः ॥ पथापापीयसानीतस्तमसायमसादनम् २३ योजनानांसहस्राणिनवतिंनवचाध्वनः ॥ त्रिभिर्मुहूर्तैर्द्वाभ्यांवानीतःप्राप्नोति यातनाः २४ आदीपनंस्वगात्राणांवेष्टयित्वोल्मुकादिभिः ॥ आत्ममांसादनंक्वापिस्वकृत्तंपरतोऽपिवा २५ जीवतश्चांत्राभ्युद्धारःश्वगृध्रैर्यमसादने ॥ सर्पवृश्चिकदंशाद्यैर्दशद्भिश्चात्मवैशसम् २६ कृंतनंचावयवशोगजादिभ्योभिदापनम् ॥ पातनंगिरिशृंगेभ्योरोधनंचांबुगर्तयोः २८ यास्तामिस्रांधतामिस्रारौरवाद्याश्चयातनाः ॥ भुंक्तेनरोवानारीवामिथःसंगेननिर्मिताः २८ अत्रैवनरकःस्वर्गइतिमातःप्रचक्षते ॥ यायातनावैनारक्यस्ताइहाप्युपलक्षिताः २९ एवंकुटुंबंबिभ्राणउदरंभरएववा ॥ विसृज्येहोभयंप्रेत्यभुंक्तेतत्फलमीदृशम् ३०एकःप्रपद्यतेध्वांतंहित्वेदंस्वंकलेवरम् । कुशलेतरपाथेयोभूतद्रोहेणयद्भृतम् ३१

चूर्णिका

तौयातनादेहेआवृत्यगलेपाशैः बध्वा दीर्घमार्गंनयतः इहराजभटाःदंड्यंयथा२०ततःतयोस्तर्जनैः भिन्नहृदयः श्वभिर्भक्ष्यमाणःक्षुत्तृड्व्याप्तःतप्तवालुकेपथि अर्कदवानलानिलैस्तप्तः पृष्ठेकशयाताडितः निराश्रमोदकेअशक्तोपिचलति २१ २२ तत्रतत्रपतञ्छ्रांतः मूर्छितः पुनः उत्थितः एवंयमसदनंद्वाभ्यांत्रिभिर्वामुहूर्तैः नवनवतिसहस्रयोजनानिनीतः सन् यातनाः प्राप्नोति २३ २४ तत्रयमलोकेस्वगात्राणांआदीपनं आत्ममांसादनं २५ श्वगृध्रैः अंत्राभ्युद्धारं दशद्भिः सर्पवृश्चिकादिभिःपीडां २६ २७ तामिस्ररौरवाद्याः यातनाः नरोवानारीवामिथःसंगेनभुंक्ते २८ हेमातः नरकः स्वर्गश्च अत्रैव तत्रत्यंसुखदुःखादि अत्रापिदृश्यते २९ कृतंकर्मएकएवभुंक्ते ३० ३१

१ द्वाभ्यांवाईतिच पुस्तकान्तरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१३०॥

ननुकुटुंबपोषणादि पापमपिविहायगच्छतुतत्राह दैवेनेति तस्य कुटुंबपोषणस्यशमलं पापं दैवेनईश्वरेणमापितं भुंक्ते (यथाहृतंवित्तं यस्य स आतुरोदैवेनासादितं दुःखं भुंक्ते यद्वा हृतं अपहृतं लोकस्यवित्तं येन स चोरइव) ३२ ननुकुटुंबपोषणं विहितमेवतत्राह केवलेति (अधर्मेणरागप्रयुक्तेन नतुविहितवृत्त्या) तमसोनरकस्यचरमं पदं स्थानं उत्कृष्टं नरकमित्यर्थः) ३३ पुनर्मनुष्यशरीरप्राप्तिप्रकारमाह (अधइति) नरलोकस्यमनुष्यादिदेहस्यप्राप्तेरधस्तात् अर्वाक्यावत्यो यातनाः (वेदनाः) आदिशब्देन श्वसूकरादियोनयश्चयास्ताः सर्वाः (क्रमशःसमनुक्रम्य) क्रमेणसंप्राप्यभोगेनक्षीणपापः शुचिःसन्अत्रपुनर्नरत्वंप्राप्नोतीत्यर्थः ३४ ॥ ॥ इति टीकायां तृतीयेत्रिंशत्तमः ॥ ३० ॥ ॥ ७ ॥ ॥ एकत्रिंशेविमिश्रैस्तुपुण्यपापैरिहांतरा मनुष्ययोनिसंप्राप्तिर्वर्ण्यतेराजसीगतिः ॥ ॥ पुनरत्राव्रजेदित्युक्तं तदेवविशेषतोदर्शयति कर्मणापूर्वकृतेन दैवमीश्वरः तदेव नेत्रंनेतृप्रवर्तकंयस्य (देहोपपत्तयेशरीरस्वीकाराय स्त्रियाउदरं) प्रविष्टोभवति (रेतसःकणा आश्रयोयस्य) १ कललंशुक्रशोणितमिश्रितांनीर्यासतुल्यंभवति बुद्बुदं वर्तुलाकारंकर्कंधुबदरीफलं तदाकारंकठिनं पेशीमांसपिंडाकारंअंडंवायोन्यंतरे २ (द्वाभ्यां मासाभ्यां) बाह्वंघ्र्यादिरूपोअंगानांविग्रहोविभागः लिंगंच (गुह्यं) छिद्राणिचतेषामुद्भवः ३ (धातवस्त्वगादयः सप्त) जरायुणागर्भवेष्टनेनवीतः प्रावृतः ४ मातुर्जग्धेनभक्षितेनान्नेनपानाद्यैश्चएधमानाधातवोयस्यजंतूनां (क्रमिविशेषाणां) संभवो यस्मिन्तस्मिन् अतएवासंमते गर्तेशेते तथाचमार्कंडेयपुराणे " नाडीचाप्यायनीनाम नाभ्यांतस्यानिबध्यते स्त्रीणांतथांतःसुषिरे सानिवद्धोपजायते क्रमंतेभुक्तपीतानिस्त्रीणांगर्भोदरेतथा तैराप्यायितदेहोसौजंतुर्वृद्धिमुपैतिवै" इति ५ तत्रत्यैः क्रमिभिःखादद्भिः सौकुमार्यात् कोमलत्वेनक्षतानिसर्वाण्यंगानियस्य ६ उल्बणैर्दुःसहैः (कट्वादिभिः रसैः उपस्पृष्टः तत्ररूक्षंकोद्रवादि) सर्वेष्वंगेषुउत्थितावेदनायस्यसआस्तइत्युत्तरेणान्वयः ७ उल्वेनजरायुणाभुग्नंकुटिलीभूतंपृष्ठं शिरोधराग्रीवाचयस्य ८

दैवेनासादितंतस्यशमलंनिरयेपुमान् ॥ भुंक्तेकुटुंबपोषस्यहृतवित्तइवातुरः ३२ केवलेनह्यधर्मेणकुटुंबभरणोत्सुकः ॥ यातिजीवोंऽधतामिस्रंचरमंतमसः पदम् ३३ अधस्तान्नरलोकस्ययावतीर्यातनादयः ॥ क्रमशःसमनुक्रम्यपुनरत्राव्रजेच्छुचिः ३४ इतिश्रीभागवतेतृतीयस्कंधेकापिलेयोपाख्यानेकर्मविपाकोनामत्रिंशत्तमोऽध्यायः ३० ॥ श्रीभगवानुवाच ॥ कर्मणादैवनेत्रेणजंतुर्देहोपपत्तये ॥ स्त्रियाःप्रविष्टउदरंपुंसोरेतःकणाश्रयः १ कललंत्वेकरात्रेणपंचरात्रेणबुद्बुदम् ॥ दशाहेनतुकर्कंधुःपेश्यंडंवाततःपरम् २ मासेनतुशिरोद्वाभ्यांबाह्वंघ्र्याद्यंगविग्रहः ॥ नखलोमास्थिचर्माणिलिंगच्छिद्रोद्भवस्त्रिभिः ३ चतुर्भिर्धातवःसप्तपंचभिःक्षुत्तृडुद्भवः ॥ षड्भिर्जरायुणावीतःकुक्षौभ्राम्यतिदक्षिणे ४ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते ॥ शेतेविण्मूत्रयोर्गर्तेसजंतुर्जंतुसंभवे ५ क्रमिभिःक्षतसर्वांगःसौकुमार्यात्प्रतिक्षणम् ॥ मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैःक्षुधितैर्मुहुः ६ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः ॥ मातृभुक्तैरुपस्पृष्टःसर्वांगोत्थितवेदनः ७ उल्बेनसंवृतस्तस्मिन्नंत्रैश्चबहिरावृतः ॥ आस्तेकृत्वाशिरःकुक्षौभुग्नपृष्ठशिरोधरः ८

श्लोकाः ३२ / ८

चूर्णिका

३२ ३३ यावतीः यातनाः क्रमशः भुक्त्वापुनः नरदेहंप्राप्नोति ३४ ॥ ॥ इतितृतीयेत्रिंशः ३० ॥ ॥ ७ ॥ ॥श्रीभगवानुवाच ॥ ॥ जंतुः दैवनेत्रेणकर्मणः पुंसःरेतः कणाश्रयः स्त्रियःउदरंप्रविष्टः एकरात्रेणकललंभवति पंचरात्रेणबुद्बुदः दशाहेनकर्कंधूफलं ततःपेशीअंडंवा२मासेनशिरः द्वाभ्यांबाह्वंघ्र्यादि त्रिभिः नखरोमास्थिचर्माणि ३ चतुर्भिःधातवःपंचभिः क्षुत्तृडुद्भवः षड्भिर्जरायुणावीतः दक्षिणेकुक्षौभ्राम्यति४मातुः जग्धान्नपानाद्यैः एधद्धातुः विण्मूत्रगर्तेशेते५तत्र क्रमिभिः क्षतसर्वांगः पंजरेशकुंतइवयातनाः भुंक्ते ६ ७ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दैवात्पूर्वकर्मवशाल्लब्धास्मृतिर्येनसः दीर्घदुरंतमनुच्छ्रासंयथाभवतितथातत्रस्थितः सन् (शर्मसुखं किंनाम नकिमपीत्यर्थः) ९ सूतिहेतुभिर्वातैर्वेपितः सोदरः समानोदरजन्माविष्ठाभूः कृमिरिव (तस्मिन्नेवोदरेविष्ठायांकृमिर्यथाचेष्टतेतद्वत्तत्रायमित्यर्थः) १० नाथमानोयाचमानः उपतप्यमानइतिवा ऋषिर्देहात्मदर्शी भीतः पुनर्गर्भवासात् सप्तवध्रयोबंधनभूताधातवोयस्यसः विक्लवयाआकुलया (तमीश्वरं) ११ उपसन्नं (शरणागतं) जगद्रक्षितुंस्वेच्छयागृहीतनानामूर्तेः भगवतश्चरणारविंदंअकुतोभयंसोहंशरणंव्रजामि भुविचलदितिश्रीकृष्णावताराभिप्रायेण (उक्तं) असतोमेअनुरूपायोग्याईदृशीगर्भवासलक्षणागतिर्येनदर्शितातस्य १२ ननुकोसौ यंशरणंव्रजसि कोवातवतस्यचविशेषः येनसेव्यसेवकत्वमित्यपेक्षायामाह (यइति) अत्रमातुर्देहेभूतेंद्रियाशयमयीं देहाद्याकारपरिणतांमायामवलंब्यआश्रित्यकर्मभिरावृतस्वरूपइवबद्धइवचयआस्तेसोहं यस्तुअत्रैवआस्तेतंनमामि कथंभूतमित्यपेक्षायांतुशब्दोक्तंविशेषंदर्शयति आतप्यमाने (अप्यस्मिन्नेव) हृदयेऽवसितंप्रतीतं एवमप्यविकारं कुतः विशुद्धंनिरुपाधिं तत्कुतः अखंडोबोधोयस्यतम् १३ ननुत्वमपिवस्तुतःशुद्धएव "असंगोह्ययं पुरुष" इत्यादिश्रुतेः तत्कथं युवयोरयंविशेषस्तत्राह यः पंचभिर्भूतैरचितेशरीरे अयथा मिथ्यैवछन्नः नवस्तुतः यतस्तेनशरीरेणरहितः असंगः अतोअयथैवइंद्रियगुणार्थचिदात्मकः इंद्रियाणिचगुणाश्चअर्थाश्चचिदाभासश्चतदात्मकः सोहंतंवंदे कथंभूतं तेनशरीरेणअविकुंठोअनवच्छिन्नोमहिमायस्यतं अवगुंठेतिपाठे अवसन्नंगुंठनमावरणंयस्यसमहिमायस्येत्यर्थः तत्रहेतुः प्रकृतिपूरुषयोः परं नियंतारं कुतः ऋषिंसर्वज्ञंविद्याशक्तिमित्यर्थः विद्याऽविद्याकृतोविशेषइतिभावः १४ ननुज्ञानेनायं (अज्ञानकृतो) बंधोनिवर्तिष्यतेकिंपरमेश्वरवंदेननतत्राह यस्यमाययानष्टस्मृतिः सन्संसारसंबंधिनिपथितदभिश्रमेणतत्कृतेनक्लेशेनचरन्नयं जीवः महतस्तस्यैवेश्वरस्यानुग्रहं विना पुनः कयायुक्त्यालोकंनिजस्वरूपंप्रवृणीतसंभजेत् । अभिश्रमहेतुत्वेनपंथानंविशिनष्टि ऊरूणि (बहूनि) गुणनिमित्तानिकर्माणिनितरांबंधनानियस्मिन् ईश्वरस्यप्रसादंविनाज्ञानाभावात्सएवसेव्यइत्यर्थः १५

श्लोकाः ९—१५

अकल्पःस्वांगचेष्टायांशकुंतइवपंजरे ॥ तत्रलब्धस्मृतिर्दैवात्कर्मजन्मशतोद्भवम् ॥ स्मरन्दीर्घमनुच्छ्वासंशर्मकिंनामविंदते ९ आरभ्यसप्तमान्मासाल्लब्धबोधोऽपिवेपितः ॥ नैकत्रास्तेसूतिवातैर्विष्ठाभूरिवसोदरः १० नाथमानऋषिर्भीतःसप्तवध्रिःकृतांजलिः ॥ स्तुवीततंविक्लवयावाचायेनोदरेऽर्पितः ११ जीवउवाच ॥ तस्योपसन्नमवितुंजगदिच्छयाऽऽत्तनानातनोर्भुविचलच्चरणारविंदम् ॥ सोहंव्रजामिशरणंह्यकुतोभयंमेयेनेदृशीगतिरदर्श्यसतोऽनुरूपा १२ यस्त्वत्रबद्धइवकर्मभिरावृतात्माभूतेंद्रियाशयमयीमवलंब्यमायाम्॥आस्तेविशुद्धमविकारमखंडबोधमातप्यमानहृदयेऽवसितंनमामि १३ यःपंचभूतरचितेरहितःशरीरेछन्नोऽयथेंद्रियगुणार्थचिदात्मकोहम्॥तेनाविकुंठमहिमानमृषिंतमेनंवंदेपरंप्रकृतिपूरुषयोःपुमांसम् १४ यन्माययोरुगुणकर्मनिबंधनेस्मिन्सांसारिकेपथिचरंस्तदभिश्रमेण ॥ नष्टस्मृतिःपुनरयंप्रवृणीतलोकंयुक्त्याकयामहदनुग्रहमंतरेण १५

चूर्णिका सप्तममासादारभ्यतत्रदैवात्लब्धस्मृतिः सूतिवातैः भ्रमन् कृतांजलिः सन्येनउदरेअर्पितः तंवाचास्तौत् १० ११ ॥ ॥ जीवउवाच ॥ ॥ येनईदृशीगतिः तंअहंशरणंव्रजामि १२ अहंप्रकृतिपुरुषयोः परंपुमांसंवंदे १४ १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.तृ. ईश्वरएवज्ञानदइत्युपपादयन्नाह । ज्ञानमिति यदेतत् (मयिवर्तमानं) त्रिकालविषयंज्ञानंतत्तं (महांतं) विनाकतमोमय्यदधात् नकोपिकिंतु सदेवः सईश्वरएव ननुअन्यः (कश्चित्) प्रकृष्टोजी अ०
वोदधातु नेत्याह जीवरूपांकर्मपदवींअनुवर्तमानावयामितितद्व्यतिरेकेणान्येषांजीवत्वाविशेषात्नकोपिसमर्थइत्यर्थः अन्यस्यात्रासंभवमुक्त्वातस्यसंभवमाह स्थिरेषुचचरेषुअंतर्यामिरूपोअनुवर्तितोअंशोये
टीका नतभंजेय १६ स्वदुःखंविज्ञापयन्नाहदेहीति अन्यदेहविवरेमातुरुदरकुहरे योसृग्विण्मूत्रकूपस्तस्मिन्पतितःतत्रजठराग्निनाभृशंतप्तोदेहोयस्य अतएवकृपणधीः इतोविवरात् विवसितुंनिर्गंतुंइच्छन्स्वमा
सान् गणयन् (कत्यतीताः कत्यवशिष्टा इति गर्भस्थस्यस्वस्यमाससंख्यांकुर्वन्) असौदेहीकदानुअहोबाहिर्निर्वास्यते (निष्कास्यतेत्वयेतिशेषः) १७ तत्कृतमुपकारंस्मरन्नाह (येनेति हेईश) येनेदृशीं ॥३१
गतिंज्ञानम्(संग्राहितः असौदशमासानभूतोदशमास्योहं) भवादृशेनेतिनिरुपमेनेत्यर्थः (सभवान् स्वेनैवकृतेन) स्वकृतेनैवोपकारेणस्वयंतुष्यतु अंजलिमात्रंविना (कोनामतत्प्रतिकुर्यात्) तत्कृतोपकारंप्रत्यु
॥१३२॥ पकारंकःकुर्यादित्यर्थः१८ईदृशींगातिमित्यनेनजात्यंतरविलक्षणं ज्ञानं प्रापितवानित्युक्तं तदेववैलक्षण्यमाहपश्यतीति अयमपरःपश्वादिःसप्तवध्रयस्त्वगादयोयस्यसजीवःस्वदेहेस्वकीयेशरीरेशारीरकेशरिरभ
वेसुखदुःखेकेवलंननुपश्यति अहंपुनर्यत्सृष्टयाधिषणयायदृत्तेनविवेकज्ञानेनदमशरीरी दमइत्युपलक्षणम् शमदमादियुक्तशरीरवान्आसंअभवं तमेवचपुराणंअनादिंपुरुसंपूर्ण बहिश्चहृदिचपश्येपश्यामीत्यन्वयः
कथंअपरोक्षतयाप्रतीतंचैत्यामिवअहंकारास्पदं भोक्तारमिवेत्यर्थः १९ विवेकज्ञानकृतंसंसारोद्वेगमनुवद २मोक्षमार्गमेवाध्यवस्यति सोहमितिद्वाभ्यां हेविभोबहुदुःखवासंयथाभवतितथागर्भेवसन्नपिसोहंगर्भा
द्बहिर्निर्गंतुमिच्छामि तत्रहेतुः अंधकूपप्राये (मोहमये) यत्रबहिरुपयातंप्राणिनंदेवस्यतवमायाउपसर्पतिव्याप्नोति यदनुयांमायामनुमिथ्यामतिः देहेअहंबुद्धिःसंसृतिचक्रंचकलत्रपुत्रादिसंबंधादुपसर्पति
२० तस्मादत्रैवास्थितोपिविगतविक्लवःअव्याकुलःसन्सुहृदाआत्मनासारथिरूपयाबुद्धयैवआत्मानंतमसःसंसारादुद्धरिष्यामि अनेकरंध्रंनानागर्भवासरूपं एतत्व्यसनंदुःखंयथा मे (मम) माभविष्यन्नभविष्य
तितथा कात्रतवसाधनसामग्रीतत्राह उपसादितौ हृदयंप्रापितौ विष्णोः पादौयेनमयासः २१ दशमासाःपरिच्छेदकायस्येतिप्रसूतिपूर्वक्षणोपलक्षणं ऋषिर्जीवः (गर्भेत्रिकालदर्शित्वमस्तीतितथोक्तः)
सद्यःतत्क्षणमेवअवाचीनमवाङ्मुखंसूतिहेतुर्मारुतः (प्रसूत्यैप्रसवाय) क्षिपतिनुदति २२

ज्ञानंयदेतददधात्कतमःसदेवस्त्रैकालिकंस्थिरचरेष्वनुवर्तितांशः ॥ तंजीवकर्मपदवीमनुवर्तमानास्तापत्रयोपशमनायवयंभजेम १६ देह्यन्यदेहविवरेजठरा
ग्निनाऽसृग्विण्मूत्रकूपपतितोभृशतप्तदेहः ॥ इच्छन्नितोविवसितुंगणयन्स्वमासान्निर्वास्यतेकृपणधीर्भगवन्कदानु १७ येनेदृशींगतिमसौदशमास्यईश श्लोकाः
संग्राहितःपुरुदयेनभवादृशेन ॥ स्वेनैवतुष्यतुकृतेनसदीननाथःकोनामतत्प्रतिविनांऽजलिमस्यकुर्यात् १८ पश्यत्ययंधिषणयाननुसप्तवध्रिःशारीरकेदमशरी
र्यपरःस्वदेहे ॥ यत्सृष्टयासतमहंपुरुषंपुराणंपश्येबहिर्हृदिचचैत्यमिवप्रतीतम् १९ सोऽहंवसन्नपिविभोबहुदुःखवासंगर्भान्ननिर्जिगमिषेबहिरंधकूपे ॥ यत्रो १६/२२
पयातमुपसर्पतिदेवमायामिथ्यामतिर्यदनुसंसृतिचक्रमेतत् २०तस्मादहंविगतविक्लवउद्धरिष्यआत्मानमाशुतमसःसुहृदात्मनैव ॥ भूयोयथाव्यसनमेतदने
करंध्रंमामेऽभविष्यदुपसादितविष्णुपादः ॥ ॥ कपिलउवाच ॥ ॥ एवंकृतमतिर्गर्भेदशमास्यः स्तुवन्नृषिः॥सद्यःक्षिपत्यवाचीनंप्रसूत्यैसूतिमारुतः२२

चूर्णिका १९ अहंवहुदुःखरूपगर्भवासात् ननिर्जिगमिषे २० २१ अत्रैवसर्वकर्मफलंभुक्त्वा उपसादितविष्णुपादः आत्मानंउद्धरिष्ये २१ कपिलउवाच गर्भेएवंकृतमतिंप्रसू
तिमारुतः अवाचीनंक्षिपति २२ ॥१३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(तेनवातेन) अवसृष्टःअधःक्षिप्तःसन् (शिरोऽवाक्कृत्वाऽकस्मात्विनिष्क्रामति हतस्मृतिर्नष्टजन्मांतरज्ञानः) २३ (विष्ठाभूःकृमिर्विशेषः असृक्चमूत्रंचतत्र) रोरूयतिरोरूयते २४ परस्यछंदंअभिप्रायं आविदुषा (जनेन अतएव) अनभिप्रेतंस्तन्यार्थरोदनेउदरव्यथांप्रकल्प्य (दीयमानं) निंबरसपानंउदरव्यथयारोदनेस्तनपानमित्यादि (प्रत्याख्यातुंनिराकर्तुम्)२५(अशुचौविण्मूत्रयुक्तत्वादशुद्धेतल्प विशेषेस्वेदजैर्मत्कुणादिभिर्दूषिते) आसनोत्थानचेष्टने (कंडूयने) चानीशःसन्रोरूयतीत्यनुषंगः २६ आमाकोमलात्वक्यस्यतम् विगतंगर्भेजातम् ज्ञानं यस्यतं २७ शैशवंपंचवर्षाणिततः पौगंडं यौवनादर्वाक्तत्रचाध्ययनादिदुःखंयौवनदुःखमाह (अलब्धेति) सार्धैस्त्रिभिः अलब्धाभीप्सितत्वेनशुचा (शोकेन) अर्पितोव्याप्तः अज्ञानादिद्धोदीप्तोमन्युर्यस्यसः २८ देहेनसहैववर्धमानेनाभिमानेनमन्युनाच (क्रोधेन) विग्रहंविरोधंकरोति आत्मनोऽताय (स्वस्य) नाशाय (कामिषुविषयलालसेषु) २९ अज्ञानंप्रपंचयतिभूतैरारब्धेदेहे (असन्ग्राहोयस्यसः) असदाग्रहइत्यर्थः अहंममेतिमतिंकरोति ३० तदर्थंदेहार्थं (यद्बद्धः) येनकर्मणाबद्धो (देहीसंसृतिंयाति) योदेहःअनुयातिपुनःपुनरायातिअनुवर्ततइतिवा कुतः अविद्याकर्मभ्यांबध्यतइतितथा३१ यदि (शिश्नोदरपूरणेकृतउद्यमः प्रयत्नोयैस्तैः) असद्भिः आस्थितःअधिष्ठितःसन्तेषांपाथिरमते पथिसन्मार्गेआस्थितोपियद्यसद्भिःसहरमतेइतिवातार्हियातनादेहमावृत्येत्यादिनापूर्वोक्तप्रकारेणतमोनरकंप्रविशति ३२ असत्संगंनिंदतिसत्यमितित्रिभिः बुद्धिःपरमपुरुषार्थविषया श्रीर्धनधान्यलक्षणा ह्रीर्लज्जा यशःकीर्तिः क्षमासहिष्णुत्वं शमोबाह्येन्द्रियनिग्रहः दमोमनोनिग्रहः भगंउन्नतिः यत्संगाद्येषांमसतांसंगात् ३३

श्लोकाः २३/३३

तेनावसृष्टःसहसाकृत्वाऽवाक्शिरआतुरः ॥ विनिष्क्रामतिकृच्छ्रेणनिरुच्छ्वासोहतस्मृतिः २३ पतितोभुव्यसृङ्मूत्रेविष्ठाभूरिवचेष्टते ॥ रोरूयतिगतेज्ञाने विपरीतांगतिंगतः २४ परच्छंदंनविदुषापुष्यमाणोजनेनसः ॥ अनभिप्रेतमापन्नःप्रत्याख्यातुमनीश्वरः२५शायितोऽशुचिपर्यंकेजंतुस्वेदजदूषिते ॥ नेशः कंडूयनेंऽगानामासनोत्थानचेष्टने२६तुदंत्यामत्वचंदंशामशकामत्कुणादयः ॥ रुदंतंविगतज्ञानंकृमयःकृमिकंयथा २७ इत्येवंशैशवंभुक्त्वादुःखंपौगंडमेवच॥ अलब्धाभीप्सितोज्ञानादिद्धमन्युःशुचाऽर्पितः २८ सहदेहेनमानेनवर्द्धमानेनमन्युना॥करोतिविग्रहंकामीकामिष्वंतायचात्मनः२९भूतैःपंचभिरारब्धेदेहेदेह्यबुधोऽसकृत् ॥ अहंममेत्यसद्ग्राहःकरोतिकुमतिर्मतिम् ३० तदर्थंकुरुतेकर्मयद्बद्धोयातिसंसृतिम् ॥ योऽनुयातिददत्क्लेशमविद्याकर्मबंधनः ३१ यद्यसद्भिःपथिपुनःशिश्नोदरकृतोद्यमैः ॥ आस्थितोरमतेजंतुस्तमोविशतिपूर्ववत् ३२ सत्यंशौचंदयामौनंबुद्धिःश्रीर्ह्रीर्यशःक्षमा ॥ शमोदमोभगश्चेतियत्संगाद्यातिसंक्षयम् ३३

चूर्णिका

तेनआतुरः हतमृतिः विनिष्क्रामति २३भुविपतितः ज्ञानेगतेसतिरोरूयति २४ तदास्वेदजदूषितेअशुचिपर्यंकेशायितः दुःखं भुंक्ते २५२६ २७ इत्यादिशैशवंपौगंडंचभुक्त्वा २८ तारुण्येसातिशिश्नोदरकृतोद्यमः असत्पथिआस्थितःरमन् पूर्ववत् तमः विशति २९ ३० ३१एवंअसत्संगात् सत्यादिनियमाः क्षयं यांति३२यथायोषित्संगात्पुंसो बंधोभवति तथाअन्यसंगतः न ३३

१ भगऐश्वर्यमितिमहेश्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

तेषुअसाधुषुखंडितात्मसुदेहात्मबुद्धिषु योषितांक्रीडामृगवत्अधीनेषु (शोच्येषुवृथैषांजन्म भारभूतं भुव इतिशोकविषयेषु) ३४ यथाचयोषित्संगिनांसंगतोबंधःतथान्यप्रसंगतोनभवेत् ३५ योषित्संग स्यानर्थहेतुतांप्रपंचयति प्रजापतिरितिसप्तभिः (तस्यारूपेणधर्षितःविह्वलइत्यर्थः) रोहिद्भूतांमृगीरूपांसतींऋक्षरूपीमृगाकारःसन् हतत्रपोनिर्लज्जः ३६ तेनब्रह्मणासृष्टामरीच्यादयःतैःसृष्टाःकश्यपाद यः तैरपिसृष्टादेवमनुष्यादयः तेषुकोनुपुमान् अखंडितधीःअनाकृष्टमनाः (नकोपीत्यर्थः योषिन्मय्यास्त्रीरूपया) ३७ दिशांजयिनःशूरानपि (पदाक्रांतान्स्वाधीनानित्यर्थः) ३८ (परंपारंप्राप्तुमिच्छुः) प्रतिलब्धआत्मरूपोलाभोयेन (सचसंगंनकुर्यात्) अस्यमुमुक्षोर्याः प्रमदाः निरयद्वारं (नरकद्वारभूताः) वदंतियोगिनः ३९ शनैःशुश्रूषादिमिषेणोपयाति (समीपमायाति) यायोषिद्रूपामाया (तांयो षितं) मृत्युंमृत्युवत् प्रतिकूलामीक्षेत) बहिर्मनोहरत्वेप्यंतर्मृत्युरूपत्वेदृष्टांतः तृणैरावृतंकूपमिवेति) ४० मुमुक्षुंस्त्रियंप्रत्येतदेवाह यामितिद्वाभ्यां ऋषभायतींपुरुषवदाचरंतींयांममायांवित्तादि प्रदंपतिंमन्यते तदातां पुरुषरूपां मायां मृत्युंविद्यादित्युत्तरेणान्वयः यतःपूर्वजन्मनि पुमान्स्त्रीसंगतः अंतकालेस्त्रीध्यानेनस्त्रीत्वंप्राप्तोजीवः ४१ तांमायांपत्यादिरूपंमृत्युंविजानीयात् (नायंदेहवियो गलक्षणोमृत्युःकिंतुपतिपुत्राद्यात्मकएवेत्यर्थः दैवोपपादितम् दैवेनोपसादितम्) मृगयोर्लुब्धकस्यगायनंअनुकूलत्वेनप्रतीयमानमपियथामृगस्यमृत्युः ४२ तदेवंजीवस्यसंसृतिः प्रपंचितातत्र च तस्यकर्मव शेनलोकाल्लोकांतरगमनं जन्ममरणं चोक्तं तत्रैवंशंकते ननुव्यापकस्यकथं लोकाल्लोकांतरगमनं नित्यस्यचकथंजन्ममरणे भोगेनकर्मक्षयेचसतिजन्ममरणंचनेष्यते तत्कुतः पुनरपितस्यकर्मसंभवइति तत्र (लोकात्) लोकांतरगमनं कर्मसंभवतीत्याहजीवेनेति जीवभूतेनजीवस्योपाधितयाभूतेनजातेनजीवेनलिंगदेहेन (देहेनेतिपाठेपिसएवार्थः) लोकांतरमनुव्रजन् कर्मफलानिभुंजानएवअविरतंकर्माणिकरो तीतिकर्मणामसमाप्तिरुक्ता ४३ जन्ममरणसंभवमाह जीवोजीवोपाधिर्लिंगदेहःअस्यात्मनःअनुगतः अनुवर्ती भूतेंद्रियमनोमयः स्थूलभूतादिविकारः देहःभोगायतनं (स्थूलशरीरं) तयोर्निरोधः कार्यायो ग्यता तदस्यजीवस्यमरणमुच्यते आविर्भावस्तुसंभवोजन्मोच्यते ४४

श्लोकाः ३४/४४

तेष्वशांतेषुमूढेषुखंडितात्मस्वसाधुषु ॥ संगंनकुर्याच्छोच्येषुयोषित्क्रीडामृगेषुच ३४ नतथास्यभवेन्मोहोबंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथापुंसो यथातत्संगिसंगतः ३५ प्रजापतिःस्वांदुहितरंदृष्ट्वातद्रूपधर्षितः ॥ रोहिद्भूतांसोऽन्वधावदृक्षरूपीहतत्रपः ३६ तत्सृष्टसृष्टसृष्टेषुकोन्वखंडितधीःपुमान् ॥ ऋ षिंनारायणमृतेयोषिन्मय्येहमायया ३७ बलंमेपश्यमायायाःस्त्रीमय्याजयिनोदिशाम् ॥ याकरोतिपदाक्रांतान्भ्रूविजृंभेणकेवलम् ३८ संगंनकुर्यात्प्रमदा सुजातुयोगस्यपारंपरमारुरुक्षुः ॥ मत्सेवयाप्रतिलब्धात्मलाभोवदंतियानिरयद्वारमस्य ३९ योपयातिशनैर्मायायोषिद्देवविनिर्मिता ॥ तामीक्षेतात्मनो मृत्युंतृणैःकूपमिवावृतम् ४० यामन्यतेपतिंमोहान्मन्मायामृषभायतीम् ॥ स्त्रीत्वंस्त्रीसंगतःप्राप्तोवित्तापत्यगृहप्रदम् ४१ तामात्मनोविजानीयात्पत्यपत्यगृ हात्मकम् ॥ दैवोपसादितंमृत्युंमृगयोर्गायनंयथा ४२ देहेनजीवभूतेनलोकाल्लोकमनुव्रजन् । भुंजानएवकर्माणिकरोत्यविरतंपुमान् ४३ जीवोह्यस्यानुगो देहोभूतेंद्रियमनोमयः ॥ तन्निरोधोऽस्यमरणमाविर्भावस्तुसंभवः ४४

चूर्णिका

अहोब्रह्मापिस्वांदुहितरंदृष्ट्वामोहितः ३४ ३५ किंचमेमायाबलंपश्ययास्त्रीरूपिणीमेमायादिशांजयिनोपिपदाक्रांतान्करोति ३६ ३७ अतः योगंआचरन्प्रमदासुसंगंनकु र्यात् यस्मात्ज्ञानवैराग्ययुक्त्या विचारबुद्ध्यामायाविरचितेलोकेदेहासक्तिंत्यक्त्वाविचरेत् ३९ ४० ४१ ४२ ४३ ४४

१ जीवोस्यानुगतोदेहइतिलिखितपुस्तकेपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतदेवदृष्टांतेनस्पष्टयति द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेर्द्रव्येक्षायां (घटादिगते रूपादिदर्शने काचकामलादिदोषेणायोग्यता यदाभवति तदैवचक्षुषइंद्रियस्याप्ययोग्यता अनयोः स्यानचक्षुषोर्यदाऽयोग्यतातदैव द्रष्टृजीवस्यद्रष्टृत्वापोग्यता एवंस्थूलदेहवैकल्येलिंगस्यवैकल्यंतदेवजीवस्यमरणं नस्वतइत्यर्थः क्वचित्(एतत्पंचत्वमित्यादिः)एकःश्लोकोऽधिकःपठ्यते तत्रायमर्थःद्रव्योपलब्धिस्थानस्य स्थूलशरीरस्यद्रव्येक्षायांयदाऽयोग्यता तत्पंचत्वंमरणम् यदातुअहंमानात् इदमेवाहमित्यभिमानेनद्रव्यस्यस्थूलशरीरस्यदर्शनं उत्पत्तिः जन्म अक्ष्णोर्गोलकयोः द्रव्यावयवस्यरूपादेर्दर्शनेऽयोग्यता यदाभवति शेषंसमानं ४५ यस्मान्नवस्तुतोजीवस्यजन्ममरणादितस्मान्मरणात्संत्रासोनकार्यः जीवनेचनकार्पण्यंदैन्यंकार्यं संभ्रमश्चजीवनप्रयत्ने४६(जीवगतिंजीवस्यब्रह्मतांबुध्द्वाधीरोज्ञानी) ४७ननुसर्वथामुक्तसंगत्वेकथंजीवितमित्यतआह सम्यक्पश्यति विचारयतीति सम्यग्दर्शना तयाबुद्ध्यामायाविरचितेलोकेकलेवरं न्यस्यनिक्षिप्यतस्मिन्नासक्तिं त्यक्त्वाचरेदित्यर्थः ४८ ॥ ॥ इतितृतीयेएकत्रिंशः ३१ ॥ ॥ ७ ॥ ॥ द्वात्रिंशेसात्त्विकी धर्मैरूर्ध्वागतिरुदीर्यते । तत्रज्ञानविहीनस्यततश्चपुनरागतिः ॥ ॥ तदेवंपापकर्मणोगतिरुक्ता इदानीं काम्यकर्मणोगतिमाहअथेतिचतुर्भिः (श्लोकैः) योगृहएवावसन्स्वान् धर्मान् दोग्धि दोह्यमाह काममर्थंच तान्दुग्धान्धर्मान् भूयः पिपर्तिपूरयति अनुतिष्ठति (यःपुनःपुनः काम्यंकर्माचरतीत्यर्थः) १ सोपिचभगवदाराधनरूपाद्धर्मात्पराङ्मुखः सन्प्राकृतानपिदेवान् पितॄंश्चयजते (सचापीत्यत्रचशब्दोहेत्वर्थः) २ ततःकिंतत्राह तेषांश्रद्धयाआक्रांताव्याप्तामतिर्यस्य पित्रर्थंदेवार्थंचव्रतंनियमोयस्य सोमपाःतत्रसोमंपीत्वेत्यर्थः ३ लोकेतिष्ठत्यपिपुण्यक्षयात् पुनरागतिमुक्त्वालोकानामपिलयमाह यदाच (अहरहःप्रलयेशेषपर्यंकेशेते अनंतएवासनं यस्यतदागृहमेधिनांप्रवृत्तिधर्मिणांलोकाएतेलयंयांति) ४ भगवद्धर्मनिष्ठानांतत्प्राप्तिमेवगतिमाह त्रिभिःयेतुकामार्थप्रयोजनायस्वधर्मान् नदुह्यंतिनदुहंति निःसंगाः अनासक्ताः न्यस्तानिईश्वरेसमर्पितानिकर्माणियैः (प्रशांतारागद्वेषरहिताः) ५

श्लोकाः ४५ / ५

द्रव्योपलब्धिस्थानस्यद्रव्येक्षाऽयोग्यतायदा ॥ तत्पंचत्वमहंमानादुत्पत्तिर्द्रव्यदर्शनम् ४५ यथाऽक्ष्णोर्द्रव्यावयवदर्शनायोग्यतायदा ॥ तदैवचक्षुषोद्रष्टुर्द्रष्टृत्वायोग्यताऽनयोः ४६ तस्मान्नकार्यःसंत्रासोनकार्पण्यंनसंभ्रमः ॥ बुद्ध्वाजीवगतिंधीरोमुक्तसंगश्चरेदिह ४७ सम्यग्दर्शनयाबुद्ध्यायोगवैराग्ययुक्तया ॥ मायाविरचितेलोकेचरेन्न्यस्यकलेवरम् ४८ इतिश्रीभा० तृ० स्कंधे कापिलेयेजीवगतिर्नामैकत्रिंशत्तमोध्यायः ॥ ३१ ॥ ॥ ॥ कपिलउवाच ॥ ॥ अथयोगृहमेधीयान्धर्मानेवावसन्गृहे ॥ काममर्थंचधर्मान्स्वान्दोग्धिभूयःपिपर्तितान् १ सचापिभगवद्धर्मात्काममूढःपराङ्मुखः ॥ यजतेक्रतुभिर्देवान्पितॄंश्चश्रद्धयाऽन्वितः २ तच्छ्रद्धयाक्रांतमतिःपितृदेवव्रतःपुमान् ॥ गत्वाचांद्रमसंलोकंसोमपाःपुनरेष्यति ३ यदाचाहींद्रशय्यायांशेतेऽनंतासनोहरिः ॥ तदालोकालयंयांतितएतेगृहमेधिनाम् ४ येस्वधर्मान्नदुह्यंतिधीराःकामार्थहेतवे ॥ निःसंगान्यस्तकर्माणःप्रशांताःशुद्धचेतसः ५

चूर्णिका

४५ ४६ ४७ ॥ ॥ इतितृतीयेएकत्रिंशः ३१ ॥ ॥ ७ ॥ ॥ कपिलउवाच ॥ ॥ अथगृहेधर्मानेवआचरन् यः वर्तते सः पुनः धर्मकामान्दोग्धि १ किंच भगवद्धर्मान्त्यक्त्वाक्रतुभिः देवान् पितॄन्यजन् चांद्रमसंलोकंगत्वापुनः अत्रएष्यति २ ३ येनिवृत्तिधर्मनिरताः निष्कामकर्माणः शुद्धचेतसः निरहंकाराः संतः ते सूर्यद्वारेणविश्वतोमुखंपुरुषंयांति ४ ५

१ धर्माश्चेतिलिखितपुस्तकेपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(निवृत्तिधर्मनिरताः शमादिनिष्ठाः स्वधर्मरूपंयत्सत्त्वंतेन परिशुद्धेन) ६ विश्वतोमुखंपरिपूर्णंपुरुषंयाति तथाचश्रुतिः "सूर्यद्वारेणतेविरजाः प्रयांति यत्रामृतः पुरुषो ह्यव्ययात्मे"ति प्रकृतिंउपादानकारणम् उत्पन्त्यंतभावनम् निमित्तकारणम् (अस्यजगतः) ७ परमेश्वरदृष्ट्याहिरण्यगर्भोपासकानामपिक्रमेणतत्प्राप्तिमाह द्विपरार्धेतित्रिभिः (ब्रह्मणः द्विपरार्धावसानेयः प्रलयस्तावत्पर्यंतं ते) परस्यहिरण्यगर्भस्य (लोकमध्यासते) परचिंतकाः परमेश्वरदृष्ट्या हिरण्यगर्भोपासका (इत्यर्थः) ८ क्ष्मादीनिपंचमहाभूतानिमनश्चइंद्रियाणि चअर्थाश्चशब्दादयः भूतादिश्चअहंकारः एवमादिभिःपरिवृतंयुक्तं ब्रह्मांडंप्रतिसंहर्तुमिच्छुः सन्अव्याकृतमीश्वरं (यर्हियदापरः स्वयंभूर्ब्रह्मा) पराख्यंद्विपरार्धलक्षणं कालं अनुभूय ९ परेत्यदूरंगत्वाभगवंतंहिरण्यगर्भमनुप्रविष्टायेयोगिनः तेतेनैवसहअमृतंपरमानंदरूपं प्रधानं उत्कृष्टंब्रह्मउपयांति नतुपूर्वं यतस्तदाअगताभिमानाः तथाचश्रुतिः " ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे परस्यांतेकृतात्मानःप्रविशंतिपरंपदमि"ति १० भगवदुपासकास्तुसाक्षादेव तंप्राप्नुवंति नतुक्रमेणअतस्त्वंसाक्षात्तमेवभजेत्याह अथतस्मात् (हेभामिनि श्रुतानुभावं तस्यप्रभावं श्रुत्वेत्यर्थः) भावेनप्रेम्णा ११ एवंतावद्भगवद्भक्तानां निरंतरमेवतत्प्राप्तिः भगवदभेदेन हिरण्यगर्भोपासकानांतुक्रमेणत्युक्तं भेदेनोपासनेतुब्रह्मादयोप्यावर्तंते किमुतान्यइत्याह आद्यइतिचतुर्भिः योवेदगर्भो (ब्रह्मा) सोपिगुणव्यतिकरेजातेपूर्वंयथाब्रह्मपदाधिकृतः सन्प्रजायते इतितृतीयेनान्वयः नकेवलं सएवैकः किंतु ऋषिभिर्मरीच्यादिभिश्चसह १२ जन्मनिहेतुद्वयंभेददृष्ट्याऽभिमानेनच कर्तृत्वादितियथापूर्वत्वेहेतुः निःसंगेननिष्कामेनकर्मणेति १३ (पुरुषर्षभः पुरुषश्रेष्ठः) किंकृत्वात्रप्रजायतेप्रथमंपारमेष्ठ्यमैश्वर्यंनिषेव्यपश्चात्प्रलये सगुणं गुणाधिष्ठातारं ब्रह्मरूपंपुरुषंसंस्तुत्यप्राप्य तेपिऋषिप्रमुखाःस्वकर्मनिर्भितमैश्वर्यं निषेव्यंपुरुषंचसंस्तुत्ययथापूर्वंस्वस्वाधिकारेणपुनरायांतीत्यन्वयः (गुणानांव्यतिकरेअसति अविद्यमानेप्रलयेइत्यर्थः) १४ १५ यदाब्रह्मोपासकानामपिभेददर्शनाभिमानाभ्यांपुनरेवमावृत्तिस्तदाकाम्यकर्मिणांकिंवक्तव्यमितितान्निंदन्नाहषड्भिःयेत्विहकर्मस्वासक्तमनसः संतः अप्रतिषिद्धानिकाम्यानि नित्यानिच (अकरणेप्रत्यवायसाधकानि) कर्माणिकृत्स्नानि कुर्वंतितेअर्यम्णः (पितॄणामधिपस्य) दक्षिणेनपथाधूममार्गेण पितृलोकंव्रजंतीतिपंचमेनान्वयः १६ मध्येतन्निंदा-(-माह रजसेत्यादिना रजसाकुंठमनसः रजोगुणेनव्याप्तचेतसः अतएवकामात्मानोविषयासक्तस्वभावाः यतः आजितेंद्रियाः अतोगृहेष्वेवाभिरत्तमनसः) १७

॥१३६॥

श्लोकाः ६/१७

निवृत्तिधर्मनिरतानिर्ममानिरहंकृताः ॥ स्वधर्माख्येनसत्त्वेनपरिशुद्धेनचेतसा ६ सूर्यद्वारेणतेयांतिपुरुषंविश्वतोमुखम् ॥ परावरेशंप्रकृतिमस्योत्पत्त्यंतभावनम् ७ द्विपरार्धावसानेयःप्रलयोब्रह्मणस्तुते ॥ तावदध्यासतेलोकंपरस्यपरचिंतकाः ८ क्ष्मांभोनलानिलवियन्मनइंद्रियार्थभूतादिभिःपरिवृतंप्रतिसंजिहीर्षुः ॥ अव्याकृतंविशतियर्हिगुणत्रयात्माकालंपराख्यमनुभूयपरःस्वयंभूः९ एवंपरेत्यभगवंतमनुप्रविष्टायेयोगिनोजितमरुन्मनसोविरागाः ॥ तेनैवसाकममृतंपुरुषंपुराणंब्रह्मप्रधानमुपयांत्यगताभिमानाः १० अथतंसर्वभूतानांहृत्पद्मेषुकृतालयम् । श्रुतानुभावंशरणंव्रजभावेनभामिनि ११ आद्यः स्थिरचराणांयोवेदगर्भःसहर्षिभिः ॥ योगेश्वरैःकुमाराद्यैःसिद्धैर्योगप्रवर्त्तकैः १२ भेददृष्ट्याभिमानेननिःसंगेनापिकर्मणा ॥ कर्तृत्वात्सगुणंब्रह्मपुरुषंपुरुषर्षभम् १३ ससंसृत्यपुनःकालेकालेनेश्वरमूर्तिना ॥ जातेगुणव्यतिकरेयथापूर्वंप्रजायते १४ ऐश्वर्यंपारमेष्ठ्यंचतेऽपिधर्मविनिर्मितम् ॥ निषेव्यपुनरायांतिगुणव्यतिकरेसति १५ येत्विहासक्तमनसःकर्मसुश्रद्धयान्विताः ॥ कुर्वंत्यप्रतिषिद्धानिनित्यान्यपिचकृत्स्नशः १६ रजसाकुंठमनसःकामात्मानोऽजितेंद्रियाः ॥ पितॄन्यजंत्यनुदिनंगृहेष्वभिरताशयाः १७

॥१३६॥

चूर्णिका

६ ७ नब्रह्मलोकंस्थित्वाअंतेब्रह्मणासहमुच्यंते ८ ९ १० हेभामिनि सर्वभूतानांहृत्पद्मस्थितंपरमात्मानंभक्त्याशरणंव्रज ११ भगवति वासुदेवे प्रयोजितः भक्तियोगःवैराग्यं ब्रह्मदर्शनंज्ञानंच जनयति १२ १३ १४ १५ १६ १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हरतिसंसारं मेधा (प्रज्ञा) यस्य (यद्विषयंज्ञानं संसारंहरतीत्यर्थः) कथनीयाउरवोविक्रमायस्यतस्यमधुद्विषः कथायांविमुखाः संतोयेत्रैवर्गिकाः (धर्मार्थकामतत्पराः तेविहतावंचिताइत्यर्थः) १८ येचअच्युतस्यकथैवसुधातांहित्वाअसतांगाथाः शृण्वंतितेनूनंदैवेनविहताइत्यन्वयः (विड्भुजः सूकराइव) १९ पितृलोकात्पुनः प्रजामनुपुत्रादिषुप्रजायंते गर्भाधानादारभ्यश्मशानांताः क्रियाः कृतवंतः यथोक्तकर्मकारिणइत्यर्थः २० कथंप्रजायंतेतदाह ततस्तेपुनरिमंलोकंप्रतिपतंति (दैवैः)—विभ्रंशितउदयोभोगसाधनंयेषाम् २१ परमेष्ठिनंपरमेश्वरम् सर्वभावेनातिप्रीत्यातस्यगुणानाश्रयते याभक्तिस्तया २२ भजनेचज्ञानवैराग्येस्वतएवभवतइत्याह वासुदेवइति (ब्रह्मदृश्यतेसाक्षात्क्रियतेऽनेनेति)२३ तदेवोपपादयति यदास्यचित्तंभगवद्गुणानुरागेणतस्मिन्नेवनिश्चलंसत्इंद्रियवृत्तिभिर्ममेदंप्रियमिदमप्रियमिति (कल्पनया) वैषम्यं अर्थेषु (घटादिषुसमेष्व—)—पिनगृह्णाति२४तदैवसआत्मनाबुद्ध्याआत्मानं स्वप्रकाशमीक्षते कथंभूतंसमंचतद्दर्शनंचतत्कुतःनिःसंगम् संगाद्धिवैषम्यंभवति निःसंगत्वेहेतुःहेयोपादेयरहितम् तत्कुतः पदंव्यवसितम् (यतः) आरूढंपरमानंदोहमितिनिश्चयंप्राप्तमित्यर्थः २५ समेष्वर्थेष्वित्युक्तंतदेवसाम्यंदर्शयति ज्ञानमात्रमेवपरब्रह्म।दिशब्दैः प्रसिद्धंदृश्यादिभिः दृश्यद्रष्टृकरणरूपेणपृथक्प्रतीयते ज्ञानमात्रत्वेनतुसमेष्वित्यर्थः २६ ननुज्ञानमात्रमात्मनः स्वरूपत्वान्नित्यप्राप्तमेवेति किमनेकसाधनसाध्येनयोगेनप्राप्यतेतदाह एतावानिति (इहसमग्रेणापियोगेन साध्यो योगिनोभिमतोयोऽसंगइतियत् एतावानेव) युज्यते प्राप्यते (साकल्येन) प्रपंचव्युदासएवयोगफलमित्यर्थः २७ ननुकथं प्रत्यक्षादिप्रतीतः प्रपंचो व्युदसितुंशक्यते प्रतीतेभ्रांतत्वाच्छक्यतइत्याह ज्ञानमिति पराचीनैः पराङ्मुखैः शब्दादिर्धर्मोऽस्तियस्यतेनार्थरूपेणज्ञानरूपं निर्गुणं (प्रकाशमानं) ब्रह्मैवावभातिनत्वर्थः पृथगस्तीत्यर्थः २८ अर्थरूपत्वमेवोदाहृत्यदर्शयति यथेति (महान् महत्तत्त्वं (अहंरूपः अहंकारः सचत्रिवृत्त्रिगुणात्मकः पुनश्चभूतरूपेण पंचविधः इंद्रियरूपेणैकादशविधश्च स्वराड्जीवरूपः तस्यजीवस्यवपुःअंडंजगच्चयतोयेभ्यो महदादिभ्यस्तथाऽवभाति २९

श्लोकाः १८—२९

त्रैवर्गिकास्तेपुरुषाविमुखाहरिमेधसः ॥ कथायांकथनीयोरुविक्रमस्यमधुद्विषः १८ नूनंदैवेनविहतायेचाच्युतकथासुधाम् । हित्वाशृण्वंत्यसद्गाथाःपुरीषमिवविड्भुजः १९ दक्षिणेनपथाऽर्यम्णःपितृलोकंव्रजंतिते ॥ प्रजामनुप्रजायंतेश्मशानांतक्रियाकृतः २० ततस्तेक्षीणसुकृताःपुनर्लोकमिमंसति ॥ पतंतिविवशादेवैःसद्योविभ्रंशितोदयाः २१ तस्मात्त्वंसर्वभावेनभजस्वपरमेष्ठिनम् ॥ तद्गुणाश्रययाभक्त्याभजनीयपदांबुजम् २२ वासुदेवेभगवतिभक्तियोगःप्रयोजितः ॥ जनयत्याशुवैराग्यंज्ञानंयद्ब्रह्मदर्शनम् २३ यदाऽस्यचित्तमर्थेषुसमेष्विंद्रियवृत्तिभिः ॥ नविगृह्णातिवैषम्यंप्रियमप्रियमित्युत २४ सतदैवाऽऽत्मनात्मानंनिःसंगंसमदर्शनम् ॥ हेयोपादेयरहितमारूढंपदमीक्षते २५ ज्ञानमात्रंपरंब्रह्मपरमात्मेश्वरःपुमान् ॥ दृश्यादिभिःपृथग्भावैर्भगवानेकईयते २६ एतावानेवयोगेनसमग्रेणेहयोगिनः ॥ युज्यतेऽभिमतोह्यर्थोयदसंगस्तुकृत्स्नशः २७ ज्ञानमेकंपराचीनैरिंद्रियैर्ब्रह्मनिर्गुणम् ॥ अवभात्यर्थरूपेणभ्रांत्याशब्दादिधर्मिणा २८ यथामहानहंरूपस्त्रिवृत्पंचविधःस्वराट् ॥ एकादशविधस्तस्यवपुरंडंजगद्यतः २९

चूर्णिका

१८ १९ २० २१ २२ २३ योगिनः सर्वत्र असंगःइतियत् अयमेवअभिमतोऽर्थःयुज्यते येअच्युतकथासुधांहित्वा असद्गाथाः शृण्वंति तेविड्भुजः पुरीषमिवनूनंदैवेननिहताः स्युः एवंब्रह्मरूपंसमाहितात्मा निःसंगः नित्यशः २४ २५ श्रद्धयाभक्त्यायोगाभ्यासेनविरक्त्याचपरिपश्यति हेगुर्विंइत्येतत्ब्रह्मदर्शनंज्ञानंतेकथितम् २६ २७ २८ २९

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुब्रह्मतथावभातिचेत्तर्हिजनः किमित्येवंनप्रत्येतितत्राह एतद्ब्रह्म (श्रद्धयाविश्वासेन समाहितात्माएकाग्रचित्तः) ३० उक्तमेवार्थं सुखप्रतिपत्त्यर्थं संक्षेपेणानुवदति इतीति हेगुर्विपूज्ये (तत्त्वंअनारोपितं स्वरूपं येनज्ञानेनानुभूयते यतस्तद्ब्रह्मदर्शनम्) ३१ अनेनचज्ञानयोगेन भगवानेवप्राप्यो यथाभक्तियोगेनेत्याह (ज्ञानेति) नैर्गुण्योज्ञानयोगश्च मन्निष्ठा भक्तिलक्षणश्चयोयोगः तयोर्द्वयोरप्येकएवार्थः प्रयोजनम् कोसौ भगवच्छब्दोलक्षणं ज्ञापकंयस्य (निर्गुणब्रह्मविषयस्यज्ञानस्य भगवन्निष्ठस्य भक्तियोगस्यच भगवत्प्राप्तिरेवफलमित्यर्थः) तदुक्तंगीतासु "तेप्राप्नुवंतिमामेवसर्वभूतहितेरता" इति ३२ ननुज्ञानयोगस्यआत्मलाभःफलंशास्त्रेणावगम्यते भक्तियोगस्यतु भजनीयेश्वरप्राप्तिः कुतस्तयोरेकार्थत्वं इत्याशंक्यदृष्टांतेनोपपादयति यथाबहूनांरूपरसादीनामाश्रयोगुडक्षीरादिः एकएवार्थोमार्गभेदप्रवृत्तैरिंद्रियैर्नानाप्रतीयते चक्षुषा शुक्लइतिरसनेनमधुर इतिस्पर्शनेनशीत इत्यादि तथाभगवानेवतत्तद्रूपेणावगम्यते ३३ शास्त्रमार्गानेव प्रपंचयति क्रिययेतित्रिभिः क्रिययापूर्तरूपया क्रतुभिर्यागैः दानैस्तुलापुरुषादिभिः मर्शनं मीमांसा आत्मेंद्रियजयो निषिद्धवर्जनं (इत्यर्थः) ३४ (विविधांगेनयमनियमाद्यष्टांगेन) उभयचिह्नेनसकामनिष्कामलक्षणेन तमेवाह यइति ३५ (यद्यपि) सकामधर्मप्राप्यं स्वर्गादितथापि तद्भगवत एवसगुणस्वरूपमिति(भावेनसगुणो भगवानीयतइत्युक्तं) एभिर्वर्त्मभिःस्वदृक्स्वप्रकाशः(इयतेप्राप्यते)३६तदेवंज्ञानयोगमुपसंहृत्यतस्यचभक्तियोगेनसमानार्थत्वमुक्त्वाभक्तियोगाद्युपसंहरति द्वाभ्यांप्रावोचमिति चतुर्विधं त्रिगुणनिर्गुणभेदेन अंतर्धावतिउत्पत्तिनिधनादि करोति (तस्यचस्वरूपं उक्तवानहं) ३७ अंगहेमातः (संसृतीर्गतीः यासुसंसृतिषुआत्माजीवः) ३८ (अस्मिन्) उपदेशाऽनधिकारिणो दर्शयति नैतादितिद्वाभ्यां खलाय (दुर्जनाय) परद्वेषकायेत्यर्थः (स्तब्धायगुरुनियोगमकुर्वाणाय) भिन्नायदुराचाराय धर्मध्वजायदांभिकाय ३९ (लोलुपाय अत्यंतलोभयुक्ताय गृहारूढचेतसेगृहाभिनिविष्टमनसेइत्यर्थः मद्भक्तद्वेषिणस्तुप्रसंगेनापिनैवोपदेशयोग्याइतिदर्शयितुमाह जात्विति अपिशब्दादभक्तोपि) ४० अथाधिकारिणआह श्रद्दधानायेतिद्वाभ्यां (प्रेयसांस्त्रीपुत्रादीनामपिसकाशात्प्रियतमइत्यर्थः "तदेतत्प्रेय"इतिश्रुतेः) ४१

॥१३८॥

श्लोकाः ३०/४१

एतद्बैश्रद्धयाभक्त्यायोगाभ्यासेननित्यशः ॥ समाहितात्मानिःसंगोविरक्त्यापरिपश्यति ३० इत्येतत्कथितंगुर्विज्ञानंतद्ब्रह्मदर्शनम् ॥ येनानुबुध्यतेतत्त्वं प्रकृतेःपुरुषस्यच ३१ ज्ञानयोगश्चमन्निष्ठोनैर्गुण्योभक्तिलक्षणः ॥ द्वयोरप्येकएवार्थोभगवच्छब्दलक्षणः ३२ यथेंद्रियैःपृथग्द्वारैरर्थोबहुगुणाश्रयः ॥ एकोनानेयतेतद्वद्भगवाञ्छास्त्रवर्त्मभिः ३३ क्रिययाक्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः ॥ आत्मेंद्रियजयेनापिसंन्यासेनचकर्मणाम् ३४ योगेनविविधांगेनभक्तियोगेनचैवहि ॥ धर्मेणोभयचिह्नेनयःप्रवृत्तिनिवृत्तिमान् ३५ आत्मतत्त्वावबोधेनवैराग्येणदृढेनच ॥ ईयतेभगवानेभिःसगुणोनिर्गुणःस्वदृक् ३६ प्रावोचं भक्तियोगस्यस्वरूपंतेचतुर्विधम् ॥ कालस्यचाव्यक्तगतेर्योंतर्धावतिजंतुषु ३७ जीवस्यसंसृतीर्बह्वीरविद्याकर्मनिर्मिताः ॥ यास्वंगप्रविशन्नात्मानवेदगतिमात्मनः ३८ नैतत्खलायोपदिशेन्नाविनीतायकर्हिचित् ॥ नस्तब्धायनभिन्नायनैवधर्मध्वजायच ३९ नलोलुपायोपदिशेन्नगृहारूढचेतसे ॥ नाभक्ताय चमेजातुनमद्भक्तद्विषामपि ४० श्रद्दधानायभक्तायविनीतायानसूयवे ॥ भूतेषुकृतमैत्रायशुश्रूषाऽभिरतायच ४१

चूर्णिका

३० ३१ ३२ भक्तियोगस्यस्वरूपंकालस्यगतिंजीवस्यबह्वीः संसृतीः। तत्त्वसंख्यानंवैराग्यंज्ञानंचप्रावोचम् ३३ ३४ ३५ ३६ ३७ ३८ इदंखलायअविनीतायस्तब्धाय दांभिकायलोभिनेअभक्तायमद्भक्तिद्विषांचनोपदिशेत् ३९ ४० श्रद्दधानायभक्तायनम्रायभूतेषुकृतमैत्रायमत्सेवारताय ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

४२ एतच्छ्रवणकीर्तनपरस्यापिमत्पदप्राप्तिरेवफलमित्याहयइति (सकृदपि मच्चित्तः मदनुसंधानवान् यश्चाभिधत्ते वक्ति) अप्यर्थेचकारः सोपिमत्पदवीमेति भागवतीं गतिमाप्नोतीत्यर्थः हिनिश्चितम् ४३ इ
तिश्री द्रा० टीकायां तृतीयस्कंधे द्विंत्रिंशोऽध्यायः ॥ ३२ ॥ ॥ त्रयस्त्रिंशेतुतस्यैवकापिलस्योपदेशतः ज्ञानभावेनतन्मातुर्जीवन्मुक्तिरुदीर्यते ॥ ॥ (एवमिति कपिलस्यजनित्रीमाता) विस्रस्तंमोहरूपं
पटलमावरणं यस्याःसा तत्त्वान्येव विषयः तेनअंकितासिद्धिः सांख्यज्ञानंतस्यभूमिंक्षेत्रंप्रवर्तकम् १ अथेतिवाक्यांतरे अजोपितववपुः केवलंदध्यौ (ध्यातवान्) नतुदृष्टवान् सचस्वयं साक्षाद्यस्यतवजठ
राज्जात् (जठरोद्गतात्कमलाज्जातः) सभवानेवविश्वस्यसर्गादिकर्ताकश्चिदस्तिएवंभूतस्त्वंमेमयाकथंजठरेणधृत इतित्रयाणामन्वयः कथंभूतंवपुःसत्व्यक्तं तत्रहेतुः अंतःसलिलेशयानं कीदृशं भूतानि इंद्रि
याणिचअर्थाश्चशब्दादयः आत्माचमनः एतन्मयंएतैर्व्याप्तमित्यर्थः कुतः गुणानां प्रवाहोयस्मिन् तत्कुतः अशेषस्यकार्यकारणस्यबीजं कारणम् २ कथंभूतो भवान् सर्गादिविधत्ते गुणप्रवाहरूपेण
॥१३९॥ विभक्तं वीर्यं शक्तिर्येनसः शक्तिद्वारेण विधत्तेनसाक्षादित्यर्थः अतः अनीहो निष्क्रियः तर्हिकथंशक्तिद्वारेणापिसर्गादिविधत्ते अवितथाभिसंधिः सत्यसंकल्पः किमर्थं विधत्ते आत्मनांजीवानामीश्वरः
जीवानांभोगार्थमित्यर्थः ननुकथं विचित्रान्भोगान् एकएवविदध्यात् अतर्क्याः सहस्रमपरिमिताःशक्तयोयस्य ३ किंच प्रलयेयस्योदरेएतद्विश्वमासीत्स (ईश्वर)-स्त्वंमयाजठरेणकथंनुधृतः ननुशिशौ
मयिकिमेतदुच्यतेतत्राह वटपत्रइति अंघ्रिपादांगुष्ठंपिबतीत्यंघ्रिपानः इदमपिशिशुत्वंतद्वदेवमायेतिभावः ४ अथवानत्वंमयाअपत्यांतरवज्जठरेधृतः किंतुवाराहाद्यवतारवदिच्छयैवाविर्भूतोसीत्याह त्वंदेहतंत्रः
देहपरिकरः स्वेच्छयास्वीकृतमूर्तिरास्से पाप्मनांदुष्टानांदमनायनिदेशभाजामाज्ञानुवर्तिनांविभूतयेसमृद्धये (तथायमप्यवतार) आत्मपथोपलब्धयेज्ञानमार्गप्रदर्शनाय ५

श्लोकाः

बहिर्जातविरागायशांतचित्तायदीयताम् ॥ निर्मत्सरायशुचयेयस्याहंप्रेयसांप्रियः ४२ यइदंशृणुयादंबश्रद्धयापुरुषःसकृत् ॥ योवाऽभिधत्तेमच्चित्तःसह्येति
पदवींचमे४३इतिश्रीभागवतेतृ०कापिलेयेद्वात्रिंशोऽध्यायः ॥ ३२॥ मैत्रेयउवाच ॥ एवंनिशम्यकपिलस्यवचोजनित्रीसाकर्दमस्यदयिताकिलदेवहूतिः॥
विस्रस्तमोहपटलातमभिप्रणम्यतुष्टावतत्त्वविषयांकितसिद्धिभूमिम् १ ॥ ॥ देवहूतिरुवाच ॥ ॥ अथाप्यजोऽतःसलिलेशयानंभूतेंद्रियार्थात्ममयंवपु ४२
स्ते ॥ गुणप्रवाहंसदशेषबीजंदध्यौस्वयंयज्जठराब्जजातः २ सएवविश्वस्यभवान्विधत्तेगुणप्रवाहेणविभक्तवीर्यः ॥ सर्गाद्यनीहोऽवितथाभिसंधिरात्मेश्वरोऽ ५
तर्क्यसहस्रशक्तिः ३ सत्वंभृतोमेजठरेणनाथकथंनुयस्योदरएतदासीत् ॥ विश्वंयुगांतेवटपत्रएकःशेतेस्ममायाशिशुरंघ्रिपानः४त्वंदेहतंत्रःप्रशमायपाप्मनां
निदेशभाजांचविभोविभूतये ॥ यथावतारास्तववसूकरादयस्तथाऽयमप्यात्मपथोपलब्धये ५

चूर्णिका

विरक्तायशांतचित्तायशुच येयस्याहंप्रियः तस्मैइदं उपदिशेत् ४ २हेअंबयः पुरुषःश्रद्धयाइदंशृणुयात् योवाअभिधत्तेसःमत्पदवीं एति ४ ३॥ ॥ इति चूर्णिकायांतृतीयेद्वात्रिंशः ३ २
॥ मैत्रेयउवाच ॥ ॥ एवंकपिलस्यजनित्री कर्दमस्यपत्नीदेवहूतिः गतमोहासतीसांख्यप्रवर्तकंतंप्रणम्य तुष्टाव १ २ ३ हेभगवन् यस्यउदरेएतद्विश्वमासीत् यः त्वंयुगां ॥१३९॥
तेमायाशिशुः अंघ्रिपानः एक वटपत्रे शेतेस्म सः अजः त्वं मयाजठरेणकथंनुधृतः ४ त्वंपाप्मनांप्रशमायनिदेशभाजांविभूतयेदेहतंत्रोभवसि यथातवसूकरादयः अवताराः
तथा आत्मपथोपलब्धये अयमपि ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

अतस्त्वद्दर्शनादहंकृतार्थास्मीतिकैमुत्यन्यायेनाह यन्नामधेयस्यश्रवणमनुकीर्तनं चयत्तस्मात् (यत्प्रह्वणात्यन्नमनात्) क्वचित्कदाचिदपि श्वानमत्तीतिश्वादः श्वपचः सोपिसवनायसोमयागायकल्पतेयोग्योभ
वतिअनेनपूज्यत्वंलक्ष्यते (सोमयाजीवपूज्यइत्यर्थः हेभगवन्तवदर्शनात्मादृशीकुतःपुनःपूताभवतीतिकिमुवक्तव्यमित्यर्थः सद्यस्तत्क्षणं)६तदुपपादयति अहोबतेत्याश्चर्येयस्यजिह्वाग्रे (तुभ्यं) तवनामवर्तते
अतःअस्मादेवहेतोःसश्वपचोपिगरीयान्यद्यस्माद्वर्ततेअतइतिवा कुतइत्यतआह तएवतपस्तेपुः कृतवंतःजुहुवुःहोमंकृतवंतःसस्नुः तीर्थेषुस्नाताः आर्याःअतएवसदाचाराःब्रह्मवेदमनूचुःअधीतवंतःयेतवनामगृणं
तित्वन्नामकीर्तनेतपआद्यंतर्भूतं अतस्तेपुण्यतमाइत्यर्थः यद्वाजन्मांतरेतैस्तपोहोमादिसर्वंकृतमितित्वन्नामकीर्तनेनमाहाभाग्योदयादवगम्यतइत्यर्थः ७ प्रत्यक्स्रोतसिप्रत्यक्(प्रवाहे)प्रत्याहृतंआत्मनिमनसिसं
विभाव्यंसंचिंत्यं स्वतेजसास्वानुभूत्या(नित्यंनिरस्तसंसारं)वेदागर्भेयस्यसःतं ८ अविक्लवया(अदीनया)गंभीरयावाचा ९ तेतवसुसेव्येन सुखंसेव्येनमेमयाउदितेन (उक्तेन) आस्थितेनअनुष्ठितेनपरांकाष्ठांजी
वन्मुक्तिअवरोत्स्यसिप्राप्स्यसि १० (अभवंअजंपरमात्मानम्) यायाः यास्यसि अतद्विदःमन्मतमविद्वांसः (मृत्युंसंसारं) ११ अनुमतःअनुज्ञातः १२ (योगादेशेनज्ञानोपदेशेन) सरस्वत्याआपीडेपुष्पमु
कुटतुल्येभूषणभूते सरस्वत्येतिपाठेमुकुटेनेवसंवेष्टिते (इत्यर्थः एतादृशे) बिंदुसरसि समाहिताबभूव १३ कथंभूतासतीसमाहितातदाह अभीक्ष्णंत्रिषवणमवगाहःस्नानंतेनकपिशान्स्वतएवकुटिलान्केशान्
तथाआत्मानंदेहंचीरिणंचीरधारिणंकृशंचाबिभ्रतीसती १४ प्रजापतेःकर्दमस्यतपोयोगाभ्यांविजृंभितम् अतिशायितमपि (देवैःप्रार्थ्यमेवनतुलभ्यंअतोऽनुपमंएतादृशमपि) स्वगार्हस्थ्यंहित्वापुत्रभूतेश्वर
विरहातुरासतीवदनंकिंचिदनिर्वाच्यंशोकव्याकुलंचकारेतिषष्ठेनान्वयः १५

श्लोकाः

यन्नामधेयश्रवणानुकीर्त्तनाद्यत्प्रह्वणाद्यत्स्मरणादपिक्वचित् ॥ श्वादोपिसद्यःसवनायकल्पतेकुतःपुनस्तेभगवन्नुदर्शनात् ६ अहोबतश्वपचोऽतोगरीयान्यज्जि
ह्वाऽग्रेवर्त्ततेनामतुभ्यम् ॥ तेपुस्तपस्तेजुहुवुःसस्नुरार्याब्रह्मानूचुर्नामगृणंतियेते ७ तंत्वामहंब्रह्मपरंपुमांसंप्रत्यक्स्रोतस्यात्मनिसंविभाव्यम् ॥ स्वतेजसा
ध्वस्तगुणप्रवाहंवंदेविष्णुंकपिलंवेदगर्भम् ८॥ ॥ मैत्रेयउवाच ॥ ॥ ईडितोभगवानेवंकपिलाख्यःपरःपुमान्॥वाचाविक्लवयेत्याहमातरंमातृवत्सलः९ ६/१५
॥ कपिलउवाच ॥ ॥ मार्गेणानेनमातस्तेसुसेव्येनोदितेनमे ॥ आस्थितेनपरांकाष्ठामचिरादवरोत्स्यसि १० श्रद्धत्स्वैतन्मतंमह्यंजुष्टंयद्ब्रह्मवादिभिः ॥
येनमामभवंयायामृत्युमृच्छंत्यतद्विदः ११ ॥ ॥ मैत्रेयउवाच । इतिप्रदर्श्यभगवान्सतींतामात्मनोगतिम् ॥ स्वमात्राब्रह्मवादिन्याकपिलोऽनुमतोययौ
१२ साचापितनयोक्तेनयोगादेशेनयोगयुक् ॥ तस्मिन्नाश्रमआपीडेसरस्वत्याःसमाहिता १३ अभीक्ष्णावगाहकपिशान्जटिलान्कुटिलालकान् ॥ आत्मा
नंचोग्रतपसाबिभ्रतीचीरिणंकृशम् १४ प्रजापतेःकर्दमस्यतपोयोगविजृंभितम् ॥ स्वगार्हस्थ्यमनौपम्यंप्रार्थ्यंवैमानिकैरपि १५

चूर्णिका

हेभगवन् ५ यन्नामधेयश्रवणकीर्तनादिभिः श्वादोऽपिसद्यः यज्ञार्थंयोग्योभवति अतः अहंकृतार्थास्मि ६ किंच तवनामयस्यजिह्वाग्रेवर्तते सः श्वपचो गरीयान् ये आर्याः ॥१४०॥
तेनामउच्चरंति तेएवतपोहोमतीर्थस्नानवेदाध्ययनादिकंकृतवंतः ७ अहंब्रह्मरूपंवेदगर्भंविष्णुंकपिलंत्वांवंदे ८ ९ ॥ ॥ कपिलउवाच ॥ ॥ हेमातः अनेनमार्गेणजीव
न्मुक्तिंशीघ्रंत्वंप्राप्स्यसि १० ११ ॥ ॥ मैत्रेयउवाच ॥ ॥ भगवान् तांआत्मनोगतिंप्रदर्श्यब्रह्मवादिन्यातयाअनुज्ञातःययौ १२ सातेनमार्गेणतस्मिन् आश्रमे १३
उग्रतपसाकृशंआत्मानंबिभ्रती १४ तांविमानसंपत्तिंइंद्रयोषितामपिईप्सितांहित्वातमेवकपिलंहरिंध्यायतीतादृशोगृहेनिस्पृहाबभूव १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यत्रगार्हस्थ्येक्षीरफेननिभाः मृदुशुभ्राःशय्याआस्तरणानिभांति दांताहस्तिदंतघटितामंचकाश्च रुक्मपरिच्छदाःस्वर्णमयाः परिकराः आसनानिपीठादीनि सुस्पर्शानिआस्तरणानियेषु (तथाभूतानि) १६ (महामरकतेषुमरकतबद्धभूमिष्वित्यर्थः रत्नानांदीपानांचार्चिषोभांति ललनारत्नसंयुताः दासी रत्नानिचभांतीत्यर्थः) १७ (संजातकुसुमैः)-र्बहुभिरमरद्रुमैरम्यं १८ यत्र (गृहे) उद्याने (उत्पलानांगंधोस्तियस्यांतस्यांवाप्यांदीर्घिकायां) प्रविष्टं (कर्दमेनोपलालित)–मात्मानंदेवहूतिं (जगुरिति) १९ आखंडलइंद्रःतस्ययायोषितस्तासामपीप्सिततमंप्राप्तुमिष्टतमंतत्‌हित्वातत्राभिमानंत्यक्त्वाः २० (तादृशं) सुहृद्वियोगस्यदुःसहतामाहवनमिति (अपत्यस्यकपिलस्यविरहेणातुरा) नष्टेवत्सेवत्सलागौरिवाभूत् २१ विरहकृतध्यानफलमाह निस्पृहानिर्वासना (अचिरतः शीघ्रं) हेवत्सविदुर २२ ततःस्वसुतःकपिलोयदाहप्रसन्नवदनांभोजमित्यादिनातत्‌ध्यानस्यविषयंभगवद्रूपंसमस्तव्यस्ताचिंतयासर्वांगचिंतया एकैकावयवचिंतयाचध्यायतीतदाआत्मानंच विश्वतोमुखंसर्वगतंध्यायतीब्रह्मण्यवस्थितमतिर्बभूवेतिपूर्वस्यैवानुषंगः केनध्यायती विशुद्धेनात्मनामनसा २३ विशुद्धौकारणान्याह भक्तिप्रवाहरूपेणयोगेन (तीव्रेण) वैराग्येणच युक्तानुष्ठानेनजातम्यत्ज्ञानंतेनचयुक्तानुष्ठानंच गीतासूक्तं"युक्ताहारविहारस्ययुक्तचेष्टस्यकर्मसु युक्तस्वप्नावबोधस्ययोगोभवतिदुःखहे"ति ब्रह्महेतुनाब्रह्मत्वापादकेन२४विश्वतोमुखत्वेहेतुःस्वानुभूत्यास्वरूपप्रकाशेनतिरोभूतंमायागुणैर्विशेषणंपरिच्छेदोयस्य २५ कथंभूतेब्रह्मणि आत्मनांजीवानांसंश्रये (आधारे) भगवति तस्याजीवन्मुक्तिमाहसार्धैस्त्रिभिः तदाच निवृत्ताजीवापत्तिर्जीवभावोयस्यास्तस्याभावस्तत्त्वंतस्मात् (मुक्तोलिंगाभिमानित्वात्) विगतक्लेशाआप्तनिर्वृतिःप्राप्तानंदाचसतीआत्मानंदेहम् नसस्मारेत्युत्तरेणान्वयः २६ ननुतथापिगुणानांविद्यमानत्वात्कथमस्मरणंतत्राह नित्यारूढोलब्धप्रतिष्ठःसमाधिर्यस्यास्तस्याभावस्तत्त्वंतस्मात् परावृत्तःशांतोगुणनिमित्तोभ्रमोयस्याः (सा यथोत्थितःपुरुषःस्वप्नेदृष्टंदेहंसत्यतयानस्मरति) २७ परतःपराभिरेवकर्दमसृष्टविद्याधरीभिःपोषःपोषणंयस्यआधिर्मनोग्लानिःतदसंभवादकृशः मलैरवच्छन्नोबभौ २८

श्लोकाः १६/२८

पयःफेननिभाःशय्यादांतारुक्मपरिच्छदाः ॥ आसनानिचहैमानिसुस्पर्शास्तरणानिच १६ स्वच्छस्फटिककुड्येषुमहामारकतेषुच ॥ रत्नप्रदीपाआभांतिललनारत्नसंयुताः १७ गृहोद्यानंकुसुमितैरम्यंबह्वमरद्रुमैः ॥ कूजद्विहंगमिथुनंगायन्मत्तमधुव्रतम् १८ यत्रप्रविष्टमात्मानंविबुधानुचराजगुः ॥ वाप्यामुत्पलगंधिन्यांकर्दमेनोपलालितम् १९ हित्वातदीप्सिततममप्याखंडलयोषिताम् । किंचिच्चकारवदनंपुत्रविश्लेषणातुरा २० वनंप्रव्रजितेपत्यावपत्यविरहातुरा ॥ ज्ञाततत्त्वाऽप्यभून्नष्टेवत्सेगौरिववत्सला २१ तमेवध्यायतीदेवमपत्यंकपिलंहरिम् ॥ बभूवाचिरतोवत्सनिस्पृहाताहृशेगृहे २२ ध्यायतीभगवद्रूपंयदाहध्यानगोचरम् । सुतःप्रसन्नवदनंसमस्तव्यस्तचिंतया २३ भक्तिप्रवाहयोगेनवैराग्येणबलीयसा ॥ युक्तानुष्ठानजातेनज्ञानेनब्रह्महेतुना २४ विशुद्धेनतदाऽऽत्मानमात्मनाविश्वतोमुखम् ॥ स्वानुभूत्यातिरोभूतमायागुणविशेषणम् २५ ब्रह्मण्यवस्थितमतिर्भगवत्यात्मसंश्रये ॥ निवृत्तजीवापत्तित्वात्क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढसमाधित्वात्परावृत्तगुणभ्रमा ॥ नसस्मारतदाऽऽत्मानंस्वप्नेदृष्टमिवोत्थितः २७ तद्देहःपरतःपोषोऽप्यकृशश्चाध्यसंभवात् ॥ बभौमलैरवच्छन्नःसधूमइवपावकः २८

चूर्णिका

१६ १७ १८ १९ २० २१ २२ २३ भक्तिप्रवाहयोगेनबलीयसावैराग्येणयुक्तानुष्ठानजातेनब्रह्महेतुनाज्ञानेन २४ आत्मनाब्रह्मण्यवस्थितमतिः निवृत्तगुणभ्रमास्वदेहं नसस्मार २५ २६ २७ तस्याः देहः परतः पोष्यः मलैः अवच्छन्नोपि सधूमपावकइवबभौ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(स्वांगंस्वदेहं) दैवगुप्तंआरब्धकर्मपालितं (अबोधेहेतुःवासुदेवेति) २९ निर्वाणंनित्यमुक्तं (परमात्मानंब्रह्म प्राप) ३० हेवीरविदुर(तत्क्षेत्रंनाम्नासिद्धपदमासीत्) उपेयुषीप्राप्ता ३१ हेसौम्यत स्यास्तन्मर्त्यंशरीरं सरिदभूत् कथंभूतं योगेनविधुतंविलीनामात्र्यौदैहिकाधातुमलायस्यतत् (कथंभूतासरित्स्रोतसांनदीनांप्रवराश्रेष्ठासिद्धैर्योगिभिः सेविता) ३२ कपिलोयया वित्युक्तं तदेवप्रपंच यति कपिलोपीतितिभिः समनुज्ञाप्यअनुज्ञांसंप्रार्थ्य (प्रागुदीचीं ऐशानीं) ३३ दत्तं (समर्पितं) अर्हणमर्घो निकेतनंच (निवासस्थानं) यस्मै ३४ (सांख्याचार्यैर्ज्ञानोपदेष्टृभिर्मुनिभिः उपशांत्यै) उपशांत्यर्थं मंगलायसमाहितआस्ते ३५ प्रकरणार्थमुपसंहरति एतदिति (तात हेविदुर) तवत्वया (यदहं पृष्टस्तदेतदुक्तम्) ३६ एतच्छ्रवणकीर्तनफलमाह यइति (आत्मयोगगुह्यं आत्मप्राप्त्युपायेषुरहस्यभूतं) सुपर्णकेतौगरुडध्वजे (निश्चितमतिः सन्) उपलभतेप्राप्नोति ॥ ३७ ॥ इतिश्रीभागवते महापुराणेतृतीयस्कंधे भावार्थदीपिकायां श्रीधरस्वामिविरचितायां त्रयस्त्रिंशत्तमोध्यायः ॥ ॥ ३३ ॥ (व्याख्यातंश्रीधराचार्यैर्नेहयत्सुगमत्वतः । किंचिन्महेश्वरस्तत्रव्याचष्टेस्वयथामति) ॥ १ ॥

॥१४२॥

श्लोकाः २९/३७

स्वांगंतपोयोगमयंमुक्तकेशंगतांबरम् ॥ दैवगुप्तंनबुबुधेवासुदेवप्रविष्टधीः २९ एवंसाकपिलोक्तेनमार्गेणाचिरतःपरम् ॥ आत्मानंब्रह्मनिर्वाणंभगवंतमवापह
३० तद्वीरासीत्पुण्यतमंक्षेत्रंत्रैलोक्यविश्रुतम् । नाम्नासिद्धपदंयत्रसासांसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यंमर्त्यमभूत्सरित् ॥ स्रोतसांप्रवरासौ
म्यसिद्धिदासिद्धसेविता ३२ कपिलोऽपिमहायोगीभगवान्पितुराश्रमात् ॥ मातरंसमनुज्ञाप्यप्रागुदीचींदिशंययौ ३३ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरो
गणैः ॥ स्तूयमानःसमुद्रेणदत्तार्हणनिकेतनः ३४ आस्तेयोगंसमास्थायसांख्याचार्यैरभिष्टुतः ॥ त्रयाणामपिलोकानामुपशांत्यैसमाहितः ३५ एत
न्निगदितंतातयत्पृष्टोऽहंतवानघ ॥ कपिलस्यचसंवादोदेवहूत्याश्चपावनः ३६ यइदमनुशृणोतियोऽभिधत्तेकपिलमुनेर्मतमात्मयोगगुह्यम् ॥ भगवति
कृतधीःसुपर्णकेतावुपलभतेभगवत्पदारविंदम् ३७॥ ॥ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेकापिलेयोपाख्यानेत्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ ।
समाप्तोऽयंतृतीयस्कंधः ॥ ३ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ७ ॥

चूर्णिका

वासुदेवप्रविष्टधीः सतीमुक्तकेशंगतांबरंस्वांगंनसस्मार २९ एवंकपिलोक्तेनमार्गेणसाब्रह्मनिर्वाणंआप ३० हेविदुरयत्रसासिद्धिंप्राप्तातत्क्षेत्रंनाम्नासिद्धपदंआसीत् ३१ तस्याः शरीरंसिद्धिदा नाम नदीआसीत् ३२ कपिलोऽपिमातरंसमनुज्ञाप्यपितुःआश्रमात्देवादिभिः स्तुतःप्रागुदीचींदिशंययौ ३३ समुद्रेणदत्तार्हणनिकेतनःत्रयाणांलोकानांशांत्यैयोगंआस्थायआस्ते ३४ ३५ हेविदुरकपिलस्यदेवहूत्याश्चसंवादःतेकथितः ३६ यः कपिलमतंशृणोतिश्रावयेद्वा सःभगवतिकृतधीः भगवत्पदारविंदंउपलभते ३७ ॥ ॥ इतिश्रीभागवतचूर्णिकायांतृतीयस्कंधेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत--तृतीयस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवते चतुर्थस्कंधः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीगणपतयेनमः श्रीसरस्वत्यैनमः श्रीकुलदेवताभ्योनमोनमः ॥ श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरामायनमः ॥ अथैकत्रिंशताध्यायैर्विसर्गस्तुर्यईर्यते । विसर्ग
स्त्वीश्वराधीनैर्ब्रह्मरुद्रादिभिःकृतः ॥१॥ तत्रतुप्रथमेऽध्याये मनुकन्यान्वयाः पृथक् । वर्ण्यंतेयत्रयज्ञादिमूर्तिभिः प्रभवो हरेः ॥२॥ ॥ मनुकन्यान्वयं विस्तरेण वक्तुमाह मनोस्त्विति।(शतरूपायांतुपत्न्यां) चका
रात्द्वौपुत्रौच १ तुशब्दादन्यतोपिपुत्रलाभःसूचितस्तंदर्शयितुमाह।पुत्रिकाधर्ममाश्रित्येति।"अभ्रातृकांप्रदास्यामितुभ्यंकन्यामलंकृताम्।अस्यांयोजायतेपुत्रःसमेपुत्रोभवेदिति"भाषाबंधेनकन्यादानं पुत्रि
काधर्मः सच अभ्रातृकायांकन्यायां पुत्रार्थिनएवप्रसिद्धः तथापि पुत्रबाहुल्यकामस्तथाकृतवानित्याह भ्रातृमतीमपीति (तथाकर्तुं शतरूपयाअनुमोदितश्च) २ मिथुनं पुरुषंस्त्रियंच समाधिना श्रीवि
ष्णुध्यानेन भूतेर्लक्ष्म्याअंशभूता अतस्तयोर्विवाहोनविरुद्धइतिभावः ४ पुत्र्या आकूतेः पुत्रंयज्ञम् ५ यजुषां यज्ञानांमंत्राणांवापतिर्विष्णुः । (कामयमानांतां) ६ द्विषट्द्वादश ७ प्रसंगात्स्वायंभुवम
न्वंतरगतंषट्कमाह।तुषिताइतिद्वाभ्यां।"मन्वंतरंमनुर्देवामनुपुत्राः सुरेश्वरः। ऋषयोंऽशावतारश्चहरेः षड्विधमुच्यत"इतिवक्ष्यति। तत्रस्वायंभुवोमनुः तुषिता देवाः मरीचिप्रमुखाः सप्तर्षयः यज्ञोहरेरवतारः
सएवसुरगणेश्वरइंद्रः ८ प्रियव्रतोत्तानपादौमनुपुत्रौपृथ्वीपालकौ। तदेवंयज्ञस्यद्वैविध्येनषड्विधत्वंतयोः पुत्रपौत्रनप्तॄणां वंशैरनुवृत्तं व्याप्तं पालितं तन्मन्वंतरम् ९ (तत्संबंधिवंशादि) श्रुतप्रायंबाहुल्येन
श्रुतं(ममगदतः सकाशात्) तत्कन्यावंशानामश्रुतत्वात्प्रायग्रहणम् १० (विततः विस्तृतः) ११ (ब्रह्मर्षीणांमरीच्यादीनांपत्न्यः प्रोक्ताः तासां) प्रसूतिप्रसवं पुत्रपौत्रादिविस्तारं (मेमया) १२

॥१॥ श्लोकाः १/१२

श्रीगणेशायनमः ॥ ॥ मैत्रेयउवाच ॥ मनोस्तुशतरूपायांतिस्रःकन्याश्चजज्ञिरे ॥ आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रुताः १ आकूतिंरुचयेप्रादादपिभ्रा
तृमतींनृपः ॥ पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः २ प्रजापतिःसभगवान्रुचिस्तस्यामजीजनत् ॥ मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना ३ यस्तयोः
पुरुषःसाक्षाद्विष्णुर्यज्ञस्वरूपधृक् ॥ यास्त्रीसादक्षिणाभूतेरंशभूताऽनपायिनी ४ आनिन्येस्वगृहंपुत्र्याःपुत्रंविततरोचिषम् ॥ स्वायंभुवोमुदायुक्तोरुचिर्जग्रा
हदक्षिणाम् ५ तांकामयानांभगवानुवाहयजुषांपतिः ॥ तुष्टायांतोषमापन्नोऽजनयद्द्वादशात्मजान् ६ तोषःप्रतोषःसंतोषोभद्रःशांतिरिडस्पतिः ॥ इध्मः
कविर्विभुःस्वह्नःसुदेवोरोचनोद्विषट् ७ तुषितानामतेदेवाआसन्स्वायंभुवांतरे ॥ मरीचिमिश्राऋषयोयज्ञःसुरगणेश्वरः ८ प्रियव्रतोत्तानपादौमनुपुत्रौ
महौजसौ ॥ तत्पुत्रपौत्रनप्तॄणामनुवृत्तंतदंतरम् ९ देवहूतिमदात्तातकर्दमायात्मजांमनुः ॥ तत्संबंधिश्रुतप्रायंभवतागदतोमम १० दक्षायब्रह्मपुत्रायप्रसू
तिंभगवान्मनुः ॥ प्रायच्छद्यत्कृतःसर्गस्त्रिलोक्यांविततोमहान् ११ याः कर्दमसुताःप्रोक्तानवब्रह्मर्षिपत्नयः ॥ तासांप्रसूतिप्रसवंप्रोच्यमानंनिबोधमे १२

चूर्णिका

श्रीगणेशायनमः ॥ ॥ श्रीमत्कुलदेवतायैनमः ॥ ॥ मैत्रेयउवाच ॥ ॥ मनोस्तुशतरूपायांआकूतिःदेवहूतिःप्रसूतिःइतितिस्रःकन्याःजज्ञिरे १ मनुः रुचये पुत्रिकाधर्मेण
आकूतिंप्रादात् २ तस्यांरुचिःमिथुनंअजीजनत् ३ तत्रयःपुरुषःसःयज्ञइतिसंज्ञयाविष्णववतारः यास्त्रीसादक्षिणानाम्नी लक्ष्म्यंशा ४ मनुः तंगृहेआनयत् ५ यज्ञःदक्षिणांउवा
च अस्यां तोषःप्रतोषःसंतोष.भद्रःइडस्पतिःशांतः इध्मःकविःविभुःस्वप्रःसुदेवःरोचनःएवंद्वादशदेवाःअभवन् ६ ७ तेस्वायंभुवेंतरेहविर्भुजःदेवाःआसन् तत्रमरीच्यादयःऋषयःय
ज्ञःअवतारःसएवइंद्रः ८ प्रियव्रतोत्तानपादौमनुपुत्रौ तथाकर्दमायदेवहूतिंअदात् तच्चरितंउक्तम् ९ १० तथाब्रह्मपुत्रायदक्षायप्रसूतिंददौ यत्सर्गः त्रिलोकींविततःपरकर्द
मकन्यानांवंशंशृणु ११ १२

॥१॥

१ द्वैरूप्येण इति वापाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥२॥ पयोः पुत्रयोर्वंशेनआपूरितम् १३कश्यपस्यवंशं षष्ठे वक्ष्यति (अतो) द्वितीयस्यवंशंतावदाह पूर्णिमेति देवकुल्यां नाम कन्यांच हरेःपादक्षालनाज्जन्मांतरे यादिवःसरित् गंगाऽभूत् (तम्) १४आत्मेशब्रह्मसंभवान् विष्णुरुद्रब्रह्मणामंशैःसंभूतान् (जनयामास) १५ किंचित्किंस्वित् किंकर्तुमिच्छवइत्यर्थः १६ ऋक्षं नामकुलाद्रिंतपसिास्थितः(आस्थितः) सन्१७ तास्मिन्कुलाद्रौप्रसूनानां स्तवकाये षुपलाशाशोकेषुतेषां कानने निर्विंध्यानामनदी तस्याः स्रवद्भिर्वार्भिःउद्घुष्टेनादिते १८ (निर्द्वंद्वःजितशीतोष्णादिद्वंद्वइत्यर्थः) १९ (प्रजांसंततिम्) २० प्राणायामएव एधः संदीपकं (काष्ठं) यस्यतेनमुनेर्मूर्ध्नोनिर्गतेनअग्निनातप्यमानंसमीक्ष्यतदाश्रमपदं (ब्रह्मादयस्त्रयो) ययुरित्यन्वयः २१ अप्सरःप्रमुखैःवितायमानं विस्तारेणगीयमानं यशोयेषांते २२ तेषांप्रादुर्भावः प्राकट्यंतस्यसंयोगःसंनिधिःतेन विद्योतितं मनोयस्य उत्तिष्ठन् उत्कर्षेणतिष्ठन् २३ अर्हणं पुष्पादिकं अंजलौयस्य उपतस्थे पूजयामास वृषाद्यारूढान् स्वैःस्वैश्चिह्नैः त्रिशूलकमंडलुचक्रादिभिः २४ कृपयाअवलोकोयस्मिन् हसच्चतद्वदनंच तेनउपलंभितान् प्रसन्नत्वेनज्ञापितान्तेषांरोचिषादीप्त्या २५ श्लक्ष्णयामधुरया सूक्तयागंभीरार्थया (सर्वलोकगरीयसःसर्वेषांलोकानांगुरुवरान्अस्तावीत् तत्प्रवणंतेषुतत्परंयुंजन्कुर्वन्नित्यर्थः) २६

श्लोकाः १३/२६

पत्नीमरीचेस्तुकलासुषुवेकर्दमात्मजा ॥ कश्यपंपूर्णिमानंचययोरापूरितंजगत् १३ पूर्णिमाऽसूतविरजंविश्वगंचपरंतप ॥ देवकुल्यांहरेःपादशौचाद्याऽभूत्सरिद्दिवः १४ अत्रेःपत्न्यनसूयात्रीन्जज्ञेसुयशसःसुतान् ॥ दत्तंदुर्वाससंसोममात्मेशब्रह्मसंभवान् १५॥ विदुरउवाच ॥ अत्रेर्गृहेसुरश्रेष्ठाःस्थित्युत्पत्त्यंतहेतवः ॥ किंचिच्चिकीर्षवोजाताएतदाख्याहिमेगुरो १६॥ मैत्रेयउवाच ॥ ब्रह्मणानोदितःसृष्टावत्रिर्ब्रह्मविदांवरः ॥ सहपत्न्याययावृक्षंकुलाद्रिंतपसिस्थितः १७ तस्मिन्प्रसूनस्तबकपलाशाशोककानने ॥ वार्भिःस्रवद्भिरुद्घुष्टेनिर्विंध्यायाःसमंततः १८ प्राणायामेनसंयम्यमनोवर्षशतंमुनिः ॥ अतिष्ठदेकपादेननिर्द्वंद्वोऽनिलभोजनः १९ शरणंतंप्रपद्येऽहंयएवजगदीश्वरः ॥ प्रजामात्मसमांमह्यंप्रयच्छत्विितिचिंतयन् २० तप्यमानंत्रिभुवनंप्राणायामैधसाग्निना॥ निर्गतेनमुनेर्मूर्ध्नःसमीक्ष्यप्रभवस्त्रयः २१ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः ॥ वितायमानयशसस्तदाश्रमपदंययुः २२ तत्प्रादुर्भावसंयोगविद्योतितमनामुनिः ॥ उत्तिष्ठन्नेकपादेनददर्शविबुधर्षभा न् २३ प्रणम्यदंडवद्भूमावुपतस्थेऽर्हणांजलिः ॥ वृषहंससुपर्णस्थान्स्वैःस्वैश्चिह्नैश्चचिह्नितान् २४ कृपाऽवलोकेनहसद्वदनेनोपलंभितान् ॥ तद्रोचिषाप्रतिहतेनिमील्यपुनरक्षिणी २५ चेतस्तत्प्रवणंयुंजन्नस्तावीत्संहतांजलिः ॥ श्लक्ष्णयासूक्तयावाचासर्वलोकगरीयसः २६

चार्णिका मरीचेःपत्नीकला कश्यपंपूर्णिमानंचसुषुवे कश्यपवंशंषष्ठेवक्ष्ये पूर्णिमाविरजंविश्वगंदेवकुल्यां व कन्यां असूत याजन्मांतरेगंगाभूत् १३ १४अत्रेःपत्नी अनसूयात्रीन्दत्तदुर्वाससोमान् विष्ण्वीशब्रह्मसंभवान्सुतान्जज्ञे १५ ॥ ॥ विदुरउवाच ॥ ॥ अत्रेर्गृहेईशाःकिंस्विच्चिकीर्षवोजाताः एतद्वद १६ ॥ ॥ मैत्रेयउवाच ॥ ॥ ब्रह्मणासृष्टौनोदितःअत्रिःपत्न्यासहऋक्षंअद्रिंएत्य १७ तत्रएकेनपदातिष्ठन्वर्षशतंतपसिस्थितः इदंआह १८ १९ यः ईश्वरोऽस्तिसःमेस्वतुल्यांप्रजांयच्छतुइतितंशरणंप्राप २० एतत्ज्ञात्वा तेदेवाः अत्रेः आश्रमंययुः तान्दृष्ट्वाप्रणम्यपूजयामासअस्तौत् २१ २२ २३ २४ २५ २६ ॥ ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. अनुयुगंकल्पेकल्पे (विभज्यमानै-)-विभज्यगृहीतादेहायैस्ते प्रसिद्धाब्रह्माविष्णुगिरिशायूयंवःयुष्मान्प्रणतोस्मि तेभ्यःसकाशादेकएवमेमयाउपहूतः(प्रार्थितःनतुबहवः) शरणंतंप्रपद्येहमित्येकस्यैवानिर्दिष्ट अ०
त्वात् सचयुष्मासुकइतियुष्माभिरेवकथ्यतामित्यर्थः २७ अस्यप्रपंचएकइति । विविधैःप्रधानैरुपचारैः । विबुधप्रधानइतिवापाठः। प्रजननायपुत्रोत्पत्त्यै चित्तीकृतःचित्तेनैक्यंनीतः (चिंतितइत्यर्थः) मनसो
टीका पिदूरात्अगो:—:संतःकथंनुत्रयोपिअत्रागताः (एकस्यापिनेत्रगोचरत्वमसंभाव्यंतत्रत्रयोपिनेत्रगोचरत्वंप्राप्ताइतिमहान्विस्मयोममेत्यर्थः) २८ (प्रभोहेविदुर) २९ तेत्वयायथाकृतःसंकल्पःतेनतथैवभा ॥१॥
व्यंनान्यथा। यतःसत्संकल्पस्यसत्पसंकल्पस्यतेसंकल्पः तर्हिकथमेकस्मिन्ध्यायमानेत्रयःप्रतीताःस्थ तत्राहुः यदेकंजगदीश्वराख्यंतत्त्वंभवान्ध्यायति।("शरणंतंप्रपद्येहंयएवजगदीश्वर" इत्यादिना) तेवयं
॥३॥ त्रयोपितदेवैकंतत्त्वंनास्माकंभेदोस्तीत्यर्थः ३० (भवितारोभविष्यंतितेभद्रंतुभ्यंस्वस्ति) विस्रप्स्यंतिविस्तारयिष्यंति अंतर्भूतणिजर्थस्यसृप्लृगतावित्यस्यरूपम् ३१ ताभ्यांसम्यक्सभाजिताःपूजिताःसंतः
(तयोःपश्यतोः) ततःस्थानात्प्रतिजग्मुः ३२ अथांगिरसोब्रह्मणस्तृतीयपुत्रस्य (प्रजाःसंततीः) निबोधबुध्यस्व ३३ ताःकन्यानिर्दिशतिसिनीवालीति ३४ ३५ पुलस्त्योहविर्भुविपत्न्यामित्यन्वयः।सोगस्त्यः
जन्मांतरेदहाग्निःजाठराग्निःविश्रवाश्चपुलस्त्यस्यसुतइतिशेषः३६तस्यविश्रवसःइडविडायांपत्न्यांजातःसुतःकुबेरःअन्यस्यांभार्यायांकेशिन्यांरावणादयःत्रयःसुताः३७(सतीसाध्वीगत्याख्याभार्या) ३८

श्लोकाः

॥ अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषुविभज्यमानैर्मायागुणैरनुयुगंविगृहीतदेहाः ॥ तेब्रह्मविष्णुगिरिशाःप्रणतोस्म्यहंवस्तेभ्यःकएवभवतांमइहो
पहूतः २७एकोमयेहभगवान्विविधप्रधानैश्चित्तीकृतःप्रजननायकथंनुयूयम् ॥ अत्रागतास्तनुभृतांमनसोऽपिदूराद्ब्रूतप्रसीदतमहानिहविस्मयोमे २८॥ मैत्रे २७—३८
उवाच ॥ इतितस्यवचःश्रुत्वात्रयस्तेविबुधर्षभाः॥ प्रत्याहुःश्लक्ष्णयावाचाप्रहस्यतमृषिंप्रभो २९॥ ॥ देवाऊचुः ॥ यथाकृतस्तेसंकल्पोभाव्यंतेनैवनान्यथा॥
सत्संकल्पस्यतेब्रह्मन्यद्वैध्यायतितेवयम् ३० अथास्मदंशभूतास्तेआत्मजालोकविश्रुताः ॥ भवितारोंऽगभद्रंतेविस्रप्स्यंतिचतेयशः ३१ एवंकामवरंदत्त्वा
प्रतिजग्मुःसुरेश्वराः ॥ सभाजितास्तयोःसम्यग्दंपत्योर्मिषतोस्ततः ३२ सोमोऽभूद्ब्रह्मणोंऽशेनदत्तोविष्णोस्तुयोगवित् ॥ दुर्वासाःशंकरस्यांशोनिबोधांगि
रसःप्रजाः ३३ श्रद्धात्वंगिरसःपत्नीचतस्रोऽसूतकन्यकाः ॥ सिनीवालीकुहूराकाचतुर्थ्यनुमतिस्तथा ३४ तत्पुत्रावपरावास्तांख्यातौस्वारोचिषेऽतरे ॥
उतथ्योभगवान्साक्षाद्ब्रह्मिष्ठश्चबृहस्पतिः३५ पुलस्त्योजनयत्पत्न्यामगस्त्यंचहविर्भुवि ॥ सोऽन्यजन्मनिदह्राग्निर्विश्रवाश्चमहातपाः ३६ तस्ययक्षपतिर्दे
वःकुबेरस्त्विडविडासुतः॥ रावणःकुंभकर्णश्चतथान्यस्यांविभीषणः ३७ पुलहस्यगतिर्भार्यात्रीनसूतसतीसुतान् ॥ कर्मश्रेष्ठंवरीयांसंसहिष्णुंचमहामते ३८

चूर्णिका ॥ अत्रिरुवाच ॥ ॥ हेदेवाःवःप्रणतोस्मि मयाएकएवआहूतःसःकःइतिभवद्भिरेवकथनीयः २७ २८ २९ ॥देवाऊचुः ॥ हेअत्रेयदेकंतत्त्वंत्वंध्यायासि तेएववयम् त्रयःप्राप्ताः
अस्मद्दर्शनंअन्यथान ३० अतःअस्मदंशभूतास्तेपुत्राःभविष्यंति ३१ एवंवरंदत्त्वाजग्मुः ३२ ततःब्रह्मणोंशेनसोमःविष्ण्वंशेनदत्तःशिवांशेनदुर्वासाःबभूवुः ३३ अंगिरसः ॥३॥
पत्नीश्रद्धानाम्नीसिनीवालीकुहूराकानुमतीःअसूत ३४ उतथ्यबृहस्पतीपुत्रौ ३५ पुलस्त्यःहविर्भुवि अगस्त्यविश्रवसंचअजनयत् ३६ विश्रवाःइडविडायांकुबेरं केशिन्यांरा
वणंकुंभकर्णविभीषणंच अजनयत् ३७ पुलहःगत्यां कर्मश्रेष्ठंवरीयांसंसहिष्णुंचअसूत ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ज्वलतःप्रकाशमानान् ३९ चित्रकेतुप्रमुखाजज्ञिरे तेचसप्तर्षयोजाताः ४० तानेवाह चित्रकेतुरिति वसुभृद्यानोनामएकः शक्थ्यादयोऽपरेअन्यस्यांजाताःपुत्राः ४१ (योऽश्वशिरादध्यङ्तंपुत्रंलेभेकथं भूतम्धृतव्रतम्)४२ ख्यात्यांपत्न्यांपुत्रान्पुत्रौपुत्रींच तानेवाह धातारमिति ४३तयोर्धातृविधात्रोः (मेरुः सुतेअदात् ताभ्यांधातृविधातृभ्यां) ४४ (मृकंडस्यपुत्रोमार्कंडेयः) कविश्चभार्गवःभृगोः पुत्रः (आसीत्) यस्यकवेः उशनाशुक्रः ४५ (हेक्षत्तः अभावयन्विस्तारयामासुरित्यर्थः कर्दमस्यदुहितृसंबंधीसंतानोवंशः) ४६ (मानवीं मनोः कन्यां) अजात्मजोब्रह्मपुत्रः नतुप्राचेतसः४७ युक्तेभ्यः संयतेभ्यो मीलितेभ्योवा ४८ (शुभंपुत्रमसूतसुषुवे) ४९ ५० ५१ सर्वेषांगुणानामुत्पत्तिर्यस्यांसा (मूर्तिः नरंनारायणंचअसूयत सुनिर्वृतंसुखसंपन्नम्) ५२

श्लोकाः ३९/५२

क्रतोरपिक्रियाभार्यावालखिल्यानसूयत ॥ ऋषीन्षष्टिसहास्राणिज्वलतोब्रह्मतेजसा ३९ ऊर्जायांजज्ञिरेपुत्रावासिष्ठस्यपरंतप ॥ चित्रकेतुप्रधानास्ते सप्तब्रह्मर्षयोऽमलाः[१] ४० चित्रकेतुःसुरोचिश्चविरजामित्रएवच ॥ उल्बणोवसुभृद्यानोद्युमान्शक्थ्यादयोऽपरे ४१ चित्तिस्त्वथर्वणःपत्नीलेभेपुत्रंधृतव्रतम् ॥ दध्यञ्चमश्वशिरसंभृगोर्वंशंनिबोधमे ४२ भृगुःख्यात्यांमहाभागःपत्न्यांपुत्रानजीजनत् ॥ धातारंचविधातारंश्रियंचभगवत्पराम् ४३ आयतिंनियतिंचैवसुतेमेरुस्तयोरदात् ॥ ताभ्यांतयोरभवतांमृकंडःप्राणएवच ४४ मार्कंडेयोमृकंडस्यप्राणाद्वेदशिरामुनिः ॥ कविश्चभार्गवोयस्यभगवानुशनासुतः ४५ ॥ तएतेमुनयःक्षत्तर्लोकान्सर्गैरभावयन्[२] ॥ एषकर्दमदौहित्रसंतानःकथितस्तव ॥ ४६ ॥ शृण्वतःश्रद्दधानस्यसद्यःपापहरःपरः ॥ प्रसूतिंमानवींदक्षउपयेमेह्यजात्मजः ४७ तस्यांससर्जदुहितॄः षोडशामललोचनाः ॥ त्रयोदशादाद्धर्मायतथैकामग्नयेविभुः ४८ पितृभ्यएकांयुक्तेभ्योभवायैकांभवच्छिदे ॥ श्रद्धामैत्रीदयाशांतिस्तुष्टिःपुष्टिःक्रियोन्नतिः ४९ बुद्धिर्मेधातितिक्षाह्रीर्मूर्त्तिर्धर्मस्यपत्नयः ॥ श्रद्धाऽसूतशुभंमैत्रीप्रसादमभयंदया ॥ ५० ॥ शांतिःसुखंमुदंतुष्टिःस्मयंपुष्टिरसूयत ॥ योगंक्रियोन्नतिर्दर्प्पमर्थंबुद्धिरसूयत ५१ मेधास्मृतिंतितिक्षातुक्षेमंह्रीःप्रश्रयंसुतम् ॥ मूर्तिःसर्वगुणोत्पत्तिर्नरनारायणावृषी ॥ ५२

चूर्णिका

क्रतोःक्रियाभार्या ६००००वालखिल्यान् असूत ३९ वसिष्ठःऊर्जायांचित्रकेतुम् सुरोचिम् विरजसम् मित्रम् उल्बणम् वसुभृद्यानम् सुमंतम् एतान् प्रासूत४०४१ अथर्वणः चित्त्यांभार्यायांधृतव्रतम् दध्यंचंप्रासूत ४२ भृगुःख्यात्यांधाताविधातारौश्रियंचप्रासूत४३ ताभ्यांमेरुः आयतिं नियतिंचद्वेकन्येददौ तयोःताभ्यांमृकंडःप्राणश्चद्वौजातौमृकंडात्मार्कंडेयःप्राणात्वेदशिराःभृगोःअन्यपुत्रःकाविःकवेःउशनाः एषाकर्दमकन्यासंततिः कथिता ४४ ४५ ४६ दक्षःप्रसूत्यांषोडशकन्याः अजनयत् ४७ तासुत्रयोदशधर्माय अग्नये एका पितृभ्यः एका भवायएका ४८ श्रद्धा धर्मस्त्री शुभंपुत्रंअसूत मैत्री २ प्रसादं दया ३ अभयम् शांतिः४सुखं तुष्टिः५ मुदं पुष्टिः६स्मयं क्रिया ७ योगं उन्नतिः ८ दर्पं बुद्धिः ९ अर्थं मेधा १० स्मृतिं तितिक्षा ११ क्षेमं ह्रीः १२ प्रश्रयं मूर्तिः४९नरनारायणौ ऋषीप्रासूत ययोर्जन्मानिइदंविश्वं आनंदंप्राप ५० ५१ ५२ ॥४॥

१ शक्त्यादयइतिमुद्रितपुस्तके २ नवैतेमुनयइतिचपाठांतरम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प्रसेदुः प्रसन्नाबभूवुः) ५३ (तूर्याणिवादित्राणिदिविस्वर्गे अभिष्टवैः स्तोत्रैः) ५४ उपतस्थुर्भेजुः ५५ निजयामाययायस्मिन्नात्मनिखेगगनेरूपभेदंगंधर्वनगरामिवइदंविश्वंविरचितंतस्यआत्मनः प्राति
चक्षणायप्रकाशनायआत्मानंयोचप्रादुश्चकारप्रकटितवान्तस्मैपुरुषायनमः । केनरूपेणप्रादुश्चकार ऋषेर्मूर्तिराकारोयस्मिन्तेनैतेनरूपेण ५६ सोयंनोऽस्मान्सुरगणान् अनल्पकरुणायुक्तेनविलोकने
नविशिष्टनेत्रेणदृश्यात्पश्यतु कथंभूतेन यच्छ्रीनिकेतं (लक्ष्म्यालयभूतम्) अमलमरविंदंतत्क्षिपतातिरस्कुर्वता कथंभूतः अननुमेयं शास्त्रतोऽविचार्यंनत्वस्माकमपरोक्षंतत्त्वंयस्य कथंभूतान्अस्मान् स्थि
तेर्जगन्मर्यादायाः व्यतिकरोन्यथात्वंतस्योपशमाय (असुरोपशमनायेत्यर्थः) सत्त्वेनगुणेनसृष्टान् ५७ लब्धो अवलोकोयैःसुरगणैः तैरभिष्टुतौ अर्चितौसंतौययतुः ५८ भुवोभारस्यव्ययायनाशा
य चकारएकवाक्यत्वार्थः तौ च सांप्रतमिहागतावित्यर्थः तदुक्तंतंत्रे "अर्जुनेतुनरावेशः कृष्णो नारायणः स्वय"मिति यदूद्वहः श्रीकृष्णः कुरूद्वहोऽर्जुनः उभावपिकृष्णनामानौ ५९ अग्न्यभिमानिनो
देवान् स्वाहानामअग्नेर्भार्या (त्रीनात्मजान्असूत तानाह पावकमिति) हुतभोजनमितित्रयाणांविशेषणम् ६० पितरस्त्रयः पितामहएकःतैः साकंसह (एकोनपंचाशत्) ६१ वैतानिकेवैदिकेकर्मणियज्ञेयेषां
नामभिराग्निदेवताका इष्टयो निरूप्यंतेक्रियंते तएतेऽग्नयोनलौकिकाःअतोबहूनांनैवयर्थ्यमितिभावः ६२ सौम्याःसोमपाः येषामग्नौकरणमस्तितेसाग्नयः तद्राहितास्त्वनग्नयः६३ (दधारअसूयतेत्यर्थः) तया
स्तु संततिर्नाभवत् जीवन्मुक्तत्वादित्याह उभेतेइति (ज्ञानंशास्त्रीयम् विज्ञानंतदनुभवः) ६४ नाम्नासती देवं अनुव्रतापि (गुणशीलतः गुणेनशीलेनच) आत्मनः सदृशं (देवमनुव्रतापिसती) पुत्रं नलेभे
६५ तत्रहेतुः स्वेपितरिदक्षेअप्रतिरूपेअसदृशेप्रातिकूलेसतीत्यर्थः । आत्मनास्वयमेवआत्मानंदेहंअजहात्त्यक्तवती । योगसंयुतायोगमाश्रित्येति ६६ ॥ इति चतुर्थे प्रथमोध्यायः १

ययोर्जन्मन्यदोविश्वमभ्यनंदत्सुनिर्वृतम् ॥ मनांसिककुभोवाताःप्रसेदुःसरितोऽद्रयः ५३ दिव्यवाद्यंततूर्याणिपेतुःकुसुमवृष्टयः ॥ मुनयस्तुष्टुवुस्तुष्टाज श्लोकाः ५३/६६
गुर्गंधर्वकिन्नराः ५४ नृत्यंतिस्मास्त्रियोदेव्यआसीत्परममंगलम्॥देवाब्रह्मादयःसर्वेउपतस्थुरभिष्टवैः ५५ ॥ देवाऊचुः ॥ योमाययाविरचितंनिजयाऽऽत्मनी
दंखेरूपभेदमिवतत्प्रतिचक्षणाय ॥ एतेनधर्मसदनेऋषिमूर्तिनाऽद्यप्रादुश्चकारपुरुषायनमःपरस्मै ५६ सोऽयंस्थितिव्यतिकरोपशमायसृष्टान्सत्त्वेननःसुरग
णाननुमेयतत्त्वः ॥ दृश्याददभ्रकरुणेनविलोकनेनयच्छ्रीनिकेतममलंक्षिपताऽरविंदम् ५७ एवंसुरगणैस्तातभगवंतावभिष्टुतौ ॥ लब्धावलोकैर्ययतुरार्चितौ
गंधमादनम् ५८ ताविमौवैभगवतोहरेरंशाविहागतौ ॥ भारव्ययायचभुवःकृष्णौयदुकुरूद्वहौ५९स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ॥ पावकंपव
मानंचशुचिंचहुतभोजनम् ६० तेभ्योग्नयःसमभवंश्चत्वारिंशच्चपंचच ॥ तएवैकोनपंचाशत्साकंपितृपितामहैः६१वैतानिकेकर्मणियन्नामाभिर्ब्रह्मवादिभिः॥
आग्नेय्यइष्टयोयज्ञेनिरूप्यंतेऽग्नयस्तुते ६२ अग्निष्वात्ताबर्हिषदःसौम्याःपितरआज्यपाः ॥ साग्नयोऽनग्नयस्तेषांपत्नीदाक्षायणीस्वधा ६३ तेभ्योदधा
रकन्येद्वेवयुनांधारिणींस्वधा ॥ उभेतेब्रह्मवादिन्यौज्ञानविज्ञानपारगे ॥६४॥ भवस्यपत्नीतुसतीभवंदेवमनुव्रता ॥ आत्मनःसदृशंपुत्रंनलेभेगुणशीलतः ६५
पितर्यप्रतिरूपेस्वेभवायानागसेरुषा॥अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ६६ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेविदुरमैत्रेयसंवादेप्रथमोऽध्यायः १ ॥५॥

चूर्णिका
अवाद्यंत पुष्पवृष्टयःपेतुःमुनयःतुष्टुवुः गंधर्वादयोजगुःदेव्यःननृतुः ब्रह्मादयःस्तुतिंचक्रुः५३ ५४ ५५ हेईशतेपुरुषायनमः५६ एवंस्तुतौतौगंधमादनंययतुः५७ ५८ तौहरेः अं
शौ इहभुवः भारव्ययायकृष्णार्जुनौजातौ ५९ अग्निः स्वाहायांपवमानंपावकंशुचिंअसूत ६० तेभ्यःअग्नयः ४५ एतेएवंसर्वे ४९ अभवन् ६१ पितरः स्वधायांवयु
नांधारिणींचद्वेकन्येप्रासूत ६२ ६३ ६४ भवस्य पत्नी सतीतु दक्षकोपात् अप्रौढैवयोगेनदेहंजहौ ६५ ६६ ॥ इतिचतुर्थेप्रथमः १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयेप्रथमाध्ययोपक्षिप्ते भवदक्षयोः विद्वेषवर्ण्यतेहेतुर्विश्वस्त्रग्यज्ञसंभवः ॥ १ ॥ (शीलवतांसद्वृत्तवताम्) सतींसतीनाम्नीम् १ नचासौकस्याचिदपिद्वेषार्हइत्याह कइति चराचरगुरुंजगतो दैवतं च तं को द्वेष्टि कथं (केनप्रकारेण) चनिर्वैरंद्वेष्टि । निर्वैरत्वेहेतुःशांतम् । भावेक्तः । शांतिरेवविग्रहोयस्य । कुतःआत्मन्येवआरामोरतिर्यस्यनतुविषये तम् यद्वा कःप्रजापतिर्दक्षःकथंद्वेष्टि एवं भूतेतस्मिन्द्वेषोअयुक्तोअशक्यश्चेत्यर्थः २ यतोहेतोर्विद्वेषः यतोविद्वेषात्प्राणांस्तत्याजएतदाख्याहि ३ तदेवाख्यातुमितिहासं प्रस्तौति । पुरेति समेताआसन् ४ प्रविष्टंदक्षमितिशेषः (अर्कमिवभ्राजमानंरोचिषाशरीरकांत्या) महत्सदःमहतीं सभाम् ५ स्वधिष्ण्येभ्यःस्वीयासनेभ्यः(तस्य दक्षस्य तेजसा)६।७प्राक्स्वोपवेशनात्पूर्वमेवनिषण्णंउपविष्टं मृडं शिवं तदनाहतःतेनाभ्युत्थानादिभिरकृतादरःनामृष्यत् नासहत वामंवक्रं यथास्यात्तथाभिवीक्ष्य ८ मेवचनं श्रूयतां अज्ञानात् (अविवेकात्) मत्सराच्चनब्रुवतः (किंतुसाधूनांवृत्तं आचारं ब्रुवतः) ९ (निरपत्रपःलोकलज्जाहीनः) स्तब्धेनउचितक्रियाशून्येन ध्वस्तेमेतिपाठेभ्रष्टेन १० तदेवाह एषइति । यत्यस्मात्विप्राग्निसमक्षंसावित्रीतुल्यायामेदुहितुः (साध्वरिवसन्) पाणिंअग्रहीत् ११ मृगशावस्यहरिणबालस्य अक्षिणीइवआक्षिणीयस्याः प्रत्युत्थानाभिवादनयोग्येमयिउचितंसन्मानं वाचापिनाकरोत् १२ अनर्हायकन्यादत्तेत्यनुतप्यमानआह लुप्तक्रियायेतिसार्धैश्चतुर्भिः (दातुमनिच्छन्नपि) उशतीं शुद्धांवेदलक्षणांगिरम् १३

श्लोकाः १/१३

॥ विदुरउवाच ॥ ॥ भवेशीलवतांश्रेष्ठेदक्षोदुहितृवत्सलः ॥ विद्वेषमकरोत्कस्मादनादृत्यात्मजांसतीम् १ कस्तंचराचरगुरुंनिर्वैरंशांतविग्रहम् ॥ आत्मारामंकथंद्वेष्टिजगतोदैवतंमहत् २ एतदाख्याहिमेब्रह्मञ्जामातुःश्वशुरस्यच ॥ विद्वेषस्तुयतःप्राणांस्तत्यजेदुस्त्यजान्सती ३ ॥ ॥मैत्रेयउवाच ॥ ॥ पुराविश्वसृजांसत्रेसमेताःपरमर्षयः ॥ तथाऽमरगणाःसर्वेसानुगामुनयोग्नयः ४ तत्रप्रविष्टमृषयोदृष्ट्वार्कमिवरोचिषा ॥ भ्राजमानंवितिमिरंकुर्वंतंतन्महत्सदः ५ उदतिष्ठन्सदस्यास्तेस्वधिष्ण्येभ्यःसहाग्नयः ॥ ऋतेविरिंचंशर्वंचतद्भासाक्षिप्तचेतसः ६ सदसस्पतिभिर्दक्षोभगवान्साधुसत्कृतः ॥ अजंलोकगुरुंनत्वानिषसादतदाज्ञया ७ प्राङ्निषण्णंमृडंदृष्ट्वानामृष्यत्तदनादृतः ॥ उवाचवामंचक्षुर्भ्यामभिवीक्ष्यदहन्निव ८ श्रूयतांब्रह्मर्षयोमेसहदेवाःसहाग्नयः ॥ साधूनांब्रुवतोवृत्तंनाज्ञानान्नचमत्सरात् ९ अयंतुलोकपालानांयशोघ्नोनिरपत्रपः ॥ सद्भिराचरितःपंथायेनस्तब्धेनदूषितः १० एषमेशिष्यतांप्राप्तोयन्मेदुहितुरग्रहीत् ॥ पाणिंविप्राग्निमुखतःसावित्र्याइवसाधुवत् ११ गृहीत्वामृगशावाक्ष्याःपाणिंमर्कटलोचनः ॥ प्रत्युत्थानाभिवादार्हेवाचाऽप्यकृतनोचितम् ॥ १२ लुप्तक्रियायाशुचयेमानिनेभिन्नसेतवे ॥ अनिच्छन्नप्यदांबालांशूद्रायेवोशतींगिरम् १३

चूर्णिका ॥ विदुरउवाच ॥ ॥ दक्षःचराचरगुरुंशिवंप्रतिकुतः द्वेषंअकरोत् १ २ हेमैत्रेयजामातुः श्वशुरस्य द्वेषे किंकारणम् यतःसती प्राणान्जहौएतत्सर्वं वद ३ ॥ ॥ मैत्रेयउवाच ॥ ॥ पुराविश्वसृजांसत्रेऋषयःदेवाःअग्नयःप्राप्ताःतत्सभायांतेजसासूर्यमिवदक्षंप्रविष्टंदृष्ट्वाविरिंच्यंशिवंविनासर्वेउत्थिताः४ ५ ६ सर्वैः सत्कृतो दक्षःअजंनत्वानिषसाद ७ अनुत्थितंमृडंदृष्ट्वादहन्निववक्रंवीक्ष्यउवाच ८ हेसभासदः श्रूयताम् ९ अयंतुलोकपालानांयशोघ्नःनिर्लज्जःयेनसत्पंथाः त्यक्तः १० एषःमेशिष्यतांप्राप्तः विप्राग्निसमक्षंमेपुत्र्याःपाणिंमर्कटलोचनोयंजग्राह ११ प्रत्युत्थानाभिवादार्हेमयिनसत्कृतम् १२ अशुचये अस्मैशूद्रायवेदमिवबालां अदाम् १३ ॥६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७॥

प्रेतावासेषु श्मशानेषु व्युप्ता विकीर्णाः केशा यस्य १४ चिताभस्मनाकृतं स्नानं (सर्वांगलेपो) येन प्रेतानां स्रजो माल्यानि यस्य स प्रेतस्रक् नृणांअस्थीनि भूषणानि यस्य। शिवइत्यपदेशो नाममात्रं यस्य। (कर्मणात्वशिवः अमंगलः) तमोमात्रात्मकःकेवलतमोरूपः आत्मास्वभावोयेषां (तेषांप्रमथानांगणानांभूतानांचपतिः) १५ उन्मादा भूतविशेषास्तेषां नाथायदुर्हृदेदुष्टचित्ताय। बतेतिखेदे (ब्रह्मणोवाक्याद्विश्रब्धोहमित्याह चोदितेइति) वास्तवस्त्वयमर्थः लुप्ताः क्रियायस्मिन् परब्रह्मरूपत्वात् अतएवनास्तिशुचिर्यस्मात् आमानिनेअभिन्नसेतवेइतिचछेदः तस्यपरमेश्वरस्यमदीयामानुषीकन्या कथं योग्यास्यादितिलज्जादिनादातुमनिच्छन्नपितत्संबंधलोभेनदत्तवान् शूद्रायेतिअनर्हत्वमात्रेदृष्टांतःनतुहीनत्वे पूर्वापरस्ववचनविरोधापत्तेः एतदुक्तंभवति यथा कश्चिच्छूद्रायवेदंमर्थलोभेनददाति तद्व-(-त्संबंधलोभेने-)ति प्रेतावासेष्वित्यादिसर्वंविडंबनमात्रमिति स्वयमेवाह उन्मत्तवदिति अन्यथाउन्मत्तइत्येवावक्ष्यत्। अशिवः नास्ति शिवोयस्मात् । अमत्तः अमत्तजनप्रियइतिचछेदःपतिः। प्रमथभूतानामितिभक्तवात्सल्यमाह तामसानपि दोषमपनीयपातीति नष्टानामपिशौचंशुद्धिर्यस्मात् दुष्टेष्वपिएतेमयाऽनुकंप्याइतिहृत्मनोयस्यसदुर्हृत्तस्मै बतेतिहर्षे ब्रह्मणोवाक्याल्लज्जाभयादिकं परित्यज्यदत्तेत्यर्थः १६ अप्रतीपंअप्रतिकूलंयथाभवत्येवमवस्थितमपिविनिंद्य (अपउपस्पृश्यआचम्य) १७ देवानांयजनसमयेदेवैःसह भागंनलभतांकिंतुतेभ्यः पूर्वमेवलभतां अग्रभोजित्वात् यद्वातेषुभुक्तवत्सुलभतांसर्वपोषकत्वात् अत्रहेतुः देवगणोऽधमोयस्मात्सः (इति वास्तवोर्थः) १८ सदक्षस्तस्मात्स्थानात् विनिष्क्रम्यजगाम हे कौरव्य १९ गिरिशस्यानुगानामग्रणीर्मुख्यः रोषएवकषायः (रक्तिमा) तेनदूषितआरक्तनेत्रइत्यर्थः तस्यगिरिशस्यअवाच्यतांवचनानर्हतां निंद्यतामित्यर्थः (येऽन्वमोदन्)तेभ्योपिशापं विससर्ज २० दक्षंशपति (यइतिं) सार्धैस्त्रिभिः एतन्मर्त्यंदक्ष-(संज्ञं) शरीरमुद्दिश्यश्रेष्ठंमत्वा अप्रतिद्रुहिप्रतिद्रोहमकुर्वतिपृथग्दृष्टिः भेददर्शी तत्त्वतः परमार्थात् (विमुखोभवेत्) २१ अज्ञत्वमेवाह गृहेष्विति कर्मतंत्रंकर्मपरिकरं वेदेयेवादाअर्थवादाः " अक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतं भवती" त्यादयस्तैर्विपन्नाविनष्टाधीर्यस्य २२

श्लोकाः १४/२२

प्रेतावासेषुघोरेषुप्रेतैर्भूतगणैर्वृतः ॥ अटत्युन्मत्तवन्नग्नोव्युप्तकेशोहसन्रुदन् १४ चिताभस्मकृतस्नानःप्रेतस्रङ्न्रस्थिभूषणः ॥ शिवापदेशोह्यशिवोमत्तो मत्तजनप्रियः ॥ पतिःप्रमथभूतानांतमोमात्रात्मकात्मनाम् १५ तस्माउन्मादनाथायनष्टशौचायदुर्हृदे ॥ दत्ताबतमयासाध्वीचोदितेपरमेष्ठिना १६ ॥ मैत्रेयउवाच ॥ विनिंद्यैवंसगिरिशमप्रतीपमवस्थितम् ॥ दक्षोऽथापउपस्पृश्यक्रुद्धःशप्तुंप्रचक्रमे १७ अयंतुदेवयजनइंद्रोपेंद्रादिभिर्भवः॥सहभागंनलभतांदेवैर्देवगणाधमः १८ निषिध्यमानःससदस्यमुख्यैर्दक्षोगिरित्राायविसृज्यशापम् ॥ तस्माद्विनिष्क्रम्यविवृद्धमन्युर्जगामकौरव्यनिजंनिकेतनम् १९ विज्ञायशापंगिरिशानुगाग्रणीर्नंदीश्वरोरोषकषायदूषितः ॥ दक्षायशापंविससर्जदारुणंयेचान्वमोदंस्तदवाच्यतांद्विजाः २० यएतन्मर्त्यमुद्दिश्यभगवत्यप्रतिद्रुहि ॥ द्रुह्यत्यज्ञःपृथग्दृष्टिस्तत्त्वतोविमुखोभवेत् २१ गृहेषुकूटधर्मेषुसक्तोग्राम्यसुखेच्छया ॥ कर्मतंत्रंवितनुतेवेदवादविपन्नधीः २२

चूर्णिका ॥७॥

अयंस्मशानेतिष्ठति चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः एवंभूताय उन्मादनाथाय ब्रह्मणा नोदितेन मया साध्वी दत्ता १४ १५ १६ ॥ ॥ मैत्रेयउवाच ॥ एवं दक्षःविनिंद्यशिवंशशाप १७ अयं यज्ञेदेवैःसहभागंनलभताम् १८ दक्षःसर्वैःनिषिध्यमानोपिशिवायशापंदत्त्वास्वगृहंययौ १९ तदानंदीश्वरः दक्षाययेचनिंदांअन्वमोदंततेभ्यःशापान्ददौ २० यः भगवतिद्रुह्यतिसःपरमार्थतःविमुखोभवेत् २१ अयंदक्षःगृहेषुसक्तःनित्यंकर्मकरोति २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

परोदेहादिः तमेवात्मत्वेन अभितोध्यातुंशीलंयस्यास्तयाबुद्ध्याविस्मृताआत्मनोगतिस्तत्त्वंयेन अतःपशुतुल्यः।अतितरांस्त्रीकामोऽस्त्वितिद्वितीयः शापः ।बस्तस्यछागस्यमुखमेवमुखंयस्येतितृतीयःशा
पः २३ अयंचशापोऽस्यानुरूपएवेत्याह विद्याबुद्धिः इयमेवतत्त्वविद्येति बुद्धिर्यस्यातोऽसौजडएव द्विजान्शपति संसरंत्विति सार्धाभ्यां शर्वमवमन्यतेइतितथातममुं दक्षंयेचानुवर्ततेतेसंसरंतु जन्ममरणा
द्यनुभवंतुइत्येकः शापः २४ श्रुतायावेदरूपायाःपुष्पिण्याः । पुष्पाणीवअर्थवादाः मनःक्षोभकत्वात्संतियस्याः अर्थवादबहुलायाइत्यर्थः मधुगंधतुल्येनप्ररोचनेन (तद्व्रतेनार्थेन) मथ्नामनःक्षोभकेणउन्म
थितआत्मामनोयेषां ते संमुह्यंतुकर्मस्वासक्ताभवंतुइतिद्वितीयः शापः २५ सर्वभक्षाः भक्ष्याभक्ष्यविचारशून्याः वृत्त्यैदेहादिपोषणायनतुमोक्षायधृतानिविद्यातपोव्रतानियैः वित्तादिष्वेवआरामोरतिर्येषांतेया
चकाः संतोविचरंतु इतिचशापचतुष्टयं (एवंशापाः षट्) २६ प्रत्यसृजत्प्रत्यदात् शापरूपं ब्रह्मदंडम् २७ सच्छास्त्रस्य(धर्मप्रतिपादकस्यवेदस्य) परिपंथिनः प्रतिकूलाः (अतस्तेपाषंडिनःसंतु)२८
सुरागौडीपैष्टीमाध्वीच आसवस्तालादिसंभवंमद्यम् द्वंद्वैक्यात्षंढत्वम् तचत्रदैवंपूज्यंदेवतावदादरणीयमितिवा २९ ब्रह्मवेदंकथंभूतम् सेतुंमर्यादारूपं सदेवाह पुंसां वर्णाश्रमाचारवतांविधारणंधारकम् ३०से
तुत्वंप्रपंचयतिद्वाभ्याम् एषवेदलक्षणएवशिवः पंथाः यतोयंपूर्वेऋषयः अनुसंतस्थुः आश्रितवंतःयत्यस्मिन्जनार्दनःप्रमाणंमूलम् ३१ (परमंउत्कृष्टंवर्त्मेमोक्षमार्गभूतंब्रह्मवेदम्) भूतराट्भूतानांतामसानांप
तिः ३२ एवंतस्यवदतः सतः अन्योन्यशापेनउभयोर्नाशात् विमनाइवेति (शब्दात्) तथापि भगवदनुगृहीतानांनाशोनस्यादितिभावः ३३ ऋषभः सर्वश्रेष्ठो हरिर्यत्र इज्यः पूज्यः तत्सत्रंसम्यक्
विधाय हेमहेष्वास विदुर ३४

श्लोकाः २३/३४

बुद्ध्यापराभिध्यायिन्याविस्मृतात्मगतिःपशुः ॥ स्त्रीकामःसोऽस्त्वतितरांदक्षोबस्तमुखोऽचिराव २३ विद्याबुद्धिरविद्यायांकर्ममय्यामसौजडः ॥ संसरं
त्विहयेचामुमनुशर्वावमानिनम् २४ गिरःश्रुतायाःपुष्पिण्यामधुगंधेनभूरिणा ॥ मथ्नाचोन्मथितात्मानःसंमुह्यंतुहरद्विषः २५ सर्वभक्षाद्विजावृत्त्यैधृतविद्या
तपोव्रताः ॥ वित्तदेहेंद्रियारामायाचकाविचरंत्विह २६ तस्यैवंददतःशापंश्रुत्वाद्विजकुलायवै॥भृगुःप्रत्यसृजच्छापंब्रह्मदंडंदुरत्ययम् २७ भवव्रतधरायेचये
चतान्समनुव्रताः॥पाखंडिनस्तेभवंतुसच्छास्त्रपरिपंथिनः २८ नष्टशौचामूढधियोजटाभस्मास्थिधारिणः॥ विशंतुशिवदीक्षायांयत्रदैवंसुरासवम् २९ ब्रह्म
चब्राह्मणांश्चैवयद्यूयंपरिनिंदथ ॥ सेतुंविधारणंपुंसामतःपाखंडमाश्रिताः ३० एषएवहिलोकानांशिवःपंथाःसनातनः ॥ यंपूर्वेचानुसंतस्थुर्यत्प्रमाणंज
नार्दनः ३१ तद्ब्रह्मपरमंशुद्धंसतांवर्त्मसनातनम् ॥ विगर्ह्ययातपाषंडंदैवंवोयत्रभूतराट् ३२॥ मैत्रेयउवाच ॥ तस्यैवंवदतःशापंभृगोःसभगवान्भवः ॥
निश्चक्रामततःकिंचिद्विमनाइवसानुगः ३३ तेऽपिविश्वसृजःसत्रंसहस्रपरिवत्सरान् ॥ संविधायमहेष्वासयत्रेज्यऋषभोहरिः ३४

चूर्णिका ॥८॥

अतःस्त्रीकामःअस्तु यःआत्मगतिंनवेद तस्मात् अयंपशुरूपःबस्तमुखः भवतु२३ अयंअविद्यायां विद्याबुद्धिःअस्तुयेचदक्षंअनुसरंति तेसर्वेजन्ममरणादियातनांअनुभवंतु२४ ये
एनंअनुसृताः ब्राह्मणाःतेविद्यातपोव्रतयुक्ताआपिसर्वभक्षाःसंतःइहयाचकाः विचरंतु२५२६एवंश्रुत्वाभृगुः तंअशपत्२७येशिवव्रतधराःतेपाखंडिनःभवंतु२८ किंचजटाभस्मा
स्थिधारिणःनष्टशौचाःशिवदीक्षायांविशंतु२९३०३१३२॥मैत्रेयउवाच॥ततोभवःभृगुवाक्यंश्रुत्वाखिन्नइवसानुगःनिश्चक्राम३३तेविश्वसृजःसहस्रपरिवत्सरान्सत्रंकृत्वा३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्रप्रयागे(यमुनया)अन्विता तत्र अवभृथस्नानंकृत्वावतःस्थानात् ययुः३५इतिचतुर्थेस्कंन्धे द्वितीयोध्यायः२ ॥॥तृतीयेतुसतीचारुयज्ञोत्सवदिदृक्षया।गमिष्यंती महेशेनवारितानीतिहेतुभिः[1]॥ ॥ ध्रियमाण
योःअवतिष्ठमानयोः 'धृङ्अवस्थाने'इत्यस्मात् (शानच्) १ रुद्रविहीनो यज्ञोनास्त्येव तथापिदक्षस्यरुद्रपरित्यागोद्वेषाद्गर्वाच्च तत्रद्वेषेहेतुरुक्तः गर्वेहेतुमाह यदातुप्रजापतीनामाधिपत्योभिषिक्तःतदातस्यस्म
योगर्वोऽभवत् २ गर्वादेवब्रह्मनिष्ठान्सेश्वरानभिभूयतिरस्कृत्य "वाजपेयेनेष्ट्वा बृहस्पतिसवेनयजेते"तिश्रुतेः वाजपेयेनेष्ट्वा (बृहस्पतिसवं) समारेभे ३ कृतस्वस्त्ययनाः कृत–(तिलकालंकारादि)–मंगलाः
सभर्तृका इति दक्षिणादिभिः प्रथममर्हितानामपिपत्न्यर्हणेपुनरर्हणमुक्तम् ४ तत्तदाखेचराणां (उपदेवानाम्) प्रजल्पतांसताम् पितृयज्ञमहोत्सवं श्रुत्वा ५ तत्रप्रव्रजंतीरुपदेवानांगंधर्वादीनां वरस्त्रियश्च
स्वस्य निलयस्याभ्याशेसमीपेदृष्ट्वा औत्सुक्यात् पतिमभ्यभाषतेतित्रयाणामन्वयः कथंभूताःस्त्रियोदृष्ट्वा विमानानियानानियासांताः प्रेष्ठैःसहिताः निष्कानिपदकानिकंठेषुयासां शोभनानिवासांसियासां६
लोलानिचंचलानिअक्षीणियासाम् मृष्टानिउज्ज्वलानिकुंडलानियासांताः ७ निर्यापितः प्रवर्तितः हे वाम (सुंदर) शिवतेयद्यर्थिता इच्छातर्हि वयंचतत्राभिसरामगच्छाम नचाद्यापियागोनिवृत्तः
यतोमी विबुधा व्रजंति ८ औत्सुक्यं प्रकटयंत्याह तस्मिन्नितिषड्भिः पितृभ्यामुपनीतं दत्तं परिबर्हमलंकारादिद्रव्यंभवतासह अर्हितुं स्वीकर्तुं कामये (इच्छामि) अर्हितुमितिपाठेसत्कृतं परि
बर्हमिच्छामीति ९

आप्लुत्यावभृथंयत्रगंगायमुनयाऽन्विता ॥ विरजेनात्मनासर्वेस्वंस्वंधामययुस्ततः ३५ इ० श्रीभा० म० च० स्कं० दक्षशापोनामद्वितीयोऽध्यायः २
मैत्रेयउवाच ॥ सदाविद्विषतोरेवंकालोवैध्रियमाणयोः ॥ जामातुःश्वशुरस्यापिसुमहानतिचक्रमे १ यदाभिषिक्तोदक्षस्तुब्रह्मणापरमेष्ठिना ॥ प्रजापती
नांसर्वेषामाधिपत्येस्मयोऽभवत् २ इष्ट्वासवाजपेयेनब्रह्मिष्ठानभिभूयच ॥ बृहस्पतिसवंनामसमारेभेक्रतूत्तमम् ३ तस्मिन्ब्रह्मर्षयःसर्वेदेवर्षिपितृदेवताः ॥
आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्चसभर्तृकाः ४ तदुपश्रुत्यनभसिखेचराणांप्रजल्पताम् ॥ सतीदाक्षायणीदेवीपितुर्यज्ञमहोत्सवम् ५ व्रजंतीःसर्वतोदिग्भ्य
उपदेववरस्त्रियः ॥ विमानयानाःसप्रेष्ठानिष्ककंठीःसुवासः ६ दृष्ट्वास्वनिलयाभ्याशेलोलाक्षीर्मृष्टकुंडलाः ॥ पतिंभूतपतिंदेवमौत्सुक्यादभ्यभाषत ७ ॥ ॥
सत्युवाच ॥ ॥ प्रजापतेस्तेश्वशुरस्यसांप्रतंनिर्यापितोयज्ञमहोत्सवःकिल ॥ वयंचतत्राभिसरामवामतेयद्यर्थिताऽमीविबुधाव्रजंतिहि ८ तस्मिन्भगि
न्योममभर्तृभिःस्वकैर्ध्रुवंगमिष्यंतिसुहृद्दिदृक्षया ॥ अहंचतस्मिन्भवताभिकामयेसहोपनीतंपरिबर्हमर्हितुम् ९

श्लोकाः ३५ / ९

चूर्णिका
प्रयागेअवभृथंआप्लुत्य सर्वेस्वंस्वंधामययुः ॥ ३५ ॥ ॥ इतिश्रीभाग० चतुर्थेद्वितीयः २ ॥ ॥ मैत्रेयउवाच ॥ ॥ सदाजामातुः श्वशुरस्यापिद्विषतोः सतोः महान्कालःअग
मत् १ यदा ब्रह्मणाप्रजापतीनां आधिपत्ये दक्षः अभिषिक्तस्तदातस्य अतिगर्वः अभवत् २ सःएकदावाजपयेनइष्ट्वासेश्वरान्तिरस्कृत्यबृहस्पतिसवंनामक्रतुंआरेभे ३ तस्मिन्
क्रतौसर्वेदेवर्षिपितरःसपत्नीकाः आययुः ४ नभसिखेचराणांप्रजल्यतांवचांसिश्रुत्वा ५ विमानैः देवस्त्रियःस्वलंकृताःव्रजंतीःदृष्ट्वाऔत्सुक्यात्सतीशिवंअभाषत ६ ७
॥ सत्युवाच ॥ हेशिवसांप्रतंतेश्वशुरस्यगृहेयज्ञमहोत्सवः आरब्धःकिलतत्रविबुधाःव्रजंति ८ वयंतत्रगच्छामःममभागिन्यःसभर्तृकाः तत्रगमिष्यंति पश्यपश्य अहंचभवता
सह तत्रगत्वाअलंकारादिकंकामये ९

१ भवताच कामये इति लिखितपुस्तकेपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्वसॄर्भगिनीः भर्तृभिःसंमिताः सदृशीः (सहिताइत्यर्थः तथामातृस्वसृः मातरंच) छिन्नधियं स्नेहार्द्रचित्तां चिरमुत्कंठमुत्सुकं मनोयस्याः साहं द्रक्ष्यामि । हेमृड उन्नीयमानं प्रवर्त्यमानं अध्वरे ध्वजामि वद्दश्यं श्रेष्ठमध्वरमित्यर्थः । यद्वा उत्क्षिप्यमाणं यज्ञकेतुं यूपंवा १० अहोकिं तत्राश्चर्यं येनतवैतदौत्सुक्यमितिचेदतआह त्वयीति हेअज एतद्विश्वमाश्चर्यरूपं त्वय्येवत्वन्माययारचितं विभाति अतोयद्य पितव नाश्चर्यबुद्धिः । तथाप्यहंयोषित् उत्सुकस्वभावा तवतत्त्वं नजानामि । अतोदीना कृपणासती हेभव (मे) भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि । दिदृक्षामेवकैमुत्यन्यायेन व्यनक्ति । पश्येति द्वाभ्याम् । हेअभवेति सुहृद्वियोगदुःखंत्वयानास्वादितं (जन्मरहितत्वात्)इतिभावः अन्ययोषितः (दक्ष)-संबंधरहिताअपिप्रयांतीः पश्य कांतसखाभर्तृसहिताः वरूथशः संघशः कथंभूताःयासांविमानैर्नभो मंडितं ताः हेशितिकंठनीलकंठेतिपरानुग्रहायत्वयाविषमपिभक्षितामितिसूचयति १२ तदाहेसुरश्रेष्ठ पितृगेहोत्सवंनिशम्यसुतायादेहःकथंनेंगतद्रष्टुंनप्रचलति।तथाप्यनाहूताःसंतः कथंगच्छामः तत्राह । सौहृदं सुहृदो मित्रस्य केतनंगृहम्।तथाभर्तुः देहकृतः पितुश्च केतनंअनाहुताअप्यभियंतिसंतः (आकारणंसुहृदोगुरोश्चगृहं गंतुं नापेक्षंतइत्यर्थः । (अनाहुताइत्यत्र) ह्रस्वआर्षः । १३ । हेअमर्त्यतत्तस्मात्प्रसीद । इदंमेवांछितंकर्तुं भवान् अर्हति । कारुणिकत्वमेवाह । अदभ्रचक्षुषाअनल्पज्ञानेनापित्वयाआत्मनोदेहस्यार्धेहं निरूपिताधृता यतोर्धनारीश्वरइतिख्यातोसि । अतो (मा) मांअनुगृहाण । याचितः (प्रार्थितः) सन् १४ अभिभाषितः(अभियाचित)ः (सुहृत्स्त्रीप्रियायस्यसप्रत्युवाच।) कःदक्षःयानाहमर्मभिदंतियेतान्कुवागिषून् दुरुक्तिबाणान् संस्मारितः सन्१५अनाहुताअपीतित्वयायदुदितमुक्तंतच्छोभनमेव । अनात्म्यंदेहादावहंकारः तत्कृतेनमदेनमन्युनाचतेबंधवोयद्यनुत्पादितदोषदृष्टयोभवंतितर्हि । नउत्पादितेआरोपितेदोषदृष्टिर्येषांते १६

॥ १० ॥

श्लोकाः १०/१६

तत्रस्वसॄर्मेननुभर्तृसंमितामातृष्वसॄःक्लिन्नधियंचमातरम् ॥ द्रक्ष्येचिरोत्कंठमनामहर्षिभिरुन्नीयमानंचमृडाध्वरध्वजम् १० त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितंभातिगुणत्रयात्मकम् ॥ तथाप्यहंयोषिदतत्त्वविच्चतेदीनादिदृक्षेभवमेभवाक्षितिम् ११पश्यप्रयांतीरभवान्ययोषितोऽप्यलंकृताःकांतसखावरूथशः यासांव्रजद्भिःशितिकंठमंडितंनभोविमानैःकसहंसपांडुभिः १२ कथंसुतायाःपितृगेहकौतुकंनिशम्यदेहःसुरवर्यनेंगते ॥ अनाहुताअप्यभियंतिसौहृदंभर्तुर्गुरोर्देहकृतश्चकेतनम् १३तन्मेप्रसीदेदममर्त्यवांच्छितंकर्तुंभवान्कारुणिकोबतार्हति॥त्वयात्मनोर्धेऽहमदभ्रचक्षुषानिरूपितामाऽनुगृहाणयाचितः १४ ॥ऋषिरुवाच ॥ एवंगिरित्रःप्रिययाऽभिभाषितः प्रत्यभ्यधत्तप्रहसन्सुहृत्प्रियः ॥ संस्मारितोमर्मभिदःकुवागिषून्यानाहकोविश्वसृजांसमक्षतः १५ ॥ श्रीभगवानुवाच ॥ त्वयोदितंशोभनमेवशोभनेअनाहुताअप्यभियंतिबंधुषु ॥ तेयद्यनुत्पादितदोषदृष्टयोबलीयसाऽनात्म्यमदेनमन्युना १६

चूर्णिका

तत्रवहुकालतः मातृभागिन्यादीः द्रक्ष्ये १० हेभगवन् त्वयिनैतदाश्चर्यम् तथापिअहंयोषित् तवस्वरूपंनवेद्मिअतः जन्मभूमिंद्रष्टुंइच्छामि ११ नभोमंडलंविमानैः व्याप्तं पश्य १२ पितृगेहेकौतुकंश्रुत्वागंतुंइच्छाकथंनस्यात् भर्तुः गुरोः पितुश्चगृहंअनाहूताआपियांति १३ तस्मात्त्वयासहगंतुंमेप्रसीद १४ ॥ ॥ श्रीशुकउवाच ॥ ॥ गिरित्रः एवंसतीवाक्यंश्रुत्वाविश्वसृजांसमक्षतः दक्षःयत्आहतत्स्मरन्उवाच ॥ ॥ १५ ॥ भगवान्उवाच ॥ हेशोभनेबंधुषुअनाहूताअपिगच्छंतीतियत्त्वयोक्तंतच्छोभनमेवतथापिते अहंकारेणमदेनमन्युनाचदोषदृष्टयःनभवंतिचेत्तर्हिगंतव्यम् १६

॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

ननुविद्यादिगुणायुक्तोदक्षस्त्वादृशेषुमहत्सुकथंदोषदृष्टिर्भवेत्तत्राह । विद्यादिभिरेवस्मृतौहतायांविवेकज्ञाने नष्टेसति भूयसांमहत्तमानां धामतेजोनपश्यंतिहि ननुगुणैः कथं विवेकनाशस्तत्राह । सतांगुणैः विवेकहेतुभिरपिअसत्तमानांइतरैः दोषभूतैःअतएवतैर्भृतःधृतः पुष्टोवाअहं विद्वान्तापसइत्यादिमानो गर्वस्तेनदुष्टादृष्टिर्येषांते १७ स्वजनव्यपेक्षयाबंधुदृष्ट्या (एतादृशानां) गृहान्नप्रतीयात्नावलोकयेत्। अनवस्थितचित्तत्वमेवाह।येवक्रधियाकुटिलयाबुद्ध्या पश्यंति आरोपिताउत्तंभिताभ्रूर्येषुतान्पारोपितभ्रूणितैःअमर्षणैःसक्रोधैरक्षिभिर्नेत्रैः।आरोपिताभिर्भ्रूभिरितिवा१८ ननुस्वजनानांगृहंसुहृद्भिर्गंतव्यंतेषांदु श्चेष्टितंचविवेकिभिः सोढव्यं इतिचेन्न तस्यदुःसहत्वादित्याह तथेति । अरिभिः शत्रुभिः शिलीमुखैर्बाणैरर्दितांगः खंडितगात्रोपि तथानव्यथते यतःशेते स्वपिति स्वानांदुरुक्तिभिः मर्मसुताडितोयथादूय ताव्यथमानेनहृदादिवानिशंतप्यति १९ मयितत्रगतायांनैयंशंकेतिचेत्तत्राह व्यक्तंनिश्चितं उत्कृष्टागतिः स्थितिर्यस्यतस्यात्मजानांकन्यानांमध्येत्वंप्रियेतिमेसंमतासि (मयाज्ञातासि) अथापिपितुः सकाशात् मानंन लप्स्यसे मदाश्रयात्मत्संबंधात् २० ननुभगवन्त्वयाकिमितिदक्षः तिरस्कृतः यतोसौत्वां द्वेष्टि। अतआह।पापच्यमानेनअलंदह्यमानेनहृदा दुःखितेंद्रियः।काभिः पुरुषोजीवस्तस्य बुद्धि श्चित्तंतत्साक्षिणांनिरहंकाराणामित्यर्थः समृद्धिभिः पुण्यकीर्त्यादिभिः (स्वय–)–मेषांपदं स्थानमैश्वर्यं प्राप्तुमकल्पः अशक्तःसन् परंद्वेष्टिअसुरायथाहरिं केवलं (निरपराधमपि) द्विषंति २१ ननुत्वयाप्र त्युत्थानविनयाद्यकरणात् अवज्ञातएवासौतत्राह हेसुमध्यमेप्रत्युद्गमादिकंमिथोजनैर्यद्विधीयतेतत्तुप्राज्ञैर्भागवतैःसाधुविधीयते । साधुत्वमेवाह । परस्मैश्रीवासुदेवाय गुहाशयायअंतर्यामिणएवतच्चचेतसैव परिपूर्णेतस्मिन्कायिकव्यापारायोगात्अतोंतर्यामिदृष्ट्यामनसासर्वंकृतमितिभावः २२ किंच नकेवलमभ्यागतेष्वेववासुदेवदृष्ट्यानमनादिक्रियते किंतु नित्यमेवमनसिवासुदेवश्चिंत्यतेइत्याह (सत्त्व मिति) शुद्धंसत्त्वंअंतःकरणंसत्त्वगुणोवा वसुदेवशब्दितंवसुदेवशब्देनोक्तंकुतः यद्यस्मात्तत्रतस्मिन्सत्त्वेपुमान्वासुदेवईयतेप्रकाशते अपगतंआवृतमावरणंयस्मात्सः (स्पष्टइत्यर्थः)। अयमर्थः वसुदेवेभव तिप्रतीयतेइतिहिवासुदेवः परमेश्वरः प्रसिद्धः सचविशुद्धेसत्त्वेप्रतीयते अतःप्रत्ययार्थेनप्रसिद्धेनप्रकृत्यर्थोनिर्धार्यते ततश्चवासयतिदेवमिति व्युत्पत्त्यावावसत्यस्मिन्देवइतिवावसुः दीव्यतिद्योततेइतिदेवः (वसुश्चासौदेवश्च) वसुभिः पुण्यैर्दीव्यतिप्रकाशतेइतिवासुदेवशब्दवाच्यंशुद्धंसत्त्वंततः"तत्रभव"इत्यण् अत्रप्रतीतिर्भवतेरर्थः । ततःकिमतआह सत्त्वेचतस्मिन्भगवान्मेमयानमसानमस्कारेणानु विधीयतेसेव्यतइत्यर्थः मनसेतिपाठेमनसा विशेषेणधीयतेधार्यतेचिंत्यतइत्यर्थःयतःअधोभूतेषुप्रत्याहृतेषुजक्षेषुइंद्रियेषुजायतेप्रकाशते (अन्यथाऽप्रकाशमानत्वात्) इंद्रियागोचरइत्यर्थः २३

श्लोकाः १७—२३

विद्यातपोवित्तवपुर्वयःकुलैःसतांगुणैःषड्भिरसत्तमेतरैः । स्मृतौहतायांभृतमानदुर्दृशःस्तब्धानपश्यंतिहिधामभूयसाम् १७ नैतादृशानांस्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनाम् ॥ येऽभ्यागतान्वक्रधियाऽभिचक्षतेआरोपितभ्रूभिरमर्षणाक्षिभिः १८ तथाऽरिभिर्नव्यथतेशिलीमुखैःशेतेऽर्दितांगोहृदयेनदूयता ॥ स्वानांयथावक्रधियांदुरुक्तिभिर्दिवानिशंतप्यतिमर्मताडितः १९ व्यक्तंत्वमुत्कृष्टगतेःप्रजापतेःप्रियात्मजानामसिसुभ्रूसंमता ॥ अथापिमानंनपितुःप्रपत्स्यसेमदाश्रयात्कःपरितप्यतेयतः २० पापच्यमानेनहृदातुरेंद्रियःसमृद्धिभिःपूरुषबुद्धिसाक्षिणाम् ॥ अकल्पएषामधिरोढुमंजसा पदंपरंद्वेष्टियथाऽसुराहरिम् २१ प्रत्युद्गमप्रश्रयणाभिवादनंविधीयतेसाधुमिथःसुमध्यमे ॥ प्राज्ञैःपरस्मैपुरुषायचेतसागुहाशयायैवनदेहमानिने २२ सत्त्वंविशुद्धंवसुदेवशब्दितंयदीयतेतत्रपुमानपावृतः ॥ सत्त्वेचतस्मिन्भगवान्वासुदेवोह्यधोक्षजोमेनमसाविधीयते २३

चूर्णिका

किंचविद्यातपोवित्तवपुर्वयःकुलैर्येगर्विष्ठाःतेश्रेष्ठानांतेजःनपश्यंति१७एवंभूतानास्वजनसंगेच्छानयेअभ्यागतान्वक्रधियापश्यंतितद्गृहान्नगंतव्यम्१८यथावक्रधियांस्वानांदुर्भाषणै र्मर्मताडितःदिवानिशंतप्यति तथा अरिमुक्तैःबाणैःनव्यथते१९ त्वंदक्षकन्यानांमध्येअतिमान्यासि अथापि पितुःमानंनलप्स्यसेयतःममाश्रयाद्दक्षःत्वयिपरितप्यते२०२१२२२३

१ मेसुसंमतेतिलिखितपुस्तकेपाठः २ मनसेतिपाठोप्यस्ति

CC-0. In Public Domain. Digitization by eGangotri

तस्माच्त्वयाननिरीक्ष्यः देहकृदपीति(विशेषणम्) पोषकत्वादिभिरौपचारिकपितृत्वव्यावृत्त्यर्थं द्विट् शत्रुः तदेवाह हेवरोरु। योदक्षः विश्वसृजांयज्ञगतंमांनिरपराधंतिरोऽकरोत्तिरस्कृतवान्२४विपक्षेदो
षमाह यदीति मद्वचोऽतिहायअतिक्रम्य यतःसंभावितस्यसुप्रतिष्ठितस्ययदापराभवोभवतितदासपराभवःतस्यमरणायकल्पते (तिरस्कर्तुः तिरस्क्रियमाणस्यवाद्वयोर्वा) २५इतिश्रीमद्भागवतेचतुर्थस्कंधेतृती
योध्यायः॥३॥ चतुर्थेतुपतिंहित्वागतापित्रावमानिता रुषानिर्भर्त्स्यतंयज्ञेजहौदेहमितीर्यते ॥॥ उभयत्रअनुज्ञानेबलान्निवारणेच(पत्न्यादेहनाशंचिंतयन्तूष्णींबभूव।सातु)सुहृद्दिदृक्षुःनिष्क्रामती भवात् परिशंकि
तापुनर्निर्विशंतीचसती द्विधाआसउभयानिष्ठचित्ताबभूव नगतानचस्थिता आन्दोलावद्गतिरभवत् १ सुहृदांदिदृक्षायाःप्रतिघातेनदुर्मनाः अश्रूणांकलाभिर्लेशैरतिविह्वलाव्याकुलाअप्रतिपुरुषं स्वसमानपुरुषां
तररहितंप्रधक्ष्यतीवभस्मीकरिष्यतीव (एतादृशा) रुषा (क्रोधेन) जातोवेपथुःकंपोयस्याः(ऐक्षत)२(पितृविरहसंभावनाजन्यशोकेनअननुज्ञाजन्यरोषेणचदूयताहृदाविनिश्वस्य) अथतंविहायपित्रोर्गृहानगा
त् । कथंभूतंतम् यःप्रीत्यातस्यैआत्मनोदेहस्यार्धमदात्त्यागेहेतुः । स्त्रैणंस्त्रीस्वभावः । तेनविमूढाधीर्यस्याःसा३(निवारणशंकयाद्रुतविक्रमां) शीघ्रंगच्छंतीं सहपार्षदैःयक्षैश्चवर्तमानाःमणिमान्मदश्चआदिर्ये
षांते पुरःपुरतोवृषेंद्रोयेषांतेगतव्यथानिर्भयाः रुद्रातिक्रमेणतस्यागमनादागतव्यथाः(प्राप्तचिंता) इतिवा ४ तांवृषेंद्रमारोप्यसारिकादिभिः क्रीडोपकरणैःश्वेतातपत्रादिभिश्चमहाराजविभूतिभिःसहविशंकिताः
शोभिताययुः । सारिकापठनर्निरूपितापक्षिणी गीतायनैर्गीताश्रयैः (स्तोत्रविशेषैः) ५ आसमंताद्योवेदघोषस्तेनोर्जितंशोभमानंयज्ञसंबंधिपशुविशसनंयस्मिन् यद्वा तेनोर्जितअतिशयितंयज्ञवैशसंपरस्प
रस्पर्धायस्मिन्तद्यजनंयज्ञस्थानंसमाविशद्देवी (कथंभूतं) विप्रर्षिभिर्जुष्टं (सर्वशो) विबुधैश्चजुष्टम् । मृदादिभिः निसृष्टानिनिर्मितानिभांडानि (यज्ञ-)-पात्राणि यस्मिन् ६

श्लोकाः २४ / ६

तत्तेनिरीक्ष्योनपिताऽपिदेहकृद्दक्षोममद्विट्तदनुव्रताश्चये ॥ योविश्वसृग्यज्ञगतंवरोरुमामनागसंदुर्वचसाकरोत्तिरः २४ यदिव्रजिष्यस्यतिहायमद्वचोमद्रंभ
वत्यानततोभविष्यति ॥ संभावितस्यस्वजनात्पराभवोयदाससद्योमरणायकल्पते २५ इतिश्रीभागवतेच०उमारुद्रसंवादेतृतीयोध्यायः ३ ॥मैत्रेयउवाच॥
एतावदुक्त्वाविरराम शंकरःपत्न्यंगनाशंह्युभयत्रचिंतयन् ॥ सुहृद्दिदृक्षुःपरिशंकिताभवान्निष्क्रामतीनिर्विशतीद्विधाऽऽससा १ सुहृद्दिदृक्षाप्रतिघातदुर्मनाःस्ने
हाद्रुदत्यश्रुकलाऽतिविह्वला ॥ भवंभवान्यप्रतिपूरुषंरुषाप्रधक्ष्यतीवैक्षतजातवेपथुः २ ततोविनिश्वस्यसतीविहायतंशोकेनरोषेणचदूयताहृदा ॥ पित्रो
रगात्स्त्रैणविमूढधीर्गृहान्प्रेम्णात्मनोयोऽर्धमदात्सतांप्रियः ३ तामन्वगच्छन्द्रुतविक्रमांसतीमेकांत्रिनेत्रानुचराःसहस्रशः ॥ सपार्षदयक्षामणिमन्मदादयः
पुरोवृषेंद्रास्तरसागतव्यथाः ४ तांसारिकाकंदुकदर्पणांबुजश्वेतातपत्रव्यजनस्रगादिभिः ॥ गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्यविटंकितायुः ५ आ
ब्रह्मघोषोर्जितयज्ञवैशसंविप्रर्षिजुष्टंविबुधैश्चसर्वशः ॥ मृद्दार्वयःकांचनदर्भचर्मभिर्निसृष्टभांडंयजनंसमाविशत् ६

चूर्णिका

दक्षः सर्वत्र हरिव्याप्तिं न जानाति तस्मात्त्वयापितापिननिरीक्ष्यः यः पूर्वंयज्ञगतंमांनिरपराधंदुर्वचोभिः तिरस्कृतवान्२४हेदेवि मद्वचःअतिक्रम्ययदिगच्छसितर्हितवभद्रंन संभा
वितस्यचाकीर्तिर्मरणाय प्रकल्पते इति२५ इतिचतुर्थेतृतीयः ३ ॥ ॥मैत्रेयउवाच॥ ॥शंकरः उभयत्रपत्न्यंगनाशंज्ञात्वाइत्युक्त्वाचविररामसासुहृद्दिदृक्षःनिष्क्रामतीनिर्विशती
आंदोलावत् द्विधा आस १ साभवरुषाधक्ष्यतीवऐक्षत २ ततः सतीविनिश्वस्य तंविहायपित्रोः गृहंअगात् ३ शिवानुचराः तदाएकांगच्छंतींसतींवृषेंद्रसाहिताः सपार्षदय
क्षाः मणिमन्मदादयः ४ तत्क्रीडासाधनसारिकाकंदुकादीन्प्रगृह्यश्वेतातपत्रादिभिः तांवृषेंद्रंआरोप्यशोभिताः संतः देवर्षिजुष्टंययु५ सापिवेदघोषनादितंयज्ञस्थानंसमाविशत्६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. च. टीका ॥१३॥

कश्चन(कोपि) नाद्रियत् नाहतवान् । यज्ञकृद्दक्षः तस्माद्भयं तस्मात् । तत्रहेतुः तेनविमानिताम् (अवगणितां) स्वसृर्जननींच ऋते विना । तास्तु सादराः परिषस्वजुः आलिंगितवत्यः । प्रेमाश्रुभिर्निरुद्धः कंठोयासां (ताः) ७ अप्रतिनंदिता अनाहता सती (मात्रादिभिर्दत्तां सपर्यां पादप्रक्षालनार्थमुदकादि दिव्यमासनंच) नादत्त न गृहीतवती । कथं । सौंदर्येण सुंदरत्वेन सम्यक्तयायो भगिनीनांसंप्रश्नः तत्रसमर्था योग्या या वार्ता तया सह तांचनादत्त नाशृणोदित्यर्थः ८ नविद्यते रुद्रस्य भागो यस्मिंस्तं देवेरुद्रे कृतं हेलनं अवज्ञानं आह्वानाद्यकरणात् ९ जगर्ह निंदितवती अमर्षेण कोपेन विपन्ना अव्यक्ता तया (गिरा) शिवं द्वेष्टि शिवद्विट्तम् । धूमपथः कर्ममार्गस्तत्रश्रमोऽभ्यासस्तेनस्मयोगर्वोयस्य दक्षवधाय समुत्थितान् स्वाज्ञया निगृह्य निवार्य १० निंदामेवाह । नयस्येति त्रयोदशभिः । मुक्तवैरके त्यक्तविरोधे तस्मिन् शिवे भवंतं (त्वां) ऋतेविना कतमः प्रतीपयेत् प्रतिकूलमाचरेत् । वैराभावेहेतवः । यस्यलोके अतिशायनः अतिशायित (उत्कृष्टो) नास्तितथा प्रियश्चाप्रियश्चनास्ति । समासपाठे अतिशयेन प्रियोनास्ति देहभृतां प्रियोऽयमात्मातस्य समस्तस्यात्मनिकरणभूतेसमस्तरूपइति वा ११ तस्यचप्रतिकूलकरणंद्वेधामहत्तमद्रोहेणसाक्षात्तद्द्रोहेणच तत्रपुरुषाणांचातुर्विध्यं वदंतीमहत्तमद्रोहमाह दोषानितिद्वाभ्यां हेद्विजेत्यधिक्षेपः भवादृशास्त्वद्विधाः (असाधवः) असूयकाः परेषां गुणेषुदोषानेवगृह्णंति नतुगुणान् तेअधमाउच्यंते केचिन्मध्यस्थागुणेषुदोषान्नगृह्णंतिकिंतु यथास्थितान्गुणदोषान्विवेकेनगृह्णंतितेतुमहांतउच्यंते साधवस्तुकेवलंगुणानेवगृह्णंतिनदोषान् तेतुमहत्तराउच्यंते महत्तमास्तुदोषान्नगृह्णंतितेचप्रत्युतफल्गून्तुच्छानपिगुणान्बहुलीकरिष्णवोभंवतिबहुलीकुर्वंति तेषुभवान्अघंअविदत्विदितवान्कल्पितवानित्यर्थः तच्चब्रह्मिष्ठानभिभूयेत्यनेनसूचितम् १२ एतच्चदुर्जनेषुयुक्तमेवेत्याह नेति कुणपंजडं शरीरंतदेवआत्मेतिवदंतियेतेषु (असत्सु)सेर्ष्यं ईर्ष्याअक्षांतिः (तत्सहितं) यथाभवत्येवमहतां विनिंदेतियत्एतदाश्चर्यंनभवति (महापूरुषपादपांसुभिः) सेर्ष्यं निरस्ततेजस्सुइति वा निरस्तं तेजः प्रभावोयेषां इतिवायद्यपिमहापुरुषाःस्वनिंदांसहंतेतथापितत्पादरेणवः तदसहमानाः तेषांतेजोनिरस्यंति अतोऽशक्तेषुमहन्निंदनमेवोचितमित्यर्थः १३

अ० ॥४॥

श्लोकाः

तामागतांतत्रनकश्चनाऽऽद्रियद्विमानितांयज्ञकृतोभयाज्जनः ॥ ऋतेस्वसॄर्वैजननींचसादराःप्रेमाश्रुकंठ्यःपरिषस्वजुर्मुदा ७ सौदर्यसंप्रश्नसमर्थवार्त्तयामात्राचमातृष्वसृभिश्चसादरम् ॥ दत्तांसपर्यांवरमासनंचसानादत्तपित्राऽप्रतिनंदितासती ८ अरुद्रभागंतमवेक्ष्यचाध्वरंपित्राचदेवेकृतहेलनंविभौ ॥ अनादृताय ज्ञसदस्यधीश्वरीचुकोपलोकानिवधक्ष्यतीरुषा ९ जगर्हसाऽमर्षविपन्नयागिराशिवद्विषंधूमपथश्रमस्मयम् ॥ स्वतेजसाभूतगणान्समुत्थितान्निगृह्यदेवी जगतोऽभिशृण्वतः १० ॥ ॥ श्रीदेव्युवाच ॥ ॥ नयस्यलोकेऽस्त्यतिशायनःप्रियस्तथाऽप्रियोदेहभृतांप्रियात्मनः ॥ तस्मिन्समस्तात्मनिमुक्तवैरके ऋतेभवंतंकतमःप्रतीपयेत् ११ दोषान्परेषांहिगुणेष्वसाधवोगृह्णंतिकेचिन्नभवादृशाद्विज ॥ गुणांश्चफल्गून्बहुलीकरिष्णवोमहत्तमास्तेष्वविदद्भवानघम् १२ नाश्चर्यमेतद्यदसत्सुसर्वदामहद्विनिंदाकुणपात्मवादिषु ॥ सेर्ष्यंमहापूरुषपादपांसुभिर्निरस्ततेजस्सुतदेवशोभनम् १३

$\frac{७}{१३}$

चूर्णिका

तत्र तांदक्षभयात् कश्चन नाद्रियत् ७ सामात्रादिभिः दत्तांपूजांनगृह्णात् ८ तंयज्ञंअरुद्रभागंअवेक्ष्यलोकान्धक्ष्यतीवचुकोप ९ तदादक्षवधायउत्थितान्स्वगणान्निगृह्यसर्वेषांशृण्वतां सा उवाच १० अहोयस्य लोके प्रियःअप्रियश्चनतास्मिन्शिवेत्वांविनाकः प्रतिकूलंआचरेत् ११ १२ यस्यद्व्यक्षरंशिवेतिनामनृणांगिरेरितंसकृत् प्रसंगाद्वा तत्आशुअघंहंति १३

॥१३॥

टीका ॥१४॥

एवंमहत्तमद्रोहमुक्त्वा (साक्षात्) तस्मिन्नेव कृतं द्रोहमाह यदितिद्वाभ्याम् यत्यस्यद्व्यक्षरमात्रमपिशिवेतितत्प्रसिद्धंनाम (अविभक्तिकमपि) नृणांसर्वेषामपि (नतुब्राह्मणादीनामेववर्णानां) आशुअघंसर्वं हंति (तच्च)केवलंगिरैवेरितंनतुमनःपूर्वकं तत्तुसकृदपिप्रसंगादपितंशिवंद्वेष्टिभवान्नलघ्यंशासनमाज्ञायस्य (तं) अहोशिवेतरःअमंगलरूपः१४ पापहरत्वमुक्तं भुक्तिमुक्तिप्रदत्वेनशिवंवर्णयंत्याह यस्य पादपद्मंमनांस्येवालयः तैः ब्रह्मरसोब्रह्मानंदः सएवासवोमकरंदः तदर्थिभिः यच्चार्थिनः सकामस्यलोकस्यतास्ताः कामनावर्षतिविश्वबंधवेजगत्पित्रे १५ यदुक्तंशिवापदेशोह्यशिवइतियच्चोक्तंप्रेतावासोष्वित्यादि तदाक्षिपंत्याह किंवेति योजटाअवकीर्यश्मशानअवसत्वसतिस्मतस्यश्मशानस्यमाल्यानिभस्मानिनृकपालानिचभूषणत्वेनसंतियस्यतं (तथाभूतं) त्वत्तोन्येनविदुः तेविदंत्येवेतिचेन्न तथासतितेषांतद्दास्यानुपपत्तेरित्याह तच्चरणादवसृष्टंगलितंनिर्माल्यंयेमूर्धभिर्धारयंति (यमुपासतेतेइत्यर्थः) १६ इदानींदेहंत्यक्तुकामाधर्मतत्त्वमाह कर्णावाच्छाद्यनिर्गच्छेत् यद्यदिमर्तुंमारयितुंवानकल्पो (नसमर्थो) भवति कदा धर्मावितरिधर्म संरक्षकेईशेस्वामिनिअसृणिभिर्निरंकुशैर्नृभिरस्यमानेअधिक्षिप्यमाणे प्रभुः शक्तश्चेत् रुशतीं अकल्याणवादिनीं प्रसह्यबलात्तांछिंद्यात् ततोपिस्वयंप्राणान्विसृजेदितियत्सधर्मः १७ तवत्वत्तः उत्पन्नं शितिकंठोनीलकंठः तन्निंदकात् प्रमादादापन्नस्यापवित्रस्यत्यागंविनानशुद्धिरितिदृष्टांतेनाह जग्धस्यभक्षितस्यान्नस्योद्धरणंवमनमेवपुंसः शुद्धिंप्रचक्षते १८ यदुक्तंलुप्तक्रियायाशुचयइतितत्प्रत्याह नेति वेदवादान्विधिनिषेधरूपान्स्वएवलोके स्वात्मन्येवरममाणस्यमहतोमुनेः सम्यग्विरक्तस्यमतिः नानुवर्ततेनिवृत्ताधिकारत्वात् अधिकारभेदेदृष्टांतः यथादेवानांगतिराकाशएव मनुष्याणांपृथिव्यामेव अतः स्वधर्मएवप्रवृत्तिलक्षणेनिवृत्तिलक्षणेवावस्थितः सन्परमन्यंधर्मंपुरुषंवानक्षिपेत् नानिंदेत् व्यवस्थिताधिकारत्वेनोभयोः सत्यत्वात् नक्षिपेदेवेतिवान्वयः १९

श्लोकाः १४/१९

यद्व्यक्षरंनामगिरेरितंनृणांसकृत्प्रसंगादघमाशुहंतितत् ॥ पवित्रकीर्तिंतमलंघ्यशासनंभवानहोद्वेष्टिशिवंशिवेतरः १४ यत्पादपद्मंमहतांमनोऽलिभिर्निषेवितंब्रह्मरसासवार्थिभिः ॥ लोकस्ययद्वर्षतिचाशिषोऽर्थिनस्तस्मैभवान्द्रुह्यतिविश्वबंधवे १५ किंवाशिवाख्यमशिवंनविदुस्त्वदन्येब्रह्मादयस्तमवकीर्यजटाःश्मशाने ॥ तन्माल्यभस्मनृकपाल्यऽवसत्पिशाचैर्येमूर्द्धभिर्दधतितच्चरणावसृष्टम् १६ कर्णौपिधायनिरयाद्यदकल्पईशेधर्मावितर्यसृणिभिर्नृभिरस्यमाने ॥ छिंद्यात्प्रसह्यरुशतीमसतींप्रभुश्चेज्जिह्वामसूनपिततोविसृजेत्सधर्मः १७ अतस्तवोत्पन्नमिदंकलेवरंनधारयिष्येशितिकंठगर्हिणः ॥ जग्धस्यमोहाद्धिविशुद्धिमंधसोजुगुप्सितस्योद्धरणंप्रचक्षते १८ नवेदवादाननुवर्ततेमतिःस्वएवलोकेरमतोमहामुनेः ॥ यथागतिर्देवमनुष्ययोःपृथक्स्वएवधर्मेनपरंक्षिपेत्स्थितः १९

चूर्णिका ॥१४॥

१४ तंपवित्रकीर्तिंशिवंशिवेतरः त्वं द्वेष्टि १५ शिवरूपंत्वंनवेत्सि किंच श्मशानेजटाः अवकीर्य क्रीडतः उद्धृतंमाल्यभस्मादि अन्येब्रह्मादयः मूर्द्धभिःतदधि तस्मिन्नत्वंद्रुह्यसि १६ यत्र सभायां महतांनिंदा भवति ततः कर्णौपिधायनिगच्छेत् शक्तश्चेत्ताजिह्वांछित्त्वास्त्रयमपि प्राणान्त्यजेत् इतिधर्मः १७ अतः शिवानिंदकात्त्वत्तः उत्पन्नं इमंदेहंनधारयिष्ये भक्षितान्नस्यशुद्धिःर्वमनंविनान १८ अतः शिवेकृतागसः तव देहात् उत्पन्नंइदंशवरूपं वपुः त्यक्ष्यामि १९

---

१ आशिष इति कुत्रचित् मु० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतदेवोपपादयंत्याह प्रवृत्तमग्निहोत्रादि निवृत्तं शमदमादि ऋतंसत्यमेव यतः वेदेआश्रितं विहितम् तच्चविविच्यव्यवस्थया आश्रितंनत्वविशेषेण व्यवस्थामेवाह उभयंरागवैराग्यलक्षणंलिंगंचिह्नमधिकारिविशेषणंयास्मिन् तत् । "यावज्जीवमग्निहोत्रं जुहोतिशांतोदांत" इत्यादिषुनैवंव्यवस्थाप्रतीयते सत्यम् तथाप्युभयोरेकाधिकारविरोधात्तथापर्यवस्यतीत्याह युगपद्भावोयौगपदम् यौगपदेनैकस्मिन्कर्तरितत्कर्मद्वयंविरोधि ननुतर्हि निवृत्तंकर्म शिवेनापिकर्तव्यमेव नेत्याह ब्रह्मणि सदाशिवेकिंचिदपिकर्मनर्छतिनप्राप्नोति अतःयथाप्रवृत्तनिवृत्तयोरधिकारिणोःपरस्परधर्माकरणेनदोषःतथेश्वरेतदुभयकर्माकरणेपीतिभावः २० चिताभस्मकृतस्नानः तथानग्नइत्यादिना यो भोगाद्यभाव उक्तः तत्राह । हेपितःअस्माभिरास्थिता आश्रिताः पदव्यः अणिमादिसमृद्धयः वोयुष्माकं मान संतीत्यर्थः । यतो वः पदव्यो यज्ञशालास्वेवभवंति ताश्च तदन्नेनयज्ञगतेनान्नेनतृप्तैः कवलमीडिताः धूमवर्त्मभिश्च भुज्यंते । या अस्मत्पदव्यः तास्तु नैवंभूताः किंतुअव्यक्तालिंगाः अव्यक्तंलिंगं हेतुर्यासामिच्छामात्रप्रभवत्वात् । अवधूतैर्ब्रह्मविद्भिः सेविताः अतोऽहमाढचोरुद्रोदरिद्रइतिगर्वमाकृथाइतिभावः२१किंबहुनोक्तेनइमं देहं त्यक्ष्याम्येवेत्याह द्वाभ्याम् । एतेननालंनपूर्यतेकिम् । अपित्वलमेव । कथंभूतेन । कुजन्मना (कुत्सितंजन्मयस्यतेन) तदेवाह हरे कृतापराधस्य तव देहादुद्भूतेन । ननुतवश्लाघ्योयंदेहः कथंत्याज्यस्तत्राह । कुजनस्य कुत्सितजनकस्य तव प्रसंगतः संबंधात् मम लज्जाऽभूत् । अतोयोमहतामप्रियकर्तातस्माद्यज्जन्मतद्धिक् त्वत्संबंधादश्लाघ्यमित्यर्थः २२ किंचपरिहासादिषुविनोदेनापिदाक्षायणिइतिसंबोधयन् त्वदीयंत्वत्संबधवाचकंगोत्रंनाम यदावृषध्वजआह गृह्णाति तदाहंव्यपेतनर्मस्मितंयथाभवत्येवंसुदुर्मनाअतिदुःखितचित्ताभवामितत्तस्माद्धिनिश्चितंएतत्कुणपप्रायं (त्वदंगाज्जातंदेहम्) व्युत्स्रक्ष्ये त्यक्ष्यामि २३ दक्षंप्रत्यनुवादंकृत्वा शत्रुहन् हे क्रोधादिरिपुघातिन्विदुर उदीचींउदीच्यांदिशि पाठांतरेउदङ्मुखीशांतवाक्गृहीतमानौ जलंस्पृष्ट्वाआचम्यदृक्दृशं २४ योगपथमेवाह । कृत्वेति । अनिलौप्राणापानौ उर्ध्वाधोवृत्तिकौनिरोधेनसमानौएकरूपौनाभिचक्रेकृत्वा ततउदानमुत्थाप्य धियासहहृदिस्थापयित्वाकंठमार्गेणभ्रुवोर्मध्यमनयत् २५ महतां पूज्यतमेन शिवेन (अंकंप्रतिमुहुः स्थापितंत्यक्तुमिच्छंतीवाय्वग्निधारणांदधार) २६ चरणांबुजेआसवंभजनानंदं (चिंतयतीसती) भर्तुरपरंनददर्श देहश्चसद्यः (प्रजज्वाल) प्रज्वलितोभूत् । समाधिना (धारणया) योग्निस्तेन २७

॥१५॥

श्लोकाः २०—२७

कर्मप्रवृत्तंचनिवृत्तमप्यृतंवेदेविविच्योभयलिंगमाश्रितम् ॥ विरोधितद्यौगपदैककर्तरिद्वयंतथाब्रह्मणिकर्मनर्च्छति २० मावःपदव्यःपितरस्मदास्थितायायज्ञशालासुनधूमवर्त्मभिः ॥ तदन्नतृप्तैरसुभृद्भिरीडिताअव्यक्तलिंगाअवधूतसेविताः २१ नैतेनदेहेनहरेकृतागसोदेहोद्भवेनालमलंकुजन्मना ॥ व्रीडाममाभूत्कुजनप्रसंगतस्तज्जन्मधिग्योमहतामवद्यकृत् २२ गोत्रंत्वदीयंभगवान्वृषध्वजोदाक्षायणीत्याहयदासुदुर्मनाः ॥ व्यपेतनर्मस्मितमाशुतद्ह्यहंव्युत्स्रक्ष्यएतत्कुणपंत्वदंगजम् २३ ॥मैत्रेयउवाच॥ इत्यध्वरेदक्षमनूद्यशत्रुहन्क्षितावुदीचींनिषसादशांतवाक् ॥ स्पृष्ट्वाजलंपीतदुकूलसंवृतानिमील्यदृग्योगपथंसमाविशत् २४ कृत्वासमानावनिलौजितासनासोदानमुत्थाप्यचनाभिचक्रतः ॥ शनैर्हृदिस्थाप्यधियोरसिस्थितंकंठाद्भ्रुवोर्मध्यमनिंदिताऽनयत् २५ एवंस्वदेहंमहतांमहीयसामुहुःसमारोपितमंकमादरात् ॥ जिहासतीदक्षरुषामनस्विनीदधारगात्रेष्वनिलाग्निधारणाम् २६ ततःस्वभर्तुश्चरणांबुजासवंजगद्गुरोश्चिंतयतीनचापरम् ॥ ददर्शदेहोहतकल्मषासतीसद्यःप्रजज्वालसमाधिनाग्निना २७

चूर्णिका

२० २१ २२ २३ ॥ ॥ मैत्रेय उवाच ॥सती इत्युक्त्वाउदङ्मुखीसतीआसनंस्थित्वा योगमार्गं प्राविशत् २४ आदौ प्राणापानौ नाभिचक्रे समौ कृत्वा ततः उदानं उत्थाप्य ततः हृदयादिषु आनीय भ्रूमध्यं अनयत् २५ ततः भर्तुश्चरणांबुजं ध्यायतीसद्यःसमाधिजाग्निनादेहंअदहत् २६ २७ ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. खभुवि चहाहेत्यादिवादः तमेवाह। हंतेतिविषादे। दैवतमस्य पूज्यतमस्यमहादेवस्य प्रिया केन दक्षेण प्रकोपिता सती (देवीप्राणान्तत्याज) २८ (अस्य दक्षस्य) महत्अनात्म्यंदौर्जन्यं। अस्यसर्वत्रस्नेहएव अ०
न्याय्यइत्याहुः। यस्येति (यस्यप्रजापतेः) येनविमताअवज्ञाता २९ दुर्मर्षंअत्यसहनंहृदयंयस्य लोकेजनमध्ये चशब्दान्नरकंच यद्यतः स्वीयामंगजांसुतांअपराधतःस्वावज्ञया मृतये मरणायोद्यतांननिवारित
टीका वान् पुरुषद्विट्शिवद्वेषी ३० अद्भुतं (सत्या असुत्यागं) दृष्ट्वा च३१यत्पज्ञघ्नान्हंतीतियज्ञघ्नघ्नंतेनअपहतंरक्षइत्यादिना ३२ अध्वर्युणा भृगुणा येतपसासोमंप्राप्ताऋभवोनामदेवाउत्थिताः३३ ब्रह्मतेजसा (भृगु
प्रयुक्तमंत्रतेजसा) उशद्भिर्देदीप्यमानैः (अलातायुधैः उल्काप्रहरणैस्तैर्हन्यमानाः) ३४ इतिचतुर्थेस्कंधे टीकायांचतुर्थोध्यायः ४॥॥ पंचमेतुसतीदेहत्यागमाकर्ण्यशंकरः। वीरभद्रंरुषोत्पाद्यतेनदक्षमघातयत् ॥५॥
१ प्रजापतेर्हेतोर्निधनंकुतः। तेनअसत्कृतायाःतस्याध्वरेयेऋभवोदेवास्तै-(र्विद्राविर्तंनारदादवगम्य) १ सधूर्जटिः रुद्रःघोरः सन् जटामुत्कृत्यउत्पाट्यउत्थितः सन् तांभुविविससर्ज सुदष्टः ओष्ठपुटोयेन
॥१६॥ तडितांवह्नीनांचसटाज्वालास्तद्वत्उग्रंरोचिर्यस्यास्ताम् २ ततोजटायाः सकाशात्अतिकायोवीरभद्रोजातइतिशेषः तनुवा तन्वा देहेन दिवं स्पृशन् अत्युच्चइत्यर्थः घनरुक् कृष्णवर्णः त्रयः
सूर्याइवदृशो यस्य करालास्तुंगादंष्ट्रायस्यज्वलदग्निरिवमूर्धजाः केशा यस्य कपालमालायुक्तः विविधान्युद्यतानि आयुधानि यस्य ३

तत्पश्यतांखेभुविचाद्भुतंमहद्धाहेतिवादःसुमहानजायत॥ हंतप्रियादैवतमस्यदेवीजहावसून्केनसतीप्रकोपिता २८ अहोअनात्म्यंमहदस्यपश्यतप्रजापतेर्य श्लोकाः
स्यचराचरंप्रजाः॥ जहावसून्याद्विमतात्मजासतीमनस्विनीमानमभीक्ष्णमर्हति २९ सोयंदुर्मर्षहृदयोब्रह्मध्रुक्चलोकेऽपकीर्तिमहतीमवाप्स्यति॥ यदंग
जांस्वांपुरुषद्विडुद्यतांनप्रत्यषेधन्मृतयेऽपराधतः ३० वदत्स्येवंजनेसत्यादृष्ट्वासुत्यागमद्भुतम्॥ दक्षंतत्पार्षदाहंतुमुदतिष्ठन्नुदायुधाः ३१ तेषामापततांवेगं
निशाम्यभगवान्भृगुः॥ यज्ञघ्नघ्नेनयजुषादक्षिणाग्नौजुहावह ३२ अध्वर्युणाहूयमानेदेवाउत्पेतुरोजसा॥ ऋभवोनामतपसासोमंप्राप्ताःसहस्रशः ३३ तै २८/३
रलातायुधैःसर्वेप्रमथाःसहगुह्यकाः॥ हन्यमानादिशोभेजुरुशद्भिर्ब्रह्मतेजसा ३४ इ०श्रीभा०म०च०स्कं०सतीदेहोत्सर्गोनामचतुर्थोऽध्यायः ४ ॥ मै
त्रेयउवाच ॥ भवोभवान्यानिधनंप्रजापतेरसत्कृतायाअवगम्यनारदात्॥ स्वपार्षदसैन्यंचतदध्वरर्भुभिर्विद्रावितंक्रोधमपारमादधे १ क्रुद्धःसुदष्टौष्ठपुटः
सधूर्जटिर्जटांतडिद्वह्निसटोग्ररोचिषम्॥ उत्कृत्यरुद्रःसहसोत्थितोहसन्गंभीरनादोविससर्जतांभुवि २ ततोऽतिकायस्तनुवास्पृशन्दिवंसहस्रबाहुर्घनरुक्त्रि
सूर्यदृक्॥ करालदंष्ट्रोज्वलदग्निमूर्धजःकपालमालीविविधोद्यतायुधः ३

चूर्णिका तदा खे भुवि च हाहाकारः अभूत् सर्वे ऊचुश्च केनसतीप्रकोपिता २८ अयंब्रह्मध्रुक्महदपकीर्तिंप्राप्स्यति २९ ३०तद्दृष्ट्वा शिवानुचराः दक्षंहंतुंउदतिष्ठन् ३१ भृगुः तेषां ॥१६॥
वेगंदृष्ट्वायज्ञघ्नघ्नेनमंत्रेणदक्षिणाग्नौजुहाव ३२ तदाऋभवोनामदेवाः सहस्रशः उत्पन्नाः ३३ तैःअलातायुधैः हन्यमानाः शिवानुचराः दिशः भेजुः ३४ ॥ ॥ इतिचतुर्थस्कंधे
चतुर्थोध्यायः ४ ॥ ॥ मैत्रेय उवाच ॥ ॥ भवः दक्षेण असत्कृतायाः भवान्याः निधनं नारदात् श्रुत्वास्वसैन्यंपलायितंचश्रुत्वाक्रुद्धः धूर्जटिः जटांउत्कृत्य भुविविससर्ज
१ २ ततः जटायाः सकाशात् वीरभद्रः तन्वा दिवंस्पृशन् सहस्रबाहुः त्रिसूर्यदृक् अनेकायुधधरः उत्पन्नः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेरुद्र हेभट युद्धकुशल मद्भटानां त्वमग्रणीः सन् सयज्ञं दक्षं जहि।ब्रह्मतेजो दुर्जयमिति मामंस्थाःयतस्त्वं मे अंशकः४मन्युना रुद्रेण स वीरभद्रः परिचक्रमे प्रदक्षिणीचकार। असंगंअप्रतिघातं यत्रंहोवेगः तेन भोतात (विदुर) महीयसांवलीयसामपिसहः सहिष्णुं बलं सोढुंक्षमंमेने ५ जगदंतको मृत्युस्तस्याप्यंतकंशूलं। घोषयंति शब्दं कुर्वंतीति घोषणानि नुपूरादीनि भूषणानिययोः तावंघ्रीयस्यस (वीरभद्रः हस्फुटं नदद्भिः रुद्रस्य पार्षदैः प्रमथादिभिरनुगम्यमानःसुभैरवंअतिभयानकं यथास्यात्तथा व्यनदत्) ६ ककुभिदिशि (रेणुंरुद्रसैन्योत्थितांधूलिंप्रकर्षेणसमीक्ष्यऋत्विगादयःद्विजाद्विजपत्न्यश्च) तमो नभवति किंतु रज इतिज्ञात्वाऽऽहुः।रजएतत्कुतोभूदितिदध्युः चिंतयामासुः ७ हेत्वंतरासंभवेनऔत्पातिकंकल्पयंति वाताइति दस्यूनामभावेहेतुः प्राचीनबर्हिस्तदानींतनोराजाजीवतीति।नकाल्यं ते नशीघ्रंनीयंते ८ प्रसूतिर्दक्षपत्नीसामिश्रामुख्यायासाम् विपाकः फलंपश्यंतीनामितितस्यादुःखाधिक्येहेतुः अवदध्यौअवज्ञातवान् अनागायनागसं (निरपराधां) ९ नचेदंसुतावज्ञामात्रंकिंतुरुद्रावज्ञा नम् (अपिच) अतोनास्यभद्रंभविष्यतीत्याहुः यस्त्वितिद्वाभ्याम् व्युप्तो विकिर्णोजटाकलापोयस्य।स्वशूलस्याग्रेअर्पिताप्रोतादिग्गजेंद्रायस्य उदितान्युन्नमितानिअस्त्राणियैस्तेदोषाबाहवएवध्वजास्तान् वितत्यविस्तार्यहर्षेणनृत्यति। उच्चः अट्टहासः कठोरोहासः सएवस्तनयित्नुर्घनगर्जितंतेनभिन्नाविदीर्णादिशोयेनसः १० अमर्षयित्वा असहनयुक्तंकृत्वा मन्युप्लुतंक्रोधव्याप्तंउदस्तः विक्षिप्तः भगणोनक्षत्रसंघो यने पुनश्च तंकोपयतोविधातुरपि किंस्वस्तिस्यात्नस्यादेव। कान्यस्यकथा ११ उद्विग्नाप्रचलिताहक्यस्यतेनजनेनबहुयथाभवत्येवमुच्यमानेसतिउत्पाततमाः महोत्पाता उत्थिताः पर्यक् सर्वतश्च कथं भूताः। महात्मनो(महाधैर्ययुक्तस्या–)–पिदक्षस्यभयावहाः १२

॥१७॥

तंकिंकरोमीतिगृणंतमाहबद्धांजलिंभगवान्भूतनाथः ॥ दक्षंसयज्ञंजहिमद्भटानांत्वमग्रणीरुद्रभटांशकोमे ४ आज्ञप्तएवंकुपितेनमन्युनासदेवदेवंपरिचक्रमेवि भुम् ॥ मेनेतदात्मानमसंगरंहसामहीयसांतातसहःसहिष्णुम् ५ अन्वीयमानःसतुरुद्रपार्षदैर्भृशंनदद्भिर्व्यनदत्सुभैरवम् ॥ उद्यम्यशूलंजगदंतकांतकंसप्रा द्रवद्घोषणभूषणांघ्रिः ६ अथर्त्विजोयजमानःसदस्याःककुभ्युदीच्यांप्रसमीक्ष्यरेणुम् ॥ तमःकिमेतत्कुतएतद्रजोऽभूदितिद्विजाद्विजपत्न्यश्चदध्युः ७ वाता नवांतिनहिसंतिदस्यवःप्राचीनबर्हिर्जीवतिहोग्रदंडः ॥ गावोनकाल्यंतइदंकुतोरजोलोकोऽधुनाकिंप्रलयायकल्पते ८ प्रसूतिमिश्राःस्त्रियउद्विग्नचित्ताऊचुर्वि पाकोवृजिनस्यैषतस्य ॥ यत्पश्यंतीनांदुहितॄणांप्रजेशःसुतांसतीमवदध्यावनागाम् ९ यस्त्वंतकालेव्युप्तजटाकलापःस्वशूलसूच्यर्पितदिग्गजेंद्रः ॥ वित त्यनृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तनयित्नुभिन्नदिक् १० अमर्षयित्वातमसह्यतेजसंमन्युप्लुतंदुर्विषहंभ्रुकुट्या ॥ करालदंष्ट्राभिरुदस्तभागणंस्यात्स्वस्ति किंकोपयतोविधातुः ११ बह्वेवमुद्विग्नदृशोच्यमानेजनेनदक्षस्यमुहुर्महात्मनः ॥ उत्पेतुरुत्पाततमाःसहस्रशोभयावहादिविभूमौचपर्यक् १२

श्लोकाः $\frac{४}{१२}$

चूर्णिका

किंकरोमीति गृणंतंतं शिवः आह हेवीरभद्रत्वंमेअंशोसि अतः सयज्ञंदक्षंजहि ४ तदा वीरभद्रः पार्षदैः सह शूलं उद्यम्ययज्ञंअगमत् ५ ६ तदाऋत्विगाद्याः उत्तरस्यांदिशि रेणुंवीक्ष्यकिमेतदितिचिंतयामासुः ७ अधुनालोकः किंप्रलयायकल्पते ८ तदादक्षपत्न्याद्याः स्त्रियः सत्याः अपमानस्येदंफलमिति ऊचुः ९ यः विश्वलयंकरोति तस्यकोपात्स्वास्तिस्यात्किम् १० ११ तदासहस्रशः उत्पाताः उत्पेतुः १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नानाआयुधानियेषाम्। वायनकैः ह्रस्वैः उद्यतायुधैः पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवोदरमाननंचयेषांतैः परितोधावद्भिः (हेविदुरसमहान्मखो)ऽवरुद्धः १३ यज्ञशालायाः पूर्वपश्चिमस्तंभयोरर्पितंपूर्वपश्चिमायतंकाष्ठंप्राग्वंशः तं यज्ञशालायाः पश्चिमतः पत्नीशाला। तां। यज्ञशालायाः पुरतः स्थितंसदोमंडपं सदसःपुरतोहविर्धानं तस्योत्तरतआग्नीध्रशालां तद्विहारंयजमानगृहं महानसंपाकभोजनशालां (चबभंजुः) १४ रुरुजुः बभंजुः उत्तरवेद्यांमेखलाः सीमासूत्राणि आज्ञागुरूणांह्यविचारणीयाइतिहेतोर्नतेदोषभाजिनइतिभावः १५ प्रत्यासन्नान् (निकटवर्तिनः) पलायितांश्च १६।१७ ग्रावभिः (पाषाणैः)—रर्द्यमानानैकधादुद्रुवुः १८ स्रुवोहस्तेयस्य। भवोवीरभद्रः लुलुंचेउत्पाटितवान् १९ (भुविपातितस्यारुषा) उज्जहारउद्धृतवान्। यः सदःस्थः सभायांस्थितःसन् शपंतं शिवनिंदांकुर्वंतं दक्षं अक्षिसंकोचेन असूसुचत्प्रेरितवान् २० कलिंगदेशराजस्यानिरुद्धोद्वाहेबलभद्रो यथा द्यूते दंतान् पातितवान्। गरिमणि गुरुतरे रुद्रेनिंद्यमानेदतःदंतान् दर्शयन् योजहास। पूष्णोरितिपाठे द्विवचनमैंद्रापौष्णश्चरुर्भवतीत्यत्र तत्सहितस्यापिपूष्णोदंतपातप्राप्त्यर्थं सूचितवान् तथाहि। पूषाप्रपिष्टभागोऽदंतकोहि। तदेवा अब्रुवन्निति। विहितस्य पेषणस्य द्विदैवत्याभावात्तत्रतस्यदंताः संती विवक्तव्यंस्यात्। नचैतत्संगच्छते इत्याशंक्यतत्रापितस्य दंतपातो अवस्थाभेदेप्रवृत्तेन द्विवचनेन ज्ञाप्यते। अतएवपूष्णोऽनुग्रहंह्रद्वेधावक्ष्यति। 'पूषातु यजमानस्य दद्भिर्जक्षितुपिष्टभुगि'ति। केवलश्चेत्प्रपिष्टभुग्भविष्यति अन्यसहितश्चेद्यजमानस्य दद्भिर्भक्षयिष्यतीत्यर्थः। २१ छिंदन्नपीत्यत्रशिरइत्युपरिव्यक्तीभविष्यति। त्र्यंबकोवीरभद्रः २२ अस्त्रान्वितैर्मंत्रसहितैः शस्त्रैर्ननिर्भिन्नात्वग्यस्यतथा। भूतंदृष्ट्वा पशुपतिर्हरोवीरभद्रः चिरंचिंतितवान् २३ पशूनांपतिःसः मखेसंज्ञपनयोगंकंठनिष्पीडनादिरूपं मारणोपायंदृष्ट्वा तेनोप्रायेनाहरत्। २४

॥१८॥

श्लोकाः

तावत्सरुद्रानुचरैर्मखोमहान्नानायुधैर्वामनकैरुदायुधैः ॥ पिंगैःपिशंगैर्मकरोदराननैःपर्याद्रवद्भिर्विदुरान्वरुध्यत १३ केचिद्बभंजुःप्राग्वंशंपत्नीशालांतथापरे ॥ सदआग्नीध्रशालांचतद्विहारंमहानसम् १४ रुरुजुर्यज्ञपात्राणितथैकेग्नीननाशयन्॥कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः १५ अबाधंतमुनीनन्यएकेपत्नीरतर्जयन् ॥ अपरेजगृहुर्देवान्प्रत्यासन्नान्पलायितान् १६ भृगुंबबंधमणिमान्वीरभद्रःप्रजापतिम् ॥ चंडीशःपूषणंदेवंभगंनंदीश्वरोऽग्रहीत् १७ सर्वएवर्त्विजोदृष्ट्वासदस्याःसदिवौकसः ॥ तैरर्द्यमानाःसुभृशंग्रावभिर्नैकधाऽद्रवन् १८ जुह्वतःस्रुवहस्तस्यश्मश्रूणिभगवान्भवः ॥ भृगोर्लुलुंचेसदसियोऽहसत्श्मश्रुदर्शयन् १९ भगस्यनेत्रेभगवान्पातितस्यरुषाभुवि ॥ उज्जहारसदःस्थोऽक्ष्णायःशपंतमसूसुचत् २० पूष्णश्चापातयद्दंतान्कालिंगस्ययथाबलः ॥ शप्यमानेगरिमणियोऽहसद्दर्शयन्दतः २१ आक्रम्योरसिदक्षस्यशितधारेणहेतिना ॥ छिंदन्नपितदुद्धर्तुंनाशक्नोत्त्र्यंबकस्तदा २२ शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचंहरः ॥ विस्मयंपरमापन्नोदध्यौपशुपतिश्चिरम् २३ दृष्ट्वासंज्ञपनंयोगंपशूनांसपतिर्मखे ॥ यजमानपशोःकस्यकायात्तेनाहरच्छिरः २४

१३/२४

चूर्णिका

तावत् अनेकरूपैः यज्ञः अन्वरुध्यत १३ केचित्प्राग्वंशंबभंजुः अपरेपत्नीशालां अन्ये आग्नीध्रशालां तथा यजमानगृहम् १४ यज्ञपात्राणिकेचित् अग्नीन् अनाशयन् कुंडेषु अमूत्रयन् १५ अन्ये मुनीन् अबाधंत एकेपत्नीः अतर्जयन् अपरेपलायितान् देवान् जगृहुः १६ मणिमान्भृगुं बबंध वीरभद्रः दक्षम् चंडीशः पूषणम् नंदी भगम् १७ सर्वेऋत्विक्सदस्यदेवाः पाषाणैः अर्द्यमानाः दुद्रुवुः १८ वीरभद्रः जुह्वतः भृगोः श्मश्रूणि उत्पाटितवान् १९ भगंभुविपातयित्वातस्यनेत्रेउद्धृतवान् २० पूष्णः दंतान् अपातयत् २१ दक्षशिरः हेतिना छिंदन् अपिउद्धर्तुंनाशकत् २२ तदाचिरंध्यात्वापशुवत् २३ कंठपीडनादिनादक्षशिरः आहरत् २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१९॥

अन्येषांब्राह्मणादीनांतद्विपर्ययः असाधुवादः अभूदितिशेषः २५ (अमर्षितः क्रोधयुक्तः देवयजनं यज्ञमंडपं दग्ध्वा) गुह्यकालयं कैलासं प्रतस्थे २६ इति चतुर्थस्कंधेटीकायांपंचमोध्यायः ॥ ५ ॥ षष्ठेतुदेवसंघेन सहगत्वाभवंविधिः। सांत्वयामासदक्षादिजीवितार्थ्यमादरात् १ अथ देवगणाः सर्वेस्वयंभुवेन्यवेदयन्निति द्वितीयेनान्वयः १ संछिन्नानि त्रुटितानिभिन्नानि विदीर्णानि अंगानियेषाम् सहऋत्विग्भिःसभ्यैश्चवर्तमानाः (किंकृत्वान्यवेदयन् नमस्कृत्य) २ (उपलभ्यज्ञात्वा) कस्य दक्षस्य नेयतुःनजग्मतुः ३ (विभुर्ब्रह्माप्राह)। तेजीयसि अतितेजस्विनिपुरुषे कृतागसि कृतापराधे सत्यपितत्र कृतागसांबुभूषतां भवितुमिच्छताम् प्रत्यपराधंचिकीर्षतामित्यर्थः। सातत्रतथाविधाबुभूषातेषांक्षेमायनभूयात्। प्रायेणेतिलोकोक्तिः नभवेदेवेत्यर्थः ४ यूयंतु अकृतागस्यापितस्मिन् कृतकिल्बिषाः अतः कथंक्षेमंस्यात् अथापितंप्रसादयध्वंक्षमापयत। येभवंतोबर्हिषो यज्ञस्यभागभाजंपरादुः दूरादेवखंडितवंतः प्रगृहीतांघ्रिपद्मं पादौप्रगृह्येत्यर्थः। (नन्वेवमपिदुःसहमपराधंकथंक्षमेतसइति शंकानकार्येत्याह क्षिप्रप्रसादमिति। महत्यपराधेपिपादग्रहणमात्रेण प्रसन्नोभवतीत्यर्थः) ५ अध्वरस्यजीवितं पुनःसंधानं प्रार्थयमानाः संतः यस्मिन् कुपितेसातिसपालो लोको नभवति नश्येदित्यर्थः ६ वयंतुतत्रगंतुंबिभीमस्त्वमेव कंचिदुपायं विधत्स्वेतिचेदत आह नेति। यज्ञस्तदानींतनइंद्रः। यस्यतत्त्वं स्वरूपं बलवीर्ययोः प्रमाणं इयत्तांचनविदुः। तत्रवीर्यं पराक्रमः। तस्यस्वतंत्रस्य कउपायं कर्तुमिच्छेत्। पापमितिपाठेअपराधं (कोविधित्सेदेकंदक्षं विनेतिभावः) ७ ८

श्लोकाः २५/८

साधुवादस्तदातेषांकर्मतत्तस्यशंसताम् ॥ भूतप्रेतपिशाचानामन्येषांतद्विपर्ययः २५ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः ॥ तद्देवयजनंदग्ध्वाप्रातिष्ठद्गुह्यकालयम् २६ इतिश्रीभा०म०च०दक्षयज्ञविध्वंसोनामपंचमोऽध्यायः ५ ॥ मैत्रेयउवाच ॥ अथदेवगणाःसर्वेरुद्रानीकैःपराजिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः १ संच्छिन्नभिन्नसर्वांगाःसर्त्विक्सभ्याभयाकुलाः ॥ स्वयंभुवेनमस्कृत्यकार्त्स्न्येनैतन्न्यवेदयन् २ उपलभ्यपुरैवैतद्भगवानब्जसंभवः ॥ नारायणश्चविश्वात्मानकस्याध्वरमीयतुः ३ तदाकर्ण्यविभुःप्राहतेजीयसिकृतागसि ॥ क्षेमायतत्रसाभूयान्नप्रायेणबुभूषताम् ४ अथापियूयंकृतकिल्बिषाभवंयेबर्हिषोभागभाजंपरादुः ॥ प्रसादयध्वंपरिशुद्धचेतसाक्षिप्रप्रसादंप्रगृहीतांघ्रिपद्मम् ५ आशासानाजीवितमध्वरस्यलोकःसपालःकुपितेनयस्मिन् ॥ तमाशुदेवंप्रिययाविहीनंक्षमापयध्वंहृदिविद्धंदुरुक्तैः ६ नाहंनयज्ञोनचयूयमन्येयेदेहभाजोमुनयश्चतत्त्वम् ॥ विदुःप्रमाणंबलवीर्ययोर्वायस्यात्मतंत्रस्यकउपायंविधित्सेत् ७ सइत्थमादिश्यसुरानजस्तैःसमन्वितःपितृभिःसप्रजेशैः ॥ ययौस्वधिष्ण्यान्निलयंपुरद्विषःकैलासमद्रिप्रवरंप्रियंप्रभोः ८

चूर्णिका

तदा शिवगणानां साधुवादःअभूत् ब्राह्मणादयः शोकंचक्रुः २५ वीरभद्रः दक्षिणाग्नौतच्छिरः हुत्वा देवयजनंदग्ध्वाकैलासंययौ २६ ॥ ॥ इतिचतुर्थेपंचमः ५ ॥ ॥ मैत्रेय उवाच ॥ ॥ अथसर्वेदेवगणाः रुद्रसैन्यैः पराजिताः छिन्नभिन्नसर्वांगाः भयाकुलाः ब्रह्मणे नमस्कृत्य इदंन्यवेदयन् १ २ पूर्वेइदंभाविज्ञात्वा ब्रह्मनारायणौदक्षयज्ञंनजग्मतुः ३ ब्रह्मातच्छ्रुत्वाप्राह तेजीयसिअपराधः क्षेमायनस्यात् ४ यूयंसापराधाः यतः तद्भागंलुप्तवंतः अतः तत्पादौप्रगृह्यप्रसादयध्वम् ५ अहंइंद्राद्याश्चतद्वीर्यबलप्रमाणं नविद्मः ६ ७ इत्युक्त्वादेवर्षिपितृप्रजेशैः सहब्रह्माकैलासंययौ ८ ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰च॰ कैलासं वर्णयति । जन्मौषधीत्यादिचतुर्दशभिः (जन्मादिभिः सिद्धैः) नरेतरैर्देवैर्जुष्टं सेवितम् । ९ शृंगैः (शिखरैः) रमणैः (प्रियैः सहक्रीडंतीनां सिद्धयोषितांरमणं) रतिप्रदमित्युत्तरेणान्वयः अ०
कथंभूतैः । नानाधातुभिर्विचित्रितैः । नानाविधाद्रुमलतागुल्मायेषु १० नानाअमलानिप्रस्रवणानि (स्नुतजलानि) येषु नानाकंदरा (दर्यः) सानवश्च (प्रस्था) येषुतैः ११ मयूराणांकेकाभिः स्वनैः
टीका. (अभिरुतं) नादितंमदांधैरलिभिर्मृगैर्विशेषेणमूर्छितं मूर्छारागगतिविशेषः तद्व्याप्तम् । रक्तकंठानांकोकिलानांप्लावितैः प्लुतत्वंनीतैः स्वरैः अन्येषांचपतत्रिणां पक्षिणांकूजितैः १२उद्धस्तैः उन्नतशाखैर्द्रुमैः ॥६॥
द्विजान्पक्षिणः आह्वयंतमिवआकारयंतमिव । लोकेहिहस्तमुत्क्षिप्यउच्चैःस्वरेणआह्वानमर्थिनांद्विजानांकुर्वंतिअद्रिश्चोत्क्षिप्तहस्ताकारैर्द्रुमैस्तत्रत्यपक्षिस्वनैश्चतथालक्ष्यतइत्यर्थः १३ व्रजद्भिर्मातंगैर्गर्जद्भिर्व्रजंत
मिव । निर्झरध्वनिभिर्गृणंतंभाषमाणामिव(मंदारादिभिर्वृक्षविशेषैः उपशोभितंमंडितम्) १४ चूताम्रयोः (अवांतरजातिभेदः) कदंबनीपयोरपि वेणुकीचकयोस्तुनीरंध्रसरंध्रत्वेनभेदोज्ञेयः१५स्वर्णार्णैःशतप
॥२०॥ त्रैः पुष्पप्रधानगुल्मभेदैः । वरवेणुकजातिभिरित्यत्रवराः श्रेष्ठाः वेणुकाएलाः जातिर्मालती । १६ (ओषधिभिर्व्रीह्यादिभिः) १७द्रुमजातिभिरित्यत्रजातिरवांतरभेदसामान्यम् १८ कुमुदादिवनस्यसमृद्धि
भिर्हेतुभिः नलिनीपुसरस्सुकलंमधुरंयथाभवत्येवंकूजंतियानिपक्षिवृंदानितैरुपशोभितम् १९ मृगादिभिर्निर्जुष्टंनिषेवितं । तत्रशाखामृगैर्वानरैः । क्रोडैः सूकरैः । ऋक्षैरच्छभल्लैः । नाभिभिः कस्तुरिमृगैः । पूर्वंमृग
गणाः शृंगविशेषणत्वेनोक्ताः इदानींतुस्वातंत्र्येणेत्यपौनरुक्त्यं २० कदलीनां खंडैः संघातैः संरुद्धानिआवृतानिनलिनीनांनदीनांपुलिनानितैः श्रीः शोभायस्मिंस्तम् २१ नंदयागंगयापर्यस्तंप
रिवेष्टितं(कथंभूतया) सत्याः भवान्याः स्नानेनपुण्यतरंअतिसुगंधं उदकंयस्याम् तया २२

जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः ॥ जुष्टंकिन्नरगंधर्वैरप्सरोभिर्वृतंसदा ९ नानामणिमयैःशृंगैर्नानाधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्नानामृगगणा श्लोकाः
वृतैः १० नानाऽमलप्रस्रवणैर्नानाकंदरसानुभिः ॥ रमणंविहरंतीनांरमणैःसिद्धयोषिताम् ११ मयूरकेकाभिरुतंमदांधालिविमूर्च्छितम् ॥ प्लावितैरक्तकं
ठानांकूजितैश्चपतत्रिणाम् १२ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः ॥ व्रजंतमिवमातंगैर्गृणंतमिवनिर्झरैः १३ मंदारैःपारिजातैश्चसरलैश्चोपशोभितम् ॥ ९
तमालैःशालतालैश्चकोविदारासनार्जुनैः १४ चूतैःकदंबैर्नीपैश्चनागपुन्नागचंपकैः ॥ पाटलाशोकबकुलैःकुंदैःकुरबकैरपि १५ स्वर्णार्णशतपत्रैश्चवरवेणुकजाति २२
भिः ॥ कुब्जकैर्मल्लिकाभिश्चमाधवीभिश्चमंडितम् १६ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः ॥ भूर्जैरोषधिभिःपूगैराजपूगैश्चजंबुभिः १७ खर्जूराम्रातकाम्राद्यैः
प्रियालमधुकेंगुदैः ॥ द्रुमजातिभिरन्यैश्चराजितंवेणुकीचकैः १८ कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः ॥ नलिनीषुकलंकूजत्खगवृंदोपशोभितम् १९ मृगैः
शाखामृगैःक्रोडैर्मृगेंद्रैर्ऋक्षशल्यकैः ॥ गवयैःशरभैर्व्याघ्रैरुरुभिर्माहिषादिभिः २० कर्णांत्रैकपदाश्वास्यैर्निर्जुष्टंमाहिषादिभिः ॥ कदलीखंडसंरुद्धनलिनीपुलि
नश्रियम् २१ पर्यस्तंनंदयासत्याःस्नानपुण्यतरोदया ॥ विलोक्यभूतेशगिरिंविबुधाविस्मयंययुः २२

चूर्णिका
कीदृशंकैलासं योगसिद्धैः जुष्टम् गंधर्वादिभिः वृतम्९ अनेकमणिमयशृंगैः युतम् अनेकद्रुमलताभिः व्याप्तम् नानामृगपक्षिभिः वृतं १० ११ १२ १३ १४ १५ ॥२०॥
१६ १७ १८ १९ २० ॥ अनेकदिव्यकौतुकैः युक्त कैलासं वीक्ष्य देवाद्याः विस्मयंप्रापुः २१ तत्रअलकापुरी सौगंधिकंवनंच २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रगिरौवनंचददृशुः (वनस्यसौगंधिकामितिसंज्ञायांहेतुमाह) यत्रवनेतन्नामसौगंधिकंपंकजंभवतिजातावेकवचनं ('सौगंधिकतुकह्लार'मित्यमरः २३ पुरींवर्णयति नंदाचेतिचतुर्भिः सरितोबाह्यतः पुरं पुराद्वाह्यतोभवतः तीर्थपादस्य हरेः पदांभोजरजसा (अतीवपावनेलोकंपावयतस्तथाभूते) २३ हेक्षत्तः (ययो)–र्नद्योः सुरतश्रमकर्शिताः (विगाह्य)प्रविश्य (पुंसोभर्तॄन्‌सिंचंत्यः नलिकादिभिः स्नपयंत्यः क्रीडंति) २५ ययोरंभोविगततृषोपिगजाः पिबंति तत्रहेतुः तासांसुरस्त्रीणांस्नानेनभ्रष्टंगलितंयन्नवंकुंकुमं नवीनकेसरंतेनपिंजरंपीतवर्णं गजीःकरिणीः (प्राशनंकारयंतः) २६ तारंरूप्यंतारादिमयविमाना नांशतैः संकुलां तडिद्भिः स्त्रीणां घनैर्विमानानां खेनपुर्याः सादृश्यम् २७ यक्षेश्वरपुरीं (कुबेरनगरींअलकां) हित्वाअतिक्रम्यतद्वनंचदृष्ट्वातेदेवाआराद्दूरात्वटंददृशुरितिचतुर्थेनान्वयः कथंभूतंतद्वनम् चित्रा णिमाल्यानिछदाश्चपर्णानियेषुतैर्द्रुमैः हृद्यंसुखकरम् २८ रक्तकंठखगानांकोकिलानांअनीकस्यस्वरैर्मंडिताः षट्पदाः षट्पदस्वरायस्मिन् कलहंसानांकुलस्यप्रेष्ठंअतिशयेनप्रियं खरदंडानिपद्मानितैर्युक्ताज लाशयायस्मिन् २९ वनकुंजरैः संघृष्टायेहरिचंदनद्रुमास्तत्संबंधिनावायुनापुण्यजनस्त्रीणां (यक्षांगनानां) मनः अधि अधिकंउन्मथयत् (क्षोभयत्) ३० यत्रचउत्पलमालिन्यो वाप्यःतत्किंपुरुषैः प्राप्तंवनंदृष्ट्वापाठांतरेकिंपुरुषैः प्राप्तावापीश्चदृष्ट्वेत्यर्थः ३१ योजनशतमुत्सेधउच्छ्रयोयस्य पादोनैः सर्वतःपंचसप्ततियोजनप्रमाणैः विटपैः शाखाभिरायतो विस्तृतः पर्यक्सर्वतः कृताअचलाछायायेन निर्ग तनीडंयस्मात्३२ मुमुक्षूणांशरणेआश्रयेत्यक्तामर्षोअंतकस्तत्तुल्यम् ३३ तंविशिमष्टि सनंदनाद्यैरितिपंचाभिः(महासिद्धैर्यक्षरक्षसांपत्या) सख्याकुबेरणचोपास्यमानम् ३४ विद्याउपासना । तपाश्चैत्तैकाग्र्यं योगः समाधिः तेषांपंथानंप्रवर्तनद्वारंआस्थितंलोकस्यमंगलंहितंतपः वात्सल्यातस्नेहात्आचरंतं (यतःविश्वस्यसुहृत्पितातम्) ३५ संध्याभ्ररुचारक्तवर्णेनांगेनभस्मादिलिंगंचंद्रलेखांचबिभ्रतं ३६

श्लोकाः २३/३६

ददृशुस्तत्रतेरम्यामलकांनामवैपुरीम् ॥ वनंसौगंधिकंचापियत्रतन्नामपंकजम् २३ नंदाचालकनंदाचसरितौबाह्यतःपुरम् ॥ तीर्थपादपदां भोजरजसाऽतीवपावने २४ ययोःसुरस्त्रियःक्षत्तरवरुह्यस्वधिष्ण्यतः ॥ क्रीडंतिपुंसःसिंचंत्योविगाह्यरतिकर्शिताः २५ ययोस्तत्स्नानविभ्रष्टनवकुंकुम पिंजरम् ॥ वितृषोऽपिपिबंत्यंभःपाययंतोगजागजीः २६ तारहेममहारत्नविमानशतसंकुलाम् ॥ जुष्टांपुण्यजनस्त्रीभिर्यथाखंसतडिद्घनम् २७ हित्वा यक्षेश्वरपुरींवनंसौगंधिकंचतत् ॥ द्रुमैःकामदुघैर्हृद्यंचित्रमाल्यफलच्छदैः २८ रक्तकंठखगानीकस्वरमंडितषट्पदम् ॥ कलहंसकुलप्रेष्ठंखरदंडजला शयम् २९ वनकुंजरसंघृष्टहरिचंदनवायुना ॥ अधिपुण्यजनस्त्रीणांमुहुरुन्मथयन्मनः ३० वैदूर्यकृतसोपानावाप्यउत्पलमालिनीः॥ प्राप्तंकिंपुरुषैर्दृष्ट्वातआ राद्ददृशुर्वटम् ३१ सयोजनशतोत्सेधःपादोनविटपायतः ॥ पर्यक्कृताचलच्छायोनिर्नीडस्तापवर्जितः ३२ तस्मिन्महायोगमयेमुमुक्षुशरणेसुराः ॥ ददृशुः शिवमासीनंत्यक्तामर्षमिवांतकम् ३३ सनंदनाद्यैर्महासिद्धैःशांतैःसंशांतविग्रहम् ॥ उपास्यमानंसख्याचभर्त्रागुह्यकरक्षसाम् ३४ विद्यातपोयोगपथमा स्थितंतमधीश्वरम् ॥ चरंतंविश्वसुहृदंवात्सल्याल्लोकमंगलम् ३५ लिंगंचतापसाभीष्टंभस्मदंडजटाजिनम् ॥ अंगेनसंध्याभ्ररुचाचंद्रलेखांचबिभ्रतम् ३६

चूर्णिका ॥२१॥

पुरः बाह्यतः नंदालकनंदेतिद्वेसरितौददृशुः२३तांकुबेरपुरींहित्वा ततः आरात् वटंददृशुः २४ २५ २६ २७ २८ २९ ३० सःयोजनशतंउच्छ्रायःपंचसप्ततियोजनाऽतिशा खाभिःआयतः ३१तत्रआसीनंशिवंदेवाद्याददृशुः ३२ सनंदनाद्यैः महासिद्धैः कुबेरेणचउपास्यमानम् ३३ तापसचिह्नयुक्तं भस्मदंडजटाजिनधरंचंद्रलेखायुतं ३४ ३५ वृस्यांस्थितम् सतांशृण्वतांनारदाय ब्रह्मप्रवोचंतम् ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

व्रतीनामासनंवृसीतस्यां (उपविष्टंसतांसनंदनादीनांशृण्वतांसताम्) ब्रह्मप्रवोचंतम् ३७ सव्यपादपद्मंदक्षिणे ऊरौकृत्वा विन्यस्य जानुनिचसव्ये बाहुं कृत्वा दक्षिणबाहुप्रकोष्ठेमाणिबंधस्थानेअक्षमालांकृत्वा दक्षिणहस्तकृतया तर्कमुद्रयाउपलक्षितं आसीनमित्यर्थः तदुक्तंयोगशास्त्रे 'एकपादमथैकस्मिन् विन्यसेदूरुसंस्थितम् । इतरस्मिंस्तथाबाहुं वीरासनमिदंस्मृत'मिति । तर्कमुद्राचोक्ता । 'तर्जन्यंगुष्ठयोरग्रेमिथः संयोज्यचांगुलीः । प्रसार्य बंधनं प्राहुस्तर्कमुद्रेतिमांत्रिका'इति ३८ ब्रह्मनिर्वाणंब्रह्मानंदः तत्रसमाधिरैकाग्र्यंतं ईप्सितं योगकक्षांयोगपट्टंच वामजानुदृढीकरणार्थंविशेषेणोपाश्रितवंतं। मननशीलामनवः तेषामाद्यं मुख्यम् ३९ अर्हत्तमः पूज्यतमोपिविष्णुर्वामनमूर्तिर्यथाकस्यकश्यपस्य ४० महर्षिभिः सहिता येसमंतान्नीललोहितमनुवर्तंते तेपितस्मैवंदनंचक्रुः । एवं सर्वैर्नमस्कृतः प्राह कृतः प्रणामोदेवैर्यस्मैतम् ४१ यद्यपि त्वंनीचवन्मांनमस्करोषितथापितवैश्वर्यमहंवेद्मीत्याह । जानेइति । त्वां विश्वस्येशंजाने । तत्रहेतुः । जगतोयोनिर्याशक्तिः प्रकृतिः बीजंचाशिवः पुरुषः तयोः परंकारणं तथापिनिर्भेदं यद्ब्रह्मनिर्विकारंतदेवत्वमितिजाने ४२ ननुविरुद्धमेतत् । तत्राह । त्वमेवसरूपयोः अविशेषयोः शिवशक्त्योः क्रीडन्विश्वसृष्ट्यादिकरोषि । ऊर्णपटोयथाउर्णनाभिरिव । स्वरूपयोरितिपाठेस्वांशयोः अतोनविरोधः ४३ धर्ममर्थंचदोग्धियात्रयीतस्याअभिपत्तये संरक्षणायाध्वरं सृष्टवानसि । यद्वा हेधर्मार्थदुघ धर्माद्यभिपत्तये तत्प्राप्तयेदक्षेणसूत्रेण निमित्तेन । सेतवोवर्णाश्रममर्यादाश्चअवसिताः निबद्धाः । निर्णीताइतिवा । श्रद्दधते (श्रद्धयाअनुतिष्ठंति) ४४ सर्वकर्मफलदातापित्वमेवेत्याह । हेमंगलत्वंमंगलानांशुभानां कर्मणांकर्तुःस्वर्गः परं मोक्षं वातनुषे । अमंगलानांअशुभानां निषिद्धानांकर्मणांकर्तुंश्चतामिस्रं नरकंतनुषे । तत्रकेनहेतुनातदेवतस्मिन्नेवकस्यचिद्विपर्ययोभवति ४५ त्वत्कोपोत्रहेतुरित्यसंभावितमितिकैमुत्यन्यायेनाह । नवैसतांसतः रोषोऽभिभवेत् । तवत्वां द्वितीयार्थेषष्ठ्यौ । पशुंअज्ञंयथाऽभिभवति तद्वत्त (तत्रत्वयिक्रोधोनसंभवतीविकिमुवक्तव्यम्) ४६

श्लोकाः ३७/४६

उपविष्टंदर्भमय्यांबृस्यांब्रह्मसनातनम् ॥ नारदायप्रवोचंतंपृच्छतेशृण्वतांसताम् ३७ कृत्वोरौदक्षिणेसव्यंपादपद्मंचजानुनि ॥ बाहुंप्रकोष्ठेऽक्षमालामासीनंतर्कमुद्रया ३८ तंब्रह्मनिर्वाणसमाधिमाश्रितंव्युपाश्रितंगिरिशंयोगकक्षाम् ॥ सलोकपालामुनयोमनूनामाद्यंमनुंप्रांजलयःप्रणेमुः ३९ सतूपलभ्यागतमात्मयोनिंसुरासुरेशैरभिवंदितांघ्रिः ॥ उत्थायचक्रेशिरसाऽभिवंदनमर्हत्तमःकस्ययथैवविष्णुः ४० तथाऽपरेसिद्धगणामहर्षिभिर्येवैसमंतादनुनीललोहितम् ॥नमस्कृतःप्राहशशांकशेखरंकृतप्रणामंप्रहसन्निवात्मभूः४१ ॥ ब्रह्मोवाच ॥ जानेत्वामीशंविश्वस्यजगतोयोनिबीजयोः ॥ शक्तेःशिवस्यचपरंयत्तद्ब्रह्मनिरंतरम् ४२ त्वमेवभगवन्नेतच्छिवशक्त्योःसरूपयोः ॥ विश्वंसृजसिपास्यत्सिक्रीडन्नूर्णपटोयथा ४३ त्वमेवधर्मार्थदुघाभिपत्तयेदक्षेणसूत्रेणससर्जिथाध्वरम्॥ त्वयैवलोकेऽवसिताश्चसेतवोयान्ब्राह्मणाःश्रद्दधतेधृतव्रताः४४त्वंकर्मणांमंगलमंगलानांकर्त्तुःस्मलोकेतनुषेस्वःपरंवा॥ अमंगलानांचतमिस्रमुल्बणंविपर्ययःकेनतदेवकस्यचित्४५नवैसतांत्वच्चरणार्पितात्मनांभूतेषुसर्वेष्वभिपश्यतांतव ॥ भूतानिचात्मन्यपृथग्दिदृक्षतांप्रायेणरोषोऽभिभवेद्यथापशुम् ४६

चूर्णिका

तर्कमुद्रयाआसीनम् ३७एतादृशंशिवंदृष्ट्वा लोकपालाः मुनयश्चप्रांजलयः प्रणेमुः ३८ शिवः ब्रह्माणंदृष्ट्वाउत्थायशिरसाप्रणामंचक्रे ३९ तदाब्रह्माप्रहसन् धूर्जटिंप्राह ४० हेभगवन् अहंत्वांविश्वस्यईशंजाने त्वं अखंडंब्रह्मासि ४१ त्वंसत्वादिशक्तिभिःविश्वसर्गादिकरोषि ४२ लोकेवेदमार्गः त्वयैवस्थापितः ४३ ४४ ४५ भवादृशाः साधवः दयामेवकुर्वंति ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतः ये पृथाग्धियः भेददृशः अतः कर्मण्येवदृष्टिर्येषांदुष्टआशयोयेपाम् । परेषामुदयेनसंपदाअर्पिता हृदिरुक्येषां अरुंतुदा मर्मभेत्तारः तान् दैवेनैववधो येषांतान् मृतप्रायान् भवद्विधः निरुपमःसाधुः माव धीत् नहन्यात् ४७ प्रत्युत साधूनांवृत्तमालोक्यानुग्रहमेवकर्तुमर्हसीत्याह द्वाभ्याम् । यस्मिन्देशे यदाकाले भगवन्माययास्पृष्टधियो मोहितचित्ताः पृथक्दृशोभेदबुद्धयोभवंति तत्रापराधेपिसाधवोहि अनुकंपयाअनंतरमेवपरदुःखासहिष्णुतया चित्तप्रकंपेनकृपांकुर्वंति । नतुक्रमपराक्रमम् । कुतः दैवबलात्कृतेर्थे ममैवदैवमेवंभूतंको पराधस्तेषामितिमत्वाहननंकुर्वतइत्यर्थः ४८ भवांस्तुमाय याअस्पृष्टमतिः अतः समस्तदृक्सर्वज्ञः तया मायया हत आत्मायेषांतेषु अतएवकर्मानुगतचित्तेषुइहापराधेअनुग्रहंकर्तुमर्हसि ४९ एवं सामान्येनोक्त्वाप्रस्तुतमाह । कुर्वंतितित्रिभिः । त्वया हतस्यअतएवासमाप्तस्यप्रजापतेरध्वरस्य हे मनो यत्राध्वरे कुयाज्ञिकाः भागिनोपितवभागंनददुः भ गार्हत्वमाह । येनत्वयामखोनिनीयते फलंप्राप्यते ५० दंताश्चरोहंतु । ५१ हेमन्यो आयुधैरश्मभिश्च भग्नगात्राणांअनातुरं आरोग्यमस्तु ५२ भागश्चतवास्त्वित्याह । हेरुद्र यावदित्यर्थेयादित्यव्ययम्।यज्ञेऽकृतेयावानुच्छिष्टः अवशिष्टोर्थः तावानेषतवभागोऽस्तु हेरुद्रतवभागेनाद्ययज्ञः कल्पतांसंपद्यतां सिद्धो भवत्वित्यर्थः ५३ इतिचतुर्थस्कंधेटीकायांषष्ठोध्यायः ६ ॥ सप्तमे विष्णुरुद्भूतः स्तुतोदक्षभवादिभिः । यज्ञंप्रवर्तयामासदक्षेणेतितिनिरूप्यते १ अजेन (ब्रह्मणा) योनुनीतः प्रार्थितोभवस्तेनाभिहितं हेमहाबाहोविदुर १ अघमपराधम् । (दंडोदमः शिक्षेत्यर्थः यथाबालेषुपिताऽनुग्रहरूपंदंडंधारयतीतिभावः) २

॥२३॥

श्लोकाः ४७/२

पृथग्धियःकर्मदृशोदुराशयाःपरोदयेनार्पितहृद्रुजोऽनिशम् ॥ परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्दैववधान्भवद्विधः ४७ यस्मिन्यदापुष्करनाभमायया दुरंतयास्पृष्टधियःपृथग्दृशः ॥ कुर्वंतितत्रह्यनुकंपयाकृपांनसाधवोदैवबलात्कृतेक्रमम् ४८ भवांस्तुपुंसःपरमस्यमाययादुरंतयाऽस्पृष्टमतिःसमस्तदृक् ॥ तया हतात्मस्वनुकर्मचेतःस्वनुग्रहंकर्तुमिहार्हसिप्रभो ४९ कुर्वध्वरस्योध्धरणंहतस्यभोस्त्वयाऽसमाप्तस्यमनोप्रजापतेः॥ नयत्रभागंतवभागिनोददुःकुयज्विनोये नमखोनिनीयते५०जीवताद्यजमानोयंप्रपद्येताक्षिणीभगः ॥ भृगोःश्मश्रूणिरोहंतुपूष्णोदंताश्चपूर्ववत् ५१ देवानांभग्नगात्राणामृत्विजांचायुधाश्मभिः ॥ भवताऽनुगृहीतानामाशुमन्योस्त्वनातुरम् ५२ एषतेरुद्रभागोस्तुयदुच्छिष्टोऽध्वरस्यवै ॥ यज्ञस्तेरुद्रभागेनकल्पतामद्ययज्ञहन् ५३ इ०भा०च०रुद्रसांत्वनं नामषष्ठोध्यायः ॥ ६ ॥ मैत्रेयउवाच ॥ ॥ इत्यजेनानुनीतेनभवेनपरितुष्यता ॥ अभ्यधायिमहाबाहोप्रहस्यश्रूयतामिति१ ॥ ॥ श्रीमहादेवउवाच ॥ नाघंप्रजेशबालानांवर्णयेनानुचिंतये ॥ देवमायाभिभूतानांदंडस्तत्रधृतोमया २

चूर्णिका

४७ अतः कर्मानुगतचित्तेपुसापराधेपुएपुअनुग्रहंकर्तुंअर्हासि४८त्वयाहतस्ययज्ञस्यउद्धारंकुरु ४९ अयंयजमानः जीवतात् भगः अक्षिणीप्रपद्येत भृगोः श्मश्रूणिरोहंतु पूष्णः दंताःभवंतु५० आयुधाश्मभिः भग्नगात्राणांदेवर्त्विजांभवदनुग्रहात् अनातुरमस्तु ५१ यज्ञावशिष्टोर्थः सः तेभागोस्तुहेयज्ञहन् अद्यतवभागेनयज्ञः कल्पताम् ५२ ॥ इति चतुर्थेषष्ठः ६ ॥ ॥ मैत्रयउवाच॥ ॥ इतिब्रह्मणाअनुनीतः शिवःउवाच ॥ १ हेप्रजेशमायाभिभूतानां अज्ञानां अपराधंनवर्णये तत्रमयादंडः धृतः २

॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्वापराधमपहृत्यानुगृह्णाति । दग्धं शीर्षं यस्यतस्यप्रजापतेर्दक्षस्य अजमुखं अजस्यमुखंयस्मिन् तत्तथाभूतंशिरोस्तु । बर्हिषोयज्ञस्यसंबंधिनंभागंमित्रनाम्नोदेवस्य (चक्षुषा) ३ (यजमानस्य दक्षस्य दंतैः जक्षतुअत्तु । येभग्नांगादेवास्ते) प्रकर्षेणकृतानिसर्वाण्यंगानियेषांते भवंतु (अविकृतांगाः संत्वित्यर्थः । येमह्यं) उच्छेषणं यज्ञावशिष्टं(ददुः)। ४ येषांत्वंगानिविनिष्टान्येवतेतु अश्विनोर्बाहुभ्यांकृतबाहवः पूष्णोर्हस्ताभ्यांकृतहस्ताश्चभवंतु । अध्वर्यवः अन्येचऋत्विजः बस्तस्याजस्यश्मश्रूणियस्य ५ मीढुष्टमःशिवः तेनोक्तं परितुष्टैश्चित्तैः (अब्रुवन् अंगीचक्रुरित्यर्थः) ६ मीढ्वांसं शिवंत्वयागत्यसर्वं कार्यंइत्यामंत्र्यसंप्रार्थ्य शुनासीरादेवाः सहमीढुषावेधसाचवर्तमानाः समीढ्वद्वेधसः ७ कार्त्स्न्येनवक्रहस्तबाह्वादिसाधारण्यंविधाय (कस्यदक्षस्यकायेनकबंधेन सवनायपज्ञसिद्ध्यर्थं) ८ (रुद्रेणाभितो विलोकितः उत्तस्थौ) ९ पूर्वंवृषध्वजद्वेषेण कलिलः कलुषीकृतः आत्मायस्यसः तदा (शिवेनावलोकितत्वात्) शरत्कालीनोह्रदइवामलोऽभवत् १० (भवंस्तोतुं कृतनिश्चयोपिमृतांसुतांस्मरन् बाष्पकलयाउद्गतकंठत्वात् नाशक्नोत् । औत्कंठ्यात् औत्सुक्यादितिवा) ११ (निष्कपटेन भावेनईशंशशंसतुष्टाव) १२ यदपियद्यपिप्रलब्धः पराभूतोमयाभवांस्तथापित्वयादंडोभृतः शिक्षाकृता नतूपेक्षितोऽस्मि (यथाऽपकारिण्यपिपुत्रेतस्यहितार्थमेवपित्रादंडः क्रियतेनतुतन्नाशार्थंतद्वत् तस्मादहोभवतामूयाननुग्रहः कृतः) युक्तमेवैतदित्याह । ब्रह्मबंधुषुचब्राह्मणाभासेष्वपितुभ्यंतवहरेश्चेतिवांयुवयोरवज्ञाउपेक्षानास्ति १३

॥२४॥

श्लोकाः ३/१३

प्रजापतेर्दग्धशीर्ष्णोभवत्वजमुखंशिरः ॥ मित्रस्यचक्षुषेक्षेतभागंस्वंबर्हिषोभगः ३ पूषातुयजमानस्यदद्भिर्जक्षतुपिष्टभुक् ॥ देवाःप्रकृतसर्वांगायेमउच्छेषणं ददुः ४ बाहुभ्यामश्विनोःपूष्णोहस्ताभ्यांकृतबाहवः ॥ भवंत्वध्वर्यवश्चान्येबस्तश्मश्रुर्भृगुर्भवेत् ५ ॥ ॥ मैत्रेयउवाच ॥ तदासर्वाणिभूतानिश्रुत्वा मीढुष्टमोदितम् ॥ परितुष्टात्मभिस्तातसाधुसाध्वित्यथाब्रुवन् ६ ततोमीढ्वांसमामंत्र्यशुनासीराःसहर्षिभिः ॥ भूयस्तद्देवयजनंसमीढ्वद्वेधसोययुः ७ विधायकार्त्स्न्येनचतद्यदाहभगवान्भवः ॥ संदधुःकस्यकायेनसवनीयपशोःशिरः ८ संधीयमानेशिरसिदक्षोरुद्राभिवीक्षितः ॥ सद्यःसुप्तइवोत्तस्थौददृशेचाग्रतोमृडम् ९ तदावृषध्वजद्वेषकलिलात्माप्रजापतिः ॥ शिवावलोकादभवच्छरद्ध्रदइवामलः १० भवस्तवायकृतधीर्नाशक्नोदनुरागतः ॥ औत्कंठ्याद्बाष्पकलयासंपरेतांसुतांस्मरन् ११ कृच्छ्रात्संस्तभ्यचमनःप्रेमविह्वलितःसुधीः ॥शशंसनिर्व्यलीकेनभावेनेशंप्रजापतिः १२ ॥ ॥ दक्षउवाच ॥ ॥ भूयाननुग्रहअहोभवताकृतोमेदंडस्त्वयामयिधृतोयदपिप्रलब्धः ॥ नब्रह्मबंधुषुचवांभगवन्नवज्ञातुभ्यंहरेश्चकुतएवधृतव्रतेषु १३

चूर्णिका

अस्तुदग्धशिरसः दक्षस्य अजमुखंशिरःभवतु भवः मित्रस्यचक्षुषाईक्षेत ३ पूषापिष्टभुक् यजमानदद्भिर्जक्षतु देवाः यथापूर्वंभवंतु ४ भृगुस्तुबस्तश्मश्रुर्भवेत् ५ ॥ मैत्रेयउवाच ॥ ॥ इतिशिवोक्तंश्रुत्वासर्वेसाधुइतिअब्रुवन् ६ ततः सर्षयः देवाःब्रह्माशिवसाहताः यज्ञस्थानंययुः ७ यथाशिवःआह तथैवतेचक्रुः सवनीयपशोः शिरः दक्षकायेन संदधुः ८ तदारुद्राभिवीक्षितः दक्षः सद्यः सुप्तइवउत्तस्थौ ९ अथअग्रतः शिवंदृष्ट्वाअस्तौत् १० ११ १२ ॥ हेभगवन् ॥ मयित्वयादंडोनधृतः किंतु अनुग्रहएवदंडरूपः कृतः १३

॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. तत्रहेतुमाह। विद्येति। ब्रह्माभूत्वात्वमस्राक्सृष्टवानसिकिमर्थम्। आत्मतत्त्वमवितुम्।यद्वाब्रह्मवेदंआत्मतत्त्वंचअवितुंसंप्रदायप्रवर्तनेनज्ञापयितुमित्यर्थः तत्तस्मात् हेपरमउत्कृष्ट१४अत्रचमत्युपकारोनास्तीत्याह अ०
योऽसाविति।विदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन।तत् (क्षेपणं) अगणय्यविस्मृत्यअर्हत्तमस्यतवनिंदयाअर्वागधःपततंमामपात् रक्षितवान् स्वकृतेनैवपरानुग्रहेणैवतुष्येत् नमयाततप्रतिकर्तुंशक्यमित्यर्थः १५
टीका अनुमंत्रितोनुज्ञातः। (सोपाध्यायै-)—रुपाध्यायसहितैः ऋत्विगादिभिः(सइतिच्छेदोवासंधिरार्षः सयजमानः संतानयामास)अनुवर्तयामास१६वीराणांप्रमथादीनांसंसर्गकृतदोषस्यशुद्धयेनिवृत्त्यर्थं (त्रिकपा ॥७॥
लंत्रिषुकपालेषुसंस्कृतंयज्ञसंतत्यैयज्ञस्यानुवर्तनाय) १७ उपात्तहविषाअध्वर्युणासहविशुद्धयाबुद्ध्यादध्यौ। (तथातद्ध्यानानुरूपम्) हेविशांपतेविदुर १८ स्वयाप्रभया तेषांतेजोमुष्णन्तिरस्कुर्वन्उपानीतः
समीपंप्रापितः। स्तोत्रेबृहद्रथंतरेवाजौपक्षौतद्वता।“बृहद्रथंतरेपक्षा”वितिश्रुतेः १९ तमेवानुवर्णयतिश्यामइति द्वाभ्याम्।हिरण्यवत्रशनायस्येति (रशनाशब्देन) वस्त्रंलक्ष्यते। (रशनायुक्तपीतांबरधारी
॥२५॥ त्यर्थः) अर्कतुल्येनकिरीटेनजुष्टः। नीलालकाएवभ्रमरास्तैर्मंडितंकुंडलयुक्तमास्यंयस्य। कंब्वादिभिरायुधैर्भृत्यरक्षार्थंव्यग्रैर्हिरण्मयैः स्वर्णभूषितैर्भुजैः पुष्पितः कर्णिकारइवशोभमानः भुजानां हिरण्मयत्वंके
यूरकंकणमुद्रिकाद्यलंकारैर्लक्षितम् २० वक्षसिअधिश्रितावधूर्लक्ष्मीर्यस्य। उदारोहासोअवलोकश्चतयोः कलयालेशेन। पार्श्वेउभयतोभ्रमंतीव्यजनचामरेएवराजहंसौयस्मिन्सः(श्वेतच्छत्रेणपूर्णचंद्रेणउप
रि) रज्यमानः शोभातिशयंनीयमानः २१ ब्रह्मेंद्रत्र्यक्षानायकामुख्यायेषांते। २२ हतरुचः तिरस्कृतप्रभाः सन्नास्खलिताक्षराजिह्वायेषाम्। ससाध्वसाः तन्महिम्नाक्षुभितचित्ताउपतस्थुः तुष्टुवुः २३
यस्यमहिमहिमानंप्रतितुअर्वागेववृत्तिर्येषांतेपियथामतिगृणंतिस्मअस्तुवन्। कृतःप्रकटीकृतोनुग्रहार्थं विग्रहोयेनतम्। यद्वा तेषांअर्वाग्वृत्तित्वेहेतुः तेतुयस्यमहिमहिमाविभूतिमात्ररूपाइत्यर्थः। २४

विद्यातपोव्रतधरान्मुखतःस्माविप्रान्ब्रह्मात्मतत्त्वमवितुंप्रथमंत्वमस्राक् ॥ तद्ब्राह्मणान्परमसर्वविपत्सुपासिपालःपशूनिवविभोप्रगृहीतदंडः १४ योऽसौ श्लोकाः
मयाऽविदिततत्त्वदृशासभायांक्षिप्तोदुरुक्तिविशिखैरगणय्यतन्माम् ॥ अर्वाक्पतंतमर्हत्तमनिंदयाऽपाद्दृष्ट्याऽऽर्द्रयासभगवान्स्वकृतेनतुष्येत् १५ ॥ मैत्रे
यउवाच॥ ॥ क्षमाप्यैवंसमीढ्वांसंब्रह्मणाचानुमंत्रितः ॥ कर्मसंतानयामाससोपाध्यायर्त्विगग्निभिः १६ वैष्णवंयज्ञसंतत्यैत्रिकपालंद्विजोत्तमाः ॥ पुरोडा १४
शंनिरवपन्वीरसंसर्गशुद्धये १७ अध्वर्युणाऽऽत्तहविषायजमानोविशांपते ॥ धियाविशुद्धयादध्यौतथाप्रादुरभूद्धरिः १८ तदास्वप्रभयातेषांद्योतयंत्या २४
दिशोदश ॥ मुष्णंस्तेजउपानीतस्तार्क्ष्येणस्तोत्रवाजिना १९ श्यामोहिरण्यरशनोऽर्ककिरीटजुष्टोनीलालकभ्रमरमंडितकुंडलास्यः ॥ कंब्वब्जचक्रशरचा
पगदाऽसिचर्मव्यग्रैर्हिरण्मयभुजैरिवकर्णिकारः २० वक्षस्यधिश्रितवधूर्वनमाल्युदारहासावलोककलयारमयंश्चविश्वम् ॥ पार्श्वभ्रमद्व्यजनचामरराजहंसः
श्वेतातपत्रशशिनोपरिरज्यमानः २१ तमुपागतमालक्ष्यसर्वेसुरगणादयः ॥ प्रणेमुःसहसोत्थायब्रह्मेंद्रत्र्यक्षनायकाः २२ तत्तेजसाहतरुचःसन्नजिह्वाःससा
ध्वसाः ॥ मूर्ध्नाधृतांजलिपुटाउपतस्थुरधोक्षजम् २३ अप्यर्वाग्वृत्तयोयस्यमहित्वात्मभुवादयः ॥ यथामतिगृणंतिस्मकृतानुग्रहविग्रहम् २४

चूर्णिका त्वंब्राह्मणान्सर्वविपत्सुपासि १४ सः त्वंस्वकृतेनतुष्येत् १५ ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंशिवंक्षमाप्यब्रह्माज्ञयादक्षः कर्मवर्तयामास १६ तथावीरभद्रसंसर्गशुद्ध ॥२५॥
येयज्ञसतंत्यै वैष्णवंत्रिकपालंपुरोडाशंनिरवपन् १७ ततः यजमानेनध्यातः सन् गरुडारूढः सर्वालंकारायुधाढ्यः लक्ष्म्यायुतः हरिः प्रादुरभवत् १८ १९ २० २१
तंउपागतं आलक्ष्य ब्रह्मेंद्रत्र्यक्षनायकाः सर्वेसुराद्याः प्रणेमुः तुष्टुवुः दक्षोपिप्रणम्यास्तौत् २२ २३ २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रतावत् दक्षस्तुतिप्रकारमाह । दक्षइति । गृहीतं अर्हणसादनोत्तमंयेनतम् ।(सादनंपात्रं) उत्तमेपात्रे आसाद्य अर्हणेषु समर्पितेषु प्रीत्यासार्हणं पात्रमेवयेनगृहीतं तमित्यर्थः । यद्वा कथंप्रपेदे गृहीतार्ह णसादनोत्तमं यथाभवतितथा तद्गृहीत्वाप्रपेदेइत्यर्थः । गृहीत्वेतिपाठस्तुसुगमः गृणन् स्तुवन् प्रपेदेशरणंजगाम । दक्षऋत्विक्सदस्येशभृगुब्रह्मेंद्रयोषितः । ऋषयश्चतथासिद्धायजमानीचलोकपाः । योगिब्रह्माग्निदेवाश्चस्तुवंति जगदीश्वरम् । तथागंधर्वविद्याध्रब्राह्मणाश्चपृथङ्मतैः २५ ननुसाक्षात्परमेश्वरएवरुद्रस्तस्यब्रह्मपुत्रत्वेन जीवत्वमनुकारमात्रं हंतकिमितित्वयाभेददृष्ट्यासौअवज्ञातइतिमां भगवानाक्षेप्स्यतीत्याशंक्याप्रच्युतस्वरूपस्य जीवधर्मनाख्यं तवैवसंगच्छते नान्यस्येत्याह । शुद्धमिति । स्वधाम्निस्वस्वरूपेतिष्ठन् भगवान् शुद्धंचिन्मात्रंचैतन्यघनः । शुद्धत्वेहेतुः उपरतानित्य निवृत्ता अखिलबुद्ध्यवस्थायस्मात् । अतः एकंभेदशून्यंअतएवअभयम् । "द्वितीयाद्वैभयंभवती"तिश्रुतेः । जीवस्यापिवस्तुतएवंभूतत्वात्तद्वैलक्षण्यार्थमुक्तम् । मायांप्रतिषिध्यअभिभूयस्वतंत्रएवसंस्त यामाययापुरुषत्वं मनुष्यनाख्यमुपेत्यतस्यांमायायांतिष्ठन् अपरिशुद्धइवरागादिमानिवास्ते रामकृष्णाद्यवतारे तथाप्रतीयतेभवानित्यर्थः । अन्येत्वविद्योपाधयोमायाभिभूताः संसरंति अतस्त्वमेवेश्वरोन रुद्रादय इतिभावः । अतएवतामिमां (संस्कारवशाद्वर्तमानांरुद्रादिभेद–)–दृष्टि–(–मसहमानो) भगवान् वारयिष्यति । "अहंब्रह्माचशर्वश्चजगतः कारणंपरमि"त्यादिना २६ ऋत्विजोपिस्वापराधं परिहरंतः स्तुवंति । भोअनंजन उपाधिमलशून्य यद्यपित्वमेवरुद्रादिदेवतारूपः तथापिनंदीश्वरशापात् कर्मण्येवदुराग्रहधियः संतस्तवतत्त्वंनविद्मः । किंतु धर्मस्यापूर्वस्यउपलक्षणीभूतंत्रिवृत् त्रयीप्रति पाद्यं अध्वराख्यंतवरूपमस्माभिर्ज्ञातम् । कीदृशंयदर्थंयस्यसिद्धये अधिदैवंदेवताधिकारेण अदोव्यवस्थाः अमूर्व्यवस्थाः अत्र (कर्मणि) इयमेवदेवतानान्येत्येवंभूतानियमाः प्रवृत्ताइत्यर्थः यद्वा व्यव स्थाइत्याख्यातम् । अडागमाद्यभावआर्षः यदर्थं अदः इंद्रादिअधिदैवरूपं विशेषेणास्थितवानसीत्यर्थः २७ सदस्यास्तुनिरीश्वरेपिदक्षाध्वरे धनलोभेनस्वप्रवृत्तिमनुचिंत्यानुतप्ता विरक्तिमाशासानाः स्तुवंति । हेशरणदआश्रयप्रद उत्पत्त्यध्वनि संसारमार्गे वर्तमानो अज्ञानांसार्थः समूहः तेपादौकः त्वत्पादरूपं ओको निवासं कदा यास्यति । कथंभूतेसंसारमार्गे (अध्वानंविशिनष्टि) अशरणेवि श्रामस्थानशून्ये । उरुक्लेशाएवदुर्गमस्थानानियस्मिन् । अंतकएवोग्रोव्यालस्तेनान्विष्टेलक्षीकृते । विषयरूपामृगतृष्णिकायस्मिन्आत्माअहंकारास्पदंशरीरं ममत्वास्पदंगेहंचसएवउरुभारोयस्यसः । द्वंद्वा निसुखदुःखान्येवश्वभ्राणिगर्तायस्मिन्खलाएवमृगाव्याघ्रादयस्तेभ्योभयंयस्मिन् शोकएवदावाग्निर्यस्मिन्कामेनोपसृष्टः पीडितः । २८

॥२६॥

श्लोकाः

दक्षोगृहीतार्हणसादनोत्तमंयज्ञेश्वरंविश्वसृजांपरंगुरुम् ॥ सुनंदनंदाद्यनुगैर्वृतंमुदागृणन्प्रपेदेप्रयतःकृतांजलिः२५॥ ॥दक्षउवाच ॥ ॥ शुद्धंस्वधाम्न्युपरता खिलबुद्ध्यवस्थंचिन्मात्रमेकमभयंप्रतिषिध्यमायाम् ॥ तिष्ठंस्तयैवपुरुषत्वमुपेत्यतस्यामास्तेभवानपरिशुद्धइवात्मतंत्रः२६ ॥ ॥ऋत्विजऊचुः ॥ ॥तत्त्वंनते वयमनंजनरुद्रशापात्कर्मण्यवग्रहधियोभगवन्विदामः॥धर्मोपलक्षणमिदंत्रिवृदध्वराख्यंज्ञातंयदर्थमधिदैवमदोव्यवस्थाः२७॥ ॥सदस्याऊचुः॥उत्पत्त्यध्वन्य शरणउरुक्लेशदुर्गेंतकोग्रव्यालान्विष्टेविषयमृगतृष्णात्मगेहोरुभारः ॥ द्वंद्वश्वभ्रेखलमृगभयेशोककदावेज्ञसार्थःपादौकस्तेशरणदकदायातिकामोपसृष्टः २८

२५
२८

चूर्णिका

२५ ॥ ॥ दक्षउवाच ॥ ॥ हेभगवन् भवान्मायामाभिभूय स्वतंत्रः सन् तयामाययापुरुषत्वंउपेत्य तस्यांमायायांतिष्ठन् रागादिमानिवआस्ते २६ ॥ ॥ ऋत्विज ऊचुः ॥ ॥ हेहरे वयंकर्माणिदुराग्रहधियः संतः तवतत्त्वंनविद्मः २७ ॥ ॥ सदस्याऊचुः ॥ ॥ हेआश्रयप्रदअयं अज्ञसमूहः संसारमार्गेवर्तमानः कामेनपीडितः सन् त्वत्पाद रूपंनिवासंकदायास्यति २८

॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

श्रीरुद्रस्तुपूर्वमभानिंदादुःसहाआसीत् । इदानींतुतांनगणयामीत्याह । तवेति । आशिषाकामेन असक्तैर्निष्कामैः रचितधियंअभिनिवेशितचित्तंमामामविद्यः विद्याहीनोलोकः यदिअपविद्धंजपतिआचारभ्र ष्टंजल्पति तज्जल्पनं अहंनगणये तत्र हेतुः तव यः परोनुग्रहः त्वत्पराणां वायोनुग्रहस्तेन २९ भृगुस्तुस्वभावतस्तत्त्वज्ञानहीनाजीवाअतोऽज्ञानकृतंममदुश्चेष्टितंक्षमस्वेत्याह । यन्मायेयेति । आत्मन्नात्म निश्रितंअनुगतंतवतत्त्वंनविदंति । प्रणतानामात्माबंधुश्चभवान् ३० ब्रह्मादयोनविदंतीतिभृगुणोक्तेतदसहमानोब्रह्मातत्त्वज्ञानमाविष्कुर्वन्निवाह । नैतदिति । पदार्थभेदग्राहकैरिंद्रियैः (असौपुरुषोयावदी क्षेत्यत्किंचित्पश्येत्तदेतद्भवतः स्वरूपंनभवति । यतस्त्वंमायामयादस्मात्व्यतिरिक्तोसि । तत्रहेतुः । ज्ञानस्येति) गुणस्यइंद्रियस्य । यद्वा ज्ञानार्थयोः कारणस्यसत्त्वादेः । अतएवासतोमायामयाद्व्यति रिक्तोभवान् (अर्थोविषयः) ३१ इंद्रस्तुइंद्रियविषयः सर्वोपिमिथ्येतिब्रह्मणोक्तमसहमानआह । इदंतववपुरपिउपपन्नमेव ननु प्रपंचवदनिर्वचनीयतयाऽनुपपन्नम् (यतोविश्वंभावयतितथा) सुराणांविद्विषःक्ष पर्यंतीतितथातैर्भुजदंडैरुपलक्षितम् ३२ ऋत्विजांपत्न्यः स्तुवंति । यज्ञोयंतवयजनायत्वांयष्टुंकेनब्रह्मणापूर्वंसृष्टः हेयज्ञात्मन्त्वंनः अस्माकंयज्ञंनलिनकांत्याद्दशानेत्रेणपुनीहिपवित्रंकुरु । कथंभूतंयज्ञंशवाःशे रतेयस्मिन्निति शवशयनंश्मशानंतद्वदाभाप्रतीतिर्यस्यसचासौशांतमेधश्चउपरतोत्सवः । मेधशब्देनपशुहिंसाद्युत्सवोलक्ष्यते (सयस्यशांतः अतः श्मशानवदाभातीत्यर्थः) शवमुदकंतत्रशेतेइतितथा (शवशयं) पद्मंतन्नाभौतिसंबोधनंवा । ३३ ऋषयस्तुकर्माण्यनुष्ठितवंतस्तत्पुण्येनतत्फलेनचयुज्यंतेभगवतितुतदभावमालक्ष्यविस्मिताः स्तुवंति । अनन्वितंअघटमानंयद्यस्मात् आत्मनास्वयंकर्मआचरसिअनु तिष्ठसि नाज्यसेहिनैवलिप्यसे । यतश्चअन्येविभूतयेसंपदेईश्वरींलक्ष्मींउपसेदुः भेजुः यद्वा यतइतिसार्वविभक्तिकस्तसिःयमित्यर्थः । भवांस्तुस्वयमेव (नतुत्वदिच्छया) अनुवर्तमानां (सेवमानां) तांनमन्यतेनाद्रियते ३४

॥२७॥

श्लोकाः २९/३४

॥ रुद्रउवाच ॥ ॥ तववरदवरांघ्रावाशिषेहाखिलार्थेह्यपिमुनिभिरसक्तैरादरेणार्हणीये ॥ यदिरचितधियंमाऽविद्यलोकोऽपविद्धंजपतिनगणयेतत्त्वत्परानुग्रहेण २९ ॥ ॥ भृगुरुवाच ॥ ॥ यन्माययागहनयाऽपहृतात्मबोधाब्रह्मादयस्तनुभृतस्तमसिस्वपंतः ॥ नात्मन्श्रितंतवविदंत्यधुनाऽपितत्त्वं सोयंप्रसीदतुभवान्प्रणतात्मबंधुः ३० ॥ ॥ ब्रह्मोवाच ॥ ॥ नैतत्स्वरूपंभवतोऽसौपदार्थभेदग्रहैःपुरुषोयावदीक्षेत् ॥ ज्ञानस्यचार्थस्यगुणस्यचाश्रयोमायामयाद्व्यतिरिक्तोयतस्त्वम् ३१ ॥ ॥ इंद्रउवाच ॥ ॥ इदमप्यच्युतविश्वभावनंवपुरानंदकरंमनोदृशाम् ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ३२ ॥ ॥ पत्न्यऊचुः ॥ ॥ यज्ञोऽयंतवयजनायकेनसृष्टोविध्वस्तःपशुपतिनाऽद्यदक्षकोपात् ॥ तंनस्त्वंशवशयनाभशांतमेधंयज्ञात्मन्नलिनरुचादृशापुनीहि ३३ ॥ ॥ ऋषयऊचुः ॥ ॥ अनन्वितंतेभगवन्विचेष्टितंयदात्मनाचरसिहिकर्मनाज्यसे ॥ विभूतयेयतउपसेदुरीश्वरींनमन्यतेस्वयमनुवर्ततींभवान् ३४

चूर्णिका

॥ रुद्रउवाच ॥ ॥ हेवरदत्वयिनिविष्टचित्तंमांअयंलोकः यदिआचारभ्रष्टंवदति तथापित्वदनुग्रहेणतत् नगणये २९ ॥ ॥ भृगुरुवाच ॥ ॥ हेविष्णोब्रह्मादयः मायया गतबोधाः संतः तवतत्त्वंनविंदंति सः त्वंप्रसीद ३० ॥ ॥ ब्रह्मोवाच ॥ ॥ असौपुरुषः इंद्रियैः एतत्तेस्वरूपंनपश्यति मायामयात् व्यतिरिक्तस्त्वमसि ३१ ॥ इंद्र उवाच ॥ ॥ हेहरेइदंअष्टभिर्भुजदंडैः युक्तंवपुः उपपन्नमेव ३२ ॥पत्न्यऊचुः॥ ॥अयंयज्ञः तवयजनायब्रह्मणासृष्टः सः शिवेनविध्वस्तः तंयज्ञंदृशापुनीहि ३३ ॥ ॥ ऋषयऊचुः ॥ ॥ हेविष्णोत्वंकर्मानुतिष्ठसि नतुलिप्यसे अन्येसंपदेलक्ष्मींभजंति त्वंतुस्वयमागतांतांनाद्रियसे एतत्तेचेष्टितंअघटितं ३४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका सिद्धास्तु (तन्महिमानंश्रुत्वा) तत्कथासुखमभिनंदंतः स्तुवंति । अयंनो (अस्माकं) मनोगजः त्वत्कथैवमृष्टंशुद्धंपीयूष-(ममृतं) तन्मयियानदीतस्यांअवगाढः मविष्टः दावाग्नितुल्यंसंसारतापंनस्मरति स्म । नचततोनिर्गच्छति । ब्रह्मसंपन्नवत् ब्रह्मैक्यंप्राप्तइव ३५ यजमानीदक्षपत्नीस्तौति । ते (तव) स्वागतंभद्रमागमनं जातं । हेअधीशयथाशिरसाहीनः कबंधमात्रः पुरुषोऽगैः करचरणाद्यवयवैः शोभनैरपिनशोभतेतथात्वांविनाकेवलंप्रयाजाद्यंगैर्मखोनशोभतेअतः (कांतयाश्रियासहत्वं) नः अस्मान्श्रियासहत्रायस्वत्वद्भक्तान्कुर्वित्यर्थः ३६ लोकपालास्त्वीश्वरत्वाभिमानारूढाभगवतस्तत्त्वमपश्य न्तऊचुः । दृष्टः किं । नदृष्टइत्यर्थः । कुतः असद्ग्रहैः पुंस्त्वमाविष्टलिंगत्वात् असत्प्रकाशरूपाभिर्दृग्भिरिंद्रियैः(त्वंतुप्रत्यग्द्रष्टा । येनत्वयादृश्यंप्रकाश्यते । यश्चत्वंषष्ठः भूतैर्भासिउपलक्षितोसिएषातेमाया) अ यंभाव शुद्धचित्तानांत्वंशुद्धसत्त्वमूर्तिर्भासि । अस्माकंतुबहिर्मुखेंद्रियाणांपंचभूतोपलक्षितोजीवविशेषइवाभासि । अतस्त्वमस्मादिंद्रियगोचरोनभवसिधिगस्मज्जीवितमिति ३७ योगेश्वरास्तदभेदेनभजतामनुग्र हभाक्त्वंमन्यमानाः स्वामिभृत्यभावेनभजतामप्यनुग्रहंप्रार्थयमानाः स्तुवंति द्वाभ्याम् । प्रेयानिति । विश्वात्मनिपरब्रह्मणित्वयियआत्मनः पृथक्त्वंनेक्षेतअमुतः अमुष्मादन्यः तेप्रेष्ठोनास्ति आत्मनोजीवान्पृ थक्त्वेक्षेतेतिवा । हेवत्सलभक्तप्रियअनन्यवृत्त्याभक्त्याअव्यभिचारिभक्त्याभजतोऽनुगृहाणेत्यर्थः ३८ अव्यभिचारिणीभक्तिः कथंस्यात् । भजनीयानांबहुत्वात् इत्याशंक्याहुः । जगतः उद्भवादिषुनिमित्ते षुदैवतोवाऽदृष्टात्बहुधाभिद्यमाना गुणायस्यास्तयास्वमाययाआत्मनिस्वरूपेरचिताब्रह्मादिभेदमूर्तिर्येनतस्मै । स्वसंस्थया केवलस्वरूपावस्थानेनचविनिवर्तितोभेदभ्रमोगुणाश्चतद्धेतवआत्मनियेनतस्मै ३९ शब्दब्रह्मस्तौति । नमस्तेइति । श्रितंस्वीकृतंसत्त्वंयेन । अतः भक्त्यादिफलप्रसवित्रे । ननुसत्त्वगुणत्वंनिर्गुणत्वंचैकस्यकथमित्याशंक्याह । यस्यकाष्ठांतत्त्वंनाहंवेद्मिअपरेब्रह्मादयश्चनविदुः तस्मै (अतर्क्यै श्वर्यायतेनमः) ४०

॥२८॥

श्लोकाः ॥ सिद्धाऊचुः ॥ ॥ अयंत्वत्कथामृष्टपीयूषनद्यांमनोवारणःक्लेशदावाग्निदग्धः ॥ तृषार्त्तोवगाढोनसस्मारदावंननिष्क्रामतिब्रह्मसंपन्नवन्नः ३५ ॥ य
जमान्युवाच ॥ ॥ स्वागतंतेप्रसीदेशतुभ्यंनमःश्रीनिवासश्रियाकांतयात्राहिनः ॥ त्वामृतेऽधीशनांगैर्मखःशोभतेशीर्षहीनःकबंधोयथापूरुषः ३६
॥लोकपालाऊचुः॥ दृष्टःकिंनोदृग्भिरसद्ग्रहैस्त्वंप्रत्यग्द्रष्टादृश्यतेयेनदृश्यम् ॥ मायाह्येषाभवदीयाहिभूमन्यस्त्वंषष्ठःपंचभिर्भासिभूतैः ३७ ॥ योगेश्वराऊचुः॥ ३५/४०
प्रेयान्नतेऽन्योऽस्त्यमुतस्त्वयिप्रभोविश्वात्मनीक्षेन्नपृथग्यआत्मनः ॥ अथापिभक्त्येशतयोपधावतामनन्यवृत्त्याऽनुगृहाणवत्सल ३८ जगदुद्भवस्थितिलये
षुदैवतोबहुभिद्यमानगुणयात्ममायया ॥ रचितात्मभेदमतयेस्वसंस्थयाविनिवर्तितभ्रमगुणात्मनेनमः ३९ ॥ ॥ ब्रह्मोवाच ॥ ॥ नमस्तेश्रितसत्त्वा
यधर्मादीनांचसूतये ॥ निर्गुणायचयत्काष्ठांनाहंवेदापरेऽपिच ४०

चूर्णिका सिद्धाऊचुः ॥ ॥अयं नः मनोगजः त्वत्कथामृतनद्यांप्रविष्टः सः संसारतापंनस्मरति ततोननिर्गच्छतिच ३५ ॥ ॥ यजमान्युवाच ॥ ॥ हेश्रीनिवास तेस्वागतंतुभ्यंनमः नः त्राहि ३६ ॥ ॥ लोकपालाऊचुः ॥ ॥ शुद्धसत्त्वानांत्वंशुद्धसत्त्वमूर्तिर्भासि नास्माकम् अतोनः धिक् ३७ ॥ ॥ योगेश्वराऊचुः॥ ॥ हेईश यः त्वयिआत्मनः पृथक्त्वंनेक्षेतअतोन्यस्तेप्रियोनास्ति अथापिभक्त्याभजतोनुगृहाण ३८ ३९ ॥ ॥ ब्रह्मोवाच ॥ ॥ धर्मादीनांभक्त्येश्वप्रसवित्रेतेनमः ४० ॥ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अग्निस्तुयज्ञमूर्तिंप्रणमति । यस्यतेजसासुष्ठुसमिद्धंप्रदीप्तंतेजोयस्यसोहंप्रशस्तेअध्वरेहविर्वहामि । तंयज्ञियंयज्ञानांहेतुंपालकंयज्ञंयज्ञमूर्तिम् । पंचविधत्वंमैतरेयकेउक्तम् "सएषयज्ञः पंचविधोऽग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुःसोम" इति । पंचभिर्यजुर्मंत्रैः यज्ञमंत्रैःस्विष्टंसुपूजितम् । तथाच श्रुतिः । "आश्रावयेतिचतुरक्षरमस्तुश्रौषडितिचतुरक्षरंयजेतिद्व्यक्षरंयेयजामहइतिपंचाक्षरंद्व्यक्षरोवषट्कार" इति । स्मृतिश्च । "चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपंचभिरेवच । हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदत्वि"ति ४१ । देवस्तुसत्यं (वयमेव) देवाः तथापिजगदाद्यंतयोः त्वमेव (दीव्यसि) नान्यः कश्चिदित्याहुः पुरेतिकल्पापाये प्रलयेविकृतं कार्यजातंउदरीकृत्यसंहृत्यत्वमेवाद्यः पुमान्उरगेंद्रएवाधिकंशयनंशय्यातस्मिन् शेषे शयनंकरोषि । सिद्धैर्जनलोकादिवासिभिः विमृशिताविचिंतिताअध्यात्मपदवीज्ञानमार्गोयस्यसएवत्वं यइदानीमक्ष्णोः पथिचरसिप्रत्यक्षोसि अवसिरक्षसि ४२ गंधर्वाप्सरसस्तुवयंभियाकेवलंसर्वानपि परमेश्वरत्वेनोपश्लोकयामः त्वमेवतुपरमेश्वरः अन्येतुत्वदंशाएवेत्याहुः । अंशांशाइति । हेविभूमन् महत्तम क्रीडाभांडंक्रीडोपकरणंविश्वंब्रह्मांडं यस्य तस्मैतेनमनंकुर्मः ४३ विद्याधरास्तुकेवलंविद्याभिः संपदःप्राप्यंते अहंकारादिव्यामोहनिवृत्तिस्तुत्वत्कथाश्रवणंविनानास्तीत्याहुः । (त्वन्माययेति ।) अर्थंपुरुषार्थसाधनंकलेवरं अभिपद्य प्राप्य त्वन्माययाऽस्मिन्ममेत्यहमितिचाभिमानंकृत्वाइमंश्चात्ममोहंयुष्मत्कथामृतनिषेवकः उत्उच्चैः व्युदस्येत् परित्यजेत् नान्यः ननु स्वैः पुत्रादिभिरधिक्षिप्तोदुःखितःसन्परित्यजेदेव नेत्याहुः क्षिप्तोपिदुर्मतिः असत्सुविषयेष्वेवलालसातृष्णायस्यसः ४४ ब्राह्मणाः स्तुवंति । त्वमितित्रिभिः । सदस्याश्चऋत्विजश्च ४५ गांपृथ्वीं रसायाः रसातलात्दंष्ट्रयाव्युज्जहर्थविशेषेणोद्धृतवानसि । योगिभिः स्तूयमानः हेत्रयींगात्र वेदमूर्ते यज्ञोयागः सयूपस्तद्विशेषः क्रतुः तद्रूपी यज्ञसंकल्परूपइतिवा । यज्ञः क्रतुः कर्मयस्येतिवा । ४६

॥२९॥

श्लोकाः ४१/४६

॥ अग्निरुवाच ॥ ॥ यत्तेजसाऽहंसुसमिद्धतेजाहव्यंवहेस्वध्वरआज्यसिक्तम् ॥ तंयज्ञियंपंचविधंचपंचभिःस्विष्टंयजुर्भिःप्रणतोस्मियज्ञम् ४१ ॥ देवा ऊचुः ॥ पुराकल्पापायेस्वकृतमुदरीकृत्यविकृतंत्वमेवाद्यस्तस्मिन्सलिलउरगेंद्राधिशयने ॥ पुमाञ्छेषेसिद्धैर्हृदिविमृशिताध्यात्मपदविःसएवाद्याक्ष्णोर्यःपथिचरसिभृत्यानवसिनः ४२ ॥ गंधर्वाऊचुः ॥ अंशांशास्तेदेवमरीच्यादयएतेब्रह्मेंद्राद्यादेवगणारुद्रपुरोगाः ॥ क्रीडाभांडंविश्वमिदंयस्यविभूमंस्तस्मैनित्यंनाथनमस्तेकरवाम ४३ ॥ विद्याधराऊचुः ॥ ॥ त्वन्मायया ऽर्थमभिपद्यकलेवरेस्मिन्कृत्वाममाहमितिदुर्मतिरुत्पथैःस्वैः ॥ क्षिप्तोऽप्यसद्विषयलालसआत्ममोहंयुष्मत्कथाऽमृतनिषेवकउद्व्युदस्येत् ४४ ॥ ब्राह्मणाऊचुः ॥ ॥ त्वंक्रतुस्त्वंहविस्त्वंहुताशःस्वयंत्वंहिमंत्रःसमिद्दर्भपात्राणि च ॥ त्वंसदस्यर्त्विजोदंपतीदेवताअग्निहोत्रंस्वधासोमआज्यंपशुः ४५ त्वंपुरागांरसायामहासूकरोदंष्ट्रयापद्मिनींवारणेंद्रोयथा ॥ स्तूयमानोनदल्लीलयायोगिभिर्व्युज्जहर्थत्रयीगात्रयज्ञक्रतुः ४६

चूर्णिका

॥ अग्निरुवाच ॥ यत्तेजसाहंसमिद्धतेजाः सन् हव्यंवहंतंयज्ञंनतोस्मि ४१ ॥ देवाऊचुः ॥ ॥ यः त्वंप्रलयेकार्यजातंसंहृत्य शयनं करोषि सएवत्वंप्रत्यक्षोसि नः अवसि ४२ ॥ गंधर्वाऊचुः ॥ एतेमरीच्यादयः देवाश्चयस्यअंशांशाः ब्रह्मांडं यस्य क्रीडोपकरणं तस्यतेनमस्करवाम ४३ ॥ ॥ विद्याधराऊचुः ॥ ॥ त्वन्माययाऽस्मिन्देहेममाहमितिदुर्मतिः पुत्रादिभिःक्षिप्तोपि आत्ममोहंनत्यजति त्वत्कथामृतसेवकस्तुत्यजति ४४ ॥ ॥ब्राह्मणाऊचुः यज्ञः हविः अग्निः मंत्रः समित्दर्भाः पात्राणि सदस्यादयश्च त्वमेवासि ४५ त्वंवराहःसन् पृथिवींरसायाः उद्धृतवान् ४६

१ सएववयज्ञइति वापाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सत्वमस्माकं त्वद्दर्शनमाकांक्षतां प्रसीद अस्मद्यज्ञमप्युद्धरेत्यर्थः । नचाशक्यंतवैतत् यतस्तवनाम्निकीर्त्यमानएवयज्ञविघ्नाः क्षयंयांति । एवंप्रभावोयस्य तस्मैनमः । ४७ इत्यनेनप्रकारेणसर्वैः कीर्त्यमाने हे भद्र विदुर संनिन्येप्रवर्तयामास । (कथंभूते । यज्ञभावनेयज्ञस्यप्रकाशके) ४८ सर्वात्मतया सर्वभागभोक्तापिभगवान् निजानंदतृप्तोपिस्वेनत्रिकपालपुरोडाशेनप्रीयमाणइवदक्षमाभाष्य संबोध्य बभाषे । ४९ योऽहंजगतःकारणंआत्माचेश्वरश्च उपद्रष्टा साक्षीच स्वयंदृक्स्वयंप्रकाशश्च (अविशेषणो) निरुपाधिश्चसएवब्रह्माचशर्वश्चेत्यन्वयः । ५० कुतइत्यतआह । अहमेवआत्ममायामाधिष्ठायजगत्सृष्ट्यादि कुर्वन् कर्मशक्तियोजिताम् (स्रष्टा शर्व इत्यादिकां) संज्ञांधारयामि । ५१ तस्मिन्केवलेअद्वितीयेसजातीयभेदरहितेब्रह्मणिमयिब्रह्मरुद्रौ (तत्र) भूतानिचभेदेनाज्ञःपश्यतीत्यर्थः ५२ विद्वांस्तुभेदंनपश्यती तिसदृष्टांतमाह । यथेति । (अहमेवपरोयस्यसः) ५३ तस्मादेवमैक्यंपश्यन्कृतार्थोभवतीत्याह (सर्वेषांभूतानामात्माअंतर्यामीतद्रूपाणांएकोभावःस्वरूपं) येषांतेषांत्रयाणांब्रह्मविष्णुरुद्राणाम् ५४ (प्रजापतीनांमरीच्यादीनामपिपतिर्दक्षः) स्वेनक्रतुनात्रिकपालेष्ट्या (हरिंअर्चित्वाइष्ट्वा) उभयतः अंगैः प्रधानेनच ५५ स्वेनभागेनयज्ञावशिष्टेनउदवस्यतेसमाप्यतेअनेनेत्युदवसानंतेनकर्मणासोमपानृइ तरानपिउपाधावत् अयजदित्यनुषंगः । ततश्च (ऋत्विग्भिःसहितः) उदवस्यकर्मसमाप्यअवभृथरूपंयथाभवातितथास्नातवान् ५६

॥३०॥

श्लोकाः ४७—५६

सप्रसीदत्वमस्माकमाकांक्षतांदर्शनंतेपरिभ्रष्टसत्कर्मणाम् ॥ कीर्त्यमानेनृभिर्नाम्नियज्ञेशतेयज्ञविघ्नाःक्षयंयांतितस्मैनमः ४७ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिदक्षःकविर्यज्ञंभद्ररुद्रावमर्शितम् ॥ कीर्त्यमानेहृषीकेशेसंनिन्येयज्ञभावने ४८ भगवान्स्वेनभागेनसर्वात्मासर्वभागभुक् ॥ दक्षंबभाषआभाष्यप्रीयमाणइवानघ ४९ ॥ ॥ श्रीभगवानुवाच ॥ ॥ अहंब्रह्माचशर्वश्चजगतःकारणंपरम् ॥ आत्मेश्वरउपद्रष्टास्वयंदृगविशेषणः ५० आत्ममायांसमाविश्यसोहंगुणमयींद्विज ॥ सृजन्रक्षन्हरन्विश्वंदध्रेसंज्ञांक्रियोचिताम् ५१ तस्मिन्ब्रह्मण्यद्वितीयेकेवलेपरमात्मनि ॥ ब्रह्मरुद्रौचभूतानिभेदेनाज्ञोऽनुपश्यति ५२ यथापुमान्नःस्वांगेषुशिरःपाण्यादिषुक्वचित् ॥ पारक्यबुद्धिंकुरुतेएवंभूतेषुमत्परः ५३ त्रयाणामेकभावानांयोनपश्यतिवैभिदाम् ॥ सर्वभूतात्मनांब्रह्मसन्शांतिमधिगच्छति ५४ ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंभगवतादिष्टःप्रजापतिपतिर्हरिम् ॥ अर्चित्वाक्रतुनास्वेनदेवानुभयतोऽयजत् ५५ रुद्रंचस्वेनभागेनह्युपाधावत्समाहितः ॥ कर्मणोदवसानेनसोमपानितरानपि ॥ उदवस्यसहर्त्विग्भिःसस्नाववभृथंततः ५६

चूर्णिका

त्वंअस्माकं प्रसीद तेनमोस्तु ४७ ॥ मैत्रेयउवाच ॥ एवंकीर्त्यमानेहरौदक्षःयज्ञंप्रवर्तयामास ॥ ४८ भगवान् सर्वात्मा सर्वभागभुक् दक्षंबभाषे ४९ ॥ श्रीभगवानुवाच॥ अहंब्रह्माचशर्वश्चजगतः कारणंपरम् ५० आत्मेश्वरः अहंमायांआश्रित्यविश्वंसृजन्रक्षन् हरन् क्रियोचितांसंज्ञांदधे ५१ एवंभूतेमयिब्रह्मरुद्रौभूतानिचभेदेनयः पश्यति सः अज्ञः ५२ सर्वत्रऐक्येन यः पश्यति सः शांतिंप्राप्नोति ५३ ५४ ॥ ॥ मैत्रेयउवाच ॥ दक्षःइतियज्ञंसमाप्य अवभृथंसस्नौ ५५ ५६

---

१ सर्वशक्तिःक्रियोचिताम् इतिमु०पु० २ समानासमानजातीयभेदरहितेषु इति मु०पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३१॥

स्वेनैवानुभावेन आप्तराधसे प्राप्तसिद्धये तस्माअपि (तथाभूतायापिदक्षायधर्मएवमतिंदत्त्वाधर्मेमतिरस्त्वति आशिषोदत्त्वेत्यर्थः) ५७ (हिमवतः हिमाचलस्य क्षेत्रेभार्यायाम्) ५८ (भूयःपुनःरुद्रमेव)आवृं
क्तेभजतेस्म अनन्यभावानांस्वात्मन्येकनिष्ठानांएकैवगतिर्यस्तम् । केव । प्रलयकालेसुप्ताशक्तिरीश्वरमिव ६९ (दक्षाध्वरद्रुहएतत्कर्मभगवद्भक्तात्) बृहस्पतेःशिष्यान्मयाश्रुतम् । ६० (इदं ईशस्य चरित्रं)
परंपवित्रं यआकर्ण्य तथाऽनुकीर्तयेत् हेकौरव विदुर स आत्मनः परस्यापि अघंसंसारव्यसनं सर्वदा धुनोति (दूरीकरोतीत्यर्थः)६१इतिचतुर्थस्कंधे टीकायां सप्तमोऽध्यायः॥ ७ ॥ ॥ दक्षकन्यान्वये
प्राप्तादक्षयज्ञकथोदिता । मनुपुत्रान्वयेप्राप्ताध्रुवचर्यार्थपंचभिः १ । अष्टमेगुरुदारोक्तिरोषमत्सरतःपुरात्।निर्गतेन ध्रुवेणाह तपसातोषणं हरेः । २ ॥।।एवंतावन्मनुकन्यान्वयोक्त्यैव मरीच्यादीनांब्रह्मपुत्राणां
वंशावर्णिताः। तत्रात्रशिष्टं किंचिदाह । सनकाद्याइति । नावसन्नाश्रिताः किंतुऊर्ध्वरेतसः नैष्ठिकाआसन् अतस्तेषांवंशोनास्ति १ अधर्मोपिब्रह्मपुत्रस्तस्यवंशमाह मृषेतिचतुर्भिः । दंभः परप्रतारणं
मायातदुचिताचेष्टा तयोः सोदरयोरपिदांपत्यमधर्मांशतया । एवमुपर्यपि । अप्रजःअपुत्रः। २ (तयोर्मायादंभयोः लोभः पुत्रः) निष्कृतिः शठता सास्त्री यत् याभ्यांकलिश्चतस्यस्वसादुरुक्तिश्चेत्यर्थः
(भयंसमभवत्) ३ (भयंभीतिः । तयोः मृत्युभीतिभ्यामित्यर्थः) यातनातीव्रवेदना ४ प्रतिसर्गोऽनुसर्गएव (यमधर्मसंबंधी) यद्वा प्रतिसर्गः प्रलयः अधर्मस्यप्रलयहेतुत्वात् प्रतिसर्गत्वम्। एतत्एतम
धर्मवंशं पुण्यमिति वर्जनद्वारापुण्यहेतुत्वात् ५

श्लोकाः

तस्माअप्यनुभावेनस्वेनैवावाप्तराधसे ॥ धर्मएवमतिंदत्त्वात्रिदशास्तेदिवंययुः ५७ एवंदाक्षायणीहित्वासतीपूर्वकलेवरम् ॥ जज्ञेहिमवतःक्षेत्रेमेनायामिति
शुश्रुम ५८ तमेवदयितंभूयआवृंक्तेपतिमंबिका ॥ अनन्यभावैकगतिंशक्तिःसुप्तेवपूरुषम् ५९ एतद्भगवतःशंभोःकर्मदक्षाध्वरद्रुहः ॥ श्रुतंभागवताच्छिष्यादु
द्धवान्मेबृहस्पतेः ६०इदंपवित्रंपरमीशचेष्टितंयशस्यमायुष्यमवौघमर्षणम् ॥ योनित्यदाकर्ण्यनरोनुकीर्त्तयेद्धुनोत्यघंकौरवभक्तिभावतः ६१ इ०श्रीभा०
च०स्कंधेदक्षयज्ञसंधानंनामसप्तमोऽध्यायः ७॥ ॥ मैत्रेयउवाच ॥ ॥ सनकाद्यानारदश्चऋभुर्हंसोऽरुणिर्यतिः ॥ नैतेगृहान्ब्रह्मसुताह्यावसन्नूर्ध्वरेतसः
१ मृषाऽधर्मस्यभार्यासीद्दंभंमायांचशत्रुहन् ॥ असूतामिथुनंतत्तुनिर्ऋतिर्जगृहेऽप्रजः २ तयोःसमभवल्लोभोनिष्कृतिश्चमहामते ॥ ताभ्यांक्रोधश्चहिंसाच
यद्दुरुक्तिःस्वसाकलिः ३ दुरुक्तौकलिराधत्तभयंमृत्युंचसत्तम ॥ तयोश्चमिथुनंजज्ञेयातनानिरयस्तथा ४ संग्रहेणमयाख्यातःप्रतिसर्गस्तवानघ ॥
त्रिःश्रुत्वैतत्पुमान्पुण्यंविधुनोत्यात्मनोमलम् ५

५७/८

चूर्णिका ॥३१॥

देवाद्याः धर्मेतस्यमतिंस्थाप्य दिवंययुः ५७ एवंदक्षकन्यासती पूर्वदेहं हित्वा हिमवतः मेनायांजज्ञेइतिशुश्रुम ५८ अंबिका भूयः तमेवपतिंभजतेस्म ५९ एतत् दक्षाध्वर
द्रुहः शंभोः कर्म बृहस्पतेः शिष्यात् उद्धवात् मयाश्रुतम् ६० ॥ ॥ हेविदुर इदं पवित्रंईशचेष्टितं यशस्यं आयुष्यं यः शृणुयात् कीर्तयेत् वा सः अघंधुनोति ६१ ॥
॥ इतिचतुर्थेसप्तमः ७ ॥ मैत्रेयउवाच ॥ सनकाद्याः नारदश्चऋभुर्हंसोऽरुणिर्यतिः एतेनैष्ठिकाः अतःगृहाश्रमंनचक्रुः १ ब्रह्मणः पृष्ठात् जातस्यअधर्मस्यवंशमा
ह अधर्मः मृषायांदंभंमायांचप्रासूत तन्मिथुनं अप्रजः निर्ऋतिः जगृहे २ तयोः लोभः शठता ताभ्यां क्रोधः हिंसा ताभ्यांकलिः दुरुक्तिश्चताभ्यांभयंमृत्युश्च ताभ्यांयातना
निरयश्च ३ ४ इमं अधर्मवंशंश्रुत्वा एतेषां त्यागद्वारा मलंहित्वापुण्यंप्राप्नोति ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनोः पुत्रवंशं (मनुपुत्रयोर्वंशमित्यर्थः) हरेवंशोब्रह्मातस्यांशात् देहार्धाज्जन्मयस्य ६ जगतो रक्षायांस्थितौ ७ सुनीतिः सुरुचिश्चजाये । तयोर्मध्ये । नेतरासुनीतिः (न प्रेयसी । यस्याः सुतः ध्रुवनामा) ८ तयोः प्रियाप्रियत्वेप्रपंचयन् ध्रुवचरित्रमाह पंचभिरध्यायैः । सुरुचेः पुत्रं उत्तमसंज्ञंलालयन् ९ (आरुरुक्षंतं) अंकमारोढुमिच्छंत-(–मपिनाभ्यनंदत) (तथाउत्तमवदंकारोहणं चिकीर्षमाणं शृण्वतः सतः) १० गर्वोक्तिमेवाह त्रिभिः । नेति । नृपतेर्धिष्ण्यमासनं नृपात्मजोपिभवान् नारोढुमर्हति । (यत्यस्मात्) ११ (बतेतिखेदे । अन्यस्त्रीसपत्नी तद्गर्भसंभृतम् । अर्थे पासनलक्षणे) १२ पुरुषमीश्वरम् १३ (दुरुक्तिभिर्विद्धःसः) मिषंतंपश्यंतं सन्नवाचंकुंठितवाचम् १४ उदुह्यआरोप्य । (पौरमुखात्) अंतःपुरजनमुखात् श्रुत्वा१५ शोकएवदावाग्निस्तेनदावाग्निगतम्। लतेवास्थितासावालाविलापंचकार । (सरोजस्य श्रीरिवश्रीः शोभायस्यास्तयादृशावाष्पलेशंवहतिस्म) १६ वृजिनस्यदुःखस्य (बालासुनीतिः) बालकंध्रुवं। अमंगलं अपराधम् (हेतात) परेषुमामंस्थाः यद्यतः परेभ्यो दुःखं ददाति यः सास्वदत्तमेवतत् दुःखंभुंक्ते । १७ (सुरुच्यायदभिहितं तत्सत्यं) दुर्भगाया (दैवहीनायामे) मम उदरेगृहीतजन्मा ।तस्याएव स्तन्येन वृद्धश्च । दुर्भगत्वमेवाह । यांमामिडस्पतिर्भूपतिः भार्येतिवोढुंस्वीकर्तुं विलज्जते । वाशब्दाद्दासीत्यपि १८

श्लोकाः ६/१८

अथातः कीर्त्तयेवंशंपुण्यकीर्त्तेःकुरूद्वह ॥ स्वायंभुवस्यापिमनोर्हरेरंशांशजन्मनः ६ प्रियव्रतोत्तानपादौशतरूपापतेःसुतौ ॥ वासुदेवस्यकलयारक्षायांजगतः स्थितौ७जायेउत्तानपादस्यसुनीतिःसुरुचिस्तयोः ॥ सुरुचिःप्रेयसीपत्युर्नेतरायत्सुतोध्रुवः ८ एकदासुरुचेःपुत्रमंकमारोप्यलालयन् ॥ उत्तमंनारुरुक्षंतंध्रुवं राजाऽभ्यनंदत ९ तथाचिकीर्षमाणंतंसपत्न्यास्तनयंध्रुवम् ॥ सुरुचिःशृण्वतोराज्ञःसेर्ष्यमाहातिगर्विता १० नवत्सनृपतेर्धिष्ण्यंभवानारोढुमर्हति ॥ नगृहीतोमयायत्त्वंकुक्षावपिनृपात्मजः ११ बालोऽसिबतनात्मानमन्यस्त्रीगर्भसंभृतम् ॥ नूनंवेदभवान्यस्यदुर्लभेऽर्थेमनोरथः १२ तपसाराध्यपुरुषंतस्यैवानुग्रहेणमे ॥ गर्भेत्वंसाधयात्मानंयदीच्छसिनृपासनम् १३ ॥ ॥ मैत्रेयउवाच ॥ मातुःसपत्न्याःसुदुरुक्तिविद्धःश्वसन्रुषादंडहतोयथाहिः ॥ हित्वामिषंतंपितरंसन्नवाचंजगाममातुःप्ररुदन्सकाशम् १४ तंनिश्वसंतंस्फुरिताधरोष्ठंसुनीतिरुत्संगउदुह्यबालम् ॥ निशम्यतत्पौरमुखान्नितांतंसाविव्यथेयद्गदितंसपत्न्याः १५ सोत्सृज्यधैर्यंविललापशोकदावाग्निनादावलतेवबाला ॥ वाक्यंसपत्न्याःस्मरतीसरोजश्रियादृशाबाष्पकलामुवाह १६ दीर्घंश्वसंतीवृजिनस्यपारमपश्यतीबालकमाहबाला ॥ माऽमंगलंतातपरेष्वमंस्थाभुंक्तेजनोयत्परदुःखदस्तत् १७ सत्यंसुरुच्याऽभिहितंभवान्मेयद्दुर्भगायाउदरेगृहीतः ॥ स्तन्येनवृद्धश्चविलज्जतेयांभार्येतिवावोढुमिडस्पतिर्माम् १८

॥३२॥

चूर्णिका

स्वायंभुवमनोः पुण्यवंशंकीर्तये ६ मनोः प्रियव्रतोत्तानपादौद्वौपुत्रौ ७ तत्रउत्तानपादस्यसुनीतिः सुरुचिः स्त्रियौ सुरुचिः पत्युः प्रेयसी यत्सुतो ध्रुवः सानप्रियाआस ८ एकदाराजासुरुचेः पुत्रंउत्तमंनामलालयन् ध्रुवं अंकंआरोढुंइच्छंतंनाभ्यनंदत् ९ तदा सुरुचिः तथाचिकीर्षमाणं ध्रुवं दृष्ट्वा राज्ञः शृण्वतः गर्वितासती सेर्ष्यंआह १० हेवत्स त्वं नृपतेः आसनं आरोढुंनार्हसि यतः त्वंमयाकुक्षौनधृतः ११ तवएवंमनोरथश्चेत् तर्हितपसाहरिंआराध्य तत्कृपयामेगर्भे आत्मानंसाधय १२ १३ ॥ मैत्रेयउवाच ॥ एवंसापत्नमातुः दुरुक्तिवाणैः विद्धः अहिरिवश्वसन् पश्यंतं मौनीभूतंपितरंहित्वारुदन् मातुः सकाशंजगाम १४ सुनीतिः सपत्न्याः वाक्यंश्रुत्वाबालंअंके आरोप्यशुशोच आहच १५ १६ १७ हेवाल राजा मांभार्याइतिवक्तुंलज्जते सुरुच्याभिहितंसत्यम् १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितृभार्यात्वेन मात्रासमा (समाता) मातुः सपत्नीतयापि यदुक्तम् तपसाराध्यपुरुषमित्यादि तत् आतिष्ठ कुरु । (अव्यलीकंनिष्कपटंहितमित्यर्थः) अध्यासनंयदीच्छसि १९ परिचर्य निषेव्य विश्वस्यविभावनाय पालनाय आत्तास्वीकृता गुणाभिपत्तिः सत्त्वगुणाधिष्ठानंयेनतस्य । जितआत्मामनः श्वसनः प्राणश्चयैस्तैरभिवंद्यं (पारमेष्ठ्यंसत्यलोकाख्यम्) २० एकमत्यासर्वांतर्यामि दृष्ट्या (दृढनिश्चयात्मकबुद्ध्योतिवा । ''व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदने''तिस्मृतेः) २१ (हेवत्स) मृग्यापदाब्जयोःपद्धतिर्मार्गोयस्यतमेव आश्रय शरणंव्रज ततो भजस्व ।नअन्यस्मिन्भावोऽभिप्रायोयस्यतस्मिन् । निजधर्मैः (स्ववर्णाश्रमधर्मैः नित्यनैमित्तिकैः) भाविते शोधिते (मनसिअवस्थाप्य) २२ तमेवेत्यनेनसूचितंसर्वोत्तमत्वंप्रपंचयति । नान्यमिति । हस्तेनगृहीतंदी[illegible]पद्मंययातयाश्रिया (अंगहेपुत्र) इतरैर्ब्रह्मादिभि–(–मृग्यमाणयापियोमृग्यते) २३ संजल्पितंसविलापं।तत्।अर्थस्य (पुरुषार्थस्य) आगमः प्राप्तिर्यस्मात्तथाभूतंवचआकर्ण्य(आत्मनानिश्चयात्मिकयाबुद्ध्याआत्मानंमनः) २४ (अकस्मादागतोनारदस्तत्सर्वमस्यमुखात्श्रुत्वाचिकीर्षितंचज्ञात्वा) २५ विस्मितइत्युक्तंतदेवाह । अहोतेजः प्रभावः (यत्यस्मात् समातुः मातुः सपत्न्याः) २६ (अधुनाअस्मिन्वयसीत्यर्थः । मानापमानाभ्यांनस्थातव्यमितिभावः) २७ विकल्पेमानापमानविवेकेसत्यपि (असंतोषस्यहेतवः मोहमृते) भिन्नानसंति किंतुमोहकल्पिताएवतेइत्यर्थः। कुतःयत्सुखंदुःखंवातन्निजकर्मभिरेवमवतियतः२८ उपशमोपदेशेननिवर्तयति। परितुष्येदितिषड्भिः। ईश्वरगतिंवीक्ष्यईश्वरानुकूल्यंविनानोद्यमाः फलहेतवइतिज्ञात्वा। (यावद्दैवेनोपसादितंप्रापितंतावन्मात्रेण) परितुष्येत् (ननुततोधिकंवृथैवेच्छेत्) २९

श्लोकाः १९/२९

आतिष्ठतत्तातविमत्सरस्त्वमुक्तंसमात्राऽपियदव्यलीकम् ॥ आराधयाधोक्षजपादपद्मंयदीच्छसेध्यासनमुत्तमोयथा १९ यस्यांघ्रिपद्मंपरिचर्यविश्वविभावनायात्तगुणाभिपत्तेः ॥ अजोऽध्यतिष्ठत्खलुपारमेष्ठ्यंपदंजितात्मश्वसनाभिवंद्यम् २० तथामनुर्वोभगवान्पितामहोयमेकमत्यापुरुदक्षिणैर्मखैः ॥ इष्ट्वाऽभिपेदेदुरवापमन्यतोभौमंसुखंदिव्यमथापवर्ग्यम् २१ तमेववत्साश्रयभृत्यवत्सलंमुमुक्षुभिर्मृग्यपदाब्जपद्धतिम् ॥ अनन्यभावेनिजधर्मभाविते मनस्यवस्थाप्यभजस्वपूरुषम् २२ नान्यंततःपद्मपलाशलोचनाद्दुःखच्छिदंतेमृगयामिकंचन ॥ योमृग्यतेहस्तगृहीतपद्मयाश्रियेतरैरंगविमृग्यमाणया २३ ॥ ॥ मैत्रेयउवाच ॥ एवंसंजल्पितंमातुराकर्ण्यार्थागमंवचः ॥ संनियम्यात्मनात्मानंनिश्चक्रामपितुःपुरात् २४ नारदस्तदुपाकर्ण्यज्ञात्वा तस्यचिकीर्षितम् ॥ स्पृष्ट्वामूर्द्धन्यघघ्नेनपाणिनाप्राहविस्मितः २५ अहोतेजःक्षत्रियाणांमानभंगममृष्यताम् ॥ बालोऽप्ययंहृदाधत्तेयत्समातुरसद्वचः २६ ॥ ॥ नारदउवाच ॥ नाधुनाप्यवमानंतेसंमानंवापिपुत्रक ॥ लक्षयामःकुमारस्यसक्तस्यक्रीडनादिषु २७ विकल्पेविद्यमानेऽपिनह्यसंतोषहेतवः ॥ पुंसोमोहमृतेभिन्नायल्लोकेनिजकर्मभिः २८ परितुष्येत्ततस्तातताावन्मात्रेणपूरुषः ॥ दैवोपसादितंयावद्वीक्ष्येश्वरगतिंबुधः २९

चूर्णिका

यदिआसनंइच्छसि तर्हिअधोक्षजंआराधय १९ हरेः अन्यं दुःखच्छिदं न जानामि२० २१२२ २३ ॥ ॥ मैत्रेयउवाच ॥ एवंमातुः वचः श्रुत्वापुरात् निर्जगाम २४ नारदः ध्रुवचिकीर्षितंज्ञात्वाएत्य तं पाणिनामूर्धनिस्पृष्ट्वाआह२५ २६ हे पुत्रक अस्मिन् वयसि तेमानापमानौ न स्तः२७ २८ २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३४॥

दुष्करश्च तवायमुद्यमइत्याह अथेतिद्वाभ्याम् । (योगेनउपायेन) यस्यप्रसादंअवरोद्धुंप्राप्तुमिच्छसि । (सभगवान्त्वादृशांपुंसांदुराराध्यः) ३० निःसंगेन (निष्कामेन) तीव्रयोगेनयुक्तेनसमाधिनामृगयंतोपि (बहुभिर्जन्मभिरपि) यस्यपदवींमार्गंनविदुः सदेवोदुराराध्यः ३१ (अतएषतवनिर्बंधः निवर्तताम् । आग्रहस्त्यक्तव्यइत्यर्थः) श्रेयसांकालेवृद्धत्वे ३२ सुखदुःखयोर्मध्ये सुखेसति पुण्यंक्षीयत इति दुःखेसतिपापंक्षीयतइति आत्मानंतोषयन्तमसः (संसारस्यपारं) मोक्षंप्राप्नोति । ३३ किंच । गुणैरधिकात्पुंसइतिल्यब्लोपेपंचमी । तंदृष्ट्वाप्रीतिंकुर्यात् नत्वसूयामित्यर्थः । अनुक्रोशंकृपांलिप्सेत् नतुतिरस्कारं । समानान्मैत्रीं नतुस्पर्धां (तस्मादुत्तमस्य तन्मातुश्चासूयानकर्तव्येत्यर्थः) ३४ (सुखदुःखाभ्यांहतअत्मांतःकरणंयेषांतेषांदर्शितोपितदनधिकारिभिरस्मद्विधैर्दुष्करः) ३५ (घोरं) क्षात्रंस्वभावंप्राप्तवतः अतएवाविनीतस्यदुर्वाक्यबाणैः भिन्नेहृदिनश्रयतेनतिष्ठति ३६ (अस्मत्पित्रादिभिः) अन्यैरनधिष्ठितंत्रिभुवनेउत्कृष्टंपदंजेतुमिच्छोर्मेसाधुवर्त्म मार्गंब्रूहि ३७ अंकजइति पाठेउत्संगाज्जातोयोनारदः सभवान्खलु । तत्रलिंगंतु वीणां वितुदन् वादयन् हितायअटाति । ३८ ।३९ । निश्रेयसस्यअभिप्रेतार्थस्यपंथाः । कोसावित्यतआह भगवान्वासुदेवः अतएव (तत्परेणचेतसा) तंभज ४० (हरेः पादसेवनमेवतत्रैकंकारणं इतरव्यावर्तकं साधनम् ४१ मधुवनाख्यं तटंगच्छ । यत्रमधुवने। ४२ अध्ययनाद्यभावेपिआत्मनउचितानियोग्यानिदेवतानमस्कारादीनिकृत्वेतियमनियमाउक्ताः । आसनकल्पनंचकुशादिभिः स्वस्तिकादिभिश्च ४३

श्लोकाः ३०/४३

अथमात्रोपदिष्टेनयोगेनावरुरुत्ससि ॥ यत्प्रसादंसवैपुंसांदुराराध्योमतोमम ३० मुनयःपदवींयस्यनिःसंगेनोरुजन्मभिः ॥ नविदुर्मृगयंतोपितीव्रयोगसमाधिना ३१ अतोनिवर्ततामेषनिर्बंधस्तवनिष्फलः॥यतिष्यतिभवान्कालेश्रेयसांसमुपस्थिते ३२ यस्ययद्दैवविहितंसतेनसुखदुःखयोः॥आत्मानंतोषयन्देही तमसःपारमृच्छति ३३ गुणाधिकान्मुदंलिप्सेदनुक्रोशंगुणाधमात् ॥ मैत्रींसमानादन्विच्छेन्नतापैरभिभूयते३४ ॥ध्रुवउवाच॥ ॥ सोऽयंशमोभगवतासुखदुःखहतात्मनाम् ॥ दर्शितःकृपयापुंसांदुर्दर्शोऽस्मद्विधैस्तुयः ३५ अथापिमेऽविनीतस्यक्षात्रंघोरमुपेयुषः ॥ सुरुच्यादुर्वचोबाणैर्नभिन्नेश्रयतेहृदि ३६ पदंत्रिभुवनोत्कृष्टंजिगीषोःसाधुवर्त्ममे ॥ ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितम् ३७ नूनंभवान्भगवतोयोंऽगजःपरमेष्ठिनः ॥ वितुदन्नटतेवीणांहितार्थंजगतोऽर्कवत् ३८ ॥ ॥ मैत्रेयउवाच ॥ इत्युदाहृतमाकर्ण्यभगवान्नारदस्तदा ॥ प्रीतःप्रत्याहतंबालंसद्वाक्यमनुकंपया ३९ ॥ नारदउवाच ॥ जनन्याऽभिहितःपंथाःसवैनिःश्रेयसस्यते ॥ भगवान्वासुदेवस्तंभजतत्प्रवणात्मना ४० धर्मार्थकाममोक्षार्थंयइच्छेच्छ्रेयआत्मनः ॥ एकमेवहरेस्तत्रकारणंपादसेवनम् ४१ तत्तातगच्छभद्रंतेयमुनायास्तटंशुचि ॥ पुण्यंमधुवनंयत्रसांनिध्यंनित्यदाहरेः४२ स्नात्वाऽनुसवनंतस्मिन्कालिंद्याःसलिलेशिवे ॥ कृत्वोचितानिनिवसन्नात्मनःकल्पितासनः ४३

चूर्णिका ॥३४॥

मात्रोपदिष्टं कर्तुंइच्छसि तर्हिसः दुराराध्यः ३० अतः निवर्त्यताम् ३१ ३२ यस्ययथादैवंतथाआत्मानं तोषयन् क्षेमंप्राप्नोति ३३ अतः दुरुक्तंमनासिमाकुरु ३४ ॥ ध्रुवउवाच ॥ हेनारद भवदुक्तंसुरुच्यः दुर्वचोबाणैः भिन्नेहृदिनतिष्ठति ३६ त्रिभुवनोत्कृष्टंअन्यैः अनधिष्ठितंपदंइच्छोः ममउपायंब्रूहि ३७ ३८ ३९ ॥ नारदउवाच ॥ तेजनन्यायदुक्तंसएवपंथाः तस्मात् वासुदेवंभज ४० सःमोक्षमापियच्छति ४१ हेतात यमुनायास्तटेमधुवने गत्वा ४२ तत्रयमुनाजलेस्नात्वाआसनंप्रकल्प्य प्राणायामेनमनोमलंहित्वा ४३

आ॰च॰ अ०

टीका ॥८॥

॥३५॥

(त्रिवृतात्रित्वसंख्योपेतेनप्राणायामेन) प्राणेंद्रियमनसां मलं चांचल्यं व्युदस्येति प्राणायामप्रत्याहारौ धारणामाह अभिध्यायेदित्यादिषड्भिः। गुरुणाधीरेणमनसागुरुंश्रीहरिम्। ४४ सुरेषुसुंदरम्। ४५ रमणीयान्यंगानियस्य। ओष्ठश्चईक्षणाचईक्षणं अरुणे ओष्ठेक्षणेधारयतीतितथा। अरुणं ओष्ठंईक्षणं चआधारयतीतिवा। नृम्णंसुखकरं यद्वा नृम्लंधनं सर्वपुरुषार्थनिधिमित्यर्थः शरणंरक्षितारम्४६ पुरुषं पुरुषलक्षणयुक्तम् ४७ कौस्तुभस्य आभरणं ग्रीवायस्य। ४८ (कलापोभूषणं) कांचीकलापेनपर्यस्तंपरिवेष्टितं। मनोनयनयोर्वर्धनं हर्षकरम्। ४९ हृत्पद्मकर्णिकायांधिष्ण्यंमध्यमस्थानंतदाक्रम्यसमर्चतां भक्तानांआत्मनिमनसिस्थितम् ५० ध्यानमाह स्मयमानमिति। (स्मयमानं स्मितशोभिमुखं) नियतेन प्रागुक्तधारणया सुस्थिरेण अत एकभूतेन एकाग्रेण । धारणोक्तानिविशेषणानिध्यानेपि द्रष्टव्यानि। यद्वा यथोक्तमात्रमेव। तदुक्तमेकादशस्कंधे। ''नान्यानिचिंतयेद्भूयः सस्मितंभावयेन्मुखमि''ति ५१ समाधिमाह एवमिति परयानिर्वृत्त्याआनंदेन तूर्णंशीघ्रं संपन्नं सत् ५२ जप्योमंत्रः (प्रपठन् निरंतरं जपन्) ५३ (द्रव्यमयीं द्रव्यप्रधानां सपर्यांपूजाम्) ५४ द्रव्याण्येवाह। सलिलैरिति। (वन्यैर्वनभवैः माल्यैः शिरसिधार्यैः पुष्पैः) शस्तैः (अंकुरैः) दूर्वांकुरैः अंशुकैर्वन्यैरेवभूर्जत्वगादिभिः (पूजयेत्) ५५ अधिष्ठानमाह! द्रव्यमयीं शिलादिनिर्मितां अर्चांप्रतिमां (क्षितौअंबुनिआदिना सूर्यमंडले अग्नौ हृदिवा) पूजासाद्गुण्यहेतूनाह। सार्धाभ्याम् आभृतात्मा धृतचित्तः । मितंवन्यं फलमूलादिभुंक्तेइतितथा ५६ (निजमाययाचिच्छक्त्यायेस्वेच्छावतारास्तच्चरितैःकंसवधादिभिः) यत्करिष्यति (चरित्रंतद्ध्यायेत्।) करिष्यतीतितदानीमवतारप्राचुर्याभावात् लट् ५७

श्लोकाः ४४/५७

प्राणायामेनत्रिवृताप्राणेंद्रियमनोमलम् ॥ शनैर्व्युदस्याभिध्यायेन्मनसागुरुणागुरुम् ४४ प्रसादाऽभिमुखंशश्वत्प्रसन्नवदनेक्षणम् ॥ सुनासंसुभ्रुवंचारुकपोलंसुरसुंदरम् ४५ तरुणंरमणीयांगमरुणोष्ठेक्षणाधरम् ॥ प्रणताश्रयणंनृम्णंशरण्यंकरुणार्णवम् ४६ श्रीवत्सांकंघनश्यामंपुरुषंवनमालिनम् ॥ शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजम् ४७ किरीटिनंकुंडलिनंकेयूरवलयान्वितम् ॥ कौस्तुभाभरणग्रीवंपीतकौशेयवाससम् ४८ कांचीकलापपर्यस्तंलसत्कांचननूपुरम् ॥ दर्शनीयतमंशांतंमनोनयनवर्धनम् ४९ पद्भ्यांनखमणिश्रेण्याविलसद्भ्यांसमर्चताम् ॥ हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितम् ५० स्मयमानमभिध्यायेत्सानुरागावलोकनम् ॥ नियतेनैकभूतेनमनसावरदर्षभम् ५१ एवंभगवतोरूपंसुभद्रंध्यायतोमनः ॥ निर्वृत्त्यापरयातूर्णंसंपन्नंनिवर्त्तते ५२ जप्यश्चपरमोगुह्यःश्रूयतांमेनृपात्मज ॥ यंसप्तरात्रंप्रपठन्पुमान्पश्यतिखेचरान् ५३॥ ॐनमोभगवतेवासुदेवाय ॥ मंत्रेणानेनदेवस्यकुर्याद्द्रव्यमयींबुधः ॥ सपर्यांविविधैर्द्रव्यैर्देशकालविभागवित् ५४ सलिलैःशुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः ॥ शस्तांकुरांशुकैश्चार्चेत्तुलस्याप्रिययाप्रभुम् ५५ लब्ध्वाद्रव्यमयीमर्चांक्षित्यंब्वादिषुवार्चयेत् ॥ आभृतात्मामुनिःशांतोयतवाङ्मितवन्यभुक् ५६ स्वेच्छावतारचरितैरचिंत्यनिजमायया ॥ करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमम् ५७

॥३५॥

चूर्णिका ४४ ४५ ४६ ४७ ४८ ४९ किरीटिनंकुंडलिनं चतुर्भुजं मनसि स्थितम् ५० स्मयमानंहार्दिमनसा ध्यायेत् ५१ ५२ किंच ॐनमोभगवतेवासुदेवायेति मंत्रंजपेत् यः प्रपठन् पुमान् सप्तरात्रात् खेचरान्पश्यति ५३ अनेनमंत्रेणवन्यैर्माल्यफलादिभिः हरेः पूजांकुर्यात् ५४ ५५ ५६ ५७

१नृम्लंमति लिखितपुस्तके पाठः

CC-0. In Public Domain. Digitization by eGangotri

(याः परिचर्याः) पूर्वंसेविताः पूर्वंसेवनंकारिताः कर्तव्यतयाविहिताइत्यर्थः ।(ताः मंत्रमूर्तयेवासुदेवाय) मंत्रहृदयेनद्वादशाक्षरेण (प्रयुंज्यात्कल्पयेत्) । ५८ एवमुक्तरीत्यामनोगतं (चित्तैकाग्र्ययुक्तं) यथाभवतितथाकायादिभिर्भक्तिमत्यापरिचर्ययासेवयापरिचर्यमाणोभगवान् अमायिनांनिष्कपटानांपुंसांधर्मार्थकामेषुयदभिमतंतत्श्रेयोदिशतीतिद्वयोरन्वयः।५९।६०। इंद्रियरतोविषयभोगोविरक्तः सन्(चनिरंतरभावेनअखंडितभावनायुक्तेनभूयसाभक्तियोगेनतं) भजेत । किमर्थं विमुक्तये ६१ (तंनारदंप्रदक्षिणीकृत्य) हरेश्चरणाभ्यांचर्चितंमंडितम्।६२ (तस्मिन्ध्रुवे ।राज्ञाउत्तानपादेन) अर्हितंसत्कृत्यसमर्पितंअर्हणमर्घ्यादियस्मै । ६३ । (कामोधर्मोवाअर्थोवा) किंवानरिष्यतेननश्यतीतिसवितर्कः प्रश्नः । (नष्टःकिमित्यर्थः) ६४ (अकरुणआत्मामनोयस्यतेनस्त्रीजितेनबालकोपिमहान्कविर्विचक्षणः) मात्रासहनिर्वासितः निष्कासितः मात्रेत्युक्तिः तस्याअप्यनादृतत्वात् ६५ मास्मादंति । किंस्विन्नखादंतीत्यर्थः । ६६ (योहमारुरुक्षंतंआरोढुमिच्छंतंसुतम्) ६७ देवगुप्तंहरिणारक्षितं (अतः मामाशुचः तद्विषयंशोकंमाकार्षीः यस्ययशो) जगत्प्रावृंक्तेव्याप्नोति ६८ । (लोकपालैरपिकर्तुमशक्यं ।) विपुलयन्विस्तारयन् ६९ ७०

श्लोकाः ५८/७०

परिचर्याभगवतोयावत्यःपूर्वसेविताः ॥ तामंत्रहृदयेनैवप्रयुंज्यान्मंत्रमूर्त्तये ५८ एवंकायेनमनसावचसाचमनोगतम् ॥ परिचर्यमाणोभगवान्भक्तिमत्परिचर्यया ५९ पुंसाममायिनांसम्यग्भजतांभाववर्धनः ॥ श्रेयोदिशत्यभिमतंयद्धर्मादिषुदेहिनाम् ६० विरक्तश्चेंद्रियरतौभक्तियोगेनभूयसा ॥ तंनिरंतरभावेनभजेताद्धाविमुक्तये ६१ इत्युक्तस्तंपरिक्रम्यप्रणम्यचनृपार्भकः ॥ ययौमधुवनंपुण्यंहरेश्चरणचर्चितम् ६२ तपोवनंगतेतस्मिन्प्रविष्टोंऽतःपुरंमुनिः ॥ अर्हितार्हणकोराज्ञासुखासीनउवाचतम् ६३ ॥ ॥नारदउवाच॥ ॥ राजन्किंध्यायसेदीर्घंमुखेनपरिशुष्यता ॥ किंवानरिष्यतेकामोधर्मोवाऽर्थेनसंयुतः ६४ ॥ ॥ राजोवाच ॥ ॥ सुतोमेबालकोब्रह्मन्स्त्रैणेनाकरुणात्मना ॥ निर्वासितःपंचवर्षःसहमात्रामहान्कविः ६५ अप्यनाथंवनेब्रह्मन्मास्मादंत्यर्भकंवृकाः ॥ श्रांतंशयानंक्षुधितंपरिम्लानमुखांबुजम् ६६ अहोमेबतदौरात्म्यंस्त्रीजितस्योपधारय ॥ योऽंकंप्रेम्णाऽऽरुरुक्षंतंनाभ्यनंदमसत्तमः ६७ ॥ ॥ नारदउवाच ॥ ॥ मामाशुचःस्वतनयंदेवगुप्तंविशांपते ॥ तत्प्रभावमविज्ञायप्रावृंक्तेयद्यशोजगत् ६८ सुदुष्करंकर्मकृत्वालोकपालैरपिप्रभुः ॥ एष्यत्यचिरतोराजन्यशोविपुलयंस्तव६९॥ ॥ मैत्रेयउवाच ॥ ॥ इतिदेवर्षिणाप्रोक्तंविश्रुत्यजगतीपतिः ॥ राजलक्ष्मीमनादृत्यपुत्रमेवान्वचिंतयत् ७०

चूर्णिका

५८ ५९ एवंकायमनोवचोभिः पूजितो भगवान् पुंसां अभीष्टं श्रेयोदिशति ६० ६१ इत्युक्तः सन्ध्रुवः तं प्रणम्य मधुवनं ययौ ६२ नारदःउत्तानपादं एत्यपुत्रशोकातुरं ॥ राजानं उवाच ॥ ॥ ६३ हेराजन् किंचिंतयासि ॥ ६४ ॥ राजोवाच ॥ ॥ हेब्रह्मन् मया पचंवर्षसुतः मात्रासह्वानिर्वासितः ६५ तंवनेश्रांतंक्षुधितंशयानंवृकादयः किंनखादंति ६६ अहोस्त्रीजितस्यमेदौरात्म्यंपश्य पश्य प्रेम्णाअंकंआरुरुक्षंतंनाभ्यनंदम् ६७ ॥ ॥नारदउवाच ॥ ॥ हेराजन् माशुचः ६८ तवपुत्रः देवैरपि कर्तुमशक्यंकर्मकृत्वाअचिरंएष्यति ६९ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिदेवर्षिणोक्तंश्रुत्वापुत्रमेवअन्वचिंतयत् ७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ध्रुवोमधुवनेकिमकरोदित्यपेक्षायामाह । तत्रेत्यादिना । अभिषिक्तः स्नातः (प्रयतः शुद्धः रागादिरहितइत्यर्थः) यस्यांप्राप्तस्तांरात्रिं (समाहितः एकाग्रचित्तः । ऋष्यादेशेननारदोक्तप्रकारेण) ७१ कपित्थानिबदराणिचअशनंयस्य । (यावता) आत्मवृत्तिः देहस्थितिस्तदनुसारेण ७२ (शीर्णैः पतितैः कृतान्नो हरिंपूजयन्मासंनिन्ये) ७३ तृतीयंचआनयन्ईषदिवनयन् (अब्भक्षः जलाहारः) उपाधावत् (उपास्तेस्मे-)–त्यन्वयः ।प्रतिमासंआहारसंकोचं तपोतिरेकंच कृतवानित्यर्थः ७४ (चतुर्थमप्यानयन्देवंध्यायन्अधारयत्) ७५ (ब्रह्मध्यायन्एकेनपदातस्थौअचलः स्थिरः) ७६ भूतानि शब्दादीनिइंद्रियाणिचआशेरतेयस्मिन्तन्मनो (हृदि) आकृष्यभगवतोरूपंब्रह्मध्यायन् ७७ (महदादीनामाधारंप्रधानपुरुषयोर्नियंतृब्रह्म) धारयमाणस्यसतः तस्यतेजः सोढुमशक्नुवंतः संतःचकंपिरे कंपिताः ७८ तस्यांगुष्ठेन निपीडिता आक्रांता सतीमहीतत्रतदाअर्धननाम । समेंशकेअर्धशब्दस्यनपुंसकत्वादंशांशिनोरभेदाच्चैवंसामानाधिकरण्यम् । इभेंद्रेणाधिष्ठितातरीनौर्यथापदेपदेसव्यतोदक्षिणतश्चनमति तद्वत् ७९अन्यदप्याश्चर्यमाह।तस्मिन् ध्रुवेविश्वंविश्वात्मकं विष्णुं आत्मनःसकाशात्अनन्ययाधिया आत्माभेददृष्ट्याअभिध्यायति सति किंकृत्वा असुं प्राणंतद्वारंच निरुध्य।लोकानिरुच्छ्वासनिपीडिता विश्वरूपं विष्णुंआत्मन्येकीकृत्यस्वप्राणनिरोधेकृते विश्वस्यापिप्राणनिरोधोजातः (सोभ्यासबलादनेनसुसहोपि लोकैर्दुःसहइतिभावः) ८० एवं (चरस्थिररूपस्य अखिलसत्त्वधाम्नः सर्वप्राणिशरीरस्य) प्राणनिरोधं कदाचिदपिनाविद्मः । इदानीमाश्चर्यमिदं । तत्तस्माद्वृजिनात् । क्लेशात् ८१ यतो बालात् कोसौ बालः कथंचतस्मात्प्राणनिरोधइत्यत आह ।(औत्तानपादिः) उत्तानपादस्य पुत्रोमयिविश्वरूपेसंगतात्माऐक्यंप्राप्तोवर्ततेइति ८२ इतिचतुर्थेस्कंधेटीकायामष्टमोऽध्यायः ८ ॥

श्लोकाः ७१–८२

तत्राभिषिक्तःप्रयतस्तामुपोष्यविभावरीम् ॥ समाहितःपर्यचरदृष्यादेशेनपूरुषम् ७१ त्रिरात्रांतेत्रिरात्रांतेकपित्थबदराशनः ॥ आत्मवृत्त्यनुसारेणमासंनिन्येऽर्चयन्हरिम् ७२ द्वितीयंचतथामासंषष्ठेषष्ठेऽर्भकोदिने ॥ तृणपर्णादिभिः शीर्णैःकृतान्नोऽभ्यर्चयद्विभुम् ७३ तृतीयंचानयन्मासंनवमेनवमेऽहनि ॥ अब्भक्षउत्तमश्लोकमुपाधावत्समाधिना७४चतुर्थमपिवैमासंद्वादशेद्वादशेऽहनि॥वायुभक्षोजितश्वासोध्यायन्देवमधारयत् ७५पंचमेमास्यनुप्राप्तेजितश्वासोनृपात्मजः ॥ ध्यायन्ब्रह्मपदैकेनतस्थौस्थाणुरिवाचलः ७६ सर्वतोमनआकृष्यहृदिभूतेंद्रियाशयम् ॥ध्यायन्भगवतोरूपंनाद्राक्षीत्किंचनापरम् ७७आधारंमहदादीनांप्रधानपुरुषेश्वरम्॥ब्रह्मधारयमाणस्यत्रयोलोकाश्चकंपिरे ७८ यदैकपादेनसपार्थिवार्भकस्तस्थौतदंगुष्ठनिपीडितामही ॥ ननामतत्रार्धमिभेंद्रधिष्ठितातरीवसव्यतरतःपदेपदे ७९ तस्मिन्नभिध्यायतिविश्वमात्मनोद्वारंनिरुध्यासुमनन्ययाधिया ॥ लोकानिरुच्छ्वासनिपीडिताभृशंसलोकपालाःशरणंययुर्हरिम् ८० ॥ ॥ देवाऊचुः ॥ नैवंविदामोभगवन्प्राणरोधंचराचरस्याखिलसत्त्वधाम्नः ॥ विधेहितन्नोवृजिनाद्विमोक्षंप्राप्तावयंत्वांशरणंशरण्यम् ८१ ॥ ॥श्रीभगवानुवाच ॥ ॥ मामैष्टबालंतपसोदुरत्ययान्निवर्तयिष्येप्रतियातस्वधाम ॥ यतोहिवःप्राणनिरोधआसीदौत्तानपादिर्मयिसंगतात्मा ८२ इ० श्रीभा० चतुर्थस्कंधेध्रुवचरिते अष्टमोऽध्यायः ॥ ८ ॥ ॥

चूर्णिका ततःध्रुवः मधुवनंगत्वानारदोक्तमंत्रेणहरिं अर्चयन् ७१ त्रिरात्रांते त्रिरात्रांते कपित्थबदराशनः एवंएकंमासंनिन्ये ७२ द्वितीयं षष्ठेदिने तृणपर्णादिभिः ७३ तृतीयं नवमे अहनिअब्भक्षः ७५ चतुर्थेद्वादशे अन्हिवायुभक्षः ७५ पंचमे एकपादेनास्थितः ७६ ७७ ब्रह्मधारयामास तदापृथ्वीननाम ७८ ७९ ८० तस्यश्वासनिरोधेनविश्वस्यप्राणनिरोधोजातः तदासर्वेदेवाद्याः भीताः संतः हरिंशरणंययुः ८१ ॥ ॥ श्रीभगवानुवाच ॥ ॥ हेदेवाः माभैष्टयस्मात् वः प्राणनिरोधोजातः तंबालंतपसः निवर्तयिष्ये यूयंस्वस्थानंयात ८२ ॥ ॥ इतिचतुर्थेअष्टमः ८ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

नवमेतुहरिंस्तुत्वा लब्ध्वा तस्माद्वरान्ध्रुवः। प्रत्यागत्याकरोद्राज्यं पित्रादत्तमितीर्यते ॥१॥ एवंभगवद्वाक्येन गतभयाः (सहस्रशीर्षाभगवानापितदनंमधुवनंतरंतरंप्रतिगतः गरुत्मतागरुडमारुह्येत्यर्थः) १ सवैध्रुवः योगविपाकेन योगस्यदाढर्येन निश्चलया धिया गरुडाधिरूढं पुरतःस्थितमपियदाअंतर्दृष्टित्वादसौ नापश्यत् तदा भगवतैवांतःस्वरूपमाकृष्टं अतस्तिरोहितं (सहसा) उपलक्ष्यव्युत्थितःसन्तदवस्थमेवयादृगंतः स्फुरितस्तादृशमेव २ आगतसाध्वसः जातसंभ्रमः विनमय्य आनतंकृत्वा । संभ्रममेवाह । दृग्भ्यांप्रपिबन्निव (सादरं) पश्यन्नवंदत आस्येनचुंबन्निवावंदत । भुजाभ्यामाश्लिषन्निवावंदतेत्यर्थः ३॥विवक्षंतंतद्गुणान्वक्तुमिच्छंतंअतद्विदंस्तुत्यादिकर्तुमजानंतं अस्यसर्वस्यध्रुवस्यचहृद्यवस्थितत्वात्ज्ञात्वाब्रह्ममयेनवेदात्मकेनशंखेन (बालंकपोलेस्पृष्टवान्)। ४ (तदैवशंखद्वारा) भगवताप्रतिपादितांगिरं प्रतिपद्येतिशेषः। प्रतिपद्यतामितिपाठेतांवेदात्मिकाम्।परिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयोयेनसः । अतएवभक्त्याभावः प्रेमायस्य । असत्वरंस्थैर्येण। परितः श्रुतंविख्यातंउरुश्रवःकीर्तिर्यस्यतं ध्रुवाक्षितिः स्थानंयस्येतिभाविनिर्देशः ५॥ ईशानुग्रहसंप्राप्तवागाद्यद्भुतवृत्तिभिः। द्वादशादित्यसंकाशैः श्लोकैरस्तौद्धरिंध्रुवः ॥ योममप्रसुप्तांलीनांवाचं अन्यां(-श्चहस्तादीन्प्राणान्इंद्रियाणि) स्वधाम्नाचिच्छक्त्यासंजीवयति यतः अखिलाश्चक्षुरादिज्ञानक्रियाशक्तीः धारयतीतितथापुरुषायअंतर्यामिणे ६ ननुवागादींद्रियशक्तिधरावह्न्यादयः प्रसिद्धा नाहमित्यत आहएकइति । (हेभगवन् इदंमहदादिआत्मशक्त्याउरवोरजआद्यागुणायस्यास्तयासृष्ट्वा) अनुविश्यपुरुषोअंतर्यामीत्वमेकएवतस्यामायायाअसत्सुगुणेष्विंद्रियादिषुस्थितःसन्तत्तद्देवतारूपोनानेवभासि (मायागुणानांनानात्वात्तदधिष्ठातरित्वयिनानात्वंऔपचारिकंभासते) अतस्त्वद्व्यतिरेकेणज्ञानक्रियाशक्तिधरोनकश्चिदस्तीत्यर्थः । ७ अपिचाकिंवक्तव्यंवह्न्यादयोज्ञानादिशक्तिधरानभवंतीति । यस्माद्ब्रह्मणोपिज्ञानंत्वदधीनमेवेत्याह । त्वद्दत्तयावयुनयाज्ञानेनभवंतंशरणंप्रपन्नोब्रह्माइदंविश्वंअचष्ट अपश्यत्। कथं सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति। तद्वत् । अतआपवर्ग्यामुक्तास्तेषामपिशरणं (आश्रयं) कृतविदासर्वेंद्रियजीवनेनत्वत्कृतमुपकारंजानताकथंविस्मर्यतेएवंभूतंत्वामभजंतः कृतघ्नाइत्यर्थः ८

श्लोकाः १/८

॥ मैत्रेयउवाच ॥ ॥ तएवमुत्सन्नभयाउरुक्रमेकृतावनामाःप्रययुस्त्रिविष्टपम् ॥ सहस्रशीर्षापिततोगरुत्मतामधोर्वनंभृत्यदिदृक्षयागतः १ सवैधियायोगविपाकतीव्रयाहृत्पद्मकोशेस्फुरितंतडित्प्रभम् ॥ तिरोहितंसहसैवोपलक्ष्यबहिःस्थितंतदवस्थंददर्श २ तद्दर्शनेनागतसाध्वसःक्षितावबंदतांगंविनमय्यदंडवत् ॥ दृग्भ्यांप्रपश्यन्प्रपिबन्निवार्भकश्चुंबन्निवास्येनभुजैरिवाश्लिषन् ३ सतंविवक्षंतमतद्विदंहरिर्ज्ञात्वास्यसर्वस्यचहृद्यवस्थितः ॥ कृतांजलिंब्रह्ममयेनकंबुनापस्पर्शबालंकृपयाकपोले ४ सवैतदैवप्रतिपादितांगिरंदैवींपरिज्ञातपरात्मनिर्णयः ॥ तंभक्तिभावोऽभ्यगृणादसत्वरंपरिश्रुतोरुश्रवसंध्रुवक्षितिः ५ ॥ ॥ ध्रुवउवाच ॥ ॥ योऽतःप्रविश्यममवाचमिमांप्रसुप्तांसंजीवयत्यखिलशक्तिधरःस्वधाम्ना ॥ अन्यांश्चहस्तचरणश्रवणत्वगादीन्प्राणान्नमोभगवतेपुरुषायतुभ्यम् ६ एकस्त्वमेवभगवन्निदमात्मशक्त्यामायाख्ययोरुगुणयामहदाद्यशेषम् ॥ सृष्ट्वाऽनुविश्यपुरुषस्तदसद्गुणेषुनानेवदारुषुविभावसुवद्विभासि ७ त्वद्दत्तयावयुनयेदमचष्टविश्वंसुप्तप्रबुद्धइवनाथभवत्प्रपन्नः ॥ तस्याऽपवर्ग्यशरणंतवपादमूलंविस्मर्यतेऽकृतविदाकथमार्तबंधो ८

चूर्णिका

॥ मैत्रेयउवाच ॥ देवाःभगवद्वाक्यात् निर्भयाः भूत्वा स्वर्गंययुः हारिरापिगरुडारूढःसन् मधुवनं ययौ ध्रुवः हृत्स्थंहरिंतिरोहितंआलक्ष्यवहिःस्थितंदृष्ट्वा १ २ दंडवत् ननाम ३ हरिः ध्रुवकपोलेशंखेनपस्पर्श ४ ध्रुवःस्पर्शमात्रेणउत्पन्नज्ञानःतंअस्तौत् ॥५॥ ध्रुवउवाच ॥ यःत्वंअंतःप्रविश्य मम सुप्तां वाचं अन्यांश्च इंद्रियादीन् संजीवयसि तस्मैतुभ्यंनमः ६ ७ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. येचमादृशाः कामाद्यर्थंभजंतितेपिमूढा इत्याह । नूनमिति। भवाप्ययौजन्ममरणेतद्विमोक्षे हेतुंत्वां अन्यहेतोः कामाद्यर्थंये भजंति ते नूनंविमुष्टमतयः वंचितचित्ताः यतस्तेकल्पकतरुं(कल्पवृक्षं) त्वामर्चंति अ०
ततः कुणपतुल्येनशवतुल्येनदेहेनोपभोग्यंसुखमिच्छंति नचेच्छायोग्यंतदित्याह । यत्स्पर्शजंविषयसंबंधजन्यंसुखंतन्नरकेपि (इच्छामंतरेणापि) भवति ९ननुस्वर्गादिसुखंसकामैः प्राप्यते निष्कामभजने
टीका तुतन्नस्यादित्यतआह । येति। (निर्वृतिःसुखं) स्वमहिमनिनिजानंदरूपेपिमाभूत्नभवतीत्यर्थः । अंतकस्यअसिनाशस्त्ररूपेणकालेनलुलितात्खंडितात्विमानात्पततांसानास्तीतिकिमुवक्तव्यम्१० अतः तेक ॥९॥
थाश्रवणायसत्संगंतिदेहीत्याह । भक्तिंत्वयिप्रवहतांसातत्येनकुर्वतां ननु मोक्षंकिंनयाचसेअतआह । येनमहत्प्रसंगेनअंजसाअयत्नतएवउरूणिव्यसनानि (दुःखानि) यस्मिन् (उल्बणंभयंकरंभवस
मुद्रं) नेष्ये तत्पारंगमिष्यामि (तरिष्यामीत्यर्थः ।) भवद्गुणकथैवअमृतंतस्यपानेनमत्तः सन् ११ कथामृतपानस्यमादकत्वमाह । तेअतितरांप्रियमपिमर्त्यंदेहंनस्मरंति नानुसंदधते । येचसुतादयःअदः
॥३९॥ मर्त्यमनुसंबद्धाः । तानपि । केतेनस्मरंति (हेईशहेपद्मनाभ) येकृतप्रसंगाः केषु। भवदीयपदारविंदसौगंध्येलुब्धंहृदयंयेषांतेषु । तुशब्देनअन्येषांकेवलयागादिनिष्ठानांदेहाद्यभिमानानिवृत्तिंदर्शयति । १२
नन्वेवंविद्वानपित्वंकिमित्यभिमानंवहसीत्यतआह। तिर्यगिति। तिर्यङ्नगपक्षिसर्पादिभिः परिचितंव्याप्तंसंतोअसंतश्चविशेषायस्य । (यद्वा सच्छब्देनपृथिव्यप्तेजांसिअसच्छब्देनवाय्वाकाशौविशेषायत्र।)
महदादीनिअनेकानिकारणानियस्यहेपरमहेअजतेइदंस्थविष्ठंविराड्रूपंकेवलंवेद्मि अतःपरंईश्वरस्वरूपंनवेद्मि ।यत्रवादः शब्दव्यापारोनास्तितद्ब्रह्मस्वरूपंचनवेद्मि । अतोऽभिमानोननिवर्ततेइतिभावः।१३
तदैवभगवदनुकंपयातद्रूपद्वयंचज्ञात्वाईश्वररूपमनुवर्णयन्नमस्करोति । कल्पांतइति । एतत्त्रैलोक्यं (उदरेणगृह्णन्) यः पुमान्शेते । स्वस्मिन्नेवदृक्नबहिर्यस्ययोगानिद्रारूढत्वात् । अनंतसखःशेषसहायः
तदंकेशेषोत्संगे यस्यनाभिरेवासिंधुः समुद्रः तस्मिन्रोहतीतितथातस्यकांचनलोकपद्मस्याहिरण्मयलोकरूपकमलस्यगर्भेकर्णिकायांद्युमान्तेजस्वीब्रह्माभवतितंप्रणतोस्मीत्यर्थः १४ । ननु ममापिस्वापाद्य
वस्थावत्त्वेकोजीवाद्विशेषइत्यतआह । त्वंतुव्यतिरिक्तः जीवविलक्षणः आस्सेतिष्ठसि। वैलक्षण्यमेवाह । त्वंनित्यमुक्तः जीवस्तुत्वत्प्रसादान्मुच्यते । त्वंपरिशुद्धः सतुमलिनः । त्वंविबुद्धः सत्वज्ञः
त्वमात्मासतुजडः (यत-)– स्त्वंकूटस्थः सतुविकारी । त्वमादिपुरुषः सत्त्वादिमान् । त्वंतुभगवान् सतु भगहीनःत्वंत्रयाणांगुणानामधीशः । सतुपरतंत्रः। कुतएतद्वैलक्षण्यं । यद्यतः बुद्ध्यवस्थितिंबु
द्धेस्तांतामवस्थांअखंडितयास्वदृष्ट्याचिच्छक्त्याद्रष्टापश्यसिद्रष्टेतितृन्प्रत्ययांतः शब्दः । अतोबुद्ध्यवस्थितिमितिषष्ठ्यभावः । तथाभूतएवत्वंस्थितौपालनेअधिमखः यज्ञाधिष्ठाताश्रीविष्णुः । १५

नूनंविमुष्टमतयस्तवमाययातेयेत्वांभवाप्ययविमोक्षणमन्यहेतोः॥अर्चंतिकल्पकतरुंकुणपोपभोग्यमिच्छंतियत्स्पर्शजंनिरयेपिनृणाम् ९ यानिर्वृतिस्तनुभृतां श्लोकाः
तवपादपद्मध्यानाद्भवज्जनकथाश्रवणेनवास्यात् ॥ साब्रह्मणिस्वमहिमन्यपिनाथमाभूत्किंत्वंतकासिलुलितात्पततांविमानात् १०भक्तिंमुहुःप्रवहतांत्वयिमे
प्रसंगोभूयादनंतमहताममलाशयानाम् ॥ येनांजसोल्बणमुरुव्यसनंभवाब्धिंनेष्येभवद्गुणकथामृतपानमत्तः ११ तेनस्मरंत्यतितरांप्रियमीशमर्त्यं ९/१५
येचान्वदःसुतसुहृद्गृहवित्तदाराः ॥ येत्वब्जनाभभवदीयपदारविंदसौगंध्यलुब्धहृदयेषुकृतप्रसंगाः १२ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिःपरिचितं
सदसद्विशेषम् ॥ रूपंस्थविष्ठमजतेमहदाद्यनेकंनातःपरंपरमवेद्मिनयत्रवादः १३ कल्पांतएतदखिलंजठरेणगृह्णञ्छेतेपुमान्स्वदृगनंतसखस्तदंके ॥ यन्ना
भिसिंधुरुहकांचनलोकपद्मगर्भेद्युमान्भगवतेप्रणतोस्मितस्मै १४ त्वंनित्यमुक्तपरिशुद्धविबुद्धआत्माकूटस्थआदिपुरुषोभगवांस्त्र्यधीशः ॥ यद्बुद्ध्यवस्थिति ॥३९॥
मखंडितयास्वदृष्ट्याद्रष्टास्थितावधिमखोव्यतिरिक्तआस्से १५

चूर्णिका ९ १० हेहरे तव भक्तिंकुर्वतां सतां प्रसंगः भूयात् येन भवाब्धितरिष्ये ११ १२ १३ १४ १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ च॰ तमेव ब्रह्मरूपेण ज्ञातंनमस्करोति । यस्मिन्निति । पतंति अकस्माद्गुद्भवंति । (विरुद्धगतयोविरुद्धविषयाः) विश्वस्य भवोजन्मयस्मात् । एकमखंडंआद्यंअनादि १६ सकामभजनादपिमोक्षमाशासानआह । अ०
हेभंगवन्पुरुषार्थः परमानंदः सएवमूर्तिर्यस्यतस्यतवपादपद्मंआशिषोराज्यादेःसकाशात् सत्याआशीः परमार्थफलंहिनिश्चितम् । कस्य । तथातेनप्रकारेणत्वमेवपुरुषार्थः इत्येवंनिष्कामतयाअन्वनुभजतः
टीका यद्यप्येवंतथापि हेआर्य स्वामिन् दीनान्सकामानप्यस्मान्भवान्परिपातिसंसारभयाद्रक्षत्येव । यतः अनुग्रहेहिताचरणेकातरः परवशः यथा वाश्रा नवप्रसूताधेनुः वत्संक्षीरंपाययतिवृकादिभ्योरक्षतिच ।
(वाश्रानवप्रसूतागौरित्यभिधानं।अल्पोवत्सोवत्सकस्तं) १७(सत्संकल्पेनसत्यसंकल्पेनध्रुवेणएवंस्तुतइदमब्रवीत् ।) १८ व्यवसितंसंकल्पितम् १९ तत्प्रयच्छामीत्युक्तेकिंतदित्यपेक्षायामाह । नान्यैरि ॥९॥
तिसार्धाभ्यां हेभद्र ध्रुवाक्षितिर्निवासोयस्मिन् (ग्रहनक्षत्रादिरूपाणांज्योतिषां) आहितमर्पितम् २० (कथमाहितंतदाह । मेढ्यां) धान्याक्रमणायभ्राम्यमाणानांपशूनांबंधनस्तंभोमेढीतस्यांबलीवर्दसमूहवत् ।
॥४०॥ अवांतरकल्पवासिनांपरस्तादपिस्थास्तु । लोकत्रयनाशेप्यनश्वरं । धर्माग्न्यादयोनक्षत्ररूपाः वनौकसः सप्तर्षयः तत्प्रदक्षिणीकृत्यचरंति । २१ एतच्चराज्यानंतरंभविष्यतीत्याह प्रस्थितइति तुभ्यंपृथ्वीं
दत्त्वावनंप्रस्थितेभावेक्तः वनंप्रतिदीर्घगमनेकृतेसतिधर्मसंश्रयः राजधर्मंसमाश्रयन्नित्यर्थः । अव्याहतानिअविरुद्धार्थसेवीनिइंद्रियाणियस्य गां रक्षिता रक्षिष्यति २२ त्वयाअसंकल्पितमद्भक्तस्यतव
(अत्युत्कटद्रोहलक्षणात्कर्मणः) एवंभविष्यतीतिदर्शयति । त्वद्भातरीति (मृगयायांनष्टेसतितस्मिन्मनोयस्याः) सा (तन्माता) सुरुचिः (वनमन्वेषतीमार्गमाणा) वनवह्निंप्रवेक्ष्यति २३ किंच । त्वं
इष्ट्वामांयज्ञोहृदयंप्रियामूर्तिर्यस्यतं । २४ यतः स्थानात् २५ अतिदिश्यदत्त्वा (स्वंधामतस्यपश्यतः सतः गतवान्) २६

यस्मिन्विरुद्धगतयोह्यनिशंपतंतिविद्यादयोविविधशक्तयआनुपूर्व्यात् ॥ तद्ब्रह्मविश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहंप्रपद्ये १६ सत्याशिषोहिभग श्लोकाः
वंस्तवपादपद्ममाशीस्तथानुभजतःपुरुषार्थमूर्तेः ॥ अप्येवमार्यभगवान्परिपातिदीनान्वाश्रेववत्सकमनुग्रहकातरोऽस्मान् १७ ॥ ॥ मैत्रेयउवाच ॥ ॥
अथाभिष्टुतएवंवैसत्संकल्पेनधीमता ॥ भृत्यानुरक्तोभगवान्प्रतिनंद्येदमब्रवीत् १८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ वेदाहंतेव्यवसितंहृदिराजन्यबालक ॥
तत्प्रयच्छामिभद्रंतेदुरापमपिसुव्रत १९ नान्यैरधिष्ठितंभद्रयद्भ्राजिष्णुध्रुवक्षिति ॥ यत्रग्रहर्क्षताराणांज्योतिषांचक्रमाहितम् २० मेढ्यांगोचक्रवत्स्थास्नुपर १६/२६
स्तात्कल्पवासिनाम् ॥ धर्मोग्निःकश्यपःशक्रोमुनयोयेवनौकसः ॥ चरंतिदक्षिणीकृत्यभ्रमंतोयत्सतारकाः २१ प्रस्थितेतुवनंपित्रादत्त्वागांधर्मसंश्रयः ॥
षट्त्रिंशद्वर्षसाहस्रंरक्षिताऽव्याहतेंद्रियः २२ त्वद्भ्रातर्युत्तमेनष्टेमृगयायांतुतन्मनाः ॥ अन्वेषंतीवनंमातादावाग्निंसाप्रवेक्ष्यति २३ इष्ट्वामांयज्ञहृदयंयज्ञैः
पुष्कलदक्षिणैः ॥ भुक्त्वाचेहाशिषःसत्याअंतेमांसंस्मरिष्यसि २४ ततोगंतासिमत्स्थानंसर्वलोकनमस्कृतम् ॥ उपरिष्टादृषिभ्यस्त्वंयतोनावर्ततेगतः
२५ ॥ ॥ मैत्रेयउवाच ॥ ॥ इत्यर्चितःसभगवानतिदिश्यात्मनःपदम् ॥ बालस्यपश्यतोधामस्वमगाद्गरुडध्वजः २६

चूर्णिका १६ १७ ॥ मैत्रेय उवाच॥ एवंस्वस्तवं श्रुत्वा भगवानुवाच॥ १८ हेध्रुवतवेच्छां अहं वेद्मि तत् प्रयच्छामि १९ यत्र ग्रहर्क्षताराणां चक्रम् २० मेढ्यांगोसमूहवत् बद्धम् यत्र ॥४०॥
चधर्माग्निकश्यपादयः प्रदक्षिणं चरंति तत्ध्रुवपदंतेअस्तु २१ तुभ्यंपृथ्वीं दत्त्वा तवपितरिवनंगतेसतिषट्त्रिंशत्वर्षसाहस्रंराज्यंकरिष्यसि २२ त्वद्भ्रातरि उत्तमेमृगयायां नष्टेसतित
न्माता तंअन्वेषंती दावाग्निं प्रवेक्ष्यति २३ त्वंयज्ञैःइष्ट्वाअंतेमांस्मृत्वाऋषिभ्यःउपरिष्टात् अचलं मत्स्थानं गमिष्यसि २४ २५॥ मैत्रेयउवाच ॥इत्युक्त्वाभगवान्स्वधामअगात् २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(सोपिध्रुवः) संकल्पजंसंकल्पाज्जातंमनोरथं पादसेवयाप्रापितंप्राप्य (कथंभूतं ।) संकल्पस्य (विषयाभिलाषस्य) निर्वाणंसमाप्तिर्यस्मात् (तादृशंसर्वोत्कृष्टम् ।) २७ (नातिप्रीतइत्युक्तत्वात्पृच्छ ति । सदुर्लभमिति) । मायाविनः सकामस्ययत्सुदुर्लभंहरेः पदं तदेकेनैवजन्मनालब्ध्वापिस्वमात्मानमंनः असिद्धार्थं अप्राप्तमनोरथमिवकथममन्यत । पुरुषार्थविदपि । २८ (वाग्बाणैर्हृदिविद्धः सन् तद भिनिविष्टमनाआदौमुक्तिंनसंकल्पितवान् ततः पश्चात्तापंप्राप्तइत्यर्थः) २९ तापमेवाह समाधिनेतिसार्धैःषड्भिः । नैके अनेकेभवायस्मिन्बहुजन्माभ्यस्तेनेत्यर्थः । प्रणामस्तुत्यादिसमयेगरुडाधिरूढस्यहरेः पादच्छायायांस्थितमात्मानंस्मरन्नाह । छायामुपेत्येति । पृथङ्मतिः भेददृष्टिः सन् (भ्रष्टोस्मि) हाकष्टमितिभावः ३० (बतेतिखेदे ।) अनात्म्यंआत्मशून्यत्वंअज्ञत्वंभवच्छेत्तुः यदंतवत्तत्अयाचेया चितवानस्मि ३१ अज्ञत्वेकारणंसंभावयति । मतिरिति । पतद्भिः मदपेक्षयाअधः स्थानं प्राप्नुवद्भिः अतएवासहनशीलैः “नाधुनाप्यवमानंत”इत्यादिसत्यमपिनारदस्यवचोनगृहीतवानस्मितस्यमेमतिर्विदू षिता ३२ किंचदैवीमिति । (देवस्यभगवतोमायांस्पृष्ट्वा) प्रसुप्तः स्वप्नानिवपश्यन् द्वितीयेअसत्यपि भ्रातैवभ्रातृव्यः शत्रुरितिदृष्ट्याहृद्रुजाहृदयशोकेन तप्ये तापमनुभवामि । ३३ किंच । (तपसा) प्रसाद्यमयायत्प्रार्थितंतद्व्यर्थं । (व्यर्थत्वेदृष्टांतः चिकित्सारुक्प्रतिक्रियासायथा ।) प्रार्थितमाह । भवच्छिदमिति भवंसंसारम् । ३४ एतदेवसदृष्टांतमाह । स्वाराज्यंनिजानंदंप्रयच्छतः सकाशात्अभि मानःक्षीणपुण्येनमयाभिक्षितोयाचितः । क्षीणेनपुण्येनेति वादृष्टांतएवसंबंधः । यथाअधनो (दरिद्रः पुण्यराहित्येन) ईश्वराच्चक्रवर्तिनोपिफलीकारान्सतुषतंडुलकणान् याचतेतद्वत् । ३५ एवंनिस्पृह त्वंतस्ययुक्तमित्याह । (रजांसिजुषंतेसेवंतेतेत्वादृशाः हेतातविदुर) तस्यदास्यंविनाअन्यमर्थमात्मनानैववांछंति । यदृच्छयैवलब्धेनमनसः समृद्धिर्येषांते ३६

॥४१॥ श्लोकाः २७/३६

सोपिसंकल्पजंविष्णोःपादसेवोपसादितम् ॥ प्राप्यसंकल्पनिर्वाणंनातिप्रीतोऽभ्यगात्पुरम् २७ ॥ ॥ विदुरउवाच ॥ ॥ सुदुर्लभंयत्परमंपदं हरेर्मायाविनस्तच्चरणार्चनार्जितम् ॥ लब्ध्वाप्यसिद्धार्थमिवैकजन्मनाकथंस्वमात्मानममन्यतार्थवित् २८ ॥ ॥ मैत्रेयउवाच ॥ ॥ मातुः सपत्न्यावाग्बाणैर्हृदिविद्धस्तुतान्स्मरन् ॥ नैच्छन्मुक्तिपतेर्मुक्तिंतस्मात्तापमुपेयिवान् २९ ॥ ॥ ध्रुवउवाच ॥ ॥ समाधिनानैकभवेनयत्पदंविदुः सनंदादयऊर्ध्वरेतसः ॥ मासैरहंषड्भिरमुष्यपादयोश्छायामुपेत्यापगतःपृथङ्मतिः ३० अहोबतममानात्म्यंमंदभाग्यस्यपश्यत ॥ भवच्छिदःपादमू लंगत्वाऽयाचेयदंतवत् ३१ मतिर्विदूषितादेवैःपतद्भिरसहिष्णुभिः ॥ योनारदवचस्तथ्यंनाग्राहिषमसत्तमः ३२ दैवींमायामुपाश्रित्यप्रसुप्तइवभिन्नदृ क् ॥ तप्येद्वितीयेऽप्यसतिभ्रातृभ्रातृव्यहृद्रुजा ३३ मयैतत्प्रार्थितंव्यर्थंचिकित्सेवगतायुषि ॥ प्रसाद्यजगदात्मानंतपसादुष्प्रसादनम् ॥ भवच्छिदमयाचे हंभवंभाग्यविवर्जितः ३४ स्वराज्यंयच्छतोमौढ्यान्मानोमेभिक्षितोबत ॥ ईश्वरात्क्षीणपुण्येनफलीकारानिवाधनः ३५ ॥ ॥ मैत्रेयउवाच ॥ ॥ न वैमुकुंदस्यपदारविंदयोरजोजुषस्तातभवादृशाजनाः ॥ वांच्छंतितद्दास्यमृतेर्थमात्मनोयदृच्छयालब्धमनःसमृद्धयः ३६

चूर्णिका

ध्रुवोपि मनोरथंप्राप्य नातिप्रीतमनाः सन् पुरंअगात् २७ ॥ विदुरउवाच ॥ हेमुनेध्रुवः हरेःपदंलब्ध्वापि आत्मानंअप्राप्तमनोरथामिव कथं अमन्यत २८॥ मैत्रेयउवाच ॥ ॥ सापत्नमातुर्वाग्बाणैः विद्धः ध्रुवःतान्स्मरन्सन् मुक्तिं नैच्छत् तस्मात् तापंप्राप्तः २९ ॥ ध्रुवउवाच॥ अहोमंदभाग्यस्य मे अज्ञत्वं पश्यत भवच्छिदः पादमूलंगत्वा ३० अंत वत्यत्तत्याचे ३१ ॥ नारदवचः नगृहीतमतोमेमतिःदेवैःदूषिता३२ ईश्वरं प्रसाद्य मया एतत् राज्यादिव्यर्थंप्रार्थितम् अहंनिर्दैवःभवच्छिदंहरिंभवं अयाचे ३३ ३४ अहो निजानंदंददतः हरेः मया मानो भिक्षितः ३५ ॥ ॥ मैत्रेयउवाच ॥ ॥ हेविदुरत्वादृशाः हरिदास्यंविनाअन्यन्नवांछंति ३६

॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.च | अ०

टीका | ॥९॥

॥४२॥

प्रस्तुतमाह । आकर्ण्यैति । संपरेत्य मृत्वा आगतमाकर्ण्य यथातथा न श्रद्दधे विश्वासंनचकार । अभद्रस्य(अमंगलस्यममएतादृशं) भद्रंकुतः (संभाव्यते) इतिमत्वा ३७ एष्यत्यचिरतइतिदेवर्षेर्वाक्यंश्रद्धाय(धर्षितः विवशीकृतः) ३८ (संतोभ्यर्हिताअश्वायस्यतं । कार्तस्वरेणस्वर्णेनभूषितं ।) ब्राह्मणादिभिः पर्यस्तः परिवृतः । ३९ (स्नेहोद्रेकादुचितमेतदित्याह । आत्मजस्यअभीक्ष्णेसंदर्शनेउत्सुकः सोत्कंठः) ४० अस्यराज्ञोमहिष्यौउत्तमंमध्येनिधाय (तेनसहप्रीत्याएका)-मेवशिबिकांनरविमानमारुह्य ४१ उपवनस्याभ्याशेसमीपे ।(आसाद्यतन्निकटंगत्वापरिरेभे)। ४२ (दीर्घंचिरकालमुत्कंठंमनोयस्य) विष्वक्सेनस्यविष्णोः अंघ्रिसंस्पर्शेनहतमशेषमघंबंधनंचयस्यतम् ४३ (शांतैः सुशीतलैः जातः) उद्दामोमहान्मनोरथोयस्य ४४ अभिमंत्रितः पितुराशीर्भिः सह तेनकृतसंभाषणः (सुरुच्यामपि तस्यभेदबुद्धिराहित्येहेतुः सज्जनाग्रणीरिति) ४५ ४६ सुरुच्याः प्रीतिर्नासंभावितेत्याह । यस्येति । (मैत्रीकारुण्यादिभिः) नमंतिअनुसरंति । अपोयथास्वयमेवनिम्नंदेशमवतरंति ४७ (अस्रौघंअश्रुप्रवाहं) ऊहतुः दधतुः। ४८ (आधिंविरहसंतापं) ४९ हेवीर (तदा) वीरसुवोध्रुवमातु (अश्रुभिः): अभिषिच्यमानाभ्यांस्तनाभ्यांपयः सुस्राव ५० चिरंनष्टः दर्शनमप्राप्तः (दिष्ट्यापुण्येनत्वया प्रतिलब्धः आर्तिहा क्लेशापहः) रक्षिता रक्षिष्यति ५१

श्लोकाः ३७/५१

आकर्ण्यात्मजमायांतंसंपरेत्ययथागतम् ॥ राजानश्रद्दधेभद्रमभद्रस्यकुतोमम ३७ श्रद्धायवाक्यंदेवर्षेर्हर्षवेगेनधर्षितः ॥ वार्त्ताहर्तुरतिप्रीतोहारंप्रादान्महाधनम् ३८ सदश्वंरथमारुह्यकार्त्तस्वरपरिष्कृतम्॥ ब्राह्मणैःकुलवृद्धैश्चपर्यस्तोमात्यबंधुभिः ३९ शंखदुंदुभिनादेनब्रह्मघोषेणवेणुभिः ॥ निश्चक्रामपुरात्तूर्णमात्मजाभीक्षणोत्सुकः ४० सुनीतिःसुरुचिश्चास्यमहिष्यौरुक्मभूषिते ॥ आरुह्यशिबिकांसार्धमुत्तमेनाभिजग्मतुः ४१ तंदृष्ट्वोपवनाभ्याशआयांतंतरसारथात् ॥ अवरुह्यनृपस्तूर्णमासाद्यप्रेमविह्वलः ४२ परिरेभेंगजंदोर्भ्यांदीर्घोत्कंठमनाःश्वसन् ॥ विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनम् ४३ अथाजिघ्रन्मुहुर्मूर्ध्निशीतैर्नयनवारिभिः ॥ स्नापयामासतनयंजातोद्दाममनोरथः ४४ अभिवंद्यपितुःपादावाशीर्भिश्चाभिमंत्रितः । ननाममातरौशीर्ष्णासत्कृतःसज्जनाग्रणीः ४५ सुरुचिस्तंसमुत्थाप्यपादावनतमर्भकम् ॥ परिष्वज्याहजीवेतिबाष्पगद्गदयागिरा ४६ यस्यप्रसन्नोभगवान्गुणैर्मैत्र्यादिभिर्हरिः ॥ तस्मैनमंतिभूतानिनिम्नमापइवस्वयम् ४७ उत्तमश्चध्रुवश्चोभावन्योन्यंप्रेमविह्वलौ ॥ अंगसंगादुत्पुलकावस्रौघंमुहुरूहतुः ४८ सुनीतिरस्यजननीप्राणेभ्योपिप्रियंसुतम् ॥ उपगुह्यजहावाधिंतदंगस्पर्शनिर्वृता ४९ पयःस्तनाभ्यांसुस्रावनेत्रजैःसलिलैःशिवैः ॥ तदाभिषिच्यमानाभ्यांवीरवीरसुवोमुहुः ५० तांशशंसुर्जनाराज्ञींदिष्ट्यातेपुत्रआर्त्तिहा ॥ प्रतिलब्धश्चिरंनष्टोरक्षितामंडलंभुवः ५१

चूर्णिका | ॥४२॥

राजा पुत्रागमनं श्रुत्वा वार्ताहर्तुः हारंददौ ३७ ३८ तदा ब्राह्मणादिभिः सहसंमुखं अगात् ३९ ४० तथा सुरुचिः सुनीतिश्च उत्तमेनसहशिबिकां आरुह्य जग्मतुः ४१ नगराभ्याशेध्रुवंदृष्ट्वारथात्अवप्लुत्य ४२ तंदोर्भ्यांउदूह्यपरिरेभे ४३ सः पितुः पादौ ननाम मातरौच ४४ ४५ सुरुचिः तंपरिष्वज्य जीवेत्याशिषंददौ ४६ भगवान् मैत्र्यादिगुणैः यस्य प्रसन्नस्तस्मै सर्वभूतानि नमंति ४७ ४८ ४९ ५० ततः जनाः सुनीतिं धन्याःइतिशशंसुः नृपः ध्रुवं करिणीआरोप्यअनेकाशोभाढ्यं नगरं प्राविशत् ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥९॥

॥४३॥

(त्वयाअभ्यर्चितोनूनमितिसंभाव्यते अन्यथानष्टः कथंप्रतिलभ्येत । वीरायोगिनः यंभगवंतमनुध्यायंतः) ५२ एवमितिव्यवहितंपित्राद्युपलालनंपरामृश्यते (करिणीमित्युक्तिस्तस्याअत्रप्राशस्त्यात्
उक्तंच । करिणीबालमंगलेइति)५३ पुरंवर्णयतितत्रतत्रेतिचतुर्भिः । (उपसंक्षिप्तैः स्थापितैः) सवृंदैः फलमंजरीयुक्तैः पूगानांपोतैर्बालवृक्षैः तद्विधैः सवृंदैःउपस्कृतंप्रतिद्वारमित्युत्तरेणान्वयः । ५४
चूतपल्लवाश्चवासांसिचस्रजश्चमुक्तादामानिचतेषांविशिष्टंलंबनमस्तियेषुकुंभेषु ५५ गोपुरैर्बहिर्द्वारैरगारैर्गृहैश्चशातकुंभाः (हिरण्मयाः) परिच्छदाः परिकरायेषु (कथंभूतैर्गोपुरादिभिः)। विमानानामिव
शिखरैर्द्युतिर्येषांतैः । (यद्वा श्रीमतांविमानानामिवआकाशगामिनांशिखराणांद्युभिर्द्युतिभिरुपस्कृतम्।) ५६ चत्वरमंगणं रथ्या महामार्गः अट्टः उच्चगृहस्योपरिनिर्मिताभूमिका। मार्गोऽवांतरः मृष्टाः संमा
र्जिताः चत्वरादयोयस्मिन् ५७ सिद्धार्थाः श्वेतसर्षपाः अक्षता यवाः ५८ उपजह्रुः व्यकिरन्।सतीः (सत्यः पुरस्त्रीणांविशेषणं। आशिषांविशेषणंवा) ५९महामणयोमहामूल्यानिरत्नानितद्व्रातमयेसभुवः)
६० (दांताहस्तिदंतनिर्मिताः रुक्मपरिच्छदाः सुवर्णपरिबद्धाः) यत्रभवनोत्तमे । (रौक्माः सुवर्णनिर्मिताउपस्कराः पात्राणि)६१ (स्फटिकरचितकुड्येषुमहामरकतरचितेषुचमणिप्रदीपारत्नदीप्तयः
प्रतिबिंबिताआभांति । स्त्रीरत्नानिचयत्रआभांति) ६२ (उद्यानानिचभाक्रीडाः आभांति ।) ६३ कुमुत्कुमुदं । पद्मादिमत्योवाप्यः (हंसादिभिर्जुष्टाः सेविताः) ६४ (तंभगवदुपासनादिलक्षणम्) ६५
ऊढवयसंप्राप्तयौवनम् । अनुरक्ताः प्रजायस्मिन् ६६ प्रवयसंवृद्धम् ६७ ॥ इतिचतुर्थस्कंधे टीकायां नवमोध्यायः ९ ॥

श्लोकाः ५२/६७

अभ्यर्चितस्त्वयानूनंभगवान्प्रणतार्त्तिहा॥यदनुध्यायिनोवीरामृत्युंजिग्युःसुदुर्जयम्५२लाल्यमानंजनैरेवंध्रुवंसभ्रातरंनृपः ॥ आरोप्यकरिणींहृष्टःस्तूयमानो
विशत्पुरम् ५३तत्रतत्रोपसंक्षिप्तैर्लसन्मरकतोरणैः ॥ सवृंदैःकदलीस्तंभैःपूगपोतैश्चतद्विधैः५४ चूतपल्लववासःस्रङ्मुक्तादामविलंबिभिः ॥ उपस्कृतंप्रतिद्वारम
पांकुंभैःसदीपकैः ५५ प्राकारैर्गोपुरागारैःशातकुंभपरिच्छदैः॥सर्वतोलंकृतंश्रीमद्विमानशिखरद्युभिः५६मृष्टचत्वररथ्याट्टमार्गचंदनचर्चितम्॥लाजाक्षतैःपुष्प
फलैस्तंडुलैर्बलिभिर्युतम् ५७ध्रुवायपथिदृष्टायतत्रतत्रपुरस्त्रियः॥सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानिच ५८ उपजह्रुःप्रयुंजानावात्सल्यादाशिषःसतीः ॥
शृण्वंस्तद्वल्गुगीतानिप्राविशद्भवनंपितुः ५९ महामणिव्रातमयेसतस्मिन्भवनोत्तमे ॥ लालितोनितरांपित्रान्यवसाद्दिविदेववत् ६० पयःफेननिभाःश
य्यादांतारुक्मपरिच्छदाः ॥ आसनानिमहार्हाणियत्ररौक्माउपस्कराः ६१ यत्रस्फटिककुड्येषुमहामारकतेषुच ॥ मणिप्रदीपाआभांतिललनारत्नसंयुताः
६२ उद्यानानिचरम्याणिविचित्रैरमरद्रुमैः ॥ कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ६३ वाप्योवैदूर्यसोपानाःपद्मोत्पलकुमुद्वतीः ॥ हंसकारंडवकुलैर्जुष्टाश्च
क्राह्वसारसैः ६४ उत्तानपादोराजर्षिःप्रभावंतनयस्यतम् ॥ श्रुत्वादृष्ट्वाऽद्भुततमंप्रपेदेविस्मयंपरम् ६५ वीक्ष्योढवयसंतंचप्रकृतीनांचसंमतम् ॥ अनुरक्तप्र
जंराजाध्रुवंचक्रेभुवःपतिम्६६आत्मानंचप्रवयसमाकलय्यविशांपतिः॥वनंविरक्तःप्रातिष्ठद्विमृशन्नात्मनोगतिम् ६७ इतिश्रीभा०चतुर्थ०नवमोध्यायः ॥ ९ ॥

॥४३॥

चूर्णिका

सकलसंपद्युक्तंगृहंप्रविष्टः राजर्षिः ननंद ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५ ध्रुवंऊढवयसंप्रजानांसंमतंज्ञात्वा भुवः पतिं कृत्वा
६६ स्वयंवृद्धः विरक्तः सन् वनं प्रातिष्ठत् ६७ इति चतुर्थेनवमोध्यायः ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. दशमेभ्रातृहंतॄणांयक्षाणामकरोद्वधम्।एकएवालकांगत्वा तस्य विक्रम उच्यते।१॥(तत्सुतौतस्याभ्रमेः सुतौकल्पोवत्सरश्चेति द्वावास्ताम्।१(कथंभूतंपुत्रं)योषितांरत्नमिवमनोहरम्। कन्यारत्नंचाजीजनदितिवा अ०
२ (उत्तमस्य संततिर्नास्तीत्याह अकृतोद्वाहइति) यक्षेण अद्रौ हिमवति हतः।आजावितिपाठेयुद्धे । अस्यगतिंगता मृतेत्यर्थः ३ कोपामर्षशुचां द्वंद्वैक्यं (कोपः क्रोधः अमर्षोऽसहनं।भ्रातुः शुक्च) तेनअर्पि
टीका तोव्याप्तः । जैत्रंजयहेतुं । पुण्यजनालयंअलकां (पुरीं) ४ रुद्रानुचरा भूतादयः (तैः सेवितांरक्षितामित्यर्थः हिमवतोगिरेर्द्रोण्यांनिम्नतटे । गुह्यकैर्यक्षैः संकुलां ।) ५ दध्मौ वादितवान् । येनशंखवादने ॥१०॥
न हेक्षत्तः उपदेव्योयक्षस्त्रियः (अत्रसन्बिभ्युः) ६ (अभिपेतुराजग्मुः) ७ एकैकंत्रिभिस्त्रिभिरित्येवंसर्वान् त्रयोदशायुतानियक्षान् युगपदहन् जघान ८ (तेयक्षाआत्मानं) निरस्तं (मत्वा) तस्ययुद्धच
मत्कारमशंसन् ।९ ते (ध्रुवेणहताः) अपि (वीराः) तत्कर्मअसहमानाअमुमविध्यन् । ध्रुवकृतविक्रमात्द्विगुणंयथाभवत्येवषड्भिः षड्भिरिषुभिः प्रतिकर्तुमिच्छंतः (युगपदविध्यन्) १०(शक्तिभिः ऋष्टिभिश्च)
॥४४॥ चित्रवाजैः विचित्रपक्षैः ११ (रथसारथिसहितस्यध्रुवस्योपरिशस्त्रवृष्टिंचक्रुः) १२ धारासंपातेनछन्नोगिरिरिवनैवादृश्यत १३

॥ मैत्रेयउवाच ॥ ॥ प्रजापतेर्दुहितरंशिशुमारस्यवैध्रुवः ॥ उपयेमेभ्रमिंनामतत्सुतौकल्पवत्सरौ १ इलायामपिभार्यायांवायोःपुत्र्यांमहाबलः ॥ पुत्रमु श्लोकाः
त्कलनामानंयोषिद्रत्नमजीजनत् २ उत्तमस्त्वकृतोद्वाहोमृगयायांबलीयसा ॥ हतःपुण्यजनेनाद्रौतन्मातास्यगतिंगता ३ ध्रुवोभ्रातृवधंश्रुत्वाकोपामर्ष
शुचार्पितः ॥ जैत्रंस्यंदनमास्थायगतःपुण्यजनालयम् ४ गत्वोदीचींदिशंराजारुद्रानुचरसेविताम् ॥ ददर्शहिमवद्द्रोण्यांपुरींगुह्यकसंकुलाम् ५ दध्मौशंखं १/१२
बृहद्बाहुःखंदिशश्चानुनादयन् ॥ येनोद्विग्नदृशःक्षत्तरुपदेव्योत्रसन्भृशम् ६ ततोनिष्क्रम्यबलिनउपदेवमहाभटाः ॥ असहंतस्तंनिनादमभिपेतुरुदायुधाः
७ सतानापततोवीरउग्रधन्वामहारथः ॥ एकैकंयुगपत्सर्वानहन्बाणैस्त्रिभिस्त्रिभिः ८ तेवैललाटलग्नैस्तैरिषुभिःसर्वएवही ॥ मत्वानिरस्तमात्मानमाशं
सन्कर्मतस्यतत् ९ तेपिचामुममृष्यंतःपादस्पर्शमिवोरगाः ॥ शरैरविध्यन्युगपद्द्विगुणंप्रचिकीर्षवः १० ततःपरिघनिस्त्रिंशैःप्रासशूलपरश्वधैः ॥ शक्त्यृ
ष्टिभिर्भुशुंडीभिश्चित्रवाजैःशरैरपि ११ अभ्यवर्षन्प्रकुपितासरथंसहसारथिम् ॥ इच्छंतस्तत्प्रतीकर्तुमयुतानित्रयोदश १२ औत्तानपादिःसतदाशस्त्रव
र्षेणभूरिणा ॥ नउपादृश्यतच्छन्नआसारेणयथागिरिः १३

चूर्णिका ॥ मैत्रेयउवाच॥ ॥ ध्रुवः शिशुमारस्य प्रजापतेः भ्रमिंनामकन्यां उवाह ॥ तत्सुतौ कल्पवत्सरौ आस्ताम् १ द्वितीयायां वायोः पुत्र्यां इलायां उत्कलंपुत्रं अजीजनत् २
उत्तमस्तु अकृतविवाहः हिमाद्रौ मृगयार्थंगतः तत्र पुण्यजनेन हतः तन्मातापिमृता ३ ध्रुवःभ्रातृवधंश्रुत्वाकोपयुक्तः रथं आस्थाय उदीचीं गत्वापुण्यजनालयंदृष्ट्वा ॥४४॥
४ ५ शंखंदध्मौ तच्छब्देन यक्षस्त्रियः अत्रसन् ६ ततः उपदेवमहाभटाः तन्निनादंश्रुत्वाउदायुधाः अभिपेतुः ७ ध्रुवःतान्त्रयोदशायुतानि यक्षान् एकैकंत्रिभिस्त्रिभिः बा
णैः ललाटेजघान ८ तेपि द्विगुणशरैः तं अविध्यन् ९ १० तत अनेकशस्त्रास्त्रैः युद्धं अभूत् ११ १२ ते त्रयोदशायुतसंख्याकाः ध्रुवंशस्त्रवर्षणेन आच्छादयामासुः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(सूर्यः) सूर्यतुल्यः (मानवोमनोः पौत्रः। पुण्यजनार्णवेयक्षाब्धौ ।) १४ यातुधानेषु राक्षसेषु जयकाशिषु जितंजितमितिप्रकाशमानेषु सत्सु (तस्यध्रुवस्यरथः) १५ व्यधमत्संचूर्णयामास १६ वर्माणि कवचानि (अशनयोवज्राणि।) १७ शिरःप्रमुखैरास्तृताः प्रकीर्णारणभुवोरेजुरितिद्वयोरन्वयः (हेमतालसमानैः ऊरुभिरुत्संगैः।वलयैः वलगवः सुंदरास्तैः उष्णीषैः शिरोवेष्टनैः।) १८ १९ प्रायः बाहुल्येनविवृक्णाः संछिन्नाअवयवायेषां (ते मृगेंद्रस्यसिंहस्य विक्रीडितमात्रेण यूथपागजाइव विदुद्रुवुः) २० आततायिनंशस्त्रपाणिम् २१ इतिप्रुवन्नित्यत्रापिनमायिनामित्यादेरनुषंगः। चित्ररथोध्रुवः। यत्तः यत्नवान् । प्रतियोगः पुनरुद्योगस्तस्माच्छंकितः नभस्वतोवायोर्हेतोः (जलधेः शब्दमिवदिक्षु शब्दं शुश्राव रजो धूलिः) २२ विस्फुरंत्यस्तडितोयस्मिंस्तेन । त्रासयंतः (भीषयंतः) स्तनयित्नवोशनयो यस्मिन्तेनतेन (घनानीकेनमेघमंडलेन) २३ ववृषुः निपेतुरित्यर्थः । (इहअसृक्शब्देनश्लेष्मादि ।) नसृजतिशरीरमित्यसृक् । (रुधिरंप्रसिद्धं ।) मेदसःपुंस्त्वमार्षम् । मेदांसि । अस्यध्रुवस्याग्रतोनिपेतुः (हेअनघ) २४ साश्मवर्षिणः अश्मसहितंयद्वर्षं तद्वंतो (गदादयोगिरेःसकाशान्निपेतुः) २५ अशानिवन्निःश्वासोयेषां (रुषाअक्षिभिरग्निंवमंतः अहयः सर्पाःगजादयश्चाभ्यधावन्) २६ (महान्ह्रादोघोषोयस्य)२७ (अमनस्विनांअधीराणां) त्रासनानिभयंकराणितिग्माक्रूरागतिःप्रवृत्तिर्येषां (तेअसुराः।) असुरराक्षसादिशब्दैरदूरांतरत्वेनयक्षाएवोच्यंते । (आसुर्याअसुरप्रयुक्तया) २८

॥४५॥

श्लोकाः १४—२८

हाहाकारस्तदैवासीत्सिद्धानांदिविपश्यताम् ॥ हतोयंमानवःसूर्योमग्नःपुण्यजनार्णवे १४ नदत्सुयातुधानेषुजयकाशिष्वथोमृधे ॥ उदतिष्ठद्रथस्त
स्यनीहारादिवभास्करः १५ धनुर्विस्फूर्जयद्दिव्यंद्विषतांखेदमुद्वहन् ॥ अस्त्रौघंव्यधमद्बाणैर्घनानीकमिवानिलः १६ तस्यतेचापनिर्मुक्ताभित्त्वावर्माणिरक्ष
साम् ॥ कायानाविविशुस्तिग्मागिरीनशनयोयथा १७ भल्लैःसंछिद्यमानानांशिरोभिश्चारुकुंडलैः ॥ ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः १८ हार
केयूरमुकुटैरुष्णीषैश्चमहाधनैः॥ आस्तृतास्तारणभुवोरेजुर्वीरमनोहराः१९हतावशिष्टाइतरेरणाजिराद्रक्षोगणाःक्षत्रियवर्यसायकैः॥प्रायोविवृक्णावयवाविदु
द्रुवुर्मृगेंद्रविक्रीडितयूथपाइव २० अपश्यमानःसतदाततायिनंमहामृधेकंचनमानवोत्तमः ॥ पुरींदिदृक्षन्नपिनाविशद्द्विषांनमायिनांवेदचिकीर्षितंजनः २१
इतिब्रुवंश्चित्ररथःस्वसारथिंयत्तःपरेषांप्रतियोगशंकितः ॥ शुश्रावशब्दंजलधेरिवेरितंनभस्वतोदिक्षुरजोन्वदृश्यत २२ क्षणेनाच्छादितंव्योमघनानीकेनसर्व
तः ॥ विस्फुरत्तडितादिक्षुत्रासयन्स्तनयित्नुना २३ ववृषूरुधिरौघासृक्पूयविण्मूत्रमेदसः ॥ निपेतुर्गगनादस्यकबंधान्यग्रतोनघ २४ ततःखेऽदृश्यतगिरि
र्निपेतुःसर्वतोदिशम् ॥ गदापरिघनिस्त्रिंशमुसलाःसाश्मवर्षिणः २५ अहयोशनिनिःश्वासावमंतोग्निंरुषाक्षिभिः॥अभ्यधावन्गजामत्ताःसिंहव्याघ्राश्चयूथशः
२६ समुद्रऊर्मिभिर्भीमःप्लावयन्सर्वतोभुवम् ॥ आससादमहाह्रादःकल्पांतइवभीषणः २७ एवंविधान्यनेकानित्रासनान्यमनस्विनाम् ॥ ससृजुस्तिग्मगतय
आसुर्यामाययासुराः २८

॥४५॥

चूर्णिका

तदा सिद्धादीनां हाहाकारोभूत् १४ ततः नीहारात् सूर्यइव ध्रुवरथः उदातिष्ठत् १५ तेषां अस्त्रौघंव्यर्थंकृत्वा १६ स्वबाणैः तान् अहनत् १७ हतैःयक्षैः रणभूः आस्तृता अभूत् १८ १९ हतावशिष्टाः यक्षाः प्रायः छिन्नावयवाः अदृश्याः भूत्वा आसुरीःमाया. ससृजुः तदेवाह आदौरजः अदृश्यत २० २१ २२ मेघाः रुधिरपूयविण्मूत्र मेदसः ववृषुः २३ २४ गदापरिघनिस्त्रिंशाश्मानश्चपेतुः २५ सर्पगजव्याघ्रसिंहादयः अभ्यधावन् २६ समुद्रः प्लावयन्निवअदृश्यत २७ एवंमायाः ससृजुः २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥११॥

(निशाम्यआलोच्य) तस्यशंकल्याणमाशंसन्प्रार्थितवंतः। २९ तवविपक्षान्शत्रून्(क्षिणोतु) नाशयतुअद्धा साक्षात् (निशम्यश्रुत्वा) अंजसा सुखेनैव मृत्युं (संसारं) तरति ३० इतिचतुर्थस्कंधेटीकायांदशमोध्यायः॥१०॥ एकादशेतुयक्षाणांक्षयंदृष्ट्वामनुःस्वयम्। आगत्यवारयामासध्रुवंतत्त्वोपदेशतः१॥एवंवदतांवचनमुपदेशमिवनिशम्य उपस्पृश्य आचम्य यन्नारायणनिर्मितं (अतएव) नारायणाख्यमितिप्रसिद्धंतदस्त्रंसंदधे (प्रयुक्तवान् ।) १ (हेविदुर ज्ञानोदयेआत्मसाक्षात्कारे) क्लेशा (अविद्यास्मिता) रागद्वेषाभिनिवेशायथा (विनश्यंति।) २ तस्यध्रुवस्यआर्षास्त्रंऋषेर्नारायणादुद्भूतंअस्त्रंप्रयुंजतः संदधतः सतः सुवर्णमयाः पुंखा मूलप्रदेशायेषां कलहंसानांवासांसिपक्षा (इवपक्षा) येषांतेशराः विनिःसृताइतिद्रष्टव्यम्। उपरिष्टाच्छिलीमुखग्रहणात् । (यथेति यथा भीमंमुखंयेषांतेशिखंडिनः मयूराः

॥४६॥ भुजंगभुजोवनंविशंतितद्वच्चित्रपक्षास्तीक्ष्णमुखाअस्त्रसंबंधिनोबाणामायाविप्रयुक्तसर्पादीन्नाशयितुंद्विषद्बलंप्रविष्टाइत्यर्थः)३ प्रधनेयुद्धे । (शिलीमुखैर्बाणैः) उन्नद्धाउच्छ्रिताः फणा येषां तेअहयः सर्पा (इवतंध्रुवमभिधावंतिस्म) ४ पृषत्कैर्बाणैर्निकृत्तावाह्वादयोयेषांतान्(तत्रशिरोधराग्रीवा । तान्) परंलोकंनिनाय । कथंभूतंलोकं । ऊर्ध्वरेतसः संन्यासिनोअर्कमंडलंनिर्भिद्य यंव्रजंति तं । (तथाचस्मृतिः "द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ । परिव्राड्योगयुक्तश्चरणेचाभिमुखोहत"इति।) ५ तान्अनागसोनिरपराधान् (चित्ररथेनध्रुवेणभूयसामहीयसा । मनुःस्वायंभुवोध्रुवंजगाद)६ तमसोनरकस्य द्वारेणयेनरोषेण (एतान्यक्षानवधीस्तेनातिरोषेणअलम्) ७

श्लोकाः

ध्रुवेप्रयुक्तामसुरैस्तांमायामतिदुस्तराम्॥ निशाम्यतस्यमुनयःशमाशंसन्समागताः २९॥मुनयऊचुः॥ ॥औत्तानपादेभगवांस्तवशार्ङ्गधन्वादेवःक्षिणोत्ववनतार्तिहरोविपक्षान् ॥ यन्नामधेयमभिधायनिशम्यचाद्धालोकोंजसातरतिदुस्तरमंगमृत्युम् ३० इतिश्रीभा०च०दशमोध्यायः१०॥ ॥ मैत्रेयउवाच॥ ॥ निशम्यगदतामेवमृषीणांधनुषिध्रुवः ॥ संदधेस्त्रमुपस्पृश्ययन्नारायणनिर्मितम् १ संधीयमानएतस्मिन्मायागुह्यकनिर्मिताः ॥ क्षिप्रंविनेशुर्विदुरक्लेशाज्ञानोदये

२९/७

यथा २ तस्यार्षास्त्रंधनुषिप्रयुंजतःसुवर्णपुंखाःकलहंसवाससः ॥ विनिःसृताआविविशुर्द्विषद्बलंयथावनंभीमरवाःशिखंडिनः २ तैस्तिग्मधारैःप्रधनेशिलीमुखैरितस्ततःपुण्यजनाउपद्रुताः[१] ॥ तमभ्यधावन्कुपिताउदायुधाःसुपर्णमुन्नद्धफणाइवाहयः ४ सतान्पृषत्कैरभिधावतोमृधेनिकृत्तबाहूरुशिरोधरोदरान् ॥ निनायलोकंपरमर्कमंडलंव्रजंतिनिर्भिद्ययमूर्ध्वरेतसः ५ तान्हन्यमानानभिवीक्ष्यगुह्यकाननागसश्चित्ररथेनभूरिशः ॥ औत्तानपादिंकृपयापितामहोमनुर्जगादोपगतःसहर्षिभिः ६ ॥ ॥ मनुवारुच ॥ ॥ अलंवत्सातिरोषेणतमोद्वारेणपाप्मना ॥ येनपुण्यजनानेतानवधीस्त्वमनागसः ७

चूर्णिका ॥४६॥

तदामुनयः एतत् ज्ञात्वा तत्रागत्यध्रुवस्यकल्याणं ऐच्छन्२९ ॥ ॥ मुनयऊचुः॥ ॥हेऔत्तानपादेभगवान्शार्ङ्गधन्वा तव शत्रून् नाशयतु लोकः यन्नामधेयंउच्चार्यनिशम्यवा दुस्तरमपि मृत्युंतरति ३० ॥ ॥ इतिचतुर्थेदशमः १० ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंवदतांऋषीणांवाचंनिशम्य ध्रुवः धनुषिनारायणास्त्रं संदधे १ अस्त्रेसंधीयमानेगुह्यकनिर्मिताः मायाः यथाज्ञानोदयेक्लेशाः तथाविनेशुः २ नारायणास्त्रतः बाणाः विनिःसृत्य शत्रुबलंविविशुः ३ तैः ध्रुवः पुण्यजनान् निकृत्तबाहूरुशिरोधरोदरान् कृत्वा परलोकंनिनाय ४ ५ ध्रुवेणगुह्यकानहन्यमानान् वीक्ष्य तदा मनुः ऋषिभिः सह तत्र एत्य ध्रुवंजगाद ६ ॥ ॥ मनुरुवाच ॥ हेवत्स पाप्मना तमोद्वारेण अतिरोषेण अलम् येनअनागसः पुण्यजनान् अवधीः ७

१ भीममुखाःशिखंडिनइतिलिखितपुस्तकेपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (साद्भिर्विगर्हितंयतःअकृतैनसां अकृतापराधानाम्) ८ ननुमद्भ्रातृहंतारः (एते) कथमकृतैनसोऽतआह नन्विति (अंग हेध्रुव एकस्यैवापराधस्तेन प्रसंगात्बहूनांहिंसनंनन्याय्यमितिभावः) ९ (नन्वे कस्यहिदोषःसर्वेषां संसर्गिणांभवितुमर्हतीत्याशंक्यसत्यप्यपराधेतवैतदुचितंन भवतीत्याह । नायमिति । पराग्गृह्यपराग्भूतं देहम् आत्मानं गृहीत्वाआत्मत्वेनांगीकृत्यपशवोयथादेहाभिमानादन्योन्यं घ्नंतितथाभूतानांवैशसंहिंसेतियत् (अयंमार्गःयद्वा आत्मानंमनः पराग्गृह्यबहिर्मुखं कृत्वा) १० त्वंचबाल्येसाधुःसन् इदानींकथमन्यथाकृतवान्इत्याह । सर्वभूतात्मभावेनेतिद्वाभ्याम् (सर्वेषुभूतेषुयआ त्मभावस्तेन दुराराध्यमपि आराध्य परमंपदमापप्राप्तवान्) ११ अनुध्यातःहरेःहृदिस्थितः । (तस्य) अनुज्ञातोवा । तत्पुंसांहरिदासानामपिसाधुत्वेनसंमतः । १२ सतांव्रतमेवाह । महत्सुतितिक्षयानीचे षुकरुणयासमेषुमैत्र्याअखिलेषु जंतुषु समत्वेनच (रागद्वेषराहित्येन)१३ततःकृतार्थोभवतीत्याह । संप्रसन्नेसतिगुणैर्विमुक्तोऽतएवतत्कार्येणजीवेनलिंगशरीरेण निर्मुक्तःसन् निर्वाणं सुखात्मकं ब्रह्म प्राप्नोति १४ (इति) भ्रातृहंतृत्वमंगाक्षिप्त्योक्तम् । इदानींतुनात्मनोभ्रातृपुत्रादिसंबंधःनचान्योन्यंहंतृत्वादिकमपीत्याह दशभिः । भूतैःपंचभिरारब्धैर्देहाद्याकारेणपरिणतैर्योषित्पुरुषश्चेतिप्रसिद्धिः तयोर्व्यवायात्मै थुनात्संभूतिरन्ययोर्योषित्पुरुषयोरिहसंसारेभवति १५ एवंतावत्सर्गःप्रवर्त्तते । एवंपालकाकारेणपरिणतैर्भूतैरेवस्थितिः हंतृदेहाकारपरिणतैःसंयमः । सचपरमात्मनोमाययागुणानांव्यतिकरात् (क्षो भात्) नतुस्वतः । १६ ननुजडानांदेहानांगुणानांवाकथंसर्गादिहेतुत्वंतत्राह । निमित्तमात्रंपुरुषर्षभईश्वरः । यत्रयस्मिन्निमित्तेसतिकार्यकारणात्मकं विश्वं भ्रमति परिवर्तते । यथा अयस्कांतेनिमित्ते सति (जडमपि) लोहंप्रवर्ततेतद्वत् १७ ननुसचेन्निमित्तंतर्हितस्याविशेषाद्युगपदेवसर्गादित्रयंभवेत् अतआह । सखल्विति । कालशक्त्याक्रमेणगुणानांप्रवाहः क्षोभःतेनविभक्तंसृष्ट्यादिविषयंवीर्यंश क्तिर्यस्य । ननुकालोपिगुणान्युगपदेवक्षोभयतुतत्राह । (विभून्नईश्वरस्य) चेष्टाकालशक्तिःदुर्विभाव्याअचिंत्या ।१८

॥४७॥

श्लोकाः ८/१८

नास्मत्कुलोचितंतातकर्मैतत्साद्विगर्हितम् ॥ वधोयदुपदेवानामारब्धस्तेकृतैनसाम् ८ नन्वेकस्यापराधेनप्रसंगाद्बहवोहताः ॥ भ्रातुर्वधाभितप्तेनत्वयांग भ्रातृवत्सल ९ नायंमार्गोहिसाधूनांहृषीकेशानुवर्तिनाम् ॥ यदात्मानंपराग्गृह्यपशुवद्भूतवैशसम् १० सर्वभूतात्मभावेनभूतावासंहरिंभवान् ॥ आराध्या पदुराराध्यंविष्णोस्तत्परमंपदम् ११ सत्वंहरेरनुध्यातस्तत्पुंसामपिसंमतः ॥ कथंत्ववद्यंकृतवाननुशिक्षन्सतांव्रतम् १२ तितिक्षयाकरुणयामैत्र्याचाखि लजंतुषु ॥ समत्वेनचसर्वात्माभगवान्संप्रसीदति १३ संप्रसन्नेभगवतिपुरुषःप्राकृतैर्गुणैः ॥ विमुक्तोजीवनिर्मुक्तोब्रह्मनिर्वाणमृच्छति १४ भूतैःपंच भिरारब्धैर्योषित्पुरुषएवहि ॥ तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह १५ एवंप्रवर्त्ततेसर्गःस्थितिःसंयमएवच ॥ गुणव्यतिकराद्राजन्माययापरमात्मनः १६ निमित्तमात्रंतत्रासीन्निर्गुणःपुरुषर्षभः ॥ व्यक्ताव्यक्तमिदंविश्वंयत्रभ्रमतिलोहवत् १७ सखल्विदंभगवान्कालशक्त्यागुणप्रवाहेणविभक्तवीर्यः ॥ करो त्यकर्त्तैवनिहंत्यहंताचेष्टाविभून्नःखलुदुर्विभाव्या १८

चूर्णिका एतत् साद्भिः निंदितं कर्म अस्मत्कुलोचितं न अकृतापराधानां उपदेवानां वधः आरब्धःइदं अन्याय्यं ८ननु एकस्यअपराधेन प्रसंगात् त्वया बहवोहताः ९ अयं साधूनांपंथाःन १० भवा न्दुराराध्यंहरिंआराध्य विष्णोः परमंपदंलब्ध्वा ११ सतांव्रतंशिक्षन्कथंनिंद्यंकृतवान्असि १२ तितिक्षयाकरुणयामैत्र्याचाखिलजंतुषु समत्वेनचसर्वात्माभगवान् संप्रसीदति १३ भगवति प्रसन्ने सति पुरुषः प्राकृतैः गुणैः मुक्तोब्रह्मनिर्वाणमृच्छति १४ परमात्मनः मायया सृष्टिचक्रं प्रवर्तते १५ १६ तस्यकर्तव्यतांकोपिनवेद १७ १८

॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४८॥

ननुपित्रादिः सृजति। पालयतिराजादिः। निहंति चचोरादिः नत्वीश्वरस्तत्राह। सइति जनेन पित्रादिना जनंपुत्रादिंजनयन्नादिकृत् अंतकंचोरादिकंतन्मृत्युहेतुना राजादिना मारयन् अंतकरः स्वयंतुअनंतोऽना दिश्चअव्ययः अक्षीणशक्तिः। अयंभावः पित्रादयोऽन्यतउत्पत्त्यादिमंतोनस्वातंत्र्येणकारणं। किंत्वीश्वरएव तन्नियंतासर्वकारणमिति १९ नचैवंकुर्वतोपिवैषम्यप्रसक्तिःपक्षपाताभावादित्याह द्वाभ्याम्। नवैइति। (परस्यमृत्योः)मृत्युरूपस्यसमंयथाभवतितथाप्रजाः कर्मभूताः विशतः। तस्यसाम्येपिभूतेषुफलवैषम्यंतत्कर्मणांतथात्वादितिसदृष्टांतमाह। तंधावंतमनुअनीशाः कर्माधीनाःभूतसंघा धावंति। अनिलंधावंतमनुरजांसीव। तत्रयथारजसांतमःप्रकाशजलाग्न्यादिप्रवेशेपिनानिलस्य वैषम्यम्। एवमीश्वरस्यापीतिभावः। (आयुषः) अपचयं अकालमृत्युं उपचयं कालमृत्योरपरिक्षां। यद्वा अपचयं (अल्पत्वं) मशकादौउपचयं (आधिक्यं) देवादौ। स्वस्थत्वादुभाभ्यामुपचयापचयाभ्यांरहितोऽसौविभुर्दुस्थस्यकर्माधीनस्यजंतोर्जीवस्यविदधाति २१ एवंभूतश्चेश्वरःसर्ववादिसंमतः। विवादस्तु नाममात्रइत्याहकेचिदिति(केचिन्मीमांसकाःअपरेचार्वाकादयःएकेपौराणिकादयःपरेमौहूर्तिकाःदैवंग्रहादि।अपरेवात्स्यायनादयः) पुंसःकाममेवएनंईश्वरंवदंति।श्रुतिश्च। "कामोऽकार्षीत्।कामःकरोतिःकामः कर्ताकामःकारयिते"त्यादि २२ ननुकर्मादीनांजडत्वादिनास्वरूपतोपिभिन्नत्वात्कथमैकमत्यंतत्राह। अव्यक्तस्यअतएवाप्रमेयस्य। तथाप्यस्यसत्त्वेहेतुः। नानाशक्तीनांमहदादीनांउदयोयस्मात्। चिकीर्षितं (कर्तुमिष्टमेवहेतात) तावत्कोपिनवेद। अथस्वस्यसंभवोयस्मात्तमीश्वरंकोवेदनकापि। अद्धेतिपाठेसाक्षात्। अतस्तस्यतत्त्वज्ञानाभावाद्विशेषांशेविवादइतिभावः। तथाचश्रुतिः " कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृष्टिः। अर्वाग्देवाअस्य विसर्जनेनाथाकोवेदयतआबभूवे" ति। (यद्वाकोब्रह्मापियस्याचिकीर्षितंनवेद। स्वस्यापिसंभवोयस्मात्चिकीर्षिता दिति) २३ ईश्वरवादस्यप्रकृतोपयोगमाह। नचैते (यक्षा) भ्रातुर्हंतारः। अत्रउक्तमेवहेतुमनुवदाति। विसर्गादानयोःमृत्युजन्मनोः यद्वा विसर्गः सृष्टिः आदानंसंहारः (तयोः) दैवमीश्वरएवहि कारणं। २४ तथापिनिर्लेपतामाह। सएवेति। (नाज्यतेनलिप्यते) २५ अनहंकारित्वेहेतुमाह। एषइति (स्वशक्त्यायुक्तः भूतानिसृजतिअत्तिचसंहरति। भूतात्माभूतानामंतर्यामी साक्षीत्यर्थः)। २६ सत्यमीश्वरएवकर्ता तथाप्यहंकारादि मयात्यक्तुं न शक्यमितिचेदतआह। तमेवेतिचतुर्भिः। मृत्युमभक्तानां। भक्तानांत्वमृतं। जगतः (परमाश्रयं तमेवेश्वरं) उपेहि शरणं गच्छ। तमेवेत्यवधा रणे हेतुः यस्मैनसिनासिकायां दामभिर्बद्धा गावइव विश्वसृजोपि नामभिर्यंत्रिताबद्धाः संतोबलिंहरंति तत्कारितं कर्मकुर्वंतीत्यर्थः २७

श्लोकाः १९/२७

सोनंतोंतकरःकालोनादिरादिकृदव्ययः॥ जनंजनेनजनयन्मारयन्मृत्युनांतकम् १९ नवैस्वपक्षोस्यविपक्षएववापरस्यमृत्योर्विशतःसमंप्रजाः॥ तंधावमानम नुधावंत्यनीशायथारजांस्यनिलंभूतसंघाः २० आयुषोपचयंजंतोस्तथैवोपचयंविभुः॥ उभाभ्यांरहितःस्वस्थोदुःस्थस्यविदधात्यसौ २१ केचित्कर्मवदंत्ये नंस्वभावमपरेनृप॥ एकेकालंपरेदैवंपुंसःकाममुतापरे २२ अव्यक्तस्याप्रमेयस्यनानाशक्त्युदयस्यच॥ नवैचिकीर्षितंतातकोवेदाथस्वसंभवम् २३ नचैते पुत्रकभ्रातुर्हंतारोधनदानुगाः॥ विसर्गादानयोस्तातपुंसोदैवंहिकारणम् २४ सएवविश्वंसृजतिसएवावतिहंतिच॥ अथापिह्यनहंकारान्नाज्यते गुणकर्मभिः २५ एषभूतानिभूतात्माभूतेशोभूतभावनः॥ स्वशक्त्यामाययायुक्तःसृजत्यत्तिचपातिच २६ तमेवमृत्युममृतंतातदैवंसर्वात्मनोपेहि जगत्परायणम्॥ यस्मैबलिंविश्वसृजोहरंतिगावोयथावैनसिदामयंत्रिताः २७

॥४८॥

चूर्णिका १९ २० २१ २२ २३ २४ २५ २६ तस्मात् हेतात तमेवहरिंसर्वात्मनाशरणं व्रज २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

तदाराधनंचतवसुशकमेवेत्याह । यःपंचवर्षः सःत्वंयमाराध्यत्रिलोक्यामूर्ध्निपदंस्थानं लेभे लब्धवानसि । इदानीं तमेवान्विच्छ । अवलोकयेत्युत्तरेणान्वयः । (मातुःसपत्न्याः वाग्बाणेनभिन्नं मर्म सांधिस्थानंयस्य ।) प्रत्यंचिअक्षाणिइंद्रियाणियस्मिन् । क्रियाविशेषणंवा २८ हरिंध्यायंतं प्रत्याह । अंग ध्रुव मुक्तविग्रहेमुक्ताविरोधेआत्मनिमनसिव्यपाश्रितं अवास्थितंपरमात्मानं आत्मदृक्प्रत्यगदृष्टिःसन् इदंभेदमितिसमस्तं पदं । अयंदृश्यमानो भेदोयस्मिन् तदिदंभेदं विश्वं असदेवं यस्मिन्नधिष्ठाने प्रतीयते (सदिवदृश्यतेतं अन्विच्छआलोचय) २९ तदन्वेषणफलमाह । त्वंतदान्वेषणकालएव (उपसन्नाः उपगताः समस्ताः शक्तयो वृत्तयो यस्मिन् ।) ३० उपदेशसारमाह । संयच्छेतिद्वाभ्याम् । (श्रेयसां) प्रतीपंप्रतिकूलं अगदेन औषधेन यथारोगं नियच्छति ३१ येनरोषेणोपसृष्टात्व्याप्तात् । ३२ अन्यच्चत्वयाकार्यमित्याह । हेलनमिति द्वाभ्याम् । (हेलनमवज्ञानं । गिरिशभ्रातुः रुद्रसखस्य ।) यंचतः जाघ्निवान् घातितवान् ३३ (संनत्यासाष्टांगनमस्कारेण प्रश्रयोक्तिभिः विनयपूर्वकवचनैः । महतामिति बहुवचनेनइदंकर्मअन्येषामपि रोषायस्यादितिसूचितम्) ३४ । ३५ । इतिचतुर्थस्कंधे टीकायां एकादशोध्यायः ११ ॥ ॥ द्वादशेधनदेनाभिनंदितः पुरामगतः । यज्ञैरिष्ट्वाहरेःस्थानमारुरोहेतिकीर्त्यते । १ वैशसात् वधात् निवृत्तं (प्रतिबुध्यज्ञात्वाअपेतमन्युंअपगतक्रोधंकृतांजलिर्धैनतं ध्रुवमभ्यवदत्) १ हे क्षत्रियदायाद क्षत्रियपुत्र (पितामहादेशात् मनोराज्ञया) अत्यजः त्यक्तवानसि २ नचवैरस्यकारणमस्तीत्याह ॥ नभवानिति॥अप्ययभावयोः मृत्युजन्मनोः ३

श्लोकाः २८/३

यःपंचवर्षोजननींत्वंविहायमातुःसपत्न्यावचसाभिन्नमर्मा ॥ वनंगतस्तपसाप्रत्यगक्षमाराध्यलेभेमूर्ध्निपदंत्रिलोक्याः २८ तमेनमंगात्मानिमुक्तविग्रहेव्यपाश्रितंनिर्गुणमेकमक्षरम् ॥ आत्मानमन्विच्छविमुक्तमात्मदृग्यस्मिन्निदंभेदमसत्प्रतीयते २९ त्वंप्रत्यगात्मनितदाभगवत्यनंतआनंदमात्रउपपन्नसमस्तशक्तौ ॥ भक्तिंविधायपरमांशनकैरविद्याग्रंथिंविभेत्स्यसिममाहमितिप्ररूढम् ३०संयच्छरोषंभद्रंतेप्रतीपंश्रेयसांपरम् ॥ श्रुतेनभूयसाराजन्नगदेनयथामयम् ३१ येनोपसृष्टात्पुरुषाल्लोकउद्विजतेभृशम् ॥ नबुधस्तद्वशंगच्छेदिच्छन्नभयमात्मनः ३२ हेलनंगिरिशभ्रातुर्धनदस्यत्वयाकृतम् ॥ यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ३३ तंप्रसादयवत्साशुसन्नत्याप्रश्रयोक्तिभिः ॥ नयावन्महतांतेजःकुलंनोभिभविष्यति ३४ एवंस्वायंभुवःपौत्रमनुशास्यमनुर्ध्रुवम् ॥ तेनाभिवंदितःसाकमृषिभिःस्वपुरंययौ ३५ ॥ इतिश्रीभा॰ चतु॰ एकादशोध्यायः ॥ ११ ॥ ॥ ॥ मैत्रेयउवाच ॥ ध्रुवंनिवृत्तंप्रतिबुध्यवैशसादपेतमन्युंभगवान्धनेश्वरः ॥ तत्रागतश्चारणयक्षकिन्नरैःसंस्तूयमानोभ्यवदत्कृतांजलिम् १ ॥ ॥ धनदउवाच ॥ ॥ भोभोक्षत्रियदायादपरितुष्टोस्मितेनघ ॥ यस्त्वंपितामहादेशाद्वैरंदुस्त्यजमत्यजः २ नभवानवधीद्यक्षान्नयक्षाभ्रातरंतव ॥ कालएवहिभूतानांप्रभुरप्ययभावयोः ३

चूर्णिका

यत्प्रसादात् लोकत्रयमूर्ध्निपदं लब्धवानसि २८ तंपरमात्मानं अवलोकय २९ अहंकारग्रंथिंछित्वातद्भक्तिंकुरु ३० हे ध्रुव श्रेयसांघातकं रोषं संयच्छ ३१ रेत्वयाशिवसखस्य कुवेरस्यहेलनं कृतम् ३२ ३३ अतः नम्रत्वेन तं प्रसादय यावत् महतांतेजः नः कुलं न अभिभवेत् ३४ तावत् मनुः एवंपौत्रं अनुशास्य ऋषिभिः सह स्वपुरं ययौ ३५ इति चतुर्थे एकादशः ११ ॥ मैत्रेयउवाच ॥ कुवेरः ध्रुवं वधात् निवृत्तंज्ञात्वा यक्षादिभिः स्तूयमानः तत्रागत्यध्रुवं अवदत् १ ॥ धनदउवाच ॥ हेक्षत्रियपुत्रपत्वंमन्वादेशात् वैरंत्यक्तवान् २ अतः तेभद्रम् भवान् यक्षान्नावधीत् नयक्षाः तवभ्रातरं किंतुकालएवासर्वेषांमृत्युजन्मनोः प्रभुः ३

टीका.

कथंतर्हि अहं हंतेत्यादिबुद्धिस्तत्राह । अहंत्वमिति । (अज्ञानात् आत्मज्ञानाभावात्) आभाति प्रकाशते जायते इत्यर्थः अतद्ध्यानात् देहानुसंधानात् । (स्वाप्नीवस्वप्नसंबंधिनीधीरिव । साहिमनोम यदेहानुसंधानात् अहंत्वमितिअपार्थापिभाति) ययाधियाकर्मात्मकोबंधः विपर्ययोदुःखादिश्च ४ तत्तस्माद्गच्छ गत्वाचभगवंतं भजस्वेत्युत्तरेणान्वयः । सर्वभूतात्मकोविग्रहोयस्यतं । (सर्वेषुभूतेषुयआ त्मभावस्तेन ५ (अभवायमोक्षाय) । युक्तंपुक्तमिव वस्तुतस्तुविरहितमित्यर्थः । यद्वा शक्त्याशुद्धसत्त्वात्मिकयायुक्तं गुणमय्या (त्रिगुणात्मिकया) आत्माधीनया प्रकृत्याविरहितं ६ (हेनृप) कामंअसं कोचेन । (हे औत्तानपदे) अविशंकितः (अन्यतः कथं वृणोमीति) शंकारहितः । (अंबुजनाभस्यहरेः) अनंतरं अतिनिकटं (श्रुतवंतः) ७ (राजराजेनधनदेन) वरायचोदितइत्यनुवादरूपं पृथग्वाक्यं । अतः सचवव्रेइति तच्छब्दस्यापौनरुक्त्यं । (अचलितांस्थिरां । ययास्मृत्यातमोमोहं संसाराब्धिमित्यर्थः) ८ (ऐडविडइडविडायाः पुत्रोधनदः तांस्मृतिं । पश्यतोध्रुवस्यसतः । सोपि ध्रुवोपि) ९द्रव्यक्रियादेवतानांकर्म साध्यं । द्रव्यादिशब्दैर्यज्ञादिकर्मलक्ष्यते । तत्फलरूपं कर्मफलप्रदंचेत्यर्थः १० सर्वस्यात्मानि असर्वे सर्वोपाधिवर्जिते । (अव्धौगंगायाइवतीव्रओघोयस्याः आत्मनिस्व स्मिन्भूतेषुचावस्थितं) ११ (तंपितरमेवमेनिरे) १२ (पुण्यक्षयं प्रारब्धपुण्यनाशं) अभोगैः यज्ञाद्यनुष्ठानैः (पापक्षयंकुर्वन्) १३ बहवः सवायागाः संवत्सर वायस्मिन्तंकालं त्रिवर्गौपयिकंत्रिवर्ग साधकंनीत्वा अविचलानिसंयतानिइंद्रियाणियस्य १४ इदंदेहादि (समस्तं) भगवन्माययाआत्मनिस्वस्मिन्रचितंमन्यमानः अत्रअविद्यासृष्टिंदृष्टांतयति । अविद्येति । (आत्माज्ञानरचित स्वप्नादियथा तथेत्यर्थः) १५ आत्मादेहः (ऋद्धउपचितः कोशोधनागारं । अंतःपुरंस्त्रीगृहंअन्याश्चरम्याःपरितोविहारभुवः) आत्मादिमायिकमपिपुनःकालेनोपसृष्टंअनित्यं (उपद्रुतंच) आकलय्याविचिंत्य (इत्यतो हेतोः) विशालांबदरिकाश्रमंप्रतस्थे १६

श्लोकाः ४/१६

अहंत्वमित्यपार्थाधीरज्ञानात्पुरुषस्यहि ॥ स्वाप्नीवाभात्यतद्ध्यानाद्ययाबंधविपर्ययौ ४ तद्गच्छध्रुवभद्रंतेभगवंतमधोक्षजम् ॥ सर्वभूतात्मभावेनसर्वभू तात्मविग्रहम् ५ भजस्वभजनीयांघ्रिमभवायभवच्छिदम् ॥ युक्तंविरहितंशक्त्यागुणमय्यात्ममायया ६ वृणीहिकामंनृपयन्मनोगतंमत्तस्त्वमौत्तानपदेवि शंकितः ॥ वरंवरार्होंबुजनाभपादयोरनंतरंत्वांवयमंगशुश्रुम ७ ॥ ॥ मैत्रेयउवाच ॥ ॥ सराजराजेनवरायचोदितोध्रुवोमहाभागवतोमहामतिः ॥हरौ सवव्रेचलितांस्मृतिंययातरत्ययत्नेनदुरत्ययंतमः ८ तस्यप्रीतेनमनसातांदत्त्वैडविडस्ततः ॥ पश्यतोंतर्दधेसोपिस्वपुरंप्रत्यपद्यत ९ अथायजतयज्ञेशंक्रतु भिर्भूरिदक्षिणैः ॥ द्रव्यक्रियादेवतानांकर्मकर्मफलप्रदम् १० सर्वात्मन्यच्युतेसर्वेतीव्रौघांभक्तिमुद्वहन् ॥ ददर्शात्मनिभूतेषुतमेवावस्थितंविभुम् ११ तमेवंशी लसंपन्नंब्रह्मण्यंदीनवत्सलम् ॥ गोप्तारंधर्मसेतूनांमेनिरेपितरंप्रजाः १२ षट्त्रिंशद्वर्षसाहस्रंशशासक्षितिमंडलम् ॥ भोगैःपुण्यक्षयंकुर्वन्नभोगैरशुभक्षयम् १३ए वंबहुसवंकालंमहात्माविचलेंद्रियः ॥ त्रिवर्गौपयिकंनीत्वापुत्रायादान्नृपासनम् १४ मन्यमानइदंविश्वंमायारचितमात्मनि ॥ अविद्यारचितस्वप्नगंधर्वनगरो पमम् १५ आत्मस्त्र्यपत्यसुहृदोबलमृद्धकोशमंतःपुरंपरिविहारभुवश्चरम्याः ॥ भूमंडलंजलधिमेखलमाकलय्यकालोपसृष्टमितिसप्रययौविशालाम् १६

चूर्णिका

इतः त्वंगच्छ ४ ५ हरिभक्तिं कुरु ६ मत्तः कामवरं वरय ७ ॥ मैत्रेयउवाच ॥ तदाध्रुवः अचलांस्मृतिंवव्रे ८ कुबेरः तथेत्युक्त्वाअंतर्दधे ध्रुवः स्वपुरंययौ ९ भूरिदक्षिणैः क्रतुभिः हरिंअयजत् १० प्रजाःतंपितृवत् मेनिरे ११ १२ सः क्षितिमंडलं षट्त्रिंशत् वर्षसहस्रं शशास एवं अनेकयज्ञैः बहुकालंनीत्वासुखदुःखादिभोगैः पुण्यपापक्षयंकुर्वन् १३ इदंविश्वंआत्मनिमायारचितं मन्यमानः पुत्राय राज्यं दत्वा १४ १५ स्वयं बदरिकाश्रमंययौ १६

तत्रतत्कृतमष्टांगयोगमाह । तस्यां (विशालायां) शिवं वाःउदकं विगाह्यमविश्येतिस्नानादिनियमाउक्ताः।विशुद्धकरणइतितुशमादयोयमा (उक्ताः) आसनादीनि (क्रमेण) स्फुटमेवोक्तानि ।(आसनंपद्मस्व स्तिकादि ।) बृसींवा । जितोमरुत्प्राणोयेनसः । (मनसाकृत्वा) आहृतानिअक्षाणि इंद्रियाणियेन । भगवतःप्रतिनिधिभूतेस्थूलेविराड्रूपेएतन्मनोदधार । (तथा) ध्यायन् (ध्यानं कुर्वन्) अव्यवहितो (ध्यानपरिपाके) ध्यातृध्येयभेदशून्यःसन् समाधौस्थितः तत्स्थूलंव्यसृजत् १७एवमजस्रंनित्यंहरौभक्तिप्रकर्षेणवहन्असौध्रुवोहमित्यात्मानं न सस्मार । यतोमुक्तलिंगःत्यक्तशरीराभिमानः । तत्रहेतवः । आनंदबाष्पस्यकलयाबिंदुप्रवाहेण (मुहु-)रभिभूयमानः विक्लिद्यमानं द्रवत् हृदयंयस्य । पुलकैः (रोमांचैराचितांगो)व्याप्तांगः १८ (राकापतिंपूर्णचंद्रम्) १९ अनुअनंतरंदेवप्रवरौददर्शेत्यनुषंगः । गदामवष्टभ्य स्थितौ। किरीटादिभिःसहितचारुणीकुंडलेययोः । २० उत्तमगायःपुण्यश्लोकोहरिस्तस्यकिंकरौतौ विज्ञायमधुद्विषः पार्षत्प्रधानाविितिहेतोः साध्वसेनसंभ्रमेण विस्मृतपूजाक्रमः(अभ्युत्थितः) केवलंतस्य नामानि गृणन्ननाम २१ (तमुपसृत्य उपगम्य ज्ञात्वेतिवासुनंदसंज्ञौपद्मनाभस्यसंमतौपार्षदौ) २२ सुभद्रंतइतिसशरीरस्यैवविष्णुपदारोहाभिप्रायम् । (अवहितः सावधानः) अतीतृपतत् पिंतवान् २३ आवां तस्यपार्षदौ सुदुर्जयत्वेहेतुः । सूरयःसप्तर्षयोपियदप्राप्यकेवलमधःस्थिताःपश्यंति । यच्चंद्रादयोदक्षिणंप्रदक्षिणंयथाभवतितथापरिक्रामंति । तत्आतिष्ठअधितिष्ठ । २५ । २६ आयुष्मन्नित्यपिसंबोधनंसशरीरयानाभिप्रायमेव (उपस्थापितंप्रेषितम्) २७ मधुच्यवते स्रवतीतिमधुच्युत्तां । पाठांतरेमधुच्युतंस्रुतंयंस्यांतांअमृतस्राविणीमित्यर्थः कृतंनित्यं नित्यकर्ममंगलंचालंकरणंयेन । अभ्यवादयत् वादयामास । (स्वस्तिभवंतोब्रुवंत्वितिप्रार्थयतेस्मेत्यर्थः) २८ (परीत्यप्रदक्षिणीकृत्य) तदेवरूपंहिरण्मयंबिभ्रत्सन्इयेषऐच्छत् २९

श्लोकाः १७/२९

तस्यांविशुद्धकरणःशिववार्विगाह्यबद्ध्वासनंजितमरुन्मनसाहृताक्षः॥ स्थूलेदधारभगवत्प्रतिरूपएतद्ध्यायंस्तदव्यवहितोव्यसृजत्समाधौ १७ भक्तिंहरौभगवतिप्रवहन्नजस्रमानंदबाष्पकलयामुहुरर्द्यमानः ॥ विक्लिद्यमानहृदयःपुलकाचितांगोनात्मानमस्मरदसावितिमुक्तलिंगः १८ सददर्शविमानाग्र्यंनभसोवतरद्ध्रुवः विभ्राजयद्दशदिशोराकापतिमिवोदितम् १९ तत्रानुदेवप्रवरौचतुर्भुजौश्यामौकिशोरावरुणांबुजेक्षणौ ॥ स्थितावष्टभ्यगदांसुवाससौकिरीटहारांगदचारुकुंडलौ २० विज्ञायतावुत्तमगायकिंकरावभ्युत्थितःसाध्वसविस्मृतक्रमः ॥ ननामनामानिगृणन्मधुद्विषःपार्षत्प्रधानाविितिसंहतांजलिः २१ तंकृष्णपादाभिनिविष्टचेतसंबद्धांजलिंप्रश्रयनम्रकंधरम् ॥ सुनंदनंदावुपसृत्यसस्मितंप्रत्यूचतुःपुष्करनाभसंमतौ २२ ॥ ॥ सुनंदनंदावूचतुः ॥ ॥ भोभोराजन्सुभद्रंतेवाचंनोवहितःशृणु ॥ यःपंचवर्षस्तपसाभवान्देवमतीतृपत् २३ तस्याखिलजगद्धातुरावांदेवस्यशार्ङ्गिणः ॥ पार्षदाविहसंप्राप्तौनेतुंत्वांभगवत्पदम् २४ सुदुर्जयंविष्णुपदंजितंत्वयायत्सूरयोप्राप्यविचक्षतेपरम् ॥ आतिष्ठतच्चंद्रदिवाकरादयोग्रहर्क्षताराःपरियंतिदक्षिणम् २५ अनास्थितंतेपितृभिरन्यैरप्यंगकर्हिचित् ॥ आतिष्ठजगतांवंद्यंतद्विष्णोःपरमंपदम् २६ एतद्विमानप्रवरमुत्तमश्लोकमौलिना ॥ उपस्थापितमायुष्मन्नधिरोढुंत्वमर्हसि २७ ॥ मैत्रेयउवाच ॥ ॥ निशम्यवैकुंठनियोज्यमुख्ययोर्मधुच्युतंवाचमुरुक्रमप्रियः ॥ कृताभिषेकःकृतनित्यमंगलोमुनीन्प्रणम्याशिषमभ्यवादयत् २८ परीत्याभ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवंद्यच ॥ इयेषतदधिष्ठातुंबिभ्रद्रूपंहिरण्मयम् २९

॥५१॥

चूर्णिका

तत्र स्नात्वा आसनं बध्वा जितमनाःसन् स्थूलेविराड्रूपेमनःदधार १७ समाधिरूपःअभवत् १८ ततः विमानस्थौसुनंदनंदौचप्राप्तौदृष्ट्वा १९२०२१ ताभ्यांननाम ॥तदासुनंदनंदावूचतुः २२ भोराजन्तेभद्रम् यः त्वंपंचवर्षः देवंतर्पितवान् २३ तस्यहरेः पार्षदौत्वांभगवत्पदंनेतुंप्राप्तौविद्धि २४ हेतातदुर्जयंपदंत्वयाजितम् २५ अतः जगद्वंद्यंविष्णोः पदंआतिष्ठ २६ २७ ॥ ॥ मैत्रेयउवाच ॥ ॥ ध्रुवः एवंश्रुत्वामुनीन्प्रणम्य २८ विमानं तौ चनमस्कृत्यतत्आरोढुं ऐच्छत् २९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गृहं विमानं अयंभावः यदा ध्रुवोविमानमारोढुमैच्छत्तदामृत्युरागत्य प्रणम्योवाच हे महाराज मामंगीकुरु उवाच ध्रुवःस्वागतं ते क्षणं तावदुपविश एवमुक्त्वाध्रुवोविष्णुस्मरणंकृत्वामृत्योर्मूर्ध्निपदंदत्त्वाविमाना
ग्र्यमारुरोह ३० ३१ दीनांजननींहित्वाअगंदुर्गमंत्रिविष्टपंयास्यामीत्यन्वस्मरत् ३२ (इति) व्यवसितंअभिप्रायं व्यवसायज्ञात्वा ३३ ३४ देवयानेनदेवमार्गेणविमानेनेतिवा(विमानैश्चरंतिवैमानिकास्तैःपुष्पै
रवकीर्यमाणःग्रहान्क्रमशोदद्दशेददर्श) मुनीन्सप्तर्षीनपि (अतिव्रज्य) ततः (परस्ताद्यत्विष्णोःपदंतदभ्यगात् । ध्रुवागतिर्यस्यसः (ध्रुवइत्यर्थः)३५ यत् (स्वरुचैव) भ्राजमानमनुयस्यरुचालो
काविभ्राजंते । ये (जंतुषु)अननुग्रहानिष्कृपास्तेयन्नाव्रजन् । नगतवंतः । येजंतुषुअनिशंभद्राणिचरंतिअनुग्रहान्कुर्वंतीत्यर्थः तेयद्व्रजंति) ३६ अच्युतप्रियाः(भागवताः) बांधवायेषाम् ३७ । ३८
अनिमिषंअनलसंज्योतिषांचक्रंयस्मिन् (पदे) आहितंअर्पितंसत्भ्रमति । मेढ्यां (स्तंभविशेषेधान्यमर्दनार्थ–) माहितोगंभीरवेगोगवांगणइव ३९ आतोद्यंवीणांवितुदन्प्रचेतसांब्रह्मसत्रेभगवन्माहा
त्म्यप्रसंगेनध्रुवमहिमप्रतिपादनपरान्त्रीन्श्लोकान्अगायत् ४० नूनमिति । पतिरेवदेवतायस्यास्तस्याः सुतस्ययस्तपःप्रभावस्तस्यतांगतिफलमधिगंतुंवेदवादनशीलाब्रह्मर्षयोपिनैवप्रभवंतिअभ्युपायान्
भगवद्धर्मान्दृष्ट्वापिकिंपुनर्नृपाः ४१ तपःप्रभावंगतिंचविशिनष्टिद्वाभ्याम् । गुरुदाराः पितृपत्नीसुरुचिः तस्यावाक्शरैः निर्भिन्नेनअतएवदूयताहृदयेनवनंयातः सन्अजितमपि (प्रभुं) जिगायवशीकृत
वान् (तस्यभक्तानांगुणैर्हिपराजितंममनारदस्यआदेशंकरोतितच्छीलः) ४२

॥५२॥

तदोत्तानपदःपुत्रोददर्शांतकमागतम् ॥ मृत्योर्मूर्ध्निपदंदत्त्वाआरुरोहाद्भुतंगृहम् ३० तदादुंदुभयोनेदुर्मृदंगपणवादयः ॥ गंधर्वमुख्याःप्रजगुःपेतुःकुसुमवृष्टयः ३१
सचस्वर्लोकमारोक्ष्यन्सुनीतिंजननींध्रुवः ॥ अन्वस्मरदगंहित्वादीनांयास्येत्रिविष्टपम् ३२ इतिव्यवसितंतस्यव्यवसायसुरोत्तमौ ॥ दर्शयामासतुर्देवींपुरोयानेन
गच्छतीम् ३३ तत्रतत्रप्रशंसद्भिःपथिवैमानिकैःसुरैः ॥ अवकीर्यमाणोददृशेकुसुमैःक्रमशोग्रहान् ३४ त्रिलोकींदेवयानेनसोतिव्रज्यमुनीनपि ॥ परस्ताद्यद्ध्रुवग
तिर्विष्णोःपदमथाभ्यगात् ३५ यद्भ्राजमानंस्वरुचैवसर्वतोलोकास्त्रयोह्यनुविभ्राजंतएते ॥ यन्नाव्रजन्जंतुषुयेननुग्रहाव्रजंतिभद्राणिचरंतियेनिशम् ३६ शां
ताःसमदृशःशुद्धाःसर्वभूतानुरंजनाः ॥ यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ३७ इत्युत्तानपदःपुत्रोध्रुवःकृष्णपरायणः ॥ अभूत्त्रयाणांलोकानांचूडाम
णिरिवामलः ३८ गंभीरवेगोनिमिषंज्योतिषांचक्रमाहितम् ॥ यस्मिन्भ्रमतिकौरव्यमेढ्यामिवगवांगणः ३९ महिमानंविलोक्यास्यनारदोभगवानृषिः ॥ आ
तोद्यंवितुदञ्श्लोकान्सत्रेगायत्प्रचेतसाम् ४० ॥ ॥ नारदउवाच ॥ ॥ नूनंसुनीतेःपतिदेवतायास्तपःप्रभावस्यसुतस्यतांगतिम् ॥ दृष्ट्वाभ्युपायानपिवेद
वादिनोनैवाधिगंतुंप्रभवंतिकिंनृपाः ४१ यःपंचवर्षोगुरुदारवाक्शरैर्भिन्नेनयातोहृदयेनदूयता ॥ वनंमदादेशकरोजितंप्रभुंजिगायतद्भक्तगुणैःपराजितम् ४२

श्लोकाः ३० / ४२

चूर्णिका

तदामृत्युः आगत्य आह हे महाराजमांअंगीकुरु ॥ ध्रुवउवाच ॥ ते स्वागतंक्षणंतिष्ठ एवमुक्त्वाध्रुवः विष्णोः स्मरणंकृत्वा मृत्योः मूर्ध्निपदंदत्वा विमानं आरुहत् ३० तदास्वर्गेदुं
दुभ्य॥दिवाद्यानिनेदुःगधर्वाःजगुः पुष्पवृष्टयः पेतुः ३१ सःस्वर्लोकंगच्छन् जननींसस्मार ३२ तदा॥विष्णुपार्षदौअग्रेविमानेनगच्छंतींसुनीतीं दर्शयामासतुः ३३ स्वर्ग
मार्गेदेवैः स्तुवद्भिः कुसुमैरवकीर्यमाणः ग्रहान्मुनींश्च अतिव्रज्यविष्णोः पदंअगात् ३४ ३५ इतिध्रुवः त्रयाणांलोकानांचूडामणिरिवअभूत् ३६ ३७ ३८ नारदःध्रुवप्रभावंप्रचे
तसांसत्रे अगायत् ३९ ४० ध्रुवस्यविक्रमयोगिनोपिप्राप्तुंनालंकिंपुनर्नृपाः ४१ यः पंचवर्षःप्रभुंवशीकृतवान् ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१३॥

तस्याधिरूढंतेनप्राप्तंपदंयोभुविक्षत्रबंधुः क्षत्रियोभवेत्सः तमनुवर्षसमूहैरपि (आरुरुक्षेदपि) आरोढुमिच्छेत्किं । तत्संकल्पोप्यशक्यः दूरतआरोहणमित्यर्थः कथंभूतंपदं।षड्वा पंचवा वर्षाणियस्यसःअल्पै
रेवाहोभिः वैकुंठंप्रसाद्य यत्तस्यपदमवाप तत् । ४३ उद्दामंउत्कृष्टंयशोयस्य । ४४ धनादेर्निमित्तं । ध्रौव्यंध्रुवस्थानप्रापकं। प्रशस्यंप्रशंसार्हं । अघमर्षणंपापनाशनम् । ४५ अच्युतप्रियस्यध्रुवस्यचेष्टितंश्रुत्वा
योवर्तते तस्य भक्तिर्भवेत् । ४६ तीर्थंमहत्त्वावाप्तिस्थानम् । (शीलादयः सद्वृत्तप्रभृतयः) गुणायत्रभवंति । ४७ समवायेसभायां। ४८ (पूर्णमास्यांपूर्णिमायां। सिनीवाल्यांअमायाम्)४९ नेच्छन्निष्कामः।
(तीर्थपादस्यविष्णोः पदकमलमेवाश्रयोयस्य।) तत्रश्रवणेआत्मनैव(स्वतएव)आत्मानंप्रतिसंतुष्टोभवतीतिहेतोः सिद्धिमाप्नोति। ५० किंच सत्पथेभगवन्मार्गेअमृतरूपंज्ञानंयोदद्यात् ५१ ध्रुवस्यचरितंमया
ऽभिहितं मातुर्गृहंचहित्वा (हेकुरूद्वह) ५२ इतिचतुर्थेद्वादशः १२ ॥ ॥ एवंपंचभिरध्यायैर्ध्रुवचर्याऽनुवर्णिता । अथैकादशभिश्चित्रंपृथुचारित्रमुच्यते ।१ तत्रत्रयोदशेवक्तुंपृथोर्जन्मध्रुवान्वये । अंगोवेनापि
॥५३॥ तापुत्रक्रौर्याद्व्रतइतीर्यते ॥२॥ प्ररूढोभावोभक्तिर्यस्यसः (तंकौषारविम्) १ (सत्रेऽप्यायत्प्रचेतसामितियेभवतोक्ताः केते) अन्ववायेवंशे । २ नारदेनप्रचेतसांसत्रेवर्णिताः कथाः प्रष्टुंतन्महिमानमाह मन्यइति।
देवस्यदर्शनंयस्य । हरेः परिचर्याप्रकारः क्रियायोगः पंचरात्रेयेनप्रोक्तः । ३

यःक्षत्रबंधुर्भुवितस्याधिरूढमन्वारुरुक्षेदपिवर्षपूगैः ॥ षट्पंचवर्षोयदहोभिरल्पैःप्रसाद्यवैकुंठमवापतत्पदम् ४३ ॥ ॥ मैत्रेयउवाच ॥ ॥ एतत्तेभिहितंस श्लोकाः
र्वंयत्पृष्टोहमिहत्वया॥ध्रुवस्योद्दामयशसश्चरितंसंमतंसताम् ४४ धन्यंयशस्यमायुष्यंपुण्यंस्वस्त्ययनंमहत् ॥ स्वर्ग्यंध्रौव्यंसौमनस्यंप्रशस्यमघमर्षणम् ४५ श्रु
त्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितम्॥भवेद्भक्तिर्भगवतिययास्यात्क्लेशसंक्षयः ४६ महत्त्वमिच्छतांतीर्थंश्रोतुःशीलादयोगुणाः॥यत्रतेजस्तदिच्छूनांमानोय ४३/३
त्रमनस्विनाम् ४७ प्रयतःकीर्त्तयेत्प्रातःसमवायेद्विजन्मनाम्॥सायंचपुण्यश्लोकस्यध्रुवस्यचरितंमहत् ४८ पौर्णमास्यांसिनीवाल्यांद्वादश्यांश्रवणेथवा॥दिनक्ष
येव्यतीपातेसंक्रमेर्कदिनेपिवा ४९ श्रावयेच्छ्रद्दधानानांतीर्थपादपदाश्रयः ॥ नेच्छंस्तत्रात्मनात्मानंसंतुष्टइतिसिध्यति ५० ज्ञानमज्ञाततत्त्वाययोदद्या
त्सत्पथेमृतम् ॥ कृपालोर्दीननाथस्यदेवास्तस्यानुगृह्णते ५१ इदंमयातेभिहितंकुरूद्वहध्रुवस्यविख्यातविशुद्धकर्मणः ॥ हित्वार्भकःक्रीडनकानिमातुर्गृहं
चविष्णुंशरणंयोजगाम ५२ इतिश्रीभा०म०च०स्कंधेध्रुवचरितंनामद्वादशोध्यायः १२ ॥ ॥ सूतउवाच ॥ ॥ निशम्यकौषारविणोपवर्णितंध्रुवस्य
वैकुंठपदाधिरोहणम् ॥ प्ररूढभावोभगवत्यधोक्षजेप्रष्टुंपुनस्तंविदुरःप्रचक्रमे १ ॥ ॥ विदुरउवाच ॥ केतेप्रचेतसोनामकस्यापत्यानिसुव्रत ॥ कस्यान्ववा
येप्रख्याताःकुत्रवासत्रमासते २ मन्येमहाभागवतंनारदंदेवदर्शनम् ॥ येनप्रोक्तःक्रियायोगःपरिचर्याविधिर्हरेः ३

चूर्णिका ४३ ॥ ॥ मैत्रेयउवाच ॥ ॥ ध्रुवस्यचरितं ते कथितम् ४४ इदंधन्यं यशस्यं आयुष्यं स्वर्ग्यं पापनाशकं ४५ एतत् श्रुत्वाभगवतिभक्तिः क्लेशक्षयश्चभवति ४६ पौर्णिमास्यां
सिनीवाल्यां द्वादश्यां श्रवणे दिनक्षयेव्यतीपाते संक्रमे रवौ यः शृणुयात् ४७ ४८ ४९ यः श्रावयेत् स सिद्धिआप्नोति ५० इदंध्रुवाख्यानंतेकथितम् ५१ ५२ ॥ ॥ इतिचतु ॥५३॥
र्थेद्वादशः १२ ॥ ॥ सूतउवाच ॥ ॥ मैत्रेयात् ध्रुवचरितं श्रुत्वा भगवद्भक्त्यापूर्णः विदुरः पप्रच्छ १ ॥ ॥ विदुरउवाच ॥ ॥ तेप्रचेतसः के कस्यान्वये जाताः कुत्र सत्रं
आसत २ नारदेन तत्र भगवत्कथाः वर्णिताः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्वधर्मशीलैः प्रचेतोभिः। ४ (आचष्टुंआख्यातुम्) ५ ध्रुवस्यवंशेतेजाताइातिवक्तुंध्रुवस्यवंशमनुक्रामति ध्रुवस्येत्यादिना। पितुःसार्वभौमश्रियंनैच्छत् अधिराजासनंच ६ अनिच्छायांहेतुमाह सइतिचतुर्भिः।
(जन्मारभ्यउपशांतः आत्मा अंतःकरणंयस्य। यतोनिःसंग विषयसंगराहितः समंब्रह्मपश्यतीतितंतथा। तदेवाह ददर्शेति) ७ आत्मानंस्वरूपभूतंब्रह्मअवरुंधानः आप्नुवन् जानन् आत्मनोनान्यंतदैक्षत
(इतिद्वयोरन्वयः) स्वयंतुसर्वस्मादन्यः सन्। कथंभूतंब्रह्मनिर्वाणं शांतं। प्रत्यस्तमितविग्रहं प्रतिसंधानेनअस्तमितः (लयंप्राप्तो) विग्रहो (भेदोदेहादिप्रपंचो) यस्मिन् (यदनुसंधानेदेहाद्यनुसं
धानाभावस्तादृशमित्यर्थः) अवबोधरसेनऐकात्म्यंयस्य। ८(कथंभूतः। अव्यवच्छिन्नोनिरंतरोयोयोगः सएवाग्निस्तेनदग्धः कर्ममलआशयोवासनायस्य) ९ जडादीनामिव (आकृति)-र्यस्यतथाभूतो (बाला
नामविवेकिनांपथि) लक्षितः (वस्तुतः) अतन्मतिः नतेषामिवमतिर्यस्यसर्वज्ञत्वात्। प्रशांतान्यर्चींषिज्वालायस्यअनलस्यतद्वत्स्थितः। (भस्मच्छन्नोग्निर्यथाअंतस्तेजोरूपोपिअबहिर्नतथातद्वदित्यर्थः
१० यवीयांसंउत्कलात्कनिष्ठम् ११ इष्टाप्रिया (स्ववींथिसंज्ञा) भार्या १२। १३ निशिथोनिशीथः (त्रयइतित्रित्वं प्रभासुतेष्वपि ज्ञेयम्।) १४ ससर्वतेजाः चक्षुःसंज्ञंसुतंमनुरूपमवाप। मनो
र्महिषीनाम्नानड्वलाविरजान्शुद्धान्पुरुप्रमुखान्द्वादशसुतान्असूत। १५

श्लोकाः ४/१५

स्वधर्मशीलैःपुरुषैर्भगवान्यज्ञपूरुषः॥ इज्यमानोभक्तिमतानारदेनेरितःकिल ४ यास्तादेवर्षिणातत्रवर्णिताभगवत्कथाः॥ मह्यंशुश्रूषवेब्रह्मन्कात्स्न्र्येनाचष्टु
मर्हसि ५॥ ॥ मैत्रेयउवाच॥ ॥ ध्रुवस्यचोत्कलःपुत्रःपितरिप्रस्थितेवनम्॥सार्वभौमश्रियंनैच्छदधिराजासनंपितुः ६ सजन्मनोपशांतात्मानिःसंगः
समदर्शनः॥ददर्शलोकेविततमात्मानंलोकमात्मनि ७ आत्मानंब्रह्मनिर्वाणंप्रत्यस्तमितविग्रहम्॥अवबोधरसैकात्म्यमानंदमनुसंततम् ८ अव्यवच्छिन्नयो
गाग्निदग्धकर्ममलाशयः॥ स्वरूपमवरुंधानोनात्मनोन्यंतदैक्षत ९ जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः॥ लक्षितःपथिबालानांप्रशांतार्चिरिवानलः
१० मत्वातंजडमुन्मत्तंकुलवृद्धाःसमंत्रिणः॥ वत्सरंभूपतिंचक्रुर्यवीयांसंभ्रमेःसुतम् ११ स्ववींथिर्वत्सरस्येष्टाभार्यासूतषडात्मजान्॥ पुष्पार्णंतिग्मकेतुंच
इषमूर्जंवसुंजयम् १२ पुष्पार्णस्यप्रभाभार्यादोषाचद्वेबभूवतुः॥ प्रातर्मध्यंदिनंसायमितिह्यासन्प्रभासुताः १३ प्रदोषोनिशिथोव्युष्टइतिदोषासुतास्त्रयः॥
व्युष्टःसुतंपुष्करिण्यांसर्वतेजसमादधे १४ सचक्षुःसुतमाकूत्यांपत्न्यांमनुमवापह॥ मनोरसूतमहिषीविरजान्नड्वलासुतान् १५

चूर्णिका

४ तदेतत् सर्वंवद ५॥ ॥ मैत्रेयउवाच॥ ॥ ध्रुवस्य इडायां जातःउत्कलः पुत्रः पितरिवनंगते राज्यंनैच्छत् ब्रह्मनिष्ठत्वात् ६ किंच आत्मनः अन्यंनैक्षत् ७ ८
९ १०तदा वृद्धाःमंत्रिणः तंराज्यानर्हंमत्वा भ्रमेः सुतं कनिष्ठं वत्सरंनामभूपतिं चक्रुः ११ वत्सरः स्ववीथिपत्न्यांषट्सुतान्प्रासूत पुष्पार्णतिग्मकेतुं इषंऊर्जंवसुंजयामिति ६
१२ वत्सरज्येष्ठपुत्रस्यपुष्पार्णस्यप्रभादोषाच द्वेभार्ये तत्रप्रभासुता प्रातः मध्यं सायमितिः १३ दोषायास्तु प्रदोषः निशिथः व्युष्ट इतित्रयः व्युष्टस्यपुष्करिण्यां सर्वतेजा
जातः १४ सएवआकूत्यां पत्न्यां चक्षुःसंज्ञं मनुं अजनयत् तस्मात् नड्वलायां द्वादशपुत्राः १५ ॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

। १६ । १७ । (तत्रांगस्ययापत्नीनाम्नासुनीथा साउल्बणंअसुरस्वभावंयद्दौःशिल्यात्यस्यदौरात्म्यात्) १८ अंगविदुर । वागेववज्रंयेषाम् । १९ मथनेहेतुः । अराजकइति । आद्यः पुरग्रामादी नांतेनरचितत्वात् । २० (तस्यअंगस्य । प्रजासंततिः) यत्यस्याः प्रजायाहेतोः विमनाः सन् ययौ । २१ किंचअंहः कमपराधंवेनमुद्दिश्यआलक्ष्य । (दंडव्रतंशासनाख्यंव्रतंधारयतीतितस्मि न्अयूयुजन् योजितवंतः) २२ यतोयमधर्मइत्याह । नावध्येयः अवज्ञेयोपिनभवति । (अघवानपराधवानपि । तत्रनिमित्तमाह । यदितिलोकपालानामिंद्रादीनाम्) २३ परावरविदांमध्येश्रेष्ठस्त्वम् २४ अभावीपुत्रः काम्यकर्मणाबलादापादितोनसुखायभवेदितिद्योतयन्अंगस्यपुत्रोत्पत्तिक्रममाह । अंगइत्यादिना । २५ (तेतव) २६ (आसादितानिआपादितानि । छंदांसिमंत्राः) अयातयामा निअगतवीर्याणि । २७ । २८ यज्ञेगृहीतमौनोपि (तदनुज्ञयाद्विजाज्ञया) वाचंव्यसृजत्प्रायुंक्त । २९

॥५५॥ श्लोकाः

पुरुंकुत्संत्रितंद्युम्नंसत्यवंतमृतंव्रतम् ॥ अग्निष्टोममतीरात्रंप्रद्युम्नंशिबिमुल्मुकम् १६ उल्मुकोजनयत्पुत्रान्पुष्करिण्यांषडुत्तमान् ॥ अंगंसुमनसंख्यातिंक्रतुमं गिरसंगयम् १७ सुनीथांगस्ययापत्नीसुषुवेवेनमुल्बणम् ॥ यद्दौःशील्यात्सराजर्षिर्निर्विण्णोनिरगात्पुरात् १८ यमंगशेपुःकुपितावाग्वज्रामुनयःकिल ॥ गतासोस्तस्यभूयस्तेममंथुर्दक्षिणंकरम् १९ अराजकेतदालोकेदस्युभिःपीडिताःप्रजाः ॥ जातोनारायणांशेनपृथुराद्यःक्षितीश्वरः २०॥ ॥ विदुरउवाच ॥ ॥ तस्यशीलनिधेःसाधोर्ब्रह्मण्यस्यमहात्मनः ॥ राज्ञःकथमभूद्दुष्टाप्रजायद्विमनाययौ २१ किंवांहोवेनमुद्दिश्यब्रह्मदंडमयूयुजन् ॥ दंडव्रतधरेराज्ञिमुन योधर्मकोविदाः २२ नावध्येयःप्रजापालःप्रजाभिरघवानपि ॥ यदसौलोकपालानांबिभर्त्योजःस्वतेजसा २३ एतदाख्याहिमेब्रह्मन्सुनीथात्मजचेष्टितम् श्रद्दधानायभक्तायत्वंपरावरवित्तमः २४ ॥ ॥ मैत्रेयउवाच ॥ अंगोश्वमेधंराजर्षिराजहारमहाक्रतुम् ॥ नाजग्मुर्देवतास्तस्मिन्नाहूताब्रह्मवादिभिः २५ तमूचुर्विस्मितास्तत्रयजमानमथर्त्विजः ॥ हवींषिहूयमानानिनतेगृह्णंतिदेवताः २६ राजन्हवींष्यदुष्टानिश्रद्धयासादितानिते ॥ छंदांस्ययातयामानियो जितानिधृतव्रतैः २७ नविदामेहदेवानांहेलनंवयमण्वपि ॥ यन्नगृह्णंतिभागान्स्वान्येदेवाःकर्मसाक्षिणः २८ ॥ ॥ मैत्रेयउवाच ॥ ॥ अंगोद्विजवचः श्रुत्वायजमानःसुदुर्मनाः ॥ तत्प्रष्टुंव्यसृजद्वाचंसदस्यांस्तदनुज्ञया २९

१६—२९

चूर्णिका

पुरुः कुत्सः त्रितः द्युम्नः सत्यवंतः ऋतः व्रतः अग्निष्टोमः अतीरात्रः प्रद्युम्नः शिबिः उल्मुकइति १६ उल्मुकात् पुष्करिण्यांषट्पुत्राः अंगः सुमनसः ख्यातिः क्रतुः अंगिराः गयइति १७ तत्र अंगस्यपत्नी मृत्युकन्या सुनीथानामआसीत् सा वेनंसुषुवे यद्दौःशील्यात् अंगः पुरात्निरगात् १८ यंमुनयः शेपुःगतासोस्तस्यदक्षिणंकरं मुनयः ममंथुः १९ तदानारायणांशः पृथुर्जातः २० ॥ ॥ विदुरउवाच ॥ ॥ साधोः अंगस्यदुष्प्रजाकथं अभूत् यस्माद्वनंगतवान् २१ धर्मकोविदामुनयः राज्ञि शापं कथं ददुः २२ २३ एतत् वेनचेष्टितं मे आख्याहि यतःत्वं सर्वज्ञोसि २४ ॥ ॥ मैत्रेयउवाच ॥ ॥ एकदा सः अंगोराजा अश्वमेधंचकार तदायज्ञेऋषिभिः आहूता देवाः नाजग्मुः २५ तदाविस्मिताः ऋत्विजः अंगं ऊचुःहेअंग त्वया श्रद्धया हवींषि संपादितानि देवताः नगृह्णंति २६ २७ तस्यकारणंनविदामः २८ ॥ मैत्रेयउवाच ॥ ॥ अंगः द्विजवचः श्रुत्वा खिन्नः सन् ब्राह्मणान् पप्रच्छ २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहुताआहूताः ग्रहान् सामपात्राणि । इहयज्ञेनगृह्णंति । ३० इहजन्मनितावत् मनाक् ईषदपि अघं नस्थितम् । कथंचिज्जातस्याघस्य सद्य एव प्रायश्चित्तैः क्षालनात् । किंतुप्राक्तनमेकमघमस्ति यद्यस्मात् ई दृक्गुणाधिकोपि त्वं प्रजारहितः ३१ अतोयथादेवाहविर्गृह्णंतितथात्मानंसुप्रजंसाधय । कथंसाधनीयं तदाहुः । इष्टइति (यजिकर्मीकृतइत्यर्थः) ३२ तथासतिस्वभागान्ग्रहीष्यंति । यत्यतः (यज्ञपुरुषो) हरिः साक्षात्कृतः स्यात् । अतस्तेनसहसर्वेदेवाआगमिष्यंतीत्यर्थः । ३३ नन्वतितुच्छान्कामान्हरिः कथंदद्यात् तत्राह तांस्तानिति । (यथायेनप्रकारेणसकामतयानिष्कामतयावाआराधितस्तथास्वर्ग मोक्षादिरूपः फलोदयोपिभवति) ३४ प्रजातयेपुत्रोत्पत्तये (शिपिविष्टाय) पशुपुयज्ञरूपेणप्रविष्टाय तथाचश्रुतिः "यज्ञोवैविष्णुः पशवः शिपिर्यज्ञएवपशुषुप्रतितिष्ठती"ति । ३५ तस्मादितियोग्यतया ऽग्नेः । (तस्मात्हुतात्पुरोडाशादितिवा) ३६ (ओदनंपायसंसमहामतिः विप्रानुमतोऽवघ्राय) पत्न्यैप्रादात् ३७ पुमांसंसूतेअनेनेतितथातत्अन्नंप्राश्यपत्युः सकाशाद्गर्भमादधे । अप्रजासती । ३८ मातामहंमृत्युंमृत्योर्हिपुत्रीसुनीथा । (अधर्मांशस्यउद्भवोयस्मात्तथातंअसुरप्रकृतिमित्यर्थः । तदुक्तं । "मृत्युर्देवोयमभ्रातावेनमातामहोऽसुर" इति)३९ मृगयुर्लुब्धकः सन् । तंदृष्ट्वावेनोसावागच्छतीतिजनः सर्वोप्यरौत् चुक्रोश । (वेनयतिपीडयतीतिवेनः । यदुक्तं । "वेनोसौपीडनादभूदि"ति । अतएवासाधुर्दुर्जनः) ४० आक्रीडेक्रीडास्थाने (वयस्यान्तुल्यवयस्कान् निरनुक्रोशोनिर्घृणः पशुमारंयथाभव तितथाअमारयत्पशूनिवाताडयदित्यर्थः । ४१ विचक्ष्यदृष्ट्वा (शासनैः सदुपदेशैः शासितुंनशक्तस्तदा) ४२

नागच्छंत्याहुतादेवानगृह्णंतिग्रहानिह ॥ सदसस्पतयोब्रूतकिमवद्यंमयाकृतम् ३० ॥ ॥ सदसस्पतयऊचुः ॥ ॥ नरदेवेहभवतोनाघंतावन्मना क्स्थितम् ॥ अस्त्येकंप्राक्तनमघंयदिहेदृक्त्वमप्रजः ३१ तथासाधयभद्रंतेआत्मानंसुप्रजंनृप ॥ इष्टस्तेपुत्रकामस्यपुत्रंदास्यतियज्ञभुक् ३२ तथास्वभागधे यानिग्रहीष्यंतिदिवौकसः ॥ यद्यज्ञपुरुषःसाक्षादपत्यायहरिर्वृतः ३३ तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयतेजनः ॥ आराधितोयथैवैषतथापुंसांफलो दयः ३४ इतिव्यवसिताविप्रास्तस्यराज्ञःप्रजातये ॥ पुरोडाशंनिरवपञ्शिपिविष्टायविष्णवे ३५ तस्मात्पुरुषउत्तस्थौहेममाल्यमलांबरः ॥ हिरण्मये नपात्रेणसिद्धमादायपायसम् ३६ सविप्रानुमतोराजागृहीत्वांजलिनौदनम् ॥ अवघ्रायमुदायुक्तःप्रादात्पत्न्याउदारधीः ३७ सातत्पुंसवनंराज्ञीप्राश्यवै पत्युरादधे ॥ गर्भंकालउपावृत्तेकुमारंसुषुवेऽप्रजा ३८ सबालएवपुरुषोमातामहमनुव्रतः ॥ अधर्मांशोद्भवंमृत्युंतेनाभवदधार्मिकः ३९ सशरासनमुद्यम्य मृगयुर्वनगोचरः ॥ हंत्यसाधुर्मृगान्दीनान्वेनोसावित्यरौज्जनः ४० आक्रीडेक्रीडतोबालान्वयस्यानतिदारुणः ॥ प्रसह्यनिरनुक्रोशःपशुमारममारयत् ४१ तंविचक्ष्यखलंपुत्रंशासनैर्विविधैर्नृपः ॥ यदानशासितुंकल्पोऽभ्टशमासीत्सुदुर्मनाः ४२

श्लोकाः ३०/४२

चूर्णिका

॥ हेऋत्विजः देवाः कुतोनायांति भागान् कुतोनगृह्णंति मयाकिंअपराद्धम् ३० तेऊचुः ॥ हेराजन्तेप्राक्तनंअघमस्ति यतःत्वं अप्रजोसि ३१ अतः यथापुत्रः स्यात्त थासाधय भगवान्पुत्रकामेष्ट्याइष्टश्चेत् तेपुत्रंदास्यति ३२ ततः देवाः भागंग्रहीष्यंति ३३ इतिव्यवस्य विप्राः राज्ञःपुत्राप्त्यैविष्णवे पुरोडाशंनिरवपन् ३४ ३५ तदा अग्नेः सकाशात्पायसं आदाय पुरुषः उत्तस्थौ ३६ राजाविप्राज्ञयापायसंगृहीत्वावघ्राय पत्न्यै ददौ ३७ सातत्प्राश्य गर्भं दधार कालेपुत्रंसुषुवे ३८ सः बालः मातामहं अनुव्रतः तेनअधार्मिकोजातः ३९ तस्यमृगघातादि रौद्रंकर्मदृष्ट्वा जनः अयंवेनइति चुक्रोश ४० सः क्रीडाकाले बालान् पशुवत् अमारयत् ४१ राजा दुष्टंपुत्रंवीक्ष्य तंशासितुं अकल्पः सन् आह ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दुर्मनसस्तस्य कुपुत्रानिंदावाक्यान्याह । प्रायेणेतितित्रिभिः । अप्रजा ये तैरभ्यर्चितः । तत्रहेतुः । कुत्सितैरपत्यैः संभृतंदुर्भरंधारयितुमशक्यंदुःखं ये न विंदंति ४३ (यतः) सर्वेषांसर्वैः सह (विरोधः यतः) आधिर्मानसीव्यथा ४४ तं (तादृशं) प्रजापदेशं (प्रजायाअपदेशं) पुत्रनाममात्रमपि (आत्मनो) मोहबंधनं (मोहेनबंधनरूपं कोबहुमन्येत) । यदर्थाः यन्निमित्ताः क्लेशदागृहाभवंति ४५ इदानीं निर्वेदहेतुत्वेनकुत्सितमेवापत्यमभिनंदति । कदपत्यमिति । शुचांपदात् विरहादौशोकानांस्थानात् (वरंसाधुमन्ये) वरत्वेहेतुः । निर्विद्येतेति तत्कुतः।यत्।यतः कदपत्यात् गृहाः क्लेशनिवहा भवंति । ४६ महतामुदयानां विभूतीनांउदयो यस्मिन् तस्माद्गृहात्गतः । यावेनंसूतेस्मतां (हित्वा) ४७ प्रजाः पुरोहितादयश्च विचिक्युरन्वेषितवंतः । तं (तु) तत्रैवसंतमपिनापश्यन्निति दृष्टांतेनाह । यथेति (कुयोगिनः अजितात्मानःपुरुषमंतर्यामिणम्) ४८ (प्रत्युपसृत्यप्रत्यागत्य)। साश्रवोरुदंतः (हेपौरव) भर्तुर्विप्लवंनाशं अदर्शनमित्यर्थः ४९ इतिचतुर्थस्कंधेटीकायां त्रयोदशोध्यायः १३ ॥ ॥ चतुर्दशेतुदुष्पुत्रभयादंगेगतेद्विजैः । अभिषिक्तस्यवेनस्यरोषात्तैर्वधउच्यते १ ॥ क्षेमदर्शिनः क्षेमचिंतकाः (पशुभिः साम्यंयेषांतेषां भावः पशुसाम्यता तां) पशुसमानरूपतांपश्यंतः १ अमात्यादीनांप्रकृती नामसंमत-(-मपि) पाठांतरे प्रकृत्यास्वभावेनासंमत-(-मपिअभ्यषिंचन् यतो ब्रह्मवादिनः वेदवादिनः धर्मज्ञाइत्यर्थः) २ (सर्पाद्भीता आखवोमूषकाइव) चोराः (निलिल्युः) लीनाबभूवुः ३ आरूढं नृपस्थानंराजासनंयेन । अष्टविभूतिभिर्लोकपालैश्वर्यैः । (उन्नद्धः स्तब्धः) ४ (उत्सिक्तउन्मत्तः ५ (हेद्विजाः नयष्टव्यंआचेंतव्यम्) ६

॥५७॥

श्लोकाः ४३/६

प्रायेणाभ्यर्चितोदेवोयेप्रजागृहमेधिनः ॥ कदपत्यभृतंदुःखंयेनविंदंतिदुर्भरम् ४३ यतःपापीयसीकीर्तिरधर्मश्चमहान्नृणाम् ॥ यतोविरोधःसर्वेषांयतआधिरनं
तकः ४४ कस्तंप्रजापदेशंवैमोहबंधनमात्मनः ॥ पंडितोबहुमन्येतयदर्थाःक्लेशदागृहाः ४५ कदपत्यंवरंमन्येसदपत्याच्छुचांपदात् ॥ निर्विद्येतगृहान्मर्त्योयत्क्लेश
निवहागृहाः ४६ एवंसनिर्विण्णमनानृपोगृहान्निशीथउत्थायमहोदयोदयात् ॥ अलब्धनिद्रोनुपलक्षितोनृभिर्हित्वागतोवेनसुवंप्रसुप्ताम् ४७ विज्ञायनिर्विद्यग
तंपतिंप्रजाःपुरोहितामात्यसुहृद्गणादयः ॥ विचिक्युरुर्व्यामतिशोककातरायथानिगूढंपुरुषंकुयोगिनः ४८ अलक्षयंतःपदवींप्रजापतेर्हतोद्यमाःप्रत्युपसृत्य
तेपुरीम् ॥ ऋषीन्समेतानभिवंद्यसाश्रवोन्यवेदयन्पौरवभर्तृविप्लवम् ४९ इतिश्रीभा०म०च०त्रयोदशोध्यायः १३ ॥ ॥ मैत्रेयउवाच ॥ ॥ भृग्वादय
स्तेमुनयोलोकानांक्षेमदर्शिनः ॥ गोप्तर्यसतिवैनृणांपश्यंतःपशुसाम्यताम् १ वीरमातरमाहूयसुनीथांब्रह्मवादिनः ॥ प्रकृत्यसंमतंवेनमभ्यषिंचन्पतिंभुवः २
श्रुत्वानृपासनगतंवेनमत्युग्रशासनम् ॥ निलिल्युर्दस्यवःसद्यःसर्पत्रस्ताइवाखवः ३ सआरूढनृपस्थानउन्नद्धोष्टविभूतिभिः ॥ अवमेनेमहाभागान्स्तब्धःसं
भावितःस्वतः ४ एवंमदांधउत्सिक्तोनिरंकुशइवद्विपः ॥ पर्यटन्रथमास्थायकंपयन्निवरोदसी ५ नयष्टव्यंनदातव्यंनहोतव्यंद्विजाःक्वचित् ॥ इतिन्यवार
यद्धर्मंभेरीघोषेणसर्वशः ६

चूर्णिका

अहो ये जनाः कुपुत्रजं दुःखं नविंदंति तैर्हरिः पूजितः ४३ येनदुष्पुत्रेणदुष्कीर्तिः अधर्मः विरोधः आधिश्चदुःखदागृहाश्चभवंति ४४ एवंखिन्नः सन् निशीथेपलायितः ४५ ४६ ४७ प्रातः पुरोहितामात्यादयः राजानंविचिक्युः ४८ तंअलब्ध्वापुरीं एत्यरुदंतः राज्ञः अप्राप्तिंऋषिभ्योन्यवेदयन् ४९ ॥ ॥ इतिचतुर्थेत्रयोदशः ॥ १३ ॥ ॥ मैत्रेयउवाच ॥ ॥ ततोभृग्वादयः नृणांरक्षणकर्त्रभावंदृष्ट्वा प्रजानांनाशंपश्यंतः १ दुष्टमपिवेनंराज्ये अभ्यषिंचन् २ तदा दस्यवः आसनगतंवेनं श्रुत्वा निलिल्युः ३ सः राज्यलक्ष्म्यामत्तः सन् साधून् अवमेने ४ कदाचित् रथंआस्थाय पृथिव्यांभ्रमन् ५ भेरीघोषेण नयष्टव्यं नदातव्यं नहोतव्यं इति धर्मं न्यवारयत् ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्रिणः मीलिताः संतः ७ मूलतश्चाग्रतश्चदीप्तेप्रज्वलिते काष्ठे मध्यवर्तिनां पिपीलिकादीनांयथाउभयतो व्यसनं एवंतस्करेभ्यः पालकाच्च (वेनात्) दुःखं प्राप्तमित्यर्थः ८ तदेवाहुः । अराजकभयादि
ति । अतदर्हणः राज्यानर्हः ९ अस्माकमप्यनिष्टंजातमित्याहुः । अहेः (सर्पस्य) यथापयःपोषः क्षीरेणपोषणं पोषकस्याप्यनर्थं विषद्वाराबिभर्ति पुष्णाति । तदेवाहुः वेनइति । खलत्वेहेतुः सुनीथा
गर्भसंभवइतिमृत्योर्दौहित्रइत्यर्थः १० (यासांप्रजानां पालने) योस्माभिर्निरूपितो नियुक्तः (सताएवजिघांसति) । सांत्वयेम उपपत्तिभिः प्रार्थयिष्यामः (तदा) तस्यपातकम् ११ स्वस्यतत्पातकस्पर्शेहे
तुः । तत् (तस्य) पातकित्वंविद्वाद्भि-(रपिवेनोऽस्माभिर्नृपः कृतः । अतोऽवश्यं पातकस्पर्शेनभाव्यं । सांत्वितोपिनोऽस्माकंवाचं सामवचनंनग्रहीष्यतितदालोकधिक्कारैः संदग्धंदग्धप्रायमपि) १२
(अध्यवसायानिश्चित्य) । गूढोमन्युर्येषां (एवंसंतोपि) सामभिः प्रियोक्तिभिः (सांत्वयित्वासंप्रार्थ्य) १३ (आयुरादीनांवर्धनं यद्विज्ञापयामतच्छृणु) १४ (लोकान्स्वर्गादीन् । असंगिनां)
निष्कामानां । आनंत्यं मोक्षमपि (ददाति) १५ (सधर्मः तेत्वत्तः) माविनशेत् नविनश्यतु (अवरोहतिभ्रश्यति) १६ (असाधवोये अमात्यास्तेभ्य-) श्चोरादिभ्यश्च) यथा यथाशास्त्रं (बलिंकरं)
१७ (वर्णाश्रमरूपैर्जनैः स्वेनस्वविहितेन) १८ (निजशासने वेदशास्त्रविहितधर्मे) १९ (जगतामीश्वराब्रह्मादयस्तेषामपीश्वरे । एतस्मैईश्वरायबलिंकरम्) २० सर्वान्लोकांश्चतत्पालानमरांश्चतत्प्रापकान्य
ज्ञांश्चसंगृह्णातिनियच्छतीति तथा तं (तादृशं नियंतारं) विचित्रैर्द्रव्ययज्ञतपोयज्ञादिभिः (तैंतव) भवायसमृद्धये (यजतः) स्वदेशान् (निजदेश-)-वासिनो जनान् अनुरोद्धुं अनुवर्तितुम् २१

वेनस्यावेक्ष्यमुनयोदुर्वृत्तस्यविचेष्टितम् ॥ विमृश्यलोकव्यसनंकृपयोचुःस्मसत्रिणः ७ अहोउभयतःप्राप्तंलोकस्यव्यसनंमहत् ॥ दारुण्युभयतोदीप्तइवतस्कर
पालयोः ८ अराजकभयादेषकृतोराजातदर्हणः ॥ ततोप्यासीद्भयंत्वद्यकथंस्यात्स्वस्तिदेहिनाम् ९ अहेरिवपयःपोषःपोषकस्याप्यनर्थभृत् ॥ वेनःप्रकृत्यै
वखलःसुनीथागर्भसंभवः १० निरूपितःप्रजापालःसजिघांसतिवैप्रजाः ॥ तथापिसांत्वयेमामुंनास्मांस्तत्पातकंस्पृशेत् ११ तद्विद्वद्भिरसद्वृत्तोवेनोस्माभिः
कृतोनृपः ॥ सांत्वितोयदिनोवाचंनग्रहीष्यत्यधर्मकृत् १२ लोकधिक्कारसंदग्धंदहिष्यामःस्वतेजसा ॥ एवमध्यवसायैनंमुनयोगूढमन्यवः ॥ उपव्रज्या
ब्रुवन्वेनंसांत्वयित्वाचसामभिः १३ ॥ मुनयऊचुः ॥ नृपवर्यनिबोधैतद्यत्तेविज्ञापयामभोः ॥ आयुःश्रीबलकीर्तीनांतवताताविवर्धनम् १४ धर्मआचरितःपुं
सांवाङ्मनःकायबुद्धिभिः ॥ लोकान्विशोकान्वितरत्यथानंत्यमसंगिनाम् १५ सतेमाविनशेद्वीरप्रजानांक्षेमलक्षणः ॥ यस्मिन्विनष्टेनृपतिरैश्वर्यादवरोहति
१६राजन्नसाध्वमात्येभ्यश्चोरादिभ्यःप्रजानृपः ॥ रक्षन्यथाबलिंगृह्णन्निहप्रेत्यचमोदते १७ यस्यराष्ट्रेपुरेचैवभगवान्यज्ञपूरुषः ॥ इज्यतेस्वेनधर्मेणजनैर्वर्णा
श्रमान्वितैः १८ तस्यराज्ञोमहाभागभगवान्भूतभावनः ॥ परितुष्यतिविश्वात्मातिष्ठतोनिजशासने १९ तस्मिंस्तुष्टेकिमप्राप्यंजगतामीश्वरेश्वरे ॥ लोकाः
सपालाह्येतस्मैहरंतिबलिमादृताः २० तंसर्वलोकामरयज्ञसंग्रहंत्रयीमयंद्रव्यमयंतपोमयम् ॥ यज्ञैर्विचित्रैर्यजतेभवायतेराजन्स्वदेशाननुरोद्धुमर्हसि २१

श्लोकः ७/२१

तदा मुनयः मंत्रिणश्चराज्ञः दुर्वृत्तंवीक्ष्य ऊचुः ७ अहो लोकस्य महत् दुःखं प्राप्तम् ८ ९ १० एषः पालकोभूत्वाप्रजाः हंति तथापिएनंसांत्वयेम तेनपातकंनस्पृशेत् ११
यदिसः नश्रोष्यति १२ तर्हितदंहिष्यामः इतिनिश्चित्य वेनंगत्वाऊचुः १३ हेनृप यत् विज्ञापयामहे तन्निबोध तेआयुःश्रीबलकीर्तीनांवृद्धिकरः १४ धर्मः रक्ष्यः धर्मेनष्टे
राजाऐश्वर्याद्भ्रश्यति प्रजारक्षणेकृते विश्वात्मातुष्यति १५१६ १७ १८ १९ तस्मिंस्तुष्टेअप्राप्यंकिम् २० अतःत्वंयज्ञैः इष्ट्वा राज्यं पालयितुं अर्हसि २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका युष्मद्विषये भवद्देशे हरेः कलाअंशाः सुराः (स्विष्टाः सुपूजिताः हेवीर तद्धेलनं) तेषांसुराणामवज्ञां (कर्तुंनार्हसि) २२ बालिशाअज्ञाः। वृत्तिदं अन्नादिप्रदं मां हित्वा (जारंअमुख्यम्) २३ (येऽमीमूढा स्ते इह राज्ञः परत्र यमात्) २४ (यथाकुयोषितांजारेभक्तिस्तथावोयत्र स कः) भर्तृस्नेहोविदूरोयेषां (तेषां) २५(ननु सविष्णुर्विरिंच्यादिरूपइत्यत्राह। विष्णुरिति) २६ देहेभवंतिनृपतेः अतो नृपतीरेवे श्वरः इतरे तदंशाइतिभावः। २७ हेविप्राःबलिंच करादिकं।(मत्तःकोन्यो)ऽग्रभुक् आराध्यः २८ (विपर्ययमतिः विपरीतबुद्धिः अनुनीयमानः सामभिः प्रार्थ्यमानः) २९ तेन असत्कृताः (भव्याया-)-मपि याच्ञायां) भग्नायांसत्यां (हेविदुर) ते चुक्रुधुः क्रोधंचक्रुः ३० (ऊचुश्चेत्याह। हन्यतामिति। असौजीवन् जगद्भस्मसात्कुर्यादेव) ३१ (नरदेवयोग्यंयद्वरासनं तन्नार्हति। अनपत्रपो निर्लज्जः। अधियज्ञो यज्ञादिष्ठातासचासौपतिश्चतं एवंविष्णुंकोवा) परिचक्षीत विनिंदेत्। अशुभंवेनं विना। कृतघ्नतामाहुः। यदनुग्रहविषयःसन् ईदृशमैश्वर्यं यः प्राप्तः ३३ पूर्वं गूढमन्यवः इदानींरूढमन्यवः प्रकटकोपाः(संतः) हुंकृतैः हुंकारैः (हतंजीवन्मृतमित्यर्थः) ३४ स्वाश्रमपदंप्रति ऋषिभिर्गते गमने कृते सति। विद्यायोगेन मंत्रसहितयायुक्त्या पालयामास ३५

॥५९॥

श्लोकाः २२/३५

यज्ञेनयुष्मद्विषयेद्विजातिभिर्वितायमानेनसुराःकलाहरेः ॥ स्विष्टाःसुतुष्टाःप्रदिशंतिवांछिततद्धेलनंनार्हसिवीरचेष्टितुम् २२ ॥ ॥ वेनउवाच ॥ बालिशाबतयूयंवाअधर्मेधर्ममानिनः ॥ येवृत्तिदंपतिंहित्वाजारंपतिमुपासते २३ अवजानंत्यमीमूढानृपरूपिणमीश्वरम् ॥ नानुविंदंतितेभद्रमिहलोकेपर त्रच २४ कोयज्ञपुरुषोनामयत्रवोभक्तिरीदृशी ॥ भर्तृस्नेहविदूराणांयथाजारेकुयोषिताम् २५ विष्णुर्विरिंचोगिरिशइंद्रोवायुर्यमोरविः ॥ पर्जन्योधनदःसो मःक्षितिरग्निरपांपतिः २६ एतेचान्येचविबुधाःप्रभवोवरशापयोः ॥ देहेभवंतिनृपतेःसर्वदेवमयोनृपः २७ तस्मान्मांकर्मभिर्विप्रायजध्वंगतमत्सराः ॥ ब लिंचमह्यंहरतमत्तोन्यःकोग्रभुक्पुमान् २८ ॥ ॥ मैत्रेयउवाच ॥ ॥ इत्थंविपर्ययमतिःपापीयानुत्पथंगतः ॥ अनुनीयमानस्तद्याच्ञांनचक्रेभ्रष्टमं गलः २९ इतितेसत्कृतास्तेनद्विजाःपंडितमानिना ॥ भग्नायांभव्ययाच्ञायांतस्मैविदुरचुक्रुधुः ३० हन्यतांहन्यतामेषपापःप्रकृतिदारुणः ॥ जीवञ्जग दसावाशुकुरुतेभस्मसाद्ध्रुवम् ३१ नायमर्हत्यसद्वृत्तोनरदेववरासनम् ॥ योधियज्ञपतिंविष्णुंविनिंदत्यनपत्रपः ३२कोवैनंपरिचक्षीतवेनमेकमृतेशुभम् ॥ प्राप्तई दृशमैश्वर्यंयदनुग्रहभाजनः ३३ इत्थंव्यवसिताहंतुमृषयोरूढमन्यवः ॥ निजघ्नुर्हुंकृतैर्वेनंहतमच्युतनिंदया ३४ ऋषिभिःस्वाश्रमपदंगतेपुत्रकलेवरम् ॥ सुनीथापालयामासविद्यायोगेनशोचती ३५

चूर्णिका २२॥ वेनउवाच ॥ ॥ हेब्राह्मणाः यूयं बालिशाः अधर्मेधर्ममानिनः २३ अहोविष्णुविरिंच्यगिरिशाद्याः नृपतेः देहेवसंति २४ २५ २६ २७ तस्मात् गतमत्सराः क र्मभिः मांयजध्वम् २८ ॥ ॥ मैत्रेयउवाच ॥ ॥पापीयान् वेनः ऋषिवचः न मेने २९ तदातेद्विजाः चुक्रुधुः ३० अहो यः विष्णुं निंदतिअतः अयंराज्यं नार्हति एषः ह न्यतां हन्यतां ३१ इति व्यवस्य वेनं हुंकृतैः जघ्नुः ३२ ३३ ३४ ततोऋषयः स्वाश्रमं जग्मुः ततः सुनीथापुत्रदेहंयोगेनररक्ष ३५

॥५९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

र्ुवद्भाव आर्षः सरस्वत्याःसलिले आप्लुताः कृतस्नानाः विष्णुकथाः चक्रुः (इत्यर्थः) ३६ तदात्पातान् वीक्ष्य नुपरहितायाभुवोअभद्रंनभवेत्किमित्याहुश्च (परस्परम्) ३७ एवंविमृशंतऋषयःस्थिताः तदा धावतांचोराणां (सकाशात्) पांसुर्धूलिः समुत्थितः । ३८ तत्तदातेषांलोकस्यवसुधनंलुंपत्तांजिघांसतांयउपद्रवस्तंचाज्ञाय ३९ तथाचोरप्रायंअराजकंहीनसत्त्वंचजनपदमाज्ञाय शक्ता–(-स्तन्निवारणेसमर्थाः) अपिअवारणेदोषदर्शिनोपिजनाः (क्षत्रियादयो) लुंपतोलोकान्नावारयन्नित्यन्वयः । (अत्रोपायऋषिभिरेवानुष्ठेयइत्यभिप्रायेणोतिभावः) ४० शक्तानांक्षत्रियाणांअवारणेदोषइतिकिंवक्तव्यं । (यदि). समदृगपिशांतोपिब्राह्मणोपिदीनानांसमुपेक्षकोभवेत्तर्हितस्यापिब्रह्मतपः स्रवति । ४१ अतउपेक्षादोषपरिहारायनांगस्येत्यादिविनिश्चित्यमहीपतेरूरुंतरसाममंथुरित्यन्वयः संस्थातुंनाशंगंतुं । यद्वा ऋषयएवलुंपतोलोकान्नावारयन् कथंभूताः हुंकारेणैववेनंनिवारयितुंशक्ताअपि । तत्किं । तस्मिन्निवारणेतन्मरणादिदोषदर्शिनः । नचोदासत। चोरोपद्रुतदीनोपेक्षायांतपोहानिप्रसंगात् नचान्यंतन्निवारकंराजानमकुर्वन् । अंगवंशोच्छेदस्यानर्हत्वात् अतोवेनस्यैवदेहंममंथुरितियोज्यम् । ४२ (विपन्नस्यमृतस्य । बाहुकोवामनः । "ह्रस्ववामनबाहुका" इत्यभिधानम्) ४३ तमेवाह । काकइवकृष्णः । महत्यौहनूकपोलप्रांतौयस्य । ह्रस्वौपादौयस्य । ४४ (तेऋषयः निषीद निर्गच्छेत्यब्रुवन् ततः सनिषादइत्यभवत्) ४५ गिरिः काननंचगोचरआश्रयो नतुपुरादिप्रवेशो येषां (ते तत्रहेतुः । येनहेतुनाअसौ (वेनस्य) कल्मषमहरत् । ततस्तस्यवंशास्तथाभूताः ४६ इतिचतुर्थस्कंधेटीकायांचतुर्दशोध्यायः १४

॥६०॥

श्लोकाः ३६/४६

एकदामुनयस्तेतुसरस्वत्सलिलाप्लुताः ॥ हुत्वाग्नीन्सत्कथाश्चक्रुरुपविष्टाःसरित्तटे ३६ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् ॥ अप्यभद्रमनाथायाद
स्युर्भ्योनभवेद्भुवः ३७ एवंमृशंतऋषयोधावतांसर्वतोदिशम्॥ पांसुःसमुत्थितोभूरिश्चोराणामभिलुंपताम् ३८तदुपद्रवमाज्ञायलोकस्यवसुलुंपताम् ॥ भर्त
र्युपरतेतस्मिन्नन्योन्यंचजिघांसताम् ३९चोरप्रायंजनपदंहीनसत्त्वमराजकम् ॥ लोकान्नावारयञ्शक्ताअपितद्दोषदर्शिनः४०ब्राह्मणःसमदृक्शांतोदीनानांस
मुपेक्षकः ॥ स्रवतेब्रह्मतस्यापिभिन्नभांडात्पयोयथा ४१ नांगस्यवंशोराजर्षेरेषसंस्थातुमर्हति ॥ अमोघवीर्याहिनृपावंशेस्मिन्केशवाश्रयाः ४२ विनि
श्चित्यैवमृषयोविपन्नस्यमहीपतेः ॥ ममंथुरूरुंतरसातत्रासीद्बाहुकोनरः ४३ काककृष्णोतिह्रस्वांगोह्रस्वबाहुर्महाहनुः ॥ ह्रस्वपान्निम्ननासाग्रोरक्ताक्षस्ता
म्रमूर्द्धजः ४४ तंतुतेवनतंदीनंकिंकरोमीतिवादिनम् ॥ निषीदेत्यब्रुवंस्तातसनिषादस्ततोभवत् ४५ तस्यवंश्यास्तुनैषादागिरिकाननगोचराः ॥ येनाहर
ज्जायमानोवेनकल्मषमुल्बणम् ४६ इतिश्रीभा०च०स्कंधेपृथुचरितेनिषादोत्पत्तिर्नामचतुर्दशोध्यायः १४ ॥

चूर्णिका

ततः बहुकालेन ऋषयः सरस्वतीतीरेस्थिताः संतः सत्कथाश्चक्रुः ३६ तदा महोत्पातान् वीक्ष्य भुवः अभद्रं नभवेत्किं ३७ एवंमृशंतः स्थिताःतदा चोराणामुपद्रवं आज्ञाय ३८ ३९ तथाअराजकं देशंआज्ञाय ४० ४१ अहोअयंवंशः संस्थातुंनार्हति ४२ इत्युक्त्वा मृतवेनदेहस्य ऊरुंममंथुः४३ तस्मात्काककृष्णः ह्रस्वांगः महाहनुः ह्रस्वपादबाहुः ताम्रमूर्धजः पुरुषः अभवत् ४४ तंकिंकरोमीतिवादिनं निषीदेतिअब्रुवन् सनिषादः अभवत् ४५ तस्यवंश्या गिरिकाननगोचराः नैषादाः जाताः तेनपुरुषेणऋषयः वेनकल्मषंअहरन् ४६ ॥ ॥ ॥ इतिचतुर्थेचतुर्दशः ॥१४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. ततः पंचदशे विप्रैर्मंथनाद्बेनबाहुतः । जातस्यतुपृथोरुक्तमभिषेकार्हणादिकम् ॥ १ ॥ (विप्रैर्मथ्यमानाभ्यांतस्यबाहुभ्यांमिथुनं स्त्रीपुंसौ) १ । २ किमूचुरित्यतआह एषइति चतुर्भिः।(एषपुमान् विष्णोः कला । अ०
इयंतुपुरुषस्यविष्णोरनपायिनीअवियोगिनी)लक्ष्म्याः संभूतिः कला । ३ अत्रयः पुमान्सतुमहाराजोभविष्यति । (राज्ञांगणनावसरेप्रथमोयतोयशःप्रथयिता । प्रख्यापयिष्यति) ४ सुदतीशोभनदं
टीका तवती । गुणानांभूषणानांचभूषणरूपा । अवरुंधतीभर्तृत्वेनभजंतीभविष्यति । ५ अत्रहेतुः । एषइति । लोकस्यरिरक्षयारिरक्षयिषया । (अनपायिनीविश्लेषरहिता) ६ स्वस्त्रियः अप्सरसोनृत्यंति ॥१५॥
स्म । ७।८ (सुरेश्वरैः) देवैः-(-स्तदीश्वरैश्च) सहआसृत्यआगत्यवैन्यस्यपृथोः चिह्नंरेखात्मकंचक्रम् ।९ अप्रतिहतंरेखांतरैरभिन्नंचक्रंयस्यचिह्नंसपरमेश्वरस्यांशः। १० आभिषेचनिकानि । अभिषेकसा
धनानि ।११।१२।१३ हेवीर विदुर ।वरासनं उत्तममासनं । सलिलस्यस्रावो यस्मात् १४ (कीर्तिमयींयशोरूपिणीं स्रजं मालां) द्वे वालव्यजने (चामरे ।संयमनं दुष्टदमनसाधनम्)१५

॥६१॥

॥ मैत्रेयउवाच ॥ ॥ अथतस्यपुनर्विप्रैरपुत्रस्यमहीपतेः ॥ बाहुभ्यांमथ्यमानाभ्यांमिथुनंसमपद्यत १ तद्दृष्ट्वामिथुनंजातमृषयोब्रह्मवादिनः ॥ ऊचुः श्लोकाः
परमसंतुष्टाविदित्वाभगवत्कलाम् २ ॥ ॥ ऋषयऊचुः ॥ ॥ एषविष्णोर्भगवतःकलाभुवनपालनी ॥ इयंचलक्ष्म्याःसंभूतिःपुरुषस्यानपायिनी ३
अत्रतुप्रथमोराज्ञांपुमान्प्रथयितायशः ॥ पृथुर्नाममहाराजोभविष्यतिपृथुश्रवाः ४ इयंचसुदतीदेवीगुणभूषणभूषणा ॥ अर्चिर्नामवरारोहापृथुमेवावरुंध १
ती ५ एषसाक्षाद्धरेरंशोजातोलोकरिरक्षया ॥ इयंचतत्पराहिश्रीरनुजज्ञेनपायिनी ६ ॥ ॥ मैत्रेयउवाच ॥ ॥ प्रशंसंतिस्मतंविप्रागंधर्वप्रवराजगुः १९
मुमुचुःसुमनोधाराःसिद्धानृत्यंतिस्वःस्त्रियः ७ शंखतूर्यमृदंगाद्यानेदुर्दुंदुभयोदिवि ॥ तत्रसर्वउपाजग्मुर्देवर्षिपितॄणांगणाः ८ ब्रह्माजगद्गुरुर्देवैःसहासृत्यसु
रेश्वरैः ॥ वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः ९ पादयोररविंदंचतंवैमेनेहरेःकलाम् ॥ यस्याप्रतिहतंचक्रमंशःसपरमेष्ठिनः १०तस्याभिषेकआरब्धोब्राह्म
णैर्ब्रह्मवादिभिः ॥ आभिषेचनिकान्यस्माआजह्रुःसर्वतोजनाः ११ सरित्समुद्रागिरयोनागागावःखगामृगाः ॥ द्यौःक्षितिःसर्वभूतानिसमाजह्रुरुपाय
नम् १२ सोभिषिक्तोमहाराजःसुवासाःसाध्वलंकृतः ॥ पत्न्यार्चिषालंकृतयाविरेजेग्निरिवापरः १३ तस्मैजहारधनदोहैमंवीरवरासनम् ॥ वरुणःसलिलस्रा
वमातपत्रंशशिप्रभम् १४ वायुश्चवालव्यजनेधर्मःकीर्तिमयींस्रजम् ॥ इंद्रःकिरीटमुत्कृष्टंदंडंसंयमनंयमः १५

चूर्णिका ॥ मैत्रेयउवाच ॥ ॥ अथविप्रैः पुनस्तस्यबाहुभ्यांमथ्यमानाभ्यांमिथुनंसमपद्यत १ तत् दृष्ट्वा भगवत्कलामितिज्ञात्वासंतुष्टाः उचुः २ एषः पुमान् साक्षात् विष्णोःकला
इयं कन्यालक्ष्म्याः कला ३ अयंराज्ञांप्रथमः पृथुः नामराजाभविष्यति ४ इयंकन्या पृथोः पत्नी आर्चिः नामभविष्यति ५ अयंलोकरक्षकः स्यात् इत्यादिब्राह्मणाऊचुः ॥६१॥
तदागंधर्वाः जगुः सिद्धाः पुष्पवृष्टिं चक्रुः अप्सरसः ननृतुः ६ ७ दिविशंखतूर्यमृदंगाद्याः नेदुः सर्वेदेवर्षिब्रह्माद्याः ययुः ८ ब्रह्मा पृथोः दक्षिणहस्तेगदाविह्नं पादयोः
पद्माचिह्नंदृष्ट्वा हरेः कलां मेने ९ १० ब्राह्मणैः तस्यअभिषेके आरब्धेसति जनाः अभिषेकवस्तूनि आजह्रुः ११ समुद्रः द्यौःपृथिव्यादयः उपायनानि आनिन्युः १२
स अभिषिक्तः पृथुः पत्न्यासहअग्निरिवरेजे १३ तस्मै कुबेरः हैमंसिंहासनं ददौ वरुणः श्वेतछत्रम् १४ वायुः व्यजने धर्मःस्रजं इंद्रः किरिटम् यमः दंडं १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ब्रह्ममयं वेदमयं। (भारती ब्रह्मपत्नी। हरिर्विष्णुः।) वर्म कवचं तत्पत्नी (लक्ष्मीः अखंडितां) श्रियं संपदम् १६ दशचंद्राकाराणि बिंबानि कोशेयस्यतं असिं खड्गं। शतचंद्रंचर्म। रूपाश्रयं अति सुंदरम्। १७ अजस्यगोश्च (वृषभस्य) शृंगाभ्यां निर्मितं चापं। योगमय्यौ पादस्पर्शमात्रेणाभीष्टदेशप्रापिके १८ नाट्यादिकौशलं खेचराः (गंधर्वप्रमुखाः तत्रांतर्धानमदृश्यत्वं) आत्मजं स्वप्रभवम्। १९ (महात्मनस्तस्य रथवीथीः रथमार्गान्। सूतः पौराणिकः। सूतादय-) स्तं स्तोतुमुपस्थिताः २० स्तावकान् स्तोतुमुद्यतान् अभिमेत्य ज्ञात्वा २१ लोके स्पष्टगुणस्यसतो मेस्तुतिः स्यात्। अधुना-(-त्वस्पष्टगुणत्वात्) किमाश्रयो मेस्तवोयो ज्यतां। अतोवो गिरोऽधुनामयि वितथा माभूवन्। यद्वा लाके अधुना अस्पष्टगुणस्यमे किमाश्रयः स्तवः स्यात्। (अतएव क्रियमाणः स्तवःअमे मदन्यस्य योज्यतां। नतुमे) वितथाभिधानापत्तेरित्यर्थः २२ तस्मात्परोक्षेकालांतरेस्पष्टेषुगुणेषुसत्सु अस्माकमुपश्रुतानियशांसिप्रतिस्तोत्रमलमत्यर्थं करिष्यथ। हे अपीच्यवाचःमधुरागिरः सभ्यैः प्रेरिता वयं त्वामेवस्तुमइतिचेत्तत्राह। उत्तमश्लोकस्यगुणानुवादे कार्ये सतिजुगुप्सितं अर्वाचीनं नरस्तावयंति। २३ ननु संभावितैरेवगुणैरात्मानं जनः स्तावयतीतिचेत्तत्राह। महतां गुणानात्मनिसंपादयितुंशक्तोपि असतो गुणान् संभावनामात्रेण कः स्तावयते। यद्वा आदावेवसतोपिकः स्तावयते। स्वतएव प्रख्यातिसिद्धेः। अन्यस्तु मिथ्यागुणस्तुतिश्लाघीमंद इत्याह। तइति। यद्यं। शास्त्राभ्यासादिकं अकरिष्यत् तर्ह्यस्यते विद्यादयोगुणा अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धो जनानामवहासं न वेद २४ किंचप्रभवोपि विश्रुताअपि ह्रीमंतो जुगुप्संति। वेतिदृष्टांते। यथा (विद्यादयो गुणाः) अतिस्तुतौ क्रियमाणायां विगर्हितं ब्राह्मणबधादि पौरुषमपि निंदंतितथाउचितामपिस्तुतिंनसहंतइत्यर्थः। २५

श्लोकाः १६/२५

॥६२॥ ब्रह्माब्रह्ममयंवर्मभारतीहारमुत्तमम् ॥ हरिःसुदर्शनंचक्रंतत्पत्न्यव्याहतांश्रियम् १६ दशचंद्रमसिंरुद्रःशतचंद्रंतथांबिका ॥ सोमोमृतमयानश्वांस्त्वष्टारूपाश्रयंरथम् १७ अग्निराजगवंचापंसूर्योरश्मिमयानिषून् ॥ भूःपादुकेयोगमय्यौद्यौःपुष्पावलिमन्वहम् १८ नाट्यंसुगीतंवादित्रमंतर्धानंचखेचराः ॥ ऋषयश्चाशिषःसत्याःसमुद्रःशंखमात्मजम् १९ सिंधवःपर्वतानद्योरथवीथीर्महात्मनः ॥ सूतोथमागधोबंदीतंस्तोतुमुपतस्थिरे २० स्तावकांस्तानभिप्रेत्यपृथुर्वैन्यःप्रतापवान् ॥ मेघनिर्ह्रादयावाचाप्रहसन्निदमब्रवीत् २१ ॥ ॥ पृथुरुवाच ॥ ॥ भोःसूतहेमागधसौम्यबंदिँल्लोकेधुनास्पष्टगुणस्यमेस्यात् ॥ किमाश्रयोमेस्तवएषयोज्यतांमामय्यभूवन्वितथागिरोवः २२ तस्मात्परोक्षेस्मदुपश्रुतान्यलंकरिष्यथस्तोत्रमपीच्यवाचः ॥ सत्युत्तमश्लोकगुणानुवादेजुगुप्सितंनस्तवयंतिसभ्याः २३ महद्गुणानात्मनिकर्त्तुमीशःकःस्तावकैःस्तावयतेसतोपि ॥ तेस्याभविष्यन्निितिविप्रलब्धोजनावहासंकुमतिर्नवेद २४ प्रभवोह्यात्मनःस्तोत्रंजुगुप्संत्यपिविश्रुताः ॥ ह्रीमंतःपरमोदाराःपौरुषंवाविगर्हितम् २५

चूर्णिका

ब्रह्माकवचं सरस्वती हारं हरिश्चक्रम् लक्ष्मीः संपदम् १६ रुद्रः अतिम् अंबिका चर्म सोमः अश्वान् त्वष्टा रथम् १७ अग्निः चापम् सूर्यःइषून् भूः पादुके द्यौः पुष्पावलिम् १८ खेचराः नाट्यंगीतं वादित्रं अंतर्धानम् ऋषयः आशिषः समुद्रः शंखं १९ सिंधवः पर्वताः नद्यः रथमार्गंददुः सूतमागधाद्याः तंस्तोतुं उपतस्थिरे २० तत् ज्ञात्वा पृथुः तान् इदमब्रवीत् २१ हेसूताद्याः अधुनाअस्पष्टगुणस्यमे किंस्तोतुं इच्छथ २२ स्तव्यस्तुभगवान् उत्तमश्लोकएवतस्मात् स्पष्टगुणे मयि जाते मेस्तुतिं करिष्यथ २३ २४ २५

१ श्रीरितिपाठःमु०पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वरीमभिरितिदीर्घमार्षं भवितृप्रधानश्चायं निर्देशः।वरिष्ठैःकर्मभिरविदिताइत्यर्थः (हेसूत)२६इतिचतुर्थस्कंधेटीकायांपंचदशोध्यायः॥१५॥षोडशेसर्वलोकेशैःसत्कृतंभार्ययायुतम्।मुनिप्रयुक्ताः सूताद्याः स्तुवंति
स्मेतिवर्ण्यते॥१॥ गायकाः सूतादयः (तस्यपृथोर्वागेवामृतंतत्सेवया तुष्टं मनोयेषांम्) १ नालं नसमर्थाः। योभवान्। अवतारेष्वप्यस्याधिक्यमाहुः ।वेनस्यांगाज्जातस्यते पौरुषाणिप्रति अवितर्क्यतया
ब्रह्मादीनामपि धियोबभ्रमुः कुतः पुनर्वयंतद्वर्णनेसमर्था भवेम २ अथापियथावद्वर्णयितुमशक्ताअपिकथामृतेसादराः मुनिभिरुपदेशंयोगबलेनहृदिप्रकाशनंतदनतिक्रम्यतैः (प्रचोदिताः संतो)
वितन्महिविस्तारयामः ३ (तत्परिपंथिनांधर्मसेतोर्विरोधिनाम्) ४। तनौस्वदेहे लोकपालानांतनूर्मूर्तीः (काले-)—कालेबिभर्तियथाभागंपालनपोषणानुरंजनादिकार्यानुसारेणयज्ञादिप्रवर्तनेनस्वर्गस्य
हितं वृष्ट्यादिनाच भूलोकस्याहितंयथाभवतितथा५सूर्यादितनुधारणमेवाहाष्टाभिः। वसुधनंकरादानकालेआदत्तेदुर्भिक्षादिकालेविमुंचतिच। अष्टौमासान्सूर्योयथावसुजलंआदत्तेविमुंचतिचवर्षासुतद्वत्।६
॥६३॥ मस्तकेपादेनाक्रमतामप्यार्तानांभूतानामतिक्रमंसहिष्यते।क्षितेर्वृत्तिःसर्वसहनं।सावृत्तिर्यस्यास्तिसतथा ७ देवेअवर्षति(सति) कृच्छ्रंगताःप्राणायासांताप्रजाःस्वयंवृष्टिंकृत्वारक्षिष्यति अत्रहेतुःअसौनरदेववपुर्ह
रिरिति। ८ वदनमेवअमृतमूर्तिश्चंद्रः तेन। सानुरागोवलोकोयस्मिन्। विशदंशुभ्रंयत्स्मितंतेनचारुणा। अत्रचक्वचिद्वर्तमाननिर्देशो"वर्तमानसामीप्यंवर्तमानव"द्वेति। भूतनिर्देशश्च"आशंसायांभूतवच्चे"
तिद्रष्टव्यः। ९

वयंत्वविदितालोकेसूताद्यापिवरीमभिः ॥ कर्मभिःकथमात्मानंगापयिष्यामबालवत् २६ इतिश्रीभा०म०चतुर्थस्कंधेपृथुचरितेपंचदशोध्यायः १५ ॥ श्लोकाः
॥ मैत्रेयउवाच ॥ ॥ इतिब्रुवाणंनृपतिंगायकामुनिचोदिताः ॥ तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया १ नालंवयंतेमहिमानुवर्णनेयोदेववर्योवततारमा
यया ॥ वेनांगजातस्यचपौरुषाणितेवाचस्पतीनामपिबभ्रमुर्धियः २ अथाप्युदारश्रवसःपृथोर्हरेःकलावतारस्यकथामृतादृताः ॥ यथोपदेशंमुनिभिःप्रचो २६/९
दिताःश्लाघ्यानिकर्माणिवयंवितन्महि ३ एषधर्मभृतांश्रेष्ठोलोकंधर्मेनुवर्तयन् ॥ गोप्ताचधर्मसेतूनांशास्तातत्परिपंथिनाम् ४ एषवैलोकपालानांबिभर्त्ये
कस्तनौतनूः ॥ कालेकालेयथाभागंलोकयोरुभयोर्हितम् ५ वसुकालउपादत्तेकालेचायंविमुंचति ॥ समःसर्वेषुभूतेषुप्रतपन्सूर्यवद्विभुः ६ तितिक्षत्यक्र
मंवैन्यउपर्याक्रमतामपि ॥ भूतानांकरुणःशश्वदार्त्तानांक्षितिवृत्तिमान् ७ देवेऽवर्षत्यसौदेवोनरदेववपुर्हरिः ॥ कृच्छ्रप्राणाःप्रजाह्येषरक्षिष्यत्यंजसेंद्रवत् ८
आप्याययत्यसौलोकंवदनामृतमूर्तिना ॥ सानुरागावलोकेनविशदस्मितचारुणा ९

चूर्णिका

अधुनालोकेवयंकर्मभिः आविदिताः अतः मांबालकवत् कथंगापयिष्यामः २६ इतिचतुर्थेपंचदशोऽध्यायः १५ ॥ ॥मैत्रेय उवाच॥ इतिब्रुवाणंनृपतिं मुनिनोदिताःगायकाः
तुष्टुवुः १ हेदेववर्य तेमहिमानुवर्णने वयं नसमर्थाः तेयशासिब्रह्मादीनामपिधियःबभ्रमुः २तथापिहरेरंशस्यतेमुनिनोदिताः संतः कर्माणिवितन्महि ३ एषः धर्मभृतांश्रेष्ठः ॥६७॥
धर्ममर्यादागोप्ता दुष्टानां शास्ता भविष्यति ४ सर्वपालानांतेजः तनौबिभर्ति ५ कालेद्रव्यंउपादत्ते कालेविमुंचति सूर्यवत् ६क्षमया धरित्रीव भूतानां अंतर्बहिः व्यापकत्वे
न वायुवत् दंडे यमवत् अवर्षणेसति प्रजाः रक्षयति ७ ८ लोकंचंद्रवत् सुखयति ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नव्यक्तंवर्त्मप्रवेशनिर्गमयोर्मार्गोयस्य । (कदागच्छतिकदावाप्रविशतितच्चारैरपिनज्ञायतइत्यर्थः) निगूढंनिष्पत्तेःपूर्वमविज्ञातंकार्यंयस्य । तच्चकार्यंगंभीरंकिमर्थमेतत्कृतमित्यन्यैरज्ञाताभि
प्रायंविधत्तइति । तथाउपगुप्तंसुरक्षितंवित्तंयस्य । अनंतमाहात्म्यश्चासौगुणानामेकंधामविस्फूर्तिर्यस्मिन्सच । अनंतमाहात्म्योपेतागुणाएवएकंधामस्थानंयस्येतिवा । संवृतात्मासंयतमूर्तिः । रुमु
द्रंचरत्वेनवरुणस्याप्येतेगुणाद्रष्टव्याः।१० दुरासदः शत्रोर्मनसापिप्राप्तुमशक्यः । दुर्विषहः शत्रुभिः सोढुमशक्यः । विदूरवत्पौरुषेणाभिभवितुमशक्यः । वेनएवारणिस्तस्मादुत्थितः ११ चारण
गुप्तप्रभृत्यैः पश्यन्नपिस्वस्तुतिनिंदादीनुदासीनइववर्तिष्यते । यथादेहिनामध्यक्षोऽविकृत आत्मभूतोवायुः सूत्रात्मातद्वत् । १२ आत्मद्विषांसुतमितिसुतग्रहणंस्वात्मजसाम्यार्थं । द्विषांसुतमपि
दंडानर्हं नदंडयतिआत्मनः सुतमपि दंडार्हं दंडयत्येवेत्यर्थः धर्मपथेयमस्यवृत्तेस्थितः।१३ चक्रंआज्ञा सेना वा रथस्यवाचक्रंमानसाचलमभिव्याप्यप्रवर्तते किंपर्यंतमित्यतआह । अर्कोरश्मिगणैर्यावत्तप
तितावत् । १४ यद्यस्मात् (आत्मनश्चरितैः) रंजयिष्यति । अथतस्मान्मनोरंजनैर्हेतुभिरमुंराजानमाहुः । मनोरंजनैरितिचेष्टितविशेषणंवा १५ (सत्यसंधः सत्यप्रतिज्ञः) १६ मातरीवभक्तिर्भ
जनंयस्य । आत्मनोदेहस्यार्धइवपत्न्यांप्रीतिमान् १७ नांदिंसुखंवर्धयतीतितथा । मुक्तसंगेषु साधुषु प्रकृष्टः संगोयस्य । दंडपाणिः (यमः) सइवेत्यपराधानुपेक्षणमुच्यते । नादंड्यमित्यत्रतुपक्षपाता
भावउक्तः । १८ अयंत्विति तुशब्देननिरुपमत्वंदर्शयति । कोसावात्मातमाह । यस्मिन्प्रतीतमपिनानात्वमर्थशून्यंपश्यंति । १९ आउदयाद्रेः उदयाचलपर्यंतंगोप्तागोपायिष्यति । तदथ
(दक्षिणतः) पर्यस्यतेपर्यटिष्यति । प्रदक्षिणंकरिष्यतीत्यर्थः २० अस्मैतथाप्रदक्षिणंकुर्वते (एषांलोकपालनृपालानांस्त्रियश्चक्रायुधंविष्णुं) मंस्यंते ज्ञास्यंति । तस्ययशउद्धरंत्यउदाहरंत्यः
कीर्तयंत्यः (इत्यर्थः) २१

श्लोकाः १० — २१

अव्यक्तवर्त्मैषनिगूढकार्योगंभीरवेधाउपगुप्तवित्तः ॥ अनंतमाहात्म्यगुणैकधामापृथुःप्रचेताइवसंवृतात्मा १० दुरासदोदुर्विषहआसन्नोपिविदूरवत् ॥
नैवाभिभवितुंशक्योवेनारण्युत्थितोनलः ११ अंतर्बहिश्चभूतानांपश्यन्कर्माणिचारणैः ॥ उदासीनइवाध्यक्षोवायुरात्मेवदेहिनाम् १२ नादंड्यंदंडय
त्येषसुतमात्मद्विषामपि ॥ दंडयत्यात्मजमपिदंड्यंधर्मपथेस्थितः १३ अस्याप्रतिहतंचक्रंपृथोरामानसाचलात् ॥ वर्त्ततेभगवानर्कोयावत्तपतिगोगणैः १४
रंजयिष्यतियल्लोकमयमात्मविचेष्टितैः ॥ अथामुमाहूराजानंमनोरंजनकैःप्रजाः १५ दृढव्रतःसत्यसंधोब्रह्मण्योवृद्धसेवकः ॥ शरण्यःसर्वभूतानांमानदोदीन
वत्सलः १६ मातृभक्तिःपरस्त्रीषुपत्न्यामर्धइवात्मनः ॥ प्रजासुपितृवत्स्निग्धःकिंकरोब्रह्मवादिनाम् १७ देहिनामात्मवत्प्रेष्ठःसुहृदांनंदिवर्धनः ॥ मुक्तसं
गप्रसंगोयंदंडपाणिरसाधुषु १८ अयंतुसाक्षाद्भगवांस्त्र्यधीशःकूटस्थआत्माकलयावतीर्णः ॥ यस्मिन्नविद्यारचितंनिरर्थकंपश्यंतिनानात्वमपिप्रतीतम् १९
अयंभुवोमंडलमोदयाद्रेर्गोप्तैकवीरोनरदेवनाथः ॥ आस्थायजैत्रंरथमात्तचापःपर्यस्यतेदक्षिणतोयथार्कः २० अस्मैनृपालाःकिलतत्रतत्रबलिंहरिष्यंतिसलो
कपालाः ॥ मंस्यंतएषांस्त्रियआदिराजंचक्रायुधंतद्यशउद्धरंत्यः २१

चूर्णिका

अग्निरिवसोढुं अशक्यः अदंड्यं अरिसुतं नदंडयति सुतमपिदंड्यंदंडयति १० ११ १२ १३ अस्यमानसाचलपर्यंतं अप्रतिहतंचक्रंवर्तेत १४ अयं आत्मचेष्टितैः
लोकंरंजयिष्यति १५ अयंभूतानांशरण्यः वृद्धसेवकः १६ अयंपरस्त्रीषुमातृभक्तिः सतां किंकरः १७ असाधुषु दंडपाणिरिव अयंपृथ्वीरक्षकः १८ १९ २० अस्मैनृपाः
बलिंदास्यंति २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(महीरूपागांप्रजानांवृत्तिकरः प्रजापतिरिव। शरासोधनुः तस्यकोट्या) इंद्रइवाद्रीन्विभिंदन् (गांमहीम्)। २२ लांगूलं(पुच्छं) उन्नमय्य यथामृगेंद्रश्चरतितथा (आजौयुद्धेअविषह्य) धनुर्विस्फूर्जयन् (घो
षयन्नुद्यम्य). यदाक्ष्मामचरत् (तदाअसंतोऽसाधवः निलीनाः) २३ सरस्वती यत्रप्रादुरभावि प्रादुर्भूता। कर्मकर्तरिचिण् (तत्रचरमेशततमेअश्वमेधे) अहारषीत्अहार्षीत् हरणंकरिष्यतीत्यर्थः (तत्र
हेतुगर्भंविशेषणंशतक्रतुरिति) २४ (समेत्यसमागम्यततोज्ञानात्परंब्रह्मानुभवंति) २५ (इत्येवं) विश्रुताः विक्रमायस्यसः (याआत्माश्रिताः विष्ण्वाश्रिताः स्वविषयास्तास्तागिरो) गाथाः प्रबंधरूपाः ॥१७॥
(श्रोष्यति। पृथुर्महान्पराक्रमोयस्य।) २६ (अप्रतिरुद्धमप्रतिहतंचक्रमाज्ञायस्य। स्वतेजसैवोत्पाटितंलोकानांशल्यंक्षुधादिलक्षणंयेन)। उपगीयमानोमहाननुभावोयस्य २७ इतिचतुर्थस्कंधेटीकायांषो
डशोध्यायः॥१६॥ ततः सप्तदशेलोकक्षुधांप्रशमयन्पृथुः। ग्रस्तबीजांमहींहंतुंयत्तोभीत्यातयास्तुतः ॥१॥ (तान्सूतादीन्) छंदयामास तोषितवान् (अभिनंद्यसाधुसाध्वितिप्रशस्य) १ भृत्यानमात्यान्पुरो
॥६५॥ धसः पुरोहितांश्च श्रेणीः तैलिकतांबूलिकादीन् पौरविशेषान्प्रकृतीर्नियोगिनः २ दोहनं पात्रं (किं)। ३ (देवी पृथ्वीस्वभावतएवविषमा।) मेध्यंयज्ञार्हं (देवइंद्रः) ४ (हेब्रह्मन्) सविज्ञानंअपरो
क्षज्ञानसहितम् ५ पूर्वदेहः पृथ्ववतारः (सहिप्रथमः) तत्कथाश्रयं श्रवायशः सुष्ठुश्रवोयस्य (तस्यभगवतः) ६ (तवगुरोः अधोक्षजस्यचभक्तायसेवकायमे) अदुह्यत्दुग्धवान् ७।

अयंमहींगांदुदुहेधिराजःप्रजापतिर्वृत्तिकरःप्रजानाम् ॥ योलीलयाद्रीन्स्वशरासकोटयाभिंदन्समांगामकरोद्यथेंद्रः २२ विस्फूर्जयन्नाजगवंधनुःस्वयं श्लोकाः
यदाचरत्क्ष्मामविषह्यमाजौ ॥ तदानिलिल्युर्दिशिदिश्यसंतोलांगूलमुद्यम्ययथामृगेंद्रः २३ एषोश्वमेधाञ्शतमाजहारसरस्वतीप्रादुरभावियत्र ॥ अहार
षीद्यस्यहयंपुरंदरःशतक्रतुश्चरमेवर्त्तमाने २४ एषस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकम् ॥ आराध्यभक्त्यालभतामलंतज्ज्ञानंयतोब्रह्मपरंविदंति २२/७
२५ तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः ॥ श्रोष्यत्यात्माश्रितागाथापृथुःपृथुपराक्रमः २६ दिशोविजित्याप्रतिरुद्धचक्रःस्वतेजसोत्पाटितलोकशल्यः
॥ सुरासुरेंद्रैरुपगीयमानमहानुभावोभवितापतिर्भुवः २७ इतिश्रीभा०म० च०स्कंधेषोडशोध्यायः १६ मैत्रेयउवाच॥ ॥ एवंसभगवान्वैन्यःख्यापितो
गुणकर्मभिः ॥ छंदयामासतान्कामैःप्रतिपूज्याभिनंद्यच १ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः ॥ पौराञ्जानपदाञ्श्रेणीःप्रकृतीःसमपूजयत् २
विदुरउवाच॥ ॥कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी॥ यांदुदोहपृथुस्तत्रकोवत्सोदोहनंचकिम् ३ प्रकृत्याविषमादेवीकृतातेनसमाकथम् ॥ तस्यमेध्यंहयं
देवःकस्यहेतोरपाहरत् ४ सनत्कुमाराद्भगवतोब्रह्मन्ब्रह्मविदुत्तमात् ॥ लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः ५ यच्चान्यदपिकृष्णस्यभवान्भगवतः
प्रभोः ॥ श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयम् ६ भक्तायमेनुरक्तायतवचाधोक्षजस्यच ॥ वक्तुमर्हसियोदुह्यद्वैन्यरूपेणगामिमाम् ७

चूर्णिका

अयंगोरूपांमहीं अदुहत् पृथ्वींसमांअकरोत् २२ एषः शतंअश्वमेधान् आजहार चरमे अश्वमेधे इंद्रः अश्वं अहार्षीत् २४ एषः स्वगृहेप्राप्तंसनत्कुमारं आरा
ध्य अमलंज्ञानं प्राप्स्यति २५ २६ किंच दिशः विजित्य स्वतेजसा उत्पाटितलोकशल्यः देवदैत्यैः उपगीयमानः भुवः पतिर्भविता २७ ॥ ॥इति चतुर्थेषोड
शोध्यायः १६ ॥ ॥मैत्रेयउवाच ॥ ॥ एवंगुणकर्मभिः ख्यापितः पृथुः सूतमागधादीन् ब्राह्मणांश्च तोषितवान् १ २ ॥ ॥ विदुरउवाच ॥ ॥ धरित्री गोरूपं द ॥६५॥
धार यां पृथुः दुदोह तत्र वत्सः कः दोहनं किम् ३ किंच पृथुना इयंभूः कथंसमाकृता इंद्रः तस्य हयंकुतः जहार ४ सः सनत्कुमारात् ज्ञानंलब्ध्वाकांगतिं गतः ५ ए
तत् अन्यच्चभक्तायमे वक्तुं अर्हसि ६ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

८ जनताया (जनसमूहस्य) त्वं ॥ल इत्यामंत्रितोनियुक्तस्तदानिरन्नेक्षितितले सति क्षुधा क्षामाः क्षीणदेहायासां॥ः प्रजाएत्यपतिंपृथुमब्रुवन् ९ जाठरेणाग्निनाभितप्ताः (कोटरस्थेनवृक्षविवरस्थेनाग्निनायथावृक्षाः) यः साधितः विप्रैर्मंथनेनसंपादितः । तंत्वांशरणंयाताः १० तत्तस्मात्नोऽस्माकंअन्नंरातवेरातुम् दातुं ईहतुईहतांयत्नंकरोतु । उज्झितोर्जाः त्यक्तान्नाः सत्यः वार्तापतिः जीविकायाःपतिः । ११ (करुणंदयोत्पादकमित्यर्थः) परिदेवितंविलापं ।(दध्यौचिंतितवान्) निमित्तंहेतुंअन्वपद्यत ज्ञातवान् १२ पृथिव्यैवऔषधिबीजानिग्रस्तानीति (बुद्ध्या) व्यवसितोनिश्चितवान्सन् । (भूमेः भूमिंहंतुमित्यर्थः । गौः गोरूपासतीअपाद्रवत्अपगता) १३ मृगयुनाद्रुताअनुगतामृगीव १४ (तत्तदा ।) १५ (रोदसीद्यावापृथिव्यौतयोरंतरमंतरिक्षंच । अनु पृष्ठतः उद्यतमायुधंयेनतम्) १६ (त्राणंनाविंदतनालभत । यथामनुष्यामृत्योस्त्राणंनलभंते) १७ (आपन्नवत्सलहेशरणागतवत्सल) १८ योधर्मज्ञइतिमतः सभवान्योषांमांकथमहनिष्यत्हनिष्यति १९ । २० अजरांदृढांविपाट्यहत्वा । धास्यसिधारयिष्यसि २१

॥६६॥

॥ सूतउवाच ॥ चोदितोविदुरेणैवंवासुदेवकथांप्रति ॥ प्रशस्यतंप्रीतमनामैत्रेयःप्रत्यभाषत ८ ॥ ॥ मैत्रेयउवाच ॥ ॥ यदाभिषिक्तःपृथुरंगविप्रैरामंत्रितोजनतायाश्चपालः ॥ प्रजानिरन्नेक्षितिपृष्ठएत्यक्षुत्क्षामदेहाःपतिमभ्यवोचन् ९ वयंराजन्जाठरेणाभितप्तायथाग्निनाकोटरस्थेनवृक्षाः ॥ त्वामद्ययाताःशरणंशरण्यंयःसाधितोवृत्तिकरःपतिर्नः १० तन्नोभवानीहतुरातवेन्नंक्षुधार्दितानांनरदेवदेव ॥ यावन्ननंक्ष्यामहउज्झितोर्जावार्त्तापतिस्त्वंकिललोकपालः ११ ॥ ॥ मैत्रेयउवाच ॥ ॥ पृथुःप्रजानांकरुणंनिशम्यपरिदेवितम् ॥ दीर्घंदध्यौकुरुश्रेष्ठनिमित्तंसोन्वपद्यत १२ इतिव्यवसितोबुद्ध्याप्रगृहीतशरासनः ॥ संदधेविशिखंभूमेःक्रुद्धस्त्रिपुरहायथा १३ प्रवेपमानाधरणीनिशाम्योदायुधंचतम् ॥ गौःसत्यपाद्रवद्भीतामृगीवमृगयुद्रुता १४ तामन्वधावत्तद्वैन्यःकुपितोत्यरुणेक्षणः ॥ शरंधनुषिसंधाययत्रयत्रपलायते १५ सादिशोविदिशोदेवीरोदसीचांतरंतयोः ॥ धावतीतत्रतत्रैनंददर्शानूद्यतायुधम् १६ लोकेनाविंदतत्राणंवैन्यान्मृत्योरिवप्रजाः ॥ त्रस्तातदानिववृतेहृदयेनविदूयता १७ उवाचचमहाभागंधर्मज्ञापन्नवत्सल ॥ त्राहिमामपिभूतानांपालनेवस्थितोभवान् १८ सत्वंजिघांससेकस्माद्दीनामकृतकिल्बिषाम् ॥ अहनिष्यत्कथंयोषांधर्मज्ञइतियोमतः १९ प्रहरंतिनवैस्त्रीषुकृतागःस्वपिजंतवः ॥ किमुतत्वद्विधाराजन्करुणादीनवत्सलाः२० मांविपाट्याजरांनावंयत्रविश्वंप्रतिष्ठितम् ॥ आत्मानंचप्रजाश्चेमाःकथमंभसिधास्यसि २१

८/२१

चूर्णिका

सूतउवाच एवं विदुरेण पृष्टो मैत्रेयः आह ८ ॥ ॥ मैत्रेयउवाच ॥ ॥ यदाविप्रैः अभिषिक्तः पृथुः तदाप्रजाः एत्यपतिं अवोचन् ९ हेराजन् वयं जठराग्निनातप्ताः त्वांशरणंयाताः १० अतः नः अन्नंदातुं यत्नं करोतु ११ ॥ ॥ मैत्रेयउवाच ॥ ॥ प्रभुः प्रजानांदीनांवाचं निशम्य दीर्घंदध्यौ १२ ततः दुःखनिमित्तं ज्ञात्वा भूमिंहंतुं धनुषिबाणंसंदधे १३ तदाप्रवेपमानागोरूपापृथ्वी अपलायत् १४ पृथुः तां अन्वधावत १५ सात्रैलोक्यं भ्रांत्वा तत्रतत्रपृष्ठतःएनंददर्श १६ कुत्रापित्रातारं नलेभे तदा पृथुंउवाच ॥ १७ हेधर्मज्ञमांत्राहि १८ योषांमां कथं हनिष्यसि १९ २० हेवैन्य अजरां नौकारूपांमांहत्वा प्रजाआत्मानंच अंभसि कथं धास्यसि २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

बर्हिषियज्ञेयाभवती देवतारूपेणभागंवृंक्तेभजते। वसुधनधान्यादि २२ गोरूपेणतुयवसं तृणंजग्धि अत्तीत्यर्थः।ऊधःसंबंधिप्रयस्तुनैव दोग्धि दुग्धं नस्रवतीत्यर्थः अत्रअस्मिन्नपराधे (नशस्यतेन अपितुश स्यतएव) २३ आत्मनिदेहेरुद्धानि २४ मद्बधेसर्वथाअन्नंनस्यादितिचेदतआह।अमूषांप्रजानां।मेदसामांसेन (क्रोधातिशयादुक्तिरियम्) २५ यदुक्तंयोषांकथंहनिष्यतीति तत्राह पुमानिति।तस्यवधोऽवधएव (दोषजनकोनभवतीत्यर्थः)२६ यच्चोक्तंकथमंभसिधास्यसीतितत्राह । त्वामिति । तिलशः तिलप्रमाणानिखंडानीत्येवंभूतामवस्थांत्वांनीत्वा । (मायागामित्यनेनवस्तुतोगोत्वाभावात्गोवधदोषोपिनास्ती तिसूचितम्)२७ मन्युः (क्रोधः तन्मयींमूर्तिंबिभ्रतंकृतांतमिव । अत्र मन्युमयीं) मूर्तिंबिभ्रतः कृतांततुल्यत्वमुच्यते । नतुकृतांतस्यमन्युमयीमूर्तिरिति२८"शुद्धसत्त्वतनुंदेवमकस्मादतिदारुणम् । वीक्षमा णापृथुंपृथ्वीतुष्टावकरुणोक्तिभिः" । माययाविन्यस्ताराचितानानाघोरादितनवोयेन । गुणात्मनेगुणमयत्वेनप्रतीयमानाय । वस्तुतस्तुनिर्धुतानिरस्ताद्रव्यक्रियाकारकेषुअधिभूताध्यात्माधिदैवेषु

॥६७॥ विभ्रमोऽहंकारःतन्निमित्ताऊर्मयो रागद्वेषादयश्चयस्मिन्तस्मै २९ अहोसर्वजीवाश्रयत्वेनसृष्टांमांकथंहंतुंप्रवर्ततेइत्याह। येनविधात्राआत्मनांजीवानांआयतनमहंविनिर्मिता।यतः यस्यांमयिगुणसर्गस्यचतु र्विधभूतग्रामस्यसंग्रहःधारणंसएवस्वराट्स्वतंत्रः (उदायुधः धनुर्धरः मांहंतुमुपस्थितः) ३० सृष्टिसंहारकर्तृकोऽहमेवेतिचेत्तथापिप्रजापालने प्रवृत्तस्य मद्वधोनुचितएवेत्याह । एतदिति । आत्माश्रयया जीवविषयिण्या ३१ अतोदुर्ज्ञेयमीश्वरचेष्टितमित्याह । नूनमिति । अकृतात्मभिः विक्षिप्तचित्तैः (ईशस्यचेष्टितंनलक्ष्यतेबत) यईश्वरः स्वतंत्रः अकरोद्ब्रह्माणम् । परतइतितेनब्रह्मणाचराचरमकारयत् । यश्चस्वतएकः परतोमाययाअनेकः । ३२

॥ पृथुरुवाच ॥ वसुधेत्वांवधिष्यामिमच्छासनपराङ्मुखीम् ॥ भागंबर्हिषियावृंक्तेनतनोषिचनोवसु २२ यवसंजग्ध्यनुदिनंनैवदोग्ध्यौधसंपयः ॥ श्लोकाः

तस्यामेवंहिदुष्टायांदंडोनात्रनशस्यते २३ त्वंखल्वोषधिबीजानिप्राक्सृष्टानिस्वयंभुवा ॥ नमुंचस्यात्मरुद्धानिमामवज्ञायमंदधीः २४ अमूषांक्षुत्परीतानामा २२

र्तानांपरिदेवितम् ॥ शमयिष्यामिमद्बाणैर्भिन्नायास्तवमेदसा २५ पुमान्योषिदुतक्लीबआत्मसंभावनोधमः ॥ भूतेषुनिरनुक्रोशोनृपाणांतद्वधोवधः २६ त्वां ३२

स्तब्धांदुर्मदांनीत्वामायागांतिलशःशरैः ॥ आत्मयोगबलेनेमाधारयिष्याम्यहंप्रजाः २७ एवंमन्युमयींमूर्तिंकृतांतमिवबिभ्रतम् ॥ प्रणतांप्रांजलिःप्राहम हीसंजातवेपथुः २८ ॥ धरोवाच ॥ नमःपरस्मैपुरुषायमाययाविन्यस्तनानातनवेगुणात्मने । नमःस्वरूपभानुवेननिर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये २९ येनाहमात्मायतनंविनिर्मिताधात्रायतोयंगुणसर्गसंग्रहः ॥ सएवमांहंतुमुदायुधःस्वराडुपस्थितोन्यंशरणंकमाश्रये ३० यएतदादावसृजच्चराचरंस्वमा ययात्माश्रययावितर्क्यया ॥ तयैवसोयंकिलगोप्तुमुद्यतःकथंनुमांधर्मपरोजिघांसति ३१ नूनंबतेशस्यसमीहितंजनैस्तन्माययादुर्जययाकृतात्मभिः ॥ नलक्ष्यतेयस्त्वकरोदकारयद्योनेकएकःपरतश्चईश्वरः ३२

चूर्णिका पृथुरुवाच ॥ हेवसुधेत्वांहनिष्यामि २२ नित्यं यवसंजग्धिः पयः नैवदोग्धि २३ पूर्वंब्रह्मणासृष्टानि ओषधिबीजानि त्वयाग्रसितानितानिनमुंचसि २४ प्रजानां क्षुधं मद्बा णैर्विद्धायास्तेमांसेनशमयिष्यामि २५ २६ त्वांतिलशः हत्वायोगबलेन प्रजाःधारयिष्यामि २७ एवंक्रोधमूर्त्तिं बिभ्रतं पृथुं कंपायमानामही प्राह २८ ॥ धराउवाच ॥ ॥ परपुरुषायतेनमः २९ येनविधात्रा जीवानांस्थानं अहंनिर्मिता सएवमांहंतुं उपस्थितः अन्यंकं शरणं ब्रजामि ३० धर्मपरोभवान्कथंमांजिघांसति ३१ ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका. तस्मादचिंत्यशक्तयेकेवलंनमइत्याह । सर्गादिजन्मस्थितिभंगंअस्य जगतः अनुरुणद्धि अनुवर्तते करोति । द्रव्याणि महाभूतानि । क्रिया इंद्रियाणि । कारका देवाः । चेतना बुद्धिः । आत्मा अहंकारः तैः स्वशक्तिरूपैः समुन्नद्धाः समुत्कटानिरुद्धाः शक्तयोयस्य ३३ प्राणिनांधारणार्थंमांरसातलादुद्धृत्येदानींप्रजारक्षणेप्रवृत्तस्यमद्वधोनयुक्तइतिसकरुणयाहद्वाभ्यां । सइति । हेअज । यः सृष्टवान् सएव भवान् स्वनिर्मितंचराचरंजगत् सम्यक्स्थापयितुंआदिसूकरः मांरसातलादंभसोऽभ्युज्जहार ३४ सएवधराधरोवराहोअद्यअपामुपस्थेउपरिमयिनाविआधारेआधारभूतायांअवस्थिताः प्रजारक्षितुमिच्छुः वीरमूर्तिःपृथुरूपःसमभूत् । यएवंभूतः सत्वंपयसिक्षीरनिमित्तेमांजिघांससिहंतुमिच्छसीतिचित्रमित्यर्थः । ३५ तस्मादीश्वरचेष्टितंदुर्ज्ञेयमितिकैमुत्यन्यायेनोपसंहराति । नूनमिति । तस्येश्वरस्यगुणसर्गरूपया (रजआदिगुणसृष्टिरूपया) माययामोहितंचित्तमेववर्त्मयेषांमाहितानिचित्तस्यवर्त्मानियेषामितिवातैर्जनैरीश्वराणांहरिभक्तानामवतावदीहितंनज्ञायतेकिंपुनस्तस्यपरमेश्वरस्यच । अतः परमेश्वराएव ॥१८॥

॥६८॥ तेकेवलंतेभ्योपि नमएव वीराणांजितेंद्रियाणांयशःकुर्वंति ये तेभ्यः । यथावीराणांयशोवर्धेततथाचेष्टतांनत्तुयथेष्टमितिभावः ३६ ॥ ॥ इतिचतुर्थस्कंधेटीकायां सप्तदशोध्यायः ॥ १७ ॥ ॥ अष्टादशेमही वाक्याद्भत्सपात्रादिभेदतः । पृथ्व्यादिभिरतुक्रमशःसाचदुग्धात्वितीर्यते ॥१॥ १ (अभितोभवतीत्यभिभुस्तत्संबोधनम्) हेअभिभोयद्वा प्रभोभोदेव अभिअभयं यथा भवत्येवंमन्युं संनियच्छ । श्रावितंविज्ञापितं नमद्वाक्येऽनादरः कर्तव्यइत्याह । बुधोहिसर्वतः सारमादत्ते । २ मयिजीर्णाश्चौषधीरुपायेनगृहाणेति वक्तुमुपायेनसर्वंसिध्यतिनान्यथेत्याह । अस्मिन्नितित्रिभिः । पुंसांश्रेयसः पुरुषार्थस्यप्रसिद्धये अस्मिंल्लोकेकृष्यादयः अमुष्मिंल्लोकेऽग्निहोत्रादयोयोगाउपायादृष्टाज्ञाताः प्रयुक्ता अनुष्ठिताश्च । ३ पूर्वैर्दर्शितान् अवरोऽर्वाचीनः (श्रद्धयाविश्वासेनानुतिष्ठति स उपेयान् फलानि) ४ अविद्वान् विद्वानपीतिवा । व्यभिचरंतिन सिध्यंति । ५ सहेतुकमुपायमाह पुरेतिषड्भिः ओषधयोव्रीह्यादयः) ६

सर्गादियोस्यानुरुणद्धिशक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ॥ तस्मैसमुन्नद्धनिरुद्धशक्तयेनमःपरस्मैपुरुषायवेधसे ३३ सवैभवानात्मविनिर्मितंजगद्भूतें श्लोकाः
द्रियांतःकरणात्मकंविभो ॥ संस्थापयिष्यन्नजमांरसातलादभ्युज्जहारांभसआदिसूकरः ३४ अपामुपस्थेमयिनाव्यवस्थिताःप्रजाभवानद्यरिरक्षिषुःकि
ल ॥ सवीरमूर्त्तिःसमभूद्धराधरोयोमांपयस्युग्रशरोजिघांससि ३५ नूनंजनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ नज्ञायतेमोहितचित्तवर्त्मभि ३३/६
स्तेभ्योनमोवीरयशस्करेभ्यः ३६ ॥इतिश्रीभा०म०च०स्कंधेपृथुविजयधरित्रीनिग्रहोनामसप्तदशोध्यायः १७॥ ॥ मैत्रेयउवाच ॥ ॥ इत्थंपृथुमभि
ष्टूयरुषाप्रस्फुरिताधरम् ॥ पुनराहावनिर्भीतासंस्तभ्यात्मानमात्मना १ संनियच्छाभिभोमन्युंनिबोधश्रावितंचमे ॥ सर्वतःसारमादत्तेयथामधुकरोबुधः २
अस्मिँल्लोकेथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः ॥ दृष्टायोगाःप्रयुक्ताश्चपुंसांश्रेयःप्रसिद्धये ३ तानातिष्ठतियःसम्यगुपायान्पूर्वदर्शितान् ॥ अवरःश्रद्धयोपे
तउपेयान्विंदतेंजसा ४ ताननादृत्ययोविद्वानर्थानारभतेस्वयम् ॥ तस्यव्यभिचरंत्यर्थाआरब्धाश्चपुनःपुनः ५ पुरासृष्टाह्योषधयोब्रह्मणायाविशांपते ॥
भुज्यमानामयादृष्टाअसद्भिरधृतव्रतैः ६

चूर्णिका ३३ हेअज त्वंपुरारसातलात्सूकररूपेणमांउज्जहार ३४ सः त्वंकथंमांहंतुं अर्हसि ३५ तेचरितं केनापि न ज्ञायते अतःतेनमोस्तु ३६॥ इतिचतुर्थेसप्तदशः ॥ मैत्रेय उवाच ॥ ॥ एवंमहीपृथुंस्तुत्वाभीतासतीपुनः आह १ हेराजन् मेविज्ञापनंनिबोध २ पूर्वैतत्त्वदर्शिभिः येउपायाः दृष्टाःप्रयुक्ताश्च ३ तान्यः आतिष्ठति सः श्रेयः प्राप्नोति ४ ५ पुराब्रह्मणा ओषधयः सृष्टाः ताः दुष्टराजन्यैः भुज्यमानाः दृष्ट्वा ६ ॥६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवद्भिरिति राजसामान्याभिप्रायेण वेनादिभिरितिवा । अपालिताचोराद्यनिवारणात् । अनादृताचयज्ञादिप्रवर्तनाभावात् (अथातः) यज्ञार्थे अग्रसं गिलितवती । अन्यथाऽधृतव्रतैर्भुक्ताः नप्रसो
ष्यंते । ततश्च यज्ञादयोनसिध्येरन्निति भावः । ७ क्षीणाः जीर्णाः । ८ (हेवीर अत्रयोग्यं) दोहनं दोहनपात्रम् (वत्सं) दोग्धारंचोपकल्पय (संपादय ।) धोक्ष्येप्रपूरयिष्यामि ९ (हे भूत
भावन) भूतानामभीप्सितमन्नम् ऊर्जस्वत् बलप्रदम् १० (ओषध्युत्पत्तौ प्रधानसाधनम् जलं तद्विषमायां मयि नसमं प्रसरति । तत्) अपगतेपि वर्षर्तौमयि यथासर्वतो वर्तेत (तथामां समांकुरु)
११मनुंस्वायंभुवं ओषधीः व्रीह्यादीः । (प्रियंश्रोत्रसुखं । हितंपथ्यम्) १२ प्रसंगादर्थांतरमाह । तथेति । भुवोवाक्यं श्रुत्वा यथापृथुरेवंसर्वत्रवाक्येहिपरेपिसारमाददते । प्रस्तुतमनुवर्तयति । ततोन्येचऋ
ष्यादयः पंचदशदुदुहुः पृथुनाभावितांवशीकृताम् १३ देवीं पृथ्वीं वाङ्मनःश्रवणैर्वेदग्रहणादिंद्रियाणांपात्रत्वम् (छंदोमयं वेदमयम् हे सत्तमविदुर)१४सोमममृतम् वीर्यंमनःशक्तिम् ओजइंद्रियशक्तिम् बलं
देहशक्तिंचतदवपयः।१५सुरां(गौडीपैष्टीतथामाध्वी त्रिविधेयं सुरामतेत्युक्तां) आसवं च तालादिमद्यं (अयःपात्रेलोहमयेपात्रे) १६ मधुवाङ्माधुर्यं सौभगं सौंदर्यं तत्सहितम् (गांधर्वं अधुक्षन् दुदुहुः)
१७ कव्यंपितृणामन्नम् आमपात्रे अपक्वे मृन्मये अधुक्षत दुदुहुः । १८ संकल्पनामयींअणिमादिरूपाम् सिद्धिं । येविद्याधरादयस्तेचतमेववत्संप्रकल्प्यनभस्येवपात्रेखेचरत्वरूपांविद्यांदुदुहुः । १९
अन्येचाकिंपुरुषादयः अंतर्धानेन अद्भुतात्मनां आश्चर्यमनसां संबंधिनीं मायांधारणामयीं संकल्पमात्रप्रभवाम् २०

अपालितानादृताचभवद्भिर्लोकपालकैः ॥ चोरीभूतेथलोकेहंयज्ञार्थेग्रसमोषधीः ७ नूनंतावीरुधःक्षीणामयिकालेनभूयसा ॥ तत्रयोगेनदृष्टेनभवानादातु
मर्हति ८ वत्संकल्पयमेवीरयेनाहंवत्सलातव ॥ धोक्ष्येक्षीरमयान्कामाननुरूपंचदोहनम् ९ दोग्धारंचमहाबाहोभूतानांभूतभावन ॥ अन्नमीप्सितमू
र्जस्वद्भगवान्वांछतेयदि १० समांचकुरुमांराजन्देववृष्टंयथापयः ॥ अपर्तावपिभद्रंतेउपावर्तेतमेविभो ११ इतिप्रियंहितंवाक्यंभुवआदायभूपतिः ॥
वत्संकृत्वामनुंपाणावदुहत्सकलौषधीः १२ तथापरेचसर्वत्रसारमाददतेबुधाः ॥ ततोन्येचयथाकामंदुदुहुःपृथुभाविताम् १३ ऋषयोदुदुहुर्देवीमिंद्रिये
ष्वथसत्तम ॥ वत्संबृहस्पतिंकृत्वापयश्छंदोमयंशुचि १४ कृत्वावत्संसुरगणाइंद्रंसोममदूदुहन् ॥ हिरण्मयेनपात्रेणवीर्यमोजोबलंपयः १५ दैतेयादान
वावत्संप्रह्रादमसुरर्षभम् ॥ विधायादूदुहन्क्षीरमयःपात्रेसुरासवम् १६ गंधर्वाप्सरसोधुक्षन्पात्रेपद्ममयेपयः ॥ वत्संविश्वावसुंकृत्वागांधर्वंमधुसौभगम् १७
वत्सेनपितरोर्यम्णाकव्यंक्षीरमधुक्षत ॥ आमपात्रेमहाभागाःश्रद्धयाश्राद्धदेवताः १८ प्रकल्प्यवत्संकपिलंसिद्धाःसंकल्पनामयीम् ॥ सिद्धिंनभसिविद्यां
चयेचविद्याधरादयः १९ अन्येचमायिनोमायामंतर्धानाद्भुतात्मनाम् ॥ मयंप्रकल्प्यवत्संतेदुदुहुर्धारणामयीम् २०

श्लोकाः ७/२०

चूर्णिका

लोकेचोरीभूतेमति अहंयज्ञार्थेताः ओषधीःअग्रसम् ७ ताःबहुकालेन मयिक्षीणाजाताः भवान् योगेन आदातुं अर्हति ८ हेवीर दोहनार्थं वत्सं दोहनं दोग्धारं च कल्पय
यदिभवान् अन्नंवांच्छति ९ १० तर्हिमासमांकुरु यथातर्हिमांसमां कुरु यथामयि मेघोदकं स्थिरंस्यात् ११ इतिश्रुत्वाराजाप्रीतःसन् मनुंवत्संकृत्वा स्वहस्ते औषधीः
अदुहत् १२ ततोन्येच यथाकामं दुदुहुः १३ ऋषयबृहस्पतिंवत्सं कृत्वाइंद्रियरूपपात्रे छंदोमयं दोहं अदुहन् १४देवा इंद्रं वत्संकृत्वा हिरण्यपात्रेअमृतं दुदुहुः१५दैत्याः
प्रह्लादंवत्संकृत्वा अयःपात्रेसुरांदुदुहुः १६ गधर्वास्परसःविश्वावसुंवत्संकृत्वा पद्मपात्रे वाङ्माधुर्यं दुदुहुः १७ पितरः अर्यमणंवत्संकृत्वा आमपात्रेकव्यं दुदुहुः १८ वि
द्याधरादयः कपिलंवत्संकृत्वा नभःपात्रेखेचरत्वादिसिद्धीर्दुदुहुः १९ मायिनःमयासुरं वत्संकृत्वा धारणामयींमायां दुदुहुः २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥७८॥

भूतेशो रुद्रः स एववत्सोयेषाम् क्षतजंरुधिरं तदेवासवं (मद्यम्) २१ अहयोनिष्फणाः दंदशूकावृश्चिकादयः (क्रिमिविशेषाः) सर्पाः सफणाः त एवकद्रूसंततिजा नागाः बिलपात्रेमुख (रूपे) २२ यवसंतृणं । गोवृषं रुद्रवाहरूपं वृषभं (श्रेष्ठं) मृगेंद्रेणेत्युत्तरेणान्वयः । २३ क्रव्यंमांसं । चरंकीटादि अचरं फलादि । (सुपर्णोगरुडः) २४ (धातून्सुवर्णादीन्) २५ अनुक्तसंग्रहार्थमाह । सर्वेइति सर्वे स्वजातीयोमुख्यस्तेनवत्सेन २६ उपसंहरति । एवमिति । (अन्नादाः तत्तदन्नस्यभोक्तारः) स्वन्नमभीष्टमन्नंतमेवक्षीरभेदंदुदुहुः । (नन्वेकस्याभुवः क्षीरभेदः कथं तत्राह) दोहः पात्रं (आदिनादोग्धृभेदः) २७ इमांपृथ्वीम् २८ धनुषोग्रेणगिरिशृंगाणिचूर्णयन्राजराट्राज्ञांराजासर्वेषामाजीविकादानात् २९ (यथायोग्यनिवासान्कल्पितवान्) ३० ग्रामाहट्टादिशून्याः । पुरोहट्टादिमत्यः ताएवमहत्यः पत्तनानि । दुर्गाणिविविधानिदुर्गमस्थानानि । यथाहबृहस्पतिः ' औदकंपार्वतंवार्क्षऐरिणंधान्वतंतथे'ति घोषान्आभीराणांनिवासान् । व्रजान्गवांनिवासान् । शिबिरंसेनानिवासस्थानं । तत्सहितान् । आकरान्स्वर्णादिस्थानानि । खेटाः कर्षकग्रामाः । खर्वटाः पर्वतप्रांतग्रामाः तांश्च ३१ ३२ ॥ इतिचतुर्थस्कंधे टीकायामष्टादशोध्यायः ॥१८॥

॥७०॥

श्लो.

यक्षरक्षांसिभूतानिपिशाचाःपिशिताशनाः ॥ भूतेशवत्सादुदुहुःकपालेक्षतजासवम् २१ तथाहयोदंदशूकाःसर्पानागाश्चतक्षकम् ॥ विधायवत्संदुदुहुर्बिलपात्रेविषंपयः २२ पशवोयवसंक्षीरंवत्संकृत्वाचगोवृषम् ॥ अरण्यपात्रेचाधुक्षन्मृगेंद्रेणचदंष्ट्रिणः २३ क्रव्यादाःप्राणिनःक्रव्यंदुदुहुःस्वेकलेवरे ॥ सुपर्णवत्साविहगाश्चरंचाचरमेवच २४वटवत्सावनस्पतयःपृथग्रसमयंपयः ॥ गिरयोहिमवद्वत्सानानाधातून्स्वसानुषु २५ सर्वेस्वमुख्यवत्सेनस्वेस्वेपात्रेपृथक्पयः ॥ सर्वकामदुघांपृथ्वींदुदुहुःपृथुभाविताम् २६ एवंपृथ्वादयःपृथ्वीमन्नादाःस्वन्नमात्मनः ॥ दोहवत्सादिभेदेनक्षीरभेदंकुरूद्वह २७ ततोमहीपतिःप्रीतःसर्वकामदुघांपृथुः ॥ दुहितृत्वेचकारेमांप्रेम्णादुहितृवत्सलः २८ चूर्णयन्स्वधनुष्कोटयागिरिकूटानिराजराट् ॥ भूमंडलमिदंवैन्यःप्रायश्चक्रेसमंविभुः २९ अथास्मिन्भगवान्वैन्यःप्रजानांवृत्तिदःपिता ॥ निवासान्कल्पयांचक्रेतत्रतत्रयथार्हतः ३० ग्रामान्पुरःपत्तनानिदुर्गाणिविविधानिच ॥ घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान् ३१ प्राक्पृथोरिहनैवैषापुरग्रामादिकल्पना ॥ यथासुखंवसंतिस्मतत्रतत्राकुतोभयाः ३२ इतिश्रीभा॰ म॰ च॰ स्कंधेपृथुविजयेऽष्टादशोध्यायः ॥ १८ ॥

२१/३२

चूर्णिका

यक्षरक्षोभूतपिशाचाः रुद्रंवत्संकृत्वा कपालेरक्तं दुदुहुः२१ अहिनागाद्याःतक्षकं मुखपात्रेविषम्२२ पशवःनंदिनंवत्संकृत्वा अरण्येयवसं२३ दंष्ट्रिणःमृगेंद्रंवत्संकृत्वा स्वकलेवरेक्रव्यं विहगाः गरुडंवत्संकृत्वा स्वपात्रेकीटफलादि२४ वनस्पतयःवटं॰ रसमयंपयः॰ गिरयःहिमाचलं॰ स्वस्वसानुषुधातून् दुदुहुः२५ एवंस्वेस्वेपात्रेभिन्नं भिन्नं पयः कामदुघां पृथ्वीं दुदुहुः २६ २७ ततः प्रीतःपृथुःपृथ्वींदुहितृत्वेचकार२८ स्वधनुःकोटयागिरिकूटानिचूर्णयन् भूमंडलंप्रायः समंचक्रे २९ अथजनानांयथार्हतः निवासंचक्रे३०ग्रामान्पुरः पत्तनानिदुर्गाणिविधानिच घोषान्व्रजान्सशिबिरान्आकरान्खेटखर्वटान् चक्रे ३१ इतिपृथिव्यांपृथोःपूर्वं पुरग्रामादिकल्पनानासीत् ततः अकुतोभयाः प्रजाः यथा सुखंवसतिस्म ३२ इतिचतुर्थेष्टादशः १८ ॥ ॥७०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ऊनविंशेऽश्वमेधांगहयापहरणात्पृथोःइंद्रंहंतुंप्रवृत्तस्यधात्रावारणमुच्यते ॥१॥ हयमेधशतेननिमित्तेनअदीक्षतदीक्षितोभूत् । शताश्वमेधसंकल्पमकरोदित्यर्थः । ब्रह्मावर्ते''सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम् । तंदेवनिर्मितंदेशंब्रह्मावर्तप्रचक्षते १ (शतक्रतुरिंद्रः) आत्मनः स्वस्यकर्मअतिशेतेइतिअतिशयं (स्वकर्मापेक्षयाऽत्युत्कृष्ट-)-मित्यर्थः अभिप्रेत्यज्ञात्वा तदिति तंपृथोर्यज्ञमहोत्सवंनममृषे नसेहे । २ अतिशयमेवदर्शयाति यत्रेतिसप्तभिः । साक्षादन्वभूयत प्रत्यक्षेणादृश्यत ३ । ४ । सिद्धादयश्चतंहरिमन्वीयुरित्युत्तरेणान्वयः ५ । ६ धर्मदुघाहविर्दोग्ध्री (यज्ञयोग्यपयोदोग्ध्रीतियावत् । तादृशी) धेनुः सती (नकेवलंधर्मदुघैव । किंतुसर्वकामदुघा । नैतत्स्तुतिमात्रं अनुभवसिद्धमपीत्याह । दोग्धिस्मेति । हेभारतविदुर) ७ ऊहुः वहंतिस्म । सर्वरसान् इक्षुद्राक्षादिरसान् । क्षीरंचदधिच । अन्नंच।पानकादिगोरसोघृतंतक्रंच । (तांश्चोहुः) भूरीणित्रिस्तृतानिवर्ष्माणिशरीराणियेषांतेफलादिप्रासूयंत । मधुच्युतः मधुस्राविणः संतः ८ चतुर्विधंभक्ष्यंभोज्यंचोष्यंलेह्यंच । ९ अधोक्षज ईशोनाथोयस्यतस्यपृथोः परमउदयोऽभिवृद्धिर्यस्मिन्तत्कर्मअसूयन्असहमानः प्रतिघातंविघ्नंचकारेत्यर्थः । १०वैन्येयजुष्पतिंविष्णुंयजमानेसतिस्पर्धमानइंद्रः तिरोहितः सन्अश्वं(यज्ञपशुमपोवाह) अपहृतवान् ११ त्वरमाणंधावंतं । (गृहीतकवचआमुक्तउच्यते) आमुक्तःप्रतिमुक्तश्चापिनद्धश्चापिनद्धवत् । सन्नद्धोवर्मितः सज्जइत्यमरसिंहः पाषंडआमुक्तमिवपाषंडवेषंकवचमिवगृहीतवंतमित्यर्थः । अधर्मेधर्मविभ्रमः । धर्मोयमितिभ्रांतिकरोयः तम् १२ १३ । (तादृशाकृतिंपाषंडवेषधरं । बाणं) नमुंचातिस्म । १४

॥७१॥

श्लोकाः १—१४

अथादीक्षतराजातुहयमेधशतेनसः ॥ ब्रह्मावर्त्तेमनोःक्षेत्रेयत्रप्राचीसरस्वती १ तदभिप्रेत्यभगवान्कर्मातिशयमात्मनः ॥ शतक्रतुर्नममृषेपृथोर्यज्ञमहोत्सवम् २ यत्रयज्ञपतिःसाक्षाद्भगवान्हरिरीश्वरः ॥ अन्वभूयतसर्वात्मासर्वलोकगुरुःप्रभुः ३ अन्वितोब्रह्मशर्वाभ्यांलोकपालैःसहानुगैः ॥ उपगीयमानोगंधर्वैर्मुनिभिश्चाप्सरोगणैः ४ सिद्धविद्याधरादैत्यादानवागुह्यकादयः ॥ सुनंदनंदप्रमुखाःपार्षदप्रवराहरेः ५ कपिलोनारदोदत्तोयोगेशाःसनकादयः ॥ तमन्वीयुर्भागवतायेचतत्सवनोत्सुकाः ६ यत्रधर्मदुघाभूमिःसर्वकामदुघासती ॥ दोग्धिस्माभीप्सितानर्थान्यजमानस्यभारत ७ ऊहुःसर्वरसान्नद्यःक्षीरदध्यन्नगोरसान् ॥ तरवोभूरिवर्ष्माणःप्रासूयंतमधुच्युतः ८ सिंधवोरत्ननिकरान्गिरयोन्नंचतुर्विधम् ॥ उपायनमुपाजह्रुःसर्वेलोकाःसपालकाः ९ इतिचाधोक्षजेशस्यपृथोस्तुपरमोदयम् ॥ असूयन्भगवानिंद्रःप्रतिघातमचीकरत् १० चरमेणाश्वमेधेनयजमानेयजुष्पतिम् ॥ वैन्येयज्ञपशुंस्पर्द्धन्नपोवाहतिरोहितः ११ तमत्रिर्भगवानैक्षत्त्वरमाणंविहायसा ॥ आमुक्तमिवपाखंडंयोधर्मेधर्मविभ्रमः १२ अत्रिणाचोदितोहंतुंपृथुपुत्रोमहारथः ॥ अन्वधावतसंक्रुद्धस्तिष्ठतिष्ठेतिचाब्रवीत् १३ तंतादृशाकृतिंवीक्ष्यमेनेधर्मंशरीरिणम् ॥ जटिलंभस्मनाच्छन्नंतस्मैबाणंनमुंचति १४

चूर्णिका

॥ मैत्रेयउवाच ॥ अथएकदापृथुः ब्रह्मावर्तेमनोःक्षेत्रे यत्र प्राची सरस्वती तत्रशताश्वमेधानां संकल्पंअकरोत् १ इंद्रः तत्कर्मनसेहे २ यत्रब्रह्मशर्वाभ्यांहरिःप्रत्यक्षंअदृश्यत ३ ४ यत्रच गंधर्वमुन्यप्सरसः विद्याधरदैत्यदानवगुह्यकाद्याःसुनंदनंदप्रमुखाः ५ कपिलःनारदः सनकादयश्च आययुः ६ यस्मिन्यज्ञेभूमिः पृथोः सर्वकामदुघाआसीत् ७ नद्यःसर्वरसान् ऊहुः तरवः फलानि ८ सिंधवःरत्नानि गिरयः अन्नं सर्वेलोकपालाः उपायनानि आजह्रुः ९ एवंपृथुप्रभावं असहमानःइंद्रःचरमेअश्वमधे पाखंडवेषःअश्वंजहार १० ११ तंअत्रिःऐक्षत् ततः अत्रिनोदितः पृथुपुत्रः तंअन्वधावत् १२ १३ तंपाखंडवेषादिगृहीतंदृष्ट्वाअयंधार्मिकइति बुद्ध्याबाणंनामुंचत १४

॥७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हंतवेहंतुं । यज्ञहनंयज्ञंहतवंतम् । १५ (विहायसाआकाशमार्गेणत्वरमाणंत्वरयागच्छंतंमहेंद्रं) गृध्रराड्जटायुः १६ तस्मैहित्वातदर्थमुत्सृज्य । (स्वराडिंद्रः । वीरोवैन्यसुतः) १७ विचक्ष्यदृष्ट्वा । १८ उपसृज्यसृष्ट्वातेनछन्नः सन् । चषालोयूपाग्रेनिक्षिप्तःकाष्ठकटकः तद्युक्तात् यूपात् हिरण्यनिर्मितारशनायस्यतं रशनाया दृढत्वेन छेदाशक्त्या रशनासहितमेवोद्धृत्ययूपाग्रान्नीतवानित्यर्थः विभुः ससर्थः १९ २० । २१ अवद्यंनिंदितंहरेरिंद्रस्यरूपंज्ञानदुर्बलामंदप्रज्ञाजगृहुः २२ अवद्यत्वमेवपाषंडनामनिरुक्त्यादर्शयति । यानीतिबहुवचनेनचान्यान्यपिगृहीतानीत्युक्तम् २३ तत्प्रभृतिपाषंडमार्गाः प्रवृत्ताइत्याह । एवमिति । तेनगृहीतेषुपुनर्विसृष्टेषुपाषंडेषु । २४ नग्नाजैनाःरक्तपटाबौद्धाः आदिशब्देनकापालिकादयः । तेषुउपधर्मेषुधर्मोपमेषुधर्मएवायमितिमति(-भ्रांतिःतयानृणां)मतिः सज्जतइतिद्वयोरन्वयः । पेशलेषुअविचारितरमणीयेष्वित्यर्थः वाग्मिषुहेतूक्तिचतुरेषु २५ २६ । शक्रवधेअभिसंधितंकृताभिप्रायम् । प्रचोदितात्पशोर्वधादन्यस्यवधस्तवनयुज्यते २७ तद्वधंतुवयंकरिष्यामइत्याहुः । वयमिहयज्ञनाशकंत्वत्कीर्त्यैवहतप्रभमिंद्रमाह्वयामहे । कैः । अयातयामैरगतवीर्यैराह्वानमंत्रैः । अनंतरंचतेतवाहितंजुहवाम होष्यामः २८ । (क्रतुपतिंयजमानंपृथुं) अस्यपृथोः । स्रुक्हस्तेयेषांतान् (यद्वाक्रतुपतिमिंद्रमामंत्र्यआहूयजुह्वतः प्रत्यषेधत) २९

श्लोकाः १५/२९

वधान्निवृत्तंतंभूयोहंतवेत्रिरचोदयत् ॥ जहियज्ञहनंतातमहेंद्रंविबुधाधमम् १५ एवंवैन्यसुतःप्रोक्तस्त्वरमाणंविहायसा ॥ अन्वद्रवदभिक्रुद्धोरावणं गृध्रराडिव १६ सोश्वंरूपंचतद्धित्वातस्माअंतर्हितःस्वराट् ॥ वीरःस्वपशुमादायपितुर्यज्ञमुपेयिवान् १७ तत्तस्यचाद्भुतंकर्मविचक्ष्यपरमर्षयः ॥ नामधेयं ददुस्तस्मैविजिताश्वइतिप्रभो १८ उपसृज्यतमस्तीव्रंजहाराश्वंपुनर्हरिः ॥ चषालयूपतश्छन्नोहिरण्यरशनंविभुः १९ अत्रिःसंदर्शयामासत्वरमाणंविहायसा ॥ कपालखट्वांगधरंवीरोनैनमबाधत २० अत्रिणाचोदितस्तस्मैसंदधेविशिखंरुषा ॥ सोश्वंरूपंचतद्धित्वातस्थावंतर्हितःस्वराट् २१ वीरश्चाश्वमुपादायपितृयज्ञमथाव्रजत् ॥ तदवद्यंहरेरूपंजगृहुर्ज्ञानदुर्बलाः २२ यानिरूपाणिजगृहेइंद्रोहयजिहीर्षया ॥ तानिपापस्यखंडानिलिंगंखंडमिहोच्यते २३ एवमिंद्रेहरत्यश्वंवैन्ययज्ञजिघांसया ॥ तद्गृहीतविसृष्टेषुपाखंडेषुमतिर्नृणाम् २४ धर्मइत्युपधर्मेषुनग्नरक्तपटादिषु ॥ प्रायेणसज्जतेभ्रांत्यापेशलेषुचवाग्मिषु २५ तदभिज्ञायभगवान्पृथुःपृथुपराक्रमः ॥ इंद्रायकुपितोबाणमादत्तोद्यतकार्मुकः २६ तमृत्विजःशक्रवधाभिसंधितंविचक्ष्यदुष्प्रेक्ष्यमसह्यरंहसम् ॥ निवारयामासुरहोमहामतेनयुज्यतेत्रान्यवधःप्रचोदितात् २७ वयंमरुत्वंतमिहार्थनाशनंह्वयामहेत्वच्छ्रवसाहतत्विषम् ॥ आयातयामोपहवैरनंतरंप्रसह्यराजन्जुहवामतेऽहितम् २८ इत्यामंत्र्यक्रतुपतिंविदुरास्यर्त्विजोरुषा ॥ स्रुग्घस्तान्जुह्वतोभ्येत्यस्वयंभूःप्रत्यषेधत २९

चूर्णिका

अत्रिःवधात् निवृत्तंतंदृष्ट्वा हेतात इमं इंद्रंयज्ञहनंजहिइति आह १५ ताः पृथुपुत्रः इंद्रं प्रतिगतः १६ तदाइंद्रः अश्वंतद्रूपंचहित्वाअंतर्हितः सवीरः अश्वं आनीय यज्ञं ययौ १७ तदाऋषयः विजिताश्वइति तस्यनामददुः १८ एवंबहुवारंकृतवान् १३ २० २१ २२ २३ पाखंडमार्गेषु नृणांबुद्धिः अभवत् २४ २५ तदाकुपितःपृथुः इंद्रंहंतुं बाणंआददे २६ तदाऋत्विजः तंनिवारयामासुः अस्मिन्यज्ञे हेपृथोपशुंविनाअन्यवधःयोग्योन २७ वयं मंत्रैः तवाहितं इंद्रं होष्यामः २८ इत्युक्त्वा ऋत्विजःस्रुक्हस्तान्जुह्वतः प्रतिब्रह्मा एत्य न्यषेधत् २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामिंद्रंयज्ञेनयजनेनाजिघांसथ । यज्ञेनेष्टाःसर्वेसुराः यस्यतनवः सइंद्रोभवतांवधार्होनभवति। यद्यस्मात्अस्मिन्मन्वंतरेयज्ञोनामायमिंद्रोभगवतस्तनुरवतारः। "ततः सप्तमआकूत्यांरुचेर्यज्ञोभ्यजायत। स यामाद्यैः सुरगणैरपात्स्वायंभुवांतर"मित्युक्तत्वात् ३० अतोबलीयसातेनसख्यमेवकर्तव्यंअन्यथाभूयः पाषंडंस्रक्ष्यतीत्याशयेनाह। तदिदमिंद्रेणानुष्ठितंमहदन्याय्यंपश्यत। किमित्यपेक्षायामाह। धर्मस्यव्यतिकरंविपर्ययंपाषंडपथम्। ३१ तर्हिकिमत्रयुक्तमित्यतआह। पृथुकीर्तेरिति। एकेनोनंशतंयस्मिन्ताहशः क्रतुः क्रतुप्रयोगः पृथोर्भूयात्। पृथुरितिपाठेएकोनशतंक्रतवोयस्यताहशोपिमहेंद्रात्पृथुकीर्तिर्भूयादित्यर्थः। तदेवमृत्विजः प्रत्युक्ता पृथुंप्रत्येवाह। अलमिति ३२आत्मनैवात्मने महेंद्राय रोषंकर्तुं नार्हसि। तत्र हेतुः। उभावपीति। ३३ तथापिक्रतुसमाप्तिमेवध्यायंतं प्रत्याह। अस्मिन् यज्ञविघ्ने चिंतां मास्मकृथाः। यद्यस्मात् दैवहतं कार्यं कर्तुं ध्यायतोमनः नुनिश्चितम् (अतिरुष्टं चिंतयाक्लिष्टम्) सत् अंधंतमोमोहं विशति नतुशांतिंलभते ३४ अतएवतवक्रतुर्विरमतु। नान्विंद्रःकिंन निवार्यते। अतआह। यतो देवेषुदुराग्रहो भवतीति। किंच। यत्रक्रतौ ३५ इंद्रदुराग्रहकृतमनर्थं पश्येत्याह। एभिरिंद्रेणोपसृष्टैरधिष्ठितैः हारिभिश्चित्ताकर्षकैः (ह्रियमाणंआकृष्यमाणम्) यइंद्रः तेअश्वं मुष्णातीतितथा। यज्ञायद्रुह्यतीतितथा तेनसृष्टैः ३६ ततो ममकिमिति चेत्तत्राह। भवानितिद्वाभ्यां। सांख्ययोगादिनानासिद्धांतानुरूपं धर्मं वेनस्यान्यायात्लुप्तंपरित्रातुं तद्देहात् विष्णोः कलैवत्वमवतीर्णोसि ३७हेप्रजापते अस्य विश्वस्य भवमुद्भवं विचार्य यैरुत्पादितोसि तेषां विश्वसृजां संकल्पं पिपीपृहि आर्षःप्रयोगः। पूरयेत्यर्थः। प्रचंडोर्यः पाषंडमार्गः सैवेंद्री माया उपधर्मजननी तांजहिविनाशय ३८ तथाचकृत्वा यज्ञाग्रहं हित्वावात्सल्यं स्नेहंच कृत्वा इंद्रेणसहसंधानंच कृतवान् ३९ कृतमवभृथसंबंधिस्नानंयेनतस्मै (तस्यबर्हिषियज्ञे) ४० (हेक्षत्तः) ४१

नवध्योभवतामिंद्रोयद्यज्ञोभगवत्तनुः ॥ यंजिघांसथयज्ञेनयस्येष्टास्तनवःसुराः ३० तदिदंपश्यतमहद्धर्मव्यतिकरंद्विजाः ॥ इंद्रेणानुष्ठितंराज्ञःकर्मैतद्विजिघांसता ३१ पृथुकीर्तेःपृथोर्भूयात्तर्ह्येकोनशतक्रतुः ॥ अलंतेक्रतुभिःस्विष्टैर्यद्भवान्मोक्षधर्मवित् ३२ नैवात्मनेमहेंद्रायरोषमाहर्तुमर्हसि ॥ उभावपिहिभद्रंतउत्तमश्लोकविग्रहौ ३३ मास्मिन्महाराजकृथाःस्मचिंतांनिशामयास्मद्वचआदृतात्मा ॥ यद्ध्यायतोदैवहतंनुकर्तुंमनोतिरुष्टंविशतेतमोधम् ३४ क्रतुर्विरमतामेषदेवेषुदुरवग्रहः ॥ धर्मव्यतिकरोयत्रपाखंडैरिंद्रनिर्मितैः ३५ एभिरिंद्रोपसंसृष्टैःपाखंडैर्हारिभिर्जनम् ॥ ह्रियमाणंविचक्ष्वैनंयस्तेयज्ञध्रुगश्वमुट् ३६ भवान्परित्रातुमिहावतीर्णोधर्मंजनानांसमयानुरूपम् ॥ वेनापचारादवलुप्तमद्यतद्देहतोविष्णुकलासिवैन्य ३७ सत्वंविमृश्यास्यभवंप्रजापतेसंकल्पनंविश्वसृजांपिपीपृहि ॥ ऐंद्रींचमायामुपधर्ममातरंप्रचंडपाखंडपथंप्रभोजहि ३८ ॥ ॥ मैत्रेयउवाच ॥ ॥ इत्थंसलोकगुरुणासमादिष्टोविशांपतिः ॥ तथाचकृत्वावात्सल्यंमघोनापिचसंदधे ३९ कृतावभृथस्नानायपृथवेभूरिकर्मणे ॥ वरान्ददुस्तेवरदायेतद्बर्हिषितर्पिताः ४० विप्राःसत्याशिषस्तुष्टाःश्रद्धयालब्धदक्षिणाः ॥ आशिषोयुयुजुःक्षत्तरादिराजायसत्कृताः ४१

चूर्णिका

हेऋत्विजः भगवत्तनुः इंद्रः वधार्होन ३० ३१ पृथोः एकोनशतक्रतवः भवंतु पृथुं प्रत्याह हनृप क्रतुभिः अलम् भवान् मोक्षधर्मवित् अस्ति ३२ ३३ ३४ एषः क्रतुः विरमताम् ३५ इंद्रनिर्मितैः पाखंडैः जनाः अधर्मेयांति ३६ त्वंतु धर्मंपातुं विष्णुकलया अवतीर्णोसि ३७ अतः हेप्रभोपाखंडमार्गंजहि ३८॥ ॥ मैत्रेयउवाच ॥ ततः ब्रह्मवाक्यं श्रुत्वायज्ञाग्रहंहित्वा इंद्रेणस्नेहं कर्तुं ऐच्छत् ३९ ततः अवभृथस्नानं चकार देवाः तस्मै वरान्ददुः ४० लब्धदक्षिणाः ब्राह्मणाः आशिषोददुः ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. तुष्टानांवाक्यंत्वयेति४२॥इतिचतुर्थस्कंधेटीकायां एकोनविंशोध्यायः॥१९ ॥ विंशेतुविष्णुना साक्षात्पृथोर्यज्ञानुशासनम् । वरदानप्रसंगेनप्रीतिश्चान्योन्यमीर्यते ॥ १ ॥ मघवतासाकं इंद्रेणसह वर्तमानः १ अ०
आत्मानंत्वांक्षमांकारयतोमुष्य (इंद्रस्य) त्वमपिक्षंतुमर्हसि) २ (हेनरदेव) यार्हि यस्मात् कलेवरमात्मानभवति । अतस्तदभिमानेनभूतानिनाभिद्रुह्यंति ३ ४ अविद्या स्वरूपाज्ञानं ततः
टीका कामः ततः कर्म तैरारब्ध इति विद्वान् अतएवप्रतिबुद्धआत्मज्ञः अस्मिन्नैवानुषज्जते ५ तथापि पुत्रादिममत्वेन भूतद्रोहेणचसंगो भवेत् तत्राह असंसक्तइति ६ प्रतिबोधक्रमंविवृण्वन्देहेनुपंगाभा ॥२०॥
वमाह । एकइतिद्वाभ्याम् । असावात्माआत्मनो देहात्परो भिन्नः । तत्र नवधा वैलक्षण्येनभेदं साधयति । एक इति नवभिः पदैः । देहोहिबाल्युवादिभेदादनेकः । मलिनश्च । जडश्चसगुणश्चस्वकारणा
भूतगुणाश्रितश्च । परिच्छिन्नश्चगृहादिभिरावृतश्चदृश्यश्चसात्माचआत्मातुनैवंअतोभिन्नः ७ आत्मस्थं स्वस्मिन्स्थितं (एवं पूर्वोक्तविशेषणैर्देहाद्भिन्नंसंतंयआत्मानंवेदसः) प्रकृतिस्थोदेहस्थोपितद्गुणैस्तद्धिका
॥७४॥ रैर्नलिप्यते यतो मयिब्रह्मणिस्थितः । ८ इयमवस्थाकस्योत्पद्यतइत्यपेक्षायामाह । यःस्वधर्मेणेतिचतुर्भिः । निराशीर्निष्कामः ९ भवतुमनःप्रसन्नंततःकिंतत्राह यर्हियदाविशदाशयः प्रसन्नमनाः
(तदा) परित्यक्तगुणः सन् सम्यग्दर्शनोभूत्वाशांतिमश्नुते । शांतिमेवाह । ममसम्यगौदासीन्येनावस्थानमेवब्रह्मतदेवकैवल्यमश्नुते १०

त्वयाहूतामहाबाहोसर्वएवसमागताः ॥ पूजितादानमानाभ्यांपितृदेवर्षिमानवाः ४२ इ०भा०म०च०पृथुविजयेएकोनविंशोध्यायः १९ ॥ ॥मैत्रेयउवाच॥ श्लोकाः
॥ भगवानपिवैकुंठःसाकंमघवताविभुः ॥ यज्ञैर्यज्ञपतिस्तुष्टोयज्ञभुक्तमभाषत १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एषतेकारषीद्भंगंहयमेधशतस्यह ॥
क्षमापयतआत्मानममुष्यक्षंतुमर्हसि २ सुधियःसाधवोलोकेनरदेवनरोत्तमाः ॥ नाभिद्रुह्यंतिभूतेभ्योयर्हिनात्माकलेवरम् ३ पुरुषायदिमुह्यंतित्वादृशादे ४२/१०
वमायया ॥ श्रमएवपरंजातोदीर्घयावृद्धसेवया ४ अतःकायमिमंविद्वानविद्याकामकर्मभिः ॥ आरब्धइतिनैवास्मिन्प्रतिबुद्धोनुषज्जते ५ असंसक्तःशरीरे
स्मिन्नमुनोत्पादितेगृहे ॥ अपत्येद्रविणेवापिकःकुर्यान्ममतांबुधः ६ एकःशुद्धःस्वयंज्योतिर्निर्गुणोसौगुणाश्रयः ॥ सर्वगोनावृतःसाक्षीनिरात्मात्मात्मनः
परः ७ यएवंसंतमात्मानमात्मस्थंवेदपूरुषः ॥ नाज्यतेप्रकृतिस्थोपितद्गुणैःसमयिस्थितः ८ यःस्वधर्मेणमांनित्यंनिराशीःश्रद्धयान्वितः ॥ भजतेशनकै
स्तस्यमनोराजन्प्रसीदति ९ परित्यक्तगुणःसम्यग्दर्शनोविशदाशयः ॥ शांतिमेसमवस्थानंब्रह्मकैवल्यमश्नुते १०

चूर्णिका हेमहाबाहो वयं त्वया आहूताः सर्वे समागताः दानमानाभ्यां पूजिताः सर्वेसंतुष्टाः स्म ४२ ॥ ॥ इतिचतुर्थे एकोनविंशः१९ ॥॥ मैत्रेयउवाच॥ ॥ भगवान् वैकुंठः
मघवतासहतुष्टः सन् पृथुंअभाषत १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ हेराजन् एषः तेयज्ञभंगं अकरोत् तत् क्षंतुं अर्हसि २ लोके साधवः अनात्मनः देहस्य अभि
मानेनभूतेभ्यः नद्रुह्यंति ३ त्वादृशाः देवमाययायदिमुह्यंति तर्हिज्ञानवृद्धानांसेवया श्रमएव जातः ४ अतः मायोत्पन्ने शरीरेगृहे अपत्ये द्रविणे वाबुधः कः ममतां ॥७४॥
कुर्यात् ५ ६ आत्मातुएकःशुद्धः तंस्वस्मिन् स्थितं पुरुषं यः वेद सः प्रकृतिस्थोपितद्गुणैः नलिप्यते ७ ८ यः निष्कामंस्वधर्मेणनित्यमांभक्त्याभजते तस्यमनः शांतिए
ति सः कैवल्यमश्नुते ९ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सम्यक्दर्शनमेवाह । उदासीनमेवआत्मानंद्रव्यज्ञानक्रियात्मनां देहज्ञानकर्मेंद्रियमनसां अध्यक्षमिवस्थितमात्मानं योवेद (कूटस्थंनिर्विकारम्) ११ संसारिणःकथंकूटस्थत्वमत आह । भिन्नस्यलिंगस्यदेहस्यगुणप्रवाहः संसारः । (नत्वात्मनः) भिन्नत्वेहेतुः । द्रव्याद्यात्मकस्य । तत्रचेतनाचिदाभासः अतः दृष्टासुप्राप्तासुसंपदादिषुहर्षशोकादिभिर्नविक्रियंते (मयिबद्धंसौहृदंप्रेममयैस्ते) १२ त्वंचसूरिः अतः (हेवीर) सुखेदुःखेचसमःसन् समानाउत्तममध्यमाधमायस्य (स रागद्वेषरहितइत्यर्थः ।) जितानींद्रियाण्याशयश्चयेनसः त्वंअखिललोकरक्षणंविधत्स्व । कथमेकेनमयातत्कर्तुं शक्यंतत्राह । मयेश्वरेणउपक्लृप्ताःसंपादितायेऽखिलालोकाअमात्यादयस्तैः संयुतः १३ ननुरक्षणंदंडादिसापेक्षंअतस्तपोऽन्यद्वापुण्यंकरिष्यामीतिचेदतआह श्रेयइति । यद्यस्मात्सांपरायेपरलोकेप्रजाभिः कृतात्सुकृतात्षष्ठमंशंहर्ताहरति । अरक्षणेदोषमाह । अन्यथाप्रजाभिर्हृतंपुण्यंयस्यसप्रजानामघमत्तिपापंभुंक्ते । अन्यथेत्यस्यविवरणं (करंहरतीति) करहारः सन् नरक्षिताचेत् ।१४ एवंचमोक्षोप्यनायासेनभविष्यतीत्याह द्विजाग्र्याणामनुमतश्चासावनुवृत्तश्चपरंपराप्राप्तोयोधर्मः सएवप्रधानंअर्थकामौतुप्रासंगिकौयस्य । अन्यतमः अतिशयेनअन्यःधर्मादिष्वनासक्तइत्यर्थः ऐकपद्यपाठेधर्मप्रधानौअन्यतमौअर्थकामौयस्येत्यर्थः अस्याः पृथिव्याअवितासन्अल्पेनकालेनगृहागतान्सनकादीन्द्रक्ष्यासि । अनुरक्तोलोकोयस्मिन्सः १५ (हेनरेंद्र) मत्मत्तः सकाशात्कंचिद्वरंवृणीष्व । (अहं)गुणाःशमादयः शीलंनिर्मत्सरत्वादिस्वभावः तैर्यंत्रितोवशीकृतः तद्रहितैस्तुमखादिभिर्नाहंसुलभः । (यतः) समं (रागद्वेषरहितं) चित्तंयेषांतेष्वेववर्तितुंशीलंयस्यसोऽहम् । १६ (विश्वजित्विश्वस्यजेतापृथुः अनुशासितः आदिष्टः) १७ क्षमापयितुंपादयोःस्पृशंतंस्वेनकर्मणाअश्वापहरणेनव्रीडितंशक्रंप्रेम्णापरिष्वज्य १८ (अथ) भगवान् प्रस्थानाभिमुखोपिअनुग्रहेण विलंबितः सन् न प्रतस्थे प्रयाणं न कृतवानितिद्वयोरन्वयः । कथंभूतः । उपहृतं अर्पितमर्हणं यस्मै । समुज्जिहानयासमुद्गच्छंत्यावर्धमानयाभक्त्यागृहीते चरणांबुजेयस्य १९ पद्मपलाशवदक्षिणीयस्य । तथाभूतः सन् एनंपृथुंपश्यन् २० भगवतस्तत्कृपातिरेकमुक्त्वातस्यभक्त्युद्रेकमाह । सइतिद्वाभ्याम् । बाष्पविक्लववत्वेन तूष्णीमवस्थितः सन् अमुंहरिं हृदोपगुह्याधात् धृतवान् २१

॥७५॥

श्लोकाः ११/२१

उदासीनमिवाध्यक्षंद्रव्यज्ञानक्रियात्मनाम् ॥ कूटस्थमिममात्मानंयोवेदाप्नोतिशोभनम् ११ भिन्नस्यलिंगस्यगुणप्रवाहोद्रव्यक्रियाकारकचेतनात्मनः ॥ दृष्टासु संपत्सुविपत्सुसूरयोनविक्रियंतेमयिबद्धसौहृदाः १२ समःसमानोत्तममध्यमाधमःसुखेचदुःखेचजितेंद्रियाशयः ॥ मयोपक्लृप्ताखिललोकसंयुतोविधत्स्व वीराखिललोकरक्षणम् १३ श्रेयःप्रजापालनमेवराज्ञोयत्सांपरायेसुकृतात्षष्ठमंशम् ॥ हर्तान्यथाहृतपुण्यःप्रजानामरक्षिताकरहारोघमत्ति १४ एवंद्विजाग्र्या नुमतानुवृत्तधर्मप्रधानोन्यतमोवितास्याः ॥ ह्रस्वेनकालेनगृहोपयातान्द्रष्टासिसिद्धाननुरक्तलोकः १५ वरंचमत्कंचनमानवेंद्रवृणीष्वतेहंगुणशीलयंत्रितः ॥ नाहंमखैर्वैसुलभस्तपोभिर्योगेनवायत्समचित्तवर्ती १६ ॥ ॥ मैत्रेयउवाच ॥ ॥ सइत्थंलोकगुरुणाविष्वक्सेनेनविश्वजित् ॥ अनुशासितआदेशंशिरसाजगृहेहरेः १७ स्पृशंतंपादयोःप्रेम्णाव्रीडितंस्वेनकर्मणा ॥ शतक्रतुंपरिष्वज्यविद्वेषंविससर्जह १८ भगवानथविश्वात्मापृथुनोपहृतार्हणः ॥ समुज्जिहानयाभक्त्यागृहीतचरणांबुजः १९ प्रस्थानाभिमुखोप्येनमनुग्रहविलंबितः ॥ पश्यन्पद्मपलाशाक्षोनप्रतस्थेसुहृत्सताम् २० सआदिराजोरचितांजलिर्हरिंविलोकितुंनाशकदश्रुलोचनः ॥ नकिंचनोवाचसबाष्पविक्लवोहृदोपगुह्यामुमधादवस्थितः २१

॥७५॥

चूर्णिका

११ अतः मयिमनो निधायप्रजापालनंकुरु १२ १३ अहं संयतचित्तस्ययथासुलभः तथायज्ञादिभिर्न अतः परं वरं वृणु १४ १५ १६ ॥ ॥ मैत्रेयउवाच॥ ॥ सःलोकगुरोः आज्ञां शिरसाजगृहे १७ इंद्रंपादयोः स्पृशंतं परिष्वज्य द्वेषं विससर्ज १८ सः भगवता वरार्थं नोदितः १९ २० हरिंहृदिउपगुह्य अश्रुलोचनः हरिंद्रष्टुं नाशकत् २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतृप्तयोर्दृशोर्गोचरंविषयभूतं पदा क्षितिंस्पृशंतमिति अयंभावः नखलु देवाः पदा भुवं स्पृशंति । अतः कृपापरवशोनूनं हरिरात्मानं विस्मृतवानिवेति । अतएव स्खलनपरिहारायेव (उरंगविद्विषो) गरुडस्यउन्नते स्कंधे विन्यस्तं हस्ताग्रं येन (तथा भूतं पूरुषंहरिमाह) २२ वरंवृर्णीष्वेति यदुक्तंतदसहमान आह । हेविभोवरदानांब्रह्मादीनामीश्वरात्त्वत्तःसकाशात्बुधः सन् कथं वरान् (विषयलक्षणान्) वृणीते । कीदृशान् गुणैर्विक्रियते इति गुणविक्रियोहंकारः सएवात्मायेषां तेषां ब्रह्मादीनांसंबंधिनो-(-पीत्यर्थः) । देहाभिमानिनां भोग्यानितिवा । तथाचेत्स बुधएवन भवतीत्यर्थः । जुगुप्सितत्वादपीत्याहयेइति । (नरकस्थानामपियेसंति तान्) बुधएवाहमपिन वृणे इति समुच्चयायचकारः २३ कैवल्यपतेइतिसंबोधनात्कैवल्यंवरिष्यतीतिमाशंकीरित्याह । नेति महत्तमानामंतर्हृदयात् मुखद्वारेण निर्गतो भगवत्पदांभोजमकरंदोयशःश्रवणादिसुखंयत्रनास्ति तादृशंचेत्कैवल्यं तर्हितदपि कदाचिदपिनकामये । तर्हिकिंकामयसेतदाह । यशःश्रवणायकर्णानाम युतंविधत्स्व । ननुकोप्येवं नवृतवान् (इत्यत्र) किमन्यच्चिंतयेत्याह एषमेवरः २४ ननुतर्हि कैवल्याभावेरागद्वेषाद्याकुलानां भक्तिसुखमपि नस्यादित्याशंक्याह सइति (हेउत्तमश्लोक) भवत्पदांभोजसुधायाः कणोलेशः तत्संबंधीयोनिलः सएव । दूरादपिकिंचिद्यशःश्रवणमात्रमित्यर्थः । विस्मृतंतत्त्ववर्त्मयैः कुयोगिभिस्तेषामपि पुनः स्मृतिं आत्मज्ञानंवितरति । अतोनखलुभक्तानांरागद्वेषादिसंभवः । अतोनोऽस्माकंसारग्राहिणामन्यैर्वरैरलम् । भक्तावेवमोक्षादिसर्वसुखांतर्भावादितिभावः २५ ननुभक्तिर्मुक्तिफलैव अतः फलंविहाय साधनेभवतः कोयमाग्रहइत्याशंक्याह । हेसुश्रवःमंगलकीर्ते शिवंयशः सतांसंगमे यः सकृदपि यदृच्छयापिउपशृणोतिगुणज्ञश्चेत्सः पशुंविनाअन्यः कथंविरमेत् । गुणातिशयं सूचयति । श्रीर्यत्यशएव प्रकर्षेणवृतवती। गुणानांसर्वपुरुषार्थानां संग्रहः स्वस्मिन्समहारः तदिच्छया २६ अतोलक्ष्मीरिवान्यवरत्यागेनत्वामेवाहंभजे इत्याह । अथेति । लालसउत्सुकः सन्कर्मणि क्रियमाणेयथेंद्रेणसहकलिः एवं भक्तावपि किंलक्ष्म्यासहकलिः स्यादितिवितर्कयति । एकस्मिन्पत्यौस्पर्धमानयोरावयोरपि किंकलिर्नस्यादितिकाक्वावितर्कः । ननुपर्यायेणसेवायांनस्यात् । मैवं । कुतः त्वच्चरणयोरेवैकः तानोमनोविस्तारोयाभ्यांतयोः २७ भवतुवाकलिः तथापिभजेयैवेत्याह । जगज्जनन्यांवैशसंविरोधः स्यादेव । तत्रहेतुः । यस्याः कर्मणिचरणसेवालक्षणे नः समीहितंइच्छाभवति । तथापींद्रविरोधेमत्पक्षपातवदत्रापिमयितवपक्षपातएवस्यादित्याह । फल्गुतुच्छमपि (मादृशस्यसमीहितं) उरुबहुकरोषि । यतोदीनेषुवत्सलः (युक्तमेतदित्याह ।) स्वेस्वरूपएवरतस्यतवतयालक्ष्म्याकिंप्रयोजनंतामपिनाद्रियसेइत्यर्थः २८

श्लोकाः २२/२८

अथावमृज्याश्रुकलाविलोकयन्नतृप्तदृग्गोचरमाहपूरुषम् ॥ पदास्पृशंतंक्षितिमंसउन्नतेविन्यस्तहस्ताग्रमुरंगविद्विषः २२ ॥ ॥ पृथुरुवाच॥ ॥वरान्विभोत्वद्वरदेश्वराद्बुधःकथंवृणीतेगुणविक्रियात्मनाम् ॥ येनारकाणामपिसंतिदेहिनांतानीशकैवल्यपतेवृणेनच २३ नकामयेनाथतदप्यहंक्वचिन्नयत्रयुष्मच्चरणांबुजासवः ॥ महत्तमांतर्हृदयान्मुखच्युतोविधत्स्वकर्णायुतमेषमेवरः २४ सउत्तमश्लोकमहन्मुखच्युतोभवत्पदांभोजसुधाकणानिलः ॥ स्मृतिंपुनर्विस्मृततत्त्ववर्त्मनांकुयोगिनांनोवितरत्यलंवरैः २५ यशःशिवंसुश्रवआर्यसंगमेयदृच्छयाचोपशृणोतितेसकृत् ॥ कथंगुणज्ञोविरमेद्विनापशुंश्रीर्यत्प्रवव्रेगुणसंग्रहेच्छया २६ अथाभजेत्वाखिलपूरुषोत्तमंगुणालयंपद्मकरेवलालसः ॥ अप्यावयोरेकपतिस्पृधोःकलिर्नस्यात्कृतत्वच्चरणैकतानयोः २७ जगज्जनन्यांजगदीशवैशसंस्यादेवयत्कर्मणिनःसमीहितम् ॥ करोतिफल्ग्वप्युरुदीनवत्सलःस्वएवधिष्ण्येऽभिरतस्यकिंतया २८

चूर्णिका अथाश्रुकलाः विमृज्यहरिं विलोकयन् पृथुः भगवंतं आह २२ हेविभोवरदेश्वरात् त्वत्तः बुधः सन् बंधकान् वरान् कथं वृणीते २३ हेकैवल्यपते यत्र तेयशःश्रवणादिसुखंनास्ति तादृशं कैवल्यमपि नकामये तर्हितेयशःश्रवणार्थंकर्णायुतं देहि एषएवमेवरोस्तु २४ २५ २६ अहं पद्मकरा लक्ष्मीरिव तेचरणांबुजं भजे तत्रलक्ष्म्याः ममचकलिः माभूत् २७ हेजगदीश भक्तैः अर्पितं अल्पमपि त्वं उरुकरोषि २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२१॥

यतस्त्वंदीनवत्सलोऽतएवसाधवो निष्कामाः अथ ज्ञानानंतरमपि त्वां भजंति । कथंभूतम् । मायागुणानांविभ्रमोविलासः तस्योदयःकार्यंसनिरस्तोयास्मिंस्तम् । तेमांकिमर्थंभजंति तत्राह । भवत्पदानुस्मरणाद्विनाअन्यत्तेषांनिमित्तंफलंनविद्मः । २९ वरैः प्रलोभनंचकृपालोस्तवानुचितमित्याशयेनाह । मन्यइति । नुअहोतेवाचातंत्यायादिजनोयंअसितः अबद्धः स्यात् तर्हि पुनःपुनः फलैर्मोहितः सन् कथं कर्मकरोति । (तस्माद्बद्धएवेत्यर्थः) ३० त्वन्माययाखंडितस्य त्वया पुनः खंडनंनकर्तव्यं किंतुहितमेवचेष्टितव्यमित्याह । त्वन्माययाकृता-(-त्सत्या)-दात्मनस्त्वत्तः खंडितः पृथक्कृतः यत्यतोऽन्यत्पुत्रादिकंआशास्तेअतः स्वयमविज्ञापितएवनः समीहितुं हितंचेष्टितुमर्हसि ३१।(तंपृथुम्।ययाभक्त्या) ३२ (आदिष्टंयत्प्रजापालनादि तत्कुरु।) ३३(अर्थवत्प्रशस्तोर्थोस्तियस्य । एनंपृथुमनुगृहीत्वा सदयमवलोक्येत्यर्थः ।) ३४ ३५ (यज्ञेश्वरधियासर्वेषुयज्ञेश्वरोवर्ततेसर्मीयतामितिबुद्ध्येत्यर्थः)वाग्वित्तांजलिभिः भक्तितश्चपूजिताः संतो (देवर्ष्यादयो) वैकुंठानुगता (विष्णु)-पार्षदाश्च (ततः स्वंस्वं धामययुः) ३६ अमुष्यराज्ञःहरन्निवेतिलोकोक्तिः वस्तुतस्तस्यमनः सर्वदैवतदधानमस्त्येव स्वधामराज्ञोहृदयम् ३७ अदृष्टायलोचनपथमतिक्रांताय । संदर्शितः अनुभावितःआत्मायेन । तस्मै । वासुदेवायशुद्धेचेतसिप्रतीयमानाय ३८ इतिचतुर्थस्कंधे टीकायां विंशोध्यायः ॥ २० ॥ ॥एकविंशेतुपृथुनाप्रजानामनुशासनम् । महासत्रेसुरादीनां महासदसिवर्ण्यते ॥ १ ॥ स्वपुरंययावित्युक्तं तत्पुरं वर्णयतिमौक्तिकैरिति त्रिभिः १

॥७७॥

श्लोकाः २९/१

भजंत्यथत्वामतएवसाधवोव्युदस्तमायागुणविभ्रमोदयम् ॥ भवत्पदानुस्मरणादृतेसतांनिमित्तमन्यद्भगवन्नविद्महे २९ मन्येगिरंतेजगतांविमोहिनींवरंवृणीष्वेतिभजंतमात्थयत् ॥ वाचानुतंत्यायदितेजनोसितःकथंपुनःकर्मकरोतिमोहितः ३० त्वन्माययाद्धाजनईशखंडितोयदन्यदाशास्तऋतात्मनोबुधः ॥ यथाचरेद्बालहितंपितास्वयंतथात्वमेवार्हसिनःसमीहितुम् ३१ मैत्रेयउवाच ॥ इत्यादिराजेननुतःसविश्वदृक्तमाहराजन्मयिभक्तिरस्तुते ॥ दिष्ट्येदृशीधीर्मयितेकृतायययामायांमदीयांतरतिस्मदुस्त्यजाम् ३२ तत्त्वंकुरुमयादिष्टमप्रमत्तःप्रजापते ॥ मदादेशकरोलोकःसर्वत्राप्नोतिशोभनम् ॥ ३३ ॥ ॥ मैत्रेयउवाच इतिवैन्यस्यराजर्षेःप्रतिनंद्यार्थवद्वचः ॥ पूजितोनुगृहीत्वैनंगंतुंचक्रेच्युतोमतिम् ३४ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः ॥ किन्नराप्सरसोमर्त्याःखगाभूतान्यनेकशः ३५ यज्ञेश्वरधियाराज्ञावाग्वित्तांजलिभक्तितः ॥ सभाजितााययुःसर्वेवैकुंठानुगतास्ततः ३६ भगवानपिराजर्षेःसोपाध्यायस्यचाच्युतः ॥ हरन्निवमनोमुष्यस्वधामप्रत्यपद्यत ३७ अदृष्टायनमस्कृत्यनृपःसंदर्शितात्मने ॥ अव्यक्तायचदेवानांदेवायस्वपुरंययौ ३८ इतिश्रीभा०म०च०स्कंधेविंशोध्यायः ॥ २० ॥ ॥ ॥ मैत्रेयउवाच ॥ ॥ मौक्तिकैःकुसुमस्रग्भिर्दुकूलैःस्वर्णतोरणैः ॥ महासुरभिभिर्धूपैर्मंडितंतत्रतत्रवै १

चूर्णिका

हेदीनवत्सल यथापिता बालहितं स्वयं चरेत् तथा नः ईहितं कर्तुं त्वमेवार्हसि २९ ३० ३१ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिआदिराजेनस्तुतः भगवान् आह हेनृप मयि तेभक्तिः अस्तु ३२ मया आदिष्टंत्वंकुरु मदाज्ञाकरः लोकः सर्वत्र शोभनंआप्नोति ३३ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिराज्ञा सभाजिताः सर्वेस्वस्थानंययुः ३४ ३५ भगवानपि इंद्रेणसाकं स्वधामप्रत्यगात् ३७ पृथुः देवदेवाय नमस्कृत्य स्वपुरंययौ ३८ इतिचतुर्थेविंशः ॥ २० ॥ ॥ मैत्रेयउवाच ॥ ॥ अथमौक्तिकैः दुकूलैः तत्रतत्र मंडितं पुष्पाक्षतफलैः लाजैः दीपैः अर्चितं पुष्पफलयुक्तैः कदलीस्तंभैः पूगवृक्षैश्चशोभितम् पुरं गत्वा १

॥७७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चंदनागुरुयुक्तैस्तोयैरार्द्रा रथ्यादयस्तद्युक्तम् । तोक्मैर्हरितयवैः । अंकुरैरितिवा । आर्चिभिर्दीपैः २ सवृंतैः फलपुष्पसहितैरित्यर्थः । पूगपोतैः ह्रस्वैः पूगैरित्यर्थः । तथाविधैः सर्वतः समलंकृतंशोभितम् ३ (दीपैर्बलिभिश्चसह) संभृतानिसंपादितानिअशेषाणिमंगलानिदध्यादीनितैश्चसहअभिजग्मुः । (मृष्टैः कुंडलैर्मंडिताः) मृष्टाउज्वलाः कन्याश्च ४ गतस्मयोनिरहंकारः । ५ (पौरैर्जानपदैश्चतत्रतत्रपूजितस्तान्तान्पौरादीन्पूजयामास) प्रियान्वरान्प्रददातीतितथा । ६ (अनवद्यंनिर्दोषंचेष्टितंयस्यसः) गुणैर्महान्अतएवमहत्तमः पूज्यतमः (स्फीतंपुष्टंयशोत्रनिधायपरंपदंवैकुंठम्) ७ सगुणैर्विजृंभितं ऊर्जितम् । गुणवद्भिः सभाजितंसत्कृतम् (तत्पृथोः) यशोगृणंतंमैत्रेयंअर्चयन्प्राह हेसदसस्पतेशौनक । ८ लब्धानिअशेषाणांसुराणामर्हणानियेनसः (बाह्वोः वैष्णवंतेजः पराक्रमंगांपृथ्वीं । स) किमकरोदितिशेषः ९ श्रवणौत्सुक्यमाविष्कुर्वन्प्रार्थयते । कोन्विति । यस्यविक्रमः पृथ्वीदोहनंतस्योच्छिष्टतुल्यंकामंविषयंतत्तस्यकर्मवद १० (अंतरामध्येयत्क्षेत्रंतदावसन्) प्राचीनकर्मभिःप्रारब्धानेवभोगान्नुभुजे नतुभोगांतरार्थंकर्माणिकरोति । तदपिभोगेन (पुण्यजिहासया) पुण्यक्षपणेच्छया । नतुसुखासक्त्याइत्यर्थः । ११ अस्खलितः अप्रतिहतआदेशआज्ञायस्य । सप्तसु द्वीपेष्वेकएव दंडं धारयतीतितथा । किंसर्वत्र नेत्याह । (अन्यत्रेति) ब्रह्मकुलव्यतिरेकेण । अच्युतोगोत्रप्रवर्तकतुल्योयेषांवैष्णवानां तद्व्यतिरेकेणच (सर्वत्रयथापराधंदंडंकुर्वन्पृथुः सप्तद्वीपवतींमहींशशासेत्यर्थः) १२ एकदातस्यमहासत्रदीक्षाआसीत् । तत्रसत्रेदेवादीनांसमाजआसीदित्यर्थः । १३

॥७८॥

श्लोकाः २/१३

चंदनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् ॥ पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितम् २ सवृंदैःकदलीस्तंभैःपूगपोतैःपरिष्कृतम् ॥ तरुपल्लवमालाभिःसर्वतःसमलंकृतम् ३ प्रजास्तंदीपबलिभिःसंभृताशेषमंगलैः ॥ अभीयुर्मृष्टकन्याश्चमृष्टकुंडलमंडिताः ४ शंखदुंदुभिघोषेणब्रह्मघोषेणचर्त्विजाम् ॥ विवेशभवनंवीरःस्तूयमानोगतस्मयः ५ पूजितःपूजयामासतत्रतत्रमहायशाः ॥ पौराञ्जानपदांस्तांस्तान्प्रीतःप्रियवरप्रदः ६ सएवमादीन्यनवद्यचेष्टितःकर्माणिभूयांसिमहान्महत्तमः ॥ कुर्वञ्शशासावनिमंडलंयशःस्फीतंनिधायारुरुहेपरंपदम् ७ ॥ सूतउवाच ॥ तदादिराजस्ययशोविजृंभितंगुणैरशेषैर्गुणवत्सभाजितम् ॥ क्षत्तामहाभागवतःसदस्पतेकौषारविंप्राहगृणंतमर्चयन् ८ ॥ विदुरउवाच ॥ सोभिषिक्तःपृथुर्विप्रैर्लब्धाशेषसुरार्हणः ॥ बिभ्रत्सवैष्णवंतेजोबाह्वोर्याभ्यांदुदोहगाम् ९ कोन्वस्यकीर्तिंनशृणोत्यभिज्ञोयद्विक्रमोच्छिष्टमशेषभूपाः ॥ लोकाःसपालाउपजीवंतिकाममद्यापितन्मेवदकर्मशुद्धम् १० ॥ मैत्रेयउवाच ॥ गंगायमुनयोर्नद्योरंतराक्षेत्रमावसन् ॥ आरब्धानेवबुभुजेभोगान्पुण्यजिहासया ११ सर्वत्रास्खलितादेशःसप्तद्वीपैकदंडधृक् ॥ अन्यत्रब्राह्मणकुलादन्यत्राच्युतगोत्रतः १२ एकदासीन्महासत्रदीक्षातत्रदिवौकसाम् ॥ समाजोब्रह्मर्षीणांचराजर्षीणांचसत्तम १३

चूर्णिका

२ ३ तत्र शंखादिवाद्यघोषेण अनेकसंपद्भिः युक्तं स्वगृहं सर्वैः स्तूयमानः पृथुः प्रविवेश ४ ५ ६ सःपरंसिंहासनं आरुह्य भूयांसि कर्माणिकुर्वन् पृथ्वींशशास ७ ८ ॥ विदुरउवाच ॥ ॥ विप्रैः अभिषिक्तः पृथुः किंचकार ९ अस्यकीर्तिंकः नशृणोति सर्वेभूपालाः अद्यापियद्विक्रमोच्छिष्टं आचरंति तस्यशुद्धंकर्मवद १० ॥ ॥मैत्रेयउवाच॥ ॥ पृथुः अंतर्वेद्यांवसन् सप्तद्वीपैकदंडधृक् ब्राह्मणकुलाद्वैष्णवाच्च अन्यत्रअस्खलितादेशः आसीत् ११ १२ एकदा तत्र महासत्रेदीक्षा आसीत् तत्र देवानां ब्रह्मर्षीणां राजर्षीणां पित्रादीनां समाजः बभूव १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

तस्मिन्सत्रेपूज्येषु स्वर्चितेषु सत्सु सदसोमध्ये उत्थितः सन्पृथुः समंततः समैक्षतेति षष्ठश्लोकेनान्वयः (ताराणांमध्येउदितश्चंद्रइव) १४ प्रांशुःउन्नतः पीनावायतौ भुजौ यस्य । कंजवदरुणेईक्षणेयस्य । (सौम्योमनोरमः)शोभनाद्विजादंताः स्मितंचयस्य १५ व्यूढंविस्तीर्णंवक्षोयस्य । वलिभिस्तिसृभिर्वल्गुसुंदरंदलवत्अधोग्रं(यत्अश्वत्थपत्रं)तद्वत्उपरिविस्तृतंअधस्तात्संकुचितंउदरंयस्य । आवर्तवत्अंभसां भ्रमइवनिम्नानाभिर्यस्य । कांचनवदुज्ज्वलावूरूयस्य । उदग्रौश्रेष्ठौपादौयस्य । १६ सूक्ष्माश्चतेवक्राश्चसिताश्चस्निग्धाश्चमूर्धजायस्यकंबुवत् (शंखवत्) त्रिरेखांकिताकंधरायस्य । परिधाय वसित्वा उपवीय उत्तरीयंकृत्वा १७ नियमेनिमित्तेन्यस्तानित्यक्तानिभूषणानियेनसः । अतएवतैरनावृतत्वाद्व्यंजिताअशेषगात्रेषुश्रीः स्वाभाविकीशोभायेन । कृतमुचितंविहितंकर्मयेनसः । १८ शिशिरेसंतापहरेस्निग्धे चतारेययोस्तेअक्षिणीयस्य । इदंवक्ष्यमाणंवाक्यमुक्तवांश्च १९ चारुश्रोत्रप्रियम् । चित्राणिपदानियस्मिन् । श्लक्ष्णंप्रशस्तं । गूढगंभीरार्थं । मृष्टंशुद्धम् । अविक्लवंअव्याकुलंउत्प्रेक्षते(अस्खालितमित्यर्थः) २० भाषणेहेतुः धर्मजिज्ञासुभिः पुंभिः सत्सुस्वमनीषितमावेद्यंवक्तव्यम् । अतः प्रजानुशासनमिषेण (मयाधर्म–) जिज्ञासैवक्रियतेनयुष्मान्प्रतिधर्मप्रवचनमितिभावः २१ इदानीं प्रजाः शिक्षयिष्यन् प्रजाशिक्षणादिकं ममावश्यकमित्याह । अहमितित्रिभिः पृथक् सेतुषुस्वस्वविहितवर्त्मसुस्थापितास्थापयिता (ईश्वरेणेतिशेषः) २२ दिष्टदृक्प्राक्कर्मसाक्षीईश्वरोयस्यतुष्यतितस्य (ब्रह्मवादिनो) वेदवादिनः यान्लोकानाहुः प्रजारक्षणाद्यनुष्ठानात् तेल्लोकामेस्युः । कथंभूताः कामानांसम्यक्दोहः प्रपूरणंयेषु २३ अन्यथात्वनिष्टंस्यादित्याह । यइति । (करंबलिंउद्धरेत् गृह्णीयादित्यर्थः) शमलं पापं । भगमैश्वर्यम् २४ तत्तस्मात्हेप्रजाः भर्तुर्मेसपिंडार्थंपिंडदानवत्परलोकहितार्थंस्वार्थं स्वकार्यमेवकुरुव धर्ममेवानुतिष्ठतेत्यर्थः । अधोक्षजेधीर्येषांताहशाः संतःवासुदेवार्पणदृष्ट्येत्यर्थः अनुग्रहः कृतो भवेदितिशेषः २५

।।७९।।

श्लोकाः १४/२५

॥ तस्मिन्नर्हत्सुसर्वेषुस्वर्चितेषुयथार्हतः ॥ उत्थितःसदसोमध्येताराणामुडुराडिव १४ प्रांशुःपीनायतभुजोगौरःकंजारुणेक्षणः ॥ सुनासःसुमुखःसौम्यः पीनांसःसुद्विजस्मितः १५ व्यूढवक्षाबृहच्छ्रोणिर्वलिवल्गुदलोदरः ॥ आवर्तनाभिरोजस्वीकांचनोरुरुदग्रपात् १६ सूक्ष्मवक्रासितस्निग्धमूर्द्धजः कंबुकंधरः ॥ महाधनेदुकूलाग्र्येपरिधायोपवीयच १७ व्यंजिताशेषगात्रश्रीर्नियमेन्यस्तभूषणः ॥ कृष्णाजिनधरःश्रीमान्कुशपाणिःकृतोचितः १८ शिशिरःस्निग्धताराक्षःसमैक्षतसमं ततः ॥ ऊचिवानिदमुर्वीशःसदःसंहर्षयन्निव १९ चारुचित्रपदंश्लक्ष्णंमृष्टंगूढमविक्लवम् ॥ सर्वेषामुपकारार्थंतदाअनुवदन्निव २० राजोवाच ॥ सभ्याःशृणुतभद्रंवःसाधवोयइहागताः ॥ सत्सुजिज्ञासुभिर्धर्ममावेद्यंस्वमनीषितम् २१ अहंदंडधरोराजाप्रजानामिहयोजितः ॥ रक्षिताव्रत्तिदःस्वेषुसेतुषुस्थापितापृथक् २२ तस्यमेतदनुष्ठानाद्यानाहुर्ब्रह्मवादिनः ॥ लोकाःस्युःकामसंदोहायस्यतुष्यतिदिष्टदृक् २३ यउद्धरेत्करंराजाप्रजाधर्मेष्वशिक्षयन् ॥ प्रजानांशमलंभुंक्तेभगंचस्वंजहातिसः २४ तत्प्रजाभर्तृपिंडार्थंस्वार्थमेवानसूयवः ॥ कुरुताधोक्षजधियस्तार्हिमेनुग्रहःकृतः २५

चूर्णिका

तत्समाजे स्वयंउत्थितः सन् सभ्यान्उवाच १४ १५ १६ १७ १८ १९ हेसभ्याः वःभद्रम् धर्मजिज्ञासुभिः सत्सु स्वमनीषितंनिवेद्यम् २० अहंप्रजानांइहराजायोजितः २१ ब्रह्मवादिनः यत्आहुः तत्राज्ञाआचरितंचेत् तस्यकामदुघाः लोकाः स्युः २२ २३ हेप्रजाः स्वधर्ममेव अधोक्षजधिया कुरुत २४ हेदेवाद्याः यूयंतत् अनुमोदध्वम् कर्तुः शास्तुः अनुज्ञातुः फलं तुल्यम् २५ ।।७९।।

१ उन्नताविति पाठःप्राचीनोवा

आ॰ च॰ (हेपित्रादयः अमलाः शुद्धचित्तायूयं तदनुमोदध्वम्।) शास्तुः शिक्षयितुः अनुज्ञातुरनुमोदितुश्च प्रेत्य परलोके यत्फलंतत्तुल्यम् २६ कर्मकर्तव्यमित्यनुमोदामहे नतुवासुदेवेर्पणीयमिति वदादिभिस्तदनं अ०
गीकारादित्येवंवादिनः शनैःसंबोधयन्नाह । हेअर्हसत्तमाः मीमांसकश्रेष्ठाः यज्ञपतिर्नामपरमेश्वरः केषांचिन्मतेतावदस्ति तथापिविप्रतिपत्तेः नतत्सिद्धिरित्याशंक्यजगद्वैचित्र्यान्यथानुपपत्तिंप्रमा
टीका. णयाति । इहामुत्रचज्योत्स्नावत्यः कांतिमत्यः भुवोभोगभूमयः शरीराणिच (ताविचित्राईश्वरं फलदातारं विनानोपपद्यंतइतीश्वरसिद्धिः) २७ नन्विदं कर्मवैचित्र्यादेवसेत्स्यति (इत्याशंक्य) तथा
पिविद्वदनुभवेनेश्वरसिद्धिरित्याह मनोरितित्रिभिः। (अस्मत्पितुःपितुः) अस्मत्पितामहस्यांगस्य२८(ईदृशानामन्येषामपिअथब्रह्मादीनांचगदाभृता) कृत्यमस्ति।अवश्यंकमफलदात्रा(ईश्वरेण) भाव्यमितितेषां ॥२१॥
मतमित्यर्थः २९ (अन्येषामित्युक्तंतेन) मृत्योर्दौहित्रादीनृतेवेनादीन्विना । धर्मविमोहितान् । अतः शोच्यान् । ननुकर्मैवफलंदास्यति विध्युद्देशगतावादेवता । किंपरमेश्वरेणतत्राह । वर्गेति । वर्गो
॥८०॥ त्रिवर्गः स्वर्गोधर्मस्यफलं अपवर्गोमोक्षः । तेषामैकात्म्येनऐकरूप्येणसर्वानुगतेनहेतुनातत्रापिप्रायेणहेतुना । सर्वानुगतत्वंमहत्त्वंचेश्वरस्यैवदृष्टम् । अयंभावः । नतावज्जडस्यकर्मणः फलदातृत्वंघटते !
नचार्वाग्देवतानांस्वातंत्र्यंअंतर्यामिश्रुतेः । नचतदाकर्मसाम्येफलतारतम्यं क्वचित्तदसिद्धिश्चसंभवति ।अतः स्वातंत्र्येणकर्तुमन्यथाकर्तुंसमर्थेनपरमेश्वरेणभाव्यमिति । ३० किंचजीवानां मोक्षदः परमे
श्वरएव । नार्वाग्देवताः तासामपिजीवत्वाविशेषादित्याशयेनाह त्रिभिः । यस्यपादयोः सेवायामभिरुचिस्तपस्विनां संसारतप्तानांअशेषैर्जन्मभिः संवृद्धंधियोमलंसद्यः क्षपयतितमेवभजतेतितृतीयेनान्वयः।
कथंभूताभिरुचिः । अहन्यहनि (एधती) वर्धमानासतीसात्त्विकी । तत्पादसंबंधस्यैवैषमहिमेतिदृष्टांतेनाह यथेति । ३१ विनिर्धूताअशेषामनोमलायस्य । असंगोवैराग्यंतेनविज्ञानस्यविशेषः साक्षा
त्कारस्तदेववीर्यंयस्य । यस्यांघ्रिमूलेकृताश्रयः सन् । ३२ आत्मवृत्तिभिः अध्यापनादिभिः । मनोवचःकायानांगुणैर्ध्यानस्तुतिपरिचर्यादिभिः (स्वकर्मभिर्यजनादिभिः ।) अमायिनोनिष्कपटाः सं
तः । ननुब्रह्मादिभिः सेव्ये (तस्मिन्) किमस्मद्भक्त्याभविष्यतितत्राह । यथाधिकारमेवअवसितानिश्चिता समाप्तावाअर्थसिद्धिर्येषां । (कामदुघं अंघ्रिपंकजंयस्यतम्) ३३ स्वकर्मभिर्यागादि
भिर्भजेतत्युक्तंतत्र'ब्रह्मार्पणंब्रह्महवि'रितिन्यायेनसर्वेषुयागतदंगतत्फलेषुभगवद्दृष्ट्याकर्मकर्तव्यंनभिन्नदृष्ट्येतिवक्तुंतेषांभवगद्रूपतामाहद्वाभ्यां।असौभगवानेवस्वरूपतोविशुद्धविज्ञानघनोपि (शुद्धचैतन्यघनो
पि) अगुणोनिर्विशेषणोपिसन्निहकर्ममार्गेअनेकगुणः नानाविशेषणवान्अध्वरोयज्ञः संपद्यते " यज्ञोवैविष्णु" रितिश्रुतेः। अनेकगुणत्वमेवाह । पृथग्विधानियानिद्रव्यादीनि तत्र द्रव्याणिव्रीह्यादीनि
गुणाःशुक्लादयः क्रियाअवघातादयः उक्तयोमंत्राः (तथा) अर्थोअंगसाध्यउपकारः आशयः संकल्पः लिंगंपदार्थानांशक्तिः नामज्योतिष्टोमादि तैश्वयोऽध्वरः संपद्यते ३४

यूयंतदनुमोदध्वंपितृदेवर्षयोमलाः ॥ कर्तुःशास्तुरनुज्ञातुस्तुल्यंयत्प्रेत्यतत्फलम् २६ अस्तियज्ञपतिर्नामकेषांचिदर्हसत्तमाः ॥ इहामुत्रचलक्ष्यंतेज्योत्स्नाव श्लोकाः
त्यःक्वचिद्भुवः २७ मनोरुत्तानपादस्यध्रुवस्यापिमहीपतेः ॥ प्रियव्रतस्यराजर्षेरंगस्यास्मत्पितुःपितुः २८ ईदृशानामथान्येषामजस्यचभवस्यच ॥ प्रह्लाद २६/३४
स्यबलेश्चापिकृत्यमस्तिगदाभृता २९ दौहित्रादीनृतेमृत्योःशोच्यान्धर्मविमोहितान् ॥ वर्गस्वर्गापवर्गाणांप्रायेणैकात्म्यहेतुना ३० यत्पादसेवाभिरुचिस्तप
स्विनामशेषजन्मोपचितंमलंधियः ॥ सद्यःक्षिणोत्यन्वहमेधतीसतीयथापदांगुष्ठविनिःसृतासरित् ३१ विनिर्धुताशेषमनोमलःपुमानसंगविज्ञानविशेषवीर्य
वान् ॥ यदंघ्रिमूलेकृतकेतनःपुनर्नसंसृतिंक्लेशवहांप्रपद्यते ३२ तमेवयूयंभजतात्मवृत्तिभिर्मनोवचःकायगुणैःस्वकर्मभिः ॥ अमायिनःकामदुघांघ्रिपंकजंय
थाधिकारावसितार्थसिद्धयः ३३ असाविहानेकगुणोगुणोध्वरःपृथग्विधद्रव्यगुणक्रियोक्तिभिः ॥ संपद्यतेर्थाशयलिंगनामभिर्विशुद्धविज्ञानघनःस्वरूपतः३४ ॥८०॥

चूर्णिका २६ २७ २८ २९ तपस्विनःभगवत्पादसेवया अशेषजन्मसंचितंधियः मलं त्यजंति ३० येनभगवच्चरणाश्रयःकृतः सः क्लेशवहां संसृतिं नप्रपद्यते ३१ ३२ ३३ ३४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतस्यैवानंदस्यान्यानिभूतानि मात्रामुप
यागफलस्यापि भगवद्रूपतामाह । प्रधानेति । एषविष्णुः परमानंदोपि शरीरे चेतनां विषयाकारांबुद्धिंप्रतिपद्यतदभिव्यंग्यानंदरूपः सन् क्रियाफलत्वेन प्रतीयते "एतस्यैवानंदस्यान्यानिभूतानि मात्रामुप
जीवंती" तिश्रुतेः । यथाऽनलो दारुषु स्थितः तद्गुणात्मकः दारुधर्मदैर्घ्यवक्रत्वादिमान् । तद्वत् । कथंभूतेशरीरे । प्रधानंअव्यक्तं कालः क्षोभकः आशयोवासना । धर्मोऽदृष्टंतैः संगृह्यतेजन्यतइति
तथातस्मिन् । ३५ तदेवमप्रवृत्तान्भगवद्भजनेप्रवर्त्यस्वतः प्रवृत्तानांप्रवृत्तिमभिनंदनेन द्रढयति । अहोइति । वितरंतिकुर्वंति । गुरुत्वेनस्वविहितकर्मफलदातृत्वेनचपूज्यंहरिरूपमिष्टदैवतंस्वधर्मयोगेन भक्ति
योगेन यजंति पूजयंति ३६ इदानींहरिभक्तिदाढर्याय ब्राह्मणभक्तिंविधत्ते । माजात्वित्यष्टभिः । महत्यश्चताऋद्धयश्चताभिर्यद्राजकुलस्य तेजः तत् तस्मात्सकाशात् द्विजानांकुलेअजितोविष्णुर्देवतायेषांवै
ष्णवानांतेषांचकुले (यद्वाअजितस्यदेवतानांअजितेनापिब्राह्मणोममदेवतेतिबहुमतानामितिद्विजविशेषणम्) माजातुप्रभवेत्कदाचिदपिप्रभावंनकरोतु । कथंभूते (कुले ।) समृद्धिभिर्विनापिस्वयमेवाति
तिक्षादिभिर्देदीप्यमाने ३७ ब्राह्मणान्स्तुवन्नाह । यच्चरणाभिवंदनाद्धरिः लक्ष्मींयशश्चअवाप । (कथंभूतः ब्रह्मण्योब्राह्मणप्रियः सचासौदेवश्च) यत्सेवयाचेश्वरस्तुष्यति तदेवब्रह्मकुलंनिषेव्यतामि
तिद्वयोरन्वयः । ३८ तस्यहरेर्लोकसंग्रहरूपोयोधर्मः तत्परैः ३९ ननु ब्रह्मकुलएवानित्यंसेव्यमानेसर्वदेवमुखभूतेग्नौयज्ञाद्यनुष्ठानंनस्यात् नचतेनविनाचित्तशुद्धिः नचतयाविनामोक्षःस्यादित्याशंक्या
ह पुमानिति द्वाभ्याम् । यस्यब्रह्मकुलस्य नित्यंसंबंधेननिषेवयापुमान्स्वयमेवज्ञानाभ्यासादिकंविनापिअत्युत्तमंशमंमोक्षंलभेत कुतः । यत्सेवयास्वतएवअनतिवेलंशीघ्रंप्रसीदतः शुध्यतः आत्मनाश्चि
त्तात् (स्वतएवसंभूतांचित्तशुद्धिं लब्ध्वेत्यर्थः ।) ततःपरंश्रेष्ठं हविर्भुजांदेवानांकिंमुखमस्ति । ब्राह्मणसेवयैव यज्ञादिफलंज्ञानफलंचतत्सर्वंभवतीत्यर्थः ४० हरेरापितदेवपरं मुखमित्याह । अश्नातीति । ईज्या
नामिंद्रादीनांनामभिः यस्यब्रह्मकुलस्य मुखेश्रद्धयाहुतंहविरनंतोयथाश्नाति तथाचेतनयाराहितेहुताशनेहुतंनाश्नाति । कैर्हुतमश्नाति । तत्त्वकोविदैः । सर्वदेवमयश्चैतन्यमूर्तिरनंतइतितत्त्वविद्भिः ।
कुतएवंभूतोसौ तत्राह । पारमहंस्यंज्ञानंतत्परान्अर्हंति अधिकुर्वंतीतिपारमहंस्यपर्याः । तागावोवाचोयस्मिन् । उपनिषद्भिर्ज्ञानघनत्वेनोक्तइत्यर्थः । यद्वा परमहंसानांज्ञाननिष्ठानांगम्यः पारमहंस्यःपरितोनग
च्छंतिगावोवाचोयस्मात्सपर्यगुः इंद्रियनियंतासचासौसचपारमहंस्यपर्यगुः । ज्ञानरूपःसर्वांतर्यामीत्यर्थः ४१

श्लोकाः ३५ / ४१

प्रधानकालाशयधर्मसंग्रहेशरीरएषप्रतिपद्यचेतनाम् ॥ क्रियाफलत्वेनविभुर्विभाव्यतेयथानलोदारुषुतद्गुणात्मकः ३५ अहोममामीवितरंत्यनुग्रहंहरिंगुरुं यज्ञभुजामधीश्वरम् ॥ स्वधर्मयोगेनयजंतिमामकानिरंतरंक्षोणितलेदृढव्रताः ३६ माजातुतेजःप्रभवेन्महर्द्धिभिस्तितिक्षयातपसाविद्ययाच ॥ देदीप्यमाने जितदेवतानांकुलेस्वयंराजकुलाद्द्विजानाम् ३७ ब्रह्मण्यदेवःपुरुषःपुरातनोनित्यंहरिर्यच्चरणाभिवंदनात् ॥ अवापलक्ष्मीमनपायिनींयशोजगत्पवित्रंचमहत्त माग्रणीः ३८ यत्सेवयाशेषगुहाशयःस्वराड्विप्रप्रियस्तुष्यतिकाममीश्वरः ॥ तदेवतद्धर्मपरैर्विनीतैःसर्वात्मनाब्रह्मकुलंनिषेव्यताम् ३९ पुमाँल्लभेतानातिवे लमात्मनःप्रसीदतोत्यंतशमंस्वतःस्वयम् ॥ यंनित्यसंबंधनिषेवयाततःपरंकिमत्रास्तिमुखंहविर्भुजाम् ४० अश्नात्यनंतःखलुतत्त्वकोविदैःश्रद्धाहुतंयन्मुख इज्यनामभिः ॥ नवैतथाचेतनयाबहिष्कृतेहुताशनेपारमहंस्यपर्यगुः ४१

चूर्णिका ३५ ३६ तद्भक्तिमूलंब्राह्मणाः अहोहरिः यच्चरणाभिवंदनात् स्थिरां लक्ष्मीं यशश्च आप ३७ ३८ ३९ अनंतः ब्राह्मणमुखहुतंयथा अश्नाति तथा अग्नौन ४० येनित्यंसमा
धिनाब्रह्मबिभ्रति ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नकेवलं चेतनत्वेन हुताशनाद्विशेषः किंतु वेदज्ञानादपीत्याह । यदित्यव्ययम् । (यत्) ये ब्रह्मवेदं नित्यं बिभ्रति तेषामित्युत्तरेणान्वयः मंगलं नाम । "प्रशस्ताचरणंनित्यमप्रशस्तस्यवर्जनम् । एतद्धिमंगलंप्रोक्तमृषिभिस्तत्त्वदर्शिभिः" । मौनमध्ययनविरोधिवार्तात्यागः संयमोदमः तैः । समाधिनाचित्तस्थैर्येणच । किमर्थं अर्थदृष्टये । अध्ययनस्यार्थज्ञानपर्यवसायित्वात् । वेदार्थमपिविचारयंतीत्यर्थः । यत्रवेदेइदंविश्वं । आदर्शेदर्पणे इ स्फुटम् ४२ हेआर्याः आआयुः (आयुर्मर्यादीकृत्य) । यावज्जीवमित्यर्थः अधिकिरीटं मुकुटस्योपरि वहेयेतिप्रार्थनायांलिङ् । यंरेणुं (बिभ्रतःपुंसः । अमुंपुमांसम्) ४३ गुणभजनस्यफलमाह । गुणायनं (गुणानांस्थानं) अन्वनुसंपदः संवृणतेसम्यग्भजंति । तस्मात्प्रसीदतां (ब्रह्मकुलं) गवांचकुलम् ४४ (साधुवादेननिर्दोषवाक्येन) ४५ साधुवादमाह । पुत्रेणेतिपङ्क्तिः । यद्यतःवेनोपि (पापोपित्रह्मदंडेनमुनीनां हुंकारलक्षणेनदंडेनहतोपि) तमोनरकं अत्यतरत् अतितताार ("तस्मात्पुत्रेणजयते" इतिश्रुतिः सत्यवती । सोयंमनुष्यलोकः पुत्रेणजय्य इत्यादिकंश्रौतंवाक्यंयथार्थमभूदित्यर्थः) ४६ (भयवतोनिंदयातमोविविक्षुः प्रवेष्टुमिच्छुरपिसूनोःप्रभावतस्तत्तमोत्यगात् अतिततार) ४७ (हेपृथ्व्याःपितः पातृत्वात्पितृत्वंयुक्तम् शाश्वतीः समाःबहूनि वर्षाणि यस्यतवेदृशीसर्वोत्कृष्टा)४८ (त्वयैवनाथेन) मुकुंदनाथाःस्मः । त्वन्नाथत्वमेवमुकुंदनाथत्वेपर्यवसितमित्यर्थः तत्रहेतुः यइति ४९ (तव) आजीविनांसेवकानां (अस्माकं) आसम्यक्अनुशासनं (इदंनात्यद्भुतं यतः) प्रजास्वनुरागः (महतां) प्रकृतिः स्वभावः ५० (हेप्रभोतमसःअज्ञानस्यपारःज्ञानलक्षणः) उपासादितः प्रापितः कर्मभिः (प्राचीनैः) भ्राम्यतां (नःअस्माकम्) ५१ ईश्वरदृष्ट्याविप्रादयोपि प्रणमंति नमइति ब्रह्माविश्य ब्राह्मणजातिमधिष्ठायक्षत्रं क्षत्रियं बिभर्ति (पालयति) क्षत्रंचाविश्य ब्रह्म बिभर्ति । तदुभयंचाविश्यइदंविश्वंबिभर्ति (तस्मैनमः) ५२ इतिचतुर्थस्कंधेटीकायामेकविंशोध्यायः ॥ २१ ॥

॥८२॥

श्लोकाः ४२/५२

यद्ब्रह्मनित्यंविरजंसनातनंश्रद्धातपोमंगलमौनसंयमैः ॥ समाधिनाबिभ्रतिहार्थदृष्टयेयत्रेदमादर्शइवावभासते ४२ तेषामहंपादसरोजरेणुमार्यावहेयाधिकिरीटमायुः ॥ यंनित्यदाबिभ्रतआशुपापंनश्यत्यमुंसर्वगुणाभजंति ४३ गुणायनंशीलधनंकृतज्ञंवृद्धाश्रयंसंवृणतेनुसंपदः ॥ प्रसीदतांब्रह्मकुलंगवांचजनार्दनःसानुचरश्चमह्यम् ४४॥मैत्रेयउवाच॥ इतिब्रुवाणंनृपतिंपितृदेवद्विजातयः॥ तुष्टुवुर्हृष्टमनसःसाधुवादेनसाधवः ४५ पुत्रेणजयतेलोकानितिसत्यवतीश्रुतिः ॥ ब्रम्हदंडहतःपापोयद्वेनोत्यतरत्तमः ४६ हिरण्यकशिपुश्चापिभगवन्निंदयातमः ॥ विविक्षुरत्यगात्सूनोःप्रह्लादस्यानुभावतः ४७ वीरवर्यपितःपृथ्व्याःसमाःसंजीवशाश्वतीः ॥ यस्येदृश्यच्युतेभक्तिःसर्वलोकैकभर्त्तरि ४८ अहोवयंह्यद्यपवित्रकीर्तेत्वयैवनाथेनमुकुंदनाथाः ॥ यउत्तमश्लोकतमस्यविष्णोर्ब्रह्मण्यदेवस्यकथांव्यनक्ति ४९ नात्यद्भुतमिदंनाथतवाजीव्यानुशासनम् ॥ प्रजानुरागोमहतांप्रकृतिःकरुणात्मनाम् ५० अद्यनस्तमसःपारस्त्वयोपासादितःप्रभो ॥ भ्राम्यतांनष्टदृष्टीनांकर्मभिर्दैवसंज्ञितैः ५१ नमोविवृद्धसत्त्वायपुरुषायमहीयसे ॥ योब्रम्हक्षत्रमाविश्यबिभर्तीदंस्वतेजसा ५२ इति श्रीभागवतेमहापुराणेचतुर्थस्कंधेएकविंशोऽध्यायः २१

चूर्णिका

तेषां पादरेणुं अहं किरीटेन वहामि ४२ एवंश्रेष्ठब्रह्मकुलंगवांकुलंच तथाजनार्दनश्च मह्यं प्रसीदताम् ४३ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतिब्रुवाणंनृपतिं पितृदेवद्विजातयः सर्वे तुष्टुवुः ४४ पुत्रेणंजयतेलोकानितिसत्यवतीश्रुतिः वेनः ब्रह्मदंडहतोपि नरकंत्वत्तः अतरत् ४५ ४६ हेवीरयस्यतेहरौईदृशीभक्तिः अतः त्वंशाश्वतीः समाः जीव ४७ अहोवयंत्वयानाथेनसनाथाः स्मः ४८ ४९ नःअद्यत्वयातमसः पारः दर्शितः ५० अतः विवृद्धसत्त्वाय तस्मै ते नमोस्तु ५१ ॥ इतिश्रीभा० चूर्णि० चतुर्थेएकविंशः ॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥८३॥

द्वाविंशेतुपरंज्ञानंपृथवेहारिशासनात् । सनत्कुमारोभगवानुपादिशादितीर्यते ॥१॥ मुनयःसनकादयः (प्रगृणत्सु स्तुवत्सु) १ (अपापान् पवित्रान्कुर्वंत्या) अर्चिषालक्षितान् सनकादयइति ज्ञापितान् अचष्ट अपश्यत् ।२ तेषांदर्शनेनउद्गतान् प्राणान्(प्रत्यादित्सुरिव) प्राप्तुमिच्छुरिव । अयंभावः। "ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविर आयति । प्रत्युत्थानाभिवादाभ्यांपुनस्तान्प्रतिपद्यत" इतिस्मृतेः। प्राणास्तावत्त त्तेजसाक्षिप्तास्तान्प्रत्युद्गच्छंति अतःस्वमयनुद्गच्छतः प्राणहानिःस्यादितिभयादिवससंभ्रमं प्रत्युद्गमंचकारेति। सहसदस्यैरनुगैश्चवर्तमानः इंद्रियेशोजीवः गुणान्गंधादीन्प्रतिगथोद्गच्छतीत्यौत्सुक्येदृष्टांतः ३ (सभ्यःसदसिसाधुःतेषांगौरवात्) यंत्रितोवशीकृतः (प्रश्रयेणविनयेननम्रकंधरः ।) गृहीतंअध्यर्हणमर्घ्यंआसनंचयैस्तान् ४ मार्जितंक्षालितंअलकबंधनंकेशबंधनं यस्य । (शीलवतांयद्वृत्तंतत्) मानयन्निवस्वयमाचचार ५ (हाटकासनेसुवर्णपीठे स्वधिष्ण्येषुकुंडेषुस्थितान्) भवस्याप्यग्रजत्वेनमान्यान् संयमःप्रश्रयः ६ प्रीतःप्राहेत्युक्तंतदेवप्रीतिपूर्वकंवचनमाह । अहोइतिदशभिः । मंगलंशुभमयनं (संचरणं)येषांते । मयाकिंमंगलंपुण्यंआचरितम् । यस्यमेयोगिभिरपिदुर्दर्शानांवोदर्शनं आसीत् ७ (यस्यविप्राःप्रसीदंतितस्यसानुगः शिवोविष्णुश्चप्रसीदति अतस्तस्यकिंदुर्लभतरमिति) ८ दुर्दर्शत्वमेवाह । नैवेति । (यान्युष्मान्) सर्वदृशं (सर्वेषांद्रष्टार–)–मात्मानंयथासर्वेदृश्यानलक्षयंते । यस्यविश्वस्यहेतवोपिमहदादयोमन्वादयोवा । यद्वा कथंभूतान्'येऽस्यसर्वदृगात्मदर्शनस्यहेतवस्तान् (युष्मानित्यर्थः) ९ येषांसाधूनांगृहाअर्हाणांपूज्यानांवर्यावरणीयाः स्वीकारार्हाअंब्वादयोयेषुतादृशाः । अंबुचतृणंचभूमिश्चईश्वरोगृहस्वामीचअवराभृत्यादयश्च । १० व्यालानांदुष्टसर्पाणामालयाद्रुमाएवते । (गृहाःवैशब्दएवार्थे) । अरिक्ताः पूर्णाः अखिलाः संपदोयेषुतादृशाअपियेगृहाः तीर्थपादीयावैष्णवास्तेषांपादतीर्थैर्नविवर्जिताः ११ स्वागतंभद्रमागमनंजातम् । यद्यस्मात्बालाएवभवंतोबृहंतिव्रतानिचरंति । यद्वा येषांवोव्रतानिअन्येबालाश्चरंति १२ इंद्रियार्थविषयभोगमेवअर्थंपुरुषार्थंयोविदंतितेषांनः कुशलंकच्चित् । व्यसनान्युप्यंतेयस्मिन् तस्मिन् (व्यसनक्षेत्रे) संसारे (पतितानाम्)१३

श्लोकाः $\frac{१}{१३}$

मैत्रेयउवाच ॥ ॥ जनेषुप्रगृणत्स्वेवंपृथुंपृथुलविक्रमम् ॥ तत्रोपजग्मुर्मुनयश्चत्वारःसूर्यवर्चसः १ तांस्तुसिद्धेश्वरान्राजाव्योम्नोऽवतरतोर्चिषा ॥ लोकानपापान्कुर्वत्यासानुगोचष्टलक्षितान् २ तद्दर्शनोद्गतान्प्राणान्प्रत्यादित्सुरिवोत्थितः ॥ ससदस्यानुगोवैन्यइंद्रियेशोगुणानिव ३ गौरवाद्यंत्रितःसभ्यःप्रश्रयानतकंधरः ॥ विधिवत्पूजयांचक्रेगृहीताध्यर्हणासनान् ४ तत्पादशौचसलिलैर्मार्जितालकबंधनः ॥ तत्रशीलवतांवृत्तमाचरन्मानयन्निव ५ हाटकासनआसीनान्स्वधिष्ण्येष्विवपावकान् ॥ श्रद्धासंयमसंयुक्तःप्रीतःप्राहभवाग्रजान् ६ ॥ ॥ पृथुरुवाच ॥ ॥ अहोआचरितंकिंमेमंगलंमंगलायनाः ॥ यस्यवोदर्शनंह्यासीद्दुर्दर्शानांचयोगिभिः ७ किंतस्यदुर्लभतरमिहलोकेपरत्रच ॥ यस्यविप्राःप्रसीदंतिशिवोविष्णुश्चसानुगः ८ नैवलक्षयतेलोकोलोकान्पर्यटतोपियान् ॥ यथासर्वदृशंसर्वआत्मानंयेऽस्यहेतवः९ अधनाअपितेधन्याःसाधवोगृहमेधिनः ॥ यद्गृहाह्यर्हवर्यांबुतृणभूमीश्वरावराः १० व्यालालयद्रुमावैतेप्यरिक्ताखिलसंपदः ॥ यद्गृहास्तीर्थपादीयपादतीर्थविवर्जिताः ११ स्वागतंवोद्विजश्रेष्ठायद्व्रतानिमुमुक्षवः ॥ चरंतिश्रद्धयाधीराबालाएवबृहंतिच १२ कच्चिन्नःकुशलंनाथाइंद्रियार्थार्थवेदिनाम् ॥ व्यसनावापएतस्मिन्पतितानांस्वकर्मभिः १३

॥८३॥

चूर्णिका

॥ मैत्रेयउवाच ॥ ॥ एवंपृथुंप्रतिजनेषु प्रगृणत्सु सत्सु तत्रचत्वारः सूर्यवर्चसः सनत्कुमारादयः मुनयः आकाशात् उपजग्मुः १ पृथुः तान्दृष्ट्वा २ हाटकासने उपविश्य भक्त्याविधिवत्पूजयामास ३ ४ तत्पादशौचसलिलैः स्वात्मानंमार्जयित्वा प्राह ५ ६ हेद्विजाः मयाकिंमंगलंआचरितम् वः दर्शनंयोगिनामपिदुर्लभम् तन्मेप्राप्तं ७ विप्राः यस्यप्रसीदंति तस्यशिवःविष्णुश्चप्रसीदति ८ ९ १० ११ हेमुनयः वः स्वागतंअस्तु १२ अस्मिन् भवे अंजसा क्षेमं केन भवेत् तत् युष्मान् पृच्छामि १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नन्वभ्यागतानां कुशलं पृच्छयतेलोके नत्वात्मनस्तत्राह भवत्स्विति । १४ तत्तस्मात् (अहं) कृतविश्वासः सन् तपस्विनां संतप्तानां सुहृदः (संतापनिवारकान्)युष्मान्पृच्छामि१५ नखल्वन्ययोगितुल्यायूयंकिंतुसाक्षाद्भगवानेवेत्याह । व्यक्तंनिश्चितम् । आत्मवतांधीराणामात्मातेष्वात्मत्वेनप्रकाशमानः । आत्मानंभावयतिप्रकाशयतीतितथा। अजोभगवानिमांपृथ्वींचरति१६सूक्तं शोभनं वचनं सारं न्याय्यं सुष्ठु गंभीरार्थं मितमल्पाक्षरम् । मधुश्रोत्रप्रियम् । मुखप्रसत्त्यास्मयमानइवप्रतीयमानः १७ (स्वयं) विदुषापिजानतापिईदृशीपरार्थैकपरा (भवतायत्पृष्टं तत्साधु । यतःसर्वभूतानां हितरूपआत्माअंतःकरणं यस्यतेन) १८ स्वयमपिपृथोःसंगममभिनंदति ।संगमइति । उभयेषांवक्तृणांश्रोतॄणांचयेषांसंभाषणसहितः संप्रश्नः सर्वेषांशंसुखंविस्तारयति १९ तदेवंसंगमंप्रश्नंचाभिनंद्यानुवादमुखेनैवमोक्षसाधनमुपादिशति । अस्त्येवेति । (मधुद्विषोहरेःपदकमलस्य) गुणानामनुवादनेप्रश्नद्वारेणानुवादप्रवर्तनेगुणश्रवणेइत्यर्थः(भवतोरतिरस्त्येव)आत्मनोमनसोंतरंअंतस्थं कामात्मकंमलं (या) विधुनोति (कथंभूतम्)कषायंधातुरागवदनिवर्त्य(-मपीत्यर्थः) २० चित्तशुद्धचैवबहिर्वैराग्यमात्मनिरतिश्चभवति । नचततोऽधिकंसाधनमस्ति शास्त्रेषु तयोरेवमोक्षहेतुत्वनिश्चयादित्याह शास्त्रेष्विति । सम्यग्विमृशेषुसम्यग्विचारवत्सुशास्त्रेषुक्षेमस्यहेतुरेतावानेवसुनिश्चितः । कोसौ । आत्मव्यतिरिक्ते (विषयमात्रे) देहादावसंगोवैराग्यं आत्मनिचदृढारतिः आत्मनोविशेषणंनिर्गुणेब्रह्मणीति । २१ नन्वेतदेवातिदुर्लभंइत्याशंक्योत्तमाधिकारिणः श्रवणमात्रेणभवतिअन्यस्यतुचित्तशुद्धयनुसारेणसाधनतारतम्यतोवर्धमानयाभक्त्येत्यभिप्रेत्याह । सेतिचतुर्भिः । साब्रह्मणिरतिः असंगश्चश्रद्धादिभिःस्यादितिचतुर्थेनान्वयः (भगवद्धर्माणांचर्यया आचरणेन) जिज्ञासयातत्तद्विशेषबुभुत्सया । पुण्यंश्रवोयशोयस्यतस्यहरेः पुण्यायाकथा तयाच २२ अर्थारामाअर्थोद्रव्यंतन्निष्ठाः तामसाः इंद्रियारामाः कामनिष्ठा राजसाः तैः सहयागोष्ठीतस्यामतृष्णयातेषांचयेसंमता अर्थाः कामाश्चतेषामपरिग्रहेण । विविक्तेविजनेयारुचिस्तया (स्यात्) साचआत्मन्येवपरितोषेचसतिस्यात् । किंतु । हरेर्गुणपीयूषपानाद्विना । तस्मिन्सति विविक्तेरुचिर्नकार्यानचात्मनिपरितोषःकार्यइत्यर्थः २३

॥८४॥

श्लोकाः १४/२३

भवत्सुकुशलप्रश्नआत्मारामेषुनेष्यते ॥ कुशलाकुशलायत्रनसंतिमतिवृत्तयः १४ तदहंकृतविश्रंभःसुहृदोवस्तपस्विनाम्॥संपृच्छेभवएतस्मिन्क्षेमःकेनांजसाभवेत् १५ व्यक्तमात्मवतामात्माभगवानात्मभावनः ॥ स्वानामनुग्रहायेमांसिद्धरूपीचरत्यजः १६ ॥ मैत्रेयउवाच ॥ पृथोस्तत्सूक्तमाकर्ण्यसारंसुष्ठुमितंमधु ॥ स्मयमानइवप्रीत्याकुमारःप्रत्युवाचह १७ ॥ सनत्कुमारउवाच ॥ साधुपृष्टंमहाराजसर्वभूतहितात्मना ॥ भवताविदुषाचापिसाधूनांमतिरीदृशी १८ संगमःखलुसाधूनामुभयेषांचसंमतः ॥ यत्संभाषणसंप्रश्नःसर्वेषांवितनोतिशम् १९ अस्त्येवराजन्भवतोमधुद्विषःपादारविंदस्यगुणानुवादने ॥ रतिर्दुरापाविधुनोतिनैष्ठिकीकामंकषायंमलमंतरात्मनः २० शास्त्रेष्वियानेवसुनिश्चितोनृणांक्षेमस्यसम्यग्विमृशेषुहेतुः ॥ असंगआत्मव्यतिरिक्तआत्मनिदृढारतिर्ब्रह्मणिनिर्गुणेचया २१ साश्रद्धयाभगवद्धर्मचर्ययाजिज्ञासयाध्यात्मिकयोगनिष्ठया ॥ योगेश्वरोपासनयाचनित्यंपुण्यश्रवःकथयापुण्ययाच २२ अर्थेंद्रियारामसगोष्ठ्यतृष्णयातत्संमतानामपरिग्रहेणच ॥ विविक्तरुच्यापरितोषआत्मन्विनाहरेर्गुणपीयूषपानात् २३

चूर्णिका

१४ १५ अजः भक्तानांभवायसिद्धरूपीनित्यंचरति १६ १७ ॥ ॥ सनत्कुमारउवाच ॥ ॥ हेमहाराजत्वयासाधुपृष्टं साधूनांसंगमः उभयोः संमतः१८१९हेराजन् हरेः गुणानुश्रवणेभवतः याप्रीतिरस्तिसामनोमलंधुनोति २० शास्त्रेषु नृणां इयान् एव अर्थः क्षेमाय सुनिश्चितः २१ वैराग्येणनिर्गुणेब्रह्मणिदृढारतिःभवति २२ २३

---

१ नारायणेति पाठः मु० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अहिंसया "कर्मणामनसावाचासर्वभूतेषुसर्वदा । अक्लेशजननंप्रोक्तमहिंसात्विहयोगिभि"रित्युक्तया ।) पारमहंसचर्यया उपशमादिप्रधानयावृत्त्या स्मृत्याआत्महितानुसंधानेन । मुकुंदाचरितमेवअग्र्यंसीधुश्रेष्ठममृतंतच्चरितस्मृतिसुखेनेत्यर्थः । मार्गांतरस्यानिंदया । निरीहया योगक्षेमार्थं क्रियाराहित्येनशीतोष्णादिद्वंद्वसहनेनच । २४ कथयेत्यत्रोक्तमपिकथनंभक्तावंतरंगत्वेनपुनरुच्यते । तत्पराहरिभक्तास्तेषांकर्णपूराः कर्णालंकारभूतायेहरेर्गुणाः तेषामभिधानेनकीर्तनेन । सदसति कार्यकारणरूपे (प्रपंचे) २५ भवत्वन्यत्रासंगः आत्मनिरतिश्चत तःकिमतआह । यदानिष्ठांप्राप्तारतिर्भवतितदाआचार्यवान्सन्ज्ञानवैराग्ययोर्वेगेनअवीर्यंनिर्वासनंसत्जीवस्यकोशंआवरकंहृदयंपुमान्दहति । कथंभूतम् पंचमहाभूतप्रधानं । यद्वा । अविद्यास्मितारागद्वेषाभिनिवेशाः पंच तदात्मकम् उत्थितः प्रज्वलितोऽग्निर्योनिमरणिमिव । यद्वा यदारतिराचार्यानुग्रहश्चतदाज्ञानविरागयोर्वेगेनोत्थितः साक्षात्कारः अवीर्यंपुनःप्ररोहक्षमंयथानभवत्येवंहृदयंदहतिशेषंसमानम् २६ ततःकिमतआह । दग्धआशयोहृदयमुपाधिर्यस्य । अतएवमुक्ताः समस्तास्तद्गुणाः कर्तृत्वादयोयेन । आत्मनः सकाशाद्बहिर्घटादि अंतः सुखदुःखादि नैवविचष्टे नपश्यत्येव । कुतइत्यपेक्षायांद्रष्टृदृश्यप्रतीतेरंतःकरणहेतुत्वादित्याह । परोदृश्यः आत्माद्रष्टातयोर्यद्व्यवधानं भेदकंपूर्वमासीत् तस्य विनाशेसति । यथास्वप्नेराजाहमित्यारोपितंसैन्यादिद्रष्टारंदृश्यंसैन्यादिचस्वप्नावस्थानाशे नपश्यतितद्वत् २७ द्रष्टृदृश्यभेदप्रतीतेरंतःकरणहेतुत्वमन्वयव्यतिरेकाभ्यामुपपादयति आत्मानमिति । आत्मानं द्रष्टारं इंद्रियार्थंदृश्यंउभयोस्तयोः परंसंबंधहेतुमहंकारंच आशयेअंतःकरणेसत्येवजाग्रत्स्वप्नयोः पश्यति । अन्यदासुषुप्तौन (अंतःकरणलयेसति नैवपश्यति) तदुक्तम् । "दृश्यानुरंजितंद्रष्टृदृश्यंद्रष्ट्रनुरंजितम् । अहंवृत्त्योभयंरक्तं तन्नाशे द्वैततात्मन इति २८ एकस्मिन्नात्मनिदृश्यादिभेदप्रतीतिरौपाधिकीतिदृष्टांतेनस्पष्टयति । निमित्तइति । लोकेपिचसर्वत्रजलदर्पणादौभेदनिमित्तेसत्येवआत्मनोबिंबभूतस्यपरस्यप्रातिबिंबस्यचभेदंपश्यतिनतुजलाद्यभावे २९ तदेवंचतुर्भिरसंगात्मरत्योर्मोक्षहेतुत्वमुक्तं इदानीं अनात्मरतेः संसारहेतुत्वमाह इंद्रियैरितिचतुर्भिः । ध्यायतांगुणारोपेणस्मरतांपुंसामिंद्रियाणिस्मृतैर्विषयैराकृष्यंते । तैश्चमनआकृष्यते विषयासक्तिंप्राप्यते (इत्यर्थः) तच्चबुद्धेःसकाशात्तद्धर्मंचेतनांविचारसामर्थ्यं हरति एतच्चाविवेकिनानलक्ष्यतइतिदृष्टांतेनाह । (स्तंबइति । यथा) तीरजः कुशादिस्तंबोमूलैः (ह्रदात्सकाशात्) तोयंहरति तद्वत् ३० चित्तंचेतनांअनु । तस्यामपहृतायांस्मृतिःपूर्वापरानुसंधानंभ्रश्यति । एवंतद्रोधंज्ञानभ्रंशंआत्मन एवहेतोरात्मनोऽपह्नवंनाशंप्राहुः । ३१ एवंभूतोनाशोभवतु ततश्चकिमित्यतआह । यदाधिय (मात्मान–)–मधिकृत्यअन्यस्यविषयस्यप्रियतमत्वं । "आत्मनस्तुकामायसर्वं प्रियंभवती"तिश्रुतेः । तस्यात्यंतप्रियतमस्य आत्मनः स्वेनैवयोव्यतिक्रमोपह्नवः तस्मात् यः स्वार्थनाशः अतः परतरः स्वार्थनाशोनास्ति ३२

॥८५॥

श्लोकाः २४–३२

अहिंसयापारमहंस्यचर्ययास्मृत्यामुकुंदाचरिताग्र्यसीधुना ॥ यमैरकामैर्नियमैश्चाप्यनिंदयानिरीहयाद्वंद्वतितिक्षयाच २४ हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेनविजृंभमाणया ॥ भक्त्याह्यसंगःसदसत्यनात्मनिस्यान्निर्गुणेब्रह्मणिचांजसारतिः २५ यदारतिर्ब्रह्मणिनैष्ठिकीपुमानाचार्यवाञ्ज्ञानविरागरंहसा ॥ दहत्यवीर्यंहृदयंजीवकोशंपंचात्मकंयोनिमिवोत्थितोग्निः २६ दग्धाशयोमुक्तसमस्ततद्गुणोनैवात्मनोबहिरंतर्विचष्टे ॥ परात्मनोर्यद्व्यवधानंपुरस्तात्स्वप्नेयथापुरुषस्तद्विनाशे २७ आत्मानमिंद्रियार्थंचपरंयदुभयोरपि ॥ सत्याशयउपाधौवैपुमान्पश्यतिनान्यदा २८ निमित्तेसतिसर्वत्रजलादावपिपूरुषः ॥ आत्मनश्चपरस्यापिभिदांपश्यतिनान्यदा २९ इंद्रियैर्विषयाकृष्टैराक्षिप्तंध्यायतांमनः ॥ चेतनांहरतेबुद्धेःस्तंबस्तोयमिवह्रदात् ३० भ्रश्यत्यनुस्मृतिश्चित्तंज्ञानभ्रंशःस्मृतिक्षये ॥ तद्रोधंकवयःप्राहुरात्मापह्नवमात्मनः ३१ नातःपरतरोलोकेपुंसःस्वार्थव्यतिक्रमः ॥ यदध्यन्यस्यप्रेयस्त्वमात्मनःस्वव्यतिक्रमात् ३२

चूर्णिका

२४ २५ तयाअहंकारोनश्यति २६ २७ २८ २९ ३० ३१ ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कुतइत्यतआह । (अर्थस्य) (–कनकादेर–)-भिध्यानं (निरंतरांचिंतनम्) इंद्रियस्यार्थः कामस्तस्याभिध्यानंसर्वार्थनाशः । ज्ञानं (परोक्षं) विज्ञानंचापरोक्षंतस्मात्येनाभिध्यानेन (भ्रंशितो)
मुख्यतांस्थावरतां (मौढ्यमित्यर्थः) ३३ अनात्मरतेरनर्थहेतुत्वमुक्तं संगस्याप्याह नेति । यद्वस्तुधर्मादीनांविघातकंतस्मिन्संगं (नकुर्यात्) तमः संसारं (तरितुमिच्छुः) ३४ तुल्यवन्निर्देशात्पुरु
पार्थसाम्यभ्रांतिंवारयति । तत्रापीति । (आत्यंतिकतयानित्यत्वेन त्रैवर्गोधर्मादिरूपः) । कृतांतः कालः ३५ भयसंयुतत्वमेवाह । परेब्रह्मादयः अवरेअस्मदादयः गुणक्षोभात्अनुपश्चाद्भवंति । ईशः
कालस्तेनविध्वंसिताआशिषः (कामना) येषां (तेषाम्) ३६ यस्मादनात्मरतिरनर्थहेतुः । तत्तस्मात्जगतांजंगमानांतस्थुषांस्थावराणांचदेहादिभिः (तत्रासुभिः प्राणैः) आत्मनाहंकारेणचआ
॥८६॥ वृतानांहृदियश्चकास्तिप्रकाशतेतमवेहि । कथम् । सोस्मीति । सोस्तीतिपाठेसएवैकोस्तिततोन्यदसदित्यर्थः ननु जीवोहृदिचकास्तिनान्यस्तत्राह।क्षेत्रविदंजीवं तपति नियमर्तीति ।क्षेत्रवित्तपः तस्यभाव
स्तत्तातयाअंतर्यामिरूपेण । यद्वा क्षेत्रवित्तेअहंममतास्पंदेपातीतिक्षेत्रवित्तपः तेनरूपेण जीवस्तुपारतंत्र्यान्नपाति ननुकर्मजीवंनियच्छति न । आविःप्रत्यक्षः । कर्मतुनतथा । तर्हिबुद्धिः । न । प्रत्यक् प्र-
तिलोमंचकास्ति । बुद्धिस्तुपराक्विषयाकारेण । तर्ह्यहंकारः । न । विष्कक्व्याप्तत्वेनसतुपरिच्छिन्नः एवंभूतो योभगवान्तमवेहीति ३७ स्थावरजंगमादीनांहृदिचकास्तीत्युक्तेतेषांसत्त्वं तत्संबंधादीश्वर
स्यमालिन्यंचप्रसक्तंनिराकुर्वन्तद्रिक्तभक्त्यातंप्रणमति । यस्मिन्निदं विश्वंसदसदात्मतयाउत्कृष्टनिकृष्टभावेनकार्यकारणभावेनवा मायैवविभातितंप्रपद्ये । मायात्वेहेतुः । विवेकेनविधुतिर्निराकृतिर्यस्यतत्।
स्रजिवेतिवाशब्दोदृष्टांते । (मालायांसर्पवुद्धिरिव) । (तं)नित्यमुक्तम् । यतः परिशुद्धं । तत्कुतः विबुद्धम् । तत्त्वंसत्यम् । अतएवप्रत्यूढाअभिभूतानिरस्ताकर्माभिः कलिलामलिनाप्रकृतिर्येनतम् ३८
तमवेहीतिज्ञानमुपदिष्टंतस्यदुष्करत्वेन भक्तिमुपदिशति द्वाभ्याम् । यस्यपादपंकजयोः पलाशानिदलानिअंगुलयः तेषांविलासःकांतिः तस्यभक्त्यास्मृत्याकर्माशयं अहंकाररूपं हृदयग्रंथिं कर्मभिरेवग्रथितं
(उद्ग्रथयंतितद्वत्) रिक्तानिर्विषया (निराश्रयामतिर्येषाम्) रुद्धः प्रत्याहृतः स्रोतोगणः इंद्रियवर्गोयैस्तेनोद्ग्रथयंति । अरणंशरणम् ३९ ननु'ब्रह्मविदाप्नोतिपर'मितिश्रुतेःकथंयतयोनोद्ग्रथयंतीत्युच्यते तत्रा
ह । कृच्छ्रइति । अप्लवेशां नप्लवस्तरणहेतुः ईट्ईशोयेषांतेषांमहानिहतरणेकृच्छ्रः क्लेशः । तेहिअसुखेनयोगादिनाषड्वर्गनक्रंइंद्रियषड्वर्गग्राहंभवार्णवंतितीर्षंति । तत्तस्मात्उडुपंप्लवंकृत्वादुस्तरार्णं दुस्तरार्ण
वमित्यर्थः यद्वा अर्णशब्देसकाराभावआर्षः । दुस्तरोदकरूपंव्यसनमित्यर्थः ४०

श्लोकाः ३३–४०

अर्थेंद्रियार्थाभिध्यानंसर्वार्थापन्हवोनृणाम् ॥ भ्रंशितोज्ञानविज्ञानाद्येनाविशतिमुख्यताम् ३३ नकुर्यात्कर्हिचित्संगंतमस्तीव्रंतितीरिषुः ॥ धर्मार्थकाममो
क्षाणांयदत्यंतविघातकम् ३४ तत्रापिमोक्षएवार्थआत्यंतिकतयेष्यते॥ त्रैवर्ग्योर्थोयतोनित्यंकृतांतभयसंयुतः ३५ परेवरेचयेभावागुणव्यतिकरादनु ॥ नते
षांविद्यतेक्षेममीशविध्वंसिताशिषाम् ३६ तत्त्वंनरेंद्रजगतामथतस्थुषांचदेहेंद्रियासुधिषणात्मभिरावृतानाम् ॥ यःक्षेत्रवित्तपतयाहृदिविष्वगाविःप्रत्यक्चका
स्तिभगवांस्तमवेहिसोऽस्मि ३७ यस्मिन्निदंसदसदात्मतयाविभातिमायाविवेकविधुतिस्रजिवाहिबुद्धिः ॥ तंनित्यमुक्तपरिशुद्धविबुद्धतत्त्वंप्रत्यूढकर्मकलि
लप्रकृतिंप्रपद्ये ३८ यत्पादपंकजपलाशविलासभक्त्याकर्माशयंग्रथितमुद्ग्रथयंतिसंतः ॥ तद्वन्नरिक्तमतयोयतयोपिरुद्धस्रोतोगणास्तमरणंभजवासुदेवम् ३९
कृच्छ्रोमहानिहभवार्णवमप्लवेशांषड्वर्गनक्रमसुखेनतितीरषंति ॥ तत्त्वंहरेर्भगवतोभजनीयमंघ्रिंकृत्वोडुपंव्यसनमुत्तरदुस्तरार्णम् ४० ॥ ॥८६॥

चूर्णिका ३३ सः योगेन क्रमात् मुच्यते ३४ ३५ ३६ तस्मात् हेराजन् स्थिरचराणांहृदि यः प्रकाशते सएव अहमस्मीति अवेहि ३७ संतः यत्पादभक्त्या हृद्ग्रंथिं छिंदंति तंवासुदेवंभज
३८ ३९ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

आत्ममेधसा ब्रह्मविदा दर्शिता आत्मनोगतिस्तत्त्वं यस्मै सः ४१ब्रह्मन्निति संबोधनं प्राधान्यादेकस्य यूयमित्युक्तिः सर्वान्प्रति । (आपादयितुं निष्पादयितुं । प्रकटयितुमित्यर्थः) ४२ (अतः ससाकल्येन घृणालुभिः दयाशीलैः निष्पादितश्च एवमुपकर्तृभ्योयुष्मभ्यंकिंदेयमित्याह) आत्मनादेहेनसहसर्वराज्यादिकंमदीयंसाधूच्छिष्टंसाधुभिःस्वीयंसत्मह्यंप्रसादरूपेणदत्तंअतस्तत्रममसत्त्वाभावात् गुरुदक्षिणार्थं किंददे नहिपित्रादत्तंमोदकादितस्मै दानरूपेणप्रत्यर्प्यते ४३निवेदनंतुतदीयस्यैवतस्मैसमर्पणम् यथाभृत्योराज्ञेसेवारूपेणतांबूलादिकमर्पयति तथा मयापिसर्वंनिवेदितमित्याह । प्राणाइति (परिच्छदैरुपकरणैः सह) ४४ आत्मनः स्वत्वाभावं प्रपंचयति सेनापत्यंचेतिद्वाभ्याम् । दंडोदमस्तन्नेतृत्वम् ४५ वस्तेपरिधत्ते । अन्नमात्रंकेवलंभुंजते । नतुदानेस्वतंत्राः । ४६सत्यपिस्वत्वेसर्वस्वेनापिनगुरोः प्रत्युपकर्तुं शक्यमित्याह । यैरिति । आत्मवादेअध्यात्मविचारे । एकांततः निश्चयेन । निगमाभिर्वेदाविद्भिः । तेनित्यमनल्पकरुणाः स्वकृतेनैवदीनोद्धरणकर्मणातुष्यंतु । कोनामतत्कृतमुपकारंप्रतिस्वयमुपकरोति । उदपात्रंविना अंजलिंविना मयाअंजलिरेवतेभ्योबद्धइत्यर्थः । यद्वा विनोदपात्रं उपहासास्पदम् । प्रत्युपकारेप्रवृत्तोजनानामुपहासास्पदं भवेदित्यर्थः ४७ (आत्मयोगस्योपदेष्टृत्वेनपतयः प्रभवस्ते) खेभूवन्आकाशमार्गेणोद्गताः (मिषतांपश्यताम्) ४८ (महतां) धुर्योमुख्यः अध्यात्मशिक्षया यासंस्थितिरेकाग्रतातयाआत्मनिस्वस्वरूपेअवस्थितः सन् (आत्मानंपूर्णकाममिव) मेने । (इवशब्दएवार्थे) ४९ । तथाब्रह्मसात्कृतंब्रह्मण्यर्पितंयथाभवत्ये-(-वंकर्माणिश्रौतानिस्मार्तानिच) ५० निर्विषंगः कर्मस्वनासक्तः (आत्मानं) कर्माध्यक्षंकर्मसाक्षिणंउदासीनंमन्वानोऽकरोदितिपूर्वेणैवान्वयः नासज्जत इत्युत्तरेणवा । ५१

॥८७॥

श्लोकाः ४१/५१

॥ मैत्रेयउवाच ॥ ॥ सएवंब्रह्मपुत्रेणकुमारेणात्ममेधसा ॥ दर्शितात्मगतिःसम्यक्प्रशस्योवाचतंनृपः ४१ ॥ ॥ राजोवाच ॥ ॥ कृतोमेनुग्रहःपूर्वंहरिणार्त्तानुकंपिना ॥ तमापादयितुंब्रह्मन्भगवन्यूयमागताः ४२ निष्पादितश्चकार्त्स्न्येनभगवद्भिर्घृणालुभिः ॥ साधूच्छिष्टंहिमेसर्वमात्मनासहकिंददे ४३ प्राणादाराःसुताब्रह्मन्गृहाश्चसपरिच्छदाः ॥ राज्यंबलंमहीकोशइतिसर्वंनिवेदितम् ४४सेनापत्यंचराज्यंचदंडनेतृत्वमेवच॥सर्वलोकाधिपत्यंचवेदशास्त्रविदर्हति ४५ स्वमेवब्राह्मणोभुंक्तेस्वंवस्तेस्वंददातिच ॥ तस्यैवानुग्रहेणान्नंभुंजतेक्षत्रियादयः ४६ यैरीदृशीभगवतोगतिरात्मवादएकांततोनिगमिभिः प्रतिपादितानः॥तुष्यंत्वदभ्रकरुणाःस्वकृतेननित्यंकोनामतत्प्रतिकरोतिविनोदपात्रम् ४७मैत्रेयउवाच ॥ तआत्मयोगपतयआदिराजेनपूजिताः ॥ शीलंतदीयंशंसंतःखेभूवन्मिषतांनृणाम् ४८ वैन्यस्तुधुर्योमहतांसंस्थित्याध्यात्मशिक्षया ॥ आत्मकाममिवात्मानंमेनआत्मन्यवस्थितः ४९ कर्माणिचयथाकालंयथादेशंयथाबलम् ॥ यथोचितंयथावित्तमकरोद्ब्रह्मसात्कृतम् ५० फलंब्रह्मणिविन्यस्यनिर्विषंगःसमाहितः ॥ कर्माध्यक्षंचमन्वानआत्मानंप्रकृतेःपरम् ५१

चूर्णिका

॥ मैत्रेयउवाच ॥ ॥ एवंब्रह्मपुत्रेण दर्शितात्मगतिः सः उवाच ४१ ॥ ॥ राजोवाच ॥ ॥ पूर्वमेवहरिणा मे अनुग्रहः कृतः तंसंपादयितुं यूयं प्राप्ताः ४२ ४३ अतः प्राणादाराः सुताब्रह्मन्गृहाश्चसपरिच्छदाः राज्यंबलंमहीकोशः इतिसर्वंभवतां निवेदितम् ४४ ४५ ४६ ४७ ॥ ॥ मैत्रेयउवाच ॥ ॥ आदिराजेन पूजिताः सनकादयः खंप्रतिजग्मुः ४८ ४९ ५० ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ५२ अर्चिषिभार्यायाम् (स्वस्यसंमतान्विजयाश्वादीन्पुत्रान्) ५३ (लोकपालानांचंद्रादीनांगुणान्लोकरंजनादीन्स्वेस्वेकालेजगत्स्रष्टुःगोपीथायसंरक्षणायस्वयमेकएवदधार) ५४ । ५५ (गुणधारणप्रकारंविविच्यदर्शयन्तावद्राजशब्दंनिर्वक्तिमनइतिं । अपरोद्वितीयः) सोमश्चासौराजाच सइव (रंजनाद्राजेतिनामधेयमधात्) भुवोवसुधनंगृह्णन्विसृजंश्चअसौसूर्यवत् (सयथाभुवोवसुजलंगृह्णातिविसृजतिच) राज्ञः प्रतपनमाज्ञाकरणम् ५६ अग्निरिवतेजसादुर्धर्षः । द्यौः स्वर्गइव । (यथाकामंयाचकेच्छानुसारेणधनंवर्षतिस्म । तर्पयन्प्रीणयन् । पर्जन्योयथाजलंवर्षति) ५७ (समुद्रइव) समुद्रोयथागांभीर्येणैतावानितिनबुध्यतेतथासावभिप्रायतोदुर्बोधः । अचलराट्मेरुरिव । (धर्मराड्यमः ।) ५८ (गुप्तार्थोगुप्तधनः सर्वात्मासर्वत्रसंचारशक्तिः बलादिभिश्चमातरिश्वेववायुरिव) ५९ सर्वात्मासर्वत्रसंचारशक्तिः बलादिभिर्मातरिश्वेवभूतराट्श्रीरुद्रः (मनस्वीधीरोमृगराट्सिंहः) ६० (मनुः स्वायंभुवः ।) अजोब्रह्मा । (ब्रह्मवादे वेदवादे) ६१ आत्मवत्त्वेजितेंद्रियत्वे (गवादिषुभगवद्भक्तेषुच) भक्त्यादिभिः परार्थोद्यमेचआत्मनास्वेनैवतुल्यः निरुपमः ६२ पुंभिः सत्पुरुषैः (तत्रतत्रोर्ध्वंगीतयाउच्चैःकीर्तितयाकीर्त्या) रामः सीतापतिर्यथासतांकर्णरंध्रेषुप्रविष्टः ६३ इतिचतुर्थस्कंधेटीकायांद्वाविंशोध्यायः ॥ २२ ॥

॥८८॥

गृहेषुवर्त्तमानोपिससाम्राज्यश्रियान्वितः ॥ नासज्जतेंद्रियार्थेषुनिरहंमतिरर्कवत् ५२ एवमध्यात्मयोगेनकर्माण्यनुसमाचरन् ॥ पुत्रानुत्पादयामासपंचार्चिष्यात्मसंमतान् ५३ विजयाश्वंधूम्रकेशंहर्यक्षंद्रविणंवृकम् ॥ सर्वेषांलोकपालानांदधारैकःपृथुर्गुणान् ५४ गोपीथायजगत्स्रष्टुःकालेस्वेस्वेच्युतात्मकः ॥मनोवाग्वृत्तिभिःसौम्यैर्गुणैःसंरंजयन्प्रजाः ५५ राजेत्यधान्नामधेयंसोमराजइवापरः ॥ सूर्यवद्विसृजन्गृह्णन्प्रतपंश्चभुवोवसु ५६ दुर्धर्षस्तेजसेवाग्निर्महेंद्रइवदुर्जयः ॥ तितिक्षयाधरित्रीवद्यौरिवाभीष्टदोनृणम् ५७ वर्षतिस्मयथाकामंपर्जन्यइवतर्पयन् ॥ समुद्रइवदुर्बोधःसत्त्वेनाचलराडिव ५८ धर्मराडिवशिक्षायामाश्चर्येहिमवानिव ॥ कुबेरइवकोशाढ्योगुप्तार्थोवरुणोयथा ५९ मातरिश्वेवसर्वात्माबलेनसहसौजसा ॥ अविषह्यतयादेवोभगवान्भूतराडिव ६० कंदर्पइवसौंदर्येमनस्वीमृगराडिव ॥ वात्सल्येमनुवन्नृणांप्रभुत्वेभगवानजः ६१ बृहस्पतिर्ब्रह्मवादेआत्मवत्त्वेस्वयंहरिः॥ भक्त्यागोगुरुविप्रेषुविष्वक्सेनानुवर्तिषु ॥ ह्रियाप्रश्रयशीलाभ्यामात्मतुल्यःपरोद्यमे ६२ कीर्त्योर्ध्वगीतयापुंभिस्त्रैलोक्येतत्रतत्रह ॥ प्रविष्टःकर्णरंध्रेषुस्त्रीणांरामःसतामिव ६३ इति श्रीभा०म०च०स्कंधेपृथुचरितेद्वाविंशतितमोध्यायः २२

श्लोकाः ५२/६३

चूर्णिका ५२ ततः पृथुः कर्मफलंब्रह्मणि विन्यस्य अर्चिषिपंचपुत्रान् जनयामास ५३ विजयाश्वं धूम्रकेतुं हर्यक्षंद्रविणं वृकम् एवंपुत्रानुत्पाद्य सर्वेषां लोकपालानां पृथक्पृथक्गुणान् एकः दधार ५४ ५५ किंच यः पृथुः द्रव्यग्रहत्यागयोः सूर्यवत् ५६ आग्निरिव दुर्धर्ष इंद्रइवदुर्जयः क्षमयाभूरिव ५७ सागरइव दुर्बोधः धैर्येमेरुवत् ५८ शिक्षायांयमवत्कुबेरइवधनी ५९ सौंदर्ये कंदर्पइव इत्यादिविशिष्टः ६० ६१ ६२ राजात्रैलोक्येयकीर्त्यासतांकर्णरंध्रेषुरामइवप्रविष्टःआसीत् ६३ ॥ इतिचतुर्थस्कंधेचूर्णिकायांद्वाविंशोऽध्यायः ॥२२॥

१ पृथग्गुणानितिलिखितपुस्तकेपाठोवर्तते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.च. त्रयोविंशेसभार्यस्य यमेमित्यसमाधितः। विमानमाधिरुह्याप्यवैकुंठगतिरीर्यते ॥२॥ प्रवयसं वृद्धं दृष्ट्वातपोवनमगादितितृतीयेनान्वयः । स्वकृतोऽनुसर्गः अन्नादिसर्गः पुरग्रामादिसर्गश्च । वर्धितः अशेषः अ०
स्वानुसर्गोयेन । १ निष्पादितईश्वरादेशः प्रजापालनादिर्येन । जज्ञिवान्जातः (जगतोवृत्तिदः अन्नादिदानेन । तस्थुषोवृत्तिदः जलसेकादिदानेन) २ आत्मजांपृथ्वींविमनस्सुचिंतातुरासु । सदारः
टीका सभार्यः ३ (तत्रतपोवनेपि) अदाभ्योविघ्नैर्नाशयितुमशक्यानियमायस्य । वानप्रस्थानांसुसंमतेउग्रेतपसिआरब्धः प्रवृत्तः कर्तरिक्तः यथा स्वस्यधरामंडलस्य विजये पूर्वंमहतायत्नेनप्रवृत्तःतथेति
। ४ उग्रंतप (एव) दर्शयति । कंदमूलेतित्रिभिः क्वचित्कदाचित् । (अब्भक्षोजलाहारः) ५ चतुर्दिक्षु चत्वारोग्नयः उपरिसूर्यइति पंचानांतपःसंतापोयस्यसः पंचतपाः । आसारं (वृष्टिसंपातं) सह ॥२३॥
तेसौआसारषाट् । शिशिरऋतौ । स्थंडिलेशयोभूमिशयनः सर्वदा ६ (ऊर्ध्वरेताजितकामः) ७ तेनतपसाक्रमानुसिद्धेनशनैः प्राप्तेनध्वस्तानिकर्माणियस्य । अमलआशयोंतःकरणंयस्य (संनिरुद्धःषड्वर्गोमनः
॥८९॥ षष्ठानींद्रियाणियेन) छिन्नानिबंधनानिवासनायस्य ८ (योगमुपायं आध्यात्मिकंअध्यात्मशास्त्रभवम्) ९ (भगवद्विषयाः धर्माः संतियस्य । यततोयतमानस्य । अनन्यविषयाभगवदेकविषया) १० परि
कर्मणापरिचर्ययाशुद्धसत्त्वः आत्मामनोयस्य । तस्यज्ञानमभूत् । कीदृशम् । येननिजमुपाधिंजीवकोशंहृदयग्रंथिंसंशयानांअसंभावनादीनांपदमाश्रयंचिच्छेद । कीदृशेन । अनयाभक्त्यानिशितेनतीक्ष्णे
न कथंभूतया । तस्यभगवतः अनुसंस्मरणेनअनुपूर्तिःसंपूर्तिःयस्यास्तयानिशितेन ११ किंच । छिन्नाअन्यधीर्देहात्मबुद्धिर्यस्ययतोअधिगतात्मगतिः । अतएवनिरीहः प्राप्तासुसिद्धिषु निस्पृहः येनवयुने
नइदंसंशयपदंचिच्छेदतत्तत्यजेत्यक्तवान् । तत्प्रयत्नादप्युपररामेत्यर्थः । तस्ययोगसिद्धिष्वपिनिस्पृहत्वंयुक्तमेवेत्याह । तावन्नाप्रमत्तः किंतुप्रमत्तोभवति । तस्यश्रीकृष्णकथारतस्यान्नतासुलोभोजातइत्यर्थः । १२

॥ मैत्रेयउवाच ॥ ॥ दृष्ट्वात्मानंप्रवयसमेकदावैन्यआत्मवान् ॥ आत्मनावर्धिताशेषस्वानुसर्गःप्रजापतिः १ जगतस्तस्थुषश्चापिवृत्तिदोधर्मभृत्सताम् ॥ श्लोकाः
निष्पादितेश्वरादेशोयदर्थमिहजज्ञिवान् २ आत्मजेष्वात्मजांन्यस्यविरहाद्रुदतीमिव ॥ प्रजासुविमनस्स्वेकःसदारोगात्तपोवनम् ३ तत्राप्यदाभ्यनियमोवै
खानससुसंमते ॥ आरब्धउग्रतपसियथास्वविजयेपुरा ४ कंदमूलफलाहारःशुष्कपर्णाशनःक्वचित् ॥ अब्भक्षःकतिचित्पक्षान्वायुभक्षस्ततःपरम् ५ ग्रीष्मे १/१२
पंचतपावीरोवर्षास्वासारषाण्मुनिः ॥ आकंठमग्नःशिशिरउदकेस्थंडिलेशयः ६ तितिक्षुर्यतवाग्दांतऊर्ध्वरेताजितानिलः ॥ आरिराधयिषुःकृष्णमचरत्तपउ
त्तमम् ७ तेनक्रमानुसिद्धेनध्वस्तकर्मामलाशयः ॥ प्राणायामैःसन्निरुद्धषड्वर्गश्छिन्नबंधनः ८ सनत्कुमारोभगवान्यदाहाध्यात्मिकंपरम् ॥ योगंतेनैवपुरुष
मभजत्पुरुषर्षभः ९ भगवद्धर्मिणःसाधोःश्रद्धयायततःसदा ॥ भक्तिर्भगवतिब्रह्मण्यनन्यविषयाभवत् १० तस्यानयाभगवतःपरिकर्मशुद्धसत्त्वात्मनस्तदनु
संस्मरणानुपूर्त्या ॥ ज्ञानंविरक्तिमद्भून्निशितेनयेनचिच्छेदसंशयपदंनिजजीवकोशम् ११ छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेच्छिनदिदंवयुनेनये
न ॥ तावन्नयोगगतिभिर्यतिरप्रमत्तोयावद्गदाग्रजकथासुरतिंनकुर्यात् १२

चूर्णिका ॥ मैत्रेयउवाच ॥ ॥ वैन्यः एकदा आत्मानं वृद्धं दृष्ट्वा संपादितईश्वराज्ञः आत्मजेषु पृथ्वीं न्यस्य प्रजासु विमनासुसतीषु सदारः तपोवनं अगात् १ २ ३ तत्रउग्रंतपः आरब्ध
वान् ४ किंचित्कालं कंदमूलफलाहारः क्रमात् अब्भक्षः वायुभक्षः ५ ग्रीष्मेपंचतपाः वर्षासु पर्जन्यसहः शिशिरेउदकेआकंठमग्नःतपस्तेपे ६ ७ ८ एवंवृत्तः सनत्कुमारोपादि ॥८९॥
ष्टयोगेन पुरुषंअभजत् ९ तदातस्यब्रह्मणिअनन्यविषयाभक्तिर्जाता १० तयाज्ञानंविरक्तिश्चअभूत्तेनजीवकोशंचिच्छेद ११ एवंसः आत्मनिआत्मानंसंयोज्य कालेब्रह्मभूतः
सन्वायूत्क्रमणमार्गेषट्चक्रभेदंकृत्वा भक्तिज्ञानवैराग्यवीर्येणस्वरूपस्थःसन्प्रभुः देहंजहौ १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

१३ देहत्यागप्रकारमाह संपीड्येति पंचभिः। पायुंगुदंसंपीड्येति मुक्तासनं सूचितं(“संपीड्यसीवनींसूक्ष्मांगुल्फेनैवतुमध्यतः। सव्येदक्षिणगुल्फेनमुक्तासनमितीरित”मित्युक्तेः) मूलाधाराद्वायुमुत्सारयन् उर्ध्वंनयन्नाभ्यामवस्थाप्यततः कोष्ठेष्ववस्थाप्यअयूयुजदित्युत्तरेणान्वयः । कोष्ठान्येवाह। हृदादीनांद्वंद्वैक्यम्। शीर्षंभ्रूमध्यंतस्मिन् । १४ तंवायुंपाठांतरेएवमसून्प्राणान्उत्सर्पयन्क्रमेणमूर्ध्निब्रह्मरंध्रेआवेश्य ततोदेहारंभकपंचभूतानि समष्टिभूतेषु विलापितवान्। तदाह । वायुं (देहगतं) वायौ (समष्टिभूते) अयूयुजत्एकीकृतवान् । कायंदेहगतंकठिनांशंक्षितौ । १५ खानिइंद्रियाच्छिद्राणि । द्रवांशंतोये । तदेवंदेहंप्रविलाप्याद्वितीयात्मप्रतिपत्त्यर्थं महाभूतानामपिलयमाह । क्षितिमंभस्येकीकृतवान् तत्अंभः । अदस्तेजः । अमुंवायुम् १६ तदेवंतामसाहंकारकार्यस्यआकाशपर्यंतस्यलयमुक्त्वा सात्विकराजसाहंकारकार्याणांलयमाह । इंद्रियेष्विति । इंद्रियेषुमनइतिदेवानामप्युपलक्षणम्। सविकल्पकज्ञानेमनसइंद्रियैराकर्षणात्तेषुलयाभिधानं। नतुकार्यत्वात् । तदुक्तंगीतासु । “इंद्रियाणांहि चरतांयन्मनोनुविधीयत”इति। अत्रचइंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतांमनइतिच । इंद्रियेषुनभइतिपाठेप्ययमर्थः । भट्टादीनांमतेनभश्चाक्षुषं । केषांचिन्मानसम्। आनुमानिकत्वमतेपींद्रियव्यापारोस्त्येव । नभोगुणश्चशब्दः श्रोत्रियग्राह्यः अतइंद्रियग्राह्यत्वादिंद्रियेषुनभोविलापितामिति । तानींद्रियाणि यथोद्भवम्। उद्भवोत्रवृत्तिलाभः। सचविषयाधीन इति श्रोत्रादीनांविषयेषुशब्दादिषुलयः। यद्वा तन्मात्रकार्याण्येवेंद्रियाणिमनोप्यपंचीकृतपंचतन्मात्रकार्यम् । अहंकारिकत्वाभिधानंतदधीनत्वविवक्षयेत्यविरोधः । भूतादिनाअहंकारेण (अमूनि) प्रागवशिष्टनभःसहितानींद्रियाणि (उत्क्षिप्य) उत्कृष्यपरतोनीत्वाभूतादौक्षिप्त्वातेनसहमहत्तत्वेसंदधेइत्यर्थः १७सर्वेषांगुणानांकार्याणांविन्यासः स्थितिर्यस्मिन्तं महांतं मायामयेमायोपाधिप्रधानेजीवे । तंचानुशयमुपाधिं यः पूर्वमनुशयीपुमान्जीवः असौ पृथुः ब्रह्मणिस्थितःसन्नजहादित्यर्थः १८ वनप्रवेशमारभ्यराज्ञीकथामाह । आर्चिर्नामेतिचतुर्भिः । अनुगताअनुजगाम । अतदर्हातदापिनार्हतिया। तत्किम् । पद्भ्यांभुवः स्पर्शनामितियत् । १९ भर्तुर्व्रतंयद्भूमिशयनादितस्मिन्धर्मेयानिष्ठातया ऋषीणामियमार्षीदेहयात्राकंदमूलादिवृत्तिस्तयाचआर्तिंदुःखंनप्राप। तत्रहेतुः। प्रेयसः करेणस्पर्शनंमानश्चताभ्यांनिर्वृतिःआनंदोयस्याः २०

श्लोकाः १३/२०

एवंसवीरप्रवरःसंयोज्यात्मानमात्मनि ॥ ब्रह्मभूतोदृढंकालेतत्याजस्वंकलेवरम् १३ संपीड्यपायुंपार्ष्णिभ्यांवायुमुत्सारयञ्शनैः ॥ नाभ्यांकोष्ठेष्ववस्थाप्यहृदुरःकंठशीर्षणि १४ उत्सर्पयंस्तुतंमूर्ध्निक्रमेणावेश्यनिस्पृहः ॥ वायुंवायौक्षितौकायंतेजस्तेजस्ययूयुजत् १५ खान्याकाशेद्रवंतोयेयथास्थानंविभागशः ॥ क्षितिमंभसितत्तेजस्यदोवायौनभस्यमुम् १६ इंद्रियेषुमनस्तानितन्मात्रेषुयथोद्भवम् ॥ भूतादिनामून्युत्क्षिप्यमहत्यात्मनिसंदधे १७ तंसर्वगुणविन्यासंजीवेमायामयेन्यधात् ॥ तंचानुशयमात्मस्थमसावनुशयीपुमान् ॥ ज्ञानवैराग्यवीर्येणस्वरूपस्थोजहात्प्रभुः १८ आर्चिर्नाममहाराज्ञीतत्पत्न्यनुगतावनम्॥सुकुमार्यतदर्हाचयत्पद्भ्यांस्पर्शनंभुवः १९ अतीवभर्तुर्व्रतधर्मनिष्ठयाशुश्रूषयाचार्षदेहयात्रया ॥ नाविंदतार्तिंपरिकर्शितापिसाप्रेयस्करस्पर्शनमाननिर्वृतिः २०

चूर्णिका

१३ १४ १५ १६ १७ १८ तत्पत्नी आर्चिर्नाम पतिदेहं विपन्नं दृष्ट्वा किंचिद्विलप्य अद्रिसानुनिचितांआरोप्यतत्कालोचितं कृत्यं विधाय स्नात्वा भर्तुः उदकंदत्त्वादिविस्थान्त्रिदशांश्च नत्वा वन्हिं त्रिः परीत्य भर्तृपादं ध्यायती वन्हिं विवेश १९ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पृथिव्याः पत्युः । दुहितृत्वंतुतस्यादेवताद्रूपेण । विपन्नंनष्टमखिलंचेतनादिकं यस्मिन् तथाभूतं देहमालक्ष्य तद्देहं चितामारोपयत् । २१ कृत्यं तत्कालोचितंविधायहृदिन्याजलेआप्लुतास्नातासतीभर्तुरुदकं दत्त्वादिविअंतरिक्षेस्थितान्नत्वावह्निंत्रिःप्रदक्षिणीकृत्य २२ देवैः सहिता (देवानांपत्न्यः) २३ गृणंतिस्मअभाषंत २४ (श्रीर्लक्ष्मीस्वरूपावधूः) २५ (एषाअर्चिर्नामपत्नीवैन्यमनुव्रजतिनूनमहो पश्यत) असतीनांदुर्विभाव्येनकर्तुमशक्येनकर्मणा २६ भगवान्पद्यतेगम्यतेअनेनेतितथातन्नैष्कर्म्यज्ञानंयेचंचलायुषोपिसाधयंतितेषां (मर्त्यानां) अन्यदेवादिपदंकिंतुदुर्लभंनकिंचिदपिदुर्लभमित्यर्थः २७ अभक्तंशोचंति सवंचितइति । यतआत्मनेद्रुह्यति (आत्मध्रुक्) यो (महतातपसा) अपवर्गसाधनंमानुष्यंलब्ध्वापि विषयेष्वासक्तिंयाति । २८ (वैन्यः पृथुर्यंप्रापतंपत्युर्लोकंगता) अच्युतेएवआशयोमनोयस्य । २९ (उपसंहराति इत्थमिति भगवतांकीर्तिमतांअतिशयेनप्रधानत्वाद्भगवत्तमः) ३० ३१ विशांपश्वादनिंवैश्यानांवापातिः स्यात् शूद्रः शृण्वन्नितिशेषः तस्यपाठनधिकारात् ३२ (आहृतः सन्त्रिवारंश्रुत्वा) ३३ (नास्तिस्पष्टाविश्रुताकीर्तिर्यस्यससुकीर्तिर्भवति) ३४

श्लोकाः २१/३४

देहंविपन्नाखिलचेतनादिकंपत्युःपृथिव्यादयितस्यचात्मनः ॥ आलक्ष्यकिंचिच्चविलप्यसासतीचितामथारोपयदद्रिसानुनि २१ विधायकृत्यंहृदिनीजलाप्लुतादत्त्वोदकंभर्तुरुदारकर्मणः ॥ नत्वादिविस्थांस्त्रिदशांस्त्रिःपरीत्यविवेशवह्निंध्यायतीभर्तृपादौ २२ विलोक्यानुगतांसाध्वींपृथुंवीरवरंपतिम् ॥ तुष्टुवुर्वरदादेवैर्देवपत्न्यःसहस्रशः २३ कुर्वत्यःकुसुमासारंतस्मिन्मंदरसानुनि ॥ नदत्स्वमरतूर्येषुगृणंतिस्मपरस्परम् २४ ॥ ॥ देव्यऊचुः ॥ ॥ अहोइयंवधूर्धन्यायाचैवंभूभुजांपतिम् ॥ सर्वात्मनापतिंभेजेयज्ञेशंश्रीर्वधूरिव २५ सैषानूनंव्रजत्यूर्ध्वमनुवैन्यंपतिंसती ॥ पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येनकर्मणा २६ तेषांदुरापंकिंत्वन्यन्मर्त्यानांभगवत्पदम् ॥ भुविलोलायुषोयेवैनैष्कर्म्यंसाधयंत्युत २७ सवंचितोबतात्मध्रुक्कृच्छ्रेणमहताभुवि ॥ लब्ध्वापवर्ग्यंमानुष्यंविषयेषुविषज्जते २८ ॥ ॥ मैत्रेयउवाच ॥ ॥ स्तुवंतीष्वमरस्त्रीषुपतिलोकंगतावधूः ॥ यंवाआत्मविदांधुर्योवैन्यःप्रापाच्युताशयः २९ इत्थंभूतानुभावोसौपृथुःसभगवत्तमः ॥ कीर्तितंतस्यचरितमुद्दामचरितस्यते ३० यइदंसुमहत्पुण्यंश्रद्धयावहितःपठेत् ॥ श्रावयेच्छृणुयाद्वापिसपृथोःपदवीमियात् ३१ ब्राह्मणोब्रह्मवर्चस्वीराजन्योजगतीपतिः ॥ वैश्यःपठन्विट्पतिःस्याच्छूद्रःसत्तमतामियात् ३२ त्रिःकृत्वइदमाकर्ण्यनरोनार्यथवादृता ॥ अप्रजःसुप्रजतमोनिर्धनोधनवत्तमः ३३ अस्पष्टकीर्तिःसुयशामूर्खोभवतिपंडितः ॥ इदंस्वस्त्ययनंपुंसाममंगल्यनिवारणम् ३४

चूर्णिका

२१ २२ तदासहस्रशोदेवपत्न्यः तुष्टुवुः २३ कुसुमवृष्टिंकुर्वंत्यः अमरतूर्येषुनदत्सुपरस्परंगृणंतिस्म २४ ॥ ॥ देव्यऊचुः अहोइयंवधूर्धन्या यतः सर्वात्मनापतिंभेजे २५ किंच या अस्मान्अतीत्य पत्यासहऊर्ध्वंव्रजति २६ तांपश्यत भुवियेलोलायुषः तेपिहरिभक्त्यामोक्षंसाधयंतिकिमाश्चर्यम् २७ २८ ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंस्तुवंतीषुवधूः पतिलोकंगता पृथुः भगवद्रूपतां प्राप २९ इत्थंपृथुचरितंतेकथितम् इदंपुण्यंयःपठेत् शृणुयात् श्रावयेद्वा सः पृथोःपदवींइयात् ३० ३१ स्वर्ग्यंआयुष्यंधन्यं धर्मकामार्थमोक्षदंइदंश्रुत्वाअप्रजः सुप्रजः निर्धनःधनी मूर्खःपंडितोभवेत् ३२ ३३ ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका. (चतुर्णांधर्मादीनांमुख्यंकारणं अतस्तत्सिद्धिमभीप्सुभिरेतदनुश्राव्यम्) ३५ (विजयाभिमुखः शत्रुविजयेप्रवृत्तः यावभियाति ते राजानः अग्रे पुरतः)३६यद्यपिफलानि फलानि भवंतितथापि मुक्तान्यसंगः (त्यक्तविषयाभिलाष-)–एवश्रवणादिकुर्यात् ३७ (हेवैचित्रवीर्यविदुर) महतोभगवतोमाहात्म्यस्यसूचकम् । पार्थवींपृथुसंबंधिनींपार्थिवीमितिवापाठः । (तत्रापिपार्थिवः पृथुः) ३८ प्रथयन् कीर्तयन् । भवाब्धौपोतोनौकापादौयस्य (तस्मिन्) ३९ इतिचतुर्थस्कंधेटीकायांत्रयोविंशोध्यायः२३॥ ॥एकादशभिरध्यायैःपृथोश्चरितमीरितम् । प्रचेतसामथाष्टाभिस्तन्मध्येपंचभिः पितुः॥१॥चतुर्विंशेप्रपौत्रात्पुत्रपृ ॥२४॥

॥९२॥ थोः प्राचीनबर्हिषः । प्रचेतसांजनिस्तेभ्योरुद्रगीतंचवर्ण्यते ॥२॥ अधिराजआसीदित्यर्थः । यवीयोभ्यः कनिष्ठेभ्यः काष्ठादिशः ।१ तुर्यांचतुर्थींउत्तरामित्यर्थः २ शक्राल्लब्ध्वापृथोरश्वमेधेअश्वविजयावस रे (अंतर्धानसंज्ञितआसीत्शिखंडिन्यांप्रियाम्) ३ अपत्यत्रयमेवाह पावकइति । पुरायः शापस्तस्मान्मनुष्येषूत्पन्नाः संतः योगगतिंअग्नित्वंप्राप्ताः । ४ । नभस्वत्यांअन्यस्यांभार्यायाम् अंतर्धानविशे षणंयइति । एतेनशक्रादंतर्धानगतिलाभेकारणमुक्तम् ५ सचांतर्धानोराज्ञांवृत्तिकरादानादिभिर्दारुणांपरपीडात्मिकांमन्यमानोविससर्जह (तत्रशुल्कंघटादिदेयम्)६ हंविस्वानांक्लेशमितिहंसस्तंपुरुषंपूर्ण म् । कुशलंपुण्यंतद्रूपेणसमाधिना । ७ (हेविदुर) ८

श्लोकाः धन्यंयशस्यमायुष्यंस्वर्ग्यंकलिमलापहम् ॥ धर्मार्थकाममोक्षाणांसम्यक्सिद्धिमभीप्सुभिः ॥ श्रद्धयैतदनुश्राव्यंचतुर्णांकारणंपरम् ३५ विजयाभिमुखो राजाश्रुत्वैतदभियातियान् ॥ बलिंतस्मैहरंत्यग्रेराजानःपृथवेयथा ३६ मुक्तान्यसंगोभगवत्यमलांभक्तिमुद्वहन् ॥ वैन्यस्यचरितंपुण्यंशृणुयाच्छ्रावयेत्पठेत् ३७ वैचित्रवीर्याभिहितंमहन्माहात्म्यसूचकम् ॥ अस्मिन्कृतमतिर्मर्त्यःपार्थवींगतिमाप्नुयात् ३८ अनुदिनमिदमादरेणशृण्वन्पृथुचरितंप्रथयन्विमुक्तसंगः ॥ भगवतिभवसिंधुपोतपादेसचनिपुणांलभतेरतिंमनुष्यः ३९ ॥ ॥ इतिश्रीभा० म०च०स्कंधेत्रयोविंशोध्यायः २३ ॥मैत्रेयउवाच॥ विजिताश्वोधि ३५/८

राजासीत्पृथुपुत्रःपृथुश्रवाः ॥ यवीयोभ्योददात्काष्ठाभ्रातृभ्योभ्रातृवत्सलः १ हर्यक्षायादिशत्प्राचींधूम्रकेशायदक्षिणाम् ॥ प्रतीचींवृकसंज्ञायतुर्यांद्रावि णसेविभुः २ अंतर्धानगतिंशक्राल्लब्ध्वांतर्धानसंज्ञितः ॥ अपत्यत्रयमाधत्तशिखंडिन्यांसुसंमतम् ३ पावकःपवमानश्चशुचिरित्यग्नयःपुरा ॥ वसिष्ठशापादु त्पन्नाःपुनर्योगगतिंगताः ४ अंतर्धानोनभस्वत्यांहविर्धानमविंदत ॥ यइंद्रमश्वहर्त्तारंविद्वानपिनजघ्निवान् ५ राज्ञांवृत्तिकरादानदंडशुल्कादिदारुणाम् ॥ मन्यमानोदीर्घसत्रव्याजेनविससर्जह ६ तत्रापिहंसंपुरुषंपरमात्मानमात्मदृक् ॥ यजंस्तल्लोकतामापकुशलेनसमाधिना ७ हविर्धानाद्धविर्धानीविदुरासू तषट्सुतान् ॥ बर्हिषदंगयंशुक्लंकृष्णंसत्यंजितव्रतम् ८

चूर्णिका ३५ ३६ ३७ ३८ ३९ ॥ इतिचतुर्थेत्रयोविंशः २३ ॥ ॥ मैत्रेयउवाच ॥ ॥ पृथुपुत्रः विजिताश्वः भ्रातृभ्योदिशःददौ १ हर्यक्षायप्राचीं धूम्रकेशायदक्षिणांवृकायप्रती ॥९२॥

चीम् द्राविणसेउदीचीमादिशत् २ ततः सः विजिताश्वः शिखंडिन्यां ३ पावकः पवमानः शुचिरितिपुत्रत्रयं जनयामास अग्नयएवतेवासिष्ठशापात् उत्पन्नाः पुनः अग्नित्वंते प्राप्ताः सएवनभस्वत्यां अन्यभार्यायां हविर्धानं अजनयत् ४ ५ सःहविर्धानः राजवृत्तिंदारुणीं मत्वा दीर्घसत्रव्याजेनतांत्यक्त्वा हरिंयजन् तल्लोकंप्राप ६ ७ हविर्धा नात्हविर्धान्यांषट्पुत्राः जाताः बर्हिषत् गयः शुक्लः कृष्णः सत्यः जितव्रतः ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हाविर्धानिर्हविर्धानस्यपुत्रः योगेषुचप्राणायामादिषु ९ क्रियाकांडनिष्णातत्वमाह । यस्येति । इदंवसुधातलंदेवयजनंयज्ञवाटंवितन्वतः (अनुयज्ञं)यज्ञैकोयज्ञः कृतः तस्समीपएवयज्ञांतरंकुर्वतः सतइत्यर्थः । अतएवप्राचीनबर्हिरित्युच्यते । १० समुद्रस्यकन्यांदेवदेवेनब्रह्मणाउपदिष्टाम् । शतद्रुतिंनाम । किशोरींबालांपरिक्रमंतींप्रदक्षिणंगच्छंतींसुष्ठुप्रशस्तंयथातथाअलंकृतांशुकीमिवेति । एवंव्याख्यायते'सप्तर्षीणांसन्नेतद्भार्यादर्शनेनाग्निः कामसंतप्तोभूत् । तंचतद्भार्यास्वाहानामसप्तर्षिभायारूपधारिणीसती रमयामासरमयित्वाचतद्रेतःशुकीरूपेणशरस्तंबेनिधायागच्छत्'। तांयथासप्तर्षिभार्याभ्रांत्याअग्निः कामितवान् । तद्वदिति । स्तुकीमिवेतिपाठेस्तोकघृतधारामिवेत्यर्थः ११ सूर्पयानवोढयैवविबुधादयोविजिताअभिभूताःतच्चनूपुरैः क्वणयंत्यैव । ध्वनिमात्रेणेत्यर्थः । १२ तुल्यंनामव्रतमाचारश्चयेषाम् (सर्वेपिप्रचेतोनामानः । सर्वेषांचसममाचरणमित्यर्थः) धर्मस्नाताः धर्मपारगाः १३ (तपसेतपश्चरितुं । तपसांतपश्चर्यया)तपसापतिंहरिंआर्चन्अर्चयामासुः । १४ (एषांकोगुरुः किंजप्यं किंध्येयं तत्राह । यदुक्तमिति) १५ (यद्वायच । अर्थवत्सप्रयोजनम्) १६ (संगमोदुर्लभः खलु) मुनयोपि (असंगात्) संगत्यागेनआप्तुमिष्टंयंदध्युरेवकेवलंनतुप्रापुः तेनाशिवेन १७ ननुमुनीनांकिंतद्ध्यानेनघोरत्वादित्याशंक्याह । आत्मारामो (लोककल्पस्य) लोकरचनायाः (राधसे) पालनाय १८ गुर्वाज्ञाकारिणांशिवदर्शनंस्वतएवभवतीत्याशयेनाह प्रचेतसइति (तपसिविषयेश्चादरयुक्तंचेतोयेषांते) १९ समुद्रमुपसमुद्रात्किंचिन्न्यूनम् । ''उपोऽधिकेचे''तिकर्मप्रवचनीयः । (सलिलेआशेरतेसलिलाशयाः) प्रसन्नाः सलिलाशयामत्स्यादयोयस्मिन् । २० नीलोत्पलादीनामाकरंजन्मस्थानं । उत्पलांभोजकल्हाराणिरात्रिदिनसंध्याविकाशीनि । इंदीवरंनीलोत्पलंतस्यपुनरुक्तिः प्राचुर्यज्ञापनार्थं । हंसादिभिर्निकूजितम् २१

श्लोकाः ९/२१

बर्हिषत्सुमहाभागोहाविर्धानिःप्रजापतिः ॥ क्रियाकांडेषुनिष्णातोयोगेषुचकुरूद्वह ९ यस्येदंदेवयजनमनुयज्ञंवितन्वतः ॥ प्राचीनाग्रैःकुशैरासीदास्तृतं
वसुधातलम् १० सामुद्रींदेवदेवोक्तामुपयेमेशतद्रुतिम् ॥ यांवीक्ष्यचारुसर्वांगींकिशोरींसुष्ठ्वलंकृताम् ॥ परिक्रमंतीमुद्वाहेचकमेऽग्निःशुकीमिव ११ विबुधासुरगं
धर्वमुनिसिद्धनरोरगाः ॥ विजिताःसूर्ययादिक्षुक्वणयंत्यैवनूपुरैः १२ प्राचीनबर्हिषःपुत्राःशतद्रुत्यांदशाभवन् ॥ तुल्यनामव्रताःसर्वेधर्मस्नाताःप्रचेतसः १३
पित्रादिष्टाःप्रजासर्गेतपसेऽर्णवमाविशन् ॥ दशवर्षसहस्राणितपसार्चंस्तपस्पतिम् १४ यदुक्तंपथिदृष्टेनगिरिशेनप्रसीदता ॥ तद्ध्यायंतोजपंतश्चपूजयंतश्चसंय
ताः १५ विदुरउवाच ॥ प्रचेतसांगिरित्रेणयथासीत्पथिसंगमः ॥ यदुताहहरःप्रीतस्तन्नोब्रह्मन्वदार्थवत् १६ संगमःखलुविप्रर्षेशिवेनेहशरीरिणाम् ॥ दुर्लभो
मुनयोदध्युरसंगाद्यमभीप्सितम् १७ आत्मारामोऽपियस्त्वस्यलोककल्पस्यराधसे ॥ शक्त्यायुक्तोविचरतिघोरयाभगवान्भवः १८ मैत्रेयउवाच ॥ प्रचेतसः
पितुर्वाक्यंशिरसाऽऽदायसाधवः ॥ दिशंप्रतीचींप्रययुस्तपस्यादृतचेतसः १९ समुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः ॥ महन्मनइवस्वच्छंप्रसन्नसलिलाश
यम् २० नीलरक्तोत्पलांभोजकल्हारेंदीवराकरम् ॥ हंससारसचक्राह्वकारंडवनिकूजितम् २१

पूर्णिका तत्रबर्हिषत् कर्मकांडेषुनिपुणः प्राचीनाग्रकुशैः येनभूमिः आस्तृता तेनतस्यप्राचीनबर्हिरितिनामजातम् ९ १० सः समुद्रकन्यांशतद्रुतिं उपयेमे ११ १२ तस्यांप्राचीनबर्हिः प्रचेतसोनामधर्मपारगान्दशपुत्रान्जनयामास १३ तेचदशप्रचेतसः पित्राप्रजासर्गेआदिष्टाः संतः पितुः वाक्यंशिरसाआदायतपःकर्तुंप्रतीच्यांदिशिसमुद्रं ययुः
१४ १५ १६ १७ १८ १९ २० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मत्तानांभ्रमराणांसौस्वर्येण (सुस्वरत्वेन) हृष्टरोमाण–(–इवभासमाना) लतांघ्रिपायस्मिन् । पद्मकोश (संबंधिरजो) दिक्षुविक्षिपतापवनेनउत्सवोयस्मिन् २२तत्रमृदंगपणवादिवाद्यमनुपश्चात् दिव्यैर्मार्गैः स्वरेभैर्दमनोहरंगांधर्वगानमाकर्ण्य (विसिस्म्युः) विस्मयंप्राप्ताः । पाठांतरेमृदंगपणवादिअवत्रक्षत्तेषांध्वनिमतिरस्कुर्वदित्यर्थः २३ तेचत्रिलोचनंवीक्ष्यजाताश्चर्याः प्रणेमुरित्युत्तरेणान्वयः २४ तप्तहे मराशिसदृशकांतिं शितिर्नीलः कंठोयस्यतम् २५ २६ वेदिषदोबर्हिषदः (युष्माभि–)–श्चिकीर्षितं भगवदाराधनं मयाविदितम् २७ अनुग्रहकारणमाह । यः साक्षाद्वासुदेवंप्रपन्नः सहिमेप्रियः । कथंभू तम् । रंहसः सूक्ष्मात्त्रिगुणात्प्रधानात्जीवसंज्ञितात्पुरुषाच्चपरंप्रकृतिपुरुषयोर्नियंतारामित्यर्थः ।२८ तत्किम्। तस्यमहत्तमत्वादित्याह। स्वधर्मनिष्ठः पुमान् बहुभिर्जन्मभिः विरिंच्यत्तांप्राप्नोति । ततोपि ॥९४॥ पुण्यातिशयेनमामेति । भागवतस्तुअथदेहांतेअव्याकृतंप्रपंचातीतंवैष्णवंपदमेति । यथाहंरुद्रोभूत्वाआधिकारिकवद्वर्तमानः विबुधादेवाश्चाधिकारिकाः कलात्ययेअधिकारांतेलिंगभंगेसत्येष्यंति । २९ अथभागवतत्वाद्यूयंमेप्रियाः स्थ (यथाभगवानितिप्रीत्यतिशयेदृष्टांतः) भवद्भिरपिमयिप्रीतिः कार्येत्याशयेनाह मदन्योभागवतानांचप्रेयान्नास्ति । ३० अतइदंजप्तव्यंश्रूयतामिति । विविक्तं असंकीर्णं यथाभवति ३१ (तथाअनुक्रोशः करुणातद्युक्तंहृदयंयस्य) सृष्ट्यादौब्रह्मणास्रष्ट्वापुत्रेभ्यःप्रोक्तमिष्टदम् । स्तोत्रंप्राहप्रचेतोभ्यः कृपयाभगवान्शिवः३२(हेभगवन्) तेतवजितमुत्कर्षः आत्मविद्धुर्याणांज्ञानि श्रेष्ठानांस्वस्तयेशोमनसत्तायै । स्वानंदलाभायेत्यर्थः (तवोत्कृष्टंचरितं श्रवणादिनास्वानंदंददातीतिभावः) अतोमेस्वस्तिस्वानंदसत्तास्तु । ननुममोत्कर्षोमदर्थएवकिंनस्यात्तत्राह । भवताराधसास्वानंद रूपेणराद्धंसिद्धं त्वंपरमानंदरूपेणनित्यंस्थितइत्यर्थः । अतएवंभूतायात्मनेतुनमः । सर्वस्मैसर्वरूपायच ३३

श्लोकाः २२/३३

मत्तभ्रमरसौस्वर्यहृष्टरोमलतांऽघ्रिपम् ॥ पद्मकोशरजोदिक्षुविक्षिपत्पवनोत्सवम् २२ तत्रगांधर्वमाकर्ण्यदिव्यमार्गमनोहरम् ॥ विसिस्म्यूराजपुत्रास्ते मृदंगपणवाद्यनु २३ तर्ह्येवसरसस्तस्मान्निष्क्रामंतंसहानुगम् ॥ उपगीयमानममरप्रवरंविबुधानुगैः २४ तप्तहेमनिकायाभंशितिकंठंत्रिलोचनम् ॥ प्रसादसुमुखंवीक्ष्यप्रणेमुर्जातकौतुकाः २५ सतान्प्रपन्नार्तिहरोभगवान्धर्मवत्सलः ॥ धर्मज्ञान्शीलसंपन्नान्प्रीतःप्रीतानुवाचह २६ ॥ ॥ श्रीरुद्रउवाच ॥ ॥ यूयंवेदिषदःपुत्राविदितंवश्चिकीर्षितम् ॥ अनुग्रहायभद्रंवएवंमेदर्शनंकृतम् २७ यःपरंरंहसःसाक्षात्त्रिगुणाज्जीवसंज्ञितात् ॥ भगवंतंवासुदेवंप्रपन्नःसप्रि योहिमे २८ स्वधर्मनिष्ठःशतजन्मभिःपुमान्विरिंचतामेतिततःपरंहिमाम् ॥ अव्याकृतंभागवतोथवैष्णवंपदंयथाहंविबुधाःकलात्यये २९ अथभागवता यूयंप्रियाःस्थभगवान्यथा ॥ नमद्भागवतानांचप्रेयानन्योस्तिकर्हिचित् ३० इदंविविक्तंजप्तव्यंपवित्रंमंगलंपरम् ॥ निःश्रेयसकरंचापिश्रूयतांतद्वदामिवः ३१ ॥ ॥ मैत्रेयउवाच ॥ ॥ इत्यनुक्रोशहृदयोभगवानाहतान्शिवः ॥ बद्धांजलीन्राजपुत्रान्नारायणपरोवचः ३२ ॥ ॥ श्रीरुद्रउवाच ॥ ॥ जितं तआत्मविद्धुर्यस्वस्तयेस्वस्तिरस्तुमे ॥ अवताराधसाराद्धंसर्वस्माआत्मनेनमः ३३

चूर्णिका

तत्रसमुद्रवत् विस्तीर्णएकंसरः अपश्यन् २२ तत्रदिव्यंगानंआकर्ण्यविस्मयंगताः तर्ह्येव २३तस्मात्सरसः निष्क्रामंतं अमरप्रवरंसहानुगं २४प्रसादसुमुखंत्रिलोचनंशिवंवीक्ष्य जातानंदाः तंप्रणेमुः २५ प्रपन्नार्तिहरः शिवः प्रीतःसन् धर्मज्ञान्तान्उवाच २६ ॥ ॥ श्रीरुद्रउवाच ॥ ॥ हेबर्हिषदःपुत्राः वः चिकीर्षितंविदितंवः अनुग्रहायमे ॥९४॥ दर्शनंकृतम् २७ यः वासुदेवंप्रपन्नः सः मेप्रियः २८ २९ यूयंभगवत्प्रियाः अतः मेप्रियाःस्थ ३० अथइदंस्तोत्रंमयावक्ष्यमणं श्रूयताम् ३१ ॥ मैत्रेयउवाच ॥ ॥ इत्युक्त्वाबद्धांजलीन्कथयामास ३२ जितंतेआत्मविद्धुर्यइत्यादितेउत्कर्षः हेभगवन् त्वंपरमानंदरूपेणनित्यंस्थितः अतः ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वरूपत्वं प्रपंचयन् प्रणमति सार्धैर्दशभिः। पंकजं लोकात्मकं नाभौ यस्य तस्मै कारणात्मने नमः।कारणत्वादेव सृज्यानां प्राणिनां ये उपाधयः भूतानिचसूक्ष्माणिचतन्मात्राणि इंद्रियाणिचतेषामात्मने।नियं त्रेअंतःकरणचतुष्टयाधिष्ठातृत्वेन प्रणमति चतुर्भिः श्लोकार्धैः। वासुदेवायचित्ताधिष्ठात्रे। कूटस्थायनिर्विकारायचित्तस्यैकरूपत्वात् ३४संकर्षणायअहंकाराधिष्ठात्रे। सूक्ष्मायअव्यक्तायदुरंतायअनंताय। अंतका यमुखाग्निना लोकदाहकाय। विश्वस्यप्रकृष्टोबोधोयस्मात् अंतरात्मनेबुद्ध्यधिष्ठात्रे। ३५ हृषीकाणांचक्षुरादीनामीशंयदिंद्रियंमनस्तदात्मने सूर्यरूपेणप्रणमति । परमहंसाय सूर्यरूपायपूर्णायतेजसाविश्व व्यापिनेनिभृतात्मनेक्षयवृद्धिशून्याय। ३६ स्वर्गापवर्गद्वारायचकर्मज्ञानफलभूतस्वर्गमोक्षयोर्द्वारभूतायत्रयीमयत्वादित्यर्थः। शुचिनिअंतःकरणेनिषीदतीतिशुचिषत्तस्मै"हंसःशुचिषदि"तिश्रुतेः। हिरण्यंवी र्यंयस्यतस्मैअग्निरूपाय। चातुर्होत्रं (चतुर्भिर्होतृभिः क्रियमाणं) कर्मवस्मैतत्साधानायेत्यर्थः। कुतःततंवेताद्विस्तारकाय३७सोमत्वमाह। ऊर्जोपितॄणामन्नायइषेदेवानामन्नाय। यज्ञरेतसेसोमाय। साहिपितॄ णांदेवानांचान्नम्। एवंरूपायत्रय्याः पतयेहरयेनमः। सूर्याग्निसोमत्वेनैवतेजस्त्वमुक्तम्। जलत्वमाह। सर्वरसात्मनेजलरूपाय ३८। विशेषायपृथ्वीरूपाय। सर्वेषांसत्त्वानांप्राणिनांयआत्मानस्तेषांदेहाय स्थवीयसेविराड्देहायच। त्रैलोक्यपालायवायवेसहआदिरूपाय। सहिप्राणरूपेणत्रैलोक्यंपालयतिअतस्तस्यैतद्रूपत्वं । सहआदिधर्मायच।३९नभसेआकाशायअर्थानांलिंगायज्ञापकाय।शब्दगुणत्वात् ।(शब्दोह्यर्थंज्ञापयति) अंतर्बहिरात्मने अंतर्बहिर्व्यवहारालंबनाय। एवंमहाभूतरूपत्वमुक्तम्। अमुष्मैस्वर्गाय। भूरिवर्चसे।"एषवैज्योतिष्मंतंपुण्यंलोकंयाती"तिश्रुतेः।४०प्रवृत्तायनिवृत्तायचकर्मणे।पितृदे वाययथाक्रमंपितृप्राप्तिफलायदेवप्राप्तिफलायच । अधर्मफलरूपायचमृत्यवे। ४१ हेईशआशिर्षांकामनानांकाराणात्मने। सर्वकर्मफलदात्रेइत्यर्थः। मनवेसर्वज्ञाय। मंत्रात्मकायेतिवा विष्णुत्वेनप्रण मति। बृहतेधर्मायपरमधर्मात्मने कृष्णाय। (अकुंठानित्यामेधाज्ञानंयस्यतस्मै। सांख्यंकपिलोक्तंसंख्यानं योगोऽष्टांगः पतंजलिप्रोक्तः तयोरीश्वराय) ४२ रुद्ररूपेणप्रणमति। मीढुषेरुद्राय। अ हंकृतमहंकारः तदात्मने। सचकर्तृकरणकर्मशक्तित्रयसमेतस्तस्मै। ब्रह्मत्वेनप्रणमति। चेतोज्ञानं। आकूतिः क्रियातद्रूपाय। वाचोविविधाभूतिः सृष्टिर्यस्मात्तस्मै। (वेदात्मने) ४३ एवंनमस्कृत्य दर्शनं प्रार्थयतेदर्शनमितिनवभिः। भागवतैः सत्कृतंदर्शनंदेहीत्यस्यविवरणंरूपमित्यादिप्रदर्शयेत्यंतं। स्वानांभक्तानांप्रियतमंरूपंप्रदर्शयेतिनवमेनान्वयः। सर्वेषामिंद्रियाणांयेगुणाविषयास्तेषामंजनंव्यं जकंसर्वेंद्रियविषयव्यंजकरूपमित्यर्थः। सर्वेंद्रियाणिस्वगुणैरनक्तिरंजयतीतिवा-४४

श्लोकाः ३४/४४

नमःपंकजनाभायभूतसूक्ष्मेंद्रियात्मने ॥ वासुदेवायशांतायकूटस्थायस्वरोचिषे ३४ संकर्षणायसूक्ष्मायदुरंतायांतकायच ॥ नमोविश्वप्रबोधायप्रद्युम्ना यांतरात्मने ३५ नमोनमोनिरुद्धायहृषीकेशेंद्रियात्मने ॥ नमःपरमहंसायपूर्णायनिभृतात्मने ३६ स्वर्गापवर्गद्वारायनित्यंशुचिषदेनमः ॥ नमोहिरण्य वीर्यायचातुर्होत्रायतंतवे ३७ नमऊर्जइषेत्रय्याःपतयेयज्ञरेतसे ॥ तृप्तिदायचजीवानांनमःसर्वरसात्मने ३८ सर्वसत्त्वात्मदेहायविशेषायस्थवीयसे ॥ नमस्त्रैलोक्यपालायसहओजोबलायच ३९ अर्थलिंगायनभसेनमोंतर्बहिरात्मने ॥ नमःपुण्यायलोकायअमुष्मैभूरिवर्चसे ४० प्रवृत्तायनिवृत्तायपितृ देवायकर्मणे ॥ नमोधर्मविपाकायमृत्यवेदुःखदायच ४१ नमस्तआशिषामीशमनवेकारणात्मने ॥ नमोधर्मायबृहतेकृष्णायकुंठमेधसे ॥ पुरुषायपु राणायसांख्ययोगेश्वरायच ४२ शक्तित्रयसमेतायमीढुषेहंकृतात्मने ॥ चेतआकूतिरूपायनमोवाचोविभूतये ४३ दर्शनंनोदिदृक्षूणांदेहिभागवतार्चितम् ॥ रूपंप्रियतमंस्वानांसर्वेंद्रियगुणांजनम् ४४

चूर्णिका एवंभूताय पंकजनाभाय वासुदेवाय ३४ प्रद्युम्नाय ३५ अनिरुद्धाय ३६ संकर्षणायसोमसूर्याग्निजलपृथ्वीवायुनभोरूपायतेनमः ३७ ३८ ३९ ४० ४१ ४२ रुद्रब्रह्म रूपायचतेनमः ४३ इत्यादिस्तुत्वादर्शनं प्रार्थयते स्वानांभक्तानांस्वस्वरूपंदर्शय ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्निग्धः प्रावृषि योघनस्तद्वत् श्यामम् । सर्वेषांसौंदर्याणांसंग्रहोयास्मिन् । चारवआयताश्चत्वारोबाहवोयस्मिन् । सुजातंसुष्ठुजातं यथोचितसर्वावयवंरुचिरंसुंदरमाननंयस्मिन् ४५ पद्मस्य कोशेमध्येया निपलाशानिदलानितद्वद्दक्षिणीयस्मिन् । (शोभनादंतायस्मिन्) सुकपोलमास्यंयस्मिन् । समौकर्णौविभूषणं (अलंकारभूतौ) यस्य कुंडलयोरग्रेवक्ष्यमाणत्वात् ४६ प्रीत्याप्रहसितावितापांगौय स्मिन् (अलकैः कुतलैःलसत्कमलकिंजल्कनिभंपीतवर्णंदुकूलंयस्मिन्) ४७ स्फुरंतिकिरीटादीनियस्मिन् शंखादिमत् । (तत्रमालावैजयंती मणिःकौस्तुभः) उत्तमर्द्धिर्लक्ष्मीः यदाएतैरुत्तमाऋद्धिरुत्कर्षोय स्यास्तितत् ४८ सौभगयुक्ताग्रीवायेनस (सौभगग्रीवः) सिंहस्यस्कंधेपरितः प्रसरंतः केसराएवत्विषः तादृशीःसर्वतस्त्विषोबिभ्रच्चासौसौभगग्रीवश्चतादृशः कौस्तुभोयस्मिन् । यद्वा सिंहस्येवयौस्कंधौत योस्त्विषः कुंडलहारादिदीप्तीर्विभ्रदितिपृथग्विशेषणम् । सौभगयुक्ताग्रीवायेनसकौस्तुभोयस्मिन् । श्रियाहेतुभूतयाक्षिप्तस्तिरस्कृतो निकषाश्मास्वर्णरेखांकितो निकषणपाषाणोयेनतादृशेनोरसाउ ल्लसत्शोभमानम् । ४९ श्वासोच्छ्वासाभ्यांसंविग्नाश्चंचलावलयस्ताभिर्वल्गुसुंदरंदलवदश्वत्थपत्रसदृशंउदरंयस्मिन् आवर्तगभीरयादक्षिणावर्तेननिम्नयाप्रतिसंक्रामयत्यतोनिर्गतंतेनैवद्वारेणपुनः प्रवेशयदि व ५० श्यामश्रोण्याऽधिकंरोचिष्णुयत्पीतंदुकूलंतत्रस्वर्णमयीमेखलायस्मिन् अंघ्रीचजंघेचऊरूचनिम्नेअनुन्नतेजानुनीचसमैश्चारुभिः (सुंदरैरेतैः शोभनंदर्शनंयस्य ।) समाश्चारवोंऽघ्र्यादयोयस्मिन् निम्नेजानुनीयस्मिन् । शोभनंदर्शनंयस्येतिपदत्रयंवा ५१ पदादीपस्थानीयेन। यद्वा एवंभूतेन पदाउपलक्षितंरूपंपदंशरणं (आश्रयभूतं) प्रदर्शयेत्यर्थः । शरदियत्पद्मंतस्यपलाशंतद्वत् रोचिर्यस्यतेन नखदीप्तिभिः (अस्माक)–मंतर्भवं अधमज्ञानंविधुन्वता (नाशयता) अपास्तंप्रह्लादादीनांसाध्वसंभयंयेनतत् । हेगुरोयतस्त्वमेवतमोजुषामज्ञानांमार्गप्रदर्शकोगुरुः ५२ अतिदुर्लभमिदंमयाप्रार्थितमिति स्तौतैवाह । एतद्रूपमनुध्येयंध्यानार्हमेव । नतुप्रत्यक्षतः प्राप्यमित्यर्थः (आत्मशुद्धिंचित्तशुद्धिंअभीप्सतांअतः स्वधर्ममनुतिष्ठतां चित्तशुद्ध्यालभ्योयस्यभक्तियोगोमोक्षदः) ५३ तर्हिकिंकेनापिन प्राप्यतेतत्राह भवानिति । दुर्लभत्वमेवाह । स्वर्गेराज्यंयस्यतस्याप्यभिमतः स्पृहणीयः (नतुलभ्यः) किंच । एकांतेन (नियमेन) यआत्मवित्तस्यापिगतिर्गम्यः ५४ अतस्तद्व्यतिरेकेणनाकिंचि द्वांछामीत्याह । तंत्वामेकांतभक्त्याआराध्य । बहिः स्वर्गादिसुखम् ५५

श्लोकाः ४५/५५

स्निग्धप्रावृड्घनश्यामंसर्वसौंदर्यसंग्रहम् ॥ चार्वायतचतुर्बाहुंसुजातरुचिराननम् ४५ पद्मकोशपलाशाक्षंसुंदरभ्रुसुनासिकम् ॥ सुद्विजंसुकपोलास्यं समकर्णविभूषणम् ४६ प्रीतिप्रहसितापांगमलकैरुपशोभितम् ॥ लसत्पंकजकिंजल्कदुकूलंमृष्टकुंडलम् ४७ स्फुरत्किरीटवलयहारनूपुरमेखलम् ॥ शंखच क्रगदापद्ममालामण्युत्तमर्द्धिमत् ४८ सिंहस्कंधत्विषोबिभ्रत्सौभगग्रीवकौस्तुभम् ॥ श्रियानपायिन्याक्षिप्तनिकषाश्मोरसोल्लसत् ४९ पूररेचकसंवि ग्नवलिवल्गुदलोदरम् ॥ प्रतिसंक्रामयद्विश्वंनाभ्यावर्त्तगभीरया ५० श्यामश्रोण्यधिरोचिष्णुदुकूलस्वर्णमेखलम् ॥ समचार्वंघ्रिजंघोरुनिम्नजानुसुद र्शनम् ५१ पदाशरत्पद्मपलाशरोचिषानखद्युभिर्नोंतरघंविधुन्वता ॥ प्रदर्शयस्वीयमपास्तसाध्वसंपदंगुरोमार्गगुरुस्तमोजुषाम् ५२ एतद्रूपमनुध्येयमात्म शुद्धिमभीप्सताम् ॥ यद्भक्तियोगोभयदःस्वधर्ममनुतिष्ठताम् ५३ अवान्भक्तिमतालभ्योदुर्लभःसर्वदेहिनाम् ॥ स्वाराज्यस्याप्यभिमतएकांतेनात्मविद्गतिः ५४तंदुराराध्यमाराध्यसतामपिदुरापया ॥ एकांतभक्त्याकोवांछेत्पादमूलंविनाबहिः ५५

चूर्णिका ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२४॥

तत्रहेतुः । यत्रपादमूले (अरणं) शरणंप्रविष्टं (पुरुषं) कृतांतः कालोमाययंवश्यइतिनाभिमानंकरोति । किंकुर्वन् । वीर्यं प्रभावः शौर्यमुत्साहः ताभ्यांविस्फूर्जितयाक्षुभितयाभ्रुवाविश्वंविध्वंसयन्नपि । ५६ त्वत्पादमूलेप्रविष्टस्यकृतांतभयाभावः कियानयंलाभः । यस्त्वद्भक्तसंगएवसकलपुरुषार्थश्रेणिशिरसिनरीनर्तीत्याह । क्षणार्धेनेति । भगवतस्तवसंगिनांसंगस्यक्षणार्धेनापिनस्वर्गंतुलयेसमंनगणयामि । नचापुनर्भवंमोक्षम् । मर्त्यानामाशिषोराज्याद्याः किमुत ५७ अथअतोहेतोः अनघौअघहरौअंघ्रीयस्यतस्यतवकीर्तिर्यशः तीर्थंगंगातयोः क्रमेणांतर्बहिःस्नानाभ्यांविधूतः पाप्मायेषां अतएवभूतेष्वनुक्रोशः कृपा । सुसत्त्वंचरागादिरहितंचित्तंशीलंचआर्जवादिविद्यतेयेषांतेषांसंगमोऽस्माकंस्यात् एषएवनस्त्वदनुग्रहः ५८ तत्त्वज्ञानंचत्वद्भक्तसंगादेवभवतीत्याहनयस्येति । एषांसतांभक्तियोगेनानुगृहीतंशुद्धं सद्यस्यचित्तंबाह्यार्थविक्षिप्तंनभवातितमोरूपायांगुहायांचनाविशत्लयंनप्राप (अवस्थात्रयरहितंभवतीत्यर्थः) तत्रतदा (तुरीयावस्थायांसः) मुनिस्तवगतिंतत्त्वंपश्यति ५९ कीदृशंतत्त्वंतदाह

॥९७॥ । यत्रेति ।(इदंविश्वंयत्रयदाधारतयाऽव्यज्यते) ६० जगतः उपादानत्वेनतत्त्वंलक्षितं । निमित्तत्वेनापितदेवलक्षयन्नाह । यइदंविश्वंसदिवपरमार्थमिवमाययास्रजत् । कथंभूतया(मायया)(यत्) ययाभेदबुद्धिरन्येषांभवातितया । आत्मनित्वयिदुःस्थयास्वकार्यंकर्तुमसमर्थया । तंत्वांनिरस्तभेदंप्रतीमाहिजानीमः ६१ यद्यपित्वमेवंनिर्भेदंब्रह्मतथापिप्रागुक्तंसाकारंतवरूपंयेइदंयजंतितिएववेदागमतत्त्वंजानतइत्याह। क्रियाकर्मलापैर्येकर्मयोगिनः (इदमुक्तंरूपमेव) पूजयंतितएवकोविदाः नत्वेतदनादृत्यकेवलज्ञानेप्रवृत्ताः । तंत्रेआगमे । कथंभूतमिदं । भूतेंद्रियांतःकरणैरस्वतंत्रैर्यदुपलक्ष्यतेनियंतृरूपंतत् ६२ नन्वभिन्नेमयिभेदंकुर्वंतः संतः कथंतेकोविदाः। नहितैर्भेदः क्रियते त्वयैवक्रीडार्थंचेतनाचेतनात्मकोभेदः कृतइत्याह । त्वमिति । आद्यस्त्वमेकएव। सुप्तामायाख्याशक्तिर्यस्य।पश्चात्तयाशक्त्यारजःसत्त्वतमसांद्वंद्वैक्यं यतोरजआदेः महानहंकारः खंचमरुदग्निवार्धराश्च । तत्रवाः उदकं । सुराश्चऋषयश्चभूतगणाश्च एवमिदंजगत्यतोभवतितद्विभिद्यतइत्यन्वयः । एतदुपपादयाति सृष्टमिति । जरायुजांडजस्वेदजोद्भिज्जरूपेणचतुर्विधम् । स्वांशेनप्रविष्टः अथोइतिहेतोः पुरस्यांतः संतंअंशंचिदाभासंपुरीशयनात्पुरुषंविदुः तर्हिकिमीश्वरमेवसंसारिणंविदुः । नेत्याह । सरघामधुमक्षिकास्ताभिः सृष्टंमध्विवक्षुल्लकंविषयसुखंअविद्यावृतः सन् योभुंक्तेतंजीवंविदुः । तथाचश्रुतिः । “ तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीती”ति । निर्णीतंच । “गुहांप्रविष्टावात्मानौहितद्दर्शनादि”त्यत्र ।६४ तववतुसर्वनियंतुः कुतः संसारइत्याह । यः स्वशक्त्येदंसृष्टवान् सएषत्वंखलुभूतैरेवभूतानिमेघपंक्तीरिववायुः कालयन्विचालयन्लोकान्विकर्षसिसंहरसि अनुमेयतत्त्वः अलक्ष्यस्वरूपः ६५

श्लोकाः

यत्रनिर्विष्टमरणंकृतांतोनाभिमन्यते॥विश्वंविध्वंसयन्वीर्यशौर्यविस्फूर्जितभ्रुवा५६क्षणार्धेनापितुलयेनस्वर्गंनापुनर्भवम् ॥ भगवत्संगिसंगस्यमर्त्यानांकिमु
ताशिषः ५७ अथानघांघ्रेस्तवकीर्तितीर्थयोरंतर्बहिःस्नानविधूतपाप्मनाम्॥भूतेष्वनुक्रोशसुसत्त्वशीलिनांस्यात्संगमोनुग्रहएषनस्तव ५८ नयस्यचित्तंबहिर
र्थविभ्रमंतमोगुहायांचविशुद्धमाविशत् ॥ यद्भक्तियोगानुगृहीतमंजसामुनिर्विचष्टेननुतत्रतेगतिम् ५९ यत्रेदंव्यज्यतेविश्वंविश्वस्मिन्नवभातियत् ॥ तत्त्वं
ब्रह्मपरंज्योतिराकाशमिवविस्तृतम् ६० योमाययेदम्पुरुरूपयासृजद्बिभर्तिभूयःक्षपयत्यविक्रियः ॥ यद्भेदबुद्धिःसदिवात्मदुःस्थयातमात्मतंत्रंभगवन्प्रतीम
हि ६१ क्रियाकलापैरिदमेवयोगिनःश्रद्धान्विताःसाधुयजंतिसिद्धये ॥ भूतेंद्रियांतःकरणोपलक्षितंवेदेचतंत्रेचतएवकोविदाः ६२ त्वमेकआद्यःपुरुषःसुप्तश
क्तिस्तयारजःसत्त्वतमोविभिद्यते ॥ महानहंखंमरुदग्निवार्धराःसुरर्षयोभूतगणाइदंयतः ६३ सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेन ॥ अथोवि
दुस्तंपुरुषंसंतमंतर्भुंक्तेहृषीकैर्मधुसारघंयः ६४सएषलोकानतिचंडवेगोविकर्षसित्वंखलुकालयानः ॥ भूतानिभूतैरनुमेयतत्त्वोघनावलीर्वायुरिवाविषह्यः६५

५६ / ६५

॥९७॥

चूर्णिका ५६ ५७ ५८ ५९ ६० ६१ ६२ ६३ ६४ ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विकर्षणप्रकारमाह । प्रमत्तमिति । इतिकृत्यं एवमेवामिदंकर्तव्यमितिचिंतयोच्चैःप्रमत्तंअनवहितम् तत्रहेतुः विषयेषुलालसंअतिकामुकम् । प्राप्तेपिविषयेप्रवृद्धलोभंअंतकस्त्वंअभिपद्यसेआक्रमसि । क्षुधा लेलिहानः जिह्वयोष्ठप्रांतौस्पृशन् । सर्पोमूषकमिव । ६६ अतः कस्तवपदाब्जंत्यजेत् पंडितश्चेत् । कथंभूतः । यस्तव अवमानोऽनादरः तेनव्ययमानम् । अयगतौ । व्ययंप्राप्नुवत्केतनंशरीरं यस्यसः । यदस्माकंगुरुर्ब्रह्माअर्चतिसर्वेपांस्तोतृणांवाक्यंविशंकयानिःशंकत्वेनदृढविश्वासेन । विनोपपत्तिं अस्मादेतत्फलंभवतीत्युपपत्त्यपेक्षांविनापिस्वभावतएवमनवश्चार्चतिस्म । ६७ उपसंहरति अथेति । विश्वं रुद्रभयेनध्वस्तमितियस्मात्अथअतः विदुषामस्माकंनकुतश्चिद्भयंयस्यांताहशीगतिरसि । ६८ (जितंतइत्यारभ्यएतत्पर्यंतमिदंस्तोत्रंविशुद्धाःसंतोजपत) ६९ (आत्मस्थंस्वांतर्यामिणंआत्मानंहरिंपूजयध्वं सर्वभूतेष्ववस्थितमित्यादिविशेषणैः पूजायामनायासोदर्शितः) ७० योगादेशंनामैतत्स्तोत्रंउपासाद्यपाठतःप्राप्यमनसाधारयंतअभ्यासेन (जपंतः) अभ्यस्यत ७१ विश्वसृजांपतिर्ब्रह्मा (सिसृक्षुः सन्तदाज्ञयास्रष्टुमिच्छतामस्माकमात्मजानामिदमाहेति) ७२ (ब्रह्मणाप्रजासृष्टौनोदितास्तेवयंअनेनस्तोत्रेण)सिसृक्षमःसृष्टवंतः ७३ युक्तः एकाग्रचित्तः (अवहितः अप्रमत्तः) ७४(ज्ञानंपरंनिःश्रेयसंपरमंकल्याणं । अतः) ज्ञानमेवनौर्यस्यसः ७५ यःअधीयानोभवति । सदुराराध्यमपिआराधयति ७६ असावमुष्माद्धरेः असत्वरम् स्थिरः सन् । मद्गीतंस्तोत्रंतेनगीतात्स्तुतात् । एकएववल्लभः प्रियआश्रयस्तस्मात् ७७ कल्येउपसि ७८ तपश्चरत । तपसोऽतेईप्सितंप्राप्स्यथ ७९ इतिचतुर्थस्कंधेटीकायांचतुर्विंशोध्यायः ॥ २४ ॥

श्लोकाः ६६—७९

प्रमत्तमुच्चैरितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलालसम् ॥ त्वमप्रमत्तःसहसाभिपद्यसेक्षुल्लेलिहानोहिरिवाखुमंतकः ६६ कस्त्वत्पदाब्जंविजहातिपंडितोयस्तेवमानव्ययमानकेतनः ॥ विशंकयास्मद्गुरुरर्चतिस्मयद्विनोपपत्तिंमनवश्चतुर्दश ६७ अथत्वमसिनोब्रह्मन्परमात्मन्विपश्चिताम् ॥ विश्वंरुद्रभयध्वस्तमकुतश्चिद्भयागतिः ६८ इदंजपतभद्रंवोविशुद्धान्नृपनंदनाः ॥ स्वधर्ममनुतिष्ठंतोभगवत्यर्पिताशयाः ६९ तमेवात्मानमात्मस्थंसर्वभूतेष्ववस्थितम् ॥ पूजयध्वंगृणतश्चध्यायंतश्चासकृद्धरिम् ७० योगादेशमुपासाद्यधारयंतोमुनिव्रताः ॥ समाहितधियःसर्वएतदभ्यसतादृताः ७१ इदमाहपुरास्माकंभगवान्विश्वसृक्पतिः ॥ भृग्वादीनामात्मजानांसिसृक्षुःसंसिसृक्षताम् ७२ तेवयंनोदिताःसर्वेप्रजासर्गेप्रजेश्वराः ॥ अनेनध्वस्ततमसःसिसृक्ष्मोविविधाःप्रजाः ७३ अथेदंनित्यदायुक्तोजपन्नवहितःपुमान्॥अचिराच्छ्रेयआप्नोतिवासुदेवपरायणः ७४ श्रेयसामिहसर्वेषांज्ञानंनिःश्रेयसंपरम् ॥ सुखंतरतिदुष्पारंज्ञाननौर्व्यसनार्णवम् ७५यइमंश्रद्धयायुक्तोमद्गीतंभगवत्स्तवम् ॥ अधीयानोदुराराध्यंहरिमाराधयत्यसौ ७६ विंदतेपुरुषोमुष्माद्यद्यदिच्छत्यसत्वरम् ॥ मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ७७ इदंयःकल्यउत्थायप्रांजलिःश्रद्धयान्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्योमुच्यतेकर्मबंधनैः ७८ गीतंमयेदंनरदेवनंदनाःपरस्यपुंसःपरमात्मनःस्तवम् ॥ जपंतएकाग्रधियस्तपोमहच्चरध्वमंतेततआप्स्यथेप्सितम् ७९ ॥ ॥ इतिश्रीभा० म० च० स्कंधेरुद्रगीतंनामचतुर्विंशोध्यायः॥ २४ ॥

चूर्णिका

६६ ६७इत्युक्त्वातान्आह ६८ हेनृपनंदनाः सर्वभूतेषुआत्मनिचस्थितंहरिंपूजयंतः ध्यायंतः गृणंतश्चइदंजपत ६९ ७० वः भद्रमस्तु ७१ पुरा अस्माकंभृग्वादीनांच ब्रह्मा इदमेवाह ७२ ततः ब्रह्मणाप्रजासर्गेआदिष्टाः वयंअनेनस्तोत्रेणाविविधाः प्रजाः सृष्टवंतः ७३ अथइदंनित्यंयः जपेत् सः अचिरात्श्रियंप्राप्नुयात् ७४ सर्वश्रेयसं यत्ज्ञानंश्रेष्ठंतत् अस्मात्लभ्यते ७५ किंचपुरुषः यद्यदिच्छतितत् अस्मात्मद्गीतात् सर्वंविंदते ७६ ७७ ७८ हेराजपुत्राः प्रचेतसः मद्गीतंजपंतः महत्तपः चरध्वम् ततः अंते ईप्सितंप्राप्स्यथ ७९ ॥ इतिचतुर्थेचतुर्विंशोध्यायः ॥ २४ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

॥९९॥ प्रचेतस्सुतपस्यत्सुतत्पुत्रोनारदोघृणी। प्राचीनबर्हिषेऽध्यात्मंपारोक्ष्येणाहपंचभिः।१। पुरंजनकथाव्याजात्पंचविंशेतुनारदः। आत्मनोबुद्धिसंगेनविविधामाहसंसृतिम् ।२। बार्हिषदैः प्रचेतोभिः । १ २ प्रचेत
स्सुत्तपस्तीव्रंतप्यमानेषुनारदः। पुरंजनकथाकूटंप्राहप्राचीनबर्हिषे। प्रचेतस्सुतपश्चरत्सुनारदः प्राचीनबर्हिषंपुरंजनकथाकूटेनबोधितवान्अतः प्रचेतसांकथामसमाप्यैवतत्पितुर्वृत्तमाह । प्राचीनबर्हिषमिति हे
क्षत्तः। ३ श्रेयः फलं । ईहसेइच्छसि । इहकर्मणितदुभयं नेष्यतेविचारकैः। ४ परंश्रेयः मोक्षं। कर्मभिरपविद्धाविक्षिप्ताधीर्यस्य ५ किंच । (कूटास्तुच्छमायानृतदंभान्यतमफलाधर्मायेषांतेषु । यतो) गृहेषुस्थि
तः पुत्रादिष्वेवपुरुषार्थ (इति) धीर्यस्य (सः परंमोक्षं) ६ कर्मफलेषुवैराग्यमुत्पाद्यब्रह्मविद्यामुपदेष्टुंयोगानुभावेनयज्ञपशून्प्रत्यक्षंप्रदर्श्यआह। भोभोइति। पशुरूपान्जीवसंघान्संज्ञापितान्मारितान् ७ एते
त्वांसंपरेतंमृतंसंप्रतीक्षंते। वैशसंत्वत्कृतांपीडांस्मरंतः। ततश्चअयःकूटैर्लोहयंत्रमयैः शृंगैः छिंदांतिछेत्स्यंति। ८ अत्रअस्मिन्संकटेनिस्तारकममुमितिहासंकथयिष्यामि । ९ तत्रजीवस्याविषयासक्त्यासंसा
रः सचेश्वरानुग्रहेणनिवर्ततइतिवक्तुंविपर्ययगृहीतस्यसाक्षाद्बोधयितुमशक्तोराजवृत्तांतमिवाह । आसीदिति । पुरंजनादीन्स्वयमेवेतःपंचमेध्यायेव्याख्यास्यतितथापितावत्सुखग्रहणाययथोपयोगंकिंचि
त्किंचिद्व्याख्यास्यामः तत्रस्वकर्मभिःपुरंशरीरंजनयतीतिपुरंजनोजीवः नविज्ञातंनामयस्य नचविज्ञातंचेष्टितंयस्य सईश्वरस्तस्यसखा। यद्वा विज्ञातंचेष्टितंजीवप्रेरणादिलक्षणंयस्य । जीवपारतंत्र्यस्यानु
भवसिद्धत्वात् १० शरणंभोगायतनंदेहंपृथिवीतदुपलक्षितंब्रह्मांडम् ११

श्लोकाः १/११

॥ मैत्रेयउवाच ॥ ॥ इतिसंदिश्यभगवान्बार्हिषदैरभिपूजितः ॥ पश्यतांराजपुत्राणांतत्रैवांतर्दधेहरः १ रुद्रगीतंभगवतःस्तोत्रंसर्वेप्रचेतसः॥जपंतस्ते
तपस्तेपुर्वर्षाणामयुतंजले २ प्राचीनबर्हिषंक्षत्तःकर्मस्वासक्तमानसम् ॥ नारदोध्यात्मतत्त्वज्ञःकृपालुःप्रत्यबोधयत् ३ श्रेयस्त्वंकतमद्राजन्कर्मणात्मनईह
से ॥ दुःखहानिःसुखावाप्तिःश्रेयस्तन्नेहचेष्यते ४ ॥ ॥ राजोवाच ॥ ॥ नजानामिमहाभागपरंकर्मापविद्धधीः ॥ ब्रूहिमेविमलंज्ञानंयेनमुच्ये
यकर्मभिः ५ गृहेषुकूटधर्मेषुपुत्रदारधनार्थधीः ॥ नपरंविंदतेमूढोभ्राम्यन्संसारवर्त्मसु ६ ॥ ॥ नारदउवाच ॥ ॥ भोभोप्रजापतेराजन्पशून्पश्यत्व
याध्वरे ॥ संज्ञापितान्जीवसंघान्निर्घृणेनसहस्रशः ७ एतेत्वांसंप्रतीक्षंतेस्मरंतोवैशसंतव ॥ संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः ८ अत्रतेकथयिष्येमुमि
तिहासंपुरातनम् ॥ पुरंजनस्यचरितंनिबोधगदतोमम ९ आसीत्पुरंजनोनामराजाराजन्बृहच्छ्रवाः ॥ तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः १०
सोन्वेषमाणःशरणंबभ्रामपृथिवींप्रभुः ॥ नानुरूपंयदाविंददभूत्सविमनाइव ११

चूर्णिका

॥ मैत्रेयउवाच ॥ भगवान् शिवः एवंसंदिश्य प्रचेतोभिः पूजितः सन् तत्रैवअंतर्दधे १ ततः प्रचेतसः रुद्रगीतंजपंतः जले प्रविश्य वर्षाणामयुतं तपस्तेपुः २ एवंप्रचेतसःकथां
असमाप्य तत्पितुः वृत्तांतमाह हेविदुर प्राचीनबर्हिषं कर्मसु आसक्तं दृष्ट्वा कृपालुः नारदः एत्य तंप्रबोधयत् ३ ॥ ॥ नारदउवाच ॥ ॥ हेराजन्इहकर्मणाश्रेयः ईहसेतत् मोक्ष
रूपंश्रेयः कर्मणानभवति ४ ॥ ॥ राजोवाच ॥ ॥ हेमहाभाग कर्मापविद्धधीः अहंश्रेयः नजानामिअतः मेज्ञानंब्रूहि ५ ६ ॥ ॥ नारदउवाच ॥ ॥ हेराजन्यज्ञादिषु
यान्पशून्संज्ञापितवान् असि ७ तेत्वयिमृतेसति अयःकूटैः शृंगैः त्वांपरलोकेछेत्स्यंति ८ एतद्विषयेतवजीवबुद्ध्योर्दंपतीरूपेण पुरंजनसंज्ञकराजचरितरूपंइतिहासंकथयि
ष्यामि तंपारोक्ष्येणशृणु ९ हेराजन् कश्चित् पुरंजनोनामराजा आसीत् तस्यअविज्ञातनामासखा आसीत् १० सः राजा पुरं अन्वेषमाणः भूतलेबभ्राम ११ ॥९९॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

(यावती–)–यावत्यः पुरः तास्तस्यतस्यकामस्योपपत्तयेप्राप्यैसाधुनमेने। गवादिदेहानामैहिकपारलौकिकभोगयोग्यत्वाभावात्। तथाचश्रुतिः"ताभ्योगामनयत्ताअब्रुवन्नवैनोयमलमितिताभ्योऽश्वमान यत्ताअब्रुवन्नैवनोयमलमितीति १२ हिमवतोदक्षिणेषुसानुषुकर्मक्षेत्रेभारतवर्षे (सानुशब्देनहिकर्मफलसंभजनपटुत्वमुच्यते 'वनषणसंभक्तौ') पुरंमनुष्यशरीरम्। लक्षितानिदृष्टानिसर्वाणिलक्षणानियस्याम्। अंधपंगुत्वादिदोषरहितामित्यर्थः १३ तामनुवर्णयतित्रिभिः। अत्राकिंचित्किंचित्साहश्यमवलंब्यकथासौंदर्यायप्राकारादीनिवर्ण्यंते। परिखैरितिपुंस्त्वमार्षम्। अक्षाणिगवाक्षाः त्वगादयः शरीरावयवाः प्राकारादिपुरावयवत्वेननिरूप्यंते। स्वर्णादि–(विकारैः) शृंगैः शिखरैः युक्तायेगृहास्तैः संकुलामिति। आधारादिचक्राणिगृहाशृंगाणिचराजसादिस्वभावाविवक्षिताः १४ नीलादिभिः क्लृप्ताहर्म्यस्थली यस्याम्। अरुणंमाणिक्यम्।स्थली।हृदयम्। नाड्योनीलादिभावेननिरूप्यंतेतत्तद्विषयवासनावा। भोगवतींनागानांपुरीमिवभोगसाधनभूतामितिवा। १५ सभासमाजस्थानंचत्वरंचतुष्पथः रथ्याराजमार्गः आक्रीडायतनंद्यूतादिस्थानं।आपणोहट्टः।तैः। चैत्यंजनानांविश्रामस्थानम्।ध्वजेषुपताकाः ताभिश्चयुक्ताम्।१६ अत्रचविषयनिष्ठबुद्धियोगेनजीवस्यदेहसंबंधइतिविवक्षयाविषयवर्गोबाह्योपवनत्वेननिरूपयति तद्विशेषान्स्रक्चंदनादीन्दिव्यद्रुमलतादिभावेनेति। शेषः कथालंकारः। बाह्योपवने प्रमदां ददर्शेतिचतुर्थेनान्वयः। नदतांविहगालिकुलानांकोलाहलोयेषुतेजलाशयायस्मिन् १७ हिमनिर्झराणांविप्रुषोबिंदवः तद्वताकुसुमाकरसंबंधिना वायुनाचलंतः प्रवालाविटपाः शाखाश्रयेषांतैर्वृक्षैर्नलिनीनांसरसीनांतटेषुसंपत्समृद्धिर्यस्मिन्। १८ आबाधामहतीपीडातत्कृतोपद्रवरहिते। मुनिव्रतैरहिंस्रैः। आत्मानमाहूतंमन्यतेयत्र। १९ तत्रप्रमदोत्तमांविवेकवतींबुद्धिंददर्श। यदृच्छयागतामितितयोःसंबंधस्य दुर्निरूपत्वंदर्शयति। तामनुवर्णयतिसार्धैश्चतुर्भिः। दशभिर्ज्ञानकर्मेंद्रियैः एकैकंप्रत्येकंशतंअनंतावृत्तयस्तासांनायकैः पतिभिः सह। पाठांतरेनायिकाः स्त्रियोयेषांतैः२०पंचशीर्षाणिवृत्तयोयस्यतेनअहिनाप्राणेनप्रतीहारेणपालकेनगुप्तांरक्षितांऋषभंभर्तारं अप्रौढांषोडशवार्षिकीम् २१ गंधज्ञानादिभिर्बुद्ध्यवयवैः सुनासत्वादिनिरूप्यते समंविन्यस्तौरचितौकर्णौताभ्यां कुंडलश्रियंदधतीं (विषयपरिवर्तनेनकुंडलशोभारूप्यते) २२ (पिशंगनीवीं विषयोपरक्तवृत्तिविशेषवतीम्।) "अन्नमयंहि सौम्यमनइतियत्कृष्णंतदन्नस्ये" त्यादिश्रुत्यनुसारेणश्यामामित्युक्तम्। नूपुरैः क्वणद्भ्यांनूपुरेणपादांगुलीयकानामप्युपलक्षणाद्बहुवचनम् २३

॥१००॥ श्लोकाः १२/२३

नसाधुमेनेताःसर्वाभूतलेयावतीःपुरः ॥ कामान्कामयमानोसौतस्यतस्योपपत्तये १२ सएकदाहिमवतोदक्षिणेष्वथसानुषु ॥ ददर्शनवभिर्द्वार्भिःपुरं लक्षितलक्षणाम् १३ प्राकारोपवनाट्टालपरिखैरक्षतोरणैः ॥ स्वर्णरौप्यायसैःशृंगैःसंकुलांसर्वतोगृहैः १४ नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः ॥ क्लृप्तहर्म्यस्थलींदीप्तांश्रियाभोगवतीमिव १५ सभाचत्वररथ्याभिराक्रीडायतनापणैः ॥ चैत्यध्वजपताकाभिर्युक्तांविमद्रुवेदिभिः १६ पुर्यास्तुबाह्योपवनेदिव्यद्रुमलताकुले ॥ नदद्विहंगालिकुलकोलाहलजलाशये १७ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ॥ चलत्प्रवालविटपनलिनीतटसंपदि १८ नानारण्यमृगव्रातैरनाबाधेमुनिव्रतैः ॥ आहूतंमन्यतेपांथोयत्रकोकिलकूजितैः १९ यदृच्छयागतांतत्रददर्शप्रमदोत्तमाम् ॥ भृत्यैर्दशभिरायांतीमेकैकशतनायकैः २० पंचशीर्षाहिनागुप्तांप्रतीहारेणसर्वतः ॥ अन्वेषमाणामृषभमप्रौढांकामरूपिणीम् २१ सुनासांसुदतींबालांसुकपोलांवराननाम् ॥ समविन्यस्तकर्णाभ्यांबिभ्रतींकुंडलश्रियम् २२ पिशंगनीवींसुश्रोणींश्यामांकनकमेखलाम् ॥ पद्भ्यांक्वणद्भ्यांचलतींनूपुरैर्देवतामिव २३

चूर्णिका एकदा भूतलंभ्रमन् हिमवतः दक्षिणे भागे नवद्वार्भिः युक्तंपुरं ददर्श १२ १३ १४ १५ १६ १७ १८ १९ तस्यबहिः उपवनेएकांस्त्रियंएकैकशतनायकैः दशभिः भृत्यैः सहआयांतीं २० पंचशीर्षाहिनागुप्तांभर्तारंइच्छंतीम् २१ उत्कृष्टरूपांयदृच्छयाप्राप्तांप्रमदोत्तमांददर्श २२ २३ ॥१००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घ्यंजितंकैशोरंयौवनोपक्रमोयाभ्यां तौ समौ च(तौ)वृत्तौच २४ तामाहेतितयोः संवादोक्तिः संबंधदाढर्चाय। अपांगएवपुंखोमूलप्रांतोयस्य कटाक्षबाणस्यतेनस्पृष्टोविद्धः। प्रेम्णाउच्चैर्भ्रमंतीभ्रूः धनुःस्था नीयायस्मिन्तेन २५ कुतः स्थानादिहागतासि। हेसति पुर्याःसमीपस्थाउपपुरीभूः तामालक्ष्य किंकर्तुमिच्छसीत्यर्थः।२६ तवयेऽनुपथाः अनुवर्तिनः एतेके। एकादशोमहाभटोनूहह्वलत्वेनवक्ष्यमाणो येषुदशसुते। बुद्धेर्मनसः पृथगुपादानं बुद्धिपरिचारकेंद्रियसहायतयातत्परिचारकत्वविवक्षया२७त्वंन्ही–(–रासि)किंपतिंधर्मंविचिन्वती। अथकिंभवान्यासि पतिंशिवंविचिन्वती। अथवाकिंवाक्सरस्वतीप तिंब्रह्माणम्। रमालक्ष्मीः पतिंविष्णुंमुनिरिवसंयतासती। कथंभूतंपतिंत्वदंघ्रिकामेनैवत्वत्कृतयात्वदंघ्रिकामनयैवमाप्ताः समस्ताः कामायेनतं(पद्मकोशः कंदुकाभोलीलाकमलमुकुलः) २८ हेवरोरुआसांह्री प्रभृतीनांमध्येत्वमन्यतमापिनभवसि। यतोभुविस्पृक्। नहिदेवताभुवंस्पृशंति। वीरवरेणमया ननु त्वमकर्माकथंत्वयासहालंकरोमीतिचेत्तत्राह अदभ्रमनकल्पंकर्म त्वत्संगाद्यस्य मम तेनस्वतोऽकर्मत्वेनत्व त्संगात्सकर्माभवामीत्यर्थः।परंवैकुंठम्२९यद्यस्मात्तवापांगेनविखंडितमिंद्रियंमनोयस्यतंमांमनोभवोबाधते।अथ तस्मादनुगृहाण। सव्रीडंयद्भावेनप्रेम्णास्मितंतेनविभ्रमंतीयाभ्रूस्तयाउपसृष्टः प्रेरितः३०यद्व्री डयासंमुखंनभवतितदाननमुन्नीयमेदर्शय। शोभनेभ्रुवौयस्मिन्। सुतारेशोभनकनीनिकेलोचनेयस्मिन्। व्यालंविनोदीर्घायेनीलाअलकास्तेषांवृंदेनसंवृतंवल्गूनिवाचकानिवाक्यानियस्मिन्।३१हेवीरहेरा जन् सापितंदृष्ट्वामोहितासततिमाह ३२ यत्पृष्टंकस्यासीत्यनेनकस्यपुत्रीकिंगोत्रजेति। कात्वमितिचकिंनामासीतितत्राह। आत्मनोममपरस्यतवापिकर्तारंसम्यङ्नविद्मः। गोत्रंनामचयत्कृतंभवतितंचनवि दामनविद्मः। ३३ हेवीरआत्मनोममशरणमियंपुरीयेननिर्मितांतंचनविद्मः। (किंतुइहसंतमात्मानंमामेवविदामततोन्यन्नकिमपिविद्मः) ३४

श्लोकाः २४/३४

स्तनौव्यंजितकैशोरौसमवृत्तौनिरंतरौ ॥ वस्त्रांतेननिगूहंतींव्रीडयागजगामिनीम् २४ तामाहललितंवीरःसव्रीडस्मितशोभनाम् ॥ स्निग्धेनापांगपुं खेनस्पृष्टःप्रेमोद्भ्रमद्भ्रुवा २५ कात्वंकंजपलाशाक्षिकस्यासीहकुतःसति ॥ इमामुपपुरींभीरुकिंचिकीर्षसिशंसमे २६ कएतेनुपथायेतएकादशमहाभटाः ॥ एतावाललनाःसुभ्रूःकोयंतेहिपुरःसरः २७ त्वंह्रीर्भवान्यस्यथवाग्रमापतिंविचिन्वतीकिंमुनिवद्रहोवने ॥ त्वदंघ्रिकामाप्तसमस्तकामंक्वपद्मकोशःपति तःकराग्रात् २८ नासांवरोर्वन्यतमाभुविस्पृक्पुरीमिमांवीरवरेणसाकम् ॥ अर्हस्यलंकर्तुमदभ्रकर्मणालोकंपरंश्रीरिवयज्ञपुंसा २९ यदेषमापांगविखंडितेंद्रि यंसव्रीडभावस्मितविभ्रमद्भ्रुवा ॥ त्वयोपसृष्टोभगवान्मनोभवःप्रबाधतेथानुगृहाणशोभने ३० तदाननंसुभ्रुसुतारलोचनंव्यालंबिनीलालकवृंदसंवृतम् ॥ उन्नीयमेदर्शयवल्गुवाचकंयद्व्रीडयानाभिमुखंशुचिस्मिते ३१ ॥ ॥ नारदउवाच ॥ ॥ इत्थंपुरंजनंनारीयाचमानमधीरवत् ॥ अभ्यनंदततंवीरंहसंतीवी रमोहिता ३२ नविदामवयंसम्यक्कर्त्तारंपुरुषर्षभ ॥ आत्मनश्चपरस्यापिगोत्रंनामचयत्कृतम् ३३ इहाद्यसंतमात्मानंविदामनततःपरम् ॥येनेयंनिर्मितावी रपुरीशरणमात्मनः ३४

चूर्णिका २४ संमुह्य तांउवाच २५ हेकंजपलाशाक्षि त्वंकस्यासि कुतः प्राप्तासि इमांउपपुरीं आलक्ष्य किंकर्तुमिच्छसि २६ एते अनुपथाः एकादशमहाभटाः के एताः लल नाः काः २७ त्वंभवानी रमा सरस्वती वा असिकिम् २८ हेशोभनेत्वयोपसृष्टःकामःमांबाधते २९ तस्मात् अनुग्रहाण ३० इत्थंयाचमानं पुरंजनंसाअभ्यनंदत् सा पितंदृष्ट्वा मोहितासती आह ३१ ३२ हेपुरुषर्षभ मम तव च कर्तारं येन चइयं पुरी निर्मिता तंचापि वयं न विद्मः ३३ ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

यत्पृष्टंकएतेऽनुपथा इतितत्राहएतइति ३५ आस्तांनामगोत्रादि । यदत्रागतोसिएतद्दिष्ट्याभद्रंतावत् । ग्राम्यानइंद्रियग्रामार्हान् (तवस्नेहं) उद्वहिष्यामि संपादयिष्यामि स्वबंधुभिः सखीभिश्वसह । ३६ (वि षयभोगान्भुंजानः) समाः संवत्सरान्मनुष्यदेहप्रवेशाच्छतमित्युक्तम् ३७ प्रवृत्तिस्वभावत्वात्निवृत्तिनिंदापूर्वकंतत्संगमभिनंदतिपंचभिः । कामिति । त्वत्तोन्यंकंनुरमये । अरतिज्ञंनैष्ठिकम् । अकोविदंअ निषिद्धसुखत्यागिनम् संपरायोमृत्युस्तदनभिमुखंपरलोकचिंताशून्यम् । अश्वस्तनाविदम् । श्वः इदंकर्तव्यमितीहलोकचिंताशून्यंअतएव । पशुतुल्यम् । ३८ अत्रगार्हस्थ्येप्रजानंदःपुत्रसुखम् । अमृतंमोक्षः केव लिनोयतयः । ३९ गृहाश्रमइतियत्एतत्क्षेमार्हंशरणंआश्रयंवदंते । ४० (हेवीरस्वयंप्राप्तंत्वाहशंकानामनवृणीत) ४१भोगिभोगयोः सर्पदेहाकारयोः तवभुजयोर्यन्नसज्जेत एवंभूतंकस्याः स्त्रियामनः स्यात् । नकस्यार्अपि । योभवान् अनाथवर्गादीनास्तेषामाधिंमनोदुःखंअलमत्यर्थं अपोहितुंसर्वत्रचरति । केनापोहितुं घृणया (कृपया) उद्धतो अतिशयितो यः स्मितपूर्वकोऽवलोकस्तेन ४२ (इ तिसिद्धांतं) समुष्यसमुदीर्य (वदेल्यंप्) समाः संवत्सरान् ४३ तत्रजाग्रदवस्थांसंक्षेपेणाह । उपगीयमानइति । सषुप्त्यवस्थामाह । हृदिनीं हृदयाकाशंस्वापस्थानम् । शुचौनिदाघे (जाग्रन्निमित्ते संतापेइत्यर्थः) ४४ इदानीं नवद्वारप्रदर्शनपूर्वकंजाग्रदवस्थांप्रपंचयति सप्तेतियावदध्यायसमाप्ति । तस्याः पुरउपरिकृताद्वारः सप्त । वृताइतिपाठेसंवृताः नेत्रनासिकेश्रोत्रेमुखंचेतिसप्त । अधोद्वेद्वारौगुद लिंगे । यःकश्वनेतिआत्मनः सम्यगविज्ञानादनियतत्वाच्च । ४५ तासुसप्तसुपंचद्वारः पौरस्त्याः पूर्वदिग्भवाः ४६

श्लोकाः ३५/४६

एतेसखायःसख्योमेनरनार्यश्वमानद ॥ सुप्तायांमयिजागर्त्तिनागोयंपालयन्पुरीम् ३५ दिष्ट्यागतोसिभद्रंतेग्राम्यान्कामानभीप्ससे ॥ उद्वहिष्यामित्व त्स्नेहंस्वबंधुभिररिंदम ३६ इमांत्वमधितिष्ठस्वपुरींनवमुखींविभो ॥ मयोपनीतान्गृह्णानःकामभोगान्शतंसमाः ३७ कंनुत्वदन्यंरमयेह्यरतिज्ञमकोविदम् ॥ असंपरायाभिमुखमश्वस्तनविदंपशुम् ३८ धर्मोह्यत्रार्थकामौचप्रजानंदोमृतंयशः ॥ लोकाविशोकाविरजायन्नकेवलिनोविदुः ३९ पितृदेवर्षिमर्त्यानांभू तानामात्मनश्वह ॥ क्षेम्यंवदंतिशरणंभवेस्मिन्यद्गृहाश्रमः ४० कानामवीरविख्यातंवदान्यंप्रियदर्शनम् ॥ नवृणीतप्रियंप्राप्तंमादृशीत्वादृशंपतिम् ४१ कस्यामनस्तेभुविभोगिभोगयोःस्त्रियानसज्जेद्भुजयोर्महाभुज ॥ योऽनाथवर्गाधिमलंघृणोद्धतस्मितावलोकेनचरत्यपोहितुम् ४२ ॥ ॥ नारदउवाच ॥ ॥इतितौदंपतीतत्रसमुद्यसमयंमिथः ॥ तांप्रविश्यपुरींराजन्मुमुदातेशतंसमाः ४३ उपगीयमानोललितंतत्रतत्रचगायकैः ॥ क्रीडन्परिवृतःस्त्रीभिर्ह्रदिनीमा विशच्छुचौ ४४ सप्तोपरिकृताद्वारःपुरस्तस्यास्तुद्वेअधः ॥ पृथग्विषयगत्यर्थंतस्यांयःकश्वनेश्वरः ४५ पंचद्वारस्तुपौरस्त्यादक्षिणैकातथोत्तरा ॥ पश्चिमेद्वे अमूषांतेनामानिनृपवर्णये ४६

चूर्णिका

एतेमेसखायः सख्यश्वसंति मयिसुप्तायां अयंनागः पुरींपालयन् जागर्ति ३५ हेनृप त्वंअत्रागतोसि एतन्मेदिष्ट्या त्वंयान्विषयान् अभीप्ससि तान्संपादयिष्यामि ३६ हेविभोमयासहकामभोगान् शतंसमाः इमांपुरीं आश्रित्यभुंक्ष्व ३७ ३८ ३९ ४० ४१ ४२ ॥ ॥ नारदउवाच ॥ ॥ एवंतौदंपतीनिश्चित्य पुरीं प्रविश्य वर्षशतमु मुदाते ४३ यस्याः पुर्याः सप्तउपरिद्वाराणि ४४ ४५तत्र पंच पूर्वतः द्वे दक्षिणोत्तरे अधः द्वे ४६

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

खद्योतवदल्पप्रकाशावामनेत्ररूपा। आविः प्रकटंमुखंयस्याः साबहुप्रकाशा। दक्षिणनेत्रलक्षणा। "तस्माद्दक्षिणोअर्धआत्मनोवीर्यवत्तर" इतिश्रुतेः। स्वानुभवाच्चतत्रप्रकाशाधिक्यम्। एकत्रसंलग्ने। विभ्राजितं रूपं द्युमत्सखः चक्षुरिंद्रियसहितः (द्युमानादित्यस्तस्यावासहेतुत्वाच्चक्षुषोपितन्नाम) ४७ नलनालशब्दौछिद्रवचनौतद्वतीनालिनीनलिनीचवामदक्षिणनासिके। अत्रापिसंज्ञाभेदादेवकार्येन्यूनाधिक्यंपूर्ववत्ज्ञेयम्। अवधूतोवाय्वधिष्ठितोघ्राणः सौरभंगंधम् ४८ मुख्याप्रधानाआस्यमित्यर्थः आपणोभाषणम्। बहूदनश्चित्रमन्नम्। बह्वोदनइत्यनुक्तिः परोक्षवादत्वाय। रसज्ञंरसनेंद्रियम् विपणोवागिंद्रियंताभ्यामन्वितः (पणव्यवहारे) ४९ दक्षिणेनेतिचनतृतीया। किंतुदक्षिणस्यांदिशीत्यस्मिन्नर्थेतद्धितायमेनप्प्रत्ययस्त्योऽव्ययसंज्ञः। एवमुत्तरेणेति। अयमर्थः। पंचानांविषयाणामन्यतोऽनवगतानांप्रकाशनायालमितिपंचालंशास्त्रंश्रवणकालेचबलाधिक्याद्दक्षिणकर्णः प्रथमंप्रवर्तते। शास्त्रेचप्रथमंश्रोतव्यंकर्मकांडमित्येतावतासाम्येनप्रवृत्तसंज्ञस्यकर्मकांडस्यदक्षिणकर्णेनश्रवणामिष्यते। ततस्तदर्थमनुष्ठाय पितृभिराहूतः

॥१०३॥ पितृलोकप्रापकं पितृयाणंप्रपद्यते। तदत्तेनप्रकारेणपितृणामाह्वानं अनेनभवतीतिपितृहूर्दक्षिणः कर्णः। एवंतद्वैपरीत्येनोत्तरः कर्णो देवहूः तथाचव्याख्यास्यति। "पितृहूर्दक्षिणःकर्णउत्तरोदेवहूःस्मृतः प्रवृत्तंचनिवृत्तंचशास्त्रंपंचालसंज्ञकं। पितृयानंदेवयानंश्रोत्राच्छ्रुतधरात् व्रजेदि"ति ५०। ५१। असुराइंद्रियारामास्तेषामियमासुरीशिश्नद्वाः ग्रामकं ग्रामस्थजनानांकंसुखंव्यवायम्। दुर्मदेनगुह्येंद्रियेण ५२ निर्ऋतिर्नामगुदः मृत्युद्वारत्वात्। वैशसंमलविसर्गलक्षणंविषयंलुब्धकेमपायुनातेनोत्क्रांतस्यदुःखप्राप्तेर्लुब्धकसाम्यम्। ५३ अमीषांमध्येनिर्वाक्पादः पेशस्कृत्हस्तः। तावुभावंधौ। छिद्राभावात्स्वतोज्ञानक्रियाशक्त्यभावाच्च। अक्षण्वतांइंद्रियवतांदेहानामधिपतिः पुरंजनः त्वगिंद्रियस्यानुक्तिः सर्वेष्वंतर्भावात् ५४ अंतःपुरंहृदयंगतः विषूचीनंसर्वतोमुखंमनः मोहप्रसादहर्षाः तमःसत्त्वरजःकार्याणि। जायाबुद्धिः आत्मजाइंद्रियपरिणामास्तदुद्भवं (तत्रहृष्यत्यनेनेतिहर्षः सर्गादिचिंतनम्) ५५ (कामात्माविषयासक्तमनाः वंचितोदैवेनेतिशेषः अबुधोअविवेकी। महिषीराज्ञीबुद्धिः ५६

श्लोकाः ४७/५६

खद्योताविर्मुखीचप्राग्द्वारावेकत्रनिर्मिते ॥ विभ्राजितंजनपदंयातिताभ्यांद्युमत्सखः ४७ नलिनीनालिनीचप्राग्द्वारावेकत्रनिर्मिते ॥ अवधूतसखस्ताभ्यां विषयंयातिसौरभम् ४८ मुख्यानामपुरस्ताद्द्वास्तयापणबहूदनौ ॥ विषयौयातिपुरराड्रसज्ञविपणान्वितः ४९ पितृहूर्नृपपुर्याद्वार्दक्षिणेनपुरंजनः ॥ राष्ट्रंदक्षिणपंचालंयातिश्रुतधरान्वितः ५० देवहूर्नामपुर्याद्वाउत्तरेणपुरंजनः ॥ राष्ट्रमुत्तरपंचालंयातिश्रुतधरान्वितः ५१ आसुरीनामपश्चाद्द्वास्तयायातिपुरंजनः ॥ ग्रामकंनामविषयंदुर्मदेनसमन्वितः ५२ निर्ऋतिर्नामपश्चाद्द्वास्तयायातिपुरंजनः ॥ वैशसंनामविषयंलुब्धकेनसमन्वितः ५३ अंधावमीषांपौराणां निर्वाक्पेशस्कृतावुभौ ॥ अक्षण्वतामधिपतिस्ताभ्यांयातिकरोतिच ५४ सयर्ह्यंतःपुरगतोविषूचीनसमन्वितः ॥ मोहंप्रसादंहर्षंवायातिजायात्मजोद्भवम् ५५ एवंकर्मसुसंसक्तःकामात्मावंचितोऽबुधः ॥ महिषीयद्यदीहेततत्तदेवान्ववर्त्तत ५६

॥१०३॥

चूर्णिका तत्रद्वारद्वयेनपश्यति ४७ द्वयेनजिघ्रति ४८ ऐकेन खादति ४९ दक्षिणोत्तराभ्यांदक्षिणोत्तरसंज्ञौपंचालदेशौयाति ५० एकेन अधोद्वारेण व्यवायसुखं गृह्णाति ५१ ५२ अपरेण मलंत्यजति ५३ पुर्याः चत्वारः अंधसंज्ञकाः दासाः संति ५४ तत्रद्वाभ्यांयाति द्वाभ्यांकरोति ५५ एवंपुरंजनः कर्मासक्तः सन् स्त्रीयथाकरोतितथानुवर्तते ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अश्नंत्यांभोजनंकुर्वत्याम्) जक्षत्यांभक्षयंत्याम् ५७ । ५८ आसतींआसीनाम् ५९ । ६० । ६१ । सर्वा (समग्रा) असंगत्वादिलक्षणाप्रकृतिः स्वभावोवंचितोयस्य । सर्वथाप्रकृत्यावंचितइतिवा । नेच्छन् अनिच्छन्क्लैब्यात्पारवश्यात् (क्रीडामृगोगृह्योमर्कटः) ६२ इतिचतुर्थस्कंधेटीकायांपंचविंशोध्यायः २५ ॥ ॥ षड्विंशेमृगयाव्याजात्स्वप्नजागरणोक्तिवः । सुबुद्धित्यागयोगाभ्यांसंसृतिः साप्रपंच्यते ॥१॥तदेवमात्मनउपाधिकृतांसुषुप्त्यवस्थांजाग्रदवस्थांचोक्त्वेदानींस्वप्नावस्थामाह सएकदेतिदशभिः । महानिष्वासोधनुःकर्तृत्वभोक्तृत्वाद्यभिनिवेशोयस्यसरथमारुह्यपंचप्रस्थंवनमगादितितृतीयेनान्वयः । रथं तदानीमेवविधृतंस्वप्नदेहंजाग्रद्देहस्यशतसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात् । पंच ज्ञानेंद्रियाणि अश्वायस्य । आशुगंशीघ्रगतिंद्वेअहंताममतेइषेदांडिकेयस्य । द्वेपुण्यपापेचक्रेयस्य । एकंप्रधानमक्षोयस्य । त्रयोगुणावेणवोध्वजायस्य । पंचप्राणाबंधुराणिबंधनानियस्य । १ एकंमनोरश्मिः प्रग्रहोयस्य । एकाबुद्धिर्दमनः सूतोयस्यतंचतंच । एकंनीडंरथिनउपवेशस्थानंयस्मिन् । द्वौशोकमोहौकूबरौयुगबंधनस्थानंयस्य । पंचशब्दादयोविषयाः प्रह्रियंतेप्रक्षिप्यंतेयस्मिन् । अस्यव्याख्यानंभविष्यति पंचेंद्रियार्थप्रक्षेपइति । सप्तधातवोवरूथारक्षार्थंचर्माद्यावरणानियस्य । पंचकर्मेंद्रियाणिविक्रमागतिप्रकारायस्य । २ हैमोपस्करंसौवर्णाभरणम् । स्वर्णवर्मा । वर्म कवचम् । रजोगुणावृतइत्यर्थः । अक्षयेषुधिः । इषुधिर्निषंगः अनंतवासनायुक्ताहंकारोपाधिः एकादशोमनोरूपश्चमूनाथः सेनापतिर्यस्य । वासनामयस्यमनसः प्रग्रहत्वात् संकल्पविकल्पात्मकस्यवृहद्बलत्वेनवक्ष्यमाणस्यचमूनाथत्वमितिविभागः । पंचशब्दादयोविषयाःप्रस्थाःसानवोयस्मिन्तद्वनंभजनीयंदेशमगात् । ३ आत्ताग्रहीताइषवोरागादिरूपाः कार्मुकंचभोगाद्यभिनिवेशरूपंयेन । जायांविवेकवतींबुद्धिंविहायअतदर्हांत्यागानर्हांत्यागेहेतुः । मृग्यंतइतिमृगाः विषयाः तेषुव्यसनंभोगासक्तिः तेनलालसाअतिस्पृहायस्य ४

श्लोकाः ५७ / ४

क्वचित्पिबंत्यांपिबतिमदिरांमदविह्वलः ॥ अश्नंत्यांक्वचिदश्नातिजक्षत्यांसहजक्षति ५७ क्वचिद्गायतिगायंत्यांरुदत्यांरुदतिक्वचित् ॥ क्वचिद्धसंत्यांहसतिजल्पंत्यामनुजल्पति ५८ क्वचिद्धावतिधावंत्यांतिष्ठंत्यामनुतिष्ठति ॥ अनुशेतेशयानायामन्वास्तेक्वचिदासतीम् ५९ क्वचिच्छृणोतिशृण्वंत्यांपश्यंत्यामनुपश्यति ॥ क्वचिज्जिघ्रतिजिघ्रंत्यांस्पृशंत्यांस्पृशतिक्वचित् ६० क्वचिच्चशोचतींजायामनुशोचतिदीनवत् ॥ अनुहृष्यतिहृष्यंत्यांमुदितामनुमोदते ६१ विप्रलब्धोमहिष्यैवंसर्वप्रकृतिवंचितः ॥ नेच्छन्ननुकरोत्यज्ञःक्लैब्यात्क्रीडामृगोयथा ६२ इतिश्रीभा०म०च०स्कंधेपुरंजनोपाख्यानेपंचविंशोध्यायः २५ ॥ ॥ नारदउवाच ॥ ॥ सएकदामहेष्वासोरथंपंचाश्वमाशुगम् ॥ द्वीषंद्विचक्रमेकाक्षंत्रिवेणुंपंचबंधुरम् १ एकरश्म्येकदमनमेकनीडंद्विकूबरम् ॥ पंचप्रहरणंसप्तवरूथंपंचविक्रमम् २ हैमोपस्करमारुह्यस्वर्णवर्माक्षयेषुधिः ॥ एकादशचमूनाथःपंचप्रस्थमगाद्वनम् ३ चचारमृगयांतत्रदृप्तआत्तेषुकार्मुकः ॥ विहायजायामतदर्हांमृगव्यसनलालसः ४

चूर्णिका

कदाचित् तस्यांमदिरांपिबंत्यांस्वयंपिबति ५७ अश्नंत्यां अश्नाति रुदंत्यां रुदति हसंत्यांहसति५८जल्पंत्यां जल्पति५९ ६० ६१ एवं सा यद्यत् करोति तत्तदेव अयमपिकुरुते एवंमहिष्यावांचितः क्रीडामृगइवअनुकरोति अज्ञवत् ६२ ॥ इतिचतुर्थेपंचविंशः ॥ २५ ॥ ॥ ॥ नारदउवाच ॥ ॥ एकदा सः राजा एकादशचमूनाथः धनुर्बाणान् प्रगृह्य रथं पंचेंद्रियरूपाश्वं अहंममतारूपद्विदंडिकं पुण्यपापरूपद्विचक्रम् प्रधानाक्षं त्रिगुणध्वजम् पंचप्राणबंधनम् १ मनःप्रग्रहम् बुद्धिसूतं हृदयनीडम् द्वौशोकमोहौयुगबंधनस्थानंयस्यतम् पंचविषयप्रहरणं सप्तधातवः रक्षार्थं आवरणानियस्यतं पंचकर्मेंद्रियगतिप्रकारं २ एतादृशंस्वप्नदेहरूपंरथं आस्थायपंचविषयरूपंवनंप्रविश्य ३ विवेकवतीं बुद्धिरूपांस्त्रियंगृहेविहाय अनेकविषयरूपान् मृगशशादीन् न्यहनत् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

बाणैरागादिभिः वनेषुभजनीयदेशेपुवनगोचरान् भजनीयविषयान् न्यहनत् आत्मसात्कृतवान् । आसुरींराजसीम् । कथापक्षेतुस्पष्टमेव ५ नन्वासुरींवृत्तिमाश्रित्येति किमितिमृगयानिंद्यते । कथापक्षे तावद्राज्ञोविहितैवसा । अध्यात्मपक्षेपिजीवस्यविषयभोगोविहितएवअन्यथाशरीरनिर्वाहोपिनस्यात्। इत्याशंक्याह तीर्थेष्विति त्रिभिः । अयंभावः । नहिमृगयाविधीयते रागप्राप्तत्वात् किंतुनियम्यते प्रवृत्तिःसंकोच्यते । नियममेवषाड्विधं दर्शयति । यद्यलं अत्यर्थं लुब्धोरागीसन्हन्यात्तर्हितीर्थेषुश्राद्धादिष्वेवतत्रापिप्रतिदृष्टेषुप्रख्यातेष्वेव नतुनित्यश्राद्धादिषु तत्रापिराजैव मेध्यानेव वनएव यावदुपयोगमेवेति । एवंजीवस्यविषयसेवापियावदुपयोगं नयथेष्टमितिनियमएवेत्यर्थः ६ अतोनावश्यकत्वमित्याह । यइति । एवंनियतंकर्मविद्वान् तेनेत्युपलक्षणंतेनअन्येनवाकर्मणाएवमनुष्ठितेनयत्ज्ञानंभवतितेनज्ञानेननहेतुनासोऽनुष्ठाता नलिप्यते ७ अन्यथानियमोल्लंघनेनअंतःकरणशुद्ध्यभावात्कर्तृत्वाभिमानमारूढः कर्मभिरनुबध्यते । ततश्चगुणप्रवाहेपतितोऽधोव्रजति ८ प्रासंगिकंपरिसमाप्यपुनर्मृगयामेवानुवर्तयति तत्रेति । चित्रावाजाःपक्षायेषांतैः विप्लवोनाशः करुणात्मनांकृपालूनांदुःसहः । ९ (शशादीन्मेध्यान्महिषादीन्मेध्यांश्च । रुरवश्चशल्यकाश्चतान्) १० तदेवंस्वप्नावस्था दर्शिता । इदानीं पुनरपिविवेकवत्याबुद्ध्यारममाणस्यपुत्रादिसंततिंप्रपंचयिष्यन्कथासौंदर्यायतस्याः प्रणयकुपितायाः अनुनयं प्रस्तावसहितमाह । ततइत्यारभ्ययावदध्यायसमाप्ति । एयिवान्आगतः कृतंस्नानंउचितआहारश्चयेन । संविवेश शय्यामाश्रितः ११ । १२ गृहमेधिनीं विवेकवतीं सात्विकीं बुद्धिंराजस्यांबुद्धौवर्तमानोनापश्यत् १३ हेवेदिषत् हेप्राचीनबर्हिः अंतःपुरस्त्रियः तत्सखीः (इंद्रियवृत्तीः । सेश्वरीणांस्वामिनीसहितानां । यथापुरेत्यादिपृथक्वाक्यम् । (मह्यंपुरायथारोचंतेतथैतर्हि इदानींनेति) १४ व्यंगेचक्राद्यंगहीने (रथेइव तस्मिन्गेहे) १५

श्लोकाः ५/१५

आसुरींवृत्तिमाश्रित्यघोरात्मानिरनुग्रहः ॥ न्यहनन्निशितैर्बाणैर्वनेषुवनगोचरान् ५ तीर्थेषुप्रतिदृष्टेषुराजामेध्यान्पशून्वने ॥ यावदर्थमलंलुब्धोहन्यादितिनियम्यते ६ यएवंकर्मनियतंविद्वान्कुर्वीतमानवः ॥ कर्मणातेनराजेंद्रज्ञानेननसलिप्यते ७ अन्यथाकर्मकुर्वाणोमानारूढोनिबध्यते ॥ गुणप्रवाहपतितोनष्टप्रज्ञोव्रजत्यधः ८ तत्रनिर्भिन्नगात्राणांचित्रवाजैःशिलीमुखैः ॥ विप्लवोभूद्दुःखितानांदुःसहःकरुणात्मनाम् ९ शशान्वराहान्माहिषान्गवयान्रुरुशल्यकान् ॥ मेध्यानन्यांश्चविविधान्विनिघ्नन्श्रममध्यगात् १० ततःक्षत्तृट्परिश्रांतोनिवृत्तोगृहमेयिवान् ॥ कृतस्नानोचिताहारःसंविवेशगतक्लमः ११ आत्मानमर्हयांचक्रेधूपालेपस्रगादिभिः ॥ साध्वलंकृतसर्वांगोमहिष्यामादधेमनः ॥ तृप्तोहृष्टःसुदृप्तश्चकंदर्पाकृष्टमानसः ॥ नव्यचष्टवरारोहांगृहिणींगृहमेधिनीम् १२ अंतःपुरस्त्रियोपृच्छद्विमनाइववेदिषत् ॥ अपिवःकुशलंरामाःसेश्वरीणांयथापुरा ॥ नतथैतर्हिरोचंतेगृहेषुगृहसंपदः १४ यदिनस्याद्गृहेमातापत्नीवापतिदेवता ॥ व्यंगेरथइवप्राज्ञःकोनामासीतदीनवत् १५

चूर्णिका

ततः बाणैः हतानांमृगाणां नाशः अभूत् ५ ६ ७ ८ ९ ततः मृगयायांशशान् वराहान् महिषान् गवयान् रुरुशल्लकान् अन्यांश्चनिघ्नन् १०श्रातः गृहं एत्य स्नानादि कृत्वा ११ कामविद्धः गृहिणींसस्मार १२ १३ तदा तां अदृष्ट्वा दासीः अपृच्छत् १४ हेदास्यः साललनाकास्ति यामांउद्धरते यदिनस्यात्गृहेमातापत्नीवापतिदेवता ॥ व्यंगेरथइवप्राज्ञःकोनामासीत दिनवत् १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प्रज्ञांविवेकंप्रतिक्षणंदीपयंतीउद्बोधयंतीमामुरद्धते) १६ निरवस्तारेआस्तरणरहिते(रजोन्विते) १७ अवधुतांत्यक्तदेहादरां(रजोयोगात्त्यक्तविवेकामित्यर्थः) तत्संगेनउन्मथितंव्याकुलंज्ञानंयस्य १८ प्रेमसंरंभः प्रणयकोपः तस्यलिंगंकुटिलदृष्ट्यादिस्वस्मिन् नलब्धवान् १९ उत्संगमारोप्यलालितां (पस्पर्शासिषेवेत्तद्वशोभूदित्यर्थः।) २० कृतमागोऽपराधोयैस्तेषुतथाभूतेषु (येषुस्वामिनः) आत्मसात्कृत्वा अस्मदधीनोयमितिमत्वाशिक्षार्थंदंडः शिक्षादंडस्तंनकुर्वंतितेभृत्यामंदभाग्याः २१(ननुदंडस्यनिग्रहरूपत्वात्सकथंप्रार्थ्यतेइत्यतआह)यतः परमोऽनुग्रहोदंडः। यस्तुदंडितोविषीदातिसोऽज्ञइत्याह बालइति। बंधुकृत्यंशिक्षाकरणंअमर्षणः क्रोधी।(शिक्षार्थंकृतमपिदंडंनिग्रहंमत्वाबंधुभ्यः क्रुध्यतीत्यर्थः) २२ हेसुदतिहेसुभ्रूःहेमनस्विनिसात्वमस्माकंस्वामिनीअतःस्वानांमुखंप्रदर्शय। कीदृशंअनुरागभारेण व्रीडयाचयोविलंबःमंथरतातेनाविलसन्हासितावलोकोयास्मिन्। नीलाअलकाएवअलयस्तैरुपस्कृतं भूषितम्। उन्नसंउच्चनासिकंवल्गु (मनोहरं) वाक्यंयत्रतत्।२३ हेवीरपत्नि वीरस्यममभार्येयस्तवकृतापराधस्तस्मिन्नहं ब्राह्मणकुलादन्यत्रअन्यस्मिन्प्राणिनिमुरारिपुदासादितरत्रचदमंदधेदंडंकरोमि। किंतु तंविगतभयंउच्चैर्मुदितंत्रिलोक्यांलोकत्रयेअन्यत्रवैलोकत्रयाद्बहिरपिनपश्यामि।यस्तेपराधीसयत्रकुत्रापिगतोमद्भयान्मरिष्यतीत्यर्थः २४ ते(तव)वक्त्रंइतःपूर्वंकदाचिदपिवितिलकंनपश्यामि। (विहर्षंप्रमोदरहितं) संरंभेणकोपावेशेनभीमंभयंकरम्। अविमृष्टमनुज्वलं अपेतरागंस्नेहशून्यंतथातेसुजातौशोभनौस्तनावपि शोकाश्रुभिरुपहतौनपश्यामि।तथाबिंबफलाकारंअधरंचविगतःकुंकुमपंकतुल्यस्तांबूलरागोयस्मात्तादृशंनपश्यामिइदानींकुतएवंजातमितिशेषः। पाठांतरेएवंभूतंमुखंस्तनौचपश्यन्शंनाविंदामीत्यन्वयः२५

श्लोकाः १६—२५

क्ववर्ततेसाललनामज्जंतंव्यसनार्णवे ॥ यामामुद्धरतेप्रज्ञांदीपयंतीपदेपदे १६ ॥ ॥ रामाऊचुः ॥ ॥ नरनाथनजानीमस्त्वत्प्रियायद्व्यवस्यति ॥ भूतलेनिरवस्तारेशयानांपश्यशत्रुहन् १७॥ ॥नारदउवाच॥ ॥पुरंजनःस्वमहिषींनिरीक्ष्यावधुतांभुवि ॥ तत्संगोन्मथितज्ञानोवैक्लव्यंपरमंययौ १८ सांत्वयन् श्लक्ष्णयावाचाहृदयेनविदूयता ॥ प्रेयस्याःस्नेहसंरंभलिंगमात्मनिनाभ्यगात् १९ अनुनिन्येथशनकैर्वीरोनुनयकोविदः ॥ पस्पर्शपादयुगलमाहचोत्संगलालिताम् २०॥ ॥पुरंजनउवाच॥ ॥ नूनंत्वकृतपुण्यास्तेभृत्यायेष्वीश्वराःशुभे ॥ कृतागस्स्वात्मसात्कृत्वाशिक्षादंडंनयुंजते २१ परमोनुग्रहोदंडोभृत्येषुप्रभुणार्पितः ॥ बालोनवेदतत्तन्विबंधुकृत्यममर्षणः २२ सात्वंमुखंसुदतिसुभ्र्वनुरागभारव्रीडाविलंबविलसद्धसितावलोकम् ॥ नीलालकालिभिरुपस्कृतमुन्नसंनःस्वानांप्रदर्शयमनस्विनिवल्गुवाक्यम्२३तस्मिन्दधेदममहंतववीरपत्नियोन्यत्रभूसुरकुलात्कृतकिल्बिषस्तम् ॥ पश्येनवीतभयमुन्मुदितंत्रिलोक्यामन्यत्रवैमुररिपोरितरत्रदासात् २४ वक्त्रंनतेवितिलकंमलिनंविहर्षंसंरंभभीममविमृष्टमपेतरागम् ॥ पश्येस्तनावपिशुचोपहतौसुजातौबिंबाधरंविगतकुंकुमपंकरागम् २५

चूर्णिका

१६ एवंश्रुत्वा दास्यऊचुः हेनरनाथत्वंत्प्रियायत्इच्छाति ततवयंनजानीमः भूतले शयानां तांपश्य १७ तदा पुरंजनः स्वमहिषीं निरीक्ष्य तस्याः संगेन अतिव्याकुलतांगत्वा १८ तांसांत्वयित्वातस्याःपादौस्पृष्ट्वातांउत्संगेआरोप्यउवाच १९ २० हेसुभ्रूः हेसुदतित्वन्मुखं हास्यावलोकयुतंमांदर्शय वल्गुवाक्यंचवद २१ २२ २३ हेममभार्ये येतवकृतापराधाः तेषुब्रह्मकुलात् मुररिपोः दासात् अन्यत्र दंडंकरोमि २४ इतःपूर्वंत्वन्मुखंवितिलकंनपश्यामि इदानीमेवकुतःएवंजातम् २५

---

१ यस्मिन्निितिपाठः मु. पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तस्मात्कृतंकिल्बिषमपराधोयेनतस्य। किल्बिषमेवाह। स्वैरंस्वातंत्र्येणत्वामपृष्ट्वा मृगयांगतस्य। देवोदेवनंक्रीडातांरातिददातीतिदेवरःकांतः तंकामवेगेनविस्रस्तंगतंपौंस्नंपौरुषंधैर्यंयस्यतंउशतीकामयमा नाकृत्येकर्तुंयोग्येअर्थेकानभजेत२६इतिचतुर्थस्कंधेटीकायांषड्विंशोध्यायः२६॥ ॥सप्तविंशेप्रियापुत्राद्यासक्त्याविस्मृतात्मनः।कालकन्याद्युपाख्यानैर्जरारोगाद्युदीर्यते॥१॥तदेवंजीवस्यानुनयादिकथासौंदर्येण अत्यंतमुपाधिवश्यत्वमुक्त्वातन्निमित्तांसंसारपरंपरांनिपरूपयितुमाह।इत्थमिति। अत्रचप्रतिपदंकथंचिदध्यात्मपक्षेपियोजयितुंशक्यमेव। श्रीनारदेनतुजीवस्यस्त्रीपुरुषवासनादार्ढ्येनविचित्रासंसृतिर्भवतीत्ये तावदेवकथातात्पर्यंदर्शितम्। "क्वचित्पुमान्क्वचिच्चस्त्रीक्वचिन्नोभयमंधधीः। देवोमनुष्यस्तिर्यग्वायथाकर्मगुणंभव"इतिवदता। तत्रादौपुंस्त्वेनसंसृतिरध्यायत्रयेणोक्ता। ततश्चैकेनाध्यायेनस्त्रीत्वेनसंसृतिंमद श्यैश्वरप्रसादलब्धज्ञानेनमोक्षइत्युक्तम्। ततस्तदेवयथोपयोगंव्याख्यातमितिपंचाध्याय्यारंभः प्रतीयते। प्रतिपदमध्यात्मयोजनातुदुर्घटाप्रायशोनिःप्रयोजनाचेतिस्वप्रौढिप्रख्यापनमनाहत्ययथोपयोगमेव व्याख्यास्यामः सम्यक्सम्यक्विभ्रमैर्विलासैः (वृत्तिविशेषैः पुरंजनीपुरंजनस्यस्त्रीबुद्धिः) १ कृतंस्वस्त्ययनंमंगलंकुंकुमसिंदूरादिभिर्यस्याः तां (समीपमागतांसराजापुरंजनः) २ उपगूढः परिरब्धः। प रिरब्धाकंधरातस्याप्रियेन। रहएकांते। अनुमंत्रैः अनुकूलैः गुह्यभाषणैः अपकृष्टाचेतनाविवेकोयस्य। कालरंहआयुर्व्ययम्। अहर्निशमित्येवंप्रमदैवपरिग्रहोनज्ञानसाधनंयस्य ३ महार्हतल्पेउत्कृष्टश य्यायां (ज्ञाननाशिनिवृत्तिविशेषे) शयानः महिष्याभुजउपधिरुपधानं उच्छीर्षकंयस्य। अविसर्गपाठेशयनक्रियाविशेषणम्। तांमहिषींमेवपरंपुरुषार्थममन्यत नतुयन्निजंरूपंब्रह्मतत् तमसाअज्ञानेनाभि भूतोयतः ४ (व्यतिक्रांतंगतम्)५ पुत्रानिंद्रियपरिणामान्। दुहितॄः तदनंतरबुद्धिवृत्तीः। (चक्षुरादिमनोंतानींद्रियाण्येकादश तेषां परिणामाः प्रत्येकंशतमित्येकादशशतानिभवंति।)इयंपुत्रसंख्याचबा हुल्यमात्रविवक्षया। दुहितृसंख्यातुपुत्रेभ्योन्यूनत्वेनगार्हस्थ्यसौंदर्यार्थमेव। विराट्सम्राट्। आयुषोर्धमित्याद्यपिकथासौंदर्यार्थमेव। ६ पुरंजनकन्यात्वात्पौरंजन्यः। हेप्रजापते ७ दारैः परिणामानं तरं हिताहितचिंताभिः वरैरुचितभोगैः ८

तन्मेप्रसीदसुहृदःकृतकिल्बिषस्यस्वैरंगतस्यमृगयांव्यसनातुरस्य॥ कादेवरंवशगतंकुसुमास्त्रवेगविस्रस्तपौंस्नमुशतीनभजेतकृत्ये २६ इतिश्रीभागवते महापुराणेचतुर्थस्कंधेपुरंजनोपाख्यानेषड्विंशोध्यायः॥ २६॥ ॥ ॥नारदउवाच॥ ॥ इत्थंपुरंजनंसम्यग्वशमानीयविभ्रमैः॥ पुरंजनीमहाराज रेमेरमयतीपतिम् १ सराजामहिषींराजन्सुस्नातांरुचिराननाम्॥ कृतस्वस्त्ययनांतृप्तामभ्यनंददुपागताम् २ तयोपगूढःपरिरब्धकंधरोरहोनुमंत्रैरपकृष्ट चेतनः॥ नकालरंहोबुबुधेदुरत्ययंदिवानिशेतिप्रमदापरिग्रहः ३ शयानउन्नद्धमदोमहामनामहार्हतल्पेमहिषीभुजोपधिः॥ तामेवबीरोमनुतेपरंयतस्त मोभिभूतोननिजंपरंचयत् ४ तयैवंरममाणस्यकामकश्मलचेतसः॥ क्षणार्धमिवराजेंद्रव्यतिक्रांतंनवंवयः ५ तस्यामजनयत्पुत्रान्पुरंजन्यांपुरंजनः॥ शतान्येकादशविराडायुषोर्धमथात्यगात् ६ दुहितृर्दशोत्तरशतंपितृमातृयशस्करीः॥ शीलौदार्यगुणोपेताःपौरंजन्यःप्रजापते ७ सपंचालपतिःपुत्रा न्पितृवंशविवर्धनान्॥ दारैःसंयोजयामासदुहितॄःसदृशैर्वरैः ८

श्लोकाः २६/८

चूर्णिका

तस्मात् कृतकिल्बिषस्य त्वांअपृष्ट्वा मृगयांगतस्य मेप्रसीद अहोस्त्रीवशगतंत्यक्तधैर्यं पुरुषंकामुकास्त्री कर्तुंयोग्येअर्थे कानभजेत् २६॥ इतिचतुर्थेषड्विंशः॥ २६॥ नारदउवाच॥ ॥हेप्राचीनबर्हिः इत्थंपुरंजनी पुरंजनंविभ्रमैः वशंआनीय पतिंरमयतीरमे १ २ सःतया आलिंगितकंठः एकांतगुह्यभाषणैः गताविवेकः स्त्रीपरिग्रहः सन् दिवारात्रिरूपं आयुर्व्ययं नबुबुधे ३ तयाअभिभूतः सन् स्वस्वरूपं ब्रह्मतत्साधनंज्ञानंचनसस्मार ४ एवंतयासहरममाणस्य नवंवयः क्षणार्धमिवव्यतिक्रांतं५ पुरंजनः तस्यां एकादशशतंपुत्रान् दशोत्तरशतंकन्याश्चजनयामास ६ तदातस्यआयुषः अर्द्धअभूत् तेषांतासांच विवाहान् अकरोत् ७ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पुत्राणांपुत्राः कर्माणि । (शतशब्दः पूर्ववत्) पंचालेषुशब्दादिविषयेषु । ९ तेषुपुत्रादिषु तेषामपियेरिक्थहाराः पुत्रास्तेषुच १० (भूतपतीन्भैरवादीन्) ११ युक्तेषु (उचितेषु) आत्महितेषुकर्मसुअनवहितस्य । (प्रियाहृद्यायोषितो येषांतेषांकामुकानांयोऽप्रियः) सवैकालः जरालमयः १२ (गंधर्वाणांअहोरात्ररूपाणांस्वावयवानामधिपतिः) चंडो वेगो (यस्य अतश्चंडवेगइतिख्यातः) संवत्सरेणावर्तमानोयोऽनुपलक्षितः गंधर्वा दिवसाः । १३ गंधर्व्योरात्रयः तादृशीस्तादृश्यः मैथुन्यः दिवसैर्मिथुनीभूयस्थिताः सिताश्चासिताश्चशुक्लकृष्णपक्षीयाः (परिवृत्या) परिभ्रमणेन सर्वैः कामैः सह विनिर्मितांपुरीमपहरंति १४ प्रजागरः प्राणः । १५ (विंशकेन) विंशत्याचसह । (समाः वर्षाणि ।) २६ (बहुभिः सहयुधासंग्रामेणएकस्मिन्)स्वसंबंधेस्वसंबंधिनिप्राणे । (राष्ट्रेणविषयेणपुरेणनवद्वारदेहलक्षेणनबांधवैरिंद्रियैश्चसहवर्तमानः) १७ सएवमधुभुक् क्षुद्रसुखभोक्तास्वपार्षदैरिंद्रियैः नाविदत्नालोचितवान् १८ कालस्यदुहिताजरा (त्रिलोकींपर्यटंती) अस्तितांनप्रत्यनंदत्नैच्छत्बर्हिष्मन् हेप्राचीनबर्हिः १९ पूरवेययातिपुत्रायतेनवृतासतीवरमदात् । ययातिः शुक्रशापाज्जरांप्राप्यपुत्रानुवाच इमांगृह्णीतेति । तांज्येष्ठाश्चात्वारोनजगृहुः पूरुस्तुजगृहे ततोययातिस्तस्मैराज्यं ददावितिजरेवादादित्युक्तम् २० (मांबृहद्व्रतं ब्रह्मचारिणंजानत्यपि ब्रह्मलोकात्पृथ्वीमागतम्) २१

॥१०८॥ श्लोकाः ९/२१

पुत्राणांचाभवन्पुत्राएकैकस्यशतंशतम् ॥ यैर्वैपौरंजनोवंशःपंचालेषुसमेधितः ९ तेषुतद्रिक्थहारेषुगृहकोशानुजीविषु ॥ निरूढेनममत्वेनविषयेष्वन्वबध्यत १० ईजेचक्रतुभिर्घोरैर्दीक्षितःपशुमारकैः ॥ देवान्पितॄन्भूतपतीन्नानाकामोयथाभवान् ११ युक्तेष्वेवंप्रमत्तस्यकुटुंबासक्तचेतसः ॥ आससादसवैकालोयोऽप्रियःप्रिययोषिताम् १२ चंडवेगइतिख्यातोगंधर्वाधिपतिर्नृप ॥ गंधर्वास्तस्यबलिनःषष्ट्युत्तरशतत्रयम् १३ गंधर्व्यस्तादृशीरस्यमैथुन्यश्चसितासिताः ॥ परिवृत्याविलुंपंतिसर्वकामविनिर्मिताम् १४ तेचंडवेगानुचराःपुरंजनपुरंयदा ॥ हर्तुमारेभिरेतत्रप्रत्यषेधत्प्रजागरः १५ ससप्तभिःशतैरेकोविंशत्याचशतंसमाः ॥ पुरंजनपुराध्यक्षोगंधर्वैर्युयुधेबली १६ क्षीयमाणेस्वसंबंधेएकस्मिन्बहुभिर्युधा ॥ चिंतांपरांजगामार्त्तःसराष्ट्रपुरबांधवः १७ सएवपुर्यांमधुभुक्पंचालेषुस्वपार्षदैः ॥ उपनीतंबलिंगृह्णन्स्त्रीजितोनाविदद्भयम् १८ कालस्यदुहिताकाचित्त्रिलोकींवरमिच्छती ॥ पर्यटंतीनबर्हिष्मन्प्रत्यनंदतकश्चन १९ दौर्भाग्येनात्मनोलोकेविश्रुतादुर्भगेतिसा ॥ यातुष्टाराजर्षयेतुवृतादात्पूरवेवरम् २० कदाचिदटमानासाब्रह्मलोकान्महींगतम् ॥ वव्रेबृहद्व्रतंमांतुजानतीकाममोहिता २१

धूर्णिका

ऐककस्य शतंशतं पुत्राः अभवन् यैः पुरंजनवंशः समेधितः ९ एवंसः विषयेषु अन्वबध्यत १०सः पुरंजनः दीक्षां गृहीत्वा घोरैः पशुमारकैः क्रतुभिः देवादीन् ईजे यथाभवान् ११ एवं कुटुंबे आसक्तस्य सतः जरारूपः कालः आजगाम १२ सचंडवेगोनामगंधर्वाधिपतिः तस्यषष्ट्युत्तरशतत्रयं सेवकाः गंधर्वाः तावत्यः सितासिताः गंधर्व्यः दास्यः १३ १४ एवंसः चंडवेगः विंशतिसप्तशतैः सैन्यरूपैर्युक्तः पुरंजनपुरंहर्तुंआरेभे १५ तदातैः साकं पंचशीर्षा प्रजागरः शतंसमाः युयुधे १६ सः बले क्षीयमाणे परांचिंतांआप १७ सः पुरंजनः पुर्यांस्वपार्षदैः इंद्रियैः आनीतंबलिंगृह्णन् स्त्रीजितः भयंनाविंदत् १८ हेराजन् एतस्मिन्कालेकालस्यकन्याजरानाम्नी पतिंइच्छती त्रिलोकीं बभ्राम तां कोपि नैच्छत् १९ २० कदाचित्सा अटमाना मां पथि दृष्ट्वा वर्तुं ऐच्छत् मयिक्रुद्धेसति मांशापंअदात् २१

॥१०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. च. प्रत्याख्यातवाति मयि संरभ्य क्रोधं कृत्वा नैकत्रस्थातुमर्हसीति शापमदात् २२ (ततःसाकन्यका)आधयोव्याधयश्चयवनास्तेषामीश्वरं भयनामानं मृत्युरूपंपातिंवव्रे । २३ हेवीरत्वामीप्सितं पतिम अ०
हंवृणे नरिष्यति ननश्यति । (अतोममसंकल्पः सिध्यत्वित्यर्थः) २४ लोकतोवेदतश्चयत्देयत्वेनग्राह्यत्वेनचउपनतं प्राप्तं तद्याच्यमानं योनददाति । यश्चदीयमानं नेच्छतिनगृह्णाति इमौद्वौ (बालाव
टीका ज्ञौ) कर्मभूतौअनुशोचंतिसंतः । (असन्अवग्रहआग्रहोययोस्तौ) । २५ (अथोअतःकारणात्) पुरुषेणकर्तव्योधर्मः पौरुषः (अनुकंपतेअनुगृह्णातीत्यर्थः) २६ देवगुह्यंमरणंतद्धिप्राणिनांवैराग्यानु ॥२८॥
दयायदेवैर्गोप्यते । (तच्चिकीर्षुः ।) २७ तुभ्यंतव । आत्मसमाधिना (स्वकीय–)–ज्ञानदृष्ट्या । याच्यमानोयंलोकस्त्वांनेच्छति अभद्रांदुर्भगाम् ।) २८ अतोअव्यक्तगतिःकुतःप्राप्तेयमित्यलक्षितग
तिःसतीलोकमाक्रम्यभुंक्ष्व । एवंसर्वोपिलोकस्तवपातिःस्यादित्यर्थः नचैवत्वयाशंकनीयम् । मांप्रतिकूलांलोकोहनिष्यतीति । यस्मात्त्वमेवप्रजानाशंकरिष्यसीत्याह याहीति । यामदीयायवनपृतनातया
॥१०९॥ युक्ता २९ किंच प्रज्वारइति । प्रज्वारोवैष्णवोज्वरः । माहेश्वरस्यव्याध्यंतःपातित्वात् । भीमाघोराःसैनिकायस्य ३० इतिचतुर्थस्कंधेटीकांयाम सप्तविंशोध्यायः २७॥ ॥अष्टाविंशेतुवैदर्भ्याख्यानेनस्त्री
विचिंतया । स्त्रीत्वंप्राप्तस्यदैवेनकदाचिन्मुक्तिरुच्यते ॥१॥ इदानींतु पुरंजनस्य पुंदेहत्यागप्रकारपूर्वकंस्त्रीत्वप्रकारमाह सैनिकाइत्यादिनाराजसिंहस्यवेश्मनीत्यंतेन । (हेबर्हिष्मन्) दिष्टंदैवंकुर्वंति अधि
कुर्वंतीतितथा । (दैवानुसारिणइत्यर्थः) मृत्योरादेशकारिणईतिवा । १ (रभसाबलात्) जरत्पन्नगेनजीर्णप्राणेनपालिताम् २ । ३ । द्वार्भिःचक्षुरादिभिःरागरूपेणप्रविश्य ४

मयिसंरभ्यविपुलमदाच्छापंसुदुःसहम् ॥ स्थातुमर्हसिनैकत्रमद्याच्ञाविमुखोमुने २२ ततोविहतसंकल्पाकन्यकायवनेश्वरम् ॥ मयोपदिष्टमासाद्यवव्रे श्लोका.
नाम्नाभयंपतिम् २३ ऋषभंयवनानांत्वांवृणेवीरेप्सितंपतिम् ॥ संकल्पस्त्वयिभूतानांकृतःकिलनरिष्यति २४ द्वाविमावनुशोचंतिबालावसदवग्रहौ ॥
यल्लोकशास्त्रोपनतंनरातिनतदिच्छति २५ अथोभजस्वमांभद्रभजतींमेदयांकुरु ॥ एतावान्पौरुषोधर्मोयदार्त्ताननुकंपते २६ कालकन्योदितवचोनिश
म्ययवनेश्वरः ॥ चिकीर्षुर्देवगुह्यंससस्मितंतामभाषत २७ मयानिरूपितस्तुभ्यंपतिरात्मसमाधिना ॥नाभिनंदतिलोकोयंत्वामभद्रामसंमताम् २८त्वमव्य २२/४
क्तगतिर्भुंक्ष्वलोकंकर्मविनिर्मितम् ॥ याहिमेपृतनायुक्ताप्रजानाशंप्रणेष्यसि २९ प्रज्वारोऽयंममभ्राातात्वंचमेभगिनीभव ॥ चराम्युभाभ्यांलोकेस्मिन्नव्य
क्तोभीमसैनिकः ३० इतिश्रीभा०म०च०स्कंधेपुरंजनोपाख्यानेसप्तविंशोऽध्यायः २७॥ ॥नारदउवाच॥ ॥ सैनिकाभयनाम्नोयेबर्हिष्मन्दिष्टकारिणः ॥
प्रज्वारकालकन्याभ्यांविचेरुरवनीमिमाम् १ तएकदातुरभसापुरंजनपुरींनृप ॥ रुरुधुर्भौमभोगाढ्यांजरत्पन्नगपालिताम् २ कालकन्यापिबुभुजेपुरंज
नपुरंबलात् ॥ ययाभिभूतःपुरुषःसद्योनिःसारतामियात् ३ तयोपभुज्यमानांवैयवनाःसर्वतोदिशम् ॥ द्वार्भिःप्रविश्यसुभृशंप्रार्दयन्सकलांपुरीम् ४

चूर्णिका हेमुने एकत्रस्थातुं नार्हसि २२ तदामयाउपदिष्टासाभयंनामपतिंवव्रे २३ २४ २५ २६ सः यवनेश्वरः भयनामाकालकन्यायाः वचः श्रुत्वा सस्मितंतांअभाषत
२७ हेकालकन्ये मया आत्मसमाधिनातुभ्यं अयंलोकः पतिः निरूपितः त्वां अभद्रां असंमतांइतिमत्वाकश्चित्जनः नाभिनंदति २८ अतः त्वंमेसेनयासहयाहि प्रजा
नाशंप्रणेष्यसि २९ अयंप्रज्वारोनामज्वरः ममभ्राातात्वंचमेभागिनीभव उभाभ्यांसहअहं अस्मिन्लोकेअव्यक्तः सन्चरामि ३०इतिचतुर्थेसप्तविंशः ॥ २७ ॥नारदउवाच॥ ॥१०९॥
॥ हेबर्हिष्मन्भयनाम्नःसैनिकाः प्रज्वारकालकन्याभ्यांजरत्पन्नगपालिताम् पुरंजनपुरीं एकदारुरुधुः १ २ तत्रकालकन्यातस्यपुरंबुभुजे ३ यवनाः द्वार्भिः रोगरूपेण
प्रविश्य तांप्रादर्शयन् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

। ५ । कन्ययाजरयोपगूढःसन् तत्प्रतिक्रियां नलेभे इतितृतीयेनान्वयः । (गंधर्वैः अहोरात्ररूपैःकालावयवैःयवनैरोगैश्च) हृतैश्वर्यःउत्थानादिष्वशक्तेः । ६ प्रतिकूलान्अनपेक्षितविषयप्रापणान् । अनाहृतान् आदरमकुर्वाणान् । स्वाधीनत्वाभावात् । (पुत्रानिंद्रियपरिणामान् पौत्रान् तत्कर्माणि ।) अनुगान् इंद्रियाणि अमात्या इंद्रियदेवाः (तान्) गतसौहृदांअध्यवसायाभावात् । ७ अरिभिर्विघ्नादिभिर्दूषितान् (वीक्ष्य) ८ कालकन्यया हेतुभूतया यातयामान् निःसारानपि कामान् अभिलषन् विगता आत्मनोगतिः पारलौकिकी ऐहिकःपुत्रादिस्नेहश्चयस्य । स्नेहादितिवापाठः तदाविगताआत्मगतिर्यस्येत्येवविसर्गांतपदपाठेविग्रहः ९ सराजापुरंजनोहातुंत्यक्तुंप्रचक्रमे उपक्रांतवान् इतिद्वयोरन्वयः ॥ अनिकामतोऽनिच्छयापि १० (भ्रातुर्भृत्योः हितकरणेच्छया प्रज्वारोज्वरः) ११ सपरिच्छदः भृत्यवर्गसहितः कुटुंबेनदीव्यतिकौटुंबिकःकुटुंबिन्यासह । संधिर्नात्रविवक्षितः । सान्वयः पुत्रादिसहितः १२ यवनैर्व्याधिभिरुपरुद्धानिआयतनानि (नाडीप्रभृतीनि) यस्यसपुरपालः (प्राणोपि प्रज्वारसंसृष्टः ज्वरसंसर्गयुक्तः) १३ (तत्र) पुरुबहुकृच्छ्रंक्लेशस्तेनउरुर्वेपथुर्यस्य (पुरंजनस्यससेवितुंनशेके किंतु) वृक्षकोटरादिवसर्पः (गंतुमैच्छत्) १४ कंठेउपरुद्धोरुरादे घुरुघुरुध्वानिंचकारेत्यर्थः १५ दुहित्रादीन्दध्यावित्युत्तरेणान्वयः । जामयोत्रस्नुषाः । (अत्रवृत्तीर्विनाबाह्यदुहित्रादयोपिग्रहीतुंशक्यंते ।) स्वत्त्वमात्रेणावशिष्टम् (नतुभोग्यत्वेन ।) भोगस्तुप्रागेवक्षीणः । (एवंगृहादिचयत्किंचित्तदप्यहंममेतिस्वीकृत्यदध्यौ) १६ (विप्रयोगेवियोगेप्राप्तेसाति) १७ ध्यानमेवाह लोकांतरमितिचतुर्भिः । १८ अनाशितेअभोजिते । भर्त्सितेभर्त्सनेकृतेयतवाक्भवति १९

॥११०॥

श्लोकाः ५/१९

तस्यांप्रपीड्यमानायामभिमानीपुरंजनः ॥ अवापोरुविधांस्तापान्कुटुंबीममताकुलः ५ कन्योपगूढोनष्टश्रीःकृपणोविषयात्मकः ॥ नष्टप्रज्ञोहृतैश्वर्योगंधर्वयवनैर्बलात् ६ विशीर्णांस्वपुरींवीक्ष्यप्रतिकूलाननादृतान् ॥ पुत्रान्पौत्राननुगामात्यान्जायांचगतसौहृदाम् ७ आत्मानंकन्ययाग्रस्तंपंचालानरिदूषितान् ॥ दुरंतचिंतामापन्नोनलेभेतत्प्रतिक्रियाम् ८ कामानभिलषन्दीनोयातयामांश्चकन्यया ॥ विगतात्मगतिस्नेहःपुत्रदारांश्चलालयन् ९ गंधर्वयवनाक्रांतांकालकन्योपमर्दिताम् ॥ हातुंप्रचक्रमेराजातांपुरीमनिकामतः १० भयनाम्नोग्रजोभ्राताप्रज्वारःप्रत्युपस्थितः ॥ ददाहतांपुरींकृत्स्नांभ्रातुःप्रियचिकीर्षया ११ तस्यांसंदह्यमानायांसपौरःसपरिच्छदः ॥ कौटुंबिकःकुटुंबिन्याउपातप्यतसान्वयः १२ यवनोपरुद्धायतनोग्रस्तायांकालकन्यया ॥ पुर्यांप्रज्वारसंसृष्टःपुरपालोऽन्वतप्यत १३ नशेकेसोऽवितुंतत्रपुरुकृच्छ्रोरुवेपथुः ॥ गंतुमैच्छत्ततोवृक्षकोटरादिवसानलात् १४ शिथिलावयवोयर्हिगंधर्वैर्हृतपौरुषः ॥ यवनैररिभीराजन्नुपरुद्धोरुरोदह १५ दुहितॄःपुत्रपौत्रांश्चजामिजामातृपार्षदान् ॥ स्वत्वावशिष्टंयत्किंचिद्गृहकोशपरिच्छदम् १६ अहंममेतिस्वीकृत्यगृहेषुकुमतिर्गृही ॥ दध्यौप्रमदयादीनोविप्रयोगउपस्थिते १७ लोकांतरंगतवतिमय्यनाथाकुटुंबिनी ॥ वर्त्तिष्यतेकथंत्वेषाबालकाननुशोचती १८ नमय्यनाशितेभुंक्तेनास्नातेस्नातिमत्परा ॥ मयिरुष्टेसुसंत्रस्ताभर्त्सितेयतवाग्भयात् १९

॥११०॥

चूर्णिका

ततः पुरंजनः उरुविधान् तापान् आप ५ पुत्रादीन्स्मरन् तत्प्रतीकारंनलेभे ६ ७ ८ ९ १० तदाप्रज्वारः भयनाम्नःभ्रातुः प्रियचिकीर्षया तांपुरीं ददाह ११ १२ १३ १४ शिथिलावयवः राजा यवनैः रुद्धः सन् १५ सर्वं अहंममेति स्वीकृत्य पुरीवियोगकालेस्त्रियंशोचन् तामेवदध्यौ १६ १७ १८ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अविज्ञंअविवेकिनं मा मां (प्रबोधयति) व्युषितेदेशांतरंगते गृहमेधीयंवर्त्मगृहधर्मंअपिनेष्यति । किमनुवर्तयिष्यति । (णीञ्प्रापणे ।) युक्तमेतत् । यतोवीरसूः पुत्रवती । किंवा मद्विरहमसहमानामरिष्यत्येवेत्यर्थः । २० नविद्यतेपरमयनंआश्रयोयेषांतेअपरायणाः पुत्राःकन्याश्च । यद्वापराश्रयाः कन्याः । भिन्नानौर्येषाम् २१ (अतदर्हणंशोकानर्हं) वस्तुतस्तस्यब्रह्मत्वात् । २२ एषयदाक्षयंस्थानंनीयमानस्तदा अनुपथाः प्राणाइंद्रियाणिच । तथाचश्रुतिः '' तमनुक्रामंतंप्राणोनुक्रामति प्राणमनुक्रामंतंसर्वेप्राणाअनुक्रामंती ''ति २३ (यदाभुजंगमः प्राणः पुरींविहायगतः तदैवतमनु) प्रकृतिंमहाभूतात्मताम् । २४ (पुरंजनस्तुतमसाव्याप्तः) नाविदत्नसस्मार । पुरः पूर्वंसखायंसंतमीश्वरम् २५अदयालुना(अनेनराज्ञा) काम्यकर्मसुयेसंज्ञप्ताहताः (तेतमेनं चिच्छिदुः) अमीवंपापंक्रौर्यंवा२६ शाश्वतीः समाः आर्तिं अनुभूय२७अंतकालेतांभार्यामेवमनसागृह्णन्स्मरन् अनंतरंविदर्भस्यवेश्मनि प्रमदोत्तमाबभूव । अतःपरमस्मिन्प्रकरणेएतावदेवप्रकृतोपयोगिविवक्षितम् । स्त्रीध्यानेनस्त्रीत्वप्राप्तावपिपतिव्रताध्यानेनपूर्वादृष्टेनचधार्मिकाद्विदर्भाज्जन्माभूत् । धार्मिकसंगेनचविशुद्धस्य (तस्य) भागवतेनमलयध्वजेनसंगोऽभूत् ततोविष्णुभक्तिः ततोवैराग्यंततस्तमेवभर्तृरूपंगुरुंपातिव्रत्यधर्मेणभजतोभगवत्प्रसादलब्धज्ञानेनमोक्षइति । अन्यत्तुकथालंकारमात्रम् । तथापिकिंचिद्वृत्तिसामान्येनेहयोजयिष्यामः विदर्भस्यविशिष्टदर्भोपलक्षितस्यकर्मठस्यराजसिंहस्यधर्मेणहिप्रजापालनेनयज्ञादिनाचक्षत्रियाराजंतेतेपुश्रेष्ठस्यवेश्मनि २८ (वीर्यपणांब्रह्मचर्यादिसाधनसाध्यामित्यर्थः) । मलयोपलक्षितेदक्षिणदेशेध्वजइवदर्शनीयः सहिश्रीविष्णुभक्तिप्रधानोदेशः तत्रमुख्यः महाभागवतइत्यर्थः पंडानिश्चयबुद्धिः तामर्हतीतिपांड्यः (परेषांइंद्रियाणांपुरंवि षयलक्षणंकामादिशत्रूणांपुरंमनोलक्षणंवाजयतीतितथा) सउपयेमेपुरंजनोभागवतसंगंप्राप्तइत्यर्थः । (युधियमनियमादिलक्षणेराजन्यान्इंद्रियाणिनिर्जित्यवशीकृत्य) २९ आत्मजांश्रीकृष्णसेवारुचि-(-लक्षणांतनयाम्)सत्संगेनभगवद्धर्मेरुचिरभूदित्यर्थः । आसितस्यश्रीकृष्णस्येक्षणंययाताम् । यवीयसःसप्तसुतान् । ''श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनं । अर्चनंवंदनंदास्य''मितिभक्तिप्रकारान् सख्यात्मनिवेदनयोः त्वंपदार्थज्ञानोत्तरकालत्वात्तस्यचभगवतैवोत्तरत्रोपदेक्ष्यमाणत्वादिदानीमनुत्पत्तेः सप्तेत्युक्तम् । भगवद्धर्मरुच्यातच्छ्रवणकीर्तनादिकंजातमित्यर्थः (सप्त)द्रविडभूमिपालकान् । द्रविडभूमिर्हिश्रवणादिभक्तिभिरेवसुराक्षितास्तीतिप्रसिद्धम् । ३०

श्लोकाः २० / ३०

प्रबोधयतिमाविज्ञंव्युषितेशोककर्शिता ॥ वर्त्मैतद्गृहमेधीयंवीरसूरपिनेष्यति २० कथंनुदारकादीनादारकीर्वापरायणाः ॥ वर्तिष्यंतेमयिगतेभिन्ननावइवोदधौ

२१ एवंकृपणयाबुद्ध्याशोचंतमतदर्हणम् ॥ ग्रहीतुंकृतधीरेनंभयनामाभ्यपद्यत २२ पशुवद्यवनैरेषनीयमानःस्वकंक्षयम् ॥ अन्वद्रवन्ननुपथाःशोचंतो

भृशमातुराः २३ पुरींविहायोपगतउपरुद्धोभुजंगमः ॥ यदातमेवानुपुरीविशीर्णाप्रकृतिंगता २४ विकृष्यमाणःप्रसभंयवनेनबलीयसा ॥ नाविदत्तमसा

विष्टःसखायंसुहृदंपुरः २५ तंयज्ञपशवोनेनसंज्ञप्तायेऽदयालुना ॥ कुठारैश्चिच्छिदुःक्रुद्धाःस्मरंतोमीवमस्यतत् २६ अनंतपारेतमसिमग्नोनष्टस्मृतिः

समाः ॥ शाश्वतीरनुभूयार्तिंप्रमदासंगदूषितः २७ तामेवमनसागृह्णन्बभूवप्रमदोत्तमा ॥ अनंतरंविदर्भस्यराजसिंहस्यवेश्मनि २८ उपयेमेवीर्यपणांवैद

र्भींमलयध्वजः ॥ युधिनिर्जित्यराजन्यान्पांड्यःपरपुरंजयः २९ तस्यांसजनयांचक्रेआत्मजामसितेक्षणाम् ॥ यवीयसःसप्तसुतान्सप्तद्रविडभूभृतः ३०

चूर्णिका

२० २१ २२ २३ २४ तदाबलीयसायवनेनविकृष्यमाणः अज्ञानाविष्टःसन् पूर्वसखायंनसस्मार २५ तेनयज्ञेयेहताः पशवः तेकुठारमयैः शृंगैः तंचिच्छिदुः २६ सः स्त्रीसंगदूषितः शाश्वतीःसमाः अनंतपारेतमासिमग्नःआर्तिंअनुभूय २७ तामेवमनसाध्यायन् अनंतरंविदर्भराज्ञः कन्याबभूव २८ तांमलयध्वजः पांड्यः युधिराजन्यान् निर्जित्य उपयेमे २९ सः तस्यांसप्तपुत्रान् एकांकन्यांचप्रासूत ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्बुदमितिश्रवणादीनांप्रत्येकमनेकेप्रकाराअभवन्नित्यर्थः । तदुक्तम् । "भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यत"इति । येषांवंशधरैः यतःप्रवृत्तैः संप्रदायभेदैः कृत्स्नामहीमन्वंतरंततःपरंचभोक्ष्यते अविद्याकामकर्मभ्योपरिक्षिप्यते ३१ अगानिनिष्क्रियाणिगात्राणिस्त्यायतिसंघातयतीतिअगस्त्योमनः समाकप्रथमजातांदुहितरंकृष्णसेवारुचिमुपयेमे । तस्यामनः कृष्णेदृढांरतिंबबंधेत्यर्थः । धृता निशमदमादीनिव्रतानिययातांरातिम् । दृढेभ्यः सत्यलोकादिभोगेभ्योपिच्युतस्तद्रहितः । कृष्णरतौइहामुत्रभोगविरागोजातइत्यर्थः । सएवोपशमात्मकत्वान्मुनिः । कथंभूतः । इध्मवाहोआत्मजोयस्यसः । "तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियंब्रह्मनिष्ठ"मित्यादिश्रुतिप्रसिद्धासमिद्वहनोपलक्षितागुरूपसत्तिर्वैराग्यादभूदित्यर्थः । नह्यविरक्तस्यगुरूपसत्तिः संभवति । कथापक्षेयथाश्रुतमेव ३२ (तनयेभ्यः श्रवणादिभ्यः) क्ष्मांविभज्य तत्रश्रवणादिभक्तिभेदंव्यवस्थाप्येत्यर्थः (कृष्णंपरमानंदरूपंपरमात्मानंसेवितुमिच्छुः कुलाचलंगतवान्) ३३ इदानींपुरंजनस्यस्त्रीभावंप्राप्तस्यसर्वतोविरक्तस्य"पतिरेवगुरुःस्त्रीणा"मितिवचनात् पतिसेवयागुरुशुश्रूषाप्रकारंदर्शयितुमाह हित्वेत्यादिनामनोदधेइत्यंतेनग्रंथेन। मदयतीतिमदिरंईक्षणंयस्याः ३४तत्रचंद्रवसाद्यानद्यः तासांपुण्यैः सलिलैः उभयत्रअंतर्बहिश्चआत्मनो मृजन्मनोमलंक्षालयन्तपआस्थितइत्युत्तरेणान्वयः । ३५ अस्यतेभूमौक्षिप्यतेइत्यष्टिर्बीजम् । (वर्तमानः शरीरयात्रांकुर्वाणः) ३६ (शीतोष्णादीनिअजयत् सहतेस्म) ३७ (तपसाक्रियाविशेषेण) विद्ययाउपासनया पक्वकषायःदग्धकामादिवासनः युयुजे आत्मनोब्रह्मतां भावयामास । अक्षाणींद्रियाणिअनिलः प्राणः आशयश्चित्तंविजिताअक्षादयोयेन । ३८ (स्थाणुरिवस्थितः) आस्तेस्म । वर्षशतमितिज्ञानस्यदुःसाधनतांदर्शयति । अतएवभक्तिंकृतवानित्याह । वासुदेवेरतिमुद्वहन्सन्अन्यद्देहादिकंनवेदेति ३९ सएवंवर्तमानः आत्मन्यात्मानंविद्वान् (अनुभवन्) अन्यस्मादुपरराम । कथंविद्वान् व्यतिरिक्ततयादेहादिव्यतिरिक्तत्वेन । कुतः । व्यापकतयादेहादिप्रकाशकत्वेन । ननु देहाद्याकारोविमर्शएवतत्प्रकाशयति नतुनिराकारआत्माऽतआह । आमर्शस्यापिसाक्षिणम् । अयंभावः । विमर्शोनामअंतःकरणवृत्तिः साचजडत्वादात्मप्रकश्यैवेति । यथास्वप्नेममेदंशिरश्छिन्नमित्यादिप्रतीतौतद्व्यतिरिक्तमात्मानंछिन्नशिरस्कस्यप्रकाशकंवेत्तितद्वत् । ४०

श्लोकाः ३१/४०

एकैकस्याभवत्तेषांराजन्नर्बुदमर्बुदम् ॥ भोक्ष्यतेयद्वंशधरैर्महीमन्वंतरंपरम् ३१ अगस्त्यःप्राग्दुहितरमुपयेमेधृतव्रताम् ॥ यस्यांदृढच्युतोजातइध्मवाहात्मजोमुनिः ३२ विभज्यतनयेभ्यःक्ष्मांराजर्षिर्मलयध्वजः ॥ आरिराधयिषुःकृष्णंसजगामकुलाचलम् ३३ हित्वागृहान्सुतान्भोगान्वैदर्भीमदिरेक्षणा ॥ अन्वधावतपांड्येशंज्योत्स्नेवरजनीकरम् ३४ तत्रचंद्रवसानामताम्रपर्णीवटोदका ॥ तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनोमृजन् ३५ कंदाष्टिभिर्मूलफलैःपुष्पपर्णैस्तृणोदकैः ॥ वर्त्तमानःशनैर्गात्रकर्षणंतपआस्थितः ३६ शीतोष्णवातवर्षाणिक्षुत्पिपासेप्रियाप्रिये ॥ सुखदुःखेइतिद्वंद्वान्यजयत्समदर्शनः ३७ तपसाविद्ययापक्वकषायोनियमैर्यमैः ॥ युयुजेब्रह्मण्यात्मानंविजिताक्षानिलाशयः ३८ आस्तेस्थाणुरिवैकत्रदिव्यंवर्षशतंस्थिरः ॥ वासुदेवेभगवतिनान्यद्वेदोद्वहन्रतिम् ३९ सव्यापकतयात्मानंव्यतिरिक्ततयात्मनि ॥ विद्वान्स्वप्नइवामर्शसाक्षिणंविररामह ४०

चूर्णिका

तेषांसप्तानांअर्बुदं अर्बुदं एकैकस्यपुत्राः अभवन् ३१ तांमलयध्वजकन्यांअगस्त्यः उपयेमे तस्यांदृढच्युतोमुनिः जातः तस्यइध्मवाहः पुत्रोभूत् ३२ सः मलयध्वजःतनयेभ्यः क्ष्मांविभज्य कृष्णंआराधयितुंताम्रपर्णीतीरेगत्वावैदर्भ्यासहतपश्चचार ३३ ३४ ३५ ३६ ब्रह्माणि आत्मानं योजयित्वा सः पांड्यः देहंजहौ ३७ ३८ ३९ ४०

१ अमर्शीनामेतिमु. पाठः २ चंद्रमसेनिकचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

केनविद्वान् तत्राह । साक्षाद्भगवान् हरिरेवयो गुरुस्तेनोक्तेन सर्वतोमुखं यथातथास्फुरताअनवाच्छिन्नेन विशुद्धेन ज्ञानदीपेन । ४१ तदेवाह । परइति ब्रह्मैवाहंनसंसारीति ब्रह्मण्यात्मनईक्षणे शोकादिनिवृत्तिः अहमेव ब्रह्मेत्यात्मनिब्रह्मणईक्षणे ब्रह्मपारोक्ष्यनिवृत्तिः अतोव्यतिहारेणेक्षमाणोअस्मात्संसारादुपरराम । नन्वेवमपिजीवस्य कुतोब्रह्मतापत्तिः ईक्षणस्यैवव्यवधायकत्वादित्याशंक्याह । ईक्षांविहायदग्धेंधनानलवत्तस्याःस्वयमेवोपशांतेरितिभावः ४२ ४३ उपपतिंपत्युःसमीपे । यद्वा पत्युःकिंचिन्मात्रंन्यूना । तत्समानासतीबभावित्यर्थः । "उपोधिकेचे"तिकर्मप्रवचनीयः तद्योगेचद्वितीया । शांतमंगारावस्थं ज्वालायाअधःस्थितमनलंउपशांताशुद्धानिर्धूमाज्वालायथाभाति तद्वत् । ४४ तदानीमपिसुस्थिरमासनं यस्य । अवएवाजानती यदातदायथापूर्वमसेवत ४५ पत्युरंघ्रिमर्चंतीसेवमानायदातस्मिन्नंघ्रौऊष्माणं नापश्यत् ४६ अबंधुंपतिरहितं (अतएवदीनं आत्मानं शोचंती विक्लवासतीरुरोद । स्तनौ) अश्रुभिरासिच्य ४७ (दस्युभ्यश्चौरेभ्यः) क्षत्रबंधुभ्यः अधार्मिकक्षात्रियेभ्योपि (इमांपृथ्वीम्) ४८ अवर्तयत् प्रवर्तयामास । (विलपती विलापं कुर्वतीरुदंतीशोचंती) ४९ (चित्वारचयित्वेत्यर्थः ।) तस्यां (चितौ) निधायअग्निदानेनादीप्यच ५० पूर्वतरः अनादिरीश्वरः सखा "द्वा सुपर्णा" वितिश्रुतेः । साम्नाप्रियवाक्येनसंबोधयन् ५१ यस्ययं शोचासि । अग्रेसृष्टेःपूर्वंयेन विचचर्थ । मयिस्थितत्वेनसख्यसुखं अनुभूतवानसि ५२ ननु नाहमावयोः सख्यं सहचरत्वंचजानामीतिचेत्तत्राह यद्यपिमांनजानासितथाप्यात्मानं त्वामविज्ञातसखं अविज्ञातः कश्चिन्मेसखाआसीदित्येवं किंस्मरसि । सखइतिपुंस्त्वनिर्देशः प्राक्तनपुंस्त्वस्मरणाय । सख्यं स्मारयन् स्ववियोगकृतमनर्थमाह । हित्वेतिसार्धैः षड्भिः पदंस्थानम् ५३ हंसौशुद्धौ । मानसंहृदयमयनं ययोः । कथापक्षेमानससरसिस्थितौपक्षिणौ । अभूतांजातौ । ओकोगृहं अंतरा विनैव । वाशब्दएवार्थे । सहस्रपरिवत्सरान् महाप्रलयो यावत् । (हे आर्य प्राज्ञ) ५४

॥११३॥

श्लोकाः ४१/५४

साक्षाद्भगवतोक्तेनगुरुणाहरिणानृप ॥ विशुद्धज्ञानदीपेनस्फुरताविश्वतोमुखम् ४१ परेब्रह्मणिचात्मानंपरब्रह्मतथात्मनि ॥ ईक्षमाणोविहायेक्षामस्मादुपरराम ह ४२ पतिंपरमधर्मज्ञंवैदर्भीमलयध्वजम् ॥ प्रेम्णापर्यचरद्धित्वाभोगान्सापतिदेवता ४३ चीरवासाव्रतक्षामावेणीभूतशिरोरुहा ॥ बभावुपपतिंशांताशिखाशांतमिवानलम् ४४ अजानतीप्रियतमंयदोपरतमंगना ॥ सुस्थिरासनमासाद्ययथापूर्वमुपाचरत् ४५ यदानोपालभेतांघ्रावूष्माणंपत्युरर्चती ॥ आसीत्संविग्नहृदयायूथभ्रष्टामृगीयथा ४६ आत्मानंशोचतीदीनमबंधुंविक्लवाश्रुभिः ॥ स्तनावासिच्यविपिनेसुस्वरंप्ररुरोदसा ४७ उत्तिष्ठोत्तिष्ठराजर्षेइमामुदधिमेखलाम् ॥ दस्युभ्यःक्षत्रबंधुभ्योबिभ्यतींपातुमर्हसि ४८ एवंविलपतीबालाविपिनेनुगतापतिम् ॥ पतितापादयोर्भर्तूरुदंत्यश्रूण्यवर्तयत् ४९ चितिंदारुमयींचित्वातस्यांपत्युःकलेवरम् ॥ आदीप्यचानुमरणेविलपंतीमनोदधे ५० तत्रपूर्वतरःकश्चित्सखाब्राह्मणआत्मवान् ॥ सांत्वयन्वल्गुनासाम्नातामाहरुदतींप्रभो ५१ ॥ ॥ ब्राह्मणउवाच ॥ कात्वंकस्यासिकोवायंशयानोयस्यशोचसि ॥ जानासिकिंसखायंमांयेनाग्रेविचचर्थह ५२ अपिस्मरसिचात्मानमविज्ञातसखंसखे ॥ हित्वामांपदमन्विच्छन्भौममभोगरतोगतः ५३ हंसावहंचत्वंचार्यसखायौमानसायनौ ॥ अभूतामंतरावौकःसहस्रपरिवत्सरान् ५४

॥११३॥

चूर्णिका

४१ ४२ ४३ ४४ ४५ ४६ तदापतिव्रता वैदर्भीकिंचित् विलप्य ४७ ४८ ४९ चितिंकृत्वापतिदेहं उपरिनिधाय प्रदीप्य अंतः प्रवेष्टुंमनोदधे ५० तदापूर्वतरः कश्चित्सखा ब्राह्मणरूपेण एत्य तांअबोधयत् ५१ त्वं कासि अयं ते कः मांसखायंस्मरसिकिम् ५२ ५३ हेसखेमांहित्वाभौमसुखंभोक्तुंत्वंगतः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०च. अ०

टीका ॥२९॥

हे बंधो ग्राम्ये विषयसुखे मतिर्यस्य । स्त्रियामायया । (पदंस्थानम् ।) ५५ (कथंभूतंपदम् ।) पंच (शब्दादय आरामाउपवनानियस्मिन् । नवद्वाराणि प्राणच्छिद्राणि यस्मिन् । एकः प्राण
पालोयस्मिन् । त्रीणि पृथिव्यप्तेजांसिकोष्ठानिप्रकारायस्मिन् षट्ज्ञानेंद्रियमनांसिकुलानि अभीष्टविषयसमर्पकावणिजो यस्मिन् । पंचविपणाहट्टाः कर्मेंद्रियाणियस्मिन् । पंचभूतानि प्रकृतिः उपा
दानकारणं यस्य । स्त्रीबुद्धिरेव धवःपतिः स्वामिनी यस्मिन् । ५६ स्वयमेवश्लोकंव्याचष्टे पंचेंद्रियार्थाइति (द्वाभ्यां) षट्कुलमितिएकपालमिति स्पष्टत्वान्नव्याख्यातम् । (इंद्रियार्थाः शब्दादयः) भूता
न्येवप्रकृतिरव्ययाउपादानरूपा । स्त्रीधवमित्यस्यव्याख्यानंशक्तिर्बुद्धिरधीशायस्यसः तद्वशः सन्नित्यर्थः ।५८ (रामयानुद्धया) स्पृष्टः अभिभूतः अतोनविद्यतेश्रुतिर्ब्रह्मत्वेस्मृतिर्यस्य ५९ तत्त्वमुपदि
॥११४॥ शति नत्वमितिचतुर्भिः । सुहृत्पतिः । नवद्वारेपुरेययारुद्धोसिनतस्याः(पुरंजन्याः पतिरसि) ६० पुमांसंपूर्वजन्मनियदमन्यथाः इदानींचसतींश्रेष्ठांस्त्रियंयन्मन्यसेएषामाया । यतउभयत्वमपिवस्तुतोना
स्ति । यस्मादावांहंसौशुद्धौ । नौआवयोर्वक्ष्यमाणांगतिंस्वरूपंपश्य ६१ तत्त्वंपदार्थयोश्चिदंशेनैक्यमाह । अहमेवभवान् । उपचारंवारयति । नचान्यइति । व्यतिहारोपदेशउक्ताभिप्रायएव । छिद्रमं
तरम् ६२ तर्हिकथमावयोरज्ञत्वसर्वज्ञत्वादिधर्मभेदस्तत्राह यथेति । आत्मानंदेहंआदर्शेनिर्मलंमहांतंस्थिरंचावेक्षेत । परस्यचक्षुषिचतद्विपरीतम् । विद्याविद्योपाधिकृतोधर्मभेदोनतुवास्तवइत्यर्थः ।६३ स्वस्थः
सन्तद्व्यभिचारेणईश्वरावियोगेननष्टाम् । ६४कथामात्रमेतदितिबुद्धिंवारयतिबर्हिष्मन्निति । पारोक्ष्येणराजकथामिषेण । तत्रहेतुः यत्यस्मात् । तथाचश्रुतिः "परोक्षप्रियाइवाहिदेवा"इति । ६५ । इ
तिचतुर्थस्कंधेटीकायामष्टाविंशोध्यायः २८ ॥ ॥ऊनत्रिंशपरोक्षार्थव्याख्यानेनोपसंहृतम् । स्त्रीसंगत्तोभवस्त्वीशसंगान्मुक्तिरितिस्फुटम् ॥ १ ॥ कवयः अध्यात्मविदः । १

श्लोकाः

सत्वंविहायमांबंधोगतोग्राम्यमतिर्महीम् ॥ विचरन्पदमद्राक्षीःकयाचिन्निर्मितंस्त्रिया ५५ पंचारामंनवद्वारमेकपालंत्रिकोष्ठकम् ॥ षट्कुलंपंचविपणंपं
चप्रकृतिस्त्रीधवम् ५६ पंचेंद्रियार्थाआरामाद्वारःप्राणानवप्रभो ॥ तेजोबन्नानिकोष्ठानिकुलमिंद्रियसंग्रहः ५७ विपणस्तुक्रियाशक्तिर्भूतप्रकृतिरव्यया ॥
शक्त्यधीशःपुमांस्त्वत्रप्रविष्टोनाववुध्यते ५८ तस्मिंस्त्वंरामयास्पृष्टोरममाणोश्रुतस्मृतिः ॥ तत्संगादीदृशींप्राप्तोदशांपापीयसींप्रभो ५९ नत्वंविदर्भदु ५५/१
हितानायंवीरःसुहृत्तव ॥ नपतिस्त्वंपुरंजन्यारुद्धोनवमुखेयया ६० मायाह्येषमयासृष्टायत्पुमांसंस्त्रियंसतीम् ॥ मन्यसेनोभयंयद्वैहंसौपश्यावयोर्गतिम्
६१ अहंभवान्नचान्यस्त्वंत्वमेवाहंविचक्ष्वभो ॥ ननौपश्यंतिकवयश्छिद्रंजातुमनागपि ६२ यथापुरुषआत्मानमेकमादर्शचक्षुषोः ॥ द्विधाभूतमवेक्षेततथैवां
तरमावयोः ६३ एवंसमानसोहंसोहंसेनप्रतिबोधितः ॥ स्वस्थस्तद्व्यभिचारेणनष्टामापपुनःस्मृतिम् ६४ बर्हिष्मन्नेतदध्यात्मंपारोक्ष्येणप्रदर्शितम् ॥ य
त्परोक्षप्रियोदेवोभगवान्विश्वभावनः ६५ इतिश्रीभा०म०च०स्कंधेपुरंजनोपाख्यानेऽष्टाविंशतितमोऽध्यायः २८ ॥ ॥ प्राचीनबर्हिरुवाच॥ ॥भगवं
स्तेवचोस्माभिर्नसम्यगवगम्यते ॥ कवयस्तद्विजानंतिनवयंकर्ममोहिताः १

चूर्णिका ५५ ५६ ५७ ५८ ५९ त्वंविदर्भदुहितान अयंतेपतिर्न त्वंपुरंजनः पुरंजन्यानवमुखेपुरेरुद्धः ६० इयंमायामयासृष्टा आवांहंसौ आवयोः गतिंपश्य ६१ अहंभवान् त्वंच
अहं एवंविचक्ष्व ६२ ६३ एवंमानसः हंसः हंसेनप्रतिबोधितः सन् पूर्वनष्टांस्मृतिंआप ६४ ॥ ॥ नारदउवाच ॥ ॥ हेबर्हिष्मन्एतत् अध्यात्मंतत्र पारोक्ष्ये ॥११४॥
णमयाप्रदर्शितम् यस्मात्देवः परोक्षप्रियोऽस्ति साक्षात् आत्मज्ञानकथेननत्वेचतसिकथानायाति अतएवमुक्तम् ६५इतिचतुर्थेअष्टविंशः २८ ॥ ॥ प्राचीनबर्हिरुवाच ॥
हेभगवन्वयंकर्ममोहिताःतेवचः सम्यक् नविदामः ज्ञानिनः जानंति अतः स्पष्टतयावद १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(यत्यस्मात्) व्यनक्तिलिंपतिचेतनीकरोतीत्यर्थः यद्वा व्यनक्ति प्रकटयति । ततश्च स्वकर्मणापुरंजनयतीतिपुरंजनपदंव्याख्यातंभवति । एकद्व्यादयः पादायस्य ।२ अविज्ञातशब्देनआहृतः व्याहृतः उक्तोयः सईश्वरः । अविज्ञातनामनिरुक्तिस्तु यद्यस्मात्पुंभिः नामादियोगेन नविज्ञायतेइति । ३ (यदाप्रकृतेर्गुणान्विषयान्साकल्येनाजिघृक्षत् तदा) तत्रतेषुपुरेषुमध्ये । ४ । (यत्कृतंययाकृतमस्ति) अक्षभिरिंद्रियैः ५ पंचवृत्तित्वात्पंचशिराः सर्पइवप्राणः ६ एकादशमहाभटइत्यनेनएकादशोमहाभटोनायकइत्युक्तंसंदर्शयति । (उभयति) बृहद्बलंयस्यतन्मनः । नवखानिद्वाराणियस्यतत् । ७ द्युमत्सखइत्यादेरर्थंसंक्षेपेणाह । यस्तादिंद्रियसंयुतःसन्सआत्माताभिर्द्वाभिर्बहिर्यातीति८ पुरः पूर्वभागेकृताः ९ नेत्रेइतिरूपमितिचक्षुषेतिखद्योतादीनांव्याख्यानम् (तत्रचक्षुर्षेतिद्युमदित्यस्य । शेषोऽनुवादः । ईश्वरः पुरंजनः १० नासेइतिव्याख्या अवधुनोतीत्यवधूतोवायुः तदात्मकेनोछ्वासेनसहैकस्थानत्वात्घ्राणोवधूतः । आस्यमितिव्याख्या । रसज्ञविपणान्वितइत्यत्ररसज्ञशब्दर्निर्दिष्टस्यरसविदित्यनुवादः रसइतिव्याख्या । रसनेंद्रियमित्यर्थः । विपणोवाग्रसविद्रसइत्येवपाठः । आर्षत्वान्नदोषः ११ अंधः अन्नम् १२ (श्रोत्रादितिश्रुतधरेत्यस्यव्याख्यानम् ।) १३ ग्रामकमित्यस्यानुवादः ग्रामिणांरतिरिति । तस्यव्याख्याव्यवायइति १४ । १५

श्लोकाः $\frac{२}{१५}$

॥ नारदउवाच ॥ ॥ पुरुषंपुरंजनंविद्याद्यद्व्यनक्त्यात्मनःपुरम् ॥ एकद्वित्रिचतुष्पादंबहुपादमपादकम् २ योविज्ञाताहृतस्तस्यपुरुषस्यसखेश्वरः ॥ यन्न विज्ञायतेपुंभिर्नामभिर्वाक्रियागुणैः ३ यदाजिघृक्षन्पुरुषःकार्त्स्न्येनप्रकृतेर्गुणान् ॥ नवद्वारंद्विहस्तांघ्रितत्रामनुतसाध्विति ४ बुद्धिंतुप्रमदांविद्यान्ममाहमिति यत्कृतम् ॥ यामधिष्ठायदेहेस्मिन्पुमान्भुंक्तेऽक्षभिर्गुणान् ५ सखायइंद्रियगणोज्ञानंकर्मचयत्कृतम् ॥ सख्यस्तद्वृत्तयःप्राणःपंचवृत्तिर्यथोरगः ६ बृहद्बलंमनो विद्यादुभयेंद्रियनायकम् ॥ पंचालाःपंचविषयायन्मध्येनवखंपुरम् ७ अक्षिणीनासिकेकर्णौमुखंशिश्नगुदाविति ॥ द्वेद्वेद्वारौबहिर्यातियस्तदिंद्रियसंयुतः ८ अक्षिणीनासिकेआस्यमितिपंचपुरःकृताः ॥ दक्षिणादक्षिणःकर्णउत्तराचोत्तरःस्मृतः ९ पश्चिमेइत्यधोद्वारौगुदंशिश्नमिहोच्यते ॥ खद्योताविर्मुखीचात्र नेत्रेएकत्रानिर्मिते ॥ रूपंविभ्राजितंताभ्यांविचष्टेचक्षुषेश्वरः १० नलिनीनालिनीनासेगंधःसौरभउच्यते ॥ घ्राणोवधूतोमुख्यास्यंविपणोवाग्रसविद्रसः ११ आपणोव्यवहारोत्रचित्रमंधोबहूदनम् ॥ पितृहूर्दक्षिणःकर्णउत्तरोदेवहूःस्मृतः १२ प्रवृत्तंचनिवृत्तंचशास्त्रंपंचालसंज्ञितम् ॥ पितृयानंदेवयानंश्रोत्राच्छ्रुतधराद्व्रजेत् १३ आसुरीमेढ्रमर्वाग्द्वार्व्यवायोग्रामिणांरतिः ॥ उपस्थोदुर्मदःप्रोक्तोनिर्ऋतिर्गुदउच्यते १४ वैशसंनरकंपायुर्लुब्धकोंधौतुमेशृणु ॥ हस्तपादौपुमांस्ताभ्यांयुक्तोयातिकरोतिच १५

चूर्णिका

॥ नारदउवाच ॥ ॥ जीवंपुरंजनंविद्यात् २ अस्यसखायंईश्वरं ३ शरणंनामभोगायतनंदेहम् नवद्वारं द्विहस्तांघ्रिंविद्यात् ४ स्त्रियंविवेकवर्तीबुद्धिम् ५ तद्गाः सखायः ज्ञानकर्मेंद्रियाणि याः सख्यः ताः इंद्रियवृत्तयः ६ पंचशीर्षोरगंप्राणं बृहद्बलंमनः पंचालान् विषयान् नवद्वारयुक्तंमनुष्यशरीरंविद्यात् ७ अक्षिणीनासिकेकर्णौमुखमिति सप्तोर्ध्वद्वाराणि शिश्नगुदेअधोद्वारेविद्यात् ८ तत्रपुरः पंचद्वाराणि अक्षिणीनासिके मुखमिति दक्षिणद्वारं दक्षिणकर्णंउत्तरद्वारं उत्तरकर्णं विद्यात् ९ १० ११ १२ १३ १४ अंधचतुष्टय द्वौकरौद्वौपादौच १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषूचीनपदार्थानुवादो विषूचिरिति। तद्गुणैर्मनोगुणैः तमःसत्त्वरजोभिः १६ महिषीयद्यदीहेतेत्यादेरर्थंसंगृह्याह । यथायथाबुद्धिः स्वप्नेविक्रियतेजाग्रतिविकरोतिवा इंद्रियाणिपरिणामयति । तस्याशुणैरक्तोलिप्तआत्मातथातथातस्यावृत्तीः दर्शनस्पर्शनाद्याः केवलमुपद्रष्टैवसन्बलादनुकार्यते १७ आशुगमित्येतद्व्याचष्टे । संवत्सरस्येवअप्रतिहतोरयोवेगः प्रतीतितोयस्यसःसंवत्सररयः वस्तुतस्तु अगतिः स्वप्नशरीरादेर्बुद्धावेवविवृतत्वेन देशांतरगत्यभावात् पाठांतरे संवत्सरंच तत्कृतंवयश्चताभ्यांगतिर्यस्येति । द्वीषमित्यस्यव्याख्यानारदेननकृता । द्विचक्रमित्यस्यव्याख्याद्विकर्मचक्रइति । त्रिगुणध्वजइति त्रिवेणुपदव्याख्या (पंचअसवःप्राणाः बंधुराणियस्य)। १८ पंचप्रहरणमित्येतद्व्याचष्टे पंचेंद्रियार्थप्रक्षेपइति (पंचविक्रममित्यस्यव्याख्याआकूतिः कर्मेंद्रियम्। विक्रमोगतिः) १९। पंचेंद्रियैःसूनाविनोदामिवहिंसाविनोदमिवअन्यायेनविषयसेवांकरोतीतिपंचसूनाविनोदकृत्। अनेनचचारमृगयांतत्रेत्यादिव्याख्यातम्। २० परिक्रांत्यापरिभ्रमणेन। २१ भगिनीत्वेनजगृहेलोकानांक्षयाय। २२ चराः संचारिणः भूतानामुपसर्गैःपीडायांआशुशीघ्रोमृत्युहेतुः रयोवेगोअस्यप्रज्वारस्येतिप्रशब्दव्याख्या । अरयइतिपाठांतरेभूतकृता (उपसर्गाः) अरयः अनेनचअरिभिरुपरुद्धइत्यरिपदंव्याख्यातम् द्विविधः शीतोष्णरूपेणप्रवेशनिर्गमभेदात् । २३ एवंपरोक्षत्वेनोक्तमर्थंव्याख्यायसर्वकथातात्पर्यमाह । एवमित्यादिविरमक्रमेणेत्यंतेन । आधिदैविकादिभिः दुःखैः क्लिश्यमानोममाहमितिदेहेशतंवर्षाणिशेते वर्ततेइतिद्वयोरन्वयः २४ अशनापिपासादीन्प्राणधर्मान् अंधत्वादीनिंद्रियधर्मान् । कर्मादीन्मनोधर्मांश्चनिर्गुणोप्यात्मन्यध्यस्यकामलवान् विषयसुखलेशान् ध्यायन्कर्मकृत् । २५ ततः किमत आह यदेतिद्वाभ्याम् । स्वदृक्स्वप्रकाशप्रभावोपि २६

अंतःपुरंचहृदयंविषूचिर्मनउच्यते ॥ तत्रमोहंप्रसादंवाहर्षंप्राप्नोतितद्गुणैः १६ यथायथाविक्रियतेगुणाक्तोविकरोतिवा ॥ तथातथोपद्रष्टात्मातद्वृत्तीरनुकार्यते १७ देहोरथास्त्विंद्रियाश्वःसंवत्सररयोगातिः ॥ द्विकर्मचक्रस्त्रिगुणध्वजःपंचासुबंधुरः १८ मनोरश्मिर्बुद्धिसूतोहृन्नीडोद्वंद्वकूबरः ॥ पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः १९ आकूतिर्विक्रमोबाह्योमृगतृष्णांप्रधावति ॥ एकादशेंद्रियचमूःपंचसूनाविनोदकृत् ॥ संवत्सरश्चंडवेगःकालोयेनोपलक्षितः २० तस्याहानीहगंधर्वागंधर्व्योरात्रयःस्मृताः ॥ हरंत्यायुःपरिक्रांत्याषष्ट्युत्तरशतत्रयम् २१ कालकन्याजरासाक्षाल्लोकस्तांनाभिनंदति ॥ स्वसारंजगृहेमृत्युः क्षयाययवनेश्वरः २२ आधयोव्याधयस्तस्यसैनिकायवनाश्चराः ॥ भूतोपसर्गाशुरयःप्रज्वारोद्विविधोज्वरः २३ एवंबहुविधैर्दुःखैर्दैवभूतात्मसंभवैः ॥ क्लिश्यमानःशतंवर्षंदेहेदेहीतमोवृतः २४ प्राणेंद्रियमनोधर्मानात्मन्यध्यस्यनिर्गुणः॥ शेतेकामलवान्ध्यायन्ममाहमितिकर्मकृत् २५ यदात्मानमविज्ञायभगवंतंपरंगुरुम् ॥ पुरुषस्तुविषज्जेतगुणेषुप्रकृतेःस्वदृक् २६

श्लोकाः १६/२६

चूर्णिका अंतःपुरंहृदयम् विषूचीः मनः तत्रमोहं प्रसादं हर्षं वा प्राप्नोति १६ १७ उक्तो यः रथः तंस्वप्नदेहम् पंचाश्वान् ज्ञानेंद्रियाणिविद्यात् १८ पुण्यपापेचक्रेइत्यादि १९ एवंभूतरथस्थः जीवः मृगतृष्णांधावति चंडवेगं संवत्सरात्मकंकालं २० तस्यानुचराः तेदिवसाः ३६० तेषांपत्न्यः गंधर्व्यः ताःशुक्लकृष्णाः रात्रयः ३६० एतेसर्वे आयुर्हरंति २१ कालकन्याजरा मृत्युः क्षयायतांजगृहे २२ तस्यसेनाः आधयोव्याधयः प्रज्वारः वैष्णवज्वरः २३ इत्यादिसर्वंऊह्यम् एवंबहुविधैः दैवभूतात्मसंभवैःदुःखैः जीवः अज्ञानावृतः देहेशतं वर्षाणि क्लिश्यमानः २४ ममाहमितिकर्मकृत् कामलवान्ध्यायन् शेते २५ यदाआत्मानंभगवंतामितिनज्ञायतेतदाप्रकृतेर्गुणेषुसज्जते २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

शुक्लसांत्त्विकम्।कृष्णंतामसं लोहितंराजसंयथाकर्मतथाजायते। २७ तदेवाह शुक्लादितिद्वाभ्याम् प्रकाशोभूयिष्ठोयेषु।दुःखमुदर्कमुत्तरफलंयेषु।क्रियया‌आयासोयेषुतान्।लोहितात्(आप्नोति।)तमःशोकौउत्कटौये
पुतान् कृष्णादितिज्ञेयम् (तत्रतमोऽज्ञानम्) २८ नोभयंनपुंसकम्। यथाकर्मगुणंकर्मगुणावनतिक्रम्य २९ तेषुदैववशेनसुखदुःखेप्राप्नोतीतिसदृष्टांतमाहद्वाभ्याम्। क्षुधापरीतोव्याप्तः सारमेयः श्वा। दंडंदंडे
नताडनं ओदनमन्नंवा ३० कामव्याप्तआशयो (अंतःकरणं) यस्य (उच्चावचपथाविहिताविहितमार्गेण। दिष्टंदैवतःप्राप्तम्) ३१ ननु तर्हिंसुखस्यसंभवात्दुःखस्यचप्रतिकारसंभवात्नैकांततोहेयत्वं
(भवस्येति) तत्राह। दुःखेष्विति। दुःखस्यप्रतीकारस्तावन्नास्ति । स्याच्चेत्तस्यतस्यप्रतिक्रियातथापित्रिविधेषुदुःखेषुमध्येएकतरेणापिदुःखेनव्यच्छेदोपियोगोनास्ति । ३२ प्रतिक्रियाणामपिदुःख
रूपत्वादितिसदृष्टांतमाह। यथाहीति। (स्कंधाधानरूपप्रतिक्रियायायथादुःखरूपत्वंतथासर्वादुःखरूपाइत्यर्थः) ३३ दुःखस्यमूलभूतानिकर्माणितु प्रतिक्रियादिकर्मभिरविरोधितयानैवनिवर्ततंइत्याह
नेति। एकांततः नियमेन। अत्यंतंसवासनम् (नप्रतिकरोति। यतः) केवलंज्ञानरहितम् अविद्ययाउपसृतंप्राप्तम्। अतोऽविरोधान्ननिवर्त्यं निवर्तकत्वंतस्येतिभावः। अत्रदृष्टांतः। स्वप्नेदृष्टः स्वप्नः प्र
बोधंविनायथातंस्वप्नमत्यंतंनप्रतिकरोतीत्यर्थः (ननुस्वप्नेपिव्याघ्रादिदर्शनेनतन्निवृत्तिर्दृश्यतइतिचेन्न । व्याघ्रादेः प्रबोधहेतुत्वेनतद्द्वारास्वप्ननिवर्तकत्वात्।) ३४ (ननुतर्हिं अज्ञान-)-विलसितत्वेन
संसृतिहेतोर्देहादेरप्यसत्वात्किंतन्निवर्तनप्रयासेनतत्राह अर्थेहीति। लिंगरूपेणउपाधिभूतेन (विचरतोवर्तमानस्ययथाऽनर्थनिवृत्तिर्नेत्यर्थः।) ३५ तदेवंसंसृतिप्रकारंमुक्त्वातन्निवृत्तिप्रकारमाह अथ त
स्मात्पुरुषार्थभूतस्यैवात्मनः यतोऽज्ञानान्मनसोवाअनर्थपरंपरारूपासंसृतिर्भवतितस्य व्यवच्छेदोनिवृत्तिः गुरुरूपेवासुदेवेभक्त्यैव ३६ ननुसंसृतिनिवृत्तिर्वैराग्यपूर्वकात्ज्ञानादेव नतुभक्त्या "तरतिशोकमा
त्मविदित्यादि" श्रुतेस्तत्राह। वासुदेवइति। सध्रीचीनेनसमीचीनेनप्रकारेण (समाहितः सम्यक्स्थापितः) ३७ नन्वसौमहाफलोभक्तियोगः कथंस्यादतआह। सतुअच्युतस्यकथामाश्रित्यवर्तमानोऽचि
रात्स्यात्। कस्यस्यात्तदाह। शृण्वतः अधीयानस्यच। ३८ कुत्रस्यात्तदाह। यत्रेति। भगवतोगुणानुकथनेश्रवणेचव्यग्रंसत्वरंचेतोयेषांते ३९

श्लोकाः २७/३९

गुणाभिमानीसतदाकर्माणिकुरुतेवशः ॥ शुक्लंकृष्णंलोहितंवायथाकर्माभिजायते २७ शुक्लात्प्रकाशभूयिष्ठाल्लोकानाप्नोतिकर्हिचित् ॥ दुःखोदर्कान्क्रि
यायासांस्तमःशोकोत्कटान्क्वचित् २८ क्वचित्पुमान्क्वचिच्चस्त्रीक्वचिन्नोभयमंधधीः ॥ देवोमनुष्यस्तिर्यग्वायथाकर्मगुणंभवः २९ क्षुत्परीतोयथादीनःसार
मेयोगृहंगृहम् ॥ चरन्विंदतियद्दिष्टंदंडमोदनमेववा ३० तथाकामाशयोजीवउच्चावचपथाभ्रमन् ॥ उपर्यधोवामध्येवायातिदिष्टंप्रियाप्रियम् ३१ दुःखेष्वेकत
रेणापिदैवभूतात्महेतुषु ॥ जीवस्यनव्यवच्छेदःस्याच्चेत्तत्तत्प्रतिक्रिया ३२ यथाहिपुरुषोभारंशिरसागुरुमुद्वहन् ॥ तंस्कंधेनसआधत्ततथासर्वाःप्रति
क्रियाः ३३ नैकांततःप्रतीकारःकर्मणांकर्मकेवलम् ॥ द्वयंह्यविद्योपसृतंस्वप्नेस्वप्नइवानघ ३४ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त्तते ॥ मनसालिंग
रूपेणस्वप्नेविचरतोयथा ३५ अथात्मनोर्थभूतस्ययतोनर्थपरंपरा ॥ संसृतिस्तद्व्यवच्छेदोभक्त्यापरमयागुरौ ३६ वासुदेवेभगवतिभक्तियोगःसमाहितः
॥ सध्रीचीनेनवैराग्यंज्ञानंचजनयिष्यति ३७ सोचिरादेवराजर्षेस्यादच्युतकथाश्रयः ॥ शृण्वतःश्रद्दधानस्यनित्यदास्यादधीयतः ३८ यत्रभागवताराजन्साधवोविशदाशयाः ॥ भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ३९

चूर्णिका

२७ २८ ततः क्वचित्पुमान्क्वचित्स्त्रीक्वचित्नपुंसकंदेवोमनुष्यादिरूपोवाभवति २९ तस्मात्कर्मएवकुर्वाणः बुद्ध्याकृतंस्वस्मिन् आरोप्य स्वयंसंसृतिं याति अतः
अहंकर्तृत्वंत्यक्त्वाअस्मिन्मनुष्यदेहेज्ञानवैराग्ययुक्तः सन्हरौवासुदेवेभक्तिंकुर्वन्क्रमात्मुक्तोभवति २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥११८॥ ननु साधुसंगंविना स्वयमेवहरिकथाचिंतनादिना भक्तिर्भवेदेवेत्याशंक्याहद्वाभ्याम् ।तस्मिन्स्थानेमहद्भिर्मुखरिताः कीर्तिताः मधुभिदश्चरित्रमेवपीयूषंतदेवाशिष्यतइतिशेषोयासु।असारांशरहितशुद्धामृतवाहिन्यइत्यर्थः । अवितृषः अलंबुद्धिशून्याः संतः गाढैः सावधानैः कर्णैर्येताः सरितः पिबंति सेवंते । अशनशब्देनक्षुल्लभ्यतेअशनादयस्तान्नस्पृशंति । भक्तिरसिकान्नबाधंतेइत्यर्थः ।४०सत्संगमंतरेणस्वयमेवकथाचिंतनादावालस्यादिनारसावेशाभावात्क्षुत्पिपासाद्यभिभूतस्यभक्तिर्नसंभवतीत्याह।एतैरिति(एतैरशनादिभिः) ४१भगवदनुग्रहमंतरेणतुनकस्यापिज्ञानसंभवइतिकैमुत्यन्यायेनाहचतुर्भिः प्रजापतीनां(दक्षादीनां) पतिर्ब्रह्मा । ४२ मदंताअहंनारदोअंतेयेषांते । ४३ वाचांपतयेऽपितपोविद्यासमाधिभिरुपायैः पश्यंतोविचिन्वंतोपिपश्यंतंसर्वसाक्षिणंनपश्यंति । ४४ कुतइत्यतआह । शब्दब्रह्मणिवेदेउरुर्महान्विस्तरोयस्य । अर्थतोपिपारशून्ये । तस्मिन्वर्तमानाः मंत्राणांलिंगैः वज्रहस्तत्वादिगुणयुक्तविविधदेवताभिधानसामर्थ्यैः परिच्छिन्नमेवेंद्रादिरूपंतत्तत्कर्मांग्रहेणभजंतः परं (अपरिच्छिन्नं) परमेश्वरंनविदुः ४५ तर्ह्यन्यः कोनामकर्माद्याग्रहंहित्वापरमेश्वरमेवभजेदतआह । यदायमनुगृह्णाति । अनुग्रहेहेतुः आत्मनि (अंतःकरणे) भावितः (उपासितः) सन्सततदालोकेलोकव्यवहारेवेदेचकर्ममार्गेपरिनिष्ठितांमतिंत्यजति ४६ अर्थकाशिषुपरमार्थत्वेनप्रकाशमानेषुअज्ञानाद्विवेकाभावात्पुरुषार्थबुद्धिमाकृथाः नकुरु (। तत्प्रवृत्तौनिमित्तमाह। श्रोत्रस्पार्शिषु।) प्ररोचनायकेवलंश्रोत्रप्रियेषु (हेयत्वेकारणमाह) नस्पृष्टंवस्तुयैः। ४७ ननु वेदेनस्वर्गादिसाधनत्वेनोक्तानिकर्माणीतिवेदवादिनोवदंतिकथमस्पृष्टवस्तुत्वमित्युच्यतेतत्राह । येधूम्रधियः मलिनबुद्धयः सकर्मकंकर्मपरंवेदमाहुस्तेअतद्विदः अवेदज्ञाः यतस्तेस्वंस्वरूपभूतंलोकमात्मतत्त्वंवेदतात्पर्यगोचरंनविदुः यत्रदेवोस्ति ४८ त्वंतुमहामूर्खइत्याह । आस्तीर्येति । बृहद्वधात्बहुपशुवधात्मानीमहायज्वाहमित्यहंकारी । अतः स्तब्धः अविनीतः सन् कर्मनावैपिपरंविद्यास्वरूपंतच्चनवेत्सि । (तर्हिकिंतत्कर्मकाऽसौविद्येत्यत्र) नारदः स्वयंकृपयातद्द्वयंनिरूपयति । हरिंतोषयतीतिहरितोषंयत्तदेवकर्म । ययातस्मिन्हरौमतिर्भवतिसैवविद्यामहाफलत्वात् ।४९ कुतइत्यपेक्षायांहरेः परमफलत्वंदर्शयन्नाहद्वाभ्याम् । हरिर्देहभृतामात्माईश्वरश्च । तत्रहेतुः । स्वयंस्वातंत्र्येणप्रकृतिः कारणं । अतस्तेषांतत्पादमूलमेवशरणंआश्रयः यतः यस्मिन् ५० नचतद्भजनेअन्यभजनइवदुःखंभयंचेत्याह ।सइति । इतियोवेदसएवविद्वान्सगुरुरेवहरिश्च ५१

श्लोकाः ४०/५१

तस्मिन्महन्मुखरितामधुभिच्चरित्रपीयूषशेषसरितःपरितःस्रवंति ॥ तायेपिबंत्यवितृषोनृपगाढकर्णैस्तान्नस्पृशंत्यशनतृड्भयशोकमोहाः ४० एतैरुपद्रुतोनित्यंजीवलोकःस्वभावजैः ॥ नकरोतिहरेर्नूनंकथामृतंनिधौरतिम् ४१ प्रजापतिपतिःसाक्षाद्भगवान्गिरिशोमनुः ॥ दक्षादयःप्रजाध्यक्षानैष्ठिकाःसनकादयः ४२ मरिचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः ॥ भृगुर्वसिष्ठइत्येतेमदंताब्रह्मवादिनः ४३ अद्यापिवाचस्पतयस्तपोविद्यासमाधिभिः ॥ पश्यंतोपिनपश्यंतिपश्यंतंपरमेश्वरम् ४४ शब्दब्रह्मणिदुष्पारेचरंतउरुविस्तरे ॥ मंत्रलिंगैर्व्यवच्छिन्नंभजंतोनविदुःपरम् ४५ यदायमनुगृह्णातिभगवानात्मभावितः ॥ सजहातिमतिंलोकेवेदेचपरिनिष्ठिताम् ४६ तस्मात्कर्मसुबर्हिष्मन्नज्ञानादर्थकाशिषु ॥ मार्थदृष्टिंकृथाःश्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ४७ स्वंलोकंनविदुस्तेवैयत्रदेवोजनार्दनः ॥ आहुर्धूम्रधियोवेदंसकर्मकमतद्विदः ४८ आस्तीर्यदर्भैःप्रागग्रैःकार्त्स्न्येनक्षितिमंडलम् ॥ स्तब्धोबृहद्वधान्मानीकर्मनावैषियत्परम् ॥ तत्कर्महरितोषंयत्साविद्यातन्मतिर्यया ४९ हरिर्देहभृतामात्मास्वयंप्रकृतिरीश्वरः ॥ तत्पादमूलंशरणंयतःक्षेमोनृणामिह ५० सवैप्रियतमश्चात्मायतोनभयमण्वपि ॥ इतिवेदसवैविद्वान्योविद्वान्सगुरुर्हरिः ५१ ॥

॥११८॥

चूर्णिका ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain: Digitization by eGangotri

टीका

उक्तमुपसंहरति एवंभवतः प्रश्नः संछिन्नः परिहृतः तदेवमात्मनोबंधमोक्षप्रकारेकथारूपकेणकथितेपिनातिनिर्विण्णचित्तंपुत्रागमनंप्रतीक्षमाणं/ तंतंतत्क्षणमेव महाभयकंपितसकलगात्रंगृहान्निर्वासयितुंह रिणरूपकमाह । अत्रेति। वदतो मे(गुह्यं) वचः शृणु ५२ क्षुद्रमल्पंचरतीतितथातम् अलुक् सुमनसांपुष्पाणांशरणेआश्रमेवाटिकायां मिथित्व/ । मिथः परस्परंस्त्रियासहमिलित्वा तत्रैवरक्तमासक्तं षडंघ्रयो भ्रमरास्तेषांगणास्तेषांसामसुगीतेषुलुब्धः कर्णौ यस्यतम् परेषामसुभिर्हतैः स्वीयानसूंस्तर्पयंतीतिअसुतृपः तानविगणय्यअगणयित्वा । लुब्ध/ धकस्यबाणेनभिन्नंमृगं मृगयान्वेषय ५३ श्लोकंप्रस्तुतेयोजयन् (स्वयमेव) व्याचष्टे । सुमनोभिः समानोधर्मः परिणामविरसत्वंयासांस्त्रीणाम् । मिथित्वेत्यस्यव्याख्यामिथुनीभूयेति । स्त्रीभिः सहेतिशेषः । रक्तमित्यस्यव्याख्या तास्वभिनिवेशितंमनोयेन । असुतृ पइत्यस्यव्याख्या आयुर्हरतइति । यांतमित्यस्यव्याख्याविहरंतमिति । अंतःनालिकायांगूढेनशरेणपराविध्यति दूरादेवताडयति ५४ उ/ पदेशसारमाह सइति । एवंत्वंआत्मनः स्वस्य मृगवच्चेष्टितंविचक्ष्य विचार्यअंतर्हृदिचित्तं कर्णयोःश्रोत्रेंद्रियस्यधुनीं नदीमिवबहिर्वृत्तिंचित्तेनियच्छ।एतच्चसर्वेंद्रियोपलक्षणार्थम्। अंगनाश्रमंगृहाश्रमंचजहि / कीदृशम् असत्तमानांअतिकामुकानांयानियूथानितेषांगाथावार्ताय स्मिन् । जीवानांशरणमीश्वरं प्रीणीहि । एवंक्रमेणसर्वतो विरम ५५ अर्थांतरं प्रष्टुंपूर्वोक्तमर्थमनुवदति । श्रुतमन्वीक्षितं विचारितंच । ब्रह्मन् नारद एतत्त्वदुक्तंआत्मतत्त्वंउपाध्यायाः येममकर्मोपदे ष्टारः आचार्यास्तेनजानंति । (तत्रहेतुः यदिविदुस्तर्हिकिंनब्रूयुरिति) ५६ अतस्तत्कृतउपाध्यायकृतः तद्वाक्यविरोधेनात्मत्वेऽसंभाव नारूपोमहान्संशयः स संछिन्नस्त्वया । अत्रतुकश्चित्संशयोवर्ततेयत्रें द्रियवृत्तीनामप्रवृत्तेर्मुह्यंति। (अतस्त्वांपृच्छामीतिशेषः) ५७ संशयमाहद्वाभ्याम् कर्माणियेनदेहेनकरोतितमत्रैवविहायअमुत्रलोकांतरे कर्मोपस्थापितेनअन्येनदेहेनजुष्टानिउपभुक्तानि जीवोश्नुतेप्राप्नोति ५८

॥११९॥

श्लोकाः ५२/५८

॥ नारदउवाच ॥ ॥ प्रश्नएवंहिसंछिन्नोभवतःपुरुषर्षभ ॥ अत्रमेवदतोगुह्यंनिशामयसुनिश्चित/म् ५२ क्षुद्रंचरंसुमनसांशरणेमिथित्वारक्तंषडंघ्रिगणसा मसुलुब्धकर्णम् ॥ अग्रेवृकानसुतृपोविगणय्ययांतंपृष्ठेमृगंमृगयलुब्धकबाणभिन्नम् ५३ सुमनःस/मधर्माणांस्त्रीणांशरणआश्रमेपुष्पमधुगंधवत्क्षुद्रतमंकाम्य कर्मविपाकजंकामसुखलवंजैह्व्यौपस्थ्यादिविचिन्वंतंमिथुनीभूयतदभिनिवेशितमनसंषडंघ्रिगण/सामगीतवदतिमनोहरवनितादिजनालापेष्ववतितरामति प्रलोभितकर्णमग्रेवृकयूथवदात्मनआयुर्हरतोहोरात्रांतान्काललवविशेषानविगणय्यगृहेषुविह/रंतंपृष्ठतएवपरोक्षमनुप्रवृत्तोलुब्धकःकृतांतोंतःशरेणयमिहप राविध्यतितामिममात्मानमहोराजान्भिन्नहृदयंद्रष्टुमर्हसीति ५४ सत्वंविचक्ष्यमृगचेष्टितम/त्मनोंतश्चित्तंनियच्छहृदिकर्णधुनींचचित्ते ॥ जह्यंगनाश्रममस त्तमयूथगाथंप्रीणीहिहंसशरणंविरमक्रमेण ५५ ॥ ॥ राजोवाच ॥ ॥ श्रुतमन्वीक्षि/तंब्रह्मन्भगवान्यदभाषत ॥ नतज्जानंत्युपाध्यायाःकिन्नब्रूयुर्विदु र्यदि ५६ संशयोत्रतुमेविप्रसंछिन्नस्तत्कृतोमहान् ॥ ऋषयोपिहिमुह्यंतियत्रनेंद्रियवृत्तय/ः ५७ कर्माण्यारभतेयेनपुमानिहविहायतम् ॥ अमुत्रान्येनदेहेनजु ष्टानिसयदश्नुते ५८

चूर्णिका ५२ हेराजनइमं मृगंपुष्पवाटिकायांरक्तं पृष्ठेलुब्धकं अग्रे असुतृपः वृकान् अविगणय्य स्त्रि/यासहरममा/णंपश्य ५३ ५४ एवं मृगचेष्टितं विचार्य अंतर्हृदिईश्वरं निधेहि ५५ ५६ ५७ ५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिवादः श्रूयते। ''प्राप्यपुण्यकृतांल्लोकानि''ति। ''शरीरजैः कर्मदोषैर्यातिस्थावरतांनर'' इति। त्वयाचोक्तं''शाश्वतीरनुभूयाति''मिति। एतच्चकर्तृभोक्तृदेहभेदेनं कृतनाशाकृताभ्यागमप्रसंगान्नसंगच्छतेइ तिभावः। संशयांतरमाह। प्रोक्तंवेदोक्तंकर्मक्रियतेजनैः तच्चानंतरक्षणएवपरोक्षं अदृश्यंसन्नप्रकाशते। अतः कर्मणोनष्टत्वात् तद्भोगोपिदुर्घटइतिभावः ५९ प्रथमस्यैवोत्तरं येनैवेति। अव्यवधानेनकर्तृ भोक्तृदेहविच्छेदंविना। स्थूलदेहनाशेपिमनःप्रधानस्य लिंगदेहस्यानाशान्नोक्तदोषप्रसंगइत्यर्थः ६० लिंगदेहविशिष्टस्यभोक्तृत्वंस्वप्नदृष्टांतेनस्पष्टयति। शयानमिमंजाग्रद्देहंश्वसंतंजीवंतं उत्सृज्यतदभिमानं त्यक्त्वाआत्मनिमनसिसंस्काररूपेणाहितं कर्मयथाभुंक्तेतादृशेनशयानदेहसदृशेनकर्मोपस्थापितेनदेहेनअन्येनवापश्वादिदेहेन। तथालोकांतरेपीतिभावः। ६१ ननु भवतुनामलिंगविशिष्टस्यानेनदृष्टांतेनभोक्तृ त्वम्। कर्तृत्वंतुदानप्रतिग्रहादिषुस्थूलदेहविशिष्टस्यैवदृश्यतेतत्राह। ममैतेपुत्रादयोसावहंब्राह्मणइतिब्रुवन्मनसायद्यदेहंगृह्णीयात्तत्ततोदेहाद्राद्धंसिद्धंकर्मपुमान्गृह्णीयात्। येनकर्मणाएवमहंकारगृहीतेन पुनर्भवोभवति। अन्यथाजन्मानुपपत्तेः। अतोऽभिमंतुर्मनोविशिष्टस्यैवकर्तृत्वम्। अभिमानविषयस्यतुदेहस्यपुत्रादिदेहवत्द्वारमात्रत्वमितिभावः ६२यदुक्तंकर्मणोनष्टत्वान्नामुत्रभोगइतितत्राह। उभयैर्ज्ञान क्रियारूपैरिंद्रियाणामीहितैः कदाचित्कर्मणिप्रवृत्तिभिश्चित्तमनुमीयते। सत्यपिसर्वेंद्रियविषयसंबंधेयुगपज्ज्ञानानुत्पत्तेः। तदुक्तमक्षपादेन। ''युगपज्ज्ञानानुत्पत्तिर्मनसोलिंग''मिति। एवंचित्तवृत्तिभिरपि पूर्वदेहजंकर्मलक्ष्यतेतासामपियुगपदनुत्पत्तेः।६३इतोपिकर्मलक्ष्यतइत्याह।नानुभूतमितिद्वाभ्याम्।अनेनवर्तमानेनदेहेनक्वचकुत्रचिदपियन्नानुभूतं अननुभूतम् अनुपभुक्तंअदृष्टंचाश्रुतंच।यद्रूपंयदात्मकंयादृक्य त्प्रकारंचतत्कदाचित्स्वप्नमनोरथादिषुआत्मनिमनसिउपलभ्यते। ६४ तेनहेतुनाअस्यलिंगिनोवासनाश्रयस्यजीवस्यतादृशंतदनुभवादियुक्तंपूर्वदेहसंभवंश्रद्धत्स्व (श्रद्धया) स्वानिश्चयेममन्यस्व। न ह्यननुभूतोर्थोमनःस्प्रष्टुंमनसिस्फुरितुमर्हति ६५ किंचमनोवृत्त्यैवपूर्वापराणिशुभाशुभनिमित्तानिशरीराणिज्ञायंतइत्याह मनएवेति। भद्रंतइतिसम्यगवधानार्थमाशिषाभिनंदति। भविष्यतउद्भवंप्राप्स्यतः नभविष्यतःनीचत्वंप्राप्स्यतोपि भावीनिरूपाणि शंसति। मनएवौदार्यकार्पण्यादिवृत्तिभिःपूर्वमप्येवमेवासम्पश्चादप्येवमेव भविष्यतीति भूतभाविरूपाणिज्ञापयतीत्यर्थः ६६ ननु कदाचिद्दर्शनानर्हमपि स्वप्नेप्रतीयते। यथापर्वताग्रेसमुद्रः दिवानक्षत्राणि स्वशिरश्छेदइत्यादितत्राह। अदृष्टमिति। अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे। निशाश्रयं नक्षत्रादिकं दिवा। अभ्यंगादिक्रियाश्रयंस्व शिरश्छेदनाश्रयम्। निद्रादिदोषेणहिप्रतीयतेइत्यनुमंतव्यम् (प्रतिवादिनोपि) परस्यापितदनुपपत्तेस्तुल्यत्वादितिभावः। (देशकालक्रियाआश्रयोयस्यदर्शनस्यतत्तथा) ६७

श्लोकाः ५९—६७

इतिवेदविदांवादःश्रूयतेतत्रतत्रह ॥ कर्मयत्क्रियतेप्रोक्तंपरोक्षंनप्रकाशते ५९ ॥ ॥ नारदउवाच ॥ ॥ येनैवारभतेकर्मतेनैवामुत्रतत्पुमान् ॥ भुंक्तेह्यव्यवधानेनलिंगेनमनसास्वयम् ६० शयानमिममुत्सृज्यश्वसंतंपुरुषोयथा ॥ कर्मात्मन्याहितंभुंक्तेतादृशेनेतरेणवा ६१ ममैतेमनसायद्यदसावहमितिब्रुवन् ॥ गृह्णीयात्तत्पुमान्राद्धंकर्मयेनपुनर्भवः ६२ यथानुमीयतेचित्तमुभयैरिंद्रियेहितैः ॥ एवंप्राग्देहजंकर्मलक्ष्यतेचित्तवृत्तिभिः ६३ नानुभूतंक्वचानेनदेहेनादृष्टमश्रुतम् ॥ कदाचिदुपलभ्येतयद्रूपंयादृगात्मनि ६४ तेनास्यतादृशंराजन्लिंगिनोदेहसंभवम् ॥ श्रद्धत्स्वाननुभूतोर्थोनमनःस्प्रष्टुमर्हति ६५ मनएवमनुष्यस्यपूर्वरूपाणिशंसति ॥ भविष्यतश्चभद्रंतेतथैवनभविष्यतः ६६ अदृष्टमश्रुतंचात्रक्वचिन्मनसिदृश्यते ॥ यथातथानुमंतव्यंदेशकालक्रियाश्रयम् ६७

॥१२०॥

चूर्णिका ५९ ६० ६१ ६२ ६३ ६४ ६५ ६६ ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननु दरिद्रःक्वचिदात्मानंमहाराजंपश्यति महाराजश्चरंकमात्मानंपश्यति तत्कथमसंभावितंसंगच्छेततत्राह । सर्वंइति । (इंद्रियाणांविषयाः) आयांति भोग्यत्वेनप्राप्नुवंति । यांतिचभोगानंतरम् यादिकश्चिदमनाभवेत् तर्ह्येवंनस्यात् । नत्वेतदस्तीत्याह सर्वेसमनसइति । अतःसर्वेषां समनस्कत्वात् मनसिचसर्वार्थानांक्रमेणप्रवेशान्नात्यंतादृष्टचरः कस्यापिकश्चिदर्थोस्तीत्यर्थः ६८ तदेवंसर्वैरपिसर्वे र्थाः क्रमेणदृश्यंतइत्युक्तम् । इदानींयुगपदपिसर्वदर्शनंकदाचिद्भवतीत्याह । सत्त्वैकनिष्ठेसत्त्वेएवएकानिष्ठायस्य । भगवत्पार्श्ववर्तिनिभगवद्ध्यानपरेमनसिइदंविश्वं उपरज्य संयोगमिवप्राप्यावभासते । प्रतीत्यनर्हस्यापिकदाचित्प्रतीतौदृष्टांतः । चंद्रमसिउपरज्यतमःराहुरिव । तदिदंशुद्धेमनसिसर्वविषयस्फुरणम् योगिप्रत्यक्षमितिप्रसिद्धम् ६९ तदेवंस्थूलदेहनाशेपिलिंगदेहस्यानाशादन्यः कर्ताऽन्योभो क्तेतिनास्तीत्युक्तम् । तत्रैवंशंकते । ननुलिंगदेहस्य स्थूलदेहद्वारेणैवकर्तृत्वभोक्तृत्वे नतुकेवलस्य तत्रकदाचित्स्थूलदेहाभावेजीवस्यकर्तृत्वभोक्तृत्वाभावान्मुक्तीः प्रसज्येततत्राह । अहंममेतिभावः स्थूलदे हसंबंधः पुरुषेजीवे नव्यवधीयते नविच्छिन्नोभवति । किंपर्यंतम् । बुद्ध्यादीनांव्यूहः परिणामोलिंगंयावदस्तिअनादिमान् अनादिः सन् । (तत्राक्षाणींद्रियाणि । अर्थास्तन्मात्राणि ।) ७० स्वापादा वहंकाराभावात्तद्विच्छेदमाशंक्याह द्वाभ्याम् । सुप्त्यादिषु । उपतापइष्टवियोगादिदुःखम् । (प्रज्वारोतिज्वरः) । तेषुअहमितिज्ञानंअहंकारः नेहतेनप्रकाशते । प्राणायनानामिंद्रियाणां विघातात् । इंद्रियै रिदंकारास्पदवस्तुग्रहणेह्यहंकारः स्फुरति नान्यथेत्यर्थः ७१ अपौष्कल्यात् असंपूर्णत्वात् प्राणायनानामितिशेषः यूनस्तरुणस्ययदेकादशविधंएकादशेंद्रियैः स्फुटंलिंगमहंकरणंतन्नदृश्यते गर्भादेरितिशे षः । सतोप्यनभिव्यक्तौदृष्टांतः । कुह्वाममावास्यायांचंद्रमसोलिंगंरूपमिव । ७२ तस्मादहंकारास्पदस्यस्थूलदेहस्याविच्छेदाद्वस्तुभूतार्थाभावेपिसंसृतिनिवृत्तिर्नास्तीत्याह अर्थेहीति । (अस्यपुंसः ।) ७३ यावल्लिंगंस्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्येतत्प्रपंचयतिएवमितिसार्धैस्त्रिभिः । पंचविधंपंचतन्मात्रात्मकम् । त्रिवृत्त्रिगुणंषोडशविकारात्मनाविस्तृतम् । (एषलिंगदेहः) ७४ (अनेनलिंगे नस्थूलदेहान् गृह्णातित्यजतिच ।) ७५ नन्वेकंदेहंविसृज्यदेहांतरप्रवेशात्पूर्वं (कंचित्कालं) अदेहतास्यादेवेत्यतआह । यथेति[१] । नापयाति पूर्वतृणस्यात्यागात् अपयातिचतृणांतरधारणात् । (तृणजलूकाकीटविशेषः ।) तथा कर्मणांप्राग्देहारंभकाणांव्यवधानेन विच्छेदेनसमाप्त्या यावदन्यंदेहंनविंदेत तावत्प्राग्देहाभिमानंनत्यजेत् म्रियमाणोपि ७६ प्रकरणार्थमुपसंहरति मनएवेति । (तस्मात् हेमनुष्येंद्र भवंसंसारं भावयतिउत्पादयतीति) भवभावनंसंसारहेतुः ७७

श्लोकाः

सर्वेक्रमानुरोधेनमनसींद्रियगोचराः ॥ आयांतिवर्गशोयांतिसर्वेसमनसोजनाः ६८ सत्त्वैकनिष्ठेमनसिभगवत्पार्श्ववर्त्तिनि ॥ तमश्चंद्रमसीवेदमुपरज्यावभा
सते ६९ नाहंममेतिभावोयंपुरुषेव्यवधीयते ॥ यावद्बुद्धिमनोक्षार्थगुणव्यूहोह्यनादिमान् ७० सुप्तिमूर्च्छोपतापेषुप्राणायनविघाततः ॥ नेहतेहमितिज्ञानं
मृत्युप्रज्वारयोरपि ७१ गर्भेबाल्येप्यपौष्कल्यादेकादशविधंतदा ॥ लिंगंनदृश्यतेयूनःकुह्वांचंद्रमसोयथा ७२ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्त्तते ॥ ध्याय
तोविषयानस्यस्वप्नेनर्थागमोयथा ७३ एवंपंचविधंलिंगंत्रिवृत्षोडशविस्तृतम् ॥ एषचेतनयायुक्तोजीवइत्यभिधीयते ७४ अनेनपुरुषोदेहानुपादत्तेविमुंच
ति ॥ हर्षंशोकंभयंदुःखंसुखंचानेनविंदति ७५ यथातृणजलुकेयंनापयात्यपयातिच ॥ नत्यजेन्म्रियमाणोपिप्राग्देहाभिमतिंजनः ७६ यावदन्यंनविंदेतव्य
वधानेनकर्मणाम् ॥ मनएवमनुष्येंद्रभूतानांभवभावनम् ७७

६८
७७

चूर्णिका

६८ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ किंच हेराजन् भूतानांमन एव बंधमोक्षयोः कारणम् अतः विश्वंतदात्मकंपश्यन्सर्वात्मना हरिंभज ७७

१ विदेहतास्यादितिवापाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

कथंसतितदाह ।(अक्षैरिंद्रियै-)-श्चरितान्उपभुक्तान् (विषयान्ध्यायन्तदनुसारेणकर्माणिकरोत्यसकृत् ।) यतः कर्मणिसाति । नन्वसंगस्यकुतः कर्मतत्राह । अविद्यायांसत्यां अनात्मनोदेहादेः
कर्मणिबंधोभवति ७८ विश्वस्य स्थित्यादयोयतोहरेर्भवंति (तद्विश्वम्) ७९ हंसयोर्जीवेश्वरयोः । (अमुंप्राचीनबर्हिषम्) ८० पुत्रानादिश्येतिपुत्राणामादेशंमंत्रिणामग्रेकथयित्वा कपिलाश्रमंगंगासा
गरसंगमम् ८१ ८२ (पारोक्ष्यंपरोक्षतयाकथारूपकेणकथितं आत्मानमधिकृत्यवर्तमानम् तच्चतत् ।) ८३ आत्मशौचंमनःशोधकम् पारमेष्ठ्यंसर्वोत्कृष्टफलदम् । ८४ स्त्रीबुद्धिर सत्सहितस्य (पुंसः)
आश्रयोअहंकारः छिन्नोभवति । अमुत्रकर्मफलभोगः कथमितिसंशयश्चछिन्नः।८५ इतिचतुर्थस्कंधेटीकायांएकोनत्रिंशोध्यायः २९॥ ॥ ॥प्रसंगात्पंचाभिःप्रोक्तंवृत्तंप्राचीनबर्हिषः । व र्ण्यतेचपुनर्द्वाभ्यांप्रस्तुतं
तत्प्रचेतसां॥ १ ॥तत्रत्रिंशेतपस्तुष्टादीशाल्लब्धवरास्ततः । आगत्यवार्क्षींमुद्वाह्यराज्यंचक्रुरितीर्यते ॥ २॥ हरिंप्रतोष्यकांसिद्धिमापुः १हेबार्हस्पत्य कस्यांचिद्विद्यायां बृहस्पतेर्मे श्रेयः शिष्यइतिज्ञातव्यम्।
॥१२२॥ तेयदृच्छयागिरिशंप्राप्यतस्यैव कैवल्यनाथोविष्णुस्तत्प्रियस्यगिरिशस्यपार्श्ववर्तिनस्तदनुगृहीताः संतोनूनंपरंमोक्षंप्रापुरेवततःपूर्वंतुइहअथवापरत्रांकिंमापुः २

श्लोकाः ७८/२

यदाक्षैश्चरितान्ध्यायन्कर्माण्याचिनुतेसकृत् ॥ सतिकर्मण्यविद्यायांबंधःकर्मण्यनात्मनः ७८ अतस्तदपवादार्थंभजसर्वात्मनाहरिम् ॥ पश्यंस्तदात्मकं
विश्वंस्थित्युत्पत्त्यप्ययायतः ७९ ॥ ॥ मैत्रेयउवाच ॥ ॥ भागवतमुख्योभगवान्नारदोहंसयोर्गतिम् ॥ प्रदर्श्यह्यमुमामंत्र्यसिद्धलोकंततोऽगमत् ८०
प्राचीनबर्हीराजर्षिःप्रजासर्गाभिरक्षणे ॥ आदिश्यपुत्रानगमत्तपसेकपिलाश्रमम् ८१ तत्रैकाग्रमनावीरोगोविंदचरणांबुजम् ॥ विमुक्तसंगोनुभजन्भक्त्या
तत्साम्यतामगात् ८२ एतदध्यात्मपारोक्ष्यंगीतंदेवर्षिणानघ ॥ यःश्रावयेद्यःशृणुयात्सलिंगेनविमुच्यते ८३ एतन्मुकुंदयशसा भुवनंपुनानंदेवर्षिवर्यमुख
निःसृतमात्मशौचम् ॥ यःकीर्त्यमानमधिगच्छतिपारमेष्ठ्यंनास्मिन्भवेभ्रमतिमुक्तसमस्तबंधः ८४ अध्यात्मपारोक्ष्यमिदंमयाधिगतमद्भुतम् ॥ एवंस्त्रि
याश्रमःपुंसश्छिन्नोमुत्रचसंशयः ८५ इतिश्रीभा०म०च०विदुरमैत्रेयसंवादेप्राचीनबर्हिर्नारदसंवादोनामएकोनत्रिंशोध्यायः ॥ २९ ॥ ॥ विदुरउवाच ॥
येत्वयाभिहिताब्रह्मन्सुताःप्राचीनबर्हिषः ॥ तेरुद्रगीतेनहरिंसिद्धिमापुःप्रतोष्यकाम् १ किंबार्हस्पत्येहपरत्रवाथकैवल्यनाथप्रियपार्श्ववर्त्तिनः ॥ आसा
द्यदेवंगिरिशंयदृच्छयाप्रापुःपरंनूनमथप्रचेतसः २

चूर्णिका

७८ ७९ ॥ ॥ मैत्रेयउवाच ॥ ॥ भगवान्नारदः प्राचीनबर्हिषेहंसयोः गतिंप्रदर्श्य तं आमंत्र्य सिद्धलोकं अगमत् ८० राजाप्रजारक्षणेपुत्रान् आदिश्य कपिलाश्रमं
गत्वा ८१ तत्रभक्त्या गोविंदचरणांबुजंभजन्तत्साम्यतांइयात् ८२ एतत्यः शृणुयात्श्रावयेत्सः लिंगशरीरेणमुच्यते ८३ किंच एतत्देवर्षिवर्यमुखनिःसृतंभगवद्यशो ॥१२२॥
युक्तंयः पठेत् सः मुक्तबंधः सन् अस्मिन्भवेपुनः नभ्रमति ८४ ८५॥ ॥ इतिचतुर्थेएकोनत्रिंशः २९ ॥ ॥ विदुरउवाच ॥ ॥ हेब्रह्मन्बर्हिषः पुत्राः दशप्रचे
तसः त्वयाये पूर्वं अभिहिताः तेरुद्रगीतेनहरिंप्रतोष्यकांसिद्धिं आपुः १ २ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

रुद्रागीतजपरूपेणयज्ञेनतपसाचपुरंजनंहरिम् ३ तेषांकृच्छ्रंतपःक्लेशंरुचाकांत्याशमयन् शांतेनशुद्धसत्त्वेनवपुषाआविर्भूतः ४ सुपर्णस्कंधमारूढइत्यादीनांबार्हिष्मतःसुतानाहेतितृतीयेनान्वयः (कौ
स्तुभयुक्ताग्रीवायस्य) ५ (काशिष्णुनाभ्राजमानेन) कनकमयेनवर्णवताविभूषणेनभ्राजमानंकपोलंवदनंचयस्य । अष्टाभिरायुधैःगरुडएवंकिंनरस्तेनपक्षस्वनैर्गीताकीर्तिर्यस्य ६ पीनाश्चतेआयता
(दीर्घा) अष्टौभुजास्तेषांमंडलंसमूहस्तन्मध्येस्थितयालक्ष्म्यास्पर्धमानाश्रीःशोभायस्यास्तयावनमालयापरिवृतः आद्यःपुरुषआह । पर्जन्यस्यनादइवरुतंनादोयस्यास्तयावाचा । सघृणोऽवलोकोयस्य ॥३०॥
७ (हेनृपनंदनाः) यूयंमत्तोवरंवृणीध्वम् । सौहार्देनहेतुनाअपृथक्एकविषयोधर्मोयेषांतेषांसंबोधनम् । वःपरस्परंसौहृदेनतुष्टोहम् ८ (आत्मसाम्यंआत्मौपम्यम् । अपृथग्भावइत्यर्थः) भूतेषुसौहृदंचभ
विष्यति । ९ तेभ्योदास्येकिंपुनर्युष्मभ्यमितिशेषः १० अग्रहीष्ट गृहीतवंतः अथोइतिहेतोःलोकाननुलोकेषुभविष्यसि । यद्वा लोकान्अनुभविष्यतिद्रक्ष्यतिव्याप्स्यतीत्यर्थः ११ (अनवमःतुल्यगुणःभ
॥१२३॥ विष्यति ।) आत्मनोवीर्येणसंतानेन १२ पुत्रार्थंआदौभार्यासंपादयति । कंडोरितित्रिभिः । तपोनाशार्थंइंद्रप्रेरितयाप्रम्लोचया (कंडोःसकाशाल्लब्धा) कंडुर्नामऋषिः (तयासह) बहुकालंरेमेसाचत
तःस्वर्गंगच्छंतीकंडोर्जातंगर्भंवृक्षेषुत्यक्त्वाजगाम । तदेतदुक्तंअपविद्धांत्यक्तामिति १३

श्लोकाः ३/१३

॥ मैत्रेयउवाच ॥ ॥ प्रचेतसोंतरुदधौपितुरादेशकारिणः ॥ जपयज्ञेनतपसापुरंजनमतोषयन् ३ दशवर्षसहस्रांतेपुरुषस्तुसनातनः ॥ तेषामाविरभूत्कृच्छ्रं
शांतेनशमयन्रुचा ४ सुपर्णस्कंधमारूढोमेरुशृंगमिवांबुदः ॥ पीतवासामणिग्रीवःकुर्वन्वितिमिरादिशः ५ काशिष्णुनाकनकवर्णविभूषणेनभ्राजत्कपो
लवदनोविलसत्किरीटः ॥ अष्टायुधैरनुचरैर्मुनिभिःसुरेंद्रैरासेवितोगरुडकिन्नरगीतकीर्तिः ६ पीनायताष्टभुजमंडलमध्यलक्ष्म्यास्पर्द्धच्छ्रियापरिवृतो
वनमालयाद्यः ॥ बर्हिष्मतःपुरुषआहसुतान्प्रपन्नान्पर्जन्यनादरुतयासघृणावलोकः ७ ॥ श्रीभगवानुवाच ॥ वरंवृणीध्वंभद्रंवोयूयंमेनृपनंदनाः ॥ सौ
हार्देनापृथग्धर्मास्तुष्टोहंसौहृदेनवः ८ योनुस्मरतिसंध्यायांयुष्माननुदिनंनरः ॥ तस्यभ्रातृष्वात्मसाम्यंतथाभूतेषुसौहृदम् ९ येतुमांरुद्रगीतेनसायं
प्रातःसमाहिताः ॥ स्तुवंत्यहंकामवरान्दास्येप्रज्ञांचशोभनाम् १० यद्यूयंपितुरादेशमग्रहीष्टमुदान्विताः ॥ अथोवउशतीकीर्तिर्लोकाननुभविष्यति ११
भविताविश्रुतःपुत्रोऽनवमोब्रह्मणोगुणैः ॥ यएतामात्मवीर्येणत्रिलोकींपूरयिष्यति १२ कंडोःप्रम्लोचयालब्धाकन्याकमललोचना ॥ तांचापविद्धांजगृहुर्भू
रुहान्नृपनंदनाः १३

चूर्णिका

॥ मैत्रेयउवाच ॥ ॥ तेप्रचेतसः उदकेस्थित्वा जपयज्ञेनपरमात्मानं अतोषयन् ३ ततः भगवान् दशवर्षसहस्रांते स्वतेजसातेषांक्लेशंशमयन् ४ भगवान् पीतवासाः अष्टभुजः
किरीटी गरुडकिन्नरगीतकीर्तिः गरुडारूढः सन् आगत्य तान् उवाच ५ ६ ७ हेनृपनंदनाः वः भद्रंवरंवृणीध्वं वःबंधूनांसौहृदंदृष्ट्वा अहंतुष्टोऽस्मि ८ यःसंध्यायांनित्यंयुष्मान्
स्मरति तस्यभ्रातृषुआत्मसाम्यंभविष्यति ९ येतुमांसायंप्रातः रुद्रगीतेनस्तुवंति तान्प्रति कामवरान्प्रज्ञांचदास्ये १० यूयंपितुराज्ञांकृतवंतः अतः वः कीर्तिः लोकान् व्याप्स्य ॥१२३॥
ति ११ वः एकः विश्रुतः पुत्रः भविता यः आत्मसंतानेन त्रिलोकीं पूरयिष्यति १२ किंच कंडोः ऋषेः सकाशात् प्रम्लोचायां अप्सरसि लब्ध कन्यां वृक्षाः जगृहुः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

समासिद्धोवनस्पतीनांराजासोमः अमृतस्राविणींदेशिनींतर्जनीम् (क्षुत्क्षामायाःअतो) रुदंत्यास्तस्यामुखेनिदधे । अनेनअप्सरोगर्भसंभवेन । अमृताहारेणचतस्यालावण्यं क्रमस्वेददौर्गंध्यादिराहित्यंचोक्तम् १४ मामनुवर्तमानेनपित्रानियुक्ताःसंतःतत्रप्रजासर्गेनिमित्तेतामुद्वहत । १५ ननुबहूनांकथमेकाभार्यास्यात्तत्राह । अपृथक्धर्मः शीलंचयेषांतेषांवः पत्नीभूयात् । अर्पितोभवत्सुआशयोयया । धर्मशीलयो रैक्यात्मद्वाक्याच्चनदृष्टादृष्टविरोधइतिभावः १६ अहतौजसः अप्रतिहतबलाः संतः १७ (अनपायिन्याअविच्छिन्नया।) पक्वगुणोदग्धकामादिमलआशयोयेषाम् पक्वोगुणानांआशयोयेषामितिवा । अतो लोकद्वयभोगरूपान्निरयान्निर्विद्य मत्स्थानंप्राप्स्यथ १८ ननुगृहेषुप्रविष्टानामस्माकंतदासक्त्या बंधएवस्यात् कुतस्त्वद्भक्तिर्निर्वेदोवातत्राह गृहेष्विति । कुशलं मय्यर्पितंकर्मयेषाम् । मद्वार्तायांयातोयामः कालोयेषाम् १९ ननुत्वद्वार्ताश्रोतॄणांगृहैर्नबंधइतिकुतस्तत्राह । नव्यवदिति यत्यस्मात्कथाश्रवणात् ज्ञःसर्वज्ञोहमीश्वरःब्रह्मवादिभिःप्रवक्तृभिःनिमित्तभूतैः श्रोतॄणांहृत्दयंनव्यवत् प्रतिपदंनूतनवत्अये प्राप्नोमि ब्रह्मसाक्षात्कारोभवतीत्यर्थः । ननुत्वत्कथाश्रवणेकथंब्रह्मसाक्षात्कारस्तत्राह । योहंएतदेवब्रह्म तत्रहेतुः यतोगताःयंमांप्राप्ताः संतोमोहशोकहर्षान् (तमोरजःसत्त्वात्मकान्) नप्राप्नुवंति । अतो मत्कथाश्रवणेननव्यवन्ममहृद्याविर्भावादस्यैवब्रह्मसाक्षात्कारत्वाद्गृहेषुवसतामपिनबंधइत्यर्थः २० पुरुषार्थंभाजयतिप्रापयतीतितथातं (अगृणन्अस्तुवन् ।) २१ वेदैर्ब्रह्मवादिभिश्चसकलश्रेयःसाधन त्वेनानिरूपिताउदारगुणाआह्वयानामानिचयस्य । मनोवचसोर्वेगादपिपुरोऽग्रतोजवोवेगोयस्य । मनोवचसोरगोचरायेत्यर्थः । अतएव सर्वेषामक्षाणां(इंद्रियाणां) मार्गैरगतोऽनवगतोध्वायस्यतस्मै तेनमः २२ स्वनिष्ठयास्वरूपस्थित्याशुद्धाय । अतः शांतायसुखाय ! मनसिनिमित्तेसतिअपार्थं व्यर्थमेव विलसत् विस्फुरितंद्वयं (द्वैतरूपं) यस्मिन् । गृहीतामायागुणैर्विग्रहाब्रह्मादिमूर्तयोयेन २३

श्लोकाः १४/२३

क्षुत्क्षामायामुखेराजासोमःपीयूषवर्षिणीम् ॥ देशिनींरोदमानायानिदधेसदयान्वितः १४ प्रजाविसर्गआदिष्टाःपित्रामामनुवर्त्तता ॥ तत्रकन्यांवरारोहांता मुद्वहतमाचिरम् १५ अपृथग्धर्मशीलानांसर्वेषांवःसुमध्यमा ॥ अपृथग्धर्मशीलेयंभूयात्पत्न्यर्पिताशया १६ दिव्यवर्षसहस्राणांसहस्रमहतौजसः ॥ भौमान्भोक्ष्यथभोगान्वैदिव्यांश्चानुग्रहान्मम १७ अथमय्यनपायिन्याभक्त्यापक्वगुणाशयाः ॥ उपयास्यथमद्धामनिर्विद्यनिरयादतः १८ गृहेष्वावि शतांचापिपुंसांकुशलकर्मणाम् ॥ मद्वार्त्तायातयामानांनबंधायगृहामताः १९ नव्यवद्धृदयेयज्ज्ञोब्रह्मैतद्ब्रह्मवादिभिः ॥ नमुह्यंतिनशोचंतिनहृष्यंतियतो गताः २० ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंब्रुवाणंपुरुषार्थभाजनंजनार्दनंप्रांजलयःप्रचेतसः ॥ तद्दर्शनध्वस्ततमोरजोमलागिरागृणन्गद्गदयासुहृत्तमम् २१ ॥ प्रचेतसऊचुः ॥ नमोनमःक्लेशविनाशनायनिरूपितोदारगुणाह्वयाय ॥ मनोवचोवेगपुरोजवायसर्वाक्षमार्गैरगताध्वनेनमः २२ शुद्धायशांतायनमःस्व निष्ठयामनस्यपार्थंविलसद्द्वयाय । मनोजगत्स्थानलयोदयेषुगृहीतमायागुणविग्रहाय २३

चूर्णीका

१४ तांयूयं उद्वहत १५ तयासहदिव्यवर्षसहस्राणां सहस्राणि भौमान् दिव्यांश्चभोगान् ममानुग्रहात् भोक्ष्यथ १६ १७ अथमयिभक्तिंकृत्वा मां यास्यथ १८ गृहेष्ववि स्थितानांमद्वार्तयागतकालानांपुंसांगृहधर्माः बंधायनभवंति १९ २० ॥ ॥ मैत्रेयउवाच ॥ ॥ एवंभगवद्वाक्यंश्रुत्वाप्रचेतसः प्रांजलयः तंअगृणन् २१ प्रचेतसऊचुः नमोनमः क्लेशविनाशनायइत्यादि २२ २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वतस्तु विशुद्धसत्त्वरूपाय । संसारंहरतिमेधाज्ञानं यस्यतस्मै २४ । २५ । (नमो) अयुंक्ष्महि कृतवंतो वयम् २६ यदुक्त वरं वृणीध्वमितितन्मनासिनिधायाहुः रूपमिति । समस्तानांक्लेशानां संक्षयो यस्मात् । (तदेतद्रूपं अनुकंपया) नः आविष्कृतं प्रकटितं अतोन्यत्किमनुकंपितं अनुकंपा । इयमेवास्माकं परमानुकंपेत्यर्थः २७ कुतइत्यत आह । हे अभद्ररंधनअमंगलनाशन । त्वत्प्रत्ययो त्रन विवक्षितः । एतावदेवदीनेषु वत्सलैः प्रभुभिर्भाव्यंकार्यम् । किंतत्तदाह । यदिति । अस्मदीयाएतइतिबुद्ध्या । उचितकाले अनुस्मर्यते इतियत् । त्वयातुरूपमदर्शितमितिभावः २८ येनानुस्मरणेन स्मृतानांतेषांउपशांतिः सुखंभवति । किंच । क्षुल्लकानां क्षुद्राणामपिभूतानां अंतर्हृदयेअंतर्हितः अंतर्यामित्वेन स्थितो भवान् ईहतामिच्छतां त्वदुपासकानांनोऽस्माकमाशिषः कस्माद्धेतोर्नवेद । जानात्येवेत्यर्थः । २९ तथापि वक्तव्यंचेत्तर्हि येषामस्माकं भगवान् प्रसन्नः तेषां असावेववरः । भगवत्प्रसादएवास्माकमीप्सितोवरइत्यर्थः अपवर्गगुरुः मोक्षमार्गप्रदर्शकः गतिः स्वतश्चपुरुषार्थभूतः ३० यद्यप्येवंअथापिहेनाथत्वत्त्वत्तः वरमेकंवृणीमहे । कथंभूतात् । परतः कारणादपिपरात् । ''अक्षरात्परतः पर''इतिश्रुतेः । अतोयद्यपित्वंदातुंसमर्थः । नचदेवानांत्वद्विभूतीनामंतोऽस्ति यतोऽनंतविभूतित्वादनंतइतिगीयसे (एतादृशित्वय्यनंतेलब्धेकिमंतवद्विषयवरेणेतिभावः ।) ३१ (एतदेवस्पष्टमाहुः ।) यथासारंगोभ्रमरः पारिजातेअंजसासुखेनलब्धेसतिसुलभमप्यन्यवृक्षांतरं नसेवते तथावयमपि साक्षात्त्वदंघ्रिमूलंप्राप्य किंवृणीमहिनकिंचिदित्यर्थः । यद्वा किमन्यत्तुच्छं किमर्थं वृणीमहिअनंतत्वेन मनोरथानामनवस्थानादित्यर्थः ३२ अतएतावदेवप्रार्थयामहइत्याहुः । यावदिति । स्पृष्टाः व्याप्ताः संतः भवति (भगवति) प्रकृष्टः संगोयेषांतेषांसंगोऽस्माकंस्यात् । ३३ ननु राज्यभोगान् स्वर्गापवर्गौचविहाय किमिदंप्रार्थ्यते तत्राहुः । तुलयामेति । भगवत्संगिनांभागवतानांसंगस्यलवेनापि ३४तत्संगस्यश्रैष्ठ्यंप्रपंचयतियत्रेतित्रिभिः । यत्रयेषुभगवत्संगिसंगेषु यतः । याभ्यः कथाभ्यः । निर्वैरंवैराभावः उद्वेगोभयम् ३५ (न्यासिनांपरमहंसानाम् । तस्यभगवतः कथासु) ३६

श्लोकाः २४/३६

नमोविशुद्धसत्त्वायहरयेहरिमेधसे ॥ वासुदेवायकृष्णायप्रभवेसर्वसात्त्वताम् २४ नमःकमलनाभायनमःकमलमालिने ॥ नमःकमलपादायनमस्तेकमलेक्षण २५ नमःकमलकिंजल्कपिशंगामलवाससे ॥ सर्वभूतनिवासायनमोयुंक्ष्महिसाक्षिणे २६ रूपंभगवतात्वेतदशेषक्लेशसंक्षयम् ॥ आविष्कृतंनःक्लिष्टानांकिमन्यदनुकंपितम् २७ एतावत्त्वंहिविभुभिर्भाव्यंदीनेषुवत्सलैः ॥ यदनुस्मर्यतेकालेस्वबुद्ध्याभद्ररंधन २८ येनोपशांतिर्भूतानांक्षुल्लकानामपीहताम् ॥ अंतर्हितोंतर्हृदयेकस्मान्नोवेदनाशिषः २९ असावेववरोस्माकमीप्सितोजगतःपते ॥ प्रसन्नोभगवान्येषामपवर्गगुरुर्गतिः ३० वरंवृणीमहेथापिनाथत्वत्परतःपरात् ॥ नह्यंतस्त्वद्विभूतीनांसोनंतइतिगीयसे ३१ पारिजातेंजसालब्धेसारंगोन्यन्नसेवते ॥ त्वदंघ्रिमूलमासाद्यसाक्षात्किंकिंवृणीमहि ३२ यावत्तेमाययास्पृष्टाभ्रमामइहकर्मभिः ॥ तावद्भवत्प्रसंगानांसंगःस्यान्नोभवेभवे ३३ तुलयामलवेनापिनस्वर्गंनापुनर्भवम् ॥ भगवत्संगिसंगस्यमर्त्यानांकिमुताशिषः ३४ यत्रेड्यंतेकथामृष्टास्तृष्णायाःप्रशमोयतः ॥ निर्वैरंयत्रभूतेषुनोद्वेगोयत्रकश्चन ३५ यत्रनारायणःसाक्षाद्भगवान्न्यासिनांगतिः ॥ संस्तूयतेसत्कथासुमुक्तसंगैःपुनःपुनः ३६

चूर्णिका २४ २५ २६ २७ २८ २९ हेजगत्पतेत्वत्प्रसादो यः जातः अयमेवअस्माकंवरः इष्टः ३० हेनाथहेअनंत अन्यंवरंवृणीमहे ३१ ३२ इहकर्मभिः यावत् भ्रमाम तावत्तुप्रतिजन्मनि भवत्प्रसंगानांसंगोस्तु ३३ भगवत्संगिसगस्यं लवेन समंस्वर्गं अपुनर्भवमपि नतुलयाम ३४ अहो वयं भवस्यक्षणसंगेनमृत्युरोगमंत्वांवैद्यंप्राप्ताःस्म ३५ ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पद्भ्यांयत्पावनं (पवित्रीकरणं) तदिच्छया । संसाराद्भीतस्य । ३७ सत्सं॰फलमस्माभिरेवानुभूतमित्याहुः । वयंत्विति । तव यः प्रियः सखातस्यभवस्यरुद्रस्य । अत्यंतमचिकित्सस्य असाध्यरोगरू
पस्य भवस्यजन्मनोमृत्योश्च भिषक्तमं सद्वैद्यंत्वांगतिंगताः ३८ वरांतरंवृणते यन्नइतिद्वाभ्याम् । नतानमस्कृताः (अनुवृत्त्यासेवया भ्रातरोग्रजाःनोऽस्माभिः ।) ३९ निरंधसांनिरन्नानामस्माकं अदभ्रं
वहुकालं (अप्सु सुतप्तंयत्तपः तदेतत्सर्वं) तेपरितोषणायभवत्वितिवृणीमहे । ४० स्तोतुमजानतामस्माकं त्वत्स्तुतिर्नायुक्तेत्याहुः मनुरिति । यस्यतवमहिम्नोनदृष्टंपारंयैस्ते (मन्वादयोपित्वा) त्वांआ
त्मसमं स्वशक्त्यनुरूपंयतः स्तुवंति अथोअतः वयमपिगृणीमः ४१ (समायवैषम्यनैर्घृण्यरहितायशुद्धायरागद्वेषरहिताय) सत्त्वमूर्तयेवासुदेवाय (तुभ्यंनमः) ४२ (प्रीतः सन्तथास्त्वित्याह) यानं
स्वप्रयाणं अनिच्छतामपिसतां स्वधामययौ । अनपवर्गवीर्यः अकुंठितप्रभावः । ४३ उदन्वतः सिंधोः सलिलात् निर्यायनिर्गत्यगांस्वर्गंरोद्धुमिवोत्थितैः द्रुमैःगांमहींछन्नांवीक्ष्यद्रुमेभ्योऽकुप्यन् । तदाहि
॥१२६॥ प्राचीनवर्हिषः प्रव्रजितत्वात् अराजकेकर्षणाद्यभावात् द्रुमैर्भूमिश्छन्नाऽभूत् ४४ निरस्ता वीरुधोलताअपियस्यास्तथाभूतांकर्तुं संवर्तकः कालाग्निरुद्रः अत्ययेप्रलये ४५ नयैर्युक्तिभिः । ४६ (ब्रह्म
णाकन्यांदातुमुपदिष्टाः संतोभीताश्चतां) उज्जन्हुः समर्पयामासुः ४७ । मारिषांवार्क्षीम् (अजनोविष्णुःसएवयोनिरुत्पत्तौकारणंयस्यसः) अजनयोनिर्ब्रह्मातस्माज्जातोदक्षः महतः श्रीमहादेवस्यावज्ञानात्
पूर्वंअजनयोनिजोब्रह्मपुत्रोपिसन्क्षत्रियजातौयस्यांवाक्ष्यांजातः ४८ प्राक्सर्ग॰पूर्वदेहकालेनविद्रुतेनष्टेदैवेनईश्वरेणचोदितः प्रेरितः सन्चाक्षुषेंऽतरेयइष्टाः प्रजाः ससर्ज सदक्षइतिप्रसिद्धः ४९

श्लोकाः ३७/४९

तेषांविचरतांपद्भ्यांतीर्थानांपावनेच्छया ॥ भीतस्यकिंनरोचेततावकानांसमागमः ३७ वयंतुसाक्षाद्भगवन्भवस्यप्रियस्यसख्युःक्षणसंगमेन ॥ सुदुश्चि
कित्सस्यभवस्यमृत्योर्भिषक्तमंत्वाद्यगतिंगताःस्म ३८ यन्नःस्वधीतंगुरवःप्रसादिताविप्राश्चवृद्धाश्चसदानुवृत्त्या ॥ आर्यानताःसुहृदोभ्रातरश्चसर्वाणिभूतान्यन
सूययैव ३९ यन्नःसुतप्तंतपएतदीशनिरंधसांकालमदभ्रमप्सु ॥ सर्वंतदेतत्पुरुषस्यभूम्नोवृणीमहेतेपरितोषणाय ४० मनुःस्वयंभूर्भगवान्भवश्चयेन्येतपो
ज्ञानविशुद्धसत्त्वाः ॥ अदृष्टपाराअपियन्महिम्नःस्तुवंत्यथोत्वात्मसमंगृणीमः ४१ नमःसमायशुद्धायपुरुषायपरायच ॥ वासुदेवायसत्त्वायतुभ्यंभगवतेनमः
४२॥ ॥ मैत्रयउवाच ॥ ॥ इतिप्रचेतोभिरभिष्टुतोहरिस्तथेत्याहशरण्यवत्सलः ॥ अनिच्छतांयानमतृप्तचक्षुषांययौस्वधामानपवर्गवीर्यः ४३
अथनिर्यायसलिलात्प्रचेतसउदन्वतः ॥ वीक्ष्याकुप्यन्द्रुमैश्छन्नांगांगांरोद्धुमिवोच्छ्रितैः ४४ ततोग्निमारुतौराजन्नमुंचन्मुखतोरुषा ॥ महींनिर्वीरुधंक
र्तुंसंवर्त्तकइवात्यये ४५ भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्यपितामहः ॥ आगतःशमयामासपुत्रान्बर्हिष्मतोनयैः ४६ तत्रावशिष्टायेवृक्षाभीतादुहितरंतदा
॥ उज्जन्हुस्तेप्रचेतोभ्यउपदिष्टाःस्वयंभुवा ४७ तेचब्रह्मणआदेशान्मारिषामुपयेमिरे ॥ यस्यांमहदवज्ञानादजन्यजनयोनिजः ४८ चाक्षुषेत्वंतरेप्राप्तेप्रा
क्सर्गेकालविद्रुते ॥ यःससर्जप्रजाइष्टाःसदक्षोदैवचोदितः ४९

चूर्णिका ३७ ३८ किंच यद्यत्वयंकरिष्यामः तत्सर्वंते संतोषाय अस्तु इतिवृणीमहे श्रीवासुदेवायतुभ्यंनमः इतिस्तुतिंचक्रुः ३९ ४० ४१ ४२ ॥ ॥ मैत्रेयउवाच ॥ हरिः ॥१२६॥
तथास्त्वित्युक्त्वास्वधामययौ ४३ ततः तेप्रचेतसः सलिलाद्वहिः निर्गत्य द्रुमैः छन्नांमहींवीक्ष्य ४४ दुःखतःअग्निमारुतौउत्पाद्य वृक्षानूदग्धुं उपचक्रमुः ४५ अथतत्रब्रह्माए
त्य ४६वृक्षेभ्यः कन्यांगृहीत्वाक्रोधशांत्यैतेभ्यः ददौ४७तेप्रचेतसः ब्रह्माज्ञया मारिषांनाम्नींकन्यांउपयेमिरे तस्यांदक्षः ब्रह्मपुत्रः शिवावज्ञानात्क्षत्रियवंशेपुनर्जातः ४८ ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यःस्वयारुचाप्रभयातेजस्विनांतेजः उपादत्त आच्छादितवानित्यर्थः । यंचकर्मदाक्ष्यात्दक्षमब्रुवन् ५० तंअभिषिच्य अनादिर्ब्रह्माप्रजासर्गरक्षायांयुयोज । सचदक्षोअन्यान्मरीच्यादीन्तत्तद्व्यापारेषुनियुक्त
वान् ५१ इतिचतुर्थस्कंधेटीकायांत्रिंशोध्यायः ३० ॥ ॥एकत्रिंशेसुतेदक्षेधुरंन्यस्यवनेसताम् । नारदोक्तेनमार्गेणमुक्तिरुक्ताप्रचेतसाम् ॥ १ ॥ ततःदिव्यवर्षसहस्राणांसहस्रस्यांतेउत्पन्नविवेकज्ञानास्ते"उपया
स्यथमद्धामनिर्विद्यनिरयादत" इतिअधोक्षजभाषितंस्मरंतआशुप्राव्रजन् १ ब्रह्मसत्रेणआत्मविमर्शेनदीक्षिताः कृतसंकल्पाबभूवुः । सर्वेषुभूतेष्वात्मेतिमेधाज्ञानंयस्मिन्तेन । क्व । वेलायांसमुद्रतटे । जाज
लिर्नामऋषिः २ निर्जिताः प्राणमनोवाचोदृशोयैस्तान् । शांताउपरताः समानामूलाधारादारभ्य ऋजवोविग्रहायेषाम् । ब्रह्मणियोजितआत्मायैःतान् सुरासुरैरीड्यःस्तुत्यःददृशेदृष्टवान्३ उत्थाय तंप्रणि
पत्य यथादेशंयथाविधिपूजयित्वा ४ (चंक्रमणंपुनःपुनरागमनम्) ५ आदिष्टंउपदिष्टंयदात्मतत्त्वम् । क्षपितंविस्मृतम् । ६(अध्यात्मज्ञानंआत्मविषयकंज्ञानम् । तत्त्वार्थस्यदर्शनमनुभवोयस्मात् । विज्ञानस
॥१२७॥ हितमित्यर्थः । प्रद्योतयप्रकाशय) ७ इतिप्रचेतोभिःपृष्टः ८ अहो गृहप्रसक्त्याहरिसेवांविहायसर्वजन्मकर्मादिकंव्यर्थंकृतमितितान्शोचन्नाह तज्जन्मेतिचतुर्भिः । येनजन्मादिना।विश्वात्मेतिसुलभत्वमुक्तम्
। यतोजन्मादेर्हरिसेवैवफलंअतस्तद्विहीनंसर्वव्यर्थमित्यर्थः । ९ शौक्रंशुक्रसंबंधि विशुद्धमातृपितृभ्यामुत्पत्तिः । सावित्रमुपनयनेन । याज्ञिकंदीक्षया । विबुधानामिवदीर्घायुषापि १०

श्लोकाः ५०/१०

योजायमानःसर्वेषांतेजस्तेजस्विनांरुचा ॥ स्वयोपादत्तदाक्ष्याच्चकर्मणांदक्षमब्रुवन् ५० तंप्रजासर्गरक्षायामनादिरभिषिच्यच ॥ युयोजयुयुजेन्यांश्चसवैस
र्वप्रजापतीन् ५१ इतिश्रीभा॰ म॰ च॰ स्कंधेत्रिंशोध्यायः ॥ ३० ॥ ॥ मैत्रेयउवाच ॥ ॥ ततउत्पन्नविज्ञानाआश्वधोक्षजभाषितम् ॥ स्मरंतआ
त्मजेभार्यांविसृज्यप्राव्रजन्गृहात् १ दीक्षिताब्रह्मसत्रेणसर्वभूतात्ममेधसा ॥ प्रतीच्यांदिशिवेलायांसिद्धोभूद्यत्रजाजलिः २ तान्निर्जितप्राणमनोवचोदृशो
जितासनान्शांतसमानविग्रहान् ॥ परेमलेब्रह्मणियोजितात्मनःसुरासुरेड्योददृशेस्मनारदः ३ तमागतंतउत्थायप्रणिपत्याभिनंद्यच ॥ पूजयित्वायथादे
शंसुखासीनमथाब्रुवन् ४ ॥ ॥ प्रचेतसऊचुः ॥ ॥ स्वागतंतेसुरर्षेद्यदिष्ट्यानोदर्शनंगतः ॥ तवचंक्रमणंब्रह्मन्नभयाययथारवेः ५ यदादिष्टंभगवता
शिवेनाधोक्षजेनच ॥ तद्गृहेषुप्रसक्तानांप्रायशःक्षपितंप्रभो ६ तन्नःप्रद्योतयाध्यात्मज्ञानंतत्त्वार्थदर्शनम् ॥ येनांजसातरिष्यामोदुस्तरंभवसागरम् ७
॥ ॥ मैत्रेयउवाच ॥ इतिप्रचेतसांपृष्टोभगवान्नारदोमुनिः ॥ भगवत्युत्तमश्लोकआविष्टात्माब्रवीन्नृपान् ८ ॥ ॥ नारदउवाच ॥ ॥ तज्जन्मतानिकर्माणि
तदायुस्तन्मनोवचः ॥ नृणांयेनेहविश्वात्मासेव्यतेहरिरीश्वरः ९ किंजन्मभिस्त्रिभिर्वेहशौक्लसावित्रयाज्ञिकैः ॥ कर्मभिर्वात्रयीप्रोक्तैःपुंसोपिविबुधायुषा १०

चूर्णिका

५० तंदक्षंयथाकालेप्रजासर्गरक्षायांब्रह्माअभिषेचयत् ५१ इतिचतुर्थेत्रिंशः ३० ॥ ॥ मैत्रेयउवाच ॥ ॥ दिव्यवर्षसहस्राणांसहस्रास्यांतेउत्पन्नविज्ञानाः तेप्रचेतसः
अधोक्षजभाषितंस्मरंतः आत्मजेभार्यांन्यस्य १ प्रतीच्यांदिशिसमुद्रतटेयत्रजाजलिर्नामऋषिःसिद्धः अभूत् २ तत्रगत्वाब्रह्मसत्रेण दीक्षिताबभूवुः तान्परब्रह्मणियोजितात्मनः
ज्ञात्वा नारदः ययौ ३ तेनारदंदृष्ट्वापूजयित्वाप्रणिपत्यप्रचेतसः ऊचुः ४ हेसुरर्षेतेस्वागतमस्तु तवचक्रमणंसर्वेषांअभयायभवति ५ हेमुने पूर्वंभगवताशिवेनयदुपदिष्टंतत्गृ ॥१२७॥
हेषुसक्तानांनः प्रायः क्षपितम् ६ अतःतत् अध्यात्मज्ञानंनः प्रद्योतय येनभवाब्धिंतरिष्यामः ७ ८ ॥ ॥नारदउवाच ॥ ॥ हेप्रचेतसः येनहरिः सेव्यतेतज्जन्मतानि
कर्माणि आयुः मनः तदेव अहोश्रुतेनतपसा योगेनसांख्येनन्यासेनअन्यैः श्रेयोभिश्चकिम् यत्रआत्मप्रदःहरिः न ९ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका.

वचोभिर्वाग्विलासैः । चित्तवृत्तिभिः नानावधानसामर्थ्यैः । बलेनशरीरशक्त्या । इंद्रियाणांराधसापाटवेन ११ योगेनप्राणायामादिना । सांख्येनदेहादिव्यतिरिक्तात्मज्ञानमात्रेण संन्यासवेदाध्ययना भ्यामपिअन्यैरपिव्रतवैराग्यादिभिः श्रेयःसाधनैः १२ नन्वेषांनानाफलसाधनानां हरिसेवाभावमात्रेणकुतो वैयर्थ्यंतत्राह । श्रेयसांफलानामात्मैव अवधिः पराकाष्ठा । अर्थतः परमार्थतः आत्मार्थत्वेनैव अन्येषांश्रेयसांप्रियत्वादित्यर्थः । भवत्वात्माअवधिः हरेःकिमायातं तत्राह । सर्वेषामपीति । आत्मदश्चाविद्यानिरासेनस्वरूपाभिव्यंजकः ऐश्वरेणापिरूपेण बलिप्रभृति भ्यइवआत्मप्रदः प्रियश्चपरमानंदरूपत्वात् । १३ किंचनानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपिफलानिहरिप्रीत्याभवंति । केवलं तत्तद्देवताराधनेनतुर्नाकिंचिदिति सदृष्टांतमाह यथेति । मूलात्प्रथमवि भागाः स्कंधाः । तद्विभागाभुजाः तेषामपि उपशाखाः उपलक्षणम् । पत्रपुष्पादयोपितृप्यंति । नतुमूलसेकंविनाताःखस्वनिषेचनेनप्राणस्योपहारोभोजनं तस्मादेवेंद्रियाणांतृप्तिः नतुतत्तदिंद्रियेषुपृथ क्पृथगन्नलेपनेन । तथाऽच्युताराधनमेवसर्वदेवताराधनं नपृथगित्यर्थः । १४ कुतः सर्वमूलत्वादितिसदृष्टांतांतरमाह । यथैव वारःजलानि वर्षाकाले सूर्यादुद्भवंति ग्रीष्मेतस्मिन्नेवप्रविशंति । अस्याप्र सिद्धत्वेनदृष्टांतांतरमाह । यथाभूतानि भूमावितित (भूमेरुत्पन्नानिभूमावेवप्रविशंतियद्वदित्यर्थः ।) गुणप्रवाहः चेतनाचेतनात्मकः प्रपंचः । १५ ननुहरावेवगुणप्रवाहइत्युक्तं तदाधारत्वेनसोपाधि कत्वंहरेःस्यादित्याशंक्याह एतदिति । एतद्विश्वं विष्णोः तत्सर्वशास्त्रप्रसिद्धं परंपदं सर्वोपाधिरहितंतदुत्पन्नं नततः पृथागित्यर्थः । तर्हि (आधाराधेयतया) कथमन्यथाभातितत्राह । सकृत् कदा चित् विभातं स्फुरितं गंधर्वनगरवत् । यथासवितुःप्रभा नततोभिन्ना यथाचजाग्रति असवः इंद्रियाणिस्फुरंति । कथंभूताःसुप्तशक्तयः । सुषुप्तौ असवः सुप्ताः शक्तयोयेषांते तथा संतिहि । द्रव्यादे रप्यत्ययोभवति । सवितुः प्रभेत्युद्रतौ दृष्टांतः । (अजाग्रतीतिवाच्छेदः । सुषुप्तावित्यर्थः) १६ नन्वसंगेहरौ कथं प्रपंचोत्पत्तिलयौ तत्राह यथेति (नभसि) अभ्रतमःप्रकाशाआगमापायिनः (संतितेत्र क्रमेण) रजस्तमःसत्त्वस्थानीयाज्ञेयाः । हे भूपाः प्रचेतसः तथा अमूः रजआदयः शक्तयोभवंति उद्भवंति । न भवंतिलीयंते इत्येवमयंजगत्प्रवाहः १७ तेन सर्वकारणत्वेनहेतुना अशेषदेहिना मात्मानं कालोनिमित्तं प्रधानमुपादानं पुरुषः कर्ता । एतच्चितयात्मकत्वात् सर्वकारणं परेशमीश्वरं अद्धासाक्षाद्भजध्वम् । कथम् । आत्मनाएकभावेन अभिन्नत्वेन १८

॥१२८॥

श्लोकाः ११/१८

श्रुतेनतपसावाकिंवचोभिश्चित्तवृत्तिभिः ॥ बुद्ध्यावाकिंनिपुणयाबलेनेंद्रियराधसा ११ किंवायोगेनसांख्येनन्यासस्वाध्याययोरपि ॥ किंवाश्रेयोभिरन्यैश्चनयत्रात्मप्रदोहरिः १२ श्रेयसामपिसर्वेषामात्माह्यवधिरर्थतः ॥ सर्वेषामपिभूतानांहरिरात्मात्मदःप्रियः १३ यथातरोर्मूलनिषेचनेनतृप्यंतितत्स्कंधभुजोपशाखाः ॥ प्राणोपहाराच्चयथेंद्रियाणांतथैवसर्वार्हणमच्युतेज्या १४ यथैवसूर्यात्प्रभवंतिवारःपुनश्चतस्मिन्प्रविशंतिकाले ॥ भूतानिभूमौस्थिरजंगमानितथाहरावेवगुणप्रवाहः १५ एतत्पदंतज्जगदात्मनःपरंसकृद्विभातंसवितुर्यथाप्रभा ॥ यथासवोजाग्रतिसुप्तशक्तयोद्रव्यक्रियाज्ञानभिदाभ्रमात्ययः १६ यथानभस्यभ्रतमःप्रकाशाभवंतिभूपानभवंत्यनुक्रमात् ॥ एवंपरेब्रह्मणिशक्तयस्त्वमूरजस्तमःसत्त्वमितिप्रवाहः १७ तेनैकमात्मानमशेषदेहिनांकालंप्रधानंपुरुषंपरेशम् ॥ स्वतेजसाध्वस्तगुणप्रवाहमात्मैकभावेनभजध्वमद्धा १८

चूर्णिका

११ १२ १३ यथातरोःमूलनिषेचनेनस्कंधाद्यास्तृप्यंति तथाअच्युतेज्यासर्वार्हणंभवति १४ अतः सर्वात्मानंईश्वरं आत्मैकभावेनअद्धाभजध्वम् १५ १६ १७।१८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

साधनमाह । दयादिभिः शीघ्रं तुष्यति । ततो न कदाचिद्भक्तजनांस्त्यजतीत्याह अपहतानिरस्ताःसकलाएषणाःकामायस्मात्सचासावमलआत्मामनः तस्मिन्सतांमनसिनिरंतरमेधितया भावनयो पहूतः आहूतः सन्निधापितः सन् अक्षरोहरिः छिद्रवत् तत्रत्याकाशवत् ततो नसरतिनापयातिहि । किंकुर्वन् आत्मनः स्वस्यनिजजनवशगत्वं स्वभक्ताधीनत्वं अयन् अवगच्छन् २० सतामेवंवश्योऽसौ असतांतुपूजामपिनगृह्णातीत्याह।कुमनीषियाकुत्सितमतीनां अधनाश्चते आत्मधनाश्चभगवद्धनास्त प्रियायस्य।रसज्ञःभक्तिसुखज्ञः केकुमनीषिणस्तानाह।श्रुतादिनिमित्तैर्मदैर्येसत्सुपापंतिरस्कारंकुर्वंति२१ भक्ताधीनत्वंप्रपंचयन्नाह । अनुवर्तमानांसंसेवमानामपिश्रियंतदर्थिनः सकामान्द्विपदपतीन्नरेंद्रान् विबुधान्देवानपियोनानुवर्तते । यतः स्वेनैवपूर्णः अतःस्वभृत्यवर्गानुरक्तएव । एवंभूतः कृतज्ञोभगवान् अमुं (भक्तजनंकथमुद्विसृजेत् ।) ईषदपिकथंपरित्यजेत् । २२ प्रचेतसः कर्मभूतान् इत्येवंभगवन्माहात्म्यंश्रावयित्वा अन्याश्चभगवत्कथाध्रुवचरिताद्याः ("नूनंसुनीतेः पतिदेवताया "इत्यादिश्लोकैः) सर्वेऽगायत्प्रचेतसामित्युक्तत्वात् २३ तेपिप्रचेतसः तद्धाम विष्णुलोकं (तस्यनारदस्यमुखान्निर्यातंहरेर्यशः) २४ प्रचेतसांनारदस्यचसंवादरूपमेतदाख्यानम् (हेक्षत्तः) त्वेऽभिहितं हरेः कीर्तनंयस्मिंस्तत् । २५ यएष (उत्तानपदो) वंशः सोनुवर्णितः । (अथप्रियव्रतस्यापिवंशंनिबोध ।) २६

श्लोकाः १९/२६

दययासर्वभूतेषुसंतुष्ट्यायेनकेनवा ॥ सर्वेंद्रियोपशांत्याचतुष्यत्याशुजनार्दनः १९ अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ॥ निजजनवशगत्वमात्मनोयन्नसरतिछिद्रवदक्षरःसतांहि २० नभजतिकुमनीषिणांसइज्यांहरिरधनात्मधनप्रियोरसज्ञः ॥ श्रुतधनकुलकर्मणांमदैर्येविदधतिपापमकिंचनेषुसत्सु २१ श्रियमनुचरतींतदर्थिनश्चद्विपदपतीन्विबुधांश्चयत्स्वपूर्णः ॥ नभजतिनिजभृत्यवर्गतंत्रःकथममुमुद्विसृजेत्पुमान्कृतज्ञः २२ ॥ ॥ मैत्रेयउवाच॥ ॥ इतिप्रचेतसोराजन्नन्याश्चभगवत्कथाः ॥ श्रावयित्वाब्रह्मलोकंययौस्वायंभुवोमुनिः २३ तेपितन्मुखनिर्यातंयशोलोकमलापहम् ॥ हरेर्निशम्यतत्पादंध्यायंतस्तद्गतिंययुः २४ एतत्तेभिहितंक्षत्तर्यन्मांत्वंपरिपृष्टवान् ॥ प्रचेतसांनारदस्यसंवादंहरिकीर्त्तनम् २५ ॥ ॥ श्रीशुकउवाच ॥ ॥ यएषउत्तानपदोमानवस्यानुवर्णितः ॥ वंशःप्रियव्रतस्यापिनिबोधनृपसत्तम २६

चूर्णिका ॥१२९॥

दययासर्वभूतेपुसंतुष्ट्यायेनकेनवा सर्वेंद्रियोपशांत्याचतुष्यत्याशुजनार्दनः १९ २० २१ २२ ॥ ॥ मैत्रेयउवाच ॥ ॥ इतितान्श्रावयित्वा मुनिः ब्रह्मलोकंययौ २४ तेपिनारदवचः श्रुत्वा हरिपदंध्यायंतः तद्गतिंययुः हेविदुरयत्त्वंमांपृष्टवान् तत्तेप्रचेतसांनारदस्यसंवादरूपंएतत् आख्यानंहरिकीर्तनरूपंतवकथितम् ॥ ॥ श्रीशुकउवाच ॥ हेपरीक्षित एवंतेउत्तानपदः वंशः वर्णितः इतः प्रैय्यव्रतंवंशंशृणु २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यः प्रियव्रतः २७ (क्षत्ताविदुरः अजितस्यहरेर्वादोयस्यां अतएवसतीं साध्वींकथाम् यद्वा अजितवादयुक्तांसतांराज्ञांकथां कौषारविणामैत्रेयेणोपवर्णितांश्रुत्वाऽश्रुकलाभिर्व्याप्तः सन् मुनेश्चरणैामूर्ध्ना हरेश्चरणौ हृदा दधार) २८ (हेतातसदयहृदयेनभवतातमसः पारोमोक्षोदर्शितः यत्रतमसःपारेहरिः स्थितः) २९ (इतितंमैत्रेयं आनम्यनत्त्वाआमंत्र्यतदाज्ञांगृहीत्वा) स्वान्ज्ञातीन्दिदृक्षुः (गजसाह्वयंहास्तिनपुरम् । निर्वृताशयः हृष्टचित्तः) ३० राज्ञामेतच्चरितमितिशेषः । ३१ इतिश्रीभागवतेमहापुराणे भावार्थदीपिकायांश्रीधरस्वामिविरचितायां चतुर्थस्कंधेएकत्रिंशोऽध्यायः ३१ ॥ ॥ (श्रीधरैरिहयत्पूर्वं व्याख्यातत्वादुपेक्षितम् । सुगमत्वाच्चतत्किंचिद्व्याचचक्षेमहेश्वरः १)

॥१३०॥ योनारदादात्मविद्यामधिगम्यपुनर्महीम् ॥ भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदम् २७ इमांतुकौषारविणोपवर्णितांक्षत्तानिशम्याजितवादसत्कथाम् ॥ प्रवृद्धभावोश्रुकलाकुलोमुनेर्दधारमूर्ध्नाचरणंहृदाहरेः २८ ॥ ॥ विदुरउवाच ॥ ॥ सोयमद्यमहायोगिन्भवताकरुणात्मना ॥ दर्शितस्तमसःपारोयत्राकिंचनगोहरिः २९ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्यानम्यतमामंत्र्यविदुरोगजसाह्वयम् ॥ स्वानांदिदृक्षुःप्रययौज्ञातीनांनिर्वृताशयः ३० एतद्यःशृणुयाद्राजन्राज्ञांहर्यर्पितात्मनाम् ॥ आयुर्धनंयशःस्वस्तिगतिमैश्वर्यमाप्नुयात् ३१ इतिश्रीमद्भागवतेमहापुराणेष्टादशसाहस्र्यांसांहितायांचतुर्थस्कंधेप्राचेतसोपाख्याननामएकत्रिंशोध्यायः ३१ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

श्लोकाः २७/३१

चूर्णिका

इमांमैत्रेयवर्णितांहरिसत्कथांश्रुत्वाभक्त्याहरेः चरणंहृदामुनेश्चरणंमूर्ध्नादधार २७ २८ ॥ ॥ विदुरउवाच ॥ ॥ हेमहायोगिन्करुणात्मनाभवतातमसः पारः दर्शितः२९ इत्युक्त्वाविदुरः तंआमंत्र्यस्वानांदिदृक्षुः हास्तिनपुरंययौ ३० हेराजन्एतद्यः शृणुयात्सः आयुर्धनंयशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ३१ ॥ इतिश्रीमद्भागवतेचतुर्थस्कंधेचूर्णिकायांएकत्रिंशोध्यायः समाप्तः ॥ ३१ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत--चतुर्थस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवते पंचमस्कंधः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्री गणपतयेनमः । स्वस्तिश्रीर्जयति ॥ ॐ नमः परमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासाय श्रीरामाय । अथातःपंचमस्कंधव्याख्याऽनेकविशेषवान् । प्रियव्रतान्वयोयत्रसप्रपंच प्रपंच्यते ॥१॥ षड्विंशत्याऽधुनाध्यायैःपंचमेस्थाममीर्यते । लोकद्वीपादिमर्यादापालनाख्यमनेकधा । २ पृथिव्युपर्यधोलोकैर्मर्यादात्रिविधामता । पुनश्चैकैकशस्तेषुमर्यादाबहुधामता । ३ भुविद्वीपादिम र्यादाःपाल्यंतेराजभिःपृथक् । भूमेरुपरिदेवाद्यैस्ततश्चाधोऽसुरादिभिः ४ तत्राध्यायैस्तुविंशत्याप्रियव्रतपुरःसरैः । भुवोद्वीपादिमर्यादाःपालिताइतिवर्ण्यते ५ त्रिभिःसूर्यादिभिर्ज्योतिश्चक्रादिष्विवितिकी र्त्यते । अतलादिषुदैत्याद्यैःपालनंचततस्त्रिभिः ६ तत्रतुप्रथमेध्यायेज्ञानिनोराज्यनिर्वृतिः । पुनश्चज्ञाननिष्ठेतिप्रियव्रतकथाद्भुता ७ ॥ ॥ "वंशंप्रियव्रतस्यापिनिबोधनृपसत्तम । योनारदादात्मविद्यामधिगम्यपु नर्महीम् । भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदमि"तिपूर्वस्कंधांतेउक्तम् । प्रियव्रतस्यप्रथमं आत्मविद्याततोगृहाश्रमः ततः सर्वसंगत्यागेनमोक्षइत्युक्तम् तत्रविस्मितः पृच्छति । प्रियव्रतोभागवतः अतएवात्मा रामः गृहेकथमरमत ननुरमतांकोदोषइतिचेदतआह । कर्मणाबंधः पराभवश्चस्वस्वरूपतिरस्कारो यन्मूलोभवति यद्गृहंमूलंकारणंयस्य १ गृहेषुरतिश्चतत्राभिनिवेशात्स्यात् सचभागवतानां आत्मारामाणां नसंभवतीत्याह ननूनमिति।(अभिनिवेशोऽत्यंतासक्तिः) २ गृहासक्तिर्हिकुटुंबादिस्पृहयाभवति। साचतेषांनास्तीत्याह । महतामिति । उत्तमश्लोकस्यभगवतः पादयोश्छाया कामादिसंतापहारिणी तयानि र्वृतंसुखसंपन्नंचित्तंयेषां तेषांस्पृहापुक्तामतिर्नास्ति । ३ दाराद्यासक्तस्यतुमोक्षः श्रीकृष्णेऽस्खलितामतिश्चाभूदितियत्त अयंचमहान्संशयइत्याह संशयइति ४ अंगीकृत्यपरिहरति । बाढंअभिनिवेशादिकं नास्तीतिसत्यमेव । तथापिविघ्नवशेनतेषांप्रवृत्तिः पूर्वाभ्यासबलेनपुनर्निवृत्तिश्चसंगच्छतइत्याह । भगवतः श्रीमच्चरणारविंदमकरंदरूपोयोरसः तस्मिन्नावेशितंचेतोयैस्तेऽपिकेनचिदंतरायेणविघ्नेनवि हताअपिस्वशिवतमांपदवींमार्गंनहिन्वंतिनत्यजंति । कां (तां) भागवताएवपरमहंसास्तेषांदयितस्यप्रियस्यश्रीवासुदेवस्यकथाम् ५

अ० ॥१॥

श्लोकाः १/५

॥ ॥श्रीराजोवाच ॥ ॥ प्रियव्रतोभागवतआत्मारामःकथंमुने ॥ गृहेरमतयन्मूलःकर्मबंधःपराभवः १ ननूनंमुक्तसंगानांतादृशानांद्विजर्षभ ॥ गृहेष्वभिनिवे शोयंपुंसांभवितुमर्हति २ महतांखलुविप्रर्षेउत्तमश्लोकपादयोः ॥ छायानिर्वृतचित्तानांनकुटुंबेस्पृहामतिः ३ संशयोयंमहान्ब्रह्मन्दारागारसुतादिषु ॥ स क्तस्ययत्सिद्धिरभूत्कृष्णेचमतिरच्युता ४ ॥ ॥ श्रीशुकउवाच ॥ ॥ बाढमुक्तंभगवतउत्तमश्लोकस्यश्रीमच्चरणारविंदमकरंदरसआवेशितचेतसोभा गवतपरमहंसदयितकथांकिंचिदंतरायविहतांस्वांशिवतमाम्पदवींनप्रायेणहिन्वंति ५

चूर्णिका

श्रीगणेशायनमः ॥श्रीकुलदेवतायैनमः ॥ ॥ राजोवाच ॥ ॥ हेमुने भगवतः आत्मारामः प्रियव्रतः गृहे कथं अरमत् यन्मूलः बंधः १ मुक्तसंगानां पुंसांगृहाभिनिवे शोभवितुंनार्हति २ किंच दाराद्यासक्तस्य मोक्षः भगवन्मतिश्च कथमभूत् एतंसंशयंनिवर्तय ३ ४ ॥ ॥ श्रीशुकउवाच ॥ ॥ बाढमुक्तं भगवच्चरणे आवेशितचेतसः ये ते भगवत्कथां स्वमार्गं नत्यजंति ५

॥१॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रियव्रतस्यब्रह्माज्ञैवांतरायरूपाबभूवेतिसप्रसंगमाह । यर्हीत्यादिना विमुक्तसंगःप्रक्रांतिंभजस्वेत्यंतेन।यर्हिवावहयदाहिवावेतिप्रसिद्ध्यादौ।हइतिच। सःस्वपित्रामनुनाअवनितलपरिपालनायापेमांत्रितोर्नियुक्तः नेवाभ्यनंदत्तन्नैच्छत् । अथहतदैवभगवानादिदेवोब्रह्मास्वभवनादवततारेत्यन्वयः । उपामंत्रणेहेतुः।आम्नाताः राज्ञांशास्त्रेणोक्तायेप्रवराः श्रेष्ठागुणास्तेषांगणस्यएकांतभाजनतयानियताश्रयत्वेन । अनिच्छायांहेतुः परमार्थसतत्त्वंआत्मयाथात्म्यं अवगतं (विदितं) तच्चेनसतथा । अतः ब्रह्मसत्रेणआत्मध्यानेनकार्येणदीक्षिष्यमाणः नियमंग्रहीष्यन् । प्रागपिवासुदेवएवनिरंतरसमाधियोगेनचित्तैकाग्र्येणसमावेशितः समर्पितः सकलकारकाणामिंद्रियाणांयाः क्रियास्तासांकलापोयेनसः । यन्नापितात्पित्रोक्तं (अप्रत्याम्नातव्यं) नप्रत्याख्येयंतथापितदधिकरणेराज्याधिकारेअसतोपिमिथ्याभूतादपिराज्यप्रपंचादात्मनः पराभवं (तिरस्क्रियां) आलोचयन्नाभ्यनंदत्(अन्यस्मादनात्मरूपात्) ६ गुणविसर्गस्यगुणसृष्टेः परिबृंहणंसमृद्धिस्तदनुचिंतयाव्यवसितो (ज्ञातः) सकलजगतामभिप्रायो

॥२॥ येनसः । यथाराज्ञा चारैर्मंडलेश्वराणामभिप्रायोनिश्चीयते तद्वत्। अखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैश्चमरीच्यादिभिः परिवृतः सत्यलोकादवतीर्णः ७ सचब्रह्मातत्रतत्रउडुपतिश्चंद्रइवप्रकाशमानोगंधमादनस्यद्रोणींदरीमवभासयन्उपससर्पेत्यन्वयः । अमरपरिवृढैर्देवेंद्रादिभिः ८ हंसयानेनोपलक्षणेनएपितरमुपलभमानः मत्पितायमितिलक्षयन्। पितापुत्राभ्यांमनुप्रियव्रताभ्यांसहनारदःकृतांजलिः सन्सहसैवाभ्युत्थायार्हणेनपूजयासहोपतस्थेतुष्टाव। प्रियव्रतंतदामंदरद्रोण्यांनारदउपदिशति मनुश्चतंनेतुमागतोस्तीतिज्ञातव्यम् ९ हेभारत भगवानादिपुरुषोब्रह्मापितंप्रियव्रतमितिहोवाचेत्यन्वयः। तेननारदेनोपनीतमर्हणंपूजनंयस्यसः । सूक्तवाकेनयथोचितवाक्येनअतिशयेनउदितावर्णितागुणगणाअवताराः सुजयाः सर्वोत्कर्षाश्चयस्य । (सदयोमंदहासयुक्तोऽवलोकोयस्य) १०

यर्हिवावहराजन्सराजपुत्रःप्रियव्रतःपरमभागवतोनारदस्यचरणोपसेवयांजसावगतपरमार्थसतत्त्वोब्रह्मसत्रेणदीक्षिष्यमाणोवनितलपरिपालनायाम्नातप्रवर श्लोकाः

गुणगणैकांतभाजनतयास्वपित्रोपामंत्रितोभगवतिवासुदेवएवाव्यवधानसमाधियोगेनसमावेशितसकलकारकक्रियाकलापोनैवाभ्यनंदद्यद्यपितदप्रत्याम्ना

तव्यंतदधिकरणआत्मनोन्यस्मादसतोपिपराभवमन्वीक्षमाणः ६ अथहभगवानादिदेवएतस्यगुणविसर्गस्यपरिबृंहणानुध्यानव्यवसितसकलजगदभि ६

प्रायआत्मयोनिरखिलनिगमनिजगणपरिवेष्टितःस्वभवनादवततार ७ सतत्रतत्रगगनतलउडुपतिरिवविमानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः १०

पथिपथिचवरूथशःसिद्धगंधर्वसाध्यचारणमुनिगणैरुपगीयमानोगंधमादनद्रोणीमवभासयन्नुपससर्प ८ तत्रहवाएनंदेवर्षिर्हंसयानेनापितरंभगवंतंहिरण्य

गर्भमुपलभमानःसहसैवोत्थायार्हणेनसहपितापुत्राभ्यामवहितांजलिरुपतस्थे ९ भगवानपिभारततदुपनीतार्हणःसूक्तवाकेनातितरामुदितगुणगणावता

रसुजयःप्रियव्रतमादिपुरुषस्तंसदयहासावलोकइतिहोवाच १०

चूर्णिका

हेराजन् प्रियव्रतः नारदात्ज्ञानंप्राप्तः सन् राज्याधिकारात्स्वपराभवंमन्यमानः स्वपित्रा मनुना राज्यं कुरु इति बोधितोपितन्नैच्छत् ६ तदाब्रह्माचंद्रवत् प्रकाशमानः गंधमादनद्रोणीं प्रकाशयन् तत्रागत्य अकथयत् ८ ९ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

प्रवृत्तिनिष्ठंमद्वाक्यंप्रातिकूलमंत्वा मय्यसूयांकरिष्यतीति शंकमानः नाहेमवंवदामि किंतु मन्मुखेनहरिरेवत्वांआज्ञापयतीतिवदन्प्रवृत्तिनिवृत्तिरहस्यमाह निबोधेतिनवभिः । ऋतंसत्यं (वच्मि) अप्रमेयंदेवंअ
सूयितुंदोषारोपेणद्रष्टुंनार्हसि (भवोरुद्रः) तेतव ततः तातोमनुः एषत्वद्गुरुर्महर्षिश्चनारदः दिष्टंआदिष्टंआज्ञांविवशाअस्वतंत्राः संतोवहामः । ११ विवशत्वमेवाहचतुर्भिर्नेति । तस्यकृतंतेननिर्मितंतनुभृ
ज्जीवः तपआदिभिर्विहंतुंअन्यथाकर्तुंनविभूयात्प्रभुर्नभवेत् । मनीषयासामादिबुद्धिबलेन । परतः बलवदाश्रयात् । (स्वतः स्वसामर्थ्येनैववा) १२ तत्रदेहयोगेतावत्पारतंत्र्यंप्रसिद्धमेवेत्याह । भवायेति
भवोजन्म भवाद्यर्थंअव्यक्तेनेश्वरेणादिष्टंदत्तंदेहयोगं जनताजीवसमूहः सदाधत्तेतत्त्वन्यथाकर्तुंनशक्नोतिअंगहेप्रियव्रत १३ कर्मकरणेपिपारतंत्र्यमाह यद्वाचीति। यस्यवाचिवेदलक्षणायांतंत्यांदामन्यांगुणाः
सत्त्वादयस्तत्पूर्वकाणिच यानिकर्माणितन्निबंधनैर्दामभिर्ब्राह्मणादिशब्दैःसुदुस्तरैःसुदृढैःहेवत्सवयंसर्वेसुयोजिताःनिबद्धाःसंतःतस्मैईश्वरायबलिंवहामः तदिच्छयाकर्मकुर्मः नसि नासिकायांप्रोताबद्धा
संतश्चतुष्पदोबलीवर्दा यथा द्विपदेपुरुषाय (कर्मरूपंबलिंवहंति) १४ भोगेष्वपिपारतंत्र्यमाह । ईशाईश्वरेणअभिसृष्टंदत्तमेव (सुखंदुःखंवा) अंगहेप्रियव्रत अवरुंध्महे । स्वीकुर्मः यथास्वामिना
दत्तमेवकणिशादिबलीवर्दाभक्षयंतिनस्वेच्छयातद्वत् । नचैवंवैषम्यमीश्वरस्य । यत्तोगुणकर्मसंगात् गुणानुरूपकर्मसंगवशात्नाथःपरमेश्वरोयद्यत् देवतिर्यगादिलक्षणंदेहं अयुंक्तयोजितवान् तत्तदास्थाय
स्वीकृत्य । यथांधाः चक्षुष्मताछायामातपंवा (तत्तत्कर्मानुसारं) नीयमानाःसंतः तत्रैवगच्छंतितद्वत् (सुखंदुःखंवाभुंजते) १५ नन्वेतत्सर्वमविदुषएव नत्वात्मविदइत्याशंक्याह । मुक्तोपीति । याव
त्प्रारब्धंकर्मतावत्(तत् भुंजन्मुक्तोपिस्वदेहं बिभृयात् ।) यथास्वप्ने अनुभूतंप्रति यातनिद्रः गतनिद्रः अभिमानशून्यएवानुस्मरति तर्हिभोगवासनया पुनर्जन्मभवेत्तत्राह किंतुदेहांतरारंभकान्गुणान्क
र्माणिवासनाश्चनवृंक्तेनसंभजते (नस्वीकरोति) १६ ननुगृहेवर्तमानस्यभोगान्भुंजानस्यकुतोभिमानाभावोमोक्षोवाअतस्तत्त्यागेन वनवासएवयुक्तस्तत्राह । भयंसंसारःस्यादेव । प्रमत्तस्यअजितेंद्रियस्य वने
ष्विति संगभियावनाद्वनांतरंगच्छतोपीत्यर्थः । सहैवषट्सपत्नाःशत्रवोमनोबुद्धींद्रियाणिचयस्यसतथाभूतएववनेष्वपियतआस्ते । बुधत्वेनजितेंद्रियत्वात् आत्मरतेरात्मारामस्यतु (गृहाश्रमः) अवद्यं
रागादिदोषंकिंकरोति । नकरोत्येव १७

॥ ॥ श्रीभगवानुवाच ॥ ॥ निबोधतातेदमृतंब्रवीमिनासूयितुंदेवमर्हस्यप्रमेयम् ॥ वयंभवस्तेततएषमहर्षिर्वहामसर्वेविवशायस्यदिष्टम् ११ नत
स्यकश्चित्तपसाविद्ययावानयोगवीर्येणमनीषयावा ॥ नैवार्थधर्मैःपरतःस्वतोवाकृतंविहंतुंतनुभृद्विभूयात् १२ भवायनाशायचकर्मकर्तुंशोकायमोहायस
दाभयाय ॥ सुखायदुःखायचदेहयोगमव्यक्तदिष्टंजनतांगधत्ते १३ यद्वाचितंत्यांगुणकर्मदामाभिःसुदुस्तरैर्वत्सवयंसुयोजिताः ॥ सर्वेवहामोबलिमी
श्वरायप्रोतानसीवद्विपदेचतुष्पदः १४ ईशाभिसृष्टंह्यवरुंध्महेंगदुःखंसुखंवागुणकर्मसंगात् ॥ आस्थायतत्तद्यदयुंक्तनाथश्चक्षुष्मतांधाइवनीयमानाः १५
मुक्तोपितावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ॥ यथानुभूतंप्रतियातनिद्रःकिंत्वन्यदेहायगुणान्नवृंक्ते १६ भयंप्रमत्तस्यवनेष्वपिस्याद्यतःसआस्ते
सहषट्सपत्नः । जितेंद्रियस्यात्मरतेर्बुधस्यगृहाश्रमःकिंनुकरोत्यवद्यम् १७

श्लोकाः ११—१७

॥३॥

चूर्णिका ॥ ॥ ब्रह्मोवाच ॥ ॥ हेतातअहंतेसत्यंब्रवीमि वयंसर्वेभगवद्वशाः तत्कृतंहंतुंकोपिनसमर्थः ११ १२ अतः इदानींत्वंकियत्कालं राज्यंकुरुपश्चात् मुक्तसंगः सन्
स्वरूपं भज १३ १४ १५ १६ १७

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननु गृहेवसतः पुरुषस्यरागादयः संभवंत्येव नतुवनेष्विति तत्राह । यइति । यः षड्वैरिणः मनःषष्ठानींद्रियाणि विजिगीषमाणः (जेतुकामः) सपूर्वंगृहेषुस्थित्वातेषामत्यंतं निरोधमकुर्वन्जेतुंय तेत । क्षीणेष्वरिपुकामंगृहेन्यत्रवा विचरेत् । यतोलोकेऊर्जितारीन्दुर्गाश्रितएवात्येतिजयति । पश्चाद्दुर्गेवान्यत्रवावर्तते । युध्येतेतिपाठेप्रहरेदित्यर्थः १८ इदंचगृह-(-रूप-)-दुर्गाश्रयणंप्राकृतानांत्वंतु अब्जनाभस्यहरेरंघ्रिसरोजकोशएवदुर्गंतदाश्रितोऽतएव निर्जितषट्सपत्नश्चतथापिपुरुषेणेश्वरेणातिदिष्टान् दत्तान् भोगान् तावत् भुंक्ष्व पश्चाद्विमुक्तसंगःसन्प्रकृतिंस्वरूपं भजस्व आत्मनिष्ठोभवेत्यर्थः १९ (इत्युक्तः) आत्मनस्ततोलघुतयाअल्पतया तस्यानुशासनं (उवाह) अंगीचकार । यद्वा आत्मनो यदनुशासनंतत्अलघुतया गौरवेणबाढंतथाकरिष्यामीति अवनतकंधरः सन् (बहुमानपुरःसरंयथातथा) जग्राह २० मनुनासंतुष्टेनउपकल्पिता (समर्पिता) पूजायस्यसः । प्रियव्रतस्ययोगभ्रंशात् नारदस्यचशिष्यनाशात् कुटिलमीक्षणं संभवतितत्तुनास्तीत्याह । अविषमंयथातथा तयोरभिसमीक्षमाणयोः सतोः आत्मनः सम्यगवस्थानं अवाङ्मनसं वाङ्मनसयोरविषयंक्षयं निवासं । पाठांतरे अवाक्वाचामगोचरं कथंचिन्मनसः क्षयंविषयं अतः अव्यवहृतं व्यवहारशून्यं ब्रह्मनिवृत्तं प्रवर्तयन् व्यवहाराद्विषण्णः सन् व्यवहारातीतंस्वरूपंचिंतयन्वर्तीहतइत्यर्थः २१ पुत्रंराज्येऽभिषिच्यवनंयास्यामीतिएवंयोमनोरथः सः परेणब्रह्मणैवप्रतिसंधितः संपादितोयस्यसः । नारदस्यानुमतेनराज्ये स्थापयित्वाअतिविषमो दुस्तरोयोविषयविषजलाशयो विषयलक्षणस्य विषस्यह्रदइवयहंतस्य आशादिक्प्रवृत्तिवासनाभोगेच्छावातस्याउपरतोभूत् २२ यत्पृष्टंगृहे कथमरमतेतितत्रोक्तमुत्तरमुपसंहरतिइतिहवावइत्थमेवहिअधिनिवेशितःप्रापितः कर्माधिकारो यस्यसोखिलस्यजगतोबंधध्वंसनः परोनुभावः प्रभावोयस्य (यद्विषयंज्ञानंवा) तस्ययदंघ्रियुगलं तस्यानवरतं अजस्रंध्यानं तदनुभावेन (तत्सामर्थ्येन) परिरंधितकषायोदग्धरागादिमलआशयो (अंतःकरणं) यस्यअतोऽवदातः शुद्धोपि महतांब्रह्मादीनामाज्ञापालनेन मानवर्धनो (अनुशशासपालयामास) २३ उर्वस्मयेहमसिद्धौ । वावेतिनिश्चये (उपयेमेपरिणीतवान् ।) आत्मनः समानैस्तुल्यैः शीलादिभिः उदारान् महतः (तत्रशीलंस्वभावः वीर्यंप्रभावः ।) दशपुत्रान्जनयामास २४

॥४॥

श्लोकाः

यःषट्सपत्नान्विजिगीषमाणोगृहेषुनिर्विश्ययतेतपूर्वम् ॥ अत्येतिदुर्गाश्रितऊर्जितारीन्क्षीणेषुकामंविचरेद्विपाश्चित् १८ त्वंत्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितोनिर्जितषट्सपत्नः ॥ भुंक्ष्वेहभोगान्पुरुषातिदिष्टान्विमुक्तसंगःप्रकृतिंभजस्व १९ ॥ ॥ श्रीशुकउवाच॥ ॥ इतिसमभिहितोमहाभागवतोभगवतस्त्रिभुवनगुरोरनुशासनमात्मनोलघुतयावनतशिरोधरोबाढमितिसबहुमानमुवाह २० भगवानपिमनुनायथावदुपकल्पितापचितिःप्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसंक्षयमव्यवहृतंप्रवर्तयन्नगमत् २१ मनुरापिपरेणैवंप्रतिसंधितमनोरथःसुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितिगुप्तयआस्थाप्यस्वयमातिविषमविषयविषजलाशयाशायाउपरराम २२ इतिहवावसजगतीपतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोखिलजगद्बंधध्वंसनपरानुभावस्यभगवतआदिपुरुषस्यांघ्रियुगलानवरतध्यानानुभावेनपरिरंधितकषायाशयोवदातोपिमानवर्धनोमहतांमहीतलमनुशशास २३ अथचदुहितरंप्रजापतेर्विश्वकर्मणउपयेमेबर्हिष्मतींनामतस्यामुहवावआत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान्दशभावयांबभूवकन्यांचयवीयसीमूर्जस्वतींनाम २४

१८/२४

चूर्णीका

१८ १९ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्युक्त्वा ब्रह्मा ययौ २० २१ मनुः नारदाज्ञयातंराज्येभिषिच्य स्वयंउपरराम २२ प्रियव्रतः भगवच्चरणे मनःनिवेश्य महीं शशास २३ अथविश्वकर्मणः प्रजापतेः कन्यांबर्हिष्मतींउपयेमे तस्यांआग्नीध्रम् १ इध्मजिव्हं २ यज्ञबाहुम् ३ महावीरं ४ हिरण्यरेतसम् ५ घृतपृष्ठम् ६ सवनम् ७ मेधातिथिं ८ वीतिहोत्रं ९ कविम् १० इतिदशपुत्रान् ऊर्जस्वतीं कन्यांचजनयामास २४

॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका　॥१॥

तानाह । आग्नीध्रः इध्माजिह्वः यज्ञबाहुर्महावीरः हिरण्यरेताः घृतपृष्ठः सवनः मेधातिथिः वीतिहोत्रः कविश्चेति अग्नीनांनामानियेषांते २५ (उर्ध्वरेतसोब्रह्मचर्यव्रतधारिणः) अर्भभावात् बाल्यादा रभ्य (आत्मज्ञानेकृताभ्यासाः) २६ तस्मिन्वैपारमहंस्याश्रमेएव (उहेत्यतिप्रसिद्धौ । भगवतः) श्रीमच्चरणारविंदयोरविरतस्मरणेनअविगलितोऽखंडितोयः परमोभक्तियोगस्तस्यानुभावेन (साम र्थ्येन) विशोधितांतःकरणेअधिगतः प्रतीयमानोयोभगवान्तस्मिन् (सर्वेषामात्मभूतेतत्पदार्थेप्रत्यगात्मनिनिरुपाधिके) आत्मनस्त्वंपदार्थस्यतादात्म्यंअविशेषेणविशेषोदेहाद्युपाधिः तदपोहेन (सम्य क्) प्रापुः २७ (अस्यद्वितीयाप्यस्तिपत्नीसापिप्रयोजकपुत्रप्रसूरित्याह अन्यस्यामिति) २८ उपशमायनेषुउपशमाश्रयेषु (आत्मनिष्ठेषु) सत्स्वित्यर्थः । दशकोटिभिरेकमर्बुदंएतादृशानिवर्षाणामेका दशार्बुदानिजगतींबुभुजइत्यन्वयः । राज्ञोधर्मपालनविषयभोगप्रभावैर्भाव्यंतत्रानायासेनैवधर्मपालनमाह । अव्याहताः (अनिवारिताः) अखिलाः पुरुषकाराःपौरुषाणि यस्मात्तेनसारेणबलेनसंभृतौ

॥५॥ पूर्णौदोर्दंडौदीर्घौबाहूतयोर्युगलंतेनापीडितआकृष्टोमौर्वीगुणः (ज्यासंज्ञकगुणः) तस्यस्तनितंटंकारः तेनैवयुद्धंविनाविरमितानिरस्ताधर्मप्रतिपक्षायेन । विषयभोगातिशयमाह । बर्हिष्मत्याः स्वभार्या याः अनुदिनमेधमानैः-(-वृद्धिंगच्छद्भिः) प्रमोदादिभिः पराभूयमानविवेकइव (विवेकरहितइव) अतएवविषयासक्त्याआत्मानमनवबुध्यमानइव (वस्तुतोमहामनाः महाबुद्धिः) बुभुजे । तत्रप्रमोदः पतिं दृष्ट्वाहर्षः । ततः प्रसारणंअभ्युत्थानादिलीला । ततोयौषिण्यंयोषित्स्वभावकृतशृंगारानुभावप्रकाशनंततोव्रीडयाप्रमुषिताः संकोचिताहासावलोकाः ततोरुचिरक्ष्वेल्यादयः सुंदरपरिहासवाक्यादीनितैः । २९ प्रभावातिशयमाह । यावद्वसुधातलंलोकालोकपर्यंतमवभासयति मेरुंप्रदक्षिणीकुर्वन्आदित्यः तस्मिन्नर्धेनैवोपलक्षितंप्रदेशंप्रतपतिप्रकाशयतिअर्धेनचावच्छादयतितमसाआवृणोति (यतोमेरुणाव्यवधी यते । तदवच्छादनमनभिनंदन्सूर्यरथसमजवेनस्वेनरथेनसूर्यमनुलक्ष्य) द्वितीयः पतंगः सूर्यइवपर्यक्रामत् नचेदमसंभावितंयतोभगवदुपासनोपचितः अतिपुरुषः पुरुषानतिक्रांतःप्रभावोयस्य ३०

श्लोकः २९/३०

आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवयइतिसर्वएवाग्निनामानः २५ एतेषांकविर्महावीरःसवनइतित्रयआसन्नूर्ध्व रेतसस्तआत्मविद्यायामर्भभावादारभ्यकृतपरिचयाःपारमहंस्यमेवाश्रममभजन् २६ तस्मिन्नुहवाउपशमशीलाःपरमर्षयःसकलजीवनिकायावासस्यभग वतोवासुदेवस्यभीतानांशरणभूतस्यश्रीमच्चरणारविंदाविरतस्मरणाविगलितपरमभक्तियोगानुभावेनपरिभावितांतर्हृदयाधिगतेभगवतिसर्वेषांभूतानामात्म भूतेप्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेणसमीयुः २७ अन्यस्यामपिजायायांत्रयःपुत्राआसन्नुत्तमस्तामसोरैवतइतिमन्वंतराधिपतयः २८ एवमु पशमायनेषुस्वतनयेष्वथजगतीपतिर्जगतीमर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितध र्मप्रतिपक्षोबर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिःपराभूयमानविवेकइवानवबुद्ध्यमानइवमहाम नाबुभुजे २९ यावदवभासयतिसुरगिरिमनुपरिक्रमन्भगवानादित्योवसुधातलमर्धेनैवप्रतपत्यर्धेनावच्छादयतितदाहिभगवदुपासनोपचितातिपुरुष प्रभावस्तदनभिनंदन्समजवेनरथेनज्योतिर्मयेनरजनीमपिदिनंकरिष्यामीतिसप्तकृत्वस्तरणिमनुपर्यक्रामद्द्वितीयइवपतंगः ३०

चूर्णिका　॥५॥

२५ तेषांमध्येकविः १ महावीरः २ सवनः ३ इतित्रयः ऊर्ध्वरेतसः संतः पारमहंस्यमाश्रमंअभजन् २५ किंच तेब्रह्मप्रापुः २७ अन्यस्यांभार्यायांप्रियव्रतात् उत्तमः १ तामसः २ रैवतः ३ इतित्रयः पुत्राः तेमन्वंतराधिपतयः आसन् २८ एवंपुत्रान्उत्पाद्य ११० एकादशार्बुदवर्षाणिपृथ्वींबुभुजे २९ किंच भगवान्सूर्यः मेरुं प्रदक्षिणीकुर्वन्रात्रिंदिनविभागंकरोति तांरात्रिमपिदिनंकरिष्यामीतिभगवदुपासनबलः वायुसमवेगेनतेजोमयेनरथेनसप्तवारंतरणिंअन्वधावत् द्वितीयः सूर्यइव ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१॥

येवैउहअतिप्रसिद्धास्तस्यरथचक्राग्रकृताःपरिखातागर्ताःयतएवयैरेवकृताः ३१ तानाहजंब्विति । तेषांपरियाणंशृण्वितिशेषः पूर्वस्य (पूर्वस्यद्वीपस्य) यद्विस्तारमानंउत्तरउत्तरस्ततोद्विगुणेनविस्तारमा नेनेत्येवंयथासख्यंसिंधुभ्योबहिः समंततउपक्लृप्ताराचिताः ३२ यथासिंधुभ्योबहिरेकैकशोद्वीपाएवंद्वीपानामपिबहिः सिंधवइत्याह । क्षारोदेति । दधिमंडईषन्मथितंदधि । एतेसप्तजलधयः सप्तद्वीपानांए कैकश्येनपरिखाइवाभ्यंतरेतैः संवेष्टितायेद्वीपास्तैः समानाविस्तारतः बहिर्बहिर्नेत्त्वंतः पृथगसंकीर्णतया ३३ (उशनसेकाव्याय) ३५ अहोआश्चर्यंराज्ञः सामर्थ्यमितिपरिक्षिदभिप्रायज्ञोभगवान्बादरा यणिराह । नैवमिति । (तस्यहरेरंघ्रिरजसानिषेवितेनेतिशेषः) जिताः षड्गुणामनःषष्ठानींद्रियाणिषड्ूर्मयोवायैस्तेषामेवंविधपुरुषकारोमाहात्म्यविशेषश्चिह्नं । नासंभावितमित्यर्थः । यतोविदूरविगतः अंत्यजोपियोयन्नामयस्योरुक्रमस्यनामसकृदप्युच्चारयेत्सोऽधुनातत्क्षणमेवबंधंसंसारं तन्वमितिपाठेपिअयमेवार्थः। पाठांतरेतत्त्वंचंडालत्वंजह्यातिशुद्धोभवतीत्यर्थः ३४तस्यपराक्रममुपसंहरन्निवृत्तिक्रममाह । सएवामिति । देवर्षिचरणयोरनुशयनमुपसत्तिः तदनुपतितो (तत्प्राप्तौसत्यामप्राप्तो) गुणविसगः राज्यादिप्रपंचः तत्संसर्गेण (तत्संबंधेनअनिर्वृंतसुखरहितं) आत्मनिमनस्विनिर्वेदोयस्य ३६ किमाहे त्यत्राह । अहोइतिमयाअसाध्वनुष्ठितंयत्यतो (अहमिंद्रियैः) अभिनिवेशितः (क । अविद्ययारचिताविषमा परिणामेविषोपमाविषयायत्रताहशेमोहगर्तरूपेसंसारे) तत्ततः अलमलंविषयैः । विनो दमृगंमर्कटम् ३७

॥६॥

श्लोकः ३१/३७

येवाउहतद्रथचरणनेमिकृतपरिखातास्तेसप्तसिंधवआसन्यतएवकृताःसप्तभुवोद्वीपाः ३१ जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसंज्ञास्तेषांपरिमाणंपूर्वस्मा त्पूर्वस्मादुत्तरउत्तरोयथासंख्यंद्विगुणमानेनबहिःसमंततउपक्लृप्ताः ३२क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमंडोदशुद्धोदाःसप्तजलधयःसप्तद्वीपपरिखाइवाभ्यं तरद्वीपसमानाएकैकश्येनयथानुपूर्वंसप्तस्वपिबहिर्द्वीपेषुपृथक्परितउपकल्पितास्तेषुजंब्वादिषुबार्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहूहिर ण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिंविदधे ३३ दुहितरंचोर्जस्वतींनामोशनसेप्रायच्छद्यस्यामासीद्देवयानीनामका व्यसुता ३४नैवंविधःपुरुषकारउरुक्रमस्यपुंसांतदंघ्रिरजसाजितषड्गुणानाम्॥ चित्रंविदूरविगतःसकृदाददीतयन्नामधेयमधुनासजहातिबंधम् ३५सएवमपारि मितबलपराक्रमएकदातुदेवर्षिचरणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानंमन्यमानआत्मनिर्वेदइदमाह ३६ अहोअसाध्वनुष्ठितंयदभिनि वेशितोहमिंद्रियैरविद्यारचितविषमविषयांधकूपेतदलमलममुष्यावनितायाविनोदमृगंमांधिग्धिगितिगर्हयांचकार ३७

चूर्णिका ॥६॥

तेतद्रथचक्राग्रेणकृतपरिखाः तेसप्तसिंधवःआसन् ३१ तदंतरस्थाःसप्त जंबुः १ प्लक्षः २ शाल्मलिः ३ कुशः ४ क्रौंचः ५ शाकः ६ पुष्कराख्यः ७ पूर्वद्विगुणमनेनद्वीपाः आसन् ३२ तथाक्षारोदः १ इक्षुरसोदः २ सुरोदः ३ घृतोदः ४ क्षीरोदः ५ दधिमंडोदः ६ शुद्धोदः ७ एतेसप्तसमुद्राः प्रतिद्वीपेद्वीपमानेनपरिखाइव आसन् सप्रियव्रतः सप्तद्वीपेषुआग्नीध्रादीन् पुत्रान् अधिपतीन्चक्रे ३३ ऊर्जस्वतींकन्यांशुक्रायददौयस्यांदेवयानी आसीत् ३४ एवंअपरिमितबलपराक्रमःनिर्विण्णः सन्इदंआह ३५ ३६अहो असाधुमयाआचरितम् वनितायां क्रीडामृगंमांधिक्धिक्इतिगर्हयांचकार ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

परदेवतायाहरेः प्रसादनाधिगतेःप्राप्तोयआत्मप्रत्यवमर्शआत्मन्निवेकस्तेननारदस्यपदवींतदपदिष्टमार्गमेवपुनरनुससारेत्यन्वयः । किंकृत्वाअनुगतेभ्यः पुत्रेभ्यइमांपृथ्वींविभज्यभुक्तोभोगोयस्यास्तांसह महाविभूतिंसाम्राज्यसंपत्सहितांमहिषींचराज्ञींमृतशरीरामिवपरित्यज्य तत्रहेतुः । हृदिनिहितोनिर्वेदोयेन। हृदीत्यस्य उत्तरत्राप्यन्वयः हृदिगृहीतोनिश्चितोयोहरिविहारस्तेनअनुभावः त्यागसामर्थ्यंयस्य ३८ तस्येति (हइतिप्रसिद्धौ ।) महिमोपनिबंधनश्लोकाः प्रियव्रतस्यपूर्वसिद्धाः कथ्यंतेयथावेदे " तदप्येषश्लोकोभवती " वितद्वदुक्तिरियम् । कोनुकोनामकुर्यात् । छायांघ्नन्तमोनिरस्यन् नेमिनिम्नैः रथचक्रधाराकृतगर्तैरित्यर्थः ३९ भूसंस्थानं भुवोवयवविशेषरूपद्वीपैः कृतंद्वीपेद्वीपेचसरिद्गिरिप्रभृतिभिः सीमाचकृता । भूतानांनिर्वृत्यैसुखाय अविवादाय । ४० भौमंपातालजं दिव्यंस्वर्गजं मानुषं मर्त्यलोकजंमहित्वंवैभवंयो निरयतुल्यंमेने । पुरुषानुजना विष्णुभक्तास्तएवप्रियायस्येति । ४१ ॥ इतिपंचमेस्कंधेटीकायांप्रथमोध्यायः ॥ १ ॥ ॥ द्वितीयेप्रोक्तमाग्नीध्रचरित्रंत्र्यैणसंमतम् । पत्न्यां हिपूर्वचित्यांयोनाभिमुख्यानजीजनत् १ अस्मिन्वंशेप्रसिद्धोयमाग्नीध्रः स्त्रैणपुंगवः । विहसन्निवतस्येदंचरितंमुनिरब्रवीत् २ जंबूद्वीपमोकोयासांताः प्रजाः पुत्रवत्पालयामास ॥ धर्मावेक्षमाणः धर्ममवे क्षमाणइत्यर्थः १ पितृलोककामः पुत्रकामः सुपुत्रेणपितुः (पितृलोकप्राप्तेः ।) सुरवराणांवनितास्तासामाक्रीडाचलोमंदरः तस्यद्रोण्यांआभृतानिसंपादितानिपरिचर्योपकरणानिकुशपुष्पादीनियेन । (विश्वसृजांपतिंब्रह्माणम्) २ तदुपलभ्यज्ञात्वा (आदिपुरुषो) ब्रह्माअभियापयामाससंभोगार्थं प्रस्थापयामास ३ साचतदाश्रमोपवनमुपबभ्रामेत्यन्वयः रमणीयत्वमेवाह । विविधाश्चनिबिडाश्च (संघ ट्टिताः) येविटपिनोवृक्षास्तेषां विटपाः शाखास्तेषां निकरास्तैः संश्लिष्टा (आलिंगिताः) पुरटलताः स्वर्णवल्लयः तास्वारूढाउपविष्टाः स्थलविहंगामयूरादयस्तेषांमिथुनैः प्रोच्यमानाभिः श्रुतिभिः उच्चार्यमाणैः षड्जादिस्वरैः प्रतिबोध्यमानायेसलिलकुक्कुटादयस्तैर्विचित्रंयथातथोपकूजिता नादिताः अमलाजलाशयास्तेषुकमलानितेषामाकरं (उत्पत्तिस्थानरूपं) उपवनम् ४

॥७॥

श्लोकाः

परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यःपुत्रेभ्यइमांयथादायंविभज्यभुक्तभोगांचमहिषींमृतकमिवसहमहाविभूतिमपहायस्वयंनिहितनिर्वेदोहृ
दिगृहीतहरिविहारानुभावभगवतोनारदस्यपदवींपुनरेवानुससार ३८ तस्यहवाएतेश्लोकाः ॥ प्रियव्रतकृतंकर्मकोनुकुर्याद्विनेश्वरम् ॥ योनेमिनिम्नैरकरो
च्छायांघ्नन्सप्तवारिधीन् ३९ भूसंस्थानंकृतंयेनसरिद्गिरिवनादिभिः ॥ सीमाचभूतनिर्वृत्यैद्वीपेद्वीपेविभागशः ४० भौमंदिव्यंमानुषंचमहित्वंकर्मयोगजम् ॥
यश्चक्रेनिरयौपम्यंपुरुषानुजनप्रियः ४१ इतिश्रीभा०म०पं०स्कंधेप्रियव्रतविजयेप्रथमोध्यायः १ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंपितरिसंप्रवृत्ते
तदनुशासनेवर्त्तमानआग्नीध्रोजंबूद्वीपौकसःप्रजाऔरसवद्धर्मावेक्षमाणःपर्यगोपायत् १ सचकदाचित्पितृलोककामःसुरवरवनिताक्रीडाचलद्रोण्यांभगवं
तंविश्वसृजांपतिमाभृतपरिचर्योपकरणआत्मैकाग्र्येणतपस्व्याराधयांबभूव २ तदुपलभ्यभगवानादिपुरुषःसदसिगायंतींपूर्वचित्तिंनामाप्सरसमभियाप
यामास ३ साचतदाश्रमोपवनमतिरमणीयंविविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहंगममिथुनैःप्रोच्यमानश्रुतिभिःप्रतिबोध्यमान
सलिलकुक्कुटकारंडवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ४

३८/४

चूर्णिका

एवंनिर्विद्यपुत्रेभ्यः राज्यंविभज्य महिषींचत्यक्त्वा नारदोपदिष्टंमार्गंपुनरेवानुससार ३८ प्रियव्रतकृतंकर्मईश्वरंविनाअन्यः कः कुर्यात् यः सप्तसमुद्रान्द्वीपविभागंचच क्रे ३९ भौमंदिव्यंसुखंनिरयवत् मत्वा साधुप्रियः पुनः भगवद्भक्तिं अकरोत् ४० ४१ इतिपंचमेप्रथमः ॥ १ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंपितरिसंप्रवृत्तेसति आग्नीध्रः राजाजंबुद्वीपौकसः प्रजाः पुत्रवत्पालयामास १ सः कदाचित् पुत्रकामः मंदरगुहायांब्रह्माणं आराधयामास २ ब्रह्मातत्ज्ञात्वासभायांगायंतींपूर्वचित्तिं अ प्सरसमनोदयत् ३ सातदाश्रमसमीपंएत्य वभ्राम ४

॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सुललितेगमनेयेपदविन्यासास्तैर्गतौविलासोयस्याः चकारस्तस्याश्चेत्येकवाक्यत्वाय । अनुपदं प्रतिपदंखणखणेतिध्वनिंकुर्वतोरुचिरस्यचरणाभरणस्यस्वनं आमीलितेनयने एवनलिनमुकुले तयोर्युगलमर्षद्विकचय्य किंचिदुन्मील्यव्यचष्टददर्श । ५ तामेवदेवीं मकरध्वजस्यवशमुपनीतःसन्जडवत् (विवेकशून्यइवेति) हमसिद्धंवक्ष्यमाणान् दशश्लोकानुवाच जाड्यानुकरणंचैवदग्ध्येनतद्वशीकारार्थं । (अन्यथाजडइत्येवब्रूयात् ।) दिविजानांदेवानां मनुजानांचयानिमनांसिनयनानिचतेषामाल्हाददुघैः आल्हादंदुहंतिप्रपूरयंतीतितथातैः गत्यादिभिर्नृणांमनसिकामस्यविवरं प्रवेशद्वारं (अवकाशं वा) विदधतीं कुर्वतीं । गतिश्च विहारः क्रीडाच विनययुक्तोवलोकश्चसुस्वराण्यक्षराणिचअवयवाश्चनेत्रादयस्तैः (कथंभूतांताम्) निजमुखाद्विगलितं (निःसृतंसरसत्वात्) अमृतमिवस्वादुआसव इवमादकंचयत्सहासंभाषणंतस्मिन् आमोदोमुखनिश्वासगंधः तेनमदांधायेमधुकरनिकरास्तैरुपरोधआवरणंतद्भयात्द्रुतः शीघ्रोयः पदविन्यासस्तेनवल्गुसुंदरंस्पंदनंकिंचिच्चलनंस्तनकलशयोः कबरभारे रशनायांचयस्यास्ताम् (कथंभूतस्यमकरध्वजस्य)तस्याअवलोकनेनविवृतावसरस्यदत्तावकाशस्य । ६ । कात्वंशैलेगिरावस्मिन् किंचिकीर्षसि । मुनिवर्येत्यादिपुंस्त्वेनसंबोधनादिजाड्यानुकरणार्थं । हेमुनिवर्यनूनंभगवतः परदेवताभूतस्यमायासि (काप्यतर्क्या ।) भ्रुवावालक्ष्याह । हेसहृत्सखेविज्येनिर्गुणेधनुषी बिभर्षि किमात्मनोर्थे । तवैवाभ्यां किंकार्यमस्ति । किंवाप्रमत्तान्अजितेंद्रियान् मृगतुल्यानस्मदादीन्मृगयसेतान्वशीकर्तुंधनुषीधारयसिकिमित्यर्थः । ७ कटाक्षावालक्ष्याह । बाणाविमौ । शतपत्रेनेत्रकमलेतेएवपत्राणिपिच्छानिययोः। शांतौविभ्रमेणमंथरौ । पुंखाभ्यांविनापिरुचिरौ पत्रतयाकल्पितेनेत्राभ्यांपुरभागस्य पुंखस्थानीयस्याभावात् । अतितिग्मौतीक्ष्णौदंतौ अग्रभागौययोः । तौकस्मैप्रयोक्तुमिच्छसीतिनविद्मः । अतोभयादेतावत्प्रार्थयामहे । तवायंविक्रमोस्माकंक्षेमायास्तु । ८ तदंगपरिमललोभेनानुगच्छतोभ्रमरानालक्ष्याह । शिष्याइति । अजस्रंसंततंयुष्मच्छिखातोविलुलिताः (युष्माकंकेशपाशात्) विगलिताः सुमनसामभितोवृष्टीः गलितानिकुसुमानिभजंतीत्यर्थः शुद्धत्वेनोपमावेदशाखाइवेति ९

॥८॥

श्लोकाः ५/९

तस्याःसुललितगमनपदविन्यासगतिविलासायाश्चानुपदंखणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्यनरदेवकुमारःसमाधियोगेनामीलितनयननालिनमुकुलयुगलमीषद्विकचय्यव्यचष्ट ५ तामेवाविदूरेमधुकरीमिवसुमनसउपजिघ्रंतींदिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडाविनयावलोकसुस्वराक्षरावयवैर्मनसिनृणांकुसुमायुधस्यविदधतींविवरमनिजमुखविगलितामृतासवसहासभाषणामोदमदांधमधुकरनिकरोपरोधेनद्रुतपदविन्यासेनवल्गुस्पंदनस्तनकलशकबरभाररशनांदेवींतदवलोकनेनविवृतावसरस्यभगवतोमकरध्वजस्यवशमुपनीतोजडवदितिहोवाच ६ कात्वंचिकीर्षसिचकिंमुनिवर्यशैलेमायासिकापिभगवत्परदेवतायाः ॥ विज्येबिभर्षिधनुषीसुहृदात्मनोर्थेकिंवामृगान्मृगयसेविपिनेप्रमत्तान् ७ बाणाविमौभगवतःशतपत्रपत्रौशांतावपुंखरुचिरावतितिग्मदंतौ ॥ कस्मैयुयुंक्षसिवनेविचरन्नविद्मःक्षेमायनोजडधियांतवविक्रमोस्तु ८ शिष्याइमेभगवतःपरितःपठंतिगायंतिसामसरहस्यमजस्रमीशम् ॥ युष्मच्छिखाविलुलिताःसुमनोभिवृष्टीःसर्वेभजंत्यृषिगणाइववेदशाखाः ९

॥८॥

घूर्णिका

तस्याः नूपुराद्याभरणस्वनंश्रुत्वानरदेवकुमारः नेत्रेकिंचित् उन्मील्य तांदृष्ट्वा कामवशंगतः सन्जडवदुवाच ५ ६ ७ त्वंकासि किंचिकीर्षसि किं देवमायासि मृगतुल्यान्मादृशान् विषयिणः वशीकर्तुंविज्येधनुषी बिभर्षिकिम् ८ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.पं. अ०

॥२॥

टीका

॥९॥

नूपुरस्वनमाकर्ण्याह । वाचमिति। (हेब्रह्मन्) तुभ्यंतवचरणगतपंजरयोः नूपुरयोः तित्तिरीणां अंतर्गतरत्नानांपरंकेवलंवाचं (शृणवाम शृणुमः। कथंभूतां अरूपा अदृष्टवक्तृकामुखराअतिप्रकटातांचतांच
पीतंपरिधानवस्त्रं नितंबकांतित्वेनप्रकल्प्याह । कदंबकुसुमस्यरुचिर्दीप्तिः अंकविटंकबिंबे । (अंकशब्देनसामीप्यान्नितंबोलक्ष्यते) । नितंबस्यविटंकबिंबेसुंदरमंडले क्वलब्धा (कुतःप्राप्तेत्यर्थः) पाठांतरे
अंगेतिसंबोधनम् । मेखलामालक्ष्याह । यस्यामलातपरिधिः (यस्यांदीप्तौअलातपरिधिः उल्मुकभ्रमणरूपःपरिवेषो) वर्तते । वस्त्रंनितंबकांतित्वेन प्रकल्प्य अतोवस्त्रमदृष्ट्वैवपृच्छति।क्वचतेवल्कलमिति १०
स्तनावालक्ष्याह । शृंगयोःस्तनयोः किंसंभृतं । किंपूर्णमस्ति । मनोहरं किंचिदस्तीत्येतावत्तुजानामि । यतोमध्येकृशोपित्वं कृच्छ्रेण वहसि । यत्रचमे दृशिर्दृष्टिः श्रितासलग्नास्ति । अन्यथेदंद्वयंनघट
तइतिभावः । स्तनगतं कुंकुममालक्ष्याह । पंकोरुणआरक्तआत्मनस्तवविषाणेस्तनेईदृक्अत्यपूर्वः । कुतइत्यतआह। येनपंकेन आश्रमं सुरभीकरोषि सुगंधयुक्तंकरोषीति (हेसुभग सुंदरद्विजेतिसंबोधनंज
डत्वात्)।११ (हेसुहृत्तम) लोकंस्थानम्। यत्रत्योजनःउरसाइत्थमपूर्वावयवौबिभर्ति । मनसउन्नयनौक्षोभकौ । पाठांतरे इत्थंभूतलक्षणेतृतीया । वक्त्रेचवहुअद्भुतं बिभर्ति । किंतदाह । रसोम
धुरालापः रासोविलासः ताभ्यांसहितासुधाअधरामृतम् आदिशब्दात्स्मितनर्मादि । १२ कावातवलोकेआत्मनोदेहस्यवृत्तिर्जीविका । आहारइत्यर्थः । अंगहेसखे । अदनाच्चर्वणात् हविरितिलक्षणयात
त्संबंधींगंधोवाति आगच्छति । इतितांबूलाभिप्रायम् । अदनाद्वहिरंगभातीतिपाठे ममतावद्भोजनात्बहिर्भूतैवअन्यैववृत्तिर्भातीत्यर्थः । यतस्त्वंविष्णोःकलासि । विष्णुश्चनाश्नाति । "अनश्नन्नन्योअ
भिचाकशीती"तिश्रुतेः।विष्णोःकलासीत्यत्रहेतुः तवचकर्णौविष्णोरिवानिमिषोन्मकरौ। अनिमिषौरत्नरूपनेत्रत्वेननिमेषशून्यौउल्लसंतौमकरौतदाकारेकुंडलेययोस्तौ। किंच। तवमुखंसरइत्सरइव तदेवाह।
उद्विग्नंचंचलंमीनयुगलमिवनेत्रद्वयंयस्मिन्। द्विजादंताः तेषांपंक्त्याशोचिः शोभायास्मिन्। सरसितुद्विजाराजहंसादयः। आसन्नो (निकटवर्ती) भृंगनिकरइवकेशस्तोमः परिमललुब्धोभ्रमरस्तोमो
वायस्मिन्। १३ (त्वयाकरकमलेनताडितः) पतंगः कंदुकः भ्रमतः भ्रमच्चित्तस्यमेअक्षिणीएजयतेचंचलतांनयाति (भ्रमतस्तवेतिवा । पतंगः पक्षिसूर्ययोः तद्रूपकत्वात्कंदुकोलक्षितः) वक्रकेशसमू
हंमुक्तबंधनंनस्मरसिनसंभावयसिकिमित्यर्थः कष्टः धूर्तः अनिलोवायुर्नीवीं (वस्त्रबंधं) हरतिएतच्चनस्मरसिकिम् १४ (हेतपोधनतपस्यतांतपोघ्नंरूपंसौंदर्यं) उपलब्धंप्राप्तम् । महांममहेममामित्रमया
सहतपश्चर्तुमर्हसि । किंच । सर्वैभवभावनः संसृतिविस्तारकोब्रह्मामेप्रसीदतियतस्त्वांभार्यांकल्पयतीत्यर्थः । १५

श्लोकाः

वाचंपरंचरणपंजरतित्तिरीणांब्रह्मन्नरूपमुखरांशृणवामतुभ्यम् ॥ लब्धाकदंबरुचिरंकविटंकबिंबेयस्यामलातपरिधिःक्वचवल्कलंते १० किंसंभृतंरु
चिरयोर्द्विजशृंगयोस्तेमध्येकृशोवहसियत्रदृशिःश्रितामे ॥ पंकोरुणःसुरभिरात्मविषाणईदृग्येनाश्रमंसुभगमेसुरभीकरोषि ११ लोकंप्रदर्शयसुहृत्तमताव
कंमेयत्रत्यइत्थमुरसावयवावपूर्वौ ॥ अस्मद्विधस्यमनउन्नयनौबिभर्तिबह्वद्भुतंसरसरासमुधादिवक्त्रे १२ कावात्मवृत्तिरदनाद्धविरंगवातिविष्णोः
कलास्यनिमिषोन्मकरौचकर्णौ ॥ उद्विग्नमीनयुगलंद्विजपंक्तिशोचिरासन्नभृंगनिकरंसरइन्मुखंते १३ योसौत्वयाकरसरोजहतःपतंगोदिक्षुभ्रमन्भ्रम
तएजयतेक्षिणीमे ॥ मुक्तंनतेस्मरसिवक्रजटावरूथंकष्टोनिलोहरतिलंपटएषनीवीम् १४ रूपंतपोधनतपश्चरतांतपोघ्नंह्येतत्तुकेनतपसाभवतोपलब्धम् ॥
चर्तुंतपोर्हसिमयासहमित्रमह्यंकिंवाप्रसीदतिसवैभवभावनोमे १५

१०
—
१५

॥९॥

चूर्णिका ११ १२ हेसुहृत्तम मे तावकंलोकं दर्शय यत्रत्योजनः उरसाइत्थं अपूर्वावयवौबिभर्ति १३ १४ १५

CC-0. In Public Domain. Digitization by eGangotri

द्विजदेवेनब्रह्मणादत्तम् (हेद्विजेतिवा) दृङ्मनश्च (यस्मिंस्त्वयि) लग्नंसत्नापयाति । हेचारुशृंगियतस्तेचित्तंतत्रमामनुव्रतंत्वदधीनंनेतुमर्हसि । सचिव्यस्तवसख्योपिशिवाअनुकूलाः सत्यः मांप्र
तिसरंतुअनुवर्ततां । यद्वा एतावत्पर्यंतंयाअत्रमेसचिव्यः सख्यः शिवाः फेरवः ताः मतिसरंतु। निर्यांतु यद्वा वनवासेसहचर्योहरिण्यः शिवाः कल्याण्यः सत्यः प्रतिसरंतुमदक्षिणंगच्छंतु । १६ (इत्येवंलल
नायाअनुनयेऽतिविशारदः वशीकारेऽतिकुशलइत्यर्थः) ग्राम्येषु (विषयभोगकथासु) वैदग्ध्यं (पाटवं) यस्यास्तयापरिभाषयावाचासभाजयाभासपूजयामाससंमुखीचकारेत्यर्थः । (विबुधमतीर्नि
पुणबुद्धिःआधिकमानयामास) १७ (रूपंसौंदर्यम् । वयोयौवनम् । श्रीःसंपत्) बुद्ध्यादीनांद्वंद्वैक्यम् । (औदार्यमहत्वंदाक्षिण्यंवा । तेनपराक्षिप्तंआकृष्टंमनोयस्याःसातेनसहबहुकालंस्वस्याःदेवांगानात्वात्त
स्यचजंबूद्वीपपतित्वात्सुलभंदिव्यंभौमंचसुखंबुभुजे) १८ (नाभिः किंपुरुषः हरिवर्षः इलावृतः रम्यकः हिरण्मयः कुरुः भद्राश्वः केतुमालश्चेतिसंज्ञायेषांतान् । सातुतान् प्रतिवर्षं) १९ सूत्वाप्रसूय
(तद्गृहेपहायपुनर्ब्रह्माणं-)मुपतस्थेअभजत् । २० (अनुग्रहादेव) औत्पत्तिकेनस्वभावेनसंहननंदृढांगत्वं (बलंशक्तिः आत्मतुल्यनामानिस्वस्वनामसदृशनामानिजंबूद्वीपस्यवर्षाणिखंडानि) २१
कामानां (अतृप्तः) भोगैः (अलंभावमप्राप्तइत्यर्थः)अधिअधिकंमन्यमानः श्रुतिभिर्वेदोक्तैः कर्मभिःअवारुंधप्राप (यत्रलोके) मादयंतेमोदंते (अनेनयत्रापितृलोकस्तत्रैवाप्सरोलोकश्चेतिध्वनितम्) । २२ (सं
परेतेपरलोकंगतेमेरोर्दुहितॄः) पुत्रीइतिएवंभूताः संज्ञायासांता (मेरुदेव्याद्याः)परिणीतवंतः २३ इतिपंचमस्कंधेटीकायां द्वितीयोध्यायः ॥ २ ॥

नत्वांत्यजामिदयितंद्विजदेवदत्तंयस्मिन्मनोदृगपिनोनवियातिलग्नम् ॥ मांचारुशृग्यर्हसिनेतुमनुव्रतंतेचित्तंयतःप्रतिसरंतुशिवाःसाचिव्यः १६ ॥
॥ श्रीशुकउवाच ॥ ॥ इतिललनानुनयातिविशारदोग्राम्यवैदग्ध्ययापरिभषायातांविबुधवधूंविबुधमतिरधिसभाजयामास १७ साचततस्तस्यवी
रयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येणपराक्षिप्तमनास्तेनसहायुतायुतपरिवत्सरोपलक्षणंकालंजंबूद्वीपपतिनाभौमस्वर्गभोगान्बुभुजे १८ तस्यामुहवाआ
त्मजान्सराजवरआग्नीध्रोनाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नवपुत्रानजनयत् १९ सासूत्वाथसुतान्नवानुवत्सरंगृहएवा
पहायपूर्वचित्तिर्भूयएवाजंदेवमुपतस्थे २० आग्नीध्रसुतास्तेमातुरनुग्रहादौत्पत्तिकेनैवसंहननबलोपेताःपित्राविभक्ताआत्मतुल्यनामानियथाभागंजंबुद्वी
पवर्षाणिबुभुजुः २१ आग्नीध्रोराजाऽतृप्तःकामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याःसलोकतांश्रुतिभिरवारुंधायत्रपितरोमादयंते २२ संपरेतेपि
तरिनवभ्रातरोमेरुदुहितॄर्मेरुदेवींप्रतिरूपामुग्रदंष्ट्रींलतांरम्यांश्यामांनारींभद्रांदेववीतिमितिसंज्ञानवोदवहन् २३ इतिश्रीभा० पं० आग्नीध्रवर्णनंनामद्वि
तीयोध्यायः ॥ २

चूर्णिका १६ तपश्चरतांतपोमूर्तिइदंरूपंत्वयाकेनतपसालब्धं हे मित्र मयासहतपश्चर्तुंत्वमर्हसि त्वांअहंनत्यजामि इत्यादिश्रुत्वा अप्सराचतस्यराज्ञः बुद्धिशीलरूपवयःश्रियौदार्येणमो
हितासतीतेनसहअयुतायुतवर्षाणिभौमस्वर्गभोगान्बुभुजे १७ १८ १९ तस्यांआग्नीध्रः नाभिः १ किंपुरुषः २ हरिवर्षः ३ इलावृत्तः ४ रम्यकः ५ हिरण्मयः ६ कुरुः ७
भद्राश्वः ८ केतुमालः ९ इत्येतान् नवपुत्रान् अजनयत् साप्रतिवर्षंनवपुत्रान्सूत्वातंत्यक्त्वाब्रह्माणंययौ २० तेपुत्राः पित्रायथाविभागंदत्तानि स्वनाभाभिःख्यातानि जंबुद्वीपवर्षा
णिनवबुभुजुः २१ आग्नीध्रोपितस्यांअतृप्तः सन्तामेवध्यायन्अंतेतल्लोकंप्राप यत्रपितरःमोदंते २२ एवंसंपरेतेपितरिनवभ्रातरःमेरुदुहितॄः मेरुदेवीं १ प्रतिरूपां २ उग्रदंष्ट्रीम्
३ लताम् ४ रम्याम् ५ श्यामाम् ६ नारीम् ७ भद्राम् ८ देववीतिं ९ इतिनवउदवहन् २३ इतिपंचमेद्वितीयः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·पं तृतीयचरितंनाभेःपरंमंगलमीर्यते । यस्ययज्ञेप्रतीतःसन्पुत्रोभूदृषभोहरिः १ नाभिराग्नीध्रसुतः अपुत्रयामेरुदेव्याभार्ययासह (अवहितात्मासावधानचित्तः) १ प्रवर्ग्येषुतत्संज्ञकेषुकर्मसुप्रचरत्सु अ०
क्रियमोणषुसत्स्वित्यर्थः । द्रव्यादयः सप्तयेयोगाउपायास्तेषामुपपत्त्यासंपत्त्यादुराधिगमो दुष्प्रापोपिभागवतेषुवात्सल्यतया (वत्सलतया) कृपालुतया सुप्रतीकः शोभनावयवःसन्नात्मानमाविश्चकार । (दुर
धिगमत्वेहेतुः) अपराजितंस्वतत्रं । (तथापि) निजभक्तानांयेऽभिप्रेतार्थास्तेषां विधित्सया (चिकीर्षया) गृहीतमाकृष्टंहृदयं चित्तंयस्य । (अत्रहेतुः शुद्धभावेनयजतइतिकथंभूतमात्मानं) हृदयंगमं
टीका सुखकरं । यतो मनोनयनान्यानंदयंतियेऽवयवास्तैरभिरामंसुंदरम् २ अथहेत्यादिनिपातबाहुल्यंवाक्यालंकाराय आविष्कृतंभुजानांयुगलद्वयं चतुष्टयंयेनतं हिरण्मयंतेजोमयं पुरुषेषुविशिष्यतइतितथा ॥३॥
पुरुषोत्तममित्यर्थः । अर्हणेनअर्घ्येणसहोपतस्थुरभजन्नित्यन्वयः विलसन्श्रीवत्सएवललामंचिह्नं यस्य दरवरः शंखश्रेष्ठः वनरुहंपद्मम् । अछूरिचक्रं । अमृतमणिःकौस्तुभः एवमादिभिः उपलक्षितं (वि
॥११॥ शिष्टम्) ३ स्फुटकिरणाः येप्रवराः (श्रेष्ठाः ।) मणयो (रत्नानि) तन्मयानिमुकुटादीनि अंगानां (शिरःकर्णादीनां) भूषणानि तैर्विभूषितं बहुमानेदृष्टांतःअधना (दरिद्रा-)-इवोत्तमधनंनिधिम् ४
अर्हसीत्यादिनानिगदेनस्तुवंति । हेअर्हत्तमपरिपूर्णोपित्वमनुपथानांभृत्यानामस्माकमर्हणंमुहुःस्वयमेव स्वीकर्तुमर्हसि । नतुवयंस्तोतुंशक्ताइत्याहुः नमोनमइत्येतदेवास्माकंसद्भिरुपशिक्षितं । (नमस्कार
मात्रंकुरुतेतिशिष्टैरुपदिष्टम् त्वद्रूपस्यदुर्ज्ञेयत्वादित्यर्थः । तदेवाहुः । कोर्हतीति । प्रकृतिगुणानांव्यतिकरः प्रपंचस्तस्मिन्नेवमतिर्यस्यअतएवानीशः प्रकृतिपुरुषयोःपरस्य अतएवेश्वरस्यअर्वाक्तनाभिः
त्वामस्पृशंतीभिः प्रपंचांतर्गताभिः नामचरूपंचआकृतिश्चआकारः ताभिः स्वरूपनिरूपणंकर्तुंकोनामपुमानर्हति (नकोपित्वत्स्वरूपवर्णनेसमर्थइत्यर्थः) ५ सह्येतन्मात्रमेवार्हतिनाधिकमित्याहुः
सकलजननिकायवृजिनंनिरस्यतीतितथाशिवतमाः (मंगलतमाः) प्रवराश्चश्रेष्ठायेगुणगणास्तेषामेकदेशस्तस्यकथनाद्विनाअधिकं(किमपि) नार्हति ६

॥ ॥ श्रीशुकउवाच ॥ ॥ नाभिरपत्यकामोऽप्रजयामेरुदेव्याभगवंतंयज्ञपुरुषमवहितात्माऽयजत १ तस्यहवावश्रद्धयाविशुद्धभावेनयजतःप्रवर्ग्ये श्लोकः
षुप्रचरत्सुद्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयोगोपपत्त्यादुरधिगमोपिभगवान्भागवतवात्सल्यतयासुप्रतीकआत्मानमपराजितंनिजजनाभिप्रेतार्थविधि
त्सयागृहीतहृदयोहृदयंगमंमनोनयनानंदनावयवाभिराममाविश्चकार२अथहतमाविष्कृतभुजयुगलद्वयंहिरण्मयंपुरुषविशेषंकपिशकौशेयांबरधरमुरसिवि १/६
लसच्छ्रीवत्सललामंदरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिरुपलक्षितं ३स्फुटकिरणप्रवरमुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुराद्यंगभूषणविभूषि
तमृत्विक्सदस्यगृहपतयोऽधनाइवोत्तमधनमुपलभ्यसबहुमानमर्हणेनावनतेशीर्षाणउपतस्थुः ४ ॥ ॥ ऋत्विजऊचुः ॥ ॥ अर्हसिमुहुरर्हत्तमार्हणम
स्माकमनुपथानांनमोनमइत्येतावत्सुदुपशिक्षितंकोऽर्हतिपुमान्प्रकृतिगुणव्यतिकरमतिरनीशईश्वरस्यपरस्यप्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभीरूप
निरूपणम् ५ सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ६

॥ श्रीशुकउवाच ॥ ॥ आग्नीध्रपुत्रः नाभिःअपत्यकामः सन्मेरुदेव्यापत्न्यासहयज्ञपुरुषंअयजत् १ तत्रयज्ञेश्रद्धयाविशुद्धभावेनसम्यक्यजतः तस्यसतः वात्सल्यात्द्वि
चूर्णिका भुजः सर्वालंकारयुक्तःभगवान्आविर्बभूव २ तदाआविष्कृतभुजचतुष्टयंतेजोमयंकौशेयांबरधरंउरासिविलसच्छ्रीवत्सलांछनंशंखादिभिरुपलक्षितंमुकुटकुंडलकटककटि ॥११॥
सूत्रहारकेयूरनूपुराद्यंगभूषणभूषितं हर्षिद्मासर्वेऋत्विगाद्याः नम्राः संतः तंपूजयित्वातुष्टुवुः ३ ४ हेपूर्ण त्वद्भृत्यानांअस्माकं तवार्हणंनमोनमः इत्येवसद्भिःउपशिक्षितं
तवस्वरूपवर्णनंकर्तुंकोनामपुमान्अर्हति ५ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.पं वाङ्मनसागोचरोपित्वंभक्तानांसुखाराध्यएवेत्याहुः (परिजनेति ।) हेपरम परिजनैः सेवकैरनुरागेण विरचितायेशबलसंशब्दा गद्गदाक्षराः स्तुतयः सलिलं (जलं)चसितकिसलयाश्चशुद्धपल्लवाः शिल अ०
तिपाठे शिलंकुशादिमंजरीएवमादिभिः संभृतयासंपादितयापूजयापरितुष्यसि। ७अथेतिप्रकारांतरे। अन्यथातु अनयाइज्यया यागेनापिउरुभारभरया अनेकांगसमृद्ध्यापिभवतः समुचितंअपेक्षितं प्रयो
जनं नैवपश्यामः। ८ अत्रहेतुः। आत्मनः स्वतएवअनुसवनं सर्वदाअंजसासाक्षात् अव्यतिरेकेणसमन्वयेन बोभूयमाना अतिशयेनभवंतः येअशेषाः पुरुषार्थाः तेस्वरूपंयस्यपरमानंदस्य। नचैवंसत्यपि
टीका यागानर्थक्यमित्याहुः किंत्विति । सकामानामस्माकमेवैतदुपपद्यतेनतवेत्यर्थः (हेनाथ) ९स्वोपयोगमेवप्रदर्शयंतितत्चथेति । बालिशानांमूढानांअतएवात्मनः परंश्रेयः अविदुषांप्रकर्षयुक्तयाकरुणयापरमे ॥३॥
भ्योपिपरमपुरुषस्त्वंमोक्षाख्यंस्वमहिमानंउपकल्पयिष्यन्चकारात्कामितंच । नापचितः अनपचितः अपूजितएवपूजानपेक्षत्वात्स्वयमेवआत्मनैवउपलक्षितः दृष्टोसि । इतरवत्सापेक्षवत् (यद्वा) बालि
॥१२॥ शानांबालानांपितृवत्) १० यद्यपित्वंवरान्दातुमाविर्भूतोसितथापिहेअर्हत्तमराजर्षेर्बर्हिषियज्ञेनिजपुरुषाणांत्वद्भक्तानामस्माकंईक्षणविषयोभगवान्यर्हियदाआसीत्तदाह्ययमेववरः संजातः ११ दर्श
नस्यदुर्लभतामाहुः असंगेननिशितंवैराग्येण (तेजितं) यत्ज्ञानंसएवानलस्तेनविधूताअशेषामलायेषाम्। अतोभवतइवस्वभावोयेषाम् । तानेवाह । आत्मारामाणां (स्वात्मन्येवरममाणानां)एवंभूता
नांमुनीनामपिपरममंगलायनंगुणगणकथनमेवनतुदर्शनंयस्य । अतस्तैरनवरतंपरिगुणिताअभ्यस्तागुणगणायस्येतितत्संबोधनम् १२ दर्शनेनैवकृतार्थाअपिवरमेकंप्रार्थयंते । अथेति । स्मरणायविवशा
नांत्वांस्मर्तुमशक्तानांनः (दुरवस्थानंसशोकमवस्थानंदुःखस्थानंप्रवासादिवा । तत्रज्वरदशायांमरणदशायांवाकथमपीवचनगोचराणिभवंतु) १३ अन्यच्चप्रार्थनीयमस्तीत्याहुः । किंचेति । आ
शिषामैहिकानांकामानांस्वर्गापवर्गयोरपीश्वरंत्वामुपधावति (शरणंव्रजाति) प्रजायां (अपत्ये) एव अर्थः पुरुषार्थइतिप्रत्ययो (ज्ञानं) यस्य । अधनोयथाफलीकरणंतुषकणादिकंआशासानोधनदं
उपधावति १४

परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वांकुरैरपिसंभृतयासपर्ययाकिलपरमपरितुष्यसि ७ अथानयापिनभवतइज्ययो श्लोकः
रुभारभारयासमुचितमर्थमिहोपलभामहे ८ आत्मनएवानुसवनमंजसाऽव्यतिरेकेणबोभूयमानाशेषपुरुषार्थस्वरूपस्यकिंतुनाथाशिषआशासानानामेतद
भिसंराधनमात्रंभवितुमर्हति ९ तद्यथाबालिशानांस्वयमात्मनःश्रेयःपरमविदुषांपरमपरमपुरुषःप्रकर्षकरुणयास्वमहिमानंचापवर्गाख्यमुपकल्पयिष्यन्स्व ७/१४
यंनापचितएवेतरवदिहोपलक्षितः १० अथायमेववरोह्यर्हत्तमयर्हिबर्हिषिराजर्षेर्वरदर्षभोभवान्निजपुरुषेक्षणविषयआसीत् ११ असंगनिशितज्ञानानलवि
धूताशेषमलानांभवत्स्वभावानामात्मारामाणांमुनीनामनवरतपरिगुणितगुणगणपरममंगलायनगुणगणकथनोसि १२ अथकथंचित्स्खलनक्षुत्पतनजृ
म्भणदुरवस्थानादिषुविवशानांनःस्मरणायज्वरमरणदशायामपिसकलकश्मलनिरसनानितवगुणकृतनामधेयानिवचनगोचराणिभवंतु १३ किंचायंराज
र्षिरपत्यकामःप्रजांभवादृशीमाशासानईश्वरमाशिषांस्वर्गापवर्गयोरपिभवंतमुपधावतिप्रजायामर्थप्रत्ययोधनदमिवाधनःफलीकरणम् १४ ॥१२॥

चूर्णकी हेभगवन् त्वंनः वरान् दातुंआविर्भूतोसि तथापित्वद्दर्शनमेवअस्माकं वरोस्ति ७ ८ ९ १० ११ हेभगवन् भक्तैः अर्पितजलपल्लवतुलसीदूर्वांकुरैरपि त्वंतुष्यसि १२ अतः
अनेनराजकृतयज्ञेनवयंइच्छितार्थंलभामहे १३ हेहरेअयंराजर्षिः भवादृशींप्रजांइच्छति तांसंपादय १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदंचनातिचित्रमित्याहुः । कइति । इहसंसारेतेतवापराजितयामाययाअनवसितपदव्याअलक्षितमार्गयाअपराजितः कोवै नकोपि (त्वामेकंविनासर्वोपितयावशीकृतएवेत्यर्थः) अतस्तयाऽनावृतमतिः अ०
आ. पं. कः अतएवविषयाएवविषंतस्यरयावेगास्तैरनावृताप्रकृतिर्यस्यसकः (नकोपिसर्वोपिआवृतस्वभावएवेत्यर्थः) यतोऽनुपासितमहच्चरणः । अतस्त्वन्मायामोहितस्यैवमाशंसाघटतइत्यर्थः १५ अदभ्रकर्तः हे
बहुकार्यकारिन्अल्पीयसेकार्यायत्वंयत्यस्मात्इहसमाहूतोसि । तत्रप्रजायांअर्थधीः (पुरुषार्थबुद्धि-)–र्येषांमंदानांतेषांनोयद्देवहेलनं (देवस्यतव) अवज्ञानंतत् (हेदेवदेव) सर्वान्प्रतितवसाम्येन (अ
टीका वैषम्येण) हेतुनाप्रतिबोद्धुंसोढुमर्हसि । १६ इतिनिगदेनगद्यात्मकस्तोत्रेण (अनिमिषाणांदेवानांऋषभोभगवान्) वर्षधरोभारतवर्षपतिः नाभिः तेनाभिवादितायेऋत्विजस्तैरभिवंदितौचरणौयस्य १७ ॥४॥
(हेऋषयः अवितथगीर्भिः सत्यवचनैः यूयंतुसत्यवचसः । वरस्त्वसुलभः) असुलभत्वेहेतुः ममाहमेवाभिरूपः सदृशः (नान्यः) कैवल्यत्वात् । अद्वितीयत्वात् । द्विजेषुदेवाइवब्राह्मणास्तेषांकुलं । (तद्वचनं
हिमद्वचनमेवेत्यर्थः) "अहोबतानुकंपायांखेदेसंबोधनेपिच"१८ (ततः कारणात्) आग्नीध्रीयेनाभौ । १९ (निशामयंत्यापश्यंत्याः) पतिंनाभिं । २० हेविष्णुदत्त तस्य (नाभेः) अवरोधायनेअंतःपुरेमेरु
॥१३॥ देव्यांशुक्लया (तनुवा) शुद्धसत्त्वमूर्त्याऽवततार । केषांधर्मान् । वातरशनानांदिग्वाससां । पाषंडिव्यावृत्त्यर्थमाह । श्रमणानांतपस्विनां । ऋषीणांज्ञानिनां । ऊर्ध्वमंथिनांनैष्ठिकब्रह्मचारिणाम् । २१
इतिपंचमस्कंधेटीकायांतृतीयोध्यायः ३ ॥ ॥ चतुर्थादित्रिभिःप्रोक्तमृषभस्येहितंमहत्। लोकार्थं येनसत्कर्म नैष्कर्म्यंचनिदर्शितं॥ १ ॥चतुर्थे शतपुत्रस्यराज्यंतस्योपवर्ण्यते । यस्यराज्येजनःसर्वःसंतोषामृत
निर्वृतः॥२॥ अभिव्यज्यमानानिभगवल्लक्षणानिपादतलादिषुवज्रांकुशादीनियस्य । महाविभूतिःसर्वसंपत्तिः साम्यादिभिः सह(दिनेदिने)वर्धमानप्रभावं (तंनाभेः पुत्रं प्रकृतयोअमात्यादयः पृथ्वीतलपाल
नायजगृधुः अभिकांक्षंतिस्म। १ ।

कोवाइहतेऽपराजितोऽपराजितयामाययाऽनवसितपदव्यानावृतमतिर्विषयाविषरयानावृतप्रकृतिरनुपासितमहच्चरणः १५ यद्दुहवाबतवपुनरदभ्रकर्तरि श्लोकाः
इहसमाहूतस्तत्रार्थधियांमंदानांनस्तद्यद्देवहेलनंदेवदेवार्हसिसाम्येनसर्वान्प्रतिबोद्धुमविदुषाम् १६ ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिनिगदेनाभिष्टूयमानो
भगवाननिमिषर्षभोवर्षधराभिवादिताभिवंदितचरणःसदयमिदमाह१७ ॥ ॥श्रीभगवानुवाच॥ ॥ अहोबताहमृषयोभवद्भिरवितथगीर्भिर्वरमसुलभमभि १९/१
याचितोयदमुष्यात्मजोमयासदृशोभूयादितिममाहमेवाभिरूपःकैवल्यादथापिब्रह्मवादोनमृषाभवितुमर्हतिममैवहिमुखंयद्द्विजदेवकुलम् १८ ततआग्नी
ध्रीयेंशकलयावतरिष्याम्यात्मतुल्यमनुपलभमानः १९ ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिनिशामयंत्यामेरुदेव्याःपतिमभिधायांतर्दधेभगवान् २० ब
र्हिषितस्मिन्नेवविष्णुदत्तभगवान्परमर्षिभिःप्रसादितोनाभेःप्रियचिकीर्षयातदवरोधायनेमेरुदेव्यांधर्मान्दर्शयितुकामोवातरशनानांश्रमणानामृषीणामूर्ध्वमं
थिनांशुक्लयातनुवावततार २१ इतिश्रीभा० म० पं०स्कंधेनाभिचरित्रेतृतीयोध्यायः ३ ॥ श्रीशुकउवाच ॥ ॥ अथहतमुत्पत्त्यैवाभिव्यज्यमानभग
वल्लक्षणंसाम्योपशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावंप्रकृतयःप्रजाब्राह्मणादेवताश्चावनितलसमवनायातितरांजगृधुः १

एवंस्तुतः सन् भगवानुवाच १५ १६ १७ हेऋषयः ब्रह्मवादः मृषाभवितुंनार्हतिअतः अहंकलयाअस्यपुत्रत्वेनअवतरिष्यामि १८ १९ इत्युक्त्वाभगवान्अंतर्दधे २० ॥१३॥
चूर्णिका ततः नाभेः प्रियचिकीर्षयामेरुदेव्यांदिग्वाससांतपस्विनांनैष्ठिकब्रह्मचारिणांधर्मान्दर्शयितुंसत्त्वमूर्त्याभगवान्अवततार २१ ॥ इतिपंचमेतृतीयः ॥ ३ ॥ ॥ ॥ श्रीशुकउ
वाच ॥ ॥ अथउत्पत्त्यैवतं भगवल्लक्षणयुतं ज्ञात्वा अमात्यादयः ब्राह्मणाश्च अयं नःराजा अस्तुइतिइच्छां चक्रुः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वर्ष्मणादेहेन । तस्यविशेषणद्वयंवरीयसाश्रेष्ठतमेन । बृहंतः श्लोकाः पद्यानिकवीनांयस्मिन्तेनच । ओजस्तेजः वीर्यंप्रभावः शौर्यंउत्साहः एतैर्गुणैश्चातिश्रेष्ठत्वादृषभःइमिनामचकार । (ऋषभः श्रेष्ठः) २ तस्यवर्षेमंडले । (अजनाभसंज्ञकंस्वमंडलंवृष्टियुक्तमकरोत्) ३ (सुप्रजस्त्वंसत्पुत्रत्वं) अवरुध्यप्राप्य । स्वैरंइच्छयागृहीतोनरलोकसमानधर्मो मनुष्याकारोयेनतम्)। अतएवमाययास्वपुत्रइतिविलसितामतिर्यस्य ४ आपौरप्रकृति । पारान्प्रकृतीश्चाभिव्याप्य विदितोनुरागोयस्मिन् (पौराणांप्रकृतीनांचानुरागोयांनिजपुत्रेस्तितंविज्ञायेत्यर्थः) कथंभूतोनाभिः । जनपदः जनाः पौरादयः पदंप्रमाणंयस्यसः । आत्मजंधर्ममर्यादारक्षणार्थमभिषिच्यब्राह्मणानामुत्संगेनिधाय(नीतिधर्मशिक्षणार्थंब्राह्मणाधीनंकृत्वेत्यर्थः ।) विशालायांबदरिकाश्रमे । प्रसन्नंपरानतुद्वेजकम् निपुणंचतीव्रंतेनउपासीनः) सेवमानः तन्महिमानंजीवन्मुक्ततामवाप ५ (हेपांडवेययस्यनाभेः हप्रसिद्धमुदाहरंति) नाभेः तत्प्रसिद्धंकर्मअनुतदनंतरंकोनुपुमान्चरेत्नकोपीत्यर्थः । ६ मंगलैर्दक्षिणाभिः पूजिताः संतः ओजसामंत्रबलेन । ७ (अनुमन्यमानः जानन्) अन्येषांग्रहणायप्रदर्शितोगुरुगृहवासोयेन । (लब्धदक्षिणैः समावर्तनपूर्वकंगृहाश्रमाय दत्तानुज्ञः) अनुशिक्षमाणो अनुशिक्षयन्उभयविधंश्रौतस्मार्तलक्षणंकर्मविधिंअभियुंजन् अनुतिष्ठन् (समाम्नायैः कर्मकांडलक्षणैराम्नातम् विहितंइंद्रेणदत्तायां) जयंती (-संज्ञायां) भार्यायां (लक्षणैरात्मसमानानां) आत्मजानांशतंजनयामास ८

श्लोकाः २/८

तस्यहवाइत्थंवर्ष्मणावरीयसाबृहच्छ्लोकेनचौजसाबलेनश्रियायशसावीर्यशौर्याभ्यांचापिताऋषभइतीदंनामचकार २ तस्यहींद्रःस्पर्द्धमानोभगवान्वर्षेनववर्ष तदवधार्यभगवानृषभदेवोयोगेश्वरःप्रहस्यात्मयोगमाययास्ववर्षमजनाभंनामाभ्यवर्षत् ३ नाभिस्तुयथाभिलषितंसुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलोगद्गदाक्षरयागिरास्वैरंगृहीतनरलोकसधर्मंभगवंतंपुराणपुरुषंमायाविलसितमतिर्वत्सताततेतिसानुरागमुपलालयन्परांनिर्वृतिमुपगतः ४ विदितानुरागमापौरप्रकृतिजनपदोराजानाभिरात्मजंसमयसेतुरक्षायामाभिषिच्यब्राह्मणेषूपनिधायसहमेरुदेव्याविशालायांप्रसन्ननिपुणेनतपसासमाधियोगेननरनारायणाख्यंभगवंतंवासुदेवमुपासीनःकालेनतन्महिमानमवाप ५ यस्यहपांडवेयश्लोकावुदाहरंति ॥कोनुतत्कर्मराजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्यहरिःशुद्धेनकर्मणा ६ ब्रह्मण्योन्यःकुतोनाभेर्विप्रामंगलपूजिताः ॥ यस्यबर्हिषियज्ञेशंदर्शयामासुरोजसा ७ अथहभगवानृषभदेवःस्ववर्षंकर्मक्षेत्रमनुमन्यमानःप्रदर्शितगुरुकुलवासोलब्धवरैर्गुरुभिरनुज्ञातोगृहमेधिनांधर्माननुशिक्षमाणोजयंत्यामिंद्रदत्तायामुभयलक्षणंकर्मसमाम्नायाम्नातमभियुंजन्नात्मजानामात्मसमानानांशतंजनयामास ८

चूर्णिका

सुयशसावीर्यशौर्यादिगुणैः श्रेष्ठत्वात् तस्यऋषभ इतिनामपिताचक्रे २ तदास्पर्धमानः इंद्रः तस्मिन्वर्षे नववर्षतदाऋषभदेवः प्रहस्य स्वयोगबलेनअजनाभे स्ववर्षेवृष्टिंचकार ३ ४ नाभिः यथाकालेऋषभदेवंराज्येभिषिच्य ब्राह्मणेषु उपनिधायपत्न्यासहबदरिकाश्रमंगत्वा नरनारायणंउपासीनः कालेनमुक्तिं प्राप ५ एवंनाभेः प्रसिद्धंकर्म कः पुमान् आचरेत् यस्यशुद्धकर्मणाहरिः अपत्यतांप्राप्तः ६ ७ अथभगवान् ऋषभदेवः लोकशिक्षार्थंगुरुगृहे ब्रह्मचर्यादिकृत्वा गुर्वनुज्ञया गृहधर्मान् शिक्षयन् इंद्रदत्तकन्यायांजयंत्यांआत्मसमान् शतपुत्रान् जनयामास ८

॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (वर्षखंडंयेनभरतेनाधिकृतत्वात् भारतमितिनाम्नाकथयंति) ९ तंभरतमनुकुशावर्तादयोनवपुत्रानवतेः (पुत्रेभ्यः) प्रधानाज्येष्टाः १० तदनंतरंकविप्रमुखा नवभागवतधर्मप्रदर्शकाः वसुदेवनारदयोः संवादोयस्मिन् (भगवतोमहिम्नाउपबृंहितंपूरितं) उपरिष्टादेकादशेस्कंधे ११ महाशालीनाः अतिविनीताः (महाश्रोत्रियाः महांतोवैदिकाः ब्राह्मणावेदार्थज्ञाविप्रकर्मनिष्ठितत्वेनतच्छब्दवाच्या इतिवाजायंते याजयंत्याः पुत्राः) १२ (अनर्थानांजन्मादीनांपरंपरानित्यनिवृत्तायस्मात् । यतः) केवलः शुद्धो (यआनंदानुभवस्तद्रूपः ईश्वरोपि) विपरीतवत् अनीश्वरवत्कर्माणिकुर्वन् (गृहेषुलोकं) नियमयत् नियमितवान् । पाठांतरेनितरामरमयत् । कर्मकरणेहेतुः । अनुगतंउत्सन्नं धर्मंस्वयमाचरणेन (अनुष्ठानेन) अतद्विदांउपशिक्षयन् (अनुष्ठापयन्) कथं धर्मादीनां अवरोधेनसंग्रहेण । (प्रजासंततिः) आनंदोभोगः । अमृतंमोक्षः । (अनुष्ठापनेहेतवः समोरागद्वेषशून्यः यतउपशांतः अथापिमैत्रः भूतहितेरतः यतः कारुणिकः) १३ शीर्षण्यः श्रेष्ठः तेनआचरितंतत्तदनुवर्ततेयतः १४ सकलोधर्मोयस्मिन्तत् ब्राह्मंगुह्यंवेदानांरहस्यंयद्यापि स्वेनैवविदितमेवतथापि (ब्राह्मणैर्दर्शितेनप्रकारेण) ब्राह्मणान्पृष्ट्वैव (सामादीन्) करोतीत्यर्थः । १५ द्रव्यादिभिरुपचितैः (समृद्धैः प्राथमकल्पिकैः) यज्ञैरिष्टवान् । तत्रवयोयौवनं "युवैवधर्ममन्विच्छेदि"तिवचनात् । (श्रद्धाआस्तिक्यबुद्धिः ।) विविधोद्देशाः नानादेवतोद्देशाः यथोपदेशंयथाविधि । (शतकृत्वः शतवारं) १६ (भगवताईश्वरेण ।) अन्यस्मात्सकाशात् आत्मनःकश्चिदपिकिमपिकथंचनापिनवांछति (नचकदाचिदन्यदीयमवेक्षतेपीत्यर्थः) भर्तरिऋषभदेवे (अनुसवनं) प्रतिक्षणंउल्लसितस्नेहोद्रेकंविनाअन्यत्रवांछाति । अन्यत्रइच्छानुदयेदृष्टांतः । अविद्यमानामिवखपुष्पादिकमिवयथाकश्चिदपिखपुष्पादिकंनेच्छतितद्वत् । १७

॥१५॥ येषांखलुमहायोगीभरतोज्येष्ठःश्रेष्ठगुणआसीद्येनेदंवर्षभारतमितिव्यपदिशंति ९ तमनुकुशावर्त्तइलावर्त्तोब्रह्मावर्त्तोमलयःकेतुर्भद्रसेनइंद्रस्पृग्विदर्भःकीकट इतिनवनवतिप्रधानाः १० कविर्हरिरंतरिक्षःप्रबुद्धःपिप्पलायनः ॥ आविर्होत्रोथद्रुमिलश्चमसःकरभाजन इतिभागवतधर्मदर्शनानवमहाभागवतास्तेषांसुचरितंभगवन्माहिमोपबृंहितंवसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः ११ यवीयांसएकाशीतिर्जायंतेयाःपितुरादेशकरामहाशालीनामहाश्रोत्रियायज्ञशीलाःकर्मविशुद्धाब्राह्मणाबभूवुः १२ भगवानृषभसंज्ञआत्मतंत्रःस्वयंनित्यनिवृत्तानर्थपरम्परःकेवलानंदानुभवईश्वरएवविपरीतवत्कर्माण्यारभमाणःकालेनानुगतंधर्ममाचरणेनोपशिक्षयन्नतद्विदांसमउपशांतोमैत्रःकारुणिकोधर्मार्थयशःप्रजानंदामृतावरोधेनगृहेषुलोकंन्ययमयत् १३ यद्यच्छीर्षण्याचरितंतत्तदनुवर्त्ततेलोकः १४ यद्यपिस्वविदितंसकलधर्मंब्राह्मंगुह्यंब्राह्मणैर्दर्शितमार्गेणसामादिभिरुपायैर्जनतामनुशशास १५ द्रव्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैःसर्वैरपिक्रतुभिर्यथोपदेशंशतकृत्वइयाज १६ भगवतर्षभेणपरिरक्ष्यमाणएतस्मिन्वर्षेनकश्चनपुरुषोवांछत्यविद्यमानमिवात्मनोन्यस्मात्कथंचनाकिमपिकर्हिचिदवेक्षतेभर्तर्यनुसवनंविजृंभितस्नेहातिशयमंतरेण १७

श्लोकाः ९/१७ ॥१५॥

चूर्णिका येषांमध्येमहायोगीज्येष्ठः भरतः आसीत् येनेदंवर्षभारतमितिव्यपदिशंति ९ तमनुकुशावर्तः १ इलावर्तः २ ब्रह्मावर्तः ३ मलयः ४ केतुः ५ भद्रसेनः ६ इंद्रस्पृक् ७ विदर्भः ८ कीकटइतिनव ९ नवतिमुख्याः १० कविर्हरिरंतरिक्षःप्रबुद्धःपिप्पलायनः आविर्होत्रोथद्रुमिलश्चमसःकरभाजनः एतेनवमहाभागवताः एतेषांचरितं एकादशेवक्ष्यामः ११ एकाशीतिमिताः कनिष्ठाः ब्राह्मणाः बभूवुः १२ अथभगवान्ऋषभः गृहस्थधर्मंशिक्षयन्स्वयंगृहस्थाश्रमंचकार १३ यद्यत्श्रेष्ठः आचरति तदनुलोकःवर्तते १४ ससर्वैःक्रतुभिः शतवारंईश्वरं इयाज १५ १६ यस्यराज्येकश्चनपुरुषः आत्मनः अन्यस्मात्किमपिनवांछतिअन्यदीयमपिनावेक्षते १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवहितात्मनः संयतचित्तानपिप्रजानुशासनमुपशिक्ष्यन्नितिहवक्ष्यमाणमुवाच १८ इतिपंचमेस्कंधेटीकायांचतुर्थोध्यायः ४ पंचमेमोक्षधर्मोपदेशैःपुत्रानुशासनम् । उक्तंपरमहंस्यंचतस्यद्वंद्वतितिक्षया ।
१ विड्भुजामपिसूकरादीनां येसंतितान्कष्टान्दुःखदान् कामान् विषयान् नार्हति तद्योग्योऽयंमनुष्यदेहोनभवति । (हेपुत्रकाः) दिव्यमुत्कृष्टं (निवृत्तिलक्षणं) येनतपसा (सत्त्वमंतःकरणम् ।)
यस्मात्शुद्धात्सत्त्वात्अनंतं ब्रह्मसुखंभवति १ मोक्षबंधयोर्निदानमाह । महत्सेवामिति । तमसः संसारस्यद्वारंयोषितांयेसंगिनस्तेषांसंगम् । महतांलक्षणमाहसार्धेन महांतइति । साधवः सदाचाराः २
मयिईशेकृतंसौहृदमेव(प्रीतिरेव)अर्थः पुरुषार्थोयेषाम् । वाशब्देनान्यनिरपेक्षस्यैवास्यलक्षणत्वंदर्शयति । देहंबिभर्तीतिदेहंभराविषयवार्तेव नधर्मविषयायेषुतेषुजनेषु गृहेषुचजायादिषुक्तेषु रातिर्मित्रंधनं
वापाठांतरे जायादिप्रदेषुनप्रीतियुक्ताः (लोकेजने) यावदर्थं यावत्प्रयोजनमेवार्थोयेषांते इतिमध्यमपदलोपीसमासः । देहनिर्वाहाधिकस्पृहाशून्याइत्यर्थः । ३ कामान्नार्हतीतियदुक्तंतदुपपादयति ।
नूनमिति । यत्यदाइंद्रियप्रीतयेआपृणोतिव्याप्रियतेतदाप्रमत्तः सन्विकर्मपापंनूनंकुरुते । यतोविकर्मणः प्राचीनादयंक्लेशदोदेहोजातः । तस्यैवकरणंपुनः साधुनमन्ये । (असन्नपिनश्वरोपि ।) ४ दे
हादेर्नश्वरत्वात्कियानयमनर्थ इत्याशंक्याह । पराभवोदेहादिनास्वरूपाभिभवः अज्ञानकृतः तावद्भवति । (नजिज्ञासतेनविचारयति ।) तत्रहेतुः यावत्क्रियाः (व्यापाराः) स्युः तावदिदंमनोहि
(कर्मात्मकं) कर्मस्वभावमेवस्यात् । येनकर्मात्मकेनमनसा ५ उक्तमुपसंहरति एवंपूर्वकृतंकर्मकर्तृभूतं । मनः कर्मभूतंवशंप्रयुंक्तेपुनः पुनः कर्मनिष्ठंकरोति । जीवन्मुक्तकर्मव्यावृत्त्यर्थमाह । अविद्ययेति ।
अज्ञानेनआत्मनिउपधीयमानेआच्छाद्यमानेसति । एवंमनः कर्तृ । पुरुषंकर्मवशंप्रयुंक्तेइतिवा । (तथाचयावन्नप्रीतिः स्नेहः) ६

श्लोकाः

सकदाचिदटमानोभगवानृषभोब्रह्मावर्त्तगतोब्रह्मर्षिप्रवरसभायांप्रजानांनिशामयंतीनामात्मजानवहितात्मनःप्रश्रयप्रणयभरसुयंत्रितानप्युपशिक्षयन्निति
होवाच १८ इ० भा० म० पं० ऋषभदेवानुचरितेचतुर्थोध्यायः ४ ॥ ॥ ऋषभउवाच ॥ ॥ नायंदेहोदेहभाजांनृलोकेकष्टान्कामानर्हतेविड्भुजांये ॥
तपोदिव्यंपुत्रकायेनसत्त्वंशुध्येद्यस्माद्ब्रह्मसौख्यंत्वनंतम् १ महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसंगिसंगम् ॥ महांतस्तेसमचित्ताःप्रशांताविमन्यवःसु
हृदःसाधवोयेर२येवामयीशेकृतसौहृदार्थाजनेषुदेहंभरवार्तिकेषु ॥ गृहेषुजायात्मजरातिमत्सुनप्रीतियुक्तायावदर्थाश्चलोके३ नूनंप्रमत्तःकुरुतेविकर्मयदिंद्रियप्री
तयआपृणोति ॥ नसाधुमन्येयतआत्मनोयमसन्नपिक्लेशदआसदेहः ४ पराभवस्तावदबोधजातोयावन्नजिज्ञासतआत्मतत्त्वम् ॥ यावत्क्रियास्तावदिदंमनो
वैकर्मात्मकंयेनशरीरबंधः ५ एवंमनःकर्मवशंप्रयुंक्तेअविद्ययात्मन्युपधीयमाने ॥ प्रीतिर्नयावन्मयिवासुदेवेनमुच्यतेदेहयोगेनतावत् ६

१८/६

चूर्णिका

सःऋषभःकदाचित्पृथिव्यांभ्रमन्ब्रह्मावर्तंगतः सन् ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयंतीनां ज्ञानिनोपि पुत्रान् प्रजानांअनुशासनार्थं उपशिक्षयन् इतिहोवाच १८॥इतिपंचमेच
तुर्थः४ ॥ ॥ ऋषभउवाच ॥ ॥ हेपुत्रकाः देहभाजामयंदेहः विड्भुजामिवविषयभोगार्थं न तर्हिदिव्यंतपः कर्तुंयोग्योस्ति येनतपसाअनंतंब्रह्मसुखंभवति १ किंच विमुक्तेः
द्वारंमहत्सेवामाहुः योषितांसंगिसंगंतमोद्वारमाहुः महतांलक्षणमाह येसमचित्ताः शांताः सर्वसुहृदः विमन्यवः २ एवंभूताः तेमहांतः ३ अथअयंलोकः
यदाइंद्रियप्रीतयेव्याप्रियते तदापापंकरोतितस्मात् दुःखदः देहोभवति ४ यदातु यावत् वासुदेवे प्रीतिं न करोति तावत् देहेननमुच्यते ५ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰पं॰ नकेवलंदेहयोगमात्रंअपित्वनर्थांतरंचेत्याह । यदागुणानामिंद्रियाणांईहांचेष्टांअयथामिथ्याआत्मीयानभवतीतिविपश्चित्विवेकीसन्नुपश्यतीतिपाठेअयथाआत्मीयत्वेनेत्यर्थः तत्रतदासहसागतस्मृतिः अ०
स्वरूपस्मृतिशून्यः सन्अज्ञोमूढः मैथुन्यंमैथुनसुखप्रधानंगृहंप्राप्यतापान्विंदति ७ ननुयथोपयोगंस्त्रियामिथुनीभूयसुखमात्रमनुभवतःकुतस्तापाःस्युस्तत्राह । पुंसइति । (तयोः स्त्रीपुंसयोः) प्रत्येकंतयो
रेकैकोहृदयग्रंथिरस्त्येव । एनं मिथःपरस्परं स्थूलंअन्यंहृदययोर्ग्रंथिंदुर्भेदंवदांति । कुतइत्यतआह । अतः अस्मान्मिथुनीभावात् । प्रत्येकंहृदयग्रंथिनातुदेहेंद्रियमात्रेऽहंममेतिमोहः । अस्मात्तु(प्राप्ते)–
टीका -गृहादिभिर्विषयभूतैर्महान्मोहोभवेदित्यर्थः ८ कदातर्हितस्यनिवृत्तिरतआह । यदाऽस्यजनस्यकर्मभिरनुबद्धोदृढोमनोरूपोहृदयग्रंथिः (आश्लथेत)शिथिलोभवेत् । तदास्मात्मिथुनीभावात्निवर्ततेततश्च ॥५॥
हेतुमहंकारंत्यक्त्वामुक्तः सन्परंपदंयाति ९ हेतुमतिहायेत्युक्तंतत्रपंचविंशतिसाधनान्याहचतुर्भिः । हंसेमयिगुरौ भक्तिःसेवा । अनुवृत्तिस्तत्परता । विगततृष्णया (तृष्णात्यागेनेत्यर्थः) सर्वत्रलोकांत
॥१७॥ रेपिव्यसनावगत्यादुःखानुसंधानेन । ईहानिवृत्त्याकाम्यकर्मत्यागेन १० मदर्थैः कर्मभिः अहमेवदेवोयेषांतै-(-र्महद्भिः) संगात् (भूतेषुनिर्वैरेणसाम्येनउपशमेनच) हेपुत्राः देहगेहयोरात्मबुद्धेः अहंममेति
बुद्धेः (जिहासयाहानेच्छया) ११ अध्यात्मयोगेनअध्यात्मशास्त्राभ्यासेन (विविक्तसेवयाएकांतसेवनेनप्राणेंद्रियमनसामभिजयेनवशीकरणेन) सध्यक्सम्यगितिसर्वत्रसंबंधः असंप्रमादेनकर्तव्यस्याप
रित्यागेन । १२ सर्वत्रमद्भावोमद्भावनातत्रविचक्षणेनर्निपुणेनमद्भावनायुक्तेनेत्यर्थः एतादृशेनविज्ञानविराजितेनअनुभवपर्यंतेनज्ञानेन । योगेनसमाधिनाधृत्युद्यमसत्त्वयुक्तः धैर्यप्रयत्नविवेकैर्युक्तः सन्अहं
काराख्यमुपाधिंव्यपोहेत्निरस्येत् १३ ततः साधनादुपरमेदित्याह । कर्माण्याशेरतेयस्मिन् (तादृशंअविद्ययामाप्तंहृदयग्रंभिरूपंबंधं) योगेनउपायेन (सम्यक्व्यपोह्यसमूलंनिरस्य) यद्यपिफलेसि
द्धेसाधनोपरमः सिद्धएवतथापियावद्देहपातंतदभ्यासशंकावारणायोक्तं (एवमप्यप्रमत्तः सावधानःसन्) १४

यदानपश्यत्ययथागुणेहांस्वार्थेप्रमत्तःसहसाविपश्चित् ॥ गतस्मृतिर्विंदतितत्रतापानासाद्यमैथुन्यमगारमज्ञः ७ पुंसःस्त्रियामिथुनीभावमेतंतयोर्मिथोहृद श्लोकाः
यग्रंथिमाहुः ॥ अतोगृहक्षेत्रसुताप्तवित्तैर्जनस्यमोहोयमहंममेति ८ यदामनोहृदयग्रंथिरस्यकर्मानुबद्धोदृढआश्लथेत ॥ तदाजनःसंपरिवर्ततेस्मान्मुक्तः
परंयात्यतिहायहेतुम् ९ हंसेगुरौमयिभक्त्यानुवृत्त्यावितृष्णयाद्वंद्वतितिक्षयाच ॥ सर्वत्रजंतोर्व्यसनावगत्याजिज्ञासयातपसेहानिवृत्त्या १० मत्कर्म ७/१४
भिर्मत्कथयाचनित्यंमद्देहसंगाद्गुणकीर्त्तनान्मे॥निर्वैरसाम्योपशमेनपुत्राजिहासयादेहगेहात्मबुद्धेः ११ अध्यात्मयोगेनविविक्तसेवयाप्राणेंद्रियात्माभिज
येनसध्र्यक् ॥ सच्छ्रद्धयाब्रह्मचर्येणशश्वदसंप्रमादेनयमेनवाचाम् १२ सर्वत्रमद्भावविचक्षणेनज्ञानेनविज्ञानविराजितेन ॥ योगेनधृत्युद्यमसत्त्वयुक्तोलिं
गंव्यपोहेत्कुशलोऽहमाख्यम् १३ कर्माशयंहृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः ॥ अनेनयोगेनयथोपदेशंसम्यग्व्यपोह्योपरमेतयोगात् १४

चूर्णिका यदाचप्रमत्तः सन् इंद्रियचेष्टांमिथ्यानपश्यति तदास्वरूपभ्रष्टः सन् मैथुन्यसुखंगृहंप्राप्यतापान्विंदति ७ यदाचअस्यदृढः हृदयग्रंथिः विवेकेनशिथिलोभवति तदास्त्रीपुंरूप
मिथुनीभावात् निवर्तते ततः अहंकारंहित्वामुक्तसंगः सन् परंपदंयाति ८ ९ अहंकारत्यागेसाधनानि हंसेगुरौमयिभक्त्यासर्वत्रवितृष्णयाद्वंद्वतितिक्षयापरलोके दुःखानुसंधानेन ॥१७॥
आत्मजिज्ञासयातपसाकाम्यकर्मत्यागेन १० मदर्पणकमत्कथयासाधुसंगेनमद्गुणकीर्तनेनप्राणेंद्रियजयेन सर्वत्रमद्भावनया यागेन च युक्तः सन्अहंकारंव्यपोह्य ११ १२ १३
साधनात् उपरमेत् १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच पुत्रान्पिता शिष्यान्वा गुरुः नृपश्चप्रजाः एवमनुशिक्षयेत् । ममलोकंयःकामयते । यद्वा मदनुग्रहएवार्थोयस्यसः । विमन्युःशिक्षितस्याकरणेपिकोपशून्यः (पुनःपुनःशिक्षयेदित्यर्थः) अतज्ज्ञान्तत्त्वम विदुषः । श्रेयोबुद्ध्याकर्मसुमूढान् (कर्मसुनयोजयेत्) अन्यथोपदेशेप्रत्यवायमाह कमिति । योमनुजः काम्यकर्मसुपुरुषंयोजयन्गर्तेसंसारकूपेतंपातयतिसकमर्थं पुरुषार्थंलभेतनकमपीत्यर्थः १५ नयोजयेदित्येतदुपपादयतिलोकइति त्रिभिः । (श्रेयसिविषयेनष्टाद्दष्टिर्बुद्धिर्यस्य ।)नष्टदृष्टित्वेहेतुः यइति (अर्थान्विषयान् यतो) निकाममतिशयेनकामोयस्य । (लेशमात्रस्यापिसुखस्यहेतोःसौ हृदमुत्सृज्यमहत्पापमाचरन्तत्फलंदुःखंनजानातीत्यर्थः) १६ तमीदृशंकुबुद्धिंदृष्ट्वा (तदभिज्ञः प्रवृत्तिधर्मादनंतदुःखावाप्तिमभिजानन् विपश्चित्ज्ञानी) तत्रैवकस्तं प्रवर्तयेत् नकोपि । उत्पथेनग च्छंतं अंधंयथातेनैवगच्छेतिकोब्रूयात् । १७समुपेतः संप्राप्तोमृत्युः संसारोयेनतं ततोभक्तिमार्गोपदेशेनयोनमोचयेत्सगुर्वादिर्नभवतीत्यर्थः । यद्वा यस्तंमोचयितुंनशक्नुयात् (अत) स्तस्यसगुर्वादिर्नस्या दितिनिषेधः । ततश्चपितानसस्यादिति (यः पुत्रंनमोचयेत्) पुत्रोत्पत्तौतेनयत्नोनकार्यइत्यर्थः । दैवंदेवतानस्यादितिपूजानग्राह्येत्यर्थः एवमन्यदपिद्रष्टव्यम् १८ एवंमोक्षधर्मानुपदिश्यभ्रातृशुश्रूषणल क्षणं धर्मस्पर्धादिनिवृत्तयेतेषांजन्मकथनपूर्वकमाहद्वाभ्याम् । इदंमनुष्याकारमपिशरीरंममदुर्विभाव्यंअवितर्क्यंमदिच्छाविलसितं नत्वहं प्राकृतोमनुष्यइत्यर्थः मेहृदयंतुतत्त्वं । किंतत्हृदयंयत्रधर्मस्तत् शुद्धंसत्त्वमित्यर्थः । कुतःयद्यस्मान्मयाऽधर्मोदूरादेवपृष्ठेकृतः उत्सारितः अतएवमामृषभंश्रेष्ठंमाहुः १९ भवंतश्च (भवंतश्चतस्मान्मत्तो) हृदयेनशुद्धसत्त्वमयेनजाताः । अतोमत्सरंहित्वामहत्तमसनाभं सादरं भजत्वं । ननुत्वत्पुत्रत्वात्त्वा-(-मेव) वयंभजेम राजपुत्रत्वात्प्रजाश्चपालयामेतिचेदतआह तदेवमेशुश्रूषणंप्रजानांचपालनं । भरतानुवृत्त्यैवसर्वंकृतंस्यादितिभावः । २० इदानीं ब्राह्मणाश्चसे व्याइत्याशयेनतेषांसर्वेभ्यः श्रैष्ठ्यमाहपंचभिः भूतेषुचेतनाचेतनेषुविरोहंतीतिवीरुधः (तरुगुल्माद्याः) स्थावराः (तेभ्यउत्तमेभ्यः) उत्उच्चैः अतिशयेनोत्तमाः तेभ्योपिये सरीसृपाः सर्पंतीतिजंगमाः तेउदुत्तमाइतिसर्वत्रानुषंगः तेष्वपिसबोधानिष्ठास्थितिर्येषांपश्वादीनांतेकीटादिभ्यः । ततः तेष्वपिमनुष्यास्ततोपिप्रमथाभूतप्रेतादयः ततोपिगंधर्वाः ततः सिद्धाः ततोऽन्येविबुधानुगाः किन्नरादयः २१ तेभ्योऽसुराः देवासुरेभ्यःसंधिरार्षः देवाश्चमघवत्प्रधानाः देवेभ्यइंद्रःश्रेष्ठइत्यर्थः । ततोपिब्रह्मसुतादक्षादयः तेषांमध्येभवः परःश्रेष्ठः सभवः विरिंच्योवीर्यंशक्तिः कारणंयस्यसविरिंच्यवीर्यः अतस्तज्जनकत्वाद्विरिंच्यस्ततः परइत्यर्थः सविरिंच्योमत्परः अहंपरोयस्य । द्विजदेवाब्राह्मणा एवदेवाः पूज्यायस्यसोहम् । २२

श्लोकाः १९/२२

पुत्रांश्चशिष्यांश्चनृपोगुरुर्वामल्लोककामोमदनुग्रहार्थः ॥ इत्थंविमन्युरनुशिष्यादतज्ज्ञान्नयोजयेत्कर्मसुकर्ममूढान् ॥ कंयोजयन्मनुजोऽर्थंलभेतनिपातयन्नष्ट दृशंहिगर्ते १५ लोकःस्वयंश्रेयसिनष्टदृष्टिर्योर्थान्समीहेतनिकामकामः ॥अन्योन्यवैरःसुखलेशहेतोरनंतदुःखंचनवेदमूढः १६ कस्तंस्वयंतदभिज्ञोविपश्चिद विद्यायामंतरेवर्तमानम् ॥ दृष्ट्वापुनस्तंसघृणःकुबुद्धिंप्रयोजयेदुत्पथगंयथांधम् १७ गुरुर्नसस्यात्स्वजनोनसस्यात्पितानसस्याज्जननीनसास्यात् ॥ दैवंनत स्यान्नपतिश्चसस्यान्नमोचयेद्यःसमुपेतमृत्युम् १८ इदंशरीरंममदुर्विभाव्यंसत्त्वंहिमेहृदयंयत्रधर्मः ॥ पृष्ठेकृतोमेयदधर्मआरादतोहिमामृषभंप्राहुरार्याः १९ तस्माद्भवंतोहृदयेनजाताःसर्वेमहीयांसममुंसनाभम् ॥ अक्लिष्टबुद्ध्याभरतंभजध्वंशुश्रूषणंतद्भरणंप्रजानाम् २० भूतेषुवीरुद्भ्यउदुत्तमायेसरीसृपास्तेषुसबोधनि ष्ठाः ॥ ततोमनुष्याःप्रमथास्ततोपिगंधर्वसिद्धाविबुधानुगाये २१ देवासुरेभ्योमघवत्प्रधानादक्षादयोब्रह्मसुतास्तुतेषाम् ॥ भवःपरःसोथविरिंचवीर्यः समत्परोहंद्विजदेवदेवः २२

चूर्णिका

१५ १६ १७किंच अहो गुरुर्नसःस्यात्स्वजनोनसःस्यात्पितानसःस्यज्जननीनसास्यात् दैवंनतत्स्यात्नपतिश्चसस्थान्नमोचयेद्यःसमुपेतमृत्युम् १८ तस्मात्यूयंसर्वेभरतं भजध्वम् १९ २० किंच जंगमाजंगमप्राणिषुशिवब्रह्मविष्ण्वंतेषुब्राह्मणाः श्रेष्ठाः २० २१ २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥१९॥

ब्राह्मणैरन्यद्भूतंनतुल्येसमंनपश्यामि।अतोब्राह्मणात्परंतुभूतं किंपश्यामिनाकिंचित्।विप्राइति तत्रत्यानांब्राह्मणानांसंबोधनं।समस्यैवाभावादधिकंकुतस्त्यमित्यर्थः।तत्रहेतुमाहसार्धाभ्याम्।यस्मिन्ब्राह्मणेश्रद्धयाप्रकर्षेणहुतमन्नादि कामंयथेष्टमहमश्नामि । २३ मेतनूर्मूर्तिर्वेदाख्यायेनब्राह्मणेनइहलोकेधृता । यत्रचब्राह्मणेसत्त्वादयोष्टौगुणाः संति (तत्रानुभवआत्मज्ञानं) ततो (ब्राह्मणात्) परंकिंपश्यामीत्यन्वयः २४ निस्पृहत्वमाह । मत्तोपियेषांनाकिंचित्प्रार्थनीयमस्ति । (परतोब्रह्मादिभ्यः परस्मात्श्रेष्ठात् । स्वर्गापवर्गयोराधिपतेः स्वर्गमोक्षावपिदातुंसमर्थादित्यर्थः ।) तेषामितरेणराज्यादिनाकिमुस्यात्नकिमपि । २५ तदेवंब्राह्मणसंमानंविधायेदानींसर्वभूतसंमानंविधत्ते (सर्वाणीति) हेसुताः सर्वाणिजंगमानिस्थावराणिचभूतानिमदधिष्ठानतयावोयुष्माभिः संमाननीयानिपदेपदेक्षणेक्षणे । विविक्तापूतामत्सरादिरहितादृष्टिर्येषांतैः । तदेवममार्हणम्२६ सर्वकर्मणामीश्वरार्पणंविधत्ते । मनोवचोदृशांअन्येषांचकरणानां ईहितस्यव्यापारस्यकर्मणइतियावत्यन्मेपरिबर्हणं आराधनंतदेवसाक्षात्कृतंफलम् । येनपरिबर्हणेनविनाकालपाशाद्विमोक्तुंनईशेत्नसमर्थोभवेत् । २७ स्वयएवसुशिक्षितानपिलोकानुशासनार्थं अनुशास्यमुनीनां पारमहंस्यधर्मंउपशिक्षयिष्यन्भरतमभिषिच्यऋषभइत्यपदेशोनामयस्यसभगवान् ब्रह्मावर्तात्स्वदेशात्प्रवव्राजेत्यन्वयः । (भवनेगृहेएवसर्वस्वविसर्जनात्) उर्वरितोऽवशिष्टः शरीरमात्रपरिग्रहोयस्यसः (गगनपरिधानः दिगंबरइत्यर्थः) २८ अभिभाष्यमाणोपि (संबोध्यमानोपि) जनानांमध्येजडादिवद्वर्तमानः तूष्णींबभूव । अवधूतस्येववेषोयस्य । २९

श्लोकाः २३/२९

नब्राह्मणैस्तुलयेभूतमन्यत्पश्यामिविप्राःकिमतःपरंतु ॥ यस्मिन्नृभिःप्रहुतंश्रद्धयाहमश्नामिकामंनतथाग्निहोत्रे २३ धृतातनूरुशतीमेपुराणीयेनेहसत्त्वंपरमंपवित्रम् ॥ शमोदमःसत्यमनुग्रहश्चतपस्तितिक्षानुभवश्चयत्र २४ मत्तोप्यनंतात्परतःपरस्मात्स्वर्गापवर्गाधिपतेर्नकिंचित् ॥ येषांकिमुस्यादितरेणतेषामकिंचनानांमयिभक्तिभाजाम् २५ सर्वाणिमद्धिष्ण्यतयाभवद्भिश्चराणिभूतानिसुताध्रुवाणि ॥ संभावितव्यानिपदेपदेवोविविक्तदृग्भिस्तदुहार्हणंमे २६ मनोवचोदृक्करणेहितस्यसाक्षात्कृतंमेपरिबर्हणंहि ॥ विनापुमान्येनमहाविमोहात्कृतांतपाशान्नविमोक्तुमीशेत् २७ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवमनुशास्यात्मजान्स्वयमनुशिष्टानपिलोकानुशासनार्थंमहाऽनुभावःपरमसुहृद्भगवानृषभापदेशउपशमशीलानामुपरतकर्मणांमहामुनीनांभक्तिज्ञानवैराग्यलक्षणंपारमहंस्यधर्ममुपशिक्षमाणःस्वतनयशतज्येष्ठंपरमभागवतं भगवज्जनपरायणंभरतंधरणिपालनायाभिषिच्यस्वयंभवनएवोर्वरितशरीरमात्रपरिग्रहउन्मत्तइवगगनपरिधानःप्रकीर्णकेशआत्मन्यारोपिताहवनीयोब्रह्मावर्त्तात्प्रवव्राज ॥ २८ ॥ जडांधमूकबधिरपिशाचोन्मादकवदवधूतवेषोऽभिभाष्यमाणोपिजनानांगृहीतमौनव्रतस्तूष्णींबभूव ॥ २९

चूर्णिका तेनहुतं अहंयथाअश्नामि तथा अग्निहोत्रे न २३ किंच सर्वभूतेषुमद्भावना कार्या एतदेवममार्हणम् पुमान् एवं अर्हणेन विनाकृतांतपाशात् आत्मानंविमोक्तुंनसमर्थोभवेत् २४ २५ २६ २७॥ ॥ श्रीशुकउवाच ॥ ॥ एवंपुत्रान्अनुशास्य पारमहंस्यधर्मं उपशिक्षाणः भरतं राज्ये अभिषिच्य आत्मनि अग्नीन् समारोप्य देहमात्रावशेषितः उन्मत्तइवगगनपरिधानः ब्रह्मावर्तात्प्रवव्राज २८ २९ ॥१९॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

तत्रतत्र पुरादिषुअनुपथंमार्गेमार्गेअवतिचरापसदैर्दुर्जनैस्तर्जनादिभिःपरिभूयमानोपितत्त(त्परिभवनं)अविगणयन्नेवैकचरएकाकीपृथिवींपरिबभ्रामेत्यन्वयःतत्रपुरंपत्तनम्। ग्रामाहट्टवंतः। आकरःखानिः। खेटः कृषीवलग्रामः। वाटिःपुष्पादिवाटिका खर्बटः पर्वतप्रायग्रामाःशिबिरंसेनायावासस्थानम्। व्रजोगवांस्थानम्। घोषोगोपानांस्थानम्। सार्थोयात्रिकजनसंघातः। आश्रमाऋषीणाम्। तर्जनंभयजननंताडनं प्रहारः (अवमेहनंशरीरो-)·परिमूत्रणं ष्ठीवनं थूत्कृत्य श्लेष्मप्रक्षेपः। ग्राव्णांशकृतोरजसश्चप्रक्षेपः। पूतिवातोऽधोवायुः। दुरुक्तंशापःएतैः। अविगणनेदृष्टांतः मक्षिकाभिरिवेति। तत्रैवहेतुः। असतिमिथ्याभूतेसंस्थानेसंनिवेशेदेहइत्युपलक्षणमाकारोयस्य (तस्मिन्) सदित्यपदेशमात्रंयस्यतस्मिन्[^1]निरभिमानत्वात् । केनेहतुना। उभयोःसदसतोर्योनुभवः (स्वानुभूति-)-स्तत्स्वरूपेणयत्स्वमहिमन्यवस्थानं तेनअतएवाखंडितंमनोयस्यसपरिबभ्राम ३० सचतदाग्रहगृहीइवादृश्यत। (ग्रहःपिशाचःतद्गृहीतइव) तत्रहेतुः पराक्पुरतोऽवलंबमानाश्चतेकटिलाश्चतेजटिलाश्चतेकपिशाश्चकेशास्तेषांभूरिभारोयस्यसः। अवधूतमनादृतंअतएवमलिनंनिजशरीरंतेन । कथंभूतोप्येवमदृश्यत । अतिसुकुमाराणिकरचणोरःस्थलानितथाविपुलाबाह्वादयः तएवावयवाः तेषांविशिष्टोन्यासः सन्निवेशोयस्यसः तथाप्रकृत्यैवसुंदरः स्वभावसिद्धोहासस्तेनशोभनंमुखंयस्य । तथानवनलिनदलवदारचरंती येशिशिरतारेतापहारिकनीनिकेअरुणेआयतेदीर्घेनयनेताभ्यांरुचिरःतथासदृशाअन्यूनाधिकाः सुभगाश्च (रुचिराः) कपोलकर्णकंठनासिकायस्य। तथाविगूढस्मितंयद्वदनंतस्यमहोत्सवेनविभ्रमेणपुरांगनानां मनसिकाममुद्दीपयन् एवंभूतोपितथाऽदृश्यतेत्यन्वयः ३१ यर्हियदालोकंजनंयोगस्यसाक्षात् (प्रतीपमिव) प्रतिपक्षमाचक्षाणः पश्यन्बभूवतस्यप्रतिक्रियाकरणंचानीदितमित्याचक्षाणः तदाआजगरंव्रतमास्थितःसन्शयानएवअश्नातिस्मेत्यन्वयः आजगरंव्रतंनामैकत्रैवस्थित्वाप्रारब्धकर्मोपभोगः)। अवमेहति पूत्रयति। हदतिपुरीषमुत्सृजति। उच्चरितेपुरीषेचेष्टमानोविलुंठन्तेनैवादिग्धाआलिप्ताउदेशादेहप्रदेशायस्यसः वावेतिव्याख्यातंप्राक्। ३२ बीभत्समिवाशंक्याह। तस्येति। (हइतिस्फुटमित्यर्थे) परीषस्यसुरभिणा (शोभनेन) गंधेनसौगंध्यंगस्यसवायुः ३३

॥२०॥

श्लोकाः ३०/३३

तत्रतत्रपुरग्रामाकरखेटखर्वटशिबिरव्रजघोषसार्थगिरिवनाश्रमादिष्वनुपथमवनिचरापसदैःपरिभूयमानोमक्षिकाभिरिववनगजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तदविगणयन्नेवासत्संस्थानएतस्मिन्देहोपलक्षणेसदपदेशउभयानुभवस्वरूपेणस्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादविखंडितमनाःपृथिवीमेकचरःपरिबभ्राम ३० अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वंसगलवदनाद्यवयवविन्यासःप्रकृतिसुंदरस्वभावहाससुमुखोनवनलिनदलायमानशिशिरतारारुणायतनयनरुचिरःसदृशसुभगकपोलकर्णकंठनासोविगूढस्मितवदनमहोत्सवेनपुरवनितानांमनसिकुसुमशरासनमुपदधानःपरागवलंबमानकुटिलजटिलकपिशकेशभूरिभारोऽवधूतमलिननिजशरीरेणग्रहगृहीतइवादृश्यत ३१ यर्हिवावसभवांल्लोकमिमंयोगस्याद्धाप्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्मबीभत्सितमितिव्रतमाजगरमास्थितःशयानएवाश्नातिपिबतिखादत्यवमेहतिहदतिस्मचेष्टमानउच्चरितआदिग्धोद्देशः ३२ तस्यहयःपुरीषसुरभिसौगंध्यवायुस्तंदेशंदशयोजनंसमंतात्सुरभिंचकार ३३

चूर्णिका तत्रतत्रपुरग्रामादिषुदुर्जनैःतर्जनताडनमेहनष्ठीवनशकृत्रजःपूतिवात दुरुक्तिभिः पीडितोपि अहंममतां हित्वा स्थिरमनाः सन् एकएवपृथिवींबभ्राम ३० जनानांग्रहगृहीतवत् अदृश्यत ३१ ततः आजगरंव्रतं आस्थितः शयानएवअश्नाति खादति पिबति मूत्रयति पुरीषं उत्सृजति तस्यपुरीषसुगंधः दशयोजनं देशंसुवासयति ३२ ३३ ॥२०॥

[^1]: १ हट्टहीनाइतिकचित्पाठः

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंगवादिचर्यया पानादिकरोतिस्म । तदेवाह व्रजन्नित्यादिना । काकमृगगवामिवअन्यदपिचरितंवृत्तिर्यस्य । ३४ (इत्येवं) नानायोगचर्या (आजगरवृत्ताद्याः) आचरतीतितथाल्लोकयात्रापरिहारार्थं योगिभिरवंवर्तितव्यमितिप्रदर्शनायतथाकृतवान् । वस्तुतस्तुभगवान् (मोक्षाधिपतिर्यतः) अविरतःपरमग्रहान्उत्तरोत्तरशतगणत्वेनोक्तोयआनंदस्तदनुभवस्वरूपः किंचवासुदेवे (भगवतिसर्वेषामात्मभूतेपरआत्मनि) आत्मनोऽव्यवधानेनअभेदेननविद्यते अन्येपामिवअंतरामध्येउदरस्यदेहोपाधेर्भावस्तेननित्यनिवृत्तोपाधित्वेनेत्यर्थः स्वतएवसिद्धैः समस्तैरर्थैःफलैः परिपूर्णत्वात्योगैश्वर्याणिनाभ्यनंदत् । वैहायसंखेचरत्वम् । मनोजवमनसइवदेहस्यवेगम् । दूरग्रहणंदूरदर्शनम् । हेनृपहृदयेनमनसा ३५॥ ॥इतिपंचमेस्कंधेटीकायांपंचमोध्यायः ५ ॥ ॥षष्ठेलीलाभिमानस्यदेहत्यागक्रमाभिधा । प्रदहंतंदवाग्निंयः पश्यन्नपिनपश्यति । १ योगैश्वर्याणिनाभ्यनंदददित्युक्तम् । तत्रपृच्छतिनेनेति । भगवः हेभगवन् योगेनसमीरितमुद्दीपितंयत् ज्ञानंतेनावभर्जितानिदग्धानिकर्मबीजानिरागादीनियैः तेषांयदृच्छयाप्राप्तानियोगैश्वर्याणिपुनःक्लेशदानिभवितुंनार्हंतिअतः किमितिनाभ्यनंददित्यर्थः १ अंगीकृत्यपरिहरति । सत्यमिति । एकेबुद्धिमंतोऽनवस्थानस्यचंचलस्यमनसो विश्वासंनसंगच्छंतेनसम्यक्प्राप्नुवंति शठःकिरातोयथाधृतेष्वपिमृगेषु । शठेकिरातेयथामृगाइतिसप्तम्यंतंवा । पाठांतरेशठोवंचकः किराटोवणिक् (यथा) व्यवहर्तरि । अस्मिन्वाव्यवहर्ता विश्वासंनयातीत्यर्थः। पाक्षिकोदोषोवर्जनीयइत्युपदेष्टुंनाभ्यनंददितिभावः २ यद्विश्रंभात् (यस्यविश्वासात्) चिराचीर्णं बहुकालसंचितंतपः चस्कंदसुस्राव । ऐश्वरं (ईश्वरस्यरुद्रस्यापि) विष्णोर्मोहिनीरूपस्यदर्शनेन । यद्वा ईश्वराणां समर्थानामपिसौभरिप्रभृतीनांतपः ३ तत्रहेतुः नित्यमिति । कृतविश्वासोयोयोगीतदीयंमनः कामस्यतमनुयेऽरयः क्रोधादयस्तेषांचछिद्रमवकाशंददाति । यथाकृतविश्वासस्यपत्युः पुंश्चलीजायाजाराणामवकाशं दत्त्वापतिं घातयतितथामनोपिकामादिभिर्योगिनंभ्रंशयतीत्यर्थः ४ अरीन्कथयन्नुपसंहरति । कामइति । (मन्युःक्रोधः ।) यन्मूलः यन्निमित्तोभवतितन्मनःकोनुबुधःस्वीकुर्यात् स्वाधीनमितिमन्येत । ५

श्लोकाः ३४ ६

एवंगोमृगकाकचर्यया व्रजस्तिष्ठन्नासीनःशयानःकाकमृगगोचरितःपिबतिखादत्यवमेहतिस्म ३४ इतिनानायोगचर्याचरणोभगवान्कैवल्यपतिर्ऋषभोऽविरतपरममहानंदानुभवआत्मनिसर्वेषांभूतानामात्मभूतेभगवतिवासुदेवआत्मनोव्यवधानानंतरोदरभावेनसिद्धसमस्तार्थपरिपूर्णोयोगैश्वर्याणिवैहायसमनोजवांतर्धानपरकायप्रवेशदूरग्रहणादीनियदृच्छयोपगतानिनांजसानृपहृदयेनाभ्यनंदत् ३५ इ०भा०म०पंच०ऋषभदेवानुचरितेपंचमोध्यायः ॥ ५ ॥

॥राजोवाच ॥ ननूनंभगवआत्मारामाणांयोगसमीरितज्ञानावभर्जितकर्मबीजानामैश्वर्याणिपुनःक्लेशदानिभवितुमर्हंतियदृच्छयोपगतानि १ ऋषिरुवाच सत्यमुक्तंकिंत्विहवाएकेनमनसोद्धाविश्रंभमनवस्थानस्यशठकिरातइवसंगच्छंते २ तथाचोक्तम् ॥ नकुर्यात्कर्हिचित्सख्यंमनसिह्यनवस्थिते ॥ यद्विश्रंभाच्चिराच्चीर्णंचस्कंदतपऐश्वरम् ३ नित्यंददातिकामस्याच्छिद्रंतमनुयेऽरयः ॥ योगिनःकृतमैत्रस्यपत्युर्जायेवपुंश्चली ४ कामोमन्युर्मदोलोभःशोकमोहभयादयः ॥ कर्मबंधश्चयन्मूलःस्वीकुर्यात्कोनुतद्बुधः ५

चूर्णिका ॥२१॥

एवंगवादिचर्यया वर्तमानः ऋपभः वासुदेवे आत्मनः अभेदनस्थितः सन् मध्येप्राप्ताः अणिमाद्यष्टसिद्धीः तत्याज ३४ ३५ ॥इतिपंचमेपंचमः ॥ ५ ॥ ॥राजोवाच॥ ॥ हेभगवन्आत्मारामाणांयोगिनांयदृच्छयाउपगतानि ऐश्वर्याणिक्लेशदानि नभवंति एवंसातिऋषभः कुतोनागृह्णात्एतत्वद १ ॥ ॥ ऋपिरुवाच ॥ ॥ सत्यमुक्तंभवताअथापिज्ञानिनः चंचलस्यमनसः विश्वासंनगच्छंति २ अस्याविश्वासात् बहुकालसंचितंतपः स्रवति ३ ४ तथाहि कामोमन्युर्मदोलोभःशोकमोहभयादयः कर्मबंधश्चमनसोनिमित्तात्भवति एवंभूतंमनः स्वाधीनंजातंइतिकः मन्येत ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रासंगिकंसमाप्य प्रस्तुतमाह । अथेति । अखिलानांलोकपालानांललामाभंडनभूतोपि उपरता (निवृत्ता) बाधित-(-विषयानुवृत्तिर्यस्मात्सउपरराम देहाभिमानंजहौ । विलक्षणैरनेकप्रकारैरवधूतवे षादिभिर्नविलक्षितो भगवत्प्रभावो यस्मिन् सांपरायविधिंदेहत्यागप्रकारम् । (अनुशिक्षयन् आत्मनिब्रह्मणि) आधाराधेयभावनिवृत्त्यर्थमाह अनर्थांतरभावेनाभेदेन । (अर्थांतराभावेनअभेदेनेत्यर्थः ।) उपासनाव्यावृत्त्यर्थमाह असंव्यवहितमिति । ६ । मनसास्वयंत्यक्तेप्यभिमाने केनापिसंस्कारेणदेहःप्रचलतियथाकुलालचक्रंसोयमभिमानाभासस्तेन । सचजीवन्मुक्तानामविद्यावासनयाभवतीतितितो विशेषमाह । योगमायावासनयेति । (चंक्रमाणःपुनःपुनर्गच्छन् ७) कोंकादीन्देशान् (दक्षिणकर्णाटकान्सौराष्ट्रादीन्उप-)-गतः सन्कयापिवासनयाआस्येकृतः अश्मकवलो येन । असंवी तोनग्नः (उन्मादइवउन्मादेसतिपुमान् यथाचेष्टेतेतथेत्यर्थः ।) ८ अथसमीरवेगेनविधूतानांकंपितानांवेणूनांसंघर्षणेनजातउग्रोदावानलस्तद्वनंआलेलिहानः सर्वतोग्रसन् (तेनदेहेन) ९ अवधूतवेषे णऋषभदेवस्तत्रगतइत्येतस्यसूचकमाह यस्यकिलआश्रमातीतमनुचरितंतदेशवासिभ्यउपाकर्ण्य अर्हन्नितिनामयस्यसराजास्वयंतत्रउपशिक्ष्यशिक्षित्वाकुपथश्चासौपाषंडश्चतंनिजमनीषयासंप्रवर्तयिष्यतइ त्यन्वयःतत्रहेतुः । कलावित्यादि । भवितव्येनप्राणिनांपूर्वसंचितपापफलेन १० येनप्रवर्तकेन । अर्हता । मनुजेष्वपसदानिकृष्टाः स्वविधिना (वर्णाश्रमाचारप्रवर्तकेनवेदेन) नियोगः (प्रवर्तना) यस्मि न् शौचचारित्रेतद्विहीनाः देवावज्ञारूपाण्यस्नानादीनिकुव्रतानिगृह्णानावेदादीनां विदूषकाभविष्यंति । केशोल्लुंचनं केशानामपनयनम् ११

श्लोकाः ६/११

अथैवमखिललोकपालललामोपिलक्षणैर्जडवदवधूतवेषभाषाचरितैरविलक्षितभगवत्प्रभावोयोगिनांसांपरायविधिमनुशिक्षयन्स्वकलेवरंजिहासुरात्मन्या त्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाणउपरताऽनुवृत्तिरुपरराम ६ तस्यहवाएवंमुक्तलिंगस्यभगवतऋषभस्ययोगमायावासनयादेहइमांजगतीम भिमानाभासेनसंक्रममाणः ७ कोंकवेंककुटकान्दक्षिणकर्णाटकान्देशान्यदृच्छयोपगतःकुटकाचलोपवनआस्यताश्मकवलउन्मादइवमुक्तमूर्धजऽसंवीतएव विचचार ८ अथसमीरवेगविधूतवेणुविकर्षणजातोग्रदावानलस्तद्वनमालेलिहानःसहतेनददाह ९ यस्यकिलानुचरितमुपाकर्ण्यकोंकवेंककुटकानांराजाऽर्हन्ना मोपशिक्ष्यकलावधर्मउत्कृष्यमाणेभवितव्येनविमोहितःस्वधर्मपथमकुतोभयमपहायकुपथपाषंडमसमंजसंनिजमनीषयामंदःसंप्रवर्तयिष्यते १० येनहवा वकलौमनुजापसदादेवमायामोहिताःस्वविधिनियोगशौचचारित्रविहीनादेवहेलनान्यपव्रतानिनिजनिजेच्छयागृह्णानाअस्नानानाचमनाशौचकेशोल्लुंचना दीनिकलिनाऽधर्मबहुलेनोपहतधियोब्रह्मब्राह्मणयज्ञपुरुषलोकविदूषकाःप्रायेणभविष्यंति ११

चूर्णिका

अथसर्वलोकपालश्रेष्ठः भगवान्ऋषभदेवः जडवत् अवधूतवेषचरितैः अलक्षितस्वभावःयोगिनां देहत्यागप्रकारंदर्शयन् स्वकलेवरंजिहासुः कोंकवेंककुटकान्दाक्षिणकर्णा टकान्यदृच्छयाप्राप्तः सन् कुटकाचलोपवने आस्येकृताश्मकवलः उन्मत्तइवमुक्तकेशः नग्नइवविचचार ६ ७ ८ अथसमीरवेगेनवेणुविकर्षणजातोग्निः तद्वनंसर्वतोग्रस न्ऋषभेनसहवनं ददाह ९ अथऋषभाचरितं श्रुत्वा तद्देशानांअर्हन्नामराजास्वधर्मं अपहायकुपथपाखंडंस्वबुद्ध्याप्रवर्तयिष्यति १० यनेपाखंडेने तद्देशीयाः जनाः वेदब्राह्म णयज्ञादिविदूषकाः भविष्यंति ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्फलंचांधंतमःप्राप्स्यंतीत्याह । तेचेति । अर्वाक्तनयाअवेदमूलया निजलोकयात्रयास्वेच्छाकृतप्रवृत्त्याआश्वस्ताः कृतविश्वासाः १२ ननु तर्हिअनर्थकारीकिमर्थोयमृषभावतारस्तत्राह । अयमिति । रजोगुणेनव्याप्तानां जनानां मोक्षमार्गोपशिक्षणार्थः । तस्यकैवल्योपशिक्षणस्यानुरूपान् १३ अधिकंपुण्यंयस्मिन् एतद्भारतंवर्षम् । ऋषभाद्यवतारयुक्तानिकर्माणि । १४ प्रियव्रतस्यवंशःअवदातः शुद्धः यत्रवंश (कृतऋषभाख्योऽवतारोयेनसआद्यः पुरुषः ऋषभः) यद्यस्मात् अकर्म मोक्षस्तस्यहेतुंधर्मंचचार १५ अपरःकोनुयोगीअस्यकाष्ठांदिशमपि (मनोरथेना–)–प्यनुगच्छेत् । योयोगीयेनऋषभेणअ सत्तयाअवस्तुत्वेनउदस्ताःनिरस्ताः योगमायाः सिद्धीर्वांछति । कथंभूताः कृतःप्रयत्नोयासुतदर्थं प्रयत्नंचकरोतीत्यर्थः । यद्वा कथंभूताः उदस्ताः कृतप्रयत्नाः (ऋषभं) सेवितुमुद्यताअपीत्यर्थः १६ विशुद्धाचरितेयत्ईरितंकथितंतत्पुंसांसमस्तंदुश्चरितंपापमभितो हरतीतितथा परममहामंगलानां (भक्तियोगानां) अयनंच । (उपचितयाअनुदिनमेधमानया निरंतरश्रद्धया) अवहितः (सावधा नः) सन् । अनयोरपिश्रोतृश्रावयित्रोरपिअविशेषेणभक्तिः सम्यगनुवृत्ताभवतीत्यर्थः १७ भक्तेःपरमपुरुषार्थत्वमाह । यस्यांभक्तावेवनतुयोगादिषु । (अविरतानिनिरंतराणि विविधानिवृजिनानिदुःखानि तद्युक्तोयः संसारस्तत्परितापेनोपतप्यमानंदंदह्यमानमात्मानं) अनुसवनमविरतंस्नापयंतः (परयानिर्वृत्यासर्वोत्कृष्टेनसुखेन हेतुना) स्वयमासादितं अप्रार्थितं भगवतास्वयमेवदीयमानमपि । अनादरेहे तुः । भगवदीयत्वेनैवपरितः समाप्ताः सम्यक्प्राप्ताः सर्वेपुरुषार्थायैस्ते । (भागवतत्वमेवपरमपुरुषार्थो नतुमोक्षइत्यर्थः) १८ ननुभगवतोऽतिसुलभत्वदर्शनान्मोक्षस्यचातिदुर्लभत्वादियमतिस्तुतिरेवेत्या शंक्याह । हेराजन् भवतां पांडवानां यदूनांचपतिः पालकः । गुरुः उपदेष्टा । दैवमुपास्यः । प्रियः सुहृत् । कुलस्यपतिर्नियंता । किंबहुनाक्कचकदाचित् दौत्यादिषु वः पांडवानांकिंकरोपिआज्ञानुवर्ती अस्तुनामैवं । (महदहर्षंहिभवतां) तथाप्यन्येषांनित्यं भजतामपिमुक्तिंददातिनतुकदाचिदपिसप्रेमभक्तियोगम् । १९

॥२३॥

श्लोकाः १२/१९

तेचह्यर्वाक्तनयानिजलोकयात्रयांऽधपरंपरयाश्वस्तास्तमस्यंधेस्वयमेवप्रपतिष्यंति १२ अयमवतारोरजसोपप्लुतकैवल्योपशिक्षणार्थःतस्यानुगुणाञ्छ्लोकान्गा यंति १३ अहोभुवःसप्तसमुद्रवत्याद्वीपेषुवर्षेष्वधिपुण्यमेतत् ॥ गायंतियत्रत्यजनामुरारेःकर्माणिभद्राण्यवतारवंति १४ अहोनुवंशोयशसावदातःप्रैयव्रतो यत्रपुमान्पुराणः ॥ कृतावतारःपुरुषःसआद्यश्चचारधर्मंयदकर्महेतुम् १५ कोन्वस्यकाष्ठामपरोनुगच्छेन्मनोरथेनाप्यभवस्ययोगी ॥ योयोगमायाःस्पृह यत्युदस्ताह्यसत्तमायेनकृतप्रयत्नाः १६ इतिहस्मसकलवेदलोकदेवब्राह्मणगवांपरमगुरोर्भगवतऋषभाख्यस्यविशुद्धाचरितमीरितंपुंसांसमस्तदुश्चरिताभिह रणंपरममहामंगलायनमिदमनुश्रद्धयोपचितयाऽनुशृणोत्याश्रावयतिवाऽवहितोभगवतितस्मिन्वासुदेवएकांततोभक्तिरनयोरपिसमनुवर्तते १७ य स्यामेवकवयआत्मानमविरतंविविधवृजिनसंसारपरितापोपतप्यमानमनुसवनंस्नापयंतस्तयैवपरयानिर्वृत्त्याह्यपवर्गमात्यंतिकंपरमपुरुषार्थमपिस्वयमासा दितंनोएवाद्रियंतेभगवदीयत्वेनैवपरिसमाप्तसर्वार्थाः ॥ १८ ॥ राजन्पतिर्गुरुरलंभवतांयदूनांदैवंप्रियःकुलपतिःक्वचकिंकरोवः ॥ अस्त्वेवमंगभगवान्भज तांमुकुंदोमुक्तिंददातिकर्हिचित्स्मनभक्तियोगम् ॥ १९ ॥

चूर्णिका

१२ अयमवतारःरजोव्याप्तजनानांमोक्षमार्गशिक्षणार्थः तस्यानुगुणान् श्लोकान् गायंति १३ सप्तसमुद्रवत्याः भुवः द्वीपेषु वर्षेषुभारतंवर्षंअधिपुण्यंयत्रत्यजनाः मुरारेः ऋषभा द्यवतारयुक्तानि कर्माणि गायंति १४ अहो प्रियव्रतस्यवंशः यशसाशुद्धः यत्रवंशेकृतावतारः पुरुषः मोक्षधर्मंचचार १५ अपरःयोगीअस्यदिशंको नामअनुगच्छेत् १६ एवं परमगुरोः ऋषभाख्यस्य चरितं सर्वपातकहरं परममंगलायनं कथयितुः श्रोतॄणां चवासुदेवेभक्तिः भवति १७ हेराजन् यःमुकुंदः भजतांमुक्तिंकदाचित्ददाति नभक्तिम् १८ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णितमृषभावतारंनमस्करोति । नित्यमनुभूतंयन्निजंरूपंसएवलाभः तेननिवृत्तातृष्णायस्यसः अतद्वचनया देहाद्यर्थमनोरथेनश्रेयसिविषये चिरंसुप्ताबुद्धिर्यस्यतस्यजनस्यकरुणयानिर्भयमात्मस्वरूपं यआख्यातवान्तस्मैनमः २० ॥ ॥ इतिपंचमस्कंधेटीकायांषष्ठोऽध्यायः ६ ॥ ॥अध्यायान्तांत्रयेणैवमृषभाख्यानमीरितम् । अष्टभिर्भरताख्यानमतः प्रस्तूयतेऽमृतम् ॥१॥ सप्तमेभरतोराज्येचिरंयज्ञैर्हरिंयजन् । आरब्धकर्मनिर्वाणेहरिक्षेत्रेभजद्धरिम् ॥ २ ॥ (भगवताऋषभेनसंचिंतितः) संकल्पेनैवराज्यादौनियुक्तः (अभिषिक्तइतिवा । "संचिंताचर्यायामभिषेचनइत्युत्पलमालायामभिधानात्" । तस्यऋषभस्यानुशासनमाज्ञातत्परः पंचजनींनामविश्वरूपस्यकन्यां परिणीतवान्) १ आत्मनोऽनुरूपान्भूतादिरहंकारइवभूतसूक्ष्माणि (शब्दादीनिपंच) संततिवृद्धौदृष्टांतः २ (पूर्वमजनाभसंज्ञमपियतआरभ्य) भारतमिति (अभिदधते)स्वनाम्नास्यख्यापकत्वेन (भरतस्य) धर्माद्यतिशयः सूचितः ३ बहुवित्सर्वज्ञः (उरुवत्सलतयामहतास्नेहेनपालयामास ।) ४ यज्ञाअयूपाःक्रतवः सयूपाः तद्रूपं (भगवंतं) उच्चावचैर्महद्भिरल्पैश्चक्रतुभिः कर्मभिः श्रद्धयाईजेच । तानेवाह आहृता स्वाधिकारेणात्मसात्कृताः येअग्निहोत्रादयस्तेषां प्रकृतिविकृतिभिः अग्निहोत्रादयोद्विविधाः सकलांगयुक्ताः प्रकृतयः विकलांगाविकृतयइतितैर्द्विविधैरपीष्टवानित्यर्थः अनुसवनमित्यंतं वा चातुर्होत्रविधिनेत्यंतंवागम्यं (चत्वारोहोतारोयत्रतेनविधिना) ५

नित्यानुभूतनिजलाभनिवृत्ततृष्णःश्रेयस्यतद्रचनयाचिरसुप्तबुद्धेः ॥ लोकस्ययःकरुणयाऽभयमात्मलोकमाख्यान्नमोभगवतेऋषभायतस्मै २० ॥ ॥ इति श्रीभागवतेम० पंचमस्कंधेऋषभदेवानुचरितेषष्ठोऽध्यायः ॥ ६ ॥ श्रीशुकउवाच ॥ भरतस्तुमहाभागवतोयदाभगवताऽवनितलपरिपालनायसंचिंतितस्तदनुशासनपरःपंचजनींविश्वरूपदुहितरमुपयेमे ॥ १ ॥ तस्यामुहवाआत्मजान्कार्त्स्न्येनानुरूपानात्मनःपंचजनयामासभूतादिरिवभूतसूक्ष्माणि ॥ २ ॥ सुमतिंराष्ट्रभृतंसुदर्शनमावरणंधूम्रकेतुमितिअजनाभंनामैतद्वर्षंभारतमितियतआरभ्यव्यपदिशंति ३ सबहुविन्महीपतिःपितृपितामहवदुरुवत्सलतयास्वेस्वेकर्मणिवर्त्तमानाःप्रजाःस्वधर्ममनुवर्त्तमानःपर्यपालयत् ४ ईजेचभगवंतंयज्ञक्रतुरूपंक्रतुभिरुच्चावचैःश्रद्धयाहृताग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानांप्रकृतिविकृतिभिरनुसवनंचातुर्होत्रविधिना ५

श्लोकाः २०/५

चूर्णिका

यःऋषभः करुणयालोकस्यआत्मस्वरूपमाख्यातवान् तस्मैनमोस्तु २० ॥ इतिपंचमेषष्ठः ॥ ६ ॥ ॥ श्रीशुकउवाच ॥ ॥ भरतस्तुमहाभागवतः यदा१स्वपित्राऋषभेणपृथ्वीपालनाय नियुक्तः तदा तदाज्ञापरोभूत्वा पंचजनीं विश्वरूपदुहितरं उपयेमे १ तस्यांसुमतिं १ राष्ट्रभृतं २ सुदर्शनं ३ आवरणं ४ धूम्रकेतुं ५ इतिपंचपुत्रान्जनयामास २ किंचयस्यनाम्नापूर्वंअजनाभवर्षसद्भारतमितिव्यपदिशंति ३ एवंभूतो राजा भरतः स्वधर्मनिष्ठाः प्रजाः पितृवत् पालयामास ४ यज्ञेश्वरंहरिं सर्वैः क्रतुभिः निष्कामत्वेनईजे ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच । संप्रचरत्सुप्रवर्त्तमानेषुनानायोगेषु विरचिता अनुष्ठिता अंगक्रिया येषां तेषु यदपूर्वंतद्वासुदेवएवभावयमानश्चिंतयन् सयजमानो (हविष्षुगृह्यमाणेषु) यज्ञभाजोयेदेवाःसूर्यादयस्तान् पु
भा. पं. रुषस्यवासुदेवस्यावयवेषुचक्षुरादिष्वभ्यध्यायत् नतुपृथक्त्वेनेत्यन्वयः अपूर्वेहिपक्षद्वयंमीमांसकानाम् । तदानीमेवसूक्ष्मत्वेनोत्पन्नंफलमेवापूर्वम् । कालांतरफलोत्पादिकाकर्मशक्तिर्वाऽपूर्वमिति । अ०
तदुक्तं " यागादेवफलं तद्धिशक्तिद्वारेण सिध्यति । सूक्ष्मशक्त्यात्मकंवापिफलमेवोपजायत"इति । तदेवाह । क्रियाफलं धर्माख्यमितिच । ननुयद्यंगं देवताः कर्मतुप्रधानमिति मतं तर्हिकर्तृनिष्ठ
टीका मपूर्वंस्यात् । तदुक्तं " कर्मभ्यः प्रागयोग्यस्यकर्मणः पुरुषस्यवा योग्यता शास्त्रगम्यायापरासाऽपूर्वमिष्यते " इति । अथदेवताः प्रधानं कर्मतुदेवताराधनार्थं तदादेवताप्रसादरूपत्वादपूर्वस्य
देवताश्रयत्वमेवयुक्तम् । प्रोक्षणाद्यपूर्वस्येवव्रीह्याद्याश्रयत्वम् । कुतोवासुदेवाश्रयमपूर्वंभावयति । उच्यते । यदिकर्तृनिष्ठमपूर्वं तर्हिवासुदेवस्यांतर्यामिणः प्रवर्तकत्वेनमुख्यकर्तृत्वात् तदाश्रयमे ॥७॥
वापूर्वं नतुतत्प्रयोज्ययजमानाश्रयम् । शास्त्रफलं प्रयोक्तरीतिन्यायात् । अन्यथाऋत्विजामप्यपूर्वाश्रयत्वप्रसंगात् । तदेतदाह साक्षात्कर्तरीति । देवताश्रयत्वेपि वासुदेवाश्रयत्वमेवेत्याह । प
॥२५॥ रदेवतायामिति । परदेवतात्वे हेतुः । सर्वदेवतालिंगानां तत्तद्देवताप्रकाशकानां मंत्राणां येऽर्था इंद्रादिदेवतास्तेषां नियामकतयास्वामित्वेनतस्यैवप्रसादनीयत्वात् फलदातृत्वाच्च युक्तमेवापूर्वाश्रय
त्वमित्यर्थः एवंभावनमेवआत्मनो नैपुण्यं कौशलं तेनमृदिताः क्षीणाः कषायाः रागादयोयस्य । अध्वर्युभिरिति बहुवचनंनानाकर्माभिप्रायेण ६ एवंभूतयाकर्मविशुद्ध्या विशुद्धंसत्त्वमंतःकरणंयस्य
तस्यभक्तिरजायतेत्यन्वयः । क्व । अंतर्हृदयेयआकाशः सएवशरीरमभिव्यक्तिस्थानं यस्यतस्मिन्ब्रह्मणि । कीदृशे । महापुरुषरूपस्योपलक्षणं आकारोयस्यतस्मिन् किंच श्रीवत्सादिभिरुपल
क्षिते । निजपुरुषाणां नारदादीनांहृदिलिखितवन्निश्चलतयास्थितेनउक्तविधेन पुरुषरूपेण आत्मनिस्वमनसि विरोचमाने (प्रकाशमाने ।) कीदृशीभक्तिः उच्चैस्तरांअत्यंतातिशेयन (दिनेदिने)
एधमानो रयोवेगः प्रकर्षोयस्याः (सा) ७ एवमनुवृत्त्यावर्षाणामयुतानि तेषांसहस्रंतत्पर्यंतकालेऽवासितोनिश्चितः कर्मनिर्वाणावसरः राज्यभोगादृष्टसमाप्तिसमयो येनसः (पित्रादिभ्यआगतं)
अधिकृत्यभुज्यमानंरिक्थं (राज्यलक्षणं) धनंयथाविभागं विभज्यसकलसंपदां निकेतादाश्रयात् स्वगृहात् पुलहाश्रमं हरिक्षेत्रं प्रवव्राज ८ ।

संप्रचरत्सुनानायागेषुविरचितांगक्रियेष्वपूर्वंयत्तत्क्रियाफलंधर्माख्यंपरेब्रह्मणियज्ञपुरुषेसर्वदेवतालिंगानांमंत्राणामर्थनियामकतयासाक्षात्कर्तरिपरदेवता
यांभगवतिवासुदेवएवभावयमानआत्मनैपुण्यमृदितकषायोहविःष्वध्वर्युभिर्गृह्यमाणेषुसयजमानोयज्ञभाजोदेवास्तान्पुरुषावयवेष्वभ्यध्यायत् ६ ए श्लोकाः
वंकर्मविशुद्ध्याविशुद्धसत्त्वस्यांतर्हृदयाकाशशरीरेब्रम्हणिभगवतिवासुदेवेमहापुरुषरूपोपलक्षणेश्रीवत्सकौस्तुभवनमालाऽरिदरगदादिभिरुपलक्षितेनिजपु
रुषहृल्लिखितेनात्मनिपुरुषरूपेणविरोचमानउच्चैस्तरांभक्तिरनुदिनमेधमानरयाऽजायत ७ एवंवर्षायुतसहस्रपर्यंतावसितकर्मनिर्वाणावसरोऽधिभुज्यमानं ६/८
स्वतनयेभ्योरिक्थंपितृपैतामहंयथादायंविभज्यस्वयंसकलसंपन्निकेतात्स्वनिकेतात्पुलहाश्रमंप्रवव्राज ८

किंच एवंप्रवर्तमानेषुयोगेषुयदपूर्वंक्रियाफलंतत्भगवतिचिंतयन्यज्ञभाजोदेवान्भगवदवयवेषु अभ्यध्यायत् ६ एवंवर्तमानस्यभरतस्याभगवद्भक्तिः प्रतिदिनंवृद्धिंअगमत् ७ एवं
चूर्णिका वर्षायुतसहस्रपर्यंतंराज्यंभुक्त्वापुत्रेभ्यः विभज्य सकलसंपत्तिंविहाय स्वगृहात् पुलहाश्रमंहरिक्षेत्रंप्रवव्राज ८ ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

यत्रक्षेत्रेविद्याधरकुंडे (अद्यापि) वात्सल्यंकर्तृतेन (हरिः कर्मसंनिधाप्यते) सन्निहितः क्रियते (इच्छारूपेण) भक्तानामपेक्षितेनरूपेण (भक्तवात्सल्यात् तदिच्छानुसारंतत्र) संनिहितो भवतीत्यर्थः ९
(यत्र) आश्रमस्थानानिउभयतः उपर्यधश्चनाभिराकारविशेषोयेषांतैर्दृषच्चक्रैः शिलामध्यगतैश्चक्रैश्चक्रनदीगंडकीसरितांश्रेष्ठापवित्रीकरोति १० एकलः एकः आराधनंसमीहमानः कुर्वाणःविविक्तः
शुद्धः अतएवउपरतोविषयाभिलाषोयस्य । उपभृतः संवृद्धउपशमोयस्य ११ प्रवर्धमानानुरागस्यभरेणयत् द्रुतंद्रवीभूतंहृदयंतस्मिन्शैथिल्यमनुद्यमोयस्य । आत्मनिदेहेउद्भिद्यमानंरोमपुलककुलंरोमांचवृं
दंयस्य । ककारः समासांतः । औत्कंठ्यात्प्रवृत्तेनप्रणयबाष्पेणप्रेमाश्रुणानिरुद्धोवलोकोययोः तेनयनेयस्यसः एवंवर्तमानस्तामपिभगवत्सपर्यांनसस्मारेत्यन्वयः तत्रहेतुः निजरमणस्यस्वप्रेमदातुर्येअरुणे
चरणारविंदेतयोरनुध्यानेनपरिचितः समृद्धोभक्तियोगस्तेनपरिप्लुतः सर्वतोव्याप्तः परमाह्लादः परमानंदोयस्मिन्गंभीरहृदयह्रदेतस्मिन्अवगाढानिमग्नाधिषणायस्य १२ धृतानिभगवद्व्रतानि (भगवत्प
रिचर्यानियमा) येनसभगवंतंसूर्यमंडलेभ्युपतिष्ठन्नेतदुहोवाचेत्यन्वयः । कीदृशः । एण्याहरिण्याअजिनमैणेयंतदेववासस्तेनअनुसवनाभिषेकेनार्द्राःकपिशाश्चयाः कुटिलजटास्तासांकलापेनचविरो
चमानः सूर्यप्रकाशिकयाऋचा । हिरण्मयं''ध्येयःसदासवितृमंडलमध्यवर्ती''त्यादिनोक्तं (सूर्यबिंबे) उज्जिहानेउद्गच्छतिसतिसांकारांतपाठेसन्नंतात्पचाद्यच् । अर्थस्तुसएव १३ (परोइत्योदंतमव्ययं
परमित्यर्थेअथोइतिवत्) परोरजः रजसःप्रकृतेः परंशुद्धसत्त्वात्मकंसावितुर्देवस्यसूर्यस्यभर्गः स्वरूपभूतंतेजः जातवेदोधनंकर्मफलंयस्मात्तत्कर्मफलदमित्यर्थः अत्रहेतुः यत्मनसैव (संकल्पेनैव) इदंविश्वं
जजानससर्जापुनश्चअदः सृष्टंविश्वमंतर्यामिरूपेणप्रविश्यगृध्राणं (अभि) कांक्षंतंहंसंजीवंसुरेतसाचिच्छक्त्याविचष्टेपश्यतिपालयतीत्यर्थः । नृषुसीदतिउपाधितयातिष्ठतीतिनृषत्बुद्धिः तस्यारिंगिंरिंगणं
गतिंरातीतिनृषद्रिंगिरां । ''वाछंदसी''त्यमिपूर्वरूपत्वाभावः । तद्भर्गः इमः शरणंव्रजामः १४ ॥ ॥ इतिश्रीभागवतेसहा०पंचमस्कंधेटीकायांसप्तमोध्यायः ॥ ७ ॥

॥२६॥

श्लोकाः ९/१४

यत्रहवावभगवान्हरिरद्यापितत्रत्यानांनिजजनानांवात्सल्येनसंनिधाप्यतेइच्छारूपेण ९ यत्राश्रमपदान्युभयतोनाभिभिर्दृषच्चक्रैश्चक्रनदीनामसरित्प्रवरास
र्वतःपवित्रीकरोति १० तस्मिन्वावकिलसएकलःपुलहाश्रमोपवनेविविधकुसुमकिसलयतुलसिकांबुभिःकंदमूलफलोपहारैश्चसमीहमानोभगवतआराधनंवि
विक्तउपरतविषयाभिलाषउपभृतोपशमःपरांनिर्वृतिमवाप ११ तयेत्थमविरतपुरुषपरिचर्ययाभगवतिप्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यःप्रहर्षवेगे
नात्मन्युद्भिद्यमानरोमपुलककुलकऔत्कंठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयनएवंनिजरमणारुणचरणारविंदानुध्यानपरिचितभक्तियोगेनपरिप्लुतपरमाह्ला
दगंभीरहृदयह्रदावगाढधिषणस्तामपिक्रियमाणांभगवत्सपर्यांनसस्मार १२ इत्थंधृतभगवद्व्रतऐणेयाजिनवाससाऽनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापे
नचविरोचमानःसूर्यर्चाभगवंतंहिरण्मयंपुरुषमुज्जिहानेसूर्यमंडलेऽभ्युपतिष्ठन्नेतदुहोवाच १३ परोरजःसवितुर्जातवेदोदेवस्यभर्गोमनसेदंजजान ॥ सुरे
तसादःपुनराविश्यचष्टेहंसंगृध्राणंनृषद्रिंगिरामिमः १४ ॥ ॥ इतिश्रीभा०म०पं०भरतचरित्रेभगवत्परिचर्यायांसप्तमोध्यायः ॥ ॥ ७ ॥

चूर्णिका

यत्रहरिः अद्यापि तत्रत्यभक्तानांसान्निध्यंददाति ९ यत्राश्रमेउभयतःशालग्रामशिलाभिः चक्रनदीगंडासरित्श्रेष्ठासर्वतःपवित्रीकरोति १० तत्राश्रमेविविधकुसुमकिसलयतुल
सिकांबुभिः कंदमूलफलोपहारैश्चभगवत्पूजांकुर्वन्भरतः परांनिर्वृतिमवाप ११ एवंअखंडपूजाभक्तियोगेन शिथिलहृदयः परमानंदमग्नः सन् क्रियमाणांपूजामपिनसस्मार
१२ इत्थं धृतभगवद्व्रतः ऐणेयाजिनवासाःअनुसवनाभिषेकार्द्रकपिशकुटिलजटाकलापः सन् सूर्येउदितेसति हिरण्मयं पुरुषंउपतिष्ठन् एतदुवाच १३ सूर्यस्यसर्वकर्म
फलंदजगदुत्पत्तिस्थितिसंहारकरंतेजःप्रतिवयंशरणंव्रजामः १४ ॥ इतिपंचमेसप्तमः ॥ ७ ॥

॥२६॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

अष्टमेभजतोविष्णुंतस्यकर्मांतरायतः । एणरक्षाप्रसक्तस्यजातमेणत्वमीर्यते १ कृपयापिकृतः संगः पतनायैवयोगिनः । इतिप्रदर्शयन्नाहभरतस्यैणपोषणम् । २ नैयमिकंनित्यनैमित्तिकविधिप्राप्तंआव
श्यकंअर्थप्राप्तमूंत्रोत्सर्गादि । (अत्रक्रमोऽविवक्षितः । अभिषेकः स्नानं) कृतमभिषेकादिकंयेन । ब्रह्माक्षरंप्रणवंजपन्उदकांतेनद्यास्तीरे १ जलाशयाभ्याशंनद्याः समीपे २ पेपीयमानेअत्यासक्त्यापीयमा
नेसतितावदेवतत्क्षणमेवआविदूरेणसन्निधौमृगपतेः सिंहस्यउन्नादोमहान्नादः उद्गतः । ३ प्रकृत्यास्वभावतएवविक्लवाव्याकुलासुतरांतुसिंहभयस्याभिनिवेशेनअभिनिविष्टत्वेनव्यग्रंव्याकुलंहृदयंयस्याःपारि
प्लवदृष्टिः परिभ्रांतनेत्रानगतःतृषातृडयस्याः उच्चक्रामनदीमुल्लंघितवती । ४अंतर्वत्न्यागर्भिण्याः उरुभयेनस्थानाद्विचालितोयोनेर्निर्गतः सन् गर्भः स्रोतसिप्रवाहेनिपतितः ५ प्रसवोगर्भपातः उत्सर्प
णमुल्लंघनं भयं (सिंहात् खेदोगर्भनाशात्) तैरेतैरातुरापीडिता (स्वगणेनचरहिताएकाकिनीसती) दर्यांगिरिगुहायांहरिणवधूः पपातअथानंतरं (एव) मृताच ६ एणकुणकं हरिणबालकं स्रोतसानी
यमानं अपविद्धंबंधुभिस्त्यक्तंइतिएतैः कृपणत्वादिहेतुभिः याऽनुकंपातयाऽनयत् ७ कृतोनिजः स्वीयइत्यभिमानोयेन । पोषणंतृणादिना । पालनंवृकादिभ्योरक्षणम् । प्रीणनंकंडूयनादिना । लालनं
चुंबनादिना । एतैर्यदनुध्यानमासक्तिस्तेन आत्मनोनियमाः स्नानादयः यमाअहिंसादयस्तत्सहिताः । ईश्वरपरिचर्यादयश्चप्रत्यहमेकैकशोवियुज्यमानाः संतः कतिपयेनाहर्गणेनसर्वेउत्सन्नावभूवुः । ८

श्लोकाः १/८

॥ श्रीशुकउवाच ॥ ॥ एकदातुमहानद्यांकृताभिषेकनैयमिकावश्यकोब्रह्माक्षरमभिगृणानोमुहूर्तत्रयमुदकांतउपविवेश १ तत्रतदाराजन्हरिणीपिपास
याजलाशयाभ्याशमेकैवोपजगाम २ तयापेपीयमानउदकेतावदेवाविदूरेणनदतोमृगपतेरुन्नादोलोकभयंकरउदपतत् ३ तमुपश्रुत्यसामृगवधूःप्रकृतिवि
क्लवाचकितनिरीक्षणासुतरामपिहरिभयाभिनिवेशव्यग्रहृदयापारिप्लवदृष्टिरगततृषाभयात्सहसैवोच्चक्राम ४ तस्याउत्पतंत्याअंतर्वत्न्याउरुभयावगलितोयोनि
निर्गतोगर्भःस्रोतसिनिपपात ५ तत्प्रसवोत्सर्पणभयखेदातुरास्वगणेनवियुज्यमानाकस्यांचिद्दर्यांकृष्णसारसतीनिपपातअथचममार ६ तंत्वेणकुणकंकृपणंस्रो
तसाऽनूह्यमानमभिवीक्ष्यापविद्धंबंधुरिवानुकंपयाराजर्षिभरतआदायमृतमातरमित्याश्रमपदमनयत् ७ तस्यहवाएणकुणकेउच्चैरेतस्मिन्कृतनिजाभिमानस्या
हरहस्तत्पोषणपालनलालनप्रीणनानुध्यानेनात्मनियमाःसहयमाःपुरुषपरिचर्यादयएकैकशःकतिपयेनाहर्गणेनवियुज्यमानाःकिलसर्वएवोदवसन् ८

चूर्णिका

॥ ॥ श्रीशुकउवाच ॥ ॥ एकदागंडक्यांकृताभिषेकनैयमिकावश्यकः ब्रह्माक्षरंगृणन्मुहूर्तत्रयंनद्यास्तीरेउपविवेश १ हेराजन् तत्रैकागर्भिणीहरिणी पिपासयाजलसमीपे
आजगाम तयापेपीयमाने उदके तदैवसमीपेसिंहस्यभयंकरः शब्दः अभूत् २ साहरिणी सिंहभयेनपरिभ्रांतनेत्राअगततृषासहसैवनदींउल्लंघितवती ३ तदाअंतर्वत्न्याः तस्याः
उड्डाणसमये योनिनिर्गतः गर्भः प्रवाहेनिपपात तद्दुःखेनआतुरासतीकस्यांचित्पर्वतदर्यां गत्वानिपपातममारच ४ ५ ततः तंहरिणबालकंप्रवाहेणऊह्यमानंवीक्ष्यराजर्षिः
भरतः मृतमातरमिति अनुकंपयास्वाश्रममनयत् ६ तस्मिन्बालकेस्वीयमित्यभिमानेन तत्पालनरक्षणादिनाहरिपूजादिनियमाः शनैः सर्वेउत्सन्नाः बभूवुः ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

आसक्तिंप्रपंचयतिअहोइत्यादिनाइतिकृतानुषंगइत्येतत्पर्यंतेन । (बतेतिखेदे ।) ईश्वररथचरणः कालचक्रंतस्यपरिभ्रमणवेगेन (स्वगणादिभ्यःस्वगणः सजातीयसमूहः सुहृदोमित्राणिबंधवोमात्राद यस्तेभ्यो) विभ्रंशितः माइतिमांशरणंप्रापितः मामेवमातापित्रादिबुद्ध्याउपेयायप्राप्तः यौथिकान्यूथसंघातिनः अनसूयुना एतन्निमित्तंममस्वार्थोभ्रश्यतीतिदोषदृष्टिमकुर्वता । (शरणागतोपेक्षायांदो षंचजानतामयानुष्ठेयम् ।) ९ तदेवाह । नूनंहीति । (एवंविधार्थेशरणागतरक्षणादिलक्षणेऽर्थे) १० इत्येवंकृतोनुषंगआसक्तिर्येन । मृगजहुनामृगापत्येनसह स्नेहेनानुबद्धंहृदयंयेनसः ११ स्नेहानुबंधमेवप्रपंचयति कुशकुसुमेत्यादिनास्वश्रयतीत्यंतेन। सालावकाः श्वानःयदाभयंशंकमानोभवति तदातेनसहवनंसमाविशति १२ अतिशयितः प्रणयभरोयस्यतद्धृदयंयस्यसः (विषक्तंक्षणमात्रंस्थि तमित्यर्थः ।) १३ क्रियायांदेवपूजादिलक्षणायां (कर्मण्यनुष्ठीयमानेमध्येउत्थायउत्थाय) सवर्षपतिर्भरतः (एनंपश्यतितदैव) प्रकृतिस्थेनस्वस्थेनस्तात्भूयात्।१४ अन्यदाअदर्शनकालेसकरुणं यथाभ वत्येवमनुशोचन् इतिहोवाचेत्यन्वयः । अतितर्षेणात्यौत्सुक्येन । हरिणबालविरहेण विह्वलेहृदयेसंतापोयस्य।कश्मलंमोहं (अभिरंभितः) प्रापितः सन् १५ अपीतिसंभावनायां बतेत्यनुकंपायां । अहोइतिखेदे । शठकिरातयोरिववंचनपरा क्रूराचमतिर्यस्य ।। अकृतसुकृतस्य निर्भाग्यस्यममतच्छाठ्यादिकमपराधजातमगणयन्नचिंतयन्नागमिष्यतिकिं । तदचिंतनेहेतुः आत्मप्रत्ययेनस्वाचित्तशु द्ध्याकृतविश्वासः सन् । सुजनइवसज्जनोयथानगणयातितद्वत् १६

॥२८॥ ॥८॥

अहोबतायंहरिणकुणकःकृपणईश्वररथचरणपरिभ्रमणरयेणस्वगणसुहृद्बंधुभ्यःपरिवर्जितःशरणंचमोपसादितोमामेवमातापितरौभ्रातृज्ञातीन्यौथिकांश्चैवो पेयायनान्यंकंचनवेदमय्यतिविस्रब्धश्चातएवमयामत्परायणस्यपोषणपालनप्रीणनलालनमनसूयुनाऽनुष्ठेयंशरण्योपेक्षादोषविदुषा ९ नूनंह्यार्याःसाध वउपशमशीलाःकृपणसुहृदएवंविधार्थेस्वार्थानपिगुरुतरानुपेक्षंते १० इतिकृतानुषंगआसनशयनाटनस्थानाशनादिषुसहमृगजहुनास्नेहानुबद्धहृदयआ सीत् ११ कुशकुसुमसमित्पलाशफलमूलोदकान्याहरिष्यमाणोवृकसालावृकादिभ्योभयमाशंसमानोयदासहहरिणकुणकेनवनंसमाविशति १२ पथिषुचमुग्धभावेनतत्रतत्रविषक्तमतिप्रणयभरहृदयःकार्पण्यात्स्कंधेनोद्वहतिएवमुत्संगेउरसिचाधायोपलालयन्मुदंपरमामवाप १३ क्रियायांनिर्वर्त्यमाना यामंतरालेप्युत्थायोत्थाययदैनमभिचक्षीततर्हिवावसवर्षपतिःप्रकृतिस्थेनमनसातस्माआशिषआशास्तेस्वस्तिस्ताद्वत्सतेसर्वतइति १४ अन्यदाभृशमुद्विग्नम नानष्टद्रविणइवकृपणःसकरुणमतितर्षेणहरिणकुणकविरहविह्वलहृदयसंतापस्तमेवानुशोचन्किलकश्मलंमहदभिरंभितइतिहोवाच १५ अपिबतसवैकृप णएणबालकोमृतहरिणीसुतोऽहोममानार्यस्यशठकिरातमतेरकृतसुकृतस्यकृतविश्रंभआत्मप्रत्ययेनतदविगणयन्सुजनइवागमिष्यतिकिम् १६

श्लोकाः ९/१६

चूर्णिका

नूनंआर्याःकृपणसुहृदःएवंविधार्थेस्वार्थानपिउपेक्षंते अयंहरिणबालः मामेवमातापित्रादिबुद्ध्याप्राप्तः अतोवश्यंमयाअस्यपोषणादिकार्यम् ९ एवंतस्मिन्अतिस्नेहार्थानुबद्धमनाः आसीत् १० ११ कदाचित्कुशकुसुमाद्याहरिष्यमाणः वृकादिभ्योभयंशंकमानः भवति तदामृगेणसहवनंविशति १२ पथिमुग्धभावेनसक्तंस्कंधेनउद्वहति एवंउत्संगेनिधायला लयन्परमांमुदंप्राप १३ कदाचित् हेवत्सतेस्वस्तिभूयात्एवमाशीः ददाति १४ एवंतस्मिन्आसक्ते सति सः हरिणबालकः किंचित्प्रौढः सन्पलाय्यगतः तदाहरिणवियो गेनमोहंप्राप्तः सन्इति होवाच १५ अयंएणबालकः निर्भाग्यस्यममशाठ्यादिकंनगणयन् एष्यतिकिम् १६

॥२८॥ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(क्षेमेणसुखेन) शष्पाणिकोमलतृणानि (स्वादंतंदेवेनरक्षितम्) १७ नैकचरोयूथचरः सूकरादिः यद्वा एकएवचरतियः क्रूरस्वभावोव्याघ्रादिर्नभक्षयातिकिम् १८ सकललोकस्यक्षेमोयस्मात्सउदयोयस्यसः त्रयीवेदत्रयमात्मास्वरूपंयस्यससूर्योनिम्लोचतिअस्तंयाति । (अद्यापि) मृगवध्वान्यासोनिक्षेपभूतः १९ हरिणएवराजकुमारः आगत्य (अकृतपुण्यमपि) मांअपिस्वित्सुखयिष्यतीत्यन्वयः । किंकुर्वन् विविधैरुचिरैर्दर्शनीयैर्निजैर्मृगदारकविनोदैः स्वीयानांखेदमपनुदन् २० संभवतिचैतदित्याह।क्ष्वेलिकायांक्रीडायांमृषायः समाधिस्तेनामीलितेईषन्निमीलितेदृशौयेनतंमांप्रेमसंरंभेणप्रणयकोपेनपृषत्जलबिंदुः तद्वदपरुषेणमृदुनाविषाणाग्रेणलुठतिसंघट्टयाति । २१ आसादितंनिहितंहविर्यस्मिन्तस्मिन्बर्हिषिदर्भेदंताकर्षणादिनाचापलेनदूषितेसति।दूषित्वेतिपाठेबर्हिषिविषयेदूषणंकृत्वेत्यर्थः।मयाधिक्षिप्तः सन् तत्क्षण मेवोपरतक्रीडोनिश्चलआस्ते। २२ इतिबहुधाप्रलप्योत्थायबहिर्निर्गत्यतत्खुरखातभूभागोपलंभसंभ्रांतहृदयआह किंवेति। अरेअहोअनयाक्षित्याकिंवातपआचरितम् । तपस्विन्यासभाग्यया । यत्यस्मा दियंसाविनयस्यकृष्णसारतनयस्यमृगवालस्यतनुतराः सूक्ष्माः सुभगाश्चसुंदराः शिवतमाः सुखकराश्चाखरा (मृदवश्च) खुरायेषुतेषांपदानांतत्रतत्रांकितानांपंक्तिभिः द्रविणंधनंमृगलक्षणंतेनरहितस्यअत एवातुरस्यदुःखितस्यममद्रविणमार्गंसूचयंतीसतीस्वात्मानंचताभिः कृतमंडनंद्विजानांयज्ञभूमिंकरोति । "यस्मिन्देशेमृगःकृष्णस्तस्मिन्धर्मान्निबोधते" ति स्मृतेः २३ तावदुदितेचंद्रेमृगचिह्नंदृष्ट्वास्वमृ गत्वंसंभावयन्नाह । अपिस्विदिति २४ चंद्ररश्मिस्पर्शसुखंप्राप्याह । किंवेतिसंभावनायाम्। आत्मजविश्लेषेणज्वरस्तापः सएवदावदहनः तस्यज्वालाभिरुपतप्यमानाहृदयरूपास्थलनलिनीयस्य । जलस्थं पद्मंतापंसोढुंक्षममितिस्थलग्रहणम् । उपसृतोलब्धोमृगीतनयोयेनतंमांचंद्रः स्वधयतिशांतिंगमयाति। कैःशिशिरवच्छांतंचमय्यनुरागेणगुणितंचआवर्तितंपुनः पुनःस्रवत्यन्निजवदनसलिलंतदेवामृतमयागभ स्तयः किरणास्तैः।लोकेहिमंत्रवादिनोवदनसलिलैस्तापंशमयंतीतिप्रसिद्धम् ।उपसृत्यमृगीतनयइतिपाठेमनोरथांतरमेतत्।उपसृत्यमृगीतनयः उक्तविधैर्गभस्तिभिः किंवामांस्वधयिष्यतीति।शेषंसमानम् २५

॥२९॥

श्लोकाः १७/२५

अपिक्षेमेणास्मिन्नाश्रमोपवनेशष्पाणिचरंतंदेवगुप्तंद्रक्ष्यामि १७ अपिचनवृकःसालावृकोऽन्यतमोवानैकचरएकचरोवाभक्षयाति १८ निम्लोचतिहभगवान्सक लजगत्क्षेमोदयस्त्रय्यात्माऽद्यापिममनमृगवधून्यासआगच्छाति १९ अपिस्विदकृतसुकृतमागत्यमांसुखयिष्यतिहरिणराजकुमारोविविधरुचिरदर्शनीयनिज मृगदारकविनोदैरसंतोषंस्वानामपनुदन् २० क्ष्वेलिकायांमांमृषासमाधिनाऽऽमीलितदृशंप्रेमसंरंभेणचकितचकितआगत्यपृषदपरुषविषाणाग्रेणलुठति २१ आसादितहविषिबर्हिषिदूषितेमयोपालब्धोभीतभीतःसपद्युपरतरासऋषिकुमारवदवहितकरणकलापआस्ते २२ किंवाअरेआचरितंतपस्तपस्विन्याऽनयाय दियमवनिःसविनयकृष्णसारतनयतनुतरसुभगशिवतमाखरखुरपदपंक्तिभिर्द्रविणविधुरातुरस्यकृपणस्यममद्रविणपदवींसूचयंत्यात्मानंचसर्वतःकृतकौतुकं द्विजानांस्वर्गापवर्गकामानांदेवयजनंकरोति २३ अपिस्विदसौभगवानुडुपतिरेनंमृगपतिभयान्मृतमातरंमृगबालकंस्वाश्रमपरिभ्रष्टमनुकंपयाकृपणजनवत्स लःपरिपाति २४ किंवाऽऽत्मजविश्लेषज्वरदवदहनशिखाभिरुपतप्यमानहृदयस्थलनलिनीकंमामुपसृतमृगीतनयंशिशिरशांतानुरागगुणितनिजवदनसलिला मृतमयगभस्तिभिःस्वधयतीतिच २५

चूर्णिका

किंच अस्मिन्आश्रमेकोमलतृणानिचरंतंदेवगुप्तं द्रक्ष्यामिकिम् १७ अपिच एनंवृकादयः नभक्षयिष्यंतिकिम् १८ किंचअस्मिन्सूर्येस्तमितेसति अयंमेमृगवधून्यासः एष्यतिकिम् १९ किंच हरिणराजकुमारःआगत्यमांसुखयिष्यतिकिम् २० अहोक्रीडायांमांमृदुविषाणाग्रेणसंघट्टयति २१ हविषिदूषितेसतिमयाअधिक्षिप्तः सन्निश्चलःआस्ते २२ इति वहुधाप्रलप्यतावत्उदितेचंद्रेमृगंदृष्ट्वास्वमृगत्वंसंभावयन्नाह २३ अहोअसौचंद्रः एनंहारिणवालकंवत्सलः सन्पालयतिकिम् २४ २५

॥२९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एवमघटमानेन सिद्धिमगच्छतामनोरथेन मृगाशालक्षणेन आकुलंहृदयंयस्यसः) मृगदारकवदाभासमानेन । (नायंमृगदारकः किंतुतद्रूपेणस्वारब्धकर्मैवफलितमित्यर्थः तेन) भगवदाराधनलक्षणा
त् कर्मणश्चविभ्रंशितः । प्रारब्धकर्मत्वेहेतुः । कथमित्यादि । इतरथा (प्रारब्धकर्माभावे) साक्षात्स्वपुत्रवत्कथमासंगः स्यात् । (मोक्षस्यविघ्नत्वेनहेतुना) पूर्वंपरित्यक्तादुस्त्यजाऔरसायेनतस्य । अंतरा
येणविघ्नेन विहतंयोगारंभणंयस्य (तस्य) आत्मानमविगणयतः आत्मचिंतामकुर्वतः तावदेवतीव्रवेगः कालोमृत्युसमयश्चदुस्तर आपद्यत । २६ लोकंदेहंमृगेणसहितं विसृज्यप्राकृतइवमृगशरीरमवाप
कथंभूतः कलेवरंमृतमनुनमृतानविनष्टा पूर्वजन्मानुस्मृतिर्यस्य २७ (भगवदाराधनस्यसमीहा अनुष्ठानंतत्सामर्थ्येन ।) आहस्वचित्ते २८ अहोकष्टंधीराणांमार्गात्भ्रष्टोहम् । भ्रंशमेवाह । यद्यतः वि
मुक्ताः समस्ताः संगायेन । विविक्तंशुद्धंजनरहितंवापुण्यसाधनभूतंपुण्यरूपंवाअरण्यं शरणं (आश्रयो) यस्य । आत्मवतोधीरस्यममनः सर्वेषांभूतानामात्मनिवासुदेवेसमावेशितं समाहितंचनिश्चलं
॥३०॥ सत् आरात्दूरादेवसुस्राव्रालितंनिःसृतं । केनसमावेशितंतदाह । तस्यानुश्रवणादिष्वभियोगेन अभिनिवेशेनअशून्याः सकलायामायस्मिन् तेनकालेन २९

श्लोकाः

॥ ॥ श्रीशुकउवाच ॥ ॥ एवमघटमानमनोरथाकुलहृदयोमृगदारकाभासेनस्वारब्धकर्मणायोगारंभणतोविभ्रंशितःसयोगतापसोभगवदाराधनलक्षणाच्च
कथमितरथाजात्यंतरएणकुणकआसंगःसाक्षान्निःश्रेयसप्रतिपक्षतयाप्राक्परित्यक्तदुस्त्यजहृदयाभिजातस्यतस्यैवमंतरायविहतयोगारंभणस्यराजर्षेर्भरतस्य
तावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाऽविगणयतआत्मानमहिरिवाखुबिलंदुरतिक्रमःकालःकरालरभसआपद्यत २६ तदानीमपिपार्श्ववर्ति २६/२९
नमात्मजमिवानुशोचंतमभिवीक्षमाणोमृगएवाभिनिवेशितमनाविसृज्यलोकमिमंसहमृगेणकलेवरंमृतमनुनमृतजन्मानुस्मृतिरितरवन्मृगशरीरमवाप २७
तत्रापिहवाआत्मनोमृगत्वकारणंभगवदाराधनसमीहाऽनुभावेनानुस्मृत्यभृशमनुतप्यमानआह २८ अहोकष्टंभ्रष्टोऽहमात्मवतामनुपथाद्यद्विमुक्तसमस्त
संगस्यविविक्तपुण्यारण्यशरणस्यात्मवतआत्मनिसर्वेषामात्मनांभगवतिवासुदेवेतदनुश्रवणमननसंकीर्त्तनाराधनानुस्मरणाभियोगेनाशून्यसकलयामेनका
लेनसमावेशितम् समाहितंकार्त्स्न्येनमनस्ततुपुनर्ममाबुधस्यारान्मृगसुतमनुपरिसुस्राव २९

चूर्णिका

एवंअघटमातमनोरथाकुलहृदयः स्वारब्धकर्मणांभगवदाराधनलक्षणात्कर्मणः भ्रंशितःअन्यथाजात्यंतरेकथंसंगःस्यात् एवं तस्यपोषणपालनादिना आत्मचिंतां अकुर्वतःभरतस्य
सःकालःप्राप्तः२६तदानीमपि आत्मजमिवपार्श्ववर्तिनंशोचंतंवीक्ष्यमृगेएवआवेशितमनाः मनुष्यदेहंहित्वामृगशरीरं आप पूर्वजन्मानुस्मृतिः तस्यभगवदाराधनात् आसीत् २७ ॥३०॥
एवमात्मनः मृगरूपप्राप्तिकारणं ज्ञात्वातप्यमानोभरतः आह २८ अहोकष्टंभ्रष्टोहंमृगसंगेनभगवदाराधनादित्यादिजातनिर्वेदः मृगमातरं विसृज्यपुनः कालंजरात्
पुलस्त्याश्रममाजगाम २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰पं॰ निगूढोऽनाविष्कृतो निर्वेदोयेन । शालवृक्षोपलक्षितंग्रामं कालंजरात् यत्रहरिणजन्मप्राप्तं तस्मात्पर्वतात् ३० आत्मैवसहचरोयस्यसएकाकी । (वर्तमानोवृत्तिंकुर्वाणः) । कालप्रतीक्षायाएवप्रपंचः अ॰८
मृगत्वनिमित्तेति । (मृगत्वनिमित्तस्यप्रारब्धस्यावसानंचिंतयन्) । तीर्थोदकेनक्लिन्नमार्द्रम् । अर्धोदकस्थमित्यर्थः ३१ इतिपंचमेस्कंधेटीकायामष्टमोऽध्यायः ॥८॥ नवमेजडविप्रत्वेतस्यरागाद्यभावतः । भद्र
टीका कालीपशुत्वेपिनिर्विकारत्वमीर्यते ॥१॥ पितुःप्राप्तात्मविज्ञानोभरतोमृगतांगतः । प्रारब्धकर्मवेगेनतदंतेजडविप्रताम् ॥२॥ (अंगिरसां) आंगिरसगोत्रजानां (प्रवरस्य) श्रेष्ठस्यशमादियुक्तस्य (तत्रतपः
कृच्छ्रादि ।) त्यागोऽतिथ्यादिभ्योऽन्नदानादिःविद्याकर्मविद्या । आत्मज्ञानंदेहादिव्यतिरिक्तभोक्तात्मज्ञानं आनंदोधर्मसंपत्तिजः । आत्मनासदृशाः श्रुतादयोगुणायेषांते सोदर्याः समानोदराः (एकस्या ॥१॥
मातुरुदरजातत्वात् ।) नवपुत्राबभूवुः । यवीयस्यांकनिष्ठायांच मिथुनंस्त्रीपुरुषयुग्मम् २ उत्सृष्टंमृगशरीरंयेनतम् (चरमशरीरेणअंत्यदेहेन ।) २ तत्रापिस्वजनाद्यन्यसंगादतिशयेनउद्विजमानोबिभ्यत्
॥३१॥ आत्मनोभ्रंशमाशंकमानश्चआत्मानमुन्मत्तादिरूपेणलोकस्यदर्शयामासेत्यन्वयः किंकुर्वन् । कर्मबंधस्यनाशकंश्रवणंस्मरणंगुणानांविवरणंकथनंचयस्यतथाभूतंभगवतश्चरणारविंदयुगलंमनसाविशेषेणधा
रयन् । प्रतिघातशंकायांहेतुः अनुस्मृतास्वीयपूर्वजन्मनामावलिः परंपरायेनसः । ३ पुत्रस्नेहेअनुबद्धंमनोयस्य(स विप्रः) जडस्यगार्हस्थ्यानाधिकारात्समावर्तनांतान्नेवसंस्कारान्विदधानः तमुपनीयउप
नीतस्यचपुनः शौचादीन्तस्यानभिप्रेतानपिशिक्षितवान् । तत्रहेतुः । अनुशिष्टेनहिभाव्यंपितुः सकाशात्पुत्रेणेति । ४

इत्येवंनिगूढनिर्वेदोविसृज्यमृगीमातरंपुनर्भगवत्क्षेत्रमुपशमशीलमुनिगणदयितंशालग्रामंपुलस्त्यपुलहाश्रमंकालंजरात्प्रत्याजगाम ३० तस्मिन्नपिकालं श्लोकाः
प्रतीक्षमाणःसंगाच्चभृशमुद्विग्नआत्मसहचरःशुष्कपर्णतृणवीरुधावर्तमानोमृगत्वनिमित्तावसानमेवगणयन्मृगशरीरंतीर्थोदकक्लिन्नमुत्ससर्ज ३१ इतिश्री
भागवतेमहापुराणेपंचमस्कंधेभरतचरितेऽष्टमोऽध्यायः ८ ॥ ॥ श्रीशुकउवाच ॥ ॥ अथकस्यचिद्द्विजवरस्यांगिरःप्रवरस्यशमदमतपःस्वाध्याया ३०/४
ध्ययनत्यागसंतोषतितिक्षाप्रश्रयविद्याऽनसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणानवसोदर्याअंगजाबभूवुर्मिथुनंचयवीयस्यांभार्याया
म् १ यस्तुतत्रपुमांस्तंपरमभागवतंराजर्षिप्रवरंभरतमुत्सृष्टमृगशरीरंचरमशरीरेणविप्रत्वंगतमाहुः २ तत्रापिस्वजनसंगाच्चभृशमुद्विजमानोभगवतः
कर्मबंधविध्वंसनश्रवणस्मरणगुणविवरणचरणारविंदयुगलंमनसाविदधदात्मनःप्रतिघातमाशंकमानोभगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्म
त्तजडांधबधिरस्वरूपेणदर्शयामासलोकस्य ३ तस्यापिहवाआत्मजस्यविप्रःपुत्रस्नेहानुबद्धमनाआसमावर्तनात्संस्कारान्यथोपदेशंविदधानउपनीतस्यचपु
नःशौचाचमनादीन्कर्मनियमाननभिप्रेतानपिसमशिक्षयदनुशिष्टेनहिभाव्यंपितुःपुत्रेणेति ४

चूर्णिका ३० तस्मिन्नपिकालंप्रतीक्षमाणः संगात्भीतः एकएवशुष्कपर्णादिभक्षयन् कालेनमृगशरीरंतीर्थोदकक्लिन्नंउत्ससर्ज ३१॥ इतिपंचमेअष्टमः ॥ ८ ॥ ॥ ॥ श्रीशुकउवाच
॥ ॥ अथकस्याचित्अंगिरःप्रवरस्यआत्मज्ञानानंदयुक्तस्यद्विजस्यनवपुत्राः बभूवुः कनिष्ठभार्यायांमिथुनंचजातम् १ यःतत्र पुमान् तं परमभागवतंभरतं त्यक्तमृगशरीरंच ॥३१॥
रमेणशरीरेणविप्रत्वंगतमित्याहुः २ तत्रापिस्वजनसंगात्भीतः सन्भगवच्चरणांबुजंध्यायन् उन्मत्तजडांधइवलोकस्यआत्मानंदर्शयामास ३ पितातस्यउपनयनांतान् सं
स्कारान् कृत्वा पुनः वेदान्अध्यापयिष्यन्सः चतुरोमासान् सावित्रींअधीयमानमपिपुत्रंप्रातमिवअपश्यत् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

सोपिचपितुः शिक्षानिर्बंधनिवृत्तये (यत्पित्राशिक्षितंतत्) असध्रीचीनमसमीचीनमिवकरोतिस्म । (अन्यथाचरतिस्मेत्यर्थः इवशब्देनज्ञानिनः कामचारोनदोषायेतिसूचितम् ।) उपाकरणवेदव्रताद्यनंतरंश्रावणादिमासेषुवेदानध्यापयिष्यन्आदौतावत्व्याहृतिभिःसहप्रणवशिरःसहितांत्रिपदींग्रीष्मवसंतसंबंधिनः चैत्रादिचतुरोमासान्अधीयानमप्यसमवेतरूपं (असमंजसरूपं) यथाभवत्येवंग्राहयामास । (चैत्रादिमासचतुष्टयपर्यंत-)-मधीतमपितस्यस्वरानुपूर्व्यादियुक्तंव्याहृत्याद्यपितस्यनागतमित्यर्थः । ५ (आत्मनि) आत्मभूतेस्वतनुजेअनुरागेणावेशितंचित्तंयेन । शौचादीनियान्यौपकुर्वाणकस्यसावभित्रह्मचर्यवतः कर्माणितेनानभियुक्तानिअनादृतान्यपितंपुत्रंप्रत्यनुशास्यापिअप्राप्तपुत्रपांडित्यमनोरथः स्वयंकालेनोपसंहृतः कालवशान्मृतइत्यर्थः अनुशासननिर्बंधेपुनः तमेवहेतुमाह । अनुशिष्टेनभाव्यंपुत्रेणेत्यसन्अयोग्यआग्रहोयस्य ६ सपत्न्यैसमर्प्यअनुसंस्थयाअनुमरणेन (सहगमनविधिनेत्यर्थः) सप्तम्यंतपाठेप्ययमेवार्थः ७ ("त्रय्यांअग्निष्टोमेनस्वर्गकामोयजेते" त्याद्यायांपर्यवसितामतिर्येषां नतुब्रह्मविद्यायांते) न्यवृत्सत निवर्तितुमैच्छन्निवृत्ताइत्यर्थः ८ यदाऽभिभाष्यमाणः (संबोध्यमानः) तदातदनुरूपाणि (उन्मत्तादिवचनानुकूलवचनानि हेउन्मत्तेत्यादीनि) प्रभाषते । मूल्यमंतरेणबलात्यत्कर्मकार्यतेसाविष्टिः । वेतनंमूल्यं । (यदृच्छास्वैरिता ।) विष्ट्यादिभिरुपसादितंअन्नंअभ्यवहरतिपरं भुंक्तेकेवलं । नत्विंद्रियप्रीतिनिमित्तं । (नजिह्वादींद्रियतृप्तये इत्यर्थः) अत्रहेतुद्वयमाह । नित्यंसदानिवृत्तंनिमित्तंयस्मात् उत्पादकशून्यः स्वसिद्धः अभिव्यंजकशून्यः विशुद्धः एवंभूतः केवलोयोनुभवः सएवानंदरूपः स्वात्मातस्यलाभः एवंभूतोहमितिज्ञानंतस्याधिगमः प्राप्तिरस्तियस्य । द्वंद्वानिसन्मानावमानादीनि तद्धेतुकयोः सुखदुःखयोरकृतदेहाभिमानः तस्मान्नेंद्रियप्रीतिनिमित्तमभ्यवहरतीत्यर्थः । ९

श्लोकाः ५/९

सचापितदुहपितृसन्निधावेवासध्रीचीनमिवस्मकरोति छंदांस्यध्यापयिष्यन्सहव्याहृतिभिः सप्रणवशिरस्त्रिपदींसावित्रींग्रैष्मवासंतिकान्मासानधीयानमप्यसमवेतरूपंग्राहयामास ५ एवंस्वतनुजआत्मन्यनुरागावेशितचित्तःशौचाध्ययनव्रतनियमगुर्वनलशुश्रूषणाद्यौपकुर्वाणककर्माण्यनभियुक्तान्यपिसमनुशिष्टेनभाव्यमित्यसदाग्रहःपुत्रमनुशास्यस्वयंतावदनधिगतमनोरथःकालेनाप्रमत्तेनस्वयंगृहएवप्रमत्तउपसंहृतः ६ .अथयवीयसीद्विजसतीस्वगर्भजातंमिथुनंसपत्न्याउपन्यस्यस्वयमनुसंस्थयापतिलोकमगात् ७ पितर्युपरतेभ्रातरएनमतत्प्रभावविदस्त्रय्यांविद्यायामेवपर्यवसितमतयोनपरविद्यायांजडमतिरितिभ्रातुरनुशासननिर्बंधान्न्यवृत्सत ८ सचप्राकृतैर्द्विपदपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणोयदातदनुरूपाणिप्रभाषतेकर्माणिचसकार्यमाणःपरेच्छयाकरोतिविष्टितोवेतनतोवायाच्ञयायदृच्छयावोपसादितमल्पंबहुमिष्टंकदन्नंवाऽभ्यवहरतिपरंनेंद्रियप्रीतिनिमित्तम् ॥ नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमः सुखदुःखयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः ९

·चूर्णिका

५ एवंअनधिगतमनोरथः तस्यपिताकालेनमृतः ६ ततः पत्नीसपत्न्यांमिथुनंन्यस्यपतिलोकं अगात् ७ एवंपितरिमृतेसति नवभ्रातरः अतत्प्रभावविदः अयंजडइतिनिश्चयंचक्रुः ८ सचद्विपदपशुभिः यदाभिभाष्यमाणः तदातदनुरूपाणिप्रभाषतेकिंचयाच्ञयापरेच्छयावाप्राप्तंबहुअल्पंमिष्टान्नंकदन्नंवाभुंक्ते निरभिमानः ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतएवशीतोष्णादिष्वनावृतांगः विचचारेत्यन्वयः कीदृशः पीनः पुष्टः। संहननांगः संहन्यंतेनिबिडीभवंतिस्मअंगानियस्य। कठिनावयवइत्यर्थः। स्थंडिलसंवेशनंभूमिशयनम्। अनुन्मर्दनम्उन्मर्दनाभावः अमज्जनंस्नानाभावः तैर्यद्रजः तेनाप्रकटं ब्रह्मवर्चसंब्राह्मंतेजोयस्य। यथारजसामहामणिरनभिव्यक्ततेजाभवति कुत्सितेनपटेनावृताकटिर्यस्य। उरुमषिणाअतिमलिनेन। नतत्त्वतस्तंजानंतियेतैर्जनै रवमतः सन्। १० यदातुपरेभ्यः कर्ममूल्येनाहारमपेक्षमाणो भवति तदाकेदारकर्मणि शालिक्षेत्रेकर्दमविलोडनादौ आहारप्रलोभनेन नियुक्तः सन् तदपिकरोति। किंतुअत्रकर्दमस्यप्रक्षेपेक्षेत्रंसमंभवेत् इतउद्धरणे विषमंस्यात् इत्यादिनवेद.। भ्रातृभिर्दत्तान् कणादीनप्यमृतवद्भुंक्ते। कणाश्चूर्णतंडुलाः पिण्याकंतैलयंत्रोद्धृततिलकिट्टम्। फलीकरणंतुषः। कुल्माषाः कीटदष्टामाषाः स्थालीपुरीषंस्थाली लग्नंदग्धान्नम्। ११॥॥तस्यरागादिराहित्यमलोल्यंचैवमीरितम्।अथान्यच्चरितंप्राहचित्रंमृत्यावसंभ्रमम् वृषलपतिः शूद्रसामंतश्चोरराजः आलभतआलब्धुंप्रवृत्तः १२ दैवाद्बंधनविमुक्तस्य(अर्थात्पलायितस्यतस्य)पशोः(पदवींमार्गंपरिधावंतःपरितः शोधयंतइत्यर्थः तस्यवृषलपतेरनुचराः) तमसाव्याप्तायां निशितत्रापिनिशीथसमयेअर्धरात्रावसरे आकस्मिकोदैवनिर्मितोविधिःप्रकारःतेन (अंगिरःप्रवरस्यसुतमपश्यन्) वीरासनेनऊर्ध्वावस्थानेन (क्षेत्राणिसंरक्षमाणंपालयंतम्।) १३ अवमृश्यज्ञात्वा (रशनयारज्ज्वा) १४ पणयश्चोराः (स्वविधिनास्वागमोक्तमार्गेण।)अहतेननूतनेन। उपस्कृतमलंकृतम्।(किसलयः पल्लवः अंकुरोयवादीनाम्।) वैशससंस्थयाहिंसाविधानेनगीतादिघोषेणसह १५ वृषलराजस्यपणिः पुरोहितत्वेनवर्तमानश्चोरः (असृगासवेनरक्तरूपेणमद्येन।) तदभिमंत्रितंभद्रकालीमंत्राभिमंत्रितम् १६

श्लोकाः १०/१६

शीतोष्णवातवर्षेषुवृषइवानावृतांगः पीनःसंहननांगःस्थंडिलसंवेशनानुन्मर्द्दनामज्जनरजसामहामणिरिवानभिव्यक्तब्रह्मवर्चसःकुपटावृतकटिरुपवीतेनोरुमषिणाद्विजातिरितिब्रह्मबंधुरितिसंज्ञयाऽतज्ज्ञजनावमतोविचचार १० यदातुपरतआहारंकर्मवेतनतईहमानःस्वभ्रातृभिरपिकेदारकर्मणिनिरूपितस्तदपिकरोतिकिंतुनसमविषमन्यूनमधिकमितिवेदकणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीनप्यमृतवदभ्यवहरति ११ अथकदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यैपुरुषपशुमालभतापत्यकामः १२ तस्यहदैवमुक्तस्यपशोःपदवींतदनुचराःपरिधावंतोनिशिनिशीथसमयेतमसावृतायामनधिगतपशवआकस्मिकेनविधिनाकेदारान्वीरासनेनमृगवराहादिभ्यःसंरक्षमाणमंगिरःप्रवरसुतमपश्यन् १३ अथतएनमनवद्यलक्षणमवमृश्यस्वभर्तृकर्मनिष्पत्तिंमन्यमानाबध्वारशनयाचंडिकागृहमुपनिन्युर्मुदाविकसितवदनाः १४ अथपणयस्तंस्वविधिनाऽभिषिच्याहतेनवाससाऽऽच्छाद्यभूषणालेपस्रक्तिलकादिभिरुपस्कृतंभुक्तवंतंधूपदीपमाल्यलाजकिसलयांकुरफलोपहारोपेतयावैशससंस्थयामहतागीतस्तुतिमृदंगपणवघोषेणच पुरुषपशुंभद्रकाल्याःपुरतउपवेशयामासुः १५ अथवृषलराजपणिःपुरुषपशोरसृगासवेनदेवींभद्रकालींयक्ष्यमाणस्तदभिमंत्रितमसिमतिकरालनिशितमुपाददे १६

चूर्णिका

कुपटावृतकटिः उरुमषिणोपवीतेनब्रह्मबंधुरितिसंज्ञयाअज्ञैः अवमतः सन् विचचार १० यदाभ्रातृभिः केदारकर्मणिआहारप्रलोभेननियुक्तः सन् तदपिकरोति तथापिअत्रकर्दमस्य प्रक्षेपे इदं क्षेत्रं समंभवेत् इतः उद्धरणेविषमंस्यात्इतिनवेद किंच भ्रातृभिः दत्तकणपिण्याकतुषकीटदष्टमाषदग्धान्नादिकं भक्षयति ११ अथकदाचिच्चोरराजः अपत्यकामः सन्भद्रकाल्यै पुरुषपशुमालब्धुंप्रवृत्तः १२ ततःबलिदानकालेपलायितस्यपशोः पदवींगवेषयंतः तद्भृताः अर्धरात्रसमयेतं अप्राप्य अकस्मात्क्षेत्ररक्षणेस्थितंजडभरतंलब्ध्वा १३ रशनयातंबध्वा हर्षेणचंडिकागृहंनिन्युः १४ अथपणयः तंस्वविधिनाअभिषिच्यवस्त्रभूषणलेपस्रक्तिलकादिभिः उपस्कृतं भुक्तवंतंमहापूजयापूजितायाः भद्रकाल्याः अग्रेउपवेशयामासुः १५ अथचोरराजपुरोहितः पुरुषपशोः रक्तेनभद्रकालीं यक्ष्यमाणःनिशितंखड्गंआददे १६

॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥९॥

धनमदएवरजस्तेनोत्सिक्तंत्यक्तमर्यादं मनोयेषां भगवत्कलायुक्तंवीराणांब्राह्मणानांकुलंतुच्छीकृत्य यथेच्छं वर्तमानानां (अतिदारुणं ब्रह्मर्षिसुतस्यालंभनरूपं) यत्कर्मतदुपलभ्य (सहसातत्क्षणम्)
देवीउच्चचाट प्रतिमांत्यक्त्वाबहिर्निर्गता । कथंभूतं तदालंभनम् । सूनायामपि (अननुमतं ।) आपत्काले अनुज्ञातायामपिहिंसायामननुज्ञातम् । (सर्वप्राणिहिंसका अपिब्राह्मणहिंसां नानुमन्यंतेहि ।)
भद्रकालीत्यंतमिदं गद्यम् १७ अमर्षोऽपराधासहनंरोषश्चवपुषोदाहनं तयोरावेशस्तस्यरभसेन वेगेन विलसितः उत्तंभितः भ्रुकुटिलक्षणोविटपःशाखा कुटिलादंष्ट्राश्च अरुणानीक्षणानिच तेषामाटोपः
संभ्रमस्तेनातिभयानकंवदनंयस्याः इदंजगत् हंतुकामेवमहांतमट्टहासंकुर्वतीततःस्थानादुत्पत्य विवृक्णानि छिन्नानिशीर्षाणियेषां (तेषांकंठात्) गणेनपरिवारेणसह (अतिपानेनयोमदस्तेन विह्व
लासतीजगौ) शिरांस्येवकंदुकानितेषांलीलयाचिक्रीडेच १८ ननुकथंदेव्याराधकानामेवं विपरीतंफलं तत्राह । एवमेवेति । महत्सुअभिचाररूपोऽतिक्रमः अपराधः (साकल्येनआत्मनेकर्त्रैफलतिमत्वी
पदपिपरस्मै) १९ ननु संभावितमिदं एवंपन्मरणेप्यव्याकुलत्वंमारकेषुचक्रोधाभावइत्यादि । तत्राह नवाइति । (स्वशिरश्छेदनेआपतितेप्यसंभ्रम इतियत् एतद्भागवतपरमहंसानांअद्भुतंनैवेत्यन्व
यः । हेविष्णुदत्तेतिसंबोधनेनसंमति निश्चितेपिमरणेसंभ्रमरहितोगर्भेविष्णुनापरिरक्षितोभवानेवात्रदृष्टांत इति सूचितम् । विमुक्तोदेहाद्यात्मभावलक्षणः सुदृढोहृदयग्रंथिर्यैः । सर्वसत्त्वानां (सर्वेषांभूतानां) सु
हृदआत्मानश्चयेतेषां । नचतेषांदेहाद्यभिमानसद्भावेपिमरणादिभयमस्तीत्याह । साक्षाद्भगवताऽभितोरक्ष्यमाणानाम् । केन । अनिमिषःकालःसएवआरिः (सुदर्शनाख्यं) चक्रंतेनवरायुधेनतैस्तैर्भावैश्चअं
तर्यामितयाप्रवर्त्यमानैर्भद्रकाल्यादिरूपैःनकुतश्चिदपि भयंयस्मिन् (तत्शरणंगतानां) भागवतानां भगवदुपासकानां परमहंसानाम् (ज्ञानिनाम्) २०॥ ॥ इतिपंचमस्कंधेटीकायांनवमोध्यायः ॥ ९ ॥

॥३४॥

श्लोकाः १७/२०

इतितेषांवृषलानांरजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसांभगवत्कलावीरकुलंकदर्थीकृत्योत्पथेनस्वैरंविहरतांहिंसाविहाराणांकर्मातिदारुणंयद्ब्रह्मभूत
स्यसाक्षाद्ब्रह्मर्षिसुतस्यनिर्वैरस्यसर्वभूतसुहृदःसूनायामप्यननुमतमालंभनंतदुपलभ्यब्रह्मतेजसाऽतिदुर्विषहेणदंदह्यमानेनवपुषासहसोच्चचाटसैवदेवीभद्रका
ली १७ भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदनाहंतुकामेवेदंमहाट्टहासमतिसंरंभेणविमुंचंती,ततउत्पत्यपा
पीयसांदुष्टानांतेनैवासिनाविवृक्णशीर्ष्णांगलात्स्रवंतमसृगासवमत्युष्णंसहगणेननिपीयातिपानमदविह्वलोच्चैस्तरांस्वपार्षदैःसहजगौननर्तचाविजहारचाशि
रःकंदुकलीलया १८ एवमेवखलुमहदभिचारातिक्रमःकार्त्स्न्येनात्मनेफलति १९ नवाएतद्विष्णुदत्तमहदद्भुतंयदसंभ्रमःस्वशिरश्छेदनआपातितेऽपिविमु
क्तदेहाद्यात्मभावसुदृढहृदयग्रंथीनांसर्वसत्त्वसुहृदात्मनांनिर्वैराणांसाक्षाद्भगवताऽनिमिषारिवरायुधेनाप्रमत्तेनतैस्तैर्भावैःपरिरक्ष्यमाणानांतत्पादमूलमकुत
श्चिद्भयमुपसृतानांभागवतपरमहंसानाम् २० इतिश्रीभा०म०पं०जडभरतचरितेनवमोऽध्यायः ९ ॥

चूर्णिका ॥३४॥

इतितेषांदुष्टानां अतिदारुणं कर्मदृष्ट्वा ब्रह्मभूतस्य ब्राह्मणस्य वधं अयोग्यं मन्यमाना तेजोमयेन वपुषासहसैव प्रतिमां हित्वा वहिर्निर्गताभद्रकाली १७तद्धस्तात्खड्गंप्रगृह्य महाना
दंकृत्वा पापिष्ठानांसर्वचोराणांशिरांसिछित्त्वा तेषामत्युष्णं असृक्स्वगणैः सहपीत्वातेषांमस्तकैः स्वपार्षदैः सहकंदुकलीलयाविजहार १८ एवमेवखलुमहदभिचाररूपाति
क्रमः कार्त्स्न्येनात्मनेफलति १९ तस्मात् निर्भयं विष्णुपदंआश्रितानांकः हंतुंसमर्थोभवेत् २० ॥ इतिपंचमेनवमः ॥ ९ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दशमेक्षिपताराज्ञाशिबिकांस्वांवहन्मुनिः । स्वदुर्वादानुवादेनविज्ञायाशुप्रसादितः॥१॥एवंभूताविकारित्वमज्ञसर्वज्ञयोः समम् । इतिसर्वज्ञतासिद्ध्यैरहूगणकथेरणम् ॥२॥ रहूगणोनामसिंधुसौवीरदेशयोः रा
जातत्त्वजिज्ञासुः कपिलाश्रमंयदागच्छतिस्मतदायद्वृत्तंतदाह अथेति । इक्षुमत्यानद्यास्तीरे तेषांशिविकावाहानां कुलस्यनाथेन (दैवेनोपसादितः प्रापितः तदानींदृष्टः) एषगौरिवखरइवचभारंवोढुंसमर्थ
इतिधियापूर्वंयेकेचन विष्ट्यावलात्गृहीतास्तैः सहमसभंवलात् गृहीतः सन्अतदर्हो (वहनायोग्यो-)-पिसमहानुभावः शिबिकामुवाहेत्यन्वयः १ (जंतुमात्र-)हिंसापरिहारार्थं इषुमात्रप्रदेशावलोक
स्यानुपश्चात्यागतिः तस्याहेतुभूतायाः पुरुषाणांगतिर्नसम्यगाहिताएकरूपानाभूत् (अधिवहतोवोढॄन्) २ (ईश्वरस्यस्वामिनोवचः) अतः सोपालंभंसाक्षेपं सामदानभेददंडेषुउपायेषुचतुर्थाच्छंकितचित्ताः
३ (नप्रमत्ताअनवधानाः) भवन्नियमानुपथास्त्वदाज्ञानुवर्तिनः । (नियुक्तोपिसाधुगच्छेतिआज्ञप्तोपिद्रुतं अस्मद्गत्यनुगुणं) नपारयामः नशक्नुमः ४ कृपणानांवचो निशम्यसांसर्गिकः संसर्गनिमित्तः एक
॥३५॥ स्यापिदोषः सर्वेषामेवभवितुमर्हतीति निश्चित्य रहूगणआहेत्यन्वयः कथंभूतः उपासितावृद्धायेनसोपि निसर्गेणबलात्कृतस्वभावेनपरवशः कृतः सन् (अवएवोत्थितमन्युः) । कथंभूतंप्रत्याह । नसपष्टं
ब्रह्मतेजोयस्मिन्तंभस्मनाछन्नमग्निमिवस्थितम् । (रजोगुणेनावृतामतिर्यस्यसः) । ५

श्लोकाः १/५

॥ श्रीशुकउवाच ॥ ॥ अथसिंधुसौवीरपतेरहूगणस्यव्रजतइक्षुमत्यास्तटेतत्कुलपतिनाशिबिकावाहपुरुषान्वेषणसमयेदैवेनोपसादितःसद्विजवरउपल
ब्धएषपीवायुवासंहननांगोगोखरवद्धुरंवोढुमलमितिपूर्वविष्टिगृहीतैःसहगृहीतःप्रसभमतदर्हउवाहशिबिकांसमहानुभावः १ यदाहिद्विजवरस्येषुमात्रावलो
कानुगतेर्नसमाहितापुरुषगतिस्तदाविषमगतांस्वशिबिकांरहूगणउपधार्यपुरुषानधिवहतआहहेवोढारःसाध्वतिक्रमतकिमितिविषममुह्यतेयानमिति २
अथतईश्वरवचःसोपालंभमुपाकर्ण्योपायतुरीयाच्छंकितमनसस्तंविज्ञापयांबभूवुः ३ नवयंनरदेवप्रमत्ताभवन्नियमानुपथाःसाध्वेववहामःअयमधुनैवनि
युक्तोपिनद्रुतंव्रजतिनानेनसहवोढुमुहवयंपारयामइति ४ सांसर्गिकोदोषएवनूनमेकस्यापिसर्वेषांसांसर्गिकाणांभवितुमर्हतीतिनिश्चित्यनिशम्यकृपणवचो
राजारहूगणउपासितवृद्धोपिनिसर्गेणबलात्कृतईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसंजातवेदसमिवरजसावृतमतिराह ५

चूर्णिका

॥ श्रीशुकउवाच ॥ ॥ अथसिंधुसौवीरपतेः तत्त्वजिज्ञासयाकपिलाश्रमंगच्छतः रहूगणस्यइक्षुमत्या तीरेशिविकावाहपुरुषान्वेषणसमयेदैवेनप्राप्तः सः द्विजवरः एष
पीवा गोखरवत् धुरंवोढुं अलमिति पूर्वविष्टिगृहीतैः सहधृतः सन्शिविकांउवाह १ यदाद्विजस्यइतस्ततः क्षुद्रभूम्यवलोकनेनगच्छतः सतः किंचित्विषमगतां शिवि
कां उपधार्य रहूगणआह हे वोढारः साधु गच्छत तेऊचुः २ ३ हेनरदेव वयं साध्वेव वहामः अयं न ४ इति श्रुत्वा राजा एकस्य दोषः सर्वेषांससंर्गिणांभवितुमर्हतीति
निश्चित्य उत्थितमन्युः सन् तमाह ५ ॥३५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रातरितिसंबोधनमाक्षेपाभिप्रायम् । व्यक्तंनिश्चितम् उरुअधिकं परिश्रांतोसीत्यादीनि विपरीतार्थानि षड्वाक्यानि । ऊहिवान् प्रापितवान् तत्रापिसुचिरं (दीर्घकालं । नसंहननांगोदृढांगः ।) जर साचवृद्धत्वेन (पीडितः) संघट्टिनः सहचराः बहुयथाभवत्येवं विप्रलब्धोपिवक्रोक्त्योपहसितोपितूष्णीमुवाहेत्यन्वयः । तूष्णींभावेहेतुः । अविद्ययारचिताद्द्रव्यादयोयस्मिन् तस्मिन्स्वचरमकलेवरे अन ध्यारोपितो मिथ्याप्रत्ययोयेन । (अनात्मन्यात्मेतिप्रत्ययोमिथ्याप्रत्ययः) तत्रद्रव्याणिमहाभूतानि । गुणाइंद्रियाणि । कर्माणिपुण्यपापानि । आशयोंऽतः करणं । यतोब्रह्मभूतः ६ मां (कदर्थीकृत्य) अनादृत्यभर्तुः स्वामिनोमम शासनमाज्ञामतिक्रामसि । चिकित्सांशास्तिं दंडपाणिर्यमोयथाजनसमूहस्यशास्तिंकरोतितथा । स्वांप्रकृतिंअप्रमत्तताम् ७ अबद्धमनन्वितं । नरदेवोहमित्यभिमानोयस्यतम् । अनुविद्धेनसंगुणितेन । तिरस्कृतः अशेषःसंपूर्णोभगवतः प्रियोनिकेत आश्रयोयेनतम् । यद्वा अशेषाणांभगवत्प्रियाणां निकेतः । सर्वेषांभूतानांसुहृत्चआत्माच । योगेश्वराणांचर्याजडादिवदाचरणं तस्यांचात्यंतंव्युत्पन्नापरिचिता मतिर्यस्यसः तंस्मयमानइवहसन्निवेतिमुखप्रसत्तिर्चोत्यते । विगतस्मयः विगतगर्वः ८ तत्रवक्रोक्त्यायदुक्तंत्वंनश्रांतःनचदीर्घमध्वानमागतइतितत्रोत्तरमाह । त्वयायदु दितं उक्तंश्रमादिनास्तीतिबुद्ध्या । तद्व्यक्तंस्फुटम् तन्नथैव । अविप्रलब्धंविप्रलंभोनभवति । तदेवाह । हेवीर यदिभारोनामकश्चित्स्यात् सचभर्तुर्वोढुर्देहस्ययदिस्यात् सचमेयदिप्रसक्तः स्यात् तर्हिदानीं भारस्यसत्त्वात् विप्रलंभः स्यात् । नत्वेतदस्ति । वस्तुतोभारस्यवोढुश्चानिरूप्यत्वात् । ममचतत्संबंधाभावात् । तथागंतुरधिगम्यंप्राप्यंकिंचित् अध्वावायदिस्यात् अद्धेतिपाठेसाक्षात्परमार्थतः । तच्च मेयदिस्यादित्यादियोज्यम् । यच्चोक्तंनातिपीवेतितत्राह । चेतनमुद्दिश्यत्वंपीवेतिप्रवादो विदांविदुषांनभवति । किंतुमूर्खाणाम् । यतोयंप्रवादोराशौभूतसंघेदेहे नात्मनि । देहएवपीनोनाहमित्यर्थः । ९एतत् प्रपंचयति स्थौल्यमिति । कलिः कलहः । अहंकारेणमदश्च । देहेनसह तदभिमानेनजातस्यहिभवंति । ममतुनिरभिमानस्यनसंति । यद्वा देहेजातेयोजातस्तस्यैवतानि ममतुतत्रनजातस्यनसंतीति । १०

अहोकष्टंभ्रातर्व्यक्तमुरुपरिश्रांतोदीर्घमध्वानमेकएवऊहिवान्सुचिरंनातिपीवानसंहननांगोजरसाचोपद्रुतोभवान्सखेनोएवापरएतेसंघट्टिनइतिबहुविप्रल ब्धोऽप्यविद्ययाविहितद्रव्यगुणकर्माशयस्वचरमकलेवरेऽवस्तुनिसंस्थानविशेषेहंममेत्यनध्यारोपितमिथ्याप्रत्ययोब्रह्मभूतस्तूष्णींशिबिकांपूर्ववदुवाह ६ अथपुनःस्वशिबिकायांविषमगतायांप्रकुपितउवाचरहूगणःकिमिदमरेत्वंजीवन्मृतोमांकदर्थीकृत्यभर्तृशासनमतिचरसिप्रमत्तस्यचतेकरोमिचिकित्सांदंडपा णिरिवजनतायायथाप्रकृतिंस्वांभजिष्यसइति ७ एवंबह्वबद्धमपिभाषमाणंनरदेवाभिमानंरजसातमसानुविद्धेनमदेनतिरस्कृताशेषभगवत्प्रियनिकेतंपंडित मानिनंसभगवान्ब्राह्मणोब्रह्मभूतःसर्वभूतसुहृदात्मायोगेश्वरचर्यायांनातिव्युत्पन्नमतिःस्मयमानइवविगतस्मयइदमाह ८ ॥ ॥ ब्राह्मणउवाच ॥ ॥ त्वयोदितंव्यक्तमविप्रलब्धंभर्तुःसमेस्याद्यदिवीरभारः ॥ गंतुर्यदिस्यादधिगम्यमध्वापीवेतिराशौनविदांप्रवादः ९ स्थौल्यंकार्श्यंव्याधयआधयश्चक्षुत्तृड्भयं कलिरिच्छाजराच ॥ निद्रारतिर्मन्युरहंमदःशुचोदेहेनजातस्यहिमेनसंति १०

श्लोकाः ६/१०

चूर्णिका

हेभ्रातःत्वंनिश्चितं श्रांतः यतः दीर्घंमार्गं त्वंएकएवप्रापितवान् त्वंनातिपीवा वृद्धत्वेन उपद्रुतोसि तच्छ्रुत्वापिपूर्ववत् शिबिकां उवाह ६ पुनः विषमगतायां शिबिकायांप्रकुपितः रहूगणः उवाच अरेकिमिदंत्वंजीवन्मृतः मांकदर्थीकृत्य चरसि अतःयमइवतेचिकित्सांकरोमि ७ इत्यादि श्रुत्वा ब्राह्मणःयोगेश्वर चर्यायां पूर्णः सन् उवाच८ ९हेराजन् त्वयो दितं स्फुटम् स्थौल्यकार्श्यादिजीवन्मृतत्वादि देहस्यैव मे न उन्मत्तवत् स्वस्वंरूपं प्राप्तस्यमे भवताशिक्षितेनपिष्टपेषणवत् व्यर्थंनकिम् १०

१ भारत्वादितिवापाठः २ यत्त्वयोक्तमित्यपिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यच्चोक्तंजीवन्मृतोसीतितत्राप्याह । जीवन्मृतत्वंनकेवलंमम ।किंतु विकृतस्य सर्वस्यापि परिणामिनो दृष्टम् यद्यस्माद्विकृतंप्रतिक्षणमाद्यंतवत् । (जीवनंप्राणयोगेनचेष्टावत्त्वंमृतत्वंप्राणराहित्येनचेष्टारा
हित्यम् । एतद्विकृतस्यैवदेहस्यदृष्टंआद्यंतवत्त्वात् । नतुचैतन्यस्यमम विकाराभावेनाद्यंतवत्त्वायोगादित्यर्थः) यदुक्तंभर्तुःशासनमतिचरसीतितत्राह । स्वंचस्वाम्यंचतयोर्भावः सत्ता। हेईडच यत्रपक्षेध्रुवः
यदिऽव्यवास्थितःस्यादित्यर्थः तर्हिविधिर्नियोगः कृत्यंकर्मतयोर्योगः ध्रुवउच्यंतउचितोभवति । 'उचसमवाय'इतिधातुः । यदितुतवराज्यभ्रंशोममचराज्यंस्यात्तदासर्वमेतद्विपरीतंस्यादित्यर्थः । ११ ननु
यावद्राजाहं तावत्तवस्वामीभवाम्येवेतिचेत् तत्राह । विशेषोराजभृत्यादिभेदः तव्दुद्धेर्विवरं अवकाशंव्यवहारादन्यन्नपश्यामि । (नाममात्रादन्यन्नपश्यामि''वाचारंभणं विकारोनामधेय''मित्यादिश्रुतेरि
त्यर्थः ।) मनाक्ईषदपि । अथापितवायमभिमानोदृढश्चेत्तर्हि ब्रूहिकिंतेकरवामेति १२ यत्तूक्तंप्रमत्तस्यतेचिकित्सांकरोमि यथास्वांप्रकृतिंभजिष्यसइतितत्राह । उन्मत्तादिवद्वर्तमानस्यवस्तुतः स्वसंस्थां
ब्रह्मभावंगतस्य भवताकृतेन चिकित्सितेनदंडेनशिक्षितेनवाकियानर्थः । मुक्तस्यार्थानर्थयोरसंभवात् । यदिपुनरहंनमुक्तः किंतुप्रमत्तस्तब्धएव । (स्तब्धश्चासौप्रमत्तश्चेतिकर्मधारयः ।) तथापिममशि
क्षादिकं (पिष्टपेषः) पिष्टस्यैवपेषणंयथातद्वद्व्यर्थमित्यर्थः नहिजडस्वभावः शिक्षयापिपटूकर्तुंशक्यतइति । १३ अनुवादरूपयापरिभाषयाभाषणेन (प्रत्युदीर्य) प्रत्युत्तरंदत्त्वा । उपरतंअनात्म्येदेहा
त्मत्वेनिमित्तं अविद्यायस्य । आरब्धंआरब्धफलंकर्मव्यपनयन्क्षपयन् १४ हेपांडवेय सम्यक्याश्रद्धातयैवतत्त्वजिज्ञासायांप्राप्तोधिकारोयेन । यथादर्शपूर्णमासाधिकृतस्यैव गोदोहनेनपशुकामस्या
पःप्रणयेदितिगुणफलसंबंधेप्यधिकारः एवंसात्विकश्रद्धायामधिकृतस्यैवास्यामधिकारइत्यर्थः (अहंकारस्यसाक्षिणश्चान्योन्यतादात्म्यंहृदयंग्रंथिस्तं विमोचयतीतितथा) बहुयोगग्रंथसंमतंद्विजस्यतद्व
चः श्रुत्वा विगतोनृपदेवोधिराजोहमितिगर्वोयस्य१५द्विजानांमध्येकतमः । यतः सूत्रमुपवीतंबिभर्षि । यद्वा दत्तात्रेयादीनांमध्येकतमोवधूतः । (योगींद्रः कस्यवंशेजातोसि । कुत्रत्यः कस्मिन्देशेविद्य
मानः) इहापि (अस्मिन्नपिदेशे) कस्माद्धेतोः प्राप्तः । नोऽस्माकंक्षेमायचेत्प्राप्तः तर्हिशुक्लः कपिलोमुनिर्नासिनभवसिकिंउवेतिवितर्के १६

श्लोकाः ११, १६

जीवन्मृतत्वंनियमेनराजन्नाद्यंतवद्यद्विकृतस्यदृष्टम् ॥ स्वस्वाम्यभावोध्रुवईडचयत्रतर्ह्युच्यतेसौविधिकृत्ययोगः ११ विशेषबुद्धेर्विवरंमनाक्चपश्यामयन्नव्यव
हारतोन्यत् ॥ कईश्वरस्तत्रकिमीशितव्यंतथापिराजन्करवामकिंते १२ उन्मत्तमत्तजडवत्स्वसंस्थांगतस्यमेवीरचिकित्सितेन ॥ अर्थःकियान्भवताशिक्षि
तेनस्तब्धप्रमत्तस्यचपिष्टपेषः १३ ॥ ॥ श्रीशुकउवाच ॥ ॥ एतावदनुवादपरिभाषयाप्रत्युदीर्यमुनिवरउपशमशीलउपरतानात्म्यनिमित्तउपभोगेन
कर्मारब्धंव्यपनयन्राजयानमपितथोवाह १४ सचापिपांडवेयसिंधुसौवीरपतिस्तत्त्वजिज्ञासायांसम्यक्श्रद्धयाऽधिकृताधिकारस्तद्धृदयग्रंथिविमोचनंद्विजव
चआश्रुत्यबहुयोगग्रंथसंमतंत्वरयाऽवरुह्यशिरसापादमूलमुपसृतःक्षमापयन्विगतनृपदेवस्मयउवाच १५ कस्त्वंनिगूढश्चरसिद्विजानांबिभर्षिसूत्रंकतमोऽ
वधूतः ॥ कस्यासिकुत्रत्यइहापिकस्मात्क्षेमायनश्चेदसिनोतशुक्लः १६

चूर्णिका

११ १२ १३॥ ॥ श्रीशुकउवाच ॥ ॥ इत्युक्त्वा प्रारब्धक्षयंकुर्वन्राजयानमपि उवाह १४ सः रहूगणः तद्धृदयग्रंथिभेदकंद्विजवचः श्रुत्वा त्वरया अवरुह्य शिरसा
पादमूलं प्राप्तः क्षमापयन् विगतगर्वः उवाच १५ हेब्रह्मन् दत्तात्रेयादीनांमध्येत्वंकतमः अवधूतोसि १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३८॥

किमनया।चिंतयाशिविकांतावद्वहामीतिचेत्अतआह।नाहमिति।वित्तपः कुबेरः(तस्यात्रात्।)१७ यस्माद्भृशंशंकेतस्मात्कस्त्वमित्यादिप्रश्नानांउत्तरंब्रूहि।निगूढंपिहितं विज्ञानरूपंवीर्यप्रभावोयेन। अपारः अनंतमहिमा। तत्रहेतुः नोमनसापिभेत्तुंवेदितुंनक्षमंनशक्यम्।किंभेत्तुमित्यपेक्षायामाह।तेवचांसीति। यद्वा मनसायुक्ताः सूक्ष्मदृष्टयोपिभेत्तुंनक्षमंतेशक्नुवंति(नोस्माकंकावार्तेत्यर्थः यद्वा मनसापिभेत्तुंनोऽस्माकंनक्षमंतेनशक्यानीत्यन्वयः। योगेअध्यात्मविषयेग्रथितानिसंबद्धानि) १८ स्वस्यज्ञानार्थितांदर्शयति अहंचेति। इहसंसारेयत् अरणं शरणंतत्किमितिप्रष्टुंप्रवृत्तोस्मि (ज्ञानकलया) ज्ञानशक्त्याऽवतीर्णंकपिल-(संज्ञंहरिम्) १९ सएवभवान् किंस्विदेवविचरति। गृहाविष्टः कथंविचक्षीतपश्येत्। २० एवंतत्स्वरूपंपृष्ट्वातदुक्तोत्तराण्याक्षिपति। तत्रयदुक्तंममश्रमोनास्तीतितत्राह दृष्टइति। आत्मनोमे(भर्तुर्गंतुः कर्मतः श्रमोदृष्टः वैसर्वानुभवसिद्धश्चेत्यर्थः तमहंभर्तुर्गंतुर्भवतः)अनुमन्ये अनुमिमे अनुमानंचैवं। भवान्भारोद्वहनादिनाश्रांतः कर्तृत्वात्।यःकर्तासश्राम्यति। यथाहंयुद्धादिकर्तेति। नन्विदं व्यवहारमात्रंनतुसत्यं तदुक्तंव्यवहारतोन्यन्नपश्यामीतितत्राह यथेति।व्यवहारमार्गः प्रपंचः समूलः सप्रमाणकएवेष्टः। यथायथावत्। असताघटादिनाउदकानयनादेर्जलाहरणादेरभावात्। एवंप्रयोगः प्रपंचः सत्यः अर्थक्रियाकारित्वात् यः पुनरसत्यः नासावर्थक्रियाकारी। यथामिथ्याघट्टादिरिति २१ यदुक्तं (स्थौल्यंकार्श्यमित्यादिना) उपाधिधर्माःस्थौल्यादयोमेनवस्तुतः संतीतितत्रौपाधिकत्वेपि सत्यत्वंकिंनस्यादित्याह।स्थाल्याअग्निनातापात् तन्मध्यवर्तिनः क्षीरस्यतापःतस्यतापात् तंडुलानां बहिर्भागस्यततस्तद्गर्भस्यच रंधिःपाकः। नचात्रकिंचिन्मिथ्या। एवंदेहादिभिःसंनिकर्षात्संबंधात् तन्निमित्ता संसृतिः पुरुषस्यभवति। असवःप्राणाः आशयोमनः। अनुरोधात् उपाधिधर्मानुवृत्तेः।तथाहि। निदाघादिना देहेतप्ते इंद्रियाणांतापः ततःप्राणस्यततोमनसः इत्येवंयथायथमूह्यम् २२ यदुक्तंस्वस्वाम्यभावोऽध्रुवइतितत्राह। शास्तेति। अध्रुवत्वेपियदायोनृपतिः सप्रजानांशास्तागोप्ताच। यच्चोक्तंस्तब्धादेःशिक्षा।पिष्टपेषइतितत्राह।योऽच्युतस्यकिंकरःसपिष्टंन पिनष्टि। निष्फलंनकरोति स्तब्धत्वाद्यनपगमेपिशास्तुरीश्वराज्ञासंपादनेनैव सफलत्वात्। तदाह। स्वधर्मरूपमच्युताराधनंकुर्वन्यस्मादघौघंजहाति २३ यस्मादेवंममत्वदुक्तंविपरीतं प्रतिभाति। तत्तस्मात् नरदेवाभिमानमदेन तुच्छीकृताः तिरस्कृताः सत्तमाभवादृशा येनतस्यमे मैत्रीदृशं स्नेहयुक्तांदृष्टिंकृपीष्टकरोतु सतामवज्ञारूपंपापंयथातरे तरिष्यामीत्यर्थः २४

श्लोकाः १७ / २४

नाहंविशंकेसुरराजवज्रान्नत्र्यक्षशूलान्नयमस्यदंडात् ॥ नाग्न्यर्कसोमानिलवित्तपास्त्राच्छंकेभृशंब्रह्मकुलावमानात् १७ तद्ब्रूह्यसंगोजडवन्निगूढविज्ञानवीर्यो विचरस्यपारः ॥ वचांसियोगग्रथितानिसाधोननःक्षमंतेमनसापिभेत्तुम् १८ अहंचयोगेश्वरमात्मतत्त्वविदांमुनीनांपरमंगुरुंवै ॥ प्रष्टुंप्रवृत्तःकिमिहारणंतत्साक्षाद्धरिंज्ञानकलावतीर्णम् १९ सवैभवाँल्लोकनिरीक्षणार्थमव्यक्तलिंगोविचरत्यपिस्वित् ॥ योगेश्वराणांगतिमंधबुद्धिःकथंविचक्षीतगृहानुबंधः २० दृष्टः श्रमःकर्मतआत्मनोवैभर्तुर्गंतुर्भवतश्चानुमन्ये ॥ यथाऽसतोदानयनाद्यभावात्समूलइष्टोव्यवहारमार्गः २१ स्थाल्यग्नितापात्पयसोभितापस्तत्तापतस्तंडुलगर्भरंधिः ॥ देहेंद्रियास्वाशयसन्निकर्षात्तत्संसृतिःपुरुषस्यानुरोधात् २२ शास्ताभिगोप्तानृपतिःप्रजानांयःकिंकरोवैनपिनष्टिपिष्टम् ॥ स्वधर्ममाराधनमच्युतस्ययदीहमानोविजहात्यघौघम् २३ तन्मेभवान्नरदेवाभिमानमदेनतुच्छीकृतसत्तमस्य ॥ कृषीष्टमैत्रीदृशमार्तबंधोयथातरेसदवध्यानमंहः २४

चूर्णिका ॥३८॥

नाहंविशंके सुरराजवज्रात् तथा यमस्यदंडात् यथा ब्रह्मकुलावमानात् १७ किंच अज्ञाननाशार्थं कपिलंप्रतिगच्छतामयात्वंदृष्टः १८ १९ २० २१ २२ २३ अतः भवान्राजाइतिअभिमानेनतुच्छीकृतसत्तमस्य मे कृपांकुरु यथाअहं अज्ञानात् तरिष्यामितथाक्रियताम् २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुममावज्ञाकृतविकाराभावात् कुतःपापंतत्राह नेति । यद्यपि तवविक्रियानास्ति । विश्वस्यसुहृच्चासौसखाचतस्य । अतःसर्वत्रसाम्येनस्वदेहेविगताभिमानस्य । तथापि स्वकृतान्महतांअवमानात् माहशोविनंक्ष्यति अदूरात्क्षिप्रं । अपिशूलपाणिः शूलपाणिरिवातिसमर्थोपीत्यर्थः२५ ॥ ॥ इतिपंचमस्कंधेटीकायांदशमोध्यायः ॥ १० ॥ ॥ एकादशेथसंपृष्टोरहूगणमहीभृता । उपादिशत्परंज्ञानंसयोगीतिनिगद्यते ॥१॥ अकोविदः अविद्वानपित्वंकोविदानां (विदुषां) वादा उद्ग्रहणिकास्तत्तुल्यान्वादानेववदसि । (नतुविचारंकरोषि) अथाअंतः अत्यंतं विदुषांमध्येश्रेष्ठोनभवसि कुतःहियस्मात्यं स्वामिभृत्यादिलौकिकव्यवहारं त्वंसत्यमात्थ एतंसूरयस्तत्त्वज्ञास्तस्वविचारेणसहनवदंतिकिंत्वविचारसुंदरंवदंतिअतोनसत्यः १ (ननुतर्हिकथं) वैदिकानां (व्यवहारः संगच्छतामित्याशंक्य) वैदिकोपि कर्मव्यवहारोनसत्यइत्याह । तथैवेति । उरवोगार्हाग्रहसंबंधिनोमेधायज्ञाः तेषांवितानोविस्तारः तद्विषयासुविद्यासुउरुअधिकं विजृंभिताविलसितास्तेषुवेदवादेषुतत्त्ववादः तुनिश्चितंनचकास्तिनप्रकाशते । तथाचश्रुतिः । "नेहनानास्तिकिंचने"त्यादि । शुद्धोहिंसादिशून्यः साधूरागादिशून्यश्च । प्रायेणेति ईश्वरार्पितकर्मणांपरमार्थफलत्वाभिप्रायेणोक्तम् । २ ननुश्रुतवेदांतस्यापिपुंसः कर्मसुप्रवृत्तेःकथमसत्यतातत्राह । नेति । साक्षाद्यथावत् तत्त्वज्ञानाय (वरीयसीः) वरीयस्योपिवेदांतवाचः तस्यनसम्यगासन्बभूवुः (तस्यकस्य ।) स्वप्नेयानिरुक्तिस्तया स्वप्नदृष्टांतेनदृश्यत्वादिहेतुना (गृहमेधिसौख्यं) स्वयमेवहेयत्वेनानुमितंयस्यनस्यात् । ३ एवंप्रपंचस्यसत्यत्वं तदुक्तंनिराकृत्यसंसारस्यापितदुक्तांसत्यतांनिराकर्तुं तस्यमनोनिमित्ततामाह । यावदित्यादिनायावदध्यायसमाप्ति । मनोयावद्रजआदिभिर्गुणैरनुरुद्धंवशीकृतंभवति । तावत्तन्मनो निरंकुशंसत् पुरुषस्यकुशलंधर्मं इतरमधर्मंवाआतनोति । कैः । चेतोभिर्ज्ञानेंद्रियैः । आकूतिभिः कर्मेंद्रियैश्च । ४ ततश्चधर्माधर्मवासनायुक्तं(तन्मनः) तदेवानेकदेहादिवैचित्र्यं करोतीत्याह । सइतिपुंस्त्वमात्मशब्दविशेषणत्वेन । तन्मनइत्यर्थः । (वासनात्मा) वासनायुक्तआत्मोपाधित्वादात्मा । अतोविषयैरुपरक्तोऽनुविद्धः अतोगुणप्रवाहःगुणैरितस्ततश्चाल्यमानः अतएवविकृतः कामादिपरिणामवान् । षोडशात्मा षोडशकलासुभूतेंद्रियरूपासुमुख्यः । पृथङ्नामभिःसहपृथग्रूपभेदंदेवतिर्यगादिरूपंबिभ्रत् अंतर्बहिष्ट्वंउत्कृष्टत्वंनिकृष्टत्वंचपुरैस्तैरेवदेहै हेतुभूतैस्तनोति । नामभिरित्यत्ररेफलोपेदीर्घाभावआर्षः । ५

॥३९॥

नविक्रियाविश्वसुहृत्सखस्यसाम्येनवीताभिमतेस्तवापि ॥ महद्विमानात्स्वकृताद्धिमादृङ्नंक्ष्यत्यदूरादपिशूलपाणिः २५ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेदशमोध्यायः १० ॥ ॥ ब्राह्मणउवाच ॥ ॥ अकोविदःकोविदवादवादान्वदस्यथोनातिविदांवरिष्ठः ॥ नसूरयोहिव्यवहारमेतंतत्त्वावमर्शेनसहामनंति १ तथैवराजन्नुरुगार्हमेधवितानविद्योरुविजंभितेषु ॥ नवेदवादेषुहितत्त्ववादःप्रायेणशुद्धोनुचकास्तिसाधुः २ नतस्यतत्त्वग्रहणायसाक्षाद्वरीयसीरपिवाचःसमासन् ॥ स्वप्नेनिरुक्त्यागृहमेधिसौख्यंनयस्यहेयानुमितंस्वयंस्यात् ३ यावन्मनोरजसापूरुषस्यसत्त्वेनवातमसावानुरुद्धम् ॥ चेतोभिराकूतिभिरातनोतिनिरंकुशंकुशलंचेतरंवा ४ सवासनात्माविषयोपरक्तोगुणप्रवाहोविकृतःषोडशात्मा ॥ बिभ्रत्पृथङ्नामभिरूपभेदमंतर्बहिष्ट्वंचपुरैस्तनोति ५

श्लोकाः २५ / ५

चूर्णिका

२५ ॥ इतिपंचमेदशमः ॥ १० ॥ ॥ ॥ ब्राह्मणउवाच ॥ ॥ हेराजन् त्वमविद्वानपि ज्ञानीव वादान् वदसिअतः त्वंविदांमध्येश्रेष्ठोनभवसि यस्मात्लौकिकव्यवहारंत्वंसत्यं आत्थ ज्ञानिनस्तुमिथ्यात्वेनजानंति १ हेराजन्कर्मार्जितान् लोकानपि तथैव यावत्पुरुषस्यमनः सुखदुःखात्मकं कर्म दशेंद्रियैः तनोति तावत्तन्मनःविषयोपरक्तंसत्गुणप्रवाहेणदेहान्उत्पादयति २ ३ ४ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंचतदनुरूपंकरोतीत्याह । दुःखंसुखंव्यतिरिक्तंचमोहं तीव्रंदुर्निवारं कालप्राप्तंफलं सर्वतोव्यनक्ति । सृजति । ननुजडः कथंसृजतितत्राह । स्वदेहिनमालिंग्य । आलिंगनेकारणमाह । माययारचितः अंतरात्माजीवोपाधिः । उपाधितामाह । संसृतिचक्रेकूटयतिछलयतीतितथा । यथाग्रामकूटकइति । ६ एवमयंमनोनिबंधनः संसारः जीवेफलतीत्याह । तावानिति । (यावानुक्तस्तावानयं) अविः प्रकाशमानः सदाक्षेत्रज्ञस्यसाक्ष्यः दृश्योभवति स्थूलसूक्ष्मः जाग्रत्स्वप्नस्वरूपः । मनसः संसारहेतुत्वमुपसंहरन् मोक्षस्यापितदेवकारणमित्याह । तस्मादिति । अदोमनः लिंगंकारणं गुणत्वंगुणाभिमानित्वं अगुणत्वंतद्राहित्यंतदेवपरमवरंचतस्य ७ कथमेकमेव विलक्षणयोः कारणं । अवस्थाभेदादित्याह । गुणेति । (गुणानुरक्तं विषयाभिनिविष्टं । व्यसनायसंसाराय ।) नैर्गुण्यंनिर्गुणं (क्षेमायमोक्षाय ।)अथाइति कात्स्न्येंन । दृष्टांतेनस्फुटयति । यथेति । (घृतयुक्तांवर्तिं) अन्यदा घृतवर्तिक्षयेस्वंपदं शुक्लभास्वररूपं महाभूतात्मत्वंवा (भजति । तथागुणकर्मानुबद्धंगुणैः रजआदिभिः कर्मभिश्चपूर्वसंचितैर्वशीकृतं वृत्तीःश्रयते) अन्यत्रअन्यदा (तत्त्वंश्रयते) ८ वृत्तीर्दर्शयति । एकादशवृत्तयआसन् । आकूतयः क्रियाकाराः पंच । धियश्चज्ञानाकाराः पंच । अभिमानश्चैकइति । हे वीर मात्राणिकर्माणिपुरंचशरीरमित्येकादशतासांवृत्तीनां) भूमीर्विषयान् (वदंति) ९ (मात्राणीत्यादिनोक्तान्विषयानेवाह । गंधादयः पंचज्ञानेंद्रियद्वाराधीवृत्तीनांविषयाः । तत्रआकृतिः रूपं श्रवः शब्दः । विसर्गादयःपंचकर्मेंद्रियद्वाराकर्माकारवृत्तीनांविषयाः । तत्ररतिः संभोगः अर्तिर्गतिः (शिल्पोहस्तव्यापारः) पुरस्याभिमानविषयत्वप्रकारमाह । एकादशंपुरं(ममेति)स्वीक्रियतइतिस्वीकरणं अयमर्थः । शरीरमभिमानस्य नज्ञेयतयागंधादिवद्विषयः । नापिकार्यतया विसर्गादिवत् । किंतुममेतिभोगायतनत्वेनस्वीकार्यतया विषयइति । एकेतुविवेकिनामेवपुरंममत्वाभिमानविषयः नतुमूढानां अतोमूढदृष्ट्या अहंअहंकारंद्वादशंवृत्त्यंतरमाहुः । तस्यचपुरमेवशय्यासंज्ञंद्वादशंविषयमाहुः । तत्रहिजीवोऽहंकारेणशेते यतः पुरिशयनात्पुरुषइत्युच्यते १० तासांवृत्तीनामवांतरभेदैरानंत्यमाह । द्रव्याणिविषयाः । स्वभावः परिणामहेतुः । आशयः संस्कारः । कर्मअदृष्टं । कालः क्षोभकः । तैर्निमित्तभूतैः । प्रथमंशतशः ततः सहस्रशः ततः कोटिशः स्युः । नतुमिथःस्युः नचस्वतः किंतुक्षेत्रज्ञतः परमेश्वरात् । तस्यचानंतशक्तित्वादनंताःस्युरित्यर्थः । यद्वा तासांमिथ्यात्वमनेनोच्यते । कोटिशोभवंतिअतस्ताः क्षेत्रज्ञतएवस्युः तत्सत्तयैवसत्तांलभेरन् । (रज्जुसत्तयासर्पाधारया ।) नतुमिथोनच स्वतइति । यद्वाक्षेत्रज्ञोजीवस्तस्मान्नस्युः तस्याविकारित्वात् नमिथः इतरेतराश्रयापत्तेः । नस्वतः आत्माश्रयत्वापत्तेः । अतोमिथ्याभूताएवेति ११

श्लोकाः ६—११

दुःखंसुखंव्यतिरिक्तंचतीव्रंकालोपपन्नंफलमाव्यनक्ति ॥ आलिंग्यमायारचितांतरात्मास्वदेहिनंसंसृतिचक्रकूटः ६ तावानयंव्यवहारःसदाविःक्षेत्रज्ञसाक्ष्यो
भवतिस्थूलसूक्ष्मः ॥ तस्मान्मनोलिंगमदोवदंतिगुणागुणत्वस्यपरावरस्य ७ गुणानुरक्तंव्यसनायजंतोःक्षेमायनैर्गुण्यमथोमनःस्यात् ॥ यथाप्रदीपोघृतवर्तिं
मश्नन्शिखाःसधूमाभजतिह्यन्यदास्वम् ॥ पदंतथागुणकर्मानुबद्धंवृत्तीर्मनःश्रयतेन्यत्रतत्त्वम् ८ एकादशासन्मनसोहिवृत्तयआकूतयःपंचधियोऽभिमानः ॥
मात्राणिकर्माणिपुरंचतासांवदंतिहैकादशवीरभूमीः ९ गंधाकृतिःस्पर्शरसश्रवांसिविसर्गरत्यर्त्यभिजल्पशिल्पाः ॥ एकादशंस्वीकरणंममेतिशय्यामहंद्वाद
शमेकआहुः १० द्रव्यस्वभावाशयकर्मकालैरेकादशामीमनसोविकाराः ॥ सहस्रशःशतशःकोटिशश्चक्षेत्रज्ञतोनमिथोनस्वतःस्युः ११

चूर्णीकाः सुखंदुःखंचसृजति ६ ७ तस्मात्जंतोः मनः गुणानुरक्तं व्यसनायभवति निर्गुणंक्षेमाय यथादीपः घृतवर्तिमश्नन्सधूमाः शिखाः भजतिघृतक्षयेस्वंरूपंभजतितद्वत् ८ किंच दशेंद्रियाणि एकादशंमनः द्वादशंअहंकारः एतैः युक्ताः मायारचिताः कोटिशः देहाः ईश्वरात् भवंति इदंसर्वंमायाकृतं हेनरेंद्र देहीयावत् एतांमायांविधूयआत्मतत्त्वंनवेदतावत् इह भ्रमति ९ १० ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

तदेवंश्लोकत्रयेणगुणकर्मानुबद्धंमनोवृत्तीः श्रयतइतियदुक्तंतत्प्रपंचितम् । अन्यदातत्त्वंश्रयतइतियदुक्तंतदेवतत्त्वमाह । क्षेत्रज्ञइति । जीवस्यजीवोपाधेः अविशुद्धकर्तुर्मनसः (विभूतीरेताः) नित्याःप्रवाहरूपेणाविच्छिन्नाः जाग्रत्स्वप्नयोराविर्भूताः पश्यति क्वापिसुषुप्तौतिरोभूताः पश्यति अवस्थात्रयसाक्षीक्षेत्रज्ञः आत्मातत्त्वमित्यर्थः १२ क्षेत्रज्ञोद्विविधः त्वंपदार्थोजीवः तत्पदार्थईश्वरश्च । तत्राद्योनिरूपितः इदानींतत्प्राप्यमीश्वरंनिरूपयति । क्षेत्रज्ञआत्माव्यापी । पुराणोजगत्कारणभूतःपुरुषः पूर्णः । साक्षादपरोक्षः । सचस्वयंज्योतिः (स्वप्रकाशः) नतुज्ञानस्य विषयत्वेनाश्रयत्वेनवाऽपरोक्षःअजःजन्मादिशून्यः।परेशांब्रह्मादीनामपीशः नारंजीवसमूहः सअयनंयस्यनियंतुः भगवान्ऐश्वर्यादिषड्गुणवान् । वासुदेवः सर्वभूतानामाश्रयः।स्वाधीनयामायया आत्मनिजीवेअवधीयमानःअवस्थाप्यमानः कर्मकर्तरिप्रयोगः तन्नियंतृत्वेनवर्तमानइत्यर्थः । १३ एतत्सदृष्टांतमाह । यथेति । आत्मास्वरूपेण प्राणरूपेण (स्थिरचराणामंतर्निविष्टस्तेषां)ईशेत् नियमयति । ('अधीगर्थेतिकर्मणिषष्ठी । एवं) इदंविश्वं (अनुप्रविष्टस्तस्येष्टे)१४तदेवमात्मनः शुद्धत्वं संसारस्यचमिथ्यात्वंप्रदर्श्येदानीं तन्निवृत्तिमाह । (नयावदिति ।) तनुभृद्देहीवयुनोदयेनज्ञानोत्पत्त्यायावन्मायां विधूयआत्मतत्त्वंनवेदतावदिहभ्रमति । (जिताःषींद्रियशत्रवः कामादयोवायेन । विमुक्तसंगः विषयवासनारहितः ।) १५ यावच्चविषयानुरक्तंमनएवानर्थहेतुरितिनवेदतावन्निर्वेदाभावात्परिभ्रमत्येवेत्याह नेति । आत्मनोलिंगमुपाधिभूतंमनःसंसारतापानामावपनंक्षेत्रंयावन्नवेदतावद्भ्रमतीत्यनुषंगः । तापावपनत्वेहेतुः । यन्मनः (जनस्य) शोकाद्यनुबंधंममतांच (तद्धेतुभूतां) विधत्ते १६ तत्तस्मात् (एनंमनोरूपं) भ्रातृव्यंशत्रुंअध्येधितंसंप्रवृद्धंस्वयंव्यलीकं मिथ्याभूतं तथाप्यात्मानंमुष्णातीतितथातं गुरुरेवहरिस्तस्यचरणोपासनमेवअस्त्रंयस्यतथाभूतःसन्जहिघातय १७ ॥ इतिपंचमेस्कंधेटीकायामेकादशोध्यायः ॥ ११ ॥

॥४१॥

द्वादशेपुनरापृष्टः संदेहेनमहीभृता । सयोगीसर्वसंदेहानुपानुददितीर्यते ॥ १ ॥ कारणमीश्वरस्तस्यैवलोकसंरक्षणार्थो विग्रहोदेहोयस्य । स्वरूपेणपरमानंदप्रकाशेनतुच्छीकृतोविग्रहोयेन । हेअवधूतद्विजबंधोर्मलिनद्विजस्यलिंगेनवेषेण निगूढोनित्यानुभवोयेनतस्मैनमः । १

श्लोकाः १२/१

क्षेत्रज्ञएतामनसोविभूतीर्जीवस्यमायारचितस्यनित्याः ॥ आविर्हिताःक्वापितिरोहिताश्चशुद्धोविचष्टेह्यविशुद्धकर्तुः १२ क्षेत्रज्ञआत्मापुरुषःपुराणःसाक्षात्स्वयंज्योतिरजःपरेशः ॥ नारायणोभगवान्वासुदेवःस्वमाययात्मन्यवधीयमानः १३ यथाऽनिलःस्थावरजंगमानामात्मस्वरूपेणनिविष्टइशेत् ॥ एवंपरोभगवान्वासुदेवःक्षेत्रज्ञआत्मेदमनुप्रविष्टः १४ नयावदेतांतनुभृन्नरेंद्रविधूयमायांवयुनोदयेन ॥ विमुक्तसंगोजितषट्सपत्नोवेदात्मतत्त्वंभ्रमतीहतावत् १५ नयावदेतन्मनआत्मलिंगंसंसारतापावपनंजनस्य ॥ यच्छोकमोहामयरागलोभवैरानुबंधंममतांविधत्ते १६ भ्रातृव्यमेनंतददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्तः ॥ गुरोर्हरेश्चरणोपासनास्त्रोजहिव्यलीकंस्वयमात्ममोषम् १७ इतिश्रीभा०म०पंच०ब्राह्मणरहूगणसंवादेएकादशोध्यायः ११ ॥ ॥ रहूगणउवाच ॥ नमोनमःकारणविग्रहायस्वरूपतुच्छीकृतविग्रहाय ॥ नमोऽवधूतद्विजबंधुलिंगनिगूढनित्यानुभवायतुभ्यम् १

चूर्णिका

१२ १३ १४ किंचआत्मनः उपाधिभूतंसंसारतापानां क्षेत्रं इदंमन इतियावत्जीवोनवेद तावत् भ्रमति १५ १६ तस्मात् हेरहूगण एनं आत्ममोषं मनोरूपं शत्रुंगुरोः हरेः चरणोपासनास्त्रः सन् घातय १७ इतिपंचमेएकादशः ॥ ११ ॥ ॥ रहूगणउवाच ॥ ॥ हेभगवन् कारणविग्रहायनमः हेअवधूत द्विजलिंगाय निगूढनित्यानुभवाय ते ईश्वररूपाय नमः १ ॥४१॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४२॥

विशेषत प्रष्टुंतद्वाक्यमभिनंदन् (प्रकाशयति ।) ज्वरएवामयोरोगस्तेनार्तस्ययथासत् स्वादुअगदंऔषधम् । यथाचनिदाधेनदग्धस्यसंतप्तस्यहिमांभः शीतलमुदकंगंगोदकंवा तथाहेब्रह्मन् कुत्सितेदे हेयोमानोऽहंकारः सएवाहिः सर्पस्तेन विशेषणदष्टादृष्टिर्विवेकलक्षणायस्य तस्यमे तवेदंवचः अमृततुल्यमौषधम् २ममसंशयार्थम् संशयविषय-(भूतमर्थं) पश्चात्प्रक्ष्यामि । अधुनातावत्त्वदुक्तंवचः अध्यात्मयोगेन (आत्मज्ञानयोगेन) ग्रथितम् (अतो) दुर्बोधम् (तत्सुबोधं) यथाभवत्येवंव्याख्याहि कौतूहलं (अभिलापः) तद्युक्तंचेतोयस्यतस्यमम ३ त्वयोदितंव्यक्तमविमलब्ध मित्यादिनाभारवाहनादिक्रियाचतत्फलं चश्रमादिप्रत्यक्षादिभिर्दृश्यमानंज्ञायमानं सत्अबाधितमितिव्यवहारमात्रमूलम् । यद्वासतः अबाधितस्यव्यवहारस्यमूलंकारणमपि (तत्)नह्यंजसातत्त्वविमर्श नायक्षममिति भवान्यदाह अमुष्मिन्नर्थेममनोभ्रमति (अस्यवचनस्यार्थोयमेवेति स्थितिंनलभते ४ अबाधितत्त्वमसिद्धमित्याह (अयमिति)हेपार्थिव यः पार्थिवोविकारः सएवकस्यहेतोः कस्मा च्चित्कारणात्पृथिव्यांचलन् अयंभारवाहकादिर्जनोनामप्रसिद्धः यस्तुनचलतिसपाषाणादिरित्येतावानेवभेदः । तस्यजडत्वात् (पाषाणादेरिव) नभारः श्रमश्च । किंचभवेदेवंयदिश्रमस्याश्रयोनिरूप्ये तनत्वेतदस्ति । अवयवव्यतिरेकेणश्रमास्पदस्यावयविनोऽनिरूपणादित्याशयेनाह तस्यापिपृथिवीविकारस्यापिअंघ्र्योःअधिउपरिगुल्फौ (तयोरुपरिजंघेएवंजान्वादयः अधिशब्दोत्रउपर्युपर्यर्थ वाचकः) उरसःसलोपआर्षः (शिरोधराग्रीवा) ५ (अंसेधिअंसोपरि दारुविकारः)शिबिकायामप्यवयवीनास्तित्वस्यापिनास्ति । तदाह । सौवीरराजइत्यपदेशोनाममात्रंयस्य सपार्थिवोविका रएवास्ते राजेतिसंधिरार्षः यस्मिन् भवान् निरूढात्माभिमानःसिंधुपुराजास्मीतिदुर्मदेनअंधःसन् ६ शोच्यान् (अधिकष्टदीनान्अनेकक्लेशयुक्तान्दरिद्रान्) इमान् (वाहकान्) विष्ट्यानिगृह्णन् (त्वंनिरनुग्रहोसि) निष्कृपोवर्तसे । अतोमिथ्यैवगोप्तास्मीतिश्लाघमानोमहतांसभासुनशोभसेयतोधृष्टः ७ नचोत्तरोत्तरावयवभारः पूर्वपूर्वावयवानांभवेदितिवाच्यंतेषामप्यनिरूपणादित्याशयेनाह । यदे ति । निष्ठांनाशंप्रभवमुत्पत्तिं (चपृथिव्यामेव) विदामविद्मः तत्तदाक्षितेरन्यस्यविकारस्याभावात् नाममात्रादन्यत्व्यवहारस्यमूलं कारणं अर्थक्रिययासदित्यनुमेयंअस्तिचेत् निरूप्यतां । तथाचश्रुतिः 'वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्य'मिति ८

श्लोकाः २/८

ज्वरामयार्तस्ययथाऽगदंसन्निदाघदग्धस्ययथाहिमांभः ॥ कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेऽमृतमौषधंमे २ तस्माद्भवंतंममसंशयार्थंप्रक्ष्यामिपश्चा दधुनासुबोधम् ॥ अध्यात्मयोगग्रथितंतवोक्तमाख्याहिकौतूहलचेतसोमे ३ यदाहयोगेश्वरदृश्यमानंक्रियाफलंसद्व्यवहारमूलम् ॥ नह्यंजसातत्त्वविमर्श नायभवानमुष्मिन्भ्रमतेमनोमे ४ ॥ ॥ ब्राह्मणउवाच ॥ ॥ अयंजनोनामचलन्पृथिव्यांयःपार्थिवःपार्थिवकस्यहेतोः ॥ तस्यापिचांघ्र्योरधिगु ल्फजंघाजानूरुमध्योरशिरोधरांसाः ५ अंसेऽधिदार्वीशिबिकाचयस्यांसौवीरराजेत्यपदेशआस्ते ॥ यस्मिन्भवान्रूढनिजाभिमानोराजास्मिसिंधुष्विति दुर्मदांधः ६ शोच्यानिमांस्त्वमधिकष्टदीनान्विष्ट्यानिगृह्णन्निरनुग्रहोसि ॥ जनस्यगोप्ताऽस्मिविकत्थमानोनशोभसेवृद्धसभासुधृष्टः ७ यदाक्षितावेव चराचरस्यविदामनिष्ठांप्रभवंचनित्यम् ॥ तन्नामतोन्यद्व्यवहारमूलंनिरूप्यतांसत्क्रिययाऽनुमेयम् ८

चूर्णिका ॥४२॥

अहोरोगार्तस्ययथासाधु औषधं उष्णतप्तस्य यथागंगोदकं तथा देहाभिमान एव सर्पः तेनदष्टस्यमेतववचः अमृततुल्यं औषधं भवति २ अतः अध्यात्मयोगग्रंथितंदु र्बोधंतवोक्तं मेयथासुबोधंस्यात् तथाआख्याहि ३ ४ ॥ ॥ब्राह्मणउवाच ॥ ॥ हे पार्थिव अयंजनो नामपृथिव्यांचलन्सर्वोपिपृथ्वीविकारः यथानामभेदेन अंघ्रिगु ल्फजंघाजानुऊरु उरः अंसाः ५ अंसदार्वीशिबिकातस्यां अहंराजाजनस्यगोप्ताअस्मि ६ इतित्वंकत्थमानः ज्ञानिनांसमूहेधृष्टः त्वंनशोभसे ७ कुतः चराचरस्यप्रभवः ना शश्चेतिपृथिव्यामेव ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हिक्षितेः सत्यतास्यात्तत्राह । एवंक्षितिशब्दस्यापिवृत्तं वर्तनं अर्थं विनैवनिरुक्तम् । यद्वा क्षितिशब्दस्य (क्षितिरित्यभिधानस्य) वृत्तं (वर्तनं) यस्मिन्तदपिमिथ्यात्वेननिरुक्तमित्यर्थः । कुतः असत्सुसूक्ष्मेषुपरमाणुषुस्वकारणभूतेषुनिधानात्लयात् । अतःपरमाणुव्यतिरेकेणक्षितिर्नास्त्येवेत्यर्थः परमाणवस्तर्हिसत्याःस्युस्तत्राह तेमनसाकार्यानुपपत्त्यावादिभिः कल्पिताः कल्पनाबीजमाह । येषांसमूहेनविशेषःकृतः ।तेषांसमूहः क्षितिबुद्ध्यालंबनमित्यर्थः । अवयविनोनिरस्तत्वात्समूहग्रहणम् । तथापिसत्याःस्युःन । अविद्ययाप्रपंचस्यभगवन्मायाविलसितत्वादज्ञानेनकल्पिताः (रज्ज्वज्ञानेनकल्पितः सर्पइवमिथ्येत्यर्थः)९एवमन्यदपिकृशत्वादिधर्मकं बुद्ध्याप्रतीतं द्वितीयं द्वैतं द्रव्यादिनाग्नाउपलक्षितयाऽजयामाययाकृतमवेहि ।तत्रकृशंह्रस्वं । स्थूलंतत्प्रतियोगि । अणुबृहतोः पृथगुपादानात् असत्कारणं सत्कार्यम् ।जीवं चेतनं अजीवं जडम् १० तर्हिकिंसत्यंतदाह । ज्ञानंसत्यम् । व्यावहारिकसत्यत्वंव्यावर्तयाति । परमार्थ । वृत्तिज्ञानव्यवच्छेदार्थानिषड्विशेषणानि । विशुद्धं तत्तुआविद्यकं । एकं तत्तुनानारूपं । अनंतरंत्वबहिः बाह्याभ्यंतरशून्यं तत्तुविपरीतं । ब्रह्मपरिपूर्णं तत्तुपरिच्छिन्नं । प्रत्यक् (आत्मरूपं) तत्तुविषयाकारं । प्रशांतं निर्विकारं (तत्तुसविकारं) तदेवंस्वरूपज्ञानंसत्यमित्युक्तं । कीदृशंतत्ऐश्वर्यादिषड्गुणत्वेनभगवच्छब्दः संज्ञायस्य । यच्चज्ञानंवासुदेवंवदंति ११ एतत्प्राप्तिस्तुमहत्सेवांविनानभवतीत्याह । हेरहूगण एतद्ज्ञानंतपसापुरुषोनयाति । इज्ययावैदिककर्मणा । निर्वपणात् अन्नादिसंविभागेन । गृहाद्वातन्निमित्तपरोपकारेण छंदसावेदाभ्यासेन । जलाग्न्यादिभिरुपासितैः १२ महत्सेवायास्तत्प्राप्त्युपायतामाह । यत्रयेषुमहत्सु (उत्तमश्लोकस्यहरेर्गुणानुवादः) ग्राम्यकथानां (विषयवार्तानां) विघातोयस्मात् । (तत्रप्रस्तुतोसौनिषेव्यमाणोमतिंसतीं विषयवासनारहिताम् ।) १३ विषयसंगस्तुयोगभ्रंशकरइतिवदन् कस्त्वंनिगूढश्चरसीतिप्रश्नस्योत्तरमाह । अहमितिद्वाभ्याम् । (दृष्टराज्यादिश्रुतस्वर्गादिताभ्यांसंगस्तत्संगः ।) विमुक्तोदृष्टश्रुतसंगनिमित्तोबंधोयेन । हवोऽर्थः प्रयोजनंयस्य । १४ श्रीकृष्णार्चनंभ्रष्टमप्युद्धरतीत्याह । सेति । जनसंगाद्विशंकमानः अविवृतः अप्रकटः १५

श्लोकाः ९/१५

एवंनिरुक्तंक्षितिशब्दवृत्तमसन्निधानात्परमाणवोये ॥ अविद्ययामनसाकल्पितास्तेयेषांसमूहेनकृतोविशेषः ९ एवंकृशंस्थूलमणुर्बृहद्यदसच्चसज्जीवमजीवमन्यत् ॥ द्रव्यस्वभावाशयकालकर्मनाम्नाजयाऽवेहिकृतंद्वितीयम् १० ज्ञानंविशुद्धंपरमार्थमेकमनंतरंत्वबहिर्ब्रह्मसत्यम् ॥ प्रत्यक्प्रशांतंभगवच्छब्दसंज्ञं यद्वासुदेवंकवयोवदंति ११ रहूगणैतत्तपसानयातिनचेज्ययानिर्वपणाद्गृहाद्वा ॥ नच्छंदसानैवजलाग्निसूर्यैर्विनामहत्पादरजोभिषेकम् १२ यत्रोत्तमश्लोकगुणानुवादःप्रस्तूयतेग्राम्यकथाविघातः ॥ निषेव्यमाणोनुदिनंमुमुक्षोर्मतिंसतींयच्छतिवासुदेवे १३ अहंपुराभरतोनामराजाविमुक्तदृष्टश्रुतसंगबंधः ॥ आराधनंभगवतईहमानोमृगोऽभवंमृगसंगाद्धतार्थः १४ सामांस्मृतिर्मृगदेहेपिवीरकृष्णार्चनप्रभवानोजहाति ॥ अथोअहंजनसंगादसंगोविशंकमानोऽविवृतश्चरामि १५

चूर्णिका सापृथ्वी परमाणुरूपा ते परमाणवः भगवन्माययाकल्पिताः ९ एवं कृशस्थूलादिद्रव्यस्वभावादि सर्वं प्रपंचजातं भेदरूपं कृतमस्ति १० तस्मात् इदं व्यवहाररूपं सर्वंमिथ्या सत्यंतु ज्ञानं भगवच्छब्दसंज्ञम् यद्वासुदेवमिति कवयो वदंति ११ हेरहूगण एतत् ज्ञानं पुरुषः तपसा यज्ञैः वेदाभ्यासादिनाचनप्राप्नोति तत्तुमहत्संगेनप्राप्यते १२ ततः अकिंचनाभक्तिः भवति १३ हेराजन् पुरा अहं भरतो नाम राजा आसम् ईश्वराराधनं ईहमानः मृगसंगात् मृगः अभवम् मृगदेहेपिकृष्णार्चनप्रभावात् मत्स्मृतिर्नगता अतः अहं जनसंगात् विशंकमानः अप्रकटः चरामि १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

(यतोदुष्टसंगाद्दुर्गतिःतस्मात्) असंगेगर्महद्भिः यः सुसंगः तेनजातंज्ञानमेवअसिः खड्गस्तेनछिन्नमोहः सन्अध्वनः संसारमार्गस्य अतिशयितंश्रेष्ठंपारंहरिं याति यद्वा पारमति अतिक्रम्यहरिंयाति। "अतिर तिक्रमणेचे"तिकर्मप्रवचनीयत्वाद्द्वितीया। तस्यहरेरीहानां (चरितानां) कथनस्मृतिभ्यांलब्धास्मृतिर्येनसः १६ इतिपंचमेस्कंधेटीकायांद्वादशोध्यायः॥१२॥त्रयोदशेऽविरक्तायवृथातत्त्वनिरूपणम्। इतिवै राग्यदार्ढ्यायभवाटव्युपवर्ण्यते ॥ १ ॥ अध्वनः पारमित्युक्तं तमेवाध्वानं प्रसिद्धमार्गरूपकेण वैराग्यायप्रपंचयति दुरत्ययेदुस्तरेअध्वनिप्रवृत्तिमार्गेरजस्तमःसत्त्वैः विभक्तानिकर्माणिकार्यतयापश्यती
॥४४॥ तितथासएवप्रसिद्धः सार्थोजीवसमूहः अर्थपरः सुखार्थः सन्यथावणिक्सार्थो अर्थार्जनायगच्छन् अटवींयातितद्वत् (भवाटवीं संसारविपिनंयाति । शर्मसुखंनलभते) १ अस्याध्यायस्यव्याख्यानरू पउत्तराध्यायोस्तितथापिसुखप्रतिपत्तये किंचिद्व्याख्यायते । यस्यांभवाटव्यां इमेइंद्रियनामानः षड्दस्यवः चोराः कुत्सितोनायकः नेतासारथिर्बुद्धिलक्षणोयस्यतंसार्थं विलुंपंति । तस्यधर्मंधनमुपभो गेनमुष्णंतीत्यर्थः । गोमायवः सृगालतुल्यादारापत्यादयः त्वंमेभर्तापितेत्येवं प्रविश्यप्रमत्तंसार्थिकं सार्थेस्थितंहरंतिइतस्ततआकर्षंति । उरणंमेषम् २ वीरुधोलताः तृणानिचगुल्मानिचलतादिजाला निप्रभूतैः (बहुलैः) एतैः गह्वरेदुःप्रवेशक्षेत्रे । कठोरैस्तीव्रैर्दंशैर्मक्षिकाविशेषैर्मशकैश्चयथाकश्चिदुपद्रुतोभवति । एवंकामकर्मादिभिर्गह्वरेगृहाश्रमेवर्तमानोदुजनैरुपद्रुतोभवतीत्यर्थः गंधर्वपुरव दघटमानमेवदेहादिकं प्रकर्षेणसत्यमेवेदमितिपश्यति क्वचित्क्वचित्क्वापिक्वापिआशुरयः अतिवेगउल्मुकाकारोग्रः पिशाचः तत्तुल्यं सुवर्णमुपादेयत्वेनप्रपश्यतीत्यर्थः ३ निवासादिषुआत्मास्वभावो (अभिनिवेशो) यस्याः साबुद्धिर्यस्यसः । ततस्ततोधावतीत्युभयत्रतावानेवार्थः । वात्याचक्रवातः तस्यामुत्थितः पांसुस्तेनधूम्रादिशः रजस्वलेरजोव्याप्ते अक्षिणीयस्यसयथानजनातितथावात्येवभ्रम यंती यात्रीतस्यामुद्रतैः रागादिभिः अप्रकाशमानादिग्देवताः कर्मसाक्षिभूतानजानातीत्यर्थः ४ अदृश्यानां झिल्लीनां भृंगारिकासंज्ञानां कीटविशेषाणां स्वनैः कर्णयोः शूलोव्यथायस्य । उलूकाघूका स्तेषां वाग्भिर्व्यथितोऽतरात्मामनोयस्य । अत्रचपरोक्षमप्रियवक्तारोझिल्लीतुल्याः प्रत्यक्षमप्रियवक्तारोघूकतुल्याः येषां (कारस्करबिभीतकादीनां) छायापिपापहेतुस्तेअपुण्यवृक्षास्तत्तुल्यानधार्मिकान् सेवते । मरीचितोयानीतिनिष्फलत्वेनविज्ञातानपिविषयान् । ५

श्लोकाः १६ / ५

तस्मान्नरोऽसंगसुसंगजातज्ञानासिनेहैवविवृक्णमोहः ॥ हरिंतदीहाकथनस्मृतिभ्यांलब्धस्मृतिर्यात्यतिपारमध्वनः १६ इतिश्रीभा०म०पंचमस्कंधेब्रा ह्मणरहूगणसंवादेद्वादशोध्यायः ॥ १२ ॥ ॥ ॥ ब्राह्मणउवाच ॥ ॥ दुरत्ययेऽध्वन्यजयानिवेशितोरजस्तमःसत्त्वविभक्तकर्मदृक् ॥ सएषसार्थोऽर्थ परःपरिभ्रमन्भवाटवींयातिनशर्मविंदति १ यस्यामिमेषण्नरदेवदस्यवःसार्थंविलुंपंतिकुनायकंबलात् ॥ गोमायवोयत्रहरंतिसार्थिकंप्रमत्तमाविश्ययथोर णंवृकाः२प्रभूतवीरुत्तृणगुल्मगह्वरेकठोरदंशैर्मशकैरुपद्रुतः॥ क्वचित्तुगंधर्वपुरंप्रपश्यतिक्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ३निवासतोयद्रविणात्मबुद्धिस्ततस्ततो धावतिभोअटव्याम् ॥ क्वचिच्चवात्योत्थितपांसुधूम्रादिशोनजानातिरजस्वलाक्षः ४ अदृश्यझिल्लीस्वनकर्णशूलउलूकवाग्भिर्व्यथितांतरात्मा ॥ अपुण्य वृक्षाञ्छ्रयतेक्षुधार्दितोमरीचितोयान्यभिधावतिक्वाचित् ५

चूर्णिका

तस्मात् नरः सत्संगलब्धज्ञानासिना छिन्नमोहः जन्ममरणादिरूपसंसारमार्गस्य पारंयाति १६ इतिपंचमेद्वादशः ॥ १२ ॥ ॥ ॥ ब्राह्मणउवाच ॥ ॥ हेरहूगण अयं जीवसमूहः अजया दुरत्यये अध्वनि निवेशितः सुखार्थेच्छयाभवाटवींयाति १ यस्यांभवाटव्यांषट्दस्यवः बलात्सार्थस्यधनंमुष्णांति किंच यस्यांसृगालाइवदाराःप्रमत्तंसा ॥४४॥
र्थिकंहरति यथावृकाः मेषम् २ तत्रदंशैः मशकैःउपद्रुतः क्वचित्गंधर्वपुरंपश्यति क्वाचित्पिशाचंपश्यति ३ भयात् अटव्यां इतस्ततो धावति कदाचित् दिशः नजानाति ४ क्वचित् उलूकवाग्भिः व्यथितमनाः क्षुधार्दितः सन् मृगजलानि अभिधावति ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वितोयासुसरित्सुपतितस्यगात्रभंगात्सद्योदुःखंभवतिनचोदकलाभः तद्वादिहचपरत्रचदुःखदान्पाषंडानभियाति । आलपते दायादादिभ्योन्नादिवांछति । (निरंधोनिरंन्नः) उभयत्रापिसएवार्थः । दा
वंदावाग्नितुल्यं दुःखदंगृहं प्राप्यशोकाग्निनातप्तोनिर्विद्यतेविषीदति । तत्रचयक्षराक्षसतुल्यैः राजभिः हृतं असुवत्प्रेष्ठं धनंयस्यसनिर्विद्यते। ६ अन्यैःशूरैर्हृतं सर्ववित्तंयस्यानिर्विण्णंविषण्णं चेतोयस्य । क
श्मलंमूर्छांगंधर्वपुरमिवमनोरथोपगतपितृपुत्रादिसमाजं प्रविष्टः सन् । (निर्वृतवत्सुखीव) ७ (शर्करासूक्ष्मप्रस्तरः) । कंटकादिविद्धांघ्रिरिवविघ्नैराभिभूतः सन्नगतुल्यंमहत्कर्मआरूढं कर्तुमिच्छुर्विम
नाइवआस्ते । पदेपदेक्षणेक्षणेअभ्यंतरेणवह्निनाजाठरेणाग्निना (क्षुधापीडितोजनायकुटुंबाय) ८ अजगराहिनानिद्रारूपेणगिलितः किमपिनवेत्तिविपिनेत्यक्तः शवइव। दंदशूकैः (भुजंगैः) हिंस्रैर्दुर्जनै
र्दष्टः पीडितः अंधोलुप्तविवेकः अंधकूपेमोहेपतितः तमिस्रेदुःखेशेतेलीयते ९ क्षुद्ररसान्परयोषादीन् विचिन्वन् गवेषयन् तन्मक्षिकाभिर्योषादिस्वामिभिः विमानः अवज्ञातः ताडितः सन् व्यथितोभव
ति । यदिकथंचित्तत्रातिक्लेशेनप्रतिलब्धमानः प्राप्तयोषादिर्भवतितदाबलात् अन्येऽपहरंति । तान्यदाऽभियुंक्तेतदाततोप्यन्येहरंति । १० यत्किंचित्अत्यल्पमपिमिथोविपणन् व्यवहरन् क्रयादिना
गृह्णन् वित्तशाठ्यात् धनवंचनात् ११ शय्यादिहीनः । आस्यतेस्मिन्नित्यासनं कंबलादि । स्थीयतेत्रेतिस्थानं । गृहं विहरंत्यनेनेतिविहारो यानादि । याचमानोपियदापरात्परस्मादप्राप्तकाम
स्तदापरकीये वस्तुनिदृष्टिरभिलाषोयस्यसोऽवमानंप्राप्नोति १२ एवमन्योन्यंवित्तव्यतिषंगेणधनविनिमयेन विवृद्धोवैरानुबंधोयस्यतथाविधोपिपरस्परंविवहन् विवाहादिसंबंधंकुर्वन् उरुभिः कृच्छ्रैः श्रमैः
वित्तबाधैरुपसर्गैश्चद्वेषादिभिर्विपन्नोमृतप्रायोभवति । १३

श्लोकाः ६/१३

क्वचिद्वितोयाःसरितोभियातिपरस्परंचालषतेनिरंधः ॥ आसाद्यदावंक्वचिदग्नितप्तोनिर्विद्यतेक्वचयक्षैर्हृतासुः ६ शूरैर्हृतस्वःक्वचनिर्विण्णचेताःशोचन्विमुह्य
न्नुपयातिकश्मलम्॥क्वचिच्चगंधर्वपुरंप्रविष्टःप्रमोदतेनिर्वृतवन्मुहूर्तम् ७ चलन्क्वचित्कंटकशर्करांघ्रिर्नगारुरुक्षुर्विमनाइवास्ते॥पदेपदेभ्यंतरवह्निनार्दितःकौटुंबि
कःक्रुध्यतिवैजनाय ८ क्वचिन्निगीर्णोऽजगराहिनाजनोनावैतिकिंचिद्विपिनेऽपविद्धः ॥ दष्टःस्मशेतेक्वचदंदशूकैरधोंऽधकूपेपातितस्तामिस्रे ९ कर्हिस्मचित्क्षु
द्ररसान्विचिन्वंस्तन्मक्षिकाभिर्व्यथितोविमानः ॥ तत्रातिकृच्छ्रात्प्रतिलब्धमानोबलाद्विलुंपंत्यथतंततोन्ये १० क्वचिच्चशीतातपवातवर्षप्रतिक्रियांकर्तुमनीश
आस्ते ॥ क्वचिन्मिथोविपणन्यच्चकिंचिद्विद्वेषमृच्छत्युतवित्तशाठ्यात् ११ क्वचित्क्वचित्क्षीणधनस्तुतस्मिञ्शय्यासनस्थानविहारहीनः ॥ याचन्परा
दप्रतिलब्धकामःपारक्यदृष्टिर्लभतेऽवमानम् १२ अन्यान्यवित्तव्यतिषंगवृद्धवैरानुबंधोविवहन्मिथश्च ॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन्विप
न्नः १३

चूर्णिका

क्वचित्वितोयाःसरितोभियातिक्वचित् दावंप्राप्यअग्नितप्तः सन्विषीदति ६ क्वचित् शूरैः हृतधनः शोचन्सन् मूर्च्छांउपयाति क्वचित् गंधर्वपुरंप्रविश्यमोदते ७ क्वचित्कंटकादि
भिः विद्धांघ्रिः सन् नगारुरुक्षुः विमनाइव आस्ते क्षणेक्षणे जठराग्निनादग्धः सन् स्वजनायक्रुध्यति ८ क्वचित् अजगरसर्पेणागिलितः सन्किंचिन्नावैति क्वचित् दंदशूकैःदष्टः सन्
अंधकूपेपतति ९ क्षुद्ररसान्विचिन्वन्सन्मक्षिकाभिः ताडितः व्यथितोभवति १० क्वचित् शीतातपवातवर्षप्रतिक्रियांकर्तुमनीशः आस्तेक्वचित्मिथोव्यवहरन्वित्तशाठ्यात्द्वेषं
ऋच्छति ११ क्वचित् क्षीणधनः शय्यासनादिहीनः सन् अन्यंपुरुषंयाचित्वा तत् शय्यादिअप्राप्य अवमानं प्राप्नोति १२ एवंबहुभिः श्रमैःउपसर्गैश्चविपन्नः सन् मृतप्रायो
भवति १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दुरत्ययत्वमध्वनोदर्शयति। तांस्तांन्विपन्नान्मृतान् विहायजातंजातंपरिगृह्यविहरन्यतः प्रस्थितः तंप्रतिनावर्तते ।हेवीरअध्वनः पारंयोयोगस्तंचनोपैति। अत्रसार्थेकश्चिदतिसमर्थोपि । १४ तदेवाह । मन
स्विनः शूराः निर्जितादिग्गजेंद्रायैः ममेयंभूर्ममेयमिति भुविनिमित्तभूतायां बद्धंवैरंयैस्तेन्यस्तदंडः संन्यासी यद्विष्णोः पदमभियातितत्तुनव्रजंति १५ सिंहावलोकनेनपुनर्भवाटवीमेवानुवर्तयति । प्रसज्जति
आसक्तिंकरोति । कीदृशः लतानांभुजाः शाखाः तद्वत्सुकुमारायेस्त्रीणांभुजास्तदाश्रयः सन्तदाश्रया अव्यक्तपदा अस्फुटाक्षराः कलभाषिणोयेद्विजाः पक्षिणः तत्तुल्येषुस्त्रीसंगप्रसक्तेष्वपत्येषुस्पृहाय
स्यताहशोभूत्वा हरिचक्रं सिंहसमूहः तत्तुल्यात्कालचक्रनिमित्ताज्जन्ममरणादेः त्रसन्तत्परिहाराय कैश्चित्प्रलोभितो बकादिवद्वंचकैः क्षुद्रैः क्रूरैश्चपाषंडैः सहसख्यंकरोति तेषुप्रविशति १६ तैर्वंचित
स्तत्रफलाभावंज्ञात्वाहंसानांब्राह्मणानांकुलंपुनः प्रविशन्तेषांशीलंप्रायश्चित्तपूर्वकं पुनरुपनयनाद्याचारं अरोचयन् अप्रियंपश्यन् वानरतुल्यान् भ्रष्टाचारान् शूद्रप्रायानुपैति । तज्जातिरासेनवानरजाति
क्रीडया स्त्रियामिथुनीभूय परस्परमुखोद्वीक्षणेन विस्मृतोजीवितावधिर्मरणकालोयेन १७ (द्रुमेषु) द्रुमवत्केवलदृष्टार्थेषुगृहेषु (रंस्यन्सुतेषुदारेषुचास्निग्धो) व्यवायदीनः सुरतेच्छयाकृपणः(मनोर
थानुसारेणसुरतासंभवेतदिच्छयादैन्यंकुर्वन्इत्यर्थः एवंस्वस्यपद्धंधनंप्राप्तंतस्मिन्विवशः परिहर्तुमशक्तः पाठांतरेतुवनेसंसारेचरन्नित्यर्थः।गिरिकंदरवत् अतिभयानकेरोगादिदुःखेपतन् कंदरस्थगजतुल्या
न्मृत्योर्भीतः सन्वल्लीतुल्यंप्राचीनं कर्मावलंब्यावस्थितोभवति १८ (अतआपदः कथंचिद्विमुक्तः स्वर्गगतः पुनः) सार्थंप्रविशति । यथापूर्वं प्रवृत्तिमार्गे रमते । (एवंप्रवृत्तौरममाणः संसारेएवभ्रम
न्स्वमार्गमद्यापिकश्चन) नवेद परमपुरुषार्थं । (हेअरिंदमेत्यनेनजितेंद्रियस्यतवास्तिमुक्त्यधिकारइतिसूचितम् १९ त्वमपिअध्वनिनिवेशितइत्यनुषंगः । अतोस्याध्वनः पारमतितर। असज्जितात्मा
विषयेष्वनभिनिवेशितचित्तः सन् । हरिसेवयाशितंतीक्ष्णीकृतं (ज्ञानखङ्गं । आदायतेनास्याध्वनः पारमतितर । संन्यस्तदंडः त्यक्तप्रवृत्तिमार्गइत्यर्थः)। २०

श्लोकाः १४/२०

तांस्तान्विपन्नान्सहितत्रतत्रविहायजातंपरिगृह्यसार्थः ॥ आवर्ततेऽद्यापिनकश्चिदत्रवीराध्वनःपारमुपैतियोगम् १४ मनस्विनोनिर्जितदिग्गजेंद्राममेति
सर्वेभुविबद्धवैराः ॥ मृधेशयीरन्नतुतद्व्रजंतियन्न्यस्तदंडोगतवैरोभियाति १५ प्रसज्जतिक्वापिलताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृहः ॥ क्वचित्क्वदा
चिद्धरिचक्रतस्त्रसन्सख्यंविधत्तेबककंकगृध्रैः १६ तैर्वंचितोहंसकुलंसमाविशन्नरोचयञ्शीलमुपैतिवानरान् ॥ तज्जातिरासेनसुनिर्वृतेंद्रियःपरस्परोद्वी
क्षणविस्मृतावधिः १७ द्रुमेषुरंस्यन्सुतदारवत्सलोव्यवायदीनोविवशःस्वबंधने ॥ क्वचित्प्रमादाद्गिरिकंदरेपतन्वल्लींगृहीत्वागजभीतआस्थितः १८ अतः
कथंचित्सविमुक्तआपदःपुनश्चसार्थंप्रविशत्ययंदिम ॥ अध्वन्यमुष्मिन्नजयानिवेशितोभ्रमन्जनोद्यापिनवेदकश्चन १९ रहूगणत्वमपिह्यध्वनोस्यसंन्यस्तदं
डःकृतभूतमैत्रः ॥ असज्जितात्माहरिसेवयाशितज्ञानासिमादायतरातिपारम् २० ॥

चूर्णिका

किंचसः मृतान् तत्रतत्र हित्वाजातंजातं परिगृह्य विहरन्सन्अद्यापिनावर्तते १४ किंच एतेभुविममेयंभूरितिबद्धवैराः संतः युद्धेम्रियंते नतुविष्णुपदंव्रजंति १५ अथपु
नः भवाटवविंर्णयति अयंसार्थः क्वचित् सिंहसंघात् त्रसन् बककंकगृध्रैः सहसख्यंकरोति १६ ततः तैर्वंचितः सन्हंसकुलं प्रविशति तत्रापितच्छीलं अरोचयन् वान
रान्उपैति ततः तज्जातिक्रीडयाविस्मृतजीवितावधिर्भवति १७ एवं अमुष्मिन्मार्गेभ्रमन्अद्यापि कश्चन न वेद हेरहूगणत्वमपिसर्वभूतमैत्रः न्यस्तदंडः सन् हरिसेवयाती
क्ष्णंज्ञानासिंगृहीत्वा अस्यअध्वनः पारंयाहि १८ १९ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अखिलजन्मसुशोभनंनृजन्मैवपरंश्रेष्ठम् येभ्योदेवादिजन्मभ्यः । तैरपिकिं । अमुष्मिन्स्वर्गेपिजन्मभिः किं । नकिंचित् । यत्येषुजन्मसुयत्रस्वर्गेवावोमहात्मनां समागमः प्रचुरोनभवति । हृषीकेशस्य यशसाकृतःशोधितआत्मायैस्तेषाम् २१ संततमुपासितैःतेषांमहतांपदाब्जरेणुभिः हतमंहोयस्यतस्याधोक्षजे निर्मलाभक्तिर्भवतीतिनैवाद्भुतम् । यस्यतवमुहूर्तमात्रभवात्समागममात्रादपिदुस्तर्केण (दृष्टःश्रमः कर्मतआत्मनइत्यादिनोक्तेन)बद्धमूलोपिममअविवेकोनष्टः। २२ ब्रह्मविदः केनरूपेणविचरंतीत्यज्ञानात् सर्वान्नमस्यति नमइति। येबटवः क्रीडारतत्वादश्रेद्धेयधौरयास्तानप्यभिव्याप्यसर्वेभ्योनमइत्यर्थः। स्वदृष्टांतेनराज्ञां (श्रीमंदांधत्वा-)-न्महदवज्ञां संभाव्याह राज्ञां शिवमस्त्विति । २३ उत्तरामातायस्यहेउत्तरामातः (परिक्षित्) विगणयतः नगणयतः (परमकारुणिकतया) अवमंतर्यपिपरमकरु णाकरत्वेनेत्यर्थः सिंधुपतये (रहूगणाय) आत्मसतत्त्वं (आत्मतत्त्वमित्यर्थः) उपदिश्यनिभृताः शांताः करणानामिंद्रियाणामूर्मयोयस्मिन्सआशयोस्य । (परोऽनुभावः सामर्थ्यंयस्य) । २४ सुज नात्तस्मात् सम्यगवगतं (ज्ञातं) परमात्मसतत्त्वं (भगवत्स्वरूपं) येनतथाभूतःसन् तदानीमेव (अविद्ययाअज्ञानेनकल्पितां) देहेआत्ममतिंचविससर्ज । हेनृपभगवदाश्रितोभरतः तदाश्रितोपोरहूग णस्तस्यानुभावः सद्योदेहाहंकारत्यागः । २५ पारोक्ष्येणवणिक्सार्थकरूपकेणआर्याणां विवेकिनां मनीषयैवदस्युस्थानीयानींद्रियाणि गोमायुस्थानीयान्यपत्यादीनि इत्येवंकल्पितविषयः अव्युत्पन्न स्यतुलोकस्यजनस्यसम्यक्अधिगमो(यस्यतथा) भवतिअतः तदेवभवाध्वरूपकमेतत् समवेतानुकूल्येनप्रस्तुतस्यतदनुरूपार्थोपकल्पनेनकथ्यताम् २६ ॥ ॥ इतिपंचमस्कंधेटीकायांत्रयोदशोध्यायः १३

॥४७॥

श्लोकाः २१/२६

॥ राजोवाच ॥ ॥ अहोनृजन्माखिलजन्मशोभनंकिंजन्मभिस्त्वपरैरप्यमुष्मिन् ॥ नयद्धृषीकेशयशस्कृतात्मनांमहात्मनांवःप्रचुरःसमागमः २१ नह्य द्भुतंत्वच्चरणाब्जरेणुभिर्हतांहसोभक्तिरधोक्षजेऽमला ॥ मौहूर्तिकाद्यस्यसमागमाच्चमेदुस्तर्कमूलोऽपहतोऽविवेकः २२ नमोमहद्भ्योस्तुनमःशिशुभ्योनमोयुव भ्योनमआवटुभ्यः ॥ येब्राह्मणागामवधूतलिंगाश्चरंतितेभ्यःशिवमस्तुराज्ञाम् २३ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्येवमुत्तरामातःसवैब्रह्मर्षिसुतःसिंधु पतयआत्मसतत्त्वंविगणयतःपरानुभावःपरमकारुणिकतयोपदिश्यरहूगणेनसकरुणमभिवंदितचरणआपूर्णार्णवइवनिभृतकरणोर्म्याशयोधरणिमिमांविच चार २४ सौवीरपतिरपिसुजनसमवगतपरात्मसतत्त्वआत्मन्यविद्याध्यारोपितांदेहात्ममतिंचविससर्ज ॥ एवंहिनृपभगवदाश्रिताश्रितानुभावः २५ ॥ ॥ राजोवाच ॥ ॥ योहवाइहबहुविदामहाभागवतत्वयाभिहितःपारोक्ष्येणवचसाजीवलोकभवाध्वासद्यार्यमनीषिकयाकल्पितविषयोनांजसाऽव्युत्पन्न लोकसमधिगमः ॥ अथतदेवैतद्दुरवगमंसमवेतानुकूल्येननिर्दिश्यतामिति २६ इतिश्रीभागवतेमहा०पंच०त्रयोदशोऽध्यायः १३

चूर्णिका

॥ रहूगणउवाच ॥ ॥ अहोअखिलजन्मसु मध्येनृजन्मैवश्रेष्ठंकिंदेवादिजन्मना नृजन्मनातुसत्समागमोभवति २१ तेनभगवच्चरणे अमलाभक्तिः उत्पद्यते अहोतव मुहुर्तमात्रसंगात्ममअविवेकोगतः २२ किंच ब्रह्मविदः केनरूपेण विचरंति इत्यज्ञानात् सर्वान्नमस्यति महद्भ्यः शिशुभ्यः युवभ्यः बटुभ्यः नमः येअवधूतलिंगाः ब्रा ह्मणाः तेभ्यः नमः राज्ञांशिवमस्तु २३॥ ॥ श्रीशुकउवाच॥ ॥एवंसःजडभरतः करुणया रहूगणाय तत्त्वं उपदिश्य तेन वंदितचरणः पृथ्वींविचचार २४ सौवीरपतिरपिसाधुसं गात् लब्धतत्त्वज्ञानः अज्ञानेनआत्मनिअध्यारोपितां देहात्मबुद्धिं विससर्ज एवं हेनृपभगवदाश्रितानुभावः अस्ति २५ ॥ ॥ परीक्षिदुवाच ॥ ॥हेशुक त्वयालोकस्य संसारमार्गः पारोक्ष्येणकथितःसः सर्वेषांबोधाय प्रत्यक्षेणनिर्दिश्यताम् २६ ॥ ॥ इतिपंचमेत्रयोदशः ॥ १३ ॥

॥४७॥

१ त्वच्चरणाब्जरेणुभिरितिक्वचित्पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४८॥

॥ चतुर्दशेभवारण्यरूपकव्याकृतिः कृता । प्रस्तुतेतस्यगोमायुमशकाद्यर्थकल्पनम् ॥१॥ यःपरिक्षितापृष्टः सश्रीशुकउवाच । सहेतिसूतोक्तिः । दुरत्ययेध्वन्यजयानिवेशितइतियदुक्तं तदेवनिवेशनप्रकार
कथनेनप्रपंचयति । एषप्रसिद्धोजीवलोकः अयंविष्णोर्माययाअसुगमेध्वन्यापतितोभवाटवींगतः सन् हरिरूपस्यगुरोश्चरणारविंदेयेमधुकराः सेवकास्तेषां अनुपदवींतैरनुष्ठितं भक्तिमार्गं अद्यापिनावरुं
धेनसंप्राप्नोतीत्यन्वयः मायायाः स्वकार्यद्वारेणसंसारमार्गेपातहेतुत्वमाह । देहात्ममानिनां सत्त्वादिगुणविशेषैर्विकल्पितानिविभक्तानियानिकुशलाकुशलावीमिश्रकर्माणितैर्वानिर्मिताभिर्विविधदेहावली
भिः वियोगसंयोगादिर्योऽनादिः संसारः तदनुभवस्यद्वारभूतेनषडिंद्रियवर्गेण तस्मिन् संसाररूपेदुर्गमार्गवत् असुगमे (दुर्गमे) अध्वनि (मार्गे) आपतितः यथावणिजांसार्थः समूहः अर्थार्जनप
रः स्वदेहनिष्पादितानां कर्मणां फलद्वारेणानुभवोयस्यविफलाश्चबहुप्रातियोगाः बहुविघ्नाश्चईहाश्चेष्टायस्यसः । तस्यां संसाराटव्यां येतापास्तेषां उपशमनींनाशनीम् यस्यामित्यादिव्याचष्टे । यस्यां
भवाटव्याम् १ दस्युतुल्यंतेषां कर्मदर्शयति । तद्यथेति । धर्मौपयिकं धर्मकारणं ।तमेवस्वाभिप्रेतं धर्ममाह । साक्षादिति । ततुसांपरायेपरलोकार्थमुदाहरंति । तद्धर्म्यंधर्मार्हधनं । दर्शनाद्याः पं
चज्ञानेंद्रियाणांवृत्तयः । संकल्पव्यवसायावंतःकरणस्य । एतैर्गृहेयोग्राम्यउपभोगः तेनकुनाथस्यकुबुद्धेरजितात्मनोविलुंपंति । यथाचोराः कुपालकस्यअनवहितात्मनः सार्थस्यधनंहरंतितद्वत् २
गोमायवोयत्रेत्येतद्व्याचष्टे । (अथचेति) । अथचेत्यर्थांतरोपन्यासे । कर्मणातुवृकाः शृगालाश्चकदर्यस्यातिलुब्धस्य (उदासीनस्यापिकुटुंबभवानाम्नादारापत्यादयः मेषमिवमिषतः पश्यतः सतो
पिसंरक्ष्यमाणंहरंति) ३ प्रभूतवीरुत्तृणगल्मगह्वरइत्येतद्व्याचष्टे । यथाहीति । नदग्धानि(गुल्मादीनां)बीजानियस्मिन् । यद्यस्माद्योयमावसथआश्रमएषकामानांकरंडः यथाकर्पूरभाजनेकर्पूरक्षयेपि
परिमलोनक्षीयते । एवमत्रवासनानामक्षीणत्वान्नकर्माण्युत्सीदंतीत्यर्थः ४

श्लोकाः १/४

॥ ॥ सहोवाच ॥ ॥ यएषदेहात्ममानिनांसत्त्वादिगुणविशेषविकल्पितकुशलाकुशलसमवहारविनिर्मितविविधदेहावलीभिर्वियोगसंयोगाद्यनादिसं
सारानुभवस्यद्वारभूतेनषडिंद्रियवर्गेणतस्मिन्दुर्गाध्ववदसुगमेऽध्वन्यापतितईश्वरस्यभगवतोविष्णोर्वशवर्तिन्यामाययाजीवलोकोयंयथावणिक्सार्थोऽर्थप
रःस्वदेहनिष्पादितकर्मानुभवःश्मशानवदशिवतमायांसंसाराटव्यांगतोनाद्यापिविफलबहुप्रतियोगेहस्तत्तापोपशमनींहरिगुरुचरणारविंदमधुकरानुपदवी
मवरुंधेयस्यामुहवाएतेषडिंद्रियनामानःकर्मणादस्यवएवते १तद्यथापुरुषस्यधनंयत्किंचित्साक्षाद्धर्मौपयिकंबहुकृच्छ्राधिगतंसाक्षात्परमपुरुषाराधनलक्षणो
योऽसौधर्मस्तंतुसांपरायउदाहरंतितद्धर्म्यंधनंदर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेनकुनाथस्याजितात्मनोयथासार्थस्यतथाऽजिता
त्मनोविलुंपंति २ अथचयत्रकौटुंबिकादारापत्यादयोनाम्नाकर्मणावृकसृगालाएवअनिच्छतोपिकदर्यस्यकुटुंबिनउरणकवत्संरक्ष्यमाणंमिषतोपिहरंति ३
यथाह्यनुवत्सरंकृष्यमाणमप्यदग्धबीजंक्षेत्रंपुनरेवावपनकालेगुल्मतृणवीरुद्भिर्गह्वरमिवभवति ॥ एवमेवगृहाश्रमःकर्मक्षेत्रंयस्मिन्नहिकर्माण्युत्सीदंतियदयं
कामकरंडएषआवसथः ४

चूर्णिका ॥४८॥

॥ ॥ श्रीशुकउवाच ॥ ॥ यएषः जीवलोकः विष्णोर्माययाभवाटवींगतः सन् भगवद्भक्तैरनुष्ठितंसंसारतापोपशमनंभक्तिमार्गं अद्यापिनप्राप्नोति यस्यां भवाट
व्यामेतेषडिंद्रियनामानः कर्मणादस्यवएवसंति १ तद्यथापुरुषस्ययत्किंचिद्भगवदाराधनलक्षणं धर्मकारणं धनं तत् दर्शनस्पर्शनश्रवणास्वादनावघ्राणैः विषयभोगेन हरंति
२ अथचदारापत्यादयः कर्मणाश्वसृगालाएवलुब्धस्यकुटुंबिनः सर्वस्वंहरंति ३ यथाक्षेत्रंकृष्यमाणमपिगुल्मतृणादिभिर्गह्वरंभवति एवमेवगृहाश्रमःकर्मक्षेत्रं यस्मिन्कर्मा
णिनोत्सीदंति ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४९॥

दंशमशकतुल्यैरपसदैर्नीचैः शलभादिमिश्चउपरुध्यमानः पीड्यमानोवहिःप्राणोवित्तंयस्य । तथाविधोयस्मिन्नध्वनि परिभ्रमन् अविद्यादिभिरुपरक्तेनमनसागंधर्वपुरतुल्यमघटमानंनरलोकं सत्यतयामिथ्यादृष्टिरनुपश्यति । (भ्रांतदृष्टिः सन्नामपात्रमपिदेहं वस्तुतयाजानातीत्यर्थः ।) ५ प्रपश्यतीतिप्रशब्दसूचितमर्थांतरंदर्शयति । तत्रचगंधर्वपुरे क्वचिदातपोदकं मृगतृष्णाजलं तत्तुल्यान् विषयान्उपधावतीति ६ क्वचित्क्वचिच्चाशुरयोल्मुकग्रहमित्येतद्व्याचष्टे । क्वचिच्चाशेषाणांदोषाणांनिषदनंस्थानं पुरीषविशेषं अग्नेर्विष्ठाम् । तस्यपुरीषस्येवलोहितोवर्णो यस्यरजोगुणस्यतेननिर्मितातद्विषयामतिर्यस्यसःसुवर्णमुपादातुमिच्छति अग्निकामेनकातरः परवशः उल्मुकपिशाचं (ज्वलदुल्मुकनिभंपिशाचविशेषमिव । शीतातुरोह्यरण्येऽग्निवज्ज्वल्यमानंततस्ततोधावंतमुल्मुकपिशाचमग्निबुद्ध्याऽनुधावति । नतुतंमाप्नोति कथंचित्प्राप्तश्चेत्तर्हितेनभक्षितः सन् म्रियतेएवंसुवर्णमनुधावन्नपीत्यर्थः। ७ निवासतोयद्रविणेत्येतद्व्याचष्टे । अथेति । निवासादिष्वनेकेष्वात्मनउपजीव्येषु अभिनिवेशोयस्य । ८ क्वचिच्चवात्योत्थितेत्येतद्व्याचष्टे । क्वचिचेति । आरोहंअंकं । तस्मिन् कालेयद्रजः रागस्तेनस्वदृष्ट्यावरकेणरजन्यांरात्रौभूताइव । ह्रस्वपाठेरजनीभूतस्तमोमयइवातीवरजसाच्छन्नमतिः अतएवरजोव्याप्तचक्षुरिवदिक्षुस्थितामर्यादातिक्रमसाक्षिभूतादेवतानजानाति ९ अनुपादेयमेवोपादेयतयागृह्णातीतिभ्रमसाजात्यादुत्तरश्लोकचतुर्थपादंप्रथमंव्याचष्टे । क्वचित्सकृदिति । क्वचिदातपोदकनिभानीत्यत्रमिथ्याविषयेषुलंपटत्वमुक्तम् । निवासतोयेत्यत्रतदर्जनप्रयासउक्तः । अत्रतुवाधितेष्वपिपुनः प्रवृत्तिरुच्यतइत्यपौनरुक्त्यं । स्वयमेवसकृदवगतं विषयाणांवैतथ्यं विफलत्वंयेन । पराभिध्यानेनदेहाभिवेशेन विभ्रंशितास्मृतिर्यस्य तयैवविभ्रंशितयास्मृत्यैव । स्मृतिभ्रंशादेवेत्यर्थः १० अदृश्यझिल्लीस्वनेत्येतद्व्याचष्टे । कचिदुलूकेति । अतिपरुषोऽतिकठिनोरभसउत्साहस्तेनाटोपः संभ्रमोयाभवत्येवंरिपूणांराजकुलस्यचनिर्भर्त्सितेन अतिव्यथितंकर्णमूलंहृदयंचयस्य ११

श्लोकाः ९/११

तत्रगतोदंशमशकसमापसदैर्मनुजैःशलभशकुंततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणःक्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्तमनसानुपपन्नार्थनरलोकंगंधर्वनगरमुपपन्नमितिमिथ्यादृष्टिरनुपश्यति५ क्वचिदातपोदकनिभान्विषयानुपधावतिपानभोजनव्यवायादिव्यसनलोलुपः६क्वचिच्चाशेषदोषनिषदनंपुरीषविशेषंतद्वर्णगुणनिर्मितमतिःसुवर्णमुपादित्सत्यग्निकामकातरइवोल्मुकपिशाचम्७अथकदाचिन्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेशएतस्यांसंसाराटव्यामितस्ततःपरिधावति८क्वचिच्चवात्यौपम्यययाप्रमदयारोहमारोपितस्तत्कालरजसारजनीभूताइवासाधुमर्यादोरजस्वलाक्षोदिग्देवताअतिरजस्वलमतिर्नविजानाति ९ क्वचित्सकृदवगतविषयवैतथ्यःस्वयंपराभिध्यानेनविभ्रंशितस्मृतिस्तयैवमरीचितोयप्रायांस्तानेवाभिधावति १० क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपंप्रत्यक्षंपरोक्षंवारिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः ११

चूर्णिका ॥४९॥

अत्रवासनानां अक्षीणत्वात्तत्रगतःसन्दंशमशकतुल्यैःनीचमनुष्यैःपीड्यमानःअविद्यादिभिरुपरक्तेनमनसागंधर्वपुरतुल्यंनरलोकंसत्यतयामिथ्यादृष्टिःसन्अनुपश्यति ५
क्वचित्मृगजलतुल्यान्विषयान्व्यसनलुब्धः सन्अनुधावति ६ क्वचित् अशेषदोषस्थानंसुवर्णं उपादातुंइच्छति अग्निकामेनउल्मुकपिशाचमिवआग्निबुद्ध्यानुधावति नतुतंप्राप्नोति कथंचित्प्राप्तश्चेत्तर्हितेनभक्षितः सन्म्रियतेएवंसुवर्णमनुधावन्नपि ७ कदाचित् निवासतोयद्रविणादिष्वभिनिविष्टः एतस्यां संसाराटव्यां इतस्ततःपरिधावति ८ कदाचित् वात्यातुल्ययास्त्रिया उत्संगं आरोपितः रजस्वलाक्षः सन् दिग्देवताः नजानाति ९ क्वचित् देहाभिनिवेशेनभ्रंशितमतिः मरीचितोयप्रायान् विषयान् अभिधावति १० क्वचित् उलूकझिल्लीस्वनवत् रिपूणांराजकुलस्यच निर्भर्त्सितेनव्यथितकर्णमूलहृदयो भवति ११

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥५०॥

अपुण्यवृक्षानित्येतद्व्याचष्टे सयदेति। दुग्धमुपभुक्तं पूर्वसुकृतं येन तदा । कारस्करोविषतिंदुःतत्प्रमुखाये अपुण्यद्रुमास्तथाविधालताश्चविषोदपानाश्चविषकूपास्तत्तुल्यान् दृष्टश्रुतप्रयोजनशून्यधनान्(अति कृपणानधार्मिकान्)१२क्वचिद्द्वितोयाः सरितइत्येतद्व्याचष्टे । एकदाक्वचिदसतांप्रसंगात् निकृतावंचितामतिर्यस्यसः । निरुदकनदीगर्तेपातेयथासद्यः शिरःस्फुटतिपश्चादपिचतद्वेदनाऽनुवर्ततेएवमिहपरत्रं चदुःखदम् १३ परस्परं चालुषंतनिरंधइत्येतद्व्याचष्टे । यदात्विति । अंधः अन्नंनोपनमतिनोपतिष्ठतितदाहिपितृपुत्राणां बर्हिः कुशः तद्वतः पितृसंबंधिपुत्रसंबंधिवाकुशादितृणमात्रमपियेषुपश्यतितान्(पि तृपुत्रान्वा) भक्षयति (अन्नार्थं बाधतइत्यर्थः) पितृपुत्रबर्हिष्ठानितितुपाठः सुगमः १४ आसाद्यदावमित्येतद्व्याचष्टेक्वचिदासाद्येति । (प्रियार्थविधुरं प्रियविषयरहितं दुःखरूपोत्तरफलं । निर्वेदं वैराग्य १५ क्वचयक्षैर्हृतासुरित्येतद्व्याचष्टे । क्वचित्कालेनविषमितं प्रतिकूलतांनीतं यद्राजकुलं तदेवरक्षस्तेनआपहृताः प्रियतमधनरूपाअसवोयस्य । विगतानिजीवलक्षणानिहर्षादीनियस्य । शूरैर्हृतस्वइत्यप्य नेनैवव्याख्यातम् । १६ क्वचिच्चगंधर्वपुरं प्रविष्टइत्येतद्व्याचष्टे । कदाचिन्मनोरथप्राप्तं पितृ-(पितामहा-)-असदेव (असत्यमेव) सदितिमत्वा (स्वप्नसुखतुल्यंसुखं) पूर्व गंधर्वपुरवदघटमानदर्शनमु क्तं । इदानींतन्निमित्तसुखासक्तिरुच्यतइतिभेदः १७ चलन् क्वचिदित्येतद्व्याचष्टे । क्वचिद्गृहाश्रमेयाः कर्मचोदनाः (अग्निष्टोमेनयजेतेत्याद्या-)-रतासामतिभरोऽतिविस्तारः सएवगिरिस्तमारुरुक्षन् तदंते गंतुमिच्छन् (लोकः स्वर्गादिस्तद्व्यसनेनतदासक्त्याकर्शितं मनोयस्य) १८ पदेपदेभ्यंतरवह्निनेतिव्याचष्टे । क्वचिच्चदुःसहेनेति । (गृहीतसारः आत्तबलः अशक्तइत्यर्थः । १९

श्लोकाः १२-१९

सयदादुग्धपूर्वसुकृतस्तदाकारस्करकाकतुंडाद्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्यद्रविणान्जीवन्मृतान्स्वयंजीवन्म्रियमाणउपधावति १२ एकदाऽ सत्प्रसंगान्निकृतमतिर्व्युदकस्रोतस्खलनवदुभयतोऽपिदुःखदंपाषंडमभियाति १३ यदातुपरबाधयांऽधआत्मनेनोपनमतितदाहिपितृपुत्रबर्हिष्मतःपितृपु त्रान्वासखलुभक्षयति १४ क्वचिदासाद्यगृहंदाववत्प्रियार्थविधुरंअसुखोदर्कंशोकाग्निनादह्यमानोभृशंनिर्वेदमुपगच्छति १५ क्वचित्कालविषमितराजकु लरक्षसाऽपहृतप्रियतमधनासुःप्रमृतकइवविगतजीवलक्षणआस्ते १६ कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदितिस्वप्ननिर्वृतिलक्षणमनुभवति १७ क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरिमारुरुक्षमाणोलोकव्यसनकर्शितमनाःकंटकशर्कराक्षेत्रंप्रविशन्निवसीदति १८ क्वचिच्चदुःसहेनकायाभ्यंतरवह्नि नागृहीतसारःस्वकुटुंबायक्रुध्यति १९

चूर्णिका

क्वचित् अपुण्यवृक्षलताविषोदकपानतुल्यान् जीवन्मृतान् उपधावति १२ क्वचित् असतां प्रसंगात् वंचितमतिः निरुदकनदीगर्तपाततुल्यं इहपरत्रचदुःखदंपाखंड मभियाति १३ यदाआत्मने अन्नं नोपातिष्ठति तदापितृपुत्रान्बाधतेक्वचित् १४ दावतुल्यं गृहमासाद्य शोकाग्निनादह्यमानः निर्वेदमुपगच्छति १५ क्वचित् कालेनप्रति कूलतांनीतंयद्राजकुलंतदेवरक्षः तेनापहृताः प्रियतमधनरूपाः प्राणाःयस्यस मृतकइव आस्ते १६ क्वचित् मनोरथप्राप्तं पित्रादि असत् सदितिमत्वा अनुभवति १७ क्वचित् गृहाश्रमेयाः कर्मचोदनास्तासांमतिविस्तारएव गिरिः तंआरुरुक्षन्कंटकशर्कराक्षेत्रं प्रविष्टइवसीदति १८ क्वचित् दुःसहेनकायाभ्यंतरवह्निनागृहीतसारः स्वकुटुं बायक्रुध्यति १९

॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

क्वचिन्निगीर्णइत्येतद्व्याचष्टे । सएवेति । (अपविद्धःउत्सृष्टः) २० दष्टःस्मशेतइतिव्याचष्टे कदाचिदिति। मानोगर्वएवदंष्ट्रापरपीडाकरत्वात् भग्नामानदंष्ट्रायस्य अतएवनलब्धोनिद्रायाः क्षणोपियेन।२१ कर्हिस्मचित्क्षुद्ररसानित्येतद्व्याचष्टे । कर्हिस्मचित्काममधुलवानिति । यदानिहतोभवतितदासद्यएवनिरयेपतति। २२ प्रसंगात्प्रवृत्तस्यवर्मणः संसारहेतुत्वं स्फुटयति अथचेति।यस्मादेवं (स्यात्) अथ तस्मात् अनंतरमेवउभयथाइहचपरत्रचअस्मिन् प्रवृत्तिमार्गेसंसारस्यावपनं जन्मनांक्षेत्रं कर्मोदाहरंति।२३तत्रातिकृच्छ्रं प्रतिलब्धमानइत्येतद्व्याचष्टे । मुक्तइति । यदि (कथंचित् प्राप्तविषयः)बंधान्मुक्तो भवतितर्हिततःसकाशा (-त्कश्चित्) अन्योहरतितस्मादप्यन्यः (कश्चित्) नत्वसौभोक्तुंलभतइत्यर्थः। २४ क्वचिच्चशीतातपेत्येतद्व्याचष्टे क्वचिच्चेति शीतादयोनेकाआधिदैविक्याद्यायादशादुःखावस्थास्तासां

॥५१॥ २५ क्वचिन्मिथइत्येतद्व्याचष्टे । क्वचिन्मिथो (वाणिज्यवृत्त्या) यत्किंचिद्धनं व्यवहरन् काकिणिकामात्रंविंशतिकपर्दकमात्रं ततोपिन्यूनं वायत्किंचिदपहरतिअथविद्वेषमेति २६ अध्वन्यमुष्मिन्नुरु कृच्छ्रवित्तबाधोपसर्गैरित्युक्तानुपसर्गान् प्रपंचयति । अध्वन्यमुष्मिन्इमेउरुकृच्छ्रवित्तबाधादयः तथासुखदुःखादयश्च तत्रमात्सर्यं परसंपत्त्यसहनं ईर्ष्यापरगुणमात्रासहनम् । २७ । व्युत्क्रमैः पुनरुक्तैश्च नानापाठैरतः परं।दुर्गमोपिभवाध्वायं संप्रदायेनतीर्यते ॥१॥ तत्रप्रसज्जतिक्वापीत्यादिना सिंहावलोकनन्यायेन । उक्तमर्थमपकृष्यक्रमेणव्याचष्टे । क्वापिदेवमाययेति (देवस्यविष्णोर्मायामोहनीशक्तिस्त द्रूपया।) प्रस्कन्नअपगतं विवेकविज्ञानंयस्य । यस्याः स्त्रियाविहारगृहं क्रीडागृहंतदारंभे (तदुद्यमे)आकुलंहृदयंयस्य । अनेनप्रसज्जतीतिव्याख्यातम् । तदाश्रयेत्यादिव्याचष्टे । तस्याआश्रयेअवसक्ताः संलग्नाः सुतादुहितरश्चकलत्रंचसैवस्त्रीतेषां भाषितादिभिरपहृतंहृदयंयस्य । (अपारेअपरिमिते) प्रहिणोतिप्रक्षिपति (यतोनजितआत्मामनोयेन) २८

श्लोकाः २०—२८

सएवपुनर्निद्राजगरगृहीतोऽधेतमसिमग्नःशून्यारण्यइवशेतेनान्यत्किंचनवेदशवइवापविद्धः २० कदाचिद्भग्नमानदंष्ट्रोदुर्जनदंदशूकैरलब्धनिद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञानोऽधकूपेऽधवत्पतति २१ कर्हिस्मचित्काममधुलवान्विचिन्वन्यदापरदारपरद्रव्याण्यवरुंधानोराज्ञास्वामिभिर्वानिहतः पतत्यपारेनिरये २२ अथचतस्मादुभयथापिहिकर्मास्मिन्नात्मनःसंसारावपनमुदाहरंति २३ मुक्तस्ततोयदिबंधाद्देवदत्तउपाच्छिनत्तितस्मादपिविष्णु मित्रइत्यनवस्थितिः २४ क्वचिच्चशीतवाताद्यनेकाधिदैविकभौतिकात्मीयानांदशानांप्रतिनिवारणेअकल्पोदुरंतचिंतयाविषण्णआस्ते २५ क्वचिन्मिथो व्यवहरन्यत्किंचिद्धनमन्येभ्योवाकाकिणिकामात्रमपहरन्यत्किंचिद्वाविद्वेषमेतिवित्तशाठ्यात् २६ अध्वन्यमुष्मिन्निमउपसर्गास्तथासुखदुःखरागद्वेषभ याभिमानप्रमादोन्मादशोकमोहलोभमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः २७ क्वापिदेवमाययास्त्रियाभुजलतोपगूढःप्रस्कन्नविवेक विज्ञानोयद्विहारगृहारंभाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोकविचेष्टितापहृतहृदयआत्मानमजितात्माऽपारेंऽधेतमसिप्रहिणोति २८

चूर्णिका

सएवपुनः निद्राजगरगृहीतः शून्यारण्यइवशेते नान्यत् किंचनवेद २० कदाचित् दुर्जनदंदशूकैर्भग्नगर्वदंष्ट्रःअंधकूपेंधवत्पतति क्वचित् २१ काममधुलवान्विचि न्वन्यदापरदारपरद्रव्याणि अवरुंधानः भवतितदाराज्ञास्वामिभिर्वानिहतः सन्निरयेपतति २२ तस्मात् प्रवृत्तिमार्गेआत्मनः जन्मक्षेत्रं कर्म उदाहरंति २३ यदिबंधात् मुक्तो भवति तर्हितस्मात् देवदत्तोहरति तस्मात्विष्णुमित्रः २४ क्वचित् शीतवाताद्यनेकाधिदैविकादिदुःखानांनिवारणे अकल्पोदुरंतचिंतयाविषण्णः आस्ते २५ क्वचित् मिथः व्यवहरन् यत्किंचिद्धनं अन्येभ्यः काकिणिकामात्रं ततोन्यूनंवाअपहरन् विद्वेषंएति २६ अमुष्मिन्अध्वनिइमे सुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकलोभमोहम त्सर्येर्ष्याविमानक्षुत्पिपासाधिव्याधिजन्ममरणादयः उपसर्गाः संति २७ क्वापिदेवमाययास्त्रियाभुजलतोपगूढः गतविवेकाविज्ञानः सुतदुहितृकलत्रभाषितादिभिः अपहृत हृदयः आत्मानं अपारेंधेतमसिप्रक्षिपति २८

॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कचित्कदाचिद्धरिचक्रतत्रसन्नित्येतद्व्याचष्टे । कदाचिदीश्वरस्येति । परमाणुरादिः द्विपरार्धोऽपवर्गोंतः तदेवोपलक्षणंयस्यतस्मात् कालोपलक्षणादिति पृथक्पदत्वेनपाठेकालस्वरूपादित्यर्थः । सूर्योहि यावताकालेनपरमाणुदेशमत्येतिसकालः । परमाणुः ब्रह्मणोवर्षशतंद्विपरार्धः । एतादृशात् तथारंहसाशीघ्रेणपरिवर्तितेनपरिभ्रमणेनवयसाबाल्यादिक्रमेण ब्रह्माणमभिव्याप्यतृणस्तंबआदि-(र्येषांतानिभूतानिहरतः, (एतादृशा-)-चक्रात्सकाशात् वित्रस्तहृदयः सन्पाषंडदेवताआभिमुख्येनधत्ते (भजतइत्यर्थः ।) इत्यन्वयः । (पुनः कथंभूताच्चक्रात् ।) अनिमिषतः निमेषमकुर्वतः अप्रमत्तादित्यर्थः । (कीदृशानांभूतानां ।) मिषतांप्रतिकर्तुमशक्तानामित्यर्थः । कर्मणिषष्ठ्यः । कालचक्रं निजंनित्यंमायुधंयस्यतं । (केनभजते ।) सांकेत्येनमूलप्रमाणशून्येनपाषंडागमेन । (आर्यसमयपरिहृता आर्यसिद्धांतैरनंगीकृताः) २९ तैर्वंचितइत्येतद्व्याचष्टे । यदात्विति । आत्मना (स्वयमेव) वंचितैउरुअधिकंवंचितःसन् तेषां ब्राह्मणानांयच्छीलं उपनयनादितदरोचयन् (अपथ्यंमन्वानः) शूद्रवद्वर्तते । निगमाचारेऽशुद्धितः । (निगमोक्ताचारे)स्वस्यशुद्ध्यभावात् । (अनधिकारात्) यस्यशूद्रस्यकेवलंमिथुनीभावः (स्त्रीपुंसभावः) कुटुंबभरणंचव्यापारोनाग्निहोत्रादिः । (ब्राह्मणानांशीलंतुश्रुतिस्मृत्युक्तकर्मानुष्ठानेनयज्ञपुरुषस्यआराधनरूपमेव) ३० तज्जातिरासेनेत्यादिव्याचष्टे । तत्रापिनिरवरोधः प्रतिबाधरहितः स्वैरेणस्वेच्छयाक्रीडन् विस्मृतमृत्युकालः सन् ३१ द्रुमेषुरंस्यन्नित्येतद्व्याचष्टे । कचिद्द्रुमवदिति । व्यवायक्षणः मिथुनभावोत्सवोभवति ३२ कचित्प्रमादादित्येतत्त्वाचष्टे । एवमध्वनिसुखदुःखाचवरुंधानोगिरिकंदरप्रायेतमसिरोगाद्यापदिपततीतिशेषः । ३३

श्लोकाः २९/३३

कदाचिदीश्वरस्यभगवतोविष्णोश्चक्रात्परमाण्वादिद्विपरार्धापवर्गात्कालोपलक्षणात्परिवर्तितेनवयसारंहसाहरतआब्रह्मतृणस्तंबादीनांभूतानामनिमिषतोमिषतांवित्रस्तहृदयस्तमेवेश्वरंकालचक्रनिजायुधंसाक्षाद्भगवंतंयज्ञपुरुषमनादृत्यपाषंडदेवताःकंकगृध्रबकवटप्रायाआर्यसमयपरिहृताःसांकेत्येनाभिधत्ते २९ यदातुपाषंडिभिरात्मवंचितैस्तैरुरुवंचितोब्रह्मकुलंसमावसंस्तेषांशीलमुपनयनादिश्रौतस्मार्तकर्मानुष्ठानेनभगवतोयज्ञपुरुषस्यआराधनमेवतदरोचयञ्छूद्रकुलंभजतोनिगमाचारेऽशुद्धितोयस्यमिथुनीभावःकुटुंबभरणंयथावानरजातेः ३० तत्रापिनिरवरोधःस्वैरेणविहरन्नतिकृपणबुद्धिरन्योन्यमुखनिरीक्षणादिनाग्राम्यकर्मणैवविस्मृतकालावधिः ३१ कचिद्द्रुमवदैहिकार्थेषुगृहेषुरंस्यन्यथावानरःसुतदारवत्सलोव्यवायक्षणः ३२ एवमध्वन्यवरुंधानोमृत्युगजभयात्तमसिगिरिकंदरप्राये ३३

चूर्णिकाः कचित्भगवतः विष्णोः कालचक्रात्त्रस्तहृदयः तमेवईश्वरंयज्ञपुरुषं अनादृत्यकंकगृध्रबकतुल्याःपाखंडदेवताः आभिमुख्येन धत्ते २९ यदापाखंडिभिर्वंचिताः तदाब्रह्मकुलंसमावसन्तेषांशीलंश्रौतादिकर्मानुष्ठानेनभगवदाराधनमेवतत् अरोचयन् शूद्रकुलंभजतेयस्य शूद्रस्यमिथुनीभावः उदरभरणंचव्यापारः ३० तत्रापिप्रतिबंधराहितः स्वेच्छयाक्रीडन्सन्अन्योन्यमुखनिरिक्षणादिना विस्मृतकालावधिर्भवति ३१ कचित् द्रुमवत्ऐहिकार्थेषुरंस्यन्वानरवत् मिथुनोत्सवोभवति ३२ एवं अध्वनि अवरुंधानः मृत्युगजभयात्गिरिकंदरप्राये रोगाद्यापदि पतति ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

क्वचिच्छीतवातेत्यादिपूर्वस्मादधिकोक्तिःरोगाद्यापदिपतितः सन्शीतादिभिः क्लिश्यन्नास्तइत्यर्थः३४तदेवं सिंहावलोकनन्यायेनोक्तमर्थं यथास्थानमपकृष्यव्याख्यायक्रमस्थमनुवर्तयितुं पूर्वोक्तमेवानुवदति क्वचिन्मिथइति वित्तशाठ्येनकदाचिद्यत्किंचिद्धनमुपयाति.३५क्वचित्क्वचित्क्षीणधनास्स्वितिव्याचष्टे।क्वचित्क्षीणधनइति। अप्रतिलब्धंयन्मनोरथेनोपगतंवांछितं तस्यादानेस्वीकारेनिश्चितमतिःसन् ३६अन्योन्यवित्तव्यतिषंगेनेत्येतद्व्याचष्टे। एवं (वित्तव्यतिषंगेनविनिमयेनविवृद्धोवैरानुबंधोवैरपरंपरायस्यएवंभूतोपिउद्वहतिविवाहादिसंबंधंकरोतिअथअनंतरं) अपवहतित्यजति ३७ अध्वन्यमुष्मिन्नित्यादिव्याचष्टेएतस्मिन्निति। (यत्र यः) आपन्नआपदंप्राप्तोविपन्नोवाविनष्टस्तामितरस्तत्रविसृज्यनह्यमानः बध्यमानः साधुवर्जितः साधुव्यतिरिक्तः (एषनरलोकसंघः यतः सकाशादारब्धः यमस्य संसारस्यपारं कथयंति तंप्रत्याद्यापिनावर्तते) ३८ अनावृतौ हेतुमाह यदिदमिति। (योगानुशासनं योगशास्त्रं नावगच्छंति। यंयोगंन्यस्तदंडाः संन्यासिनः) ३९ मनस्विनइत्यादिव्याचष्टेयदपीति। येराजर्षयस्तोपिनावरुंधतेकिंतुपरं केवलं मृधेरणभूमौशयीरन्। (अस्यांपृथिव्याम्।) ४० प्रसज्जतीत्यादिगिरिकंदरइत्यंतं अपकृष्यव्याख्यातं ग्रंथमतिक्रम्यवल्लींगृहीत्वेत्यादिग्रंथंव्याचष्टे। कर्मवल्लीमिति। एवमुपरिस्वर्गंगतोपिनरलोकसार्थमुपयाति (क्षीणेपुण्येमर्त्यलोकं पुनरायातीत्यर्थः।) ४१ तदेवं भरतोक्तिव्याख्यायतच्चरितेसंग्रहश्लोकानाह। तस्येदं कर्मश्लोकैरुपगायंति। आर्षभस्यऋषभपुत्रस्यअन्योनृपःअनुवर्त्मनार्हतिर्वर्त्मानुगंतुंनशक्नोति ४२

श्लोकाः ३४/४२

क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानांदुःखानांप्रतिनिवारणेअकल्पोदुरंतविषण्णआस्ते ३४ क्वचिन्मिथोव्यवहरन्यत्किंचिद्धनमुपयातिवित्तशाठ्येन ३५ क्वचित्क्षीणधनःशय्यासनाद्युपभोगविहीनोयावदप्रतिलब्धमनोरथोपगतादानेऽवसितमतिस्ततस्ततोऽवमानादीनिजनादभिलभते ३६ एवंवित्तव्यतिषंगविवृद्धवैरानुबंधोपिपूर्ववासनयामिथउद्वहत्यथापवहति ३७ एतस्मिन्संसाराध्वनिनानाक्लेशोपसर्गबाधितःआपन्नविपन्नोयस्तमुहवावेतरस्तत्रविसृज्यजातंजातमुपादायशोचन्मुह्यन्बिभ्यद्विवदन्क्रंदन्संहृष्यन्गायन्नह्यमानःसाधुवर्जितोनैवावर्ततेऽद्यापियतआरब्धएषनरलोकसार्थःयमध्वनःपारमुपदिशंति ३८ यदिदंयोगानुशासनंनवाएतदवरुंधतेयंन्यस्तदंडामुनयउपशमशीलाउपरतात्मानःसमवगच्छंति ३९ यदपिदिगिभजयिनोयज्विनोयेवैराजर्षयःकिंतुपरंमृधेशयीरन्अस्यामेवममेयमितिकृतवैरानुबंधायांविसृज्यस्वयमुपसंहृताः ४० कर्मवल्लीमवलंब्यततआपदःकथंचिन्नरकाद्विमुक्तःपुनरप्येवंसंसाराध्वनिवर्तमानोनरलोकसार्थमुपयातिएवमुपरिगतोपि ४१ तस्येदमुपगायंति ॥ आर्षभस्येहराजर्षेर्मनसापिमहात्मनः ॥ नानुवर्त्मार्हतिनृपोमक्षिकेवगरुत्मतः ४२

चू.र्णि.का

क्वचित् शीतवाताद्यनेकाधिदैविकादिदुःखानां निवारणेअसमर्थः सन्विषयविपण्णः आस्ते ३४ ३५ क्वचित् क्षीणधनः शय्यासनाद्युपभोगविहीनः वांछितादानेनिश्चितमतिः सन्ततस्ततः जनात्अवमानादीनिलभते ३६ ३७ एतस्मिन्संसाराध्वनि यः आपदंप्राप्तः मृतोवा तं विसृज्यजातंजातंस्वीकृत्यशोचन् मुह्यन् क्रंदन् संहृष्यन् आपिअद्यापिनावर्तते ३८ तत्रहेतुः एतद्योगानुशासनं नजानंति मुनयस्तुसमवगच्छंति ३९ एवंस्वर्गतोपिनरलोकसार्थमेवोपयाति ४० ४१ हेराजन् ऋषभवदेवपुत्रस्य भरतस्यमार्गंअन्यः कोपिनृपः गंतुंनशक्नोति गरुत्मतः मार्गंमक्षिकेव ४२

॥५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रहेतुमाह यइति । सुहृद्राज्ययोर्द्वंद्वैक्यम् । हृदिस्पृशोमनोहरान् अतोदुस्त्यजान् दारादीन् योविष्ठामिव जहौ तस्यार्षभस्येतिसंबंधः । त्यागेहेतुः । उत्तमश्लोकेलालसालंपटत्वंयस्य ।४३ तस्यैवं विषय त्यागोनचित्रमित्याह । यएवंभूतोसौनृपः स क्षित्यादीन् नैच्छदितियत्तदुचितम् ।(सुरवैररपिस्पृहणीयां) सदयावलोकां भरतस्यदयायथाभवतिएवमवलोकोयस्याइतिपरिजनावलोकः श्रियामुपचर्यते । यतोमधुद्विषः सेवायामनुरक्तं मनोयेषांतेषां महतांअभवोमोक्षोपिफल्गुः तुच्छएव । (किंपुनः क्षितिसुतादि ।) ४४ । तस्यसेवानुरागमेवाह । यज्ञायेति । यज्ञरूपायधर्मपतयेयज्ञादिधर्मफलदात्रेविधौनै पुणंयस्यतस्मै।(''यद्यदाचरतिश्रेष्ठ''इतिन्यायेन) धर्मानुष्ठात्रे योगोष्टांगःतस्मै।सांख्यंज्ञानंतच्छिरः प्रधानंफलं यस्ययोगस्यतस्मै । प्रकृतीश्वरायमायानियंत्रे ।अतएवनारं जीवसमूहः सोयनमाश्रयोयस्यत स्मैसर्वजीवनियंत्रे । एवंकर्मज्ञानदेवताकांडैः प्रतिपादितायहरयेनमइत्युदारंउच्चैर्यः सम्यगुच्चारितवान् । मृगत्वंमृगदेहमपिहास्यन् त्यक्ष्यन्सन्यएवंभूतः तस्यतदुचितमितिवा । तस्यानुवर्त्मनार्हतीति
॥५४॥ वासंबंधः । ४५ भरतचरितश्रवणादिफलमाह । इदमिति । भागवतैः सभाजिताः स्तुताः अवदाताः शुद्धागुणाः कर्माणिचयस्यतस्यभरतस्यानुचरितंयोनुशृणोतिसआत्मनएवसकाशात्सर्वाआशिषआ शास्तेस्वतएवप्राप्नोतिनतुकांचिदप्याशिषंपरस्मादपेक्षतेइत्यर्थः । (कथंभूतंचरितंस्वस्त्ययनमित्यादि)४६ इतिपंचमेस्कंधेचतुर्दशोऽध्यायः॥१४॥एवमष्टभिरध्यायैर्भरतस्योक्तमीहितम् । ततः पंचदशेतस्यकी र्त्यतेवंशजानृपाः ॥१॥ ऋषभपदवींजीवन्मुक्तमार्गं अनुवर्तमानंदृष्ट्वेतिशेषः यद्वायंसुमतिंअनार्याः पामराः पाषंडिनोअवेदसमाम्नातां देवतांकल्पयिष्यंतिबुद्धोयंसाक्षादवतीर्णइतिमंस्यंतइत्यर्थः । १

श्लोकाः

योदुस्त्यजान्दारसुतान्सुहृद्राज्यंहृदिस्पृशः॥जहौयुवैवमलवदुत्तमश्लोकलालसः४३योदुस्त्यजान्क्षितिसुतस्वजनार्थदारान्प्रार्थ्यांश्रियंसुरवरैःसदयावलो काम् ॥ नैच्छन्नृपस्तदुचितंमहतांमधुद्विट्सेवानुरक्तमनसामभवोपिफल्गुः ४४ यज्ञायधर्मपतयेविधिनैपुणाययोगायसांख्यशिरसेप्रकृतीश्वराय ॥ नारायणा यहरयेनमइत्युदारंहास्यन्मृगत्वमपियःसमुदाजहार ४५ इदंभागवतसभाजितावदातगुणकर्मणोराजर्षेर्भरतस्यानुचरितंस्वस्त्ययनमायुष्यंधन्यंयशस्यं स्वर्ग्यापवर्ग्यंचानुशृणोत्याख्यास्यत्यभिनंदतिचसर्वाएवाशिषआत्मनआशास्तेनकांचनपरतइति ४६ इतिश्रीभा॰महा॰पंच॰भरतोपाख्यानेब्राह्मणरहू गणसंवादेचतुर्दशोध्यायः १४ ॥ ॥श्रीशुकउवाच ॥ ॥ भरतस्यात्मजःसुमतिर्नामाभिहितोयमुहवावकेचित्पाषंडिनऋषभपदवीमनुवर्तमानंचानार्या अवेदसमाम्नातांदेवतांस्वमनीषयापापीयस्याकलौकल्पयिष्यंति १ ४३/१

चूर्णिका

यः युवापिदारसुतसुहृद्राज्यादिजहौ ४३ किंच यः क्षितिसुतस्वजनार्थं दारादीन् नैच्छत् तत्तस्य उचितमेव यतः हरिसेवानुरक्तमनसां महतां मोक्षोपितुच्छएवकिंपुनरेते ४४ यः भरतः मृगदेहमपित्यक्ष्यन् यज्ञायनारायणायहरयेनमइत्युच्चैः सम्यगुच्चारितवान् ४५ इदंभागवतैः सत्कृतशुद्धगुणकर्मणः भरतस्यस्वस्त्ययनं आयुष्यं धन्यं यशस्यं स्वर्ग्यापवर्ग्यं अनुचरितंयः शृणोतिश्रावयति अभिनंदति सः सर्वाः आशिषः प्राप्नोति ४६ इतिपंचमेचतुर्दशः ॥ १४ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ भर तस्यात्मजः सुमतिर्नामा यंसुमतिं ऋषभपदवीमनुवर्त्तमानं दृष्ट्वा केचित्पाखंडिनः बुद्धोयं अवतीर्ण इतिमंस्यंते पाखंडमार्गंच कलौकल्पयिष्यंति १ ॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥५५॥

(तस्मात्सुमतेर्वृद्धसेनाख्यायांस्त्रियाम्) २ (आसुर्यांपत्न्यांतत्तनयः) देवताजितः पुत्रः (देवद्युम्नाख्यः ततोदेवद्युम्नात् उपजातः संभूतः) ३ आत्मविद्यांबहुम्यआख्याय तद्व्याख्यानेनैवस्वयंसंशुद्धो (महापुरुषंअंतर्यामिणं) अनुसस्मार अपरोक्षतयानुभूतवान् । प्रतिहर्ताप्रस्तोताउद्गातेतित्रयोयज्ञनिपुणाः सूनवआसन् । अजनिषातांजातौ ४ हृदयजः पुत्रः । (नक्तात्रत्याः पुत्रः गयनामाजायत ।) जयतोरिरक्षिषयागृहीतंसत्त्वंयेनतस्यविष्णोः कलाअंशः सन् ५ महापुरुषत्वमाहसवैइति । धर्मस्तस्यद्विविधः अभिषिक्तत्वात्प्रजापालनादिरेकः गृहस्थत्वादिज्यादिश्चापरः । द्विविधोपिभगवतिसर्वात्मनार्पितः सन्परमार्थलक्षण (एव) तेनपरिभाविताासंस्कृताअतिशुद्धामतिर्यस्य अतएवोपरतमनात्म्यं देहाद्यहंभावोयस्मिन् तस्मिन्नात्मनिचित्तेस्वयमेवोपलभ्यमाने ब्रह्मण्यात्मानुभवोयस्यताहशोपिनिरभिमानएवअवनिमजूगुपत्पालयामास ६ कर्मभिर्गयंकः प्रतियाति अनुकरोतिनकोपि । यथागयेनयज्ञादिकर्मकृतं तथानकोपिकर्तुंसमर्थइत्यर्थः । अत्रहेतुः ।यज्वादिरूपांभगवत्कलांगयमृतेअन्यः कोयज्वादिरूपोभवति ।अत्रकइत्यनुषंगः । (यज्वाविधिनेष्टवान्) । अभिमानीसर्वतोमानास्पदंमनस्वीति । समागतासंप्राप्ताश्रीर्येनयमितिवा । सतांसदसःसभाया पतिःसतांसेवकः । यद्वा यज्वादिरूपोपिभगवत्कलांऋतेगयंकोन्यः प्रतियातीत्यन्वयः । ७ सतीः सत्यः । सत्याआशिषोयासांताः दक्षकन्याः श्रद्धामैत्रीदयेत्याद्याः निराशिषोनिष्कामस्यापियस्यराज्ञः प्रजानामाशिषः कामान् धरा दुदुहे । तस्यगुणाएववत्सस्तेन स्नुतं (प्रस्नुतं) ऊधः (स्तनौ) यस्याः पृथिव्याः । यच्छब्दानां तंगयंकः प्रतियातीत्यनेनसंबंधः ८

श्लोकाः २/८

तस्माद्वृद्धसेनायांदेवताजिन्नामपुत्रोऽभवत् २ अथासुर्यांतत्तनयोदेवद्युम्नस्ततोधेनुमत्यांसुतःपरमेष्ठीतस्यसुवर्चलायांप्रतीहउपजातः ३ यआत्मविद्यामाख्यायस्वयंसंशुद्धोमहापुरुषमनुसस्मार ॥ प्रतीहात्सुवर्चलायांप्रतिहर्त्रादयस्त्रयआसन्निज्याकोविदाःसूनवःप्रतिहर्तुःस्तुत्यामजभूमानावजनिषाताम् ४ भूम्नऋषिकुल्यायामुद्गीथस्ततःप्रस्तावोदेवकुल्यायांप्रस्तावान्नियुत्सायांहृदयजआसीद्विभुःविभोरत्यांचपृथुषेणस्तस्मान्नक्तआकूत्यांजज्ञेनक्ताद्रतिपुत्रोगयोराजर्षिप्रवरउदारश्रवाअजायतसाक्षाद्भगवतोविष्णोर्जगद्रिरक्षिषयागृहीतसत्त्वस्यकलात्मवत्त्वादिलक्षणेनमहापुरुषतांप्राप्तः ५ सवैस्वधर्मेणप्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिनाचभगवतिमहापुरुषेपरवेराब्रह्मणिसर्वात्मनार्पितपरमार्थलक्षणेनब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेनचाभीक्ष्णशःपरिभाविताातिशुद्धमतिरुपरतानात्म्यआत्मनिस्वयमुपलभ्यमानब्रह्मात्मानुभवोपिनिरभिमानएवावनिमजूगुपत्तस्येमांगाथांपांडवेयपुराविदउपगायंति ६ गयंनृपःकःप्रतियातिकर्मभिर्यज्वाभिमानीबहुविद्धर्मगोप्ता ॥ समागतश्रीःसदसस्पतिःसतांसत्सेवकोन्योभगवत्कलामृते ७ यमभ्यषिंचन्परयामुदासतीःसत्याशिषोदक्षकन्याःसरिद्भिः ॥ यस्यप्रजानांदुदुहेधराऽऽशिषोनिराशिषोगुणवत्सस्नुतोधाः ८

॥५५॥

चूर्णिका तस्मात्सुमतेःवृद्धसेनायां देवताजिन्नामपुत्रः २ तस्मात् असुर्यां देवद्युम्नः तस्मात् धेनुमत्यांपरमेष्ठी ततः सुवर्चलायांप्रतीहः ३ तस्मात्प्रतीहात् सुवर्चलायां प्रतिहर्ता १ प्रस्तोता २उद्गाता ३ इतित्रयः पुत्राः आसन् प्रतिहर्तुः स्तुत्यां अजभूमानौ जातौ ४भूम्नः ऋषिकुल्यायां उद्गीथः तस्माद्देवकुल्यायांप्रस्तावः तस्मान्नियुत्सायांविभुर्विभोःरत्यां पृथुषेणः तस्मात्आकूत्यांनक्तः तस्माद्रत्यां गयोनामभगवदंशः सः महापुरुषतांप्राप्तः ५ सः भगवतिसमार्पितेनप्रजापालनेज्यादिधर्मेणभक्त्याचशुद्धमतिः निरभिमानएवअवनिं पालयामास ६ कर्मभिः गयं कः अनुकरोति नकोपि ७ यंदक्षकन्याः अभ्यषिंचन् धरा यस्य प्रजानां कामान् दुदुहे ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥५६॥

छंदांसिवेदाः तद्विहितकर्माणिच (यस्य कामनाः)दुदुहुः युधिप्रत्यंचिताः बाणैः प्रतिपूजिताः नृपाः यस्य बलिं (करं) आजहुरर्पयामासुः धर्मेण पालनेन यदाप्रत्यंचिताः विप्रास्तदा परेत्य लोकांतरे (उपकारकं) आशिषां (पुण्यफलानां) षष्ठमंशआजहुः । " पुण्यषड्भागमादत्ते न्यायेनपरिपालयन्नि"तिस्मृतेः । ९ उरुसोमपीथे बहुसोमपानेअध्वरे मघोनिइंद्रे माद्यति मदं प्राप्नुवति सति श्रद्धया विशुद्धो योऽचलो भक्तियोगः तेन समर्पितमिज्याफलं (भगवान्) जहार अर्हणामिवप्रत्यक्षतः स्वीकृतवानित्यर्थः १० यस्यभगवतः प्रीणनात् देवादीनां द्वंद्वैक्यं (देवतिर्यगादि) सद्यः प्रीतिं गच्छेत् सविश्वजीवःसर्वांतर्यामीस्वयं (प्रीतः) प्रीतिरूपएवबर्हिषियज्ञगयस्यहस्फुटंप्रीतिमगात्तृप्तोस्मीतिप्रत्यक्षंप्रीतिमाविष्कृतवानित्यर्थः ११ (अजनिष्टजातः) १२ (ततः सम्राजः सकाशात् । मधोः) सुमनसिस्त्रियां (जज्ञातेजातौ । शताजिन्नामापुत्रः प्रवरोज्येष्ठोयःमात्तत्) १३ कीर्त्याअतिशयेनअलमकरोतभूषितवान् । १४ ॥ इतिपंचमेस्कंधेपंचदशोऽध्यायः ॥ १५ ॥ पूर्वोक्तद्वीपसिंध्वादिमानंहृस्वंस्वरूपतः । स्पष्टंप्रवक्तुमारब्धापंचाध्यायीततः परम्॥१॥षोडशेधस्तथाचोर्ध्वंपरितः संनिवेशतः । मेरोस्थितिर्महीकंजकर्णिकाचोपवर्ण्यते॥२॥प्रियव्रतचरित्रोक्तौयोक्ताद्वीपादिकल्पना । तद्विशेषविजिज्ञासुःकथांतेपरिपृच्छति ।३ उक्तइति ।किंपर्यंतमुक्तस्तदाह । यावदादित्यस्तपति । यत्रचासौशुक्लकृष्णपक्षयोः नक्षत्रगणैः सहचंद्रमावाहश्यतेतावत् १

श्लोकाः ९/१

छंदांस्यकामस्यचयस्यकामान्दुदूहुराजह्रुरथोबलिंनृपाः ॥ प्रत्यंचितायुधिधर्मेणविप्रायदाशिषांषष्ठमंशंपरेत्य ९ यस्याध्वरेभगवानध्वरात्मामघोनिमाद्यत्युरुसोमपीथे ॥ श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार १० यत्प्रीणनाद्बर्हिषिदेवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्यात् ॥ प्रीयेतसद्यःसह विश्वजीवःप्रीतःस्वयंप्रीतिमगाद्गयस्य ११ गयाद्गयंत्यांचित्ररथःसुगतिरवरोधनइतित्रयःपुत्राबभूवुः ॥ चित्ररथादूर्णायांसम्राडजनिष्ट १२ ततउत्कलायां मरीचिर्मरीचेर्बिंदुमत्यांबिंदुमानुदपद्यत ॥ तस्मात्सरघायांमधुनामाऽभवत् ॥ मधोःसुमनसिवीरव्रतस्ततोभोजायांमंथुप्रमंथूजज्ञाते ॥ मंथोःसत्यायांभौवनस्ततोदूषणायांत्वष्टाऽजनिष्टत्वष्टुर्विरोचनायांविरजःविरजस्यशतजित्प्रवरंपुत्रशतंकन्याचविषूच्यांकिलजातम् १३ तत्रायंश्लोकः॥प्रैय्यव्रतंवंशमिमंविरजश्चरमोद्भवः ॥ अकरोदत्यलंकीर्त्याविष्णुःसुरगणंयथा १४ इतिश्रीभागवतेमहा०पंचम०प्रियव्रतवंशानुकीर्तनंनामपंचदशोध्यायः १५ ॥ ॥ राजोवाच ॥ ॥ उक्तस्त्वयाभूमंडलायामविशेषोयावदादित्यस्तपतियत्रचासौज्योतिषांगणैश्चंद्रमावासहदृश्यते १

घूर्णिका

युधिबाणैः पूजिताः नृपाः यस्यबलिंअर्पयामासुः ९ यस्ययज्ञे भगवान्यज्ञेशः भक्तियोगेन समर्पितं इज्याफलं अर्हणमिवप्रत्यक्षतः स्वीकृतवान् १० ११ तस्माद्गयंत्यांचित्ररथः सुगतिः अवरोधनः इतित्रयः चित्ररथात् ऊर्णायांसम्राट् १२ ततः उत्कलायांमरीचिः ततः बिंदुमत्यांबिंदुमान् ततः सरघायांमधुः ततः सुमनस्यांवीरव्रतः ततः भोजायांमंथुप्रमंथू मंथोः सत्यायांभौवनः ततः दूषणायां त्वष्टा ततः विरोचनायां विरजः ततःविषूच्यां शतजित्प्रवरं पुत्रशतं कन्याचएका जाता १३ प्रैय्यव्रतमिमंवंशं विरजश्चरमोद्भवः अकरोदत्यलंकीर्त्याविष्णुः सुरगणंयथा १४ इतिपंचमेपंचदशः ॥ १५ ॥ ॥ ॥ राजोवाच ॥ ॥ हे शुक त्वया पूर्वं प्रियव्रतचरिते भूमंडलायामविशेषः उक्तः कियत्पर्यंतमुक्तः तदाह यावत् आदित्यः तपति तथा नक्षत्रगणैः सहचंद्रमाः दृश्यते तावत् १

॥५६॥

१ मानचिह्नस्वरूपतइतिमु०पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यतःयेभ्यः सिंधुभ्यः एतस्याभुवः (जंबुद्वीपादिसप्तद्वीपविशेषाणांविकल्पः कल्पना) सूचितः संक्षेपतोदर्शितः। (विजिज्ञासामि विशेषेणज्ञातुमिच्छामि) २ जिज्ञासायाः फलमाह। भगवतइति (क्षमं
योग्यम् । तत्तस्मात्कारणात्हेगुरोएतत्स्थूलरूपम्) ३ भगवतोयामायागुणविभूतिः तस्याः काष्ठांअंतं (मनसाज्ञातुंवचसावक्तुंवाविबुधायुषापिपुरुषोनालंनशक्नोतिकिंपुनरस्मदायुषा । प्राधान्येनसंक्षेपे
णेत्यर्थः) रूपंसंनिवेशः लक्षणंचिह्नम् । ४ कुवलयंभूमंडलंतदेवकमलंतस्यकोशाः सप्तद्वीपाः तेष्वभ्यंतरः कोशः प्रथमोजंबूद्वीपः नियुतयोजनविशालः लक्षयोजनविस्तीर्णः । ५ नवयोजनसहस्र
मायामोत्रविस्तारः।एतच्चभद्राश्वकेतुमालव्यतिरेकेणद्रष्टव्यम् । तयोश्चतुस्त्रिंशद्योजनसहस्रायामत्वात्।किंचित्तुनीलनिषधयोः संलग्नाग्रयोः समुद्रप्रवेशमंगीकृत्यतयोरपिसंकुचितत्वेन नवसहस्रायामत्वं
संपादयंति । संनिवेशश्चवायुनोक्तः । "धनुर्वत्संस्थितेज्ञेयेद्वेवर्षेदक्षिणोत्तरे। दीर्घाणितत्रचत्वारि चतुरस्रमिलावृत"मिति । ६ नाभ्यांमध्ये । द्वीपस्यआयामोलक्षयोजनप्रमाणम् । तावान्समुन्नाहउ
च्छ्रायोयस्य । ७ मूलेषोडशयोजनसहस्रंविततः तावताषोडशयोजनसहस्रमानेन (भूमिमध्येप्रविष्टः) चतुरशीतियोजनसहस्रमानेनचबहिर्दृश्यतेएवंलक्षयोजनोन्नाहः। उत्तरोत्तरेणेलावृतम्। इलावृतस्यो
त्तरोत्तरतः। (उत्तरेणेत्येनवंतंतद्योगे'एनपे'तिद्वितीया) क्रमेणनीलादयस्त्रयोमर्यादागिरयः। प्रागायताः पूर्वतोदीर्घाः क्षारोदएवावधिर्येषांते । द्विसहस्रयोजनविस्तीर्णाः दशांशादीषदधिकोयोंशस्ते
नदैर्घ्यएवह्रसंति । नतूच्चत्वेपृथुत्वेवा । यथोक्तंविष्णुपुराणे । "लक्षप्रमाणौद्वौमध्येदशहीनास्तथापर"इति । एतच्चस्थूलदृष्ट्यैवोक्तम् । तयोरपियथावन्मध्यमत्वाभावेनलक्षप्रमाणत्वाभावात् ८

॥५७॥

श्लोकाः २/८

तत्रापिप्रियव्रतरथचरणपरिखातैःसप्तद्वीपविशेषविकल्पस्त्वयाभगवन्खलुसूचितः॥ एतदेवाखिलमहंमानतोलक्षणतश्चसर्वंविजिज्ञासामि २ भगवतोगुणम
येस्थूलरूपआवेशितंमनोह्यगुणेसूक्ष्मतमआत्मज्योतिषिपरेब्रह्मणिभगवतिवासुदेवाख्येक्षममावेशितुंतदुहैतद्गुरोऽर्हस्यनुवर्णयितुमिति ३ ॥ ॥ ऋ
षिरुवाच ॥ ॥ नवैमहाराजभगवतोमायागुणविभूतेःकाष्ठांमनसावचसावाऽधिगंतुमलंविबुधायुषापिपुरुषस्तस्मात्प्राधान्येनैवभूगोलकाविशेषंना
मरूपमानलक्षणतोव्याख्यास्यामः ४ योवायंद्वीपःकुवलयकमलकोशाभ्यंतरकोशोनियुतयोजनविशालः समवर्तुलोयथापुष्करपत्रम् ५ यस्मिन्न
ववर्षाणिनवयोजनसहस्रायामान्यष्टभिर्मर्यादागिरिभिःसुविभक्तानिभवंति ६ एषांमध्येइलावृतंनामाभ्यंतरवर्षंयस्यनाभ्यामवस्थितःसर्वतःसौवर्णःकुलगि
रिराजोमेरुर्द्वीपायामसमुन्नाहःकर्णिकाभूतःकुवलयकमलस्य ७ मूर्धनिद्वात्रिंशत्सहस्रयोजनविततोमूलेषोडशसाहस्रंतावतांऽतर्भूम्यांप्रविष्टःउत्तरोत्तरेणेला
वृतंनीलःश्वेतःशृंगवानितित्रयोरम्यकहिरण्मयकुरूणांवर्षाणांमर्यादागिरयःप्रागायताउभयतःक्षारोदावधयोद्विसहस्रपृथवएकैकशःपूर्वस्मात्पूर्वस्मादुत्तरउ
त्तरोदशांशाधिकांशेनदैर्घ्यएवह्रसंति ८

चूर्णिका

तत्रापि हेभगवन् प्रियव्रतरथचरणपरिखातैः सप्तसिंधवउपक्लृप्ताः येभ्यः एतस्याः भुवः सप्तद्वीपविशेषः त्वया संक्षेपतो दर्शितः एतत् सर्वमहंमानतः लक्षणतश्चज्ञातुमिच्छा
मि २ यतः भगवतः स्थूलरूपे आवेशितंमनः सूक्ष्मरूपे आवेशितुंक्षमंभवति तस्मात् हेगुरो एतद्वर्णयितुमर्हसि ३ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेमहाराजमायागुण
विभूतेः भगवतः अंतं पुरुषः विबुधायुषापिप्राप्तुंनसमर्थः अतः प्राधान्येनभूगोलविशेषंनामलक्षणतो व्याख्यास्यामः ४ योवाअयंजंबुद्वीपः लक्षयोजनविशालः समः
वर्तुलः वलयाकारः एतत्परिमाणेनक्षारोदेन वेष्टितः ५ अत्रनववर्षाणि नवसहस्रयोजनायामानि अत्रमर्यादाचलाः अष्टौ ६ मध्येइलावृतं तस्यनाभ्यां लक्षयोजनोच्छ्रायः
कर्णिकाकारः सौवर्णः मेरुः स्थितः ७ सः मूर्धनि द्वात्रिंशत्सहस्रयोजनविततः मूलेषोडशसहस्रयोजनविततः अंतर्भूम्यां षोडशसहस्रयोजनैः प्रविष्टः भूमेरुपरि ४ सहस्रयो
जनप्रमाणः इलावृतस्यउत्तरोत्तरतः नीलः श्वेतः शृंगवान् इतित्रयः पर्वताःएतेरम्यकहिरण्मयकुरुवर्षाणांमर्यादाचलाः अयुतयोजनोच्चाःद्विसहस्रयोजनविततः ८ ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एवं दक्षिणेनेलावृतं इलावृतस्य दक्षिणतः) अयुतयोजन उत्सेध उच्छ्रायोयेषां । अयंचोत्सेधोनीलादीनामपिद्रष्टव्यः नीलादिपृथुत्वं चैषामपि द्रष्टव्यं । यथासंख्यं मर्यादागिरय इतिशेषः ९ (तथैवेलावृतस्य पश्चिमतः पूर्वतश्च ।) आनीलनिषधायतौ । उत्तरतो नीलपर्यंतं दक्षिणतो निषधपर्यंतंचदीर्घौपप्रथतुः विस्तीर्णौ भवतः १० तावेवकेतुमालभद्राश्वयोर्वर्षयोः सीमानं कुर्वाते ११ नन्वेवंसति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्मध्येततः पूर्वापरतो गिरिद्वयं वर्षद्वयंचनातः किंचिदस्ति । दक्षिणोत्तररेखायांतु तथैवेलावृतवेष्टितो मध्येमेरुः उभयतस्त्रीणित्रीणि वर्षाणि गिरयश्चषट् तत्कथंलक्षप्रमाणत्वं जंबूद्वीपस्य । उच्यते । मेरोः षोडशसहस्राणि । सर्वतः स्थितत्वादिलावृतस्याष्टादश अन्येषांषण्णां चतुःपंचाशत् । गिरीणांषण्णां द्वादशेत्येवं दक्षिणोत्तररेखायां तावल्लक्षं पूर्वापररेखायामपिसमेरोरिलावृतस्य चतुस्त्रिंशत् । गिर्योश्चत्वारि । शेषाणिद्विषष्टिसहस्राणि । पूर्वापरवर्षयोरासमुद्रंदैर्घ्येद्रष्टव्यानि अतोन विरोधः । अयुतयोजनप्रमाणौ विस्तारोन्नाहौयेषां । विस्तीर्णमूर्ध्नोमेरोरवष्टंभत्वात्पूर्वपश्चिमौ गिरी दक्षिणोत्तरविस्तारौ । दक्षिणोत्तरौच पूर्वापरविस्तारौ द्रष्टव्यौ सर्वतो दशयोजनसहस्रविस्तारांगीकारेत्विलावृतलोपात् पूर्वेणेलावृतसुपप्लावयतीत्यादिविरोधः स्यात् १२ अधिसहस्रमकादशशतानिउन्नाहोयेषां तावत्प्रमाणं विटपवितितिर्येषां । शतयोजनं परिणाहो विस्तारोयेषाम् १३ (पयश्चमधुच इक्षुरसश्चमृष्टंचशुद्धंजलं येषुते ।) यदुपस्पर्शिनः यत्सेविनः १४ (देवोद्यानानि देवानां क्रीडावनानि ।) १५ (येषुउद्यानेषु अमरश्रेष्ठाः) ललामो भूषणं सुरललनानांभूषणभूताः श्रेष्ठाः याः स्त्रियः तासांयूथस्यपतयः सहसंभूय (ताभिः स्त्रीभिः सहिताइत्यर्थः) येषु विहरंतिक्रीडंति १६

श्लोकाः ९/१६

एवंदक्षिणेनेलावृतंनिषधोहेमकूटोहिमालयइतिप्रागायतायथानीलादयः ॥ अयुतयोजनोत्सेधाहरिवर्षकिंपुरुषभारतानांयथासंख्यम् ९ तथैवेलावृतमपरेणपूर्वेणचमाल्यवद्गंधमादनावानीलनिषधायतौद्विसहस्रंपप्रथतुः १० केतुमालभद्राश्वयोःसीमानंविदधाते ११ मंदरोमेरुमंदरःसुपार्श्वःकुमुदइतिअयुतयोजनविस्तारोन्नाहामेरोश्चतुर्दिशमवष्टंभगिरयउपक्लृप्ताः १२ चतुर्ष्वेतेषुचूतजंबूकदंबन्यग्रोधाश्चत्वारःपादपप्रवराःपर्वतकेतवइवअधिसहस्रयोजनोन्नाहास्तावद्विटपविततयःशतयोजनपरिणाहाः १३ ह्रदाश्चत्वारःपयोमध्विक्षुरसमृष्टजलायदुपस्पर्शिनउपदेवगणायोगैश्वर्याणिस्वाभाविकानिभरतर्षभधारयंति १४ देवोद्यानानिचभवंतिचत्वारिनंदनंचैत्ररथंवैभ्राजकंसर्वतोभद्रमिति १५ येष्वमरपरिवृढाःसहसुरललनाललामयूथपतयःउपदेवगणैरुपगीयमानमहिमानःकिलविहरंति । १६

चूर्णिका:

एवंदक्षिणतः निषधः हेमकूटः हिमालयः हरिवर्षकिंपुरुषभारतानांसीमाचलाःएतेसमुद्रावधयः प्रमाणंपूर्ववत् ९ इलावृतस्य पूर्वे गंधमादनः भद्राश्ववर्षस्य मर्यादागिरिः पश्चिमे माल्यवान् केतुमालवर्षस्यसीमाचलः १० ११ मेरोः चतुर्दिक्षु मंदरसुमंदरसुपार्श्वकुमुदाः ४ अवष्टंभपर्वताः दशसहस्रयोजनविस्तारोन्नाहाः १२ एषुचतुर्षु उपरिचूतजंबुकदंबवटाः एकादशशतयोजनोच्छ्रायाः शतयोजनविस्तारां संति १३ तत्रह्रदाः चत्वारः पयोमध्विक्षुरसमृष्टजलाः संति १४ तत्रदेवोद्यानानि नंदनं१ चैत्ररथं२ वैभ्राजकं३ सर्वतोभद्रमिति४ १५ एषुदेवादयःस्त्रीभिः सहविहरंति १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

एकादशशतयोजनमुत्तुंगोयो देवचूतस्तस्यशिरसः सकाशात् (अमृतकल्पानि अमृतवत्स्वादून) फलप्रमाणमुक्तं वायुपुराणे । अरत्नीनांशतान्यष्टावेकषष्ट्याधिकानिच । फलप्रमाणमाख्यातमृषिभि स्तत्त्वदर्शिभि"रिति । १७ अतिमधुरश्चासौस्वतः सुरभिश्चसुगंधिश्च नचअन्येषांगंधैरधिवासितः। एतादृशो बहुलश्चारुणश्चरसः सएवउदमुदकंतेन । १८ यदुपजोषणात्यस्यरसस्यसेवनात् । (यक्षयो षितां अवयवेषुसौगंध्यंविचते अतोऽवयवस्पर्शमात्रेणसुगंधोवायुः अनुवासयतिसुरभीकरोति। १९ अनस्थिप्रायाणां अतिसूक्ष्मबीजानांयत्रनिपततितत्तश्चारभ्यआत्मनोदक्षिणतः सर्वमिलावृतं व्याप्यवहतीत्यर्थः । २० तावत्सर्वतः रोधसोस्तटयोः । (अनुविध्यमानाप्रतिहन्यमाना) २१ २२ (तस्यकोटरेभ्यस्तद्गतविवरेभ्यः) आयामोत्रव्यामः । सच व्यामोबाह्वोः सकरयोस्ततयोस्तिर्यगंत रमित्युक्तलक्षणः । पंचव्यामं परिणाहः स्थौल्यं यासामित्यर्थः । केचित्तुपंचव्यामपरिणाहाइत्येवपठंति । २३ यामधुधाराउपभुंजतेतेषांमुखतोनिर्गतोवायुः शतयोजनंदेशंसुरभीकरोति २४ नीची नाअधोमुखाः (शतवल्शःशतशाखः । अन्नादीत्यादिशब्दादन्येपिखाद्यविशेषाः आभरणादयइत्यादिशब्दात्सौवर्णभाजनादयःपदार्थविशेषाग्राह्याः तेसर्वेपिकुमुदाग्रात्पतंतः कामदुघानदाभूत्वाइलवृतस्यो त्तरतस्तंकुमुदमुपयोजयंतिउपयोगिनंकुर्वंतीत्यर्थः । कुमुदः पयआदिभिस्तत्रोपयोगीभवतीतिभावः) २५

श्लोकाः १७/२५

मंदारोत्संगएकादशशतयोजनोत्तुंगाद्देवचूतशिरसोगिरिशिखरस्थूलानिफलान्यमृतकल्पानिपतंति १७ तेषांविशीर्यमाणानामतिमधुरसुरभिसुगंधि बहुलारुणरसोदेनारुणोदानामनदीमंदरगिरिशिखरान्निपतंतीपूर्वेणेलावृतमुपप्लावयति १८ यदुपजोषणाद्भवान्याअनुचरीणांपुण्यजनवधूनामवयवस्पर्श सुगंधवातोदशयोजनंसमंतादनुवासयति १९ एवंजंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानांरसेनजंबूनामनदीमेरुमंदरशिखरा दयुतयोजनादवनीतलेनिपतंतीदक्षिणेनात्मानंयावदिलावृतमुपस्पंदयति २० तावदुभयोरपिरोधसोर्यामृत्तिकारसेनानुविध्यमानावाय्वर्कसंयोगविपाके नसदामरलोकाभरणंजांबूनदंनामसुवर्णंभवति २१ यदुहवावविबुधादयःसहयुवतिभिर्मुकुटकटककटिसूत्राद्याभरणरूपेणखलुधारयंति २२ यस्तुमहाकदं बःसुपार्श्वनिरूढोयास्तस्यकोटरेभ्योविनिःसृताःपंचायामपरिणाहाःपंचमधुधाराःसुपार्श्वशिखरात्पतंत्योऽपरेणात्मानमिलावृतमनुमोदयंति २३ याह्युपभुं जानानांमुखनिर्वासितोवायुःसमंताच्छतयोजनमनुवासयति २४ एवंकुमुदनिरूढोयःशतवल्शोनामवटस्तस्यस्कंधेभ्योनीचीनाःपयोदधिमधुघृतगुडान्ना द्यंबरशय्यासनाभरणादयःसर्वएवकामदुघानदाःकुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति २५

चूर्णिका

मंदरोत्संगे आम्रवृक्षस्य शिरसः गिरिशिखरवत्स्थूलानि फलानिपतंति १७ तद्रसेनअरुणोदा नामनदी पूर्वेणइलावृतं उपप्लावयति १८ यस्याःजलपानतः पार्वतीदासी नां देहगंधः दशयोजनानि अनुवासयति १९ एवंमेरुमंदरोत्संगेजंबुवृक्षः तस्मात् इभकायसमानिफलानिपतंति तद्रसेनजंबूनाम नदी दक्षिणेनइलावृतं व्याप्यवहति २० तत्तटस्यमृत्तिका जांबूनदंसुवर्णंस्यात् २१ तत्सुवर्णं विबुधादयः स्त्रीभिः सह अलंकाररूपेणधारयंति २२ एवं पश्चिमे सुपार्श्वपर्वतेकदंबके टरेभ्यः निःसृताः पंचमधुधाराः पश्चिमेनइलावृतं वर्षं यांति २३ यद्रससेवितानां सुखवायुः शतयोजनं सुवासयति २४ एवंकुमुदे वटस्य स्कंधेभ्यः दधिमधुघृतपयोगुडान्नाद्यंबरशय्यासनाभर णादयः सर्वे एवंकामदुघाः नदाः पतंतः संतः उत्तरेण इलावृतं प्लावयंति २५

CC-0. In Public Domain. Digitization by eGangotri

टीका

(उपयोगमेवाह । यानिति । यान्नदविशेषान्सेवमानानांवलिः संकुचितत्वक् ।पलितं केशादौजरसाशौक्ल्यम् । क्लमोग्लानिः । आमयोरोगः उपसर्गाः द्वेषमत्सरादयः) २६ (कर्णिकाभूतस्यमेरोः केसर भूताः) २७चतुर्दिक्षुमेरुमूलाद्योजनसहस्रंत्पक्कान्नेः परिधयइवजठरदेवकूटादयस्तिष्ठंतिअतःअष्टादशयोजनसहस्रंप्रमाणमत्रोक्तं । "वैष्णवादिपुराणेषुपरिमाणादियत्पुनः । अन्यथावर्णितंतत्तुकल्पभेदाद्यपे क्षया" । द्विसहस्रंपृथूचतुंगौच । २८ (अयुतयोजनसाहस्रीं अयुतयोजनानांयानिसहस्राणितत्प्रमाणमस्याइत्यर्थः । शातकौंभीं सुवर्णमयीं आत्मयोनेर्विरिंच्यस्य) २९ यथादिशंप्राच्यादिदिक्षु । यथारूपंइंद्रादिवर्णानतिक्रमेण । (आत्मयोनेःपुर्या-)-स्तुरीयमानेनसार्धद्विसहस्रप्रमाणेन।नामानिपुराणांतरातज्ज्ञातव्यानि । यथोक्तं । "मेरौनवपुराणिस्युर्मनोवत्यमरावती । तेजोवतीसंयमिनीतथाकृष्णांगनापरा । श्रद्धावतीगंधवतीतथाचान्यामहोदया।यशोवतीचब्रह्मेंद्रवह्न्यादीनांयथाक्रममिति३० ॥इतिपंचमस्कंधेटीकायांषोडशोध्यायः१६ ततः सप्तदशेगंगागमनंतच्चतुर्दिशम्।इलावृतेचरुद्रेणसंकर्षणानिषेवणम् । यज्ञलिंगस्य । बलेर्यज्ञेर्लिंगं त्रिविक्रममूर्तिर्यस्यतस्यविष्णोर्विक्रमतः दक्षिणेनपदाभुवंक्रांत्वावामपादमुत्क्षिपतः वामपादांगुष्ठनखेननिर्भिन्नं ऊर्ध्वमुपरिभागोयस्यांडकटाहस्यतस्यविवरेणअंतः प्रविष्टा या वाह्यजलधारासादिवोमूर्धन्यवततारेत्यन्वयः । तस्य (विष्णोर्य-)-च्चरणपंकजंतस्यावनेजनेनक्षालनेनअरुणंतद्वतंकुंकुमंतदेवकिंजल्कं (यद्वा अरुणवर्णकिंजल्कंकिंजल्कस्थानीयानितद्वता निरजांसि) । तैरुपरंजिता । अतएवाखिलस्यजगतोऽघमलापहं (पापमलनाशकं) उपस्पर्शनंयस्याः तथाप्यमलातन्मलसंगशून्या । साक्षाद्भगवत्पदीतियदनुपलक्षितं जाह्नवीभागीरथीत्याद्युपलक्षणांतररहितं वचोनामतेनाभिधीयमाना । तस्मिन्समयेभगवत्पदीत्येवनामपश्चान्नामांतराणिजातानीत्यर्थः १

॥६०॥

श्लोकाः

यानुपजुषाणानांनकदाचिदपिप्रजानांवलिपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषाभवंति। यावज्जीवंसुखंनिरतिशयमेव

२६कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशितिवासकपिलशंखवैदूर्यजारुधिहंसर्षभनागकालंजरनारदादयोविंशतिगिरयोमेरोःकर्णिकायाइव

केसरभूतामूलदेशेपरितउपक्लृप्ताः २७ जठरदेवकूटौमेरुंपूर्वेणाष्टादशयोजनसहस्रमुदगायतौद्विसहस्रंपृथुतुंगौभवतःएवमपरेणपवनपारियात्रौदक्षिणेनकैला २६/१

सकरवीरौप्रागायतौएवमुत्तरतस्त्रिशृंगमकरौअष्टाभिरेतैःपरिस्तृतोग्निरिवपरितश्चकास्तिकांचनगिरिः २८ मेरोर्मूर्धनिभगवतआत्मयोनेर्मध्यतउपक्लृप्तांपुरीम

युतयोजनसाहस्रींसमचतुरस्रांशातकौंभींवदंति २९ तामनुपरितोलोकपालानामष्टानांयथादिशंयथारूपंतुरीयमानेनपुरोष्टावुपक्लृप्ताः ३० इतिश्रीभाग०

म० पंचमस्कंधेभुवनकोशवर्णनंनामषोडशोध्यायः ॥ १६ ॥ ॥ श्रीशुकउवाच ॥ ॥ तत्रभगवतःसाक्षाद्यज्ञलिंगस्यविष्णोर्विक्रमतोवामपादांगुष्ठनखनिर्भि

न्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टायाबाह्यजलधारातच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिताखिलजगदघमलापहोपस्पर्शनामलासाक्षाद्भगवत्पदीत्यनुप

लक्षितवचोभिधीयमानातिमहताकालेनयुगसहस्रोपलक्षणेनदिवोमूर्धन्यवततार १

चूर्णिका

नदसेविनांवलीपलितक्लमस्वेदादयोन भवंति २६ एवं कुरंगकुररकुसुंभाः ३ वैकंकः ४ त्रिकूटः ५ शिशिरः ६ पतंगः ७ रुचकः ८ निषधः ९ शितिवासः १० कपिलः ११ शंखः १२ वैदूर्यः १३ जारुधिः १४ हंसः १५ऋषभः १६ नागः १७ कालंजरः १८ नारदः १९ आदिः २० एतेपर्वताः मेरोर्मूलेरचिताः २८ मेरोः परितः अष्टौपर्वताः जठरदेवकूटौपूर्वस्याम् पवनपारियात्रौ पश्चिमतः कैलासकरवीरौ दक्षिणतः त्रिशृंगमकरौ उत्तरतः एवंभूतोमेरुश्चकास्ति मेरोः मूर्धनिमध्येसौवर्णीदशसहस्रयोजनाचतुरस्राब्रह्मपुरी २९ तामनुपरितः अष्टौलोकपालानांपुर्यः सार्धद्विसहस्रयोजनमिताः संति ३० इतिपंचेमेषोडशः १६ श्रीशुकउवाच अथविष्णोः श्रीवामनस्य वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टा या बाह्यजलधाराभगवच्चरणस्पर्शात्सर्वपापहरासावहुकालेनध्रुवमंडलेअवततार १ ॥६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कोसौदिवोमूर्धांतमाह ।यदिति । किंतद्विष्णुपदंतदाहयत्रेति । वीरव्रतः दृढसंकल्पः (उत्तानपादस्यपुत्रोध्रुवः) अस्मत्कुलदेवतायाहरेश्चरणारविंदोदकमितिहेतोर्यः परमादरस्तेनयांजलधारांशिरसा विभर्तीत्यन्वयः । कथंभूतःसन्प्रतिक्षणं वर्धमानेनभगवद्भक्तियोगेनदृढमत्यंतं क्लिद्यमानमंतर्हृदयं यस्यअतएवऔत्कंठ्येनविवशमामीलितंयल्लोचनयुगलंतदेवकुड्मलेताभ्यां विगलितममलंबाष्पंतस्यकलयासहअभिव्यज्यमानरोमपुलकानांकुलंयस्य । (अत्रकुलकोधुनेति भाव्यंतदभावआर्षत्वादुपपद्यते) २ ततःसप्तऋषयस्तस्यागंगायाःप्रभावाभिज्ञाः संतोयांजटाजूटैरुद्वहंतीत्यन्वयः । एतावत्येवनातोऽधिकास्तीत्यभिप्रायवंतःभगवतिसंततंभक्तियोगलाभेनैवोपेक्षिताअन्येपुरुषार्थाआत्मज्ञानंचयैः । कामिवकइवधारयंति । प्रत्यक्षंमुक्तिमिव तामागतांमुमुक्षवोजनाइवेति ३ ततोऽनेकसहस्रकोटीनांअसंख्यानांविमानानांअनीकैः(समूहैः) संकुलेन (व्याप्तेन) देवयानेनआकाशमार्गेणावतरंती । सप्तऋषिभ्योर्वागेवप्रायशःकर्मिणांगतिरितिततोर्वागेवसंकुलत्वमुक्तं आवार्यआप्लाव्यमेरुमूर्धस्थेब्रह्मसदने निपतति ४ अभिस्पंदंतीअभितोगच्छंती (नदनदीपतिंसमुद्रं । चतुर्णांभेदानांक्रमेणनामान्याह सीतेति) ५ केसराचलानांमेरुसमानोच्छ्रायत्वात्प्रथमंतेषांमादिशिखरेषुमुख्यशृंगेषुपतंतीततस्तेभ्योऽधोऽधः प्रस्रवंतीसती (गंधमादनस्यमस्तकेषुपतित्वाभद्राश्वस्यमध्यात्क्षारसमुद्रंप्रविशति) ६ एवंमाल्यवच्छिखरात्केतुमालवर्षाभिमुखंनिष्पतंतीचक्षुःसंज्ञा ७ गिरिशिखरादितिकुमुदशिखरादुच्चलितानीलशिखरंततउच्चलिताश्वेतशिखरंतदप्यतिहायशृंगवतः शिखरादधः स्रवंती (उत्तरान्कुरून्अभितःस्पंदमाना) ८

श्लोकाः २/८

यत्तद्विष्णुपदमाहुः । यत्रहवाववीरव्रतऔत्तानपादिःपरमभागवतोऽस्मत्कुलदेवताचरणारविंदोदकमितियामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेनदृढंक्लिद्यमानांतर्हृदयऔत्कंठ्यविवशामीलितलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकअधुनापिपरमादरेणशिरसाबिभर्ति २ ततःसप्तऋषयस्तत्प्रभावाभिज्ञाइयंननुतपसआत्यंतिकीसिद्धिरेतावतीभगवतिसर्वात्मनिवासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयोमुक्तिमिवागतांमुमुक्षवइवसबहुमानमद्यापिजटाजूटैरुद्वहंति ३ ततोनेकसहस्रकोटिविमानानीकसंकुलदेवयानेनावतरंतींदुमंडलमावार्यब्रह्मसदनेनिपतति ४ तत्रचतुर्धाभिद्यमानाचतुर्भिर्नामभिश्चतुर्दिशमभिस्पंदंतीनदनदीपतिमेवाभिनिविशति सीतालकनंदाचक्षुर्भद्रेति ५ सीतातुब्रह्मसदनात्केसराचलादिशिखरेभ्योऽधोधःप्रस्रवंतीगंधमादनमूर्धसुपतित्वाअंतरेणभद्राश्ववर्षंप्राच्यांदिशिक्षारसमुद्रमभिप्रविशति ६ एवंमाल्यवच्छिखरान्निष्पतंतीततोऽनुपरतवेगाकेतुमालमभिचक्षुःप्रतीच्यांदिशिसरित्पतिंप्रविशति ७ भद्राचोत्तरतोमेरुशिरसोनिपतितागिरिशिखराद्गिरिशिखरमतिहायशृंगवतःशृंगादवस्पंदमानाउत्तरांस्तुकुरूनभितउदीच्यांदिशिजलधिमभिप्रविशति ८

चूर्णिका

यांभगवत्पदीत्याहुः अहोध्रुवोपिपरमभागवतोभगवद्भक्तियोगेन क्लिद्यमानांतर्हृदयः सन्अस्मत्कुलदेवताचरणारविंदोदकमिति यांगंगांशिरसा बिभर्ति २ ततः सप्तर्षयःतत्प्रभावाभिज्ञाः भगवति वासुदेवेसंततभक्तियोगलाभेन उपेक्षितान्यपुरुषार्थाः संतः मुक्तिमिवागतांयांअद्यापि जटाजूटैः बिभ्रति ३ ततः साचंद्रमंडलं आप्लाव्य ब्रह्मसदनेपतितासती चतुर्धाअभूत् सीता अलकनंदा चक्षुर्भद्राइति ४ ५ तत्रसीताब्रह्मसदनात्केसराचलादिपर्वतेभ्यः अधोधः पतंतीगंधमादनमूर्द्धनिपतित्वाभद्राश्ववर्षंगत्वापूर्वसमुद्रंप्रविशति ६ एवं चक्षुः माल्यवच्छिखरात्पतंतीकेतुमालवर्षंगत्वापाश्चिमसमुद्रंप्रविशति ७ भद्राचब्रह्मसदनात्पतिताकुरून्गत्वा उत्तरसमुद्रंप्रविशति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

(ब्रह्मसदनस्यदक्षिणतः बहूनिगिरिशिखराण्यतिक्रम्यहेमकूटाद्धिमकूटंततो) अतिरभसतररंहसाअस्खलिततीव्रतरवेगेन (भुवंयांती भारतंवर्षमभिदक्षिणस्यांसमुद्रमभिविशति) ९ बहुशोबहुविधाः मेर्वादिगिरीणांदुहितरः तत्प्रसूताः १० दिव्यभौमबिलभेदात्त्रिविधः स्वर्गः । तत्रभौमस्वर्गस्यपदानिस्थानानि व्यपदिशंति ११ अयुतंपुरुषमानेनआयुर्वर्षाणियेषां वज्रवत्दृढसंहननंशरीरंतस्मिन् बलवयोमोदास्तैःप्रमुदितानियानिमहासौरतानि (बहुकालसुरतसुखानि) मिथुनानितेषांव्यवायापवर्गेसंभोगावसानेएकवर्षशेषेआयुषिधृतएकोगर्भोयैः तादृशानिकलत्राणियेषाम् (तेषांएषवर्तमानः कलिकालोपि)त्रेतायुगसमः विषयसुखोत्कर्षात् । कृतयुगेहिसर्वेध्यानिष्ठाः द्वापरादौतुदुःखबहुलाः १२ यत्रह येषुहिवर्षेषुदेवपतयः स्वैः स्वैःसेवकगणेषुमुख्यैः कृतमहोपचाराः संतः स्वैरंविहरंतीत्यन्वयः केषुस्थानेषु । सर्वेषुऋतुषुकुसुमस्तबकादीनांश्रियासमृद्ध्याअत्यंतनम्यमानाविटपास्तदाश्रितालताश्चयेषुतैर्विटपिभिस्तरुभिरुपशुंभमानानिशोभमानानिरुचिराणिकाननानियेषुतेष्वाश्रमायतनेषुवर्षगिरिद्रोणीषुच (वर्षसंबंधिगिरीणांद्रोण्यःपार्श्वद्वयोन्नतमध्यनिम्नस्थानविशेषास्तासु) तथा अमलेषुजलाशयेषुच विकचानिविकसितानियानिविविधानिनवानिवनरुहाणिनीरजानितेषामामोदेन(योमदस्तेन) मुदितैराजहंसादिभिर्मधुकरनिकराणांचआकृतिभिर्जातिविशेषैरुपकूजितेषु। सुष्ठुललितंशृंगारचेष्टायासां तासांसुरसुंदरीणां) कामेनकलिलैः क्षुभितैःविलासादिभिः आकृष्टंमनोदृष्टिश्चयेषांते १३

॥६२॥

श्लोकाः ९/१३

तथैवालकनंदादक्षिणेनब्रम्हसदनाद्बहूनिगिरिकूटान्यतिक्रम्यहेमकूटाद्धिमकूटादतिरभसतररंहसाभुवंयांतीभारतमभिवर्षंदक्षिणस्यांदिशिजलधिमभिप्रविशति ९ यस्यांस्नानार्थंचागच्छतःपुंसःपदेपदेऽश्वमेधराजसूयादीनांफलंनदुर्लभमिति।अन्येचनदानद्यश्चवर्षेवर्षेसंतिबहुशोमेर्वादिगिरिदुहितरःशतशः १० यत्रापिभारतमेववर्षंकर्मक्षेत्रमन्यान्यष्टवर्षाणिस्वर्गिणांपुण्यशेषोपभोगस्थानानिभौमानिस्वर्गपदानिव्यपदिशंति ११ एषपुरुषाणामयुतपुरुषायुर्वर्षाणांदेवकल्पानांनागायुतप्राणानांवज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राणांतत्रतुत्रेतायुगसमःकालोवर्तते १२ यत्रह देवपतयःस्वैस्वैर्गणनायकैर्विहितमहार्हणाःसर्वर्तुकुसुमस्तबकफलकिसलयश्रियाऽऽनम्यमानविटपलताविटपिभिरुपशुंभमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषुतथाचमलजलाशयेषुविकचविविधनववनरुहामोदमदमुदितराजहंसजलकुक्कुटकारंडवसारसचक्रवाकदिभिर्मधुकारनिकराकृतिरुपकूजितेषुजलक्रीडादिभिर्विचित्रविनोदैःसुललितसुरसुंदरीणांकामकलिलविलासहासलीलावलोकाकृष्टमनोदृष्टयःस्वैरंविहरंति १३

चूर्णिका

एवंअलकनंदाब्रह्मसदनात्पतंतीभारतंगत्वा दक्षिणसमुद्रं प्रविशति ९ यस्यांस्नानार्थं गच्छतः पुंसः पदेपदे अश्वमेधराजसूयादीनां फलंनदुर्लभमिति अन्येचनदानद्यश्ववर्षेवर्षेसंति बहुशः मेर्वादिगिरिदुहितरश्चशतशः १० तत्रापिभारतमेव वर्षं कर्मक्षेत्रं अन्यानिअष्टवर्षाणि स्वर्गिणांपुण्यशेषोपभोगस्थानानि भौमस्वर्गपदानिव्यपदिशंति ११ तत्रापिभारतवर्षंविना अन्यवर्षे पुरुषाणांपरमायुः अयुतवर्षाणि तत्रत्रेतायुगसमः कालोवर्तते १२ यत्रदेवादयः स्वैस्वैःगणनायकैःकृतमहोपचाराः संतः कुसुमस्तबकफलादीनांसमृद्ध्यानम्रशाखैर्वृक्षैः शोभमानकाननेषु आश्रमायतनवर्षगिरिद्रोणीषुतथा राजहंसजलकुक्कुटकारंडवसारसचक्रवाकादिभिरुपकूजितेषु अमलजलाशयेषुसुललितसुरसुंदरीणां कामेनक्षुभितैः विलासादिभिः आकृष्टमनोदृष्टयः स्वैरंविहरंति १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नवस्वपिवर्षेषुयेपुरुषास्तेषां तदनुग्रहायसचासौवक्ष्यमाणोनुग्रहस्तदर्थंआत्मतत्त्वव्यूहेनस्वमूर्तिसमूहेनसंनिधीयतेसंनिहितोभवति १४ अपरोअर्वाचीनः(शापलक्षणंनिमित्तंजानातीति।)पश्चात्नवमस्कंधे १५ भवानीनाथास्वामिनीयेषांतैः स्त्रीगणानामर्बुदसहस्रैरवरुध्यमानः सर्वतःसेव्यमानः (चतुर्मूर्तेःवासुदेवादिमूर्तिचतुष्टयस्वरूपस्यतुरीयाम्) आत्मनः (स्वस्यभवस्य) प्रकृतिंकारणं आत्मनिसमाधिर्ध्यानं यस्यतेन रूपेणएतद्वक्ष्यमाणं मंत्रादिकं अभिगृणन्जपन् (उपास्ते) १६ सर्वेषांगुणानां संख्यानं प्रकाशोयस्मात् (तस्मै) स्वयंतुअव्यक्तायअप्रमेयाय (नमः) १७ हेभजन्यभजनीय त्वात्वां परंईश्वरंभजेइत्यन्वयः । अरणंशरणंपादपंकजंयस्य । कृत्स्नस्यभगस्यऐश्वर्यादिषाड्गुण्यस्यपरायणंपरमयनंआश्रयम् । भक्तेषुअलमत्यर्थं भावितंप्रकटितंभूतभावनं स्वरूपंयेन ।भवापहं संसारहरं भक्तेष्वित्यनुषंगः । भवंसंसारंभावयतीति तथातंअर्थादभक्तेष्वितिद्रष्टव्यम् । १८ ईश्वरत्वमुपपादयंस्तामसत्वेनप्रसक्तमनादरंवारयति । नयस्येति । निरीक्षमाणस्यापि यस्यदृष्टिर्मायागुणैः विषयैः चित्तवृत्तिभिः करणैश्चअण्वपिईषदपिनाज्यतेनलिप्यते । किमर्थं निरीक्षमाणस्य । ईशेईशनाय । नियमनाय ईशनमीट्संपदादित्वात्भावेक्विप् । अत्रवैधर्म्येदृष्टांतः । यथाअजितक्रोधवेगानांनोऽस्माकं दृष्टि-(-विषयेरिंद्रियैश्च)रज्यते नतथेति । अतआत्मनःइंद्रियाणिमनोमुख्यानिजिगीषुः जेतुमिच्छुर्मुमुक्षुःतंनित्यमुक्तंकोनमन्येतनाद्रियेत १९ ननुसुरामद्याभ्यांमत्तस्यकुतोदृष्टिर्नाज्यतेतत्राह। असतीदृक्दृष्टिर्यस्यतस्य (पुंसः यःस्वमाययाक्षीबामत्तइवभयंकरः प्रतिभाति । मध्वासवाभ्यांआताम्रलोचनइवच । (तत्रनारिकेलादिसंभवोमद्यविशेषआसवः) नागवधूविमोहनेनतथाप्रतिभानंयुक्तमित्याह । नेति । पादार्चनसमये यस्यपादयोः स्पर्शनेनधर्षितंमोहितंइंद्रियंमनोयासांताः (अतएव) ह्रियालज्जयाअर्हणेभुजाद्यर्चनेनईशिरेनशेकुः ।कस्तंनमन्येतेतिपूर्वेणैवान्वयः २० अस्यविश्वस्यस्थितिजन्मसंयमहेतुंयंमाहुः अतएवत्रिभिःस्थित्यादिभिर्विहीनंअनंतंचयमाहुः । ऋषयोमंत्राः । छंदोनुरोधेनदीर्घपाठेआचऋषयश्चऋषयः ऋकारोदेवमातालक्ष्मीः साचऋषयश्चेत्यर्थः अनंतत्वंदर्शयति । मूर्धसहस्रमेवधामानिस्थानानितेषुक्वचिदेकदेशोस्थितंभूमंडलंयोनवेद सिद्धार्थंसर्षपमिवतस्मैनमइतिचतुर्थेनान्वयः २१

श्लोकाः १४/२१

नवस्वपिवर्षेषुभगवान्नारायणोमहापुरुषःपुरुषाणांतदनुग्रहायात्मतत्त्वव्यूहेनात्मनाद्यापिसन्निधीयते १४ इलावृतेतुभगवान्भवएकएवपुमान्नह्यन्यस्त
त्रापरोनिर्विशतिभवान्याःशापनिमित्तज्ञःयत्प्रवेशतःस्त्रीभावस्तत्पश्चाद्वक्ष्यामि १५ भवानीनाथैःस्त्रीगणार्बुदसहस्रैरवरुध्यमानोभगवतश्चतुर्मूर्तेर्महा
पुरुषस्यतुरीयांतामसींमूर्तिंप्रकृतिमात्मनःसंकर्षणसंज्ञामात्मसमाधिरूपेणसंनिधाप्यैतदभिगृणन्भवउपधावति १६ ॥ ॥ श्रीभगवानुवाच ॥ ॥
ॐनमोभगवतेमहापुरुषायसर्वगुणसंख्यानायानंतायाव्यक्तायनमइति १७भजेभजन्यारणपादपंकजंभगस्यकृत्स्नस्यपरंपरायणम् ॥भक्तेष्वलंभावितभूतभा
वनंभवापहंत्वाभवभावमीश्वरम् १८ नयस्यमायागुणचित्तवृत्तिभिर्निरीक्षतोह्यण्वपिदृष्टिरज्यते ॥ ईशेयथानोऽजितमन्युरंहसांकस्तंनमन्येतजिगीषुरात्मनः
१९ असद्दृशोयःप्रतिभातिमाययाक्षीबेवमध्वासवताम्रलोचनः ॥ ननागवध्वोर्हणईशिरेह्रियायत्पादयोःस्पर्शनधर्षितेंद्रियाः २० यमाहुरस्यस्थितिजन्मसं
यमंत्रिभिर्विहीनंयमनंतमृषयः ॥ नवेदसिद्धार्थमिवक्वचित्स्थितंभूमंडलंमूर्द्धसहस्रधामसु २१

चूर्णिका

नवस्वपिवर्षेषुभगवान्नारायणः पुरुषाणामनुग्रहास्वमूर्तिव्यूहेन आस्ते १४ इलावृते तु एकएव पुमान्शिवः भवान्यासहविहरति यत्रप्रविशतः अन्यपुरुषस्यस्त्रीत्वंजायते ततूनवमस्कंधेवक्ष्यामि १५ भवान्यादास्यः अर्बुदसहस्रैर्मिताः संति ताभिर्युक्तः शिवः विष्णोः तुरीयां संकर्षणसंज्ञांमूर्तिं सेवते स्तौति १६ ओंनमोभगवते महापुरुषाय अनंतायनमइतिमंत्रंजपति १७ भगवन् भक्तानां भवापहंत्वांभजेइत्यादिविलयोदयात्मने तुभ्यंनमः १८ १९ २० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. पं. तत्रजन्महेतुंत्वमहदादिद्वारेणप्रपंचयति । यस्यगुणनिमित्तोविग्रहोमहान्नामआसीत् । विज्ञानंसत्त्वंधिष्ण्यंआश्रयोयस्यसः । तस्यचित्तरूपत्वेनसत्त्वप्रधानत्वात् । सएवकिलाधिदैववासुदेवाभेदविवक्षयाभ अ०
गवानजोत्रह्मा । यत्संभवः यस्माद्ब्रह्मणः संभूतः अहंरुद्रः त्रिवृतात्रिगुणेनस्वतेजसास्वविभूतिरूपेणअहंकारेणवैकारिकंदेवतावर्गंतामसंभूतवर्गम् ऐंद्रियंइंद्रियवर्गंचसृजेसृजामि । २२ किंच । एतेवयंमहदा
टीका दयः सर्वेयस्यानुग्रहात्इदंब्रह्मांडंसृजामः । कथंभूताः । यस्यमहात्मनोवशेस्थिताः संतः । यतः सूत्रेणक्रियाशक्त्यायंत्रिताः प्रोता शकुंताः पक्षिणइवलौकिकेनसूत्रेणबद्धाः । वयमित्युक्तंतानेवाह । महा ॥१८॥
न्अहंकारश्चवैकृतादयः पूर्वोक्तादेवताश्च २३ (अथ) स्थितिलयहेतुत्वंदर्शयन्प्रणमति । येननिर्मितांएतांमायामेवायंजनः अंजसावेद नतुतन्निस्तारणेयोगमुपायंकर्हिचिदपिवेदेति । (तत्रहेतुः गुणा
नांशब्दादिविषयाणांरजआदीनांवासृष्ट्यामोहितः) इतिस्थितिहेतुत्वंदर्शितम् । कीदृशींमायाम् । कर्माण्येव (विहितनिषिद्धानि) पर्वाणिग्रंथयः तानिनयतिप्रापयति (पुरुषमिति) तथाताम् । प्रलय
॥६४॥ हेतुत्वमाह । विलीयतेस्मिन्नितिविलयःउदेत्यस्मादितिउदयः । विलयश्चोदयश्चात्मास्वरूपंयस्यतस्मैनमः । २४ ॥ ॥ इतिपंचमस्कंधेटीकायांसप्तदशोध्यायः ॥ १७ ॥ ॥ अष्टादशेततोमेरोः पूर्वादिक्रमत
स्त्रिषु । त्रिषुचोत्तरवर्षेषुसेव्यसेवकवर्णनम् । भद्रश्रवावर्षपतिः तस्यकुलपतयः सेवकमुख्याश्च (समाधिनाध्यानेन) १ भद्रश्रवसऊचुरितिप्राणभृतउपदधातीतिवत्गुणलक्षणयातद्योगात्गुणिषुलिंगस
मवायन्यायेनबहुवचनम् २ अयंजनोमिषन्नपिपश्यन्नपिघ्नंतंहिंसंतंनपश्यति । (स्वमृत्युं) नालोचयतीत्यर्थः । भगवद्विचेष्टितमेतत् । तच्चविचित्रं । अदर्शनेलिंगम् । पुत्रंबालंपितरंचवृद्धंमृतंनिर्हृ
त्यदग्ध्वास्वयंतदुभयधनैर्जिजीविषतिजीवितुमिच्छति । जिजीविषुरितिपाठांतरेतुच्छंदःसामंजस्यं । किंधर्मार्थं । न । यर्हियतः असत्तुच्छंविषयसुखंसेवितुंविकर्मपापमेवध्यायन् (चिंतयन्) ३
नन्वविद्वान्नपश्यतिकिमत्रचित्रंतत्राह । नश्वरंवदंतिस्मशास्त्रतः । पश्यंतिचसमाधौ । हेअजतथापिमायया मुह्यंति । एतच्चतवकृत्यंचेष्टितंसुविस्मितंअतिचित्रं । अतः शास्त्रादिश्रमंविहायतंत्वामजंनतोस्मि
। ४ इदमपरं चित्रवत्प्रतीयमानमपि त्वयिनचित्रमित्याह । विश्वोद्भवादिकर्म अकर्तुरपि अपगताआवृत् आवरणं यस्मात् तादृशस्यापितेअंगीकृतंवेदेन त्वयितन्नचित्रम् । यतःमाययासर्वात्मनिकार्य
स्यकारणेसृष्टरिकर्मयुक्तम् । वस्तुतःसर्वव्यतिरिक्तेनिरुपाधावनावृतत्वं अकर्तृत्वंचयुक्तम् । ५

यस्याद्यआसीद्गुणविग्रहोमहान्विज्ञानधिष्ण्योभगवानजःकिल ॥ यत्संभवोहंत्रिवृतास्वतेजसावैकारिकंतामसमैंद्रियंसृजे २२ एतेवयंयस्यवशेमहात्मनः श्लोकाः
स्थिताःशकुंताइवसूत्रयंत्रिताः ॥ महानहंवैकृततामसेंद्रियाःसृजामसर्वेयदनुग्रहादिदम् २३ यन्निर्मितांकर्ह्यपिकर्मपर्वणींमायांजनोयंगुणसर्गमोहितः
नवेदनिस्तारणयोगमंजसातस्मैनमस्तेविलयोदयात्मने २४ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेसप्तदशोध्यायः ॥ १७ ॥ ॥ ॥ श्रीशुकउवाच ॥ २२
॥ तथाचभद्रश्रवानामधर्मसुतस्तत्कुलपतयःपुरुषाभद्राश्ववर्षेसाक्षाद्भगवतोवासुदेवस्यप्रियांतनूंधर्ममयींहयशीर्षाभिधानांपरमेणसमाधिनासंनिधाप्येदम ५
भिगृणंतउपधावंति॥१॥भद्रश्रवसऊचुः ॥ ॥ ॐनमोभगवतेधर्मायात्मविशोधनायनमइति २ अहोविचित्रंभगवद्विचेष्टितंघ्नंतंजनोयंहिमिषन्नपश्यति॥ध्याय
न्नसद्यर्हिविकर्मसेवितुंनिर्हृत्यपुत्रंपितरंजिजीविषति ३ वदंतिविश्वंकवयःस्मनश्वरंपश्यंतिचाध्यात्मविदोविपश्चितः ॥ तथापिमुह्यंतितवाजमाययासुविस्मितं
कृत्यमजंनतोस्मितम्४विश्वोद्भवस्थाननिरोधकर्मतेह्यकर्तुरंगीकृतमप्यपावृतः । युक्तंनचित्रंत्वयिकार्यकारणेसर्वात्मनिव्यतिरिक्तेचवस्तुतः ५

चूर्णिका २२ २३ २४ इतिपंचमेसप्तदशः ॥ १७ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ तथाचभद्राश्ववर्षेभद्रश्रवानामधर्मसुतः भगवतः हयग्रीवमूर्तिंसेवते १ ॐनमोभगवते ॥६४॥
धर्मायेत्यादि २ अहोभगवद्विचेष्टितंविचित्रम् ३ ४ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

परमेश्वरत्वेनस्तुत्वा प्रस्तुतावतारचरितमाह । वेदानिति । तमसादैत्यरूपेणतिरस्कृतान्अपनीतान् नाचतुरंगश्चनृतुरंगौतद्रूपोविग्रहोयस्यसः (अभियाचतेप्रार्थनांकुर्वते) कवयेब्रह्मणेतदर्थं । (प्रत्यादद
तस्मैतेनमः) अवितथेहितायसत्यसंकल्पाय(तेनमइति) ६ उत्तरत्रप्रह्लादचरित्रे। महापुरुषस्यगुणानां(शांत्यादीनां)भाजनआश्रः । दैत्यदानवकुलस्यतीर्थीकरणम्(पावित्र्येहेतुः)शीलमाचारितंयस्य।अव्यव
धानःफलसंकल्पेनव्यवधानशून्यश्चासावनन्यश्चाव्यभिचारीयोभक्तियोगस्तेनउपास्तेसेवते ७ (तेजसांसूर्यादीना-)-मपितेजसे (''यदादित्यगतंतेज''इत्यादिस्मृतेः ।) आविराविः । अतिप्रकटोभववीप्सावा
कर्माशयान्कर्मवासनाःकर्माश्रयानितिपाठेरागादीन् रंधयनिर्दह।भूयिष्ठाःभूयाः८विश्वस्यस्वस्तिप्रार्थनेखलस्यापितद्भवेत्।तच्चसाधुपीडांविनानस्यात्।अन्योन्यममंगलंध्यायतांचभूतानांअन्योन्यघातंविना
(अभीष्टं) नभवेत् । इत्याशंक्याह । खलःप्रसीदतुक्रौर्यंत्यजतु । भूतानिचमिथःशिवमेवध्यायंतु । तेषां मनश्चभद्रंउपशमादिकंभजतु । नोऽस्माकमपिमतिः अपिशब्दात् भूतानांचमतिःअहैतुकीनिष्कामा
॥६५॥ सती । ९ नःसंगःक्वापिमास्यात् यदिकथंचित्स्यात् । तर्हिअगारादिपुमास्यादेव । किंतुभगवत्प्रियेष्वेवस्यात् । अगारादिसंगेदोषमाह । यइति (प्राणवृत्त्याप्राणधारणमात्रनिर्वाहकवृत्त्यापरितुष्टःआत्म
वान् वशीकृतमनाः अदूराच्छीघ्रंसिध्यतिकृतकृत्योभवति ।) इंद्रियप्रियोगृहाद्यासक्तः।१०भगवत्प्रियसंगेगुणमाह। येषांभगवत्प्रियाणांसंगात्लब्धंमुकुन्दविक्रमंश्रुतिभिःश्रवणादिभिःसुंस्पृशतांसेवमानानांपु
सामंतर्गतोजोहरिर्मानसंमलंहरति । कथंभूतंविक्रमं निजंअसाधारणं वीर्यंवैभवंप्रभावातिशयोयस्य । तीर्थंतु गंगादि मुहुः संस्पृशतांअंगजं मलंकेवलंहरति । तान्भगवत्प्रियान्कोवैनसेवेततत्यन्वयः ११ मान
समलापगमफलमाह । यस्येति । अकिंचनानिष्कामा । मनःशुद्धौहरेर्भक्तिर्भवति। ततश्चतत्प्रसादेसतिसर्वेदेवाःसर्वैर्गुणैर्धर्मज्ञानादिभिःसहतत्रसम्यगासते नित्यंवसंति गृहाद्यासक्तस्यतुहरिभक्त्यसंभवात्कुतो
महतांगुणाज्ञानवैराग्यादयोभवंति।असति विषयसुखेमनोरथेनवहिर्धावतः १२ ननुहरिविमुखस्यगृहाद्यासक्तस्यापिलोकेमहत्वंदृश्यते । सत्यंदृश्यतेतत्तूपहासास्पदमितिसहेतुकमाह । हरिर्हीति । यथा
झषाणांमीन.नांईप्सितंपरमप्रियंतोयमेवआत्मातेनविनाजीवनाभावात् । (तथाहरिर्हिशरीरिणांसाक्षादात्मा । तंहित्वा) महानतिप्रसिद्धोपियोगृहेयदिसज्जतेतदा (गृहेप्रसक्तानां) दंपतीनांमिथुनानांशूद्रादि
ष्वपिप्रसिद्धंवयसैवकेवलंयन्महत्त्वंतदेवतस्यभवतिनतुज्ञानादिना । मिथुनेषुपूज्यमानेषुस्त्रीभ्यः पुंसांवयसामहत्त्वंबालमिथुनेभ्यश्च (शूद्रादिषु) वृद्धमिथुनानां (वयसा) महत्त्वंयथातथेत्यर्थः १३

श्लोकाः

वेदान्युगांतेतमसातिरस्कृतान्रसातलाद्योनृतुरंगविग्रहः। प्रत्याददेवैकवयेऽभियाचतेतस्मैनमस्तेऽवितथेहितायते इति ६ हरिवर्षेचापिभगवान्नरहरिरूपे
णास्ते । तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये । तद्दयितंरूपंमहापुरुषगुणभाजनोमहाभागवतोदैत्यदानवकुलतीर्थीकरणशीलाचरितःप्रह्लादोऽव्यवधानान ६/१३
न्यभक्तियोगेनसहतद्वर्षपुरुषैरुपास्तेइदंचोदाहरति७नमोभगवतेनरसिंहायनमस्तेजस्तेजसेआविराविर्भववज्रनखवज्रदंष्ट्रकर्माशयान्रंधयरंधयतमोग्रसग्रसस्वा
हा अभयमभयमात्मनिभूयिष्ठाः ॐक्ष्रौम् ८ स्वस्त्यस्तुविश्वस्यखलःप्रसीदतांध्यायंतुभूतानिशिवंमिथोधिया ॥ मनश्चभद्रंभजतादधोक्षजआवेश्यतांनोमतिर
वीर्यतुकी ९ माऽगारदारात्मजवित्तबंधुषुसंगोयदिस्याद्भगवत्प्रियेषुनः । यःप्राणवृत्त्यापरितुष्टआत्मवान्सिध्यत्यदूरान्नतथेंद्रियप्रियः १० यत्संगलब्धंनिज
वीर्यवैभवंतीर्थंमुहुःसंस्पृशतांहिमानसम्॥ हरत्यजोऽतःश्रुतिभिर्गतोंगजंकोवैनसेवेतमुकुंदविक्रमम् ११ यस्यास्तिभक्तिर्भगवत्यकिंचनासर्वैर्गुणैस्तत्रसमासते
सुराः ॥ हरावभक्तस्यकुतोमहद्गुणामनोरथेनासतिधावतोबहिः १२ हरिर्हिसाक्षाद्भगवान्शरीरिणामात्माझषाणामिवतोयमीप्सितम् ॥ हित्वामहांस्तंय ॥६५॥
दिसज्जतेगृहेतदामहत्त्वंवयसादंपतीनाम् १३

चूर्णिका युगांतेवेदान् दैत्येननीतान् रसातलात् आनीय ब्रह्मणे ददौ तस्मै सत्यसंकल्पाय तेनमइत्यादिस्तुतिंकरोति ६ अथहरिवर्षे भगवान्नरहरिरूपेणास्ते तंप्रह्लादः तद्वर्षपुरुषैः
सहउपास्ते ओंनमोभगवतेनृसिंहायेत्यादिमंत्रंजपति ७ ८ विश्वस्यस्वस्ति अस्तु नः मतिः अधोक्षजेप्रविशताम् ९ नः संगः भगवत्प्रियेषुभवतु १० तस्मात् नृसिंहपादं
भजते इतिस्तुतिं करोति ११ १२ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१८॥

(उपसंहरतितस्मादेति)। यस्मादेवंतस्माद्गृहंहित्वाऽकुतोयंनृसिंहपादंभजतेत्यसुरान्प्रत्युक्तिः । कीदृशंगृहम् । रजस्तृष्णा । रागोऽभिनिवेशः (स्पृहाइच्छा । आधिश्चिंता) रजआदीनांमूलंकारणम् ।
अतएवसंसृतीनांजन्ममरणादीनांचक्रवालंमंडलंअविच्छेदोयस्मात् १४ केतुमालेपिकामदेवस्वरूपेणआस्तेइतिशेषः । किमर्थमास्तेअतआह । लक्ष्म्याइति । प्रजापतिः संवत्सरः। "संवत्सरोवैप्रजापति"
रितिश्रुतेः । तस्यदुहितरोरात्र्यभिमानिन्योदेवताः । पुत्रादिवसाभिमानिनोदेवाः । तेषांचतद्वर्षपतीनांप्रियचिकीर्षया । पुरुषायुषावर्षशतेनयान्यहोरात्राणितैःपरिसंख्यानंगणनायेषांषट्त्रिंशत्सहस्राणा
मित्यर्थः यासांदुहितॄणांमहापुरुषस्य (हरेः) महास्त्रंचक्रंतस्यतेजसा (उद्वेजितंमनोयासांतासांगर्भाः व्यसवोगतप्राणाः) १५ रमांरमयन्स्वीयानींद्रियाणिरमयते । केनसाधनेनरमयन्तदाह ।
अतीवसुललितयागत्यायोविलासस्तेनविलसितोरुचिरोहासलेशोमंदस्मितंतत्सहितोऽवलोकएवलीलातयाकिंचिदुत्तंभितंउत्तुंगितंसुंदरंयद्भ्रूमंडलंतेनसुभगंवदनारविंदंतस्याश्रिया १६ (संवत्सरस्यरात्रिषुप्र
जापतेर्दुहितृभिः रात्र्यधिष्ठात्रीभिरुपेता अहःसु तासां) तत्भर्तृभिर्दिवसाधिष्ठातृभिरुपेता१७सर्वैर्गुणविशेषैः श्रेष्ठवस्तुभिर्विलक्षितोलक्षीकृतआत्मायस्य।आकूतीनांक्रियाणांचित्तीनांज्ञानानांचेतसांसंकल्पाध्य
वसायादीनांविशेषाणांतत्तद्विषयाणां। षोडशकलाअंशाएकादशेंद्रियपंचविषयलक्षणायस्यछंदोमयायवेदोक्तकर्मप्राप्यायअन्नमयायअन्नोपष्टभ्यत्वात्अमृतमयायपरमानंदाविष्कारित्वात् । सर्वमयायसर्वविष
यत्वात्सहसओजसेबलायतद्धेतुत्वात् ।(उभयत्रअंतर्बहिश्च)१८ त्वत्कामेनैवत्वत्सेकत्वादहंकृतार्थास्मि। अन्यकामनयातुत्वामर्चंत्योनपरिपूर्णमनोरथाः स्युरित्याह ।स्त्रियइति। स्वतएवहृषीकाणामीश्वरंपतिं
संतंत्वामाराध्य याःस्त्रियोऽन्यंपतिंप्रार्थयंतिपतिकामानांहिकामदेवाराधनंव्रतेषुप्रसिद्धंतासामपत्यादीनितेपतयोनपातुंशक्ताः १९

श्लोकाः १४/१९

तस्माद्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलम् ॥ हित्वागृहंसंसृतिचक्रवालंनृसिंहपादंभजताकुतोभयमिति १४ केतुमालेपिभगवान्कामदेवस्वरू
पेणलक्ष्म्याःप्रियचिकीर्षयाप्रजापतेर्दुहितृणांपुत्राणांतद्वर्षपतीनांपुरुषायुषाहोरात्रपरिसंख्यानानांयासांगर्भामहापुरुषमहास्त्रतेजसोद्वेजितमनसांविध्वस्ता
व्यसवःसंवत्सरांतेविनिपतंति १५ अतीवसुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलयाकिंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविंदश्रि
यारमांरमयन्निंद्रियाणिरमयते १६ तद्भगवतोमायामयंरूपंपरमसमाधियोगेनरमादेवीसंवत्सरस्यरात्रिषुप्रजापतेर्दुहितृभिरुपेतोऽहस्सुचतद्भर्तृभिरुपास्तेइदं
चोदाहरति १७॥ॐह्रांह्रींह्रूंॐनमो भगवतेहृषीकेशायसर्वगुणविशेषैर्विलक्षितात्मनेआकूतीनांचित्तीनांचेतसांविशेषाणांचाधिपतयेषोडशकलायछंदोमया
यान्नमयायामृतमयायसर्वमयायसहसेओजसेबलायकांतायकामायनमस्तेउभयत्रभूयात् १८ स्त्रियोव्रतैस्त्वाहृषिकेश्वरंस्वतोह्याराध्यलोकेपतिमाशासतेन्य
म् ॥ तासांनतेवैपरिपांत्यपत्यंप्रियंधनायूंषियतोऽस्वतंत्राः १९

चूर्णिका

१४ केतुमाले भगवान् कामदेवरूपेण आस्ते तंरमादेवी उपास्ते १५ १६ १७ ओंह्रांह्रींह्रूं ओंनमो भगवते हृषीकेशायेत्यादिमंत्रंजपति १८ स्त्रियःत्वांव्रतैः आ
राध्यअन्यंपतिं प्रार्थयंति तत् व्यर्थम् १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतस्तेपतयएवनभवंतीत्याह ।सवाइतिसचैवंभूतः पतिर्भवानेकएव । नान्यः । (यतःस्वयमकुयोभयः सन्भयातुरंपाति)योभवान्आत्मलाभात्परमधिकंनमन्यतेइतरथाअन्याधीनसुखस्य (पुंसो) नस्वतं
त्रता । स्वतंत्रनानात्वेचमंडलेश्वराणामिवमिथोभयंस्यादित्यर्थः २० किंच । निष्कामभजनेअप्रार्थिताएवसर्वेकामाभवंति । सकामभजनेतुकामितमात्रंअनित्यंचेत्याह । यास्त्रीतस्यउक्तलक्षणस्यतेपाद
सरोरुहस्यार्हणंपूजामेवनितरांकामयेत्नफलांतरंसाअखिलेषुकामेषुलंपटा । सर्वान्कामान्प्राप्नोतीत्यर्थः । ईप्सितमीप्सितः अभीप्सितंफलांतरमाप्तुमपेक्षितः सन्अर्चितश्चेत्ताहितदेवैकंरासिददासि ।
किंच । यत्यतः फलभोगानंतरंभग्नायाश्चायाचितोर्थोयस्याः साप्रतप्यतेदुःखंप्राप्नोतिताहशमेवतद्रासिनतुनित्यम् २१ननुममार्हणेकुतः सर्वकामप्राप्तिः यतस्त्वमेवहिकामार्थिभिः सेव्यसेअतआह । मत्प्रा
प्तयेब्रह्मादयस्तपस्तप्यंतेकुर्वंति । कथंभूताः ऐंद्रियेसुखेधीर्येषांते । अलुक्समासः । तथापिभवत्पादपरायणाहतेत्वच्चरणोपासकंविनामांनविंदंतिमत्कटाक्षविलसिताविभूतीर्नलभंतइत्यर्थः । यतस्त्वय्येवहृ
यंयस्याः साहं । त्वत्परतंत्रत्वात्त्वदनुवर्तिनमेवविलोकयामिनान्यमित्यर्थः(हेअजितस्वतंत्र)२२इदानींकृपाप्रार्थयतेसत्वमिति । यद्भजनंविनानकश्चित्पुरुषार्थः सत्वंत्वदितित्वयायत्करांबुजंसात्वतांभक्तानां
। शीर्ष्णिअधायिकृपयान्यस्तं । तन्ममापिशीर्ष्णिनिधेहीतिशेषः । कथंभूतंवंदितंसर्वकामवर्षित्वेनसद्भिः स्तुतं । नचमयितवानादरः । यतः हेवरेण्यवरणीयमांवक्षसिलक्ष्माविभर्षि । अहोचित्रमेतत्म
यिकेवलमादरमात्रंभक्तेषुतुपरमाकृपा। अतईश्वरस्यतवयत्माययाईहितंतत्कोवितर्कयितुंसमर्थः २३ (मनोःवैवस्वतस्य) २४ सत्त्वायसत्त्वप्रधानायमुख्यतमायप्राणायसूत्रात्मने २५ उरुःस्वनोवेदात्मको
नादोयस्य यइदंविश्वंब्राह्मणादिनाम्नाविधिनिषेधालंबनभूतेनवशेअनयत्नियमितवान्सत्वमीश्वरः । तथाचश्रुतिः । "तस्यवाक्तंतिर्नामानिदामानी„ति २६

॥६७॥

श्लोकाः

सवैपतिःस्यादकुतोभयःस्वयंसमंततःपातिभयातुरंजनम् ॥ सएकएवेतरथामिथोभयंनैवात्मलाभादधिमन्यतेपरम्२० यातस्यतेपादसरोरुहार्हणंनिकामये
त्साखिलकामलंपटा ॥ तदेवरासीप्सितमीप्सितोर्चितोयद्भग्नयाच्ञाभगवन्प्रतप्यते२१मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यंतउग्रंतपऐंद्रियेधियः॥ ऋतेभवत्पा
दपरायणान्नमांविंदंत्यहंत्वद्धृदयायतोजित २२ सत्वंममाप्यच्युतशीर्ष्णिवंदितंकरांबुजंयत्त्वदधायिसात्वताम् ॥ बिभर्षिमांलक्ष्मवरेण्यमाययाकईश्वरस्ये
हितमूहितुंविभुरिति २३ रम्यकेचभगवतःप्रियतमंमात्स्यमवताररूपंतद्वर्षपुरुषस्यमनोःप्राक्प्रदर्शितंसइदानीमपिमहताभक्तियोगेनाराधयतीदंचोदाहर
ति २४ ॐनमोभगवतेमुख्यतमायनमःसत्त्वायप्राणायौजसेसहसेबलायमहामत्स्यायनमइति २५ अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपोविचरस्युरु
स्वनः ॥ सईश्वरस्त्वंयइदंवशेऽनयन्नाम्नायथादारुमयींनरःस्त्रियम् २६

२०/२६

चूर्णिका

२० यतःअकुतोभयंभवति सएवपतिः प्रार्थ्यः एवंभूतस्त्वमेवासि हेईश्वर तवइच्छांज्ञातुंकः समर्थः इत्यादिस्तौति २१ २२ २३ रम्यकवर्षेमत्स्यरूपेणभवान् आस्तेतं वैवस्व
तमनुः आराधयति २४ ओंनमो भगवते मुख्यतमायेत्यादिजपति २५ भगवान्युगांतार्णवेइमांपृथ्वीं मयासहअपात् तस्मैमत्स्यायनमइत्यादिस्तौति २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.पं. नान्विद्रादयोवशंनयंति लोकपालत्वात्। कुतोहं। तत्राहायमिति । मत्सरएवज्वरोयेषांते यं (त्वां) हित्वा (पृथग्वा समत्येवा यतंतोपि) द्विपदश्चतुष्पदः सरीसृपंजंगमंस्थाणुस्थावरंचयदत्रदृश्यतेतत्किंचिद अ०
पिपातुंनशक्ताः सःत्वमेवप्राणरूपेणपालकईश्वरश्चेत्यर्थः तथाचश्रुतिः "ताअहिंसंताहमुक्थपस्म्यहमुवकथमस्मी"त्यादि । २७ अवतारचरित्रमाह । भवानिमांक्षोणीमयामनुनासहमत्सहितांधृत्वेत्यध्याहार
टीका उर्मिमालावतिप्रलयार्णवेओजसा (उरुअधिकं) क्रमतेविचरति । यद्वा पातुमित्यस्यानुषंगः ।क्षोणींपातुंक्रमतेउत्सहतेइत्यर्थः । यतःअजः । कीदृशीं ।ओषधीनांवीरुधांचलतादीनांनिधिंआश्रयभूताम् (तत्स ॥१८॥
हितामित्यर्थः) तस्मैनमः । जगतोयः प्राणगणस्तस्यात्मनेनियंत्रे २८ तत्प्रियतमांतांप्रियतमाम् २९ अकूपारायकूर्माय । सर्वःसंपूर्णः सत्त्वगुणः (शुद्धसत्त्वं) विशेषणंयस्य । नउपलक्षितंस्थानंयस्य
वारिचरत्वात् । वर्ष्मणेवर्षीयसेकालानवच्छिन्नाय । भूम्नेसर्वगतायअवस्थानायआधाराय ३० निजमाययार्पितंप्रकाशितमेतदर्थस्वरूपंदृश्यंपृथिव्यादियस्यैवरूपं । यतः पृथक्नास्ति कथंभूतं बहुभिः रूपै
॥६८॥ रूपितंनिरूपितं । यस्यचसंख्यानास्ति । कुतः अयथामिथ्यैवोपलंभनात् । नहिमरीचिजलमेतावदितिसंख्यातुंशक्यते । अव्यपदेशरूपिणेअनिरुक्तप्रपंचाकाराय ३१ बहुरूपत्वंदर्शयंस्तस्येश्वरादव्यतिरे
कमाह । जरायुजेति । द्वीपग्रहर्क्षमित्यभिधेयस्त्वमेवैकः । नत्वद्व्यतिरेकोस्ति । "सर्वंखल्विदंब्रह्मे"त्यादिश्रुतेरित्यर्थः । ३२ सप्रपंचतामनूद्यतन्निरासेनप्रणमतियस्मिन्निति । असंख्येयाअनंताविशेषायेषांता
निनामानिरूपाण्याकृतयश्चजातयोयस्यतादृशेयस्मिन्त्वयिकविभिः कपिलादिभिरियंचतुर्विंशत्यादिसंख्याकल्पितासतीयथातत्त्वदृशायेनतत्त्वज्ञानेनअपनीयतेतस्मैतेसांख्यासिद्धांतरूपायनमः परमार्थ
ज्ञानरूपायेतिवा (यद्वाअसंख्येयाविशेषाव्यावर्तकधर्माः असंख्येयानिनामानिनारायणादीनिरूपाणिपशुक्लादीनियस्यास्त्वादृशीआकृतिर्विग्रहोयस्यतथाविधेयस्मिन्त्वयि) ३३ एषाभूः (कुरुभिस्तत्रत्यैः
पुरुषैः सह) उपधावतिहित्यन्वयः (उपनिषदंमंत्रंआवर्तयतिजपति) ३४

श्लोकाः
यंलोकपालाःकिलमत्सरज्वराहित्वायतंतोपिपृथक्समेत्यच ॥ पातुंनशेकुर्द्विपदश्चतुष्पदःसरीसृपंस्थाणुयदत्रदृश्यते २७ भवान्युगांतार्णवऊर्मिमालिनिक्षो
णीमिमामोषधिवीरुधांनिधिम् ॥ मयासहोरुक्रमतेजओजसातस्मैजगत्प्राणगणात्मनेनमइति २८ हिरण्मयेपिभगवान्निवसतिकूर्मतनुंबिभ्राणस्तस्यतत्प्रि २७
यतमांतनुमर्यमासहवर्षपुरुषैःपितृगणाधिपतिरुपधावति ॥ मंत्रमिमंचानुजपति २९ ॐनमोभगवतेअकूपारायसर्वसत्त्वगुणविशेषणायनोपलक्षितस्थानाय ३४
नमोवर्ष्मणेनमोभूम्नेनमोनमोवस्थानायनमस्ते ३० यद्रूपमेतन्निजमाययार्पितमर्थस्वरूपंबहुरूपरूपितम् ॥ संख्यानयस्यास्त्ययथोपलंभनात्तस्मैनमस्तेव्य
पदेशरूपिणे ३१ जरायुजंस्वेदजमंडजोद्भिदंचराचरंदेवर्षिपितृभूतमैंद्रियम् ॥ द्यौःखंक्षितिःशैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेयएकः ३२ यस्मिन्नसंख्येयविशे
षनामरूपाकृतौकविभिःकल्पितेयम् ॥ संख्याययातत्त्वदृशाऽपनीयतेतस्मैनमःसांख्यनिदर्शनायतइति ३३ उत्तरेषुचकुरुषुभगवान्यज्ञपुरुषःकृतवराहरूप
आस्तेतंतुदेवीहैषाभूःसहकुरुभिरस्खलितभक्तियोगेनोपधावतिइमांचपरमामुपनिषदमावर्तयति ३४

चूर्णिका २७ २८ तथाहिरण्मयवर्षे भगवान् कूर्मरूपेण आस्ते तंपितृगणाधिपतिः अर्यमाउपास्ते २९ ३० ओंनमो भगवते अकूपारायेत्यादिमंत्रंजपति ३१ इदंसर्वंचराचरं ॥६८॥
ब्रह्मांडसहितं त्वद्व्यतिरिक्तंनास्ति ३२ यास्मिन् त्वयिकविभिः इदंनामरूपंभेदेनबहुधाकल्पितम् तत्त्वदृष्ट्याएकमेव एवंभूतायसांख्यनिदर्शनायते नमइत्यादि स्तौति ३३
तथाउत्तरेषुकुरुषुभगवान् वराहरूपेणआस्ते तंपृथ्वी देवीभक्त्या उपधावति ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मंत्रैस्तत्त्वेनलिंग्यतइतितथातस्मै।यज्ञाअयूपाःक्रतवःसयूपाःतद्रूपाय।अतएवमहांतोऽध्वराअवयवभूतायस्य।कर्मणाशुक्लायशुद्धाय।यज्ञानुष्ठात्रे।त्रियुगाय कृतयुगे यज्ञाभावात्।यद्वा।कलियुगेछन्नत्वात् ३५कवयो विद्वांसःविपश्चितोनिपुणाः गुणेषुदेहेंद्रियादिषुमथ्नंतिविचिन्वंतिमथ्नाविवेकसाधनेनमनसा।क्रियार्थैःकर्मभिस्तत्फलैश्चगूढंअप्रकाशमानंदिदृक्षवः।एवंमंथनेईरितःप्रकटितः आत्मस्वरूपंयस्यतस्मैनमः३६मथ नमेवदर्शयन्नाह । द्रव्यंविषयः क्रियाइंद्रियव्यापारः हेतुर्देवताअयनंदेहः ईशः कालः कर्ताअहंकारः एतैर्मायायागुणैः कार्यैरुपलक्षणैर्वस्तुनावस्तुत्वेननिरीक्षितोयआत्मातस्मै । अन्वीक्षयाविचारेणअंगै र्यमनियमादिभिः अतिशयात्मानिश्चयवतीबुद्धिर्येषांतैः निरस्तामायानिमित्ताआकृतिर्यस्मात्तस्मै ३७ तदेवंनिर्गुणरूपेणनत्वापरमेश्वररूपेणप्रणमति करोतीति । यस्येक्षितुः (सर्गादावालोचयितुः परमे श्वरस्यईप्सितं) जीवार्थमिष्टंअत्यंतानिछायामीक्षणायोगात् । स्वार्थंतुनेप्सितम् (एतादृशम्) विश्वास्थित्यादिस्वगुणैर्मायाकरोति । तस्याः जडत्वेपीश्वरसंनिधानान्प्रवृत्तिदृष्टांतेनाह । यथाअयोलोहं ग्राव्णोअयस्कांतात्तन्निमित्तात्भ्रमतितदाश्रयंतदभिमुखंसत् । गुणानांकर्मणांजीवादृष्टानांचसाक्षिणेतस्मैनमः । ३८ अवतारचरितमाह प्रमथ्येति । योजगतामादिः कारणभूतः सूकरः मांपृथ्वींअग्रदंष्ट्रे दंष्ट्राग्रेकृत्वा (निधाय) रसातलादारभ्यउदन्वतः प्रलयार्णवात्इभोगजइवनिरगात् । ततश्चप्रतिगजतुल्यंदैत्यंप्रमथ्ययःक्रीडन्स्थितः तंविभुंप्रणतास्मीत्यन्वयः ३९ ॥ ॥ इतिपंचमस्कंधेटीकायांअ ष्टादशोध्यायः १८ ॥ ॥ ऊनविंशेकिंपुरुषेभारतेचोपवर्ण्यते । सेव्यसेवकभावश्चभारतश्रैष्ठ्यमेवच । १ १ भर्ताचासौभगवांश्चतस्यकथां २

॥६९॥

श्लोकाः

ॐनमोभगवतेमंत्रतत्त्वलिंगाययज्ञक्रतवेमहाध्वरावयवायमहापुरुषायनमःकर्मशुक्लायत्रियुगायनमस्ते ३५ यस्यस्वरूपंकवयोविपश्चितोगुणेषुदारुष्विवजा

तवेदसम् ॥ मथ्नंतिमथ्नामनसादिदृक्षवोगूढंक्रियार्थैर्नमईरितात्मने ३६ द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षितात्मने ॥ अन्वीक्षयांगातिशया ३५/२

त्मबुद्धिभिर्निरस्तमायाकृतयेनमोनमः ३७ करोतिविश्वस्थितिसंयमोदयंयस्येप्सितंनेप्सितमीक्षितुर्गुणैः ॥ मायायथाऽयोभ्रमतेतदाश्रयंग्राव्णोनमस्तेगुणक

र्मसाक्षिणे ३८प्रमथ्यदैत्यंप्रतिवारणंमृधेयोमांरसायाजगदादिसूकरः ॥ कृत्वाग्रदंष्ट्रेनिरगादुदन्वतःक्रीडन्निवेभःप्रणतास्मितंविभुमिति ३९ इतिश्रीभा०म०

पं०भुवनकोशवर्णनंनामाष्टादशोध्यायः ॥१८ ॥ ॥श्रीशुकउवाच ॥ ॥ किंपुरुषेवर्षेभगवंतमादिपुरुषंलक्ष्मणाग्रजंसीताभिरामंश्रीरामंतच्चरणसन्निकर्षाभिर

तःपरमभागवतोहनुमान्सहकिंपुरुषैरविरतभक्तिरुपास्ते १ आर्ष्टिषेणेनसहगंधर्वैरनुगीयमानांपरमकल्याणीभर्तृभगवत्कथांसमुपशृणोतिस्वयंचेदंगायति २

॥६९॥

चूर्णिका

ओंनमो भगवते मंत्रतत्त्वलिंगाययज्ञक्रतवेनमइत्यादिजपति यस्यतव स्वरूपं कवयः अग्निरिवमथित्वा जानंति ३६ ३७ ३८ किंच युद्धे हिरण्याक्षंमथित्वामांदं ष्ट्राग्रे धृत्वारसातलात्यः निरगात् तंविभुं प्रणतास्मि ३९ इतिपंचमेऽष्टादशः॥ १८॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ अथकिंपुरुषेवर्षे भगवान् श्रीरामचंद्ररूपेणास्ते तं हनुमानुपास्ते १ ओंनमो भगवते उत्तमश्लोकायेत्यादिजपति २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आ. पं. आर्याणिश्रेष्ठानिलक्षाणानिशीलंव्रतंचयस्मिन् । उपशिक्षितात्मनेसंयतचित्ताय । उपासितोऽनुसृतोलोकोयेन । साधुवादःसाधुत्वप्रसिद्धिः तस्यनिकषणायनिकषाश्मवन्निर्धारस्थानायपरमसीम्नेइत्यर्थः ३ अ० श्रीरामंपरमार्थरूपेणप्रणमति । यदेकंवेदांतेषुप्रसिद्धंतत्त्वंतत्प्रपद्यते । कथंभूतम् । विशुद्धश्चासावनुभवश्चसएवमात्रास्वरूपंयस्य । विशुद्धत्वेहेतुः प्रशांतं तत्रहेतुः स्वतेजसास्वरूपप्रकाशेनध्वस्तागुणानांवि

टीका विधाजाग्रदाद्यवस्थायस्मिन्अनुभवमात्रत्वेहेतुःप्रत्यक्दृश्यादन्यत् तत्कुतः अनामरूपं ननुवस्तुतएवंभूतस्यापिजीवस्योक्तसर्वविपर्ययोदृश्यतेतत्राह । अहंकाराभावान्नतथावैपरीत्यमित्यर्थः ननुश्रीरामस्परूपंनै वंप्रतीयतेतत्राह । सुधियापुंसाउपलभ्यतइत्युपलंभनंशुद्धचित्तेनपुरुषेणब्रह्मत्वेनैवोपलभ्यतइत्यर्थः ४ कथंतर्हिदशरथपुत्रत्वंतत्राह । विभोर्मर्त्यावतारस्तुरक्षसोरावणस्यवधायतस्यमनुष्यादन्यतोऽवध्यत्वात् ॥१९॥

॥७०॥ नकेवलमेतावत् । किंतुइहसंसारेस्त्रीसंगादिकृतंदुःखंदुर्वारमितिमर्त्यानांशिक्षणंचशिक्षार्थमपीत्यर्थः । अन्यथास्वेस्वरूपेरममाणस्यजगदात्मनः सीताविरहकृतानिव्यसनानीतियत्तत्कुतः स्यात् । ५ विषयासक्त्यभावेनव्यसनानर्हत्वमुपपादयति । नवैसभगवान्त्रिलोक्यांक्वापिसक्तः यतआत्मवतांधीराणामात्मासुहृत्तमश्चअतोनस्त्रीकृतंकश्मलंमोहंप्राप्नुयात् । नलक्ष्मणंचेति । देवदूतेनश्रीरामंसंमंत्रयता विज्ञापितंअत्रागतस्त्वयावध्यइतितदैवद्वारिस्थितंलक्ष्मणंदुर्वाससमागतंविज्ञापयितुंप्रविष्टंहंतुमुद्यतोवसिष्ठवाक्यात्तत्याजतच्चनयुज्यतेत्यर्थः ६ अतः श्रीरामएवसर्वैः सेव्यइतिवक्तुंनतस्यतोषहेतुः सत्कुलज न्मादि किंतुभक्तिरेवेत्याह । नजन्मेति । महतः पुरुषाज्जन्म । महतः श्रीरामस्येतिवा । सौभगंसौंदर्यंआकृतिर्जातिः । यद्यस्मात्तैर्जन्मादिभिर्विसृष्टान्त्यक्तानपिनोऽस्मान्वनचरान्वतअहोलक्ष्मणस्याग्र जोपिसखित्वेकृतवान् । ७ तस्मात्सुरोवाअन्योवायः कोपिश्रीराममेवसर्वप्रकारेणभजेत्सुकृतज्ञं (सुतरांकृतमितिजानातीतितथातम्) अल्पीयस्यपिभजनेबहुमानिनं (मनुष्याकारं) यउत्तरान्कोश लान्अयोध्यावासिनः (दिवंस्वर्गंवैकुंठमित्यर्थः) ८ उपचितैः ऋद्धैर्धर्मादिभिरात्मोपलभ्यतेयेनतत्तपश्चरति । तत्रोपशमः इंद्रियाणांसंयमः । उपरमोनिरहंकारता । आत्मवतां (वशीकृतमनसां) अनु ग्रहाय न स्वार्थंईश्वरत्वात् ९ ॥

श्लोकाः ॐनमोभगवतेउत्तमश्लोकायनमआर्यलक्षणशीलव्रतायनमउपशिक्षितात्मनेउपासितलोकायनमःसाधुवादनिकषणायनमोब्रह्मण्यदेवायमहापुरुषायमहारा जायनमइति ३ यत्तद्विशुद्धानुभवमात्रमेकंस्वतेजसाध्वस्तगुणव्यवस्थम् ॥ प्रत्यक्प्रशांतंसुधियोपलंभनंह्यनामरूपंनिरहंप्रपद्ये ४ मर्त्यावतारस्त्विहमर्त्य शिक्षणंरक्षोवधायैवनकेवलंविभोः ॥ कुतोन्यथास्याद्रमतःस्वआत्मनःसीताकृतानिव्यसनानीश्वरस्य ५ नवैसआत्मात्मवतांसुहृत्तमःसक्तस्त्रिलोक्यांभग वान्वासुदेवः ॥ नस्त्रीकृतंकश्मलमश्नुवीतनलक्ष्मणंचापिविहातुमर्हति ६ नजन्मनूनंमहतोनसौभगंनवाङ्नबुद्धिर्नाकृतिस्तोषहेतुः ॥ तैर्यद्विसृष्टानपिनो वनौकसश्चकारसख्येबतलक्ष्मणाग्रजः ७ सुरोऽसुरोवाप्यथवानरोनरःसर्वात्मनायःसुकृतज्ञमुत्तमम् ॥ भजेतरामंमनुजाकृतिंहरिंयउत्तराननयत्कोशला न्दिवमिति ८ भारतेपिवर्षेभगवान्नरनारायणाख्यआकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकंपयातपोऽ व्यक्तगतिश्चरति ९ ३/९

चूर्णिका ३ यत् एकंवेदांतेषु प्रसिद्धं अनामरूपं तत्त्वं अहं प्रपद्ये ४ ५ ६ ७ किंच अयोध्यावासिनः जनान् यः स्वर्गंनिनाय तं मनुजाकृतिं रामं भजे इत्यादिस्तौति ८ तथाभारतेऽ ॥७०॥ पिवर्षे भगवान् नरनारायणाख्यः आस्ते आत्मवतां अनुग्रहायतपश्चरति ९

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(सांख्ययोगाभ्यांज्ञानतत्साधनाभ्याम्) भगवदनुभावउपवर्ण्यतेयेनपंचरात्रेणतत्सावर्णैर्मनोरुपदेक्ष्यन्उपसराति सेवते १० उपरतानात्म्यायनिरहंकाराय (अकिंचनानिष्कामभक्ताएवधनंयस्यऋषि पुश्रेष्ठाय) ११ असक्तश्चासौविविक्तश्चसाक्षीचतस्मैनमः असक्तत्वंदर्शयाति।अस्यविश्वस्यसर्गादिषुकर्तापियोनबध्यतेअहंकर्तेतिनमन्यते । विविक्तत्वमाह । देहगतोपिदैहिकैः क्षुत्पिपासादिभिर्योनहन्यतेनाभि

टीका भूयते । साक्षित्वमाह । यस्यद्रष्टुरापिसतोदृष्टिर्गुणैर्दृश्यैर्नदूष्यतेनविक्रियते १२ योगकौशलंनिरूपयन्योगंप्रार्थयतेइदमितित्रिभिः । हेयोगेश्वरहिरण्यगर्भोयत्योगनैपुणंजगाद तदिदमेव। किंतत् । जन्म ॥१९॥

प्रभृतिभक्त्याअंतकालेपुमांस्त्वयिमनोधारयेदितियत् कथंभूतः सन् । उज्झितं (त्यक्तं) दुःकलेवरंतदभिमानोयेन । १३ अन्यथातस्यशास्त्राभ्यासादिश्रमोव्यर्थइत्याह । ऐहिकामुष्मिककामेषुलंपटोमूर्खः सुतादिषुयोगक्षेमंचिंतयन्कुत्सितस्यकलेवरस्यअत्ययान्मृत्योः शंकतेतथाविद्वानपिसन्यः शंकेततस्ययत्नः श्रमएव (केवलम्) १४ यस्माद्विदुषापीयमेवदशाततत्तस्मात्हेप्रभोअधोक्षजत्वमेवनोऽस्मभ्यं

॥७१॥ योगंविधेहि । कीदृशंत्वयिस्वभावंसहजवासनारूपंयेनयोगेनवयंत्वन्मायया नः कुकलेवरेअर्पितांअहंममतांशीघ्रंभिद्यामत्यजेम । सुदुर्भिदांउपायांतरैः सर्वथात्यक्तुमशक्याम्। १५ इलावृतवदस्मिन्नपिवर्षेस रितः शैलाश्चसंति । नितंबप्रभवाः तटेभ्यः संभूताः १६

तंभगवान्नारदोवर्णाश्रमवतीभिर्भारतीभिःप्रजाभिर्भगवत्प्रोक्ताभ्यांसांख्ययोगाभ्यांभगवदनुभावोपवर्णनंसावर्णेरुपदेक्ष्यमाणःपरमभक्तिभावेनोपसरतिइदं श्लोकाः

चाभिगृणाति १०ॐनमोभगवतेउपशमशीलायोपरतानात्म्यायनमोऽकिंचनवित्तायऋषिऋषभायनरनारायणायपरमहंसपरमगुरवेआत्मारामाधिपत

येनमोनमइति ११ गायतिचेदं ॥ कर्तास्यसर्गादिषुयोनबध्यतेनहन्यतेदेहगतोपिदैहिकैः ॥ द्रष्टुर्नदृग्यस्यगुणैर्विदूष्यतेतस्मैनमोऽसक्तविविक्तसाक्षिणे १२ १०/१६

इदंहियोगेश्वरयोगनैपुणंहिरण्यगर्भोभगवान्जगादयत् ॥ यदंतकालेत्वयिनिर्गुणेमनोभक्त्यादधीतोज्झितदुष्कलेवरः १३ यथैहिकामुष्मिककामलंपटःसुते

षुदारेषुधनेषुचिंतयन् ॥ शंकेतविद्वान्कुकलेवरात्ययाद्यस्तस्ययत्नःश्रमएवकेवलम् १४ तन्नःप्रभोत्वंकुकलेवरार्पितांत्वन्माययाहंममतामधोक्षज ॥ भिंद्या

मयेनाशुवयंसुदुर्भिदांविधेहियोगंत्वयिनःस्वभावमिति १५ भारतेप्यस्मिन्वर्षेसरिच्छैलाःसंतिबहवोमलयोमंगलप्रस्थोमैनाकस्त्रिकूटऋषभःकूटकःको

ल्लकःसह्योदेवगिरिरृष्यमूकःश्रीशैलोवेंकटोमहेंद्रोवारिधारोविंध्यःशुक्तिमानृक्षगिरिःपारियात्रोद्रोणश्चित्रकूटोगोवर्धनोरैवतकःककुभोनीलोगोकामुखइंद्रकी

लःकामगिरिरितिचान्येचशतसहस्रशःशैलास्तेषांनितंबप्रभवानदानद्यश्चसंत्यसंख्याताः १६

चूर्णिका तंभगवान्नारदः भारतीभिः प्रजाभिः सहसेवते १० ओंनमो भगवते उपशमशीलायेत्यादिजपति ११ यःविश्वस्य सर्गादिषुकर्तापि अहंकर्ता इति न मन्यते किंच ॥७१॥

देहगतोपि क्षुधादिभिर्न हन्यते तस्मैनमः १२ हेप्रभोत्वयि नः योगंविधेहीत्यादि स्तौति १३ १४ अस्मिन्वर्षे बहवः सरिच्छैलाः संति ते च मलयः १ मंगलप्रस्थः २ मैनाकः ३ त्रिकूटः ४ ऋषभः ५ कूटकः ६ कोल्लकः ७ सह्यः ८ देवगिरिः ९ ऋष्यमूकः १० श्रीशैलः ११ वेंकटः १२ महेंद्रः १३ वारिधारः १४ विंध्यः १५ शुक्तिमान् १६ ऋष्यगिरिः १७ पारियात्रः १८ द्रोणः १९ चित्रकूटः २० गोवर्धनः २१ रैवतकः २२ ककुभः २३ नीलः २४ गोकामुखः २५ इंद्रकीलः २६कामगिरिरिति २७ अन्येशतशः सहस्रशः शैलाः तेषांनितंबप्रभवाः नदाः नद्यश्चअसंख्याताः १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनाचदेहेनाप्युपस्पृशांति १७।१८ लब्धंजन्मयैस्तैः पुरुषैः सात्त्विकादिनास्वकृतेनकर्मणादिव्यादिगतयआत्मनोविधीयंतेसाध्यंतेहियस्मात्सर्वाएवगतयः कर्मानुसारेणसर्वेषांभवंति । यस्यवर्णस्ययद्विधानंमोक्षप्रकारः संन्यासवनस्थत्वादि तदनतिक्रमेणास्मिन्नेववर्षेनृणांअपवर्गश्चमोक्षोभवति । एतच्चकर्मादिबहुसाधनसंभवाभिप्रायेणोक्तं नत्वन्यत्रापवर्गाभावेन । तदुपर्यपिबादरयाणः संभवादितिदेवानामपिमोक्षस्यसूत्रितत्त्वात् । १९ अपवर्गस्वरूपमाह योसाविति । अनात्म्येआत्मनिभवमात्म्यंरागादितद्रहितेअनिरुक्तेवाचामगोचरेअनिलयनेअनाधारेअनन्यनिमित्तोअहैतुकोभक्तियोगएवलक्षणंस्वरूपंयस्यकथंभवति । नानागतीनांनिमित्तंयोअविद्याग्रंथिः तस्यरंधनंछेदनंतद्वारेणमहापुरुषपुरुषाः विष्णुभक्ताः तैः प्रकृष्टः संयोगोयदाभवतितदा २० एतदेवमानुष्यमेवसर्वपुरुषार्थसाधनंगायंति । (अहो) अमीषांएभिरित्यर्थः उतस्वित्अथवास्वयमेवसाधनंविनैवहरिरेषांप्रसन्नोभूत् । एवंभूतस्यपुण्यस्यदुष्करत्वात् । भारताजिरेभारतप्रांगणे । नः केवलंस्पृहैवयत्रतत्नृषुजन्ममुकुंदसेवोपयोगियै र्लब्धम् २१ स्पृहामेवाह किमित्यादिसप्तभिः । दुष्करैः (प्रयाससाध्यैः) क्रत्वादिभिः नः फल्गुनातुच्छेनद्युजयेनस्वर्गप्राप्त्याकिं । नकिंचिदपिफलमित्यर्थः । कुतः । यत्रनारायणपादपंकजस्मृतिर्नभवति । प्रत्युत अतिशयितादिंद्रियाणामुत्सवात्भोगात्प्रमुष्टाभूत् २२

श्लोकाः १७/२२

एतासामपोभारत्यःप्रजानामभिरेवपुनंतीनामात्मनाचोपस्पृशंति १७ चंद्रवशाताम्रपर्णीअवटोदाकृतमालावैहायसीकावेरीवेणीपयस्विनीशर्करावर्तातुंगभद्राकृष्णावेणाभीमरथीगोदावरीनिर्विंध्यापयोष्णीतापीरेवासुरसानर्मदाचर्मण्वतीसिंधुरंधःशोणश्चनदौमहानदीवेदस्मृतिर्ऋषिकुल्यात्रिसामाकौशिकीमंदाकिनीयमुनासरस्वतीदृषद्वतीगोमतीसरयूरोधस्वतीसत्यवतीसुषोमाशतद्रूश्चंद्रभागामरुद्वृधावितस्ताअसिक्नीविश्वेतिमहानद्यः १८ अस्मिन्नेववर्षेपुरुषैर्लब्धजन्मभिःशुक्ललोहितकृष्णवर्णेनस्वारब्धेनकर्मणादिव्यमानुषनारकगतयोबह्व्यआत्मनआनुपूर्व्येणसर्वाह्येवसर्वेषांविधीयंतेयथावर्णाविधानमपवर्गश्चापिभवति १९ योसौभगवतिसर्वभूतात्मन्यनात्म्येऽनिरुक्तेनिलयनेपरमात्मनिवासुदेवेऽनन्यनिमित्तभक्तियोगलक्षणोनानागतिनिमित्ताविद्याग्रंथिरंधनद्वारेणयदाहिमहापुरुषपुरुषप्रसंगः २० एतदेवहिदेवागायंति अहोअमीषांकिमकारिशोभनंप्रसन्नएषांस्विदुतस्वयंहरिः ॥ यैर्जन्मलब्धंनृषुभारताजिरेमुकुंदसेवौपयिकंस्पृहाहिनः २१ किंदुष्करैर्नःक्रतुभिस्तपोव्रतैर्दानादिभिर्वाद्युजयेनफल्गुना ॥ नयत्रनारायणपादपंकजस्मृतिःप्रमुष्टातिशयेंद्रियोत्सवात् २२

चूर्णिका ॥७२॥

तत्रमहानद्यः चंद्रवशा १ ताम्रपर्णी२अवटोदा ३ कृतमाळा ४ वैहायसी ५ कावेरी ६ वेणी ७पयस्विनी ८ शर्करावर्ता ९ तुंगभद्रा १० कृष्णा ११ वेणा १२ भीमरथी १३ गोदादरी १४ निर्विंध्या १५ पयोष्णी १६ तापी १७ रेवा १८ सुरसा १९ नर्मदा २०चर्मण्वती २१ सिंधुः २२ अंधशोणौनदौ महानदी २३ वेदस्मृती २४ ऋषिकुल्या२५त्रिसामा २६ कौशिकी २७ मंदाकिनी २८ यमुना २९ सरस्वती ३० दृषद्वती ३१ गोमती ३२ शरयू ३३ रोधस्वती ३४ सत्यवती ३५ सुषोभा ३६ शतद्रूः ३७ चंद्रभागा ३८ मरुद्वृधा ३९ वितस्ता ४० असिक्नी४१ विश्वा ४२ इतिमहानद्यः १७ १८ आस्मिन्वर्षेजनैः कृतकर्मणादिव्यमानुषनारकगतयामोक्षश्च भवति १९ २० स्वर्गेदेवाः एततूगायंति अहोएभिर्जनैः किंसुकृतंकृतं एषांहरिः स्वयंप्रसन्नोभवति २१ नः दुष्करैः क्रतुतपआदिभिः किम् यत्रनारायणपादस्मृतिर्नःन २२

भा॰ पं॰ (कल्पायुषांयत्स्थानंमहर्लोकादितज्जयात् अत्रकल्पायुः शब्देनमहरादिलोकस्थालक्ष्यंते । यद्वा कल्पायुषां नः स्थानजयात्स्वर्गजयात्) क्षणमल्पमेवायुर्येषांतेषाम् (भारतभुवोयोजयः अ०
सवरंश्रेष्ठइत्यर्थः ।) श्रेष्ठत्वेहेतुः मर्त्येनापिदेहेनक्षणेनैवकालेनकृतंकर्मसंन्यस्यहरेः पदंसम्यग्यांति (कल्पायुषांनिकृष्टत्वेहेतुः पुनर्भवादिति) २३ अतः यत्रवैकुंठकथामृतनद्योनसंतितदाश्रयाः
टीका कथापगाश्रयाः महांतोनृत्याद्युत्सवायेषुताद्दशायज्ञेशस्यमखाश्चपूजारूपाःससुरेशस्यब्रह्मणोपिलोकोनसंव्यताम् २४ अमुमुक्षून्नरान् निंदतिप्राप्ताइति । ज्ञानंचतदर्था क्रियाश्चतदर्थानिद्रव्या
णिचतेषांकलापेनसंभृतांपूर्णा (नृजातिंनृजन्मइहभारते) अपुनर्भवायमोक्षाय । वनौकाइववनौकसः पक्षिणोयथालुब्धकान्मुक्ताअपिपुनर्यदितस्मिन्नेववृक्षेप्रवृत्ताविहरंतितर्हियथाबध्यंतेतद्वत् २५ ॥१९॥
अहोभारतवासिनांभाग्यमित्याहुः । यैरिति । अग्नयेजुष्टंनिर्वपामिइंद्रायजुष्टंनिर्वपामिइत्येवंभागशः बर्हिषियज्ञेनिरुप्तंपृथक्कृतम् । कथं । विधिनाप्रकारेणमंत्रेणचवस्तुतश्चरुपुरोडाशादिभेदेनइष्टदेवतामुद्दिश्य
॥७३॥ त्यक्तं । निरुप्तंचममेदमितिस्वीकृत्यत्यागानंतरमश्नातीत्यर्थः (विधिमंत्राणामिंद्रादिविषयत्वेनसिद्धत्वात्कथंहरिर्गृह्णातीत्युच्यते तत्राह ।नामभिरिति) इंद्रादिनामभिः पृथगाहुतः आहूतोपिआशिषांप्रभुः
(स्वयंएकः) स्वयंपूर्णोपिहरि-(-गृह्णातियतः श्रद्धयानिरुप्तं । तथाचस्मृतिः । येप्यन्यदेवताभक्तायजंतेश्रद्धयान्विताः । तेपिमामेवकौंतेययजंतीत्यादि) २६ तत्रापिनिष्कामाः कृतार्थाइत्याहुः सत्यमि
ति मार्थितःसन्नर्थितंददातीतिसत्यंअथापिपरमार्थदोनभवत्येव । यद्यस्माद्यतोदत्तादनंतरंपुनरप्यर्थिताभवतिननुनार्थितश्चेत्किमपिनदद्यादित्याशंक्याह । अनिच्छतांनिष्कामानातुइच्छानांपिधानंआ
च्छादकं सर्वकामपरिपूरकंनिजपादपल्लवंस्वयमेवसंपादयति२७स्विष्टस्यसम्यग्यजनस्य सूक्तस्यप्रवचनस्यकृतस्यअन्यस्यापिकर्मणः स्वर्गसुखादुपभुक्तादवशेषितंशोभनंपुण्यंयदिकिंचिदास्तितेन आजनाभे
भारतेवर्षे नोऽस्माकं जन्मस्यात् । कीदृशंस्मृतिमत् हरिरेवसेव्यइत्यनुसंधानयुक्तम् । यतोहरिर्भजतां शंसुखंतनोति२८ २९ ३०(हेभारतोत्तमपरीक्षित्)३१ । इतिपंचस्कंधेटीकायांएकोनविंशोध्यायः॥१९॥

कल्पायुषांस्थानजयात्पुनर्भवात्क्षणायुषांभारतभूजयोवरम् ॥ क्षणेनमर्त्येनकृतंमनस्विनःसंन्यस्यसंयांत्यभयंपदंहरेः २३ नयत्रवैकुंठकथासुधापगानसा श्लोकाः
धवोभागवतास्तदाश्रयाः ॥ नयत्रयज्ञेशमखामहोत्सवाःसुरेशलोकोपिनवैससेव्यताम् २४ प्राप्तानृजातिंत्विहयेचजंतवोज्ञानक्रियाद्रव्यकलापसंभृताम् ॥
नवैयतेरन्नपुनर्भवायतेभूयोवनौकाइवयांतिबंधनम् २५ यैःश्रद्धयाबर्हिषिभागशोहविर्निरुप्तमिष्टंविधिमंत्रवस्तुतः ॥ एकःपृथङ्नामभिराहुतोमुदागृह्णातिपूर्णः २३/३१
स्वयमाशिषांप्रभुः २६ सत्यंदिशत्यर्थितमर्थितोनृणांनैवार्थदोयत्पुनरर्थितायतः ॥ स्वयंविधत्तेभजतामनिच्छतामिच्छापिधानंनिजपादपल्लवम् २७ यद्यत्र
नःस्वर्गसुखावशेषितांस्विष्टस्यसूक्तस्यकृतस्यशोभनम् ॥ तेनाजनाभेस्मृतिमज्जन्मनःस्याद्वर्षेहरिर्यद्भजतांशंतनोति २८ ॥ ॥ श्रीशुकउवाच ॥ ॥ जं
बुद्वीपस्यचराजन्नुपद्वीपानष्टौहैकउपदिशंतिसगरात्मजैरश्वान्वेषणइमांमहींपरितोनिखनद्भिरुपकल्पितान् २९ तद्यथास्वर्णप्रस्थश्चंद्रशुक्लआवर्तनोरमणको
मंदरहरिणःपांचजन्यःसिंहलोलंकेति ३० एवंतवभारतोत्तमजंबूद्वीपवर्षविभागोयथोपदेशमुपवर्णितइति ३१ इतिश्री भा० म० पं०स्कंधेजंबूद्वी
पवर्णननामएकोनविंशतितमोध्यायः ॥ १९ ॥

चूर्णिका कल्पायुषामपिपुनरभवात्भारतेवर्षेतत्रक्षणायुषोवरम् यतः क्षणात्सर्वंत्यक्त्वाहरेः पदंयांति २३ अयंइंद्रलोकोपिनसेव्यताम्कुतः यत्रविष्णुकथान २४भारतेनृजातिंप्राप्ययेमोक्ष
य नयतेरन् ते बंधनंयांति २५ नः स्वर्गसुखावशेषितं पुण्यंचेत् तर्हिभारते खंडेजन्मास्तु यत्रहरिःभजतांशंतनोति२६ २७ २८ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन्
जंबुद्वीपस्य अष्टौ उपद्वीपानि सगरात्मजैः अश्वान्वेषणेपृथ्वींखनद्भिः काल्पितानि २९ यथा स्वर्णप्रस्थः १ चंद्रशुक्लः २ आवर्तनः ३ रमणकः ४ मंदरहरिणः ५ पांचजन्यः ॥७३॥
६ सिंहलः ७ लंकेति ८ ३० एवंतव हेभारतोत्तम जंबुद्वीपवर्षविभागोयथोपदेशंउपवर्णितइति ३१ इतिपंचमेएकोनविंशः ॥ १९ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

विंशेप्लक्षादिषड्द्वीपस्थितिमाहसहार्णवैः । लोकालोकस्थितिंचांतर्बहिर्भागादिमानतः ॥१॥ (प्रमाणमियत्ता । लक्षणंचिह्नं । संस्थानंसंनिवेशः)१तावतालक्षयोजनविस्तारेणपरिक्षिप्तः परितोवेष्टितः ।(यथा मेरुर्जंबूद्वीपेनपरिवेष्टितस्तथा । एवंलवणोदधिरपिद्विलक्षविस्तारेणप्लक्षद्वीपेनपरिक्षिप्तः परिवेष्टितः । यत्रद्वीपेप्लक्षोवृक्षविशेषउत्थितः । जंबूप्रमाणः अधिसहस्रयोजनप्रमाणः) उपास्तेतिष्ठति । आकलय्यसमर्प्य २ अभिज्ञाताः प्रसिद्धाः सप्तैव । अन्येचपर्वतानद्यश्चसहस्रशः संतीत्यर्थः । मानसोत्तरस्यमंडलाकारत्वोक्तेरेतेषुप्लक्षादिपंचद्वीपेषुवर्षाद्रयस्तिर्यग्रेखाकाराउभयतोऽब्धिस्पृशइतिगम्यते । अन्यथासप्तभिः सप्तवर्षविभागासंभवात् । वैष्णववर्षाणांपूर्वादिक्रमोक्तेश्च । ३ (सेतुशैलामर्यादागिरयः) जलोपस्पर्शनेनविधूतंरजस्तमश्चयेषाम् । हंसादयोब्राह्मणादिस्थानीयाः वर्णाः । विबुधोपमंसंदर्शनंक्लमस्वेदादिराहितंरूपंप्रजननंअपत्योत्पादनंचयेषाम् ४ विगीताअपिद्वीपमंत्राव्याख्यायंते । प्रत्नस्यपुराणपुरुषस्यविष्णोर्यद्रूपंतंसूर्यईमहिशरणंव्रजेम । कथंभूतम् । सत्यादीनामात्मानंअधिष्ठातारम् । तत्रसत्यमनुष्ठीयमानोधर्मः ऋतंप्रमीयमाणोधर्मः । ब्रह्मणः तद्बोधकस्यवेदस्यअमृतस्यशुभफलस्यमृत्योः अशुभफलस्य ५ (इंद्रियंइंद्रियपाटवं । ओजआदयः सामर्थ्यविशेषाः । औत्पत्तिकीसहजा सर्वेपामविशेषेणसाधारण्येन) ६ (यथाप्लक्षद्वीपः स्वसमानेनावृतस्तथाशाल्मलोपिद्वीपः सुरोदेन) परिवृंक्तेपरितोबहिरस्तीत्यर्थः ७

श्लोकाः १–७

॥ ॥ श्रीशुकउवाच ॥ ॥ अतःपरंप्लक्षादीनांप्रमाणलक्षणसंस्थानतोवर्षविभागउपवर्ण्यते १ जंबूद्वीपोयंयावत्प्रमाणविस्तारस्तावताक्षारोदधिनापरिवेष्टितोयथामेरुर्जंब्वाख्येनलवणोदधिरपिततोद्विगुणविशालेनप्लक्षाख्येनपरिक्षिप्तोयथापरिखाबाह्योपवनेनप्लक्षोजंबूप्रमाणोद्वीपाख्याकरोहिरण्मयउत्थितोयत्राग्निरुपास्तेसप्तजिह्वस्तस्याधिपतिःप्रियव्रतात्मजइध्मजिह्वःस्वंद्वीपंसप्तवर्षाणिविभज्यसप्तवर्षनामभ्यआत्मजेभ्यआकलय्यस्वयमात्मयोगेनोपरराम२ शिवंयशस्यंसुभद्रंशांतंक्षेममममृतमभयमितिवर्षाणितेषुगिरयोनद्यश्चसप्तैवाभिज्ञाताः ३ मणिकूटोवज्रकूटइंद्रसेनोज्योतिष्मान्सुपर्णोहिरण्यष्ठीवोमेघमालइतिसेतुशैलाःअरुणानृम्णांगिरसीसावित्रीसुप्रभाताऋतंभरासत्यंभराइतिमहानद्यःयासांजलोपस्पर्शनाविधूतरजस्तमसोहंसपतंगोर्ध्वायनसत्यांगसंज्ञाश्चत्वारोवर्णाःसहस्रायुषोविबुधोपमसंदर्शनप्रजननाःस्वर्गद्वारंत्रय्याविद्ययाभगवंतंत्रयीमयंसूर्यमात्मानंयजंते ४ प्रत्नस्यविष्णोरूपंयत्सत्यस्यर्तस्यब्रह्मणः अमृतस्यचमृत्योश्चसूर्यमात्मानमीमहीति ५ प्लक्षादिषुपंचसुपुरुषाणामायुरिंद्रियमोजःसहोबलंबुद्धिर्विक्रमइतिचसर्वेषामौत्पत्तिकीसिद्धिरविशेषेणवर्तते ६ प्लक्षःस्वसमानेनेक्षुरसोदेनावृतोयथातथाद्वीपोपिशाल्मलोद्विगुणविशालःसमानेनसुरोदेनावृतःपरिवृंक्ते ७

चूर्णिका

॥ श्रीशुकउवाच ॥ अतःपरं प्लक्षादिद्वीपानां प्रमाणलक्षणसंस्थानतो वर्षविभागः उपवर्ण्यते १ जंबुद्वीपोयंलक्षयोजनपरिमाणः तावताक्षारोदधिनापरिवेष्टितः एवंपूर्वस्मात् उत्तराद्विगुणाः अतःपरंद्विलक्षयोजनमितोप्लक्षद्वीपः तावन्मानेनइक्षुरसोदेनवेष्टितः तत्रापिद्वीपाख्याकरः जंबूप्रमाणः प्लक्षः आस्ति तत्रहिरण्मयः अग्निः तिष्ठति तस्य अधिपतिःप्रियव्रतपुत्रः इध्मजिह्वः सः स्वद्वीपवर्षाणिसप्तधाविभज्यवर्षनामभ्यःपुत्रेभ्यः अदात् स्वयं चयोगेनउपरराम २ वर्षपुत्रनामानि शिवं यशस्यं सुभद्रं शांतं क्षेमं अमृतं अभयमितिवर्षाणितेषुवर्षेषुगिरयःनद्यश्च सप्तैव ३ मणिकूटःवज्रकूटइंद्रसेनःज्योतिष्मान्सुपर्णःहिरण्यष्ठीवःमेघमालः इतिसप्तगिरयःअरुणा नृम्णा आंगिरसीसावित्रीसुप्रभात ऋतंभरा सत्यंभराएवंसप्तमहानद्यः यासांजलस्पर्शेनाविधूतरजस्तमसः हंसः पतंगः ऊर्ध्वायनः सत्यांगः एतेचत्वारोवर्णाः सहस्रायुषः तेत्रय्याविद्ययासूर्यरूपंहरिंभजंते ४ ५ प्लक्षादिषुपंचसुपुरुषाणांआयुः इंद्रियंओजः सहः बलंपराक्रमः सर्वेषांऔत्पत्तिकीसिद्धिर्वर्तते ६ अतः परंशाल्मलोद्वीपः पूर्वस्मात् द्विगुणः तावन्मानेनसुरोदेनवेष्टितः ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुपर्णोसिगरुत्मान्'त्रिवृत्तेशिर इत्यादिश्रुतेः । छंदोभिः स्वावयवभूतैः श्रीविष्णुंस्तौतीतिछंदस्तुत्तस्य (पतत्रिराजस्य) गरुडस्यनिलयंस्थानम् । साशाल्मली (तस्य) द्वीपस्यहूतयेव्यपदेशाय (यत्रशाल्मलीतमुत्पन्नावर्ततेसद्वीपः शाल्मलइति) ८ ९ १० (तेषांसुतानांनामानीवनामानियेषांतानि । वेदेनयजंतेवेदपाठेनोपासते) ११ स्वगोभिः स्वरश्मिभिः अंधः अन्नं । सोमोनः राजाअस्तु अभिमुख्येनभवतु । ह्रस्वपाठेत्वविवक्षयासंध्यभावः १२ एवंसुरोदाद्बहिर्घृतोदेनावृतः कुशद्वीपइत्यन्वयः । (देवकृतईश्वरेणविहितः पूर्वः शाल्मलोयथासुरोदेनावृतस्तथा) स्वशष्पाणिस्ववालतृणा निनिजकोमलशिखाइत्यर्थः तपांरोचिषा । १३।१४।१५।१६

यत्रहवैशाल्मलीप्लक्षायामायस्यांवावकिलनिलयमाहुर्भगवतश्छंदःस्तुतःपतत्रिराजस्यसाद्वीपहूतयेउपलक्ष्यते ८ तद्वीपाधिपतिःप्रियव्रतात्मजोयज्ञबाहुः स्वसुतेभ्यःसप्तभ्यस्तन्नामानिसप्तवर्षाणिव्यभजत्सुरोचनंसौमनस्यंरमणकंदेववर्षपारिभद्रमाप्यायनमविज्ञातमिति ९ तेषुवर्षाद्रयोनद्यश्चसप्तैवाभिज्ञाताः स्वरसःशतशृंगोवामदेवः कुंदोमुकुंदःपुष्पवर्षःसहस्रश्रुतिरितिअनुमतिःसिनीवालीसरस्वतीकुहूरजनीनंदाराकेति १० तद्वर्षपुरुषाःश्रुतधरवीर्यधरवसुंधरे षंधरसंज्ञाभगवंतंवेदमयंसोममात्मानंवेदेनयजंते ११ स्वगोभिःपितृदेवेभ्योविभजन्कृष्णशुक्लयोः ॥ प्रजानांसर्वासांराजांऽधःसोमोनआस्त्विति १२ एवंसुरोदाद्बहिस्तद्द्विगुणःसमानेनावृतोघृतोदेनयथापूर्वःकुशद्वीपोयस्मिन्कुशस्तंबोदेवकृतस्तद्वीपाख्याकरोज्वलनइवापरःस्वशष्परोचिषादिशोविराजय ति १३ तद्वीपपतिःप्रैयव्रतोराजन्हिरण्यरेतोनामस्वंद्वीपंसप्तभ्यःस्वपुत्रेभ्योयथाभागंविभज्यस्वयंतपआतिष्ठतवसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतवि विक्तवामदेवनामभ्यः १४ तेषांवर्षेषुसीमागिरयोनद्यश्चाभिज्ञाताःसप्तसप्तैवचक्रश्चतुःशृंगःकपिलश्चित्रकूटोदेवानीकऊर्ध्वरोमाद्रविणइतिरसकुल्यामधु कुल्यामित्रविंदाश्रुतविंदादेवगर्भाघृतच्युतामंत्रमालेति १५ यासांपयोभिःकुशद्वीपौकसःकुशलकोविदाभियुक्तकुलकसंज्ञाभगवंतंजातवेदस्वरूपिणंकर्म कौशलेनजयंते १६

चूर्णिका यत्रशाल्मलीवृक्षोस्ति द्वीपाख्याकरः यस्मिन् गरुडनिलयमाहुः ८ तद्वीपपतिः प्रियव्रतपुत्रोयज्ञबाहुः स्वंद्वीपंसप्तधाकृत्वा पुत्रेभ्यः अदात् सुरोचनं सौमनस्यं रमणकं देववर्षं पारिभद्रं आप्यायनं अविज्ञातं ७।१ तत्रपर्वताः स्वरसः शतशृंगः वामदेवः कुंदः कुमुदः पुष्पवर्षः सहस्रश्रुतिः ७ नद्यश्चसप्त अनुमतिः सिनीवालीस रस्वती कुहूः रजनी नंदा राकेति७ ।१०तद्वर्षपुरुषाः श्रुतधरः वीर्यधरः वसुंधरः इषंधरः भगवंतंसोमंवेदेनयजंते११ १२ततः कुशद्वीपः अष्टलक्षयोजनः तावता घृतोदेन आवृतः तत्रद्वीपाख्याकरः कुशस्तंबोस्ति १३ यत्रद्वीपपतिः प्रियव्रतपुत्रोहिरण्यरेताः स्वंद्वीपंसप्तधा कृत्वा पुत्रेभ्यः अदात् १४ वसुः १ वसुदानः २ दृढरुचिः ३ नाभिगु प्तः ४ स्तुत्यव्रतः ५ विभक्तः ६ वामदेवः ७ इतितत्रसीमाचलाः सप्त चक्रः १ चतुःशृंगः २ कपिलः ३ चित्रकूटः ४ देवानीकः ५ ऊर्ध्वरोमा ६ द्रविणः ७ इति १५ नद्यः रसकुल्या १ मधुकुल्या २ मित्रविंदा ३ श्रुतविंदा ४ देवगर्भा ५ घृतच्युता ६ मंत्रमाला ७ इतितत्रवर्णाः कुशः १ कोविदः २ अभियुक्तः ३ कुलकसंज्ञइति एतेअग्निरूपंदेवंयजंते ॥ १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२०॥

हेजातवेदस्त्वंसाक्षात्परस्यब्रह्मणोहरेर्हव्यवाट्आसि (हाविर्नेतासि) अतः (पुरुषस्यहरेरंगभूतानाम्) देवानांयज्ञेनपुरुषमेवयज । अंगानांनाम्नादत्तम् (हविः पुरुषाय) अंगिनेसमर्पयेत्यर्थः १७ उपक्लृप्तो वेष्टितः यथाकुशद्वीपोघृतोदेनवृतः १८ गुहस्यकार्तिकेयस्यप्रहरणेन (शक्त्याख्येन) आयुधेनउन्मथिताः (पीडिता) नितंबाः कुंजानिच (लतादिपिहितोदराणिस्थलानि) यस्य १९ (रिक्थादान्पुत्रान्) स्वयंभगवान्ज्ञानी । परमकल्याणंयशोयस्यतस्य । २०।२१ आपोमयंअम्मयंदेवम् । २२ हेआपः पुरुषवीर्याः ईश्वराल्लब्धसामर्थ्याः स्थभवथ । अतएवभूर्भुवःस्वः त्रैलोक्यंपुनंत्यः ताः भवत्योनोऽस्माकंस्पृशतांस्पर्शनंकुर्वतां (आचमनादिनासेवमानानाम्) भुवः शरीराणिपुनंतुयतआत्मनास्वरूपेणैवअमीवघ्नीः पापहंत्र्यः २३ दध्नोमंडंरसः सएवोदकंयस्य (तेनपरीतः आवृतः) यस्यपर्णान्यंतःखरस्पर्शानिबहिर्मृदुस्पर्शानिसशाकोनामवृक्षविशेषः (स्वद्वीपस्याख्याकरः) २४

॥७६॥

श्लोकाः १७/२४

परस्यब्रह्मणःसाक्षाज्जातवेदोसिहव्यवाट् ॥ देवानांपुरुषांगानांयज्ञेनपुरुषंयजेति १७ तथाघृतोदाद्बहिःक्रौंचद्वीपोद्विगुणःस्वसमानेनक्षीरोदेनपरितउपक्लृप्तोवृतोयथाकुशद्वीपोघृतोदेन ॥ यस्मिन्क्रौंचोनामपर्वतराजोद्वीपनामनिर्वर्तकआस्ते १८ योसौगुहप्रहरणोन्मथितनितंबकुंजोपिक्षीरोदेनासिच्यमानोभगवतावरुणेनाभिगुप्तोविभयोबभूव १९ तस्मिन्नपिप्रैय्यव्रतोघृतपृष्ठोनामाधिपतिःस्वेद्वीपेवर्षाणिसप्तविभज्यतेषुपुत्रनामसुसप्तरिक्थादान्वर्षपान्निवेश्यस्वयंभगवान्भगवतःपरमकल्याणयशसआत्मभूतस्यहरेश्चरणारविंदमुपजगाम २० आमोमधुरुहोमेघपृष्ठःसुधामाभ्राजिष्ठोलोहितार्णोवनस्पतिरितिघृतपृष्ठसुतास्तेषांवर्षगिरयःसप्तसप्तैवनद्यश्चाभिख्याताःशुक्लोवर्धमानोभोजनउपबर्हिणोनंदोनंदनःसर्वतोभद्रइतिअभयाअमृतौघाआर्यकातीर्थवतीवृत्तिरूपवतीपवित्रवतीशुक्लेति२१यासामंभःपवित्रममलमुपयुंजानाःपुरुषऋषभद्रविणदेवकसंज्ञावर्षपुरुषाआपोमयंदेवमपांपूर्णेनांजलिनायजंते२२आपःपुरुषवीर्याःस्थपुनंतीर्भूर्भुवसुवः ॥ तानःपुनीतामीवघ्नीःस्पृशतामात्मनाभुवइति २३ एवंपुरस्तात्क्षीरोदात्परितउपवेशितःशाकद्वीपोद्वात्रिंशल्लक्षयोजनायामःसमानेनचदधिमंडोदेनपरीतोयस्मिन्शाकोनाममहीरुहःस्वक्षेत्रव्यपदेशकोयस्यहमहासुरभिगंधस्तंद्वीपमनुवासयति २४

॥७६

चूर्णिका

१७ ॥ ततः षोडशलक्षयोजनः क्रौंचद्वीपः तावताक्षीरोदेन आवृतः यत्रक्रौंचपर्वतो द्वीपाख्याकरोऽस्ति १८ १९ तत्रापिप्रियव्रतपुत्रः घृतपृष्ठः स्वंद्वीपंसप्तधा विभज्य पुत्रेभ्यः अदात् २० ॥ आमः १ मधुसहः २ मेघपृष्ठः ३ सुधामा ४ भ्राजिष्ठः ५ वनस्पतिः ६ लोहितार्णः ७ इतितत्रसीमाचलाः ७ शुक्लः१ वर्धमानः २ भोजनः ३ उपबर्हणः ४ नंदः ५ नंदनः ६ सर्वतोभद्रः ७ इति २१ नद्यः ७ अभया १ अमृतौघा २ आर्यका ३ तीर्थवती३ रूपवती ५ पवित्रवती ६ शुक्लइति ७ तत्रवर्णाः ४ पुरुषः १ ऋषभः २ द्रविणः ३ देवकः ४ इतितेचसदावरुणं देवंअंजलिनायजंते २२ २३ ततः शाकद्वीपःद्वात्रिंशल्लक्षयोजनः तावन्मानेनदाधिमंडोदेन आवृतः यत्रशाकवृक्षः द्वीपाख्याकरोस्ति २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पुत्रनामानिपुत्रनामसदृशनामानि) २५ २६ २७ आत्मकेतुभिः प्राणादिवृत्तिभिः (स्फुटंदृश्यमनमिदमित्यर्थः । यद्वा यद्वशेवर्तमानान्नः अस्मान्पातु) २८ ज्वलमशिखावत्अमलानांकनकप
त्राणामयुतानामयुतानियस्यतत् (देवानामहोरात्राभ्यांउत्तरदक्षिणायनाभ्यामित्यर्थः) ३९ (भगवत्कर्मशीलः भगवद्भक्तिनिष्ठः) ३०३१ब्रह्मरूपिणंकमलासनमूर्तिंसकर्मकेनब्रह्मसालोक्यादिसाधनस
हितेन ३२ कर्ममयंकर्मफलरूपम् । ब्रह्मलिंग्यतेयस्मात् (तत्ब्रह्मलिंगंब्रह्मबोधकम्) एकस्मिन्नेवपरमेश्वरेअंतोनिष्ठायस्यतत्अतएववस्तुतो (अद्वयम्) अद्वैतम् (ब्रह्म) ३३ ततः शुद्धोदात्परस्तात्लो
कः सूर्याद्यालोकवान्देशः अलोकस्तद्रहितः तयोरंतरालेमध्येतयोर्विभागार्थमित्यर्थः । ३४

श्लोकाः २५/३४

॥७७॥ तस्यापिप्रैयव्रतएवाधिपतिर्नाम्नामेधातिथिःसोपिविभज्यसप्तवर्षाणिपुत्रनामानितेषुस्वात्मजान्पुरोजवमनोजवपवमानधूम्रानीकाचित्ररेफबहुरूपविश्वधारसं
ज्ञान्निधाय्याधिपतीन्स्वयंभगवत्यनंतआवेशितमतिस्तपोवनंप्रविवेश २५ एतेषांवर्षमर्यादागिरयोनद्यश्चसप्तसप्तैवईशानउरुशृंगोबलभद्रःशतकेसरःसह
स्रस्रोतोदेवपालोमहानसइतिअनघाऽऽयुर्दाउभयस्पृष्टिरपराजितापंचपदीसहस्रस्रुतिर्निजधृतिरिति २६ तद्वर्षपुरुषाऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानो
भगवंतंवाय्वात्मकंप्राणायामविधूतरजस्तमसःपरमसमाधिनायजंते २७ अंतःप्रविश्यभूतानियोबिभर्त्यात्मकेतुभिः ॥ अंतर्यामीश्वरःसाक्षात्पातुनोयद्व
शेस्फुटम् २८ एतमेवदधिमंडोदात्परतःपुष्करद्वीपस्ततोद्विगुणायामःसमंततउपकल्पितःसमानेनस्वादूदकेनसमुद्रेणबहिरावृतोयस्मिन्बृहत्पुष्करंज्वलन
शिखामलकनकपत्रायुतायुतंभगवतःकमलासनस्याध्यासनंपरिकल्पितम् २९ तद्द्वीपमध्येमानसोत्तरनामैकएवार्वाचीनपराचीनवर्षयोर्मर्यादाचलोऽयुत
योजनोच्छ्रायायामोयत्रतुचतस्रषुदिक्षुचत्वारिपुराणिलोकपालानामिंद्रादीनांयदुपरिष्टात्सूर्यरथस्यमेरुंपरिभ्रमतःसंवत्सरात्मकंचक्रंदेवानामहोरात्राभ्यांप
रिभ्रमति ३० तद्द्वीपस्याप्यधिपतिःप्रैयव्रतोवीतिहोत्रोनामैतस्यात्मजौरमणकधातकिनामानौवर्षपतीनियुज्यस्वयंपूर्वजवद्भगवत्कर्मशीलएवास्ते ३१
तद्वर्षपुरुषाभगवंतंब्रह्मरूपिणंसकर्मकेनकर्मणाऽऽराधयंतीदंचोदाहरंति ३२ यत्तत्कर्ममयंलिंगंब्रह्मलिंगंजनोर्चयेत् ॥ एकांतमद्वयंशांतंतस्मैभगवतेनमइति
३३ ॥ ॥ ऋषिरुवाच ॥ ॥ ततःपरस्ताल्लोकालोकनामाचलोलोकालोकयोरंतरालेपरितउपक्षिप्तः ३४

चूर्णिका

तत्रापिप्रियव्रतपुत्रोमेधातिथिः स्वंद्वीपंसप्तधा कृत्वापुत्रेभ्यः अदात् पुरोजवः १ मनोजवः २ पवमानः ३ धूम्रानीकः ४ चित्ररेफः ५ बहुरूपः ६ विश्वधारः ७ इति
॥२५॥ तत्रसीमापर्वताः सप्तईशानः १ उरुशृंगः २ बलभद्रः ३ शतकेसरः ४ सहस्रस्रोतः ५ देवपालः ६ महानसइति नद्यः अनघा १ आयुर्दा २ उभय
स्पृष्टिः ३ अपराजिता ४ पंचपदी ५ सहस्रस्रुतिः ६ निजधृतिः ७ इति २६ तद्वर्षपुरुषाः ऋतव्रतः १ सत्यव्रतः २ दानव्रतः ३ अनुव्रतः ४ वाय्वात्मकंभगवं
तं समाधिनायजंते २७ २८ ततःपुष्करद्वीपः चतुःषष्टिलक्षयोजनः तावतास्वादुजलोदेनावृतः तत्रबृहत्पुष्करं कमलासनस्य आसनं परिकल्पितं तद्द्वीपमध्ये मानसोत्त
तरनामाएकः शैलः अयुतयोजनोच्छ्रायः यत्रचतुर्दिक्षु इंद्रादीनांचतस्रः पुर्यः संति तदुपरिसूर्यरथचक्रंभ्रमति ३० यत्रप्रियव्रतपुत्रो वीतिहोत्रःस्वंद्वीपंद्विधाविभज्यरमणकधातकिना
मभ्यां पुत्राभ्यांददौस्वयंचभगवत्कर्मशीलः आस्ते ३१ तत्रपुरुषाः ब्रह्मरूपंदेवंयजंते ३२ ३३ ॥ श्रीशुकउवाच ॥ ॥ ततःशुद्धोदात्परतः लोकालोकपर्वतः अस्ति ३४

॥७७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ततः परस्तादित्युक्तंतदेवकियता अंतरेणेत्यपेक्षायांतदंतर्वर्तिनींभूमिमाह । यावन्मानसोत्तरमेवारतर सार्धसप्तलक्षोत्तरंसार्धकोटिपरिमितं तावतीभूः शुद्धोदात्परतोस्ति । तत्रचप्राणिनोपिसंति ततः कांचनीभूमिरन्यास्तीत्यर्थः साचैकोनचत्वारिंशल्लक्षोत्तरकोट्यष्टकपरिमिताज्ञेया । अर्धपुष्करद्वीपेन सह शुद्धोदः षण्णवतिलक्षाणि । एवंहिसतिमेरुलोकालोकयोरंतरंसार्धद्वादशकोटिपरिमितंवक्ष्य माणमुपपन्नंभवति । एतदेवशैवतंत्रेपूक्तं। "कोटिद्वयंत्रिपंचाशल्लक्षाणिचततःपरं । पंचाशचसहस्राणिसप्तद्वीपाससागरा । ततोहेममयीभूमिर्दशकोट्योवरानने । देवानांक्रीडनार्थायलोकालोकस्ततःपर"मिति अत्रचदशकोटित्वंपूर्वोक्तभूम्यासहद्रष्टव्यम् । सर्वसत्त्वपरिहृतेतिदेवव्यतिरेकेणेतिविज्ञेयं देवानांक्रीडनार्थायेत्युक्तत्वात् (प्रहितःप्रक्षिप्तः) ३५ (लोकालोकइतिसमाख्याअन्वर्थसंज्ञाअनेनहि अवस्था प्यते) । ३६ (सलोकालोकाचलः) लोकत्रयस्यांतेपरितोमर्यादारूपोविहितः यस्मात्प्रतिबंधकात्सूर्यआदिर्येषां ध्रुवोऽपवर्गोंतोयेषां । आवितन्वानाः समंतात्प्रकाशयंतः (पराचीनाभवितुंनो त्सहंते) परतोगंतुंनशक्नुवंतितावदुन्नहनमुत्सेधः तदनुरूपआयामश्चविस्तारोयस्य । ध्रुवादप्युच्छ्रितत्वात्त्रिलोकीमर्यादाभूतइत्यर्थः ३७ (संस्थास्वरूपस्थितिः तयाचविचिंतितः) सोयंतुलोकालोका चलः तुरीयभागः चतुर्थोंशः सार्धद्वादशकोट्यः मेरोरेकत (आलोकालोक) इतिद्रष्टव्यम् ३८ आशासुदिक्षु येऽधिनिवेशिताः स्थापितास्तेआसते ३९ तेषांदिग्गजानां स्वविभूतीनांस्वांशभूतानांमहें द्रादीनांचविविधवीर्योपबृंहणायसकललोकस्वस्तयेचभगवान्तस्मिन्नास्तइत्यन्वयः । किंकुर्वन् आत्मनः स्वस्ययद्विशुद्धंसत्त्वं तत्संधारयमाणः आविष्कुर्वन् । कीदृशंधर्मज्ञानादिन्यष्टमहासिद्धय श्चोपलक्षणं यस्यतत् । दोर्दंडैरुपलक्षितः सन् महाविभूतेः परमैश्वर्यस्य पतित्वादेकयैवमूर्त्या (सर्वलोककल्याणाय) समंतादास्ते ४०

||२०|| ||७८||

श्लोकाः ३५/४०

यावन्मानसोत्तरमेर्वोरंतरंतावतीभूमिःकांचन्यन्यादर्शलोपमायस्यांप्रहितःपदार्थोनकथंचित्पुनःप्रत्युपलभ्यतेतस्मात्सर्वसत्त्वपरिहृतासीत् ३५ लोका लोकइतिसमाख्यायदनेनाचलेनलोकालोकस्यांतर्वर्तिनावस्थाप्यते ३६ सलोकत्रयांतेपरितईश्वरेणविहितोयस्मात्सूर्यादीनांध्रुवापवर्गाणांज्योतिर्गणानां गभस्तयोर्वाचीनास्त्रींल्लोकानावितन्वानानकदाचित्पराचीनाभवितुमुत्सहंतेतावदुन्नहनायामः ३७ एतावाँल्लोकविन्यसोमानलक्षणसंस्थाभिर्विचिंतितःक विभिःसतुपंचाशत्कोटिगणितस्यभूगोलस्यतुरीयभागोयंलोकालोकाचलः ३८ तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाखिलजगद्गुरुणाऽधिनिवेशिताये द्विरदपतयऋषभःपुष्करचूडोवामनोपराजितइतिसकललोकस्थितिहेतवः ३९ तेषांस्वविभूतीनांलोकपालानांचविविधवीर्योपबृंहणायभगवान्परमम हापुरुषोमहाविभूतिपतिरंतर्याम्यात्मनोविशुद्धसत्त्वंधर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणंविष्वक्सेनादिभिःस्वपार्षदप्रवरैःपरिवारितोनिजवरायुधो पशोभितैर्निजभुजदंडैः संधारयमाणस्तस्मिन्गिरिवरेसमंतात्सकललोकस्वस्तयआस्ते ४०

चूर्णिका

यावन्मानसोत्तरमेर्वोरंतरंएकाकोटि सप्तलक्षाणी तावतीभूमिः शुद्धोदात्परास्ति तत्रप्राणिनोपिसंतिततः आदर्शतलोपमाकांचनीभूःअन्यास्तिसाच एकोनचत्वारिंशत्लक्षोत्तरको ट्यष्टकमिताप्राणिवर्जिताचज्ञेया ३५ ततःलोकालोकपर्वतः सःलोकत्रयस्यमर्यादारूपः ईश्वरेणविहितः तेनप्रतिबंधकेनसूर्यादिज्योतिर्गणानां गभस्तयः अर्वाचीनाः ध्रुवप दादप्युच्छ्रितः ३६ ३७ सचमेरोः एकतः सार्द्धद्वादशकोटिमितः अन्यतश्चतावान् ३८ तदुपरिचतुर्दिक्षुद्विरदपतयः ऋषभः पुष्करचूडः वामनः अपराजितइति एते लोकस्थितिहेतवः संति ३९ तस्मिन्पर्वतेलोकरक्षणाय आकल्पं भगवान् आस्ते ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२१॥

नन्वंतर्यामिणा अंतस्थेनैव सर्वं कर्तुं शक्यं किंतस्यबहिःसमंतादवस्थानेनेत्याशंक्यतस्यार्थं स्वयमेवव्याचष्टे। आत्मनोयोगमायया विरचिता या विविधालोकयात्रातस्या गोपीथायरक्षणाय एषभगवा
न्एवंभूतंविभूतिभिः सहआकल्पंप्रलयपर्यंतं वेषंगतः लीलयाप्राप्तः इतिसमंतादास्तेइत्यस्यार्थः ४१योमेरुलोकालोकयोरंतर्विस्तारएतेम लोकालोकाचलाद्बहिर्यत्अलोकपरिमाणं(तच्चव्याख्यातम्।तद्धि)
मेरोरेकतः सार्धद्वादशकोट्यः । ततोलोकालोकात्अलोकाद्वापरस्तात् विशुद्धांद्विजपुत्रानयने अर्जुनस्य श्रीकृष्णेन प्रदर्शिताम् ४२ विस्तरेणोक्तं ब्रह्मांडमानं सर्वतोपिनिरूपयति । अंडमध्यगतः
किंतन्मध्यं तदाह । द्यावाभूम्योः पूर्वोत्तरकपालयोर्यदंतरंमध्यस्थानं।सर्वतः पंचविंशतिकोट्यःस्युः ४३ अंडमध्यावस्थानेकारणंतन्नामानिर्वचनेनाह मृतेअचेतनेएषसूर्योवैराजरूपेणयस्मात्प्रविष्टः(तस्मा
न्मार्तंडइतियद्यस्माद्धिरण्यांडसमुद्भवस्तस्माद्धिरण्यगर्भइतिंचव्यपदेशः । यद्वायद्यथाहिरण्यांडसमुद्भवोविरिंच्योहिरण्यगर्भउच्यतेतथेति) ४४ किंचसूर्येणैवविभज्यंतेदिशः खंअंतरिक्षंभिदाअन्योपिवि
भागः स्वर्गापवर्गौभोगमोक्षदेशौरसोकांसिअतलादीनि। ४५ उपासनार्थमाह । देवादीनांसूर्यआत्मदृगीश्वरः नेत्राधिष्ठाताच ४६ ॥ ॥ इतिपंचमस्कंधेटीकायां विंशोध्यायः ॥ ॥ २० ॥
एवमध्यायविंशत्याभूमर्यादानिरूपिता। अतः परंद्युमर्यादापालनंत्रिभिरुच्यते ॥१॥ एकविंशेरवेःकालचक्रेणभ्रमतोन्वहम्। स्वगत्याराशिसंचारैर्लोकयात्रानिरूप्यते २। एतावान्विस्तारेणकोट्यः पंचाशत्।
उत्सेधेनपंचाविंशतिः (संनिवेशः। विन्यासाविस्तारइत्यर्थः) १ द्विदलयोर्मध्येयथैकस्यमानेनअपरस्यमानमुपादिश्यतेतद्वत्तेअंतरेणतयोर्मध्येतदुभयसंधितंताभ्यामुभयतः संलग्नम् २

श्लोकाः

आकल्पमेवंवेषंगतएषभगवानात्मयोगमाययाविरचितविविधलोकयात्रागोपीथायेत्यर्थः ४१ योंतर्विस्तारएतेनह्यलोकपरिमाणंचव्याख्यातंयद्बहिर्लो
कालोकाचलात् ततःपरस्ताद्योगेश्वरगतिंविशुद्धामुदाहरंति ४२ अंडमध्यगतःसूर्योद्यावाभूम्योर्यदंतरम् ॥ सूर्यांडगोलयोर्मध्येकोट्यःस्युःपंचविंशतिः
४३ मृतेंडएषएतस्मिन्यदभूत्ततोमार्तंडइतिव्यपदेशःहिरण्यगर्भइतियद्धिरण्यांडसमुद्भवः ४४ सूर्येणहिविभज्यंतेदिशःखंद्यौर्महीभिदा ॥ स्वर्गापवर्गौ ४१/२
नरकारसौकांसिचसर्वशः४५देवतिर्यङ्मनुष्याणांसरीसृपसवीरुधाम् ॥ सर्वजीवनिकायानांसूर्यआत्मादृगीश्वरः ४६ इतिश्रीभागवतेमहापुराणेपंचमस्कंधे
भुवनकोशवर्णनेसमुद्रद्वीपवर्षसन्निवेशपरिमाणलक्षणोविंशतितमोध्यायः ॥ २० ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ एतावानेवभूवलयस्यसन्निवेशःप्रमा
णलक्षणतोव्याख्यातः एतेनहिदिवोमंडलमानंतद्विदउपदिशंति १ यथाद्विदलयोर्निष्पावादीनांतेअंतरेणांतरिक्षंतदुभयसंधितम् २

चूर्णिका

एतेनह्यलोकपरिमाणंचव्याख्यातम् ततः लोकालोकात् अलोकाद्वापरतः योगेश्वराणांविशुद्धांगतिंद्विजपुत्रानयनेर्जुनस्यश्रीकृष्णेनदर्शितामुदाहरंति ४१ ४२ अंडम ॥७९॥
ध्यगतः सूर्यो द्यावाभूम्योर्यदंतरम् सूर्यांडगोलयोर्मध्येकोट्यःस्युःपंचविंशतिः ४३ ४४ सूर्येणहिविभज्यंतेदिशः खंद्यौर्महीभिदा स्वर्गापवर्गनरकारसौकांसि चसर्वशः
४५ देवतिर्यङ्मनुष्याणांसरीसृपखगवीरुधाम् सर्वजीवनिकायानांसूर्य आत्मादृगीश्वरः ४६ इतिपंचमेविंशः ॥ २० ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ एतावानेव
भूवलयस्यसन्निवेशोव्याख्यातः एतेनहि दिवोमंडलमानंतद्विदः उपदिशंति १ यथाद्विदलयोः निष्पावादीनांतदुभयसंधितंअंतरिक्षंज्ञेयम् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका.

उदगयनादिसंज्ञाभिर्मंदक्षिप्रसमगतिभिर्यथाकालमारोहणादिस्थानेष्वारोहणाद्यभिपद्यमानोमकरादिष्वहोरात्राणिदीर्घह्रस्वसमानानिविधत्ते ३ तत्प्रपंचयतियदेति । अत्यंतवैषम्याभावात्समानानित्युक्तं । सर्वथासाम्यंत्वेकस्यैवाहोरात्रस्य । यद्यपिवृषभमिथुनयोरेवाह्नांवृद्धिःकर्कटादिषुह्रासः तथापिरात्र्यपेक्षयाऽधिकत्वाद्वर्धंतइत्युक्तं । एवंरात्रिवृद्धावपिदिनापेक्षयाह्रसंतीत्युक्तम् । मासिमास्येकैकाघटिकेतिस्थूलदृष्ट्योक्तम् (सौक्ष्म्यंतुगणितग्रंथोक्तचरसाधनेनतत्तद्देशेपृथक्पृथक्द्रष्टव्यम्) वृद्धिह्रासयोः प्रतिमासम् (प्रतिदेशं) वैषम्या (–प्सर्वथैकरूप्यम्) ४ विपर्ययाणीतिअहानिन्यूनानिरात्रयोऽधिकाइत्यर्थः ५तद्वृद्धिह्रासकालमाह यावदिति ६ एवंमंदादिगतिभिः नवकोट्यइतिमेरोरुभयतोमानसोत्तरस्यांतर्विस्तारेणपंचदशलक्षाधिककोटित्रयपरिमितेनेदंपरिमंडलमानमुन्नेयम् । एवंपंचदशभिर्घटिकाभिरित्यादिष्वपित्रैराशिकगणितेनतत्तन्मानमुन्नेयम् । अत्रापेक्षितोविशेषः पुराणांतरादवगंतव्यः । तत्रारोहणादिस्थानानिवायुपुराणेदर्शितानि । ''सर्वग्रहाणांत्रीण्येवस्थानानिद्विजसत्तमाः । स्थानंजरद्गवंमध्यंतथैरावतमुत्तरम् । वैश्वानरंदक्षिणतोनिर्दिष्टमिहतत्त्वतइति''तदेवमध्यमोत्तरदक्षिणमार्गत्रयंप्रत्येकंवीथीत्रयेणत्रिधाभिद्यते । त्रिभिस्त्रिभिरश्विन्यादिनक्षत्रैः नागवीथीगजवीथीऐरावतीचेत्युत्तरमार्गेवीथीत्रयम् । आर्षभीगोवीथीजरद्गवीचेतिवैषुवतेमध्यममार्गेवीथीत्रयम् । अजवीथीमृगवीथीवैश्वानरीचेतिदक्षिणमार्गेवीथीत्रयम् । तदप्युक्तंतत्रैव । ''अश्विनीकृत्तिकायाम्यानागवीथीतिशब्दिता। रोहिण्यार्द्रामृगशिरोगजवीथ्यभिधीयते । पुष्याश्लेषातथादित्यावीथीचैरावतीस्मृता । एतास्तुवीथयस्तिस्रउत्तरोमार्गउच्यते । तथाद्वेचापिफल्गुन्यौमघाचैवार्षभीमता । हस्तश्चित्रातथास्वातीगोवीथीतितुशब्दिता । ज्येष्ठाविशाखानुराधावीथीजारद्गवीमता । एतास्तुवीथयस्तिस्रोमध्यमोमार्गउच्यते । मूलाषाढोत्तराषाढाअजवीथ्यभिशब्दिता । श्रवणंचधनिष्ठाचमार्गीशतभिषक्तथा ।वैश्वानरीभाद्रपदेरेवतीचैवकीर्तिता । एतास्तुवीथयस्तिस्रोदक्षिणोमार्गउच्यते''इतिःअत्रयाम्याभरणी । आदित्याआदितिर्देवताकापुनर्वसुः (शतभिषक्शततारा) मार्गीमृगवीथीत्यर्थः एवंस्थितेउत्तरायणेध्रुवेणयुगाक्षकोटिनिबद्धवायुपाशद्वयाकर्षणेरथस्यारोहणम् । तदाभ्यंतरमंडलप्रवेशोगतिर्मांद्यंचेतिदिनवृद्धिः रात्रिह्रासश्च । दक्षिणायनेचपाशप्रेरणादवरोहणेबहिर्मंडलप्रवेशोगतिशैघ्र्यंचेत्यहोरात्रयोर्विपर्ययः । वैषुवतेतुपाशसाम्यात्समावस्थानेमध्यमंडलप्रवेशोगतिसाम्यंचेत्यहोरात्रयोः साम्यमिति । तथाचपुराणांतरम् ।''आकृष्यतेयदातौतुध्रुवेणसमधिष्ठितौ । तदाभ्यंतरतः सूर्योभ्रमतेमंडलानितु । ध्रुवेणमुच्यमानेनपुनारश्मियुगेनतु । तथैवबाह्यतः सूर्योभ्रमतेमंडलानिचे''ति तदेतदुक्तंयदामेषतुलयोरित्यादिना ॥ उदयास्तादिकंवक्तुमाह । तस्मिन्मानसोत्तरेमेरोः पूर्वतः ऐंद्रींपुरींउपदिशंतीत्यनुषंगः । तासुपुरीषुउदयादीन्युपदिशति । चतुर्दिशमित्युक्तेयेमेरोर्दक्षिणेदेशेतेषामैंद्रीमारभ्यपूर्वादयः येपश्चिमेतेषांयाम्यामारभ्य । येउत्तरेतेषांवारुणीमारभ्य । येपूर्वेतेषांसौम्यामारभ्य ७

॥८०॥

श्लोकाः ३/७

यन्मध्यगतोभगवांस्तपतांपतिस्तपनआतपेनत्रिलोकींप्रतपत्यवभासयत्यात्मभासासएषउदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमानाभिर्गतिभिरारोहणावरोहणसमानस्थानेषुयथासवनमभिपद्यमानोमकरादिषुराशिष्वहोरात्राणिदीर्घह्रस्वसमानानिविधत्ते३यदामेषतुलयोर्वर्ततेतदाहोत्राणिसमानानिभवंतियदावृषभादिषुपंचसुचराशिषुचरतितदाहान्येववर्द्धंतेह्रसतिचमासिमास्येकैकाघटिकारात्रिषु ४ यदावृश्चिकादिषुपंचसुवर्ततेतदाहोरात्राणिविपर्ययाणिभवंति ५ यावद्दक्षिणायनमहानिवर्द्धंतेयावदुदगयनंरात्रयः६ एवंनवकोटयएकपंचाशल्लक्षाणियोजनानांमानसोत्तरगिरिपरिवर्तनस्योपदिशंति॥तस्मिन्नैंद्रींपुरींपूर्वस्मान्मेरोर्देवधानींनामदक्षिणतोयाम्यांसंयमनींनामपश्चाद्वरुणींनिम्लोचनींनामउत्तरतःसौम्यांविभावरींनामतासूदयमध्याह्नास्तमयनिशीथानीतिभूतानांप्रवृत्तिनिवृत्तिनिमित्तानिसमयविशेषेणमेरोश्चतुर्दिशम् ७ ॥८०॥

चूर्णिका अंडमध्यगतः सूर्यः त्रिलोकीं अवभासयति तपतिच सः सौम्ययाम्यायनविषुवसंज्ञाभिः मांद्यशैघ्र्यसमानाभिः गतिभिः उच्चनीचसमस्थानेषुप्राप्तः सन्मकरादिषुराशिषु अहोरात्राणिदीर्घह्रस्वसमानतयाविधत्ते ३ तत्रयदावृषभादिषुपंचराशिषुचरति तदाअहानिवर्धंतेह्रसतिचमासिमासिएकैकाघटिकारात्रिषु४यदावृश्चिकादिपंचसुचरति तदाअहानिन्यूनानिरात्रयोऽधिकाः भवंति५यदामेषतुलयोर्वर्ततेतदादिनरात्रयःसमानाभवंति ६ किंचमेरोःपूर्वतःमानसोत्तरपर्वतेदेवधानीनामऐंद्रीपुरीवर्तते दक्षिणतो याम्यासंयमनी पश्चात्वारुणी ।निम्लोचनीउत्तरतः सौम्याविभावरी तासुउदयमध्याह्नास्तमयनिशीथानि उपदिशंति७

CC-0. In Public Domain. Digitization by eGangotri

भा.पं. तत्रत्यानांमेरुस्थानां (सर्वदामध्याह्नसमयएवेत्यर्थः) सव्येनेति । नक्षत्राभिमुखतयास्वगत्यामेरुंवामतः कुर्वन्नपिप्रदक्षिणावर्तप्रवाहाख्यवायुभ्राम्यमाणज्योतिश्चक्रवशात्प्रत्यहंदाक्षिणतः करोति । अतश्चक्रग अ०
तिवशात्अतिदूरतोभूसंलग्नस्येवदर्शनमुदयः । आकाशमारूढस्येवदर्शनंमध्याह्नः भूमिंप्रविष्टस्येवादर्शनमस्तमयः ततोतिविदूरगमनेनिशीथइति । समुद्रतीरस्थदृष्ट्याच "अह्नचोवाएषप्रातरुदेत्यपः सायंप्रवि
शतीति" श्रुतिव्यवहारोनवस्तुतः । तदुक्तंवैष्णवे । 'उदयास्तमयेचैवसर्वकालंतुसंमुखे । दिशास्वशेषासुतथामैत्रेयविदिशासुच । यैर्यत्रदृश्यतेभास्वान्सतेषामुदयः स्मृतः तिरोभावंचयत्रैतितत्रैवास्तमनंरवेः ।
टीका नैवास्तमनमर्कस्यनोदयः सर्वदासतः । उदयास्तमनाख्यंहिदर्शनादर्शनेरवेः । शक्रादीनांपुरेतिष्ठन्स्पृशत्येषपुरत्रयम् । विकर्णौद्वौविकर्णस्थस्त्रीन्कोणान्द्वेपुरेतथेति अतएवतत्रैवोक्तम् । 'तस्माद्दिश्युत्त ॥२१॥
रस्यांवैदिवारात्रिस्तदेवहि । सर्वेषांद्वीपवर्षाणांमेरुरुत्तरतःस्थितइति" । यतोयत्रचयः पश्यतिसैवतस्यप्राचीतिस्यवामतोमेरुस्तिष्ठतीति । ८ यथोक्तमुदयास्तमनाद्यानियमंदर्शयतियत्रोदेतीत्यादिना स्यंदे
॥८१॥ नस्वेदोद्गमेन । प्रस्वापयतिनिशीथंकरोति (यत्रमध्याह्नस्तत्समानसूत्रनिपातेऽर्धरात्रइत्यर्थः ।) येतंसमनुपश्येरन्प्रस्वापसमानसूत्रस्था- (स्तेपितत्रगतंनपश्यंतितदानिशीथमनुभवंतीत्यर्थः) ९ साधिका
निपंचविंशतिसहस्राधिकानि । (देवधान्याः निर्गत्यसंयमनीं प्रवेक्ष्यन् पंचदशघटीभिः पादोनाष्टत्रिंशल्लक्षोत्तरकोटिद्वयमतिक्रामतीत्यर्थः । एवंचतुर्गुणितान्येतानिएकपंचाशल्लक्षाधिकनवकोटिसं
ख्यानीतिज्ञातव्यं) १० सहवासहैव । यद्यपिवस्तुतः सूर्यस्यापिनक्षत्रैः सहैवोदयास्तमयौतथापितस्यतत्साहित्यादर्शनात्सोमादीनामेवतत्साहित्यमुक्तम् ११ त्रयीमयइत्याद्युपासनार्थमुक्तम् १२
द्वादशमासाअरायस्य । षड्ऋतवोनेमयोयस्य । त्रीणिचातुर्मास्यानिनाभयोयस्य । (मानसोत्तरे) कृतइतरभागोयस्य । (यत्रेतरभागेरविरथचक्रंप्रोतम्) मानसोत्तरगिरौलक्षार्धादुपरिवायुबद्धभ्र
माविविद्रष्टव्यम् । चक्रंवा तावदुच्छ्रितमितिमंतव्यम् । अन्यथाऽयुतमात्रोच्छ्रायत्वान्मानसोत्तरस्यमेरोश्चतुरशीत्युच्छ्रायत्वादक्षस्यसाम्यानुपपत्तेः । १३

तत्रत्यानांदिवसमध्यंगतएवसदादित्यस्तपतिसव्येनाचलंदक्षिणेनकरोति८यत्रोदेतितस्यहसमानसूत्रनिपातेनिम्लोचति॥यत्रक्वचनस्पंदेनाभितपतितस्यहै श्लोकाः
षसमानसूत्रनिपातेप्रस्वापयतितत्रगतंनपश्यंतियेतंसमनुपश्येरन् ९ यदाचैंद्र्याःपुर्याःप्रचलतिपंचदशघटिकाभिर्याम्यांसपादकोटिद्वयंयोजनानांसार्द्धद्वाद
शलक्षाणिसाधिकानिचोपयाति १० एवंततोवारुणींसौम्यामैंद्रींचपुनस्तथाऽन्येचग्रहाःसोमादयोनक्षत्रैःसहज्योतिश्चक्रेसमभ्युद्यंतिसहवानिम्लोचंति ११ ८/१३
एवंमुहूर्तेनचतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानिसौरोरथस्त्रयीमयोऽसौचतसृषुपरिवर्ततेपुरीषु १२ यस्यैकंचक्रंद्वादशारंषण्नेमित्रिणाभिसंवत्सरात्मकंसमा
मनंतितस्याक्षोमेरोर्मूर्द्धनिकृतोमानसोत्तरेकृतेतरभागोयत्रप्रोतंरविरथचक्रंतैलयंत्रचक्रवद्भ्रमन्मानसोत्तरगिरौपरिभ्रमति १३

चूर्णिका मेरुस्थानांतुसदैवमध्याह्नः किंचनक्षत्राभिमुखतयास्वगत्यामेरुंवामतः कुर्वन्नपिचक्रगतिवशात् प्रत्यहंदक्षिणतः करोति ८ यत्रोदेति तस्यसमानसूत्रनिपाते अस्तं
याति ९ यत्रमध्याह्नंकरोति तत्समानसूत्रनिपातेनिशीथं करोति १० यदाइंद्रपुर्याः प्रचलति सूर्यः तदापंचदशघटिकाभिः संयमनीपादोनत्रयोदशलक्षयोजनाधिकसपा
दकोटिद्वयंयोजनानि याति २३ ७७ ५१ १० ७ एववारुणींसौम्यामैंद्रींच तथान्येसोमादिग्रहाः नक्षत्रैः सहज्योतिश्चक्रेउद्यंतिनिम्लोचंति ११ एवंसूर्यरथः मुहू
र्तेन अष्टशताधिकचतुस्त्रिंशल्लक्षयोजनानिचतसृषुपुरीषुपरिवर्तते १२ यस्यैकंचक्रंसंवत्सरात्मकंसमामनंति तस्यरथस्यअक्षः मेरुमूर्धनिकृतोत्तरभागः मानसोत्तरेकृतेतरभागः ॥८१॥
यत्रप्रोतंरविरथचक्रंतैलयंत्रवत् मानसोत्तरागिरौपरिभ्रमति १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. पं. तस्मिन्नक्षेचक्रप्रांतेकृतमूलः निबद्धपूर्वभागःप्रथमाक्षोमेरुमानसोत्तरायतः सार्धसप्तलक्षाधिकसार्धकोटिप्रमाणः तस्यतुर्यमानेनसार्धसप्तत्रिंशसहस्राधिकैकोनचत्वारिंशल्लक्षमानेनध्रुवेकृतः वायुपाशेननिब अ०
द्धउपरिभागोयस्य १४ नीडउपवेशस्थानंगायत्र्यादिछंदोनामानः अरुणेमयोजिताः संतोदेवंवहंति १५ पुरस्तात्स्थितोपिपश्चात्प्रत्यङ्मुखआस्ते यद्वा यत्सूर्यस्यपुरस्तात्तत्तस्यैवपश्चिमत्वात्पश्चादित्युक्तं ।
(यद्वा सवितुः पुरस्तादश्वानांपश्चात्) अश्वस्थानंचवायुनोक्तं । "सप्ताश्वरूपच्छंदांसिवहंतेवामतोरवेः । चक्रपक्षनिबद्धानिचक्रेचाक्षःसमाहित" इति १६ सूक्तवाकायसुभाषिताय १७ एकैकशश्चतुर्दश ।
टीका द्वंद्वशः सप्तगणाः संतोमासिमास्युपासतइत्यन्वयःतत्रग्रामण्योयक्षाः । (गंधर्वाश्चअप्सरसश्च । एतेषांपृथक्कर्मादिकं द्वादशे वक्ष्यति सूतः) १८ गव्यूतिः क्रोशद्वयं सगत्यु त्तरं यथाभवतितथा (भुंक्ते) ॥२१॥
१९ इतिपंचमेस्कंधेटीकायामेकाविंशोध्यायः ॥२१॥ द्वाविंशेसोमशुक्रादेःस्थानमाहोत्तरोत्तरं । तत्तद्गत्यनुसारेणइष्टानिष्टंतथानृणाम् ॥१॥ राशीनांअभिमुखंचअप्रदक्षिणंचोपवर्णितं । सव्येनचलन्दक्षिणे
॥८२॥ नकरोतीतिविदता । अमुष्यवयंकथमनुमीमाहिअनुमिमीमहिएतत्कथंज्ञास्यामोविरुद्धत्वादित्यर्थः १

तस्मिन्नक्षेकृतमूलोद्वितीयोऽक्षस्तुर्यमानेनसंमितस्तैलयंत्राक्षवद्ध्रुवेकृतोपरिभागः १४ रथनीडस्तुषट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागविशालस्तावान्रविर श्लोकाः
थयुगोयत्रहयाश्छंदोनामानःसप्तारुणयोजितावहंतिदेवमादित्यम् १५ पुरस्तात्सवितुररुणःपश्चाच्चनियुक्तःसौत्येकर्मणिकिलास्ते १६ तथावालखिल्याऋषयों
ऽगुष्ठपर्वमात्राःषष्टिसहस्राणिपुरतःसूर्यंसूक्तवाकयनियुक्ताःसंस्तुवंति १७ तथाऽन्येचऋषयोगंधर्वाप्सरसोनागाग्रामण्योयातुधानादेवाइत्येकैकगणाःसप्त १४/१
चतुर्दशमासिमासिभगवंतंसूर्यमात्मानंनानानामानंपृथङ्नानानामानःपृथक्कर्मभिर्द्वंद्वशउपासते १८लक्षोत्तरंसार्द्धनवकोटियोजनपरिमंडलंभूवलयस्यक्षणेनस
गव्यूत्युत्तरंद्विसहस्रयोजनानिसभुंक्ते १९ ॥ इतिश्रीभा०म०पं०ज्योतिश्चक्रसूर्यरथमंडलवर्णनंनामैकविंशतितमोऽध्यायः॥ २१ ॥ ॥ राजोवाच ॥ ॥
यदेतद्भगवतआदित्यस्यमेरुंध्रुवंचप्रदक्षिणेनपरिक्रामतोराशीनामभिमुखंप्रचलितंचाप्रदक्षिणंभगवतोपवर्णितममुष्यवयंकथमनुमीमहीति १

चूर्णिका तस्मिन्अक्षेकृतमूलः द्वितीयोक्षः सार्धसप्तत्रिंशत्सहस्राधिकैकोनचत्वारिंशत्लक्षयोजनसंमिततैलयंत्राक्षवत् ध्रुवेकृतोपरिभागः आस्ति १४ रथनीडस्तुषट्त्रिंशल्लक्षयो
जनायतः नवलक्षयोजनाविशालः तावान्रविरथयुगः यत्रसप्ताश्वाः छंदोनामानः सूर्यंवहंति १५ यत्ररथेअरुणः सारथिः आस्ते १६ तथावालखिल्याः ऋषयः
षष्टिसहस्रमिताः सूर्यंस्तुवंति १७ तथान्येमुनिगंधर्वाप्सरसोनागाग्रामण्योयातुधानाः देवाः प्रतिमासिसूर्यंउपासते १८ एवंएकपंचाशत्लक्षाधिकनवकोटियोजनंभूवल ॥८२॥
यस्य मंडलं तस्यमंडलस्यदक्षिणेनसः सूर्यः गव्यूत्युत्तराद्विसहस्रयोजनानिभुंक्ते १९ इतिपंचमेएकविंशः ॥ २१ ॥ ॥ ॥ राजोवाच ॥ ॥ यदेतद्भगवतः आदित्यस्य
मेरुंध्रुवंचप्रदक्षिणंपरिक्रामतः राशीनामभिमुखंअप्रदक्षिणंचलितमुपवर्णितंतद्वयंकथंजानीमः १॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (योराज्ञापृष्टः सशुकउवाच यथेति) चक्रवशाद्गतिरेका स्वतश्चगतिरन्येतिगतिद्वयमविरुद्धमितिपरिहारार्थः २ तत्तत्कालनियमेनकर्मणांविशुद्धेः साद्गुण्यस्यनिमित्तभूतमात्मानं विभज्य विजिज्ञास्यमानः वितर्क्यमाणः यथोपजोषं यथाकर्मभोगं ऋतुगुणान् शीतोष्णादीन् ३ वर्णाश्रमाचारानुवर्तिनः पुरुषास्त्रय्याम्नातैःकर्मभिरिंद्रादिरूपं योगवितानैश्चध्यानादिभिरंतर्यामिरूपंपूजयंतः ४ सएवस्वगत्यामासादिव्यवहारकारणमित्याह । सएषलोकानामात्माद्यावापृथिव्योरंतरेणमध्येयन्नभोवलयमंतरिक्षं तस्यमध्येयत्कालचक्रंतद्गतः राशिभिर्मेषादिभिः संज्ञायेषां । चैत्रादिसंज्ञातुचांद्रमासानां । मासमाह पक्षद्वयंमासइतिचांद्रेणमानेन । सपादंमहानक्षत्रद्वयंसौरेण । दिवानक्तंचअहोरात्रमितिपित्र्येण । षष्ठमंशंराशिद्वयम् । ५ ६ मंडलाभ्यांसहभुंजीत । सह साहि सूर्यःयदाशुक्लप्रतिपदि संक्रांतिर्भवतितदासौरचांद्रयोर्मासयोर्युगपदुपक्रमोभवतिससंवत्सरः। ततःसौरमानेनषड्दिनानिवर्धंतेचांद्रमानेनषड्दिनानिह्रसंतितीतिद्वादशदिन व्यवधानादुभयोरग्रपश्चाद्भावोभवति एवंपंचवर्षाणिगच्छंति । तन्मध्येद्वौमलमासौभवतः पुनः षष्टःसंवत्सरोभवति । तदेवमवांतरभेदेन संवत्सरादिपंचकं समामनंति ७ सोमादीनामपिस्थानंकार्यंचाह । एवंचंद्रमाइति । अर्कगभास्तिभ्यः मंडलरूपेभ्यः सपादर्क्षाभ्यां सपाददिनद्वयेन ८

॥८३॥

सहोवाच॥ यथाकुलालचक्रेणभ्रमतासहभ्रमतांतदाश्रयाणांपिपीलिकादीनांगतिरन्यैवप्रदेशांतरेष्वप्युपलभ्यमानत्वादेवंनक्षत्रराशिभिरुपलक्षितेनकालचक्रेणध्रुवंमेरुंचप्रदक्षिणेनपरिधावतासहपरिधावमानानांतदाश्रयाणांसूर्यादीनांग्रहाणागतिरन्यैवनक्षत्रांतरेराश्यंतरेचोपलभ्यमानत्वात् २सएषभगवानादिपुरुषएवसाक्षान्नारायणोलोकानांस्वस्तयआत्मानंत्रयीमयंकर्मविशुद्धिनिमित्तंकविभिरपिचवेदेनावीजिज्ञास्यमानोद्वादशधाविभज्यषट्सुवसंतादिषुऋतुषुयथोपजोषमृतुगुणान्विदधाति३तमेतमिहपुरुषास्त्रय्याविद्ययावर्णाश्रमाचारानुपथाउच्चावचैः कर्मभिराम्नातैर्योगवितानैश्चश्रद्धयायजंतोऽजसाश्रेयः समधिगच्छंति४अथसएषआत्मालोकानांद्यावापृथिव्योरंतरेणनभोवलयस्यकालचक्रगताद्द्वादशमासान्भुंक्तेराशिसंज्ञान्संवत्सरावयवान्मासः पक्षद्वयंदिवानक्तंचेतिसपादर्क्षद्वयमुपदिशंतियावताषष्ठमंशंभुंजीतसवैऋतुरित्युपदिश्यतेसंवत्सरावयवः ५ अथचयावताऽर्द्धेननभोवीथ्यांप्रचरतितंकालमयनमाचक्षते ६ अथचयावन्नभोमंडलंसहद्यावापृथिव्योर्मंडलाभ्यांकात्स्न्येंनसहभुंजीततंकालंसंवत्सरंपरिवत्सरमिडावत्सरमनुवत्सरंवत्सरमितिभानोर्मांद्यशैघ्र्यसमगतिभिः समामनंति ७ एवंचंद्रमाअर्कगभस्तिभ्यउपरिष्टाल्लक्षयोजनतउपलभ्यमानोऽर्कस्यसंवत्सरभुक्तिपक्षाभ्यांमासभुक्तिंसपादर्क्षाभ्यांदिनेनैवपक्षभुक्तिमग्रचारीद्रुततरगमनोभुंक्ते ८

श्लोकाः २/८

चूर्णिका सहोवाच यथाकुलालचक्रेणभ्रमतासह भ्रमतांपिपीलिकादीनां अन्यैवगतिः एवंकालक्रेणभ्रमतां तदाश्रयाणांसूर्यादीनांगतिः अन्यैव २ सएवनारायणः वेदरूपः द्वादशधाभूत्वालोकानांस्वस्तयेऋतुगुणान् विदधाति ३ जनाःतंत्रय्याविद्ययावर्णाश्रमाचारपराः यजंतः श्रेयांसिप्राप्नुवंति ४ सचद्यावापृथिवीमध्यस्थकालचक्रगतः सूर्यः यावताद्वादश मासान्भुंक्ते पक्षद्वयंमासः चांद्रमानेनसपादमहानक्षत्रद्वयंसौरेण अहोरात्रंपित्र्येणेति उपदिशंति यावताषष्ठमंशंभुंजीतसऋतुः ५ यावता अर्धंभुंक्ते तदयन ६ यावतानभोमंडलं कात्स्न्येंनभुंजीत तंकालंसंवत्सरं परिवत्सरंइडावत्सरं अनुवत्सरंवत्सरमित्याहुः ७ ततः सूर्योपरिचंद्रमाः लक्षयोजनतः उपलभ्यमानः अर्कस्य वत्सरभुक्तिं पक्षाभ्यांमासभुक्तिं सपादर्क्षाभ्यां दिनेनैवपक्षभुक्तिं द्रुततरगमनोभुंक्ते ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सर्वेषांजीवनिवहानांप्राणःअन्नमयत्वाच्च अतएवजीवनहेतुत्वाज्जीवश्च ९ तदेवाह यएषइति । १० दक्षिणेनैवनतुतेषांपृथगन्या गतिरस्तीत्यर्थः । कालायने कालचक्रे उत्तराषाढाश्रवणसंधौअभिजिन्न क्षत्रंफलविशेषेण पृथक्कल्पितंतेनसह। तयाचश्रुतिः।"अभिजिन्नामनक्षत्रंउपरिष्टादाषाढानांअधस्ताच्छ्रोणायाइत्यादि ११ उशना शुक्रः पुरतः सूर्येणमोक्ष्यमाणे नक्षत्रे पश्चात् भुक्तनक्षत्रे । सहै वभुज्यमाने।चारेणक्रमस्थनक्षत्राद्यतिक्रमेणवृष्टे।र्विष्टंभःस्तंभनंयस्मात्ग्रहात्तमुपशमयतीतितथा१२बुधोव्याख्यातःपुरतःपश्चात्सहैववाचरतीति।किंचिद्विशेषंचाहततइत्यादिना।(व्यतिरिच्येत)व्यतिरिक्तोभवे त् । अभ्रप्रायंमेघवाहुल्यं । आशंसतेसूचयाति १३ (यदिनवक्रोणवक्रगत्याऽभिवर्ततेतर्हित्रिभिस्त्रिभिः पक्षैरेकैकराशिमनुभुंक्ते) । अवशंसोदुःखसूचकः १४ यादिनवक्रःस्यात्तर्हि परिवत्सरम् (द्वादश मासान्) । १५ (सर्वानेवराशींस्तुतावद्भिरनुवत्सरैस्त्रिशद्धर्षैः) १६ (येशंकल्याणमेवानुभावयंतः विष्णोःपरमंपदंध्रुवलोकम् १७) ॥ ॥ इतिपंचमस्कंधेटीकायांद्वाविंशोऽध्यायः ॥ २२ ॥ ॥

॥८४॥ अथचापूर्यमाणाभिश्चकलाभिःअमराणांक्षीयमाणाभिश्चकलाभिःपितॄणामहोरात्राणिपूर्वपक्षापरपक्षाभ्यांवितन्वानःसर्वजीवनिवहप्राणोजीवश्चएकमेकंनक्ष त्रंत्रिंशतामुहूर्तैर्भुंक्ते ९ यएषषोडशकलःपुरुषोभगवान्मनोमयोऽन्नमयोऽमृतमयोदेवपितृमनुष्यभूतपशुपक्षिसरीसृपवीरुधांप्राणाप्यायनशीलत्वात्सर्वमय इतिवर्णयंति १० ततउपरिष्टात् त्रिलक्षयोजनतोनक्षत्राणिमेरुंदक्षिणेनैवकालायनईश्वरयोजितानिसहाभिजिताऽष्टाविंशतिः ११ ततउपरिष्टादुशनाद्विल क्षयोजनतउपलभ्यतेपुरतःपश्चात्सहैवचार्कस्यशैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति ॥ लोकानांनित्यदानुकूलएवप्रायेणवर्षयन्चारेणानुमीयतेसवृष्टि विष्टंभग्रहोपशमः १२ उशनसाबुधोव्याख्यातः ॥ ततउपरिष्टाद्द्विलक्षयोजनतोबुधःसोमसुतउपलभ्यमानःप्रायेणशुभकृद्यदाऽर्काद्व्यतिरिच्येततदातिवा ताभ्रप्रायानावृष्ट्यादिभयमाशंसते १३ अतऊर्ध्वमंगारकोपियोजनलक्षाद्वितयउपलभ्यमानस्त्रिभिस्त्रिभिःपक्षैरेकैकशोराशीन्द्वादशानुभुंक्ते॥यदिनवक्रेणाभि वर्ततेप्रायेणाशुभग्रहोऽवशंसः १४ ततउपरिष्टाद्द्विलक्षयोजनांतरगतोभगवान्बृहस्पतिरेकैकस्मिन्राशौपरिवत्सरंचरतियदिनवक्रःस्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य १५ ततउपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानःशनैश्चरएकैकस्मिन्राशौत्रिंशन्मासान्विलंबमानःसर्वानेवानुपर्येतितावद्भिरनुवत्सरैः ॥ प्रा येणहिसर्वेषामशांतिकरः १६ ततउत्तरस्मादृषयएकादशलक्षयोजनांतरउपलभ्यंतेयएवलोकानांशमनुभावयंतोभगवतोविष्णोर्यत्परमंपदंप्रदक्षिणंप्रक्र मंति १७ ॥ ॥ इतिश्रीभा०म०पंचमस्कंधेज्योतिश्चक्रवर्णनंनामद्वाविंशतितमोऽध्यायः ॥ २२ ॥

श्लोकाः ९/१७

चूर्णिका

अथ आपूर्यमाणकलाभिः अमराणांक्षीयमाणाभिः पितॄणां अहोरात्राणि करोति ९ यएषभगवान् अन्नमयोमृतमयः देवादिपिपीलिकांतानां आप्या यनशीलत्वात्सर्वमयइतिवर्णयंति १० तदुपरि त्रिलक्षयोजनांतरेनक्षत्राणि ११ ततउपरि द्विलक्षयोजनेशुक्रः उपलभ्यते सः अर्कस्याग्रेपश्चात्सहैववाचरति लोकानांनित्य दाअनुकूलः १२ ततः उपरिष्टात् द्विलक्षयोजनेबुधः प्रायः शुभकृत् यदा अर्कात् वियुज्येततदा अनावृष्ट्यादि भयंसूचयते १३ तत उपरिष्टाताद्द्विलक्षयोजने अंगार कः प्रायोदुःखदः १४ तत उपरिष्टात् द्विलक्षयोजने भगवान्बृहस्पतिः प्रायेण अनुकूलो ब्राह्मणकुलस्य एकैकस्मिन् राशौयदिनवक्रः तर्हिवत्सरंचरति १५ ततः द्विलक्ष योजनेशनैश्वरः प्रतिराशौत्रिंशन्मासान्भुंक्ते प्रायः सर्वेषां अशांतिकरः १६ तत उपरि एकादश लक्षयोजनांतरेसप्तर्षयः लोकानांशमिच्छंतः भगवतः विष्णोः परंपदं प्रद क्षिणं प्रक्रमंति १७ इतिपंचमेद्वाविंशः ॥ २२ ॥८४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्रयोविंशे ध्रुवस्थानं ज्योतिश्चक्राश्रयं ततः। शिशुमारस्वरूपेण हरेश्च स्थितिरुच्यते ॥१॥ (तस्मात् ऋषिलोकात्) यत्तत्प्रसिद्धं विष्णोः पदं यत्र ध्रुव उपास्ते तिष्ठतीत्यन्वयः । (सर्वेपि) समकालमेव युज्यंते इति तथा तैर्नक्षत्ररूपैः (आजीव्य आश्रय इत्यर्थः अनुभावः पराक्रम उपवर्णितो गतस्कंधे १ (आजीव्यत्वमेव दर्शयति सहीति । सध्रुवः । अनिमिषेण उन्मीलितलोचनेन अप्रमत्तेनेत्यर्थः) खले निखातस्तंभविशेषो मेढीस्तंभः तंत्र बद्धा धान्याक्रमणपशवः बलीवर्दाः (यथास्थानं विहितस्थानमनतिक्रम्य मंडलानि मेढीमभितः स्थानानि) २ एतस्मिन् कालचक्रे अंतर्योगेन बहिर्योगेन च आयोजिताः स्थापिताः ध्रुवमेवाश्रित्य परिचंक्रमं तिपुनः पुनर्भ्रमंति । नन्वेते कथं चिद्भुवि पतेयुरिति तत्राह । यथेति ।) कर्मसारथिः सहायो येषाम् ३ ईश्वराधारत्वात् पतनशंकैव नोचितेति वक्तुं मतांतरमाह केचिदिति । ज्योतिरनीकं ज्योतिश्चक्रं योग धारणायां स्थितमिति शेषः ४ लांगूले अग्राद् अधोभागे । उदगयनानि अभिजिदादीनि पुनर्वस्वंतानि चतुर्दश दक्षिणपार्श्वे । दक्षिणायनानि तु पुष्यादीन्युत्तराषाढांतानि चतुर्दश वामपार्श्वे ५

श्लोकाः १–५

॥ ॥ श्रीशुक उवाच ॥ ॥ अथ तस्मात्परतस्त्रयोदशलक्षयोजनांतरतो यत्तद्विष्णोः परमं पदमभिवदंति ॥ यत्र ह महाभागवतो ध्रुव औत्तानपादिर ग्निनेंद्रेण प्रजापतिना कश्यपेन धर्मेण च समकालयुग्भिः सबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्येहानुभाव उपवर्णितः १ सहि सर्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनामनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टंभ ईश्वरेण विहितः शश्वदवभासते ॥ यथा मे ढीस्तंभ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मंडलानि चरंति २ एवं भगणा ग्रहादय एतस्मिन्नंतर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवाव लंब्य वायुनोदीर्यमाणा आकल्पांतं परिचंक्रमंति ॥ नभसि यथा मेघाः श्येनादयो वायुवशाः कर्मसारथयः परिवर्तंते ॥ एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानु गृहीताः कर्मनिर्मितगतयो भुवि न पतंति । ३ केचिदेतज्ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति । ४ यस्य पुच्छाग्रेऽ वाक्शिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितः ॥ तस्य लांगूले प्रजापतिरग्निरिंद्रो धर्म इति पुच्छमूले धाता विधाता च कट्यां सप्तर्षयस्तस्य दक्षिणावर्तकुंडलीभूतः शरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्राण्युपकल्पयंति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुंडलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः सम संख्या भवंति पृष्ठे त्वजवीथी आकाशगंगा चोदरतः ॥ ५ ॥

चूर्णिका

॥ ॥ ॥ श्रीशुक उवाच ॥ ॥ अथ तस्मात् परतः त्रयोदशलक्षयोजनांतरे विष्णोः परमं पदं वदंति यत्र महाभागवतः ध्रुवोस्ति तदनुभावः पूर्वं उक्तः १ चक्रेण भ्राम्य माणानां ग्रहनक्षत्रादीनां स्थाणुरिव आश्रयोस्ति २ यथा च मेढीस्तंभे योजिताः पशवः तथा एते ग्रहनक्षत्रादयः कालचक्रयोजिताः वायुना प्रेर्यमाणाः तं परिभ्रमंति यथा च नभ सि वायुवशाः मेघाः पक्षिणश्च परिवर्तंते एवं प्रकृतिपुरुषानुगृहीताः ज्योतिर्गणाः कर्मनिर्मितगतयः भुवि न पतंति ३ केचित् एतत् ज्योतिश्चक्रं शिशुमारसंस्थानेन वासु देवस्य योगधारणायां स्थितमिति अनुवर्णयंति ४ यस्य अवाक्शिरसः कुंडलीभूतदेहस्य पुच्छाग्रे ध्रुवः तदधः प्रजापतिधर्माग्नींद्राश्च पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः दक्षिणपार्श्वे अभिजिदादीनि नक्षत्राणि १४ वामपार्श्वे पुष्यादीनि १४ पृष्ठे अजवीथी उदरे आकाशगंगा ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवस्थानविशेषेणविभज्य दर्शयति । पुनर्वसुपुष्यावित्यादिना । पुनर्वसुरुदगयनांत्यंनक्षत्रं । पुष्योदक्षिणायनस्याद्यं श्रोण्योः कट्योः । आर्द्राश्लेषेतयोर्निरंतरे । अभिजिदुत्तराषाढेउत्तरदक्षिणायनयोरंतनक्षत्रे । श्रवणपूर्वाषाढेतुतयोरुत्तरपूर्वे धनिष्ठामूलंचतयोरप्युत्तरपूर्वे । मघादीनियान्यनुराधांतानिदक्षिणायनान्यष्टतानिवामपार्श्ववंक्रिषुवामपार्श्वास्थिषु । मृगशीर्षादीनिप्रातिलोम्येनपूर्वाभाद्रपदांतानियान्युदगयननक्षत्राण्यष्टतानिदक्षिणपार्श्वास्थिषु । शतभिषाज्येष्ठेउत्तरदक्षिणायनयोःयेअवशिष्टेतेस्कंधयोर्न्यसेत् ६ यमोनक्षत्ररूपः तथानारायणोऽश्विनौच । ककुदिगलपृष्ठशृंगे । ७ ज्योतिषोलोकायाश्रयायकालायनायकालचक्ररूपायनमोऽभिधीमहीतिमंत्रेणोपतिष्ठेत ८ मंत्रकृतांपूर्वोक्तंमंत्रंजपताम् ९ इतिपंचमस्कंधे टीकायां त्रयोविंशोऽध्यायः ॥२३॥ एवंत्रिभिर्द्युमर्यादापालनंवर्णितंतथा । अधोभुवनमर्यादापालनंत्रिभिरुच्यते ॥१॥ चतुर्विंशेरवेरर्वाक्स्वर्भान्वादिस्थितिक्रमात् । अतलादिबिलस्वर्गमर्यादाःसप्तवर्णिताः ॥ २ ॥ सूर्यमारभ्यध्रुवांतंसंनिवेशंनिरूप्यइदानींसूर्यादधस्तान्निरूपयतिअधस्तादिति । स्वर्भानुः राहुः अलभतलेभेसिंहिकायाः पुत्रः १

श्लोकाः ६/१

पुनर्वसुपुष्यौदक्षिणवामयोः श्रोण्योरार्द्राश्लेषेचदक्षिणवामयोःपश्चिमयोः पादयोरभिजिदुत्तराषाढेदक्षिणवामयोर्नासिकयोर्यथासंख्यंश्रवणपूर्वाषाढेदक्षिणवामयोर्लोचनयोर्धनिष्ठामूलंचदक्षिणवामयोःकर्णयोःमघादीन्यष्टनक्षत्राणिदक्षिणायनानिवामपार्श्ववंक्रिषुयुंजीत।तथैवमृगशीर्षादीन्युदगयनानिदक्षिणपार्श्ववंक्रिषुप्रातिलोम्येनप्रयुंजीतशतभिषाज्येष्ठेस्कंधयोर्दक्षिणवामयोर्न्यसेत् ६ उत्तराहनावगस्तिरधराहनौयमोमुखेचांगारकःशनैश्चरउपस्थेबृहस्पतिःककुदिवक्षस्यादित्योहृदयेनारायणोमनसिचंद्रोनाभ्यामुशनास्तनयोरश्विनौबुधःप्राणापानयोराहुर्गलेकेतवःसर्वांगेषुरोमसुसर्वेतारागणाः ७ एतदुहैवभगवतोविष्णोःसर्वदेवतामयंरूपमहरहःसंध्यायांप्रयतोवाग्यतोनिरीक्षमाणउपतिष्ठेत।नमोज्योतिर्लोकायकालायनायानिमिषांपतयेमहापुरुषायाभिधीमहीति ८ ग्रहर्क्षतारामयमाधिदैविकंपापापहंमंत्रकृतांत्रिकालम् ॥ नमस्यतःस्मरतोवात्रिकालंनश्येततत्कालजमाशुपापम् ९ इतिश्रीभा० म० पं० शिशुमारसंस्थानवर्णनंनामत्रयोविंशोध्यायः ॥ २३ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ अधस्तात्सवितुर्योजनायुतेस्वर्भानुर्नक्षत्रवच्चरतीत्येकेयोऽसावमरत्वंग्रहत्वंचाऽलभतभगवदनुकंपयास्वयमसुरापसदःसैंहिकेयोह्यतदर्हःतस्यताततजन्मकर्माणिचोपरिष्टाद्वक्ष्यामः १

चूर्णिका

पूनर्वसुपुष्यौ दक्षिणवामश्रोण्योः आर्द्राश्लेषेपश्चिमदक्षिणवामपादयोः अभिजिदुत्तराषाढेदक्षिणवामयोः नासिकयोः श्रवणपूर्वाषाढेदक्षिणवामनेत्रयोः धनिष्ठामूलेदक्षिणवामकर्णयोःमघादीनिअष्टवामपार्श्वास्थिषुतथैवमृगशीर्षादीनिअष्टदक्षिणवामपार्श्ववंक्रिषुप्रातिलोम्येन युंजीत शतभिषाज्येष्ठेदक्षिणवामयोःस्कंधयोः ६ उत्तराहनौ अगस्तिः अधराहनौनक्षत्ररूपोयमः मुखेमंगलः उपस्थेशनिः ककुदिबृहस्पतिः वक्षसिसूर्यः हृदयेनारायणः मनसिचंद्रः नाभ्यांशुक्रः स्तनयोः अश्विनौ प्राणापानयोर्बुधः गलेराहुः सर्वांगेषुकेतवः रोमसुसर्वेतारागणाः ७ एतत्भगवतः सर्वदेवतामयंरूपं अहरहः संध्यायांवाग्यतः निरीक्षन्उपतिष्ठेत् नमोज्योतिर्लोकायकालायनमोनिमिषांपतयेमहापुरुषायधीमहीति ८ ग्रहर्क्षतारामयमाधिदैविकंपापापहंमंत्रकृतांत्रिकालम् नमस्यतःस्मरतोवात्रिकालंनश्यतेतत्कालजमाशुपापम् ९ इतिपंचमेत्रयोविंशः ॥ २३ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ अधःस्तात्सवितुः अयुतयोजनेराहुः योसौभगवदनुग्रहात् अमरत्वं ग्रहत्वंचलेभे १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥८७॥

ग्रहणंवक्तुमाह । यददः प्रतपतस्तरणेमंडलं (योजनायुतंतस्याविस्तारः) अमृतपानेमध्यप्रवेशेनतयोः सूर्याचंद्रमसोर्व्यवधानंकरोतीतितथा । अतएवैताभ्यांसूचितत्वाद्वैरमनुबध्नातीतितथा । (अतए वपर्वणितावभिधावति) २ (उभयत्रापिसूर्याचंद्रमसोरपि) भागवतंचक्रंपरिवर्तमानंपरिभ्रमत्अभिमुखंमुहूर्तमवस्थितः सन्दुर्विषहेणतत्तेजसाउद्विजमानआराद्दूरादेव । इत्येवमंतरातदवस्थानंउपरागंव दंति । तत्रचक्रजुवक्रस्थितिभ्यांअर्धग्राससर्वग्रासौनतुग्रासोस्तिवस्तुतोदूरांतरत्वात् ३ तावन्मात्रेयोजनायुते ४अंतरिक्षंग्रहहीनंतस्यावधिमाह। यावद्वायुः प्रवातीति तीव्रोवातीत्यर्थः । तस्याप्यवधिमा ह यावन्मेघाइति । ५ पृथिव्याउपरिभूर्लोकावधिमाह । यावदितियावद्धंसादयः पार्थिवाविकाराः । ६ योजनायुतांतरेणप्रत्येकमुच्छ्रिताः आयामोयः (अंडं) कटाहस्यतावद्विस्तारेणोपक्लृप्ताः ७ सामा न्येनविवराणिवर्णयतिएतेष्वित्यादिना । अथातलइत्यतः प्राक्तनेनग्रंथेन । एतेषुदैत्यादयोनिवसंतीत्यन्वयः । (काद्रवेयाः सर्पाः) कथंभूतेषु । अधिकः कामभोगश्चऐश्वर्यानंदश्चविभूतिश्चसंपत्तिः । (स्वर्गापेक्षयाअधिककामभोगादिभिः) सुसमृद्धाभवनादयोयेषु (तेषु । तत्रआक्रीडःमिथुनक्रीडायोग्यउद्यानविशेषः । आसमंताद्विहारोयत्रसआविहारःस्थालविशेषः) कथंभूता-(-,स्ते) नित्यंप्रमुदिता अनुरक्ताः कलत्रादयोयेषां (ते । ईश्वरात्ईश्वरप्रसादात्) अप्रतिहतः (अखंडितः)कामोयेषांते । माययाविनोदोयेषां (तेमायाविनइत्यर्थः)८

श्लोकाः २/८

यददस्तरणेर्मंडलंप्रतपतस्तद्विस्तरतोयोजनायुतमाचक्षतेद्वादशसहस्रंसोमस्यत्रयोदशसहस्रंराहोर्यःपर्वणितद्व्यवधानकृद्वैरानुबंधःसूर्याचंद्रमसावभिधावति
२ तन्निशम्योभयत्रापिभगवतारक्षणायप्रयुक्तंसुदर्शनंनामभागवतंदयितमस्त्रंतत्तेजसादुर्विषहेणमुहुःपरिवर्तमानमभ्यवस्थितोमुहूर्तमुद्विजमानश्चकितहृदय
आरादेवनिवर्ततेतदुपरागमितिवदंतिलोकाः ३ ततोऽधस्तात्सिद्धचारणविद्याधराणांसदनानितावन्मात्रएव ४ ततोऽधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानां
विहाराजिरमंतरिक्षंयावद्वायुःप्रवातियावन्मेघाउपलभ्यंते ५ ततोऽधस्ताच्छतयोजनांतरइयंपृथिवीयावद्धंसभासश्येनसुपर्णादयःपतत्त्रिप्रवराउत्पतंतीति
६ उपवर्णितंभूमेर्यथासंनिवेशावस्थानमवनेरप्यधस्तात्सप्तभूविवराएकैकशोयोजनायुतांतरेणायामविस्तारेणोपक्लृप्ताःअतलंवितलंसुतलंतलातलंमहातलं
रसातलंपातालमिति ७ एतेषुहिबिलस्वर्गेषुस्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिःसुसमृद्धभवनोद्यानाक्रीडविहारेषुदैत्यदानवकाद्रवेयानित्यप्रमुदि
तानुरक्तकलत्रापत्यबंधुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकामामायाविनोदानिवसंति ८

चूर्णिका ॥८७॥

अथसूर्यमंडलं योजनायुतमाचक्षते द्वादशसहस्रं सोमस्य त्रयोदशसहस्रंराहोः यः पर्वणिपर्वणिपूर्ववैरेण सूर्याचंद्रमसौधावति २ तद्रक्षणार्थं भगवत्प्रयुक्तचक्रतेजसाभीतः सन्निवर्तते तत् उपरागइतिलोकाः वदंति ३ ततोऽधस्तात्सिद्धचारणादीनांस्थानानि ४ ततोधस्तात् यक्षरक्षःपिशाचादीनांक्रीडास्थानमंतरिक्षं यावन्मेघाः उपलभ्यंते यावद्वायुर्वाति ५ ततोधः शतयोजनांतरे इयंपृथ्वी तदुपरियावत्हंसश्येनादिपक्षिणउत्पतंति तावत्भूर्लोकः ६ भूमेः सन्निवेशावस्थानं एतत् वर्णितम् अथभूमेः अधस्तात्सप्तभूविवराणि एकैकशः अयुतयोजनांतरेण आयामविस्तारेण उपक्लृप्तानि तद्यथा अतलं वितलं सुतलं महातलं रसातलं तलातलं पातालमिति ७ एतेषु बिलस्वर्गेषु स्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिःसुसमृद्धभवनोद्यानाक्रीडाविहारेषुदैत्यदानवकाद्रवेयाःनित्यंप्रमुदिताःनिवसंति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. पं. अ०

टीका ॥२४॥

किंच । हेमहाराज येषु(मायाविना) मयेनानिर्मिताः पुरः चकासतीत्यन्वयः । कथंभूताः । नानायेमणिप्रवरास्तेषांप्रवेकामुख्यास्तैर्विरचितैः विचित्रैर्भवनादिभिः तथाविवरेश्वराणां (बिलस्वामिनां) गृहोत्तमैश्चसमलंकृताः (तत्रचैत्यंदेवालयः आयतनानिस्थानविशेषाः) कीदृशैर्गृहोत्तमैः । नागाश्चअसुराश्चमिथुनभूताः पारावतादयश्चतैराकीर्णाः (व्याप्ताः) कृत्रिमाः कारुनिर्मिताभूमयोयेषुतैः । पाठांतरेनानास्वनत्वंमिथुनविशेषणम् ९। उद्यानानिचअतितरांअमरलोकश्रियमतिशायितानियेषुचकासतीत्यन्वयः । काभिः । श्रीभिः । केषां । कुसुमफलस्तबकाश्चसुभगकिसलयानिचतैरवनतारुचिराविटपायेषांविटपिनांवृक्षाणांलतानामंगैरालिंगितानांश्रीभिः (शोभाभिः) तथासमिथुनाश्चक्रवाकादिमिथुनसहितायेविविधाविहंगमास्तद्युक्तानांजलाशयानांचश्रीभिः । कीदृशानांअमलैर्जलैः पूर्णानां । पुनरपिकैरतिशायितानिउद्यानानि । झषकुलोल्लंघनेनक्षुभितंयज्जलाशयानांनीरंतस्मिन्यानिनीरजादीनितेषांवनेषुकृतंनिकेतनं (निलयो) यैस्तेषांअर्थात्पक्षिणांएकोऽखंडोयोविहारः तेनाकुलाश्चतेमधुराश्चविविधस्वनादयः तैर्येइंद्रियोत्सवास्तैश्च । यद्वा समिथुनेत्यादेरुत्तरेणैवसंबंधः । मनइंद्रियानंदिभिरितिस्वनादीनांविशेषणम्। तत्रनीरजंसामान्येनकमलंलोहितंशतपत्रंतद्विशेषः १० अहोरात्रादिभिर्यंद्वयंतन्नोपलक्ष्यतेसूर्याद्यभावात् । ११ (महांतोयेअहिप्रवरासर्पश्रेष्ठास्तेषांशिरस्थितानिरत्नानि)१२(दिव्यौषधीनांरसैः रसायनैः भिषग्रचितादिरसविशेषैः आधयोमनोदुःखानि।) क्लमः श्रमः । ग्लानिरनुत्साहः (पलितंकेशादौशौक्ल्यं)१३ कल्याणानांमंगलरूपाणां (कुतश्चित्निमित्तात्) १४ यस्मिन्भगवत्तेजसिप्रविष्टेपुंसवनानिगर्भाः । 'आचतुर्थाद्भवेत्स्रावः पातः पंचमषष्ठयो'रितिस्रावपातौज्ञेयौ। १५

॥९८॥

श्लोकाः ९/१५

येषुमहाराजमयेनमायाविनाविनिर्मिताः पुरोनानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमिभिर्विवरेश्वरगृहोत्तमैःसमलंकृताश्चकासति ९उद्यानानिचातितरांमनइंद्रियानंदिभिःकुसुमफलस्तबकसुभगकिसलयावनतरुचिरविटपविटपिनांलतांऽगालिंगितानांश्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णानांझषकुलोल्लंघनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषुकृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादिभिरिंद्रियोत्सवैरमरलोकश्रियमतिशयितानि १०यत्रहवावनभयमहोरात्रादिभिःकालविभागैरुपलक्ष्यते ११ यत्रहिमहाहिप्रवरशिरोमणयःसर्वंतमःप्रबाधंते १२नवाएतेषुवसतांदिव्यौषधिरसरसायनान्नपानस्नानादिभिराधयोव्याधयोवलीपलितजरादयश्चदेहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरितिवयोऽवस्थाश्चभवंति १३ नहितेषांकल्याणानांप्रभवतिकुतश्चनमृत्युर्विनाभगवत्तेजसश्चक्रापदेशात् १४ यस्मिन्प्रविष्टेऽसुरवधूनांप्रायःपुंसवनानिभयादेवस्रवंतिपतंतिच १५

॥८८॥

चूर्णिका ९ १० यत्रमयेननिर्मिताः संपदः स्वर्गलोकश्रियं अतिशयिताः यत्र अहोरात्रादिभयंचनास्ति ११ यत्रसर्पाशिरोमणयः सर्वंतमः प्रबाधंते १२ यत्ररोगाद्याः वयोवस्थाश्चन १३ तत्ररत्नानाआधिव्याधयः मृत्युश्चनभवति १४ विनासुदर्शनात् यस्मिंश्चक्रेप्रविष्टे असुरवधूनांगर्भाः स्रवंति पतंतिच १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सवर्णेपुरुषेरताः स्वैरिण्यः। कामिन्यस्त्वसवर्णेपि। तत्राप्यतिचंचलाः पुंश्चल्यः। बिलायनं बिलस्थानं। साधयित्वा संभोगसमर्थंकृत्वा स्वेयेअसाधारणाविलासाः तत्पूर्वकोऽवलोकः तेनानुरागयुक्तंयत् स्मितंतेनसंलापो (मिथोभाषणं) उपगूहनमालिंगनंचतदादिभिः यस्मिन्हाटकाख्येरसेउपयुक्तेसेविते १६ भवयोर्भवस्यभवान्याश्च (यद्वीर्यरूपंजलं) चित्रभानुरग्निः (वायुनासमिध्यमानः पिबति) अथतेन निष्ठ्यूतंफूत्कृत्य त्यक्तं। असुरेंद्राणामवरोधेपुअंतःपुरेषुपुरुषीभिः स्त्रीभिः १७ सुतलेबलिरधुनाप्यास्तइत्यन्वयः। कथंभूतः। महेंद्रस्यप्रियंकर्तुमिच्छताभगवताप्रथमंपराक्षिप्तंअपहृतंलोकत्रयंयस्यसपुनर्भगवताऽनुकंपयैवतत्रप्रवेशितःसन्। कीदृशेन (तेन) योऽदितेःसकाशात्भूत्वाप्रकटीभूयबटुवामनरूपेण (बटुरूपह्रस्वाकारेण) लब्धकायः (गृहीतमूर्तिर्बभूव) तेन १८ केचित्तस्यसुतलराज्यंभूमिदानफलंमन्यंतेतन्निराकरोति नोएवैतदिति यद्बिलनिलयेविवरस्थानेऐश्वर्यंएतत्भूमिदानस्यसाक्षात्कारःफलंनभवत्येव। कुतइत्यपेक्षायांएवंभूतस्यदानस्यसाक्षादपवर्गहेतुत्वादित्याह। यत्तत्प्रसिद्धंदानंतस्य। तदेवाह भगवतिअशेषजिवनिकायानां(समग्रजीवसमूहानां)जीवभूतश्चासावात्मभूतश्च। सर्वजीवनियंताचासावात्मारामश्चेत्यर्थः। तस्मिन्संप्रतिपादितस्य (समर्पितस्य। कथंभूतेतीर्थतमेजगद्गुरौउपपन्नेअवसरप्राप्तेयुक्तेवा १९

श्लोकाः १६/१९

अथातलेमयपुत्रोऽसुरोबलोनिवसति येनहवाइहसृष्टाःषण्णवतिर्मायाःकाश्चनाद्यापिमायाविनोधारयंति यस्यचजृंभमाणस्यमुखतस्त्रयस्त्रीगणाउदपद्यंतस्वैरिण्यःकामिन्यःपुंश्चल्यइतियावैबिलायनंप्रविष्टंपुरुषंरसेनहाटकाख्येनसाधयित्वास्वविलासावलोकनानुरागस्मितसंलापोपगूहनादिभिःस्वैरंकिलरमयंति यस्मिन्नुपयुक्तेपुरुषईश्वरोऽहंसिद्धोऽहमित्ययुतमहागजबलमात्मानमभिमन्यमानःकत्थतेमदांधइव १६ ततोऽधस्ताद्वितलेहरोभगवान्हाटकेश्वरः स्वपार्षदभूतगणावृतःप्रजापतिसर्गोपबृंहणायभवोभवान्यासहमिथुनीभूतआस्तेयतःप्रवृत्तासरित्प्रवराहाटकीनामभवयोर्वीर्येणयत्रचित्रभानुर्मातरिश्वनासमिध्यमानओजसापिबतितन्निष्ठ्यूतंहाटकाख्यंसुवर्णंभूषणेनासुरेंद्रावरोधेषुपुरुषाःसहपुरुषीभिर्धारयंति १७ ततोऽधस्तात्सुतलउदारश्रवाःपुण्यश्लोकोविरोचनात्मजोबलिर्भगवतामहेंद्रस्यप्रियंचिकीर्षमाणेनादितेर्लब्धकायोभूत्वाबटुवामनरूपेणपराक्षिप्तलोकत्रयोभगवदनुकंपयैवपुनः प्रवेशितइंद्रादिष्वविद्यमानयासुसमृद्धयाश्रियाऽभिजुष्टःस्वधर्मेणाराधयंस्तमेवभगवंतमाराधनीयमपगतसाध्वसआस्तेऽधुनाऽपि १८ नोएवैतत्साक्षात्कारोभूमिदानस्य यत्तद्भगवत्यशेषजीवनिकायानांजीवभूतात्मभूते परमात्मनिवासुदेवेतीर्थतमेपात्रउपपन्नेपरयाश्रद्धयापरमादरसमाहितमनसासंप्रतिपादितस्यसाक्षादपवर्गद्वारस्ययद्बिलनिलयैश्वर्यम् १९

चूर्णिका

अथ अतले मयपुत्रः बलोनिवसति यस्यजृंभमाणस्यमुखतः त्रयः स्त्रीगणाः उत्पन्नाः स्वैरिण्यः कामिन्यः पुंश्चल्यइति ताः बिलायनं प्रविष्टं पुरुषंहाटकाख्यरसेनभोगसमर्थंकृत्वारमयंति १६ ततः अधस्तात् वितले हाटकेश्वरः भवान्यासह आस्ते तयोर्वीर्यतः प्रवृत्ताहाटकीनामनदी तद्रेतोदकंअग्निः वायुनाइद्धः सन्पिबति तेनफूत्कृत्यत्यक्तं तत्हाटकाख्यं सुवर्णंभवति तत् पुरुषाः स्त्रीभिसहधारयंति १७ ततोधः सुतलेपुण्यश्लोकः विरोचनात्मजः श्रीवामनेनहृतलोकत्रयः श्रियाभिजुष्टः स्वधर्मेण हरिंआराधयन्सन्बलिः आस्ते १८ एतत् ऐश्वर्यंभूदानस्य फलंनभवति वासुदेवेपात्रे उपपन्नेसति प्रतिपादितस्य तस्य मोक्षहेतुत्वात् १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच । यस्यनामक्षुतादिषुविवशोपिसकृदपिगृणन्कर्मबंधंविधुनोति । कथंभूतम्(कर्मबंधनं) यस्यप्रतिबाधनं(नाशं-)-त्विहमुमुक्षवोन्यथैवोपलभंते (उपायांतरेण) यन्निवृत्त्यर्थयोगसांख्यादीन्महा
क्लेशानतुभवंति(मुमुक्षवः) तंकर्मबंधं (यन्नामोच्चारमात्रेण) त्यजतीत्यर्थ २० तत्तस्मिन्भगवतां भक्तानां ज्ञानिनांच यथायथं आत्मदेज्ञानदेहरौ आत्मतमेच (प्रियतमे) समर्पितस्यभूमिदानस्यनत
त्फलमितिपूर्वेणैवसंबंधः २१ किंच । नेदंनेदं भगवदनुकंपाफलमपि । किंतुएकांतभक्तस्यतस्यांतरायमात्रमित्याह । नेति । भगवान् अमुष्यअमुंबलिंनैवानुगृहीतवान् । तत्रहेतुः । यदुतेति । आत्म
न ईश्वरस्यानुस्मृतिं मुष्णातीतितथा । तदुक्तं " वासुदेवेमनो यस्यजपहोमार्चनादिषु । तस्यांतरायोमैत्रेयदेवेंद्रत्वादिकं फल" मिति २२ तस्यैकांतभक्तिं सप्रपंचामाह। यत्तत्अतिप्रसिद्धं इति वक्ष्यमा
णमुवाचहेत्यन्वयः । कथंभूतः अनधिगतः अन्यउपायोयेन तेनभगवता याच्ञाछलेनअपहृतं स्वशरीरमात्रावशेषितं लोकत्रयंयस्य। सम्यक्प्रतिमुक्तोबद्धः । अपविद्धः प्रक्षिप्तोपिसन् २३ वतेतिखेदे
भगवान्विद्वानपियोसाविंद्रः यस्यैकांतेनबृहस्पतिः सचिवः सहायः यतो मंत्रार्थवृतः सोपिपुरुषार्थेषुनानिष्णातः ननिपुणः यतः (यः) उपेंद्रेण (वामनेन) द्वारभूतेनतं उपेंद्रंविहायआत्मानं मां
लोकत्रयमयाचत तंमंत्रप्रदंबृहस्पतिमतिहायेतिवा । तस्मिन्प्रसन्नेसएववरणीयो नलोकत्रयं यतस्तदतितुच्छमित्याह । अतिगंभीरंअनंतं वयोयस्यतस्यकालस्यावयवरूपं मन्मन्वंतरं तेनपरिवृतं
विपर्यस्तंलोकत्रयमिदंकियत् २४ महादस्त्वेकएवार्थेनिष्णात इत्याह यस्यानुदास्यमिति । स्वपितरि उपरतेमृतेसति स्वापित्र्यंपदं भगवतादीयमानमपि भगवतः खलुपरमन्यादितिकृत्वानतुज
ग्राहेत्यर्थः २५ ननुत्वमतिवीरः कुतस्तमेव बहुमन्यसेतत्राह । तस्यानुपथंअनुवर्त्मअमृजिता अक्षीणाः कषायारागादयो यस्य । परिहीणो भगवदनुग्रहोयस्य सकोवाउपगंतुमिच्छतीति २६ अथशु
कोक्तिः । नन्वेवंभूतश्चेद्बलिः तर्हि तस्यैव चरितंविस्तरेण कथ्यतांतत्राह । तस्यबलेरनुचरितमुत्तरस्मात् उपरिष्टात् अष्टमे विस्तरिष्यते । यस्यद्वार्यवतिष्ठते निजजनेष्वनुकंपितंकृतानुकंपंहृदयं
यस्य । द्वारपालकर्म दर्शयति । येनश्रीनारायणेनबलेर्द्वारिविशन् दशकंधरो (रावणः) उच्चाटितः केनपदा तत्राप्यंगुष्ठेनैव २७

श्लोकाः २०/२७

यस्यहवावक्षुत्पतनप्रस्खलनादिषुविवशःसकृन्नामाभिगृणन्पुरुषःकर्मबंधनमंजसाविधुनोतियस्यहैवप्रतिबाधनंमुमुक्षवोऽन्यथैवोपलभंते २० तद्भगवता
मात्मवतांसर्वेषामात्मन्यात्मदआत्मतयैव २१ नवैभगवान्नूनममुष्याजशग्राहयदुतपुनरात्मानुस्मृतिमोषणंमायामयभोगैश्वर्यमेवातनुतेति २२ यत्तद्भग
वताऽनधिगतान्योपायेनयाच्ञाच्छलेनापहृतस्वशरीरावशेषितलोकत्रयोवरुणपाशैश्चसंप्रतिमुक्तोगिरिदर्यांचापविद्धइतिहोवाच २३ नूनंबतायंभगवान
र्थेषुननिष्णातोयोऽसाविंद्रोयस्यसचिवोमंत्रायवृतएकांततोबृहस्पतिस्तमतिहायस्वयमुपेंद्रेणात्मानमयाचतात्मनश्चाशिषोनोएवतद्दास्यमतिगंभीरवयसः
कालस्यमन्वंतरपरिवृत्तंकियल्लोकत्रयमिदम् २४ यस्यानुदास्यमेवास्मत्पितामहःकिलवव्रेनतुस्वपित्र्यंयदुताकुतोभयंपदंदीयमानंभगवतःपरमितिभग
वतोपरतेखलुस्वपितरि २५ तस्यमहानुभावस्यानुपथममृजितकषायःकोवास्माद्विधःपरिहीणभगवदनुग्रहउपजिगमिषतीति २६ अथतस्यानुचरितमुत्त
रस्माद्विस्तरिष्यते यस्यभगवान्स्वयमखिलजगद्गुरुर्नारायणोद्वारिगदापाणिरवतिष्ठते निजजनानुकंपितहृदयोयेनांगुष्ठेनपदादशकंधरोयोजनायुतांदिग्विजय
उच्चाटितः २७

चूर्णिका

पुरुषः यस्यसकृन्नामगृणन्कर्मबंधंधुनोति २० तस्मिन्हरौसमर्पितस्यभूदानस्य नेदंफलं २१ भगवान्अमुंबलिंनैवानुगृहीतवान् यतः भगवत्स्मृतिमोषणंऐश्वर्यमेवात ॥९०॥
नुत २२ २३२४ २५ २६ अथबलेश्चरितं अष्टमस्कंधेविस्तरिष्यते यस्यद्वारि नारायणः गदापाणिः अवतिष्ठते येन दशकंधरः पादांगुष्ठेनउच्चाटितः २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. पं. यथाहरिणास्वभक्तोबलिः सुतले निहितः सुखमास्ते । एवं महादेवभक्तोपिमयस्तलातलेसुखमास्तइत्याह । ततइति । लब्धंपदंस्थानंयेन महीयतेपूज्यते २८ (काद्रवेयाणां कद्रूसुतानां) नैकशिर अ०
सां अनेकफणानांगणोस्ति । एतत्प्रपंचयति कुहकेति महाभोगवंतोमहाकायाः । पुरुषवाहात्हरेर्वाहनात् (गरुडात्सततंउद्विजमाना बिभ्यतः) २९ (पणयोदैत्यादानवाः । निवातकवचाः कालकन्या
टीका पुत्राः कालेयाः) विबुधप्रत्यनीकाः देवशत्रवः (उत्पत्त्यैवमहौजसोमहाबलाःमहत्साहसंबलात्कारोस्तियेषांते) सकलेष्वपिलोकेषुअनुभावः(सामर्थ्यं) यस्यतस्यैवहरेस्तेजसासुदर्शनेनप्रतिहतोबलावलेपो ॥२४॥
वीर्यमदोयेषांतेबिलेशयाः सर्पाइवइंद्रदूत्याप्रयुक्ताभिर्मंत्रवर्णाभिर्मंत्ररूपाभिर्वाग्भिः । एवंहिवैदिकमाख्यानं ।पणिभिरसुरैर्निगूढांगामन्वेष्टुंसरमांदेवशुनीमिंद्रेणप्रहितांसंधिमिच्छंतःपणयः प्राहुः "किमिच्छंती
सरमे" त्यादि । साचसंधिमनिच्छंतींद्रस्तुतिपूर्वकंतान्प्रतिपरुषमाह ।"हताइंद्रेणपणयःशयध्व" मित्यादि । तेचतच्छ्रुत्वाबिभ्यतीति ।३० महाभोगिनोमहाफणाः महान्अमर्षः क्रोधोयेषां । पंचादिसंख्या
॥ ९१॥ निशीर्षाणियेषां । शीर्ष्णामितिवक्तव्येशीर्षाणामित्यार्षः ३१ इतिपंचमस्कंधेटीकायांचतुर्विंशोध्यायः ॥ २४ ॥

ततोऽधस्तात्तलातलेमयोनामदानवेंद्रस्त्रिपुराधिपतिर्भगवतापुरारिणात्रिलोकीशंचिकीर्षुणानिर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदोमायाविनामाचार्योमहादे श्लोकाः
वेनपरिरक्षितोविगतसुदर्शनभयोमहीयते २८ ततोऽधस्तान्महातलेकाद्रवेयाणांसर्पाणांनैकशिरसांक्रोधवशोनामगणःकुहकतक्षककालियसुषेणादिप्रधा
नामहाभोगवंतःपतत्रिराजाधिपतेःपुरुषवाहादनवरतमुद्विजमानाःस्वकलत्रापत्यसुहृत्कुटुंबसंगेनक्वचित्प्रमत्ताविहरंति २९ ततोऽधस्ताद्रसातलेदैतेया २८—
दानवाःपणयोनामनिवातकवचाः कालेयाहिरण्यपुरवासिनइतिविबुधप्रत्यनीकाउत्पत्त्यामहौजसोमहासाहसिनोभगवतःसकललोकानुभावस्यहरेरेवतेज ३१
साप्रतिहतबलावलेपाबिलेशयाइववसंतियेवैसरमयेंद्रदूत्यावाग्भिर्मंत्रवर्णाभिरिंद्राद्बिभ्यति ३०ततोऽधस्तात्पातालेनागलोकपतयोवासुकिप्रमुखाःशंखकु
लिकमहाशंखश्वेतधनंजयधृतराष्ट्रशंखचूडकंबलाश्वतरदेवदत्तादयोमहाभोगिनोमहामर्षानिवसंतियेषामुहवैपंचसप्तदशशतसहस्रशीर्षाणांफणासुविरचितम
हामणयोरोचिष्णवःपातालविवरतिमिरनिकरंस्वरोचिषाविधमंति ३१ इतिश्रीभागवतेमहापुराणेपंचमस्कंधेराह्वादिस्थितिबिलस्वर्गमर्यादानिरूपणंनामच
तुर्विंशतितमोऽध्यायः ॥ २४ ॥ ॥

चूर्णिका ततोधः तलातलेमहादेवेनरक्षितः गतसुदर्शनभयः मयोनामदानवः आस्ते २८ ततोधः महातले काद्रवेयसर्पाणांक्रोधवशोनामगणः गरुडात् उद्विग्नमनाः क्वचित्प्रमत्ताः ॥९१॥
संतः कलत्रादिसंगेनविहरंति २९ ततोधः रसातलेदैतेयाः दानवाः पणयः निवातकवचाः संति तेचसरमया इंद्रदूत्याउक्ताभिर्वाग्भिः इंद्रात्बिभ्यति ३० ततोधः पातालेनागाः
वासुकिशंखकुलिकादयः निवसंति तेषांअनेकफणासुस्थिताः मणयः अंधकारंविधमंति ३१ इतिपंचमेचतुर्विंशः ॥ ॥ २४ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

पंचविंशेततोधस्तादाहशेषस्यसंस्थितिं । संजिहीर्षोरिदंकालेयत्ररुद्रसमुद्भवः ॥१॥तस्यपातालस्य (मूलदेशेत्रिंशद्योजनसहस्राणिअंतरं व्यवधानंयत्रतास्मिन्) कोसावनंतःसात्वतीयाःसात्त्वततंत्रनिष्ठा चतुर्व्यूहोपासनेयंसंकर्षणमित्याचक्षते। तथाख्यानेहेतुः । द्रष्टृदृश्ययोः सम्यक्कर्षणं एकीकरणंयेन । तत्कुतः । अहमित्यभिमानोलक्षणंचिह्नंयस्यअधिष्ठातुस्तंअहंकाराधिष्ठानेनदृग्दृश्यसंकर्षणात् अधिष्ठाता संकर्षणइत्यर्थः १ अनंतत्वमाह । यस्येदमितियच्छब्दानां सएषभगवाननंतइत्युत्तरेणान्वयः (सिद्धार्थःसर्षपः) २ तामसत्वमाह । यस्येदंविश्वमुपसंहर्तुमिच्छतः अमर्षेणविरचिते (रुचिरे) रुचिरीकृतेकुटिलीकृतेभ्रमंत्यौभ्रुवौतयोर्मध्ये (शूलं) उत्तंभयन्नुन्नमयन् (एकादशव्यूहः एकादशधाविभक्तरूपविशेषःरुद्रउत्थितः) ३ सुभगत्वमाह। यस्यांघ्रिकमलयुगले अरुणाविशदानखाएवमणयस्तेषांखंडःसमूहस्तस्यमंडलेषु परिस्फुरतांकुंडलानां प्रभयामंडितानिगंडस्थलानियेषुतानि ४ (आशिषःकामनाः) चारुणि (रुचिरे) अंगवलये (कुंडलाकारेदेहे)विल सिताश्चतेविशदाश्चनिर्मलाः विपुलाश्चधवलाश्चसुभगाश्चसुंदरारुचिराश्च (मनोहराः) भुजाएवरजतस्तंभास्तेषु अगुरुचंदनकुंकुमानां पंकएवानुलेपः तेनावलिंपमानास्तेषां (भुजानां) अभिमर्शनेनउन्मथि तेहृदयेमकरध्वजस्यावेशेनरुचिरंचललितंचस्मितंयासांताः तस्यानंतस्यअनुरागेणचमदेनचमुदितंचतत्मदेन विघूर्णितेप्रचलितेच आईषदरुणेकरुणावलोकयुक्तेनयनेयास्मिन्तद्वदनारविंदंविलोकयंति ५ अमर्षोऽसहनंरोषःक्रोधःउपसंहृतस्तयोर्वेगोयेन ६

॥९२॥

श्लोकाः १—६

॥ श्रीशुकउवाच ॥ ॥ तस्यमूलदेशेत्रिंशद्योजनसहस्रांतरआस्तेयावैकलाभगवतस्तामसीसमाख्याताऽनंतइतिसात्वतीयाद्रष्टृदृश्ययोःसंकर्षणमह मित्यभिमानलक्षणंयंसंकर्षणमित्याचक्षते १ यस्येदंक्षितिमंडलंभगवतोऽनंतमूर्तेःसहस्रशिरसएकस्मिन्नेवशीर्षणिध्रियमाणंसिद्धार्थइवलक्ष्यते २ यस्यहवाइदंकालेनोपसंजिहीर्षतोऽमर्षविरचितरुचिरभ्रमद्भ्रुवोरंतरेणसांकर्षणोनामरुद्रएकादशव्यूहस्त्र्यक्षस्त्रिशिखंशूलमुत्तंभयन्नुदतिष्ठत् ३ यस्यांघ्रि कमलयुगलारुणविशदनखमणिखंडमंडलेष्वहिपतयःसहसात्वतर्षभैरेकांतभक्तियोगेनावनमंतःस्ववदनानिपरिस्फुरत्कुंडलप्रभामंडितगंडस्थलान्यतिमनो हराणिप्रमुदितमनसःखलुविलोकयंति४यस्यैवहिनागराजकुमार्यआशिषआशासानाश्चार्वंगवलयविलसितविशदविपुलधवलसुभगरुचिरभुजरजतस्तंभेष्व गुरुचंदनकुंकुमपंकानुलेपेनावलिंपमानास्तदभिमर्शनोन्मथितहृदयमकरध्वजावेशरुचिरललितस्मितास्तदनुरागमदमुदितमदविघूर्णितारुणकरुणाऽवलो कनयनवदनारविंदंसव्रीडंकिलविलोकयंति ५ सएवभगवाननंतोऽनंतगुणार्णवआदिदेवउपसंहृतामर्षरोषवेगोलोकानांस्वस्तयआस्ते ६

चूर्णिका

॥ ॥ श्रीशुकउवाच ॥ ॥ अथपातलस्यमूलप्रदेशे त्रिंशद्योजनसहस्रांतरेभगवत्कला अनंतः आस्ते यंचतुर्व्यूहोपासनेसंकर्षणमित्याचक्षते सात्त्वताः १ अस्यमूर्ध निइदं भूमंडलं सर्षपइव लक्ष्यते २ इदंसंहर्तुः यस्यभ्रूमध्यतः सांकर्षणोनामरुद्रः त्र्यक्षःत्रिशूलंउत्तंभयन् उदतिष्ठत् ३ यस्यांघ्रिकमलनखमंडलेषुनमंतोनागपतयः स्वव दनानि विलोकयंति ४ किंच नागराजकुमार्यः यस्यवदनारविंदंसव्रीडंपश्यंति ५ सः अनंतः संहृतरोषः सन् लोकस्वस्तये आस्ते ६

॥९२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

उपासनार्थमाह । सुरादिभिर्ध्यायमानः चिंत्यमानः अनवरतं मदेनामुदितश्चासौविकृतविह्वललोचनश्च । सुललितेन वचनामृतेनस्वपार्षदान्विबुधयूथपानांपतींश्चाप्यायमानः हर्षयन् नीलेवाससीयस्य । एकमेवकुंडलंयस्य । हलस्यककुदिपृष्ठेकृतः न्यस्तः सुभगश्चसुंदरश्च (चारुः) भुजोयेन । उदारालीलायस्यसः नपरिम्लानोरागः कांतिर्यस्याः तस्या नवतुलसिकायाआमोदमध्वासवेनसुरभिमधुरसेनमाद्यतांमधुकराणांयेव्राताः तेषांमधुरगीतेनश्रीर्यस्याः तां वनमालां (वारणेंद्रऐरावतः कांचनीं) कक्षां वरत्रामिव । ७ (योऽनुश्रुतोध्यायमानश्चिंत्यमानोतएवांतर्हृदयंगतोमुमुक्षूणामनादिकालमारभ्यकर्मसंस्कारैर्ग्रथितंत्रिगुणात्मकंहृदयग्रंथिरूपमहंकारंनिर्भिनत्तिसमूलंछिनत्तितस्यानुभावान्)संश्लोकयामासवर्णयामास ८ अस्यजगतउत्पत्त्यादिहेतवोगुणायस्येक्षयाकल्पाः स्वस्वकार्यसमर्थाआसन्अस्यतुरूपंध्रुवंअनंतंअकृतंअनादि । तत्रहेतुः यदेकमेवसत्आत्मन्आत्मनिनानाकार्यप्रपंचंअधात्तस्यब्रह्मरूपस्यवर्त्मतत्त्वंजनः कथमुहवेदनैववेदेत्यर्थः ९ तर्हिकथमसौमुमुक्षुभिःसेव्यते तत्राह । मूर्तिमिति । यत्रेदंसदसत् (कार्यकारणात्मकंजगत्) विभांतिसः नोऽस्माकंभक्तानांबहुकृपयासंशुद्धंसत्त्वंमूर्तिंबभार । स्वजनानांमनांसिआदातुंवशीकर्तुंकृतां यस्यलीलांमृगपतिः सिंहः आददेअशिक्षत् । यतः उदाराणिवीर्याणियस्य । तस्मादन्यंमुमुक्षुः कमाश्रयेदित्युत्तरेणान्वयः । यद्वाकृपयेत्यत्रहेतुः । यद्यस्मात्स्वजनानांमनांस्यादातुंलीलामाददेमृगपतिरिवोदारवीर्यः यदामृग्यंतइतिमृगाः कामप्रदास्तेषांपतिर्मुख्यः । १० किंचआरतांतस्यकृपयावपुर्धारणं । तद्भजनंवा । तन्नामौदार्यमेवातिचित्रमित्याह । यस्यनामयदिपतितोमहापातक्यपिअनुकीर्तयेत्तर्हिसंशुध्येदितिकिमुवक्तव्यंयतोऽसावेवनृणामशेषमंहः सद्योहंति । कथंअनुकीर्तयेत्अन्यतः श्रुतंवाऽकस्माद्वाआर्तोवासन्प्रलंभनाद्वापरिहासात्तस्मात्शेषात्संकर्षणादन्यम् ११

श्लोकाः

ध्यायमानःसुरासुरोरगसिद्धगंधर्वविद्याधरमुनिगणैरनवरतमदमुदिताविकृताविह्वललोचनःसुललितमुखरिकाऽमृतेनाप्यायमानःस्वपार्षदाविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेनमाद्यन्मधुकरव्रातमधुरगीतश्रियंवैजयंतींस्वांवनमालांनीलवासाएककुंडलोहलककुदिकृतसुभगसुंदरभुजोभगवान्माहेंद्रोवारणेंद्रइवकांचनींकक्षामुदारलीलोबिभर्त्ति ७ यएषएवमनुश्रुतोध्यायमानोमुमुक्षूणामनादिकालकर्मवासनाग्रथितमविद्यामयंहृदयग्रंथिंसत्त्वरजस्तमोमयमंतर्हृदयंगतआशुनिर्भिनत्तितस्यानुभावान्भगवान्स्वायंभुवोनारदःसहतुंबुरुणासभायांब्रह्मणःसंश्लोकयामास ८ उत्पत्तिस्थितिलयहेतवोऽस्यकल्पाःसत्त्वाद्याःप्रकृतिगुणायदीक्षयासन्॥ यद्रूपंध्रुवमकृतंयदेकमात्मन्नानाऽधात्कथमुहवेदतस्यवर्त्म ९ मूर्त्तिंनःपुरुकृपयाबभारसत्त्वंसंशुद्धंसदसदिदंविभातियत्र ॥ यल्लीलांमृगपतिराददेऽनवद्यामादातुंस्वजनमनांस्युदारवीर्यः १० यन्नामश्रुतमनुकीर्त्तयेदकस्मादार्त्तोवायदिपतितःप्रलंभनाद्वा ॥ हंत्यंहःसपदिनृणामशेषमन्यंकंशेषाद्भगवतआश्रयेन्मुमुक्षुः ११

७/११

चूर्णिका

सचसुरादिभिः ध्यायमानः नीलवासाः एककुंडलः हलपृष्ठेकृतहस्तः अपरिम्लानकांत्याःनवतुलसिकायाः सुरभिमधुरसेनमाद्यन्मधुकराणांमधुरगीतेनशोभितांस्वांवनमालां बिभर्ति ७ तस्यानुभावान् नारदः तुंबरुणासहब्रह्मणःसभायांवर्णयामास ८ ९ १० यन्नामश्रुतंअनुकीर्तितंसत् नृणांअंहःहंति ११

CC-0. In Public Domain. Digitization by eGangotri

टीका

गिर्यादिसहितंभूगोलंसत्त्वानिप्राणिनः (यस्यमूर्धनिअणुवदर्पितंतस्यअनिमितविक्रमस्यअपरिमितवीर्यस्यवीर्याणिआनंत्यात्) सहस्रजिह्वोपिकोगणयेत् १२ दुरंतंवीर्यंबलंयस्यउरवोगुणाअनुभा वश्चयस्यसचरसायाभूमेर्मूलेस्थितः । तिष्ठति । आत्मतंत्रः आत्माधारः १३ उक्तस्यलोकविभागस्योपयोगंवदन्उपसंहरति । एतात्घेवेहकामान्कामयमानैर्नृभिः उपगंतव्याइत्यन्वयः १४ तस्यप्रपंचः । एतावत्यःविपाकगतयः फलभूतागतयः ताःव्याचख्येव्याख्यातवानस्मि १५ ॥ इतिपंचमेस्कंधेटीकायांपंचविंशोध्यायः ॥ ॥ २५ ॥ षड्विंशेतुततोधस्तान्नरकस्थितिरुच्यते । पापिनोयत्रद त्ध्वंतेयमदूतैर्यथायथम् । पुंसोगतयउच्चावचाविसदृशाइतिभोगवैचित्र्यमुक्तंतदेतत्कुतइतिपृच्छति । महर्षइति । १ कर्मणः समानत्वेपिश्रद्धावैचित्र्यात्फलवैचित्र्यमितिपरिहरति । त्रिगुणत्वादिति । सात्त्वि क्याश्रद्धयाकर्तुः सुखित्वं । राजस्यासुखित्वंदुःखित्वंच । तामस्यादुखिःत्वंमूढत्वंच । तत्रापितासांश्रद्धानांतारतम्यात्सुखादितारतम्यंसर्वेषामित्यर्थः२ प्रतिषिद्धंप्रतिषेधः सएवलक्षणंप्रमाणंयस्यअधर्मस्यकर्तुः श्रद्धावैसादृश्यंतमसस्तारतम्यात् तत्रापिकारणंदर्शयन्नाह । याअनाद्यविद्ययाकृतानांकामानांविषयकामनानांसृतयोगतयः नरकाः तासांसृतीनांमध्येअथेदानींप्राचुर्येणप्राधान्येनताअनुवर्णयिष्या मइत्यन्वयः ३ किंभूमावेवदेशविशेषाः त्रिलोक्याब्रह्मांडाद्बहिर्वा आवरणेषुमध्येअंतरालेवाभूमिव्यतिरिक्ते ४

॥९४॥

श्लोकाः १२/४

मूर्धन्यर्पितमणुवत्सहस्रमूर्ध्नोभूगोलंसगिरिसरित्समुद्रसत्त्वम् ॥ आनंत्यादनिमितविक्रमस्यभूम्नःकोवीर्याण्यधिगणयेत्सहस्रजिह्वः १२ एवंप्रभावोभगवान नंतोदुरंतवीर्योरुगुणानुभावः ॥ मूलेरसायाःस्थितआत्मतंत्रोयोलीलयाक्ष्मांस्थितयेबिभर्ति १३एताह्येवहन्नृभिरुपगंतव्यागतयोयथाकर्मविनिर्मितायथो पदेशमनुवर्णिताःकामान्कामयमानैः १४ एतावतीर्हिराजन्पुंसःप्रवृत्तिलक्षणस्यधर्मस्यविपाकगतयउच्चावचाविसदृशायथाप्रश्नंव्याचख्येकिमन्यत्कथयाम इति१५ इतिश्रीभा०म०पंच० भूविवरविध्युपवर्णनंनामपंचविंशतितमोऽध्यायः ॥२५॥ ॥ राजोवाच ॥ ॥ महर्षएतद्वैचित्र्यंलोकस्यकथमिति १ ऋषिरुवाच ॥ त्रिगुणत्वात्कर्तुःश्रद्धयाकर्मगतयःपृथग्विधाःसर्वाएवसर्वस्यतारतम्येनभवंति २ अथेदानींप्रतिषिद्धलक्षणस्याधर्मस्यतथैवकर्तुःश्रद्धाया वैसादृश्यात्कर्मफलंविसदृशंभवतियाह्यनाद्यविद्ययाकृतकामानांतत्परिणामलक्षणाःसृतयःसहस्रशःप्रवृत्तास्तासांप्राचुर्येणानुवर्णयिष्यामः ३ राजोवाच ॥ नरकानामभगवन्किंदेशविशेषाअथवाबहिस्त्रिलोक्याआहोस्विदंतरालइति ४

चूर्णिका

यस्यमूर्धनिअर्पिताभूगोलः अणुवद्भाति तस्यवीर्याणिसहस्रजिह्वोपिकः गणयेत् १२ एवंप्रभावःअनंतः रसायाः मूलेस्थितः सन् स्थितयेक्ष्मांबिभर्ति १३ हेराजन्एवंएता यथाकर्मविनिर्मिताः गतयःतथावर्णिताः १४ किमन्यत्कथयामः १५ ॥ ॥ इतिपंचमेपंचविंशः २५ ॥ ॥ राजोवाच ॥ ॥ हेमहर्षेएतत्लोकस्यवैचित्र्यंकथम् १ ॥ श्रीशुकउवाच ॥ ॥ कर्तुःत्रिगुणत्वात्श्रद्धायाभिन्नाएवकर्मगतयः सर्वाएवसर्वेषांश्रद्धातारतम्येनभवंति २ अविद्याकृतकामपरिणामलक्षणाःसृतयःसहस्रशः प्रवृत्ताः ताः वर्णयिष्यामः ३ ॥ ॥ राजोवाच ॥ ॥ हेभगवन् नरकानामकिंदेशविशेषाःत्रिलोक्याःबहिः अंतराले वा संति तत्कथ्यताम् ४ ॥

१ अत्रश्रीशुकउवाचेतिलिखितपुस्तकेपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अंतरालएवत्रिजगत्याः। तर्हिकस्यांदिशितु । दक्षिणस्यां । क्वतर्हि । भूमेरधउपरिष्टादंडजलाशयस्यगर्भोदकस्य । त्रिलोकीगर्भोदकयोर्मध्येइत्यर्थः । यस्यांदिशि । गोत्राणांवंशजानाम्)५ (स्ववि
षयंस्वदेशं । यथाकर्मावद्यं) कर्मदोषमनतिक्रम्यदोषमेवदमंपापफलंदंडंकरोति (तत्कृतमवद्यमेवदंड रूपंपरिणतंकरोतीत्यर्थः । तत्रहेतुः) नउल्लंघितंभगवच्छासनंयेन । ६ मतांतरेणाष्टाविंशतिमाहाकिंचेति
। ७ । पापभेदेनचतन्नरकयातनाभेदंप्रपंचयति । तत्रयस्त्वित्यादिना । यातनास्तीव्रवेदनास्ताभिः यात्यमानः पीड्यमानः (कश्मलंमहत्दुःखं । एकदाएकस्मिन्कालेउपयाति । कदाचिन्नोपयाति ।
यद्वा) एकदैवतदैव (कश्मललक्षणेएवेत्यर्थः । तमिस्रप्रायेप्रायेणनिबिडांधकाररूपे । मूर्छयाबुद्धिनाशात्)। ८ (एवमेवनिपात्यतेयः)। पुरुषंपतिंवंचयित्वा (उपयुंक्तेउपभुंक्ते । वृश्च्यमानमूलः छिद्य
मानशिफः तथानिपात्यमानोदेहीनष्टमतिरंधश्चभवति । तस्मादंधत्वापादकांधकारयोगात्) ९ एतच्छरीरमहमितिइदंधनादिममेतिचमत्वाकेवलंस्वकुटुंबमेवप्रपुष्णातितेनाशुभेन (निपतितितत्कुटुंबंविहाय)
१० रुरवोभूत्वेतिकर्माण्येवतथापरिणामंप्राप्येत्यर्थः । अतिक्रूरस्यभारशृंगाख्यसत्त्वस्यापदेशःसंज्ञा ११

॥९५॥

श्लोकाः ९/११

ऋषिरुवाच॥अंतरालएवत्रिजगत्यास्तुदक्षिणस्यामधस्ताद्भूमेरुपरिष्टादंडजलशयायस्यामाग्निष्वात्तादयःपितृगणादिशिस्वानांगोत्राणांपरमेणसमाधिनास
त्याएवाशिषआशासानानिवसंति५यत्रहवावभगवान्पितृराजोवैवस्वतःस्वविषयंप्रापितेषुस्वपुरुषैर्जंतुषुसंपरेतेषुयथाकर्मावद्यंदोषमेवानुल्लंघितभगवच्छाल
सनःसगणोदमंधारयति६तत्रहैकेनरकानेकविंशतिंगणयंतिअथतांस्तेराजन्नामरूपलक्षणतोऽनुक्रमिष्यामःतामिस्रोंधतामिस्रोरौरवोमहारौरवःकुंभीपाकःका
लसूत्रमसिपत्रवनंसूकरमुखमंधकूपःकृमिभोजनःसंदंशस्तप्तसूर्मिर्वज्रकंटकशाल्मलीवैतरणीपूयोदः प्राणरोधोविशसनंलालाभक्षःसारमेयादनमवीचिरयःपान
मितिकिंचक्षारकर्दमोरक्षोगणभोजनःशूलप्रोतोदंदशूकोऽवटनिरोधनःपर्यावर्तनःसूचीमुखमित्यष्टाविंशतिनरकाविविधयातनाभूमयः ७ तत्रयस्तुपरवित्ता
पत्यकलत्राण्यपहरतिसहिकालपाशबद्धोयमपुरुषैरतिभयानकैस्तामिस्रेनरकेबलान्निपात्यतेअनशनानुदपानदंडताडनसंतर्जनादिभिर्यातनाभिर्यात्यमानो
जंतुर्यत्रकश्मलमासादितएकदैवमूर्च्छामुपयातितामिस्रप्राये ८ एवमेवांधतामिस्रेयस्तुवंचयित्वापुरुषंदारादीनुपयुंक्तेयत्रशरीरीनिपात्यमानोयातनास्थोवे
दनयानष्टमतिर्नष्टदृष्टिश्चभवतियथावनस्पतिर्वृश्च्यमानमूलस्तस्मादंधतामिस्रंतमुपदिशंति ९ यस्त्विहवाएतदहमितिममेदमितिभूतद्रोहेणकेवलंस्वकुटुंबमे
वानुदिनंप्रपुष्णातिसतदिहविहायस्वयमेवतदशुभेनरौरवेनिपतति १० येत्विहयथैवामुनाविहिंसिताजंतवःपरत्रयमयातनामुपगतंतएवरुरवोभूत्वातथात
मेवविहिंसंतितस्माद्रौरवमित्याहुःरुरुरितिसर्पादतिक्रूरसत्त्वस्यापदेशः ११

चूर्णिका

॥ श्रीशुकउवाच ॥ ॥ जगत्याअंतरालेदिशिदक्षिणस्यांभूमेः अधस्तात्जलादुपरिनरकाः संति ५ यत्रभगवान्पितृराजोयमः मृतजंतूनांकर्मानुरूपंदंडंकुर्वन्नास्ते ६
अथतान्शृणु तामिस्रं १ अंधतामिस्रं २ रौरवः ३ महारौरवः ४ कुंभीपाकः ५ कालसूत्रम् ६ असिपत्रवनम् ७ सूकरमुखम्८ अंधकूपः ९कृमिभोजनः १० संदंशः ११
तप्तसूर्मिः १२ वज्रकंटकशाल्मली १३ वैतरणी १४ पूयोदः १५ प्राणरोधः १६ विशसनम् १७ लालाभक्षः १८ सारमेयादनम् १९ अवीचिः २० अयःपानम्
२१ क्षारकर्दमः २२ रक्षोगणभोजनः २३ शूलप्रोतः २४ दंदशूकः २५ अवटनिरोधः २६ पर्यावर्तनरः २७ सूचीमुखम् २८ इतिनरकाःसंति ७ यःपरवित्ता
पत्यकलत्राणिहरातिसः दूतैः पाशवद्धः तामिस्रनरकेनिपात्यते अनशनानुपादनताडनादिभिः पीड्यमानः कश्मलंयाति । ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका
क्रव्येणनिमित्तेनमांसार्थमित्यर्थः। १२(प्राणंतीतितथातान्)प्राणतःसजीवान्उपरंधयतिपचतिअपकरुणंनिष्कृपं (पुरुषादैःरक्षोभिरपिविगर्हितंधिक्कृतमित्यर्थः)।१३(तप्ते)खले(धान्यादिशोषणस्थानीये)
समेदेशे (अधस्तादग्निः उपर्यर्कः ताभ्यां । नकेवलंपित्रादिध्रुक्पशुहिंसकोप्येवमित्याहयावंतीति) । १४ (अनापदीतिविशेषणात्आपदिकंचनानुग्रहंसूचयति । तालवनस्यतालवृक्षसमूहस्यअसिवन्निशि
तैःपत्रैः उभयतोधारैः धाराशब्देननिशितप्रांतभागउच्यते) स्वधर्महास्वधर्मत्यागी । १५ (अदंडचेदडनानर्हेशरीरदंडंताडनादिरूपं । यथेक्षुदंडोयंत्रेतथातत्रबलाढ्यैर्विनिष्पीडचमानांगः) स्वनयन्रु
दन्कश्मलंमोहमुपगतोभवति । अदृष्टदोषाः (अदंड्या-)-स्तेनेहोपरुद्धाः संतोयथाकश्मलमुपगतास्तद्वत्(अमुत्रासौ) १६ ईश्वरेणकल्पितामनुष्यरक्तपानादिलक्षणावृत्तिर्येषांमत्कुणादीनांनविविक्ताविज्ञाता
परव्यथायैरविवेकिभिस्तेषांपुरुषेणब्राह्मणादिभावेनविधिनिषेधपूर्वकंउपकल्पितावृत्तिर्यस्य । विविक्ताविज्ञातापरव्यथायेनविवेकिना (एवंभूतोपिपीडामाचरति । अभिद्रुग्धाहिंसिता । विहतानिद्रारूपा
निर्वृतिः स्वास्थ्यंयस्य । नलब्धमवस्थानयेनतमसिपरिक्रामति (यथाकुत्सितेदेहे) १७

॥२६॥

॥९६॥ श्लोकाः १२—१७
एवमेवमहारौरवोयत्रनिपतितंपुरुषंक्रव्यादानामरुरवस्तंक्रव्येणघातयंतियःकेवलंदेहंभरः १२ यस्त्विहवाउग्रःपशून्पक्षिणोवाप्राणतउपरंधयतितमपकरुणं
पुरुषादैरपिविगर्हितममुत्रयमानुचराःकुंभीपाकेतप्ततैलेउपरंधयंति १३ यस्त्विहपितृविप्रब्रह्मध्रुक्सकालसूत्रसंज्ञकेनरकेअयुतयोजनपरिमंडलेताम्रमयेतप्तख
लेउपर्यधस्तादग्न्यर्काभ्यामतितप्यमानेऽभिनिवेशितःक्षुत्पिपासाभ्यांचदह्यमानांतर्बहिःशरीरआस्तेशेतेचेष्टतेअवतिष्ठतिपरिधावतिचयावंतिपशुरोमाणिता
वद्वर्षसहस्राणि १४ यस्त्विहवैनिजवेदपथादनापद्यपगतःपाखंडंचोपगतस्तमसिपत्रवनंप्रवेश्यकशयाप्रहरंतितत्रहासावितस्ततोधावमानउभयतोधारैस्ताल
वनासिपत्रैश्छिद्यमानसर्वांगोहाहतोऽस्मीतिपरमयावेदनयामूर्छितःपदेपदेनिपततिस्वधर्महापाखंडानुगतंफलंभुंक्ते १५ यस्त्विहवैराजाराजपुरुषोवाअ
दंड्येदंडंप्रणयतिब्राह्मणेवाशरीरदंडंसपापीयान्नरकेऽमुत्रसूकरमुखेनिपतति तत्रातिबलैर्विनिष्पीड्यमानावयवोयथैवेहेक्षुखंडआर्त्तस्वरेणस्वनयन्क्वचिन्मूर्छि
तःकश्मलमुपगतोयथैवेहादृष्टदोषाउपरुद्धाः १६ यस्त्विहवैभूतानामीश्वरोपकल्पितवृत्तीनामविविक्तपरव्यथानांस्वयंपुरुषोपकल्पितवृत्तिर्विविक्तपर
व्यथोव्यथामाचरतिसपरत्रांधकूपेतदभिद्रोहेणनिपतितत्रहासौतैर्जंतुभिःपशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्येकेचाभिद्रुग्धास्तैः सर्वतो
भिद्रुह्यमाणस्तमसिविहतनिद्रानिर्वृतिरलब्धावस्थानःपरिक्रामतियथाकुशरीरेजीवः १७

चूर्णिका
यस्तुपुरुषंवंचयित्वादारादीनुपभुंक्तेसःअंधतामिस्रेपतति तत्रयातनास्थः वेदनयानष्टमतिर्नष्टदृष्टिश्चभवति ९ यस्तुममइदंअहमितिमत्वाभूतद्रोहेणस्वकुटुंबमेवपुष्णातिसः
रौरवेनिपतति १० यथावेनाविहिंसिताजंतवः तेएवपरत्ररुरवोभूत्वातंखादंति ११ यः केवलंदेहंभरः सः महारौरवेनिपतति तत्रक्रव्यादानामरुरवः तन्मांसंखादंति १२
यस्तुपशून्पक्षिणोवाप्राणैः सहरंधयातंअमुत्रदूताः तप्ततैलेकुंभीपाकेरंधयंति १३ यश्चपितृविप्रध्रुक्सः तप्तताम्रमयेदेशेकालसूत्राख्येपतति तत्रक्षुत्पिपासाभ्यांअंतर्दह्यमानः
पशुरोमसंख्यासहस्रवर्षाणि आस्ते १४ यस्तुनिजवेदमार्गंत्यक्त्वापाखंडं आश्रितः तंअसिपत्रवनंप्रवेश्य कशयाप्रहरंति तत्रअसिपत्रैः छिद्यमानसर्वांगः हाहतोस्मीति वे
दनयामूर्छितः पदेपदेनिपतति स्वधर्महापाखंडमार्गफलंभुंक्ते १५ यस्तुराजाराजपुरुषोवा अदंड्येदंडंब्राह्मणेवाशरीरदंडंकरोतिसः सूकरमुखेनिपतति तत्रइक्षुदंडवत्
निष्पिष्यमाणावयवः क्वचिन्मूर्छितः कश्मलंयाति १६ यस्तुभूतानांईश्वरकल्पितवृत्तीनांव्यथांकरोतिसः अंधकूपेपतति तत्रतैः पशुपक्षिमृगसरीसृपमशकमत्कुणमशका
दिभिः पीडयमानः दुःखंप्राप्नोति १७

॥९६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यत्किंचनभक्ष्यादिकंउपनतंप्राप्तंतदसंविभज्यनानिर्मिताः पंचयज्ञायेन ।अतएववायसैः संस्तुतःसमत्वेनवर्णितः क्रमिभोजनःक्रमीनेवभुंजानः(यावदिति ।यावत्तत्पातकंभोक्तव्यंतावत्पर्यंतमित्यर्थः । यद्वा) यावंतियोजनानितत्क्रमिकुंडंतावंतिवर्षाणि ।अप्रत्तंअसंविभक्तंअप्रहुतंवाऽत्तीतितथासः। अनिर्वेशंअकृतप्रायश्चित्तम् १८ निष्कुषंतिछिंदंति१९तिग्मयातप्तयासूर्म्याप्रतिमया । २० सर्वाभिगमः पश्वाद्युपगं ता २१ अपाखंडाःसत्कुलीनाः संतः । द्वितीयांतपाठेसेतुविशेषणं (धर्मसेतून्धर्ममर्यादाःयेभिंदंतितेवैतरण्यांनद्यांनिपतंति) नदींविशिनष्टि (विण्मूत्रेति । तस्यांउह्यमानाः यादोगणैस्तत्रत्यैर्जंतु भिः । आत्मनादेहेनअसुभिश्चप्राणैः नवियुज्यमानाअम्रियमाणाइत्यथः । स्वाघेनस्वपापेनपीड्यंते)२२ पशुचर्यांस्वेच्छाचारं (तेपूयादिभिरापूर्णेअर्णवइवगंभीरेपूयोदसंज्ञेनरकेनिपतंतीतिदेवपूयादि)२३ अतीर्थेविहितादन्यत्र । विध्यंतीतिप्राणनिरोधो (नरको) दर्शितः २४ (येदंभार्थयज्ञेषुनतुविहितेषु) निरयपतयोयमपुरुषाः (यातयित्वापीडयित्वा विशसंतिहिंसंति)२५लालाभक्षमाह । यस्त्विहेति । रेतः पाययतिरेतः पानंकारयति(तत्रहेतुः काममोहितः)२६

॥९७॥ यस्त्विहवाअसंविभज्याश्नातियत्किंचनोपनतमनिर्मितपंचयज्ञोवायससंस्तुतःसपरत्रकृमिभोजनेनरकाधमोनिपतति तत्रशतसहस्रयोजनेकृमिकुंडेकृमिभू तःस्वयंकृमिभिरेवभक्ष्यमाणःकृमिभोजनोयावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानंयातयते १८ यस्त्विहवैस्तेयेनबलाद्वाहिरण्यरत्नादीनिब्राह्मणस्यवाऽपह रत्यन्यस्यवाऽनापदिपुरुषस्तममुत्रराजन्यमपुरुषाअयस्मयैरग्निपिंडैःसंदंशैस्त्वचिनिष्कुषंति१९यस्त्विहवाअगम्यांस्त्रियमगम्यंवापुरुषंयोषिदभिगच्छति तावमुत्रकशयाताडयंतस्तिग्मयासूर्म्यालोहमय्यापुरुषमालिंगयंतिस्त्रियंचपुरुषरूपयासूर्म्या २० यस्त्विहवैसर्वाभिगमस्तममुत्रनिरयेवर्त्तमानंवज्रकंटक शाल्मलीमारोप्यनिष्कर्षंति २१ येत्विहवैराजन्याराजपुरुषावाअपाखंडाधर्मसेतून्भिंदंतितेसंपरेत्यवैतरण्यांनिपतंतिभिन्नमर्यादास्तस्यांनिरयपरिखाभू तायांनद्यांयादोगणैरितस्ततोभक्ष्यमाणाआत्मनानवियुज्यमानाश्चासुभिरुह्यमानाःस्वाघेनकर्मपाकमनुस्मरंतोविण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसव सावाहिन्यामुपतप्यंते२२ येत्विहवैवृषलीपतयोनष्टशौचाचारनियमास्त्यक्तलज्जाःपशुचर्यांचरंतितेचापिप्रेत्यपूयविण्मूत्रश्लेष्ममलापूर्णार्णवेनिपतंतितदेवा तिबीभत्सितमश्नंति२३ येत्विहवैश्वगर्दभपतयोब्राह्मणादयोमृगयाविहाराअतीर्थेचमृगान्निघ्नंतितानपिसंपरेतांल्लक्ष्यभूतान्यमपुरुषाइषुभिर्विध्यंति २४ ये त्विहवैदांभिकादंभयज्ञेषुपशून्विशसंतितानमुष्मिँल्लोकेवैशसेनरकेपतितान्निरयपतयोयातयित्वाविशसंति २५ यस्त्विहवैसवर्णांभार्यांद्विजोरेतःपाय यतिकाममोहितस्तंपापकृतममुत्ररेतःकुल्यायांपातयित्वारेतःसंपाययंति २६

श्लोकाः १८—२६

चूर्णिका

यस्तुअकृतपंचमहायज्ञः असंविभज्यअश्नातिसः कृमिकुंडेकृमिभूतः कृमिभिर्भक्ष्यमाणः कृमिभोजनस्तिष्ठति १८ यस्तुस्तेयेनबलाद्वाविप्रस्य अन्यस्यवाहिरण्यरत्नादी निहरतिसः संदंशेपततितत्रलोहमयैः तप्तैः संदंशैः त्वचिछिंदंति १९ यस्तुअगम्यांस्त्रियंस्त्रीवाअगम्यंपुरुषंगच्छति तौकशयाताडितौतप्तसूर्मिनरके तप्तलोहमय्याप्रतिमया आलिंगयंति २० यस्तुपश्वादिषुगमनंकरोति तंवज्रकंटकशाल्मलींआरोप्यनिष्कर्षंति २१ येतुराजन्याः राजपुरुषावाधर्ममार्गान्भिंदंति तेविण्मूत्रपूयशोणितकेशनखास्थि मेदोमांसवाहिन्यांवैतरिण्यांउपतप्यंते २२ येत्विहवृषलीपतयः नष्टशौचाचाराः तेविण्मूत्रश्लेष्ममलपूर्णार्णवेपतंति तदेवबीभत्सितं अश्नंति २३ येत्विहश्वगर्दभपतयः मृग याविहाराः अतीर्थेमृगान्घ्नंतितान्परेतान्प्राणरोधेइषुभिर्विध्यंति २४ येदांभिकाः दंभयज्ञेषुपशून्विशसंतितान्वैशसेनरकेदूताः घातयंति २५ यस्तुअसवर्णांभार्यांद्वि जोरेतः पातयतितंलालाभक्षेनरकेनिपात्यरेतः पाययंति २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(सार्थान्पांथान्भटाराजपुरुषाः)यमदूतायेश्वानः(ते)सरभसंससंभ्रमम्२७द्रव्यविनियमेक्रयविक्रयादौ। निरवकाशेनिरालंबे। अवीचिशब्दार्थमाह। यत्रेति वीचिस्तरंगः तद्रहितत्वादवीचिः।२८योविप्रस्तत्कलत्रंवासुरांपिबति। अन्योपिवाव्रतस्थःसन् राजन्योवैश्योवासोमपीथः कृतसोमपानइत्यन्वयः। तयोःसोमपाननिषेधेपिसोमस्थानेफलचमसविधानात् तथाचश्रुतिः। ' न्यग्रोधस्तिभीराहृत्यताःसंपिष्य दधन्युपमृज्यतमस्मैभक्षंसंप्रयच्छेन्नसोममिति २९(वरीयसोवहुमानयोग्यान्) सपूर्वमपिमृतकएवसन्मृत्वा ३० पुरुषस्यमेधेनहिंसया भैरवादीन्यजंते। याश्चस्त्रियः नरमांसंभक्षयंति (तांस्ते) कामरूपारक्षोगणाभूत्वायथेहतेपुरुषादाःसंतःपूर्वमनृत्यंततद्वत् (सौनिकाःपशुघातिनइवअवदायखंडयित्वा)३१ वैश्रंभकैः विश्वासोपायैः उपविश्रंभय्य विश्वास्य (क्रीडनकतयाक्रीडोपकरणतयापीडयंति) ३२ (दंदशूकाःसर्पाः) विलेशयान्मूषकान् (हेनृप) ३३

॥९८॥ येत्विहवैदस्यवोऽग्निदागरदाग्रामान्सार्थान्वाविलुंपंतिराजानोराजभटावातांश्चापिहिपरेत्ययमदूतावज्रदंष्ट्राःश्वानःसप्तशतानिविंशतिश्चसरभसंखादंति २७ यास्त्विहवाअनृतंवदतिसाक्ष्येद्रव्यविनिमयेदानेवाकथंचित्सवैप्रेत्यनरकेऽवीचिमत्यधःशिरानिरवकाशेयोजनशतोच्छ्रयाद्गिरिमूर्ध्नःसंपात्यतेयत्रजलमिवस्थलमश्मपृष्ठमवभासतेतदवीचिमत्तिलशोविशीर्यमाणशरीरोनाम्रियमाणःपुनरारोपितोनिपतति२८ यस्त्विहवैविप्रोराजन्योवैश्योवासोमपीथस्तत्कलत्रंवासुरांव्रतस्थोऽपिवापिबतिप्रमादतस्तेषांनिरयंनीतानामुरसिपदाक्रम्यास्येवह्निनाद्रवमाणंकार्ष्णायसंनिषिंचंति२९अथचयस्त्विहवाआत्मसंभावनेनस्वयमधमोजन्मतपोविद्याचारवर्णाश्रमवतोवरीयसोनबहुमन्येतसमृतकएवमृत्वाक्षारकर्दमेनिरयेऽवाक्शिरानिपातितोदुरंतायातनाह्यश्नुते३०येत्विहवैपुरुषाःपुरुषमेधेनयजंतेयाश्चस्त्रियोनृपशून्खादंतितांश्चतेपशवइवनिहतायमसदनेयातयंतोरक्षोगणाःसौनिकाइवस्वधितिनावदायासृक्पिबंतिनृत्यंतिचगायंतिचहृष्यमाणायथेहपुरुषादाः ३१ येत्विहवाअनागसोऽरण्येग्रामेवावैश्रंभकैरुपसृतानुपविश्रंभय्यजिजीविषूञ्छूलसूत्रादिषूपप्रोतान्क्रीडनकतयायातयंतितेऽपिचप्रेत्ययमयातनासुशूलादिषुप्रोतात्मानःक्षुत्तृड्भ्यांचाऽभिहताःकंकवटादिभिश्चेतस्ततस्तिग्मतुंडैराहन्यमानाआत्मशमलंस्मरंति ३२ येत्विहवैभूतान्युद्वेजयंतिनराउल्बणस्वभावायथादंदशूकास्तेपिप्रेत्यनरकेदंदशूकाख्येनिपतंतियत्रनृपदंदशूकाःपंचमुखाःसप्तमुखाउपसृत्यग्रसंतियथाबिलेशयान् ३३

श्लोकाः २७—३३

घूर्णिका

येतुदस्युरूपाः राजानोभटावाआग्निदाः गरदाः ग्रामादीन्लुंठंति तान्वज्रदंष्टाः श्वानः ७२० खादंति २७ यस्तुसाक्ष्ये अनृतंवदतिसः अवीचिनरकेयोजनशतोच्छ्रायात् गिरिमूर्ध्नः अधःशिराः निपात्यते २८ यः विप्रोराजन्योवैश्योवातत्कलत्रंवाप्रमादतःसुरांपिबति तान् अयःपानेनरकेनिपात्यतेषांमुखेवह्निनाद्रवीभूतंलोहरसंनिषिंचंति २९ यः आत्मसंभावनेनजन्मतपोविद्यावर्णाश्रमवतः श्रेष्ठान् न बहुमन्यते सः क्षारकर्दमेअवाक्शिरानिपतति यातनाः भुंक्ते ३० येत्विहपुरुषाः पुरुषमेधेनभैरवादीन् यजंते याः कामरूपाः स्त्रियः नृपशून्खादंति तान् इहतैर्हताः पशवः तेरक्षोगणभोजनेरक्षोगणाः भूत्वाशस्त्रेणछित्वातद्रक्तंपिबंतिनृत्यंतिच३१ येत्विहवा अनागसः पशून्अरण्ये ग्रामेवाविश्वस्यशूलसूत्रादिषुप्रोतान्घातयंति तेप्रेत्यशूलादिषुप्रोताः तिग्मतुंडैःकंकवटादिभिःहन्यमानाआत्मशमलंस्मरंति ३२ येतुभूतान्उद्वेजयंति तेदंदशूकेनिपतंति३३ येतुगुहादिषुभूतानिरुंधंतितान्अवटनिरोधेसगरेणवह्निनाधूमेननिरुंधंति ३४ यः अतिथीन्पापचक्षुषानिरीक्षते तस्य अक्षिणिवज्रतुंडाः गृध्राःकंककाकवटादयः पर्यावर्तननरके बलात्उत्पाटयंति३५यः धनगर्वितः मानी तिर्यक्प्रेक्षणः द्रव्यनाशशंकितयाशुष्यद्वदनहृदयः गृहइव अर्थरक्षतिसः प्रेत्य सूचीमुखेनरकेपततियत्रदूता तंअंगेषुसूत्रैः बध्नंति ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अंधावटोअंधकारयुक्तोगर्तः कुसूलंव्रीहिस्थापनयोग्योगर्तविशेषः) सगरेणसावषेण । तेष्वेवअवटादिष्वेव ३४ अतिथयोअज्ञातपूर्वाःअभ्यागता ज्ञातपूर्वाःतान्(क्रोधयुक्तोदग्धुमिच्छुरिव)पापेनवक्रीक्ष
तेन ३५ आढ्योहमित्यभिमाति-(-र्यस्यसः) धनगर्वितः । अहंकृतिःअहंकारस्वरूपः श्रेष्ठोहमितिमानी । तिर्यक्प्रेक्षणंयस्यसर्वतः शुर्वादेरपिधनंचोरयिष्यंतीतिविशंकमानः (नकमपिविश्वसनित्यर्थः ।)
परिशुष्यमाणंहृदयंवदनंचयस्य (निर्वृतिंसौख्यं) अनवगतः अप्राप्तः (ग्रहइवब्रह्मराक्षसइव) तस्यार्थस्योत्पादनादिभिः(वर्धनसंरक्षणैः) शमलं (अघं) गृह्णातीतितथापरिवयंतिसूत्रप्रोतंकुर्वंति ३६
इतरत्रस्वर्गादौ इहमर्त्यलोकेपुनर्भवेपुनर्जन्मनिमित्तम् । उभयोर्धर्माधर्मयोः शेषाभ्यां ३७ आदावेवद्वितीयस्कंधेवैश्वानरं यातीत्यादिना । (चतुर्दशधाचतुर्दशभुवनात्मकः यद्भगवतःस्थविष्ठरूपंभूद्वी
पादिअनुवर्णितंतद्यआदृतः सन्सः) उपगेयंउपनिषदांरूपं(स्तुत्यंअग्राह्यं अवाङ्मनसगोचरमपि) श्रद्धाभक्तिभ्यांविशुद्धाबुद्धिर्यस्य ३८ यथायथावत्श्रुत्वा (स्थूलेरूपेधारणयानिर्जितमात्मानंमनःसूक्ष्मे
॥९९॥ रूपेशनैर्नयेत् ।)३९ (भागणोज्योतिर्गणः तल्लोकस्यचसंस्थास्थितिर्मयागीतावर्णिता । हेनृप ।) कथंभूतासंस्था । सकलानांजीवनिकायानांधामआश्रयभूतम् (अद्भुतंईश्वरस्यस्थूलं) वपुः ४०
पंचमस्कंधसंबंधिपदभावार्थदीपनैः । प्रीयतांपरमानंदनृहरिर्बालभाषितैः । १ ॥ इतिश्रीभागवतेमहापुराणेश्रीधरस्वामिविरचितायांपंचमस्कंधटीकायां षड्विंशतितमोध्यायः ॥ २६ ॥

(यदिहश्रीधराचार्यैः सुगमत्वादुपेक्षितम् । बालानांबोधसिद्ध्यैतद्व्याचचक्षेमहेश्वरः १)

श्लोकाः

येत्विहवाअंधावटकुसूलगुहादिषुभूतानिनिरुंधंतितथामुत्रतेष्वोपवेश्यसगरेणवह्निनाधूमेननिरुंधंति ३४ यस्त्विहवाअतिथीनभ्यागतान्वागृहपतिरसकृदुपग
तमन्युर्दिधक्षुरिवपापेनचक्षुषानिरीक्षतेतस्यचाऽपिनिरयेपापदृष्टेरक्षिणीवज्रतुंडागृध्राःकंककाकवटादयःप्रसह्योरुबलादुत्पाटयंति ३५ यस्त्विहवाआढ्या
भिमतिरहंकृतिस्तिर्यक्प्रेक्षणःसर्वतोऽभिविशंकीअर्थव्ययनाशचिंतयापरिशुष्यमाणहृदयवदनोनिर्वृतिमनवगतोग्रहइवार्थमभिरक्षतिसचापिप्रेत्यतदुत्पादनो
त्कर्षणसंरक्षणशमलग्रहःसूचीमुखेनरकेनिपततियत्रहवित्तग्रहंपापपुरुषंधर्मराजपुषावायकाइवसर्वतोऽगेषुसूत्रैःपरिवयंति ३६ एवंविधानरकायमालये
संतिशतशः सहस्रशस्तेषुसर्वेषुचसर्वएवाधर्मवर्त्तिनोयेकेचिदिहोदिताअनुदिताश्चावनिपतेपर्यायेणविशंतितथैवधर्मानुवर्त्तिनइतरत्रइहतुपुनर्भवेतउभयशेषा
भ्यांनिविशंति ३७ निवृत्तिलक्षणमार्गआदावेवव्याख्यातःएतावानेवांडकोशोयश्चतुर्दशधापुराणेषुविकल्पितउपगीयतेयत्तद्भगवतोनारायणस्यसाक्षान्महापु
रुषस्यस्थविष्ठंरूपमात्ममायागुणमयमनुवर्णितमादृतःपठतिशृणोतिश्रावयतिसउपगेयंभगवतःपरमात्मनोऽग्राह्यमपिश्रद्धाभक्तिविशुद्धबुद्धिर्वेद ३८ श्रुत्वास्थू
लंयथासूक्ष्मंरूपंभगवतोयतिः।स्थूलेनिर्जितमात्मानंशनैःसूक्ष्मंधियानयेदिति ३९ भूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिङ्नरकभागणलोकसंस्था।गीतामयातव
नृपाद्भुतमीश्वरस्यस्थूलंवपुःसकलजीवनिकायधाम ४० इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांपंचमस्कंधेनरकानुवर्णनंनामषड्विंशतितमोऽध्यायः २६

चूर्णिका

एवंविधाः नरकाः यमालयेसंतिसहस्रशः तेषुअधर्मवर्तिनः यथाकर्मणाविशंतिधर्मानुवर्तिनः तुस्वर्गादौमर्त्यलोकेधर्माधर्मशेषाभ्यांविशंति ३७ एतावानेवआंडकोशः पुराणे
षुचतुर्दशधाविकल्पेनगीयते ३८ एतत् भगवतः नारायणस्यस्थूलंमायामयंरूपंयःआदरेणपठतिशृणोतिश्रावयतिसः भक्त्याविशुद्धबुद्धिः अग्राह्यमपितत्त्ववेत्ति यतिः
भगवतः स्थूलेरूपेनिर्जितंमनः धियाशनैः सूक्ष्मेरूपेनयेत् ३९ हेनृपभूद्वीपवर्षसरिदद्रिनभःसमुद्रपातालदिक्नरकभगणलोकसंस्थाइयमंयातवगिताएवईश्वरस्यइदंस्थू
लंरूपंतेअनुवर्णितम् ४० ॥ ॥ इतिपंचमस्कंधेचूर्णिकायांषड्विंशोऽध्यायः॥ ॥ २६ ॥ ॥ ॥ ॥ अयंस्कंधःसमाप्तः ॥ ॥ श्रीकृष्णार्पणंभूयात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत--पंचमस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत--षष्ठस्कंधः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीर्जयतितराम् । । पुण्यारण्येनृसिंहैकनामासिंहोविराजते । यस्मादतःपलायंतेमहाकल्मषकुंजराः ।१ विसंगंसमवान्जीवान्स्वमर्यादासुसंयतान् । विष्णुःपात्यखिलैरूपैरित्येवंपंचमेस्थितम् २। अध्या
यैकोनविंशत्याषष्ठेपोषणमुच्यते । अतिलंघितमर्यादभक्तरक्षणलक्षणम् ३ ।अजामिलोमनुष्येषुमहापापोयथाऽवितः।विश्वरूपादिघातीचतथादेवेषुवासवः ४। अजामिलस्यभक्तत्वंविष्णुदूतैर्निरूपितम्। संके
ततश्चतन्नामपुत्रस्नेहानुषंगजम्५इंद्रोपिभगवद्भक्तःसख्येनोपेंद्रसेवकः । तदधीनसुरैश्वर्यशत्रुनिर्जयजीवितः ६ तत्रादौत्रिभिरध्यायैरजामिलकथोच्यते । विश्वरूपकथाषड्भिरिंद्रदोषोक्तयेततः ७ इंद्रस्यैवतु
दोषोक्त्यैवृत्राख्यानंततोऽष्टभिः । द्वाभ्यांचमरुदाख्यानमेवंप्रकरणक्रमः८तत्रादौप्रथमेविष्णोर्दूतैःपातकिमोचने।तत्पापख्यापनायोक्तंयाम्यैर्धर्मादिलक्षणम् ९अथषष्ठस्कंधोव्याख्यास्यते(तत्र)पूर्वोक्तानुवाद
पूर्वकंनिरंतरोक्तनरकपरिहारोपायंपृच्छतिनिवृत्तिमार्गइतिषड्भिः।आदौद्वितीयस्कंधेवैश्वानरंयातीत्यादिना। भगवतात्वयायथायथावत्। यत्येनमार्गेण। क्रमेणयोगोऽर्चिरादिप्राप्तिस्तेनोपलब्धोयोब्रह्मात
नसहअसंसृतिर्मोक्षोभवति।“ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे। परस्यांतेकृतात्मानः प्रविशंतिपरंपद”मितिवचनात्।१ त्रैगुण्यंस्वर्गादिसुखंतदेवविषयःप्राप्यंयस्य।नलीनाप्रकृतिर्यस्यतस्यपुंसःपुनःपुनर्गुण
सर्गःभोगार्थदेहारंभरूपः सच (प्रवृत्तिलक्षणो) मार्गः कथितः । तृतीये । दक्षिणेनपथार्यम्णः पितृलोकंव्रजंतित्तइत्यादिना । २ अनुवर्णितानिरंतराध्यायेव्याख्याताः । चतुर्थस्यादौ (मन्वंतरश्चव्या
ख्यातः) यत्रः यस्मिन् (आद्यः स्वायंभुवः) ३।४। (पंचमे) द्वीपादीन् भागतो लक्षणतो मानतश्चधरामंडलस्यसंस्थानंज्योतिषां विवराणांच । इदंसंस्थानंविभुर्यथाऽसृजत्तथाव्याख्यातमित्य
र्थः ५ नानाउग्रयातनायेषुतान्नरकान्यथायेनोपायेननेयावनगच्छेत् । तन्मेअधुनाव्याख्यातुमर्हसि ६ तत्रतावन्मन्वाद्युक्तंप्रायश्चित्तंविनानरकादुर्निवाराइत्याहनचेदितिद्वाभ्यां । मनउक्तिपाणिभिःमनो
वाक्कायैः कृतस्यांहसोदोषस्यतैरेवइहैवापचितिंप्रायश्चित्तंनकुर्याच्चेत्तर्हिपुरुषःप्रेत्यमृत्वानरकान्ध्रुवमुपैति। मेमयायेभवतः कीर्तिताः तिग्मादारुणायातनायेषु ७ यस्मादेवंतस्मात्पापस्यनिष्कृतौप्रायश्चित्तेयते
तकदा मृत्योः पुरैवतत्रापिअविपद्यताअम्रियमाणेनआत्मनादेहेन । यद्वाअविपत्विपत्तिरहितोयावत्।यत्तात्मना संयतेनमनसा । तत्रापिआशु (शीघ्रं)“अन्यथाअतीवचिरकालेतुद्विगुणंव्रतमर्हती”तिद्वैगु
ण्यापत्तेः। तत्रचपापस्यमहत्वमल्पत्वंचावेक्ष्यतदनुरूपेप्रायश्चित्तेयतेतरुजांरोगाणांनिदानवित्यथावैद्यस्तदनुरूपंचिकित्सेततद्वत् ८

श्लोकाः १-८

श्रीः ॥ राजोवाच ॥ निवृत्तिमार्गःकथितआदौभगवतायथा ॥ क्रमयोगोपलब्धेनब्रह्मणायदसंसृतिः १प्रवृत्तिलक्षणश्चैवत्रैगुण्यविषयोमुने॥यौसावलीनप्रकृते
र्गुणसर्गःपुनःपुनः २ अधर्मलक्षणानानानरकाश्चानुवर्णिताः॥ मन्वंतरश्चव्याख्यातआद्यःस्वायंभुवोयतः ३ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानिच॥द्वीपवर्षस
मुद्राद्रिनद्युद्यानवनस्पतीन्४ धरामंडलसंस्थानंभागलक्षणमानतः॥ज्योतिषांविवराणांचयथेदमसृजद्विभुः५अधुनेहमहाभागयथैवनरकान्नरः॥नानोग्रयात
नान्नेयात्तन्मेव्याख्यातुमर्हसि६॥ श्रीशुकउवाच ॥ नचेदिहैवापचितिंयथांहसःकृतस्यकुर्यान्मनउक्तिपाणिभिः ॥ ध्रुवंसवैप्रेत्यनरकानुपैतियेकीर्तितामेभवत
स्तिग्मयातनाः ७ तस्मात्पुरैवाश्विहपापनिष्कृतौयतेतमृत्योरविपद्यतात्मना ॥ दोषस्यदृष्ट्वागुरुलाघवंयथाभिषक्चिकित्सेतरुजांनिदानवित् ८

चूर्णिका

श्रीगणेशायनमः श्रीमत्कुलदेवतायैनमः अथषष्ठस्कंधव्याख्या ॥ ॥ राजोवाच ॥ ॥ हेभगवन् त्वयानिवृत्तिमार्गश्चकथितः १ २ अधर्मलक्षणाः नरकाश्च३ स्वायंभु
वंमन्वंतरंप्रियव्रतोत्तानपदोर्वंशः ४ धरामंडलसंस्थानंचज्योतिषांविवराणांचस्थितिरुक्तासाश्रुता ५ इदानींनरः नरकान्येननगच्छेत्तद्वक्तुमर्हसि ६॥ ॥ श्रीशुकउवाच ॥
हेनृप इह मनउक्तिपाणिभिः कृतस्यअंहसः मन्वाद्युक्तंप्रायश्चित्तंयदिनकुर्यात् तर्हिप्रेत्यनरकान्याति ७ तस्मात्पापनिष्कृतौमृत्यो पूर्वमेवयतेत ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ष. अ० ॥१॥

टीका ॥२॥

अत्रचोदयतिद्वाभ्याम् । दृष्टंराजदंडादि । श्रुतंनरकपातादि । ताभ्यामात्मनःपापमहितंजानन्नपिभूयःप्रायश्चित्तानंतरंकरोति अथो अतःकारणाद्वादशाब्दादिकथंप्रायश्चित्तं तेनसमूलदोषस्यानि
वृत्तेः निवृत्तौवापुनश्चपापप्ररोहायोगादितिभावः ९ किंच । क्वचित्कदाचित् अभद्रात्पापान्निवर्ततेक्वचित्तदेवपुनराचरति । यथाकुंजरः स्नातोपिरजोभिरात्मानंमलिनीकरोति तथापापस्यदुर्निवारत्वेननर
कपातस्यावश्यंभावित्वात्प्रायश्चित्तंव्यर्थमिति १० परिहरति । कर्मणाकृच्छ्रादि-(-लक्षणेन) प्रायश्चित्तेन कर्मणःपापस्यनिर्हारोनाशःआत्यंतिकःसमूलोनर्हाप्यते । अविद्वानधिकारीयस्मिं
स्तस्यभावस्तत्त्वंतस्मात् अतोऽविद्यायानाशाभावान्नष्टेपितस्मिन्पापेतत्संस्कारेणपांतरस्यपुनःपुनःप्ररोहोभवत्येव । किंतर्हिमुख्यंप्रायश्चित्तंतदाह । प्रायश्चित्तंतुविमर्शनंज्ञानम् ११ तत्तुनित्यम
प्रमत्तः शनैर्लभतेनान्यइतिसदृष्टांतमाह नेति पथ्यमेवान्नमश्नतः पुरुषान् यथाव्याधयोनबाधंते । तथा नियमादिकर्ताक्षेमायतत्त्वज्ञानाय (कल्पते) समर्थोभवति १२ एतदेवविशदयतिद्वाभ्यां तपसा
एकाग्र्येण । "मनसश्चेंद्रियाणांच एकाग्र्यंपरमंतप"इतिस्मृतेः। ब्रह्मचर्येणाष्टांगेन तदुक्तं"स्मरणंकीर्तनंकेलिःप्रेक्षणंगुह्यभाषणं।संकल्पोऽध्यवसायश्चक्रियानिर्वृतिरेवच ।एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणः
। विपरीतंब्रह्मचर्यमेतदेवाष्टलक्षणमिति" । शमोमनसोनियमनं । दमोबाह्येंद्रियाणां । त्यागोदानं यमो हिंसादिः नियमोजपादिः । १३ । १४ । अस्यापिदुष्करत्वान्मुख्यमेवान्यत्प्रायश्चित्तमाह के
चिदिति । केचिदित्यनेनएवंभूताभक्तिप्रधानाविरलाइतिदर्शयति । केवलयातपआदिनिरपेक्षया । वासुदेवपरायणाइतिनाधिकारिविशेषणमेतत् । किंत्वन्येषामश्रद्धयातत्राप्रवृत्तेरर्थात्तेष्वेवपर्यवसा
नादनुवादमात्रं १५ एतच्चज्ञानमार्गादपि श्रेष्ठमित्याहनतथापूयेतशुध्येत । यथातत्पूरुषेनिषवयाकृष्णेऽर्पिताः प्राणायेन १६ तत्रहेतुः । सध्रीचीनः । समीचीनः अयंपंथाभक्तिमार्गःयतःक्षेमः । क्षेमत्वेहे
तुः।नकुतश्चिद्विघ्नादेर्भयंयत्र ।तदेवाह।सुशीलाः कृपालवः साधवोनिष्कामायत्रयास्मिन्मार्गे (भागवताः) धर्मनिष्ठाअतोनज्ञानमार्गइवासहायतानिमित्तंभयंनापिकर्ममार्गवन्मत्सरादियुक्तेभ्योभयमिति भावः१७

श्लोका ९/१७

॥ राजोवाच ॥ दृष्टश्रुताभ्यांयत्पापंजानन्नप्यात्मनोऽहितम् ॥ करोतिभूयोविवशःप्रायश्चित्तमथोकथम् ९क्वचिन्निवर्ततेभद्रात्क्वचिच्चरतितत्पुनः॥प्रायश्चित्तम
तोऽपार्थंमन्येकुंजरशौचवत् १०॥श्रीबादरायणिरुवाच॥कर्मणाकर्मनिर्हारोनह्यात्यंतिकइष्यतेअविद्वदधिकारित्वात्प्रायश्चित्तंविमर्शनम् ११ नाश्नतःपथ्यमे
वान्नंव्याधयोभिभवंतिहि॥एवंनियमकृद्राजन्शनैःक्षेमायकल्पते १२तपसाब्रह्मचर्येणशमेनचदमेनच॥त्यागेनसत्यशौचाभ्यांयमेननियमेनच १३ देहवाग्बु
द्धिजंधीराधर्मज्ञाःश्रद्धयान्विताः॥क्षिपंत्यघंमहदपिवेणुगुल्ममिवानलः१४ केचित्केवलयाभक्त्यावासुदेवपरायणाः॥अघंधुन्वंतिकार्त्स्न्येननीहारमिवभा
स्करः १५ नतथाह्यघवान्राजन्पूयेततपआदिभिः॥यथाकृष्णार्पितप्राणस्तत्पूरुषनिषेवया १६ सध्रीचीनोह्ययंलोकेपंथाःक्षेमोऽकुतोभयः॥ सुशीलाः
साधवोयत्रनारायणपरायणाः १७

घूर्णिका ॥२॥

॥ ॥ राजोवाच ॥ जनः दृष्टश्रुताभ्यांराजदंडनरकपाताभ्यांआत्मनःअहितंपापंजानन्नपिप्रायश्चित्तानंतरंपापंकरोतिअतःद्वादशाब्दादिप्रायश्चित्तंकथम् ९ किंचकदाचित्पा
पात्निवर्ततेक्वचित् तदेवपुनराचरति तस्यप्रायश्चित्तंकुंजरशौचवत्व्यर्थंभवति १० ॥ ॥ श्रीशुकउवाच ॥ ॥ कृच्छ्रादिकर्मणापापनाशः समूलोनभवति संस्कारेणपुनः
पापांतरस्यप्ररोहोभवत्येव किंतर्हिमुख्यंप्रायश्चित्तं ज्ञानं ११ तत्तुशनैर्लभते पथ्यमेवअश्नतःपुरुषान्यथाव्याधयोनबाधंते तथानियमादिकर्ताशनैःतत्त्वज्ञानायसमर्थोभवति
१२ तपसाब्रह्मचर्येणशमेनदमेनत्यागेनसत्यशौचाभ्यां यमनियमाभ्यांच १३ धर्मज्ञाः देहवाक्बुद्धिजंपापंनाशयंति १४ केचित्केवलयाभक्त्याअघंधुन्वंति १५
यथाकृष्णार्पितप्राणःसाधुसेवयाच अघवान्यथापूयेत तथातपआदिभिर्न १६ १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तेरन्यनिरपेक्षत्वमुक्तंकृच्छ्रादीनितुभक्तिंविनानशोधयंतीत्याह । प्रायश्चित्तानीति । महतामघशोधकत्वदृष्टांतमाह । सुराकुंभमापगानद्यइवेति १८ भक्तिः स्वल्पापिपुनात्येवेत्याह । सकृदिति । तस्य गुणेषुरागमात्रमस्तिनतुज्ञानंयस्यतन्मनः। (अत्रापिशब्दः प्रत्येकंयोजनीयः ।सकृदपिकिंपुनरभ्यासेन ।मनःसंशयात्मकमप्यंतःकरणंकिंपुनर्निश्चयात्मिकावृत्तिः । पादारविंदयोरपिकिंपुनःसमग्रमूर्तौ । निवेशितंबलादपि किंपुनःस्वतोनिविष्टं। तद्गुणेष्वपिरागि । किंपुनस्तत्स्वरूपेयैरिहेतिसामान्यवाचिभ्यांसर्वनामभ्यांमनोनिवेशनेजातिदेशविशेषानपेक्षेतिगम्येत।यैः कैश्चिदपिइहक्वापिनिवेशितंतेभक्तायमादीन्स्वप्नेपिनपश्यंति)। तावतैवचीर्णंनिष्कृतंप्रायश्चित्तं यैः १९ इममर्थमितिहासेनोपपादयतिअत्रचेतिमेमत्तः २० कान्यकुब्जेपुरेदास्याःपतिर्नाम्नाऽजामिलइति । २१ बंदीग्रहेण अक्षैश्चद्यूते न कैतवैर्वंचनादिभिश्चवृत्तिंजीविकां । बिभ्रत्पुष्णन् । यातयामासपीडयामास । २२ आयुषःसंबंधीमहान्कालोऽत्यगात् । सक्रियानित्यपेक्षायामाह । अष्टाशीत्यासंख्ययायुक्ताः समाः संवत्सराः २३ प्रवयसोवृद्धस्य (अवमः कनिष्ठः । नाम्नानारायणः पित्रोर्भृशंदयितश्च) २४(कलभाषिणिअस्फुटमधुरभाषणशीले) बद्धंहृदयंयेन। जरठोवृद्धः । २५ (यदास्वयंभुंजानस्तदातंभोजयन्एवंप्रपिबन्पाययन्खादन्खादयंश्चेति ।) एतच्चतदुपलालनादिश्रीनारायणनामोपचारमाहात्म्येनतद्भक्तिरेवाभूदितिसिद्धांतोपयोगित्वेनापिद्रष्टव्यं २६ । २७

श्लोकाः १८/२७

प्रायश्चित्तानिचीर्णानिनारायणपराङ्मुखम्॥नानिःपुनंतिराजेंद्रसुराकुंभमिवापगाः १८सकृन्मनःकृष्णपदारविंदयोर्निवेशितंतद्गुणरागियैरिह॥नतेयमंपाशभृतश्चतद्भटान्स्वप्नेपिपश्यंतिहिचीर्णनिष्कृताः १९अत्रचोदाहरंतीममितिहासंपुरातनम्। दूतानांविष्णुयमयोःसंवादस्तंनिबोधमे २०कान्यकुब्जेद्विजः कश्चिद्दासीपतिरजामिलः । नाम्नानष्टसदाचारोदास्याःसंसर्गदूषितः २१ बंद्यक्षकैतवैश्चौर्यैर्गर्हितांवृत्तिमास्थितः ॥ बिभ्रत्कुटुंबमशुचिर्यातयामासदेहिनः२२एवंनिवसतस्तस्यलालयानस्यतत्सुतान् ॥ कालोत्यगान्महान्राजन्नष्टाशीत्याऽऽयुषःसमाः२३ तस्यप्रवयसःपुत्रादशतेषांतुयोवमः॥ बालोनारायणोनाम्नापित्रोश्चदयितोभृशम्२४सबद्धहृदयस्तस्मिन्नर्भकेकलभाषिणि॥ निरीक्षमाणस्तल्लीलांमुमुदेजरठोभृशम्२५ भुंजानःप्रपिबन्खादन्बालकस्नेहयंत्रितः ॥ भोजयन्पाययन्मूढोनवेदागतमंतकम् २६ सएवंवर्तमानोज्ञोमृत्युकालउपस्थिते । मतिंचकारतनयेबालेनारायणाह्वये २७

कर्णीचू

आचरितानि प्रायश्चित्तानिनारायणपराङ्मुखंनानिः पुनंति आपगाः सुराकुंभमिव १८ यैःयैःकृष्णपादारविंदयोःसकृन्मनःनिवेशितंतेपूताः संतः यमंतद्भटांश्चनपश्यंति १९ अत्रविष्णुयमयोर्दूतानां संवादरूपंइतिहासंशृणु २० कान्यकुब्जेनगरेअजामिलनामाकश्चित्द्विजःदासीपतिःनष्टसदाचारःदासीसंसर्गदूषितः आसीत् २१ गर्ह्यवृत्त्यासः कुटुंबंअबिभ्रत् २२ एवंतस्याः सुतान् लालयतः सतः अष्टशीतिसमाभिःमितःकालः अगमत् २३ तस्यदशपुत्राआसन् तेषुकनिष्ठः नारायणो नामआसीत् २४ स्वयंजरठःसन्तंस्नेहेनलालयन्प्राप्तंअंतकंनवेद २५ २६ एवंमृत्युकालेउपस्थितेसतिपाशहस्तान्त्रीन्पुरुषान्दृष्ट्वाभीतःसन्उच्चैःनारायणइतितं आजुहाव २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वक्राणिविकटानितुंडानिमुखानियेषांतान्ऊर्ध्वाणिरोमाणियेषांतान् २८ प्लावितेनप्लुतत्वंनीतेन (आजुहावएहीत्याकारितवान्) २९ हरिकीर्तनं निशाम्य (सहसाऽकस्मात् आपतन् (प्राप्ताः) यतस्तद्भर्तुर्नाम ३० (अंतर्हृदयात्हृदयमध्यात् । यमप्रेष्यान्यमदूतान्) ३१ (वैवस्वतस्ययमस्य) पुरःसराभृत्याः ३२ अस्यनयंनंनिषेधथ ३३ वयंयुष्मान्नजानीमइतिकोपोनकार्यः यतोलौकिकाद्रु तरूपायूयमित्याहुः सर्वइतिसार्धाभ्यां । लसंत्यः पुष्करमालाः संतियेषां ३४ नूत्नंनवंवयोयेषांते(तरुणा इत्यर्थः) निषंगइषुधिः धनुर्निषंगादिभिःश्रीः शोभायेषांते । ३५विगतंतिमिरंआलोकश्चान्यस्य प्रकाशोयासुतथाभूतादिशःकुर्वंतः । भवतामेतदनुचितमित्याहुः किमर्थमिति । ३६ अहोदंडयादंडयादिज्ञानशून्याएतेचोराएवास्मद्भियाधर्मराजस्यकिंकराइत्यनृतंवदंतीतिविस्मयेनप्रहस्यतान्प्र त्यूचुः । मेघस्येवनिर्ह्रादोध्वनिर्यस्यास्तया ३७ तत्त्वंस्वरूपं लक्षणंप्रमाणं । ३८कथंस्वित्केनप्रकारेण । (अस्यदंडस्य) स्थानंविषयः । कारिणः कर्मिणः । नृणामितिनराएवनपश्वादयः । तेष्वपिक तिचिदेवेत्यर्थः । ३९

श्लोकाः

सपाशहस्तांस्त्रीन्दृष्ट्वापुरुषान्भृशदारुणान् ॥ वक्रतुंडानूर्ध्वरोम्णआत्मानंनेतुमागतान् २८ दूरेक्रीडनकासक्तंपुत्रंनारायणाह्वयम् ॥ प्लावितेनस्वरेणोच्चैराजु हावाकुलेंद्रियः २९ निशम्यम्रियमाणस्यब्रुवतोहरिकीर्तनम् ॥ भर्तुर्नाममहाराजपार्षदाःसहसाऽपतन् ३० विकर्षतोंऽतर्हृदयाद्दासीपतिमजामिलम् । यमप्रेष्यान्विष्णुदूतावारयामासुरोजसा ३१ ऊचुर्निषेधितास्तांस्तेवैवस्वतपुरःसराः ॥ केयूयंप्रतिषेद्धारोधर्मराजस्यशासनम् ३२ कस्यवाकुतआयाताःकस्मा दस्यनिषेधथ ॥ किंदेवाउपदेवावायूयंकिंसिद्धसत्तमाः ३३ सर्वेपद्मपलाशाक्षाःपीतकौशेयवाससः ॥ किरीटिनःकुंडलिनोलसत्पुष्करमालिनः ३४ सर्वेचनूत्नवय सःसर्वेचारुचतुर्भुजाः ॥ धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः ३५ दिशोवितिमिरालोकाःकुर्वंतःस्वेनरोचिषा ॥ किमर्थंधर्मपालस्यकिंकरान्नोनिषेधथ ३६ इत्युक्तेयमदूतैस्तेवासुदेवोक्तकारिणः ॥ तान्प्रत्यूचुःप्रहस्येदंमेघनिर्ह्रादयागिरा ३७ विष्णुदूताऊचुः ॥ यूयंवैधर्मराजस्ययदिनिर्देशकारिणः ॥ ब्रूतधर्मस्यनस्त त्त्वंयच्चधर्मस्यलक्षणम् ३८ कथंस्विद्ध्रियतेदंडःकिंवास्यस्थानमीप्सितम् ॥ दंड्याःकिंकारिणःसर्वेआहोस्वित्कतिचिन्नृणाम् ३९

२८
३९

चूर्णिका

२८ २९ तदाम्रियमाणस्यहरिकीर्तनंनिशम्यविष्णुपार्षदाःएत्य ३० दासीपतिं अजामिलंविकर्षतः यमदूतान्ओजसा वारयामासुः ३१ तदायमदूताःसायुधान्विष्णुरूपधरान्दृष्ट्वा तान्ऊचुःयूयंधर्मराजस्यशासनंप्रतिषेद्धारः केयूयं ३२ किं देवाःउपदेवाः वासिद्धावा ३३ यतः सर्वेपद्मपत्राक्षाः चतुर्भुजाःपीतवाससः किरीटिनः कुंडलिनः कमलमा लिनः ३४ तरुणाः धनुर्निषंगादिधारिणःसंतःयमदूतान्नःकिमर्थंनिषेधथ ३५ ३६ श्रीशुकउवाच यमदूतैःएवमुक्तेविष्णुदूताऊचुः ३७ यूयंधर्मराजस्ययादिनिर्देशकारिणः तर्हिधर्मस्यतत्त्वंब्रूत ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदेनप्रणिहितोविहितोधर्मः वेदप्रमाणकइत्यर्थः अनेनयोवेदप्रमाणकः सधर्मःयोधर्मः सवेदप्रमाणकइतिस्वरूपंप्रमाणंचोक्तं ।यथाहजैमिनिः।"चोदनालक्षणोर्थोधर्म"इति । व्याख्यातंचभट्टैः"द्वयमेकेनसूत्रेण श्रुत्यर्थाभ्यांनिरूप्यत " इति । अपृष्टस्याप्यधर्मस्यस्वरूपंलक्षणंचदंडस्थानकथनायाहुः । तद्विपर्ययः योवेदनिषिद्धः सोऽधर्मः । निषेधश्चतस्मिन्प्रमाणमित्यर्थः । वेदस्यप्रामाण्येहेतुः । वेदोनारायणादुद्भूतोऽतः सएवसाक्षादित्युपचारः । स्वयंभूरितिचनिश्वासमात्रेणस्वयमेवभवतीति ।तथाचश्रुतिः । "अस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेद "इति ४० कोसौनारायणस्तत्राहुः । येनस्वधाम्निस्वस्वरूपेअमीभावाः प्राणिनः गुणाः शांतत्वादयः नामानिब्राह्मणइत्यादीनि । क्रियाश्चाध्ययनाद्याः रूपाणिवर्णाश्रमादयः।तैर्विभाव्यंतेविविच्यंतेयथातथ्यंयथावत् सनारायणः ४१ तथाप्यधर्मोनेनकृतइतिकुतोज्ञायतेतत्राहुः । सूर्यइति (मरुद्वायुः)अहनीअहश्चरात्रिश्च । कंउदकं । कुः पृथ्वी (धर्मोयमः) देह्यस्यजीवस्य । यथाहुः । " आदित्यचंद्रावनिलोऽनलश्चद्यौर्भूमिरापोहृदयंमनश्च । अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्त"मिति४२स्थानमाहुः । एतैर्निमित्तभूतौर्विज्ञातः । दंड्यानाहुः । सर्वइति (कारिणः कर्मिणः)४३विपरीतानिअभद्राणिचकर्मिणांसंभवंति।यतस्तेषांगुणसंयोगोस्ति। यदिकश्चिदकर्तास्यात् तर्हितस्याभद्राणिनस्युः।नत्वेतदस्तीत्याहुः । नहिदेहवानकर्मकृदस्तीति । अतः सर्वेकर्मिणः कर्मिणांचपापस्यावश्यंभावित्वात् तेसर्वेक्रमानुरोधेनदंडमर्हंतीत्यर्थः४४कथंस्विद्ध्रियते दंडइत्यस्योत्तरं येनेति । धर्मेवेतिदृष्टांतः । अधर्मानुसारेणदंडोधर्मानुसारणसुखवदित्यर्थः ४५ नकेवलंसूर्यादयएवज्ञापकाः किंत्वर्थापत्तिरपीत्याहुः । यथेति । हेदेवप्रवराः इहजन्मानिशांतघोरमूढत्वेनसुखिदुःखिमिश्रत्वेनवाधार्मिकत्वादिनावात्रैविध्यंभूतेषुयथोपलभ्यतेतथान्यत्रजन्मांतरेऽनुमीयतेत्रैविध्यान्यथानुपपत्त्याकल्प्यते ४६ वर्तमानजन्मनापूर्वापरजन्मधर्माधर्मज्ञानंभवतीतिसदृष्टांतमाहुः वर्तमानोवसंतादिकालः अन्ययोर्भूतभविष्ययोर्वसंतयोर्येगुणाः पुष्पफलादयः तेषामभिज्ञापकोयथाएवमेतज्जन्मअन्ययोर्भूतभाविजन्मनोर्धर्माधर्मौनिदर्शयतीतितथा ४७ अयंचधर्माधर्मज्ञानप्रकारोन्येषाम्। धर्मराजस्तुमनसैवसर्वंपश्यतीत्याहुः । पुरेसंयमिन्यांस्थितएवदेवोयमः देहेस्थितोऽतर्यामीवाजीवस्यपूर्वरूपंधर्माधर्मादियुक्तंविशेषेणपश्यति । अनुअनंतरमपूर्वंरूपंमीमांसतेयद्यस्यानुरूपंतद्विचारयतियतोसौभगवानजः ४८

श्लोका ४०/४८

॥यमदूताऊचुः॥वेदप्रणिहितोधर्मोह्यधर्मस्तद्विपर्ययः॥वेदोनारायणःसाक्षात्स्वयंभूरितिशुश्रुम ४० येनस्वधाम्न्यमीभावारजःसत्त्वतमोमयाः॥गुणनामक्रियारूपैर्विभाव्यंतेयथातथम् ४१ सूर्योग्निःखंमरुद्देवःसोमःसंध्याहनीदिशः॥कंकुःकालोधर्मइतिह्येतेदैह्यस्यसाक्षिणः ४२ एतैरधर्मोऽभिज्ञातःस्थानंदंडस्ययुज्यते सर्वेक्रमानुरोधेनदंडमर्हंतिकारिणः ४३ संभवंतिहिभद्राणिविपरीतानिचानघाः॥कारिणांगुणसंगोस्तिदेहवान्नह्यकर्मकृत् ४४ येनयावान्यथाधर्मोधर्मोवेहसमीहितः ॥ सएवतत्फलंभुंक्तेतथातावदमुत्रवै ४५ यथेहदेवप्रवरास्त्रैविध्यमुपलभ्यते ॥ भूतेषुगुणवैचित्र्यात्तथान्यत्रानुमीयते ४६ वर्तमानोऽन्ययोःकालोगुणाभिज्ञापकोयथा ॥ एवंजन्मान्ययोरेतद्धर्माधर्मनिदर्शनम् ४७ मनसैवपुरेदेवःपूर्वरूपंविपश्यति ॥ अनुमीमांसतेऽपूर्वंमनसाभगवानजः ४८

॥५॥

चूर्णिका यमदूताऊचुः वेदप्रणीतोयः सः धर्मः तद्विपयर्यः अधर्मः वेदः साक्षात्नारायणइति शुश्रुम ३९ ४० ४१ सूर्यः १ आग्निः २ खं ३ मरुत् ४ गावः ५ सोमः संध्या ६ अह ः ६ ७ ८ रात्रिः ९ दिशः १० कं ११ कुः १२ कालः १३ धर्मः १४ एते देहिनःसाक्षिणोभवंति एतैःअधर्म.विज्ञातःयथाकर्मतदनुरूपंदंडंसर्वेजीवाः अर्हंतिइत्यादि ४२ ४३ ४४ ४५ ४६ ४७ ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जीवस्त्वीश्वरेणउपस्थापितंवर्तमानंदेहंपश्यतिनतुपूर्वमपरंचेत्याहुः।अज्ञःअविद्योपाधिर्जीवस्तुव्यक्तमेवप्राचीनकर्माभिव्यक्तंवर्तमानमेवदेहाद्युपास्तेअहमितिमन्यते । पूर्वमपरंवानवेद ! अत्रहेतुःनष्टाजन्मनास्मृतिर्यस्य। अत्रदृष्टांतःतमसानिद्रयायुक्तोयथास्वप्नेभिव्यक्तमेवदेहाद्युपास्तेनतुजाग्रद्देहादि।पूर्वंस्वप्नादिगतंवातद्वादित्यर्थः४९एवंभूतस्यजीवस्यसंसारंप्रपंचयतिपंचभिःश्लोकैः।पंचभिःकर्मेंद्रियैःस्वार्थान्उपादानादीन्कुरुते तथापंचभिर्ज्ञानेंद्रियैःपंचशब्दादीन्वेद। षोडशेनमनसासहसप्तदशः षोडशोपाध्यंतर्गतोपिस्वयंत्वेकएवसर्वेंद्रियविषयप्रतिसंधानात् त्रीन्ज्ञानकर्मेंद्रियमनोविषयान्प्राप्नोति५० तदेतल्लिंगशरीरंशक्तित्रयंगुणत्रयकार्यंमहदनादिपुंसिजीवे अन्वनुसंसृतिंधत्ते ५१ नेच्छन्अनिच्छन्नपि (नाजितः षण्णांकामादीनांवर्गोयेनसः) अनेनैवलिंगेनकर्माणिकार्यते । कोशकारः कीटविशेषः । मुह्यतिनिर्गमोपायंनजानाति ५२ कार्यतइत्यत्रानुभवंप्रमाणयतिनहीति । गुणैर्गुणकार्यरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः ५३ कर्मवशेनचतदनुरूपोदेहोभवतीत्याह । लब्ध्वेति। अव्यक्तंअदृष्टंनिमित्तंलब्ध्वा तदनुरूपंव्यक्ताव्यक्तंस्थूलंसूक्ष्मंचशरीरंभवति । यथायोनिमातृसदृशं । यथाबीजंपितृसदृशं । स्वभावोवासना । शुक्रशोणितयोः सर्वत्रैकत्वेपिकर्मवासनयामातृसदृशः पितृसदृशश्चदेहोभवतीत्यर्थः ५४ संसारचक्रमुपसंहरंतो मुक्तिप्रकारमाहुः । एषइति । ईशसंगात्परमेश्वरभजनात् ५५ तदेवंसामान्यतो धर्मादिनिर्णयमुक्त्वा प्रस्तुतस्याजामिलस्याधर्मंप्रपंचयंतो दंड्यत्वमाहुः । अयंहीतियावदध्यायसमाप्ति । तत्रद्वाभ्यांतत्पूर्ववृत्तांतानुवादोऽन्यायातिरेकप्रदर्शनार्थं । शीलंसुस्वभावः वृत्तंसदाचारः गुणाः क्षमादयः तेषामालयोयं (अजामिलः) ५६ निरहंकृतोनिरहंकारः । ५७ ततः आवृत्तः वनात्परावृत्तः ५८ भुजिष्ययाभोगस्त्रियादास्या मैरेयंमधु पैष्टींसुरांपीत्वामदेनआघूर्णितेभ्रांतेनेत्रेयस्याः ५९ विशेषेणश्लथंतीनीवीयस्याः (अनयासह) व्यपेतं स्वाचाराद्भ्रष्टम् ६० कामोद्दीपकेनतदंगरागेणहारिद्रादिनालिप्तेन (बाहुनापरिरंभितामालिंगिताम्) ६१ सत्त्वंधैर्यं श्रुतंज्ञानं तद्बलेनस्तंभयन्नपिमदनकंपितंमनःसमाधातुंनशक्तोभूत् ६२ तद्दर्शनमेवनिमित्तंयस्यस्मरव्याजस्यग्रहस्यतेनग्रस्तः विचेतनोगतस्मृतिः ६३ यावतासमग्रेण । ६४ लंभितांपरिणीताम् ६५

यथाज्ञस्तमसायुक्तउपास्तेव्यक्तमेवहि ॥ नवेदपूर्वमपरंनष्टजन्मस्मृतिस्तथा ४९पंचभिःकुरुतेस्वार्थान्पंचवेदाथपंचभिः ॥ एकस्तुषोडशेनत्रीन्स्वयंसप्तदशोऽश्नुते ५० तदेतत्षोडशकलंलिंगंशक्तित्रयंमहत्॥धत्तेनुसंसृतिंपुंसिहर्षशोकभयार्तिदाम्५१ देह्यज्ञोऽजितषड्वर्गोनेच्छन्कर्माणिकार्यते॥कोशकारइवात्मानंकर्मणाच्छाद्यमुह्यति५२नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत् ॥ कार्यतेह्यवशःकर्मगुणैःस्वाभाविकैर्बलात्५३लब्ध्वानिमित्तमव्यक्तंव्यक्ताव्यक्तंभवत्युत॥यथायोनियथाबीजंस्वभावेनबलीयसा ५४एषप्रकृतिसंगेनपुरुषस्यविपर्ययः॥आसीत्सएवनाचिरादीशसंगाद्विलीयते ५५ अयंहिश्रुतिसंपन्नःशीलवृत्तगुणालयः ॥ धृतव्रतोमृदुर्दांतःसत्यवान्मंत्रविच्छुचिः५६गुर्वग्न्यतिथिवृद्धानांशुश्रुषुर्निरहंकृतः॥सर्वभूतसुहृत्साधुर्मितवागनसूयकः ५७एकदासौवनंयातःपितृसंदेशकृद्द्विजः ॥ आदायततआवृत्तःफलपुष्पसमित्कुशान् ५८ददर्शकामिनंकंचिच्छूद्रंसहभुजिष्यया॥ पीत्वाचमधुमैरेयंमदाघूर्णितनेत्रया ५९ मत्तया विश्लथन्नीव्याव्यपेतंनिरपत्रपम्॥ क्रीडंतमनुगायंतंहसंतमनयांऽतिके ६० दृष्ट्वातांकामलिप्तेनबाहुनापरिरंभिताम्॥जगामहृच्छयवशंसहसैवविमोहितः६१ स्तंभयन्नात्मनात्मानंयावत्सत्त्वंयथाश्रुतम्॥ नशशाकसमाधातुंमनोमदनवेपितम्६२तन्निमित्तस्मरव्याजग्रहग्रस्तोविचेतनः॥तामेवमनसाध्यायन्स्वधर्माद्विरराम६३तामेवतोषयामासपित्र्येणार्थेनयावता॥ग्राम्यैर्मनोरमैःकामैःप्रसीदेतयथातथा६४विप्रांस्वभार्यामप्रौढांकुलेमहतिलंभिताम् ॥ विससर्जाचिरात्पापःस्वैरिण्यापांगविद्धधीः ६५ ॥६॥

चूर्णिका। ४९५०५१५२५३५४५५अयंअजामिलोतिशुचिः सन्५६५७पित्राज्ञयावनंगत्वाफलपुष्पसमित्कुशानादायपरावृत्तः ५८ मार्गेकंचिन्मद्यपानेनमत्तयादास्यानग्नयाक्रीडंतंशूद्रंददर्श५९६०तांदृष्ट्वाआत्मानंस्तंभयन्नपिकामवशंगतः६१मदनवेपितंमनःनियमितुंनशक्तोभूत्६२ ततःपित्र्येणार्थेनतांवशंआनीयसतींस्वभार्यांत्यक्त्वातयासहरेमे६३ ६४ ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ६६अघरूपमायुर्यस्यमलमेवतदीयमन्नादिकमत्तीतिमलात्६७अकृतनिर्वेशंअकृतप्रायश्चित्तम्अस्यैवचहितार्थेनेष्यामइत्याहुःयत्रेति६८इतिषष्ठस्कंधेटीकायांप्रथमोध्यायः ॥१॥ द्वितीयेवैष्णवैर्याम्यान्नाममाहा
त्म्यमुद्धृतम्। श्रावयित्वाद्विजोविष्णोर्लोकंनीतइतीर्यते ॥१॥ नयकोविदाःन्यायनिपुणाः१ धर्मदृशांसभामधर्मः स्पृशति । तदाह । यत्रसभायांयैःधर्मदृग्भिःातेषांतांसभां२पितरः पितृवत्पालकाः शास्तारो
अनुशिक्षकाः । वैषम्यमदंडचदंडनम् ३ एतत्प्रवर्त्तितमधर्ममन्योपिकरिष्यतीतिमहत्कष्टमभूदित्याहुः यद्यदिति श्रेयान्श्रेष्ठः ४ विश्वस्तघातादपीत्याहुः । यस्येतिद्वाभ्यां (अंकेउत्संगे) निर्वृतोनिश्चिंतः ५
टीका तद्विश्वासेननितरामर्पितश्चात्मायेनतं। विश्रंभणीयः विश्वसनीयः सघृणः (सकरुण-)श्चेत् ६ नन्वस्यपापिनोदंडे किमर्थमाक्रोशःक्रियतेतत्राहुः अयंहीति। यद्यस्माद्विवशोपिहरेर्नामव्याजहारउच्चारितवान् ॥२॥
नकेवलंप्रायश्चित्तमात्रंहरेर्नामअपितुस्वस्त्ययनं मोक्षसाधनमपि । "सकृदुच्चरितंयेनहरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेनमोक्षायगमनंप्रती" तिस्मृतेः ७ ननुकर्मसाद्गुण्यकरंहेरनामेतियुक्तं। "यस्यस्मृत्या
॥ ७ ॥ चनामोक्त्यातपोयज्ञक्रियादिषु। न्यूनंसंपूर्णतांयातिसद्योवंदेतमच्युत"मित्यादिवचनात्। स्वातंत्र्येणत्वघनिवर्तकंहरेर्नामकथंस्यात्तत्राहुः। एतेनैवेति अघोनःअघवतःमघवच्छब्दवद्रूपं । यत्आइतिच्छेदः ।
आईषत्आभासमात्रंचतुरक्षरंयन्नामजगाद एतेनैवकेवलेन।चतुरक्षरमित्यनेनाधिक्यंचदर्शितम्। कथंजगाद नारायण आयआगच्छइत्येवंविक्रोशरूपेणपुत्राह्वानेन ।अयंभावः । कर्मांगत्वेपिहरिनाम्नः खा
दिरत्वादिवत् खादिरोयूपोभवति।खादिरंवीर्यकामस्य । इत्यत्रयथाएकस्यैवख।दिरत्वस्यक्रत्वर्थत्वं वीर्यलक्षणपुरुषार्थत्वंचतद्वत्संयोगपृथक्त्वेनप्रायश्चित्तार्थत्वंयुक्तमेव। तथाहि। "अवशेनापियन्नाम्निकीर्तिते
सर्वपातकैः । पुमान्विमुच्यतेसद्यः सिंहत्रस्तैर्मृगै"रिवेत्यादिभिः पुराणेषुतावत्सहस्रशोनाम्नः स्वातंत्र्यमवगम्यते।नचैतेर्थवादाइतिशंकनीयं विधिशेषत्वाभावात् यथावायव्यंश्वेतमालभेतभूतिकामइतिविधि
स्तच्छेषत्वंवायुर्वैक्षे पिष्ठादेवतेत्यर्थवादस्य । तथात्रापिविधिशेषत्वेनभाव्यंतदभावात्इत्यर्थः। नचाविध्यश्रवणादन्यशेषताकल्पनीया । यदा" ग्नेयोष्टाकपालोभवतीत्यादिवदप्राप्तार्थत्वेतुविध्यनुपपत्तिः यथा
रागतःप्राप्तेभोजनादौ प्राप्तार्थत्वेनविधिकल्पनोपपत्तेः । मंत्रेषुच । "मर्ताअमर्त्यस्यते भूरिनाममनामहे । विप्रासोजातवेदसः।आस्यजानंतोनामाचिद्विविक्तन"(मर्ताःमर्त्याःमरणधर्माणो।विप्रासोविप्रास्तेवयं
अमर्त्यस्यजातवेदसस्तेनामभूरितपोदानादिसर्वधर्मेभ्योऽधिकंमनामहेमन्यामहइत्यर्थः ।आअस्येतिछेदः अस्यविष्णोः आसम्यक्प्रकारेणनामयूयंविवक्तनकीर्तयतकिंकुर्वंतः चित्क्वाचित्जानंतः नाममाहात्म्य
ज्ञानंवतइत्यर्थः) इत्यादिषुनाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते । उपपादितंचमंत्रार्थवादानामपिस्वार्थेप्रामाण्यंदेवताधिकरणे । तस्माच्छ्रीनारायणनामाभासमात्रेणैवसर्वाघनिष्कृतंकृतंस्यादिति ८

यतस्ततश्चोपनिन्येन्यायतोऽन्यायतोधनम्।।बभारास्याःकुटुंबिन्याःकुटुंबंमंदधीरयम्६६यदसौशास्त्रमुल्लंघ्यस्वैरचार्यार्यगर्हितः।।अवर्ततचिरंकालमघायुरशु श्लोकाः
चिर्मलात्६७ततएनंदंडपाणेःसकाशंकृतकिल्बिषम्।।नेष्यामोऽकृतनिर्वेशंयत्रदंडेनशुद्ध्यति६८इतिश्रीभा० ष०प्रथमोध्यायः।।१।।श्रीशुकउवाच।एवंतेभगवद्
तायमदूताभिभाषितम्।।उपधार्याथतान्राजन्प्रत्याहुर्नयकोविदाः१ विष्णुदूताऊचुः।।अहोकष्टंधर्मदृशामधर्मःस्पृशतेसभाम्।।यत्रादंड्येष्वपापेषुदंडोयैर्ध्रियते ६६/८
वृथा२प्रजानांपितरोयेचशास्तारःसाधवःसमाः।यदिस्यात्तेषुवैषम्यंकंयांतिशरणंप्रजाः३यद्यदाचरतिश्रेयानितरस्तत्तदीहते।सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते४
यस्यांकेशिरआधायलोकःस्वपितिनिर्वृतः।स्वयंधर्ममधर्मंवानाहिवेदयथापशुः५सकथंन्यर्पितात्मानंकृतमैत्रमचेतनम्।विश्रंभणीयोभूतानांसघृणोद्रोग्धुमर्हति६
अयंहिकृतनिर्वेशोजन्मकोट्यंहसामपि।यद्व्याजहारविवशोनामस्वस्त्ययनंहरेः।।७एतेनैवह्यघोनोऽस्यकृतंस्यादघनिष्कृतम्।यदानारायणायेतिजगादचतुरक्षरं८

चूर्णिका ६६ ६७ सधर्मंतत्याजअसौशास्त्रंउल्लंघ्यपापंकृतवान्ततः एनंदंडपाणेःसकाशंनेष्यामः यत्र दंडे नशुध्यति ६८ इतिषष्ठस्कंधेप्रथमोध्यायः १ श्रीशुकउवाच एवंते
भगवद्दूताः यमदूतवाक्यंउपधार्य तानाहुः १ ॥ ॥ विष्णुदूताऊचुः ॥ ॥ अहोकष्टंधर्मदृशांसभांअधर्मः स्पृशति यत्रनिष्पापेषुवृथादंडः ध्रियते २ ये प्रजानां पितृवत्पा
लकाः तेषुयदिवैषम्यंस्यात् तर्हिप्रजाः कंशरणंयास्यंति ३ यद्य दाचरतिश्रेयानितरस्तत्तदीहते सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते ४ लोकःयस्यांकेशिरः आधायस्वस्थः स्व ॥७॥
पिति धर्माधर्मंनवेद यथा पशुः५सःकथंद्रोग्धुमर्हति६अयंतुजन्मकोट्यंहसांकृतनिर्वेशःयदाविवशःसन्७हरेः नामव्याजहारएतेनैवअस्यपातकंदग्धंयदानारायणेतिजगाद ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुकामकृतानांवहूनांमहापातकानांसहस्रशआवर्तितानांद्वादशाब्दादिकोटिभिरप्यनिवर्त्यानांकथमिदमेकमेवप्रायश्चित्तंतत्राहुः स्तेनइतिद्वाभ्यांम्९सुनिष्कृतंश्रेष्ठंप्रायश्चित्तमिदमेव । तत्रहेतुः । (नामव्याहरणंनामोच्चारणम्) यतोनामव्याहरणात्तद्विषयानामोच्चारकपुरुषविषयामदीयोयंमयासर्वतोरक्षणीयइतिविष्णोर्मतिर्भवति १०श्रेष्ठत्वमेवोपपादयंतिनेतिद्वाभ्याम् । ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैःप्रायश्चित्तैस्तथानशुध्यति।उदाहृतैरुच्चारितैर्यथानामपदैरित्यनेननमामत्यादिक्रियायोगोपिनापेक्षितइतिदर्शितम्।किंच।तन्नामपदोच्चारणंउत्तमश्लोकस्यतद्गुणानांचोपलंभकंज्ञापकंभवति ।नतुकृच्छ्रचांद्रायणादिवत्पापनिवृत्तिमात्रोपक्षीणमित्यर्थः ११ नैकांतिकंनांत्यंतशोधकम् । तन्निष्कृतम् । यस्मिन्कृतेपिअसत्पथेपापमार्गे मनोधावतिचेत् । कर्मणांपापानांनिर्हारंआत्यंतिकंनाशमिच्छतांहरेर्गुणानुवादएवप्रायश्चित्तम् । यतोसौखलुसत्त्वभावनः चित्तशोधकः १२ अथतस्मादेनंमाअपमार्गेणनयत । कृतमशेषाणामघानांनिष्कृतंयेन । यद्यस्मात्समग्रहीत्संपूर्णमुच्चारितवान् । नामैकदेशेनाप्यलमितिभावः म्रियमाणइत्यनेनपुनः पापांतरासंभवउक्तः नतुतत्कालत्वमेवविवक्षितम् । तदानींकृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात् । नचविधिंविनाकाकतालीयनामोच्चारणंपापहरमितिप्रमाणमस्ति १३ नन्वयंपुत्रनामाग्रहीत्नतुभगवन्नामतत्राहुः सांकेत्यंपुत्रादौसंकेतितम् । पारिहास्यंपरिहासेनकृतम् । स्तोभंगीतालापपूरणार्थंकृतम् । हेलनंकिंविष्णुनेतिसावज्ञमपिचवैकुंठनामोच्चारणम् १४ ननु नायंसंकल्पपूर्वकंवैकुंठनामाग्रहीत् । किंतुपुत्रस्नेहपरवशःसन् । तत्राहुः । पतितइति । अवशेनापियोहरिरित्याहसयातनांनार्हति । पुमानित्यनेन नात्रवर्णाश्रमादिनियमइत्युक्तम् ।अवशत्वमेवाह । पतितः प्रासादादिभ्यः स्खलितोमार्गे । भग्नोभग्नगात्रः । संदष्टः सर्पादिभिः । तप्तोज्वरादिना । आहतोदंडादिना १५ ननुमहतःपापस्यमहदेवप्रायश्चित्तंयुक्तंनत्वल्पंनामग्रहणमात्रं पापतारतम्येनकृच्छ्रादितारतम्यवत्तत्राहुर्द्वाभ्याम् । गुरूणांपापानांगुरूणिप्रायश्चित्तानिलघूनांचलघूनितारतम्यंज्ञात्वामन्वादिभिरुक्तानि । अतस्तत्रतथैवव्यवस्था । हरिनाम्नस्तुनेयंव्यवस्थोक्ता " विष्णोः स्मरणमात्रेणमुच्यतेसर्वपातकैरि " ति वचनात् । नचसुराबिंदुपानेमहापातकत्वस्मरणवत्नाम्नस्तत्प्रायश्चित्तत्वस्मरणस्यायमतिभारः । १६

श्लोकाः ९ — १६

स्तेनःसुरापोमित्रध्रुग्ब्रह्महागुरुतल्पगः॥ स्त्रीराजपितृगोहंतायेचपातकिनोपरे ९ सर्वेषामप्यघवतामिदमेवसुनिष्कृतम्॥ नामव्याहरणंविष्णोर्यतस्तद्विषयामतिः १० ननिष्कृतैरुदितैर्ब्रह्मवादिभिस्तथाविशुद्ध्यत्यघवान्व्रतादिभिः ॥ यथाहरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलंभकम् ११ नैकांतिकंतद्धिकृतेपिनिष्कृतेमनःपुनर्धावतिचेदसत्पथे ॥ तत्कर्मनिर्हारमभीप्सतांहरेर्गुणानुवादःखलुसत्त्वभावनः १२ अथैनंमापनयतकृताशेषाघनिष्कृतम् ॥ यदसौभगवन्नामम्रियमाणःसमग्रहीत् १३ सांकेत्यंपारिहास्यंवास्तोभंहेलनमेववा । वैकुंठनामग्रहणमशेषाघहरंविदुः १४ पतितःस्खलितोभग्नःसंदष्टस्तप्तआहतः । हरिरित्यवशेनाहपुमान्नार्हतियातनाम् १५ गुरूणांचलघूनांचगुरूणिचलघूनिच ॥ प्रायश्चित्तानिपापानांज्ञात्वोक्तानिमहर्षिभिः १६

चूर्णिका अहो स्तेनःसुरापोमित्रध्रुक्ब्रह्महागुरुतल्पगः स्त्रीराजपितृगोहंतायेचपातकिनोपरे९सर्वेषांअघवतांइदमेवश्रेष्ठंप्रायश्चित्तं किंतत् विष्णोर्नामोच्चारणामिति १० यथाहरेर्नाम्नाशुध्यतितथाप्रायश्चित्तैर्न ११ अतःकृतप्रायश्चित्तंएनंमानयत१२ १३ यदसौम्रियमाणः भगवन्नामअग्रहीत् सांकेत्यंपारिहास्यंवास्तोभंहेलनमेववावैकुंठनामग्रणंअशेषाघहरंविदुः १४ पतितः स्खलितोभग्नः संदष्टः तप्तः यः पुमान्हरिरितिआहसः यातनांनार्हति १५ किंच गुरूणांलघूनांचपापानांगुरूणिलघूनिचप्रायश्चित्तानिमन्वदिभिरुक्तानि १६

॥८॥

१ काकागमनेतालपतनमिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

किंच तैस्तपोदानादिभिस्तान्यघान्येवपूयंतेनश्यंति। अधर्मज्जातंमलिनंतुतस्यपापकर्तुर्हृदयं यद्वा तेषांअघानांहृदयंसूक्ष्मंरूपंसंस्काराख्यंनशुद्ध्यति। तदपीशांघ्रिसेवयाकीर्तनादिनाशुद्ध्यतीत्यर्थः।अयं
भावः। महांत्यपिपापानिसकृदुच्चारितेनैवनाम्नानश्यंति । सकृत्प्रवर्तितेनदीपेनेवगाढध्वांतानि । तदावृत्त्यातुपापांतरस्यानुत्पत्तिः दीपधारणयेवतमोंतरस्य । ततश्चवासनाक्षयात्हृदयशुद्धिः एतदर्थंमे
वतत्रतत्रावृत्तिविधानम् "पापक्षयश्चभवतिस्मरतांतमहर्निशं"मित्यादिषु । तदेवात्राप्युक्तम्।"गुणानुवादः खलुसत्त्वभावनः" "तदपीशांघ्रिसेवये"तिचअतोस्यहरिनाम्नैवसर्वपापक्षयः।वासनाक्षयस्तु
महापुरुषदर्शनादिभिरिति १७ तथापिपापप्रायश्चित्तमिदमितिज्ञात्वानोच्चारितमितिचेत्तत्राहुः ।अज्ञानादिति । बालकेनाज्ञानादपिप्रक्षिप्तोग्निर्यथाकाष्ठराशिंदहतितद्वत् १८ नन्विदमपिपर्षदनुपदिष्टंश्रद्धा
हीनंचकथंप्रायश्चित्तंस्यात्तत्राहुः। यथेति। अगदमौषधंवीर्यवत्तममितिवक्तव्येवीर्यतममित्युक्तंयदृच्छयाश्रद्धादिहीनंउपयुक्तंभक्षितंपर्षन्मुखादज्ञानतोपिस्वगुणमारोग्यंकुर्यात् मंत्रोपिनामात्मकस्तथास्वकार्यं
कुर्यादेव । नहिवस्तुशक्तिः श्रद्धादिकमपेक्षतइत्यर्थः। तदुक्तंविष्णुधर्मेषु । "हरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः । अनिच्छयापिसंस्पृष्टोदहत्येवहिपावक"इति १८ तंविप्रंअमूमुचन्मोचयामासुः ।
२० प्रत्युदितानिराकृताःसंतः । यात्वागत्वायमराज्ञेयमराजाययथावत्कथयामासुः । २१ दर्शनेमउत्सवोयस्य (प्रकृतिंगतःस्वस्थः।) २२ विवक्षुंवक्तुमिच्छंतंज्ञात्वा (तस्यपश्यतःसतः) २३
त्रैविध्यंवेदत्रयप्रतिपाद्यंगुणाश्रयंयमदूतानांधर्मंतथाशुद्धंनिर्गुणंभागवतंभगवत्प्रणीतंविष्णुदूतानांचधर्मंआकर्ण्यभक्तिमानासीदित्युत्तरस्यानुषंगः २४ २५

॥९॥

श्लोकाः १७/२५

तैस्तान्यघानिपूयंतेतपोदानजपादिभिः ॥ नाधर्मजंतद्धृदयंतदपीशांघ्रिसेवया १७ अज्ञानादथवाज्ञानादुत्तमश्लोकनामयत् ॥ संकीर्तितमघंपुंसोदहेदे
धोयथानलः १८ यथाऽगदंवीर्यतममुपभुक्तंयदृच्छया ॥ अजानतोप्यात्मगुणंकुर्यान्मंत्रोप्युदाहृतः १९ ॥ ॥श्रीशुकउवाच॥ ॥तएवंसुविनिर्णीयधर्मं
भागवतंनृप ॥ तंयाम्यपाशान्निर्मुच्याविप्रंमृत्योरमूमुचन् २० इतिप्रत्युदितायाम्यादूतायात्वायमांतिके ॥ यमराज्ञेयथासर्वमाचचक्षुररिंदम २१ द्विजः
पाशाद्विनिर्मुक्तोगतभीःप्रकृतिंगतः ॥ववंदेशिरसाविष्णोःकिंकरान्दर्शनोत्सवः २२ तंविवक्षुमभिप्रेत्यमहापुरुषकिंकराः ॥ सहसापश्यतस्तस्यतत्रांतर्दधि
रेनघ २३ अजामिलोऽप्यथाकर्ण्यदूतानांयमकृष्णयोः ॥ धर्मंभागवतंशुद्धंत्रैविद्यंचगुणाश्रयम् २४ भक्तिमान्भगवत्याशुमाहात्म्यश्रवणाद्धरेः ॥ अनुता
पोमहानासीत्स्मरतोऽशुभमात्मनः २५

चूर्णिका

तैस्तपादिभिस्तान्येवाघानिनश्यंति नवासना सातु हरिकीर्तनादिनानश्यति १७ अज्ञानात् ज्ञानाद्वा कीर्तितं हरिनामपुंसः अघंदहेत एधोग्निरिव १८यथाऔषधंभक्षितंसत्
आरोग्यंकरोति एवंनामात्मकः मंत्रोपि १९ ॥ ॥श्रीशुकउवाच॥ ॥ तेएवंभगवद्धर्मंनिर्णीयविप्रंयाम्यापाशात्निर्मुच्यमृत्योः मोचयामासुः तदायमदूताः स्वस्थानं ॥९॥
गत्वायमायसर्वंन्यवेदयन् द्विजः पाशात्मुक्तः विष्णुदूतान्ववंदे २२ तंवक्तुमिच्छतंज्ञात्वातेअंतर्दधिरे २३ अजामिलःतयोः संवादंश्रुत्वा २४ आत्मनः अशुभंस्मरन्
पश्चात्तापयुक्तः भगवतिभक्तिमान्सन्स्वात्मानंनिनिंद २५

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुतापंप्रपंचयति । अहोइतिचतुर्भिः । येनआत्मनामयावृषल्यांपुत्रतयाजायमानेनब्रह्मब्राह्मणजातिःविप्लावितंनाशितम् २६ दुष्कृतंदोषकर्तारकुलस्यकज्जलंकलंकम् २७नास्त्यन्योबंधुःपुत्रादिर्ययोस्तौतपा
स्विनौसंतप्तौअधुनातत्क्षणमेव। (नीचवत्कृतघ्नेनेव)२८ २९ इदानींतस्यविमर्शपूर्वकंमोक्षक्रममाह । किमिदमित्यष्टभिः । साक्षात्प्रत्यक्षंइहजाग्रतैवदृष्टम् ३० येमांव्यमोचयन्तेचक्वगताः ३१ यद्यप्यहम
स्मिन्जन्मनिदुर्भगः पापीयान्अथापिजन्मांतरेनूनंपुण्यवानित्याह । विबुधोत्तमदर्शनइतिनिमित्तेसप्तमी । तेषांदर्शनार्थंपूर्वेणमंगलेनमहतापुण्येनभवितव्यंयेनदर्शनेन ३२ अन्यथापूर्वपुण्यंविना । कथं
भूतंवैकुंठनाम । गृह्यतेवशीक्रियते (वैकुंठो-)-नेनेतिग्रहणं । ३३ ब्रह्मघ्नोविप्रत्वनाशकः ३४ (यतिष्यामियत्नंकरिष्यामि) ३५ (अविद्याकामकर्मजअवस्थात्रयात्मकं) ३६ ।३७ अमिथ्याभूते
ऽर्थे (परमात्मनि) धीर्यस्यतथाभूतः सन्देहादौममाहमितिमतिंहित्वा (तस्यभगवतःकीर्तनाभिः शुद्धंरागादिरहितम्) मन-(-स्तस्मिन्) धास्ये (समाहितंकरिष्यामि) ३८मुक्तंसर्वमनुबंधनंपुत्रादि
स्नेहोयेनसः ३९ (सोऽजामिलः तास्मिन्गंगाद्वारेदेवसदनेदेवालये) मत्याहृतइंद्रियग्रामोयेन (सः जीवात्मनिमनोयुयोज) ४०

श्लोकाः २६/४०

अहोमेपरमंकष्टमभूदविजितात्मनः॥येनाविप्लावितंब्रह्मवृषल्यांजायतात्मना२६धिग्मांविगर्हितंसाद्भिर्दुष्कृतंकुलकज्जलम्।हित्वाबालांसतींयोऽहंसुरापामसती
मगाम्२७ वृद्धावनाथौपितरौनान्यबंधूतपस्विनौ ॥ अहोमयाऽधुनात्यक्तावकृतज्ञेननीचवत् २८सोहंव्यक्तंपतिष्यामिनरकेभृशदारुणे । धर्मघ्नाःकामिनो
यत्रविंदंतियमयातनाः २९ किमिदंस्वप्नआहोस्वित्साक्षाद्दृष्टमिहाद्भुतम् ॥ क्वयाताअद्यतेयेमांव्यकर्षन्पाशपाणयः ३० अथतेक्वगताःसिद्धाश्चत्वारश्चा
रुदर्शनाः ॥ व्यमोचयन्नीयमानंबद्ध्वापाशैरधोभुवः ३१ अथापिमेदुर्भगस्यविबुधोत्तमदर्शने ॥ भवितव्यंमंगलेनयेनात्मामेप्रसीदति ३२ अन्यथाम्रियमा
णस्यनाशुचेर्वृषलीपतेः ॥ वैकुंठनामग्रहणंजिह्वावक्तुमिहार्हति ३३ क्वचाहंकितवःपापोब्रह्मघ्नोनिरपत्रपः ॥ क्वचनारायणेत्येतद्भगवन्नाममंगलम् ३४ सो
हंतथायतिष्यामियतचित्तेंद्रियानिलः॥यथानभूयआत्मानमंधेतमसिमज्जये ३५विमुच्यतमिमंबंधमविद्याकामकर्मजम्॥सर्वभूतसुहृच्छांतोमैत्रःकरुणआत्म
वान् ३६ मोचयेग्रस्तमात्मानंयोषिन्मय्यात्ममायया॥ विक्रीडितोययैवाहंक्रीडामृगइवाधमः ३७ ममाहमितिदेहादौहित्वाऽमिथ्यार्थधीर्मतिम् ॥ धा
स्येमनोभगवतिशुद्धंतत्कीर्तनादिभिः३८॥श्रीशुकउवाच ॥ इतिजातसुनिर्वेदःक्षणसंगेनसाधुषु ॥ गंगाद्वारमुपेयायमुक्तसर्वानुबंधनः ३९सतास्मिन्देवसदन
आसीनोयोगमाश्रितः ॥ प्रत्याहृतेंद्रियग्रामोयुयोजमनआत्मनि ४०

चूर्णिका ॥१०॥

अहोअहंसतींस्त्रींअनाथौपितरौस्वधर्माचरणंचहित्वा२६सुरापांअसतीं अगांअतःमांधिक् २७ २८ अस्तुसोहंनरकेपतिष्यामि २९ मयाकिं स्वप्नोदृष्टः अहोयेमांव्यकर्षन्तेते
क्वगताः ३० येचमांव्यमोचयन्तेसिद्धाःक्वगताः ३१ दुर्भगस्यमेमंगलंभाविअतः हरेर्नामजिह्वयायातं ३२ ३३ ३४ ३५ ३६ ३७ सोहंममाहमितिमायाबंधंहित्वातत्की
र्तनादिभिः शुद्धंमनः भगवति धास्ये३८३९ श्रीशुकउवाच एवंसाधूनांक्षणसंगेनजातनिर्वेदः सन्गंगाद्वारंगत्वादेवसदनेआसीनः आत्मनिमनःयुयुजे ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ततोगुणेभ्यआत्मानंवियुज्यविशोध्यआत्मसमाधिनाचित्तैकाग्र्येणभगवतोधाम्निरूपे (अनुभूत्यात्मकेब्रह्मणियुयुजे) ४१ तस्मिन्भगवद्धाम्निउपरतानिश्चलाधीर्यस्यसः तास्मिन्कालेऽद्राक्षीदितिवा। पुरः पुरतः आवितश्चप्रागुपलब्धानेवतानुपलभ्यप्रत्यभिज्ञायववंदे ४२।४३।४४ उपसंहराति एवमितिद्वाभ्याम्।विप्लापिताः सर्वेधर्मायेन । हतंव्रतंस्वदारनियमादियस्य ४५ कर्मानिबंधस्यपापमूलस्यकृंतनंछेदकम तःपरंनास्ति कस्मात्परम् । तीर्थपदस्यानुकीर्तनात् । तत्रहेतुः । यत्यतोनुकीर्तनात् । ततोनुकीर्तनादन्यथाप्रायश्चित्तांतरैः रजस्तमोभ्यांकलिलंमलिनमेवतिष्ठतियत्तन्मनः ४६।४७ नचेक्षितोभवति ४८ म्रियमाणः अवशत्वेनश्रद्धाविहीनोपि ४९इतिश्रीभागव०म०टीकायांषष्ठस्कंधेद्वितीयोध्यायः ॥२॥ तृतीयेतुयमेनापिवैष्णवोत्कर्षवर्णनैः । सांत्वयित्वास्वदूतांस्तेवैष्णवेकिंकरीकृताः । विष्णुदूतैर्नि र्णीतंशास्त्रार्थंयमसुखेनद्रढयितुंतृतीयाध्यायारंभः । तत्रयदुक्तंयमराज्ञेयथासर्वमाचचक्षुरिति । ततःकिंतत्रवृत्तमितिपृच्छति निशम्येति । मुरारेर्निदेशिकैः किंकरैः एवंविहतान् अतएवहता आज्ञा यस्ययस्यवशवर्तीअयंजनः सोपितान्प्रतिकिमाह।१अत्याश्चर्यमेतदित्याह। यमस्येति। हेऋषेयमस्यदंडभंगः कुतश्चनकस्माच्चिदपिश्रुतपूर्वोनासीत्। एतत्एतस्मिन्नर्थे। यद्वा नश्रुतपूर्वः एतत्यमदूतनिराक रणंचासीत् । अतः सर्वस्यापिलोकस्यसंशयोवर्ततेतंत्वत्तोन्योनछिनत्तीतिमेनिश्चितं (निश्चयः) अतः कथयेतिशेषः २ भगवतः पुरुषैः प्रतिहतउद्यमोयेषांतेयाम्याः पुरुषाः ३

श्लोकाः ४१/३

ततोगुणेभ्यआत्मानंवियुज्यात्मसमाधिना ॥ युयुजेभगवद्धाम्निब्रह्मण्यनुभवात्मनि ४१ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः ॥ उपलभ्योपलब्धान् प्राग्ववंदेशिरसाद्विजः ४२ हित्वाकलेवरंतीर्थेगंगायांदर्शनादनु॥सद्यःस्वरूपंजगृहेभगवत्पार्श्ववर्तिनाम् ॥४३॥ साकंविहायसाविप्रोमहापुरुषकिंकरैः॥ हैमंविमानमारुह्ययथौयत्रश्रियःपतिः ॥४४ एवंसविप्लावितसर्वधर्मादास्याःपतिःपतितोगर्ह्यकर्मणा॥ निपात्यमानोनिरयेहतव्रतःसद्योविमुक्तोभगवन्नामगृ ह्णन् ४५ नातःपरंकर्मनिबंधकृतनंमुमुक्षतांतीर्थपदानुकीर्तनात् ॥ नयत्पुनःकर्मसुसज्जतेमनोरजस्तमोभ्यांकलिलंततोन्यथा ४६ यएवंपरमंगुह्यमितिहा समघापहम्॥शृणुयाच्छ्रद्धयायुक्तोयश्चभक्त्याचानुकीर्तयेत्४७ नवैसनरकंयातिनेक्षितोयमकिंकरैः॥यद्यप्यमंगलोमर्त्योविष्णुलोकेमहीयते४८म्रियमाणोहरे र्नामगृणन्पुत्रोपचारितम् ॥ अजामिलोप्यगाद्धामकिंपुनःश्रद्धयागृणन् ४९ ॥ ॥ इतिश्रीभागवते म० षष्ठस्कंधेद्वितीयोध्यायः २ ॥ राजोवाच ॥ निशम्यदेवःस्वभटोपवर्णितंप्रत्याहकिंतान्प्रतिधर्मराजः। एवंहताज्ञोविहतान्मुरारेर्नैदेशिकैर्यस्यवशेजनोयम् १ यमस्यदेवस्यनदंडभंगःकुतश्चनर्षेश्रुतपूर्व आसीत् ॥ एतन्मुनेवृश्चतिलोकसंशयंनहित्वदन्यइतिमेविनिश्चितम् २ ॥ श्रीशुकउवाच ॥ भगवत्पुरुषैराजन्याम्याःप्रतिहतोद्यमाः॥ पतिंविज्ञापयामासु र्यमंसंयमिनीपतिम् । ३

चूर्णिका

आत्मनि मनः युयुजे ४१ ततः कालेनउपरतधीः सन् पुनः विष्णुदूतान् अद्राक्षीत्ननामच४२ ततः गंगायांकलेवरंहित्वा विष्णुदूतस्वरूपंप्राप्तः सन् ४३तैःसहविमानंआ रुह्यभगवत्समीपंययौ ४४ एवंसर्वधर्मत्यक्तोपिविष्णुनामगृणन् मुक्तः ४५ अतः मुमुक्षतांविष्णुकीर्तनादन्यत्बंधकृंतनंन ४६ यः इमंइतिहासंशृणुयात्कीर्तयेत्सः विष्णुलो केमहीयते ४७ ४८ म्रियमाणोहरेर्नामगृणन्पुत्रोपचारितं अजामिलोप्यगाद्धामकिंपुनःश्रद्धयागृणन् ४९ इतिषष्ठेद्वितीयः २ राजोवाच धर्मराजः स्वदूतवर्णितंनि शम्य तान्प्रतिकिमाह१ हेऋषेयमस्यदंडभंगः कुतश्चपूर्वंनश्रुतः एतत् लोकसंशयंछिंधि २ श्रीशुकउवाच हेराजन्भगवद्दूतैःयाम्याःप्रतिहतोद्यमाःसंतःयमंविज्ञापयामासुः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कतिसंतीतिआक्षेपोक्तिः । त्रैविध्यंत्रिविधंस्वार्थेष्यञ् यथाभवतितथाकर्मकुर्वतः तदर्थेचकर्मफलस्याभिव्यक्तिहेतवः कतिसंतीति ४ । संतुबहवः कोबाधस्तत्राहुः । यदीति । मृत्युर्दुःखं अमृतंसुखम् । तेषां विमतिपत्तौतेउभेकस्यस्यातां । नकस्यापि परस्परविरोधेनोभयोरपिप्रतिबंधात् । ऐकमत्येतुकस्यवानस्यातां एकःसुखंकर्तुमिच्छतिदुःखंचान्यः ऐकमत्येचतयोःपरस्परकार्यानुमोदनेनोभयोरपिप्राप्तिः कस्यवातेउभेअपिनस्यातामित्यर्थः ५ ननुबहूनांकर्मिणांव्यवस्थया बहवः शास्तारोभवंतुतथासतिनायंदोषःस्यात्तत्राहुः बहूनांकर्मिणांव्यवस्थायाः शास्तृबहुत्वेशास्तृत्वंस्यात्घटेत किंतु तदायत्तसर्वशास्तरिमुख्यंशास्तृत्वंतदेकदेशेउपचारमात्रमेवस्यात्। यथाचक्रवर्तिनएवमुख्यंशास्तृत्वंमंडलवर्तिनामुपचारमात्रंनिरंकुशत्वाभावात्। ६ यस्मादेवंशास्तृबहुत्वंनघटते अतस्त्वमेकएवशास्ता। शुभाशुभेविविनक्तीतितथा ७ विप्रलंभितावंचितालंघितेत्यर्थः ८ तदेवाहुः नीयमानमिति (यातनागृहान्नरकान्) ९ तेत्वत्तः यदिनोऽस्माकंक्षमंहितंमन्यसेअन्यथाऽज्ञानतस्तदवज्ञानेतवाप्यनर्थःस्यात्। अतक्योंहितेषां प्रभावः । यतोनारायणायेतिकेवलमभिहितेमाभयंकुर्वितिवदंतः शीघ्रमागताः । १० प्रजाःसंयमयतीतितथा ११ मत्तोऽन्योजगतस्तस्थुषश्चपरोऽधीश्वरोस्ति । अहंतु जंगमानामेवतत्रापिपापिनामेव सत्किंकरःसन् ईश्वरः सतुसर्वेश्वरः । कोसौ । यत्रयस्मिन्विश्वमोतंप्रोतंच। ऊर्ध्वतिर्यक्तंतुषुपटवत् यस्यत्वंशेभ्योब्रह्मविष्णुरुद्रेभ्योऽस्यस्थित्यादयोभवंतियस्यचवशेलोकोवर्ततेनासिनासिकायां (ओतवत्) प्रोतबलीवर्दवत् १२ एतत्प्रपंचयाति । ब्राह्मणइत्यादिनामभिः (वर्णाश्रमादिनियमैरित्यर्थः) वाचिनिजायां (वाचित्रय्यांजनंयोबध्नाति) तंत्यांदामन्यांजनान्योबध्नातिदामभिर्गाः बलीवर्दानिव । तइमे जीवा नामभिस्तदनुरूपकर्मभिश्चनिबंधैर्बद्धाः संतएवयस्मैबलिं (करभारं) वहंतियदधीनाः कर्मकुर्वंतीत्यर्थः १३

श्लोकाः ४/१३

॥ यमदूताऊचुः ॥ कतिसंतीहशास्तारोजीवलोकस्यवैप्रभो ॥ त्रैविध्यंकुर्वतःकर्मफलाभिव्यक्तिहेतवः४ यदिस्युर्बहवोलोकेशास्तारोदंडधारिणः ॥ कस्यस्यातानवाकस्यमृत्युश्चामृतमेववा ५ किंतुशास्तृबहुत्वेस्याद्बहूनामिहकर्मिणाम्॥शास्तृत्वमुपचारोहियथामंडलवर्तिनाम् ॥६ अतस्त्वमेकोभूतानांसेश्वराणामधीश्वरः । शास्तादंडधरोनृणांशुभाशुभविवेचनः ७ तस्यतेविहतोदंडोनलोकेवर्ततेऽधुना ॥ चतुर्भिरद्भुतैःसिद्धैराज्ञातेविप्रलंभिता ८ नीयमानंतवादेशादस्माभिर्यातनागृहान्॥व्यमोचयन्पातकिनंछित्वापाशान्प्रसह्यते९तांस्तेवेदितुमिच्छामोयदिनोमन्यसेक्षमम्॥नारायणेत्यभिहितेमाभैरित्याययुर्द्रुतम् १०॥ श्रीशुकउवाच ॥ इतिदेवःसआपृष्टःप्रजासंयमनोयमः ॥ प्रीतःस्वदूतान्प्रत्याहस्मरन्पादांबुजंहरेः ११ ॥ यमउवाच ॥ परोमदन्योजगतस्तस्थुषश्चओतंप्रोतंपटवद्यत्रविश्वम् । यदंशतोऽस्यस्थितिजन्मनाशानस्योतवद्यस्यवशेचलोकः १२ योनामभिर्वाचिजनंनिजायांबध्नातितंत्यामिवदामभिर्गाः । यस्मैबलिंतइमेनामकर्मनिबंधबद्धाश्चकितावहंति १३

चूर्णिका ॥१२॥

यमदूताऊचुःहेप्रभोजीवलोकस्यशास्तारः कतिसंति ४ सेश्वराणांभूतानांशास्तात्वमेवएकोसि ५६७ इदानींचतुर्भिःसिद्धैः तवदंडभंगः कृतःतेआज्ञाचलंघिता ८ अस्माभिःतवाज्ञयानरकान्नीयमानंपातकिनं तेपाशान्छित्वाव्यमोचयन् ९ तेके इदंत्वत्तः ज्ञातुं इच्छामः येनारायणइतिउक्तेसतिभयंमाकुरुइतिनदंतः शीघ्रंआगताः १० श्रीशुकउवाच इतिदूतैःपृष्टःसतःयमःहरिपदांबुजं स्मरन्तान्आह ११ हेदूताःजगतः तस्थुषश्चमत्तः परःअधीश्वरोस्ति १२ यस्यअंशेभ्यः अस्यस्थित्यादयोभवंति १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यस्यचलीलादुर्विभाव्येत्याह।अहमितिद्वाभ्याम्।१४नस्पृष्टंरजस्तमश्चयैस्ते (सत्त्वप्रधानाअपि) ईहितंअभिप्रेतंचेष्टितंवानविदुः तत्रहेतुःस्पृष्टमाया माययास्पृष्टाः ततस्तेभ्योन्येनविदुरितिकिंपुनर्वक्तव्यम् १५
तन्मायामोहितत्वान्नजानंतीत्युक्तम् । अविषयत्वाच्चतस्येत्याह यमिति । गोभिरिंद्रियैः हृदाचित्तेन । नविचक्षते न पश्यंति । (इंद्रियादीनिनतद्दर्शनसाधनानीत्यर्थः ।) "यद्वाचानभ्युदितंयन्मनोनम
नुते"इत्यादिश्रुतेः । आत्मनांजीवानांआत्मानंद्रष्टारं आकृतयोरूपाणिचक्षुर्यथाकर्मभूतंनजानंतितत्तःपरमाकृतीनांप्रकाशकम् । नहिप्रमाताप्रमाणस्यविषयइतिभावः । एवंभूतःपरमेश्वरोस्तीतिपूर्वेणैवसंबं
धः १६ भवत्वेवंभूतोन्यः परमेश्वरः येपुनरस्मान्निर्भर्त्स्यपापिनंरक्षितवंतस्तेके तानाह द्वाभ्याम् तस्येति। तस्यैवरूपं गुणाः प्रभावादयः स्वभावोभक्तवात्सल्यादिर्येषांते १७विष्णोर्भूतानिभृत्यादुर्दर्शानिद्रष्टु
मप्यशक्तानिलिंगानिरूपाणियेषांतानितद्भक्तिमतो विष्णुभक्तान्परेभ्यः शत्रुभ्यः मत्तोमत्सकाशात् सर्वतोऽग्न्यादिभ्यश्चरक्षंति १८ ननुविष्णुभक्ताश्चेत्कथमधर्मपक्षपातंकृतवंतस्तत्राहधर्ममिति । ऋष
योभृग्वादयः १९ ननुकेपिचेन्नजानंतितस्यसत्त्वेकिंप्रमाणंतत्राह । स्वयंभूरिति । कुमारः सनत्कुमारः । (मनुः स्वायंभुवः । वैयासकिः शुकः ।) वयमित्यात्मानमेवभागवतत्वलाभाद्बहुमन्यमानोनि
र्दिशति २० हेभटाः २१ तमेवधर्ममाहएतावानिति २२ नचात्रप्रमाणंवक्तव्यंदृष्टत्वादित्याह । नामोच्चारणेति । येनैवकेवलेनसकृदुच्चारितेन २३

श्लोकाः १४/२३

अहंमहेंद्रोनिर्ऋतिःप्रचेताःसोमोग्निरीशःपवनोर्कोविरिंच्यः ॥ आदित्यविश्वेवसवोथसाध्यामरुद्गणारुद्रगणाःससिद्धाः १४ अन्येचयेविश्वसृजोऽमरेशा
भृग्वादयोऽस्पृष्टरजस्तमस्काः ॥ यस्येहितंनविदुःस्पृष्टमायाःसत्त्वप्रधानाअपिकिंततोन्ये १५ यंवैनगोभिर्मनसाऽसुभिर्वाहृदागिरावाऽसुभृतोविचक्षते
आत्मानमंतर्हृदिसंतमात्मनांचक्षुर्यथैवाकृतयस्ततःपरम् १६ तस्यात्मतंत्रस्यहरेरधीशितुःपरस्यमायाधिपतेर्महात्मनः ॥ प्रायेणदूताइहवैमनोहराश्चरंति
तद्रूपगुणस्वभावाः १७ भूतानिविष्णोःसुरपूजितानिदुर्दर्शलिंगानिमहाद्भुतानि ॥ रक्षंतितद्भक्तिमतःपरेभ्योमत्तश्चमर्त्यानथसर्वतश्च १८ धर्मंतुसाक्षाद्भ
गवत्प्रणीतंनवैविदुर्ऋषयोनापिदेवाः ॥ नसिद्धमुख्याअसुरामनुष्याःकुतश्चविद्याधरचारणादयः १९ स्वयंभूर्नारदःशंभुःकुमारःकपिलोमनुः ॥ प्रह्लादोजन
कोभीष्मोबलिर्वैय्यासकिर्वयम् २० द्वादशैतेविजानीमोधर्मंभागवतंभटाः ॥ गुह्यंविशुद्धंदुर्बोधंयज्ज्ञात्वाऽमृतमश्नुते २१ एतावानेवलोकेस्मिन्पुंसांधर्मःपरः
स्मृतः॥ भक्तियोगोभगवतितन्नामग्रहणादिभिः २२ नामोच्चारणमाहात्म्यंहरेःपश्यतपुत्रकाः ॥ आजामिलोपियेनैवमृत्युपाशादमुच्यत २३

चूर्णिका

किंच अहं महेंद्रःनिर्ऋतिःप्रचेताःसोमःअग्निःईशःपवनःअर्कःविरिंचिःएवमादयःसर्वे यस्येच्छांनविदुः १४ १५ तस्यहरेःदूताःतद्रूपाःसंतःहरिभक्तान्रक्षंति १६ १७ साक्षा
द्भगवत्प्रणीतंधर्मंदेवादयोनविदुः १८ १९ तस्यसत्त्वेकिं प्रमाणंवाच्यं स्वयंभूर्नारदःशंभुःकुमारःकपिलोमनुः प्रह्लादोजनकोभीष्मोबलिर्वैयासकिर्वयम् २० हेदूताःएतेवयंद्वादश
भगवद्धर्मंजानीमःयंज्ञात्वाअमृतंअश्नुते २१ २२ हेपुत्रकाःहरेः नामोच्चारणमाहात्म्यंपश्यतआजामिलोपियन्नाम्नामुक्तः २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

ननुनामाभासेनकथंसर्वपापक्षयः स्यात्। श्रद्धाभक्त्यावृत्त्यादेरपिविधानात्। तथाहि। "सायंप्रातर्गृणन्भक्त्यादुःखग्रामाद्विमुच्यत" इति "अनुदिनमिदमादरेण शृण्वन्निति ।" श्रवणंकीर्तनंध्यानंहरेरद्भुत कर्मणः । जन्मकर्मगुणानांचतदर्थेऽखिलचेष्टित"मित्याद्यस्मिन्नेव पुराणे तत्रतत्रपठ्यते। पुराणांतरेच। " पापक्षयश्चभवतिस्मरतांतमहर्निशमि"ति।अत्रैवच "तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां। महतामपिकौरव्यविद्ध्यैकांतिकनिष्कृत " मित्यादिनासम्यक्कीर्तनादेवाघनिष्कृतंमन्यते । किंच । तथासतिमन्वादयो द्वादशाब्दादीनि (किमिति) स्मरेयुः । तस्मादिदमनुपपन्नमेवतत्राह । एता वतेति।भगवतोगुणानांकर्मणांनाम्नांच सम्यक्कीर्तनमितियत् एतावतापुंसामघनिर्हरणायपापक्षयमात्रायअलंउपयोगोनास्ति। अलंशब्दोत्रवारणे।यथाहामरसिंहः।"अलंभूषणपर्याप्तिशक्तिवारणवाचक"मिति । उपयोगाभावमेवाह । अजामिलोमहापातक्यपिनारायणेति विक्रुश्यनतुसम्यक्कीर्तयित्वातच्चपुत्रंविक्रुश्यनतुहरिं अघवान्अशुचिरपि म्रियमाणोऽस्वस्थचित्तोपिमुक्तिमवापनत्वघनिर्हरणमात्रं । ॥१४॥ अतोनामाभासेनापिसर्वपापक्षयइत्येवतत्त्वम् । आवृत्तिश्रद्धादिविधयस्तुपापवासनाक्षयार्था इत्युक्तमेव । हरेर्गुणानुवादःखलुसत्त्वभावनइत्यत्र २४ यत्तूक्तंव्यर्थंतर्हिद्वादशाब्दादिस्मरणमितितत्राह प्रायेणे ति । महाजनोमन्वादिः मृतसंजीवनौषधिमजानंतोवैद्यारोगनिर्हरणाय त्रिकटुकानिंबादीनिस्मरंति । तथास्वयंभूशंभुप्रमुखद्वादशव्यतिरेकेणायंमहाजनोऽतिगुह्यमिदमज्ञात्वाद्वादशाब्दादिकंस्मरती ति । किंचमाययादेव्याअलंमोहितमतिः अयंजनः मधुमधुरं यथाभवत्येवंपुष्पितायांपुष्पस्थानीयैरर्थवादैर्मनोहरायां त्रय्यांजडीकृता अभिनिविष्टामतिर्यस्यअतोमहत्येवकर्मणिश्रद्धया।युज्यमानोनाल्पे प्रवर्तते । दृश्यतेहिप्राकृतस्यलोकस्यमहतिमंत्रादौश्रद्धाऽल्पेचाश्रद्धा । तस्मादस्यग्राहकोनास्तीतितैर्नोक्तम् । यद्वा । स्वाधीनः सिंहोस्त्येतावताश्वसृगालादिनिवारणायतंयथानप्रयुंजते । तथातितुच्छ त्वात्पापस्यनतन्निरसनायपरमंमंगलंहरेर्नामस्मरंति । यद्वा नाममाहात्म्यज्ञानेसर्वमुक्तिप्रसंगादित्येषादिक्। ग्रंथविस्तरभयात्तुनातिप्रपंच्यते २५ भावयोगंभक्तियोगम्। अमीषांपातकंनस्यादेव । यदिस्या दुरुगायस्यभगवतोवादःकीर्तनम् २६ तदेवंधर्मतत्त्वंनिर्णीयभृत्याननुशास्ति तइति । येभगवंतंप्रपन्नाः तेदेवैःसिद्धैश्चपरिगीतपवित्रगाथाःवर्णितपवित्रकथाःअतस्तान्नोपसीदततत्समीपमपिनगच्छत। वयं नप्रभवाम वयःकालोपिनप्रभवति २७ केतर्हिदंडार्थमानेयाइत्यत्राह तानितिद्वाभ्याम् । असतः दुष्टान् तानेवाह। मुकुंदपादारविंदयोर्योमकरंदरूपोरसस्तस्माद्विमुखान् । कथंभूतात् । निष्किंचनैःरसज्ञै (परमहंसकुलैः सनकादिभिः) अजस्रंजुष्टात् । असतांज्ञापकमाह । निरयवर्त्मनिस्वधर्मशून्येगृहेबद्धातृष्णायैस्तान् २८

श्लोकाः २४–२८

एतावतालमघनिर्हरणायपुंसांसंकीर्तनंभगवतोगुणकर्मनाम्नाम्। विक्रुश्यपुत्रमघवान्यदजामिलोपिनारायणेतिम्रियमाणइयायमुक्तिम् २४प्रायेणवेदतादिदंन महाजनोयंदेव्याविमोहितमतिर्बतमाययाऽलम् ॥ त्रय्यांजडीकृतमतिर्मधुपुष्पितायांवैतानिकेमहतिकर्मणियुज्यमानः२५ एवंविमृश्यसुधियोभगवत्यनंते सर्वात्मनाविदधतेखलुभावयोगम् । तेमेनदंडमर्हंत्यथयद्यमीषांस्यात्पातकंतदपिहंत्युरुगायवादः २६ तेदेवसिद्धपरिगीतपवित्रगाथायेसाधवःसमदृशोभ गवत्प्रपन्नाः । तान्नोपसीदतहरेर्गदयाभिगुप्तांस्तेषांवयनचवयःप्रभवामदंडे२७ तानानयध्वमसतोविमुखान्मुकुंदपादारविंदमकरंदरसादजस्रम्॥निष्किंचनैः परमहंसकुलैरसज्ञैर्जुष्टाद्गृहेनिरयवर्त्मनिबद्धतृष्णान् । २८

चूर्णिका

भगवतःगुणकर्मनाम्नांकीर्तनमितियत् एतावतापुंसांपापक्षयायअलम् अजामिलोपिनारायणइतिपुत्रंविक्रुश्यअशुचिरपिमुक्तिंप्राप २४ येभगवतिभक्तियोगंकुर्वंति तेमेदंडं नार्हंति येचभगवंतंप्रपन्नाःतेहरेःगदयारक्षिताःतेषांदंडेवयंनप्रभवामकालोपिनसमर्थः २५ २६ २७ येतुमुकुंदपादारविंदविमुखाःतान्आनयध्वम् २८ ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच जिह्वेत्यादि । यद्येषांजिह्वेत्याद्यन्वयः । नकृतंविष्णुकृत्यंभगवद्वृतंयैः २९ भगवंतंक्षमापयति तदिति । अयंभावः । नः स्वपुरुषैरस्मदीयत्वेनस्थितैः स्वीयैरेवपुरुषैःयच्चस्मादसत्अन्याय्यंकृतं
तत्तस्मात्स्वयमेवक्षम्यतांसहतां । स्वानांस्वियानांअस्माकंनाविदुषांअज्ञानांअहोगरीयासितस्मिन्क्षांतिर्युक्तैव । महइतिपाठेस्वीयानांमाहात्म्यमविदुषांनः क्षमांकरोत्वित्यर्थः । (भूम्नेमहतेपुरुषायतस्मैनमः)
३० तस्मादित्यादिशुकोक्तिः । जगतोपिमंगलरूपं (महतामप्यंहसांऐकांतिकानिष्कृतिंनितांतप्रायश्चित्तंविद्धि) ३१ ऐकांतिकत्वमेवाह । शृण्वतामिति । (आत्मांऽतःकरणं) व्रतादिभिस्तथान
शुद्ध्येत् ३२ एतदुपपादयति । कृष्णांघ्रिपद्मयोर्मधुलेढिआस्वादयतीतितथा । मधुलिहतातितुच्छत्वेनविसृष्टायेमायागुणाविषयास्तेषुपुनर्नरमते । अन्यस्तुतन्मध्वास्वादराहितः अतएवकामाभिभूतःसन्नात्म
नोरजःप्रमार्ष्टुमपिकर्मैवप्रायाश्चित्तरूपमीहेत । यतः कर्मणः पुनरापिरजःपापंस्यादेव । कुंजरशौचवत् । सत्त्वशोधकत्वाभावात् ३३ नैवविस्मिताधियोबभूवुः । किंतुसत्यमुक्तमित्येवमेनिरे । ततः प्रभृतिशं
॥१५॥ कमानाअस्मानेवैषहन्यादितिशंकांवहंतस्तंद्रष्टुमपिबिभ्यतिस्म । पाठांतरेतुविस्मितधियोजाताः । तेचततःप्रभृतिबिभ्यतिस्मेत्यर्थः ३४ कुंभसंभवोऽगस्त्योमलयेपर्वतेआसीनोऽव्यग्रोहरिमर्चयन् पुनः
पुनः विश्वासार्थंहरेः पादौस्पृशन्नित्यर्थः ३५ ॥ ॥ इतिषष्ठेतृतीयोध्यायः ॥ ॥ ॥ ३ ॥

श्लोकाः २९/३

जिह्वानवक्तिभगवद्गुणनामधेयंचेतश्चनस्मरतितच्चरणारविंदम् । कृष्णायनोनमतियच्छिरएकदापितानानयध्वमसतोऽकृतविष्णुकृत्यान् २९ तत्क्षम्यतांसभ
गवान्पुरुषःपुराणोनारायणःस्वपुरुषैर्यदसत्कृतंनः ॥ स्वानामहोनविदुषांरचितांजलीनांक्षांतिर्गरीयसिनमःपुरुषायभूम्ने ३० तस्मात्संकीर्तनंविष्णोर्ज
गन्मंगलमंहसाम् । महतामपिकौरव्यविद्ध्यैकांतिकनिष्कृतिम् ३१ शृण्वतांगृणतांवीर्याण्युद्दामानिहरेर्मुहुः । यथासुजातयाभक्त्याशुध्येन्नात्माव्रतादिभिः
३२ कृष्णांघ्रिपद्ममधुलिण्नपुनर्विसृष्टमायागुणेषुरमतेवृजिनावहेषु ॥ अन्यस्तुकामहतआत्मरजःप्रमार्ष्टुमीहेतकर्मयतएवरजःपुनःस्यात् ३३ इत्थंस्वभ
र्तृगदितंभगवन्महित्वंसंस्मृत्यविस्मितधियोयमकिंकरास्ते ॥ नैवाच्युताश्रयजनंप्रतिशंकमानाद्रष्टुंचबिभ्यतिततःप्रभृतिस्मराजन् ३४ इतिहासमिमंगुह्यं
भगवान्कुंभसंभवः ॥ कथयामासमलयआसीनोहरिमर्चयन् ३५ ॥ इतिश्रीभागवतेमहा० षष्ठस्कंधेतृतीयोध्यायः ॥ ३

चूर्णिका

किंच येषांजिह्वाभगवद्गुणनामनवक्ति चेतश्चरणकमलंननस्मरति शिरःकृष्णायननमति तान्आनयध्वम् २९ अस्मद्दूतैःयत् अन्याय्यंकृतंतत्भगवान्क्षम्यतांतस्मैपुरुषायनमः
३० श्रीशुकउवाच हेनृपविष्णोःकीर्तनंमहत्पातकानामपिनाशकंप्रायश्चित्तंविद्धि ३१ यथाभक्त्यामनःशुध्येत्तथाव्रतादिभिर्न ३२ भगवद्भक्तः वृजिनावहेषुविषयेषुपुनःनरमते
३३ तच्चरणकंजास्वादरहितःकामहतःपुमान्आत्मनःपापंप्रमार्ष्टुंकर्मैवप्रायाश्चित्तरूपंईहते कर्मणापुनरपिपापंस्यादेवइत्थंयमगदितंश्रुत्वा ततः प्रभृतिदूताःअच्युताश्रयंजनंद्र
ष्टुंबिभ्यतिस्म३४ इमंइतिहासंमलयेआसीनःभगवान्अगस्त्यःहरिंअर्चयन्कथयामास ३५ इतिषष्ठेतृतीयः ॥ ३ ॥ ॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चतुर्थादित्रिभिर्विश्वरूपजन्मविवक्षया । प्रचेतःसुतदक्षस्यवंशस्तावत्प्रतन्यते ॥१॥ चतुर्थेतुप्रजासृष्ट्यैदक्षेणाराधनंहरेः । तपसाहंसगुह्याख्यस्तोत्रेणचनिरूप्यते ॥२॥ प्रसक्तानुप्रसक्तेनस्वायंभुवसुतान्वये । नामप्रभावमाकर्ण्यवंशव्यासंबुभुत्सते॥३॥ देवासुरेतिद्वाभ्यां । सामासिकः संक्षिप्तः । यः प्रोक्तस्तृतीयस्कंधे १ व्यासंविस्तारंतेत्वत्तः । ययाशक्त्यायथाससर्जतांशक्तिंतंचप्रकारंज्ञातुमिच्छामि । अनुसर्गमनुवृत्तंसर्गम् २ (हेमुनिसत्तमाः) ३ दक्षादिरूपेणससर्जेतिवक्तुंदक्षजन्मप्रकारमाह । यदेति । प्राचीनबर्हिषः पुत्राः (प्रचेतःसंज्ञकाः) यदासमुद्रमध्यादुन्मग्नाः निर्गतास्तदागांपृथ्वीं द्रुमैर्वृतांददृशुः । नारदोपदेशतः प्राचीनबर्हिषोनिवृत्त्याअराजकेसातिकृष्याद्यभावात् ४ तपसादीपितोमन्युर्येषांतेषां (तद्दिधक्षया)द्रुमाणांदग्धुमिच्छया ५ ताभ्यांवाय्वग्निभ्यांदह्यमानांस्तान् द्रुमान्वनस्पतीनांराजासोमउवाच । माद्रुमेभ्यइतिनवभिः ६ हेमहाभागाः विवर्धयिषवोविशेषेणवर्धयितुमिच्छवो (यूयंद्रुमेभ्योद्रोग्धुंमार्हथ) ७ प्रजापतीनांतद्भक्ष्यभोज्यदाहोऽनुचितइत्याह अहोइतित्रिभिः (वनस्पतीन्द्रुमान् ओषधीर्व्रीह्यादिकाः) ऊर्जंभक्ष्यंइषंअन्नं ८ (प्रसंगात्अन्नप्रकारमेवाह । अन्नमितितत्रअचराद्रुमादयः । फलपत्रादिनाचरमात्रस्यान्नमित्यर्थः) ९ (पित्राप्राचीनबर्हिषादेवदेवेनब्रह्मणाअन्वादिष्टाआज्ञप्ताः) १० पित्रादिभिर्जुष्टंसत्तांमार्गमुपशमम् ११

॥१६॥

श्लोकाः १/११

राजोवाच ॥ देवासुरनृणांसर्गोनागानांमृगपक्षिणाम्॥सामासिकस्त्वयाप्रोक्तोयस्तुस्वायंभुवेंऽतरे १तस्यैवव्यासमिच्छामिज्ञातुंतेभगवन्यथा॥अनुसर्गंयया शक्त्याससर्जभगवान्परः२ ॥सूतउवाच॥इतिसंप्रश्नमाकर्ण्यराजर्षेर्बादरायणिः॥प्रतिनंद्यमहायोगीजगादमुनिसत्तमाः३॥श्रीशुकउवाच॥यदाप्रचेतसःपुत्रा दशप्राचीनबर्हिषः ॥ अंतःसमुद्रादुन्मग्नाददृशुर्गांद्रुमैर्वृताम् ४ द्रुमेभ्यःक्रुध्यमानास्तेतपोदीपितमन्यवः ॥मुखतोवायुमाग्निंचससृजुस्तद्दिधक्षया५ ताभ्यां निर्दह्यमानांस्तानुपलभ्यकुरूद्वह । राजोवाचमहान्सोमोमन्युंप्रशमयन्निव । ६ माद्रुमेभ्योमहाभागादीनेभ्योद्रोग्धुमर्हथ । विवर्धयिषवोयूयंप्रजानां पतयःस्मृताः ७ अहोप्रजापतिपतिर्भगवान्हरिरव्ययः॥वनस्पतीनोषधीश्चससर्जोर्जमिषंविभुः ८अन्नंचराणामचराह्यपदःपादचारिणाम् ॥अहस्ताहस्तयुक्तानांद्विपदांचचतुष्पदः ९ यूयंचपित्रान्वादिष्टादेवदेवेनचानघाः॥ प्रजासर्गायहिकथंवृक्षान्निर्दग्धुमर्हथ १०आतिष्ठतसतांमार्गंकोपंयच्छतदीपितम् ॥ पित्रा पितामहेनापिजुष्टंवःप्रपितामहैः ११

चूर्णिका

राजोवाच देवासुरनृणांनागानांमृगपक्षिणांसर्गः त्वयासमासेनस्वायंभुवेमन्वंतरेउक्तः १ तस्यविस्तारंश्रोतुमिच्छामि २ ३ श्रीशुकउवाच यदादशप्रचेतसःअंतःसमुद्रात्निर्गताःसंतःद्रुमैर्व्याप्तांपृथ्वींददृशुः ४ तदाद्रुमान् दग्धुंमुखतःवायुंअग्निंचससृजुः ५ तदावृक्षान्दह्यमानान्दृष्ट्वासोमःएत्यतान्उवाच ६ हेमहाभागाःयूयंप्रजानांपतयःप्रजावृद्धिकर्तारःस्थ अतःद्रुमान्दग्धुंयोग्याःन ७ अहोहरिःवनस्पतीन्ओषधींश्चप्रजानांअन्नंससर्ज ८ यूयंचप्रजासर्गायपित्राआदिष्टाःसंतःकथंवृक्षान्दग्धुमर्हथ ९ १० अतः सतांमार्गंआतिष्ठत ११

॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.प. प्रजानांपतिरेवबंधुः अतस्तज्जीविकानाशोनकर्तव्यइतिदृष्टांतपंचकेनाह तोकानांबालानांमातापितरौ । अज्ञानांज्ञानदोबुधएवसुहृत् १२ ईश्वराधिष्ठानत्वाच्चभूतद्रोहोनयुक्तइत्याह । अंतर्देहेष्विति अ०
वोयुष्माभिः(अतः सर्वंतस्यभगवतोधिष्ण्यंस्थानं) १३ आकाशाद्देहेसमुत्पतितंआकस्मिकमित्यर्थः (उल्बणंप्रव्यक्तं) आत्मविचारेणयोनियच्छेत् (सत्रैगुण्यमतीत्यवर्तते) १४ खिलानांशेषाणांवः
टीका युष्माकंचाशिवमस्तु । वृक्षरक्षणार्थंतदीयांकन्यांददाति । वार्क्षीवृक्षैःपालिता १५ आमंत्र्यसांत्वयित्वा आप्सरसींअप्सरसःप्रम्लोचायाःसुताम् १६ (तेभ्यः प्रचेतोभ्यः अतोयंप्राचेतसःकिल) १७ दुहि ॥४॥
तृवत्सलइतितस्यकन्यावंशएवेत्युक्तं ममभत्तः १८ प्रजापतिर्दक्षः १९ अबृंहितंअसंवृद्धं विंध्यस्यपादान्संनिहितपर्वतान् २०।२१। हंसगुह्याख्येनस्तोत्रेण कस्यदक्षस्य २२ परायसर्वोत्तमायनमोदधेनमनं
करोमि । परत्वेहेतुः अवितथाअनुभूतिः चिच्छक्तिर्यस्य । अतोगुणत्रयाभासोजीवोनिमित्तंमायाच तयोर्बंधवेनियंत्रे एवमपिगुणेषुतत्त्वबुद्धिर्येषांतैर्जीवैरदृष्टंधामस्वरूपंयस्य । तत्रहेतुः । निवृत्तंमानं
॥१७॥ यस्मात् । पाठांतरेनिवृत्तंमानमवधिश्चयस्मात् । तर्हितस्यकथंसिद्धिस्तत्राह । स्वयंभुवेस्वप्रकाशाय २३अदृष्टधामत्वंदर्शयन्नाह । नेति । पुरुषः सखाजीवः अस्मिन्पुरे देहेवसन्नपिअत्रैवसंवसतः सख्यु
र्यस्यसख्यंकरणप्रवर्तकत्वादिकम् नावैतिनजानातितस्मै कुतः व्यक्तदृष्टेः प्रपंचद्रष्टुः । नहिद्रष्टादृश्योभवतीति । प्रथमांतपाठे व्यक्तेप्रपंचेएवदृष्टिर्यस्यसः । गुणोविषयोगुणिनो विषयिणइंद्रियादेः स
ख्यंप्रकाशकत्वं यथानवेत्तितद्वत् । २४ ॥

तोकानांपितरौबंधूदृशःपक्ष्मस्त्रियाःपतिः ॥ पतिःप्रजानांभिक्षूणांगृह्यज्ञानांबुधःसुहृत् १२ अंतर्देहेषुभूतानामात्मास्तेहरिरीश्वरः॥सर्वंतद्धिष्ण्यमीक्षध्वमे श्लोकाः
वंवस्तोषितोह्यसौ १३ यःसमुत्पतितंदेहआकाशान्मन्युमुल्बणम्॥आत्मजिज्ञासयायच्छेत्सगुणानतिवर्तते १४ अलंदग्धैर्द्रुमैर्दीनैःखिलानांशिवमस्तुवः
॥ वार्क्षीह्येषावराकन्यापत्नीत्वेप्रतिगृह्यताम् १५ इत्यामंत्र्यवरारोहांकन्यामाप्सरसींनृप॥सोमोराजाययौदत्त्वातेधर्मेणोपयेमिरे १६ तेभ्यस्तस्यांसमभव १२/२४
दृक्षःप्राचेतसःकिल ॥ यस्यप्रजाविसर्गेणलोकाआपूरितास्त्रयः १७ यथाससर्जभूतानिदक्षोदुहितृवत्सलः ॥ रेतसामनसाचैवतन्ममावहितःशृणु॥ १८
मनसैवासृजत्पूर्वंप्रजापतिरिमाःप्रजाः॥देवासुरमनुष्यादीन्नभःस्थलजलौकसः१९ तमबृंहितमालोक्यप्रजासर्गंप्रजापतिः॥विंध्यपादानुपव्रज्यसोऽचरद्दु
ष्करंतपः२० तत्राघमर्षणंनामतीर्थंपापहरंपरम्॥उपस्पृश्यानुसवनंतपसातोषयद्धरिम्२१ अस्तौषीद्धंसगुह्येनभगवंतमधोक्षजम्॥तुभ्यंतदभिधास्यामिक
स्यातुष्यद्यतोहरिः२२॥प्रजापतिरुवाच॥नमःपरायावितथानुभूतयेगुणत्रयाभासनिमित्तबंधवे॥अदृष्टधाम्नेगुणतत्त्वबुद्धिभिर्निवृत्तमानायदधेस्वयंभुवे२३न
यस्यसख्यंपुरुषोऽवैतिसख्युःसखावसन्संवसतःपुरेस्मिन्॥ गुणोयथागुणिनोव्यक्तदृष्टेस्तस्मैमहेशायनमस्करोमि २४

चूर्णिका कोपंयच्छतकिंचहरिःभूतानां अंतर्देहेषुआस्तेसर्वंताद्धिष्ण्यंईक्षध्वम्१२ १३ एवंकष्टोभगवान्तुषाणंभविष्यति१४दग्धैःद्रुमैःअलम्शेषाणांयुष्माकंचशिवंअस्तुएषाप्रम्लोचायाः ॥१७॥
कन्यावार्क्षीनामपत्नीत्वेप्रतिगृह्यतां १५ इत्यामंत्र्यतांदत्त्वासोमःययौतेधर्मेणतांउपयेमिरे १६ तेभ्यःतस्यांदक्षः अभवत् १७ सःदक्षःपूर्वंदेवासुरमनुष्यादीन्मनसैवअसृजत्
१८ १९तांसृष्टिंअसमृद्धां आलोक्यबहुसृष्ट्यर्थींविंध्याद्रिसमीपअघमर्षणतीर्थेएत्यतत्रतपसाहरिंतोषयन्सन्हंसगुह्येनस्तोत्रेणहरिंअस्तौषीत्२० २१ २२ दक्षउवाच परायजी
वमाययोर्नियंत्रेजविरैदृष्टस्वरूपयस्वप्रकाशायनमः २३ किंच जीवः अस्मिन्देहेवसन्नपिअत्रैववसतः यस्यसख्यंनजानातितस्मैमहेशायनमस्करोमि २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ष. ननुगुणोजडत्वान्नजानातु जीवःसचेतनःकिमितिनजानाति अत्राह देहइति । देहश्चासवःप्राणा अक्षाणींद्रियाणिमनश्चांतःकरणानिभूतानिचमात्राश्च तन्मात्राणिआत्मानम् स्वं अन्यं दृश्यंतयोः अ०
परंदेवतावर्गंचनाविदुः । पुमान्जीवस्तुसर्वमेतत्त्रयंवेद । गुणांश्चतन्मूलभूतान् (त्रीन्) वेदतज्ज्ञोपिसन्यंसर्वज्ञंनवेदतम्अनंतंईडेस्तौमि २५ अदृष्टधामत्वमुक्त्वास्वप्रकाशत्वमाह । (यदेति)।
यदामनसउपरामः समाधिः ननुसुषुप्ताविवलयः नचजाग्रत्स्वप्नयोरिवविक्षेपःतदाह। नामरूपेरूप्यतेयेनतत्तथा। तस्योपरामेहेतुःदृष्टंदर्शनंस्मृतिश्चतयोःसंप्रमोषात्नाशात्। तदायःकेवलेनस्वरूपज्ञानेन प्रती
यतेतस्मैहंसायशुद्धाय शुचिशुद्धंमनः सद्मप्रतीतिस्थानंयस्यतस्मैनमः२६एवंभूतः केषांप्रतीयतेइत्यपेक्षायामाह।मनीषिणइतिद्वाभ्याम् विवेकिनोयंनिष्कर्षंतिविविच्यध्यायंति । सःनिर्वाणसुखानुभूतिः ममप्र ॥४॥
टीका सीदतामितिद्वयोरन्वयः। एवंनिष्कर्षतांप्रतयितेइतिभावः। किमितिनिष्कर्षतिस्वशक्तिभिर्गूढं अप्रकाशमानं कतिभिः नवभिः पुनश्च त्रिवृद्भिः त्रिगुणाभिः सप्तविंशत्युपाधिभिः गूढं अष्टाविंशंनिष्कर्षंतीत्यर्थः
(सप्तविंशत्युपाधयस्तु पुरुषत्रयोगुणामहदहंकारौपंचमहाभूतानिदशेंद्रियाणिमनः पंचतन्मात्राणिचेतिप्रसिद्धाः) यद्वानवभिः प्रकृतिपुरुषमहदहंकारपंचतन्मात्ररूपाभिस्त्रिवृद्भिस्त्रिगुणात्मिकाभिः चका
रात्षोडशविकाररूपाभिश्च। कथंभूतंनिष्कर्षंति। मनीषयाअंतर्हृदिसन्निवेशितंनिश्चलीकृतपांचदश्यंपचदशसामिधेनीमंत्रैःप्रकाश्यंअलौकिकंवह्निमिवअंहकारास्पदादात्मनोन्यं परमात्मानन निष्कर्षंतीत्यर्थः
२७अशेषाविशेषा। (भेदा) यस्यास्तस्यामायायानिषेधेननिर्वाणसुखनेसमाधिसुखेनअनुभूतिर्यस्य । अप्रसक्तनिषेधासंभवात्प्रसक्तिमाह । सएवसर्वनामासएवचविश्वरूपइति । तद्रूपत्वेपिवास्तवत्वाभावा
॥१८॥ न्निषेधः संभवतात्यहि । अनिरुक्ता। (निर्वचनानर्हा) आत्मशक्तिर्मायायस्यसः २८ ननुयदिकेवलयास्वसंस्थयाप्रतीयतेतर्हिसर्वनामत्वंविश्वरूपत्वंचानुपपन्नं वागाद्यगोचरत्वादित्याशंक्य सर्वैर्ना
मभिर्वाच्यंप्रत्यक्षादिदृश्यंचतस्यरूपंवस्तुतोमाभूत् तथापिमाययाघटतेइतिश्लोकत्रयेणोपपादयन्नमस्करोतियद्यादिति यद्यद्वचसानिरुक्तंअभिहितंधियानिरूपितंव्यवसितं । अक्षभिर्वाइंद्रियैर्निरूपितंगृही
तंउतअपिमनसापिनिरूपितंयस्यस्वप्रकाशस्य । तस्यतत्तत्स्वरूपंमाभूत् । स्वरूपत्वाभावेहेतुः हियस्मात्तद्गुणानामेवरूपं । पाठांतरेगुणैर्वर्धितं । सतुगुणव्यतिरिक्तःयतोगुणानामपायावसर्गाभ्यांप्रलयो
त्पत्तिभ्यांलक्ष्यतइतितथा। चैतन्यरूपमधिष्ठानंविनातयोरभावात् । यद्वायस्यस्वरूपंमाभून्नभवति तस्मैनमइतितृतीयेनान्वयः २९

देहोसवोक्षामनवोभूतमात्रानात्मानमन्यंचविदुःपरंयत् ॥ सर्वंपुमान्वेदगुणांश्चतज्ज्ञोनवेदसर्वज्ञमनंतमीडे २५ यदोपरामोमनसोनामरूपरूपस्यदृष्टस्मृति श्लोकाः
संप्रमोषात्॥ यईयतेकेवलयास्वसंस्थयाहंसायतस्मैशुचिसद्मनेनमः २६ मनीषिणोंतर्हृदिसंनिवेशितंस्वशक्तिभिर्नवभिश्चत्रिवृद्भिः॥वह्निंयथादारुणिपांचद
श्यंमनीषयानिष्कर्षंतिगूढम् २७सवैममाशेषविशेषमायानिषेधानिर्वाणसुखानुभूतिः ॥ससर्वनामासचविश्वरूपःप्रसीदतामनिरुक्तात्मशक्तिः २८ यद्यन्नि २८
रुक्तंवचसानिरूपितंधियाक्षभिर्वामनसाबोतयस्य ॥ माभूत्स्वरूपंगुणरूपबृंहितंसवैगुणापायविसर्गलक्षणः २९ २९

चूर्णिका किंच अयंजीवः स्वस्वरूपंइंद्रियवर्गंदेवतावर्गंचएतत्त्रयंवेत्तितथापियंनवेदतंसर्वज्ञंअनंतंईडे २५ किंच यदादर्शनस्मृत्योर्नाशात्मनसःसमाधिर्भवतितदायःस्वरूपज्ञा ॥१८॥
नेनप्रतीयतेतस्मैहंसायनमः २६ किंच विवेकिनः यंमनीषयाध्यायंति सः विश्वरूपः ममप्रसीदतां किंच २७ २८ वचसाउक्तंवुध्यादिभिःनिरूपितंयत्तत्
यस्यस्वरूपंभवति तस्मैनमः २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ष. तदेवंवस्तुतोगुणस्वरूपत्वाभावमंगीकृत्य अनिरुक्तात्मशक्तिरित्यनेनद्योतितंमाययासर्ववाच्यत्वेनाविश्वरूपत्वमाह। यस्मिन्नधिकरणेयतोऽपादानात् येनकरणेन यस्यसंबंधि यस्मैसंप्रदानाय यदीप्सितत अ०
मं यःकर्ताकुरुतेस्वतंत्रःकार्यतेचान्येनप्रयोज्यकर्त्रातद्ब्रह्मेतिप्रत्येकंसंबंधः । अत्रचसप्तमिर्यच्छब्दैः सप्तविभक्त्यर्थादर्शिताः यथेतिचक्रियाकारकसंबंधप्रकारवाचिनामव्ययानामर्थाः कुरुतेकार्यतेचस्वा
टीका र्थपरार्थक्रियान्वयश्चसर्वेषांदर्शितः चशब्देनभावकर्मादिविहितप्रत्ययार्थाःसंगृहीताः। तद्ब्रह्मैवेतिकुतः तत्राह । तद्धेतुः तेषांकारणं । तत्कुतः सर्वेभ्यःप्राक्प्रसिद्धं ननुब्रह्मादयस्तद्धेतवः श्रूयंते। अवरेचह ॥४॥
श्यंते । तत्कथंब्रह्मैवतद्धेतुः तत्राह । परेषामवरेषांचहेतूनांपरमकारणं । ननुसर्वकारणत्वेतस्यकिंनामसहकारिभवेत्तदानीमन्यस्याभावात्सत्यंनिरपेक्षमेवतत्कारणमित्याह । अनन्यद्विजातीयशून्यं
एकंसजातीयशून्यंचतस्मैनमइत्युत्तरेणान्वयः ३० नन्वेवंब्रह्मचेद्विश्वस्यहेतुः तर्हिनकदाचिदनीदृशंजगदितिवदंतोमीमांसकाः कुतोत्रविवदंतेतैश्चान्येस्वभाववादिनः संवदंते। तेचतेचतत्त्वविद्भिर्बोधिताअ
॥१९॥ पिकुतः पुनर्मुह्यंतितत्राह । यस्यमायाविद्याद्याः शक्तयो विवादस्यक्वचित्संवादस्यभुवः स्थानानिभवंतितस्मैनमः ३१ ननुकिंतद्ब्रह्मयस्यशक्तयोविवादादिभुवोभवंतितत्राह । अस्तीति । (अस्तीति)
योगउपासनाशास्त्रंतत्रहिविराड्रूपेणोपासनायां पातालपादादिकमस्तीत्युपास्यत्वेनविधीयते । नास्तीतिसांख्यंज्ञानशास्त्रं । तत्रह्यपाणिपादंअचक्षुरश्रोत्रमितिचपादादिनास्तीतितिनिषिध्यते । तयोर्यो
गसांख्ययोर्यत्किंचित्समंअनुवर्तमानंअवेक्षितंप्रतीतंतद्बृहत्ब्रह्मविवादेप्यविवादास्पदंब्रह्मेत्यर्थः । विवादंस्फुटयति । भिन्नोअस्तिनास्तीत्येवंभूतौविरुद्धौधर्मौययोः तयोर्भिन्नविषयत्वेविरोधोनस्यादित्येक
स्थयोरित्युक्तं । एकविषययोः । कुतः वस्तुनिष्ठयोः पादादिविधिप्रतिषेधयोरेकवस्तुनिष्ठत्वात् । समत्वेहेतुः । परंहि । यतोविधिप्रतिषेधयोरविषयः । तयोः पादादिविषयत्वात् । तर्हितथाविषयस्य
सद्भावेकिंप्रमाणंतदाह । अनुकूलं । अधिष्ठानंविनापादादिकल्पनायोगात्अवधिंविनातन्निषेधायोगाच्चतयोरुपपादकत्वेनासिद्धमित्यर्थः तस्मैनमइतिपूर्वस्यानुषंगः ३२ ननूदासीनस्यसमस्यनम
स्कारेकोलाभस्तत्राह यइति । पादमूलंभजतामनुग्रहार्थंप्राकृतनामरूपरहितोपिजन्मभिरवतारैर्विशुद्धोर्जितसत्त्वानिरूपाणिकर्मभिर्नामानिचयोभेजे तत्कुतः भगवानचिंत्यैश्वर्यः समह्यंप्रसीदतु ३३ननुत्वाह
शाःसकामाःगणेशादीन्प्रार्थयंतेत्वंतुतान्विहायकिमितिभगवंतमेवप्रार्थयसेतत्राह । प्राकृतैरर्वाचीनैर्ज्ञानपथैरुपासनामार्गैःयथाशयंतत्तद्वासनानुसारेण योदेहगतोऽतर्यामीतत्तद्देवतारूपेणविविधोभवति
यथावायुः पार्थिवंगुणंचंपकादिगंधभेदं आश्रित्यनानागंधवान् विभातिरेणोर्गुणंधूसरत्वादिकं आश्रित्यनानारूपवान् प्रतीयते । तद्वत्तस्यैवतत्तद्देवतारूपेणफलदातृत्वात् सईश्वरएवममनोरथं
सत्यंकरोतुकिमंतर्गडुभिर्देवतांतरैरित्यर्थः तदुक्तंगीतासु'' योयोयांयांतनुंभक्तः श्रद्धयार्चितुमिच्छति । तस्यतस्याचलां श्रद्धांतामेवविदधाम्यहम् । सतयाश्रद्धयायुक्तस्तस्याराधनमीहते । लभतेचत
तःकामान् मयैवविहितान्हितानि''ति । '' येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहमि'' तिच । ३४

यस्मिन्यतोयेनचयस्ययस्मैयद्योयथाकुरुतेकार्यतेवा॥परावरेषांपरमंप्राक्प्रसिद्धंतद्ब्रह्मतद्धेतुरनन्यदेकम् ३० यच्छक्तयोवदतांवादिनांवैविवादसंवादभुवोभवं श्लोका
ति ॥ कुर्वंतिचैषांमुहुरात्ममोहंतस्मैनमोनंतगुणायभूम्ने ३१ अस्तीतिनास्तीतिचवस्तुनिष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ॥ अवेक्षितंकिंचनसांख्ययोग
योःसमंपरंह्यनुकूलंबृहत्तत् ३२ योनुग्रहार्थंभजतांपादमूलमनामरूपोभगवाननंतः ॥नामानिरूपाणिचजन्मकर्मभिर्भेजेसमह्यंपरमःप्रसीदतु ३३ यःप्राकृ ३०/३४
तैर्ज्ञानपथैर्जनानांयथाशयंदेहगतोविभाति ॥ यथाऽनिलःपार्थिवमाश्रितोगुणंसईश्वरोमेकुरुतान्मनोरथम् ३४

॥१९॥

चूर्णिका ३० ३१ ३२ किंच यःभगवान् प्राकृतनामरूपरहितोपिपादमूलंभजतां अनुग्रहार्थंनामानिरूपाणिभेजेसःमेप्रसीदतु ३३ ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्तुवतोदक्षस्यभगवान् प्रत्यक्षोभूत् । ३५ तंवर्णयतिसार्धैश्चतुर्भिः सुपर्णस्यांसेस्कंधेकृतौपादौयेनप्रलंबाअष्टौमहांतोभुजायस्य । चक्राद्यष्टायुधधरः । ३६ प्रसन्नं वदनं ईक्षणेचयस्य । वनमालयानि
वीतम् कंठादिपादांतं व्याप्तं अगं यस्य लसंतौश्रीवत्सकौस्तुभौयस्य । ३७ महांतिकिरीटकटकानियस्यस्फुरंतीमकरकुंडलेयस्य । कांच्यादिभिर्विभूषितः । वलंयमत्रपादभूषणंद्रष्टव्यं कटकस्योक्तत्वा
त् ३८ त्रैलोक्यमोहनंश्रीपुरुषोत्तमाख्यम्। सुरयूथपैर्लोकपालैः ३९ (विचक्ष्यदृष्ट्वाआगतसाध्वसः प्राप्तसंभ्रमः ।४०) (यथान्हदिन्योनद्योनिर्भरैरापूर्यंतेतथातीव्रयामुदापरमानंदेन) आपूरितानि
मनोद्वाराणिइंद्रियाणितैः यथान्हदिन्यः नद्यः निर्झरैरापूर्यंतेतथा।त्किंचनवक्तुंनाशकत्) महानंदापूर्णत्वेनावृत्तिकत्वाद्वागादीनांनकिंचिदपिवक्तुंशक्तोभूदित्यर्थः यद्यप्यसौनावोचत्तथापिचित्तज्ञइदंव
क्ष्यमाणमाह४२ (यद्यतः) भावंभक्तिगतः प्राप्तः ४३ यत्यतस्तेतपःअस्यविश्वस्यउद्धरणवृद्धिकरंअतस्तेऽहंप्रीतः । मत्तपसोलोकसमृद्ध्यर्थत्वेत्वत्प्रीतेः किंकारणंतत्राह । ममेति । भूतानांवि
भूतयः समृद्धयोभूयासुरितियत्एषएवममकामः अतोमत्कामपूरणादेवाहंप्रीतोस्मीत्यर्थः ४४ भूतिविस्तारप्रयत्नश्चतवोचितएवेत्याह । ब्रह्मेति । भवंतः प्रजापतयः भूतेरुद्भवस्यहेतवः ४५ विश्ववृद्ध्य
र्थेनचत्वत्तपसाहंप्रीतइत्युक्तंतदेवतपःस्तुवन्प्रसंगादन्यान्यापिलोकवृद्धिकराणिविद्यादीनिस्तौति ।(हेब्रह्मन्तपोमूर्ते) तपः यमनियमादिसहितंध्यानंमेहृदयम्। विद्यासांगोपांगमंत्रजपः सा ध्यानं तनो
तीतितनुर्देहः । क्रियाःध्यानादिविषयःपुंव्यापारोभावनाशब्दवाच्यः । तेनहिध्यानादिकं (आक्रियतेइतिआकृतिः । जाताः सुनिष्पन्नाः क्रतवोंगानि । “ शिरोवाएतद्यत्प्रवर्ग्यः ग्रीवाउपसदश्चक्षुषीआ
ज्यभागा ”वित्यादिश्रुतेः।धर्मः क्रत्वाद्यपूर्वं आत्मामनः हृदयाश्रयत्वात् । सुरायज्ञभुजस्तएवासवः प्राणाः संतर्पणीयत्वात् ४६

श्लोकाः ३५/४६

श्रीशुकउवाच ॥ इतिस्तुतःसंस्तुवतःसतास्मिन्नघमर्षणे ॥ आविरासीत्कुरुश्रेष्ठभगवान्भक्तवत्सलः ३५ कृतपादःसुपर्णांसेप्रलंबाष्टमहाभुजः ॥ चक्रशंखा
सिचर्मेषुधनुःपाशगदाधरः ३६ पीतवासाघनश्यामःप्रसन्नवदनेक्षणः ॥ वनमालानिवीतांगोलसच्छ्रीवत्सकौस्तुभः ३७ महाकिरीटकटकःस्फुरन्मक
रकुंडलः ॥ कांच्यंगुलीयवलयनूपुरांगदभूषितः ३८ त्रैलोक्यमोहनंरूपंबिभ्रत्त्रिभुवनेश्वरः ॥ वृतोनारदनंदाद्यैःपार्षदैःसुरयूथपैः ॥ स्तूयमानोनुगायद्भिः
सिद्धगंधर्वचारणैः ३९ रूपंतन्महदाश्चर्यंविचक्ष्यागतसाध्वसः ॥ ननामदंडवद्भूमौप्रहृष्टात्माप्रजापतिः ४० नकिंचनोदीरयितुमशकत्तीव्रयामुदा ॥
आपूरितमनोद्वारैर्ह्रदिन्यइवनिर्झरैः ४१ तंतथाऽवनतंभक्तंप्रजाकामंप्रजापतिम् ॥ चित्तज्ञःसर्वभूतानामिदमाहजनार्दनः ४२ ॥ श्रीभगवानुवाच ॥
प्राचेतसमहाभागसंसिद्धस्तपसाभवान् ॥ यच्छ्रद्धयामत्परयामयिभावंपरंगतः ४३ प्रीतोहंतेप्रजानाथयत्तेस्योद्बृंहणंतपः ॥ ममैषकामोभूतानांयद्भूयासु
र्विभूतयः४४ ब्रह्माभवोभवंतश्चमनवोविबुधेश्वराः॥विभूतयोममह्येताभूतानांभूतिहेतवः ४५ तपोमेहृदयंब्रह्मन्तनुर्विद्याक्रियाकृतिः ॥ अंगानिक्रतवो
जाताधर्मआत्माऽसवःसुराः ४६

चूर्णिका ॥२०॥

॥ ॥ श्रीशुकउवाच ॥ ॥ इतिस्तुतः भगवान्गरुडांसेकृतपादः अष्टभुजः शंखचक्रासिचर्मेषुधनुष्पाशगदाधरः पीतवासाः घनश्यामः नारदनंदाद्यैर्वृतः सिद्धगंधर्वा
दिभिः स्तूयमानः तत्रआविरासीत् ३५ ३६ ३७ ३८ ३९४० तंदृष्ट्वाप्रजापतिः भूमौदंडवत् ननाम ४१ तदासर्वभूतानांचित्तज्ञः जनार्दनः प्रजाकामुकंदक्षंउवा
च ४२ हेप्राचेतस भवान्तपसासांसिद्धः तेअहंप्रीतोस्मिनब्रह्माभवःभवंतश्चसर्वेभूतानांभूतिहेतवः ममविभूतयः ४५ अतः पंचजनस्यप्रजापतेः दुहिताअसिक्नी नाम्नीपत्नी
त्वेप्रगृह्यताम् ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तपसः संतानवृद्धिहेतुत्वंदर्शयितुं द्वितीयतृतीयोक्तमितिहासमाहचतुर्भिः अहमेवेतिवस्त्वंतरव्यावृत्तिः । आसमेवेतिक्रियांतरव्यावृत्तिः । अतरंग्राहकंबहिर्ग्राह्यंसंज्ञानमात्रंचैतन्यमात्रं । अव्यक्तंइंद्रियवृत्ति
भिरनभिव्यक्तंअतएवप्रसुप्तमिवविश्वतःसर्वत्र४७गुणतोमायातःगुणमयोविग्रहोत्रह्मांडंततः तदैवअजः अयोनिजः।४८(महादेवो महान् द्योतमानःसब्रह्मा । वीर्येणतेजसाउपबृंहितः) खिलमसमर्थमिव४९
मेमयातपतपेत्यभिहितःसन् । येनतपसा । ५० संततिवृद्ध्युपायमाह । एषेति । अंगहेदक्ष । पंचजनाख्यस्यप्रजापतेः ५१ मिथुनस्ययोव्यवायोरतिः सएवधर्मोयस्यसत्वम् । तथाभूतायांतस्याम् ५२
माययानिमित्तभूतयास्त्रियासहमिथुनिभूयभविष्यंतिपुत्रादिरूपेणोत्पत्स्यंते ५३॥५४॥ इतिश्रीभागवतेषष्ठस्कंधेटीकायांचतुर्थः ४ ॥ ॥ पंचमेनारदेनाथवाचः कूटैस्तुनाशितान् । सुतानाकर्ण्यदक्षो
ऽमुंशशापेतिनिरूप्यते॥१॥अपृथग्धर्मशीलाएकाचारस्वभावाः (योब्रह्मपुत्रोदक्षः सएवायंप्राचेतसइतियुष्मानित्युक्तम्) १।२ तत्रप्रतीच्यांदिशिसिंधोर्नद्याःसमुद्रस्यचयत्रसंगमस्तत्रस्थम् नारायणसरो
नामतीर्थं प्रययुरित्यन्वयः । सुमहत्अतिविस्तीर्णम् । ३ विनिर्धूतोमलोरागादिर्यस्मात्सआशयोयेषांते । ४ । तान्शुद्धसत्त्वानपिपित्रादेशजाड्येनप्रजाविवृद्धयेयत्तानुद्युक्तान्ददर्श ५ अहोकष्टंमोक्ष
मार्गाधिकारिणःसंतएतेप्रवृत्तिनिष्ठैःकर्मभिर्नश्येरन्नितिकृपयातान्निगूढार्थैर्वाक्यैरुपदिशतिस्मतदाहउवाचेतिचतुर्भिः । पालकाःसंतोपिबालिशाअज्ञायूयंकथंप्रजाःस्रक्ष्यथ । बतेतिखेदे । बालकाइति
पाठेबालिशत्वेहेतुः । ६ एकएवपुरुषोयस्मिन् तद्राष्ट्रंअदृष्ट्वेत्यनुषंगः । बिलंचेत्यादिद्वितीयांतानाम् अविज्ञायकथंसर्गंकरिष्यथेतितृतीयेनान्वयः ७

॥२१॥

॥५॥

श्लोकाः ४७/७

अहमेवासमेवाग्रेनान्यत्किंचांतरंबहिः ॥ संज्ञानमात्रमव्यक्तंप्रसुप्तमिवविश्वतः ४७ मय्यनंतगुणेऽनंतेगुणतोगुणविग्रहः ॥ यदासीत्ततएवाद्यःस्वयंभूःसम
भूदजः ४८ सवैयदामहादेवोममवीर्योपबृंहितः ॥ मेनेखिलमिवात्मानमुद्यतःसर्गकर्मणि ४९ अथमेऽभिहितोदेवस्तपोऽतप्यतदारुणम् ॥ नवविश्वसृजो
युष्मान्येनादावसृजद्विभुः ५० एषापंचजनस्यांगदुहितावैप्रजापतेः ॥असिक्नीनामपत्नीत्वेप्रजेशप्रतिगृह्यताम् ॥ ५१ मिथुनव्यवायधर्मस्त्वंप्रजासर्गमिमं
पुनः ॥ मिथुनव्यवायधर्मिण्यांभूरिशोभावयिष्यसि ५२ त्वत्तोऽधस्तात्प्रजाःसर्वामिथुनीभूयमायया ॥ मदीययाभविष्यंतिहरिष्यंतिचमेबलिम् ॥५३
॥ श्रीशुकउवाच॥ इत्युक्त्वामिषतस्तस्यभगवान्विश्वभावनः ॥ स्वप्नोपलब्धार्थइवतत्रैवांतर्दधेहरिः ५४ ॥ इतिश्रीभा०म० षष्ठस्कंधेचतुर्थोध्यायः ४ ॥
॥ श्रीशुकउवाच तस्यांसपांचजन्यांवैविष्णुमायोपबृंहितः ॥ हर्यश्वसंज्ञानयुतंपुत्रानजनयद्विभुः १ अपृथग्धर्मशीलास्तेसर्वेदाक्षायणानृप ॥ पित्राप्रो
क्ताःप्रजासर्गेप्रतीचींप्रययुर्दिशम् २ तत्रनारायणसरस्तीर्थंसिंधुसमुद्रयोः ॥ संगमोयत्रसुमहन्मुनिसिद्धनिषेवितम् ३ तदुपस्पर्शनादेवविनिर्धूतमलाशयाः॥
धर्मेपारमहंस्येचप्रोत्पन्नमतयोप्युत॥४॥तेपिरेतपएवोग्रंपित्रादेशेनयंत्रिताः ॥ प्रजाविवृद्धयेयत्तान्देवर्षिस्तान्ददर्शह ५ उवाचचाथहर्यश्वाःकथंस्रक्ष्यथवै
प्रजाः॥अदृष्ट्वांतंभुवोयूयंबालिशाबतपालकाः६ तथैकपुरुषंराष्ट्रंबिलंचादृष्टनिर्गमम् ॥ बहुरूपांस्त्रियंचापिपुमांसंपुंश्चलीपातिम् ॥ ७ ॥

चूर्णिका

४७ ४८ २९ ५० ५१ त्वंमैथुनधर्मःसन्मैथुनव्यवायधर्मिण्यांतस्यांप्रजासर्गंभूरिशः भावयिष्यसि ५२ त्वत्तः अग्रेसर्वाः प्रजाः मन्मायया मैथुनधर्मेणैवभविष्यंति५३
इतिदक्षंउक्त्वाहरिः तत्रैवअंतर्दधे ५४ इतिषष्ठेचतुर्थः ॥ ४ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ सः दक्षः पांचजन्यांतस्यांहर्यश्वसंज्ञान् अयुतंपुत्रान् अजनयत् १
हेनृपते हर्यश्वाःप्रजासर्गेपित्राप्रोक्ताःसंतःप्रतीचीं दिशंययुः २ तत्रनारायणसरसि ३ ४ प्रजाविवृद्धयेउग्रंतपः तेपिरेतान्नारदः एत्यउवाच ५ हेहर्यश्वाः
यूयंभुवः तंअ १ तथाएकपुरुषंराष्ट्रं २ अदृष्टनिर्गमंबिलं ३ बहुरूपांस्त्रियं ४ पुंश्चलीपतिंपुरुषं ५ उभयतोवाहांनदीम् ६ पंचविंशतेः गृहं ७ चित्रकथंहंसं ८ क्षौ
रपव्यंस्वयंभ्रमि ९ विपश्चितः स्वपितुरादेशं १० एतानि अविज्ञायकथंसर्गंकरिष्यथ ६ ७

॥२१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पंचपंचानांपंचविंशतेरद्भुतंगृहम् । क्षुरैःपविभिर्वज्रैश्वनिर्मितमिवातितीक्ष्णंदृढंचेत्यर्थः। स्वयंस्वतंत्रंभ्रमिभ्रमणस्वभावम् ८ विपश्चितः सर्वज्ञस्यस्वपितुरादेशमात्मनोनुरूपमविद्वांसोऽजानंतः पूर्वोक्तंचैकपुरुषं राष्ट्रमित्याद्यविज्ञायअहोकथंसर्गंकरिष्यथेत्यन्वयः ९ वाचः कूटंपरोक्षवादेनार्थांतरमिवप्रतीयमानंवचनम्। औत्पत्तिकीसहजामनीषाविचारशक्तिर्यस्यास्तयाधियास्वयमेवविममृशुः विचारितवंतः १० नारदोक्तदशवाक्यांतैर्विमृश्यनिर्णीतानर्थानाहदशभिः । अदृष्ट्वांतंभुवइत्यत्रभूशब्दार्थमाह । भूरितिक्षेत्रंतच्चात्रजीवसंज्ञंलिंगशरीरंयत्निजबंधनंआत्मनोबंधनकारणम् । अंतशब्दार्थमाहनिर्वाणंनाशम् । असद्भिः मोक्षानुपयोगिभिः कर्मभिः किंभवेन्नकिमपि ११ एकपुरुषमित्यस्यार्थमाह । एकएवेति तुर्यः सर्वसाक्षी स्वाश्रयः स्वाधारः अभवंनित्यमुक्तं असद्भिः ईश्वरासमर्पितैःकर्मभिः १२ बिलंचादृष्ट्वा निर्गमंइत्यस्यार्थमाह । पुमान्यद्गत्वाबिलस्वर्गंपातालंगतइवनैवैतिनावर्ततेतत्प्रत्यग्धामज्योतीरूपंब्रह्मअविदः अविदुषः असद्भिः नश्वरस्वर्गादिसाधनैः कर्मभिः १३ बहुरूपांस्त्रियमित्यस्यार्थमाह । नानारूपेति । स्वैरिणिपुंश्चलीव विमोहकैः रजआदिगुणैः अन्वितातन्निष्ठांतस्याअवसानंविवेकं अगतस्यअप्राप्तस्य असद्भिरशांतैः १४ पुमांसंपुंश्चलीपतिमित्यस्यार्थमाह । तस्याः संगेनभ्रंशितमैश्वर्यं स्वातंत्र्यंयस्य । कुत्सिताभार्यायस्यतद्वत् तस्यागतीः सुखदुःखलक्षणाः संसरंतंगच्छंतंजीवंअबुधस्यअजानतः असद्भिः बुद्ध्याविवेकप्राप्तैः१५ नदीमुभयतोवाहामित्यस्यार्थमाह । सृष्ट्यप्ययौकरोतीत्युभयतः प्रवाहोदर्शितः वेलाकूलं प्रवाहपतितानांनिर्गमस्थानं तपोविद्यादि तस्यांतेवेगितांनिर्गमप्रतिबंधायक्रोधाहंकारादिभिःकृतवेगां । मत्तस्यतद्वेगेनविवशस्यअतएवतांतथाभूतांअविज्ञस्यअविचारयतः असद्भिर्मायिकैः यद्वा वेलाकूलंसमुद्रस्यव्यवहारस्थानंतस्यसमीपेसमुद्रवृद्धिह्रासाभ्यांयथाउभयतोंतर्बहिःकृतवेगानदीभवति । एवंसमुद्रतुल्यस्यात्मनोव्यवहारस्थानेदेहेजन्ममरणादिभिःकृतवेगामित्यर्थः वेगिनीमितिपाठेवेगवतीम् १६

॥२२॥

श्लोकाः ८/१६

नदीमुभयतोवाहांपंचपंचाद्भुतंगृहम्॥ क्वचिद्धंसंचित्रकथंक्षौरपव्यंस्वयंभ्रमि ८ कथंस्वपितुरादेशमविद्वांसोविपश्चितः॥ अनुरूपमविज्ञायअहोसर्गंकरिष्यथ ९ ॥ ॥ श्रीशुकउवाच ॥ ॥ तन्निशम्याथहर्यश्वाऔत्पत्तिकमनीषया॥ वाचःकूटंतुदेवर्षेःस्वयंविममृशुर्धिया १० भूःक्षेत्रंजीवसंज्ञंयदनादिनिजबंधनम् ॥ अदृष्ट्वातस्यनिर्वाणंकिमसत्कर्मभिर्भवेत् ११ एकएवेश्वरस्तुर्योभगवान्स्वाश्रयःपरः ॥ तमदृष्ट्वाऽभवंपुंसःकिमसत्कर्मभिर्भवेत् १२ पुमान्नैवैति यद्गत्वाबिलस्वर्गंगतोयथा ॥ प्रत्यग्धामाविदइहकिमसत्कर्मभिर्भवेत् १३ नानारूपात्मनोबुद्धिःस्वैरिणीवगुणान्विता ॥ तन्निष्ठामगतस्येहकिमसत्कर्मभिर्भवेत् १४तत्संगभ्रंशितैश्वर्यंसंसरंतंकुभार्यवत् ॥ तद्गतीरबुधस्येहकिमसत्कर्मभिर्भवेत् १५सृष्ट्यप्ययकरींमायांवेलाकूलांतवेगिताम् ॥ मत्तस्यतामविज्ञस्य किमसत्कर्मभिर्भवेत् १६

चूर्णिका ॥२२॥

८ ९ श्रीशुकउवाच ॥ ॥ हर्यश्वाः तन्निशम्यस्वधियादेवर्षेःवाचःकूटंविचारितवंतः १० भुवः अंतमितिलिंगशरीरनाशंअदृष्ट्वाअसत्कर्मभिः किंभवेत् ११ एकंईश्वरम् २ महत्तरजआदिगुणैःअन्वितबुद्धेः विवेकम् ४ बुद्धिसंगभ्रंशितैश्वर्यसंसरंतंजीवम् ५ सृष्ट्यप्ययकरींमायाम् ६ पंचविंशतितत्त्वानांआश्रयः अंतर्यामीयः तम् ७ ईश्वरप्रतिपादकंशास्त्रंबंधमोक्षानुदर्शनम् ८ कालचक्रभ्रमणात्मकंजगदाकर्षकं ९ शास्त्ररूपपितुः आदेशम् १० ११ १२ १३ १४ १५ १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचपंचेत्यस्यार्थमाह । पंचविंशतितत्त्वानांपुरुषोंऽतर्यामीअद्भुतदर्पणंआश्चर्यरूपआश्रयः अध्यात्मंकार्यकारणसंघाताधिष्ठातारं तमबुधस्य । असद्भिर्मिथ्यास्वातंत्र्यकृतैः १७ क्वचिद्धंसमित्यस्यार्थमाह। ऐश्वरंईश्वरप्रतिपादकं। विविक्तंपदंचिज्जडरूपंवस्तुयेनेतिहंसपदव्याख्यानं । बंधमोक्षावनुदर्शयतीतितथा । अनेनाचित्राः कथायस्येतिव्याख्यातम् । तदुत्सृज्यअनभ्यस्यअज्ञायअविदुषः असद्भिः बहिर्मुखैः १८ क्षौरपव्यमित्यस्यार्थमाह । कालचक्रमिति । भ्रमिः भ्रमणात्मकम् । तीक्ष्णमितिनिष्कर्षयदितिचक्षौरपव्यपदंव्याख्यातम् । तदबुधस्य । अतएवफलस्यनित्यत्वबुद्ध्या काम्यकर्मानुष्ठानेवैगुण्यबाहुल्यादसद्भिः १९स्वपितुरादेशमित्यस्यार्थमाह । शास्त्रस्यस्वपितुःद्वितीयजन्महेतोः तदनुरूपायनिवृत्त्यनुरूपायनिवर्तकमादेशंयोनवेदसकथंगुणविश्रंभीगुणमयप्रवृत्तिमार्गं विश्वासवान्सन् उपक्रमेत् सृष्ट्यादौप्रवर्तेत । 'मोक्षेशत्रब्रह्मबुद्धीनांजीवमायांतरात्मनाम् । शास्त्रकालोपदेशानामज्ञानेकिमुकर्मभिः' इतिवाचः कूटसंग्रहश्लोकः २० इतिव्यवसिताः एवंनिश्चितवंतः एकचेतसः ऐकमत्ययुक्ताः तंनारदंप्रदक्षिणीकृत्यअपुनरावृत्तिमार्गंप्रययुः २१ (स्ववीणास्वररूपेसामवेदस्वरब्रह्मणि) निर्भातः प्रत्यक्षीभूतोयोहृषीकेशः तस्यपदांबुजे । अनुचरत्अन्वचरदित्यर्थः २२ नाशदर्शनंस्वधर्मभ्रंशंवा । शीलेनशालंतेशोभंतेइतितथातेषाम् । कःदक्षः । सुप्रजस्त्वंसत्पुत्रवत्त्वम् । शुचांशोकानांस्थानम् ।२३ अजेनब्रह्मणा (शबलाश्वसंज्ञान्) सहस्रशः सहस्रसंख्यान् २४।२५ परमंब्रह्मप्रणवंवक्ष्यमाणमंत्रंवा २६ (अब्भक्षाःजलमात्रप्राश्नंतः) इडस्पतिंमंत्राणांपतिंविष्णुंआराधयामासुः २७ विशुद्धसत्त्वाश्रयायपरमहंसायनमोधीमहि २८ मतिसर्गैधीर्येषांतान् । वाचःकूटानिअदृष्टांतमुखइत्यादीनिपूर्वोक्तानिमाह । २९

श्लोकाः १७/२९

पंचविंशतितत्त्वानांपुरुषोऽद्भुतदर्पणम् ॥ अध्यात्ममबुधस्येहकिमसत्कर्मभिर्भवेत् १७ ऐश्वरंशास्त्रमुत्सृज्यबंधमोक्षानुदर्शनम् ॥ विविक्तपदमज्ञायकिमसत्कर्मभिर्भवेत् १८ कालचक्रंभ्रमिस्तीक्ष्णंसर्वंनिष्कर्षयज्जगत् ॥ स्वतंत्रमबुधस्येहकिमसत्कर्मभिर्भवेत् १९ शास्त्रस्यपितुरादेशंयोनवेदनिवर्तकं ॥ कथंतदनुरूपायगुणविश्रंभ्युपक्रमेत् २० इतिव्यवसिताराजन्हर्यश्वाएकचेतसः ॥ प्रययुस्तंपरिक्रम्यपंथानमनिवर्तनम् ॥ २१ स्वरब्रह्मणिनिर्भातहृषीकेशपदांबुजे ॥ अखंडंचित्तमावेश्यलोकाननुचरन्मुनिः २२ नाशंनिशम्यपुत्राणांनारदाच्छीलशालिनां ॥ अन्वतप्यतकःशोचन्सुप्रजस्त्वंशुचांपदम् २३ सभूयःपांचजन्यायामजेनपरिसांत्वितः ॥ पुत्रानजनयद्दक्षःशबलाश्वान्सहस्रशः २४ तेपिपित्रासमादिष्टाःप्रजासर्गेधृतव्रताः ॥ नारायणसरोजग्मुर्यत्रसिद्धाःस्वपूर्वजाः २५ तदुपस्पर्शनादेवविनिर्धूतमलाशयाः ॥ जपंतोब्रह्मपरमंतेपुस्तत्रमहत्तपः २६ अब्भक्षाःकतिचिन्मासान्कतिचिद्वायुभोजनाः ॥ आराधयन्मंत्रमिममभ्यसंतइडस्पतिम् २७ ॐनमोनारायणायपुरुषायमहात्मने ॥ विशुद्धसत्त्वधिष्ण्यायमहाहंसायधीमहि २८ इतितानपिराजेंद्रप्रतिसर्गधियोमुनिः ॥ उपेत्यनारदःप्राहवाचःकूटानिपूर्ववत् २९

॥२३॥

चूर्णिका

१७ १८ १९ २० इतिएवंविचार्यतंपरिक्रम्य अपुनरावृत्तिंमार्गंप्रययुः २१ २२ ततःदक्षःनारदात्पुत्राणांनाशंनिशम्य सुप्रजस्त्वंशुचांपदं इतिविचारयन्अशोचत् २३ पुनः ब्रह्मणासांत्वितः दक्षः शबलाश्वसंज्ञान् सहस्रशः पुत्रान् अजनयत् २४ तेपिप्रजासर्गे पित्राआदिष्टाः संतः नारायणसरः जग्मुः २५ यत्रस्वपूर्वजाः सिद्धाः तत्सरसिस्नात्वापरब्रह्मजपंतः तपस्तेपुः २६ किंच ॐनमोनारायणायेतिमंत्रं अभ्यसंतः विष्णुंआराधयामासुः२७ २८ हेराजेंद्रतानपिनारदः एत्यवाचःकूटानि पूर्ववत् उवाच २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. ष हेदाक्षायणाः संशृणुतेत्यादिपुनरन्यदपिआह । निगममुपदेशअन्विच्छतअवलोकयत । ३० प्रायणं प्रकृष्टंगमनम् । पुण्यमेवबंधुर्यस्य । मरुद्भिर्भ्रातृवत्सलैर्देवैः ३१ अमोघंदर्शनंयस्य । हेमारिषआर्य३२ अ०
सध्रीचीनं समीचीनं प्रतीचीनं प्रत्यग्वृत्तिलभ्यं (परस्यब्रह्मणः)अनुपथंअनुगुणंपंथानं पश्चिमायामिनीःगतारात्रयइव ३३।३४ पुत्राणांपारमहंस्यनिष्ठामुपश्रुत्यदक्षोपिप्रायशोविरक्तः स्यादितितदनुग्रहार्थं
देवर्षिस्तत्पार्श्वंगतस्तदातमुपलभ्यदक्षआह ३५ साधोरिवलिंगंवेषोयस्यतेनत्वयानोऽस्मदीयानामर्भकाणांअसाधुअकारिकृतम् । तदेवाह । साधूनांस्वधर्मेप्रवृत्तानांभिक्षोर्योमार्गः सप्रदर्शितः । ३६ ननु ॥५॥
टीका संन्यासिनांमार्गः साधुरेवमोक्षहेतुत्वात् सत्यं ऋणत्रयापाकरणं विनामहाननर्थएवेत्याह । ऋणैरिति । 'जायमानोवैब्राह्मणस्त्रिभिरृणैरृणवान्जायतेब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यःएष
वाअनृणोयः पुत्रीयज्वाब्रह्मचारीवासी'तिश्रुतेः । ऋणैरमुक्तानांनमीमांसितानिविचारितानिकर्माणियैःतेषांतावदृणविमोकोनास्तितदुत्तरकालभावित्वाच्चपुत्रोत्पादनयज्ञानुष्ठानयोरभावेनपितृदेवर्षिऋणाद्वि
॥२४॥ मुक्तिश्चनास्तिअतः हेपापविषयभोगत्यागादिहलोकेश्रेयसोविघातः कृतः । मोक्षानधिकारित्वाच्चपरलोकेपिश्रेयसोविघातः कृतइत्यर्थः तथाचमनुः 'ऋणानित्रीण्यपाकृत्यमनोमोक्षेनिवेशयेत् । अनपाकृ
त्यमोक्षंतुसेवमानोव्रजत्यध'इति ३७ बालानांमतिंपुत्रादिविषयांभिनत्तीतितथा । एवंनिरनुक्रोशोनिर्घृणः हरेर्यशोनाशकःसन् तत्पार्षदमध्येकथंचरासि ३८ निर्लज्जत्वमेवाह । ननुत्वामृतेभागवताः सर्वे
भूतानुग्रहपरवशाः त्वंतुभूतविप्रियंकुर्वन्कथंनलज्जसइतिभावः । ३९ ननुवैराग्यादुपशमः उपशमाच्चभूतस्नेहपाशच्छेदनं भवतिनचाविरक्तस्यऋणत्रयापाकरणमावश्यकम् ।'यदहरेवविरजेत् तदहरेवप्रव्र
जेत्यदिवेतरथाब्रह्मचर्यादेवप्रव्रजेदित्यादिश्रुतेः अतोवैराग्योपदेशेनतेषांमयानुग्रहएवकृतइतिचेत्तत्राह । नेति । यद्यपित्वमेवंमन्यसेतथापिमृषाकेवलिनाज्ञानंविनाऽवधूतवेषेणत्वयाइत्थंमतिचालनेकृते
पिपुंसांविरागोनैवस्यात् । नचविरागंविनोपशमः नचतेनविनास्नेहपाशनिकृंतनमित्यर्थः ४०

दाक्षायणाःसंशृणुतगदतोनिगमंमम ॥ अन्विच्छतानुपदवींभ्रातॄणांभ्रातृवत्सलाः ३० भ्रातॄणांप्रायणंभ्रातायोऽनुतिष्ठतिधर्मवित् ॥ सपुण्यबंधुःपुरुषोमरु श्लोकाः
द्भिःसहमोदते ३१ एतावदुक्त्वाप्रययौनारदोऽमोघदर्शनः ॥ तेपिचान्वगमन्मार्गंभ्रातॄणामेवमारिष ॥ ३२ सध्रीचीनंप्रतीचीनंपरस्यानुपथंगताः ॥
नाद्यापितेनिवर्तंतेपश्चिमायामिनीरिव ३३ एतस्मिन्काल उत्पातान्बहून्पश्यन्प्रजापतिः ॥ पूर्ववन्नारदकृतंपुत्रनाशमुपाशृणोत् ॥ ३४ चुक्रोधनार ३०/४०
दायासौपुत्रशोकविमूर्छितः ॥ देवर्षिमुपलभ्याहरोषाद्विस्फुरिताधरः ३५ ॥ दक्षउवाच ॥ अहोअसाधोसाधूनांसाधुलिंगेननस्त्वया ॥ असाध्वकार्य
र्भकाणांभिक्षोर्मार्गःप्रदर्शितः ३६ ऋणैस्त्रिभिरमुक्तानाममीमांसितकर्मणाम् ॥ विघातःश्रेयसःपापलोकयोरुभयोःकृतः ३७ एवंत्वंनिरनुक्रोशो
बालानांमतिभिद्धरेः ॥ पार्षदमध्येचरसियशोहानिरपत्रपः ३८ननुभागवतानित्यंभूतानुग्रहकातराः ॥ ऋतेत्वांसौहृदघ्नंवैवैरकारमवैरिणाम् ३९ नेत्थंपुं
सांविरागःस्यात्त्वयाकेवलिनामृषा ॥ मन्यसेयद्युपशमंस्नेहपाशनिकृंतनम् ४०

चूर्णिका हेशबलाश्वाः भ्रातॄणांपदवीं अवलोकयतइत्याद्युक्त्वानारदः ययौ तेपिभ्रातॄणांमार्गं अन्वगमन् ३० ३१ ३२ एतस्मिन्कालेदक्षः बहून् उत्पातान्पश्यन्पूर्ववत् नारद ॥२४॥
कृतं पुत्रनाशंउपाशृणोत् ३३ ३४ ततोदक्षः नारदायचुक्रोधतत्कालेनारदं उपलभ्य आह ३५ अहोअसाधोसाधुचिह्नेनत्वया अर्भकाणांभिक्षोर्मार्गः प्रदर्शितः ३६
त्रिभिः ऋणैः अमुक्तानांउभयोः लोकयोः विघातः कृतः ३७ एवंत्वंनिर्दयः बालानांमतिभित् निर्लज्जः सन् हरेः पार्षदमध्येकथंचरसि ३८ ३९ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इत्थंविरागोनस्यादित्यत्रहेतुमाह । नानुभूयअननुभूयविषयाणांतीक्ष्णतांदुःखहेतुत्वंनजानातितस्माद्विषयानुभवेनतीक्ष्णत्वज्ञानात्कारणात्स्वयंयथानिर्विद्येततथाभवादृशैः परैःभिन्नधीर्ननिर्विद्येत ४१ अतस्त्वयास्माकमप्रियमेवकृतं तथापिवयंनकुर्मइत्याह यदिति । कर्मसंधानांकर्ममर्यादानांकर्तुमंधानामितिपाठेप्रियंकर्तुमजानतामित्यर्थः । दुर्मर्षंदुःसहंयत्त्वंकृतवानसितन्मर्षितंसोढम् । ४२ तथापि तवाभद्रंभविष्यत्येवेत्याह । तंतुकृंतन संतानच्छेदक । यद्यस्मात्अभद्रं पुत्राणांस्थानभ्रंशंअचरस्तस्मात्पदंस्थाननंभवेदितिमृदुच्छलेनशापः ४३ बाढंतथेतिस्वीकृतवान् । ईश्वरोपिप्रतिशप्तुंसमर्थोपितितिक्षे तसहेतेतियत्एतावानेव ४४ ॥ ॥ इतिषष्ठेपंचमोध्यायः ॥ ५ ॥ षष्ठेदक्षेणसृष्टायांकन्याषष्ट्यांप्रकीर्तिताः । पृथग्वंशायतोजातोविश्वरूपोऽदितेसुतात् ॥ १ ॥ नारदात्पुत्राणांनाशमाशंकमानोदुहितॄर्ज नयामास१ कायकश्यपायद्विषट्द्विगुणाःषट् द्वादशयासुताः त्रयोदशेत्यर्थः । इंदोः सोमायत्रिणवसप्तविंशतिं। ताक्ष्यीय नामांतरंप्राप्तायकश्यपायैवअपराअवशिष्टाश्चतस्रः २ सापत्यानांअपत्यसहितानां

॥२५॥ मत्तः शृणु । प्रसूतिप्रसवैः पुत्रपौत्रादिभिः ३ ४(वेदऋषभाख्यएकः पुत्रः) ततोवेदऋषभात् इंद्रसेनोऽभवत् ५ यतः कीकटात् । भुवोदुर्गाणिदुर्गाभिमानिनोदेवाः । जामेयः जाम्याःपुत्रः स्वर्गः ततः स्वर्गान्नंदिपुत्रोऽभवत् ६ तत्सुतः साध्यानांसुतः ७ । ८ ९

श्लोकाः

नानुभूयन जानातिपुमान्विषयतीक्ष्णताम् ॥ निर्विद्येतस्वयंतस्मान्नतथाभिन्नधीःपरैः ॥ ४१ यन्नस्त्वंकर्मसंधानांसाधूनांगृहमेधिनाम् ॥ कृतवानसिदु र्मर्षंविप्रियंतवमर्षितम् ४२ तंतुकृंतनयन्नस्त्वमभद्रमचरःपुनः ॥ तस्माल्लोकेषुतेमूढनभवेद्भ्रमतःपदम् ४३॥ श्रीशुकउवाच॥ प्रतिजग्राहतद्बाढंनारदःसाधुसं मतः ॥ एतावान्साधुवादोहितितिक्षेतेश्वरःस्वयम् ४४॥इतिश्रीभा०महा०षष्ठस्कंधेनारदशापोनामपंचमोध्यायः॥५॥ श्रीशुकउवाच ॥ ततःप्राचेतसोऽसि क्न्यामनुनीतःस्वयंभुवा ॥ षष्टिंसजनयामासदुहितॄःपितृवत्सलाः १ दशधर्मायकायेंदोर्द्विषट्त्रिणवदत्तवान् ॥ भूतांगिरःकृशाश्वेभ्योद्वेद्वेताक्ष्यीयचापराः २ नामधेयान्यमूषांत्वंसापत्यानांचमेशृणु ॥ यासांप्रसूतिप्रसवैर्लोकाआपूरितास्त्रयः३ भानुर्लंबाककुब्जामिर्विश्वासाध्यामरुत्वती ॥ वसुर्मुहूर्तासंकल्पाध र्मपत्न्यःसुतान्शृणु ४ भानोस्तुदेवऋषभइंद्रसेनस्ततोनृप ॥ विद्योतआसील्लंबायास्ततश्चस्तनयित्नवः ५ ककुभःसंकटस्तस्यकीकटस्तनयोयतः ॥ भुवोदुर्गाणिजामेयःस्वर्गोनंदिस्ततोभवत्६ विश्वेदेवास्तुविश्वायाअप्रजांस्तान्प्रचक्षते ॥ साध्योगणस्तुसाध्यायाअर्थसिद्धिस्तुतत्सुतः॥ ७मरुत्वांश्चजयं तश्चमरुत्वत्यांबभूवतुः ॥ जयंतोवासुदेवांशउपेंद्रइतियंविदुः ८ मौहूर्तिकादेवगणामुहूर्तायाश्चजज्ञिरे ॥ येवैफलंप्रयच्छंतिभूतानांस्वस्वकालजम् ९

४१/९

चूर्णिका

ननुजनविषयदुःखंअननुभूयकथंनिर्विद्येत ४१ कर्मकर्तॄणांत्वयाविघ्नंकृतम् अतः तेअभद्रंस्यात् ।किंचयतःपुत्राणांत्वयास्थाननाशःकृतः अतः भ्रमतः तेस्थानंनभवेत् ४२४३ ॥२५॥
॥ ॥ श्रीशुकउवाच ॥ ॥ साधुसंमतः नारदः प्रतिशप्तुंसमर्थोपितच्छापंजगृहे ४४ इतिषष्ठेपंचमः ५ ॥ ॥ श्रीशुकउउवाच ॥ ॥ ततः ब्रह्मणासांत्वितः दक्षः षष्टिकन्याः जनयामास १ तत्रधर्माय १० कश्यपाय १३ इंदोः २७ भूतस्य २ अंगिरसः २कृशाश्वाय २ ताक्ष्यइतिनामांतरंप्राप्तायकश्यपाय ४ एवं ६०।२ तत्रधर्म संततिमाह ३।भानुर्लंबाककुब्जामिर्विश्वासाध्यामरुत्वती वसुर्मुहूर्तासंकल्पा धर्मपत्न्यः सुतान्शृणु४।भानोः१देवर्षभः तस्यइंद्रसेनः लंबायाः २ विद्योतः ततस्तनयित्नवः५। ककुभः ३ संकटः तस्यकीकटः ततः दुर्गाभिमानिनोदेवाः जाम्याः ४स्वर्गः ततः नंदिः ६ विश्वायाः ५ विश्वेदेवाः तेअप्रजाः साध्यायाः ६ साध्योगणः ततः अ र्थसिद्धिः मरुत्वत्याः ७।७। मरुत्वान्जयंतश्चसईश्वरांशः ८ मुहूर्तायाः ८। मौहूर्तिकाः देवगणाः ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका. वसोर्वंशस्यभूयस्त्वादंतेनिर्देशः । मेमत्तः १० अभिमतिर्नामपत्नीतस्याहर्षादयः पुत्राः ११ सहश्चआयुश्चपुरोजवश्चपुत्राः । पुरः पुराणि१२ १३ यः कृत्तिकासुतः स्कंदः सोप्यग्नेः पुत्रः षाण्मातुरइतिअ ग्निभूरितिचप्रसिद्धेः ततः स्कंदात्विशाखादयोऽभवन् १४ आकृतेःपतिः शिल्पाचार्यः । ततोविश्वकर्मणः चाक्षुषोमनुरासीत् १५ विभावसोः उषाभार्या अथआतपात्पंचयामोदिवसोजातः अतएवरात्रि स्त्रियामा । प्रदोषप्रत्यूषयोर्दिवसस्यावयवत्वात् (येनदिवसेन) १६ भूतस्यद्वेभार्येतयोर्वंशमाह । सरूपेति १७ महानिति एवमेकादशरूपस्यरुद्रस्यपार्षदाः प्रेतादयः अन्येअन्यस्यांजाताः १८ अंगिरसः स्वधासतीचेतिद्वेभार्ये तयोर्वंशमाह प्रजापतेरिति । स्वधानामपत्नीपितॄन्पुत्रत्वेऽकरोत् । अथसतीचअथर्वांगिरसंनामवेदम्१९ कृशाश्वस्यअर्चिर्धिषणेतिद्वेभार्येतयोर्वंशमाह कृशाश्वइति २०२१ सुपर्णाविनता । अनूरुंअरुणम् २२

॥२६॥

श्लोकाः १० / २२

संकल्पायाश्चसंकल्पःकामःसंकल्पजःस्मृतः ॥ वसवोऽष्टौवसोःपुत्रास्तासांनामानिमेशृणु १० द्रोणःप्राणोध्रुवोऽर्कोग्निर्दोषोवसुर्विभावसुः ॥ द्रोणस्याभि मतेःपत्न्याहर्षशोकभयादयः ११ प्राणस्योर्जस्वतीभार्यासहआयुःपुरोजवः ॥ ध्रुवस्यभार्याधरणिरसूतविविधाःपुरः ॥ १२ अर्कस्यवासनाभार्यापुत्रा स्तर्षादयःस्मृताः ॥ अग्नेर्भार्यावसोर्धारापुत्राद्रविणकादयः १३ स्कंदश्चकृत्तिकापुत्रोयेविशाखादयस्ततः ॥ दोषस्यशर्वरीपुत्रःशिंशुमारोहरेःकला ॥ १४ वसोरांगिरसीपुत्रोविश्वकर्माकृतेःपतिः ॥ ततोमनुश्चाक्षुषोभूद्विश्वेसाध्यामनोःसुताः ॥ १५ विभावसोरसूतोषाव्युष्टंरोचिषमातपम् ॥ पंचयामोथभूता नियेनजाग्रतिकर्मसु ॥ १६ सरूपाऽसूतभूतस्यभार्यारुद्रांश्चकोटिशः ॥ रैवतोऽजोभवोभीमोवामउग्रोवृषाकपिः॥ १७अजैकपादहिर्बुध्न्योबहुरूपोमहानि ति ॥ रुद्रस्यपार्षदाश्चान्येघोराभूतविनायकाः१८प्रजापतेरंगिरसःस्वधापत्नीपितॄनथ॥ अथर्वांगिरसंवेदंपुत्रत्वेचाकरोत्सती१९कृशाश्वोऽर्चिषिभार्यायांधू म्रकेशमजीजनत् ॥ धिषणायांवेदशिरोदेवलंवयुनंमनुम् ॥ २० तार्क्ष्यस्यविनताकद्रूःपतंगीयामिनीइति ॥ पतंग्यसूतपतगान्यामिनीशलभानथ २१ सुपर्णाऽसूतगरुडंसाक्षाद्यज्ञेशवाहनम् ॥ सूर्यसूतमनूरुंचकद्रूर्नागाननेकशः २२

चूर्णिका संकल्पायाः९ संकल्पःततःकामःवसोः१०अष्टौवसवः तेषांनामानिशृणु१०द्रोणः प्राणोध्रुवोर्कोग्निर्दोषोवसुर्विभावसुःतेषांवसूनांवशंमाहद्रोणस्य १अभिमत्यांहर्षशोकभयादयः आसन् ११ ॥ प्राणस्य १ ऊर्जस्वत्यांसहआयुःपुरोजवाः ध्रुवस्य ३ धरण्यांविविधाः पुरः १२ अर्कस्य ४ आसनायांतर्षादयः अग्नेः ५ वसोर्धारायांद्रविणकायादयः १३ कृत्तिकायांस्कंदश्चस्कंदात्विशाखादयः दोषस्य६ शर्वर्यांशिशुमारः१४वसोः७आंगिरस्यांविश्वकर्माततः चाक्षुषोमनुः ततः विश्वेसाध्याः१५ विभावसोः ८ उषायांव्युष्टः रोचिषम् आतपइति आतपात्दिवसोजातः१६भूतस्यसरूपायांरैवतः अजः भवः भीमः वामः उग्रः वृषाकपिः अजैकपात् अहिर्बुध्न्यः बहुरूपः महान् अन्यस्यांएकाद शरुद्राणांपार्षदाः भूतविनायकप्रेतादयः १७१८अंगिरसः स्वधापत्न्यां १ पितरः सत्याम् २ अथर्वांगिरसोवेदः जातः १९ कृशाश्वः अर्चिषि १ धूम्रकेशम्धिषणायाम् २२ देवलम् देवशिरसम् वयुनम् मनुंजनयामास २० तार्क्ष्यस्यविनतायाम् १ गरुडः अरुणश्च कद्रुसंज्ञायाम् २ नागापतंग्याम् ३ पतगा यामिन्यांशलभाजाताः२१ २२

॥२६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

रोहिण्यामेवप्रेमातिशयेनअन्यासामुपेक्षणात्कुपितस्यदक्षस्यशापात्यक्ष्मग्रहार्दितः सन् तास्वनपत्योभूत् तंदक्षंप्रसाद्यरकेवलंकलाएवलेभेनत्वपत्यानि। कथंभूताः क्षयेकृष्णपक्षे दिताःखंडिताः सतीः (दो अवखंडनेधातुः ।) पाठांतरेक्षयेसति पुनरेधिताः । तेनैववर्धिताः सतीः २३ अथलोकानांमातृणांकश्यपपत्नीनांकल्याणकराणिनामानिशृणु २४ । २५ अल्पत्वेनसुगमत्वाच्चयथायथंव्युत्क्रमेण तासां वंशानाह । तिमेरित्यादिना २६ । २७सौरसाः सुरसायाः पुत्राः (द्विशफेतराअश्वादयः) २८ माधानिकान्मुख्यानष्टादशशृणु २९ ३० (नाहुषः नहुषस्यपुत्रः) ३१ (वैश्वानरोदनोःपुत्रस्तस्ययाः सुताः) ३२

॥२७॥ श्लोकाः २३/३२

कृत्तिकादीनिनक्षत्राणींदोःपत्न्यस्तुभारत ॥ दक्षशापात्सोनपत्यस्तासुयक्ष्मग्रहार्दितः ॥ पुनःप्रसाद्यतंसोमःकलालेभेक्षयेदिताः ॥ २३शृणुनामानिलोकानांमातृणांशंकराणिच ॥ अथकश्यपपत्नीनांयत्प्रसूतमिदंजगत् २४ आदितिर्दितिर्दनुःकाष्ठाअरिष्टासुरसाइला ॥ मुनिःक्रोधवशाताम्रासुरभिःसरमातिमिः २५ तिमेर्यादोगणाआसन्श्वापदाःसरमासुताः ॥ सुरभेर्महिषागावोयेचान्येद्विशफान्नृप २६ ताम्रायाःश्येनगृध्राद्यामुनेरप्सरसांगणाः ॥ दंदशूकादयःसर्पाराजन्क्रोधवशात्मजाः २७ ॥ इलायाभूरुहाःसर्वेयातुधानाश्चसौरसाः ॥ अरिष्टायाश्चगंधर्वाःकाष्ठायाद्विशफेतराः २८ सुतादनोरेकषष्टिस्तेषांप्राधानिकान्शृणु ॥ द्विमूर्धाशंबरोरिष्टोहयग्रीवोविभावसुः २९ अयोमुखःशंकुशिरास्वर्भानुःकपिलोऽरुणः॥पुलोमावृषपर्वाचएकचक्रोऽनुतापनः ३० धूम्रकेशोविरूपाक्षोविप्रचित्तिश्चदुर्जयः ॥ स्वर्भानोःसुप्रभांकन्यामुवाहनमुचिःकिल ॥ वृषपर्वणस्तुशर्मिष्ठांययातिर्नाहुषोबली ३१ वैश्वानरसुतायाश्चचतस्रश्चारुदर्शनाः ॥ उपदानवीहयशिरापुलोमाकालकातथा ३२

चूर्णिका

चंद्रस्यकृत्तिकादिस्त्रियः २७ सदक्षशापात् क्षयरोगीअनपत्यः सः दक्षंप्रसाद्यकलाः लेभेनत्वपत्यानि २३अथकश्यपपत्नीनांनामानिश्रृणु २४ आदितिर्दितिर्दनुः काष्टां अरिष्टा सुरसाइला मुनिः क्रोधवशाताम्रासुरभि. सरमातिमिः २५ तिमेः १ यादोगणाः सरमायाः २ श्वापदः सुरभेः ३ महिषाः गावः अन्येद्विशफाश्च२६ ताम्रायाः ४ श्येनगृध्राद्याः मुनेः ५ अप्सरोगणाः क्रोधवशायाः ६ दंदशूकादिसर्पाः २७ इलायाः ७ भूरुहाः सुरसायाः ८ यातुधानाः अरिष्टायाः ९ गंधर्वाः काष्टायाः १० पंचनखैकशफादयः २८ दनोः ११ एकषष्टिसुताः द्विमूर्धादयः तत्रमुख्याः १८ द्विमूर्धा १ शंबरः २ अरिष्टः ३ हयग्रीवः ४ विभावसुः५ २९ अयोमुखः ६ शंकुशिराः ७ स्वर्भानुः ८ कपिलः ९ अरुणः १० पुलोमा ११ वृषपर्वा १२ एकचक्रः १३ अनुतापनः १४,३० धूमकेशः १५ विरूपाक्षः १६ विप्रचित्तिः १७ दुर्जयः १८ इतिस्वर्भानोः सुप्रभावांकन्यां नमुचिः उवाह वृषपर्वणः शर्मिष्ठां ययातिः उवाह ३१ दनोः पुत्रः वैश्वानरः तस्यकन्याः ४ उपदानवी १ हयशिरा २ पुलोमा ३ कालका ४ ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. ष. वश्वानरः दनोः पुत्रस्तस्यसुतः । कः प्रजापतिः कश्यपउपयेमे । दानवीपरिणयनेहेतुः ब्रह्मणाचोदितइति ३३ तयोः षष्टिसहस्त्राणिनिवातकवचानामपुत्राजाताः तांश्च (यज्ञविध्वंसिनः) स्वर्गंगत अ०
स्तेपितामहोऽर्जुनोजघान ३४ राहुर्ज्येष्ठोयस्य (तत् । येकेतवः) ३५ ३६ ३७ (संज्ञानामभार्याश्राद्धदेवसंज्ञंमनुं) असूयतअजनयत् । ३८ (सैवसंज्ञावडवाऽश्विनीभूत्वाभुविवर्तमाना नासत्यौस्व
वैद्यौ) ३९ (ततः विवस्वतः) ४० चर्षणयः कृताकृतज्ञानवंतः । पश्यतिकर्मत्वेननिघंटावुक्तेः । यत्रयेषुआत्मानुसंधानविशेषेणमानुषीजातिश्चोपकल्पिता । तथाचश्रुतिः । " पुरुषत्वेवाविस्तरामात्मे
टीका मेति" ४१ (कुपितंहरामितिशेषः । विवृताद्विजः प्रकटितदंतः सन् । पिष्टमत्तीतिपिष्टादः) ४२ (वीर्यवान्पराक्रमी)४३ यद्यदाविमतेनअवज्ञातेनबृहस्पतिनापरित्यक्ताः तदाद्विषतांशत्रूणाभागिनेयमा ॥६॥
पिविश्वरूपंपौरोहित्येवृतवंतः । ४४ इतिश्रीभागवतेषष्ठस्कंधेटीकायांषष्ठोध्यायः ॥ ६ ॥ ॥ ॥

॥२८॥

उपदानवींहिरण्याक्षःक्रतुर्हयशिरांनृप ॥ पुलोमांकालकांचद्वेवैश्वानरसुतेतुकः ॥ उपयेमेऽथभगवान्कश्यपोब्रह्मचोदितः ॥ ३३ पौलोमाःकालकेयाश्च श्लोकाः
दानवायुद्धशालिनः ॥ तयोःषष्टिसहस्त्राणियज्ञघ्नांस्तेपितुःपिता३४ जघानस्वर्गतोराजन्एकइंद्रप्रियंकरः॥विप्रचित्तिःसिंहिकायांशतंचैकमजीजनत् ॥ रा
हुज्येष्ठंकेतुशतंग्रहत्वंयउपागताः ॥ ३५ अथातःश्रूयतांवंशोयोऽदितेरनुपूर्वशः ॥यत्रनारायणोदेवःस्वांशेनावातरद्विभुः ॥ ३६ विवस्वानर्यमापूषात्वष्टाथ ३३
सविताभगः ॥ धाताविधातावरुणोमित्रःशक्रउरुक्रमः ॥ ३७ विवस्वतःश्राद्धदेवंसंज्ञासूयतवैमनुम् ॥ मिथुनंचमहाभागायमंदेवंयमींतथा ३८ सैवभूत्वा ४४
थवडवानासत्यौसुषुवेभुवि ३९ छायाशनैश्चरंलेभेसावर्णिंचमनुंततः ॥ कन्यांचतपतींयावैवव्रेसंवरणंपतिम् ४० अर्यम्णोमातृकापत्नीतयोश्चर्षणयः
सुताः ॥ यत्रवैमानुषीजातिर्ब्रह्मणाचोपकल्पिता ४१ पूषाऽनपत्यःपिष्टादोभग्नदंतोऽभवत्पुरा ॥ योसौदक्षायकुपितंजहासविवृतद्विजः ४२ त्वष्टुर्दैत्या
नुजाभार्यारचनानामकन्यका ॥ संनिवेशस्तयोर्जज्ञेविश्वरूपश्चवीर्यवान् ॥ ४३ तंवव्रिरेसुरगणादौहित्रंद्विषतामपि ॥ विमतेनपरित्यक्तागुरुणांगिरसेनयत्
४४ ॥ ॥ इतिश्रीभागवतेमहा०षष्ठस्कंधेषष्ठोध्यायः ॥ ६ ॥

चूर्णिका हिरण्याक्षः उपदानवीम् क्रतुःहयाशिराम् ब्रह्मप्रेरितः कश्यपः पुलोमांकालकांचउवाह ३३ तयोःपौलोमाः कालकेयाः षष्टिसहस्राणि निवातकवचाश्चजाताः तानूअ
र्जुनः स्वर्गतःसन् जघान ३४ विप्रचित्तिः सिंहिकायां राहुज्येष्ठंकेतुशतं अजीजनत् ३५ अथअदितेः वंशंशृणु यत्रनारायणः अंशेनअवतरत् ३६ अदितेः द्वादशादि ॥२८॥
त्याः विवस्वानर्यमापूषात्वष्टाथसविताभगः धाताविधातावरुणोमित्रः शक्रउरुक्रमः३ ७तत्रविवस्वतः १ पत्नीसंज्ञाश्राद्धदेवंमनुंयमंयमुनांचसुषुवेसैवडवाभूत्वानासत्यौसुषुवे ३ ८
पुनःसैवछायाशनैश्चरंसावर्णिमनुं तपतींकन्यांचसुषुवे यासवर्णंवव्रे ३ ९ ४० अर्यम्णः २मातृकायांचर्षणयः पुत्राः पूषा ३ अनपत्या ४ १ ४ २ त्वष्टुः ४ दैत्यानुजारो
चनानामभार्यातस्यांसन्निवेशःविश्वरूपश्चजज्ञे ४ ३ बृहस्पतिनात्यक्ताः देवाः द्विषतांदौहित्रमपिविश्वरूपंपौरोहित्यायवव्रिरे ४४ इतिषष्ठस्कंधेषष्ठोऽध्यायः ॥ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ष. सप्तमेविश्वरूपोसौपौरोहित्येवृतःसुरैः । गुरुणासंपरित्यक्तैःपौरोहित्यमथाकरोत् ॥ १ ॥ कस्यहेतोः कस्माद्धेतोः आत्मनः शिष्याः सुराः परित्यक्ताः । अक्रममपराधम् १ संइंद्रायदांसप्राप्तवाचस्पतीं अ०
नाभ्यनंदतनाहतवान् । तदासआंगिरसस्ततोनिर्गत्यतूष्णींस्वगृहमाययावित्यष्टानामन्वयः । अनादरहेतुंमदंदर्शयितुंतंविशिनष्टि । त्रिभुवनैश्वर्यमदेन उल्लंघितःसतांपंथायेनसः २ परिश्रितः परिवृतः
टीका ३ ४ आस्थानंसभातस्मिन्नध्यासनंसिंहासनंतदास्थितः ५ पारमेष्ठ्यैर्महाराजचिह्नैः (अर्धासनया) आसनस्यार्धेस्थितयापौलोम्याशच्यासहविराजमानः ६ प्रत्युत्थानादिभिर्नाभ्यनंदत् ७ नचो ॥७॥
च्चचाल । आसनएवस्थितोपिकिंचिन्नचलितवान् ८ श्रीमदेनयाविक्रियातांजानन् ९ प्रतिबुध्यअनुस्मृत्य । (सदसिशृण्वतिआत्मनासात्त्विकबुद्ध्या) १० ममकृतंकर्मअहोअसाधु । यद्यस्मात् ।दभ्रबु
द्धिना (अल्पमतिना) मयाकात्कृतः तिरस्कृतः ११ (गृध्येदभिकांक्षेत ।) विबुधानांसात्त्विकानां देवानामीश्वरोप्यहम् १२ ननुसिंहासनस्थोराजाभ्युत्थानंनकुर्यादितिवृद्धावदंतितत्राह । यइतिद्वाभ्या
॥२९॥ म्।धिषणमासनम्(परंसूक्ष्मम्)१३कुपथंदिशंतिउपदिशंतितेकुपथदेष्टारस्तेषांवचःअश्ममयःप्लवोयेषांतेयथामज्जंतंप्लवमनुमज्जंतितद्वत् १४ अगाधागंभीराधिषणायस्यतम्। निशठः शाठ्यहीनः सन् १५

श्लोकाः

॥राजोवाच ॥ कस्यंहेतोःपरित्यक्ताआचार्येणात्मनःसुराः॥ एतदाचक्ष्वभगवन्शिष्याणामक्रमंगुरौ १ ॥श्रीशुकउवाच॥ इंद्रस्त्रिभुवनैश्वर्यमदोल्लंघितसत्पथः॥
मरुद्भिर्वसुभीरुद्रैरादित्यैर्ऋभुभिर्नृप ॥ २ विश्वैर्देवैश्वसाध्यैश्चनासत्याभ्यांपरिश्रितः ॥ सिद्धचारणगंधर्वैर्मुनिभिर्ब्रह्मवादिभिः ३ विद्याधराप्सरोभिश्चकिंन १/१५
रैःपतगोरगैः ॥ निषेव्यमाणोमघवान्स्तूयमानश्चभारत ४ उपगीयमानोललितमास्थानाध्यासनाश्रितः ॥ पांडुरेणातपत्रेणचंद्रमंडलचारुणा ॥ ५ यु
क्तश्चान्यैःपारमेष्ठ्यैश्चामरव्यजनादिभिः ॥ विराजमानःपौलोम्यासहार्धासनयाभृशम् ६ सयदापरमाचार्यंदेवानामात्मनश्चह ॥ नाभ्यनंदतसंप्राप्तंप्रत्युत्था
नासनादिभिः ७ वाचस्पतिंमुनिवरंसुरासुरनमस्कृतम् ॥ नोच्चचालासनादिंद्रःपश्यन्नपिसभागतम् ८ ततोनिर्गत्यसहसाकविरांगिरसःप्रभुः॥आययौस्वगृहं
तूष्णींविद्वान्श्रीमदविक्रियाम् ९ तर्ह्येवप्रतिबुद्धचेंद्रोगुरुहेलनमात्मनः ॥ गर्हयामाससदसिस्वयमात्मानमात्मना १० अहोबतममासाधुकृतंवैदभ्रबुद्धिना
॥ यन्मयैश्वर्यमत्तेनगुरुःसदसिकात्कृतः ॥ ११ कोगृध्येत्पंडितोलक्ष्मींत्रिविष्टपपतेरपि ॥ ययाहमासुरंभावंनीतोद्यविबुधेश्वरः १२ येपारमेष्ठ्यंधिषणमधि
तिष्ठन्नकंचन ॥ प्रत्युत्तिष्ठेदितिब्रूयुर्धर्मंतेनपरंविदुः १३ तेषांकुपथदेष्ट्णांपततांतमसिह्यधः ॥ येश्रद्दध्युर्वचस्तेवैमज्जंत्यश्मप्लवाइव १४ अथाहममराचार्यम
गाधधिषणंद्विजम्॥ प्रसादयिष्येनिशठःशीर्ष्णातच्चरणंस्पृशन् १५

चूर्णिका ॥ ॥ ॥ ॥ ॥ राजोवाच॥ स्वशिष्याः देवाः बृहस्पतिनाकुतस्त्यक्ताः देवैः किं अपराद्धंएतत् आचक्ष्व १ ॥ ॥ श्रीशुकउवाच ॥ ॥ इंद्रः त्रिभुवनैश्वर्यमदेन ॥२९॥
मत्तः सन् देवगंधर्वमुनिविद्याधराप्सरोभिः सर्वैः युक्तः सर्वराजचिह्नैः पौलौम्यासहविराजमानः अध्यासनेस्थितः सभागतंगुरुंपश्यन्नपिनोच्चचाल २ ३ ४ ५ ६ ७
८ ततः गुरुः गृहंययौ ९ ततः इंद्रः स्वात्मानंगर्हयामास १० माधिक् अस्तुअहोऐश्वर्यमत्तेनमयासदसिगुरुःतिरस्कृतः यत्प्रसादात् इयंश्रीः अतः अहंतंप्र
सादयिष्ये ११ १२ १३ १४ १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (इंद्रापेक्षया) अधिकयाआत्ममायया १६ गुरोःसंज्ञांज्ञानोपायंपरीक्षमाणोपिनाधिगतः अप्राप्तःसन् १७ आततायिनः उद्यतास्त्राः (युद्धोद्योगंचक्रुः) १८ निर्भिन्नानिअंगान्युत्तमांगानिशिरांसिउरवो बाहवश्चयेषाम् १९२० वः युष्माकंकृतंकरणंमहदभद्रं । तदाहब्रह्मिष्ठंइति । नाभ्यनंदतनाभिनंदितवंतः २१। परेभ्यः शत्रुभ्योवः पराभवइतियत्अयंतस्यअनयस्यअन्यायस्यसंबंधीफलरूपआसीत् । उक्तंच । ' ब्राह्मणंकुलसंपन्नंभक्तंविष्णोर्महात्मनः । आयांतंवीक्ष्यनोत्तिष्ठेत्सदुःखैःपरिभूयत ' इति स्वयमेववैरिणोहंतारोयेषांतेभ्यः २२ गुरुतिरस्करसत्काराववापचयोपचयकारणमित्यसुरदृष्टांतेनाह । मघवन्निति । द्विषतः शत्रून्काव्यंभार्गवंगुरुमेवाराध्योपचितान् । उपचितत्वमेवाह । (भृगुः शुक्रोदेवतायेषांते) आददीरन्गृह्णीयुः २३ अभेद्योमंत्रो(गुप्तवादो) येषां । अनुशिक्षितार्थाः शिष्याः यतः विप्रागोविंदोगावश्चेश्वराअनुग्राहकायेषांतेषामेवअभद्राणिनभवंतिअन्येषांतुभवंति २४ तत्तस्मात्अथअनंतरमेवभजत।अस्यकर्मअसुरपक्षपातम्२५उदिताउक्ताः । विगतज्वरानिर्श्चिताः २६ (हेतातविश्वरूपवेतवआश्रमं । पितॄणांपितृव्याणां ।) २७ (सतांपुत्राणांपुत्रवतामपिपितृशुश्रूषणंहिपरोधर्मः तत्रब्रह्मचारिणांकिमुतवक्तव्यम्) २८

॥३०॥ एवंचिंतयतस्तस्यमघोनोभगवान्गृहात्॥ बृहस्पतिर्गतोऽदृष्टांगतिमध्यात्ममायया १६गुरोर्नाधिगतःसंज्ञांपरीक्षन्भगवान्स्वराट्॥ध्यायन्धियासुरैर्युक्तःश श्लोकाः

र्मनालभतात्मनः १७तच्छ्रुत्वैवासुराःसर्वआश्रित्यौशनसंमतम्॥देवान्प्रत्युद्यमंचक्रुर्दुर्मदाआततायिनः १८ तैर्विसृष्टेषुभिस्तीक्ष्णैर्निर्भिन्नांगोरुबाहवः॥ब्रह्मा

णंशरणंजग्मुःसहेंद्रानतकंधराः१९तांस्तथाभ्यर्दितान्वीक्ष्यभगवानात्मभूरजः ॥ कृपयापरयादेवउवाचपरिसांत्वयन्२०॥ब्रह्मोवाच॥अहोबतसुरश्रेष्ठाह्य १६/२८

भद्रंवःकृतंमहत् ॥ ब्रह्मिष्ठंब्राह्मणंदांतमैश्वर्यान्नाभ्यनंदत २१ तस्यायमनयस्यासीत्परेभ्योवःपराभवः ॥ प्रक्षीणेभ्यःस्ववैरिभ्यःसमृद्धानांचयत्सुराः २२

मघवन्द्विषतःपश्यप्रक्षीणान्गुर्वतिक्रमात्॥ संप्रत्युपचितान्भूयःकाव्यमाराध्यभक्तितः ॥ आददीरन्निलयनंममापिभृगुदेवताः ॥२३ त्रिविष्टपंकिंगणयंत्य

भेद्यमंत्राभृगूणामनुशिक्षितार्थाः ॥ नविप्रगोविंदगवीश्वराणांभवंत्यभद्राणिनरेश्वराणाम्२४तद्विश्वरूपंभजताशुविप्रंतपस्विनंत्वाष्ट्रमथात्मवंतम् ॥ सभा

जितोर्थान्सविधास्यतेवोयदिक्षमिष्यध्वमुतास्यकर्म२५॥श्रीशुकउवाच॥तएवमुदिताराजन्ब्रह्मणाविगतज्वराः॥ ऋषिंत्वाष्ट्रमुपव्रज्यपरिष्वज्येदमब्रुवन्२६

॥देवाऊचुः॥ ॥ वयंतेऽतिथयःप्राप्ताआश्रमंभद्रमस्तुते ॥ कामःसंपाद्यतांतातपितॄणांसमयोचितः २७पुत्राणांहिपरोधर्मःपितृशुश्रूषणंसताम् ॥

अपिपुत्रवतांब्रह्मन्किमुतब्रह्मचारिणाम्२८

चूर्णिका एवंचिंतयतः सतः बृहस्पतिः आत्ममायया अंतर्धानंगतः १६ इंद्रः देवैः सहगुरुं अप्राप्यशर्मनअलभत १७ तच्छ्रुत्वासर्वेदैत्याः शुक्रं आश्रित्यदेवान्जिग्युः १८ तदासेंद्राः देवाः ब्रह्माणंशरणंजग्मुः १९ तदाब्रह्माउवाच २० हेदेवाः भवद्भिः अभद्रंकृतं २१ ब्राह्मणावमानात्ऐश्वर्यभ्रष्टाः जाताः २२ हेमघवन्संप्र तिदैत्याः शुक्रंआराध्यमत्स्थानमपिग्रहीष्यंति २३ २४ तस्मात् आशुविश्वरूपं भजतयदिअस्यकर्मक्षमिष्यध्वंतर्हिसः भवदर्थान्विधास्यते २५ ॥ ॥ श्रीशुकउवाच ॥ ॥ ॥ इतिब्रह्मोदितंश्रुत्वात्वाष्ट्रंगत्वा २६ ॥ ॥ देवाऊचुः ॥ ॥ हेतात वयंअतिथयः प्राप्ताःनः कामः संपाद्यताम् २७ पुत्राणांपितृशुश्रूषणंपरोधर्मः २८ ॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतिथीनांपितॄणांचप्रशंसार्थमाहुः । आचार्यउपनीयवेदाध्यापकः । ब्रह्मणोवेदस्यमूर्तिः । (मरुत्पतेरिंद्रस्य) २९ धर्मस्यात्मामूर्तिरतिथिः । स्वयंसाक्षात्‌आत्मनः श्रीविष्णोः यद्वा आत्मनः स्वस्य । सर्वभूतेष्वात्मदृष्टिः कर्तव्येत्येतद्यम् ३० परेभ्यः पराभवएवआर्तिः तां । ३१ संदेशमाहुः वृणीमहइति ३२ ननूपाध्यायत्वे कनिष्ठस्यममाभिवंदनंकरिष्यथतच्चगर्हितंतत्राहुर्नेति । अर्थेषुप्रयोजननि मित्तं यविष्ठानांअभिवादनंनानिंदंति । किंच । छंदोभ्योमंत्रेभ्योन्यत्रवयोज्यैष्ठ्यस्यकारणंनतुमंत्रेषु । अतोऽस्मभ्यंमंत्रदातृत्वेनत्वमेवज्येष्ठोभविष्यसि । यद्वा (हेब्रह्मन्) छंदोभ्योन्यत्रवेदान्‌विहाय वयएवज्यैष्ठ्यस्यकारणंनभवति किंतुवेदाएवकारणं । तत्साम्येतुवयः । वेदज्ञत्वाच्चत्वमेवज्येष्ठइत्यर्थः ३३(ऋषिः शुकः)। ३४ निंदितमपीदंयुष्मद्याञ्चाभंगभयेनकरिष्यामीत्याहसार्धेन । (हेनाथाः) विगर्हितंपौरोहित्यमितिशेषः धर्मशीलैः अधर्महेतुत्वात् । किंतुकिंच । ब्रह्मवर्चउपव्ययं पूर्वसिद्धस्यब्रह्मवर्चसस्यव्ययकरं प्रत्याख्यातुंचमादृशोनार्हतीत्याह । कथंत्विति । तेषांलोकेशानांशिष्यः

॥३१॥ शिक्षणार्हः सएवप्रत्याख्यानाभावएवहिशिष्यस्यस्वार्थउच्यते ३५ ननुपौरोहित्येनधनलाभाद्धर्मःसिध्येत अन्यथानिर्धनस्यकुतोधर्मः अतएवतेनलोकोहृष्यतितत्राह । अकिंचनानांशिलोंछनंहिधनं । क्षेत्रेस्वाम्युपेक्षितकणिशोपादानंशिलं । हट्टादौपतितव्रीह्यादेरुपादानमुंछनं । इहगृहाश्रमेतेनैवनिर्वर्तितासंपादितासाधूनांसत्क्रियायेन ३६ कियदेतत्प्रार्थितम् अल्पमेव । अभ्यधिकमपिकरिष्यामीत्याह । भवतामिति ।३७समाधिनापरमोद्यमेन । वैष्णव्याश्रीनारायणकवचात्मिकया ।३८ असुरचमूंदैत्यसेनाः जिग्येतांविद्यांतुतस्मैविश्वरूपउक्तवान् ।३९इतिश्रीभागवतेषष्ठस्कंधेटीकायांसप्तमोध्यायः ॥७

श्लोकाः २९/४०

आचार्योब्रह्मणोमूर्तिःपितामूर्तिःप्रजापतेः॥ भ्रातामरुत्पतेर्मूर्तिर्मातासाक्षात्क्षितेस्तनुः २९ दयायाभगिनीमूर्तिर्धर्मस्यात्मातिथिःस्वयम् ॥ अग्नेरभ्यागतोमूर्तिःसर्वभूतानिचात्मनः ३०तस्मात्पितॄणामार्तानामार्तिंपरपराभवम् ॥ तपसापनयंस्तातसंदेशंकर्तुमर्हसि ३१ वृणीमहेत्वोपाध्यायंब्रह्मिष्ठंब्राह्मणंगुरुम् ॥ यथांऽजसाविजेष्यामःसपत्नांस्तववतेजसा ३२ नगर्हयंतिह्यर्थेषुयविष्ठांघ्र्यभिवादनम् ॥ छंदोभ्योन्यत्रनब्रह्मन्वयोज्यैष्ठ्यस्यकारणम् ३३ ॥ ॥ ऋषिरुवाच ॥ ॥ अभ्यर्थितःसुरगणैःपौरोहित्येमहातपाः ॥ सविश्वरूपस्तानाहप्रसन्नःश्लक्ष्णयागिरा ३४ ॥ विश्वरूपउवाच॥ विगर्हितंधर्मशीलैर्ब्रह्मवर्चउपव्ययम्॥ कथंनुमद्विधोनाथालोकेशैरभियाचितम्॥प्रत्याख्यास्यतितच्छिष्यःसएवस्वार्थउच्यते ३५ अकिंचनानांहिधनंशिलोंछनंतेनेह निर्वर्तितसाधुसत्क्रियः ॥ कथंविगर्ह्यंनुकरोम्यधीश्वराःपौरोधसंहृष्यतियेनदुर्मतिः ३६ तथापिनप्रतिब्रूयांगुरुभिःप्रार्थितंकियत् ॥ भवतांप्रार्थितंसर्वंप्राणैरर्थैश्चसाधये३७॥ ॥ श्रीशुकउवाच ॥ ॥ तेभ्यएवंप्रतिश्रुत्यविश्वरूपोमहातपाः॥पौरोहित्यंवृतश्चक्रेपरमेणसमाधिना ३८सुरद्विषांश्रियंगुप्तामौशनस्यापिविद्यया ॥ आच्छिद्यादान्महेंद्रायवैष्णव्याविद्ययाविभुः ३९ ययागुप्तःसहस्राक्षोजिग्येऽसुरचमूर्विभुः ॥ तांप्राहसमहेंद्रायविश्वरूपउदारधीः ४०॥ ॥ इति श्रीभागवतेम० षष्ठस्कंधेसप्तमोध्यायः ७॥

चूर्णीका

यतः गुरुः वेदस्यमूर्तिः पिताब्रह्मणोमूर्तिः भ्राताइंद्रस्यमूर्तिः २९भगिनीदयायाः मूर्तिः अतिथिः धर्मस्यमूर्तिः अग्नेः अभ्यागतोमूर्तिः सर्वभूतानिश्रीविष्णोर्मूर्तिः ३० अतः अस्माकांपितॄणांदुःखं तपसाअपनयन् सन् अस्मदाज्ञांकर्तुंअर्हसि ३१ त्वांउपाध्यायंवृणीमहे यथातवतेजसाशत्रून्‌विजेष्यामः ३२ कार्येषुकनिष्ठवंदनंननिंदंति मंत्रेभ्यो

॥३१॥ न्यत्रवयोज्यैष्ठ्यस्यकारणंनतुमंत्रेषु अतःमंत्रदातृत्वेनत्वमेवज्येष्ठोभविष्यसि ३३ एवंदेवैः पौरोहित्येप्रार्थितः विश्वरूपः तान् आह ३४ ॥ ॥ विश्वरूपउवाच ॥ ॥ हेदेवाः स्वपुण्यनाशकं पौरोहित्यंकथंनुकरोमि३५ ३३तथापिगुरुभिः प्रार्थितंप्राणैः अर्थैश्चसाधये३७॥ ॥ श्रीशुकउवाच॥ ॥ विश्वरूपः एवंप्रतिज्ञायदेवैः वृतः सन्पौरोहित्यंचक्रे ३८शक्रोविद्ययागुप्तांदैत्यः श्रियंवैष्णव्याविद्ययाआच्छिद्यमहेंद्रायअदात् ३९ इंद्रः ययाविद्ययागुप्तः सन् असुरचमूः जिग्ये तांविद्यांविश्वरूपः इंद्रायप्राह४०॥ इतिषष्ठेसप्तमः७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥८॥

॥ अष्टमेविश्वरूपस्तुवर्मनारायणात्मकं । इंद्रायप्राहयेनेंद्रोगुप्तोदैत्यानथाजयत् ॥१॥ त्रिलोक्याः संबंधिनींश्रियं१ । (यथावदाख्याहि) २ । ३ । मंत्राभ्यांअष्टाक्षरद्वादशाक्षराभ्यांकृतः स्वांगेषुकरयो
श्चन्यासोयेन । नारायणमयं परंवर्म संनह्येत्बध्नीयात् ४तत्राष्टाक्षरेणपादाद्यष्टांगेषुन्यासमाह पादयोरितिसार्धेन प्रणवसंपुटितमोंकाराद्येकैकमक्षरंविन्यसेत् । विपर्ययंयथाभवत्येवंशिरआदिपादांतंवा
विन्यसेत् । उत्पत्तिन्यासंसंहारन्यासंवाकुर्यादित्यर्थः । ५ द्वादशाक्षरस्योद्धारः प्रणवादियकारांतमिति । प्रणवसंपुटितमेकैकमक्षरं दक्षिणतर्जनीमारभ्यवामतर्जनीपर्यंतमंगुलीषु । परिशिष्टमक्षरच
तुष्टयं अंगुष्ठयोराद्यंतपर्वसुन्यसेत्। ६ मंत्रांतरन्यासमाह न्यसेदिति । षकारणकारयोर्विश्लेषेणषडक्षराणिहृदयादिषुन्यसेत् ७ मकारमस्त्रमुद्दिश्यध्यात्वातन्मकारास्त्रं मःअस्त्रायफडित्येवंदिग्बंधेविनि
र्दिशेत् (ॐविष्णवेनमइतिमंत्रोद्धारः) ८ ध्येयमीश्वररूपमात्मानंध्यायेत् । षट्शक्तिभिः ऐश्वर्यादिभिः भगशब्दवाच्याभिः । विद्याचतेजश्चतपश्चमूर्तिर्यस्यतंइमंवक्ष्यमाणं श्रीनारायणकवचाख्यं ९
॥३२॥ (शंखचक्राद्यष्टायुधधरोऽष्टबाहुः)अष्टगुणः अणिमाद्यष्टैश्वर्ययुक्तो (हरिः सर्वतोरक्षणंकरोतु)१० यादसांगणाएववरुणस्यपाशस्तस्मात् ११ अटवीआजिमुखं संग्रामोपग्रहश्चआदिर्येषांतेषुसंकटस्थाने
षु१२ असौप्रसिद्धोवराहोमहात्मा अध्वनिरक्षतु। यज्ञैरवयवरूपैः कल्प्यतेनिरूप्यतइतितथा । उन्नीताउद्धृताधरायेनसः । अद्रिकूटेषुगिरिशिखरेषुरामोजामदग्न्यः विप्रवासेदूरप्रवासे

श्लोकाः

॥ राजोवाच॥ ॥ ययागुप्तःसहस्राक्षःसवाहान्रिपुसैनिकान्॥क्रीडन्निवविनिर्जित्यत्रिलोक्याबुभुजेश्रियम् १ भगवंस्तन्ममाख्याहिवर्मनारायणात्मकम्
॥ यथाततायिनःशत्रून्येनगुप्तोजयन्मृधे २॥श्रीशुकउवाच॥वृतःपुरोहितस्त्वाष्ट्रोमहेंद्रायानुपृच्छते॥ नारायणाख्यंवर्माहतदिहैकमनाःशृणु ३ ॥ ॥ वि
श्वरूपउवाच ॥ ॥ धौतांघ्रिपाणिराचम्यसपवित्रउदङ्मुखः ॥ कृतस्वांगकरन्यासोमंत्राभ्यांवाग्यतःशुचिः ॥ नारायणपरंवर्मसंनह्येद्भयआगते ॥ ४ ॥ १/१३
पादयोर्जानुनोरूर्वोरुदरेहृद्यथोरसि ॥ मुखेशिरस्यानुपूर्व्यादोंकारादीनिविन्यसेत्॥ॐनमोनारायणायेतिविपर्ययमथापिवा ॥ ५ ॥ करन्यासंततःकुर्यात्
द्वादशाक्षरविद्यया ॥ प्रणवादियकारांतमंगुल्यंगुष्ठपर्वसु ६ ॥ न्यसेद्धृदयओंकारंविकारमनुमूर्धनि ॥ शकारंतुभ्रुवोर्मध्येणकारंशिखयादिशेत् ॥ वेकारं
नेत्रयोर्युंज्यान्नकारंसर्वसंधिषु ७ मकारमस्त्रमुद्दिश्यमंत्रमूर्तिर्भवेद्बुधः ॥ सविसर्गंफडंतंतत्सर्वदिक्षुविनिर्दिशेत्॥ ॐविष्णवेनमइति ८ आत्मानंपरमंध्या
येद्ध्येयंषट्शक्तिभिर्युतम्॥ विद्यातेजस्तपोमूर्तिमिमंमंत्रमुदाहरेत् ॥ ९ ॐहरिर्विदध्यान्ममसर्वरक्षांन्यस्तांघ्रिपद्मःपतगेंद्रपृष्ठे॥ दरारिचर्मासिगदेषुचाप
पाशान्दधानोष्टगुणोऽष्टबाहुः १० जलेषुमांरक्षतुमत्स्यमूर्तिर्यादोगणेभ्योवरुणस्यपाशात् ॥ स्थलेषुमायाबटुवामनोव्यात्त्रिविक्रमःखेऽवतुविश्वरूपः
११ दुर्गेष्वटव्याजिमुखादिषुप्रभुःपायान्नृसिंहोऽसुरयूथपारिः ॥ विमुंचतोयस्यमहाट्टहासंदिशोविनेदुर्न्यपतंश्चगर्भाः १२ रक्षत्वसौमाध्वनियज्ञकल्पः
स्वदंष्ट्रयोन्नीतधरोवराहः॥ रामोद्रिकूटेष्वथविप्रवासेसलक्ष्मणोव्याद्भरताग्रजोस्मान् ॥ १३ ॥

चूर्णिका ॥ ॥ राजोवाच॥ ॥ सहस्राक्षःययागुप्तःसन्शत्रून्निर्जित्यत्रैलोक्यश्रियंबुभुजे १ हेभगवन् तत्नारायणमयंवर्ममम आख्याहि २ ॥ ॥ श्रीशुकउवाच ॥ ॥
ततः त्वाष्ट्रः महेंद्रायनारायणाख्यंवर्माहतत्शृणु ३ ॥ ॥ विश्वरूपउवाच ॥ ॥ धौतांघ्रिपाणिराचम्यउदङ्मुखः वाग्यतः अष्टाक्षरद्वादशाक्षरमंत्राभ्यांस्वांगकरयोःन्या ॥३२॥
संकृत्वानारायणमयंवर्मबध्नीयात् ४ एवंन्यासंकृत्वा ५ ६ ७ ८ आत्मानंईश्वररूपं ध्यात्वाइदंनारायणकवचंउदाहरेत् ९ ॐहरिः ममसर्वरक्षांविदध्यात्१०मत्स्यमूर्तिः
जलेषुमांरक्षतुस्थलेषुवामनः खेत्रिविक्रमः ११ दुर्गमस्थानेषुनृसिंहः अध्वनिवराहः १२ गिरिशिखरेषुपरशुरामः प्रवासेभरताग्रजः १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उग्रधर्मादभिचारादिलक्षणात् । हासाद्गर्वात्नरः अवतु। दत्तोदत्तात्रेयः अयोगात्योगभ्रंशात् । १४ पथियद्देवानांहेलनम् नमस्कारमकृत्वागमनंतस्मात् । पुरुषार्चनांतराद्देवपूजाछिद्रात्द्वात्रिंशदप राधरूपात् । (देवर्षिवर्यो) नारदः । १५ लोकाज्जनापवादात्यज्ञः । जननिमित्तोयोंतउपघातस्तस्माद्बलभद्रः अवतात् कृतांतादितिपाठेकृतांतात्कालात् । रक्षतु । क्रोधवशात्सर्पाणांगणादहींद्रः शेषः १६ कालमलभूतात्कलेः कल्किः धर्मावनायधर्मरक्षणायउरुर्महान्कृतोऽवतारोयेन १७ दिनक्ष्यषट्सुभागेषु क्रमेणप्रातरादि संज्ञेषुरात्रेश्चप्रदोषादिसंज्ञेषुरक्षाप्रार्थनंकेशवइतित्रिभिः । आसंगवंसं गवमभिव्याप्य (अरींद्रपाणिश्चक्रपाणिः) १८ त्रिधामात्रह्मादित्रिमूर्तिः माधवः । दोषेप्रदोषेहृषीकेशोऽवतु । अर्धरात्रेअर्धरात्रिपर्यंतेकाले निशीथेचएकएवपद्मनाभोवतु । १९ अपररात्रेईशः श्री वत्सधामावतु । प्रत्यूषईशःखड्गधरोजनार्दनोव्यात् । श्रीदामोदरः प्रभाते विश्वेश्वरोऽनुसंध्यं२० युगांतानलवत् तिग्मातीक्ष्णानेमिर्यस्यतच्चक्रं भगवताप्रयुक्तंसत् अरिसैन्यंदंदग्धि अतिशयेन दह ति । तस्यायंस्वभावएवनतुतस्मात्प्रार्थनीयमित्यर्थःयद्वा दंदग्धीतिलोण्मध्यमपुरुषः । अत्रत्वमेवंभूतंचक्रमितिस्वरूपमुक्तासंबोध्यप्रार्थ्यतेअतिशयेनदहेति । कक्षंशुष्कतृणं २१ अशनिवत् (स्पर्शनं) स्पर्शोयेषांतेविस्फुलिंगायस्याः तस्याः संबोधनं । हेगदेत्वमजितस्यप्रियासि अहंअच्युतस्यदासः अतः कूश्मांडादीन्निष्पिंढि निष्पिंढि अरींश्च संचूर्णय संचूर्णय सर्वत्रवीप्सा अतिशीघ्रत्वाय।२२ हेदरेंद्रपांचजन्यत्वंयातुधानादीन्विद्रावय विप्रग्रहाब्रह्मराक्षसाः येन्येचघोरदृष्टयस्तान् । २३

॥३३॥ त्वासुग्रधर्मादखिलात्प्रमादान्नारायणःपातुनरश्चहासात् ॥ दत्तस्त्वयोगादथयोगनाथःपायाद्गुणेशःकपिलःकर्मबंधात् १४ सनत्कुमारोवतुकामदेवाद्धयशी र्षामांपथिदेवहेलनात् ॥ देवर्षिवर्यःपुरुषार्चनांतरात्कूर्मोहरिर्मांनिरयादशेषात् १५ धन्वंतरिर्भगवान्पात्वपथ्यात्द्वंद्वाद्भयादृषभोनिर्जितात्मा ॥ श्लोकाः १४/२३
यज्ञश्चलोकादवताज्जनांताद्बलोगणात्क्रोधवशादहींद्रः १६ द्वैपायनोभगवानप्रबोधाद्बुद्धस्तुपाखंडगणात्प्रमादात्॥कल्किःकलेःकालमलात्प्रपातुधर्मावनायो रुकृतावतारः १७ मांकेशवोगदयाप्रातरव्याद्गोविंदआसंगवमात्तवेणुः ॥ नारायणःप्राह्णउदारशक्तिर्मध्यंदिनेविष्णुररींद्रपाणिः १८ देवापराह्णेमधुहोग्र धन्वासायंत्रिधामाऽवतुमाधवोमाम् ॥ दोषेहृषीकेशउतार्धरात्रेनिशीथएकोवतुपद्मनाभः १९ श्रीवत्सधामाऽपररात्रईशःप्रत्यूषईशोऽसिधरोजनार्दनः ॥ दामोदरोऽव्यादनुसंध्यंप्रभातेविश्वेश्वरोभगवान्कालमूर्तिः २० चक्रंयुगांतानलतिग्मनेमिभ्रमत्समंताद्भगवत्प्रयुक्तम् ॥ दंदग्धिदंदग्ध्यरिसैन्यमाशुकक्षंय थावातसखोहुताशः २१ गदेऽशनिस्पर्शनविस्फुलिंगेनिष्पिंढिनिष्पिंढ्यजितप्रियासि ॥ कूश्मांडवैनायकयक्षरक्षोभूतग्रहांश्चूर्णयचूर्णयारीन् ॥ २२ त्वं यातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् ॥ दरेंद्रविद्रावयकृष्णपूरितोभीमस्वनोरेर्हृदयानिकंपयन् २३

चूर्णिका

अभिचारादिधर्मान् नारायणः नरः गर्वात् दत्तः योगभ्रंशात् कपिलः कर्मबंधात्पातु १४ सनत्कुमारः मदनात् हयशीर्षापथिदेवहेलनात् नारदः देवपूजाछिद्रात् कूर्मः निरयात् १५ धन्वंतरिः अपथ्यात् ऋषभः द्वंद्वभयात् यज्ञःजनापवादात् बलभद्रः कृतांतात् शेषः सर्पगणात् १६ द्वैपायनः अप्रबोधात् बुद्धः पाखंडगणात् कल्किः कलिकालमलात् १७ केशवः गदया प्रातःगोविंदः आसंगवम् नारायणः प्राह्णे विष्णु मध्यंदिने १८ मधुहा अपराह्णे माधवः सायं हृषीकेशः दोषे पद्मनाभः आनि शीथम् १९ श्रीवत्सधामा अपररात्रे जनार्दनः प्रत्यूषे दामोदरःअनुसंध्यम् विश्वेश्वरः प्रभाते २० हेचक्रमेरिपुसैन्यंदंदग्धि २१ हेगदेकूष्मांडादीन् चूर्णय २२ हेपांचजन्ययातुधानादीन् विद्रावयविद्रावय २३ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तिग्माधारायस्यहेतिग्मधार असिवर खड्गश्रेष्ठ त्वंममारिसैन्यंछिंधिछिंधि । शतंचंद्राकाराणिमंडलानियस्मिन् हेशतचंद्रचर्मन् अघोनामघवतांद्विषांचक्षूंषिछादयपापचक्षुषांचउग्रदृष्टीनांचक्षूंषिहर । २४ पत्येभ्योभयं। अघेभ्यः पापेभ्यः २५ (येचनोऽस्माकं) श्रेयः प्रतीपकाइष्टव्याघातकाः। २६ स्तोत्राणिबृहद्रथंतरादिसामानितैः स्तोभ्यतेसंस्तूयतइतिस्तोत्रस्तोभः छंदोमयोवेदमूर्तिः। 'सुपर्णोसि गरुत्मा'नित्यादिश्रुतेः । ऐकपद्यपाठेस्तोभाः गीतिपूरकाक्षराणि । स्तोत्रस्तोमेतिपाठेसामाधारभूताऋक्स्तोमः २७ नामानिचरूपाणिचयानानिचवाहनानिचआयुधानिचनोबुद्ध्यादीन्पांतु । पार्षदभूषणाः पार्षदमुख्याश्चपांतु २८ सच्चअसच्चमूर्तामूर्तंयत् । तत्सर्वंजगत् २९ऐकात्म्यस्यानुभावोऽनुध्यानम् येषांतेषां विकल्पोभेदस्तद्रहितोपि ३० सत्यमानेनसत्यभूतेनप्रमाणेन ३१पुनरपिश्रीनृसिंहएवप्रार्थ्यते । विदिक्ष्विति । पात्वित्यनुषंगः । यद्वा नारसिंहः प्रह्लादः स्वनेनश्रीनृसिंहनामगर्जनेन स्वतेजसास्वप्रभावेन ग्रस्तानिसमस्तानि दिग्गजविषशस्त्रजलवाय्वग्न्यादीनांतेजांसिप्रभावाः येनसः ३२ दंशितः कवचितः ३३ सोपिसाध्वसाद्भयाद्विमुच्यते । ३४ तस्यतुभयंनभवेदेव । ३५ एतद्विद्याप्रभावमितिहासेनाह । इमामितिसार्धैस्त्रिभिः । मरुधन्वनिनिरुदकेदेशे । अनेनविद्यायाः क्षेत्रतीर्थानपेक्षत्वंदर्शितं । ३६ यत्रद्विजस्यक्षयोदेहत्यागः तस्योपरि ३७

श्लोकाः २४/३७

त्वंतिग्मधारासिवरारिसैन्यमीशप्रयुक्तोममछिंधिछिंधि ॥ चक्षूंषिचर्मन्शतचंद्रछादयद्विषामघोनांहरपापचक्षुषाम् २४ यन्नोभयंग्रहेभ्योऽभूत्केतुभ्योनृभ्य एवच॥ सरीसृपेभ्योदंष्ट्रिभ्योभूतेभ्योंहेभ्यएववा २५ सर्वाण्येतानिभगवन्नामरूपास्त्रकीर्तनात् ॥ प्रयांतुसंक्षयंसद्योयेनःश्रेयःप्रतीपकाः २६ गरुडोभगवान्स्तोत्रस्तोभश्छंदोमयःप्रभुः ॥ रक्षत्वशेषकृच्छ्रेभ्योविष्वक्सेनःस्वनामभिः ॥ २७ सर्वापद्भ्योहरेर्नामरूपयानायुधानिनः ॥ बुद्धींद्रियमनःप्राणान्पांतु पार्षदभूषणाः २८यथाहिभगवानेकंवस्तुतःसदसच्चयत्॥ सत्येनानेननःसर्वेयांतुनाशमुपद्रवाः २९ यथैकात्म्यानुभावानांविकल्परहितःस्वयम् ॥ भूषणायुधलिंगाख्याधत्तेशक्तीःस्वमायया ३० तेनैवसत्यमानेनसर्वज्ञोभगवान्हरिः ॥ पातुसर्वैःस्वरूपैर्नःसदासर्वत्रसर्वगः ३१ विदिक्षुदिक्षूर्ध्वमधःसमंतादंतर्बहिर्भगवान्नारसिंहः ॥ प्रहापयल्लोकभयंस्वनेनस्वतेजसाग्रस्तसमस्ततेजाः ३२ मघवन्निदमाख्यातंवर्मनारायणात्मकम् ॥ विजेष्यस्यंजसायेनदंशितोऽसुरयूथपान् ३३ एतद्धारयमाणस्तुयंयंपश्यतिचक्षुषा ॥ पदावासंस्पृशेत्सद्यःसाध्वसात्सविमुच्यते ३४ नकुतश्चिद्भयंतस्यविद्यांधारयतोभवेत् ॥ राजदस्युग्रहादिभ्योव्याघ्रादिभ्यश्चकर्हिचित् ३५ इमांविद्यांपुराकश्चित्कौशिकोधारयन्द्विजः ॥योगधारणयास्वांगंजहौसमरुधन्वनि ३६ तस्योपरिविमानेनगंधर्वपतिरेकदा॥ययौचित्ररथःस्त्रीभिर्वृतोयत्रद्विजक्षयः॥गगनान्न्यपतत्सद्यःसविमानोह्यवाक्शिराः ३७

चूर्णिका

हेखड्गमेअरिसैन्यंछिंधिछिंधि हेचर्मन् द्विषांचक्षूंषि छादय हर २४ भगवन्नामरूपादिकीर्तनात् श्रेयोनाशकाः क्षयंयांतु २५ २६ गरुडः कृच्छ्रेभ्योरक्षतु २७ आपद्भ्योहरेर्नामरूपादीनिपार्षदाश्चनः बुद्ध्यादीन् पांतु २८ २९ ३० सर्वरूपैः हरिः सदापातु ३१ विदिक्षुदिक्षुऊर्ध्वमधः समंतात् अंतः बहिश्चनारसिंहः पातु ३२ हेमघवन् नारायणाख्यंवर्मतेआख्यातंयेन शत्रून् विजेष्यसि ३३ यः इदं धारयेत् सः भयात्मुच्यते ३४ एतद्धारयतः कुतश्चभयंनभवेत् ३५ पुराकश्चित्कौशिकोद्विजः इमांविद्यांधारयन् योगधारणयामरुदेशेस्वांगंजहौ ३६ तस्योपरिचित्ररथः गंधर्वः विमानेनययौ सः सद्यः सविमानः गगनात् न्यपतत् ३७

॥३४॥

१ अत्र 'विद्यामिमांधारयतोमृतस्यास्थिविलंघनात्' इत्यर्धमाधिकांलिखितपुस्तकेवर्तते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

सद्यस्तत्क्षणमेवगगनाद्व्यपतत् । पाठांतरेअंगनाभिःसह । वालखिल्योपदेशात्तस्यास्थीनिप्रास्यप्रक्षिप्यविस्मितःसन्स्वंधामगंधर्वलोकंजगाम । ३८ । ३९ अधिगतः प्राप्तः सन् । ४० इतिश्री
भागवतेषष्ठस्कंधेटीकायामष्टमोध्यायः८॥नवमेविश्वरूपेतुहतेशक्रेणकोपतः।त्वष्ट्राचोत्पादितेवृत्रेभीतैर्देवैर्हरिःस्तुतः।१।सोमस्यपीथंपानंयस्मिन्।एवंसुरापीथं।अन्नमत्तीत्यन्नादं । अत्र''विश्वरूपोवैत्वाष्ट्रः पुरो
हितोदेवानामासीदित्या''दिश्रुतिरनुसंधेया १ तस्यासुरपक्षपातमाह । सवाइतिद्वाभ्याम् । प्रत्यक्षंप्रकटंयथाभवतितथासविनयंदेवेभ्योहविर्भागम् इंद्रायेदं अग्नयइदमित्युच्चैरवदत्।अत्रहेतुः । यस्यपितरो
देवाः तः २ ॥ असुरेभ्यस्तुपरोक्षंगुप्तं भागंददौ । तदेवाह । देवान्यजमानोऽसावसुरान्प्रति भागमवहत् केनाप्युपायेनप्रापयामास। अत्रहेतुः । मातृस्नेहवशानुगः ३ (देवानांहेलनमवज्ञानंयत्रतद्ध
र्मालीकंधर्मकृत्येऽनृतं । तरसाशीघ्रम् । ४ । ५ । तांवारयितुंसमर्थः तथापिजग्राह । संवत्सरंतथैवस्थित्वा संवत्सरांतेभूताक्रोशभीतःसन्भूतानांमध्येविशुद्धये लोकापवादपरिहारायसहरिरिंद्रोभूम्यादि
भ्यस्तदघं विभज्य ददौ ।६। तुरीयंचतुर्थभागंखातस्यगर्तस्यपूरः पूरणंतेनवरेण । यदिखातपूरणंस्वतएवभविष्य तितर्हिग्रहीष्यामीत्येवंभाषाबंधेनजग्राहेत्यर्थः । ईरणमूषरं । अतएवोषरेऽध्ययनादिनि
षिध्यते । ७ छेदेसतिपुनर्विरोहः प्ररोहोभवत्वितिवरेण । निर्यासरूपेणब्रह्महत्यायाः दृष्टत्वात्निर्यासोनभक्ष्यः ८

सवालखिल्यवचनादस्थीन्यादायविस्मितः ॥ प्रास्यप्राचीसरस्वत्यांस्नात्वाधामस्वमन्वगात् ३८ ॥ ॥ श्रीशुकउवाच ॥ ॥ यइदंशृणुयात्कालेयो
धारयतिचादृतः ॥ तंनमस्यंतिभूतानिमुच्यतेसर्वतोभयात् ३९ एतांविद्यामधिगतोविश्वरूपाच्छतक्रतुः ॥ त्रैलोक्यलक्ष्मींबुभुजेविनिर्जित्यमृधेऽसुरान् ४०
॥ ॥ इतिश्रीभागवते म० षष्ठस्कंधेनारायणवर्मनामाष्टमोध्यायः ८ ॥ ॥ श्रीशुकउवाच ॥ तस्यासन्विश्वरूपस्यशिरांसित्रीणिभारत ॥
सोमपीथंसुरापीथमन्नादमितिशुश्रुम १ सवैबर्हिषिदेवेभ्योभागंप्रत्यक्षमुच्चकैः॥अवदद्यस्यापितरोदेवाःसप्रश्रयंनृप २ सएवहिददौभागंपरोक्षमसुरान्प्रति ॥
यजमानोऽवहद्भागंमातृस्नेहवशानुगः ३ तद्देवहेलनंतस्यधर्मालीकंसुरेश्वरः॥ आलक्ष्यतरसाभीतस्तच्छीर्षाण्यच्छिनद्रुषा ४ सोमपीथंतुयत्तस्यशिरआसी
त्कपिंजलः ॥ कलविंकःसुरापीथमन्नादंयत्सतित्तिरिः ५ ब्रह्महत्यामंजलिनाजग्राहयदपीश्वरः ॥ संवत्सरांतेतदघंभूतानांचविशुद्धये ६ भूम्यंबुद्रुमयो
षिद्भ्यश्चतुर्धाव्यभजद्धरिः॥ भूमिस्तुरीयंजग्राहखातपूरवरेणवै ॥ ईरणंब्रह्महत्यायारूपंभूमौप्रदृश्यते ७ तुर्यंछेदविरोहेणवरेणजगृहुर्द्रुमाः॥ तेषांनिर्यासरू
पेणब्रह्महत्याप्रदृश्यते ८

श्लोकाः ३८/८

चूर्णिका

पुनः वालखिल्यवचनात् अस्थीन्यादाय प्राचीसरस्वत्यांप्रास्यस्नात्वास्वधामययौ ३८ ॥ ॥ श्रीशुकउवाच ॥ ॥ यः इदंशृणुयात् धारयतिच सः सर्वतोभयात् मुच्यते
३९ इंद्रः विश्वरूपात् एतांविद्यांप्राप्यमृधे असुरान्जित्वात्रैलोक्यलक्ष्मीं बुभुजे ४० इतिषष्ठेऽष्टमः ८ ॥ ॥ श्रीशुकउवाच ॥ ॥ विश्वरूपस्यत्रीणिशिरांसि सोमपी
थम् १ सुरापीथं २ अन्नादम् ३ इतिआसन् १ सः देवेभ्यःप्रत्यक्षं हविर्भागंददौ २ मातृस्नेहेनदैत्यान् परोक्षंददौ ३ इंद्रः एवंतस्यविपर्यासं ज्ञात्वाअसुरेभ्योभीतः सन् तस्यशी
र्षाणि अच्छिनत् ४ तत्र सोमपीथात् कपिंजलः आसीत् सुरापीथात् कलविंकः अन्नादात् तित्तिरिः ५ इंद्रः ब्रह्महत्यां अंजलिना जग्राह संवत्सरांते आत्मशुद्धये
ब्रह्महत्यांचतुर्विधा विभज्य भूम्यंबुद्रुमयोषिद्भ्यः ददौ ६ तत्रभूमिः खातपूरवरेण ७ द्रुमाः छेदविरोहेण ८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शश्वत्कामवरेणकामः संभोगः यावत्प्रसवंगर्भानुपघातेनैवसंभोगवरेणेत्यर्थः । (अंहोहत्या ।) रजः अतएवरजोदर्शनेतत्संगादिनकार्यम् । ९ द्रव्यभूयोवरेण यस्मिन्द्रव्येक्षीरादावापोमिश्राभवेयुः त स्यभूयस्त्वमाधिक्यंतन्मयत्वेनस्यादितिवरेणेत्यर्थः । यद्वास्वासामुद्धरणेपिनिर्जरोद्गमादिनाभूयस्त्ववरेण । द्रवभूयइतिपाठेऽप्ययमेवार्थः यद्वा द्रवभूयस्त्वंसांसिद्धिकद्रवत्वंतेनवरेण ।(तासु मलंपापं) । अ स्यविभागस्य "विश्वरूपोवैत्वाष्ट्र"इत्यस्यांश्रुतावुक्तेः ।तद्विभागफलमाह। ततपपंहरतिनिराकरोति।कः । क्षिपन् बुद्बुदादिजलाद्बहिः प्रक्षिपन् । (पापंहर्तुमिच्छताबुद्बुदादित्याज्यमित्यर्थः) यद्वा क्षिपन् जलंपापंहरति आहरतिगृह्णातीत्यर्थः अयंच"तस्मात् आपोनपरिचक्ष्या"इत्यादिश्रुत्यर्थ उक्तः। पाठांतरेहरिकिल्बिषंइंद्रपापम्।१० इंद्रायइंद्रंहंतुंशत्रवेशत्रूत्पत्त्यै। तदाह। इंद्रशत्रोविवर्धस्वेति। अत्रचेंद्रश त्रुपदस्य आद्युदात्तत्वात् "बहुव्रीहौप्रकृत्यापूर्वपद"मितिस्मृतेर्बहुव्रीहिलक्षणापत्त्याइंद्रएवतस्यशत्रुरभूत् । यदब्रवीत् स्वाहेंद्रशत्रोवर्द्धस्वेतितस्मादस्येंद्रः शत्रुरभवदिति तथाचशिक्षायां। "मंत्रोहीनः स्व रतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह । सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधा"दिति ११ अन्वाहार्यपचनाद्दक्षिणाग्नेः । १२ तंवीक्ष्यवित्रस्तालोकादशदिशोविदुद्रुवुरितिपंचमेनान्वयः । कथंभूतं विष्वक्समंततः इषुविक्षेपमात्रंप्रतिदिनंवर्धमानं । दग्धशैलप्रतीकाशंकृष्णवर्णं । संध्याभ्रानीकवद्वर्चोदीप्तिर्यस्यतं १३ तप्तताम्रवच्छिखाः श्मश्रूणिचयस्य मध्याह्नार्कवदुग्रेलोचनेयस्य १४ (रोद सीआरोप्येवेत्यर्थः ।)१५ दरीवद्गंभीरेणवक्त्रेणमुहुर्मुहुर्जृंभमाणमित्यन्वयः । कथंभूतेन । नभस्तलं पिबताऋक्षाणिजिह्वयालिहता भुवनत्रयंग्रसता १६ महताविस्तीर्णेन । रौद्रीदंष्ट्रायस्मिन्तेन १७ वृ त्रनामनिर्वक्ति । येनावृताइति । त्वाष्ट्रोमूर्तिर्यस्यतमसस्तेनत्वाष्ट्ररूपेणेत्यर्थः । तथाचश्रुतिः ' सइमाँल्लोकानावृणोद्यदिमाँल्लोकानावृणोत्तत्तस्यवृत्रत्वमिति) १८ अग्रसत्भक्षितवान् १९ ग्रस्तंते जोयेषांप्रत्यंचमंतर्यामिणं त्रिभुवनस्यतेनव्याप्तत्वात् क्वापिगमनासंभवात् । तत्रैवस्थित्वातुष्टुवुरित्यर्थः । २०

श्लोकाः ९/२०

शश्वत्कामवरेणांहस्तुरीयंजगृहुःस्त्रियः ॥ रजोरूपेणतास्वंहोमासिमासिप्रदृश्यते ९ द्रव्यभूयोवरेणापस्तुरीयंजगृहुर्मलम् ॥ तासुबुद्बुदफेनाभ्यांदृष्टंतद्धर तिक्षिपन् १० ॥ हतपुत्रस्ततस्त्वष्टाजुहावेंद्रायशत्रवे ॥ इंद्रशत्रोविवर्धस्वमाचिरंजहिविद्विषम् ११अथान्वाहार्यपचनादुत्थितोघोरदर्शनः ॥ कृतांतइवलो कानांयुगांतसमयेयथा१२ विष्वग्विवर्धमानंतमिषुमात्रंदिनेदिने॥ दग्धशैलप्रतीकाशंसंध्याभ्रानीकवर्चसम् १३ तप्तताम्रशिखाश्मश्रुंमध्याह्नार्कोग्रलोच नम् १४ देदीप्यमानेत्रिशिखेशूलआरोप्यरोदसी ॥ नृत्यंतमुन्नदंतंचचालयंतंपदामहीम् १५ दरीगंभीरवक्त्रेणपिबताचनभस्तलम् ॥ लिहताजिह्व यर्क्षाणिग्रसताभुवनत्रयम् १६ महतारौद्रदंष्ट्रेणजृंभमाणंमुहुर्मुहुः ॥वित्रस्तादुद्रुवुर्लोकावीक्ष्यसर्वेदिशोदश१७येनावृताइमेलोकास्तमसात्वाष्ट्रमूर्तिना ॥सवै वृत्रइतिप्रोक्तःपापःपरमदारुणः १८ तंनिजघ्नुरभिद्रुत्यसगणाविबुधर्षभाः ॥ स्वैस्वैर्दिव्यास्त्रशस्त्रौघैःसोग्रसत्तानिकृत्स्नशः १९ ततस्तेविस्मिताःसर्वेवि षण्णाग्रस्ततेजसः ॥ प्रत्यंचमादिपुरुषमुपतस्थुःसमाहिताः २०

चूर्णिका

स्त्रियः कामवरेण९ आपः द्रव्यभूयस्त्ववरेण एवंजगृहुः तस्याः स्वरूपंभूम्यादिषु ऊषरं १ निर्यासः २ रजोदर्शनबुद्बुदफेनौइति १० हतपुत्रः त्वष्टाइंद्रशत्रोविवर्धस्वइति होमंचकार ११ अथदक्षिणाग्नेः कृतांतइवघोरदर्शनः पुरुषः उत्थितः १२ सः प्रतिदिवसंइषुप्रक्षेपमात्रमानंवर्धमानः तंभयंकरंदग्धशैलप्रतीकाशं १३ तप्तताम्रशिखाश्मश्रुं पदामहीं चालयंतं १४ १५ जिह्वयाऋक्षाणिलिहंतंभुवनत्रयंग्रसतारौद्रदंष्ट्रेणमुखेनजृंभमाणं ईदृशंतंदृष्ट्वा त्रस्ताः लोकाः दुद्रुवुः १५येन इमेलोकाः व्याप्ताः सः वृत्रइति प्रोक्तः १८ इंद्राद्याः देवाः तत्रएत्यस्वैःस्वैः दिव्यास्त्रौघैः निजघ्नुः सः तानिशस्त्राण्यस्त्राणिअग्रसत् १९ तदासर्वेदेवाः विषण्णाः संतःआदिपुरुषंउपतस्थुः२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभयेपरित्राणमन्यतोनभवेदिति । हरिमेवमपंचंतेसुराः शरणमातुराः ॥ वाय्वादीनिपंचमहाभूतानितैर्निर्मितास्त्रयाल्लोकास्तेशामधिपतयो ब्रह्मादयश्चततोर्वाचीनात्वयंचसर्वेयस्मैअंतकायकालायोद्विजं
तः संतोबलिंहरामअसावपियस्माद्बिभेतिततः परमेश्वरादेवनोऽस्माकं अरणंशरणंरक्षणमस्तु २१ ततएवेत्यवधारणेहेतुमाहुः । अविस्मितंनिरहंकारं । कुतूहलशून्यंवा । कुतः । प्रशांतंरागादिशून्यं
। तच्चकुतः स्वेनैवलाभेनपरिपूर्णकामं । तच्चकुतः समंउपाधिपरिच्छेदशून्यं एवंभूतंपरमेश्वरंविनाअपरंयः शरणार्थमुपसर्पतिसबालिशोऽज्ञः यतोसौशुनोलांगूलेनपुच्छेन समुद्रमतितिर्तिअतितर्तुमिच्छ
तीत्यर्थः यथातेनसमुद्रतरणंनभवति तथा निरीश्वराश्रयणेनव्यसनार्णवतरणंनभवतीतिभावः २२ महाभयेसएवरक्षकइतिदृष्टमित्याहुर्द्वाभ्यां । यस्यमहाशृंगेजगतींपृथ्वीमेवस्वनावंबद्ध्वामनुःसत्यव्रतो
यथावद्दुर्गंसंकटंततार । सएववारिचरोमत्स्यमूर्तिर्नोऽस्मानप्याश्रितान् नूनं त्राता रक्षिष्यति ॥ २३ ॥ संयमांभसि प्रलयोदके । उदीर्णैरुद्भतैर्वातैर्यऊर्मयस्तेषांरवैः करालेभयंकरे अरविंदात्नाभि
कमलात् पतितप्रायः एकः असहायएवतस्माद्भयाद्येननारायणेन ततार सएवनः पारस्तारकोस्तु । २४ किंचवयंभगवतैवसृष्टाः पालिताश्चबहुशः अतस्तमेवशरणंव्रजामेत्याहुः । यएकइतित्रिभिः ये
नानुगृहीताः संतोविश्वंसृजाम । ननु यूयमेवस्रष्टारः नान्योयुष्माकमनुग्राहकोस्ति । तस्यादर्शनात्तत्राहुः अस्मत्तःपुरःपूर्वमेवांतर्यामितयासमीहमानस्यापियस्यलिंगरूपंनपश्यामः तत्रहेतुः पृथक्पृथगी
शाइत्यभिमानिनः२५देवादिषुउपेंद्रपरशुराममत्स्यरामादितनुभिः कृतावतारः सन् नोऽस्मान्आत्मसात्कृत्वापातिच २६ आत्मभूतंदैवतं । कुतः । विश्वंविश्वात्मकं। तथापिविकारंवारयंति । अन्यं । वि
श्वात्मत्वेहेतुः । परंकारणं । ननु प्रधानंपुरुषश्चविश्वस्यकारणंतत्राहुः प्रधानंपुरुषमितितदात्मकोपिसएवेत्यर्थः । सएवस्वानांनःशंविधास्यति । २७

श्लोकाः २१—२७

॥ देवाऊचुः ॥ वाय्वंबराग्न्यप्क्षितयस्त्रिलोकाब्रह्मादयोयेवयमुद्विजंतः ॥ हरामयस्मैबलिमंतकोसौबिभेतियस्मादरणंततोनः २१ अविस्मितंतंपरिपू
र्णकामंस्वेनैवलाभेनसमंप्रशांतम् ॥ विनोपसर्पत्यपरंहिबालिशःश्वलांगुलेनातितितर्तिसिंधुम्॥२२॥ यस्योरुशृंगेजगतींस्वनावंमनुर्यथाबध्यततारदुर्गम्॥
सएवनस्त्वाष्ट्रभयाद्दुरंतात्त्राताश्रितान्वारिचरोपिनूनम्२३ पुरास्वयंभूरपिसंयमांभस्युदीर्णवातोर्मिरवैःकराले ॥ एकोरविंदात्पतितस्ततारतस्माद्भयाद्येनस
नोस्तुपारः२४यएकईशोनिजमाययानःससर्जयेनानुसृजामविश्वम्॥वयंनयस्यापिपुरःसमीहतःपश्यामलिंगंपृथगीशमानिनः२५योनःसपत्नैर्भृशमर्द्यमाना
न्देवर्षितिर्यङ्नृषुनित्यएव॥कृतावतारस्तनुभिःस्वमाययाकृत्वात्मसात्पातियुगेयुगेच२६तमेवदेवंवयमात्मदैवतंपरंप्रधानंपुरुषंविश्वमन्यम्॥व्रजामसर्वेशर
णंशरण्यंस्वानांसनोधास्यतिशंमहात्मा २७

चूर्णिका

॥ ॥ देवाऊचुः ॥ ॥ वयंब्रह्मादयः उद्विजंतः संतः यस्मैबलिंहराम सोपिकालः यस्मात्बिभेति तस्मात्परमेश्वरात् अस्माकंरक्षणमस्तु २१ किंच स्वेनैवलाभेनपरि
पूर्णकामंतंपरमेश्वरं विनाअपरं यः शरणार्थं उपसर्पति सः अज्ञः यतः शुनः पुच्छेनासिंधुंतर्तुंइच्छति २२ किंचयस्य मत्स्यस्य शृंगे पृथ्वींनावं बद्ध्वा सत्यव्रतः संकटं
ततार सः मत्स्यमूर्तिःअस्मान् रक्षिष्यति२३पुराब्रह्मापिप्रलयोदकेनाभिकमलात्पतितः सन्येन ततार सः ईश्वरः नः तारकोस्तु २४किंच यः ईशः स्वमायया नः ससर्ज
२५ तान् नः शत्रुभिः अर्द्यमानान् दृष्ट्वा देवादिषुकृतावतारः सन् पाति २६ तं आत्मदैवंशरणं व्रजेम सः ईश्वरः नः शंविधास्यति २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

॥३८॥ प्रतीच्यांदिशिहृदिप्रथममाविरभूत्पुनश्चतंपुरोदृष्ट्वाईक्षणाह्लादेनविवशाअवनौदंडवत्पतिताः संतः शनैरुत्थायतुष्टुवुरित्यन्वयः । २८ कथंभूतं । श्रीवत्सकौस्तुभौविनाआत्मतुल्यैः । श्रीवत्सकौस्तुभमात्रव्य
तिरिक्तैः शंखचक्रादिभिः कृत्वास्वसमानैः षोडशभिः सनंदादिभिः परितः सेवितं विकसितशरदंबुरुहवदीक्षणेयस्यतं २९ । ३०यज्ञोवीर्यंस्वर्गादिफलजननायसामर्थ्यंयस्यतस्मैनमः वयसेउततत्फलपरि
च्छेदककालात्मनेपि । तद्विघातकेषुदैत्येषुअस्तंप्रक्षिप्तंचक्रंयेन । एवंभूतैः प्रभावैः सुपुरुहूतयेशोभनबहुनाम्ने ३१ ननु ममगुणातीतंरूपं विहायगुणोपाधिकं यज्ञवीर्यत्वादि किमितिवर्ण्यतेतत्राहुः ।
यत्तइति । यत्तवगुणत्रयस्येशितुर्नियंतुस्त्रिगुणात्मकानां तिसृणांगतीनां परमंपदं निर्गुणस्वरूपम् तद्विसर्गस्यअर्वाचीनइदानींतनः हेधातर्वेदितुंनार्हति अतः केवलंतस्मैतेनमोस्तु ३२ मिताक्षरा
णिपद्यानिनमीयंतेहरेर्गुणाः । इतिपद्यैरतुष्यंतः सद्योगद्येनतुष्टुवुः॥१॥भक्त्युद्रेकेणबहुधासंबोधयंतोदुर्ज्ञेयत्वंप्रपंचयंतिभगवन्नित्यादिना । परमंमंगलंशुद्धोधर्मोयस्मिन् । आत्मयोगेनअष्टांगेन यः समाधि
श्चित्तैकाग्र्यंतेनपरिभावितः सुशीलितः परिस्फुटः यः पारमहंस्यधर्मोभगवद्भजनंतेनउद्घाटितंतमोरूपं कपाटंयस्मिन्तस्मिन् द्वारभूतेचित्तेअपावृतेप्रकटे आत्मलोके प्रत्युग्रूपे स्वयमेवोपलब्धमभिव्यक्तं
यन्निजसुखंतदनुभवरूपोभवान् ३३ । ननुकेवलानुभवरूपत्वे ममसृष्ट्यादिकर्तृत्वंकथंतत्राहुः । दुरवेति । दुरवबोधइवतवायं सृष्ट्यादिलक्षणः विहारयोगःक्रीडायोगः । यद्यस्मात् अशरणोनिराश्रयः
अनवेक्षितोऽस्माकं समवायोमेलनंसाहाय्यंयेन(सतथाभूतः)त्वं (सगुणमिदंविश्वं आत्मनास्वयमेवसृजसिसंहरसि)३४दुर्ज्ञेयत्वांतरमाहुः ।अथेति । यथेहदेवदत्तोगृहादिनिर्माय तत्रस्वकृतशुभाशुभयोःफलमु
पादत्तेएवंभवान् ब्रह्मस्वरूपोजीवरूपेणगुणविसर्गेपतितः सन्नुपाददाति । यद्वा समंजसंअप्रच्युतं दर्शनंचिच्छक्तिर्यस्य उपशमोरागद्वेषाभावस्तच्छीलः) सभवानुदास्तेउदासीनः साक्षितयावर्ततइति
नविदामः ३५

श्लोकाः २८ / ३५

॥ श्रीशुकउवाच ॥ ॥ इतितेषांमहाराजसुराणामुपतिष्ठताम् ॥ प्रतीच्यांदिश्यभूदाविः शंखचक्रगदाधरः २८ आत्मतुल्यैःषोडशभिर्विनाश्रीवत्सकौ
स्तुभैः॥पर्युपासितमुन्निद्रशरदंबुरुहेक्षणम् २९ दृष्ट्वातमवनौसर्वईक्षणाह्लादविक्लवाः॥ दंडवत्पतिताराजन्शनैरुत्थायतुष्टुवुः ३०॥ ॥ देवाऊचुः ॥ ॥
नमस्तेयज्ञवीर्यायवयसेउततेनमः ॥ नमस्तेह्यस्तचक्रायनमःसुपुरुहूतये ॥ ३१ यत्तेगतीनांतिसृणामीशितुःपरमंपदम् ॥ नार्वाचीनोविसर्गस्यधातर्वेदि
तुमर्हति ३२ ॐनमस्तेस्तुभगवन्नारायणवासुदेवादिपुरुषमहापुरुषमहानुभावपरममंगलपरमकल्याणपरमकारुणिककेवलजगदाधारलोकैकनाथसर्वेश्वरल
क्ष्मीनाथपरमहंसपरिव्राजकैःपरमेणात्मयोगसमाधिनापरिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारेचित्तेऽपावृतआत्मलोकेस्वयमुपलब्ध
निजसुखानुभवोभवान् ३३ दुरवबोधइवतवायंविहारयोगोयदशरणोऽशरीरइदमनवेक्षितास्मत्समवायआत्मनैवाविक्रियमाणेनसगुणमगुणःसृजसिपा
सिसंहरसि ३४अथतत्रभवान्किंदेवदत्तवदिहगुणविसर्गपतितःपारतंत्र्येणस्वकृतकुशलाकुशलफलमुपाददाति॥आहोस्विदात्मारामउपशमशीलःसमंजसद
र्शनउदास्तइतिहवावनविदामः ३५

चूर्णिका

॥ श्रीशुकउवाच ॥ ॥ इतितेषांउपतिष्ठतांसतांप्रतीच्यांदिशिशंखचक्रगदाधरः हरिः आविरभूत् २८ श्रीवत्सकौस्तुभौविनास्वतुल्यैः षोडशभिः सुनंदादिभिःपरिसे
वितंसंदृष्ट्वादंडवत्पतिताःसंतःशनैःउत्थायतुष्टुवुः २९ ३० ॥ ॥ देवाऊचुः ॥ यज्ञवीर्यायशोभनबहुनाम्नेतेनमः ३१ हेधातः तवनिर्गुणस्वरूपंअर्वाचीनः कःवेदितुंअर्हति
अतः केवलंनमोस्तु ३२ हेभगवन्नारायणपरमकारुणिकसर्वेश्वरलक्ष्मीनाथतेनमोस्तु३३ हेभगवन्तवायंक्रीडायोगःदुर्ज्ञेयःयतः त्वंनिर्गुणोपिविश्वंमाययासृजसिपासिहरसि ३४
अथभवान्देवदत्तवत् पारतंत्र्येणशुभाशुभयोः फलंउपादत्ते आहोस्वित्आत्मारामःसन्उदासीनःसाक्षितयावर्ततेइतिवयंनविदामः ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवं विरोधेनदुर्ज्ञेयत्वमुक्त्वातत्परिहारेणज्ञानप्रकारमाहुः नहीति । विरुध्यतइतिविरोधउभयंनविरुद्धमित्यर्थः । नह्यन्यदृष्टांतेन त्वयिविकल्पोयुज्यते । अतर्क्यैश्वर्यत्वादित्याहुः । भगवतीति । अपरिमितागुणगणायस्य तस्मिन्नीश्वरेस्वतंत्रे अनवगाह्यमतर्क्यं माहात्म्यं यस्यतस्मिन् विकल्पएवंवाएवंवेति । वितर्कः किमत्रयुक्तमिति।विचारइत्थमेवेति तत्रप्रमाणाभासास्तदनुग्राहकाः कुतर्काश्चअर्वाचीनावस्तुस्वरूपासंस्पर्शिनोयेविकल्पादयस्ते येपुशास्त्रेपुतैः कलिलंव्याकुलंअंतःकरणमाश्रयोयस्यदुरवग्रहस्यदुराग्रहस्य तेनवादिनांविवादस्यानवसरेअगोचरे । ननुश्रद्धामात्रमेतत् युक्तिरुच्यतांतत्राहुः । उपरतोमायामयः संसारो यस्मिन् तस्मिन् केवलेप्यात्ममायां मध्येनिधायकोन्वर्थः कर्तृत्वादिर्नभवति । यदिवस्तुतः कर्तृत्वादिभवेत्तर्हिविरोधः स्यात् । ननुतदस्तीत्याहुः स्वरूपद्वयाभावादिति। वस्तुतोद्वैताभावान्नविरोधइत्यर्थः ३६ अनुग्रहनिग्रहादिकंतुतत्तन्मतिभेदेनत्वन्माययात्वयिस्फुरतीत्याहुः । समाविषमाचमतिर्येषांतेषांमतमभिप्रायं । सर्पादिविषयाधीर्येषांतेषां यथारज्जुखंडस्तथा तथाभाति यद्वा तमेवाविरोधंपुरुषमतिभेदेनदर्शयति । समविषमेति ।३७ तदेवंविरोधंपरिहृत्यानिश्चितंपरमार्थमाहुः । सएवहिनानारूपेणप्रतीतः । वस्तुस्वरूपः सद्रूपः । सर्वेषांगुणानां विषयाणां आभासैः प्रकाशैरुपलक्षितः ननुतैर्जीवएवोपलक्ष्यते । न । सर्वप्रत्यगात्मत्वात् सर्वजीवांतर्यामित्वात् । जडतादात्म्याध्यासेनजीवस्यापिजडप्रायत्वान्नतेनविनाप्रकाशइतिभावः । पर्यवशेषितः "नेतिनेती"त्यादिश्रुतिभिः ३८अतस्त्वद्भक्तिरेवपरमपुरुषार्थइत्याहुः अथहेतिइत्यादिनापर्यावर्तइत्यंतेन । यस्मादेवंभूतस्त्वंपरमेश्वरः अथहवाव अतएवहिहेमधुमथन परमभागवताएतेत्वत्पदांभोजानुसेवांकथंमुहुर्मुहुःविसृजंतीत्यन्वयः । हियस्मात्स्वार्थेपुरुषार्थेकुशलानिपुणाः । अतआत्मात्वमेवप्रियः सुहृच्चयेषांते। साधवोरागादिशून्याः तत्रहेतुः तवमहिमैवामृतरससमुद्रःतस्यविप्रुषाबिंदुमात्रेण सकृदप्यवलीढया आस्वादितया स्वमनसि निष्यंदमानम् अतिशयेनस्रवत्यन्निरंतरं सुखंतेनविस्मारितादृष्टश्रुतविषयाः सुखलेशाभासायेषांते । अतएवभगवतित्वयिनितरांनिरंतरम् निर्वृतंचमनोयेषांते यत्रयस्यामनुसेवायांसत्याम् । ३९

श्लोकाः ३६–३९

नहिविरोधउभयंभगवत्यपरिमितगुणितगुणगणईश्वरेअनवगाह्यमाहात्म्येअर्वाचीनविकल्पवितर्कविचारप्रमाणाभासकुतर्कशास्त्रकलिलांतःकरणाश्रयदुरवग्रहवादिनांविवादानवसरेउपरतसमस्तमायामयेकेवलएवात्ममायामंतर्धायकोनुअर्थोदुर्घटइवभवतिस्वरूपद्वयाभावात् ३६ समविषममतीनांमतमनुसरसियथारज्जुखंडःसर्पादिधियाम् ३७सएवहिपुनःसर्ववस्तुनिवस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणभूतः सर्वप्रत्यगात्मत्वात्सर्वगुणाभासोपलक्षितएकएवपर्यवशेषितः ३८ अथहवावतवमहिमामृतरससमुद्रविप्रुषासकृदवलीढयास्वमनसिनिष्यंदमानानवरतसुखेनविस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवताएकांतिनोभगवतिसर्वभूतप्रियसुहृदिसर्वात्मनिनितरांनिरंतरनिर्वृतमनसःकथमुहवाएतेमधुमथनपुनःस्वार्थकुशलाह्यात्मप्रियसुहृदः साधवस्त्वच्चरणांबुजानुसेवांविसृजंतिनयत्रपुनरयंसंसारपर्यावर्तः ३९ ॥३९॥

चूर्णिका

हेभगवन्एतदुभयंत्वयिनविरुद्धम् भगवति अनंतगुणेत्वयिकोनुकर्तृत्वादिरर्थोनसंभवति नकोपि ३६ हेहरेयः त्वंसमविषममतीनां अनुसरसि सएवसर्वेश्वरःत्वंपर्यवशेषितोसि३७ ३८ हेमधुमथनपरमभागवताएतेत्वयिनिर्वृतमनसः संतः त्वत्पादांभोजानुसेवांकथंविसृजंति ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रस्तुतंविज्ञापयंति त्रिभुवनेत्यादिनायावत्समाप्ति । त्रिभुवनमात्मास्वरूपंभवनंचयस्य । त्रिभुवनस्यात्माभवनंचेतिवा । त्रयोविक्रमायस्य । त्रीन्लोकान्नयतीतितथात्रयाणांलोकानांमनोहरोऽनुभावोयस्य एवंचतुर्धासंबोध्याहुः तेषामनुपक्रमसमयउद्यमकालोनभवतीतिमत्वाहेदंडधरपूर्वंयथादंडंदधर्थ धृतवनासिएवामनेत्वाष्ट्रमपिजहि । (मृगोवराहः । मिश्रितोनरसिंहः जलचरौमत्स्यकूर्मौ । इत्याद्याकृतिभिः) । यदिमन्यसे । हंतुंयदीच्छसि ४० (अस्माकमिति ।) प्रथमंतावत्त्वदीयानामस्माकं अंतस्तापंशमयितुमर्हसि । तावकानामित्यत्रहेतुः । तत ततामह । हेपितः हेपितामह तवचरणनलिनयुगलध्यानेनैवानुबद्धोहृदयेनिगडः शृंखलायेषां । स्वलिंगविवरणेन निजमूर्तिप्रकटनेनस्वीकृतानां । केन । अनुकंपयानुरंजितंसानुरागंचवदनुविशदंरुचिरंच शिशिरंचयत्स्मितंतत्सहितेनावलोकेन । तथानुकंपयैव विगलितोमधुरोमुखरसःप्रियवाक्सैवामृतकलातयाच ४१ किंचास्मदभिप्रायस्त्वयाज्ञायतएवकिमत्रास्माभिर्विज्ञापनीयमित्याहुः (अथेति) । अथहेभगवन्तवास्माभिरिहकियान्वार्थविशेषोविज्ञापनीयःस्यादित्यन्वयः । यथाहिरण्यरेतसोग्नेस्तदंशभूतैर्विस्फुलिंगादिभिः प्रकाशोनाक्रियते । तथातवास्माभिः कार्यार्थप्रकाशनंनकार्यमित्यर्थः । अत्रहेतुगर्भाणिविशेषणानि । अखिलजगतामुत्पत्त्यादिषु निमित्तायमानया दिव्यमायया विनोदोयस्य । अतएवसर्वजीवनिकायानामंतर्हृदयेषुब्रह्मस्वरूपेणप्रत्यगात्मांतर्यामितद्रूपेणचबहिरपिप्रधानरूपेणदेशकालदेहावस्थानविशेषानतुच्छंध्यानुभवतः । कथं । तेषांउपादानतया निमित्तरूपतयाउपलंभकतयाचउपादानस्योपलंभकतयेतिवाअतएवसर्वेषां प्रत्ययानांबुद्ध्यादीनामपिसाक्षिणः । साक्षित्वेहेतुः आकाशवदलिप्तंशरीरंस्वरूपंयस्य । अलिप्तत्वेहेतुद्वयं । साक्षात्परब्रह्मणोनिरुपाधेः परमात्मनः शुद्धसत्त्वमूर्तेश्च ४२ अतइति । अतएवसर्वज्ञत्वादेववयंयत्कामेनयस्यकार्यस्यकामेनोपसादिताः प्रापिताः तदस्माकं कार्यंस्वयमेवोपकल्पय संपादयेति चरणमेवशतपलाशंकमलंतस्यच्छायां विविधैर्वृजिनैः यः संसारपरिश्रमः तस्योपशमकरीं उपसृतानांप्राप्तानां ४३

॥४०॥

श्लोकाः ४०/४३

त्रिभुवनात्मभवनत्रिविक्रमत्रिनयनत्रिलोकमनोहरानुभावतवैवविभूतयोदितिजदनुजादयश्चापितेषामनुपक्रमसमयोयमितिस्वात्ममाययासुरनरमृगमिश्रितजलचराकृतिभिर्यथापराधंदंडंदंडधरदधर्थएवमेनमपिभगवन्जहित्वाष्ट्रमुतयदिमन्यसे ४० अस्माकंतावकानांततनतानांततततामहतवचरणनलिनयुगलध्यानानुबद्धहृदयनिगडानांस्वलिंगविवरणेनात्मसात्कृतानामनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकेनविगलितमधुरमुखरसामृतकलयाचांतस्तापमनघार्हसिशमयितुम् ४१ अथभगवंस्तवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्यसकलजीवनिकायानामंतर्हृदयेषुबहिरपिचब्रह्मप्रत्यगात्मस्वरूपेणप्रधानरूपेणचयथादेशकालदेहावस्थानविशेषंतदुपादानोपलंभकतयाऽनुभवतः सर्वप्रत्ययसाक्षिणआकाशशरीरस्यसाक्षात्परब्रह्मणःपरमात्मनःकियानिहवाअर्थविशेषोविज्ञापनीयःस्याद्विस्फुलिंगादिभिरिवहिरण्यरेतसः ४२ अतएवस्वयंतदुपकल्पयास्माकंभगवतःपरमगुरोतवचरणशतपलाशच्छयांविविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानांवयंयत्कामेनोपसादिताः ४३

॥४०॥

चूर्णिका

किंच हेत्रिविक्रमदितिजदनुजादयः तवैवविभूतयोपितासांअयं उद्यमकालोनभवतिइतिमत्वात्वंदंडंदधर्थ एवमेवत्वाष्ट्रंजहि यदिमन्यसे ४० प्रथमंतावत् त्वदीयानांतवनतानां अस्माकंअंतस्तापंशमयितुं अर्हसि ४१ हेभगवन् सर्वसाक्षिणः साक्षात्परब्रह्मणः परमात्मनः तव अस्माभिः किंविज्ञापनीयं अस्ति अस्मदभिप्रायस्तुत्वयाज्ञातएव ४१ अतः भगवतः तव चरणकमलच्छायांयत्कामेनप्राप्ताः वयं तत्कार्यंस्वयमेवसंपादय ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्वभक्तेरुत्कर्षोक्तेस्तत्कामशंकामाभूदिति स्वकामंकथयंति । अथोअनंतरमेव ४४ शीघ्रंतद्वधायपुनः प्रणमंति हंसायेति । हंसायशुद्धाय हरयेआर्तिहरायतेनमः । शुद्धत्वेहेतवः । दहानिलयायहृदयाकाश
निकेतायनिरीक्षकायबुद्ध्यादिसाक्षिणे । कृष्णायसदानंदरूपाय । "कृषिर्भूवाचकः शब्दोनश्चनिर्वृतिवाचकः । तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयत " इतिनिरुक्तेः । आर्तिहरत्वेहेतवः । मृष्टंरुचिकरंयशो
यस्य । निरुपक्रमायआदिशून्याय । सद्भिः संगृह्यतइतितथातस्मै । भवपांथोभवरूपेपथिवर्तमानः तस्यजनस्यनिजाश्रमाप्तौस्वशरणप्राप्तौसत्याम् संसारस्यांतेपरीष्टासर्वतः पूजिताउत्तमागतिः फलंयस्त
स्मै ४५ अभिनंदितः संतोषितः ४६ मदीयमुपस्थानंस्तोत्रंतत्सहितयाविद्ययाज्ञानेन आत्मनऐश्वर्यमसंसारित्वंतस्यस्मृतिर्यया । नहिविरोधउभयमित्यादिनाकर्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेः । भक्तिश्चय
थाभवति ४७ अयहवावेत्यादिनाभक्तेःसर्वोत्कर्षोक्तेर्भक्तमभिनंदति । किमिति । ४८ यदुक्तंदेवैः स्वयंतदुपकल्पयास्माकमित्यादि । तत्संपादनंकृपालोर्ममानुचितमित्याशयेनाह । नवेदेतिद्वाभ्यां ।
गुणेषुविषयेतषुत्त्वदर्शीस(कृपणोऽज्ञः) आत्मनः श्रेयोनवेद । तस्यतान् विषयान् । सोपितथाविधोऽज्ञएव । ४९ कर्मनवक्तिप्रवृत्तिमार्गं नवक्तिहि । अपथ्यंयथानरातिनददाति भिषक्तमःसद्वैद्यः । ५०
एवंतत्त्वकथनेनानौचित्यंपरिहृत्यतदभिप्रायमनुसरन्नाह । मघवन्निति । विद्ययाव्रतैस्तपसाचसारंदृढंगात्रंशरीरम् याचतयाचध्वम् । ५१ तत्रतदीयं विद्यातिशयमाह । सवाइतिद्वाभ्यां । एवंह्यत्रप्रसि
द्धाकथा । " निशम्याथर्वणंदक्षंप्रवर्ग्यब्रह्मविद्ययोः । दध्यंचं समुपागम्यतमूचतुरथाश्विनौ भगवन्देहिनौविद्यामितिश्रुत्वासचाब्रवीत् । कर्मण्यवस्थितोद्याहंपश्चाद्वक्ष्यामिगच्छतं । तयोर्निर्गतयोरेव
शक्रआगत्यतंमुनिं । उवाचभिषजोर्विद्यांमावादीरश्विनोर्मुने । यदिमद्वाक्यमुल्लंघ्यब्रवीषिसहसैवते । शिरश्छिद्यांनसंदेहइत्युक्त्वासययौहरिः । इंद्रेगतेतथाभ्येत्यनासत्यावूचतुर्द्विजं । तन्मुखादिंद्रगदितं
श्रुत्वातावूचतुःपुनः । आवांतवशिरश्छित्त्वापूर्वमश्वस्यमस्तकं । संधास्यावस्ततोब्रूहितेनाविद्यांचनौद्विज । तस्मिंश्छिन्नेपुनःसंधायमस्तकम् । निजंतेदक्षिणांदत्त्वागमिष्यावोयथागतं । एत
च्छ्रुत्वातथोवाचदध्यङ्ङाथर्वणस्तयोः । प्रवर्ग्यंब्रह्मविद्यांचसत्कृतोऽसत्यशंकित"इति ततश्चायमर्थः सोधिगतोज्ञानी यद्वा दध्यङ् निष्कलं शुद्धं ब्रह्मअधिगतःज्ञातवान् पाठांतरेतुनितरांक्रांतभवतिधनम् तंप्रव
र्ग्यंचाधिगतः ज्ञातवान् । ततोऽश्विभ्यांप्रादादित्युत्तरस्यानुषंगः उपदिदेशेत्यर्थः कथंभूतंब्रह्म यद्वैअश्वशिरसाप्रोक्तत्वादश्वशिरोनामप्रसिद्धंतयोरश्विनोरमरतां जीवन्मुक्तत्वंव्यधात् । तथाचश्रुतिः ।
''अश्वस्यशीर्ष्णाप्रयतीमुवाचे"ति । (यद्वाअश्विभ्यामितिपंचमी । ताभ्यांसकाशात् अश्वशिरोऽश्वस्यमुखमधिगतोविद्यामदात् ।) ५२

श्लोकाः ४४/५२

अथोईशजहित्वाष्ट्रंग्रसंतंभुवनत्रयम्॥ ग्रस्तानियेननःकृष्णतेजांस्यस्त्रायुधानिच ४४हंसायदह्रनिलयायनिरीक्षकायकृष्णायमृष्टयशसेनिरुपक्रमाय ॥सत्सं
ग्रहायभवपांथनिजाश्रमाप्तावंतेपरीष्टगतयेहरयेनमस्ते ४५ ॥ ॥ श्रीशुकउवाच ॥ ॥ अथैवमीडितोराजन्सादरंत्रिदशैर्हरिः ॥ स्वमुपस्थानमाक
र्ण्यप्राहतानभिनंदितः ४६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ प्रीतोऽहंवःसुरश्रेष्ठामदुपस्थानविद्यया ॥ आत्मैश्वर्यस्मृतिःपुंसांभक्तिश्चैवययामयि ४७
किंदुरापंमयिप्रीतेतथापिविबुधर्षभाः ॥ मय्येकांतमतिर्नान्यन्मत्तोवांछतितत्त्ववित् ४८ नवेदकृपणःश्रेयआत्मनोगुणवस्तुदृक् ॥ तस्यतानिच्छतो
यच्छेद्यदिसोपितथाविधः ॥ ४९ स्वयंनिश्रेयसंविद्वान्नवक्त्यज्ञायकर्महि॥नरातिरोगिणोऽपथ्यंवांछतोहिभिषक्तमः ५० मघवन्यातभद्रंवोदध्यंचमृषि
सत्तमम् ॥ विद्याव्रततपःसारंगात्रंयाचतमाचिरम् ५१सवाअधिगतोदध्यङ्ङश्विभ्यांब्रह्मनिष्कलम् ॥ यद्वाअश्वशिरोनामतयोरमरतांव्यधात् ५२ ॥४२॥

चूर्णिका

हरयेकृष्णायनमः तेजोस्त्रायुधानिग्रस्तानितंत्वाष्ट्रंजहि ४४ हंसायवुद्ध्यादिसाक्षिणेकृष्णायआदिशून्यायहरयेते नमः ४५ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंदेवैःस्तुतः हरिः
तानूउवाच ४६ हेदेवाः मयिप्रीतेसतिदुरापंकिमस्ति ४७ ४८ तथापिमयि एकांतमतिः पुरुषः मत्तोन्यत् नवांच्छति ४९ ५० अथापि हे मघवन् वः भद्रमस्तु अथ
सदध्यंचंऋषिंगत्वातस्यशरीरंअयाचत ५१सः दध्यङ् अश्वशिरोनामप्रसिद्धं ब्रह्मप्रवर्ग्यंच अधिगतः ततः अश्विभ्यांसःउपदिदेश ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका
मदात्मकंवर्मश्रीनारायणकवचं । अधिगतइतिपूर्वस्यानुषंगः । तत्रहेतुः यद्यस्मात्त्वष्ट्रेप्रादात् । (किंतत् ।) यत्त्वष्टा विश्वरूपायपुत्रायप्रादात् । कीदृशं । यत्त्वंततो विश्वरूपात् अधाःधृतवानसि ।
तदेवंविद्ययासारंगात्रंयाचध्वमित्यर्थः । ५३ ननुप्रेष्ठंदेहंकथंदास्यतितत्राह । युष्मभ्यमंगानिअस्थीनियाचितः सन्दास्यति । यतोधर्मज्ञः । विशेषतोऽश्विभ्यांशिष्यप्रीत्यादास्यति । अस्थीनीत्यनेनहे
यत्वंदर्शितं । तैरस्थिभिर्विश्वकर्मणाविनिर्मितः आयुधश्रेष्ठोवज्रोभविष्यतीतिशेषः। येनभवान् वृत्रशिरोहर्ताहनिष्यति । ममतेजसाउपबृंहितः (अभिवर्धितः) सन् । ५४ । तेजश्चअस्त्राणिच आयुधा
निचसंपदश्चभूयः प्राप्स्यथ । महाकायास्त्रिभुवनग्रासीसएवास्मान्हन्यादितिशंकाकुलचित्तान्प्रत्याह । मत्परांश्चकेपिनहिंसंति । अतोयुष्माकंभद्रमेवेति ५५ इतिषष्ठस्कंधेटीकायांनवमोध्यायः ९ ॥
दशमेकेशवादिष्टदध्यङ्ङस्थिजवज्रभृत् । इंद्रोऽयुध्यतवृत्रेणसासुरेणसनिर्जरः ॥ १ ॥ १ । २ । (अंत-)-र्मोदमान एवतन्मुखाद्धर्मं श्रोतुकामः प्रत्याचक्षाणइवोवाच । अपीतिद्वाभ्याम् । हेवृंदार
काः अपिकिंसंस्थायांमृत्यौयोभिद्रोहो दुःखं तंनजानीथ ३ आत्मादेहः । वयंजानीमएवकिंतुश्रीविष्णुरस्मन्मुखेनयाचतइतिचेत्तत्राह । याचमानायविष्णवेपिदातुंकउत्सहेत ४ पुण्यश्लोकैरीड्या
निकर्माणियेषाम् ५ याचकोयदिवेदतर्हिनयाचेत । दाताईश्वरोदानसमर्थश्चेत्तर्हिसोपिनेतिनाह । अतोयथातवसंकटंवयंस्वार्थपरानजानीमः एवंप्रत्याचक्षाणस्त्वमप्यस्मत्संकटंनजानासीतिभावः६ मेम
॥४३॥ याप्रत्युदाहृताः प्रत्युक्ताः । एषोहं मांत्यजंतंत्यक्ष्यायांतंआत्मानंदेहं ७

श्लोकाः
दध्यङ्ङाथर्वणस्त्वष्ट्रेवर्माभेद्यंमदात्मकम् ॥ विश्वरूपाययत्प्रादात्त्वष्टायत्त्वमधास्ततः ५३ युष्मभ्यंयाचितोऽश्विभ्यांधर्मज्ञोंऽगानिदास्यति ॥ ततस्तैरायु
धश्रेष्ठोविश्वकर्मविनिर्मितः ॥ येनवृत्रशिरोहर्तामत्तेजउपबृंहितः ५४ तस्मिन्विनिहतेयूयंतेजोस्त्रायुधसंपदः ॥ भूयःप्राप्स्यथभद्रंवोनहिंसंतिचमत्परान्
५५ ॥ ॥ इतिश्रीभागवते म० षष्ठस्कंधेनवमोध्यायः॥९॥श्रीबादरायणिरुवाच ॥ इंद्रमेवंसमादिश्यभगवान्विश्वभावनः ॥ पश्यतामनिमेषाणांतत्रैवांत
र्दधेहरिः १ तथाभियाचितोदेवैर्ऋषिराथर्वणोमहान् ॥ मोदमानउवाचेदंप्रहसन्निवभारत २ अपिवृंदारकायूयंनजानीथशरीरिणाम् ॥ संस्थायांयस्त्वभि ५३/७
द्रोहोदुःसहश्चेतनापहः ३ जिजीविषूणांजीवानांआत्माप्रेष्ठइहेप्सितः ॥ कउत्सहेततंदातुंभिक्षमाणायविष्णवे ४ ॥ ॥ देवाऊचुः ॥ ॥ किंतुतद्दुस्त्य
जंब्रह्मन्पुंसांभूतानुकंपिनाम् ॥ भवद्विधानांमहतांपुण्यश्लोकेड्यकर्मणाम् ५ नूनंस्वार्थपरोलोकोनवेदपरसंकटम्॥ यदिवेदनयाचेतनेतिनाहयदीश्वरः ६ ॥
॥ ऋषिरुवाच ॥ ॥ धर्मंवःश्रोतुकामेनयूयंमेप्रत्युदाहृता ॥ एषवःप्रियमात्मानंत्यजंतंसंत्यजाम्यहम् ७

चूर्णिका
अश्विनोर्जीवन्मुक्तत्वंव्यधातूदध्यङ् श्रीनारायणकवचं ज्ञातवान्सः त्वष्ट्रेप्रादात् त्वष्टाविश्वरूपाय यत् त्वंविश्वरूपात् धृतवानसि ५३ किंच सः दध्यङ् धर्मज्ञःभवद्भिर्या
चितः सन्स्वांगानि युष्मभ्यंदास्यति तदस्थिभिः विश्वकर्मविनिर्मितः आयुधश्रेष्ठोवज्रोभविष्यति ५४ येनवृत्रशिरः हरिष्यसि ततः तेजोस्त्रायुधसंपदःभूयःप्राप्स्यथ मत्प
रान्केपिनाहिंसंति अतोवः भद्रमेवास्तु ५५ ॥ ॥ इतिषष्ठेनवमः ९ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंइंद्रसमादिश्यभगवान् अंतर्दधे १ तथादेवैर्याचितः दधीचिःधर्मं ॥४३॥
श्रोतुकामः प्रत्याचक्षाणइवउवाच २ हेवृंदारकाः यूयंशरीरिणांमृत्युदुःखंनजानीथ ३ देहिनांदेहः अतिप्रियः अतः भिक्षमाणायापिविष्णवे ईदृशंदेहंदातुंकः उत्सहेत ४
॥ देवाऊचुः हेब्रह्मन्भूतानुकंपिनांपुण्यश्लोकेड्यकर्मणांभवद्विधानांपुंसांदुस्त्यजंकिंनु ५ ननुस्वार्थपरोलोकः परसंकटंनवेद यदिवेदतर्हिनयाचेत ६ इत्यादिश्रुत्वादधी
चिरुवाच हेदेवाः धर्मंश्रोतुकामेनमयायूयंप्रत्युदाहृताः अथापिमांत्यक्ष्यायांतंदेहंत्यजामि गृह्यताम्७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्रुवेणआत्मना देहेन हेनाथाः देवाः (स स्थावरैर्वृक्षादिभिरपिशोच्यः ।तदपेक्षयापरोपकारित्वात्स्थावरा अपिश्रेष्ठाइत्यर्थः)। ८ य आत्मास्वयं भूतानांशोकेन शोचति हर्षेण हृष्यति तस्य (भूतद
यालक्षणो) योधर्मएतावानेवाव्ययइत्यर्थः ९ पारक्यैः श्वसृगालादिभक्ष्यैः अस्वार्थैः आत्मोपयोगशून्यैः। स्वंवित्तं ज्ञातयःपुत्रादयः विग्रहोदेहस्तैर्नोपकुर्यादितियत् १० कृतंव्यवसितं निश्चयोयेन।
आत्मानंक्षेत्रज्ञंसन्नयन्एकीकुर्वन्तनुंजहौ ११ (अक्षाइंद्रियाणि असवःप्राणाः) यताअक्षादयोयेन तत्त्वं पश्यतीतितथा । ध्वस्तानिगतानिबंधनानियस्य १२ अर्थेंद्रः अशोभतेत्युत्तरेणान्वयः
। मुनेः शुक्तिभिरस्थिभिः निर्मितं । उत्सिक्तऊर्जितः । मुनेः शक्तिभिरिति वापाठः १३ ॥ (गजेंद्रस्योपरिशुशुभे) १४ ॥ असुरानीकानांयूथपैः पर्यस्तं परिवृतं (वृत्रंछेत्तुं अभ्यद्रवत् अभिजगाम
अंतकंहंतुंमृत्युंजयइव) १५ रणःसंग्रामः प्रथमेचतुर्युगे तत्र त्रेतायुगस्यमुखेआरंभे १६ (पितृभिर्वह्निभिश्च । एतैःस्वयाश्रियाच रोचमानं मरुत्पतिं देवराजं शक्रंदृष्ट्वा) नामृष्यन् नास
हंतेत्युत्तरेणान्वयः १७ १८ । १९ । २०

श्लोकाः ८/२०

योऽध्रुवेणात्मनानाथानधर्मंनयशपुमान् ॥ ईहेतभूतदययासशोच्यःस्थावरैरपि ८ एतावानव्ययोधर्मःपुण्यश्लोकैरुपासितः ॥ योभूतशोकहर्षाभ्यामा
त्माशोचतिहृष्यति ९ अहोदैन्यमहोकष्टंपारक्यैःक्षणभंगुरैः ॥ यन्नोपकुर्यादस्वार्थैर्मर्त्यःस्वज्ञातिविग्रहैः १० ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंकृतव्यव
सितोदध्यङ्ङाथर्वणस्तनुम्॥ परेभगवतिब्रह्मण्यात्मानंसन्नयन्जहौ ११ यताक्षासुमनोबुद्धिस्तत्त्वदृक्ध्वस्तबंधनः ॥ आस्थितःपरमंयोगंनदेहंबुबुधेगतम् १२
अथेंद्रोवज्रमुद्यम्यनिर्मितंविश्वकर्मणा ॥ मुनेःशुक्तिभिरुत्सिक्तोभगवत्तेजसान्वितः १३ वृतोदेवगणैःसर्वैर्गजेंद्रोपर्यशोभत ॥ स्तूयमानोमुनिगणैस्त्रैलोक्यंह
र्षयन्निव १४ वृत्रमभ्यद्रवच्छेत्तुमसुरानीकयूथपैः ॥ पर्यस्तमोजसाराजन्क्रुद्धोरुद्रइवांतकम् १५ततःसुराणामसुरैरणःपरमदारुणः॥ त्रेतामुखेनर्मदायामभव
त्प्रथमेयुगे १६ रुद्रैर्वसुभिरादित्यैराश्विभ्यांपितृवह्निभिः॥ मरुद्भिरृभुभिःसाध्यैर्विश्वेदेवैर्मरुत्पतिम् १७दृष्ट्वावज्रधरंशक्रंरोचमानःस्वयाश्रिया॥ नामृष्यन्नसु
राराजन्मृधेवृत्रपुरःसराः १८ नमुचिःशंबरोऽनर्वाद्विमूर्धाऋषभोऽंबरः ॥ हयग्रीवःशंकुशिराविप्रचित्तिरयोमुखः १९ पुलोमावृषपर्वाचप्रहेतिर्हेतिरुत्क
लः ॥ दैतेयादानवायक्षारक्षांसिचसहस्रशः ॥ २० ॥

चूर्णिका

हेदेवाः यः अध्रुवेणदेहेन धर्मंयशश्चभूतदयया नसंपादयेत् सः सर्वैः शोच्यः ८ ९ १० ॥ ॥ श्रीशुकउवाच ॥ ॥ एवमुक्त्वाअथर्वणःपरेब्रह्मणिक्षेत्रज्ञंएकी
कुर्वन्तनुंजहौ ११ १२ अथइंद्रः तदस्थिभिः विश्वकर्मणानिर्मितंवज्रंउद्यम्यदेवैः वृतः गजेंद्रस्थितः मुनिगणैः स्तुतः सन् १३ १४ त्रैलोक्यंहर्षयन्निववृत्रंछेत्तुं अभ्य
द्रवत् १५ ततः सुराणांदैत्यैःसह रणःत्रेतामुखेनर्मदायां अभवत् १६ रुद्रैः वसुभिः आदित्यैः आश्विभ्यांपितृवह्निभिः इत्यादिदेवैः सह इंद्रंदृष्ट्वा वृत्रपुरःसराः असुराः
नासहंत १७ १८ ततः नमुचिः शंबरः अनर्वा द्विमूर्द्धा ऋषभः अंबरः हयग्रीवः शंकुशिराः विप्रचित्तिः अयोमुखः पुलोमा वृषपर्वा प्रहेतिः हेतिः उत्कलः १९ २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(कार्तस्वराहिरण्मयाः परिच्छदाः कवचादयोयेषांते । इंद्रस्यसेनामुखंप्रतिषिध्यप्रतिरुध्य) २१ (असंभ्रांताः संभ्रमरहिताः) २२ "शतघ्नीचचतुर्हस्तालोहकंटकसंचिता । भृशुंढीसर्वतोलोहकंटकानुक्रमोन्नते"त्यभिधानं २३ पुंखोमूलदेशः। एकस्यमूलदेशस्यपुंखमनुगतोऽपरस्यपुंखो यथाभवतितथा(पतितैः) नभस्थैर्धनैर्ज्योतींषीवेत्यनेनतेषांतदप्राप्तिः सूचिता२४।तामेवाह। नतइति । शस्त्राणामस्त्राणांचयानिवर्षाणितेषामोघानासेदुः नप्रापुः सिद्धपथेआकाशे । २५ । क्षीणा अस्त्राणांशस्त्राणांच ओघोयेषांतेगिरिशृंगैर्द्रुमैरुपलैश्च (सुरसैन्यंप्रत्यभ्यवर्षन् । तांश्चगिरिशृंगादीन्)। २६ तानिंद्रसैनिकान् शस्त्राणाभस्त्राणांचपूगैःसमूहैरक्षतान् क्षतशून्यान् स्वस्तिमतः सुखिनः द्रुमादिभिश्च अविक्षतान् निशम्यदृष्ट्वावृत्रोनाथोयेषांते तत्रसुभीताः २७ कृताःकृताःपुनःपुनःकृताः । कृष्णोऽनुकूलोयेषांतेषुदेवगणेषु। रुशतीः रुशत्यः अकल्याण्यः । रुक्षाः परुषावाचो यथामहत्सुक्षोभकर्त्र्योनभवंतितद्वत् । २८ हतोयुद्धेदर्पोयेषां । आत्तः परैर्गृहीतः सारोधैर्ययेषां । तेअतिप्रसिद्धाअपितेदैत्याः । एवंतेइत्यस्यापौनरुक्त्यं । आजिमुखेयुद्धारंभेपतिं (वृत्रं) विसृज्यपलायनायमनोदधुः यतोहरावभक्ताः २९ प्रधावतः पलायमानान्प्रेक्ष्य आदावेवतीव्रेणभयेनपलायितंभग्नंचतद्बलंसैन्यं तच्चप्रेक्ष्य (मनस्वी धीरोवृत्रएत-)-द्वक्ष्यमाणंबभाषे ३० तदेवविशिनष्टि। कालोपपन्नामवसरोचितांमनस्विनांरुचिरां । हेअर्वन् मेवाचंशृणुत । ३१ प्रतिक्रियानिवर्तनोपायः। ततोमृत्योः इहयशः लोकः स्वर्गादियश्चस्यात् अथतर्हिअमुंमृत्युंयुक्तंसमीचिनंप्राप्तंवा ३२

सुमालिमालिप्रमुखाःकार्तस्वरपरिच्छदाः ॥ प्रतिषिध्येंद्रसेनाग्रंमृत्योरपिदुरासदम् २१ अभ्यद्रवन्नसंभ्रांताःसिंहनादेनदुर्मदाः ॥ गदाभिःपरिघैर्बाणैःप्रासमुद्गरतोमरैः २२ शूलैःपरश्वधैःखड्गैः शतघ्नीभिर्भृशुंडिभि ॥ सर्वतोऽवाकिरञ्छस्त्रैरस्त्रैश्चविबुधर्षभान् २३ नतेदृश्यंतसंछन्नाःशरजालैःसमंततः ॥ पुंखानुपुंखपतितैर्ज्योतींषीवनभोघनैः २४ नतेशस्त्रास्त्रवर्षौघाह्यासेदुःसुरसैनिकान् ॥छिन्नाःसिद्धपथेदेवैर्लघुहस्तैःसहस्रधा २५ अथक्षीणास्त्रशस्त्रौघागिरिशृंगद्रुमोपलैः ॥ अभ्यवर्षन्सुरबलंचिच्छिदुस्तांश्चपूर्ववत् २६ तानक्षतान्स्वस्तिमतोनिशम्यशस्त्रास्त्रपूगैरथवृत्रनाथाः ॥ द्रुमैर्दृषद्भिर्विविधाद्रिशृंगैरविक्षतांस्तत्रसुरिंद्रसैनिकान् २७सर्वेप्रयासाअभवन्विमोघाःकृताःकृतादेवगणेषुदैत्यैः ॥ कृष्णानुकूलेषुयथामहत्सुक्षुद्रैःप्रयुक्तारुशतीरुक्षवाचः २८ तेस्वंप्रयासंवितथंनिरीक्ष्यहरावभक्ताहतयुद्धदर्पाः ॥ पलायनायाजिमुखेविसृज्यपतिंमनस्तेदधुरात्तसाराः २९ वृत्रोऽसुरांस्ताननुगान्मनस्वीप्रधावतःप्रेक्ष्यबभाषएतत्॥ पलायितंप्रेक्ष्यबलंचभग्नंभयेनतीव्रेणविहस्यवीरः ३० कालोपपन्नांरुचिरांमनस्विनामुवाचवाचंपुरुषप्रवीरः॥हेविप्रचित्तेनमुचेपुलोमन्मयानर्वन्शंबरमेशृणुध्वम् ३१ जातस्यमृत्युर्ध्रुवएषसर्वतःप्रतिक्रियायस्यनचेहक्लृप्ता॥ लोकोयशश्चाथततोयदिह्यमुंकोनाममृत्युंनवृणीतयुक्तम् ३२ ॥

श्लोकाः २१/३२

धूर्णिका सुमाल्यादयः दैत्याः दानवाः यक्षाः रक्षांसिचइंद्रसेनाग्रंप्रतिषिध्य असंभ्रांताः संत. शस्त्रास्त्रैर्विबुधान् अवाकिरन् २१ २२ २३ तदाशरजालैः छन्नाः देवाः नादृश्यंत २४ ततः दैत्यानांशस्त्रास्त्रवर्षौघाः छिन्नाः २५ ततः क्षीणास्त्रशस्त्रौघाः दैत्याः गिरिशृंगद्रुमोपलैः सुरबलं अभ्यवर्षन् तांश्चपूर्ववाच्चिच्छिदुः२६ तदादैत्याः विविधशस्त्रैः द्रुमदृषदाद्रिभिः अक्षतान् देवान् दृष्ट्वात्रेसुः २७ दैत्यैः देवगणेषुकृताः प्रयासाः सर्वेव्यर्थाअभवन् २८ तदारणंविसृज्यदैत्यान्पलायमानान् दृष्ट्वादेवान् अक्षतान् निशम्य वृत्रः दैत्यान् उवाच२९ ३०हेदैत्याः मद्वचः शृणुत ३१ जातस्य मृत्युः सर्वतः ध्रुवएव यस्यप्रतिक्रियानास्ति किंच मृत्योःसकाशात् इहयशः स्वर्गश्चयदिस्यात् तर्हि एवंभूतंमृत्युंकःनवृणीत ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ब्रह्मसंधारणयाकलेवरंजह्यादितियत्सएकोमृत्युः । वीरशयेरणभूमौ अनिवृत्तः अपराङ्मुखः सन् जह्यादितियत्सचैकः तौद्वाविहशास्त्रे संमतौमृत्यू । तथाचस्मृतिः । ‘ द्वाविमौपुरुषौलोके सूर्यमंडलभेदि
नौ । परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतः’ इति ३३ ॥ ॥ इतिषष्ठस्कंधेटीकायांदशमोध्यायः १० ॥ एकादशेतुवृत्रस्ययुध्यमानस्यवज्रिणा । भक्तिज्ञानबलोदर्काश्चित्रावाचोऽनुवर्णिताः ॥ १ ॥
(तद्दैत्याः) शंसतः कथयतः पत्युर्वचः१ कालानुकूलैः कालानुवर्तिभिः काल्यमानाम् विद्राव्यमाणां (पृतनांसेनां) २ अमर्षितः असहमानः तान्त्रिदशान् निवार्यनिर्भर्त्स्यचेदंवक्ष्यमाणंउवाच । ३
(तदाहद्वाभ्यां ।) मातुरुच्चरितैः पुरीषप्रायैः प्रथमांतपाठेदेवानांसंबोधनं । पृष्ठतोहतैर्दैत्यैर्वोयुष्माकंकिंस्यात्नकिंचित् । नयशोनापिधर्मः । तदेवाहनहीति (नश्लाघ्यः स्तुत्यः ।) ४ प्रधनेसं
ग्रामे । सारंधैर्यं । हेक्षुल्लकाः क्षुद्राः मात्रंक्षणमात्रं अग्रेतिष्ठत । नचेदिहलोकभोगेस्पृहास्ति ५ सुरगणान्रिपून् । सुमहान् प्राणो बलंयस्य । येनाविचेतसोबभूवुः ६ वृत्रस्यविस्फोटनेननादेन ७
उद्यतंशूलंयेन । गांभूमिं । नालंनलानांवनं । उद्धतोमदोयस्यसयूथपतिर्गजोयथामर्दयति ८ (अभिद्रवते योद्धुमभितः पतते) ९ (सर्वे देवादयः समपूजयन्तुष्टुवुः) १०

श्लोकाः ३३/१०

द्वौसंमताविहमृत्यूदुरापौयद्ब्रह्मसंधारणयाजितासुः ॥ कलेवरंयोगरतोविजह्याद्यदग्रणीवीरशयेऽनिवृत्तः ॥ ३३ ॥ ॥ इतिश्रीभागवते म० षष्ठस्कंधे
दशमोऽध्यायः॥ १० ॥ ॥ श्रीशुकउवाच ॥ ॥ तएवंशंसतोधर्मंवचःपत्युरचेतसः ॥ नैवागृह्णन्भयत्रस्ताःपलायनपरानृप १ विशीर्यमाणांपृतना
मासुरीमसुरर्षभः ॥ कालानुकूलैस्त्रिदशैःकाल्यमानामनाथवत् २ दृष्ट्वाऽतप्यतसंक्रुद्धइंद्रशत्रुरमार्षितः ॥ तान्निवार्यौजसाराजन्निर्भर्त्स्येदमुवाचह
३ किंवउच्चरितैर्मातुर्धावद्भिःपृष्ठतोहतैः ॥ नहिभीतवधःश्लाघ्योनस्वर्ग्यःशूरमानिनां ४ यदिवःप्रधनेश्रद्धासारंवाक्षुल्लकाहृदि ॥ अग्रेतिष्ठतमात्रंमेनचे
द्ग्राम्यसुखेस्पृहा ५एवंसुरगणान्क्रुद्धोभीषयन्वपुषारिपून् ॥ व्यनदत्सुमहाप्राणोयेनलोकाविचेतसः ६तेनदेवगणाःसर्वेवृत्रविस्फोटनेनवै॥निपेतुर्मूर्च्छिताभू
मौयथैवाशनिनाहताः ७ ममर्दपद्भ्यांसुरसैन्यमातुरंनिमीलिताक्षंरणरंगदुर्मदः ॥ गांकंपयन्नुद्यतशूलओजसानालंवनंयूथपतिर्यथोन्मदः ८ विलोक्यतं
वज्रधरोत्यमर्षितःस्वशत्रवेभिद्रवतेमहागदां ॥ चिक्षेपतामापततींसुदुःसहांजग्राहवामेनकरेणलीलया ९ सइंद्रशत्रुःकुपितोभृशंतयामहेंद्रवाहंगदयोग्रविक्र
मः ॥ जघानकुंभस्थलउन्नदन्मृधेतत्कर्मसर्वेसमपूजयन्नृप १०

चूर्णिका

हेदैत्याः इहलोकेशास्त्रसंमतौ द्वौमृत्यूयोगेन देहत्यागः १ युद्धेसन्मुखंमरणं २ एतौद्वावपि स्वर्गदौभवतइति ३३ ॥ इतिषष्ठेदशमः ॥ १० ॥ ॥ श्रीशुकउवाच
॥ एवंधर्मंशंसतः वृत्रस्यवचः दैत्याः नअगृण्हन् १ तदाकालानुकूलैः त्रिदशैः अनाथवत्काल्यमानां विशीर्यमाणांच पृतनांदृष्ट्वा २ ओजसातान्निवार्य निर्भर्त्स्यच
उवाच ३ शूराणांभीतवधः श्लाघ्योनस्वर्ग्यश्चन ४ हेक्षुद्राःदेवाः यदिवः युद्धेश्रद्धातर्हिमेअग्रेक्षणंतिष्ठत ५ यदिइहलोकसुखेच्छानचेत् एवंक्रुद्धःसन्देवान्स्वदेहे
नभीषयन्महाशब्दंचकार ६ यंश्रुत्वालोकाः मूर्च्छांप्रापुः वृत्रशब्देनसर्वेदेवगणाः भूमौनिपेतुः ७ तदावृत्रः पद्भ्यांदेवसैन्यंममर्द ८ तद्विलोक्य अमर्षितः इंद्रः स्वशत्रवे
गदांचिक्षेप तदावृत्रः प्राप्तांतांगदांवामकरेणगृहीत्वा ९ तयैवऐरावतगंडस्थलेजघानतत्कर्म सर्वेसमपूजयन् १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(वृत्रस्यगदयाऽभिमृष्टस्ताडितः) सप्तधनुःप्रमाणंदेशं ११ सन्नोऽवसन्नोवाहोयस्यतस्मैनप्रायुंक्त (सवृत्रः) अमृतस्पंदी अमृतस्रावीयःस्वकरः तेनाभिमर्शःस्पर्शः तेनवीतव्यथा-(-क्षतो) गतदुःखक्षतो वाहोयस्येंद्रस्य सतथाभूतो योद्धुमवतस्थे १२ सवृत्रः हेनृपेंद्र । आहवकाम्यया युद्धेच्छयाऽवस्थितं भ्रातृहणंविश्वरूपहंतारं नृशंसंक्रूरंतदेव अंहः पापं तस्यकर्मस्मरन् १३ यो ब्रह्महा ब्राह्मणं हतवान् । विशेषतश्चगुरुंममच भ्रातरं सभवानग्रतः समवस्थितः एतद्दिष्ट्याभद्रं जातं । दिष्टेत्यव्ययमानंदार्थे । हे असत्तम ममशूलेननिर्भिन्नं दृषत् (शिला) तत्तुल्यंनिर्दयं हृत्हृदयं यस्यते नत्वया निमित्तभूतेन अद्यअचिरादेव भ्रातुरनृणोहंस्यां एतच्चादिष्ट्या १४ (विश्रभ्यविश्वासंदत्त्वेत्यर्थः स्वर्गकामोयो भवान् अवृश्चत्) स्वर्गकामोयाज्ञिकः पशोरिवेतिवा १५ (स्वकर्मणाहेतुनाल ज्जादिभिरुत्सृष्टंराक्षसैश्चगर्ह्यंशोच्यं) तंत्वामस्पृष्टवाह्निं (अस्यसंसर्गोमाभूदितिवाह्निनाप्यस्पृष्टं) अदग्धदेहं समदंति वर्तमानसामीप्ये वर्तमानवन्निर्देशः । १६ अन्येपियेअज्ञा इहत्वात्वांनृशंसमनु । मह्ममुद्यतास्त्राः संतोयदिप्रहरंति तैर्भूतनाथान् भैरवादीन्यक्ष्यामि । कथंभूतैः । निशातं तीक्ष्णंकृतं यन्ममत्रिशूलं तेननिर्भिन्नोगलोयेषांतैः १७अथोअथवाहेहरेभोइंद्र यदिभवानेवममशिरो ह र्ताहरिष्यति तत्रतथासति अनृणो विमुक्तकर्मबंधः सन्भूतेभ्यो बलिंदेहेनविधायमनस्विनांपादरजः प्रपत्स्येधीराणाम् पदंप्राप्स्यामीत्यर्थः १८ जीवितादपिमृत्युरेवममाभिमतइत्याशयेनाह । सुरेशेति नहिनोषि नहिक्षिपसि । गदेव विफलोभविष्यतीतिसंशयंमाकार्षीः । कृपणादर्थः प्रयोजनंयस्याः सायाच्ञायथानिष्फलातथानस्यात् १९

श्लोकाः ११—१९

॥ ऐरावतोवृत्रगदाभिमृष्टोविघूर्णितोऽद्रिःकुलिशाहतोयथा ॥ अपासरद्भिन्नमुखःसहेंद्रोमुंचन्नसृक्सप्तधनुर्भृशार्तः ११ नसन्नवाहायविषण्णचेतसेप्रा युंक्तभूयःसगदांमहात्मा ॥ इंद्रोमृतस्पंदिकराभिमर्शवीतव्यथाक्षतवाहोऽवतस्थे १२सतंनृपेंद्राहवकाम्ययारिपुंवज्रायुधंभ्रातृहणंविलोक्य॥ स्मरंश्चतत्कर्म नृशंसमंहःशोकेनमोहेनजगाददानवः १३ ॥ ॥ वृत्रउवाच ॥ ॥ दिष्ट्याभवान्मेसमवस्थितोरिपुर्योब्रम्हहागुरुहाभ्रातृहाच ॥ दिष्ट्याऽनृणोद्याहमसत्त मत्वयामच्छूलनिर्भिन्नदृषद्धृदाऽचिरात् १४ योनोऽग्रजस्यात्मविदोद्विजातेर्गुरोरपापस्यचदीक्षितस्य ॥ विश्रभ्यखड्गेनशिरांस्यवृश्चत्पशोरिवाकरुणःस्वर्ग कामः १५ह्रीश्रीदयाकीर्तिभिरुज्झितंत्वांस्वकर्मणापुरुषादैश्चगर्ह्यम् ॥कृच्छ्रेणमच्छूलविभिन्नदेहमस्पृष्टवह्निंसमदंतिगृध्राः १६अन्येनुयेत्वेहनृशंसमज्ञायद्यु द्यतास्त्राःप्रहरंतिमह्यम्॥तैर्भूतनाथान्सगणान्निशातत्रिशूलनिर्भिन्नगलैर्यजामि १७अथोहरेमेकुलिशेनवीरहर्ताप्रमथ्यैवशिरोयदीह ॥ तत्रानृणोभूतबलिंविधा यमनस्विनांपादरजःप्रपत्स्ये॥ १८ सुरेशकस्मान्नहिनोषिवज्रंपुरःस्थितेवैरिणिमय्यमोघम्॥मासंशयिष्ठानगदेववज्रंस्यान्निष्फलंकृपणार्थेवयाच्ञा ॥ १९

चूर्णिका

ऐरावतः वृत्रगदाभिमृष्टः भिन्नमुखः सन्असृक् वमन् सप्तधनुःप्रमाणंदेशमपासरत् ११ इंन्द्रः अमृतस्त्राविहस्तेनतं आभिमर्श्यगतव्यथः सन् युद्धाय अवतस्थे १२ हेराजन्वृत्रः भ्रातृहरणंवज्रायुधं इंद्रंदृष्ट्वा उवाच १३ हेइंद्रत्वंब्रह्महागुरुहाभ्रातृहाच अतः अद्यत्वांहत्वाअहं भ्रातृऋणात्मुक्तोभवामि १४ हेइंद्रयःत्वंस्वर्गकामः सन् द्विजस्यगुरोः नः अग्रजस्याशिरांसिपशोरिवखड्गेन अवृश्चः १५ अतः ह्रीश्रियादिभिः उज्झितं मच्छूलविभिन्नदेहंअदग्धदेहंत्वांगृध्राः समदंति १६ अन्येये उद्यतास्त्राः देवाः मह्यंप्रहरंति तान्त्रिशूलेन हत्वाभैरवादीन् यजामि १७ अथहेइंद्रत्वंवज्रेण मेशिरःयदिहरिष्यसि तर्हिदेहेन भूतानांबलिंविधायस्वर्गंयामि १८ हेसु रेशमयिवज्रंकुतः नक्षिपसिगदेववज्रंनिष्फलंनस्यात् १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अमोघत्वेहेतुंवदन् तंमोत्साहयतिनन्विति। (हरेर्विष्णोश्चतेजसा) तेजितस्तीक्ष्णीकृतः शत्रुंमांजहि विष्णुनायंत्रितः प्रेरितः। (यतोयत्रहरिस्ततस्तत्रैव।) २० हननेन ममपीडास्यादित्यपिमासं शयिष्ठाइत्याहअहमिति । संकर्षणोमत्पतिर्यथासमाधियोगमाहतथातदीयचरणारविंदेमनःसमाधायमुनेर्योगिनोगतिंयामियास्यामि । त्वद्वज्रस्यरंहसालुलिताश्छिन्नोग्राम्यपाशोविषयभोगलक्षणोयस्य अपविद्धलोकःत्यक्तदेहः २१ तर्हिभगवान्संकर्षणः स्वभृत्यायमह्यमेवस्वर्गादिसंपदोदास्यतीत्यपिमासंशयिष्ठाइत्याहपुसामिति । स्वर्गेभूमौ रसातलेचयाः संपदस्ताः किलनिश्चितं नरातिनददाति अत्रहेतुः यत्याभ्यःद्वेषादयोभवंति। (उद्रेकोगर्वः। आधिश्चिंता । मदउच्छृंखलता । व्यसनमासक्तिः । संप्रयासोरक्षणादौ) २२ तर्हिस्वभक्तस्यकिंविधत्तेतत्राह। त्रैवर्गिकोधर्मार्थकामविषयोयआयासस्तस्य विघातंविधत्ते। ततआयासोपरमादनुमेयः। नत्वैश्वर्यादिना। (यः प्रसादोऽकिंचनेभ्योऽन्यैर्दुर्लभः।) अतः सम्यग्भगवत्प्रसादाभावात्तवसंपदोभविष्यंतीतिभावः २३ एवमिंद्रायस्वाभिप्रायंनिवेद्यभगवंतं प्रार्थयतेअहमिति तवपादावेव एकंमूलमाश्रयोयेषां तेषांदासानामनुदासः भूयोभवितास्मिभवेयं । असुपतेःप्राणनाथस्यतवगुणान्ममममनः स्मरतु । वागपितानेवकीर्तयतु । कायस्तवैव कर्मकरोतु ननुकिंदास्येनतुभ्यंमहाफलानिदास्यामितत्राह । (ननाकेति) । नाकपृष्ठंध्रुवपदं ब्रह्मलोकादिकंच। हेसमंजस निखिलसौभाग्यनिधे त्वात्वांविरहय्यपृथक्कृत्यनकांक्षे नेच्छामि। (किंतुत्वामेवकांक्षे।)२५ तदेवाह। अजातपक्षाः खगाः घूकादिभिः पीडितायथामातरम् यथाचदाम्नाबद्धाबालवत्साः स्तन्यंपयः यथाचव्युषितंदूरदेशंगतंप्रियंकामेनविषण्णाप्रिया तथामेमनस्तापत्रयपीडितम् कर्मभिर्बद्धंचकामादिभिर्विषण्णंचत्वांदिदृक्षतेद्रष्टुमिच्छतीत्यर्थः २६

श्लोकाः २० / २६

नन्वेषवज्रस्तवशक्रतेजसाहरेर्दधीचेस्तपसाचतेजितः॥ तेनैवशत्रुंजहिविष्णुयंत्रितोयतोहरिर्विजयश्रीर्गुणास्ततः २० अहंसमाधायमनोयथाहसंकर्षणस्तच्चरणारविंदे॥ त्वद्वज्ररंहोलुलितग्राम्यपाशोगतिंमुनेर्याम्यपविद्धलोकः २१ पुंसांकिलैकांतधियांस्वकानांयाःसंपदोदिविभूमौरसायाम्॥ नरातियद्द्वेषउद्रेकआधिर्मदःकलिर्व्यसनंसंप्रयासः २२ त्रैवर्गिकायासविघातमस्मत्पतिर्विधत्तेपुरुषस्यशक्र॥ ततोनुमेयोभगवत्प्रसादोयोदुर्लभोऽकिंचनगोचरोन्यैः २३ अहंहरेतवपादैकमूलदासानुदासोभवितास्मिभूयः॥ मनःस्मरेतासुपतेर्गुणांस्तेगृणीतवाक्कर्मकरोतुकायः२४ ननाकपृष्ठंनचपारमेष्ठ्यंनसार्वभौमंनरसाधिपत्यम्॥ नयोगसिद्धीरपुनर्भवंवासमंजसत्वाविरहय्यकांक्षे २५ अजातपक्षाइवमातरंखगाःस्तन्यंयथावत्सतराःक्षुधार्ताः॥ प्रियंप्रियेवव्युषितंविषण्णामनोरविंदाक्षदिदृक्षतेत्वाम् २६

चूर्णिका

अयंतेवज्रः हरेस्तेजसादधीचेस्तपसाचतीक्ष्णीकृतः अस्ति अतः तेनैवशत्रुंजहि यतः यत्रहरिस्तत्रविजयः भवति २० अहंसंकर्षणचरणारविंदेमनःनिधायत्वद्वज्राहतः सन् योगिनांगतिं यास्यामि २१ भगवति दत्तचित्तानांपुंसांस्वर्गादिसंपदः हरिः नददाति यतः याभ्यःद्वेषादयोभवंति २२ अतः अस्मत्पतिः पुरुषस्यत्रैवर्गिकायासनाशं करोति ततः आयासोपरमाद्भगवत्प्रसादोनुमेयः २३ अथभगवंतं प्रार्थयते हेहरे अहंतवदासानुदासःभूयःभविष्यामि मेमनः तवगुणान्स्मरतु वाक् कीर्तयतु कायः तवकर्मकरोतु २४ हेईश्वरत्वां पृथक्कृत्यनाकपृष्ठादिकं नेच्छामि २५ अजातपक्षाः खगाः यथामातरंद्रष्टुंइच्छंति तथाहेहरेमेमनः त्वांद्रष्टुंइच्छति २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उत्तमश्लोकस्यतवजनेषुभक्तेष्वेवममसख्यंभूयात् । त्वन्माययादेहादिष्वासक्तचित्तस्यभूयोपितेष्वासक्तिर्नभूयात् । २७ इतिश्रीषष्ठस्कंधेटीकायांएकादशोध्याः ११ ॥ द्वादशेतिविषण्णेनस्वयमुत्साहितेन तु । महेंद्रेणमहायुद्धेवृत्रस्यवधईर्यते ॥१॥ (हेनृपआजौयुद्धे) महापुरुषंश्रीविष्णुं अप्सुप्रलयोदके १ युगांताग्निवत् कठोराजिह्वाशिखायस्यतत् । आविध्यभ्रामयित्वा २ तत् (शूलं) खेआपतत् आगच्छत् विचलत् परिभ्रमत्ग्रहश्च उल्काच ग्रहोल्कं तद्वत्दुःप्रेक्ष्यंशतंपर्वाणियस्य तेन । उरगराजोवासुकिस्तस्यभोगोदेहस्तदाकारं३ हनौकपोलप्रांते । अमरेभमैरावतंच । (संरब्धः क्रुद्धः ।)४ पुरुहूतस्यइंद्रस्यसंकटं५पुनश्चवृत्रस्तमाह।हेहरेइंद्र६ (युयुत्सतांयोद्धुमिच्छतां परोदेहआत्मायेषांतेषांपराधीनात्मनामिति । सदाजयोनैव किंतुकुत्रचित्जयः एकत्रकुत्रचित्कदाचित्नैव । यद्वा । कुत्राचिद पियुयुत्सतां सदाजयोनैव किंत्वेकत्रैव कदाचिदेवेत्यर्थः (यद्वायुयुत्सतां उभयेषांमध्ये सदाएकत्रैवएकस्मिन्नेवपक्षेजयोनास्तिकिंतुकुत्रचित्) परोदेहःआत्मायेषांपराधीनात्मनांइतिवा आद्यम नादि संनातनंनित्यं (एकोभगवानेवसर्वकालंजयीत्यर्थः) ७ पराधीनतामेवाह लोकाइतिसप्तभिः । यस्यवशेस्थिताः स्वयंविवशाः संतः श्वसंतिचेष्टंते । द्विजाः पक्षिणःशिचाजालेन । कलयतीति कालो भगवान् इहजयादौकारणं ८ ओजआदिरूपंतं कालंहेतुमज्ञायअविज्ञायजडंसंतं आत्मानंदेहंहेतुंमन्यते । (ओजः ऐंद्रियंबलं सहः मनोबलं) ९ १०

॥४९॥

श्लोकाः २७—१०

ममोत्तमश्लोकजनेषुसख्यंसंसारचक्रेभ्रमतःस्वकर्मभिः ॥ त्वन्माययात्मात्मजदारगेहेष्वासक्तचित्तस्यननाथभूयात् २७॥ ॥ इतिश्रीभागवते म० षष्ठ स्कंधेएकादशोऽध्यायः ११ ॥ ॥ ऋषिरुवाच ॥ एवंजिहासुर्नृपदेहमाजौमृत्युंवरंविजयान्मन्यमानः ॥ शूलंप्रगृह्याभ्यपतत्सुरेंद्रंयथामहापुरुषं कैटभोऽप्सु १ ततोयुगांताग्निकठोरजिह्वमाविध्यशूलंतरसाऽसुरेंद्रः ॥ क्षिप्त्वामहेंद्रायविनद्यवीरोहतोसिपापेतिरुषाजगाद २ खआपतत्तद्विचलद्ग्रहोल्क वन्निरीक्ष्यदुष्प्रेक्ष्यमजातविक्लवः ॥ वज्रेणवज्रीशतपर्वणाऽछिनद्भुजंचतस्योरगराजभोगम् ३ छिन्नैकबाहुःपरिघेणवृत्रःसंरब्धआसाद्यगृहीतवज्रं ॥ हनौ तताडेंद्रमथामरेभंवज्रंचहस्तान्न्यपतन्मघोनः ४ वृत्रस्यकर्मातिमहाद्भुतंतत्सुरासुराश्चारणसिद्धसंघाः ॥अपूजयंस्तत्पुरुहूतसंकटंनिरीक्ष्यहाहेतिचचुक्रुशुर्भृशम् ५ इंद्रोनवज्रंजगृहेविलज्जितश्च्युतंस्वहस्तादरिसंनिधौपुनः ॥ तमाहवृत्रोहरआत्तवज्रोजहिस्वशत्रुंनविषादकालः ६ युयुत्सतांकुत्रचिदाततायिनांजयः सदैकत्रनवैपरात्मनाम् ॥ विनैकमुत्पातिलयस्थितीश्वरंसर्वज्ञमाद्यंपुरुषंसनातनम् ७ लोकाःसपालायस्येमेश्वसंतिविवशावशे ॥ द्विजाइवशिचाबद्धाःसका लइहकारणम् ८ ओजःसहोबलंप्राणममृतंमृत्युमेवच ॥ तमज्ञायजनोहेतुमात्मानंमन्यतेजडम् ९ यथादारुमयीनारीयथायंत्रमयोमृगः ॥ एवंभूतानि मघवन्नीशतंत्राणिविद्धिभोः १०

चूर्णिका

आत्मात्मजदारगेहादिषु हेनाथ मेचित्तस्यासक्तिर्माभूयात् २७ इतिषष्ठेएकादशः ॥ ११ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेनृपएवंयुद्धेदेहंजिहासुः वृत्रः विजयात् मृत्युं वरंम न्यमानः शूलं प्रगृह्य सुरेंद्रं अभ्यपतत् १ ततः युगांताग्निवत् कठोरजिह्वंशूलंभ्रामयित्वाहेपापहतोसि इत्युक्त्वाशूलं प्राक्षिपत् २ वज्रीतत् प्रेक्ष्यशूलंतद्भुजंचवज्रेण अ च्छिनत् ३ तदाछिन्नैकबाहुः वृत्रः परिघेणइंद्रंइभंचहनौ तताड ततइंद्रहस्तात् वज्रंपपात ४ तदावृत्रस्यतत्कर्मसर्वेअपूजयन् इंद्रस्यसंकटंवीक्ष्यदेवाः चुक्रुशुः ५ इंद्रः च्युतं वज्रंलज्जयापुनर्नजगृहे तदवलोक्यवृत्रः आह हेइंद्रवज्रेणमांजहि ६ अयंविषादकालःन परमात्मानंईश्वरंविना अन्येषांयुयुत्सतां सदाजयपराजयप्रमाणंन हेइंद्रइमेसपालाः लोकाः यस्यवशेस्थिताः संतः चेष्टंते सःकालःजयादौकारणंतंकालंअज्ञायजयादौदेहं हेतुंमन्यते ८ ९ हेमघवन् यथादारुमयीस्त्री एवंभूतानिईं शतंत्राणिविद्धि १०

॥४९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ननुस्वारंभकप्रधानपुरुषादितंत्राणीतियुक्तंतत्राह। पुरुषइति। व्यक्तंमहत्तत्त्वं ।आत्माऽहंकारः। (अस्यविश्वस्यसृष्ट्यादौनशक्नुवंति)११ ननुस्वकर्मद्वाराजीवएवसृष्ट्यादिहेतुरितिमीमांसकामन्यंतेतत्राह।
(अविद्वानिति ।) एवमविद्वान् अनीशमेवात्मानंईश्वरं स्वतंत्रंमन्यते ननु पित्रादयः स्रष्टारोदृश्यंते व्याघ्रादयस्तु हंतारस्तत्राह । भूतैरिति । स्वयंईश्वरः १२ ननुत्वयापराजितस्यममजयादिशंकैव
टीका नास्ति किमितिमांबलात्युद्धेप्रवर्तयसितत्राह आयुरिति । तत्काले जयादिकाले । विपर्यया अकीर्त्यादयः १३ यस्मादेवंसर्वमीश्वराधीनंतस्मात्समःस्यात्हर्षविषादहीनोभवेत् १४ । समदृष्टावुपायमाह
। सत्त्वमिति हर्षादिभिर्नबध्यते १५ हर्षविषादनिवृत्त्यैतवाहमेवगुरुरित्याह । पश्येति । वृक्णमायुधंभुजश्चयस्य । १६ । अनियतत्वंद्यूतरूपकेणोपसंहरति । (प्राणेति ।) प्राणएवग्लहः पणोयस्मिन् ।
इषवएवअक्षाःपाशकायत्र । वाहनान्येवइतस्ततश्चाल्यमानानिआसनानिफलकायस्मिन् । १७ ॥ गतालीकंनिष्कपटं (वृत्रस्यवचः अपूजयत्सभाजयामास)१८ भक्तः सर्वात्मनाजगदीश्वरं सेवितवान
 सि । १९ । २०(सत्त्वात्मनिशुद्धसत्त्वमूर्तौ) २१ तस्यतव (अमृताब्धाविवपरमानंदेविहरतः) खातकोदकैः गर्तादिजलोपमैः (क्षुद्रैः) स्वर्गादिभिः किम् २२ युधांसंग्रामाणांपतीमुख्यौ २३

पुरुषःप्रकृतिर्व्यक्तमात्माभूतेंद्रियाशयाः ॥ शक्नुवंत्यस्यसर्गादौनविनायदनुग्रहात् ११ अविद्वानेवमात्मानंमन्यतेऽनीशमीश्वरम् ॥ भूतैःसृजतिभूतानिग्रसते श्लोकाः
तानितैःस्वयम् ॥ १२ ॥ आयुः श्रीः कीर्तिरैश्वर्यमाशिषः पुरुषस्ययाः ॥ भवंत्येवहितत्कालेयथानिच्छोर्विपर्ययाः १३ तस्मादकीर्तियशसोर्जयापजययो
रपि ॥ समःस्यात्सुखदुःखाभ्यांमृत्युजीवितयोस्तथा १४ सत्त्वंरजस्तमइतिप्रकृतेर्नात्मनोगुणाः ॥ तत्रसाक्षिणमात्मानंयोवेदसनबध्यते १५ पश्यमांनि ११/२३
र्जितंशक्रवृक्णायुधभुजंमृधे॥घटमानंयथाशक्तितवप्राणजिहीर्षया १६प्राणग्लहोयंसमरइष्वक्षोवाहनासनः॥तत्रनज्ञायतेऽमुष्यजयोमुष्यपराजयः १७ ॥
॥ श्रीशुकउवाच ॥ ॥ इंद्रोवृत्रवचःश्रुत्वागतालीकमपूजयत् ॥ गृहीतवज्रःप्रहसंस्तमाहगतविस्मयः १८ ॥ ॥ इंद्रउवाच ॥ ॥ अहोदानवसिद्धोसि
यस्यतेमतिरीदृशी ॥ भक्तःसर्वात्मनात्मानंसुहृदंजगदीश्वरम् १९ भवानतार्षीन्मायांवैवैष्णवींजनमोहिनीम्॥यद्विहायासुरंभावंमहापुरुषतांगतः२०खल्वि
दंमहदाश्चर्यंयद्रजःप्रकृतेस्तव ॥ वासुदेवेभगवतिसत्त्वात्मनिदृढामतिः २१ यस्यभक्तिर्भगवतिहरौनिःश्रेयसेश्वरे ॥ विक्रीडतोऽमृतांभोधौकिंक्षुद्रैःखातको
दकैः २२ ॥ ॥ श्रीशुकउवाच ॥ ॥ इतिब्रुवाणावन्योन्यंधर्मजिज्ञासयानृप ॥ युयुधातेमहावीर्याविंद्रवृत्रौयुधांपती २३

चूर्णिका किंच पुरुषप्रकृत्यादयः यदनुग्रहाद्विना अस्यविश्वस्यसर्गादौनशक्नुवंति ११ एवं अविद्वान् पुमान् अनीशंदेहंस्वतंत्रं मन्यते १२ किंच ईश्वरः भूतैःभूतानिसृजतेतैर्ग्रसते व
किंच जयादिकाले पुरुषस्य आयुः श्रीकीर्त्यादयोभवंति १३ तस्मात् जयपराजययोःमृत्युजीवितयोश्चसुखदुःखाभ्यांसमता स्यात् १४ १५ हेशक्रमृधेनिर्जितमपितवप्राण
जिहीर्षया घटमानंमांपश्य १६ हेइंद्र अयंप्राणपणःसमरःअत्रअमुष्यजयःअमुष्यपराजयोवेतिनज्ञायते १७ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् इंद्रःवृत्रवचःश्रुत्वा
निष्कपटंतंसंपूज्य ततः गृहीतवज्रः सन्तंआह १८अहो दानव सिद्धोसि त्वंहरिभक्तोसि १९ भवान् वैष्णवीं मायां अतार्षीत् यतः एवंतेभगवति भक्तिरस्ति २० २१ २२
॥ ॥ श्रीशुकउवाच ॥ ॥ एवं अन्योन्यंब्रुवाणौ इंद्रवृत्रौ युयुधाते २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

हेमारिपश्रेष्ठनृप । (आविध्यभ्रामयित्वा) २४ (करभोपमंहस्तिहस्ताभं । करभःकरिपोतेचतत्करेइत्यभिधानात्) । २५ उत्कृत्तेमूलेययोस्ताभ्यां । रक्तंस्रवतीतितया । गोत्रः पर्वतः । २६ कृत्वा धराभित्यादेर्जग्रासेतितृतीयेनान्वयःनभोवद्गंभीरेणवक्रेण । लेलिहःसर्पस्तद्वदुल्बणयाजिह्वया २७ कलकल्पाभिर्मृत्युतुल्यकरालाभिःग्रसन्निवचालयन्(अतिमात्रमहाकायः भृशन्नृहद्वपुः) २८ निर्जरयन्चूर्णयन्।२९ महाप्राणोमहाबलःमहावीर्योमहाप्रभावः महासर्पोऽजगरोद्विपंगजम् ३०।३१ महापुरुषेण कवचरूपेणश्रीनारायणेन संनद्धोदंशितः । योगबलेनमायाबलेनच । बलभिदिंद्रः। उच्चकर्तचिच्छेद। ३२ तदेवाहतस्यकंधरंकंधराम् आशुवेगः अतिवेगवान्। ज्योतिषांसूर्यादीनांअयनेदक्षिणोत्तरगतिरूपेसंवत्सरेयोऽहर्गणः षष्ट्युत्तरशतत्रयात्मकः तावताऽहर्गणेनवार्त्रहत्येवृत्रहत्यायोगेकालेन्यपातयत् । यद्वास्वार्थेतद्धितः । वृत्रहत्यायांवृत्रहनननार्थम् परिवर्तमान इत्यर्थः । ३३ वार्त्रघ्नलिंगै-(-मंत्रै-)-वृत्रहंतुर्वीर्यप्रकाशकैः । ("वार्त्रहत्यायशवसेपृतनाषाह्यायचे"त्याद्यैस्तमिंद्रमभिष्टुवानाः प्रतिष्टुवंतः ३४ अलोकंलोकातीतंभगवंतं ३५ इतिषष्ठस्कंधेटीकायांद्वादशोध्यायः १२ ॥

श्लोकाः २४—३५

आविध्यपरिघंवृत्रःकार्ष्णायसमरिंदमः ॥ इंद्रायप्राहिणोद्घोरंवामहस्तेनमारिष २४ सतुवृत्रस्यपरिघंकरंचकरभोपमम् ॥ चिच्छेदयुगपद्देवोवज्रेणशतपर्वणा २५ दोर्भ्यामुत्कृत्तमूलाभ्यांबभौरक्तस्रवोऽसुरः ॥ छिन्नपक्षोयथागोत्रःखाद्भ्रष्टोवज्रिणाहतः २६ कृत्वाधरांहनुंभूमौदैत्योदिव्युत्तरांहनुम् ॥ नभोगंभीरवक्त्रेणलेलिहोल्बणजिह्वया२७दंष्ट्राभिःकालकल्पाभिर्ग्रसन्निवजगत्त्रयम्॥अतिमात्रमहाकायआक्षिपंस्तरसागिरीन् २८ गिरिराट्पादचारीवपद्भ्यांनिर्जरयन्महीं जग्राससससमासाद्यवज्रिणंसहवाहनम् २९ महाप्राणोमहावीर्योमहासर्पइवद्विपम् ॥ वृत्रग्रस्तंतमालोक्यसप्रजापतयःसुराः ३०हाकष्टमितिनिर्विण्णाश्चुक्रुशुः समहर्षयः॥निगीर्णोप्यसुरेंद्रेणनममारोदरंगतः ३१ महापुरुषसंनद्धोयोगमायाबलेनच॥ भित्त्वावज्रेणतत्कुक्षिंनिष्क्रम्यबलभिद्विभुः ॥ उच्चकर्तशिरःशत्रोर्गिरिशृंगमिवौजसा ३२ वज्रस्तुतत्कंधरमाशुवेगःकृंतन्समंतात्परिवर्तमानः॥ न्यपातयत्तावदहर्गणेनयोज्योतिषामयनेवार्त्रहत्ये ३३ तदाचखेदुंदुभयोनिनेदुर्गंधर्वसिद्धाःसमहर्षिसंघाः॥ वार्त्रघ्नलिंगैस्तमभिष्टुवानामंत्रैर्मुदाकुसुमैरभ्यवर्षन् ३४ वृत्रस्यदेहान्निष्क्रांतमात्मज्योतिररिंदम॥पश्यतांसर्वलोकानामलोकंसमपद्यत ३५इतिश्रीभागवतेमहा ८ षष्ठस्कंधेवृत्रवधोनामद्वादशोऽध्यायः १२ ॥

चूर्णिका

वृत्रः परिघेणइंद्रंअताडयत् २४ ततः इंद्रः तस्यपरिघंवामकरंच चिच्छेद २५छिन्नहस्तः वृत्रः अधरोष्ठंदिविकृत्वाभूमौउत्तरोष्ठंकृत्वादंष्ट्राभिःजगत्त्रयंग्रसन्निव २६ २७२८ ऐरावतेनसहवज्रिणं जिह्वयागृहीत्वा अगिलत् २९ वृत्रग्रस्तइंद्रंआलक्ष्यसर्वेदेवाद्याः चुक्रुशुः ३० इंद्रः नारायणकवचेनसन्नद्धःनममार ३१ किंच वज्रेणतत्कुक्षिं भित्त्वानिष्क्रम्यशत्रोः शिरः उच्चकर्त ३२ सवज्रः परमवेगवान् सन्वर्षैकेनदत्रशिरः न्यपातयत् ३३ तदाखेदुंदुभयोनेदुर्गंधर्वादयः कुसुमैः अभ्यवर्षन् ३४ सर्वेइंद्रं अस्तुवन् वृत्रदेहान्निर्गतं आत्मज्योतिः सर्वेषांपश्यतांभगवंतं समपद्यत ३५ ॥ इतिषष्ठेद्वादशः ॥ १२ ॥ ॥

---

१ वार्त्रहत्यायशवसेपृतनाषाह्यायच। इंद्रत्वावर्तयामसि। इतिऋक्।भाष्यं।वृत्रोयेनशवसाहन्यते तद्वार्त्रहत्यंशवस्तस्मैवार्त्रहत्यायशवसेबलाय । पृतनाषाह्यायच । पृतनाःसेनायेनशवसासह्यंते अभिभूयते तत्पृतनाषाह्यम् तस्मैतदर्थम् सहिरत्राभिभवार्थः हेइंद्रत्वात्वाम् आवर्तयामसि आवर्तयामइति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्रयोदशेतुवृत्रस्यब्रह्महत्यामहाभयात्। चिरंनष्टोऽवितःशक्रोविष्णुनेतिनिरूप्यते १ (हेभूरिदबहुप्रद). अनिर्वृतेंद्रियंशक्रंअपृष्ट्वास्वयमेवप्रतिजग्मुः २ हरेरिंद्रस्य३तस्येंद्रस्यदुःखहेतुंवक्तुंप्रस्तावकथामाह।
वृत्रविक्रमेत्यादिना। आर्थयन्प्रार्थयंत। वृत्रद्धधात्ब्राह्मणवधाद्भीतः सन्। ४। एनः पापंविभक्तंविभज्यगृहीतं। मार्ज्मिशोधयामि। ५। ६। ७ (यस्यनारायणस्य) ८ (सब्रह्मविरिंच्यसहितं) ९
वृषाकपिंमिंद्रं। १० तयादेवादिभिःकारितयास्मेत्यवधारणे इंद्रएवतापमसहत् नान्यः अमुंमिंद्रंनिर्वृतिर्नाविशत्। ननुधैर्यादिगुणयुक्तस्यकुतोऽनिर्वृतिस्तत्राह। ह्रीमंतंलज्जावंतंवाच्यतांनिंद्यतां। ११
यक्ष्मग्रस्तांक्षयरोगव्याप्तां। १२ मीनस्येवगंधोयस्यसमीनगंधिः सचासावसुश्चश्वासवायुस्तस्यगंधेन। १३ प्रागुदीचीं (ऐशानीं) दिशंगतःसन्तूर्णंमानसंसरः (प्रविष्टः) १४

॥५२॥ ॥श्रीशुकउवाच॥ ॥ वृत्रेहतेत्रयोलोकाविनाशक्रेणभूरिद ॥ सपालाह्यभवन्सद्योविज्वरानिर्वृतेंद्रियाः॥१॥ देवर्षिपितृभूतानिदैत्यादेवानुगाःस्वयम्॥ प्रति
जग्मुःस्वधिष्ण्यानिब्रह्मेशेंद्रादयस्ततः २ ॥ राजोवाच ॥ इंद्रस्यानिर्वृतेर्हेतुंश्रोतुमिच्छामिभोमुने ॥ येनासन्सुखिनोदेवाहरेर्दुःखंकुतोभवत् ॥ ३ ॥
॥ श्रीशुकउवाच ॥ ॥ वृत्रविक्रमसंविग्नाःसर्वेदेवाःसहर्षिभिः ॥ तद्वधायार्थयन्निंद्रंनैच्छद्भीतोबृहद्वधात् ४ ॥ ॥ इंद्रउवाच ॥ ॥ स्त्रीभूजलद्रु
मैरेनोविश्वरूपवधोद्भवम् ॥ विभक्तमनुगृह्णद्भिर्वृत्रहत्यांक्वमार्ज्म्यहम् ५ ॥श्रीशुकउवाच ॥ ॥ ऋषयस्तदुपाकर्ण्यमहेंद्रमिदमब्रुवन् ॥ याजयिष्या
मभद्रंतेहयमेधेनमास्मभैः ६ हयमेधेनपुरुषंपरमात्मानमीश्वरम् ॥ इष्ट्वानारायणंदेवंमोक्ष्यसेपिजगद्वधात् ७ ब्रह्महापितृहागोघ्नोमातृहाचार्य
हाघवान् ॥ श्वादःपुल्कसकोवापिशुद्ध्येरन्यस्यकीर्तनात् ८ तमश्वमेधेनमहामखेनश्रद्धान्वितोस्माभिरनुष्ठितेन ॥ हत्वापिसब्रह्मचराचरंत्वंनलिप्य
सेकिंखलनिग्रहेण ॥९ ॥ ॥ श्रीशुकउवाच॥ ॥ एवंसंचोदितोविप्रैर्मरुत्वानहनद्रिपुम् ॥ ब्रह्महत्याहतेतस्मिन्नाससादवृषाकपिम् १० तयेंद्रः
स्मासहत्तापंनिर्वृतिर्नामुमाविशत्॥ह्रीमंतंवाच्यतांप्राप्तंसुखयंत्यपिनोगुणाः ११ तांददर्शानुधावंतींचांडालीमिवरूपिणीम्॥जरयावेपमानांगींयक्ष्मग्रस्ता
मसृक्पटाम् १२ विकीर्यपलितान्केशांस्तिष्ठतिष्ठेतिभाषिणीम्॥मीनगंध्यसुगंधेनकुर्वंतीमार्गदूषणम् १३ नभोगतोदिशःसर्वाःसहस्राक्षोविशांपते
॥ प्रागुदीचींदिशंतूर्णंप्रविष्टोनृपमानसम् ॥ १४ ॥

श्लोकाः १/१४

चूर्णिका

॥ श्रीशुकउवाच ॥ ॥ एवंवृत्रेहतेसतिइंद्रंविनासर्वे देवर्षिगणाद्याःसुखिनःसंतःस्वस्थानानिजग्मुः १ २ ॥ ॥ राजोवाच ॥ ॥ येनदेवाद्याः सुखिनः
अभवन् तेनइंद्रस्यकुतोदुःखं अभवत् तत् श्रोतुमिच्छामि ३ ॥ ॥ श्रीशुकउवाच ॥ ॥ देवाः वृत्रात्भीताः तद्वधायइंद्रं प्रार्थयन् ४ तदाइंद्रः उवाच हेदेवर्षयः
विश्वरूपवधोद्भवंएनःस्त्रीभूजलद्रुमैर्विभज्यगृहीतं अधुनाइमांवृत्रहत्यांक्वमार्ज्मि ५ ॥ ॥ श्रीशुकउवाच ॥ ॥ ततः ऋषयः इंद्रवचः श्रुत्वाऊचुः हेइंद्रहयमेधेन त्वांया
जयिष्यामः माभैः ६ हयमेधेन नारायणंइष्ट्वाजगद्वधादपिमोक्ष्यसे ७ ब्रह्महापितृहागोघ्नोमातृहाचार्यहाघवान् श्वादःपुल्कसकोवापिशुध्येरन्यस्यकीर्तनात् ८ ९ ॥ ॥
श्रीशुकउवाच ॥ ॥इत्थंब्राह्मणाज्ञयारिपुं अहनत् तदैव ब्रह्महत्या इंद्रं आससार १० इंद्रः तांचांडालीमिव असृक्पटांमीनगंधांधावंतीं आलोक्य ब्रह्मांडंभ्रमित्वामान
ससरोवरंप्रविष्टः ११ १२ १३ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सइंद्रःसहस्रंवर्षाणिपुष्करनालस्यतंतून्प्रतिआवसत् कथंभूतःनलब्धोभोगोयेनसः कुतःयत् यस्मात्इहजलेवसन् अग्निर्दूतश्चस्वयं।अग्नेश्चस्वदूतस्यहविर्भागान्नेतुःजलेप्रवेशासंभवादलब्धभोजनइत्यर्थः।पाठांत रेनलब्धोयज्ञभागोयेनसः१५त्रिणाकं नअकंदुःखंयस्मिन्नितिनाकंपुण्यलोकःतृतीयंनाकंस्वर्गं । ननुमनुष्यस्य कुतः स्वर्गराज्यंतत्राह । विद्योपासनातदादिभिरनुभावःस्वर्गपालनसामर्थ्यंयस्यसः । तर्हित स्मिन्सतिकथमिंद्रस्यपुनःस्वर्गप्राप्तिस्तत्राह । सनहुषः संपदैश्वर्याभ्यांयोमदस्तेनांधाबुद्धिर्यस्यसः । इंद्रपत्न्याशच्यातिरश्चांगतिंसर्पयोनिंनीतःउपायेनप्रापितः । एवंव्याख्यायते । नहुषः किलकदाचिदिंद्राणीमुवाचइंद्रस्तावदहंअतस्त्वंमांभजेति तयाचावेदितवृत्तांतोबृहस्पतिस्तामुवाच । ब्राह्मणवाह्यशिबिकामारुह्यआगतंत्वांभजिष्यामीतिब्रूहि।ततोसौब्रह्मशापात्पतिष्यतीति तयाचतथोक्तो नहुषोऽगस्त्यादीन्शिबिकांवाहयामास । तदाचशीघ्रंसर्पसर्पेत्यगस्त्यंपदापस्पर्श तेनसर्पोभवेतिशप्तोमहासर्पोऽजगरोऽभूदिति १६ ततइंद्रः स्वर्गंगतः प्राप्तः । कथंभूतः। ब्रह्मगिराब्राह्मणवाक्येनोपहूतः सन्ऋतंभरः सत्यपालकोहरिस्तस्यध्यानेननिवारितंअघंयेन । प्रागपितुपापोब्रह्मवधस्तमिंद्रंनाभ्यभूत् । तस्याभिभवंनाकरोत् । कुतः दिग्देवतयाप्रागुदीच्यांदिशिस्थितया देवतयाश्रीरुद्रेण (हतौजा हतबलः । विष्णुपत्न्याकमलवासिन्यालक्ष्म्या) अवितंरक्षितंसंतम् (विष्णुपद्येतिपाठेमानससरसिस्थितयागंगया) १७ । पुरुषस्यहरेराराधनंयस्मिन्तेन १८ सर्वदेवमयआत्मामूर्तिर्यस्यतस्मिन् वेद मयात्मनीतिवापाठः । ब्रह्मवादिभिर्विततेऽनुष्ठिते अश्वमेधमहेंद्रेणेज्यमानेपुरुषेसति । १९ तेनैवपुरुषेणैवशून्यायनीतः निःशेषंनाशितइत्यर्थः २० अधिक्रतायज्ञायेनतं २१ पाठादिविधातुमाख्यानंस्तौ ति इदमिति । प्रक्षाल्यतेअनेनेतिप्रक्षालनंतीर्थपदस्यानुकीर्तनंयस्मिन्। (अतस्तीर्थेभ्योधिकमेतत्।) भक्तेरुच्छ्रयोयस्मिन्। भक्तजनानामनुवर्णनंयस्मिन् महेंद्रस्यमोक्षोयस्मिन् । मरुत्वतोविशेषेणजयो यत्र २२ इंद्रियं तत्पाटवकरम् इंद्रस्यसंबंधीतिवा । आयुषंआयुष्यम् २३ ॥ इतिषष्ठस्कंधेटीकायांत्रयोदशोध्यायः १३ ॥

॥५३॥

श्लोकाः १५—२३

सआवसत्पुष्करनालतंतूनलब्धभोगोयदिहाग्निदूतः ॥ वर्षाणिसाहस्रमलक्षितोंतःसंचिंतयन्ब्रह्मवधाद्विमोक्षम् १५ तावत्त्रिणाकंनहुषःशशासविद्यातपोयो गबलानुभावः ॥ ससंपदैश्वर्यमदांधबुद्धिर्नीतस्तिरश्चांगतिमिंद्रपत्न्या १६ ततोगतोब्रह्मगिरोपहूतऋतंभरध्याननिवारिताघः ॥ पापस्तुदिग्देवतयाहतौजा स्तंनाभ्यभूदवितंविष्णुपत्न्या १७ तंचब्रह्मर्षयोभ्येत्यहयमेधेनभारत ॥ यथावद्दीक्षयांचक्रुःपुरुषाराधनेनह १८ अथेज्यमानेपुरुषेसर्वदेवमयात्मनि ॥ अश्व मेधेमहेंद्रेणवितते ब्रह्मवादिभिः ॥ १९ सवैत्वाष्ट्रवधोभूयानपिपापचयोनृप ॥ नीतस्तेनैवशून्यायनीहारइवभानुना २० सवाजिमेधेनयथोदितेनविताय मानेनमरीचिमिश्रैः ॥ इष्ट्वाधियज्ञंपुरुषं पुराणमिंद्रोमहानासविधूतपापः २१ इदंमहाख्यानमशेषपाप्मनांप्रक्षालनंतीर्थपदानुकीर्तनम् ॥ भक्त्युच्छ्रयं भक्तजनानुवर्णनंमहेंद्रमोक्षंविजयंमरुत्वतः२२पठेयुराख्यानमिदंसदाबुधाशृण्वंत्यथो पर्वणिपर्वणींद्रियम्॥धन्यंयशस्यंनिखिलाघमोचनंरिपुंजयंस्वस्त्ययनं तथायुषम्२३इतिश्रीभागवतेमहा०षष्ठस्कंधेइंद्रविजयोनामत्रयोदशोध्यायः १३ ॥

चूर्णिका

तत्रपुष्करनालतंतुषु प्रविश्यब्रह्मवधात् मोक्षंचिंतयन् वर्षसहस्रंउवास १५ तावत्नहुषःत्रिणाकंशशास सः इंद्राण्यातिरश्चांगतिं नीतः सन् ब्रह्मशापात्अजगरोभूत् १६ १७ अथब्रह्मर्षयः तत्रएत्यइंद्रायदीक्षांदत्त्वाहयमेधंकारयित्वा ब्रह्मवधात् मोचयामासुः १८ १९ २० सः मरीचिप्रभृतिभिः यथोदितवाजिमेधेनयज्ञपतिं इष्ट्वा विधूतपापः आस २१ इदं आख्यानं महेंद्रमोक्षंमरुत्वतःविजयं अशेषपाप्मनांक्षालनंयेपठेयुः पर्वणिपर्वणियेशृण्वंति तेषां धन्यंयशस्यं निखिलाघमोचनंरिपुं जयं स्वस्त्ययनं तथायुष्यंभवति २२ २३ इतिषष्ठेत्रयोदशः ॥ १३ ॥

॥५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वृत्रस्यज्ञानभक्त्यादिश्रुत्वापृष्टःपरीक्षिता । हेतुमाहचतुर्भिस्तत्प्राग्जन्मचरितोक्तिभिः ॥१॥ चतुर्दशेतुसहस्राकृच्छ्रलब्धसुतेमृते । चित्रकेतोरतिस्नेहादतिशोकोनिरूप्यते ॥२॥ रजस्तमश्चस्वभावोयस्य १।२
भक्तेर्दुर्लभत्वंप्रपंचयतित्रिभिः । रजोभिरिति पार्थिवैरजोभिः परमाणुभिःसमसंख्याताअनंताइत्यर्थः। जंतवोजीवाः तेषांमध्येयेकेचनकतिपयेश्रेयोधर्ममीहंतेकुर्वंति। ३ मुच्येतगृहादिसंगाद्विमुच्येत सिध्य
तितत्त्वंजानाति ४ । ५ । ६ । (अत्रास्माकमयंसंशयोस्तिअतःश्रोतुंकौतूहलंवर्तते ।) नचेंद्राभियाकृष्णंशरणंगतइत्याह । यः पौरुषेणेति । ७। ८ यथायथावच्छृणु ९। १० भार्यासहस्राणांदशसहस्रा
णिकोटिरित्यर्थः । सांतानिकः स्वयंसंतानार्होपिपुत्रोत्पादनसमर्थोपितासुसंततिंनलेभे । सर्वास्ता (आश्चर्यकरेण) दैवयोगेन वंध्याएवमिलिताइतिभावः ११ तदेवाह वंध्यापतेरिति १२।१३। १४ ।

॥५४॥ श्लोकाः १/१४

॥ परीक्षिदुवाच ॥ ॥ रजस्तमःस्वभावस्यब्रह्मन्वृत्रस्यपाप्मनः ॥ नारायणेभगवतिकथमासीद्दृढामतिः १ देवानांशुद्धसत्त्वानामृषीणांचामलात्म
नाम् ॥ भक्तिर्मुकुंदचरणेनप्रायेणोपजायते २ रजोभिःसमसंख्याताःपार्थिवैरिहजंतवः ॥ तेषांयेकेचनेहंतेश्रेयोवैमनुजादयः ३ प्रायोमुमुक्षवस्तेषांकेच
नैवद्विजोत्तम॥ मुमुक्षूणांसहस्रेषुकश्चिन्मुच्येतासिध्यति ४ मुक्तानामपिसिद्धानांनारायणपरायणः ॥ सुदुर्लभःप्रशांतात्माकोटिष्वपिमहामुने ५ वृत्रस्तु
सकथंपापःसर्वलोकोपतापनः॥ इत्थंदृढमतिःकृष्णआसीत्संग्रामउल्बणे ६ अत्रनःसंशयोभूयाञ्छ्रोतुंकौतूहलंप्रभो ॥ यःपौरुषेणसमरेसहस्राक्षमतोषय
त् ७॥ ॥ सूतउवाच ॥ ॥ परीक्षितोथसंप्रश्नंभगवान्बादरायणिः ॥ निशम्यश्रद्दधानस्यप्रतिनंद्यवचोऽब्रवीत् ॥ ८ ॥ ॥ श्रीशुकउवाच ॥
॥ शृणुष्वावहितोराजन्निइतिहासमिमंयथा ॥ श्रुतंद्वैपायनमुखान्नारदाद्देवलादपि ९ आसीद्राजासार्वभौमःशूरसेनेषुवैनृप ॥ चित्रकेतुरितिख्यातोयस्या
सीत्कामधुग्मही १० तस्यभार्यासहस्राणांसहस्राणिदशाभवन् ॥ सांतानिकश्चापिनृपोनलेभेतासुसंततिम् ११ रूपौदार्यवयोजन्मविद्यैश्वर्यश्रियादिभिः
॥ संपन्नस्यगुणैःसर्वैश्चिंतावंध्यापतेरभूत् १२ नतस्यसंपदःसर्वामहिष्योवामलोचनाः ॥ सार्वभौमस्यभूश्चेयमभवन्प्रीतिहेतवः १३ तस्यैकदातुभवनमंगि
राभगवानृषिः॥ लोकाननुचरन्नेतानुपागच्छद्यदृच्छया १४

चूर्णिका

॥ ॥ राजोवाच ॥ ॥ हेब्रह्मन्रजस्तमःस्वभावस्यपाप्मनः वृत्रस्यभगवति दृढामतिः कथं आसीत् १ देवादीनामपिमुकुंदचरणेभक्तिः प्रायः नजायते २ किंच
इहजीवाः अनंताः संति तेषांमध्ये केचन धर्मंकुर्वंति तेषांमध्येपिकेचनमुमुक्षवः तेष्वपिकश्चित्संगात्मुच्यते ३ ४ मुक्तानामपिकश्चित्नारायणपरः ५ एवं सति
वृत्रः पापः सन् कृष्णे दृढमतिः कथं आसीत् ६ अत्र नः संशयोस्तितंछिंधि ७ ८ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन्त्वंव्यासनारददेवलमुखात्श्रुतंइतिहासंशृणु
९ शूरसेनेषुदेशेषु कश्चिच्छूरः चित्रकेतुसंज्ञकः सार्वभौमोराजासीत् १० तस्यएककोटिभार्याः आसन् तासु सः संततिं नलेभे ११ सर्वास्तावंध्याएवदैवयोगेनामिलि
ताः तस्यरूपादिभिः संपन्नस्यापिवंध्यापतेश्चिंताभूत् १२ तस्यसर्वाः संपदः प्रीतिहेतवःनाभवन् १३ एकदातस्यगृहे अंगिरानामऋषिः आगमत् १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपासीदत्तस्यसमीपमुपविवेश। समाहितःसंयतः । १५ । १६ अपिकिंअनामयमारोग्यम् । तथात्मनस्तवप्रकृतीनांस्वस्तिशुभंकिम्। प्रकृत्यधीनमेवहिराज्यमितिसदृष्टांतमाह । यथा महदाद्याभिः सप्त भिः प्रकृतिभिः पुमान्जीवोनित्यंगुप्तोभवति। नतुतद्व्यतिरेकेणक्षणमपितिष्ठति । तथाराजापि सप्तभिः"स्वाम्यमात्यौजनपदादुर्गंद्रविणसंचयाः । दंडोमित्रंचतस्यैताःसप्तप्रकृतयोमता" इत्युक्तलक्षणाभिर्नि त्यंगुप्तःसन् श्रेयआप्नुयादित्युत्तरेणान्वयः। तत्रस्वामीगुरुः स्वयंवा (मंत्रसहायोमित्रं । कर्मसहायोऽमात्यः दंडःसेना) १७ आत्मानंप्रकृतिषु अद्धासाक्षान्निधायतदनुवर्तिनंकृत्वाश्रेयोराज्यसुखं प्राप्नु यात् । प्रकृतीनांचसुखंराजाधीनमेवत्याह ।हेनरदेवतथाप्रकृतयोपिराज्ञा(नृपेणआहिताआधियासुताः) आहिताधयः निहितनिक्षेपाः धनैः समृद्धाभवंतीत्यर्थः । पाठांतरे आसमंततोहताधयोनिरस्तमनो दुःखाभवंति ।१८ अपिकिंवशवर्तिनः संति। तत्रप्रजाः कृषीवलादयः श्रेण्यः समयविशेषेणसंघशोवर्तमानावणिक्प्रभृतयः । पौराः पुरवासिनः । जानपदास्तत्तद्देशाधिकारिणः १९ तवमनः स्ववशेवान वेत्यर्थात्पृच्छति । यस्यात्मामनः अनुवशःअनुवर्तीआधीनः स्यात्तस्यसर्वेइमेदारादयोवशगाभवंति । किंचलोकाश्चतस्यबलिंयच्छंति २० आत्मनोभवतआत्माअंतःकरणंनप्रीयतेनतुष्यतितर्हिकिंपर तोवास्वतोवा । अलब्धकामंत्वांलक्षये । (तत्रलिंगं । चिंतयेति) २१ । विदुषासर्वज्ञेनापि २२ अलब्धकामत्वंकथयन्पुत्रंयाचते भगवन्नितिचतुर्भिः २३ । २४ । अप्रजमपुत्रम्। क्षुत्तृड्भ्यामन्नपान ॥५५॥ कामम् अपरेस्रक्चंदनादयोयथानसुखयंति २५ पूर्वैः पित्रादिभिः सहगतंप्राप्तंतमःनरकंप्रजयायथातरेमतत्तथाविधेहि २६ ॥

श्लोकाः

तंपूजयित्वाविधिवत्प्रत्युत्थानार्हणादिभिः ॥ कृतातिथ्यमुपासीदत्सुखासीनंसमाहितः १५ महर्षिस्तमुपासीनंप्रश्रयावनतंक्षितौ ॥ प्रतिपूज्यमहाराज समाभाष्येदमब्रवीत् १६॥ ॥ अंगिराउवाच ॥ ॥ अपितेऽनामयंस्वस्तिप्रकृतीनांतथात्मनः ॥ यथाप्रकृतिभिर्गुप्तःपुमान्राजाचसप्तभिः १७ आत्मा नंप्रकृतिष्वद्धानिधायश्रेयआप्नुयात् ॥ राज्ञातथाप्रकृतयोनरदेवाहिताधयः १८ अपिदाराःप्रजामात्याभृत्याःश्रेण्योथमंत्रिणः ॥ पौराजानपदाभूपाआत्म १९
जावशवर्तिनः १९यस्यात्मानुवशश्चेत्स्यात्सर्वेतद्वशगाइमे ॥ लोकाःसपालायच्छंतिसर्वेबलिमतंद्रिताः २० आत्मनःप्रीयतेनात्मापरतःस्वतएववा॥लक्ष २६
येऽलब्धकामंत्वांचिंतयाशबलंमुखम् २१ एवंविकल्पितोराजन्विदुषामुनिनापिसः ॥ प्रश्रयावनतोभ्याहप्रजाकामस्ततोमुनिम् २२ चित्रकेतुरुवाच॥ ॥ भगवन्किंनविदितंतपोज्ञानसमाधिभिः ॥ योगिनांध्वस्तपापानांबहिरंतःशरीरिषु २३ तथापिपृच्छतोब्रूयाद्ब्रह्मन्नात्मनिचिंतितम् ॥ भवतोविदुषश्चा पिचोदितस्त्वदनुज्ञया २४ लोकपालैरपिप्रार्थ्याःसाम्राज्यैश्वर्यसंपदः ॥ ननंदयंत्यप्रजंमांक्षुत्तृट्कामामिवापरे २५ ततःपाहिमहाभागपूर्वैःसहगतंतमः ॥ यथातरेमदुस्तारंप्रजयातद्विधेहिनः २६

॥५५॥

चूर्णिका

तंराजापूजयामास १५ तदा अंगिराउवाच १६ हेराजन् तेस्वास्तिर्किं प्रजाः धर्मेणपालयंतंत्वांचिंताग्रःस्तंलक्षये १७ १८ १९ २० २१ २२ ॥ ॥ चित्रके तुरुवाच ॥ ॥ हेभगवन् तव किमपि अविदितं न तथापि वक्ष्ये २३ २४ लोकपालैः प्रार्थ्याः संपदः संति तथापि अप्रजं मां न नंदयंति २५ अतः पित्रादिभिः सहप्राप्तंनरकंयथाप्रजयातरेमतथाविधेहि २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(त्वाष्ट्रंत्वष्टृदेवताकं) २७ (राज्ञोमहिषीणांमध्येगुणैःश्रेष्ठा यज्ञोच्छिष्टंयज्ञशेषं २८ जन्मनाहर्षंमरणेनचशोकंप्रददातीतितथा । इतिएवमुक्त्वाययौ २९ । ३० । शूरसेनानामीशस्यतेजसावीर्येणयोगर्भः सववृधे । ३१ ३२ जातकंजातकर्म ३३ अर्बुदंदशकोट्यः । वेदेतुकोटिरेवार्बुदम् । नियुतंचप्रयुतंचार्बुदंचेतिप्रयुतानंतरंनिर्देशात् ३४ धन्यंधनकरम् आयुष्यंआयुष्करं महामनाःअत्युदारः । ३५ । ३६ । मोहस्यसमुद्भवोयस्मिन् प्रजाकामरूपोज्वरस्तापः ३७ दारइत्येकवचनमार्षं ३८ आनपत्येनअपुत्रत्वनिमित्तेन ३९ नगृहेसंमताबहुमतातां । यद्वागृहादाराः दारेष्वपिगृहाइत्यमरः नभार्येतिसंमतामित्यर्थः । ४०(स्वामिनः परिचर्ययाअभीक्ष्णंलब्धमानानांदासीनांकोनामसंतापः अतोवयंनकेवलंदास्यः किंतु)दास्यादासीयथातथादुर्भगाः ४१ नसंमतावृत्तिर्जीवनंयासां ४२

॥५६॥ श्लोकाः २७/४२

॥श्रीशुकउवाच॥ ॥ इत्यर्थितःसभगवान्कृपालुर्ब्रह्मणःसुतः॥श्रपयित्वाचरुंत्वाष्ट्रंत्वष्टारमयजद्द्विजः२७ज्येष्ठाश्रेष्ठाचयाराज्ञोमहिषीणांचभारतना॥म्नाकृतद्युतिस्तस्यैयज्ञोच्छिष्टमदाद्द्विजः २८ अथाहनृपतिंराजन्भवितैकस्तवात्मजः ॥ हर्षशोकप्रदस्तुभ्यमितिब्रह्मसुतोययौ २९ सापितत्प्राशनादेवचित्रकेतोरधारयत् ॥ गर्भंकृतद्युतिर्देवीकृत्तिकाग्नेरिवात्मजम्३० तस्याअनुदिनंगर्भःशुक्लपक्षइवोडुपः ॥ ववृधेशूरसेनेशतेजसाशनकैर्नृप ३१ अथकालउपावृत्तेकुमारःसमजायत ॥ जनयन्शूरसेनानांशृण्वतांपरमांमुदम् ३२ हृष्टोराजाकुमारस्यस्नातःशुचिरलंकृतः ॥ वाचयित्वाऽऽशिषोविप्रैःकारयामासजातकम् ३३तेभ्योहिरण्यंरजतंवासांस्याभरणानिच॥ग्रामान्हयान्गजान्प्रादाद्धेनूनामर्बुदानिषट् ३४ ववर्षकाममन्येषांपर्जन्यइवदेहिनाम् ॥ धन्यंयशस्यमायुष्यंकुमारस्यमहामनाः॥३५ कृच्छ्रलब्धेथराजर्षेस्तनयेनुदिनंपितुः ॥ यथानिःस्वस्यकृच्छ्राप्तेधनेस्नेहोन्ववर्धत३६मातुस्त्वतितरांपुत्रेस्नेहोमोहसमुद्भवः ॥कृतद्युतेःसपत्नीनांप्रजाकामोज्वरोभवत् ३७ चित्रकेतोरतिप्रीतिर्यथादारेप्रजावति॥नतथाऽन्येषुसंजज्ञेबालंलालयतोऽन्वहम्३८ताःपर्यतप्यन्नात्मानंगर्हयंत्योऽभ्यसूयया ॥ आनपत्येनदुःखेनराज्ञोऽनादरणेनच३९धिगप्रजांस्त्रियंपापांपत्युश्चागृहसंमताम् ॥ सुप्रजाभिःसपत्नीभिर्दासीमिवतिरस्कृताम्४०दासीनांकोनुसंतापःस्वामिनःपरिचर्यया॥अभीक्ष्णंलब्धमानानांदास्यादासीवदुर्भगाः४१एवंसंदह्यमानानांसपत्न्याः पुत्रसंपदा॥राज्ञोऽसंमतवृत्तीनांविद्वेषोबलवानभूत् ४२

चूर्णिका ॥५६॥

॥ ॥ श्रीशुकउवाच ॥ ॥ एवं राज्ञाप्रार्थितः अंगिराः त्वाष्ट्रंचरुंश्रपयित्वात्वष्टारं अयजत् २७ ततः सर्वस्त्रीणांमध्येज्येष्ठायाकृतद्युतिःतस्यैयज्ञोच्छिष्टंचरुंअदात् २८ आहच हेराजन् तवहर्षशोकप्रदःएकःपुत्रोभविष्यति इत्युक्त्वासःययौ २९ साचरुप्राशनात्चित्रकेतोःगर्भंअधारयत् ३० अथकाले कुमारः अजायत ३१ ३२ तदाहृष्टोराजाविप्रैः जातकंकारयित्वा ३३ तेभ्यः हिरण्यं ग्रामान्हयान् गजान् धेनूनांषडर्बुदानिअदात् ३४ अन्वहंमातापित्रोः स्नेहः पुत्रेअवर्द्धत ३५ ३६ अन्यस्त्रीणांप्रजाकामज्वरःअभवत् ३७ ताः आत्मानं गर्हयामासुः ३८ ३९ अहो अप्रजांस्त्रियंधिक्इत्यादि४० ४१ एवंसपत्न्याः पुत्रसंपदादह्यमानानांबलवान् विद्वेषः अभूत्४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मतिर्विवेकोयासांताः।गरंविषंदुर्मर्षाः।विद्वेषेणनष्टाअसहमानाः४३।४४धात्रींस्तनदायिनीं४५उद्वृत्तेतारकेकनीनिकेययोस्तेलोचनेयस्यतम्४६।४७विभ्रष्टाःशिरोरुहाअंबरेचयस्याःसा४८ताश्चसपत्न्योपि४९ अलक्षितःअंतकोमृत्युहेतुर्यस्यतम् अनुगताःप्रकृतयो अमात्यादयोयस्यसोऽनुप्रकृतिः ५०। बाष्पकलाभिरश्रुबिंदुभिरुपरोधतः संवृतत्वेन निरुद्धःकंठोयस्य उरुशुचाऽर्पितंबहुशोकेनव्याप्तम् एकमेवसंततिरूपम्। ५१ विसलंत्यः स्रजोयेभ्यस्तान्केशान्। ५२ आत्मसृष्टेरप्रतिरूपम् अननुरूपंचेष्टसे। तदेवाह। नुअहोपरेवृद्धेजीवति अपरस्यबालस्ययामृतिस्तत्। तदाहिवृद्धस्यसृष्टिसामर्थ्याभावेबालेचमृतेसति तवसृष्टिर्नष्टास्यादित्यर्थः। ननुसांप्रतंस्वसृष्टेर्विपरीतोस्मीतिचेत्तत्राह। विपर्ययः विपरीतोसिचेत्तर्हित्वंप्राणिनांअतिदुःखकारित्वाध्द्रुवः नित्यः परः शत्रुरासि नतुकृपालुरित्यर्थः५३ ननुजीवकर्मानुसारेणजन्मादिकुर्वतोममकोपराधस्तत्राहनहीति पुत्रेजीवत्येवपिताम्रियतेपितरिजीवत्येवपुत्रोजायते इतिचक्रमोनास्तिकर्माधीनत्वादितिचेत्तर्हिस्वकर्मभिरेवतज्जन्मादिकमस्तु किंत्वयाकृत्यं। ननुमयेश्वरेणविनाजडैःकर्मभिरिदंकथंसिध्येत्। भवतुनामतथापिनिजसर्गवृध्यैतेत्वयायःस्नेहपाशःकृतस्तमिमंस्वयमेवविवृश्चासिछिनत्सीत्यादिक्रोशाति। नह्येवंविधंदुःखंदृष्ट्वाकश्चिदपिपुत्रादिषुस्नेहंकरिष्यतीतिभावः ५४

॥५७॥ श्लोकाः ४३–५४

विद्वेषनष्टमतयःस्त्रियोदारुणचेतसः॥ गरंददुःकुमारायदुर्मर्षानृपतिंप्रति ४३ कृतद्युतिरजानंतीसपत्नीनामघंमहत्॥ सुप्तएवेतिसंचिंत्यनिरीक्ष्यव्यचरद्गृहे ४४ शयानंसुचिरंबालमुपधार्यमनीषिणी॥ पुत्रमानयमेभद्रेइतिधात्रीमचोदयत्४५साशयानमुपव्रज्यदृष्ट्वाचोत्तरलोचनम्॥ प्राणेंद्रियात्मभिस्त्यक्तंहतास्मीत्यपतद्भुवि ४६ तस्यास्तदाकर्ण्यभृशातुरंस्वरंघ्नंत्याःकराभ्यामुरउच्चकैरपि॥ प्रविश्यराज्ञीत्वरयाऽऽत्मजांतिकंददर्शबालंसहसामृतंसुतम् ४७ पपातभूमौपरिवृद्धयाशुचामुमोहविभ्रष्टशिरोरुहांबरा।ततोनृपांतःपुरवर्तिनोजनानराश्चनार्यश्चनिशम्यरोदनम् ४८ आगत्यतुल्यव्यसनाःसुदुःखितास्ताश्चव्यलीकंरुरुदुःकृतागसः॥ श्रुत्वामृतंपुत्रमलक्षितांतकंविनष्टदृष्टिःप्रपतन्स्खलन्पथि ४९ स्नेहानुबंधैधितयाशुचाभृशंविमूर्छितोऽनुप्रकृतिर्द्विजैर्वृतः॥ पपातबालस्यसपादमूलेमृतस्यविस्रस्तशिरोरुहांबरः ५० दीर्घंश्वसन्बाष्पकलोपरोधतोनिरुद्धकंठोनशशाकभाषितुम्॥ पतिंनिरीक्ष्योरुशुचार्पितंतदामृतंचबालंसुतमेकसंततिम्॥ जनस्यराज्ञीप्रकृतेश्चहृद्रुजंसतीदधानाविललापचित्रधा ५१ स्तनद्वयंकुंकुमगंधमंडितंनिषिंचतीसांजनबाष्पबिंदुभिः॥ विकीर्यकेशान्विगलत्स्रजःसुतंशुशोचचित्रंकुररीवसुस्वरम् ५२ अहोविधातस्त्वमतीवबालिशोयस्त्वात्मसृष्ट्यप्रतिरूपमीहसे॥ परेनुजीवत्यपरस्ययामृतिर्विपर्ययश्चेत्त्वमसिध्रुवःपरः ५३ नहिक्रमश्चेदिहमृत्युजन्मनोःशरीरिणामस्तुतदात्मकर्मभिः॥ यःस्नेहपाशोनिजसर्गवृद्धयेस्वयंकृतस्तेतमिमंविवृश्चसि ५४

चूर्णिका

तेननष्टमतयःदारुणचेतसःस्त्रियःकुमारायगरंददुः४३साकृतद्युतिःसपत्नीनांकर्मअजानतीबालःसुप्तएवेतिचिंतयतीगृहेव्यचरत् ४४बालंबहुकालंशयानंआलक्ष्यपुत्रमानयेतिधात्रींअचोदयत्४५साशयानंबालकंउपव्रज्यतंमृतंदृष्ट्वाहतास्मीतिउच्चैःशब्दंकृत्वाभुविन्यपतत् ४६तस्याःदीनंशब्दंश्रुत्वाराज्ञीत्वरयातदंतिकंआगत्यमृतंपुत्रंदृष्ट्वाभूमौपपातमुमोहशुशोच४७ ४८ततः अंतःपुरवर्तिनः नराःनार्यश्चरुरुदुःसपत्न्यश्चव्यलीकंरुरुदुः नृपःपुत्रं मृतं श्रुत्वापदेपदेप्रस्खलन् ४९ ५० तत्रागत्यबालस्यपादमूलेपतित्वा दीर्घंश्वसन्वाष्पकलयारुद्धकंठः भाषितुंनशशाक ५१ ततः राज्ञीशुचार्पितं पतिंमृतं पुत्रं चवीक्ष्य ५२ केशान् विकीर्यशुशोच आहच ५३ अहोविधातः त्वंअज्ञोसि यः आत्मासृष्टेःअननुरूपंचेष्टसे वृद्धेजीवतिसतिबालस्यमृतिरिति किंच एवंसति तवसृष्टिः नष्टास्यात् इत्यादि ५४

॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(विचक्ष्वपश्य ।) अप्रजदुस्तरम् अप्रजानांदुस्तरं ध्वांतंतमिस्त्रंअंजोऽनायासेनतरेम । अकरुणेनसह ५५ अशनयाक्षुधा (व्याप्तस्त्वंभुंक्ष्व) ५६ तनुजहेपुत्रनाहंप्रथमंत्वत्पार्श्वमागतासती तवमुग्ध स्मितंवक्त्रं-(-कमलं) ददृशोदृष्टवत्यस्मि । इदानीमपि गिरोनशृणोमि तर्हिकिं अपुनरन्वयम् पुनरागमनं यथानभवति तथापरलोकंअघृणेनयमेननीतः किंवागतोसि । ५७।५८।५९ । कश्मलंशोकंप्राप्तम् सर्वमनाथंज्ञात्वा सनारदःनारदेनसह । ६०इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेचतुर्दशोध्यायः१४ततःपंचदशेचित्रकेतोःशोकापनोदनम् । कृतंतत्त्वोपदेशेननारदेनांगिरोयुजा १॥ मृतकोपांतेशवसमीपे(पति तंतौमुनीऊचतुः) १ त्वंचास्यबंधूनांकतमः । सृष्टौप्रजारूपायां । अयंपुत्रः अहंचास्यपितेतिचेत्तत्राहतुः । पुरेति । येपूर्वजन्मनि पित्रादिरूपेणसंयुक्ताआसन् । तएवमरणेनवियुक्ताः संतोवर्तमानजन्मनि

॥५८॥ कदाचित्तस्यैवान्यस्यवा कलत्रादयः शत्रुमित्रादयोवाभवंतिअतोनायंनियमइतिभावः २ तमेवाभिप्रायंप्रकटयतः यथेति । स्रोतसः प्रवाहस्यवेगेनयथाप्रयांतिवियुज्यंते संयांतिसंयुज्यंते तथा कालवेगेन देहिनोजीवाअपि ३ तथाप्येतावंतंकालंममपुत्रोनाभूत् वार्धकेजातोमृतइतिदुःखमितिचेत्तत्राहतुः । यथाधानासुबीजेषुधानाःबीजांतराणिभवंति । कासुचित्कदाचिन्नभवंति । नोत्पद्यंते । नश्यंतिच । नतुभवंत्येवतिष्ठंत्येवेतिवानियमः । एवमेवभूतानिपुत्रादिरूपाणि भूतेषुपित्रादिषु । अतोधानानांजन्यजनकत्वेपि पितृपुत्रादिभावोनास्ति एवमत्रापीति नशोकः कार्यइतिभावः ४

त्वंतातनार्हसिचमांकृपणामनाथांत्यक्तुंविचक्ष्वपितरंतवशोकतप्तम् ॥ अंजस्तरेमभवताऽप्रजदुस्तरंयध्वांतंनयाह्यकरुणेनयमेनदूरम् ५५ उत्तिष्ठताततइमे शिशवोवयस्यास्त्वामाह्वयंतिनृपनंदनसंविहर्तुम् ॥सुप्तश्चिरंह्यशनयाचभवान्परीतोभुंक्ष्वस्तनंपिबशुचोहरनःस्वकानाम् ५६ नाहंतनूजददृशेहतमंगलातेमु ग्धस्मितंमुदितवीक्षणमाननाब्जम् ॥किंवागतोस्यपुनरन्वयमन्यलोकंनीतोघृणेननशृणोमिकलागिरस्ते ५७ ॥ ॥ श्रीशुकउवाच ॥ ॥ विलपंत्यामृतंपुत्र मितिचित्रविलापनैः ॥चित्रकेतुर्भृशंतप्तोमुक्तकंठोरुरोदह ५८ तयोर्विलपतोःसर्वेदंपत्योस्तदनुव्रताः ॥ रुरुदुःस्मनरानार्यःसर्वमासीदचेतनम् ५९ एवंक श्मलमापन्नंनष्टसंज्ञमनायकम् ॥ ज्ञात्वांऽगिरानाममुनिराजगामसनारदः ६० ॥ ॥ इतिश्रीभागवतेमहपुराणेषष्ठस्कंधेचतुर्दशोध्यायः १४ ॥ ॥ श्रीशु कउवाच ॥ ॥ ऊचतुर्मृतकोपांतेपतितंमृतकोपमम् ॥ शोकाभिभूतंराजानंबोधयंतौसदुक्तिभिः १ कोयंस्यात्तवराजेंद्रभवान्यमनुशोचति ॥ त्वंचास्य कतमःसृष्टौपुरेदानीमतःपरम् २ यथाप्रयातिसंयांतिस्रोतोवेगेनवालुकाः॥संयुज्यंतेवियुज्यंतेतथाकालेनदेहिनः ३यथाधानासुवैधानाभवंतिनभवंतिच॥एवं भूतेषुभूतानिचोदितानीशमायया ४

श्लोकाः ५५/४

चूर्णिका

हेतातः कृपणांमांत्यक्तुंनार्हसि शोकतप्तंपितरंपश्य किंच अकरुणेनयमेनसहदूरंनयाहि ५५ हेतात उत्तिष्ठइमेते वयस्याः शिशवः त्वांक्रीडितुं आह्वयंति क्षुधार्तः त्वं मेस्तनंपिब स्वकानांशुचः हर ५६ इदानीं तेकलाः गिरः नशृणोमि यतःयमेनत्वं दूरंनीतोसीत्यादि ५७ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् चित्रकेतुः मृतंपुत्रं वक्ष्य तप्तः सन् रुरोद ५८ एवंदंपत्योः विलपतोः सर्वे जनाः रुरुदुः ५९ एवंवर्तमानंज्ञात्वासनारदःअंगिराःआजगाम ६ इतिषष्ठेचतुर्दशः ॥ १४ ॥ ॥ ॥ ॥५८॥ श्रीशुकउवाच ॥ ॥ मृतबालकसमीपे शोकाभिभूतंपतितंराजानंबोधयंतौ नारदांगिरसौऊचतुः १ हेराजेंद्र त्वं यं अनुशोचसि अयं तेकः अस्यपूर्वजन्मसुकतमःपितासि अयंमेपुत्रः अहमस्यपिता एवंनियमः २ कालत्रयेन यथाप्रवाहवेगेनवालुकाः संयुज्यंते वियुज्यंते तथाकालवेगेनजीवाअपि ३ यथाधानानांजन्यजनकत्वोपिपितृपुत्रभा वोनास्ति एवंजीवस्यापि अतः शोकोनकार्यः ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इशमायया प्रेरितानामेवभवनमभवनम् नवस्तुतः । तस्यचसर्वसाधारणत्वान्नपुत्रएवशोचनीयइत्याहतुः । वयमिति । तुल्यकालावर्तमानकालीनाः जन्मनःप्राक् मृत्योःपश्चाच्च यथानसंतिएवमधुनापिनसंति । भोराजन्नाद्यंतयोरसत्त्वात्स्वप्नवदित्यर्थः ९ असत्त्वेकथंप्रतीतिः कथंवाहमस्यजनक इत्याद्यभिमानस्तत्राहतुः भूतैरिति । ईश्वरेणमाययासृष्टत्वात् प्रतीतिनिमित्तमात्रत्वेनैवचभूतानामयमभिमानइतिभावः । नन्वीश्वरस्य सृष्ट्यादिभिः साध्यमस्तिचेत् अपूर्णकामतामाप्ता । नास्तिचेत्कुतः प्रवृत्तिस्तत्राहतुः अनपेक्षोपिबालवछीलयाकरोतीति ६ अयंचजन्मादिव्यवहारोदेहानामेव नत्वात्मनइत्याहतुः । देहिनोदेहेनपितुः शरीरेणदेहान्मातुःशरीरात्पुत्रस्यदेहोऽभिजायते । यथाबीजादेवबीजंजायते । देहीतुशाश्वतएव । अर्थोभूम्यादिर्यथातद्वत् । ननुनश्वरदेहप्रतियोगित्वादेह्यपिनशाश्वतः स्यात् तत्राहतुः । देहदेहिनोरयंपरस्परप्रतियोगिविभागः पुराअनादिः अविवेककृतः अज्ञानकल्पितः जातिः सामान्यं व्यक्तिर्विशेषः तयोर्विभागोयथावस्तुनिसन्मात्रेकल्पितः । परस्परापेक्षसिद्धत्वेनानिरूप्यत्वात्तद्वत् ८ आधिनाशोकेनम्लानंवक्रं ९ । १० । उन्मत्तस्येवलिंगंयेषांते । (ग्राम्यबुद्धीनाम् विषयधियाम् ११ । १२ । १३ । १४ । १५ । ममप्रभूरक्षकौवाधेसमर्थाविति वा । अतो युवाभ्यांज्ञानदीपःप्रवर्त्यताम् १६

वयंचत्वंचयेचेमेतुल्यकालाश्चराचराः ॥ जन्ममृत्योर्यथापश्चात्प्राङ्नैवमधुनापिभोः ५ भूतैर्भूतानिभूतेशःसृजत्यवतिहंत्यजः ॥ आत्मसृष्टैरस्वतंत्रैरनपेक्षोपिबालवत् ६ देहेनदेहिनोराजन्देहाद्देहोऽभिजायते ॥ बीजादेवयथाबीजंदेह्यर्थइवशाश्वतः ७ देहदेहिविभागोयमविवेककृतःपुरा ॥ जातिव्यक्तिविभागोयंयथावस्तुनिकल्पितः ८ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवमाश्वासितोराजाचित्रकेतुर्द्विजोक्तिभिः ॥ प्रमृज्यपाणिनावक्रमाधिम्लानमभाषत ९ ॥ ॥ राजोवाच ॥ ॥ ॥ कौयुवांज्ञानसंपन्नौमहिष्ठौचमहीयसाम् ॥ अवधूतेनवेषेणगूढाविहसमागतौ १० चरंतिह्यवनौकामंब्राह्मणाभगवत्प्रियाः ॥ मादृशांग्राम्यबुद्धीनांबोधायोन्मत्तलिंगिनः ११ कुमारोनारदऋभुरंगिरादेवलोऽसितः ॥ अपांतरतमोव्यासोमार्कंडेयोथगौतमः १२ वसिष्ठोभगवान्रामःकपिलोबादरायणिः ॥ दुर्वासायाज्ञवल्क्यश्चजातूकर्ण्यस्तथारुणिः १३ रोमशश्च्यवनोदत्तआसुरिःसपतंजलिः ॥ ऋषिर्वेदशिराबोधोमुनिःपंचशिरास्तथा १४ हिरण्यनाभःकौशल्यःश्रुतदेवऋतध्वजः ॥ एतेपरेचसिद्धेशाश्चरंतिज्ञानहेतवः १५ तस्माद्युवांग्राम्यपशोर्ममूढधियाप्रभू ॥ अंधेतमसिमग्नस्यज्ञानदीपउदीर्यताम् १६

श्लोकाः ९/१६

चूर्णिका

किंचएतेवर्तमानकालीनाः चराचराः वयंचत्वंच इमेजन्मनःप्राक्मृत्योः पश्चाच्चयथानसंति तद्वदधुनापि ५ भगवान्भूतैः भूतानिलीलयासृजतिअवति हंतिच ६ हेराजन् पितुर्देहेन पुत्रदेहः मातृदेहाज्जायतेयथाबीजात् बीजं ७ जीवस्तुशाश्वत एव अयंपितृपुत्रादिविभागः अविवेककृतोस्तिअतः शोकंमाकुरुइत्यादि ८ ॥ ॥ श्रीशुकउवाच ॥ एवंतैः आश्वासितोराजापाणिनावक्रंविमृज्यउवाच ९ युवांज्ञानसंपन्नौ अवधूतवेषेणगूढौकौ १० भगवद्भक्ताः ब्राह्मणाः मादृशांअज्ञानांबोधायभूमौचरंति ११ ते च कुमाराः नारदः ऋभुःअंगिराः देवलः असितः अपांतरतमः व्यासः मार्कंडेयः गौतमः वसिष्ठः परशुरामः कपिलः दुर्वासाः याज्ञवल्क्यः जातूकर्ण्यः आरुणिः रोमशः च्यवनः दत्तः आसुरिः पतंजलिः वेदशिराः बोधः पंचशिराः हिरण्यनाभः कौशल्यः ऋतदेवः ऋतध्वजः एते १२ १३ १४ १५ अन्येचेति युवयोः एष्वेवांतर्गतत्वमास्तिअतःग्राम्यपशोःअंधतमेसिमग्नस्यममज्ञानदीपः उदीर्यताम् १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.ष. १७ महापुरुषगोचरंहरिभक्तंत्वां १८ । १९ तदैवयदापूर्वमागतोस्मि (परंतुअन्याभिनिवेशंअनात्मनिपुत्रेअत्यंतासक्तिं) २०रायः अर्थाः । (विविधानि ऐश्वर्याणि संपदश्च ।) २१ चलाअनित्याः अ०
किंचग्रहीति २२ हे शूरसेन इमेसर्वेपिशोकादिप्रदाः । किंचआगमापायित्वेन गंधर्वनगरतुल्याः । गंधर्वनगरंह्यकस्मादेवक्वचिदायातिचापयातिचेतिप्रसिद्धं । तदेवमनित्यत्वं शोकादिहेतुत्वंचाग
टीका मापायित्वंचोक्तं । मिथ्यात्वमप्याह । स्वप्नश्चमायाचमनोरथश्चयथा । तद्वत् २३ मनोभवामनोमात्रविजृंभिताः । अत्रहेतुः । अर्थेनताात्त्विकस्वरूपेणविनैवदृश्यमानाः तत्कुतः यस्मात्क्षणांतरेनदृश्यंते ॥१५॥
। तात्विकत्वेहि क्षणांतरेबाधोनस्यात् । अतो मनोमात्रविजृंभितत्वेन स्वप्नादिवन्मिथ्याभूताइत्यर्थः । नन्वेतेपुण्यापुण्यकृताइतिमीमांसकाःप्राहुस्तत्कुतोमनोभवत्वंतत्राह । कर्मभिः कर्मवासनाभिः
अर्थान्ध्यायतः पुंसोमनसएवनिमित्तात् कर्माण्यभवन् । पाठांतरे कर्मईप्सिततमधिभिध्यायतइत्यर्थः । कर्मणोपिमनोभवत्वात्तत्साध्या अर्थाअपिमनोभवाएवेतिभावः २४ तदेवंममतास्पदानांदुः
॥६०॥ खादिहेतुत्वमुक्तं । तत्रदेहसंबंधो मूलमित्याह । अयंहीति । हीत्यवधारणे । अयंद्रव्यज्ञानक्रियात्मकः अधिभूताधिदैवाध्यात्मरूपोदेहएवदेहिनो देहोहमितिमन्यमानस्यदेहिनोजीवस्यविविधान्
क्लेशान् संतापांश्च करोतीतितथा २५ स्वस्थेनअव्यग्रेण । गतिंतत्त्वं । ध्रुवोऽयमर्थइति विस्रंभंविश्वासं प्रणयंवात्यजततश्चउपशममाविशआश्रय २६ अंगिरसोपदिष्टंतत्त्वं परमेश्वरप्रसादंविनानप्रा
प्यतइतितत्प्रसादायमंत्रविद्यांनारदउपदिशाति । एतामिति । उपनिषण्णंपरंश्रेयोस्यामिति उपनिषत् । मंत्रएवोपानिषत्तांप्रतीच्छगृहाण द्रष्टाद्रक्ष्यतिभवान् २७

॥ अंगिराउवाच ॥ ॥ अहंतेपुत्रकामस्यपुत्रदोऽस्म्यंगिरानृप ॥ एषब्रह्मसुतःसाक्षान्नारदोभगवानृषिः १७ इत्थंत्वांपुत्रशोकेनमग्नंतमसिदुस्तरे ॥ श्लोकाः
अतदर्हमनुस्मृत्यमहापुरुषगोचरम् १८ अनुग्रहायभवतःप्राप्तावावामिहप्रभो ॥ ब्रह्मण्योभगवद्भक्तोनावसीदतुमर्हति १९ तदैवतेपरंज्ञानंददामिगृहमा १७
गतः ॥ ज्ञात्वाऽन्याभिनिवेशंतेपुत्रमेवददावहम् २० अधुनापुत्रिणांतापोभवतैवानुभूयते ॥ एवंदारागृहारायोविविधैश्वर्यसंपदः २१ शब्दादयश्चविषयाश्चला २७
राज्यविभूतयः ॥ राज्यंमहीबलंकोशोभृत्यामात्याःसुहृज्जनाः २२ सर्वेपिशूरसेनेमेशोकमोहभयार्तिदाः ॥ गंधर्वनगरप्रख्याःस्वप्नमायामनोरथाः २३ दृश्य
मानाविनार्थेननदृश्यंतेमनोभवाः ॥ कर्मभिर्ध्यायतोनानाकर्माणिमनसोऽभवन् २४ अयंहिदेहिनोदेहोद्रव्यज्ञानक्रियात्मकः ॥ देहिनोविविधक्लेशसं
तापकृदुदाहृतः २५ तस्मात्स्वस्थेनमनसाविमृश्यगतिमात्मनः ॥ द्वैतेध्रुवार्थविस्रंभंत्यजोपशममाविश २६ ॥श्रीनारदउवाच ॥ ॥ एतांमंत्रोपनि ॥६०॥
षदंतांप्रतीच्छयतोमम ॥ यांधारयन्सप्तरात्राद्द्रष्टासंकर्षणंप्रभुम् २७

चूर्णिका ॥ ॥ अंगिराउवाच हेनृपपुत्रकामस्यते पुत्रदोयः सएवाहमंगिरास्मि अयंतु नारदः १७ पुत्रशोकेमग्नंत्वांज्ञात्वा १८ अनुग्रहाय आवांप्राप्तौ ब्रह्मण्यः भगवद्भक्तः दुःखं
प्राप्तुंनार्हति १९ किंच अहंपूर्वमेवते ज्ञानोपदेशायप्राप्तः तदातुते अन्याभिनिवेशंज्ञात्वापुत्रमेवअदाम् २० इदानीं पुत्रवतांयस्तापः सः त्वयैव अनुभूयते एवंदारादयः गृहाः
विविधैश्वर्यसंपदः २१ सर्वेप्येतेशोकमोहभयप्रदाः स्वप्नमायामनोरथाइवामिथ्यासंति २२ २३ २४ २५ अतः स्वस्थेनमनसा आत्मनस्तत्त्वं विमृश्य द्वैते स्थिरविश्वासं
त्यज उपशमं आश्रय २६ ॥ ॥ नारदउवाच ॥ ॥ हेराजन् मत्तः एतांमंत्रोपानिषदं गृहाण यांधारयन् सप्तरात्रात् संकर्षणं विभुं द्रक्ष्यसि २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ष. टीका ॥६१॥ अ० १६

अतुलंचतदनाधिकंच समानाधिकशून्यं परंमहिमानंप्रापुः । उपैतिउपैष्यति २८॥ इतिषष्ठस्कंधेटीकायांपंचदशोध्यायः ॥ १५ ॥ षोडशेतत्सुतोक्त्यैवविशोकीकृत्यतंनृपं । आदिदेशमहाविद्यांनारदः शेषतोषिर्णीं ॥ १ ॥ आदौतावत्तत्पुत्रमुखेनैवपितृपुत्रादिसंबंधोमिथ्येतिदर्शयितुं योगबलेन तमेवज्ञातीनांदर्शयित्वाजीवात्मन्नित्याद्युवाच २ शेषमवशिष्टमायुरस्ति अपमृत्युनामृतत्वादित्यर्थः । तदेवकलेवरंप्रविश्योत्थितोजीवउवाच । यद्वांऽतराले प्रेतशरीरेस्थित्वेतिज्ञेयं ३ मह्यंमम ४ मयिमृतेपुत्रदृष्ट्याशोकश्चेत् शत्रुदृष्ट्याहर्षः किंनक्रियतेइत्याशयेनसंबधंस्यानियतत्वमाह । बंधवोविवाहादिभिः संबंधिनः । ज्ञातयः सापिंडाः । अरयोघातकाः । मित्राणिरक्षकाः । मध्यस्थाउभयव्यतिरिक्ताः साधारणाः । विद्विषोद्रव्यादिनिमित्तेनद्वेषिणः । उदासीनास्तद्व्यतिरिक्ताइतिभेदः ५ कर्मभिर्भ्राम्यमाणत्वेदृष्टांतः । यथापण्यानिक्रयविक्रयाद्यर्हाणिकर्तृषुव्यवहर्तृषुपरिभ्रमंति एवंजीवोपियोनिषुजनकेषु ६ एकस्मिन्नपिजन्मनिसंबंधस्यानियतत्वंसदृष्टांतमाहद्वाभ्यां । नित्यस्यजीवतोपि अर्थस्यपश्वादेः अनित्यः अनियतः विक्रयादिनासंबंधनिवृत्तेर्दृष्टत्वात् ७ एवं योनिगतः पित्रादिसंबंधंप्राप्तोपि सजीवोनित्यः। देहजन्मादिनातस्यजन्माद्यभावात् । अतएववस्तुतो निरहंकृतः । अहमस्यपुत्र इत्यभिमानशून्यः । यत्रपित्रादौसंबंधिनियावदुपलभ्येत कर्मवशेनवर्तेत । तावदेव तस्यपित्रादेः तत्तस्मिन्स्वत्वंनतुविक्रयाद्युत्तरकालमपि अथचैवंसंबंधः यदुक्तं कलेवरं स्वमाविश्येति तत्रतस्मिन् कलेवरे ममेदानीं स्वत्वंनिवृत्तमिति सदृष्टांतमाह । नित्यस्यचिरकालावस्थायिनः सुवर्णादेः योनिगतो देहंप्रविष्टः।यत्रदेहे तस्यजीवस्य तत्तस्मिन्देहेस्वत्वं नतुमरणोत्तरकालमपीत्यर्थः।शेषंसमानं ८

श्लोकाः २८/८

यत्पादपद्ममुपसृत्यनरेंद्रपूर्वेशर्वादयोभ्रममिमंद्वितयंविसृज्य ॥ सद्यस्तदीयमतुलानधिकंमहत्वंप्रापुर्भवानपिपरंनचिरादुपैति २८ इतिश्रीभागवतेमहापुराणे षष्ठस्कंधेपंचदशोऽध्यायः १५ ॥ ॥ श्रीशुकउवाच ॥ ॥ अथदेवऋषीराजन्संपरेतंनृपात्मजम् ॥ दर्शयित्वेतिहोवाचज्ञातीनामनुशोचताम् १ ॥ श्रीनारदउवाच ॥ ॥ जीवात्मन्पश्यभद्रंतेमातरंपितरंचते ॥ सुहृदोबांधवांस्तप्तान्शुचात्वत्कृतयाभृशम् २ कलेवरंस्वमाविश्यशेषमायुःसुहृद्वृतः ॥ भुंक्ष्वभोगान्पितृप्राप्तानधितिष्ठनृपासनम् ३ ॥ जीवउवाच ॥ कस्मिञ्जन्मन्यमीमह्यंपितरोमातरोऽभवन् ॥ कर्मभिर्भ्राम्यमाणस्यदेवतिर्यङ्नृयोनिषु ४ बंधुज्ञात्यरिमध्यस्थमित्रोदासीनविद्विषः ॥ सर्वएवहिसर्वेषांभवंतिक्रमशोमिथः ५ यथावस्तूनिपण्यानिहेमादीनिततस्ततः ॥ पर्यटंतिनरेष्वेवंजीवोयोनिषुकर्तृषु ॥ ६ नित्यस्यार्थस्यसंबंधोह्यनित्योदृश्यतेनृषु ॥ यावद्यस्यहिसंबंधोममत्वंतावदेवहि ७ एवंयोनिगतोजीवःसनित्योनिरहंकृतः ॥ यावद्यत्रोपलभ्येततावत्सत्त्वंहितस्यतत् ८

चूर्णिका ॥६१॥

शर्वादयः यत्पादमूलंउपसृत्यभयंविसृज्यमहित्वंआपुः तथाभवानपि अचिरात् उपैष्यति २८ ॥ इतिषष्ठेपंचदशः ॥ १५ ॥ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् अथदेवर्षिः मृतंनृपात्मजं ज्ञातीनांदर्शयित्वाउवाच १ हेजीवात्मन् मातरंपितरंशोचतः सुहृदश्चपश्यपश्य २ स्वंकलेवरं आविश्य पितृदत्तान्भोगान् भुंजन्नृपासनं अधितिष्ठ ३ ॥ ॥ जीवउवाच ॥ ॥ कर्मभिः देवतिर्यङ्नृयोनिषुभ्राम्यमाणस्यमेकस्मिन् जन्मनि अमीपितरः मातरः अभवन् ४ यथापण्यानि वस्तूनि व्यवहर्तृषुइतस्ततः पर्यटंति तथाजीवः कर्मणाभ्रमति ५ ६ एवंचजीवोनित्यः सर्वेंद्रियसाक्षी स्वतंत्रोऽस्ति ७ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

जीवस्यनित्यत्वंसाधयाति । एषनित्यः । तत्रहेतुः अव्ययःअपक्षयशून्यः । तत्कुतः । सूक्ष्मो जन्मादिशून्यः । तच्चकुतः सर्वाश्रयः जन्मादिमतोदेहादेराश्रयः । नतुदेहादिरूपः । यतः स्वदृक् स्वप्रकाशः । सर्वाश्रयत्वमुपपादयाति । आत्ममायागुणैरात्मानमेवविश्वं विश्वात्मकं सृजाति । "तदात्मानं स्वयमकुरुते"तिश्रुतेः । उपादानकारणत्वात् सर्वाश्रयइत्यर्थः जीवस्यवस्तुतो ब्रह्मत्वाद्ब्रह्मणएवचिच्छक्तिविशिष्टस्येश्वरत्वेनस्रष्टृत्वाज्जीवःसृजतीतिवाचोयुक्तिः यद्वास्वकर्मद्वारासृष्टिनिमित्तत्वेन स्रष्टृत्वं । भोग्यस्यचसर्वस्य भोक्ताश्रयत्वात् सर्वाश्रयत्वंचोक्तमिति द्रष्टव्यं ९ यदुक्तं सुहृद्रूतइति सुहृदोबांधवास्तप्ताइतिचतदप्याह । नह्यस्येति । तत्रहेतुः । एकः सुहृदादिसंगरहितः तत्कुतः गुणदोषयोर्हिताहितयोः कर्तॄणां मित्रादीनांयाः सर्वाधियो विचित्रा बुद्धयः तासांद्रष्टासाक्षी १० यच्चोक्तं भुंक्ष्वभोगानित्यादितत्राप्याह । नादत्तइति । गुणंसुखं ।दोषंदुःखम् । क्रियाफलंचराज्यादिकम् । उदासीनत्वेहेतुः । परावरदृक् । कारणस्यकार्यस्यचसाक्षी नतुभोक्ता । यतईश्वरःदेहादिपारतंत्र्यशून्यः । अतएवंभूतस्यममचयुष्माकंच संबंधाभावाच्छोकंमाकुरुतेतिवाक्यार्थः ११ । १२ । १३ । द्विजभाषितंअंगिरसाप्रोक्तं पुत्रादीनांदुःखहेतुत्वंस्मरंत्यः पुत्रकामनाशून्याः निर्मत्सराःसत्यइतिभावः १४ निबिडपंकतुल्यंगृहंविहायनिष्क्रमणंअतिधीरस्यतस्यैवयोग्यंनान्यस्येति सदृष्टांतमाह । सरसः पंकात्द्विपोगजइवेति१५ कृताः पुण्यजलक्रियाः (आचमन) तर्पणाद्यायेन । संयतप्राणो नियतेंद्रियः१६ धीमहिध्यायेममनसानमस्यामइत्यर्थः १७ १८

॥६२॥

श्लोकाः ९/१८

एषनित्योऽव्ययःसूक्ष्मएषसर्वाश्रयःस्वदृक् ॥ आत्ममायागुणैर्विश्वमात्मानंसृजतेप्रभुः ९ नह्यस्यातिप्रियःकश्चिन्नाप्रियःस्वःपरोपिवा ॥ एकःसर्वधियां
द्रष्टाकर्तॄणांगुणदोषयोः १० नादत्तआत्माहिगुणंनदोषंनक्रियाफलम् ॥ उदासीनवदासीनःपरावरदृगीश्वरः ११ ॥ श्रीशुकउवाच ॥ ॥ इत्युदीर्यगं
तोजीवोज्ञातयस्तस्यतेतदा॥विस्मितामुमुचुःशोकंछित्त्वाऽऽत्मस्नेहशृंखलाम्१२निर्हृत्यज्ञातयोज्ञातेर्देहंकृत्वोचिताःक्रियाः॥तत्यजुर्दुस्त्यजंस्नेहंशोकमोहभ
यार्तिदम्१३बालघ्न्योव्रीडितास्तत्रबालहत्याहतप्रभाः॥बालहत्याव्रतंचेरुर्ब्राह्मणैर्यन्निरूपितम्॥यमुनायांमहाराजस्मरंत्योद्विजभाषितम्१४सइत्थंप्रतिबुद्धा
त्माचित्रकेतुर्द्विजोक्तिभिः ॥ गृहांधकूपान्निष्क्रांतःसरःपंकादिवद्विपः १५ कालिंद्यांविधिवत्स्नात्वाकृतपुण्यजलक्रियः ॥ मौनेनसंयतप्राणोब्रह्मपुत्राववंदत
१६ अथतस्मैप्रपन्नायभक्तायप्रयतात्मने ॥ भगवान्नारदःप्रीतोविद्यामेतामुवाचह १७ ॐनमस्तुभ्यंभगवतेवासुदेवायधीमहि ॥ प्रद्युम्नायानि
रुद्धायनमःसंकर्षणायच १८

चूर्णिका

९ एवंभूतस्य ममयुष्माकंच संबंधाभावात् शोकंमाकुरु १० ११ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्युदीर्य जीवोगतः ततः सर्वेशोकंमुमुचुः मृतबालस्याक्रियाश्चक्रुः १२ १३ तत्रबालघ्न्यः स्त्रियः ब्राह्मणैःनिरूपितं बालहत्याव्रतंयमुनायांचक्रुः १४ एवं द्विजोक्तिभिः प्रतिबुद्धात्माचित्रकेतुः गृहांधकूपात् निष्क्रम्य १५ कालिंद्यांस्नात्वासंयतप्राणः ब्रह्मपुत्रौ अवंदत १६ अथ नारदः प्रपन्नाय तस्मै एतांविद्यांउवाच १७ नमस्तुभ्यंभगवतेवासुदेवायधीमहि प्रद्युम्नायानिरुद्धाय नमःसंकर्षणायच १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका.

(विज्ञानमात्राय ब्रह्मानुभवैकरूपाय) । निवृत्ताद्वैतदृष्टिर्यस्मात्(तस्मै) १९। न्यस्तानिरस्ताः शक्त्यूर्मयोमायानिमित्तारागद्वेषादयोयेन २० मनसासहवचसि अप्राप्योपरतेसति यएकएवप्र काशते । वचसीतिसर्वेंद्रियोपलक्षणम् । सोऽस्मानव्यात्सदसत्परःकार्यकारणयोःकारणम्(अधिष्ठानं)२१तदेवाह । यस्मिन्निदंकार्यकारणंचतिष्ठति । अप्येतिप्रलीयतेच । यतश्चजायते। मृन्मयेषुघटादि पुमृज्जातिर्मृन्मात्रमिवसर्वानुस्यूतंयत्तस्मै २२ ननुसर्वानुस्यूतंचेत् जातिवत्प्रतीयेतकथंमनोवचसोरप्राप्तिस्तत्राह । यत्ब्रह्मव्योमवद्विततमपि असवः प्राणाः क्रियाशक्त्यानस्पृशंति मनआदीनिचज्ञानश क्त्यानविदुः । तद्ब्रह्मनतोस्मि २३ तेषांतदज्ञानेहेतुमाह । देहेंद्रियादयोऽमीविकाराः यदंशविद्धाः यच्चैतन्यांशेनाविष्टाः संतः कर्मसुस्वस्वविषयेषुप्रचरंतिजाग्रत्स्वप्नयोः। अन्यदासुषुप्तिमूर्छादौनैवप्रचरंति यथाअप्रतप्तंलोहंनदहति अतोयथालोहं अग्निशक्त्यैवदाहकंसदाग्निनदहति । एवंब्रह्मगतज्ञानक्रियाशक्तिभ्यांप्रवर्तमानादेहादयस्तंनस्पृशंति नविदुश्चेतिभावः । जीवस्तर्हिद्रष्टृत्वाज्जानातुनेत्याह । स्थानेषुजाग्रदादिषुद्रष्टृव्यदेशं द्रष्टृसंज्ञांतदैवेति । "नान्योजीवोनामास्ति।नान्योतोस्तिद्रष्टे" त्यादिश्रुतेः।यद्वा।द्रष्टृपदेशंद्रष्टृसंज्ञंजीवमपि तदेवएतिजानातिनतुजीवस्तज्जानातीत्यर्थः।तदुक्तंहंसगुह्यस्तोत्रे। "देहोऽसवोऽक्षा" इत्यादि २४सकलायेसात्वतपरिवृढास्तेषांनिकरःसमूहस्तस्यकरकमलानांकुड्मलैर्मुकुलैरुपलालितंचरणारविंदयुगलंयस्यतस्यसंबोधनम्। परमउत्कृष्ट । परमेष्ठिन्सर्वेश्वर २५ पूर्वंसनारदोंगिराआजगामेतिअंगिराः प्राधान्येनोक्तः । चित्रकेतोःपुत्रप्रदत्वेनतस्यपृथगुक्तत्वात् । इहतु"नारदोंऽगिरसासाकंयया"वितिनारदस्यप्राधान्यनिर्देशःतदुपदेशेनतस्यवैराग्योत्पत्तेः । प्रभोहेस मर्थ । २६ यथायथावद्धारयामास २७ विद्याधराधिपत्यंचावांतरफलंलेभे । अप्रतिहतमस्खलितम् ।२८ कतिपयैरहोभिः विद्ययाइद्धेनदीप्तेनमनसागतिर्यस्य २९

श्लोकाः १९—२९

नमोविज्ञानमात्रायपरमानंदमूर्तये ॥आत्मारामायशांतायनिवृत्तद्वैतदृष्टये १९ आत्मानंदानुभूत्यैवंन्यस्तशक्त्यूर्मयेनमः॥हृषीकेशायमहतेनमस्तेनंतमूर्तये
२० वचस्युपरतेऽप्राप्ययएकोमनसासह ॥ अनामरूपश्चिन्मात्रःसोऽव्यान्नःसदसत्परः २१ यस्मिन्निदंयतश्चेदंतिष्ठत्यप्येतिजायते ॥ मृन्मयेष्विवमृज्जा
तिस्तस्मैतेब्रह्मणेनमः २२ यन्नस्पृशंतिनविदुर्मनोबुद्धींद्रियासवः ॥ अंतर्बहिश्चविततंव्योमवत्तंनतोस्म्यहम् २३ देहेंद्रियप्राणमनोधियोमीयदंशविद्धाःप्रचरं
तिकर्मसु ॥ नैवान्यदालोहमिवाप्रतप्तंस्थानेषुतद्द्रष्टृपदेशमेति २४ ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिपतयेसकलसात्वतपरिवृढनिकर
करकमलकुड्मलोपलालितचरणारविंदयुगलपरमपरमेष्ठिन्नमस्ते २५ ॥ ॥श्रीशुकउवाच ॥ ॥ भक्तायैतांप्रपन्नायविद्यामादिश्यनारदः ॥ ययावंगि
रसासाकंधामस्वायंभुवंप्रभो २६ चित्रकेतुस्तुतांविद्यांयथानारदभाषिताम् ॥ धारयामाससप्ताहमब्भक्षःसुसमाहितः २७ ततश्चसप्तरात्रांतेविद्ययाधार्यमा
णया ॥ विद्याधराधिपत्यंसलेभेऽप्रतिहतंनृप २८ ततःकतिपयाहोभिर्विद्ययेद्धमनोगतिः ॥ जगामदेवदेवस्यशेषस्यचरणांतिकम् २९

चूर्णिका

आत्मारामायपरमानंदमूर्तयेनमः १९ हृषीकेशाय विश्वमूर्तयेनमः २० इंद्रियेषूपरतेषुयः प्रकाशतेसः सदसत्परः नःअव्यात् २१ यस्मिन् इदं जगत् तिष्ठति जायते नश्यतिच तस्मै ब्रह्मणेनमः २२ किंचबुद्ध्यादयः यंनविदुः तंहरिं नतोस्मि २३ ॐनमो भगवते महापुरुषायमहाविभूतिपतयेतेनमोस्तु २४ २५ ॥ ॥ श्रीशुक उवाच ॥ ॥ नारदः भक्तायएतां विद्यांआदिश्य अंगिरसासह ब्रह्मलोकंययौ २६ चित्रकेतुः अब्भक्षः सन् नारदभाषितां विद्यांसप्ताहं धारयामास २७ ततः धार्यमाणयातयाविद्ययासप्तरात्रांतेविद्याधराधिपत्यंलेभे २८ ततः कतिपयैः दिवसैः शेषस्य चरणांतिकंजगाम २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मृगालवद्गौरम् शितिवाससंनीलांबरम् । स्फुरंतिकिरीटादीनियस्य कटित्रंकटिसूत्रम् । प्रसन्नानिवक्त्राणियस्य । अरुणानिलोचनानियस्यतंचतंच । ३० दृष्ट्वाचतमादिपुरुषम् अभ्ययाच्छरणंगतः । अनमत्ननाम ।कथंभूतः तस्यदर्शनेनध्वस्तंसमस्तंकिल्बिषंयस्य । स्वच्छममलंचांतःकरणंयस्य । (स्वच्छत्वंप्रसादः।) प्रणयेनाश्रुयुक्तेलोचनेयस्यप्रहृष्टानिरोमाणियस्यसः ।३१तंप्रसमीडितुंस्तोतुंचिरं नैवाशकन्नशशाक । तत्रहेतुः। उत्तमश्लोकस्यपादाब्जयोर्विष्टरमासनम् उपमेहयन् अभिषिंचन् प्रेम्णाउपरुद्धः अखिलानांवर्णानांनिर्गमउच्चारणंयस्यसः ३२ मनीषयाबुद्ध्यामनःसमाधायैतद्वक्ष्यमाणंव भाषे । प्रतिलब्धावाक्येन । सात्वतशास्त्रोक्तोविग्रहोयस्यतम्।३३"अन्योन्यप्रेमजानंदनिभृतान्स्वामिसेवकान् । अभिनंदन्मुदास्तौतिदशभिःपंचभिर्विभुम्" । हेअजितअन्यैरजितोपिभवान् साधुभिर्भ क्तैःजितःस्वाधीनएवकृतः । यतोभवानतिकरुणः । तेपिचनिष्कामाअपि भवताविजिताः । योभवानकामात्मनाम् आत्मानमेवददाति ३४ ननुभक्तैरेवाजितइतिकथम् । स्पर्धमानैरपिसृष्ट्यादिकर्तृभिरन्यै रीश्वरैर्जयसंभवात्तत्राह । तवेति । जगतउदयादीनितवैवविभवःविभवनंमहिमालीलेतियावत् । आदिशब्देनप्रवेशनियमादीनि । विश्वसृजस्तुब्रह्मादयोनेश्वराः । किंतुतेतवांशोयःपुरुषस्तस्यांशाः । तत्रएवंस्थितेपिपृथगीश्वरावयमित्यभिमानेनवृथैवस्पर्धंते ३५ त्वमेवविश्वसृष्ट्यादिकर्तेत्येतत् उपपादयति । परमाणुः सूक्ष्मंमूलकारणंपरममहत्अंतिमंकार्यम् तयोस्त्वमेवाद्यंतांतरवर्ती आदावंतेचअंतरेम ध्येचवर्तितुंशीलंयस्यसः अतएवत्रयविधुरः आद्यंतमध्यशून्यः ध्रुवः । तेचत्वयासृज्यंतेनतुध्रुवाः । कुतइत्याह । सत्त्वानांसत्त्वेन(ससत्तयाप्रतातीनां कार्याणांआदावंतेपियत् ध्रुवंअंतरालेपितदेवध्रुवं सुवर्णादिवत्३६ एवंध्रुवत्वेनकालतःपरिच्छेदौनास्तीत्युक्त्वादेशतोप्यपरिच्छेदमाह । क्षितीति । पूर्वस्मात्पूर्वस्माद्दशगुणोत्तरैर्दशगुणमधिकैः (क्षित्यंबुतेजोवाय्वाकाशाहंकारमहद्भि-)-रावृतः (आंडकोशःए तादृशांडकोटिभिः सहएषः) यत्रत्वयिअणुतुल्यः पततिपरिभ्रमतितस्मादनंतस्त्वम् ३७

॥६४॥

श्लोकाः ३०/३७

मृणालगौरंशितिवाससंस्फुरत्किरीटकेयूरकटित्रकंकणम्।।प्रसन्नवक्त्रारुणलोचनंवृतंददर्शसिद्धेश्वरमंडलैःप्रभुम्३०तद्दर्शनध्वस्तसमस्तकिल्बिषःस्वच्छामलां तःकरणोऽभ्ययान्मुनिः ॥ प्रवृद्धभक्त्याप्रणयाश्रुलोचनःप्रहृष्टरोमाऽनमदादिपूरुषम् ३१ सउत्तमश्लोकपदाब्जविष्टरंप्रेमाश्रुलेशैरुपमेहयन्मुहुः ॥ प्रेमो परुद्धाखिलवर्णनिर्गमोनैवाशकत्तंप्रसमीडितुंचिरम् ३२ ततःसमाधायमनोमनीषयाबभाषएतत्प्रतिलब्धवागसौ ॥ नियम्यसर्वेंद्रियबाह्यवर्तनंजगद्गुरुंसात्व तशास्त्रविग्रहम् ३३ ॥ ॥चित्रकेतुरुवाच ॥ अजिताजितःसममतिभिःसाधुभिर्भवान्जितात्मभिर्भवता ॥ विजितास्तेपिचभजतामकामात्मनांयआ त्मदोऽतिकरुणः ३४ तवविभवःखलुभगवन्जगदुदयस्थितिलयावनादीनि ॥ विश्वसृजस्तेंशांशास्तत्रमृषास्पर्धंतिपृथगभिमत्या ३५ परमाणुपरममहतो स्त्वमाद्यंतांतरवर्तीत्रयविधुरः ॥ आदावंतेचसत्त्वानांयद्ध्रुवंतदेवांतरालेपि ३६ क्षित्यादिभिरेषकिलावृतःसप्तभिर्दशगुणोत्तरैरांडकोशः ॥ यत्रप तत्यणुकल्पःसहांडकोटिभिस्तदनंतः ३७

॥६४॥

चूर्णिका

ततः तत्रनीलांबरं किरीटादिभिर्भूषितं प्रभुंददर्श ३० तद्दर्शनध्वस्तसमस्तकिल्बिषः प्रवृद्धभक्त्याअश्रुलोचनःसन् तंनत्वा ३१ प्रेमाश्रुलेशैः प्रभोरासनं अभिषिंचन् स्तोतुं नशशाक ३२ ततः मनः समाधाय जगद्गुरुंअस्तौत् ३३ ॥ ॥ चित्रकेतुरुवाच ॥ ॥ हेअजित सममतिभिः साधुभिः त्वंजितोसि तेचत्वयाजिताः ३४ हेभगवन् अयंआंडकोशः क्षित्यादिभिः सप्तावरणैः आवृतः सन् त्वयि अणुवत् परिभ्रमंति तस्मात्त्वंअनंतोसि ३५ ३६ ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मादेवंपरमेश्वरस्त्वमेव अन्येदेवास्तवविभूतयः अतस्त्वांविहाय विषयकामनयाऽन्योपासकाअतिमंदाइत्याह । विषयेषुतृट्तृष्णायेषांतेनराकाराः पशवः । कुतः येविभूतीरिंद्राद्याउपासतेनतुपरंत्वां । ततः किंतत्राह । तेषामिति । तदनुउपास्यनाशानंतरं । यथाराजकुलमनु । राजकुलनाशानंतरं (यथा) तत्सेवकानांआशिषोनश्यंतितद्वत् । अयंचपरमोऽवधिः मध्येपिनश्यंत्येव । ३८ विषयकामेनापिकृतात्वत्सेवामोक्षफलैवेत्याह । कामधियः विषयकामनाअपिहेपरमत्वयिरचिताः कृताश्चेत्नरोहंति । देहांतरोत्पत्तये नभवंति । करंभबीजानि भंजितबीजानियथा ।(नहितप्तखर्परेबीजोंकुरायभवति) यतोस्यजीवस्य गुणगणादेवद्वंद्वसमूहाभवंति । अतः कामेनापिनिर्गुणस्यतवभजनाच्छनैर्नैर्गुण्यंभवतीत्यर्थः । ३९ फलकामनयापित्वदाराधनंयदामोक्षहेतुस्तदाकिंवक्तव्यम् भगवद्धर्ममाहात्म्यमितिवक्तुम् तत्संप्रदायप्रवर्तकत्वेनचभगवंतंस्तौति । जितमिति । यदाभवान् भागवतंधर्ममाह तदाहेभगवन्त्वयाजितम्सर्वोत्कर्षेणस्थितम् । तत्रहेतुः।येनिष्किंचनाः सनत्कुमारादयोमुनयस्ते(आत्मारामाजविन्मुक्ताअपि)यंभवंतं अपवर्गाय(अखंडभक्तिरसाय)सेवंतेतेनभवताजितम्।यंधर्ममितिवा४०अनवद्यत्वमेवाह।विषममतिर्यत्रयस्मिन्भागवतेधर्मेनास्ति ।यदन्यत्र।यथान्यस्मिन्काम्यधर्मे । न नुसोपिवेदोक्तत्वादनवद्यएवतत्राह । विषमधियाशत्रुमरणादिकामनयारचितोयः सद्यविशुद्धः रागद्वेषादिमत्वात् क्षयिष्णुश्चनश्वरफलत्वात् । अधर्मबहुलश्चहिंसादिबाहुल्यात् । तदुक्तंशंबरस्वामिभिः "उभयमिहचोदनायांलक्ष्यते अर्थोऽनर्थश्च" त्यादि ४१ एतत्प्रपंचयति। कः क्षेमः किंकुशलम् नकिंचित् । निजपरयोः स्वस्यपरस्यच । स्वपरद्रुहास्वस्मैपरस्मैचद्रुह्यतीतिस्वपरध्रुक् (तेनधर्मेण)यतः स्वद्रोहादत्यंतकायक्लेशात्तवकोपः पीडासंभवति । तदुक्तंगीतासु । "कर्षयंतःशरीरस्थंभूतग्राममचेतसः । मांचैवांतःशरीरस्थंतान्विद्ध्यासुरनिश्चयानि"ति । तथापरसंपीडयाधर्मः चशब्दात्तत्रकोपश्च । अतस्त्वयारागांधमपिकथंचिद्वेदमार्गेप्रवर्तयितुंकाम्यधर्मोऽभिहितो नतत्त्वदृष्ट्या ४२ भागवतधर्मेणतुनद्रोहइत्याह नेति । नव्यभिचरतिनपरमार्थंजहाति । तवईक्षादृष्टिः । अव्यभिचारेहेतुः । स्थिरेति स्थावरजंगमप्राणिसमूहेषुसमबुद्ध्योभागवता यंधर्मंसेवंते । ४३ एवंभूतस्य भागवतधर्मप्रवर्तकस्यतवदर्शनात् सर्वपापक्षयोभविष्यतीतिकिंचित्रमित्याह । नहीति पुल्कसोपिश्वपचोपि ४४ (अतोऽहंकृतार्थोस्मीत्याह ।)अथेति। अतोहेतोः तवावलोकनेन परिमृष्टा निरस्ताआशयेचित्तेमलायेषांते । त्वद्दर्शनंचमम नारदोपदेशेनजातमित्याह सुरऋषिणेति(द्रष्टासंकर्षणंविभुमितियदुदितम् ।) ४५

श्लोकाः ३८—४५

विषयतृषोनरपशवोयउपासतेविभूतीर्नपरंत्वाम् ॥ तेषामाशिषईशतदनुविनश्यंतियथाराजकुलम् ३८ कामधियस्त्वयिरचितानपरमरोहंतियथाकरंभबीजानि ॥ ज्ञानात्मन्यगुणमयेगुणगणतोस्यद्वंद्वजालानि ३९ जितमजिततदाभवतायदाहभागवतंधर्ममनवद्यम् ॥ निष्किंचनायेमुनयआत्मारामायमुपासतेऽपवर्गाय ४० विषममतिर्नयत्रनृणांत्वमहमितिममतवेतिचयदन्यत्र ॥ विषमधियारचितोयःसह्यविशुद्धःक्षयिष्णुरधर्मबहुलः ४१ कःक्षेमोनिजपरयोःकियानर्थःस्वपरद्रुहाधर्मेण ॥ स्वद्रोहात्तवकोपःपरसंपीडयाचतथाऽधर्मः ४२ नव्यभिचरतितवेक्षाययाह्यभिहितोभागवतोधर्मः ॥ स्थिरचरसत्त्वकदंबेष्वपृथग्धियोयमुपासतेत्वार्याः ४३ नहिभगवन्नघटितमिदंत्वद्दर्शनान्नृणामखिलपापक्षयः ॥ यन्नामसकृच्छ्रवणात्पुल्कसोपिविमुच्यतेसंसारात् ४४ अथ भगवन्वयमधुनात्वदवलोकपरिमृष्टाशयमलाः ॥ सुरऋषिणायदुदितंतावकेनकथमन्यथाभवति ४५

चूर्णिका

किंच येनरपशवः तवेंद्रादिविभूतीः उपासते नत्वां तेषांआशिषः नश्यंति ३८ विषयकामेनापि कृता त्वत्सेवामोक्षफलैवभवति ३९ हेभगवन्यदाभवान् भागवतं धर्मं आह तदात्वयाजितं जितं यतः यस्मिन् धर्मे विषममतिर्नास्ति ४० ४१ ४२ ४३ हेभगवन्त्वद्दर्शनात् नृणांपापक्षयःइदं अघटितंन यतःयन्नामस्मरणात् पुल्क सोपिसंसारात् मुच्यते ४४ हेअनंत यस्यतेमूर्ध्निइदं भूमंडलंसर्षपायति तस्मै ते सहस्रमूर्ध्नेनमोस्तु ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अथचाहंपूर्वमतिमूढआसम् यथाचनारदेनानुगृहीतोस्मि तत्सर्वांतर्यामिणस्तव किंमयाप्रकाशनीयमित्याह विदितमिति । विशेषेणज्ञाप्यंप्रकाशनीयंकियदिवनकिमपीत्यर्थः । सवितुर्यथाखद्योतैः । प्रकाशनीयंनास्तितद्वत् ४६ उक्तलक्षणंभगवंतंप्रणमति । नमइतिद्वाभ्याम् । सकलस्यजगतः स्थित्यादीनामीशाय समर्थाय । (कुयोगिनांभिदाभेददृष्ट्या ।) दुरवसिता अविज्ञाता आत्मगतिर्निजतत्त्वंयस्यतस्मै केषां कुयोगिनां केन भिदाभेददृष्ट्या ४७ श्वसंतिचेष्टंते । चेकितानंपश्यंतंअनु । चित्तयोज्ञानेंद्रियाणि उच्चकंतिसारूढंपश्यंति तस्मै नमोस्तु ।४८। ४९। मेममानुशासनंमद्विषयउपदेशस्तेनच तयाचविद्यया अस्माच्चदर्शनात्संसिद्धोसि ५० तद्बोधदार्ढ्यायस्वयमप्युपदिशति । अहमित्यादिना । सर्वभूतान्यहमेव । भूतानामात्माभोक्ताप्यहमेव । भोक्तृभोग्यात्मकं विश्वंमद्व्यतिरिक्तंनास्तीत्यर्थः । यतोहंभूतभावनः भूतानांप्रकाशकः कारणंच । ननुशब्दब्रह्मप्रकाशकं परब्रह्मकारणंच । सत्यम् । तेउभेममैवरूपेइत्याह । शब्दब्रह्मेति । शाश्वतीशाश्वत्यौ ५१ अतस्त्वमेवंपश्येत्याह । लोकेभोग्यप्रपंचेभोक्तृत्वेन विततमनुगतमात्मानं लोकंचात्मनिभोग्यत्वेनसंततंव्याप्तम् तदुभयंचमयाकारणात्मनाव्याप्तंमयिचैवोभयंकृतंकल्पितंस्मरेदितितृतीयेनान्वयः । पश्येदित्यध्याहारोवा ५२ ननु जाग्रदाद्यवस्थाभेदेन भोक्तृभोग्यात्मकं विश्वंस्फुटं प्रतीयमानं कथंकल्पितंस्यादित्याशंक्य स्वप्नगतजाग्रदादिदृष्टांतेन संभावयन्नाह । यथेतिद्वाभ्यां । यथास्वप्नेसुषुप्तौ विश्वंगिरिवनादिरूपंदेशांतरस्थंआत्मन्येवपश्यति । स्वप्नमध्येसुषुप्तिस्वप्नंचपश्यतीत्यर्थः तथास्वप्नएवउत्थितःसन्आत्मानमेकदेशस्थं शयनदेशोस्थितं मन्यतेजाग्रदवस्थामनुभवति ५३ एवंप्रसिद्धान्यपिजागरणादीनिजीवस्थानानिजीवोपाधेर्बुद्धेरवस्थाभूतानि आत्मनोमायामात्राणीत्येवं विज्ञायतेषांद्रष्टारं अतएवपरम् तदवस्थारहितंआत्मानंस्मरेत् ५४ ननुतेषांद्रष्टारंइतिकथमुच्यतेस्वापेदृश्याभावेतद्द्रष्टृत्वाभावात् । तत्राह येनेति।प्रसुप्तः पुरुषोजीवः येनरूपेणतदास्वापकाले आत्मनः स्वापंनिर्गुणमतींद्रियंसुखंचवेद तमात्मानं ब्रह्ममामवेहि।तदास्वापसुखयोरसंवेदने "सुखमहमस्वाप्सम्" इतिस्मृतेरसंभवात् ।५५। ननुस्वपसाक्षिणादृष्टं कथंजाग्रदवस्थः स्मरेत् । नह्यन्येनदृष्टमन्यःस्मरतितत्राह।उभयंप्रस्वापंप्रतिबोधंचस्मरतः अनुसंदधतः तयोः प्रस्वापप्रतिबोधयोः प्रकाशकत्वेनयदन्वेतिताभ्यांव्यतिरिच्येत (व्यतिरिक्तंच) भवेत् एकैकापायेप्यनपायात् । तज्ज्ञानंपरंब्रह्म तदेवनतुभिन्नमित्यर्थः । अतोबाल्येदृष्टस्ययौवनेस्मृतिवत् अवस्थांतरत्वेपिस्वापानंदयोः स्मरणंघटतइतिभावः तदेवंभूतंब्रह्मात्मानमवेहीत्यनुषंगः ५६

श्लोकाः ४६/५६

विदितमनंतसमस्तंतवजगदात्मनोजनैरिहाचरितम्॥विज्ञाप्यंपरमगुरोःकियदिवसवितुरिवखद्योतैः ४६ नमस्तुभ्यंभगवतेसकलजगत्स्थितिलयोदयेशाय॥दुरवसितात्मगतयेकुयोगिनांभिदापरमहंसाय ४७ यंवैश्वसंतमनुविश्वसृजःश्वसंतियंचेकितानमनुचित्तयउच्चकंति॥भूमंडलंसर्षपायतियस्यमूर्ध्नितस्मैनमोभगवतेऽस्तुसहस्रमूर्ध्ने ॥ ४८ ॥ ॥ श्रीशुकउवाच ॥ ॥ संस्तुतोभगवानेवमनंतस्तमभाषत ॥ विद्याधरपतिंप्रीतश्चित्रकेतुंकुरूद्वह४९॥ ॥ श्रीभगवानुवाच ॥ ॥ यन्नारदांगिरोभ्यांतेव्याहृतंमेऽनुशासनम् ॥ संसिद्धोसितयाराजन्विद्ययादर्शनाच्चमे ५० अहंवैसर्वभूतानिभूतात्माभूतभावनः ॥ शब्दब्रह्मपरब्रह्मममोभेशाश्वतीतनू ५१ लोकेविततमात्मानंलोकंचात्मनिसंततम्॥उभयंचमयाव्याप्तंमयिचैवोभयंकृतम् ५२ यथासुषुप्तःपुरुषोविश्वंपश्यतिचात्मनि ॥ आत्मानमेकदेशस्थंमन्यतेस्वप्नउत्थितः ५३ एवंजागरणादीनिजीवस्थानानिचात्मनः ॥ मायामात्राणिविज्ञायतद्द्रष्टारंपरंस्मरेत् ५४ येनप्रसुप्तःपुरुषःस्वापंवेदात्मनस्तदा॥सुखंचनिर्गुणंब्रह्मतमात्मानमवेहिमाम्५५उभयंस्मरतःपुंसःप्रस्वापप्रतिबोधयोः॥अन्वेतिव्यतिरिच्येततज्ज्ञानंब्रह्मतत्परम् ५६

चूर्णिका

४६ ४७ ४८ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंस्तुतः अनंतःविद्याधरपतिं उवाच ४९ नारदांगिरोभ्यां उक्तोपदेशरूपाविद्ययात्वंसिद्धोसि ५० मेदर्शनाच्च ५१ ५२
५३ ५४ ५५ ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ष. विपक्षेदोषमाह ।यत्यदि एतन्मयिभावंमत्स्वरूपं ब्रह्मविस्मृतम् तदात्मनः सकाशाद्भिन्नंभवति ततएतस्यपुंसः संसारोभवति । संसारस्वरूपमाह । देहाद्देहोजन्मानंतरंपुनर्जन्म । मृतेरनंतरंमृतिश्च ५७ अ०
योन्यंतरेपिभोगादिसंपादनंशक्यंज्ञानार्थंत्वत्रैवयातितव्यमित्याह लब्ध्वेति । ज्ञानंशास्त्रोक्तम् ।विज्ञानमपरोक्षम्।तयोःसंभवोयस्यांताम्५८वैराग्यार्थमाह।स्मृत्वेति॥ईहायांप्रवृत्तिमार्गे ततईहातःअनीहायांनिवृ
त्तिमार्गेतुअभयंमोक्षोभवतीतिचस्मृत्वा फलसंकल्पाद्विरमेत् । पाठांतरेनोभयंपरिक्लेशःफलविपर्ययश्चनास्तीत्येवंस्मृत्वा ५९ एतद्विवृणोति । सुखायेतित्रिभिः । दुःखस्यानिवृत्तिःसुखस्याप्राप्तिः ६० ॥१७॥
टीका विज्ञाउच्चमेप्रवीणा वयमित्यभिमानवतां । स्थानत्रयविलक्षणांतुरीयां बुद्ध्वा ६१ दृष्टश्रुताभिर्मात्राभिः ऐहिकामुष्मिकैर्विषयैः । स्वेनतेजसाविवेकबलेन ६२ नचातः परः पुरुषार्थोस्तीत्याह । एतावा
निति।योगेनैपुण्यंयस्याः साबुद्धिर्येषां।परस्यात्मनएकंदर्शनमितियत् एतावानेव ६३ । ६४ । ६५ । इतिषष्ठस्कंधेटीकायांषोडशोध्यायः ॥ ॥ ततःसप्तदशेमोघांमहर्द्धिमाप्यखेचरन् । विहस्यगिरिशं
शापादुमायावृत्रतांगतः ॥ १ ॥ यतः यस्यांतस्यै दिशेनमः नमनंकृत्वा १ सः विद्याधरस्त्रीभिः हारें गापयन् रेमेइति द्वयोरन्वयः।अव्याहतं बलं इंद्रियपाटवंचयस्य २ नानाविधाः संकल्पेनैवसिद्धयो
यासुतासु (कुलाचलेंद्रस्य द्रोणीषुनिम्नतटीषु) ३ अकस्माद्द्भुतैश्वर्यगर्वात्प्राचीनकर्मतः । आसुरींयोनिमापन्नोभवानीशापतःसतु । तदाह एकदेत्यादिना ४

॥६७॥ यदेतद्विस्मृतंपुंसोमद्भावंभिन्नमात्मनः ॥ ततःसंसारएतस्यदेहाद्देहोमृतेर्मृतिः ५७लब्ध्वेहमानुषींयोनिंज्ञानविज्ञानसंभवाम् ॥आत्मानंयोनबुध्येतनक्वचित्क्षे श्लोकाः
ममाप्नुयात् ५८ स्मृत्वेहायांपरिक्लेशंततःफलविपर्ययम् ॥ अभयंचाप्यनीहायांसंकल्पाद्विरमेत्कविः५९सुखायदुःखमोक्षायकुर्वातेदंपतीक्रियाः॥ततोऽनि
वृत्तिरप्राप्तिर्दुःखस्यचसुखस्यच ६० एवंविपर्ययंबुद्ध्वानृणांविज्ञाभिमानिनाम् ॥ आत्मनश्चगतिंसूक्ष्मांस्थानत्रयविलक्षणाम् ६१दृष्टश्रुताभिर्मात्राभिर्निर्मु ५७/४
क्तःस्वेनतेजसा ॥ ज्ञानविज्ञानसंतृप्तोमद्भक्तःपुरुषोभवेत् ६२ एतावानेवमनुजैर्योगनैपुण्यबुद्धिभिः ॥ स्वार्थःसर्वात्मनाज्ञेयोयत्परात्मैकदर्शनम् ६३ त्वमे
तच्छ्रद्धयाराजन्नप्रमत्तोवचोमम ॥ ज्ञानविज्ञानसंपन्नोधारयन्नाशुसिध्यसि ६४ ॥ श्रीशुकउवाच ॥ आश्वास्यभगवानित्थंचित्रकेतुंजगद्गुरुः ॥ पश्यत
स्तस्यविश्वात्माततश्चांतर्दधेहरिः ६५ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेषोडशोऽध्यायः १६ ॥ ॥ श्रीशुकउवाच ॥ ॥ यतश्चांतर्हितोऽनंतस्तस्यैकृ
त्वादिशेनमः ॥ विद्याधरश्चित्रकेतुश्चचारगगनेचरः १ सलक्षंवर्षलक्षाणामव्याहतबलेंद्रियः ॥ स्तूयमानोमहायोगीमुनिभिःसिद्धचरणैः २ कुलाचलेंद्र
द्रोणीषुनानासंकल्पसिद्धिषु ॥ रेमेविद्याधरस्त्रीभिगापयन्हरिमीश्वरम् ३ एकदासविमानेनविष्णुदत्तेनभास्वता ॥गिरिशंददृशेगच्छन्परीतंसिद्धचारणैः४

चूर्णिका ५७ इहमानुषींयोनिं लब्ध्वायः आत्मानं नबुध्येतसः कुत्रापिसुखंनाप्नुयात्५८ किंच कविः इच्छायांपरिक्लेशंस्मृत्वा अनीहायां अभयंचस्मृत्वासंकल्पात् विरमेत्५९किंच
दंपती सुखायदुःखमोक्षायक्रियाः कुर्वातेततः दुःखनिवृत्तिः सुखप्राप्तिश्चनभवति६०एवं विपर्ययंबुद्ध्वा आत्मनश्चसूक्ष्मां तुरीयांगतिं बुद्ध्वादृष्टश्रुतैर्विषयैर्मुक्तः सन्ज्ञानविज्ञा
नतुष्टः ममभक्तोभवेत् इत्यादि ६१ ६२ ६३ एवंममवचः धारयन् ज्ञानविज्ञानसंपन्नः त्वंआशुसिध्यसि ६४ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंश्रीहरिः चित्रकेतुं ॥६७॥
आश्वास्यअंतर्दधे ६५ ॥ इतिषष्ठेषोडशः ॥ १६ ॥ ॥ श्रीशुकउवाच ॥ ॥ चित्रकेतुः यस्यांदिशिहरिः अंतर्हितः तस्यैदिशेनमःकृत्वागगनेचरः चचार १ सःअव्या
हतबलेंद्रियः सिद्धादिभिःस्तूयमानः २ सर्वस्थानेषुभ्रमन् विद्याधरस्त्रीभिः सहहरिंगायन् वर्षाणांलक्षंरेमे ३ एकदाविष्णुदत्तविमानेनभ्रमन्गिरिशंददृशे ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंकीकृतांउत्संगेनैकीकृत्यस्थापितांदेवींबाहुनालिंग्यस्थितंउवाचजहासचतस्यांतिकेस्थितःसन्५धर्मवक्तावदतिशरीरिणांमध्ये मुख्यश्च । भार्ययामिथुनीभूयचास्ते ६ ७ ८ । (ज्ञान्यपिमुह्यति अहोप्रा
वीनकर्मबलवदिति प्रहस्य ।) अगाधागंभीराधीर्यस्यसः । (तस्यसाधुत्वं परिज्ञायेतिभावः) ९ नतस्यवीर्यं प्रभावं विद्वान् अतद्वीर्यविद्वान् तस्मिन् । निर्जितात्माभिमानिने जितेंद्रियोहमित्य
भिमानवते । रुषाक्रोधेनाह १० विरुद्धंप्रकर्षेण करोतीति विप्रकृत् ११ अतिवर्तिनंशास्त्रमतिक्रम्यवर्तमानशीलं । ये नोनिषेधंति नवारयंति १२ एषां ब्रह्मादीनामनुध्येयं पदाब्जयुग्मंयस्यतं ।
मंगलमंगलंपरमधर्ममूर्तिं । भूरीन् परिभूय अज्ञान् कृत्वाजगद्गुरुंयः प्रशास्तिततस्मात् १३ ननुहरिभक्तोयंनदंडार्हइतिवेत्तत्राह । नायंसाधुभिः परिसेवितं वैकुंठस्य पादमूलोपसर्पणमर्हति । यतःसंभा
विता अहमधिकइति कृतामतिर्येन । अतएवस्तब्धःअनम्रः । १४ तदेवंस्वयं दंड्यत्वंनिश्चित्यतं प्रत्याहअतइति । हेपुत्रयथा भूयो महतां किल्बिषमपराधं नकर्तानकरिष्यसि तथायाहीत्यर्थः १५
। १६ पूर्वदिष्टंप्राचीनं कर्मप्राप्तमेव १७

आलिंग्यांकीकृतादेवींबाहुनामुनिसंसदि ॥ उवाचदेव्याःशृण्वंत्याजहासोच्चैस्तदंतिके ५ ॥ चित्रकेतुरुवाच ॥ एषलोकगुरुःसाक्षाद्धर्मंवक्ताशरी
रिणाम् ॥ आस्तेमुख्यःसभायांवैमिथुनीभूयभार्यया ६ जटाधरस्तीव्रतपाब्रह्मवादीसभापतिः॥अंकीकृत्यस्त्रियंचास्तेगतह्रीःप्राकृतोयथा ७ प्रायशःप्राकृ
ताश्चापिस्त्रियंरहसिबिभ्रति । अयंमहाव्रतधरोबिभर्तिसदसिस्त्रियम् ८ ॥ श्रीशुकउवाच ॥ भगवानपितच्छ्रुत्वाप्रहस्यागाधधीर्नृप ॥ तूष्णींबभूवसद
सिसभ्याश्चतदनुव्रताः ९ इत्यतद्वीर्यविदुषिब्रुवाणेबह्वशोभनम् ॥ रुषाहदेवीधृष्टायनिर्जितात्माभिमानिने १० ॥ श्रीपार्वत्युवाच ॥ अयंकिमधुनालोके
शास्तादंडधरःप्रभुः ॥ अस्माद्विधानांदुष्टानांनिर्लज्जानांचविप्रकृत् ११ नवेदधर्मंकिलपद्मयोनिर्नब्रह्मपुत्राभृगुनारदाद्याः ॥ नवैकुमारःकपिलोमनुश्चयेनो
निषेधंत्यतिवर्तिनंहरम् १२ एषामनुध्येयपदाब्जयुग्मंजगद्गुरुंमंगलमंगलंस्वयम् ॥ यःक्षत्रबंधुःपरिभूयभूरीन्प्रशास्तिधृष्टस्तदयंहिदंड्यः १३ नायमर्ह
तिवैकुंठपादमूलोपसर्पणम् ॥ संभावितमतिस्तब्धःसाधुभिःपर्युपासितम् १४ अतःपापीयसींयोनिमासुरींयाहिदुर्मते ॥ यथेहभूयोमहतांनकर्तापुत्रकिल्बि
षम् १५ ॥ शुकउवाच ॥ एवंशप्तश्चित्रकेतुर्विमानादवरुह्यसः ॥ प्रसादयामाससतींमूर्ध्नानम्रेणभारत १६ ॥ चित्रकेतुरुवाच ॥ प्रतिगृह्णामितेशा
पमात्मनोंजलिनांबिके ॥ देवैर्मर्त्याययत्प्रोक्तंपूर्वदिष्टंहितस्यतत् १७

चूर्णिका
मुनिसंसदिदेवीं आलिंग्यास्थितंशिवंदृष्ट्वादेव्याः शृण्वंत्याउच्चैः हसित्वाउवाच ५ ॥ ॥ चित्रकेतुरुवाच ॥ ॥ अयंसाक्षात्लोकगुरुः ब्रह्मवादी नृणांधर्मवक्ता सन् सभा
यां भार्यांअंगीकृत्यआस्ते ६ यथाप्राकृतः ७ प्राकृताअपिप्रायस्त्रियंरहसिबिभ्रति अयंसदसिबिभर्ति ८ किमाश्चर्यम् एवंतद्वचःश्रुत्वाशिवः सभ्याश्चतूष्णीं आसन् ९
॥ ॥ श्रीशुकउवाच ॥ इतिश्रुत्वाअभिमानवते तस्मै पार्वती उवाच १० लोकेअधुनाअयंदंडधरः अस्मद्विधानांनिर्लज्जानां शास्ताकिम् ११ ब्रह्मादयः धर्मंनविदुः ये
शास्त्रमुल्लंघ्यवर्तमानंहरंननिषेधंति १२ योयंक्षत्रबंधुः सूरीन्परिभूयशिवंशास्ति अतः निश्चयेनअयं दंड्यः १३ अयंवैकुंठपादमूलोपसर्पणंनार्हति १४ हेदुर्मतेत्वंआसुरींयो
निंयाहि यथापुनः महतांकिल्बिषंनकर्ता १५ ॥ ॥ श्रीशुकउवाच ॥ । एवंशप्तः चित्रकेतुः विमानात् अवरुह्य सतीं मूर्ध्ना प्रसादयामास १६ ॥ ॥ चित्रकेतुरुवा
च ॥ ॥ हेअंबिकेतेशापंअहं अंजलिनाप्रगृह्णामि मर्त्यायदेवैः यत् प्रोक्तंतत् तस्यपूर्वदिष्टमेव १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अयंचसंसारचक्रस्वभावएव नचित्रमित्याह । संसारचक्रइति १८ अतएवात्रममचतवचनकोपिदोषइत्याह नैवेति । १९ एवंतावत्सुखदुःखादिकमंगीकृत्योक्तं । इदानींतदपिवस्तुतोनास्तीत्याह । गुणानांमायानांप्रवाहेसंसारे २० ननुमायागुणानांचेदयं प्रवाहस्तर्हि तेषांजडत्वाद्बंधमोक्षाद्यनुभवोनस्यात्तत्राह । एकःपरमेश्वरः माययानिमित्तभूतयाभूतानिप्राणिनः सृजतिएषांबंधादिकंचसृजति निष्कलः स्वयंबंधादिशून्यः २१ नन्वेवंभूतविषमसृष्टौतस्यकिंकारणम् प्रियादिवैषम्याभावादित्याशंक्ययद्यपिप्रियादयोनसंतितथापितत्तत्कर्मवशात्सर्वंघटतइत्याह नतस्येतिद्वाभ्याम् । प्रतीपः अप्रियः । नज्ञातिर्बंधुश्चेत्यर्थः । तत्रहेतुः । सर्वत्रसमस्य । तत्कुतः । निरंजनस्यनिःसंगस्य । अतएवतन्निमित्तेसुखेरागोनास्तिरागानुबंधोरोषः कुतः स्यात् । २२ यद्यप्येवंतथापि तस्यशक्त्यामाययायोविसर्गः पुण्यपापादिलक्षणंकर्मएषांशरीरिणांसुखाद्यर्थमवकल्पतेसमर्थोभवति यथोक्तंगीतासु । " भूतभावोद्भवकरोविसर्गःकर्मसंज्ञित " इति २३ अथतस्मात् (हे) भामिनिकोपने त्वांकेवलंप्रसादयामि नतुशापमोक्षाय । तर्हिकिंप्रसादेनातआह । ममोक्तंउक्तंसाध्वपि असाधुवन्मन्यसे तत्त्वयाक्षम्यताम् २४ गिरिशौभवानीशंकरौप्रसाद्यस्मयतोर्विस्मयंकुर्वतोः सतोः । २५ । २६ । (हरेर्भृत्यस्यभृत्यानां) २७ स्वर्गादावपितुल्योऽर्थः प्रयोजनमितिद्रष्टुंशीलंयेषां (तेतथा । स्वर्गापवर्गाभ्यांनहृष्यंतिनचनरकाद्बिभ्यतीत्यर्थः) २८ तत्रतदुक्तमेवहेतुमाहद्वाभ्यां देहिनांसुखंदुःखमित्यादिद्वंद्वानिईश्वरस्यलीलयामाययाभवंति २९

॥६९॥

संसारचक्रएतस्मिन्जंतुरज्ञानमोहितः ॥ भ्राम्यन्सुखंचदुःखंचभुंक्तेसर्वत्रसर्वदा १८ नैवात्मनःपरश्चापिकर्तास्यात्सुखदुःखयोः ॥ कर्तारंमन्यतेप्राज्ञाआत्मानंपरमेवच १९ गुणप्रवाहएतस्मिन्कःशापःकोन्वनुग्रहः ॥ कःस्वर्गोनरकःकोवाकिंसुखंदुःखमेववा २० एकःसृजतिभूतानिभगवानात्ममायया ॥ येषांबंधंचमोक्षंचसुखंदुःखंचनिष्कलः २१ नतस्यकश्चिद्दयितःप्रतीपोनज्ञातिबंधुर्नपरोनचस्वः ॥ समस्यसर्वत्रनिरंजनस्यसुखेनरागःकुतएषरोषः २२ तथापितच्छक्तिविसर्गएषांसुखायदुःखायहिताहिताय ॥ बंधायमोक्षायचमृत्युजन्मनोःशरीरिणांसंसृतयेऽवकल्पते २३ अथप्रसादयेनत्वांशापमोक्षायभामिनि ॥ यन्मन्यसेअसाधूक्तंममतत्क्षम्यतांसति २४ ॥ श्रीशुकउवाच ॥ इतिप्रसाद्यगिरिशौचित्रकेतुररिंदम ॥ जगामस्वविमानेनपश्यतोःस्मयतोस्तयोः २५ ततस्तुभगवान्रुद्रोरुद्राणीमिदमब्रवीत् ॥ देवर्षिदैत्यसिद्धानांपार्षदानांचशृण्वताम् २६ ॥ श्रीरुद्रउवाच ॥ दृष्टवत्यसिसुश्रोणिहरेरद्भुतकर्मणः ॥ माहात्म्यंभृत्यभृत्यानांनिःस्पृहाणांमहात्मनाम् २७ नारायणपराःसर्वेनकुतश्चनबिभ्यति ॥ स्वर्गापवर्गनरकेष्वपितुल्यार्थदर्शिनः २८ देहिनांदेहसंयोगाद्द्वंद्वानीश्वरलीलया ॥ सुखंदुःखंमृतिर्जन्मशापानुग्रहएवच २९

श्लोकाः १८/२९

धर्णिका

एतस्मिन्संसारेअज्ञानमोहितः जंतुः अत्रसुखंदुःखंवभुक्ते १८ अस्यसुखदुःखकर्ता नात्मानपरश्च १९ किंतुईश्वरएव सः एकएवमायया भूतानिसृजाति २० एषांबंधंमोक्षंसुखंदुःखंचसृजति २१ तस्यकश्चिन्दयितोनारिपुर्न अतः सर्वत्रसमस्यतस्यसुखेनप्रीतिर्नास्तितदारोषः २२ कुतः तथापितन्माययायत्पुण्यपापादिकर्मतत् एषांशरीरिणांसुखाद्यर्थं समर्थंभवति सुखदुःखादिसर्वंमायाजनितमस्ति २३ हेदेविशापमोक्षायत्वांनप्रसादये ममोक्तंसाध्वपि असाधुवत्मन्यसे तत्क्षम्यतामित्युक्त्वासः जगाम २४ २५ ततः सर्वेषांशृण्वतांरुद्रः रुद्राणींअब्रवीत् २६ हेसुश्रोणिहरेः भक्तानांमाहात्म्यंदृष्टवत्यसि २७ नारायणपराः कुतश्चननबिभ्यति तेसर्वत्रसमदर्शिनः संति २८ ॥६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तेषुगुणदोषविकल्पइत्येवेत्यन्वयः। इष्टानिष्टभेदइवयः स्फुरतिसआत्मन्यर्थभेदः सुखादिभेदः पुंसः स्वप्नेयथाअविवेककृतोभवति। स्रजिवत् सर्पमालादिभिर्यथातथैवकृतइत्यर्थः। स्रग्वदिति (वक्तव्ये) स्रजिवदित्यार्षं। पाठांतरेतुसुगमं। ३० अतोभागवतानांनिःस्पृहत्वमुचितमेवेत्याह वासुदेवइति। ज्ञानवैराग्ययोर्वीर्यंबलंयेषांतेषांव्यपाश्रयः विशिष्टबुद्ध्याआश्रयणीयोऽर्थोनास्ति ३१ अस्यचहरिदासत्वेनतत्स्वभावत्वान्नैतच्चित्रमितिवक्तुंहरेर्माहात्म्यमाह। नाहमितिद्वाभ्यां। ईहितमभिप्रायंलीलांवा। यदावयंनविद्मस्तदातस्यस्वरूपमंशकांशकाअपिसंतःपृथगीशमानिनोनविदुरेव ३२ अतएवहरिरपिसर्वेषांभूतानांप्रियः ३३ अहंचैवाच्युतस्यप्रियः तस्मान्ममास्मिन्क्रोधोनाभूदितिभावः ३४। ३५। ३६ प्रतिशप्तुंप्रतिशापंदातुमलंतमः समर्थोपि। ३७। ३८ असुरजातेः असुरभावेनोत्पत्तेः। भगवतिमतेश्च। ३९। ४०। एतत्एनम् ४१॥ इतिषष्ठस्कंधेटीकायांसप्तदशोध्यायः १७

॥७०॥

श्लोकाः ३०—४१

अविवेककृतःपुंसोह्यर्थभेदइवात्मनि॥ गुणदोषविकल्पश्चभिदेवस्रजिवत्कृतः ३० वासुदेवेभगवतिभक्तिमुद्वहतानृणाम्॥ ज्ञानवैराग्यवीर्याणांनेहकश्चिद्व्यपाश्रयः ३१ नाहंविरिंच्योनकुमारनारदौनब्रह्मपुत्रामुनयःसुरेशाः॥ विदामयस्येहितमंशकांशकानतत्स्वरूपंपृथगीशमानिनः ३२ नह्यस्यातिप्रियःकश्चिन्नाप्रियःस्वःपरोपिवा॥ आत्मत्वात्सर्वभूतानांसर्वभूतप्रियोहरिः ३३ तस्यचायंमहाभागश्चित्रकेतुःप्रियोनुगः॥ सर्वत्रसमदृक्शांतोह्यहंचैवाच्युतप्रियः ३४ तस्मान्नविस्मयःकार्यःपुरुषेषुमहात्मसु॥ महापुरुषभक्तेषुशांतेषुसमदर्शिषु ३५ ॥श्रीशुकउवाच॥ इतिश्रुत्वाभगवतःशिवस्योमाभिभाषितम्॥ बभूवशांतधीराजन्देवीविगतविस्मया ३६ इतिभागवतोदेव्याःप्रतिशप्तुमलंतमः॥ मूर्ध्नासंजगृहेशापमेतावत्साधुलक्षणम् ३७ जज्ञेत्वष्टुर्दक्षिणाग्नौदानवींयोनिमाश्रितः॥ वृत्रइत्यभिविख्यातोज्ञानविज्ञानसंयुतः ३८ एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि॥ वृत्रस्यासुरजातेश्चकारणंभगवन्मतेः ३९ इतिहासमिमंपुण्यंचित्रकेतोर्महात्मनः॥ माहात्म्यंविष्णुभक्तानांश्रुत्वाबंधाद्विमुच्यते ४० यएतत्प्रातरुत्थायश्रद्धयावाग्यतःपठेत्॥ इतिहासंहरिंस्मृत्वासयातिपरमांगतिम् ४१ इतिश्रीभागवते महापुराणे षष्ठस्कंधेसप्तदशोऽध्यायः॥ १७॥

चूर्णिका

३० ३१ ईश्वरस्यईहितंअस्मदादयः नविदाम ३२ ३३ तस्यभक्तः सः अहंचविष्णुभक्तःअतः ममतस्मिन् क्रोधोमाभूत् ३४ तस्मात् भक्तेषुत्वयाविस्मयोनकार्यः ३५॥ ॥श्रीशुकउवाच॥ ॥ इतिशिवभाषितंश्रुत्वाउमाशांतधीः बभूव ३६ अहोचित्रकेतुर्भगवद्भक्तःशप्तुंसमर्थोपिशापमेवजगृहे एतावत्साधुलक्षणं ३७ हेराजन् सः दानवींयोनिमाश्रितः ज्ञानविज्ञानसंयुतः वृत्रइतिख्यातः त्वष्टुर्दक्षिणाग्नौजज्ञे ३८ एतत्तेकथितम् ३९ इमंचित्रकेतोः इतिहासंविष्णुभक्तमहात्म्यंश्रुत्वाबंधात्मुच्यते ४० यःएतत्प्रातः शृणुयात् पठेद्वाहरिं स्मृत्वापरांगतिंयाति ४१॥ इतिषष्ठस्कंधेसप्तदशः॥ १७॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ आदित्यानांचतुर्थस्यत्वष्टुर्वंशप्रसंगतः । प्रोक्तमिंद्रकृतंविश्वरूपवृत्रवधादिकम्॥१॥अदितेःपंचमादीनांपुत्राणामन्वयोक्तितः। अष्टादशेदितेर्गर्भेशक्रेणमरुतांभिदा॥२॥ त्वष्टुर्वंशमनुक्रम्यसप्रसंगंयथाक्रमं
। आदित्यानामथान्येषांवंशानाहमुनीश्वरः॥३॥दक्षकन्यान्वयानुकथनेअदित्याद्वादशपुत्राःप्रोक्ताः।"विवस्वानर्यमापूषात्वष्टाथसविताभगः॥धाताविधातावरुणोमित्रः शक्रउरुक्रम" इतितत्र अष्टाध्यायांतमा
रभ्य विश्वरूपवृत्रचित्रकेतूपाख्यानैस्त्वष्टुर्वंशमनुवर्ण्येदानीं सवितुर्वंशमाहपृश्निस्त्विति । सावित्रीमित्यादिषुप्रासूतेत्युत्तरस्यानुषंगः पशुंपशुयागं महामखान् पंचमहायज्ञान् । १ ।,(अंगहेराजन्) २
धातुर्भार्याकुहूः सायंपुत्रंप्रासूत। एवंसिनीवालीदर्शंइत्यनुक्रमात् ३ ।समनंतरोविधाता क्रियायांभार्यायांपुरीष्यानग्नीन् पंचचित्तीन्। "पुरीष्यासोअग्नयइति पंचवाएतेग्नयोयच्चित्तयइतिश्रुतेः" चर्षणीवरुण
स्यभार्याआसीत् । पूर्वंब्रह्मणः पुत्रोभृगुर्यस्यांपुनर्जातः ४ वाल्मीकिर्वरुणस्यैवपुत्रोऽभवत् । एतौवरुणस्यासाधारणौपुत्रौ । तथोत्सर्गादयोपिमित्रस्यासाधारणाः । तयोरेवसाधारणौद्वौपुत्रौचाह । अ
गस्त्यश्चवसिष्ठश्चऋषीमित्रावरुणयोरभवतां । ५ यतउभावपिकुंभेरेतःसिषिचतुः "सत्रेहजाताविषितानमोभिः कुंभेरेतः सिषिचतुः समान"मितिश्रुतेः । द्रुतंस्कन्नम् । ६ । ७ । ८ । पश्चात्अष्टमस्कं
धे।(तस्योरुक्रमस्यकर्मगुणवीर्याणिवक्ष्यामः)९ अथेति। कश्यपस्यादितेः पुत्राणांद्वादशादित्यानांसंततिमितिक्त्वादितेःपुत्रान्कथयामीत्यर्थः १०

श्लोकाः १/१०.

॥ श्रीशुकउवाच ॥ पृश्निस्तुपत्नीसवितुःसावित्रींव्याहृतींत्रयीम्॥अग्निहोत्रंपशुंसोमंचातुर्मास्यंमहामखान् १ सिद्धिर्भगस्यभार्याऽगमहिमानंविभुंप्रभुम्॥
आशिषंचवरारोहांकन्यांप्रासूतसुव्रताम् २ धातुःकुहूःसिनीवालीराकाचानुमतिस्तथा ॥ सायंदर्शमथप्रातःपूर्णमासमनुक्रमात् ३ अग्नीन्पुरीष्यानाधत्तक्रि
यायांसमनंतरः ॥ चर्षणीवरुणस्यासीद्यस्यांजातोभृगुःपुनः ४ वाल्मीकिश्चमहायोगीवल्मीकादभवत्किल ॥ अगस्त्यश्चवसिष्ठश्चमित्रावरुणयोर्ऋषी ५
रेतःसिषिचतुःकुंभेउर्वश्याःसन्निधौद्रुतम् ॥ रेवत्यांमित्रउत्सर्गमरिष्टंपिप्पलंव्यधात् ६ पौलोम्यामिंद्रआधत्तत्रीन्पुत्रानितिनःश्रुतम् ॥ जयंतमृषभंतातवृती
यमीढुषंप्रभुः ७ उरुक्रमस्यदेवस्यमायावामनरूपिणः ॥ कीर्तौपत्न्यांबृहच्छ्लोकस्तस्यासन्सौभगादयः ८ तत्कर्मगुणवीर्याणिकाश्यपस्यमहात्मनः ॥ प
श्चाद्वक्ष्यामहेऽदित्यांयथैवावततारह ९ अथकश्यपदायादान्दैतेयान्कीर्तयामिते ॥ यत्रभागवतःश्रीमान्प्रह्लादोबलिरेवच १०

चूर्णिका

॥ श्रीशुकउवाच ॥ ॥ अथसवितुः पत्नीपृश्निः सावित्रीं व्याहृतीः त्रयीम् अग्निहोत्रं पशुं सोमम् चातुर्मास्यम् महामखान् असूत १ भगस्य६ सिद्धिः भार्या
महिमानम् विभुम् प्रभुं असूत आशीःकन्यांच २ धातुः ७ भार्याः ४ सिनीवाली दर्शम् कुहूः सायं राका प्रातः अनुमतिः पूर्णमासम् एवंताः प्रासूयंत विधातुः ८
क्रियापुरीष्यान् अग्नीन् ३ आधत्त वरुणस्य चर्षणी भृगुंवाल्मीकिं प्रासूत ४ ५ मित्रस्य १० रेवती उत्सर्गारिष्टपिप्पलान् असूत अगस्त्यवसिष्ठौमित्रावरुणयोः
पुत्रौअभूतां यतः उर्वश्याः सन्निधौउभावपिस्कन्नंरेतः कुंभेसिषिचतुः ६ इंद्रस्य ११ पौलोमिजयंतऋषभमीढुषान् असूत ७ उरुक्रमस्य १२ कीर्तिः बृहच्छ्लोकं
तस्यसौभगादयः पुत्राः आसन् ८ अथकश्यपपुत्रान् दैत्यांस्तेकीर्तयामि यत्रभागवतः प्रह्लादो बलिश्चजातः ९ १०

१ बृहत्काय इतिवापाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हिरण्यकशिपुर्हिरण्याक्षश्चेतिप्रथमंद्वावेवतौचकीर्तितौतृतीयस्कंधे ११ ।। (जंभस्यतनयाहिरण्यकशिपवेदत्तासातस्यभार्यासुतान्सुषुवे) १२ (तत्रप्राक्पूर्वंसंह्लादंसुषुवे । पश्चादनुह्लादं तेषां स्वसादानवात्) विप्रचितोभर्तुः सकाशात्राहुंपुत्रंअग्रहीत् १३ ततः संह्लादादसूत । १४ योमेषरूपंवातापिंअगस्त्यार्थंपेचेतंइल्वलंयः पेचेतंचवातापिमसूतेत्यन्वयः । १५ (प्राह्लादिः प्रह्लादस्यपुत्रः तस्य विरोचनदेव्याः पत्न्याः) १६ ततोबलेः सकाशादभवत् । तस्यबलेरनुभावः सुश्लोक्यः पुण्यकीर्त्यर्हः । यद्वाअनुभाव्यतेसद्भिःस्तूयतइत्यनुभावंसुश्लोक्यंयशइतिशेषः । (पश्चादष्टमस्कंधे) १७ तस्यगणेषुमुख्यतांप्राधान्यम् । (भगवान्गिरिशः) १८ सात्मतांसमानरूपतांदेवत्वमित्यर्थः १९सात्म्यं देवत्वं प्रापिताः ।(हेगुरो) २० । २१ आदृतं आदरयुक्तं । (अल्पंमिताक्षरं); अर्थवत् बह्वर्थयुक्तं । सत्रमयनमाश्रयोयस्य हे सत्रायणशौनक २२ शक्रस्य पार्ष्णिग्राहेणपृष्ठतः सहायेन(पुत्रविषयकशोकदीप्तेन शक्रविषयकक्रोधेन ज्वलंती) २३ भ्रातृहंतारं इंद्रंमारयित्वा सुखंशये स्वपिमि सुखिनीस्यामिति चिंतयामासदितिः उल्बणंक्रूरं । अक्लिन्नहृदयंकठिनाचित्तं २४

॥७२॥

श्लोकाः

११/२४

दितेर्द्वावेवदायादौदैत्यदानववंदितौ॥हिरण्यकशिपुर्नामहिरण्याक्षश्चकीर्तितौ ११ हिरण्यकशिपोर्भार्याकयाधुर्नामदानवी॥जंभस्यतनयादत्तासुषुवेचतुरःसु
तान् १२ संह्लादंप्रागनुह्लादंह्लादंप्रह्लादमेवच॥तत्स्वसासिंहिकानामराहुंविप्रचितोऽग्रहीत् १३शिरोऽहरद्यस्यहरिश्चक्रेणपिबतोऽमृतम्॥संह्लादस्यकृतिर्भार्याऽ
सूतपंचजनंततः १४ ह्लादस्यधमनिर्भार्याऽसूतवातापिमिल्वलम्॥योऽगस्त्यायत्वतिथयेपेचेवातापिमिल्वलम् १५अनुह्लादस्यसूर्म्यायांबाष्कलोमहिषस्तथा
॥विरोचनस्तुप्राह्लादिर्देव्यास्तस्याभवद्बलिः १६बाणज्येष्ठंपुत्रशतमशनायांततोऽभवत्॥तस्यानुभावःसुश्लोक्यःपश्चादेवाभिधास्यते १७बाणआराध्यगिरिशं
लेभेतद्गणमुख्यताम्॥ यत्पार्श्वेभगवानास्तेह्यद्यापिपुरपालकः १८ मरुतश्चदितेःपुत्राश्चत्वारिंशन्नवाधिकाः ॥ तआसन्नप्रजाःसर्वेनीताइंद्रेणसात्मताम् १९
॥ राजोवाच ॥ कथंतआसुरंभावमपोह्यौत्पत्तिकंगुरो ॥ इंद्रेणप्रापिताःसात्म्यंकिंतत्साधुकृतंहितैः २० इमेश्रद्दधतेब्रह्मन्नृषयोहिमयासह॥ परिज्ञा
नायभगवन्तन्नोव्याख्यातुमर्हसि २१ ॥ सूतउवाच ॥ तद्विष्णुरातस्यसबादरायणिर्वचोनिशम्यादृतमल्पमर्थवत्॥सभाजयन्संनिभृतेनचेतसा
जगादसत्रायणसर्वदर्शनः २२ ॥ श्रीशुकउवाच ॥ हतपुत्रादितिःशक्रपार्ष्णिग्राहेणविष्णुना ॥ मन्युनाशोकदीप्तेनज्वलंतीपर्यचिंतयत् २३ कदानुभ्रातृ
हंतारंइंद्रियाराममुल्बणम्॥अक्लिन्नहृदयंपापंघातयित्वाशयेसुखम् २४

चूर्णिका

दित्यांहिरण्यकशिपुः हिरण्याक्षश्चजातौ ११ हिरण्यकशिपोः कयाध्वां पुत्राः ४ संह्लादः ह्लादः अनुह्लादः प्रह्लादः सिंहिकाकन्याच तांविप्रचितिर्जग्राहतत्सुतोराहुः १२ १३ यस्यशिरः हरिः अहरत् संह्लादात्कृत्यां पंचजनः १४ ह्लादात् धमन्यांइल्वलः वातापीच १५अनुह्लादात् सूर्म्यायां बाष्कलमहिषौ १६ प्रह्लादात् देव्यां विरोचनः ततोबलिः १६ ततः बाणज्येष्ठंपुत्रशतं १७१८ कश्यपात् दित्यांमरुतः ४९ अभवन् तेइंद्रेणसमानरूपतांनीताः १९ ॥ ॥ राजोवाच ॥ ॥ हेगुरोते आसुरभावंहित्वा कथंदेवत्वंप्राप्ताः इदंकथय २० २१ ॥ ॥ श्रीशुकउवाच ॥ ॥ एकदाहतपुत्रादितिः पुत्रहंतारंघातयित्वाकदासुखंशये २२ २३ २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.प. ननुराजास्वदेहरक्षार्थं अन्येषांघातंकरोत्येव किमत्रचित्रंतत्राह । क्रमीति । ईशः प्रभुरित्यभिहितस्यापि यस्यपूर्वेषांराज्ञांदेहस्य मरणानंतरंद्वित्रिदिनावस्थितस्य क्रमयइतिश्वादिभिर्भक्षितस्यतुविष्ठे अ० १८
ति दग्धस्यतुभस्मेतिसंज्ञाआसीत् । तत्कृतेतस्यदेहस्यार्थे योभूतेभ्यो द्रुह्यति सकिंस्वार्थंवेद नवेदैव । तत्रहेतुः । यतोभूतद्रोहान्निरयो भवति ।२५ इदंदेहादिकं ध्रुवंनित्यं आशासानस्यमन्यमान
स्य अतउन्नद्धं उच्छृंखलं चेतो यस्य तस्येंद्रस्ययो मदस्तस्य शोषकः पुत्रोमेयेनहेतुना भूयाद्भवेत् २६ तत्रभर्तुः प्रियाचरणमेवहेतुः इतिभावेन साभर्तुः प्रियंअसकृदाचचार । (प्रश्रयेणनम्रतया)२७
टीका (भावज्ञाभर्तुश्चित्तं जानती) २८ विवशः स्त्रीपरतंत्रः सन् बाढंतवमनोरथंपूरयिष्यामीतियदाहनताच्चित्रं २९ तत्रहेतुमाह विलोक्येति । एकांतभूतानि निःसंगानि । मैथुनेनसृष्टिवृद्ध्यर्थं स्वदेहार्ध
मेवस्त्रियंचक्रे ३० एवंस्त्रियाशुश्रूषितः सन् ३१ इहचकारात् परत्रच अगमः अप्राप्यः ३२ ननुपरमेश्वरेसुप्रीते सर्वकामप्राप्तिः प्रसिद्धं तत्राह । पतिरेवेति ३३ ननुमनसिस्थितः श्रीवासुदेव ए
वलक्ष्मीपतिः परंदैवतमितिप्रसिद्धं । सत्यं । सएवस्वाधिकारेण रूपभेदैःपूज्यत इत्याह । मानसइति सार्धेन । देवतालिंगैर्मूर्तिभिरुपलक्षितः । लिंगान्येवाह । नाम इंद्रादि रूपं वज्रहस्तत्वादि । ताभ्यां
विविधं कल्पितैः । (स्वस्वाधिकारानुसारेणविहितासुइंद्रादिमूर्तिषु भगवान् वासुदेवएवपुरुषैः पूज्यतइत्यर्थः । स्त्रीभिस्तु पतिरूपेणेश्वरः पूज्यते) ३४ । ३५ । ३६ इंद्रहणं इंद्रहंतारं । अमृत्युंमृत्यु
॥७३॥ शून्यं येनइंद्रेण विष्णुनासहाय (भूतेन) घातितौ ३७

क्रमिविड्भस्मसंज्ञाऽऽसीद्यस्येशाभिहितस्यच ॥ भूतध्रुक्तत्कृतेस्वार्थंकिंवेदनिरयोयतः २५ आशासानस्यतस्येदंध्रुवमुन्नद्धचेतसः ॥ मदशोषकइंद्रस्यभूया श्लोकाः
द्येनसुतोहिमे २६ इतिभावेनसाभर्तुराचचारासकृत्प्रियम् ॥ शुश्रूषयानुरागेणप्रश्रयेणदमेनच २७ भक्त्यापरमयाराजन्मनोज्ञैर्वल्गुभाषितैः ॥ मनो
जग्राहभावज्ञासुस्मितापांगवीक्षणैः २८ एवंस्त्रियाजडीभूतोविद्वानपिविदग्धया ॥ बाढमित्याहविवशोनतच्चित्रंहियोषिति २९ विलोक्यैकांतभूतानिभूतान्यादौ २५
प्रजापतिः ॥ स्त्रियंचक्रेस्वदेहार्धंययापुंसांमतिर्हृता ३० एवंशुश्रूषितस्तातभगवान्कश्यपःस्त्रिया ॥ प्रहस्यपरमप्रीतोदितिमाहाभिनंद्यच ३१ ॥ ३७
कश्यपउवाच ॥ वरंवरयवामोरुप्रीतस्तेहमनिंदिते ॥ स्त्रियाभर्तरिसुप्रीतेकःकामइहचागमः ३२ पतिरेवहिनारीणांदैवतंपरमंस्मृतम् ॥ मानसःसर्वभूता
नांवासुदेवःश्रियःपतिः ३३ सएवदेवतालिंगैर्नामरूपविकल्पितैः ॥ इज्यतेभगवान्पुंभिःस्त्रीभिश्चपतिरूपधृक् ३४ तस्मात्पतिव्रतानार्यःश्रेयस्कामाःसुम
ध्यमे ॥ यजंतेऽनन्यभावेनपतिमात्मानमीश्वरम् ३५ सोहंत्वयार्चितोभद्रेईदृग्भावेनभक्तितः ॥ तत्तेसंपादयेकाममसतीनांसुदुर्लभम् ३६ ॥ दितिरुवाच ॥
॥ वरदोयदिमेब्रह्मन्पुत्रमिंद्रहणंवृणे ॥ अमृत्युंमृतपुत्राहंयेनमेघातितौसुतौ ३७

चूर्णिका इतिमनसिकृत्वास्त्रीचेष्टितैः परमभक्त्याशुश्रूषयाच पतिंकश्यपंवशमकरोत् २५ २६ २७ २८ एवंस्त्रियाजडीभूतः सःविद्वानपिबाढमित्याह २९ तच्चित्रंन यतः प्रजाप
तिः स्वदेहार्धंचक्रे ययापुंसांमतिर्हृता ३० एवंशुश्रूषितः कश्यपः प्रहस्यप्रीतः सन्दितिंआह हेवामोरु ३१ अहंतेप्रीतोऽस्मिस्त्रीणां दैवतं पतिरेव ॥७३॥
किंचसर्वभूतानांपातिः ३२ वासुदेवः सएवपतिरूपेणस्त्रीभिः पूज्यते ३३ ३४ तस्मात्पतिव्रताः स्त्रियः अनन्यभावेनईश्वरंपतिंयजंते ३५ सः अहंत्वयार्चितः अतः
हेभद्रेतेकामंसंपादये ३६ ॥ दितिरुवाच ॥ हेब्रह्मन् अहंमृतपुत्रायेनमेसुतौघातितौ तंइंद्रहंतारंमृत्युहीनं पुत्रंवृणे ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३८ ३९ स्वभावमनुवर्तमानायाः योषितः कोतिक्रमोऽपराधः ४० स्वभावमेवाह । द्वाभ्यां । शरत्पद्मस्योत्सवो विकाशोयास्मिन् । श्रवणेश्रुती तयोरमृतंक्षुरधारोपमंचित्तं४१स्वाशिषाआत्मनां स्वार्थ कामनया आत्मवत्प्रेष्ठत्वेन प्रतीयमानानां ४२ तत्रेदमुपकल्पतेयोग्यं भवति । अयंभावः वैष्णवं व्रतं तावदुपदेक्ष्यामितेनैवास्याः शुद्धचित्तायाः इंद्रंप्रतिक्रोधो निवर्तिष्यते । पुत्रस्त्वमर्त्यो भविष्यति । दीर्घकालत्वेचव्रतस्य कथंचिद्वैगुण्येसतींद्रस्यवधोपिनभविष्यतीति । ४३ । ४४ हेभद्रे अंजः यथावत् यदिधारयिष्यासितर्हींद्रहाभविष्यति । वैगुण्येतुदेवबांधवो भविष्यति । वैष्णवत्वाद्व्रतस्यकथंचिद्वैगुण्येपिसति सर्वथावैफल्याभावात्४५ कार्याण्यावश्यकानिव्रतंयानिनघ्नंति नावश्यकानिनचनिषिद्धानिकिंत्वभ्यनुज्ञातानितानिसर्वाण्यपि ब्रूहि ४६ तत्रैकविंशन्निषेधानाह । नहिंस्यादितिपंचभिः । नशपेत्नाक्रोशेत् । यदमंगलं कपालास्थ्यादिकं तन्नस्पृशेत् ४७ नाप्सुप्रविश्य स्नायात् पूर्वं विधृतांस्रजं पुनर्नधारयेत् ४८

निशम्यतद्वचोविप्रोविमनाःपर्यतप्यत ॥ अहोअधर्मःसुमहानद्यमेसमुपस्थितः३८अहोअद्येंद्रियारामोयोषिन्मय्येहमायया ॥ गृहीतचेताःकृपणःपतिष्येनरकेध्रुवम् ३९ कोतिक्रमोनुवर्तंत्याःस्वभावमिहयोषितः ॥ धिग्मांबताबुधंस्वार्थेयदहंत्वजितेंद्रियः४० शरत्पद्मोत्सवंवक्त्रंवचश्चश्रवणामृतम् ॥ हृदयंक्षुरधाराभंस्त्रीणांकोवेदचेष्टितम् ४१ नहिकश्चित्प्रियःस्त्रीणामंजसास्वाशिषात्मनाम् ॥ पतिंपुत्रंभ्रातरंवाघ्नंत्यर्थेघातयंतिच ४२ प्रतिश्रुतंददामीतिवचस्तन्नमृषाभवेत् ॥ वधंनार्हतिइंद्रोपितत्रेदमुपकल्पते ४३ इतिसंचिंत्यभगवान्मारीचःकुरुनंदन ॥ उवाचकिंचित्कुपितआत्मानंचविगर्हयन् ४४ ॥ कश्यपउवाच ॥ ॥ पुत्रस्तेभविताभद्रेइंद्रहादेवबांधवः ॥ संवत्सरंव्रतमिदंयद्यंजोधारयिष्यसि ४५ ॥ दितिरुवाच ॥ धारयिष्येव्रतंब्रह्मन्ब्रूहिकार्याणियानिमे ॥ यानिचेहनिषिद्धानिनव्रतंघ्नंतियान्युत ४६ ॥ श्रीशुकउवाच ॥ नहिंस्याद्भूतजातानिनशपेन्नानृतंवदेत्॥नछिंद्यान्नखरोमाणिनस्पृशेद्यदमंगलम् ४७ नाप्सुस्नायान्नकुप्येतनसंभाषेतदुर्जनैः ॥ नवसीताधौतवासःस्रजंचाविधृतांक्वचित् ४८

श्लोकाः ३८/४८

चूर्णिका ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंतस्यावचोनिशम्यकश्यपः अतप्यत अहो अधर्मः सुमहान्प्राप्तः ३८ योषिन्मय्यामाययागृहीतचेताः अहंध्रुवंनरकेपतिष्ये ३९ अतः अबुधंमांधिक् ४० किंच शरत्पद्मोत्सवंवक्त्रं वचश्चश्रवणामृतं हृदयंक्षुरधाराभंस्त्रीणांकोवेदचेष्टितम् ४१ स्त्रीणांकोपिप्रियः न याःस्वार्थेपत्यादीन्घ्नंति ४२ अस्तु मयातुददामीत्युक्तं तन्मृषामाभूत् इंद्रोपिवधंनार्हतितत्रेदंयोग्यम् ४३ एवंविचार्यकश्यपउवाच ४४ हेभद्रेसंवत्सरं व्रतं यदिधारयिष्यासि तर्हिइंद्रहापुत्रोभवितात्रतवैगुण्ये देवबांधवोभविष्यति ४५ ॥ ॥ दितिरुवाच ॥ ॥ हेब्रह्मन्व्रतंधारयिष्येकर्तव्याकर्तव्यंकथय ४६॥ ॥कश्यपउवाच॥ ॥ भूतानिनाहिंस्यात् नशपेत् मिथ्यानवदेत् नखरोमाणिनछिंद्यात्अस्पृश्यं नस्पृशेत् ४७ अप्सुप्रविश्यनस्नायात् दुर्जनैःसहनसंभाषेत अधौतं वासोचंविधृतांस्रजंचपुनः नधारयेत् ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजनेपंचनिषेधानाह । नोच्छिष्टमिति । चंडिकान्नंभद्रकाल्यैनिवेदितम् पिपीलिकादिदूषितंवा । अंजलिनात्वपोनपिबेत् । ४९ गृहाद्बहिर्निर्गमेसप्तनिषेधानाह । नोच्छिष्टेति । अनर्चितामंडनहीना । असंवीताअप्रावृता । ५० शयनेष्टौनिषेधानाह । नाधौतपादेति ! नापराक् पश्चिमशिराः ५१ कार्याण्याह । धौतवासाइतिद्वाभ्याम् । प्रातराशात्प्रथमभोजनात् । ५२ वीरवतीर्जीवद्भर्तृकाः (बलिरुपहारः । मंडनमलंकारः ।) आचर्यसंपूज्य कोष्ठगतंकुक्ष्यंतरगतम् । ५३ पुंसवनंपुत्रोत्पत्तिकरं । (अविप्लुतंअविच्छिन्नं) तुभ्यंतव । ५४ (अंजः सम्यक्) । ५५ ५६ (अपोजलं) ५७ हरिरिंद्रोव्रतस्यछिद्रंप्रेप्सुः प्राप्तुमिच्छुः जिह्मः कुटिलः । मृगहालुब्धकोयथामृगवंचनायमृगवेषो भवतितद्वत्साधुवेषः ।५८ केनमेशिवंस्यादितिचिंतांप्राप्तः । छिद्रान्वेषणेतत्परः ५९अस्पृष्टवारिश्चासावधौतांघ्रिश्च ६० (अंतरंछिद्रम्) निद्रयाऽपहृतंचेतोयस्याः ६१ मारोदीरित्युपलालयन्निव तान्शकलीकृतान्पुनः एकैकंसप्तधाचकर्तचिच्छेद । ६२ पाट्यमानाः छिद्यमानाः ६३ ।

नोच्छिष्टंचंडिकान्नंचसामिषंवृषलाहृतम् ॥ भुंजीतोदक्ययादृष्टंपिबेदंजलिनात्वपः४९नोच्छिष्टाऽस्पृष्टसलिलासंध्यायांमुक्तमूर्धजा ॥ अनर्चिताऽसंयतवाग्नासंवीताबहिश्चरेत् ५० नाधौतपादाऽप्रयतानार्द्रपान्नोउदक्शिराः ॥ शयीतनापराक्नान्यैर्ननग्नानचसंध्ययोः५१धौतवासाःशुचिर्नित्यंसर्वमंगलसंयुता॥ पूजयेत्प्रातराशात्प्राग्गोविप्रान्श्रियमव्ययाम्५२स्त्रियोवीरवतीश्चार्चेत्स्रग्गंधबलिमंडनैः॥ पतिंचार्च्योपतिष्ठेतध्यायेत्कोष्ठगतंचतम् ५३ सांवत्सरंपुंसवनंव्रतमेतदविप्लुतम्॥धारयिष्यसिचेत्तुभ्यंशक्रहाभवितासुतः ५४ बाढमित्यभिप्रेत्याथदितीराजन्महामनाः ॥ काश्यपंगर्भमाधत्तव्रतंचांजोदधारसा ५५ मातृष्वसुरभिप्रायमिंद्रआज्ञायमानद ॥ शुश्रूषणेनाश्रमस्थांदितिंपर्यचरत्कविः५६ नित्यंवनात्सुमनसःफलमूलसमित्कुशान् ॥ पत्रांकुरमृदोऽपश्चकाले कालउपाहरत् ५७ एवंतस्याव्रतस्थायाव्रतच्छिद्रंहरिर्नृप ॥ प्रेप्सुःपर्यचरज्जिह्मोमृगहेवमृगाकृतिः ५८ नाध्यगच्छद्व्रतच्छिद्रंतत्परोथमहीपते॥चिंतांतीव्रांगतःशक्रःकेनमेस्याच्छिवंत्विह५९एकदासातुसंध्यायामुच्छिष्टाव्रतकर्शिता॥अस्पृष्टवार्यधौतांघ्रिःसुष्वापविधिमोहिता ६० लब्ध्वातदंतरंशक्रोनिद्रापहृतचेतसः ॥ दितेःप्रविष्टउदरंयोगेशोयोगमायया६१चकर्तसप्तधागर्भंवज्रेणकनकप्रभम्॥ रुदंतंसप्तधैकैकंमारोदीरितितान्पुनः ६२ तेतमूचुःपाट्यमानाः सर्वेप्रांजलयोनृप ॥ नोजिघांससिकिंइंद्रभ्रातरोमरुतस्तव ६३

घूर्णिका

उच्छिष्टंचंडिकान्नंमांसंशूद्राहृतम् रजस्वलादृष्टंअन्नंनभुंजीत अंजलिनाअपः नपिबेत् ४९ उच्छिष्टाअस्पृष्टसलिला संध्यायांमुक्तकेशा मंडनहीना असंयतवाक् अप्रावृता वहिर्नगच्छेत् ५० अधौतपादा अप्रयता आर्द्रपात् उदक्शिराः अन्यैः सह नग्नासंध्ययोः नशयीत ५१ धौतवासाः शुचिः सर्वमंगलयुतापश्चिमशिराभोजनात् प्राक् गोविप्रान् श्रियं अच्युतं पूजयेत् ५२ सुवासिनीश्च पूजयेत् पतिंचअभ्यर्च्यउपतिष्ठेत् ध्यायेत् ५३ इदंपुंसवनव्रतंसंवत्सरंयदिधारयिष्यसितर्हिशक्रहापुत्रः भविता ५४ सावाढमित्युक्त्वा कश्यपात् गर्भंव्रतं दधार ५५ तदाइंद्रः मातृष्वसुः अभिप्रायंज्ञात्वा।दितिंशुश्रूषणंचक्रे ५६ वनात्फलमूलादीनि आहरत् ५७ इंद्रः तस्याः व्रतच्छिद्रंप्रेप्सुः जिह्मः पर्यचरन् व्रतच्छिद्रं नाध्यगच्छत् तदामेशिवंकेनस्यात् इतिचिंतांआप ५८ ५९ एकदासाउच्छिष्टाअस्पृष्टवार्यधौतांघ्रिः विधिमोहितासंध्यायांसुष्वाप ६० इंद्रः तदंतरंलब्ध्वायोगमाययादितेःउदरंप्रविश्य ६१ गर्भं सप्तधाचकर्त तेसप्तधाभूताःरुरुदुः पुनः एकैकंमारोदीः इत्युक्त्वासप्तधाचकर्त ६२॥ ॥ तदातेऊचुः ॥ हे इंद्रवयंमरुतः तेभ्रातरः नः कुतः जिघांससि ६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कौशिकइंद्रः । गणान्सप्त ।''सप्तगणावैमरुत''इतिश्रुतेः। (मद्यंमम ।) ६४ (यथाद्रौणेरश्वत्थाम्नोऽस्त्रेणक्षुण्णोपिभवान्नममारतद्वत्) ६५ । (यत्यस्मात्हरिरार्चितःअतोनममार ।) ६६ सजूःसह
मातृदोषंसपत्नभावम् । ६७ । ६८ (हेतातआदित्यानांदेवानांयुष्माकम् ।) ६९ (सप्तसप्तएकोनपंचाशत्) ७० दित्यानिष्कपटमुक्तेसतिइंद्रोपिनिष्कपटमेवाह । अंबेति लब्धमंतरंयेन अर्थएवबुद्धि
र्यस्य ७१ (मेमयाकृत्ताश्छिन्नाः वृक्णाश्छिन्नाअपिनमृताः) ७२ (अनुषंगिणीअवांतरफलरूपा) ७३ अपिपरंमोक्षमपि । ७४ गुणस्पर्शंविषयभोगंबुधः कोवृणीत । यद्यस्मान्नरकेपिस्यात् । ७५
महीयसिहेमहत्तमेमृतः सन्उत्थितः । ७६ ७७ ७८ ॥ इतिषष्ठस्कंधेटीकायामष्टादशोध्यायः ॥ ऊनविंशेतुयत्प्रोक्तंकश्यपेनदितेर्व्रतम् । तदेवविवृतंलोकहितायहरितोषणं ॥१॥ तस्यप्रकारमितिशेषः १

श्लोकाः ६४/१

॥७६॥ माभैष्टभ्रातरोमह्यंयूयमित्याहकौशिकः ॥ अनन्यभावान्पार्षदानात्मनोमरुतांगणान् ६४ नममारदितेर्गर्भःश्रीनिवासानुकंपया ॥ बहुधाकुलिशक्षुण्णोद्रौ
ण्यस्त्रेणयथाभवान् ६५सकृदिष्ट्वादिपुरुषंपुरुषोयातिसाम्यताम् ॥ संवत्सरंकिंचिदूनंदित्यायद्धरिरार्चितः ६६ सजूरिंद्रेणपंचाशद्देवास्तेमरुतोऽभवन् ॥ व्य
पोह्यमातृदोषंतेहरिणासोमपाःकृताः ६७ दितिरुत्थायददृशेकुमाराननलप्रभान्॥इंद्रेणसहितान्देवीपर्यतुष्यदनिंदिता६८अथेंद्रमाहताताहमादित्यानांभ
यावहम्॥अपत्यमिच्छत्यचरंव्रतमेतत्सुदुष्करम् ६९एकःसंकल्पितःपुत्रःसप्तसप्ताभवन्कथम्॥यदितेविदितंपुत्रसत्यंकथयमामृषा ७०॥ इंद्रउवाच ॥ अंबते
हंव्यवसितमुपधार्यागतोंतिकम्॥लब्धांतरोऽच्छिदंगर्भमर्थबुद्धिर्नधर्मवित् ७१ कृत्तोमेसप्तधागर्भआसन्सप्तकुमारकाः॥तेपिचैकैकशोवृक्णाःसप्तधानापिम
म्रिरे ७२ ततस्तत्परमाश्चर्यंवीक्ष्याध्यवसितंमया ॥ महापुरुषपूजायाःसिद्धिःकाप्यनुषंगिणी७३आराधनंभगवतईहमानानिराशिषः॥येतुनेच्छंत्यपिप
रंतेस्वार्थकुशलाःस्मृताः ७४ आराध्यात्मप्रदंदेवंस्वात्मानंजगदीश्वरम्॥कोवृणीतगुणस्पर्शंबुधःस्यान्नरकेपियत् ७५तादिदंममदौर्जन्यंबालिशस्यमहीयसि॥
क्षंतुमर्हसिमातस्त्वंदिष्ट्यागर्भोमृतोत्थितः ७६ ॥ श्रीशुकउवाच ॥ इंद्रस्तयाभ्यनुज्ञातःशुद्धभावेनतुष्टया॥मरुद्भिःसहतांनत्वाजगामात्रिदिवंप्रभुः ७७ ए
तत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि॥मंगलंमरुतांजन्मकिंभूयःकथयामिते७८ ॥ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेष्टादशोध्यायः ॥ ॥ राजोवाच
व्रतंपुंसवनंब्रह्मन्भवतायदुदीरितम्॥तस्यवेदितुमिच्छामियेनविष्णुःप्रसीदति १

चूर्णिका

तदाइंद्रआह यूयंचेत्ममभ्रातरः तर्हिमाभैष्ट ६४ एवंसतिदितेर्गर्भः वज्रेणक्षुण्णोपिश्रीनिवासानुकंपयानममार यथाब्रह्मास्त्रेणभवान् ६५ ६६ तेमरुतः इंद्रेणसहपंचाश
द्देवाअभवन् एवंतेमातृदोषंव्यपोह्य हरिणा सोमपाः कृताः ६७ ततोदितिः उत्थायइंद्रेणसहअग्निप्रभान् कुमारान्दृष्ट्वासंतोषंआप ६८ अथादितिः इंद्रंआह हेतात आदि
त्यानांभयदं एकं पुत्रंइच्छंती व्रतं अचरं ६९ तेसप्तधाकथं अभवन् हेपुत्रयदित्वयासत्यंज्ञाततर्हिकथय ७० ॥ ॥ इंद्रउवाच ॥ ॥ हेअंबतेव्यवसितंज्ञात्वाव्रतच्छिद्रं
लब्ध्वाअंतरंगत्वासप्तसप्तधागर्भः छिन्नः ७१ तावंतः पुत्राजाताः महापुरुषपूजायाः सिद्ध्या ते नम्रताः ७२ ७३ तदिदंबालिशस्यममदौरात्म्यंक्षंतुमर्हसि ७४ ७५ ॥ ॥७६॥
॥ श्रीशुकउवाच ॥ ॥ तदादितिः तस्यशुद्धभावंदृष्ट्वाएतान्बंधुत्वेनपालय तवसाहाय्यंकरिष्यंति इत्याह ततः इंद्रः तांनत्वामरुद्भिः सहदिवंययौ ७६ हेराजन्
एवंतेमरुतांजन्मआख्यातं भूयः किंकथयामि ७७ ॥ इतिषष्ठेष्टादशः ॥ १८ ॥ ॥ ॥ राजोवाच ॥ ॥ हेब्रह्मन्भवतायत् पुंसवनव्रतं कथितं तत्प्रकारं ज्ञातुमिच्छा
मिकुतःयेनविष्णुःप्रसीदति १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गशिरेमासेशुक्लपक्षेआदितःप्रतिपदि। २अनुमंत्र्यपृष्ट्वाशुक्लादंतायस्याः साशुक्लदतीधौतदंता अलंकृतासतीपूजयेत् । ३ आदौतावन्नमस्कारमंत्रानाह अलमितित्रिभिःतेतुभ्यंअलंपर्याप्तमेवसर्वंनांकिंचिदन्यैः कृत्यमस्ति । अतः केवलंतेतुभ्यंनमोस्तु।पर्याप्तौहेतवःनिरपेक्षाय हेपूर्णकाम।महाविभूतिपतयेलक्ष्मीपतये सकलाः सिद्धयोअणिमाद्यायस्मिन्तस्मै४ भोईशयथायथावत्त्वंकृपादिभिर्जुष्टःमहिनामहत्त्वेन अन्यैश्चसत्यसंकल्पत्वादिभिः सर्वैर्गुणैः ततस्तस्मात् ।५महापुरुषस्यपरमेश्वरस्येवलक्षणानिनिरपेक्षत्वादीनियस्याः तस्याः संबोधनम् ।६पूजामंत्रमाहॐनमइति । हविःशेषमुपहारावशिष्टम् । ७ होममंत्रस्योदाहरणंदर्शयतिॐमिति । प्रकर्षेणभवंत्याभ्यामितिप्रभवौ८।९। (युवांश्रीश्चविष्णुश्च) । १० इज्या यज्ञाभिनिर्वर्तकःपुरुषव्यापारोभावनाख्यः । क्रियालौकिकी ।११(व्यंजकः प्रकाशकः । सर्वेषांशरीरिणामात्मा ।आशयोंऽतःकरणं) प्रत्ययोनामरूपयोः प्रकाशः।अपाश्रयस्तयोराधारः । १२ १३ (उपहरणमुपहारम्) १४। १५। महापुरुषचेतसाईश्वरबुद्ध्या । उपनमेत्भजेत् । पतिश्चस्वयंप्रेमशीलःसन्पत्न्याःसर्वकर्माणिविभृयात् । तदनुकूलोभवेदित्यर्थः १६

॥ श्रीशुकउवाच ॥ शुक्लेमार्गशिरेपक्षेयोषिद्भर्तुरनुज्ञया ॥ आरभेतव्रतमिदंसार्वकामिकमादितः २ निशम्यमरुतांजन्मब्राह्मणाननुमंत्र्यच ॥ स्नात्वाशुक्लदतीशुक्लेवसीतालंकृतांबरे ॥ पूजयेत्प्रातराशात्प्राग्भगवंतंश्रियासह ३ अलंतेनिरपेक्षायपूर्णकामनमोस्तुते॥महाविभूतिपतयेनमःसकलसिद्धये४ यथात्वंकृपयाभूत्यातेजसामाहिनौजसा॥जुष्टईशगुणैःसर्वैस्ततोसिभगवान्प्रभुः ५ विष्णुपत्निमहामायेमहापुरुषलक्षणे॥प्रीयेथामेमहाभागेलोकमातर्नमोऽस्तुते ६ॐनमोभगवतेमहापुरुषायमहानुभावायमहाविभूतिपतयेसहमहाविभूतिभिर्बलिमुपाहरामीति॥अनेनाहरहर्मंत्रेणविष्णोरावाहनार्घपाद्योपस्पर्शनस्नानवासउपवीतविभूषणगंधपुष्पधूपदीपोपहाराद्युपचारांश्चसमाहिताउपाहरेत्॥हविःशेषंतुजुहुयादनलेद्वादशाहुतीः ७ ॐनमोभगवतेमहापुरुषायमहाविभूतिपतयेस्वाहेति ॥ श्रियंविष्णुंचवरदावाशिषांप्रभवावुभौ ॥ भक्त्यासंपूजयेन्नित्यंयदीच्छेत्सर्वसंपदः ८ प्रणमेद्दंडवद्भूमौभक्तिप्रह्वेणचेतसा ॥ दशवारंजपेन्मंत्रंततःस्तोत्रमुदीरयेत् ९ युवांतुविश्वस्यविभूजगतःकारणंपरम् ॥ इयंहिप्रकृतिःसूक्ष्मामायाशक्तिर्दुरत्यया १० तस्याअधीश्वरःसाक्षात्त्वमेवपुरुषःपरः॥ त्वंसर्वयज्ञइज्येयंक्रियेयंफलभुग्भवान् ११ गुणव्यक्तिरियंदेवीव्यंजकोगुणभुग्भवान् ॥ त्वंहिसर्वशरीर्यात्माश्रीःशरीरेंद्रियाशयाः ॥ नामरूपेभगवतीप्रत्ययस्त्वमपाश्रयः १२यथायुवांत्रिलोकस्यवरदौपरमेष्ठिनौ॥तथामउत्तमश्लोकसंतुसत्यामहाशिषः १३ इत्यभिष्टूयवरदंश्रीनिवासंश्रियासह॥तान्निःसार्योपहरणंदत्त्वाचमनमर्चयेत् १४ततःस्तुवीतस्तोत्रेणभक्तिप्रह्वेणचेतसा॥यज्ञोच्छिष्टमवघ्रायपुनरभ्यर्चयेद्धरिम् १५ पतिंचपरयाभक्त्यामहापुरुषचेतसा ॥ प्रियैस्तैस्तैरुपनमेत्प्रेमशीलःस्वयंपतिः ॥ बिभृयात्सर्वकर्माणिपत्न्याउच्चावचानिच १६

॥ ॥ श्रीशुकउवाच ॥ ॥ मार्गशीर्षशुक्लपक्षप्रतिपदिस्त्रीभर्तुरनुज्ञयाइदं सार्वकामिकंव्रतं आरभेत १ मरुतांजन्मश्रुत्वाब्राह्मणाज्ञया स्नात्वा शुक्लवस्त्रे धृत्वाअलंकृतासतीप्रातःश्रियासहभगवंतंपूजयेत् ३ अलंतेनिरपेक्षाययथात्वंकृपयेतिमंत्राभ्यां ४ ५ विष्णुपत्निमहामायेत्यनेनचभगवंतं श्रियंनमस्कृत्य ॐनमोभगवते महापुरुषायेति मंत्रेण षोडशोपचारैः पूजयेत् ततः ॐ नमोभगवते महापुरुषायेतिमंत्रेण अनलेहविःशेषेणद्वादशाहुतीर्जुहुयात् ६ ७ श्रियंविष्णुंचभक्त्यानित्यंसंपूज्य ८ भूमौ दंडवत्प्रणम्यदशवारंमंत्रंजपेत् ९ युवांसर्वजगतः कारणम् इयंसूक्ष्माप्रकृतिः १० तस्याः साक्षात् अधीश्वरस्त्वं असि ११ इत्यादिनास्तुत्वा १२ १३ उपहरणांनिःसार्य आचमनंदत्त्वापुनः अर्चयेत् १४ ततः स्तोत्रेणस्तुत्वायज्ञोच्छिष्टंआघ्राय पुनरर्चयेत् १५ परमभक्त्यापतिंच भजेत्इदंव्रतंदंपत्योर्मध्ये एकेनकृतंउभयोरपिभवति १६ ॥७७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यतःदंपत्योर्मध्येएकतरेणकृतमुभयोरपिभवति (ततःपत्न्यामनर्हायांएतत्पतिः कुर्यात्)। नविहन्यात्। नविच्छिंद्यात् ।१७ १८। १९ द्वादशमासानित्युक्ते कदाचित्तन्मध्येमलमासेसति तेनसहद्वादशसं
ख्यायांसत्यांशुद्धस्यैकस्यत्यागः स्यात्। हायनमित्युक्तेतन्मध्यपातिनः तस्यापिप्रसंगः स्यात्। तदुभयंवारयितुमुभयमुक्तं। उपचरेत्उपवसेत् । २० श्वोभूतेप्रभातेसति । पयसिश्रृतेनपक्वेन पाकयज्ञ
विधानेनपार्वणस्थालीपाकविधानेन। २१। २२ सुप्रजास्त्वंसत्पुत्रत्वकरमित्यर्थः। वाग्यतः सन्शेषः । २३। २४ अवीराविधवाधनेश्वरीसत्यापियासुदुर्भगासासुभगाभवति । २५(विरूपारूपरहिता
ऽप्ययंश्रेष्ठंरूपंविंदेत्।) यआमयावीरोगी सविरुजाविशिष्टयारुजाविमुच्यते। इंद्रियैः सहितंकल्पंदेहंचाविंदेदितिशेषः । पठन्योवर्ततेतस्यापितॄणांदेवतानांचानंततृप्तिर्भवतीत्यर्थः २६ उपसंहरति राजन्नि
ति। महत्पुण्यंजन्ममहद्व्रतंच २७ ७ षष्ठस्कंधनिगूढार्थपदभावार्थदीपिका ॥ सद्भिरासेव्यतामेषायतिश्रीधरनिर्मिता ॥ इतिश्रीधरस्वामिविरचि तायांभागवतभावार्थदीपिकायांषष्ठेएकोनविंशोऽध्यायः॥
१९॥ (व्याख्यायांश्रीधरोक्तायामत्रयद्दृश्यतेक्वचित्। वचोऽधिकंसाहसंतच्चक्रेमोहान्महेश्वरः १)

॥७७॥

कृतमेकतरेणापिदंपत्योरुभयोरपि ॥ पत्न्यांकुर्यादनर्हायांपतिरेतत्समाहितः॥विष्णोर्व्रतमिदंबिभ्रन्नविहन्यात्कथंचन १७ विप्रान्स्त्रियोवीरवतीःस्रग्गंधब
लिमंडनैः ॥ अर्चेदहरहर्भक्त्यादेवंनियममास्थितः १८ उद्वास्यदेवंस्वेधाम्नितन्निवेदितमग्रतः ॥ अद्यादात्मविशुद्ध्यर्थंसर्वकामर्द्धयेतथा १९ एतेनपूजा
विधिनामासान्द्वादशहायनम्॥ नीत्वाऽथोपचरेत्साध्वीकार्तिकेचरमेहनि २० श्वोभूतेपउपस्पृश्यकृष्णमभ्यर्च्यपूर्ववत् ॥ पयःशृतेनजुहुयाच्चरुणासहस
र्पिषा २१ पाकयज्ञविधानेनद्वादशैवाहुतीःपतिः ॥ आशिषःशिरसादायद्विजैःप्रीतैःसमीरिताः ॥ प्रणम्यशिरसाभक्त्याभुंजीततदनुज्ञया २२ आचार्य
मग्रतःकृत्वावाग्यतःसहबंधुभिः ॥दद्यात्पत्न्यैचरोःशेषंसुप्रजास्त्वंसुसौभगम् २३ एतच्चरित्वाविधिवद्व्रतंविभोरभीप्सितार्थंलभतेपुमानिह ॥ स्त्रीत्वेतदा
स्थायलभेतसौभगंश्रियंप्रजांजीवपतिंयशोगृहम् २४ कन्याचविंदेतसमग्रलक्षणंवरंत्ववीराहतकिल्बिषांगतिम् ॥ मृतप्रजाजीवसुताधनेश्वरीसुदुर्भगासुभ
गारूपमग्र्यम् २५ विंदेद्विरूपाविरुजाविमुच्यतेयआमयावींद्रियकल्पदेहम्॥ एतत्पठन्नभ्युदयेचकर्मण्यनंततृप्तिःपितृदेवतानाम् २६ तुष्टाःप्रयच्छंतिसमस्त
कामान्होमावसानेहुतभुक्श्रीर्हरिश्च ॥ राजन्महन्मरुतांजन्मपुण्यंदितेर्व्रतंचाभिहितंमहत्ते २७ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेपुंसवनव्रतकथनंनामै
कोनविंशोध्यायः ॥१९॥ ७ ॥ ॥

श्लोकाः १७ २७

चूर्णिका

इदंविष्णोर्व्रतंबिभ्रत्कथंचननाविच्छिंद्यात् ततः विप्रान्सुवासिनीश्चस्रग्गंधादिभिर्नित्यं अर्चयेत् १७ १८ देवं उद्वास्यतन्निवेदितं अद्यात् १९ एवंद्वादशमासान्नीत्वाका
र्तिकेचरमेह्नानिउपवसेत् २० श्वः प्रातः अपउपस्पृश्यकृष्णंच अभ्यर्च्यपयःशृतेनघृतमिश्रचरुणायथाविधिपतिः द्वादशाहुतीर्जुहुयात् २१ द्विजाशिषोगृहीत्वा प्रणम्य २२ आचा
र्यंपुरतः कृत्वाबंधुभिः सहभुंजीतपत्न्यैचरोः शेषंदद्यात् २४ एवंकृतेपुमान्इष्टार्थंलभतेस्त्रीतुसौभाग्यश्रियंप्रजांजविपतिंयशःगृहम्कन्यातुउत्तमवरम्विधवासद्गतिम् मृतप्रजा
जीवसुताभवति दुर्भगासुभगास्यात् विरूपारूपंलभते रोगीआरोग्यलभतेएतत्पठन्अभ्युदयकर्मणिपितृदेवानांतृप्तिर्भवतितेतुष्टाःसंतःसर्वकामान्यच्छंति २४ २५ २६
श्रीःहरिश्चहेराजन्मरुतांपुण्यजन्मादितेर्व्रतंचतेकथितंइतिषष्ठस्कंधेएकोनविंशोऽध्यायः १९ इतिषष्ठस्कंधःसमाप्तःश्रीकृष्णार्पणमस्तु २७ शुभंभवतु ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत–षष्ठस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत–सप्तमस्कंधः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीलक्ष्मीनारायणाभ्यांनमः । । शांतादुर्गामहालसाभ्यांनमः । स्वभक्तपक्षपातेनतद्विपक्षविदारणम् । नृसिंहमद्भुतंवंदेपरमानंदविग्रहम् १ ऊतिःपंचदशाध्यायेसप्तमेवर्ण्यतेऽधुना । ऊतिश्चवासनाप्रोक्तात
त्तत्कर्मानुसारिणी । अशुभाचशुभाचेतिसाद्विधाहेतुभेदतः । अशुभामहतांकोपात्शुभामहदनुग्रहात् । हरेर्द्वारपयोर्यद्वद्वैकुंठेवसतोरपि । चतुःसनरुषाविष्णुद्वेषाच्चाशुभवासना । यथाहिदैत्यगर्भेपिप्रह्लाद
स्यसतःस्थिरा । नारदानुग्रहादासविष्णौसद्भक्तिवासना । स्वभक्तंचसदाविष्णुर्द्विषंतमपिरक्षति । तृतीयेपिभवेद्बाःस्थावकरोदात्मसात्पुनः । अतोमनीषिणायत्नःकार्योमहदनुग्रहे । इत्येतदर्थमूतीनामत्रल
क्षणमुच्यते । तत्रादौदशभिर्दैत्यतत्पुत्रमतिभेदतः । महत्कोपानुकंपोत्थवासनाभेदउच्यते । सद्वासनाचयुज्येतकर्मभिःशुद्धचेतसः । परैस्तुपंचभिरतस्मात्क्रियतेधर्मनिर्णयः । तत्रतुप्रथमेऽध्यायेहिरण्यक
शिपोःसुते । विष्णुभक्तेविरोधस्तुविप्रशापजईर्यते॥ यदुक्तंपूर्वस्कंधांते"हतपुत्राऽदितिःशक्रपार्ष्णिग्राहेणविष्णुना।मन्युनाशोकदीप्तेनज्वलंतीपर्यचिंतयदि"तितच्छ्रुत्वाविस्मितःपरिक्षित्पृच्छतिसमइतित्रिभिः
(श्लोकैः । तत्रसमोरागद्वेषशून्यः । सुहृन्मित्रंहितकरइत्यर्थः प्रियआत्मरूपः)। नहिसमस्यसुहृदश्चवैषम्यंनामास्ति। नचप्रियस्यप्रीतिकर्तृषुवैषम्यंयुक्तमित्यर्थः १ किंच। यस्ययैःप्रयोजनंसिध्यति। सत
त्पक्षपातीभवति । येभ्योबिभेतितान्विद्वेषेणहंतिनतुतदस्यास्तीत्याह । नहीति । (अर्थःप्रयोजनं । तदभावेहेतुः । साक्षान्निरुपाधिकं) निश्रेयसंपरमानंदएवआत्मास्वरूपंयस्यतस्य । असुरेभ्यश्चोद्वेगो
भयंनास्ति । अतोविद्वेषोपिनास्त्येव । तत्रहेतुः अगुणस्येति २ (शोभनोमहान्भागोदैवंयस्यतत्संबोधनम्) श्रीनारायणस्यगुणान्अनुग्रहादीन्प्रति । तत्तंसंशयं ३ (यद्यस्मिन्चरिते) भागवतस्यप्र
ह्लादस्यमाहात्म्यं गीयतेइतिसंबंधः (तस्यकथयिष्यमाणत्वात्प्रायेणतदेवपृष्टमित्यर्थः) ४ कृष्णायव्यासायकृष्णंमुनिंनत्वेत्यर्थः ५ यस्मात्प्रकृतेःपरःअतोनिर्गुणः । अतएवाऽजः । अतएवअव्यक्तःराग
द्वेषादिनिमित्तभूतेंद्रियादिव्यक्तिरहितः सोपिस्वमायागुणंसत्त्वादिकंआविश्यअधिष्ठायबाध्यान्प्रति (बाधकताम्) यद्वादेवासुरादीनांयापरस्परंबाध्यबाधकतातांगतःप्राप्तःतत्रहेतुर्जातइत्यर्थः ६ तत्रगुणा
नांस्वीयत्वेसतिप्राकृतपुरुषवद्विषयःविषमःस्यात्नतुतदस्तीत्याह । सत्त्वमिति । ननुस्वेच्छयागुणाधिष्ठानेनापिपक्षपातेवैषम्यंस्यादेव । न । तस्यकालकृतत्वादित्याहनतेषामितिसार्धेन । ह्रासःक्षयःउल्ला
सोवृद्धिः ७ सत्त्वस्यजयकालेउत्कर्षसमयेदेवान्ऋषींश्चअभजत् । तत्तद्देहंप्रविश्यवर्द्धयतीत्यर्थः रजसोजयकालेतमसोजयकालइत्यन्वयःअसुरान्मानवादीन् । तस्यकालस्यानुगुणःसन् ८

॥ राजोवाच ॥ समःप्रियःसुहृद्ब्रह्मन्भूतानांभगवान्स्वयम् ॥ इंद्रस्यार्थेकथंदैत्यानवधीद्विषमोयथा १ नह्यस्यार्थःसुरगणैःसाक्षान्निश्रेयसात्मनः ॥ नैवा
सुरेभ्योविद्वेषोनोद्वेगश्चागुणस्यहि २ इतिनःसुमहाभागनारायणगुणान्प्रति ॥ संशयःसुमहान्जातस्तद्भवांश्छेत्तुमर्हति ३ ॥ श्रीशुकउवाच ॥ साधुपृष्टं
महाराजहरेश्चरितमद्भुतम् ॥ यद्भागवतमाहात्म्यंभगवद्भक्तिवर्धनम् ४ गीयतेपरमंपुण्यमृषिभिर्नारदादिभिः ॥ नत्वाकृष्णायमुनयेकथयिष्येहरेःकथाः ५
निर्गुणोपिह्यजोऽव्यक्तोभगवान्प्रकृतेःपरः ॥ स्वमायागुणमाविश्यबाध्यबाधकतांगतः ६ सत्त्वंरजस्तमइतिप्रकृतेर्नात्मनोगुणाः ॥ नतेषांयुगपद्राजन्ह्रासउ
ल्लासएवच ७ जयकालेतुसत्त्वस्यदेवर्षीन्रजसोऽसुरान् ॥ तमसोयक्षरक्षांसितत्कालानुगुणोऽभजत् ८

श्लोकाः १—८

चूर्णिका

श्रीगणेशायनमः ॥ ॥ श्रीमत्कुलदेवतायैनमः ॥ अथसप्तमस्कंधचूर्णिका ॥ राजोवाच ॥ हेब्रह्मन्भगवान् सर्वभूतानांप्रियःसमश्चसन्इंद्रस्यार्थेकथंदैत्यानवधीत् १ परमात्मनः
निर्गुणस्यदेवैःअर्थोनदैत्यैःसहद्वेषोपिन २ एवंसतिकथंदैत्यनाशःअतएवभगवद्गुणान्प्रतिमहान्संशयोजातःतच्छेत्तुमर्हसि ३ ॥ श्रीशुकउवाच ॥ हेमहाभागत्वयाहरेः चरितंसाधु
पृष्टम् ४ यत्रभागवतमाहात्म्यंनारदादिभिःपरमंपुण्यंगीयते अतःकृष्णंमुनिंनत्वाहरेःकथांकथयिष्ये ५ भगवान्निर्गुणोऽपिस्वमायागुणमाविश्यबाध्यबाधकतांगतः ६ हेनृप
सत्त्वंरजस्तमइतिप्रकृतेःगुणाःतेषांयुगपद्ह्रासोनवृद्धिरपिन ७ सत्त्वोत्कर्षकालेदेवादीनांवृद्धिःरजउत्कर्षेदैत्यानाम् तमसःउत्कर्षेयक्षरक्षसाम् भगवान्तत्तत्कालानुगुणोभवति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

समस्यापिनिमित्तभेदेनवैषम्येदृष्टांतः। ज्योतिर्यथाकाष्ठादिषु। (आदिशब्दात्) जलंयथापात्रेषु। आकाशंयथाघटादिषु। तथानानारूपआभाति । ननुतर्हितद्ददेवविवेकेनमर्तयेतत्राह। संघातात्सुरादिदे
हात्नविविच्यते । तर्हितान्भजतीतिकुतोज्ञायतेतत्राह । विदंतीति । आत्मस्थंपरमात्मानंकवयोनिपुणाःमथित्वाकार्यदर्शनलिंगेनविचार्यजानंति। अंततःस्वभावकर्मादिवादानिषेधेन। विदंतीतिपाठेला
भोपिज्ञानमेव । अत्रापिज्योतिरादिरिवेतिद्रष्टव्यम् । यथाहिसूर्यकांतादौदाहदर्शनाज्ज्योतिर्ज्ञायते । यथाचकंपदर्शनाद्वायुरित्यादि ९ तदेवंमायागुणवशेनैतद्वैषम्यंनतुस्वाभाविकमित्युक्तम् । तर्हिगुणपा
रतंत्र्यादनीश्वरत्वमाशंक्याह । यदाआत्मनोजीवस्यभोगायपुरःशरीराणिपरःपरमेश्वरःसिसृक्षुर्भवतितदासाम्येनास्थितंरजःपृथक्सृजति । विचित्रासुतासुपूर्षुरिरंसुःक्रीडितुमिच्छुःसत्त्वंपृथक्सृजति । शयि
ष्यमाणःसंहरिष्यन्तमःपृथगीरयतिप्रेरयतिआधिक्यंनयतीत्यर्थः १० यदासिसृक्षुरित्यादिनिर्देशात्प्रतीतंकालपारतंत्र्यंवारयन्प्रधानपुरुषपारतंत्र्यमपिवारयति । कालमिति । हेनरदेवप्रधानपुंभ्यांनि

॥ २ ॥

मित्तभूताभ्यांसत्यकृत्अमोघकर्ताईश्वरःतयोःसहकारित्वेनआश्रयभूतंचरंतंवर्तमानंकालंस्वयमेवसृजति । स्वचेष्टारूपत्वात्कालस्यनतत्पारतंत्र्यमित्यर्थः । तथापिप्रस्तुतेकिमायातंतत्राह । यएषकालःस
सत्त्वंमेधयति । अतोहेतोःईशितापिईश्वरोपिसत्त्वप्रधानंसुरानीकंदेवसमूहमेधयतीवेत्यर्थः । तत्प्रत्यनीकान्सुरप्रतिपक्षान्प्रमिणोतिहिनस्तीवेत्यन्वयः । उरुश्रवःकीर्तिर्यस्यसउरुश्रवाःकालशक्तिक्षुभितगुण
गतंवैषम्यंसान्निधिमात्रेणतदधिष्ठातरिस्फुरतीतिप्रकरणार्थः ११ इदानींतयोर्वधोनसुरपक्षपातेनकिंतुब्राह्मणशापेनासुरीयोनिंप्राप्तयोरनुग्रहार्थएवेतिवक्तुमितिहासमुपक्षिपति । अत्रैवेति । अत्रैवद्वेषादिरहि
तस्यापिदैत्यवधेनारदेनइतिहासःप्रस्तावितः १२ चेदिभूभुजःशिशुपालस्य १३ १४ एकांतभक्तानामपिदुर्लभाप्राप्तिर्विद्विषोजातेत्येतदद्भुतंहि १५ तस्यतुवेनस्येवनरकपातएवोचितइत्याह । भगवन्नि
दयेति । तमसिनरके १६ दमघोषस्यसुतःशिशुपालःकलभाषणात्बाल्येकोमलभाषणमारभ्यसंप्रतिअधुनापि (गोविंदे) अमर्षीक्रोधीमत्सरीवा १७

श्लोकाः ९/१७

ज्योतिरादिरिवाभातिसंघातान्नविविच्यते ॥ विदंत्यात्मानमात्मस्थंमथित्वाकवयोऽततः ९ यदासिसृक्षुःपुरआत्मनःपरोरजःसृजत्येषपृथक्स्वमायया ॥
सत्त्वंविचित्रासुरिरंसुरीश्वरःशयिष्यमाणस्तमईरयत्यसौ १० कालंचरंतंसृजतीशआश्रयंप्रधानपुंभ्यांनरदेवसत्यकृत् ॥ सएषराजन्नपिकालईशितासत्त्वंसुरानी
कमिवैधयत्यतः ॥ तत्प्रत्यनीकानसुरान्सुरप्रियोरजस्तमस्कान्प्रमिणोत्युरुश्रवाः ११ अत्रैवोदाहृतःपूर्वमितिहासःसुरर्षिणा ॥ प्रीत्यामहाक्रतौराजन्पृच्छ
तेऽजातशत्रवे १२ दृष्ट्वामहाद्भुतंराजाराजसूयेमहाक्रतौ ॥ वासुदेवेभगवतिसायुज्यंचेदिभूभुजः १३ तत्रासीनंसुरऋषिंराजापांडुसुतःक्रतौ ॥ पप्रच्छवि
स्मितमनामुनीनांशृण्वतामिदम् १४ ॥ युधिष्ठिरउवाच ॥ अहोअत्यद्भुतंह्येतद्दुर्लभैकांतिनामपि ॥ वासुदेवेपरेतत्त्वेप्राप्तिश्चैद्यस्यविद्विषः १५ एतद्वेदितु
मिच्छामःसर्वएववयंमुने ॥ भगवन्निंदयावेनोद्विजैस्तमसिपातितः १६ दमघोषसुतःपापआरभ्यकलभाषणात् ॥ संप्रत्यमर्षीगोविंदेदंतवक्रश्चदुर्मतिः १७

चूर्णिका

९ किंच यदाजीवस्यभोगार्थंपुरःस्रष्टुंइच्छतितदारजोवर्द्धयतियदाक्रीडितुमिच्छतितदासत्त्वंयदासंहर्तुमिच्छति तदातमः १० हेराजन् अजः प्रधानपुरुषसहकारित्वेनस्वाश्रयभूतं
चरंतंकालंस्वयमेवसृजति हेनृप अयंकालःसत्त्वगुणोत्कर्षकृत् अतः देवानीकंवर्धयति सुरप्रतिपक्षान्हिनस्ति ११ एवंकालशक्तिक्षुभितगुणगतंवैषम्यंतदधिष्ठातरिस्फुरतिअतः त
योः सुरपक्षपातेनवधोन किंतु ब्रह्मशापेनदैत्ययोनिंप्राप्तयोः अनुग्रहार्थमेववधःकृतःहेनृपएतद्विषयेमहाक्रतौपृच्छतेयुधिष्ठिरायपूर्वंसुरर्षिणाइतिहासःउदाहृतःतंशृणु १२ अथराजसू
येमहाक्रतौश्रीकृष्णेशिशुपालस्यसायुज्यंदृष्ट्वा १३ तत्रमुनीनांशृण्वतांयुधिष्ठिरःनारदंउवाच १४ अहोएकांतभक्तानामपिदुर्लभामोक्षाप्तिःसाशत्रोःशिशुपालस्यकथंप्राप्ता १५ एतत्
ज्ञातुंइच्छामः किंचभगवन्निंदयावेनःद्विजैःनरकेपातितः १६ शिशुपालदंतवक्रौतुआबाल्यात् कृष्णद्वेष्टारौ असकृत्विष्णुंशपतोःतयोःजिव्हायांकुष्ठंनोत्पन्नंनरकंचनाविविशतुः १७

॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वित्रःकुष्ठम् १८ दुरवग्राह्यंदुःप्रापंधामस्वरूपंयस्यतस्मिन्लयंसायुज्यंईयतुःजग्मतुः । अभूतस्यापिदंतवक्त्रसायुज्यस्यजातकप्रामाण्येनासिद्धवन्निर्देशः १९ एतत्अद्भुततमंहि । अतएतत्प्रतिभ्राम्यति ।
भगवान्सर्वज्ञस्त्वंब्रूहि २० आभाष्यसंबोध्यसीदंत्यस्यामितिसत्सभा । तस्याःसद.सदसःशृण्वंत्याःसत्याःकथाःप्राहेत्यन्वयः २१ अहोभगवन्निंदकस्यनरकपातेनभाव्यमितिवदतस्तवकोभिप्रायः ।
भगवत्पीडाकरत्वेनवातदभावेपिसुरापानादिवन्निषिद्धाचरणाद्वा । तत्रतावद्देहाभिमानकृतत्वान्निंदादिनिमित्तपीडादीनाम् । भगवतश्चतदभावान्नपीडाशंकास्तीत्याहनिंदनइतिसार्धैस्त्रिभिः । निंदनंदोषकीर्त
नम् । न्यक्कारस्तिरस्कारः । स्तवोगुणकीर्तनम् । सत्कारआदरः । निंदनस्तुत्यादिज्ञानार्थंप्रधानपुरुषयोरविवेकेनअविवेचनेनकलेवरंकल्पितंरचितम् । देहाभिमानेननिंदनादिस्वीकारेआत्मानात्मविवे
काराहित्यंहेतुरित्यर्थः २२ तस्यदेहस्याभिमानेनभूतानांयथाममाहमितिवैषम्यंतत्कृतंहिंसादिकंचभवतितथानयस्येत्युत्तरेणान्वयः । दंडस्ताडनंपारुष्यंनिंदातयोर्हेतुभूतयोर्हिंसापीडाचभवति ।(देहाभिमा
नेनस्वपरबुद्धिःतयाचदंडादितेनचहिंसादीत्यर्थः) २३ यस्मिन्निबद्धोयमभिमानस्तस्यदेहस्यवधात्प्राणिनांवधश्चयथातथायस्याभिमानोनास्तिअस्यपरस्यपरमेश्वरस्यहिंसाकेनहेतुनाकल्पते । नकेनापि ।
अभिमानाभावेहेतुः । कैवल्यात् । अद्वितीयत्वेनअभिमंतव्याभावात् । वैषम्याभावेहेतुः । अखिलात्मनःसर्वात्मनइति । तर्हिकिमितिहंति । तत्राहपरस्यदमकर्तुरिति । हितार्थंदंडंकरोतीत्यर्थः २४
यस्माद्भगवतोनिंदादिकृतंवैषम्यंनास्तितस्माद्येनकेनाप्युपायेनध्यायतस्तेनैवनिंदादिकृतपापस्यापिनाशात्सायुज्यंयुक्तमित्याशयेनाहतस्मादितिसप्तभिः । नास्तिवैरंकेनापियस्मिन्तेनभक्तियोगेनेत्यर्थः । युं
ज्यान्मनइतिशेषः । तस्मात्कथंचिदेतैरुपायैःपृथक्नेक्षतेनेक्षेतअनवरतमनोयोगेनभाव्यमित्यर्थः २५ तेष्वपिवैरानुबंधःश्रेष्ठइत्याह यथेति ।(वैरस्याखंडयोगेनयथानतथाभक्तियोगेनापीति) २६
अत्रदृष्टांतः कीटःपेशस्कृताभ्रमरेणतंभ्रमरम् । संरंभोद्वेषःभयंचसएवयोगस्तेन २७ वैरेणयाअनुचिंतातयैवपूतःपाप्मायेषांतेतंप्राएुः २८ तदघंकामादिनिमित्तंपापंहित्वा २९

शपतोरसकृद्विष्णुंयद्ब्रह्मपरमव्ययम् ॥ श्वित्रोनजातोजिह्वायांनांधंविविशतुस्तमः १८ कथंतस्मिन्भगवतिदुरवग्राह्यधामनि ॥ पश्यतांसर्वलोकानांलयमी
यतुरंजसा १९ एतद्भ्राम्यतिमेबुद्धिर्दीपार्चिरिववायुना ॥ ब्रूह्येतदद्भुततमंभगवांस्तत्रकारणम् २० ॥ श्रीशुकउवाच ॥ राज्ञस्तद्वचआकर्ण्यनारदोभगवानृ
षिः ॥ तुष्टःप्राहतमाभाष्यशृण्वंत्यास्तत्सदःकथाः २१ ॥ नारदउवाच ॥ निंदनस्तवसत्कारन्यक्कारार्थंकलेवरम् ॥ प्रधानपरयोराजन्नविवेकेनकल्पितम् २२
हिंसातदभिमानेनदंडपारुष्ययोर्यथा ॥ वैषम्यमिहभूतानांममाहमितिपार्थिव २३ यन्निबद्धोऽभिमानोऽयंतद्वधात्प्राणिनांवधः ॥ तथानयस्यकैवल्यादभिमा
नोऽखिलात्मनः ॥ परस्यदमकर्तुर्हिहिंसाकेनास्यकल्पते २४ तस्माद्वैरानुबंधेननिर्वैरेणभयेनवा ॥ स्नेहात्कामेनवायुंज्यात्कथंचिन्नेक्षतेपृथक् २५ यथावैरानु
बंधेनमर्त्यस्तन्मयतामियात् ॥ नतथाभक्तियोगेनइतिमेनिश्चितामतिः २६ कीटःपेशस्कृतारुद्धःकुड्यायांतमनुस्मरन् ॥ संरंभभययोगेनविंदतेतत्स्व
रूपताम् २७ एवंकृष्णेभगवतिमायामनुजईश्वरे ॥ वैरेणपूतपाप्मानस्तमीयुरनुचिंतया २८ कामाद्द्वेषाद्भयात्स्नेहाद्यथाभक्त्येश्वरेमनः ॥ आवेश्यतद
घंहित्वाबहवस्तद्गतिंगताः २९

श्लोकाः १८/२९

चूर्णिका

१८ एवंसतिकथंसायुज्यंप्राप्तौ १९ एतद्विषयेमेमनोभ्राम्यतितत्रकारणंब्रूहि २० ॥ श्रीशुकउवाच ॥ राज्ञःवचःश्रुत्वा २१ नारदउवाच हेयुधिष्ठिरईश्वरस्यतुवैषम्यं
नास्ति २२ २३ २४ अतःवैरानुबंधेनभयेनस्नेहात्कामेनवाहरौमनःयुंज्यात् २५ २६ यथाकीटःभ्रमरेणरुद्धःतंअनुस्मरन्तद्रूपंविंदते २७ तथाभगवतिमनोयुंजन्पुमान्
सायुज्यंप्राप्नोति २८ किंच द्वेषादिभिःईश्वरेमनःस्थाप्यबहवःतद्गतिंप्राप्ताः तेच गोप्यःकामात्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः संबंधात्वृष्णयःस्नेहात्यूयंभक्त्यावयंविभो २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

३० तर्हिवेनःकिमितिनरकेपातितः । तीव्रध्यानाभावात्पापमेवतत्रफलितामित्याह । कतमोपीति । पुरुषंश्रीहरिंप्रतिपुरुषेपुरुषस्यकामासंभवात्भयादिभिश्चिंतयतांपंचानांमध्येनकतमोपिवेनः । अयंभावः । वैरंतावन्नविधीयते । किंत्वनुचिंतनमेव । वेनेनतुवैरमात्रंकृतंनतुतदनुबंधःशिशुपालादयस्तुतीव्रध्यानेननवैरादिजन्यंअघंहित्वाश्रीहरिंप्राप्ताइति ३१ तदेवमितिहासप्रस्तावकथामुक्त्वाश्रीकृष्णेशिशुपालस्यवैरा नुबंधेकोहेतुरित्यपेक्षायांतमेवेतिहासंवक्तुमाह । मातृष्वस्रेयइति । पदात्वैकुंठात्प्रच्युतौ ३२ हरिदासौअभिमृशतिअभिभवतीतितथा । भवोजन्म कस्यशापःकीदृशोवाअश्रद्धेयइवअनादरणीयइवअसंभवात् ३३ असंभवमेवाह । जन्महेतुभूतैःप्राकृतैर्देहेंद्रियासुभिर्हीनानाम् । शुद्धसत्त्वमयदेहानामित्यर्थःप्राकृतदेहसंबंधेनसंबद्धमेतदाख्यानमाख्यातुमर्हसि ३४ ३५ कथंभूताःपंचवाषड्वाहायनानिवर्षाणियेषांतेअर्भाबाला स्तद्वदाभायेषांते । पूर्वेषांमरीच्यादीनामपि । दिग्वाससोदिगंबराअतस्तान्शिशून्मत्वा (द्वाःस्थौद्वारपालौ) ३६ वासमपिनार्हथःकुतःपुनस्तत्सेवामितिचकारार्थः । हेबालिशौअतोहेतोःआशुयातं (गच्छ तम्) ३७ वांयुवयोस्त्रिभिर्जन्मभिःलोकायस्वस्थानप्राप्तयेकल्पतांशापइतिशेषः । तावता (कालेना-) यंशापःसमाप्यतामितिपुनःप्रोक्तावित्यर्थः ३८ ३९ धरोद्धारेनिमित्तेतत्प्रातिपक्षीहतः ४० हिरण्यकशिपो वधकारणंसूचयति । हिरण्यकशिपुःपुत्रमिति ४१ सर्वभूतानामात्मभूतम् । कुतःसमंब्रह्मैवपश्यतीतितथातम् । अतःप्रशांतंद्वेषादिरहितंअतएवभगवतस्तेजसास्पृष्टंव्याप्तम् । उद्यमैःशस्त्रप्रहारादिभिः ४२

॥ ४ ॥

श्लोकाः ३०/४२

गोप्यःकामाद्भयात्कंसोद्वेषाच्चैद्यादयोनृपाः ॥ संबंधाद्वृष्णयःस्नेहाद्यूयंभक्त्यावयंविभो ३० कतमोपिनवेनःस्यात्पंचानांपुरुषंप्रति ॥ तस्मात्केनाप्युपायेनम नःकृष्णेनिवेदयेत् ३१ मातृष्वस्रेयोवश्चैद्योदंतवक्त्रश्चपांडव ॥ पार्षदप्रवरौविष्णोर्विप्रशापात्पदाच्च्युतौ ३२ ॥ युधिष्ठिरउवाच ॥ कीदृशःकस्यवाशापोहरिदा साभिमर्शनः ॥ अश्रद्धेयइवाभातिहरेरेकांतिनांभवः ३३ देहेंद्रियासुहीनानांवैकुंठपुरवासिनाम् ॥ देहसंबंधसंबद्धमेतदाख्यातुमर्हसि ३४ ॥ श्रीनारदउ वाच ॥ एकदाब्रह्मणःपुत्राविष्णोर्लोकंयदृच्छया ॥ सनंदनादयोजग्मुश्चरंतोभुवनत्रयम् ३५ पंचषड्ढायनार्भाभाःपूर्वेषामपिपूर्वजाः ॥ दिग्वाससःशिशून्म त्वाद्वाःस्थौतान्प्रत्यषेधताम् ३६ अशपन्कुपिताएवंयुवांवासंनचार्हथः ॥ रजस्तमोभ्यांरहितेपादमूलेमधुद्विषः ॥ पापिष्ठामासुरींयोनिंबालिशौयातमा श्वतः ३७ एवंशप्तौस्वभुवनात्पतंतौतैःकृपालुभिः ॥ प्रोक्तौपुनर्जन्मभिर्वांत्रिभिर्लोकायकल्पताम् ३८ जज्ञातेतौदितेःपुत्रौदैत्यदानववंदितौ ॥ हिरण्यक शिपुर्ज्येष्ठोहिरण्याक्षोऽनुजस्ततः ३९ हतोहिरण्यकशिपुर्हरिणासिंहरूपिणा ॥ हिरण्याक्षोधरोद्धारेबिभ्रतासौकरंवपुः ४० हिरण्यकशिपुःपुत्रंप्रह्लादंकेशव प्रियम् ॥ जिघांसुरकरोन्नानायातनामृत्युहेतवे ४१ सर्वभूतात्मभूतंतंप्रशांतंसमदर्शनम् ॥ भगवत्तेजसास्पृष्टंनाशक्नोद्धंतुमुद्यमैः ४२

चूर्णिका

एषुमध्येवेनःकतमोपिन तस्मात्केनाप्युपायेनमनःकृष्णेनिवेशयेत् ३० शिशुपालदंतवक्त्रौतुविष्णुपार्षदौविप्रशापात्पदच्युतौ ३१ ॥ युधिष्ठिरउवाच ॥ वैकुंठवासिनोर्हरि दासयोःकीदृशःकस्यवाशापोजातः ३२ ३३ ॥ नारदउवाच ॥ एकदासनकादयःयदृच्छयावैकुंठंजग्मुः ३४ तदाद्वाःस्थौतान्शिशून्मत्वान्यषेधताम् ३५ तदातेक्रुद्धाः संतःऊचुःहेद्वाःस्थौयुवांअत्रवासंकर्तुंनचार्हथःअतःआसुरींयोनिंयातम् इतिअशपन् ३६ एवंशप्तौतस्त्थानात्पतंतौकृपालुभिःतैःपुनःप्रोक्तौयुवांत्रिभिर्जन्मभिःस्वलोकायकल्प ताम् ३७ तौहिरण्यकशिपुहिरण्याक्षौजातौ ३८ नृसिंहरूपिणाहरिणाज्येष्ठोहतःसूकररूपेणहिरण्याक्षोहतः ३९ हिरण्यकशिपुः हरिभक्तंपुत्रंप्रह्लादंजिघांसुःनानायातनाः कृत्वा ४० हंतुंनाशकत् ४१ ततस्तौरावणकुंभकर्णौजातौ ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विश्रवसःसुतौ ४३ न्यहनत्हतवानित्यर्थः । तर्हितदेवकथनीयमित्युत्सुकंप्रत्याह । रामवीर्यमिति ४४ कृष्णचक्रेणहतमंहोययोः । पापमेवहतंनतुतावित्यर्थः ४५ (अच्युतस्यसात्मतांसरूपताम्) ४६
येनकारणेनप्रह्लादस्याच्युतात्मतांअच्युतैकचित्तत्वंतदपिब्रूहीतिशेषः ४७ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेनारदयुधिष्ठिरसंवादेटीकायांप्रथमोऽध्यायः १ ॥ ॥ ७ ॥ ॥ ७ ॥
द्वितीयेविष्णुरोषेणलोकंविप्लाव्यदानवैः । तद्धतोभ्रातृपुत्रादीनितिहासैरसांत्वयत् १ भगवद्द्वेषएवतद्द्वेषेपिकारणमित्याशयेनाह । भ्रातरित्यादिना । एवंदेवपक्षपातेन (भ्रातरिहिरण्याक्षे) १ कोपेनउत्
अतिशयेनज्वलद्भ्यांकोपाग्निधूमेनैवधूम्रमंबरं निरीक्षमाणः २ करालदंष्ट्राभिर्युक्तयाउग्रयादृष्ट्यादुःप्रेक्षंभृकुटीयुक्तंमुखंयस्यसः ३ ४ (आशुमाचिरंअतिशीघ्रम् । यद्वाआशुशृणुत । माचिरंक्रियताम्) ५
समेनापिउपधावनैः भजनैःनिमित्तभूतैःपार्ष्णिग्राहेण (पृष्ठतोरक्षकेण) ६ एवंत्यक्तःस्वभावःसमत्वंयेन । तस्यघृणेःशुद्धतेजोमयस्यापिमाययावनौकसः वराहरूपस्यसतः अस्थिरात्मनःअव्यवसितचि
त्तस्य । कुतः । योयोभजतितंतंभजमानस्यअनुसरतः ७ तस्यरुधिरेणयावत्तर्पयिष्यामितावद्यूयंभुवंयातेतितृतीयेनान्वयः ८ ननुदेवैस्तद्वधःकारितः अतस्तेकिंनहन्यंतेतत्राह । तस्मिन्हरौकूटेकपटेअ
हितेप्रतिपक्षेकूटमीहितंयस्येतिवा । वस्तुतःकूटेनिश्चले । हितेसर्वसुहृदि । नष्टेअदृष्टेसतिदेवाःशुष्यंतिस्वयमेवनाशंयास्यंति । कुतःविष्णुरेवप्राणोयेषांतेयथाकृत्तमूलेवृक्षेशाखाःस्वयंशुष्यतितद्वत् ९

श्लोकाः ४३/९

ततस्तौराक्षसौजातौकेशिन्यांविश्रवःसुतौ ॥ रावणःकुंभकर्णश्चसर्वलोकोपतापनौ ४३ तत्रापिराघवोभूत्वान्यहनच्छापमुक्तये ॥ रामवीर्यंश्रोष्यसित्वंमार्कंडे
यमुखात्प्रभो ४४ तावेवक्षत्रियौजातौमातृष्वस्रात्मजौतव ॥ अधुनाशापनिर्मुक्तौकृष्णचक्रहतांहसौ ४५ वैरानुबंधतीव्रेणध्यानेनाच्युतसात्मताम् ॥ नीतौ
पुनर्हरेःपार्श्वंजग्मतुर्विष्णुपार्षदौ ४६ ॥ युधिष्ठिरउवाच ॥ विद्वेषोदयितेपुत्रेकथमासीन्महात्मनि ॥ ब्रूहिमेभगवन्येनप्रह्लादस्याच्युतात्मताम् ४७
इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेनारदयुधिष्ठिरसंवादेप्रथमोऽध्यायः १ ॥ ॥ ७ ॥ ॥ श्रीनारदउवाच ॥ भ्रातर्येवंविनिहतेहरिणाक्रोडमूर्तिना ॥ हिर
ण्यकशिपूराजन्पर्यतप्यद्रुषाशुचा १ आहचेदंरुषापूर्णःसंदष्टदशनच्छदः ॥ कोपोज्ज्वलद्भ्यांचक्षुर्भ्यांनिरीक्षन्धूम्रमंबरम् २ करालदंष्ट्रोग्रदृष्ट्यादुःप्रेक्ष्यभ्रुकु
टीमुखः ॥ शूलमुद्यम्यसदसिदानवानिदमब्रवीत् ३ भोभोदानवदैतेयाद्विमूर्धंस्त्र्यक्षशंबर ॥ शतबाहोहयग्रीवनमुचेपाकइल्वल ४ विप्रचित्तेममवचःपु
लोमन्शकुनादयः ॥ शृणुतानंतरंसर्वेक्रियतामाशुमाचिरम् ५ सपत्नैर्घातितःक्षुद्रैर्भ्रातामेदयितःसुहृत् ॥ पार्ष्णिग्राहेणहरिणासमेनाप्युपधावनैः ६ त
स्यत्यक्तस्वभावस्यघृणेर्मायावनौकसः ॥ भजंतंभजमानस्यबालस्येवास्थिरात्मनः ७ मच्छूलभिन्नग्रीवस्यभूरिणारुधिरेणवै ॥ रुधिरप्रियंतर्पयिष्येभ्रातरंमे
गतव्यथः ८ तस्मिन्कूटेऽहितेनष्टेकृत्तमूलेवनस्पतौ ॥ विटपाइवशुष्यंतिविष्णुप्राणादिवौकसः ९

चूर्णिका

तौरामःअवधीत् हेधर्मतस्यवीर्यंमार्कंडेयमुखात्श्रोष्यसि ४३ तावेवशिशुपालदंतवक्रौकृष्णचक्रहतांहसौशापमुक्तौभूत्वापुनःपार्षदौजातौ ४४ ४५ ४६ ॥ युधिष्ठिरउ
वाच विष्णुभक्तेपुत्रेविद्वेषः कुतःआसीत् प्रह्लादस्यहरिभक्तिःकथंआसीत् तत्सर्वंब्रूहि ४७ ॥ ७ ॥ ॥ इतिसप्तमेप्रथमः १ ॥ नारदउवाच ॥ क्रोडमूर्तिनाहरिणा
हिरण्याक्षेहतेसतिक्रुद्धः १ हिरण्यकशिपुःसदसिशूलंउद्यम्यदानवान्अब्रवीत् २ ३ भोदानवदैतेयाःमद्वचःशृणुत तथैवआशुक्रियताम् ४ ५ मत्सपत्नैर्देवैः हरिणामेभ्राता
घातितः ६ ७ अतःतंहरिंहत्वातद्रक्तेनयावत्भ्रातरंतर्पयिष्यामि ८ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तपोयज्ञादियुक्तान्सूदयध्वंघातयत १० ननुतैःकिमपराद्धंतत्राह। विष्णुरिति । द्विजानांक्रियाअनुष्ठानंमूलंयस्यसः ।यतोसौयज्ञोधर्ममयश्चदेवादीनांपरायणंपरमआश्रयः। अतोयज्ञरूपस्यविष्णोर्मूलत्वात्मा
मनाहत्यतदाश्रयणाच्चतेवध्याइतिभावः ११ तस्मात्परमंमंत्रंशृणुतेत्याह । यत्रयत्रेति। संदीपयतदहत । वृश्चतआजीव्यानांवृक्षाणांछेदंकुरुत १२ (विदधुश्चक्रुः) १३ पुरंहट्टादिमत् । ग्रामस्तद्रहितः।
व्रजोगवांवासः । उद्यानंकृत्रिमंवनम् । क्षेत्रंव्रीह्यादेः । आरामोऽकृत्रिमंवनम् । आश्रमऋषीणांस्थानम् । आकरोरत्नादीनाम् । खेटःकृषिवलानांवासः । खर्वटोगिरिद्रोण्याश्रयआश्रमः । घोषआभीरा
णांवासः । पत्तनंराजधानी १४ खनित्रैः खननसाधनैः । आजीव्यान्उपजीव्यान् जंब्वांब्रकपित्थादीन् शरणानिगृहान् १५ विप्रकृतेउपद्रुते । यज्ञभागानामभावात्दिवंपरित्यज्य अलक्षिताःसंतःभु
विचेरुः १६ तदेवंप्रजानांकदनंदानवेषुकुर्वत्सुस्वयंस्वर्गराज्यादिसाधयितुंतपस्तप्तुकामः प्रथमंयत्कृतवान्तदाह। हिरण्यकशिपुरित्यादिना । कटोदकंप्रेतायप्रदेयमुदकं आदिशब्दात्प्रेतश्राद्धंच १७ १८
१९ हेवधूरितिभ्रातुर्भार्यांसंबोधयति (श्लाघ्यःस्तुत्यःईप्सितःकथितइत्यर्थः) २० भवतुनामतस्यश्लाघ्योवधः । तथाप्यस्माकंतावद्बंधुर्गतएवेतिचेत्तत्राह । भूतानामिति । दैवेनप्राचीनकर्मणाएकत्रनीता
नांसंयोजितानां पुनश्चस्वैःस्वैःकर्मभिरुन्नीतानांवियोजितानाम् । (प्रपापानीयशालातस्यामिव) २१ एवंलोकदृष्ट्याशोकंनिवार्यतत्त्वदृष्ट्यानिवारयति । नित्यइति । आत्मानित्यःमृत्युशून्यः । अव्य
यःअपक्षयशून्यः । शुद्धःनिर्मलः । सर्वगःसर्वगतः । सर्ववित्सर्वज्ञश्च । सर्वत्रहेतुः परोदेहादिव्यतिरिक्तः । अतोमृतइतिकृशइतिमलिनइतिवियुक्तइतिअज्ञइतिशोकोनकार्यइत्यर्थः । कथंतर्हितस्यसंसारः
तत्राह । धत्तइति । आत्मनामाययास्वाविद्ययालिंगंधत्ते । गुणान्उच्चावचान्देहान्सुखदुःखादीन्वाविशेषेणसृजन्स्वीकुर्वन् । लिंगशरीरोपाधिःसंसारोनतुवास्तवइत्यर्थः २२

॥ ६ ॥ श्लोकाः १०/२२

तावद्यातभुवंयूयंविप्रक्षत्रसमेधिताम् ॥ सूदयध्वंतपोयज्ञस्वाध्यायव्रतदानिनः १० विष्णुर्द्विजक्रियामूलोयज्ञोधर्ममयःपुमान् ॥ देवर्षिपितृभूतानांधर्म
स्यचपरायणम् ११ यत्रयत्रद्विजागावोवेदावर्णाश्रमाःक्रियाः । तंतंजनपदंयातसंदीपयतवृश्चत १२ इतितेभर्तृनिर्देशमादायशिरसाऽऽदृताः । तथाप्रजा
नांकदनंविदधुःकदनप्रियाः १३ पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान् । खेटखर्वटघोषांश्चददहुःपत्तनानिच १४ केचित्खनित्रैर्बिभिदुःसेतुप्राकारगो
पुरान् । आजीव्यांश्चिच्छिदुर्वृक्षान्केचित्परशुपाणयः १५ प्रादहन्शरणान्यन्येप्रजानांज्वलितोल्मुकैः १५ एवंविप्रकृतेलोकेदैत्येंद्रानुचरैर्मुहुः । दिवंदेवाःप
रित्यज्यभुविचेरुरलक्षिताः १६ हिरण्यकशिपुर्भ्रातुःसंपरेतस्यदुःखितः । कृत्वाकटोदकादीनिभ्रातुःपुत्रानसांत्वयत् १७ शकुनिंशंबरंधृष्टंभूतसंतापनंवृकम् ।
कालनाभंमहानाभंहरिश्मश्रुमथोत्कचम् १८ तन्मातरंरुषाभानुंदितिंचजननींगिरा । श्लक्ष्णयादेशकालज्ञइदमाहजनेश्वर १९ ॥ हिरण्यकशिपुरुवाच ॥
अंबांबहेवधूःपुत्रावीरंमार्हथशोचितुम् ॥ रिपोरभिमुखेश्लाघ्यःशूराणांवधईप्सितः २० भूतानामिहसंवासःप्रपायामिवसुव्रते ॥ दैवेनैकत्रनीतानामुन्नीतानां
स्वकर्मभिः २१ नित्यआत्माऽव्ययःशुद्धःसर्वगःसर्ववित्परः ॥ धत्तेऽसावात्मनालिंगंमाययाविसृजन्गुणान् २२

चूर्णिका

तावत्भुवंयाततत्रतपोयज्ञादियुक्तान्द्विजान्घातयत १० एवंकृतेद्विजक्रियामूलोविष्णुःनश्येत् ११ किंच यत्रयत्रद्विजागावोवेदावर्णाश्रमाःक्रियाः तंतंजनपदंयात १२ संदीपयत
वृश्चत इतिभर्तृगदितंश्रुत्वातथाप्रजानाशंचक्रुः १३ किंचपुरग्रामादीन्ददहुः १४ केचित्खनित्रैःसेतुप्राकारादीन्बिभिदुःकेचित्आजीव्यान्वृक्षान्चिच्छिदुः १५ एवंदैत्यैःउप
द्रुतेलोकेसतिदेवाःदिवंत्यक्त्वागुप्ताःसंतःभुविचेरुः १६ ततःहिरण्यकशिपुःमृतभ्रातुःपारलौकिकंकृत्वाततूपत्नींरुषभानुंपुत्रान्शकुनिशंबरादीन् १७ १८ दितिंचसांत्वयन्उवाच
१९ हिरण्यकशिपुरुवाच हेअंबहेवधूःहेपुत्राःवीरंमाशोचथ शूराणांवधःरिपोरभिमुखेश्लाघ्यएव २० अत्रभूतानांसंवासःप्रपायामिवास्ति २१ आत्मातुनित्यःदेहसंबंधस्तुमायाकृतः २२

॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·स· अ०

टीका ॥२॥

॥७॥

एतत्सदृष्टांतंप्रपंचयति । यथेतिचतुर्भिः । तरवःप्रतिबिंबिताः । उपाधिधर्माउपहितेभवंतीतिदृष्टांतमुक्त्वाग्राहकधर्माग्राह्येभवंतीतिदृष्टांतांतरमाह चक्षुषेति २३ अविकलःपरिपूर्णएव । तत्साम्यतांमनःसम तांइत्यर्थः २४ लिंगभावनादेहाभिमानः एषआत्मनोविपर्यासःअन्यथाभावः । तमेवाह । प्रियैर्वियोगःअप्रियैर्योगश्च । कर्मचसंसृतिश्चनानागर्भेषुप्रवेशः २५ ततश्चसंभवउत्पत्तिः । विवेकस्यास्मृतिरननुसं धानम् २६ अत्रापि शोकहेतुंविनावृथैवायंशोकइत्यस्मिन्नर्थे । प्रेतस्यमृतस्यकस्यचिद्येयेबांधवास्तेषांसंवादंशृणुतच २७ उपासततत्समीपेआवृत्यस्थिताः २८ विशीर्णंरत्नमयंकवचंयस्य । विभ्रष्टानिआ भरणानिस्रजश्चयस्य । शरेणनिर्भिन्नंहृदयंयस्य । असृजारक्तेनआविलंलिप्तम् २९ प्रकीर्णाःकेशायस्य । ध्वस्तेअक्षिणीयस्य । रभसासंरंभेणदष्टोदच्छदओष्ठोयेन । रजसाकुंठंआवृतंमुखांभोजंयस्य । छि न्नमायुधंभुजश्चयस्य ३० तस्यपदयोरुपसमीपेआसमंतादपतन् ३१ (स्वशोकेनपरेषामपिनृणांशुचंशोकमुत्पादयंत्यः)३२ विलापमेवाह । अहोइतिद्वाभ्याम् । अकरुणत्वमेवाहुः । दृशामगोचरांदशांयेनभ वान्प्रणीतोगमितः । तेनविधात्रात्वमधुनाशुचांविवर्धनःकृतोसीत्यन्वयः ३३ हेमहीपतेत्वयासुहृत्तमेनविनावयंकथंस्यामभवेमजीवेमेत्यर्थः । अतःहेवीरयत्रत्वंयास्यसितत्रतेअनुयानंअनुगमनंतवपादयोःशुश्रू षांकुर्वतीनांअस्माकंदिशदेहि ३४ निर्हारंदाहार्थनयनंअनिच्छतीनाम् । अस्तंअस्ताचलंप्राप्ति ३५ प.रिदेवितंरोदनंस्वपुर्यामेवाश्रुत्यश्रुत्वातत्रस्वयमेवोपागतोयमःबालकोभूत्वातान्आहअहोइत्यादिना ३६

श्लोकाः

यथांऽभसाप्रचलतातरवोपिचलाइव ॥ चक्षुषाभ्राम्यमाणेनदृश्यतेचलतीवभूः २३ एवंगुणैर्भ्राम्यमाणेमनस्यविकलःपुमान् ॥ यातितत्साम्यतांभद्रेह्य लिंगोलिंगवानिव २४ एषआत्मविपर्यासोह्यलिंगेलिंगभावना ॥ एषप्रियाप्रियैर्योगोवियोगःकर्मसंसृतिः २५ संभवश्चविनाशश्चशोकश्चविविधःस्मृतः ॥ अविवेकश्चिंताचविवेकास्मृतिरेवच २६ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ यमस्यप्रेतबंधूनांसंवादंतंनिबोधत २७ उशीनरेष्वभूद्राजासुयज्ञइतिवि श्रुतः ॥ सपत्नैर्निहतोयुद्धेज्ञातयस्तमुपासत २८ विशीर्णरत्नकवचंविभ्रष्टाभरणस्रजम् ॥ शरनिर्भिन्नहृदयंशयानमसृगाविलम् २९ प्रकीर्णकेशंध्वस्ताक्षं रभसादष्टदच्छदम् ॥ रजःकुंठमुखांभोजंछिन्नायुधभुजंमृधे ३० उशीनरेंद्रंविधिनातथाकृतंपतिंमहिष्यःप्रसमीक्ष्यदुःखिताः ॥ हताःस्मनाथेतिकरैरुरोभृशं घ्नंत्योमुहुस्तत्पदयोरुपापतन् ३१ रुदंत्यउच्चैर्दयितांघ्रिपंकजंसिंचत्यअस्रैःकुचकुंकुमारुणैः ॥ विस्रस्तकेशाभरणाःशुचंनृणांसृजंत्यआक्रंदनयाविलेपिरे ३२ अहोविधात्राऽकरुणेननःप्रभोभवान्प्रणीतोदृगगोचरांदशाम् ॥ उशीनराणामसिवृत्तिदःपुराकृतोधुनायेनशुचांविवर्धनः ३३ त्वयाकृतज्ञेनवयंमहीपतेकथं विनास्यामसुहृत्तमेनते ॥ तत्रानुयानंतववीरपादयोःशुश्रूषतीनांदिशयत्रयास्यसि ३४ एवंविलपतीनांवैपरिगृह्यमृतंपतिम् ॥ अनिच्छतीनांनिर्हारमर्को स्तंसंन्यवर्तत ३५ तत्रहप्रेतबंधूनामाश्रुत्यपरिदेवितम् ॥ आहतान्बालकोभूत्वायमःस्वयमुपागतः ३६

२३
—
३६

चूर्णिका

तस्मात्मायाकृतंसर्वंमिथ्याइतिज्ञात्वामाशोचत २३ २४ २५ २६ अत्रइतिहासंशृणुत २७ उशीनरेषुसुयज्ञोनामराजाअभूत्सःयुद्धेशत्रुभिर्घातितःतंज्ञातयःआवृत्यास्थिताः २८ तदाशरनिर्भिन्नहृदयंशयानं २९ ध्वस्ताक्षंछिन्नायुधभुजं ३० एवंभूतंपतिंदृष्ट्वातत्स्त्रियःदुःखिताःकरैःउरोघ्नंत्यःउच्चैःरुदंत्यःसत्यःविलेपिरे ३१ ३२ अहोनिर्दयेनब्रह्म णात्वंईदृशींदशांगमितः ३३ हेराजन्त्वयासुहृत्तमेनविनावयंकथंजीवेम हेवीरयत्रत्वंयास्यसितत्रअनुगमनेनःआज्ञांदेहि ३४ एवंमृतंपतिंप्रगृह्यविलपतीनांतस्यदाहार्थंनयनंअ निच्छतीनांसतीनांसूर्यास्तंजातम् ३५ तदायमः तत्परिदेवितंश्रुत्वाबालकरूपेणतत्रागत्यतान्बोधयामास ३६ ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अहोआश्चर्यंवयसाअस्मत्तोऽधिकानामपिलोकस्यविधिंजन्ममरणादिप्रकारंविपश्यतामपि । विमोहमेवाह । यत्रयस्मादव्यक्तादागतः तत्रैवगतमपार्थंशोचंति । तदुक्तंगीतासु । ‘अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत । अव्यक्तनिधनान्येवतत्रकापरिदेवनेति ’। किंच । स्वयमपिसधर्माः तेनसमानोमृत्युलक्षणोधर्मोयेषांतथाभूताअपि ३७ अबलादुर्बलाअपिवृकादिभिरभक्ष्यमाणावयंनविचिंतयामः । तत्रहेतुः योंऽतर्गर्भेरक्षतिसएवहिसर्वत्र (विश्वं) रक्षिता (रक्षति)३८ ननुतस्यरक्षणेकिंप्रयोजनंनाकिंचिदपिकिंतुक्रीडैवकेवलमित्याह । यइतियइदंविश्वंसृजतिरक्षतिसंहरतिच । इच्छयासंकल्पमात्रेण । भोअबलाःतस्यईशितुःचराचरंक्रीडासाधनमाहुः । अतःसएवनिग्रहेसंहारेसंग्रहेपालनेचप्रभुः ३९ प्रभुत्वमेवान्वयव्यतिरेकाभ्यांदर्शयातिपथीति । दिष्टेनदैवेन (तदनुरूपेण)ईश्वरेणरक्षितम् । तेनेश्वरेणविहतमरक्षितम् । अस्यहतःतेनोपेक्षितइत्यर्थः ४० तदेवमात्मनोजन्ममरणादिकमंगीकृत्येश्वराधीनत्वान्नशोकःकार्यइत्युक्तं । इदानींतुदेहानामेवजन्मादिनत्वात्मनइत्याहात्रिभिः । भूतानिदेहाः निजयोनिःस्वकारणभूतंलिंगशरीरंतन्निमित्तैःकर्मभिः(काले)भवंतिजायंते । नभवंतिनश्यंतिच । सर्वशःदेवादिदेहाअपि । तत्रहतदा प्रकृतौदेहेस्थितोप्यात्मातस्यागुणैःदेहस्यधर्मैर्जन्मादिभिर्नबध्यतेनयुज्यते । यतःअन्यतमोदेहादत्यंतविलक्षणः ४१ नन्वहंकृशःस्थूलइत्यादौनवैलक्षण्यंप्रतीयतेतत्राह । इदंशरीरंमोहजंअविवेकादात्मत्वेनजातं । वस्तुतस्तुपृथगेव । यतःईयतेदृश्यते । भौतिकंच । यथागृहमित्यन्वयः । अत्रैवंप्रयोगः । द्रष्टुरभौतिकात्पुरुषात्शरीरंभिन्नंदृश्यत्वात्भौतिकत्वाच्चयथात्यंताविवेकिनआत्मत्वेनाभिमतमपिगृहंततःपृथक् तद्वदिति । भौतिकत्वानुमानंविवृण्वन्आत्मनोजन्माद्यभावमुपसंहराति । यथाऔदकैःपरमाणुभिर्जातोबुद्बुदादिः यथाचपार्थिवैर्जातोघटादिःयथाचतैजसैर्जातःकुंडलादिर्विनश्यतितथातैरेवत्रिविधैःपरमाणुभिर्जातोजनोदेहएवविकृतःपरिणतःसन्विनश्यतिनत्वात्मेत्यर्थः ४२ पृथगवस्थानाभावेपिभिन्नत्वेदृष्टांतद्वयमाहयथेति । यथाऽनलोदारुष्ववस्थितोपिदाहकत्वेनप्रकाशकत्वेनचभिन्नएवप्रतीयते । यथाचदेहगतोप्यनिलोनासिकादिषुपृथक्स्थितएवप्रतीयते । देहस्थत्वेप्यात्मनस्तद्धर्मयोगाभावेदृष्टांतमाह । यथानभोनसज्जतेकापिसंगंनप्राप्नोति । तथापुमानपिसर्वेषांगुणानांदेहेंद्रियादीनांआश्रयः तेष्वाश्रितोवापरःपृथगेवेत्यर्थः ४३

श्लोकाः ३७/४३

॥ यमउवाच ॥ अहोअमीषांवयसाऽधिकानांविपश्यतांलोकविधिंविमोहः ॥ यत्रागतस्तत्रगतंमनुष्यंस्वयंसधर्माअपिशोचंत्यपार्थम् ३७ अहोवयंधन्यतमायदत्रत्यक्ताःपितृभ्यांनविचिंतयामः ॥ अभक्ष्यमाणाअबलावृकादिभिःसरक्षितारक्षतियोहिगर्भे ३८ यइच्छयेशःसृजतीदमव्ययोयएवरक्षत्यवलुंपतेचयः ॥ तस्याबलाःक्रीडनमाहुरीशितुश्चराचरंनिग्रहसंग्रहेप्रभुः ३९ पथिच्युतंतिष्ठतिदिष्टरक्षितंगृहेस्थितंतद्विहतंविनश्यति ॥ जीवत्यनाथोपितदीक्षितोवनेगृहेपिगुप्तोऽस्यहतोनजीवति ४० भूतानितैस्तैर्निजयोनिकर्मभिर्भवंतिकालेनभवंतिसर्वशः ॥ नतत्रहात्माप्रकृतावपिस्थितस्तस्यागुणैरन्यतमोनिबध्यते ४१ इदंशरीरंपुरुषस्यमोहजंयथापृथक्भौतिकमीयतेगृहम् ॥ यथौदकैःपार्थिवतैजसैर्जनःकालेनजातोविकृतोविनश्यति ४२ यथाऽनलोदारुषुभिन्नईयतेयथाऽनिलोदेहगतःपृथक्स्थितः ॥ यथानभःसर्वगतंनसज्जतेतथापुमान्सर्वगुणाश्रयःपरः ४३

चूर्णिका

॥ यमउवाच ॥ अहोवयसाऽधिकानांअमीषांमोहंपश्यत जीवःयस्मादागतःतत्रैवगतः तंस्वयंसधर्माअपिव्यर्थंशोचंति ३७ अहोवयंयुष्मत्तोधन्याःअत्रपितृभ्यांत्यक्ताःबालाअपिवृकादिभिःअभक्ष्यमाणाःसंतःवयंनविचिंतयामःकुतःयःगर्भेरक्षतिसएवसर्वत्ररक्षिता ३८ हेअबलाःईश्वरेणईक्षितःअनाथोपिवनेजीवति तेनोपेक्षितःगृहेगुप्तोऽपिनजीवति ३९ ४० किंच पथिच्युतंवस्तुदिष्टरक्षितंतिष्ठति गृहेस्थितमपिईश्वरेच्छयानश्यतितद्वत् अतः शोकोनकार्यः हेमूढाः यंशोचथ सः अयंसुयज्ञः शेतेयःश्रोतायःवक्तासःकर्हिचित्नदृश्येतसएवआत्मादेहाद्भिन्नःशोच्योनभवति ४१ किंच यस्त्विहदेहेंद्रियैस्तत्तदर्थद्रष्टाआत्मासतुप्राणदेहाभ्यांअन्यएवसन्उच्चावचान्भजातिविवेकबलेनउत्सृजतिच आत्मनोदेहधर्मः ४२ ४३ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥ ९ ॥ किंच। हे मूढाः यमनुशोचथसोयंयुष्मद्भर्तासुयज्ञः शेतेकिमितिशोचथ । नन्वेतावंतंकालंअसौशृणोतिक्षनंतरं प्रतिवक्तिच । इदानींतस्यादर्शनान्मृतइतिशोचामइतिचेत्सतुनशोचनीयोभवतिप्रागपि तस्यादर्शनादित्याहयःश्रोतेति ४४ ननुमुखनासिकासंचारीप्राणःश्रोतावक्ताचदृष्टएवेत्याशंक्यनासौश्रोतावक्ताचअचेतनत्वादित्याह । नश्रोतेति । महान्सर्वेंद्रियचेष्टाहेतुः अतएवमुख्यः । 'प्राणोवै मुख्य' इतिश्रुतेः । कस्तर्हिश्रोतावक्ताचतत्राह यस्त्विहेति । यस्तुइहेंद्रियैस्तत्तदर्थद्रष्टाआत्मासश्रोतावक्ताच । सतुप्राणदेहाभ्यामचेतनाभ्यामन्यएवसचेतनश्च ४५ ननुचेतनत्वेअन्यत्वेचतस्याहंकृशः स्थूलःकाणोबधिरइत्यादिदेहधर्मोपलब्धिःकुतस्तत्राह. । भूतेंद्रियमनोभिःलिंग्यंतेलक्ष्यंतइतितथातान्देहान्तेभ्योन्यएवभजतिअहमितिमन्यते । तर्हिकथंमोक्षस्तत्राह । तच्चभजनंस्वेनतेजसाविवेकबलेन उत्सृजत्यपि । हीत्यनुभवंप्रमाणयति ४६ ननुविवेकानंतरमपिआहारादिकर्मसुप्रवृत्तेर्बंधःस्यादेवेत्यतआह । यावल्लिंगशरीरेणान्वितस्तदभिमानवानात्माभवति। तावदेवतस्यतत्कर्मनिबंधनंबंधहेतुर्भवति । ततोविपर्ययःदेहधर्मभाक्त्वं । ततःक्लेशश्चानुवर्तते । नतुलिंगाभिमानेनिवृत्ते । यतोयंमायायोगोमाययायुज्यतइतितथा । विपर्ययादिर्नपरमार्थइत्यर्थः ४७ ननुसुखदुःखादीनांतत्साधनानांचसत्यत्वप्रतीतिःकुतोमायामयत्वं तथाचबहवोवादिनःसत्यमेववदंतितत्राह वितथेतिवितथःमिथ्याभूतोयमभिनिवेशः कोसौगुणेषुतत्कार्येषुसुखदुःखादिष्वर्थःपरमार्थइतिदृक्वचश्चेतियत्त् कुतइत्यतआह । यथेति ४८ उपसंहरति । अथतस्मात् नित्यमात्मानं अनित्यंदेहंवातद्विदः नित्यमनित्यंचजानंतःनशोचंति । नन्वेवमुपदेष्टारोपिशोचंतोदृश्यंतेतत्राह । नान्यथेति । ज्ञानदार्ढ्याभावात्स्वभावोननिवर्ततइत्यर्थः ४९ स्वयंसधर्मा अपिइतियदुक्तंतत्रेतिहासमाह । लुब्धकइत्यादिना । पक्षिणामंतकईश्वरेणनिर्मितःसन्यत्रयत्रतेतत्रतत्रतान्कणादिभिःप्रलोभयन् जालं विस्तार्य विशेषेणधृतवान् पाठांतरेतेषामामिषादिभिःप्रलोभनंकृतवानित्यर्थः ५० कुलिंगःकंदभक्षीपक्षिविशेषः । कुलिंगयोर्मिथुनं ५१ शिचस्तंत्याजालस्यसूत्रेऽसज्जतबंधनंप्राप । (महिषीकुलिंगस्यस्त्री)। तांआपन्नांआपदंप्राप्तां । अकल्पःमोचयितुमसमर्थःकृपणोदीनः । पर्यदेवयत्वृक्षशाखामाश्रित्यरुरोद ५२ आकरुणयासर्वतोऽनुकंपायस्यांतया स्त्रियाकिंकरिष्यसि (मामांअनुलक्ष्यशोचंत्याकिंकरिष्यति । किमर्थमिमांरक्षेत्किंतस्यनिष्ठुरस्यानयोपयोगइतिभावः) ५३

श्लोकाः सुयज्ञोनन्वयंशेतेमूढायमनुशोचथ ॥ यःश्रोतायोनुवक्तेहसनदृश्येतकर्हिचित् ४४ नश्रोतानानुवक्तायंमुख्योप्यत्रमहानसुः ॥ यस्त्विहेंद्रियवानात्मासचा न्यःप्राणदेहयोः ४५ भूतेंद्रियमनोलिंगान्देहानुच्चावचान्विभुः ॥ भजत्युत्सृजतिह्यन्यस्तच्चापिस्वेनतेजसा ४६ यावल्लिंगान्वितोह्यात्मातावत्कर्मनिबंधन ४४/५३ म् ॥ ततोविपर्ययःक्लेशोमायायोगोनुवर्तते ४७ वितथाभिनिवेशोयंयद्गुणेष्वर्थदृग्वचः ॥ यथामनोरथःस्वप्नःसर्वमैंद्रियकंमृषा ४८ अथनित्यमनित्यंवाने हशोचंतितद्विदः ॥ नान्यथाशक्यतेकर्तुंस्वभावःशोचतामिति ४९ लुब्धकोविपिनेकश्चित्पक्षिणांनिर्मितोऽतकः ॥ वितत्यजालंविदधेतत्रतत्रप्रलोभयन् ५० कुलिंगमिथुनंतत्रविचरत्समदृश्यत ॥ तयोःकुलिंगीसहसालुब्धकेनप्रलोभिता ५१ साऽसज्जतशिचस्तंत्यांमहिषीकालयंत्रिता ॥ कुलिंगस्तांतथापन्नांनि रीक्ष्यभृशदुःखितः ॥ स्नेहादकल्पःकृपणःकृपणांपर्यदेवयत् ५२ अहोअकरुणोदेवःस्त्रियाऽऽकरुणयाविभुः ॥ कृपणंमानुशोचंत्यादीनयाकिंकरिष्यति ५३

चूर्णिका ॥ ९ ॥ ४४ ४५ ४६ ४७ ४८ भाक्त्वंतुमाययायुज्यते तस्मात्नित्यंआत्मानंअनित्यंदेहंवाज्ञानिनःनशोचंतिस्वयंसधर्मोतियदुक्तं तत्रेतिहासमाह ४९ वनेकश्चित्लुब्धकःकणादिभिःप्रलोभयन् जालंविस्तार्यपक्षिणःधृतवान् ५० एवंकृतवतितत्रविचरत्कुलिंगमिथुनंदृष्ट्वातयोर्मध्येकुलिंगींप्रलोभ्यजालसूत्रेणदधार ५१ तांबद्धांदृष्ट्वाकुलिंगःमोक्तुम समर्थःवृक्षंआश्रित्यविलापंचकार ५२ अहोदेवःअकरुणःदीनयास्त्रियाकिंकरिष्यति ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनोदेहस्यार्धेनविधुरायुषाभार्याशून्यजीवितेनअनेनदुःखंयथाभवत्येवंजीवताकिंमेप्रयोजनंअतोमामपिकामंनयत्वित्यन्वयः ५४ नजाताःपक्षायेषांतान्बालकान्कथंबिभर्मिभरिष्यामिमेप्रजामातरंप्रतीक्षंते ५५ शाकुनिकःपक्षिहंताविलीनःसन् ५६ आत्मापायंस्वमृत्युम् ५७ अयथोत्थितंमिथ्यैवाविर्भूतम् ५८ सांपरायिकंपरलोककृत्यम् ५९ अशोचतेतिपाठेअडागमआर्षः स्वःपरइतिअभिनिवेशएवाज्ञानंतेनविना ६० सस्नुषास्नुपयासहिता ६१ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांद्वितीयोऽध्यायः २॥ ॥ ७ ॥ ॥ तृतीयेतस्यतपसातप्तंवीक्ष्यजगद्विधिः । आगतःसंस्तुतस्तेनयाचितश्चवरान्बहून् १ तदेवंसाधूनांकदनेदानवानांदिश्यबंधूनांशोकंतत्त्वानिरूपणेनापनीययत्कृतवान्तदाह । हिरण्यकशिपुरित्यादिना । अप्रतिद्वंद्वंप्रतिपक्षहीनं । एकराजंएकमेवराजानं । व्यधित्सतकर्तुमैच्छत्१ऊर्ध्वौबाहूयस्य । नभसिदृष्टिर्यस्य । पादांगुष्ठेनाश्रिताऽवनिर्येन २ जटानांदीधितिभिःकांतिभिः । अंशुभिःरश्मिभिःप्रलयकर्ताअर्कइवरेजे । पूर्वयेअलक्षिताःसंतोविचेरुः । तेदेवाःपुनःस्वानिस्थानानिभेजिरे ३ विष्वगीरितःसर्वतःप्रसृतःसन् ४ द्वीपैरद्रिभिश्चसहिताभूश्चलिता ५

कामंनयतुमांदेवःकिमर्धेनात्मनोहिमे ॥ दीनेनजीवतादुःखमनेनविधुरायुषा ५४ कथंत्वजातपक्षांस्तान्मातृहीनान्बिभर्म्यहम् ॥ मंदभाग्याःप्रतीक्षंतेनीडेमेमातरंप्रजाः ५५ एवंकुलिंगंविलपंतमारात्प्रियावियोगातुरमश्रुकंठम् ॥ सएवतंशाकुनिकःशरेणविव्याधकालप्रहितोविलीनः ५६ एवंयूयमपश्यंत्य आत्मापायमबुद्धयः ॥ नैनंप्राप्स्यथशोचंत्यःपतिंवर्षशतैरपि ५७ हिरण्यकशिपुरुवाच ॥ बालएवंप्रवदतिसर्वेविस्मितचेतसः ॥ ज्ञातयोमेनिरेसर्वमनित्यमयथोत्थितम् ५८ यमएतदुपाख्यायतत्रैवांतरधीयत ॥ ज्ञातयोपिसुयज्ञस्यचक्रुर्यत्सांपरायिकम् ५९ ततःशोचतमायूयंपरंचात्मानमेवच ॥ कआत्माकःपरोवात्रस्वीयःपारक्यएववा ॥ स्वपराभिनिवेशेनविनाऽज्ञानेनदेहिनाम् ६० ॥ नारदउवाच ॥ इतिदैत्यपतेर्वाक्यंदितिराकर्ण्यसस्नुषा ॥ पुत्रशोकंक्षणात्त्यक्त्वातत्त्वेचित्तमधारयत् ६१ इतिश्रीभागवतेमहपुराणेसप्तमस्कंधेद्वितीयोऽध्यायः २ ॥ ॥ ७ ॥ ॥ श्रीनारदउवाच ॥ हिरण्यकशिपूराजन्नजेयमजरामरम् ॥ आत्मानमप्रतिद्वंद्वमेकराजंव्यधित्सत १ सतेपेमंदरद्रोण्यांतपःपरमदारुणम् ॥ ऊर्ध्वबाहुर्नभोदृष्टिःपादांगुष्ठाश्रितावनिः २ जटादीधितिभीरेजेसंवर्तार्कइवांशुभिः ॥ तस्मिंस्तपस्तप्यमानेदेवाःस्थानानिभेजिरे ३ तस्यमूर्ध्नःसमुद्भूतःसधूमोग्निस्तपोमयः ॥ तिर्यगूर्ध्वमधोलोकानतपद्विष्वगीरितः ४ चुक्षुभुर्नद्युदन्वंतःसद्वीपाद्रिश्चचालभूः ॥ निपेतुःसग्रहास्ताराजज्वलुश्चदिशोदश ५

चूर्णिका

मामपिकामंनयतु विधुरायुषाकिंप्रयोजनम् ५४ मातृहीनान्बालान्कथंबिभर्मि ५५ एवंविलपंतंकुलिंगंलुब्धकःगुप्तःसन्शरेणविव्याध ५६ एवंयूयंस्वमृत्युंअपश्यंत्यःशोचंत्यःवर्षशतैरपिएनंपतिंनप्राप्स्यथ ५७ ॥ हिरण्यकशिपुरुवाच॥ इत्युक्त्वायमःअंतरधीयतसुयज्ञस्यज्ञातयःपारलौकिकंचक्रुः ५८ ५९ तस्मात्यूयंमाशोचत ६० ॥ ॥ नारदउवाच ॥ एवंसस्नुषादितिः हिरण्यकशिपोर्वाक्यंश्रुत्वापुत्रशोकंत्यक्त्वातत्त्वेचित्तंअधारयत् ॥ ॥ इतिसप्तमेद्वितीयः २ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ॥ हेयुधिष्ठिरहिरण्यकशिपुः आत्मानं अजेयंअजरामरं शत्रुहीनंकर्तुमिच्छन् १ ऊर्ध्वबाहुःनभोदृष्टिःपादांगुष्ठाश्रितावनिःसन्मंदरद्रोण्यांदारुणंतपःतेपे २ तदादेवाःस्वस्थानानिभेजिरे ३ बहुकालकृततपसातस्यमूर्ध्नःसधूमोऽग्निःउत्थितः तेनत्रैलोक्यंअतपत् ४ समुद्राःचुक्षुभुः द्वीपाद्रिभिःसहभूश्चचाल सग्रहास्तारानिपेतुः दिशःजज्वलुः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.स. ६ तवबलिहाराः करप्रदाः पूजाकारिणइतिवा । अभितोभवततीत्यभिभूःहेअभिभूःसर्वाधिपते । पाठांतरेभोःइतिसंबोधनं । अभिअभितोयावन्ननंक्ष्यंतीतिसंबंधः ७ ब्रह्मणस्तस्मिन्द्वेषमुत्पादयितुंतत्संकल्प अ० ३
माहुः । तस्येतिचतुर्भिःतस्यसंकल्पः तवकिंनविदितः । अथाप्यस्माभिर्निवेदितस्त्वयाश्रूयताम् ८ तपोयोगयोः समाधिनानिष्ठयासर्वधिष्ण्येभ्यःश्रेष्ठंनिजासनंसत्यलोकंयथाअध्यास्तेअधितिष्ठति ९ तत्तथै
वात्मनःसाधयिष्यामि । ननुब्रह्मणाअतिदीर्घायुषातपस्तप्त्वातत्साधितं । अन्यःकुतस्तत्साधयेत् । तत्राह । कालात्मनोरिति। यद्यप्यायुषोऽल्पत्वेनदेहोवारंवारंम्रियेत । तथापिकालस्यात्मनश्चनित्यत्वा
टीका त्बहुभिर्जन्मभिस्तपस्तप्त्वातत्साधयिष्याम्येवेति १० वर्धमानेनेतियदुक्तंतस्यफलमाह । अन्यथेति । अन्यथासुरासुरादिव्यत्ययेन । अयथापूर्वंपुण्यपापादिव्यत्ययेन । इदंजगद्विधास्यामि । अन्यैर्वैष्ण ॥ ३ ॥
वादिभिःध्रुवादिपदैःकिंप्रयोजनम् । अतस्तदेवसाधयिष्यामि ११ इतित्वत्पदापहरणेतस्यनिर्बंधंशुश्रुम । अतएवासौतपःपरममास्थितःवर्ततेयदत्रयुक्तंतत् अनंतरं (शीघ्रम्) विधत्स्व १२ अन्यथात
॥११॥ वस्थानभ्रंशेसतिसाधूनामनिष्टंस्यादितिशोचंतआहुःतवपारमेष्ठ्यमिदमासनंद्विजानांगवांचभवायउद्भवायश्रेयसेसुखायभूत्यैऐश्वर्याय । क्षेमायलब्धपालनाय । विजयायउत्कर्षाय १३ १४ वल्मीकादिभिःप्र
तिच्छन्नंप्रथमंनददर्शपश्चात्कथंचिद्विलक्ष्यतंप्राहेतिद्वयोरन्वयः । पिपीलिकाभिःआचीर्णंसमंताद्भक्षितंमेदश्चत्वक्चमांसंचशोणितंचयस्य १५ अभ्रैरापिहितंछन्नंरविमिवविलक्ष्यविस्मितःप्राह १६ १७

तेनतप्तादिवंत्यक्त्वाब्रह्मलोकंययुःसुराः ॥ धात्रेविज्ञापयामासुर्देवदेवजगत्पते ६ दैत्येंद्रतपसातप्तादिविस्थातुंनशक्नुमः ॥ तस्यचोपशमंभूमन्विधेहियदि श्लोकाः
मन्यसे । लोकानयावन्नंक्ष्यंतिबलिहारास्तवाभिभूः ७ तस्यायंकिलसंकल्पश्चरतोदुश्चरंतपः ॥ श्रूयतांकिंनविदितस्तवाथापिनिवेदितम् ८ सृष्ट्वाचराच
रमिदंतपोयोगसमाधिना॥अध्यास्तेसर्वधिष्ण्येभ्यःपरमेष्ठीनिजासनम् ९ तदहंवर्धमानेनतपोयोगसमाधिना ॥कालात्मनोश्चनित्यत्वात्साधयिष्येतथात्मनः ६/१७
१० अन्यथेदंविधास्येहमयथापूर्वमोजसा ॥ किमन्यैःकालनिर्धूतैःकल्पांतेवैष्णवादिभिः ११ इतिशुश्रुमनिर्बंधंतपःपरममास्थितः ॥ विधत्स्वानंतरंयुक्तं
स्वयंत्रिभुवनेश्वर १२ तवासनंद्विजगवांपारमेष्ठ्यंजगत्पते ॥ भवायश्रेयसेभूत्यैक्षेमायविजयायच १३ इतिविज्ञापितोदेवैर्भगवानात्मभूर्नृप ॥ परीतो
भृगुदक्षाद्यैर्ययौदैत्येश्वराश्रमम् १४ नददर्शप्रतिच्छन्नंवल्मीकतृणकीचकैः ॥ पिपीलिकाभिराचीर्णंमेदस्त्वङ्मांसशोणितम् १५तपंतंतपसालोकान्यथाभ्रा
पिहितंरविम् ॥ विलक्ष्यविस्मितःप्राहप्रहसन्हंसवाहनः १६॥ ब्रह्मोवाच ॥उत्तिष्ठोत्तिष्ठभद्रंतेतपःसिद्धोसिकाश्यप॥वरदोहमनुप्राप्तोव्रियतामीप्सितोवरः १७

चूर्णिका तेनाग्निनातप्ताःदेवाःदिवंत्यक्त्वाब्रह्मलोकंगत्वाधात्रेविज्ञापयामासुः ६ हेदेवदेव दैत्येंद्रतपसातप्ताः वयंदिविस्थातुंनशक्नुमः हेभूमन्लोकाःयावन्ननंक्ष्यंतितावत्तस्यउपशमं
यदिमन्यसेतर्हिविधेहि ७ हेब्रह्मन्तवकिमपिअविदितंन तथापिविज्ञापयामहे एवंतस्यसंकल्पोस्ति ८ यथाब्रह्मातपोयोगनिष्ठयासत्यलोकंअधितिष्ठति ९ तथा अहमपितपो
योगादिना आत्मनः विधास्यामि १० किंच इदंविश्वंसुरासुरादिव्यत्ययेनविधास्यामि ११ पुण्यपापव्यत्यासंचकरोमि एवंत्वत्पदग्रहणेतस्यविनिर्बंधंशुश्रुम अतःअत्रयत् युक्तं
तत् अनंतरमेवविधत्स्व १२ हेब्रह्मन्तवासनंतुद्विजगवांसुखायवर्तते अतःतदुपशमंआशुकुरु १३ एवंदेवैर्विज्ञापितःब्रह्मातदाश्रमंभृग्वादिभिःसहययौ १४ तत्रवल्मीकतृ ॥११॥
णकीचकैः प्रतिच्छन्नंतंप्रथमंददर्श पश्चात्पिपीलिकादिभिःभक्षितमेदस्त्वङ्मांसशोणितंतपसालोकान्तपंतंदैत्यंकथंचित् आलक्ष्यविस्मितःसन्प्राह १५ १६ ॥ ब्रह्मोवाच ॥
हेकाश्यपउत्तिष्ठोत्तिष्ठत्वंतपःसिद्धोऽसि अहंवरदःप्राप्तः ईप्सितोवरःव्रीयताम् १७

CC-0. In Public Domain. Digitization by eGangotri

भा.स. हृत्सारंधैर्यं । दंशैर्मक्षिकाविशेषैर्भक्षितोदेहोयस्य १८ निरंबुर्निषिद्धमंबुर्येनसःत्यक्तोदकइत्यर्थः १९ तत्वयाअनेनव्यवसायेनैवतावज्जितोहंतपोनिष्ठेनभवतातुसुतरांजितः २० मर्त्यस्यतवअमर्त्यस्यममदर्श अ०
नमफलंनभवति २१ आदौभवतीत्यादिभवः । औक्षत्प्रोक्षितवान्२२ वज्रवत्संहननंअंगदाढर्च्यंयस्य । तप्तस्यहेम्नइवआभायस्य २३ तस्यदर्शनमेवमहानुत्सवोयस्य २४ हर्षेणाश्रूणिपुलकोद्रेदश्चयस्य
टीका २५ अंधेननिविडेन । तत्रहेतुः । कालसृष्टेनप्रकृतिगुणरूपेणध्वांतेनतमसाआवृतमिदंजगत्यःअभिव्यनक्अभिव्यक्तमकरोत् यश्चत्रिगुणेनात्मनाइदंजगत्सृजतिअवतिपालयतिलुंपतिसंहरतिचतस्मैरजः ॥ ३ ॥
सत्त्वतमसांधाम्नेआश्रयायमहतेपरायपरमेश्वरायनमइतिद्वयोरन्वयः २६ २७ अत्रचस्वप्रकाशत्वंजगत्प्रकाशकत्वंतत्कारणत्वंसृष्ट्यादिकर्तृत्वंमहत्त्वंपरमेश्वरत्वंचेतिषड्विधत्वमुक्तम् । तदेवप्रपंचयन्नमस्करो
ति । नमइतिचतुर्भिः । बीजायकारणाय । तत्रहेतुः । आद्याय । ज्ञानंज्ञप्तिःविज्ञानंविषयाकारंज्ञानंमूर्तिर्यस्यतस्मै । अनेनस्वप्रकाशत्वंजगत्प्रकाशकत्वंचदर्शितम् । बीजायेतिनिमित्तत्वमुक्तम् । उपादा
॥१२॥ नत्वमाह । प्राणादयोयेविकारास्तैरूपैर्व्यक्तिकार्याकारईयुषेप्राप्तवते २८ एवमात्मनात्रिवृताचेत्यनेनोक्तंकारणत्वंद्वेधादर्शितम् । महत्त्वमीश्वरत्वंचाह । त्वमिति त्वमेवजगतोजंगमस्यतस्थुषःस्थावरस्यच
ईशिषेनियंताभवसि । केन । मुख्येनप्राणेनसूत्रात्मरूपेण । अतस्त्वंप्रजानांपतिः तासांचित्तस्यचित्तेश्चतत्परिणामभूतायाश्चेतनायामनसश्चतन्नियम्यानांइंद्रियाणांचपतिःअतस्त्वमेवमहान् । भूतानामा
काशादीनांतद्गुणानांशब्दादिविषयाणांआशयानांतद्वासनानामीशश्चएतेनैवमहत्त्वंदर्शितम् २९

अद्राक्षमहमेतत्तेहृत्सारंमहदद्भुतम् ॥ दंशभक्षितदेहस्यप्राणाह्यस्थिषुशेरते १८ नैतत्पूर्वर्षयश्चक्रुर्नकरिष्यंतिचापरे ॥ निरंबुर्धारयेत्प्राणान्कोवैदिव्यसमाः श्लोकाः
शतम् १९व्यवसायेनतेऽनेनदुष्करेणमनस्विनाम् ॥ तपोनिष्ठेनभवताजितोहंदितिनंदन २०ततस्तआशिषःसर्वाददाम्यसुरपुंगव ॥ मर्त्यस्यतेअमर्त्यस्यदर्श
नंनाफलंमम २१ ॥ श्रीनारदउवाच ॥ इत्युक्त्वादिभवोदेवोभक्षितांगंपिपीलिकैः ॥ कमंडलुजलेनौक्षद्दिव्येनामोघराधसा २२ सतत्कीचकवल्मी १८/२९
कात्सहओजोबलान्वितः ॥ सर्वावयवसंपन्नोवज्रसंहननोयुवा ॥ उत्थितस्तप्तहेमाभोविभावसुरिवैधसः २३ सनिरीक्ष्यांबरेदेवंहंसवाहमवस्थितम् ॥
ननामशिरसाभूमौतद्दर्शनमहोत्सवः२४उत्थायप्रांजलिःप्रह्वईक्षमाणोदृशाविभुम् ॥ हर्षाश्रुपुलकोद्भेदोगिरागद्गदयाऽगृणात् २५ ॥ हिरण्यकशिपुरुवाच ॥
कल्पांतेकालसृष्टेनयोंऽधेनतमसावृतम् ॥ अभिव्यनग्जगदिदंस्वयंज्योतिःस्वरोचिषा २६ आत्मनात्रिवृताचेदंसृजत्यवतिलुंपति ॥ रजःसत्त्वतमोधाम्ने
परायमहतेनमः २७ नमआद्यायबीजायज्ञानविज्ञानमूर्तये ॥ प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे २८ त्वमीशिषेजगतस्तस्थुषश्चप्राणेनमुख्येनपतिः
प्रजानाम् ॥ चित्तस्यचित्तेर्मनइंद्रियाणांपतिर्महान्भूतगुणाशयेशः २९

चूर्णिका हेदैत्यदंशभक्षितदेहस्यतेप्राणाः अस्थिषुशेरतेएवंतेधैर्यंमयादृष्टम् १८ नैतत्पूर्वर्षयःचक्रुः नचापरेकरिष्यंति शतंदिव्यसमाःनिरंबुःप्राणान्कःधारयेत् १९ अनेनव्यवसाये ॥१२॥
नत्वयाजितोऽहम् २० मद्दर्शनंतेनिष्फलंन अतः वरं वृणीष्व २१ ॥ नारदउवाच ॥ एवमुक्त्वाब्रह्माकमंडलुजलेनतंप्रोक्षितवान् २२ ततः सः सर्वावयवसंपन्नः युवावल्मी
कादुत्थितःसन् २३ खेस्थितंब्रह्माणंदृष्ट्वाशिरसाभूमौप्रणम्यप्रांजलिःसन्अस्तौत् २४ २५ ॥ हिरण्यकशिपुरुवाच ॥ हेदेवत्वंतमसाव्याप्तंइदंजगत्प्रकटंकृतवान् २६ किं
च इदंत्वमेवपासिसृजसिहरसिरजःसत्त्वतमसां आश्रयायपरमेश्वरायतेनमः २७ २८ हेविभो त्वंचराचरस्यजगतांनियंता असि २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींयज्ञप्रवर्तकत्वेनांतर्यामित्वेनचजगत्पालकत्वमाह । त्वमेवसप्ततंतून्अग्निष्टोमादियज्ञान्विस्तारयसि । कथंत्रय्यातन्वावेदत्रयरूपेण । कथंभूतया। चत्वारोहोतारोयत्रतच्चातुर्होत्रिकंकर्म तद्विषयया विद्यया। आत्मवतांप्राणिनामात्मभूतस्त्वमेवांतरात्माचअंतर्यामी । कुतः । यतःकविःसर्वज्ञः । तत्कुतः । एकःअखंडः । तत्रहेतुः । अनादिःअनंतपारश्चेति । नास्त्यंतःकालतःपारश्चदेशतोयस्यसः ३० कालरूपेणसंहर्तृत्वमाह । त्वमेवेति । लवाद्यैःकालावयवैःक्षिणोषिक्षपयसि । तदेवंसृष्ट्यादिकर्तृत्वेपिनिर्विकारत्वमेवाहकूटस्थइति । तत्रहेतवः । आत्माज्ञानरूपःपरमेष्ठीपरमेश्वरः अजःजन्मशून्यः महान्अपरिच्छिन्नः । किंच । जीवलोकएवकर्मवशाज्जन्मादिभिर्विक्रियते । त्वंतुतस्यजीवःजीवनस्यहेतुःयतस्तस्यात्मानियंता ३१ तत्कुतस्तत्राह । त्वत्तइति । त्वत्तोऽर्व्यतिरिक्तंयदिकिंचिद्भवेत् । तर्हितस्मात्तवजन्मादिविकारोनियम्यत्वादिकंवाभवेत्तत्तुनास्तीत्याह । त्वत्तःपरंकारणंअपरंकार्यंतत्रएजत्जंगमम् । अनेजत्स्थावरंचव्यतिरिक्तंनास्ति । ननुमद्बोधकशास्त्रंव्यतिरिक्तमस्तीतिचेत्न । यतःविद्यावेदोपवेदादिविद्यास्थानानिकलाश्चतदंगानितवैवतनवः । नतद्व्यतिरिक्तः । तत्कुतःयतःत्वंबृहत्ब्रह्मैवासि । तदपिकुतः तत्राह । हिरण्यरूपंब्रह्मांडंगर्भेयस्यसः । त्रिपृष्ठःत्रिगुणात्मकस्यप्रधानस्यपृष्ठेपरतःस्थितः''अक्षरात्परतःपर''इत्यादिश्रुतेः ३२ ननुब्रह्मांडशरीरस्यजीवस्यममकुतोब्रह्मत्वंकुतोवाब्रह्मांडगर्भत्वादितत्राह । व्यक्तंकार्यमिदंतवशरीरंअव्यक्तंसत्यमितिवा । येनशरीरेणत्वमिंद्रियप्राणमनसांगुणान्विषयान् भुंक्षे । किंच । पारमेष्ठ्येपरमैश्वर्येधामनिस्वरूपेस्थितएवभुंक्षेनतुअस्मदादिवत्स्वरूपतिरोधानेन । अतस्त्वमव्यक्तआत्मानिरुपाधिब्रह्मैवपुराणपुरुषश्चेत्यर्थः ३३ ननुब्रह्मत्वंपुराणपुरुषत्वंचकथमेकस्यतत्राहअनंतइति । हेअनंतयेनत्वयाअव्यक्तेनमनोवचनागोचरेणरूपेणइदंविश्वंततंव्याप्तंतस्मैतुभ्यंभगवतेअचिंत्यैश्वर्यायनमः । भगवत्त्वेहेतुः चिच्छक्तिर्विद्याअचिच्छक्तिर्मायाताभ्यांयुक्तायेति ३४ ३५ अन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपिभगवतआयुधैर्माभूत् ३६ व्यसुभिरप्राणैःअसुमद्भिःसप्राणैः । यथात्मनस्तवास्तितथाअप्रतिद्वंद्वादिकंदेहीतिशेषः ३७

श्लोकाः ३०/३७

त्वंसप्ततंतून्वितनोषितन्वात्रय्याचातुर्होत्रिकविद्ययाच ॥ त्वमेकआत्मात्मवतामनादिरनंतपारःकविरंतरात्मा ३० त्वमेवकालोऽनिमिषोजनानामायुर्लवाद्यावयवैःक्षिणोषि ॥ कूटस्थआत्मापरमेष्ठ्यजोमहांस्त्वंजीवलोकस्यचजीवआत्मा ३१ त्वत्तःपरंनापरमप्यनेजदेजच्चकिंचिद्व्यतिरिक्तमस्ति ॥ विद्याकलास्तेतनवश्चसर्वाहिरण्यगर्भोसिबृहत्त्रिपृष्ठः ३२ व्यक्तंविभोस्थूलमिदंशरीरंयेनेंद्रियप्राणमनोगुणांस्त्वम् ॥ भुंक्षेस्थितोधामनिपारमेष्ठ्येअव्यक्तआत्मापुरुषःपुराणः ३३ अनंताव्यक्तरूपेणयेनेदमखिलंततम् ॥ चिदचिच्छक्तियुक्तायतस्मैभगवतेनमः ३४ यदिदास्यस्यभिमतान्वरान्मेवरदोत्तम ॥ भूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्ममप्रभो ३५ नांतर्बहिर्दिवानक्तमन्यस्मादपिचायुधैः ॥ नभूमौनांबरेमृत्युर्ननरैर्नमृगैरपि ३६ व्यसुभिर्वाऽसुमद्भिर्वासुरासुरमहोरगैः ॥ अप्रतिद्वंद्वतांयुद्धेऐकपत्यंचदेहिनाम् ३७

चूर्णिका ॥१३॥

किंच त्वमेवत्रय्यातन्वायज्ञान्विस्तारयसि ३० त्वमेवकालःसन्जनानांआयुःक्षिणोषि ३१ किंच कार्यकारणादिसर्वंत्वद्व्यतिरिक्तंनास्ति वेदोपवेदादयोऽपितवैवतनवःसंति ३२ किंच इदंकार्यंतवशरीरं त्वंस्वरूपेएवस्थितःसन्येनशरीरेणविषयान्भुंक्षे अतस्त्वंब्रह्मैवासितस्मैभगवतेनमः ३३ इत्यादिएवंस्तुत्वावरंप्रार्थयते ३४ हेवरदोत्तम यदिवरान्दास्यसितर्हि त्वद्विसृष्टभूतेभ्यःमेमृत्युर्माभूत ३५ अंतः न बहिर्न दिवान नक्तंन त्वत्सृष्टव्यतिरिक्तान्न आयुधैःन भूमौन अंबरेन नरैःन मृगैःन ३६ अप्राणैःन सप्राणैःन सुरासुरोरगैःमेमृत्युर्माभूत् । किंच देहिनांऐकपत्यम् ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तपसायोगेनचप्रभावोयेषांतेषांयत्अणिमाद्यैश्वर्यंनरिष्यतिननश्यतितत्त्वदेहीत्यर्थः ३८ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांतृतीयोऽध्यायः ३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥
चतुर्थेतुवरान्लब्ध्वाविजित्याखिललोकपान् । विष्णुद्वेषेणतान्सर्वान्दैत्येंद्रःसमपीडयत् १॥शतधृतिर्ब्रह्मा १ ममयत्तः । यदपियच्चापिइमेदुर्लभाः (तथापितान्वितरामिददामि) २अमोघोनुग्रहोयस्य
प्रजेश्वरैर्मरीच्यादिभिः ३ यदर्थंतपस्तप्तंतदाहएवमित्यादिना ४ ५ ६ सर्वेषांसत्त्वानांप्राणिजातानांयेयेपतयस्तान् ७ त्रिविष्टपंस्वर्गंअध्यास्तेस्म (अधिष्ठितवान्) । तत्रमहेंद्रभवनमध्युवासअ
धिवसतिस्म ८ अखिलर्द्धियुक्तत्वमेवाहयत्रेतित्रिभिः ९ मुक्तादामानिपरिच्छदाःपरिकरायासाम् १० सुदतीःसुदत्यः ११ ऊर्जितमधिकंचंडंतीव्रंशासनंयस्य १२ अंगहेराजन् । उरुगंधिनोग्रगंधेनमधुनासु
रयामत्तंअतएवविवृत्तेविघूर्णितेताम्रेअक्षिणीयस्यतम् । अशेषधिष्ण्यपाःसर्वलोकपालाःउपायनयुक्तैःपाणिभिरुपासत । त्रिभिर्ब्रह्मविष्णुरुद्रैर्विना । पदंआश्रयभूतम् १३

॥१४॥ सर्वेषांलोकपालानांमहिमानंयथात्मनः ॥ तपोयोगप्रभावानांयन्नरिष्यतिकर्हिचित् ३८ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेतृतीयोध्यायः ३ ॥ ७ ॥

श्लोकाः ३८/१३

॥ श्रीनारदउवाच ॥ एवंवृतःशतधृतिर्हिरण्यकशिपोरथ ॥ प्रादात्तत्तपसाप्रीतोवरांस्तस्यसुदुर्लभान् १ ॥ ब्रह्मोवाच ॥ तातेमेदुर्लभाःपुंसांया
न्वृणीषेवरान्मम । तथापिवितराम्यंगवरान्यदपिदुर्लभान् २ ततोजगामभगवानमोघानुग्रहोविभुः ॥ पूजितोऽसुरवर्येणस्तूयमानःप्रजेश्वरैः ३ एवं
लब्धवरोदैत्योबिभ्रद्धेममयंवपुः ॥ भगवत्यकरोद्द्वेषंभ्रातुर्वधमनुस्मरन् ४ सविजित्यदिशःसर्वालोकांश्चत्रीन्महासुरः ॥ देवासुरमनुष्येंद्रान्गंधर्वगरु
डोरगान् ५ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून् ॥ यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ ६ सर्वसत्त्वपतीन्जित्वावशमानीयविश्वजित् ॥
जहारलोकपालानांस्थानानिसहतेजसा ७ देवोद्यानश्रियाजुष्टमध्यास्तेस्मत्रिविष्टपम् ॥ महेंद्रभवनंसाक्षान्निर्मितंविश्वकर्मणा ॥ त्रैलोक्यलक्ष्म्यायत
नमध्युवासाखिलर्धिमत् ८ यत्रविद्रुमसोपानामहामरकताभुवः । यत्रस्फटिककुड्यानिवैडूर्यस्तंभपंक्तयः ९ यत्रचित्रवितानानिपद्मरागासनानिच ॥
पयःफेननिभाःशय्यामुक्तादामपरिच्छदाः १० कूजद्भिर्नूपुरैर्देव्यःशब्दयंत्यइतस्ततः ॥ रत्नस्थलीषुपश्यंतिसुदतीःसुंदरंमुखम् ११ तस्मिन्महेंद्रभव
नेमहाबलोमहामनानिर्जितलोकएकराट् ॥ रेमेभिवंद्यांघ्रियुगःसुरादिभिःप्रतापितैरूर्जितचंडशासनः १२ तमंगमत्तंमधुनोरुगंधिनाविवृत्तताम्राक्षमशेष
धिष्ण्यपाः ॥ उपासतोपायनपाणिभिर्विनात्रिभिस्तपोयोगबलौजसांपदम् १३

चूर्णिका

लोकपालानांमहिमानम् यथातवमहिमानंचदेहि तथाअणिमाद्यैश्वर्यंचदेहि ३८ ॥ इतिसप्तमेतृतीयः ३ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ब्रह्माएवंवृतः तत्तपसाप्रीतः
सन्दुर्लभान्वरान्दत्त्वा १ तेनपूजितःसन् सत्यलोकंजगाम २ ३ हिरण्यकशिपुः लब्धवरः हेममयंवपुःबिभ्रत्भ्रातुर्वधंस्मरन्भगवतिद्वेषं अकरोत् ४ ततः लोकत्रयंदेवदै
त्यगंधर्वादीन् ५ ऋषिपितृपतिमन्वादीन्सर्वसत्त्वपतीन्जित्वावशंआनीयलोकपालानांस्थानैश्वर्यादीनिजहार ६ ७ देवोद्यानश्रियाजुष्टंत्रैलोक्यलक्ष्म्यायतनंइंद्रभवनं अधिव
सतिस्म ८ तस्मिन्महेंद्रभवनेंसुरादिभिर्वंदितचरणःसन्रेमे ९ १० ११ १२ हेअंगमद्येनमत्तंतंब्रह्मविष्णुरुद्रैर्विनाइंद्रादयः देवाः दैत्यगंधर्वसिद्धविद्याधरयक्षराक्षसादयः
एतेसर्वेउपायनयुक्तपाणिभिः उपासत १३

॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तमेवद्वेषंवक्तुमादौसुतस्यमहत्त्वमाह । तस्येत्यादिना । गुणैर्महानभूत् । गुणानेवाहमहदुपासकइत्यादिना ३० सत्यासंधाप्रतिज्ञायस्य । एकएवप्रियश्चसुहृत्तमश्च ३१ दासवत्सम्यङ्नताःसन्नताआर्या
णामंघ्रयोयेन । ईश्वरइतिभावनायस्य ३२ व्यसनेषुप्राप्तेष्वपिनोद्विग्नचित्तःदृष्टेषुश्रुतेषु । गुणेषुविषयेषुनिस्पृहः । यतस्तेषुअवस्तुदृक् । दांताइंद्रियादयोयस्य । रहितआसुरोभावोमत्सरादिर्यस्य ।
असुरोपिसन्प्रशांतकामः ३३ अधुनापितेगुणानपिधीयंतेतिरोहितानभवंति ३४ साधुगाथासदसिसाधुकथाप्रसंगवत्यांसभायांयंप्रह्लादंप्रतिमानंदृष्टांतंरिपवोपिसुराःकुर्वंतिकिंवक्तव्यंभवादृशाविष्णुभक्ताः
३५ सूच्यतेमयाकेवलंचोत्यतेसुष्ठुकथ्यतइतिवा ३६ नैसर्गिकरतेर्लिंगान्याह न्यस्तक्रीडनकइतिषड्भिः । तन्मनस्तयातदेकचित्तत्वेन ३७ एतानिआसनादीनि । गोविंदेनपरिरंभितःआत्मनाएकीकृतः
३८ रुदतिरोदितिरौति । वैकुंठस्यचिंतयाशबलाव्यामिश्राक्षुभिताचेतनायस्य । तस्यचिंतयाह्लादोयस्य ३९ क्वचित्उत्कंठःमुक्तकंठःसन् । अनुचकारतच्चेष्टादिकंस्वयंकृतवान् ४० संस्पर्श
स्तद्भावापत्तिःतेनानिर्वृतः (मुदितः)। अस्पंदःस्थिरोयःप्राणःप्रणयस्तेनयआनंदःतेनयत्सलिलंतेनयुक्तेआमीलितेईषन्निमीलितेईक्षणेयस्य ४१ आत्मनःपरांनिर्वृतिंशांतिंतन्वन्दुःसंगेनदीनस्यअन्य
स्यलोकस्यापिमनसःशमंशांतिंव्यधात् ४२ अघंद्रोहमकरोत् ४३

श्लोकाः ३०/४३

तस्यदैत्यपतेःपुत्राश्चत्वारःपरमाद्भुताः ॥ प्रह्लादोभून्महांस्तेषांगुणैर्महदुपासकः ३० ब्रह्मण्यःशीलसंपन्नःसत्यसंधोजितेंद्रियः ॥ आत्मवत्सर्वभूतानामे
कःप्रियसुहृत्तमः ३१ दासवत्संनतार्यांघ्रिःपितृवद्दीनवत्सलः ॥ भ्रातृवत्सदृशेस्निग्धोगुरुष्वीश्वरभावनः ॥ विद्यार्थरूपजन्माढ्योमानस्तंभविव
र्जितः ३२ नोद्विग्नचित्तोव्यसनेषुनिस्पृहःश्रुतेषुदृष्टेषुगुणेष्ववस्तुदृक् ॥ दांतेंद्रियप्राणशरीरधीःसदाप्रशांतकामोरहितासुरोऽसुरः ३३ यस्मिन्महागुणारा
जन्गृह्यंतेकविभिर्मुहुः ॥ नतेधुनापिधीयंतेयथाभगवतीश्वरे ३४ यंसाधुगाथासदसिरिपवोपिसुरान्नृप ॥ प्रतिमानंचकुर्वंतिकिमुतान्येभवादृशाः ३५ गुणै
रलमसंख्येयैर्माहात्म्यंतस्यसूच्यते ॥ वासुदेवेभगवतियस्यनैसर्गिकीरतिः ३६ न्यस्तक्रीडनकोबालोजडवत्तन्मनस्तया ॥ कृष्णग्रहगृहीतात्मानवेदजग
दीदृशम् ३७ आसीनःपर्यटन्नश्नन्शयानःप्रपिबन्ब्रुवन् ॥ नानुसंधत्तएतानिगोविंदपरिरंभितः ३८ क्वचिद्रुदतिवैकुंठचिंताशबलचेतनः ॥ क्वचिद्धसति
तच्चिंताह्लादउद्गायतिक्वचित् ३९ नंदतिक्वचिदुत्कंठोविलज्जोनृत्यतिक्वचित् ॥ क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकारह ४० क्वचिदुत्पुलकस्तूष्णीमास्ते
संस्पर्शनिर्वृतः ॥ अस्पंदप्रणयानंदसलिलामीलितेक्षणः ४१ सउत्तमश्लोकपदारविंदयोर्निषेवयाऽकिंचनसंगलब्धया ॥ तन्वन्परांनिर्वृतिमात्मनोमुहु
र्दुःसंगदीनान्यमनःशमंव्यधात् ४२ तस्मिन्महाभागवतेमहाभागेमहात्मनि ॥ हिरण्यकशिपूराजन्नकरोदघमात्मजे ४३

चूर्णिका

तस्यदैत्यपतेः पुत्राः ४ आसन् तेषुप्रह्लादः गुणैर्महान् आसीत् ३० किंच ब्रह्मण्यः सत्यसंधः सर्वप्रियः सुहृत्तमः विषयेषुनिस्पृहः गुरुषुईश्वरभावनः नियतेंद्रियः ३१
३२ ३३ ३४ ३५ किंच यस्यवासुदेवे स्वाभाविकी मतिः ३६ यःबालोपिन्यस्तक्रीडनकः ३७ कृष्णग्रहगृहीतात्माईदृशंजगत्नवेद आसीनःपर्यटन्नश्नन्शयानः
प्रपिबन्ब्रुवन् नानुसंधत्तएतानिगोविंदपरिरंभितः क्वचित्गोविंदचिंतयारुदति हसतिगायतिनृत्यतीत्यादि ३८ ३९ ४० ४१ हरिपादारविंदसेवयासत्संगलब्धयाभक्त्या
आत्मनः सुखंतन्वन्अन्यस्यमनसोपिशांतिंव्यधात् ४२ ईदृशेभगवद्भक्तेपुत्रेदैत्यः द्रोहं अकरोत् ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपासनाप्रकारमाहजगुरितिआस्थितंअधिष्ठितम् १४ १५ (अकृष्टपच्याःकर्षणमंतरेणपचंतीत्यर्थः । द्यौःस्वर्गः) १६ तत्पत्न्योनद्यःऊहुर्वहंतिस्म । रत्नाकरानेत्राहक्षारेति (सीधुमद्यं । क्षौद्रंमधु)
१७ आक्रीडंक्रीडास्थानम् (शैलादध्रुः) द्रुमाःसर्वेषुगुणान्पुष्पफलादीन् (द्रुमादध्रुः) सचलोकपालानांपृथग्विधान्गुणान्वर्षणदहनादीन्एकएवदधार १८ निर्जिताःककुभोयेन । यथो
पजोषंयथाप्रीति १९ महान्कालःएकसप्ततियुगानिकिंचिदधिकानि २० २१ २२ २३ अरूपावक्ररहिता २४ ममदर्शनंश्रवणं । सर्वेषांश्रेयसांउपपत्तये (प्राप्तये) भवति २५ २६ २७
ननुदेवादिविद्वेषेप्यस्यविनाशोनास्तिब्रह्मवरेणोर्जितत्वात्तत्राह । निर्वैरायेति । सर्वमहंसहेनमद्भक्तद्रोहमितिभावः २८ असुरंचहतंमेनिरेतदानींद्वेषस्यप्रवृत्तत्वादितिभावः २९

जगुर्महेंद्रासनमोजसास्थितंविश्वावसुस्तुंबुरुरस्मदादयः ॥ गंधर्वसिद्धाऋषयोऽस्तुवन्मुहुर्विद्याधराअप्सरसश्चपांडव १४ सएववर्णाश्रमिभिःक्रतुभि
र्भूरिदक्षिणैः ॥ इज्यमानोहविर्भागानग्रहीत्स्वेनतेजसा १५ अकृष्टपच्यातस्यासीत्सप्तद्वीपवतीमही ॥ तथाकामदुघाद्यौस्तुनानाश्चर्यपदंनभः १६
रत्नाकराश्चरत्नौघास्तत्पत्न्यश्चोहुरूर्मिभिः ॥ क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः १७ शैलाद्रोणिभिराक्रीडंसर्वर्तुषुगुणान्द्रुमाः ॥ दधारलोकपा
लानामेकएवपृथग्गुणान् १८ सइत्थंनिर्जितककुबेकराड्विषयान्प्रियान् ॥ यथोपजोषंभुंजानोनातृप्यदजितेंद्रियः १९ एवमैश्वर्यमत्तस्यदृप्तस्योच्छा
स्त्रवर्तिनः ॥ कालोमहान्व्यतीयायब्रह्मशापमुपेयुषः २० तस्योग्रदंडसंविग्नाःसर्वेलोकाःसपालकाः ॥ अन्यत्रालब्धशरणाःशरणंययुरच्युतम् २१
तस्यैनमोस्तुकाष्ठायैयत्रात्माहरिरीश्वरः ॥ यद्गत्वाननिवर्तंतेशांताःसंन्यासिनोऽमलाः २२ इतितेसंयतात्मानःसमाहितधियोमलाः ॥ उपतस्थुर्हृषी
केशंविनिद्रावायुभोजनाः २३ तेषामाविरभूद्वाणीअरूपामेघनिःस्वना ॥ संनादयंतीककुभःसाधूनामभयंकरी २४ माभैष्टविबुधश्रेष्ठाःसर्वेषांभद्रमस्तुवः ॥
मद्दर्शनंहिभूतानांसर्वश्रेयोपपत्तये २५ ज्ञातमेतस्यदौरात्म्यंदैतेयापसदस्ययत् ॥ तस्यशांतिंकरिष्यामिकालंतावत्प्रतीक्षताम् २६ यदादेवेषुवेदेषुगो
षुविप्रेषुसाधुषु ॥ धर्मेमयिचविद्वेषःसवाआशुविनश्यति २७ निर्वैरायप्रशांतायस्वसुतायमहात्मने ॥ प्रह्लादाययदाद्रुह्येद्धनिष्येऽपिवरोर्जितम् २८ ॥ श्रीना
रदउवाच ॥ इत्युक्तालोकगुरुणातंप्रणम्यदिवौकसः ॥ न्यवर्तंतगतोद्वेगामेनिरेचासुरंहतम् २९

चूर्णिका

१४ सएववर्णाश्रमवद्भिः कृतैर्यज्ञादिभिः इज्यमानः हविर्भागान् अग्रहीत् १५ तस्य अकृष्टपच्यामहीआसीत् द्यौः कामदुघा आस १६ समुद्राः रत्नौघान्ददुः नद्यः घृतद
ग्धादीन्ऊहुः १७ पर्वताः क्रीडास्थानानिददुः द्रुमाः सर्वर्तुषुपुष्पफलादीन् दधुः लोकपालानांपृथक्गुणान् एक एवदधार १८ एवंसः त्रैलोक्यैश्वर्यंभुंजन्नातृप्यत १९ ऐ
श्वर्यमत्तस्यतस्यमहान्कालः अगात् २० तस्योग्रदंडसंविग्नाः सर्वेलोकाः सपालकाः विनिद्राः वायुभोजनाःसंतः अच्युतंशरणंगत्वाउपतस्थुः २१ २२ २३ तदासाधूनां अभयं
करी आकाशवाणी अभवत् २८ हेदेवाः माभैष्ट २५ वः भद्रंतस्यदौरात्म्यंज्ञातं तच्छांतिंकरिष्यामि तावत्कालंप्रतीक्षत २६ यदावेदेषुदेवेषुगोषुविप्रेषुसाधुषु धर्मेमयिचविद्वेषः
सवाआशुविनश्यति २७ किंच यदानिर्वैरायस्वसुतमद्भक्तप्रह्लादायद्रुह्येत् तदावरोर्जितमपितंहनिष्ये २८ ॥ नारदउवाच ॥ इत्युक्तादेवाः तंप्रणम्यन्यवर्तंत असुरंहतं चमेनिरे २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमाध्यायांतेपृष्टमेवार्थमतिविस्मयेनपुनःपृच्छति । देवर्षइति । तवत्वत्तः । तववाक्यमितिवा । साधवेअघमदात्साधोर्द्रोहंकृतवानितियत् । एतद्वेदितुंज्ञातुमिच्छामः ४४ उपालभंतेआक्षिपंति । अघं तुनैवकुर्वंति । अपरःशत्रुरिव । अनुवशान्अनुकूलान्साधून्अपगतरोषान् । गुरुःपितैवदेवताएषांतानुद्दिश्याघंनकुर्वंतीतिकिमुवक्तव्यमित्यर्थः ४५ पुत्रायपुत्रमुद्दिश्यपितुर्द्वेषःपित्राकृतोद्वेषःपुत्रस्यमरणार्थंप्रयोजितःप्रवर्तितः (नतुसाधारणइति) यत्एतत्कौतूहलंकौतुकंविधमपाकुरु । यद्वायचस्मात्पुत्राययोद्वेषःसपितुर्मरणायप्रयोजितःअतएतत्कौतूहलंविधमेत्यर्थः ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांचतुर्थोऽध्यायः ४ ॥ ॥ ७ ॥ ॥ पंचमेगुरुतोऽधीतंत्यक्त्वाविष्णुस्तुतौरतं । घातयन्द्विपसर्पाद्यैःसुतंदैत्योनचाशकत् १ भगवद्भक्तिरेवविद्वेषकारणमितिवक्तुमाह । पौरोहित्यायेत्यादिना । काव्यःशुक्रःअतस्तस्यसुतौदैत्यराजगृहांतिके (शंडश्चमर्कश्चदेवताद्वंद्वेचेतिदीर्घःतत्र) न्यवसतामितिशेषः । पाठ्यान्दंडनीत्यादि-(-ग्रंथान्) पाठ्यान्असुरबालकानितिवाऽन्वयः २ अनुश्रवणानंतरंतथैवपपाठच । किंतुतत्साधुनमेने । तत्रहेतुः । स्वःपरइतिअसद्ग्रहोमिथ्याभिनिवेशएवआश्रयोयस्यतत् ३ ४ हेअसुरवर्यअसद्ग्रहात्अहंममेतिमिथ्याभिनिवेशात्हेतोःसम्यग्बुद्धिग्नाधीर्येषां । वनंगतःसन्हरिमाश्रयेतेतियत्तदेवाहंसाधुमन्ये । कथंभूतंगृहंहित्वाआत्मपातंआत्मनः (पातंपातरूपं) अधःपातनिमित्तमितिभावः । कुतःअंधकूपवन्मोहावहम् ५ परपक्षेविष्णौसमाहिताःपरिनिष्ठिताः । हासमेवाह । बुद्धिरिति (परेषांबुद्धिभिः) ६ विष्णुपक्षैःभागवतैर्हेतुभूतैः । ननुत्वद्गृहेकुतस्तेषांप्रवेशःसत्यम् । तथाऽपिमतिच्छन्नैर्वेषांतरेणाच्छन्नैः ७ दैत्यैर्गृहमानीतम् ८

॥ युधिष्ठिरउवाच ॥ देवर्षएतदिच्छामोवेदितुंतवसुव्रत ॥ यदात्मजायशुद्धायपिताऽदात्साधवेह्यघम् ४४ पुत्रान्विप्रतिकूलान्स्वान्पितरःपुत्रवत्सलाः ॥ उपालभंतेशिक्षार्थंनैवाघमपरोयथा ॥ किमुतानुवशान्साधूंस्तादृशान्गुरुदेवतान् ४५ एतत्कौतूहलंब्रह्मन्नस्माकंविधमप्रभो ॥ पितुःपुत्राययद्द्वेषोमरणायप्रयोजितः ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेचतुर्थोऽध्यायः ४ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ पौरोहित्यायभगवान्वृतः काव्यःकिलासुरैः ॥ शंडामर्कौसुतौतस्यदैत्यराजगृहांतिके १ तौराज्ञाप्रापितंबालंप्रह्लादंनयकोविदं ॥ पाठयामासतुःपाठ्यानन्यांश्चासुरबालकान् २ यत्तत्रगुरुणाप्रोक्तंशुश्रुवेऽनुपपाठच ॥ नसाधुमनसामेनेस्वपरासद्ग्रहाश्रयम् ३ एकदाऽसुरराट्पुत्रमंकमारोप्यपांडव ॥ पप्रच्छकथ्यतांवत्समन्यतेसाधुयद्भवान् ४ ॥ प्रह्लादउवाच ॥ तत्साधुमन्येऽसुरवर्यदेहिनांसदासमुद्विग्नधियामसद्ग्रहात् । हित्वात्मपातंगृहमंधकूपंवनंगतोयद्धरिमाश्रयेत ५ ॥ नारदउवाच ॥ श्रुत्वापुत्रगिरोदैत्यःपरपक्षसमाहिताः ॥ जहासबुद्धिर्बालानांभिद्यतेपरबुद्धिभिः ६ सम्यग्विधार्यतांबालोगुरुगेहेद्विजातिभिः ॥ विष्णुपक्षैःप्रतिच्छन्नैर्नभिद्येतास्यधीर्यथा ७ गृहमानीतमाहूयप्रह्लादंदैत्ययाजकः ॥ प्रशस्यश्लक्ष्णयावाचासमपृच्छतसामभिः ८

श्लोकाः ४४/८

चूर्णिका

॥ युधिष्ठिरउवाच ॥ हेदेवर्षेशुद्धायस्वपुत्रायतत्पिताकुतःद्रोहंअकरोत् एतद्वेदितुमिच्छामः ४४ विप्रतिकूलानपिपुत्रान् पितरःशिक्षार्थंनिंदंतिपरंतुनघ्नंति ४५ एवंसतिपुत्रद्वेषःपितुर्मरणायकथंजातः एतत्कौतूहलंअपाकुरु ४६ ॥ ॥ इतिसप्तमेचतुर्थः ४ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ असुरैःपौरोहित्यायकाव्योवृतः तस्यपुत्रौशंडामर्कौ राजगृहांतिकेन्यवसताम् १ तौप्रह्लादंअन्यबालकांश्चपाठयामासतुः २ ताभ्यांप्रोक्तंद्वैतशास्त्रंशुश्रुवेपपाठच परंतु साधुनमेने ३ एकदादैत्येंद्रः पुत्रं अंकमारोप्यपप्रच्छ हेवत्सत्वंयत्साधुमन्यसे तत् उच्यताम् ४ ॥ प्रह्लादउवाच ॥ हेदैत्यवर्य आत्मपातंगृहंहित्वावनंगत्वाहरिंआश्रयेत् एतत् साधुमन्ये ५ एवंपुत्रगिरःश्रुत्वाहासित्वागुरून् उवाच अस्यधीः विष्णपक्षैः यथानभिद्येत तथास्वगृहेबालः धार्यताम् ६ ७ ततोदैत्ययाजकाःप्रह्लादंगृहमानीयप्रशस्य तं अपृच्छंत ८

॥१७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

बालान्सर्वानतिअतिक्रम्य तुभ्यंतव ९ १० अहोमायामोहिताभवंतोमामाक्षिपंतीत्याशयेनतावदाह परःस्वश्चोतिमिथ्याभिनिवेशोयदीययामाययैवकृतोनतुवास्तवः अतएवतयाविमोहितबुद्धीनांभवतामेव दृष्टःनतुमम। तस्मैअचिंत्यमायेश्वरायनमः ११ अहोकिमेतत्प्रलपसितवबुद्धिभेदोयतोजातस्तंकथयेत्याक्षिप्तः सन्तत्प्रसादादेवेत्युत्तरमाह। सइतित्रिभिः। सभगवान्यदाअनुव्रतःअनुकूलोभवतितदापशूनामिवबुद्धिर्भेदगताभेदनिष्ठाअसतीमिथ्यासंसारविषयाभिद्यतेअभिन्नात्मनिष्ठाभवति १२ भेदकस्यासत्त्वंदर्शयन्नाह। सएषपरमात्मैवस्वःपरइतिचअविवेकिभिःनिरूप्यते। युक्तंचैतत्। यतःयस्यवर्त्मनिजिज्ञासायांब्रह्मादयोपिमुह्यंति। तत्रहेतुःदुरत्ययंदुर्घटमनुक्रमणंअनुचरितमनुवर्णनंवायस्यसः (एषपरमात्मामेमतिंभिनत्ति) १३ निर्विकारस्यकथंमतिभेदकत्वंतत्राह। यथाअयोलोहंआकर्षस्यायस्कांतस्यसमीपेस्वयमेवभ्रमाति मेचेतसश्चक्रपाणेःसान्निधिरेवकुतोजातस्तत्राह। यदृच्छयेतिकस्यतपोदानादेःफलमेतत्तत्नज्ञायतेइत्यर्थः १४ राजसेवक उवाचेतिशेषः १५ अरेवेत्रंकशा आनीयतांसामदानभेददंडानां(उपायानां) मध्येचतुर्थःदमोदंडःअस्यदुर्बुद्धेःउदितःउक्तःशास्त्रेषु। दुर्बुद्धित्वेहेतुः। कुलांगारस्येतिकुलस्यज्वलदंगारवन्नाशहेतोः १६ तत्कुतस्तत्राह। दैतेयाएवचंदनद्रुमाःतेषांवनेअयंकंटकद्रुमतुल्योजातःतदेवाह। यस्यदैतेयवनस्यमूलोन्मूलपरशोःमूलोच्छेदेपरशुस्थानीयस्यविष्णोरयमर्भकएवनालायितःनालमिवाचरत्। यथावनस्यच्छेदकत्वेपरशोःबब्बुलादिनिर्मितोदंडःसहकारीभवति। तंविनाछेदनासंभवात्। तथाविष्णोर्दैत्यमूलच्छेदेहेतुर्जातइत्यर्थः १७ इतितंप्रह्लादंभीषयन्धर्मार्थकामवर्गस्य (क्षयस्थानवृद्धिलक्षणत्रिवर्गस्यवा) प्रतिपादकंशास्त्रंअध्यापयामास १८ ज्ञातंज्ञेयचतुष्टयंउपायचतुष्टयंयेनतं (ज्ञात्वा) दैत्येंद्रंप्रवि। मात्रामृष्टंउद्वर्त्यस्नापितंअलंकृतंभूषणातिलकादिभिः १९

श्लोकाः ९/१९

वत्सप्रह्लादभद्रंतेसत्यंकथयमामृषा॥ बालानतिकुतस्तुभ्यमेषबुद्धिविपर्ययः ९ बुद्धिभेदःपरकृतउताहोतेस्वतोऽभवत् ॥ भण्यतांश्रोतुकामानांगुरूणांकुलनंदन १०॥ प्रह्लादउवाच॥ परःस्वश्चेत्यसद्ग्राहःपुंसांयन्माययाकृतः॥ विमोहितधियांदृष्टस्तस्मैभगवतेनमः ११ सयदानुव्रतःपुंसांपशुबुद्धिर्विभिद्यते॥ अन्यएषततोन्योहमितिभेदगताऽसती १२ सएषआत्मास्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणोनिरूप्यते॥ मुह्यंतियद्वर्त्मनिवेदवादिनोब्रह्मादयोह्येषभिनत्तिमेमतिम् १३ यथाभ्राम्यत्ययोब्रह्मन्स्वयमाकर्षसन्निधौ॥ तथामेभिद्यतेचेतश्चक्रपाणेर्यदृच्छया १४॥ श्रीनारदउवाच॥ एतावद्ब्राह्मणायोक्त्वाविरराममहामतिः॥ तंनिर्भर्त्स्याथकुपितःसदीनोराजसेवकः १५ आनीयतामरेवेत्रमस्माकमयशस्करः॥ कुलांगारस्यदुर्बुद्धेश्चतुर्थोऽस्योदितोदमः १६ दैतेयचंदनवनेजातोयंकंटकद्रुमः॥ यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोऽर्भकः १७ इतितंविविधोपायैर्भीषयंस्तर्जनादिभिः॥ प्रह्लादंग्राहयामासत्रिवर्गस्योपपादनम् १८ ततएनंगुरुर्ज्ञात्वाज्ञातज्ञेयचतुष्टयम्॥ दैत्येंद्रंदर्शयामासमातृमृष्टमलंकृतम् १९

चूर्णिका

हेप्रह्लादसत्यंकथय बालानतिक्रम्यतेबुद्धिविपर्ययःकुतः किंच तेबुद्धिभेदःपरकृतःस्वतोवाएतद्वद ९ १० ॥ प्रह्लादउवाच॥ परः स्वः इतिअज्ञानंयस्यमाययाभवतांदृष्टम् मतुन तस्मैभगवतेनमः ११ १२ यस्याजिज्ञासायांब्रह्मादयोपिमुह्यंति सः मेबुद्धिं भिनत्ति १३ यथा अयस्कांतस्यसांनिध्यात् लोहंभ्रमति तथाचक्रपाणेः इच्छयामेचेतः भिद्यते १४ एवमुक्त्वाविरराम तदाराजसेवकःकुपितः सन्तंनिर्भर्त्स्यउवाच १५ अरेवेत्रमानीयतांकुलांगारस्यअस्यदमः उदितः सः क्रियते १६ दैतेयचंदनवनेजातोयंकंटकद्रुमः यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः १७ एवंतंभीषयन् त्रिवर्गप्रतिपादकशास्त्रं अध्यापयामास १८ ततोगुरुः ज्ञातज्ञेयचतुष्टयंएवंज्ञात्वादैत्येंद्रंदर्शयामास १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(निर्वृतिमानंदं) २० २१ (यदशिक्षत्यच्चस्वधीतंतत्किंचिदुत्तमंपठ्यतां) २२ पादसेवनंपरिचर्या । अर्चनंपूजा। दास्यंदासभावेनकर्मार्पणंसख्यंतद्विश्वासादि । आत्मनिवेदनंदेहसमर्पणं। यथाविक्री
तस्यगवाश्वादेर्भरणपालनादिचिंतानक्रियतेतथादेहंतस्मैसमर्प्यतच्चिंतावर्जनमित्यर्थः २३ इतिनव (संख्याकानि) लक्षणानियस्याःसाअद्धासाक्षात्ज्ञानपूर्वकंचेद्भगवतिविष्णौभक्तिःक्रियेतेसाचअर्पितैवस
तीयदिक्रियेतनतुकृतासतीपश्चादर्प्यतेतदुत्तमंअधीतंमन्ये । नत्वस्माद्गुरोरधीतंशिक्षितंवातथाविधंकिंचिदस्तीतिभावः २४ २५ नविद्यतेसारंयस्मादितिवास्तवोर्थः (हेब्रह्मबंधोद्विजाधम । विपक्षंविष्णुं)
२६ मित्रत्वेनप्रवर्तमानस्यापितवविरोधाचरणंनासंभावितमित्याहसंतिहीति । दुष्टंमैत्रंमित्रत्वंयेषांते (छद्मवेषिणःकपटवेषधारिणः) रोगइति । ‘ ब्रह्महाक्षयरोगीस्यात्सुरापःश्यावदंतकः । स्वर्णहारी
तुकुनखीदुश्चर्मागुरुतल्पग’इत्यादिस्मृत्युक्तःपातकिनांरोगोयथोदेतिअकस्मात्प्रकटीभवतितथातेषामघंहृद्गतंविद्वेषादिकंउदेतीत्यर्थः २७ मत्प्रणीतंमयापाठितं । नोऽस्मभ्यंकुत्कुत्सितदोषंमास्मअदाः
अडागमआर्षः । मयिदोषारोपंमाकृथाइत्यर्थः (मन्युंक्रोधंनियच्छशमय) इंद्रशत्रोइतिनहिदुर्बलेषुब्राह्मणेषुतवकोपउचितइतिभावः २८ गुरुमुखीगुरुवाग्जानिता । हेअभद्र २९ आस्तामियंवार्ताभवादृ
शानांविषयासक्तानामनधिकारादित्याशयेनाह । मतिरितिपरतःगुरोःस्वतोवामिथोवाअन्योन्यतःनाभिपद्येतनसंपद्येत । केषांगृहएवव्रतंसंकल्पइतिकृत्याचिंतायेषांअतएवअदांतैःअनुपरतैर्गोभिरिंद्रियैर्हेतुभूतै
स्तामिस्रंसंसारंविशतां । तरग्चर्वितस्यैवचर्वणंयेषां (तेषां) ३०

श्लोकाः २०/३०

पादयोःपतितंबालंप्रतिनंद्याऽऽशिषाऽसुरः ॥ परिष्वज्यचिरंदोर्भ्यांपरमामापनिर्वृतिं २० आरोप्यांकमवघ्रायमूर्धन्यश्रुकलांबुभिः ॥ आसिंचन्विकसद्वक्त्रमि
दमाहयुधिष्ठिर २१ ॥ हिरण्यकशिपुरुवाच ॥ प्रह्लादानूच्यतांतातस्वधीतंकिंचिदुत्तमम् ॥ कालेनैतावतायुष्मन्यदशिक्षद्गुरोर्भवान् २२ ॥ प्रह्लादउवाच ॥
श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम् ॥ अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनम् २३ इतिपुंसार्पिताविष्णौभक्तिश्चेन्नवलक्षणा ॥ क्रियतेभगवत्य
द्धातन्मन्येऽधीतमुत्तमम् २४ निशम्यैतत्सुतवचोहिरण्यकशिपुस्तदा ॥ गुरुपुत्रमुवाचेदंरुषाप्रस्फुरिताधरः २५ ब्रह्मबंधोकिमेतत्तेविपक्षंश्रयतासता ॥
असारंग्राहितोबालोमामनादृत्यदुर्मते २६ संतिह्यसाधवोलोकेदुर्मैत्राश्छद्मवेषिणः ॥ तेषामुदेत्यघंकालेरोगःपातकिनामिव २७ ॥ गुरुपुत्रउवाच ॥
नमत्प्रणीतंनपरप्रणीतंसुतोवदत्येषतवेंद्रशत्रो ॥ नैसर्गिकीयंमतिरस्यराजन्नियच्छमन्युंकुददाःस्ममानः २८ ॥ श्रीनारदउवाच ॥ गुरुणैवंप्रतिप्रोक्तो
भूयआहासुरःसुतम् ॥ नचेद्गुरुमुखीयंतेकुतोऽभद्रासतीमतिः २९ ॥ प्रह्लादउवाच ॥ मतिर्नकृष्णेपरतःस्वतोवामिथोभिपद्येतगृहव्रतानाम् ॥ अदांतगो
भिर्विशतांतमिस्रंपुनःपुनश्चर्वितचर्वणानाम् ३०

चूर्णिका

ततः पादयोः पतितंबालंआलिंग्य अंकमारोप्यइदंआह २० २१ ॥ हिरण्यकशिपुरुवाच ॥ हेप्रह्लादएतावताकालेनगुरोः यत्स्वधीतंतदुच्यताम् २२ ॥ प्रह्ला
दउवाच ॥ श्रवणंकीर्तनंविष्णोःस्मरणंपादसेवनम् अर्चनंवंदनंदास्यंसख्यमात्मनिवेदनम् २३ इतिनवलक्षणाभक्तिः विष्णौसमर्प्यतेइतियत्तत्उत्तमं अधीतंमन्ये २४
॥ नारदउवाच ॥ एवंपुत्रवचः श्रुत्वाक्रोधेनगुरुंउवाच २५ हेब्रह्मबंधोमेपुत्रः किं असारंग्राहितः २६ २७ ॥ गुरुपुत्रउवाच ॥ हेइंद्रशत्रोतवसुतः अयंमत्प्रणीतंनवदति ॥१९॥
अस्यइयंनैसर्गिकीमतिरस्ति अतः मन्युंनियच्छमयिदोषंमाकृथाः २८ ॥ नारदउवाच ॥ एवंगुरूक्तंश्रुत्वापुत्रंउवाच हेपुत्रइयंतेबुद्धिः गुरुमुखीनचेत्तर्हि असती कुतः
प्राप्ता २९ ॥ प्रह्लादउवाच ॥ हेपितःश्रीकृष्णेमतिः परतः स्वतोवासत्समागमंविनानोत्पद्यते ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुश्रीकृष्णस्यपरमानंदरूपत्वात्तेपितन्निष्ठाएवाकिंनस्युःतदज्ञानादित्याह। नेति। येदुराशयाविषयवासितांतःकरणास्तेहिविष्णुंनविदुः। स्वस्मिन्नेवार्थःपुरुषार्थोयेषांतेषांगतिंगम्यं। ननुतेपिगुरूपदेशा
द्विष्णुंज्ञास्यंतितत्राह। बहिर्विषयेष्वर्थोयेषांतेबहिरर्थास्तानेवगुरुत्वेनमंतुंशीलंयेषांते। अतःअंधैरुपनीयमानाअंधायथापंथानंनविदुः। किंतुगर्तेपतंति। तथातेपि। ईशस्यतंत्यांदीर्घरज्ज्वांवेदलक्षणा
यांउरूणिदामानिब्राह्मणादिनामानियस्यांतस्यांकाम्यैःकर्मभिर्बद्धाएवभवंतीत्यर्थः। तदुक्तं। 'विषयाविष्टचित्तानांविष्ण्वावेशःसुदूरतः। वारुणीदिग्गतंवस्तुव्रजन्नैंद्रींकिमाप्नुयात्' इति ३१ ननुच 'एकोदेवः
सर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांतरात्मे' त्यादिश्रुतिप्रतिपादितंविष्णुंकथंनविदुःकुतोवातेषांतमिस्रप्रवेशस्तत्राह। नैषामिति। निष्किंचनानांनिरस्तविषयाभिमानानांमहत्तमानांपादरजसामभिषेकंयावन्न
वृणीततावत्श्रुतिवाक्यतोजातापिएषांमतिरुरुक्रमस्यांघ्रिंनस्पृशतिनप्राप्नोति। असंभावनादिभिर्विहन्यतइत्यर्थः। अनर्थस्यसंसारस्यापगमोयदर्थःयस्याअंघ्रिस्पर्शिन्यामतेरर्थःप्रयोजनम्। महदनुग्रहादे
वभगवत्प्राप्तिरितिभावः ३२ निरस्यतविक्षेप ३३ अमर्षोऽसहनंतेनसाहितयारुषाआविष्टोव्याप्तःकषायीभूतेआताम्रेलोचनेयस्य। हेनैर्ऋताःराक्षसाः। एनंनिःसारयतनिष्पातयत ३४ वध्यत्वेहेतुः।
यतोयंभेभ्रातृहा। कुतःयोविष्णोःपादावर्चति। तत्पक्षपातीत्यर्थः। अतःसएवायमित्यन्वयः ३५ अहोविष्णुरप्यविश्वसनीयंकिमितिस्वीकृतवानित्याह। विष्णोर्वेति अहात्जहौ ३६ ननुतवायमपत्यंचकथं
वध्यस्तत्राह। परोप्यौषधमिवहितकृत्तदपत्यमेवज्ञेयम्। सुतःस्वदेहजोपिअहितश्चेदामयइव। आस्तांममतास्पदस्यकथा। अंगमपियत्करचरणादितदप्यात्मनोऽहितंचेच्छिद्यादेवेत्यर्थः ३७ अतःसर्वैरुपा
यैर्हंतव्यः। संभोजोभोजनम्। भोजनादिषुविषादिप्रयोगैरित्यर्थः। (सुहृल्लिंगधरः पुत्ररूपधरइत्यर्थः)। यथाबहिर्मुखामिंद्रियंस्वीयमपिमुनेःशत्रुर्भवति ३८ तिग्माःतीक्ष्णाःदंष्ट्रायेषाम्। करालान्या
स्यानियेषांतेचतेच। ताम्राणिश्मश्रूणिशिरोरुहाश्चयेषाम् ३९ (आसीनंस्वस्थचित्तमित्यर्थः) ४० परेईश्वरेयुक्तःसमाहितआत्मामनोयस्यतस्मिन्तेषांनैर्ऋतानांप्रहारानिष्फलाजाताः। तत्रहेतवः।
ब्रह्मणिनिर्विकारेअनिर्देश्येअविषयेभगवतिनिरतिशयैश्वर्ये अखिलात्मनिशक्त्यादीनामपिनियंतरिएवंभूतेपरे। अपुण्यस्यनिर्दैवस्यसत्क्रियामहोद्यमाइव ४१

श्लोकाः ३१/४१

नतेविदुःस्वार्थगतिंहिविष्णुंदुराशयायेबहिरर्थमानिनः॥ अंधायथांधैरुपनीयमानावाचीशतंत्यामुरुदाम्निबद्धाः ३१ नैषांमतिस्तावदुरुक्रमांघ्रिंस्पृ
शत्यनर्थापगमोयदर्थः॥ महीयसांपादरजोभिषेकंनिष्किंचनानांनवृणीतयावत् ३२ इत्युक्त्वोपरतंपुत्रंहिरण्यकशिपूरुषा॥ अंधीकृतात्मास्वोत्संगान्नि
रस्यतमहीतले ३३ आहामर्षरुषाविष्टःकषायीभूतलोचनः॥ वध्यतामाश्वयंवध्योनिःसारयतनैर्ऋताः ३४ अयंमेभ्रातृहासोयंहित्वास्वान्सुहृदोऽधमः॥ पि
तृव्यहंतुर्यःपादौविष्णोर्दासवदर्चति ३५ विष्णोर्वासाध्वसौकिंनुकरिष्यत्यसमंजसः॥ सौहृदंदुस्त्यजंपित्रोरहाद्यःपंचहायनः ३६ परोप्यपत्यंहितकृद्यथौ
षधंस्वदेहजोप्यामयवत्सुतोऽहितः॥ छिंद्यात्तदंगंयदुतात्मनोहितंशेषंसुखंजीवतियद्विवर्जनात् ३७ सर्वैरुपायैर्हंतव्यःसंभोजशयनासनैः॥ सुहृल्लिंगधरः
शत्रुर्मुनेर्दुष्टमिवेंद्रियम् ३८ नैर्ऋतास्तेसमादिष्टाभर्त्रावैशूलपाणयः॥ तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ३९ नदंतोभैरवान्नादांश्छिंधिभिंधी
तिवादिनः॥ आसीनंचाहनन्शूलैःप्रह्रादंसर्वमर्मसु ४० परेब्रह्मण्यनिर्देश्येभगवत्यखिलात्मनि॥ युक्तात्मन्यफलाआसन्नपुण्यस्येवसत्क्रियाः ४१

चूर्णिका

३१ ३२ ॥ नारदउवाच ॥ इत्युक्त्वाउपरतंपुत्रंस्वोत्संगात् महीतलेनिरस्यराक्षसान्उवाच ३३ हेराक्षसाः अयंवध्यताम् ३४ यः पितृव्यहंतुः विष्णोःपादौदासवत्
अर्चति ३५ योयंपंचहायनः पित्रोः सौहृदं जहौ ३६ अतःअयंसर्वैःउपायैःहंतव्यः ३७ ३८ तदातेराक्षसाः भर्त्राआदिष्टाः ३९ छिंधिभिंधीतिवादिनः संतः शूलैः
तंमर्मसु अहनन् ४० तथापिमहाभागवते ब्रह्मणि समाहितात्मनि प्रह्रादेतेषांप्रहाराः निष्फलाः आसन् ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

४२ दंदशूकैःसर्पैः अभिचाराः कृत्यादयः अवपातनानिगिरिशृंगादधःपातनानितैः मायाभिःशंबरनिर्मिताभिः अवटादिषुसंनिरोधैश्च ४३ पर्वताक्रमणैः पर्वतानांतदुपरिक्षेपैः । बहुवचनैरभिचारा
द्यावृत्तिंदर्शयति । तत् हननंकर्तुं नाभ्यपद्यतनप्रापनाशक्नोदित्यर्थः ४४ चिंतामेवाहएषइतित्रिभिः । मेमयाअसाधुपरुषंयथाभवतितथोक्तःअसद्धर्मैरपकारैःअभिचारैर्वा ४५ अविदूरेसमीपेवर्तमानोपिबालो
प्ययंअजडधीःनिर्भयचित्तः । मेअनार्यंअन्यायंशत्रुत्वंवानविस्मरति । अजीगर्तस्यमध्यमपुत्रःशुनःशेपोनामपितृभ्यांहरिश्चंद्रायविक्रीतःसयथातयोरपकारमविस्मरंस्तद्विपक्षंविश्वामित्रमाश्रित्यगोत्रांतर
मापन्नस्तद्वत् । यद्वास्वभावापरित्यागेदृष्टांतः । शुनःशेपःपुच्छमिवेति । (तद्धिसरलीकृतमपिनवक्रतांत्यजति) ४६ अप्रमेयःअपरिमेयोऽनुभावोयस्य । नकुतश्चिद्भयंयस्य । अमरोमृत्युशून्यश्च
नवाभविताअन्यथामृत्युर्नैवभविष्यतीत्यर्थः ४७ औशनसौउशनसःपुत्रौनीतिज्ञौ । विविक्तेएकांते ४७ भ्रुवोर्विजृंभणेनैवत्रस्ताधिष्ण्यपायास्मिन् । तस्यतवचिंत्यंनचक्ष्महेनपश्याम । पदमालंबनंनैवा
स्ति । यद्वाशिशूनांवृत्तंगुणदोषयोःपदंविषयोनभवतीत्यर्थः ४९ तथापितुर्बंधनमस्योचितमित्याहतुः । इमंत्विति । यावद्गुरुरागमिष्यतितावद्बद्ध्वानिधेहि । ततःकिंअतऊचतुः । यतःपुंसःबुद्धिश्च (सती) वय
सा (यौवनेन) आर्यसेवया (सत्सेवया) समीचीनाभवति ५० अनुज्ञायतथेत्यंगीकृत्य ५१ ततश्चतौप्रह्लादंधर्मादिकमूचतुः । प्रश्रितश्चासाववनतश्चतस्मै । (प्रश्रयोविनयः) ५२ यथायथावत्त्रिवर्गमनु
शिक्षितमपिसाधुनमेने । तांशिक्षांचसाधुनमेने । कुतः । द्वंद्वैःरागद्वेषादिभिर्विषयेष्वारमणंयेषांतैरुपवर्णिताम् ५३

॥२१॥

प्रयासेऽपहतेतस्मिन्दैत्येंद्रःपरिशंकितः ॥ चकारतद्वधोपायान्निर्बंधेनयुधिष्ठिर ४२ दिग्गजैर्दंदशूकेंद्रैरभिचारावपातनैः ॥ मायाभिःसंनिरोधैश्चगरदा
नैरभोजनैः ४३ हिमवाय्वग्निसलिलैःपर्वताक्रमणैरपि ॥ नशशाकयदाहंतुमपापमसुरःसुतम् ॥ चिंतांदीर्घतमांप्राप्तस्तत्कर्तुंनाभ्यपद्यत ४४ एषमे
बह्वसाधूक्तोवधोपायाश्चनिर्मिताः ॥ तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तःस्वेनैवतेजसा ४५ वर्तमानोऽविदूरेवैबालोप्यजडधीरयम् ॥ नविस्मरतिमेनार्यंशुनःशेपइव
प्रभुः ४६ अप्रमेयानुभावोयमकुतश्चिद्भयोऽमरः ॥ नूनमेतद्विरोधेनमृत्युर्मेभवितानवा ४७ इतितंचिंतयाकिंचिन्म्लानश्रियमधोमुखम् ॥ शंडामर्कावौ
शनसौविविक्तइतिहोचतुः ४८ जितंत्वयैकेनजगत्त्रयंभ्रुवोर्विजृंभणत्रस्तसमस्तधिष्ण्यपम् ॥ नतस्यचिंत्यंतवनाथचक्ष्महेनवैशिशूनांगुणदोषयोःपदम् ॥
४९ इमंतुपाशैर्वरुणस्यबद्ध्वानिधेहिभीतोनपलायतेयथा । बुद्धिश्चपुंसोवयसार्यसेवयायावद्गुरुर्भार्गवआगमिष्यति ५० तथेतिगुरुपुत्रोक्तमनुज्ञायेदमब्रवीत्
धर्मोह्यस्योपदेष्टव्योराज्ञांयोगृहमेधिनाम् ५१ धर्ममर्थंचकामंचनितरांचानुपूर्वशः ॥ प्रह्लादायोचतूराजन्प्रश्रितावनतायच ५२ तथात्रिवर्गंगुरुभिरात्म
नेउपशिक्षितम् ॥ नसाधुमेनेतच्छिक्षांद्वंद्वारामोपवर्णिताम् ५३

श्लोकाः ४२/५३

चूर्णिका

तस्मिन्प्रयासेनष्टेसतिदैत्येंद्रः तद्वधोपायान्चकार ४२ दिग्गजैः दंदशूकैः अभिचारैः गिरिशृंगात् अधःपातैः मायाभिः अवटादिषुनिरोधैः गरदानैः अभोजनैः ४३ हिम
वाय्वग्निसलिलैः पर्वताक्रमणैः एतैरुपायैः निष्पापंसुतंहंतुंनशशाक तदादीर्घंचिंतांप्राप्तः आह ४४ मयाएषः असाधुउक्तः वधोपायाश्चकृताः तथापिस्वतेजसामुक्तः ४५ किंच
मत्समीपेनिर्भयोवर्तते अतः अस्यविरोधेनमेमृत्युर्भविता ४६ ४७ इतिचिंतया अधोमुखंतंएकांतेशंडामर्कौऊचतुः ४८ त्वयाजगत्त्रयंजितंतवतुचिंत्यंनपश्यामः ४९ एनंवरु
णपाशैर्बद्ध्वायावद्भार्गवः आगमिष्यति तावन्निधेहि ५० राजातथेत्युक्त्वाइदमब्रवीत् अस्यराज्ञांधर्माः उपदेष्टव्याः ५१ तदागुरूत्रिवर्गोपपादकंशास्त्रंदैत्यबालकैःसहतंअध्याप
यताम् ५२ गुरुशिक्षितंसः साधुनमेने ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

परावृत्तःअन्यत्रगतः । उपहूतः (क्रीडार्थमाहूतः) । सांधिःपादपूरणार्थः । कृतक्षणैःकृतोत्सवैःलब्धावसरैरितिवा ५४ तन्निष्ठांतेषांनिष्ठांजन्ममरणादिलक्षणांविद्वान् ५५ द्वंद्वारामाणांईरितैरीहितैश्चनदू
पिताधीर्येषाम् । यतोबालाः ५६ तस्मिन्नेवन्यस्तंहृदयंईक्षणंचयैः ५७ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांपंचमोऽध्यायः ५ ॥ ॥ ७ ॥ ॥ षष्ठेगुरौगृहव्यग्रेप्रह्लादोदैत्यबालकान् । अनु
कंप्यपरंतत्त्वंनारदोक्तमुपादिशत् १ निरर्थकक्रियालेशैरायुर्व्ययमजानताम् । प्रह्लादःसदयंप्राहधर्मंभागवतंकृती २ ॥ कौमारइत्यादिना । इहैवमानुषजन्मनिधर्मानाचरेत् । यतोर्थदमेतत् । तत्रकौमारेएव । ॥ ५ ॥
यतःतदप्यध्रुवम् । नचैवंभूतंजन्मांतरं । यतःदुर्लभं (मानुषंजन्म) । तत्रधर्मानेवाचरेत् । नतुसुखप्रयासान् । तत्रभागवतानेवनकाम्यान् १ इहभागवतानेवधर्मानाचरेदित्येतदुपपादयति । यथाही
तिचतुर्भिः । इहपुरुषस्यविष्णोःपादोपसर्पणमेवयथाऽनुरूपम् । योग्यमित्यर्थः । यद्यस्मादेषप्रियइत्यादि २, भोगोद्यमःकथंत्याज्यइतिचेत्तत्राह । सुखमिति । सर्वत्रपश्वादावपि । दैवात्पूर्वादृष्टादेव ३ अ
॥२२॥ तस्तदर्थप्रयासोनकर्तव्यः । यतःप्रयासात्परंकेवलंआयुषोव्ययएव । तथातेनप्रकारेणक्षेमरूपम् । नप्राप्नोति ४ भयमाश्रितःसंसारंप्राप्तः । पुरुषरूपंशरीरंयावत्पुष्कलमस्ति । नविपद्येतक्षयं (अक्षमंनभ
वेत्नभजेत्ननश्येदितिवा) तावच्छीघ्रंक्षेमाययतेत ५ आयुर्व्ययक्रममाहपुंसइतित्रिभिः । यद्यस्मात् (अंधंतमःप्रापितः) शेते ६ विंशतिर्वर्षाणिआयुर्याति ७ दुरापूरेणदुःखैरापूर्यमाणेन ८

श्लोकाः ५४/८

यदाऽऽचार्यःपरावृत्तोगृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्रसोपहूतःकृतक्षणैः ५४ अथतान्श्लक्ष्णयावाचाप्रत्याहूयमहाबुधः ॥ उवाचविद्वांस्तन्निष्ठांकृप
याप्रहसन्निव ५५ तेतुतद्गौरवात्सर्वेत्यक्तक्रीडापरिच्छदाः ॥ बालानदूषिताधियोद्वंद्वारामेरितेहितैः ५६ पर्युपासतराजेंद्रतन्न्यस्तहृदयेक्षणाः ॥ तानाह
करुणोमैत्रोमहाभागवतोऽसुरः ५७ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेपंचमोध्यायः ५ ॥ ॥ ६ ॥ ॥ प्रह्लादउवाच ॥ कौमार
आचरेत्प्राज्ञोधर्मान्भागवतानिह ॥ दुर्लभंमानुषंजन्मतदप्यध्रुवमर्थदम् १ यथाहिपुरुषस्येहविष्णोःपादोपसर्पणम् ॥ यदेषसर्वभूतानांप्रियआत्मेश्व
रःसुहृत् २ सुखमैंद्रियकंदैत्यादेहयोगेनदेहिनाम् । सर्वत्रलभतेदैवाद्यथादुःखमयत्नतः ३ तत्प्रयासोनकर्तव्योयतआयुर्व्ययःपरम् ॥ नतथाविंदतेक्षेमंमुकुंदचर
णांबुजम् ४ ततोयतेतकुशलःक्षेमायभयमाश्रितः ॥ शरीरंपौरुषंयावन्नविपद्येतपुष्कलम् ५ पुंसोवर्षशतंह्यायुस्तदर्धंचाजितातात्मनः ॥ निःफलंयदसौरा
त्र्यांशेतेंऽधंप्रापितस्तमः ६ मुग्धस्यबाल्येकौमारेक्रीडतोयातिविंशतिः ॥ जरयाग्रस्तदेहस्ययात्यकल्पस्यविंशतिः ७ दुरापूरेणकामेनमोहेनचबलीय
सा ॥ शेषंगृहेस्यसक्तस्यप्रमत्तस्यापयातिहि ८

चूर्णिका

किंच यदा आचार्यः गृहमेधीयकर्मसुक्वचित् अन्यत्रगतः तदालब्धावसरैर्बालकैः क्रीडार्थमुपहूतः ५४ प्रह्लादः बालान्प्रत्याहूयउवाच ५५ हेराजेंद्रतेबालाः प्रह्लादस्य
गौरवात् त्यक्तक्रीडनकाः संतः ५६ तंपर्युपासत ततोमहाभागवतः प्रह्लादःतान्बालानाह ५७ ॥ इतिसप्तमेपंचमः ५ ॥ प्रह्लादउवाच ॥हेबालकाः प्राज्ञाः कौमारे एवभ
गवद्धर्मानाचरेत् इहमानुषंजन्मदुर्लभम् १ अतः विष्णोः पादोपसर्पणंयोग्यम् २ हेदैत्याः विषयसुखंतुसर्वत्रलभ्यते ३ अतस्तदर्थंयत्नोनकार्यः यतः तेनदृथा आयुर्व्य ॥२२॥
योभवति ४ संसारंप्राप्तः पुमान्यावच्छरीरं ननश्येत् तावत् क्षेमाययतेत ५ किंच अजितात्मनः पुंसः वर्षशतंआयुः, तत्रअर्द्धंनिष्फलंयतः असौरात्र्यांशेते ६ मुग्धस्यक्री
डतः बाल्येकौमारेविंशतिवर्षाणियाति ७ जरयाग्रस्तदेहस्यविंशतिवर्षाणियाति१० ७० शेषं १० गृहेसक्तस्यअर्थचिंतयाकामेन मोहेनचयाति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुयौवनेगृहासक्तोपिपश्चाद्विरक्तःसन्क्षेमंपास्यतीत्याशंक्यतदसंभवंदर्शयन्कौमारेएवाचरेदित्येतदुपपादयति कोगृहेष्विति सप्तभिः ९ यंअर्थअसुभिःक्रीणातिप्राणहानिमंगीकृत्यापितस्कारादिरर्थंसाधयतितस्मिन्नर्थेतृष्णांकोनुविसृजेत् १० किंच । कथमिति । प्रियायाःसंगादिकंस्मरन्कथंत्यजेदितितृतीयेनान्वयः । मंत्रान्हिताशिक्षालापान् । सुहृत्सुचसंगं । तेषांस्नेहेनसितोबद्धः कलानिमधुराण्यक्षराणियेषांतेषांचसंगम् । तेष्वनुरक्तंचित्तंयस्य ११ ताःश्वशुरगृहेस्थिताःहृदय्याहृदयंगमाः । मनोज्ञाउरवःपरिच्छदायेषुतान्वृत्तीर्जीविकाःकुल्याःकुलपरंपरागताः १२ कोशस्कृत्कोशस्कारीकीटःसयथागृहंकुर्वन्आत्मनोनिर्गमायद्वारमपिनावशेषयतितथाकर्माणीहमानः । नन्वावितृप्तकामोपिदोषदर्शनेनविरक्तःसन्त्यजेत् (सत्यं) औपस्थ्यंशैश्न्यंजैह्व्यंच (रसनेंद्रियजन्यम्) सुखंतदेवाधिकंमन्यमानःअतोदुरंतोमोहोयस्यसःकथंविरज्येतविरक्तःस्यात् १३ दुरंतमोहत्वंदर्शयन्नाह । कुटुंबपोषणायवियत्क्षीयमाणंनिजमायुःपुरुषार्थंचविहतंनबुध्यते । अतएवतापत्रयेणदुःखिताचित्तोपिमनिर्विद्यते । दुःखबुद्धिंनकरोति । यतःस्वकुटुंबेरामोरतिर्यस्य १४ प्रत्युतचौर्यंकरोतीत्याह । वित्तेष्विति । नित्यमभिनिविष्टंचेतोयस्यसः । परवित्तहर्तुःप्रेत्यनरकलक्षणंइहचदंडादिरूपंदोषंयद्यपिविद्वान्अथाप्यशांताभिलाषःसन्तत्परवित्तंहरत्येव १५ तदेवंकोगृहेषुपुमान्सक्तमित्यादिभिःसप्तभिःश्लोकैरुपपादितंगृहादिषुप्रसक्तस्यवैराग्याद्यसंभवमुपसंहरतिविद्वानपीति । स्वलोकायआत्मपरामर्शायनकल्पतेकिंतुविमूढोयथातथाविद्वानापितमःअभिनिवेशमेवप्रपद्यते । तत्रहेतुः यइति । स्वीयमिदंपारक्यमिदमितिभिन्नोभावोभावनायस्यसः १६ तस्मात्कौमारएवभागवतान्धर्मानाचरेदितिसहेतुकमुपसंहरति । यतःकश्चिदपिस्वमात्मानंमोचितुंनसमर्थःततःनारायणमुपेतेत्युत्तरेणान्वयः असामर्थ्येहेतुः । अलंदीनःलंपटः । अतःकामोद्दशियासांवासांविहारेक्रीडायांनिमित्तेक्रीडामृगः (गृह्यकमर्कटः ।) विहारमितिपाठेतासांविहारसाधनमात्मानंयतस्तासांक्रीडामृगःसइत्यन्वयः । किंच । यत्पाशुनिगडःशृंखलातुल्योविसर्गःपुत्रादिरूपोभवति १७

॥२३॥

श्लोकाः ९/१७

कोगृहेषुपुमान्सक्तमात्मानमजितेंद्रियः ॥ स्नेहपाशैर्दृढैर्बद्धमुत्सहेतविमोचितुम् ९ कोन्वर्थतृष्णांविसृजेत्प्राणेभ्योपियईप्सितः ॥ यंक्रीणात्यसुभिःप्रेष्ठैस्तस्करःसेवकोवाणिक् १० कथंप्रियायाअनुकंपितायाःसंगंरहस्यंरुचिरांश्चमंत्रान् । सुहृत्सुचस्नेहसितःशिशूनांकलाक्षराणामनुरक्तचित्तः ११ पुत्रान्स्मरंस्तादुहितॄर्हृदय्याभ्रातॄन्स्वसॄर्वापितरौचदीनौ ॥ गृहान्मनोज्ञोरुपरिच्छदांश्चवृत्तीस्तुकुल्याःपशुभृत्यवर्गान् १२ त्यजेतकोशस्कृदिवेहमानःकर्माणिलोभादवितृप्तकामः ॥ औपस्थ्यजैह्व्यंबहुमन्यमानःकथंविरज्येतदुरंतमोहः १३ कुटुंबपोषायवियन्निजायुर्नबुध्यतेर्थंविहतंप्रमत्तः ॥ सर्वत्रतापत्रयदुःखितात्मानिर्विद्यतेनस्वकुटुंबरामः १४ वित्तेषुनित्याभिनिविष्टचेताविद्वांश्चदोषंपरवित्तहर्तुः ॥ प्रेत्येहचाथाप्यजितेंद्रियस्तदशांतकामोहरतेकुटुंबी १५ विद्वानपीत्थंदनुजाःकुटुंबंपुष्णन्स्वलोकायनकल्पतेवै ॥ यःस्वीयपारक्यविभिन्नभावस्तमःप्रपद्येतयथाविमूढः १६ यतोनकश्चित्क्वचकुत्रचिद्दीनःस्वमात्मानमलंसमर्थः ॥ विमोचितुंकामदृशांविहारक्रीडामृगोयन्निगडोविसर्गः १७

चूर्णिका

एवंगृहेसक्तं आत्मानंमोचयितुंकःउत्सहेत ९ किंच प्राणहानिंअंगीकृत्यद्रव्यंसाधयातितस्मिन्नर्थेतृष्णांकोनुविसृजेत् १० किंच स्त्रीपुत्रगृहादीन्स्मरन्सन्आवितृप्तकामः कथंविरक्तःस्यात् ११ १२ १३ किंच कुटुंबपोषणार्थंक्षीयमाणायुः पुमान् पुरुषार्थंविहतंनमन्यते अतएवतापत्रयेणदुःखितचित्तोपिविषयेषुदुःखबुद्धिंनकरोति १४ किंच वित्तहर्तुःइहामुत्रदंडनरकरूपंदोषंविद्वानपिकुटुंबीपरवित्तंहरत्येव १५ इत्थंकुटुंबंपुष्णन्सन्आत्मविचारायनकल्पते १६ यतःकश्चिदपिस्वमात्मानंमोचितुंनसमर्थः १७

॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विदूराद्दूरतःसंगंपरिहृत्य । यद्वाअविदूराच्छीघ्रंनारायणमुपेतेत्यन्वयः । (उपेतशरणंगच्छत ।) यस्मात्सएवापवर्गःइषितःइष्टः १८ बालानामस्माकंतद्भजनमशक्यमितिचेत्तत्राह । नहीति । बह्वाया सोऽतिप्रयासः १९ आत्मत्वात्सर्वत्रसिद्धत्वादितिचहेतुद्वयंउपपादयतिपरावरेष्विितिचतुर्भिः । ब्रह्माअंतोयेषांस्थावरआदिर्येषांतेषु । जीवेषुघटादिषुमहत्सुचभूतेषुआकाशादिषु २० गुणसाम्येप्रधाने । गुणव्यतिकरेमहत्तत्त्वादौच । परोब्रह्मस्वरूपः २१ कथंतर्हिद्रष्टृदृश्यभोक्तृभोग्यादिभेदामाययेत्याह । प्रत्यगात्मात्रद्रष्टाभोक्तातत्स्वरूपेणव्यापकतयानिर्देश्यः । दृश्यंभोग्यंदेहादितद्रूपेणचव्याप्यतया निर्देश्योमाययाईयतेइत्युत्तरेणान्वयः । वस्तुतस्तुस्वयंअविकल्पितोअनिर्देश्योपिसन् । यद्वाअनिर्देश्योपिएवंनिर्देश्यःसन्विकल्पितईयतेइत्यन्वयः २२ यतःकेवलोऽनुभवात्मकआनंदएवस्वरूपंयस्य । ननुसएवचेत्सर्वत्रतर्हिसर्वज्ञत्वाद्युपलभ्येततत्राह । गुणात्मकःसर्गोयस्याःसागुणसर्गातयामाययाअंतर्हितंऐश्वर्यमस्यसः २३ यस्मादेवंतस्मात्सर्वेषुयथोचितंदयांसौहृदंचकुरुत । ययादयया । उन्मुच्यसंत्यज्य २४ ततःकिमतआह । तुष्टेचतत्रतस्मिन्किमलभ्यम् । तथापिगुणपरिणामाद्दैवादेवस्वसिद्धाअयत्नतःसिद्धायेधर्मादयःतैःकिं । अगुणेनचमोक्षेणकांक्षितेनकिं । तमुपगायतांनोस्माकंअकांक्षितस्यापितस्यसिद्धेः यद्वा माभून्मोक्षःतस्यचरणयोःसारंजुषांसुधांसेवमानानांतेनापिकिमित्यर्थः २५ ननुचधर्मादेरपुरुषार्थत्वेकिमित्याचार्यैःवेदोक्तत्वेनससत्यएवाभिहितस्तत्राह । धर्मोर्थःकामश्चेतित्रिवर्गस्तदर्थंचयाईक्षाद्याअभिहिता ईक्षाआत्मविद्यात्रयीकर्मविधानयदमौतर्कोदंडश्चविविधाचवार्ताजीविकातदेतत्सर्वंनिगमस्यार्थजातंस्वसुहृदःस्वांतर्यामिणःपरस्यपुंसःस्वात्मार्पणसाधनंचेत्तर्हिसत्यंमन्येत्यपरत्वात् । अन्यथातदसत्यमेव । यद्वातदेतदखिलंनिगमस्यत्रैगुण्यविषयस्यप्रतिपाद्यंमन्ये । सत्यं पुनर्निस्त्रैगुण्यलक्षणंपरमस्यपुंसःस्वात्मार्पणमेवेत्यर्थः । तदुक्तंभगवता । 'त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुने' ति २६ तेषांविश्वासार्थंगुरुसंप्रदायमाह ज्ञानमिति । यत्रनारदःश्रोतातत्रकुतोमादृशानामधिकारइत्यत्राह । भगवतएकांतभक्तानांयत्पादरजस्तेनआप्लुतानांस्नातानांदेहिनांसर्वेषामपितत्ज्ञानंस्यात्नतूत्तमानामेवेतिनियमः २७

॥२४॥

श्लोकाः १८/२७

ततोविदूरात्परिहृत्यदैत्यादैत्येषुसंगंविषयात्मकेषु ॥ उपेतनारायणमादिदेवंसमुक्तसंगैरिषितोऽपवर्गः १८ नह्यच्युतंप्रीणयतोबह्वायासोऽसुरात्मजाः ॥ आत्मत्वात्सर्वभूतानांसिद्धत्वादिहसर्वतः १९ परावरेषुभूतेषुब्रह्मांतस्थावरादिषु ॥ भौतिकेषुविकारेषुभूतेष्वथमहत्सुच २० गुणेषुगुणसाम्येचगुणव्यतिकरेतथा ॥ एकएवपरोह्यात्माभगवानीश्वरोऽव्ययः २१ प्रत्यगात्मस्वरूपेणदृश्यरूपेणचस्वयम् ॥ व्याप्यव्यापकनिर्देश्योह्यनिर्देश्योविकल्पितः २२ केवलानुभवानंदस्वरूपःपरमेश्वरः ॥ माययांतर्हितैश्वर्यईयतेगुणसर्गया २३ तस्मात्सर्वेषुभूतेषुदयांकुरुतसौहृदम् ॥ आसुरंभावमुन्मुच्यययातुष्यत्यधोक्षजः २४ तुष्टेचतत्रकिमलभ्यमनंतआद्येकिंतैर्गुणव्यतिकरादिहयेस्वसिद्धाः ॥ धर्मादयःकिमगुणेनचकांक्षितेनसारंजुषांचरणयोरुपगायतांनः २५ धर्मार्थकामइतियोभिहितस्त्रिवर्गईक्षात्रयीनयदमौविविधाचवार्ता ॥ मन्येतदेतदखिलंनिगमस्यसत्यंस्वात्मार्पणंस्वसुहृदःपरमस्यपुंसः २६ ज्ञानंतदेतदमलंदुरवापमाहनारायणोनरसखःकिलनारदाय ॥ एकांतिनांभगवतस्तदकिंचनानांपादारविंदरजसाप्लुतदेहिनांस्यात् २७

चूर्णिका

तस्मात् हेदैत्याः विषयात्मकेषुदैत्येषुसंगंत्यक्त्वामुक्तसंगैःसहसंगम्यनारायणंशरणंव्रजत १८ हेदैत्यबालकाः अच्युतंप्रीणयतःपुंसःबह्वायासोनकुतःसर्वभूतानांआत्मत्वात् १९ किंचयःब्रह्माद्यण्वंतपदार्थेषुपरमात्माव्याप्यस्थितः २० २१ २२ २३ तस्मात्आसुरंभावंउन्मुच्य सर्वभूतेषुदयांसौहृदंचकुरुतदययाअधोक्षजःतुष्यति २४ अनंतेतुष्टे तच्चरणजुषांनःअलभ्यंकिम् २५ २६ एतत्ज्ञानंनारायणःनारदायआह एकांतभक्तानांपादरजसाप्लुतानांसर्वेषामपिइदंज्ञानंस्यात् नतुउच्चानामेवेतिनियमः २७

॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवमयापिदेवस्यदर्शनंयस्यतस्मात्नारदाच्छ्रुतम् । विज्ञानसंयुतंअनुभवयुक्तम् । धर्मंच श्रुतवानहम् २८ तत्रातिविस्मिताःपृच्छंति प्रह्लादेति । एताभ्यामृतेऽन्यंगुरुंनविद्मः । एतदागमनात्पूर्वमेवाहंनारदपार्श्वंगतइतिचेत्तत्राहुः । हियस्मात्बालानामपिअतिशिशूनामस्माकंएतावीश्वरौनियंतारौ । अतस्तवान्यत्रगमनंनसंभवति २९ सएवात्रागतइत्यपिनसंभवतीत्याहुः । बालस्येति । दुरन्वयःदुर्घटः । विश्रंभकारणंविश्वासहेतुः ३० ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांप्रह्लादानुचरितेषष्ठोध्यायः ६ ॥ ॥ ७ ॥ ॥ सप्तमेमातृगर्भस्थेस्वास्मिन्नारदभाषितम् । प्रह्लादोवर्णयामासशिष्यप्रत्ययसिद्धये १ अश्राविनारदादेतन्मयागर्भइतीरितुम् । तत्प्रस्तावकथामाहपद्यैःषोडशभिःसुधीः २ ॥ १ अस्माकंपितरिहिरण्यकशिपौ २ स्वकृतेनैवपापोसौअभक्षिभक्षितइतिहर्षवंतोयुद्धोद्यमंचक्रुः ३ ४ ५ राज्ञःशिविरंआवासंव्यलुंपन्सर्वस्वापहारेणनाशितवंतः (गर्भस्थस्यममातरंअग्रहीच्च) ६ ७ अनागसंनिरपराधांएनांनेतुंमार्हसीतिप्राह ८ अविषह्यंदुःसहंअतःअनयाप्रसवपर्यंतंअत्रास्यताम् । ततश्चअर्थस्यपदवींमार्गंगतःप्राप्तःसन् (मोक्ष्ये) जातंपुत्रंहत्वामोक्ष्यामीत्यर्थः ९ साक्षात्स्वगुणैरेवमहान्नतुपित्रादिसंबंधात् । त्वयाहेतुभूतेनसंस्थांमृत्युंनयास्यतितत्रहेतवोनिष्किल्बिषइत्यादयः १०

श्लोकाः २८—१०

श्रुतमेतन्मयापूर्वंज्ञानंविज्ञानसंयुतम् ॥ धर्मंभागवतंशुद्धंनारदाद्देवदर्शनात् २८ ॥ दैत्यपुत्राऊचुः ॥ प्रह्लादत्वंवयंचापिनर्तेऽन्यंविद्महेगुरुं ॥ एताभ्यांगुरुपुत्राभ्यांबालानामपिहीश्वरौ २९ बालस्यांतःपुरस्थस्यमहत्संगोदुरन्वयः ॥ छिंधिनःसंशयंसौम्यस्याच्चेद्विश्रंभकारणम् ३० ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्लादानुचरितेषष्ठोध्यायः ६ ॥ ७ ॥ ॥ श्रीनारदउवाच ॥ एवंदैत्यसुतैःपृष्टोमहाभागवतोऽसुरः ॥ उवाचस्मयमानांस्तान्स्मरन्मदनुभाषितम् १ ॥ प्रह्लादउवाच ॥ ॥ पितरिप्रस्थितेऽस्माकंतपसेमंदराचलम् ॥ युद्धोद्यमंपरंचक्रुर्विबुधादानवान्प्रति २ पिपीलिकैरहिरिवदिष्ट्यालोकोपतापनः ॥ पापेनपापोऽभक्षीतिवादिनोवासवादयः ३ तेषामतिबलोद्योगंनिशम्यासुरयूथपाः ॥ वध्यमानाःसुरैर्भीताद्दुद्रुवुःसर्वतोदिशम् ४ कलत्रपुत्रमित्राप्तान्गृहान्पशुपरिच्छदान् ॥ नावेक्षमाणास्त्वरिताःसर्वेप्राणपरीप्सवः ५ व्यलुंपन्राजशिबिरममराजयकांक्षिणः ॥ इंद्रस्तुराजमहिषींमातरंममचाग्रहीत् ६ नीयमानांभयोद्विग्नांरुदतींकुररीमिव ॥ यदृच्छयाऽऽगतस्तत्रदेवर्षिर्ददृशेपथि ७ प्राहमैनांसुरपतेनेतुमर्हस्यनागसम् ॥ मुंचमुंचमहाभागसतींपरपरिग्रहम् ८ ॥ इंद्रउवाच ॥ आस्तेऽस्याजठरेवीर्यमविषह्यंसुरद्विषः ॥ आस्यतांयावत्प्रसवंमोक्ष्येऽर्थपदवींगतः ९ ॥ श्रीनारदउवाच ॥ अयंनिःकिल्बिषःसाक्षान्महाभागवतोमहान् ॥ त्वयानप्राप्स्यतेसंस्थामनंतानुचरोबली १०

चूर्णिका

इदंभगवद्धर्मरूपंइदंज्ञानं मयापूर्वं नारदात्श्रुतम् २८ ॥ दैत्यपुत्राऊचुः ॥ वयंत्वंचअन्यंगुरुंनविद्महे २९ अंतःपुरस्थस्यबालस्यतवमहत्संगःकथंजातःइतिनःसंशयंछिंधि ३० ॥ इतिसप्तमेषष्ठः ६ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ एवंदैत्यसुतैःपृष्टःप्रह्लादःममपूर्वानुभाषितंस्मरन्उवाच १ ॥ प्रह्लादउवाच ॥ अस्मात्पितरितपसेमंदराचलंप्रस्थितेसतिदेवाःदानवान्प्रतियुद्धोद्यमंचक्रुः २ तदाअसुराःदेवबलोद्योगंदृष्ट्वाकलत्रादिसर्वंत्यक्त्वादिशःप्रदुद्रुवुः ३ ४ ५ ततोदेवाःराज्ञःआवासंव्यलुंपन् इंद्रस्तुममातरंगृहीत्वानीतवान् ६ तांनीयमानांभयोद्विग्नांपथिदृष्ट्वानारदःइंद्रंप्राह ७ हेइंद्र एनांसतींनेतुंनार्हसि ८ मुंचमुंच एवमुक्तः इंद्रःनारदंउवाच हेऋषेअस्याःजठरेअविषह्यंवीर्यंआस्तेअतःप्रसवोत्तरंतंहत्वाएनांमोक्ष्ये ९ ॥ नारदउवाच ॥ हेइंद्रअयंमहाभागवतःअनंतानुचरःत्वयासंस्थांनप्राप्स्यते १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२६॥

अनंतस्यप्रियेयोहं सवाप्रियोयस्यतस्यममभक्त्याएनांप्रदक्षिणीकृत्य ११ इहोष्यतामित्याहेतिशेषः १२ अंतिसमीपे १३ अंतर्वत्नीगर्भिणी । इच्छयाभर्तुरागमनानंतरंप्रसूतये । एवमपिस्वगर्भस्यक्षेमाय १४ तस्याःशोकशांत्यैधर्मस्यतत्त्वंभक्तिलक्षणं ज्ञानमात्मानात्मविवेकः तदुभयंप्रादात् ईश्वरःसमर्थः १५ १६ भूयात्भवेत् वैशारदीस्वार्थेताद्धितः । देहाद्यहंकारच्छेदनिपुणेत्यर्थः । (तादृशीधीर्भूयात्भवेत् । स्त्रीणांबालानांचश्रद्धातोज्ञानाधिकारःयथामम) १७ कासौवैशारदीधीरित्यपेक्षायांनारदोक्तमेवदेहात्मविवेकप्रकारमाह । जन्मेतिदशभिः । जन्माद्याःजायतेअस्तिवर्धतेविपारिणमतेअपक्षीयतेनश्यतीत्येवंभूताइमेषड्भावाविकारावृक्षेसत्येवयथाफलानांदृश्यंतेतद्वदात्मनितथैवस्थितेदेहस्यदृष्टाइत्यर्थः । ईश्वरीविकारसमर्थामूर्तिर्यस्यतेन १८ तदेवंदेहधर्मैस्तद्वैलक्षण्येनआत्मनोदेहभेदोदर्शितः । इदानीमात्मधर्मैरेवभेदंस्फुटयंस्तदहंकारादिकंत्याजयति । आत्मानित्यः । ‘ अविनाशीवाअरेयमात्मे ’ तिश्रुतेः । अव्ययःअपक्षयशून्यः । ‘ ऋचोअक्षरेपरमेव्योमन्नि ’ तिश्रुतेः । शुद्धः ‘ निरवद्यंनिरंजन ’ मितिश्रुतेः । एकः । ‘ एकमेवाद्वितीय ’ मितिश्रुतेः । क्षेत्रज्ञः ‘ विज्ञातारमरेकेनविजानीयादि ’ तिश्रुतेः । आश्रयः । ‘ यास्मिन्द्यौःपृथिवीचांतारिक्ष ’ मि तिश्रुतेः । अविक्रियः । ‘ निष्कलंनिष्क्रियंशांत ’ मितिश्रुतेः । स्वदृक् । ‘ आत्मज्योतिःसम्राडितिहोवाचे ’ तिश्रुतेः । हेतुः । ‘सइमाँल्लोकानसृजते ’तिश्रुतेः । व्यापकः । ‘ सत्यंज्ञानमनंत ’ मितिश्रुतेः । असंगी । ‘ असंगोह्ययंपुरुष ’ इतिश्रुतेः । अनावृतः । ‘ पूर्णस्यपूर्णमदःपूर्णमेवावशिष्यत ’ इतिश्रुतेः १९ परैःश्रेष्ठैर्विवेकसमर्थैःदेहाद्भेदंविद्वान्अहंममेत्यसद्भावांमिथ्याभिनिवेशंत्यजेत् २० नन्वेवंविविक्तात्मज्ञानिनोपिअपरोक्षानुभवेनब्रह्मताप्राप्तिःकथंस्यात्यतोऽहंकारादिकंत्यजेत् । इत्यपेक्षायांतत्प्राप्तिप्रकारंसदृष्टांतमाह । क्षेत्रेषुस्वर्णाकरेषुस्फुरत्स्वर्णकणेषुग्रावसुयोगैर्धमनाद्युपायैस्तदुपायाभिज्ञोहेमकारोयथास्वर्णंप्राप्नुयात् । (एवंक्षेत्ररूपेपुदेहेषु) आत्मयोगैरात्मप्राप्त्युपायैःब्रह्मगतिंब्रह्मतांअध्यात्मवित्आत्माधिकृतकार्यकारणसंघातज्ञाता (लभेत) २१

श्लोकाः ११/२१

इत्युक्तस्तांविहायेंद्रोदेवर्षेर्मानयन्वचः ॥ अनंतप्रियभक्त्यैनांपरिक्रम्यादिवंययौ ११ ततोनोमातरमृषिःसमानीयनिजाश्रमम् ॥ आश्वास्येहोष्यतांवत्सेयावत्तेभर्तुरागमः १२ तथेत्यवात्सीद्देवर्षेरंतिसाऽप्यकुतोभया ॥ यावद्दैत्यपतिर्घोरात्तपसोनन्यवर्तत १३ ऋषिंपर्यचरत्तत्रभक्त्यापरमयासती ॥ अंतर्वत्नीस्वगर्भस्यक्षेमायेच्छाप्रसूतये १४ ऋषिःकारुणिकस्तस्याःप्रादादुभयमीश्वरः ॥ धर्मस्यतत्त्वंज्ञानंचमामप्युद्दिश्यनिर्मलम् १५ तत्तुकालस्यदीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे ॥ ऋषिणानुगृहीतंमांनाधुनाप्यजहात्स्मृतिः १६ भवतामपिभूयान्मेयदिश्रद्दधतेवचः ॥ वैशारदीधीःश्रद्धातःस्त्रीबालानांचमेयथा १७ जन्माद्याःषडिमेभावादृष्टादेहस्यनात्मनः ॥ फलानामिववृक्षस्यकालेनेश्वरमूर्तिना १८ आत्मानित्योऽव्ययःशुद्धएकःक्षेत्रज्ञआश्रयः ॥ अविक्रियःस्वदृग्घेतुर्व्यापकोऽसंग्यनावृतः १९ एतैर्द्वादशभिर्विद्वानात्मनोलक्षणैःपरैः ॥ अहंममेत्यसद्भावंदेहादौमोहजंत्यजेत् २० स्वर्णंयथाग्रावसुहेमकारःक्षेत्रेषुयोगैस्तदभिज्ञआप्नुयात् ॥ क्षेत्रेषुदेहेषुतथाऽऽत्मयोगैरध्यात्मविद्ब्रह्मगतिंलभेत २१

चूर्णिका ॥२६॥

इत्युक्तः इंद्रःतांविहायदिवंययौ ११ ततोनारदःमेमातरंआश्वास्यनिजाश्रमंआनीययावत्तेभर्तुरागमःतावत्इहउष्यतांइत्याह १२ साअंतर्वत्नीइच्छाप्रसूतयेगर्भक्षेमायचऋषिंपर्यचरत् १३ १४ कारुणिकःऋषिःमांउद्दिश्यतस्याःधर्मस्यतत्त्वरूपांभक्तिंज्ञानंचप्रादात् १५ तत्तुबहुकालत्वात्स्त्रीत्वाच्चमातुःतिरोदधेऋषिकृपयामांअधुनापिस्मृतिर्नजहाति १६ अतःयदिममवचःश्रद्दधतेतर्हिभवतामपिभक्तिर्ज्ञानंचभवेत् १७ अथनारदोक्तं देहात्मविवेकप्रकारंदर्शयति जन्माद्याःषड्भावाःदेहस्यदृष्टाःआत्मनःन १८ आत्मातुनित्यःअव्ययः शुद्धः १९ इत्यादिलक्षणैःदेहात् भेदंज्ञात्वादेहादौअहंममेतिमिथ्याबुद्धिंत्यजेत् २० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अध्यात्मविवेकरूपमात्मप्राप्त्युपायमाह । अष्टाविति त्रिभिः । मूलप्रकृतिर्महदहंकारौपंचतन्मात्राणिचेत्यष्टौ । त्रयःसत्त्वादयःतेचप्रकृतिगुणाएव । नतुभिन्नाः । एकादशेंद्रियाणिपंचमहाभूतानिचेतिषोडश पुमानात्माएकःप्रोक्तःआचार्यैःकपिलादिभिः । एकत्वेहेतुःएषुसाक्षित्वेनअन्वयात् । तदुक्तं । ' मूलप्रकृतिरविकृतिर्महदाद्याःप्रकृतिविकृतयःसप्त । षोडशकस्तुविकारोनप्रकृतिर्नविकृतिःपुरुष ' इति २२ जगत्जंगमंतस्थुःस्थावरम् । अत्रैवसर्वसंघातात्मकेदेहएवमृग्यःअन्वेष्टव्यः । सुशकंचैतदित्याह । नेतिनेतीत्यन्यापोहेक्रियमाणेस्वयमेवअनात्मवर्गात्पृथगुपलभ्यमानइत्यर्थः २३ मणिषुसूत्रस्येवसर्वत्रानुस्यूतत्वेनअन्वयः । अतएवमणिभ्यःसूत्रस्येवएकैकव्यतिरेकश्च । तयोर्द्वैक्यंतेनयोविवेकःपूर्वोक्तोवातेनउशताशुद्धेनआत्मनामनसा । सर्गस्थानसमाम्नायैःसृष्टिस्थितिसंहारैः ' यतोवाइमानिभूतानिजायंते ' इत्यादिश्रुत्युक्तसर्गाद्यनुसंधानेनेत्यर्थः । विमृशद्भिःविचारयद्भिःअसत्वरैःअव्यग्रैःमुमुक्षुभिर्मृग्यइतिपूर्वेणान्वयः २४ विमर्शप्रकारमाहबुद्धेरितिद्वाभ्याम् । अध्यक्षःसाक्षी २५ अतएभिर्बुद्धेर्भेदैःपरिणामैःपर्यस्तैःपरितःक्षिप्तैरणात्मधर्मत्वेननिरस्तैः । बुद्धिधर्मत्वेहेतुः । त्रिवर्णैःत्रिगुणात्मकैःक्रियोद्भवैःकर्मजन्यैःबुद्धेरेवत्रिगुणात्मकत्वात्कर्मकर्तृत्वाच्च । तस्याएवैताअवस्थाः । आत्मातुबुद्ध्यन्वयात्तदवस्थावानिवभातिनतत्त्वतइत्यात्मनःस्वरूपंबुध्येत्जानीयादित्यर्थः । अत्रदृष्टांतःकुसुमधर्मैर्गंधैस्तदाश्रयंवायुमिव २६ ननुतर्हियथाकुसुमधर्मोपिवायोर्गंधोविवेकज्ञानेननविवर्ततेएवमात्मनःसंसारोबुद्धिधर्मोपिनिवर्तेतेत्याशंक्याह । एतद्वारःबुद्धिद्वारकःतदवस्थाद्वारकोवानतुस्वतःहियस्मात्बुद्धेर्येगुणाःकर्माणिचतैर्निबध्यतइतितथा । सचअज्ञानमूलः (भ्रांतिमूलकः) अतोअपार्थोऽपिमिथ्याभूतोपिस्वप्नइवेष्यते । वायोस्तुगंधविशिष्टद्रव्यसंबंधस्यवास्तवत्वात्सोऽस्मिन्विषयेविषमोदृष्टांतः ।(अतोत्रस्वप्नइवेष्यतइतिभावः) २७ यस्मादेवंनिवृत्तिर्घटतेतस्मात्बीजंअज्ञानंतस्यनिर्हरणंदहनम् । किंतत् । योगःयोगरूपम् । किंविधः । धियःप्रवाहंजाग्रदादिरूपंउपरमयतीतथा ।(तथाचसूत्रं 'योगश्चित्तवृत्तिनिरोध ' इति) २८ तदेवंज्ञानप्रकारमुक्त्वातत्साधनंधर्मस्यतत्त्वंनारदोक्तमेवाहतत्रेतिपंचभिः । यैर्धर्मैर्यथानुष्ठितैर्वाभगवतिश्रीनारायणेरतिरितियत्अयंतत्रोपायोमुख्यः । यतोभगवतोक्तः । तथाहिगीतासु । 'यत्करोषियदश्नासियज्जुहोषिददासियत् । यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पण 'मिति । भक्त्यामामभिजानातियावान्यश्चास्मितत्त्वतः ' इत्यादिच२९तत्रैवांतरंगान्धर्मानाह । गुरोःशुश्रूषयापरमसेवया । भक्त्याप्रेम्णासर्वेषांलब्धानामर्पणेनच ३०तस्यलिंगानांमूर्तीनांईक्षणमर्हणंचादिर्येषांवंदनादीनांतैश्च३१

॥२७॥

श्लोकाः २२/३१

अष्टौप्रकृतयःप्रोक्तास्त्रयएवहितद्गुणाः ॥ विकाराःषोडशाचार्यैःपुमानेकःसमन्वयात् २२ देहस्तुसर्वसंघातोजगत्तस्थुरितिद्विधा ॥ अत्रैवमृग्यःपुरुषोनेतिनेतीत्यतत्त्यजन् २३ अन्वयव्यतिरेकेणविवेकेनोशतात्मना ॥ सर्गस्थानसमाम्नायैर्विमृशद्भिरसत्वरैः २४ बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितिवृत्तयः ॥ तायेनैवानुभूयंतेसोध्यक्षःपुरुषःपरः २५ एभिस्त्रिवर्णैःपर्यस्तैर्बुद्धिभेदैःक्रियोद्भवैः ॥ स्वरूपमात्मनोबुध्येद्गंधैर्वायुमिवान्वयात् २६ एतद्द्वारोहिसंसारोगुणकर्मनिबंधनः ॥ अज्ञानमूलोऽपार्थोपिपुंसःस्वप्नइवेष्यते २७ तस्माद्भवद्भिःकर्तव्यंकर्मणांत्रिगुणात्मनाम् ॥ बीजनिर्हरणंयोगःप्रवाहोपरमोधियः २८ तत्रोपायसहस्राणामयंभगवतोदितः ॥ यदीश्वरेभगवतियथायैरंजसारतिः २९ गुरुशुश्रूषयाभक्त्यासर्वलब्धार्पणेनच ॥ संगेनसाधुभक्तानामीश्वराराधनेनच ३० श्रद्धयातत्कथायांचकीर्तनैर्गुणकर्मणाम् ॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ३१

॥२७॥

चूर्णिका

२२ २३ २४ किंचजाग्रत्स्वप्नसुषुप्तिवृत्तयःबुद्धेर्भवंतिताः येनअनुभूयतेसःसाक्षीपुरुषः २५ २६ संसारस्तुबुद्धिद्वारकःअज्ञानमूलः २७ अतःतस्मात्ईश्वरेसर्वकर्मनाशकः योगः कर्तव्यः मिथ्याभूतोपिस्वप्नइवेष्यते २८ यैर्धर्मैर्भगवतिरतिः भवति अयमुपायोभगवताउक्तः २९ तत्रैव अंतरंगान् धर्मानाहगुरुशुश्रूषयाभक्त्याचईश्वराराधनेनचतत्कथायांश्रद्धयाचईश्वरेरतिर्भवति ३० ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(इतिमनसायेभूतानांकामास्तैस्तानिसम्यक्मानयेत्सर्वेषुभूतेषुदयांकुर्यादितिभावः) ३२ निर्जितःषण्णांकामक्रोधलोभमोहमदमत्सराणांइंद्रियाणांवावर्गोयैः ३३ भगवद्भक्तेर्लिंगान्याहनिशम्येतित्रि भिः । कर्माणिसृष्ट्यादीनिगुणान्भक्तवात्सल्यादीन् । अतिहर्षेणउद्गताःपुलकाअश्रूणिचतैर्गद्गदंयथाभवत्येवंप्रोद्गतकंठःउद्गायति ३४ (ग्रहग्रस्तःपिशाचगृहीतःसइवआक्रंदतेरोदिति । आत्मनिहरौम तिर्यस्य) ३५ तस्यभगवतोभावश्चेष्टादिःतस्यभावोभावनातेनानुकृते (तदेकरूपेकृते) आशयाकृतीमनःशरीरेयस्य । निर्दग्धंबीजमज्ञानंअनुशयोवासनाचयस्यसःसम्यगेतिप्राप्नोति ३६ ततःकिमतआ ह । अधोक्षजस्यालंभंमनसास्पर्शंपाठांतरेतस्याश्रयणंअशुभोरागादियुक्तआत्मामनोयस्यतस्ययत्संसृतिचक्रंतच्छातयतीतितन्निवर्तकंबुधाविदुः । तदेवब्रह्मनिर्वाणंलयोमोक्षःतदात्मकंसुखंविदुः । हृदीश्व रमंतर्यामिणम् ३७ भक्तिरशक्येतिचनमंतव्यमित्याह । कइति । छिद्रवत्आकाशवत् । तिष्ठतःविषयाणामुपपादनैःअर्जनैःकिम् । तत्रहेतुः । सर्वदेहिनांसामान्यतः । विषयनिष्ठत्वेश्वशूकरादिसाधारण्या दित्यर्थः । नचैवमादौपौनरुक्त्यदोषःनारदोक्तानुवादरूपत्वादस्यप्रकरणस्य ३८ अनर्थकंचविषयार्जनमित्याह । रायोअर्थाः (कोशोभांडागारंसूतिरैश्वर्यं) क्षणभंगुरमायुर्यस्यतस्यस्वयमपिचलाःसंतः । तदुक्तमितिहासेपु । 'धनंहिपुरुषोलोकेपुरुषंधनमेववा । अवश्यमेकंत्यजतितस्मात्किंधनतृष्णये' ति ३९ 'यन्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं । अभिलाषोपपन्नंचसुखंस्वर्गसुखास्पद' मित्येवंभूताःस्वर्गादि भोगाअपिनसेवार्हाइत्याह । एवंहीति । क्षयिष्णुत्वेहेतुः क्रतुभिःकृताइति 'तद्यथेहकर्मचितोलोकःक्षीयतेएवमेवामुत्रपुण्यचितोलोकःक्षीयत' इतिश्रुतेः । अतएवपुण्यतारतम्येनसातिशयानचानिर्मलाःस्पर्धा दिमत्वात् । नविद्यतेदृष्टंश्रुतंचदूषणंयस्मिन् ४० यदर्थोयत्संकल्पः (आत्मानंविद्वांसंमन्यतेविद्वन्मानी) । अतःसंकल्पिताद्विपर्यासंविपरीतंफलंअमोघंअवश्यंप्राप्नोति ४१

श्लोकाः ३२/४१

हरिःसर्वेषुभूतेषुभगवानास्तईश्वरः ॥ इतिभूतानिमनसाकामैस्तैःसाधुमानयेत् ३२ एवंनिर्जितषड्वर्गैःक्रियतेभक्तिरीश्वरे ॥ वासुदेवेभगवतियया संलभते रतिम् ३३ निशम्यकर्माणिगुणानतुल्यान्वीर्याणिलीलातनुभिःकृतानि ॥ यदातिहर्षोत्पुलकाश्रुगद्गदंप्रोत्कंठउद्गायतिरौतिनृत्यति ३४ यदाग्रहग्रस्तइव क्वचिद्धसत्याक्रंदतेध्यायतिवंदतेजनम् ॥ मुहुःश्वसन्वक्तिहरेजगत्पतेनारायणेत्यात्ममतिर्गतत्रपः ३५ तदापुमान्मुक्तसमस्तबंधनस्तद्भावभावानुकृताशयाकृ तिः ॥ निर्दग्धबीजानुशयोमहीयसाभक्तिप्रयोगेणसमेत्यधोक्षजम् ३६ अधोक्षजालंभमिहाशुभात्मनःशरीरिणःसंसृतिचक्रशातनम् ॥ तद्ब्रह्मनिर्वाणसुखं विदुर्बुधास्ततोभजध्वंहृदयेहृदीश्वरम् ३७ कोतिप्रयासोऽसुरबालकाहरेरुपासनेस्वेहृदिछिद्रवत्सतः ॥ स्वस्यात्मनःसख्युरशेषदेहिनांसामान्यतःकिंविष योपपादनैः ३८ रायःकलत्रंपशवःसुतादयोगृहामहीकुंजरकोशभूतयः ॥ सर्वेऽर्थकामाःक्षणभंगुरायुषःकुर्वंतिमर्त्यस्यकियत्प्रियंचलाः ३९ एवंहिलो काःक्रतुभिःकृताअमीक्षयिष्णवःसातिशयानानिर्मलाः ॥ तस्माददृष्टश्रुतदूषणंपरंभक्त्यैकयेशंभजतात्मलब्धये ४० यदर्थइहकर्माणिविद्वान्मान्यसकृन्नरः ॥ करोत्यतोविपर्यासममोघंविंदतेफलम् ४१

चूर्णिका

३२ ३३ भगवद्भक्तेर्लिंगान्याहहरेर्गुणान् श्रुत्वाउत्पुलकःसन्यदाअश्रूणिमुंचतिरौतिनृत्यति ३४ किंचगतत्रपःसन् हरेनारायणजगत्पतेइतिवक्ति ३५ तदामुक्तबं धनःसन् अधोक्षजंप्राप्नोति ३६ तदेवमोक्षसुखंबुधाःविदुःअतः ईश्वरंभजध्वम् ३७ हेदैत्यबालकाःहृत्स्थस्यहरेर्भजनेकोतिप्रयासोस्ति ३८ किंचद्रव्यकलत्रादयः एतेमर्त्यस्यकियत्प्रियं कुर्वंति ३९ यथाद्रव्यपुत्रकलत्रादिकं इहलोकसुखंनश्वरम् एवंपुण्यार्जितंस्वर्गादिकमपिनश्वरंतस्मात्आत्मलब्धयेभक्त्याहरिंभजत ४० किंच अयंनरः यत्संकल्प्यकर्माणिकरोति तद्विपरीतंफलंप्राप्नोति ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवदर्शयन्तिसुखायेति । ईहयाइच्छयाक्रिययावा । यःपूर्वमनीहायाहेतोःसुखेनआवृतोव्याप्तआसीत्सईहयादुःखमाप्नोत्येव (सदा)४२ किंचकामान्भोगान्काम्यैर्विषयैःकर्मभिर्वा । पारक्यःश्वसृगाला
दिभोग्यःनत्वात्मीयःभंगुरश्च ४३ किमुदेहात्व्यवहिताअपत्यादयोममताविषयाःपारक्याइतिवक्तव्यम्४४ किंच । स्वयंपुरुषार्थरूपस्यकिमेतैरतितुच्छैरित्याह किमेतैरिति ४५ भोगावसराभावाच्चैतैःकउप
योगइत्याहानिरूप्यतामिति । (निषेकादिषुगर्भसंभवादिषु) प्राचीनैःकर्मभिःक्लिश्यमानस्य । कर्मभिःकियानर्थइतिवाऽन्वयः ४६ ननुकर्मसुसमाप्तेषुभोगावसरःस्यात्तत्राह । कर्माणीति । नचे
दंकर्मतत्फलंदेहादिकंचपरमार्थइत्याह । उभयंकर्मचदेहंचअविवेकतःअज्ञानेनैवतनुते ४७ यदपाश्रयायदधीनाः ४८ भूतानांप्राणिनाम् । जीवसंज्ञितःअंतर्यामी ४९ असुराणामस्माकमत्रनाधिकारइत्य
पिनवाच्यमित्याह । देवइतिपंचभिः ५० (नालंनसमर्थं) ५१ अमलयानिष्कामया । अन्यद्विडंबनंनटनमात्रम् ५२ (सर्वत्रसर्वभूतेषुआत्मौपम्येनआत्मतुल्यदर्शनेन) ५३ अच्युततांअमृतत्वम् ५४

॥२९॥

श्लोकाः ४२/५४

सुखायदुःखमोक्षायसंकल्पइहकर्मिणः ॥ सदाप्नोतीहयादुःखमनीहायाःसुखावृतः ४२ कामान्कामयतेकाम्यैर्यदर्थमिहपूरुषः ॥ सवैदेहस्तुपारक्योभंगुरो
यात्युपैतिच ४३ किमुव्यवहितापत्यदारागारधनादयः ॥ राज्यंकोशगजामात्यभृत्याप्ताममतास्पदाः ४४ किमेतैरात्मनस्तुच्छैःसहदेहेननश्वरैः ॥
अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः ४५ निरूप्यतामिहस्वार्थःकियान्देहभृतोऽसुराः ॥ निषेकादिष्ववस्थासुक्लिश्यमानस्यकर्मभिः ४६ कर्माण्यारभतेदे
हीदेहेनात्मानुवर्तिना ॥ कर्मभिस्तनुतेदेहमुभयंत्वविवेकतः ४७ तस्मादर्थाश्चकामाश्चधर्माश्चयदपाश्रयाः ॥ भजतानीहयात्मानमनीहंहरिमीश्वरम् ४८
सर्वेषामपिभूतानांहरिरात्मेश्वरःप्रियः ॥ भूतैर्महद्भिःस्वकृतैःकृतानांजीवसंज्ञितः ४९ देवोऽसुरोमनुष्योवायक्षोगंधर्वएववच ॥ भजन्मुकुंदचरणंस्वस्तिमा
न्स्याद्यथावयम् ५० नालंद्विजत्वंदेवत्वमृषित्वंवाऽसुरात्मजाः ॥ प्रीणनायमुकुंदस्यनवृत्तंनबहुज्ञता ५१ नदानंनतपोनेज्यानशौचंनव्रतानिच ॥ प्रीय
तेऽमलयाभक्त्याहरिरन्यद्विडंबनम् ५२ ततोहरौभगवतिभक्तिंकुरुतदानवाः ॥ आत्मौपम्येनसर्वत्रसर्वभूतात्मनीश्वरे ५३ दैतेयायक्षरक्षांसिस्त्रियः
शूद्राव्रजौकसः ॥ खगामृगाःपापजीवाःसंतिह्यच्युततांगताः ५४

चूर्णिका

तदेवाह इहकर्मिणःसुखायसंकल्पोस्तिपरंचइच्छयादुःखंप्राप्नोति ४२ किंच यदर्थंकामान्कामयतेसःदेहस्तुपारक्योयदा ४३ तदास्त्रीपुत्रादयःपारक्याइतिकिंवक्तव्यम् ४४
किंच आत्मनःनश्वरैःएतैःकिम् किंच हेअसुराःक्लिश्यमानस्यदेहिनःकर्मभिःकियानर्थइतिकथ्यतां किंच अयंदेहीदेहंकर्मचअज्ञानेनैवतनुते ४७ तस्मात्अर्थादयोयदधीनाःतंह
रिंभजध्वम् ४८ ४९ नःअसुराणांहरिभजनेअनधिकारःइतिनचवाच्यम् देवोऽसुरोमनुष्योवायक्षोगंधर्वएवच भजन्मुकुंदचरणंस्वस्तिमान्स्याद्यथावयम् ५० ॥ नालंद्विजत्वंदे
वत्वमृषित्वंवासुरात्मजाः ॥ प्रीणनायमुकुंदस्यनवृत्तंनबहुज्ञता ॥ ५१ ॥ नदानंनतपोनेज्यानशौचंनव्रतानिच ॥ प्रीयतेऽमलयाभक्त्याहरिरन्यद्विडंबनम् ॥ ५२ ॥ ततोहरौभगवति
भक्तिंकुरुतदानवाः ॥ आत्मौपम्येनसर्वत्रसर्वभूतात्मनीश्वरे ॥ ५३ ॥ दैतेयायक्षरक्षांसिस्त्रियःशूद्राव्रजौकसः ॥ खगामृगाःपापजीवाःसंतिह्यच्युततांगताः ॥ ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अध्यायद्वयोक्तमुपसंहरति । एतावानिति । तदीक्षणंगोविंदहष्ट्यासंमाननम् ५५ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांसप्तमोऽध्यायः ७ ॥ ॥ ७ ॥ ॥ अष्टमेतिरुपासूनुंनिघ्न
न्दैत्योहतःस्वयम् । आविर्भूयनृसिंहेनसचब्रह्मादिभिःस्तुतः ॥ १ ॥ अंतःकृपासुधापूर्णोबहिःक्रोधोनृकेसरी । दैत्येंद्रमरिभावेनभजंतंसमभावयत् ॥ २ ॥ १ एकांतसंस्थितांप्रत्यङ्निष्ठाम् । यथायथावत्
२ सचपुत्रंहंतुंमनोदधे । कथंभूतः । कोपस्यावेशेनोद्रेकेणचलत्गात्रंवपुर्यस्यसः ३ क्षिप्त्वातिरस्कृत्य (अतदर्हणंतिरस्कारानर्हंपरमसाधुम्) पापेनसरोषेणतिरश्चीनेनवक्रेण (आहोवाच) ४ ५ हेमंदात्मन्
अल्पबुद्धे । मदाज्ञाऽतिलंघिनंत्वामद्ययमालयंनेष्यामि ६ अभीतवत् । किंवलंयस्यसकिंवलः (अत्यगाःअतिक्रांतवान्) ७ (सभगवान्ममैवबलमितिन । किंतुभवतोन्येषांचबलिनांसएवबलम् । येपरेब्रह्मादयोऽ
वरेचयेस्थिरजंगमास्तेयेनवशंप्रापिताः) ८ वशंप्रणीताइत्यत्रहेतुःसईश्वरइति । उरवःक्रमाःपादविक्षेपायस्य । बहुपराक्रमइतिवा । ओजआदिरूपः । सत्त्वंधैर्यंबुद्धिर्वा ९ ननुमच्छत्रुरसौकथंममापिसएव
बलंस्यादतआहजहीति । आत्मनःस्वस्यभावंस्वभावंत्यज । यतःअजितादात्मनोमनसऋतेविनाअन्येविद्विषोनसंति । किंच । तद्विहितदेवहिसाम्येनमनसोधारणमेवःसमर्हणमाराधनम् १०

॥३०॥

एतावानेवलोकेस्मिन्पुंसःस्वार्थःपरःस्मृतः ॥ एकांतभक्तिर्गोविंदेयत्सर्वत्रतदीक्षणम् ५५ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेसप्तमोऽध्यायः ७ ॥
॥ नारदउवाच ॥ अथदैत्यसुताःसर्वेश्रुत्वातदनुवर्णितम् ॥ जगृहुर्निरवद्यत्वान्नैवगुर्वनुशिक्षितम् १ अथाचार्यसुतस्तेषांबुद्धिमेकांतसंस्थिताम् ॥ आल
क्ष्यभीतस्त्वरितोराज्ञआवेदयद्यथा २ श्रुत्वातदप्रियंदैत्योदुःसहंतनयानयम् ॥ कोपावेशचलद्गात्रःपुत्रंहंतुंमनोदधे ३ क्षिप्त्वापरुषयावाचाप्रह्लादमतदर्हण
म् ॥ आहेक्षमाणःपापेनतिरश्चीनेनचक्षुषा ४ प्रश्रयावनतंदांतंबद्धांजलिमवस्थितम् ॥ सर्पःपदाहतइवश्वसन्प्रकृतिदारुणः ५ हेदुर्विनीतमंदात्मन्कुलभे
दकराधम ॥ स्तब्धंमच्छासनोद्धृतंनेष्येत्वाऽद्ययमक्षयम् ६ क्रुद्धस्ययस्यकंपंतेत्रयोलोकाःसहेश्वराः ॥ तस्यमेऽभीतवन्मूढशासनंकिंबलोऽत्यगाः ७ ॥
॥ प्रह्लादउवाच ॥ नकेवलंमेभवतश्चराजन्सवैबलंबलिनांचापरेषाम् ॥ परेऽवरेऽमीस्थिरजंगमायेब्रह्मादयोयेनवशंप्रणीताः ८ सईश्वरःकालउरुक्रमो
सावोजःसहःसत्त्वबलेंद्रियात्मा ॥ सएवविश्वंपरमःस्वशक्तिभिःसृजत्यवत्यत्तिगुणत्रयेशः ९ जह्यासुरंभावमिमंत्वमात्मनःसमंमनोधत्स्वनसंतिविद्विषः ॥
ऋतेऽजितादात्मनउत्पथस्थितात्तद्धिह्यनंतस्यमहत्समर्हणम् १०

श्लोकाः ५५/१०

चूर्णिका

॥ एतावानेवलोकेऽस्मिन्पुंसःस्वार्थःपरःस्मृतः ॥ एकांतभक्तिर्गोविंदेयत्सर्वत्रतदीक्षणम् ॥ ५५ ॥ इतिसप्तमेसप्तमः ७ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ अथसर्वेदैत्यसु
ताःनिर्दोषंप्रह्लादवाक्यंजगृहुःगुरुशिक्षितंन १ अथाचार्यसुतःबालकानांप्रत्यङ्निष्ठांबुद्धिंआलक्ष्यभीतःसन्राज्ञेशीघ्रंन्यवेदयत् २ राजातत्अप्रियंश्रुत्वाकोपावेशेनचलद्गात्रः
पुत्रंहंतुंमनोदधे ३ बद्धांजलिंस्थितंपुत्रंपापेनचक्षुषाअवलोकयन् आह ४ ५ हेदुर्विनीत हेअधममच्छासनातिगंत्वांअद्ययमसादनंनेष्ये ६ यस्यमेक्रुद्धस्यसतःत्रयोलोकाःकंपं
तेतस्यमेशासनंकस्यबलेनअतिक्रांतवान् ७ ॥ नारदउवाच ॥ इतिश्रुत्वाहरेःप्रियःप्रह्लादःप्रहसन्इवगतभीःउवाच हेराजन्सःकेवलंममबलंनकिंतुभवतः अपरेषांबलिनांचब
लम् येनब्रह्मादयोवशंनीताः ८ सःईश्वरःइदंसृजतिअवतिअत्ति ९ त्वंआसुरंस्वभावंजहिमनःसमंधत्स्वअजितात्मनःमनोविनाअन्येविद्विषोनसंति किंचसर्वत्रसाम्येनमनसो
धारणंतदेवअनंतस्यसमर्हणंभवतीत्यादि १०

॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.स. ननुमयादिग्विजयेसर्वेरिपवोजिताःअतःसांप्रतंविद्विषोनसंतीतिचेत्सत्यंतत्राह।दस्यूनिति।एकेभवादृशामंदाःपुराआदौलुंपतःसर्वस्वंहरतःषडिंद्रियलक्षणान्शत्रून्अविजित्यअजित्वादशादिशःस्वयंजितामन्य अ०
ते।साधोस्तुजितचित्तस्यदेहिनांसमस्यज्ञस्यविदुषःस्वाज्ञानकल्पिताःपरेशत्रवःकुतःस्युः११व्यक्तंनिश्चितम्।विप्लवाअनन्विताइत्यर्थः १२हेमंदभाग्यमदन्योजगदीश्वरोयद्यस्तितर्ह्यसौक्वास्ति। प्रह्लादआहसस
र्वत्रास्ति।हिरण्यकशिपुराहतर्हिकस्मात्स्तंभेनास्ति। प्रह्लादस्तुतंस्तंभंनिरीक्षमाणोनमस्यन्नाहदृश्यतइति१३हिरण्यकशिपुस्तत्रतमपश्यन्नाह।सोहमिति।(त्वात्वाम्) १४प्रह्लादेनमूर्ध्निबद्धांजलिनानिरीक्ष्य
टीका माणंस्तंभंमुष्टिनाताडितवान्१५(हेअंगयंस्वनंश्रुत्वास्वधाम्नोप्ययंप्रलयम्)१६तत्पदंतस्यध्वनेराश्रयम्।येननिनादेन(दैत्यनायकावितत्रसुःअत्युद्विग्नाआसन्)विक्रमन्समंततःप्रहरन्१७भगवांस्तदास्तंभंवि ॥८॥
दार्यअदृश्यतदृश्योबभूव।किमर्थं।निजभृत्येनप्रह्लादेनयद्भाषितंदृश्यतइतितत्सत्यंविधातुंकर्तुं। तथाअखिलेषुभूतेष्वात्मनोव्याप्तिंचसत्यांकर्तुंस्तंभेअदृश्यत।तत्किमर्थं।भौतिकेषुचभावेषुभूतेष्वथमहत्सुच।
॥३१॥ भगवानास्तइतियत्तेनैवभृत्येनभाषितंतत्सत्यंविधातुम्।तथाऽत्यद्भुतंदैत्यघातकमतिघोरंरूपमुद्वहन्दधत्।तत्किमर्थंनिजभृत्यैःसनकादिभिःशापानंतरमनुतप्तैस्त्रिभिर्जन्मभिःशापमोक्षोभवत्वितिभाषितंतत्सत्यं
कर्तुं। तथाअत्यद्भुतंब्रह्मसृष्टावदृष्टमश्रुतंचरूपमुद्वहन्तच्चनमृगाकारंनचमनुष्याकारंउद्वहन्सभायांमध्येअदृश्यततत्किमर्थंनिजभृत्येनहिरण्यकशिपुनाब्रह्माणंप्रतियद्भाषितंभूतेभ्यस्त्वद्विसृष्टेभ्योमृत्युर्माभून्मम
प्रभोइतितथान्तर्नबहिरितिनानरैर्नमृगैरपीतिच। ब्रह्मणाचनिजभृत्येनतथास्त्वितियद्भाषितंतदुभयोर्वाक्यंसत्यंकर्तुं। नहितद्ब्रह्मसृष्टंभूतंनचनरोवामृगोवानचसभागृहस्यांतःनचतत्प्रांगणंबहिःएवंताभ्यांय
द्भाषितंतत्सत्यंकर्तुं। यच्चहिरण्यकशिपुनाभाषितंनूनमेतद्विरोधेनमृत्युर्मेभवितेतितथाअयमकुतश्चिद्भयोऽमरइतिच। यच्चनारदेननिजभृत्येनेंद्रंप्रतिभाषितंअयंमहान्स्वयासंस्थांनप्राप्स्यतिअनंतानुचरोबली
त्यनेनस्वभक्तपक्षपातेनचकारान्निजभाषितंच किंतत् 'कौंतेयप्रतिजानीहिनमेभक्तःप्रणश्यति'इतितथा'तेषामहंसमुद्धर्त्तामृत्युसंसारसागरात्'इत्यादितच्चसत्यंकर्तुमदृश्यतेतिद्रष्टव्यम् अलंअतिविस्तरेण १८

दस्यून्पुराषण्णविजित्यलुंपतोमन्यंतएकेस्वजितादिशोदश ॥ जितात्मनोज्ञस्यसमस्यदेहिनांसाधोःस्वमोहप्रभवाःकुतःपरे ११ ॥ हिरण्यकशिपुरुवाच ॥ श्लोकाः
व्यक्तंत्वंमर्तुकामोसियोऽतिमात्रंविकत्थसे ॥ मुमूर्षूणांहिमंदात्मन्ननुस्युर्विप्लवागिरः १२ यस्त्वयामंदभाग्योक्तोमदन्योजगदीश्वरः ॥ क्वासौयदिससर्वत्रक
स्मात्स्तंभेनदृश्यते १३ सोहंविकत्थमानस्यशिरःकायाद्धरामिते ॥ गोपायेतहरिस्त्वाद्ययस्तेशरणमीप्सितम् १४ एवंदुरुक्तैर्मुहुरर्दयन्रुषासुतंमहाभागवतं ११/१८
महासुरः ॥ खड्गंप्रगृह्योत्पतितोवरासनात्स्तंभंतताडातिबलःस्वमुष्टिना १५ तदैवतस्मिन्निनदोतिभीषणोबभूवयेनांडकटाहमस्फुटत् ॥ यंवैस्वधिष्ण्यो
पगतंत्वजादयःश्रुत्वास्वधामाप्ययमंगमेनिरे १६ सविक्रमन्पुत्रवधेप्सुरोजसानिशम्यनिर्ह्रादमपूर्वमद्भुतम् ॥ अंतःसभायांनददर्शतत्पदंवितत्रसुर्येनसुरा
रियूथपाः १७ सत्यंविधातुंनिजभृत्यभाषितंव्याप्तिंचभूतेष्वखिलेषुचात्मनः ॥ अदृश्यतात्यद्भुतरूपमुद्वहन्स्तंभेसभायांनमृगंनमानुषम् १८

चूर्णिका ११ ॥ राजोवाच ॥ हेमंदात्मन्निश्चितंत्वंमर्तुकामोसियःत्वंअमर्यादंविकत्थसे १२ हेमंदभाग्यत्वयामदन्यःजगदीश्वरःउक्तः असौक्वास्तियदिसर्वत्रवर्ततेतर्हिकस्मात्स्तं
भेनदृश्यते १३ प्रह्लादःतंस्तंभंनिरीक्ष्यमाणः नमस्यन्नाहदृश्यतेइतिअरेकत्थमानस्यतेशिरःहरामित्वांहरिःअद्यगोपायेत १४ एवंदुरुक्तैःसुतंअर्दयन्सन्खड्गंप्रगृह्यसिंहासनादु
त्पत्यस्वमुष्टिनास्तंभंतताड १५ ततःस्तंभेअतिभीषणःशब्दःअभूत्येनअंडकटाहंअस्फुटत् तंश्रुत्वाब्रह्मादयःस्वस्थाननाशंमेनिरे १६ सःदैत्यःसभामध्येअपूर्वंनादंश्रुत्वातस्या ॥३१॥
श्रयंनददर्शनादेनसर्वेदैत्याःवितत्रसुः १७ तदाभगवान्स्तंभंविदार्यदृश्योबभूवनिजभृत्यभाषितंतथाअखिलभूतेषुआत्मनोव्याप्तिंतथाचसनकादिभिःयत्भाषितंशापमोक्षोभवत्वि
तितदपिसत्यंकर्तुंनमृगंनमानुषंअद्भुतंरूपंदधत्सन्सभायांस्तंभेअदृश्यत १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सदैत्यःएवंध्वनिंश्रुत्वातदाश्रयंसत्त्वंप्राणिविशेषंसर्वतोविलोकयन्स्तंभस्यमध्यान्निर्गच्छत्नृमृगेंद्रयोर्मिश्ररूपंअहोकिमेतदितिमीमांसितवानितिशेषः । तस्यैवंअलंभयानकंतन्नृसिंहरूपंमीमांसमानस्याग्रतोनृ
सिंहरूपोहरिःसमुत्थितः १९ भयानकत्वमेवदर्शयंस्तद्रूपमनुवर्णयति (त्रिभिः) प्रतप्तंचामीकरंस्वर्णंमिवपिंगानिचंडानिलोचनानियस्मिन् । सटाजटाःकेसराःकंठरोमाणिस्फुरद्भिःसटाकेशरैःजृंभितंसा
टोपमाननंयस्मिन्करालाःतुंगाःदंष्ट्रायस्मिन्करवालःखड्गःतद्वच्चंचलाक्षुरांतवत्तीक्ष्णाचजिह्वायस्मिन्भृकुटीयुक्तेनमुखेनोल्बणम् २० स्तब्धौउन्मत्तौशंकुवदूर्ध्वौकर्णौयस्मिन्गिरिकंदरवदद्भुतंव्यात्तंप्रसृतंआ
स्यंनासेचयस्मिन् । हनूकपोलप्रांतौतयोर्भेदनविदारणेनभीषणम् । कर्णांतमुखविस्तारमित्यर्थः दिविस्पृशन्कायोयस्मिन् । अलुक्समासः । अदीर्घाह्रस्वापीवरास्थूलाग्रीवायस्मिन् । उरुविशालंवक्ष
स्थलंयस्मिन्तत्तच्च । अल्पंमध्यमंउदरंयस्मिन् २१ चंद्रांशुवद्गौरैस्तनूरुहैर्लोमभिश्छुरितंव्याप्तंविष्वक्सर्वतःप्रसृताभुजास्तेषामनीकानिस्तोमाःतेषांशतानियस्मिन्नखान्येवायुधानियस्मिन् २२ दुरा
सदंग्राधुमशक्यंसर्वाणिचनिजानिचक्रादीनिइतराणिवज्रादीनितएवायुधप्रवेकाःशस्त्रोत्तमास्तैर्विद्राविताःदैत्यदानवायेनतद्रूपंमीमांसमानस्याग्रतःसमुत्थितइतिपूर्वेणैवान्वयः २३ तदाविर्भावप्रयोजनविमर्श
पूर्वकंतेनसहदैत्यस्ययुद्धमाहसप्तभिः । प्रायेणमहामायाविनाहरिणामेऽयमेवंभूतोवधःमृत्युहेतुःस्मृतःचिंतितः । तथाप्यनेनसमुद्यतेनवधेनकिंनोकिंचिदपीत्येवंब्रुवन्नभ्यपतदित्यन्वयः २४ तदासोऽसुरो
नृसिंहस्यौजसिदीप्तौपतितःसन्अलक्षितःअदृष्टोभूत् । सत्त्वधामनिसत्त्वप्रकाशेहरौपतिततस्यतमोमयस्यादर्शनंनतद्विचित्रंभवतितत्रहेतुःयोहरिःपुरासृष्ट्यादौप्रलयकालीनंतमःनुअहोअपिबत्तस्मिन् २५
विक्रमंतंसमंततःप्रहरंतम् । (ताक्ष्यसुतोगरुडः) २६

॥३२॥ ॥८॥

श्लोकाः १९/२६

ससत्त्वमेनंपरितोविपश्यन्स्तंभस्यमध्यादनुनिर्जिहानम् ॥ नायंमृगोनापिनरोविचित्रमहोकिमेतन्नृमृगेंद्ररूपम् ॥ मीमांसमानस्यसमुत्थितोऽग्रतोनृसिंहरूप
स्तदलंभयानकम् १९ प्रतप्तचामीकरचंडलोचनंस्फुरत्सटाकेसरजृंभिताननम् ॥ करालदंष्ट्रंकरवालचंचलक्षुरांतजिह्वंभ्रुकुटीमुखोल्बणम् २० स्तब्धो
र्ध्वकर्णंगिरिकंदराद्भुतव्यात्तास्यनासंहनुभेदभीषणम् ॥ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षस्थलमल्पमध्यमम् २१ चंद्रांशुगौरैश्छुरितंतनूरुहैर्वि
ष्वग्भुजानीकशतंनखायुधम् २२ दुरासदंसर्वनिजेतरायुधप्रवेकविद्रावितदैत्यदानवम् ॥ प्रायेणमेऽयंहरिणोरुमायिनावधःस्मृतोऽनेनसमुद्यतेनकिम् २३
एवंब्रुवंस्त्वभ्यपतद्गदायुधोनदन्नृसिंहंप्रतिदैत्यकुंजरः ॥ अलक्षितोऽग्नौपतितःपतंगमोयथान्नृसिंहौजसिसोऽसुरस्तदा २४ नतद्विचित्रंखलुसत्त्वधामनिस्वते
जसायोनुपुराऽपिबत्तमः ॥ ततोऽभिपद्याभ्यहनन्महासुरोरुषान्नृसिंहंगदयोरुवेगया २५ तंविक्रमंतंसगदंगदाधरोमहोरगंताक्ष्यसुतोयथाऽग्रहीत् ॥ स
तस्यहस्तोत्कलितस्तदाऽसुरोविक्रीडतोयद्वदहिर्गरुत्मतः २६

चूर्णिका

सःदैत्यःएवंध्वनिंश्रुत्वातदाश्रयंविलोकयन्स्तंभमध्यात्निर्गच्छंतंनृमृगेंद्ररूपंदृष्ट्वानायंमृगःनापिनरःअहोएतत्किंइतिअतर्कयत् १९ एवंतस्यतर्कयतःसतःअग्रतःनृसिंहरू
पःहरिःसमुत्थितःतदातप्तसुवर्णलोचनंकरालदंष्ट्रंगिरिकंदरवत्प्रसृतास्यनासंस्तब्धोर्ध्वकर्णंदिविस्पृशत्कायंनखायुधं २० २१ २२ ईदृशंनृसिंहंदृष्ट्वाआहअहोमहामायिना
हरिणाअयंममवधोपायःचिंतितःअस्तुतथाअनेनाकिम् २३ एवंब्रुवन्दैत्यकुंजरःतंअभ्यपतत्तदानृसिंहतेजसिअग्नौपतंगइवअदृष्टोभूत् २४ ततोदैत्यःनृसिंहंगदयाअभ्यहनत्
२५ तदैवनृहरिणागृहीतःसन्हस्तात्निसृत्य २६

॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हस्तादुत्कालितः।निःसृतःतदाअमरादेवाःसर्वेधिष्ण्यपाःअसाध्वमन्यंत । हृतान्योकांसिस्थानानियेषांतेतद्भयाद्घनच्छदामेघांतरिताःसंतः (हेभारत) २७ यस्यहस्तात्स्वयंमुक्तःतंनृहरिंस्ववीर्याच्छंकितंमन्य
मानःखड्गचर्मणीप्रगृह्यपुनस्तंआसज्जतअभ्यपद्यतेत्यन्वयः (मृधेयुद्धविषयेजितश्रमःप्रस्फुरद्देहइतियावत्) २७ श्येनस्येववेगोयस्यतंशतचंद्रवर्त्मभिःखड्गचर्ममार्गैःअच्छिद्रंयथाभवत्येवंउपर्यधश्चरंतम् । अ
ट्टहासमेवाह । खरंतीव्रम् । उत्स्वनेनमहाशब्देनउल्वणंभयंकरंतद्भयेनहरेस्तेजसाचनिमीलितेअक्षिणीयस्य २८ ग्रहणेदृष्टांतः । व्यालोयथाखुंमूषकम् । विदारणेदृष्टांतःअहिंगरुडइवेति । विष्वक्सर्वतःस्फु
रंतंनिःसरंतम् । ग्रहणेनातुरंविवशम् । इंद्रेणसहयुद्धेतत्प्रयुक्तेनकुलिशेननक्षतात्वग्यस्य । द्वारिसभायांनांतर्नबहिः ऊरेऊरौनिपात्यनभूमौनचांबरे । नखैर्नव्यसुभिरसुमद्भिर्वा । एवंदिवानक्तपरि
हारायसंध्यायामितिद्रष्टव्यम् २९ दैत्यवधमुक्त्वातद्भृत्यवधमाहद्वाभ्याम् । संरंभेणदुःप्रेक्षाणिकरालानिलोचनानियस्य । असृजोरक्तस्यलवैर्बिंदुभिःरक्ताःसिक्ताअतएवारुणाःकेसराआननंचयस्यसः । कइ
व । द्विपहत्ययागजवधेनहारिःसिंहोयथा । एवंभूतस्तस्यानुचरानहन्नित्युत्तरेणान्वयः ३० नखांकुरैरुत्पाटितंहृत्सरोरुहंयस्यतम् । दोर्दंडानांयूथानियस्यसः । तमनुपंथायेषांतान्अन्यानपित
त्पक्षपातिनइत्यर्थः ३१ दैत्यवधव्यग्रस्यनृहरेराटोपमाहद्वाभ्याम् । सटाभिरवधूताःप्रकंपिताःपरापतन्व्यशीर्यंत । तस्यदृष्ट्याविमुष्टंरोचिर्येषांतेतिरस्कृतप्रभाःअभवन्नितिशेषः । दिग्गिभादिग्ग
जाः ३२ तस्यसटाभिरुत्क्षिप्तानिविमानानितैःसंकुलाव्याप्तासतीप्रोत्सर्पतस्वस्थानात्प्रकर्षेणोदसर्पदित्यर्थः (तथाक्ष्माचप्रोत्सर्पत) ३३ स्वभृत्यैश्वर्यमाश्चर्यमिवमत्वाकौतूहलेनतस्यासनेउपविष्टंभया
त्कोपिनबभाजनासेवत नलक्षितोद्वैरथःप्रतियोद्धायेन ३४ लोकत्रयस्यमस्तकज्वरंशिरोव्यथेवदुःसहम् । प्रहर्षस्यवेगेनउत्कलितानिविकासितानिआननानियासांताःसुरस्त्रियःनृहरिंववृषुः ३५

श्लोकाः २७/३५

असाध्वमन्यंतहृतौकसोऽमराघनच्छदाभारतसर्वधिष्ण्यपाः ॥ तंमन्यमानोनिजवीर्यशंकितंयद्धस्तमुक्तोनृहरिंमहासुरः ॥ पुनस्तमासज्जतखड्गच
र्मणीप्रगृह्यवेगेनजितश्रमोमृधे २७ तंश्येनवेगंशतचंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधोहरिः ॥ कृत्वाऽट्टहासंखरमुत्स्वनोल्बणंनिमीलिताक्षंजगृहेमहाज
वः २८ विष्वक्स्फुरंतंग्रहणातुरंहरिर्व्यालोयथाऽऽखुंकुलिशाक्षतत्वचम् ॥ द्वार्यूरआपात्यददारलीलयानखैर्यथाहिंगरुडोमहाविषम् २९ संरंभदुष्प्रेक्षक
राललोचनोव्यात्ताननांतंविलिहन्स्वजिह्वया ॥ असृग्लवाक्तारुणकेसराननोयथांत्रमालीद्विपहत्ययाहरिः ३० नखांकुरोत्पाटितहृत्सरोरुहंविसृज्यतस्या
नुचरानुदायुधान् ॥ अहन्समंतान्नखशस्त्रपार्ष्णिभिर्दोर्दंडयूथोऽनुपथान्सहस्रशः ३१ सटावधूताजलदाःपरापतन्ग्रहाश्चतदृष्टिविमुष्टरोचिषः ॥ अंभोधयः
श्वासहताविचुक्षुभुर्निर्ह्रादभीतादिगिभाविचुक्रुशुः ३२ द्यौस्तत्सटोत्क्षिप्तविमानसंकुलाप्रोत्सर्पतक्ष्माचपदातिपीडिता ॥ शैलाःसमुत्पेतुरमुष्यरंहसातत्ते
जसाखंककुभोनरेजिरे ३३ ततःसभायामुपविष्टमुत्तमेनृपासनेसंभृततेजसंविभुम् ॥ अलक्षितद्वैरथमत्यमर्षणंप्रचंडवक्त्रंनबभाजकश्चन ३४ निशम्यलो
कत्रयमस्तकज्वरंतमादिदैत्यंहरिणाहतंमृधे ॥ प्रहर्षवेगोत्कलिताननामुहुःप्रसूनवर्षैर्ववृषुःसुरस्त्रियः ३५

चूर्णिका

खड्गचर्मणीप्रगृह्यवेगेनतंअभ्यपद्यत २७ तदाहरिःअट्टहासंकृत्वायथाव्यालःआखुं गरुडःअहिंतथातंसभायांद्वारिऊरौनिपात्यतस्यहृदयंसंध्यायांनखैर्विददार २८ २९ ततः॥ संरं
भदुःप्रेक्ष्यकराललोचनोव्यात्ताननस्तंविलिहन्स्वजिह्वया॥ असृग्लवाक्तारुणकेसराननोयथांत्रमालीद्विपहत्ययाहरिः ॥ तथाअशोभत ३० ततःमृतंतंविसृज्यउदायुधान्तस्यअनु
चरान्नखशस्त्रपार्ष्णिभिःअहन् ३१ तदातस्यसटाभिःकंपिताःमेघाःव्यशीर्यंततदृष्ट्याग्रहाःनिष्प्रभाःअभवन्श्वासहताःसमुद्राःचुक्षुभुः ३२ तस्यरंहसाशैलाःउत्पेतुःतत्तेज
साखंदिशःनरेजिरे ३३ ततःसभायांनृपासनेउपविष्टंविभुंभयात् कोपिनासेवत ३४ तदाहरिणात्रिलोकशत्रुंहतंदृष्ट्वासुरस्त्रियःपुष्पैःहरिंववृषुः ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नाकिनांदेवानांविमानावलिभिः । सुराणामानकाःपटहाःतैर्जघ्निरेवादिताः । स्त्रियोप्सरसोननृतुःगंधर्वमुख्याजगुः ३६ ३७ गंधर्वाश्चअप्सरसश्चचारणाश्चेत्यर्थः (हेतात)३८नरशार्दूलंपुरुषोत्तमं (नातिदूरचराःकिंचिद्दूरस्थिताः)३९ब्रह्मादयोनृसिंहस्यशंकयाऽऽकुलचेतसः । अमराअस्तुवन्सप्तदशश्लोकैःपृथक्पृथक् । अनंतायअनंतंप्रसादयितुंनतोस्मि।अनंतत्वेहेतुः दुरंताःशक्तयोयस्य । तत्कुतःविचित्राणिवीर्याणिप्रभावायस्य । तत्किमर्थं । पवित्राणिशोधकानिकर्माणियस्य । विचित्रवीर्यत्वमेवाह । विश्वस्येति । संदधतेसम्यक्कुर्वते । एवमपिअव्ययात्मनेअप्रच्युतस्वरूपाय ४० रुद्रस्तुतत्कोपकालाभिज्ञोनायंकोपावसरइतितंप्रार्थयते । (सहस्रयुगांतस्तवकोपस्यकालः) कोपायोग्यश्चायं (दैत्य) इत्याह । अल्पकःअत्यल्पः । अतःकोपानिवृत्त्याप्रह्लादंमाहिंसीरित्याह । तत्सुतमिति । यद्वा । अकालेप्ययंकोपोऽस्यभक्तस्यरक्षणार्थमितिचेत्तर्हीदानींकोपंत्यक्त्वेमंपाहीत्यर्थः ४१ इंद्रस्तुनास्माकंहविर्भागादिलाभःपुरुषार्थःकिंतुत्वत्परिचर्यैव । भवतापुनरनेनसंरंभेणस्वकार्यमेवसाधितम् । तस्यचसिद्धत्वादुपसंहरैनंक्रोधमित्याशयेनाह । हेपरम नोस्माकंत्रायतारक्षताभवतास्वीयाएवभागादैत्यात्प्रत्याहृताःअंतर्यामिणस्तवैवयज्ञेषुभोक्तृत्वात् । अस्मदीयंहृदयकमलंचत्वद्गृहमेव । एतावत्पर्यंतंभयहेतुत्वेनास्मत्स्मृतिपथेनित्यंस्थितेनदैत्येनाक्रांतंव्याप्तंसत्तत्प्रत्यबोधि । भयापकरणेनविकाशंनीतम् । तवत्रैलोक्यैश्वर्यसाधनार्थमयमुद्यमइतिचेत्तत्राह । कालग्रस्तमिति । इदंत्रैलोक्यम् । तेत्वाम् । हेनारसिंहनरसिंहाकाराभ्यामाविर्भूत । अपरैःस्वर्गादिपदैः ४२ ऋषयस्तुतपःप्रवर्तनेनास्माकंमहाननुग्रहःकृतइत्याहुः त्वंनोयदात्थउपदिष्टवान्परमंध्यानलक्षणंतपःपरमत्वेहेतुःआत्मनस्तवतेजःप्रभावरूपम् तदेवाहुःयेनतपसाआत्मनिलीनमिदंविश्वंसस्रष्टसृष्टवानसि । तत्अमुनादैत्येनविप्रलुप्तंलुंठितम् । तत्हेशरण्यपालअधरक्षार्थंगृहीतेनानेनवपुषापुनरपितपःकुरुतेत्यन्वमंस्थाअनुज्ञातवानसि । तस्मैतेनमइत्युत्तरश्लोकचतुर्थपादस्यानुषंगः ४३

॥३४॥

तदाविमानावलिभिर्नभस्तलंदिदृक्षतासंकुलमासनाकिनाम् ॥ सुरानकादुंदुभयोथजघ्निरेगंधर्वमुख्याननृतुर्जगुःस्त्रियः ३६ तत्रोपव्रज्यविबुधाब्रह्मेंद्रगिरिशादयः ॥ ऋषयःपितरःसिद्धाविद्याधरमहोरगाः३७ मनवःप्रजानांपतयोगंधर्वाप्सरचारणाः ॥ यक्षाःकिंपुरुषास्तातवेतालाःसिद्धकिन्नराः ॥ तेविष्णुपार्षदाःसर्वेसुनंदकुमुदादयः ३८ मूर्ध्निबद्धांजलिपुटाआसीनंतीव्रतेजसम् ॥ ईडिरेनरशार्दूलंनातिदूरचराःपृथक् ३९ ॥ श्रीब्रह्मोवाच ॥ नतोस्म्यनंतायदुरंतशक्तयेविचित्रवीर्यायपवित्रकर्मणे ॥ विश्वस्यसर्गस्थितिसंयमान्गुणैःस्वलीलयासंदधतेऽव्ययात्मने ४० ॥ श्रीरुद्रउवाच ॥ कोपकालोयुगांतस्तेहतोयमसुरोऽल्पकः ॥ तत्सुतंपाह्युपसृतंभक्तंतेभक्तवत्सल ४१ ॥ इंद्रउवाच ॥ प्रत्यानीताःपरमभवतात्रायतानःस्वभागादैत्याक्रांतंहृदयकमलंत्वद्गृहंप्रत्यबोधि ॥ कालग्रस्तंकियदिदमहोनाथशुश्रूषतांतेमुक्तिस्तेषांनहिबहुमतानारसिंहापरैःकिम् ४२ ॥ ऋषयऊचुः ॥ त्वंनस्तपःपरममात्थयदात्मतेजोयेनेदमादिपुरुषात्मगतंससर्ष्ठ ॥ तद्विप्रलुप्तममुनाद्यशरण्यपालरक्षागृहीतवपुषापुनरन्वमंस्थाः ४३

श्लोकाः ३६/४३

चूर्णिका

विमानावलिभिःआकाशंसंकुलंआसदेवदुंदुभयोनेदुःअप्सरसःननृतुःगंधर्वाःजगुः ३६ तत्रब्रह्मेंद्रगिरिशादयःऋषयःपितरःसिद्धाःविद्याधराःमहोरगाः ३७ गंधर्वाप्सरसःमनवःप्रजापतयःचारणाःयक्षाःकिंपुरुषादयःविष्णुपार्षदाश्चमूर्ध्निबद्धांजलिपुटाःसंतःसिंहासनेआसीनंतंउपव्रज्यईडिरे ३८ ३९ ॥ ब्रह्मोवाच ॥ हेअनंततेदुरंतशक्तयेनमोस्तु ४० ॥ रुद्रउवाच ॥ हेभगवन्अयंअल्पःअसुरोहतःइतउत्तरंकोपस्यकारणंनास्तिअतःएनंउपसृतंतत्सुतंपाहिइत्यादि ४१ ॥ इंद्रउवाच ॥ हेनृहरेअस्मान्रक्षताभवतास्वभागाःदैत्यात्प्रत्याहृताःइतउपरिक्रोधंउपसंहर ४२ ॥ ऋषयऊचुः ॥ हेनृहरेत्वंनःयत्तपःआत्थतत्येनविकुंठितंतदैत्यंहत्वापुनरपितपःकुरुतेतिनःअनुज्ञातवान्असितस्मैतेनमः ४३

॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितरस्तुश्राद्धोद्धरणेनपरमोपकारिणंप्रणमंति । श्राद्धानिश्रद्धायुक्तानिपिंडादीनिनोऽस्मभ्यंपुत्रैर्दत्तानिप्रसभंबलात्अयप्रधिकृत्यबुभुजे । किंचतीर्थस्नानसमयेदत्तंतिलोदकमप्यपिबत्तानितस्योदरात्य
आच्छेत्आहृतवान्।कथंभूतात्। नखैर्विदीर्णावपायस्यतस्मात् । वपाविदारणस्यतद्गतपिंडोद्धरणमेवफलमितिभावः ४४ योगसिद्धांगतिंअणिमादिसामर्थ्यं । तस्मैतुभ्यंतंत्वामुद्दिश्य ४५ विद्याअंतर्धाना
दिलक्षणाम् । अनुराद्धांसंप्राप्तांसंख्येयुद्धे ४६ रत्नानिफणासुस्थितानि । स्त्रीरत्नानिचउत्तमाःस्त्रियः । आसांस्त्रीणांदत्तआनंदोयेनतत्संबोधनम् । पाठांतरेअस्माकंदत्तआनंदोयेनेति ४७ नृसिंहेनावलो
किताःसंतोमूर्ध्निबद्धांजलयोमनवःप्रोचुः । मनवोवयंधर्मपालकाःपरिभूताःसेतवोवर्णाश्रमधर्ममर्यादायेषांतेअनुशाधिअनुशिक्षय ४८ प्रजापतयोपितदवलोकिताःप्रोचुः । हेपरेशतेत्वयाऽभिसृष्टाःप्रजेशावयं
येननिषिद्धाःसंतःप्रजानसृजामःसएषभिन्नंवक्षोयस्यसःनुनिश्चितंमृतःशेतेअतःपरंप्रजाःस्रक्ष्यामइतिहृष्यंतआहुः हेसत्त्वमूर्तेतवायमवतारोजगतोमंगलम् ४९गंधर्वाअपितदवलोकिताःप्रोचुः । हेविभोवयंतेत्वदी
यानटानर्तकाःनाट्येनृत्येगायकाश्च । येनस्वाधीनाःकृताःकथंभूतेनवीर्यंशौर्यंबलंशक्तिःताभ्यामोजःप्रभावोयस्यतेन । इमांदशांमृतिम् । उचितमेतादित्याहुःकिमिति ५० भवापवर्गंसंसारनिवर्तकम् । आश्र
यणेहेतुःयद्यस्मात्साधूनांहृदिभयजनकत्वेनशेतेतिष्ठतीतितथा । सएषोसुरस्त्वयासमापितःअंतंनीतः ५१ मनोज्ञैःकर्मभिःअनुचरेषुमुख्याःपंचतांमृत्युंहेपंचविंशचतुर्विंशतितत्त्वनियामक ५२

॥ पितरऊचुः ॥ श्राद्धानिनोधिबुभुजेप्रसभंतनूजैर्दत्तानितीर्थसमयेप्यपिबत्तिलांबुः ॥ तस्योदरान्नखविदीर्णवपाद्यआर्च्छत्तस्मैनमोनृहरयेऽखिलधर्मगो
प्त्रे ४४ ॥ सिद्धाऊचुः ॥ योनोगतिंयोगसिद्धामसाधुरहार्षीद्योगतपोबलेन ॥ नानादर्पंतंनखैर्निर्ददारतस्मैतुभ्यंप्रणताःस्मोनृसिंह ४५ ॥ विद्याधराऊ
चुः ॥ विद्यांपृथक्धारणयानुरुद्धांन्यषेधदज्ञोबलवीर्यदृप्तः ॥ सयेनसंख्येपशुवद्धतस्तंमहान्नृसिंहंप्रणताःस्मनित्यम् ४६ ॥ नागाऊचुः ॥ येनपापेनरत्ना
निस्त्रीरत्नानिहृतानिनः ॥ तद्वक्षःपाटनेनासांदत्तानंदनमोस्तुते ४७ ॥ मनवऊचुः ॥ मनवोवयंतवनिदेशकारिणोदितिजेनदेवपरिभूतसेतवः ॥ भवता
खलःसउपसंहृतःप्रभोकरवामतेकिमनुशाधिकिंकरान् ४८ ॥ प्रजापतयऊचुः ॥ प्रजेशावयंतेपरेशाभिसृष्टानयेनप्रजावैसृजामोनिषिद्धाः ॥ सएवत्वयाभिन्न
वक्षानुशेतेजगन्मंगलंसत्त्वमूर्तेऽवतारः ४९ ॥ गंधर्वाऊचुः ॥ वयंविभोतेनटनाट्यगायकायेनात्मसाद्वीर्यबलौजसाकृताः ॥ सएषनीतोभवतादशामिमां
किमुत्पथस्थःकुशलायकल्पते ५० ॥ चारणाऊचुः ॥ हरेतवांघ्रिपंकजंभवापवर्गमाश्रिताः ॥ यदेषसाधुहृच्छयस्त्वयाऽसुरःसमापितः ५१ ॥ यक्षाऊ
चुः ॥ वयमनुचरमुख्याःकर्मभिस्तेमनोज्ञैस्तइहदितिसुतेनप्रापितावाहकत्वम् ॥ सतुजनपरितापंतत्कृतंजानतातेनरहरउपनीतःपंचतांपंचविंश ५२

चूर्णिका ॥ पितरऊचुः ॥ नःपुत्रैर्दत्तानिश्राद्धानियःबुभुजेतस्यदैत्यस्यउदरात्तानिपिंडोदकानियःत्वंआहृतवान्तस्मैतेनमः ४४ ॥ सिद्धाऊचुः ॥ हेनृसिंहयःनःगतिंअहार्षीत्तंदैत्यं
भवान्नखैर्विददारतस्मैतेनमः ४५ ॥ विद्याधराऊचुः ॥ यःनःविद्यांन्यषेधत् सःदैत्यःभवतायुद्धेहतःतंत्वांप्रणताःस्म ४६॥ नागाऊचुः ॥ येननःरत्नानिस्त्रीरत्नानिचहृतानितद्वक्षः
पाटनेनासांदत्तानंदनमोस्तुते ४७ ॥ मनवऊचुः ॥ तवआज्ञाकारिणोवयंयेनपरिभूताःसःत्वयाहतःहेप्रभोनःशाधि ४८ ॥ प्रजापतयऊचुः ॥ हेसत्त्वमूर्तेयेनवयंप्रजासर्गेनिषि
द्धाःसःदैत्यःत्वयाहतःसन्शेतेअतःपरंप्रजाःसृजामः ४९ ॥ गंधर्वाऊचुः ॥ हेविभोत्वदीयाःवयंयेनस्ववशीकृताःसःत्वयामृतिंनीतःयोग्यमिदम् ५० ॥ चारणाऊचुः ॥ हेहरेयतः
एषःदैत्यःत्वयाहतःअतःवयंत्वत्पदंप्राप्ताः ५१ ॥ यक्षाऊचुः ॥ हेपंचविंशवयंदैत्येनवाहकत्वंप्रापिताः सः त्वयामृत्युंनीतः ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंपुरुषास्तुत्वांस्तोतुंकेवलंनराकाइत्याहुः । वयंकिंपुरुषास्तुच्छमाणिनःत्वंतुमहानद्भुतानुभावःपुरुषः । नन्वयंमहान्दैत्योहतइतिकिंनवर्ण्यतइत्याशंक्यकियदेतदित्याहुःअयमिति ५३ सत्रेषुयज्ञेषुतेत्वया हतःएतद्दिष्ट्याभद्रंकृतम् ५४ अमुनादितिजेनविष्टिंमूल्यराहितंकर्मअनुनिरंतरंकारिताःअतःपरंनःविभवायसमृद्धयेभव ५५ नोऽस्माकंभक्तानांशरणदआश्रयप्रदसर्वेषांलोकानांशर्ममंगलमेतदद्भुतंरूपमद्यैवदृष्टं नतुपूर्वम् । विधिकरःकिंकरः ५६ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांअष्टमोऽध्यायः ८ ॥ ॥ ७ ॥ ॥ नवमेब्रह्मणाभीत्याचोदितोऽसुरबालकः । कोपंप्रशमयन्नस्तौन्नृसिंहम तिभीषणम् ॥ १ ॥ 'उग्रोप्यनुग्रएवायंस्वभक्तानांनृकेसरी । केसरीवस्वपोतानामन्येषामुग्रविग्रह' इत्याद्यागमोक्तंभक्तानुकंपित्वमाहएवमितिसप्तभिः । एवंदूरतएवस्थित्वास्तुवंतः । मन्युनासंरंभआवेशो यस्य (अतएवदुरासदं) तमुपगंतुंनाशक्नुवन् १ महदद्भुतंरूपंदृष्ट्वाशंकितासतीतंनोपजगाम । अद्भुतत्वेहेतुःअदृष्टेति २ उपैहिउपगच्छ ३ ४ कालएवाहिस्तस्माद्वित्रस्ताधीर्येषांतेषांकृतमभयंये
॥३६॥ नतत् ५ तस्यकरस्पर्शेनधुतंनिरस्तमखिलमशुभंयस्य । सपदितत्क्षणमेवअभिव्यक्तंअपरोक्षीभूतंपरात्मदर्शनंब्रह्मज्ञानंयस्य । निर्वृतःसन्हृदिदधौ । हृष्यंतीरोमांचितातनुर्यस्य । क्लिन्नमार्द्रंहृत्हृदयं यस्य । अश्रूणिलोचनयोर्यस्य । परमपुरुषार्थतयादधौनतुसाधनत्वेनेत्यर्थः ६

श्लोकाः ५३/६

॥ किंपुरुषाऊचुः ॥ वयंकिंपुरुषास्त्वंतुमहापुरुषईश्वरः ॥ अयंकुपुरुषोनष्टोधिक्कृतःसाधुभिर्यदा ५३ ॥ वैतालिकाऊचुः ॥ सभासुसत्रेषुतवामलंयशोगीत्वासपर्यांमहतींलभामहे ॥ यस्तांव्यनैषीद्भृशमेषदुर्जनोदिष्ट्याहतस्तेभगवन्यथाऽऽमयः ५४ ॥ किन्नराऊचुः ॥ वयमीशकिन्नरगणास्तवानुगादितिजेनविष्टिममुनाऽनुकारिताः ॥ भवताहरेसवृजिनोऽवसादितोनरसिंहनाथविभवायनोभव ५५ ॥ विष्णुपार्षदाऊचुः ॥ अद्यैतद्धरिनररूपमद्भुतंतेदृष्टंनःशरणदसर्वलोकशर्म ॥ सोयंतेविधिकरईशविप्रशप्तस्तस्येदंनिधनमनुग्रहायविद्मः ५६ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेअष्टमोऽध्यायः ८ ॥ छ ॥
॥ श्रीनारदउवाच ॥ एवंसुरादयःसर्वेब्रह्मरुद्रपुरःसराः ॥ नोपेतुमशकन्मन्युसंरंभंसुदुरासदम् १ साक्षाच्छ्रीःप्रेषितादेवैर्दृष्ट्वातन्महदद्भुतम् ॥ अदृष्टाश्रुतपूर्वत्वात्सानोपेयायशंकिता २ प्रह्लादंप्रेषयामासब्रह्माऽवस्थितमंतिके ॥ तातप्रशमयोपैहिस्वपित्रेकुपितंप्रभुम् ३ तथेतिशनकैराजन्महाभागवतोऽर्भकः ॥ उपेत्यभुविकायेननमामविधृतांजलिः ४ स्वपादमूलेपतितंतमर्भकंविलोक्यदेवःकृपयापरिप्लुतः ॥ उत्थाप्यतच्छीर्ष्ण्यदधात्कराम्बुजंकालाहिवित्रस्तधियांकृताभयम् ५ सतत्करस्पर्शधुताखिलाशुभःसपद्यभिव्यक्तपरात्मदर्शनः ॥ तत्पादपद्मंहृदिनिर्वृतोदधौहृष्यत्तनुःक्लिन्नहृदश्रुलोचनः ६

चूर्णिका

॥ किंपुरुषाऊचुः ॥ वयंकिंपुरुषाःत्वंईश्वरःत्वयाअयंकुपुरुषोहतः ५३ ॥ वैतालिकाऊचुः ॥ हेभगवन्वयंतवयशोगीत्वांसंपदंलभामहेतांसंपदंयःव्यनैषीत्सःत्वयाहतः एतद्दिष्ट्या ५४ ॥ किन्नराऊचुः ॥ हेहरेतवानुगाःवयंदितिजेनविष्टिंकारिताःसः त्वयाहतःहेनृसिंहत्वंनःसमृद्धयेभव ५५ ॥ विष्णुपार्षदाऊचुः ॥ हेभगवन्लोकानांमंगलं इदंअद्भुतंनृसिंहरूपंअद्यैवदृष्टम्नतुपूर्वंहेईशसोयंतेकिंकरःविप्रशप्तःतस्येदंनिधनंअनुग्रहायविद्मः ५६ इतिसप्तमेअष्टमः ८ ॥ नारदउवाच ॥ एवंदूरतःस्थित्वास्तुवंतः ब्रह्माद्याःदेवाःतत्समीपेगंतुंनअशकन् १ तदादेवैःप्रेषिताश्रीःतत्अद्भुतंरूपंदृष्ट्वाअदृष्टाश्रुतपूर्वत्वात्शंकितासतीतत्समीपंनजगाम २ तदाब्रह्मासमीपेस्थितंप्रह्लादंआह हे
॥३६॥ तातस्वपित्रेकुपितंप्रभुंप्रशमयइत्युक्त्वातंप्रेषयामास ३ ततःप्रह्लादःतथेत्युक्त्वाशनकैःउपेत्यविधृतांजलिःसन्भुविकायेननमाम ४ देवःस्वपादमूलपतितअर्भकंविलोक्यकृपयापरिप्लुतः तंउत्थाप्यतच्छीर्ष्णिकरांबुजंदधौ ५ ततः भगवत्करस्पर्शात्विधूताखिलाशुभःतत्पादपद्मंहृदिदधन्एकाग्रमनसाहरिंअस्तौत् ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ९ ॥

सुसमाहितत्वमेवाह । तस्मिन्नेवन्यस्तेहृदयमीक्षणंचयेनेति ७ । स्वस्मिन्निवसमस्तेषुतत्कृपामृतवृष्टये । प्रह्लादःस्तौतिसतपचैर्द्विचत्वारिंशताहरिम् ॥ १ ॥ तत्रतावदात्मनोभगवत्स्तुतावनधिकारमिवाशं क्याधिकारंसंभावयन्नाह । ब्रह्मादयइतिपंचभिः । मुनयोमननशीलाःसिद्धाज्ञानिनोपिकथंभूताः । सत्त्वएवैकस्मिंस्तानोविस्तारोयस्याःसामतिर्येषांतथाविधाअपिवचसांप्रवाहैरपितथाबहुभिर्वक्ष्यमाणैः (धनाभिजनादि-)-गुणैरपि ।(यद्वा । कथंभूतैःप्रवाहैः । पुरवोभगवद्गुणायेषुतैरपि)। यमाराधयितुंअधुनापिनपप्रुःनपूर्णाः। नशक्ताइत्यर्थः सहरिर्मेकथंतोष्टुंतोषंप्राप्तुमर्हति । तत्रहेतुःउग्रजातेःउग्राघोराआ सुरीजातिर्यस्य ८ एवंहरितोषणेस्वस्यायोग्यतामाशंक्ययोग्यतांसंभावयतिमन्यइतिद्वाभ्याम् । अभिजनःसत्कुलेजन्म । रूपंसौंदर्यं । श्रुतंपांडित्यम् । ओजःइंद्रियनैपुण्यम्। तेजःकांतिः । प्रभावः प्रतापःपौरुषमुद्यमः। बुद्धिःप्रज्ञा। योगोष्टांगः। एतेधनादयोद्वादशापिगुणाःपरमस्यपुंसःआराधनायनभवंति । हियतःकेवलयाभक्त्यैवसतुगजेंद्रायतुष्टोभवत् ९ एवंभक्त्यैवकेवलयाहरितोषःसंभवतीत्युक्तं।

॥३७॥ इदानींभक्तिंविनानान्यत्किंचित्तोषहेतुरित्याह । विप्रादिति । पूर्वोक्ताधनादयोद्विषड्द्वादशगुणास्तैर्युक्ताद्विप्रादपिश्वपचंवरिष्ठंमन्ये । यद्वासनत्सुजातोक्ताद्वादशज्ञानादयोगुणाद्रष्टव्याः तदुक्तं ‘ ज्ञानंच सत्यंचदमःश्रुतंचह्यमात्सर्यंह्रीस्तितिक्षाऽनसूया । यज्ञश्चदानंचधृतिःशमश्चमहाव्रताद्वादशब्राह्मणस्य ’ शमोदमस्तपःशौचंक्षांत्यार्जवविरक्तताः । ज्ञानविज्ञानसंतोषाःसत्यास्तिक्येद्विषट्गुणाइति । कथं भूतात्विप्रात् । अरविंदनाभस्यपादारविंदात्विमुखात् । कथंभूतंश्वपचम् । तस्मिन्अरविंदनाभेअर्पितामनआदयोयेनतम् । ईहितंकर्म । वरिष्ठत्वेहेतुः । सएवंभूतःश्वपचःसर्वंकुलंपुनाति । भूरिर्मानो गर्वोयस्यसतुविप्रआत्मानमपिनपुनातिकुतःकुलम् । यतोभक्तिहीनस्यैतेगुणागर्वायैवभवंतिनतुश्रेयसेअतोहीनइतिभावः १० तर्हिकिंधनाचर्पणेनसंमानंप्राकृतइवभगवानपेक्षतेनेत्याह । नैवेति । अयं प्रभुरीश्वरः । अविदुषोऽल्पकाज्जनात्मानंपूजामात्मनोऽर्थेनवृणीतेनेच्छति । यतोनिजलाभेनैवपूर्णःतर्हिकिंपूजांनेच्छत्येव । तत्राह । करुणःकृपालुः । अतोवृणीते । तत्रहेतुःयदितियंयंमानम्। यद्वायद्यस्मात्यदयंधनादिनाभगवतेमानंविदधीततदेवात्मनेभवतिनान्यत्यथामुखेकृतैवतिलकादिश्रीःशोभाप्रतिबिंबस्यभवतिनतुसाक्षात्तस्यैवकर्तुंशक्यतेतद्वत् ११

श्लोकाः ७/११

अस्तौषीद्धरिमेकाग्रमनसासुसमाहितः ॥ प्रेमगद्गदयावाचातन्न्यस्तहृदयेक्षणः ७ ॥ ॥ प्रह्लादउवाच ॥ ॥ ब्रह्मादयःसुरगणामुनयोऽथसिद्धाःसत्त्वै कतानमतयोवचसांप्रवाहैः ॥ नाराधितुंपुरुगुणैरधुनापिपप्रुःकिंतोष्टुमर्हतिसमेहरिरुग्रजातेः ८ मन्येधनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबु द्धियोगाः ॥ नाराधनायहिभवंतिपरस्यपुंसोभक्त्यातुतोषभगवान्गजयूथपाय ९ विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखात्श्वपचंवरिष्ठम् ॥ मन्येतदर्पितमनोवचनेहितार्थप्राणंपुनातिसकुलंनतुभूरिमानः १० नैवात्मनःप्रभुरयंनिजलाभपूर्णोमानंजनादविदुषःकरुणोवृणीते ॥ यद्यज्जनोभगव तेविदधीतमानंतच्चात्मनेप्रतिमुखस्ययथामुखश्रीः ११

चूर्णिका

७ ॥ प्रह्लादउवाच ॥ ब्रह्मादयः सुरगणाः मुनयः सिद्धाः वचसांप्रवाहैः आराधितुंनशक्ताः सः हरिः उग्रजातेः ममकथंसंतोषंप्राप्तुं अर्हति ८ किंच धनम् सत्कुलेजन्म सौंदर्यं तपः पांडित्यं इंद्रियनैपुण्यं कांतिः प्रतापः शारीरंबलं उद्यमः प्रज्ञा अष्टांगयोगः एतेद्वादशापिगुणाः ईश्वरस्य आराधनायनभवंतियतः केवलयाभक्त्यैवहरिः गजेंद्राय तुष्टोभवत् ९ एतैर्द्वादशगुणैर्युक्तादपिनारायणपादारविंदविमुखात्विप्रात्श्वपचंभक्तियुक्तंवरिष्ठंमन्येयतः सः सर्वंकुलंपुनाति विप्रः आत्मनमपिन अतोहीनः १० ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यस्मादेवंभगवान्भक्त्यैवतुष्यतितस्मादहंनीचोपिविगतविक्लवःगताशंकःसन्ईश्वरस्यमहिमाहिमानंसर्वप्रयत्नेनस्वमनीषानुसारेणानुवर्णयामि । अजानतोपिस्तुतिकरणेहेतुमाह । येनैवमाहिम्नाऽनुवर्णितेनअविद्ययासंसारमनुप्रविष्टःपुमान्पूयेतशुध्येत्तन्महि । अन्यस्यतथाशोधकस्याभावादित्यर्थः १२ तदेवमात्मनः स्तुतावनधिकारंपरिहृत्येदानींतंस्तुवन्कोपोपसंहारंप्रार्थयतेसर्वेहीतिद्वाभ्याम् । भोईशअमीउद्विजंते।बिभ्यतःसर्वेब्रह्मादयःसत्त्वमूर्तेस्तवविधिकराःत्वन्नियोगकर्तारोभक्ताएवनान्ये । नचवयमसुराइववैरभावेनैतेभक्ताःकिंतुश्रद्धयैव । तवरुचिरैरवतारैर्विधंक्रीडनंअस्यविश्वस्यक्षेमादिप्रयोजनायनतुभयोत्पादनाय १३ तत्तस्मादेषांभयपरिहारायमन्युंक्रोधंयच्छउपसंहर । यदर्थेअयंमन्युःसचासुरःसाधूनांसंतोषार्थंअद्यहतःअतःपरंक्रोधेनकार्याभावात्तंनियच्छ । नन्वन्येषांवधेनसाधुःकिंमोदेततत्राह । वृश्चिकादेःपरोपद्रवकारिणोऽन्यतएवप्रजातयाहत्यावधेनतस्यैवतद्भद्रंजातमितिसाधुरपिमोदेतैव । तर्हिबहूनांसुखावहत्वादमुंक्रोधंनत्यजामीतिचेत्तत्राह । लोकाश्चनिर्वृतिं (सुखं) इताः प्राप्ताःसंतःप्रतियंतिक्रोधोपसंहारंप्रतीक्षंते । तर्हिजनानांपुनर्भयाभावायमन्युंधारयामीतिचेत्तत्राह । रूपमिति । विभयायभयनिवृत्यै । एतद्रूपस्मरणादेवभयनिवृत्तेर्नमन्युधारणेनकृत्यमस्तीत्यर्थः १४ त्वंचेद्बिभेषितर्हित्यजामीतिचेत्तत्राह । नाहमिति । भोअजिततेअस्माद्रूपात्अहंनबिभेमि । कथंभूतात् । आस्यंचजिह्वाचअर्कसदृशनेत्राणिचभ्रुकुटीनांरभसआटोपश्चउग्रादंष्ट्राश्चएतानिअतिभयानकानियस्मिन्तस्मात् । आंत्रमय्यःस्रजोयस्मिन्तत् आंत्रस्रक्तस्मात्क्षतजाक्ताःकेसरायस्मिन् । शंकुवदुन्नतौस्तब्धौकर्णौयस्मिन्तच्चतच्चतस्मात् । निर्ह्रादेनभीतादिगिभायस्मात्तस्मात् । अरीन्भिंदंतीतिअरिभिंदि तानिनखाग्राणियत्र । एवंभूतादपितेरूपादहंनबिभेमीति १५ महद्भयंत्वन्यदस्तीत्याह । त्रस्तोस्मीति । दुःसहंयदुग्रंसंसारचक्रंतत्रकदनंदुःखंतस्मादहंत्रस्तोस्मि । तत्रचग्रसतांहिंस्राणांमध्येस्वकर्मभिःबद्धःसन्प्रणीतःनिःक्षिप्तोस्मि । हेकृपणवत्सलहेउरुशत्तमकदानुत्वंप्रीतःसन्अपवर्गभूतंयदरणंशरणंतवांघ्रिमूलंतत्प्रतिह्वयतेमामाह्वास्यसि १६

श्लोकाः १२/१६

तस्मादहंविगतविक्लवईश्वरस्यसर्वात्मनामहिगृणामियथामनीषम् ॥ नीचोऽजयागुणविसर्गमनुप्रविष्टःपूयेतयेनहिपुमाननुवर्णितेन १२ सर्वेह्यमीविधिकरास्तवसत्त्वधाम्नोब्रह्मादयोवयमिवेशनचोद्विजंतः ॥ क्षेमायभूतयउतात्मसुखायचास्यविक्रीडितंभगवतोरुचिरावतारैः १३ तद्यच्छमन्युमसुरश्चहतस्त्वयाद्यमोदतसाधुरपिवृश्चिकसर्पहत्या ॥ लोकाश्चनिर्वृतिमिताःप्रतियंतिसर्वेरूपंनृसिंहविभयायजनाःस्मरंति १४ नाहंबिभेम्यजिततेतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् ॥ आंत्रस्रजःक्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् १५ त्रस्तोस्म्यहंकृपणवत्सलदुःसहोग्रसंसारचक्रकदनाद्ग्रसतांप्रणीतः ॥ बद्धःस्वकर्मभिरुशत्तमतेऽङ्घ्रिमूलंप्रीतोऽपवर्गशरणंह्वयसेकदानु १६

चूर्णिका ॥३८॥

किंच अहंनीचोपियथामतिईश्वरस्यमहिमानंवर्णयामियेनपुमान्पूयेत १२ हेनृसिंहसर्वेअमीब्रह्माद्याः उद्विजंतःतवभक्ताःसंतिनचवयमिववैरभावेनाकिंतुश्रद्धयातेरुचिरावतारैः क्रीडाविश्वस्यक्षेमाद्यर्थम् नतुभयोत्पादनाय १३ अतः मन्युंनियच्छयदर्थंअयंमन्युः सचअसुरः अधुनैवहतः लोकाश्चसुखंप्राप्ताःसंतः क्रोधोपसंहारंप्रतीक्षते १४ सर्वेएतद्रूपंभयनिवृत्त्यर्थंस्मरंति हे अजिततेइदंरूपंदृष्ट्वा अहंनबिभेमि १५ हेदीनदयालोस्वकर्मभिर्बद्धः संसारात्भीतः अहंएवं भूतंमांतवांघ्रिकमलं प्रतिकदा आह्वयसे १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दास्येसतिमत्प्रीतिरितिचेत्तर्हिनानायोनिषुक्लिश्यमानस्यममदास्यज्ञानाभावात्त्वमेवतदुपदिशेतिप्रार्थयते । यस्मात्प्रियैरप्रियैश्चवियोगसंयोगाभ्यांजन्मयस्यतेनशोकाग्निनासकलयोनिषुदह्यमानोस्मि । दुः
खस्यप्रतिकारःकार्यइतिचेत्तत्राह । दुःखस्यौषधंप्रतिकारःतदपिदुःखमेव । एवमपिअतद्धियादेहाद्यभिमानेनमुह्यामिअतःहेभूमन्विभोमेतवदास्यरूपंयोगंनिस्तारोपायंवद (अत्रसयोगःसहयोगःसंयोगइ
त्यर्थः) १७ ननुदास्ययोगेनप्रवृत्तस्यापितदंतरायभूतानांपूर्वोक्तनानादुःखानांकुतःपरिहारस्तत्राह । सोहंत्वद्दासःसन्भोनृसिंहतवलीलाकथाअनुगृणन्दुर्गाणिमहादुःखानिअंजसातितर्मितरामिनगणयि
ष्यामीत्यर्थः । तत्रहेतुः । गुणैःरागादिभिर्विशेषेणप्रमुक्तःसन् । तत्कुतः । तेपदयुगमेवआलयोयेषांभक्तानांतएवहंसाज्ञानिनःतेषांसंगोयस्यममसोहम् । कथंभूतस्यकथास्तत्राह । प्रियस्येत्यादि । कुतोज्ञा
ताः । विरिंच्येनगीताः । तत्संप्रदायप्रवृत्ताः । तथाचाथर्वणीश्रुतिः । 'देवाहवैप्रजापतिमब्रुवन्नि'त्यादि । दास्येप्रवृत्तस्यभगवदनुग्रहेणसत्संगःततोवीतरागतयाभगवद्गुणानुवर्णनम् । ततश्चदुःखाननुभवः
स्यादितिवाक्यार्थः १८ ननुदुःखैस्तप्तस्यतत्प्रतीकारोलोकेप्रसिद्धएव । किंममदास्यादिनातत्राह । बालस्येति । भोनृसिंहतप्तस्यतत्प्रतिविधिःदुःखप्रतीकारःइहलोकेयोंजसाइष्टःसत्वयोपेक्षितानांतनुभृतां
तावदेवक्षणमात्रमेवनत्वात्यंतिकः । तदेवाह । बालस्यपितरौशरणंरक्षकाविहनभवतः । ताभ्यांपाल्यमानस्यापितस्यदुःखदर्शनात् । क्वचिदजीगर्तादिवत्ताभ्यामेवतद्वधदर्शनाच्च । नचार्तस्यरोगिणःअ
गदमौषधंशरणम् । कृतेप्यौषधेमृत्युदर्शनात् । नचउदन्वतिसमुद्रेमज्जतःपुंसोनौःशरणम् । तयासहमज्जनदर्शनात् । अतस्त्वमेवशरणमित्यर्थः । अथचैवंकाकाव्याख्येयम् । तप्तस्यतत्प्रतिविधिर्य
इहतावत्प्रसिद्धःसत्वदुपेक्षितानांकिमंजसेष्टःअपितुनेष्टएव । यद्वायस्तावदिहप्रतिविधिरिष्टःसकिमंजसा । नैवांजसेत्यादियोज्यम् । बालस्येत्यादिपूर्ववदेव १९ ननुक्वचित्कुतश्चित्केनचित्कदाचित्क
श्चिद्रक्षकोपिदृश्यतएवेत्याशंक्यतत्रापितत्तद्रूपेणत्वमेवरक्षकइत्युररीकृत्यतस्यैवसर्वात्मतामाह । यस्मिन्निति । अपरोऽर्वाचीनःपित्रादिःपरोब्रह्मादिर्वाभावःकर्तातत्तत्कारकेणयद्यत्करोतितत्सर्वंभवतस्तव
स्वरूपंनतुपृथक् । यस्मिन्नधिकरणेयतोनिमित्तात्यर्हियस्मिन्कालेयेनकरणेनयेनकर्त्रासंचोदितश्चयस्यसंबंधियस्मादपादानात्यस्मैसंप्रदानाययदीप्सिततमं (उतवा) यःकर्तेत्येवंसप्तसप्तविभक्त्यर्थाः ।
यथायेनप्रकारेणेतिक्रियाविशेषणीभूतानामव्ययानामर्थाः । पृथक्स्वभावःसत्त्वादिप्रकृतिःकरोतिउत्पादयतिविकरोतिरूपांतरंनयतीति २० अतोन्यस्यरक्षकस्याभावात्असंसारित्वाच्चनित्यमुक्तस्त्वमेव
मांशरणागतंरक्षेतिप्रार्थयते । मायेतिद्वाभ्याम् । त्वदंशस्यपुंसोऽनुमतेनईक्षणरूपेणअनुग्रहेणमनःमनःप्रधानंमायासृजति । कथंभूता । कालेनचोदिताःक्षोभितागुणायस्याः । कथंभूतंमनःकर्ममयंकुर्वद्रू
पम् । बलीयःदुर्जयम् । छंदोमयंवेदोक्तकर्मप्रधानंच । अजयाजीवस्याविद्ययातद्भोगार्थंअर्पिताःषोडशआराविकारामनःप्राणेंद्रियरूपायस्मिन्यदेवंभूतसंसारचक्रात्मकंमनःतत्कोतितरेत् । भोअजत्वदन्यः
त्वत्तःपृथक्स्थितःत्वामभजन्नित्यर्थः २१

॥३९॥

श्लोकाः १७–२१

यस्माद्प्रियाप्रियवियोगसयोगजन्मशोकाग्निनासकलयोनिषुदह्यमानः ॥ दुःखौषधंतदपिदुःखमतद्धियाऽहंभूमन्भ्रमामिवदमेतवदास्ययोगम् १७
सोहंप्रियस्यसुहृदःपरदेवतायालीलाकथास्तवनृसिंहविरिंच्यगीताः ॥ अंजस्तितर्म्यनुगृणन्गुणविप्रमुक्तोदुर्गाणितेपदयुगालयहंससंगः १८ बालस्य
नेहशरणंपितरौनृसिंहनार्तस्यचागदमुदन्वतिमज्जतोनौः ॥ तप्तस्यतत्प्रतिविधिर्यइहांजसेष्टस्तावद्विभोतनुभृतांत्वदुपेक्षितानाम् १९ यस्मिन्यतोयर्हियेन
नचयस्ययस्माद्यस्मैयथायदुतयस्त्वपरःपरोवा ॥ भावःकरोतिविकरोतिपृथक्स्वभावःसंचोदितस्तदखिलंभवतःस्वरूपम् २० मायामनःसृजतिकर्ममयं
बलीयःकालेनचोदितगुणानुमतेनपुंसः ॥ छंदोमयंयदजयार्पितषोडशारंसंसारचक्रमजकोतितरेत्त्वदन्यः २१

॥३९॥

चूर्णिका

यस्मात्प्रियाप्रियादिसंयोगवियोगाभ्यांदह्यमानःसन् सकलयोनिषुभ्रमामिअतस्तन्निस्तारोपायंदास्ययोगंवद १७ हेभूमन्अहंत्वद्दासःसन्तवलीलाकथाःअनुगृणन्महादुः
खानिनगणयिष्यामि १८ सःत्वंसंसारात्मकेमनोरूपेचक्रेनिष्पीड्यमानंअतएवप्रपन्नंमांस्वसमीपंनय १९ २० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुममापिमायासंबंधात्कर्तृत्वाद्यविशेषाच्चत्वत्तःकोविशेषइत्यतआहसइति। स्वधाम्नाचिच्छक्त्यानित्यंविजिताआत्मनोबुद्धेर्गुणायेनस (इत्थंभूतस्त्वं) कालःमायाप्रेरकःअतएववशीकृताःविसृज्यानांकार्याणांविसर्गाणांसाधनानांचशक्तयोयेन। अतइक्षुदंडवन्निष्पीड्यमानंमांउपकर्षस्वसमीपंनय (अजयामाययाविसृष्टमर्पितं) २२ ननुलोकपालानांभोगान्भुंक्ष्वपित्र्यंचराज्यमिदंदास्यामिकिमितिसंसारादुद्विजसेतत्राह। दृष्टाइतित्रिभिः। श्रियःसंपदःविभवउद्भवःआयुरादयोदृष्टाइतिकाकातुच्छत्वमुक्तम्। तदेवाह। येअस्मत्पितुःकोपहासविजृंभितभ्रूभंगमात्रेणविध्वस्ताःसच (पिता) त्वयानिरस्तः २३ यस्मादेवंतस्मात्आशिषःभोगानूज्ञःतत्परिपाकंविद्वान्अहंऐंद्रियंइंद्रियैर्भोग्यंब्रह्मणोभोगमभिव्याप्यकमपि (विभवं) नेच्छामितेतवकालरूपेणउरुविक्रमेणविलुलितान्विध्वस्तान् २४ किंच। वर्तमानकालेपिनभोगार्हाइत्याह। कुत्रेति। श्रुतिःश्रवणंतदेवसुखंयासुताःमृगतृष्णिरूपामृगतृष्णिकावन्मिथ्याभूताआशिषःक्व। अशेषाणांरुजांरोगाणांविरोहउद्भवस्थानंक्वचेदंकलेवरम्। एवंचेत्सर्वोपिजनःकिंनविरज्यतेतत्राह। यदपियद्यपिइतिएवंविद्वान्अयंजनःतथापिननिर्विद्यतेविरक्तोनभवति कुतः कामएवानलःतंमधुतुल्यैःसुखलवैःदुःसाध्यैरपिशमयन्कामनाग्निशमनव्यग्रस्यनिर्वेदेप्यवकाशोनास्तीत्यर्थः यद्वाअचिंत्यमिदंत्वन्मायाचेष्टितमितिभावः २५ तर्हित्वंकथंनिर्विण्णोसिअनर्हेपिमयिप्रवृत्तयात्वत्कृपयैवेत्याशयेनाहक्वेति। रजसैवप्रभवोजन्मयस्यसः। सप्तम्यंतंवाकुलविशेषणम्। तमोधिकंयस्मिन्तस्मिन्नस्मिन्असुराणांकुलेजातोहंक्व। क्वचतवानुकंपा। तामेवाह। ब्रह्मादीनांशिरसियोनवैनैवार्पितःसपद्मवत्सकलसंतापहरःकररूपःप्रसादोमेशिरसिअर्पितइतियत्। यत्यथाऽनुकंपयेतिवा २६ नचत्वयीदमतिचित्रमित्याहनैषेति। एतेब्रह्मादयउत्तमाअयमसुरोनीचइत्येषापरावरमतिःजंतोःप्राकृतस्ययथातथाभवतोननुनिश्चितंनस्यात्। अत्रहेतुःजगतआत्मनःसुहृदश्च। तर्हिसर्वत्रत्वत्प्रसादएकरूपश्चकिंनस्यात्तत्राह। संसेवयातवप्रसादोभवति। तत्रचसेवानुरूपंतत्तदिच्छानुसारेणधर्मादीनामुदयोभवति। एमंसत्यपिवैषम्याभावेदृष्टांतः सुरतरुर्यथासेवकस्यैवसंकल्पानुसारेणफलंददाति। नचविषमः। तद्वन्नपरावरत्वंअत्रकारणमितिशेषः २७

श्लोकाः २२–२७

सत्वंहिनित्यविजितात्मगुणःस्वधाम्नाकालोवशीकृतविसृज्यविसर्गशक्तिः ॥ चक्रेविसृष्टमजयेश्वरषोडशारेनिष्पीड्यमानमुपकर्षविभोप्रपन्नम् २२ दृष्टामयादिविविभोऽखिलधिष्ण्यपानामायुःश्रियोविभवइच्छतियान्जनोयम् ॥ येऽस्मत्पितुःकुपितहासविजृंभितभ्रूविस्फूर्जितेनलुलिताःसतुतेनिरस्तः २३ तस्मादमूस्तनुभृतामहमाशिषोज्ञआयुःश्रियंविभवमैंद्रियमाविरिंच्यात् ॥ नेच्छामितेविलुलितानुरुविक्रमेणकालात्मनोपनयमांनिजभृत्यपार्श्वम् २४ कुत्राशिषःश्रुतिसुखामृगतृष्णिरूपाःक्वेदंकलेवरमशेषरुजांविरोहः ॥ निर्विद्यतेनतुजनोयदपीतिविद्वान्कामानलंमधुलवैःशमयन्दुरापैः २५ क्वाहंरजःप्रभवईशतमोधिकेऽस्मिन्जातःसुरेतरकुलेक्वतवानुकंपा ॥ नब्रह्मणोनतुभवस्यनवैरमायायन्मेऽर्पितःशिरसिपद्मकरःप्रसादः २६ नैषापरावरमतिर्भवतोननुस्याज्जंतोर्यथाऽऽत्मसुहृदोजगतस्तथापि ॥ संसेवयासुरतरोरिवतेप्रसादःसेवानुरूपमुदयोनपरावरत्वम् २७

चूर्णिका

२२ हेनृहरेअहंभोगपरिपाकंविद्वान्आविरिंच्यान्भोगान्अणिमादिसिद्धीरपिनेच्छामि २३ २४ किंचकर्णप्रियाःआशिषःक्वरोगाणांउत्पत्तिस्थानंकलेवरंक्वएवंविद्वानपिजनःविरक्तोनभवति २५ किंचअहंरजःप्रभवःक्वतवकृपाक्वयतःसकलसंतापहरःप्रसादःमेशिरसिअर्पितः २६ किंचहेनारसिंहयथात्वयाऽनुकंपितोस्मि २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.स. एतच्चत्वद्भृत्यकृपयामयाप्राप्तमितित्वद्भृत्यपार्श्वमेवमांनयेत्याशयेनाह । एवमिति । यथात्वयाऽनुकंपितोस्मि । एवंनारदेनात्मसात्कृत्वापूर्वमनुगृहीतःसोहंकथंनुत्वद्भृत्यसेवांविसृजामि । कथंभूतोऽनुगृ अ०
हीतोस्मि । प्रभवएवाहियुक्तःकूपःतस्मिन्कामान्अभितःकामयमानंजनंनिपतितमनुतत्प्रसंगात्प्रपतन्योऽहंतदैवंत्वद्भृत्यस्यश्रीनारदस्यानुग्रहणेनत्वयात्यंतमनुकंपितोस्मिअयमेवचममपरमोऽनुग्रहः ।
नपुनरिदमतितुच्छंमत्प्राणरक्षणादि २८ नचेदंत्वयामदनुग्रहार्थमेवकृतंकिंत्वन्यार्थमित्याह । भोअनंतयदेतन्मत्प्राणरक्षणंमांहंतुमुद्यतस्यमत्पितुर्वधश्चतदुभयंस्वभृत्यस्यऋषेर्वाक्यंऋतंविधातुमित्यहंमन्ये ।
टीका कुतः यद्यस्मात्असत्अयुक्तंविधित्सुःखड्गंप्रगृह्यावोचत् । किं । मदपरोमद्व्यतिरिक्तश्चेदीश्वरोस्तितर्हित्वामिदानींअवतुतवकंशिरोऽहंहरामीति । पाठांतरेप्ययमेवार्थः । यत्यदाअवोचत्तदामत्प्राणरक्षण ॥ ९ ॥
मितिवान्वयः । एतच्चसत्यंविधातुंनिजभृत्यभाषितमित्यत्रबहुधाव्याख्यातम् २९ नचेदंपक्षपातेनरक्षणंदैत्यहननंचत्वयिनस्वाभाविकंकिंतुमायागुणोपाधिकंसर्वात्मकेत्वयिस्वतस्तदयोगादित्याहएकइ
॥४१॥ ति । एतज्जगत्त्वमेवैकःयद्यतःअमुष्यादावंतेचपृथगवस्यासिपृथक्स्थित्वास्वस्मिन्नवसानंकरोषि । सन्मात्रतयाकारणतयाचावधित्वेनवर्तसइत्यर्थः । अतोमध्यतश्चत्वमेव । कुतस्तर्हिभेदप्रतीतिस्तत्रा
ह । निजमाययागुणपरिणामात्मकमिदंजगत्सृष्ट्वातदनुप्रविष्टस्त्वंतैर्गुणैर्हेतुभूतैर्नानेवरक्षकइवहंतेवचअवसितःप्रतीतः । तदुक्तंस्कंधोपक्रमे । 'निर्गुणोपिह्यजोऽव्यक्तोभगवान्प्रकृतेःपरः । स्वमायागुण
माविश्यबाध्यबाधकतांगत ' इति ३० ननुयद्येतज्जगदहमेवतर्हिजगतोवैषम्येणममवैषम्यमपिकिंनस्यादित्यतआह । त्वंवैत्वमेवइदंसदसत्कार्यकारणात्मकंजगत् । नतुत्वत्तःपृथक् भवांस्तुततो
न्यःआद्यंतयोःपृथगवस्थानात् । यत्यस्मादेवंअतोयमात्मीयोयंपरइतियाबुद्धिःसाअपार्थामायैव । कार्यकारणाभेदंदृष्टांतेनसाधयति । यद्यतःयस्यजन्मईक्षणंप्रकाशश्चयस्मिन्निधनंचस्थितिश्चतद्वैतदेव ।
अष्ठिर्बीजंकारणम् । तरुःकार्यं । तयोर्वसुकालवत् । भूतसूक्ष्मरूपपृथ्वीमात्रत्वमिव । कालशब्देननीलत्वासाधारणगुणयोगात्पृथ्वी । वसुशब्देनवसुमात्रंभूतसूक्ष्मम् । अयमर्थःयथापृथ्वीमयतरोःपृथ्वी
मयबीजमात्रत्वम्' तस्यचयथाभूतसूक्ष्ममात्रत्वम् । एवंसर्वमपिकार्यकारणात्मकंजगत्परमकारणात्मकमेवेतिपरमकारणंतुभगवानेव । तथाचपारमर्षंसूत्रम् । 'तदनन्यत्वमारंभणशब्दादिभ्य ' इति ।
श्रुतिश्च । 'वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्य ' मिति ३१

श्लोकाः
एवंजनंनिपतितंप्रभवाहिकूपेकामाभिकाममनुयःप्रपतन्प्रसंगात् ॥ कृत्वात्मसात्सुरर्षिणाभगवन्गृहीतःसोहंकथंनुविसृजेतवभृत्यसेवाम् २८ मत्प्राणरक्ष
णमनंतपितुर्वधश्चमन्येस्वभृत्यऋषिवाक्यमृतंविधातुम् ॥ खड्गंप्रगृह्ययदवोचदसद्विधित्सुस्त्वामीश्वरोमदपरोऽवतुकंहरामि २९ एकस्त्वमेवजगदेतदमु २८—३१
ष्ययत्त्वमाद्यंतयोःपृथगवस्यसिमध्यतश्च ॥ सृष्ट्वागुणव्यतिकरंनिजमाययेदंनानेवतैरवसितस्तदनुप्रविष्टः ३० त्वंवाइदंसदसदीशभवांस्ततोन्योमाया
यदात्मपरबुद्धिरियंह्यपार्था ॥ यद्यस्यजन्मनिधनंस्थितिरीक्षणंचतद्वैतदेववसुकालवदष्टितर्वोः ३१

चूर्णिका एवंनारदेनपूर्वं अनुगृहीतः सोहंकथंनुत्वद्भृत्यसेवांविसृजामि २८ हे अनंतमत्प्राणरक्षणंमात्पितुर्वधश्चएतद्द्वयंत्वयाकृतंतत्स्वभृत्यवाक्यंसत्यंकर्तुंमन्ये २९ किंच त्वमेवए ॥४१॥
कः एतत् जगत्सृष्ट्वातदनुप्रविष्टः सन् नानेवप्रतीयसे ३० किंच इदंकार्यं कारणात्मकंजगत् त्वमेव नत्वत्तः पृथक् त्वंतु ततोन्यः अतः अयंस्वः अयंपरइतिबुद्धिर्व्यर्थै
व ३१ किंच यः त्वंप्रलयेइदंजगत् आत्मनिनिक्षिप्यनिष्क्रियःसन्प्रलयोदकेशेषे ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४२॥

तत्रतावदंतेपृथगवस्थानंदर्शयतिन्यस्येति । इदंजगत्आत्मनाआत्मनैवआत्मनिनिक्षिप्यस्वसुखमेवानुभवन्निष्क्रियःसन्प्रलयोदकमध्येशयनंकरोषि । तर्हिकिंजीवस्येवममापितमोवृत्तिरूपानिद्रास्ति । नहि । योगएवत्वबहिर्वृत्तिभावसाम्यान्निद्रोच्यतइत्याह । योगेनमीलितेदृशौयेन । आत्मनास्वरूपप्रकाशेननिपीतानिद्रायेन । यतस्तुर्येअवस्थात्रयातिरिक्तेस्वरूपेस्थितस्त्वंनतुसुप्तइवआत्मनातमोयुंक्षेयोजयसि । नपश्यसीत्यर्थः । नजाग्रत्स्वप्नयोरिवगुणान्विषयांश्चेत्यर्थः ३२ इदानींकारणत्वेनादावपिपृथगवस्थानंदर्शयन्मध्यतश्चत्वमेवेत्येतत्प्रपंचयतिचतुर्भिः । (तस्येति) यस्त्वंअंभसिशेषेतस्यैवतेइदंजगद्वपुःस्वरूपंनान्यस्य । अतस्त्वंमध्यतोपितस्य । कथंभूतस्यतव । निजयाकालशक्त्यासंचोदिताःप्रकृतिधर्माःसत्त्वादयोयेन । स्वरूपत्वेहेतुः । अनंतशयनात्शेषपर्यंकात्विरमन्समाधिर्यस्यतस्यतवनाभेःसकाशात्एकार्णवोदकेमहाब्जंलोकपद्मंअभूत् । कथंभूतंआत्मनित्वय्येवगूढंसत्स्वकणिकातःसूक्ष्माद्वटबीजात्महावटइव ३३ तदेवंकारणत्वेनअनुगतःसन्मध्यतश्चत्वमेववर्तसइत्युक्तम् । एतदेवशुद्धसत्त्वस्यब्रह्मणोऽनुभवेनस्फुटयितुंतस्यप्राक्तनीमवस्थामाह । तस्मिन्नब्जेसंभवोयस्यसकविर्ब्रह्माअतःपद्मादन्यदपश्यन्बीजंउपादानकारणभूतंत्वांस्वस्मिन्ततंसंततंव्याप्तमपिनाविंदत् । युक्तंचैतत्उहअहोअंकुरेजातेसतिबीजंतदनुगतंकारणंपृथक्कथंनामपुमान्पश्येत् ३४ भवदुपासनयातुस्वस्मिन्नेवदृष्टवानित्याह । सत्विति । परावृत्याब्जआस्थितःसन्तीव्रेणतपसाध्यानेन । अनेनसन्मात्ररूपेणोपादानतयादर्शनमुक्तम् ३५ईश्वरत्वेनचदृष्ट्वाकृतार्थोऽभवदित्याह । एवमनेनप्रकारेणसगुणरूपत्वेनेत्यर्थः । सहस्रमपरिमितानिवदनादीनितैराढ्यंसमृद्धंमायामयंमायाप्रधानम् । सताप्रपंचेनोपलक्षितःसंनिवेशःपादादिरचनायस्य ३६ तदाभवांस्तस्यानुग्रहंकृतवानित्याह । तस्माइति । (हरिशिरस्तनुवम्) हयग्रीवमूर्तिंबिभ्रत्सन्रजस्तमोरूपौमधुकैटभाख्यौहत्वातस्मैश्रुतिगणान्समर्पितवान्तत्रहेतुः । सत्त्वमिति ३७ एकस्त्वमेवेत्यादिभिरष्टभिःश्लोकैर्यदुक्तंपक्षपातेनरक्षणंतद्विपक्षवधश्चससत्त्वोपाधिकोनतुस्वतइतितदुपसंहरतिइत्थमिति । विभावयसिपालयसिहंसिघातयसि । कलौतुतन्नकरोषि । यतस्तदात्वंच्छन्नोऽभवःयतस्त्रिष्वपिचयुगेष्वाविर्भावात्सएवंभूतस्त्वंत्रियुगइतिप्रसिद्धम् ३८

श्लोकाः ३२/३८

न्यस्येदमात्मनिजगद्विलयांबुमध्येशेषेत्मनानिजसुखानुभवोनिरीहः ॥ योगेनमीलितदृगात्मनिपीतनिद्रस्तुर्येस्थितोनतुतमोनगुणांश्चयुंक्षे ३२ तस्यैवतेवपुरिदंनिजकालशक्त्यासंचोदितप्रकृतिधर्मणआत्मगूढम् । अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटवन्महाब्जम् ३३ तत्संभवःकविरतोन्यदपश्यमानस्त्वांबीजमात्मनिततंस्वबहिर्विचिंत्य ॥ नाविंददब्दशतमप्सुनिमज्जमानोजातेंऽकुरेकथमुहोपलभेतबीजम् ३४ सत्वात्मयोनिरतिविस्मितआस्थितोब्जेकालेनतीव्रतपसापरिशुद्धभावः ॥ त्वामात्मनीशभुविगंधमिवातिसूक्ष्मंभूतेंद्रियाशयमयेविततंददर्श ३५ एवंसहस्रवदनांघ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यम् ॥ मायामयंसदुपलक्षितसंनिवेशंदृष्ट्वामहापुरुषमापमुदंविरिंच्यः ३६ तस्मैभवान्हयशिरस्तनुवंचबिभ्रद्वेदद्रुहावतिबलौमधुकैटभाख्यौ ॥ हत्वाऽनयच्छ्रुतिगणांस्तुरजस्तमश्चसत्त्वंतवप्रियतमांतनुमामनंति ३७ इत्थंनृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसिहंसिजगत्प्रतीपान् ॥ धर्मंमहापुरुषपासियुगानुवृत्तंछन्नःकलौयदभवस्त्रियुगोथसत्त्वम् ३८

॥४२॥

चूर्णिका तस्यैव तवनाभेः सकाशात् लोकपद्मं अभूत् ३३ तत्संभवोब्रह्मापद्माद्न्यत्अपश्यमानः त्वांसंतमपिनापश्यत् ३४ तदाविस्मितः ब्रह्मापद्मं आस्थितःसन् आत्मनि सहस्रमुखांघ्रिशिरआद्यवयवैर्युक्तंत्वांदृष्ट्वामुदं आप ३५ ३६ तदात्वंहयग्रीवमूर्तिं धृत्वामधुकैटभौदैत्यौहत्वा तस्मैब्रह्मणेश्रुतिगणान्समर्पितवान् ३७ एवंत्वंराममत्स्याद्यवतारैः लोकान्धर्मंचपालयसिदुष्टान्हंसिच ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंभगवतस्तत्त्वंनिरूप्यस्वस्यचतद्विचारायोग्यतांनिवेदयन्प्रार्थयतेनैतदितित्रिभिः । असाधुबहिर्मुखम् । तीव्रंदुर्धरं हर्षशोकभयैरेषणात्रयेणचआर्तंदुःखितमपित्वत्कथासुनसंप्रीयते । (इषणात्रयंतुवित्तेषणापुत्रेषणालोकेषणेतिप्रसिद्धम्) तस्मिन्नेवंभूतेमनसिसतिकथंतवतत्त्वंविचारयामि ३९ किंच । जिह्वाअवितृप्तासतीभोअच्युतमामांयतोमधुरादिरसस्ततआकर्षति । उदरंतुक्षुधासंतप्तंसच्चएवयत्किंचिदाहारमात्रंप्रति । चपलाद्दक्चक्षुः । कर्मशक्तिःकर्मेंद्रियाणि । लुनंतित्रोटयंति । अनेकाःसपत्न्योगेहपतिंयथालुनंतित्रोटयंति ४० नकेवलमहमेकएवकष्टांदशांआपन्नःकिंतुमहाजनोप्येवमेवक्लिश्यतिअतःसर्वंजनंपालयेतिप्रार्थयते एवमिति । भवःसंसारएववैतरणीयमद्वारनदीतस्यांविण्मूत्रशोणितादिपूर्णायांदेहलक्षणायांयमनद्यामित्यर्थः । स्वकर्मणापतितंअन्योन्यतोयानिजन्ममरणभक्षणानितेभ्योभीत्याभीतंस्वेषांपरेषांचविग्रहेयथाययंवैरंमैत्रंचयस्य । एवंमूढंजनंपश्यन्त्वंहेपारचरतस्याःपारेस्थितनित्यमुक्तहंतेतिअहोकष्टमित्येवमनुकंप्याद्यपीपृहिवैतरणीमुत्तार्यपालय ४१ एकेनमयाकथंसर्वोजनस्तारणीयइतिचेत्तत्राह । कोन्विति । कोनुतेअत्रसर्वजनोत्तारणेप्रयासःनकोपि । कुतः । अस्यविश्वस्यभवसंभवलोपानांउत्पत्तिस्थितिलयानांहेतोःकिमेतद्दुष्करमितिभावः । उचितंचैतदित्याह । मूढेष्विति । त्वांचत्वदीयांश्चतारयिष्यामिइमंदुराग्रहंमाकृथाइतिचेत्तत्राह । तवयेप्रियजनाभक्तास्ताननुसेवमानानांनोऽस्माकंतेनउत्तारणेनाकिम् । कोतिप्रयासोऽसुरबालकाहरेःकोन्वत्रतेऽखिलगुरोभगवन्प्रयासः । प्रह्लादइत्थमुपमंत्र्यमिथोनराणामीशेनसख्यमकरोदपनीयमायाम् ४२ वत्सप्रह्लादत्वांतावत्तारयिष्यामितावतैवकृतार्थःस्याःकिमनेननिर्बंधेनेत्यत्राह । नैवेति हेपरसर्वोत्तमत्वदीयंगायनमेवमहामृतंतस्मिन्मग्नंचित्तंयस्यसोहंभववैतरण्याःनैवोद्विजे । किंतुविमूढान्शोचामि । तानेवाह । ततोमहामृतात्विमुखंचेतोयेषां । प्रत्युतइंद्रियार्थनिमित्तंयन्मायासुखंतदर्थंभरंकुटुंबादिभारंउद्वहतः ४३ त्वंतावन्मुक्तिंगृहाणतांस्तुतत्त्वज्ञानंमुनयउपदेक्ष्यंतीतिचेत्तत्राहप्रायेणेति । नविमुमुक्षेविमुक्तिंनेच्छामि । तर्ह्यन्यंकमपिप्रार्थयमामेवकिमितिनिर्वध्नासीतिचेत्अतआह । त्वत्तोन्यमस्यजनस्यशरणंनपश्यामि ४४

श्लोकाः ३९—४४

नैतन्मनस्तवकथासुविकुंठनाथसंप्रीयतेदुरितदुष्टमसाधुतीव्रम् ॥ कामातुरंहर्षशोकभयेषणार्तंतस्मिन्कथंतवगतिंविमृशामिदीनः ३९ जिह्वैकतोऽच्युत विकर्षतिमाऽवितृप्ताशिश्नोन्यतस्त्वगुदरंश्रवणंकुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक्क्वचकर्मशक्तिर्बह्व्यःसपत्न्यइवगेहपतिंलुनंति ४० एवंस्वकर्मपतितं भववैतरण्यामन्योन्यजन्ममरणाशनभीतिभीतम् ॥ पश्यन्जनंस्वपरविग्रहवैरमैत्रंहंतेतिपारचरपीपृहिमूढमद्य ४१ कोन्वत्रतेऽखिलगुरोभगवन्प्रयासउत्तारणेस्यभवसंभवलोपहेतोः ॥ मूढेषुवैमहदनुग्रहआर्तबंधोकिंतेनतेप्रियजनाननुसेवतांनः ४२ नैवोद्विजेपरदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः ॥ शोचेततोविमुखचेतसइंद्रियार्थमायासुखायभरमुद्वहतोविमूढान् ४३ प्रायेणदेवमुनयःस्वविमुक्तिकामामौनंचरंतिविजनेनपरार्थनिष्ठाः ॥ नैतान्विहायकृपणान्विमुमुक्षएकोनान्यंत्वदस्यशरणंभ्रमतोनुपश्ये ४४

चूर्णिका

किंच हेविकुंठनाथहर्षशोकादिभिः आर्तंकामातुरंइदंममममनःतवकथासुनप्रीयतेमनसिएवंभूतेसतिकथंतत्त्वंविचारयामि ३९ किंच मांजिह्वाएकतःविकर्षति शिश्नोन्यतः त्वगुदरंश्रवणंचकुतश्चित्घ्राणःअन्यतःक्वचचपलदृक्कचकर्मेंद्रियाणिएवंसपत्न्यःपतिमिवमांत्रोटयंति ४० हेनित्यमुक्तएवंभववैतरिण्यांपतितंजनंवैतरणीमुत्तार्यपाहिहेविभो ४१ अस्योत्तारणेअखिलगुरोस्तेकोतिप्रयासोस्ति ४२ किंच हेसर्वोत्तमवैतरण्याःसकाशात्अहंनोद्विजेकिंतुत्वत्कथाविमुखान्जनान्शोचामि ४३ किंच एतान्कृपणान्विहायएकएवाहंमुक्तिंनेच्छामिकिंचअस्यजनस्यशरणंत्वत्तोन्यंनपश्यामि ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नन्वेतेस्त्रीसंभोगादिनासुखिनएवनकृपणास्तत्राह । यदिति । करयोःकंडूयनेनसंघर्षणेनेवदुःखमनुदुःखंयस्मिन् तर्हिदुःखत्वादेवततोनिर्विद्यमुच्येरन्तत्राह । कृपणाःकामुकाबहुदुःखभाजोपिइहगृहमेधि सुखेनतृप्यंतिअलमितिनमन्यंते । कंडूतिवत्कामस्यदुःसहत्वात् । ननुकेचित्कंडूतिमपिसहंतेकामंचेत्यत्राह त्वत्प्रसादात्तुकश्चिद्धीरएवमनसिजंकामंविषहेतनतुसर्वेअत्रापिकंडूतिवदितिदृष्टांतः ४५ ननुमौना दिभिर्मोक्षसाधनैःसुलभैवतेषामपिमुक्तिःतत्राहमौनेति । हेपुरुषअंतर्यामिन् । येमौनादयोदशआपवर्ग्याअपवर्गहेतवःप्रसिद्धाःरहःविविक्तवासःतेतुप्रायशःअजितेंद्रियाणांइंद्रियभोगायअर्थार्थविक्रीणतांवार्ताः जीवनोपायाभवंति । दांभिकानांवार्ताअपिभवंतिवानवादंभस्यप्रायेणनिष्फलत्वात् ४६ त्वज्ज्ञानंतुभक्तिविनासकामैर्मौनादिभिर्नभवत्येवेत्याह । रूपेइतित्रिभिः । बीजांकुरावित्प्रवाहापन्नेइमेसदसती कार्यकारणेतवरूपेउपलक्षणभूतेवेदेनसृष्टेप्रकाशितेनचान्यत् । स्वसमवेतंगौरत्वादिकमिवदेवदत्तादेः । कुतः । अरूपकस्यप्राकृतरूपादिशून्यस्यअतःयुक्ताःसंयताएवभक्तियोगेनप्रत्यक्षंत्वामुभयत्रकार्येकारणे चानुगतंपश्यंतिमथनेनदारुषुवह्निमिव । नान्यतःस्यात्ज्ञानमितिशेषः । यद्वाज्ञानप्रकारमेवाह । एतदुभयमन्यतःप्रधानपरमाण्वादेर्नस्यात् । 'सऐक्षते' त्यादिश्रुतेःअतस्त्वमेवकारणत्वात्सर्वत्रानुस्यूतइति ४७ तदेवाह त्वंवायुरिति । हृदयंमनः । चित्चित्तं । अनुग्रहोऽहंकारःदेवतावर्गोवा । सगुणःस्थूलःविगुणःसूक्ष्मः । मनश्चवचश्चमनोवचस्तेननिरुक्तंप्रकाशितंकिमपित्वत्तोन्यन्नास्ति ४८ अभक्तास्तुअस्मिन्ननु गतमपित्वांनजानंतीत्याहनैतेइति एतेगुणानुगुणिनोगुणाद्यभिमानिनोदेवाआद्यंतवंतःजडोपाधित्वात्अनाद्यंतंनिरुपाधित्वांनविदंतिहियस्मात्सुधियोविद्वांसःएवंविचार्यशब्दात्अध्यापनादिव्यापारादुपर मंति । त्वामेवसमाधिनोपासतेइत्यर्थः । तथाचश्रुतिः । 'किमर्थावयमध्येष्यामहेकिमर्थावयंयक्ष्यामह' इति । नानुध्यायेद्बहूंच्छब्दान्वाचोविग्लापनंहितदितिच । स्मृतिश्च । 'यदातेमोहकलिलंबुद्धिर्व्यतित रिष्यति । तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यचे' त्यादि ४९ उपसंहरतितादिति । हेअर्हत्तम । नमश्चस्तुतिश्चकर्मपूजाचनमःस्तुतिकर्मपूजाःप्रणिपातस्तुतिसर्वकर्मार्पणानि । कर्मपरिचर्या । चरणयोःस्मृ तिश्चकथायांश्रवणंचेतिषडंगयासम्यक्सेवयाविनापरमहंसानांगतौप्राप्येत्वयिजनःकथंभक्तिंलभेत । यस्मादेवंभक्तिंविनानमोक्षोनैवभक्तिःसंसेवयाविनाअतःप्राक्प्रार्थितंदास्ययोगमेवदेहीतिप्रकरणार्थः ५०

श्लोकाः ४५/५०

यन्मैथुनादिगृहमेधिसुखंहितुच्छंकंडूयनेनकरयोरिवदुःखदुःखम् ॥ तृप्यंतिनेहकृपणाबहुदुःखभाजःकंडूतिवन्मनसिजंविषहेतधीरः ४५ मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधयआपवर्ग्याः ॥ प्रायःपरंपुरुषतेत्वजितेंद्रियाणांवार्ताभवंत्युतनवात्रतुदांभिकानाम् ॥ रूपेइमेसदसतीतववेदसृष्टेबीजांकुराविवनचान्यदरूपकस्य ॥ युक्ताःसमक्षमुभयत्रविचिन्वतेत्वांयोगेनवह्निमिवदारुषुनान्यतःस्यात् ४७ त्वंवायुरग्निरवनिर्वियदंबुमात्राःप्राणेंद्रियाणिहृदयंचिदनुग्रहश्च ॥ सर्वंत्वमेवसगुणोविगुणश्चभूमन्नान्यत्त्वदस्त्यपिमनोवचसानिरुक्तम् ४८ नैतेगुणानुगुणिनोमहदादयोयेसर्वेमनःप्रभृतयःसहदेवमर्त्याः ॥ आद्यंतवंतउरुगायविदंतिहित्वामेवंविमृश्यसुधियोविरमंतिशब्दात् ४९ तत्तेऽर्हत्तमनमःस्तुतिकर्मपूजाःकर्मस्मृतिश्चरणयोःश्रवणंकथायाम् ॥ संसेवयात्वयिविनेतिषडंगयाकिंभक्तिंजनःपरमहंसगतौलभेत ५०

चूर्णिका

४५ हेपुरुषमौनव्रतादयःमोक्षहेतवोपिअजितेंद्रियाणांजीवनोपायाःभवंति ४६ किंच एतेकार्यकारणेएवतेरूपेअत्रयोगिनःत्वांपश्यंति ४७ दारुषुअग्निमिवकिंवहेहरेभूतानि ५ मात्राः ५ प्राणादिचमनोवचोभ्यांप्रकाशितंसर्वंत्वमेवासि ४८ एतेगुणाद्यभिमानिनोदेवाःनिरुपाधिंत्वांनविदंतिएवंविचार्यविद्वांसःअध्ययनादिव्यापारादुपरमंति ४९ किंच हेउरुगायअयंजनःप्रणिपात १ स्तुति २ सर्वकर्मार्पण ३ परिचर्या ४ चरणस्मृति ५ कथाश्रवण ६ रूपयाषडंगसेवयाविनात्वयिभक्तिंकथंलभेत् यस्मात्भक्तिंविनानमोक्षःसेवयाविनानभक्तिःअतःत्वद्दास्ययोगमेवदेहि ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतावंतोवर्णितागुणायस्य । यतमन्युःउपसंहृतकोपः ५१ कामान्पूरयतीतितथा । यद्वापुरुषार्थप्रवहोस्मीत्यर्थः । हेभद्र ५२ अप्रीणतःअप्रीणयतः । तमुंअपूर्णकामत्वेनशोचितुम् ५३ प्रीणंतितोषयंतिआशिषांश्रेयसाम् ५४ लोकाःप्रलोभ्यंतेयैस्तादृशैःप्रलोभ्यमानोपिएकांतित्वात्निरुपाधिकत्वात्अकृत्रिमभक्तत्वादित्यर्थः ५५ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांनवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ दशमेत्वनुगृह्यामुंभक्तमंतर्हितेहरौ । प्रसंगाद्धारिणारुद्रेकृतोऽनुग्रहईर्यते । तत्सर्ववरजातं । अंतरायतयाविघ्नरूपतया १ उत्पत्त्यास्वभावेनैवसक्तंमां । तेषांकामानांसंगाद्भीतः २ ननुकिमहंभक्तंप्रलोभयामिनहिनहिकिंतुवरंवृणीष्वेतिवदतस्तवाभिप्रायोऽन्यएवेत्याहभृत्यलक्षणेति । हृदयस्यग्रंथिवद्बद्धकेषु । तेतवअन्यथाअनर्थसाधनेप्रवर्तनंनघटतइत्यर्थः ३ कथमेवंभृत्यलक्षणज्ञानंस्यात् । तत्राह । यइति । तेत्वत्तः ४ ननुकामनयापिसेव्यसेवकयोःस्वामिभृत्यभावःप्रसिद्धः सत्यं सोपाधिकोसौनतुतात्विकइत्याह । आशासानइति । स्वामिन्यात्मनआशिषोअपेक्षमाणोनैव (सस्वामिनो) भृत्यः । भृत्यहेतुकमात्मनःस्वाम्यमिच्छन्योभृत्यायददाति । सनैवस्वामी ५ आवयोस्तुतात्विकोसावित्याह । अहंत्विति । अनपाश्रयोनिरभिसंधिः । अन्यथाकामाद्यभिसंधिनाअर्थःप्रयोजनंनास्ति ६ ननुतथापिपरमेश्वरस्यपरमोदारस्यममसंतोषार्थंकिमपिवृणीष्वेतिचेत्अतआहयदीति । कामांकुराणांअसंरोहंअनुत्पत्तिंभवतःसकाशात् ७

॥ ॥ श्रीनारदउवाच ॥ ॥ एतावद्वर्णितगुणोभक्त्याभक्तेननिर्गुणः ॥ प्रह्लादंप्रणतंप्रीतोयतमन्युरभाषत ५१ ॥ श्रीभगवानुवाच ॥ प्रह्लादभद्रभद्रंतेप्रीतोहंतेऽसुरोत्तम ॥ वरंवृणीष्वाभिमतंकामपूरोऽस्म्यहंनृणाम् ५२ मामप्रीणतआयुष्मन्दर्शनंदुर्लभंहिमे ॥ दृष्ट्वामांनपुनर्जंतुरात्मानंतप्तुमर्हति ५३ प्रीणंतिह्यथमांधीराःसर्वभावेनसाधवः ॥ श्रेयस्कामामहाभागाःसर्वासामाशिषांपतिम् ।५४ एवंप्रलोभ्यमानोपिवरैर्लोकप्रलोभनैः ॥ एकांतित्वाद्भगवतिनैच्छत्तानसुरोत्तमः ५५ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेनवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ श्रीनारदउवाच ॥ भक्तियोगस्यतत्सर्वमंतरायतयाऽर्भकः ॥ मन्यमानोहृषीकेशंस्मयमानउवाचह १ ॥ प्रह्लादउवाच ॥ मामांप्रलोभयोत्पत्त्यासक्तंकामेषुतैर्वरैः ॥ तत्संगभीतोनिर्विण्णोमुमुक्षुस्त्वामुपाश्रितः २ भृत्यलक्षणजिज्ञासुर्भक्तंकामेष्वचोदयत् ॥ भवान्संसारबीजेषुहृदयग्रंथिषुप्रभुः ३ नान्यथातेऽखिलगुरोर्घटेतकरुणात्मनः ॥ यस्तआशिषआशास्तेनसभृत्यःसवैवणिक् ४ आशासानोनवैभृत्यःस्वामिन्याशिषआत्मनः ॥ नस्वामीभृत्यतःस्वाम्यमिच्छन्योरातिचाशिषः ५ अहंत्वकामस्त्वद्भक्तस्त्वंचस्वाम्यनपाश्रयः ॥ नान्यथेहावयोरर्थोराजसेवकयोरिव ६ यदिरासीशमेकामान्वरांस्त्वंवरदर्षभ ॥ कामानांहृद्यसंरोहंभवतस्तुवृणेवरम् ७

चूर्णिका

॥ नारदउवाच ॥ भक्तेनएतावद्वर्णितगुणःयतमन्युःप्रीतःनृहरिःप्रह्लादंअभाषत ५१ हेप्रह्लादतेभद्रंअहंतेप्रीतःअभीष्टंवरंवृणीष्व ५२ जनानांमेदर्शनंदुर्लभम् जंतुःमांदृष्ट्वापुनःदुःखंप्राप्तुनार्हति ५३ ५४ ॥ नारदउवाच ॥ इतिलोकप्रलोभनैःवरैःप्रलोभ्यमानोपिएकांतभक्तित्वात्प्रह्लादःवरान्नैच्छत ५५ ॥ इतिसप्तमेनवमः ९ ॥ ॥ ६९ ॥ ॥ नारदउवाच ॥ प्रह्लादःवरप्रदानादिकंभक्तियोगस्यविघ्नमितिज्ञात्वाहृषीकेशंउवाच १ हेनृहरेअहंमुमुक्षुःत्वांउपाश्रितःअतःमांवरैःमाप्रलोभय २ ३ ४ ५ किंच अहंअकामःत्वद्भक्तःत्वंचनिरभिसंधिःस्वामीअतःआवयोःप्रयोजनंराजसेवकयोरिवन ६ हेवरदर्षभयदिमेवरान्दास्यसितर्हित्वदिकामांकुराणांअनुत्पत्तिवरंवृणे ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.स. ननुकामोत्पत्तौसत्यांकोदोषस्तत्राह । इंद्रियादीनियस्य (कामस्य) जन्मनानश्यंतीतिआत्मादेहः ८ कामाभावेगुणमाह । विमुंचतीति । भगवत्त्वायत्वत्समानैश्वर्यायतथाचश्रुतिः । ' यदासर्वेप्रमुच्यं अ०
तेकामायेस्यहृदिश्रिताः । अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुत ' इति ९ निर्दोषान्कामान्दातुमिच्छंतंप्रत्याख्यास्यन्नमस्यति । ॐनमइति १०सत्यमेकांतभक्तस्त्वंतथापिमदाज्ञाकरणीयेत्याहनेति । मे
एकांतिनःकदाचिदपिइहामुत्रचमय्याशिषोनवांच्छंत्येव । तथाप्येतन्मन्वंतरमात्रंभोगान्भुंक्ष्व ११ ननुतर्हिबंधःस्यादित्यतआह । कथाइतिद्वाभ्याम् । सर्वेषुभूतेषुसंतमेकमीशंयज्ञाधिष्ठातारंमामात्मन्यावे
टीका श्ययजस्व । तर्ह्यनेनैवकर्मणाबंधःस्यात्नेत्याह । योगेनमय्यर्पणेनकर्महिन्वन्त्यजन्यजस्व १२ किंच भोगेनसुखानुभवेनप्रारब्धंपुण्यंहित्वामुक्तबंधःसन्लोकानुग्रहार्थंकीर्तिंचविस्तार्यमांप्राप्स्यसि । ॥१०॥
कुशलेनपुण्याचरणेनपापंहित्वेतिबिभीषामात्रम् । अन्यथातस्यराज्येप्रवृत्तेःनतुतस्यप्राचीनंपापमस्तितदधिगमेउत्तरपूर्वाघयोरश्लेषविनाशौतद्व्यपदेशादितिन्यायात् ' तत्सुकृतदुःकृतेविधुनुते ' इतिश्रु
॥४६॥ तेः । नचेदंप्रारब्धंपापाभिप्रायंतस्यभोगेनैवक्षयात् । कुशलेनहित्वेतिवचनानुपपत्तेः । नचासावविद्वानितिवाच्यम् । भगवतैवकृतार्थत्वस्यानंतरंवक्ष्यमाणत्वात् । अतएवयोगेनकर्महिन्वन्नित्यपिलोकसंग्रहार्थे
कर्मणिप्रवर्तितस्यानुद्वेगमात्रायेतिसर्वमनवद्यम् १३ किंचयइति । त्वांचमांचइदंमच्चरितंचस्मरन्नेतत्स्तोत्रंयःकीर्तयेत्सोपिकर्मबंधाद्विमुच्यतेकुतस्तवबंधशंकेत्यर्थः १४ ईश्वराज्ञाप्राप्तकर्माधिकारोसौपितु
र्निष्कृतिंप्रार्थयतेत्रिभिः । वरंवरणीयंएतदपरंवृणेत्वत्तः १५ विद्धोऽमर्षेणक्रोधेनआशयोयस्य १६ यदातेअपांगेनसंदृष्टस्तदापूतएवतथापिभोकृपणवत्सल । कार्पण्येनप्रार्थयेहमित्यर्थः १७

इंद्रियाणिमनःप्राणआत्माधर्मोधृतिर्मतिः ॥ ह्रीःश्रीस्तेजःस्मृतिःसत्यंयस्यनश्यंतिजन्मना ८ विमुंचतियदाकामान्मानवोमनसिस्थितान् ॥ तर्ह्येवपुं श्लोकाः
डरीकाक्षभगवत्त्वायकल्पते ९ ॐनमोभगवतेतुभ्यंपुरुषायमहात्मने ॥ हरयेऽद्भुतसिंहायब्रह्मणेपरमात्मने १० ॥ श्रीनृसिंहउवाच ॥ नैकांतिनोमेम
यिजात्विहाशिषआशासतेऽमुत्रचयेभवद्विधाः ॥ अथापिमन्वंतरमेतदत्रदैत्येश्वराणामनुभुंक्ष्वभोगान् ११ कथामदीयाजुषमाणःप्रियास्त्वमावेश्यमामा ८/१७
त्मनिसंतमेकम् ॥ सर्वेषुभूतेष्वधियज्ञमीशंयजस्वयोगेनचकर्महिन्वन् १२ भोगेनपुण्यंकुशलेनपापंकलेवरंकालजवेनहित्वा ॥ कीर्तिंविशुद्धांसुरलो
कगीतांवितायमामेष्यसिमुक्तबंधः १३ यएतत्कीर्तयेन्मह्यंत्वयागीतमिदंनरः ॥ त्वांचमांचस्मरन्कालेकर्मबंधाद्विमुच्यते १४ ॥ श्रीप्रह्लादउवाच ॥
वरंवरयएतत्तेवरदेशान्महेश्वर ॥ यदनिंदत्पितामेत्वामविद्वांस्तेजऐश्वरम् १५ विद्धामर्षाशयःसाक्षात्सर्वलोकगुरुंहरिम् ॥ भ्रातृहेतिमृषादृष्टिस्त्वद्भक्ते
मयिचाघवान् १६ तस्मात्पितामेपूयेतदुरंताद्दुस्तरादघात् ॥ पूतस्तेऽपांगसंदृष्टस्तदाकृपणवत्सल १७

चूर्णिका मानवःमनःस्थितान्कामान्यदामुंचतितर्ह्येवभगवत्त्वाययोग्योभवति ८ ९ भगवतेअद्भुतसिंहायतुभ्यंनमः १० ॥ नृसिंहउवाच ॥ मेएकांतभक्ताःआशिषः नैववांछंति अथा ॥४६॥
पिएतन्मन्वंतरंदैत्येश्वराणांभोगान्भुंक्ष्व मदीयाःजुषमाणःसर्वभूतस्थंमां आत्मनिआवेश्ययोगेनमांयजस्व ११ १२ किंच पुण्यपापक्षयंकुर्वन्कालजवेनइदंकलेवरंहित्वा
अत्रशुद्धांकीर्तिंविस्तार्यमुक्तबंधःसन्मांप्राप्स्यति हेप्रह्लादत्वामांचइदंमच्चरित्रंत्वयागीतंएतत् स्तोत्रंचयःस्मरन्कीर्तयेत्सःनरः कर्मबंधात्मुच्यते १३ १४ १५ १६ ॥ प्रह्ला
दउवाच ॥ हेहरेमेपितातवतेजःअविद्वान्भ्रातृहेतिमृषादृष्टिः सन्त्वां अनिंदत्सःपूयेतमइअन्यंवरंवृणे १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यद्यपिकश्यपोमरीचिर्ब्रह्माचेतिततिपितुस्त्रयएवपूर्वजास्तथापित्रिःसप्तभिःसहेतिप्राक्कल्पगतपित्रभिप्रायेणोक्तम् । यद्यस्मात् १८ सम्यगुत्तमआचारोयेषांतेयत्रयत्रतेकीकटाअपिदेशास्तत्तुल्यावंशाश्चपूयंतेशु द्धाभवंति १९ ननुत्वद्भक्तानामयंमहिमेतिनाचित्रम् । अहंतुतादृशोनभवामीतिचेत्तत्राह । सर्वात्मनेतिद्वाभ्याम् । मद्भावेनमद्भक्त्याविगतास्पृहायेषाम् २० त्वामनुगतायेकेचित्पुरुषाःतेप्येवंलक्षणाःसंतोमद्भक्ता भवंतिअतोभवान्भक्तानांसर्वेषांप्रतिरूपधृक्उपमानास्पदंश्रेष्ठइत्यर्थः २१ मदंगस्पर्शनेनसर्वशःपूतस्यतेपितुःपापशंकैवनास्ति (किंचशोभनामजापुत्रोपस्यसलोकानुत्तमगतीः) तथापिपुत्रकृत्यानिप्रेतकर्मा णिकुरु २२ वेदवादिभिरुक्तमनतिक्रम्यमत्परःसन्कर्माणिकुरु २३ (सांपरायिकंपारलौकिकं) २४ २५ (निहतइतियत्तद्दिष्ट्याभद्रंजातमित्यर्थः) २६ ममसृष्टिभिःमयासृष्टैर्भूतैःसमस्तान्निगमान्ध र्मानित्यर्थः । अहन्हतवान्सत्वयाहतः २७ एतद्दिष्ट्या । समितःसम्यक्प्राप्तः २८ सर्वतःसंत्रासात् । गोप्तृरक्षकम् २९ एवंभूतोवरस्त्वयानप्रदेयःक्रूरोनिसर्गःस्वभावोयेषाम् । अमृतंक्षीरम् ३० ३१

॥४७॥ श्लोकाः १८/३१

॥ श्रीभगवानुवाच ॥ त्रिःसप्तभिःपितापूतःपितृभिःसहतेऽनघ ॥ यत्साधोऽस्यगृहेजातोभवान्वैकुलपावनः १८ यत्रयत्रचमद्भक्ताःप्रशांताःसमद र्शिनः ॥ साधवःसमुदाचारास्तेपूयंतेपिकीकटाः १९ सर्वात्मनानहिंसंतिभूतग्रामेषुकिंचन ॥ उच्चावचेषुदैत्येंद्रमद्भावेनगतस्पृहाः २० भवंतिपुरुषालोके मद्भक्तास्त्वामनुव्रताः ॥ भवान्मेखलुभक्तानांसर्वेषांप्रतिरूपधृक् २१ कुरुत्वंप्रेतकार्याणिपितुःपूतस्यसर्वशः ॥ मदंगस्पर्शनेनांगलोकान्यास्यति सुप्रजाः २२ पित्र्यंचस्थानमातिष्ठयथोक्तंब्रह्मवादिभिः ॥ मय्यावेश्यमनस्तातकुरुकर्माणिमत्परः २३ ॥ श्रीनारदउवाच ॥ प्रह्लादोपितथाचक्रेपितुर्य त्सांपरायिकम् ॥ यथाहभगवान्राजन्अभिषिक्तोद्विजोत्तमैः २४ प्रसादसुमुखंदृष्ट्वाब्रह्मानरहरिंहरिम् ॥ स्तुत्वावाग्भिःपवित्राभिःप्राहदेवादिभिर्वृतः २५ ॥ ब्रह्मोवाच ॥ देवदेवाखिलाध्यक्षभूतभावनपूर्वज ॥ दिष्ट्यातेनिहतःपापोलोकसंतापनोऽसुरः २६ योसौलब्धवरोमत्तोनवध्योममसृष्टिभिः ॥ तपोयोगबलोन्नद्धःसमस्तनिगमानहन् २७ दिष्ट्यास्यतनयःसाधुर्महाभागवतोर्भकः ॥ त्वयाविमोचितोमृत्योर्दिष्ट्यात्वंसमितोऽधुना २८ एतद्वपुस्ते भगवन्ध्यायतःप्रयतात्मनः ॥ सर्वतोगोप्तृसंत्रासान्मृत्योरपिजिघांसतः २९ ॥ श्रीनृसिंहउवाच ॥ मैवंभूतोऽसुराणांतेप्रदेयःपद्मसंभव ॥ वरःक्रूरनिसर्गा णामहीनाममृतंयथा ३० ॥ श्रीनारदउवाच ॥ इत्युक्त्वाभगवान्राजन्तत्रैवांतर्दधेहरिः ॥ अदृश्यःसर्वभूतानांपूजितःपरमेष्ठिना ३१

चूर्णिका

॥ श्रीभगवानुवाच ॥ हेवत्सतेपिताएकविंशति पितृभिःसहपूतःयतःयस्यकु लंसाधुर्जातः १८ किंच हेप्रह्लादयत्रयत्रमद्भक्ताः वसंतितेकीकटाअपिदेशाःशुद्धाःभवंति १९ २० किंच येपुरुषाःत्वां अनुगताः तेपिमद्भक्ताभवंति अतःत्वंमद्भक्तानांमध्येश्रेष्ठोसि २१ अथत्वंपितुःप्रेतकार्याणिकुरुपित्र्यंचस्थानमातिष्ठत्वंमत्परःसन्कर्माणिकुरु २२ २३ ॥ श्रीशुकउवाच ॥ हेराजन्प्रह्लादोपिपितुःसांपरायिकंचक्रे २४ तदाब्रह्माप्रसन्नंदेवंदृष्ट्वाप्राह २५ हेदेवत्वया असुरोहतः एतद्भद्रं २६ २७ महाभागवतः अयं अर्भकः मृत्योर्मोचितःइदमपिभद्रम् २८ २९ ॥ श्रीनृसिंहउवाच ॥ हेपद्मसंभवत्वया असुराणांएवंवरोनदेयः यथा अहीनां अमृतम् ३० ॥ ॥ नारदउवाच ॥ ॥ इत्युक्त्वाभगवान् अंतर्दधे ३१

॥४७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(भगवतःकलाविभूतीः) ३२ ३३ ३४ शिशुपालदंतवक्रयोर्द्विषतोःश्रीकृष्णसायुज्यंकथमितियत्पृष्टंतदेवतयोःसर्वजन्मकथनादिभिरुपपादितमुपसंहराति । एवमितिसप्तभिः । दितेःपुत्रत्वंप्रापितौविप्रशा
पेनेत्युत्तरस्यानुषंगः ३५ ३६ तच्चित्तौश्रीरामेचित्तंययोस्तौ ३७ करूषजोदंतवक्रः । (तवपश्यतःसतः) हरौसायुज्यंसमीयतुः ३८ कृष्णनिंदादिनापूर्वकृतंयदेनःपापंतच्चतद्ध्यानेनतदात्मानःसंतोजहुः
तदात्मत्वेदृष्टांतःकीटःपेशस्कृतोध्यानेनयथातदात्माभवतीति ३९ अभिदाभेददर्शनशून्यया । हरेःसात्म्यंसारूप्यम् ४० ४१ प्रह्लादचरितार्थमुपसंहराति । एषेतिचतुर्भिःअवतारःश्रीनृसिंहरूपस्तस्यक
थाआख्यातेतिशेषः ४२ प्रह्लादस्यचरितमित्यादेःसमाम्नातमितितृतीयेनान्वयः । अस्येत्यनेनोक्तंसर्गस्थित्यप्ययानामीशस्यहरेर्याथात्म्यंतत्त्वंअनेनकृतंहरेःगुणकर्मानुवर्णनंचेत्यर्थः ४३ परावरे
षांदेवदैत्यादीनांयानिस्थानानितेषांव्यत्ययोविपर्यासःसच ४४ आध्यात्मिकंआत्मानात्मविवेकादि ४५ एतच्छ्रवणादिफलमाहद्वाभ्याम् । एतच्छ्रुत्वायःकीर्तयेत् ४६

श्लोकाः ३२/४६

ततःसंपूज्यशिरसाववंदेपरमेष्ठिनम् ॥ भवंप्रजापतीन्देवान्प्रह्लादोभगवत्कलाः ३२ ततःकाव्यादिभिःसार्धंमुनिभिःकमलासनः ॥ दैत्यानांदानवानांच
प्रह्लादमकरोत्पतिम् ३३ प्रतिनंद्यततोदेवाःप्रयुज्यपरमाशिषः ॥ स्वधामानिययूराजन्ब्रह्माद्याःप्रतिपूजिताः ३४ एवंतौपार्षदौविष्णोःपुत्रत्वंप्रापितौ
दितेः ॥ हृदिस्थितेनहरिणावैरभावेनतौहतौ ३५ पुनश्चविप्रशापेनराक्षसौतौबभूवतुः ॥ कुंभकर्णदशग्रीवौहतौतौरामविक्रमैः ३६ शयानौयुधिनिर्भिन्न
हृदयौरामसायकैः ॥ तच्चित्तौजहतुर्देहंयथाप्राक्तनजन्मनि ३७ ताविहाथपुनर्जातौशिशुपालकरूषजौ ॥ हरौवैरानुबंधेनपश्यतस्तेसमीयतुः ३८ एनःपूर्व
कृतंयत्तद्राजानःकृष्णवैरिणः ॥ जहुःसंतोतदात्मानःकीटःपेशस्कृतोयथा ३९ यथायथाभगवतोभक्त्यापरमयाभिदा ॥ नृपाश्चैद्यादयःसात्म्यंहरेस्तच्चिं
तयाययुः ४० आख्यातंसर्वमेतत्तेयन्मांत्वंपरिपृष्टवान् ॥ दमघोषसुतादीनांहरेःसात्म्यमपिद्विषाम् ४१ एषाब्रह्मण्यदेवस्यकृष्णस्यचमहात्मनः ॥ अ
वतारकथापुण्यावधोयत्रादिदैत्ययोः ४२ प्रह्लादस्यानुचरितंमहाभागवतस्यच ॥ भक्तिर्ज्ञानंविरक्तिश्चयाथात्म्यंचास्यवैहरेः ४३ सर्गस्थित्यप्ययेशस्य
गुणकर्मानुवर्णनम् ॥ परावरेषांस्थानानांकालेनव्यत्ययोमहान् ४४ धर्मोभागवतानांचभगवान्येनगम्यते ॥ आख्यानेस्मिन्समाम्नातमाध्यात्मिकमशे
षतः ४५ यएतत्पुण्यमाख्यानंविष्णोर्वीर्योपबृंहितम् ॥ कीर्तयेच्छ्रद्धयाश्रुत्वाकर्मपाशैर्विमुच्यते ४६

चूर्णिका ततः प्रह्लादः ब्रह्मादीन्संपूज्यववंदे ३२ ततोब्रह्माकाव्यादिभिर्मुनिभिःदैत्यदानवानांपतिंप्रह्लादं अकरोत् ३३ ततोब्रह्माद्याःस्वस्थानानिययुः ३४ एवंतौविष्णोःपार्षदौदितेः
पुत्रत्वंप्रापितौहरिणाहतौ ३५ पुनः कुंभकर्णदशग्रीवौराक्षसौजातौतौरामविक्रमैःहतौ ३६ ३७ तावेवइहपुनः शिशुपालकरूषजौजातौतौवैरानुबंधेनतवपश्यतःसतः हरौ
समीयतुः ३८ ३९ ४० हेराजन्दमघोषसुतादीनांद्विषांहरेः सात्म्यंकथंइतित्वंपृष्टवान्तदाख्यातं ४१ किंच श्रीकृष्णस्यश्रीनृसिंहावतारस्यकथा ४२ प्रह्लादस्यचरितंभक्ति
र्ज्ञानंवैराग्यं ४३ हरेस्तत्वंगुणकर्मानुवर्णनंचदेवदैत्यस्थानानांविपर्यासः ४४ भागवतानां धर्मः आत्मानात्मविवेकादिचएतत्सर्वमस्मिन्नाख्यानेकथितम् ४५ ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

एतत्एतांमृगेंद्रस्यलीलाम् । तामेवाह । दैत्येंद्रस्ययूथपानांचवधंयःशुचिःसन्पठेत् । पुण्यमनुभावंप्रभावंमतिनिश्चयंवा । लोकंवैकुंठम् ४७ अहोप्रह्लादस्यभाग्यंयेनदेवो (नृहरिः) दृष्टःवयंतुमंदभाग्याइतिविषीदंतंप्रत्याहयूयमितित्रिभिः । येषांयुष्माकंगृहान्मुनयोभियंतिसर्वतःसमायांति । तत्कस्यहेतोः । एषुगृहेषुनराकारंगूढंसत्श्रीकृष्णाख्यंपरंब्रह्मसाक्षादासमंताद्वसतीति ४८ ननुकृष्णोअस्माकंमातुलेयःकथंब्रह्मेत्युच्यते । तत्राहसवैइति । सोयंब्रह्मैव । कथंभूतःमहद्भिर्विमृग्यंयत्कैवल्यनिर्वाणसुखंनिरूपाधिःपरमानंदःतदनुभूतिरूपःवोयुष्माकंखलुप्रियः । सुहृदित्यादिरूपोभवाति । अर्हणीयःपूज्यःविधिकृदाज्ञानुवर्ती ४९ ननुब्रह्मरूपश्चेत्कथंद्व्यष्टसहस्रस्त्रीपुरतिःकथंवाधर्माद्याचरणंतस्येत्यतआह । नयस्यरूपंतत्त्वंभवादिभिरपिधियास्वबुद्ध्यावस्तुतयाइदमित्थमितिसाक्षान्नोपवर्णितम् । सयुष्माकंस्वयमेवप्रसन्नः । अस्माकंतुमौनादिसाधनैस्तत्प्रसादःप्रार्थनीयएवेत्याह । मौनेति । सएवसात्वतांपतिर्नःप्रसीदतु । ननुप्रह्लादस्यगृहेषुपरंब्रह्मवसतिनैवतद्दर्शनार्थंमुनयस्तद्गृहानभियंतिनचतस्यब्रह्ममातुलेयादिरूपेणवर्ततेनचस्वयमेवप्रसन्नंअतोयूयमेवततोऽस्मत्तोपिभूरिभागाइति ५० नन्वन्यैर्दुष्करंत्रिपुरभेदादिकंश्रीरुद्रःकृतवान्सएवंभूतईश्वरोप्यस्यतत्त्वंनजानातीतिकथंइत्यपेक्षायांतस्याप्येतत्साहाय्यादेवासौप्रभावोनकेवलस्येतिवक्तुमाख्यानमुपाक्षिपतिसएषइति ५१राजायुधिष्ठिरउवाच (कस्मिन्निति) । जगदीशितुर्देवस्यकीर्तिःकस्मिन्कर्मणिमयोहतवान् (अनेनकृष्णेनउपचितातत्कथ्यताम्) ५२ अनेनश्रीकृष्णेनउपबृंहितैःसंवर्धितैः५३हैमीचरौप्याचायसीचेतितिस्रःपुरोनिर्मायतेभ्योददावितिशेषः । दुर्लक्ष्यौअपायसंयोगौगमनागमनेयासांदुर्वितर्क्यःपरिच्छदोयासु ५४

॥४९॥

श्लोकाः ४७/५४

एतद्यआदिपुरुषस्यमृगेंद्रलीलांदैत्येंद्रयूथपवधंप्रयतःपठेत ॥ दैत्यात्मजस्यचसतांप्रवरस्यपुण्यंश्रुत्वानुभावमकुतोभयमेतिलोकम् ४७ यूयंनृलोकेबतभूरिभागालोकंपुनानामुनयोऽभियंति ॥ येषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगम् ४८ सवाअयंब्रह्ममहद्विमृग्यंकैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियःसुहृद्वःखलुमातुलेयआत्माऽर्हणीयोविधिकृद्गुरुश्च ४९ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयोपवर्णितम् ॥ मौनेनभक्त्योपशमेनपूजितःप्रसीदतामेषससात्वतांपतिः ५० सएषभगवान्राजन्व्यतनोद्विहतंयशः ॥ पुरारुद्रस्यदेवस्यमयेनानंतमायिना ५१ ॥ राजोवाच ॥ कस्मिन्कर्मणिदेवस्यमयोऽहन्जगदीशितुः ॥ यथाचोपचिताकीर्तिःकृष्णेनानेनकथ्यताम् ५२ ॥ श्रीनारदउवाच ॥ निर्जिताअसुरादेवैर्युध्यनेनोपबृंहितैः ॥ मायिनांपरमाचार्यंमयंशरणमाययुः ५३ सनिर्मायपुरस्तिस्रोहैमीरौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगादुर्वितर्क्यपरिच्छदाः ५४

चूर्णिका

यःएतांमृगेंद्रलीलांदैत्येंद्रवधंप्रह्लादचरितंचपठेत् सः वैकुंठंएति ४७ हेयुधिष्ठिरयूयंनृलोकेवतभूरिभागाः यतः युष्माकंगृहान्ऋषयआयांति श्रीकृष्णश्चवसति ४८ एवंप्रह्लादो न यतःतस्यगृहेपरब्रह्मऽनवसति तद्दर्शनार्थंमुनयः नअभियंति तस्यमातुलेयादिरूपेणकृष्णोनवर्तते नचतस्यस्वयंप्रसन्नःअतःततोपि अस्मत्तोपियूयंभूरिभागाः ४९ किंच यस्यस्वरूपंभवविरिंच्यादिभिः इदमित्थमितिनोपवर्णितम् एवंभूतो भगवान्प्रसीदतां ५० ननुदुष्करंत्रिपुरभेदादिकंश्रीरुद्रः कृतवान् एवंभूतः शिवोपि अस्यतत्त्वंनजानातीति कथंइत्यपेक्षायांभगवत्साहाय्यादेवअसौशिवप्रभावः नकेवलस्यइतिवक्तुं आख्यानंउपक्षिपति हेराजन्पुरामयेनविहतंरुद्रस्ययशःसएषभगवान्व्यतनोत् ५१ ॥ युधिष्ठिरउवाच ॥ अनेनकृष्णेनरुद्रस्यकीर्तिः कस्मिन्कर्मणिवर्द्धितातत्कथ्यताम् ५२ ॥ नारदउवाच ॥ पुरादेवैः जिताः असुराः मयंशरणंययुः ५३ सः हेमरौप्यलोहमयीः तिस्रः पुरः निर्माय तेभ्यः ददौ ५४

॥४९॥

CC-0. In Public Domain. Digitization by eGangotri

टीका (असुराणां) सेनान्यःसेनापतयःपूर्ववैरंस्मरंतः ५५ ५६ अस्त्रंअभिमंत्रितम् । शस्त्रंत्वनभिमंत्रितंपुरेषुव्यमुंचत् ५७ ततःशराःसूर्यमंडलान्मयूखसंदोहारश्मिसमूहाइवयतोयेभ्यः ५८ कूपरसेस्वयंनिर्मित कूपामृते ५९ वज्रसारावज्रवद्दृढांगाःमहौजसोमहाबलाःमेघभेदिनोविद्युद्रूपावह्नयइव ६० ६१ कालेमध्याह्ने ६२ ६३ ६४ आत्मनोवाअन्यस्यवाद्वयोरपिवादैवेनदिष्टमुपकल्पितंअपोहितुंपरिहर्तुंइहक श्चिदपीश्वरःसमर्थोनास्ति असाश्रीकृष्णः (धर्मज्ञानादिभिःशक्तिभिः) प्रधनंसंग्रामस्तत्साधनं(रथसूतादियत्तद्व्यधात्) ६५ (अथहरःसन्नद्धोरथमास्थाय). ६६ अभिजितिमध्याह्ने ६७ विमानशतानिसं कुलानिसंकीर्णानियेषांतेदेवादयः ६८ (स्वधामकैलासम्) ६९ ७०

॥५०॥ ताभिस्तेऽसुरसेनान्योलोकांस्त्रीन्सेश्वरान्नृप ॥ स्मरंतोनाशयांचक्रुःपूर्ववैरमलक्षिताः ५५ ततस्तेसेश्वरालोकाउपासाद्येश्वरंविभो ॥ त्राहिनस्तावकान्देव विनष्टांस्त्रिपुरालयैः ५६ अथानुगृह्यभगवान्माभैष्टेतिसुरान्विभुः ॥ शरंधनुषिसंधायपुरेष्वस्त्रंव्यमुंचत ५७ ततोऽग्निवर्णाइषवउत्पेतुःसूर्यमंडलात् ॥ यथा मयूखसंदोहानादृश्यंतपुरोयतः ५८ तैःस्पृष्टाव्यसवःसर्वेनिपेतुःस्मपुरौकसः ॥ तानानीयमहायोगीमयःकूपरसेऽक्षिपत् ५९ सिद्धामृतरसस्पृष्टावज्रसारा महौजसः ॥ उत्तस्थुर्मेघदलनावैद्युताइववह्नयः ६० विलोक्यभग्नसंकल्पंविमनस्कंवृषध्वजम् ॥ तदाऽयंभगवान्विष्णुस्तत्रोपायमकल्पयत् ६१ वत्स आसीत्तदाब्रह्मास्वयंविष्णुरयंहिगौः ॥ प्रविश्यत्रिपुरंकालेरसकूपामृतंपपौ ६२ तेऽसुराह्यपिपश्यंतोनन्यषेधन्विमोहिताः ॥ तद्विज्ञायमहायोगीरसपाला निदंजगौ ॥ स्वयंविशोकःशोकार्तान्स्मरन्दैवगतिंचताम् ६३ देवोऽसुरोनरोन्योवानेश्वरोऽस्तीहकश्चन ॥ आत्मनोऽन्यस्यवादिष्टंदैवेनापोहितुंद्वयोः ६४ अथासौशक्तिभिःस्वाभिःशंभोःप्राधनिकंव्यधात् ॥ धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः ६५ रथंसूतंध्वजंवाहान्धनुर्वर्मशरादियत् ॥ सन्नद्धो रथमास्थायशरंधनुरुपाददे ६६ शरंधनुषिसंधायमुहूर्तेऽभिजितीश्वरः ॥ ददाहतेनदुर्भेद्याहरोऽथत्रिपुरोनृप ६७ दिविदुंदुभयोनेदुर्विमानशतसंकुलाः ६८ देवर्षिपितृसिद्धेशाजयेतिकुसुमोत्करैः ॥ अवाकिरन्जगुर्हृष्टानन्नृतुश्चाप्सरोगणाः ६९ एवंदग्ध्वापुरस्तिस्रोभगवान्पुरहान्नृप ॥ ब्रह्मादिभिःस्तूयमा नःस्वधामप्रत्यपद्यत ७०

श्लोकाः ५५-७०

चूर्णिका ताभिःतेसेश्वरान् लोकान् अबाधंत ५५ तदादेवाद्याःरुद्रंशरणंययुः ५६ ततःरुद्रःमाभैष्टेतिअभयंदत्वापुरेषुअस्त्रंव्यमुंचत ५७ तदादैत्याः बाणैर्मृताःसंतःपेतुः ५८ तदामहा योगीमयःरसकूपे तान् अक्षिपत् ५९ तेअमृतरसस्पृष्टाःवज्रसाराः उत्तस्थुः ६० तदाभग्नसंकल्पंशिवंवीक्ष्य अयंभगवान्उपायंअकरोत् ६१ तदाब्रह्मावत्सः आसीत् अयंविष्णुर्गौर्भूत्वात्रिपुरंप्रविश्यकूपामृतंपपौतेअसुराःपश्यंतोपिमोहिताःसंतः नन्यषेधन् ६२ ६३ ६४ अथ असौकृष्णःशंभोः संग्रामसाधनंरथसूतध्वजादिव्यधात् ६५ ततः रुद्रः सन्नद्धःसन्रथं आस्थाय ६६ अभिजिन्मुहूर्तेशरंमुमोच तेनतिस्रः पुरः ददाह तदादिविदुंदुभयोनेदुःपुष्पवृष्टिःपपातगंधर्वादयः ननृतुःजगुश्च ६७ ६८ ६९ ए वंशिवः पुरत्रयंदग्ध्वाब्रह्मादिभिःस्तुतः सन्स्वधामययौ ७० ॥५०॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

आदितआरभ्यस्कंधार्थंनिगमयति। एवंविधानीति । नृलोकंनराकरंआत्मनोविडंबमानस्यअनुकुर्वतः ७१ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांत्रिपुरविजयोनामदशमोऽध्यायः १० ॥
एकादशेनृणांधर्माःसाधारण्येनवर्णिताः ॥ विशेषेणचवर्णानांमुख्यामुख्याश्रयोषिताम् ॥ १ ॥ तदेवंदशभिर्ज्ञानभक्तियोगावुदीरितौ ॥ अथपंचभिरध्यायैःकर्मयोगोऽनुवर्ण्यते ॥ २ ॥ दैत्यपतेःप्रह्लादस्य ।
साधूनांसभासुसभाजितंसत्कृतंईहितंचरितंश्रुत्वापुनर्नारदंपप्रच्छ । कथंभूतस्येहितम् । महत्तमानामग्रण्योमुख्यस्य । तत्रहेतुःउरुक्रमे (भगवति) आत्मामनोयस्य १ श्रवणेच्छायांहेतुःयत्यतोधर्मात् ।
अनुष्ठितात्परंज्ञानंभक्तिंचविंदति २ ३ ननुस्मृतिकारैर्धर्मउक्तएवतत्राहनारायणपराइति ४ अजायश्रीनारायणाय । तस्यैव (नारायणस्य) मुखाच्छ्रुतम् ५ तन्मुखादात्मनःश्रवणंसंभावयन्विशिन
ष्टि यइति । योभगवान्दाक्षायण्यांमूर्त्यांनारायणसंज्ञयाऽवतीर्यआस्तेतन्मुखात् ६ प्रथमंतावद्धर्मेप्रमाणमाह । धर्मेति । धर्मस्यमूलंप्रमाणम् । तद्विदांवेदविदां (स्मृतंस्मृतिश्च । चकारात्सदाचारश्च ।)
येनचात्मामनःप्रसीदतितुष्यति । तथाचयाज्ञवल्क्यः । ' श्रुतिःस्मृतिःसदाचारःस्वस्यचप्रियमात्मनः । सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतमिति । ' मनुश्च । ' वेदोऽखिलोधर्ममूलंस्मृतिशीलेचतद्विदाम् । आचारश्चैवसाधूनामात्मनस्तुष्टिरेवचेति ' ७

श्लोकाः ७१/७

एवंविधान्यस्यहरेःस्वमाययाविडंबमानस्यनृलोकमात्मनः ॥ वीर्याणिगीतान्यृषिभिर्जगद्गुरोर्लोकंपुनानान्यपरंवदामिकिम् ७१ ॥ ॥ इतिश्रीभागवते
महापुराणेसप्तमस्कंधेत्रिपुरविजयोनामदशमोऽध्यायः १० ॥ ॥ ध्व ॥ ॥ श्रीशुकउवाच ॥ श्रुत्वेहितंसाधुसभासभाजितंमहत्तमा
ग्रण्यउरुक्रमात्मनः ॥ युधिष्ठिरोदैत्यपतेर्मुदायुतःपप्रच्छभूयस्तनयंस्वयंभुवः १ ॥ युधिष्ठिरउवाच ॥ भगवन्श्रोतुमिच्छामिनृणांधर्मंसनातनम् ॥
वर्णाश्रमाचारयुतंयत्पुमान्विंदतेपरम् २ भवान्प्रजापतेःसाक्षादात्मजःपरमेष्ठिनः ॥ सुतानांसंमतोब्रह्मन्तपोयोगसमाधिभिः ३ नारायणपराविप्राधर्मं
गुह्यंपरंविदुः ॥ करुणाःसाधवःशांतास्त्वद्विधानतथापरे ४ ॥ श्रीनारदउवाच ॥ नत्वाभगवतेऽजायलोकानांधर्मसेतवे ॥ वक्ष्येसनातनंधर्मंनाराय
णमुखाच्छ्रुतम् ५ योऽवतीर्यात्मनोंशेनदाक्षायण्यांतुधर्मतः ॥ लोकानांस्वस्तयेऽध्यास्तेतपोबदरिकाश्रमे ६ धर्ममूलंहिभगवान्सर्ववेदमयोहरिः ॥
स्मृतंचतद्विदांराजन्येनचात्माप्रसीदति ७

चूर्णिका

एवंरुद्रयशःव्यतनोत् एवंकृष्णवीर्याणिजगत्पवित्राणिवहूनिसंति अपरंकिंवदामि ७१ इतिसप्तमेदशमः १० ॥ श्रीशुकउवाच ॥ युधिष्ठिरः दैत्यपतेः नृसिंहस्यच आख्यानं
श्रुत्वामुदायुतः पुनर्नारदंपप्रच्छ १ ॥ युधिष्ठिरउवाच ॥ हेनारदनृणांवर्णाश्रमाचारयुतंधर्मंश्रोतुमिच्छामि यदाचरणेनपुमान्ज्ञानंभक्तिंचविंदति २ ३ ४ ॥ नारदउवाच ॥
हेधर्मंभगवतेनत्वानारायणमुखात्श्रुतंधर्मंवक्ष्ये ५ ६ येन आत्माप्रसीदति ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रतावन्नरमात्रसाधारणंधर्ममाह । सत्यमितिपंचभिः । तपएकादश्युपवासादि । ईक्षायुक्तायुक्तविवेकः । शमोमनसःसंयमः । दमोबाह्येंद्रियाणाम् । त्यागोदानम् । स्वाध्यायोयथोचितजपः ८ संतोषोदैवलब्धेनालंबुद्धिः । समदृशांमहतांसेवा । ग्राम्येहोपरमःप्रवृत्तकर्मभ्योनिवृत्तिः । विपर्ययेहेक्षा । निःफलक्रियाणामीक्षणम् । मौनंवृथाप्रलापनिवृत्तिः । आत्मविमर्शनंदेहादिव्यतिरिक्तात्मानुसंधानम् ९ आत्मेतिदेवतेतिचबुद्धिः १० अस्यश्रीकृष्णस्य । इज्याअर्चनम् ११ एवंत्रिंशल्लक्षणवान्धर्मः १२ इदानींवर्णधर्मान्वक्तुंद्विजानांलक्षणमाह । संस्कारामंत्रवंतोगर्भाधानादयोयस्मिन्नविच्छिन्नाःसद्विजः । तर्हिशूद्रस्यापिसंस्काराविच्छेदेसतिद्विजत्वंस्यात्तत्राह । अजोब्रह्मायमेवंभूतसंस्कारयुक्तंजगादसद्विजः । शूद्रंतुनमंत्रवत्संस्कारयुक्तंजगाद । नचोपनयनवंतंअतोनासौद्विजः । तथाचस्मृतिः । ‘ विवाहमात्रसंस्कारंशूद्रोपिलभतांसदा । नकेनचित्समसृजच्छंदसातंप्रजापति ’ रिति । श्रुतिश्च । ‘ गायत्र्याब्राह्मणमसृजत्त्रिष्टुभाराजन्यंजगत्यावैश्यंनकेनचिच्छूद्र ’ मिति । अतोविवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वात्उपनयनस्यतुसर्वथानिषेधान्नतस्यद्विजत्वमित्यर्थः । पाठांतरेवैदिकादयइतिगर्भाधानाद्याइत्यर्थः । त्रैवर्णिकानामावश्यकान्धर्मानाह । इज्येति । जन्मनाविशुद्धेनकुलेनकर्मणाचआचारेणअवदातानांशुद्धानांदुष्कुलानांदुराचाराणांचनैतानिविहितानीत्यर्थः ब्रह्मचर्याद्याश्रमविहिताःक्रियाश्च शूद्रस्यतुवर्णधर्मएव । आश्रमभेदकृतविशेषाभावात् १३ ब्राह्मणादीनामपिचतुर्णांवृत्तिरूपान्धर्मानाह । विप्रस्येतिसार्धैःसप्तभिः । विप्रस्यषट्कर्माणिविहितानीत्यनुषंगः । तत्रत्वध्यापनंयाजनंप्रतिग्रहश्चजीविका । यथाहमनुः । ‘ षण्णांतुकर्मणामस्यत्रीणिकर्माणिजीविका । याजनाध्यापनेचैवविशुद्धाच्चप्रतिग्रह ’ इति । अन्यस्यक्षत्रियस्यअप्रतिग्रहइतिप्रतिग्रहातिरिक्तंयाजनमध्यापनंचापद्यनुजानाति । वक्ष्यतिचानंतरमेव । ऋतेराजन्यमिति । श्रूयतेच । अश्वपतिकैकयप्रभृतीनांक्षत्रियाणांउपदेष्टृत्वादिति । प्रजापालनेऽधिकृतस्यक्षत्रियस्यवृत्त्यंतरमाहराज्ञइति । आदिशब्देनदंडशुल्कादि १४

॥५२॥

श्लोकाः ८/१४

सत्यंदयातपःशौचंतितिक्षेक्षाशमोदमः ॥ अहिंसाब्रह्मचर्यंचत्यागःस्वाध्यायआर्जवम् ८ संतोषःसमदृक्सेवाग्राम्येहोपरमःशनैः ॥ नृणांविपर्ययेहेक्षामौनमात्मविमर्शनम् ९ अन्नाद्यादेःसंविभागोभूतेभ्यश्चयथार्हतः ॥ तेष्वात्मदेवताबुद्धिःसुतरांनृषुपांडव १० श्रवणंकीर्तनंचास्यस्मरणंमहतांगतेः ॥ सेवेज्याऽवनतिर्दास्यंसख्यमात्मसमर्पणम् ११ नृणामयंपरोधर्मःसर्वेषांसमुदाहृतः ॥ त्रिंशल्लक्षणवान्राजन्सर्वात्मायेनतुष्यति १२ संस्कारायत्राविच्छिन्नाःसद्विजोऽजोजगादयम् ॥ इज्याध्ययनदानानिविहितानिद्विजन्मनाम् ॥ जन्मकर्मावदातानांक्रियाश्चाश्रमचोदिताः १३ विप्रस्याध्ययनादीनिषडन्यस्याप्रतिग्रहः ॥ राज्ञोवृत्तिःप्रजागोप्तुरविप्राद्वाकरादिभिः १४

चूर्णिका

सत्यं १ दया २ तपः ३ शौचं ४ तितिक्षा ५ ईक्षानामयुक्तायुक्तविवेकः ६ शमः ७ दमः ८ अहिंसा ९ ब्रह्मचर्यं १० दानं ११ स्वाध्यायः १२ आर्जवं १३ संतोषः १४ महत्सेवा १५ प्रवृत्तकर्मनिवृत्तिः १६ निष्फलक्रियाणामीक्षणं १७ मौनम् १८ आत्मविमर्शनम् १९ अन्नाद्यादेःसंविभागः २० भूतेषुआत्मदेवताबुद्धिः २१ श्रवणादिभक्तिभेदाः ३ ३० , ८ ९ १० ११ अयंत्रिंशल्लक्षणवान् सर्वेषांपरोधर्मः कथितः १२ द्विजानांलक्षणंआहगर्भाधानादिसंस्काराःयस्मिन्नविच्छिन्नाः सः द्विजः तदितरः शूद्रः द्विजन्मनांइज्याध्ययनदानानिविहितानि शूद्रस्यतुवर्णधर्माएव १३ विप्रस्यअध्ययनादिषट्कर्माणिविहितानि तत्रतु अध्यापनं याजनं शुद्धप्रतिग्रहश्चजीविका १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वार्ताकृषिवाणिज्यादिलक्षणावृत्तिर्यस्यसः । शूद्रस्याद्विजशुश्रूषाविहिता । स्वामिनोद्विजस्यतुशुश्रूषावृत्तिश्चभवेत् । (स्वामिनःसकाशाद्वृत्तिर्जीवनमितिवा) १५ विप्रस्यमुख्यानुकल्पभेदेनवृत्त्यंतरा
ण्याह । विचित्राकृष्यादिरूपावार्ता । शालीनंअयाचितंयाच्ञांविनैवप्राप्तमित्यर्थः । यायावरंप्रत्यहंधान्ययाच्ञा । शिलोंछनमितिद्वयमप्येकीकृत्यचतुर्द्धेत्युक्तम् । तत्रशिलंशालिक्षेत्रादौस्वामित्यक्तकणिशो
पादानम् । उंछनमापणादिपतितकणोपादानम् । 'उंछःकणशआदानंकणिशोपार्जनंशिलमित्य' भिधानात् । श्रेयसीउत्तमा १६ वृत्तिष्वेवंव्यवस्थांदर्शयन्आपद्वृत्तीराह । जघन्योनीचःउत्तमांअध्याप
नादिरूपांराजन्यमृतेक्षत्रियंविनानभजेत् । (राजन्यस्तुप्रतिग्रहादन्यांभजेत । आपत्सुसर्वशोवृत्तयःसर्वेषांभवंति ।) १७ चतुर्विधांपूर्वोक्तांविप्रवृत्तिंइतरेषामपिदर्शयन्नाह । ऋतामृताभ्यामिति १८ श्लोकं
व्याचष्टेऋतमिति १९ तांश्ववृत्तिम् । सदाआपद्यपि । तयोस्तद्वर्जनेहेतुमाह । सर्ववेदमयइति २० वर्णानामभिव्यंजकरूपान्धर्मानाह । शमइतिचतुर्भिःअच्युतात्मत्वंश्रीविष्णुपरत्वम् २१ शौर्यंयुद्धोत्साहः
वीर्यंप्रभावः तेजःप्रागल्भ्यं त्यागोदानं आत्मनोमनसोजयः २२ (देवेऽभीष्टदैवतेगुरौअच्युतेचभक्तिःत्रिवर्गेणधर्मार्थकामैःपरितोषणम्) २३ अमंत्रयज्ञःनमस्कारेणैवपंचयज्ञानुष्ठानम् । तथाचयाज्ञवल्क्यः
' नमस्कारेणमंत्रेणपंचयज्ञान्नहापयेत् ' इति २४ स्त्रीधर्मानाह । स्त्रीणामितिपंचभिः । पतिरेवदेवोयासाम् । तस्यपत्युःशुश्रूषातदनुकूलताच । तस्यभर्तुर्बंधुषुभागिनेयादिषुअनुवृत्तिःभर्तृवद्वर्तनम् ।
यथाभर्तातेषुवर्ततेतथावर्तनमित्यर्थः । तस्ययद्व्रतंनियमस्तस्यधारणम् । एतच्चतुष्टयंपतिव्रतानांलक्षणंधर्मश्च २५

श्लोकाः १५/२५

वैश्यस्तुवार्तावृत्तिश्चनित्यंब्रह्मकुलानुगः ॥ शूद्रस्यद्विजशुश्रूषावृत्तिश्चस्वामिनोभवेत् १५ वार्ताविचित्राशालीनंयायावरंशिलोंछनम् ॥ विप्रवृत्ति
श्चतुर्द्धेयंश्रेयसीचोत्तरोत्तरा १६ जघन्योनोत्तमांवृत्तिमनापदिभजेन्नरः ॥ ऋतेराजन्यमापत्सुसर्वेषामपिसर्वशः १७ ऋतामृताभ्यांजीवेतमृतेनप्रमृतेनवा ॥
सत्यानृताभ्यांजीवेतनश्ववृत्त्याकथंचन १८ ऋतमुंछशिलंप्रोक्तममृतंयदयाचितम् ॥ मृतंतुनित्ययाच्ञास्यात्प्रमृतंकर्षणंस्मृतम् १९ सत्यानृतंतुवाणि
ज्यंश्ववृत्तिर्नीचसेवनम् ॥ वर्जयेत्तांसदाविप्रोराजन्यश्चजुगुप्सिताम् ॥ सर्ववेदमयोविप्रःसर्वदेवमयोनृपः २० शमोदमस्तपःशौचंसंतोषःशांतिरार्ज
वम् ॥ ज्ञानंदयाऽच्युतात्मत्वंसत्यंचब्रह्मलक्षणम् २१ शौर्यंवीर्यंधृतिस्तेजस्त्यागआत्मजयःक्षमा ॥ ब्रह्मण्यताप्रसादश्चरक्षाचक्षत्रलक्षणम् २२ देवगुर्व
च्युतेभक्तिस्त्रिवर्गपरितोषणम् ॥ आस्तिक्यमुद्यमोनित्यंनैपुण्यंवैश्यलक्षणम् २३ शूद्रस्यसन्नतिःशौचंसेवास्वामिन्यमायया ॥ अमंत्रयज्ञोह्यस्तेयंसत्यंगो
विप्ररक्षणम् २४ स्त्रीणांचपतिदेवानांतच्छुश्रूषानुकूलता ॥ तद्बंधुष्वनुवृत्तिश्चनित्यंतद्व्रतधारणम् २५

चूर्णिका

क्षत्रियस्य आपदियाजनमध्यापनंच अनापदितुखड्गवृत्तिःवैश्यस्यतुवार्तावृत्तिः शूद्रस्याद्विजानांशुश्रूषाविहिता १५ विप्रस्यमुख्यवृत्तिमाह कृष्यादिः अयाचितंप्रत्यहंधान्ययाच्ञा
शिलोंछनम्इयंउत्तरोत्तराउत्तमा १६ किंच नीचःअनापदिराजन्यंविनाउत्तमांवृत्तिंनभजेत् आपत्सु सर्वेषामपिसर्वशः १७ अथापिश्ववृत्त्यादिकथंचननजीवेत १८ १९
२० शमःदमःतपः शौचंसंतोषः क्षांतिरार्जवम् ज्ञानंदयाच्युतात्मत्वं सत्यंचब्राह्मणलक्षणानि २१ शौर्यंवीर्यंधृतिस्तेजस्त्यागआत्मजयःक्षमा ब्रह्मण्यताप्रसादः रक्षाचक्षत्र
लक्षणानि २२ देवादिषुभक्तिः त्रिवर्गपोषणं आस्तिक्यंउद्यमःवैश्यलक्षणम् २३ सेवादिशूद्रलक्षणं २४ स्त्रीणांधर्मः पतिसेवादितद्बंधुषु अनुवृत्तिश्च २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच । संमार्जनोपलेपाभ्यांइत्यादेःपतिंभजेदित्युत्तरेणान्वयः । (संमार्जनंमार्जन्यारजोपाकरणम् । उपलेपोगोमयोदकेनलेपनं गृहमंडलवर्तनैर्गृहेहंरंगवल्ल्याद्यलंकरणैः । मंडिताकुंकुमादिनाऽलंकृता) परिमृष्टाउद्वर्तनादिनानिर्मलीकृताःपरिच्छदागृहोपकरणानियया २६ (उच्चैःप्रयाससाध्यैःअवचैरनायाससाध्यैःकामैर्विषयैः) २७ किंच । संतुष्टायथालाभेन । तावन्मात्रभोगेप्यलोलुपा । दक्षाअनलसा । प्रियासत्याचवाग्यस्याः । सर्वत्रापिअप्रमत्ताअवहिता । अपतितंमहापातकरहितम् । यथाहयाज्ञवल्क्यः ' आशुद्धेःसंप्रतीक्ष्योहिमहापातकदूषित ' इति २८ तत्परासतीश्रीर्हरिमिवभजेत । हर्यात्मनापत्यासह २९ प्रतिलोमजानुलोमजानांवृत्तिमाह (वृत्तिरिति । संकरजातीनां) तत्तत्कुलकृताकुलपरंपराप्राप्ता । परंपराप्राप्तमपिचौर्यहिंसादिकंप्रतिषेधति । अचोराणामपापानामिति । तत्रप्रतिलोमजप्रदर्शनार्थंकांश्चिद्विशेषानाह अंत्यजेति ' रजकश्चर्मकारश्चनटोबुरुडएवच । कैवर्तमेदभिल्लाश्चसप्तैतेअंत्यजाःस्मृताः । ' अंतेवसायिनस्तुचांडालपुल्कसादयः । तेषांपरंपराप्राप्तावस्त्रनिर्णेजनादिवृत्तिरित्यर्थः ३० श्रेष्ठादपिपरधर्मान्नीचोपिस्वधर्मएवश्रेयानित्याह । प्रायइति । स्वभावेनसत्त्वादिप्रकृत्याविहितोधर्मःशर्मकृत्सुखहेतुःस्मृतः । कैः । वेदएवदृक्चक्षुर्येषांतैः । भगवताचोक्तम् । ' श्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठिता ' दिति ३१ ननुस्वाभाविकस्यकर्मणोबंधहेतुत्वात्कथंसुखहेतुत्वंतत्राहवृत्त्येति ३२ ननुकाम्यानिकर्माणिकुर्वतस्तत्फलोपभोगपरस्यकथंनैर्गुण्यंस्यात् । तदुक्तंप्रह्लादेन । ' औपस्थ्यजैह्वयंबहुमन्यमानःकथंविरज्येतदुरंतमोह ' इति । तत्राधिकारभेदेनव्यवस्थांसदृष्टांतमाह । उप्यमानमितिद्वाभ्यां । (मुहुरुप्यमानंबीजसंतानेनयुज्यमानं ।) पुनःसूत्यैसम्यक्प्रसवाय ३३ कामाआशेरतेवासनारूपेणयस्मिन् । तत् (तथाकामबिंदुभिर्नविरज्येत ।) अयंभावः । उत्कटवासनाविष्टस्यसहसैवकामत्यागासंभवात्वेदोक्तनियमेनबहुशःकामान्भुंजानस्यैवनित्यनैमित्तिकैर्विशुद्धचित्तस्यतद्दोषदर्शनेनययातिसौभरिप्रमुखानामिवशनैर्विरागोभवति । यथासवीर्यंक्षेत्रंशनैर्निर्वीर्यंभवति । यथाचप्रज्वलितोग्निर्नघृतबिंदुभिःशाम्यति । महतातुघृतपूरेणशाम्यत्येवतद्वदिति । प्रह्लादकृतस्तुकौमारएवनिवृत्त्युपदेशोमंदवासनानांतेषामधिकारेण । (संगच्छते) तदुक्तंतत्रैव । ' बालानदूषितधियोद्वंद्वारामेरितेहितै ' रितिअतःसर्वमनवद्यम् ३४

श्लोकाः २६/३४

संमार्जनोपलेपाभ्यांगृहमंडलवर्तनैः ॥ स्वयंचमंडितानित्यंपरिमृष्टपरिच्छदा २६ कामैरुच्चावचैःसाध्वीप्रश्रयेणदमेनच ॥ वाक्यैःसत्यैःप्रियैःप्रेम्णाकालेकालेभजेत्पतिम् २७ संतुष्टाऽलोलुपादक्षाधर्मज्ञाप्रियसत्यवाक् ॥ अप्रमत्ताशुचिःस्निग्धापतिंत्वपतितंभजेत् २८ यापतिंहरिभावेनभजेच्छ्रीरिवतत्परा ॥ हर्यात्मनाहरेर्लोकेपत्याश्रीरिवमोदते २९ वृत्तिःसंकरजातीनांतत्तत्कुलकृताभवेत् ॥ अचोराणामपापानामंत्यजांतेवसायिनाम् ३० प्रायःस्वभावविहितोनृणांधर्मोयुगेयुगे ॥ वेददृग्भिःस्मृतोराजन्प्रेत्यचेहचशर्मकृत् ३१ वृत्त्यास्वभावकृतयावर्तमानःस्वकर्मकृत् ॥ हित्वास्वभावजंकर्मशनैर्निर्गुणतामियात् ३२ उप्यमानंमुहुःक्षेत्रंस्वयंनिर्वीर्यतामियात् ॥ नकल्पतेपुनःसूत्याउप्तंबीजंचनश्यति ३३ एवंकामाशयंचित्तंकामानामतिसेवया ॥ विरज्येतयथाराजन्नाग्निवत्कामबिंदुभिः ३४

चूर्णिका

किंच गृहसंमार्जनादिभिः उच्चावचैः कामैः प्रियवाक्यैः २६ २७ २८ यास्त्रीपतिंहरिभावेनभजते सावैकुंठे पत्यासहश्रीरिवमोदते २९ संकरजातीनांचतत्तत्कुलकृतावृत्तिः ३० हेराजन् अयंनृणांधर्मः इहपरत्रचवेददर्शिभिः सुखहेतुःस्मृतः ३१ ३२ ३३ ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

शमादिभिरेवब्राह्मणादिव्यवहारोमुख्यःनजातिमात्रादित्याह । यस्येति । यद्यदिअन्यत्रवर्णांतरेपिदृश्येततर्हितद्वर्णांतरंतेनैवलक्षणनिमित्तेनैववर्णेनविनिर्दिशेत् । नजातिनिमित्तेनेत्यर्थः । (यद्वादैववशा ज्जातिभेदेपिलक्षणवशाज्जन्मांतरेतेनैववर्णेनविनिर्दिशेत्) ३५ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांयुधिष्ठिरनारदसंवादेसदाचारनिर्णयएकादशोऽध्यायः ११ ॥ ॥ ॥ ७ ॥
द्वादशेवर्ण्यतेधर्मोब्रह्मचारिवनस्थयोः । चतुर्णामाश्रमाणांचसाधारण्येनकश्चन ॥ १ ॥ वर्णादीनांधर्माउक्ताःइदानीमाश्रमधर्माउच्यंते । तत्रास्मिन्द्वादशेध्यायेब्रह्मचारिवनस्थयोरसाधारणाश्चतुर्णांसाधारणाश्चोच्यंते त्रयोदशेयतेर्धर्माः चतुर्दशेगृहस्थस्य पंचदशेसर्वधर्मसारसंग्रहः । ब्रह्मचारीगुरुकुलेसगुरुर्यःक्रियाःकृत्वावेदमस्मैप्रयच्छतितस्यगृहेवसन्गुर्वादीनुपासीतेत्युत्तरेणान्वयः १ ब्रह्मगायत्रींजपन्संध्यात्रयमप्युपासीत । उभेसंध्येतुयतवाक् (उपासीत) सायंप्रातःसंध्याकालनिमित्तंमौनंकुर्यादित्यर्थः २ सुयंत्रितःसंकुचितावयवःछंदसामुपक्रमादौगुरोश्चरणौनमेत् ३ यथोदितं (मौंजीब्राह्मणस्य) पालाशोब्राह्मणस्येत्यादिनियममनतिक्रम्यजटाधारणंतुकेशप्रसाधनाभावमात्रम् ४ ५ यावदर्थंयथोपयोगमेव ६ बृहद्व्रतोब्रह्मचर्यवान् । गृहस्थव्यतिरिक्तःसर्वोपिप्रमदानांगाथामपिवर्जयेत । तत्रहेतुः । इंद्रियाणिवलवंति । संयतस्यापिमनोहरंतीति ७ (केशप्रसाधनंकेशसंस्कारंउन्मर्दमंगमर्दनंअन्याभिरपियुवतिभिस्तरुणीभिः) ८ नकारयेदित्यत्रहेतुः । नन्विति । रहएकांते । अन्यदाकेशप्रसाधनादिव्यतिरिक्तावसरेअनेकांतावसरेवा । यावदर्थंतदुक्तंकुर्यात् ९

श्लोकाः ३५ / ९

यस्ययल्लक्षणंप्रोक्तंपुंसोवर्णाभिव्यंजकम् ॥ यदन्यत्रापिदृश्येततत्तेनैवविनिर्दिशेत् ३५ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेयुधिष्ठिरनारदसंवादे सदाचारनिर्णयएकादशोऽध्यायः ११ ॥ ॥ ७ ॥ ॥ श्रीनारदउवाच ॥ ब्रह्मचारीगुरुकुलेवसन्दांतोगुरोर्हितम् ॥ आचरन्दासवन्नीचोगुरौसुदृढसौहृदः १ सायंप्रातरुपासीतगुर्वग्न्यर्कसुरोत्तमान् ॥ संध्येउभेचयतवाग्जपन्ब्रह्मसमाहितः २ छंदांस्यधीयीतगुरोराहूतश्चेत्सुयंत्रितः ॥ उपक्रमेऽवसानेचचरणौशिरसानमेत् ३ मेखलाजिनवासांसिजटादंडकमंडलून् ॥ बिभृयादुपवीतंचदर्भपाणिर्यथोदितम् ४ सायंप्रातश्चरेद्भैक्ष्यंगुरवेतन्निवेदयेत् ॥ भुंजीतयद्यनुज्ञातोनोचेदुपवसेत्क्वचित् ५ सुशीलोमितभुग्दक्षःश्रद्दधानोजितेंद्रियः ॥ यावदर्थंव्यवहरेत्स्त्रीषुस्त्रीनिर्जितेषुच ६ वर्जयेत्प्रमदागाथामगृहस्थोबृहद्व्रतः ॥ इंद्रियाणिप्रमाथीनिहरंत्यपियतेर्मनः ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकम् ॥ गुरुस्त्रीभिर्युवतिभिःकारयेन्नात्मनोयुवा ८ नन्वग्निःप्रमदानामघृतकुंभसमःपुमान् ॥ सुतामपिरहोजह्यादन्यदायावदर्थकृत् ९

चूर्णिका

३५ ॥ इतिसप्तमेएकादशः ११ ॥ ॥ ७ ॥ ॥ नारदउवाच ॥ ब्रह्मचारीगुरुकुलेवसन्दांतःगुरोर्हितं आचरेत् १ सायंप्रातःगुर्वग्न्यर्कसुरोत्तमान्उपासीत गायत्रींजपन्संध्यात्रयंउपासीत सायंप्रातःसंध्यानिमित्तंमौनंकुर्यात् २ गुरुणाआहूतश्चेत्छंदांसिअधीयीतआदौ अंतेचतच्चरणौनमेत् ३ पवित्रपाणिःसन्मेखलाजिनवासांसिजटादंडकमंडलून् उपवीतंचबिभृयात् ४ सायंप्रातर्भैक्ष्यंचरेत् तद्गुरवेनिवेदयेत् तेनानुज्ञातश्चेत्भुंजीतनोचेद्उपवसेत् ५ जितेंद्रियःसन्स्त्रीषुस्त्रीनिर्जितेषुचयावदर्थंव्यवहरेत् ६ प्रमदागाथांचत्यजेत् ७ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकंयुवासन्युवतीभिः गुरुस्त्रीभिःनकारयेत् ८ नन्वग्निःप्रमदानामघृतकुंभमयःपुमान् अतः सुतामपिरहोजह्यात् ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.स. अ०

टीका ॥१२॥

ननुमिथ्यात्वादतिकश्मलत्वाच्चस्वयंत्यक्तप्रायंस्यादितिजह्यादितिकोयमतिनिर्बंधस्तत्राह । कल्पयित्वेति । आत्मनास्वरूपसाक्षात्कारेणइदंदेहेंद्रियादिआभासमात्रंकल्पयित्वायावदसौजीवईश्वरःस्वतंत्रो (भवेत्तावज्जह्यात्यावदेवं) नभवेत् । तावद्द्वैतंअहंपुमानियंस्त्रीत्यादिभेदोनविरमेत् । ततःकिमित्यतआह । ततोहिद्वैतात्विपर्ययःगुणाध्यासेनभोग्यताबुद्धिः । अतोजह्यादेवेत्यर्थः १० एतत्सर्वंसुशीलिइत्याद्युक्तंब्रह्मचारिधर्मजातम् । गृहस्थस्यविशेषमाह । गुरुवृत्तिरिति (ऋतुगामिनःऋतौभार्यांगच्छतः) ११ अंजनादीनांआमिषांतानांद्वंद्वैक्यम् । तत्रअंजनंशरीरस्य । अभ्यंजनंशिरसः । स्त्रियंचअवलेखंचचित्रकर्म। स्त्रीणांकुड्यादौलेखनंवा । तन्निरीक्षणंवा । अत्राभ्यंगादिस्वरूपतोनिषिध्यते । पूर्वंतुकथंचिदापदिप्राप्तमपिस्त्रीकर्तृकंनिषिद्धमितिभेदः १२ अंगैःशिक्षादिभिरुपनिषद्भिश्चसहितांवेदत्रयींअधीत्यअवबुध्यचतदर्थंचविचार्य ।यावदर्थंस्वाधिकारानुसारेण १३ यदीश्वरःशक्तस्तर्हिगुरोःकामंअपेक्षितंवरंदत्वायथाधिकारंगृहस्थाद्याश्रमंस्वीकुर्यात्तत्रैववावसेत्नैष्ठिकःस्यादित्यर्थः १४ स्वधामभिःस्वाश्रयैर्भूतैःजीवैःसहतन्नियंतृतया (प्रविष्टवदधोक्षजंपश्येत्) १५ चरन्एवमाचरन्विदितंविज्ञानंविज्ञेयंयेन (सः) १६ मुनिर्वानप्रस्थःऋषिलोकंमहर्लोकम् १७ कृष्टपच्यंकर्षणादिनापक्वम् । अकृष्टंअकृष्टपच्यमपिअकालतःपाककालात्पूर्वमेवानिष्पन्नमित्यर्थः (आमप्रपक्वं) अर्कपक्वंवाफलादिआहरेत्अश्नीयात् १८ वन्यैर्नीवारादिभिःचरुपुरोडाशादीन्कालेचोदिताम् (तत्तत्कालविहितान्नित्यान्) पुराणंपूर्वसंचितम् १९ (अग्न्यर्थंअग्निरक्षणार्थंउटजंपर्णशालारूपंशरणंगृहम् । स्वयंतु) हिमादीन्सहतेतथा २० केशादीन्मलंचाप्रक्षालनेनमालिन्यंदधत्कमंडल्वादींश्चदधत् (अग्निपरिच्छदान्दर्भादीन्) २१

॥५६॥

श्लोकाः १०/२१

कल्पयित्वात्मनायावदाभासमिदमीश्वरः ॥ द्वैतंतावन्नविरमेत्ततोह्यस्यविपर्ययः १० एतत्सर्वंगृहस्थस्यसमाम्नातंयतेरपि ॥ गुरुवृत्तिर्विकल्पेनगृहस्थस्यर्तुगामिनः ११ अंजनाभ्यंजनोन्मर्दस्त्र्यवलेखामिषंमधु ॥ स्रग्गंधलेपालंकारांस्त्यजेयुर्येधृतव्रताः १२ उषित्वैवंगुरुकुलेद्विजोधीत्यावबुध्यच ॥ त्रयीं सांगोपनिषदंयावदर्थंयथाबलम् १३ दत्वावरमनुज्ञातोगुरोःकामंयदीश्वरः ॥ गृहंवनंवाप्रविशेत्प्रव्रजेत्तत्रवावसेत् १४ अग्नौगुरावात्मनिचसर्वभूतेष्वधोक्षजम् ॥ भूतैःस्वधामभिःपश्येदप्रविष्टंप्रविष्टवत् १५ एवंविधोब्रह्मचारीवानप्रस्थोयतिर्गृही ॥ चरन्विदितविज्ञानःपरंब्रह्माधिगच्छति १६ वानप्रस्थस्यवक्ष्यामिनियमान्मुनिसंमतान् ॥ यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा १७ नकृष्टपच्यमश्नीयादकृष्टंवाप्यकालतः ॥ अग्निपक्वमथामंवाअर्कपक्वमुताहरेत् १८ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान् ॥ लब्धेनवेनवेऽन्नाद्येपुराणंतुपरित्यजेत् १९ अग्न्यर्थमेवशरणमुटजंवाद्रिकंदरम् ॥ श्रयेतहिमवाय्वग्निवर्षार्कातपसाट्स्वयम् २० केशरोमनखश्मश्रुमलानिजटिलोदधत् ॥ कमंडल्वजिनेदंडवल्कलाग्निपरिच्छदान् २१

चूर्णिका

एतत्सर्वंगृहस्थस्ययतेरपिउक्तं १० ११ एवंवेदशास्त्रादीन्अधीत्यगुरवेदक्षिणांदत्वागृहंवनंवाप्रविशेत् प्रव्रजेत्तत्रवावसेत् १२ १३ १४ १५ एवंविधोब्रह्मचारीवानप्रस्थोयतिर्गृही चरन्विदंतिविज्ञानंपरंब्रह्माधिगच्छति १६ अथवानप्रस्थस्यनियमान्वक्ष्यामि यान् आतिष्ठन्ऋषिलोकंएति १७ कृष्टपच्यंनाश्नीयात् अग्निपक्वंआमंवाअर्कपक्वंवा अश्नीयात् १८ वन्यैःधान्यैःचरुपुरोडाशान्निर्वपेत् नवेअन्नाद्येप्राप्तेजीर्णंत्यजेत् १९ अग्निसेवार्थंउटजंगुहांवाश्रयेतस्वयंहिमवाय्वग्निवर्षार्कातपान् सहेत २० केशरोमनखश्मश्रुमलानिजटिलोदधत् कमंडल्वजिनेदंडवल्कलाग्निपरिच्छदान् २१ ॥५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृच्छ्रतःतपःक्लेशात्यथाबुद्धिर्नंनश्येत्तथाचरेत् २२ द्वादशाब्दाद्यनंतरमपियदिस्वधर्मानुष्ठानेशक्तःतर्हिवनेएववसेत्यदितुज्ञानाभ्यासेयोग्यस्तर्हिसंन्यसेदित्युत्तराध्यायेवक्ष्यते। तदुभयरहितस्यतुयत्कृत्यंतदाह । यदास्वक्रियायांरोगादिभिरकल्पोअसमर्थः । तदाअनशनंअशनत्यागंआदिपदात्पक्षेंगतेवाप्राश्नीयान्मासेवाऽहनिवागतइत्यादिकंद्रष्टव्यम् २३ अनशनादिकरिष्यतोमर्तुकामस्यपूर्वकृत्यमाह । आत्मनीत्यादियावत्समाप्ति । यथार्हतःयथायोग्यं स्वकारणेषुआकाशादिषुसंघातंदेहंन्यसेत्प्रविलापयेत् २४तदेवविभज्यदर्शयति । खेआकाशेखानिदेहगतछिद्राणि । आत्मवान्धीमान् । शेषंअस्थिमांसादिकठिनांशं । (यथोद्भवंउत्पत्त्यनुसारेणलीनंचिंतयेदित्यर्थः) २५ एवंस्थूलशरीरस्यलयमुक्त्वालिंगशरीररूपस्याध्यात्मादित्रयस्यलयमाहवाचमित्यादिना। अत्रयद्यपियथोद्भवंलयस्ययुक्तत्वादध्यात्मादीनांस्वस्वकारणेषुराजसाहंकारादिषुलयोवाच्यः । तथापीहतेषांलयभावनेयमद्वितीयात्मप्रतिपत्तिपरेतियथाकथंचिल्लयेभाव्यदेवतानांप्रवर्तकत्वेनप्राधान्यादिंद्रियतद्विषययोर्देवतासुलयःकथ्यते ।, वक्तव्यसहितांवाचंमग्नौन्यसेत् । एवंसर्वत्र । पदानिपादौवयसिविष्णौ रत्यासह २६ सनादेनशब्देनसह । अध्यात्मनिवायौ । अध्यात्मविदितिपाठेवायावितिज्ञातव्यम् २७ ज्योतिषिआदित्ये । रसगंधयोस्त्विंद्रियाकर्षकत्वेनप्राधान्यविवक्षयादेवतासहितस्येंद्रियस्यविषयेलयमाह । प्रचेतसासहजिह्वांरसनंअप्सुरसरूपासु । घ्राणशब्देनाश्विनोरप्युपलक्षणम् । अश्विभ्यांसहघ्राणंघ्रेयैर्गंधरूपलक्षितायांक्षितावित्यर्थः २८ परेकवौब्रह्मणि । अध्यात्मनाअहंकारेणअध्यात्मतामितिपाठेकर्माण्यहंकारंचेत्यर्थः । कथंभूतेरुद्रेयद्यस्मादहंममतापूर्विकाक्रियाभवतितस्मिन् । सत्त्वेनचेतनया । गुणैःगुणकार्यैःवागादिविशिष्टैर्देवैःयद्वासत्त्वादिभिर्गुणैर्हेतुभूतैःवैकारिकंभोक्तृत्वादिविकारवंतंक्षेत्रज्ञंपरेनिर्विकारेब्रह्मणि २९ ननुविकारवतःकथंपरेलयःस्यात् । विकारहेतूनांसर्वोपाधीनांलयद्वारेणेत्याह । अप्स्विति । अदोज्योतिः । (वायुंनभसि) तच्चनभःकूटस्थेऽहंतत्त्वे तच्चकूटस्थंमहतिमहत्तत्वे तदव्यक्तेप्रधाने । तच्चाव्यक्तमक्षरेपरमात्मनि ३० सर्वोपाधिलयाद्धेतोःअवशेषितंचिन्मात्रमात्मानंक्षेत्रज्ञमक्षरतयाज्ञात्वाअद्वयःसन्विरमेत् । दग्धकाष्ठोयथाऽनलः ३१ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांद्वादशोऽध्यायः १२ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

श्लोकाः २२—३१

चरेद्वनेद्वादशाब्दानष्टौवाचतुरोमुनिः ॥ द्वावेकंवायथाबुद्धिर्नविपद्येतकृच्छ्रतः २२ यदाऽकल्पःस्वक्रियायांव्याधिभिर्जरयाथवा ॥ आन्वीक्षिक्यांवा विद्यायांकुर्यादनशनादिकम् २३ आत्मन्यग्नीन्समारोप्यसंन्यस्याहंममात्मताम् ॥ कारणेषुन्यसेत्सम्यक्संघातंतुयथार्हतः २४ खेखानिवायौनिःश्वासांस्तेजस्यूष्माणमात्मवान् ॥ अप्स्वसृक्श्लेष्मपूयानिक्षितौशेषंयथोद्भवम् २५ वाचमग्नौसवक्तव्यामिंद्रेशिल्पंकरावपि ॥ पदानिगत्यावयसिरत्योपस्थंप्रजापतौ २६ मृत्यौपायुंविसर्गंचयथास्थानंविनिर्दिशेत् ॥ दिक्षुश्रोत्रंसनादेनस्पर्शमध्यात्मनित्वचम् २७ रूपाणिचक्षुषाराजन्ज्योतिष्यभिनिवेशयेत् ॥ अप्सुप्रचेतसाजिह्वांघ्रेयैर्घ्राणंक्षितौन्यसेत् २८ मनोमनोरथैश्चंद्रेबुद्धिंबोध्यैःकवौपरे ॥ कर्माण्यध्यात्मनारुद्रेयदहंममताक्रिया ॥ सत्त्वेनचित्तंक्षेत्रज्ञंगुणैर्वैकारिकंपरे २९ अप्सुक्षितिमपोज्योतिष्यदोवायौनभस्यमुम् ॥ कूटस्थेतच्चमहतितदव्यक्तेऽक्षरेचतत् ३० इत्यक्षरतयात्मानंचिन्मात्रमवशेषितम् ॥ ज्ञात्वाऽद्वयोथविरमेद्दग्धयोनिरिवानलः ३१ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेद्वादशोऽध्यायः १२ ॥ ॥ ७ ॥

चूर्णिका

एवंद्वादशाब्दान्अष्टौचतुरःद्वौएकंवामुनिःवनेचरेत् २२ यदाव्याधिभिःजरयावास्वक्रियायांअसमर्थःतदाअनशनादिकंकुर्यात् २३ २४ किंच आत्मनिअग्नीन्समारोप्य अहंममतांत्यक्त्वादेहंआकाशादिषुभूतेषुइंद्रियाणिचदेवतासुविलाप्यआत्मानंचिन्मात्रंअवशिष्टंज्ञात्वाअद्वयःसन्विरमेत् २५ २६ २७ २८ २९ ३० ३१ ॥ इतिसप्तमेद्वादशः १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशेयतेर्धर्मःसाधकस्योच्यतेमहान् । अवधूतेतिहासेनसिद्धावस्थाचवर्ण्यते १ एवंध्यात्वाऽकल्पोनशनादिकंकुर्यात् । आन्वीक्षिक्यांकल्पस्त्वेवंध्यात्वापरिव्रज्येतिसंबंधः । कियदत्रत्याज्यंदेहव्यति
रिक्तंसर्वमित्याह । देहमात्रेति । तस्यधर्मानाह । ग्रामैकरात्रेतिनवभिः (एकरात्रंवसेद्ग्रामेनगरेपंचरात्रकमित्यादिविधिना) १ कौपीनंगुह्यमाच्छाद्यतेयावतातन्मात्रंवासः । परंकेवलंअन्यदितिवा ।
त्यक्तंप्रैषोच्चारणात्पूर्वमेवतात्किंचिदपिअनापदिनविभृयात् । लिंगदंडादेरन्यत् । लिंगरूपंयद्दंडकमंडल्वादितद्विना २ अनपाश्रयःअकृतगृहाश्रयः ३ सदसतःपरेकार्यकारणव्यतिरिक्ते । सर्वत्रअवस्थात्र
येपि ४ नन्वात्मानंब्रह्मेतिकथंसामानाधिकरण्यनिर्देशः । नहिबद्धमुक्तयोरैक्यंसंभवतितत्राह । सुप्तेति । सुषुप्तौहितमसावृतमात्मतत्त्वंजाग्रत्स्वप्नयोस्तुविक्षिप्तंप्रकाशते । संधौतुनतमोनापिविक्षेपःअतस्तदा
आत्मदृक्आत्मानंलक्षीकृत्यस्थितःसन्आत्मनोगतिंतत्त्वंपश्यन्अतएवबंधंमोक्षंचमायामात्रंपश्यन्आत्मानंपरंब्रह्मसर्वत्रपश्येदित्यन्वयः । तदुक्तंयोगग्रंथे । ‘ निद्रादौजागरस्यांतेयोभावउपजायते । तंभावं
भावयन्नित्यंमुच्यतेनेतरोयति ’ रिति ५ (मृत्युंध्रुवंज्ञात्वानाभिनंदेत । नाप्यध्रुवंजीवितंज्ञात्वा ।) अस्यदेहस्य । किंतुप्रभवोप्ययश्चयस्मात्तंकालंपरंकारणंप्रतीक्षेत ६ असच्छास्त्रेषुअनात्मपरेषु । जीवि
कांनक्षत्रविद्यादिवृत्तिं । वादवादान्जल्पवितंडादिनिष्ठान् (तर्कान् । तर्कमाश्रित्य) कंचनकमपिपक्षंनिबंधेननसंश्रयेत् ७ नानुबध्नीतप्रलोभनादिनाबलान्नापादयेत् । आरंभान्मठादिव्यापारान्
(ग्रंथान्सच्छास्त्राण्यपि) ८ परमहंसस्यविशेषमाह । नयतेराश्रमोधर्मार्थः कथंभूतस्यमहात्मनः । तस्यलक्षणंशांतस्येत्यादि । प्रायइत्यस्यायंभावः । ज्ञानोत्पत्तिपर्यंतंबहूदकादिलिंगमाश्रित्यसत्त्वशुद्ध्यर्थं
यमान्नियमांश्चाचरन्नेवज्ञानोत्पत्त्यैयतेत । उत्पन्नेतुज्ञानेनानियमैःकृत्यमस्तियमाश्वस्वतएवस्युः । अतस्तदालिंगादिभिःप्रयोजनाभावाल्लोकसंग्रहार्थंधारयेद्वात्यजेद्वेति ९

श्लोकाः १/९

॥ श्रीनारदउवाच ॥ कल्पस्त्वेवंपरिव्रज्यदेहमात्रावशेषितः ॥ ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीम् १ बिभृयाद्यद्यसौवासःकौपीनाच्छादनंप
रम् ॥ त्यक्तंनलिंगदंडादेरन्यत्किंचिदनापदि २ एकएवचरेद्भिक्षुरात्मारामोऽनपाश्रयः ॥ सर्वभूतसुहृच्छांतोनारायणपरायणः ३ पश्येदात्मन्यदो
विश्वंपरेसदसतोऽव्यये ॥ आत्मानंचपरंब्रह्मसर्वत्रसदसन्मये ४ सुप्तप्रबोधयोःसंधावात्मनोगतिमात्मदृक् ॥ पश्यन्बंधंचमोक्षंचमायामात्रंनवस्तुतः ५ ना
भिनंदेद्ध्रुवंमृत्युमध्रुवंवास्यजीवितम् ॥ कालंपरंप्रतीक्षेतभूतानांप्रभवाप्ययम् ६ नासच्छास्त्रेषुसज्जेतनोपजीवेतजीविकाम् ॥ वादवादांस्त्यजेत्तर्कान्पक्षं
कंचननाश्रयेत् ७ नशिष्याननुबध्नीतग्रंथान्नैवाभ्यसेद्बहून् ॥ नव्याख्यामुपयुंजीतनारंभानारभेत्क्वचित् ८ नयतेराश्रमःप्रायोधर्महेतुर्महात्मनः ॥
शांतस्यसमचित्तस्यबिभृयादुतवात्यजेत् ९

चूर्णिका ॥५८॥

॥ नारदउवाच ॥ ज्ञानाभ्यासेकल्पश्चेत्तर्हिसंन्यासंगृहीत्वादेहमात्रावशेषितःनिरपेक्षःसन्महींचरेत् १ असौवासःयदिबिभृयात्तर्हिकौपीनाच्छादनंविभृयात् दंडपात्राभ्यांविना
त्यक्तंअन्यत् अनापदिनधारयेत् २ भिक्षुःएकएवचरेत् ३ ४ ५ देहस्यजीवनंमरणंवानाभिनंदेत्कालंप्रतीक्षेत आत्मनिविश्वंपश्येत्आत्मानंपरंब्रह्मपश्येत् बंधंमोक्षंचमायामा
त्रंपश्येत् ६ असच्छास्त्रेषुनसज्जेतवितंडादिवादान्त्यजेत् ७ कंचनपक्षंनसंश्रयेत् बहून्ग्रंथान्नाभ्यसेत् मठादिव्यापारान्नकुर्यात् ८ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

तस्यैवज्ञानदार्ढ्याभावेयोगभ्रंशपरिहारार्थमाह । नवहिर्व्यक्तलिंगंयस्य । व्यक्तोऽर्थप्रयोजनमात्मानुसंधानंयस्यसः । मनीष्यपिउन्मत्तवत्बालवच्चकविरपिमूकवदात्मानंनृणांदृष्ट्यादर्शयेत् । यथायथो
न्मत्तादिरूपंतेमन्येरंस्तथावर्तेत । स्वदृष्ट्येतिपाठेबाह्यानुसंधानाभावेनेत्यर्थः १० परमहंसधर्ममेवेतिहासेनस्फुटयति । अत्रापीतियावदध्यायसमाप्ति । अजगरवृत्तस्यमुनेश्च ११ धरोपस्थेभूपृष्ठे । सह्या
द्रेस्तटेरजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलंतेजोयस्यतम् १२ १३ कर्मादिभिर्जनायंसोसावितिनासावितिवानिश्चयेननविदुःतंपादयोःशिरसास्पृशन्नत्वाऽप्राक्षीदित्युत्तरेणान्वयः १४ (विवित्सुर्जिज्ञा
सुरिदंपप्रच्छ) १५ उद्यमसहितइवभोगवानिवपीवानंस्थूलंदेहंधारयसि । तत्रहेतुंवदेतितृतीयेनान्वयः । उद्यमंविनैवममभोगोस्तीतिचेत्तत्राहवित्तंचेति । उद्यमवतोहि (कृषिवाणिज्याद्युद्यमवतांवित्तं
भवति) १६ नुइतिनिश्चये । हइतिप्रसिद्धौ । तवार्थोनास्तीतिप्रसिद्धमेवेत्यर्थः यतोर्थादेवभोगः । यतोहेतोःपीवा । क्षमंयोग्यंचेत् १७ किंच । वित्तार्जनासमर्थोप्ययंजनस्तदर्थमुद्यमंकरोतित्वंतुसमर्थो
पिकिमितिनकरोषीत्याहकविर्विद्वान्कल्पोदक्षःनिपुणदृक्चतुरःचित्राःप्रियालोकरंजनाःकथायस्यतथापि (समोरागद्वेषरहितःसन्) लोकस्यकर्मकुर्वतःसतःशेषे । तद्वीक्षितापिवातत्तुसर्वंपश्यन्नापि पाठांत
रेनद्वेक्षि(निंदसि) । नवानौषिस्तौषि १८ तस्यवागेवामृतंतेनयंत्रितोवशीकृतःसन् १९ अध्यात्मचक्षुषा अंतर्दृष्ट्याभवानिदंवेदैव । यतआर्याणां ज्ञानिनां संमतोनतुभवान् । इदमितियदुक्तंतदेवाह । नृणां
ईहोपरमयोः प्रवृत्तिनिवृत्त्योः पदानिस्थानानिफलानीत्यर्थः २०

॥५९॥

श्लोकाः १०/२०

अव्यक्तलिंगोव्यक्तार्थोमनीष्युन्मत्तबालवत् ॥ कविर्मूकवदात्मानंस्वंदृष्ट्यादर्शयेन्नृणाम् १० अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ प्रह्लादस्यचसं
वादंमुनेराजगरस्यच ११ तंशयानंधरोपस्थेकावेर्यांसह्यसानुनि ॥ रजस्वलैस्तनूदेशैर्निगूढामलतेजसम् १२ ददर्शलोकान्विचरन्लोकतत्त्वविवित्स
या ॥ वृतोऽमात्यैःकतिपयैःप्रह्लादोभगवत्प्रियः १३ कर्मणाऽऽकृतिभिर्वाचालिंगैर्वर्णाश्रमादिभिः ॥ नविदंतिजनायंवैसोसावितिनवेतिच १४ तंन
त्वाभ्यर्च्यविधिवत्पादयोःशिरसास्पृशन् ॥ विवित्सुरिदमप्राक्षीत्महाभागवतोऽसुरः १५ ॥ प्रह्लादउवाच ॥ बिभर्षिकायंपीवानंसोद्यमोभोगवा
न्यथा ॥ वित्तंचैवोद्यमवतांभोगोवित्तवतामिह ॥ भोगिनांखलुदेहोयंपीवाभवतिनान्यथा १६ नतेशयानस्यनिरुद्यमस्यब्रह्मन्नुहार्थोयतएवभोगः ॥
अभोगिनोयंतवविप्रदेहःपीवायतस्तद्वदनःक्षमंचेत् १७ कविःकल्पोनिपुणदृक्चित्रप्रियकथःसमः ॥ लोकस्यकुर्वतःकर्मशेषेतद्वीक्षितापिवा १८
॥ श्रीनारदउवाच ॥ सइत्थंदैत्यपतिनापरिपृष्टोमहामुनिः ॥ स्मयमानस्तमभ्याहतद्वागमृतयंत्रितः १९ ॥ ब्राह्मणउवाच ॥ वेदेदमसुरश्रेष्ठभवान्न
न्वार्यसंमतः ॥ ईहोपरमयोर्नृणांपदान्यध्यात्मचक्षुषा २०

चूर्णिका

अव्यक्तलिंगःसन्मत्तवत्बालवत्कविरपिमूकवत् आत्मानंनृणांदर्शयेत् १० अथपरमहंसधर्ममेवेतिहासेनस्फुटयति अत्राप्युदाहरंतीममितिहासंपुरातनम् प्रह्लादस्यचसंवादंमु
नेराजगरस्यच ११ एकदाप्रह्लादःकतिपयैःअमात्यैःवृतःलोकतत्त्वविवित्सयाविचरन्सन् कावेर्यांसह्यशिखरेशयानंनिगूढामलतेजसंमुनिंदृष्ट्वा १२ १३ यंकर्मणाआकृतिलिं
गवर्णाश्रमादिभिःजनाःनविदुः १४ तंमुनिंनत्वाजिज्ञासुःप्रह्लादःइदंपप्रच्छ १५ ॥ प्रह्लादउवाच ॥ हेब्रह्मन्सोद्यमःपुमान् यथापुष्टंदेहंबिभर्तितथात्वमपितत्रहेतुंवदउद्यम
वतांवित्तंतद्वतांभोगःभोगिनांदेहःपीवाभवति अन्यथान १६ अतः हेब्रह्मन्निरुद्यमस्यतवदेहःपीवाकथंएतत्योग्यंचेत्वद १७ १८ १९ ॥ ब्राह्मणउवाच ॥ हेअसुरश्रे
ष्ठत्वंप्रवृत्तिनिवृत्त्योःफलानिज्ञानचक्षुषावेद २०

॥५९॥

CC-0. In Public Domain. Digitization by eGangotri

वेदेत्यत्रहेतुः यस्येति । हृदिप्रविष्टःसन्नज्ञानंधुनोति । अर्कोयथाबहिर्ध्वांतं २१ यथाश्रुतमित्यौद्धत्यपरिहारायोक्तं २२ लोकःकर्मसुप्रवर्ततेत्वंनिवृत्तःसन्किंशेषे इतियदुक्तंतत्राह तृष्णयेतिचतुर्भिः । भवप्रवाहकारिण्यायथोचितैरपिविषयैःपूरयितुमशक्ययातृष्णयाकर्मसुप्रवर्त्यमानोहंपूर्वंनानायोनिषुप्रवेशितः २३ तयैवेमंलोकम् मनुष्यदेहम् यदृच्छयाप्रापितः। कथंभूतंलोकम् धर्मेणस्वर्गस्यद्वारंसाधनम् अधर्मेणतिरश्चांसूकरादियोनेर्द्वारम् । मिश्राभ्यामाभ्याम् पुनरप्यस्यमनुष्यस्यद्वारम् सर्वतोनिवृत्त्याअपवर्गस्यद्वारमित्यर्थः २४ अत्रापिमनुष्यत्वेपिअन्यापनुत्तयेदुःखनिवृत्तये । विपर्ययंदृष्ट्वानिवृत्तोस्मि २५ प्रवृत्त्याकदाचित्सुखंस्यादपि । निवृत्त्यातुकिंस्यादितिचेत्तत्राह । सुखमस्यजीवस्यस्वरूपमेव । तर्हिकिंनप्रकाशते । तत्राह । सर्वंतितनोतीतितनुः (प्रकाशिका) सर्वक्रियानिवृत्तौस्वतएवप्रकाशतइत्यर्थः । भोगांश्चमनःसंस्पर्शजान्मनोरथमात्रजान् अशाश्वतान् दृष्ट्वास्वप्स्यामिनिरुद्यमोस्मीत्यर्थः । तर्हिकदाचित्कथंभुंक्षेतत्राह संविशन्प्रारब्धभोगान् भुंजानइत्यर्थः २६ एवंचेत्कोपिसंसारंनप्राप्नुयात्तत्राह । इत्येतदात्मनःसुखात्मकंरूपंयत् एतद्रूपंस्वार्थं स्वस्मिन्नेवसंतम्पुरुषार्थंविस्मृत्यअसत्यपिद्वैते २७ एतदेवदृष्टांतेनस्पष्टयतिजलमिति तदुद्भवैःतृणशैवालादिभिःजलकाम्ययाजलेच्छयायथा तथास्वतआत्मस्वरूपादन्यत्र पुरुषार्थंपश्यन् (द्वैतमुपाधावतीत्यर्थः) २८ एवंस्वस्यनिरुद्यमत्वेकारणमुक्त्वा विपर्ययंदृष्ट्वेतियदुक्तं तद्विवृणोतिदेहादिभिरितिपंचभिः । ईहतइच्छतःअनीशस्यनिर्दैवस्य (कृताः कृताः) पुनःपुनःप्रारब्धाःक्रियामोघानिःफलाएवभवंति २९ क्रियाणांसफलत्वेपिफलस्यानुपयोगमाह ।आध्यात्मिकादिभिरिति । मर्त्यस्यमरिष्यतः कृच्छ्रेणदुःखेनोपनतैः प्राप्तैः (कामैर्विषयोपभोगैःसर्पग्रस्तस्यमंडूकस्यमक्षिकालाभेनेवकिंक्रियेत) ३० कृच्छ्रंविनैवप्राप्तेप्यर्थेदुःखंतदवस्थमित्याह । पश्यामीति ३१

श्लोकाः २१/३१

यस्यनारायणोदेवोभगवान्हृद्गतःसदा ॥ भक्त्याकेवलयाऽज्ञानंधुनोतिध्वांतमर्कवत् २१ अथापिब्रूमहेप्रश्नांस्तवराजन्यथा श्रुतम् ॥ संभाषणीयोहिभवानात्मनःशुद्धिमिच्छताम् २२ तृष्णयाभववाहिन्यायोग्यैःकामैरपूरया ॥ कर्माणिकार्यमाणोहंनानायोनिषुयोजितः २३ यदृच्छयालोकमिमंप्रापितःकर्मभिर्भ्रमन् ॥ स्वर्गापवर्गयोर्द्वारंतिरश्चांपुनरस्यच २४ अत्रापिदंपतीनांचसुखायान्यापनुत्तये ॥ कर्माणिकुर्वतांदृष्ट्वानिवृत्तोस्मिविपर्ययम् २५ सुखमस्यात्मनोरूपंसर्वेहोपरतिस्तनुः ॥ मनःसंस्पर्शजान्दृष्ट्वाभोगान्स्वप्स्यामिसंविशन् २६ इत्येतदात्मनःस्वार्थंसंतंविस्मृत्यवैपुमान् ॥ विचित्रामसतिद्वैतेघोरामाप्नोतिसंसृतिम् २७ जलंतदुद्भवैश्छन्नंहित्वाऽज्ञोजलकाम्यया ॥ मृगतृष्णामुपाधावेत्तथान्यत्रार्थदृक्स्वतः २८ देहादिभिर्दैवतंत्रैरात्मनःसुखमीहतः ॥ दुःखात्ययंचानीशस्यक्रियामोघाःकृताःकृताः २९ आध्यात्मिकादिभिर्दुःखैरविमुक्तस्यकर्हिचित् ॥ मर्त्यस्यकृच्छ्रोपनतैरर्थैःकामैःक्रियेतकिम् ३० पश्यामिधनिनांक्लेशंलुब्धानामजितात्मनाम् ॥ भयादलब्धनिद्राणांसर्वतोभिविशंकिनाम् ३१

चूर्णिका

यतःयस्यनारायणःहृद्गतःसन्अज्ञानंधुनोति २१ ध्वांतंअर्कइव अथापिहेदैत्यतवप्रश्नान्ब्रूमहे २२ २३ अहंनानायोनिषुभ्रमन् इमंमनुष्यदेहंस्वर्गापवर्गयोःद्वारंप्रापितः २४तत्रापिसुखायदुःखनिवृत्त्यैचकर्मकुर्वतांदंपतीनांविपर्ययंदृष्ट्वानिवृत्तोस्मि २५ भोगान् अशाश्वतान्दृष्ट्वानिरुद्यमोस्मि २६ एवं आत्मनःस्वार्थमविद्वान्पुमान् संसारंप्राप्नोति २७ २८ २९ ३० किंचभयात्अलब्धनिद्राणांधनिनांक्लेशंराजचोरादिभ्यःनित्यंभयंचपश्यामि ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयंप्रपंचयति राजतइति । स्वस्मात्स्वतएवकथंचित्त्यागभोगविस्मरणादिनानाशःस्यादिति । प्राणवतांअर्थवतांचभयंनित्यम् ३२ अतोऽनर्थहेतुत्वात्प्राणेचार्थेस्पृहानकार्येत्याह । शोकेति । (यात्प्रा
णार्थयोःस्पृहामूलंयेषांतेतथा) ३३ नन्वनर्थाननुभवंतोपिनकेचिद्विरज्यंतेनचयथालाभेनतुष्यंतित्वंतुकथंवैराग्यादिकंप्राप्तोसितत्राह । मधुकारोमधुमक्षिका । महासर्पोऽजगरस्तयोःशिक्षयावृत्तपर्यालो
चनया ३४ मधुकाराच्छिक्षितमाह । विरागइति । वित्तपतिंहत्वाप्यन्योवित्तंहरेदित्येवम् ३५ अजगराच्छिक्षितमाह । अनीहहाति । नोपनतंचेत्(शयेस्वपिमि)। सत्त्ववान्धैर्यवान् ३६ पीनत्वेहेतुत्वेन
यदृच्छयाप्राप्तात्परितोषंप्रपंचयातिक्वचिदल्पमितिषड्भिः । (भूरिगुणोपेतंसोपस्करमधुरादिरसोपेतंवा) ३७ (अथकस्मिंश्चिद्दिवाऽहनिअभुक्त्वायदृच्छयानक्तंभुंजे ।) ३८ चीरंजीर्णवस्त्रखंडम् । वसेप
रिदधे । दिष्टभुक्प्रारब्धभोगी ३९ प्रासादमध्येपर्यंकेतत्रापिकशिपौ ४० चरेविचरामि । क्वचिद्ग्रहवद्वेतालइवदिगंबरोविचरामि ४१ नचमानापमानकर्तृषुममवैषम्यमित्याह । नाहंनिंदामि । नस्तौमि
महात्मनिविष्णौ ४२ एवंभूतत्वेनास्थितावुपायमाह । विकल्पमितिद्वाभ्यां । चित्तौभेदग्राहकमनोवृत्तौतांचित्तिं अर्थरूपोविभ्रमोयस्मिन् । वैकारिकेऽहंकारे । अनुअनंतरम् महत्तत्त्वद्वारेणेत्यर्थः ४३ स
त्यमेवपश्यतीतितथा ४४ मंददृष्ट्यालोकशास्त्राभ्यांव्यपेतंनतुतत्त्वदृष्ट्या । हियतोभवान्भगवत्प्रियः ४५

श्लोकाः ३२/४५

राजतश्चोरतःशत्रोःस्वजनात्पशुपक्षितः ॥ अर्थिभ्यःकालतःस्वस्मान्नित्यंप्राणार्थवद्भयम् ३२ शोकमोहभयक्रोधरागक्लैब्यश्रमादयः ॥ यन्मूलाःस्यु
र्नृणांजह्यात्स्पृहांप्राणार्थयोर्बुधः ३३ मधुकारमहासर्पौलोकेस्मिन्नोगुरूत्तमौ ॥ वैराग्यंपरितोषंचप्राप्तायच्छिक्षयावयम् ३४ विरागःसर्वकामेभ्यःशि
क्षितोमेमधुव्रतात् ॥ कृच्छ्राप्तंमधुवद्वित्तंहत्वाप्यन्योहरेत्पतिम् ३५ अनीहःपरितुष्टात्मायदृच्छोपनतादहम् ॥ नोचेच्छयेबह्वहानिमहाहिरिवसत्त्ववा
न् ३६ क्वचिदल्पंक्वचिद्भूरिभुंजेऽन्नंसाध्वसाधुवा ॥ क्वचिद्भूरिगुणोपेतंगुणहीनमुतक्वचित् ३७ श्रद्धयोपहृतंक्वापिकदाचिन्मानवर्जितम् ॥ भुंजेऽभुक्त्वा
थकस्मिंश्चिद्दिवानक्तंयदृच्छया ३८ क्षौमंदुकूलमजिनंचीरंवल्कलमेववा ॥ वसेऽन्यदपिसंप्राप्तंदिष्टभुक्तुष्टधीरहम् ३९ क्वचिच्छयेधरोपस्थेतृणप
र्णाश्मभस्मसु ॥ क्वचित्प्रासादपर्यंकेकशिपौवापरेच्छया ४० क्वचित्स्नातोऽनुलिप्तांगःसुवासाःस्रग्व्यलंकृतः ॥ रथेभाश्वैश्चरेक्वापिदिग्वासाग्रहव
द्विभो ४१ नाहंनिंदेनचस्तौमिस्वभावविषमंजनम् ॥ एतेषांश्रेयआशासेउतैकात्म्यंमहात्मनि ४२ विकल्पंजुहुयाच्चित्तौतांमनस्यर्थविभ्रमे ॥ मनोवै
कारिकेहुत्वातंमायायांजुहोत्यनु ४३ आत्मानुभूतौतांमायांजुहुयात्सत्यदृङ्मुनिः ॥ ततोनिरीहोविरमेत्स्वानुभूत्यात्मनिस्थितः ४४ स्वात्मवृत्तंमये
त्थंतेसुगुप्तमपिवर्णितम् ॥ व्यपेतंलोकशास्त्राभ्यांभवान्हिभगवत्प्रियः ४५

चूर्णिका ॥६१॥

३२ नृणांशोकमोहभयक्रोधादयःअर्थमूलाःस्युःअतोबुधःअर्थेस्पृहांत्यजेत् ३३ अत्रलोकेनःमधुकरमहासर्पौद्वौगुरूत्तमौवयंययोःशिक्षयावैराग्यंपरितोषंचप्राप्ताः ३४ ३५ ३६
क्वचित्अल्पंभूरिप्राप्तंअन्नंभुंजे ३७ ३८ क्वचित्क्षौमंदुकूलंअजिनंचीरंवल्कलंवापरिदधे ३९ क्वचित्धरायांक्वचित्प्रासादपर्यंकेशये ४० क्वचित्अलंकृतःपरेच्छयारथेभाश्वैः
चरे ४१ स्वभावविषमंजनंअहंनानिंदेनचस्तौमिसर्वेषांश्रेयःआशासे ४२ ४३ ४४ एवंमयासुगुप्तमपिस्वात्मवृत्तंतुभ्यंवर्णितम् यतःभवान्भगवत्परः ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४६ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेटीकायांयतिधर्मेत्रयोदशोऽध्यायः १३ ॥ चतुर्दशेगृहस्थस्यपरमोधर्मईर्यते । देशकालादिभेदेनपुनःश्रेयोविशेषकृत् ॥१॥ गृहस्थधर्मापेक्षयामोक्षंप्रत्यंतरंगत्वेनप्र
थमंवनस्थयतिधर्मेष्वभिहितेषु तर्हिगृहस्थस्यमोक्षोनस्यादितिशंकितचित्तःपृच्छतिगृहस्थइति १ तस्यमोक्षधर्मानाहगृहेष्वित्यारभ्ययावदध्यायसमाप्ति । साक्षाद्वासुदेवार्पणम् यथाभवत्येवंकुर्वन्नुपासीत २
३ स्वयमेवमुच्यमानेषु वियुज्यमानेषु (आत्मादेहःआदिनागृहादयस्तेषु) यथाउत्थितःपुमान्स्वप्नदृष्टेषुपुत्रादिषुसंगंविमुंचतितद्वत् ४ नन्वेवंभूतस्यदुर्जनैरभिभूयमानस्यकुतोगृहोचिताःक्रियाःस्युस्तत्राह ।
यावदर्थमिति (यावत्प्रयोजनदेहादावुपासीनोऽवतिष्ठमानो) अंतरनासक्तोबहिस्त्वासक्तइवनृलोकेजनमध्येनरतांमानुष्यंन्यसेत्पुरुषकारमाविष्कुर्यादित्यर्थः ५ आग्रहंतुक्वापिनकुर्यादित्याह । ज्ञातयइ
ति । निर्ममोममताहीनः ६ नन्वेवंसर्वानुमोदनेवित्तक्षयप्रसंगात्कुतोजीवनंकुतोकर्मादितत्राह दिव्यंवृष्ट्यादिभिर्जातंधान्यादि ।भौमंनिधानादि । आंतरिक्षंअकस्मादेवप्राप्तम् एवंस्वतएवअच्युतनिर्मितंदै
वलब्धम् (यत्तत्सर्वमुपभुंजानःएतत्पूर्वोक्तंकर्मादि कुर्यात् । दैवाधीनंवित्तंनकथंचित्क्षय्यमित्यर्थः) ७ अधिकलाभेजातेपितत्राभिमानोनकार्यइत्याह । यावदिति भ्रियेतपूर्येत ८ अतएवकर्मापिस्वगृ
हंक्षेत्रवाप्रविश्यभुंजानंननिवारयेदित्याह । मृगेति । मर्कोमर्कटो (मार्जारोवा ।) सरीसृप्सर्पः । तैःपुत्रैःएषांमृगादीनांकियदंतरम् ९ अतिकृच्छ्रेणआपाद्यनभजेतर्किंतुयावद्दैवोपपादितंतावद्भजेत १०

॥ श्रीनारदउवाच ॥ ॥ धर्मंपारमहंस्यंवैमुनेःश्रुत्वाऽसुरेश्वरः ॥ पूजयित्वाततःप्रीतआमंत्र्यप्रययौगृहम् ४६ ॥ ॥ इतिश्रीभागवतेमहापुरा
णेसप्तमस्कंधेयतिधर्मेत्रयोदशोध्यायः १३ ॥ ॥ छ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ गृहस्थएतांपदवींविधिनायेनचांजसा ॥ यातिदेव
ऋषेब्रूहिमादृशोगृहमूढधीः १ ॥ श्रीनारदउवाच ॥ गृहेष्ववस्थितोराजन्क्रियाःकुर्वन्गृहोचिताः ॥ वासुदेवार्पणंसाक्षादुपासीतमहामुनीन् २
शृण्वन्भगवतोऽभीक्ष्णमवतारकथामृतम् ॥ श्रद्दधानोयथाकालमुपशांतजनावृतः ३ तत्संगाच्छनकैःसंगमात्मजायात्मजादिषु ॥ विमुंचेन्मुच्यमानेषुस्व
यंस्वप्नवदुत्थितः ४ यावदर्थमुपासीनोदेहेगेहेचपंडितः ॥ विरक्तोरक्तवत्तत्रनृलोकेनरतांन्यसेत् ५ ज्ञातयःपितरौपुत्राभ्रातरःसुहृदोऽपरे ॥ यद्वदंतिय
दिच्छंतिचानुमोदेतनिर्ममः ६ दिव्यंभौमंचांतरिक्षंवित्तमच्युतनिर्मितम् ॥ तत्सर्वमुपभुंजानएतत्कुर्यात्स्वतोबुधः ७ यावद्भ्रियेतजठरंतावत्स्वत्वंहिदे
हिनाम् ॥ अधिकंयोभिमन्येतसस्तेनोदंडमर्हति ८ मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः ॥ आत्मनःपुत्रवत्पश्येत्तैरेषामंतरंकियत् ९ त्रिवर्गंनाति
कृच्छ्रेणभजेतगृहमेध्यपि ॥ यथादेशंयथाकालंयावद्दैवोपपादितम् १०

॥ नारदउवाच ॥ असुरेश्वरःमुनेःपारमहंस्यंधर्मंश्रुत्वातंपूजयित्वाआज्ञांगृहीत्वागृहंययौ ४६ ॥ ॥ इतिसप्तमेत्रयोदशः१३ ॥ ॥ छ ॥ ॥ युधिष्ठिरउवाच ॥
हेदेवर्षेगृहस्थःयेनविधिनान्यासिनांएतांपदवींयातितंविधिंब्रूहि १ ॥ नारदउवाच ॥ गृहेषुएवस्थितःगृहोचिताःक्रियाः वासुदेवार्पणंयथातथाकुर्वन्मुनीन्उपासीत २ भगवतः
अवतारकथामृतंशृण्वन् ३ सत्संगात्आत्मजायात्मजादिषुसंगंत्यजेत् ४ गृहादिषुविरक्तःअनुरक्तवानिवस्थित्वायावतादेहादिभरणंतावत्स्वीकुर्यात् ५ अधिकंयोभिमन्येतसस्ते
नोदंडमर्हति ६ ७ ८ मृगादीन्प्राणिनःआत्मनःपुत्रवत्पश्येत् ९ त्रिवर्गंअतिकृच्छ्रेणनसेवेत १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्वानश्चअघाश्चपतिताःअंतेवसायिनश्चंडालादयस्तानभिव्याप्ययथायथार्हकामान्स्वभोग्यान्संविभजेत् विभज्यदद्यात् यद्यप्येकैवआत्मनोदाराभार्यायस्यामतिथिशुश्रूषणेनियुक्तायांस्वस्यशुश्रूषाहीयेत य
स्यांचनृणांभर्तृणांस्वत्वग्रहोममैवेयमित्याग्रहस्तामपिसंविभजेत् अतिथ्यादिशुश्रूषणेनियुंजीतेत्यर्थः नत्वन्यथामंतव्यंयथार्हसंविभजेदित्युक्तत्वात् ११ एवंचेत्तेनेश्वरोवशीकृतःस्यादित्याह । जह्यादिति । य
दर्थेयन्निमित्ते । अन्यैरजितोपीश्वरस्तैर्जितएव १२ कथमेवंतस्यांस्वत्वाभिमानोहातुंशक्यस्तत्त्वावधारणेनेत्याहक्रिमिविड्भस्मसुनिष्ठापर्यवसानमंतेयस्यतत्तदीयातदेहार्थारतिर्येस्यांसा । स्वमहिम्नानभोपिछा
दयतीतितथा १३ किंचसिद्धैर्दैवलब्धैर्यज्ञावशिष्टार्थैःपंचयज्ञशेषैरन्नादिभिरर्थैः महतांनिवृत्तानाम् १४ (एतद्विवृण्वन्नाह ।) देवानिति । पंचयज्ञदेवताआत्मानंचएवंपृथक्पयजन्पुरुषमंतर्यामिणमेवयजेत्
१५ (वितानोयज्ञविस्तारस्तत्रत्येनविधिनायदग्निहोत्रादिकर्मतेन) १६ नपुनरतिनिर्बंधोयज्ञार्थकार्यइत्याह । नह्यीति । विप्रमुखेहुतैरन्नादिभिर्यथाइज्येतपूज्येतनतथाअग्निमुखेहुतेनहविषाइज्येत १७
ब्राह्मणेषुदेवेषुचपंचयज्ञदेवतासुमर्त्यादिषुअन्येष्वपिनरेषुपश्वादिषुचक्षेत्रज्ञंअंतर्यामिणंब्राह्मणाननुमर्त्यादियजनेब्राह्मणयजमानंतरम्अन्येषुयजस्वेत्यर्थःपाठांतरेब्राह्मणाआनंतर्यस्यतम् १८ प्रौष्ठपदेभाद्रपदे
(तद्बंधूनांमातामहादीनाम्) १९ (अयनेकर्कमकरसंक्रमणेविषुवेतुलामेपसंक्रमणे । कुह्वांअमावास्यायाम्) २० तृतीयायांअक्षयतृतीयायामित्यर्थः हेमंतेशिशिरेचमार्गशीर्षादिमासचतुष्टयेपिकृष्णपक्षेयाः
सप्तम्यादितिथित्रयरूपाश्चतस्रोऽष्टकास्तासु २१ संपूर्णचंद्रापौर्णमासीराका । न्यूनचंद्रासैवानुमतिः । तयामासर्क्षाणितत्तन्मासनामप्रवृत्तिनिमित्तभूतानिनक्षत्राणियुतानियदास्युस्तदापि । तदुक्तंत्रिकां
डचां । " पुष्ययुक्तापौर्णमासीपौषीमासेतुयत्रसा । नाम्नासपौषोमाघाद्याश्चैवमेकादशापर " इति २२

॥६३॥ श्लोकाः ११/२२

आश्वाघांतेवसायिभ्यःकामान्संविभजेद्यथा ॥ अप्येकामात्मनोदारांनृणांस्वत्वग्रहोयतः ११ जह्याद्यदर्थेस्वप्राणान्हन्याद्वापितरंगुरुम् ॥ तस्यांस्वत्वं
स्त्रियांजह्याद्यस्तेनह्यजितोजितः १२ क्रिमिविड्भस्मनिष्ठांतंक्वेदंतुच्छंकलेवरम् ॥क्वतदीयरतिर्भार्याक्वायमात्मानभश्छदिः १३ सिद्धैर्यज्ञावशिष्टार्थैःकल्पये
द्वृत्तिमात्मनः ॥ शेषेस्वत्वंत्यजन्प्राज्ञःपदवींमहतामियात् १४ देवानृषीन्नृभूतानिपितृनात्मानमन्वहम् ॥ स्ववृत्त्यागतवित्तेनयजेतपुरुषंपृथक् १५
यर्ह्यात्मनोऽधिकाराद्याःसर्वाःस्युर्यज्ञसंपदः ॥ वैतानिकेनविधिनाअग्निहोत्रादिनायजेत् १६ नह्यग्निमुखतोऽयंवैभगवान्सर्वयज्ञभुक् ॥ इज्येतहविषाराज
न्यथाविप्रमुखेहुतैः १७ तस्माद्ब्राह्मणदेवेषुमर्त्यादिषुयथार्हतः ॥ तैस्तैःकामैर्यजस्वैनंक्षेत्रज्ञंब्राह्मणाननु १८ कुर्यादापरपक्षीयंमासिप्रौष्ठपदेद्विजः ॥
श्राद्धंपित्रोर्यथावित्तंतद्बंधूनांचवित्तवान् १९ अयनेविषुवेकुह्वांव्यतीपातेदिनक्षये ॥ चंद्रादित्योपरागेचद्वादश्यांश्रवणेषुच २० तृतीयायांशुक्लपक्षेनवम्या
मथकार्तिके ॥ चतसृष्वप्यष्टकासुहेमंतेशिशिरेतथा २१ माघेचसितसप्तम्यांमघाराकासमागमे ॥ राकयाचानुमत्यावामासर्क्षाणियुतान्यपि २२

चूर्णिका

आश्वचांडालादिभ्यःस्वभोज्यात्विभज्यदद्यात्एकामपिस्वस्त्रियंअतिथिसेवनेयुंजीत ११ यस्यांनृणांस्वत्वंगृहःयन्निमित्तंस्वप्राणान्जह्यात्पितरंगुरुंहन्यात्यस्यांस्त्रियांयःस्वत्वं
त्यजेत्तेनअजितोजितएव १२ १३ प्राज्ञःपंचयज्ञशेषैःअन्नादिभिः स्ववृत्तिंकल्पयेत्शेषेस्वत्वंत्यजन्महतांपदवीमियात् १४ स्ववृत्त्याप्राप्तवित्तेनअन्वहंदेवादीन्यजेत् १५
यदास्वस्ययज्ञसंपदः स्युःतदाअग्निहोत्रादिनायजेत् १६ किंच विप्रमुखेहुतैःयथाभगवान्इज्येततथाअग्नौन १७ अतःब्राह्मणादिषुअंतर्यामिणंयजस्व १८ द्विजःभाद्रेआपरप
क्षिकंश्राद्धंकुर्यात् १९ अयनविषुवव्यतीपातदिनक्षयचंद्रसूर्यग्रहेषुअक्षय्यतृतीयायांकार्तिकसितनवम्यांअष्टकासुमाघसितसप्तम्यांचश्राद्धादिकुर्यात् २० २१ २२

॥६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तथाअनुराधाश्रवणउत्तराफल्गुनीउत्तराषाढाउत्तराभाद्रपदावाद्वादश्यांयदास्यात् । आसूत्तरासुएकादशीवायदास्यात्तदाच । जन्मर्क्षश्रोणयोगयुक् । जन्मनक्षत्रस्यश्रवणस्यवायोगेनयुक्तंदिनंयदा ।
योगग्रहणंसंबंधबाहुल्यार्थम् २३ नकेवलंश्राद्धस्यैवैतेकालाःकिंतुधर्ममात्रस्येत्याह । तएतइतिद्वाभ्यां । (एतेषुश्रेयःकुर्यात्तदेवआयुषः) अमोघंसार्थकंसाफल्यमित्यर्थः २४ २५ जायायाःसंस्कारःपुंस
वनादि :अपत्यस्यजातकर्मादिः आत्मनोयज्ञदीक्षादिः । (तस्यकालः) प्रेतस्यसंस्थादहनादिः । मृताहश्चसांवत्सरिकंश्राद्धंयदा । अन्यस्मिन्नपिअभ्युदयार्थेकर्मणिश्रेयःकुर्यादित्यनुषंगः २६ यत्रयस्मि
न्सर्वमेतच्चराचरमस्तितस्यभगवतोबिंबरूपंसत्पात्रंयत्रलभ्यतेसवैपुण्यतमोदेशः २७ २८ अर्हैरुत्तमैराश्रितानि २९ ३० सीतायारामस्यचआश्रमआदिर्येषां द्वयोः पृथक्ग्रहणंवियोगकालाभिप्रायेण ।
३१ अर्चाश्रिताःस्थिरप्रतिमाश्रिताःपूर्वंतुशालग्रामशिलाद्यर्चनदेशउक्तइत्यपौनरुक्त्यम् ३२ अत्रएषुईहितःकृतःइतरदेशापेक्षयासहस्रगुणस्याधिकस्यफलस्योदयोयस्मात्सतथा ३३ हरिरेवपात्रंनिरुक्तंनिर्णी
तम् ३४ तदेवाह । देवेषुचऋषिषुचअर्हत्सुचतपोयोगादिसिद्धेषुब्रह्मात्मजादिषुसनकादिष्वपिसत्सुतत्रत्वदीयेराजसूयेयद्यस्मादच्युतएवपात्रतयासंमतः ३५ संमतत्वेहेतुमाह । जीवराशिभिर्व्याप्तोब्रह्मां
डकोशएववयोंघ्रिपः । (तस्यमूलत्वात्) सर्वजीवानामात्मनश्चतर्पणम् ३६

॥६४॥ श्लोकाः २३/३६

द्वादश्यामनुराधास्याच्छ्रवणस्तिस्रउत्तराः ॥ तिसृष्वेकादशीवासुजन्मर्क्षश्रोणयोगयुक् २३ तएतेश्रेयसःकालानृणांश्रेयोविवर्द्धनाः ॥ कुर्यात्सर्वात्मनैते
षुश्रेयोऽमोघंतदायुषः २४ एषुदानंजपोहोमोव्रतंदेवद्विजार्चनम् ॥ पितृदेवनृभूतेभ्योयद्दत्तंतद्ध्यनश्वरम् २५ संस्कारकालोजायायाअपत्यस्यात्मनस्त
था ॥ प्रेतसंस्थामृताहश्चकर्मण्यभ्युदयेनृप २६ अथदेशान्प्रवक्ष्यामिधर्मादिश्रेयआवहान् ॥ सवैपुण्यतमोदेशःसत्पात्रंयत्रलभ्यते ॥ बिंबंभगवतोयत्रस
र्वमेतच्चराचरम् २७ यत्रहब्राह्मणकुलंतपोविद्यादयान्वितम् ॥ यत्रयत्रहरेरर्चासदेशःश्रेयसांपदम् २८ यत्रगंगादयोनद्यःपुराणेषुचविश्रुताः ॥ सरांसि
पुष्करादीनिक्षेत्राण्यर्हाश्रितान्युत २९ कुरुक्षेत्रंगयशिरःप्रयागःपुलहाश्रमः ॥ नैमिषंफाल्गुनंसेतुःप्रभासोथकुशस्थली ३० वाराणसीमधुपुरीपंपाबिं
दुसरस्तथा ॥ नारायणाश्रमोनंदासीतारामाश्रमादयः ३१ सर्वेकुलाचलाराजन्महेंद्रमलयादयः ॥ एतेपुण्यतमादेशाहरेरर्चाश्रिताश्चये ३२ एतान्दे
शान्निषेवेतश्रेयस्कामोह्यभीक्ष्णशः ॥ धर्मोह्यत्रेहितःपुंसांसहस्राधिफलोदयः ३३ पात्रंतत्रनिरुक्तंवैकविभिःपात्रवित्तमैः ॥ हरिरेवैकउर्वीशयन्मयंवैचरा
चरम् ३४ देवर्ष्यर्हत्सुवैसत्सुतत्रब्रह्मात्मजादिषु ॥ राजन्यदग्रपूजायांमतःपात्रतयाच्युतः ३५ जीवराशिभिराकीर्णआंडकोशांघ्रिपोमहान् ॥ तन्मूल
त्वादच्युतेज्यासर्वजीवात्मतर्पणम् ३६

चूर्णिका ॥६४॥

२३ एतेकालाःनृणांश्रेयोविवर्द्धनाः एषुश्रेयः कुर्यात् तदेव आयुषः साफल्यम् २४ किंच एषुयत्कृतंदानहोमजपादितत् अक्षय्यं भवति २५ २६ अथपुण्यदेशान्वक्ष्यामि सवै
पुण्यतमोदेशः सत्पात्रंयत्रलभ्यते २७ २८ किंच यत्र हरेः अर्चागंगाद्याःनद्यश्चसः देशः श्रेयसांपदम् २९ यत्रपुष्करादीनिसरांसि तथाकुरुक्षेत्रगयाप्रयागपुलहाश्रमाः ३० नै
मिषप्रभासकुशस्थलीवाराणसीमथुरापंपाबिंदुसरः ३१ नारायणाश्रमनंदासीतारामाश्रमादयः सर्वेकुलाचलाःमहेंद्रमलयादयः ३२ एतेयत्रसंतितेपुण्यतमाःदेशाःपुण्येच्छुः
एतान् सेवेत ३३ हे राजन् सर्वेषुहरिरेवएकंपात्रम् अच्युतेज्यासर्वेषांतर्पणंभवति ३५ ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.स. अ० ||१४|| ||६५||

टीका

एतदेवरूपनामनिरुक्त्याद्दढयति । पुराणीति । नृतिर्यगादिरूपाणिपुराणिशरीराणितेष्वंतर्यामिरूपेणप्रत्यगंशेनचयतःशेतेअतःपुरुषइतिप्रसिद्धम् ३७ तारतम्येनतिर्यगादिभ्यःपुरुषोयस्मादाधिक्ये नवर्ततेतस्मात्पुरुषःपात्रं । तत्रापियावानात्मायथेयतेयावान्ज्ञानांशोयथायथातपआदियोगेनयत्रयत्रप्रतीयतेतथातथासौपात्रमित्यर्थः । तथाचश्रुतिः । 'पुरुषत्वेचाविस्तरामात्मे' त्यादि ३८ तर्हिप्राति मादौहरेःपूजांकिमितिकुर्वंतितत्राह । दृष्ट्वेतिद्वाभ्यां । मिथोऽवज्ञानमसंमानस्तस्मिन्नात्माबुद्धिर्येषांतेषांभावंदृष्ट्वाक्रियायैपूजाद्यर्थम् ३९ हरिमुपासते । उपासिताप्यर्चापुरुषद्वेषिणामर्थदानभवति । पुरुषे षुद्वेषंहित्वाऽर्चितासतीसापिमंदाधिकारिणांपुरुषार्थप्रदाभवत्येवेत्यर्थः ४० पुरुषेष्ववजात्यातपआदिभिश्चपुनर्विशेषांतरमाह । पुरुषेष्वपीति । योधत्तेतंसुपात्रंविदुः ४१ एतदेवकैमुत्यन्यायेनद्रढयति । नन्वस्येति (त्रिलोकींपुनंतः) ४२ ॥ इतिश्रीभागवतेमहापुराणेसप्त०चतुर्दशोध्यायः १४ ॥ ७ ॥ ततःपंचदशेसर्ववर्णाश्रमनिबंधनम् ॥ सारतःसंग्रहेणाथवर्ण्यतेमोक्षलक्षणम् १ सर्वेषामपिमोक्षधर्माणांसा रसंग्रहार्थमध्यायारंभः । तत्रश्राद्धगतान्विशेषानाह । कर्मनिष्ठाइति । स्वाध्यायादिषुपरिनिष्ठिताइतिशेषः । (प्रवचनेअध्यापने) १ कव्यानिपितॄनुद्दिश्यदेयानि । दैवेचहव्यान्यपितस्मैदेयानि । यथार्ह तइतिसर्वत्रज्ञानादितारतम्येन २ ३ (द्रव्यंअन्नादि । अर्हणंपूजनं) ननुविस्तरःकुतःप्राप्तःयेननिषिध्यतेतत्राह । स्वजनानामर्पणात् जामाताचेन्निमंत्र्यतेतात्पित्रादयःकथंवर्ज्याइत्येवंप्राप्ताद्विस्तरादित्यर्थः (अतस्तद्दाक्षिण्येनदेशकालादिसंकोचान्नैतानिसम्यग्भवंतीतिभावः ।) ४ मुन्यन्नंअरण्यव्रीह्यादि । हरिदैवतंहरयेनिवेदितंसदित्यर्थः । (अक्षयंभवतीतिशेषः) ५ तद्देवादिपुरुषात्मकंईश्वररूपम् ६

श्लोकाः ३७/६

पुराण्यनेनसृष्टानिनृतिर्यगृषिदेवताः ॥ शेतेजीवेनरूपेणपुरेषुपुरुषोह्यसौ ३७ तेष्वेषुभगवान्राजन्तारतम्येनवर्तते ॥ तस्मात्पात्रंहिपुरुषोयावानात्माय थेयते ३८ दृष्ट्वातेषांमिथोनृणामवज्ञानात्मतांनृप ॥ त्रेतादिषुहरेरर्चाक्रियायैकविभिःकृता ३९ ततोऽर्चायांहरिंकेचित्संश्रद्धायसपर्यया ॥ उपासतेउपा स्तापिनार्थदापुरुषद्विषाम् ४० पुरुषेष्वपिराजेंद्रसुपात्रंब्राह्मणंविदुः ॥ तपसाविद्ययातुष्ट्याधत्तेवेदंहरेस्तनुम् ४१ नन्वस्यब्राह्मणाराजन्कृष्णस्यजग दात्मनः ॥ पुनंतःपादरजसात्रिलोकींदैवतंमहत् ४२ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेचतुर्दशोऽध्यायः १४ ॥ ॥ ७ ॥ ॥ ७ ॥
॥ श्रीनारदउवाच ॥ कर्मनिष्ठाद्विजाःकेचित्तपोनिष्ठानृपापरे ॥ स्वाध्यायेऽन्येप्रवचनेकेचिज्ज्ञानयोगयोः १ ज्ञाननिष्ठायदेयानिकव्यान्यानंत्यमिच्छ ता ॥ दैवेचतदभावेस्यादितरेभ्योयथार्हतः २ द्वौदैवेपितृकार्येत्रीनेकैकमुभयत्रवा ॥ भोजयेत्सुसमृद्धोपिश्राद्धेकुर्यान्नविस्तरम् ३ देशकालोचितश्रद्धाद्र व्यपात्रार्हणानिच ॥ सम्यग्भवंतिनैतानिविस्तरात्स्वजनार्पणात् ४ देशेकालेचसंप्राप्तेमुन्यन्नंहरिदैवतम् ॥ श्रद्धयाविधिवत्पात्रेन्यस्तंकामधुगक्षयम् ५ देवर्षिपितृभूतेभ्यआत्मनेस्वजनायच ॥ अन्नंसंविभजन्पश्येत्सर्वंतत्पुरुषात्मकम् ६

चूर्णिका ||६५||

भगवान्तिर्यगादिपूर्षु अंतर्यामितयाशेते अतः पुरुषइतिप्रसिद्धः ३७ सर्वेषुप्राणिषुभगवान्तारतम्येनवर्तते अतःपुरुषः सत्पात्रं ३८ तत्रापिब्राह्मणंसुपात्रंविदुःयतःतपआदि ना सः हरेस्तनुंवेदंधत्ते ३९ ४० ४१ एवंभूताःद्विजाःपादरजसात्रिलोकींपुनंतःएतेकृष्णस्यमहद्दैवतम् ४२ इतिसप्तमेचतुर्दशः १४ ॥ नारदउवाच ॥ केचिद्द्विजाःकर्मनि ष्ठाः अपरेतपोनिष्ठाः स्वाध्यायेअन्येप्रवचनेयेकेचित् ज्ञानयोगयोः १ तत्रकव्यानिज्ञाननिष्ठायदेयानि तथाहव्यान्यपि २ द्वौदेवेपितृकार्येत्रीन्एकैकमुभयत्रवाभोजयेत् सुस मृद्धोपिश्राद्धेकुर्यान्नविस्तरम् ३ देशेकालेचप्राप्तेहरेःअर्पणेनअन्नंविभजन् सर्वंईश्वररूपंपश्येत् ४ ५ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

७ (धर्मतत्त्वमेवाह) दंडस्यन्यासःहिंसायास्त्यागोयः एतादृशोऽन्योधर्मोनास्ति ८ अतएवोत्तमाधिकारिणोबाह्यानिकर्माणित्यजंतीत्याह । एकइति। अनीहानिष्कामाज्ञानदीपितेआत्मस्फूर्तिमतिआत्मसंयमने (मनसः संयमे) जुह्वतिमनोनियम्यतदंतरायतयात्यजंतीत्यर्थः तदुक्तम् सर्वज्ञसूक्तैः । ' प्रत्यक्स्फूर्तिरसंस्फूर्तिस्तनुनिष्ठाविघातकम् । संलक्ष्यसंत्यजेत्कर्मत्यजान्विघ्नहतोन्यथे ' ति ९ मामांएषःध्रुवंहन्यादिति । कुतःअकरुणःतत्कुतःअसुतृप्प्राणतर्पकःतत्किंअतज्ज्ञःआत्मतत्त्वानभिज्ञः तथाचश्रुतिः । 'नतंविदाथयइमाजजानान्यद्युष्माकंमंतरंबभूव । नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंति'इति १० प्रस्तुतमनुवर्तयतितस्मादिति । (दैवोपपन्नेनअनायासप्राप्तेन) ११ अधर्मवत्साक्षान्निषिद्धवत् १२ क्रममनादृत्यपंचापिस्वयंव्याचष्टे (सार्धेन) धर्मबाधोधर्मबुद्ध्यापियस्मिन्क्रियमाणे स्वधर्मबाधः । (यथाशीतज्वरेस्नानादि) अन्यस्यचोदितोऽन्यस्यपरधर्मः । उपमेतिव्याचष्टे । उपधर्मस्त्विति । (दंभोदंभेनक्रियमाणःसचोपधर्मः) शब्दस्यभित्भेदःअन्यथाव्याख्यानंयस्मिन् यथा दशावरान् भोजयेदित्युक्तेदशभ्योऽवरानितिनतुदशावरायेभ्यइति । शब्दभृदितिपाठेधर्मशब्दमात्रंबिभर्तीतितथायथागांदद्यादित्युक्तेमरिष्यंत्यागोदानम् १३ (आश्रमात्पृथक्आश्रमंविना) स्वधर्मानुष्ठानानंतरंधर्मभूयस्त्वार्थमपिपरधर्मोनानुष्ठेयःअनुपयोगादित्याह । स्वभावविहितइति । स्ववर्णाश्रमविहितः १४ किंच । अधनोधर्मार्थमपिधनंनेहेतनापेक्षेत । धनार्थंनव्याप्रियेतेतिवा । दैवोपपन्नेनैवस्वधर्मसिद्धेरुक्तत्वात् । यात्रार्थवादेहादिनिर्वाहार्थमपिनेहेतेत्येतत्प्रपंचयतिअनीहेतिसार्धैःषड्भिः (महाहेरजगरस्येव) १५ (कामलोभेनकामभोगेच्छयायाऽर्थेहातयादिशोधावतः) १६

श्लोकाः ७/१६

नदद्यादामिषंश्राद्धेनचाद्याद्धर्मतत्त्ववित् ॥ मुन्यन्नैःस्यात्सदाप्रीतिर्यथानपशुहिंसया ७ नैतादृशोऽपरोधर्मोनृणांसद्धर्ममिच्छताम् ॥ न्यासोदंडस्यभूतेषुमनोवाक्कायजस्ययः ८ एकेकर्ममयान्यज्ञान्ज्ञानिनोयज्ञवित्तमाः ॥ आत्मसंयमनेऽनीहाजुह्वतिज्ञानदीपिते ९ द्रव्ययज्ञैर्यक्ष्यमाणंदृष्ट्वाभूतानिबिभ्यति ॥ एषमाकरुणोहन्यादतज्ज्ञोह्यसुतृप्ध्रुवम् १० तस्माद्दैवोपपन्नेनमुन्यन्नेनापिधर्मवित् ॥ संतुष्टोऽहरहःकुर्यान्नित्यनैमित्तिकाःक्रियाः ११ विधर्मःपरधर्मश्चआभासउपमाछलः ॥ अधर्मशाखापंचेमाधर्मज्ञोऽधर्मवत्त्यजेत् १२ धर्मबाधोविधर्मःस्यात्परधर्मोऽन्यचोदितः ॥ उपधर्मस्तुपाखंडोदंभोवाशब्दभिच्छलः १३ यस्त्विच्छयाकृतःपुंभिराभासोह्याश्रमात्पृथक् ॥ स्वभावविहितोधर्मःकस्यनेष्टःप्रशांतये १४ धर्मार्थमपिनेहेतयात्रार्थंवाऽधनोधनम् ॥ अनीहानीहमानस्यमहाहेरिववृत्तिदा १५ संतुष्टस्यनिरीहस्यस्वात्मारामस्ययत्सुखम् ॥ कुतस्तत्कामलोभेनधावतोऽर्थेहयादिशः १६

चूर्णिका

किंचधर्मज्ञः श्राद्धेआमिषंनदद्यात् स्वयंचनाद्यात् यथामुन्यन्नैः हरेः प्रीतिः स्यात् तथापशुहिंसयान ७ किंच नृणांभूतहिंसात्यागसदृशः अन्योधर्मोनास्ति ८ अतः ज्ञानिनः मनोनियम्यकर्ममयान्त्यजंति ९ किंचद्रव्ययज्ञैर्यक्ष्यमाणंनरंदृष्ट्वाभूतानिबिभ्यति १० अतः दैवप्राप्तेनमुन्यन्नेनतुष्टःसन्नित्यनैमित्तिकाःक्रियाः कुर्यात् ११ किंच धर्मः १ परधर्मः २ आभासः ३ उपधर्मः ४ छलः इमाः पंच अधर्मशाखाः धर्मज्ञः त्यजेत् १२ आसांअर्थमाहधर्मबाधः १ अन्यस्योक्तः २ इच्छयाकृतः ३ पाखंडः ४ शब्दभेदः ५ १३ १४ किंच स्वयंअधनः धर्मार्थंयात्रार्थंवाधनंनापेक्षेत निरिच्छस्यनिरीहामहाहिरिववृत्तिदाभवति १५ संतुष्टस्ययत्सुखंतत्लोभेनधावतः कुतः १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपानहौपादयोर्यस्यसउपानत्पत्तस्य १७ गृहपालःश्वातद्वदाचरति १८ (अवकीर्यतेनश्यति) १९ जनःक्षुधातृषाचकामस्यांतंयाति । अन्नोदकातिरिक्तकामपोषकाभावात् । स्मृतिश्च । विषयावि
निवर्ततेनिराहारस्यदेहिनइति । क्रोधस्यचांतंयाति । एतस्यक्रोधस्ययत्फलंहिंसातस्योदयान्निष्पत्तेः । दिशोजित्वापिभुवोभुक्त्वापिलोभस्यनैवांतंयातीत्यर्थः २० २१ इदानींकामादिजयोपायानाह ।
असंकल्पादितिचतुर्भिः । जयेदितियथापेक्षमन्वेति । (असंकल्पाद्विषयसंकल्पाभावेन । कारणनाशेकार्यनाशइत्यर्थः) अर्थेऽनर्थदर्शनेनलोभंजयेत् । तत्त्वावमर्शनात्अद्वैतानुसंधानेन २२ आन्वीक्षि
क्याआत्मानात्मविवेकेन । महतांसात्त्विकानाम् (उपासया) सेवया । योगस्यांतरायान्लोकवार्तादीन् । कायाद्यनीहयास्वदेहाद्यनभिमानेनेत्यर्थः २३ येभ्योभूतेभ्योदुःखंजायेततेष्वेवकृपयाहि
ताचरणेन । दैवंदेवोपसर्गनिमित्तंमनःपीडादिविमनाविफलारंभःसंसीदत्यनिमित्ततइति । आत्मजंदेहजंयोगवीर्येणप्राणायामादिबलेन । सत्त्वनिषेवयासात्त्विकाहारादिना २४ २५ ननुकथंगुरोर्भक्त्या
सर्वस्यजयःस्यात् । तस्यापिमनुष्यत्वेनतदवस्थत्वात् । तत्राह यस्येति । मर्त्यासद्धीःमनुष्यइतिदुष्टाबुद्धिःतस्यशास्त्रश्रवणंकुंजरस्नानवद्व्यर्थं २६ ननुगुरोःपितृपुत्रादयस्तेतंनरमेवमन्यंतेअतआह । एषगु
रुःसाक्षाद्भगवानेव । लोकस्यनरोसावितिबुद्धिर्भ्रांतिरित्यर्थः । यद्वा । नहितत्पित्रादेर्मनुष्यत्वबुद्ध्याप्रतीयमानोपिगुरुर्भगवान्नभवेत् । यथैषश्रीकृष्णइत्यर्थः २७ एवंसर्वैरुपायैःकामादिवेगंजित्वानियतें
द्रियोभूत्वाध्यानपरोभवेत् । अन्यथातंप्रतिसर्वशास्त्रवैफल्यंस्यादित्याहषड्वर्गेति । सर्वाअपिनियमचोदनाइष्टापूर्तादिविधयःषडिंद्रियवर्गस्ययःसंयमस्तस्मिन्नंतोयासांतदेकपराइत्यर्थः नचतावतापिचरि
तार्थाइत्याह । तदंताःसत्योपियदियोगान् धारणाध्यानसमाधीन्नोआवहेयुःनसाधयेयुःतर्हिकेवलंश्रमावहाएवेत्यर्थः २८

॥६७॥

श्लोकाः १७/२८

सदासंतुष्टमनसःसर्वाःशिवमयादिशः ॥ शर्कराकंटकादिभ्योयथोपानत्पदःशिवम् १७ संतुष्टःकेनवाराजन्नवर्ततापिवारिणा ॥ औपस्थ्यजैह्व्यका
र्पण्याद्गृहपालायतेजनः १८ असंतुष्टस्यविप्रस्यतेजोविद्यातपोयशः ॥ स्रवंतींद्रियलौल्येनज्ञानंचैवावकीर्यते १९ कामस्यांतंचक्षुत्तृड्भ्यांक्रोधस्यैतत्फलो
दयात् ॥ जनोयातिनलोभस्यजित्वाभुक्त्वादिशोभुवः २० पंडिताबहवोराजन्बहुज्ञाःसंशयच्छिदः ॥ सदसस्पतयोप्येकेअसंतोषात्पतंत्यधः २१ अ
संकल्पाज्जयेत्कामंक्रोधंकामविवर्जनात् ॥ अर्थानर्थेक्षयालोभंभयंतत्त्वावमर्शनात् २२ आन्वीक्षिक्याशोकमोहौदंभंमहदुपासया ॥ योगांतरायान्मौ
नेनहिंसांकायाद्यनीहया २३ कृपयाभूतजंदुःखंदैवंजह्यात्समाधिना ॥ आत्मजंयोगवीर्येणनिद्रांसत्त्वनिषेवया २४ रजस्तमश्चसत्त्वेनसत्त्वंचोपशमेनच ॥
एतत्सर्वंगुरोर्भक्त्यापुरुषोह्यंजसाजयेत् २५ यस्यसाक्षाद्भगवतिज्ञानदीपप्रदेगुरौ ॥ मर्त्यासद्धीःश्रुतंतस्यसर्वंकुंजरशौचवत् २६ एषवैभगवान्साक्षात्प्रधा
नपुरुषेश्वरः ॥ योगेश्वरैर्विमृग्यांघ्रिर्लोकोवैमन्यतेनरम् २७ षड्वर्गसंयमैकांताःसर्वानियमचोदनाः ॥ तदंतायदिनोयोगानावहेयुःश्रमावहाः २८

चूर्णिका

सदासंतुष्टमनसः सर्वाः दिशाः सुखदाः यथाशर्कराकंटकादिभ्यः उपानत्पदः शिवं १७ १८ असंतुष्टस्यविप्रस्यतेजोविद्यादयः इंद्रियलौल्येनस्रवंति १९ जनः
क्षुत्तृड्भ्यांकामस्यअंतंयातिक्रोधफलेनक्रोधस्य अंतंयातितथापिदिशोजित्वाभुवंभुक्त्वालोभस्यअंतंनयाति २० अथकामादिजयोपायानाह २१ असंकल्पात्कामंजयेत् काम
त्यागात्क्रोधंअर्थेअनर्थदर्शनेनलोभं एवंभयशोकमोहादीन् जयेत् २२ २३२४ सत्त्वेनरजःतमश्च सत्त्वनिषेवयानिद्राम् उपशमेनसत्त्वम् एतत्सर्वंगुरौभक्त्यापुरुषोजयेत् २५
ज्ञानप्रदेगुरौयस्यमनुष्यइतिबुद्धिःतस्यशास्त्रश्रवणंव्यर्थम् २६ एवंकामादिवेगंजित्वाध्यानपरोभवेत् २७ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतदेवदृष्टांतेनाह । यथावार्तादयःकृष्यादयःअर्थाःतत्फलानिचयोगस्यार्थंनबिभ्रतिमोक्षंनसाधयंतिप्रत्युतअनर्थायसंसारायैवतेभवेयुः । असतोबहिर्मुखस्येष्टापूर्तांचापितथा २९ एवंयोगंयुंजतोऽपियस्यकु
टुंबासंगेनचित्तंविक्षिप्येततस्यकृत्यमाह । यःचित्तस्यविजयेयत्तउद्युक्तःसभिक्षुःस्यात्संन्यसेत् । तथाचस्मृतिः । ' द्वंद्वाहतस्यगार्हस्थ्यंध्यानभंगादिकारणम् । क्षपयित्वागृहीस्पष्टंसंन्यसेदविचारय " न्नि
ति । भिक्षयाप्राप्तंमितमशनंयस्य ३० ऋजुसममंगंयस्यसऋज्वंगः । सुखंयथाभवत्येवमासीत ॐमित्युच्चारयन्नितिशेषः ३१ ३२ ३३ एवमनिशमभ्यसतस्तस्ययतेश्चित्तंनिर्वाणंशांतिंयाति ३४ नचपु
॥६८॥ नर्विक्षिप्येतेत्याह । कामादिभिरक्षुभितंयच्चित्तंतन्नोत्तिष्ठेत् यतःप्रशांताअखिलावृत्तयोयस्य । कुतः ब्रह्मसुखेनस्पृष्टं ३५ यस्तुप्रव्रज्यांकृत्वापिभोगमभिलिप्सुस्तंनिंदति । (यइति) त्रयाणांधर्मादीनांवर्ग
आसमंतादुप्यतेयस्मिंस्तत्त्रिवर्गावपनंतस्माद्गृहात्पूर्वंप्रव्रज्य । तान्धर्मादीन् । वांताशीछर्दितभोजी । निर्लज्जश्चसः ३६ नचेदमर्घटितंदृष्टत्वादित्याह । यैः पूर्वंस्वदेहःअनात्मादिरूपःस्मृतःचिंतितःतएव
पुनरेनमात्मरूपइतिमत्वाश्लाघयंतिस्तावयंतिहि ३७ यतीनुपलक्षणीकृत्यान्यानपिस्वधर्मत्यागिनोनिंदति गृहस्थस्येतिद्वाभ्यां (तपस्विनोवानप्रस्थस्य) ३८ (आश्रमान्विडंबयंतिअनुकुर्वंतीतितथा)
३९ नन्वात्मतत्त्वज्ञस्यभिक्षोरिंद्रियलौल्येपिकोदोषस्तत्राह' । आत्मानंपरंब्रह्मचेज्जानीयात् ज्ञानेनधुताःनिरस्ताआशयाःवासनायस्य । तस्यज्ञानिनोलौल्यमेवनसंभवतीत्यर्थः । तथाचश्रुतिः । ' आत्मा
नंचेद्विजानीयादयमस्मीतिपूरुषः । किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदि ' ति ४०

श्लोकाः

यथावार्तादयोह्यर्थायोगस्यार्थंनबिभ्रति ॥ अनर्थायभवेयुस्तेपूर्तमिष्टंतथाऽसतः २९ यश्चित्तविजयेयत्तःस्यान्निःसंगोऽपरिग्रहः ॥ एकोविविक्तशर
णोभिक्षुर्भिक्षामिताशनः ३० देशेशुचौसमेराजन्संस्थाप्यासनमात्मनः ॥ स्थिरंसमंसुखंतस्मिन्नासीतर्ज्वंगओमिति ३१ प्राणापानौसंनिरुंध्यात्पू
रकुंभकरेचकैः ॥ यावन्मनस्त्यजेत्कामान्स्वनासाग्रनिरीक्षणः ३२ यतोयतोनिःसरतिमनःकामहतंभ्रमत् ॥ ततस्ततउपाहृत्यहृदिरुंध्याच्छनैर्बु
धः ३३ एवमभ्यसतश्चित्तंकालेनाल्पीयसायतेः ॥ अनिशंतस्यनिर्वाणंयात्यनिंधनवह्निवत् ३४ कामादिभिरनाविद्धंप्रशांताखिलवृत्तियत् ॥ चित्तं
ब्रह्मसुखस्पृष्टंनैवोत्तिष्ठेतकर्हिचित् ३५ यःप्रव्रज्यगृहात्पूर्वंत्रिवर्गावपनात्पुनः ॥ यदिसेवेततान्भिक्षुःसवैवांताश्यपत्रपः ३६ यैःस्वदेहःस्मृतोऽनात्मामर्त्यो
विट्कृमिभस्मसात् ॥ तएनमात्मसात्कृत्वाश्लाघयंतिह्यसत्तमाः ३७ गृहस्थस्यक्रियात्यागोव्रतत्यागोबटोरपि ॥ तपस्विनोग्रामसेवाभिक्षोरिंद्रियलौ
ल्यता ३८ आश्रमापसदाह्येतेखल्वाश्रमविडंबनाः ॥ देवमायाविमूढांस्तानुपेक्षेतानुकंपया ३९ आत्मानंचेद्विजानीयात्परंज्ञानधुताशयः ॥ कि
मिच्छन्कस्यवाहेतोर्देहंपुष्णातिलंपटः ४०

२९ — ४०

चूर्णिका

२९ यःचित्तजयेयत्तःसःनिःसंगोभूत्वा ३० शुचौदेशेआसनंसंस्थाप्यतत्रोपविश्य ॐमित्युच्चारयन् ३१ पूरककुंभकरेचकैःप्राणापानौसन्निरुध्यात्स्वनासाग्रनिरीक्षणः ३२ किंच ॥६८॥
यत्रयत्रमनोगच्छतितततःततःआहृत्यहृदिरुंध्यात् ३३ एवंअभ्यसतःयतेःचित्तंशांतिंयाति ३४ ३५ यःयतिःपुनःधर्मादीन्सेवतेसःवांताशीज्ञेयः ३६ ३७ गृहस्थस्यक्रिया
त्यागोव्रतत्यागोवटोरपि तपस्विनोग्रामसेवाभिक्षोरिंद्रियलौल्यता १ ३८ एतेआश्रमविडंबकाःअतःसदातत्त्वज्ञानेयतितव्यम् ३९ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आ.स.

टीका

॥७१॥

अ० ॥१५॥

नरकपातापत्तेरप्रमत्तेनसदातत्त्वज्ञानेपतितव्यमितीप्रमयं 'आत्मानंरथिनंविद्धिशरीरंरथमेवचे' त्यादिश्रुत्युक्तरथरूपकेणाह । आहुरितिषड्भिः । इंद्रियेशंमनोऽभिषून्रश्मीनाहुः । मात्राः श
नरकपातापत्तेरप्रमत्तेनसदातत्त्वज्ञानेपतितव्यमितीमर्थः ... ईशसृष्टमितिबंधनकर्तात्वीशएवेत्यर्थः ४१ प्राणादयःपंच । नागःकूर्मश्चकृकलोदेवदत्तो
गतव्यदेशानाहुः । सत्त्वंचित्तंबृहत् देहव्यापिवंधुरंबंधनं । चित्तंविनाह्यनिबद्धमिवशरीरंभवति । ईशसृष्टमितिबंधनकर्तात्वीशएवेत्यर्थः ४२ रागादयोजेतव्याःशत्रवः
गर्धिंप्राणमक्षम् । अभिमानंसाहंकारंजीवंरथिनम् शुद्धजीवंशरम् परब्रह्मलक्ष्यम् यथाधनुषाशरोलक्ष्येनिपात्यतेतथाप्रणवेनजीवोब्रह्मणिनिपात्यतइत्यर्थः
तंनवशःकथंभूताःशत्रवःरजस्तमःप्रकृतयः । (तथाकचिदारूढसमाधेःपरोपकारादिप्रवृत्तयोपि) सत्त्वप्रकृतयःशत्रवः ४४ नृकायरथंआत्मवशउपकल्पइंद्रियादिपारिकरोयस्मिन् तथाभूतं
गरिष्ठानांगुरूणांचरणसेवयानिशातंतीक्ष्णंज्ञानखड्गंबिभ्रत्अच्युताश्रयःसन्निरस्तशत्रुरतएवोपशांतःस्वानंदेनतुष्टोभूत्वाइदंरथादिकमुपेक्षेतेत्यर्थः ४५ अच्युताश्रयाभावेबाधकमाह । नो
तावहिर्मुखायेइंद्रियवाजिनःसूतश्चबुद्धिःतेउत्पथंप्रवृत्तिमार्गंनीत्वाविषयाख्येषु (दस्युषुचोरेषु) निक्षिपंति । हयैःसूतेनचसहवर्तमानमृतमंधेतमसाख्यासेउरुमृत्युभयमृयस्मिन् ४६
ष्टापूर्तादिकारिणःपुंसःकथमेवमनर्थप्राप्तिःस्यादित्याशंक्यवेदोक्तकर्मणांद्विविध्यंदर्शयन्फलमाहप्रवृत्तंचेतिदशभिः ४७ हिंस्रंश्येनयागादि । द्रव्यमयंपुरोडाशादिप्रधानंअशांतिदंअ
र्थस्वर्गादिकामनयाकृतंअग्निहोत्रादिआदिशब्दार्थविवरणंदर्शश्चेतिपशुःपशुयागःसुतःसोमयागः ४८ हुतंवैश्वदेवंप्रहुतंबलिहरणंएतत्सर्वमिष्टमुच्यते । एतदेवयदिकाम्यंअशांतिदंचतर्हि
मर्थः । (आराममउपवनम्) आजीव्यंप्रपादि । (इदंपूर्तमुच्यतेप्रवृत्ताख्यमपि) ४९

श्लोकाः ४१/४९

रथमिंद्रियाणिहयानभीषून्मनइंद्रियेशम् ॥ वर्त्मानिमात्राधिषणांचसूतंसत्त्वंबृहद्बंधुरमीशसृष्टम् ४१ अक्षंदशप्राणमधर्मधर्मौचक्रेऽभिमानंर
कम् ॥ धनुर्हितस्यप्रणवंपठंतिशरंतुजीवंपरमेवलक्ष्यम् ४२ रागोलोभश्चद्वेषश्चशोकमोहौभयंमदः ॥ मानोऽवमानोऽसूयाचमायाहिंसाचम
रजःप्रमादक्षुन्निद्राःशत्रवस्त्वेवमादयः ॥ रजस्तमःप्रकृतयःसत्त्वप्रकृतयःक्वचित् ४४ यावन्नृकायरथमात्मवशोपकल्पंधत्तेगरिष्ठचरणार्चनयानि
म् ॥ ज्ञानासिमच्युतबलोदधदस्तशत्रुःस्वाराज्यतुष्टउपशांतइदंविजह्यात् ४५ नोचेत्प्रमत्तमसदिंद्रियवाजिसूतानीत्वोत्पथंविषयदस्युषुहिक्षिपंति ॥
तेदस्यवःसहयसूतममुंतमोंधेसंसारकूपउरुमृत्युभयेक्षिपंति ४६ प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकम् ॥ आवर्तेतप्रवृत्तेननिवृत्तेनाश्नुतेऽमृतम् ४७ हिंस्रंद्रव्यम
यंकाम्यमग्निहोत्राद्यशांतिदम् ॥ दर्शश्चपौर्णमासश्चचातुर्मास्यंपशुःसुतः ४८ एतदिष्टंप्रवृत्ताख्यंहुतंप्रहुतमेवच ॥ पूर्तंसुरालयारामकूपाजीव्यादिलक्षणम् ४९

दृश्यरूपकमाह शरीरंरथंआहुः इंद्रियाणिहयान् बुद्धिंसारथिम् मनःरश्मीन् धर्माधर्मौचक्रे साहंकारंजीवंरथिनम् प्रणवंधनुःशुद्धंजीवंशरम् परब्रह्मलक्ष्यम् यथाधनुषा ॥६९॥
निपात्यतेतथाप्रणवेनजीवःब्रह्मणिनिपात्यरागद्वेषादयःजेतव्याः एवंनृकायरूपंरथंपुमान्यावत्धत्तेतावदेवमहत्सेवयाज्ञानासिंदधत् भगवदाश्रयःसन्जितशत्रुःस्वानं
निपात्यतेतथाप्रणवेनजीवःब्रह्मणिनिपात्य ... अन्यथाएतेएवअसदिंद्रियवाजिसूताःप्रमत्तंजनंप्रवृत्तिमार्गंनीत्वाविषयदस्युषुक्षिपंतितेदस्यवः एनंसरथंसंसारकूपे
त्वाइदंरथादिकंउपेक्षेत ४१ ४२ ४३ ४४ ४५ अन्यथाएतेएवअसदिंद्रियवाजिसूताःप्रमत्तंजनंप्रवृत्तिमार्गंनीत्वाविषयदस्युषुक्षिपंतितेदस्यवः एनंसरथंसंसारकूपे
चूर्णिका ४६ एवंप्रवृत्तिमार्गेणसंसारंनिवृत्तिमार्गेणअमृतंअश्नुते ४७ ४८ ४९

CC-0. In Public Domain. Digitization by eGangotri

टीका

क्रमणाआरोहावरोहाभ्यामावृत्तिप्रकारमाह । द्रव्यस्यचरुपुरोडाशादेःसूक्ष्मोविपाकःपरिणामोदेहांतरारंभकोभूतसूक्ष्माख्यः 'येनसंपरिष्वक्तोगच्छतियएवअप्शब्देनोक्तइतितुपंचम्यामाहुतावापःपु
रुषवचसोभवंती'ति ।पाठांतरेद्रव्यशब्देनतेजोमात्राशब्दोक्तानिइंद्रियाणि ऊष्मविपाकशब्देनहृदयाग्रप्रद्योतः तथाचश्रुतिः 'सइमास्तेजोमात्राःसमभ्याददानोहृदयमेवानुक्राम'दिति तथा 'तस्यहैतस्यहृदयाग्रंप्र
द्योततेतेनप्रद्योतेनैषआत्मानिष्क्रामतीति । धूमादिशब्दैस्तत्तदभिमानिन्योदेवताः । तत्रापक्षयःकृष्णपक्षःसोमःसोमलोकःतत्रभुक्तभोगस्यावरोहणप्रकारमाहअदर्शइत्यादिनाअदर्शइतिविपरीतलक्षणंविशिष्टभोगक्षयशो
लयेनादर्शनमुच्यते । एतदुक्तंभवति । भूतसूक्ष्मयुक्तोधूमाद्यतिवाहिकदेवताभिःसोमलोकंप्रापितस्तद्भोगावसानेविलीनदेहोवृष्टिद्वारेणौषधिवीरुदादिक्रमेणजायते । एवंपुनर्भवहेतुःपितृयानं
मार्गइति (क्ष्मेशहेभूपते । श्रुतिश्च । तेधूममभिसंभवंतिधूमाद्रात्रिंरात्रेरपरपक्षमित्यादि । स्मृतिश्च । 'यज्ञेनतपसादानैर्येहिस्वर्गजितोनराः धूमंनिशांकृष्णपक्षंदक्षिणायनमेवच'। पितृलोकंचंद्रमसं
वायुंवृष्टिजलंमहीं । क्रमात्तेसंभवंतीहपुनरेवव्रजंतिवै' इत्यादि । गीतासुच 'धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनम् । तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्तत' इति) ५० पुनर्भवमेवाह । एकैकश्येन
प्रत्येकंआनुपूर्व्याक्रमेणभूत्वाभूत्वातत्तत्सांनिध्यंप्राप्येहभूमौजायतेतत्राधिकारिणमाह । निषेकेति (निषेकादिश्मशानांतैःगर्भाधानाद्यंत्येष्टिपर्यंतैः) अन्यास्त्विष्टादिकार्यप्येवंजन्मनलभतइत्यर्थः ५१
निवृत्तकर्मनिष्ठस्योपासनाविशेषमुपदिशन्नर्चिरादिमार्गेणब्रह्मलोकप्राप्तिमाह इंद्रियेष्वित्यादिना । यद्वाद्रव्ययज्ञेषुहिंसायादुर्वारत्वादितिमुख्यंनिवृत्तंकर्मैवदर्शयन्नाह । ज्ञानेनदीप्यंतइतितथातेषुइंद्रियव्या
पारेष्विष्टापूर्तादीनामिंद्रियंतावन्मात्रतांभावयंतीत्यर्थःएवमुत्तरत्रापि इंद्रियेषुऊर्मौदर्शनादिसंकल्परूपेमनसि (इंद्रियाणिजुह्वतिविषयेभ्योनिगृहीतानींद्रियाणिमनोरूपाणिभावयंतीत्यर्थः) तद्वैकारिकंवि
कारशीलंमनोवाचि । विध्यादिलक्षणयावाचाहिमनःकर्तृत्वादिविकारंभजति ५२ (वाचं) वर्णानांअकारादीनांसमाम्नायेसमुदाये । तद्विशेषत्वाद्वाचः । स्वरेअकारादिस्वरत्रयात्मके (तंसमाम्नायंभावयेत्)
...नादेतंनादंतुप्राणेसूत्रात्मनि । (अमुंप्राणम्) महतिब्रह्मणि ५३ अग्निरितिअग्न्यादिशब्दैस्तत्तदभिमानिन्योदेवताः (लक्ष्यंते) ताःप्राप्नोतीतिपूर्ववत् । दिवाऽहः । प्राह्णस्तस्यैवांतः
णांतः । यद्वाप्राह्णोराकेतिचपुराणमतानुसारेणोक्तम् । उत्तरमयनम् । स्वराट्ब्रह्मा । एवंब्रह्मलोकंगतस्यभोगावसानेमोक्षप्रकारमाह । विश्वइति । विश्वःस्थूलोपाधिकः । तंस्थूलंसूक्ष्मेविला
प्यस्तैजसोभवति । सूक्ष्मंचकारणेविलाप्यकारणोपाधिःप्राज्ञोभवति । कारणंचसाक्षिणः (सर्वत्र) अन्वयात्साक्षिस्वरूपेविलाप्यतुर्योभवतितेषांचसाक्षिणिलयेशुद्धआत्माभवतिमुच्यतइ
त्यर्थः श्रुतिः । 'तेर्चिरभिसंभवंत्यर्चिषोऽह्नोऽह्नआपूर्यमाणपक्षमि' त्यादि । स्मृतिश्च । 'अग्निर्ज्योतिरहःशुक्लःषण्मासाउत्तरायणम् । तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजना' इति) ५४ (अनुपू
र्वशःअग्न्यादिरूपोभूत्वाभूत्वातत्तद्देवतसांनिध्यंप्राप्येत्यर्थः । यद्वा) यथेतरो (भूत्वा) भूत्वानिवर्ततेतथायंननिवर्ततइत्यर्थः ५५

चूर्णिका

द्रव्यस्यविपाकश्चधूमोरात्रिरपक्षयः ॥ अयनंदक्षिणंसोमोऽदर्शओषधिवीरुधः ॥ अन्नंरेतइतिक्ष्मेशपितृयानंपुनर्भवः ५० एकैकश्येनानुपूर्व्याभूत्वाभूत्वे
हजायते ॥ निषेकादिश्मशानांतैःसंस्कारैःसंस्कृतोद्विजः ५१ इंद्रियेषुक्रियायज्ञान्ज्ञानदीपेषुजुह्वति ॥ इंद्रियाणिमनस्यूर्मौवाचिवैकारिकंमनः ५२ वा
चंवर्णसमाम्नायेतमोंकारेस्वरेन्यसेत् ॥ ॐकारंबिंदौनादेतंतंतुप्राणेमहत्यमुम् ५३ अग्निःसूर्योदिवाप्राह्णःशुक्लोराकोत्तरंस्वराट् ॥ विश्वश्चतैजसःप्राज्ञस्तुर्य
आत्मासमन्वयात् ५४ देवयानमिदंप्राहुर्भूत्वाभूत्वानुपूर्वशः ॥ आत्मयाज्युपशांतात्माह्यात्मस्थोननिवर्तते ५५

श्लोकाः ५० ५५ ॥७०॥

२५ य ल ५२ ५३ ५४ ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥१५॥ ॥७१॥

(अयनेमार्गौ।) वेदेननिर्मिते 'तेधूममभिसंभवंति तेर्चिरभिसंभवंती' तिश्रुतिभ्यांनिश्चयेनविविच्यज्ञापितेइत्यर्थः। जनस्थोपिदेहस्थोपिनमुह्यति। ('नैतेसृतीपार्थजानन्योगीमुह्यतिकश्चने'तिभगवद्वचनंच) ५६ तत्रहेतुमाह। आदाविति। जनानांदेवादीनांआदौकारणत्वेनअंतेचावधित्वेनयत्सत् (सत्यं) तथाबहिर्भोग्यंअंतेभोक्तृपरमवरंचउच्चंनीचंतमोऽप्रकाशःज्योतिःप्रकाशः तत्तुसर्वंअयंज्ञानीस्वयमेव। नतस्माद्व्यतिरिक्तंकिंचिदस्तियेनमुह्येदित्यर्थः ५७ ननुतर्हिकथंपृथगर्थस्तस्यप्रतीयतेतत्राह। आबाधितःतर्कविरोधेनसर्वतोबाधितोपिआभासःप्रतिबिंबादिःवस्तुतयायथास्मृतःतद्वदैंद्रियकंसर्वंअर्थत्वेनविकल्पितम्। (प्रातिभासिकस्ययादृशंवस्तुत्वंतादृशमेवव्यावहारिकस्यापीत्यर्थः) नतुपरमार्थतःदुर्घटत्वात्। (तर्कविरुद्धत्वादित्यर्थः) ५८ दुर्घटत्वमेवाह। क्षित्यादीनांपंचभूतानांछायाऐक्यबुद्ध्यालंबनरूपंदेहादि। संघातारंभणपरिणामानांमध्येकतमापिअन्यतमापिनभवति। तथाहि। सानतेषांसंघातःवृक्षाणामिववनम्। एकदेशाकर्षणेसर्वाकर्षणानुपपत्तेः। नह्येकस्मिन्वृक्षआकृष्टेसर्ववनमाकृष्यते। नचविकारःआरब्धोऽवयवी। अपिशब्दात्परिणामोपि। कुतः। सार्किंस्वावयवेभ्योवापरिणतेभ्योवापृथक्। तदन्वितोवा। नतावदस्यंतंपृथक्तथाअप्रतीतेः। नचान्वितः। सार्किंप्रत्यवयवंसर्वोप्यन्वेतिअंशेनवा। आद्येअंगुलिमात्रेपिदेहबुद्धिःस्यात्। द्वितीयेतस्याप्यंशांगीकारेसत्यनवस्थास्यात्। अतोमृषैवेत्यर्थः ५९ एवंदेहादेर्मिथ्यात्वमुक्त्वातद्धेतूनांक्षित्यादीनामपिमिथ्यात्वमाह। धारयंतीतिधातवोमहाभूतानितन्मात्रैःसूक्ष्मैरवयवैर्विनानस्युःअवयवित्वात्तेषामपि तर्ह्यवयवःसत्यइतिचेत्तत्राह। उक्तप्रकारेणावयविन्यसतिअवयवोऽप्यंततोऽसन्नेवस्यात्। अवयवप्रतीत्यन्यथानुपपत्त्याविनातत्सद्भावेप्रमाणाभावादित्यर्थः। तदुक्तंपंचमस्कंधे। 'एवंनिरुक्तंक्षितिशब्दवृत्त' मित्यादि ६० नन्ववयविनोऽभावेआगमापायिषुबाल्यादिषुसोयंदेवदत्तइतिप्रत्यभिज्ञानंनस्यात् तदुक्तंभट्टैः। 'आविर्भावतिरोभावधर्मकेष्वनपायियत् तद्धर्मी' तितत्राह। स्यादिति। वस्तुनःपरमात्मनोविकल्पेभेदेअसतियद्वावस्तुनोऽविद्ययाविकल्पेसातिपूर्वपूर्वारोपसादृश्यात् (सेयंदीपज्वालेतिवत्) सएवेतिभ्रमःस्यात्। सचतावदेवयावदविद्यानिवृत्तिः। ननुसर्वस्यमिथ्यात्वेशास्त्रस्यविधिनिषेधताकथंतत्राह। स्वप्नमध्ये (तद्वत-) जाग्रत्स्वप्नव्यवस्थाप्रमिताप्रबोधेतुत्रयोपिस्वप्नाएवयथातथेति ६१ इदानीमुक्तमेवाद्वैतंभावनात्रयोपदेशेनदृढीकरोति। भावाद्वैतमितिचतुर्भिः। (आत्मनःभावाद्वैतादिकम्) वर्तयन्नालोचयन् स्वानुभूत्याआत्मतत्त्वानुभवेनत्रीन्जाग्रदादीन् 'त्रयआवसथास्त्रयःस्वप्ना' इतिश्रुतेः यद्वावस्तुभेदबुद्धिरेकःस्वप्नःततस्तदधिकारभेदेनकर्मबुद्धिर्द्वितीयःततोमत्कर्मसाधितमेतत्फलंममैवभोग्यमितितृतीयःतान्धुनुतेनिवर्तयति (यद्वाप्रपंचलक्षणोदीर्घस्वप्नस्तद्गतौविधिनिषेधौचेतित्रीन्) ६२ (किंतद्भावाद्वैतादिकंतदाह। कार्येति। विकल्पस्यभेदस्यमिथ्यात्वात्) कार्यकारणयोःवस्त्वैक्यस्यमर्शनंआलोचनम्। तंतुरेवनपटइतिवत् ६३

श्लोकाः ५६/६३ ॥७१॥

यएतेपितृदेवानामयनेवेदनिर्मिते ॥ शास्त्रेणचक्षुषावेदजनस्थोपिनमुह्यति ५६ आदावंतेजनानांसद्बहिरंतःपरावरम् ॥ ज्ञानंज्ञेयंवचोवाच्यंतमोज्योतिस्त्वयंस्वयम् ५७ आबाधितोपिह्याभासोयथावस्तुतयास्मृतः ॥ दुर्घटत्वादैंद्रियकंतद्वदर्थविकल्पितम् ५८ क्षित्यादीनामिहार्थानांच्छायानकतमापिहि ॥ नसंघातोविकारोपिनपृथक्नान्वितोमृषा ५९ धातवोऽवयवित्वाच्चतन्मात्रावयवैर्विना ॥ नस्युर्ह्यसत्यवयविन्यसन्नवयवोंततः ६० स्यात्सादृश्यभ्रमस्तावद्विकल्पेऽसतिवस्तुनः ॥ जाग्रत्स्वप्नौयथास्वप्नेतथाविधिनिषेधता ६१ भावाद्वैतंक्रियाद्वैतंद्रव्याद्वैतंतथात्मनः ॥ वर्तयन्स्वानुभूत्येहत्रीन्स्वप्नान्धुनुतेमुनिः ६२ कार्यकारणवस्त्वैक्यमर्शनंपटतंतुवत् ॥ अवस्तुत्वाद्विकल्पस्यभावाद्वैतंतदुच्यते ६३

चूर्णिका ५६ ५७ ५८ ५९ ६० ६१ ६२ किंच कार्यकारणवस्त्वैक्यदर्शनंपटतंतुवत्भावाद्वैतम् १ ६३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मनोवाक्तनुभिःकृतानांकर्मणांसमर्पणम् । तैःसमर्पणमितिवा । उद्देश्यफलभेदोहिक्रियाभेदेहेतुः ईश्वरार्पणेचतदभावात्क्रियाणामद्वैतम् ६४ आत्मनःस्वस्यजायादीनांचअन्येषांसर्वदेहिनांचस्वार्थश्चका मश्चतयोः । सर्वेषांदेहादीनांपंचभूतात्मकत्वेनभोक्तॄणांचपरमात्मत्वेन (यत्) अभेदालोचनंतेनार्थकामयोर्यदैक्यदर्शनंतादित्यर्थः ६५ उक्तानाश्रमधर्मान्संक्षिप्याह । यदिति । यत्रयस्मिन्देशेकालेवायं नोपायेनयत्सकाशात् (यतद्द्रव्यमनिषिद्धंयस्यपुरुषस्यसपुरुषःतेनद्रव्येण) ६६ प्रस्तुतमुपसंहरतिएतैरिति । अस्यश्रीकृष्णस्यगतिं । तद्भक्तिभाक्तस्यभक्तः ६७ एतच्चसर्वसाधारणमुक्तम् । भक्तस्त्वतुभ क्तिरेवसर्वपुरुषार्थहेतुरितिपांडवानेवलक्षीकृत्याह । यथाहीति । हेनृपदेव । नृपैर्देवैश्चसहायैर्दुस्त्यजादितिवा । आत्मनःप्रभोःश्रीकृष्णादेवहेतोः । उत्तरतउत्कर्षेणातरतेत्यर्थः अडभावआर्षः । यथाय थावत् । तमेवभजतेतिशेषः यद्वायथाआपद्गणादुत्तीर्णस्त्वंयथाचक्रतूनहार्षीत्तथासंसारादपियूयंश्रीकृष्णादेवतारकादुत्तरतेत्यर्थः ६८ श्रीकृष्णसेवापिमहतामवज्ञयाभ्रश्यतितत्कृपयाचसिध्यतीतिदर्शयन्स्व पूर्ववृत्तांतमाह । अहमितिसार्धैःपंचभिः । नाम्नाउपबर्हणः ६९ पेशलंसौकुमार्यं । रूपादिभिःप्रियंदर्शनंयस्य । (तासांस्त्रीणांपुरुलंपटःअतिलोलुपः) ७० (हरिगाथानामुपगायनंविषये) ७१ तदा ह्वानंविद्वान्अहंचगच्छन्सन्गायन्नेवगतः ७२

॥७२॥

श्लोकाः ६४ / ७२

यद्ब्रह्मणिपरेसाक्षात्सर्वकर्मसमर्पणम् ॥ मनोवाक्तनुभिःपार्थक्रियाद्वैतंतदुच्यते ६४ आत्मजायासुतादीनामन्येषांसर्वदेहिनाम् ॥ यत्स्वार्थकामयोरैक्यं द्रव्याद्वैतंतदुच्यते ६५ यद्यस्यवाऽनिषिद्धंस्यायेनयत्रयतोनृप ॥ सतेनेहेतकार्याणिनरोनान्यैरनापदि ६६ एतैरन्यैश्चवेदोक्तैर्वर्तमानःस्वकर्मभिः ॥ गृहे प्यस्यगतिंयायाद्राजंस्तद्भक्तिभाङ्नरः ६७ यथाहियूयंनृपदेवदुस्त्यजादापद्गणादुत्तरतात्मनःप्रभोः ॥ यत्पादपंकेरुहसेवयाभवानहार्षीन्निर्जितदिग्गजः क्रतून् ६८ अहंपुराऽभवंकश्चिद्गंधर्वउपबर्हणः ॥ नाम्नाऽतीतेमहाकल्पेगंधर्वाणांसुसंमतः ६९ रूपपेशलमाधुर्यसौगंध्यप्रियदर्शनः ॥ स्त्रीणांप्रियतमोनि त्यंमत्तस्तत्पुरुलंपटः ७० एकदादेवसत्रेतुगंधर्वाप्सरसांगणाः ॥ उपहूताविश्वसृग्भिर्हरिगाथोपगायने ७१ अहंचगायंस्तद्विद्वान्स्त्रीभिःपरिवृतोगतः ॥ ज्ञात्वाविश्वसृजस्तन्मेहेलनंशेपुरोजसा ॥ याहित्वंशूद्रतामाशुनष्टश्रीःकृतहेलनः ७२

चूर्णिका

परेब्रह्मणिसर्वकर्मार्पणंक्रियाद्वैतम् २ ६४ आत्मनःजायापुत्रादिसर्वप्राणिनांचअर्थकामयोर्यत्ऐक्यंद्रव्याद्वैतम् ३ ६५ एतत्त्रयंस्वानुभूत्यायःजानातिसःमुनिःत्रीन्जाग्रदादी न् धुनोति ६६ एतैरन्यैश्चवेदोक्तैःकर्मभिर्वर्तमानःगृहेपिकृष्णस्यगतियायात् ६७ हेनृपयूयंगृहेवर्त्तमानाःसंतःश्रीकृष्णादेवआपद्गणात्अतरतअतःतंभजतभगवत्सेवामहतां अवज्ञयाभ्रश्यति तत्कृपयासिध्यति ६८ तत्स्वोदाहरणेनदर्शयति हेधर्मपुराअहंगतकल्पेउपबर्हणोनामगंधर्वःआसम् ६९ एकदादेवसत्रेगंधर्वादयःहरिगाथागायनेविश्वसृ ग्भिःआहूताः तत्रअहंस्त्रीभिर्वृतःसन्गतःतदामदपराधंज्ञात्वाविश्वसृजःशूद्रोभवेतिशेपुः ७० ७१ ७२ ॥७२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.स. (तावत्तदानीम्) ७३ त्वंतुकृतार्थएवेतिहर्षेणपुनःपूर्वश्लोकानेवपठति । यूयमिति । प्राग्व्याख्यातम् । शेषंस्पष्टं ७४ ७५ ७६ ७७ ७८ ७९ (यत्रवंशेषु) ८० सप्तमस्कंधभावार्थपदभावार्थदीपिका । अ०
संसेव्यतांसदासद्भिर्यतिश्रीधरनिर्मिता ।' १ ॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमकंधेभावार्थदीपिकायांपंचदशोऽध्यायः १५ ॥ ॥ ७ ॥ ॥ समाप्तोयंसप्तमस्कंधः ॥ ७ ॥

टीका ॥१५॥

॥७३॥

श्लोकाः ७३ / ८०

तावद्दास्यामहंजज्ञेतत्रापिब्रह्मवादिनाम् ॥ शुश्रूषयानुषंगेणप्राप्तोऽहंब्रह्मपुत्रताम् ७३ धर्मस्तेगृहमेधीयोवर्णितःपापनाशनः ॥ गृहस्थोयेनपदवीमंजसा न्यासिनामियात् ७४ यूयंनृलोकेबतभूरिभागालोकंपुनानामुनयोऽभियंतियेषांगृहानावसतीतिसाक्षाद्गूढंपरंब्रह्ममनुष्यलिंगम् ७५ सवाअयंब्रह्ममहद्वि मृग्यंकैवल्यनिर्वाणसुखानुभूतिः ॥ प्रियःसुहृद्वःखलुमातुलेयआत्माऽर्हणीयोविधिकृद्गुरुश्च ७६ नयस्यसाक्षाद्भवपद्मजादिभीरूपंधियावस्तुतयोपवर्णित म् ॥ मौनेनभक्त्योपशमेनपूजितःप्रसीदतामेषससात्वतांपतिः ७७ ॥ श्रीशुकउवाच ॥ इतिदेवर्षिणाप्रोक्तंनिशम्यभरतर्षभः ॥ पूजयामाससुप्रीतःकृष्णं चप्रेमविह्वलः ७८ कृष्णपार्थावुपामंत्र्यपूजितःप्रययौमुनिः ॥ श्रुत्वाकृष्णंपरंब्रह्मपार्थःपरमविस्मितः ७९ इतिदाक्षायणीनांतेपृथग्वंशाःप्रकीर्तिताः ॥ देवासुरमनुष्याद्यालोकायत्रचराचराः ८० ॥ ॥ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांसप्तमस्कंधेपंचदशोऽध्यायः १५ ॥ ॥ ७ ॥

चूर्णिका तावदहंदास्यांजज्ञेतत्रब्रह्मवादिनांसेवयाब्रह्मपुत्रतांप्राप्तः ७३ हेराजन्एवंगृहमेधीयोधर्मःतेउक्तः येनन्यासिनांपदवींइयात् ७४ यूयंनृलोकेबतभूरिभागाःयतःयुष्माकंगृहेषुनरा कारंश्रीकृष्णाख्यंब्रह्मसाक्षाद्वसति तद्दर्शनार्थंमुनयःसर्वतःआयांति ७५ किंचसोऽयंब्रह्मैवयुष्माकंप्रियःसुहृन्मातुलेयइत्यादिरूपोभवति ७६ यस्यरूपंशिवादिभिरपिइदमित्थ मितिसाक्षान्नोपवर्णितं सःयुष्माकंस्वयमेवप्रसन्नःएवंभूतःभगवान्मेप्रसीदताम् ७७ ॥ श्रीशुकउवाच ॥ एवंदेवर्षिणाप्रोक्तंनिशम्यप्रीतःधर्मराजःकृष्णंनारदंचपूजयामास ७८ ॥७३॥
पूजितोमुनिःकृष्णपार्थौआमंत्र्यययौ पार्थःकृष्णंपरंब्रह्मश्रुत्वाविस्मितःआसीत् ७९ एवंतेदक्षकन्यानांवंशाः कीर्तिताःयत्रदेवासुरमनुष्याद्याःचराचराःअभवन् ८० ॥ ॥ इति सप्तमस्कंधेचूर्णिकायांपंचदशोऽध्यायः १५ ॥ ॥ ७ ॥ ॥ इतिसप्तमस्कंधःसमाप्तः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत–सप्तमस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत–अष्टमस्कंधः प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ १ ॥

श्रीर्जयति ॥ ॥ ॐनमःश्रीपरमहंसास्वादितचरणकमलचिन्मकरंदायभक्तजनमानसनिवासायश्रीरामाय ॥ ॥ अथाष्टमेचतुर्विंशत्यध्यायैर्मनुवर्णनम् । तत्सुतैर्ऋषिदेवेंद्रैर्मूर्तिभिश्चहरेःसह १ प्रतिम
न्वंतरंचैवमन्वाद्याःषट्पृथक्पृथक् । प्रवर्तयंतिसद्धर्मान्पालयंत्याचरंतिच २ अतोमन्वंतरस्योक्तंसद्धर्मइतिलक्षणम् । येनवैक्रियमाणेननरोननिरयंव्रजेत् ३ तत्रतुप्रथमेस्वायंभुवःस्वारोचिषस्तथा ।
उत्तमस्तामसश्चेतिचतुर्मनुनिरूपणम् ४ स्वायंभुवेऽतरेऽनंतदुरंतगुणवर्णनात् । मुदितःपरिपप्रच्छसर्वमन्वंतरस्थितिं ५ ॥ स्वायंभुवस्येतित्रिभिः । यत्र (वंशे) मनुकन्यासु विश्वसृजांमरीच्यादीनांसर्गः
पुत्रपौत्रादिः (कथितः) १ महीयसोहरेः । (यत्रयत्रमन्वंतरे) अत्रक्वचिद्बहुपाठांतरमस्तितदुपेक्षितमस्माभिः (विस्तरभीतेः) २ यस्मिन् (मन्वंतरे) स्वतीतेगतेयत्कृतवान् । यस्मिन्ननागतेयत्क
र्ताकरिष्यतिअद्यवावर्तमानेयत्कुरुतेतद्वदेत्यन्वयः ३ अस्मिन्कल्पेषण्मनवोव्यतीतागताः । (तत्रआद्यः स्वायंभुवः तेकथितःचतुर्थस्कंधे यत्रस्वायंभुवांतरे) ४ तस्यमनोर्दुहित्रोर्देवहूत्यामाकूत्यांचक
पिलयज्ञमूर्तिभ्यांपुत्रतांगतःप्राप्तः ५ (कृतंसांख्यशास्त्रादि । अनुवर्णितंतृतीयस्कंधे) ६ (शतरूपायाः पतिः स्वायंभुवः) ७ (सुनंदायांनद्यांतत्तीरेइत्यर्थः) घोरंदुश्चरंतपस्तप्यमानः समाधावनुभूत
मिदंवक्ष्यमाणंनिद्रितोच्छ्वसितवद्विस्मितइवउपदिशन्निवअनुवदन्निवचअष्टभिःश्लोकैरन्वाह ८ येनचिदात्मनाविश्वंचेतयते । चेतनीभवति । विश्वंतुयंनचेतयतेनचेतनीकरोति । स्वतएवचिद्रूपत्वात् । तत्रहे
तुः । अस्मिन्शयानेस्वपाति (सति) योजागर्तिसाक्षितयावर्तते । अहोचित्रम् । नायंजनस्तंवेदसतुइमंवेद ९

॥ १ ॥ श्लोकाः १/९

श्रियैनमः ॥ ॥ राजोवाच ॥ स्वायंभुवस्येहगुरोवंशोऽयंविस्तराच्छ्रुतः ॥ यत्रविश्वसृजांसर्गोमनूनन्यान्वदस्वनः १ यत्रयत्रहरेर्जन्मकर्माणिचमही
यसः ॥ गृणंतिकवयोब्रह्मंस्तानिनोवदशृण्वताम् २ यद्यस्मिन्नंतरेब्रह्मन्भगवान्विश्वभावनः ॥ कृतवान्कुरुतेकर्तास्वतीतेऽनागतेऽद्यवा ३ ॥ ॥ ऋषि
रुवाच ॥ मनवोस्मिन्व्यतीताःषट्कल्पेस्वायंभुवादयः ॥ आद्यस्तेकथितोयत्रदेवादीनांचसंभवः ४ आकूत्यांदेवहूत्यांचदुहित्रोस्तस्यवैमनोः ॥ धर्मज्ञानो
पदेशार्थंभगवान्पुत्रतांगतः ५ कृतंपुराभगवतःकपिलस्यानुवर्णितम् ॥ आख्यास्येभगवान्यज्ञोयच्चकारकुरूद्वह ६ विरक्तःकामभोगेषुशतरूपापतिःप्रभुः ॥
विसृज्यराज्यंतपसेसभार्योवनमाविशत् ७ सुनंदायांवर्षशतंपदैकेनभुवंस्पृशन् ॥ तप्यमानस्तपोघोरमिदमन्वाहभारत ८ ॥ श्रीमनुरुवाच ॥ येनचे
तयतेविश्वंविश्वंचेतयतेनयम् ॥ योजागर्तिशयानेऽस्मिन्नायंतंवेदवेदसः ९

चूर्णिका ॥ १ ॥

श्रीगणेशायनमः ॥ ॥ श्रीमत्कुलदेवत्तायैनमः ॥ अथाष्टमस्कंधव्याख्या ॥ राजोवाच ॥ हेगुरोस्वायंभुवमनोःवंशःमयाश्रुतःयत्रमनुकन्यासुमरीच्यादीनांपुत्रादिसर्गः अन्या
न्मनून्वद १ यत्रयत्रहरेःजन्मानिकर्माणिचकवयःगृणंतितानिवद २ तथाभगवान्गतमन्वंतरेयत्कृतवान् भाव्येयत्करिष्यतिवर्त्तमानेयत्कुरुतेतदपिब्रूहि ३ ॥ श्रीशुकउ
वाच ॥ अस्मिन्कल्पेस्वायंभुवादय.मनवः गताः ६ तत्राद्यमनुःतेकथितः ४ तस्यकन्ययोःआकूतिदेवहूत्योःधर्मज्ञानोपदेशार्थंहरिःपुत्रतांगतः ५ तत्रकपिलकृतंउक्तम् यज्ञः
यच्चकारतदाख्यास्ये ६ अथस्वायंभुवमनुःविरक्तःसन्राज्यंहित्वासभार्यःवनंप्रविश्य ७ सुनंदायांनद्यांवर्षशतंएकेनपदाभुवंस्पृशन्घोरंतपःतप्यमानःइदंउपदिशन्निवआह ८ ये
नविश्वंचेतयते विश्वंतुयंनचेतयते किंच जनेसुप्तेपःजागर्तितंजनःनवेदसतुइमंवेद ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥ २ ॥

तस्येश्वरत्वंदर्शयन्लोकस्यहितमुपदिशति । आत्मनाईश्वरेणआवास्यंस्वसत्ताचैतन्याभ्यांसंव्याप्यंविश्वंसर्वंजगत्यांलोकेयत्किंचिज्जगत्भूतजातंतत् । अतस्तेनैवेश्वरेणयत्किंचित्त्यक्तंदत्तंतेनैवभुंजीथाः भोगान्भुंक्ष्व । यद्वातेनहेतुनात्यक्तेनईश्वरार्पणेनैवभुंजीथाः । नस्वार्थं । कस्यास्वित्कस्यचिदपिधनंमागृधः माभिकांक्षीः । यद्वाकस्यस्वित् । अहोकस्यान्यस्यधनमस्तियतोधनाकांक्षाक्रियतेइत्यर्थः । तथाचश्रुतिः । ईशावास्यमिति यथाश्लोकमेव १० ननुयदिससर्वंव्याप्नोतितर्हिचक्षुरादिभिःकिंनप्रतीयतेतत्राह । यंपश्यंतंजनश्चक्षुर्वानपश्यतिचक्षुराद्यविषयत्वात् । नहिप्रमातारंप्रमाणंविषयीकरोतीतिभावः । तथाचश्रुतिः । 'चक्षुषःचक्षुःश्रोत्रस्यश्रोत्र' मित्यादि । ननुतर्हिघटनाशेदेवदत्तस्यतद्विषयंचाक्षुषंज्ञानमिवेश्वरस्यापिस्वरूपभूतंतद्विषयंज्ञानंनश्येत् । तत्राह । यस्यतुपश्यतः चक्षुर्ज्ञानंनरिष्यतिननश्यति । तत्तदाकारेणोत्पन्नायावृत्तेरेवनाशोनस्वतःसिद्धज्ञानस्य । नहिसवितृप्रकाशः प्रकाश्यनाशेनश्यतीतिभावः । भूतानिनिलयोयस्यतंसर्वांतर्यामिणम् । तथासुपर्णंशोभनपतनंअसंगंउपधावतभजध्वम् ११ तत्स्वरूपस्यनित्यत्वमेवोपपादयन्नाह । नयस्येति । अमूनिआद्यंतादीनिविश्वस्ययस्माद्भवंति । विश्वंचयत्यद्रूपम् । अतएवाव्यभिचारित्वात्तत्ऋतंसत्यंमहत्परिपूर्णंब्रह्म १२ ननुविश्वंचेत्तद्रूपंतर्हितस्यकुतोजन्माद्यभावः । स्वप्रकाशत्वंवाकुतः । कथंवाजगज्जन्मादिकर्तृत्वेनअविकारिणःसत्यत्वंपूर्णत्वंवा । तत्राह । सईशः अजः सत्यश्च । स्वप्रकाशश्चपुराणश्चनिर्विकारः । विश्वंकायोयस्यपुरूणिहूतानिनामानियस्यतथाविधोपियतः अस्यविश्वस्यजन्मादिस्वशक्त्यामाययाधत्तेतांचनित्यसिद्धयाविद्यया (ज्ञानेन) उदस्यहित्वानिःक्रियएवास्ते १३ यस्मादेवमीश्वरःकर्मकृत्वासंत्यज्यनैःकर्म्येणास्तेअथअस्माद्धेतोःऋषयोप्यग्रेआदौकर्माणिकुर्वंति । किमर्थं । अकर्महेतवेमोक्षार्थं । पाठांतरेकर्मनाशाय । हियस्मात्ननुईहमानःकुर्वाणःअनीहांअकर्मत्वम् १४ नन्वीहमानःकर्मभिरवगुंठितःकोशकारइवबध्येतैवतत्राह । ईहतइति । अतस्तमनुवर्तमानायेतेनावसीदंतिनविषज्जंते १५ तदेवंलोकानुग्रहायविश्वसृष्ट्यादियःकरोतिश्रीरामकृष्णाद्यावतारैश्चवेदोक्तमप्याचरतितंशरणंव्रजामेत्याह । तमिति । निजंवर्त्मनरावतारानुरूपोमार्गःतत्रसम्यक्स्थितम् । अतईहमानंकर्माचरंतम् । तथापिजीववैलक्षण्यमाह । निरहंकृतंनिराशिषंअनन्यचोदितमितिच । निरहंकारत्वेहेतुःबुधं । निराशीष्ट्वेहेतुः पूर्णं । अनन्यनियुक्तत्वेहेतुः प्रभुं । तथापिकर्मानुष्ठानेहेतुःनन्स्वाचारेणाशिक्षयंतं तत्किमर्थंतत्राह । अखिलान्धर्मान्भावयतिप्रवर्तयतीतितथातम् १६

श्लोकाः १०/१६

आत्मावास्यमिदंविश्वंयत्किंचिज्जगत्यांजगत् ॥ तेनत्यक्तेनभुंजथिामागृधःकस्यस्विद्धनम् १० यन्नपश्यतिपश्यंतंचक्षुर्यस्यनरिष्यति ॥ तंभूतनिलयंदेवंसुपर्णमुपधावत ११ नयस्याद्यंतौमध्यंचस्वःपरोनांतरंबहिः ॥ विश्वस्यामूनियद्यस्माद्विश्वंचतदृतंमहत् १२ सविश्वकायःपुरुहूतईशःसत्यःस्वयंज्योतिरजःपुराणः ॥ धत्तेऽस्यजन्माद्यजयाऽऽत्मशक्त्यातांविद्ययोदस्यनिरीहआस्ते १३ अथाग्रेऋषयःकर्माणीहंतेऽकर्महेतवे ॥ ईहमानोहिपुरुषःप्रायोऽनीहांप्रपद्यते १४ ईहतेभगवानीशोनहितत्रविषज्जते ॥ आत्मलाभेनपूर्णार्थोनावसीदंतियेऽनुतम् १५ तमीहमानंनिरहंकृतंबुधंनिराशिषंपूर्णमनन्यचोदितम् ॥ नॄन्शिक्षयंतंनिजवर्त्मसंस्थितंप्रभुंप्रपद्येऽखिलधर्मभावनम् १६

चूर्णिका ॥ २ ॥

१० किंच यंपश्यंतंजनःपश्यति यस्यपश्यतःज्ञानंननश्यति तंदेवंभजध्वम् ११ किंच यस्यआद्यंतादीनिनसंति विश्वस्यतुतानियस्माद्भवंति १२ सःविश्वकायःअजयाविश्वस्यजन्मादीनिधत्ते १३ १४ तांविद्ययोदस्यनिरीहआस्तेअतःकर्मसुनविषज्जते १५ तंभगवंतंरामकृष्णाद्यवतारैःवेदोक्तंकर्मआचरंतंनॄन्स्वाचारेणशिक्षयंतंसर्वधर्मप्रवर्तकंप्रभुंप्रपद्ये १६

CC-0. In Public Domain. Digitization by eGangotri

टीका

समाहितमपिसंतंइतिमंत्रोपनिषदंमंत्ररहस्यंव्याहरंतंदृष्ट्वासुप्तोत्थितवद्विवशंमन्वानाअसुरायातुधानाश्च (यक्षरक्षांसि) क्षुधानिमित्तेनजग्धुमत्तुंअभ्यद्रवन् (अभिजग्मुः) १७ (यथावसितान्अत्तुंकृत निश्चयान्) यामैःस्वपुत्रैः । त्रिविष्टपंस्वर्गमपालयत्स्वयमेवेंद्रोबभूवेत्यर्थः तत्रप्रतिमन्वंतरंमन्वादयःषट्अन्येऽन्येभवंति । तथाहिसूतोद्वादशेवक्ष्यति । ' मन्वंतरंमनुर्देवामनुपुत्राःसुरेश्वरः । ऋषयोंशावतारश्चहरेःषड्विधमुच्यत' इति । अत्रमन्वंतरंषड्विधमुच्यतइत्यन्वयः । तत्राद्येंतरेस्वायंभुवोमनुः । प्रियव्रतोत्तानपादौमनुपुत्रौ । यामादयोदेवाः । मरीचिप्रमुखाःसप्तऋषयः । यज्ञोहरेरवतारइंद्रश्चसएवेतितन्मन्वंतरंपंचविधमेव । तच्चतुर्थस्कंधोपक्रमेनिरूपितम् १८ द्वितीयादिषुत्रिषुमन्वंतरेषुमन्वादिषट्कमाह । स्वारोचिषोद्वितीयइत्यादिनायावद्गजेंद्रमोक्षप्रश्नम् १९ २० २१ विभोरसाधारणंचरितमाह । अष्टाशीतिसहस्राणीति २२ २३ २४ (धर्मस्यपत्न्यां) २५ सत्यजितःइंद्रस्यसखासन् । २६ उत्तमःतृतीयोमनुःतस्यभ्राताताामसश्चतुर्थोमनुरिति २७ (सत्यकादयोदेवाआसन्) त्रिशिखनामाईश्वरइंद्रआसीत् २८ अन्यानपितत्रविशिष्टपराक्रमान्देवानाह । देवावैधृतयइति २९

॥ ३ ॥ श्लोकाः १७—२९

॥ श्रीशुकउवाच ॥ इतिमंत्रोपनिषदंव्याहरंतंसमाहितम् ॥ दृष्ट्वाऽसुरायातुधानाजग्धुमभ्यद्रवन्क्षुधा १७ तांस्तथाऽवसितान्वीक्ष्ययज्ञःसर्वगतोहरिः ॥ यामैःपरिवृतोदेवैर्हत्वाऽशासत्त्रिविष्टपम् १८ स्वारोचिषोद्वितीयस्तुमनुरग्नेःसुतोऽभवत् ॥ द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्यचात्मजाः १९ तत्रेंद्रोरोचनस्त्वासीद्देवाश्चतुषितादयः ॥ ऊर्जस्तंभादयःसप्तऋषयोब्रह्मवादिनः २० ऋषेस्तुवेदशिरसस्तुषितानामपत्न्यभूत् ॥ तस्यांजज्ञेततोदेवोविभुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्राणिमुनयोयेधृतव्रताः ॥ अन्वशिक्षन्व्रतंतस्यकौमारब्रह्मचारिणः २२ तृतीयउत्तमोनामप्रियव्रतसुतोमनुः ॥ पवनःसृंजयोयज्ञहोत्राद्यास्तत्सुतानृप २३ वसिष्ठतनयाःसप्तऋषयःप्रमदादयः ॥ सत्यावेदश्रुताभद्रादेवाइंद्रस्तुसत्यजित् २४ धर्मस्यसूनृतायांतुभगवान्पुरुषोत्तमः ॥ सत्यसेनइतिख्यातोजातःसत्यव्रतैःसह २५ सोऽनृतव्रतदुःशीलानसतोयक्षराक्षसान् ॥ भूतद्रुहोभूतगणांस्त्ववधीत्सत्यजित्सखः २६ चतुर्थउत्तमभ्रातामनुर्नाम्नाचतामसः २६ पृथुःख्यातिर्नरःकेतुरित्याद्यादशतत्सुताः २७ सत्यकाहरयोवीरादेवास्त्रिशिखईश्वरः ॥ ज्योतिर्धामादयःसप्तऋषयस्तामसेऽतरे २८ देवावैधृतयोनामविधृतेस्तनयानृप ॥ नष्टाःकालेनयैर्वेदाविधृताःस्वेनतेजसा २९

चूर्णिका

॥ श्रीशुकउवाच ॥ एवंसमाधौमंत्रोपनिषदंउच्चारयंतंमनुंदृष्ट्वाअसुराःयातुधानाःतंजग्धुंअभ्यद्रवन् १७ तदाआकूतिपुत्रोयज्ञःस्वपुत्रैःयामैर्वृतःसन् तान् हत्वास्वर्गंअपालयत् अथमन्वंतराण्याहतत्राद्यम् स्वायंभुवोमनुः १ प्रियव्रतोत्तानपादौमनुपुत्रौ २ यामादयोदेवाः ३ मरीचिप्रमुखाःसप्तर्षयः ४ यज्ञोहरेरवतारः ५ सएवइंद्रः ६ १८ ततःद्वितीयम् अग्नेःपुत्रःस्वारोचिषोमनुः १ द्युमत्सुषेणरोचिष्मदादयःतत्सुताः २ १९ रोचननामाइंद्रः ३ ऊर्जस्तंभादयःसप्तर्षयः ४ २० तुषितादयोदेवाः ५ वेदशिरसःऋषेःतुषितायांविभुरित्यवतारः ६ २१ तस्मात् अष्टाशीतिसहस्राणि ८८००० ऋषयःब्रह्मचर्यव्रतंअन्वशिक्षन् २२ ततःतृतीयम् प्रियव्रतसुतःउत्तमोनाममनुः १ पवनसृंजयाद्याःतत्सुताः २ २३ वासिष्ठात्मजाःप्रमदादयःसप्तर्षयः ३ सत्यादयोदेवाः ४ सत्यजित् इंद्रः ५ २४ धर्मात् सूनृतायांसत्यसेनोऽवतारः ६ २५ सःयक्षराक्षसान्अवधीत् २६ ततःचतुर्थम् उत्तमभ्राताताामसोमनुः १ पृथुःख्यातिःनरःकेतुःइत्याद्याःदशतत्सुताः २७ २ सत्यकाःहरयोवीरादेवाः ३ त्रिशिखःइंद्रः ४ ज्योतिर्धामाद्याऋषयः ७ ५ २८ २९

॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हरिमेधसःपत्न्यांहरिण्यांनाम्नाहरिरित्याहृतः । ग्रहात्ग्राहात् । (येनहरिणा) ३० अमूमुचत्मोचयामास ३१ श्रवणेच्छायांहेतुः । तत्कथासुतासुकथासु । साकथैववासुमहत्पुण्यं । पुण्यस्यविशेषणंधन्यमित्यादि । (तत्कथासुधर्मार्थकाममोक्षाअपिअनायासेनसिध्यंतिअतोमुमुक्षूणामस्माकंतच्छ्रवणमिष्टमितिभावः) ३२ (प्रायोपविष्टेनगृहीतानशनव्रतेन । हेविप्राःशौनकादयःमुनीनांशृण्वतांसतां । साधुसाध्वितिप्रतिनंद्य) ३३ ॥ ॥ इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेटीकायाममन्वंतरानुचरितंनामप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ तुर्येमन्वंतरेप्रोक्तंगजेंद्रस्यविमोक्षणम् । द्वितीयादित्रिभिस्तत्तुविस्तरेणोपवर्ण्यते १ द्वितीयेतुगजेंद्रस्यगजीभिःक्रीडतोजले । दैवाद्ग्राहगृहीतस्यहरिस्मृतिरुदीर्यते २ आसीदस्ति १ तावतायोजनायुतेनपर्यक्परितः । त्रिकूटसमाख्यावीजमाह । त्रिभिःशृंगैर्मुख्यैः २ अन्यैश्चशृंगैर्निर्झरांभसांनिर्घोषैश्चककुभःसर्वारोचयन्नास्तइतिपूर्वेणैवान्वयः । कथंभूतैःशृंगैः । रत्नैर्धातुभिश्चविचित्रितैः । (पुनःकथंभूतैः) नानाविधाद्रुमलतानांगुल्मायेषुतैः ३ पयसऊर्मिभिःसमंतादवनिज्यमानाअंघ्रयोमूलप्रांतायस्य । हरिद्भिःपालाशवर्णैः ४ ५ किन्नरादीनांसंगीतसंनादैर्नदंत्योगुहायस्मिन्प्रदेशेतंअभिगर्जंतिहरयः सिंहाःअमर्षयाअसहनेन । परशंकयाप्रतिस्पर्धिसिंहशंकया ६ नानायेआरण्याःपशवःतेषांव्रातैःसंकुलाभिःद्रोणीभिः अलंकृतआस्ते । किंच चित्राद्रुमायेषुतेषुसुरोद्यानेषुकलकंठामधुरस्वनाविहंगमायस्मिन् ७

॥ ४ ॥

श्लोकाः ३०/७

तत्रापिजज्ञेभगवान्हरिण्यांहरिमेधसः ॥ हरिरित्याहृतोयेनगजेंद्रोमोचितोग्रहात् ३० ॥ ॥ राजोवाच ॥ ॥ बादरायणएतत्तेश्रोतुमिच्छामहेवयम् ॥ हरिर्यथागजपतिंग्राहग्रस्तममूमुचत् ३१ तत्कथासुमहत्पुण्यंधन्यंस्वस्त्ययनंशुभम् ॥ यत्रयत्रोत्तमश्लोकोभगवान्गीयतेहरिः ३२ ॥ सूतउवाच ॥ परीक्षितैवंसतुबादरायणिःप्रायोपविष्टेनकथासुचोदितः ॥ उवाचविप्राःप्रतिनंद्यपार्थिवंमुदामुनीनांसदसिस्मशृण्वताम् ३३ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेमन्वंतरानुचरितंनामप्रथमोऽध्यायः १ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ आसीद्गिरिवरोराजंस्त्रिकूटइतिविश्रुतः ॥ क्षीरोदेनावृतःश्रीमान्योजनायुतमुच्छ्रितः १ तावताविस्तृतःपर्यक्त्रिभिःशृंगैःपयोनिधिम् ॥ दिशःखंरोचयन्नास्तेरौप्यायसहिरण्मयैः २ अन्यैश्चककुभःसर्वारत्नधातुविचित्रितैः ॥ नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झरांभसाम् ३ सचावनिज्यमानांघ्रिःसमंतात्पयऊर्मिभिः ॥ करोतिश्यामलांभूमिंहरिन्मरकताश्मभिः ४ सिद्धचारणगंधर्वविद्याधरमहोरगैः ॥ किंनरैरप्सरोभिश्चक्रीडद्भिर्जुष्टकंधरः ५ यत्रसंगीतसन्नादैर्नदद्गुहममर्षया ॥ अभिगर्जंतिहरयःश्लाघिनःपरशंकया ६ नानारण्यपशुव्रातसंकुलद्रोण्यलंकृतः ॥ चित्रद्रुमसुरोद्यानकलकंठविहंगमः ७

चूर्णिका

हरिमेधसःविप्रस्यहरिण्यांस्त्रियांहरिःअवतारोजातः ६ येनग्राहात्गजेंद्रोमोचितः ३० ॥ राजोवाच ॥ हेशुकहरिःयथागजपतिंअमूमुचत्तत् वयंश्रोतुमिच्छामहे ३१ ३२ ॥ सूतउवाच ॥ राज्ञाएवंकथासुचोदितःशुकःमुनीनांसदसिपार्थिवंउवाच ३३ ॥ ॥ इत्यष्टमेप्रथमः १ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ हेराजन्कश्चित्त्रिकूटनामाद्रिःक्षीरोदेनावृतःअयुतयोजनोच्छ्रायविस्तारःआसीत् १ सःरौप्यायसहिरण्मयैःत्रिशृंगैःदिशःखंरोचयन्नास्ते २ ३ हरिन्मरकताश्मभिःश्यामांभूमिंकरोति ४ क्रीडद्भिःसिद्धचारणादिभिःजुष्टकंदरः चित्रद्रुमसुरोद्यानकलकंठविहंगमः स्वच्छोदकैःसरित्सरोभिर्युतःमणिमयवालुकैःपुलिनैर्युतः ५ ६ ७

॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंचस्वच्छोदकैःसरित्सरोभिर्युतः । मणयइववालुकायेषुतैःपुलिनैश्चयुतः । देवस्त्रीणांमज्जनेनयआमोदःतेनसौरभयुक्तान्यंबूनिअनिलाश्चतैश्चयुतआस्ते ८ तस्यत्रिकूटस्यद्रोण्यां (निम्नेतटे) वरुणस्योद्यानमा स्ते । सुरयोषितांआसमंतात्क्रीडायस्मिन् नाम्नाऋतुमत् । गिरिवनादिसर्वंध्येयमितिवक्ष्यति अतोगिरिमुपवर्ण्यवनंवर्णयति सर्वतोलंकृतमिति नित्यंपुष्पाणिफलानिचयेषुतैर्द्रुमैः । अतएवऋतुमदितिसमा ख्यायुक्ता ९ पुनर्गिरिंवर्णयतिमंदारैरितिचतुर्भिः । मंदारादिभिर्वृतइत्यन्वयः । चूताम्रयोरवांतरभेदः १० ११ १२ अक्षोबिभीतकः । अभयाहरीतकी । आमलोधात्रीतैः १३ तस्मिन्गिरौसरआस्ते तद्वर्णयतिसुविपुलमितिसार्धैःपंचभिः । लसंतिकांचनपंकजानियस्मिन् । कुमुदादीनांश्रियाऊर्जितंसमृद्धम् । कलःस्वनोयेषांतैः शकुंतैश्चनिर्घुष्टम् १४ चक्राह्वैश्चक्रवाकैःसारसैरप्याकीर्णं । जलकुक्कुटादी नांकुलैःकूजितम् १५ मत्स्यानांकच्छपानांचसंचारेण चलतांपद्मानांरजसायुक्तंपयोयस्मिन् (कदंबनीपयोर्वेतसवंजुलकयोश्चावांतरभेदः) १६ १७ नित्यंऋतवःफलपुष्पादिसंपत्तिहेतवोयेषुतैर्द्रुमैरलंशोभित म् १८ तत्रैवंसतिएकदातद्गिरिकाननाश्रयोगजयूथपःकरेणुभिर्हस्तिनीभिःसहचरन्तृषार्दितेनस्वयूथेनवृतःसरोवरस्याभ्याशंसमीपमगमदितिपंचमेनान्वयः । किंकुर्वन् । कीचकवेणुवेत्रवंतंविशालंमहांतं गुल्मंलतादिसंदर्भंवनस्पतींश्चप्ररुजन्भंजन् १९

॥ ५ ॥ सरित्सरोभिरच्छोदैःपुलिनैर्मणिवालुकैः ॥ देवस्त्रीमज्जनामोदसौरभांब्वनिलैर्युतः ८ तस्यद्रोण्यांभगवतोवरुणस्यमहात्मनः ॥ उद्यानमृतुमन्नामआक्री श्लोकाः

डंसुरयोषिताम् ॥ सर्वतोलंकृतंदिव्यैर्नित्यपुष्पफलद्रुमैः ९ मंदारैःपारिजातैश्चपाटलाशोकचंपकैः ॥ चूतैःप्रियालैःपनसैराम्रैराम्रातकैरपि १० क्रमुकै ८/१९

र्नालिकेरैश्चखर्जूरैर्बीजपूरकैः ॥ मधुकैःशालतालैश्चतमालैरसनार्जुनैः ११ अरिष्टोदुंबरप्लक्षैर्वटैःकिंशुकचंदनैः ॥ पिचुमर्दैःकोविदारैःसरलैःसुरदारुभिः १२

द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः ॥ बिल्वैःकपित्थैर्जंबीरैर्वृतोभल्लातकादिभिः १३ तस्मिन्सरःसुविपुलंलसत्कांचनपंकजम् ॥ कुमुदोत्पलकह्लार

शतपत्रश्रियोर्जितम् ॥ मत्तषट्पदनिर्घुष्टंशकुंतैश्चकलस्वनैः १४ हंसकारंडवाकीर्णंचक्राह्वैःसारसैरपि ॥ जलकुक्कुटकोयष्टिदात्यूहकुलकूजितम् १५

मत्स्यकच्छपसंचारचलत्पद्मरजःपयः ॥ कदंबवेतसनलनीपवंजुलकैर्वृतम् १६ कुंदैःकुरबकाशोकैःशिरीषैःकुटजेंगुदैः ॥ कुब्जकैःस्वर्णयूथीभिर्नागपुन्ना

गजातिभिः १७ मल्लिकाशतपत्रैश्चमाधवीजालकादिभिः ॥ शोभितंतीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः १८ तत्रैकदातद्गिरिकाननाश्रयःकरेणुभिर्वारणयू

थपश्चरन् ॥ सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मंप्ररुजन्वनस्पतीन् १९

चूर्णिका ८ एवंभूताचलस्यद्रोण्यांवरुणस्यऋतुमन्नामउद्यानंआस्तेकथंभूतंतत्सुरस्त्रीणामाक्रीडम् ९ किंच मंदारपारिजातपाटलाऽशोकचंपकचूतप्रियालपनसाम्राम्रातकक्रमुकनालि केरखर्जूरबीजपूरमधुकसालतालतमालासनार्जुनाऽरिष्टोदुंबरप्लक्षवटकिंशुकचंदनपिचुमंदकोविदारसुरदारुद्राक्षेक्षुरंभाजंबुबदरिबिल्वकपित्थजंबीरभल्लातकादिभिःवृक्षैःवृतःत्रिकू टः १० ११ १२ १३ तत्रसरोवरंअद्भुतमास्तेतत् किंभूतम् लसत्कांचनपंकजंकुमुदोत्पलादीनांश्रियाऊर्जितंमत्तषट्पदशकुंतैःनादितंहंसकारंडवादिभिःव्याप्तंजलकु क्कुटादीनांकुलैःकूजितम् मत्स्यकच्छपादीनांसंचारेणचलत्पद्मरजोभिःव्याप्तोदकंकदंबवेतसनलनीपकुंदस्वर्णयूथीपुन्नागजातीमल्लिकादिभिःशोभितम् १४ १५ १६ १७ ॥ ५ ॥ १८ तत्रएकदागिरिकाननाश्रयःगजेंद्रःकरेणुभिःचरन्कंटककीचकवेणुवेत्रादिगुल्मंप्ररुजन्सन्बभ्राम १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कथंभूतः । यस्य (गजेंद्रस्य) गंधमात्रात्हरयःसिंहाःगजेंद्रादयश्चभयात्द्रवंतिपलायंते। (तत्रव्यालाहिंस्रपशवः । गौरकृष्णैर्मृगभेदैःसह) २० वृकादयस्तुक्षुद्राअल्पप्राणिनःअन्यत्रदृष्टिपथंत्यक्त्वाचरं तिऋक्षाअच्छभल्लाः । २१ पुनःकीदृशःघर्मतप्तः । मदच्युत्मदस्रावी । कलभैःकरिशावकैरनुगतः । गरिम्णागुरुत्वेन । मदमश्नंतितथातैः २२ पंकजपरागमिश्रंसरःसंबंधिनंवायुंजिघ्रत् २३ निजेनपुष्क रेणकराग्रेणउद्धृतंगतक्लमः सन्निकामंपपौ २४ (घृणीदयावान्उद्धृतकणरूपवारिभिःगजीःस्वकलभांश्चसंस्नपयन्गृहस्थइवकृच्छ्रंसंकटंनापश्यत्) २५ (हेनृपसमहाबलोगजः) २६ (बलीयसाग्राहेण विकृष्यमाणंतथाभूतमातुरंगजेंद्रम्) दीनधियःकरेणवःकेवलंविचुक्रुशुः । अपरेगजास्तुपार्ष्णिग्राहाःसंतोपितंतारयितुंनाशकन् २७ (हेमहीपतेअंतरतोविकर्षतोनक्रस्यबहिर्विकर्षतोगजेंद्रस्यचसहस्रंवर्षा णिव्यगमन् । सप्राणयोःप्राणमात्रेणस्थितयोरित्यर्थः) २८ मनउत्साहशक्तिः । बलंशारीरम् । ओजऐंद्रियम् । (तेषांव्ययोमहानभूत् । कस्य । विकृष्यमाणस्यगजेंद्रस्य । जलौकसोग्राहस्यतु) सकलंबलादी विपर्ययोविपरीतं (ततो) अधिकंजलौकसोग्राहस्यइत्यर्थः । २९ सइत्थंयदाप्राणस्यसंकटमापयतोदेही (तदाचिरंदध्यौचिंतितवान् । अथेमांबुद्धिमभ्यपद्यत) ३०

॥ ६ ॥ श्लोकाः २०—३०

यद्गंधमात्राद्धरयोगजेंद्राव्याघ्रादयोव्यालमृगाःसखड्गाः ॥ महोरगाश्चापिभयाद्द्रवंतिसगौरकृष्णाःशरभाश्चमर्यः २० वृकावराहामहिषर्क्षशल्यागोपुच्छशालावृकमर्कटाश्च ॥ अन्यत्रक्षुद्राहरिणाःशशादयश्चरंत्यभीतायदनुग्रहेण २१ सघर्मतप्तःकरिभिःकरेणुभिर्वृतोमदच्युत्कलभैरनुद्रुतः ॥ गिरिंगरिम्णापरितःप्रकंपयन्निषेव्यमाणोऽलिकुलैर्मदाशनैः २२ सरोनिलंपंकजरेणुरूषितंजिघ्रद्विदूरान्मदविह्वलेक्षणः ॥ वृतःस्वयूथेनतृषाऽर्दितेनतत्सरोवराभ्याशमथागमद्द्रुतम् २३ विगाह्यतस्मिन्नमृतांबुनिर्मलंहेमारविंदोत्पलरेणुवासितम् ॥ पपौनिकामंनिजपुष्करोद्धृतमात्मानमद्भिःस्नपयन्गतक्लमः २४ स्वपुष्करेणोद्धृतशीकरांबुभिर्निपाययन्संस्नपयन्यथागृही ॥ घृणीकरेणूःकलभांश्चदुर्मदोनाचष्टकृच्छ्रंकृपणोऽजमायया २५ तंतत्रकश्चिन्नृपदैवचोदितोग्राहोबलीयांश्चरणेरुषाऽग्रहीत् ॥ यदृच्छयैवंव्यसनंगतोगजोयथाबलंसोऽतिबलोविचक्रमे २६ तथातुरंयूथपतिंकरेणवोविकृष्यमाणंतरसाबलीयसा ॥ विचुक्रुशुर्दीनधियोऽपरेगजाःपार्ष्णिग्रहास्तारयितुंनचाशकन् २७ नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतोबहिर्मिथः ॥ समाःसहस्रंव्यगमन्महीपतेसप्राणयोश्चित्रममंसतामराः २८ ततोगजेंद्रस्यमनोबलौजसांकालेनदीर्घेणमहानभूद्व्ययः ॥ विकृष्यमाणस्यजलेऽवसीदतोविपर्ययोभूत्सकलंजलौकसः २९ इत्थंगजेंद्रःसयदापसंकटंप्राणस्यदेहीविवशोयदृच्छया ॥ अपारयन्नात्मविमोक्षणेचिरंदध्याविमांबुद्धिमथाभ्यपद्यत ३०

चूर्णिका

यद्गंधमात्रात्सिंहगजेंद्राव्याघ्रादयःभयात्पलायंते २० क्षुद्राःवृकहरिणादयःतद्दृष्टिपथंहित्वायत्कृपयाअभीताःचरंति २१ एवंभ्रमन्घर्मतप्तःसःगजैःगजीभिःकलभैश्चअनुद्रुतः अलिकुलैःसेव्यमानःस्वगरिम्णागिरिंकंपयन् २२ दूरादेवपंकजरेणुमिश्रंसरोनिलंजिघ्रन्तृषार्दितेनस्वयूथेनवृतःसन्सरोवराभ्याशंअगमत् २३ तत्रविगाह्यगतक्लमःसन्उत्पलरेणुवासितंजलंकामंपपौस्वशुंडाग्रोद्धृताद्भिःआत्मानंस्नपयन्करेणूःकलभांश्चस्नपयन्पाययन् अजमाययाप्रातंकष्टंनावेष्ट २४ २५ तत्रकश्चिद्दैवचोदितःबलीयान्ग्राहःरुषातंचरणेअग्रहीत् एवंदुःखंप्राप्तोगजःयथाबलंविचक्रमे २६ तथाविधंतंअन्येगजाःमोचयितुंनाशकन्करेणवःविचुक्रुशुः २७ एवंइभेंद्रनक्रयोःअंतर्बहिःमिथःविकर्षतोःवर्षसहस्रंअगमत् २८ ततोगजेंद्रबलस्यव्ययःअभूत्नक्रस्यतुबलाधिक्यंजातम् २९ एवंगजेंद्रः यदासंकटंआप तदाचिरंध्यात्वाइमांबुद्धिंप्रत्यपद्यत ३०

॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.अ. तामेवबुद्धिमाह । नम.मीति । (इमेज्ञातयोनप्रभवंवि) अहंचनप्रभवामि । यतःग्राहरूपेणकेवलंविधातुःपाशेनआवृतःतथापितंपरंपरमेश्वरंपरेषांब्रह्मादीनामयनमाश्रयभूतंयामिशरणंव्रजामि ३१ कोसौय अ०
शरणंयासीत्यत्राह । यःकश्चनेति । अंतकएवोरगस्तस्मात् । तंअरणंशरणमीमहिव्रजेम । यद्भयादित्यत्रश्रुतिः । 'भीषास्माद्वातःपवतेभीषोदेतिसूर्यः । भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचम'इति ३२
टीका ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांगजेंद्रोपाख्यानेद्वितीयोऽध्यायः २ ॥ ॥ ७ ॥ ॥ तृतीयेतुगजेंद्रेणस्तुतोहरिरुपेत्यतम् । समुद्दधारतंग्राहाद्ग्राहंदेवलशापतः १ (हृदि । चित्ते)
जाप्यंजप्यंस्तोत्रंप्राग्जन्मनिइंद्रद्युम्नसंज्ञे १ तस्मैनमोनमनंअभिधीमहिअभिध्यायेमकेवलंग्राहगृहीतत्वेनकायप्रणतेरशक्यत्वात् । स्वस्यतज्ज्ञानंसंभावयितुंविशिनष्टि । यतश्चिद्रूपात्एतद्देहादिचिदात्मकंचे ॥ ३ ॥
तनंभवति । तदुक्तम् । येनचेतयतेविश्वमिति । तत्रहेतुः । पुरुषायपूर्वंकारणत्वेनप्रविष्टाय । ननुप्रकृतिपुरुषौकारणंप्रसिद्धंतत्राह । आदिःप्रकृतिःबीजंपुरुषःतद्रूपाय । प्रविष्टत्वेपिजीववत्पारतंत्र्यंवारय
॥ ७ ॥ तिपरेशायेति २ परेशत्वंविवृण्वन्नाहयावत्समाप्ति । यस्मिन्नधिष्ठानेयतउपादानात्येनकर्त्रायश्चस्वयमेवेदंविश्वंभवति (तथापि) अस्मात्कार्यात्परस्मात्कारणाच्चयःपरस्तंस्वयंभुवंस्वतःसिद्धंप्रपद्येशरणं
व्रजामि ३ विश्वहेतुत्वंस्वतःसिद्धत्वंचोक्तम् । इदानींविश्वप्रकाशकत्वंस्वप्रकाशकत्वंचवर्णयन्प्रार्थयते । यःस्वात्मनीति ।(क्वचित्) विभातंअभिव्यक्तंसत्क्वचित्प्रलयेतिरोहितंलीनंसत्तदुभयंकार्यकारणं
चसाक्षीसन्नीक्षते । साक्षित्वेहेतुः । अविद्धदृक्अलुप्तदृष्टिः । आत्ममूलःस्वप्रकाशःकुतःपरात्प्रकाशकाच्चक्षुरादेरपिपरः । तस्यापिप्रकाशकइत्यर्थः । 'चक्षुषश्चक्षुरि' त्यादिश्रुतेः ४ तिरोहितमीक्षतेइत्येतत्प्रपं
चपूर्वकंदुर्ज्ञेयत्वंवदन्प्रार्थयते । कालेनेतिद्वाभ्यां । पंचत्वमितेषुनाशंप्राप्तेषुगहनंदुरवगाहंगभीरमनंतम् । तस्यतमसः(पारे:) ' आदित्यवर्णंतमसःपरस्तादिति'श्रुतेः ५ अतएवदेवादयोपस्यस्वरूपंनवि
दुः । जंतुरर्वाचीनः गंतुंज्ञातुं । ईरितुंवक्तुंवा । दुरत्ययंदुर्गममनुक्रमणंचरितंकथनंवायस्यसःमामाम् ६

नमामिमेज्ञातयआतुरंगजाःकुतःकरिण्यःप्रभवंतिमोचितुम् ॥ ग्राहेणपाशेनविधातुरावृतोप्यहंचतंयामिपरंपरायणम् ३१ यःकश्चनेशोबलिनोंतकोरगा श्लोकाः
त्प्रचंडवेगादभिधावतोभृशम् ॥ भीतंप्रपन्नंपरिपातियद्भयान्मृत्युःप्रधावत्यरणंतमीमहि ३२ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेगजेंद्रोपाख्या
नेद्वितीयोऽध्यायः २ ॥ ॥ ७ ॥ ॥ बादरायणिरुवाच ॥ एवंव्यवसितोबुद्ध्यासमाधायमनोहृदि ॥ जजापपरमंजाप्यंप्राग्जन्मन्यनुशिक्षितम् ३१/६
१ ॥ गजेंद्रउवाच ॥ ॐनमोभगवतेतस्मैयतएतच्चिदात्मकम् ॥ पुरुषायादिबीजायपरेशायाभिधीमहि २ यस्मिन्निदंयतश्चेदंयेनेदंयइदंस्वयम् ॥ योऽ
स्मात्परस्माच्चपरस्तंप्रपद्येस्वयंभुवम् ३ यःस्वात्मनीदंनिजमाययार्पितंक्वचिद्विभातंक्वचतत्तिरोहितम् ॥ अविद्धदृक्साक्ष्युभयंतदीक्षतेसआत्ममूलोऽ
वतुमांपरात्परः ४ कालेनपंचत्वमितेषुकृत्स्नशोलोकेषुपालेषुचसर्वहेतुषु ॥ तमस्तदासीद्गहनंगभीरंयस्तस्यपारेऽभिविराजतेविभुः ५ नयस्यदेवाऋषयः
पदंविदुर्जंतुःपुनःकोर्हतिगंतुमीरितुम् ॥ यथानटस्याकृतिभिर्विचेष्टतोदुरत्ययानुक्रमणःसमाऽवतु ६

चूर्णिका अहोइमेगजाःआतुरंमांमोचितुंनप्रभवःकरिण्यःकुतःअहंग्राहरूपेणविधातुःपाशेनआवृतोऽपितंशरणंयामि ३१ यःईशःअंतकसर्पात्भीतंजनंपातितंशरणंव्रजेम ३२ ॥ इत्यष्ट
मेद्वितीयः २ ॥ ॥ ७ ॥ ॥ ॥ श्रीशुकउवाच ॥ एवंबुद्ध्याव्यवसितःगजेंद्रः मनः समाधायप्राग्जन्मनिअनुशिक्षितंपरमंस्तोत्रंजजाप १ ॥ गजेंद्रउवाच ॥ यतःचिद्रूपा ॥ ७ ॥
त्एतत्देहादिकंसचेतनंभवति तस्मैपूर्पुकारणत्वेनप्रविष्टायपरमेशायभगवतेकेवलंनमनंअभिध्यायेमकायप्रणतेःअशक्यत्वात् २ किंच यःकार्यकारणात्परःतंस्वयंभुवंशरणं
व्रजामि ३ सःस्वयंप्रकाशःमांअवतु४ ५ अहोदेवाःऋषयःयस्यस्वरूपंनविदुःतंकोऽपिजंतुःज्ञातुंवक्तुंवाअर्हतिकिम् सःदुर्गमचरितःमांअवतु ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कथंतर्हि 'तमेवविदित्वाऽतिमृत्युमेती'त्यादिश्रुतिरित्याशंक्यतज्ज्ञानोपायंकथयन्नाह । दिदृक्षवइति । अलोकव्रतंब्रह्मचर्यादिअव्रणमच्छिद्रम् । भूतानामात्मभूताः भूतेष्वात्मदृष्टयः संतःसमेगतिरस्तु ७ दुरत्ययानुक्रमणत्वंप्रपंचयन्नमणमाति । नविद्यतइत्यादिना । (गुणयुक्तदोषःगुणोदोषश्चेत्यर्थः) लोकानामप्ययःप्रलयःसंभवोजन्मतयोर्द्वैक्यंतदर्थंयस्तानिजन्मादीनिस्वीकरोतितस्मैममइत्युत्तरेणान्वयः ८ ब्रह्मणेब्रह्मरूपाय । (अनंतशक्तयेअनंतैश्वर्याय । उरुरूपायबहुरूपाय) अतआश्चर्याणिकर्माणियस्यतस्मैपरेशायनमः ९ आत्मप्रदीपायप्रकाशांतरस्याविषयाय । कुतः । साक्षिणेप्रकाशकाय । परमात्मनेजीवनियंत्रे । अतएवगिरांविदूरायअप्राप्याय । चेतसांचित्तवृत्तीनां । तथाचश्रुतिः । ' यतोवाचोनिवर्तंतेअप्राप्यमनसासहे ' ति १० एवमपिविपश्चितानिपुणेननैष्कर्म्येणसंन्यासेमसत्त्वेनशुद्धेन । 'संन्यासयोगाद्यतयःशुद्धसत्त्वा'इतिश्रुतेः । प्रतिलभ्यायप्रत्यक्त्वेनप्राप्याय । निर्वाणसुखसंविदेमोक्षानंदानुभूतये ११ शांतायसत्त्वानुसारिणे । घोरायरजोनुसारिणे । मूढायतमोनुसारिणे । यतोगुणधर्मिणेसत्त्वादिधर्मानुकारिणे (गुणधर्माःसंतियस्मिन्नधिष्ठानेतस्मैसाम्यायगुणसाम्याश्रयाय । वस्तुतःनिर्विशेषाय) निर्विशेषत्वेपिप्रधानवैलक्षण्यमुक्तम् ज्ञानघनायेत्यनेन १२ साक्षिणइतिसर्वाध्यक्षत्वेपिनिर्विकारत्वमुक्तम् । आत्मनांक्षेत्रज्ञानांमूलाय । मूलस्यप्रधानस्यापिप्रकृतयेउद्भवहेतवे । तत्रहेतुःपुरुषायपूर्वमेवसते । यथाचश्रुतिः । ' पूर्वमेवाहमिहासमितितत्पुरुषस्यपुरुषत्व'मिति । पूर्णायितवा १३ सर्वेंद्रियाणांयेगुणाविषयास्तेषांद्रष्ट्रे । सर्वेप्रत्ययाइंद्रियवृत्तयोहेतवोज्ञापकायस्यतस्मै । तदेवाह । असताअहंकारादिप्रपंचेन (हेतुना) छाययाप्रतिबिंबरूपयाउक्ताय । जलस्थप्रतिबिंबेनबिंबंयथासूच्यतेतथासूचिताय । तत्रहेतुः । सद्रूपोविषयेष्वाभासोयस्यतस्मै । तदुक्तंतृतीये । 'यथाजलस्थआभास'इत्यादिना । पाठांतरे । असत्यस्यछाययाअध्यासेनअक्तायमुक्ताय । तदधिष्ठानायेत्यर्थः १४ अखिलकारणायसर्वकारकरूपाय । अतएवस्वयंनिःकारणाय । कारणत्वेपिमृदादिवद्विकारंवारयति । अद्भुतकारणायेति । एवंभूतत्वेप्रमाणमाह । सर्वेआगमाःपंचरात्रादयःआम्नायाश्चवेदाःतेषांमहार्णवायस्रोतसामिवपर्यवस्थानाय । अपवर्गायमोक्षरूपाय । अतःपरायणायउत्तमानामाश्रयाय १५

॥ ८ ॥

श्लोकाः ७/१५

दिदृक्षवोयस्यपदंसुमंगलंविमुक्तसंगामुनयःसुसाधवः॥ चरंत्यलोकव्रतमव्रणंवनेभूतात्मभूताःसुहृदःसमेगतिः ७ नविद्यतेयस्यचजन्मकर्मवानचनामरूपेगुणदोषएववा ॥ तथापिलोकाप्ययसंभवाययःस्वमाययातान्यनुकालमृच्छति ८ तस्मैनमःपरेशायब्रह्मणेऽनंतशक्तये॥ अरूपायोरुरूपायनमआश्चर्यकर्मणे ९ नमआत्मप्रदीपायसाक्षिणेपरमात्मने ॥ नमोगिरांविदूरायमनसश्चेतसामपि १० सत्त्वेनप्रतिलभ्यायनैष्कर्म्येणविपश्चिता ॥ नमःकैवल्यनाथायनिर्वाणसुखसंविदे ११ नमःशांतायघोरायमूढायगुणधर्मिणे ॥ निर्विशेषायसाम्यायनमोज्ञानघनायच १२ क्षेत्रज्ञायनमस्तुभ्यंसर्वाध्यक्षायसाक्षिणे ॥ पुरुषायात्ममूलायमूलप्रकृतयेनमः १३ सर्वेंद्रियगुणद्रष्ट्रेसर्वप्रत्ययहेतवे ॥ असताच्छाययोक्तायसदाभासायतेनमः १४ नमोनमस्तेऽखिलकारणायनिःकारणायाद्भुतकारणाय ॥ सर्वागमाम्नायमहार्णवायनमोऽपवर्गायपरायणाय १५

॥ ८ ॥

चूर्णिका

यस्यपदंद्रष्टुमिच्छवःमुनयःवनेब्रह्मचर्यादिव्रतंचरंतिसःमेगतिरस्तु ७ अपिचयस्यजन्मादीनिनसंतितथापिलोकाप्ययसंभवार्थंजन्मादीनियःधत्ते ८ तस्मैपरेशायब्रह्मणे ९ परमात्मनेकैवल्यनाथाय १० ११ शांतायक्षेत्रज्ञायसदाभासाय १२ १३ १४ अखिलकारणायस्वयंप्रकाशायमादृक्प्रपन्नपशुपाशविमोक्षणायभूरिकरुणाय १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुणाएवारणिस्तयाछन्नश्चिदुष्मपोज्ञानाग्निस्तस्मै । तेषांगुणानांक्षोभेकार्यैविस्फूर्जितंबहिर्वृत्तिकंमानसंयस्य (तस्मै) 'सोऽकामयतबहुस्यामि'तिश्रुतेः । नैष्कर्म्यमात्मतत्त्वंतस्यभावेनभावनयाविवर्जिता
आगमाविधिनिषेधलक्षणायैस्तेषुस्वयमेवप्रकाशोयस्यतस्मै १६ मादृग्मद्विधःसचासौप्रपन्नःपशुःतस्यपाशोऽविद्यातस्यविशेषेणमोक्षणंयेन । तत्रयोग्यतामाह । मुक्ताय । मोचनेहेतुः । भूरिःकरुणायस्य ।
अतस्तत्रार्थेअलयायअनलसाय । स्वांशेनअंतर्यामिरूपेणसर्वेषांतनुभृतांमनसिप्रतीताप्रख्यातायाप्रत्यग्दृक्तस्यै । तथाचश्रुतिः । 'यआत्मनितिष्ठन्आत्मानमंतरोयमयती'ति । भगवतेसर्वेषांतनुभृतांनियं
मनेसमर्थाय । तेषांमनसिस्थितत्वेपिबृहतेअपरिच्छिन्नाय १७ अंतस्थत्वेपिदेहादिष्वासक्तैःदुःप्रापणायप्राप्तुमशक्याय । तत्रहेतुःगुणसंगेनविवर्जिताय । अतएवमुक्तात्मभिःदेहादिष्वनासक्तैश्चिंतिताय । तैः
परिभावितंरूपमाहज्ञानात्मनइति १८ इष्टांगतिंकामितंधर्मादिफलंप्राप्नुवंत्येव । नतुतावदेव । किंतुयास्तैरकामिताअन्याअप्याशिषोरातिदेहमप्यव्ययंराति । एवंयःअदभ्रदयःसमेविमोक्षणमेवकेवलंकरोतुना
धिकंप्रार्थये १९ एतावदप्यहंभक्तिसुखानभिज्ञत्वेनवांछामि । यस्यत्वेकांतभक्तानकंचिदर्थंवांछंतितंपरमेश्वरमीडेस्तौमीत्युत्तरेणान्वयः । तेषांनिःकामत्वेहेतुः । येवैभगवतःसर्वज्ञान्मुक्तान्प्रपन्नाःसेवितवं
तः २० अत्यद्भुतत्वसुमंगलत्वप्रदर्शनार्थंअक्षरत्वादिविशेषणानि (अध्यात्मशास्त्रोक्तोपायेनगम्यंलभ्यम्) २१ परिपूर्णत्वंप्रदर्शयन्नाहत्रिभिः । यस्येति । फल्गुरूपयास्वयैवकलयाअंशेनकृताः । सज
यतादितितृतीयेनान्वयः २२ कथंकृताइत्यपेक्षायांदृष्टांतौ । यथार्चिषोऽग्नेरितिप्रवाहेदृष्टांतः । सवितुर्गभस्तयइत्यानंत्ये । निर्यांतिउद्गच्छंति । संयांतिलीयंते (स्वरोचिषःस्वयंप्रकाशात्) गुणसंप्रवाह
मेवाह । बुद्धिर्मनःखानिकरणानि । शरीरसर्गाःकार्यदेहप्रवाहाश्रयतोभवंतिसः २३ अतएवदेवादीनांमध्येकोपिनभवति । नजंतुःलिंगत्रयशून्यंप्राणिमात्रमपि । किंतु । सर्वस्यनिषेधेअवधित्वेनअव
शिष्यतइतिनिषेधशेषः । माययाअशेषात्मकश्च । जयतात्मद्विमोक्षणायआविर्भवतु २४

श्लोकाः १६/२४

गुणारणिच्छन्नचिदुष्मपायतत्क्षोभविस्फूर्जितमानसाय ॥ नैष्कर्म्यभावेनविवर्जितागमस्वयंप्रकाशायनमस्करोमि १६ मादृक्प्रपन्नपशुपाशविमोक्षणाय
मुक्तायभूरिकरुणायनमोऽलयाय ॥ स्वांशेनसर्वतनुभृन्मनसिप्रतीतप्रत्यग्दृशेभगवतेबृहतेनमस्ते १७ आत्मात्मजाप्तगृहवित्तजनेषुसक्तैर्दुःप्रापणायगु
णसंगविवर्जिताय ॥ मुक्तात्मभिःस्वहृदयेपरिभावितायज्ञानात्मनेभगवतेनमईश्वराय १८ यंधर्मकामार्थविमुक्तिकामाभजंतइष्टांगतिमाप्नुवंति ॥ किं
त्वाशिषोरात्यपिदेहमव्ययंकरोतुमेऽदभ्रदयोविमोक्षणम् १९ एकांतिनोयस्यनकंचनार्थंवांछंतियेवैभगवत्प्रपन्नाः ॥ अत्यद्भुतंतच्चरितंसुमंगलंगायं
तआनंदसमुद्रमग्नाः २० तमक्षरंब्रह्मपरंपरेशमव्यक्तमाध्यात्मिकयोगगम्यम् ॥ अतींद्रियंसूक्ष्ममतीवदूरमनंतमाद्यंपरिपूर्णमीडे २१ यस्यब्रह्मादयोदेवावे
दालोकाश्चराचराः ॥ नामरूपविभेदेनफल्ग्व्यास्वकलयाकृताः २२ यथार्चिषोऽग्नेःसवितुर्गभस्तयोनिर्यांतिसंयांत्यसकृत्स्वरोचिषः ॥ तथायतोयं
गुणसंप्रवाहोबुद्धिर्मनःखानिशरीरसर्गाः २३ सवैनदेवासुरमर्त्यतिर्यङ्नस्त्रीनषंढोनपुमान्नजंतुः ॥ नायंगुणःकर्मनसन्नचासन्निषेधशेषोजयतादशेषः २४

चूर्णिका ॥ ९ ॥

१६. १७ आत्मात्मजाप्तगृहवित्तजनेषुसक्तैःआप्तुमशक्यायगुणसंगविवर्जितायदेहादिष्वनासक्तैःचिंतितायज्ञानात्मनेईश्वरायनमोऽस्तु १८ किंच यंधर्मकामार्थविमुक्तिकामाः
भजंतःइष्टांगतिंप्राप्नुवंत्येव किंच अन्याअपिआशिषःअव्ययंदेहंचरातिएवंयःअदभ्रदयःसःमेविमोक्षणंकेवलंकरोतु नाधिकंप्रार्थये एतावदपिभक्तिसुखानभिज्ञत्वेनवांछामि
१९ अहोयस्यएकांतभक्ताःयेतेकंचनअर्थंनवांछति २० तंपरिपूर्णअनंतंस्तौमि २१ किंच ब्रह्मादयोदेवाःवेदाःलोकाश्चनामरूपभेदेनयस्यकलयाकृताः २२ २३ सःदेवा
सुरमर्त्यतिर्यक्नस्त्रीषंढःपुमान्नतर्हिसर्वनिषेधेयःअवशिष्यतेसःपरमात्मामद्विमोक्षणायआविर्भवतु २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नवग्राहाच्छरीरस्यमोक्षणेननाहंजीवितुमिच्छामि । तत्रहेतुः । अमुयाअंतर्बहिश्चअविवेकेनव्याप्तयागजजात्याकिंप्रयोजनम् । आत्मलोकस्यआत्मप्रकाशस्ययदावरणमज्ञानंतस्यैवतुमोक्षमिच्छामि । यस्य मोक्षस्यकालेननाशोनास्ति । यद्वादेहस्यबंधोदेहनाशेगजयोनिर्नश्येदेवांकितन्मोक्षप्रार्थनेन । आत्मलोकावरणस्यतुकालेनविप्लुवोनास्ति । ज्ञानैकनिवर्त्यत्वात्अतस्तस्यैवमोक्षमिच्छामीत्यर्थः २५ सोहं मुमुक्षुःविश्वंविश्वरूपम् । अविश्वंविश्वव्यतिरिक्तंच । विश्वंवेदोधनमुपकरणंयस्यतम् । विश्वस्यात्मानंच । केवलंप्रणतोस्मिनतुतंजानामि २६ योगंविनादुर्ज्ञानत्वादित्याह । योगेनभागवतधर्मेणरंधिता निदग्धानिकर्माणियेषांतेयंप्रपश्यंति २७ तर्हिसर्वेपियोगमेवांकिंनास्थितास्तत्राहनमइतिद्वाभ्याम् । असह्योवेगोरागादिलक्षणोयस्यतथाभूतंशक्तित्रयं (द्रव्यज्ञानक्रियात्मकं) यस्यतस्मै । बहिश्चअखिल धियांसर्वेंद्रियाणांगुणायशब्दादिरूपेणप्रतीयमानाय । अतःकदिंद्रियाणांकुत्सितानींद्रियाणियेषांतेषामनवाप्यंवर्त्मयस्य २८ यच्छक्त्यायस्यमाययाऽहंधीःतयाहतंआवृतंअयंजनोनवेद । दुरत्ययंमाहा त्म्यंयस्यतंइतोस्मिआश्रितोभवामि २९ उपवर्णितंनिर्विशेषंमूर्तिभेदंविनापरंतत्त्वंयेनतम् । विविधाचासौलिंगभिदामूर्तिभेदःतस्यामभिमानोयेषांअतएतेयदानोपजग्मुःतत्रतदा (निखिलात्मकत्वात्) अखिलामरमयःसर्वदेवमयमूर्तिः ३० उपलभ्यज्ञात्वास्तोत्रंचनिशम्यश्रुत्वादिविजैर्देवैःसह । छंदांसिसामानितन्मयेनातिशीघ्रगामित्वायोक्तम् ३१ उरुबलेनग्राहेण । उपात्तंउद्यतंचक्रंयेन (संखेदृष्ट्वासां बुजकरंसपद्मशुंडाग्रम्) ३२

श्लोकाः २५/३२

जिजीविषेनाहमिहामुयाकिमंतर्बहिश्चावृतयेभयोन्या ॥ इच्छामिकालेननयस्यविप्लवस्तस्यात्मलोकावरणस्यमोक्षम् २५ सोहंविश्वसृजंविश्वमविश्वं
विश्ववेदसम् ॥ विश्वात्मानमजंब्रह्मप्रणतोस्मिपरंपदम् २६ योगरंधितकर्माणोहृदियोगविभाविते ॥ योगिनोयंप्रपश्यंतियोगेशंतंनतोस्म्यहम् २७
नमोनमस्तुभ्यमसह्यवेगशक्तित्रयायाखिलधीगुणाय ॥ प्रपन्नपालायदुरंतशक्तयेकदिंद्रियाणामनवाप्यवर्त्मने २८ नायंवेदस्वमात्मानंयच्छक्त्याऽहंधि
याहतम् ॥ तंदुरत्ययमाहात्म्यंभगवंतमितोस्म्यहम् २९ ॥ श्रीशुकउवाच ॥ एवंगजेंद्रमुपवर्णितनिर्विशेषंब्रह्मादयोविविधलिंगभिदभिमानाः ॥ नैते
यदोपसस्रुपुर्निखिलात्मकत्वात्तत्राखिलामरमयोहरिराविरासीत् ३० तंतद्वदार्तमुपलभ्यजगन्निवासःस्तोत्रंनिशम्यदिविजैःसहसंस्तुवद्भिः ॥ छंदोमये
नगरुडेनसमुह्यमानश्चक्रायुधोभ्यगमदाशुयतोगजेंद्रः ३१ सोंतःसरस्युरुबलेनगृहीतआर्तोदृष्ट्वागरुत्मतिहरिंखउपात्तचक्रम् ॥ उत्क्षिप्यसांबुजकरंगि
रमाहकृच्छ्रान्नारायणाखिलगुरोभगवन्नमस्ते ३२

चूर्णिका

अहंग्राहात्शरीरमोक्षणेनजीवितुंनेच्छामि किंतु अज्ञानमोक्षंइच्छामि २५ सोऽहंमुमुक्षुःकेवलंब्रह्मप्रणतोस्मिनतुतंजानामि २६ किंच योगिनःयंहृदिपश्यंतितंनतोऽस्मि २७ हेईश प्रपन्नपालायतुभ्यंनमोऽस्तु २८ किंच यस्वमात्मानंअयंजनःनवेद तंईश्वरंआश्रितोऽस्मि २९ ॥ श्रीशुकउवाच ॥ एवंउपवर्णितनिर्विशेषंगजेंद्रंविविधमूर्त्तिभेदाभि मानिनःब्रह्मादयःयदानोपजग्मुःतदासर्वदेवमयमूर्तिःहरिःआविरासीत् ३० ततःजगन्निवासःतंआर्त्तंउपलभ्यतत्स्तोत्रंचनिशम्यस्तुवद्भिःदेवैःसहहरिःवेदोमयगरुडेनऊह्यमानः चक्रायुधःसन्यत्रगजेंद्रःतत्रआशुअभ्यगमत् ३१ तदागजेंद्रःसरसिउरुबलेनग्राहेणगृहीतःआर्त्तःसन्गरुत्मतिधृतचक्रंहरिंदृष्ट्वासांबुजकरंऊर्ध्वंकृत्वाहेनारायणाखिलगुरोभगव न्नमस्तेइतिदीनांगिरंआह ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरुडोपिमंदगतिरितिततःसहसाऽवतीर्यसग्राहंग्राहेणसहितम् । अरिणाचक्रेणविपाटितंमुखंयस्यतस्मात् । उस्त्रियाणांदेवानाम् ३३ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांतृतीयोध्यायः ३ ॥७॥

टीका

गरुडोपिमंदगतिरितिततःसहसाऽवतीर्यसग्राहंग्राहेणसहितम् । अरिणाचक्रेणविपाटितंमुखंयस्यतस्मात् । उस्त्रियाणांदेवानाम् ३३ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांतृतीयोध्यायः ३ ॥७॥
चतुर्थेतुतयोर्ग्राहःप्रापगंधर्वतांपुनः । गजंस्वपार्षदंकृत्वाहरिर्निन्येनिजंपदम् १ १ २ हूहूसंज्ञोगंधर्वसत्तमःअसौदेवलस्यशापेनग्राहोजातः । सवैततःसद्योमुक्तःसन्उत्तमश्लोकमगायतेत्यन्वयः । एवंहीति
हासोत्तमेकथा । सरसिस्त्रीभिःक्रीडन्नसौहूहूःस्नातुंप्रविष्टंदेवलंपादेग्रहीत्वाविवकर्षसचप्रकुपितोग्राहोभवेतिशशापतेनचप्रसादितःसन्नुवाच । एवमेवगजेंद्रंगृह्णीष्वततश्चगजेंद्रमुद्धरन्हरिस्त्वामपिमोचयिष्यती
ति ३ कथंभूतंयशसोधामआश्रयम् । अतःकीर्तन्याःकीर्तनीयागुणाःसतीकथाचयस्यतम् ४ स्वंलोकंगंधर्वलोकम् ५ (पीतांबरश्चतुर्भुजःसन्भगवतोरूपंप्रापत्) ६ सगजेंद्रःपूर्वं (द्रविडेषुसत्तमःश्रेष्ठः
पांड्यदेशाधिपतिःइंद्रद्युम्नइतिख्यातोराजाभूत्) ७ (आप्लुतःस्नातः । आत्मवान्निगृहीतमनाः) कुलाचलेमलयाद्रावाश्रयोयस्य ८ (नकृतमहर्णादिकंयेनतम्) तूष्णींरहस्युपासीनंवीक्ष्य । ऋषि
॥११॥ रगस्त्यः ९ शापमेवाह । असाधुरित्यादि । अकृताअशिक्षिताबुद्धिर्यस्य । गजोयथास्तब्धमतिस्तथैवायंअतःसएवगजएवभवत्वितिशेषः १०

श्लोकाः ३३/१०

तंवीक्ष्यपीडितमजःसहसाऽवतीर्यसग्राहमाशुसरसःकृपयोज्जहार ॥ ग्राहाद्विपाटितमुखादरिणागजेंद्रंसंपश्यतांहरिरमूमुचदुस्त्रियाणाम् ३३ ॥ ॥ इति
श्रीभागवतेमहापुराणेअष्टमस्कंधेतृतीयोऽध्यायः ३ ॥ ॥ छ ॥ ॥ ॥ श्रीशुकउवाच ॥ तदादेवर्षिगंधर्वाब्रह्मेशानपुरोगमाः ॥ मुमुचुः
कुसुमासारंशंसंतःकर्मतद्धरेः १ नेदुर्दुंदुभयोदिव्यागंधर्वानन्नृतुर्जगुः ॥ ऋषयश्चारणाःसिद्धास्तुष्टुवुःपुरुषोत्तमम् २ योसौग्राहःसवैसद्यःपरमाश्चर्यरूप
धृक् ॥ मुक्तोदेवलशापेनहूहूर्गंधर्वसत्तमः ३ प्रणम्यशिरसाऽधीशमुत्तमश्लोकमव्ययम् ॥ अगायतयशोधामकीर्तन्यगुणसत्कथम् ४ सोनुकंपितईशे
नपरिक्रम्यप्रणम्यतम् ॥ लोकस्यपश्यतोलोकंस्वमगान्मुक्तकिल्बिषः ५ गजेंद्रोभगवत्स्पर्शाद्विमुक्तोऽज्ञानबंधनात् ॥ प्राप्तोभगवतोरूपंपीतवासाश्च
तुर्भुजः ६ सवैपूर्वमभूद्राजापांड्योद्रविडसत्तमः ॥ इंद्रद्युम्नइतिख्यातोविष्णुव्रतपरायणः ७ सएकदाऽऽराधनकालआत्मवान्गृहीतमौनव्रतईश्वरंहरिम् ॥
जटाधरस्तापसआप्लुतोऽच्युतंसमर्चयामासकुलाचलाश्रयः ८ यदृच्छयातत्रमहायशामुनिःसमागमच्छिष्यगणैःपरिश्रितः ॥ तंवीक्ष्यतूष्णीमकृतार्ह
णादिकंरहस्युपासीनमृषिश्चुकोपह ९ तस्माइमंशापमदादसाधुरयंदुरात्माऽकृतबुद्धिरद्य ॥ विप्रावमंताविशतातमोंधंयथागजस्तब्धमतिःसएव १०

चूर्णिका

तदाअजःआर्त्तंतंवीक्ष्यसहसागरुडात्अवतीर्यकृपयाआशुसरसःसग्राहंतंउज्जहार ततःदेवेषुपश्यत्सुहरिःचक्रेणग्राहंविदार्यगजेंद्रममूमुचत् ३३ ॥ इत्यष्टमेतृतीयः ३ ॥ छ ॥
॥ श्रीशुकउवाच ॥ तदादेवर्षिगंधर्वाब्रह्मेशानपुरोगमाःतत्हरेःकर्मशंसंतःपुष्पवृष्टिंचक्रुः १ दुंदुभयोनेदुःगंधर्वाःननृतुःजगुश्चऋषयः चारणाःसिद्धाःतुष्टुवुः २ हेराजन् योऽयं
ग्राहःसःहूहूःगंधर्वःअसौदेवलशापेनग्राहोजातः ३ सःसद्यःमुक्तःसन्हरिंप्रणम्यस्तुतिंचक्रे ४ ततःईशेनअनुकंपितःसन्तंपुनःपरिक्रम्यप्रणम्यचस्वंलोकंअगात् ५ ततःगजेंद्रः
भगवत्स्पर्शात्अज्ञानबंधनात्मुक्तःभगवद्रूपंप्राप्तः ६ हेनृपसःद्रविडदेशेपांड्यःविष्णुव्रतपरायणःपूर्वंइंद्रद्युम्ननामराजाआसीत् ७ सःमलयाद्रौएकदाआराधनकालेधृतमौनः ॥११॥
जटाधरःस्नातःसन्हरिंअर्चयामास ८ तत्रयदृच्छयासशिष्यःअगस्त्यःआगमत् तंअकृतार्हणादिकंतूष्णींस्थितंवीक्ष्यमुनिश्चुकोप ९ आहच अयंअसाधुःविप्रावमंतागजवत्स्त
ब्धमतिःअतःअयंगजएवभवतु १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेनृपदिष्टंदैवप्रापितंतदुपधारयन्आलोचयन्कौंजरींयोनिमापन्नः ११ तर्हिपश्चात्कथंस्मृतिर्जातातत्राह । हरेरर्चनस्यानुभावेनेति १२ (तेनगजेंद्रेणयुक्तः । उपगीयमानंकर्मयस्यसः) अद्भुतंस्वभवनं
अगात् १३ एतद्गजराजमोक्षणंनामकृष्णानुभावस्तवेरितः । कथंभूतंतत्राह । स्वर्ग्यमित्यादि । दुःस्वप्नंनाशयतीतितथा १४ अतःश्रेयस्कामाएतद्यथावदनुकीर्तयंति १५ अनेनश्रेयोभवतीतिकुतोज्ञातं
साक्षात्भगवद्वचनादेवेत्याह । इदमाहेत्यादिनायावत्समाप्ति १६ मत्संगादन्यस्यापिस्मरणेफलमुच्यते (क्षीरोदमित्यादिना) सर्वेषांद्वितीयांतानांस्मरंतीत्यष्टमेनान्वयः (शृंगाणिशिखराणि)
१८ (शोभनंपर्णंपतनंयस्यतंपतगेश्वरंगरुडम्) १९ (मत्कलांमदंशम् । अहमाश्रयोयस्यास्तां । भवंरुद्रम्) २० २१ अव्यक्तंमायां । अव्ययंधर्मंभक्तिलक्षणम् (दाक्षायणीर्दक्षकन्यारूपाधर्मस्यप
त्नीः) सोमकश्यपयोरपिपत्नीर्दाक्षायणीः २२ सितवारणमैरावतम्।(मानवान्मनुवंश्यान्) २३ (अपररात्रांतेब्राह्मेमुहूर्ते) प्रयताःशुद्धाःसुसमाहिताएकाग्रचित्ताः । ममरूपाणिमद्विभूतीः २४

श्लोकाः ११/२४

॥ श्रीशुकउवाच ॥ ॥ एवंशप्त्वागतोऽगस्त्योभगवान्नृपसानुगः ॥ इंद्रद्युम्नोपिराजर्षिर्दिष्टंतदुपधारयन् ११ आपन्नःकौंजरींयोनिमात्मस्मृतिविनाशि
नीम् ॥ हर्यर्चनानुभावेनयद्गजत्वेप्यनुस्मृतिः १२ एवंविमोक्ष्यगजयूथपमब्जनाभस्तेनापिपार्षदगतिंगमितेनयुक्तः ॥ गंधर्वसिद्धविबुधैरुपगीयमा
नकर्माऽद्भुतंस्वभवनंगरुडासनोऽगात् १३ एतन्महाराजतवेरितोमयाकृष्णानुभावोगजराजमोक्षणम् ॥ स्वर्ग्यंयशस्यंकलिकल्मषापहंदुःस्वप्ननाशंकुरु
वर्यशृण्वताम् १४ यथानुकीर्तयंत्येतच्छ्रेयस्कामाद्विजातयः ॥ शुचयःप्रातरुत्थायदुःस्वप्नाद्युपशांतये १५ इदमाहहरिःप्रीतोगजेंद्रंकुरुसत्तम ॥ शृण्व
तांसर्वभूतानांसर्वभूतमयोविभुः १६ ॥ ॥ श्रीभगवानुवाच ॥ ॥ येमांत्वांचसरश्चेदंगिरिकंदरकाननम् ॥ वेत्रकीचकवेणूनांगुल्मानिसुरपादपान् १७
शृंगाणीमानिधिष्ण्यानिब्रह्मणोमेशिवस्यच ॥ क्षीरोदंमेप्रियंधामश्वेतद्वीपंचभास्वरम् १८ श्रीवत्संकौस्तुभंमालांगदांकौमोदकींमम ॥ सुदर्शनंपांचजन्यं
सुपर्णंपतगेश्वरम् १९ शेषंचमत्कलांसूक्ष्मांश्रियंदेवींमदाश्रयाम् ॥ ब्रह्माणंनारदमृषिंभवंप्रह्लादमेवच २० मत्स्यकूर्मवराहाद्यैरवतारैःकृतानिमे ॥ कर्मा
ण्यनंतपुण्यानिसूर्यंसोमंहुताशनम् २१ प्रणवंसत्यमव्यक्तंगोविप्रान्धर्ममव्ययम् ॥ दाक्षायणीर्धर्मपत्नीःसोमकश्यपयोरपि २२ गंगांसरस्वतींनंदांका
लिंदींसितवारणम् ॥ ध्रुवंब्रह्मऋषीन्सप्तपुण्यश्लोकांश्चमानवान् २३ उत्थायापररात्रांतेप्रयताःसुसमाहिताः ॥ स्मरंतिममरूपाणिमुच्यंतेह्येनसोऽखिलात् २४

चूर्णिका
॥ श्रीशुकउवाच ॥ एवंशप्त्वाऋषिःगतःततःइंद्रद्युम्नोपिदैवप्रापितंसर्वंपश्यन् ११ आत्मस्मृतिविनाशिनींकौंजरींयोनिमापन्नः तथापिहर्यर्चनानुभावेनगजत्वेऽपिअनुस्मृतिः
जाता १२ एवंभगवान्गजेंद्रंविमोक्ष्यपार्षदगतिंगमितेनतेनयुक्तःसन्विबुधादिभिःस्तूयमानःगरुडासनःस्वभवनंअगात् १३ हेराजन् एवंमयातवकृष्णानुभावःवर्णितःइदंगजें
द्रमोक्षणंशृण्वताम् स्वर्ग्यंयशस्यंपापापहंदुःस्वप्ननाशमस्ति १४ अतःएतत्श्रेयस्कामाःद्विजाःप्रातःउत्थायदुःस्वप्नाद्युपशांतयेकीर्तयंति १५ हरिःगजेंद्रंइदंआह १६ ॥ श्री
भगवानुवाच ॥ हेगजेंद्रयेमांत्वांइदंसरःगिरिकंदरकाननंवेत्रकीचकवेणूनांगुल्मानिसुरपादपान् १७ ब्रह्मणःमेशिवस्यचधिष्ण्यानिइमानिशृंगाणिक्षीरोदंश्वेतद्वीपं १८ श्रीवत्सं
कौस्तुभंमालांगदांसुदर्शनंशंखंसुपर्णं १९ शेषंश्रियंब्रह्माणंनारदंभवंप्रह्लादम् २० अवतारकर्माणिसूर्यंसोमम् २१ अग्निंप्रणवंसत्यम् २२ मायांगोविप्रान्दक्षकन्याःगंगांस
रस्वतींनंदांकालिंदींऐरावतंध्रुवंसप्तर्षीन्पुण्यश्लोकान्मानवान् २३ इत्यादीनिमेरूपाणिअपररात्रांतेउत्थाययेस्मरंतितेपापात्मुच्यंते २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(प्रतिबुध्यनिद्रांपरित्यज्यअनेनत्वत्कृतेनस्तोत्रेण) २५ जलजोत्तमंशंखवरंप्रध्मायवादयित्वा २६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांचतुर्थोऽध्यायः ४ ॥ ॥ ७ ॥ ॥ अमृताख्यानमष्टाभिरध्यायैरनुवर्ण्यते । स्वभक्तपक्षपातेनयत्रयोषायितंप्रभोः १ पंचमेपंचमंचाथषष्ठंचाकथयन्मनुम् । विप्रशापाच्चनिःश्रीकैःकृतादेवैर्हरिस्तुतिः ॥ २ ॥ १ तामसश्चतुर्थोमनुःतस्यसोदरोभ्राता २ (द्विजाऋषयः) ३ (तयोर्विकुंठाशुभ्रयोः । वैकुंठैःसहकलयाअंशेनजज्ञे) ४ (तस्यारमायाःप्रियकाम्ययायेनविकुंठात्मजेन) ५ तस्यवैकुंठसंज्ञस्यहरेरनुभावः । सनकादिशापेनदैत्यतांप्राप्ताभ्यांस्वपार्षदाभ्यांवाराहादिरूपेणयुद्धादिलक्षणः । गुणाश्चब्रह्मण्यतादयःपरमोदयाश्चमहर्द्धयःकथिताःतृतीयस्कंधादिषु ६ ७ ८ ९ १० यतोहेतोःअंबुचरात्मनाकूर्मरूपेण ११ सुराणांसाधितासुधेत्युक्त्यायुद्धाद्यपिसूचितंअतःपृच्छतिकिंचान्यदिति १२

॥१३॥ येमांस्तुवंत्यनेनांगप्रतिबुध्यनिशात्यये ॥ तेषांप्राणात्ययेचाहंददामिविमलांमतिम् २५ ॥ श्रीशुकउवाच ॥ इत्यादिश्यहृषीकेशःप्रध्मायजलजोत्तमम् ॥ हर्षयन्विबुधानीकमारुरोहखगाधिपम् २६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेचतुर्थोध्यायः ४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ राजन्नुदितमेतत्तेहरेःकर्माघनाशनम् ॥ गजेंद्रमोक्षणंपुण्यंरैवतंत्वंतरंशृणु १ पंचमोरैवतोनाममनुस्तामससोदरः ॥ बलिविंध्यादयस्तस्यसुताअर्जुनपूर्वकाः २ विभुरिंद्रःसुरगणाराजन्भूतरयादयः ॥ हिरण्यरोमावेदशिराऊर्ध्वबाह्वादयोद्विजाः ३ पत्नीविकुंठाशुभ्रस्यवैकुंठैःसुरसत्तमैः ॥ तयोस्तुकलयाजज्ञेवैकुंठोभगवान्स्वयम् ४ वैकुंठःकल्पितोयेनलोकोलोकनमस्कृतः ॥ रमयाप्रार्थ्यमानेनदेव्यातत्प्रियकाम्यया ५ तस्यानुभावःकथितोगुणाश्चपरमोदयाः ॥ भौमान्रेणून्सविममेयोविष्णोर्वर्णयेद्गुणान् ६ षष्ठश्चचक्षुषःपुत्रश्चाक्षुषोनामवैमनुः ॥ पुरुपुरुषसुद्युम्नप्रमुखाश्चाक्षुषात्मजाः ७ इंद्रोमंद्रद्रुमस्तत्रदेवाआप्यादयोगणाः ॥ मुनयस्तत्रवैराजन्हविष्मद्वीरकादयः ८ तत्रापिदेवःसंभूत्यांवैराजस्याभवत्सुतः ॥ अजितोनामभगवानंशेनजगतःपतिः ९ पयोधिंयेननिर्मथ्यसुराणांसाधितासुधा ॥ भ्रममाणोंऽभसिधृतःकूर्मरूपेणमंदरः १० ॥ राजोवाच ॥ यथाभगवताब्रह्मन्मथितःक्षीरसागरः ॥ यदर्थंवायतश्चाद्रिंदधारांबुचरात्मना ११ यथाऽमृतंसुरैःप्राप्तंकिंचान्यदभवत्ततः ॥ एतद्भगवतःकर्मवदस्वपरमाद्भुतम् १२

श्लोकाः २५/१२

चूर्णिका किंच प्रातःत्वत्कृतस्तोत्रेणयेमांस्तुवंतितेषांप्राणात्ययेविमलांमतिंददामि २५ ॥ श्रीशुकउवाच ॥ हृषीकेशःइत्यादिश्यशंखंप्राध्मायदेवानीकंहर्षयन्गरुडंआरुरोह २६ ॥ इत्यष्टमेचतुर्थः ४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेराजन्हरेःअघनाशनंकर्मगजेंद्रमोक्षणंतेउदितम् अथरैवतमन्वंतरंशृणु १ पंचमोरैवतोनाममनुःतत्पुत्राःबलिविंध्यादयः २ विभुःइंद्रःभूतरयाद्याःदेवाःहिरण्यरोमादयःऋषयः ३ शुभ्रस्यविकुंठायांपत्न्यांवैकुंठःअवतारः ४ लक्ष्म्याःप्रियकाम्ययायेनवैकुंठलोकःकल्पितः ५ तस्यप्रभावगुणादयःतृतीयस्कंधादिषुकथिताः ६ षष्ठःचाक्षुषोनाममनुःपुरुपुरुषाद्याःतत्पुत्राः ७ मंत्रद्रुमःइंद्रः आप्यादयोदेवाः हविष्मद्वीरकादयोमुनयः ८ वैराजात्संभूत्यांअजितोनामअवतारः ९ येनपयोनिधिंनिर्मथ्यसुराणांसुरासाधिता किंच कूर्मरूपेणअंभसिमंदराद्रिर्धृतः १० ॥ राजोवाच ॥ हेब्रह्मन् यथाभगवताक्षीराब्धिःमथितःयदर्थंअद्रिंदधार ११ यथाचसुरैःअमृतंप्राप्तम् अन्यदपियद्यत् अभवत् तत्हरेःकर्मवद १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

१३ (हेद्विजाः) १४ (शितैस्तीक्ष्णैरायुधैःगतप्राणाः) नोत्तिष्ठेरन्नपुनर्जीवंतिस्मेत्यर्थः १५ दुर्वाससाहिकदाचिन्मार्गेगच्छंतामिंद्रंदृष्ट्वास्वकंठस्थामालातस्मैदत्ता । तेनचश्रीमदेनअनादृत्यऐराव
तस्यकुंभयोर्निक्षिप्तासचगजोमत्तःपद्भ्यांतांमालांचूर्णीचकार । ततःकुपितोदुर्वासास्तंशशापत्रिभिर्लोकैःसहत्वंनिःश्रीकोभवेतितंदेतदाह । यदादुर्वासःशापेनेति । इज्यादयःयागाद्याः १६ १७ १८
असुरान्अयथादेववैलक्षण्येन । बलप्रभादियुक्तान्विलोक्येत्यर्थः १९ हरिंशरणंगताःसंतोयथापूर्वंसर्वंप्राप्स्यामइतिहर्षेणोत्फुल्लंविकसितंवदनंयस्य २० मनुष्यादिशब्देनजरायुजांडजोद्भिज्जस्वेदजाःक्रमेणो
क्ताःयस्यावतारःपुरुषःतस्यांशोत्रह्मातस्यकलामरीच्यादयःताभिर्विसर्जिताःपुत्रपौत्रादिद्वाराजनिताः २१ ननुतर्हिसर्वेष्वसौसमःस्यात्किंतच्चरणाश्रयेण । सत्यं । यद्यप्येवंतथाप्यत्रअस्मत्पक्षपातीभवि
ष्यतीत्याशयेनाह । नयस्येतिद्वाभ्यां (उपेक्षणीयादरणीययोःपक्षःपक्षपातः) २२ स्थितिपालनस्यक्षणःकालः । अतःसुरप्रियःसन्स्वीयानांनःशंसुखंकरिष्यति २३ यत्रक्षीराब्धौहरेर्वासःतदेवतम
सःपरंपदंस्थानम् यद्वालोकालोकात्परतोयत्तमस्ततःपरंस्थानंजगाम २४ दैवीभिर्लोकेअप्रसिद्धाभिःवैदिकीभिर्गीर्भिःस्तुतिंअकरोत् २५

॥१४॥

श्लोकाः १३/२५

त्वयासंकथ्यमानेनमहिम्नासात्वतांपतेः ॥ नातितृप्यतिमेचित्तंसुचिरंतापतापितम् १३ ॥ सूतउवाच ॥ संपृष्टोभगवानेवंद्वैपायनसुतोद्विजाः ॥
अभिनंद्यहरेर्वीर्यमभ्याचष्टुंप्रचक्रमे १४ ॥ श्रीशुकउवाच ॥ यदायुद्धेऽसुरैर्देवाःबाध्यमानाःशितायुधैः ॥ गतासवोनिपतितानोत्तिष्ठेरन्स्मभूयशः १५
यदादुर्वासःशापेनसेंद्रालोकास्त्रयोनृप ॥ निःश्रीकाश्चाभवंस्तत्रनेशुरिज्यादयःक्रियाः १६ निशम्यैतत्सुरगणामहेंद्रवरुणादयः ॥ नाध्यगच्छन्स्वयंमंत्रैर्मं
त्रयंतोविनिश्चयम् १७ ततोब्रह्मसभांजग्मुर्मेरोर्मूर्धनिसर्वशः ॥ सर्वंविज्ञापयांचक्रुःप्रणताःपरमेष्ठिने १८ सविलोक्येंद्रवाय्वादीन्निःसत्त्वान्विगतप्रभान् ॥
लोकानमंगलप्रायानसुरानयथाविभुः १९ समाहितेनमनसासंस्मरन्पुरुषंपरम् ॥ उवाचोत्फुल्लवदनोदेवान्सभगवान्परः २० अहंभवोयूयमथासु
रादयोमनुष्यतिर्यग्द्रुमघर्मजादयः ॥ यस्यावतारांशकलाविसर्जिताव्रजामसर्वेशरणंतमव्ययम् २१ नयस्यवध्योनचरक्षणीयोनोपेक्षणीयादरणीयपक्षः ॥
अथापिसर्गस्थितिसंयमार्थंधत्तेरजःसत्त्वतमांसिकाले २२ अयंतुतस्यस्थितिपालनक्षणःसत्त्वंजुषाणस्यभवायदेहिनाम् ॥ तस्माद्व्रजामःशरणंजगद्गुरुं
स्वानांसनोधास्यतिशंसुरप्रियः २३ ॥ श्रीशुकउवाच ॥ इत्याभाष्यसुरान्वेधाःसहदेवैररिंदम ॥ अजितस्यपदंसाक्षाज्जगामतमसःपरम् २४ तत्राद
ष्टस्वरूपायश्रुतपूर्वायवैविभो ॥ स्तुतिमब्रूतदैवीभिर्गीर्भिस्त्ववहितेंद्रियः २५

चूर्णिका

त्वयाकथ्यमानेनहरेर्महिम्नामेचित्तंनतृप्यति १३ ॥ सूतउवाच ॥ एवंपृष्टःशुकःहरेर्वीर्यमभ्याचष्टुंप्रचक्रमे १४ ॥ श्रीशुकउवाच ॥ यदायुद्धेदैत्यैःपीड्यमानाःदेवाःगतासवःनिप
तिताःसंतःनपुनर्जीवंतिस्म १५ किंच हेनृप यदादुर्वाससःशापात् सेंद्राःत्रयःलोकाःनिःश्रीकाःअभवन् तदायागादिक्रियाःनेशुः १६ ततःमहेंद्रवरुणादयःएतत्यज्ञनाशादि
कंनिशम्यस्वयंमंत्रयंतःनिश्चयंनप्रापुः १७ ततःमेरुमूर्धनिब्रह्मसभांगत्वाप्रणताःसंतःब्रह्मणेसर्वंविज्ञापयांचक्रुः १८ तदाब्रह्माइंद्रवाय्वादीन्निःसत्त्वान्दृष्ट्वाअसुरांश्चतेजीयसः
दृष्ट्वा १९ मनसाहरिंस्मरन् देवानुवाच २० हेदेवाःअहंभवःयूयंमनुष्यादयश्चएतेसर्वेयस्यांशाःतंसर्वेशरणंव्रजाम किंच अयंकालःस्थितिपालनरूपोवर्ततेअतःतंजगद्गुरुं
शरण्यंशरणंव्रजामः २१ २२ २३ ॥ श्रीशुकउवाच ॥ इतिब्रह्मासुरान्आभाष्यदेवैःसहभगवतःस्थानंजगाम २४ तत्रअदृष्टरूपायश्रुतपूर्वायगीर्भिःस्तुतिंअकरोत् २५ ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१५॥ देववरंत्वांनमामहे । हेदेववरंत्वांनमामेतिवा । वरत्वेहेतुः । सत्यं । कुतःअविक्रियम् । तत्कुतः अनंतंआद्यंचअनादिंआद्यंतवंतोहिवृद्ध्यादिक्रियाभवंति । किंच । गुहाशयंसर्वांतरम् । कुतः निष्कलम् । निरुपाधिं । तत्कुतः मनोग्रयानम् मनसोपिजविष्टम् । मनःप्राप्स्येस्थानेततःप्रागेवविद्यमानत्वात् । तथाचश्रुतिः ‘अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्शत् । तद्धावतोन्यानत्येती’ त्यादि वचसाअनिरुक्तंअविषयत्वात् ‘यद्वाचाऽनभ्युदितंयेनवागभ्युद्यत’ इतिश्रुतेः । मनोवचसोरगोचरत्वादप्रतर्क्यं । यथेष्टंवासर्वेषांहेतुहेतुमद्भावः २६ किंच । प्राणादीनांविपश्चितंज्ञातारम् । आत्माअहंकारोदेहोवा । नतुतद्व्यतिरिक्तंज्ञेयमस्तीत्याह । अर्थोविषयःइंद्रियाणितद्ग्राहकाणि । तदुभयरूपेणआभासतेतथातम् । तथाप्यनिद्रंस्वप्नद्रष्टृवदज्ञानरहितम् । कुतःअव्रणंअदेहम् । अतएवअक्षरंखमाकाशमिवव्यापिनंच । सर्वत्रहेतुः । यत्रयस्मिन्गृध्रपक्षौजीवपक्षपातिनौछायातपौअविद्याचतन्निवर्तिकाविद्याचनास्तितम् । त्रियुगंत्रिषुयुगेष्वाविर्भवंतम् । तंव्रजामहे २७ तदेवमविक्रियत्वादिभिःसर्वज्ञत्वादिभिश्चसत्यत्वंवरेण्यत्वंचोक्तम् । संसारचक्राधारत्वेनापितदेवदर्शयन्नाह । अजस्यजीवस्यचक्रंचक्रवदावर्तमानंदेहादिअजयामाययाप्रेर्यमाणम् (यत्) यःअक्षोयस्ययदक्षंयदधिष्ठानमाहुःतंऋतंसत्यंप्रपद्ये (संसारचक्रस्याक्षभूतंसत्यंशरणंयामीत्यर्थः) कथंभूतंचक्रम् । मनोमयंमनःप्रधानम् । दशेंद्रियाणिपंचप्राणाश्चेत्येवंपंचदशअरायस्य । आशुशीघ्रवेगंत्रयोगुणानाभिरिवमध्येयस्यविद्युदिवचलंनस्थिरम् । अष्टौप्रकृतयोनेमयइवावरणानियस्य २८ सर्वजीवनियंतृत्वादिनाचवरिष्ठत्वमाह । यइति । यउपसुपर्णंजीवसमीपेतन्नियंतृत्वेनआसांचकारआस्तेस्म ‘द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजात’ इतिश्रुतेः । यद्वाभक्तरक्षार्थंगरुडस्योपरिउपविष्टइत्यर्थः । तर्हिदेहस्थत्वाद्भक्तरक्षणादिक्रियावेशाद्वाजीवसाम्यंस्यात् । तत्राह । एकवर्णंज्ञानैकस्वरूपम् । तमसःप्रकृतेःपरम् । अलोकंअदृश्यम् । अव्यक्तंनिर्विकल्पम् । अनंतपारंकालतोदेशतश्चापरिच्छिन्नम् । तद्ब्रह्मैवयः । अप्रच्युतस्वरूपत्वान्नजीवसाम्यम् । ‘तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीती’ तिविशेषश्रवणादित्यर्थः । अतएवयंधीराःयोगेनरथेनप्राप्तिसाधनेनउपासतेभजंतेतंनमामेत्युत्तरेणान्वयः २९ मायानियंतृत्वेनापिजीवसाम्यंपरिहरन्वरिष्ठत्वमाह । यस्यमायांकश्चनकश्चिदपिनातितितर्तिनातिक्रामति । कथंभूतांजनोययामुह्यति । अर्थंआत्मस्वरूपंनतुवेद । निर्जितआत्माआत्मशक्तिर्माया तद्गुणाश्चयेनतम् ३० अर्थनवेदेतियदुक्तंतत्प्रपंचयन्नाह । इमेवयंदेवाऋषयश्चयस्यप्रियपातन्वासत्त्वेनैवसृष्टाअपिबहिश्चांतश्चसत्ताप्रकाशाभ्यामाविःप्रकटामपिसूक्ष्मांगतिंनिरुपाधिस्वरूपंनविद्मः । इतरप्रधानारजस्तमोमयाःकुतोविदुःतंनमामेतिपूर्वेणैवान्वयः ३१

श्लोकाः २६—३१

॥ ब्रह्मोवाच ॥ अविक्रियंसत्यमनंतमाद्यंगुहाशयंनिष्कलमप्रतर्क्यम् ॥ मनोऽग्रयानंवचसाऽनिरुक्तंनमामहेदेववरंवरेण्यम् २६ विपश्चितंप्राणमनोधियात्मनामर्थेंद्रियाभासमनिद्रमव्रणम् ॥ छायातपौयत्रनगृध्रपक्षौतमक्षरंखंत्रियुगंव्रजामहे २७ अजस्यचक्रंत्वजयेर्यमाणंमनोमयंपंचदशारमाशु ॥ त्रिणाभिविद्युच्चलमष्टनेमियदक्षमाहुस्तमृतंप्रपद्ये २८ यएकवर्णंतमसःपरंतदलोकमव्यक्तमनंतपारम् ॥ आसांचकारोपसुपर्णमेनमुपासतेयोगरथेनधीराः २९ नयस्यकश्चातितितर्तिमायांययाजनोमुह्यतिवेदनार्थम् ॥ तंनिर्जितात्मात्मगुणंपरेशंनमामभूतेषुसमंचरंतम् ३० इमेवयंयत्प्रिययैवतन्वासत्त्वेनसृष्टाबहिरंतराविः ॥ गतिंनसूक्ष्मामृषयश्चविद्महेकुतोऽसुराद्याइतरप्रधानाः ३१

॥१५॥

चूर्णिका ॥ ब्रह्मोवाच ॥ हेईशअविक्रियंसत्यंअनंतंआद्यंगुहाशयंनिरुपाधिंअप्रतर्क्यंवचसाअनिरुक्तंदेववरंत्वांनमाम २६ २७ २८ २९ किंच यस्यतेमायांकश्चिदपिनातिक्रामति ययाजनोमुह्यति अतःआत्मस्वरूपंनवेदतंपरेशंत्वांनमाम ३० हेदेवइमेदेवाःवयंयस्यतवसत्त्वेनसृष्टाअपिनिरूपाधिस्वरूपंत्वांनविद्मःरजस्तमोमयाःदैत्याःनविदुरितिकिंवक्तव्यम् ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इदानींवैराजरूपेणस्तुवन्प्रार्थयतेपादौमहीतिद्वादशभिः । यत्रमह्यांजरायुजादिभूतसर्गःसामहीयस्यपादौसनःप्रसीदतु । आत्मतंत्रःपादादिमत्त्वेपिनतत्परतंत्रः । कुतः । ब्रह्मअप्रच्युतस्वरूपः । तत्कुतः महतीविभूतिरैश्वर्यंयस्यसः ३२ उदारंवीर्यंशक्तिर्यस्यतदंभोयस्यरेतःसनःप्रसीदतु । उदारवीर्यतामाह । यतोंऽभसोलोकादयःसिध्यंतिजायंते ३३ यःसोमोदेवानामंधःअन्नंअतएवबलमायुश्चनगानांवृक्षाणाम् प्रकर्षेणजनयतिवर्धयतीतिप्रजनःतंयस्यमनःसमामनंति । सप्रसीदतु ३४ अग्निर्यस्यतुमुखंजातःकथंभूतःजातंवेदोधनंयस्मात् । क्रियाकांडंतत्प्रतिपाद्यंकर्मतन्निमित्तंजन्मयस्य । अंतःसमुद्रे उदरमध्येस्वधातून्पाकार्हानेवअन्नादीन्अनुपचन्प्रसिद्धसमुद्रेपिवडवानलरूपेणउदकान्येवानुपचन् (तथाभूतो) अग्निर्यस्यमुखंसः ३५ एषतरणिरादित्योयस्यचक्षुरासीत् । कथंभूतःदेवयानंअर्चिरादिमार्गदेवता । त्रयीमयः ‘ सैषात्रय्येवविद्यातपती ’ तिश्रुतेः । ब्रह्मणोधिष्ण्यंउपासनास्थानम् ‘ यएषोंतरादित्येहिरण्मयःपुरुषः ’ इतिश्रुतेः । मुक्तेर्द्वारंदेवयानत्वात् । अमृतंचपुण्यलोकत्वात् । मृत्युश्चकालात्मकत्वात् एवंभूतस्तरणिर्यस्यचक्षुःसनःप्रसीदतु ३६ सहआदिधर्मवान्चराचराणांप्राणोवायुर्यस्यप्राणादभूत्सः । यंप्राणंवयंबुद्ध्याद्यधिष्ठातारोदेवाःसंभ्राजंभृत्याइवअन्वास्मअनुसृत्यस्थिताः । तत्र सहोमनसउत्साहः । बलंशारीरम् । ओजऐंद्रियम् ३७ खानिदेहगतानिछिद्राणिप्राणःपंचवृत्तिःइंद्रियाणिचआत्मामनश्चअसवोनागकूर्मादयःशरीरंचतेषांकेतंआश्रयभूतंखम् (अंतरिक्षम्) यस्यपुरुषस्यनाभ्याःप्रजज्ञेसः ३८ यस्यबलान्महेंद्रोजज्ञे । त्रिदशादेवाः । धिषणाद्बुद्धेः । छंदांसिऋषयश्चखेभ्यः । कःप्रजापतिः ३९ इतरःअधर्मः ४० विट्वैश्यःओजोनैपुण्यंतस्यवृत्तिश्च । अंघ्रिंघ्रिजइत्यर्थःअवेदशूद्रःवेदव्यतिरिक्तशुश्रूषादिवृत्तिरवेदः तद्वृत्तिमान्शूद्रइत्यर्थः । पाठांतरंसुगमम् (ऊर्वोर्विशोंघ्रेरभवंश्चशूद्राइति) ४१

॥१६॥

श्लोकाः ३२/४१

पादौमहीयंस्वकृतैवयस्यचतुर्विधोयत्रहिभूतसर्गः ॥ सवैमहापूरुषआत्मतंत्रःप्रसीदतांब्रह्ममहाविभूतिः ३२ अंभस्तुयद्रेतउदारवीर्यंसिध्यंतिजीवंत्युत वर्धमानाः ॥ लोकास्त्रयोथाखिललोकपालाःप्रसीदतांब्रह्ममहाविभूतिः ३३ सोमंमनोयस्यसमामनंतिदिवौकसांवैबलमंधआयुः ॥ ईशोनगानांप्रजनःप्रजानांप्रसीदतांनःसमहाविभूतिः ३४ अग्निर्मुखंयस्यतुजातवेदाजातःक्रियाकांडनिमित्तजन्मा ॥ अंतःसमुद्रेऽनुपचन्स्वधातून्प्रसीदतांनःसमहाविभूतिः ३५ यच्चक्षुरासीत्तरणिर्देवयानंत्रयीमयोब्रह्मणएषधिष्ण्यम् ॥ द्वारंचमुक्तेरमृतंचमृत्युःप्रसीदतांनःसमहाविभूतिः ३६ प्राणादभूद्यस्यचराचराणां प्राणःसहोबलमोजश्चवायुः ॥ अन्वास्मसम्राजमिवानुगावयंप्रसीदतांनःसमहाविभूतिः ३७ श्रोत्राद्दिशोयस्यहृदश्चखानिप्रजज्ञिरेखंपुरुषस्यनाभ्याः ॥ प्राणेंद्रियात्मासुशरीरकेतंप्रसीदतांनःसमहाविभूतिः ३८ बलान्महेंद्रस्त्रिदशाःप्रसादान्मन्योर्गिरीशोधिषणाद्विरिंच्यः ॥ खेभ्यश्चछंदांस्यृषयोमेढ्रतःकःप्रसीदतांनःसमहाविभूतिः ३९ श्रीर्वक्षसःपितरश्छाययाऽऽसन्धर्मःस्तनादितरःपृष्ठतोऽभूत् ॥ द्यौर्यस्यशीर्ष्णोऽप्सरसोविहारात्प्रसीदतांनःसमहाविभूतिः ४० विप्रोमुखंब्रह्मचयस्यगुह्यंराजन्यआसीद्भुजयोर्बलंच ॥ ऊर्वोर्विडोजोंऽघ्रिरवेदशूद्रःप्रसीदतांनःसमहाविभूतिः ४१

चूर्णिका

किंच यस्यपादौमही ३२ रेतःअंभः ३३ मनःसोमः ३४ मुखम् अग्निः ३५ चक्षुःसूर्यः ३६ यस्यप्राणात्चराचराणांप्राणः अभूत् ३७ यस्यश्रोत्रात्दिशःहृदःइंद्रियाणिनाभ्याःखम्बलात्इंद्रः ३८ प्रसादाद्देवाःक्रोधाद्रुद्रःबुद्धेर्ब्रह्माखेभ्यःवेदाऋषयश्च शिश्नात्प्रजापतिः ३९ श्रीःवक्षसःछायायाःपितरःस्तनात्धर्मःपृष्ठतःअधर्मःशीर्ष्णःद्यौः विहारादप्सरसः ४० यस्यमुखंविप्रः वेदाश्चयस्यभुजयोःक्षत्रंबलंच यस्यऊर्वोःवैश्यःवार्त्ताच यस्यांघ्रिजः शूद्रः शुश्रूषाच ४१

॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपरिउत्तरोष्ठात् । न१तःनासिकतोद्युतिःकांतिः । पशव्यःपशूनांहितःकामःस्पर्शेनाभूत् ४२ द्रव्यंभूतानि । वयःकालं । विशेषंलौकिकप्रपंचम् । यद्यस्माद्दुर्विभाव्यंप्रबुधापबाधंविद्वद्भिरपोह्यमानम् ।
पाठांतरेप्रबुधानांमायेत्यवबोधोयास्मिन्नित्यर्थः (एवंभूतम्) ४३ तदेवंसप्रपंचमुपवर्ण्यनिःप्रपंचमुपवर्णयन्प्रणमति । वृत्तिभिर्दर्शनादिभिः । नभस्वान्वायुस्तस्येवऊतिर्लीलाअसंगरूपायस्यतस्मै ४४ तेस
स्मितंमुखांबुजंदिदृक्षूणांनःअस्मच्चक्षुरादिकरणगोचरंयथाभवत्येवमात्मानंदर्शय ४५ भक्तेच्छानुवर्तित्वंचतवबहुशोदृष्टमेवेत्याह । तैस्तैरिति । यन्नोदुर्विषहमशक्यंकर्मतद्भवान्स्वयमेवकरोतिहि ४६ न
चबहिर्मुखानामिवत्वद्भक्तानामस्माकंत्वय्यर्पितानिकर्माणिविपरीतफलानिभवितुमर्हंतीत्याह । क्लेशोभूरिर्येषु अल्पंसारंफलंयेषु (तानिचतानि) यद्वाविफलान्येवसकामानांकर्माणि । त्वय्यर्पितंतुनैवतथा
४७ तत्रवैफल्यमुपपापदयति । अवमःअल्पोपिकर्मकल्पःकर्माभासोपिईश्वरार्पितश्चेद्विफलायश्रमायास्यनकल्पते । हियस्मात्सएषईश्वरःपूरुषस्यात्माअतएवदयितःप्रियःहितः (सुहृत्) नह्यात्मनिदयिते
हितेचार्पितंनिःफलम् ४८ अनंतफलत्वमाह । यथाहिमूलावसेचनंस्कंधानांशाखानांचभवति ४९ एवंसत्यपित्वदर्पितकर्मणांत्वद्भक्तानामस्माकंयन्निमित्तमिदंदुःखंतत्त्वमेववेत्सीत्याशयेनाह । नमइति । दु
र्वितर्क्याणिआत्मकर्माणिस्वभावचेष्टितानियस्यतस्मै (सत्त्वस्थायहृदयवासिने) ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांपंचमोध्यायः ५ ॥ ॥ ७ ॥ ॥ षष्ठेपुनःस्तुतिर्वि
ष्णावाविर्भूतेसुरैःकृता । तन्मंत्राच्चासुरैःसाकममृतार्थेमहोद्यमः १ ॥ सहस्रार्काणांउदयेद्युतिरिवद्युतिर्यस्य १ महसातेजसाप्रतिहतानीक्षणानिचक्षूंषियेषां २

॥१७॥ श्लोकाः ४२/२

लोभोऽधरोष्ठात्प्रीतिरुपर्यभूद्द्युतिर्नस्तःपशव्यःस्पर्शेनकामः ॥ भ्रुवोर्यमःपक्ष्मभवस्तुकालःप्रसीदतांनःसमहाविभूतिः ४२ द्रव्यंवयःकर्मगुणान्विशेषंयद्यो
गमायाविहितान्वदंति ॥ यद्दुर्विभाव्यंप्रबुधापबाधंप्रसीदतांनःसमहाविभूतिः ४३ नमोस्तुतस्माउपशांतशक्तयेस्वाराज्यलाभप्रतिपूरितात्मने ॥ गुणेषुमा
यारचितेषुवृत्तिभिर्नसज्जमानायनभस्वदूतये ४४ सत्त्वंनोदर्शयात्मानमस्मत्करणगोचरम् ॥ प्रपन्नानांदिदृक्षूणांसस्मितंतेमुखांबुजम् ४५ तैस्तैःस्वेच्छधृतै
रूपैःकालेकालेस्वयंविभो ॥ कर्मदुर्विषहंयन्नोभगवांस्तत्करोतिहि ४६ क्लेशभूर्यल्पसाराणिकर्माणिविफलानिच ॥ देहिनांविषयार्तानांनतथैवार्पितंत्वयि ४७
नावमःकर्मकल्पोपिविफलायेश्वरार्पितः ॥ कल्पतेपुरुषस्यैषसह्यात्मादयितोहितः ४८ यथाहिस्कंधशाखानांतरोर्मूलावसेचनम् ॥ एवमाराधनंविष्णोः
सर्वेषामात्मनश्चहि ४९ नमस्तुभ्यमनंतायदुर्वितर्क्यात्मकर्मणे ॥ निर्गुणायगुणेशायसत्त्वस्थायचसांप्रतम् ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टम
स्कंधेपंचमोध्यायः ५ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंस्तुतःसुरगणैर्भगवान्हरिरीश्वरः ॥ तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः १ ते
नैवमहसासर्वेदेवाःप्रतिहतेक्षणाः ॥ नापश्यन्खंदिशःक्षोणीमात्मानंचकुतोविभुम् २

चूर्णिका

यस्याधरात्लोभःऊर्ध्वोष्ठात्प्रीतिःनासिकायाद्युतिःस्पर्शेनकामः ४२ भ्रुवोःयमःपक्ष्मतःकालःएवंभूतः सःनःप्रसीदताम् ४३ किंच भूतानिकालंकर्मगुणान्लौकिकप्रपं
चंचयस्ययोगमायाविमोहितान्वदंतिसःमहाविभूतिःनःप्रसीदताम् ४४ एवंभूतःत्वंप्रपन्नानांनःआत्मानंदर्शय ४५ ४६ ४७ ४८ ४९ तेअनंतायनिर्गुणायपरेशायसांप्रतं ॥१७॥
सत्त्वस्थायतुभ्यंनमः ५० ॥ ॥ इत्यष्टमेपंचमः ५ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेराजन्सुरगणैःएवंस्तुतःभगवान्सहस्रार्कोदयद्युतिःआविरभूत् १ ततःशर्वे
णसहब्रह्माऽविर्भूतांतनुंस्वच्छांमरकतश्यामांकंजगर्भारुणेक्षणाम् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.अ. तामाविर्भूतांतनुंविरिंच्योदृष्ट्वातुष्टावेतिपंचमेनान्वयः । कंजगर्भवदरुणेईक्षणेयस्याः ३ तप्तहेमवदवदातेनपीतेनलसताकौशेयेनवाससायुक्ताम् । प्रसन्नानिचारूणिसर्वाण्यंगानियस्याः ।शोभनंमुखंयस्याः । सुं अ०
दरेभ्रुवौयस्याः ४ महांतोमणयोयस्मिन्तेनाकिरीटेन । कर्णाभरणेकुंडलेताभ्यांनिर्भातौयौकपोलौताभ्यांश्रीमुखांबुजेयस्याः ५ कौस्तुभआभरणंकंठेयस्याः लक्ष्मींवक्षसिबिभ्रतीम् ६ वेदप्रवरोब्रह्मा । सर्वा
टीका गैरवनिंगतैः साष्टांगंप्रणतैः ७ अनाविराविरासेयंनोभूताऽभूदितिब्रुवन् । ब्रह्माभिप्रैतिनित्यत्वविभुत्वेभगवत्तनोः १ श्रीमूर्तेरयमाविर्भावएवनत्वस्मदादिवज्जन्मादितवास्तीत्याह ।नजाताजन्मादयोयस्य ।
कुतः । अगुणाय । अतोनिर्वाणसुखस्यार्णवाय । अपारमोक्षसुखरूपायेत्यर्थः । तथापिअणोरप्यणिम्नेअतिसूक्ष्माय । दुर्ज्ञानत्वात् । वस्तुतस्तुअपरिगण्यंइयत्तातीतंधाममूर्तिर्यस्यतस्मै । नचैतदसंभा ॥ ६ ॥
वितंयतःमहानचिंत्योऽनुभावोयस्य ८ तन्मूर्त्तेःसनातनत्वंअपरिमेयत्वंचोपपादयति । रूपमिति । हेपुरुषर्षभहेधातःएतत्तवरूपंवैदिकेनतांत्रिकेणचयोगेनउपायेनश्रेयोर्थिभिःसदाईज्यंपूज्यंअतोनेदमिदानी
॥१८॥ मपूर्वजातमितिभावः । ननुयूयंदेवाःपूज्यत्वेनप्रसिद्धाःसत्यंसर्वेप्यत्रैवांतर्भूताइत्याह । उअहोहस्फुटम् । अमुष्मिंस्त्वयिनोऽस्मांस्त्रिलोकांश्चसहपश्यामि । तत्रहेतुः । विश्वंमूर्तौयस्य । अतस्तवैतद्रूपंपरि
च्छिन्नमपिअपरिच्छिन्नमेवेतिभावः ९ विश्वमूर्तित्वमेवाह । त्वयीति । घटस्यमृत्तिकायथाआदिरंतश्चमध्यंचतथात्वमस्यजगतः । तत्रहेतुः । परस्मात्प्रधानादपिपरः १० मृत्तिकादृष्टांतेनप्राप्तंपरिणामं
वारयति । त्वमिति । स्वयास्वाधीनयाअतएवगुणानांव्यवायेपरिणामेप्यगुणमेवत्वांयुक्ताःपश्यंतिमनीषिणोविवेकिनःविपश्चितःशास्त्रज्ञाः ११ एतदेवसदृष्टांतमाह । यथाग्निंकाष्ठेमंथनेन । अमृतमाज्यंगो
षुदोहनादिना । भुविअन्नंव्रीह्यादिकर्षणादिना । अंबुचखननेन । उद्यमनेपुरुषकारेवाणिज्यादिनावृत्तिंजीविकाम् । यद्वाअंबुनउद्यमनेघटीयंत्रादिनोद्धरणे । योगैरुपायैर्मनुष्याअधियंतिप्राप्नुवंति । तथा
कवयस्त्वांबुद्ध्यागुणेष्वधियंतिवदंतिच १२ हेनाथहेसरोजनाभअतिचिरादीप्सितमर्थंतंयोगैकप्राप्यंत्वांसम्यगुज्जिहानंआविर्भवंतंप्रत्यक्षतोदृष्ट्वाऽद्यवयंनिर्वृतिंसुखंगताः । दवार्तादावाग्निपीडिताः १३

विरिंच्योभगवान्दृष्ट्वासहशर्वेणतांतनुम् ॥ स्वच्छांमरकतश्यामांकंजगर्भारुणेक्षणाम् ३ तप्तहेमावदातेनलसत्कौशेयवाससा ॥ प्रसन्नचारुसर्वांगींसुमुखीं श्लोकाः
सुंदरभ्रुवम् ४ महामणिकिरीटेनकेयूराभ्यांचभूषिताम् ॥ कर्णाभरणनिर्भातकपोलश्रीमुखांबुजाम् ५ कांचीकलापवलयहारनूपुरशोभिताम् ॥
कौस्तुभाभरणांलक्ष्मींबिभ्रतींवनमालिनीम् ६ सुदर्शनादिभिःस्वास्त्रैर्मूर्तिमद्भिरुपासिताम् ॥ तुष्टावदेवप्रवरःसशर्वःपुरुषंपरम् ॥ सर्वामरगणैःसाकंसर्वां ३/१३
गैरवनिंगतैः ७ ॥ ब्रह्मोवाच ॥ अजातजन्मस्थितिसंयमायागुणायनिर्वाणसुखार्णवाय ॥ अणोरणिम्नेऽपरिगण्यधाम्नेमहानुभावायनमोनमस्ते ८
रूपंतवैतत्पुरुषर्षभेज्यंश्रेयोर्थिभिर्वैदिकतांत्रिकेण ॥ योगेनधातःसहनस्त्रिलोकान्पश्याम्यमुष्मिन्नुहविश्वमूर्ते ९ त्वय्यग्रआसीत्त्वयिमध्यआसीत्त्वय्यंतआ
सीदिदमात्मतंत्रे ॥ त्वमादिरंतोजगतोस्यमध्यंघटस्यमृत्स्नेवपरःपरस्मात् १० त्वंमाययात्माश्रययास्वयेदंनिर्मायविश्वंतदनुप्रविष्टः ॥ पश्यंतियुक्तामन
सामनीषिणोगुणव्यवायेप्यगुणंविपश्चितः ११ यथाग्निमेधस्यमृतंचगोषुभुव्यन्नमंबूद्यमनेचवृत्तिम् ॥ योगैर्मनुष्याअधियंतिहित्वांगुणेषुबुद्ध्याकवयोवदंति
१२ तंत्वावयंनाथसमुज्जिहानंसरोजनाभातिचिरेप्सितार्थम् ॥ दृष्ट्वागतानिर्वृतिमद्यसर्वेगजादवार्ताइवगांगमंभः १३

चूर्णिका वस्त्राभरणैःयुतां ३ ४ ५ ६ मूर्त्तिमद्भिःसुदर्शनादिभिःउपासितांतांभगवत्तनुंदृष्ट्वासशर्वोब्रह्मापरंपुरुषंतुष्टाव ७ हेईशअजातजन्मस्थितिसंयमायनिर्गुणायअपारमोक्षसुख ॥१८॥
रूपायअपरिमितधाम्नेमहानुभावायतुभ्यंनमोनमः ८ हेदेवइदंतवरूपंपूज्यम् ९ अमुष्मिन्त्वयिअस्मान्त्रिलोकांश्चसहपश्यामि किंच इदंविश्वंआदिमध्यांतेषुत्वय्येवआसी
त् १० अस्याद्यंतादिस्त्वमेव त्वंविश्वंनिर्मायतत्रप्रविष्टोऽसि ११ हेकमलनाभ एवंभूतंत्वांदृष्ट्वाअद्यवयंनिर्वृतिंगताः १२ १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० ॥ ६ ॥

भा.अ. टीका

यद्विधेयंतत्कथयतेतिचेत्तत्राह सइति हेअंतरात्मन्अशेषसाक्षिणस्तेबहिःअन्यैर्विज्ञाप्यंकिंवास्ति १४ यूयमेवकिंचित्कुरुतेतिचेत्तत्राह । अहमिति । अग्नेःकेतवोविस्फुलिंगाइवतेत्वत्तोवयंपृथग्विभाताःसंतः
आत्मनःस्वंश्रेयःकिंवाविद्मःअतस्त्वमेवद्विजानांदेवानांचमंत्रंविधत्स्व । इदंकुरुतेत्युपायमुपदिशेत्यर्थः १५ तत्हृदयंमंत्रउपदेष्टव्यइत्यभिप्रेतंयथातथैवविज्ञायजगाद । संवृतानियमितानिसर्वाणिकारका
णींद्रियाणियैस्तान् १६ ईश्वरस्यापितथैवाभिप्रेतमित्याह । सुरेश्वरोभगवान्एकएवेश्वरःसमर्थोपिसुरासुरैःसहविहर्तुकामस्तानाह १७ हेसुराःहेगंधर्वादयोऽःयेचदेवाः १८ वःआत्मनःस्वतोयावद्भवोवृद्धिर्भ
वति १९ अर्थस्यप्रयोजनस्यपदवींसिद्धिंप्राप्तैःततःपश्चादहिमूषकवद्वध्यघातकभावेनवर्तितव्यमितिशेषः । यद्वासर्पग्राहिणापेटिकायांनिरुद्धोहिर्यथानिर्गमद्वारविधानार्थंप्रथमंमूषकेणसंधिंविधत्तेपश्चात्तमेवक
दाचिद्भक्षयतितथार्थमार्गार्थंप्रवृत्तैःप्रथमंसंधेयाइत्यर्थः २० ततस्तैःसहयत्कार्यंतदाह ।अमृतोत्पादनइति। यस्यामृतस्यपीतस्यसतः २१ नेत्रंरज्जुम् २२ ननुतर्हितेप्यमृतपानेनअमृताःस्युस्तत्राहक्लेशभाजइ
॥१९॥ ति २३ बलिभिःसहकारिभिःसाध्याअर्थास्तदनुसरणंविनानसिध्यंतीतिकृत्वासामादिकमुपदिशति। यूयमितिद्वाभ्यां। हेसुराःसंरंभेणद्वेषेण। सांत्वयासाममार्गेणयथासिध्यंति २४

श्लोकाः १४/२४

सत्वंविधत्स्वाखिललोकपालावयंयदर्थास्तवपादमूलम् ॥ समागतास्तेबहिरंतरात्मन्किंवान्यविज्ञाप्यमशेषसाक्षिणः १४ अहंगिरित्रश्चसुरादयोयेदक्षाद
योऽग्नेरिवकेतवस्ते ॥ किंवाविदामेशपृथग्विभाताविधत्स्वशंनोद्विजदेवमंत्रम् १५ ॥ श्रीशुकउवाच ॥ एवंविरिंच्यादिभिरीडितस्तद्विज्ञायतेषांहृदयंत
थैव ॥ जगादजीमूतगभीरयागिराबद्धांजलीन्संवृतसर्वकारकान् १६ एकएवेश्वरस्तस्मिन्सुरकार्येसुरेश्वरः ॥ विहर्तुकामस्तानाहसमुद्रोन्मथनादिभिः १७
॥ श्रीभगवानुवाच ॥ हंतब्रह्मन्नहोशंभोहेदेवाममभाषितम् ॥ शृणुतावहिताःसर्वेश्रेयोवःस्याद्यथासुराः १८ यातदानवदैतेयैस्तावत्संधिर्विधीयताम् ॥
कालेनानुगृहीतैस्तैर्यावद्वोभवआत्मनः १९ अरयोपिहिसंधेयाःसतिकार्यार्थगौरवे ॥ अहिमूषकवद्देवाह्यर्थस्यपदवींगतैः २० अमृतोत्पादनेयत्नःक्रियताम
विलंबितम् ॥ यस्यपीतस्यवैजंतुर्मृत्युग्रस्तोऽमरोभवेत् २१ क्षिप्त्वाक्षीरोदधौसर्वावीरुत्तृणलतौषधीः ॥ मंथानंमंदरंकृत्वानेत्रंकृत्वातुवासुकिम् २२ सहायेन
मयादेवानिर्मथध्वमतंद्रिताः॥क्लेशभाजोभविष्यंतिदैत्यायूयंफलग्रहाः२३यूयंतदनुमोदध्वंयदिच्छंत्यसुराःसुराः॥नसंरंभेणसिध्यंतिसर्वेर्थाःसांत्वयायथा२४

चूर्णिका

किंच वयंतेपादमूलंयदर्थंप्राप्ताःतत्त्वंविधत्स्व हेअंतरात्मन्नशेषसाक्षिणःतेअन्यैःविज्ञाप्यंकिमस्ति १४ हेईश अहंशिवःसुरादयश्चअग्नेःविस्फुलिंगाइवत्वत्तःवयंपृथक्विभाताः
संतःआत्मनःश्रेयःकिंविद्मःअपितुन अतःदेवानांद्विजानांचइदंकुरुतेत्युपायमुपदिश १५॥ श्रीशुकउवाच ॥ एवंविरिंच्यादिभिःईडितःभगवान्तेषामभिप्रेतंज्ञात्वाबद्धांजलीन्ता
न्मेघगंभीरयावाचाजगाद १६ १७॥ श्रीभगवानुवाच ॥ हेब्रह्मन्हेशंभोहेदेवाःममभाषणंशृणुत १८ वःश्रेयःयथास्यात् यूयंयात वःयावत्वृद्धिःस्यात् तावत्कालानुगृहीतैःदान
वदैतेयैःसहसंधिर्विधीयताम् १९ किंच हेदेवाःआदौस्वकार्यार्थगौरवेअरयोऽपिसंधेयाःपश्चात्अहिमूषकवत्वर्तितव्यम् २० किंच अमृतोत्पादनेशीघ्रंयत्नःक्रियताम्यस्यपीतस्य
सतःमृत्युग्रस्तोऽपिजंतुःअमरोभवेत् २१ इतिकर्तव्यतामाह हेदेवाः क्षीरोदेवीरुत्तृणलतौषधीःक्षिप्त्वामंदरंमंथानंवासुकिंरज्जुंचकृत्वा २२ मयासहायेननिर्मथध्वम् एवंकृतेदै
त्याःक्लेशभागिनःभाविष्यंति यूयंफलभागिनोभविष्यथ २३ असुराःयत्यत्इच्छंतितत्तदनुमोदध्वम् हेसुराःसर्वेअर्थाः यथासाममार्गेणसिध्यंतितथासंरंभेणन २४ ॥१९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वस्तुपुमथनादुत्पन्नेषु (वःयुष्माभिःलोभादयोनकार्याःअत्रलोभोऽसंतोषः) २५ २६ सुरास्तुवलिमुपेयुःउपजग्मुः २७ असंयत्तान्अयुद्धोद्यतानापिदृष्ट्वा । श्लोक्यःकीर्त्यर्हः २८ वैरोचनिंबलिं । जितम
शेषंत्रैलोक्यंयेनतम् २९ तत्सर्वममृतोन्मथन दि ३० तत्रअन्येयेअसुराधिपाःपौलोमकालेयादयःशंबरादयश्चतेभ्यश्चारोचत ३१ संविदंसमयम् ३२ परिघाइवबाहवोयेषां ३३ (विजहुस्तत्यजुः) ३४
३५ (बभूवआविर्भूतः) ३६ (यथापूर्वंव्रणरहितान्) ३७ ३८ (पततांपक्षिणां) विसर्जितःप्रस्थापितः । सुपर्णेतत्रस्थितेवासुकेरागमनायोगात् (इतिभावः) ३९ ॥ ॥ इतिश्रीभागवतेमहा
पुराणेअष्टमस्कंधेटीकायांमंदराचलानयनंनामषष्ठोऽध्यायः ६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः २५/३९

॥२०॥

नभेतव्यंकालकूटाद्विषाज्जलधिसंभवात् ॥ लोभःकार्योनवोजातुरोषःकामस्तुवस्तुषु २५ ॥ श्रीशुकउवाच ॥ इतिदेवान्समादिश्यभगवान्पुरुषो
त्तमः ॥ तेषामंतर्दधेराजन्स्वच्छंदगतिरीश्वरः २६ अथतस्मैभगवतेनमस्कृत्यपितामहः ॥ भवश्चजग्मतुःस्वंस्वंधामोपेयुर्बलिंसुराः २७ दृष्ट्वारीनप्यसं
यत्तान्जातक्षोभान्स्वनायकान् ॥ न्यषेधद्दैत्यराट्श्लोक्यःसंधिविग्रहकालवित् २८ तेवैरोचनिमासीनंगुप्तंचासुरयूथपैः ॥ श्रियापरमयाजुष्टंजिताशेष
मुपागमन् २९ महेंद्रःश्लक्ष्णयावाचासांत्वयित्वामहामतिः ॥ अभ्यभाषतत्तत्सर्वंशिक्षितंपुरुषोत्तमात् ३० तदरोचतदैत्यस्यतत्रान्येयेऽसुराधिपाः ॥
शंबरोऽरिष्टनेमिश्चयेचत्रिपुरवासिनः ३१ ततोदेवासुराःकृत्वासंविदंकृतसौहृदाः ॥ उद्यमंपरमंचक्रुरमृतार्थेपरंतप ३२ ततस्तेमंदरगिरिमोजसोत्पाट्यदुर्मदाः
नदंतउदधिंनिन्युःशक्ताःपरिघबाहवः ३३ दूरभारोद्वहश्रांताःशक्रवैरोचनादयः ॥ अपारयंतस्तंवोढुंविवशाविजहुःपथि ३४ निपतन्सगिरिस्तत्र
बहूनमरदानवान् ॥ चूर्णयामासमहताभारेणकनकाचलः ३५ तांस्तथाभग्नमनसोभग्नबाहूरुकंधरान् ॥ विज्ञायभगवांस्तत्रबभूवगरुडध्वजः ३६
गिरिपातविनिष्पिष्टान्विलोक्यामरदानवान् ॥ ईक्षयाजीवयामासनिर्जरान्निर्व्रणान्यथा ३७ गिरिंचारोप्यगरुडेहस्तेनैकेनलीलया ॥ आरुह्यप्रय
यावब्धिंसुरासुरगणैर्वृतः ३८ अवरोप्यगिरिंस्कंधात्सुपर्णःपततांवरः ॥ ययौजलांतउत्सृज्यहरिणासविसर्जितः ३९ ॥ ॥ इतिश्रीभागवतेमहा
पुराणेअष्टमस्कंधेमंदराचलानयनंनामषष्ठोऽध्यायः ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

चूर्णिका

किंचजलधिभवात्विषात्नभेतव्यम्तथामथनादुत्पन्नेषुवस्तुषुकामरोषलोभाःनकार्याः २५ ॥श्रीशुकउवाच ॥ एवंभगवान्देवानादिश्यअंतर्दधे २६ अथभगवतेनमस्कृत्यब्रह्माभव
श्चस्वंस्वंधामजग्मतुः ततोदेवाः बलिमुपजग्मुः २७ तदाशस्त्रादिरहितानपिदेवान्दृष्ट्वातथास्वनायकान्जातक्षोभान्दृष्ट्वास्तुत्यःदैत्यराट्संधिविग्रहकालवित्दैत्यान्न्यषेधत् २८
देवाःबलिंउपागमन् महेंद्रः बलिंसांत्वयित्वापुरुषोत्तमात् शिक्षितंअभाषत २९ ३० तत्वचःबलेःअन्येषांशंबरारिष्टादीनांचअरोचत ३१ ततोदेवासुराःमिथःसमयंकृत्वाअमृ
तार्थेउद्यमंचक्रुः ३२ ततस्तेमंदरगिरिंउत्पाट्यअब्धिंनिन्युः ३३ शक्रवैरोचनादयःतेवोढुंअसमर्थाःश्रांताःसंतःअद्रिंपथिविजहुः ३४ सःकनकाचलःतत्रनिपतन्भारेणदेवादी
न्चूर्णयामास ३५ ततःभग्नमनसःभग्नबाहूरुकंधरान्देवासुरान्विज्ञायतत्रगरुडध्वजोभगवान्आविर्भूत्वा ३६ गिरिपातविनिष्पिष्टान् अमरादीन्त्रैलोक्यईक्षयाजीवयामास
३७ ततःएकहस्तेनागिरिंगरुडेआरोप्यस्वयंचआरुह्यसुरादिभिःसहअब्धिंययौ ३८ सुपर्णःगिरिंस्कंधात्अवरोप्यजलांतेउत्सृज्यहरिणाप्रस्थापितःययौ ३९ ॥ इत्यष्टमेषष्ठः ६

॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥७॥

॥सप्तमेमथनोद्भूतविषभीत्याऽखिलैर्जनैः । स्तुतःसन्कृपयारुद्रःपपाविषमितीर्यते ॥ १ ॥ फलभागेनतवाप्यमृतभागोभविष्यतीतिसंमंत्र्यतेसुरासुरावासुकिंनेत्रंरज्जुभूतंगिरौपरिवीयसंवेष्ट्यअब्धिमथितुमारे
भिरे (यत्तायत्नवंतः) १ वासुकेर्मुखंतीव्रंदैत्यान्ग्राहयितुमेवहरिःपूर्वपुरस्तान्मुखंजगृहे । देवाअपिततोऽभवन्मुखंजगृहुरिः(इत्यर्थः) २ (अहेःसर्पस्य) ३ (सामरःअमरैःसह) ४ कृतोधारणस्थानविभागोयैः
५ (अपोविशत्जलमध्येप्रविष्टः) ६ दैवेनहेतुनापौरुषेनष्टेसति(सुतरांनिर्विण्णमनसः) ७ विघ्नेशस्यविधिंतेनरचितंविघ्नम् । अवितथःसत्यःअभिसंधिःसंकल्पोयस्य (काछपंकौर्मं) ८ लक्षयोजनप्रस्तारो
ऽस्यास्तीतितथातेनपृष्ठेन (सकच्छपःअपरोजंबुद्वीपइव) ९ (अंगहेराजन्) तस्यगिरेरावर्तनंभ्रमणंअंगेकंडूयनंमेने १० आसुरेणअसुराकारेणदैवेनदेवाकारेणरूपेण (देवसमूहान् । नागेंद्रंवासुकिंअ
बोधरूपःतिर्यग्रूपः) आविशत् ११ (सहस्रबाहुःश्रीहरिरन्योगिरिराडिवहस्तेनमंदरमाक्रम्यउपरितस्थौ । सुमनोभिरभिवृष्टः) १२

॥२१॥ श्लोकाः

॥ श्रीशुकउवाच ॥ तेनागराजमामंत्र्यफलभागेनवासुकिम् ॥ परिवीयगिरौतस्मिन्नेत्रमब्धिमुदान्विताः ॥ आरेभिरेसुरायत्ताअमृतार्थंकुरूद्वह १
हरिःपुरस्ताजगृहेपूर्वंदेवास्ततोऽभवन् ॥ तेनैच्छन्दैत्यपतयोमहापुरुषचेष्टितम् २ नगृह्णीमोवयंपुच्छमहेरंगममंगलम् ॥ स्वाध्यायश्रुतसंपन्नाःप्रख्या
ताजन्मकर्मभिः ३ इतितूष्णींस्थितान्दैत्यान्विलोक्यपुरुषोत्तमः ॥ स्मयमानोविसृज्याग्रंपुच्छंजग्राहसामरः ४ कृतस्थानविभागास्तएवंकश्यपनंदनाः॥ १/१२
ममंथुःपरमायत्ताःअमृतार्थंपयोनिधिम् ५ मथ्यमानेऽर्णवेसोद्रिरनाधारोह्यपोऽविशत् ॥ ध्रियमाणोपिबलिभिर्गौरवात्पांडुनंदन ६ तेसुनिर्विण्णमनसःपरि
म्लानमुखश्रियः॥ आसन्स्वपौरुषेनष्टेदैवेनातिबलीयसा ७ विलोक्यविघ्नेशविधिंतदेश्वरोदुरंतवीर्योऽवितथाभिसंधिः॥ कृत्वावपुःकाच्छपमद्भुतंमहत्प्रवि
श्यतोयंगिरिमुज्जहार ८ तमुत्थितंवीक्ष्यकुलाचलंपुनःसमुत्थितानिर्मथितुंसुरासुराः ॥ दधारपृष्ठेनसलक्षयोजनप्रस्तारिणाद्वीपइवापरोमहान् ९ सुरा
सुरेंद्रैर्भुजवीर्यवेपितंपरिभ्रमंतंगिरिमंगपृष्ठतः ॥ बिभ्रत्तदावर्तनमादिकच्छपोमेनेऽगकंडूयनमप्रमेयः १० अथासुरानाविशदासुरेणरूपेणतेषांबलवी
र्यमीरयन् ॥ उद्दीपयन्देवगणांश्चविष्णुर्दैवेननागेंद्रमबोधरूपः ११ उपर्यगेंद्रंगिरिराडिवान्यआक्रम्यहस्तेनसहस्रबाहुः ॥ तस्थौदिविब्रह्मभवेंद्रमुख्यै
रभिष्टुवद्भिःसुमनोभिवृष्टः १२

चूर्णिका

॥ श्रीशुकउवाच ॥ तेदेवाःफलभागेननागराजंआमंत्र्यतंगिरौसंवेष्ट्य अमृतार्थंअब्धिमथितुंआरेभिरे १ तत्रदेवैःसहहरिःमुखंजगृहे २ तत्भगवच्चेष्टितंदैत्यपतयःनेच्छन् ३ हेदेवाःस्वा
ध्यायश्रुतसंपन्नाःजन्मकर्मभिःप्रख्याताःवयंअहेःइदंअमंगलंपुच्छंनगृह्णीमःएवंउक्त्वातूष्णींस्थितान्दैत्यान्विलोक्य ४ सामरःहरिःपुच्छंजग्राहएवंकृतस्थानविभागास्तेपयोनिधिं
ममंथुः ५ एवंअर्णवेमथ्यमानेसतिबलिभिर्ध्रियमाणोऽपिअद्रिःअनाधारःसन्गुरुत्वात् अपआविशत् ६ ततःतेस्वपौरुषेनष्टेसतिखिन्नाःबभूवुः ७ तदाईश्वरःविघ्नेशकृतंविघ्नंविलोक्यका ॥२१॥
च्छपंवपुःकृत्वातोयंप्रविश्यगिरिंउज्जहार ८ एवंकृतेतंगिरिंउत्थितंवीक्ष्यतेमथितुंपुनःउत्थिताःतदाभगवान्लक्षयोजनविस्तृतपृष्ठेनअद्रिंदधार ९ ततःसुरासुरेंद्राणांभुजवीर्यकंपितंपृष्ठे
भ्रमंतंगिरिंकच्छपः अंगकंडूयनंमेने १० ११ यदामथनसमयेगिरिःउपर्युपरिअगात् तदाभगवान् अन्यरूपंधृत्वासहस्रबाहुःसन्अद्रिंआक्रम्यब्रह्मभवेंद्रमुख्यैःस्तुतःगिरौतस्थौ १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(उपारिसहस्रबाहुरूपेणअधःकूर्मरूपेण) आत्मनिदेवदैत्यमध्येतत्तदाकारेणगोत्रेदाढर्चरूपेण (नेत्रेनागेंद्रेअबोधरूपेणप्राविशताप्रकर्षेणआसमंताद्विशता) परेणहरिणा (समेधितास्तेममंथुः) क्षोभितंनक्राणां
चक्रंसमूहोयस्मिन् १३ दृशश्चमुखानिचश्वासाश्चअहींद्रस्यसाहस्रंअपरिमिताःकठोरायेदृगादयस्तेभ्योनिर्गताभ्यांअग्निधूमाभ्यांआहतंवर्चोयेषांतेसरलाद्रुमविशेषाः १४ देवांस्तुभगवदधीनामेघाःसमभ्यवर्षन् ।
समुद्रोर्मिभिरुपगूढावायवश्चशीतलाववुःवांतिस्म । कथंभूतान्तस्याहींद्रस्यश्वासशिखाग्निभिर्हताप्रभायेषाम् । धूम्राण्यंबरादीनियेषाम् १५ १६ धृतोऽद्रिर्येनसभगवान्परमपुरुषोऽनंतरमशोभतेत्यन्वयः ।
कथंभूतः । कनकपरिधिःपीतवासाः (कनकमेखलोवा) कर्णयोर्विद्योततेविद्युत्कुंडललक्षणायस्य । मूर्ध्निभ्राजंतोविलुलिताःकचायस्यसतथा । जेत्रैर्जिष्णुभिःदंदशूकंसर्पमथ्नामंदराख्येनमंथन्प्रतिगिरिः प्रति
द्वंद्वीपर्वत(इव) १७ हालहलमित्याह्वानामयस्य । संभ्रांतामीनाउद्गतामकरादयश्चयस्मिन्तस्मात्तिमयोमत्स्यास्तदादिभिराकुलाच्च (तत्रद्विपाजलहस्तिनः) तद्विषंअप्रतिअप्रतिमम् । प्रतिक्रियाशून्यमितिवा
१८ अप्रतिमत्वमेवाह । उग्रोवेगोयस्य । अतएवसर्वासुदिक्षुविसर्पत्विसारि । यद्वाउग्रावेगारोमांचस्वेदादयोयस्मात् । अतएवासह्यवीर्यंविलोक्यभीताअन्येनकेनाप्यरक्ष्यमाणाःसदाशिवंशरणंदुद्रुवुःज
ग्मुः १९ त्रिलोक्याभवायउद्भवायदेव्यासहअद्रौकैलासेआसीनंतथापिमुनीनामभिमतंतेषामेवापवर्गायतपोजुषाणम् २० निर्गुणंसगुणंचैवशिवंहरिपराक्रमैः । स्तुवंतश्चप्रजेशानानामन्यंतांतरंतयोः २१ २२

श्लोकाः १३/२२

उपर्यधश्चात्मनिगोत्रनेत्रयोःपरेणतेप्राविशतासमेधिताः ॥ ममंथुरब्धिंतरसामदोत्कटामहाद्रिणाक्षोभितनक्रचक्रम् १३ अहींद्रसाहस्रकठोरदृङ्मुखश्वासा
ग्निधूमाहतवर्चसोसुराः ॥ पौलोमकालेयबलील्वलादयोदवाग्निदग्धाःसरलाइवाभवन् १४ देवांश्चतच्छ्वासशिखाहतप्रभान्धूम्रांबरस्रग्वरकंचुकाननान् ॥
समभ्यवर्षन्भगवद्वशाघनावबुःसमुद्रोर्म्युपगूढवायवः १५ मथ्यमानात्तथासिंधोर्देवासुरवरूथपैः ॥ यदासुधानजायेतनिर्ममंथाजितःस्वयम् १६ मे
घश्यामःकनकपरिधिःकर्णविद्योतविद्युन्मूर्ध्निभ्राजद्विलुलितकचःस्रग्धरोरक्तनेत्रः ॥ जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकंगृहीत्वामंथन्मथ्नाप्रतिगिरिरिवाशोभता
थोधृताद्रिः १७ निर्मथ्यमानादुदधेरभूद्विषंमहोल्बणंहालहलाह्वमग्रतः ॥ संभ्रांतमीनोन्मकराहिकच्छपात्तिमिद्विपग्राहतिमिंगिलाकुलात् १८ तदुग्र
वेगंदिशिदिश्युपर्यधोविसर्पदुत्सर्पदसह्यमप्रतिम् ॥ भीताःप्रजादुद्रुवुरंगसेश्वराअरक्ष्यमाणाःशरणंसदाशिवम् १९ विलोक्यतंदेववरंत्रिलोक्याभवायदे
व्याभिमतंमुनीनाम् ॥ आसीनमद्रावपवर्गहेतोस्तपोजुषाणंस्तुतिभिःप्रणेमुः २० ॥ प्रजापतयऊचुः ॥ देवदेवमहादेवभूतात्मन्भूतभावन ॥ त्रा
हिनःशरणापन्नान्त्रैलोक्यदहनाद्विषात् २१ त्वमेकःसर्वजगतईश्वरोबंधमोक्षयोः ॥ तंत्वामर्चंतिकुशलाःप्रपन्नार्तिहरंगुरुम् २२

चूर्णिका

ततःउपरिअधश्चदेवदैत्यमध्येगोत्रनेत्रयोःप्रविशतापरेणतेसमेधिताःअब्धिंममंथुः १३ तदाअहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसःदैत्याः अभवन् १४ किंच त
च्छ्वासशिखाहतप्रभान्धूम्रांबरस्रग्वरकंचुकाननान्देवांश्चभगवद्वशाघनाःअभ्यवर्षन्वायुःववौ १५ एवंतैःमथ्यमानेयदासुधानजायेततदाभगवान्स्वयंममंथ १६ तदामेघ
श्यामःपीतवासाःस्रग्धरःरक्तनेत्रःहरिःदोर्भिःदंदशूकंगृहीत्वामथ्नन्पर्वतइवअशोभत १७ ततःमथ्यमानात्उदधेःहालाहलाह्वंविषमभूत् १८ तत्उग्रवेगंदिशिदिशिउपर्यधःवि
सर्पत् असह्यवीर्यंदृष्ट्वासेश्वराःप्रजाःभीताःसत्यःकेनापिअरक्ष्यमाणाःशिवंशरणंजग्मुः १९ अद्रौआसीनंतंविलोक्यस्तुतिभिःप्रणेमुः २० ॥ प्रजापतयऊचुः ॥ हेदेवदेव हेभूत
भावनअस्मात्त्रैलोक्यदहनात्विषात्नःत्राहि २१ हेईशसर्वजगतःबंधमोक्षयोःईश्वरःत्वंएकएव २२ ॥२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नन्वेवंभूतोविष्णुरितिप्रसिद्धंतत्राहुःगुणमय्येति । अस्यजगतोयदासर्गादीन्धत्सेतदाहेभूमन्स्वदृक्स्वतःसिद्धज्ञानःत्वंब्रह्मादिसंज्ञांधत्से ; २३ तत्रहेतुःत्वंब्रह्मेति । सदसतोभावान्देवतिर्यगादिरूपान्भाव
यतीतितथा । सृज्यंतुत्वद्व्यतिरिक्तंनास्तीत्याहुः । आत्मैवत्वंनानाशक्तिभिर्जगद्रूपेणआभातःयस्मादीश्वरः २४ स्वतःसिद्धज्ञानत्वमुपपादयंतोजगदात्मनाआभानप्रकारमाहुः । त्वंशब्दस्ययोनिः । अतः
स्वतःसिद्धज्ञानस्त्वं । जगदादिर्महत्तत्वं । आत्माचअहंकारः । कथंभूतः । प्राणेंद्रियद्रव्याणांकारणभूतागुणायस्य । राजसादित्रिविधइत्यर्थः । स्वभावादयश्चत्वमेव । तत्रक्रतुःसंकल्पः । सत्यमृतंचेति
योधर्मःसचत्वम् । महदादिरूपत्वेहेतुः । त्रिवृत्त्रिगुणात्मकंयदक्षरंप्रधानंतत्त्वयित्वदाश्रयमामनंति । यद्वाएवंभूतेत्वयित्रिवृदक्षरंप्रणवंप्रकाशकमाहुरित्यर्थः २५ अखिलदेवतात्मा । ‘ अग्निःसर्वदेवता
त्मा’इतिश्रुतेः । सोऽग्निस्तेमुखं । हेलोकभव । द्वितीयांतेषुविदुरित्यस्यसंबंधः २६ परेअवरेचयेआत्मानोजीवास्तेषांआश्रयस्तवात्माहंकारः २७ त्रयीमयात्मन्वेदत्रयमूर्ते २८ पंचोपनिषदस्तत्पुरुषाघो
रसद्योजातवामदेवेशानरूपामंत्राः । यैर्मुखैरष्टोत्तरत्रिंशन्मंत्राणांवर्गःतेषामेवमंत्राणांपदच्छेदविशेषेणअष्टत्रिंशत्कलात्मकामंत्राइत्यर्थः । अवस्थितिरुपरतावस्था (हेदेव) २९ अधर्मस्योर्मिषुदंभलोभादि
षुतेछाया । यैरूर्मिभिर्विसर्गःप्रतिसर्गःसंहारः । यद्वायैःसत्त्वादिभिर्विविधःसर्गस्तानितेनेत्रत्रयम् । हेदेव । छंदोमयऋषिर्वेदःसतवेक्षाईक्षणं।साक्षान्मनुरितिपाठेमनुर्वेदः । तमेवाहछंदोमयइति ३० हेगिरि
त्रतेपरंज्योतिरखिलानांलोकपालादीनांगम्यंनभवति । कुतः । यत्ररजआदिनास्ति । किंतज्ज्योतिःयन्निरस्तभेदंब्रह्म ३१

॥२३॥

श्लोकाः २३/३१

गुणमय्यास्वशक्त्याऽस्यसर्गस्थित्यप्ययान्विभो ॥ धत्सेयदास्वदृग्भूमन्ब्रह्मविष्णुशिवाभिधाम् २३ त्वंब्रह्मपरमंगुह्यंसदसद्भावभावनः ॥ ना
नाशक्तिभिराभातस्त्वमात्माजगदीश्वरः २४ त्वंशब्दयोनिर्जगदादिरात्माप्राणेंद्रियद्रव्यगुणस्वभावः ॥ कालःक्रतुःसत्यमृतंचधर्मस्त्वय्यक्षरंयत्त्रिवृ
दामनंति २५ अग्निर्मुखंतेऽखिलदेवतात्माक्षितिर्विदुर्लोकभवांघ्रिपंकजम् ॥ कालंगतिंतेऽखिलदेवतात्मनोदिशश्चकर्णौरसनंजलेशम् २६ नाभिर्न
भस्तेश्वसनंनभस्वान्सूर्यश्चचक्षूंषिजलंस्मरेतः ॥ परावरात्माश्रयणंतवात्मासोमोमनोद्यौर्भगवन्शिरस्ते २७ कुक्षिःसमुद्रागिरयोऽस्थिसंघारोमाणिसर्वौ
षधिवीरुधस्ते ॥ छंदांसिसाक्षात्तवसप्तधातवस्त्रयीमयात्मन्हृदयंसधर्मः २८ मुखानिपंचोपनिषदस्तवेशयैस्त्रिंशदष्टोत्तरमंत्रवर्गः ॥ यत्तच्छिवाख्यंप
रमार्थतत्त्वंदेवस्वयंज्योतिरवस्थितिस्ते २९ छायात्वधर्मोर्मिषुयैर्विसर्गोनेत्रत्रयंसत्त्वरजस्तमांसि ॥ सांख्यात्मनःशास्त्रकृतस्तवेक्षाछंदोमयोदेवऋषिः
पुराणः ३० नतेगिरित्राखिललोकपालविरिंच्यवैकुंठसुरेंद्रगम्यम् ॥ ज्योतिःपरंयत्ररजस्तमश्चसत्त्वंनयद्ब्रह्मनिरस्तभेदम् ३१

॥२३॥

चूर्णिका

किंच गुह्यंपरंब्रह्मत्वमेव यदाचसर्गादीन्कर्तुमिच्छसितदागुणमय्यास्वशक्त्याब्रह्मविष्णुशिवाभिधांधत्से २३ २४ २५ हेभगवन् अग्निस्तवमुखम् पृथ्वीपादौ कालोगतिः
दिशःकर्णौवरुणःजिह्वा २६ नभोनाभिःसूर्यश्चक्षूंषिजलंरेतःचंद्रोमनः २७ द्यौःशिरःसमुद्राःकुक्षिःपर्वताःअस्थीनिओषधयोरोमाणि छंदांसिसप्तधातवःसर्वधर्मःहृदयम् २८
हेगिरित्रपंचोपनिषदःतेमुखानि २९ गुणाःनेत्राणि ३० मनुःईक्षणम् किंच ब्रह्मादीनामपितवज्योतिःअगम्यम् ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥७॥ ॥२४॥

कामश्च (मदनः) अध्वरश्चदक्षयज्ञःत्रिपुरादयश्चयेअनेकभूतद्रुहःतान्क्षपयतःसंहरतस्तेतत्कर्मस्तुतयेनभवति । अत्यल्पमेतदित्यर्थः । गरक्षपणञ्याप्यवश्यंभावित्वेनसिद्धवान्निर्देशः । स्तुतयेअलंनभवती त्यत्रहेतुः । यस्तुभवान्स्वनेत्रवह्निविस्फुलिंगस्यशिखयाइदंजगद्भसितंभस्मजातंनवेदनालोचयत्यपि ३२ तदेवंनित्यंपरानुग्रहेव्यग्रंत्वांयेनिंदंतितेअतिमूर्खाइत्याहुः । येउमयासहचरंतंतस्यांनितरांरतंका मिनंकत्थंतेप्रलपंति । तथाश्मशानेचरंतंउग्रंक्रूरंपरुषंचहिंस्रंकत्थंते । कथंभूतम् । आत्मरामाश्चतेगुरवोविश्वहितोपदेष्टारस्तैर्हृदिचिंतितंअंघ्रिद्वयंयस्य । तथाभूतमपितपसाभितप्तमपित्तेनूनंतवोतिमविदान्निति काकुः । त्वल्लीलांनैवविदुरित्यर्थः (अविदइतिपाठेनजानंतएव) अतोहातलज्जाः । त्यक्तत्रपाः । कथमात्मारामैःसेवितचरणयुगलस्यकामित्वसंभवः । कथंवातपसाभितप्तस्यशांतस्योग्रत्वंपरुषत्वंवासंभ वतीत्यविचार्यैवप्रालपन्नित्यर्थः ३३ आस्तांतावन्निंदकानांवार्ता । महांतोपितवतत्त्वंनजानंतीत्याहुः । तत्तस्मात् (स्थूलसूक्ष्माभ्यांपरतःप्रधानादपिपरस्यते) तवस्वरूपस्यगमनेज्ञानेब्रह्मादयोपिनसमर्थाःसं स्तवनेतुकुतःशक्ताःस्युः । तत्रवयंकथंप्रभवाम । यतस्तेषांसर्गस्यमरीच्यादेर्यःसर्गः (सृष्टिस्तद्विषयाब्रह्मादीनां) सर्गेअत्यंतावार्चीनाःतथापियदेतत्स्तवनंएतदात्मशक्तिपरिमितमात्रमित्यर्थः ३४ त देवाहुः । हेमहेश्वर । परंकेवलंएतत्त्रिनेत्रादिलक्षणंरूपंप्रपश्यामःनतुपरंरूपम् । तथापित्वदर्शनादेवकृतार्थावयमित्याहुः । मृडनायहीति । अव्यक्तकर्मणःअतर्क्यलीलस्य ३५ ३६ मत्प्रभावमविचार्यैवि षपानेप्रवृत्तंमांकथंचिदियंप्रियावारयेदितिशंकयातामनुज्ञापयन्नाह । अहोबतेतिसार्धैश्चतुर्भिः । वैशसंदुःखम् ३७ प्राणेप्सूनांप्राणरक्षणेच्छूनां । मेमया । प्रभोःसमर्थस्य । अर्थःकार्यं ३८ किंच (प्रा णिनोदीनान्मेरपिप्राणैःपांति । यतःक्षणभंगुरैः) बद्धवैरेषुपरस्परंजिघांसत्सु ३९ कृपयतःकृपांकुर्वतःपुंसः ४० मेमत्तःस्वस्तिःशोभनासत्तासुखेनजीवितमस्त्वित्यर्थः । जग्धुंअत्तुम् ४१

श्लोकाः ३२/४१

कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहःक्षपयतःस्तुतयेनतत्ते ॥ यस्त्वंतकालइदमात्मकृतंस्वनेत्रवह्निस्फुलिंगशिखयाभसितंनवेद ३२ येत्वात्मरामगुरु भिर्हृदिचिंतितांघ्रिद्वंद्वंचरंतमुमयातपसाऽभितप्तम् ॥ कत्थंतउग्रपरुषंनिरतंश्मशानेतेनूनमूतिमविदंस्तवहातलज्जाः ३३ तत्तस्यतेसदसतोःपरतःपर स्यनांजःस्वरूपगमनेप्रभवंतिभूम्नः ॥ ब्रह्मादयःकिमुतसंस्तवनेवयंतुतत्सर्गसर्गविषयाअपिशक्तिमात्रम् ३४ एतत्परंप्रपश्यामोनपरंतेमहेश्वर ॥ मृडना यहिलोकस्यव्यक्तिस्तेऽव्यक्तकर्मणः ३५ ॥ श्रीशुकउवाच ॥ तद्वीक्ष्यव्यसनंतासांकृपयाभृशपीडितः ॥ सर्वभूतसुहृद्देवइदमाहसतींप्रियाम् ३६ ॥ श्रीमहादेवउवाच ॥ अहोबतभवान्येतत्प्रजानांपश्यवैशसम् ॥ क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितम् ३७ आसांप्राणपरीप्सूनांविधेयमभयं हिमे ॥ एतावान्हिप्रभोरर्थोयद्दीनपरिपालनम् ३८ प्राणैःस्वैःप्राणिनःपांतिसाधवःक्षणभंगुरैः ॥ बद्धवैरेषुभूतेषुमोहितेष्वात्ममायया ३९ पुंसःकृपयतो भद्रेसर्वात्माप्रीयतेहरिः ॥ प्रीतेहरौभगवतिप्रीयेहंसचराचरः ४० तस्मादिदंगरंभुंजेप्रजानांस्वस्तिरस्तुमे ॥ एवमामंत्र्यभगवान्भवानींविश्वभावनः ॥ तद्विषंजग्धुमारेभेप्रभावज्ञान्वमोदत ४१

चूर्णिका ॥२४॥

हेमहेश्वरत्वत्तःपरंनपश्यामः किंच इयंतेव्यक्तिः लोकस्यसुखायअतःनःपाहि ३२ ३३ ३४ ३५ ॥ श्रीशुकउवाच ॥ प्रजानांतत्व्यसनंवीक्ष्यशिवःदेवींआह ३६ ॥ श्रीम हादेवउवाच ॥ हेभवानिकालकूटात्प्राप्तंप्रजानांदुःखंपश्यपश्य ३७ प्राणपरीप्सूनांआसांमयाअभयंविधेयम् किंच यद्दीनपरिपालनं तदेवश्रेष्ठस्यअर्थः ३८ साधवस्तु क्षण भंगुरैःस्वप्राणैःजीवान्पांति ३९ ४० अतःइदंगरंभुंजे मत्तःप्रजानांस्वस्त्यस्तु ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(व्यापिसर्वतःप्रसृमरम्) करतलीकृत्यकरतलपरिमितमात्रंकृत्वा ४२ जलकल्मषःजलदोषोविषम् । यस्मात्तंगलेनीलंचकार । साधोःकृपालोः(भूतहितेरतस्य) ४३ ४४ ४५ प्रस्कन्नंगलितम् । अपरे चयेसविषास्तेपिजगृहुः । अनेनाविषस्यतीव्रतोक्ता ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांअमृतमथनेसप्तमोध्यायः ॥ ॥ ७ ॥ ॥ अष्टमेमथ्यमानेब्धौलक्ष्म्याविष्णौवृते ऽसुरैः । धन्वंतरेहृतेसोमेमोहिन्युद्भवईर्यते १ हविर्धानीसुरभिः १ देवयानस्यब्रह्मलोकप्रापकस्ययज्ञस्यसंबंधिनेहविषे(अग्निहोत्रींहविषाऽग्निहोत्रसाधनभूताम्) २ ईश्वरशिक्षयाप्रागेवकृतया ३ भगवतोयः श्वेताद्रिःकैलासःतस्यमहिंमहिमानं दंतैःशिखरतुल्यैःहरन्सचंद्रवत्पांडुरइत्यनुषंगः ४ ५ (अर्थिनोयाचकान् । भवान्परीक्षित्) ६ वल्गुभिर्गत्यादिभिःस्वर्गिणांरतिकर्त्र्यः ७ सुदामापर्वतःतत्रैकस्यांदिशि जातासौदामिनीस्फटिकादिमयगिरिशृंगेषुअधिकंविस्फुरंतीविद्युदिवकांत्यादिशोरंजयंतीश्रीःसंपत्साक्षान्मूर्तिधारिणीसतीसैवभगवत्परारमाऽऽविरभूदित्यर्थः ८

श्लोकाः ४२—८

ततःकरतलीकृत्यव्यापिहालाहलंविषम् ॥ अभक्षयन्महादेवःकृपयाभूतभावनः ४२ तस्यापिदर्शयामासस्ववीर्यंजलकल्मषः ॥ यच्चकारगलेनीलंतच्चसाधोर्विभूषणम् ४३ तप्यंतेलोकतापेनसाधवःप्रायशोजनाः ॥ परमाराधनंतद्धिपुरुषस्याखिलात्मनः ४४ निशम्यकर्मतच्छंभोर्देवदेवस्यमीढुषः ॥ प्रजादाक्षायणीब्रह्मावैकुंठश्चशशंसिरे ४५ प्रस्कन्नंपिबतःपाणेर्यत्किंचिज्जगृहुःस्मतत् ॥ वृश्चिकाहिविषौषध्योदंदशूकाश्चयेऽपरे ४६ ॥ ॥ इतिश्रीभागवते महापुराणेअष्टमस्कंधेअमृतमथनेसप्तमोऽध्यायः ७ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ पीतेगरेवृषांकेणप्रीतास्तेमरदानवाः ॥ ममंथुस्तरसासिंधुंहविर्धानीततोऽभवत् १ तामग्निहोत्रीमृषयोजगृहुर्ब्रह्मवादिनः ॥ यज्ञस्यदेवयानस्यमेध्यायहविषेनृप २ ततउच्चैःश्रवानामहयोभूच्चंद्रपांडुरः ॥ तस्मिन्बलिःस्पृहांचक्रेनेंद्रईश्वशिक्षया ३ ततऐरावतोनामवारणेंद्रोविनिर्गतः ॥ दंतैश्चतुर्भिःश्वेताद्रेर्हरन्भगवतोमहिम् ४ कौस्तुभाख्यमभूद्रत्नंपद्मरागोमहोदधेः ॥ तस्मिन्मणौस्पृहांचक्रेवक्षोलंकरणेबलिः ५ ततोऽभवत्पारिजातःसुरलोकविभूषणम् ॥ पूरयत्यर्थिनोयोर्थैःशश्वद्भुवियथात्मवान् ६ ततश्चाप्सरसोजातानिष्ककंठ्यःसुवाससः ॥ रमण्यःस्वर्गिणांवल्गुगतिलीलावलोकनैः ७ ततश्चाविरभूत्साक्षाच्छ्रीरमाभगवत्परा ॥ रंजयंतीदिशंकांत्याविद्युत्सौदामिनीयथा८

चूर्णिका

एवंदेवींपृष्ट्वाविषंजग्धुंआरेभे साऽपिप्रभावज्ञाअन्वमोदत ततःविषंकरतलीकृत्य अभक्षयत् ४२ ततःविषंतस्यवीर्यंदर्शयामासगलेनीलंचकार तत्साधोःविभूषणंजातम् ४३ ४४ तत्शंभोःकर्मनिशम्यदाक्षायणीब्रह्मावैकुंठश्चशशंसिरे ४५ विषंपिबतःतस्यपाणेःयत्गलितंतत् वृश्चिकाहिविषौषध्योदंदशूकाश्चजगृहुः ४६ ॥ इत्यष्टमेसप्तमः ७ ॥ श्रीशुकउवाच ॥ एवंवृषांकेणगरेपीतेसतिदेवदैत्याःप्रीताःसंतःपुनःतरसाअब्धिंममंथुः ततःसुरभिःअभवत् १ तांऋषयःयज्ञस्यमेध्यायहविषेजगृहुः २ ततःचंद्रपांडुरःउच्चैःश्रवानामहयःअभूत् तस्मिन्बलिःस्पृहांचक्रे प्रागेवशिक्षितत्वात् इंद्रःन ३ ततः ऐरावतोनामचतुर्दंतयुक्तःश्वेतः गजःअभवत् ४ ततःकौस्तुभाख्यंरत्नंअभूत् तस्मिन्हरिःस्पृहांचक्रे ५ ततःपारिजातःकल्पतरुःअभवत् सःस्वर्गविभूषणंअभूत् ६ ततःअप्सरसोजाताःताःस्वर्गिणांरमण्यःअभवन् ७ ८

१ ईश्वरशंकयाएवंपाठांतरं । २ तस्मिन्हरिःस्पृहांचक्रेवक्षोलंकरणेमणावितिपाठांतरंमु०मु०पुस्तके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यारूपादिमहिम्नाआक्षिप्तंचेतोयेषाम् ९ भगवद्वक्षसिस्थितयाश्रियाविलोकितानांदेवानांयथापूर्वंसर्वसंपत्प्राप्तिमसुराणांचतद्विपर्ययंवक्तुंअभिषेकादिमहोत्सवपूर्वकंब्रह्मादिपरिहारेणभगवत्प्राप्तिप्रकारमाह । तस्याआसनमित्यादिना अथासीद्वारुणीत्यतःप्राक्तनेनग्रंथेन १० आभिषेचनिकाअभिषेकोचिताः । पंचपवित्राणिपंचगव्यानि । मधुमाधवौचैत्रवैशाखभवंफलपुष्पादि । पाठांतरेपिद्वंद्वैवयेसएवार्थः मधुमासेभवं (माधवं) मध्वितिवा ११ अभिषेकंअभिषेकोचितंविधिं । नव्योनटानांस्त्रियः १२ तुमुलोनिःस्वनोयेषांतान्मृदंगादीन्शंखवेणुवीणाश्चव्यनादयन् १३ १४ (मत्ताः षट्पदायस्यांतां) १५ (नागाः कुंडलद्वयमुपाहरन्) १६ (कृतंस्वस्त्ययनंययासा । नदंतोद्विरेफायस्यांतां) १७ (निरंतरंघनंसमंस्तनद्वयंचदधती) १८ (आत्मनःस्वस्यानिरवद्यंनिर्दोषंध्रुवंनित्यं) पदंआश्रयंपतिरूपं अव्यभिचारिणोनित्याः संतोगुणायस्मिन् तन्नान्वविंदत । क्वचिदपिकस्यचिद्दोषस्यसद्भावात् १९ तदेवाहनूनमितित्रिभिः (यस्यतपस्तस्य) मन्युनिर्जयोनास्तितपाविपुदूर्वासःप्रभृतिषु । क्वचिद्गुरुशुक्रादिषुज्ञानमस्तितत्रसंगवर्जितंज्ञानंनास्ति । महत्त्वेपिब्रह्मादिषुकामनिर्जयोनास्ति । परतोव्यपाश्रयः परापेक्षइंद्रादिः सकिमीश्वरः २०

श्लोकाः ९/२०

यस्यांचक्रुःस्पृहांसर्वेससुरासुरमानवाः ॥ रूपौदार्यवयोवर्णमहिम्नाऽऽक्षिप्तचेतसः ९ तस्याश्चासनमानिन्येमहेंद्रोमहदद्भुतम् ॥ मूर्तिमत्यःसरिच्छ्रेष्ठाहेमकुंभैर्जलंशुचि १० आभिषेचनिकाभूमिराहरत्सकलौषधीः ॥ गावःपंचपवित्राणिवसंतोमधुमाधवौ ११ ऋषयःकल्पयांचक्रुरभिषेकंयथाविधि ॥ जगुर्भद्राणिगंधर्वानट्यश्चननृतुर्जगुः १२ मेघामृदंगपणवमुरजानकगोमुखान् ॥ व्यनादयन्शंखवेणुवीणास्तुमुलनिःस्वनान् १३ ततोभिषिषिचुर्देवींश्रियंपद्मकरांसतीम् ॥ दिगिभाःपूर्णकलशैःसूक्तवाक्यैर्द्विजेरितैः १४ समुद्रःपीतकौशेयेवाससीसमुपाहरत् ॥ वरुणःस्रजंवैजयंतींमधुनामत्तषट्पदाम्
१५ भूषणानिविचित्राणिविश्वकर्माप्रजापतिः ॥ हारंसरस्वतीपद्ममजोनागाश्चकुंडले १६ ततःकृतस्वस्त्ययनोत्पलस्रजंनदद्द्विरेफांपरिगृह्यपाणिना ॥ चचारवक्त्रंसुकपोलकुंडलंसव्रीडहासंदधतीसुशोभनम् १७ स्तनद्वयंचातिकृशोदरीसमंनिरंतरंचंदनकुंकुमोक्षितम् ॥ ततस्ततोनूपुरवल्गुसिंजितैर्विसर्पतीहेमलतेवसाबभौ १८ विलोकयंतीनिरवद्यमात्मनःपदंध्रुवंचाव्यभिचारिसद्गुणम् ॥ गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषुनान्वविंदत १९ नूनंतपोयस्यनमन्युनिर्जयोज्ञानंक्वचित्तत्रनसंगवर्जितम् ॥ कश्चिन्महांस्तस्यनकामनिर्जयःसईश्वरःकिंपरतोव्यपाश्रयः २०

चूर्णिका

ततःभगवत्परा श्रीरमाजाता तस्यांसुरासुरमानवाःस्पृहांचक्रुः ९ तस्याः आसनंइंद्रःआनिन्ये सरितःहेमकुंभैःजलंआनिन्युः १० भूमिःअभिषेकोचिताःसर्वौषधीःआहरत् गावःपंचगव्यानिआहरत्वसंतःफलपुष्पादिआहरत् ११ ऋषयःअभिषेकंचक्रुःगंधर्वाःजगुःनट्यःननृतुः १२ देवाःमृदंगादीन्अवादयन् १३ दिग्गजाःपूर्णकलशैःअभिषिषिचुः १४ समुद्रःपीतकौशेयवाससीददौवैजयंतींमालांददौ १५ विश्वकर्माविचित्रभूषणानिददौ सरस्वतीहारंददौ अजःपद्मंददौ नागाःकुंडलेददुः १६ ततःरमानदद्द्विरेफांपद्ममालांपाणिनागृह्यवक्त्रंचचाल १७ साइतरततःविसर्पतीहेमलतेवबभौ १८ ततःदेवादिषुआत्मनःध्रुवंआश्रयंविलोकयंतीनान्वविंदत् १९ तदेवाह यस्यतपःअस्तितस्यक्रोधजयोन यस्यज्ञानंअस्तितत्संगवर्जितंनकश्चित्महान्तस्यकामजयःन २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ८ ॥

नभूतसौहृदं (यमादिषु) नमुक्तिकारणंत्यागःशिबिप्रभृतिषु । कार्तवीर्यादेर्वीर्यमस्तितदजवेगानिष्कृतंकालवेगेनपारिहृतंनभवाति (कालचक्रविजयीनभवतीत्यर्थः) । गुणसंगवर्जितः सनकादिर्मम द्विती
यो वरोनाहि समाधिनिष्ठत्वात् २१ चिरायुष्यपिमार्कंडेयादौशीलंमंगलंचनास्ति । इंद्रियदमनशीलत्वात् । क्वचित्तदपि(शीलंमंगलमप्य-)-स्तिसुरासुरविशेषेषुआयुषस्तुस्थैर्यंनवेद्यंदुर्ज्ञातं । भगवद्द्वेषेण
अकस्मादेवमृत्युसंभवात् । यत्रक्कुत्रचश्रीरुद्रेमार्कंडेयादिवत्इंद्रियदमनाद्यभावात्शीलंमंगलंशीलंचायुर्निश्चयश्चेत्युभयमस्तिनचान्यःपूर्वोक्तःकश्चिद्दोषःतथापिसोप्यमंगलः श्मशानवासाद्यमंगलवेष्टितः ।
श्रीमुकुंदंलक्षीकृत्याह । कश्चेति । कश्चित्सुमंगलःनिरवद्यश्चसतुमांनहिकांक्षतेआत्मारामत्वात् २२ एवंविमृश्यरमानिरपेक्षमपिमुकुंदमेववरंवव्रे । तत्किं । अव्यभिचारिभिःसद्भिर्धर्मज्ञानादिभिर्गुणैर्निजै
काश्रयतश्चनैरपेक्ष्येणवरंसर्वोत्तमं । तत्रहेतुः । अगुणाश्रयंप्रकृतिगुणातीतं । पाठांतरेप्ययमेवार्थःअतएवस्वस्याईप्सितं । किंच । सर्वैर्गुणैरणिमादिभिरपेक्षितंवृतं । अयंभावः । यद्यपिस्वयमात्मा
॥२७॥ रामत्वेनअन्यनिरपेक्षःतथाप्याश्रिताअणिमादिसिद्धीर्यथानोपेक्षते । तथामामपिनोपेक्षेत । तावतैवतत्सेवयाहंकृतार्थास्यांकिमन्यैःप्राकृतैरितितमेववव्रेइति २३ तदेवाह । तस्य (हरेः) अंसदेशेकमनीयां
नवकंजमालांनिधायतदनुग्रहंप्रतीक्षमाणातूष्णींतस्यनिकटेतस्थौ । कथंभूतांमालां । माद्यंतोयेमधुव्रतास्तेषांवरूथस्यगिराउपघुष्टांनादितां । कथंभूताश्रीः । सव्रीडहासेनविकसत्प्रफुल्लंयन्नयनंतेनतस्यउ
रःस्वधामयाताप्राप्तासती । वक्षःप्रतीक्षमाणातस्थावित्यर्थः २४ भगवानपित्रैलोक्याभिवृद्धयेस्ववक्षस्तस्याःस्थानंददावित्याह । तस्याइति । विशिष्टाभूतयोविभवायस्यास्तस्यास्त्रिजगतोजनन्याः श्रियः
त्रिजगतोजनकोहरिः परमंसुस्थिरं । यत्रवक्षसि । ऐधयतअवर्धयत् २५ (सस्त्रीणांस्त्रीभिः सहितानां) २६ (तल्लिंगैः विष्णुप्रतिपादकैः । आवितथैर्यथार्थैः) २७ २८ २९

धर्मःक्वचित्तत्रनभूतसौहृदंत्यागःक्वचित्तत्रनमुक्तिकारणम् ॥ वीर्यंनपुंसोस्त्यजवेगनिष्कृतंनाहिद्वितीयोगुणसंगवर्जितः २१ क्वचिच्चिरायुर्नहिशीलमंगलंक्व श्लोकाः
चित्तदप्यस्तिनवेद्यमायुषः ॥ यत्रोभयंकुत्रचसोप्यमंगलःसुमंगलःकश्चनकांक्षतेहिमाम् २२ एवंविमृश्याव्यभिचारिसद्गुणैर्वरंनिजैकाश्रयतोऽगुणाश्रय
म् ॥ वव्रेवरंसर्वगुणैरपेक्षितंरमामुकुंदंनिरपेक्षमीप्सितम् २३ तस्यांसदेशउशतींनवकंजमालांमाद्यन्मधुव्रतवरूथगिरोपघुष्टाम् ॥ तस्थौनिधायनिकटेतदुरः २१/२९
स्वधामसव्रीडहासविकसन्नयनेनयाता २४ तस्याश्रियःस्त्रिजगतोजनकोजनन्यावक्षोनिवासमकरोत्परमंविभूतेः ॥ श्रीःस्वाःप्रजाःसकरुणेननिरीक्षणे
नयत्रस्थितैधयतसाधिपतींस्त्रिलोकान् २५ शंखतूर्यमृदंगानांवादित्राणांपृथक्स्वनः ॥ देवानुगानांसस्त्रीणांनृत्यतांगायतामभूत् २६ ब्रह्मरुद्रांगिरो
मुख्याःसर्वेविश्वसृजोविभुम् ॥ ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैःपुष्पवर्षिणः २७ श्रियाविलोकितादेवाःसप्रजापतयःप्रजाः ॥ शीलादिगुणसंपन्नालेभिरेनिर्वृतिं
पराम् २८ निःसत्त्वालोलुपाराजन्निरुद्योगागतत्रपाः ॥ यदाचोपेक्षितालक्ष्म्याबभूवुर्दैत्यदानवाः २९

चूर्णिका २१ कश्चित्तुचिरायुःतस्यशीलमंगलंन यत्रउभयंसः अमंगलःकश्चित् सुमंगलः सःमांनेच्छति २२ एवंविमृश्यनिरपेक्षमपिसर्वगुणाश्रयंमुकुंदंवव्रे २३ ततस्तस्यांसदेशेनव ॥२७॥
कंजमालांनिधायनिकटेतस्थौ २४ भगवान्तस्याः स्ववक्षःस्थानंददौ २५ यत्रस्थिताश्रीःसकरुणेनसाधिपान्त्रिलोकान्अवर्धयत् गायतांगंधर्वाणांवाद्यस्वनःअभूत् २६ पुष्प
वर्षिणःब्रह्माद्याःविभुंईडिरे २७ श्रियाविलोकितादेवाद्याःसुखंप्रापुः २८ लक्ष्म्याउपेक्षितादैत्याद्याःनिःसत्त्वाः लोलुपानिर्लज्जाःबभूवुः २९

Nepal Sanskrit University, Balmeeki Campus, Kath...

CC-0. In Public Domain. Digitization by eGangotri

टीका

वारुणीवरुणदेवत्यंयदन्नंतन्मयीसुरा(तदभिमानिनीदेवतेत्यर्थः) ३० (काश्यपैःसुरासुरैः) ३१ दीर्घौपीवरौदोर्दंडौयस्य । कंबुग्रीवःशंखनाभिरिवत्रिरेखासुवृत्ताग्रीवायस्य ३२ स्निग्धःकुंचितःकेशानामं तोपियस्य ३३ इज्यभाग्यज्ञभागभोक्ता ३४ अमृतेनआभृतंपरिपूर्णम् ३५ ३६ मिथःदैत्यानांपरस्परंकलहोत्पादनेन । योगमाययामोहिन्यावोऽर्थंसाधयिष्यामि । अतोमाखिद्यतेत्याहेतिशेषः ३७ तदे वाहामिथइति । तर्षःकामःतद्युक्तानिचेतांसियेषां । इत्येवंसमबलानांकलिरभूत् ३८ दुर्बलानांत्वाक्रोशप्रकारमाह । देवाइतिद्वाभ्यां । येदेवाःतुल्येनायासेनहेतवःसाधकाः । तुल्यआयासोहेतुश्चधनादिर्ये षामितिवा । सत्रयागेयथासर्वेषांसमंफलंतद्वत् । तथाचश्रुतिः ' ऋद्धिकामाःसत्रमासीर'न्निति'येयजमानास्तेऋत्विज 'इतिच ३९ ४० ४१ तद्रूपंवर्णयतिपंचभिः । प्रेक्षणीयमुत्पलमिवश्यामं । सर्वेष्ववय वेषुसुंदरं । समानयोःकर्णयोराभरणेयस्मिन् । सुकपोलंचतदुत्कृष्टनासिकंचाननंयस्मिन् ४२ नवयौवनेननिर्वृत्तौनिष्पन्नःस्तनयोर्भारोयत्रकृशमुदरंयत्रतच्चतच्च (मुखामोदेअनुरक्तायेऽलयस्तेषांझंकारैरु द्विग्नेलोचनेयत्रतत्)४३ सुष्ठुग्रीवायस्मिन्कंठेआभरणंयस्मिन्तच्चतच्च । शोभनाग्रीवायेनतत्कंठाभरणंयस्मिन्नितिवा । सुभुजयोरंगदाभ्यांभूषितम् ४४

॥२८॥ श्लोकाः ३०/४४

अथासीद्वारुणीदेवीकन्याकमललोचना ॥ असुराजगृहुस्तांवैहरेरनुमतेनते ३० अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः ॥ उदतिष्ठन्महाराजपुरुषः परमाद्भुतः ३१ दीर्घपीवरदोर्दंडःकंबुग्रीवोरुऽणेक्षणः ॥ श्यामलस्तरुणःस्रग्वीसर्वाभरणभूषितः ३२ पीतवासामहोरस्कःसुमृष्टमणिकुंडलः ॥ स्निग्धकुं चितकेशांतःसुभगःसिंहविक्रमः ३३ अमृतापूर्णकलशंबिभ्रद्वलयभूषितः ॥ सवैभगवतःसाक्षाद्विष्णोरंशांशसंभवः ॥ धन्वंतरिरितिख्यातआयुर्वेदह गिज्यभाक् ३४ तमालोक्यासुराःसर्वेकलशंचामृताभृतम् ॥ लिप्संतःसर्ववस्तूनिकलशंतरसाऽहरन् ३५ नीयमानेऽसुरैस्तस्मिन्कलशेऽमृतभाजने ॥ विषण्णमनसोदेवाहरिंशरणमाययुः ३६ इतितद्दैन्यमालोक्यभगवान्भृत्यकामकृत् ॥ माखिद्यतमिथोर्थंवःसाधयिष्येस्वमायया ३७ मिथःकलिरभू त्तेषांतदर्थेतर्षचेतसाम् ॥ अहंपूर्वमहंपूर्वंनत्वंनत्वमितिप्रभो ३८ देवाःस्वंभागमर्हंतियेतुल्यायासहेतवः ॥ सत्रयागइवैतस्मिन्नेषधर्मःसनातनः ३९ इतिस्वान्प्रत्यषेधन्वैदैतेयाजातमत्सराः ॥ दुर्बलाःप्रबलान्राजन्गृहीतकलशान्मुहुः ४० एतस्मिन्नंतरेविष्णुःसर्वोपायविदीश्वरः ॥ योषिद्रूपमनिर्देश्यं दधारपरमाद्भुतम् ४१ प्रेक्षणीयोत्पलश्यामंसर्वावयवसुंदरम् ॥ समानकर्णाभरणंसुकपोलोन्नसाननम् ४२ नवयौवननिर्वृत्तस्तनभारकृशोदरम् ॥ मुखा मोदानुरक्तालिझंकारोद्विग्नलोचनम् ४३ बिभ्रत्स्वकेशभारेणमालामुत्फुल्लमल्लिकाम् ॥ सुग्रीवकंठाभरणंसुभुजांगदभूषितम् ४४

चूर्णिका ॥२८॥

अंथवारुणीदेवीकन्याकमललोचनाआसीत्तांअसुराःजगृहुः ३० अथमथ्यमानात्उदधेःअमृतपूर्णकलशंबिभ्रत् स्रग्वीअरुणेक्षणःपीतवासाःसिंहविक्रमःविष्णोःअंशःधन्वंतर्या ख्यःपुरुषःआयुर्वेददृक्इज्यभाक्सन्उत्थितःअसुराःतंअमृतकलशंचदृष्ट्वातंकलशंआहरन् असुरैःकलशेनीयमाने ३१ ३२ ३३ ३४ ३५ ३६ खिन्नाःदेवाःहरिंशरणंययुः भगवानतेषांदैन्यमालोक्यदैत्यानांमिथःकलहोत्पादनेनमोहिन्यावःअर्थंसाधयिष्यामि यूयंमाखिद्यतइत्याह ३७ ततःतेषांअहंपूर्वंनत्वंनत्वमितिमिथःकलहःअभूत् ३८ तत्रये दुर्बलाःतेस्वभागंदेवाःअर्हंतीत्युक्त्वाधृतकलशान्प्रबलान्प्रत्यषेधन् ३९ ४० एतस्मिन्नंतरेसर्वोपायवित् ईश्वरः अद्भुतंयोषिद्रूपम् ४१ उत्पलश्यामम् ४२ ४३ स्वकेशभारे णमालांबिभ्रत् सुग्रीवकंठाभरणम् ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥९॥

विरजांबरेणनिर्मलवाससासंवीतोनितंबएवद्वीपःविशालत्वात् । तत्रशोभायस्यास्तयाकांच्याप्रकर्षेणविलसत् । वल्गुयथाभवत्येवंचलतोश्चरणयोर्नूपुरेयस्मिन् ४५ सव्रीडेनस्मितेनसहविक्षिप्ताकंपितायाभ्रूः
तस्याविलासेनसहयान्यवलोकितानितैर्दैत्ययूथपानांचेतस्सुमुहुर्मुहुःकाममुद्दीपयत् ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांअष्टमोध्यायः ८ ॥ ॥ ७ ॥ ॥ नवमेमोहितैर्दैत्यैरर्पितेऽमृतभा
जने । तद्वंचनेनदेवेभ्योऽमृतंदत्तंतयेर्यते १ ॥ १अहोरूपंसौंदर्यंधामद्युतिःइतिसंभ्रमेणवदंतःकात्वमित्यादिपप्रच्छुः २ मथ्नंतीवक्षोभयंतीव ३ कस्यासीत्ययुक्तंपृष्टमस्माभिः । यतस्त्वंनकेनचिद्भुक्तपूर्वेत्याहुः
नेति । त्वात्वांअमरादिभिरस्पृष्टपूर्वांनजानीमइतिन । अपितुजानीमएव ४ आस्तामिदंत्वद्दर्शनंत्वीश्वरेणैवसंपादितमित्याहुः । नूनमिति । सर्वेंद्रियाणांचमनसश्चप्रीतिंविधातुंसघृणेन (सदयेनविधिना
किं) प्रेषितासि । किंवायदृच्छयैवागतासिनैवंनूनंप्रेषितैवेत्यर्थः ५ ६ भेदोविग्रहोयथानभवेत्तथा ७ (माययायोषिद्रूपंवपुर्यस्य) ८ संगताअनुसृताः ९ हेसुरद्विषः (शालावृकाणांक्रोष्टूनां) १०

॥२९॥

श्लोकाः ४५/१०

विरजांबरसंवीतनितंबद्वीपशोभया ॥ काच्याप्रविलसद्वल्गुचलच्चरणनूपुरम् ४५ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः ॥ दैत्ययूथपचेतस्सुकाममुद्दी
पयन्मुहुः ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेअष्टमोऽध्यायः ८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ तेऽन्योन्यमसुराःपात्रंहरं
तस्त्यक्तसौहृदाः ॥ क्षिपंतोदस्युधर्माणआयांतींददृशुःस्त्रियम् १ अहोरूपमहोधामअहोअस्यानवंवयः ॥ इतितेतामभिद्रुत्यपप्रच्छुर्जातहृच्छयाः २ का
त्वंकंजपलाशाक्षिकुतोवाकिंचिकीर्षसि ॥ कस्यासिवदवामोरुमथ्नंतीवमनांसिनः ३ नवयंत्वामरैर्दैत्यैःसिद्धगंधर्वचारणैः ॥ नास्पृष्टपूर्वांजानीमोलोकेशै
श्चकुतोनृभिः ४ नूनंत्वंविधिनासुभ्रुप्रेषितासिशरीरिणाम् ॥ सर्वेंद्रियमनःप्रीतिंविधातुसघृणेनकिम् ५ सात्वंनःस्वर्धमानानामेकवस्तुनिभामिनि ॥ ज्ञाती
नांबद्धवैराणांशंविधत्स्वसुमध्यमे ६ वयंकश्यपदायादाभ्रातरःकृतपौरुषाः ॥ विभजस्वयथान्यायंनैवभेदोयथाभवेत् ७ इत्युपामंत्रितोदैत्यैर्मायायोषि
द्वपुर्हरिः ॥ प्रहस्यरुचिरापांगैर्निरीक्षन्निदमब्रवीत् ८ ॥ श्रीभगवानुवाच ॥ कथंकश्यपदायादाःपुंश्चल्यांमायिसंगताः ॥ विश्वासंपंडितोजातुकामिनी
षुनयातिहि ९ शालावृकाणांस्त्रीणांचस्वैरिणीनांसुरद्विषः ॥ सख्यान्याहुरनित्यानिनूत्नंनूत्नंविचिन्वताम् १०

चूर्णिका ॥२९॥

लसच्चरणनूपुरम् ४५ नवयौवननिर्वृत्तस्तनभारकृशोदरंसव्रीडस्मितादिभिः दैत्यचित्तेषुकामंउद्दीपयत् एवंभूतंरूपंदधार ४६ ॥ इत्यष्टमेअष्टमः ॥ ८ ॥ ॥७॥ ॥ श्रीशुक
उवाच ॥ अथतेसुराःत्यक्तसौहृदाःसंतः अन्योऽन्यतःपात्रंहरंतःआयांतींस्त्रियंददृशुः १ अहोअस्याःरूपंअहोधामअहोनवंवयःइतिवदंतः जातकामाःसंतः तांपप्रच्छुः २
हेकमलाक्षिकात्वंकुतःआगताकिंचिकीर्षसि ३ वयंत्वां अमरादिभिःअस्पृष्टपूर्वांजानीमः ४ किंच विधिनानःसर्वेंद्रिमनःप्रीतिंविधातुंप्रेषिताआसिकिम् ५ सात्वंएकवस्तुनिस्पर्ध
मानानांबद्धवैराणांनःशंविधत्स्व ६ वयंकश्यपपुत्राःभ्रातरःअतःनःभेदोयथानभवेत् तथासुधांविभजस्व ७ एवंदैत्यैःप्रार्थितःहरिःप्रहस्यइदंआह ८ ॥ श्रीभगवानुवाच ॥ हेदै
त्याःयूयंकश्यपपुत्राःपुंश्चल्यांमयिकथंअनुसृताःपंडितःकामिनीषुविश्वासंनयाति ९ हेदैत्याःवृकाणांस्वैरिणीनांस्त्रीणांचसख्यानिअनित्यान्याहुः १०

Nepal Sanskrit University, Balmeeki Campus...

CC-0. In Public Domain. Digitization by eGangotri

भा.अ. (क्ष्वेलितैः छलमिश्रवचनैः) भावेनकेनाप्यभिप्रायेणगंभीरंयथाभवत्येवंजहसुः ११ ईषत्स्मितेनशोभायस्यास्तयामयाकृतंसाधुवाअसाधुवायद्यभ्युपेतअंगीकुरुततर्हिविभजे १२ असुरपुंगवाःदैत्यश्रेष्ठाः अ०
प्रमाणमियत्तामजानंतः १३ १४ यथोपजोषंयथाप्रीति । अहतस्यलक्षणम् । 'अहतंयंत्रनिर्मुक्तंवासःप्रोक्तंस्वयंभुवा । शस्तंतन्मांगलिक्येषुतावन्मात्रेनसर्वदेति' । प्रागग्रेषुकुशेषुविविशुः १५ धूपैरामोदि
टीका तायांसुरभीकृतायांशालायाम् (माल्यैर्दीपकैश्च) १६ अथतस्यांशालायांहेनरेंद्रसाकलशपाणिराविवेश ।कथंभूता । 'मणिबंधादाकनिष्ठंकरस्यकरभोबहिः' । करभसदृशौसुवृत्तौऊरूयस्याःसा । उश ॥ ९ ॥
त्कमनीयंदुकूलंयस्मिन्तेनश्रोणीतटेनविशालयाश्रोण्याऽलसामंदागतिर्यस्याःसा । पाठांतरेकरभसदृशयोरूर्वोर्लसत्दुकूलंयस्याःसाचासौश्रोणीतटेनअलसगतिश्च । मदेनविह्वलेअक्षिणीयस्याः १७
तांश्रियःसखींसंवीक्ष्यदेवासुराःसंमुमुहुः । कथंभूतां । कनककमयेकुंडलेयस्याःसाचासौचारवःकर्णादयोयस्याःसाच । विगलितोविस्रस्तःस्तनपट्टिकायाअंतोयस्याः १८ एवंतान्मोहयित्वायत्कृतवान्तदाह
॥३०॥ त्रिभिः । असुराणांसुधादानंसर्पाणांक्षीरदानमिवदुर्नयम् । अन्याय्यंमत्वातांसुधांतेभ्योनव्यभजत् (सुधापयसिदेवान्नइत्यभिधानम्) अयंभावः । दैत्यैर्मदीयंसाध्वसाधुवासर्वमनुमतमेव । अतोमद्भक्ता
न्देवानेवसुधांपाययिष्यामि (ननुतद्वैरिणोनिसर्गक्रूरान्दैत्यान्) किंच तैर्यथान्यायंविभजस्वेत्युक्तंअतश्चक्रूरेभ्यस्तेभ्यःसुधांनदद्यामिति १९ पंक्तीःपृथक्विविक्ताःकल्पयित्वाविधायतासुपंक्तिषु
स्वेषुस्वेषुतत्सजातीयेषुतांश्चअसुरानविप्रतारणार्थमेवोपवेशयामास २०

॥ श्रीशुकउवाच ॥ इतितेक्ष्वेलितैस्तस्याआश्वस्तमनसोऽसुराः ॥ जहसुर्भावगंभीरंददुश्चामृतभाजनम् ११ ततोगृहीत्वाऽमृतभाजनंहरिर्बभाषईष श्लोकाः
त्स्मितशोभयागिरा ॥ यद्यभ्युपेतक्वचसाध्वसाधुवाकृतंमयावोविभजेसुधामिमाम् १२ इत्यभिव्याहृतंतस्याआकर्ण्यासुरपुंगवाः ॥ अप्रमाणविदस्तस्या
स्तत्तथेत्यन्वमंसत १३ अथोपोष्यकृतस्नानाहुत्वाचहविषाऽनलम् ॥ दत्त्वागोविप्रभूतेभ्यःकृतस्वस्त्ययनाद्विजैः १४ यथोपजोषंवासांसिपरिधायाहता ११/२०
निते ॥ कुशेषुप्राविशन्सर्वेप्रागग्रेष्वभिभूषिताः १५ प्राङ्मुखेषूपविष्टेषुसुरेषुदितिजेषुच ॥ धूपामोदितशालायांजुष्टायांमाल्यदीपकैः १६ तस्यांनरें
द्रकरभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी ॥ साकूजतीकनकनूपुरसिंजितेनकुंभस्तनीकलशपाणिरथाविवेश १७ तांश्रीसखींकनककुंडलचा
रुकर्णनासाकपोलवदनांपरदेवताख्याम् ॥ संवीक्ष्यसंमुमुहुरुत्स्मितवीक्षणेनदेवासुराविगलितस्तनपट्टिकांताम् १८ असुराणांसुधादानंसर्पाणामिवदु
र्नयम् ॥ मत्वाजातिनृशंसानांनतांव्यभजदच्युतः १९ कल्पयित्वापृथक्पंक्तीरुभयेषांजगत्पतिः ॥ तांश्चोपवेशयामासस्वेषुस्वेषुचपंक्तिषु २०

चूर्णिका ॥ श्रीशुकउवाच ॥ एवंतस्याःनर्मवाक्यैःमोहिताःसंतःजहसुःतस्यैअमृतभाजनंचददुः ११ ततोहरिःअमृतपात्रंगृहीत्वाआह हेदैत्याःमयासाधुवाअसाधुवाकृतंयदिअंगीकुरुतत
र्हिसुधांविभजे १२ एवंतस्याःवाक्यंश्रुत्वातथेतिअमंसत १३ अथतेसर्वेउपोष्यअग्निंहुत्वादानानिविप्रादिभ्योदत्त्वावासांसिधृत्वाभूषिताःसंतःप्रागग्रदर्भेषुप्राविशन् १४ १५ ॥३०॥
धूपामोदितशालायांसुरासुरेषुप्राङ्मुखेषूपविष्टेषुसत्सु १६ तस्यांसामोहिनीअमृतकलशंगृहीत्वाआविवेश १७ विस्रस्तस्तनपट्टिकांतांतांदृष्ट्वासर्वेमुमुहुः १८ जात्याक्रूराणां
असुराणांसुधादानंअहीनांक्षीरमिवअन्याय्यंमत्वातेभ्यःसुधांनव्यभजत् १९ एवंदेवदैत्यानांपृथक्पंक्तीःकृत्वास्वस्वपंक्तिषुचतान्उपवेश्य २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंचरैर्बहुमानप्रियवाक्यादिनातानतिक्रम्यागमनैर्दूरस्थानपिदेवान् २१ तयाकृतःस्नेहोयेषां । स्त्रियासहविवादस्यजुगुप्सया २२ कृतोऽतिप्रणयःस्नेहोयैः । प्रणयापायात्स्नेहनाशात्कातराभीताःएते
तावत्कृपणाःपूर्वंकिंचित्पिबंतुयूयंतुधीराःक्षणंप्रतीक्षध्वमित्यादिबहुमानेनचआबद्धानियंत्रिताः ।समयपालनादिभिःषड्भिरेतैःकारणैःअप्रियंकिंचिदपिनोचुः । किंतुतूष्णीमासन् २३ देवपंक्तौचंद्रार्कयोर्मध्ये ॥ ९ ॥
प्रविष्टोराहुःसोममृतमपिबत् २४ हरिस्तस्यशिरोजहार । अप्लावितःअसंस्पृष्टः (अतोऽपतत्) २५ (शिरस्त्वमृतेनप्लावितमतोऽमरतांनीतम् अजोब्रह्मा) ग्रहंसूर्यादिवद्ग्रहत्वाधिकारिणम् २६ २७
टीका हरिभक्तानामेवोद्यमःफलतिनान्येषामित्येवमाख्यानतात्पर्यमाह । एवमिति । समादेशादयोयेषाम् । हेतुर्मंदरादिः अर्थःसमुद्रोक्षिप्तंवीरुत्तृणादि । विविधःकल्पःफलंकेषांचिज्जातंकेषांचिन्नेतिवैचित्र्यंयेषा
म् । फलेवैषम्यवंतोबभूवुरित्यर्थः । तदेवाह । तत्रतेषुयस्यपादपंकजरजःश्रयणादेवाअमृतंफलमापुःसएवसेव्यइत्यर्थःयत्तदोर्नित्यसंबंधात् २८ एतदेवोपपादयति । असवःप्राणाःवसुधनम् । प्राणादिभि
॥३१॥ र्देहात्मजादिषुनृभिर्यद्युज्यतेदेहाद्यर्थंतदसत्व्यर्थंभवति । कुतःपृथक्त्वात्भेदाश्रयत्वात् । शाखानिषेचनवत् । तैरेवप्राणादिभिरीश्वरोद्देशेनयत्क्रियतेतत्तुसन्महाफलंभवति । कुतःअपृथक्त्वात् । ईश्वर
स्यसर्वत्रानुगतत्वात् । तत्रदृष्टांतः । यत्तरोर्मूलनिषेचनंतद्यथासर्वस्यस्कंधशाखादेरपिभवति । यद्वाल्यव्लोपेपंचम्यौ । पृथक्त्वंपर्यालोच्यभेददृष्ट्यादेहाद्युद्देशेनयत्क्रियतेतदसत् । अपृथक्त्वंपर्यालोच्येश्व
रदृष्ट्यातैरेवतेष्वेवचयत्क्रियतेतत्सत्भवतीति । शेषंसमानम् २९ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांनवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

दैत्यान्गृहीतकलशोवंचयन्नुपसंचरैः ॥ दूरस्थान्पाययामासजरामृत्युहरांसुधाम् २१ तेपालयंतःसमयमसुराःस्वकृतंनृप ॥ तूष्णीमासन्कृतस्नेहाः श्लोकाः
स्त्रीविवादजुगुप्सया २२ तस्यांकृतातिप्रणयाःप्रणयापायकातराः ॥ बहुमानेनचाबद्धानोचुःकिंचनविप्रियम् २३ देवलिंगप्रतिच्छन्नःस्वर्भानुर्देवसं २१
सदि ॥ प्रविष्टःसोममपिबच्चंद्रार्काभ्यांचसूचितः २४ चक्रेणक्षुरधारेणजहारपिबतःशिरः ॥ हरिस्तस्यकबंधस्तुसुधयाऽप्लावितोऽपतत् २५ शिरस्त्व २९
मरतांनीतमजोग्रहमचीक्लृपत् ॥ यस्तुपर्वणिचंद्रार्कावभिधावतिवैरधीः २६ पीतप्रायेऽमृतेदेवैर्भगवान्लोकभावनः ॥ पश्यतामसुरेंद्राणांस्वरूपंजगृहे
हरिः २७ एवंसुरासुरगणाःसमदेशकालहेत्वर्थकर्ममतयोपिफलेविकल्पाः ॥ तत्रामृतंसुरगणाःफलमंजसापुर्यत्पादपंकजरजःश्रयणान्नदैत्याः २८ य
द्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषुनृभिस्तदसत्पृथक्त्वात् ॥ तैरेवसद्भवतियत्क्रियतेऽपृथक्त्वात्सर्वस्यतद्भवतिमूलनिषेचनंयत्२९ ॥ ॥ इति
श्रीभागवतेमहापुराणेअष्टमस्कंधेअमृतमथनेनवमोऽध्यायः ९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

चूर्णिका गृहीतकलशःहरिःप्रियवाक्यादिनातान्अतिक्रम्यअतिक्रम्यवंचयन्गमनैःदूरस्थानपिदेवान्जरामृत्युहरांसुधांपाययामास २१ ततोदैत्याःसमयंपालयंतःतस्याःबहुमानेनबद्धाःस्त्री ॥३१॥
वादजुगुप्सयाविप्रियंकिंचिदपिनोचुः २२ २३ तदाराहुःदेवसंसदिचंद्रार्कयोःमध्येस्थितःसन्सुधांपपौ २४ ताभ्यांसूचितःहरिःचक्रेणतच्छिरःजहार तत्कबंधस्तुसुधयाअस्पृ
ष्टःअपतत् २५ शिरस्त्वमरतांनीतंअजःतंग्रहंअकरोत् यःपर्वणिचंद्रार्कौअभिधावति २६ एवंदेवैःअमृतेपीतेअसुराणांपश्यतांसतांहरिःस्वस्वरूपंजगृहे २७ एवंसुरासुराःश्रमे
तुल्याअपिफलेविकल्पंआपुः हेनृप देवाःयत्पादपंकजरजःश्रयणात्अमृतंआपुःदैत्याःन २८ २९ ॥ इत्यष्टमेनवमः ९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥ दशमेमत्सराद्दैत्यैरारब्धेतुमृधेसुरैः । दैत्यमायाविपण्णेषुदेवेष्वाविर्बभौहरिः ॥ १ ॥ तदेवममृतावाप्तिर्नाभक्तानामितीरितम् । भक्तमत्सरतःप्राणहानिःपुनरुदीर्यते ॥ २॥ (यत्तायत्नवंतःतथाप्यमृतालाभेहेतुः । वासुदेवेति) १ २ ३ ४ रणःसंग्रामःउदन्वतःसमुद्रस्यरोधसितीरेबभूव ५ अन्योन्यंसमासाद्य (संरब्धंक्रुद्धंमनोयेषां । खड्गादिभिः) निजघ्नुः ६ ७ (संयुगेरणे) ८ (वाहनान्याह । उष्ट्रैरितिऋक्षैरच्छभल्लैः । द्वीपिभिर्व्याघ्रैः) ९ (गोवृषैर्वृषभश्रेष्ठैः) १० ११ (जलखगाःकारंडवादयःस्थलखगाःकुक्कुटादयस्तैः । विकृतोविग्रहोदेहोयेषांतैःसत्त्वैःप्राणिभिः) १२ चित्रध्वजपटादिभिश्चवीराणांमालाभिश्चनिरंतरपंक्तिभिः देवदानववीराणांध्वजिन्यौयादसांमालाभिःसागराविवरेजतुरितित्रयाणामन्वयः । यादोभिरितिवा । सितैरमलैश्चातपत्रैः । बार्हैश्चचामरैश्चव्यजनैः १३ वातेनोद्धूतैरुत्तरैरुष्णीषैश्च । सूर्यरश्मिभिःकृत्वासुतरांस्फुरद्भिः (वर्मादिभिस्तेषामर्चिर्भिश्च) १४ १५ संख्येयुद्धे । असुराणांयाचमूःतस्याःपतिःसबलिर्यानमास्थितः १६

॥३२॥

श्लोकाः १/१६

॥ श्रीशुकउवाच ॥ इतिदानवदैतेयानाविंदन्नमृतंनृप ॥ युक्ताःकर्मणियत्ताश्चवासुदेवपराङ्मुखाः १ साधयित्वाऽमृतंराजन्पाययित्वास्वकान्सुरान् ॥
पश्यतांसर्वभूतानांययौगरुडवाहनः २ सपत्नानांपरामृद्धिंदृष्ट्वातेदितिनंदनाः ॥ अमृष्यमाणाउत्पेतुर्देवान्प्रत्युद्यतायुधाः ३ ततःसुरगणाःसर्वेसुधयापी
तयैधिताः ॥ प्रतिसंयुयुधुःशस्त्रैर्नारायणपदाश्रयाः ४ तत्रदेवासुरोनामरणःपरमदारुणः ॥ रोधस्युदन्वतोराजन्तुमुलोरोमहर्षणः ५ तत्रान्योन्यंसप
त्नास्तेसंरब्धमनसोरणे ॥ समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ६ शंखतूर्यमृदंगानांभेरीडमरिणांमहान् ॥ हस्त्यश्वरथपत्तीनांनदतांनिःस्वनोऽभवत्
७ रथिनोरथिभिस्तत्रपत्तिभिःसहपत्तयः ॥ हयाहयैरिभाश्चेभैःसमसज्जंतसंयुगे ८ उष्ट्रैःकेचिदिभैःकेचिदपरेभिययुःखरैः ॥ केचिद्गौरमृगैरृक्षैर्द्वी
पिभिर्हरिभिर्भटाः ९ गृध्रैःकंकैर्बकैरन्येश्येनभासैस्तिमिंगिलैः ॥ शरभैर्महिषैःखड्गैर्गोवृषैर्गवयारुणैः १० शिवाभिराखुभिःकेचित्कृकलासैःशशैर्नरैः ॥ बस्तै
रेकेकृष्णसारैर्हंसैरन्येचसूकरैः ११ अन्येजलस्थलखगैःसत्त्वैर्विकृतविग्रहैः ॥ सेनयोरुभयोराजन्विविशुस्तेऽग्रतोग्रतः १२ चित्रध्वजपटैराजन्नातपत्रैः
सितामलैः ॥ महाधनैर्वज्रदंडैर्व्यजनैर्बार्हचामरैः १३ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः ॥ स्फुरद्भिर्विशदैःशस्त्रैःसुतरांसूर्यरश्मिभिः १४ देवदानववी
राणांध्वजिन्यौपांडुनंदन ॥ रेजतुर्वीरमालाभिर्यादसामिवसागरौ १५ वैरोचनोबलिःसंख्येसोऽसुराणांचमूपतिः ॥ यानंवैहायसंनामकामगंमयनिर्मितम् १६

चूर्णिका

॥ श्रीशुकउवाच ॥ हेनृपदैतेयाःकर्मणियत्ताःसंतःभगवत्पराङ्मुखाःअतएवअमृतंनाविंदन् १ एवंभगवान्देवान्अमृतंसाधयित्वाययौ २ ततःदेवानांपरांऋद्धिंदृष्ट्वादैत्याः गृहीतायुधाःसंतःयुद्धार्थंययुः ३ ४ तदासमुद्रतीरेदेवासुरोनामतुमुलोरणःअभवत् ५ तत्ररणेसपत्नाःअन्योन्यंआसाद्यआयुधैःजघ्नुः ६ तत्रशंखादीनांस्वनःअभवत् ७ अथरथिनःरथिभिःपत्तयःपत्तिभिःहयाःहयैःइभाःइभैश्चरणेअसज्जंत ८ तथाकेचिद्दैत्यभटाः उष्ट्रेभखरसिंहगृध्रकंकबकशरभमहिषगोवृषशिवाखुकुकुटवस्तहंससूकरजलस्थलखगादिषु आरूढाःतेष्वारूढैःअन्यैःसहयुयुधुः एवंउभयोःसेनयोर्मध्ये अग्रतोऽग्रतःतेविविशुः ९ १० ११ १२ तदाचित्रध्वजपटातपत्रव्यजनचामरोष्णीषादिभिः देवदैत्यसेनयादोभिःसागराविवरेजतुः १३ १४ १५ तत्रअसुराणांपतिः बलिःवैहायसंनामकामगं १६

॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सर्वैःसांग्रामिकैर्युद्धसाधनैःशस्त्रादिभिरुपेतं । मनसाऽप्रतर्क्यं । वाचाऽनिर्देश्यंक्वचिद्दृश्यमानं । क्वचिन्नास्तिदर्शनंयस्य १७ उदयेउदयशिखरेस्थितश्चंद्रइवविरेजइतित्रयाणामन्वयः १८ १९ २० २१ २२ (सोमस्यसुधायाःबहुशोबहुवारं) २३ (बलभित्इंद्रःउत्सिक्तान्बलगर्वितान्) २४ स्रवंतिप्रस्रवणानियस्मिन्नितिमदधारासादृश्यम् २५ नानावाहनादीनियेषाम् २६ तेदेवाअसुराश्च मिथोऽभिसंगम्यनामभिर्नामानिगृहीत्वाक्षिपंतस्तिरस्कुर्वंतोयुयुधुः २७ द्वंद्वान्येवाह युयोधेतिसप्तभिः । अस्यतआस्यत्अयुध्यदित्यर्थः २८ २९ सूर्योदेवएकएवशतेनबलिसुतैः (युयुधे) बाणोज्ये ष्ठोयेषांतैः ३० निशुंभशुंभाभ्यांदेवी ३१ (इल्वलोवातापिश्चब्रह्मपुत्रैर्युयुधाते) ३२

॥३३॥ सर्वसांग्रामिकोपेतंसर्वाश्चर्यमयंप्रभो ॥ अप्रतर्क्यमनिर्देश्यंदृश्यमानमदर्शनम् १७आस्थितस्तद्विमानाग्र्यंसर्वानीकाधिपैर्वृतः ॥ वालव्यजनछत्राग्र्यैरेजेचंद्रइ वोदये १८ तस्यासन्सर्वतोयानैर्यूथानांपतयोसुराः ॥ नमुचिःशंबरोबाणोविप्रचित्तिरयोमुखः १९ द्विमूर्धाकालनाभोथप्रहेतिर्हेतिरिल्वलः ॥ शकुनिर्भूतसं तापोवज्रदंष्ट्रोविरोचनः२० हयग्रीवःशंकुशिराःकपिलोमेघदुंदुभिः ॥ तारकश्चक्रदृक्शुंभोनिशुंभोजंभउत्कलः २१ अरिष्टोऽरिष्टनेमिश्चमयश्चत्रिपुराधिपः ॥ अन्येपौलोमकालेयानिवातकवचादयः २२ अलब्धभागाःसोमस्यकेवलंक्लेशभाजिनः ॥ सर्वएतेरणमुखेबहुशोनिर्जितामराः २३ सिंहनादंविमुंचंतःशंखा न्दध्मुर्महारवान्॥दृष्ट्वासपत्नानुत्सिक्तान्बलभित्कुपितोभृशम् २४ ऐरावतंदिक्करिणमारूढोवियतिस्वराट् ॥ यथास्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः२५तस्या सन्सर्वतोदेवानानावाहध्वजायुधाः ॥ लोकपालाःसहगणैर्वाय्वग्निवरुणादयः२६ तेन्योन्यमभिसंसृत्यक्षिपंतोनामभिर्मिथः॥ आह्वयंतोविशंतोऽग्रेयुयुधुर्द्वं द्वयोधिनः २७ युयोधबलिरिंद्रेणतारकेणगुहोऽस्यत ॥ वरुणोहेतिनाऽयुध्यन्मित्रोराजन्प्रहेतिना २८ यमस्तुकालनाभेनविश्वकर्मामयेनवै ॥ शं बरोयुयुधेत्वष्ट्रासवित्रातुविरोचनः २९ अपराजितेननमुचिरश्विनौवृषपर्वणा ॥ सूर्योबलिसुतैर्देवोबाणज्येष्ठैःशतेनच ३० राहुणाचतथासोमःपुलो म्नायुयुधेऽनिलः ॥ निशुंभशुंभयोर्देवीभद्रकालीतरस्विनी ३१ वृषाकपिस्तुजंभेनमहिषेणविभावसुः ॥ इल्वलःसहवातापिर्ब्रह्मपुत्रैररिंदम ३२

श्लोकाः १७/३२

चूर्णिका

विमानमास्थितःसन्चंद्रइवरेजे १७ १८ तस्यसर्वतःयानैःदैत्याःनमुचिःशंबरःविप्रचित्तिःबाणःअयोमुखः १९ द्विमूर्धाकालनाभःप्रहेतिःहेतिःइल्वलःशकुनिः भूतसंतापः वज्रदंष्ट्रःविरोचनः २० हयग्रीवःशंकुशिराःकपिलःमेघदुंदुभिःतारकःचक्रदृक् शुंभःनिशुंभःजंभःउत्कलः २१ अरिष्टःआरिष्टनेमिःमयःअन्येपौलोमकालेयनिवातकव चादयः २२ एतेदैत्याःआसन् २३ तथा सिंहनादान्मुंचंतःशंखान्दध्मुःततःशत्रून् दृष्ट्वाइंद्रःकुपितःसन् २४ ऐरावतारूढः सूर्यइवरेजे २५ तस्यसर्वतःनानावाहध्व जायुधाःवाय्वग्निवरुणादयःदेवाः आसन् २६ तेऽन्योऽन्यमभिसंसृत्यक्षिपंतोमर्मभिर्मिथः आह्वयंतोविशंतोऽग्रेयुयुधुर्द्वंद्वयोधिनः । २७ तत्रबलिःइंद्रेणयुयोध तारकेणगुहःवरु णःहेतिना मित्रःप्रहेतिना २८ यमःकालनाभेन विश्वकर्मामयेन शंबरःत्वष्ट्रा विरोचनःसवित्रा २९ अपराजितेननमुचिःआश्विनौवृषपर्वणा सूर्यः बालिसुतैः ३० राहुणासो मःपुलोम्नावायुःनिशुंभशुंभाभ्यांदेवी ३१ वृषाकपिःजंभेनविभावसुः माहिषेण इल्वलवातापीब्रह्मपुत्रैः ३२ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, ...

CC-0. In Public Domain. Digitization by eGangotri

भा.अ. टीका

आरोहंतीत्यारोहावीराःतैःसहिताअन्येचवाहाःपूर्वंतुकेवलंगजादयउक्ताः । कथंभूताःनिकृत्ताबाह्वादयोयेषां । छिन्नानिध्वजादीनियेषां (इष्वा
३३ ३४ (आजौयुद्धे) ३५ (गदाभिर्ऋष्टिभिश्च) ३६ सोधनुः । तनुत्रंकवचम्) ३७ तेषांदेवादीनांपदाघातैःरथांगैश्चरथचक्रैश्चूर्णितादायोधनाद्रणभूमेरुत्थितोरेणुर्दिशःखंद्युमणिंचसूर्यंछादयंस्तदैवादिगादिभ्योन्यवर्तत । (तत्रहेतुः ।) कथंभूतात् । असृक्स्नु
तिभिःरक्तक्षरणैःपरिप्लुतात्सिक्तात् । यद्वा । परिप्लवनाद्धेतोर्न्यवर्तत । भावेक्तः । रक्तधाराणांतत्पर्यंतमुच्छलनादित्यर्थः । प्रथमांतपाठेरेणोर्विशेषणं ३८ शिरोभिर्महाभुजैश्चकरभसदृशैरूरुभिश्चसारणभूःप्रक
र्षेणआस्तृतासतीबभौ । कथंभूतैःशिरोभिःउद्धूतानिउत्पतितानिकिरीटानिकुंडलानिचयेभ्यःतैः । संरंभयुक्तादृशोयेषुतैः । परिदष्टादच्छदाओष्ठायेषुतैः ३९ पतितानियानिस्वशिरांसितत्रस्थैरक्षिभिः
पश्यंतइत्यर्थः । उद्यतानिआयुधानियैस्तैर्दोर्दंडैर्युक्ताः ४० वाहान्ऐरावतपादरक्षकान् । आरोहंगजयंतारम् । आच्छैयत्विव्याध ४१ (तान्शरान्) ४२ दुर्मर्षःअसहनोबलिः ४३ (ऋष्टयःऋष्टीः
॥३४॥ विभुरिंद्रः) ४४ ४५ टंकवत्तीक्ष्णाग्रैःशिखरैःसहिताः ४६

श्लोकाः ३३/४६

मरुतोनिवातकवचैःकालेयैर्वसवोऽमराः ॥ विश्वेदेवास्तुपौलोमैः
कामदेवेनदुर्मर्षउत्कलोमातृभिःसह ॥ बृहस्पतिश्चोशनसानरकेणशनैश्चरः ३३
रुद्राःक्रोधगणैःसह ३४ तएवमाजावसुराःसुरेंद्राद्वंद्वेनसंहत्यचयुध्यमानाः ॥ अन्योन्यमासाद्यनिजघ्नुरोजसाजिगीषवस्तीक्ष्णशरासितोमरैः ३५ भृशुं
डिभिश्चक्रगदर्ष्टिपट्टिशैःशक्त्युल्मुकैःप्रासपरश्वधैरपि ॥ निस्त्रिंशभल्लैःपरिघैःसमुद्गरैःसभिंडिपालैश्चशिरांसिचिच्छिदुः ३६ गजास्तुरंगाःसरथाःपदातयः
सारोहवाहाविविधाविखंडिताः ॥ निकृत्तबाहूरुशिरोधरांघ्रयःछिन्नध्वजेष्वासतनुत्रभूषणाः ३७ तेषांपदाघातरथांगचूर्णितादायोधनादुल्बणउत्थितस्त
दा ॥ रेणुर्दिशःखंद्युमणिंचछादयन्न्यवर्ततासृक्स्नुतिभिःपरिप्लुतात् ३८ शिरोभिरुद्धूतकिरीटकुंडलैःसंरंभदृग्भिःपरिदष्टदच्छदैः ॥ महाभुजैःसाभर
णैःसहायुधैःसाप्रास्तृताभूःकरभोरुभिर्बभौ ३९ कबंधास्तत्रचोत्पेतुःपश्यंतःस्वशिरोक्षिभिः ॥ उद्यतायुधदोर्दंडैराधावंतोभटान्मृधे ४० बलिर्महेंद्रं
दशभिस्त्रिभिरैरावतंशरैः ॥ चतुर्भिश्चतुरोवाहानेकेनारोहमार्च्छयत् ४१ सतानापततःशक्रस्तावद्भिःशीघ्रविक्रमः ॥ चिच्छेदनिशितैर्भल्लैरसंप्राप्तान्हस
न्निव ४२ तस्यकर्मोत्तमंवीक्ष्यदुर्मर्षःशक्तिमाददौ ॥ तांज्वलंतींमहोल्काभांहस्तस्थामच्छिनद्धरिः ४३ ततःशूलंततःप्रासंततस्तोमरमृष्टयः ॥ यद्य
च्छस्त्रंसमादद्यात्सर्वंतदच्छिनद्विभुः ४४ ससर्जाथासुरींमायामंतर्धानगतोऽसुरः ॥ ततःप्रादुरभूच्छैलःसुरानीकोपरिप्रभो ४५ ततोनिपेतुस्तरवोदह्य
मानादवाग्निना ॥ शिलाःसटंकशिखराश्चूर्णयंत्योद्विषद्बलम् ४६

चूर्णिका

मरुतःनिवातकवचैःकालेयैःवसवः विश्वेदेवाःपौलोमैः रुद्राःक्रोधवशैः युयुधुः ३४ तएवंअन्योऽन्यं ॥३४॥
कामदेवेनदुर्मर्षःउत्कलःमातृभिः बृहस्पतिःशुक्रेणनरकेणशनिः ३३ तत्रकबंधाःउत्पेतुः४० ततः बलिः
आसाद्यतीक्ष्णशरासितोमरैःमिथःनिजघ्नुः ३५ ३६ ३७ भूमेःरेणुःउत्थितः ३८ तेषांवाहनानांचशिरोरुबाहुभिःआस्तृताभूःबभौ ३९ ततोबलिःशक्तिंआददे तांइंद्रःचिच्छेद ४३ ततःबलिः
इंद्रंदशभिःशरैःत्रिभिर्गजंचतुर्भिर्गजपादरक्षकान् एकेनगजयंतारंविव्याध ४१ प्राप्तान्शरान्इंद्रःभल्लैःचिच्छेद ४२ ततःतरवःशिलाः सर्पाः ४६
यद्यत् जगृहेतत्तदिंद्रःचिच्छेद ४४ ततोबलिःअंतर्धायमायांससर्जततःदेवसेनोपरिशैलःप्रादुरभूत् ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

४७ ४८ स्तनयित्नवःसनिर्घातामहामेघाअंगारान्मुमुचुरित्यन्वयः ४९ अधाक्आर्षःअधाक्षीदित्यर्थः ५० उद्भूतैस्तरंगैरावर्तैश्चभीषणः ५१ एवमन्यैश्चदैत्यैःसृज्यमानासु (विषेदुर्विषण्णाबभुवुः) ५२ यत्र यदा । तत्र तदा तैर्ध्यातःसन् ५३ अष्टौआयुधयुक्ताबाहवोयस्य । श्रीश्चकौस्तुभश्चअनर्घ्यंकिरीटंचकुंडलेचउल्लसंतिश्रीकौस्तुभादीनियस्मिन् ५४ असुराणांकूटकर्ममंत्रादिप्रयोगःतस्माज्जाताः । महिनामहिम्ना । हरेःस्मृतिरेवसर्वासांविपदांविमोक्षणेरूपाकिमुतहरेःप्रवेशइत्यर्थः ५५ इभारिवाहःसिंहवाहःअहिनोत्चिक्षेप । लीलयैवतद्गृहीत्वाऽहनत्अहन्हेनृप (त्र्यधीशोविष्णुः) ५६ यस्यचक्रेणकृत्तशिरसौपेततुः । तंतथाभूतमपिहरिंआहत्यसंघर्ष्यअंडजेंद्रंगरुडंयावदहनत्हंतुंगदामुन्निन्यइत्यर्थः । तावदाद्योहरिः (अरेर्माल्यवतोऽरिणाचक्रेण) ५७ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांदशमोऽध्यायः १० ॥ ॥ ७ ॥ ॥ एकादशेतुदेवेषुदैत्यघातिषुनारदः । देवानवारयच्छुक्रोमृतान्दैत्यानजीवयत् ॥ १ ॥ १ (वैरोचनायबलये) उदयच्छत्उन्निन्ये २

महोरगाःसमुत्पेतुर्दंदशूकाःसवृश्चिकाः ॥ सिंहव्याघ्रवराहाश्चमर्दयंतोमहागजान् ४७ यातुधान्यश्चशतशःशूलहस्ताविवाससः ॥ छिंधिभिंधीतिवादिन्यस्तथारक्षोगणाःप्रभो ४८ ततोमहाघनाव्योम्निगंभीरपरुषस्वनाः ॥ अंगारान्मुमुचुर्वातैराहताःस्तनयित्नवः ४९ सृष्टोदैत्येनसुमहान्वह्निःश्वसनसारथिः ॥ सांवर्तकइवात्युग्रोविबुधध्वजिनीमधाक् ५० ततःसमुद्रउद्वेलःसर्वतःप्रत्यदृश्यत ॥ प्रचंडवातैरुद्भूततरंगावर्तभीषणः ५१ एवंदैत्यैर्महामायैरलक्ष्यगतिभीषणैः ॥ सृज्यमानासुमायासुविषेदुःसुरसैनिकाः ५२नतत्प्रतिविधिंयत्रविदुरिंद्रादयोनृप ॥ ध्यातःप्रादुरभूत्तत्रभगवान्विश्वभावनः ५३ ततःसुपर्णांसकृतांघ्रिपल्लवःपिशंगवासानवकंजलोचनः ॥ अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुंडलः ५४ तस्मिन्प्रविष्टेऽसुरकूटकर्मजामायाविनेशुर्महिनामहीयसः ॥ स्वप्नोयथाहिप्रतिबोधआगतेहरिस्मृतिःसर्वविपद्विमोक्षणं ५५ दृष्ट्वामृधेगरुडवाहमिभारिवाहआविध्यशूलमहिनोदथकालनेमिः ॥ तल्लीलयागरुडमूर्ध्निपतद्गृहीत्वातेनाहनन्नृपसवाहमरिंत्र्यधीशः ५६ मालीसुमाल्यतिबलौयुधिपेततुर्यच्चक्रेणकृत्तशिरसावथमाल्यवांस्तम् ॥ आहत्यतिग्मगदयाऽहनदंडजेंद्रंतावच्छिरोच्छिनदरेर्नदतोऽरिणाऽऽद्यः ५७ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेदशमोध्यायः १० ॥ श्रीशुकउवाच ॥ अथोसुराःप्रत्युपलब्धचेतसःपरस्यपुंसःपरयानुकंपया ॥ जघ्नुर्भृशंशक्रसमीरणादयस्तांस्तान्रणेयैरभिसंहताःपुरा १ वैरोचनायसंरब्धोभगवान्पाकशासनः ॥ उदयच्छद्यदावज्रंप्रजाहाहेतिचुक्रुशुः २

चूर्णिका

सिंहव्याघ्रादयःउत्पेतुः ४७ यातुधान्यःछिंधिभिंधीतिवादिन्यःआसन् ४८ मेघाःअंगारकान्मुमुचुः ४९ दैत्येनसृष्टःवह्निः सांवर्तकइवसैन्यंअदहत् ५० समुद्रःउद्वेलःदृश्यत ५१ एवंसृष्टासुमायासुइंद्रादयः तत्प्रतिविधिअजानंतः५२ खिन्नाःसंतःहरिंदध्युः ५३ तदाहरिःअष्टबाहुःगरुडारूढःप्रादुरभूत् ५४ तदैवमायाःविनेशुः एवंहरेःस्मृतिःसर्वविपद्विमोक्षणेभवति ५५ कालनेमिःयुद्धेहरिंदृष्ट्वाशूलंचिक्षेपतदागरुडमूर्ध्निपतत् तत्हरिः गृहीत्वातेनैवसगजंअरिंअहनत् ५६ ततः मालीसुमालीचक्रेणकृत्तशिरसौपेततुः अथमाल्यवान्गदयागरुडंनिहत्यहरिंहंतुंगदांजगृहेतावत् सः तच्छिरःचक्रेणचिच्छेद ५७ ॥ इत्यष्टमेदशमः १० ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अथोदेवाः हरेःकृपयादैत्यान्निजघ्नुः १ किंच यदाइंद्रःबलिंहंतुंवज्रंजगृहे तदाप्रजाः हाहेतिचुक्रुशुः २

Nepal Sanskrit University, Balmeeki Campus ...

CC-0. In Public Domain. Digitization by eGangotri

टीका

३ निबद्धान्यक्षीणियेषांतान्बालान्जित्वानटःकपटवृत्तिर्यथातेषांधनंहरतितथाहेमूढमायेशान्अस्मान्जेतुमिच्छसि ४ मत्प्रभावंशृण्वित्याह । आरुरुक्षंतिआरोढुमिच्छंति । ये (दिवं) उत्सिसृप्संति उल्लंघयितुमिच्छंतिमोक्षमिच्छंतीत्यर्थः । अधोविधुनोमिपातयामि(तथाचऋक् ‘ मायाभिरुत्सिसृप्सतइंद्रद्यामारुरुक्षतः । अवदस्यूरंधूनुथा ’ इति) ५ ६(कालेनचोदितंपूर्वंकर्मयेषांतेषां । कीर्त्यादयोनुक्रमात्कर्मानुसारेणस्युः) ७ ततःइदंकीर्त्यादिकालरशनंकालयंत्रितं । अतोनहृष्यंति । तत्रएवंविवेकेयूयंअपंडिताःअनिपुणाः ८ तत्रकीर्तिजयादौआत्मानंसाधनंमन्यमानानांवोगिरोनगृह्णीमः । मर्मसुताडनाःयाभिस्ताः ९ विभुमिंद्रंवीरोबलिः (पूर्वमधिक्षेपैराहतंपुनआकर्णपूर्णैःकर्णपर्यंतमाकृष्टैः) १० (निराकृतोऽधिक्षिप्तः) तोत्रमंकुशस्तेनआहतइव ११ (तस्मैबलये) सयानःविमानसहितः १२ १३ (जत्रौभुजसमीपे) १४ १५(हरिभिरश्वैः) १६ (यंतुर्मातलेःतद्रथानयनम्) १७ (सत्वंधैर्यम्) १८

श्लोकाः ३/१८

वज्रपाणिस्तमाहेदंतिरस्कृत्यपुरःस्थितम् ॥ मनस्विनंसुसंपन्नंविचरंतंमहामृधे ३ नटवन्मूढमायाभिर्मायेशान्नोजिगीषसि ॥ जित्वाबालान्निबद्धाक्षान्नटोहरतितद्धनम् ४ आरुरुक्षंतिमायाभिरुत्सिसृप्संतियेदिवम् ॥ तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्चपदादधः ५ सोहंदुर्मायिनस्तेद्यवज्रेणशतपर्वणा ॥ शिरोहरिष्येमंदात्मन्घटस्वज्ञातिभिःसह ६ ॥ बलिरुवाच ॥ संग्रामेवर्तमानानांकालचोदितकर्मणाम् ॥ कीर्तिर्जयोऽजयोमृत्युःसर्वेषांस्युरनुक्रमात् ७ तदिदंकालरशनंजनाःपश्यंतिसूरयः ॥ नहृष्यंतिनशोचंतितत्रयूयमपंडिताः ८ नवयंमन्यमानानामात्मानंतत्रसाधनम् ॥ गिरोवःसाधुशोच्यानांगिरोवोमर्मताडनाः ९ ॥ श्रीशुकउवाच ॥ इत्याक्षिप्यविभुंवीरोनाराचैर्वीरमर्दनः ॥ आकर्णपूर्णैरहनदाक्षेपैराहतंपुनः १० एवंनिराकृतोदेवोवैरिणातथ्यवादिना ॥ नामृष्यत्तदधिक्षेपंतोत्राहतइवद्विपः ११ प्राहरत्कुलिशंतस्माअमोघंपरमर्दनः ॥ सयानोन्यपतद्भूमौछिन्नपक्षइवाचलः १२ सखायंपतितंदृष्ट्वाजंभोबलिसखःसुहृत् ॥ अभ्ययात्सौहृदंसख्युर्हतस्यापिसमाचरन् १३ ससिंहवाहआसाद्यगदामुद्यम्यरंहसा ॥ जत्रावताडयच्छक्रंगजंचसुमहाबलः १४ गदाप्रहारव्यथितोभृशंविह्वलितोगजः ॥ जानुभ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ १५ ततोरथोमातलिनाहरिभिर्दशशतैर्वृतः ॥ आनीतोद्विपमुत्सृज्यरथमारुरुहेविभुः १६ तस्यतत्पूजयन्कर्मयंतुर्दानवसत्तमः ॥ शूलेनज्वलतातंतुस्मयमानोहनन्मृधे १७ सेहेरुजंसुदुर्मर्षांसत्त्वमालंब्यमातलिः ॥ इंद्रोजंभस्यसंक्रुद्धोवज्रेणापाहरच्छिरः १८

चूर्णिका

युद्धेइंद्रः बलिआह ३ हेमूढमायाभिः मायेशान्नः जेतुमिच्छसि ४ किंच मायाभिः येदिवंआरोढुमिच्छंतितान्दस्यून्पूर्वपदात् अधः पातयामि ५ हेमंदात्मन् अहंवज्रेणतेशिरःहरिष्येज्ञातिभिःसहयत्नंकुरु ६ बलिरुवाच ॥ मृधेवर्तमानानांकीर्तिः जयःपराजयः मृत्युर्वाक्रमात्स्यात् ७ एतत् सर्वंसूरयः कालाधीनंपश्यंति एवंविवेकेयूयं अज्ञाःस्थ ८ अतःयुष्मद्गिरः नगृह्णीमः ९ ॥ श्रीशुकउवाच ॥ एवंबलिः इंद्रंविनिंघतंबाणैः अहनत् १० तदाइंद्रः तस्मैवज्रंप्राहरत् ततः बलिः सयानः भूमौपपात ११ १२ बलिंपतितंदृष्ट्वाजंभः सिंहारूढःसन्गदांउद्यम्यशक्रंजत्रौगजंचअताडयत् १३ १४ ततोगजः जानुभ्यांभुवंस्पृष्ट्वाकश्मलंययौ १५ ततः मातलिनासहस्राश्वैर्युक्तःरथः आनीतः इंद्रःरथं आरुरुहे १६ तदायंतुःकर्मअपूजयत् दानवःशूलेनमातलिं अहनत् १७ सः धैर्यंधृत्वारुजंसेहे तदैवइंद्रः जंभशिरः वज्रेणअहरत् १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नमुचिर्बलःपाकश्चेतित्रयोनारदवचनादाजग्मुः १९ (अर्दयंतःपीडयंतःअस्येंद्रस्य) २० त्रयाणांपृथग्विक्रमानाह । हरीनितित्रिभिः । हर्यश्वस्यइंद्रस्यतावद्भिःदशभिःशतैः २१ (सकृत्संधानमोक्षेणयु
गपदेवसंधानाद्बाणमोक्षणेनपृथगर्दयामासेतियत्तदद्भुतमभूत्) २२ इंद्रमाहत्य (तोयदइवजगर्ज) २३ प्रावृट्कालीनंसूर्यमिव २४वणिक्पथावणिजःभिन्नानौर्येषांतेभिन्ननावइत्यर्थः २५ तुराषाडिंद्रःअश्वादिस
हितोविनिर्गतः । अग्रणीःसारथिः २६ २७ २८ शोकामर्षाभ्यांयुक्तयारुषाक्रोधेनअन्वितःसन्निंद्रंहंतुं हेनृपते। प्रयत्नंचकारेत्यर्थः २९ घंटावत्किंकिणीयुक्तम् ३० (हरिरिंद्रः तच्छूलंआपतत्सहस्रधा
गगनतलएवविचिच्छिदे । अथकंधरेशिरोहरन्तमाहनत्हेनृप) ३१ (सुरपतिनाबलेनप्रेरितोवज्रस्तस्यनमुचेस्त्वचमपिनाचिच्छेद । योवज्रः) अतिवीर्यवृत्रंबिभेद (सनमुचिकंधरत्वचातिरस्कृतइ
तियत्तत्परमद्भुतम्) ३२ (अबिभेत्भीतः) ३३ (मेमया) पतत्रैःपक्षैः (उत्पततांअथभुविभारैर्निविशतांअद्रीणांयेनवज्रेण) ३४

॥३७॥ जंभंश्रुत्वाहतंतस्यज्ञातयोनारदादृषेः ॥ नमुचिश्चबलःपाकस्तत्रोपेयुस्त्वरान्विताः १९ वचोभिःपरुषैरिंद्रमर्दयंतोऽस्यमर्मसु ॥ शरैरवाकिरन्मेघाधाराभि श्लोकाः
रिवपर्वतम् २० हरीन्दशशतान्याजौहर्यश्वस्यबलःशरैः ॥तावद्भिरर्दयामासयुगपल्लघुहस्तवान् २१शताभ्यांमातलिंपाकोरथंसावयवंपृथक् । सकृत्संधान
मोक्षेणतदद्भुतमभूद्रणे २२ नमुचिःपंचदशभिःस्वर्णपुंखैर्महेषुभिः ॥ आहत्यव्यनदत्संख्येसतोयइवतोयदः २३सर्वतःशरकूटेनशक्रंसरथसारथिम् ॥ छादया १९—३४
मासुरसुराःप्रावृट्सूर्यमिवांबुदाः २४ अलक्षयंतस्तमतीवविह्वलाविचुक्रुशुर्देवगणाःसहानुगाः ॥ अनायकाःशत्रुबलेननिर्जितावणिक्पथाभिन्ननवोयथार्ण
वे २५ ततस्तुराषाडिषुबद्धपंजराद्विनिर्गतःसाश्वरथध्वजाग्रणीः ॥ बभौदिशःखंपृथिवींविरोचयन्स्वतेजसासूर्यइवक्षपात्यये २६ निरीक्ष्यपृतनांदेवःपरैरभ्य
र्दितांरणे ॥ उदयच्छद्रिपुंहंतुंवज्रंवज्रधरोरुषा २७ सतेनैवाष्टधारेणशिरसीबलपाकयोः ॥ ज्ञातीनांपश्यतांराजन्जहारजनयन्भयम् २८ नमुचिस्तद्वधं
दृष्ट्वाशोकामर्षरुषान्वितः ॥ जिघांसुरिंद्रंनृपतेचकारपरमोद्यमम् २९ अश्मसारमयंशूलंघंटावद्धेमभूषणम् ॥ प्रगृह्याभ्यद्रवत्क्रुद्धोहतोसीतिवितर्जयन् ॥ प्राहि
णोद्देवराजायनिनदन्मृगराडिव ३० तदापतद्गगनतलेमहाजवंविचिच्छिदेहरिरिषुभिःसहस्रधा ॥ तमाहनन्नृपकुलिशेनकंधरेरुषान्वितस्त्रिदशपतिःशिरो
हरन् ३१ नतस्यहित्वचमपिवज्रऊर्जितोबिभेदयःसुरपतिनौजसेरितः ॥ तदद्भुतंपरमतिवीर्यवृत्रभित्तिरस्कृतोनमुचिशिरोधरत्वचा ३२ तस्मादिंद्रोऽबि
भेच्छत्रोर्वज्रःप्रतिहतोयतः ॥ किमिदंदैवयोगेनभूतंलोकविमोहनम् ३३ येनमेपूर्वमद्रीणांपक्षच्छेदःप्रजात्यये ॥ कृतोनिविशतांभारैःपतत्रैःपततांभुवि ३४

चूर्णिका

नारदात् जंभंहतंश्रुत्वानमुचिःबलःपाकःइतित्रयःप्राप्ताः १९ तेइंद्रंशरैःअवाकिरन् २० तत्रबलःसहस्रशरैःइंद्राश्वान्पाकःशताभ्याम् २०० मातलिंनमुचिःपंचदशबाणैः
इंद्रंविद्ध्वामेघइवव्यनदत् २१ २२ २३ ततोदैत्याःसरथंइंद्रंशरैःछादयामासुः २४ तदादेवाःविचुक्रुशुः २५ ततःइंद्रःइषुबद्धपंजरात्निर्गतःसूर्यइवबभौ २६ ततःदैत्यैः
अर्दितांसेनांवीक्ष्यरिपुंहंतुंवज्रंगृहीत्वा २७ बलपाकयोःशिरसीवज्रेणजहार २८ नमुचिःतद्वधंदृष्ट्वाइंद्रंहंतुं २९ शूलंप्रगृह्यहतोऽसिहतोसीतिवदन्विसर्जयत् ३० ततश्शू ॥३७॥
लंइंद्रः इषुभिः सहस्रधाचिच्छेदअथइंद्रः वज्रेणतंकंधरे अहनत् ३१ तस्यत्वचमपिवज्रः नबिभेद तन्महदद्भुतं अभूत् ३२ तदाशत्रोः भीतः इंद्रः इदं आह ३३
मयाअनेनवज्रेणपर्वतपक्षाःछिन्नाः ३४

Nepal Sanskrit University, Balmandir Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सारगयंवीर्याधिकंयत्त्वाष्ट्रंतपःतदेववृत्रःसयेनवज्रेणमयाविपाटितः ३५ दंडंलकुटतुल्यंकुलिशं । ब्रह्मतेजःदधीचेःसामर्थ्यमपि ३६ ३७ आर्द्रशुष्काभ्यांमृत्युर्नैवेति ३८ ३९ उभयात्मकत्वमेवाह । नशुष्केणनचार्द्रेणफेनेन । तथाचश्रुतिः ‘ अपांफेनेननमुचेःशिरइंद्रोदवर्तय ’ इति ४० ४१ ४२ ४३ ४४ (मन्युसंरभंक्रोधोद्रेकम्) अनुचरैरुद्गीयमानाइत्यर्थः । उद्गीयमानैरनुचरैःसेनानीभिः सहेतिवा ४५ ४६ अविनष्टाअवयवायेषांविद्यमानाःशिरोधरायेषांतान् ४७ प्रत्यापन्नानिपुनःप्राप्तानिइंद्रियाणिस्मृतिश्चयेनसः ४८ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांदेवासुरसंग्रामो नामैकादशोऽध्यायः ११ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

तपःसारमयंत्वाष्ट्रंवृत्रोयेनविपाटितः ॥ अन्येचापिबलोपेताःसर्वास्त्रैरक्षतत्वचः ३५ सोयंप्रतिहतोवज्रोमयामुक्तोऽसुरेऽल्पके ॥ नाहंतदाददेदंडंब्रह्मतेजो
प्यकारणम् ३६ इतिशक्रंविषीदंतमाहवागशरीरिणी ॥ नायंशुष्कैरथार्द्रैर्वावधमर्हतिदानवः ३७ मयास्मैयद्वरोदत्तोमृत्युर्वैनार्द्रशुष्कयोः ॥ अतोन्य
श्चिंतनीयस्तउपायोमघवन्रिपोः ३८ तांदैवींगिरमाकर्ण्यमघवान्सुसमाहितः ॥ ध्यायन्फेनमथापश्यदुपायमुभयात्मकम् ३९ नशुष्केणनचार्द्रेणजहार
नमुचेःशिरः ॥ तंतुष्टुवुर्मुनिगणामाल्यैश्चावाकिरन्विभुम् ४० गंधर्वमुख्यौजगतुर्विश्वावसुपरावसू ॥ देवदुंदुभयोनेदुर्नर्तक्योननृतुर्मुदात ४१ अन्ये
प्येवंप्रतिद्वंद्वान्वाय्वग्निवरुणादयः ॥ सूदयामासुरस्त्रौघैर्मृगान्केसरिणोयथा ४२ ब्रह्मणाप्रेरितोदेवान्देवर्षिर्नारदोन्नृप ॥ वारयामासविबुधान्दृष्ट्वादान
वसंक्षयम् ४३ ॥ श्रीनारदउवाच ॥ भवद्भिरमृतंप्राप्तंनारायणभुजाश्रयैः ॥ श्रियासमेधिताःसर्वेउपारमतविग्रहात् ४४ ॥ श्रीशुकउवाच ॥ संयम्यम
न्युसंरंभंमानयंतोमुनेर्वचः ॥ उद्गीयमानानुचरैर्ययुःसर्वेत्रिविष्टपम् ४५ येऽवशिष्टारणेतस्मिन्नारदानुमतेनते ॥ बलिंविपन्नमादायअस्तंगिरिमुपागमन्
४६ तत्राविनष्टावयवान्विद्यमानशिरोधरान् ॥ उशनाजीवयामाससंजीविन्यास्वविद्यया ४७ बलिश्चोशनसास्पृष्टःप्रत्यापन्नेंद्रियस्मृतिः ॥ पराजितो
पिनाखिद्यल्लोकतत्त्वविचक्षणः ४८ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेदेवासुरसंग्रामोनामैकादशोऽध्यायः ११ ॥ ॥ छ ॥ ॥ छ ॥

श्लोकाः ३५/४८

चूर्णिका वृत्रश्चहतः सोऽयमेवज्रः ३५ अल्पकेअसुरेव्यर्थोजातःतस्मात्वज्रंनाहमाददेअहोदधीचेः सामर्थ्यमपिअकारणंजातम् ३६ एवंविषीदंतंशक्रंअशरीरिणीवागाहहेइंद्रअयंदैत्यः शुष्कैःआर्द्रैश्चवधंनार्हति ३७ एवंमया अस्मैआर्द्रशुष्काभ्यांमृत्युर्नैवेतिवरोदत्तःअतः अन्यउपायः चिंत्यः ३८ तांगिरंश्रुत्वाउभयात्मकंउपायंअपांफेनंज्ञात्वा ३९ तेनइंद्रः नमुचेः शिरः जहारतदामुनयःतुष्टुवुः पुष्पैश्चअवाकिरन् ४० दुंदुभयोनेदुःनर्तक्यःननृतुः ४१ ततः वाय्वग्निवरुणादयःअस्त्रौघैः दैत्यान्सूदयामासुः ४२ तदैवब्रह्मणाप्रेषि तःनारदः एत्यदैत्यक्षयंदृष्ट्वादेवान्वारयामास ४३ हेदेवाः नारायणभुजाश्रयैःभवद्भिःअमृतंप्राप्तंश्रियाचसमेधिताःअतः विग्रहात्उपारमत ४४ एवंमुनेर्वचःमानयंतः देवाः अनुचरैःसहस्वर्गंययुः ४५ ततःयुद्धेअवशिष्टायेदैत्याः तेनारदानुमतेनविपन्नंबलिंआदायअस्तंगिरिंउपागमन् ४६ तत्रशुक्रः अविनष्टावयवान्तान्संजीविन्याविद्ययाजीवया मास ४७ एवंशुक्रेणस्पृष्टःबलिःपुनःप्राप्तेंद्रियस्मृतिः पराजितोऽपिनाखिद्यत् ४८ ॥ इत्यष्टमेएकादशः ११ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ द्वादशेमोहिनीरूपविभ्रमालोकनोत्सुकम् । भवंसंमोहयामासहरिःपुनरसांत्वयत् ॥ १ ॥ अमुह्यन्नसुराविष्णुमाययानतदद्भुतम् । इतिवक्तुंमहादेवमोहोऽयमुपवर्ण्यते ॥ २ ॥ हरिरमृतमपाययदितीदंनिशम्य (सयत्रास्तेतत्रतद्रूपंद्रष्टुंययावित्युत्तरेणान्वयः) १ सोमयाउमयासह २ (सभाजितःपूजितःउमयासह) ३ त्वयिकिंचिन्नचाश्चर्यंवयंत्वाश्चर्यमानसाः । इतिवक्ष्यन्महादेवस्तुष्टावहरिमष्टभिः ॥ त्वयिमहामायाविनिपरमेश्वरेनहिकिलांकिंचिदघटितमिव । वयंतुपरमकौतूहलेनद्रष्टुमागताइतिबहुधासंबोधयन्स्तौतिदेवेति । हेदेवदेव । कुतोहंदेवानांदेवइत्यतआह । हेजगद्व्यापिन् । तत्कुतः । हेजगन्मय । तर्हिकिंप्रधानम् । नहि । हेजगदीश । तच्चकुतस्तत्राह । सर्वेषामपित्वंहेतुः । अतईश्वरआत्माच । आत्मत्वाच्चनत्वंजडंप्रधानमित्यर्थः ४ ननुजगन्मयत्वोक्त्याजगतउत्पत्त्यादिनाऽसत्यत्वेनचजाड्येन चममापिकिंतथात्वंब्रूषेनहिनहीत्याह । आद्यंतौमध्यंचअस्यजगतांभवंति । अस्यचअव्ययस्यएतानिआद्यंतमध्यानिनसंति । यच्च । इदंकारास्पदंदृश्यंअहंकारास्पदंद्रष्टृच । बहिर्भोग्यंअन्यत्भोक्तृच । अयंचधर्मोजगतएवनत्वव्ययस्यतवतत्तस्मात्सत्यंचिद्रूपंचब्रह्मैवभवान्अतोनतवाविकारादिशंकेत्यर्थः ५ तवैवंभूतत्वेमुमुक्षूणामाचारःप्रमाणमित्याह । तवैवेति । उभयतःइहामुत्रचसंगंत्यक्त्वा ६ ननुब्रह्मैवचेदहंतर्ह्यसंगोदासीनस्यममचरणांभोजोपासनयाकिंतेषांतत्राह त्वमिति । ब्रह्मत्वेपित्वंनात्यंतमुदासीनःकिंतुविश्वस्यप्रपंचस्योदयादीनांहेतुःतदुपाधीनामात्मनांजीवानामीश्वरश्चतत्तत्फलदाता । तर्हिकिंराजादिवत्कयाप्यपेक्षयासेवकेभ्यःफलंददामिनहिनाहि । अनपेक्षएवत्वम् । तर्हिकिमीश्वरत्वेन । तत्राह । तैरात्मभिःतत्फलदानार्थमपेक्ष्यतइतितदपेक्षस्तस्यभावस्तदपेक्षतातया । अनपेक्षत्वमेवदर्शयितुंतदीयंब्रह्मत्वंविशिनष्टि । पूर्णअमृतंचसुखरूपम् । विषयसुखवैलक्षण्यार्थमाह । अविकारंनित्यंआनंदमात्रंच । कुतःविशोकम् । तत्कुतःविगुणम् । किंच । अनन्यत् । नविद्यतेअन्यद्यस्मात् । ब्रह्मव्यतिरिक्ताभावादपिनिरपेक्षस्त्वमित्यर्थः । तर्हिसर्वात्मकत्वेतत्तद्विकारप्रसंगोदुर्वारःतत्राह । अन्यत्सर्वतोव्यतिरिक्तंचकारणत्वात् । नह्येवंभूतसुखात्मकब्रह्मस्वरूपस्यतवान्यापेक्षास्ति । अतःकेवलंभक्तानुग्रहार्थमेवतवैश्वर्यंनस्वार्थमित्यर्थः ७

श्लोकाः १/७

॥ श्रीबादरायणिरुवाच ॥ वृषध्वजोनिशम्येदंयोषिद्रूपेणदानवान् ॥ मोहयित्वासुरगणान्हरिःसोममपाययत् १ वृषमारुह्यगिरिशःसर्वभूतगणैर्वृतः ॥ सोमयाचययौद्रष्टुंयत्रास्तेमधुसूदनः २ सभाजितोभगवतासादरंसोमयाभवः ॥ सूपविष्टउवाचेदंप्रतिपूज्यस्मयन्हरिम् ३ ॥ श्रीमहादेवउवाच ॥ देवदेवजगद्व्यापिन्जगदीशजगन्मय ॥ सर्वेषामपिभावानांत्वमात्माहेतुरीश्वरः ४ आद्यंतावस्ययन्मध्यमिदमन्यदहंबहिः ॥ यतोऽव्ययस्यनैतानि तत्सत्यंब्रह्मचिद्भवान् ५ तवैवचरणांभोजंश्रेयस्कामानिराशिषः ॥ विसृज्योभयतःसंगंमुनयःसमुपासते ६ त्वंब्रह्मपूर्णममृतंविगुणंविशोकमानंदमात्रमविकारमनन्यदन्यत् ॥ विश्वस्यहेतुरुदयस्थितिसंयमानामात्मेश्वरश्चतदपेक्षतयाऽनपेक्षः ७

चूर्णिका ॥ श्रीशुकउवाच ॥ हरिःयोषिद्रूपेणदैत्यान्संमोह्यदेवान्सोमंअपाययत् १ इदंश्रुत्वाशिवः देव्यासहवृषंआरुह्ययत्रहरिःआस्तेतत्रययौ २ भगवतासत्कृतः शिवउपविष्टःसन् हरिंप्रतिपूज्यइदंआह ३ ॥ शिवउवाच ॥ हेदेवदेवहेजगदीशसर्वभावानांत्वंहेतुः ४ आत्माअसि अस्यजगतः आद्यंतौमध्यंचयतः भवंतितच्चिद्रूपंब्रह्मैवभवान् ५ किंच मुनयः संगंत्यक्त्वातवैवचरणांबुजंउपासते ६ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४०॥

अनन्यत्वमन्यत्वंचैकस्यकुतइत्याशंक्यदृष्टांतेनोपपादयति । सदसत्कार्यकारणरूपंद्वयम् । अद्वयंचपरमकारणंत्वमेवैकः । कृतंकुंडलादिरूपंद्वयम् । अकृतंचकेवलमद्वयंस्वर्णंयथैकमेवतद्वद्देवेहत्वायिवस्तु तोभेदोनास्ति । कथंतर्हिभेदप्रतीतिस्तत्राह । अज्ञानतइति । कुतःयस्मान्निरुपाधिकस्यैवतवायंगुणैर्व्यतिकरोभेदःनस्वतः ८ अतएव (कवयः) त्वांबहुधावर्णयंतितत्त्वतस्तुकेपिनजानंतीत्याह द्वाभ्याम् । त्वांब्रह्मवेदांतिनोऽवयंतिमन्यंते । त्वामेवधर्मंमीमांसकामन्यंते । प्रकृतिपुरुषयोःपरंपुमांसंसांख्याः । विमलाउत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्याईशानाअनुग्रहाचेत्येवंनवशक्तियुतंपरंपांचरात्राः । महापुरुषंपातंजलाः ९ परायुर्ब्रह्मा । सत्त्वसर्गाःसत्त्वगुणेनसृष्टाअपियेनत्वयाविरचितंविश्वमपिखलुतत्त्वतोनजानंतिकिंपुनस्त्वाम् । हेईशअभद्रंराजसंतामसंचवृत्तंउत्पत्तिर्वृत्तिश्चयेषांतेनजानंतीति किमुवक्तव्यम् १० किंतु । त्वंसर्वंजानासीत्याह । सःत्वंसर्वंअवरुंत्सेव्याप्नोषिजानासि । किंतत्सर्वंसमीहितंस्वकृतम् । अदःस्थितिजन्मनाशंअमुष्यजगतोजन्मादि । भूतानामीहितंच । जगतोभवबंधंमोक्षंच । व्याप्तौदृष्टांतः । चराचराख्यंदेहजातंखंचयथावायुराविशतितथा । कथमवरुंत्से । तदात्मकतयातस्यसर्वस्यात्मतयेत्यर्थः । आत्मत्वेहेतुःअवगमःज्ञानरूपइति ११ एवंस्तुत्वाप्रस्तुतंविज्ञापयति । अवताराइतिद्वाभ्यां । तेत्वया १२ १३ १४ सुरकार्याणियोषिद्वेषेणभविष्यंतीतिपश्यता । अयंभावः । अवश्यंतावदुन्मत्तान्दैत्यान्वंचयित्वादेवेभ्योऽमृतंदेयम् । नचैवंवैषम्यंरूपांतरेणकर्तुमुचितम् । अतोवंचनमोहनादिसारंकामिनीरूपंमयाधृतमिति १५ तद्रूपंदर्शयिष्यामि । संकल्पप्रभवःकामस्तस्योदयोयस्मात् (अतःकामिनांपुंसांबहुमंतव्यम्) १६ १७

श्लोकाः ८/१७

एकस्त्वमेवसदसद्द्वयमद्वयंचस्वर्णंकृताकृतमिवेहनवस्तुभेदः ॥ अज्ञानतस्त्वयिजनैर्विहितोविकल्पोयस्माद्गुणव्यतिकरोनिरुपाधिकस्य ८ त्वांब्रह्मकेचिदवयंत्युतधर्ममेकएकेपरंसदसतोःपुरुषंपरेशम् ॥ अन्येऽवयंतिनवशक्तियुतंपरंत्वांकेचिन्महापुरुषमव्ययमात्मतंत्रम् ९ नाहंपरायुर्ऋषयोनमरीचिमुख्याजानंतियद्विरचितंखलुसत्त्वसर्गाः ॥ यन्मायया मुषितचेतसईशदैत्यमर्त्यादयःकिमुतशश्वदभद्रवृत्ताः १० सत्वंसमीहितमदःस्थितिजन्मनाशंभूतेहितंचजगतोभवबंधमोक्षौ ॥ वायुर्यथाविशतिखंचचराचराख्यंसर्वंतदात्मकतयाऽवगमोऽवरुंत्से ११ अवतारामयादृष्टारममाणस्यतेगुणैः ॥ सोहंतद्द्रष्टुमिच्छामियत्तेयोषिद्वपुर्धृतम् १२ येनसंमोहितादैत्याःपायिताश्चामृतंसुराः ॥ तद्दिदृक्षवआयाताःपरंकौतूहलंहिनः १३ ॥ श्रीशुकउवाच ॥ एवमभ्यर्थितोविष्णुर्भगवान्शूलपाणिना प्रहस्यभावगंभीरंगिरिशंप्रत्यभाषत १४ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कौतूहलायदैत्यानांयोषिद्वेषोमयाकृतः ॥ पश्यतासुरकार्याणिगतेपीयूषभाजने १५ तत्तेऽहंदर्शयिष्यामिदिदृक्षोःसुरसत्तम ॥ कामिनांबहुमंतव्यंसंकल्पप्रभवोदयम् १६ ॥ श्रीशुकउवाच ॥ इतिब्रुवाणोभगवांस्तत्रैवांतरधीयत ॥ सर्वतश्चारयंश्चक्षुर्भवआस्तेसहोमया १७

चूर्णिका ॥४०॥

८ वेदांतिनः त्वांब्रह्ममन्यंते मीमांसकास्त्वांधर्ममन्यंतेइत्यादि ९ किंच त्वद्राचितंविश्वंअस्मदादयः नजानंति अन्येदैत्यादयः नेतिकिम् १० ११ एवंस्तुत्वाविज्ञापयति हेहरेगुणैःरममाणस्यतेमयाबहवः अवताराः दृष्टाः सोऽहंतवयोषिद्रूपंद्रष्टुंइच्छामि १२ येनदैत्याः मोहिताः सुराः अमृतंपायिताः तद्रूपंदर्शय परंनः कौतूहलमस्ति १३ ॥ श्रीशुकउवाच ॥ एवंप्रार्थितःविष्णुः प्रहस्यशिवंअभाषत १४ ॥ श्रीभगवानुवाच ॥ हेशिवदैत्यानांकौतूहलायअमृतपात्रेगतेसतिदेवकार्यार्थंयोषिद्वेषःकृतः १५ तद्रूपंतेदर्शयिष्यामि १६ ॥ श्रीशुकउवाच ॥ भगवानूइत्युक्त्वाअंतरधीयत ततोभवः सर्वतश्चक्षुश्चारयन्देव्यासह आस्ते १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.अ. अ०

टीका ॥१२॥

॥४१॥

विचित्राणिपुष्पाणिअरुणाःपल्लवाश्चयषांतेद्रुमायस्मिन् । लसद्दुकूलेनपर्यस्तेपरिवृतेनितंबेमेखलायस्यारताम् १८ निपतदुत्पतत्कंदुकलीलावशेनयेआवर्तनोद्वर्तनेनमनोज्ञमनेताभ्यांकंपितयोःस्तनयोःप्र
कृष्टहाराणांचोरुभारैःप्रतिपदंमध्येप्रभज्यमानामिव। चलत्पदमेवप्रवालवत्कोमलंततस्ततोनयंतीम् १९ दिक्षुभ्रमतःकंदुकस्यचापलैश्चांचल्यैःभृशंप्रोद्विग्नतारेआयतेदीर्घेलोलेचंचलेलोचनेयस्याःस्वकर्णा
भ्यांविभ्राजितेयेकुंडलेताभ्यामुल्लसंतौकपोलौताभ्यांचनीलालकैश्चमंडितमाननंयस्याः २० संनह्यतींबध्नतींजगद्विमोहयंतीम् २१ तांवीक्ष्यदेवःश्रीरुद्रःआत्मानमंतिकेस्थितामुमांस्वगणांश्चनवेद । कथंभू
तः । इतिएवंभूतयाकंदुकलीलयाईषद्व्रीडातयाअस्फुटंस्मितंतेनसहविसृष्टोयःकटाक्षःतेनमुष्टोवंचितः। अतएवस्वयंयत्स्त्रियाःप्रेक्षणंतयाचयत्प्रतिसमीक्षणंताभ्यांविह्वलआत्मामनोयस्य २२ तंकंदुकमनुव्रजं
त्याःस्त्रियाःलघुसूक्ष्मंवासःससूत्रंकांचीसहितम् २३ विषज्जंत्यांकुंचितकटाक्षैरात्मानंनिरीक्षमाणायाम् २४ (भवान्याःअनादरेषष्ठी । तामनादृत्येत्यर्थः) तत्पदंतस्याःसमीपंययौ २५ (नान्वतिष्ठ
तनानुकूलाभूत्) २६ २७ २८ २९ अंगहेराजन् ३०

श्लोकाः १८/३०

ततोददर्शोपवनेवरस्त्रियंविचित्रपुष्पारुणपल्लवद्रुमे ॥ विक्रीडतींकंदुकलीलयालसद्दुकूलपर्यस्तनितंबमेखलाम् १८ आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारो
रुभारैःपदेपदे ॥ प्रभज्यमानामिवमध्यतश्चलत्पदप्रवालंनयतींततस्ततः १९ दिक्षुभ्रमत्कंदुकचापलैर्भृशंप्रोद्विग्नतारायतलोललोचनाम् ॥ स्वकर्णविभ्रा
जितकुंडलोल्लसत्कपोलनीलालकमंडिताननाम् २० श्लथद्दुकूलंकबरींचविच्युतांसंनह्यतींवामकरेणवल्गुना ॥ विनिघ्नतींचान्यकरेणकंदुकंविमोहयंतींज
गदात्ममायया २१ तांवीक्ष्यदेवइतिकंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः ॥ स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मानात्मानमंतिकउमांस्वगणां
श्चवेद २२ तस्याःकराग्रात्सतुकंदुकोयदागतोविदूरंतमनुव्रजत्स्त्रियाः ॥ वासःससूत्रंलघुमारुतोऽहरद्भवस्यदेवस्यकिलानुपश्यतः २३ एवंतांरुचिरापांगीं
दर्शनीयांमनोरमाम् ॥ दृष्ट्वातस्यांमनश्चक्रेविषज्जंत्यांभवःकिल २४ तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः ॥ भवान्याअपिपश्यंत्यागतह्रीस्तत्पदंययौ २५
सातमायांतमालोक्यविवस्त्राव्रीडिताभृशम् ॥ निलीयमानावृक्षेषुहसंतीनान्वतिष्ठत २६ तामन्वगच्छद्भगवान्भवःप्रमुषितेंद्रियः ॥ कामस्यचवशंनी
तःकरेणुमिवयूथपः २७ सोनुव्रज्यतुवेगेनगृहीत्वाऽनिच्छतींस्त्रियम् ॥ केशबंधउपानीयबाहुभ्यांपरिषस्वजे २८ सोपगूढाभगवताकरिणाकरिणीयथा ॥
इतस्ततःप्रसर्पंतीविप्रकीर्णशिरोरुहा २९ आत्मानंमोचयित्वांगसुरर्षभभुजांतराद् ॥ प्राद्रवत्सापृथुश्रोणीमायादेवविनिर्मिता ३०

चूर्णिका ॥४१॥

अथविचित्रपुष्पारुणपल्लवद्रुमेउपवनेकंदुकलीलयाक्रीडंतीं १८ १९ २० श्लथद्दुकूलांच्युतकबरींवामकरेणसन्नह्यंतींअन्येनकंदुकंनिघ्नंतींजगन्मोहयंतीं २१ तांवीक्ष्यभवः
तत्प्रेक्षणेनविह्वलःसन्अंतिकस्थांउमांस्वगणांश्चनवेद २२ तस्याः करात्कंदुकः यदादूरंगतः तदानुव्रजंत्याः तस्याः ससूत्रंवासः मारुतःअहरत् २३ एवंभवः तांदृष्ट्वात
स्यांरंतुंमनश्चक्रे २४ ततः तत्कृतस्मरविह्वलः शिवःदेव्याःपश्यंत्याः तत्समीपंययौ २५ तदासातंविलोक्यविवस्त्रालज्जयावृक्षेषुनिलीयमानानान्वतिष्ठत् २६ भवः तांअन्व
गच्छत्कामवशंनीतः २७ तांअनुव्रज्यअनिच्छंतींस्त्रियंकेशबंधेगृहीत्वापरिषस्वजे २८ आलिंगितासाइतस्ततःप्रसर्पंतीतद्भुजात् आत्मानंमोचयित्वाप्राद्रवत् २९ ३०

Nepal Sanskrit University, Balmiki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पदवींपंथानम् । तामन्वधावदित्यर्थः) ३१ (शुष्मिणोमत्तस्ययूथपस्यगजस्य । वासितांमैथुनेच्छावतींकरिणीम्) ३२ (रुद्रस्यक्षेत्राणिसांनिध्यकराणिहेम्नश्चक्षेत्राणिआकराआसन्) ३३ एवं (यत्रक्कचसरित्सरस्सुशैलादिषुच) तामनुधावतो (रेतश्चस्कंदतत्रऋषयआसन् । यतस्तत्रहरःसंनिहितोबभूव) ३४ ३५ जगदात्मनोऽवगतंमाहात्म्यंयेनसआत्मनस्तदुहमाययाजडीकरणंअद्भुतं नमेने ३६ अविक्लवंस्वस्थम् ३७ आत्मनास्वयंस्वांनिष्ठांप्रकृतिम् ३८ विषक्तोमोहपाशयंत्रितःत्वदृतेत्वांविना । भावान्चेष्टाविशेषान् ३९ कालेनसृष्ट्यादिनिमित्तेनमयाकालरूपेणभागशोरजआद्यंशे नसमेतामदधीनासती ४० ४१ विष्णोरंशभूतांतांशंसतांस्तुवतांसतांहेभारत ४२ अयिहेप्रियेव्यपश्यःदृष्टवत्यसि । कलानांविभूतीनांऋषभोपिअवशोऽपरवशोपिविमुह्येत ४३ वर्षसहस्रांतेयोगात्समा धेरुपारतंमांकिंध्यायसीतित्वंयमपृच्छःसएषःयत्रकालोनविशतेअपरिच्छिन्नत्वात् । नचवेदःअगोचरत्वात् ४४ अष्टाध्याय्यर्थनिगमनंइतीति ४५

॥४२॥

श्लोकाः ३१/४५

तस्यासौपदवींरुद्रोविष्णोरद्भुतकर्मणः ॥ प्रत्यपद्यतकामेनवैरिणेवविनिर्मिता ३१ तस्यानुधावतोरेतश्चस्कंदामोघरेतसः ॥ शुष्मिणोयूथपस्येववासिताम नुधावतः ३२ यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः ॥ तानिरुद्रस्यहेम्नश्चक्षेत्राण्यासन्महीपते ३३ सरित्सरस्सुशैलेषुवनेषूपवनेषुच ॥ यत्रक्कचास न्नृषयस्तत्रसंनिहितोहरः ३४ स्कन्नेरेतसिसोऽपश्यदात्मानंदेवमायया ॥ जडीकृतंनृपश्रेष्ठसंन्यवर्ततकश्मलात् ३५ अथावगतमाहात्म्यआत्मनोजग दात्मनः ॥ अपरिज्ञेयवीर्यस्यनमेनेतदुहाद्भुतम् ३६ तमविक्लवमव्रीडमालक्ष्यमधुसूदनः ॥ उवाचपरमप्रीतोबिभ्रत्स्वांपौरुषींतनुम् ३७ ॥ श्रीभगवा नुवाच ॥ दिष्ट्यात्वंविबुधश्रेष्ठस्वांनिष्ठामात्मनास्थितः ॥ यन्मेस्त्रीरूपयास्वैरंमोहितोप्यंगमायया ३८ कोनुमेतितरेन्मायांविषक्तस्त्वदृतेपुमान् ॥ तांस्तान्विसृजतींभावान्दुस्तरामकृतात्मभिः ३९ सेयंगुणमयीमायानत्वामभिभविष्यति ॥ मयासमेताकालेनकालरूपेणभागशः ४० ॥ श्रीशुक उवाच ॥ एवंभगवताराजन्श्रीवत्सांकेनसत्कृतः ॥ आमंत्र्यतंपरिक्रम्यसगणःस्वालयंययौ ४१ आत्मांशभूतांतांमायांभवानींभगवान्भवः ॥ शं सतामृषिमुख्यानांप्रीत्याचष्टाथभारत ४२ अयिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः ॥ अहंकलानामृषभोविमुह्येययाऽवशोन्येकिमुतास्वतंत्राः ४३ यंमामपृच्छस्त्वमुपेत्ययोगात्समासहस्रांतउपारतंवै ॥ सएषसाक्षात्पुरुषःपुराणोनयत्रकालोविशतेनवेदः ४४ ॥ श्रीशुकउवाच ॥ इतितेऽभिहि तस्तातविक्रमःशार्ङ्गधन्वनः ॥ सिंधोर्निर्मथनेयेनधृतःपृष्ठेमहाचलः ४५

चूर्णिका

तांअनुधावतः शिवस्यरेतः पपात ३१ ३२ तद्रेतः मह्यांयत्रयत्रअपतत्ततत्रूप्यस्यहेम्नश्चक्षेत्राणिआसन् ३३ रेतसिस्कन्नेसतिशिवः आत्मानंमाययाजडीकृतम् अपश्यन् ततोमोहात्न्यवर्तत ३४ ३५ एवंअवगतमाहात्म्यः शिवःविष्णोः मायाजडीकरणंअद्भुतंनमेने ३६ ततोभगवान्स्वतनुंबिभ्रत् प्रीतःसन्शिवंआह ३७ हेदेवमयास्वमाय यामोहितोऽपित्वंस्वांप्रकृतिंस्थितः ३८ एतत्दिष्ट्यामेमायांत्वदृतेकोनुपुमान् अतितरेत् ३९ सेयंमेमायात्वांनाभिभविष्यति ४० ॥ श्रीशुकउवाच ॥ एवंभगवतासत्कृतः शिवःतंआमंत्र्यपरिक्रम्यस्वालयंययौ ४१ ततोभवः भवानींऋषीणांमध्येइदंसर्वंआह ४२ अपित्वंअजस्यमायांव्यपश्यः अहंश्रेष्ठोऽपिययाविमुह्येअन्येअस्वतंत्राः किमुत ४३ ४४ ॥ श्रीशुकउवाच ॥ हेनृपएवंतेहरेः विक्रमः उक्तः ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्कीर्तनादौफलमाह । एतदिति (नरिष्यतेननश्यति) ४६ भगवताकृतंभक्तपक्षपातंस्मरन्नमस्करोति । असतामविषयम् । भावोभजनंतेनगम्यमंघ्रिंप्रपन्नान् । सिंधुमथ्यंसिंधोर्मथनेजातममृतंयआ
शयत्अभोजयत् ४७ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांद्वादशोध्यायः १२ ॥ ॥ ७ ॥ ॥ त्रयोदशेतुवर्ण्यंतेसप्तमादीन्यनुक्रमात् । मन्वंतराणिसर्वाणिषड्विधानिपृथक्
पृथक् १ ॥ सप्तमादिमन्वंतराण्याहमनुरित्यादिनायावदध्यायसमाप्ति (इदानींवर्तमानोयःसप्तमोमनुः) १ (इक्ष्वाकुप्रभृतयोदशैतेवैवस्वतस्यश्राद्धदेवस्यपुत्राः) २ ३ आदित्यादयोदेवाइत्यन्वयः (ऋ
षभःश्रेष्ठः) ४ ५ भगवतोजन्मअवतारः । तमेवाह । आदित्यानांविवस्वानर्यमापूषेत्याद्युक्तानांमध्येअवरंजन्मयस्यसः ६ शक्त्याअवतारेणअन्वितानि ७ अष्टमंमनुंवक्तुंकथामाहविवस्वतइतित्रिभिः ८
एकेवडवांतृतीयामाहुः । ममतुसंज्ञैववडवेतिमतम् । तदुक्तंषष्ठे । ' सैवभूत्वातुवडवानासत्यौसुषुवेभुवी ' ति । यमोयमीश्राद्धदेवश्चेतित्रयः (संज्ञायाःसुताः) (यमीयमुना) ९ सावर्णिःपुत्रः (यातपतीसं
वरणस्यभार्यासीत् । वडवायाःपुत्रौतुअश्विनौ) १० ११

एतन्मुहुःकीर्तयतोऽनुशृण्वतोनरिष्यतेजातुसमुद्यमःक्वचित् ॥ यदुत्तमश्लोकगुणानुवर्णनंसमस्तसंसारपरिश्रमापहम् ४६ असदविषयमंघ्रिंभावगम्यंप्रप
न्नानमृतममरवर्यानाशयत्सिंधुमथ्यम् ॥ कपटयुवतिवेषोमोहयन्यःसुरारींस्तमहमुपसृतानांकामपूरंनतोस्मि ४७ ॥ ॥ इतिश्रीभागवतेमहापुरा
णेअष्टमस्कंधेद्वादशोऽध्यायः १२ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ मनुर्विवस्वतःपुत्रःश्राद्धदेवइतिश्रुतः ॥ सप्तमोवर्तमानोयस्तद
पत्यानिमेशृणु १ इक्ष्वाकुर्नभगश्चैवधृष्टःशर्यातिरेवच ॥ नरिष्यंतोथनाभागःसप्तमोदिष्टउच्यते २ करुषश्चपृषध्रश्चदशमोवसुमान्स्मृतः ॥ मनोर्वैवस्वतस्यैते
दशपुत्राःपरंतप ३ आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः ॥ अश्विनावृषभोराजन्निंद्रस्तेषांपुरंदरः ४ कश्यपोऽत्रिर्वसिष्ठश्चविश्वामित्रोथगौतमःजमद
ग्निर्भरद्वाजइतिसप्तर्षयःस्मृताः ५ अत्रापिभगवज्जन्मकश्यपाददितेरभूत् ॥ आदित्यानामवरजोविष्णुर्वामनरूपधृक् ६ संक्षेपतोमयोक्तानिसप्तमन्वंतरा
णिते ॥ भविष्याण्यथवक्ष्यामिविष्णोःशक्त्यन्वितानिच ७ विवस्वतश्चद्वेजायेविश्वकर्मसुतेउभे ॥ संज्ञाछायाचराजेंद्रयेप्रागभिहितेतव ८ तृतीयांवड
वामेकेतासांसंज्ञासुतास्त्रयः ॥ यमोयमीश्राद्धदेवश्छायायाश्चसुतान्शृणु ९ सावर्णिस्तपतीकन्याभार्यासंवरणस्यया ॥ शनैश्चरस्तृतीयोभूदश्विनौवडवा
त्मजौ १० अष्टमेंऽतरआयातेसावर्णिर्भवितामनुः ॥ निर्मोकविरजस्काद्याःसावर्णेस्तनयानृप ११

श्लोकाः ४६ — ११

चूर्णिका इदंउत्तमश्लोकगुणानुवर्णनंशृण्वतः कीर्तयतः पुंसः उद्यमोननश्यति ४६ एवंकपटस्त्रीवेषः दैत्यान्मोहयन्सन् अंघ्रिंप्रपन्नान्देवान् अमृतं अभोजयत् तंकामपूरंनतोऽस्मि
४७ ॥ इत्यष्टमेद्वादशः ॥ १२ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ अथविवस्वतःपुत्रःश्राद्धदेवः सप्तमोमनुः १ इक्ष्वाकुः नभगः धृष्टः शर्यातिः नरिष्यंतः नाभा
गः दिष्टः करूषः पृषध्रः वसुमान् एतेतत्सुताः २ ३ आदित्याः वसवः रुद्राविश्वेदेवाः मरुद्गणाःअश्विनौ ऋभवः एतेदेवाः पुरंदरः इंद्रः ४ कश्यपाद्याः सप्तर्षयः ५
कश्यपाददित्यांवामनावतारः ६ एवंसप्तमन्वंतराणिउक्तानि भाव्यानिवक्ष्ये ७ विवस्वतःमनोः द्वेभार्ये छाया १ संज्ञाचेति २ ८ तृतीयावडवा यमःयमी श्राद्धदेवः ए
तेत्रयः संज्ञासुताः ९ सावर्णिः तपती शनैश्चरः एतानिछायापत्यानि अश्विनौवडवासुतौ १० अष्टमेंऽतरेसावर्णिर्मनुर्भविष्यतिनिर्मोकविरजस्काद्याः तत्सुताः ११

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

१२ पदत्रयंयाचमानायइमांसर्वांमहींसप्तमेमन्वंतरेदत्वाऽष्टमेमन्वंतरेविष्णोःप्रसादेनराद्धंलब्धंइंद्रपदंहित्वेत्यर्थः १३ (स्वर्गादधिकेसुतलेऽधुनाऽऽस्ते) १४ रामःपरशुरामः । द्रोणपुत्रोऽश्वत्थामा १५ इदानींतुस्वयोगतआसते १६ (सरस्वत्यांजातःप्रभुःस्थानंस्वर्गंहृत्वाआदाय) १७ १८ श्रुतसंज्ञकइंद्रः १९ (संराद्धांसंसिद्धां) २० हविष्मत्प्रमुखाइत्युक्तानामेवकेषांचिन्नामान्याहहविष्मानिति २१ २२ विषूच्यांजातःसन् २३ एकादशमइत्यादिरार्षः (अनागतोभविष्यन्) २४ २५ (आर्यकस्यवैधृतायांसुतःधर्मसेतुसंज्ञकः) २६ २७ २८

टीका ॥१३॥ श्लोकाः

तत्रदेवाःसुतपसोविरजाअमितप्रभाः ॥ तेषांविरोचनसुतोबलिरिंद्रोभविष्यति १२ दत्त्वेमांयाचमानायविष्णवेयःपदत्रयम् ॥ राद्धमिंद्रपदंहित्वाततः सिद्धिमवाप्स्यति १३ योसौभगवताबद्धःप्रीतेनसुतलेपुनः ॥ निवेशितोऽधिकेस्वर्गादधुनाऽऽस्तेस्वराडिव १४ गालवोदीप्तिमान्रामोद्रोणपुत्रःकृप

॥४४॥ स्तथा ॥ ऋष्यशृंगःपिताऽस्माकंभगवान्बादरायणः १५ इमेसप्तर्षयस्तत्रभविष्यंतिस्वयोगतः ॥ इदानीमासतेराजन्स्वेस्वआश्रममंडले १६ १२/२८

देवगुह्यात्सरस्वत्यांसार्वभौमइतिप्रभुः ॥ स्थानंपुरंदराद्धृत्वाबलयेदास्यतीश्वरः १७ नवमोदक्षसावर्णिर्मनुर्वरुणसंभवः ॥ भूतकेतुर्दीप्तकेतुरित्याद्या स्तत्सुतानृप १८ पारामरीचिगर्भाद्यादेवाइंद्रःश्रुतःस्मृतः ॥ द्युतिमत्प्रमुखास्तत्रभविष्यंत्यृषयस्ततः १९ आयुष्मतोंबुधारायामृषभोभगवत्कला ॥ भ वित्रीयेनसंराद्धांत्रिलोकींभोक्ष्यतेश्रुतः २० दशमोब्रह्मसावर्णिरुपश्लोकसुतोमहान् ॥ तत्सुताभूरिषेणाद्याहविष्मत्प्रमुखाद्विजाः २१ हविष्मान्सुकृ तिःसत्योजयोमूर्तिस्तदाद्विजाः ॥ सुवासनविरुद्धाद्यादेवाःशंभुःसुरेश्वरः २२ विष्वक्सेनोविषूच्यांतुशंभोःसख्यंकरिष्यति ॥ जातःस्वांशेनभगवान् गृहेविश्वसृजांविभुः २३ मनुर्वैधर्मसावर्णिरेकादशमआत्मवान् ॥ अनागतास्तत्सुताश्चसत्यधर्मादयोदश २४ विहंगमाःकामगमानिर्वाणरुचयःसु राः ॥ इंद्रश्चवैधृतस्तेषामृषयश्चारुणादयः २५ आर्यकस्यसुतस्तत्रधर्मसेतुरितिस्मृतः ॥ वैधृतायांहरेरंशस्त्रिलोकींधारयिष्यति २६ भवितारुद्रसा वर्णीराजन्द्वादशमोमनुः ॥ देववानुपदेवश्चदेवश्रेष्ठादयःसुताः २७ ऋतधामाचतत्रेंद्रोदेवाश्चहरितादयः ॥ ऋषयश्चतपोमूर्तिस्तपस्व्याग्नीध्रकादयः २८

चूर्णिका

सुतपसः विरजाः अमृतप्रभाः एतेदेवाः बलिः इंद्रोभविष्यति १२ यः सप्तमेंऽतरेपदत्रयंयाचमानायविष्णवेमहींदत्वा अष्टमेंऽतरेविष्णोः प्रसादेनलब्धंइंद्रपदंहित्वाततः सिद्धिंप्राप्स्यति १३ सः अधुनासुतले आस्ते १४ गालवः दीप्तिमान् परशुरामः अश्वत्थामाकृपः ऋष्यशृंगःव्यासः १५ एते सप्त ऋषयः १६ सार्वभौमः हरेरवतारः सः इंद्रात्स्वर्गंहृत्वाबलयेदास्यति १७ अथदक्षसावर्णिः नवमोमनुः भूतकेतुःदीप्तिकेत्वादयः पुत्राः १८ पारामरीचिगर्भाद्याःदेवाः श्रुतः इंद्रः द्युतिमत्प्रमुखाः ऋ षयः १९ आयुष्मतः अंबुधारायांपत्न्यांऋषभावतारः येनराद्धांत्रिलोकींश्रुतनामाइंद्रःभोक्ष्यति २० अथब्रह्मसावर्णिः दशमोमनुः भूरिषेणाद्याःतत्सुताः २१ हविष्मान्सुकृतः सत्यः जयः मूर्तिः एतेऋषयः सुवासनविरुद्धाद्याःदेवाःशंभुःइंद्रः २२ विष्वक्सेनअवतारः सः शंभोःसख्यंकरिष्यति २३ एकादशःमनुःधर्मसावर्णिः सत्यधर्मादय दश तत्सुताः २४ विहंगमाःकामगमाःनिर्वाणरुचयोदेवाःवैधृतिःइंद्रःअरुणादयः ऋषयः २५ धर्मसेतुरवतारः सः त्रिलोकींधारयिष्यति २६ द्वादशोमनुः रुद्रसावर्णिःदे ववान् उपदेवः देवश्रेष्ठादयः तत्सुताः २७ ऋतधामाइंद्रः हरितादयोदेवाः आग्नीध्रकादयः ऋषयः २८ ॥४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१३॥

तस्यमनोरंतरंसाधयिष्यति । सत्यसहसोयासूनृताख्यीतस्याःसुतःसन् २९ ३० ३१ दिवस्पतेरिंद्रस्योपहर्तासंपादकोदेवहोत्रस्यबृहत्यांसंभविष्यति ३२ ३३ ३४ (वितानायांसंभूतः) क्रियातंतून्कर्म संततीःवितायितावितारयिष्यति ३५ युगसाहस्रेणपर्ययःपरिवर्तोयस्य । युगसहस्रप्रमाणइत्यर्थः ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांत्रयोदशोऽध्यायः १३ ॥ ॥ छ ॥ चतुर्दशेतुसर्वेषांमन्वादीनांयथायथम् । पृथक्कर्माणिवर्ण्यंतेभगवद्वशवर्तिनाम् ॥ १ ॥ (भगवान्यथायेनप्रकारेणप्रवृत्तः । येइमेमन्वादयश्चयस्मिन्कर्मणियेनपुरुषेणनियुक्तास्तत्सर्वं) १ पुरुषेणईश्वरेणयज्ञाद्यवतारैःशास्यंतेनियुज्यंतइतितथा २ तदेवाहयज्ञादयइति (आभिस्तनूभिःप्रचोदितामन्वादयःजगद्यात्रांनयंति) ३ ऋष्यादीनांकर्माण्याह । चतुर्युगांतइतिचतुर्भिः । यतःयेभ्यःश्रुतिगणेभ्यः (धर्मस्तान्श्रुतिगणान्यथायथावत्) ४ उदिताःउक्ताः । युक्ताःसंयताःसंतोमहींधर्मंसंचारयंति । मह्यांधर्मंप्रवर्तयंतीत्यर्थः (तपःशौचंदयासत्यमितिपादाःप्रकीर्तिताः) ५

॥४५॥ श्लोकाः २९/५

स्वधामाख्योहरेरंशःसाधयिष्यतितन्मनोः ॥ अंतरंसत्यसहसःसूनृतायाःसुतोविभुः २९ मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान् ॥ चित्रसेनविचित्राद्यादेवसावर्णिदेहजाः ३० देवाःसुकर्मसुत्रामसंज्ञाइंद्रोदिवस्पतिः ॥ निर्मोकतत्त्वदर्शाद्याभविष्यंत्यृषयस्तदा ३१ देवहोत्रस्यतनयउपहर्तादिवस्पतेः ॥ योगेश्वरोहरेरंशोबृहत्यांसंभविष्यति ३२ मनुर्वाइंद्रसावर्णिश्चतुर्दशमएष्यति ॥ उरुगंभीरबुद्ध्याद्याइंद्रसावर्णिवीर्यजाः ३३ पवित्राश्चाक्षुषादेवाःशुचिरिंद्रोभविष्यति ॥ अग्निर्बाहुःशुचिःशुद्धोमागधाद्यास्तपस्विनः ३४ सत्रायणस्यतनयोबृहद्भानुस्तदाहरिः ॥ वितानायांमहाराजक्रियातंतून्वितायिता ३५ राजन्चतुर्दशैतानित्रिकालानुगतानिते ॥ प्रोक्तान्येभिर्मितःकल्पोयुगसाहस्रपर्ययः ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेमन्वंतरानुवर्णनंनामत्रयोदशोऽध्यायः १३ ॥ ॥ छ ॥ ॥ राजोवाच ॥ मन्वंतरेषुभगवान्यथामन्वादयस्त्विमे ॥ यस्मिन्कर्मणियेयेननियुक्तास्तद्वदस्वमे १ ॥ ऋषिरुवाच ॥ मनवोमनुपुत्राश्चमुनयश्चमहीपते ॥ इंद्राःसुरगणाश्चैवसर्वेपुरुषशासनाः २ यज्ञादयोयाःकथिताःपौरुष्यस्तनवोनृप ॥ मन्वादयोजगद्यात्रांनयंत्याभिःप्रचोदिताः ३ चतुर्युगांतेकालेनग्रस्तान्श्रुतिगणान्यथा ॥ तपसाऋषयोऽपश्यन्यतोधर्मःसनातनः ४ ततोधर्मंचतुष्पादंमनवोहरिणोदिताः ॥ युक्ताःसंचारयंत्यद्धास्वेस्वेकालेमहींनृप ५

चूर्णिका ॥४५॥

स्वधामाख्यः अवतारः २९ त्रयोदशोमनुः देवसावर्णिःचित्रसेनविचित्राद्याः तत्सुताः ३० सुकर्मसुत्रामसंज्ञाः देवाः दिवस्पतिरिंद्रः निर्मोकतत्वदर्शाद्याऋषयः ३१ योगेश्वरः अवतारः ३२ चतुर्दशोमनुः इंद्रसावर्णिःउरुगंभीरब्रह्माद्याः तत्सुताः ३३ पवित्राश्चाक्षुषाः देवाः शुचिरिंद्रः अग्निर्बाहुः शुचिः शुद्धः मागधाद्याऋषयः ३४ बृहद्भानुरवतारः सः कर्मसंततीर्विस्तारयिष्यति ३५ हेराजन् एतानिमन्वंतराणि १४ एभिर्युगसहस्रप्रमाणः कल्पोमितः ३६ ॥ इत्यष्टमेत्रयोदशः १३ ॥ ॥ छ ॥ ॥ राजोवाच ॥ हेभगवन् मन्वंतरेषुइमेमन्वादयः यस्मिन्कर्मणियेननियुक्ताः संतः यत्कुर्वंतितद्वद १ ॥ ऋषिरुवाच ॥ मनवः मनुपुत्राः मुनयःइंद्राःसुरगणाःएतेसर्वे २ यज्ञाद्यवतारैःप्रचोदिताःसंतः जगद्यात्रांनयंति ३ तेषांकर्माण्याह चतुर्युगांतेकालग्रस्तान्वेदान्ऋषयःतपसाअपश्यन् ४ ततोमनवः चतुष्पादंधर्ममह्यांप्रवर्तयंति ५

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

६ (प्रवर्षतिवृष्टिंकरोति) ७ प्रसंगात्
प्रजापालामनुपुत्रास्तंधर्मंपालयंति । यावदंतंयावन्मन्वंतरावसानं । विभागशःपुत्रपौत्रादिक्रमेण । येचान्येद्यावापृथिव्यादयोयत्रकर्मणिभोक्तृत्वेनान्वितास्तैश्चसह
पांतरैरपिजगद्यात्राप्रवर्तनमाह ज्ञानमितिद्वाभ्यां । सिद्धाःसनकादयः । ऋषयोयाज्ञवल्क्यादयःयोगेशादत्तात्रेयादयःतत्तद्रूपःसन्ज्ञानंकर्मचयोगंचब्रूते ८ प्रजेशामरीच्यादयस्तेनरूपेणसर्गंकरोतीतिशेषः।
स्वराड्वपुःराजमूर्तिः । सर्वेषामभावायभवति । पृथग्विधागुणाःशीतोष्णादयोयस्य ९ नामरूपात्मिकयामाययाविमोहितात्मभिःएभिर्जनैःनानादर्शनैःअनेकशास्त्रैःस्तूयमानोनिरूप्यमाणोपिनैवदृश्यतइत्यर्थः
१० प्रासंगिकंनिरूप्यप्रस्तुतमेवोपसंहरति । एतदिति । कल्पविकल्पस्यकल्पभेदस्यएतत्प्रमाणमुक्तंयत्रचतुर्दशमन्वंतराण्याहुः ११ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांचतुर्दशोऽध्यायः १४ ॥
बलिंपंचदशेविश्वजिताऽऽचार्याअयाजयन् । ततोऽसौस्वर्गमजयद्भयाद्देवानिलिल्यिरे १ । अथेर्यतेनवाध्याय्यावामंवामनचेष्टितं । निग्रहच्छलतोयत्रबलेर्भूयाननुग्रहः ॥२॥ ईश्वरःस्वयंकृपणवत्कस्माद्धेतो
रयाचत । लब्धार्थोभूत्वापितंकस्माद्बबंध १ (पूर्णस्ययाच्ञा । अनागसोबलेर्बंधनंचैतत्) २ तत्रतावद्बलेःत्रिलोकीमपहर्तुंयाच्ञादिच्छलंकृतवानितिवक्तुंब्राह्मणाराधनबलेनबलेरकांडएवस्वर्गविजयक्र
ममाह । पराजितश्रीरित्यादिनायावदध्यायसमाप्ति । युद्धेपराजिताश्रीर्भूर्येनसः । इंद्रेणअसुभिश्चत्याजितःसन्भृगून्भृगोर्वंश्यान्शुक्रदीन्महात्माउदारचित्तः । अर्थानांनिवेदनेनअर्पणेन ३ त्रिणाकं
स्वर्गंजेतुमिच्छंतंविश्वजितायागेनअयाजयन् । महाभिषेकेणऐंद्रेणबह्वृचब्राह्मणप्रसिद्धेन ४

श्लोकाः ६/४

पालयंतिप्रजापालायावदंतंविभागशः ॥ यज्ञभागभुजोदेवायेचयत्रान्विताश्चतैः ६ इंद्रोभगवतादत्तांत्रैलोक्यश्रियमूर्जिताम् ॥ भुंजानःपातिलोकांस्त्री
न्कामंलोकेप्रवर्षति ७ ज्ञानंचानुयुगंब्रूतेहरिःसिद्धस्वरूपधृक् ॥ ऋषिरूपधरःकर्मयोगंयोगेशरूपधृक् ८ सर्गंप्रजेशरूपेणदस्यून्हन्यात्स्वराड्वपुः ॥ काल
रूपेणसर्वेषामभावायपृथग्गुणः ९ स्तूयमानोजनैरेभिर्माययानामरूपया ॥ विमोहितात्मभिर्नानादर्शनैर्नचदृश्यते १० एतत्कल्पविकल्पस्यप्रमाणंप
रिकीर्तितम् ॥ यत्रमन्वंतराण्याहुश्चतुर्दशपुराविदः ११ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेमनुवर्णनंनामचतुर्दशोऽध्यायः १४ ॥ ॥ छ ॥
॥ राजोवाच ॥ बलेःपदत्रयंभूमेःकस्माद्धरिरयाचत ॥ भूत्वेश्वरःकृपणवल्लब्धार्थोपिबबंधतम् १ एतद्वेदितुमिच्छामोमहत्कौतूहलंहिनः । याच्ञेश्वरस्य
पूर्णस्यबंधनंचाप्यनागसः २ ॥ श्रीशुकउवाच ॥ पराजितश्रीरसुभिश्चहापितइंद्रेणराजन्भृगुभिःसजीवितः ॥ सर्वात्मनातानभजद्भृगून्बलिःशिष्यो
महात्माऽर्थनिवेदनेन ३ तंब्राह्मणाभृगवःप्रीयमाणाअयाजयन्विश्वजितात्रिणाकम् ॥ जिगीषमाणंविधिनाऽभिषिच्यमहाभिषेकेणमहानुभावाः ४

चूर्णिका

मनुपुत्राः तंधर्मंपालयंति देवाःयज्ञभागान् भुंजंति ६ इंद्रः भगवद्दत्तांश्रियंभुंजानः सन्त्रिलोकान्पाति लोकेप्रवर्षति ७ सिद्धरूपधृक्हरिः अनुयुगंज्ञानंब्रूतेऋषिरूपधरः
हरिः कर्मब्रूतेयोगरूपधृक्हरिः योगंब्रूते ८ प्रजेशरूपेणसर्गंकरोति राजमूर्तिःसन्दस्यून्हन्यात्कालरूपेणसर्वेषांनाशायभवति ९ माययामोहितात्मभिर्जनैः नानाशास्त्रैः
स्तूयमानोऽपिनैवदृश्यते १० एतत्अवांतरकल्पस्यप्रमाणंतेकीर्तितम् यत्रमन्वंतराण्याहुश्चतुर्दशपुराविदः ११ ॥ इत्यष्टमेचतुर्दशः १४ ॥ ॥ छ ॥ ॥ राजोवाच ॥
ईश्वरः कृपणवत्भूत्वाबलेः सकाशाद्भूमेः पदत्रयंकस्मादयाचत किंच लब्धार्थोऽपिहरिः कस्मात्तंबबंध १ एतद्वेदितुमिच्छामः २ ॥ श्रीशुकउवाच ॥ हेराजन्युद्धेइंद्रेण
पराजितश्रीः बलिः भृगुभिः जीवितःसन् पश्चात्तान् सर्वात्मना अभजत् ३ ततः प्रसन्नाः भृगवः स्वर्गंजिगीषमाणंतंबलिंविश्वजितायागेनअयाजयन् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हर्यश्वस्यैंद्रस्ययेतुरंगास्तेषामिववर्णोंहरितोयेषाम् ५ पुरटंसुवर्णंतूणौइषुधी।अरिक्तौअक्षयशरौ। पिताम्हः प्रह्लादः जलजंशंखम् ६ विप्रैरर्जितःसंपादितोयोधनार्थोयुद्धपरिकरोयस्य। तैरेवकल्पितंस्वस्त्ययनंमं
गलवाचनादियस्य। आमंत्र्यपृष्ट्वा ७ अथारुह्यरराजेतिद्वयोरन्वयः। सुस्रग्धरःशोभनमालाधरः संनह्यकवचंन्यस्य ८ हेमांगदाभ्यांलसंतौबाहूयस्य। धिष्ण्यस्थःकुंडस्थआहवनीयइव। अधिष्ण्यस्थो
ऽरण्येप्रज्वलितइतिवा ९ तुल्यमैश्वर्यंनियंतृत्वंबलंचश्रीश्चयेषांतैर्निजयूथभूतैर्दैत्ययूथपैर्वृतोययाविति द्वयोरन्वयः। परिधीन्दिशः १० स्वृद्धांअतिसमृद्धां (ययौप्रतस्थे) ११ धिक्ग्राम्यसुखंतथाविधा
मपिपुरींअकस्मादेवपरित्यज्यैंद्रादयःपलायिताइतिवैराग्यार्थमिंद्रपुरीमनुवर्णयति। रम्यामितिसार्धैरेकादशभिउपवनानिफलप्रधानानिनिकटानिवा। उद्यानानिपुष्पप्रधानानिदूरस्थानिवातैः रम्यांकू
जंतिविहंगमिथुनानियेषु। जायंतोमत्तामधुव्रतायेषुतैः १२ प्रवालादीनामुरुर्भारोयासुताःशाखायेषांतेअमरद्रुमायेषुतैः। यत्रयासुसुरसेविताःप्रमदाःक्रीडंतिताहंसादिकुलैराकुलान्यापानलिन्यःसरांसियत्रये
॥४७॥ षुसंतितैरुपवनोद्यानैरम्यामितिपूर्वेणैवान्वयः १३ किंचपरिखाभूतयाआकाशगंगयाआवृतां। प्राकारेणसौवर्णेनचआवृतां। अट्टालाःप्राकारोपरिरचितान्युन्नतानियुद्धस्थानानितत्सहितेन १४ पट्टमुपरि
बंधः। रुक्मपट्टानिकपाटानियेषुतैर्द्वारैरवांतरैःस्फटिकमयैर्गोपुरैश्चपुरद्वारैर्जुष्टां। विभक्ताःप्रपथाराजमार्गायस्यां १५ सभाउपवेशस्थानानि। चत्वराण्यंगणानि। रथ्याउपमार्गाः। तैराढ्यांसंपन्नां न्यर्बुदं
दशकोट्यःतैर्गणनीयैरपरिमितैर्विमानैर्युतां। वज्रविद्रुममय्योवेदयोयेषुतैःशृंगाटकैश्चतुष्पथैर्युक्ताम् १६

श्लोकाः ५—१६

ततोरथःकांचनपट्टनद्धोहयाश्वहर्यश्वतुरंगवर्णाः ॥ ध्वजश्चसिंहेनविराजमानोहुताशनादासहविर्भिरिष्टात् ५ धनुश्चदिव्यंपुरटोपनद्धंतूणावरिक्तौकवचं
चदिव्यम्॥ पितामहस्तस्यददौचमालामम्लानपुष्पांजलजंचशुक्रः ६ एवंसविप्रार्जितयोधनार्थस्तैःकल्पितस्वस्त्ययनोथविप्रान् ॥ प्रदक्षिणीकृत्यकृ
तप्रणामःप्रह्लादमामंत्र्यनमश्चकार ७ अथारुह्यरथंदिव्यंभृगुदत्तंमहारथः ॥ सुस्रग्धरोथसंनह्यधन्वीखड्गीधृतेषुधिः ८ हेमांगदलसद्बाहुःस्फुरन्मकरकुंडलः॥
रराजरथमारूढोधिष्ण्यस्थइवहव्यवाट् ९ तुल्यैश्वर्यबलश्रीभिःस्वयूथैर्दैत्ययूथपैः ॥ पिबद्भिरिवखंदृग्भिर्दहद्भिःपरिधीनिव १०वृतोविकर्षन्महतीमासुरीं
ध्वजिनींविभुः॥ययाइंद्रपुरींस्वृद्धांकंपयन्निवरोदसी ११ रम्यामुपवनोद्यानैःश्रीमद्भिर्नंदनादिभिः॥कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः १२ प्रवालफलपुष्पोरु
भारशाखामरद्रुमैः॥हंससारसचक्राह्वकारंडवकुलाकुलाः॥ नलिन्योयत्रक्रीडंतिप्रमदाःसुरसेविताः १३ आकाशगंगयादेव्यावृतांपरिधिभूतया ॥ प्राकारेणा
ग्निवर्णेनसाट्टालेनोन्नतेनच ॥ रुक्मपट्टकपाटैश्चद्वारैःस्फाटिकगोपुरैः ॥ जुष्टांविभक्तप्रपथांविश्वकर्मविनिर्मिताम् १५ सभाचत्वररथ्याढ्यांविमानैर्न्य
र्बुदैर्युताम् ॥ शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः १६

चूर्णिका

ततः हविर्भिरिष्टात्हुताशनात्कांचनपट्टनद्धः रथः इंद्राश्ववत् अश्वाः सिंहांकितध्वजः ५ धनुः तूणौकवचंचआस अथप्रह्लादः तस्मै अम्लानपुष्पांमालां शुक्रः शं
खंचददौ ६ एवंविप्रैः संपादितयुद्धपरिकरोबलिः तान्प्रदक्षिणीकृत्यप्रणम्यप्रह्लादंपृष्ट्वानमश्चकार ७ ततः महारथोबलिः शस्त्रालंकारादिधृत्वाभृगुदत्तरथं आरुह्यधिष्ण्य
स्थः अग्निरिवशुशुभे ८ ९ अथतुल्यैश्वर्यबलश्रीभिः दैत्ययूथपैःवृतःसन्महतींआसुरींसेनांविकर्षन् १० अतिसमृद्धां इंद्रपुरींययौ ११ किंभूतांतांउपवनोद्यानैः १२
चंदनादिभिःरम्यांपरिखभूतया आकाशगंगयावृतां १३ १४ रुक्मपट्टकपाटैःद्वारैः जुष्टांसभाचत्वररथ्याढ्यांन्यर्बुदविमानैर्युताम् १५ १६

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका

वयस्तारुण्यंरूपंसौकुमार्यंनित्येवयोरूपेयासांताः । श्यामाःषोडशवर्षाः । विरजानिदिव्यानिवासांसियासां ताःरूपवन्नार्यःस्वलंकृताःस्त्रियःयत्रयस्यांभ्राजंते (अलंकाराणांअर्चिषउपमानं । यद्वारूपवतां देवानांनार्यः।तदादेवानांवह्नयोनारीणामर्चिषउपमानंचयुक्तम्) १७ सुरस्त्रीणांकेशेभ्योविभ्रष्टानांनवसौगंधिकस्रजांआमोदंउपादाय १८ हेमजालाक्षेभ्योहिरण्मयगवाक्षेभ्योनिर्गच्छताधूमेन । सुरप्रियाअप्सरसः १९ मुक्तामयैर्वितानैःमणिहेममयैःकेतुभिश्चध्वजैः । नानावर्णपताकायुक्ताभिर्वलभीभिःविमानानांपुरोभागैःआवृतांव्याप्तां । वैमानिकस्त्रीणांकलगीतैर्मंगलाम् २० (ऋष्टिर्वाद्यविशेषः) उपदेवानांगंधर्वादीनांगीतकैश्चमनोरमां । जितप्रभासाक्षाद्दीप्त्यधिष्ठात्रीदेवतायायातां । अन्यैरजितप्रभामितिवा । पाठांतरेजिताग्रहाःसूर्यादयोयया २१ यत्याम् २२ पृतन्ययासेनया २३ २४ केनहेतुनाएवंतेजसाऊर्जितआसीत् २५ (यःप्रलयाग्निरिवोत्थितएनं) प्रतिव्योढुंअपाकर्तुम् २६ यतःकारणादेतस्यओजआदितत्कारणंब्रूहि । यतओजआदेःएतस्यबलेःसमुद्यमः २७ उपभृतंसंचितं (हेमघवन्) २८ २९ अत्रोचितंमंत्रमाह । तस्माद्यूयंत्रिविष्टपमुत्सृज्यनिलयमदर्शनंयात । यतःकालात् ३०

॥४८॥

श्लोकाः १७/३०

यत्रनित्यवयोरूपाःश्यामाविरजवाससः ॥ भ्राजंतेरूपवन्नार्योह्यर्चिर्भिरिववह्नयः १७ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजाम् ॥ यत्रामोदमुपादायमार्गआवातिमारुतः १८ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना ॥ पांडुरेणप्रतिच्छन्नमार्गेयांतिसुरप्रियाः १९ मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृताम् ॥ शिखंडिपारावतभृंगनादितांवैमानिकस्त्रीकलगीतमंगलाम् २० मृदंगशंखानकदुंदुभिस्वनैःसतालवीणामुरजर्ष्टिवेणुभिः ॥ नृत्यैःसवाद्यैरुपदेवगीतकैर्मनोरमांस्वप्रभयाजितप्रभाम् २१ यांनव्रजंत्यधर्मिष्ठाःखलाभूतद्रुहःशठाः ॥ मानिनःकामिनोलुब्धाएभिर्हीनाव्रजंतियत् २२ तांदेवधानींसवरूथिनीपतिर्बहिःसमंताद्रुरुधेपृतन्यया ॥ आचार्यदत्तंजलजंमहास्वनंदध्मौप्रयुंजन्भयमिंद्रयोषिताम् २३ मघवांस्तदभिप्रेत्यबलेःपरमसुद्यमम् ॥ सर्वदेवगणोपेतोगुरुमेतदुवाचह २४ भगवन्नुद्यमोभूयान्बलेर्नःपूर्ववैरिणः ॥ अविषह्यमिमंमन्येकेनासीत्तेजसोर्जितः २५ नैनंकश्चित्कुतोवापिप्रतिव्योढुमधीश्वरः॥ पिबन्निवमुखेनेदंलिहन्निवदिशोदश ॥ दहन्निवदिशोदृग्भिःसंवर्ताग्निरिवोत्थितः २६ ब्रूहिकारणमेतस्यदुर्धर्षत्वस्यमद्रिपोः॥ओजःसहोबलंतेजोयतएतत्समुद्यमः २७ ॥ गुरुरुवाच ॥ जानामिमघवन्शत्रोरुन्नतेरस्यकारणम् ॥ शिष्यायोपभृतंतेजोगुरुभिर्ब्रह्मवादिभिः २८ भवद्विधोभवान्वापिवर्जयित्वेश्वरंहरिम् । नास्यशक्तःपुरःस्थातुंकृतांतस्ययथाजनाः २९ तस्मान्निलयमुत्सृज्ययूयंसर्वेत्रिविष्टपम् ॥ यातकालंप्रतीच्छंतोयतःशत्रोर्विपर्ययः ३०

चूर्णिका

यस्यास्वलंकृताःनिर्मलवाससःनार्यःभ्राजंतेताम् १७ किंचयस्यांदेवस्त्रीकेशच्युतानांस्रजांआमोदमादायमार्गेवायुर्वातिताम् १८ शिखंडिपारावतभृंगनादितां मृदंगशंखादिस्वनैःगंधर्वादीनांगीतैश्चमनोरमाम् १९ २० २१ यांपुरींअधर्मिष्ठाःखलाः भूतद्रुहादयश्चनव्रजंति २२ इत्यादिविशिष्टांतांदेवधानींगत्वासेनयारुरुधेततःभृगुदत्तंशंखंस्त्रीणांभयंजनयन्सन्दध्मौ २३ अथइंद्रःबलेःपरमंउद्यमंअभिप्रेत्यसर्वदेवगणोपेतःगुरुमुवाच २४ हेभगवन्पूर्ववैरिणःबलेःभूयान्अयंउद्यमःअतःइदंअविषह्यंमन्ये २५ इदंकेनहेतुनाअद्भुतप्रवाहादिसर्वंजातम् २५ २६ एतस्यकारणंब्रूहि २७ ॥ गुरुरुवाच ॥ हेमघवन्तेशत्रोःउन्नतेःकारणंजानामि अस्मैशिष्यायभृगुभिःतेजःसंचितम् २८ भवद्विधः भवान्वाअपिअस्यपरतःस्थातुंईश्वरंविनानकोपिसमर्थः २९ कृतांतस्ययथाजनाःअतःहेदेवाःयूयंस्वर्गंहित्वाकालंप्रतीक्षंतःअदर्शनंयात ३०

॥४८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

फेनास्यविपर्ययःस्यादित्यतआहएषइति विप्राणांवलेनउदर्कंउत्तरोत्तरंअधिकंफलंयस्यसः ३१ सुमंत्रितःअर्थःकार्यंयेषांतेनिलयंजग्मुः ३२ ३३ एवंप्राप्तमिंद्रपदंस्थिरीकर्तुंमयाजयन् । अनुव्रतंअनुव
र्तिनम् ३४ द्विजदेवैर्ब्राह्मणैरुपलंभितांप्रापिताम् ३६ ॥ ॥ इतिश्रीभाग०म०अष्टमस्कंधेटीकायांपंचदशोध्यायः १५ ॥ ॥ ७ ॥ ॥ षोडशेपुत्रनाशेनशोचंत्याअदितेःपतिः । प्रार्थितःकश्यपःप्राहपयो
व्रतमितीर्यते १ ॥ इदानींश्रीवामनावतारप्रसंगमाह । एवमित्यादियावत्समाप्ति । नष्टेषुअदृष्टेषुसत्सु १ (निरतःउपरतःउत्थितइत्यर्थः) २ सःकश्यपः (सभाजितःपूजितः) पत्नीमिदमाह ३ दीनवदन
त्वादिकमालक्ष्यबहुधाविकल्पयन्पृच्छति । अप्यभद्रमितिसप्तभिः । हेभद्रेमृत्योःछंदमिच्छामनुवर्ततइतितथामृत्युवशवर्तिनोजनस्येत्यर्थः (अपिकिं) ४ हेगृहमेधिनिअपिवाकिंवागृहेषुधर्मादेःकिंचिदकु
शलमितिकाकाप्रश्नः यत्रयेषुगृहेषुअयोगिनामपियोगःस्वधर्मादिनायोगफलंभवति ५ किंवात्वयाऽपूजिताएवगृहाद्याताः (प्रत्युत्थानेनअपूजितावा) ६ नार्चिताअनर्चिताःसंतोयदिनिर्गच्छंतितेगृहाःफे
॥४९॥ रुराजःसृगालाधिपःतद्विवरतुल्याः ७

श्लोकाः ३१/७

एषविप्रबलोदर्कःसंप्रत्यूर्जितविक्रमः ॥ तेषामेवापमानेनसानुबंधोविनंक्ष्यति ३१ एवंसुमंत्रितार्थास्तेगुरुणाऽर्थानुदर्शिना ॥ हित्वात्रिविष्टपंजग्मुर्गी
र्वाणाःकामरूपिणः ३२ देवेष्वथनिलीनेषुबलिर्वैरोचनःपुरीम् ॥ देवधानीमधिष्ठायवशंनिन्येजगत्त्रयम् ३३ तंविश्वजयिनंशिष्यंभृगवःशिष्यवत्सलाः ॥
शतेनहयमेधानामनुव्रतमयाजयन् ३४ ततस्तदनुभावेनभुवनत्रयविश्रुताम् ॥ कीर्तिंदिक्षुवितन्वानःसरेजउडुराडिव ३५ बुभुजेचश्रियंस्वृद्धांद्विजदेवो
पलंभिताम् ॥ कृतकृत्यमिवात्मानंमन्यमानोमहामनाः ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेपंचदशोऽध्यायः १५ ॥ ॥ छ ॥
॥ श्रीशुकउवाच ॥ एवंपुत्रेषुनष्टेषुदेवमाताऽदितिस्तदा ॥ हृतेत्रिविष्टपेदैत्यैःपर्यतप्यदनाथवत् १ एकदाकश्यपस्तस्याआश्रमंभगवानगात् ॥ नि
रुत्सवंनिरानंदंसमाधेर्विरतश्चिरात् २ सपत्नींदीनवदनांकृतासनपरिग्रहः ॥ सभाजितोयथान्यायमिदमाहकुरूद्वह ३ अप्यभद्रंनविप्राणांभद्रेलोकेऽधुनाग
तम् ॥ नधर्मस्यनलोकस्यमृत्योश्छंदानुवर्तिनः ४ अपिवाऽकुशलंकिंचिद्गृहेषुगृहमेधिनि ॥ धर्मस्यार्थस्यकामस्ययत्रयोगोह्ययोगिनाम् ५ अपिवाऽतिथयो
ऽभ्येत्यकुटुंबासक्तयात्वया ॥ गृहादपूजितायाताःप्रत्युत्थानेनवाक्वचित् ६ गृहेषुयेष्वतिथयोनार्चिताःसलिलैरपि ॥ यदिनिर्यांतितेनूनंफेरुराजगृहोपमाः ७

चूर्णिका

अधुनाअयंबलिःविप्रबलोदर्कोऽस्तिकालेनएषामेवअपमानात् सानुबंधःनंक्ष्यति ३१ एवंगुरुणासुमंत्रितार्थाः देवाः स्वर्गंहित्वाकामरूपिणः संतः जग्मुः ३२ देवेषुलीनेषुसत्सुबलिः
देवधानींआस्थायजगत्त्रयंवशंनिन्ये ३३ अथभृगवः विश्वजयिनंशिष्यंहयमेधानांशतेनइंद्रपदंस्थिरीकर्तुम्अयाजयन् ३४ तदनुभावेनत्रैलोक्यविश्रुतांकीर्तिंदिक्षुवितन्वानः
सन्उडुराडिवरेजे ३५ ततोबलिः आत्मानंकृतकृत्यमिवमन्वानः ब्राह्मणैःसंपादितांसमृद्धांश्रियंबुभुजे ३६ ॥ इत्यष्टमेपंचदशः १५ ॥ ॥ छ ॥ ॥ श्रीशुकउ
वाच ॥ एवंपुत्रेषुनष्टेषुदैत्यैश्चस्वर्गेहृतेसतिदेवमाताअदितिः अनाथवत्पर्यतप्यत् १ एकदाकश्यपः तस्याः निरुत्सवंनिरानंदं आश्रमंअगात् २ कृतासनपरिग्रहः सः
दीनवदनांपत्नींइदंआह ३ हेभद्रेअधुनाविप्राणांधर्मस्य अभद्रंनागतंकिम् किंवात्रिवर्गस्यअकुशलंकिम् अपिवाअतिथयः त्वद्गृहंएत्यत्वयाअपूजिताःसंतःगताःकिम् किंवावे
लायांअग्नयोनहुताःकिम् ४ ५ ६ ७

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

वेलायांहोमकालेकर्हिचित् (कदाचित्) नहुताः किं ८ (गृहान्वितःगृहस्थः येषांअतिथीनांअग्नेश्चपूजया। यस्माद्ब्राह्मणोग्निश्चविष्णोर्मुखं) ९ भवत्याआत्मानंमनः अस्वस्थंअप्रकृतिस्थं। लक्षणैर्मुखम्लान्यादिभिर्लक्षयामि १० अस्वास्थ्यकारणमन्यदस्तीतिवक्तुंत्वत्पृष्टमभद्रादिर्कंनास्तीत्याह। भद्रमितिद्वाभ्यां। इमेगृहाःत्रिवर्गस्य (धर्मार्थकामानां) परक्षेत्रंउद्भवस्थानंत्रिवर्गोयथावद्वर्ततइत्यर्थः ११ भगवतस्तवानुध्यानंयन्मयाक्रियतेतस्मात्अग्नयोऽतिथयइत्यादिसर्वंनरिष्यतिनहीयते १२ प्रस्तुतंविज्ञापयितुमाह। कोन्विति। (मानसःमनसिस्थितः। यस्यामे) १३ संपाद्यंकाममाहतवैवेतिचतुर्भिः। (हेमारीचमनसःशरीराच्चजाताःतवैवअतस्तासुसर्वासुभवान्समःतथापिभक्तंभजते) १४ सपत्नैर्दैत्यैर्हृताश्रीर्येषांहृतंस्थानंयेषांतानितिबहुवचनंपुत्राभिप्रायेण १५ १६ १७ कःकश्यपः। प्रथमंतावत्पुत्रस्नेहंत्याजयितुंविस्मयव्याजेनतत्त्वमुपदिशतिअहोइतिसार्धेन १८ १९ अत्रापरितुष्यंतींमत्याह। उपतिष्ठस्वेतिद्वाभ्याम् २० नन्वेवंभूतकामप्राप्तिहेतुर्देवांतरसेवाप्रसिद्धातत्राह। अमोघेति २१

श्लोकाः ८/२१

अप्यग्नयस्तुवेलायांनहुताहाविषासति ॥ त्वयोद्विग्नधियाभद्रेप्रोषितेमयिकर्हिचित् ८ यत्पूजयाकामदुघान्यातिलोकान्गृहान्वितः ॥ ब्राह्मणोग्निश्चवैविष्णोःसर्वदेवात्मनोमुखम् ९ अपिसर्वेकुशलिनस्तवपुत्रामनस्विनि ॥ लक्षयेऽस्वस्थमात्मानंभवत्यालक्षणैरहम् १० ॥ अदितिरुवाच ॥ भद्रंद्विजगवांब्रह्मन्धर्मस्यास्यजनस्यच ॥ त्रिवर्गस्यपरंक्षेत्रंगृहमेधिन्गृहाइमे ११ अग्नयोऽतिथयोभृत्याभिक्षवोयेचलिप्सवः ॥ सर्वंभगवतोब्रह्मन्ननुध्यानान्नरिष्यति १२ कोनुमेभगवन्कामोनसंपद्येतमानसः ॥ यस्याभवान्प्रजाध्यक्षएवंधर्मान्प्रभाषते १३ तवैवमारीचमनःशरीरजाःप्रजाइमाःसत्त्वरजस्तमोजुषः ॥ समोभवांस्तास्वसुरादिषुप्रभोतथापिभक्तंभजतेमहेश्वरः १४ तस्मादीशभजंत्यामेश्रेयश्चिंतयसुव्रत ॥ हृतश्रियोहृतस्थानान्सपत्नैःपाहिनःप्रभो १५ परैर्विवासितासाहंमग्नाव्यसनसागरे ॥ ऐश्वर्यंश्रीर्यशःस्थानंहृतानिप्रबलैर्मम १६ यथातानिपुनःसाधोप्रपद्येरन्ममात्मजाः ॥ तथाविधेहिकल्याणंधियाकल्याणकृत्तम १७ ॥ श्रीशुकउवाच ॥ एवमभ्यर्थितोऽदित्याकस्तामाहस्मयन्निव ॥ अहोमायाबलंविष्णोःस्नेहबद्धमिदंजगत् १८ क्वदेहोभौतिकोऽनात्माक्वचात्माप्रकृतेःपरः ॥ कस्यकेपतिपुत्राद्यामोहएवहिकारणम् १९ उपतिष्ठस्वपुरुषंभगवंतंजनार्दनम् ॥ सर्वभूतगुहावासंवासुदेवंजगद्गुरुम् २० सविधास्यतितेकामान्हरिर्दीनानुकंपनः ॥ अमोघाभगवद्भक्तिर्नेतरेतिमतिर्मम २१

चूर्णिका

८ ९ अथवातेसर्वेपुत्राःकुशलिनःअहंभवत्याःमनःअस्वस्थंलक्षये १० ॥ अदितिरुवाच ॥ हेब्रह्मन् द्विजगवांधर्मस्यचभद्रमस्ति ११ तवअनुध्यानाद्धेतोःअग्नयोऽतिथयइत्यादिसर्वंनहीयते १२ किंच भवान्एवंधर्मान्यस्याःप्रभाषतेतस्याकामःकोनुनसंपद्यते १३ हेमारीच तवैवसर्वाःइमाःप्रजाःतासुत्वंसमःअसितथापिईश्वरःभक्तंभजते १४ अतएवहेस्वामिन् भजंत्याःमेश्रेयश्चिंतयसपत्नैःहृतश्रियःहृतस्थानान्नःपाहि १५ किंचप्रबलैर्दैत्यैःऐश्वर्यादीनिहृतानि १६ तानिमेपुत्राः यथापुनःप्रपद्येरन्तथामेकल्याणंकुरु १७ ॥ श्रीशुकउवाच ॥ एवंप्रार्थितःकश्यपःतांआहअहोस्नेहबद्धंजगत्इदंविष्णोर्मायाबलं १८ किंच अयंभौतिकःदेहः क्वप्रकृतेःपरःआत्माक्व कस्यकेपतिपुत्राद्याःअत्रमोहएवकारणम् १९ अतःजनार्दनंवासुदेवंउपतिष्ठस्व २० सःतेकामान्विधास्यतियतःभगवद्भक्तिःअमोघान २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१६॥

तथाचमेमनोरथंविदध्यात् २२ यथाचमेआशुतुष्यतितथातत्सेवाप्रकारमादिश (आज्ञापय) २३ मेमयापृष्टःपद्मजः(प्रजाकामस्य)मेयद्व्रतमाहएतत्तेप्रवक्ष्यामीत्यन्वयः २४ अमलेशुक्ले (द्वादशदिनंपय
एवव्रतंभक्षणंयस्य) २५ तत्रादौपूर्वेद्युःकृत्यमाहसिनीवाल्यामित्यादिनाब्रह्मचार्यथतद्रात्र्यामित्यंतेनग्रंथेन । यदिलभ्यतेतर्हिक्रोडविदीर्णयावन्यवराहोत्खातयाआलिप्य २६ तत्रमंत्रः ।त्वंदेवीतिहेदेवित्वं
रसायाःउद्धृतासि २७ निर्वर्तितआत्मानियमोनित्यनैमित्तिक-(-लक्षणो) येन २८ तत्रावाहनादौनवमंत्रानाह । नमस्तुभ्यमिति । पाद्यादौविशेषतस्तुद्वादशाक्षरंवक्ष्यति २९ चतुर्विंशद्गुणाश्चतुर्विंशतित
त्त्वानितानिजानातितथातस्मै । गुणसंख्यानस्यहेतवेसांख्यप्रवर्तकाय ३० एवंसामान्यतोनत्वागुणावतारान्प्रणमतित्रिभिः । तत्रादौमंत्रोक्तयज्ञरूपेणविष्णोःप्रणामोनमइति द्वेशीर्षेयस्य । त्रयःपादा
यस्य । तंतवेफलविस्तारकाय । त्रय्यांविद्यायामात्मायस्येतित्रिधाबद्धइत्यस्यार्थउक्तः । तथाचमंत्रः ' चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआ
विवेशे ' ति (निरुक्तंयास्केन । चत्वारिशृंगेतिवेदावाएतउक्तास्त्रयोस्यपादाइतिसवनानित्रीणिद्वेशीर्षेप्रायणीयोदयनीयेसप्तहस्तासःसप्तछंदांसित्रिधाबद्धस्त्रेधाबद्धोमंत्रब्राह्मणकल्पैर्वृषभोरोरवीतिरोरवणम
स्यसवनक्रमेणऋग्भिर्यजुर्भिःसामभिर्यदेनमृग्भिःशंसंतियजुर्भिर्यजंतिसामभिःस्तुवंतिमहोदेवइत्येषहिमहान्देवोयद्यज्ञोमर्त्यांआविवेशेत्येषहिमनुष्यानाविशातियजनायेति) ३१ ३२ प्राणायसूत्रात्म
ने । योगैश्वर्यंशरीरंयस्य ३३ ३४

॥५१॥ श्लोकाः २२/३४

॥ अदितिरुवाच ॥ केनाहंविधिनाब्रह्मन्नुपस्थास्येजगत्पतिम् ॥ यथामेसत्यसंकल्पोविदध्यात्समनोरथम् २२ आदिशत्वंद्विजश्रेष्ठविधिंतदुपधावनम्
आशुतुष्यतिमेदेवःसीदंत्याःसहपुत्रकैः २३ ॥ कश्यपउवाच ॥ एतन्मेभगवान्पृष्टःप्रजाकामस्यपद्मजः ॥ यदाहतेप्रवक्ष्यामिव्रतंकेशवतोषणम् २४
फाल्गुनस्यामलेपक्षेद्वादशाहंपयोव्रतः ॥ अर्चयेदरविंदाक्षंभक्त्यापरमयान्वितः २५ सिनीवाल्यांमृदालिप्यस्नायात्क्रोडविदीर्णया ॥ यदिलभ्ये
तवैस्रोतस्येतंमंत्रमुदीरयेत् २६ त्वंदेव्यादिवराहेणरसायाःस्थानमिच्छता ॥ उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रणाशय २७ निर्वर्तितात्मनियमोदेवमर्चे
त्समाहितः ॥ अर्चायांस्थंडिलेसूर्येजलेवह्नौगुरावपि २८ नमस्तुभ्यंभगवतेपुरुषायमहीयसे ॥ सर्वभूतनिवासायवासुदेवायसाक्षिणे २९ नमोऽव्यक्ता
यसूक्ष्मायप्रधानपुरुषायच ॥ चतुर्विंशद्गुणज्ञायगुणसंख्यानहेतवे ३० नमोद्विशीर्ष्णेत्रिपदेचतुःशृंगायतंतवे ॥ सप्तहस्ताययज्ञायत्रयीविद्यात्मनेनमः
३१ नमःशिवायरुद्रायनमःशक्तिधरायच ॥ सर्वविद्याधिपतयेभूतानांपतयेनमः ३२ नमोहिरण्यगर्भायप्राणायजगदात्मने ॥ योगैश्वर्यशरीरायनमस्ते
योगहेतवे ३३ नमस्तेआदिदेवायसाक्षिभूतायतेनमः ॥ नारायणायऋषयेनरायहरयेनमः ३४

चूर्णिका ॥५१॥

॥ अदितिरुवाच ॥ हेब्रह्मन् केनविधिनाजगत्पतिंउपस्थास्येपुत्रैःसहसीदंत्याःमेमनोरथंयथाविदध्यात् २२ तथातत्सेवाप्रकारंआदिश २३ ॥ कश्यपउवाच ॥ प्रजाका
मेनमयापृष्टः ब्रह्मायत्व्रतंआहतत्तेवक्ष्यामि २४ फाल्गुनस्यशुक्लपक्षेद्वादशाहंपयोव्रतःसन्हरिं अर्चयेत् २५ सिनीवाल्यांक्रोडविदीर्णयामृदाअंगंलिप्यप्रवाहेस्नायात् २६
त्वंदेव्यादिवराहेणरसायाःस्थानमिच्छता उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रणाशयइमंमंत्रंमृल्लेपनेउच्चारयेत् २७ ततःनित्यनैमित्तिकंकर्मकृत्वाप्रतिमादिषुदेवंअर्चयेत् २८ नम
स्तुभ्यंभगवतेपुरुषायमहीयसे सर्वभूतनिवासायवासुदेवायसाक्षिणे २९ प्रधानपुरुषाययज्ञायशिवायहिरण्यगर्भायनारायणायपीतवाससेकेशवायनमः ३० ३१ ३२ ३३ ३४

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

टीका अधिगताप्राप्ताश्रीर्येनतस्मै ३५ (सर्वेषांवराणांदाता । हेवरेण्यपतोवरदर्षभोसि) तत्पादपद्मयोःआमोदंस्पृहयंतइवदेवाश्चश्रीश्चयमन्ववर्ततसमेप्रसीदतु ३७ आवाहनेनपुरस्कृतंसंमानितं (हृषीकेशं । पाद्याचमनादिभिः) ३८ ३९ पयसिशृतंपक्वंपायसं । मूलविद्ययाद्वादशाक्षरेणैव ४० ४१ पूर्वोक्ताभिरन्याभिश्चस्तुतिभिः ४२ तच्छेषंनिर्माल्यं । द्वौअवरौयेषांतान् (अधिका) संभवेद्वावपिभोजये दित्यर्थः ४३ सभाजितैस्तैरनुज्ञातःसन्सेष्टःबंधुभिःसहितः) शेषं ।) तस्यांरात्र्यांब्रह्मचारीसन् । श्वोभूतेप्रभातेसति ४४ ४५ पयएवभक्षआहारोयस्य ४६ ४७ अधःस्वप्नंशयनं (त्रिषवणंत्रिकालं) ४८ ४९ पंचकैःपंचामृतैः ५० (शिपिविष्टायजीवांतर्यामिणे । यद्वा । शिपिषुरश्मिषुविष्टःशिपिविष्टस्तस्मै) ५१ (शृतेनपक्वेन । अतिगुणवत्मधुरादिरसयुक्तंसोपस्करम्) ५२

॥५२॥ नमोमरकतश्यामवपुषेऽधिगतश्रिये ॥ केशवायनमस्तुभ्यंनमस्तेपीतवाससे ३५ त्वंसर्ववरदःपुंसांवरेण्यवरदर्षभः ॥ अतस्तेश्रेयसेधीराःपादरेणुमुपासते ३६ अन्ववर्ततयंदेवाःश्रीश्चतत्पादपद्मयोः ॥ स्पृहयंतइवामोदंभगवान्मेप्रसीदताम् ३७ एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतम् ॥ अर्चयेच्छ्रद्धयायुक्तःपाद्योपस्पर्शनादिभिः ॥ अर्चित्वागंधमाल्याद्यैःपयसास्नपयेद्विभुम् ३८ वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ॥ गंधपुष्पादिभिश्चार्चेद्द्वादशाक्षरविद्यया ३९ शृतंतपसिनैवेद्यंशाल्यन्नंविभवेसति ॥ ससर्पिःसगुडंदत्त्वाजुहुयान्मूलविद्यया ४० निवेदितंतद्भक्तायदद्याद्भुंजीतवास्वयम् ॥ दत्त्वाचमनमर्चित्वातांबूलंचनिवेदयेत् ४१ जपेदष्टोत्तरशतंस्तुवीतस्तुतिभिःप्रभुम् ॥ कृत्वाप्रदक्षिणंभूमौप्रणमेद्दंडवन्मुदा ४२ कृत्वाशिरसितच्छेषंदेवमुद्वासयेत्ततः ॥ द्व्यवरान्भोजयेद्विप्रान्पायसेनयथोचितम् ४३ भुंजीततैरनुज्ञातःशेषंसेष्टःसभाजितैः ॥ ब्रह्मचार्यथतद्रात्र्यांश्वोभूतेप्रथमेऽहनि ४४ स्नातःशुचिर्यथोक्तेनविधिनासुसमाहितः ॥ पयसास्नपयित्वार्चेद्यावद्व्रतसमापनम् ४५ पयोभक्षोव्रतमिदंचरेद्विष्णवर्चनादृतः ॥ पूर्ववज्जुहुयादग्निंब्राह्मणांश्चापिभोजयेत् ४६ एवंत्वहरहःकुर्याद्द्वादशाहंपयोव्रतः ॥हरेराराधनंहोममर्हणंद्विजतर्पणम् ४७ प्रतिपद्दिनमारभ्ययावच्छुक्लत्रयोदशि ॥ ब्रह्मचर्यमधःसुप्तिंस्नानंत्रिषवणंचरेत् ४८ वर्जयेदसदालापंभोगानुच्चावचांस्तथा ॥ अहिंस्रःसर्वभूतानांवासुदेवपरायणः ४९ त्रयोदश्यामथोविष्णोःस्नापनंपंचकैर्विभोः ॥ कारयेच्छास्त्रदृष्टेनविधिनाविधिकोविदः ५० पूजांचमहतींकुर्याद्वित्तशाठ्यविवर्जितः ॥ चरुंनिरूप्यपयसिशिपिविष्टायविष्णवे ५१ शृतेनतेनपुरुषंयजेतसुसमाहितः ॥ नैवेद्यंचातिगुणवद्दद्यात्पुरुषतुष्टिदम् ५२

श्लोकाः ३५/५२

चूर्णिका ३५ हेईशत्वंपुंसांसर्ववरदः ३६ अतोधीरास्तवपादरेणुमुपासते इत्यादिमंत्रैः द्वादशाक्षरविद्ययाचहृषीकेशंआवाहनपाद्यादिभिः अर्चयेत् ३७ ३८ ततःपयसास्नापयित्वावस्त्राद्युपचारैः अर्चयेत् ३९ ततः ससर्पिः सगुडंपायसंनैवेद्यंदत्त्वामूलविद्ययाजुहुयात् ४० निवेदितंतद्भक्तायदद्यात् स्वयंवाभुंजीत ततः आचमनंदत्त्वातांबूलंनिवेद्य ४१ अष्टोत्तरशतंमंत्रंजपेत् स्तुतिभिःप्रभुंस्तुत्वाप्रदक्षिणांनमस्कारंकृत्वा ४२ निर्माल्यंशिरसिधृत्वादेवंविसर्जयेत् पायसेनद्व्यवरान्विप्रान्भोजयेत् ४३ ततः बंधुभिःसहभुंजीत ४४ इदंव्रतंपयोभक्षःसन्द्वादशाहंकुर्यात् ४५ ४६ ४७ शुक्लप्रतिपदमारभ्यत्रयोदश्यंतंहरेःआराधनंहोमंअर्हणंद्विजतर्पणंब्रह्मचर्यादिनियमान् आचरेत् ४८ ४९ त्रयोदश्यांपंचामृतैः स्नाप्यविष्णोः ५० महापूजांकृत्वाचरुंनिरूप्यतेनपुरुषंइष्ट्वापुरुषतुष्टिदंनैवेद्यंदत्त्वा ५१ ५२ ॥५२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (विद्धिजानीहि) ५३ ५४ (आश्वपाकान्श्वपचानपि) ५५ ५६ ५७ मयाचतेसमुदाहृतम् ५८ ५९ सर्वयज्ञाख्योयंयज्ञः । सर्वव्रतमितिचस्मृतमेतद्व्रतम् ६० ६१ ६२ ॥ इतिश्रीभागवतेम०अष्टमस्कं
धेटीकायांषोडशोध्यायः १६ ॥ ततःसप्तदशेऽदित्याकृतेतस्मिन्व्रतेहरिः । तत्कामपूरणायादौतत्पुत्रोभूदितीर्यते ॥ १ ॥ (एकयाएकाग्रया । इंद्रियलक्षणान्दुष्टाश्वान्रश्मितुल्येनमनसाप्रगृह्यतत्रबुद्धिरेव
सारथिर्यस्याः) २ ३ ४ ५ प्रीतिविह्वलत्वादेवसाबद्धांजलिःसतीस्थिताकेवलं । ईडितुंपुनर्नोत्सेहेनशशाक । अपितूष्णींबभूव । कथंभूता । आनंदजलैराकुलेईक्षणेयस्याः । पुलकैराकुलाआकृति
र्देहोयस्याः । तस्यदर्शनेनयोऽत्युत्सवःतेनगात्रेवेपथुःकंपोयस्याः ६ तुष्टावपिबतीवोद्वीक्षमाणेतिचक्रियाभेदात्सेत्यस्यद्विरुक्तिरदोषः ७

श्लोकाः ५३/७

॥५३॥ आचार्यंज्ञानसंपन्नंवस्त्राभरणधेनुभिः ॥ तोषयेदृत्विजश्चैवतद्विद्ध्याराधनंहरेः ५३ भोजयेत्तान्गुणवतासदन्नेनशुचिस्मिते ॥ अन्यांश्चब्राह्मणान्शक्त्या
येचतत्रसमागताः ५४ दक्षिणांगुरवेदद्यादृत्विग्भिश्चयथार्हतः ॥ अन्नाद्येनाश्वपाकांश्चप्रीणयेत्समुपागतान् ५५ भुक्तवत्सुचसर्वेषुदीनांधकृपणादिषु ॥
विष्णोस्तत्प्रीणनंविद्वान्भुंजीतसहबंधुभिः ५६ नृत्यवादित्रगीतैश्चस्तुतिभिःस्वस्तिवाचकैः ॥ कारयेत्तत्कथाभिश्चपूजांभगवतोन्वहम् ५७ एतत्पयोव्रतं
नामपुरुषाराधनंपरम् ॥ पितामहेनाभिहितंमयातेसमुदाहृतम् ५८ त्वंचानेनमहाभागेसम्यक्चीर्णेनकेशवम् ॥ आत्मनाशुद्धभावेननियतात्माभजाव्य
यम् ५९ अयंवैसर्वयज्ञाख्यःसर्वव्रतमितिस्मृतम् ॥ तपःसारमिदंभद्रेदानंचेश्वरतर्पणम् ६० तएवनियमाःसाक्षात्तएवचयमोत्तमाः ॥ तपोदानंव्रतं
यज्ञोयेनतुष्यत्यधोक्षजः ६१ तस्मादेतद्व्रतंभद्रेप्रयताश्रद्धयाचर ॥ भगवान्परितुष्टस्तेवरानाशुविधास्यति ६२ ॥ ॥ इतिश्रीभागवतेमहापुराणे
अष्टमस्कंधेकश्यपादितिसंवादेषोडशोऽध्यायः १६ ॥ ॥ ध ॥ ॥ श्रीशुकउवाच ॥ इत्युक्तासाऽदितीराजन्स्वभर्त्राकश्यपेनवै ॥ अन्व
तिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता १ चिंतयंत्येकयाबुद्ध्यामहापुरुषमीश्वरम् ॥ प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रयाबुद्ध्याभगवत्यखि
लात्मनि ॥ वासुदेवेसमाधायचचारहपयोव्रतम् ३ तस्याःप्रादुरभूत्तातभगवानादिपूरुषः ॥ पीतवासाश्चतुर्बाहुःशंखचक्रगदाधरः ४ तंनेत्रगोचरंवी
क्ष्यसहसोत्थायसादरम् ॥ ननामभुविकायेनदंडवत्प्रीतिविह्वला ५ सोत्थायबद्धांजलिरीडितुंस्थितानोत्सेहआनंदजलाकुलेक्षणा ॥ बभूवतूष्णींपुलकाकु
लाकृतिस्तद्दर्शनात्युत्सवगात्रवेपथुः ६ प्रीत्याशनैर्गद्गदयागिराहरिंतुष्टावसादेव्यदितिःकुरूद्वह ॥ उद्वीक्षतीसापिबतीवचक्षुषारमापतिंयज्ञपतिंजगत्पतिम् ७

चूर्णिका आचार्यादीन्वस्त्रादिनाप्रतोष्य ५३ अन्यांश्चब्राह्मणान्भोजयेत् ५४ ततःगुरवे ऋत्विग्भ्यश्चदक्षिणांदत्वा अन्नादिना आश्वपाकादीन् प्रीणयेत् ५५ ततःबंधुभिःसहस्वयंभुंजीत
५६ नृत्यादिभिः प्रत्यहंभगवतः पूजांकारयेत् ५७ एतत्पयोव्रतंमेपितामहेनोक्तंतत्तेकथितम् ५८ हेमहाभागेत्वंअनेनकेशवंभज ५९ ६० . येनहरिः तुष्यति तदेवतपो
नियमादि ६१ अतः श्रद्धयाइदंव्रतमाचर अनेनतुष्टः भगवान्तववरान्आशुविधास्यति ६२ ॥ इत्यष्टमेषोडशः १६ ॥ ॥ ध ॥ ॥ श्रीशुकउवाच ॥ हेनृप ॥५३॥
एवंकश्यपेनउक्ताअदितिः मनसाइंद्रियदुष्टाश्वान्निगृह्यएकाग्रबुद्ध्याईश्वरंचिंतयतीसतीमनःवासुदेवेसमाधायपयोव्रतंचचार १ २ ३ हेताततस्मात्व्रतात्भगवान्पीता
वासाःचतुर्भुजः शंखचक्रगदाधरः प्रादुरभूत् ४ तंवीक्ष्यभुविकायेनदंडवत्ननाम ५ ततः साउत्थायबद्धांजलिः स्थितासतीस्तोतुंनोत्सहे ६ पश्चाद्गद्गदयागिराहरिंतुष्टाव ७

Nepal Sanskrit University, Balmeeki Campus...

CC-0. In Public Domain. Digitization by eGangotri

टीका

अपन्नतोविनिर्जित्यदैत्यानत्यूर्जितानपि । भक्तान्रक्षितुमोशस्त्वमेत्यस्तौददितिस्त्रिभिः ॥ यज्ञेशेत्यादिदशभिःसंबोधनैस्तवाशक्यंकिमपिनास्तीतिवदंतीप्रार्थयते । शंनःक्वधिकुरु । यतोदनानांनाथोसित्वं । तीर्थश्रवःकीर्तिर्यस्य।श्रवणमेवमंगलंयस्यतन्नामधेयंयस्य । आपन्नानांशरणागतानां (लोकानां) वृजिनोपशमायउदयोयस्य। हेआद्य ८ भूम्नेमहतेनमः। महत्त्वेहेतवः। विश्वायविश्वस्यजन्मस्थितिसंयमार्थस्वैरंगृहीताःपुरुशक्तेर्मायायाःगुणायेनतस्मै । तथापिस्वस्थायअप्रच्युतस्वरूपाय । कुतःशश्वदुपबृंहितोनित्योर्जितोयःपूर्णोबोधस्तेनव्यापादितंनित्यनिरस्तंआत्मनितमोमायालक्षणंयेनतस्मै ९ अस्मदीयमनोरथपूरणंईषत्करमेवतवेतिकैमुतिकन्यायेनाह । परंआयुःब्रह्मायुः । पुनरपि । द्यौश्चभूश्चरसातलंचद्योभूरसाः। द्यौरितिपृथक्पाठेभूश्चरसाश्चबिलस्वर्गाइतिविग्रहः रसेतिपाठेतुत्रीणिपदानि । सकलायोगगुणाअणिमादयः १०क्षेत्रज्ञःअंतर्यामी ११ सपत्नैर्हृताश्रीर्येषां (तेषां) स्वधामतश्च्यावितानांचपुत्राणांसंबंधियत्तद्भवत्याश्चिरमाकांक्षितंमयाविज्ञातम् १२ कांक्षितमेवाहतानितित्रिभिः। प्रतिलब्धोजयश्चश्रीश्चयैःतैःपुत्रैःसहउपासितुंएकत्रस्थातुमिच्छसि १३ १४ प्रत्याहृतंयशश्चश्रीश्चयैस्तान् १५ अपारणीयाअनतिक्रमणीयाः । यद्यस्मादनुकूलईश्वरःकालोयेषांतैर्विप्रैर्गुप्तारक्षिताःअनुकूलैरीश्वरैःसमर्थैर्विप्रैर्गुप्ताइतिवा । ममयाचिंत्यएव । तत्रहेतुःसंतोषितस्येत्यादि । श्रद्धानुरूपंसंकल्पानुसारेणफलहेतुत्वात् १७

॥५४॥

श्लोकाः ८/१७

॥ अदितिरुवाच ॥ यज्ञेशयज्ञपुरुषाच्युततीर्थपादतीर्थश्रवःश्रवणमंगलनामधेय ॥ आपन्नलोकवृजिनोपशमोदयाद्यशंनःकृधीहभगवन्नसिदीननाथः ८ विश्वायविश्वभवनस्थितिसंयमायस्वैरंगृहीतपुरुशक्तिगुणायभूम्ने ॥ स्वस्थायशश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसेहरयेनमस्ते ९ आयुःपरंवपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाःसकलयोगगुणास्त्रिवर्गः ॥ ज्ञानंचकेवलमनंतभवंतितुष्टात्त्वत्तोनृणांकिमुसपत्नजयादिराशीः १० ॥ श्रीशुकउवाच ॥ अदित्यैवंस्तुतोराजन्भगवान्पुष्करेक्षणः ॥ क्षेत्रज्ञःसर्वभूतानामितिहोवाचभारत ११ ॥ श्रीभगवानुवाच ॥ देवमातर्भवत्यामेविज्ञातंचिरकांक्षितम् ॥ यत्सपत्नैर्हृतश्रीणांच्यावितानांस्वधामतः १२ तान्विनिर्जित्यसमरेदुर्मदानसुरर्षभान् ॥ प्रतिलब्धजयश्रीभिःपुत्रैरिच्छस्युपासितुम् ॥ इंद्रज्येष्ठैःस्वतनयैर्हतानांयुधिविद्विषाम् ॥ स्त्रियोरुदतीरासाद्यद्रष्टुमिच्छसिदुःखिताः १४ आत्मजान्सुसमृद्धांस्त्वंप्रत्याहृतयशःश्रियः ॥ नाकपृष्ठमधिष्ठायक्रीडतोद्रष्टुमिच्छसि १५ प्रायोऽधुनातेऽसुरयूथनाथाअपारणीयाइतिदेविमेमतिः ॥ यत्तेऽनुकूलेश्वरविप्रगुप्तानविक्रमस्तत्रसुखंददाति १६ अथाप्युपायोममदेविचिंत्यःसंतोषितस्यव्रतचर्ययाते ॥ ममार्चनंनार्हतिगंतुमन्यथाश्रद्धानुरूपंफलहेतुकत्वात् १७

चूर्णिका

॥ अदितिरुवाच ॥ हेयज्ञेशहेयज्ञपुरुषनःशंकुरु त्वंदीननाथोऽसि ८ जगतः जन्मस्थितिसंयमार्थगृहीतमायागुणायहरयेतेनमोस्तु ९ हेअनंतसंतुष्टात्त्वत्तः नृणांब्रह्मायुः इष्टवपुः इत्यादिसर्वंभवति शत्रुजयाद्याशीः किमुत १० ॥ श्रीशुकउवाच ॥ एवंअदित्यास्तुतः हरिःउवाच ११ हेदेवमातःभवत्याश्चिरकांक्षितंयत्तत्मयाविज्ञातम् १२ किंच युद्धेदैत्यान्निर्जित्यप्राप्तजयश्रीभिः पुत्रैः सहएकत्रस्थातुंइच्छसि १३ तथाइंद्रमुख्यैःदेवैः युधिहतानांविद्विषांदुःखिताःरुदंतीः स्त्रियः द्रष्टुमिच्छसि १४ तथास्वर्गंअधिष्ठायक्रीडतः स्वपुत्रान्द्रष्टुमिच्छसि १५ हेदेविदैतेयाः अधुनाअनतिक्रमणीयाः तत्रविक्रमः सुखंनददाति एवंममसतिः १६ अथापिमयाउपायश्चिंत्यः यतः तेव्रतचर्ययातुष्टस्यममअर्चनंअन्यथागंतुंनार्हति १७

॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारीचस्यतपसिअधिष्ठायस्थितःसन्गोप्तास्मिपालयिष्यामि १८ अतःपातिमुपधावभजस्व १९ देवानांगुह्यंरहस्यंसर्वसुसंवृतंसुसंगुप्तंसत्संपद्यतेसिध्यति २० प्रभोर्हरेर्जन्मआत्मानिलब्ध्वा २१ अवित
धमीक्षणंदृष्टिर्यस्यसः २२ अनिलोयथासर्वत्रसमोपिदारुणिसंघर्षेणवनदाहकमग्निमाधत्तेएवंस्वयंसर्वेषुपुत्रेषुसमोपिदैत्यघातिवीर्यमाधत्तेत्यर्थः २३ (अदितेर्गर्भ) धिष्ठितंअधिष्ठायस्थितंसमीडेतुष्टावेत्यर्थः २४
(उरुभिर्गीयतेउरुगायस्तत्संबोधनं) २५ अदितेरेवपूर्वास्मिन्जन्मनिपृश्निरितिनाम तस्यागर्भायअर्भकाय । तत्रापिवेदागर्भेयस्य । यद्वावेदानांगर्भायवेदेषुप्रकाशमानायेत्यर्थः । त्रयोलोकानाभौयस्यस
त्रिणाभस्तस्मै । त्रयाणांलोकानांपृष्ठेउपरिस्थिताय । शिपिशब्देनपशवोजीवास्तेष्वंतर्यामितयाप्रविष्टाय ‘ यज्ञोवैविष्णुःपशवःशिपिर्यज्ञएवपशुषुप्रतितिष्ठती ’ तिश्रुतेः यद्वाशिपयोरश्मयस्तैर्वेष्टितायेत्यर्थः ।
तथापिविष्णवेव्यापिने २६ अंतःपतितंतृणादियथागभीरंस्रोतआक्षिपतिआकर्षतितथाकालात्माभवान्विश्वमाक्षिपति २७ प्रजाप्रतीनांचत्वमेवसंभविष्णुःउत्पादनशीलोसि । अयंभावः । नह्येवंभूतस्य
तवजन्मादिसंभवः । किंतुदेवादीनांपरमाश्रयत्वेनतत्कार्यसाधनायावतारोयंअतस्तान्स्वर्गच्युतान्पुनःस्वर्गेस्थापयेति २८ ॥ इतिश्रीभागवतेटीकायांअदितिवरप्रदानंनामसप्तदशोध्यायः १७ ॥ ॥छ॥

श्लोकाः १८/२८

त्वयार्चितश्चाहमपत्यगुप्तयेपयोव्रतेनानुगुणंसमीडितः ॥ स्वांशेनपुत्रत्वमुपेत्यतेसुतान्गोप्तास्मिमारीचतपस्यधिष्ठितः १८ उपधावपतिंभद्रेप्रजाप
तिमकल्मषम् ॥ मांचभावयतीपत्यावेवंरूपमवस्थितम् १९ नैतत्परस्माआख्येयंपृष्ठयापिकथंचन ॥ सर्वंसंपद्यतेदेविदेवगुह्यंसुसंवृतम् २० ॥ श्रीशुक
उवाच ॥ एतावदुक्त्वाभगवांस्तत्रैवांतरधीयत ॥ अदितिर्दुर्लभंलब्ध्वाहरेर्जन्मात्मनिप्रभोः २१ उपाधावत्पतिंभक्त्यापरयाकृतकृत्यवत् ॥ सवैस
माधियोगेनकश्यपस्तदबुध्यत ॥ प्रविष्टमात्मनिहरेरंशंह्यवितथेक्षणः २२ सोऽदित्यांवीर्यमाधत्ततपसाचिरसंभृतम् ॥ समाहितमनाराजन्दारुण्यग्निं
यथानिलः २३ अदितेर्धिष्ठितंगर्भंभगवंतंसनातनम् ॥ हिरण्यगर्भोविज्ञायसमीडेगुह्यनामभिः २४ ॥ ब्रह्मोवाच ॥ जयोरुगायभगवन्नुरुक्रमनमोस्तुते ॥
नमोब्रह्मण्यदेवायत्रिगुणायनमोनमः २५नमस्तेपृश्निगर्भायवेदगर्भायवेधसे॥त्रिणाभायत्रिपृष्ठायशिपिविष्टायविष्णवे२६ त्वमादिरंतोभुवनस्यमध्यमनंतश
क्तिंपुरुषंयमाहुः ॥ कालोभवानाक्षिपतीशविश्वंस्रोतोयथांतःपतितंगभीरम् २७ त्वंवैप्रजानांस्थिरजंगमानांप्रजापतीनामसिसंभविष्णुः ॥ दिवौकसांदेव
दिवश्च्युतानांपरायणंनौरिवमज्जतोऽप्सु २८ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेअदितिवरप्रदानंनामसप्तदशोऽध्यायः १७ ॥ ॥ छ ॥

चूर्णिका

हेमातः यतः त्वयाअपत्यगुप्तयेव्रतेनअर्चितः अहंकश्यपतपसिस्थितःसन्स्वांशेनपुत्रत्वंएत्यतवसुतान्गोप्तास्मि १८ हेदेविपत्यौमांभावयतीसतीपातिंभजस्व १९ एतत्अ
न्यस्मैनाख्येयम् अनेनसर्वंसिध्यति २० ॥ श्रीशुकउवाच ॥ इत्युक्त्वाभगवान्अंतर्दधेअथदितिःआत्मनिदुर्लभंहरेः जन्मलब्ध्वापातिंअभजत् कश्यपः समाधियोगेन
२१ २२ आत्मनिहरेः प्रविष्टंअंशंज्ञात्वाअदित्यांवीर्यंआधत्त अनिलः दारुणि अग्निंयथा २३ ततोब्रह्मा अदितेः गर्भंअधिष्ठायस्थितंहरिंविज्ञायगुह्यनामभिस्तुष्टाव २४
हेभगवन् त्वंजयब्रह्मण्यदेवाय २५ पृश्निगर्भायविष्णवेतेनमः २६ २७ त्वंदेवानांपरमायनंअसि एवंभूतस्यतेजन्मादिनास्तिअथापिदेवादीनांकार्यसाधनायअयमवतारः
अतः स्वर्गच्युतान्देवान्पुनः स्वर्गेस्थापय २८ ॥ इत्यष्टमेसप्तदशः १७ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥छ॥

Nepal Sanskrit University...

CC-0. In Public Domain. Digitization by eGangotri

ततस्त्वष्टादशेभूत्वावामनःसत्कृतोऽखिलैः । यज्ञंगतस्ततस्तेनसत्कृत्योक्तोवराबहून् ॥ १ ॥ इत्थंविरिंच्येनस्तुतंकर्मचदेवकार्यलक्षणंवीर्यंचप्रभावोयस्यसहरिरदित्यांप्रादुर्बभूवेतित्रयाणामन्वयः । अमृत भूःमृत्युजन्मशून्यः । शंखगदापद्मचक्राणिअस्यसंतीतितथा । अर्शआदित्वेनमत्वर्थीयोच्प्रत्ययः । अविसर्गपाठेसचासौपिशंगवासाश्च १ श्यामावदातःश्यामेषुप्रवरः । झषराजोमकरस्तदाकारयोःकुंडलयो स्त्विषाउल्लसंतीश्रीर्वदनांबुजेयस्य । श्रीवत्सोवक्षसियस्य । वलयैरंगदैश्चसहोल्लसंतिकिरीटादीनियस्य २ श्रीमत्यावनमालयाविराजितः । वेश्मगतंतमः ३ अग्निजिह्वादेवाः । नगाःपर्वताः ४ तत्प्रादुर्भा वसमयमाह । श्रोणायामिति । भाद्रपदशुक्लद्वादशीश्रवणद्वादशीतिप्रसिद्धातस्यांतत्रापिश्रोणायांश्रवणस्थेचंद्रेइत्यर्थः । तत्रापिश्रवणस्यप्रथमांशेअभिजितिनक्षत्रे । तच्चश्रुत्यादर्शितं । 'अभिजिन्नाम नक्षत्रंउपरिष्टादाषाढानांअधस्ताच्छ्रोणाया' इति । एवंविशिष्टेमुहूर्तेसुसमयेप्रभुःप्रादुर्बभूव । किंचनक्षत्राण्यश्विन्यादीनितारशब्देनताराग्रहाभौमादयस्तेआद्यायेषांतेसूर्यादयोपिसर्वेतस्यजन्मदक्षिणं (आ नूकुल्येन) उदारंचक्रुः । जन्ममुहूर्तेबहवोगुणाबभूवुरित्यर्थः ५ विशेषांतरमाह । यस्यांद्वादश्यांहरेर्जन्मतस्यामहन्येवविदुः तदाचमध्यंदिनगतःसविताऽतिष्ठत् । अनेनअभिजिन्मुहूर्तेजन्मोक्तम् । सा चद्वादशीविजयानामप्रोक्तेत्यन्वयः ६ शंखादयो(नेदुरितिशेषः)येतेषांचित्रतुर्याणांचनिर्घोषोऽभवत् ७ देवामनवइत्यादीनांकुसुमैःसमवाकिरन्नितितृतीयेनान्वयः ८ ९ १० (प्रजापतिःकश्यपः) ११

श्लोकाः १/११

॥ श्रीशुकउवाच ॥ इत्थंविरिंच्यस्तुतकर्मवीर्यःप्रादुर्बभूवामृतभूरदित्याम् ॥ चतुर्भुजःशंखगदाब्जचक्रःपिशंगवासानलिनायतेक्षणः १ श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजःपुमान् ॥ श्रीवत्सवक्षावलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः २ मधुव्रतव्रातविघुष्टयास्वयाविराजितःश्री वनमालयाहरिः ॥ प्रजापतेर्वेश्मतमःस्वरोचिषाविनाशयन्कंठनिविष्टकौस्तुभः ३ दिशःप्रसेदुःसलिलाशयास्तदाप्रजाःप्रहृष्टाऋतवोगुणान्विताः ॥ द्यौरंतरिक्षंक्षितिरग्निजिह्वागावोद्विजाःसंजहृषुर्नगाश्च ४ श्रोणायांश्रवणद्वादश्यांमुहूर्तेऽभिजितिप्रभुः ॥ सर्वेनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् ५ द्वा दश्यांसविताऽतिष्ठन्मध्यंदिनगतोनृप ॥ विजयानामसाप्रोक्तायस्यांजन्मविदुर्हरेः ६ शंखदुंदुभयोनेदुर्मृदंगपणवानकाः ॥ चित्रवादित्रतूर्याणांनिर्घोष स्तुमुलोऽभवत् ७ प्रीताश्चाप्सरसोऽनृत्यन्गंधर्वप्रवराजगुः ॥ तुष्टुवुर्मुनयोदेवामनवःपितरोग्नयः ८ सिद्धविद्याधरगणाःसकिंपुरुषकिंनराः ॥ चारणा यक्षरक्षांसिसुपर्णाभुजगोत्तमाः ९ गायंतोतिप्रशंसंतोनृत्यंतोविबुधानुगाः ॥ अदित्याआश्रमपदंकुसुमैःसमवाकिरन् १० दृष्ट्वाऽदितिस्तंनिजगर्भसंभवं परंपुमांसंमुदमापविस्मिता ॥ गृहीतदेहंनिजयोगमायया प्रजापतिश्चाहजयेतिविस्मितः ११

चूर्णिका ॥५६॥

॥ श्रीशुकउवाच ॥ एवंब्रह्मणास्तुतः भगवान् चतुर्भुजः शंखगदाब्जचक्रः पीतवासाः १ श्रीवत्सवक्षाः २ वनमालयायुतः कंठनिविष्टकौस्तुभः हरिः प्रादुरभूत् ३ तदादिशः प्रसेदुः सलिलाशयाःप्रजाश्चप्रहृष्टाः द्यौः अंतरिक्षंक्षितिः देवाः गावः द्विजाः पर्वताःजहृषुः ४ हरेः प्रादुर्भावसमयमाह श्रवणद्वादश्यांश्रवणस्थेचंद्रेअभिजिन्नक्षत्रेप्र भुःप्रादुर्बभूव सर्वेनक्षत्रग्रहाःजन्ममुहूर्तेबहुगुणाःबभूवुः ५ यस्यांद्वादश्यांहरेर्जन्मजातंतस्यांमध्यंदिनंगतः सूर्यः आसीत् विजयानामसाप्रोक्ता ६ तदाशंखादयोनेदुः ७ वाद्यना दः अभूत् अप्सरसःननृतुः गंधर्वाःजगुः ८ मुनयः तुष्टुवुः देवादयः अदित्याश्रमपदंकुसुमैः अवाकिरन् ९ १० अदितिःतंदृष्ट्वामुदंआप कश्यपः जयइत्याह ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विस्मयांतरमाह । यत्तदिति । यद्वपुर्हरिरधारयत्प्रकटितवान् । तेनवपुषामातापित्रोः संपश्यतोरेववामनोवटुर्बभूव । दिव्यगतिःअद्भुतचेष्टितः । स्वयंकथंभूतःअव्यक्तचिद्रूपः । कथमधारयत् । भातिर्दीप्तिः (साच) विभूषणानिच आयुधानिचतैर्व्यक्तम् यथाभवतितथा १२ कर्माणिजातकर्मादीनि १३ १४ वनस्पतिर्वनानांपतिःसोमः १५ (वेदगर्भोब्रह्मा) १६ (यक्षराट्कुबेरः) पात्रिकां भिक्षापात्रम् १७ एवंसंभावितोमारिषःश्रेष्ठोबटुर्ब्रह्मवर्चसेनब्रह्मर्षिगणैःसंजुष्टांतांसभामतिक्रम्यारोचत १८ (तत्रवह्निंसमिद्धंप्रज्वलितंकृत्वापरिसमूहनंचकृत्वा) १९ यदर्थंबटुर्बभूवतदाह । श्रुत्वेत्यादियावत्समाप्ति । यजमानंयजंतम् । भृगूणांभृगुभिरुपकल्पितैःप्रवर्तितैःअखिलेनसारेणबलेनसंभृतःसंपूर्णः(गांपृथ्वीं) २० नर्मदायाउत्तरेतटेभृगुकच्छसंज्ञकेक्षेत्रेक्रतूत्तमंप्रवर्तयंतोयेबलेर्ऋत्विजोभृगवस्तेतं व्यचक्षतअपश्यन्आरात्समीपएवउदितंरविमिव २१ तेऋत्विगादयःसूर्यःकिलेत्येवमादिव्यर्तकयन्नितिशेषः २२ हयमेधवाटंअश्वमेधमंडपंविवेश २३ (मौंज्यामुंजैर्निर्मितया) उपवीताजिनंउपवीतवद्धृतंअजिनमेवउत्तरंउत्तरीयंयस्यतम् (माययामाणवकंबटुम्) २४

श्लोकाः १२/२४

यत्तद्वपुर्भातिविभूषणायुधैरव्यक्तचिद्व्यक्तमधारयद्धरिः ॥ बभूवतेनैवसवामनोबटुःसंपश्यतोर्दिव्यगतिर्यथानटः १२ तंबटुंवामनंदृष्ट्वामोदमानामहर्षयः ॥ कर्माणिकारयामासुःपुरस्कृत्यप्रजापतिम् १३ तस्योपनीयमानस्यसावित्रींसविताऽब्रवीत् ॥ बृहस्पतिर्ब्रह्मसूत्रंमेखलांकश्यपोऽददात् १४ ददौकृष्णाजिनंभूमिर्दंडंसोमोवनस्पतिः ॥ कौपीनाच्छादनंमाताद्यौश्छत्रंजगतःपतेः १५ कमंडलुंवेदगर्भःकुशान्सप्तर्षयोददुः ॥ अक्षमालांमहाराजसरस्वत्यव्ययात्मनः १६ तस्माइत्युपनीताययक्षराट्पात्रिकामदात् ॥ भिक्षांभगवतीसाक्षादुमाऽदादंबिकासती १७ सब्रह्मवर्चसेनैवसभांसंभावितोबटुः ॥ ब्रह्मर्षिगणसंजुष्टामत्यरोचतमारिषः १८ समिद्धमाहितंवह्निंकृत्वापरिसमूहनम् ॥ परिस्तीर्यसमभ्यर्च्यसमिद्भिरजुहोद्द्विजः १९ श्रुत्वाश्वमेधैर्यजमानमूर्जितंबलिंभृगूणामुपकल्पितैस्ततः ॥ जगामतत्राखिलसारसंभृतोभारेणगांसंनमयन्पदेपदे २० तंनर्मदायास्तटउत्तरेबलेर्यऋत्विजस्तेभृगुकच्छसंज्ञके ॥ प्रवर्तयंतोभृगवःक्रतूत्तमंव्यचक्षताराडुदितंयथारविम् २१ तऋत्विजोयजमानःसदस्याहतत्विषोवामनतेजसानृप ॥ सूर्यःकिलायात्युतवाविभावसुःसनत्कुमारोथदिदृक्षयाक्रतोः २२ इत्थंसशिष्येषुभृगुष्वनेकधावितर्क्यमाणोभगवान्सवामनः ॥ छत्रंसदंडंसजलंकमंडलुंविवेशबिभ्रद्धयमेधवाटम् २३ मौंज्यामेखलयावीतमुपवीताजिनोत्तरम् ॥ जटिलंवामनंविप्रंमायामाणवकंहरिम् २४

चूर्णिका

हरिः यद्वपुः पूर्वंदधारतेनवपुषापित्रोः पश्यतोरेववामनोबटुर्बभूव १२ ऋषयः बटुंदृष्ट्वाकश्यपंपुरस्कृत्यकर्माणिकारयामासुः १३ उपनीयमानस्यतस्यवामनस्यसूर्यःसावित्रींअब्रवीत् बृहस्पतिःब्रह्मसूत्रम् कश्यपः मेखलाम् १४ भूमिः अजिनम् सोमःदंडम् माताकौपीनम् द्यौः छत्रम् १५ ब्रह्माकमंडलुम् सप्तर्षयः कुशान् सरस्वतीअक्षमालाम् १६ कुबेरःभिक्षापात्रीम् उमाभिक्षांददौ १७ एवंबटुः वामनः ब्रह्मवर्चसेनअरोचत १८ ततः बटुः वह्निंसमिध्यपरिसमुह्यपरिस्तीर्याभ्यर्च्यसमिद्भिः अजुहोत् १९ एतर्हि अश्वमेधैर्यजंतंबलिंश्रुत्वातत्रजगाम २० ततःनर्मदोत्तरतीरेभृगुकच्छक्षेत्रेयज्ञंप्रवर्तयंतःभृगवः रविमिवभास्वरंतंदृष्ट्वाव्यतर्कयन् २१ अहोक्रतुदिदृक्षयासूर्यः अग्निः सनत्कुमारोवाआयातिकिम् २२ एवंभृगुषुवितर्कयत्सुवामनः हयमेधमंडपंविवेश २३ भृगवः तंवामनंजटिलंमौंजीमेखलायुक्तंवीक्ष्यउत्थायअग्निभिः सहप्रत्यगृह्णन् २४

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

संक्षिप्ताअभिभूताःसंतः २५ रूपस्यअनुरूपाअवयवायस्यतंदृष्ट्वेतिशेषः २६ (मुक्तसंगानामपिमनोरमम्) २७ चंद्रमौलिश्चेत्यन्वयः । अप्यर्थेचकारः ।' चंद्रमौलिरपिगंगारूपंयन्मूर्ध्नादधारेत्यर्थः २८ हे आर्यत्वात्त्वांसाक्षात्प्रत्यक्षंब्रह्मर्षीणांतपएवमन्ये । कथंभूतंतपः । वपुर्धरंमूर्तिधारि २९ ३० त्वच्चरणावनेजनैर्वार्भिः हतमंहोयस्यतस्यमे पुनीतापवित्रीकृता ३१ मेमत्तःप्रतीच्छगृहाण हेअर्हत्तमपूज्यतम (गुणवत्समृद्धियुक्तम् । मृष्टंशुद्धम् । अन्नंचपेयंचक्षीरादि) ३२ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांअष्टादशोऽध्यायः १८ ॥ ॥ ७ ॥ ॥ ऊनंविंशेतुहरिणायाचितेचपदत्रये । प्रतिश्रुतेचबलिनाजानन्भृगुरवारयत् १ (ससूनृतम्प्रियवचनसहितम्) ॥१॥ दातुःस्तुतिःस्वयंतुष्टिरित्यादिप्रस्तुतोचितम् । वक्तव्यमितिभिक्षूंस्तुशिक्षयन्नाहवामनः । वचस्तवैतदितिषोडशभिः । हेजन देव । सांपरायेपारलौकिकेधर्मेपितामहश्चप्रह्लादःप्रमाणम् २ निःसत्त्वस्यलक्षणम् । योद्विजातयेयाचकायप्रत्याख्यातानददामीतिवक्ता । कृपणस्यलक्षणम् (ददामीति) प्रथमंप्रतिश्रुत्य योवानदातेति ३

श्लोकाः २९/३

प्रविष्टंवीक्ष्यभृगवःसशिष्यास्तेसहाग्निभिः ॥ प्रत्यगृह्णन्समुत्थायसंक्षिप्तास्तस्यतेजसा २५ यजमानःप्रमुदितोदर्शनीयंमनोरमम् ॥ रूपानुरूपावयवंतस्मा आसनमाहरत् २६ स्वागतेनाभिनंद्याथपादौभगवतोबलिः ॥ अवनिज्यार्चयामासमुक्तसंगमनोरमम् २७ तत्पादशौचंकलिकल्मषाहंसधर्मविन्मूर्ध्न्य दधात्सुमंगलम् ॥ यद्देवदेवोगिरिशश्चंद्रमौलिर्दधारमूर्ध्नापरयाचभक्त्या २८ ॥ बलिरुवाच ॥ स्वागतंतेनमस्तुभ्यंब्रह्मन्किंकरवामते ॥ ब्रह्मर्षीणांत पःसाक्षान्मन्येत्वाऽऽर्यवपुर्धरम् २९ अद्यनःपितरस्तृप्ताअद्यनःपावितंकुलम् ॥ अद्यस्विष्टःक्रतुरयंयद्भवानागतोगृहान् ३० अद्याग्नयोमेसुहुतायथा विधिद्विजात्मजत्वच्चरणावनेजनैः ॥ हतांहसोवार्भिरियंचभूरहोतथापुनीतातनुभिःपदैस्तव ३१ यद्यद्वटोवांच्छसितत्प्रतीच्छमेत्वामर्थिनंविप्रसुतानुत र्कये ॥ गांकांचनंगुणवद्धाममृष्टंतथान्नपेयमुतवाविप्रकन्याम् ॥ ग्रामान्समृद्धांस्तुरगान्गजान्वारथांस्तथार्हत्तमसंप्रतीच्छ ३२ ॥ ॥ इतिश्रीभाग वतेमहापुराणेअष्टमस्कंधेऽष्टादशोऽध्यायः १८ ॥ ॥ श्रीशुकउवाच ॥ इतिवैरोचनेर्वाक्यंधर्मयुक्तंससूनृतम् ॥ निशम्यभगवान्प्रीतःप्रतिनंद्येदमब्रवी त् १ ॥ श्रीभगवानुवाच ॥ वचस्तवैतज्जनदेवसूनृतंकुलोचितंधर्मयुतंयशस्करम् ॥ यस्यप्रमाणंभृगवःसांपरायेपितामहःकुलवृद्धःप्रशांतः २ नह्येतस्मिन् कुलेकश्चिन्निःसत्त्वःकृपणःपुमान् ॥ प्रत्याख्याताप्रतिश्रुत्ययोवाऽदाताद्विजातये ३

घूर्णिका

२५ यजमानोबलिस्तस्मैबटवेआसनंदत्वा २६ स्वागतेनअभिवंद्यतत्पादौअवनिज्यआनर्च २७ जन्मकल्मषापहंतत्पादशौचंगंगारूपंमूर्ध्निधृत्वाऽऽह २८ हेब्रह्मन्तेस्वा गतंतुभ्यंनमःतवकिंकरवाम २९ अद्यनः पितरः तृप्ताः कुलंचपावितम् अयंक्रतुः स्विष्टः यतः त्वंगृहान् आगतः ३० अद्यमेअग्नयः सुहुताः त्वत्पदैः मेभूमिः पवित्री कृता ३१ हेबटोयद्वांछसितत्मेमत्तः गृहाण त्वां अर्थिनंतर्कये गांकांचनंगुणवद्धाम अन्नंपेयंकन्यांग्रामान्तुरगगजरथान्इदंसर्वंहेसाधोमत्तःगृहाण ३२ ॥ इत्यष्टमेअष्टा दशः १८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एवंधर्मयुक्तंबलेर्वाक्यंश्रुत्वाप्रीतःवामनःइदंआह १ हेजनदेवएतत्तववचः कुलोचितंसूनृतंधर्मयुक्तंचास्ति २ अस्मिन्कुलेकश्चित्कृपणःनिःसत्त्वःब्राह्मणायददामित्युक्त्वाप्रत्याख्यातापिन ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तीर्थदानावसरे । यत् यस्मिन् युष्मत्कुले ४ यतोयस्मिन्जातः (एकोऽसहायः) ५ क्ष्मोद्धारेभूम्याउद्धरणे ६ ७ ८ पराग्दृशोबहिर्दृष्टेः ९ अतोहृदयेस्थितंमांनज्ञास्यतीत्येवंनिश्चित्यश्वासानिलें ऽतर्हितःसूक्ष्मोदेहोयस्य । विविग्नमतिकंपितंचेतोयस्य । अकंपितचित्तइतिवास्तवोर्थः १० (शून्यंस्वामिरहितंपरिमृश्यविचार्य) नददर्शअंतःप्रविष्टत्वात् ११ (अन्विष्टंगवेषितम्) पुमान्यतःसका शान्नावर्तततद्ब्रह्मैवनूनंगतःनित्यमुक्तत्वादितिवास्तवोर्थः (एवंमृत्युपर्यंतमखंडंविष्णोर्वैरंयत्कृतवान्तदुचितमेव । तस्याप्रतिद्वंद्वस्यमहाबलपराक्रमस्यशूराहंमानविजृंभितक्रोधानुबंधस्य) १२ कथंनामा सौशूरशिरोमणिर्जीवन्नेवकातरवद्वैरमुपेक्षितवानित्याशंक्याह (वैरेति) वैरानुबंधएतावान्आमृत्योर्भवति (वैरिणिमृतेतुसनोचितइत्यर्थः) देहिनांदेहेनिगूढाभिमानवतांशूराणाम् । तथाहंमानेनो पबृंहितोमन्युश्चभवत्येवतावत् । यतोऽज्ञानप्रभवःअज्ञाननिवृत्तेःप्राक्पौरुषत्यागोमांद्यमेवेत्यर्थः १३ तदेवंपूर्वजान्स्तुत्वाततित्पितरंस्तौति । पितेति (तवपिता) द्विजवेषधारिणोमद्वैरिणोदेवाएतेनतुद्वि जाइतिविद्वानपिसयाचितःसन्स्वीयमायुरपिदेवेभ्योपिवैरिभ्योददौ (यतोद्विजवत्सलः) १४ १५ ममपदासंमितानीतित्रिविक्रमपदाभिप्रायेण । नचानृतवादःतत्रापिस्वपदत्वानपगमात् १६

॥५९॥

श्लोकाः ४/१६

नसंतितीर्थेयुधिवाऽर्थिनाऽर्थिताःपराङ्मुखायेत्वमनस्विनोनृपाः ॥ युष्मत्कुलेयद्यशसाऽमलेनप्रह्लादउद्भातियथोडुपःखे ४ यतोजातोहिरण्याक्षश्चरन्ने
कइमांमहीम् ॥ प्रतिवीरंदिग्विजयेनाविंदतगदायुधः ५ यंविनिर्जित्यकृच्छ्रेणविष्णुःक्ष्मोद्धारआगतम् ॥ नात्मानंजयिनंमेनेतद्वीर्यंभूर्यनुस्मरन् ६ निशम्यतद्वधं
भ्राताहिरण्यकशिपुःपुरा ॥ हंतुंभ्रातृहणंक्रुद्धोजगामनिलयंहरेः ७ तमायांतंसमालोक्यशूलपाणिंकृतांतवत् ॥ चिंतयामासकालज्ञोविष्णुर्मायाविनांव
रः ८ यतोयतोहंतत्रासौमृत्युःप्राणवतामिव ॥ अतोहमस्यहृदयंप्रवेक्ष्यामिपराग्दृशः ९ एवंसनिश्चित्यरिपोःशरीरमाधावतोनिर्विविशेऽसुरेंद्र ॥ श्वासानि
लांतर्हितसूक्ष्मदेहस्तत्प्राणरंध्रेणविविग्नचेताः १० सतन्निकेतंपरिमृश्यशून्यमपश्यमानःकुपितोननाद ॥ क्ष्मांद्यांदिशःखंविवरान्समुद्रान्विष्णुंविचिन्वन्न
ददर्शवीरः ११ अपश्यन्नितिहोवाचमयाऽन्विष्टमिदंजगत् ॥ भ्रातृहामेगतोनूनंयतोनावर्ततेपुमान् १२ वैरानुबंधएतावानामृत्योरिहदेहिनाम् ॥ अज्ञानप्र
भवोमन्युरहंमानोपबृंहितः १३ पिताप्रह्लादपुत्रस्तेतद्विद्वान्द्विजवत्सलः ॥ स्वमायुर्द्विजलिंगेभ्योदेवेभ्योऽदात्सयाचितः १४ भवानाचरितान्धर्माना
स्थितोगृहमेधिभिः ॥ ब्राह्मणैःपूर्वजैःशूरैरन्यैश्चोद्दामकीर्तिभिः १५ तस्मात्त्वत्तोमहीमीषद्वृणेहंवरदर्षभात् ॥ पदानित्रीणिदैत्येंद्रसंमितानिपदामम १६

चूर्णिका

किंच दानकालेयुद्धेच अर्थिना अर्थिताःत्वत्कुलजाः पराङ्मुखाःन यत्रप्रह्लादः यशसाचंद्रइवरेजे ४ यत्रजातोहिरण्याक्षः दिग्विजयेप्रतियोद्धारंनाविंदत ५ यंनिर्जि त्यविष्णुः तद्वीर्यंस्मरन् नात्मानंजयिनंमेने ६ ततः हिरण्यकशिपुः भ्रातृवधंश्रुत्वाहरेः निलयंजगाम ७ आयांतंदैत्यं आलोक्यविष्णुः चिंतयामास ८ यतोयतोऽहंतत्रासौ मृत्युः अतोऽस्यहृदयंप्रवेक्ष्यामि ९ एवंनिश्चित्यरिपोः शरीरंविवेश १० दैत्यः तत्रहरिमपश्यन्क्रुद्धः ननाद ततःक्ष्मादिषुविष्णुंविचिन्वन्नददर्श ११ एवमपश्यन्नाहमेभ्रातृहा विष्णुः यतः पुमान्नावर्ततेतद्ब्रह्मैवगतः १२ १३ किंच तेपिताविरोचनः द्विजैर्याचितःसन्द्विजलिंगेभ्योदेवेभ्यः स्वमायुरदात् १४ १५ हेबले एवंभूतकुलोत्पन्नात्त्वत्त ईषत्महींममपदातुल्यानित्रीणिपदानिवृणे १६

॥५९॥

Nepal Sanskrit University...

CC-0. In Public Domain. Digitization by eGangotri

टीका

यावदर्थएवप्रतिग्रहोयस्यसः (यावताप्रतिग्रहेणस्वप्रयोजनंसिध्यतितावतःप्रतिग्रहादित्यर्थः) १७ ईश्वरस्यापियाच्ञाप्रकारमुक्त्वाबलेर्बंधनप्रश्नोत्तरत्वेनतस्यगर्वातिरेकेणाधिक्षेपप्रकारमाह । अहोइति त्रिभिः । तववाचोवृद्धानांसंमताः (हेब्राह्मणपुत्र) त्वंतुबालोबालिशमतिश्च बालिशानामज्ञानांमतिरिवमतिर्यस्य । अतएवस्वार्थंप्रतियथावदबुधः । वस्तुतोबालइव । अबालिशमतिश्चेतिच्छेदः । स्वार्थंप्रत्यबुधइतिचभक्तानामेवार्थंबुध्यसेनतुस्वार्थं (बुध्यसे) परिपूर्णस्यतवतद्व्यतिरेकेणस्वार्थाभावादित्यर्थः १८ अबुधत्वमेवाहमामिति । द्वीपस्यदाशुषंदातारम् । अबुद्धिमान् । वस्तुतस्तुबुद्धिमानित्येवच्छेदः १९ कामंयथेच्छम् (वस्तुतः) सम्यक्पादप्रसारणेनेत्यर्थः अतएवतथाकरिष्यति२०पुनरपिनिस्पृहत्वमेवाविःकुर्वन्नाह । यावंतइतिसप्तभिः (अजितेंद्रियंलुब्धम्) २१ (क्रमैः पदन्यासैः) नवखंडसमेतेनद्वीपेनापि । सप्तानांद्वीपवराणांइच्छया२२तृष्णायाअंतंनगताइत्यस्माभिःश्रुतम् (कामैर्विषयभोगैः) २३ असंतुष्टस्तुसंपादितैस्त्रिभिर्लोकैरपिनसुखंवर्तते (असंतोषेहेतुःअजितात्मेति) २४ २५ आशुशुक्षणिरग्निः २६ सिद्धःकृतार्थः । एतावतैवसर्वस्वापहारसिद्धेरितिगूढोभिप्रायः । तदेवाह । वित्तंहियावत्प्रयोजनमेवसुखम् । अधिकस्यक्लेशावहत्वादित्यर्थः २७ २८ २९

श्लोकाः १७/२९

नान्यत्तेकामयेराजन्वदान्याज्जगदीश्वरात् ॥ नैनःप्राप्नोतिवैविद्वान्यावदर्थप्रतिग्रहः १७ ॥ बलिरुवाच ॥ अहोब्राह्मणदायादवाचस्तेवृद्धसंमताः ॥ त्वंबालोबालिशमतिःस्वार्थंप्रत्यबुधोयथा १८ मांवचोभिःसमाराध्यलोकानामेकमीश्वरम् ॥ पदत्रयंवृणीतेयोऽबुद्धिमान्द्वीपदाशुषम्१९ नपुमान्मामुपव्रज्यभूयोयाचितुमर्हति ॥ तस्माद्वृत्तिकरींभूमिंबटोकामंप्रतीच्छमे २० ॥ श्रीभगवानुवाच ॥ यावंतोविषयाःप्रेष्ठास्त्रिलोक्यामजितेंद्रियम् ॥ नशक्नुवंतितेसर्वेप्रतिपूरयितुंनृप २१ त्रिभिःक्रमैरसंतुष्टोद्वीपेनापिनपूर्यते ॥ नववर्षसमेतेनसप्तद्वीपवरेच्छया २२ सप्तद्वीपाधिपतयोनृपावैन्यगयादयः ॥ अर्थैःकामैर्गतानांतंतृष्णायाइतिनःश्रुतम्२३ यदृच्छयोपपन्नेनसंतुष्टोवर्ततेसुखम्॥नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः२४ पुंसोऽयंसंसृतेर्हेतुरसंतोषोर्थकामयोः ॥ यदृच्छयोपपन्नेनसंतोषोमुक्तयेस्मृतः २५ यदृच्छालाभतुष्टस्यतेजोविप्रस्यवर्धते ॥ तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः २६ तस्मात्त्रीणिपदान्येववृणेत्वद्वरदर्षभात्॥ एतावतैवसिद्धोहंवित्तंयावत्प्रयोजनम् २७॥ श्रीशुकवाच ॥ इत्युक्तःसहसन्नाहवांछातःप्रतिगृह्यताम् ॥ वामनायमहींदातुंजग्राहजलभाजनम् २८ विष्णवेक्ष्मांप्रदास्यंतमुशनाअसुरेश्वरम् ॥ जानंश्चिकीर्षितंविष्णोःशिष्यंप्राहविदांवरः २९

चूर्णिका

वदान्यात्त्वत्तः नान्यत्कामये यावदर्थपरिग्रहःविद्वानेनःनप्राप्नोति १७ ॥ बलिरुवाच ॥ अहोब्राह्मणपुत्रत्वंबालः स्वार्थंप्रत्यबुधः असि १८ द्वीपदातारंमांवचोभिः आराध्ययःपदत्रयंवृणीतेसः अबुधः १९ यतः पुमान्मांउपव्रज्यपुनर्याचितुंनार्हति तस्माद्धेबटोवृत्तिकरींभूमिंगृहाण २० ॥ वामनउवाच ॥ हेराजन्त्रैलोक्येयावंतो विषयाः संति तेअजितेंद्रियंयाचकंपूरयितुंनसमर्थाः २१ किंच पदत्रयेणयः असंतुष्टः सः वर्षेणद्वीपेनापिचनतुष्यति २२ एवंवैन्यादिनृपाः अर्थकामैः तृष्णांतंनगताः इतिश्रुतम् २३ यदृच्छयोपपन्नेनसंतुष्टःसुखंवर्तते असंतुष्टस्तुन २४ किंच पुंसोऽसंतोषः संसृतिहेतुः संतोषस्तुमुक्तयेस्मृतः २५ तथायदृच्छालाभतुष्टस्यविप्रस्यतेजः वर्द्धतेअसंतोषान्नश्यति २६ तस्मात्त्रिपदान्येववृणे एतावतैवासिद्धोऽहम् २७ ॥ श्रीशुकउवाच ॥ एवमुक्तःबलिःहसन्आह हेबटोवांछातः प्रतिगृह्यताम् एवमुक्त्वावामनायमहींदातुंजलपात्रंजग्राह २८विष्णवेक्ष्मांप्रदास्यंतंशिष्यंशुक्रः उवाच २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३० अनयोअन्यायः ३१ अन्यायमेवाह । एषतइति (आच्छिद्यआकृष्य) ३२ ननुमयापदत्रयमेवप्रतिश्रुतंनाधिकंतत्राह त्रिभिरिति । क्रमतामितिचेत्तत्राहसर्वस्वामिति ३३तथापिप्रतिश्रुतंसंपादनीयमे वेतिचेत्तत्राह । क्रमतइद्वितााभ्याम् एकेनपादन्यासेनगांभूमिमाक्रममाणस्येत्यर्थः तार्तीयस्यतृतीयपादन्यासस्य ३४ ३५ तथापिसर्वस्वदानात्कीर्तिस्तावद्भविष्यतीतिचेत्तत्राह । नतद्दानमिति (वृत्ति र्जीवनंविपद्यतेनश्यति) तपश्चित्तैकाग्र्यं कर्मपूर्तादि ३६ (अर्थायकोशवृद्धये । कामायभोगाय) ३७ ननुतर्हिंप्रतिश्रुत्यनेतिकथमनृतंवाच्यंतत्राहसार्धैःषड्भिः । अत्रापिसत्यानृतव्यवस्थायाम् बह्वृचैर्ऋग्वे दिभिः । बह्वृचश्रुत्याहिप्रथमम्। 'ओमितिसत्यंनेत्यनृत'मित्यादिनासत्यानृतयोर्लक्षणपूर्वकंस्तुतिनिंदाभ्यांसत्यंविहितंअनृतंचनिषिद्धम्। तदनंतरंच । 'पराग्वाएतद्रिक्तमक्षर'मित्यादिनासत्येदोषान्अनृ तेचगुणानुक्त्वा'तस्मात्कालएवदद्यात्कालेनदद्यात्सत्यानृतेमिथुनीकरोती'त्युपसंहारेणवृत्तिसंकटादिष्वनृतमप्यनुज्ञातम् । तमिमंश्रुत्यर्थंदर्शयन्नाह। ओमित्यंगीकारेणयत्प्रोक्तंतत्सत्यम् । नेतियदाहतदे वानृतम् ३८ तत्तुसत्यमीषदनृतंविनानसिध्यतीत्याशयेनाह । सत्यमिति । सत्यंआत्मवृक्षस्यदेहरूपस्यवृक्षस्यपुष्पफलंविद्यात्जानीयात् । कुतः । गीयतेश्रुत्योच्यतइत्यर्थः । पाठांतरंतुसुगमम् । य द्यपिश्रुत्यावाचःसत्यंपुष्पंफलंचेत्युक्तंतथापिवाचोदेहनिर्वाहाधीनत्वात्आत्मवृक्षस्येतिप्रस्तुतानुसारेणोक्तम् । भवतुपुष्पफलस्थानीयंसत्यंततःकिमतआह । वृक्षेदेहेअजीवतितत्पुष्पफलंनस्यात्। सानस्या दितिपाठेश्रुत्युक्तायावाचापरामर्शःअतोदेहश्चानृतेनरक्षणीयइत्याह । अनृतंत्वात्मनोदेहस्यमूलम् (यथावृक्षेरक्षितेपुनःपुनःपुष्पफलसिद्धिःतथासंकटेऽनृतेनापिदेहेरक्षितेसत्यलाभःस्यादेवेतिभावः) ३९

श्लोकाः ३०–३९

॥ शुक्रउवाच ॥ एषवैरोचनेसाक्षाद्भगवान्विष्णुरव्ययः ॥ कश्यपाददितेर्जातोदेवानांकार्यसाधकः ३० प्रतिश्रुतंत्वयैतस्मैयदनर्थमजानता ॥ नसा धुमन्येदैत्यानांमहानुपगतोऽनयः ३१ एषतेस्थानमैश्वर्यंश्रियंतेजोयशःश्रुतम् ॥ दास्यत्याच्छिद्यशक्रायमायामाणवकोहरिः ३२ त्रिभिःक्रमैरिमाँल्लोकान् विश्वकायःक्रमिष्यति ॥ सर्वस्वंविष्णवेदत्त्वामूढवर्तिष्यसेकथम् ३३ क्रमतोगांपदैकेनद्वितीयेनदिवंविभोः॥ खंचकायेनमहतातार्तीयस्यकुतोगतिः ३४ निष्ठांतेनरकेमन्येह्यप्रदातुःप्रतिश्रुतम् ॥ प्रतिश्रुतस्ययोऽनीशःप्रतिपादयितुंभवान् ३५ नतद्दानंप्रशंसंतियेनवृत्तिर्विपद्यते ॥ दानंयज्ञस्तपःकर्मलोकेवृ त्तिमतोयतः ३६धर्मायायशसेऽर्थायकामायस्वजनायच ॥ पंचधाविभजन्वित्तमिहामुत्रचमोदते ३७ अत्रापिबह्वृचैर्गीतंशृणुमेऽसुरसत्तम ॥ सत्यमोमि तियत्प्रोक्तंयन्नेत्याहानृतंहितत् ३८ सत्यंपुष्पफलंविद्यादात्मवृक्षस्यगीयते ॥ वृक्षेऽजीवतितन्नस्यादनृतंमूलमात्मनः ३९

चूर्णिका

हेवैरोचनेएषः साक्षाद्विष्णुः देवानांकार्यसाधकः कश्यपात् आदित्यांजातः ३० किंच अस्मैयत्प्रतिश्रुतंतत् अहंसाधुनमन्ये ३१ एषः त्वत्तः स्थानैश्वर्यादिकंआच्छि द्यइंद्रायदास्यति ३२ अयंविश्वकायः त्रिभिः क्रमैः इमान्लोकान्क्रमिष्यति हेमूढविष्णवेसर्वस्वंदत्वाकथंवर्त्तिष्यसे ३३ एकेनपादन्यासेनभूमिंद्वितीयेनदिवंकायेनखंक्रम माणस्यवटोः तृतीयपादन्यासस्यकागतिः ३४ किंच प्रतिज्ञातं अप्रदातुः तेनरकेस्थितिंमन्ये ३५ येनवृत्तिः विपद्यतेतद्दानंनप्रशंसंति यतः वृत्तिमतः पुरुषात्दानंयज्ञः तपः कर्मंचभवति ३६ अपिच धर्मायायशसेऽर्थायकामायस्वजनायचवित्तंविभजन्पुमान्इहामुत्रचमोदते ३७ अपिचबह्वृचश्रुत्यासत्यानृतयोः व्यवस्थाप्रतिपादिता साचवृत्तिसंकटादिपुअनृतमपिननिषिद्धमिति तच्च अत्रापिबह्वृचैर्गीतंशृणु ओमितिसत्यंप्रोक्तंनेतिअनृतम् ३८देहवृक्षस्यमूलंअनृतम् पुष्पफलंसत्यं अतःदेहेजीवतितन्नस्यात् ३९

Nepal Sanskrit University ...

CC-0. In Public Domain. Digitization by eGangotri

टीका

(...वदृष्टांतेनस्पष्टयति । तद्यथावृक्षउत्पाटितमूलःशुष्यतिअचिरादेवोद्वर्ततेपततिच । एवंनष्टमनृतंयस्यसःआत्मादेहःशुष्येत् (संकटेसर्वथात्यक्तानृतश्चेन्म्रीयेतेत्यर्थः) यद्यपिचश्रुत्या (एवमेवानृतं वदन्नात्मानमाविर्मूलंकरोतीति) एवंनिंदयानृतंनिषिद्धम् । तथाप्युपसंहारानुसारेणतत्केवलानृतविषयमित्यभिप्रेत्यैवंव्याख्यातम् दयेतत्वेतेनेतिचतत्रैवोक्तेः । तथाचश्रुतिः ' ओमितिसत्यंनेत्यनृतंतदेत त्पुष्पंफलंवाचोयत्सत्यंसहेश्वरोयशस्वीकल्याणकीर्तिर्भवितापुष्पंहिफलंवाचःसत्यंवदत्यथैतन्मूलंवाचोयदनृतम् तद्यथावृक्षआविर्मूलःशुष्यतिसउद्वर्ततएवमेवानृतंवदन्नाविर्मूलंआत्मानंकरोतिसशुष्यतिसउ द्वर्ततेतस्मादनृतंनवदेद्दयेतत्वेतेने' तिच एतेनअनेनतुअनृतेनदयेतसंकटेष्वात्मानंरक्षेतितिदितिश्रुत्यर्थः ४० सर्वथासत्यवचनेदेहोननिर्वहेदितिस्फुटीकर्तुंसत्यस्यदोषान्अनृतस्यचगुणानाह । परागितिद्वा भ्याम् । यतओमित्यक्षरंतत्रिक्तम् । पराक्परांचतिदूरेअर्थंगृहीत्वाव्रजतीतिपराक् । रिक्तमितियत्श्रुतिपदम् (तस्य) व्याख्यानंअपूर्णंवैइति । तत्तस्मादर्थिनेयत्किंचिदोमितिदास्यामीतिब्रूयात्ते नीरच्येतन्यूनोभवेत् ४१ किंचभिक्षवेसर्वमोंकुर्वन्दास्यामीत्यंगीकुर्वन्आत्मनेकामेननालंपर्याप्तोनभवतिस्वस्यभोगोनसिध्यतीत्यर्थः । तथाचश्रुतिः । ' पराग्वाएतद्रिक्तमक्षरंयदेतदोमितितद्यत्किंचोमि त्याहात्रैवास्मैतद्रिच्यतेसयत्सर्वमोंकुर्याद्रिच्यादात्मानंसकामेभ्योनालंस्यादिति ' नेतियदनृतंवचःएतत्पूर्णंअर्थव्ययाभावात् । अभ्यात्मंचेतिचकारान्वयः आत्मनोभिमुखमन्यस्यार्थमाकर्षतीत्यभ्या त्मम् । योहिनित्यंममकिंचिदपिनास्तिसीदामीतिब्रूतेसहितेनानृतेनपरेषामर्थानाकर्षतीतिप्रसिद्धम् ४२ ननुतर्हिइदमनृतमेवसर्वदासेव्यंस्यान्नेत्याहसर्वमिति । यथाचश्रुतिः ' अथैतत्पूर्णमभ्यात्मंयन्ने'ति ब्रूयात्सयत्सर्वंनेतिब्रूयात् । पापिकास्यकीर्तिर्जायेतसैनंतत्रैवहन्यादिति ४२ अतोवृत्तिसंकटादिष्वनृतंनदोषायेत्युपसंहरति । स्त्रीषुप्रोत्साहनेनवशीकारे । नर्मेनर्मणिपरिहासे । विवाहेचवरादि स्तुतौ । गवांब्राह्मणानांचहितार्थंहिंसायांचकस्यचित्प्राप्तायाम् । तथाचयाज्ञवल्क्यः । वर्णिनांहिवधोयत्रतत्रसाक्ष्यनृतंवदेदिति । तथाचश्रुतिः ' तस्मात्कालएवदद्यात्कालेनदद्यात्तत्सत्यानृतेमिथुनी करोती'ति ४३ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांवामनप्रादुर्भावएकोनविंशोध्यायः ॥ १९ ॥ ॥ ७ ॥ ॥ विंशेत्वनृतभीतोसौज्ञात्वापिकपटंहरेः । ददावेवततोविष्णुः सहसाऽवर्धताद्भुतम् ॥ १ ॥ (सत्रीगृहपतिःसमावित्यमरः) १

श्लोकाः ४०/१

तद्यथावृक्षउन्मूलःशुष्यत्युद्वर्ततेऽचिरात् ॥ एवंनष्टानृतःसद्यआत्माशुष्येन्नसंशयः ४० पराग्रिक्तमपूर्णंवाअक्षरंयत्तदोमिति ॥ यत्किंचिदोमितिब्रूयात्ते नरिच्येतवैपुमान् ४१ भिक्षवेसर्वमोंकुर्वन्नालंकामेनचात्मने ॥ अथैतपूर्णमभ्यात्मंयच्चनेत्यनृतंवचः ४२ सर्वंनेत्यनृतंब्रूयात्सदुःकीर्तिःश्वसन्मृतः ॥ स्त्रीषुनर्मेविवाहेचवृत्त्यर्थेप्राणसंकटे ॥ गोब्राह्मणार्थेहिंसायांनानृतंस्याज्जुगुप्सितम् ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवामनप्रादुर्भावएकोन विंशोध्यायः ॥ १९ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ बलिरेवंगृहपतिःकुलाचार्येणभाषितः ॥ तूष्णींभूत्वाक्षणंराजन्नुवाचावहितोगुरुम् १

चूर्णिका

यथाउत्पाटितमूलोवृक्षः सद्यः शुष्यति पततिच एवंनष्टानृतोदेहः ४० तस्मात् अर्थिनेयत्किंचिद्दास्यामीतिब्रूयात्तेनन्यूनोभवेत्ः ४१ अतः नेत्यनृतंवचएवपूर्णम् अन्या र्थाकर्षकंच ४२ ननुतर्हिअनृतमेवसर्वदासेव्यंस्यात् नेत्याह सर्वंनेत्यनृतंब्रूयात्सदुष्कीर्तिःश्वसन्मृतः स्त्रीषुनर्मविवाहेचवृत्त्यर्थेप्राणसंकटे गोब्राह्मणार्थेहिंसायांनानृतंस्याज्जु गुप्सितम् ४३ ॥ इत्यष्टमेएकोनविंशः १९ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एवंकुलगुरुणाउक्तःबलिः क्षणंतूष्णींभूत्वाउवाच १

१ तयैवोक्तेइतिपाठःमु०मु०पुस्तके । २ तस्येतिपाठांतरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवतात्वयाप्रोक्तंसत्यंकिंतत् । योऽर्थकामादिकंनवाधेतसोयंहिगृहमेधिनांधर्मइति २ कथंप्रत्याचक्षेनिराकरोमि (यथायेनप्रकारेणधूर्तःस्यात्) ३ ४ नन्वप्रत्याख्यानेदोषाउक्तास्तत्राह । नाहमिति । अधन्यात्दारिद्र्यात् । मृत्योरापि ५ किंच । यद्यद्धनादिकंतत्सर्वंसंपरेतंमृतंपुरुषंहास्यतित्यक्ष्यत्येवतत्किमितिजीवतैवस्वयंनदेयमितिभावः । तथापितावद्वृत्तिसंकटपरिहारार्थंअर्द्धंदीयतां (इत्युक्तम्) इतिचेत्तत्राह तस्येति । विप्रश्चेत्तेनार्थेनदत्तेनापिनतुष्येत्तर्हितस्यार्थस्यत्यागेदानेकिंनिमित्तंनाकिंचित् । याचितादल्पस्यदानेविप्रस्यासंतोषेणदानंव्यर्थमेवस्यात् । अतस्तद्याचितंसर्वंदेयंनाकिंचिदितिभावः ६ तर्हिनदेयमेवेतिचेत्तत्राह । श्रेयइति । दुस्त्यजैरसुभिरपि । कोविकल्पोविचारः ७ यैर्दैत्येंद्रैर्युद्धेऽनिवर्तिभिरियंभूर्बुभुजे उपभुक्ता । तेषामिहलोकान्परलोकांश्चभोगानितिवा (देहानिति) वाकालोऽग्रसीत्संहृतवान् । नतुभुवितैरधिगतंप्राप्तंयशोऽग्रसीत् । अतःकीर्तिरेवसाध्यानान्यदितिभावः ८ देहत्यागादपिधनत्यागेकीर्तिरधिकेत्याह । सुलभाइति । तनुंत्यजंतीतितनुत्यजःतथा । तीर्थेपात्रेअतोतिदुष्करोधनत्यागएवमयाकार्यइतिभावः ९ तर्हिनिर्धनत्वेनदैन्यंस्यादितिचेत्तत्राह । मनस्विनइति । यादृशतादृशानामप्यर्थिनांकामोपनयेनकामपूरणेनदुर्गतिर्दैन्यमितियत्तच्छोभनंभद्रमेव । भवादृशानांतुकामोपनयेनदुर्गतिःशोभनमितिकिंपुनर्वक्तव्यमित्यर्थः १० ननुनायंबटुःकिंतुविष्णुस्तवशत्रुरित्युक्तंतर्हिसुतरामेवदास्यामीत्याहयजंतीति परःशत्रुर्वास्तु ११ (ब्रह्मतनुंब्राह्मणतनुंतत्रापिभीतंवस्तुतःपरब्रह्ममूर्तिमभीतम्) १२

श्लोकाः २/१२

॥ बलिरुवाच ॥ सत्यंभगवताप्रोक्तंधर्मोऽयंगृहमेधिनाम् ॥ अर्थंकामंयशोवृत्तिंयोनबाधेतकर्हिचित् २ सचाहंवृत्तिलोभेनप्रत्याचक्षेकथंद्विजम् ॥ प्रतिश्रुत्यददामीतिप्राह्लादिःकितवोयथा ३ नह्यसत्यात्परोऽधर्मइतिहोवाचभूरियम् ॥ सर्वंवोढुमलंमन्येऋतेऽलीकपरंनरम् ४ नाहंबिभेमिनिरयान्नाधन्यादसुखार्णवात् ॥ नस्थानच्यवनान्मृत्योर्यथाविप्रप्रलंभनात् ५ यद्यद्धास्यतिलोकेऽस्मिन्संपरेतंधनादिकम् ॥ तस्यत्यागेनिमित्तंकिंविप्रस्तुष्येन्नतेनचेत् ६ श्रेयःकुर्वंतिभूतानांसाधवोदुस्त्यजासुभिः ॥ दध्यङ्शिबिप्रभृतयःकोविकल्पोधरादिषु ७ यैरियंबुभुजेब्रह्मन्दैत्येंद्रैरनिवर्तिभिः ॥ तेषांकालोऽग्रसील्लोकान्नयशोधिगतंभुवि ८ सुलभायुधिविप्रर्षेह्यनिवृत्तास्तनुत्यजः ॥ नतथातीर्थआयातेश्रद्धयायेधनत्यजः ९ मनस्विनःकारुणिकस्यशोभनंयदर्थिकामोपनयेनदुर्गतिः ॥ कुतःपुनर्ब्रह्मविदांभवादृशांततोबटोरस्यददामिवांछितम् १० यजंतियज्ञक्रतुभिर्यमादृताभवंतआम्नायविधानकोविदाः ॥ सएषविष्णुर्वरदोऽस्तुवापरोदास्याम्यमुष्मैक्षितिमीप्सितांमुने ११ यद्यप्यसावधर्मेणमांबध्नीयादनागसम् ॥ तथाप्येनंनहिंसिष्येभीतंब्रह्मतनुंरिपुम् १२

चूर्णिका हेगुरोत्वयाप्रोक्तोयंगृहमेधिनांधर्मः सत्यः २ अहोप्राह्लादिः अहंदास्यामीतिप्रतिज्ञायवृत्तिलोभेनकथंप्रत्याचक्षे ३ किंच असत्यात्परः अधर्मःनेतिइयंभूः उवाच अलीकंनरंऋतेसर्वंसोढुमलंमन्ये ४ अतोऽहंनरकदारिद्र्यादिभ्यः मृत्योश्चतथानबिभेमियथाविप्रप्रलंभनात् ५ ६किंच साधवः दध्यङ्शिबिप्रभृतयःदुस्त्यजैःप्राणैरपिभूतानांश्रेयःकुर्वंति किंपुनर्धरादिषुविचारः ७ किंच यैः दैत्यैः इयंभूः उपभुक्ता तेषांलोकान्भोगांश्चकालःअग्रसीत्नतुयशः अतः कीर्तिरेवसाध्या ८ अन्यच्चयुद्धेतनुत्यागिनःसुलभाःयथातथापात्रेप्राप्तेधनत्यागिनःन ९ अपिच शूरस्यदयालोः पुंसः आर्थिनांकामपूरणेनयत्दैन्यंतत्भद्रमेव किंपुनर्भवादृशानां दानेन १०अतः एषःविष्णुः शत्रुर्वास्तु अस्मै ईप्सितांक्षितिंदास्यामि ११ यद्यपिअनागसंमांअसाव धर्मेणबध्नीयात्तथापिएनंभीतंरिपुंनहिंसिष्येइति १२

CC-0. In Public Domain. Digitization by eGangotri

टीका

यद्यदियशोनजिहासतितर्हियुद्धेअयंमामांहत्वाएनांभूमिंहरेत् (एवंमयानिहतः) शयीतवा । नितरांज्ञातःसन्ममचित्तेशयीतेतिवास्तवोर्थः (तस्मादस्याभीप्सितंदास्याम्येवेतिभावः) १३ अश्र द्धितंअजातश्रद्धम् १४ १५ १६ जालकंमुक्ताभरणविशेषस्तम् (मालिनी । मौक्तिकमालावती) । अवनेजनींनामपां भृतम् (पाद्योदकेन पूर्णं) कलशम् १७ १८ (आर्यंज्ञानवृद्धंअसुरेंद्रम्) १९ (रिपुरितिविद्वानपिजगत्त्रयमपि) २० अवर्द्धत । वांच्छातःप्रतिगृह्यतामितिबलिनापूर्वमुक्तत्वात् । गुणत्रयमात्मनियस्यतत् । अतएवभूःखमित्यादयोयद्यस्मिन्आसतास्थितवंतः २१, ऋत्विगादिस हितोबलिस्तस्यहरेःकायेएतद्विश्वंददर्श २२ तदेवप्रपंचयति रसामितिपादोनैःसप्तभिः (रसामधस्तलम्) मारुतंगणंवायुसंघम् । इंद्रस्यसेनैवसेनायस्यसःइंद्रपदेस्थितत्वात् । अचष्टऐक्षत २३ आत्मा स्वयंबलिमुख्योयेषांतानसुरान् (जघनेऐक्षदपश्यत्) ऋक्षमालांनक्षत्रपंक्तिम् २४

एषवाउत्तमश्लोकोनजिहासतियद्यशः ॥ हत्वामैनांहरेद्युद्धेशयीतनिहतोमया १३ ॥ श्रीशुकउवाच ॥ एवमश्रद्धितंशिष्यमनादेशकरंगुरुः ॥ शशापदै
वप्रहितःसत्यसंधंमनस्विनम् १४ दृढंपंडितमान्यज्ञःस्तब्धोस्यस्मदुपेक्षया ॥ मच्छासनातिगोयस्त्वमचिराद्भ्रश्यसेश्रियः १५ एवंशप्तःस्वगुरुणास
त्यान्नचलितोमहान् ॥ वामनायददावेनामर्चित्वोदकपूर्वकम् १६ विंध्यावलिस्तदागत्यपत्नीजालकमालिनी ॥ आनिन्येकलशंहैममवनेजन्यपांभृतम्
१७ यजमानःस्वयंतस्यश्रीमत्पादयुगंमुदा ॥ अवनिज्यावहन्मूर्ध्नितदपोविश्वपावनीः १८ तदाऽसुरेंद्रंदिविदेवतागणागंधर्वविद्याधरसिद्धचारणाः ॥
तत्कर्मसर्वेपिगृणंतआर्यंप्रसूनवर्षैर्ववृषुर्मुदान्विताः १९ नेदुर्मुहुर्दुंदुभयःसहस्रशोगंधर्वकिंपूरुषकिंनराजगुः ॥ मनस्विनाऽनेनकृतंसुदुष्करंविद्वानदाद्य
द्रिपवेजगत्त्रयम् २० तद्वामनंरूपमवर्धताद्भुतंहरेरनंतस्यगुणत्रयात्मकम् ॥ भूःखंदिशोद्यौर्विवराःपयोधयस्तिर्यङ्नृदेवाऋषयोयदासत २१ का
येबलिस्तस्यमहाविभूतेःसहर्त्विगाचार्यसदस्यएतत् ॥ ददर्शविश्वंत्रिगुणंगुणात्मकेभूतेंद्रियार्थाशयजीवयुक्तम् २२ रसामचष्टांघ्रितलेथपादयोर्महींमही
ध्रान्पुरुषस्यजंघयोः ॥ पतत्रिणोजानुनिविश्वमूर्तेरूर्वोर्गणंमारुतमिंद्रसेनः २३ संध्यांविभोर्वाससिगुह्यऐक्षत्प्रजापतीन्जघनेआत्ममुख्यान् ॥ ना
भ्यांनभःकुक्षिषुसप्तसिंधूनुरुक्रमस्योरसिऋक्षमालाम् २४

चूर्णिका

॥ श्रीशुकउवाच ॥ एवंअनादेशकरंशिष्यंगुरुः शशाप १४ हेबलेपंडितमानी मदाज्ञातिगः त्वमसि अतः शीघ्रंश्रियः भ्रश्यसे १५ एवंगुरुणाशप्तोऽपिसत्यान्नचलितः बलिः वामनाय अर्चित्वाएनांददौ १६ तदाविंध्यावलिः हैमंजलपूर्णकलशं आनिन्ये १७ ततः स्वयंयजमानः भगवतः श्रीमत्पादयुगंमुदाप्रक्षाल्यतदपः विश्वपावनीः मूर्ध्निदधौ १८ तदासुरेंद्रंस्वर्गेदेवगंधर्वादयः तत्कर्मगृणंतः संतः पुष्पैःववृषुः १९ दुंदुभयोनेदुः गंधर्वादयोजगुः अनेनबलिनारिपवेजगत्त्रयंदत्तं इदंदुष्करंकृतम् २० एवंवदतिसातितद्वामनरूपं अद्भुतं अवर्धत यत्ररूपेभूः खंद्यौः दिशः विवराः सागरादयश्च आसत २१ ततोबलिः तस्यदेहेइदंविश्वंसकलात्मकंददर्श २२ तच्चतस्यांघ्रितले रसातलंपादयोर्महींजंघयोर्वृक्षान् जानुनिपक्षिणः ऊर्वोर्मरुतः २३ गुह्येप्रजापतीन् जघनेदैत्यान् नाभौनभः कुक्षिषुसमुद्रान् उरसिनक्षत्राणि २४

॥६४॥

१ सम्यगितिपाठंकस्मिंश्चित्पुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अंगहेराजन्समस्तान्रेफांश्चशब्दान् २५ चौश्चद्याम् २६ रसेरसने २७ रेतसोरेतसि । क्रमणेषुपादन्यासेषु । ओषधजातयऔषधिजातीश्च२८ प्राणेषु इंद्रियेषु (देवगणान्)२९(एवंसर्वात्मनींदंनिरीक्ष्या सुराःकश्मलमापुः) सुदर्शनमित्यादीनांईशंउपतस्थुरित्युत्तरेणान्वयः ३० (अक्षयाःसायकायत्रतौ) विद्याधरसंज्ञोऽसिः ३१ मीनकुंडलेमकरकुंडले । स्फुरंतिकिरीटादीनियस्यसः । ३२ मधुव्रतानांस्रजोयस्यांतयावनमालयाश्रीवत्सादिभिश्चावृतोव्याप्तः(रत्नोत्तमंकौस्तुभः) उरुक्रमत्वमेवाह।क्षितिमितिं । ३३ द्वितीयंपदंक्रमतोविक्षिपतास्त्रिविष्टपंतदीयंकिंचिन्मात्रंजातम् । तृतीयायतुनकिंचिदपि तत्रहेतुः । उरुक्रमस्यांघ्रिस्त्रिविष्टपादुपर्युरिगच्छन्महर्जनलोकाभ्यांतपसश्चपरंगतःसत्यलोकंप्राप्तः ३४ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांविंशतितमोध्यायः २० ॥

॥६५॥ श्लोकाः २५/३४

हृद्यंगधर्मस्तनयोर्मुरारेर्ऋतंचसत्यंचमनस्यथेंदुम् ॥ श्रियंचवक्षस्यरविंदहस्तांकंठेचसामानिसमस्तरेफान् २५ इंद्रप्रधानानमरान्भुजेषुतत्कर्णयोःककुभो द्यौश्चमूर्ध्नि ॥केशेषुमेघान्श्वसनंनासिकायामक्ष्णोश्चसूर्यंवदनेचवह्निम् २६ वाण्यांचछंदांसिरसेजलेशंभ्रुवोर्निषेधंचाविधिंचपक्ष्मसु ॥ अहश्चरात्रिंचपरस्यपुंसोमन्युंललाटेऽधरएवलोभम् २७ स्पर्शेचकामंनृपरेऽतसोंभःपृष्ठेत्वधर्मंक्रमणेषुयज्ञम् ॥ छायासुमृत्युंहसितेचमायांतनूरुहेष्वोषधिजातयश्च २८ नदीश्चनाडीषुशिलानखेषुबुद्धावजंदेवगणानृषींश्च ॥ प्राणेषुगात्रेस्थिरजंगमानिसर्वाणिभूतानिददर्शवीरः २९ सर्वात्मनीदंभुवनंनिरीक्ष्यसर्वेऽसुराःकश्मलमापुरंग ॥ सुदर्शनंचक्रमसह्यतेजोधनुश्चशार्ङ्गंस्तनयित्नुघोषम् ३० पर्जन्यघोषोजलजःपांचजन्यःकौमोदकीविष्णुगदातरस्विनी ॥ विद्याधरोऽसिःशतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौच ३१ सुनंदमुख्याउपतस्थुरीशंपार्षदमुख्याःसहलोकपालाः ॥ स्फुरत्किरीटांगदमीनकुंडलःश्रीवत्सरत्नोत्तममेखलांबरैः ३२ मधुव्रतस्रग्वनमालयाऽऽवृतोरराजराजन्भगवानुरुक्रमः॥क्षितिंपदैकेनबलेर्विचक्रमेनभःशरीरेणदिशश्चबाहुभिः ३३पदंद्वितीयंक्रमतस्त्रिविष्टपंनवैतृतीयायतदीयमण्वपि ॥ उरुक्रमस्यांघ्रिरुपर्युपर्यथोमहर्जनाभ्यांतपसःपरंगतः ३४ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेविंशतितमोऽध्यायः २० ॥

चूर्णिका

हृदिधर्मम् स्तनयोः ऋतसत्ये मनसिइंदुम् वक्षसिश्रियम् २५ भुजेषुलोकपालान् कर्णयोः दिशः मूर्ध्निद्यौः केशेषुमेघान् नासिकायांवायुम् अक्ष्णोः सूर्यम् मुखेअग्निम् २६ वाण्यांछंदांसि भ्रुवोविविधिंनिषेधौपक्ष्मसुअहोरात्रंललाटेमन्युंअधरेलोभम् २७ रेतसिजलंपृष्टेअधर्मंछायासुमृत्युंहास्येमायांलोमसुओषधीः २८ नाडीषुनदीः नखेषुशिलाः बुद्धौ अजंदेगवणान्ऋषींश्चइंद्रियेषुगात्रेषुस्थिरजंगमानिसर्वाणिभूतानि २९ एवंसर्वात्मनिइदं त्रिभुवनंवीक्ष्यसर्वे असुराः कश्मलंआपुः ३० तदासुदर्शनंशार्ङ्गंधनुः कौमोदकींगदाविद्याधरः आसिः तूणौसुनंदमुख्याः पार्षदाः ईशंउपतस्थुः ३१ हेराजन्तदाउरुक्रमः किरिटांगदमनिकुंडलः श्रीवत्सकौस्तुभमेखलांबरवनमालाभिः वृतः रराज ३२ ततः त्रिविक्रमःबलेः भूमिएकेनपदाविचक्रमेशरीरेणनभः बाहुभिः दिशः द्वितीयेनपदास्वर्गंतृतीयायतदीयमण्वपिनावशिष्टम् ३३ एवंउरुक्रमस्यअंघ्रिः उपर्युपरि गच्छन्महर्जनाभ्यांतपसश्चपरंसत्यलोकंगतः ३४ ॥ इत्यष्टमेविंशः २० ॥ ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकविंशेपदापूर्तिमिषेणबलिबंधनम् । विष्णुनाकृतमुत्कर्षंतस्यख्यापयितुंजने ॥ १ ॥ उरुक्रमस्यांघ्रिस्तपसःपरंगतइत्युक्तंततःकिंवृत्तंतदाह । सत्यंसत्यलोकंप्राप्तमंघ्रिंअब्जभवःसमीक्ष्याभ्यगात् (यद्वासइतिपृथक्पदम् त्यंतमंघ्रिम् ।) तथामरीच्यादयश्चेतिद्वयोरन्वयः । कथंभूतोऽब्जभवःहरेरंघ्रेर्नखाएवेंदवस्तैर्हतास्वधाम्नोद्युतिर्यस्यसः स्वयंचतैरावृतःछन्नः । हेनरदेवनृहद्व्रतायोगिनश्च १ अंगानिशिक्षादीनि । पुराणानितत्संहिताश्च । योगएवसमीरस्तेनदीपितंज्ञानमेवाग्निस्तेनरंधितंदग्धंकर्मकल्मषंकर्ममलंयेषाम् २ तेचसर्वेतमंघ्रिंववंदिरे । यस्यांघ्रेःस्मरणानुभावतःअकर्मकंकर्मभिरप्राप्यंविष्णोरंघ्रये । स्वयंयन्नाभिपंकेरुहसंभवःतस्यविष्णोरंघ्रिंसमभ्यर्च्य ३ (पादस्यावनेजनंप्रक्षालनंतेनपवित्रतयास्वर्धुन्यभूत् । यानभसिपतती) लोकत्रयंनिर्मार्ष्टिपवित्रयति ४ संक्षिप्ताउपसंहृताआत्मविभूतिःस्वविस्तारोयेनतस्मैयथापूर्वंवामनरूपेणस्थितायेत्यर्थः (बलिंपूजाम्) ५ (समर्हणैःपादक्षालनादिसाधनभूतैस्तोयैः) ६ ७ (महानुत्सवोयत्रतंविजयम् । ऋक्षाणामच्छभल्लानांराजा) ८ त्रिपदव्याजयाच्ञया त्रिपदविषययाकपटयाच्ञयास्वभर्तुर्बलेर्महींहृतांदृष्ट्वाऊचुः ९ किमूचुस्तदाह । नवैइतिसार्धैस्त्रिभिः १० (बर्हिषियज्ञेव्रतस्थत्वाद्यस्तदंडस्यनोस्माकंभर्तुः) ११ (ब्रह्मण्यस्यब्राह्मणेभ्योहितस्य) १२

॥ श्रीशुकउवाच ॥ सत्यंसमीक्ष्याब्जभवोनखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् ॥ मरीचिमिश्राऋषयोबृहद्व्रताःसनंदनाद्यानरदेवयोगिनः १ वेदोपवेदानियमायमान्वितास्तर्केतिहासांगपुराणसंहिताः ॥ येचापरेयोगसमीरदीपितज्ञानाग्निनारंधितकर्मकल्मषाः २ ववंदिरेयत्स्मरणानुभावतःस्वायंभुवंधामगताअकर्मकम् ॥ अथांघ्रयेप्रोन्नमितायविष्णोरुपाहरत्पद्मभवोऽर्हणोदकम् ॥ समर्च्यभक्त्याऽभ्यगृणाच्छुचिश्रवायन्नाभिपंकेरुहसंभवःस्वयं ३ धातुःकमंडलुजलंतदुरुक्रमस्यपादावनेजनपवित्रतयानरेंद्र ॥ स्वर्धुन्यभून्नभसियापततीनिमार्ष्टिलोकत्रयंभगवतोविशदेवकीर्तिः ४ ब्रह्मादयोलोकनाथाःस्वनाथायसमादृताः ॥ सानुगाबलिमाजह्रुःसंक्षिप्तात्मविभूतये ५ तोयैःसमर्हणैःस्रग्भिर्दिव्यगंधानुलेपनैः ॥ धूपैर्दीपैःसुरभिभिर्लाजाक्षतफलांकुरैः ६ स्तवनैर्जयशब्दैश्चतद्वीर्यमहिमांकितैः ॥ नृत्यवादित्रगीतैश्चशंखदुंदुभिनिःस्वनैः ७ जांबवान्नृक्षराजस्तुभेरीशब्दैर्मनोजवः ॥ विजयंदिक्षुसर्वासुमहोत्सवमघोषयत् ८ महींसर्वांहृतांदृष्ट्वात्रिपदव्याजयाच्ञया ॥ ऊचुःस्वभर्तुरसुरादीक्षितस्यात्यमर्षिताः ९ नवाअयंब्रह्मबंधुर्विष्णुर्मायाविनांवरः ॥ द्विजरूपप्रतिच्छन्नोदेवकार्यंचिकीर्षति १० अनेनयाचमानेनशत्रुणाबटुरूपिणा ॥ सर्वस्वंनोहृतंभर्तुर्न्यस्तदंडस्यबर्हिषि ११ सत्यव्रतस्यसततंदीक्षितस्यविशेषतः ॥ नानृतंभाषितुंशक्यंब्रह्मण्यस्यदयावतः १२

पूर्णिका ॥ श्रीशुकउवाच ॥ अथसत्यलोकेप्राप्तंअंघ्रिंवीक्ष्यब्रह्मातथामरीच्यादयः सनंदनाद्याः योगिनश्च १ वेदोपवेदनियमयमतर्केऽतिहासांगपुराणसंहिताःतत्रअगमन्ततः ववंदिरे २ अथविष्णोः प्रोन्नतायअंघ्रयेअर्हणोदकमानीयभक्त्यासमर्च्यब्रह्माअभ्यगृणात् ३ धातुः कमंडलुजलमुरुक्रमस्यपादावनेजनपवित्रतयास्वर्धुनीअभूत्सालोकत्रयंपवित्रयति ४ ततः ब्रह्मादयोलोकपालाः स्वनाथायत्रिविक्रमायबलिंदत्वा ५ तोयैः स्रग्भिः गंधपुष्पधूपदीपैः ६ स्तुतिजयशब्दवाद्यादिभिः पूजयामासुः ७ तदाजांबवान्भेरीनादैः दिक्षुमहोत्सवंअघोषयत् ८ सर्वांमहींत्रिपदयाच्ञामिषेणहृतांदृष्ट्वाक्रुद्धाः दैत्याः ऊचुः ९ अहो अयंब्रह्मबंधुर्नतर्हिद्विजरूपछन्नः विष्णुः देवकार्यंचिकीर्षति १० अनेनशत्रुरूपिणाअस्मद्भर्तुः सत्यव्रतस्यबलेःसर्वस्वंहृतम् ११ १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अनुचराश्चतेअसुराश्च १३ १४ १५ १६ (नागानांहस्तिनांअयुतंतत्तुल्यबलवंतः) १७ (पुरुषस्यभगवतोनुचरैः) १८ अर्थकृत्अनुकूलः १९ (हेदैत्याः) पौरुषैः (पुरुषकारैः) तंकाल
मतिवर्तितुंपुमानीश्वरःसमर्थोनभवति २० (तद्विपर्ययंयथास्यात्तथावर्तते) २१ २२ हरेरनुचरादेवाः । दैवेनऋद्धैःसमृद्धैर्भवद्भिः २३ अर्थत्वायआनुकूल्याय २४ (रसामधस्तलम्) २५ विपुपक्षिपुरा
जतइतिविराट्गरुडःप्रभोश्चिकीर्षितंज्ञात्वा । अयमर्थः । अस्यसर्वस्वापहारेणममेत्यभिमानंसंत्याज्येदानींदेहस्वीकारेणाहंकारमपित्याजयित्वापरमानुग्रहंकर्तुमिच्छतिनचानेनतुल्यःकोपिसत्यसंधोवीरोवास्ती
तितद्यशःप्रख्यापनार्थंकिंचित्पातयितुमपीच्छतीतिप्रभोरभिप्रायंज्ञात्वातंबबंधेति । सौत्येऽहनिसोमाभिषवदिने २६ रोदस्योर्द्यावापृथिव्योः (प्रभविष्णुनाप्रभावशीलेन) २७ (स्थिरप्रज्ञंस्थिरबुद्धिम्) २८

॥६७॥ तस्मादस्यवधेधर्मोभर्तुःशुश्रूषणंचनः ॥ इत्यायुधानिजगृहुर्बलेरनुचरासुराः १३ तेसर्वेवामनंहंतुंशूलपट्टिशपाणयः ॥ अनिच्छतोबलेराजन्प्राद्रवन् श्लोकाः
जातमन्यवः १४ तानभिद्रवतोदृष्ट्वादितिजानीकपान्नृप ॥ प्रहस्यानुचराविष्णोःप्रत्यषेधन्नुदायुधाः १५ नंदःसुनंदोथजयोविजयःप्रबलोद्बलौ ॥ कुमुदः
कुमुदाक्षश्चविष्वक्सेनःपतत्रिराट् १६ जयंतःश्रुतदेवश्चपुष्पदंतोऽथसात्वतः ॥ सर्वेनागायुतप्राणाश्चमूंतेजघ्नुरासुरीम् १७ हन्यमानान्स्वकान्दृष्ट्वापुरुषा १३/२८
नुचरैर्बलिः ॥ वारयामाससंरब्धान्काव्यशापमनुस्मरन् १८ हेविप्रचित्तेहेराहोहेनेमेश्रूयतांवचः ॥ मायुध्यतनिवर्तध्वंननःकालोयमर्थकृत् १९ यःप्रभुः
सर्वभूतानांसुखदुःखोपपत्तये ॥ तंनातिवर्तितुंदैत्याःपौरुषैरीश्वरःपुमान् २० योनोभवायप्रागासीदभवायदिवौकसां ॥ सएवभगवानद्यवर्ततेतद्विपर्ययम्
२१ बलेनसचिवैर्बुध्यादुर्गैर्मंत्रौषधादिभिः ॥ सामादिभिरुपायैश्चकालंनात्येतिवैजनः २२ भवद्भिर्निर्जिताह्येतेबहुशोनुचराहरेः ॥ दैवेनर्द्धैस्तएवाद्ययुधि
जित्वानदंतिनः २३ एतान्वयंविजेष्यामोयदिदैवंप्रसीदति ॥ तस्मात्कालंप्रतीक्षध्वंयोनोऽर्थत्वायकल्पते २४ ॥ श्रीशुकउवाच ॥ पत्युर्निगदितंश्रुत्वादै
त्यदानवयूथपाः ॥ रसांनिर्विविशूराजन्विष्णुपार्षदताडिताः २५ अथतार्क्ष्यसुतोज्ञात्वाविराट्प्रभुचिकीर्षितम् ॥ बबंधवारुणैःपाशैर्बलिंसौत्येऽहनि
क्रतोः २६ हाहाकारोमहानासीद्रोदस्योःसर्वतोदिशम् ॥ गृह्यमाणेऽसुरपतौविष्णुनाप्रभविष्णुना २७ तंबद्धंवारुणैःपाशैर्भगवानाहवामनः ॥ नष्ट
श्रियंस्थिरप्रज्ञमुदारयशसंनृप २८

चूर्णिका

अतःअस्यवधेधर्मःभर्तुःशुश्रूषणंचस्यात् एवमुक्त्वाबलेःसेवकाः १३ वामनंहंतुंआयुधानिगृहीत्वाबलेःअनिच्छतःसतः प्राद्रवन् १४ धावमानान्तान्दृष्ट्वाप्रहस्यविष्णुदूताः
१५ नंदसुनंदजयविजयप्रबलबलकुमुदकुमुदाक्षविष्वक्सेनगरुड जयंतश्रुतदेवाद्याः सर्वेनागायुतबलाः उदायुधाःसंतः दैत्यचमूंजघ्नुः १६ १७ अथबलिःस्वकान्हन्यमाना
न्दृष्ट्वाशुक्रशापंस्मरन्तान्वारयामास १८ हेविप्रचित्तेहेराहोहेनेमे मेवचःश्रूयताम् यूयंमायुद्ध्यत निवर्तध्वम् १९ अयंकालःनःअर्थकृत् न २० यःपूर्वंदेवानांअभवायआसी
त् सःकालःअद्यविपरीतोवर्तते २१ किंच अयंजनःबलसचिवबुद्धिदुर्गादिभिः सामाद्युपायैश्चकालंनअत्येति २२ हेदैत्याःएतेदेवाःपूर्वंबहुशःजिताः अधुनाएतेनःजित्वानदंति ॥६७॥
२३ यदिअस्मद्दैवंप्रसीदतितर्हिएतान्जेष्यामः तावत्यूयंप्रतीक्षध्वम् २४ ॥ श्रीशुकउवाच ॥ एवंबलेर्वचःश्रुत्वादैत्यादानवाः पार्षदैस्ताडिताःसंतःरसांविविशुः २५ अथग
रुडः प्रभुचिकीर्षितंज्ञात्वाबलिंवारुणैःपाशैःसोमाभिषवदिनेबबंध २६ तदाद्यावापृथिव्योहाहाकारःआसीत् २७ ततःपाशैः बद्धंउदारयशसंबलिंवामनः आह २८

CC-0. In Public Domain. Digitization by eGangotri

टीका

(दत्तानिप्रतिश्रुतानि) २९ असौसूर्यः (तावत्येवतवेयंभूःअतःकिंदास्यसीतिभावः) ३० मयाआत्मनेत्यन्वयः । व्यापिनेत्यर्थः । खंचदिशश्चतनोस्तन्वा (आक्रांताः) तेस्वंत्वदीयंसर्वस्वम् (तद्रूपः स्वर्लोकः) ३१ गुरुणाशुक्रेणानुमोदितःसन् ३२ सएवमुक्तोपिनिरयपरिहारार्थंस्वर्गाद्भ्रंशपरिहारार्थंचमनोरथंकुर्वंतंप्रत्याह । वृथेति । यःप्रतिश्रुतस्यअदानेनयाचकंविप्रलंभतेतस्यमनोरथोवृथैव । स्वर्गश्चतस्यदूरएव । सचाधःपतत्येव ३३ त्वयाचाहंविप्रलब्धःतस्मादलीकफलंअनृतस्यफलंनिरयंभुंक्ष्व ३४ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांबलिनिग्रहोनामैकविंशोध्यायः २१ ॥ ७ ॥ ॥२१॥
द्वाविंशेतुप्रसन्नःसन्प्रस्थाप्यसुतलंबालिम् । दत्वावरान्हरिर्नूनंमत्त्वातद्द्वारपोऽभवत् ॥१॥ समर्पिततनूवित्तनिर्मलाचलभक्तितः । च्छलितोबलिनाचित्रंस्वमेवार्पयदच्युतः ॥२॥ विप्रकृतःअपहृतः । भिद्यमानःसत्याच्चाल्यमानः १ हेउत्तमश्लोकेतिकटाक्षः । ममवचईरितंप्रतिश्रुतंनतावद्व्यलीकंत्वयाकपटेनवामनतयाभिक्षित्वारूपांतरस्याविःकृतत्वात् । एवमपियदिभवान्व्यलीकंमन्यतेतथापि (तत्) ऋतमेवाहंकरोमि मेशीर्ष्णिनिजंतृतीयंपदंकुरु मदुक्तंप्रलंभनंनभवेत् । नचद्वाभ्यांविश्वंक्रांतवतस्तवमेशिरःपादपर्याप्तंनभवतीतिमन्येथाः । वित्तेनचेत्पदद्वयंजातंतर्हीदमधिकमेवस्यात् । वित्तादपिवित्तवतोऽधिकत्वाद् ॥६८॥
दितिभावः २ ननुच "आपदर्थेधनंरक्षेद्दारान्रक्षेद्धनैरपि । आत्मानंसततंरक्षेद्दारैरपिधनैरपी" त्यादिवचनादात्मभयपरिहारायसर्वस्वंत्यज्यतेत्वंतुकुतोभीतःसन्आत्मानमर्पयसीत्यतआहबिभेमीति । स्थानभ्रष्टोप्यहंअसाधुवादादपकीर्तेर्यथाभृशमुद्विजेतथानिरयादिभ्योनाबिभेमि । व्यसनादुःखात् । अर्थकृच्छ्रात्दारिद्र्यात् । निग्रहाद्दंडादपि ३

श्लोकाः

पदानित्रीणिदत्तानिभूमेर्मह्यंत्वयासुर ॥ द्वाभ्यांक्रांतामहीसर्वातृतीयमुपकल्पय २९ यावत्तपत्यसौगोभिर्यावदिंदुःसहोडुभिः ॥ यावद्वर्षतिपर्जन्यस्ताव
तीभूरियंतव ३० पदैकेनमयाऽऽक्रांतोभूर्लोकःखंदिशस्तनोः ॥ स्वर्लोकस्तुद्वितीयेनपश्यतस्तेस्वमात्मना ३१ प्रतिश्रुतमदातुस्तेनिरयेवासइष्यते ॥ वि २९/३
शत्वंनिरयंतस्माद्गुरुणाचानुमोदितः ३२ वृथामनोरथस्तस्यदूरस्वर्गःपतत्यधः ॥ प्रतिश्रुतस्यादानेनयोऽर्थिनंविप्रलंभते ३३ विप्रलब्धोददामीतित्वयाहंचा
ढ्यमानिना ॥ तद्व्यलीकफलंभुंक्ष्वनिरयंकतिचित्समाः ३४ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेबलिनिग्रहोनामैकविंशोऽध्यायः २१ ॥ ७ ॥
॥ श्रीशुकउवाच ॥ एवंविप्रकृतोराजन्बलिर्भगवताऽसुरः ॥ भिद्यमानोप्यभिन्नात्माप्रत्याहाविक्लवंवचः १ ॥ बलिरुवाच ॥ यद्युत्तमश्लोकभवान्ममेरितं
वचोऽव्यलीकंसुरवर्यमन्यते ॥ करोम्यृतंतन्नभवेत्प्रलंभनंपदंतृतीयंकुरुशीर्ष्णिमेनिजम् २ बिभेमिनाहंनिरयात्पदच्युतोनपाशबंधाद्व्यसनादुरत्ययात् ॥ नै
वार्थकृच्छ्राद्भवतोविनिग्रहादसाधुवादाद्भृशमुद्विजेयथा ३

चूर्णिका

हेबलेत्वयाभूमेःत्रिपदानिमेदत्तानि तेसर्वामहीद्वाभ्यांक्रांतातृतीयंकल्पय २९ यावत् असौसूर्यःगोभिःतपतितावतीतवभूमिः ३० एवंतेभूर्लोकः एकेनपदाक्रांतः ३१ तन्वाखंदिशःद्वितीयेनस्वर्लोकः तृतीयस्यअभावात् प्रतिश्रुतं अदातुस्तेनरकवासःइष्टः अतः गुर्वनुमोदितः सन्नरकंविश ३२ किंच विप्रलब्धोददामीतित्वयाऽहंचाढ्यमानिना तद्व्यलीकफलंभुंक्ष्वनिरयंकतिचित्समाः ३३ ३४ ॥ इत्यष्टमेएकविंशः २१ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एवंभगवतासत्त्वात्चाल्यमानः बलिः अविकलंवचआह १ ॥६८॥
॥ बलिरुवाच ॥ हेभगवन् मेप्रतिज्ञातंमिथ्यानयतः त्वयावामनतयाभिक्षित्वारूपांतरस्याविष्कृतत्वात् अथापित्वंयदिमिथ्यामन्यसेतर्हि ऋतंकरोमिमेशीर्ष्णितृतीयंपदंकुरु २
हेभगवन् अहंनिरयात्दुःखात् भवन्निग्रहात्चनविभेमि असाधुवादात्यथा ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुमयानिग्रहात्तवापकीर्तिर्जातैवनैवेत्याह । पुंसामिति । अर्हत्तमैरर्पितम् । यंदंडंमात्रादयोपिनह्यादिशंतिनैवार्पयंति । हितैषिणात्वयानिगृहीतोहंश्लाघ्यएवास्मीतिभावः ४ नन्वहंदेवानांहितैषीनासुराणांतत्राह । त्वमिति । पारोक्ष्यःशत्रुच्छलेनवर्तमानः (चक्षुर्दृष्टिम्) ५ शत्रुत्वंपुनर्भक्तानिवास्माननुगृहीतुमेवेत्याहयस्मिन्निति । उअहो । हप्रसिद्धम् ६ अतोनात्रममतल्लजानापिदुःखमित्याह । तेनगुरुणाभवता ७ किंच । योयंदंडरूपोममानुग्रहस्त्वयाकृतः सत्वद्भक्तपौत्रत्वेननत्वहमनुग्रहस्यपात्रमित्याशयेनाहपितामहइति । भवदीयानांसंमतःयतःआविःकृतःसाधुवादोयस्य । त्वमेवपरमआश्रयोयस्यसः । अतोभवतोविपक्षेणविद्विषाहिरण्यकशिपुनाविचित्रंवैशसंहिंसांप्रापितोपिदेहादीनामसारतांनिश्चित्याकुतोभयंध्रुवंचभवतःपादपद्ममेवप्रपेदे अथतस्मादहमपिदैवेनतस्यैवभाग्येनतवांतिकंनीतइतिचतुर्णामन्वयः ८ (आत्मनादेहेन) अंततःआयुषोंते । रिक्थहारैःपुत्रैः । इहगेहेषुकेवलमायुषोव्ययएवनतुसुखंकिंचित् ९ सप्रसिद्धोमहान्स्वपक्षंदैत्यकुलंक्षपयतीतितथातस्यापि १० (अथतस्मादहमपिदैवेनतवांतिकंनीतः) प्रसभंबलात्त्याजिताश्रीर्यस्य । ययाश्रियास्तब्धमतिःसन्पुमानिदंजीवितमध्रुवंनबुध्यते । कथंभूतम् । कृतांतस्यांतिकवर्ति । मृत्योःसंनिहितम् ११ राकापतिःपूर्णेंदुः १२ (इंद्रसेनोबलिः) अंजनत्विषंश्यामम् १३ स्वकृताहंकारादिरूपापराधस्मरणेनसव्रीडंनिचीनमधोमुखंयस्यसः १४

पुंसांश्लाघ्यतमंमन्येदंडमर्हत्तमार्पितम् ॥ यंनमातापिताभ्रातासुहृदश्चादिशंतिहि ४ त्वंनूनमसुराणांनःपारोक्ष्यःपरमोगुरुः ॥ योनोऽनेकमदांधानांविभ्रं
शंचक्षुरादिशत् ५ यस्मिन्वैरानुबंधेनरूढेनविबुधेतराः ॥ बहवोलेभिरेसिद्धिंयामुहैकांतयोगिनः ६ तेनाहंनिगृहीतोस्मिभवताभूरिकर्मणा ॥ बद्धश्ववारु
णैःपाशैर्नातिव्रीडेनचव्यथे ७ पितामहोमेभवदीयसंमतःप्रह्लादआविष्कृतसाधुवादः ॥ भवद्विपक्षेणविचित्रवैशसंसंप्रापितस्त्वत्परमःस्वपित्रा ८ किमात्म
नाऽनेनजहातियोंततःकिंरिक्थहारैःस्वजनाख्यदस्युभिः ॥ किंजाययासंसृतिहेतुभूतयामर्त्यस्यगेहैःकिमिहायुषोव्ययः ९ इत्थंसनिश्चित्यपितामहोमहान
गाधबोधोभवतःपादपद्मम् ॥ ध्रुवंप्रपेदेह्यकुतोभयंजनाद्भीतःस्वपक्षक्षपणस्यसत्तमः १०अथाहमप्यात्मरिपोस्तवांतिकंदैवेननीतःप्रसभंत्याजितश्रीः ॥ इदंकृ
तांतांतिकवर्तिजीवितंयथाऽध्रुवंस्तब्धमतिर्नबुध्यते ११ श्रीशुकउवाच ॥ तस्येत्थंभाषमाणस्यप्रह्लादोभगवत्प्रियः ॥ आजगामकुरुश्रेष्ठराकापतिरिवो
त्थितः १२ तमिंद्रसेनःस्वपितामहंश्रियाविराजमानंनलिनायतेक्षणम् ॥ प्रांशुंपिशंगांबरमंजनत्विषंप्रलंबबाहुंसुभगंसमैक्षत १३ तस्मैबलिर्वारुणपाशयं
त्रितःसमर्हणंनोपजहारपूर्ववत् ॥ ननाममूर्ध्नाऽश्रुविलोललोचनःसव्रीडनिचीनमुखोबभूव १४

चूर्णिका

किंच श्रेष्ठैःअर्पितंदंडंअहंसाधुमन्येयतः मात्रादयः तंदंडंनार्पयंति ४ किंच त्वंअसुराणांनः शत्रुच्छलेनवर्तमानःगुरुःअसि ५ यस्मिन्त्वयिवैरानुबंधनेबहवोदैत्याः सिद्धिंप्राप्ताः ६ तेनगुरुणात्वयानिगृहीतः बद्धश्चाहंनातिव्रीडेनचव्यथे ७ किंच मेपितामहः प्रह्लादः पित्राहिंसांप्रापितोऽपि ८ देहादीनामसारतांनिश्चित्यतेध्रुवंचरणारविंदंप्रपेदे ९ १० अतः तस्यैवभाग्येन अहंतवांतिकंनीतः ११ ॥ श्रीशुकउवाच ॥ एवंबलेःउक्तवतः सतः प्रह्लादः आजगाम १२ ततःपाशबद्धोबलिःतस्मैपूर्ववत्पूजांनजहारकेवलंमूर्ध्ना ननाम १३ किंच स्वकृताहंकारादिरूपापराधस्यस्मरणेनसव्रीडावाङ्मुखोबभूव १४

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

शिरसानमन्नेवउपेत्यमूर्ध्नाननाम । बलेस्तत्कृतमनुग्रहंदृष्ट्वापुलकैरश्रुभिश्चविक्लवोविह्वलः १५ त्वयैवेति । नहिऐंद्रंपदमेतदीयंत्वयापहृतंकिंतुस्वीयमेवपुनःस्वीकृतंतच्चशोभनमेवकृतम् । तत्रहेतुः मन्यइति यद्यस्मात् (श्रियः) श्रीरूपात्आत्ममोहनाद्विभ्रंशितः १६ मोहनत्वमेवाह । ययाश्रियाविद्वानपियतःसंयतोपिमुह्यतेतत्तस्यांसत्यांकोन्यःपुमानात्मनोगतिंतत्त्वंयथावत्विचष्टेपश्यति । तस्मैमहाकारुणिकाय १७ तस्यप्रह्लादस्यानुशृण्वतःउवाचेतिकिंचिद्वक्तुंप्रवृत्तइत्यर्थः १८ तदैवाविंध्यावलिरपिवक्तुंप्रवृत्ता । तांचसंमानयन्हिरण्यगर्भःक्षणंतूष्णींस्थितःअतस्तस्याएववाक्यंप्रथममवतारयति । बद्धंवीक्ष्येति १९ त्रिजगतःकर्तुःप्रभोःपालकस्यअस्यतःसंहर्तुश्चईश्वरस्यतवान्येकिंआवहंतिकिंसमर्पयंति । त्वयाअवरोपिते (विचालितः) कर्तृवादःकर्तारःस्वतंत्रावयमितिवादमात्रमपियेषांते । तथापित्यक्तलज्जास्तत्रस्वाम्यंकुर्युः । अयंभावः । लोकत्रयंमयार्पितंतृतीयपादायदेहंसमर्प्यप्रतिश्रुतंऋतंकरोमीतिदेहादिषुस्वाम्याविःकारेणब्रुवन्नयंकुबुद्धिर्निर्लज्जश्च । यतस्त्वमेवसर्वस्यापिस्वामीअतोमंदबुद्धिमेनंकेवलंकृपयाविमुच्यपालयेति २० तदेवंप्रह्लादस्यविंध्यावलेश्चपरमार्थोक्त्याप्रसन्नोऽभूद्धरिःब्रह्मातुलोकदृष्टचैवविज्ञापयति (भगवदभिप्रायप्रकाशनाय) भूतभावनेतित्रिभिः २१ निग्रहानर्हत्वेहेतुःकृत्स्नेति । सर्वस्वमेवाहआत्मेतिअविक्लवयाअविह्वलया २२

॥७०॥

श्लोकाः १५/२२

सतत्रहासीनमुदीक्ष्यसत्पतिंसुनंदनंदाद्यनुगैरुपासितम् ॥उपेत्यभूमौशिरसामहामनानानामभूर्ध्नापुलकाश्रुविक्लवः १५ ॥ प्रह्लादउवाच ॥ त्वयैवदत्तंपदमैंद्रमूर्जितंहृतंतदेवाद्यतथैवशोभनम् ॥ मन्येमहानस्यकृतोह्यनुग्रहोविभ्रंशितोयच्छ्रियआत्ममोहनात् १६ ययाहिविद्वानपिमुह्यतेयतस्तत्कोविचष्टेगतिमात्मनोयथा ॥ तस्मैनमस्तेजगदीश्वरायवैनारायणायाखिललोकसाक्षिणे १७ ॥ श्रीशुकउवाच ॥ तस्यानुशृण्वतोराजन्प्रह्लादस्यकृतांजलेः ॥ हिरण्यगर्भोभगवानुवाचमधुसूदनम् १८ बद्धंवीक्ष्यपतिंसाध्वीतत्पत्नीभयविह्वला ॥ प्रांजलिःप्रणतोपेंद्रंबभाषेऽवाङ्मुखीनृप १९ ॥ विंध्यावलिरुवाच ॥ क्रीडार्थमात्मनइदंत्रिजगत्कृतंतेस्वाम्यंतुतत्रकुधियोऽपरईशकुर्युः ॥ कर्तुःप्रभोस्तवकिमस्यतआवहंतित्यक्तह्रियस्त्वदवरोपितकर्तृवादाः २० ॥ ब्रह्मोवाच ॥ भूतभावनभूतेशदेवदेवजगन्मय ॥ मुंचैनंहृतसर्वस्वंनायमर्हतिनिग्रहम् २१ कृत्स्नातेऽनेनदत्ताभूर्लोकाःकर्मार्जिताश्चये ॥ निवेदितंचसर्वस्वमात्माऽविक्लवयाधिया २२

चूर्णिका

ततःप्रह्लादः वामनंवीक्ष्यननाम १५ ॥ प्रह्लादउवाच ॥ हेभगवन् अस्मैत्वयाइंद्रपदंदत्तंततूत्हृतम् तच्चशोभनंकृतम् अहोत्वयाएषः श्रीमदात्भ्रंशितःअयंमहान् अनुग्रहःकृतइत्यहं मन्ये १६ एवंकृपालवेतुभ्यंनमः १७ ॥ श्रीशुकउवाच ॥ प्रह्लादस्यशृण्वतः सतःब्रह्माभगवंतंकिंचिद्वक्तुंप्रवृत्तः तदैवाविंध्यावलिरपिवक्तुंप्रवृत्ता तांसंमानयन्सःब्रह्माक्षणंतूर्ष्णींस्थितः १८ ततः साविंध्यावलिःबद्धंपतिंवीक्ष्यप्रांजलिःसती उपेंद्रंबभाषे १९ हेईश इदंजगत् त्वयाक्रीडार्थंकृतम् तत्रान्येकुबुद्धयःस्वाम्यंकुर्युः अस्तुहेईश अयंबलिःएवंवदतिकिंतत् मयातेलोकत्रयंअर्पितंतृतीयपादायदेहंसमर्प्यप्रतिश्रुतंसत्यंकरोमीत्येवंदेहादिषुस्वाम्याविष्कारेणब्रुवन् अयंकुबुद्धिःनिर्लज्जःयतःत्वमेवसर्वस्वामी अतः मंदबुद्धिंएनंकेवलंकृपयापालय २० ॥ ब्रह्मोवाच ॥ हेदेवदेवहृतसर्वस्वंएनंमुंचमुंच अयंनिग्रहंनार्हति २१ अनेनतुभ्यंभूःसर्वस्वंदेहश्चनिवेदितः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यस्यतवपादयोःसलिलमात्रमपिप्रदायसर्वोपिजनःउत्तमांगातिंप्राप्नोति । तस्मैतुभ्यमसौबलिःत्रिलोकींदाश्वान्दत्तवान्आर्तिंकथंप्राप्नुयात् २३ तस्यविशःअर्थान् । नन्वर्थापहारः
तदेवकैमुत्यन्यायेनाह कोयमनुग्रहःतत्राह । यन्मदःयैरर्थैर्मदोयस्यसःअतएवस्तब्धःअनम्रःसन् । मदस्तंभहेतूनामर्थानामपहारएवानुग्रहइत्यर्थः२४दुर्लभंमनुष्यजन्मकथंचिल्लब्धवतोजीवस्यजन्मादिनिमित्तोगर्वोमहाहानिकरस्त
स्यचनाशोमदनुग्रहादेवेत्याह।यदेतिद्वाभ्याम्अनीशःपरतंत्रःसन्निजैःकर्मभिर्नानायोनिषुकृमिकीटादिषुसंसरन्२५तत्रपौरुष्यांगतौन्मादिभिरस्ययदिस्तंभोनवभेत्तर्हिअयंमदनुग्रहएव २६ कथंतर्हिध्रुवादि
भ्योर्थसंपदोददासीतिचेच्छृणु । मानस्तंभःअनम्रतातस्यनिमित्तभूतानांसमंततःसर्वश्रेयःप्रतिकूलानांजन्मादीनांसत्त्वेपिजन्मादिभिरितिवा हंत हेब्रह्मन्मत्परोनमुह्येत् । अतोभक्तस्येच्छयासंपदोपिददामि
(दैवयोगादिच्छायामपिरागद्वेषाभावान्नमोहः) अभक्तस्तुमुह्येदेवेतितदपहाररूपमेवतस्यानुग्रहंकरोमीतिभावः २७ अस्यचेदानींमत्परत्वादन्यैर्दुःप्रापमपिदास्यामीतिवक्तुंतस्यमोहाभावमाह एषइतित्रिभिः ।
(नजयोयस्यास्तां । अतःसीदन्स्थानंमाप्नुवन्) २८ (क्षीणंरिक्थंधनंयस्य । क्षिप्तःतिरस्कृतः अनुयापितःविशत्वंनिरयंतस्मादित्यादिना) २९ नह्येतस्मिन्कुलेकश्चिन्निःसत्वःकृपणःपुमानित्यादिना
छलैरेवमयाधर्मउक्तःतथापितंधर्ममयंनत्यजतिअतःसत्यवाक् ३० मेमया । अहमेवाश्रयःपालकोयस्यसः ३१ स्थानंप्रापितइतियदुक्तंतदेवस्थानमाह । तावत्सावर्णिमन्वंतरपर्यंतंसुतलमध्यास्ताम् ।
तत्राधिवसत्वित्यर्थः । यद्यस्मिन्निवसतांआध्यादयोममेक्षयानसंभवंति ३२

श्लोकाः २३/३२

यत्पादयोरशठधीःसलिलंप्रदायदूर्वांकुरैरपिविधायसतींसपर्याम् ॥ अप्युत्तमांगतिमसौभजतेत्रिलोकींदाश्वानविक्लवमनाःकथमार्तिमृच्छेत् २३ ॥ श्री
भगवानुवाच ॥ ब्रह्मन्यमनुगृह्णामितद्विशोविधुनोम्यहम् ॥ यन्मदःपुरुषःस्तब्धोलोकंमांचावमन्यते २४ यदाकदाचिज्जीवात्मासंसरन्निजकर्मभिः ॥
नानायोनिष्वनीशोयंपौरुषींगतिमाव्रजेत् २५ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः ॥ यद्यस्यनभवेत्स्तंभस्तत्रायंमदनुग्रहः २६ मानस्तंभनिमित्तानां
जन्मादीनांसमंततः ॥ सर्वश्रेयःप्रतीपानांहंतमुह्येन्नमत्परः २७ एषदानवदैत्यानामग्रणीःकीर्तिवर्धनः ॥ अजैषीदजयांमायांसीदन्नपिनमुह्यति २८ क्षीण
रिक्थश्च्युतःस्थानात्क्षिप्तोबद्धश्चशत्रुभिः ॥ ज्ञातिभिश्चपरित्यक्तोयातनामनुयापितः २९ गुरुणाभर्त्सितःशप्तोजहौसत्यंनसुव्रतः ॥ छलैरुक्तोमयाधर्मोना
यंत्यजतिसत्यवाक् ३० एषमेप्रापितःस्थानंदुःप्रापममरैरपि ॥ सावर्णेरंतरस्यायंभवितेंद्रोमदाश्रयः ३१ तावत्सुतलमध्यास्तांविश्वकर्मविनिर्मितम् ॥
यन्नाधयोव्याधयश्चक्लमस्तंद्रापराभवः ॥ नोपसर्गानिवसतांसंभवंतिममेक्षया ३२

चूर्णिका

अहोयस्यतेपादयोः सलिलमात्रंदत्त्वाजनःसद्गतिंयातितस्मैतुभ्यं अयंबलिःत्रिलोकींदत्तवान् सःकथंआर्तिं अर्हति २३ ॥ श्रीभगवानुवाच ॥ हेब्रह्मन् अहंयंअनुगृह्णामितद
र्थान्विधुनोमियतः द्रव्यमत्तः पुमान्लोकंमांचअवमन्यते २४ कथंतर्हिध्रुवादिभ्यः अर्थसंपदःददासिइतिचेत्तत्राहहेब्रह्मन्यः मत्परःसःजन्मकर्मवयोरूपविद्यैश्वर्यादिभिः
पुमान्नमुह्यति अतः भक्तेच्छयासंपदोददामिअभक्तस्तुमुह्येत् अतः तदपाहाररूपमेवतस्यानुग्रहंकरोमि किंच एषःदानवेंद्रःमेमायांअजैषीत् यतः सीदन्नपिनमुह्यति
किंच२८ अयंक्षीणवित्तःस्थानात् च्युतःबद्धः२९गुरुणाशप्तोऽपिसत्यंनजहौ तथासत्यवाक्अयंधर्मंनत्यजति३०एषः सावर्णेऽतरेमदाश्रयः इंद्रःभविता ३१ तावत्सुतलंअध्या
स्ताम् यत्रआध्यादयः नसंति ३२

॥७१॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंब्रह्माणंप्रत्युक्त्वाकरुणापरवशःसाक्षाद्बलिंप्रत्याहइंद्रसेनेतिचतुर्भिः ३३ त्वच्छासनंअतिगच्छंतिअतिवर्ततेतान् ३४ तथापिभगवद्वियोगासदनिच्छंतंप्रत्याह सदेति ३५ संगात्यआसुरोभावःससद्यः कुंठोमंदःसन्विनंक्ष्यति ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांबलिमोक्षणंनामद्वाविंशः २२ ॥ ॥ ७ ॥ ॥ त्रयोविंशेचबलौयातेसुतलंसपितामहे। उपेंद्रेणदिवंगत्वापूर्ववन्मोदतेहरिः । वाष्पस्यकलाभिर्बिंदुभिराकुलेईक्षणेयस्य । भक्त्याउद्गलःउत्कंठः १ अहोत्वत्प्रणामस्यमहिमा यदर्थेकृतःसमुद्यमएवप्रपन्नानांभक्तानांयोऽर्थःतस्यविधौअभक्तेपितस्यसंपादनेसमाहितःअप्रमत्ततयास्थितः । यद्येनोचमेनलोकपालैरमरैःसत्त्वप्रधानैरपिअलब्धपूर्वःस्त्वदनुग्रहःअपसदेनीचेऽसुरेराजसेमयिअर्पितः । अयंभावः । परमेश्वरायतुभ्यमहंवराकस्त्रिलोकींदत्तवानित्येतदास्तां । प्रणामोऽपि नसम्यक्कृतःकिंतुतदर्थमुद्यममात्रंकृतंतेनचबलपोदानादिकोटिभिरप्यलभ्यस्त्वदनुग्रहःसंपादितःअहोत्वत्प्रणामप्रभावआश्चर्यकरइति २ (सभवंसशिवम् । प्रत्यानीयसमर्प्य) ३ अशासत्उपेंद्रःसन्पालयामास ४ (निशम्यआलोच्य) ५ (तेतवप्रसादम्) । दुर्गपालोसिरक्षिष्येसर्वतोहमित्युक्तत्वात् ६

॥७२॥

श्लोकाः ३३/६

इंद्रसेनमहाराजयाहिभोभद्रमस्तुते ॥ सुतलंस्वर्गिभिःप्रार्थ्यंज्ञातिभिःपरिवारितः ३३ नत्वामभिभविष्यंतिलोकेशाःकिमुतापरे ॥ त्वच्छासनातिगान्दैत्यान्चक्रंमेसूदयिष्यति ३४ रक्षिष्येसर्वतोऽहंत्वांसानुगंसपरिच्छदम् ॥ सदासन्निहितंवीरतत्रमांद्रक्ष्यतेभवान् ३५ तत्रदानवदैत्यानांसंगात्तेभावआसुरः ॥ दृष्ट्वामदनुभावंवैसद्यःकुंठोविनंक्ष्यति ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेबलिमोक्षणंनामद्वाविंशोऽध्यायः २२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ इत्युक्तवंतंपुरुषंपुरातनंमहानुभावोऽखिलसाधुसंमतः ॥ बद्धांजलिर्बाष्पकलाकुलेक्षणोभक्त्योद्गलोगद्गदयागिराऽब्रवीत् १ ॥ बलिरुवाच ॥ अहोप्रणामायकृतःसमुद्यमःप्रपन्नभक्तार्थविधौसमाहितः ॥ यल्लोकपालैस्त्वदनुग्रहोमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः २ ॥ श्रीशुकउवाच ॥ इत्युक्त्वाहरिमानम्यब्रह्माणंसभवंततः ॥ विवेशसुतलंप्रीतोबलिर्मुक्तःसहासुरैः ३ एवमिंद्रायभगवान्प्रत्यानीयत्रिविष्टपम् ॥ पूरयित्वाऽदितेःकाममशासत्सकलंजगत् ४ लब्धप्रसादंनिर्मुक्तंपौत्रंवंशधरंबलिम् ॥ निशम्यभक्तिप्रवणःप्रह्लादइदमब्रवीत् ५ ॥ प्रह्लादउवाच ॥ नेमंविरिंच्योलभतेप्रसादंनश्रीर्नशर्वःकिमुतापरेते ॥ यन्नोऽसुराणामसिदुर्गपालोविश्वाभिवंद्यैरभिवंदितांघ्रिः ६

चूर्णिका

हेबलेत्वंज्ञातिभिः सहसुतलंयाहितेभद्रम् ३३ यत्वांलोकेशाः नाभिभविष्यंतिवदाज्ञालंघिनःदैत्यान्मेचक्रंसूदयिष्यति ३४ सर्वतःसानुगंत्वामहंरक्षिष्ये हेवीर तत्रमांभवान् द्रक्ष्यते ३५ दैत्यानांसंगात् तेआसुरःभावः मदनुभावंदृष्ट्वासद्यः नंक्ष्यति ३६ ॥ इत्यष्टमेद्वाविंशः २२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एवंब्रुवाणंभगवंतंबद्धांजलिः वाष्पकलाकुलेक्षणःबलिः सद्गदयागिराअब्रवीत् १ ॥ बलिरुवाच ॥ हेभगवन् अहंतुभ्यंत्रिलोकींदत्तवान् इदंतावदास्ताम् प्रणामोपिनसम्यक्कृतः किंतुतदर्थमुद्यममात्रंकृतम् तेनचकर्मतपोदानादिकोटिभिरपिअलभ्यस्त्वदनुग्रहः संपादितःअहोत्वत्प्रणामप्रभावाश्चर्यमिति २ ॥ श्रीशुकउवाच ॥ एवमुक्त्वाबलिः हरिंनत्वाब्रह्माणंशिवंचनत्वामुक्तःसन्दैत्यैः सहसुतलंविवेश ३ एवंभगवान्इंद्रायस्वर्गंदत्वाआदितेः कामंचपूरयित्वासकलंजगत्पालयामास ४ ततः लब्धप्रसादंपौत्रंदृष्ट्वाप्रह्लादःइदंआह ५ ॥ प्रह्लादउवाच ॥ हेभगवन्इमंप्रसादंब्रह्माभवःश्रीश्चनलभतेकोसौतमाह यःत्वंनःदुर्गपालोसि ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

हेशरणदआश्रयप्रद । येकुत्सतपःदुर्वृत्ताःखलुयोनयउग्रजातयश्चतेवयंतस्यभवतोदाक्षिण्यदृष्टेःपदवींकस्माद्धेतोःप्रणीताः । बहुमानेनचित्तानु-(-सारं) वर्तनंदाक्षिण्यंतेनयादृष्टिस्तद्विषयतांप्रापिताः ७
भक्तप्रियत्वादितिचेत्तर्हिएवंतवेहितंअहोचित्रम् । किंतत् । सर्वात्मनःसमदृशश्चस्वभावोविषमइतियत् । सर्वात्मत्वेचित्रचरितत्वेचहेतुः । अमिताअचिंत्यायोगमायालीलातयाविसृष्टानिविरचितानिभुवना
नियेनतस्य । अहोइत्यत्रसंधिरार्षः । समदृक्त्वेहेतुः । विशारदस्यसर्वज्ञस्य । अथवाभक्तप्रियत्वेपितववैषम्यंनास्त्येवयतःकल्पतरुस्वभावःसन्भक्तप्रियोसि । नहिकल्पतरुराश्रितानामेवकामान्पूरयन्न
विषमोभवतीत्यर्थः ८ ९ मद्दर्शनेनयोमहाह्लादःतेनध्वस्तंकर्मबंधनमज्ञानंयस्य १० ११ १२ १३ कर्मवितन्वतःशिष्यस्य (बलेः) यच्छिद्रंअंतरंजातंतत्संतनुविस्तारयसंधत्स्व । यजमानंवि
नाकथंसंधातव्यमितिनवाच्यमित्याह । यत्तदिति । ब्रह्मदृष्टंब्राह्मणैर्दृष्टमेवसमंभवेत् । किंपुनरनुष्ठितमित्यर्थः १४ भवान्यस्यसर्वैर्गाविभावेनदेहगेहादिनावस्तुमात्रेणपूजितःतस्यकर्मसुकुतोवैषम्यम्
कथंभूतःकर्मणामीश्वरःप्रवर्तकः । यज्ञेशोयज्ञफलदः । यज्ञमयश्चपुरुषः १५ आस्तांतावत्पूजा । यस्मान्मंत्रतःस्वरादिभ्रंशेनतंत्रतःव्युत्क्रमादिनादेशतःकालतश्चअर्हतःपात्रतःवस्तुतोदक्षिणादिनायच्छिद्रं
तत्सर्वंतवानुसंकीर्तनमात्रमेवनिश्छिद्रंकरोति १६ १७ (इति)हरेराज्ञामभिनंद्यबलेर्यज्ञच्छिद्रं (ब्रह्मर्षिभिःसहोशना)समाधत्त संदधे पाठांतरेसमाधायतामाज्ञांसंपादितवानितिशेषः १८

श्लोकाः ७/१८

यत्पादपद्ममकरंदनिषेवणेनब्रह्मादयःशरणदाश्नुवतेविभूतीः ॥ कस्माद्वयंकुसृतयःखलयोनयस्तेदाक्षिण्यदृष्टिपदवींभवतःप्रणीताः ७ चित्रंतवेहितमहो
ऽमितयोगमायालीलाविसृष्टभुवनस्यविशारदस्य ॥ सर्वात्मनःसमदृशोविषमःस्वभावोभक्तप्रियोयदसिकल्पतरुस्वभावः ८ ॥ श्रीभगवानुवाच ॥ व
त्सप्रह्लादभद्रंतेप्रयाहिसुतलालयम् ॥ मोदमानःस्वपौत्रेणज्ञातीनांसुखमावह ९ नित्यंद्रष्टासिमांतत्रगदापाणिमवस्थितम् ॥ मद्दर्शनमहाह्लादध्वस्तकर्मनिबं
धनः १०॥ श्रीशुकउवाच ॥आज्ञांभगवतोराजन्प्रह्लादोबलिनासह ॥ बाढमित्यमलप्रज्ञोमूर्ध्न्याऽऽधायकृतांजलिः ११ परिक्रम्यादिपुरुषंसर्वासुरचमूपतिः
॥ प्रणतस्तदनुज्ञातःप्रविवेशमहाबिलम् १२ अथाहोशनसंराजन्हरिर्नारायणोंऽतिके ॥ आसीनमृत्विजांमध्येसदसिब्रह्मवादिनाम् १३ ब्रह्मन्संतनुशिष्य
स्यकर्मच्छिद्रंवितन्वतः ॥ यत्तत्कर्मसुवैषम्यंब्रह्मदृष्टंसमंभवेत् १४ ॥ शुक्रउवाच ॥ कुतस्तत्कर्मवैषम्यंयस्यकर्मेश्वरोभवान् ॥ यज्ञेशोयज्ञपुरुषःसर्व
भावेनपूजितः १५ मंत्रतस्तंत्रतश्छिद्रंदेशकालार्हवस्तुतः ॥ सर्वंकरोतिनिश्छिद्रमनुसंकीर्तनंतव १६ तथापिवदतोभूमन्करिष्याम्यनुशासनम् ॥ एत
च्छ्रेयःपरंपुंसांयत्तवाज्ञानुपालनम् १७ ॥ श्रीशुकउवाच ॥ अभिनंद्यहरेराज्ञामुशनाभगवानिति ॥ यज्ञच्छिद्रंसमाधत्तबलेर्विप्रर्षिभिःसह १८

चूर्णिका

किंच हेआश्रयप्रदब्रह्मादयः यत्पादपद्मरससेवनात्विभूतीःअश्नुवतेतस्यतेदाक्षिण्यदृष्टिमार्गंवयंउग्रजातयःकस्माद्धेतोःप्रापिताःएवंतवेहितंअहोचित्रम् ७ ८ ॥ श्रीभगवा
नुवाच ॥ हेवत्सप्रह्लादतेभद्रम्त्वंपौत्रेणसहसुतलंयाहि ९ तत्रगदापाणिंस्थितंमांद्रक्ष्यसि १० ॥ श्रीशुकउवाच ॥ एवंभगवदाज्ञांगृहीत्वाबलिनासहप्रह्लादः ११ तं
प्रणम्यनम्रःसन्महाबिलंविवेश १२ अथश्रीहरिःऋत्विक्मध्येस्थितंभृगुंआह १३ हेब्रह्मन्यजमानस्ययज्ञेयत्न्यूनंतत्संधत्स्वब्राह्मणैर्दृष्टंसमंभवेत् १४ ॥ शुक्रउवाच ॥ हे
ईशयस्यकर्मेश्वरःत्वंतस्यकर्मवैषम्यंकुतः १५ किंचत्वन्नामकीर्तनात्मंत्रतंत्रादिषुयत्छिद्रंतत्सर्वंअच्छिद्रंभवति १६ अथापितेआज्ञांकरिष्यामितेआज्ञापालनमेवपुंसांश्रेयइति
१७ ॥ श्रीशुकउवाच ॥ हेनृप शुक्रः भगवदाज्ञांस्वीकृत्ययज्ञच्छिद्रंसंदधे १८

CC-0. In Public Domain. Digitization by eGangotri

टीका

(त्रिदिवंत्रिविष्टपम्) १९ देवाश्चऋषयश्चभूमिपाश्चमनवःतैःसहितः(प्रजापतीनांदक्षादीनांपतिः) २० २१ ननु लोकादीनांपतिरिंद्रएवसत्यम् तथापिवेदादीनांकल्पंपालनेदक्षंवामनमुपेंद्रंकल्पयांचक्रे २२ २३ देवयानेनतत्संज्ञकमार्गेणविमानेनेतिवा २४ (गतसाध्वसोनिर्भयः) २५ २६ २७ २८ एतच्चरितंसर्वमाख्यातमितिविशेषोक्त्याअन्यान्यपिसंतीत्युक्तम् । तानितर्हिनिःशेषाणिवर्णनीयानी त्यपेक्षायामाह । पारमिति । उरुबहुधाविक्रमतोविष्णोर्महिम्नःपारंयोगृणानोभवतिसमर्त्यःपार्थिवानिरजांसिविममेगणितवान् । यथापार्थिवपरमाणुगणनमशक्यंतथाविष्णोर्गुणगणनमशक्यमित्यर्थः । तथाचमंत्रः । 'विष्णोर्नुकंवीर्याणिप्रवोच'मिति । मंत्रांतरार्थंसूचयन्नेतदेवाह । यस्यपुरुषस्यपूर्णस्यमहिम्नःपारंमंत्रदृक्ऋषिर्वसिष्ठइतिएवमाह । कथम् । किंजायमानोजातोवाउपैतिनकोपीतिवदन्ननंतत्वे नैवाहेत्यर्थः । तथाचमंत्रः ' नतेविष्णोजायमानोनजातोदेवमहिम्नःपरमंतमापे'ति २९ यइदंशृण्वन्भवतिसपरांगतिंयाति ३० (यत्रयत्रकर्मणीदमनुकीर्त्येत । तत्तत्) सुकृतंयथावत्कृतंविदुः ३१

॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेटीकायांवामनावतारचरितेत्रयोविंशः २३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः १९/३१

एवंबलेर्महींराजन्भिक्षित्वावामनोहरिः ॥ ददौभ्रात्रेमहेंद्रायत्रिदिवंयत्परैर्हृतम् १९ प्रजापतिपतिर्ब्रह्मादेवर्षिपितृभूमिपैः ॥ दक्षभृग्वंगिरोमुख्यैःकुमारे णभवेनच २० कश्यपस्यादितेःप्रीत्यैसर्वभूतभवायच ॥ लोकानांलोकपालानामकरोद्वामनंपतिम् २१ वेदानांसर्वदेवानांधर्मस्ययशसःश्रियः ॥ मंगला नांव्रतानांचकल्पंस्वर्गापवर्गयोः २२ उपेंद्रंकल्पयांचक्रेपतिंसर्वविभूतये ॥ तदासर्वाणिभूतानिभृशंमुमुदिरेनृप २३ ततस्त्विंद्रःपुरस्कृत्यदेवयानेनवाम नम् ॥ लोकपालैर्दिवंनिन्येब्रह्मणाचानुमोदितः २४ प्राप्यत्रिभुवनंचेंद्रउपेंद्रभुजपालितः ॥ श्रियापरमयाजुष्टोमुमुदेगतसाध्वसः २५ ब्रह्माशर्वःकुमार श्चभृग्वाद्यामुनयोनृप ॥ पितरःसर्वभूतानिसिद्धावैमानिकाश्चये २६सुमहत्कर्मतद्विष्णोर्गायंतःपरमाद्भुतम् ॥ धिष्ण्यानिस्वानितेजग्मुरदितिंचशशंसि रे २७ सर्वमेतन्मयाख्यातंभवतःकुरुनंदन ॥ उरुक्रमस्यचरितंश्रोतॄणामघमोचनम् २८ पारंमहिम्नउरुविक्रमतोगृणानोयःपार्थिवानिविममेसरजांसिम र्त्यः ॥ किंजायमानउतजातउपैतिमर्त्यइत्याहमंत्रदृगृषिःपुरुषस्ययस्य २९ यइदंदेवदेवस्यहरेरद्भुतकर्मणः ॥ अवतारानुचरितंशृण्वन्यातिपरांगतिम् ३० क्रियमाणेकर्मणीदंदैवेपित्र्येऽथमानुषे ॥ यत्रयत्रानुकीर्त्येततत्तेषांसुकृतंविदुः ३१ ॥ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेवामनावतारचरितेत्रयोविंशः २३

चूर्णिका

हेराजन्एवंबलेः महींभिक्षित्वाभ्रात्रेइंद्रायदिवंददौ १९ ततः ब्रह्मादेवर्षिपितृमनुकुमारभवदक्षमरीच्यादिभिः सह २० कश्यपस्यादितेः प्रीत्यैसलोकलोकपालानांपतिं वामनं अकरोत् २१ सर्वेषांईशेइंद्रेसत्यपिवेददेवादीनांपालने २२ दक्षंउपेंद्रंकल्पयांचक्रे तदासर्वभूतानिमुमुदिरे २३ ततंइद्रः विमानेनवामनंपुरस्कृत्यदिवंनिन्ये २४ किंच वामनभुजगुप्तइंद्रः त्रिभुवनंप्राप्यमुमुदे २५ ततो ब्रह्मभवाद्याः २६ सर्वेहरेस्तत्कर्मगायंतःसंतः स्वस्थानानिजग्मुः अदितिंचशशंसिरे २७ हेनृपएवंतेश्रोत्रघहरं त्रिविक्रमचरितं कथितम् २८ अहोविष्णोर्महिम्नः पारंयोगृणानःभवतिसःभूरजांस्यपिगणितवान् यथाभूरजोगणनं अशक्यंतथाहरिगुणानुवर्णनमिति २९ यः इदंहरे रवतारचरितंशृणोति सःपरांगतिंयाति ३० क्रियमाणेकर्मणीदंदैवेपित्र्येथमानुषे यत्रयत्रानुकीर्त्येततत्तेषांसुकृतंविदुः ३१ ॥ ॥ इत्यष्टमेत्रयोविंशः २३ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सतुर्विंशेप्रसंगेनमत्स्यरूपस्यशार्ङ्गिणः । लीलोच्यतेयतःसत्यव्रतरक्षामहार्णवे १ तनुंतनुंनिदर्श्यादौनिजैश्वर्यनिदर्शनात् । मत्स्यंपृच्छतिपृथ्वीशोलीलयावामनोपमम् ॥ २ ॥ माययामत्स्यविडंबनमत्स्या
नुकरणंयस्यांताम् १ ननुकस्मादकस्मादेवमत्स्यावतारश्रवणेच्छाश्रीवामनसादृश्यादित्याह। यदर्थमितिद्वाभ्याम् (तमःप्रकृतिजडस्वभावं) दुर्मर्षंसोढुमशक्यम् (कर्मग्रस्तोजीवइव) २ बलेरनुग्रहायजुगु
प्सितमपियाचकरूपंधृत्वाववृधइतियुक्तमुक्तम् । यदर्थंतुलोकजुगुप्सितंमात्स्यंरूपंधृत्वाववृधेएतन्नोयथावद्वक्तुमर्हसीत्यर्थः ३ ४ सामान्येनावतारप्रयोजनमाह । (गोविप्रादीनांरक्षामिच्छंस्तनूर्धत्ते) ५ जु
गुप्सितत्वंपरिहरति । धियोगुणैर्यान्युच्चावचानिरूपाणितेषुनियंतृत्वेनचरन्नपीश्वरोनोच्चावचत्वंभजतेनिर्गुणत्वात्कुतःपुनःशुद्धसत्त्वमयैर्मत्स्याद्याकारैरुच्चावचत्वशंकेतिभावः ६ विशेषतोमत्स्यावतारप्र
योजनमाह । आसीदितित्रिभिः । ब्रह्मणोनिद्रायांभवोब्राह्मः । तेनैवनिमित्तेनजातोनैमित्तिकः । समुद्रेउपप्लुतानिमग्नाः ७(आगतनिद्रस्यातएवशयितुमिच्छोः) अंतिकेनिःसृतान् ८ शफरीरूपंमत्स्या
॥७५॥ कृतिम ९प्रयोजनांतरंलीलाप्रकारंचाह । तत्रराजऋषिरित्यादियावत्समाप्ति (सलिलमशनंयस्यसः) १०(योसौसत्यव्रतः)सएवश्राद्धदेवइतिख्यातः ११कृतमालायांनद्याम् (शफरीसूक्ष्मोमत्स्यः)१२ १३

श्लोकाः

॥ राजोवाच ॥ ॥ भगवञ्छ्रोतुमिच्छामिहरेरद्भुतकर्मणः ॥ अवतारकथामाद्यांमायामत्स्यविडंबनाम् १ यदर्थमदधाद्रूपंमात्स्यंलोकजुगुप्सितम् ॥तमः
प्रकृतिदुर्मर्षंकर्मग्रस्तइवेश्वरः २ एतन्नोभगवन्सर्वंयथावद्वक्तुमर्हसि ॥ उत्तमश्लोकचरितंसर्वलोकसुखावहम् ३ ॥ सूतउवाच ॥ इत्युक्तोविष्णुरातेनभग १/१३
वान्बादरायणिः ॥ उवाचचरितंविष्णोर्मत्स्यरूपेणयत्कृतम् ४ ॥ श्रीशुकउवाच ॥ गोविप्रसुरसाधूनांछंदसामपिचेश्वरः ॥ रक्षामिच्छंस्तनूर्धत्तेधर्मस्या
र्थस्यचैवहि ५ उच्चावचेषुभूतेषुचरन्वायुरिवेश्वरः ॥ नोच्चावचत्वंभजतेनिर्गुणत्वाद्धियोगुणैः ६ आसीदतीतकल्पांतेब्राह्मोनैमित्तिकोलयः ॥ समुद्रोपप्लुता
स्तत्रलोकाभूरादयोनृप ७ कालेनागतनिद्रस्यधातुःशिशयिषोर्बली ॥ मुखतोनिःसृतान्वेदान्हयग्रीवोऽतिकेऽहरत् ८ ज्ञात्वातद्दानवेंद्रस्यहयग्रीवस्यचे
ष्टितम् ॥ दधारशफरीरूपंभगवान्हरिरीश्वरः ९ तत्रराजऋषिःकश्चिन्नाम्नासत्यव्रतोमहान् ॥ नारायणपरोऽतप्यत्तपःससलिलाशनः १० योसावस्मि
न्महाकल्पेतनयःसविवस्वतः ॥ श्राद्धदेवइतिख्यातोमनुत्वेहरिणार्पितः ११ एकदाकृतमालायांकुर्वतोजलतर्पणम् ॥ तस्यांजल्युदकेकाचिच्छफर्येका
भ्यपद्यत १२ सत्यव्रतोंजलिगतांसहतोयेनभारत ॥ उत्ससर्जनदीतोयेशफरींद्रविडेश्वरः १३

चूर्णिका

॥ राजोवाच ॥ ॥ हेभगवन्हरेः आद्यांमत्स्यावतारकथांश्रोतुमिच्छामि १ किंच इदंलोकनिंद्यंमात्स्यंरूपंयदर्थंधृतंएतत्नोवक्तुमर्हसि २ ३ ॥ सूतउवाच ॥ राज्ञाएवमुक्तः
शुकःविष्णोश्चरितंप्राह ४ ॥ श्रीशुकउवाच ॥ गोविप्रसुरसाधूनांछंदसांचरक्षांइच्छन्हरिःतनूर्धत्ते ५ हरेः जुगुप्सितत्वंपरिहरति उच्चनीचभूतेषुवायुरिवचरन्ईश्वरः नि
र्गुणत्वात्नोच्चावचत्वंभजतेइति ६ अथगतकल्पांतेनैमित्तिकोलयः आसीत् तत्रभूरादयोलोकाः समुद्रेमग्नाः आसन् ७ तत्रलयेप्राप्तनिद्रस्यधातुः मुखतोनिर्गतान्वेदान्हय ॥७५॥
ग्रीवःअहरत् ८ तत्ज्ञात्वाहरिःमात्स्यंरूपंदधार ९ तत्रकश्चित्सत्यव्रतःनामराजर्षिः तपः अतप्यत् १० यः अस्मिन्महाकल्पेविवस्वतस्तनयः श्राद्धदेवइतिख्यातोमनु
त्वेहरिणार्पितः ११ एकदाकृतमालायांनद्यांजलतर्पणंकुर्वतःसत्यव्रतस्यअंजल्युदकेएकाशफरीअभ्यपद्यत १२ सःतांनदीतोयेउत्ससर्ज १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

१४ (शफर्यारक्षणार्थाय) १५ १६ १७ (वस्तुंवासंकर्तुं) यत्राहंसुखंनिवसामितदोकःस्थानंकल्पय १८ औदंचनोदकेमणिकस्थेजले १९ (मेमह्यंनालम् । पदंस्थानम् । त्वात्वाम्) २० (तत्तोयसावृत्यव्याप्य)२१रक्षायायोगेनउपायेनयथामहाह्रदप्राप्तेःपूर्वंजलंविनानशुष्येयंताहृशेनोपायेनशीघ्रमित्यर्थःअविदासिनिअनुपक्षये(अगाधेइत्यर्थः)२२ संमितंतत्तज्जलाशयपरिमितं (संतंझषंमत्स्यम्) २३ २४ २५ अभिव्यानशेअभितोव्याप्तवान् २६ २७ मुख्यःसभ्यः । आत्माचगतिश्चआश्रयः २८ २९ हेअरविंदाक्ष । पृथगात्मनांदेहाद्यभिमानिनांसतामितरेषांपादोपसर्पणंयथामृषा (निष्फलं) भवेत् । तथासुहृत्प्रियात्मनस्तवपादोपसर्पणंमृषानभवेत् । यद्यस्मान्नःभक्तानांअद्भुतंवपुरदीदृशःदर्शितवानसि । पाठांतरेपृथगात्मनोभेददर्शिनःपुंसःअसतांपरिच्छिन्नानांपादोपसर्पणंयथामृषेत्यर्थः ३०

॥७६॥ तमाहसातिकरुणंमहाकारुणिकंनृपम् ॥ यादोभ्योज्ञातिघातिभ्योदीनांमांदीनवत्सल ॥ कथंविसृजसेराजन्भीतामस्मिन्सरिज्जले १४ तमात्मनोऽनुग्रहार्थंप्रीत्यामत्स्यवपुर्धरम् ॥ अजानन्रक्षणार्थायशफर्याःसमनोदधे १५ तस्यादीनतरंवाक्यमाश्रुत्यसमहीपतिः ॥ कलशाप्सुनिधायैनांदयालुर्निन्यआश्रमम् १६ सातुतत्रैकरात्रेणवर्धमानाकमंडलौ ॥ अलब्ध्वात्मावकाशंवाइदमाहमहीपतिम् १७नाहंकमंडलावस्मिन्कृच्छ्रंवस्तुमिहोत्सहे ॥ कल्पयौकःसुविपुलंयत्राहंनिवसेसुखम् १८ सएनांततआदायन्यधादौदंचनोदके ॥ तत्रक्षिप्तामुहूर्तेनहस्तत्रयमवर्धत १९ नमएतदलंराजन्सुखंवस्तुमुदंचनम् ॥ पृथुदेहिपदंमह्यंयत्त्वाहंशरणंगता २० ततआदायसाराज्ञाक्षिप्ताराजन्सरोवरे ॥ तदावृत्यात्मनातोयंमहामीनोन्ववर्धत २१ नैतन्मेस्वस्तयेराजन्उदकंसलिलौकसः ॥ निधेहिरक्षायोगेनह्रदेमामविदासिनि २२ इत्युक्तःसोऽनयन्मत्स्यंतत्रतत्राविदासिनि ॥ जलाशयेसंमितंतंसमुद्रेप्राक्षिपज्झषम् २३ क्षिप्यमाणस्तमाहेदमिहमांमकरादयः ॥ अदंत्यतिबलावीरमांनेहोत्स्रष्टुमर्हसि २४ एवंविमोहितस्तेनवदतावल्गुभारतीम् ॥ तमाहकोभवानस्मान्मत्स्यरूपेणमोहयन् २५ नैवंवीर्योजलचरोदृष्टोऽस्माभिःश्रुतोपिवा ॥ योभवान्योजनशतमह्नाऽभिव्यानशेसरः २६ नूनंत्वंभगवान्साक्षाद्धरिर्नारायणोऽव्ययः ॥ अनुग्रहायभूतानांधत्सेरूपंजलौकसाम् २७नमस्तेपुरुषश्रेष्ठस्थित्युत्पत्त्यप्ययेश्वरः ॥ भक्तानांनःप्रपन्नानांमुख्योह्यात्मगतिर्विभो २८ सर्वेलीलावतारास्तेभूतानांभूतिहेतवः ॥ ज्ञातुमिच्छाम्यदोरूपंयदर्थंभवताधृतम् २९ नतेरविंदाक्षपदोपसर्पणंमृषाभवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषांपृथगात्मनांसतामदीदृशोयद्वपुरद्भुतंहिनः ३०

श्लोकाः १४/३०

चूर्णिका सातंनृपंआह हेदीनवत्सलज्ञातिघातिभ्योयादोभ्योभीतांमांकथंविसृजसे १४ तद्दीनवाक्यंश्रुत्वाकलशाप्सुतांनिधायआश्रमंनिन्ये १५ १६ साएकरात्रेणवर्द्धमानातंआह १७ अहंकमंडलौवस्तुंनउत्सहे विपुलंस्थानंकल्पय १८ ततःमणिकस्थेजलेतान्यधात् तत्रापिमुहूर्तेनहस्तत्रयंअवर्धत १९ एतत् उदकंमेअलंनपृथुपदंदेहि २० ततः तांआदायसरोवरेप्राक्षिपत् तदपिसरःप्राप्यअवर्धत २१ इदंसरःमेनस्वस्तयेअतःमेअशुष्कह्रदेनिधेहि २२ एवमुक्तःसः यत्रयत्रजलाशयेनीतवान् तत्रतत्रवर्धमानांतांदृष्ट्वासमुद्रेप्राक्षिपत् २३ क्षिप्यमाणासाइदं आह हेवीर अत्रमांमकरादयः अदंतिअतः इहउत्स्रष्टुंनार्हसि २४ एवंमोहितोराजामत्स्यंआह नःमत्स्यरूपेणमोहयन् त्वंकोऽसि २५ एवंवीर्योजलचरः अस्माभिः पूर्वंनदृष्टः नश्रुतः यः त्वं अह्नायोजनशतंसरः व्याप्तवान् २६ त्वंसाक्षाद्भगवान्भूतानांअनुग्रहायजलचररूपंधत्से २७ अतस्तुभ्यंनमः २८ किंच त्वयायदर्थमिदंरूपंधृतंतत्ज्ञातुमिच्छामि २९ ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

एकांतजनाभक्ताःप्रियायस्य ३१ अप्पयांभोधौप्रलयार्णवे । भूर्भुवआदिकमित्यर्थः (निमंक्ष्यतिमग्नंभविष्यति) ३२ संवर्ताभसिप्रलयोदकेत्वामुपस्थास्यतिप्राप्स्यति ३३ ओषधीःआदायेतिशेषः (स र्वैःसत्त्वैःप्राणिभिरुपबृंहितः) ३४ ऋषीणामेवालोकेनविचरिष्यसि ३५ महाहिनावासुकिना (यतोदोधूयमानांभृशंकंप्यमानाम्) ३६ ३७ मेमयाअनुगृहीतंप्रसादीकृतंहृदिअपरोक्षंवेत्स्यसिज्ञास्यसि । त्वयाकृतैःसंप्रश्नैर्मयाविवृतंप्रकाशितंसंतम् ३८ (अन्ववैक्षतप्रतीक्षतेस्म) ३९ (प्रागुदङ्मुखःईशानदिङ्मुखः) ४० ४१ (नावंनौकाम्ओषधीश्चवीरुधश्चलताः) ४२ (नोस्माकम्) ४३ (नियुतंलक्षम्) ४४ ॥२४॥

॥७७॥ ॥ श्रीशुकउवाच ॥ इतिब्रुवाणंनृपतिंजगत्पतिःसत्यव्रतंमत्स्यवपुर्युगक्षये ॥ विहर्तुकामःप्रलयार्णवेऽब्रवीच्चिकीर्षुरेकांतजनप्रियःप्रियम् ३१ ॥ श्रीभग
वानुवाच ॥ सप्तमेद्यतनादूर्ध्वमहन्येतदरिंदम ॥ निमंक्ष्यत्यप्ययांभोधौत्रैलोक्यंभूर्भुवादिकम् ३२ त्रिलोक्यांलीयमानायांसंवर्तांभसिवैतदा ॥ उपस्था
स्यतिनौःकाचिद्विशालात्वांमयेरिता ३३ त्वंतावदोषधीःसर्वाबीजान्युच्चावचानिच ॥ सप्तर्षिभिःपरिवृतःसर्वसत्त्वोपबृंहितः ३४ आरुह्यबृहतींनावंविचरि
ष्यस्यविक्लवः ॥ एकार्णवेनिरालोकेऋषीणामेववर्चसा ३५ दोधूयमानांतांनावंसमीरेणबलीयसा ॥ उपस्थितस्यमेशृंगेनिबध्नीहिमहाहिना ३६ अहं
त्वामृषिभिःसाकंसहनावमुदन्वति ॥ विकर्षन्विचरिष्यामियावद्ब्राह्मीनिशाप्रभो ३७ मदीयंमहिमानंचपरंब्रह्मेतिशब्दितम् ॥ वेत्स्यस्यनुगृहीतंमेसंप्रश्नै
र्विवृतंहृदि ३८ इत्थमादिश्यराजानंहरिरंतरधीयत ॥ सोन्ववैक्षततंकालंयंहृषीकेशआदिशत् ३९ आस्तीर्यदर्भान्प्राक्कूलान्राजर्षिःप्रागुदङ्मुखः ॥ नि
षसादहरेःपादौचिंतयन्मत्स्यरूपिणः ४० ततःसमुद्रउद्वेलःसर्वतःप्लावयन्महीम् ॥ वर्धमानोमहामेघैर्वर्षद्भिःसमदृश्यत ४१ ध्यायन्भगवदादेशंददृशेनाव
मागताम् ॥ तामारुरोहविप्रेंद्रैरादायौषधिवीरुधः ४२ तमूचुर्मुनयःप्रीताराजन्ध्यायस्वकेशवम् ॥ सवैनःसंकटादस्मादविताशंविधास्यति ४३ सोनु
ध्यातस्ततोराज्ञाप्रादुरासीन्महार्णवे ॥ एकशृंगधरोमत्स्योहैमोनियुतयोजनः ४४

श्लोकाः ३१/४४

चूर्णिका

॥ श्रीशुकउवाच ॥ एवंब्रुवाणंसत्यव्रतंमत्स्यवपुःहरिःआह ३१ ॥ श्रीभगवानुवाच ॥ हेनृपअद्यतनादूर्ध्वंसप्तमेहनिअर्णवेत्रैलोक्यंनंक्ष्यति ३२ तस्मिन्लीनेसातिका चिन्नौः त्वांप्राप्स्यति ३३ त्वंचओषधिबीजानिआदायसप्तर्षिभिःसह ३४ नावंआरुह्यएकार्णवेचरिष्यसि ३५ तत्रवायुवेगेनचंचलांनावंप्राप्तस्यमेशृंगेवासुकिनाबध्नीहि ३६ अहं सप्तर्षिभिः साकंसनावंत्वांविकर्षन् यावत्ब्राह्मीनिशातावत्चरिष्यामि ३७ मन्महिमानंत्वंवेत्स्यसि ३८ इत्थंराजानंआदिश्यहरिः अंतर्दधेसःतंकालंअन्वैक्षत ३९ अथरा जाप्रागग्रान्दर्भानास्तीर्यतत्रस्थितः हरेः पादौचिंतयन्निषसाद ४० ततःवर्षद्भिर्मेघैःवर्द्धमानःसमुद्रःमहींप्लावयन्सन् अदृश्यत ४१ तदासत्यव्रतः भगवदाज्ञांध्यायन् तावत्नावंदृष्ट्वाओषधिवीरुधः आदायऋषिभिःसहतांआरुरोह ४२ तदाप्रीताःमुनयःतंऊचुःहेराजन्केशवंध्यायस्वसःअस्मात्संकटात्नःशंविधास्यति ४३ ततःराज्ञा ध्यातःहरिःप्रलयार्णवेएकशृंगधरःहैमःनियुतयोजनोमत्स्यःप्रादुर्बभूव ४४ ॥७७॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

वरत्रेणदोरकरूपेण ४५ सागरंतारयिष्यंततरिष्यन्निवसागरम् । सत्यव्रतोगुरुत्वेनतुष्टावहरिमष्टभिः । अत्रेदंचिंत्यम् । किमयंमहाप्रलयोदैनंदिनोवेति । तत्रतावद्ब्राह्मोलयइतियोसावस्मिन्महा
कल्पइतिचोक्तेर्महाप्रलयइतिप्राप्तम् नेतिब्रूमः । महाप्रलयेपृथिव्यादीनामवशेषाभावात् । यावद्ब्राह्मीनिशेत्याद्युक्तिविरोधाच्च । अतोदैनंदिनइतियुक्तंनचैतदपिसंगच्छते । सांवर्तकैरनावर्षणादि
भिर्विनाअकस्मादेवसप्तमेऽहनित्रैलोक्यंनिमंक्ष्यतीतिमत्स्योक्तेरनुपपत्तेः । यच्चोक्तंप्रथमस्कंधे । रूपंसजगृहेमात्स्यंचाक्षुषांतरसंप्लवे । नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुमितितदपितदादुर्घटम् । नहि
प्रलयद्वयेपिमहीमय्यांनाव्यारोहःसंभवति । नचचाक्षुषमन्वंतरेप्रलयोस्ति । तथाचसतिसप्तमोमनुर्वैवस्वतइत्यपिदुर्घटंस्यात् । त्वंतावदोषधीःसर्वाइत्यादिनिर्देशोपिनसंगच्छते । नहितदाओषध्यादीनांस
त्त्वानांचावशेषःसंभवति । तस्मादन्यथावर्ण्यते । नैवायंवास्तवःकोपिप्रलयः । किंतुसत्यव्रतस्यज्ञानोपदेशायाविर्भूतोभगवान्वैराग्यार्थमकस्मात्प्रलयमिवदर्शयामास । यथास्मिन्नेववैवस्वतमन्वंतरेमार्कंडे

॥७८॥ यायदर्शितवान् । तदपेक्षयैवचमहाकल्पेऽस्मिन्नितिविशेषणंसंगच्छते । तथाच । ततःसमुद्रउद्वेलःसर्वतःसमदृश्यतेतितस्यैवतथादर्शनमुक्तमित्येषादिक् । प्रस्तुतंस्तोत्रंव्याख्यास्यामः । तत्रनानायोनि
षुसंसरतःस्वस्यभगवत्प्राप्तिंदृष्ट्वामुक्तयेतमेवप्रार्थयते(अनादीति) अनादिर्याअविद्यातयाउपहताआवृताआत्मसंविद्येषांते । अतएवाविद्यामूलैःसंसारपरिश्रमैरातुराः । इहसंसारेयदृच्छयायदनुग्रहादेवउपसृ
ताआश्रिताःसंतोयंआप्नुयुः । सभवानेवसाक्षान्नोगुरुःसन्ग्रंथिंभिंद्यादित्युत्तरेणान्वयः ४६ ननुवैराग्यंविनाकुतोमुक्तिःतर्हितस्यत्वत्सेवैकफलत्वात्सेवामादिशेत्याशयेनाह । जनइति। अबुधोयंजनःअसुखंय
थाभवतितथाकर्मसमीहते । तांसुखेच्छाम् । नो(अऽस्माकं)हृदयरूपंग्रंथिंसभिंद्यात् । यतःसएवपरमोगुरुः ४७ ननुयज्ञदानादिभिःसत्त्वशुद्धिंविनाग्रंथिःकथंभेद्यःस्यात्तत्राह ।यदिति। यस्यसेवयैवपुमान्
आत्मनोमनसोमलंतमोविजह्यात् । एषहीनमलोनिजंवर्णंचस्वरूपंभजेत् । सईशोनोगुरुर्भूयात् यतःसएवगुरोरपिपरमोगुरुः । मलहानेदृष्टांतः । रुद्ररोदनंरजतम् । ‘यदरोदीत्तद्रुद्रस्यरुद्रत्वंयदश्रुशी
र्यततद्रजतंहिरण्यमभव’ दितिश्रुतेः । तद्यथाग्नेःसंपर्कान्मलंजहाति । स्वंवर्णंचभजतेनतुक्षालनादिभिःतथानयज्ञादिभिर्मलत्यागःकिंतुत्वत्सेवयैव । तेषांतुसेवांगत्वमितिभावः ४८ परमेश्वरत्वंपरमगुरुत्वं
चप्रपंचयन्नाह । नयदिति । यत्प्रसादस्यायुतभागस्यलेशमात्रमपिअन्येदेवादयःसर्वेसमेताअपिस्वयंतान्निरपेक्षाःसंतःकर्तुंनप्रभवंति ४९

श्लोकाः

निबध्यनावंतच्छृंगेयथोक्तोहरिणापुरा ॥ वरत्रेणाहिनातुष्टस्तुष्टावमधुसूदनम् ४५ ॥ राजोवाच ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमा
तुराः ॥ यदृच्छयेहोपसृतायमाप्नुयुर्विमुक्तिदोनःपरमोगुरुर्भवान् ४६ जनोऽबुधोऽयंनिजकर्मबंधनःसुखेच्छयाकर्मसमीहतेऽसुखम् ॥ यत्सेवयातांवि
धुनोत्यसन्मतिंग्रंथिंसभिंद्याद्धृदयंसनोगुरुः ४७ यत्सेवयाग्नेरिवरुद्ररोदनंपुमान्विजह्यान्मलमात्मनस्तमः ॥ भजेतवर्णंनिजमेषसोव्ययोभूयात्सईशःपरमो
गुरोर्गुरुः ४८ नयत्प्रसादायुतभागलेशमन्येचदेवागुरवोजनाःस्वयम् ॥ कर्तुंसमेताःप्रभवंतिपुंसस्तमीश्वरंत्वांशरणंप्रपद्ये ४९

४५/४९

॥७८॥

चूर्णिका

ततोराजातस्यशृंगेअहिनानावंनिवध्यहरिंतुष्टाव ४५ ॥ राजोवाच ॥ अनाद्यविद्यावृतात्मसंविदःजनाःयदनुग्रहात्यंप्राप्नुवंतिसःभवान् गुरुःसन्हृदयग्रंथिंभिंद्यात् ४६ किंच
यस्यसेवयापुमान्मनोमलंत्यक्त्वास्वरूपंभजेत्सईशःनोगुरुर्भूयात् ४७ ४८ किंच देवादयःयत्प्रसादलेशमपि कर्तुं नसमर्थाः तंईश्वरंत्वांशरणंप्रपद्ये ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवदृष्टांतेनस्पष्टयन्नाह । अचक्षुरिति (यथांऽधस्यांधोऽग्रणीःअग्रेनयतीत्यग्रणीःकृतस्तथैव) अविदुषोजनस्यअबुधोऽविद्वान्गुरुः । त्वंतुअर्कप्रकाशवत्स्वतएवदृक्ज्ञानंयस्यसःअर्कदृक् अतःसर्व
दृशांसर्वेंद्रियाणांसमीक्षणःप्रकाशकःअतएवस्वगतिंबोद्धुमिच्छद्भिःनोस्माभिर्गुरुर्वृतोसि ५० किंच । प्राकृतोगुरुरनर्थहेतुरेवेत्याह । जनइति । आदिशतेउपदिशति । असतींमतिंअर्थकामादिमतिम् ।
तमःसंसारम् ५१ ननुतर्हिसर्वोपिलोकोमामेवकिंनोपसरति । अज्ञानादित्याह त्वंसर्वेति । प्रियश्चासावीश्वरश्च ५२ अहंतुत्वामेवशरणंयामीत्याह । त्वामिति प्रतिबोधनायउपदेशाय । अर्थदीपैःपरमार्थ
प्रकाशकैः । हृदय्यान्हृदयभवान्ग्रंथीन्अहंकारादीन् । स्वमोकःस्वरूपंविवृणुप्रकाशय ५३ नृपतिंप्रति ५४ पुराणसंहितांमत्स्यपुराणंअशेषतोऽब्रवीदित्यनुषंगः (सांख्यंतत्त्वविवेकःयोगश्चित्तनिरोधोपायः ।
क्रियानित्यनैमित्तिकादिकंकर्मतद्वतींआत्मगुह्यमात्मरहस्यंचाशेषतोऽब्रवीत्) ५५ ५६

॥७९॥

श्लोकाः ५०/५६

अचक्षुरंधस्ययथाग्रणीःकृतस्तथाजनस्याविदुषोऽबुधोगुरुः ॥ त्वमर्कदृक्सर्वदृशांसमीक्षणोवृतोगुरुर्नःस्वगतिंबुभुत्सताम् ५० जनोजनस्यादिशतेऽसतीं
मतिंयथाप्रपद्येतदुरत्ययंतमः ॥ त्वंत्वव्ययंज्ञानममोघमंजसाप्रपद्यतेयेनजनोनिजंपदम् ५१ त्वंसर्वलोकस्यसुहृत्प्रियेश्वरोह्यात्मागुरुर्ज्ञानमभीष्टसिद्धिः ॥
तथापिलोकोनभवंतमंधधीर्जानातिसंतंहृदिबद्धकामः ५२ तंत्वामहंदेववरंवरेण्यंप्रपद्यईशंप्रतिबोधनाय ॥ छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्
विवृणुस्वमोकः ५३॥ श्रीशुकउवाच ॥ इत्युक्तवंतंनृपतिंभगवानादिपूरुषः ॥ मत्स्यरूपीमहांभोधौविहरंस्तत्त्वमब्रवीत् ५४ पुराणसंहितांदिव्यांसांख्ययो
गक्रियावतीम् ॥ सत्यव्रतस्यराजर्षेरात्मगुह्यमशेषतः ५५ अश्रौषीदृषिभिःसाकमात्मतत्त्वमसंशयम् ॥ नाव्यासीनोभगवताप्रोक्तंब्रह्मसनातनम् ५६

चूर्णिका

५० किंच अयंजनः जनस्यअसतींमतिं आदिशते ययासंसारंप्राप्नोति ५१ त्वंतु अमोघंज्ञानंआदिशसेयेननिजंपदंप्राप्नोति हेईश्वरत्वंसर्वलोकस्यगुरुः सुहृत्प्रियेश्वरश्च
असितथापिजनःअंधधीःसन्हृदिसंतंत्वांनजानाति ५२ एवंभूतंत्वांअहंशरणंप्रपद्ये हेभगवन्परमार्थप्रकाशकैःवचोभिःनःहृद्ग्रंथीन्छिंधिस्वंरूपंप्रकाशय ५३॥ श्रीशुकउवाच॥
एवंब्रुवाणंनृपंहरिः तत्त्वंमत्स्यपुराणंच अब्रवीत् ५४ ५५ नाविस्थितःसःऋषिभिःसहतत्अश्रौषीत् ५६

Nepal Sanskrit University, Balmeeki Campus Library

CC-0. In Public Domain. Digitization by eGangotri

अतीतःपूर्वोयःप्रलयःतस्यापायेअवसाने (उत्थिताय ततःप्रबुद्धायवेधसेब्रह्मणेप्रत्याहरत्प्रत्याहृत्यदत्तवानित्यर्थः) ५७ ५८ ५९ योयंहरेरवतारस्तंयःकीर्तयेत् ६० दितिजंहयग्रीवंहत्वातेनापनी
तंश्रुतिगणंप्रत्युपादत्तप्रत्यानीतवान् । सत्यव्रतानांसत्यव्रतस्यऋषीणांच । छत्रिणोयांतीतिवच्छिगसमवायाद्बहुवचनम् । जिह्ममीनंमायामत्स्यम् ॥ ६१ ॥ ॥इतिश्रीभागवतभावार्थदीपिकायांश्री
धरस्वामिविरचितायांअष्टमस्कंधेटीकायांमत्स्यावतारचरितानुवर्णनंनामचतुर्विंशोध्यायः ॥ २४ ॥ श्रीः ॥(श्रीधरैर्नहृयत्किंचिद्व्याख्यातंसुगमत्वतः । बालानांसुखबोधार्थंतद्व्याचष्टमहेश्वरः) १ शिवम्

श्लोकाः ५७/६१

अतीतप्रलयापायेउत्थितायसवेधसे ॥ हत्वाऽसुरंहयग्रीवंवेदान्प्रत्याहरद्धरिः ५७ सतुसत्यव्रतोराजोज्ञानविज्ञानसंयुतः ॥ विष्णोःप्रसादात्कल्पे
स्मिन्आसीद्वैवस्वतोमनुः ५८ सत्यव्रतस्यराजर्षेर्मायामत्स्यस्यशार्ङ्गिणः ॥ संवादंमहदाख्यानंश्रुत्वामुच्येतकिल्बिषात् ५९ अवतारोहरेर्योयंकीर्तये
द्न्वहंनरः ॥ संकल्पास्तस्यसिध्यंतिसयातिपरमांगतिम् ६० प्रलयपयसिधातुःसुप्तशक्तेर्मुखेभ्यःश्रुतिगणमपनीतंप्रत्युपादत्तहत्वा ॥ दितिजमक
थयद्योब्रह्मसत्यव्रतानांतमहमखिलहेतुंजिह्ममीनंनतोस्मि ६१ ॥ ॥ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांअष्टमस्कंधेमत्स्यावतारचरि
तानुवर्णनंनामचतुर्विंशोऽध्यायः २४ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

चूर्णिका

ततःप्रलयांतेउत्थितवेधसे हरिः हयग्रीवंहत्वावेदानानीयददौ ५७सतुसत्यव्रतः अस्मिन्कल्पेहरेःप्रसादात्वैवस्वतोमनुःआसीत् ५८ मत्स्यरूपिणःहरेः राज्ञश्चसंवादंश्रुत्वा ॥८०॥
पातकात्मुच्यते ५९ अयंहरेःअवतारःतंअन्वहंयः कीर्तयेत्तस्यसंकल्पाः सिध्यंति सःपरमांगतिंयाति ६० किंच हेराजन्यः प्रलयपयसिदैत्यंहत्वा तेनब्रह्मणः मुखेभ्यः
अपनीतंश्रुतिगणंउपादायसत्यव्रतस्यऋषीणांचब्रह्मअकथयत् तंजिह्ममीनंनतोस्मि ६१ ॥ इत्यष्टमेचूर्णिकायांचतुर्विंशोऽध्यायः२४ ॥ ॥ समाप्तोयंस्कंधः ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत—अष्टमस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत–नवमस्कंधः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीगणपतिसरस्वतीभ्यांनमः । श्रीर्जयतितराम् । गुणायंगुणतावाप्त्यैवृणतेकरुणानिधिम् । तमहंशरणंयामिपरमानंदमाधवम् ॥१॥ त्रिगुणाष्टभिरध्यायैर्वैवस्वतसुतान्वयः । नवमेकृष्णसत्कीर्तिप्रसंगा यवितन्यते॥२॥एवमुक्तोष्टमस्कंधेसद्धर्मःसत्त्वशोधकः । कर्तृपालकवक्त्रादिमन्वादीनांनिरूपणैः॥३॥सद्धर्मशुद्धसत्त्वानामंतरंगेशसत्कथा। सूर्यसोमान्वयाख्यानैरधुनासंगतोच्यते॥४॥त्रयोदशभिरध्यायैः सूर्यवंशोऽनुवर्ण्यते । एकादशभिरध्यायैः सोमवंशस्ततः परैः॥५॥तत्रतुप्रथमेऽध्यायेवैवस्वतसुतान्वये । सोमवंशप्रवेशोक्त्यैसुद्युम्नस्त्रीत्वमुच्यते ॥ ६ ॥ उक्तानुवादपूर्वकंवैवस्वतमनोर्वंशंपृच्छति मन्वंतरा णीतिपंचभिः । मेमया । (तत्रमन्वंतरेषुकृतानिहरेर्वीर्याणिप्रभावाश्च) १ (पुरुषस्यहरेः सेवया) २ ३ (अनुक्तंवंशंशुश्रूषतांश्रोतुमिच्छतां) ४ (येचाद्यतनाःसंति) ५ ६ (प्राचुर्येणसंक्षेपेण) ७ पूर्वोक्त मेवतावद्वंशंतत्प्रवर्तकंश्रीनारायणमारभ्यानुस्मरति परावरेषामितिपंचभिः ८ ९ १० ११ नाभागंचेतिपाठेनभगएवनाभागः १२ सूर्यपौत्रस्यसुद्युम्नस्यस्त्रीत्वेसतिबुधात्पुरूरवःप्रभृतिसोमवंशसंचारंवक्तुं
॥ १ ॥ सप्रस्तावमिलोपाख्यानमाह अप्रजस्यमनोःपूर्वमित्यादिनायावदध्यायसमाप्ति पूर्वंइक्ष्वाकुप्रभृतीनामुत्पत्तेःप्राक् १३

॥ राजोवाच ॥ मन्वंतराणिसर्वाणित्वयोक्तानिश्रुतानिमे ॥ वीर्याण्यनंतवीर्यस्यहरेस्तत्रकृतानिच १ योऽसौसत्यव्रतोनामराजर्षिर्द्रविडेश्वरः ॥ ज्ञानंयो तीतकल्पांतेलेभेपुरुषसेवया २ सवैविवस्वतःपुत्रोमनुरासीदितिश्रुतम् ॥ त्वत्तस्तस्यसुताश्चोक्ताइक्ष्वाकुप्रमुखान्नृपाः ३ तेषांवंशंपृथग्ब्रह्मन्वंश्यानुच रितानिच ॥ कीर्तयस्वमहाभागानित्यंशुश्रूषतांहिनः ४ येभूतायेभविष्याश्चभवंत्यद्यतनाश्चये ॥ तेषांनःपुण्यकीर्तीनांसर्वेषांवदविक्रमान् ५ ॥ सूतउ वाच ॥ एवंपरीक्षिताराज्ञासदसिब्रह्मवादिनाम् ॥ पृष्टःप्रोवाचभगवाञ्छुकःपरमधर्मवित् ६ ॥ श्रीशुकउवाच ॥ श्रूयतांमानवोवंशःप्राचुर्येणपरंतप ॥ नशक्यतेविस्तरतोवक्तुंवर्षशतैरपि ७ परावरेषांभूतानामात्मायःपुरुषःपरः ॥ सएवासीदिदंविश्वंकल्पांतेऽन्यन्नकिंचन ८ तस्यनाभेःसमभवत्पद्मकोशो हिरण्मयः ॥ तस्मिन्जज्ञेमहाराजस्वयंभूश्चतुराननः ९ मरीचिर्मनसस्तस्यजज्ञेतस्यापिकश्यपः ॥ दाक्षायण्यांततोऽदित्यांविवस्वानभवत्सुतः १० ततो मनुःश्राद्धदेवःसंज्ञायामासभारत ॥ श्रद्धायांजनयामासदशपुत्रान्सआत्मवान् ११ इक्ष्वाकुनृगशर्यातिदिष्टधृष्टकरूषकान् ॥ नरिष्यंतंपृषध्रंचनभगंचक विंविभुः १२ अप्रजस्यमनोःपूर्वंवसिष्ठोभगवान्किल ॥ मित्रावरुणयोरिष्टिंप्रजार्थमकरोद्विभुः १३

श्लोकाः १/१३

चूर्णिका

श्रीगणेशाय नमः ॥ अथ नवमस्कंधार्थो लिख्यते ॥ राजोवाच हे शुक त्वया उक्तानि सर्वमन्वंतराणि श्रुतानि तेषु हरेः कृतानि वीर्याणि च श्रुतानि १ योसौ सत्य व्रतोनाम राजर्षिः सः गतकल्पांते २ विवस्वतः पुत्रः मनुः आसीत् इति श्रुतम् ३ हे ब्रह्मन् तस्य इक्ष्वाकुप्रमुखपुत्राणां वंशं वंश्यानुचरितानि च वद ४ किं च ये भूताः येभाव्याः ये अद्यतनाः तेषां पुण्यकीर्तीनां विक्रमान् वद ॥ ५ ६ ॥ श्रीशुक उवाच ॥ हे राजन् मानवो वंशः प्राचुर्येण श्रूयताम् ७ कल्पांते नारायणः एक एवासीत् ८ तस्य नाभिकमलात् ब्रह्माजज्ञे ९ तस्य मनसः मरीचिः तस्य कश्यपः तस्मात्अदित्यां विवस्वान्अभवत् १० तस्मात् संज्ञायां श्राद्धदेवः मनुः तस्मा त् श्रद्धायांदशपुत्राः ११ इक्ष्वाकुः प्रथमः नृगः द्वितीयः शर्यातिः तृतीयः दिष्टः चतुर्थः धृष्टः पंचमःकरूषकः षष्ठः नरिष्यंतः सप्तमः पृषध्रः अष्टमः नभगः नवमः क विः दशमः १२ एषां पुत्राणां उत्पत्तेःप्राक् अप्रजस्य मनोः प्रजार्थं वसिष्ठः मित्रावरुणयोः इष्टिं चकार १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. न. दुहित्रर्थंममकन्यायथाभवेत्तथायजेतिहोतारंगत्वानमस्कृत्यसम्यगयाचत । पयएवव्रतमाहारोनियतोयस्याः १४ अध्वर्युणाहोतर्यजेतिप्रेरितोहोतातेनगृहीतेहविषिसतितत्तयाप्रार्थितंध्यायन्व्यचरत् अ० ९
अयजत् । पाठांतरेतदध्यायत्वाचावषट्कारंगृणन्वषडित्युच्चारयन् १५ १६ ब्रह्मविक्रियामंत्रान्यथात्वं १७ १८ प्रपितामहोवसिष्ठः १९ २० २१ २२ २३ २४ २५ २६ २७ २८ विगतंतिमिरं
टीका आभासः प्रकाशश्चान्यस्ययासुतथाभूतादिशः कुर्वंतः २९ ३० ॥ १ ॥

॥ २ ॥ तत्रश्रद्धामनोःपत्नीहोतारंसमयाचत ॥ दुहित्रर्थमुपागम्यप्रणिपत्यपयोव्रता १४ प्रेरितोऽध्वर्युणाहोताध्यायंस्तत्सुसमाहितः ॥ हविषिव्यचरत्तेनवषट्का श्लोकाः
रंगृणन्द्विजः १५ होतुस्तद्व्यभिचारेणकन्येलानामसाऽभवत् ॥ तांविलोक्यमनुःप्राहनातिहृष्टमनागुरुम् १६ भगवन्किमिदंजातंकर्मवोब्रह्मवादिना
म् ॥ विपर्ययमहोकष्टंमैवंस्याद्ब्रह्मविक्रिया १७ यूयंमंत्रविदोयुक्तास्तपसादग्धकिल्बिषाः ॥ कुतःसंकल्पवैषम्यमनृतंविबुधेष्विव १८ तन्निशम्यवचस्त १४/३०
स्यभगवान्प्रपितामहः ॥ होतुर्व्यतिक्रमंज्ञात्वाबभाषेरविनंदनम् १९ एतत्संकल्पवैषम्यंहोतुस्तेव्यभिचारतः ॥ तथापिसाधयिष्येतेसुप्रजस्त्वंस्वते
जसा २० एवंव्यवसितोराजन्भगवान्समहायशाः ॥ अस्तौषीदादिपुरुषमिलायाःपुंस्त्वकाम्यया २१ तस्मैकामवरंतुष्टोभगवान्हरिरीश्वरः ॥ ददा
विलाऽभवत्तेनसुद्युम्नःपुरुषर्षभः २२ सएकदामहाराजविचरन्मृगयांवने ॥ वृतःकतिपयामात्यैरश्वमारुह्यसैंधवम् २३ प्रगृह्यरुचिरंचापंशरांश्चपरमाद्भु
तान् ॥ दंशितोनुमृगंवीरोजगामादिशमुत्तराम् २४ सकुमारोवनंमेरोरधस्तात्प्रविवेशह ॥ यत्रास्तेभगवाञ्शर्वोरममाणःसहोमया २५ तस्मिन्प्रविष्टएवा
सौसुद्युम्नःपरवीरहा ॥ अपश्यत्स्त्रियमात्मानमश्वंचवडवांनृप २६ तथातदनुगाःसर्वेआत्मलिंगविपर्ययम् ॥ दृष्ट्वाविमनसोऽभूवन्वीक्ष्यमाणाःपरस्परम्
२७ ॥ राजोवाच ॥ कथमेवंगुणोदेशःकेनवाभगवन्कृतः ॥ प्रश्नमेनंसमाचक्ष्वपरंकौतूहलंहिनः २८ ॥ श्रीशुकउवाच ॥ एकदागिरिशंद्रष्टुमृषयस्तत्रसु
व्रताः ॥ दिशोवितिमिराभासाःकुर्वंतःसमुपागमन् २९ तान्विलोक्यांबिकादेवीविवस्त्राव्रीडिताभृशम् ॥ भर्तुरंकात्समुत्थायनीवीमाश्वथपर्यधात् ३०

चूर्णिका तदा श्रद्धा नाम मनोः पत्नी होतारं प्रति मम कन्या भवात्विति अयाचत १४ १५ तदा होतुर्मंत्रव्यभिचारेण इला नाम कन्या अभवत् तदा मनुः कन्यां
दृष्ट्वा उवाच १६ हे वसिष्ठ किमिदं विपरीतं जातं १७ १८ ततोवसिष्ठः होतुर्व्यतिक्रमंज्ञात्वा तं उवाच १९ हे मनो होतुर्व्यभिचारतः इदं संकल्पवैषम्यं जातं
तथापि ते सुप्रजास्त्वं साधयिष्ये २० इत्युक्त्वाहरिं अस्तौत् २१ तदा प्रसन्नः हरिः इलामेव सुद्युम्नं अकरोत् २२ सः सुद्युम्नः एकदा अश्वं आरुह्य अमात्यादिभिः
सह मृगयां गतः सन् २३ २४ मेरोः अधस्तात् वनं विवेश यत्र उमया सह शिवः रममाणः आस्ते २५ तस्मिन्प्रविष्टे सति आत्मानं स्त्रियं अश्वं च वडवां अपश्य
त् २६ तदनुगाः सर्वे आत्मलिंगविपर्ययं दृष्ट्वा मिथो वीक्षंतः संतः खिन्नाः अभूवन् ॥ २७ ॥ राजोवाच ॥ कथमेवंगुणो देशः केन वा भगवन् कृतः तद्वद ॥ २८ ॥ ॥ २ ॥
श्रीशुक उवाच ॥ एकदा ऋषयः गिरिशं द्रष्टुं तत्र अगमन् २९ तान् दृष्ट्वा विवस्त्रा देवी व्रीडिता सती भर्तुरंकात् उत्थाय वासः पर्यधात् ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसंगंरत्यभिनिवेशंस्त्रीप्रसंगदर्शनकलुषितमनसःसंतस्तत्प्रसंगशून्यंनरनारायणाश्रमंप्रययुः ३१ ३२ प्रासंगिकमुक्त्वाप्रस्तुतमनुवर्णयति (ततइति) अनुचरीसंयुक्तेतिवक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः

३३ ३४ ३५ ३६आशयन्इच्छन्. ३७ ३८ ३९ नाभ्यनंदत्स्त्रीत्वेलज्जयामासंनिलीयावस्थानात् ४० ४१ ४२ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांप्रथमोऽध्यायः १ ॥ ॥ ७ ॥

टीका द्वितीयेमनुपुत्राणांद्वावपुत्रौविरागतः । करूषकादिपंचानांवंशानाहलघुक्रमात् ॥ १ ॥ १ इक्ष्वाकुः पूर्वजोयेषांतान् २

॥ ३ ॥ ऋषयोपितयोर्वीक्ष्यप्रसंगंरममाणयोः ॥ निवृत्ताःप्रययुस्तस्मान्नरनारायणाश्रमम् ३१ तदिदंभगवानाहप्रियायाःप्रियकाम्यया ॥ स्थानंयःप्रविशेदेतत्स

वैयोषिद्भवेदिति ३२ ततऊर्ध्वंवनंतद्वैपुरुषावर्जयंतिहि ॥ साचानुचरसंयुक्ताविचचारवनाद्वनम् ३३ अथतामाश्रमाभ्याशेचरंतींप्रमदोत्तमाम् ॥ स्त्री

भिःपरिवृतांवीक्ष्यचकमेभगवान्बुधः ३४ सापितंचकमेसुभ्रूःसोमराजसुतंपतिम् ॥ सतस्यांजनयामासपुरूरवसमात्मजम् ३५ एवंस्त्रीत्वमनुप्राप्तःसुद्युम्नो

मानवोनृपः ॥ सस्मारस्वकुलाचार्यंवसिष्ठमितिशुश्रुम ३६ सतस्यतांदशांदृष्ट्वाकृपयाभृशपीडितः ॥ सुद्युम्नस्याशयन्पुंस्त्वमुपाधावतशंकरम् ३७ तु

ष्टस्तस्मैसभगवानृषयेप्रियमावहन् ॥ स्वांचवाचमृतांकुर्वन्निदमाहविशांपते ३८ मासंपुमान्सभवितामासंस्त्रीतवगोत्रजः ॥ इत्थंव्यवस्थयाकामंसु

द्युम्नोवतुमेदिनीम् ३९ आचार्यानुग्रहात्कामंलब्ध्वापुंस्त्वंव्यवस्थया ॥ पालयामासजगतींनाभ्यनंदत्स्मतंप्रजा ४० तस्योत्कलोगयोराजन्विमलश्चसु

तास्त्रयः ॥ दक्षिणापथराजानोबभूवुर्धर्मतत्पराः ४१ ततःपरिणतेकालेप्रतिष्ठानपतिःप्रभुः ॥ पुरूरवसउत्सृज्यगांपुत्रायगतोवनम् ४२ ॥ ॥ इतिश्री

भागवतेमहापुराणेनवमस्कंधेइलोपाख्यानेप्रथमोऽध्यायः १ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंगतेथसुद्युम्नेमनुर्वैवस्वतःसुते ॥ पुत्रका

मस्तपस्तेपेयमुनायांशतंसमाः १ ततोयजन्मनुर्देवमपत्यार्थंहरिंप्रभुम् ॥ इक्ष्वाकुपूर्वजान्पुत्रान्लेभेस्वसदृशान्दश २

ऋषयोपि रममाणयोस्तयोः प्रसंगं दृष्ट्वा निवृत्ताः संतः नरनारायणाश्रमं प्रययुः ३१ तदा शिवः प्रियायाः प्रियकाम्यया इदं आह एतत् स्थानं यः प्रविशेत् सः यो

चूर्णिका षित् भवेत् ३२ तत ऊर्ध्वं पुरुषाः तद्वनं वर्जयंति सा इला कन्या वनात् वनं चचार ३३ ततो बुधः स्वाश्रमसमीपे चरंतीं तां वीक्ष्य चकमे ३४ सापि तं चकमे

तस्यां बुधः पुरूरवसं पुत्रं जनयामास ३५ एवं स्त्रीत्वं प्राप्तः सुद्युम्नः वसिष्ठं सस्मार ३६ ततो वसिष्ठः तस्य तां अवस्थां दृष्ट्वा तस्य पुंस्त्वं इच्छन् शंकरं उपाधावत

३७ सभगवान् वसिष्ठाय तुष्टः सन् स्वांवाचं ऋतां कुर्वन् तत्प्रियं च कुर्वन् इदं आह ३८ अयं मासं पुमान् मासं स्त्री भविता ३९ इत्थं व्यवस्थया गुरोः कृपया

सुद्युम्नः भूमिंपालयामास तं प्रजाः नाभ्यनंदन् ४० तस्य उत्कलः प्रथमः गयः द्वितीयः विमलः तृतीयः एते त्रयः पुत्राः दक्षिणापथगोप्तारः बभूवुः ४१ ततः प्रतिष्ठान ॥ ३ ॥

पतिः सुद्युम्नः पुरूरवसे पुत्राय गां उत्सृज्य वनं गतः ४२ ॥ ॥ इतिनवमे प्रथमः १ ॥ ॥ छ ॥ ॥ श्रीशुक उवाच ॥ ॥ एवंसुद्युम्ने सति वैवस्वतो मनुः

पुत्रकामः सन् यमुनायां शतं समाः तपः तेपे १ ततो मनुः अपत्यार्थं हरिं ईजे ततः इक्ष्वाकुप्रमुखान् पूर्वोक्तदशपुत्रान् लेभे २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रपृषध्रस्यवंशोनाभवदिति सहेतुकमाह पृषध्रस्त्वित्यादिना कविःकनीयानित्यतः प्राक्तनग्रंथेन । यत्तःसावधानः खड्गपाणेःसततस्तिष्ठतोजागरणंवीरासनमुच्यतेतदेवव्रतंनियमोयस्यएवंभूतःसन्गाःपाल यामास ३ शार्दूलोव्याघ्रः ४ ५ प्रलीनाउडुगणायस्मिन्तस्मिन्समयेबभ्रोः कपिलायागोः ६ गांकामतोनजघानेतिख्यापयितुंवृक्णश्रवणइत्याद्युक्तं ७ व्युष्टायांप्रभातायां ८ क्षत्रबंधुः क्षत्रियाधमो पित्वंनभविता अपितुशूद्रोभवितेति ९ १० ११ १२ १३ उपयुक्तकरणः १४ दग्धदेहः कवेरपिवंशोनाभवदित्याह । कविरिति बंधुभिः सहराज्यंविसृज्य १५ १६ ब्रह्मभूयंब्राह्मणत्वं (ब्रह्मत्वरूपंक्षत्तं मासं) नृगस्यवंशःपुत्रःसुमतिस्ततोभूतज्योतिःततोवसुः १७

॥ ४ ॥ पृषध्रस्तुमनोःपुत्रोगोपालोगुरुणाकृतः ॥ पालयामासगायत्तोरात्र्यांवीरासनव्रतः ३ एकदाप्राविशद्गोष्ठंशार्दूलोनिशिवर्षति ॥ शयानागावउत्थायभी तास्ताबभ्रमुर्व्रजे ४ एकांजग्राहबलवान्साचुक्रोशभयातुरा ॥ तस्यास्तत्क्रंदितंश्रुत्वापृषध्रोनिषसादह ५ खड्गमादायसहसाप्रलीनोडुगणेनिशि ॥ अजा नन्नहनद्बभ्रोःशिरःशार्दूलशंकया ६ व्याघ्रोपिवृक्णश्रवणोनिस्त्रिंशाग्रहतस्ततः ॥ निश्चक्रामभृशंभीतोरक्तंपथिसमुत्सृजन् ७ मन्यमानोहतंव्याघ्रंपृषध्रः परवीरहा ॥ अद्राक्षीत्स्वहतांबभ्रुंव्युष्टायांनिशिदुःखितः ८ तंशशापकुलाचार्यःकृतागसमकामतः ॥ नक्षत्रबंधुःशूद्रस्त्वंकर्मणाभवितामुना ९ एवंश प्तस्तुगुरुणाप्रत्यगृह्णात्कृतांजलिः ॥ अधारयद्व्रतंवीरऊर्ध्वरेतामुनिप्रियम् १० वासुदेवेभगवतिसर्वात्मन्यमलेपरे ॥ एकांतित्वंगतोभक्त्यासर्वभूतसुहृत्स मः ११ विमुक्तसंगःशांतात्मासंयताक्षोऽपरिग्रहः ॥ यदृच्छयोपपन्नेनकल्पयन्वृत्तिमात्मनः १२ आत्मन्यात्मानमाधायज्ञानतृप्तःसमाहितः ॥ विचचार महीमेतांजडांधबधिराकृतिः १३ एवंवृत्तोवनंगत्वादृष्ट्वादावाग्निमुत्थितम् ॥ तेनोपयुक्तकरणोब्रह्मप्रापपरंमुनिः १४ कविःकनीयान्विषयेषुनिःस्पृहोवि सृज्यराज्यंसहबंधुभिर्वनम् ॥ निवेश्यचित्तेपुरुषंस्वरोचिषंविवेशकैशोरवयाःपरंगतः १५ करूषान्मानवादासन्कारूषाःक्षत्रजातयः ॥ उत्तरापथगोप्तारो ब्रह्मण्याधर्मवत्सलाः १६ धृष्टाद्धार्ष्टमभूत्क्षत्रंब्रह्मभूयंक्षितंगतम् ॥ नृगस्यवंशःसुमतिर्भूतज्योतिस्ततोवसुः १७

श्लोकाः $\frac{३}{१७}$

चूर्णिका

तत्र पृषध्रस्तु अष्टमः गुरुणा गोपालः कृतः सः गाः पालयामास ३ एकदा निशि वर्षति सति गोष्ठं व्याघ्रः प्राविशत् भीताः गावः व्रजे बभ्रमुः ४ व्याघ्रः एकां जग्रा ह सा भयातुरा चुक्रोश ५ तदा पृषध्रः खड्गं आदाय शार्दूलशंकया न ज्ञात्वा बभ्रोः शिरः अहरत् ६ व्याघ्रोपि छिन्नकर्णः भीतः सन् रक्तं पथि उत्सृजन् निश्चक्राम ७ पृषध्रः व्याघ्रं हतं मन्यमानः व्युष्टायां निशि स्वहतां बभ्रुं दृष्ट्वा दुःखितः जातः ८ तदा सः गुरुः पृषध्रं शशाप अनेन कर्मणा त्वं शूद्रो भव इति ९ एवं गुरुणा शप्तः सः ऊर्ध्वरेताः मुनिप्रियं व्रतं दधार १० सः वासुदेवे मनः समाधाय जडांधबधिराकृतिः सन् कालेन दावाग्निदग्धः ब्रह्मप्राप ११ १२ १३ १४ ततः क निष्ठः कविः दशमः विषयेषु निरिच्छः सन् राज्यं हित्वा वने गत्वा चित्ते पुरुषं निवेश्य परं गतः १५ अथ करूषात् षष्ठात् कारूषाः क्षत्रियाः ते उत्तरदेशपालकाः आसन् १६ ततः धृष्टात् पचमात् धार्ष्टं क्षत्रं अभूत् तत् ब्राह्मणत्वं गतं नृगस्य द्वितीयस्य सुमतिः ततः भूतज्योतिः ततः वसुः १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओघवतःपितातत्पुत्रोप्योघवानेवेत्यर्थः १८ तदेवंत्रिभिःश्लोकैःकरूषधृष्टनृगाणांत्रयाणांवंशाउक्ताः । नरिष्यंतस्यवंशमाह चित्रसेनइतिसार्धैस्त्रिभिः १९ ततइत्यादेर्यत्राधिक्यंस्यात्तत्रानंतर्यैततइत्यादिपदंव्याख्येयंयत्रतुन्यूनत्वंतत्रपूर्वपदानुषंगेणव्याख्येयं २० अग्निवेशएवकानीनइतिजातूकर्ण्यइतिचविख्यातः २१ २२ दिष्टस्यपुत्रोनाभागोवक्ष्यमाणान्नाभागादन्यइतिभ्रांतिव्युदासार्थंअनुवादमात्रं २३ २४ २५ आंगिरसःसुतोमहायोगीसंवर्तोयमयाजयत्समरुतः २६ अस्ययत्किंचपात्रादिकमास्तितत्तुसर्वंहिरण्मयंशोभनमासीत् २७ अमाद्यत् अहृष्यत् २८ २९ ३० (यतःयस्यांतृणबिंदोःपुत्राअभवन् ननुदेवीकस्माद्भेजेइत्यतआह भजनीयेति) ३१ (यस्यांइडविलायांविश्रवाऋषियोंगेश्वरात्पितुःपुलस्त्यात्विद्यांमादायधनदंकुबेरंपुत्रमुत्पादयामास) ३२

वसोःप्रतीकस्तत्पुत्रओघवानोघवत्पिता ॥ कन्याचौघवतीनामसुदर्शनउवाहताम् १८ चित्रसेनोनरिष्यंताद्दक्षस्तस्यसुतोभवत् ॥ तस्यमीढ्वांस्ततःकूर्चइंद्रसेनस्तुतत्सुतः १९ वीतिहोत्रस्त्विंद्रसेनात्तस्यसत्यश्रवाअभूत् ॥ उरुश्रवाःसुतस्तस्यदेवदत्तस्ततोभवत् २० ततोग्निवेशोभगवानग्निःस्वयमभूत्सुतः ॥ कानीनइतिविख्यातोजातूकर्ण्योमहानृषिः २१ ततोब्रह्मकुलंजातमाग्निवेश्यायनंनृप ॥ नरिष्यंतान्वयःप्रोक्तोदिष्टवंशमतःशृणु २२ नाभागोदिष्टपुत्रोन्यःकर्मणावैश्यतांगतः ॥ भलंदनःसुतस्तस्यवत्सप्रीतिर्भलंदनात् २३ वत्सप्रीतेःसुतःप्रांशुस्तत्सुतंप्रमितिंविदुः ॥ खनित्रःप्रमितेस्तस्माच्चाक्षुषोथविविंशतिः २४ विविंशतिसुतोरंभःखनिनेत्रोस्यधार्मिकः ॥ करंधमोमहाराजतस्यासीदात्मजोनृपः २५ तस्याविक्षित्सुतोयस्यमरुतश्चक्रवर्त्यभूत् ॥ संवर्तोयाजयद्यंवैमहायोग्यंगिरःसुतः २६ मरुत्तस्ययथायज्ञोनतथान्योस्तिकश्चन ॥ सर्वंहिरण्मयंत्वासीद्यत्किंचास्यस्यशोभनम् २७ अमाद्यदिंद्रःसोमेनदक्षिणाभिर्द्विजातयः ॥ मरुतःपरिवेष्टारोविश्वेदेवाःसभासदः २८ मरुत्तस्यदमःपुत्रस्तस्यासीद्राजवर्धनः ॥ सुधृतिस्तत्सुतोजज्ञेसौधृतेयोनरःसुतः २९ तत्सुतःकेवलस्तस्माद्बंधुमान्योगवांस्ततः ॥ बुधस्तस्याभवद्यस्यतृणबिंदुर्महीपतिः ३० तंभेजेऽलंबुसादेवीभजनीयगुणालयम् ॥ वराप्सरायतःपुत्राःकन्याचेडविलाऽभवत् ३१ यस्यामुत्पादयामासविश्रवाधनदंसुतम् ॥ प्रादायविद्यांपरमांऋषियोंगेश्वरात्पितुः ३२

चूर्णिका

ततः प्रतीकः ततः ओघवान् ओघवती कन्या च तां सुदर्शनः उवाह ओघवतः पुत्रः ओघवान् १८ सतो नरिष्यंतात् सप्तमात् चित्रसेनः ततो दक्षःतस्य मीढ्वान् तस्मात् कूर्चःतस्मात् इंद्रसेनः १९ तस्मात् वीतिहोत्रः तस्य सत्यश्रवाःतस्मात् उरुश्रवाः तस्मात् देवदत्तः २० तस्य अग्निवेश्यः नाम स्वयं अग्निः सुतोभूत् स एव कानीनः जातूकर्ण्यः इति २१ नस्मात् ब्रह्मकुलं जातं दिष्टात् चतुर्थात् नाभागः स च वैश्यतां गतः तस्मात् भलंदनः तस्मात् वत्सप्रीतिः २२ २३ तस्मात्प्रांशुः तस्मात् प्रमतिः तस्मात् खनित्रः तस्मात् चाक्षुषःतस्मात् विविंशतिः २४ ततःरंभः तस्य खनिनेत्रः तस्य करंधमः २५ तस्य आविक्षित् तस्य मरुतःचक्रवर्तीअभूत् २६ यस्य यज्ञ इव अन्यस्य यज्ञः न जातः तस्य यज्ञेसर्वं हिरण्मयं आसीत् २७ २८ तस्य दमः तस्य राज्यवर्धनः तस्य सुधृतिःतस्यनरः २९ तस्यकेवलः तस्य बंधुमान् तस्य वेगवान् तस्य बंधुः तस्य तृणविंदुः ३० तं अलंबुषा अप्सरा भेजे तस्यां तृणविंदोः पुत्राः त्रयः विशालः शून्यबंधुः धूम्रकेतुरिति इडविडा कन्याच जाता ३१ तस्यां विश्रवा कुबेरं जनयामास ३२

१ 'तंभेजेऽलंबुषादेवी'तिक्वचित्पाठोदृश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तृणविंदोःपुत्रानाह विशालइति । तस्यतृणविंदोःसुताः ३३ सहदेवजःदेवजेनसहितः (देवजोपिसंयमस्यपुत्रइत्यर्थः) पाठांतरेनामान्यत्वमात्रंअर्थस्तुसएव ३४ ३५ (सौमदत्तिः सोमदत्तपुत्रःसुमतिः) वैशालभूपालाविशालस्यान्वयेजाताः ३६ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांद्वितीयोध्यायः २ ॥ ॥ ७ ॥ ॥ तृतीयेमनुपुत्रस्यशर्यातेःकीर्त्यतेऽन्वयः । यत्रसौकन्यमाख्यानंरैवतंचमहाद्भुतं ॥ १ ॥ ब्रह्मिष्ठःवेदार्थतत्त्वज्ञःतदेवाह योवाइति द्वितीयमहः द्वितीयेऽह्निक्रियमाणंकर्मऊचिवान्उवाच । तस्यवंशंउत्तानबर्हिरानर्तइत्यादिनावक्ष्यति १ तावत्कन्यावृत्तांतमाह सुकन्येति २ ३ ४ ५ भार्गवस्यच्यवनस्यअभद्रंअपराधः ६ ७ ८ मुग्धेयंममकन्याक्षंतव्यंत्वयेत्युच्यमानेकतिवर्षाण्यस्याःविवाहःकृतोनवेत्यादिवाक्यैस्तदभिप्रायंज्ञात्वातस्मैतांदुहितरंप्रादात् ९

॥ ३ ॥

॥ ६ ॥

श्लोकाः

३३
—
९

विशालःशून्यबंधुश्चधूम्रकेतुश्चतत्सुताः ॥ विशालोवंशकृद्राजावैशालींनिर्ममेपुरीम् ३३ हेमचंद्रःसुतस्तस्यधूम्राक्षस्तस्यचात्मजः ॥ तत्पुत्रात्संयमादासीत्कृशाश्वःसहदेवजः ३४ कृशाश्वात्सोमदत्तोभूद्योश्वमेधैरिडस्पतिम् ॥ इष्ट्वापुरुषमापाग्र्यांगतिंयोगेश्वराश्रितः ३५ सौमदत्तिस्तुसुमतिस्तत्सुतोजनमेजयः ॥ एतेवैशालभूपालास्तृणबिंदोर्यशोधराः ३६ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेद्वितीयोऽध्यायः २ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ शर्यातिर्मानवोराजाब्रह्मिष्ठःसबभूवह ॥ योवाअंगिरसांसत्रेद्वितीयमहऊचिवान् १ सुकन्यानामतस्यासीत्कन्याकमललोचना ॥ तयासार्धंवनगतोह्यगमच्च्यवनाश्रमम् २ सासखीभिःपरिवृताविचिन्वंत्यंघ्रिपान्वने ॥ वल्मीकरंध्रेददृशेखद्योतेइवज्योतिषी ३ तदैवंचोदिताबालाज्योतिषीकंटकेनवै ॥ अविध्यन्मुग्धभावेनसुस्रावासृक्ततोबहु ४ शकृन्मूत्रनिरोधोभूत्सैनिकानांचतत्क्षणात् ॥ राजर्षिस्तमुपालक्ष्यपुरुषान्विस्मितोऽब्रवीत् ५ अप्यभद्रंनयुष्माभिर्भार्गवस्यविचेष्टितम् ॥ व्यक्तंकेनापिनस्तस्यकृतमाश्रमदूषणम् ६ सुकन्याप्राहपितरंभीताकिंचित्कृतंमया ॥ द्वेज्योतिषीअजानंत्यानिर्भिन्नेकंटकेनवै ७ दुहितुस्तद्वचःश्रुत्वाशर्यातिर्जातसाध्वसः ॥ मुनिंप्रसादयामासवल्मीकांतर्हितंशनैः ८ तदभिप्रायमाज्ञायप्रादाद्दुहितरंमुनेः ॥ कृच्छ्रान्मुक्तस्तमामंत्र्यपुरंप्रायात्समाहितः ९

चूर्णिका

तृणविंदुसुतेन विशालेन वैशाली पुरी निर्मिता ३३ विशालात् हेमचंद्रः तस्य धूम्राक्षः तस्य संयमः तस्य कृशाश्वदेवजौ पुत्रौद्वौ ३४ कृशाश्वात् सोमदत्तः ३५ सः अश्वमेधैः पुरुषं इष्ट्वा अग्र्यां गतिं आप सोमदत्तात् सुमतिः तस्य जनमेजयः एते वैशालभूपालाः तृणबिंदोर्यशोधराः ३६ इति नवमे द्वितीयः २ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ मानवः शर्यातिः तृतीयः ब्रह्मिष्टो बभूव सः आंगिरसां सत्रे द्वितीयेह्नि क्रियमाणं कर्म उवाच १ तस्य सुकन्या नाम कन्या आसीत् तया सह च्यवनाश्रमं वनं गतः २ सा सखिभिः सह वने वृक्षान् विचिन्वती सती वल्मीकरंध्रे खद्योत इवद्वेज्योतिषी दृष्ट्वा ३ दैवेननोदिता कंटकेन अविध्यत् ततःअसृक् सुस्राव ४ तदैव सैनिकानां शकृन्मूत्रनिरोधः अभूत् तदा राजर्षिः सैनिकान् अब्रवीत् ५ युष्माभिःभार्गवस्य अपराधः कृतः किंनु तदा सुकन्या पितरं प्राह ६ अजानंत्या मया द्वे ज्योतिषी कंटकेन निर्भिन्ने ७ तच्छ्रुत्वा शर्यातिः मुनिं प्रसादयामास ८ मुनेः अभिप्रायं ज्ञात्वा कन्यां मुनये दत्त्वा कृच्छ्रान्मुक्तः पुरं ययौ ९

॥ ६ ॥

१ ‘तेदैवचोदितावाले’तिमु०पु०पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

१० हेईश्वरौसद्वैद्यौयुवांमह्यंवयस्तारुण्यंदत्तंसंपादयतम् ११ असोमपोःसोमपानरहितयोरपिवांयुवयोःसोमस्यग्रहं सोमपूर्णपात्रंग्रहीष्येदास्यामि । युवांसोमेनयक्ष्यइत्यर्थः ‘ ऐद्रंवायव्यंगृह्णाती ’ त्यादि
श्रुद्रव्यदेवतासंबंधानुपपत्त्याग्रह्णातेर्यागपर्यवसायित्वात् १२ बाढमित्यभिनंद्यभवानस्मिन्निमज्जतामित्यूचतुः १३ ह्रदंप्रवेशितःतावपितमतिवृद्धंगृहीत्वाप्रविष्टावित्यर्थः १४ (अपीच्याःसुंदराः) १५
अश्विनौशरणंययौयुवांपृथक्स्थित्वामत्पतिंदर्शयतमितिप्रार्थयामासेत्यर्थः १६ १७ १८ १९ प्रलंभितोवंचितःहेअसतिदुष्टेअसंमतंअनभीष्टम् २० हेसतांकुलप्रसूते तेतवमतिरन्यथाताद्विपर्ययेणकथमव
गताअध्यवसन्नात्वयाध्यवसितेतिवा । तदेवाह । कुलदूषणंत्विदमित्यादि २१ २२ २३ (अश्विनोरपिसोमस्यग्रहंअग्रहीत्ददौ) २४ ॥ ३ ॥

॥ ७ ॥ सुकन्याच्यवनंप्राप्यपतिंपरमकोपनम् ॥ प्रीणयामासचित्तज्ञाअप्रमत्ताऽनुवृत्तिभिः १० कस्यचित्त्वथकालस्यनासत्यावाश्रमागतौ ॥ तौपूजयित्वाप्रो श्लोकाः
वाचवयोमेदत्तमीश्वरौ ११ ग्रहंग्रहीष्येसोमस्ययज्ञेवामप्यसोमपोः ॥ क्रियतांमेवयोरूपंप्रमदानांयदीप्सितम् १२ बाढमित्यूचतुर्विप्रमभिनंद्यभिषक्त
मौ ॥ निमज्जतांभवानस्मिन्ह्रदेसिद्धविनिर्मिते १३ इत्युक्तोजरयाग्रस्तदेहोधमनिसंततः ॥ ह्रदंप्रवेशितोऽश्विभ्यांवलीपलितविप्रियः १४ पुरुषास्त्रयउ १०/२४
त्तस्थुरपीच्यावनिताप्रियाः ॥ पद्मस्रजःकुंडलिनस्तुल्यरूपाःसुवाससः १५ तान्निरीक्ष्यवरारोहासरूपान्सूर्यवर्चसः ॥ अजानंतीपतिंसाध्वीअश्विनौशरणं
ययौ १६ दर्शयित्वापतिंतस्यैपातिव्रत्येनतोषितौ ॥ ऋषिमामंत्र्यययतुर्विमानेनत्रिविष्टपम् १७ यक्ष्यमाणोथशर्यातिश्च्यवनस्याश्रमंगतः ॥ ददर्शदु
हितुःपार्श्वेपुरुषंसूर्यवर्चसम् १८ राजादुहितरंप्राहकृतपादाभिवंदनाम् ॥ आशिषश्चाप्रयुंजानोनातिप्रीतमनाइव १९ चिकीर्षितंतेकिमिदंपतिस्त्वयाप्रलं
भितोलोकनमस्कृतोमुनिः ॥ यत्त्वंजराग्रस्तमसत्यसंमतंविहायजारंभजसेऽमुमध्वगम् २० कथंमतिस्तेऽवगतान्यथासतांकुलप्रसूतेकुलदूषणंत्विदम् ॥ बि
भर्षिजारंयदपत्रपाकुलंपितुश्चभर्तुश्चनयस्यधस्तमः २१ एवंब्रुवाणंपितरंस्मयमानाशुचिव्रता ॥ उवाचततजामातातवैषभृगुनंदनः २२ शशंसपित्रेतत्सर्वं
वयोरूपाभिलंभनम् ॥ विस्मितःपरमप्रीतस्तनुजांपरिषस्वजे २३ सोमेनयाजयन्वीरंग्रहंसोमस्यचाग्रहीत् ॥ असोमपोरप्यश्विनोश्च्यवनःस्वेनतेजसा २४

चूर्णिका

ततः सुकन्या मुनिं प्रीणयामास १० कस्मिंश्चित्समये नासत्यौ स्वाश्रमं प्राप्तौ तौ पूजयित्वा मुनिः प्रोवाच ११ हे सद्वैद्यौ मे तारुण्यं संपादयतं अहं भवतोः असो
मपोःसतोः युवां सोमेन यक्ष्ये मे प्रमदानां ईप्सितं वयो रूपं चेत् क्रियतां १२ तौ बाढमित्यूचतुः हे ऋषेअस्मिन् ह्रदे निमज्जताम् १३ इत्युक्तो मुनिः जरया ग्रस्तदे
हः अश्विभ्यां सह ह्रदं विवेश १४ ततः ह्रदात् सूर्यवर्चसः त्रयः पुरुषाः उत्तस्थुः १५ तान् दृष्ट्वा पतिं अजानती साध्वी अश्विनौ शरणं ययौ १६ तौ तस्यै पतिं
दर्शयित्वा ऋषिंआमंत्र्य स्वर्गं ययतुः १७ कालेन यक्ष्यमाणः शर्यातिः च्यवनाश्रमं गतः तत्र कन्यासमीपे दिव्यं पुरुषं दृष्ट्वा दुहितरं प्राह १८ १९ हे सुकन्ये त्वं
वृद्धं पतिं हित्वा जारं भजसे २० पितुः भर्तुश्च कुलं अधो नयसि २१ इति श्रुत्वा सुकन्योवाच हे तात एषः भृगुनंदनः तव जामाता २२ इत्युक्त्वा सर्वं पूर्ववृत्तं ॥ ७ ॥
पित्रे शशंस तत् श्रुत्वा तनयां परिषस्वजे २३ च्यवनः वीरं सोमेन याजयन् अश्विनोः सोमपूर्णपात्रं अग्रहीत् २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सद्यस्तत्क्षणमेवमन्युर्यस्यसइंद्रः (सवज्रंवज्रेणसहितं)२५ २६ २७ विषयान्देशान्अभुंक्तअपालयत् २८ ककुद्मिःज्येष्ठोयास्मिंस्तत् । विभुंब्रह्माणम् २९ नलब्धःक्षणोऽवसरोयेन ३० आद्यंब्रह्माणम् ३१ तेत्वयाहृदियेकृतास्तेसर्वेभूपाःकालेननिरुद्धाःसंहृताः ३२ त्रिणवसप्तविंशतिश्चतुर्युगानितैर्विकल्पितोविभक्तः ३३ देवस्यांशोऽस्ति तस्मैनररत्नायदेहि ३४ तदेवाह ३५ पुण्यजनत्रासात्यक्षभयात्पूर्वमेव यच्चिरंपुरंतत्भ्रातृभिस्त्यक्तंतत् ३६ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांतृतीयोध्यायः ३ ॥ ७ ॥ चतुर्थेमनुपुत्रस्यनाभागस्यकथोच्यते । तत्सूनोश्चांबरीषस्यकृत्याप्रतिहतायतः ॥१॥ नभगस्य वंशमाह । नभगस्यापत्यंनाभागः । नाभागादंबरीषोभूदितिवक्ष्यन्तद्धेतुत्वेननाभागस्यनिष्कपटंचरितंतेनश्रीरुद्रप्रसादंचाह । यंततमित्यादिना । ब्रह्मचारिणंबहुकालंगुरुकुलेवसंतं । नैष्ठिकोसाविति मत्वाविभागसमयेतस्मैभागमप्रकल्प्यैव भ्रातरःसर्वदायंविभज्यगृहीत्वा पश्चाद्गुरुकुलादागतंभागार्थिनंकविंविद्वांसंयविष्ठंयं (नाभागं) प्रतिततंतातंपितरंदायंव्यभजन् (पितृरूपंभागंकल्पयामासुरित्यर्थः) १

॥ ८ ॥ श्लोकाः २५/१

हंतुंतमाददेवज्रंसद्योमन्युरमर्षणः ॥ सवज्रंस्तंभयामासभुजमिंद्रस्यभार्गवः २५ अन्वजानंस्ततःसर्वेग्रहंसोमस्यचाश्विनोः ॥ भिषजावितियत्पूर्वंसोमाहुत्या बहिष्कृतौ २६ उत्तानबर्हिरानर्तोभूरिषेणइतित्रयः ॥ शर्यातेरभवन्पुत्राआनर्ताद्रेवतोभवत् २७ सोंतःसमुद्रेनगरींविनिर्मायकुशस्थलीम् ॥ आस्थितोऽभुं क्तविषयानानर्तादीनरिंदम २८ तस्यपुत्रशतंजज्ञेककुद्मिज्येष्ठमुत्तमम् ॥ ककुद्मीरेवतींकन्यांस्वामादायविभुंगतः २९ पुत्र्यावरंपरिप्रष्टुंब्रह्मलोकमपावृतम् ॥ आवर्तमानेगांधर्वेस्थितोऽलब्धक्षणःक्षणम् ३० तदंतआद्यमानम्यस्वाभिप्रायंन्यवेदयत् ॥ तच्छ्रुत्वाभगवान्ब्रह्माप्रहस्यतमुवाचाह ३१ अहोराजन्निरुद्धा स्तेकालेनहृदियेकृताः ॥ तत्पुत्रपौत्रनप्तॄणांगोत्राणिचनशृण्महे ३२ कालोभियातस्त्रिणवचतुर्युगविकल्पितः ॥ तद्गच्छदेवदेवांशोनरदेवोमहाबलः ३३ क न्यारत्नमिदंराजन्नररत्नायदेहिभोः ॥ भुवोभारावतारायभगवान्भूतभावनः ३४ अवतीर्णोनिजांशेनपुण्यश्रवणकीर्तनः ॥ इत्यादिष्टोभिवंद्याजंनृपःस्वपुरमा गतः ३५ त्यक्तंपुण्यजनत्रासात्भ्रातृभिर्दिक्ष्ववस्थितैः ॥ सुतांदत्त्वाऽनवद्यांगींबलायबलशालिने ॥ बदर्याख्यंययौराजातप्तुंनारायणाश्रमम् ३६ ॥ इतिश्री भा०म०नवमस्कंधेतृतीयोऽध्यायः ३ ॥ ७ ॥ श्रीशुकउवाच ॥ नाभागोनभगापत्यंयंततंभ्रातरःकविम् ॥ यविष्ठंव्यभजन्दायंब्रह्मचारिणमागतम् १

चूर्णिका

तदा क्रुद्धः इंद्रः शर्यातिं हंतुं वज्रं आददे च्यवनः सवज्रं हस्तं स्तंभयामास २५ ततः सर्वे अश्विनोः सोमग्रहं अजानन् २६ शर्यातेः उत्तानबर्हिःआनर्तः भूरिषेणः इति त्रयः पुत्राः आनर्तात् रेवतो जातः २७ सः अंतःसमुद्रे कुशस्थलीं निर्माय आस्थितः सन् आनर्तादीन् बुभुजे २८ तस्य ककुद्मिज्येष्ठंपुत्रश तं अभवत् ककुद्मी स्वां रेवतीं कन्यां आदाय २९ वरं प्रष्टुं ब्रह्माणं गतः तत्र गांधर्वे आवर्तमाने सति क्षणं स्थित्वा ३० तदंते स्वाभिप्रायं न्यवेदयत् तत् श्रुत्वा ब्र ह्मा प्रहस्य आह ३१ अहो राजन् ये त्वया हृदि कृताः ते सर्वे कालेन संहृताः ३२ चतुर्युगविकल्पितः त्रिणवमितः कालो गतः इदानीं देवदेवांशः बलदेवः अ स्ति ३३ तस्मै इदं कन्यारत्नं देहि इत्यादिष्टः अजं अभिवंद्य स्वपुरं आगत्य ३४ ३५ बलरामाय कन्यां दत्त्वा तप्तुं बदर्याश्रमं जगाम ३६ इति नवमे तृतीयः ३ श्रीशुक उवाच मनुपुत्रः नभगः नवमः तस्य पुत्रो नाभागः सः गुरुकुले चिरं अवसत् तदा तस्य सर्वे भ्रातरः एनं नैष्ठिकं मत्वा तस्य भागं अप्रकल्प्य पितृधनं विभज्य जगृहुः कालेन सः आगत्य भ्रातॄन् प्रति स्वभागं अपृच्छत् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतदेवप्रश्नोत्तराभ्यां दर्शयति तत्र नाभागः पृच्छति हेभ्रातरः मह्यं किमभंक्त व्यभजंत कंभागं मदर्थं यूयं कल्पितवंतः । भ्रातरआहुः तदा विस्मृतमस्माभिः इदानीं तुतवपितरंभजामंविभजामत्वंपितरंगृहाणेत्य र्थः सचापितरंगत्वाह तत्तहेतात आर्याःश्रेष्ठाःमम त्वामभांक्षुर्भागंचक्रुः मदीयोभागस्त्वमित्यर्थः । पाठांतरे हेतात किमिदंममाभांक्षुः । भजामापितरंतंवेत्युक्तवंतः आर्यास्त्वांमह्यंकिमर्थंददुरित्यर्थः । पिताह । हेपु त्रकतत्तैरुक्तंमाआद्दथाःप्रतारणमात्रंतैःकृतंतस्मिन्नादरंमाकार्षीः । नह्यहंदायइव भोगसाधनमित्यर्थः २ तथापितैःभागत्वेनदत्तोहंतवजीवनोपायंउपदेक्ष्यामीत्याह इमइतिसपादाभ्यांद्वाभ्यां । "अभिप्लवः षडहोभवति पृष्ठ्यःषडहोभवती"ति विहितेषुषडहेषुआवर्त्यमानेषुषष्ठंषष्ठमहः कर्मोपेत्य प्राप्य कर्मणितदनुष्ठानेसुमेधसोपितेसूक्तविशेषाज्ञानेनमुह्यंति कर्त्रे हेविद्वन् ३ तान्महात्मनोपि त्वं'इदमित्थारौद्रमि'तिच 'येयज्ञेनदक्षिणये'तिच वैश्वदेवेद्वेसूक्तेशंसयपाठय । ततःकर्मणिसमाप्तेसतितेस्वर्यंतःस्वर्गंगच्छंतःस्वसत्रेपरिशेषितमवशिष्टमात्मनोधनंतेतुभ्यंदास्यंति ४ (अथतस्मात्तान्गच्छेतितथेत्यादिशुकवाक्यंयथाय थावत्कृतवान्सत्रपरिशेषणंसत्रावशिष्टंधनं) ५ पुरुषःश्रीरुद्रःदृश्यतइतिदर्शनंरूपंकृष्णगदर्शनंयस्यसःवास्तुकंयज्ञभूमिगतंवसुधनंममेत्युवाच ६ तर्हिस्मतदैवममेदमितिमानवोनाभागउवाच । पुनश्चरुद्रउ वाच नौआवयोरस्मिन्विवादेतेपितरिप्रश्नःस्यादिति । पृष्टवानितिशुकोक्तिः ७ पृष्टस्य (मानवस्यवा) यज्ञवास्तुगतमितिउच्छिष्टंउर्वरितंकचिदितिदक्षाध्वरे"उच्छेषणभागोवै रुद्रइ"तिश्रुतेश्चकिंचसदेवई श्वरःसर्वमप्यर्हति । किंपुनर्यज्ञावशिष्टमित्यर्थः ८ ९ श्रीरुद्रआह यत्तइति १०

॥ ९ ॥

श्लोकाः २/१०

भ्रातरोऽभंक्तकिंमह्यंभजामपितरंतव ॥ त्वांममार्यास्तताभांक्षुर्मापुत्रकतदाद्दथाः २ इमेअंगिरसःसत्रमासतेद्यसुमेधसः ॥ षष्ठंषष्ठमुपेत्याहःकवेमुह्यंतिकर्म णि ३ तांस्त्वंशंसयसूक्तेद्वेवैश्वदेवेमहात्मनः ॥ तेस्वर्यंतोधनंसत्रपरिशेषितमात्मनः ४ दास्यंत्यथततोगच्छतथासकृतवान्यथा ॥ तस्मैदत्त्वाययुःस्वर्गंते सत्रपरिशेषणम् ५ तंकश्चित्स्वीकरिष्यंतंपुरुषःकृष्णदर्शनः ॥ उवाचोत्तरतोभ्येत्यममेदंवास्तुकंवसु ६ ममेदमृषिभिर्दत्तमितितर्हिस्ममानवः ॥ स्यान्नौ तेपितरिप्रश्नःपृष्टवान्पितरंतथा ७ यज्ञवास्तुगतंसर्वमुच्छिष्टमृषयःक्वचित् ॥ चक्रुर्हिभागंरुद्रायसदेवःसर्वमर्हति ८ नाभागस्तंप्रणम्याहतवेशकिलवास्तु कम् ॥ इत्याहमेपिताब्रह्मन्शिरसात्वांप्रसादये ९ ॥ श्रीरुद्रउवाच ॥ यत्तेपिताऽवदद्धर्मंत्वंचसत्यंप्रभाषसे ॥ ददामितेमंत्रदृशोज्ञानंब्रह्मसनातनम् १०

चूर्णिका

ते ऊचुः अयं उर्वरितः पिता ते भागः तदा पितरं गत्वा उवाच हे पितः त्वमेव मम भागः इति आर्याः कथयंति तदा पिता उवाच हे पुत्र तेषां अनादरं माकार्षीः २ ते जीवनोपायं उपदेक्ष्यामि हे विद्वन् इमे आंगिरसः सत्रं कुर्वंति ते षष्ठदिने कर्मणि मुह्यंति ३ तान् त्वं द्वे सूक्ते शंसय ते स्वर्यंतः आंगिरसः सत्रशेषितं बहुधनं तुभ्यं दास्यंति ४ तत् श्रुत्वा सः तथाकरोत् तदा आंगिरसः सत्रपरिशेषितं सर्वधनं तस्मैदत्त्वा स्वर्गं ययुः ५ स्वीकरिष्यंतं तं कश्चित् पुरुषः उवाच इदं मदीयं वसु ६ तदा नाभागः उवाच मां इदं ऋषिभिर्दत्तम् ॥ तदा रुद्र उवाच ॥ इदं कस्यद्रव्यमिति पितरं पृच्छ सः तं गत्वा पृष्टवान् ७ ॥ पितोवाच ॥ ऋषयः यज्ञवास्तुगतं शेषं भागं रुद्राय चक्रुः ८ एवं श्रुत्वा नाभागः रुद्रमागत्य प्रणम्य आह हे ईश वास्तुकं सर्वं तव भागः इति मे पिता आह अहं त्वां शिरसा प्रसादये ९ ॥ तदा रुद्र उवाच॥ यतः ते पिता धर्मं अवदत् त्वं सत्यं भाषसे अतः तुभ्यं ज्ञानं ददामि १०

॥ ९ ॥

१ परिशेषितमितिक्वचित्पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मत्सकाशाद्गृहाणइदमाख्यानंश्रुतिप्रसिद्धम्। तथाहि ।बह्वृचब्राह्मणम् । 'नाभानेदिष्ठंशंसतिनाभानेदिष्ठंवैमानवंब्रह्मचर्यंवसंतंभ्रातरोनिरभजन्सोब्रवीदि'त्यादि ११अस्याख्यानस्यफलमाह । यइतिआत्मने गतिंचप्राप्नोतीतिशेषः १२क्वचिदपिनप्रतिहतोपिब्रह्मशापोब्राह्मणेनदुर्वाससानिर्मितःकृत्यानलोपियंनास्पृशत् । अतोसौमहाभागवतःअतएवकृतीपुण्यवान् १३ तस्यश्रोतुमिच्छामि चरितमितिशेषः ब्रह्मदंडः कृत्यानलःनप्राभूत्नसमर्थोबभूव १४श्रियंसंपदंविभवमैश्वर्यंअतुलंनिरुपमम् १५पुंसांअतिदुर्लभमपितत्सर्वंस्वप्नवत्संस्तुतंनिरूपितंअनुपादेयंमेने तत्रहेतुःविभवस्यनिर्वाणंनाशंविद्वान् यत् येनविभवेनतन्नाशेनवापुमान्तमोविशति मोहेनिमज्जति १६नन्वेवंजानंतोपिविभवैषिणोदृश्यंतेतत्राह वासुदेवइति । भावंभक्तिंप्राप्तःयेनभावेनइदंविश्वम् लोष्टवदतितुच्छंस्मृतम् १७ भक्तिमेवसर्वेंद्रियाणांभगवत्परत्वकथनेनप्रपंचयति । सवाइतित्रिभिः । सोंबरीषःश्रुतिंश्रोत्रम् । अच्युतस्यसत्कथानांउदयेश्रवणेचकारेत्यस्यसर्वत्रान्वयः १८ मुकुंदस्यलिंगानांआलयानिस्थानानितेषांदर्शनेदृशौनेत्रे । श्रीमत्यास्तुलस्यास्तत्पादसरोजेनयत्सौरभंतास्मिन्तत्पादसरोजेवायत्सौरभंतत्र । तदर्पितेतस्मैनिवेदितान्नादौरसनांचकार १९ हरेः (क्षेत्ररूपंयत्पदंस्थानं पाठेक्षेत्रेयःपंथास्तदनुगमनेपादौ । दास्येनिमित्ते) कामंविषयसेवांतत्प्रसादस्वीकाराय स्रक्चंदनादिसेवनंचकारेत्यर्थः नतुकामकाम्ययाविषयसुखाभिलाषेण । कथंचकार । उत्तमश्लोकजनाश्रयारतिर्यथायेनप्रकारेणस्यात्तथा । अनेनतद्भक्तेषुचपरंभावंप्राप्तइत्येतत्स्फुटीकृतम् २० सर्वत्रात्मेतिभावोभावनायस्मिन्तम् । आत्मनःस्वस्यकर्मणांकलापंसमूहंभगवतिविदधत्समर्पयन्तन्निष्ठैर्भागवतैर्विप्रैरभिहितःशिक्षितःसन्महींशशास पालयामास अनेनाधिकृतधर्मोपियथावद्दर्शितः २१

गृहाणद्रविणंदत्तंमत्सत्रपरिशेषितम् ॥ इत्युक्त्वांतर्हितोरुद्रोभगवान्सत्यवत्सलः ११ यएतत्संस्मरेत्प्रातःसायंचसुसमाहितः ॥ कविर्भवतिमंत्रज्ञोगतिंचैवतथात्मनः १२ नाभागादंबरीषोऽभून्महाभागवतःकृती ॥ नास्पृशद्ब्रह्मशापोपियंनप्रतिहतःक्वचित् १३ ॥ राजोवाच ॥ भगवन्श्रोतुमिच्छामोराजर्षेस्तस्यधीमतः ॥ नप्राभूद्यत्रनिर्मुक्तोब्रह्मदंडोदुरत्ययः १४ ॥ श्रीशुकउवाच ॥ अंबरीषोमहाभागःसप्तद्वीपवतींमहीम् ॥ अव्ययांचश्रियंलब्ध्वाविभवंचातुलंभुवि ॥ १५ मेनेतिदुर्लभंपुसांसर्वंतत्स्वप्नसंस्तुतम् ॥ विद्वान्विभवनिर्वाणंतमोविशतियत्पुमान् १६ वासुदेवेभगवतितद्भक्तेषुचसाधुषु ॥ प्राप्तोभावंपरंविश्वंयेनेदंलोष्टवत्स्मृतम् १७ सवैमनःकृष्णपदारविंदयोर्वचांसिवैकुंठगुणानुवर्णने ॥ करौहरेर्मंदिरमार्जनादिषुश्रुतिंचकाराच्युतसत्कथोदये १८ मुकुंदलिंगालयदर्शनेदृशौतद्भृत्यगात्रस्पर्शेऽगसंगमम् ॥ घ्राणंचतत्पादसरोजसौरभेश्रीमत्तुलस्यारसनांतदर्पिते १९ पादौहरेःक्षेत्रपदानुसर्पणेशिरोहृषीकेशपदाभिवंदने ॥ कामंचदास्येनतुकामकाम्ययायथोत्तमश्लोकजनाश्रयारतिः २० एवंसदाकर्मकलापमात्मनःपरेऽधियज्ञेभगवत्यधोक्षजे ॥ सर्वात्मभावंविदधन्महीमिमांतन्निष्ठविप्राभिहितःशशासह २१ श्लोकाः ११/२१

मद्दत्तं द्रविणं च गृहाण इत्युक्त्वा शिवः अंतर्दधे ११ इदं आख्यानं यः संस्मरेत् सः आत्मगतिं प्राप्नोति १२ अथ नाभागात् अंबरीषः अभूत् तस्य ब्रह्मशापोपि न अस्पृशत् १३ ॥ राजोवाच ॥ हे भगवन् तस्य राजर्षेः ब्रह्मदंडः कुतः न प्रादुरभूत् इदं श्रोतुमिच्छामि १४ ॥ श्रीशुक उवाच ॥ महाभागः अंबरीषः सर्वां महीं अव्ययां श्रियं च लब्ध्वा १५ सर्वं स्वप्नवत् मत्वा वासुदेवे तद्भक्तेषु च सर्वात्मभावं प्राप्तः सन् १६ १७ कृष्णपदारविंदयोः मनश्चकार भगवद्गुणानुवर्णने वचांसि इत्यादि १८ १९ २० एवं भक्तिं कुर्वन् महीं शशास २१

१. 'क्षेत्रपथानुसर्पण'इतिपाठोपिक्वचित्.

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच । यज्ञाधिष्ठातारमीश्वरमश्वमेधैरीजे आराधयामास । महाविभूत्याउपचितानिअंगानिदक्षिणाश्चयेषुतैःवसिष्ठादिभिर्हेतुभूतैस्ततैर्विस्तृतैःधन्वनिधन्वदेशेनिरुदकेसरस्वतीमभिस्रोतंतस्याःप्रतिलोममि त्यर्थः २२ किंच । यस्यक्रतुषुसदस्यादयोगीर्वाणैःसहभूषणादिभिस्तुल्यरूपाव्यदृश्यंत । सइत्थमितिचतुर्थेनान्वयः । नचदेवानांनिमिषाभावाद्वैलक्षण्यम् । यतःअनिमिषाश्चव्यदृश्यंत । ननिमिषंती त्यनिमिषाःआश्चर्यदर्शनौत्सुक्येनतेषांनिमेषोपरमादितिभावः २३ यस्यपदीयैर्मनुजैरपिस्वर्गोनप्रार्थितःतस्यतुकावार्ता २४ आस्तांस्वर्गप्रार्थनशंकापि । यद्यतःमुकुंदंहृदिपश्यतस्तान् कामा विषया नसमर्धयंतिनहर्षयंति । कथंभूताःस्वाराज्येनस्वरूपसुखेनपरिभाविताःअतिशायिताःअतएव सिद्धानामपि दुर्लभाः । यानितिपाठेयान्मनुजान् स्वाराज्येत्यत्रापि द्वितीयांतपाठे मनुजानांविशेषणम् । यमितिपाठेयमंबरीषं पश्यतामितिपाठेसिद्धानांविशेषणम् २५ एवंभगवदाराधनपरस्यकामान्युपेक्षानैवचित्रमित्युपसंहरति सइत्थमितिद्वाभ्याम् २६ २७ नन्वेवंभूतोसौकथंप्रतिपक्षान्जयेत्तत्राह तस्मा इति (प्रत्यनीकभयावहंशत्रूणांभयंकरंभृत्याभिरक्षणंभक्तसंरक्षणकरंचक्रंतस्मैददौ) २८ तदेवंतस्यवैराग्यादिकंहरिभक्तिचोक्त्वाब्रह्मदंडोयत्रनप्राभूदितियदुक्तं तदेव द्वादशीव्रतनिष्ठांकथयन्नाह आ रिराधयिषुरित्यादि यावदध्यायसमाप्ति २९ अर्चयत् आडागमाभावआर्षः ३० (अंबराकल्पैर्वस्त्रालंकारैः) ३१ ब्राह्मणांश्चपूजयामासासिद्धार्थान् आप्तकामान् पूजानपेक्षानपीत्यर्थः ३२ (पयःक्षीरं शीलंसाधुत्वं वयस्तारुण्यं रूपंसौंदर्यं वस्त्रंदुकूलादि उपस्करागंधमाल्यादयः) रूप्यंघ्रीणांरूप्यखुराणां पयःशीलादिसंपदोयासांतासाम् ३३ न्यर्बुदानिषट् षष्टिकोटीः (गुणवत्तमंआतिशयेनघृत क्षीरादिगुणैर्युक्तंस्वाद्वन्नंअग्रेप्रथमंद्विजान् भोजयित्वा लब्धाभीष्टैस्तैरनुज्ञातः पारणायोपचक्रमे) ३४

ईजेश्वमेधैरधियज्ञमीश्वरंमहाविभूत्योपचितांगदक्षिणैः ॥ ततैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौसरस्वतीम् २२ यस्यक्रतुषुगीर्वाणैःसदस्याऋ त्विजोजनाः ॥ तुल्यरूपाश्चानिमिषाव्यदृश्यंतसुवाससः २३ स्वर्गोनप्रार्थितोयस्यमनुजैरमरप्रियः ॥ शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् २४ समर्धयंतियंकामाःस्वाराज्यपरिभाविताः ॥ दुर्लभानापिसिद्धानांमुकुंदंहृदिपश्यतः २५ सइत्थंभक्तियोगेनतपोयुक्तेनपार्थिवः ॥ स्वधर्मेणहरिंप्रीणन्सं गान्सर्वाञ्शनैर्जहौ २६ गृहेषुदारेषुसुतेषुबंधुषुद्विपोत्तमस्यंदनवाजिवस्तुषु ॥ अक्षय्यरत्नाभरणायुधादिष्वनंतकोशेष्वकरोदसन्मतिम् २७ तस्माअदाद्ध रिश्चक्रंप्रत्यनीकभयावहम् ॥ एकांतभक्तिभावेनप्रीतोभृत्याभिरक्षणम् २८ आरिराधयिषुःकृष्णंमहिष्यातुल्यशीलया ॥ युक्तःसांवत्सरंवीरोदधारद्वादशी व्रतम् २९ व्रतांतेकार्तिकेमासित्रिरात्रंसमुपोषितः ॥ स्नातःकदाचित्कालिंद्यांहरिंमधुवनेऽर्चयत् ३० महाभिषेकविधिनासर्वोपस्करसंपदा ॥ अभिषिच्यां बराकल्पैर्गंधमाल्यार्हणादिभिः ३१ तद्गतांतरभावेनपूजयामासकेशवम् ॥ ब्राह्मणांश्चमहाभागान्सिद्धार्थानपिभक्तितः ३२ गवांरुक्मविषाणीनांरूप्यांघ्री णांसुवाससाम् ॥ पयःशीलवयोरूपवत्सोपस्करसंपदाम् ३३ प्राहिणोत्साधुविप्रेभ्योगृहेषुन्यर्बुदानिषट् ॥ भोजयित्वाद्विजानग्रेस्वाद्वन्नंगुणवत्तमम् ३४

श्लोकाः २२ — ३४

चूर्णिका ॥११॥

अश्वमेधैः हरिं ईजे २२ २३ यस्य प्रजाभिः स्वर्गो न प्रार्थितः २४ सः सर्वेंद्रियैः हरिं अभजत् २५ २६ २७ तस्य भक्त्या तुष्टः हरिः संरक्षणाय चक्रं अदात् २८ सःसपत्नीकः सांवत्सरं द्वादशीव्रतं दधार २९ व्रतांते कार्तिके द्वादशीदिने कालिंद्यां स्नात्वा मधुवने हरिं ब्राह्मणांश्च संपूज्य ३० ३१ ३२ तेभ्यः षट्न्यर्बुदा नि गाः दत्त्वा तान् भोजयित्वा ३३ ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हितदैवदुर्वासाअतिथिः साक्षात्प्रत्यक्षोभूत् ३५ आनर्चअर्चितवान् (भूयःअधिकंयथास्यात्तथा) अभ्यवहारायभोजनाय ३६ आवश्यकंनैत्यमिकंमाध्याह्निकंकर्तुंगतः बृहद्ब्रह्म ३७ ३८ धर्मसंकटमेवाह । यद्यतःब्राह्मणातिक्रमेदोषः अधर्मः । द्वादश्यामपारणेपिदोषःव्रतवैगुण्यम् । यत्कृत्वायस्मिन्कृते ३९ एवंद्विजैःसहविचार्यनिश्चिनोति अंभसेति व्रतस्यपारणंसमाप्तिम् । तत्अशितंआहुः अशितंनेतिचाहुः । श्रुतिश्च । " अपोश्नातितन्नैवाशितंनैवानशितमि"ति ४० प्रत्यचष्टप्रत्यैक्षत ४१ ४२ प्रचलत्कंपमानंगात्रंयस्यभृकुटीभ्यांकुटिलमाननंयस्य ४३ ४४ (तस्यतेसद्यःफलंदर्शये) ४५ ४६ ४७ क्रुद्धमहिंपावकोदावाग्निरिव ४८ निष्फलमुद्वीक्ष्य ४९ अनुषक्तंपृष्ठतःसंसक्तम् । मेरोर्गुहांविविक्षुरधावत् ५०

लब्धकामैरनुज्ञातःपारणायोपचक्रमे ॥ तस्यतर्ह्यतिथिःसाक्षाद्दुर्वासाभगवानभूत् ३५ तमानर्चातिथिंभूयःप्रत्युत्थानासनार्हणैः ॥ ययाचेभ्यवहारायपादमूलमुपागतः ३६ प्रतिनंद्यसतद्याञ्चांकर्तुमावश्यकंगतः ॥ निममज्जबृहद्ध्यायन्कालिंदीसलिलेशुचौ ३७ मुहूर्तार्धावशिष्टायांद्वादश्यांपारणंप्रति ॥ चिंतयामासधर्मज्ञोद्विजैस्तद्धर्मसंकटे ३८ ब्राह्मणातिक्रमेदोषोद्वादश्यांयदपारणे ॥ यत्कृत्वासाधुमेभूयादधर्मोवानमांस्पृशेत् ३९ अंभसाकेवलेनाथकरिष्येव्रतपारणम् ॥ प्राहुरब्भक्षणंविप्राह्यशितंनाशितंचतत् ४० इत्यपःप्राश्यराजर्षिश्चिंतयन्मनसाच्युतम् ॥ प्रत्यचष्टकुरुश्रेष्ठद्विजागमनमेवसः ४१ दुर्वासायमुनाकूलात्कृतावश्यकआगतः ॥ राज्ञाभिनंदितस्तस्यबुबुधेचेष्टितंधिया ४२ मन्युनाप्रचलद्गात्रोभ्रुकुटीकुटिलाननः ॥ बुभुक्षितश्चसुतरांकृतांजलिमभाषत ४३ अहोअस्यनृशंसस्यश्रियोन्मत्तस्यपश्यत ॥ धर्मव्यतिक्रमंविष्णोरभक्तस्येशमानिनः ४४ योमामतिथिमायातमातिथ्येननिमंत्र्यच ॥ अदत्त्वाभुक्तवांस्तस्यसद्यस्तेदर्शयेफलम् ४५ एवंब्रुवाणउत्कृत्यजटांरोषविदीपितः ॥ तयासनिर्ममेतस्मैकृत्यांकालानलोपमाम् ४६ तामापतंतींज्वलतीमसिहस्तांपदाभुवम् ॥ वेपयंतींसमुद्वीक्ष्यनचचालपदान्नृपः ४७ प्राग्दिष्टंभृत्यरक्षायांपुरुषेणमहात्मना ॥ ददाहकृत्यांतांचक्रंक्रुद्धाहिमिवपावकः ४८ तदभिद्रवदुद्वीक्ष्यस्वप्रयासंचनिष्फलम् ॥ दुर्वासादुद्रुवेभीतोदिक्षुप्राणपरीप्सया ४९ तमन्वधावद्भगवद्रथांगंदावाग्निरुद्भूतशिखोयथाहिम् ॥ तथानुषक्तंमुनिरीक्षमाणोगुहांविविक्षुःप्रससारमेरोः ५०

चूर्णिका

तदनुज्ञया पारणां कर्तुं उद्यतः तदैव दुर्वासाः अतिथिः प्राप्तः ३५ तं संपूज्य भोजनाय न्यमंत्रयत् ३६ सः राजानं प्रतिनंद्य माध्याह्निकं कर्तुं यमुनां गत्वा बृहत् ध्यायन् निममज्ज ३७ पारणां प्रति मुहूर्तार्धावशिष्टायां द्वादश्यां धर्मज्ञः द्विजैःसह चिंतयामास ३८ ब्राह्मणातिक्रमे पारणातिक्रमे च दोषः एवं विचार्य निश्चिनोति ३९ हे विप्राः केवलेनांभसा पारणां करिष्ये अब्भक्षणं अशितं नाशितं चाहुः ४० एवं चिंतयन् अपः प्राश्य द्विजागमनं प्रत्यैक्षत ४१ तदैव दुर्वासाः आगत्य राजचेष्टितं ज्ञात्वा चुक्रोध ४२ त्वं मां आतिथ्येन निमंत्र्य अदत्वा भुक्तवान् तस्य फलंदर्शये ४३ ४४ ४५ इत्युक्त्वा जटामुत्पाट्य तया कृत्यां निर्ममे ४६ नृपः तां आपतंतीं वीक्ष्य स्थानात् न चचाल ४७ तदा विष्णुचक्रं कृत्यां दग्ध्वा ऋषिंअन्वधावत् ४८ तदा ऋषिः भीतःसन् प्राणपरीप्सया दिक्षु दुद्रुवे ४९ यतो यतो याति तत्र तत्र चक्रं ददर्श एवं सर्वत्र भ्रमित्वा ब्रह्माणं शरणं जगाम ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

५१ अरणमेषमाणःशरणमिच्छन् अजिततेजसःहरेश्चक्रात् ५२ एतत्सर्वंयस्य भ्रूभंगमात्रेणतिरोभविष्यति । कदा क्रीडायाअवसानेतदपिकदा द्विपरार्धसंज्ञेकाले ५३ अतोवयंसर्वेयस्यानियममाज्ञांप्रप
न्नाःप्राप्ताःसंतोलोकहितंयथाभवत्येवंतान्नियमंमूर्ध्न्यर्पितंवहामअतस्तद्भक्तद्रोहिणंत्वांनरक्षितुंसमर्थोंहमितिशेषःयच्चदोर्नित्यसंबंधात् ५४ ५५ श्रीरुद्रोपिप्रत्याचष्टे वयमितिचतुर्भिः । भूम्निमहति । महत्त्व
मेवाह । यस्मिन्परेपरमेश्वरेअजाब्रह्माणरतएवजीवास्तेषांकोशाउपाधिभूताब्रह्मांडविग्रहाईदृशादृश्यमानब्रह्मांडप्रमाणाअन्येऽपिभवंतिजायंतेनश्यंतिच । यत्रयेषुब्रह्मांडेषुलोकेशाभिमानिनोवयंभ्रमामः
५६ ननुसर्वज्ञस्यतवभ्रमःकुतस्तत्राहअहमिति ५७ पारदर्शिनःसर्वज्ञाअपियस्यमायांनविद्मः ५८ ५९ ६० हेसतामीप्सित मा मां अव पाहि ६१ अपराधंनिवेदयन्प्रार्थयते अजानतेति अघंदुःखंअपचि
तिंमद्भक्तद्रोहेनिष्कृतिम्(तां)नपश्यामिचेत्तत्राह यस्यतवनाम्निकीर्तितेनरकस्थोपिमुच्यतेतस्यतवकिमशक्यमितिभावः ६२ (युक्तैर्जितेंद्रियैः) ६३नआशासेनस्पृहयामि ६४ इमंपरंचलोकंहित्वा ६५ ६६

॥१३॥ श्लोकाः ५१ / ६६

दिशोनभःक्ष्मांविवरान्समुद्रांल्लोकान्सपालान्त्रिदिवंगतःसः ॥ यतोयतोधावतितत्रतत्रसुदर्शनंदुष्प्रसहंददर्श ५१ अलब्धनाथःसयदाकुतश्चित्संत्रस्तचित्तो
ऽरणमेषमाणः ॥ देवंविरिंच्यंसमगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसोमाम् ५२ ॥ ब्रह्मोवाच ॥ स्थानंमदीयंसहविश्वमेतत्क्रीडावसानेद्विपरार्धसंज्ञे ॥
भ्रूभंगमात्रेणहिसंदिधक्षोःकालात्मनस्तस्यतिरोभविष्यति ५३ अहंभवोदक्षभृगुप्रधानाःप्रजेशभूतेशसुरेशमुख्याः ॥ सर्वेवयंयन्नियमंप्रपन्नामूर्ध्न्यर्पितं
लोकहितंवहामः ५४ ॥ श्रीशुकउवाच ॥ प्रत्याख्यातोविरिंचेनविष्णुचक्रोपतापितः ॥ दुर्वासाःशरणंयातःशर्वंकैलासवासिनम् ५५ ॥ श्रीशंकरउ
वाच ॥ वयंनतातप्रभवामभूम्नियस्मिन्परेऽन्येप्यजजीवकोशाः ॥ भवंतिकालेनभवंतिहीदृशाःसहस्रशोयत्रवयंभ्रमामः ५६ अहंसनत्कुमारश्चनारदो
भगवानजः ॥ कपिलोऽपांतरतमोदेवलोधर्मआसुरिः ५७ मरीचिप्रमुखाश्चान्येसिद्धेशाःपारदर्शिनः ॥ विदामनवयंसर्वेयन्मायांमाययावृताः ५८ तस्य
विश्वेश्वरस्येदंशस्त्रंदुर्विषहंहिनः ॥ तमेवशरणंयाहिहरिस्तेशंविधास्यति ५९ ततोनिराशोदुर्वासाःपदंभगवतोययौ ॥ वैकुंठाख्यंयदध्यास्तेश्रीनिवा
सःश्रियासह ६० संदह्यमानोऽजितशस्त्रवह्निनातत्पादमूलेपतितःसवेपथुः ॥ आहाच्युतानंतसदीप्सितप्रभोकृतागसंमाऽवहिविश्वभावन ६१ अजा
नतातेपरमानुभावंकृतंमयाघंभवतःप्रियाणाम् ॥ विधेहितस्यापचितिंविधातर्मुच्येतयन्नाम्न्युदितेनारकोपि ६२ ॥ श्रीभगवानुवाच ॥ अहंभक्तपराधी
नोह्यस्वतंत्रइवद्विज ॥ साधुभिर्ग्रस्तहृदयोभक्तैर्भक्तजनप्रियः ६३ नाहमात्मानमाशासेमद्भक्तैःसाधुभिर्विना ॥ श्रियंचात्यंतिकींब्रह्मन्येषांगतिरहंपरा
६४ येदारागारपुत्राप्तान्प्राणान्वित्तमिमंपरम् ॥ हित्वामांशरणंयाताःकथंतांस्त्यक्तुमुत्सहे ६५ मयिनिर्बद्धहृदयाःसाधवःसमदर्शनाः ॥ वशीकुर्वंति
मांभक्त्यासत्स्त्रियःसत्पतिंयथा ६६

चूर्णिका

५१ ५२ तदा नाहं समर्थ इति ब्रह्मवाक्यं श्रुत्वा शंकरं जगाम ५३ ५४ ५५ तदा शंकरः त्वद्रक्षणे नाहं समर्थः यस्य चक्रं तमेव शरणं याहीत्युवाच ५६ ५७ ५८ ५९
तदा विष्णुं गत्वा त्राहि इति प्रार्थयामास ६० ६१ ६२ ॥ विष्णुःउवाच ॥ अहं भक्तपराधीनः ६३ येदारादीन् हित्वा मां शरणं याताः तान् त्यक्तुं कथं उत्सहे ६४ ६५ ६६

CC-0. In Public Domain. Digitization by eGangotri

प्रतीतंप्राप्तमपि ६७ ६८ आत्मनस्तवैवअभिचारोहिंसायतोऽभूत् तमेवयातु अशिवमनर्थम् ६९ तपोविद्यासंपन्नस्यममकथमनर्थः समजनीति मास्मविस्मयंकार्षीरित्याह तपइति ७० ७१ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांअंबरीषचरितेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ७ ॥ ॥ पंचमेविष्णुचक्रंतुप्रसाद्यप्राणसंकटात् ॥ दुर्वासारक्षितस्तेनयथातद्वृत्तमीर्यते ॥ १ ॥
१ (सउद्यमनामितिच्छेदः सुलोपःपादपूरणार्थःउद्यमनंधावनादियत्नम्) २ ज्योतिषांनक्षत्राणांपतिःसोमस्त्वंमात्राणिइंद्रियाणिच त्वच्छक्त्यैवाग्न्यादयःस्वंस्वंकार्यंकुर्वंतीत्यर्थः ३ सहस्रंअरायस्य हेसहस्रार स्वस्तिशरणंभूयाःइडस्पतेपृथ्वीपते ४ ब्राह्मणरक्षणंतवयुक्तमेवेत्याह । त्वंधर्मइति (ऋतंतुसूनृतावाणी) नचतवेयमतिस्तुतिरित्याह । पौरुषंपुरुषस्येश्वरस्यपरंतेजःसामर्थ्यंत्वं अयंभावः "सऐक्षते"त्यादिश्रुतिप्रसिद्धंभगवतःशोभनंदर्शनंहिसुदर्शनंततएवसर्वंजातंअतस्त्वमेवसर्वात्मेति ९ हेसुनाभ अद्भुतकर्माणंत्वांकःस्तोतुंसमर्थःअतस्तुभ्यंकेवलंनमोगृणइत्यन्वयः अद्भुतकर्मत्वमेवाह । अखिलानांधर्माणांसेतवेमर्यादारूपाय । अतएवाधर्मशीलानामसुराणांधूमकेतवेदाहकाय । त्रैलोक्यंगोपायतीतितथा । विशुद्धमत्युज्ज्वलंवर्चस्तेजोयस्यतस्मै ६ तदेवप्रपंचयति त्वत्तेजसेतिद्वाभ्याम् । सूर्यादीनांप्रकाशश्च (त्वत्तेजसाधृतः) त्वयैवरूप्यतेप्रकाश्यतइतित्वद्रूपं (सदसत्कार्यकारणात्मकं हेगिरांपते तवमहिमामहात्मनामपिदुरत्ययः) ७

श्लोकाः ६७/७

मत्सेवयाप्रतीतंचसालोक्यादिचतुष्टयम् ॥ नेच्छंतिसेवयापूर्णाःकुतोऽन्यत्कालविद्रुतम् ६७ साधवोहृदयंमह्यंसाधूनांहृदयंत्वहम् ॥ मदन्यंतेनजानंतिनाहं तेभ्योमनागपि ६८ उपायंकथयिष्यामितवविप्रशृणुष्वतत् ॥ अयमात्माभिचारस्तेयतस्तंयातुवैभवान् ॥ साधुषुप्रहितंतेजःप्रहर्तुःकुरुतेऽशिवम् ६९ तपोविद्याचविप्राणांनिश्रेयसकरेउभे ॥ तेएवदुर्विनीतस्यकल्पेतेकर्तुरन्यथा ७० ब्रह्मंस्तद्गच्छभद्रंतेनाभागतनयंनृपम् ॥ क्षमापयमहाभागंततःशांतिर्भविष्यति ७१ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेअंबरीषचरितेचतुर्थोऽध्यायः ४ ॥ ॥ श्रीशुकउवाच ॥ एवंभगवतादिष्टोदुर्वासाश्चक्रतापितः ॥ अंबरीषमुपावृत्यतत्पादौदुःखितोऽग्रहीत् ॥ १ ॥ तस्यसोद्यमनंवीक्ष्यपादस्पर्शविलज्जितः ॥ अस्तावीत्तद्धरेरस्त्रंकृपयापीडितोभृशम् २ ॥ अंबरीषउवाच ॥ त्वमग्निर्भगवान्सूर्यस्त्वंसोमोज्योतिषांपतिः ॥ त्वमापस्त्वंक्षितिर्व्योमवायुर्मात्रेंद्रियाणिच ३ सुदर्शननमस्तुभ्यंसहस्राराच्युतप्रिय ॥ सर्वास्त्रघातिन्विप्रायस्वस्तिभूयाइडस्पते ४ त्वंधर्मस्त्वमृतंसत्यंत्वंयज्ञोऽखिलयज्ञभुक् ॥ त्वंलोकपालःसर्वात्मात्वंतेजःपौरुषंपरम् ५ नमःसुनाभाखिलधर्मसेतवेह्यधर्मशीलासुरधूमकेतवे ॥ त्रैलोक्यगोपायविशुद्धवर्चसेमनोजवायाऽद्भुतकर्मणेगृणे ६ त्वत्तेजसाधर्ममयेनसंहृतंतमःप्रकाशश्चधृतोमहात्मनाम् ॥ दुरत्ययस्तेमहिमागिरांपतेत्वद्रूपमेतत्सदसत्परावरम् ७

चूर्णिका

६७ साधवः मम हृदयं साधूनां अहं हृदयं मदन्यत्ते न जानंति इत्यादि ६८ हे विप्र तेउपायं कथयामि शृणु ६९ ७० हे ब्रह्मन् राजानं गत्वा क्षमापय ततः ते शांतिर्भविष्यति ७१ ॥॥ इतिनवमेचतुर्थः ४ ॥ छ ॥ श्रीशुकउवाच ॥ एवं भगवता आदिष्टःदुर्वासाः चक्रतापितः सन् अंबरीषं एत्य तत्पादौ अग्रहीत् १ तदा पादस्पर्शविलज्जितः राजा चक्रं अस्तौत् २ त्वं अग्निः सूर्यः ज्योतिषां पतिरित्यादि ३ ४ ५ त्वांस्तोतुं कः समर्थः अतः तुभ्यं केवलं नमःउच्चारितवान् अस्मि इत्यादि स्तुत्वा प्रार्थयामास ६ ७

१ मदन्यत्तेनजानतीतिक. पा. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अहेतुकंयथास्यात्तथाययौयदृच्छयेत्यर्थः) २२ तस्यधैर्यातिशयमाह । गतोमुनिर्यावतानागतस्तावत्संवत्सरोऽतिक्रांतइति (अब्भक्षोजलमात्राशनः) २३ द्विजस्योपयोगेनभोजनेनअतिपवि
त्रमाहरत्बुभुजे । स्ववीर्यंचधैर्यादिलक्षणं (व्यसनंसंकटंततोविमोक्षंचसर्वं) परानुभावंभगवतःप्रभावंमेने २४ एवंविधाअनेकेगुणायस्यसः आविरिंच्यान् विरिंचपदसहितान्भोगान्निरयप्रायान
पश्यदित्यर्थः २५ २६ २७ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांपंचमोऽध्यायः ॥ ५ ॥ ॥ ६ ॥ ॥ षष्ठारंभेऽबरीषस्यवंशमुक्त्वाततःपरम् । षष्ठाद्यष्टभिरध्यायैरि
क्ष्वाकोर्वंशउच्यते ॥ १ ॥ तत्रषष्ठेशशादादिर्मांधात्रंतोनिरूप्यते । प्रसंगात्सौभरेराख्यामांधातृतनयापतेः ॥ २ ॥ १ तंतवेसंतानार्थम् २ येअंगिरसाजनिताएतेरथीतरस्यक्षेत्रेप्रसूतत्वेनरथीतरगोत्राः
संतः अंगिरसोवीर्येणप्रसूतत्वादांगिरसाश्च । पुनरपिरथीतराणामन्येषांजातानांप्रवरामुख्याः स्मृताः यतः क्षत्रोपेताब्राह्मणाइत्यर्थः ३ तदेवं मनोर्दशसु पुत्रेषु पृषध्रश्च कविश्च विरक्तत्वान्नवंशप्रवर्तकौ ।
॥१६॥ करूषादीनां सप्तानां च वंशास्तारतम्यक्रमेणोक्ताः इदानीमतिविततमिक्ष्वाकोर्वंशमाह । क्षुवतइत्यादिनायावत्सोमवंशप्रस्तावम् । क्षुतंकुर्वतोमनोर्घ्राणतोजज्ञे । "श्रद्धायांजनयामासदशपुत्रानि"ति
पूर्वोक्तंबाहुल्याभिप्रायेणेतिद्रष्टव्यम् । पुत्राणांशतेज्येष्ठाः ४

श्लोकाः २२/४

॥ श्रीशुकउवाच ॥ ॥ एवंसंकीर्त्यराजानंदुर्वासाःपरितोषितः ॥ ययौविहायसाऽऽमंत्र्यब्रह्मलोकमहेतुकम् २२ संवत्सरोऽत्यगात्तावद्यावताना
गतोगतः ॥ मुनिस्तद्दर्शनाकांक्षोराजाऽब्भक्षोबभूवह २३ गतेचदुर्वाससिसोंबरीषोद्विजोपयोगातिपवित्रमाहरत् ॥ ऋषेर्विमोक्षंव्यसनंचबुद्ध्वामेने
स्ववीर्यंचपरानुभावम् २४ एवंविधानेकगुणःसराजापरात्मनिब्रह्मणिवासुदेवे ॥ क्रियाकलापैःसमुवाहभक्तिंययाविरिंच्यान्निरयांश्चकार २५ अथांबरी
षस्तनयेषुराज्यंसमानशीलेषुविसृज्यधीरः ॥ वनंविवेशात्मनिवासुदेवेमनोदधद्ध्वस्तगुणप्रवाहः २६ इत्येतत्पुण्यमाख्यानमंबरीषस्यभूपतेः ॥ संकी
र्तयन्ननुध्यायन्भक्तोभगवतोभवेत् २७ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेअंबरीषचरितेपंचमोऽध्यायः ५॥ श्रीशुकउवाच ॥ विरूपःकेतुमाञ्शं
भुरंबरीषसुतास्त्रयः ॥ विरूपात्पृषदश्वोभूत्तत्पुत्रस्तुरथीतरः १ रथीतरस्याप्रजस्यभार्यायांतंतवेऽर्थितः ॥ अंगिराजनयामासब्रह्मवर्चस्विनःसुतान् २ एतेक्षेत्रप्र
सूतावैपुनस्त्वांगिरसाःस्मृताः ॥ रथीतराणांप्रवराःक्षत्रोपेताद्विजातयः ३ क्षुवतस्तुमनोर्जज्ञेइक्ष्वाकुर्घ्राणतःसुतः ॥ तस्यपुत्रशतज्येष्ठाविकुक्षिनिमिदंडकाः४

चूर्णिका

॥ श्रीशुक उवाच ॥ एवंउक्त्वा ऋषिः ब्रह्मलोकं ययौ २२ संवत्सरोत्यगात्तावत् यावत्तानागतोगतः मुनिस्तद्दर्शनाकांक्षोराजाब्भक्षोवभूवह २३ एवं दुर्वाससिगते
सति स्वयं वुभुजे एतत्भगवदनुभावं मेने २४ एवंविधो राजा वासुदेवे क्रियाकलापैः भक्तिकुर्वन् आविरिंच्यान् भोगान् निरयवत् मत्वा २५ कालेन तनयेषु राज्यं
विसृज्य वासुदेवे मनोनिवेश्य वनं विवेश २६ एतत् पुण्यं आख्यानं यः कीर्तयेत् ध्यायेत् सः भगवतः भक्तो भवेत् २७ ॥ ॥ इति नवमे पंचमः ॥ ५ ॥ ॥ ६ ॥
॥ श्रीशुक उवाच ॥ अंवरीषस्य पुत्राः त्रयः विरूपः केतुमान् शंभुः विरूपात् पृषदश्वः तस्य रथीतरः १ सः अनपत्यः तस्य भार्यया अंगिराः अपत्यार्थं प्रार्थितः सन्
तस्यां पुत्रान्जनयामास ते ब्रह्मवर्चस्विनः बभूवुः २ एतेरथीतरक्षेत्रे अंगिरसः वीर्येण जाताः अतो आंगिरसा रथीतराश्च अभवन् ३ ततः वैवस्वतमनोः क्षुवतः नासिकातः
इक्ष्वाकुः जज्ञे तस्य विकुक्षिः निमिः दंडकाद्याः शतपुत्राः बभूवुः ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेअजित अनंजनेनश्रीहरिणायदाविसृष्टः त्वं तदादैत्यदानवानांबलंप्रविष्टःसन् तेषांबाह्वादीन् वृक्णन् विराजसे । पाठांतरेऊर्जितादैत्यदानवा यस्मिन्तद्बलं पूर्वपदेनसंधिरार्षः ८ किंच त्वयाभग
वन्नियुक्तेनखलानामेवदंडःकार्यःसाधवस्तुरक्षणीयाःअतोविप्ररक्षणेनास्माननुगृहाणेत्याह सत्वमिति । हेजगत्त्राण । सएवंभूतःत्वंखलानामेवप्रहरणार्थंनिरूपितोनियुक्तः । अतोस्मत्कुलस्यदैवहेतवेभाग्य
लाभायविप्रस्यभद्रंविधेहि । तदेवनोऽनुग्रहः ९ सर्वसुकृतार्पणेनविप्ररक्षांप्रार्थयते यद्यस्तीतिद्वाभ्यां विप्रोदैवंदेवतायस्मिन्तत् १० ११ तस्यैवराज्ञोयाच्ञया (अशाम्यत् शशाम) १२ १३ १४
(कोर्थोदुष्करः कोवाविषयोदुस्त्यजः विप्ररक्षणंकामक्रोधादित्यागश्चसाधुस्वभावएवेत्यर्थः १५ १६ १७ राजेत्यादिश्लोकद्वयंशुकोक्तिः १८ (आतिथ्यंअतिथयेहितंअन्नादिकंमिष्टमशित्वाभुक्त्वा)
१९ प्रीतोस्मीतिश्लोकद्वयंपुनश्चविप्रोक्तिः । आत्मनिविषयेमेधायेन (भवति) तेनातिथ्येन २० (स्वःस्त्रियोदेवांगनाःगायंतिगास्यंति ।) भूरियंतत्रस्थितोजनःकीर्तयिष्यति २१

॥१५॥

श्लोकाः ८/२१

यदाविसृष्टस्त्वमनंजनेनवैबलंप्रविष्टोऽजितदैत्यदानवम् ॥ बाहूदरोर्वंघ्रिशिरोधराणिवृक्णन्नजस्रंप्रधनेविराजसे ८ सत्वंजगत्त्राणखलप्रहाणयेनिरूपितःस
र्वसहोगदाभृता ॥ विप्रस्यचास्मत्कुलदैवहेतवेविधेहिभद्रंतदनुग्रहोहिनः ९ यद्यस्तिदत्तमिष्टंवास्वधर्मोवास्वनुष्ठितः ॥ कुलंनोविप्रदैवंचेद्द्विजोभवतु
विज्वरः १० यदिनोभगवान्प्रीतएकःसर्वगुणाश्रयः ॥ सर्वभूतात्मभावेनद्विजोभवतुविज्वरः ११ ॥ श्रीशुकउवाच ॥ इतिसंस्तुवतोराज्ञोविष्णुचक्रंसुदर्श
नम् ॥ अशाम्यत्सर्वतोविप्रंप्रदहद्राजयाच्ञया १२ समुक्तोऽस्त्राग्नितापेनदुर्वासाःस्वस्तिमांस्ततः ॥ प्रशशंसतमुर्वीशंयुंजानःपरमाशिषः १३ ॥ दुर्वा
साउवाच ॥ अहोअनंतदासानांमहत्त्वंदृष्टमद्यमे ॥ कृतागसोपियद्राजन्मंगलानिसमीहसे १४ दुष्करःकोनुसाधूनांदुस्त्यजोवामहात्मनाम् ॥ यैःसंगृही
तोभगवान्सात्वतामृषभोहरिः १५ यन्नामश्रुतिमात्रेणपुमान्भवतिनिर्मलः ॥ तस्यतीर्थपदःकिंवादासानामवशिष्यते १६ राजन्ननुगृहीतोहंत्वयाति
करुणात्मना ॥ मदघंपृष्ठतःकृत्वाप्राणायन्मेभिरक्षिताः १७ राजातमकृताहारःप्रत्यागमनकांक्षया ॥ चरणावुपसंगृह्यप्रसाद्यसमभोजयत् १८ सोऽशित्वा
दृतमानीतमातिथ्यंसार्वकामिकम् ॥ तृप्तात्मान्नृपतिंप्राहभुज्यतामितिसादरम् १९ प्रीतोस्म्यनुगृहीतोस्मितवभागवतस्यवै ॥ दर्शनस्पर्शनालापैरा
तिथ्येनात्ममेधसा २० कर्मावदातमेतत्तेगायंतिस्वःस्त्रियोमुहुः ॥ कीर्तिंपरमपुण्यांचकीर्तयिष्यतिभूरियम् २१

चूर्णिका

८ ९ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः कुलं नो विप्रदैवंचेद्द्विजो भवतु विज्वरः १० यदि नः सर्वभूतात्मभावेन भगवान्प्रीतश्चेत् तर्हि अयं द्विजः विज्वरो
भवतु ११ एवं स्तुवतः राज्ञःचक्रं अशाम्यत् १२ अस्त्राग्नितापेन मुक्तः दुर्वासाः स्वस्तिमान् सन् राजानं प्रशशंस १३ अहो अनंतदासानां महत्वं अद्य मया दृष्टं
कृतागसोपि मम मंगलानि ईहसे इत्यादि १४ १५ १६ हे राजन् अहं त्वयानुगृहीतः मदघं पृष्ठतः कृत्वा मे प्राणाः रक्षिताः १७ ततः अकृताहारः राजा ऋषेः चरणौ
संप्रगृह्य प्रसाद्य समभोजयत् १८ सः आशिषः दत्त्वा नृपतिं भुज्यतामित्याह १९ तव दर्शनादिभिः प्रीतोस्मि २० हे राजन् एतत् तव कर्म स्वःस्त्रियः गायंति ते
पुण्यां कीर्तिं इयं भूः कीर्तयिष्यति २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

“ आर्यावर्तःपुण्यभूमिर्मध्यंविंध्यहिमालयोः ” तस्मिन्पुरस्तात्समुद्रपर्यंतंमंडलविभागेनपंचविंशतिर्नृपाअभवन् हेनृपतथैवपश्चाच्चपंचविंशतिः । मध्येतुज्येष्ठास्त्रयः । अपरेतुअन्यत्रदक्षिणोत्तरादिषु ५ विकुक्षिरेवशशादइति विश्रुतइतिवक्ष्यति तत्रहेतुमाह सएकदेतिचतुर्भिः ६ क्रियार्हणान् श्राद्धार्हान् आदत् अभक्षयत् ७ तद्गुरुर्वसिष्ठः प्रोक्षणायश्राद्धोचितसंस्काराय ८ त्यक्तोविधिः सदाचारोयेनतम् ९ सतुइक्ष्वाकुः जापकेनवसिष्ठेन । राज्यभोगेनविरक्तोयोगीसन् तेनयोगेनकलेवरंत्यक्त्वासयत्परंतत्त्वंतदवाप १० शासत्पालयन् हरिमीजे ११ दैत्यपुरस्यजयात् पुरंजयः इंद्रोवाहोयस्येतींद्रवाहः ककुदिस्थितत्वात्ककुत्स्थ इतिशशादसुतस्यत्रीणिनामानितत्तत्कर्मनिमित्तानि १२ तान्येवव्याचक्षाणआह कृतांतइतिसप्तभिः कृतांविश्वंअंतयतीतितथा । पार्ष्णिग्राहःसहायः १३ इंद्रोयदिममवाहनंस्यात् तर्हिदैत्यान् हनिष्यामीतितेनवाहनत्वेवृतःसन्निंद्रोलज्जयातदनंगीकुर्वन्विष्णोर्वचनात्तस्यवाहनत्वायमहावृषोबभूवेत्यर्थः १४ १५ १६येभिमुखंययुः तान् यमंदर्शयितुंसदेहानेवभल्लैरनयदित्यर्थः १७ तच्चदृष्ट्वाऽन्येदुद्रुवुः स्वमालयंपातालम् १८ इतिएतैः कर्मभिः पुरंजयादिनामभिराहृतः व्याहृतः पाठांतरेआहूतइत्यर्थः १९

॥१७॥

श्लोकाः ५/१९

तेषांपुरस्तादभवन्नार्यावर्तेनृपानृप ॥ पंचविंशतिःपश्चाच्चत्रयोमध्येऽपरेन्यतः ५ सएकदाऽष्टकाश्राद्धइक्ष्वाकुःसुतमादिशत् ॥ मांसमानीयतांमेध्यंविकुक्षेगच्छमाचिरम् ६ तथेतिसवनंगत्वामृगान्हत्वाक्रियार्हणान् ॥ श्रांतोबुभुक्षितोवीरःशशंचाददपस्मृतिः ७ शेषंनिवेदयामासपित्रेतेनचतद्गुरुः ॥ चोदितःप्रोक्षणायाहदुष्टमेतदकर्मकम् ८ ज्ञात्वापुत्रस्यतत्कर्मगुरुणाभिहितंनृपः ॥ देशान्निःसारयामाससुतंत्यक्तविधिंरुषा ९ सतुविप्रेणसंवादंजापकेनसमाचरन् ॥ त्यक्त्वाकलेवरंयोगीसतेनावापयत्परम् १० पितर्युपरतेभ्येत्यविकुक्षिःपृथिवीमिमाम् ॥ शासदीजेहरिंयज्ञैःशशादइतिविश्रुतः ११ पुरंजयस्तस्यसुतइंद्रवाहइतीरितः ॥ ककुत्स्थइतिचाप्युक्तःशृणुनामानिकर्मभिः १२ कृतांतआसीत्समरोदेवानांसहदानवैः ॥ पार्ष्णिग्राहोवृतोवीरोदेवैर्दैत्यपराजितैः १३ वचनाद्देवदेवस्यविष्णोर्विश्वात्मनःप्रभो ॥ वाहनत्वेवृतस्तस्यबभूवेंद्रोमहावृषः १४ ससन्नद्धोधनुर्दिव्यमादायविशिखाञ्शितान् ॥ स्तूयमानःसमारुह्ययुयुत्सुःककुदिस्थितः १५ तेजसाप्यायितोविष्णोःपुरुषस्यपरात्मनः ॥ प्रतीच्यांदिशिदैत्यानांन्यरुणत्त्रिदशैःपुरम् १६ तैस्तस्यचाभूत्प्रधनंतुमुलंरोमहर्षणम् ॥ यमायभल्लैरनयद्दैत्यान्येऽभिययुर्मृधे १७ तस्येषुपाताभिमुखंयुगांताग्निमिवोल्बणम् ॥ विसृज्यदुद्रुवुर्दैत्याहन्यमानाःस्वमालयम् १८ जित्वापुरंधनंसर्वंसश्रीकंवज्रपाणये ॥ प्रत्ययच्छत्सराजर्षिरितिनामभिराहृतः १९

चूर्णिका

५ एकदा इक्ष्वाकुः अष्टकाश्राद्धे मांसानयनार्थं विकुक्षिं आदिशत् ६ सः वनं गत्वा मृगान् हत्वा बुभुक्षितः सन् शशं भक्षयित्वा ७ शेषंमांसं पित्रे निवेदयामास तदा इक्ष्वाकुणा नोदितः वसिष्ठः प्रोक्षणकाले तत्कर्म ज्ञात्वा राज्ञे निवेदयामास ८ तदा इक्ष्वाकुः पुत्रं देशान्निःसारयामास ९ इक्ष्वाकुः योगेन देहं हित्वा तत्त्वं अवाप१० अथ विकुक्षिः पितर्युपरते सति इमां पृथ्वीं पालयामास स एवशशाद इति विश्रुतः अभूत् ११ तस्यः पुत्रःपुरंजयः इंद्रवाहः ककुत्स्थः इति नामत्रयेण अभूत् तस्य कर्मभिर्नामानि शृणु १२ पुरा देवदैत्यसमरे देवैर्वृतः सः उवाच इंद्रो यदि मम वाहनं स्यात् तर्हि दैत्यान्हनिष्यामि १३ एवं वाहनत्वेन वृतः इंद्रः लज्जया तदनंगीकुर्वन् विष्णोर्वचनात् वृषभो बभूव १४ तदा वृषरूपेंद्रस्य ककुदि स्थित्वा १५ सःदैत्यान्हत्वा तेषां सर्वं धनं इंद्राय प्रायच्छदिति १६ १७ १८ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ६ ॥

२० शावस्तिः शावस्तस्यपुत्रः २१ कुवलयाश्वकएवधुंधुमारइतिख्यातस्तत्रकारणमाह यइति । सुतानामेकविंशत्यासहस्रैर्वृतः सन्हतवान् २२ धुंधुमारइतिचेतिचकारस्यान्वयः (मुख्याग्निनामुखोद्भवेनवह्निना) २३ २४ (अथ) तस्मात् निकुंभात् कृशाश्वः २५ भार्याणांशतेनसहअस्यपुत्रार्थमिंद्रदैवत्यामिष्टिंवर्तयामासुःसमेत्याश्चार्ये २६ तदेवाह राजेतिषड्भिः । तर्षितःतृषितः सन्जलार्थंप्रविष्टः मंत्राभिमंत्रितंजलंपत्न्यैदेयंस्वयंपपौ २७ व्युदकंनिरुदकंपुंसवनंपुत्रोत्पत्तिकारणम् २८ अहो दैवबलमेवमुख्यंबलं पुरुषबलंतुनकिंचिदितिवदंतःईश्वरायनमस्कारंचक्रुः २९ ३० अयंकंधास्यतीतिदुःखितैर्विप्रैरुक्तेसति तस्यामिष्ट्यामाराधितइंद्रोमांधातापास्यति हेवत्स मारोदीरितिब्रुवन्देशिनींतर्जनीमदात् (तन्मुखेनिक्षिप्तवानित्यर्थः) ३१ तस्यपितायुवनाश्वोभिन्नकुक्षिरपि नममार । किंतुकालांतरेतपसासिद्धिमन्वगात् ३२

॥१८॥ श्लोकाः २०/३२

पुरंजयस्यपुत्रोभूदनेनास्तत्सुतःपृथुः ॥ विश्वरंधिस्ततश्चंद्रोयुवनाश्वश्चतत्सुतः २० शावस्तस्तत्सुतोयेनशावस्तीनिर्ममेपुरी ॥ बृहदश्वस्तुशावस्तिस्ततः कुवलयाश्वकः २१ यःप्रियार्थमुतंकस्यधुंधुनामासुरंबली ॥ सुतानामेकविंशत्यासहस्रैरहनद्वृतः २२ धुंधुमारइतिख्यातस्तत्सुतास्तेचजज्वलुः ॥ धुंधोर्मुख्याग्निनासर्वेत्रयएवावशेषिताः २३ दृढाश्वःकपिलाश्वश्चभद्राश्वइतिभारत ॥ दृढाश्वपुत्रोहर्यश्वोनिकुंभस्तत्सुतःस्मृतः २४ बर्हणाश्वोनिकुंभस्यकृशाश्वोथास्यसेनजित् ॥ युवनाश्वोभवत्तस्यसोनपत्योवनंगतः २५ भार्याशतेननिर्विण्णऋषयोस्यकृपालवः ॥ इष्टिंस्मवर्तयांचक्रुरैंद्रींतेसुसमाहिताः २६ राजातद्यज्ञसदनंप्रविष्टोनिशितर्षितः ॥ दृष्ट्वाशयानान्विप्रांस्तान्पपौमंत्रजलंस्वयम् २७ उत्थितास्तेनिशम्याथव्युदकंकलशंप्रभो ॥ पप्रच्छुःकस्यकर्मेदंपीतंपुंसवनंजलम् २८ राज्ञापीतंविदित्वाथईश्वरप्रहितेनते ॥ ईश्वरायनमश्चक्रुरहोदैवबलंमहत् २९ ततःकालउपावृत्तेकुक्षिंनिर्भिद्यदक्षिणम् ॥ युवनाश्वस्यतनयश्चक्रवर्तीजजानह ३० कंधास्यतिकुमारोयंस्तन्येरोरूयतेभृशम् ॥ मांधातावत्समारोदीरितींद्रोदेशिनीमदात् ३१ नममारपितातस्यविप्रदेवप्रसादतः ॥ युवनाश्वोथतत्रैवतपसासिद्धिमन्वगात् ३२

चूर्णिका

पुरंजयात् अनेनाः तस्य पृथुः तस्य विश्वरंधिः तस्य चंद्रः तस्य युवनाश्वः २० तस्य शावस्तः येन शावस्ती पुरी निर्मिता तस्यबृहदश्वः तस्य कुवलयाश्वः २१ सः एकविंशतिसहस्रपुत्रैः सह वृतः धुंधुनामासुरं अहनत् २२ तेन धुंधुमार इति विख्यातः धुंधोर्मुखाग्निना तत्सुताः सर्वे दग्धाः २३ दृढाश्वः कपिलाश्वः भद्राश्व इति त्रयः अवशिष्टाः दृढाश्वात् हर्यश्वः तस्य निकुंभः २४ तस्य पुत्रौ द्वौ बर्हणाश्वकृशाश्वौ कृशाश्वात् सेनजित् तस्य युवनाश्वःसः अनपत्यः भार्याशतेन सह वनं गतः तस्य पुत्रार्थं ऋषयः ऐंद्रीं इष्टिं चक्रुः २५ २६ निशि तृषितो राजा शयानान् विप्रान् दृष्ट्वा अभिमंत्रितं जलं पत्न्यै देयंस्वयं पपौ २७ प्रातः ते मुनयः व्युदकं कलशं दृष्ट्वा राज्ञा पीतं विदित्वा अहो दैवबलं बलं इत्युक्त्वा ईश्वराय नमश्चक्रुः २८ २९ ततः काले प्राप्ते सति युवनाश्वस्य दक्षिणं कुक्षिं भित्त्वा निर्गतः अयं कुमारः कं पास्यति ३० इति विप्रैः उक्ते सति तस्यां इष्ट्यां आराधितः इंद्रः मां धाता इति ब्रुवन् तन्मुखे तर्जनीमदात् ३१ तस्य पिता भिन्नकुक्षिरपि विप्रदेवप्रसादतः नममार कालांतरेण तत्रैव सः सिद्धिं अन्वगात् ३२ ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांधातुर्महिमानमाह त्रसद्दस्युरितिषड्भिः अंगहेराजन् यस्मान्मांधातुर्दस्यवउद्विग्नाः कंपिताः संतस्त्रसंति अतइंद्रोयस्यत्रसद्दस्युरितिनामविंदधेसमांधाताअवनिमेकःशशासंत्येुत्तरणान्वयः ३३ अच्युतस्य तेजसाअप्रच्युततेजसेतिवा ३४ आत्मविदपिसःयज्ञंविष्णुमीजे तमेवविशिनाष्टि सर्वदेवमयमितिसार्धेन ३५३६ प्रतितिष्ठतिअस्तंगच्छति ३७ प्रसंगात्सौभरेश्चरितमाह तेषामितियावत्समाप्ति (नृपोमांधाता ।) तेषांस्वसारोमांधातुः कन्याः ३८ ननु महातापसस्यकुतोविवाहप्रसंगः कथंवाजराजर्जरंतंराजकन्यावव्रिरे तदाह यमुनेतिषड्भिः (निर्वृतिंसुखम्)३९ नृपंमांधातारम् । सोपिमांधातास्वयंवरेकामं गृह्यतामित्याह । सइति ४० सविप्रःस्त्रीणांअप्रियंमांविचिंत्यानेननृपेणाहंतथाप्रत्युक्तः अतआत्मानंतथासाधयिष्यइतिव्यवसितोनिश्चितवान् इतिद्वयोरन्वयः। अप्रियत्वेहेतुःजरठोवृद्धः । वलीभिर्युक्तः पलितश्च । एजत्कः कंपमानशिराः । तापसत्वादिनावाअसंमतोहमितिकृत्वा ४१ तथेत्यस्यप्रपंचःसुरस्त्रीणामपीप्सितम्। किंपुनर्मनुजेंद्राणांयाःस्त्रियः तासामिति ४२ ततःकिंवृत्तंतदाह मुनिरितिद्वाभ्याम् । क्षत्राप्रतिहारेण पंचाशतापिराजकन्याभिः सएकएववरोवृतः ४३ अयंवरोममैवानुरूपःनतुयुष्माकमितितासांकलहोभूत् ४४

श्लोकाः ३३/४४

त्रसद्दस्युरितींद्रोंगविदधेनामतस्यवै ॥ तस्मात्त्रसंतिह्युद्विग्नादस्यवोरावणादयः ३३ यौवनाश्वोथमांधाताचक्रवर्त्यवनींप्रभुः ॥ सप्तद्वीपवतीमेकःशशासा च्युततेजसा ३४ ईजेचयज्ञंक्रतुभिरात्मविद्भूरिदक्षिणैः ॥ सर्वदेवमयंदेवंसर्वात्मकमतींद्रियम् ३५ द्रव्यंमंत्रोविधिर्यज्ञोयजमानस्तथर्त्विजः ॥ धर्मोदेश श्चकालश्चसर्वमेतद्यदात्मकम् ३६ यावत्सूर्यउदेतिस्मयावच्चप्रातितिष्ठति ॥ सर्वंतद्यौवनाश्वस्यमांधातुःक्षेत्रमुच्यते ३७ शशबिंदोर्दुहितरिबिंदुमत्याम धान्नृपः ॥ पुरुकुत्समंबरीषंमुचुकुंदंचयोगिनम् ॥ तेषांस्वसारःपंचाशत्सौभरिंवव्रिरेपतिम् ३८ यमुनांऽतर्जलेमग्नस्तप्यमानःपरंतपः ॥ निर्वृतिंमीनराजस्य वीक्ष्यमैथुनधर्मिणः ३९ जातस्पृहोनृपंविप्रःकन्यामेकामयाचत ॥ सोप्याहगृह्यतांब्रह्मन्कामंकन्यास्वयंवरे ४० सविचिंत्याप्रियःस्त्रीणांजरठोयमसंमतः ॥ वलीपलितएजत्कइत्यहंप्रत्युदाहृतः ४१ साधयिष्येतथात्मानंसुरस्त्रीणामपीप्सितम् ॥ किंपुनर्मनुजेंद्राणामितिव्यवसितःप्रभुः ४२ मुनिःप्रवेशितःक्षत्त्राकन्यांतःपुरमृद्धिमत् ॥ वृतश्चराजकन्याभिरेकःपंचाशतावरः ४३ तासांकलिरभूद्भूयांस्तदर्थेपोह्यसौहृदम् ॥ ममानुरूपोनायंवइतितद्गतचेतसाम् ४४

चूर्णिका इंद्रः पुत्रस्य नाम त्रसद्दस्युरिति विदधे यस्मात् रावणादयः त्रसंति ३३ असौ मांधाता अवनिं शशास ३४ सः शशबिंदोः कन्यायां बिंदुमत्यां पुरुकुत्सं अंबरीषं मुचुकुंदं पंचाशत्कन्याश्च उत्पादयामास ३५ ३६ ३७ ३८ ३९ ताः सौभरिं पतिं वव्रिरे एकदा सौभरिः ऋषिः यमुनांतर्जले मैथुनधर्मिणः मीनराजस्य निर्वृतिं वीक्ष्य जातस्पृहः सन् मांधातारं गत्वा एकां कन्यां अयाचत ४० तदा राजासौभरिं वृद्धं दृष्ट्वा स्वयंवरे कन्या कामं गृह्यतामित्युवाच ४१ तत् श्रुत्वा ऋषिः अहं जरठः अतः राज्ञा एवं उक्तं तस्मात् सुरस्त्रीणामपि ईप्सितं रूपं साधयिष्यामि ४२ इति निश्चित्य तथा रूपं धृतवान् ततो राज्ञा कन्यांतःपुरे निवेशितः सन् सर्वाभिः एक एव वृतः ४३ तद्गतचेतसां तासां ममायं अनुरूपः नायं तव इति कलहः अभूत् ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.न. तस्यगार्हस्थ्यंवर्णयति सइतिचतुर्भिः बह्वृचइतिमंत्रसामर्थ्यमुक्तं ताभिः संहरेमेइत्युत्तरेणान्वयः । करेमे। अपारणीयंदुरंतंयत्तपः तस्यश्रियासमृद्ध्याअनर्घ्याःपरिच्छदायेषुतेषु गृहेषु तथानानाविधेषु पवने अ०
षुचअमलान्यंभांसियेषांतेषुसरस्सुच । कथंभूतेषुसौगंधिकानांकह्लाराणांकाननानिस्तोमायेषु ४५ कथंभूतेषुगृहादिषुस्वलंकृताः स्त्रियः पुरुषाश्चयेषुअनुगायंतोद्विजाश्चपक्षिणोभृंगाश्चयेषुकथंभूतः महा
टीका र्हशय्यादिभिरुपलक्षितः सन् (अभ्यवहारोभोजनं.) ४६ स्तंभंगर्वं ४७ आज्यस्तोकैर्घृतबिंदुभिः ४८ इदानींतस्यानुतापपूर्वकंवानप्रस्थाश्रममाह । सकदाचिदितिसप्तभिः । आत्मनोमनसोहेतोः आ
त्मनोपह्नवंतपोहानिंददर्श ४९ संश्चासौचरितव्रतश्चयोहं तस्यब्रह्मतपः ५० मिथुनव्रतिनांदांपत्यधर्मवतांचेद्यदिप्रसंगः तर्हितद्व्रतिषुईश्वरार्थधर्मपरेष्वेवकार्यइतिशेषः ५१ संगाज्जातंदोषंप्रपंचयति । ए ॥ ६ ॥
कइति । पंचाशताभार्याभिः सहसंबंधात्पंचाशदासंअभूवंततश्चसुतैः पंचसहस्रसर्गः आसम् । तासुप्रत्येकंपुत्रशतरूपेणोत्पत्तेः उभयकृत्यानिऐहिकपारत्रिकाणिकर्माणितद्विषयाणांमनोरथानाम् । यद्वा
॥२०॥ उभयकृत्यंस्त्रीपुरुषकर्मसुरतमित्यर्थः । अर्थभावः पुरुषार्थबुद्धिमान् ५२ न्यासोत्रसंगत्यागएववानप्रस्थधर्मइत्यर्थः ५३ ५४ आध्यात्मिकींगतिंब्रह्मणिलयम् ५५ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कं
धेटीकायांषष्ठोऽध्यायः ६ ॥ ॥ ७ ॥ ॥ मांधातुरन्वयः प्रोक्तःसप्तमेयत्रगीयते । पुरुकुत्सस्यचाख्यानंहरिश्चंद्रस्यचोत्तमम् ॥ १ ॥ पुत्रवरः पुत्रश्रेष्ठः सपितामहेनयुवनाश्वेनप्रवृतः पुत्रत्वे
नस्वीकृतःअतएवतस्यमांधातृप्रवर्ग्यत्वंतत्सुतः अंबरीषस्यसुतः १

सबह्वृचस्ताभिरपारणीयतपःश्रियाऽनर्घ्यपरिच्छदेषु ॥ गृहेषुनानोपवनामलांभःसरस्सुसौगंधिककाननेषु ४५ महार्हशय्यासनवस्त्रभूषणस्नानानुलेपा श्लोकाः
भ्यवहारमाल्यकैः ॥ स्वलंकृतस्त्रीपुरुषेषुनित्यदारेमेऽनुगायद्द्विजभृंगबंदिषु ४६ यद्गार्हस्थ्यंतुसंवीक्ष्यसप्तद्वीपवतीपतिः ॥ विस्मितःस्तंभमजहात्सार्वभौ ४९/१
मश्रियान्वितम् ४७ एवंगृहेष्वभिरतोविषयान्विविधैःसुखैः ॥ सेवमानोनचातुष्यदाज्यस्तोकैरिवानलः ४८ सकदाचिदुपासीनआत्मापह्नवमात्म
नः ॥ ददर्शबह्वृचाचार्योमीनसंगसमुत्थितम् ४९ अहोइमंपश्यतमेविनाशंतपस्विनःसच्चरितव्रतस्य ॥ अंतर्जलेवारिचरप्रसंगात्प्रच्यावितंब्रह्मचिरंधृतंयत्
५० संगंत्यजेतमिथुनव्रतिनांमुमुक्षुःसर्वात्मनानविसृजेद्बहिरिंद्रियाणि ॥ एकश्चरन्रहसिचित्तमनंतईशेयुंजीततद्व्रतिषुसाधुषुचेत्प्रसंगः ५१ एकस्तपस्य
हमथांभसिमत्स्यसंगात्पंचाशदासमुतपंचसहस्रसर्गः ॥ नांतंव्रजाम्युभयकृत्यमनोरथानांमायागुणैर्हृतमतिर्विषयेऽर्थभावः ५२ एवंवसन्गृहेकालेविरक्तो
न्यासमास्थितः ॥ वनंजगामानुययुस्तत्पत्न्यःपतिदेवताः ५३ तत्रतप्त्वातपस्तीक्ष्णमात्मकर्षणमात्मवान् ॥ सहैवाग्निभिरात्मानंयुयोजपरमात्मनि
५४ ताःस्वपत्युर्महाराजनिरीक्ष्याध्यात्मिकींगतिम् ॥ अन्वीयुस्तत्प्रभावेनअग्निंशांतमिवार्चिषः ५५ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधे
षष्ठोऽध्यायः ६ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ मांधातुःपुत्रप्रवरोयोऽबरीषःप्रकीर्तितः ॥ पितामहेनप्रवृतोयुवनाश्वेनतत्सुतः १

चूर्णिका ततः सौभरिः ताभिः सह अनेककालं गृहकाननादिषु रेमे ४५ ४६ ततः कालेन निर्विण्णः सन् वनं गत्वा ४७ ४८ ४९ ५० ५१ ५२ ५३ तपः तप्त्वा अग्नि ॥२०॥
भिः सह आत्मानं परमात्मनि युयोज ५४ ताः स्त्रियः तं अन्वीयुः ५५ ॥ इति नवमे षष्ठः ६ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ मांधातुः पुत्रश्रेष्ठःअंबरी
षः कथितः सः पितामहेन युवनाश्वेन पुत्रत्वेन स्वीकृतः तस्य पुत्रः यौवनाश्वः १

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.न. इमेयौवनाश्वांबरीषहारीतामांधातृगोत्रस्यप्रवराअवांतरविशेषप्रवर्तकाः यद्वा यौवनाश्वविशेषणंपितामहेनमांधात्रासहआर्षेयवरणेप्रवृत्तः मांधाताप्रवरोयेषांते इमेअंबरीषयौवनाश्वहारीताः यथाहाश्वला अ०
यनः " हरितकुत्सपिंगदर्भभैमगवानामांगिरसांबरीषयौवनाश्वेति मांधातारंह्येकेब्रुवतेअतीत्यांगिरसम् । " आंगिरसंहारीतंविहायेत्यर्थः मांधात्रांबरीषयौवनाश्वेतीति । पुरुकुत्सस्यवंशंकथयिष्यन्
टीका आदौतावत्तस्यविवाहंप्रभावंचाह । उरगैर्भ्रातृभिर्यादत्तानर्मदातया २ वध्यान् वधार्हान् सचपुरुकुत्सोनागाल्लब्धवरोऽभूत् । वरमाह । इदंनर्मदयारसातलनयनादिकंस्मरतांसर्पादभयमिति ३ देहकृ
त्पिता । त्रसद्दस्योःसुतोऽनरण्यइत्यर्थः ४ त्रयःशंकवइवदुःखहेतवोदोषायस्यासौत्रिशंकुः । तदुक्तंहरिवंशे । " पितुश्चापरितोषेणगुरोर्दोग्ध्रीवधेनच ॥ अप्रोक्षितोपयोगाच्चत्रिविधस्तेव्यतिक्रम "इति । ॥७॥
परिणीयमानविप्रकन्याहरणात् क्रुद्धस्यगुरोः पितुः शापात् । कौशिकस्यविश्वामित्रस्यतेजसाप्रभावेन ५ तेनैवकौशिकेन .६ पक्षिणोः आडीबकयोः विश्वामित्रोराजसूयदक्षिणाच्छलेनहरिश्चंद्रंसर्वं
॥२१॥ स्वमपहृत्ययातयामास । तच्छ्रुत्वाकुपितोवसिष्ठोपिविश्वामित्रमाडीभवेतिशशाप सोपि त्वंबको भवेति वसिष्ठंशशाप तयोश्चयुद्धमभूदितिप्रसिद्धम् ७ " हरिश्चंद्रोहवैधसऐक्ष्वाकोराजापुत्रआसे "त्यादि
श्रुतिप्रसिद्धहरिश्चंद्रस्यचरितमाह । सोऽनपत्यइत्यादियावदध्यायसमाप्ति कथंशरणंयातस्तदाह पुत्रोमेजायतां ८ यदिवीरःपुत्रोमेजायेततर्हितेनैवपुरुषपशुनात्वांयजेयजामीतिभाषया । तथेत्युक्तवता
वरुणेननिमित्तेनास्यरोहितोनामपुत्रोजातः ९ जातेपुत्रेसवरुणोजातःसुतोमामनेनयजस्वेत्यब्रवीत् । यदापशुर्निर्दशः निर्गतदशदिवसः स्यादित्यत्र सराजाब्रवीदित्यनुषंगः १०

हारीतस्तस्यपुत्रोभून्मांधातृप्रवराइमे ॥ नर्मदाभ्रातृभिर्दत्तापुरुकुत्सायचोरगैः ॥ तयारसातलंनीतोभुजगेंद्रप्रयुक्तया २ गंधर्वानवधीत्तत्रवध्यान्वैविष्णुश श्लोकाः
क्तिधृक् ॥ नागाल्लब्धवरःसर्पादभयंस्मरतामिदम् ३ त्रसद्दस्युःपौरुकुत्सोयोनरण्यस्यदेहकृत् ॥ हर्यश्वस्तत्सुतस्तस्मादरुणोथत्रिबंधनः ४ तस्यसत्य
व्रतःपुत्रस्त्रिशंकुरितिविश्रुतः ॥ प्राप्तश्चांडालतांशापाद्गुरोःकौशिकतेजसा ५ सशरीरोगतःस्वर्गमद्यापिदिविदृश्यते ॥ पातितोऽवाक्शिरादेवैस्तेनैवस्तं २/१०
भितोबलात् ६ त्रैशंकवोहरिश्चंद्रोविश्वामित्रवसिष्ठयोः ॥ यन्निमित्तमभूद्युद्धंपक्षिणोर्बहुवार्षिकम् ७ सोऽनपत्योविषण्णात्मानारदस्योपदेशतः ॥ वरुणं
शरणंयातःपुत्रोमेजायतांप्रभो ८ यदिवीरोमहाराजतेनैवत्वांयजेइति ॥ तथेतिवरुणेनास्यपुत्रोजातस्तुरोहितः ९ जातःसुतोह्यनेनांगमांजयस्वेतिसो
ऽब्रवीत् ॥ यदापशुर्निर्दशःस्यादथमेध्योभवेदिति १०

चूर्णिका तस्य हारीतः एतेत्रयः मांधातृगोत्रप्रवराः अथ मांधातृपुत्रः पुरुकुत्सः तस्मै उरगैः स्वभगिनी नर्मदा दत्ता २ तया सः रसातलं नीतः सन् तत्र गंधर्वान् अवधीत् ३
नागात् लब्धवरश्च आसीत् इदं स्मरतां सर्पादभयं स्यात् अथ पुरुकुत्सात् त्रसद्दस्युः तस्य अनरण्यः ४ तस्य हर्यश्वः तस्य अरुणः तस्यत्रिबंधनः तस्य सत्यव्रतः असौ
त्रिशंकुरिति विश्रुतः ५ सः गुरोः शापात् चांडालतां प्राप्तोपि विश्वामित्रप्रभावेन सशरीरःस्वर्गं गतः ६ तत्र देवैः अर्वाक्शिराः पातितोपि विश्वामित्रेण बलात् स्तंभितः
सः अद्यापि दिवि दृश्यते त्रिशंकोः पुत्रः हरिश्चंद्रः यन्निमित्तं विश्वामित्रवसिष्ठयोः पक्षिणोः बहुकालं युद्धं अभूत् ७ हरिश्चंद्रः अनपत्यः नारदोपदेशतः वरुणं शरणं ॥२१॥
गत्वा मे पुत्रो जायतां ८ तेनैव त्वां यजे इति अयाचत वरुणः तथास्त्वित्युक्तवान् तदा रोहितो नाम पुत्रो जातः ९ तदा वरुणः एत्य अनेन मां यजस्व इत्याह तदा
राजोवाच यदा पशुः निर्गतदशदिवसः स्यात् अथ मेध्यः भवेत् १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. न. ११ १२ १३ राजन्हेवरुण राजन्यःपशुः यदासान्नाहिकः कवचबंधार्हः संग्रामसमर्थः अथतदाशुचिः १४ इत्येवंतंतंकालंवंचयताराज्ञाउक्तः प्रार्थितोदेवोवरुणः तंतंकालंप्रत्यैक्षतेत्यर्थः १५ चि अ०
कीर्षितंआत्मनापशुनावरुणयजनं १६ ततश्चकुपितेनवरुणेनग्रस्तंअतएवजातंमहदुदरंयस्यतंपितरंश्रुत्वा १७ (तीर्थक्षेत्रनिषेवणैः पुण्यरूपंभूमेः पर्यटनं) समांवर्षं । १८ द्वितीयेचवर्षेवृत्रहाअभ्येत्या
टीका भ्येत्यतथैवतंप्रतिषेधन्किंचित्किंचिदाह १९ (पुत्रत्रयेमध्यमं) २० २१ वरुणेनमुक्तमुदरंयस्यमहत्सुकथायस्यसः आत्मवान् २२ जमदग्निरध्वर्युरभूत् अयास्योमुनिःसामगउद्गाताऽभूदित्यर्थः २३
उपरिष्टाद्विश्वामित्रसुताख्यानप्रसंगे २४ ॥ ७ ॥

।२२॥ निर्दशेचसआगत्ययजस्वेत्याहसोब्रवीत् ॥ दंताःपशोर्यजायेरन्नथमेध्योभवेदिति ११ जातादंतायजस्वेतिसप्रत्याहाथसोब्रवीत् ॥ यदापतंत्यस्यदंताअ श्लोकाः
थमेध्योभवेदिति १२ पशोर्निपतितादंतायजस्वेत्याहसोब्रवीत् ॥ यदापशोःपुनर्दंताजायंतेथपुनःशुचिः १३ पुनर्जातायजस्वेतिसप्रत्याहाथसोऽब्रवीत् ॥
सान्नाहिकोयदाराजन्राजन्योथपशुःशुचिः १४ इतिपुत्रानुरागेणस्नेहयंत्रितचेतसा ॥ कालंवंचयतातंतमुक्तोदेवस्तमैक्षत १५ रोहितस्तदभिज्ञायपितुःक ११
र्मचिकीर्षितम् ॥ प्राणप्रेप्सुर्धनुष्पाणिररण्यंप्रत्यपद्यत १६ पितरंवरुणग्रस्तंश्रुत्वाजातमहोदरम् ॥ रोहितोग्राममेयायतमिंद्रःप्रत्यषेधत १७भूमेःपर्यटनं २४
पुण्यंतीर्थक्षेत्रनिषेवणैः ॥ रोहितायादिशच्छक्रःसोप्यरण्येऽवसत्समाम् १८ एवंद्वितीयेतृतीयेचतुर्थेपंचमेतथा ॥ अभ्येत्याभ्येत्यस्थविरोविप्रोभूत्वाहवृ
त्रहा १९ षष्ठंसंवत्सरंतत्रचरित्वारोहितःपुरीम् ॥ उपव्रजन्नजीगर्तादक्रीणान्मध्यमंसुतम् २० शुनःशेपंपशुंपित्रेप्रदायसमवंदत ॥ ततःपुरुषमेधेनहरि
श्चंद्रोमहायशाः २१ मुक्तोदरोऽयजद्देवान्वरुणादीन्महत्कथः ॥ विश्वामित्रोऽभवत्तस्मिन्होताचाध्वर्युरात्मवान् २२ जमदग्निरभूद्ब्रह्मावसिष्ठोऽया
स्यसामगः ॥ तस्मैतुष्टोददाविंद्रःशातकौंभमयंरथम् २३ शुनःशेपस्यमाहात्म्यमुपरिष्टात्प्रवक्ष्यते ॥ सत्यसारांधृतिंदृष्ट्वासभार्यस्यचभूपतेः २४

चूर्णिका निर्दशेसति वरुणः आगत्य यजस्वेत्याह सोऽब्रवीत् यदा पशोः दंताः जायेरन् ११जाता दंता यजस्वेति स प्रत्याहाथसोऽब्रवीत् यदा दंताः पतिष्यंतिअथमेध्योभवेदिति प
शोर्निपतिता दंता यजस्वेत्याह सोऽब्रवीत् यदा पुनः दंताः भवेयुः १२पुनर्दंता जाता यजस्वेत्याहसोब्रवीत् यदा युद्धयोग्यः स्यात्१३ १४एवं पुनः पुनः वरुणः आग
त्य यजस्वेत्युक्तवान् तदा राजा पुत्रानुरागेण कालं वंचयन् इत्युवाच १५ ततः रोहितःपितुः चिकीर्षितं ज्ञात्वा धनुष्पाणिः वनं अगात् तत् ज्ञात्वा वरुणः राज्ञे महोद
रं विदधे १६ तदा रोहितः पितरं वरुणग्रस्तं श्रुत्वा ग्रामं इयाय तदा इंद्रः मार्गे तं भूमेः पर्यटनं पुण्यं तीर्थक्षेत्रनिषेवणैरित्युक्त्वा प्रत्यषेधत १७ एवं पंचवर्षपर्यंतं इंद्रः
वृद्धो भूत्वा तं न्यवर्तयत् १८ १९ एवंषट् संवत्सराणि तत्र चरित्वा पुरीं उपव्रजन् अजीगर्तात् शुनःशेपं मध्यमं पुत्रं क्रीत्वा २० पित्रे दत्वा ववंदे ततो हरिश्चंद्रः ॥२२॥
मुक्तोदरः सन् पुरुषमेधेन २१ वरुणादीन् अयजत् यत्र यज्ञे विश्वामित्रो होता २२ जमदग्निरध्वर्युः वासिष्ठो ब्रह्मा अयास्य ऋषिः उद्गाता अभूत् तत्र यज्ञे तुष्टः
शुक्रः तस्मै सौवर्णं रथं ददौ २३ शुनःशेपस्य माहात्म्यं उपरिष्टात् प्रचक्षते २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अविहतांगतिंज्ञानम् तामेवगतिमाह सार्धाभ्यां मनः पृथिव्यांधारयन् ज्ञानकलांध्यात्वातयाऽज्ञानंविनिर्दहन् तांचहित्वामुक्तामुक्तबंधनस्तस्थावित्यन्वयः मनोमूलोहिसंसारः मनश्चान्नमयम् । "अन्नमयंहिसोम्यमन"इतिश्रुतेः अतोऽन्नशब्दवाच्यायांपृथिव्यांमनोधारयन् एकीकुर्वन् तांपृथिवीमाद्भिरेकीकुर्वन् अपस्तेजसातत्तेजोऽनिलेनतंच २५ खेआकाशेतच्चभूतादावहंकारेतंचभूतादिंमहात्मनि महत्तत्वेतास्मिन्विषयाकारंव्यावर्त्यज्ञानकलांज्ञानांशमात्मत्वेनध्यात्वातयाध्यानवृत्तिरूपयाआत्मावरकमज्ञानंविनिर्दहन् २६ निर्वाणसुखसंविदातांचहित्वामुक्तबंधनःसन्अनिर्देश्येनाप्रतर्क्येणस्वेनभावे नस्वस्वरूपेणतस्थौ २७॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांहरिश्चंद्रोपाख्यानेसप्तमोऽध्यायः ७ ॥ ॥ छ ॥ ॥ अष्टमेरोहितस्योक्तोवंशोयत्राभवन्नृपः । सगरःकपिलाक्षेपात् निर्दग्धायस्यसूनवः ॥ १ ॥ चंपस्तस्माद्धरितादभूद्येनचंपापुरीविनिर्मिता । अतश्चंपात्सुदेवः १ हृताभूर्यस्य २ और्वेणऋषिणाआत्मानंदेहंप्रजावंतंसगर्भम् ३ गरोविषंतेनगरेणसहैवजातः ४ ५ गुरुवाक्ये नऔर्ववचनेन । कांश्चिदहत्वैवविकृतवेषिणश्चक्रे । तदेवाह मुंडानिति मुक्तकेशानर्द्धमुंडितांश्च ६ ७ और्वेणोपदिष्टोयोगउपायस्तेन ८

॥८॥

॥२३॥

श्लोकाः २९/८

विश्वामित्रोऽश्वशंप्रीतोददावविहतांगतिम् ॥ मनःपृथिव्यांतामद्भिस्तेजसाऽपोऽनिलेनतत् २५ खेवायुंधारयंस्तच्चभूतादौतंमहात्मनि ॥ तस्मिन्ज्ञान कलांध्यात्वातयाऽज्ञानंविनिर्दहन् २६ हित्वातांस्वेनभावेननिर्वाणसुखसंविदा ॥ अनिर्देश्याप्रतर्क्येणतस्थौविध्वस्तबंधनः २७ ॥ ॥ इतिश्री भागवतेमहापुराणेनवमस्कंधेहरिश्चंद्रोपाख्यानेसप्तमोऽध्यायः ७ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ ॥ हरितोरोहितसुतश्चंपस्त स्माद्विनिर्मिता ॥ चंपापुरीसुदेवोतोविजयोयस्यचात्मजः १ भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापिबाहुकः ॥ सोऽरिभिर्हृतभूराजासभार्योवनमाविशत् २ वृद्धंतंपंचतांप्राप्तंमहिष्यनुमरिष्यती ॥ और्वेणजानतात्मानंप्रजावंतंनिवारिता ३ आज्ञायास्यैसपत्नीभिर्गरोदत्तोऽधसासह ॥ सहतेनैवसंजातःसग राख्योमहायशाः ४ सगरश्चक्रवर्त्यासीत्सागरोयत्सुतैःकृतः ॥ यस्तालजंघान्यवनान्शकान्हैहयबर्बरान् ५ नावधीद्गुरुवाक्येनचक्रेविकृतवेषिणः ॥ मुं डान्श्मश्रुधरान्कांश्चिन्मुक्तकेशार्धमुंडितान् ६ अनंतर्वाससःकांश्चिदबहिर्वाससोपरान् ॥ सोश्वमेधैरयजतसर्ववेदसुरात्मकम् ७ और्वोपदिष्टयोगेनहरिमात्मा नमीश्वरम् ॥ तस्योत्सृष्टंपशुंयज्ञेजहाराश्वंपुरंदरः ८

चूर्णिका

संभार्यस्य भूपतेः प्रीतः विश्वामित्रः ज्ञानं ददौ अनुहरिश्चंद्रः मनः भूमौ धारयन् तां अद्भिरेकीकुर्वन् ताअपः तेजसा तत् वायुना तमाकाशे तत् अहंकारे तं महत्तत्वे तस्मिन् ज्ञानांशं ध्यात्वा तेन अज्ञानं दहन् २५ २६ तं च हित्वा मुक्तबंधः सन् स्वस्वरूपेण तस्थौ २७ ॥ इति नवमे सप्तमोध्यायः ७ ॥ ॥ छ ॥ ॥ श्रीशुक उवाच ॥ रोहितात् हरितः तस्य चंपः येन चंपापुरी निर्मिता तस्य सुदेवः तस्य विजयः १ तस्य भरुकः तस्य वृकः तस्य बाहुकः सः शत्रुभिः हृतराज्यः सभू वनं गत्वा २ कालेन मृतः तस्य पत्नीं अग्निं प्रवेष्टुकामां दृष्ट्वा और्वऋषिणा सगर्भा ज्ञात्वा निवारिता ३ तत् ज्ञात्वा तस्यै सपत्नीभिः गरो दत्तः तेन सह सा कुमारं सुषुवे ४ सः सगराख्यः चक्रवर्ती आसीत् यत्सुतैः सागरः कृतः किंच यः और्ववचसा तालजंघान् यवनान् शकान् हैहयबर्बरान् अहत्वैव विकृतवेषिणश्चक्रे ५ ६ ७ सः और्वोपदिष्टयोगेन अश्वमेधैर्हरिं अयजत् इंद्रः तस्य अश्वं जहार ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यद्वेभार्येसुमतिःकेशिनीचतत्रसुमत्याः पुत्राणांप्रभावंमृत्युंचाह सुमत्याइतिषड्भिः ९ १० एषवाजिहरइतिब्रुवंतोभियपुः । षष्टिसहस्राणिपरिच्छेदकतयासंतियेषां । उन्मिमेष लोचनोन्मीलनंचकार ११ १२ केचित्तुकपिलस्यकोपाग्निनादग्धाइतिवर्णयंतितन्निराकरोति नेति कुतइत्यतआह । सत्त्वधामानिशुद्धसत्त्वमूर्तौजगतः पवित्रंशुद्धिकरआत्मायस्यतस्मिन् कथंविभाव्यतेसंभाव्यते । असंभावनायांदृष्टांतः। भुवोरजःखेकथंसंभाव्यतइति १३ किंच । यस्ययेनईरिताप्रवर्तितातस्याविपश्चितः सर्वज्ञस्यकथंपृथङ्मतिः अरिमित्रादिभेददृष्टिः१४तदेवंसुमत्याः पुत्रेषुमृतेषुकेशिन्याःपौत्रेणाश्वः समानीतः पितृव्योद्धरणप्रयत्नश्चकृतइतिदर्शयितुमाह । योऽसमंजसइतिउक्तःकेवलमज्ञैः वस्तुतस्तुसमंजसएवसतुकेशिन्याः सुतः क्षेत्रजत्वमिवप्रतीतंवारयति । तस्यैवनृपस्यात्मनोदेहाज्जातः १५ तस्यकथामाह चतुर्भिः । असमंजसः पुरापूर्वजन्मनियोगीसन् संगाद्धेतोः योगाद्विचालितः १६ अतइदानींजातिस्मरःसन्संगपरिहारायजनमुद्वेजयन् लोकेगर्हितंज्ञातीनांचविप्रियंकर्माचरन् क्रीडतोबालान् सरय्वांप्रास्यत् प्राक्षिपदितिद्वयोरन्वयः १७ एवंविधंवृत्तंकर्मयस्यसः १८ १९ पितृव्यखातमनुयःपंथास्तंययौ । भस्मांतिभस्मसमीपे २० २१

श्लोकाः ९/२१

सुमत्यास्तनयादृप्ताःपितुरादेशकारिणः ॥ हयमन्वेषमाणास्तेसमंतान्न्यखनन्महीम् ९ प्रागुदीच्यांदिशिहयंददृशुःकपिलांतिके ॥ एषवाजिहरश्चौरआस्ते मीलितलोचनः १० हन्यतांहन्यतांपापइतिषष्टिसहस्रिणः ॥ उदायुधाअभिययुरुन्मिमेषतदामुनिः ११ स्वशरीराग्निनातावन्महेंद्रहृतचेतसः ॥महद्व्यतिक्रमहताभस्मसादभवन्क्षणात् १२ नसाधुवादोमुनिकोपभर्त्सितानृपेंद्रपुत्राइतिसत्त्वधामनि ॥ कथंतमोरोषमयंविभाव्यतेजगत्पवित्रात्मनिखेरजोभुवः १३ यस्येरितासांख्यमयीदृढेहनौर्ययामुमुक्षुस्तरतेदुरत्ययम् ॥ भवार्णवंमृत्युपथंविपश्चितःपरात्मभूतस्यकथंपृथङ्मतिः १४ योऽसमंजसइत्युक्तःसकेशिन्यांनृपात्मजः ॥ तस्यपुत्रोंऽशुमान्नामपितामहहितेरतः १५ असमंजसआत्मानंदर्शयन्नसमंजसम् ॥ जातिस्मरःपुरासंगात्योगीयोगाद्विचालितः १६ आचरन्गर्हितंलोकेज्ञातीनांकर्मविप्रियम् ॥ सरय्वांक्रीडतोबालान्प्रास्यदुद्वेजयन्जनम् १७ एवंवृत्तःपरित्यक्तःपित्रास्नेहमपोह्यवै ॥ योगैश्वर्येणबालांस्तान्दर्शयित्वाततोययौ १८ अयोध्यावासिनःसर्वेबालकान्पुनरागतान् ॥ दृष्ट्वाविसिस्मिरेराजन्राजाचाथान्वतप्यत १९ अंशुमांश्चोदितोराज्ञातुरंगान्वेषणेययौ ॥ पितृव्यखातानुपथंभस्मांतिददृशेहयम् २० तत्रासीनंमुनिंवीक्ष्यकपिलाख्यमधोक्षजम् ॥ अस्तौत्समाहितमनाःप्रांजलिःप्रणतोमहान् २१

चूर्णिका

राज्ञः षष्टिसहस्राणि पुत्राः हयं अन्वेषमाणाः संतः ९ ईशान्यां दिशि कपिलांतिकेहरिंददृशुः अहो एषः वाजिहरः चोरः मीलितलोचनः आस्ते १० एषः हन्यतां हन्यतां इत्युक्त्वा उदायुधाः अभिययुः तदा मुनिः लोचनोन्मीलनं चकार ११ तदा महद्व्यतिक्रमात् तेषामेव शरीरात् उत्पन्नेन अग्निना ते सर्वे भस्मसात् अभवन् १२ केचित्तु कपिलस्य कोपाग्निना दग्धा इति वदंति तदसंगतम् कुतः सत्वमूर्तौ कपिले भेदस्य असंभवात् नैवमिति १३ १४ सगरस्य केशिन्यां अन्यभार्यायां असमंजस इति पुत्रो जातः तस्य अंशुमान् १५ सः असमंजसः लोके आत्मानं असमंजसंदर्शयन् १६ ज्ञातीनां अप्रियं आचरन् सरय्वां बालान् प्राक्षिपत् १७ एवं वृत्तः पुत्रः पित्रा त्यक्तः सन् योगबलेन मृतबालान् दर्शयित्वा ततो ययौ १८ सर्वे अयोध्यावासिनः पुनःप्राप्तान् बालान् दृष्ट्वा विसिस्मिरे राजा अन्वतप्यत १९ ततः राज्ञा अश्वान्वेषणे चोदितः अंशुमान् पितृव्यमार्गं गत्वा भस्मसमीपे हयं ददर्श २० तत्रासीनं कपिलं दृष्ट्वा अस्तौत् २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. न. अजानंतोऽवजानंतोप्यनुकंप्यावयंत्विति । तुष्टावषड्गिरीशानमंशुमानेवमाशयः ॥ अजनः अजोब्रह्मापित्वामद्यापिनपश्यतिनचबुध्यते कथंभूतं । आत्मनः स्वस्मात्परंपरमेश्वरं । कैर्हेतुभिः समाधियु अ०
क्तिभिः । समाधिनाप्यपरोक्षंनपश्यतियुक्तिभिः परोक्षमपिसम्यक् नबुध्यतइत्यर्थः । अपरेअर्वाचीनास्तुकुतस्त्वांपश्येयुः । अर्वाचीनत्वेहेतुः । तस्यब्रह्मणः मनश्चशरीरंचधीश्चसत्त्वतमोरजःकार्याणिता
भिर्येविविधादेवतिर्यङ्नराणांसर्गास्तेषुसृष्टास्तत्रापिवयमप्रकाशाअज्ञाः कुतः पश्यामेत्यर्थः २२ अपरेतर्हिकिंनपश्यंतितदाह । येदेहभाजस्तेस्वास्मिन्सम्यक्स्थितमपित्वांनाविदुः किंतुगुणानेवविपश्यंति
टीका अथवा नगुणानापितुतमएवपश्यंति यतस्त्रिगुणाबुद्धिरेवप्रधानंयेषांअतो बहिरेवप्रकाशोज्ञानंयेषां । बुद्धिपरतंत्रतयाजाग्रत्स्वप्नयोर्विषयान्पश्यंति । सुषुप्तौतमएवकेवलं नतुनिर्गुणंत्वां सर्वत्रहेतुः । ॥८॥
यत्यतः यस्यतवमाययेतिवामोहितंचेतोयेषांते २३ तथाप्यहं विचारेणज्ञास्यामीतिचेत्तत्राह । तंत्वामहंविमूढःकथंपरिभावयामि विचारयामि कथंभूतं ज्ञानघनं शुद्धज्ञानमूर्तिंस्वतएवप्रध्वस्तौमायागुण
॥२५॥ निमित्तौभेदमोहौयेषांतैर्विभाव्यंविचिंत्यं अयंभावः ज्ञानघनत्वान्नतावत् ज्ञानविषयत्वम् । विचारविषयत्वेऽपिमायागुणैरभिभूतोहंनविचारेसमर्थइति २४ तस्मात् हेप्रशांत त्वांपुराणंपुरुषंकेवलंनमामेत्य
न्वयः । पुराणपुरुषत्वेहेतुः मायायागुणाः कर्माणिविश्वसृष्ट्यादीनिलिंगानिचब्रह्मादिरूपाणियस्यतं । प्रशांतत्वेहेतुः सदसद्भ्यांकार्यकारणाभ्यांपुण्यपापाभ्यांवाविमुक्तंअतः अनामरूपंतत्कृतनामरू
पशून्यं । किंतुज्ञानोपदेशायगृहीतः प्रकटितोदेहः शुद्धसत्त्वमूर्तिर्येनतं यद्वा । हेप्रशांतमाय हेअगुणेति चसंबोध्यकर्मभिः सृष्ट्यादिकार्यैः लिंगानियस्येतियोज्यं । यद्वा प्रशांतामायागुणादयोयस्मिन्
तामित्येकमेवपदम् २५ स्वभाग्यंश्लाघते त्वन्मायेतिद्वाभ्याम् कामादिभिर्विभ्रांतानिचेतांसियेषांतेइमेसर्वेगृहादिषुभ्रमंति २६ हेसर्वभूतात्मन् नः अस्माकंतुत्वत्कृपयैवघटितात्त्वद्दर्शनात् दृढोपिमो
हमयः पाशः छिन्नः कथंभूतः कामादीनामाशयआश्रयः त्वत्प्रसादेनकृतार्थोस्मीत्यर्थः २७ २८ अश्वंलब्ध्वापिसकांक्षंप्रत्याह । इमेचेति २९ तंपरिक्रम्येतिशुकोक्तिः ३०

॥ अंशुमानुवाच ॥ नपश्यतित्वांपरमात्मनोऽजनोनबुध्यतेऽद्यापिसमाधियुक्तिभिः ॥ कुतःपरेतस्यमनःशरीरधीविसर्गसृष्टावयमप्रकाशाः २२ येदेहभा श्लोकाः
जस्त्रिगुणप्रधानागुणान्विपश्यंत्युतवातमश्च ॥ यन्माययामोहितचेतसस्तेविदुःस्वसंस्थंनबहिःप्रकाशाः २३ तंत्वामहंज्ञानघनंस्वभावप्रध्वस्तमायागुणभे
दमोहैः ॥ सनंदनाद्यैर्मुनिभिर्विभाव्यंकथंविमूढःपरिभावयामि २४ प्रशांतमायागुणकर्मलिंगमनामरूपंसदसद्विमुक्तम् ॥ ज्ञानोपदेशायगृहीतदेहंनमा २२/३०
महेत्वांपुरुषंपुराणम् २५ त्वन्मायारचितेलोकेवस्तुबुद्ध्यागृहादिषु ॥ भ्रमंतिकामलोभेर्ष्यामोहविभ्रांतचेतसः २६ अद्यनःसर्वभूतात्मन्कामकर्मेंद्रिया
शयः ॥ मोहपाशोदृढश्छिन्नोभगवंस्तवदर्शनात् २७ इत्थंगीतानुभावस्तंभगवान्कपिलोमुनिः ॥ अंशुमंतमुवाचेदमनुगृह्यधियानृप २८ ॥ श्रीभग
वानुवाच ॥ अश्वोयंनीयतांवत्सपितामहपशुस्तव ॥ इमेचपितरोदग्धागंगांभोऽर्हंतिनेतरत् २९ तंपरिक्रम्यशिरसाप्रसाद्यहयमानयत् ॥ सगरस्तेनप
शुनाक्रतुशेषंसमापयत् ३०

चूर्णिका हे कपिल ब्रह्मापि ईश्वरं त्वां न पश्यति २२ तं ज्ञानघनं सनंदनादिमुनिभिर्भाव्यं त्वां अहं मूढः कथं परिभावयामि २३ २४ हे प्रशांत तस्मात् ज्ञानोपदेशाय गृही ॥२५॥
तदेहं त्वां नमाम इत्यादि २५ २६ २७ तदा प्रसन्नः कपिलः उवाच २८ हे वत्स ते पितामहपशुः अयं अश्वः नीयतांइमे तव पितरो दग्धाः गंगांभः अर्ह
ति नेतरत् २९ इति श्रुत्वा तं परिक्रम्य शिरसा नमस्कृत्य हयं आनयत् सगरः तेन क्रतुशेषं समापयत् ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

३१ ॥ ॥ इतिश्रीभागवतेमहापुराणेटीकायांनवमस्कंधेसगरोपाख्यानेऽष्टमोध्यायः ८ ॥ ॥ ७ ॥ ॥ नवमेंऽशुमतोवंशः खट्वांगावधिवर्ण्यते । गंगांभूतलमानिन्येयस्यपौत्रोभगीरथः
॥ १ ॥ यथासगरः पौत्रायराज्यंदत्त्वा तपस्तेपेतथा अंशुमांश्चस्वपुत्रायराज्यंदत्वा महांतंकालंतपस्तेपेइतिचकारस्यार्थः नाशक्नोत् गंगामानेतुमितिशेषः संस्थितः मृतः १ कालंमृत्युं एयिवान् प्राप्तः
२ तंप्रत्यात्मानंदर्शयामास । तेवरदास्मीतिगंगयोक्तः सन्स्वमभिप्रायंपूर्वजोद्धरणंशशंसकथयामास ३ आहगंगा कोपिगगनात्पतंत्यामेवेगंधारयिताधारयिष्यति ४ किंच । आमृजंतिक्षालयंतितत्रोपा
योविचिंत्यताम् ५ हरंतिहरिष्यंति । अघंभिनत्तीत्यघभित् ६ आत्माकथंभूतः यस्मिन्निदंविश्वंओतंग्रथितंऊर्ध्वतंतुषुशाटीवपटइव । प्रोतंचातिर्यक्तंतुषुपटइवअसौसर्वाधारस्त्वद्वेगंधारयिष्यतीत्यर्थः ७
इतिएवंगंगामुक्तातच्छ्रुत्वेतिपाठेश्रावयित्वेत्यर्थः ८ राज्ञाभिहितंतथेत्यंगीकृत्यहरेःपादेनपूतंजलंयस्यास्ताम् ९ १० ११ प्रसंगाद्गंगामाहात्म्यमाह चतुर्भिः । यस्याजलस्पर्शमात्रेणतच्चकेवलंदेहभस्म
भिरेवनसाक्षात् । ब्रह्मणिस्वकृतेनदंडेनहताअपितांश्रद्धयासेवेतेतिशेषः १२

श्लोकाः ३१/१२

राज्यमंशुमतिन्यस्यनिःस्पृहोमुक्तबंधनः॥और्वोपदिष्टमार्गेणलेभेगतिमनुत्तमाम् ३१ इतिश्रीभागवतेमहापुराणेनवमस्कंधेसगरोपाख्यानेऽष्टमोध्यायः ८
श्रीशुकउवाच ॥ अंशुमांश्चतपस्तेपेगंगानयनकाम्यया ॥ कालंमहांतंनाशक्नोत्ततःकालेनसंस्थितः १ दिलीपस्तत्सुतस्तद्वदशक्तःकालमेयिवान् ॥ भगी
रथस्तस्यपुत्रस्तेपेससुमहत्तपः २ दर्शयामासतंदेवीप्रसन्नावरदास्मिते ॥ इत्युक्तःस्वमभिप्रायंशशंसावनतोनृपः ३ कोपिधारयितावेगंपतंत्यामेमहीतले ॥
अन्यथाभूतलंभित्त्वानृपयास्येरसातलम् ४ किंचाहंनभुवंयास्येनरामय्यामृजंत्यघम् ॥ मृजामितदघंकुत्रराजंस्तत्रविचिंत्यताम् ५ ॥ भगीरथउवाच ॥
साधवोन्यासिनःशांताब्रह्मिष्ठालोकपावनाः ॥ हरंत्यघंतेऽगसंगात्तेष्वास्तेह्यघभिद्धरिः ६ धारयिष्यतितेवेगंरुद्रस्त्वात्माशरीरिणाम् ॥ यस्मिन्नोतमिदंप्रो
तंविश्वंशाटीवतंतुषु ७ इत्युक्तःसनृपोदेवंतपसाऽतोषयच्छिवम् ॥ कालेनाल्पीयसाराजन्तस्येशश्चाश्वतुष्यत ८तथेतिराज्ञाभिहितंसर्वलोकहितःशिवः ॥
दधारावहितोगंगांपादपूतजलांहरेः ९ भगीरथःसराजर्षिर्निन्येभुवनपावनीम् ॥ यत्रस्वपितॄणांदेहाभस्मीभूताःस्मशेरते १० रथेनवायुवेगेनप्रयांतमनुधा
वती ॥ देशान्पुनंतीनिर्दग्धानासिंचत्सगरात्मजान् ११ यज्जलस्पर्शमात्रेणब्रह्मदंडहताअपि ॥ सगरात्मजादिवंजग्मुःकेवलंदेहभस्मभिः १२

चूर्णिका

ततः अंशुमति राज्यं न्यस्य मुक्तबंधनः राजा और्वोपदिष्टमार्गेण अनुत्तमां गतिं लेभे ३१ ॥ इति नवमेष्टमः ८ ॥ ॥ छ ॥ ॥ श्रीशुक उवाच ॥ अंशुमान् गंगान
यनकाम्यया तपस्तेपे कालेन मृतः १ तत्सुतः दिलीपः तद्वत्तपस्तेपेसः सोपि मृतः भगीरथस्तस्यपुत्रः स सुमहत्तपः तेपे २ तं प्रति गंगा आत्मानं दर्शयामास हे भगी
रथ ते अहं वरदास्मि एवं गंगया उक्तः राजा स्वाभिप्रायं तस्यै शशंस ३ तत् श्रुत्वा गंगा आह गगनात् महीतले पतंत्याः मम वेगं कोपि धारयिष्यति अन्यथा रसातलं
यास्ये ४ किंच नराः मयि अघं मृजंति तत् कुत्र मृजामि हे राजन् तत्र उपायो विचिंत्यताम् ५ ॥ भगीरथ उवाच ॥ साधवः ते अघं हरंति रुद्रः ते वेगं धारयिष्य
ति ६ ७ इत्युक्त्वा सः तपसा शिवं अतोषयत् ततः प्रसन्नः शिवः ८ गंगां दधार ९ भगीरथः यत्र पितॄणां देहाः भस्मीभूताः तत्र गंगां निन्ये १० वायुवेगेन रथेन
प्रयांतं अनुधावंती देशान् पुनंती सगरात्मजान् आसिंचत् ११ यस्याः जलस्पर्शमात्रेण ब्रह्मदंडहता अपि सगरात्मजाः दिवं जग्मुः १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्प्रपंचयति भस्मीभूतेनांगेनयः संगस्तेन १३ १४ अनंतस्यविशेषणं संनिवेश्येति त्रैगुण्यंदेहसंबंधम् १५ १६ नलस्यसखाश्रयात्प्राप्तः । तत्सुतः ऋतुपर्णस्यसुतः १७ तत्पुत्रः सौदासः यंमित्रसहं कल्माषपादंचाहुः तत्रकारणमाह वसिष्ठशापादिति १८ नरहः नरहस्यम् १९ मृगयांचरन् कंचिद्राक्षसंजघान । तस्यभ्रातरंमुमोचसभ्रातापलाय्यगतः २० अघंअनिष्टंसूदः पाचकः तद्रूपधरः सन् राज्ञोगृहेवर्तमानः २१ (पात्रेपरिवेक्ष्यमाणं) अभक्ष्यमंजसाविलोक्यएवंनरमांसव्यवहारेण २२ वसिष्ठएवतंशापंद्वादशवार्षिकंचक्रे (कृतवान्) २३ रुशतीः तीक्ष्णा अपःस्वपादयोर्जहौ नान्यत्र तत्रहेतुः दिशइति । एवमनेनमित्रसहत्वमपिदर्शितम् । मित्रस्यकलत्रस्यवाचः सहनात् २४ तदेवंराक्षसत्वेकल्माषांघ्रित्वेचकारणमुक्त्वा स्वकर्मणाऽनपत्यइतियदुक्तंतत्प्रपंचयति व्यवायकालइत्यादिना कर्मणाऽप्रजइत्यंतेन । वनमोकोनिवासोययोस्तौवनौकसौतौचतौदंपतीच । पृथक्पदत्वेसकारलोपआर्षः २५

॥२७॥ भस्मीभूतांगसंगेनस्वर्याताःसगरात्मजाः ॥ किंपुनःश्रद्धयादेवींयेसेवंतेधृतव्रताः १३ नह्येतत्परमाश्चर्यंस्वर्धुन्यायदिहोदितम् ॥ अनंतचरणांभोजप्रसूताया भवच्छिदः १४ संनिवेश्यमनोयस्मिन्श्रद्धयामुनयोऽमलाः ॥ त्रैगुण्यंदुस्त्यजंहित्वासद्योयातास्तदात्मताम् १५ श्रुतोभगीरथाज्जज्ञेतस्यनाभोऽपरोभवत् ॥ सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोभवत् १६ ऋतुपर्णोनलसखोयोऽश्वविद्यामदान्नलात् ॥ दत्त्वाक्षहृदयंचास्मैसर्वकामस्तुतत्सुतः १७ ततःसुदासस्तत्पुत्रोमदयंतीपतिर्नृप ॥ आहुर्मित्रसहंयंवैकल्माषांघ्रिमुतक्वचित् ॥ वसिष्ठशापाद्रक्षोऽभूदनपत्यःस्वकर्मणा १८ ॥ राजोवाच ॥ किंनिमित्तोगुरोःशापः सौदासस्यमहात्मनः॥एतद्वेदितुमिच्छामिकथ्यतांनरहोयदि १९ श्रीशुकउवाच ॥ सौदासोमृगयांकिंचिच्चरन्रक्षोजघानह ॥ मुमोचभ्रातरंसोथगतःप्रतिचिकीर्षया २० सचिंतयन्नघंराज्ञःसूदरूपधरोगृहे ॥ गुरवेभोक्तुकामायपक्त्वानिन्येनरामिषम् २१ परिवेक्ष्यमाणंभगवान्विलोक्याभक्ष्यमंजसा ॥ राजानमशपत्क्रुद्धोरक्षोह्येवंभविष्यसि २२ रक्षःकृतंतद्विदित्वाचक्रेद्वादशवार्षिकम् ॥ सोप्यपोंऽजलिनादायगुरुंशप्तुंसमुद्यतः २३ वारितोमदयंत्यापोरुशतीः पादयोर्जहौ ॥ दिशःखमवनिंसर्वंपश्यञ्जीवमयंनृप २४ राक्षसंभावमापन्नःपादेकल्माषतांगतः ॥ व्यवायकालेददृशेवनौकोदंपतीद्विजौ २५

श्लोकाः १३—२५

चूर्णिका

ये तु श्रद्धया गंगां सेवंते ते स्वर्गं गच्छंतीति किं वक्तव्यम् १३ १४ १५ भगीरथात् श्रुतः तस्य नाभः तस्य अपरःतस्य सिंधुद्वीपःतस्य अयुतायुः १६ तस्य ऋतुपर्णः यःनलाय अक्षहृदयं दत्वातस्मात् अश्वविद्यां प्राप्तः तस्य सर्वकामः १७ तस्मात् सुदासः तस्मात् मदयंतीपतिः सौदासः एनं मित्रसहं कल्मषांघ्रिं आहुः सःवसिष्ठशापात् राक्षसः अनपत्यश्चअभूत् १८ ॥ राजोवाच ॥ सौदासस्य गुरोःशापः कुतः एतत् कथ्यताम् १९ ॥ श्रीशुक उवाच ॥ सौदासः मृगयां चरन् कंचित् राक्षसं जघान तस्य भ्राता पलाय्य गतः २० सः राज्ञः अघं चिंतयन् सूदरूपो भूत्वा तद्गृहे वर्तमानः सन् भोक्तुकामाय गुरवे नरामिषं पक्त्वा आनिन्ये वसिष्ठः तत्परिवेक्ष्यमाणं अभक्ष्यं नृमांसं विलोक्य क्रुद्धः सन् राजानं रक्षो भविष्यसीति अशपत् २२ अग्रे रक्षःकृतं तद्विदित्वा द्वादशवार्षिकं शापं चक्रे ततः राजा गुरुं शप्तुं अंजलौ अपः गृहीत्वा उद्यतः २३ तदा तत्पत्न्या मदयंत्या निवारितः ततः ताः तीक्ष्णाः अपः सर्वं जीवमयं पश्यन् स्वपादयोः जहौ २४ ततःराक्षसं भावं आपन्नः पादे कल्माषतां गतः सः एकदा वने मैथुनासक्तौ वनौकसौ दंपती दृष्ट्वा २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अकृतार्थवद्दीनवत् २६ अकृतार्थअनाप्तरतिम् २७ २८ सर्वभूतानामात्मेतिभावनयाआराधयितुमिच्छुः । यद्वा सर्वभूतानामात्मभावेनभूतेषुस्थितमपिगुणैरंतर्हितंब्रह्मेतिसंबंधःपाठांतरे अंतर्हितः सोयमित्युत्तरेणान्वयः २९ ३० भ्रूणस्यश्रोत्रियस्यगर्भस्यसतइतिवा । बभ्रोःगोः । सतांमतोभवान् वधंकथंसाधुमन्यतेइत्यर्थः ३१ क्षणमपियेनाविनानजीविष्यामि सोयंयदि भक्षः क्रियते तर्हिमृतकंयथामृतप्रायांमांपूर्वंभक्षय ३२ ३३ दीधिषुंगर्भाधानकर्तारम् ३४ आधानात् मैथुनात् । हेअकृतप्रज्ञमृत्युर्मयादर्शितः ३५ ३६ ३७ तदेवंकर्मणाअप्रजः ३८ अबिभ्रत् दधारेत्य र्थः नव्यजायतनप्रासूत । वसिष्ठएवतस्याउदरमश्मनाजघानउत्पन्नः सुतोऽश्मकः ३९

॥२८॥ क्षुधार्तोजगृहेविप्रंतत्पत्न्याहाकृतार्थवत् ॥ नभवान्राक्षसःसाक्षादिक्ष्वाकूणांमहारथः २६ मदयंत्याःपतिर्वीरनाधर्मंकर्तुमर्हसि ॥ देहिमेऽपत्यकामायाअकृ तार्थंपतिंद्विजम् २७ देहोयंमानुषोराजन्पुरुषस्याखिलार्थदः ॥ तस्मादस्यवधोवीरसर्वार्थवधउच्यते २८ एषहिब्राह्मणोविद्वान्तपःशीलगुणान्वितः ॥ आरिराधयिषुर्ब्रह्ममहापुरुषसंज्ञितम् ॥ सर्वभूतात्मभावेनभूतेष्वंतर्हितंगुणैः २९ सोयंब्रह्मर्षिवर्यस्तेराजर्षिप्रवराद्विभो ॥ कथमर्हतिधर्मज्ञवधंपितुरिवात्म जः ३० तस्यसाधोरपापस्यभ्रूणस्यब्रह्मवादिनः ॥ कथंवधंयथाबभ्रोर्मन्यतेसन्मतोभवान् ३१ यद्ययंक्रियतेभक्षस्तर्हिमांखादपूर्वतः ॥ नजीविष्येवि नायेनक्षणंचमृतकंयथा ३२ एवंकरुणभाषिण्याविलपंत्याअनाथवत् ॥ व्याघ्रःपशुमिवाखादत्सौदासःशापमोहितः ३३ ब्राह्मणीवीक्ष्यदिधिषुंपुरुषादे नभक्षितम् ॥ शोचंत्यात्मानमुर्वीशमशपत्कुपितासती ३४ यस्मान्मेभक्षितःपापकामतःसपतिस्त्वया । तवापिमृत्युराधानादकृतप्रज्ञदर्शितः ३५ ए वंमित्रसहंशप्त्वापतिलोकपरायणा ॥ तदस्थीनिसमिद्धेऽग्नौप्रास्यभर्तुर्गतिंगता ३६ विशापोद्वादशाब्दांतेमैथुनायसमुद्यतः ॥ विज्ञायब्राह्मणीशापंम हिष्यासनिवारितः ३७ ततऊर्ध्वंसतत्याजस्त्रीसुखंकर्मणाऽप्रजः ॥ वसिष्ठस्तदनुज्ञातोमदयंत्यांप्रजामधात् ३८ सावैसप्तसमागर्भमबिभ्रन्नव्यजायत ॥ ज घ्नेऽश्मनोदरंतस्याःसोश्मकस्तेनकथ्यते ३९

श्लोकाः २६—३९

चूर्णिका

क्षुधार्तः सन् तत्रत्यं विप्रं जगृहे तदा तत्पत्नी उवाच भवान् राक्षसः न किंतु इक्ष्वाकूणां वंशजोसि २६ मदयंत्याः पतिस्त्वं अधर्मं कर्तुं नार्हसि अपत्यकामा याः मे अपूर्णरतिं पतिं देहि २७ अयं ब्रह्मवेत्ता यद्येनं भक्षयसि तर्हि मां पूर्वं खाद २८ २९ ३० ३१ ३२ एवं अनाथवत् विलपंत्याः सत्याः शापमोहितः सौदासः तं अखादत् ३३ सा स्त्री राक्षसेन भक्षितं पतिं वीक्ष्य कुपिता सती आह ३४ हे पाप कामार्तायाः मे पतिः यतस्त्वयाभक्षितः तस्मात् स्त्रीसंगात्त्वं मरि ष्यसि ३५ एवं सौदासं शप्त्वा भर्तुः गतिं गता ३६ ततः राजा द्वादशाब्दांते विशापः सन् मैथुनाय उद्यतः तदा ब्राह्मणीशापं विज्ञाय महिष्या निवारितः ३७ तत ऊर्ध्वं स्त्रीसुखं तत्याज तेन कर्मणा अप्रजः तेनानुज्ञातः वसिष्ठः मदयंत्यां गर्भं अधात् ३८ सा सप्तवर्षाणिगर्भं दधार ततः वसिष्ठः अश्मना उदरं भित्त्वा निष्का शितः तेन अश्मकः कथ्यते ३९ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्त्रीभिः संवेष्टचपरशुरामात्परिरक्षितः अतोनारीकवचइत्युक्तः ।निःक्षत्रेसति क्षत्रवंशस्यमूलमभवत् अतोमूलकइतिचोक्तः ४० ४१ सुप्रसन्नैर्देवैर्वरंवृणीष्वेत्युक्ते खट्वांगेनोक्तं प्रथमंतावन्ममायुः कथ्यतामि
तिदेवैश्चोक्तंमुहूर्तमात्रमितितज्ज्ञात्वादेवैर्दत्तेनविमानेनशीघ्रंस्वपुरमेत्यमनःपरमेश्वरेसंदधे ४२ एतदेवस्वसाधुवृत्तानुस्मरणपूर्वकंतत्कृतेननिश्चयेनदर्शयति नमइतिसप्तभिः । कुलदैवात् ब्रह्मकुलात्सकाशा
न्मेप्राणादयोनातिवल्लभाः नातिप्रियाः ४३ मह्यंमम ४४ भूतभावनोहरिस्तस्मिन्नेवभावनायस्यसोहंतंकामंनवृणे ४५ तत्रहेतुः यइति विक्षिप्तानींद्रियाणिधीश्चयेषांतेदेवाअपि ४६ अथतस्मात्प्रकृत्या
स्वभावेनात्मनिरूढंगुणेषुसंगंविश्वकर्तुर्भावेनहित्वातमेवाहंप्रपद्ये ४७ अन्यभावंदेहाद्यभिमानरूपमज्ञानंहित्वा ४८ स्वंभावमेवाह यत्तदितिशून्यवत्कल्पितं वागाद्यविषयत्वात् । वासुदेवइतियं गृणंति ।
ब्रह्मणएवभक्तानुग्रहार्थमाविष्कृतशक्तेर्वासुदेवत्वात् ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांनवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥२९॥

श्लोकाः ४०/४९

अश्मकान्मूलकोजज्ञेयःस्त्रीभिपरिरक्षितः ॥ नारीकवचइत्युक्तोनिःक्षत्रेमूलकोऽभवत् ४० ततोदशरथस्तस्मात्पुत्रऐडविडस्ततः ॥ राजाविश्वसहोयस्य
खट्वांगश्चक्रवर्त्यभूत् ४१ योदेवैरर्थितोदैत्यानवधीद्युधिदुर्जयः । मुहूर्तमायुर्ज्ञात्वैत्यस्वपुरंसंदधेमनः ४२ नमेब्रह्मकुलात्प्राणाःकुलदैवान्नचात्मजाः ॥ न
श्रियोनमहीराज्यंनदाराश्चातिवल्लभाः ४३ नबाल्येपिमतिर्मह्यमधर्मेरमतेक्वचित् ॥ नापश्यमुत्तमश्लोकादन्यत्किंचनवस्त्वहम् ४४ देवैःकामवरोदत्तोमह्यं
त्रिभुवनेश्वरैः ॥ नवृणेतमहंकामंभूतभावनभावनः ४५ येविक्षिप्तेंद्रियधियोदेवास्तेस्वहृदिस्थितम् ॥ नविंदंतिप्रियंशश्वदात्मानंकिमुतापरे ४६ अथे
शमायारचितेषुसंगंगुणेषुगंधर्वपुरोपमेषु ॥ रूढंप्रकृत्यात्मनिविश्वकर्तुर्भावेनहित्वातमहंप्रपद्ये ४७ इतिव्यवसितोबुद्ध्यानारायणगृहीतया ॥ हित्वान्य
भावमज्ञानंततःस्वंभावमाश्रितः ४८ यत्तद्ब्रह्मपरंसूक्ष्ममशून्यंशून्यकल्पितम् ॥ भगवान्वासुदेवेतियंगृणंतिहिसात्त्वताः ४९ ॥ ॥ इतिश्रीभागवते
महापुराणेनवमस्कंधेनवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

तस्य मूलकः यः स्त्रीभिः स्ववेषं दत्त्वा परशुरामात् रक्षितः अतो नारीकवचइति नामांतरं सः निःक्षत्रे सति क्षत्रस्य मूलं अतो मूलक इति च उक्तः ४० तस्मात्
दशरथः तस्मात् ऐडविडः तस्मात् विश्वसहः तस्मात् खट्वांगः चक्रवर्ती अभवत् ४१ यः देवैः अर्थितः दैत्यान् अवधीत् प्रसन्नदेवैःवरं वृणीष्वेत्युक्ते
प्रथमंतावत् आयुः कथ्यतामित्याह देवैः उक्तं मुहूर्तमात्रं आयुर्ज्ञात्वा विमानेन स्वपुरं एत्य परमेश्वरे मनः संदधे ४२ एतत् दर्शयति मम ब्रह्मकुलात्प्राणात्मजादयो
न वल्लभाः ४३ मे मतिः बाल्येपि अधर्मे न रमते विष्णोरन्यत् वस्तु नपश्ये ४४ मह्यं देवैः वरो दत्तः तं अहं न वृणे ४५ ये देवास्तेपि स्वहृत्स्थं आत्मानं न पश्यं
ति ४६ अतः अहं गुणेषु संगं हित्वा तमेव प्रपद्ये ४७ इति बुद्ध्याव्यवसितः अज्ञानं हित्वा यं वासुदेवं इति गृणंति तं स्वं भावं आश्रितः ४८ ४९ ५० ॥
॥ इति नवमस्कंधे नवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दशमेप्राहखट्वांगवंशेश्रीरामसंभवम् तच्चरित्रंचलंकेशंहत्वाऽयोध्यागमावधि ॥ १ ॥ खट्वांगाच्चदीर्घबाहुः (तस्मात्पृथुश्रवामहायशारघुरासीत् ततोरघोर्महाराजोऽजः तस्मादजाद्दशरथः) १ (एषते ध्यानप्रत्यक्षोभगवान् यथा वसुदेवस्य तथा तस्यदशरथस्यापिरामादिसंज्ञयाअंशविभागेनपुत्रत्वमगात्) २ ऋषिभिर्वाल्मीकिमुख्यैःभूरिवर्णितंत्वयामुहुःश्रुतंतथापिसंक्षेपतःकथ्यमानंशृणु ३ ग्रंथ कोटिभिराकीर्णमद्भुतंरामविक्रमं । अध्यायद्वयतोवक्ष्यन्नेकश्लोकेसमस्यति ॥ सकोशलेंद्रःश्रीरामःनोऽस्मान्अवतात्पातु । कथंभूतः । योगुर्वर्थेपितुःसत्यस्यपालनार्थंत्यक्तराज्यःसन्पद्मवदतिसुकुमाराभ्यांप द्भ्याम् । तदेवाह । प्रियायाःपाण्योरपिस्पर्शेनास्तिक्षमाययोस्ताभ्यांप्रतिवनंव्यचरत् । हरींद्रोहनुमान् सुग्रीवोवा अनुजोलक्ष्मणस्ताभ्यां । मृजिताअपनीतापथरुजामार्गश्रमोयस्यसः । शूर्पणख्यावै रूप्यात्कर्णनासिकच्छेदाद्धेतोःतयाप्रलोभितेनरावणेनापहारात् प्रियेणकलत्रेणविरहोवियोगस्तेनरुट्तयाआरोपितयाभ्रुवोविजृंभेणैवत्रस्तोऽब्धिर्यस्मात्सः ततस्तद्विज्ञापनेनबद्धःसेतुर्येन ततः खला राव णादयएवदवोवनंतस्यदहनः ४ ततउत्तरचरितंकेशलेंद्रशब्देनध्वनितम् संक्षेपतोवर्णितंरामचरितंआदितआरभ्यविस्तरेणाह विश्वामित्रइत्यादिनायावदुत्तराध्यायसमाप्ति । पश्यतएवलक्ष्मणस्यतमप्य नपेक्ष्यैवहताइत्यर्थः । यच्छब्दानांसकोशलेंद्रोवतादित्यनेनान्वयः ५ लोकेयेवीरास्तेषांसमितौसमाजे । ऐशंत्रैयंबकंधनुः इक्षुयष्टिमिवलीलयैवादायसज्जीकृतंआरोपितंविकृष्यमध्येबभंज हेनृप उग्रंकठिनं गरिष्ठंतदाह वाहकानांत्रिभिःशतैरुपनीतंबालगजस्यलीलेवलीलायस्यसः ६ अनुरूपाणिस्वयोग्यानिगुणशीलादीनियस्याः तांसीतासंज्ञांपूर्वमुरसिअतिलब्धोमानोययातांश्रियंजित्वाधनुर्भंगमहानादश्रव णक्षुभितस्यभृगुपतेः दर्पंव्यनयत् अपनीतवान् कथंभूतस्य । त्रिःत्रिःसप्तकृत्वः राजबीजशून्यांमहींयोऽकरोत्तस्य (त्रिशब्देनसप्तकत्रयंलक्षितम्) ७

श्लोकाः १/७

॥ श्रीशुकउवाच ॥ खट्वांगाद्दीर्घबाहुश्चरघुस्तस्मात्पृथुश्रवाः ॥ अजस्ततोमहाराजस्तस्माद्दशरथोभवत् १ तस्यापिभगवानेषसाक्षाद्ब्रह्ममयोहरिः ॥ अं शांशेनचतुर्धाऽगात्पुत्रत्वंप्रार्थितःसुरैः ॥ रामलक्ष्मणभरतशत्रुघ्नाइतिसंज्ञया २ तस्यानुचरितंराजन्नृषिभिस्तत्त्वदर्शिभिः ॥ श्रुतंहिवर्णितंभूरित्वयासी तापतेर्मुहुः ३ गुर्वर्थेत्यक्तराज्योव्यचरदनुवनंपद्मपद्भ्यांप्रियायाःपाणिस्पर्शाक्षमाभ्यांमृजितपथरुजोयोहरींद्रानुजाभ्याम् ॥ वैरूप्याच्छूर्पणख्याःप्रिय विरहरुषारोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुःखलदवदहनःकोशलेंद्रोऽवतान्नः ४ विश्वामित्राध्वरेयेनमारीचाद्यानिशाचराः ॥ पश्यतोलक्ष्मणस्यैवहता नैर्ऋतपुंगवाः ५ योलोकवीरसमितौधनुरैशमुग्रंसीतास्वयंवरगृहेत्रिशतोपनीतम् ॥ आदायबालगजलीलइवेक्षुयष्टिंसज्जीकृतंनृपविकृष्यबभंजमध्ये ६ जित्वानुरूपगुणशीलवयोंगरूपांसीताभिधांश्रियमुरस्यभिलब्धमानाम् ॥ मार्गेव्रजन्भृगुपतेर्व्यनयत्प्ररूढंदर्पमहीमकृतयस्त्रिरराजबीजाम् ७

चूर्णिका

॥ श्रीशुक उवाच ॥ खट्वांगाद्दीर्घबाहुः तस्य रघुः तस्य अजः तस्य दशरथः १ तस्य देवैः प्रार्थितो हरिः रामलक्ष्मणभरतशत्रुघ्नाः इति चतुर्धा पुत्रत्वं अगात् तस्य चरि तं ऋषिभिर्वर्णितम् त्वया श्रुतं १ २ ३ यः श्रीरामः गुर्वर्थे राज्यं त्यक्त्वा वनं विवेश तत्र शूर्पणख्याः वैरूप्यकरणात् सीता रावणेन हृता तेन क्रुद्धःसः समुद्रं गत्वा से तुं बबंध ततः रावणादीन् अहन् एवं भूत ईश्वरः नः अवतु ४ किंच यः गच्छन् पथि ताटिकां हत्वा विश्वामित्राध्वरे मारीचादीन् अहनत् ५ यः जनकगृहे शैवं धनुः भंक्त्वा ६ सीतां जित्वा पथि परशुरामदर्पं अपनयत् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इदानींगुर्वर्थइतिश्लोकत्रयंविवृण्वन्नाह यइति कदाचित्कैकेय्यास्तुष्टेन राज्ञात्वदपेक्षितंदास्यामीति प्रतिश्रुतं ततः श्रीरामस्ययुवराज्याभिषेकसमये तयाभरतस्य राज्यंरामस्यचवनेवासः प्रार्थितः तदासत्य पाशेनपरिवीतस्यपितुर्निदेशमाज्ञांशिरसाजगृहे ततोराज्यादिकंत्यक्त्वा सभार्योवनंययौ । दुस्त्यजस्यापिसहर्षत्यागेदृष्टांतः मुक्तसंगोयोगीअसून् प्राणानिवेति ८ रक्षसोरावणस्यस्वसुः शूर्पणखायाः अशुद्धबुद्धेः सीतांजिघृक्षोः कामातुरायाइतिवा रूपंव्यकृतविकारमनयत् । तस्याःखरत्रिशिरोदूषणमुख्याबंधवोयेषुतांश्चतुर्दशसहस्रंजघान । अपारणीयंअलंघ्यंअसह्यंकोदंडंपाणौयस्यसः ९ सीतायाः कथाश्रवणेनदीपितोहृच्छयः (कामो) यस्यतेनसीतांहरिष्यतास्वस्माद्भीतेनरावेणनस्वस्याश्रमादपकर्षणार्थसृष्टंनिरूपितंमारीचंविलोक्यजघान । कथंभूतंअद्भुतेनवपुषास्वर्णहरिणदेहेनोपलक्षितम् । अतएवप्रलोभनेनाश्रमतस्तेनापकृष्टः सन् कंदक्षंयथाउग्रः श्रीरुद्रः १० ततश्चरक्षोधमेनरावणेनवृकवत् श्ववत् असमक्षमपनीतायाम् । प्रिययाविमुक्तोभ्रात्रालक्ष्मणेनसहकृपणवत् वनेविचचार । किमभिप्रायः सन् । इतिअनेनप्रकारेणस्त्रीसंगिनांदुःखोदर्कांगतिंप्रख्यापयन् ११ आत्मार्थेनकृत्येनकर्मणारावणेनसहयुद्धे (लक्षणे) नहतंकृत्यंशास्त्रीयंदहनादिकंयस्यतंजटायुषंपुत्रइवदग्ध्वा कबंधंस्वग्रहणाय प्रसारितबाहुंराक्षसमहन् (अवधीत्) अथानंतरंवालिनिहतेतैर्दयितायाः गतिंबुद्ध्वाअजभवाभ्यामर्चितावंघ्रीयस्यसमनुजोवेलांसमुद्रतीरमगात् १२ तत्रत्रिरात्रमुपवासेन प्रतीक्षितोपिसिंधुः यदानोपस्थितः तदा यस्यरोषविभ्रमेणक्रोधलीलयाविवृत्तोयःकटाक्षः तस्यपातेनसंभ्रांतानक्रामकराश्चयस्मिन् भयेनगीर्णः ग्रस्तः स्तंभितोघोषोयेनसः सिंधुः एतद्वक्ष्यमाणंबभाषे अर्हणमर्घादिकं रूपीमूर्तिमान् १३ भाषणमेवाह । नत्वामितिद्वाभ्याम् । एतावत्पर्यंतंनुनिश्चितंत्वांनविदामनजानीमइत्यर्थः इदानींतुज्ञातोसीत्याह । यदितिपृथक्पदं यस्येत्यर्थः । यद्वशेभ्यः सत्त्वादिभ्यः सुरगणादयोभवंति सभवानिति । (गुणेशोगुणानांनियंता) १४

श्लोकाः ८/१४

यःसत्यपाशपरिवीतपितुर्निदेशंस्त्रैणस्यचापिशिरसाजगृहेसभार्यः ॥ राज्यंश्रियंप्रणयिनःसुहृदोनिवासंत्यक्त्वाययौवनमसूनिवमुक्तसंगः ८ रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याःखरत्रिशिरदूषणमुख्यबंधून् ॥ जघ्नेचतुर्दशसहस्रमपारणीयकोदंडपाणिरटमानउवासकृच्छ्रम् ९ सीताकथाश्रवणदीपितहृच्छयेनसृष्टंविलोक्यनृपतेदशकंधरेण ॥ जघ्नेऽद्भुतैणवपुषाश्रमतोऽपकृष्टोमारीचमाशुविशिखेनयथाकमुग्रः १० रक्षोधमेनवृकवद्विपिनेऽसमक्षंवैदेहराजदुहितर्यपयापितायाम् ॥ भ्रात्रावनेकृपणवत्प्रिययाविमुक्तःस्त्रीसंगिनांगतिमितिप्रथयंश्चचार ११ दग्ध्वात्मकृत्यहतकृत्यमहन्कबंधंसख्यंविधायकपिभिर्दयितागतिंतैः ॥ बुद्ध्वाथवालिनिहतेप्लवगेंद्रसैन्यैर्वेलामगात्समनुजोऽजभवार्चितांघ्रिः १२ यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरोभयगीर्णघोषः ॥ सिंधुःशिरस्यर्हणंपरिगृह्यरूपीपादारविंदमुपगम्यबभाषएतत् १३ नत्वांवयंजडधियोनुविदामभूमन्कूटस्थमादिपुरुषंजगतामधीशम् ॥ यत्सत्त्वतःसुरगणारजसःप्रजेशामन्योश्चभूतपतयःसभवागुणेशः १४

चूर्णिका

ततः नगरं एत्य पितुराज्ञया सीतालक्ष्मणसहितः वनं ययौ ८ शूर्पनखाया रूपं व्यकृत ततः खरत्रिशिरादिचतुर्दशसहस्रराक्षसान् हत्वा दंडकारण्ये उवास ९ ततः मृगवपुषं मारीचं जघ्ने १० तदा रामः रावणेन सीता हृता अतः शोचन् सन् सलक्ष्मणः वने चचार ११ तत्र जटायुषं पुत्रवत् दग्ध्वा स्वग्रहणाय प्रसारितबाहुं कबंधं हत्वा कपिभिः सख्यं विधाय वालिनि हते सति तैः सीतागतिं ज्ञात्वा समुद्रतीरं अगात् १२ तत्र त्रिरात्रोपवासेन प्रतीक्षितोपि सिंधुर्यदा नोपस्थितः तदा यस्य रोषेण भीतः सिंधुः अर्हणं परिगृह्य पादारविंदं उपगम्य इदं उवाच १३ हे भूमन् वयं जडधियः त्वां नविदाम इत्यादि १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.न. अ० ॥१०॥

टीका

कामंयथेच्छंजलमाक्रम्यापिप्रयाहि । अवमेहंपुरीषप्रायम् । त्रैलोक्यंरावयतीतितथातंजहि । हेवीरयद्यपितवजलंप्रतिबंधकंनभवतितथापीहसेतुंबध्नीहि । तर्हिंकिमर्थं । तेयशोविस्तारायतवयशःश्रवणे
नअन्येषामपिमहापातकानांक्षयःस्यात् । तदेवाह । यंसेतुमुपेत्यदुष्करंकर्मविक्ष्यत्वद्यशोगास्यंतिभूपास्तम् १५ तद्वाक्यमभिनंद्ययत्कृतंतदाह बद्धेति । विविधैरद्रीणांकूटैः शृंगैः सेतुंबद्ध्वाअग्रेसीतान्वे
षणेहनुमतैवदग्धांलंकामविशत् । कथंभूतैः शृंगैः कपींद्राणांकरैः कंपितानिभूरुहाणामंगानिशाखादीनियेषुतैः । विभीषणस्यदृशाबुद्ध्या । कैःसहाविशत् सुग्रीवादयः प्रमुखायेषांतैरनीकैः १६ तत
श्चसालंकाघूर्णाप्रचलिताबभूव । कथंभूता । वानरेंद्राणांबलैरुद्धाविहारादयोयस्यांसा । निर्भज्यमानाधिषणादयोयस्यांसा । तत्रविहारः क्रीडास्थानम् । कोष्ठंधान्यागारादि । श्रीःकोशः । द्वारंगृहादी
नाम् । गोपुरंपुरद्वारम् । सदःसभा । वलभी प्रासादादिपुरोभागच्छादिनी । विटंकः कपोतपालिका । धिषणंवेदिकादि । शृंगाटकंचतुष्पथम् १७ रक्षस्पतीरावणः पुत्रमिंद्रजितंप्रहस्तादींश्चसमहिनो
त् प्रायुंक्त १८ (तां) असिशूलादिभिर्दुर्गांदुर्गमांयातुधानपृतनांसुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् । मरुत्सुतोहनुमान् । ऋक्षोजांबवान् १९ तेरघुपतेरनीकपाअंगदाद्याः सर्वेरावणस्यइभादि
भिर्यद्वरूथंचतुरंगसैन्यंतत् द्वंद्वंयथाभवतितथाऽभिपत्यसंगम्यद्रुमादिभिर्जघ्नुः । कान् । सीतायाः अभिमर्शेनहतंमंगलंयस्यसरावणईशोयेषांतान् २० स्वबलस्यनष्टिंनाशमवेक्ष्यरुष्टःक्रुद्धःसन्यानकं
पुष्पकविमानंरथंवाआरुह्यश्रीराममभिससार । अथ (तं) स्वःस्यंदनेस्वर्गस्थेइंद्रस्यरथेमातलिनाइंद्रसारथिनोपनीतेद्युमतिदीप्तियुक्तेविभ्राजमानंअहनत्अहन् २१ हेपुरुषादपुरीषराक्षसविष्ठाप्राय यद्य
स्मादपहृताश्ववत् श्वायथाअसमक्षंगृहंप्रविश्यकिमपिहरतितद्वत्तस्माज्जुगुप्सितस्यकर्मणःकर्तुस्तेद्यकालइवालंघ्यवीर्योहंफलंयच्छामिअधर्मकर्तुः पुंसः कालोयथायच्छतीतिवा २२

॥३२॥

श्लोकाः १५/२२

कामंप्रयाहिजहिविश्रवसोऽवमेहंत्रैलोक्यरावणमवाप्नुहिवीरपत्नीम् ॥ बध्नीहिसेतुमिहतेयशसोवितत्यैगायंतिदिग्विजयिनोयमुपेत्यभूपाः १५ बद्धो
दधौरघुपतिर्विविधाद्रिकूटैःसेतुंकपींद्रकरकंपितभूरुहांगैः ॥ सुग्रीवनीलहनुमत्प्रमुखैरनीकैर्लंकांविभीषणदृशाऽविशदग्रदग्धाम् १६ सावानरेंद्रबल
रुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटंका ॥ निर्भज्यमानधिषणध्वजहेमकुंभशृंगाटकागजकुलैर्ह्रदिनीवघूर्णा १७ रक्षस्पतिस्तदवलोक्यनिकुंभकुं
भधूम्राक्षदुर्मुखसुरांतनरांतकादीन् ॥ पुत्रंप्रहस्तमतिकायविकंपनादीन्सर्वानुगान्समहिनोदथकुंभकर्णम् १८ तांयातुधानपृतनामसिशूलचापप्रासर्ष्टि
शक्तिशरतोमरखड्गदुर्गाम् ॥ सुग्रीवलक्ष्मणमरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिरन्वितोऽगात् १९ तेऽनीकपारघुपतेरभिपत्यसर्वेद्वंद्वंवरूथमिभपत्ति
रथाश्वयोधैः ॥ जघ्नुर्द्रुमैर्गिरिगदेषुभिरंगदाद्याःसीताभिमर्शहतमंगलरावणेशान् २० रक्षस्पतिःस्वबलनष्टिमवेक्ष्यरुष्टआरुह्ययानकमथाभिससाररामम्
स्वःस्यंदनेद्युमतिमातलिनोपनीतेविभ्राजमानमहनन्निशितैःक्षुरप्रैः २१ रामस्तमाहपुरुषादपुरीषयन्नःकांताऽसमक्षमसताऽपहृताश्ववत्ते ॥ त्यक्तत्रपस्यफ
लमद्यजुगुप्सितस्ययच्छामिकालइवकर्तुरलंघ्यवीर्यः २२

चूर्णिका ॥३२॥

हे राम त्वं जलं आक्रम्य कामं याहि तथारावणं जहि पत्नीं प्राप्नुहि हे वीर इदं जलं ते प्रतिबंधकं न तथापि यशो विस्ताराय सेतुं बध्नीहि १५ ततोरामः उदधौ सेतुं बद्ध्वा
विभीषणदृशा लंकां विवेश १६ सा लंका वानरेंद्रसैन्यैः घूर्णा बभूव १७ तत् दृष्ट्वा रावणः निकुंभकुंभधूम्राक्षादीन् इंद्रजितं कुंभकर्णं चप्राहिणोत् १८ तान् रामदू
ता वानराः गिरिगदेषुभिः जघ्नुः १९ ततो रुष्टः रावणः पुष्पकं विमानं आरुह्य रामं अभ्यधावत् २० २१ २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

रिक्तःक्षीणपुण्यःसुकृतीविमानादिव । विमानात्पुष्पकान्न्यपतदितिवा २३ राक्षसस्त्रीणांविलापमाह ततइतिपंचभिः मंदंस्वल्पमुदरंयस्यास्तयारावणभार्ययासह २४ २५ परैरर्दिता २६ २७ गृध्राणांभ
क्षः नरकहेतवेनरकभोगाय २८ सांपरायिकंऔर्ध्वदेहिकम् २९ ३० आत्मनः स्वस्यदर्शनेनयआह्लादस्तेनविकसन्मुखपंकजंयस्यास्ताम् ३१ यानंपुष्पकंभ्रातृभ्यांलक्ष्मणसुग्रीवाभ्याम् ३२कल्पां
तमायुश्चदत्त्वातेनापिसहैवययौ । चीर्णव्रतंवनवासनियमोयेन ३३ गोमूत्रयावकंगोमूत्रपक्वयवान्नभोजिनंभ्रातरंभरतम् ३४ ३५ स्वाशिबिरात्रामंविनाऽयोध्यामप्रविशन्स्वस्यवासंयत्रनिर्मितवान्
तस्मात्सकाशात् गीतादिभिर्युक्तोरामंप्रत्युद्यतः अभिमुखंययौ ३६ ब्रह्मघोषेणबृहताघोषेणपठद्भिर्ब्राह्मणैः स्वर्णरसाक्ताःकक्षाःप्रांतायासांताभिः पताकाभिः हैमैरितिचत्वारिरथविशेषणानि ३७

॥३३॥ श्लोकाः २३/३७

एवंक्षिपन्धनुषिसंधितमुत्ससर्जबाणंसवज्रमिवतद्धृदयंबिभेद ॥ सोऽसृग्वमन्दशमुखैर्न्यपतद्विमानाद्धाहेतिजल्पतिजनेसुकृतीवरिक्तः २३ ततोनिष्क्रम्य
लंकायायातुधान्यःसहस्रशः ॥ मंदोदर्यासमंतस्मिन्प्ररुदंत्यउपाद्रवन् २४ स्वान्स्वान्बंधून्परिष्वज्यलक्ष्मणेषुभिरर्दितान् ॥ रुरुदुःसुस्वरंदीनाघ्नंत्यआत्मा
नमात्मना २५ हाहताःस्मवयंनाथलोकरावणरावण ॥ कंयायाच्छरणंलंकात्वद्विहीनापरार्दिता २६ नैववेदमहाभागभवान्कामवशंगतः ॥ तेजोनुभावं
सीतायायेननीतोदशामिमाम् २७ कृतैषाविधवालंकावयंचकुलनंदन ॥ देहःकृतोऽन्नंगृध्राणामात्मानरकहेतवे २८ ॥ श्रीशुकउवाच ॥ स्वानांविभीषण
श्चक्रेकोशलेंद्रानुमोदितः ॥ पितृमेधविधानेनयदुक्तंसांपरायिकम् २९ ततोददर्शभगवानशोकवनिकाश्रमे ॥ क्षामांस्वविरहव्याधिंशिंशपामूलमास्थिता
म् ३० रामःप्रियतमांभार्यांदीनांवीक्ष्यान्वकंपत ॥ आत्मसंदर्शनाह्लादविकसन्मुखपंकजाम् ३१ आरोप्यारुरुहेयानंभ्रातृभ्यांहनुमद्युतः ॥ विभीषणाय
भगवान्दत्त्वारक्षोगणेशताम् ३२ लंकामायुश्चकल्पांतंययौचीर्णव्रतःपुरम् ॥ अवकीर्यमाणःकुसुमैर्लोकपालार्पितैःपथि ३३ उपगीयमानचरितःशतधृ
त्यादिभिर्मुदा ॥ गोमूत्रयावकंश्रुत्वाभ्रातरंवल्कलांबरम् ३४ महाकारुणिकोऽतप्यज्जटिलंस्थंडिलेशयम् ॥ भरतःप्राप्तमाकर्ण्यपौरामात्यपुरोहितैः ३५
पादुकेशिरसिन्यस्यरामंप्रत्युद्यतोग्रजम् ॥ नंदिग्रामात्स्वशिबिराद्गीतवादित्रनिःस्वनैः ३६ ब्रह्मघोषेणचमुहुःपठद्भिर्ब्रह्मवादिभिः ॥ स्वर्णकक्षपताका
भिर्हैमैश्चित्रध्वजैरथैः ३७

चूर्णिका

ततो रामः तं बहुधा क्षिपन् धनुषि संधितं बाणमुत्सृज्य तेन तद्धृदयं बिभेद सः दशमुखैः असृक् वमन् न्यपतत् २३ ततो मंदोदर्याद्याः स्त्रियः रुदंत्यः तत्र एत्य २४ स्व
पतीन् आलिंग्य रुरुदुः ऊचुश्च २५हे रावण वयं हताःस्म त्वद्विहीना लंका कं शरणं यायात् २६ भवान् कामवशं गतः सीतायास्तेजोनुभावं न वेद येन इमां दशां प्राप्तः
२७ एषा लंका विधवा कृता वयं च इत्यादि विलापं चक्रुः२८॥ श्रीशुक उवाच रामाज्ञया विभीषणः स्वानां और्ध्वदेहिकं चक्रे२९ततः रामः सीतां गृहीत्वा यानं आ
रुरुहे ३० ३१ ३२ रामः विभीषणाय रक्षोगणेशतां कल्पांतं आयुश्च दत्वा स्वपुरीं ययौ ३३ तदा गोमूत्रयावकं जटिलं वल्कलांबरं भरतं श्रुत्वा ३४ अतप्यत् भरतः
प्राप्तं रामं श्रुत्वा पादुके शिरसि धृत्वा पौरामात्यपुरोहितैः ब्राह्मणैः सह ३५ ३६ राजचिह्नान्युपादाय रामं एत्य पादुके पुरतः न्यस्य प्रेम्णा पादयोः न्यपतत् ३७ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पुरटवर्मभिर्हिरण्मयकवचैरित्येकंभटविशेषणम् ३८ पारमेष्ठ्यानिराजार्हाणिछत्रचामरादीनिपण्यानिक्रयेणसंपादितान्युपायनानिच । प्रेम्णाप्रक्लिन्नंहृदयंईक्षणेनेत्रेचयस्य ३९ नेत्रजैर्जलैः स्नपयन्नाश्लिष्य ४० (लक्ष्मणेनसीतयाचसहरामो) येऽर्हसत्तमाः कुलवृद्धास्तेभ्योपिस्वयंनमनंचक्रे ४१ (उत्तरासंगान् उत्तरीयांबराणिप्रेमातिशयवशाद्धुन्वंतः कंपयंतः उत्तराःकोशलाअयोध्यावासिनइत्यर्थः माल्यैः पुष्पैः) ४२ अयोध्याप्रवेशप्रकारमाहपादुकेइतिसार्धैस्त्रिभिः ४३ धनुश्चनिषंगौचतान् । ऋक्षराट्जांबवान् ४४ ४५ गुरुपत्नीःकैकेय्याद्याः ४६ वयस्यानवरजांश्च । यथावत् अनुक्रमेणसमुपेयतुः ४७ बाष्पौघैरभिषिंचंत्यः शुचः शोकान्विजहुः । शेषंस्पष्टम् ४८ ४९ ५० आसनंसिंहासनंभ्रात्राभरतेन ५१ ५२ ५३ ५४

॥३४॥ श्लोकाः ३८—५४

सदश्वैरुक्मसन्नाहैर्भटैःपुरटवर्मभिः ॥ श्रेणीभिर्वारमुख्याभिर्भृत्यैश्चैवपदानुगैः ३८ पारमेष्ठ्यान्युपादायपण्यान्युच्चावचानिच ॥ पादयोर्न्यपतत्प्रेम्णाप्रक्लिन्नहृदयेक्षणः ३९ पादुकेन्यस्यपुरतःप्रांजलिर्बाष्पलोचनः ॥ तमाश्लिष्यचिरंदोर्भ्यांस्नपयन्नेत्रजैर्जलैः ४० रामोलक्ष्मणसीताभ्यांविप्रेभ्योयेऽर्हसत्तमाः ॥ तेभ्यःस्वयंनमश्चक्रेप्रजाभिश्चनमस्कृतः ४१ धुन्वंतउत्तरासंगान्पतिंवीक्ष्यचिरागतम् ॥ उत्तराःकोशलामाल्यैःकिरंतोननृतुर्मुदा ४२ पादुकेभरतोऽगृह्णाच्चामरव्यजनोत्तमे ॥ विभीषणःससुग्रीवःश्वेतच्छत्रंमरुत्सुतः ४३ धनुर्निषंगाञ्शत्रुघ्नःसीतातीर्थकमंडलुम् ॥ अबिभ्रदंगदःखड्गंहैमंचर्मर्क्षराण्नृप ४४ पुष्पकस्थोन्वितःस्त्रीभिःस्तूयमानश्चबंदिभिः ॥ विरेजेभगवान्राजन्ग्रहैश्चंद्रइवोदितः ४५ भ्रातृभिर्नंदितःसोपिसोत्सवांप्राविशत्पुरीम् ॥ प्रविश्यराजभवनंगुरुपत्नीश्चमातरम् ४६ गुरून्वयस्यावरजान्पूजितःप्रत्यपूजयत् ॥ वैदेहीलक्ष्मणश्चैवयथावत्समुपेयतुः ४७ पुत्रान्स्वमातरस्तांस्तुप्राणांस्तन्वइवोत्थिताः ॥ आरोप्यांकेभिषिंचंत्योबाष्पौघैर्विजहुःशुचः ४८ जटानिर्मुच्यविधिवत्कुलवृद्धैःसमंगुरुः ॥ अभ्यषिंचद्यथैवेंद्रंचतुःसिंधुजलादिभिः ४९ एवंकृतशिरःस्नानःसुवासास्स्रग्व्यलंकृतः ॥ स्वलंकृतैःसुवासोभिर्भ्रातृभिर्भार्ययाबभौ ५० अग्रहीदासनंभ्रात्राप्रणिपत्यप्रसादितः ॥ प्रजाःस्वधर्मनिरतावर्णाश्रमगुणान्विताः ५१ जुगोपपितृवद्रामोमेनिरेपितरंचतम् ॥ त्रेतायांवर्तमानायांकालःकृतसमोऽभवत् ५२ रामेराजनिसर्वज्ञेसर्वभूतसुखावहे ॥ वनानिनद्योगिरयोवर्षाणिद्वीपासिंधवः ॥ सर्वेकामदुघाआसन्प्रजानांभरतर्षभ ५३ नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः ॥ मृत्युश्चानिच्छतांनासीद्रामेराजन्यधोक्षजे ५४

चूर्णिका

३८ ३९ रामः तं चिरं आश्लिष्य नेत्रोदकैः स्नापयामास ४० विप्रेभ्यः नमश्चक्रे ४१ चिरागतं रामं वीक्ष्य जनाः माल्यैः किरंतः ननृतुः ४२ भरतः पादुके अगृह्णात् विभीषणः चामरं सुग्रीवः व्यजनं मारुतिः श्वेतच्छत्रं ४३ शत्रुघ्नः धनुर्निषंगान् सीता तीर्थकमंडलुं अंगदः खड्गं जांबवान् चर्म ४४ एवंविधः रामः बंदिभिः स्तूयमानः पुष्पकस्थः ग्रहैश्चंद्र इव रेजे ४५ ततः स्वपुरं प्रविश्यगुरुं स्वमातॄः ननाम ४६ मातरः तं अंके आरोप्य बाष्पौघैः सिंचंत्यः शुचः जहुः ४७ ४८ वसिष्ठः रामं सिंहासने अभ्यषिंचत् ४९ ५० रामः पितृवत् प्रजाः जुगोप प्रजाः तं पितरं मेनिरे ५१ कालः कृतसमः अभवत् ५२ रामे राज्ञि सति सर्वे वनादयः कामदुघा आसन् ५३ यत्र आध्यादयो न संति ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

९५ ९६ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांदशमोऽध्यायः ॥ १० ॥ ॥ ७ ॥ ॥ ततएकादशेऽयोध्यामावसन्ननुजैःसह । यज्ञादियच्चकारेशोरामस्तदनुवर्ण्यते ॥ १ ॥ आचार्यवान् आचार्याधीनः । उत्तमकल्पकैः मुख्यकल्पेनविहितैः १ २ तदंतरातासांदिशांमध्येयावतीभूःतांशेषभूताम् ३ इदंसर्वंब्राह्मणएवार्हतीतिमन्यमानोयंरामः तत्तदाऽलंकारवासोभ्यामेवावशेषितोऽभूत् । सौमंगल्यंकंठसूत्रादियदावश्यकंतावन्मात्रमवशेषितंयस्यास्तद्व्यतिरिक्तंहिरण्यादिसर्वंददावित्यर्थः ४ ५ अप्रत्तंअदत्तंकिं सर्वंदत्तमित्यर्थः । विश्यप्रविश्य ६ न्यस्तदंडैर्मुनिभिरर्पितौचिच्चेन्यस्तौ अंघ्रीयस्य तस्मै तेष्वर्पितावंघ्रीयेनेतिवा ७ ८ ९ असंविदः अज्ञात् १० अंतर्वत्नीगर्भिणीसती प्राचेतसोवाल्मीकिस्तस्याश्रमंप्राप्ता । क्रियाजातकर्माद्याः ११ १२

श्लोकाः ९५/१२

॥३५॥ एकपत्नीव्रतधरोराजर्षिचरितःशुचिः ॥ स्वधर्मंगृहमेधीयंशिक्षयन्स्वयमाचरत् ९५ प्रेम्णानुवृत्त्याशीलेनप्रश्रयावनतासती ॥ धियाह्रियाचभावज्ञाभर्तुः सीताऽहरन्मनः ९६ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेरामानुचरितेदशमोध्यायः १० ॥ ॥ ध ॥ ॥ श्रीशुकउवाच ॥ भगवानात्मनात्मानंराममउत्तमकल्पकैः ॥ सर्वदेवमयंदेवमीजआचार्यवान्मखैः १ होत्रेऽददाद्दिशंप्राचींब्रह्मणेदक्षिणांप्रभुः ॥ अध्वर्यवेप्रतीचींचउदीचींसामगायसः २ आचार्यायददौशेषांयावतीभूस्तदंतरा ॥ मन्यमानइदंकृत्स्नंब्राह्मणोऽर्हतिनिस्पृहः ३ इत्ययंतदलंकारवासोभ्यामवशेषितः ॥ तथाराज्ञ्यपिवैदेहीसौमंगल्यावशेषिता ४ तेतुब्रह्मण्यदेवस्यवात्सल्यंवीक्ष्यसंस्तुतम् ॥ प्रीत्याक्लिन्नधियस्तस्मैप्रत्यर्प्येदंबभाषिरे ५ अप्रत्तंनस्त्वयाकिंनुभगवन्भुवनेश्वर ॥ यन्नोऽतर्हृदयंविश्यतमोहंसिस्वरोचिषा ६ नमोब्रह्मण्यदेवायरामायाकुंठमेधसे ॥ उत्तमश्लोकधुर्यायन्यस्तदंडार्पितांघ्रये ७ ॥ श्रीशुकउवाच ॥ कदाचिल्लोकजिज्ञासुर्गूढोरात्र्यामलक्षितः ॥ चरन्वाचोऽशृणोद्रामोभार्यामुद्दिश्यकस्यचित् ८ नाहंबिभर्मित्वांदुष्टामसतींपरवेश्मगाम् ॥ स्त्रीलोभीबिभृयात्सीतांरामोनाहंभजेपुनः ९ इतिलोकाद्बहुमुखाद्दुराराध्यादसंविदः ॥ पश्चाद्भीतेनसात्यक्ताप्राप्ताप्राचेतसाश्रमम् १० अंतर्वत्न्यागतेकालेयमौसासुषुवेसुतौ ॥ कुशोलवइतिख्यातौतयोश्चक्रेक्रियामुनिः ११ अंगदश्चित्रकेतुश्चलक्ष्मणस्यात्मजौस्मृतौ ॥ तक्षःपुष्कलइत्यास्तांभरतस्यमहीपते १२

चूर्णिका

स्वयं गृहधर्मं लोकान् शिक्षयन् आचरत् ९५ भावज्ञा सीता प्रेमादिभिः भर्तुर्मनः अहरत् ९६ ॥ ॥ इति नवमे दशमः १० ॥ ॥ ध ॥ ॥ ध ॥ ॥ श्रीशुकउवाच ॥ ॥ भगवान् रामः मखैः सर्वदेवमयं आत्मानं ईजे १ यत्र यज्ञे होत्रे प्राचीं दिशं ददौ ब्रह्मणे दक्षिणां अध्वर्यवे प्रतीचीं सामगाय उदीचीं २ शेषां सर्वां आचार्याय इदं सर्वं ब्राह्मण एव अर्हतीति मन्यमानः ३ वासोभ्यां अवशेषितः तथा सीता अपि सौभाग्यद्रव्यावशेषिता आसीत् ४ ते ऋत्विजः रामस्य वात्सल्यं वीक्ष्य प्रीताः संतः तस्मै सर्वं दत्त्वा ऊचुः ५ हे भगवन् त्वया किं नु न दत्तम् त्वं नः अंतर्हृदयं विश्य तमः हंसि ६ तस्मै तुभ्यं नमः ७ कदाचित् लोकवृत्तिं जिज्ञासुः रामः रात्र्यां गूढः चरन् कस्यचिद्भार्यां उद्दिश्य वाचं अशृणोत् नाहं बिभर्मि त्वां दुष्टामसतीं परवेश्मगाम् स्त्रीलोभी बिभृयात्सीतां रामो नाहं भजे पुनः ९ इति लोकापवादात् भीतेन रामेण त्यक्ता सीता अंतर्वत्नी सती वाल्मीकेः आश्रमं कालेन प्राप्ता १० काले प्राप्ते कुशलवौ सुषुवे तयोः जातकर्माद्याः क्रियाः मुनिश्चक्रे ११ अंगदः चित्रकेतुश्च लक्ष्मणपुत्रौ तक्षपुष्कलौ भरतपुत्रौ १२

CC-0. In Public Domain. Digitization by eGangotri

टीका

१३ १४ १५ ईश्वरोपिशुचोरोद्धुंनाशक्नोत् १६ नचातिचित्रमेतादित्याह । स्त्रीपुंसोःप्रसंगआसक्तिःत्रासमावहतीतितथाविभक्तेरलुगार्षः (एव)- भयावहइतिपाठःसुगमः । किमुतेकि प्रासंगिकोक्तिः
१७ अग्निहोत्रमजुहोत् १८ आत्मज्योतिर्निजंधाम १९ जलधिबंधनंअस्त्रपूगैश्चरक्षसांवधइतीदंकविभिराश्चर्यमिववर्णितमपियशः स्तुतिर्नभवति । अत्रहेतुः । अधिकसाम्याभ्यांविमुक्तंधामप्रभावोयस्य
तस्यकिंकपयः सहायाः । अतःसुग्रीवाद्याश्रयणंयथालीलामात्रंतथैवेदमपि । युक्तंचैतदित्याह । सुराणांयाच्ञयाआत्तास्वीकृतालीलार्थातनुर्येनतस्य २० एवंविधलीलाप्रयोजनंदर्शयन्प्रणमति ।
यस्ययशः नृपाणांयुधिष्ठिरादीनांसदस्सु ऋषयोमार्कंडेयादयो गायंति । दिगिभेंद्राणांपट्टवदाभरणरूपम् । तत्पर्यंतंव्याप्तमित्यर्थः । नाकपालादेवाः वसुपालाश्चवसुधापालाः । तेषांकिरीटैर्जुष्टंपादांबुजं
यस्यतंरघुपतिं पाठांतरेतत्तस्यरघुपतेः जुष्टंपादांबुजं प्रपद्यइत्यर्थः २१ सरामः संविष्टः उपवेशितःअनुगतोवायैः तेकोशलदेशवासिनः सर्वेपियत्रयोगिनोगच्छंतितत्स्थानंययुः २२ आनृशंस्यपरः
॥३६॥ उपशमनिष्ठः सन् विमुच्यते २३ सरामःकथंस्वयंअवर्तत । भ्रातॄन्वाप्रतिकथमवर्तत । कथंभूतान्आत्मनः आत्मांशभूतान् । अस्मिन्वाईश्वरेतेभ्रात्रादयःअनुअनंतरंकथमवर्ततेतिप्रश्नत्रयम् । २४

श्लोकाः १३/२४

सुबाहुःश्रुतसेनश्चशत्रुघ्नस्यबभूवतुः ॥ गंधर्वान्कोटिशोजघ्नेभरतोविजयेदिशाम् १३ तदीयंधनमादायसर्वंराज्ञेन्यवेदयत् ॥ शत्रुघ्नश्चमधोःपुत्रंलवणं
नामराक्षसम् ॥ हत्वामधुवनेचक्रेमथुरांनामवैपुरीम् १४ मुनौनिक्षिप्यतनयौसीताभर्त्राविवासिता ॥ ध्यायंतीरामचरणौविवरंप्रविवेशह १५ तांश्रु
त्वाभगवान्रामोरुंधन्नपिधियाशुचः ॥ स्मरंस्तस्यागुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः १६ स्त्रीपुंप्रसंगएतादृक्सर्वत्रत्रासमावहः ॥ अपीश्वराणांकिमुतग्रा
म्यस्यगृहचेतसः १७ ततऊर्ध्वंब्रह्मचर्यंधारयन्नजुहोत्प्रभुः ॥ त्रयोदशाब्दसाहस्रमग्निहोत्रमखंडितम् १८ स्मरतांहृदिविन्यस्यविद्धंदंडककंटकैः ॥
स्वपादपल्लवंरामआत्मज्योतिरगात्ततः १९ नेदंयशोरघुपतेःसुरयाच्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः ॥ रक्षोवधोजलधिबंधनमस्त्रपूगैःकिंतस्य
शत्रुहननेकपयःसहायाः २० यस्यामलंनृपसदस्सुयशोऽधुनापिगायंत्यघघ्नमृषयोदिगिभेंद्रपट्टम् ॥ तन्नाकपालवसुपालकिरीटजुष्टपादांबुजंरघुपतेःशरणं
प्रपद्ये २१ यैःसंस्पृष्टोभिदृष्टोवासंविष्टोऽनुगतोपिवा ॥ कोशलास्तेययुःस्थानंयत्रगच्छंतियोगिनः २२ पुरुषोरामचरितंश्रवणैरुपधारयन् ॥ आनृशं
स्यपरोराजन्कर्मबंधैर्विमुच्यते २३ ॥ राजोवाच ॥ कथंसभगवान्रामोभ्रातॄन्वास्वयमात्मनः ॥ तस्मिन्वातेऽन्ववर्तंतप्रजाःपौराश्चईश्वरे २४

चूर्णिका

सुबाहुश्रुतसेनौ शत्रुघ्नपुत्रौ भरतः दिग्विजये कोटिशः गंधर्वान् जघ्ने १३ शत्रुघ्नःमधोः पुत्रं लवणासुरं हत्वा मधुवने मथुरां नाम पुरीं चक्रे १४ सीता मुनौ पुत्रौ स्थाप्य
रामचरणौ ध्यायती विवरं प्रविवेश १५ १६ रामःतद्गुणान् स्मरन् तत ऊर्ध्वं ब्रह्मचर्यं धारयन् त्रयोदशसहस्रवर्षाणि अग्निहोत्रं अजुहोत् १७ १८ ततः भक्तानां हृ
दि स्वपादपल्लवं विन्यस्य निजं धाम प्रत्यगात् १९ २० २१ यैः संस्पृष्टोभिदृष्टोवा संविष्टोनुगतोपि वा कोसलास्ते ययुः स्थानं यत्र गच्छंति योगिनः २२ हे
राजन् पुरुषः रामचरितं शृण्वन् कर्मबंधाद्विमुच्यते २३ ॥ राजोवाच ॥ हे शुक सः रामः स्वयं भ्रातॄन् वा कथं अवर्तत तथा तस्मिन् रामे ते भ्रातरः प्रजाश्च कथं
अवर्तंत तद्वद २४ ॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तत्रश्रीरामस्यभ्रात्रादिषुप्रवृत्तिप्रकारमाह अथेति । अनेनैवभ्रातृणाममितदाज्ञानुवर्तितयावृत्तिरुक्ता । अथसिंहासनस्वीकारानंतरम् २५ पुरींवर्णयतित्रिभिः । गंधोदकैर्मदबिंदुभिश्चआसिक्तामाग यस्यांसुतरांमत्तामिवसमृद्धां वेतिवितर्के । पाठांतरे वासितांकामोन्मत्तांगामिवेत्यर्थः २६ (चैत्यंपाषाणादिभिर्बद्धंमार्गस्थवृक्षमूलादि) २७ (सवृंतैःसप्रसवैरित्यर्थः) २८ पौराणांतस्मिन्वृत्तिमाह । तमुपेयुरिति । वराहरूपेणत्वयोद्धृतांइमांपृथ्वीं पाहि २९ प्रजानांतस्मिन्वृत्तिमाह ततःप्रजाइति ३० स्वयंकथमवर्ततेत्यस्योत्तरमाह अथेतियावत्समाप्ति । स्वगृहंप्रविष्टःसन्तस्मिन्रेमे इतिपंचमेनान्वयः गृहं वर्णयतिसार्धैस्त्रिभिः अनंतायेअखिलारत्नादीनांकोशास्तैराढ्यंअनर्घ्याउरवःपरिच्छदायस्मिन् ३१ विद्रुममयाउदुंबरादेहल्योयेषुतैर्द्वारैःस्वच्छैःस्थलैः तृतीयांतानांमंडितमितितृतीयेनान्वयः ३२ वास सांमणिगणानांचअंशुकैर्दीप्तिभिःचिदुल्लासैः चिच्चैतन्यंतद्वदुल्लासैरुज्ज्वलैः । यद्वा चिदित्यव्ययं क्वचित्क्वचित्वैदूर्यस्तंभादिषुयथाशोभंउज्ज्वलैःमुक्ताफलैर्मंडितमित्यर्थः । कांताःकमनीयाः कामो पपत्तयोभोगसाधनानिताभिः ३३ (स्त्रीपुंभिःस्त्रीपुंसैरित्यर्थः) भूषणानांभूषणभूतैः ३४ (स्वस्मिन्नारामआरमणंनतुविषयेषुयेषांतेचतेधीराश्चतेषाम्) ३९ नृणांमध्ये । यद्वा नृभिरभिध्यातंअंघ्रिपल्लवंय स्योति ३६ ॥ ॥ इतिश्रीभागगतेमहापुराणेनवमस्कंधेटीकायांएकादशोऽध्यायः ११ ॥ ॥ ७ ॥ ॥ द्वादशेरामपुत्रस्यकुशस्यान्वयउच्यते ॥ एवमिक्ष्वाकुपुत्रस्यशशादस्येरितो ऽन्वयः ॥ १ ॥ कुशस्यश्रीरामसुतस्यातिथिःसुतोभवत् १

श्लोकाः २५/१

॥ श्रीशुकउवाच ॥ अथादिशद्दिग्विजयेभ्रातॄंस्त्रिभुवनेश्वरः ॥ आत्मानंदर्शयन्स्वानांपुरीमैक्षतसानुगः २५ आसिक्तमार्गांगंधोदैःकरिणांमदसीकरैः ॥ स्वामिनंप्राप्तमालोक्यमत्तांवासुतरामिव २६ प्रासादगोपुरसभाचैत्यदेवगृहादिषु ॥ विन्यस्तहेमकलशैःपताकाभिश्चमंडिताम् २७ पूगैःसवृंतैरंभाभिः पताकाभिःसुवाससाम् ॥ आदर्शैरंशुकैःस्रग्भिःकृतकौतुकतोरणाम् २८ तमुपेयुस्तत्रतत्रपौराअर्हणपाणयः ॥ आशिषोयुयुजुर्देवपाहीमांप्राक्त्वयोद्धृ ताम् २९ ततःप्रजावीक्ष्यपतिंचिरागतंदिदृक्षयोत्सृष्टगृहाःस्त्रियोनराः ॥ आरुह्यहर्म्याण्यरविंदलोचनमतृप्तनेत्राःकुसुमैरवाकिरन् ३० अथप्रविष्टःस्वगृहं जुष्टंस्वैःपूर्वराजभिः ॥ अनंताखिलकोशाढ्यमनर्घ्योरुपरिच्छदम् ३१ विद्रुमोदुंबरद्वारैर्वैदूर्यस्तंभपंक्तिभिः ॥ स्थलैर्मारकतैःस्वच्छैर्भ्राजत्स्फटिकभित्ति भिः ३२चित्रस्रग्भिःपट्टिकाभिर्वासोमणिगणांशुकैः ॥ मुक्ताफलैश्चिदुल्लासैःकांतकामोपपत्तिभिः ३३ धूपदीपैःसुरभिभिर्मंडितंपुष्पमंडनैः ॥ स्त्रीपुंभिः सुरसंकाशैर्जुष्टंभूषणभूषणैः ३४ तस्मिन्सभगवान्रामःस्निग्धयाप्रिययेष्टया ॥ रेमेस्वाराममधीराणामृषभःसीतयाकिल ३५ बुभुजेचयथाकालंकामान्धर्म मपीडयन् ॥ वर्षपूगान्बहून्नृणामभिध्यातांघ्रिपल्लवः ३६ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेएकादशोध्यायः ११ ॥ ॥ ७ ॥ ॥ ७ ॥ श्रीशुकउवाच ॥ कुशस्यचातिथिस्तस्मान्निषधस्तत्सुतोनभः ॥ पुंडरीकोथतत्पुत्रःक्षेमधन्वाऽभवत्ततः १

चूर्णिका ॥ श्रीशुकउवाच ॥ रामः भ्रातॄन् दिग्विजये आदिशत् ततः पुरीमैक्षत २५ कथंभूतां तां गंधोदकादिभिः सिक्तमार्गां २६ पताकादिभिर्मंडितां पूगरंभादिभिः शोभितां २७ ततः तं रामं पौराः उपेयुः आशिषो ददुः हे देवपृथ्वीं पाहि २८ २९ ततः प्रजाः चिरागतं पतिं वीक्ष्य हर्म्याणि आरुह्य कुसुमैः अवाकिरन् ३० अथ अने कोपस्करैर्युक्तं स्वगृहं प्रविष्टः रामः प्रियया सीतयासह रेमे ३१ ३२ ३३ ३४ ३५ किंच यथाकालं बहून् वर्षपूगान् कामान् बुभुजे ३६ ॥ ॥ इति नवमे एकादशः ११ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ कुशस्यपुत्रः अतिथिः तस्य निषधः तस्य नभः तस्य पुंडरीकः तस्य क्षेमधन्वा अभवत् १ ॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अर्कसंभवःअर्कस्यांशात्संभूतः २ हिरण्यनाभःकथंभूतः जैमिनेःशिष्योयोगाचार्यः ३ तदाह । ततःसकाशात्कौशल्योयाज्ञवल्क्यऋषिराध्यात्मंयोगमध्यगात् । महांतउदयाःसिद्धयोयस्मिंस्तं । हृद
यग्रंथेर्भेदकंच ४ ५ मरुंविशिनाष्टि । योसाविति । पुनर्भावयिताभावयिष्यति ६ ७ पित्राअभिमन्युना ८ ९ १० ११ तत्तस्मादमित्रजित् १२ १३ १४ निष्ठा वंशस्यस्थितिः तस्याअंतः (अं
तिमः) १५ तदेवाह इक्ष्वकूणामिति १६ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांद्वादशोऽध्यायः १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः २/१६

॥३८॥ देवानीकस्ततोऽनीहःपारियात्रोऽथतत्सुतः ॥ ततोबलच्छलस्तस्माद्वज्रनाभोऽर्कसंभवः २ खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः ॥ ततोहिरण्यना
भोभूद्योगाचार्यस्तुजैमिनेः ३ शिष्यःकौशल्यआध्यात्मंयाज्ञवल्क्योऽध्यगात्ततः ॥ योगंमहोदयमृषिर्हृदयग्रंथिभेदनम् ४ पुष्योहिरण्यनाभस्यध्रुवसि
द्धिस्ततोऽभवत् ॥ सुदतोऽथाग्निवर्णश्वशीघ्रस्तस्यमरुःसुतः ५ योसावास्तेयोगसिद्धःकलापग्राममाश्रितः ॥ कलेरंतेसूर्यवंशंनष्टंभावयितापुनः ६ तस्मा
त्प्रसुश्रुतस्तस्यसंधिस्तस्याप्यमर्षणः ॥ महस्वांस्तत्सुतस्तस्माद्विश्वसाह्वोऽन्वजायत ७ ततःप्रसेनजित्तस्मात्तक्षकोभवितापुनः ॥ ततोबृहद्बलोयस्तुपि
त्रातेसमरेहतः ८ एतेहीक्ष्वाकुभूपालाअतीताःशृण्वनागतान् ॥ बृहद्बलस्यभवितापुत्रोनामबृहद्रणः ९ उरुक्रियस्ततस्तस्यवत्सवृद्धोभविष्यति ॥ प्र
तिव्योमस्ततोभानुर्दिवाकोवाहिनीपतिः १० सहदेवस्ततोवीरोबृहदश्वोथभानुमान् ॥ प्रतीकाश्वोभानुमतःसुप्रतीकोथतत्सुतः ११ भवितामरुदे
वोथसुनक्षत्रोथपुष्करः ॥ तस्यांतरिक्षस्तत्पुत्रःसुतपास्तदमित्रजित् १२ बृहद्राजस्तुतस्यापिबर्हिस्तस्मात्कृतंजयः ॥ रणंजयस्तस्यसुतःसंजयोभ
विताततः १३ तस्माच्छाक्योथशुद्धोदोलांगलस्तत्सुतःस्मृतः ॥ ततःप्रसेनजित्तस्मात्क्षुद्रकोभविताततः १४ रणकोभवितातस्मात्सुरथस्तनयस्ततः ॥
सुमित्रोनामनिष्ठांतएतेबार्हद्बलान्वयाः १५ इक्ष्वाकूणामयंवंशःसुमित्रांतोभविष्यति ॥ यतस्तंप्राप्यराजानंसंस्थांप्राप्स्यतिवैकलौ १६ ॥ इतिश्रीभागव
महापुराणेनवमस्कंधेद्वादशोऽध्यायः १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

तस्य देवानीकः तस्य अनीहः तस्यपारियात्रः तस्य बलः तस्य स्थलः तस्य अर्कसंभूतः तस्य वज्रनाभः २ तस्य स्वगणः तस्य विधृतिः तस्य हिरण्यनाभः सः जैमिनेः
शिष्योभूत् ३ तस्य याज्ञवल्क्यः अध्यात्मयोगं प्राप ४ तस्य पुष्यः तस्य ध्रुवसंधिः तस्य सुदर्शनः तस्य अग्निवर्णः तस्य शीघ्रः तस्य मरुः ५ यः योगसिद्धः सन् कलाप
ग्रामंस्थित्वा कलेरंते नष्टं सूर्यवंशं पुनर्भावयिष्यति ६ तस्य प्रसुश्रुतः तस्य संधिः तस्य अमर्षणः तस्य महस्वान् तस्य विश्वसाह्वः तस्य प्रसेनजित् तस्य तक्षकः ८
तस्य बृहद्बलः एते ऐक्ष्वाकुभूपालाः अतीताः अनागतान् शृणु तस्य बृहद्रणः ९ तस्य उरुक्रियः तस्य वत्सवृद्धः तस्य प्रतिव्योमः तस्य भानुः तस्य दिवाकः १० तस्य
सहदेवः तस्य बृहदश्वः तस्य भानुमान् तस्य प्रतीकाश्वः तस्य सुप्रतीकः ११ तस्य मरुदेवः तस्य सुनक्षत्रः तस्य पुष्करः तस्य अंतरिक्षः तस्य सुतपाः तस्य अमित्र ॥३८॥
जित् १२ तस्य बृहद्राजः तस्य बर्हिः तस्य कृतंजयः तस्य रणंजयः तस्य संजयः १३ तस्य शाक्यः तस्य शुद्धोदः तस्य लांगलः तस्य प्रसेनजित् तस्य क्षुद्रकः १४
तस्य रणकः तस्य सुरथः तस्य सुमित्रः १५ इक्ष्वाकूणामयं वंशः सुमित्रांतो भविष्यति यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वैकलौ १६ ॥ इति नवमे द्वादशः १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इक्ष्वाकोरेवपुत्रस्यनिमेर्वंशस्त्रयोदशे ॥ वर्ण्यतेजज्ञिरेयत्रब्रह्मज्ञाजनकादयः ॥ १ ॥ निमिरौरसःपुत्रोनाभूदितिदर्शयन्कथामाह निमिरित्येकादशभिः । सत्रमारभ्यवसिष्ठंऋत्विजं अवृत वव्रे १ तंशक्रस्यमखंनिर्वर्त्य । प्रतिपालयप्रतीक्षस्वेति गृहपतिर्निमिः २ इदंजीवितंचलंअस्थिरं विद्वान् ३ इंद्रस्यमखंनिर्वर्त्यागतोगुरुःशिष्यस्यव्यतिक्रममन्यायंवीक्ष्यनिमेर्देहःपततादित्यशपत् ४ ५ (इतिशापंदत्त्वानिमिस्तंदेहंत्यक्तवान्) उर्वशीदर्शनात्स्कन्नंरेतोमित्रावरुणाभ्यांकुंभेनिषिक्तंतस्माद्वसिष्ठोजज्ञे तदाह मित्रावरुणयोरिति । प्रपितामहोवसिष्ठः सहि शुकाचार्यस्यप्रपितामहसमः तथाचश्रुतिः । " कुंभेरेतःसिषिचतुःसमानमि"ति ६ गंधवस्तुषुसुगंधद्रव्येषु ७ यदिप्रसन्नाः प्रभवःसमर्थाश्च तर्हिजीवत्वित्यूचुः ८ यस्यदेहस्ययोगंनवांच्छंति । अपितुमोक्षायैवभजंति हरिंमेधसोभगवतः । हरौमेधायेषांतइतिवा ९ १० निमिर्विदेहःसन्उष्यतांवसतु । कामंयथेच्छम् । एवंसतियुष्माभिःप्रार्थितंजीवितमस्यभविष्यति नचदेहसंबंधइतिभावः । सचअध्यात्मसंस्थितःलोचनयोःस्थितःसन्उन्मेषणनिमेषाभ्यांतत्प्रवर्तकत्वेनलक्षितोवर्ततेइतिशेषः ११ तदेवंमृतादपिनिमेर्देहाद्वंशप्रवृत्तिंदर्शयति अराजकभयमिति १२

॥३९॥

श्लोकाः १—१२

॥ श्रीशुकउवाच ॥ निमिरिक्ष्वाकुतनयोवसिष्ठमवृतर्त्विजम् ॥ आरभ्यसत्रंसोप्याहशक्रेणप्राग्वृतोस्मिभोः १ तंनिर्वर्त्यागमिष्यामितावन्मांप्रतिपालय ॥ तूष्णीमासीद्गृहपतिःसोपींद्रस्याकरोन्मखम् २ निमिश्चलमिदंविद्वान्सत्रमारभतात्मवान् ॥ ऋत्विग्भिरपरैस्तावन्नागतोयावतागुरुः ३ शिष्यव्यतिक्रमंवीक्ष्यनिर्वर्त्यगुरुरागतः ॥ अशपत्पततादेहोनिमेःपंडितमानिनः ४ निमिःप्रतिददौशापंगुरवेऽधर्मवर्तिने ॥ तवापिपततादेहोलोभाद्धर्ममजानतः ५ इत्युत्ससर्जतंदेहंनिमिरध्यात्मकोविदः ॥ मित्रावरुणयोर्जज्ञेउर्वश्यांप्रपितामहः ६ गंधवस्तुषुतद्देहंनिधायमुनिसत्तमाः ॥ समाप्तेसत्रयागेथदेवानूचुःसमागतान् ७ राज्ञोजीवतुदेहोयंप्रसन्नाःप्रभवोयदि ॥ तथेत्युक्तेनिमिःप्राहमाभून्मेदेहबंधनम् ८ यस्ययोगंनवांछंतिवियोगभयकातराः ॥ भजंतिचरणांभोजंमुनयोहरिमेधसः ९ देहंनावरुरुत्सेहंदुःखशोकभयाश्रयम् ॥ सर्वत्रास्ययतोमृत्युर्मत्स्यानामुदकेयथा १० ॥ देवाऊचुः ॥ विदेहउष्यतांकामंलोचनेषुशरीरिणाम् ॥ उन्मेषणनिमेषाभ्यांलक्षितोध्यात्मसंस्थितः ११ अराजकभयंनृणांमन्यमानामहर्षयः ॥ देहंममंथुःस्मनिमेःकुमारःसमजायत १२

चूर्णिका

॥ श्रीशुक उवाच ॥ इक्ष्वाकुपुत्रो निमिः सत्रं आरभ्य वसिष्ठं ऋत्विजं वव्रे तदा वसिष्ठः आह अहं शक्रेण प्राक् वृतोस्मि १ अतः तं क्रतुं कृत्वा आगमिष्ये तावत् मां प्रतीक्षस्व इत्युक्त्वा इंद्रस्यमखं अकरोत् २ निमिः इदं अनित्यं शरीरं ज्ञात्वा अपरैः ऋत्विग्भिः यावत् गुरुर्नागतः तावत् सत्रं आरभत ३ वसिष्ठः इंद्रमखं निर्वर्त्य आगतः सन् शिष्यस्य अन्यायं दृष्ट्वा निमेर्देहः पततु इति अशपत् ४ तदा निमिः लोभात् धर्मं अजानतः तवापि देहः पततु इति गुरवे अशपत् ५ इत्युक्त्वा स्वदेहं उत्ससर्ज ततः उर्वशीदर्शनात् मित्रावरुणयोः स्कन्नं रेतः ताभ्यां कुंभे निक्षिप्तं तस्मात् वसिष्ठो जज्ञे ६ मुनयः गंधद्रव्ये निमेर्देहं स्थाप्य सत्रं समाप्य प्राप्तान् देवान् प्रति राज्ञः अयं देहः जीवतु इत्यूचुः ७ देवैः तथेत्युक्ते सति निमिः जीवन् सन् प्राह मे देहबंधनं माभूत् ८ यतः वियोगभयकातराः मुनयः यस्य योगं न वांछंति ९ १० ॥ देवा ऊचुः ॥ विदेहः देहिनां नेत्रेषु वसतु एवं सति युष्माभिः प्रार्थितं जीवितं अस्य भवेत् देहबंधश्च न ११ ततः उन्मेषनिमेषाभ्यां लक्षितः अवर्तत ऋषयः अराजके नृणां भयं मत्वा निमेर्देहं ममंथुः तदा कुमारः समजायत १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यान्वर्थानि त्रीणिनामान्याह । जन्मना असाधारणेनजनएवजनकः यद्वा स्वदेहद्वारा जनकत्वात्सनिमिर्जनकोभूदित्यर्थः । मिथिलायेननिर्मितेत्यनेनव्युत्पत्त्यंतरमर्थादुक्तम् १३ १४ सुधृत् सुधृतिःतस्यपिता १५ १६ १७ १८ १९ २० द्रुतोगतः । तस्यकेशिध्वजस्यभानुमान् २१ २२ ततस्मात्सुपार्श्वकः २३ अग्निसंभवः अग्नेरंशात्संभूतः २४ यद्यस्मात्सुभूषणः २५ २६

टीका

॥४०॥ श्लोकः १३—२६

जन्मनाजनकःसोभूत्वविदेहस्तुविदेहजः ॥ मिथिलोमथनाज्जातोमिथिलायेननिर्मिता १३ तस्मादुदावसुस्तस्यपुत्रोऽभूत्नंदिवर्धनः ॥ ततःसुकेतुस्तस्यापिदेवरातोमहीपते १४ तस्माद्बृहद्रथस्तस्यमहावीर्यःसुधृतिपता ॥ सुधृतेर्धृष्टकेतुर्वैहर्यश्वोथमरुस्ततः १५ मरोःप्रतीपकस्तस्माज्जातःकृतरथोयतः ॥ देवमीढस्तस्यसुतोविश्रुतोथमहाधृतिः १६ कृतिरातस्ततस्तस्मान्महारोमाथतत्सुतः ॥ स्वर्णरोमासुतस्तस्यह्रस्वरोमाव्यजायत १७ ततःसीरध्वजोजज्ञे यज्ञार्थंकर्षतोमहीम् ॥ सीतासीराग्रतोजातातस्मात्सीरध्वजःस्मृतः १८ कुशध्वजस्तस्यपुत्रस्ततोधर्मध्वजोनृप ॥ धर्मध्वजस्यद्वौपुत्रौकृतध्वजमितध्वजौ १९ कृतध्वजात्केशिध्वजःखांडिक्यस्तुमितध्वजात् ॥ कृतध्वजसुतोराजन्नात्मविद्याविशारदः २० खांडिक्यःकर्मतत्त्वज्ञोभीतःकेशिध्वजाद्द्रुतः ॥ भानुमांस्तस्यपुत्रोभूत्शतद्युम्नस्तुतत्सुतः २१ शुचिस्तत्तनयस्तस्मात्सनद्वाजस्ततोऽभवत् ॥ ऊर्ध्वकेतुःसनद्वाजादजोथपुरुजित्सुतः २२ अरिष्टनेमिस्तस्यापिसुतायुस्तत्सुपार्श्वकः ॥ ततश्चित्ररथोयस्यक्षेमाधिर्मिथिलाधिपः २३ तस्मात्समरथस्तस्यसुतःसत्यरथस्ततः ॥ आसीदुपगुरुस्तस्मादुपगुप्तोग्निसंभवः २४ वस्वनंतोथतत्पुत्रोयुयुधानात्सुभाषणः ॥ श्रुतस्ततोजयस्तस्माद्विजयोस्माद्दतःसुतः २५ शुनकस्तत्सुतोजज्ञेवीतहव्योधृतिस्ततः ॥ बहुलाश्वोधृतेस्तस्यकृतिरस्यमहावशी २६

चूर्णिका

स एव जन्मना जनकः अभूत् विदेहजः अतः वैदेहोऽभूत् मथनाज्जातः अतः मिथिलः अभूत् येन मिथिला निर्मिता १३ विदेहात् उदावसुः तस्य नंदिवर्धनः तस्य सुकेतुः तस्य देवरातः १४ तस्य बृहद्रथः तस्य महावीर्यः तस्य सुधृतिः तस्य धृष्टकेतुः तस्य हर्यश्वः तस्य मरुः १५ तस्य प्रदीपकःतस्य कृतिरथः तस्य देवमीढः तस्य विश्रुतः तस्य महाधृतिः १६ तस्य कृतिरातः तस्य महारोमा तस्य स्वर्णरोमा तस्य ह्रस्वरोमा १७ तस्य सीरध्वजः सः यज्ञार्थं महीं कर्षतः सतः लांगलाग्रात् सीता जाता अत एव सीरध्वजः इति तस्य नाम १८ तस्मात् कुशध्वजः तस्य धर्मध्वजः तस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ १९ कृतध्वजात् केशिध्वजः मितध्वजात् शांडिक्यः केशिध्वजस्य भानुमान् तस्य शतद्युम्नः २० २१ तस्यः शुचिः तस्य सनद्वाजः तस्य ऊर्ध्वकेतुः तस्य अजः तस्य पुरुजित् २२ तस्य अरिष्टनेमिः तस्य श्रुतायुः तस्य सुपार्श्वकः तस्य चित्ररथः तस्य क्षेमधिः २३ तस्य समरथः तस्य सत्यरथः तस्य उपगुरुः तस्य उपगुप्तः २४ तस्य वस्वनंतः तस्य युयुधानः तस्य सुभाषणः तस्य श्रुतः तस्य जयः तस्य विजयः तस्य ऋतः २५ तस्यः शुनकः तस्य वीतिहव्यः तस्य धृतिः तस्मात् बहुलाश्वः तस्मात् कृतिः तस्य महावशी २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

योगेश्वरायाज्ञवल्क्यादयः तेषांप्रसादेन २७ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांजनकवंशेत्रयोदशोऽध्यायः ॥ १३ ॥ ॥ ७ ॥ ॥ चतुर्दशादिभिःसोमवंशमाहासमाप्तितः ॥ यस्मिन्नैलादयोभूपाःकीर्त्यंतेपुण्यकीर्तयः ॥ १ ॥ चतुर्दशेगुरोःपत्न्यांतारायांसोमजाद्बुधात् ॥ जातश्चैलःषड्उर्वश्यामायुर्मुख्यानजीजनत् ॥ २ ॥ १ २ दृग्भ्यःआनंदाश्रुभ्यः अतएवामृतमयः किलेत्याश्चर्ये । पाठांतरेदृशोनेत्रात् । वक्ष्यमाणदर्पस्यकारणमाह विप्रेति ३ सोमस्यपुत्रोबुधइतिकथाद्वारेणाह । पत्नीमितिसार्धैर्नवभिः ४ तत्कृतेतन्निमित्तम् ५ सुराणांदानवानांचविग्रहेकारणमाह शुक्रइति असुरैःसहितउडुपमग्रहीदित्यर्थः । संधिरार्षः । गुरोःसुतंबृहस्पतिंअग्रहीत् । अंगिरसःसकाशात्प्राप्तविद्योहरइतिहिप्रसिद्धिः ६ (तारकानक्षत्राणिसैनिकरूपाणितत्प्रधानस्तारकामयःयद्वा तारकातारातदर्थंप्रवृत्तइत्यर्थः) ७ निवेदितोविज्ञापितोविश्वकृत्ब्रह्मा । अवैत्अबुध्यत् ८ बृहस्पतिराह त्यजत्यजेति । परैराहितंगर्भम् । गर्भेत्यक्तेभस्मीकरिष्यतीतिबिभ्यतींप्रत्याह । नाहमिति । सांतानिकःसंतानार्थी सांतानिकेइतिपाठेहेसपुत्रेइत्यर्थः ९ १०

॥४१॥

श्लोकाः २७/१०

एतेवैमैथिलाराजन्नात्मविद्याविशारदाः ॥ योगेश्वरप्रसादेनद्वंद्वैर्मुक्तागृहेष्वपि २७ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेजनकवंशेत्रयोदशोऽध्यायः १३
॥ श्रीशुकउवाच ॥ अथातःश्रूयतांराजन्वंशःसोमस्यपावनः ॥ यस्मिन्नैलादयोभूपाःकीर्त्यंतेपुण्यकीर्तयः १ सहस्रशिरसःपुंसोनाभिह्रदसरोरुहात् ॥ जात
स्यासीत्सुतोधातुरत्रिःपितृसमोगुणैः २ तस्यदृग्भ्योऽभवत्पुत्रःसोमोऽमृतमयःकिल ॥ विप्रौषध्युडुगणानांब्रह्मणाकल्पितःपतिः ३ सोऽयजद्राजसूयेन
विजित्यभुवनत्रयम् ॥ पत्नींबृहस्पतेर्दर्पात्तारांनामाहरद्बलात् ४ यदासदेवगुरुणायाचितोऽभीक्ष्णशोमदात् ॥ नात्यजत्तत्कृतेजज्ञेसुरदानवविग्रहः ५ शु
क्रोबृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपम् ॥ हरोगुरुसुतंस्नेहात्सर्वभूतगणावृतः ६ सर्वदेवगणोपेतोमहेंद्रोगुरुमन्वयात् ॥ सुरासुरविनाशोऽभूत्समरस्तारकाम
यः ७ निवेदितोऽगिरसासोमंनिर्भर्त्स्यविश्वकृत् ॥ तारांस्वभर्त्रेप्रायच्छदंतर्वत्नीमवैत्पतिः ८ त्यजत्यजाशुदुष्प्रज्ञेमत्क्षेत्रादाहितंपरैः ॥ नाहंत्वांभस्मसा
त्कुर्यांस्त्रियंसांतानिकःसति ९ तत्याजव्रीडितातारकुमारंकनकप्रभम् ॥ स्पृहामांगिरसश्चक्रेकुमारेसोमएवच १०

चूर्णिका

हे राजन् एते मैथिलाः योगेश्वरप्रसादेन गृहेष्वपि द्वंद्वैर्मुक्ता आसन् २७ ॥ इति नवमे त्रयोदशः ॥ १३ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच हे राजन् सोमस्य पावनः वंशः श्रूयताम् यस्मिन् एलादयः भूपाः कीर्त्यंते १ आदौ नारायणस्य नाभिपद्मात् ब्रह्मा आसीत् तस्मात् अत्रिः २ तस्य दृग्भ्यः सोमः अभवत् सः विप्रौषध्युडुगणानां ब्रह्मणा पतिः कल्पितः३ सः सोमः भुवनत्रयं जित्वा राजसूयेन अयजत् सः बृहस्पतेः भार्यांतारां दर्पात् अहरत् ४ यदा देवगुरुणा याचितः चंद्रः तां न अदात् तत्कृते देवदैत्यविग्रहो जज्ञे ५ ततः बृहस्पतेः द्वेषात् दैत्यैः सह शुक्रः चंद्रसहायः अभूत् सर्वभूतगणावृतः हरः देवैः सहितः इंद्रश्च गुरुं अन्वयात् ६ तस्मिन् युद्धे देवदैत्यनाशः अभूत्७ अंगिरसाप्रार्थितो ब्रह्मा सोमं निर्भर्त्स्य तारां गुरवे प्रायच्छत् गुरुः अंतर्वत्नीं तां ज्ञात्वा आह ८ हेदुःप्रज्ञे परैः आहितं गर्भं आशु त्यज त्यज संतानार्थी अहं अतस्त्वां भस्मसान्नकुर्याम् ९ ततः व्रीडिता सा कनकप्रभं कुमारं तत्याज तं दृष्ट्वा बृहस्पतिसोमौ इच्छां चक्राते १०

॥४१॥

१ सांतानिकेऽसतिइत्यपिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

११ (वोचसिवदांसि) १२ रहएकांते १३ १४ पुरूरवसउर्वश्यांआयुप्रमुखाः षट्पुत्राजाताइतिवक्तुंकथामाह तस्येत्यादिनायावत्समाप्ति १५ ननु देवीकुतोमनुष्यस्यांतिकमुपगच्छेत्तत्राह । मित्रावरुणयोःशापान्नरलोकतांमनुष्यत्वमापन्नासती १६ १७ १८ नौआवयोः रतिरस्त्विति १९ यस्पतवअंगांतरंवक्षः आसाद्य रिरंसयारंतुमिच्छयाहस्फुटंच्यवंते (धैर्यं) नोपयाति यद्यस्मादितिवा २० शापावसानेभाषाभंगमिषेणजिगमिषोस्तस्याभाषाबंधमाह । एताविति द्वाभ्याम् । उरणकौमेषौन्यासौनिःक्षेपरूपौरक्षस्व । यःश्लाघ्यः सएवस्त्रीणांवरःस्मृतः अतोविजातीयत्वं नदोषइतिभावः २१ हेवीरघृतंमेभक्षःस्यात् । 'अमृतंवाआज्यमितिश्रुतेः' । देवानांचामृताशित्वात् । मैथुनादन्यत्रविवाससंनग्नं (त्वा) त्वांनेक्षिष्यइति । प्रतिपेदेअंगीकृतवान् । तदेवाह अहोइति २२ २३ (यथेच्छम हतोऽनिवारितःरेमे) २४ पद्मकिंजल्कगंधइवगंधोयस्याः तस्यामुखामोदेनसुखितःप्रलोभितःसन् २५

॥४२॥ ममायंनतवेत्युच्चैस्तस्मिन्विवदमानयोः ॥ पप्रच्छुर्ऋषयोदेवानैवोचेव्रीडितातुसा ११ कुमारोमातरंप्राहकुपितोऽलीकलज्जया ॥ किंनवोचस्यसद्वृत्तेआ श्लोकाः

त्मावद्यंवदाशुभे १२ ब्रह्मातांरहआहूयसमप्राक्षीच्चसांत्वयन् ॥ सोमस्येत्याहशनकैःसोमस्तंतावदग्रहीत् १३ तस्यात्मयोनिरकृतबुधइत्यभिधांनृप ॥

बुद्ध्यागंभीरयायेनपुत्रेणापोडुराण्मुदम् १४ ततःपुरूरवाजज्ञेइलायांयउदाहृतः ॥ तस्यरूपगुणौदार्यशीलद्रविणविक्रमान् १५ श्रुत्वोर्वशींद्रभवनेगीय ११/२५

मानात्सुरर्षिणा ॥ तदंतिकमुपेयायदेवीस्मरशरार्दिता ॥ मित्रावरुणयोःशापादापन्नानरलोकताम् १७ निशम्यपुरुषश्रेष्ठंकंदर्पमिवरूपिणम् ॥ धृतिंवि

ष्टभ्यललनाउपतस्थेतदंतिके १७ सतांविलोक्यनृपतिर्हर्षेणोत्फुल्ललोचनः ॥ उवाचश्लक्ष्णयावाचादेवींहृष्टतनूरुहः १८ ॥ राजोवाच ॥ स्वागतंतेवरारो

हेआस्यतांकरवामकिम् ॥ संरमस्वमयासाकंरतिर्नौशाश्वतीःसमाः १९ ॥ उर्वश्युवाच ॥ कस्यास्त्वयिनसज्जेतमनोदृष्टिश्चसुंदर ॥ यदंगांतरमासाद्यच्य

वतेहरिरंसया २० एतावुरणकौराजन्न्यासौरक्षस्वमानद ॥ संरंस्येभवतासाकंश्लाघ्यःस्त्रीणांवरःस्मृतः २१ घृतंमेवीरभक्षःस्यान्नेक्षेत्वान्यत्रमैथुनात् ॥

विवाससंतत्तथेतिप्रतिपेदेमहामनाः २२ अहोरूपमहोभावोनरलोकविमोहनम् ॥ कोनसेवेतमनुजोदेवींत्वांस्वयमागताम् २३ तयासपुरुषश्रेष्ठोरमयं

त्यायथाऽर्हतः ॥ रेमेसुरविहारेषुकामंचैत्ररथादिषु २४ रममाणस्तयादेव्यापद्मकिंजल्कगंधया ॥ तन्मुखामोदसुखितोमुमुदेऽहर्गणान्बहून् २५

चूर्णिका

ममायं नच तवेति उच्चैर्विवदतुः तदा देवैः ऋषिभिः पृष्टा सा किमपि नोचे ११ तदा कुमारः कुपितः सन् मातरं वदेत्याह १२ ततः ब्रह्मा तां रहसि अपृच्छत् सा सोमस्य पुत्रः इत्याह तं सोमः अग्रहीत् १३ ब्रह्मा तस्य बुध इति नाम चक्रे चंद्रः पुत्रेणमुदं आप १४ ततः बुधात् इलायां पुरूरवा जज्ञे १५ उर्वशी इंद्रभुवने नारदात् तद्रूपगुणादीन् श्रुत्वा १६ मित्रावरुणयोः शापात् भुवं एत्य पुरूरवसमीपं गत्वा १७ धैर्यं धृत्वा तदंतिके उपतस्थे सः तांविलोक्य मोहितः सन् उवाच १८ हेउर्वशि अत्रास्यतां ते भद्रं मयासाकं रमस्व १९ ॥ उर्वश्युवाच ॥ हे सुंदर कस्याः मनः त्वयि नसज्जेत तथापि मम नियमपर्यंतं अत्र स्थास्यामि २० ॥४२॥

हे राजन् एतौ उरणकौ रक्षस्व २१ मेभक्ष्यं घृतं मैथुनादन्यत्र विवाससं त्वां नेक्षिष्ये तथेति राजा अंगीकृतवान् २२ २३ ततः सुरविहारादिषु तया स कामं रेमे २४ किंच तया सह रममाणः बहून्अहर्गणान् मुमुदे २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

मह्यंमम २६ महारात्रेगध्यरात्रे। "महानिशाद्वेघटिकेरात्रौमध्यमयामयो" रितिश्रुतेः २७ जिगमिषोस्तस्याःपरुषोक्तिमाह हाहतास्मीतिसार्धेन। नपुंसा नपुंसकेन २८ यथानारीतथा (यःपुमान् दिवा निशि) संत्रस्तो (भीतः) शेते २९ ३० विद्युतोविशिष्टद्युतिमंतः। व्यद्योतंत दीप्तिमकुर्वत। यद्वा (ते) तदैवतडितः प्रकाशंतेस्मेत्यर्थः। नग्नमैक्षत अतोभाषाभंगान्निर्जगामेतिज्ञेयम् ३१ ३२ तस्याःसखीश्चपंचवीक्ष्य सूक्तंशोभनंवचनं हयेजायइत्यादि (प्राह) ३३ तदेवार्थतआह। अहोइतिद्वाभ्याम्। अनिर्वृत्य मत्कृतांनिर्वृतिमप्राप्य मांत्यक्तुंनार्हसि। पाठांतरेमांनिर्वृतिमगमयित्वा। मंत्राननुक्त्वेतिवा वचांसिकृणवावहै। गोष्ठीःकरवावहै ३४ सुदेहोऽतिकमनीयोममदेहोत्रपतेत् ३५ पुरूरवोमामृथाइत्यादितस्याः सूक्तंतदप्यर्थतआह। मामृथाइतिचतुर्भिः। मामृथामाम्रियस्व। पुरुषोसि धैर्यमावहस्वेतिभावः ३६ प्रियेनिमित्तेसाहसं यासाम् ३७ तं सांत्वयाति। संवत्सरांत इति ३८ अपराणीतिवचनादंतर्वत्नीमुपालक्ष्य ज्ञात्वा ३९ ४०

॥४३॥ श्लोकाः २६/४०

अपश्यन्नुर्वशीमिंद्रोगंधर्वान्समचोदयत् ॥ उर्वशीरहितंमह्यमास्थानंनातिशोभते २६ तउपेत्यमहारात्रेतमसिप्रत्युपस्थिते ॥ उर्वश्याउरणौजह्रुर्न्यस्तौ राजनिजायया २७ निशम्याक्रंदितंदेवीपुत्रयोर्नीयमानयोः ॥ हतास्म्यहंकुनाथेननपुंसावीरमानिना २८ यद्विश्रंभादहंनष्टाहृतापत्याचदस्युभिः ॥ यःशेतेनिशिसंत्रस्तोयथानारीदिवापुमान् २९ इतिवाक्सायकैर्विद्धःप्रतोत्रैरिवकुंजरः ॥ निशिनिस्त्रिंशमादायविवस्त्रोभ्यद्रवद्रुषा ३० तेविसृज्योरणौतत्र व्यद्योतंतस्मविद्युतः ॥ आदायमेषावायांतंनग्नमैक्षतसापतिम् ३१ ऐलोपिशयनेजायामपश्यन्विमनाइव ॥ तच्चित्तोविह्वलःशोचन्बभ्रामोन्मत्तवन्महीम् ३२ सतांवीक्ष्यकुरुक्षेत्रेसरस्वत्यांचतत्सखीः ॥ पंचप्रहृष्टवदनाःप्राहसूक्तंपुरूरवाः ३३ अहोजायेतिष्ठतिष्ठघोरेनत्यक्तुमर्हसि ॥ मांत्वमप्राप्यानिर्वृत्यवचांसिकृणवावहै ३४ सुदेहोयंपतत्यत्रदेविदूरंहृतस्त्वया ॥ खादंत्येनंवृकागृध्रास्त्वत्प्रसादस्यनास्पदम् ३५ ॥ उर्वश्युवाच ॥ मामृथाःपुरुषोसित्वंमास्मत्वाद्युर्वृकाइमे ॥ क्वापिसख्यंनवैस्त्रीणांवृकाणांहृदयंयथा ३६ स्त्रियोह्यकरुणाःक्रूरादुर्धर्षाःप्रियसाहसाः ॥ घ्नंत्यल्पार्थेपिविस्रब्धान्पतिंभ्रातरमप्युत ३७ विधायालीकविस्रंभमज्ञेषुत्यक्तसौहृदाः ॥ नवंनवमभीप्संत्यःपुंश्चल्यःस्वैरवृत्तयः ३८ संवत्सरांतेहिभवानेकरात्रंमयेश्वर ॥ वत्स्यस्यपत्यानिचतेभविष्यंत्यपराणिभोः ३९ अंतर्वत्नीमुपालक्ष्यदेवींसप्रययौपुरम् ॥ पुनस्तत्रगतोब्दांतउर्वशींवीरमातरम् ४०

चूर्णिका

इंद्रः एकदा उर्वशीं अपश्यन् सन् तां आनेतुं गंधर्वान् अचोदयत् २६ ते महारात्रे एत्य उर्वश्याः उरणौ जह्रुः २७ देवी तयोः पुत्रयोः आक्रंदितं श्रुत्वा शुशोच २८ २९ तदा राजा खड्गं गृहीत्वा नग्न एव अभ्यद्रवत् ३० गंधर्वाः तं दृष्ट्वा उरणौ विसृज्य दीप्तिं अकुर्वत मेषौ आदाय आयांतं नग्नं दृष्ट्वा सा अगच्छत् ततः भाषाभंगात् सा निर्जगाम ३१ राजापि शयने तां अदृष्ट्वा उन्मत्तवत् महीं बभ्राम ३२ बहुकालेन कुरुक्षेत्रे तां दृष्ट्वा उवाच ३३ अहोजाये तिष्ठ तिष्ठ मांत्यक्तुं नार्हसि ३४ हे देवि अयं देहः पतति त्वया दूरं हृतः अतः एनं वृकाद्याः खादंति ३५ ॥ उर्वश्युवाच ॥ हे राजन् त्वं पुरुषोसि धैर्यं आवह मा म्रियस्व स्त्रियः स्वभावतः क्रूराः तासां सख्यं क्वापि न ३६ वृकाणां हृदयं यथा याः अल्पार्थे पतिं भ्रातरं घ्नंति ३७ तासां सख्यं सत्यं न ३८ अथ संवत्सरांते एकरात्रं मया सह त्वं वत्स्यसि ते अपराणि अपत्यानि भविष्यंति ३९ ॥ श्रीशुकउवाच ॥ राजा तां अंतर्वत्नीं ज्ञात्वा पुरं ययौ पुनः अब्दांते कुरुक्षेत्रं गत्वा ४० ॥४३॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(उपधाव संस्तुहि) ४१ अनेनाग्निनाकर्मकृत्वा तद्वशादुर्वशींप्राप्स्यसीत्यभिप्रायेणाग्निस्थालीं ददुः । सतु तांस्थालीमेवोर्वशीं मन्यमानस्तया सहितोवनेविचरन् नेयमुर्वशीकिंत्वग्निस्थालीत्यबुध्य
त ४२ ततश्चतांस्थालींवनेस्थापयित्वागृहान्गत्वानिशिनित्यंतामेवाध्यायतस्तस्यमनसि त्रयीअवर्तत ।कर्मबोधकंवेदत्रयं प्रादुरभूत् ४३ ततःस्थालीस्थानंगतःसन् तत्रशम्यागर्भेजातमश्वत्थंविलक्ष्य अ
स्मिन्नसावग्निरस्तीतिविशेषेणलक्षयित्वा तेनाश्वत्थेनद्वेअरणीकृत्वा अग्निममंथेति शेषः । 'शमीगर्भादग्निममंथे' तिश्रुतेः । मथनप्रकारमाह । अधरारणिमुर्वशींध्यायन् उत्तरांचारणिमात्मानंध्यायन् उभ
॥४५॥ योररण्योर्मध्येयत्काष्ठंतत् प्रजननंप्रजासाधनंध्यायन् । तथाचमंत्रः । ' उर्वश्यामुरसिपुरूरवा ' इति ४५ तस्यतेनकृतान्निर्मथनाद्विभावसुरग्निर्जातः । कथंभूतः । जातंवेदोधनंभोग्यंयस्मात् सचत्रय्याविद्ययाविहितेनाधानसंस्कारेणत्रिवृत् आहवनीयादिरूपः सन् राज्ञापुरूरवसापुत्रत्वेकल्पितः पुण्यलोकप्रापकत्वात् ४६ तदाह तेनेति ४७ नन्वनादिवेदत्रयबोधितोब्राह्मणादीनामिंद्राद्यनेकदेवताय
जनेनस्वर्गप्राप्तिहेतुःकर्ममार्गः कथंसादिरिववर्ण्यतेतत्राह । एकएवेतिद्वाभ्याम् । पुराकृतयुगेसर्ववाङ्मयः सर्वासांवाचांबीजभूतः प्रणवएकएववेदः । देवश्चनारायणएकएव । अग्निश्चैकएव लौकिको
वर्णश्चैकएवहंसोनाम ४८ वेदत्रयीतुपुरूरवःसकाशादासीत् । एयिवान्प्राप ।अयंभावः कृतयुगेसत्वप्रधानाःप्रायशः सर्वेपिध्याननिष्ठाः । रजःप्रधानेतुत्रेतायुगवेदादिविभागेनकर्ममार्गःप्रगटोबभूवेति ४९
॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांऐलोपाख्यानेचतुर्दशोऽध्यायः १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः ४१/४९

उपलभ्यमुदायुक्तःसमुवासतयानिशम् ॥ अथैनमुर्वशीप्राहकृपणंविरहातुरम् ॥ गंधर्वानुपधावेमान्तुभ्यंदास्यंतिमामिति ४१ तस्यसंस्तुवतस्तुष्टाअ
ग्निस्थालींददुर्नृप ॥ उर्वशींमन्यमानस्तांसोऽबुध्यतचरन्वने ४२ स्थालींन्यस्यवनेगत्वागृहानाध्यायतोनिशि ॥ त्रेतायांसंप्रवृत्तायांमनसित्रय्यवर्तत ४३
स्थालीस्थानंगतोऽश्वत्थंशमीगर्भंविलक्ष्यसः ॥ तेनद्वेअरणीकृत्वाउर्वशीलोककाम्यया ४४ उर्वशींमंत्रतोध्यायन्नधरारणिमुत्तराम् ॥ आत्मानमुभयोर्मध्ये
यत्तत्प्रजननंप्रभुः ४५ तस्यनिर्मथनाज्जातोजातवेदाविभावसुः ॥ त्रय्यासविद्ययाराज्ञापुत्रत्वेकल्पितस्त्रिवृत् ४६ तेनायजतयज्ञेशंभगवंतमधोक्षजम् ॥
उर्वशीलोकमन्विच्छन्सर्वदेवमयंहरिम् ४७ एकएवपुरावेदःप्रणवःसर्ववाङ्मयः ॥ देवोनारायणोनान्यएकोग्निर्वर्णएवच ४८ पुरूरवसएवासीत्त्रयीत्रेतामु
खेनृप ॥ अग्निनाप्रजयाराजालोकंगांधर्वमेयिवान् ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेऐलोपाख्यानेचतुर्दशोऽध्यायः १४ ॥ ७ ॥

चूर्णिका

तया सह एकरात्रं रेमे उर्वशी तं प्राह त्वं गंधर्वान् उपधाव ते मां तुभ्यं दास्यंति सः तथा चक्रे गंधर्वाः तं अग्निस्थालीं ददुः सः तां उर्वशीं मत्वा वने वि
चरन् पश्चात् अग्निस्थाली इत्यबुद्ध्यत ४२ ततः तां स्थालीं वने न्यस्य गृहे गतः ततः त्रेतायां संप्रवृत्तायांमनसिवेद त्रयी अवर्तत ४३ पुनः राजा स्थालीस्थानं गत्वा तत्र श
मीगर्भं अश्वत्थं दृष्ट्वा तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ममंथ ४४ ४५ तस्मादग्निः उत्पन्नः सः राज्ञा पुत्रत्वे कल्पितः ४६ ततः उर्वशीलोकं इच्छन् ते ॥४४॥
न अग्निना हरिं अयजत् ४७ आदौ कृतयुगे प्रणवः एक एव वेदःएकएव देवः नारायणः एक एव अग्निश्च लौकिकः एक एव वर्णश्च हंसो नाम एक एव आसीत् ४८ हे
नृप त्रेतामुखे पुरूरवस एव वेदत्रयी आसीत् राजा अग्निना प्रजया गांधर्वं लोकं प्राप ४९ ॥ ॥ इति नवमे चतुर्दशः १४ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

ततःपंचदशेगाधिरैलपुत्रान्वयेजनिः ॥ यद्दौहित्रसुतोरामःकार्तवीर्यमहन्रुषा ॥ १ ॥ १ सुग्रहत्वायतावदायोर्वंशमनुक्त्वाऽल्पादिक्रमेणश्रुतायुःप्रभृतिषण्णांवंशानाह श्रुतायोरित्यादिना । एकएकसंज्ञः २ ३ जह्नोःपुरुःतस्यबलाकः । तस्याजकःतस्यकुशःतस्यकुशांबुप्रभृतयश्चत्वारःपुत्राःतत्रकुशांबुसुतोगाधिरासीत् ४ गाधेःपुत्रोविश्वामित्रोब्रह्मर्षिरभूदित्युत्तराध्यायांतेवक्ष्यति ‘गाधेरभून्महातेजा’ इत्यादिना तत्रतावत्तदुपोद्घातत्वेनभृगुवंशभवस्यऋचीकस्यचरितंप्रसक्तानुप्रसक्तत्वेनचपरशुरामावतारचरितंचाह तस्यसत्यवतीमित्यादिना । विसदृशंअननुरूपंभार्गवंऋचीकम् ५ दक्षिणवामयोरेकतएकत्रश्यामः कर्णोयेषांतेषाम् । सर्वस्मिन्नंगेचंद्रस्येववर्चोयेषांतेषाम् । नचेदमपिपर्याप्तमस्मत्कन्यायाः यतोवयंकुशिका महेच्छाः ६ ७ उभयैः पत्न्यैब्राह्मैर्मंत्रैः श्वश्र्वैतुक्षात्रैरित्यर्थः ८ यावत्स्नात्वामुनिर्नागतः तावत् भार्यायांभर्तृस्नेहाधिक्यात् तस्याश्चरुंश्रेष्ठंमत्वामात्रायाचितासासत्यवतीब्राह्ममंत्राभिमंत्रितंस्वचरुंमात्रेऽयच्छत्प्रादात् । मातुश्चरुंक्षात्रमंत्राभिमंत्रितंस्वयमदत्तआदत्त ९ कष्टंजुगुप्सितं तदेवाह । तेपुत्रोघोरोभविष्यति । भ्रातातुब्रह्मवित्तमोभविष्यतीति १०

श्लोकाः १/१०

॥ श्रीशुकवाच ॥ ऐलस्यचोर्वशीगर्भात्षडासन्नात्मजानृप ॥ आयुःश्रुतायुःसत्यायूरयोथविजयोजयः १ श्रुतायोर्वसुमान्पुत्रःसत्यायोश्चश्रुतंजयः ॥ २ यस्यसुतएकश्चजयस्यतनयोऽमितः २ भीमस्तुविजयस्याथकांचनोहोत्रकस्ततः ॥ तस्यजह्नुःसुतोगंगांगंडूषीकृत्ययोऽपिबत् ३ जह्नोःपुरुश्चतत्पुत्रोबलाकश्चात्मजोऽजकः ॥ ततःकुशःकुशस्यापिकुशांबुर्मूर्तयोवसुः ॥ कुशनाभश्चचत्वारोगाधिरासीत्कुशांबुजः ४ तस्यसत्यवतींकन्यामृचीकोऽयाचतद्विजः ॥ वरंविसदृशंमत्वागाधिर्भार्गवमब्रवीत् ५ एकतःश्यामकर्णानांहयानांचंद्रवर्चसाम् ॥ सहस्रंदीयतांशुल्कंकन्यायाःकुशिकावयम् ६ इत्युक्तस्तदथज्ञात्वा गतःसवरुणांतिकम् ॥ आनीयदत्त्वातानश्वानुपयेमेवराननाम् ७ सऋषिःप्रार्थितःपत्न्याश्वश्र्वाचापत्यकाम्यया ॥ श्रपयित्वोभयैर्मंत्रैश्चरुंस्नातुंगतोमुनिः ८ तावत्सत्यवतीमात्रास्वचरुंयाचितासती ॥ श्रेष्ठंमत्वातथाऽयच्छन्मात्रेमातुरदत्स्वयम् ९ तद्विज्ञायमुनिःप्राहपत्नींकष्टमकार्षीः ॥ घोरोदंडधरःपुत्रो भ्रातातेब्रह्मवित्तमः १०

चूर्णिका

श्रीशुक उवाच ॥ ऐलस्य ऊर्वशीगर्भात् षट् पुत्रा आसन् आयुः प्रथमःश्रुतायुः द्वितीयः सत्यायुः तृतीयः रयः चतुर्थः विजयः पंचमः जयः षष्ठः इति १ तत्र श्रुतायोः वसुमान् पुत्रः सत्यायोः श्रुतंजयः रयस्य एकसंज्ञः जयस्य अमितः २ विजयस्य भीमः ततः कांचनः ततः होत्रकः तस्य जन्हुः यः गंगां गंडूषीकृत्य अपिबत् तस्य पूरुः तस्य बलाकः तस्य अजकः ३ तस्य कुशः तस्य पुत्राः चत्वारः कुशांबुः प्रथम मूर्तरयः द्वितीयःवसुः तृतीयः कुशनाभः चतुर्थः इति कुशांबोः गाधिः ४ तस्य सत्यवती कन्या अभूत् तां ऋचीकः अयाचत गाधिः विसदृशंवर मत्वा भार्गवं ऋचीकं अब्रवीत् ५ हे ऋचे एकतः श्यामकर्णानां हयानां सहस्रं शुल्कं दीयताम् इदमपि मे कन्यायाः पर्याप्तं न ६ एवमुक्तः ऋषिः तन्मतं ज्ञात्वा वरुणात् अश्वान् आनीय गाधये दत्त्वा सत्यवतीमुपयेमे ७ ऋचीकः पत्न्या श्वश्र्वा च अपत्यकामनया प्रार्थितः सन् उभयमंत्रैः चरुं श्रपयित्वा स्नातुं गतः ८ यावत्स्नात्वा सः नागतः तावत्सत्यवतीमात्रा स्वचरुं याचिता सती श्रेष्ठं मत्वा तथामात्रे अयच्छत् मातुरदत्स्वयम् ९ मुनिः तद्विज्ञाय पत्नीमाह तव पुत्रः दंडधरो भविष्यति तव भ्राता ब्रह्मवित्तमः भवेत् १०

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवंमाभूदितिप्रसादितोभार्गवआह । अथतर्हिंपौत्रोघोरोभविष्यतीति । ततऋचीकाज्जमदग्निःपुत्रोऽभवदित्यर्थः ११ साचसत्यवतीकौशिकीनदीअभूत् १२ भार्गवऋषेर्जमदग्नेःसुताः १३ १४ अनी
नशत् नाशयामास । तदेवाह रजस्तमोवृतमिति । पाठांतरंतुसुगमम् १५ अभीक्ष्णशःएकविंशतिवारम् १६ कार्तवीर्यार्जुनेनकृतमपराधंवक्तुंतस्यदर्पहेतुमैश्वर्यादिकमाह हैहयानामितिषड्भिः । परि
टीका कर्मभिःपरिचर्याभिः दत्तंदत्तात्रेयंआराध्य १७ अव्याहतमिंद्रियादिकंचलेभे (ओजःप्राणशक्तिःश्रीःसंपत्वीर्यंपराक्रमः) १८ यत्रयस्मिन्नैश्वर्येअणिमादयोगुणाः १९ रेवांभसिनर्मदाजलेसरितंनर्म
दाम् २० रावणोदिग्विजयेमाहिष्मत्याः समीपेनर्मदायांदेवपूजांकुर्वन् तेनप्रवाहस्यावरोधात् प्रतिस्रोतसःसत्यास्तस्याः सरितोजलैर्विप्लावितंस्वशिबिरमालक्ष्य तस्यतद्वीर्यंनसेहे २१ ततश्चकृत
किल्बिषःक्रीडंतमभिभवितुंप्रवृत्तःसन् गृहीतः माहिष्मत्यांस्वपुर्यांकपिरिवसन्निरुद्धश्चपुनश्चावज्ञयायेनमर्कटइवस्वनगरान्मुक्तः २२ इदानींतत्कृतमपराधंदर्शयन्नाहसएकदेत्यादिना २३

 प्रसादितःसत्यवत्यामैवंभूदितिभार्गवः ॥ अथतर्हिंभवेत्पौत्रोजमदग्निस्ततोऽभवत् ११ साचाभूत्सुमहापुण्याकौशिकीलोकपावनी ॥ रेणोःसुतांरेणुकां श्लोकाः
वैजमदग्निरुवाहयाम् १२ तस्यांवैभार्गवऋषेःसुतावसुमदादयः ॥ यवीयान्जज्ञएतेषांरामइत्यभिविश्रुतः १३ यमाहुर्वासुदेवांशंहैहयानांकुलांतकम् ॥
त्रिःसप्तकृत्वोयइमांचक्रेनिःक्षत्रियांमहीम् १४ दुष्टंक्षत्रंभुवोभारमब्रह्मण्यमधार्मिकम् ॥ रजस्तमोवृतमहन्फल्गुन्यपिकृतेंऽहसि १५ ॥ राजोवाच ॥ ११/२३
किंतदंहोभगवतोराजन्यैरकृतात्मभिः ॥ कृतंयेनकुलंनष्टंक्षत्रियाणामभीक्ष्णशः १६ ॥ श्रीशुकउवाच ॥ हैहयानामधिपतिरर्जुनःक्षत्रियर्षभः ॥ दत्तंनारा
यणस्यांशमाराध्यपरिकर्मभिः १७ बाहून्दशशतंलेभेदुर्धर्षत्वमरातिषु ॥ अव्याहतेंद्रियौजःश्रीस्तेजोवीर्ययशोबलम् १८ योगेश्वरत्वमैश्वर्यंगुणायत्राणि
मादयः ॥ चचाराव्याहतगतिर्लोकेषुपवनोयथा १९ स्त्रीरत्नैरावृतःक्रीडन्रेवांभसिमदोत्कटः ॥ वैजयंतींस्रजंबिभ्रद्रुरोधसरितंभुजैः २० विप्लावितंस्व
शिबिरंप्रतिस्रोतःसरिज्जलैः ॥ नामृष्यत्तस्यतद्वीर्यंवीरमानीदशाननः २१ गृहीतोलीलयास्त्रीणांसमक्षंकृतकिल्बिषः ॥ माहिष्मत्यांसन्निरुद्धोमुक्तोये
नकपिर्यथा २२ सएकदातुमृगयांविचरन्विपिनेवने ॥ यदृच्छयाश्रमपदंजमदग्नेरुपाविशत् २३

चूर्णिका ततः एवं माभूदिति सत्यवत्या प्रार्थितः ऋषिःआह एवं चेत्तर्हिं पौत्रो घोरो भविष्यति ततः ऋचीकात् जमदग्निः अभूत् ११ सत्यवती कौशिकी नाम नदी अभूत्
जमदग्निः रेणोः सुतां रेणुकां उवाह १२तस्यां वसुमदादयः पुत्राः अभवन् तेषां कनीयान् वासुदेवांशः रामः जज्ञे १४ यः एकविंशतिवारं महीं निःक्षत्रियां चक्रे
१४ किंच क्षत्रेण फल्गुन्यपि अंहसि कृते दुष्टक्षत्रं नाशयामास १५ ॥ राजोवाच ॥ राजन्यैः तस्य अंहः किं कृतं येन क्षत्रियाणां कुलं नष्टं १६ ॥ श्रीशुक
उवाच हे नृप हैहयानामाधिपः अर्जुनः दत्तात्रेयं आराध्य १७ बाहूनां सहस्रं शत्रुषु दुर्धर्षत्वं योगेश्वरत्वं अणिमाद्यैश्वर्यं च लेभे १८ १९ सः अव्याहतगतिः चचार
यदा सः स्त्रीभिः सह रेवांभसि क्रीडन् सन् भुजैः नदीं रुरोध २० तदा रावणोपि दिग्विजयं कृत्वा तत्तीरेअर्चां कुर्वन् जलैः प्लावितं स्वशिबिरं आलक्ष्य तद्वीर्यं न
सेहे २१ क्रीडंतं तमभिभवितुं प्रवृत्तः तदा स्त्रीणां समक्षं रावणं धृत्वा माहिष्मत्यां निरुद्धः पुनः अवज्ञया मुक्तः २२ अथ एकदार्जुनः मृगयां विचरन्
जमदग्नेः आश्रमं अगमत् २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ...ातिथ्यादि ... हविष्मत्या कामधेन्वा २४ तत्अर्हणंनाद्रियत तस्मिन्नातुष्यत् यतोऽग्निहोत्र्यां होमधेनौ साभिलाषः । सहैहयः हैहयैः सह वर्तमानः २५ दर्पाद्धेतोः ऋषेर्हविधानींअग्निहो त्रधेनुंहर्तुनरानचोदयत् प्रेरितवान् २६ (आहतश्चरणादिनाताडितः) २७ सतूणंकार्मुकंचर्मचादाय २८ ऐणेयचर्म कृष्णाजिनमंबरंयस्यतम् (अर्कधामभिःरविकिरणनिभाभिर्जटाभिर्युतम्) २९ (हस्त्यादिभिर्गदादिभिश्चातिभीषाणाभयंकरीः असूदयत् निहतवान्) ३० प्रहरन् परश्वधो यस्य । मनश्च अनिलश्चतयोरिवौजोवीर्यंयस्य । परेषांचक्रंसैन्यंसूदयतीतितथा । छिन्नाभुजाऊरवः कंध राश्चयेषां हताः सूतावाहनानिचयेषांतेवीरानिपेतुः ३१ विवृक्णावर्मादयोयस्य ३२ पंचशतेषु धनुःषु सोऽर्जुनःरामायसंदधे । एकमेवधनुर्यस्यसएकधन्वा । पाठांतरेएकएवबंधःसंधानंयेषांतैःइषुभिः तानिधनूंषिसमंसहतत्क्षणमेवाच्छिनत् ३३ मृधे साधनभूतान् अचलान् अंघ्रिपांश्चोत्क्षिप्य अभिधावतस्तस्यभुजान् चिच्छेद । अहेः (भुजान्) फणानिव ३४ ३५ समर्पयत् समापर्यत् ३६

॥४७॥ तस्मैसनरदेवायमुनिरर्हणमाहरत् ॥ ससैन्यामात्यवाहायहविष्मत्यातपोधनः २४ सवीरस्तत्रतंदृष्ट्वाआत्मैश्वर्यातिशायिनम् ॥ तन्नाद्रियताग्निहोत्र्यांसा भिलाषःसहैहयः २५ हविर्धानीमृषेर्दर्पान्नरान्हर्तुमचोदयत् ॥ तेचमाहिष्मतींनिन्युःसवत्सांक्रंदतींबलात् २६ अथराजनिनिर्यातेरामआश्रममागतः ॥ श्रुत्वातत्तस्यदौरात्म्यंचुक्रोधाहिरिवाहतः २७ घोरमादायपरशुंसतूणंचर्मकार्मुकम् ॥ अन्वधावतदुर्मर्षोमृगेंद्रइवयूथपम् २८ तमापतंतंभृगुवर्यमोजसाध नुर्धरंबाणपरश्वधायुधम् ॥ ऐणेयचर्मांबरमर्कधामभिर्युतंजटाभिर्ददृशेपुरींविशन् २९ अचोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः ॥ अक्षौहिणीःसप्तदशातिभीषणास्तारामएकोभगवानसूदयत् ३० यतोयतोऽसौप्रहरत्परश्वधोमनोऽनिलौजाःपरचक्रसूदनः ॥ ततस्ततश्छिन्नभुजोरुकंधरा निपेतुरुर्व्यांहतसूतवाहनाः ३१ दृष्ट्वास्वसैन्यंरुधिरौघकर्दमेरणाजिरेरामकुठारसायकैः ॥ विवृक्णवर्मध्वजचापविग्रहंनिपातितंहैहयआपतद्रुषा ३२ अ थार्जुनःपंचशतेषुबाहुभिर्धनुःषुबाणान्युगपत्ससंदधे ॥ रामायरामोऽस्त्रभृतांसमग्रणीस्तान्येकधन्वेषुभिराच्छिनत्समम् ३३ पुनःस्वहस्तैरचलान्मृधेऽङ्घ्रि पानुक्षिप्यवेगादभिधावतोयुधि ॥ भुजान्कुठारेणकठोरनेमिनाचिच्छेदरामःप्रसभंत्वहेरिव ३४ कृत्तबाहोःशिरस्तस्यगिरेःशृंगमिवाहरत् ॥ हतेपितरित त्पुत्राअयुतंदुद्रुवुर्भयात् ३५ अग्निहोत्रीमुपावर्त्यसवत्सांपरवीरहा ॥ समुपेत्याश्रमंपित्रेपरिक्लिष्टांसमर्पयत् ३६ ॥४७॥

श्लोकाः २४/३६

चूर्णिका जमदग्निःकामधेन्वा ससैन्यस्य तस्य आतिथ्यं चक्रे २४ राजा आत्मैश्वर्यादाधिकं कामधेनोः सामर्थ्यं दृष्ट्वा तदर्हणं नाद्रियत यतः धेन्वां साभिलाषः २५ ततः अर्जुनेन चोदिताः दूताः सवत्सां क्रंदंतीं धेनुं बलात् माहिष्मतीं निन्युः २६ अथ राजनि गते सति रामः आश्रमं एत्य तस्य तत् दौरात्म्यं श्रुत्वा अहिरिव चुक्रोध २७ ततः घोरं परशुं सतूणं चापं चर्म च आदाय अर्जुनं अन्वधावत् २८ राजा आपतंतं रामं वीक्ष्य सप्तदश अक्षौहिणीः सेनाः अचोदयत् २९ ताः भगवान् रामः एक एव असूदयत् ३० ३१ अर्जुनः स्वसैन्यं हतं दृष्ट्वा ३२ स्वयं पंचशतेषु धनुष्षु बाणान् युगपत्संदधे तदा रामः इषुभिः तानि धनूंषि चिच्छेद ३३ पुनः अर्जुनः स्वहस्तैः मृधे अचलान् वृक्षांश्च उत्क्षिप्य वेगेन रामंअधावत ततोरामः कुठारेण तद्भुजान् शिरश्च चिच्छेद ३४ सहस्रार्जुने मृते सति अयुतं तत्पुत्राः भयात् दुद्रुवुः ३५ रामः सवत्सां धेनुं गृहीत्वा आश्रमं एत्य पित्रे तां दत्त्वा ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१५॥

३७ ३८ अर्हणताम् । पूज्यतां (लोकगुरुर्ब्रह्मा) ३९ (ब्राह्मीलक्ष्मीःब्राह्मणस्यश्रीः) सौरीसूर्यस्यप्रभेव ४० तीर्थसंसेवया चकारात् यमनियमैश्च । अच्युतेचेतनाचित्तंयस्यसः ४१ ॥ ॥ इतिश्री भागवतेमहापुराणेनवमस्कंधेटीकायांपंचदशोऽध्यायः ॥ १५ ॥ ॥ ७ ॥ ॥ षोडशेथार्जुनसुतैर्जमदग्नौहतेमुहुः । रामात्क्षत्रवधःप्रोक्तोविश्वामित्रस्यचान्वयः ॥ १ ॥ १ २ किंचित् ईषत् चित्ररथेगंधर्वराजेस्पृहायस्याःसा किंचिन्नसस्मारेतिवा ३ कलशंपुरोधाय अग्रेनिधाय ४ व्यभिचारंमानसंज्ञात्वा ५ आज्ञातिलंघिनांभ्रातॄणांमातुश्चवधेसंचोदितःसन्मुनेर्यः समाधिस्तपश्चतयोः प्रभावज्ञः यदि नहन्यां तर्हिमामपिशप्तुंसमर्थः यदि हन्यांतर्हि मयिसंतुष्टःसन् तानपिजीवयितुंसमर्थइतिजानन्नित्यर्थः ६ ७ नन्वतिनिंदितंतत्कथंकृतवान् तत्राह । पितुर्विद्वानिति पूर्वोक्तएवाभिप्रायः ८

॥४८॥ श्लोकाः ३७/८

स्वकर्मतत्कृतंरामःपित्रेभ्रातृभ्यएवच ॥ वर्णयामासतच्छ्रुत्वाजमदग्निरभाषत ३७ रामरामहाबाहोभवान्पापमकारषीत् ॥ अवधीन्नरदेवंयत्सर्वदेवमयं वृथा ३८ वयंहिब्राह्मणास्तातक्षमयाऽर्हणतांगताः ॥ ययालोकगुरुर्देवःपारमेष्ठ्यमियात्पदम् ३९ क्षमयारोचतेलक्ष्मीर्ब्राह्मीसौरीयथाप्रभा ॥ क्षमिणा माशुभगवांस्तुष्यतेहरिरीश्वरः ४० राज्ञोमूर्धाभिषिक्तस्यवधोब्रह्मवधाद्गुरुः ॥ तीर्थसंसेवयाचांहोजह्यंगाच्युतचेतनः ४१ ॥ इतिश्रीभागवतेमहापुराणे नवमस्कंधेहैहयार्जुनवधोनामपंचदशोध्यायः १५ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ पित्रोपाशिक्षितोरामस्तथेतिकुरुनंदन ॥ संवत्सरंतीर्थचर्यांचरित्वाश्रममाव्रजत् १ कदाचिद्रेणुकायातागंगायांपद्ममालिनम् ॥ गंधर्वराजंक्रीडंतमप्सरोभिरपश्यत २ विलोकयंतीक्रीडंतमुदकार्थंनदींगता ॥ होमवेलांनसस्मारकिंचिच्चित्ररथस्पृहा ३ कालात्ययंतंविलोक्यमुनेःशापविशंकिता ॥ आगत्यकलशंतस्थौपुरोधायकृतांजलिः ४ व्यभिचारंमुनिर्ज्ञात्वापत्न्याःप्रकुपितोऽब्रवीत् ॥ घ्नतैनांपुत्रकाःपापामित्युक्तास्तेनचक्रिरे ५ रामःसंचोदितःपित्राभ्रातॄन्मात्रासहावधीत् ॥ प्रभावज्ञोमुनेःसम्यक्समाधेस्तपसश्चसः ६ वरेणच्छंदयामास प्रीतःसत्यवतीसुतः ॥ वव्रेहतानांरामोपिजीवितंचास्मृतिंवधे ७ उत्तस्थुस्तेकुशलिनोनिद्रापायइवांजसा ॥ पितुर्विद्वांस्तपोवीर्यंरामश्चक्रेसुहृद्वधम् ८

चूर्णिका

कृतं कर्म कथयामास तदा जमदग्निः अभाषत ३७ भवान् पापं अकार्षीत् सर्वदेवमयं राजानं वृथा अवधीत् ३८ वयं ब्राह्मणाः क्षमया पूज्यतां गताः ३९ क्षमिणां भगवान् आशु तुष्यति ४० मूर्धाभिषिक्तस्य राज्ञः वधः ब्रह्मवधादपि महान् अतः त्वं अच्युते चित्तं निधाय तीर्थसंसेवया अघं जहि ४१ ॥ ॥ इति नवमे पंचदशः ॥ १५ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ ॥ रामः पित्राज्ञया संवत्सरं तीर्थयात्रां चरित्वा आश्रमं आव्रजत् १ कदाचित् रेणुका जलार्थं गंगां गता तत्र अप्सरोभिः क्रीडंतं चित्ररथं दृष्ट्वा किंचित् गंधर्वे स्पृहावती सती होमवेलां न सस्मार २ ३ ततः कालात्ययं ज्ञात्वा मुनेः शापशंकिता सती तं आगत्य कलशं अग्रे निधाय कृतांजलिः तस्थौ ४ तदा मुनिः तस्याः मानसं व्यभिचारं ज्ञात्वा कुपितः सन् आह हे पुत्रकाः पापां एनां घ्नत एवमुक्तास्ते वधं न चक्रुः ५ तदा रामः मुनेः प्रभावज्ञः पित्रा संचोदितः सन् मात्रा सह भ्रातॄन् अवधीत् ६ तदा प्रसन्नः जमदग्निः वरेण छंदयामास रामोपि निहतानां जीवितं वधे अस्मृतिं च वव्रे ७ तदा ते निद्रापाये इव कुशलिनः उत्तस्थुः रामः पितुः तपोवीर्यं विद्वान् सुहृद्वधं चक्रे ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.न. सर्वक्षत्रियवधेकारणंवक्तुमाह । येर्जुनस्यसुताइत्यादिना ९ १० भगवत्यावेशिताधीर्येनतम् ११ १२ १३ १४ दुःखादीनांवेगेनविमोहितः (तत्ररोषःक्रोधः । अमर्षोऽसहनता आर्तिःपीडा । शो अ०
कः संतापः) १५ १६ ब्रह्मघ्नैर्विहताश्रीर्यस्यास्तां । हेराजन् सरामस्तेषांशीर्षभिर्माहिष्मत्यांमध्येमहांतंगिरिंचक्रे १७ तेषांरक्तेनअब्रह्मण्यानांभयावहांघोरांनदींचचक्रे । तथापिसर्वक्षत्रियवधेकिंकारणंत
दाह । हेतुंकृत्वेतिसार्धेन अमंगलकारिणिअन्यायवर्तिनिसति १८ त्रिःसप्तकृत्वोरेणुकयादुःखावेशादुदरताडनंकृतंततोरामस्तावत्कृत्वःक्षत्रमुत्सादितवानितिप्रसिद्धिः (स्यमंतपंचकाख्येक्षेत्रे) १९
टीका (पितुः शिरः कायेनसंधायबर्हिषिअग्नौआधाय आहिताग्निर्भूत्वेत्यर्थः बर्हिःकुशहुताशयोरित्यभिधानम्) २० २१ २२ २३ ॥१६॥

॥४९॥ येर्जुनस्यसुताराजन्स्मरंतःस्वपितुर्वधम् ॥ रामवीर्यपराभूतालेभिरेशर्मनक्वचित् ९ एकदाश्रमतोरामेसभ्रातरिवनंगते ॥ वैरंसिसाधयिषवोलब्धच्छिद्रा श्लोकाः
उपागमन् १० दृष्ट्वाग्न्यगारआसीनमावेशितधियंमुनिम् ॥ भगवत्युत्तमश्लोकेजघ्नुस्तेपापनिश्चयाः ११ याच्यमानाःकृपणयाराममात्राऽतिदारुणाः ॥ प्र
सह्यशिरउत्कृत्यनिन्युस्तेक्षत्रबंधवः १२ रेणुकादुःखशोकार्तानिघ्नंत्यात्मानमात्मना ॥ रामरामेहितातेतिविचुक्रोशोच्चकैःसती १३ तदुपश्रुत्यदूरस्थोहारा ९
मेत्यार्तवत्स्वनम् ॥ त्वरयाश्रममासाद्यददृशेपितरंहतम् १४ तद्दुःखरोषामर्षार्तिशोकवेगविमोहितः ॥ हातातसाधोधर्मिष्ठत्यक्त्वास्मान्स्वर्गतोभवान् १५ २३
विलप्यैवंपितुर्देहंनिधायभ्रातृषुस्वयम् ॥ प्रगृह्यपरशुंरामःक्षत्रांतायमनोदधे १६ गत्वामाहिष्मतींरामोब्रह्मघ्नविहतश्रियम् ॥ तस्यांसशीर्षभीराज्ञांमध्ये
चक्रेमहागिरिम् १७ तद्रक्तेननदींघोरामब्रह्मण्यभयावहाम् ॥ हेतुंकृत्वापितृवधंक्षत्रेऽमंगलकारिणि १८ त्रिःसप्तकृत्वःपृथिवींकृत्वानिःक्षत्रियांप्रभुः ॥
स्यमंतपंचकेचक्रेशोणितोदान्ह्रदान्नव १९ पितुःकायेनसंधायशिरआधायबर्हिषि॥ सर्वदेवमयंदेवमात्मानमयजन्मखैः २० ददौप्राचींदिशंहोत्रेब्रह्मणेदक्षि
णांदिशम् ॥ अध्वर्यवेप्रतीचींवैउद्गात्रेउत्तरांदिशम् २१ अन्येभ्योऽवांतरदिशःकश्यपायचमध्यतः ॥ आर्यावर्तमुपद्रष्ट्रेसदस्येभ्यस्ततःपरम् २२ ततश्चा
वभृथस्नानावधूताशेषकिल्बिषः ॥ सरस्वत्यांब्रह्मनद्यांरेजेव्यभ्रइवांशुमान् २३

चूर्णिका अथ ये अर्जुनस्य दश सहस्रं पुत्राः पितुर्वधं स्मरंतः शर्म न लेभिरे ९ एकदा आश्रमतो रामे वनं गते सति वैरं साधयंतः संतः आश्रमं एत्य १० होमशा
लायां समाधिस्थं मुनिं दृष्ट्वा जघ्नुः ११ तदा राममात्रा याच्यमाना अपि शिर उत्कृत्य निन्युः १२ तदा शोकार्ता रेणुका रामरामेति चुक्रोश १३ रामः तत् श्रु
त्वा आश्रमं एत्य पितरं हतं ददृशे १४ तदा शोकमोहितः रामः किंचिद्विलप्य पितुर्देहं भ्रातृषु निधाय परशुं गृहीत्वा क्षत्रांताय मनो दधे १५ १६ ततः माहि
ष्मतीं पुरीं गत्वा तेषां शीर्षभिः महागिरिं चक्रे १७ तद्रक्तेन घोरां नदीं चक्रे पितृवधं हेतुं कृत्वा १८ एकविंशतिवारंनिःक्षत्रां पृथ्वीं कृत्वा स्यमंतपंचके शोणितो ॥४९॥
दान् नव ह्रदान् चक्रे १९ शिरः आदाय पितुः काये निधाय सर्वदेवमयं आत्मानं मखैः अयजत् २० तदा होत्रे प्राचीं ददौ ब्रह्मणे दक्षिणां अध्वर्यवे प्रतीचीं
उद्गात्रे उत्तराम् २१ अन्येभ्यो विदिशः कश्यपाय मध्यमां उपद्रष्ट्रे आर्यावर्तं ददौ २२ ततः सरस्वत्यां अवभृथस्नानेन गतपापः सन् अंशुमानिव रेजे २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

संज्ञानंस्मृतिः (ज्योतिर्वा) तदेवलक्षणंचिह्नंयस्यतंस्वदेहंलब्ध्वा सऋषीणांमंडलेसप्तमऋषिरभूत् २४ बृहद्ब्रह्मवेदम् । वेदप्रवर्तकेषुसप्तर्षिष्वेकतमोभविष्यतीत्यर्थः २५ २६ भुवोभारंअहन् । भारमे वाह नृपानिति २७ तदेवंप्रसक्तानुप्रसक्तंसमाप्य प्रस्तुतमाह गाधेरिति महातेजाविश्वामित्रः २८ एकशतंएकोत्तरशतं वेसर्वेलिंगसमवायन्यायेनप्राणभृतउपदधातीतिवन्मधुच्छंदसएवोच्यंतेतथाचश्रु तिः " तस्यहविश्वामित्रस्यैकशतंपुत्राआसुः पंचाशदेवज्यायांसोमधुच्छंदसः पंचाशत्कनीयांस" इत्यादि तत्रचविश्वामित्रपुत्रेषुभार्गवस्याजीगर्तस्यदेवरातस्यज्येष्ठत्वमवगम्यते । तथा आश्वलायनबौ धायनादिभिःकौशिकानांदेवरातप्रवरत्वमुक्तं । प्रवरश्चतस्मिन्नेववंशेअवांतरभेदः नतुवंशांतरं । तथाचस्मृतिः । "एकएवऋषिर्यावत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वंविनाभृग्वंगिरोगणादि"ति २९ त त्कुतोभृगुवंशभवस्यदेवरातस्यकौशिकप्रवरत्वमित्याशंक्य तदुपपादयन्नाह । पुत्रंकृत्वेत्यादियावत्समाप्ति । पूर्वमजीगर्तसुतत्वेमध्यमत्वेनपितृभ्यांममतांविहायविक्रीतत्वात् तस्यकृपयासुतानाह ज्ये ष्ठएषःप्रकल्प्यतामिति ३० एतदेवस्पष्टयितुंविशिनष्टि यइतिद्वाभ्यां मुमुचेअमुच्यत ३१ भार्गवोपिगाधिषुगाधेर्वंशजेषुदेवरातइतिख्यातः ३२ तत्तस्यज्येष्ठत्वंकुशलंनमेनिरे । मध्यमत्वस्यानर्थावहत्वं दृष्ट्वानांगीकृतवंतः । मुनिर्विश्वामित्रः ३३ पंचाशताकनिष्ठैःसाकंसमध्यमोमधुच्छंदाउवाच । नोऽस्माकंयत्ज्येष्ठत्वंकनिष्ठत्वंवाभवान् पितासंजानीतेतस्मिन्वयंतिष्ठामेति ३४

॥५०॥

श्लोकाः २४/३४

स्वदेहंजमदग्निस्तुलब्ध्वासंज्ञानलक्षणम् ॥ ऋषीणांमंडलेसोऽभूत्सप्तमोरामपूजितः २४ जामदग्न्योपिभगवान्रामःकमललोचनः ॥ आगामिन्यं तरेराजन्वर्तयिष्यतिवैबृहत् २५ आस्तेद्यापिमहेंद्राद्रौन्यस्तदंडःप्रशांतधीः ॥ उपगीयमानचरितःसिद्धगंधर्वचारणैः २६ एवंभृगुषुविश्वात्माभ गवान्हरिरीश्वरः ॥ अवतीर्यपरंभावंभुवोऽहन्बहुशोनृपान् २७ गाधेरभून्महातेजाःसमिद्धइवपावकः ॥ तपसाक्षात्रमुत्सृज्ययोलेभेब्रह्मवर्चसम् २८ वि श्वामित्रस्यचैवासन्पुत्राएकशतंनृप ॥ मध्यमस्तुमधुच्छंदामधुच्छंदसएवते २९ पुत्रंकृत्वाशुनःशेपंदेवरातंचभार्गवम् ॥ आजीगर्तंसुतानाहज्येष्ठएषप्र कल्प्यताम् ३० योवैहरिश्चंद्रमखेविक्रीतःपुरुषःपशुः ॥ स्तुत्वादेवान्प्रजेशादीन्मुमुचेपाशबंधनात् ३१ योरातोदेवयजनेदेवैर्गाधिषुतापसः ॥ देव रातइतिख्यातःशुनःशेपस्तुभार्गवः ३२ येमधुच्छंदसोज्येष्ठाःकुशलंमेनिरेनतत् ॥ अशपत्तान्मुनिःक्रुद्धोम्लेच्छाभवतदुर्जनाः ३३ सहोवाचमधुच्छंदाः सार्धंपंचाशताततः ॥ यन्नोभवान्संजानीतेतस्मिंस्तिष्ठामहेवयम् ३४

चूर्णिका

जमदग्निःदेहं लब्ध्वा ऋषीणां मंडले रामपूजितः सप्तमः अभवत् २४ रामोपि आगामिनि मन्वंतरे वेदप्रवर्तको भविष्यति २५ अद्यापि सिद्धगंधर्वचारणैः गीयमा नचरितः आस्ते २६ एवं श्रीहरिः भृगुषु अवतीर्य भुवः भारं अहरत् २७ अथ गाधेः महातेजाः विश्वामित्रोऽभूत् यः तपसा क्षत्रं हित्वा ब्रह्मवर्चसं लेभे २८ यस्य एकशतं पुत्राः आसन् २९ अन्यश्च यो वै हरिश्चंद्रमखे देवैः संरक्षितः तं शुनःशेपं विश्वामित्रः पुत्रत्वेन स्वीकृत्य सुतानाह अयं ज्येष्ठत्वे प्रकल्प्यताम् ३० ३१ ३२ ये ज्येष्ठाः पञ्चाशत् ते न मेनिरे क्रुद्धः मुनिः म्लेच्छा भवत इति तान् अशपत् ३३ ततः कनिष्ठान् पञ्चाशतः आह अयं ज्येष्ठः कल्पताम् ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१६॥

एवमुक्का मंत्रदृशं"कस्यनूनंकतमस्यामृतानामि"त्यादिमंत्राणांद्रष्टारंशुनःशेपंज्येष्ठंचक्रुः । कथंचक्रुस्तदाह । वयंसर्वेत्वामन्वंचःस्महि । अनुगंतारः कनिष्ठाःस्मेत्यर्थः । ततःप्रसन्नोविश्वामित्रः तान्सुता
नाह । वीरवंतःपुत्रवंतोभविष्यथ । येयूयंमेमानंपूज्यतांअनुगृह्णंतःअनुवर्तमानाःसंतःमांवीरवंतंपुत्रवंतंअकर्त कृतवंतइत्यर्थः ३५ हेकुशिकाएषदेवरातः वःयुष्मदीयःकौशिकएव । यतोवीरः मत्पुत्रःतमे
वअन्वितअनुगच्छत । अन्येचाष्टकादयःतस्यसुताआसन् ३६ उपसंहरति एवमिति । एकेशप्ताएकेऽनुगृहीताअन्यस्तुपुत्रत्वेनस्वीकृतइत्येवंकौशिकगोत्रंपृथग्विधंनानाप्रकारंजातम् । तच्चप्रवरांतरमापन्नं
प्राप्तंहियस्मात् एवंदेवरातज्येष्ठ्येनतत्प्रकल्पितम् ॥ ३७ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांषोडशोऽध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ आयोः सप्तदशेत्वैलज्येष्ठपुत्रस्यपं
चसु । सुतेषुक्षत्रवृद्धादिचतुर्णांवंशवर्णनम् ॥ १ ॥ इहकृष्णावतारप्रस्तावायवंशानुक्रमणमैलादिक्रमेणप्रक्रांतमिति यस्यवंशेकृष्णावतारस्तस्यवंशोऽतिविततत्वादंतेनिरूप्यते । अतः पुरूरवसः पुत्रा
णांपंचानांकनिष्ठानांवंशानुक्त्वेदानींप्रथमस्यवंशमाह । यइति एवंनहुषययातियदुप्रभृतिष्वपिद्रष्टव्यंक्षत्रवृद्धः क्षत्रवृद्धाख्यः १ (वीर्यवान् पराक्रमी) २ ३ दीर्घतमसः पिता (दैर्घतमसोदीर्घतमसो
ऽपत्यम्) ४ स्मृतमात्रएवार्तिरोगदुःखंनाशयतीतितथा (तस्यधन्वंतरेःपुत्रः) ५. ततः प्रतर्दनादिशब्दवाच्यात् द्युमतः सकाशात् अलर्कादयः ६ ७

॥५१॥ श्लोकाः ३५/७

ज्येष्ठंमंत्रदृशंचक्रुस्त्वामन्वंचोवयंस्महि ॥ विश्वामित्रःसुतानाहवीरवंतोभविष्यथ ॥ येमानंमेऽनुगृह्णंतोवीरवंतमकर्तमाम् ३५ एषवःकुशिकावीरोदेवरात
स्तमन्वित ॥ अन्येचाष्टकहारीतजयक्रतुमदादयः ३६ एवंकौशिकगोत्रंतुविश्वामित्रैःपृथग्विधम् ॥ प्रवरांतरमापन्नंतद्धिचैवंविकल्पितम् ३७ ॥ इतिश्री
भागवतेमहापुराणेनवमस्कंधेषोडशोऽध्यायः१६॥ ॥ श्रीशुकउवाच ॥ यःपुरूरवसःपुत्रआयुस्तस्याभवन्सुताः ॥ नहुषःक्षत्रवृद्धश्चरजीरंभश्चवीर्यवान् १
अनेनाइतिराजेंद्रक्षत्रवृद्धान्वयंशृणु ॥ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्मजास्त्रयः २ काश्यःकुशोगृत्समदइतिगृत्समदादभूत् ॥ शुनकःशौनकोयस्यबह्वृचप्रव
रोमुनिः ३ काश्यस्यकाशिस्तत्पुत्रोराष्ट्रोदीर्घतमःपिता ॥ धन्वंतरिर्दैर्घतमआयुर्वेदप्रवर्तकः ४ यज्ञभुग्वासुदेवांशःस्मृतमात्रार्तिनाशनः ॥ तत्पुत्रःकेतुमा
नस्यजज्ञेभीमरथस्ततः ५ दिवोदासोद्युमांस्तस्मात्प्रतर्दनइतिस्मृतः ॥ सएवशत्रुजिद्वत्सऋतुध्वजइतीरितः ॥ तथाकुवलयाश्वेतिप्रोक्तोऽलर्कादयस्ततः ६
षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच ॥ नालर्कादपरोराजन्बुभुजेमेदिनींयुवा ७

चूर्णिका

तदा ज्येष्ठं चक्रुः तदा विश्वामित्रः पुत्रवंतो भविष्यथेति तान् आशिषं ददौ ३ ५ ३ ६ एवं कौशिकगोत्रं विश्वामित्रगोत्रं पृथग्विधं कृतं प्रवरांतरं च आपन्नं तथा अन्ये च विश्वामि
त्रस्य सुताः अष्टकादयः आसन् ३ ७ ॥ इति नवमे षोडशः ॥ १ ६ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ यः पुरूरवसः पुत्रः आयुः तस्य पंच पुत्राः अभवन् नहुषः क्ष
त्रवृद्धः रजिः रंभःअनेनाः इति १ क्षत्रवृद्धस्य सुहोत्रः तस्य त्रयःपुत्राः २ काश्यः कुशः गृत्समदः इति गृत्समदात् शुनकः तस्य शौनकः अभवत् ३ काश्यात् काशिः तस्य
राष्ट्रः तस्य दीर्घतमाः तस्य धन्वंतरिः यः वासुदेवांशः आयुर्वेदप्रवर्तकः ४ तस्य केतुमान् तस्य भीमरथः ५ तस्य दिवोदासः तस्य द्युमान् स एव प्रतर्दनः शत्रुजित् ऋ
तध्वजः कुवलयाश्व इति नामचतुष्टयेन उक्तः तस्य अलर्कादयः ६ सः अलर्कः षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च मेदिनीं बुभुजे ७ ॥५१॥

१ धन्वन्तरिर्दैर्घतमस इति लिखितपुस्तके पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१७॥

संततिसंज्ञकः ८ सत्यकेतोर्धृष्टकेतुः । तस्मात्सुकुमारः । तस्माद्वीतिहोत्रः तस्यभर्गः अतोभर्गाद्भार्गभूमिः ९ काशयःकाशेर्वंश्याः । काशेः प्रपितामहस्यक्षत्रवृद्धस्यान्वयमयंतेयांतीतितथा १० ततः अनेनसः शुद्धोजज्ञे ११ कृतकृत्यः सः यतआत्मवान् ज्ञानीअतः पुत्रोत्पादनंनकृतवानित्यर्थः १२ १३ १४ तेषांमतिभ्रंशायगुरुणाबृहस्पतिनाअभिचारविधानेनाग्नौहूयमानेसतिबलभिदिंद्रः १५ सिंहावलोकनेनाह । क्षात्रवृद्धात् क्षत्रवृद्धपौत्रात् कुशात् प्रतिः प्रतेः संजयः १६ १७ १८ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांसप्तदशोऽध्यायः ॥ १७ ॥ ॥ ७ ॥ अष्टादशेययातेस्तुनाहुषस्यकथोच्यते । यस्यपंचसुपुत्रेषुकनीयानग्रहीज्जरां ॥ १ ॥ १ तस्यराज्यस्यपरिणामंअनर्थावहत्वंवेत्तीतितथा तत्रहेतुः । यत्रेति २

॥५२॥ श्लोकाः ८/२

अलर्कात्संततिस्तस्मात्सुनीथोथसुकेतनः ॥ धर्मकेतुःसुतस्तस्मात्सत्यकेतुरजायत ८ धृष्टकेतुःसुतस्ततस्मात्सुकुमारःक्षितीश्वरः ॥ वीतिहोत्रोस्यभर्गोऽतो भार्गभूमिरभून्नृप ९ इतीमेकाशयोभूपाःक्षत्रवृद्धान्वयायिनः ॥ रंभस्यरभसःपुत्रोगंभीरश्चाक्रियस्ततः १० तस्यक्षेत्रेब्रह्मजज्ञेशृणुवंशमनेनसः ॥ शुद्धस्ततः शुचिस्तस्मात्त्रिककुब्धर्मसारथिः ११ ततःशांतरयोजज्ञेकृतकृत्यःसआत्मवान् ॥ रजेःपंचशतान्यासन्पुत्राणाममितौजसाम् १२ देवैरभ्यर्थितोदैत्यान्हत्वें द्रायाददाद्दिवम् ॥ इंद्रस्तस्मैपुनर्दत्त्वागृहीत्वाचरणौरजेः १३ आत्मानमर्पयामासप्रह्लादाद्यरिशंकितः ॥ पितर्युपरतेपुत्रायाचमानायनोददुः १४ त्रिवि ष्टपंमहेंद्राययज्ञभागान्समाददुः ॥ गुरुणाहूयमानेऽग्नौबलभित्तनयान्रजेः १५ अवधीद्भ्रंशितान्मार्गान्नकश्चिदवशेषितः ॥ कुशात्प्रतिःक्षात्रवृद्धात्संजयस्त त्सुतोजयः १६ ततःकृतःकृतस्यापिजज्ञेहर्यबनोनृपः ॥ सहदेवस्ततोऽहीनोजयसेनस्तुतत्सुतः १७ संकृतिस्तस्यचजयःक्षत्रधर्मामहारथः ॥ क्षत्रवृद्धा न्वयाभूपाःशृणुवंशंचनाहुषम् १८ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेसप्तदशोऽध्यायः १७ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ यतिर्ययातिः शर्यातिरायतिर्वियतिःकृतिः ॥ षडिमेनहुषस्यासन्इंद्रियाणीवदेहिनः १ राज्यंनैच्छद्यतिःपित्रादत्तंतत्परिणामवित् ॥ यत्रप्रविष्टःपुरुषआत्मानंनावबुध्यते २

चूर्णिका

अलर्कस्य संततिः पुत्रः तस्य सुनीथः तस्य सुकेतनः तस्य धर्मकेतुः तस्मात् सत्यकेतुः तस्य धृष्टकेतुः तस्य सुकुमारः तस्य वीतिहोत्रः तस्य भर्गः तस्य भार्गभूमिः ९ इमे काशिवंश्याः भूपाः क्षत्रवृद्धान्वयायिनः अथ आयुपुत्रस्य रंभस्य रभसो जातः तस्य गभीरः तस्य अक्रियः १० तत्क्षेत्रे ब्रह्म जज्ञे आयुपुत्रस्य अनेनसः शुद्धो जातः तस्य शुचिः तस्य त्रिककुत् तस्य धर्मसारथिः ११ तस्य शांतरयः तस्य वंशो न आयुपुत्रस्य रजेः पंचशतं पुत्राः बभूवुः १२ यः रजिः देवैः प्रार्थितः दैत्यान् हत्वा महेंद्राय दिवं ददौ इंद्रः तस्मै पुनः दिवं दत्वा तं नत्वा १३ तच्चरणौ धृत्वा प्रह्लादाद्यरिशंकितः आत्मानमपि अर्पयामास पितर्युपरते सति पुत्राः याचमानाय इंद्राय स्वर्गं न ददुः १४ तदा गुरुणाभिचारविधानेन अग्नौ हूयमाने सति इंद्रः रजेः पुत्रानवधीत् न कश्चिदवशिष्टः सुहोत्रपुत्रस्य कुशस्य प्रतिः पुत्रः तस्य संजयः तस्य जयः १५ १६ तस्य कृतः तस्य हर्यबनः तस्य सहदेवः तस्य अहीनः तस्य जयसेनः १७ तस्य संकृतिः तस्य जयः तस्यः क्षत्रधर्माइति अथनहुषवंशं शृणु १८ ॥ इति नवमे सप्तदशः १७ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ यतिः ययातिः संयातिः आयतिः वियतिः कृतिः इति षट् नहुषपुत्राः बभूवुः १ यतिः पित्रा दत्तं राज्यं नैच्छत् यतः तत्परिणामवित् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(इंद्राण्याधर्षणात्बलात्कारनिमित्तात्) द्विजैरगस्त्यादिभिः स्थानात्स्वर्गात् (भ्रंशितेऽजगरत्वंमहासर्पत्वं) ३ यवीयसोभ्रातृनादिशत् । काव्यस्यशुक्रस्यवृषपर्वणश्चकन्याभ्यांकृतदारःसन् ४ ५
नात्रप्रतिलोमतादोषः ईश्वरघटनादितिदर्शयन्कथामाह । एकदेत्यादिनाप्रतिजग्राहतद्वचइत्यंतेन । गुरोः शुक्रस्यपुत्र्यादेवयान्याचव्यचरदितिद्वयोरन्वयः६कलगीताअलयोयेषुतानिनलिनीपुलिना
नियस्मिन् तास्मिन्पुरोद्यानेअबलाशर्मिष्ठा ७ सिंचतीर्जलंसिंचंत्यः ८ ९ अजानतीस्वीयंमत्वागुरुपुत्र्यावासःसमव्ययत्पर्यधात् १० असांप्रतंअन्याय्यम् ११ अन्यायमेवब्राह्मणोत्कर्षवर्णनेनव्यन
क्ति यैरितित्रिभिः इदंविश्वं । येब्राह्मणाः परस्यपुंसोमुखंमुखादुत्पन्नत्वेनवृत्तिद्वारत्वेनचश्रेष्ठाइत्यर्थःज्योतिर्ब्रह्मरूपं । पंथावेदमार्गः १२ १३ तदेवंब्राह्मणमात्रमेवतावत्पूज्यंतत्रापिवयंभृगवःअस्याश्च
पिता नःशिष्यःएवंसत्यपिअस्माभिर्धार्यंवासइयमसतीधृतवती १४ । (धर्षितानिर्भर्त्सितेत्यर्थः) १५

श्लोकाः ३/१५

पितरिभ्रंशितेस्थानादिंद्राण्याधर्षणाद्द्विजैः ॥ प्रापितेजगरत्वंवैययातिरभवन्नृपः ३ चतसृष्वादिशद्दिक्षुभ्रातृन्भ्रातायवीयसः ॥ कृतदारोजुगोपोर्वींकाव्य
स्यवृषपर्वणः ४ ॥ राजोवाच ॥ ब्रह्मर्षिर्भगवान्काव्यःक्षत्रबंधुश्चनाहुषः ॥ राजन्यविप्रयोःकस्माद्विवाहःप्रतिलोमकः ५ ॥ श्रीशुकउवाच ॥ एकदा
दानवेंद्रस्यशर्मिष्ठानामकन्यका ॥ सखीसहस्रसंयुक्तागुरुपुत्र्याचभामिनी ६ देवयान्यापुरोद्यानेपुष्पितद्रुमसंकुले ॥ व्यचरत्कलगीतालिनलिनीपुलिने
ऽबला ७ ताजलाशयमासाद्यकन्याःकमललोचनाः ॥ तीरेन्यस्यदुकूलानिविजह्रुःसिंचतीर्मिथः ८ वीक्ष्यव्रजंतंगिरिशंसहदेव्यावृषस्थितम् ॥ सहसो
त्तीर्यवासांसिपर्यधुर्व्रीडिताःस्त्रियः ९ शर्मिष्ठाऽजानतीवासोगुरुपुत्र्याःसमव्ययत् ॥ स्वीयंमत्वाप्रकुपितादेवयानीदमब्रवीत् १० अहोनिरीक्ष्यतामस्या
दास्याःकर्मह्यसांप्रतम् ॥ अस्मद्धार्यंधृतवतीशुनीवहविरध्वरे ११ यैरिदंतपसासृष्टंमुखंपुंसःपरस्ययो ॥ धार्यतेयैरिहज्योतिःशिवःपंथाश्चदर्शितः १२ या
न्नमंत्युपतिष्ठंतेलोकनाथाःसुरेश्वराः ॥ भगवानपिविश्वात्मापावनःश्रीनिकेतनः १३ वयंतत्रापिभृगवःशिष्योस्यानःपिताऽसुरः ॥ अस्मद्धार्यंधृतवती
शूद्रोवेदमिवासती १४ एवंक्षिपंतींशर्मिष्ठागुरुपुत्रीमभाषत ॥ रुषाश्वसंत्युरंगीवधर्षितादष्टदच्छदा १५

चूर्णिका

नहुषे पितरि इंद्राण्या धर्षणात् द्विजैः स्थानाद्भ्रंशिते अजगरत्वं प्रापिते सति पश्चात् ययातिः नृपः अभवत् ३ सः चतुर्दिक्षु कनिष्ठभ्रातॄन् आदिशत् ततः काव्यस्य
वृषपर्वणश्च कन्याभ्यां कृतदारः सन् उर्वीं जुगोप ४ ॥ राजोवाच ॥ ब्रह्मर्षिः भगवान् काव्यः ययातिस्तु क्षत्रियः एवं सति अनयोः प्रतिलोमको विवाहः कथं
तत्कथ्यताम् ५ ॥ श्रीशुकउवाच ॥ एकदा दानवेंद्रस्य शर्मिष्ठा नाम कन्या सहस्रसखीभिः युता देवयान्यासह पुरोद्याने विजहार ६ ७ ताः तीरेदुकूलानि वि
न्यस्य जलाशये विजह्रुः तदा देव्या सह वृषस्थितं व्रजंतं शिवं वीक्ष्य व्रीडिताः सत्यः सरसः उत्तीर्य वासांसिपर्यधुः ८ ९ तदा अजानती शर्मिष्ठा गुरुपुत्र्याः वासः
स्वीयं मत्वा पर्यधात् तदा कुपिता देवयानी इदं अब्रवीत् १० अहो अस्याः दास्याः अयोग्यं कर्म निरीक्षताम् अस्मद्धार्यं धृतवती शुनीव हविरध्वरे ११ अहो वयं
ब्राह्मणाः परमात्मनः मुखं १२ यान् देवाः हरिरपि स्तुवंते १३ तत्रापि मत्पितुः शिष्यस्य त्वं कन्या शूद्रः वेदमिव असती त्वं अस्मद्धार्यं कथं धृतवती १४ एवं
शपंतीं गुरुपुत्रीं क्रुद्धा शर्मिष्ठा अभाषत १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(बहुकत्थसे । बलिभुजः श्वानः काकावा) १६ १७ १८ १९ २० निषिद्धोयंप्रतिलोमसंबंधइतिचेत्तत्राह । एषइति २१ ब्राह्मणमेव त्वं वृणीहि किमनेनाग्रहेणेतिचेत्तत्राह नब्राह्मणइति । बृहस्पतेः सुतः कचः शुक्रान्मृतसंजीविनींविद्यामध्यगात् । तदाचदेवयानीतंपतिंचकमे । सचगुरुपुत्री ममपूज्येति नतामुदवहत् । ततश्चकुपितासती तवेयंविद्या निष्फलाभवत्विति तं शशाप सचतवब्राह्मणः पतिर्न भवेदितितां शशाप तदेतदाह यमहमशपंतस्यशापात् २२ अशास्त्रीयत्वादनभिप्रेतमपिदैवेनोपहृतंप्रापितंबुद्ध्वा तद्गतंतस्यांसकामंस्वमनश्चबुद्ध्वा नह्यधर्मेमदीयंमनःप्रविशेदितितद्युक्तंमत्वा तस्यावचः प्रतिजग्राह अंगीकृतवान् २३ शर्मिष्ठासंबंधोपिदैववशादेवाभवदितिदर्शयन्नाह गतेराजनीतिनवभिः । उक्तंभिक्षुकीत्यादि । कृतंकूपप्रक्षेपादि (तच्चसर्वंन्यवेदयत्) २४ कापोतीं (वृत्तिं) उंछवृत्तिं २५ प्रत्यनीकादेवास्तेविवक्षिताजयंप्रापणीयाइत्यभिप्रेतंयस्यतथाभूतंज्ञात्वा प्रत्यनीकानांविवक्षितमितिवा २६ (अस्यादेवयान्याः कामोऽपेक्षा) २७ (तथेत्यंगीकृत्यवृषपर्वण्यवस्थितेयतोयत्र) सानुगासखीसहिताशर्मिष्ठामामनुयात्विति २८

॥५४॥

श्लोकाः १६/२८

आत्मवृत्तमविज्ञायकत्थसेबहुभिक्षुकी ॥ किंनप्रतीक्षसेऽस्माकंगृहान्बलिभुजोयथा १६ एवंविधैःसुपरुषैःक्षिप्त्वाऽचार्यसुतांसतीम् ॥ शर्मिष्ठाप्राक्षिपत्कूपेवासआदायमन्युना १७ तस्यांगतायांस्वगृहंययातिर्मृगयांचरन् ॥ प्राप्तोयदृच्छयाकूपेजलार्थीतांददर्शह १८ दत्त्वास्वमुत्तरंवासस्तस्यैराजाविवाससे ॥ गृहीत्वापाणिनापाणिमुज्जहारदयापरः १९ तंवीरमाहौशनसीप्रेमनिर्भरयागिरा ॥ राजंस्त्वयागृहीतोमेपाणिःपरपुरंजय २० हस्तग्राहोऽपरोमाभूद्गृहीतायास्त्वयाहिमे ॥ एषईशकृतोवीरसंबंधोनौनपौरुषः २१ यदिदंकूपमग्नायाभवतोदर्शनंमम ॥ नब्राम्हणोमेभविताहस्तग्राहोमहाभुज ॥ कचस्य बार्हस्पत्यस्यशापाद्यमशपंपुरा २२ ययातिरनभिप्रेतंदैवोपहृतमात्मनः ॥ मनस्तुतद्गतंबुद्ध्वाप्रतिजग्राहतद्वचः २३ गतेराजनिसावीरेतत्रस्मरुदतीपितुः ॥ न्यवेदयत्ततःसर्वमुक्तंशर्मिष्ठयाकृतम् २४ दुर्मनाभगवान्काव्यःपौरोहित्यंविगर्हयन् ॥ स्तुवन्वृत्तिंचकापोतींदुहित्रासययौपुरात् २५ वृषपर्वातमाज्ञायप्रत्यनीकविवक्षितम् ॥ गुरुंप्रसादयन्मूर्ध्नापादयोःपतितःपथि २६ क्षणार्धमन्युर्भगवान्शिष्यंव्याचष्टभार्गवः ॥ कामोस्याःक्रियतांराजन्नैनांत्यक्तुमिहोत्सहे २७ तथेत्यवस्थितेप्राहदेवयानीमनोगतम् ॥ पित्रादत्तायतोयास्येसानुगायातुमामनु २८

चूर्णिका

हे भिक्षुकि आत्मवृत्तं अज्ञाय किं बहु कत्थसे अस्माकं किं न प्रतीक्षसे बलिभुजो यथा १६ एवंविधैः दुष्टवाक्यैः गुरुपुत्रीं निंद्य वासः आदाय देवयानीं कूपे प्रक्षिप्य स्वगृहे अगात् १७ तस्यां गतायां ययातिः मृगयांचरन् यदृच्छया तत्र प्राप्य जलार्थी सन् कूपे तां नग्नां दृष्ट्वा १८ तस्यै स्वं उत्तरं वासो दत्त्वा पाणिना गृहीत्वा कूपात्तां उज्जहार १९ देवयानी तं आह हे राजन् त्वया मे पाणिः गृहीतः २० अतः मया त्वं वृतः एषः ईशकृतः संबंधः २१ कचस्य शापात् मे ब्राह्मणः पतिर्नभविता २२ ययातिः अशास्त्रीयमपि दैवप्रापितंबुद्ध्वा तस्याः वचो जग्राह २३ अथ राजनि गते सति देवयानी सर्वं शर्मिष्ठाकृतं स्वकृतं च पित्रे न्यवेदयत् २४ तदा शुक्रः पौरोहित्यंनिंदन् उंछवृत्तिं स्तुवन् दुहित्रा सह पुरात् निर्ययौ २५ वृषपर्वा गुरुं मूर्ध्ना प्रसादयामास २६ क्षणार्धमन्युः शुक्रः शिष्यं आह कन्यायाः इच्छा क्रियताम् २७ तथेत्युक्ते सति देवयानी प्राह अहं पित्रा दत्ता यतः यास्ये तत्र शर्मिष्ठा सखीसहिता मां अनु यातु २८

॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्तस्मान्निर्गताच्छुक्रात्स्वानांसंकटंवीक्ष्य तत्तस्मादवस्थितादर्थस्यप्रयोजनस्यगौरवंचवीक्ष्य (शर्मिष्ठादेवयानींदासीवपर्यचरत्) २९ तल्पेनआधाःनोपगच्छेरित्यर्थः ३० अपत्यार्थंऋतुकालेप्रार्थ नात्तस्याःकामपूरणंधर्मंअवेक्ष्य शुक्रस्यवचश्चस्मरन्दिष्टंदैवप्रापितमेवतत्संगंअभ्यपद्यत नतुकामतइत्यर्थः । तथाचश्रुतिः " नकांचनपरिहरेत्तद्व्रत"मिति ३१ ३२ (यदुंतुर्वसुंचव्यजायतसुषुवे) ३३ आसुर्याःशर्मिष्ठायाः भर्तुःसकाशात् ३४ उपमंत्रयन्प्रसादयन् ३५ विकृतंरूपंकरोतीतितथा ३६ तेदुहितरिकामैरद्याप्यतृप्तोस्मि । कामानामंतोयैरितिवा । अथशुक्रोक्तिः । तर्हियोऽभिधास्यतिअ भितोधारयिष्यति । तस्यवयसाकामंव्यत्यस्यतांयथेच्छंजराव्यत्ययंयातुव्यत्ययंनीयतामितिवा । व्यत्यस्येतिवाछेदः तांजरांव्यत्यस्य (व्यत्यासंगमयेतिअर्थःलोण्मध्यमपुरुषः) ३७ इतिलब्धंव्यव स्थानंजरायाव्यवस्थितिर्येनसः ३८ ३९ ४० यतोअधर्मज्ञाःअनित्येचयौवनेनित्यबुद्धयः ४१

श्लोकाः २९/४१

स्वानांतत्संकटंवीक्ष्यतदर्थस्यचगौरवम् ॥ देवयानींपर्यचरत्स्त्रीसहस्रेणदासवत् २९ नाहुषायसुतांदत्त्वासहशर्मिष्ठयोशना ॥ तमाहराजञ्शर्मिष्ठामाधा स्तल्पेनकर्हिचित् ३० विलोक्यौशनसींराज्ञींशर्मिष्ठासुप्रजांक्वचित् ॥ तमेववव्रेरहसिसख्याःपतिमृतौसती ३१ राजपुत्र्यार्थितोऽपत्येधर्मंचावेक्ष्यधर्म वित् ॥ स्मरञ्शुक्रवचःकालेदिष्टमेवाभ्यपद्यत ३२ यदुंचतुर्वसुंचैवदेवयानीव्यजायत ॥ द्रुह्युंचानुंचपूरुंचशर्मिष्ठावार्षपर्वणी ३३ गर्भसंभवमासुर्या भर्तुर्विज्ञायमानिनी ॥ देवयानीपितुर्गेहंययौक्रोधविमूर्छिता ३४ प्रियामनुगतःकामीवचोभिरुपमंत्रयन् ॥ नप्रसादयितुंशेकेपादसंवाहनादिभिः ३५ शु क्रस्तमाहकुपितःस्त्रीकामानृतपूरुष ॥ त्वांजराविशतांमंदविरूपकरणीनृणाम् ३६ ॥ ययातिरुवाच ॥ अतृप्तोस्म्यद्यकामानांब्रह्मन्दुहितरिस्मते ॥ व्य त्यस्यतांयथाकामंवयसायोभिधास्यति ३७ इतिलब्धव्यवस्थानःपुत्रंज्येष्ठमवोचत ॥ यदोतातप्रतीच्छेमांजरांदेहिनिजंवयः ३८ मातामहकृतांवत्सनतृ प्तोविषयेष्वहम् ॥ वयसाभवदीयेनरंस्येकतिपयाःसमाः ३९ ॥ यदुरुवाच ॥ नोत्सहेजरसास्थातुमंतराप्राप्तयातव ॥ अविदित्वासुखंग्राम्यंवैतृष्ण्यंनैति पूरुषः ४० तुर्वसुश्चोदितःपित्राद्रुह्युश्चानुश्चभारत ॥ प्रत्याचख्युरधर्मज्ञाअनित्येनित्यबुद्धयः ४१

चूर्णिका

तदा वृषपर्वा स्वानां संकटं वीक्ष्य कन्यां ददौ शर्मिष्ठा स्त्रीसहस्रेण देवयानीं पर्यचरत् २९ ततः शुक्रः कन्यां ययातये दत्त्वा आह हे राजन् शर्मिष्ठा तल्पे माधाः ३० कदाचित् शर्मिष्ठा देवयानीं सप्रजां दृष्ट्वा रहसि तमेव पतिं वव्रे ३१ शर्मिष्ठया अपत्यार्थं याचितः ययातिः धर्मं अवेक्ष्य शुक्रवचः स्मरन् दैवप्राप्तं संगं अमन्यत ३२ ततो देवयानी यदुं तुर्वसुं प्रासूत शर्मिष्ठा द्रुह्युं अनुं पूरुं च व्यजायत ३३ शर्मिष्ठायाः भर्तुः सकाशात् गर्भसंभवं विज्ञाय देवयानी पितुर्गेहं ययौ ३४ ययातिः कामी सन् प्रियां अनुगतः प्रसादयितुं न शेके ३५ तदा शुक्रः क्रुद्धः सन् आह हे अनृतपूरुष त्वां जरा विशताम् ३६ ॥ ययातिरुवाच ॥ हे ब्रह्मन् ते दुहितरि अहं अतृप्तः तदा शुक्रः उवाच यः अभितः धारयिष्यति तस्य वयसा यथेच्छं जरा विपर्यासं यातु ३७ इति लब्धव्यवस्थानः राजा ज्येष्ठं यदुं अयाचत हे पुत्र इमां जरां प्रतीच्छ निजं वयः देहि ३८ ३९ ॥ यदुरुवाच ॥ हेतात अहं जरया स्थातुं नोत्सहे ४० एवमेव तुर्वसुः द्रुह्युः अनुश्च ऊचुः ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्वंजरांकिंग्रहिष्यसीत्यपृच्छत् । प्रत्याख्यानंमाकृथाइत्याह । नत्वमिति ४२ आत्मकृतःदेहकर्तुःप्रत्युपकारंकर्तुंकोनुक्षमः ४३ तथापितुर्यंश्चिंतितंकुर्यात्सउत्तमः । यस्तुप्रोक्तकारीसमध्यमः । यस्त्वश्रद्ध
याकुर्यात्सोऽधमः । अकर्तातुपितुरुच्चरितंपुरीषप्रायः ४४ जुजुषेसेवितवान् ४५ यथोपजोषंयथाप्रीति ४६ ४७ ४८ नानेवभातियावदिंद्रियप्रवृत्तिः । तदुपरमे (सति) नाभातिच । स्वप्नमायाभ्यांस
हितोमनोरथइवेत्यर्थः ४९ ५० मनःसुखंकामोपभोगंमनःषष्ठैःकर्दिंद्रियैःकुत्सितैःपराङ्मुखैरिंद्रियैः ५१ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायामष्टादशोऽध्यायः १८ ॥ ॥ ७ ॥
ऊनविंशेययातिःस्वंचेष्टितंनन्वजोपमं । देवयानींसमाश्राव्यविरक्तोमुक्तिमाप्तवान् ॥ १ ॥ भुक्तभोगामजांहास्यन्नजवद्वृत्तमात्मनः । विडंबयन्प्रियामाहनिर्वेदयितुमात्मवान् ॥ २ ॥ कामानाचरन्उपभुं
जानःगाथामितिहासम् १ मद्विधेनमादृशेनाचरितांअनुष्ठितांमद्विधस्याचरितंयस्यामितिवा । यस्यग्रामनिवासिनःकामिनोमद्विधस्यचरितंवनेस्थिताधीराःशोचंतितस्यगाथांशृणु २ आत्मानमनुलक्ष्याह
बस्तइति । प्रियामनुलक्ष्याह अजामिति । वनेसंसारेप्रियंविषयं ३ रोधसितटे । विषाणाग्रेणमृदादिकमुद्धृत्य तीर्थनिर्गमायमार्गंव्यधत्त ४

श्लोकाः ४२/४

अपृच्छत्तनयंपूरुंवयसोनंगुणाधिकम् ॥ नत्वमग्रजवद्वत्समांप्रत्याख्यातुमर्हसि ४२ ॥ पूरुरुवाच ॥ कोनुलोकेमनुष्येंद्रपितुरात्मकृतःपुमान् ॥
प्रतिकर्तुंक्षमोयस्यप्रसादाद्विंदतेपरम् ४३ उत्तमश्चिंतितंकुर्यात्प्रोक्तकारीचमध्यमः ॥ अधमोऽश्रद्धयाकुर्यादकर्तोच्चरितंपितुः ४४ इतिप्रमुदितःपूरुःप्रत्यगृ
ह्णाज्जरांपितुः ॥ सोपितद्वयसाकामान्यथावज्जुजुषेनृपः ४५ सप्तद्वीपपतीःसम्यक्पितृवत्पालयन्प्रजाः ॥ यथोपजोषंविषयान्जुजुषेऽव्याहतेंद्रियः ४६
देवयान्यप्यनुदिनंमनोवाग्देहवस्तुभिः ॥ प्रेयसःपरमांप्रीतिमुवाहप्रेयसीरहः ४७ अयजद्यज्ञपुरुषंक्रतुभिर्भूरिदक्षिणैः ॥ सर्ववेदमयंदेवंसर्वदेवमयंहरिम् ॥
४८ यस्मिन्निदंविरचितंव्योम्नीवजलदावलिः ॥ नानेवभातिनाभातिस्वप्नमायामनोरथः ४९ तमेवहृदिविन्यस्यवासुदेवंगुहाशयम् ॥ नारायणमणी
यांसंनिराशीरयजत्प्रभुम् ५० एवंवर्षसहस्राणिमनःषष्ठैर्मनःसुखम् ॥ विदधानोपिनातृप्यत्सार्वभौमःकदिंद्रियैः ५१ ॥ ॥ इतिश्रीभागवतेमहापु
राणेनवमस्कंधेअष्टादशोऽध्यायः १८ ॥ ॥ श्रीशुकउवाच ॥ सइत्थमाचरन्कामान्स्त्रैणोऽपह्नवमात्मनः ॥ बुद्ध्वाप्रियायैनिर्विण्णोगाथामेतामगा
यत १ शृणुभार्गव्यमूंगाथांमद्विधाचरितांभुवि ॥ धीरायस्यानुशोचंतिवनेग्रामनिवासिनः २ बस्तएकोवनेकश्चिद्विचिन्वन्प्रियमात्मनः ॥ ददर्शकूपेप
तितांस्वकर्मवशगामजाम् ३ तस्याउद्धरणोपायंबस्तःकामीव्यचिंतयन् ॥ व्यधत्ततीर्थमुद्धृत्यविषाणाग्रेणरोधसि ४

चूर्णिका

तदा राजा पूरुं उवाच हे वत्स अग्रजवत् प्रत्याख्यातुं त्वं नार्हसि ४२ ॥ पूरुरुवाच ॥ हे तात पितुराज्ञां लोके को न मन्येत यत्प्रसादात्परं विंदंति ४३ उत्तमश्चिंतितं
कुर्यात्प्रोक्तकारी च मध्यमः अश्रद्धया यः कुर्यात्सः अधमः अकर्ता पुरीषसमः ४४ इत्युक्त्वा जरां जगृहे ययातिरपि तद्वयसा ४५ पितृवत्प्रजाः पालयन् विषयान् बु
भुजे ४६ अनेकैः क्रतुभिः सर्वदेवमयं हरिं निष्कामतया अयजत ४७ ४८ ४९ ५० एवं वर्षसहस्राणि सार्वभौमः कदिंद्रियैः विषयान् भुंजानोपि नातृप्यत् ५१
॥ इतिनवमेऽष्टादशः १८ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ सः इत्थं स्त्रैणः सन् कामान् आचरन् आत्मनाशं बुध्वा निर्विण्णः सन् प्रियायै एतां गाथां अ
गायत १ हे भार्गवि मद्विधाचरितां अमूं गाथां शृणु २ कश्चिदेकः बस्तः वने विचरन् कूपे पतितां अजां ददर्श ३ कामी बस्तः तस्याः उद्धरणोपायं अचिंतयत् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बह्वयइतिशर्मिष्ठाप्रमुखाः कामयामासुः कांतंप्रतिकामिनीः कामयंत्यः ५ पीवानंपुष्टम् । श्मश्रुलंश्मश्रुबहुलंरतिसमर्थमित्यर्थः मीढ्वांसंरेतःसेक्तारं याभेमैथुनेकोविदं (कुशलंकामशास्त्राभिज्ञमित्यर्थः) अ
तएवप्रेष्ठंनावबुध्यत नान्वबुध्यत ६ ७ स्वामिनमितिशुक्राभिप्रायेण ८ इडविडाकारंबस्तजातिशब्दं संधितुंप्रसादयितुम् ९ वृषणमाच्छिनत् । जरयासंभोगासमर्थमकरोत् । अर्थायपुत्र्याः कामभो
गाययोगवित् उपायज्ञः । जराव्यत्ययेनरतिशक्तिददावित्यर्थः १० कूपलब्धयासहकामैः सेव्यमानैर्नतुष्यति ११ १२ ननुतर्हिपुनरपिबहवोविषयाः सेव्यंतां ततोमनसिप्रीतेसतिकामोपशांत्यामो
होनिवर्तेतेतिचेत् तत्राह यदितिद्वाभ्याम् । नदुह्यंति नपूरयंति १३ हविषाघृतेनकृष्णवर्त्माअग्निरिव १४ तर्हिकदाकेनोपायेनवा मनसःपूर्णाप्रीतिः स्यात् । ययाकामोपशमः स्यादित्यतआह यदे
तिषड्भिः अमंगलंभावंरागद्वेषादिवैषम्यम् १५ दुःखानिनितरांवहतीतितथाताम् १६ स्त्रीसंनिधानंतुसर्वथात्याज्यमित्याह मात्रेति अविविक्तंसंकीर्णआसनंयस्यसः कर्षतिआकर्षति १७

श्लोकाः ५/१७

सोत्तीर्यकूपात्सुश्रोणीतमेवचकमेकिल ॥ तयावृतंसमुद्वीक्ष्यबह्व्योजाःकांतकामिनीः ५ पीवानंश्मश्रुलंप्रेष्ठंमीढ्वांसंयाभकोविदम् ॥ सएकोजवृषस्तासांब
ह्वीनांरतिवर्धनः ६ रेमेकामग्रहग्रस्तआत्मानंनावबुध्यत ॥ तमेवप्रेष्ठतमयारममाणमजान्यया ॥ विलोक्यकूपसंविग्नानामृष्यद्बस्तकर्मतत् ७ तंदुर्हृदंसु
हृद्रूपंकामिनंक्षणसौहृदम् ॥ इंद्रियाराममुत्सृज्यस्वामिनंदुःखितायया ८ सोपिचानुगतःस्त्रैणःकृपणस्तांप्रसादितुम् ॥ कुर्वन्निडविडाकारंनाशक्नोत्पथिसं
धितुम् ९ तस्यास्तत्रद्विजःकश्चिदजास्वाम्यच्छिनद्रुषा ॥ लंबंतंवृषणंभूयःसंदधेर्थाययोगवित् १० संबद्धवृषणःसोपिह्यजयाकूपलब्धया ॥ कालंबहु
तिथंभद्रेकामैर्नाद्यापितुष्यति ११ तथाहंकृपणःसुभ्रुभवत्याःप्रेमयंत्रितः ॥ आत्मानंनाभिजानामिमोहितस्तवमायया १२ यत्पृथिव्यांव्रीहियवंहिरण्यं
पशवःस्त्रियः ॥ नदुह्यंतिमनःप्रीतिंपुंसःकामहतस्यते १३ नजातुकामःकामानामुपभोगेनशाम्यति ॥ हविषाकृष्णवर्त्मेवभूयएवाभिवर्धते १४ यदानकु
रुतेभावंसर्वभूतेष्वमंगलम् ॥ समदृष्टेस्तदापुंसःसर्वाःसुखमयादिशः १५ यादुस्त्यजादुर्मतिभिर्जीर्यतोयानजीर्यते ॥ तांतृष्णांदुःखनिवहांशर्मकामोद्रुतं
त्यजेत् १६ मात्रास्वस्रादुहित्रावानाविविक्तासनोभवेत् ॥ बलवानिंद्रियग्रामोविद्वांसमपिकर्षति १७

चूर्णिका ततः विषाणाग्रेण कूपतटं उद्धृत्य तामुज्जहार सा कूपादुत्तार्य तमेव पतिं चकमे तया वृतं वीक्ष्य अन्या अजाः वव्रुः ५ सः अजः सर्वाभिः सह रेमे ६ कूपसल्लग्ना
अजा अन्यया सह रमंतं दृष्ट्वा ७ तमुत्सृज्य दुःखिता सती स्वामिनं ययौ सोपि स्त्रैणः तदनुगतः सन् इडविडाकारं शब्दं कुर्वन् तां प्रसादयितुं नाशक्नोत् ९ तत्र
कश्चित् अजास्वामी द्विजः तद्वृषणं अच्छिनत् पुनः लंबंतं वृषणं तं योगवित् अर्थाय संदधे १० सोपि कूपलब्धया अजया बहुकालं रेमे अद्यापि न तुष्यति ११ हे दे
वयानि तथा अहं भवत्याः प्रेमयंत्रितः तव मायया मोहितः आत्मानं न जानामि ११ तर्हि पुनरपि बहवो विषयाः सेव्यंतां ततो मनसि प्रीते कामोपशांत्या मोहो
निवर्तेत इति चेत् तर्हि शृणु यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः इदं सर्वं कामहतस्य पुंसः मनःप्रीतिं न पूरयति १३ न जातु कामः कामानामुप
भोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते १४ यदा तु पुंसः समदृष्टित्वं तदा सर्वाः दिशः सुखमयाः भवंति १५ या तृष्णा स्वयं जीर्यतः सतः न जीर्यते
तां दुःखप्रदां तृष्णां शर्मकामः द्रुतं त्यजेत् १६ स्त्रीसन्निधानं तु सर्वथा त्याज्यं मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् बलवानिंद्रियग्रामो विद्वांसमपि कर्षति १७ ॥९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. न. अ०

टीका

१८ १९ ननुतृष्णात्यागस्यअतिदुष्करत्वात् कथंमनसोब्रह्मण्याधानंस्यात् तत्राह दृष्टमिति । योनानुध्यायेत् नानुस्मरेत् नसंविशेत् नचोपभुंजीत । तत्र दृष्टश्रुतयोरनुध्यानादौसंसृत्यादिकंविद्वान्
सआत्मदृक्भवति २० २१ (दक्षिणपूर्वस्यांऐशान्याम् आग्नेय्यां) २२ तस्यपुरोवंशे (स्थाप्य) स्थापयित्वा २३ विषयेषुशब्दादिषुआसेवितंषड्वर्गंषडिंद्रियसुखं मुमुचे तत्याज । यद्वा विषयेआ
सेवितंसेवांकारितंषण्णांइंद्रियाणांवर्गंमुमुचेउपैक्षतेत्यर्थः २४ विधुतंनिरस्तंत्रिगुणात्मकंलिंगंयेन । प्रतीतः प्रख्यातः २५ प्रस्तोभं (उपहासं) तमेवाह । परिहासमिवेति । यद्वा प्रस्तोभंनिवृत्तिमार्गे
प्रोत्साहनंमेने २६ २७ २८ कथंसमावेश्यतदाह नमइतिनमनादिभिः समावेश्येत्यर्थः । शुकोवानमनमिदंचक्रे २९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांएकोनविंशोऽध्यायः ॥ १९ ॥ ॥१९॥
विंशेपितृप्रसादाप्तराजासनमहोन्नतेः । पुरोर्वंशेचदौष्यंतेर्भरतस्येर्यतेयशः ॥ १ ॥ १ २

॥५८॥ श्लोकाः

पूर्णंवर्षसहस्रंमेविषयान्सेवतोऽसकृत् ॥ तथापिचानुसवनंतृष्णातेषूपजायते १८ तस्मादेतामहंत्यक्त्वाब्रह्मण्याधायमानसम् ॥ निर्द्वंद्वोनिरहंकारश्चरि
ष्यामिमृगैःसह १९ दृष्टंश्रुतमसद्बुद्ध्वानानुध्यायेन्नसंविशेत् ॥ संसृतिंचात्मनाशंचतत्रविद्वान्सआत्मदृक् २० इत्युक्त्वानाहुषोजायांतदीयंपूरवेवयः ॥
दत्त्वास्वजरसंतस्मादाददेविगतस्पृहः २१ दिशिदक्षिणपूर्वस्यांद्रुह्युंदक्षिणतोयदुम् ॥ प्रतीच्यांतुर्वसुंचक्रउदीच्यामनुमीश्वरम् २२ भूमंडलस्यसर्वस्यपू १८/२
रुमर्हत्तमंविशाम् ॥ अभिषिच्याग्रजांस्तस्यवशेस्थाप्यवनंययौ २३ आसेवितंवर्षपूगान्षड्वर्गंविषयेषुसः ॥ क्षणेनमुमुचेनीडंजातपक्षइवद्विजः २४ सत
त्रनिर्मुक्तसमस्तसंगआत्मानुभूत्याविधुतत्रिलिंगः ॥ परेऽमलेब्रह्मणिवासुदेवेलेभेगतिंभागवतींप्रतीतः २५ श्रुत्वागाथांदेवयानीमेनेप्रस्तोभमात्मनः ॥
स्त्रीपुंसोःस्नेहवैक्लव्यात्परिहासमिवेरितम् २६ सासंनिवासंसुहृदांप्रपायामिवगच्छताम् ॥ विज्ञायेश्वरतंत्राणांमायाविरचितंप्रभोः २७ सर्वत्रसंगमुत्सृज्य
स्वप्नौपम्येनभार्गवी ॥ कृष्णेमनःसमावेश्यव्यधुनोल्लिंगमात्मनः २८ नमस्तुभ्यंभगवतेवासुदेवायवेधसे ॥ सर्वभूताधिवासायशांतायबृहतेनमः २९
॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेएकोनविंशोऽध्यायः १९ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ पूरोर्वंशंप्रवक्ष्यामियत्रजातोसिभारत ॥
यत्रराजर्षयोवंश्याब्रह्मवंश्याश्चजज्ञिरे १ जनमेजयोह्यभूत्पूरोःप्रचिन्वांस्तत्सुतस्ततः ॥ प्रवीरोथनमस्युर्वैतस्माच्चारुपदोभवत् २

चूर्णिका

एवं पूर्णं वर्षसहस्रं असकृत् विषयान् सेवतः मम तृष्णा विषयेषु पुनर्जायते १८ अतः एतां त्यक्त्वा ब्रह्मणि मन आधाय अहं निर्द्वंद्वः निरहंकारश्च सन् मृगैः सह
चरिष्यामि १९ ययातिः इति जायां उक्त्वा पूरवे तदीयं वयः दत्त्वा स्वां जरां आददे २० २१ ततः चतुर्दिक्षु द्रुह्युयदुतुर्वस्वनून् विवेश्य २२ पूरुं सार्वभौमपदे अभि
षिच्य तस्य वशे अग्रजान् स्थाप्य वनं ययौ २३ सः विषयेषु मुक्तसंगः सन् वासुदेवे भक्तिं कुर्वन् भगवद्गतिं लेभे २४ २५ ततः देवयानिः तां गाथां श्रुत्वा प
रिहासमिव मत्वा २६ राजनि गते सति इदं सर्वं भगवन्मायारचितं ज्ञात्वा २८ सर्वत्र संगं त्यक्त्वा नमनादिभिः कृष्णे मनः स्थाप्य आत्मनः लिंगं व्यधुनोत् २८ ॥५८॥
२९ ॥ ॥ इति नवमे एकोनविंशः १९ ॥ ॥ छ ॥ ॥ श्रीशुक उवाच ॥ ॥ पूरोर्वंशं प्रवक्ष्यामि हे नृप यत्र त्वं जातोसि हे नृप यत्र राजर्षयः ब्र
ह्मवंश्याश्च जज्ञिरे १ पुरुपुत्रः जनमेजयः तस्य प्रचिन्वान् तस्य प्रवीरः तस्य नमस्युः तस्य चारुपदः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्सुतः तस्यअहंयातेः सुतः ३ धर्मेयुश्चसत्येयुश्चव्रतेयुश्चधर्मसत्यव्रतेयवः४ वनेयुश्चावमः स्मृतः। एवंदशैतेऋतेयुप्रमुखास्तस्यरौद्राश्वस्यघृताच्यामप्सरसिपुत्राजाताः। अप्सरसइतिषष्ठीसप्तम्यर्थे वशवर्तित्वेदृष्टांतः। जगदात्मनः जगतआत्मभूतस्यमुख्यप्राणस्येंद्रियाणीव ५ (तस्यरंतिभारस्य) ६ ७ दुष्यंतस्यशकुंतलायांभरतः पुत्रोभवदितिकथाद्वारेणाह दुष्यंतोमृगयामितिपंचभिः तमाश्रमंमंडयंतींस्त्रियंविलोक्य मुमुहे अमुह्यत ८ तस्यादर्शनेनप्रमुदितः अतएवसंनिवृत्तःपरिश्रमोयस्य ९ १० ११ पौरवाणां चेतोनह्यधर्मेरमते। अतोमच्चेतसस्त्वयिरमणादेवत्वांराजन्यतनयांवेद्मि १२ विश्वामित्रस्यात्मजाहंमेनकायांजाता तयाचस्वर्गंगच्छंत्यात्रत्यक्ता अतोराजन्यकन्यैवाहमित्यर्थः १३ १४ किंकरवामेत्यादिवाक्यात्तदभिप्रायंज्ञात्वाह उपपन्नमिति १५

॥२०॥

॥९९॥ तस्यसुद्युरभूत्पुत्रस्तस्माद्बहुगवस्ततः ॥ संयातिस्तस्याहंयातीरौद्राश्वस्तत्सुतःस्मृतः ३ ऋतेयुस्तस्यकुक्षेयुःस्थंडिलेयुःकृतेयुकः ॥ जलेयुःसंततेयुश्चधर्मसत्यव्रतेयवः ४ दशैतेप्सरसःपुत्रावनेयुश्चावमःस्मृतः ॥ घृताच्यामिंद्रियाणीवमुख्यस्यजगदात्मनः ५ ऋतेयोरंतिभारोभूत्त्रयस्तस्यात्मजान्नृप ॥ सुमतिर्ध्रुवोऽप्रतिरथःकण्वोऽप्रतिरथात्मजः ६ तस्यमेधातिथिस्तस्मात्प्रस्कण्वाद्याद्विजातयः ॥ पुत्रोभूत्सुमतेरैभ्योदुष्यंतस्तत्सुतोमतः ७ दुष्यंतोमृगयांयातःकण्वाश्रमपदंगतः ॥ तत्रासीनांस्वप्रभयामंडयंतींरमामिव ८ विलोक्यमुमुहेसद्योदेवमायामिवस्त्रियम् ॥ बभाषेतांवरारोहांभटैःकतिपयैर्वृतः ९ तद्दर्शनप्रमुदितःसंनिवृत्तपरिश्रमः ॥ पप्रच्छकामसंतप्तःप्रहसञ्श्लक्ष्णयागिरा १० कात्वंकमलपत्राक्षिकस्यासिहृदयंगमे ॥ किंवाचिकीर्षितंत्वत्रभवत्यानिर्जनेवने ११ व्यक्तंराजन्यतनयांवेद्म्यहंत्वांसुमध्यमे ॥ नहिचेतःपौरवाणामधर्मेरमतेक्वचित् १२॥ शकुंतलोवाच ॥ विश्वामित्रात्मजैवाहंत्यक्तामेनकयावने ॥ वेदैतद्भगवान्कण्वोवीरकिंकरवामते १३ आस्यतामरविंदाक्षगृह्यतामर्हणंचनः ॥ भुज्यतांसंतिनीवाराउष्यतांयदिरोचते १४ ॥ दुष्यंतउवाच ॥ उपपन्नमिदंसुभ्रुजातायाःकुशिकान्वये ॥ स्वयंहिवृणुतेराज्ञांकन्यकासदृशंवरम् १५

श्लोकाः ३/१५

चूर्णिका तस्य सुद्युः तस्य वहुगवः तस्य संयातिः तस्य अहंयातिः तस्य रौद्राश्वः३ तस्य घृताच्यां अप्सरसि दश पुत्रावभूवुः तेच ऋतेयुः प्रथमः कुक्षेयुः द्वितीयः स्थंडिलेयुः तृतीयः कृतेयुः चतुर्थः जलेयुः पंचमः संततेयुः षष्ठः धर्मेयुः सप्तमः सत्येयुः अष्टमः व्रतेयुः नवमः वनेयुः दशमः इति ४ ५ ऋतेयोः पुत्रः रंतिभारः तस्य पुत्राः त्रयः सुमतिः प्रथमः ध्रुवः द्वितीयः अप्रतिरथः तृतीयः इति अप्रतिरथस्य कण्वः ऋषिः तस्य ६ मेधातिथिः तस्मात् प्रस्कण्वाद्याः द्विजातयः सुमतेः पुत्रः रैभ्यः तस्य दुष्यंतः ७ सः कदाचित् मृगयां यातः सन् कण्वाश्रमं गतः तत्र आसीनां स्वप्रभया मंडयंतीं रमामिव स्त्रियं दृष्ट्वा मुमुहे ८ तद्दर्शनप्रमुदितः कामसंतप्तः तां बभाषे ९ हे कमलपत्राक्षि त्वं का कस्यासि १० निर्जने वने तव किं चिकीर्षितमस्ति त्वां राजन्यतनयामिति निश्चयेन अहं वेद्मि कुतः पौरवाणां चेतः अधर्मे क्वचिदपि न हि रमते ११ १२ ॥ शकुंतलोवाच ॥ अहंविश्वामित्रात्मजा मेनकायां जाता स्वर्गं गच्छंत्या तया अत्र वने त्यक्ता कण्वः एतत्सर्वं वेद हे वीर ते किं करवाम १३ अत्रास्यतां नः अर्हणं च गृह्यताम् अत्र नीवाराः संति भुज्यताम् रोचते चेत् उष्यताम् १४ ॥ दुष्यंत उवाच ॥ हे सुभ्रूः कुशिकान्वये जातायाः ते इदं योग्यम् राज्ञां कन्यास्तु स्वयं सदृशं वरं वृणते १५

॥९९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गांधर्वविधिना मिथःसमयपूर्वकेण (विधिना) १६ १७ (मृगेंद्रांसिंहम्) १८ दुरत्ययंविक्रांतंविक्रमणंयस्य १९ २० भस्त्राचर्मप्रसेविका तद्वन्माताधारमात्रं पितुरेवतुपुत्रः तत्रहेतुः येनेति "आत्मावैपुत्रनामासीति " श्रुतेः । भरस्व पुषाण । अनेनभरतनामनिरुक्तम् २१ किंच । रेतोधाःरेतःसेक्तावंशकृत्पुत्रोयमक्षयात्पितरंनयतितारयति । तथाचश्रुतिः " पुंनाम्नोनरकाद्यस्मात्पितरंत्रायते सुतः । तस्मात्पुत्रइतिप्रोक्तः स्वयमेवस्वयंभुवे"ति । पाठांतरे मातापित्रोःपुत्रंप्रतिंविवादेयमक्षयात् धर्मनिर्णेतुः यमस्यसभायाः सकाशात् रेतोधाःपितैवधर्मेणविजित्य पुत्रंनयति । नतुमातेत्यर्थः।ततश्च भार्यापुत्रौस्वीकृतवानितिज्ञेयम् २२ चक्रवर्तीबभूवेतिशेषः । तस्यमहिमागीयते । " तदप्येतेश्लोकाअभिगीता " इत्यादिबह्वृचश्रुत्या । हरेरंशभुवः अंशाज्जातस्य २३ तत्रलिंगमाह चक्रमिति २४ (कथमीजेतदाह । पंचेति । मामतेयंदीर्घतमसंपुरोधायपुरोहितंकृत्वा) गंगायामनुलोम पंचपंचाशतावाजिभिरीजे । पुरोधायपुरोहितंकृत्वायमुनायामनुयमुनायाश्चानुलोमंअष्टाधिकसप्ततिमेध्यानश्वान् ववंध । किंकुर्वन् वसुधनंप्रकर्षेणददत् २५

॥६०॥

श्लोकाः १६/२५

॥ श्रीशुकउवाच ॥ ओमित्युक्तेयथाधर्ममुपयेमेशकुंतलाम् ॥ गांधर्वविधिनाराजादेशकालविधानवित् १६ अमोघवीर्योराजर्षिर्महिष्यांवीर्यमादधे ॥ श्वोभू
तेस्वपुरंयातःकालेनासूतसासुतम् १७ कण्वःकुमारस्यवनेचक्रेसमुचिताःक्रियाः ॥ बद्ध्वामृगेंद्रंतरसाक्रीडतिस्मसबालकः १८ तंदुरत्ययविक्रांतमादायप्रमदो
त्तमा ॥ हरेरंशांशसंभूतंभर्तुरंतिकमागमत् १९ यदानजगृहेराजाभार्यापुत्रावनिंदितौ ॥ शृण्वतांसर्वभूतानांखेवागाहाशरीरिणी २० माताभस्त्रापितुः
पुत्रोयेनजातःसएवसः ॥ भरस्वपुत्रंदुष्यंतमावमंस्थाःशकुंतलाम् २१ रेतोधाःपुत्रोनयतिनरदेवयमक्षयात् ॥ त्वंचास्यधातागर्भस्यसत्यमाहशकुंतला २२
पितर्युपरतेऽसौवैचक्रवर्तीमहायशाः ॥ महिमागीयतेतस्यहरेरंशभुवोभुवि २३ चक्रंदक्षिणहस्तेऽस्यपद्मकोशोस्यपादयोः ॥ ईजेमहाभिषेकेणसोभिषि
क्तोऽधिराड्विभुः २४ पंचपंचाशतामेध्यैर्गंगायामनुवाजिभिः ॥ मामतेयंपुरोधाययमुनायामनुप्रभुः ॥ अष्टसप्ततिमेध्याश्वान्बबंधप्रददद्वसु २५

चूर्णिका

तया ओमित्युक्ते सति राजा गांधर्वविधिना तां उपयेमे १६ तदा अमोघवीर्यः राजर्षिः तस्यां वीर्यं आदधे श्वोभूते स्वपुरं यातः सा कालेन पुत्रं असूत १७ कण्वः वने कुमारस्य जातकादिसंस्कारान् चक्रे सः बालः मृगेंद्रान् बद्ध्वा क्रीडतिस्म १८ शकुंतला पराक्रमिणं हरेरंशांशसंभवं पुत्रं आदाय भर्तुः समीपं आगमत् १९ राजा भार्यापुत्रौ यदा न जगृहे तदा सर्वेषां शृण्वतां आकाशवाणी आह २० माता भस्त्रा[1] पितुः पुत्रो येन जातः स एव सः हे दुष्यंत पुत्रं भरस्व शकुंतलां मावमंस्थाः २१ किंच पुत्रः नरकात् पितरं त्रायति अस्य त्वं धाता शकुंतला सत्यं आह इत्युक्ते ततः भार्यापुत्रौ स्वीकृतवान् २२ ततो दुष्यंते कालेन उपरते सति सः भरतः चक्रवर्ती बभूव २३ यस्यदक्षिणहस्ते चक्रचिह्नं पादयोः कमलचिह्नं सः भरतः एकदा मामतेयं पुरोहितं कृत्वा गंगातीरे यमुनातीरे च पंचपंचाशताश्वमेधैः ईजे २४ अष्टसप्ततिमेध्यान्अश्वान् बबंध २५ ॥६०॥

१ आधारपात्रं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.न. साचीगुणेप्रकृष्टगुणवतिदेशेऽग्निश्चितोऽभूत् । यस्मिन्नाग्निचयनेदेशेवासहस्रंब्राह्मणाः भरतेनभूरिदानेदत्तागाः बद्वशः प्रत्येकंबद्वंबद्वंविभेजिरे । विभज्य जगृहुः । चतुरशीत्यधिकैस्त्रयोदशसहस्रैरेकंबद्वं अ०
भवति । तथा च "हिरण्येनपरीवृतान् कृष्णान् शुक्लदतोमृगान् । मष्णारेभरतोऽददाच्छतंबद्वानिसप्तचे " तिश्रुत्युक्तानि (गजानां) सप्ताधिकशतंबद्वानिश्रीशुकेनचतुर्दशलक्षत्वेनसंगृहीता
नि । अदात्कर्मणिमष्णारेनियुतानिचतुर्दशेति । एवंचतुर्दशलक्षाणांसप्ताधिकशतभागोबद्वमित्युक्तंभवति । इयंचबद्वसंख्याश्लोकेनसंगृह्यते । चतुर्दशानांलक्षाणांसप्ताधिकशतांशकः । बद्वंचतुरशीत्यग्र
टीका सहस्राणित्रयोदशेति (तथाचगवांसंख्या १३०८४००० चतुरशीतिसहस्राधिकानित्रिंशल्लक्षाणिकोटिश्चैका) २६ देवानामपिमायांवैभवंअत्यगात् अत्यशेत । यतः गुरुंपूज्यंहरिंआययौप्राप्तः । तदं ॥२०॥
शभवत्वात् । मायवत्तरइतिपाठेह्रस्वंश्रुत्युनुसारेण । मायावतांश्रेष्ठः हरिरेवासावित्यर्थः २७ मृगान् । श्रेष्ठगजान् । भद्रमंद्रमृगादयोगजजातिभेदाः । मष्णारेइतिश्रुतिपदस्यव्याख्यानंकर्मणीति ।
॥६१॥ कस्मिंश्चित्कर्मविशेषे । केचित्तुमष्णारेतीर्थइतिव्याचक्षते २८ २९ ३० पुरादेवान् जित्वायेऽसुरारसौकांसिरसातलादिस्थानानिभेजिरे तैः प्राणिभिर्बलिभिः देवस्त्रियोरसातलंनीताः सतीः पुनराहरत् ।
आनिन्ये । प्राणिभिरन्यैर्मनुष्यादिभिःसहनीताइतिवा । पणिभिरितिपाठेपणयोऽसुरास्तैर्नीताः सतीः । यद्वा पणयोदूताः तैः दूतान्प्रस्थाप्याहरदित्यर्थः ३१ त्रिणवसाहस्रीः समाः सप्तविंशतिसहस्र
संवत्सरान् । चक्रंसेनाआज्ञावा ३२ तस्यवैराग्येणमोक्षप्रकारमाह । सइति । मृषेतिविचार्येतिशेषः ३३ नानुरूपाः सदृशानभवंतीतिभर्त्राईरितेसतिव्यभिचारशंकयाऽस्मांस्त्यक्ष्यतीतिभयात् पुत्रान्
जघ्नुः पुनः पुनः पुत्राणांदर्शनेवैसादृश्यानुसंधानेनत्यजेन्नान्यथेत्याशयेनहतवत्यः ३४

भरतस्यहिदौष्यंतेरग्निःसाचीगुणेचितः ॥ सहस्रंबद्वशोयस्मिन्ब्राह्मणागाविभेजिरे २६ त्रयस्त्रिंशच्छतंह्यश्वान्बध्वाविस्मापयन्नृपान् ॥ दौष्यंतिरत्यगान्मायां श्लोकाः
देवानांगुरुमाययौ २७ मृगाञ्शुक्लदतःकृष्णान्हिरण्येनपरिष्कृतान् ॥ अदात्कर्मणिमष्णारेनियुतानिचतुर्दश २८ भरतस्यमहत्कर्मनपूर्वेनापरेनृपाः ॥
नैवापुर्नैवप्राप्स्यंतिबाहुभ्यांत्रिदिवंयथा २९ किरातहूणान्यवनानंध्रान्कंकान्खशाञ्शकान् ॥ अब्रह्मण्यान्नृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिलान् २६/३४
३० जित्वापुराऽसुरादेवान्येरसौकांसिभेजिरे ॥ देवस्त्रियोरसांनीताःप्राणिभिःपुनराहरत् ३१ सर्वकामान्दुदुहतुःप्रजानांतस्यरोदसी ॥ समास्त्रिणवसा
हस्रीर्दिक्षुचक्रमवर्तयत् ३२ ससम्राड्लोकपालाख्यमैश्वर्यमधिराट्स्वयम् ॥ चक्रंचास्खलितंप्राणान्मृषेत्युपरराम ह ३३ तस्यासन्नृपवैदर्भ्यःपत्न्यस्ति
स्रःसुसंमताः ॥ जघ्नुस्त्यागभयात्पुत्रान्नानुरूपाइतीरिते ३४

चूर्णिका दौष्यंतेःभरतस्य प्रकृष्टगुणवति देशे चितः अग्निः अभूत् यस्मिन् अग्निचयने सहस्रं ब्राह्मणाः भरतेन दत्ताः गाः प्रत्येकं वद्वं वद्वं विभज्य जगृहुः २६ ततश्च भरतः नृपान् वि
स्मापयन् सन् त्रयस्त्रिंशच्छतं अश्वान् वद्ध्वा देवानां वैभवं अत्यगात् २७ ततश्च मष्णाराख्ये कर्मणि तीर्थे वा चतुर्दशनियुतानि गजान् अदात् २८ २९ अथ भरतःदिग्विजये
अब्रह्मण्यान् नृपान् किरातादीन् अहन् ३० पुरा असुरैः हृताः देवस्त्रियः असुरान् हत्वा देवेभ्यः ददौ ३१ सप्तविंशतिसहस्रं वत्सरान् राज्यं च चक्रे ३२ सः राज्यं देहं ॥६१॥
च मृषेति विचार्य उपरराम ३३ तस्य तिस्रः स्त्रियः आसन् ताः भर्त्रा एते सुता नानुरूपा इत्युक्ते सति व्यभिचारशंकयास्मान्त्यक्ष्यतीति भयात् पुत्रान् जघ्नुः ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वितथेव्यर्थेसतितदर्थपुत्रार्थंमरुत्स्तोमेनयागेनयजतस्तस्यप्रसन्नाःसंतोमरुतोभरद्वाजंनामपुत्रंउपाददुःसमर्पयामासुः ३५ मरुतांभरद्वाजप्राप्तिप्रकारंदर्शयन्नाह अंतर्वत्न्यामितिचतुर्भिः अंतर्वत्न्यांगर्भिण्यां भ्रातुरुतथ्यस्यपत्न्यांममतायांचौर्येणमैथुनायकदाचित्प्रवृत्तोबृहस्पतिः तदा द्वितीयगर्भस्यावकाशाभावात् आक्रोशपूर्वंगर्भस्थेनवारितः ततः क्रुद्धोबृहस्पतिरंधोभवेतितंगर्भंशप्त्वावलाद्वीर्यंन्यषिंचत् । ततोबृहस्पतेः शापात् गर्भस्थोदीर्घतमाबभूव । तेनचतद्वीर्यपार्ष्णिप्रहारेणयोनेर्बहिर्निःसारितंभूमौपतितंसद्यएवकुमारोऽभवत् ३६ तंचपरवीर्यजंभर्तुस्त्यागाद्विशंकितांसतींत्यक्तुकामांममतांप्रतिसुराएनंबृहस्पतेर्ममतायाश्चविवादरूपंश्लोकंजगुः । किमर्थमतआह । तस्यनामनिरुच्यतेयेनतत् । तन्नामनिर्वचनेनैवभर्तृत्यागशंकामपाकर्तुमित्यर्थः ३७ तत्रपुत्रंत्यक्त्वायांतींममतांबृहस्पतिराह । हे मूढेइमंपुत्रंभरपुषाण । भर्तुर्बिभेमीतिचेत्तत्राह । द्वाजम् । एकस्यक्षेत्रेअन्यस्यवीजादित्येवंद्वाभ्यांजातंअतस्तस्याप्ययंपुत्रइतिनतस्माद्भयशंकेत्यर्थः । एवमुक्तासतीतंप्रत्याह । हेबृहस्पतेत्वमिमंभर । यतोद्वाजंद्वाभ्यामावाभ्यामन्यायतोजातं अतोनाहमेकाकिनीभरामीत्यर्थः । यद्यस्मादेवमुक्त्वापितरौममताबृहस्पतीविवदमानौपुत्रंपरित्यज्ययातौततोहेतोरयंभरद्वाजसंज्ञइति । पाठांतरेयस्यपुत्रस्यत्यागदुःखात्पितरौयातावित्यर्थः ३८ वितथंव्यभिचारसंभवत्वात्तमात्मजंवितथंव्यर्थंमत्वा ममताव्यसृजत् तत्याज । पाठांतरेआदिजंप्रथमजंभर्तुर्वीर्याज्जातमेवमुख्यमात्मजंमत्वाबृहस्पतेर्जातंतत्याजेत्यर्थः । एवंतयात्यक्तंमरुतोऽबिभ्रन् अबिभरुः । तदेवंमरुद्भिः प्राप्तोयंभरतस्यान्वयेवितथेसतिदत्तः ३९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांविंशतितमोऽध्यायः २० ॥ ७ ॥ ॥ एकविंशेतुदौष्यंतेः सुतस्यान्वयउच्यते । रंतिदेवाजमीढादेर्यत्रकीर्तिःप्रतन्यते ॥ १ ॥ भरतस्यान्वयेवितथेसतिदत्तत्वात् वितथसंज्ञोभरद्वाजः । सचब्राह्मणोपिभरतस्यदत्तपुत्रोजातइतितद्वंशोनुक्रम्यते । वितथस्यसुतोमन्युस्तस्माद्बृहत्क्षत्रजयद्रथमहावीर्यनरगर्गाः पंचपुत्राबभूवुः १

श्लोकाः ३५/१

तस्यैवंवितथेवंशेतदर्थंयजतःसुतम् ॥ मरुत्स्तोमेनमरुतोभरद्वाजमुपाददुः ३५ अंतर्वत्न्यांभ्रातृपत्न्यांमैथुनायबृहस्पतिः ॥ प्रवृत्तोवारितोगर्भंशप्त्वावीर्यमवासृजत् ३६ तंत्यक्तुकामांममतांभर्तृत्यागविशंकिताम् ॥ नामनिर्वचनंतस्यश्लोकमेनंसुराजगुः ३७ मूढेभरद्वाजमिमंभरद्वाजंबृहस्पते ॥ यातौयदुक्त्वापितरौभरद्वाजस्ततस्त्वयम् ३८ चोद्यमानासुरैरेवंमत्वावितथमात्मजम् ॥ व्यसृजन्मरुतोऽबिभ्रन्दत्तोयंवितथेऽन्वये ३९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेविंशोऽध्यायः २० ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ वितथस्यसुतान्मन्योर्बृहत्क्षेत्रोजयद्रथः ॥ महावीर्योनरोगर्गःसंकृतिस्तुनरात्मजः १

चूर्णिका ॥६२॥

तदा वंशे वितथे सति पुत्रार्थं मरुत्स्तोमेन यागेन यजतः भरतस्य मरुतः भरद्वाजं नाम पुत्रं ददुः ३५ तदुत्पत्तिमाह गर्भिण्यां भ्रातुः उतथ्यस्य पत्न्यां ममतायां चौर्येण मैथुनाय प्रवृत्तो बृहस्पतिः तदा गर्भस्थेन निवारितः तदा क्रुद्धो बृहस्पतिः अंधो भवेति गर्भं शप्त्वा बलात् वीर्यं न्यषिंचत् ततो बृहस्पतेः शापात् गर्भस्थोदीर्घतमाः अंधोबभूव तेन च तद्वीर्यं पार्ष्णिना योनेः बहिः निःसारितम् भूमौ पतितं सः सद्य एव कुमारः अभवत् ३६ तत्र पुत्रं त्यक्त्वा यांतीं ममतां बृहस्पतिः आह ३७ हे मूढे इमं पुत्रं भर एकस्य क्षेत्रे अन्यस्य वीजादिति द्वाभ्यां जातम् अतः तस्याप्ययं पुत्रः एवं उक्त्वा ममता तं आह हे बृहस्पते त्वं इमं भर यतः द्वाभ्यां आवाभ्यां अन्यायतो जातः अतो नाहं एकाकिनी भरामि एवमुक्त्वा विवदमानौतौ पुत्रं त्यक्त्वा यातौ ततो हेतोःअयं भरद्वाजः ३८ तं मरुतः अबिभ्रन् एवं मरुद्भिः प्राप्तोयं भरतान्वये व्यर्थे सति दत्तः अतः वितथो जातः ३९ ॥ ॥ इति नवमे विंशः २० ॥ ॥ ७ ॥॥ श्रीशुक उवाच ॥ ॥ वितथस्य सुतः मन्युः तस्य पुत्राः पंच ते च बृहत्क्षत्रः प्रथमः जयद्रथः द्वितीयः महावीर्यः तृतीयः नरः चतुर्थः गर्गः पंचमः इति नरात्संकृतिः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

२ वियद्वित्तस्यवियतोगगनादिवउद्यमंविनादैवादुपस्थितमेववित्तंभोग्यंयस्य । यद्वा वियद्यंप्राप्नुवद्वित्तंयस्य । तदेवाह । बुभुक्षतोपिसतः लब्धंलब्धंददतः । तत्प्रपंचयति निष्किंचनस्येत्यादिसार्धैः पंचदशभिः (निष्किंचनस्यदत्तसर्वस्वस्य) ३ अपिबतः जलपानमप्यकुर्वतः (अष्टचत्वारिंशदहानिव्यतीयुः । ततः प्रातरुपस्थितंप्राप्तम्) घृतादित्रयाणांद्वंद्वैक्यंतोयंच (तत्रसंयावंगोधूमान्नम्) ४ (एतद्भोक्तुकामस्यकृच्छ्रक्लेशंप्राप्तंकुटुंबंयस्य ।कालेभोजनसमये) ५ ६ अथान्योवृषलोऽतिथिरागमत् । विभक्तस्यकुटुंबार्थमन्नादिकंविभक्तवतः (विभक्तंब्राह्मणशेषरूपंअन्नंतस्मैवृषलायशूद्रायव्यभत्विभज्यदत्तवान्) ७ सगणायश्वयूथसहिताय ८ (यदवशिष्टंतत्सर्वं) ९ ततः पानीयमात्रंउच्छेषंउर्वरितंतदप्येकमेवपरितर्पयतीतितथा (तत्पास्यतःपातुकामस्येत्यर्थःपुल्कसोगोमांसभक्षकोनीचजातिविशेषः) १० ११ परदुःखासहिष्णुतयासर्वेषांदुःखंस्वयंभोक्तुमाशास्ते नकामयइति । अणिमाद्यष्टसमृद्धियुक्तांगतिमपिमोक्षमपिवाअहंनकामये । तर्हिकिंकामयसेतदाह । अखिलदेहभाजामार्तिंदुःखंतद्भोक्तृरूपेणांतःस्थितःसन्अहंप्राप्नुयामित्येवंकामये । येनतद्दुःखभोक्त्रामयाहेतुभूतेनतेसर्वेअदुःखाभवंति १२

श्लोकाः २/१२

गुरुश्चरंतिदेवश्चसंकृतेःपांडुनंदन ॥ रंतिदेवस्यहियशइहामुत्रचगीयते २ वियद्वित्तस्यददतोलब्धंलब्धंबुभुक्षतः ॥ निष्किंचनस्यधीरस्यसकुटुंबस्यसीदतः ३ व्यतीयुरष्टचत्वारिंशदहान्यपिबतःकिल ॥ घृतपायससंयावंतोयंप्रातरुपस्थितम् ४ कृच्छ्रप्राप्तकुटुंबस्यक्षुत्तृड्भ्यांजातवेपथोः ॥ अतिथिर्ब्राह्मणःकालेभोक्तुकामस्यचागमत् ५ तस्मैसंव्यभजत्सोन्नमादृत्यश्रद्धयान्वितः ॥ हरिंसर्वत्रसंपश्यन्सभुक्त्वाप्रययौद्विजः ६ अथान्योभोक्ष्यमाणस्यविभक्तस्यमहीपतेः ॥ विभक्तंव्यभजत्तस्मैवृषलायहरिंस्मरन् ७ यातेशूद्रेतमन्योऽगादतिथिःश्वभिरावृतः ॥ राजन्मेदीयतामन्नंसगणायबुभुक्षते ८ सआदृत्यावशिष्टंयद्बहुमानपुरःसरम् ॥ तच्चदत्वानमश्चक्रेश्वभ्यःश्वपतयेविभुः ९ पानीयमात्रमुच्छेषंतच्चैकपरितर्पणम् ॥ पास्यतःपुल्कसोभ्यागादपोदेह्यशुभस्यमे १० तस्यतांकरुणांवाचंनिशम्यविपुलश्रमाम् ॥ कृपयाभृशसंतप्तइदमाहामृतंवचः ११ नकामयेऽहंगतिमीश्वरात्परामष्टर्धियुक्तामपुनर्भवंवा ॥ आर्तिंप्रपद्येऽखिलदेहभाजामंतःस्थितोयेनभवंत्यदुःखाः १२

चूर्णिका

तस्य गुरुः तस्य रंतिदेवश्च रंतिदेवस्य यशः इहामुत्रच गीयते २ तस्य दैवात् लब्धंअभुक्षतः निष्किंचनस्य धीरस्य सकुटुंबस्य सीदतः लब्धं लब्धं ददतः एवं वर्तमानस्य सतः अष्टचत्वारिंशत् दिनानि व्यतीयुः तदा घृतं पायसं संयावं तोयं च प्रातः प्राप्तं ४ कृच्छ्रप्राप्तकुटुंबस्य क्षुत्तृड्भ्यां जातवेपथोः भोक्तुकामस्य तस्य काले ब्राह्मणः अतिथिः आगमत् ५ सः सर्वत्र हरिं पश्यन् तस्मै श्रद्धया अन्नं ददौ स द्विजः भुक्त्वा ययौ ६ अवशिष्टमन्नं कुटुंबाय विभज्य भोक्तुकामस्य सतः अन्यः वृषलः अतिथिः आगमत् राजा तस्मै अन्नं ददौ ७ शूद्रे याते श्वभिरावृतः अतिथिः तं अगात् हे राजन् सगणाय क्षुधार्ताय मे अन्नं दीयताम् ८ तदा राजा तंबहुमानपुरःसरं श्वभ्यश्च शेषं अन्नं दत्त्वा नमश्चक्रे ९ ततः एकतृप्तिकरं जलं अवशिष्टं तत् पास्यतः पुल्कसः आगत्य अशुभस्यमे अपः देहीति अयाचत १० तस्य तां दीनां वाचं निशम्य कृपया पीडितः इदं आह ११ अहं ईश्वरात् गतिं मोक्षं च न कामये किंतु अखिलदेहभाजां अंतः स्थितः सन् तेषां आर्तिं कामये येन ते अदुःखाः भवंति १२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुदुःखंकिमितिप्रार्थयसे।तत्रपरदुःखनिवृत्त्यैवममसर्वदुःखनिवृत्तिरित्याह । क्षुत्तृडिति । कृपणस्यजंतोर्जीवनहेतोःजलस्यार्पणात्मेसर्वेक्षुत्तृडादयोनिवृत्ताएवेत्येवंप्रभाष्य १३ १४ त्रिभुवनाधीशाः ब्रह्माद यः मायाः तदीयधैर्यपरीक्षार्थंप्रथमंमाययावृषलादिरूपेणप्रतीताःसंतइत्यर्थः १५ परंकेवलंवासुदेवेमनश्चक्रेनतुतान्किमपियाचितवान् १६ अनन्यराधसःईश्वरातिरिक्तफलांतरानपेक्षस्य । प्रत्यलीयत आत्मन्येवलीनाबभूव १७ १८ मन्युसुतस्यनरस्यवंशमुक्तातत्सुतस्यैवगर्गस्यवंशमाह । गर्गादिति (ततःक्षत्राच्छिनेःगार्ग्योब्रह्मह्यवर्तत) महावीर्यस्यवंशमाह । महावीर्यात्दुरितक्षयः तस्यत्रय्या रुणिःकविःपुष्करारुणिश्चेतित्रयःपुत्राः १९ कथंभूताःअत्रक्षत्रवंशेपेब्राह्मणगतिंब्राह्मणरूपतांगतास्ते मन्युपुत्राणां पंचानांज्येष्ठस्यवंशमाह। बृहत्क्षत्रस्येतियत्येनहस्तिनापुरंकृतमित्यर्थः२०अतस्तत्राम्नाम सिद्धंतत् । अजोमीढादयस्त्रयोहस्तिनःपुत्राः २१ अजमीढादेवान्यःपुत्रोबृहदिषुर्नामाभवत् २२ २३ पारस्यतनयोनीपःनीपस्यपुत्रशतं २४

श्लोकाः १३ — २४

क्षुत्तृड्श्रमोगात्रपरिश्रमश्चदैन्यंक्लमःशोकविषादमोहाः ॥ सर्वेनिवृत्ताःकृपणस्यजंतोर्जिजीविषोर्जीवजलार्पणान्मे १३ एवंप्रभाष्यपानीयंम्रियमाणःपिपा सया ॥ पुल्कसायाददाद्धीरोनिसर्गकरुणोनृपः १४ तस्यत्रिभुवनाधीशाःफलदाःफलमिच्छताम् ॥ आत्मानंदर्शयामासुर्मायाविष्णुविनिर्मिताः १५ सवैतेभ्योनमस्कृत्यनिःसंगोविगतस्पृहः ॥ वासुदेवेभगवतिभक्त्याचक्रेमनःपरम् १६ ईश्वरालंबनंचित्तंकुर्वतोनान्यराधसः ॥ मायागुणमयीराजन्स्व प्रवत्प्रत्यलीयत १७ तत्प्रसंगानुभावेनरंतिदेवानुवर्तिनः ॥ अभवन्योगिनःसर्वेनारायणपरायणाः १८ गर्गाच्छिनिस्ततोगार्ग्यःक्षत्राद्ब्रह्मह्यवर्तत ॥ दुरि तक्षयोमहावीर्यात्तस्यत्रय्यारुणिःकविः १९ पुष्करारुणिरित्यत्रयेब्राह्मणगतिंगताः ॥ बृहत्क्षत्रस्यपुत्रोऽस्माद्धस्तीयद्धस्तिनापुरम् २० अजमीढोद्विमी ढश्चपुरुमीढश्चहस्तिनः ॥ अजमीढस्यवंश्याःस्युःप्रियमेधादयोद्विजाः २१ अजमीढाद्बृहदिषुस्तस्यपुत्रोबृहद्धनुः ॥ बृहत्कायस्ततस्तस्यपुत्रश्चासीज्जयद्र थः २२ तत्सुतोविशदस्तस्यसेनजित्समजायत ॥ रुचिराश्वोदृढहनुःकाश्योवत्सश्चतत्सुतः २३ रुचिराश्वसुतःपारःपृथुसेनस्तदात्मजः ॥ पारस्यतन योनीपस्तस्यपुत्रशतंत्वभूत् २४

चूर्णिका

१३ इत्यादिप्रभाष्य स्वयं पिपासया म्रियमाणोऽपि तस्मै जलं ददौ १४ तदा ब्रह्मविष्णुमहेशाः आत्मानं दर्शयां चक्रुः १५ सः तेभ्यः नमस्कृत्य निःसंगः सन् वासु देवेभक्त्या नमश्चक्रे १६ एवं ईश्वरालंबनं चित्तं कुर्वतः तस्य माया स्वप्नवत् प्रत्यलीयत १७ तत्प्रसंगानुभावेन सर्वे जनाः नारायणपराः अभवन् १८ अथ गर्गस्य मन्युसुतस्य वंशमाह गर्गात् शिनिः तस्मात् गार्ग्यप्रभृति द्विजाः महावीर्यस्य वंशमाह महावीर्यस्य दुरितक्षयः तस्य त्रय्यारुणिः कविः १९ पुष्करारुणिः एते द्विजत्वं प्राप्ताः अथ बृहत्क्षत्रस्य पुत्रः हस्ती येन हस्तिनापुरं कृतम् २० तस्य त्रयः अजमीढः द्विमीढः पुरुमीढ इति अजमीढस्य प्रियमीढादयो द्विजाः २१ अजमीढादेवअ न्यः पुत्रः बृहदिषुः तस्य बृहद्धनुः यस्य बृहत्कायः तस्य जयद्रथः २२ तस्य विशदः तस्य सेनाजित् तस्य पुत्राः चत्वारः रुचिराश्वः दृढहनुः काश्यःवत्सः इति २३ रुचिराश्वात् पारः तस्यः पुत्रौ द्वौ पृथुसेनः नीपइति नीपस्य पुत्रशतं अभूत् २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सएवकृत्वीसंज्ञायांशुककन्यायांब्रह्मदत्तंजनयामास । तदुक्तंहरिवंशादिषु । " पराशरकुलोत्पन्नःशुकोनाममहायशाः । व्यासादरण्यांसंभूतोविधूमोग्निरिवज्वलन् । सतस्यांपितृकन्यायांवीरिण्यांजन यिष्यति । कृष्णंगौरंप्रभुंशंभुंतथाभूरिश्रुतंजयं । कन्यांकीर्तिमतींषष्ठींयोगिनींयोगमातरं । ब्रह्मदत्तस्यजननींमहिषीमणुहस्यचेति" यद्यपिशुकउत्पत्त्यैवविमुक्तसंगोनिर्गतःतथापिविरहातुरंव्यासंअनुयां तंदृष्ट्वाछायाशुकंनिर्मायगतवान्तदभिप्रायेणैवायंगार्हस्थ्यादिव्यवहारइत्यविरोधःसचब्रह्मदत्तोयोगेश्वरो गवि वाचि सरस्वत्यां २५ सएवयोगतंत्रंचकार बार्हदीषवाअजमीढपुत्रस्यबृहदिषोर्वंश्याइमेदी र्घत्वमार्ष (अथद्विमीढस्यवंशमाहयवीनरइति) २६ सुपार्श्वकृत्सुपार्श्वस्यपिता २७ प्राच्यसाम्नांषट्संहिताःजगौविभज्याध्यापितवान् २८ २९ (पुरुमीढस्यतुवंशोनास्तीत्याह पुरुमीढइति) ॥२१॥
अजमीढस्यवंश्याःप्रियमेधादयः केचिद्ब्राह्मणाबभूवुः । बृहदिषुप्रभृतयःक्षत्रियाश्चेतिवंशद्वयमुक्तं । अथतस्यैववंशांतरमाह । नलिन्यामितियावत्समाप्ति ३० मुद्गलएकःयवीनरादयश्चत्वारइत्येवंपंच ३१
॥६५॥ ३२ (विषयाणांदेशानां) ३३ भार्म्यात्भर्म्याश्वपुत्रात्मिथुनंचाभूत् तदेवाह । दिवोदासःपुमान्अहल्याचकन्यकेति तस्यशतानंदस्य ३४ ३५

श्लोकाः २५/३५

सकृत्व्यांशुककन्यायांब्रह्मदत्तमजीजनत् ॥ योगीशोगविभार्यायांविष्वक्सेनमधात्सुतम् २५ जैगीषव्योपदेशेनयोगतंत्रंचकारह ॥ उदक्स्व नस्ततस्तस्माद्भल्लादोबार्हदीषवाः २६ यवीनरोद्विमीढस्यकृतिमांस्तुततःस्मृतः ॥ नाम्नासत्यधृतिर्यस्यदृढनेमिःसुपार्श्वकृत् २७ सुपार्श्वात्सुमतिस्तस्य पुत्रःसंनतिमांस्ततः ॥ कृतीहिरण्यनाभाद्योयोगंप्राप्यजगौस्मषट् २८ संहिताःप्राच्यसाम्नांवैनीपोह्युग्रायुधस्ततः ॥ तस्यराज्ञःसुवीरोस्यसुवीरस्यरि पुंजयः २९ ततोबहुरथोनामपुरुमीढोऽप्रजोऽभवत् ॥ नलिन्यामजमीढस्यनीलःशांतिस्तुतत्सुतः ३० शांतेःसुशांतिस्तत्पुत्रःपुरुजोकस्ततोऽभवत् ॥ भर्म्याश्वस्तनयस्तस्यपंचासन्मुद्गलादयः ३१ यवीनरोबृहदश्वःकांपिल्यःसृंजयःसुताः ॥ भर्म्याश्वःप्राहपुत्रामेपंचानांरक्षणायहि ३२ विषयाणामल मिमेइतिपंचालसंज्ञिताः ॥ मुद्गलाद्ब्रह्मनिर्वृत्तंगोत्रंमौद्गल्यसंज्ञितम् ३३ मिथुनंमुद्गलाद्भार्म्याद्दिवोदासःपुमानभूत् ॥ अहल्याकन्यकायस्यांशतानंदस्तु गौतमात् ३४ तस्यसत्यधृतिःपुत्रोधनुर्वेदविशारदः ॥ शरद्वांस्तत्सुतोयस्मादुर्वशीदर्शनात्किल ३५

चूर्णिका

स एव नीपः शुककन्यायां कृत्व्यां ब्रह्मदत्तं सुतं प्रासूत सः ब्रह्मदत्तः सरस्वत्यां भार्यायां विष्वक्सेनं पुत्रं अधात् २५ स एव ब्रह्मदत्तः जैगीषव्योपदेशेन योगतंत्रं चकार विष्वक्सेनात् उदक्स्वनः तस्य भल्लादः एते बार्हदीषवः २६ अथ द्विमीढात् यवीनरः तस्य कृतिमान् तस्य सत्यधृतिः तस्य दृढनेमिः तस्य सुपार्श्वः २७ तस्य सुमतिः तस्य सन्नतिमान् तस्य कृती सः हिरण्यनाभात् योगंप्राप्य २८ प्राच्यसाम्नां षट्सहिताः विभज्य शिष्यान् अध्यापितवान् तस्य नीपः तस्य उपायुधः तस्य क्षे म्यः तस्य सुवीरः तस्य रिपुंजयः २९ तस्य बहुरथः तस्यपुरुमीढः अप्रजः अजमीढस्य वंशांतरमाह अजमीढात् नलिन्यां नीलः तस्य शांतिः तस्य सुशांतिः ३० तस्य पुरुजः ॥६५॥
तस्य अर्कः तस्य भर्म्याश्वः तस्य पुत्राः पंच मुद्गलः ३१ यवीनरः बृहदिषुः कांपिल्यः संजयः ३२ इमेपंचालसंज्ञकाः आसन् मुद्गलात् ब्रह्म जातं तत् गोत्रं मुद्गला ख्यं जातं ३३ मुद्गलात् मिथुनं तत्र दिवोदासः पुमान्अहल्या कन्याच तस्यां गौतमात् शतानंदः जातः ३४ तस्य सत्यधृतिः तस्य शरद्वान् यस्मात् उर्वशीदर्शनात् ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३६ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांएकविंशतितमोध्यायः २१ ॥ ॥ ७ ॥ ॥ द्वाविंशेतुदिवोदासवंशमुक्त्वाथवर्णिताः । क्षत्रवंशेजरासंधपार्थदुर्योधनादयः ॥ १ ॥ १ तस्यसोमकस्यपुत्राणांशतंबभूव । तेषांजंतुर्ज्येष्ठः।यवीयान्पृषतः। (तस्यद्रुपदस्यसुताद्रौपदी। पुत्रास्तुधृष्टद्युम्नादयः) २ अजमीढस्यैववंशांतरमाह। यइति । ततःसंवरणात्कुरुः ३ ४ तस्यकृतिनउपरिचरोवसुः । ततोवसोःबृहद्रथोमुखंआदिर्येषां ५ तानेवाह । कुशांबेतितत्सुतःपुष्पन्जज्ञे । तस्यापत्यंसत्यहितइतियोज्यं ६ ७ जरयाराक्षस्या (अतोनाम्नाजरासंधोऽभवत्) ८ यस्मात्सोमापेःश्रुतश्रवाः । कुरोःपुत्रःपरीक्षिदनपत्यः । जाह्नवोजह्नोःपुत्रः ९ अतोराधीकादयुतोभूदित्यर्थः १० ११

श्लोकाः ३६ / ११

॥६६॥ शरस्तंबेऽपतद्रेतोमिथुनंतदभूच्छुभम् ॥ तद्दृष्ट्वाकृपयाऽगृह्णात्शंतनुर्मृगयांचरन् ॥ कृपःकुमारःकन्याचद्रोणपत्न्यभवत्कृपी ३६ ॥ ॥ इतिश्री भागवतेमहापुराणेनवमस्कंधेएकविंशतितमोऽध्यायः २१ ॥ ७ ॥ श्रीशुकउवाच ॥ ॥ मित्रायुश्चदिवोदासाच्च्यवनस्तत्सुतोनृप ॥ सुदासःसहदेवोथसोमकोजंतुजन्मकृत् १ तस्यपुत्रशतंतेषांयवीयान्पृषतःसुतः ॥ द्रुपदोद्रौपदीतस्यधृष्टद्युम्नादयःसुताः २ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्यःपांचालकाइमे ॥ योऽजमीढसुतोह्यन्यऋक्षःसंवरणस्ततः ३ तपत्यांसूर्यकन्यायांकुरुक्षेत्रपतिःकुरुः ॥ परीक्षित्सुधनुर्जह्नुर्निषधाश्वःकुरोःसुताः ४ सुहोत्रोभूत्सुधनुषश्च्यवनोथततःकृती ॥ वसुस्तस्योपरिचरोबृहद्रथमुखास्ततः ५ कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्चचेदिपाः ॥ बृहद्रथात्कुशाग्रोऽभूदृषभस्तस्यसुतस्ततः ६ जज्ञेसत्यहितोऽपत्यंपुष्पवांस्तत्सुतोजह्नुः ॥ अन्यस्यांचापिभार्यायांशकलेद्वेबृहद्रथात् ७ तेमात्राबहिरुत्सृष्टेजरयाचाभिसंधिते ॥ जीवजीवेतिक्रीडंत्याजरासंधोभवत्सुतः ८ ततश्चसहदेवोभूत्सोमापिर्यच्छ्रुतश्रवाः ॥ परीक्षिदनपत्योऽभूत्सुरथोनामजाह्नवः ९ ततोविदूरथस्तस्मात्सार्वभौमस्ततोभवत् ॥ जयत्सेनस्तत्तनयोराधीकोऽतोऽयुतोह्यभूत् १० ततश्चक्रोधनस्तस्माद्देवातिथिरमुष्यच ॥ ऋष्यस्तस्यदिलीपोभूत्प्रतीपस्तस्यचात्मजः ११

चूर्णिका शरस्तंबे रेतः अपतत् तस्मात् रेतसः मिथुनं जातम् तन्मिथुनं दृष्ट्वा शंतनुः मृगयां चरन् कृपया जग्राह तत्र पुमान् कृपः कन्या कृपी सा द्रोणपत्नी आसीत् ३६ ॥ ॥ इति नवमे एकविंशः ॥ २१ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ ॥ दिवोदासात् मित्रेयुः तस्मात् च्यवनः तस्मात् सुदासः तस्मात् सहदेवः तस्मात् सोमकः १ तस्मात् पुत्रशतं बभूव तेषु जंतुः ज्येष्ठः पृषतः कनिष्ठः पृषदात् द्रुपदः तस्य द्रौपदी कन्या धृष्टद्युम्नादयः सुताः २ धृष्टद्युम्नात् धृष्टकेतुः इमे पांचालसंज्ञकाः अजमीढस्य वंशांतरमाह अजमीढात् ऋक्षः तस्य संवरणः ३ तस्य तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः तस्य पुत्राः चत्वारः परीक्षित् सुधनुः जह्नुः निषधाश्व इति ४ सुधनुषः सुहोत्रः तस्य च्यवनः तस्य कृती तस्य उपरिचरो वसुः तस्य बृहद्रथः ५ कुशांबोः मत्स्यः प्रत्यग्रः इमे चेदिपाद्याः पुत्राः चेदिपसंज्ञकाः बृहद्रथात् कुशाग्रः तस्य ऋषभः तस्य ६ पुष्पवान् तस्य सत्यहितः तस्य जह्नुः बृहद्रथादेवान्यभार्यायां द्वे शकले जाते ७ ते मात्रा बहिरुत्सृष्टे जीवजीवेतिक्रीडंत्या जरया चाभिसंधिते सः जरासंधः ८ तस्य सहदेवः तस्य सोमापिः तस्य श्रुतश्रवाः कुरुपुत्रो यः परीक्षित् सः अनपत्यः कुरुपुत्रस्य जह्नोः सुरथः ९ तस्य विदूरथः तस्य सार्वभौमः तस्य जयसेनः तस्य राधीकः तस्य अयुतः १० तस्य क्रोधनः तस्य देवातिथिः तस्य ऋष्यः तस्य दिलीपः तस्य प्रतीपः ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यप्रतीपस्यदेवापिशंतनुवाह्लीकाः १२ प्राक्पूर्वजन्मनिमहाभिषइतिसंज्ञा (जाता) यस्यसः १३ यदादेवोनववर्ष तदाशंतनुस्तत्रकारणंब्राह्मणानपप्रच्छ १४ ब्राह्मणैश्चैवमुक्तः " दाराग्निहोत्रसंयोगंकुरुतेयोऽग्रजेस्थिते । परिवेत्तासविज्ञेयःपरिवित्तिस्तुपूर्वजः" इतिस्मृतेःयोऽग्रभुक्भुवमग्रतोभुनक्तिअयंत्वाहशःपरिवेत्ताभवतिअतःपरिवेदनदोषपरिहारायराज्यमग्रजायदेहीति ततोवृष्टिर्भविष्यतीत्येवमुक्तःशंतनुः (तत्र) वनंगत्वाज्येष्ठंछंदयामास। राज्ञःप्रजापालनादिःपरमोधर्मःअतस्त्वंराज्यंस्वीकुर्वितिप्रार्थितवान्। ततःपूर्वमेवतस्यमंत्रिणाअश्मगवसंज्ञेनदेवापिंपाखंडीकृत्यराज्यानर्हंकर्तुंप्रहिताविप्राःतैःपाखंडमताश्रययागिरावेदाद्विभ्रंशितःसन्वेदवादस्यातिवादान्निंदावचनानिसोऽब्रवीत् । ततस्तस्यपातित्येनराज्यानर्हत्वेजातेशंतनोर्दोषाभावात्देवोववर्षेत्यर्थः १५ १६ १७ (कृतयुगस्यादौपुनःसोमवंशंस्थापयिष्यतिप्रवर्तयिष्यतीत्यर्थः) ततःसोमदत्ताद्भूरिःभूरिश्रवाःशलश्चेतित्रयः १८ १९ रामोजामदग्न्यः दाशकन्यायामिति उपरिचरस्यवसोर्वीर्येणमत्स्यगर्भादुत्पन्नाकन्यादाशैःकैवर्तैःपालिता अतोदाशकन्येतिप्रसिद्धायांसत्यवत्यां २० नाम्नातत्समाननाम्नाचित्रांगदेनगंधर्वेणयुद्धेहतः (नाम्नानिमित्तेनहतइतिवा) यस्यांसत्यवत्यांशंतनुपरिग्रहात्पूर्वमेव २१

श्लोकाः १२—२१

देवापिःशंतनुस्तस्यबाह्लीकइतिचात्मजाः ॥ पितृराज्यंपरित्यज्यदेवापिस्तुवनंगतः १२ अभवच्छंतनूराजाप्राङ्महाभिषसंज्ञितः ॥ यंयंकराभ्यांस्पृशतिजीर्णंयौवनमेतिसः १३ शांतिमाप्नोतिचैवाग्र्यांकर्मणातेनशंतनुः ॥ समाद्वादशतद्राज्येनववर्षयदाविभुः १४ शंतनुर्ब्राह्मणैरुक्तःपरिवेत्तायमग्रभुक् ॥ राज्यंदेह्यग्रजायाशुपुरराष्ट्रविवृद्धये १५ एवमुक्तोद्विजैर्ज्येष्ठंछंदयामाससोब्रवीत् ॥ तन्मंत्रिप्रहितैर्विप्रैर्वेदाद्विभ्रंशितोगिरा ॥ वेदवादातिवादान्वैतदादेवोववर्षह ॥ देवापिर्योगमास्थायकलापग्राममाश्रितः १७ सोमवंशेकलौनष्टेकृतादौस्थापयिष्यति ॥ बाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्रवास्ततः १८ शलश्चशंतनोरासीद्गंगायांभीष्मआत्मवान् ॥ सर्वधर्मभृतांश्रेष्ठोमहाभागवतःकविः १९ वीरोयूथाग्रणीर्येनरामोपियुधितोषितः ॥ शंतनोर्दाशकन्यायांजज्ञेचित्रांगदःसुतः २० विचित्रवीर्यश्चावरजोनाम्नाचित्रांगदोहतः ॥ यस्यांपराशरात्साक्षादवतीर्णोहरेःकला २१

चूर्णिका

तस्य पुत्राःत्रयः देवापिः शंतनुः बाल्हीकइति तत्र देवापिः पितृराज्यं त्यक्त्वा दिवं गतः ततः शंतनुः राजा अभवत् सः कराभ्यां यंयं जीर्णं स्पृशति सः यौवनं एति १२ १३ तद्राज्ये यदा द्वादश समाः देवो न ववर्ष १४ तदा शंतनुः तत्कारणं विप्रान् पृष्ट्वा तैः त्वं परिवेत्ता अतः तद्दोषपरिहारार्थं आशु अग्रजाय राज्यं देहि ततो वृष्टिः स्यात् १५ एवमुक्त्वा शंतनुः वनं गत्वा ज्येष्ठं छंदयामास शंतनुगमनात् पूर्वमेव अश्मरावसंज्ञेन मंत्रिणा देवापिं पाखंडीकृत्य राज्यानर्हं कर्तुं ये प्रहिताः विप्राः तैः वेदात् भ्रंशितः सन् वेदनिंदापरः अभवत् १६ ततः तस्य पातित्येन राज्यानर्हत्वे जाते शंतनोः दोषाभावात् देवो ववर्ष देवापिः योगं आस्थाय कलापग्रामे आस्ते १७ सः कलौ सोमवंशे नष्टे कृतादौ स्थापयिष्यति बाल्हीकात् सोमदत्तः तस्य पुत्राः त्रयः भूरिः भूरिश्रवाः शलश्चेति १८ शंतनोः गंगायां भीष्मः आसीत् १९ येन जामदग्न्योपि युधि तोषितः शंतनोः दाशकन्यायां सत्यवत्यां चित्रांगदः विचित्रवीर्यश्च जज्ञे २० तत्र चित्रांगदः तन्नामकगंधर्वेण युद्धे हतः सत्यवत्यां शंतनुपरिग्रहात्पूर्वमेव पराशरात् हरेः अंशो व्यासो जातः २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वेदागुप्ताः (शाखाप्रभेदादिनारक्षिताः) येन । यतोहंजातः । इदंश्रीभागवतंचाध्यगां अधिगतवानस्मि (समुनिःकृष्णो व्यासः) २२ २३ स्वयंवराद्भीष्मेणबलादुपनीते २४ मात्रासत्यवत्याउक्त इतिनिषेधाभावमाह । अनपत्याऽपत्यलिप्सुर्देवराद्गुरुप्रयुक्ताऋतुमतीयादित्यादिवचनात् २५ दुःशलानामकन्याचजज्ञे २६ अरण्येमृग-(रूपमुनि)-शापात् मैथुनेनरुद्धस्य (मरणलक्षणविघ्नेन) प्रतिबद्धस्य (धर्मात्यमात् युधिष्ठिरः । अनिलाद्भीमः । इंद्रादर्जुनः) २७ नासत्यदस्रयोः । अश्विभ्यामित्यर्थः । पंचभ्योयुधिष्ठिरादिभ्यः पंचाऽभवन् (तेतव) २८ २९ तथापरेचभार्यांतरेषु (अथ हिडंबायांभीमसेनाद्घटोत्कचः) ३० कालीचान्याभीमस्यभार्यातस्यांततोभीमात् सर्वगतोनामपुत्रोऽभवदित्यर्थः ३१ तथाऽर्जुनउलूप्यांनागकन्यायां (इरावंतंपुत्रमसूत) मणिपूरपतेः सुतायांचपुत्रिकाधर्मेणदत्तायांबभ्रुवाहनमसूत । अतस्तत्पुत्रःसन्नपिसःपुत्रिकासुतः मातामहसुतइत्यर्थः । (अस्यांयोजायतेपुत्रःसमेपुत्रोभविष्यतीतिभाषयाकन्यादानंपुत्रिकाधर्मः) ३२

॥६८॥

श्लोकाः २२ — ३२

वेदगुप्तोमुनिःकृष्णोयतोहमिदमध्यगाम् ॥ हित्वास्वशिष्यान्पैलादीन्भगवान्बादरायणः २२ मह्यंपुत्रायशांतायपरंगुह्यमिदंजगौ ॥ विचित्रवीर्योथोवाहकाशिराजसुतेबलात् २३ स्वयंवरादुपानीतेअंबिकांबालिकेउभे ॥ तयोरासक्तहृदयोगृहीतोयक्ष्मणामृतः २४ क्षेत्रेऽप्रजस्यवैभ्रातुर्मात्रोक्तोबादरायणः ॥ धृतराष्ट्रंचपांडुंचविदुरंचाप्यजीजनत् २५ गांधार्यांधृतराष्ट्रस्यजज्ञेपुत्रशतंनृप ॥ तत्रदुर्योधनोज्येष्ठोदुःशलाचापिकन्यका २६ शापान्मैथुनरुद्धस्यपांडोःकुंत्यांमहारथाः ॥ जाताधर्मानिलेंद्रेभ्योयुधिष्ठिरमुखास्त्रयः २७ नकुलःसहदेवश्चमाद्र्यांनासत्यदस्रयोः ॥ द्रौपद्यांपंचपंचभ्यःपुत्रास्तेपितरोऽभवन् २८ युधिष्ठिरात्प्रतिविंध्यःश्रुतसेनोवृकोदरात् ॥ अर्जुनाच्छ्रुतकीर्तिस्तुशतानीकस्तुनाकुलिः २९ सहदेवसुतोराजञ्छ्रुतकर्मातथाऽपरे ॥ युधिष्ठिरात्तुपौरव्यांदेवकोथघटोत्कचः ३० भीमसेनाद्धिडंबायांकाल्यांसर्वगतस्ततः ॥ सहदेवात्सुहोत्रंतुविजयाऽसूतपार्वती ३१ करेणुमत्यांनकुलोनिरमित्रंतथार्जुनः ॥ इरावंतमुलूप्यांवैसुतायांबभ्रुवाहनम् ॥ मणिपूरपतेःसोपितत्पुत्रःपुत्रिकासुतः ३२

चूर्णिका

यतः अहं जातः सः पैलादीन् हित्वा २२ मह्यं पुत्राय इदं भागवतं जगौ विचित्रवीर्यः काशिराजसुते २३ भीष्मेण स्वयंवरात् आनीते अंबिकांबालिके उवाह तयोः आसक्तहृदयः सः यक्ष्मणा मृतः २४ अप्रजस्य तस्य भ्रातुः क्षेत्रे मात्रोक्तः व्यासः अंबिकायां धृतराष्ट्रं अंबालिकायां पांडुं दास्यां विदुरं च अजीजनत् २५ धृतराष्ट्रस्य गांधार्यां दुर्योधनप्रमुखं पुत्रशतं दुःशला कन्या च जज्ञे २६ वने मृगशापात् मैथुने प्रतिबद्धस्य पांडोः कुंत्यां धर्मानिलेंद्रेभ्यो युधिष्ठिरप्रमुखाः त्रयः २७ माद्र्यां नासत्यदस्राभ्यां नकुलसहदेवौ द्रौपद्यां पंचभ्यः पंच पुत्राः ते पितरः अभवन् २८ तत्र युधिष्ठिरात् प्रतिविंध्यः भीमात् श्रुतसेनः अर्जुनात् श्रुतकीर्तिः नकुलात् शतानीकः २९ सहदेवात् श्रुतकर्मा तथा अन्यस्त्रीषु धर्मात् पौरव्यां देवकः भीमात् हिडिंबायां घटोत्कचः ३० तथा काल्यां सर्वगतः सहदेवात् विजयायां सुहोत्रः ३१ नकुलात् करेणुमत्यां निरमित्रः अर्जुनात् उलूप्यां नागकन्यायां इरावान् तथा मणिपूरपतेः सुतायां चित्रांगदायां पुत्रिकाधर्मेण दत्तायां बभ्रुवाहनः अतः अर्जुनपुत्रः सन्नपि मणिपूरपतेः सुतः ३२

१ अपतिरितिपाठोपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा. न. टीका ॥६९॥ | अ० ॥२२॥

(सर्वानतिरथान् जयतीतितथाभूतोऽभिमन्युःततोभिमन्योरुत्तरायांभवान् त्वंजातः) ३३ (अंतकात् भस्मसात्कर्तुंशक्तात्ब्रह्मास्त्रात्) ३४ ३५ (होष्यतिहोमंकरिष्यति) ३६ (तुरं) तुरसंज्ञंपुरोहितंकृत्वा ३७ भविष्यानाह तस्यपुत्रइतियावत्समाप्ति । याज्ञवल्क्यात् क्रियाज्ञानं (प्राप्स्यति) शौनकात्परंआत्मज्ञानंएष्यति अस्त्रज्ञानंचकृपाचार्यादितिद्रष्टव्यम् । याज्ञवल्क्यात्त्रयीमधीत्यकृपादस्त्राण्यवाप्येतिवैष्णवोक्तेः । क्वचित्तुअस्त्रज्ञानंकृपादित्येवपाठः ३८ (तत्पुत्रःशतानीकस्यपुत्रः । ततआश्वमेधसनामातत्सुतःकृष्णः) ३९ (गजाह्वयेहास्तिनपुरे ४० कौशांब्यांपुर्यां) यद्यस्मात्सुषीनरः पुत्रः ४१ तस्मात्पारिप्लवात्सुदयस्तस्यात्मजोमेधावीत्यर्थः ४२ तस्मात्सुदासः ततःशतानीकइत्यर्थः ४३ (ब्रह्मक्षत्रस्यबृहत्क्षत्रस्य । देवैर्ऋषिभिश्चसत्कृतः) ४४ (संस्थांअंतं । अथयेमागधराजानोभवितारस्तांस्तेवदामि) ४५

श्लोकाः ३३/४५

तवतातःसुभद्रायामभिमन्युरजायत ॥ सर्वातिरथजिद्वीरउत्तरायांततोभवान् ३३ परिक्षीणेषुकुरुषुद्रौणेर्ब्रह्मास्त्रतेजसा ॥ त्वंचकृष्णानुभावेनसजीवोमोचितोऽतकात् ३४ तवेमेतनयास्तातजनमेजयपूर्वकाः ॥ श्रुतसेनोभीमसेनउग्रसेनश्ववीर्यवान् ३५ जनमेजयस्त्वांविदित्वातक्षकान्निधनंगतम् ॥ सर्पान्वैसर्पयागाग्नौसहोष्यतिरुषान्वितः ३६ कावषेयंपुरोधायतुरंतुरगमेधयाट् ॥ समंतात्पृथिवींसर्वांजित्वायक्ष्यतिसोऽध्वरे ३७ तस्यपुत्रःशतानीकोयाज्ञवल्क्यात्त्रयींपठन् ॥ अस्त्रज्ञानंक्रियाज्ञानंशौनकात्परमेष्यति ३८ सहस्रानीकस्तत्पुत्रस्ततश्चैवाश्वमेधसः ॥ असीमकृष्णस्तस्यापिनेमिचक्रस्तुतत्सुतः ३९ गजाह्वयेहृतेनद्याकौशांब्यांसाधुवत्स्यति । उक्तस्ततश्चित्ररथस्तस्मात्कविरथःसुतः ४० तस्माच्चवृष्णिमांस्तस्यसुषेणोथमहीपतिः ॥ सुनीथस्तस्यभवितानृचक्षुर्यत्सुषीनरः ४१ पारिप्लवःसुतस्तस्मान्मेधावीसुदयात्मजः ॥ नृपंजयस्ततोदूर्वस्तिमिस्तस्माजनिष्यति ४२ तिमेर्बृहद्रथस्तस्माच्छतानीकःसुदासजः ॥ शतानीकाद्दुर्दमनस्तस्यापत्यंबहीनरः ४३ दंडपाणिर्नृपस्तस्यक्षेमकोभवितानृपः ॥ ब्रह्मक्षत्रस्यवंशोयंप्रोक्तोदेवर्षिसत्कृतः ४४ क्षेमकंप्राप्यराजानंसंस्थांप्राप्स्यतिवैकलौ ॥ अथमागधराजानोभवितारोवदामिते ४५

चूर्णिका

अर्जुनात् सुभद्रायां ते तातः अभिमन्युः तस्मात्त्वं ३३ द्रौणेः ब्रह्मास्त्रतेजसा क्षीणेषु कुरुषु कृष्णानुभावेन अंतकात् मोचितः ३४ तव पुत्राः चत्वारः जनमेजयः श्रुतसेनः भीमसेनः ४ उग्रसेनःइति ३५ जनमेजयः तक्षकात् त्वां निधनं गतं श्रुत्वा सर्पसत्रं कारिष्यति ३६ ततःभुवं जित्वा कावषेयं तुरसंज्ञं पुरोहितं कृत्वा अश्वमेधैःयक्ष्यति ३७ तस्य पुत्रःशतानीकः सः याज्ञवल्क्यशौनककृपेभ्यः त्रयीं क्रियात्मनोः ज्ञानं क्रमतः एष्यति ३८ तस्य सहस्रानीकः तस्य अश्वमेधसः तस्य असीमकृष्णः तस्य निमिचक्रः ३९ एते भाव्याः निमिचक्रः नद्या गजाह्वये हृते सति कौशांब्यां वत्स्यति तस्य उक्तसंज्ञः तस्य चित्ररथः तस्य कविरथः ४० तस्य वृष्टिमान् तस्य सुषेणः तस्य सुनीथः तस्य नृचक्षुः तस्य सुखीनलः[१] ४१ तस्य परिप्लवः तस्य सुनयःतस्य मेधावी तस्य नृपंजयः तस्य दूर्वः तस्य तिमिः४२ तस्य बृहद्रथः तस्य सुदासः तस्य शतानीकः तस्य दुर्दमनः तस्य वहीनरः४३ तस्य दंडपाणिः तस्य निमिः तस्य क्षेमकः४४ एवं प्राप्य पुरुवंशः संस्थां प्राप्स्यति अथ भाव्याः मागधाः राजानः ते वदामि ४५

१ सुखीनलइतिपाठांतरं ।

॥६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

बृहद्रथस्यजरासंधःतस्यसहदेवस्तस्यमार्जारिः यस्मान्मार्जारेः श्रुतश्रवाः ४६ ४७ ४८ सहस्रसंवत्सरमेतेभाव्याभूपालाः ततःपरंभाव्यान् द्वादशस्कंधेवक्ष्यति ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणे नवमस्कंधेटीकायांद्वाविंशोऽध्यायः २२ ॥ ॥ ७ ॥ ॥त्रयोविंशेत्वनोर्द्रुह्योस्तुर्वसोश्चान्वयःक्रमात् । यदोश्चवंशोऽनुक्रांतोयावज्ज्यामघसंभवः ॥ १ ॥ तदेवंययातेःपुत्राणांपंचमस्यपुरोर्वं शअनुक्रांतः । इदानींचतुर्थस्यवंशमनुक्रामति । अनोरिति कर्णस्यजगतीपतेरित्यंतेन १तस्यजनमेजयस्यमहाशीलःतस्यमहामनाः २ चत्वारउशीनरात्मजाःसंधिरार्षः (वृषादर्भादयःशिबेरात्मजाः) ३४ (दीर्घतमसऋषेः) ५ (विषयान् देशान् अंगात् खनपानोनाम) ६ (चित्ररथएवरोमपादाख्यस्तस्यसखादशरथःस्वांकन्यांतस्मैदत्तवान्तांऋष्यशृंगोववे) ७ (अवर्षतिसतियमृष्यशृंगम्) ८

श्लोकाः ४६–८

॥७०॥ भवितासहदेवस्यमार्जारिर्यच्छ्रुतश्रवाः ॥ ततोऽयुतायुस्तस्यापिनिरमित्रोथतत्सुतः ४६ सुनक्षत्रःसुनक्षत्राद्बृहत्सेनोथकर्मजित् ॥ ततःसुतंजयोविप्रःशु
चिस्तस्यभविष्यति ४७ क्षेमोथसुव्रतस्तस्माद्धर्मनेत्रःशमस्ततः ॥ द्युमत्सेनोथसुमतिःसुबलोजनितस्ततः ४८ सुनीतःसत्यजिदथविश्वजिद्यद्रिपुंजयः ॥
बार्हद्रथाश्चभूपालाभाव्याःसाहस्रवत्सरम् ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेद्वाविंशोऽध्यायः २२ ॥ ॥ छ ॥ श्रीशुकउवाच
अनोःसभानरश्चक्षुःपरोक्षश्चत्रयःसुताः ॥ सभानरात्कालनरःसृंजयस्तत्सुतस्ततः १ जनमेजयस्तस्यसुतोमहाशीलोमहामनाः ॥ उशीनरस्तितिक्षुश्चम
हामनसआत्मजौ २ शिबिर्वनःशमिर्दक्षश्चत्वारोशीनरात्मजाः ॥ वृषादर्भःसुवीरश्चमद्रःकैकेयआत्मजाः ३ शिबेश्चत्वारएवासंस्तितिक्षोश्चउशद्रथः ॥ त
तोहेमोथसुतपाबलिःसुतपसोऽभवत् ४ अंगवंगकलिंगाद्याःसुह्मपुंड्रांध्रसंज्ञिताः ॥ जज्ञिरेदीर्घतमसोबलेःक्षेत्रेमहीक्षितः ५ चक्रुःस्वनाम्नाविषयान्षडिमा
न्प्राच्यकानिह ॥ खनपानोंऽगतोजज्ञेतस्माद्दिविरथस्ततः ६ सुतोधर्मरथोयस्यजज्ञेचित्ररथोऽप्रजः ॥ रोमपादइतिख्यातस्तस्मैदशरथःसखा ७ शां
तांस्वकन्यांप्रायच्छदृष्यशृंगउवाहताम् ॥ देवेऽवर्षतियंरामाआनिन्युर्हरिणीसुतम् ८

चूर्णिका

बृहद्रथात् पूर्वोक्तात् जरासंधः तस्य सहदेवः तस्य मार्जारिः तस्य श्रुतश्रवाः तस्य अयुतायुः तस्य निरमित्रः ४६ तस्य सुनक्षत्रः तस्य बृहत्सेनः तस्य कर्मजित् तस्य सृंजयः तस्य विप्रः तस्य शुचिः ४७ तस्य क्षेमः तस्य सुव्रतः तस्य धर्मसूत्रः तस्य शमः तस्य द्युमत्सेनः तस्य सुमतिः तस्य सुबलः ४८ तस्य सुनीथः तस्य सत्यजित् तस्य विश्वजित् तस्य रिपुंजयः भविष्यति एते बार्हद्रथाः भूपालाः साहस्रसंवत्सरं भाव्याः ४९ ॥ ॥ इति नवमे द्वाविंशः २२ ॥ ॥ छ ॥ ॥ ॥ श्रीशुक उवाच ॥ ययातिपुत्रस्य अनोः पुत्राः त्रयः सभानरः चक्षुः परोक्षः इति सभानरात् कालनरः तस्य सृंजयः १ तस्य जनमेजयः तस्य महात्मनाः तस्य उशीनरः तितिक्षुश्च द्वौ पुत्रौ २ उशीनरस्य पुत्राः चत्वारः शिबिः वनः शमिः दक्षइति शिबेः पुत्राः वृषादर्भः सुवीरः मद्रः कैकयः इति ३ उशीनरबंधोः तितिक्षोः रुशद्रथः तस्य हेमः तस्य सुतपाः तस्य बलिः ४ तत्क्षेत्रे दीर्घतमसः अंगवंगकलिंगाद्याः सुह्मपुंड्रांध्रसंज्ञिताः पुत्राः ५ एते स्वनाम्ना षट् देशान् चक्रुः अंगात् खनपानः तस्य दिविरथः ६ तस्य धर्मरथः तस्य चित्ररथः सः अप्रजः एव रोमपाद इति ख्यातः ७ तस्मै दशरथः शांतां स्वकन्यां ददौ तां ऋष्यशृंगः उवाह यं रामाः वृष्ट्यर्थं नात्यगीतादिभिः आनिन्युः ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (विश्रमोहावविशेषःअर्हणंउपचारसमर्पणम् । सतुऋष्यशृंगःमरुत्पतेरिष्टिंनिरूप्य राज्ञोरोमपादस्य प्रजामदात् । येनऋष्यशृंगेणहेतुभूतेनइष्टिविशेषेणवादशरथोपिचतुरःपुत्रान्लेभे) ९ (तस्माद्रोमपादच्चतुरंगः पुत्रोभूत् तस्यचतुरंगस्यसुतःपृथुलाक्षः) १० (आद्याद्बृहद्रथात्) ११ १२ (कानीनंकन्यायांजातं अपविद्धंत्यक्तं मंजूषांतर्गतंपेटायांविद्यमानं) १३ (द्रुह्योर्वंशमाह द्रुह्योरिति) १४ १५ १६ १७ सदुष्यंतःस्ववंशंपौरववंशम् १८ १९ २० प्रथमस्यहसस्रजितः आत्मजः २१

श्लोकाः ९/२१

॥७१॥ नाट्यसंगीतवादित्रैर्विभ्रमालिंगनार्हणैः ॥ सतुराज्ञोऽनपत्यस्यनिरूप्येष्टिंमेरुत्पतेः ९ प्रजामदाद्दशरथोयेनलेभेऽप्रजःप्रजाः ॥ चतुरंगोरोमपादात्पृथुलाक्षस्तुतत्सुतः १० बृहद्रथोबृहत्कर्माबृहद्भानुश्चतत्सुताः १० आद्याद्बृहन्मनास्तस्माजयद्रथउदाहृतः ११ विजयस्तस्यसंभूत्यांततोधृतिरजायत ॥ ततोधृतव्रतस्तस्यसत्कर्माधिरथस्ततः १२ योसौगंगातटेक्रीडन्मंजूषांतर्गतंशिशुम् ॥ कुंत्यापविद्धंकानीनमनपत्योकरोत्सुतम् १३ वृषसेनःसुतस्तस्यकर्णस्यजगतीपते ॥ द्रुह्योश्चतनयोबभ्रुःसेतुस्तस्यात्मजस्ततः १४ आरब्धस्तस्यगांधारस्तस्यधर्मस्ततोधृतः ॥ धृतस्यदुर्मदस्तस्मात्प्रचेताःप्राचेतसंशतम् १५ म्लेच्छाधिपतयोभूवन्नुदीचींदिशमाश्रिताः ॥ तुर्वसोश्चसुतोवह्निर्वह्नेर्भर्गोथभानुमान् १६ त्रिभानुस्तत्सुतोस्यापिकरंधमउदारधीः ॥ मरुतस्तत्सुतोऽपुत्रःपुत्रंपौरवमन्वभूत् १७ दुष्यंतंसपुनर्भेजेस्ववंशंराज्यकामुकः ॥ ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशंनरर्षभ १८ वर्णयामिमहापुण्यंसर्वपापहरंनृणाम् ॥ यदोर्वंशंनरःश्रुत्वासर्वपापैःप्रमुच्यते १९ यत्रावतीर्णोभगवान्परमात्मानराकृतिः ॥ यदोःसहस्रजित्क्रोष्टानलोरिपुरितिश्रुताः २० चत्वारःसूनवस्तत्रशताजित्प्रथमात्मजः ॥ महाहयोवेणुहयोहैहयश्चेतितत्सुताः २१

चूर्णिका सः हरिणीसुतः मरुत्वतः इष्टिं निरूप्य चित्ररथाय प्रजां अदात् येन दशरथोपि प्रजाः लेभे ९ रोमपादात् चतुरंगः तस्य पृथुलाक्षः १० तस्य पुत्राः त्रयः बृहद्रथः बृहत्कर्मा बृहद्भानुरिति बृहद्रथात् बृहन्मनाः तस्य जयद्रथः ११ तस्य विजयः तस्य धृतिः तस्य धृतव्रतः तस्य सत्कर्मा तस्य अधिरथः १२ यः गंगातटे क्रीडन् कुंत्या त्यक्तं मंजूषागतं कानीनं सुतं अकरोत् सः कर्णः १३ तस्य वृषसेनः द्रुह्योर्वंशं शृणु द्रुह्योः बभ्रुः तस्य सेतुः १४ तस्य आरब्धः तस्य गांधारः तस्य धर्मः तस्य धृतः तस्य दुर्मनाः तस्य प्रचेताः तस्य शतंपुत्राः म्लेच्छपतयो बभूवुः १५ अथ तुर्वसोः वन्हिः तस्य भर्गः तस्य भानुमान् १६ तस्य त्रिभानुः तस्य करंधमः तस्य मरुतः सः अपुत्रः सन् पौरवं दुष्यंतं पुत्रत्वेन अन्वभूत् १७ सः दुष्यंतः पुनः स्वं पुरुवंशं राज्यकामुकः सन् भेजे १८ ययातेर्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ वर्णयामि महापुण्यं सर्वपापहरं नृणाम् यदोर्वंशं नरः श्रुत्वा सर्वपापैः प्रमुच्यते १९ यत्रावतीर्णो भगवान् परमात्मा नराकृतिः यदोः पुत्राः चत्वारः सहस्रजित् क्रोष्टा नलः रिपुः इति २० ज्येष्ठात् शतजित् तस्य पुत्राः त्रयः महाहयः वेणुहयः हैहयः इति २१

१ मरुत्वतःइतिपाठभेदो दृश्यतेकचित् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(नेत्रात्कुंतिरभवदित्यर्थः) कुंतेःसोहंजिः सोहंजेर्महिष्मान् महिष्मतोभद्रसेनकः २२ तस्यदुर्मदो धनकश्चेति द्वौपुत्रौ । कृतवीर्यसूःकृतवीर्यस्यजनकः । कृतवीर्यादयश्चत्वारोधनकात्मजाइत्यर्थः २३ (माप्तायोगस्यमहागुणाअणिमादयोयेन) २४ २५ अनष्टमविनाशंवित्तंयेनतथाविधंस्मरणंयस्यसः । अक्षय्यंषड्वसुषडिंद्रियविषयंबुभुजे २६ २७ और्वस्यतेजसासगरेणोपसंहृतमित्यर्थः २८ तेषां तालजंघपुत्राणांज्येष्ठःतस्यमधोःपुत्रशतंवृष्णिर्ज्येष्ठोयस्मिन् । यतोमधोर्वृष्णेर्यदोश्चहेतोरिदंकुलम् २९ ३० ३१ चतुर्दशमहारत्नानितत्तज्जातिश्रेष्ठानियस्यसः । तानिचमार्कंडेयपुराणेवर्णितानि । " गजवाजिरथस्त्रीषुनिधिमालांबरद्रुमाः । शक्तिपाशमणिच्छत्रविमानानिचतुर्दश " इति (तस्य) दशानांपत्नीसहस्राणां (दशसहस्रसंख्याकभार्याणां) अयुतस्यप्रत्येकंलक्षंलक्षमित्येवं तासुपुत्राणांदशलक्षसहस्राणि (आसन् तानिसमहायशास्तासु) जनयामासइत्यर्थः ३२

श्लोकाः २२—३२

धर्मस्तुहैहयसुतोनेत्रःकुंतिपिताततः ॥ सोहंजिरभवत्कुंतेर्महिष्मानभद्रसेनकः २२ दुर्मदोभद्रसेनस्यधनकःकृतवीर्यसूः ॥ कृताग्निःकृतवर्माचकृतौजाधनकात्मजाः २३ अर्जुनःकृतवीर्यस्यसप्तद्वीपेश्वरोऽभवत् ॥ दत्तात्रेयाद्धरेरंशात्प्राप्तयोगमहागुणः २४ ननूनंकार्तवीर्यस्यगतिंयास्यंतिपार्थिवाः ॥ यज्ञदानतपोयोगैःश्रुतवीर्यजयादिभिः २५ पंचाशीतिसहस्राणिह्यव्याहतबलःसमाः ॥ 'अकरोदर्जुनोराज्यंहरिंचैवान्वहंस्मरन्' ॥ अनष्टवित्तस्मरणोबुभुजेक्षय्यषड्वसु २६ तस्यपुत्रसहस्रस्यपंचैवोर्वरितामृधे ॥ जयध्वजःशूरसेनोवृषभोमधुरूर्जितः २७ जयध्वजात्तालजंघस्तस्यपुत्रशतंत्वभूत् ॥ क्षत्रंयत्तालजंघाख्यमौर्वतेजोपसंहृतम् २८ तेषांज्येष्ठोवीतिहोत्रोवृष्णिःपुत्रोमधोःस्मृतः ॥ तस्यपुत्रशतंत्वासीद्वृष्णिज्येष्ठंयतःकुलम् २९ माधवावृष्णयोराजन्यादवाश्चेतिसंज्ञितम् ॥ यदुपुत्रस्यचक्रोष्टोःपुत्रोवृजिनवांस्ततः ३० श्वाहिस्ततोरुशेकुर्वैतस्यचित्ररथस्ततः ॥ शशबिंदुर्महायोगीमहाभागोमहानभूत् ३१ चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः ॥ तस्यपत्नीसहस्राणांदशानांसुमहायशाः ॥ दशलक्षसहस्राणिपुत्राणांतास्वजीजनत् ॥ ३२ ॥

चूर्णिका

हैहयात् धर्मः तस्य नेत्रः तस्य कुंतिः तस्य सोहंजिः तस्य महिष्मान् तस्य भद्रसेनकः तस्य पुत्रौ द्वौ दुर्मदः धनकश्चेति धनकस्यपुत्राः चत्वारः कृतवीर्यः कृताग्निः कृतवर्मा कृतौजाः इति २३ कृतवीर्यस्य सहस्रार्जुनः सप्तद्वीपेश्वरः अभवत् सः दत्तात्रेयात् योगसिद्धिं प्राप २४ तस्य गतिं यज्ञादिभिः अन्ये नृपाः न यास्यंति २५ सः पंचाशीतिसहस्राणि समाः राज्यं चकार २६ तस्य पुत्रसहस्रेषु युद्धे पंच उर्वरिताः ते च जयध्वजः शूरसेनः वृषभः मधुः ऊर्जितः इति २७ जयध्वजात् तालजंघः तस्य पुत्रशतं जज्ञे तत् और्वतेजसा सगरेण उपसंहृतम् २८ तत्र वीतिहोत्रो ज्येष्ठः अथ मधोः वृष्णिज्येष्ठं पुत्रशतमासीत् यतः मधोः वृष्णेः यदोश्च हेतोः इदं कुलं तत्संज्ञं २९ यदुपुत्रस्य क्रोष्टोः वृजिनवान् ३० तस्य श्वाहिः तस्य रुशेकुः तस्य चित्ररथः तस्य शशबिंदुः तस्य महाभोजः ३१ सः स्वस्य अयुतस्त्रीषु प्रत्येकं लक्षं लक्षं एवं पुत्राणां दशलक्षसहस्राणि अजनयत् ३२

१ इदमर्धं मुंबामुद्रितपुस्तके न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पृथुश्रवाःपृथुकीर्तिः पृथुयशाइत्यादयःषट्प्रधानाःश्रेष्ठायेषांतेषांमध्ये (पृथुश्रवसोधर्मोनामआत्मजआसीत् । तस्योशनाअश्वमेधशतस्ययष्टाऽसीत्) ३३ पंचआत्मजाआसन्तान् शृणु तानेवाह पुरुजिदिति ३४ तत्रभार्याभयादेवैकभार्यस्यवंध्यापतेरपुत्रस्यज्यामघस्यतद्वयमेवपुत्रप्रदमभवदितिदर्शयन्नाह ज्यामघइति । (ज्यामघस्तुशैब्यायाःपतिःसोऽप्रजोपिशैब्यायाभयात् अन्यांभार्यांनाविंदत् । सकदाचित् शत्रुभवनात् भोज्यांनामकन्यांजित्वाऽहार्षीत् ३५ ३६ (भयसंभ्रमव्याकुलेनभर्त्रातिवेयंस्नुषेत्यभिहितेयद्यहंवंध्यानस्याम्) यदिवामेसपत्नीस्यात् तर्हिस्नुषेयंयुज्येतापिनत्वेतदस्तीत्याह असपत्नीचेति (अहमिति) ३७ अतिभयव्याकुलआह जनयिष्यसीति भार्याभयेनप्रकंपमानस्यस्विन्नसर्वांगस्यराज्ञःप्राणसंकटमालोक्यसदयहृदयास्तेनपूर्वंबहुकालमाराधिताविश्वेदेवाःपितरश्चतद्वचनं तथास्त्वित्यन्वमोदंत ३८ ततश्चदेवताप्रसादेननिवृत्तरजस्कापिशैब्यागर्भमधात् (नाम्नास्नुषाम्) ज्यामघस्यमहिमापराशरादिभिरुक्तः । " भार्यावश्यास्तुयेकेचिद्भविष्यंत्यथवामृताः । तेषांतुज्यामघःश्रेष्ठःशैब्यापतिरभून्नृप" इति ३९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेटीकायांत्रयोविंशोऽध्यायः २३ ॥ ॥ ७ ॥ ॥ चतुर्विंशेविदर्भस्यपुत्रत्रयसमुद्भवाः । वंशानानामुखाः प्रोक्तारामकृष्णोद्भवावधि ॥ १ ॥ १

॥७३॥

॥२३॥

श्लोकाः ३३/१

तेषांतुषट्प्रधानानांपृथुश्रवसआत्मजः ॥ धर्मोनामोशनास्तस्यहयमेधशतस्ययाट् ३३ तत्सुतोरुचकस्तस्यपंचासन्नात्मजाःशृणु ॥ पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ३४ ज्यामघस्त्वप्रजोप्यन्यांभार्यांशैब्यापतिर्भयात् ॥ नाविंदच्छत्रुभवनाद्भोज्यांकन्यामहार्षीत् ३५ रथस्थांतांनिरीक्ष्याहशैब्यापतिममर्षिता ॥ केयंकुहकमत्स्थानंरथमारोपितेतिवै ३६ स्नुषातवेत्यभिहितेस्मयंतीपतिमब्रवीत् ॥ अहंवंध्याऽसपत्नीचस्नुषामेयुज्यतेकथम् ३७ जनयिष्यसियंराज्ञितस्येयमुपयुज्यते ॥ अन्वमोदंतताद्विश्वेदेवाःपितरएवच ३८ शैब्यागर्भमधात्कालेकुमारंसुषुवेशुभम् ॥ सविदर्भइतिप्रोक्तउपयेमेस्नुषांसतीम् ३९ ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेत्रयोविंशोऽध्यायः २३ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ तस्यांविदर्भोऽजनयत्पुत्रौनाम्नाकुशक्रथौ ॥ तृतीयंरोमपादंचवैदर्भकुलनंदनम् १

चूर्णिका

तत्र पृथुश्रवाः पृथुयशाः इत्यादयः षट् मुख्याः पृथुश्रवसः धर्मः तस्य उशनाः ३३ तस्य रुचकः तस्य पुत्राः पंच पुरुजित् रुक्मः रुक्मेषुः पृथुः ज्यामघश्चेति ज्यामघः ३४ अप्रजः तस्य शैब्या स्त्री आसीत् सः एकदा शत्रुभवनात् भोज्यां कन्यां जहार ३५ रथस्थां तां दृष्ट्वा शैब्या आह हे कुहक केयं मत्स्थानं रथं स्थापिता ३६ इति श्रुत्वा भयात् तव स्नुषा इत्याह सा स्मयंती सती पतिं आह अहं वंध्या असपत्नी च स्नुषा मे युज्यते कथं ३७ तदा सः प्राह जनयिष्यसि यं राज्ञितस्येयमुपयुज्यते अन्वमोदंत तद्विश्वे देवाः पितर एव च ३८ शैब्या गर्भमधात्काले कुमारं सुषुवे शुभम् स विदर्भ इति प्रोक्त उपयेमे स्नुषां सतीम् ३९ ॥ इति नवमे त्रयोविंशः २३ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ ॥ विदर्भः तस्यां कुशक्रथरोमपादान् त्रीन् पुत्रान् अजनयत् १

॥७३॥

१ अनुकंपिताइति पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. न. ततश्चैचादयोदमघोषाद्याः २ ३ ततोदशरथाच्छकुनिः (तस्यकरंभिरित्यर्थः) पुराणांतरादेवमादिर्विशेषोद्रष्टव्यः ४ ततः कुरुवशादनुः अनोः पुत्रः पुरुहोत्रः ५ ६ महाभोजश्चेत्येवंसप्त । मारिषहे आर्य ७ ८ ९ तत्तदुपदेशभेदेनयेषांचषष्ट्यादिसंख्याः पुरुषाः ते अमृतत्वंमोक्षंप्राप्ताः १० ११ तस्ययुधाजितः शिनिरनमित्रश्च १२ १३ सात्यकिः सत्यकस्यपुत्रोयुयुधानः तस्यजयः तस्यकुणिः ततः कुणेर्युगंधरः । अनमित्रस्यैवापरः वृष्णिर्नामपुत्रः (एवमनमित्रस्यनिम्नः शिनिर्वृष्णिरिति त्रयः पुत्राउक्ताः । ततोवृष्णेः) १४ — अ० ॥२४॥

टीका

॥७४॥ रोमपादसुतोबभ्रुर्बभ्रोःकृतिरजायत ॥ कुशिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयोनृपाः २ क्रथस्यकुंतिःपुत्रोभूद्धृष्टिस्तस्याथनिर्वृतिः ॥ ततोदशार्होनाम्नाभू — श्लोकाः
त्तस्यव्योमसुतस्ततः ३ जीमूतोविकृतस्तस्ययस्यभीमरथःस्मृतः ॥ ततोनवरथःपुत्रोजातोदशरथस्ततः ४ करंभिःशकुनेःपुत्रोदेवरातस्तदात्मजः ॥ दे
वक्षत्रःसुतस्तस्यमधुःकुरुवंशादनुः ५ पुरुहोत्रस्त्वनोःपुत्रस्तस्यायुःसात्वतस्ततः ॥ भजमानोभजिर्दिव्योवृष्णिर्देवावृधोऽधकः ६ सात्वतस्यसुताःसप्तम — २/१४
हाभोजश्चमारिष ॥ भजमानस्यनिम्लोचिःकिंकिणोधृष्टिरेवच ७ एकस्यामात्मजाःपत्न्यामन्यस्यांतुत्रयःसुताः ॥ शताजिच्चसहस्राजिदयुताजिदितिप्रभो
८ बभ्रुर्देवावृधसुतस्तयोःश्लोकान्पठंत्यमून् ॥ यथैवशृणुमोदूरात्संपश्यामस्तथांतिकात् ९ बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः ॥ पुरुषाःपंचषष्टिश्चष
ट्सहस्राणिचाष्टच १० येऽमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि ॥ महाभोजोपिधर्मात्माभोजाआंसस्तदन्वये ११ वृष्णेःसुमित्रःपुत्रोऽभूद्युधाजिच्चपरंतप ॥
शिनिस्तस्यानमित्रश्चनिम्नोऽभूदनमित्रतः १२ सत्राजितःप्रसेनश्चनिम्नस्याप्यासतुःसुतौ ॥ अनमित्रसुतोयोन्यःशिनिस्तस्यचसत्यकः १३ युयुधानःसात्य
किर्वैजयस्तस्यकुणिस्ततः ॥ युगंधरोऽनमित्रस्यवृष्णिःपुत्रोऽपरस्ततः १४

चूर्णिका रोमपादस्य बभ्रुः तस्य कृतिः तस्य उशिकः तस्य चेदिः तस्मात् चैद्यादयः २ अथ क्रथस्य कुंतिः तस्यधृष्टिः तस्य निर्वृतिः तस्य दाशार्हः तस्य व्योमः ३ तस्य जीमूतः तस्य विकृतिः तस्य भीमरथः तस्य नवरथः तस्य दशरथः ४ तस्य शकुनिः तस्य करंभिः तस्य देवरातःतस्य देवक्षत्रःतस्य मधुःतस्य कुरुवशः तस्य अनुः ५ तस्य पुरुहोत्रः तस्य आयुः तस्य सात्वतः तस्य पुत्राः सप्त भजमानः भजिः दिव्यः वृष्णिः देवावृधः अंधकः महाभोजःइति ६ भजमानात् एकस्यां पुत्राः त्रयः निम्लोचिः किंकिणः वृष्णिः इति ७ तथा अन्यस्यां पुत्राः त्रयः शताजित् सहस्राजित् अयुताजित् इति ८ अथ देवावृधात् बभ्रुः सः मनुष्येषु श्रेष्ठः देवावृधश्च देवैः समं ताभ्यां अष्टाधिकपंचषष्टिसहस्रं पुरुषाः मोक्षं प्राप्ताः अथ महाभोजान्वये भोजाः आसन् ९ १० ११ अथ सात्वतपुत्रस्य वृष्णेः पुत्रौ द्वौ सुमित्रः युधाजित् इति युधाजितः पुत्रौ द्वौ शिनिः अनमित्रश्च अनमित्रात् निम्नः १२ तस्य पुत्रौ द्वौ सत्राजितः प्रसेनश्च इति अनमित्रसुतोन्यः शिनिः तस्य सत्यकः १३ तस्य युयुधानः तस्य जयः तस्य कुणिः तस्य युगंधरः अनमित्रस्य अपरः पुत्रः वृष्णिः १४ — ॥७४॥

१ कुरुवशस्तत ’ इतिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अक्रूरःप्रमुखोयेषामित्यतद्गुणसंविज्ञानोबहुव्रीहिः १५ अतोऽक्रूरातिरिक्तान् द्वादशदर्शयतिआसंगइति १६ १७ पृथुरेकः विदूरथाद्याअन्ये चबहवः विपृथुधान्यइतिपाठेआद्यशब्देनविदूरथोप्युक्तः ततश्च शूरोविदूरथादासीदितिवक्ष्यमाणनिर्देशोपपत्तिः १८ कुकुरादयश्चत्वारोंधकस्यसुताइतिज्ञेयम् । यथाह श्रीपराशरः । " कुकुरभजमानशुचिकंबलबर्हिषाख्यास्तथांधकस्यपुत्राइति (वृष्णेस्तनयोविलोमा) १९ (यस्यकपोतरोम्णः सुतोऽनुः यस्यानोः सखा तुंबुरुरासीत्) अनोरंधकः पुत्रः अंधकाद्दुंदुभिरित्यपिपराशरवचनादेवज्ञेयम् । अतोदरिद्रात्पुनर्वसुः२० (तस्यपुत्रआहुकआहुकीकन्या) २१ श्रुतदेवाआदिर्यासांशांतिदेवादीनांषण्णांताः सप्त २२ २३ औग्रसेनयःउग्रसेनस्यसुताः २४ वसुदेवस्ययेऽनुजादेवभागादयस्तेषांस्त्रियोभार्याः २५

॥७५॥ श्वफल्कश्चित्ररथश्चैवगांदिन्यांतुश्वफल्कतः ॥ अक्रूरप्रमुखाआसन्पुत्राद्वादशविश्रुताः १५ आसंगःसारमेयश्चमृदुरोमृदुविद्गिरिः ॥ धर्मवृद्धःसुकर्माचक्षेत्रोपेक्षोऽरिमर्दनः १६ शत्रुघ्नोगंधमादश्चप्रतिबाहुश्चद्वादश ॥ तेषांस्वसासुचाराख्याद्वावक्रूरसुतावपि १७ देववानुपदेवश्चतथाचित्ररथात्मजः ॥ पृथुर्विदूरथाद्याश्चबहवोवृष्णिनंदनाः १८ कुकुरोभजमानश्चशुचिःकंबलबर्हिषः ॥ कुकुरस्यसुतोवह्निर्विलोमातनयस्ततः १९ कपोतरोमायस्यानुःसखायस्यचतुंबुरुः ॥ अंधकोदुंदुभिस्तस्यदरिद्योतःपुनर्वसुः २० तस्याहुकश्चाहुकीचकन्याद्वावाहुकात्मजौ ॥ देवकश्चोग्रसेनश्चचत्वारोदेवकात्मजाः २१ देववानुपदेवश्चसुदेवोदेववर्धनः ॥ तेषांस्वसारःसप्तासन्श्रुतदेवादयोनृप २२ शांतिदेवोपदेवाचश्रीदेवादेवरंजिता ॥ सहदेवादेवकीचवसुदेवउवाहताः २३ कंसःसुनामान्यग्रोधःकंकःशंकुःसुहूःस्तथा ॥ राष्ट्रपालोथसृष्टिश्चतुष्टिमानौग्रसेनयः २४ कंसाकंसवतीकंकाशूरभूराष्ट्रपालिका ॥ उग्रसेनदुहितरोवसुदेवानुजस्त्रियः २५

श्लोकाः १५/२५

चूर्णिका

तस्य पुत्रौ द्वौ श्वफल्कः चित्ररथश्च इति श्वफल्कात् गांदिन्यां त्रयोदश पुत्राः १५ अक्रूरः आसंगः सारमेयः मृदुरः मृदुवित् गिरिः धर्मवृद्धः सुकर्मा क्षत्रोपेक्षः अरिमर्दनः शत्रुघ्नः गंधमादः प्रतिबाहुः इति सुचीराख्या तेषां स्वसास्ति १६ १७ अक्रूरस्य पुत्रौ द्वौ देववान् उपदेवश्च इति श्वफल्कबंधोः चित्ररथस्य पृथुः एकः अन्ये विदूरथाद्याः बहवः संति १८ सात्वतपुत्रात् अंधकात् पुत्राः चत्वारः कुकुरः भजमानः शुचिः कंबलबर्हिः इति कुकुरस्यवन्हिःतस्य विलोमा १९ तस्य कपोतरोमा तस्य अनुः तस्य अंधकःतस्य दुंदुभिः तस्य अरिद्योतः तस्य पुनर्वसुः २० तस्य आहुकः आहुकी कन्या च आहुकस्य पुत्रौ द्वौ देवकः उग्रसेनः इति देवकात्मजाः चत्वारः देववान् उपदेवः सुदेवः देववर्धनः इति तेषां भगिन्यः सप्त २२ धृतदेवा शांतिदेवा उपदेवा श्रीदेवा देवरक्षितासहदेवा देवकीइति एताः वसुदेवः उवाह २३ उग्रसेनस्य पुत्राः नव कंसः सुनामा न्यग्रोधः कंकः शुंकुः सुहूः राष्ट्रपालः सृष्टिः तुष्टिमान् इति २४ एषां भगिन्यः पंच कंसा कंसवती कंका शूरभूः राष्ट्रपालिका इति एताः वसुदेवानुजस्त्रियः २५ ॥७५॥

१ धृतदेवेतिपाठातरं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अंधकस्यसुतानांचतुर्णांप्रथमस्यकुकुरस्यवंशउक्तः । द्वितीयस्यभजमानस्यवंशमाह । शूरोविदूरथादिति । भजमानाच्चविदूरथः पुत्रोऽभवत् विदूरथाच्चशूरइतिपराशरादिवचनात् यद्वा पृथुर्विदूरथाद्याइतिपूर्वोक्ताच्चित्ररथात्मजाद्विदूरथात् २६ देवमीढस्ययः शूरोनामपुत्रस्तस्य । देवमीढस्तुहृदीकस्यसुतः । यथाह पराशरः । तस्यापिकृतवर्मशतधनुर्देवमीढुषाद्याः पुत्राबभूवुः देवमीढुषस्यशूरः शूरस्यापिमारिषानामपत्न्यभूत् । तस्यांचासौदशपुत्रानजनयद्वसुदेवपूर्वानिति २७ २८ आनकाश्चनेदुः २९ हरेः प्रादुर्भावस्यस्थानम् ३० पृथायाः कन्यकावस्थायांकर्णोत्पत्तिप्रकारमाह कुंतेरितिपंचभिः (पृथायाः पिताशूरः स्वस्यसख्युरपुत्रस्यकुंतेः पृथामदात् अतस्तेनपालितासानाम्नाकुंतीतिप्रसिद्धा । सातत्रस्थितासती) ३१ कदाचिद्गृहमागतंदुर्वाससं पृथा परिचर्यादिना तोषयामास । ततश्चसा (प्रतोषितात्) तस्माद्देवाह्वानहेतुभूतांविद्यामवाप । तदाह सापेति (देवानांहूतिराह्वानंयतस्तांआप लेभे) ३२ तंदेवमुपागतंवीक्ष्य सा प्राह । प्रत्ययार्थंपरीक्षार्थंमयाविद्या प्रयुक्ता । नतु त्वयाकिंचित्कार्यमित्यभिसंधिनाप्रयोगोयम् । अतोयाहीत्येवमुक्तोरविरुवाच ३३ अमोघंदेवदर्शनमिति कन्याहमितिचेत्तत्राह । योनिरिति । यथायोनिर्नंदुष्येततथाहंकर्ताकरिष्यामि ३४ ३५ ३६

श्लोकाः २६—३६

शूरोविदूरथादासीद्भजमानःसुतस्ततः ॥ शिनिस्तस्मात्स्वयंभोजोहृदीकस्तत्सुतोमतः २६ देवबाहुःशतधनुःकृतवर्मेतितत्सुताः ॥ देवमीढस्यशूरस्यमारिषानामपत्न्यभूत् २७ तस्यांसजनयामासदशपुत्रानकल्मषान् ॥ वसुदेवंदेवभागंदेवश्रवसमानकम् २८ सृंजयंश्यामकंकंकंशमीकंवत्सकंवृकम् ॥ देवदुंदुभयोनेदुरानकायस्यजन्मनि २९ वसुदेवंहरेःस्थानंवदंत्यानकदुंदुभिम् ॥ पृथाचश्रुतदेवाचश्रुतकीर्तिःश्रुतश्रवाः ३० राजाधिदेवीचैतेषांभगिन्यःपंचकन्यकाः ॥ कुंतेःसख्युःपिताशूरोह्यपुत्रस्यपृथामदात् ३१ सापदुर्वाससोविद्यांदेवहूतिंप्रतोषिताद ॥ तस्यावीर्यपरीक्षार्थंआजुहावरविंशुचिः[1] ३२ तंदेवोपगतंदेवंवीक्ष्यविस्मितमानसा ॥ प्रत्ययार्थंप्रयुक्तामेयाहिदेवक्षमस्वमे ३३ अमोघंदर्शनंदेविआधत्सेत्वयिचात्मजम् ॥ योनिर्यथानदुष्येतकर्ताहंतेसुमध्यमे ३४ इतितस्यांसमाधायगर्भंसूर्योदिवंगतः ॥ सद्यःकुमारःसंजज्ञेद्वितीयइवभास्करः ३५ तंसाऽत्यजन्नदीतोयेकृच्छ्राल्लोकस्यबिभ्यती ॥ प्रपितामहस्तामुवाहपांडुर्वैसत्यविक्रमः ३६

चूर्णिका

अथ अंधकपुत्रस्य भजमानस्य विदूरथः तस्य शूरः तस्य भजमानः तस्य शिनिः तस्य स्वयंभोजः तस्य ह्रदीकः २६ तस्य पुत्राः चत्वारः देवबाहुः शतधनुः कृतवर्मा देवमीढः इति देवमीढस्य शूरः २७ तस्य मारिषायां पुत्राः दश वसुदेवः देवभागः देवश्रवाः आनकः सृंजयः श्यामकः कंकः शमीकः वत्सकः वृकः इति वसुदेवजन्मनि आनकदुंदुभयो नेदुः २८ २९ अतः तं आनकदुंदुभिं हरेः स्थानं वदंति शूरस्य कन्याः पंच पृथा श्रुतदेवा श्रुतकीर्तिः श्रुतश्रवाः राजाधिदेवी इति ३० शूरः अप्रजस्य कुंतेः पृथां ददौ ३१ एकदा गृहागतं दुर्वाससं पृथा परिचर्यादिना तोषयामास तस्मात् सा देवाह्वानविद्यांआप विद्यापरीक्षार्थं रविं आजुहाव ३२ तदा प्राप्तं रविं दृष्ट्वा आह मया परीक्षार्थं विद्या प्रयुक्ता हे देव याहि क्षमस्व ३३ रविराह हे देवि मे दर्शनं व्यर्थं न त्वयि पुत्रं धत्से ३४ यथा योनिः न दुष्येत तथा एवं तस्यांगर्भं स्थाप्य गतः ततः सद्यः कुमारः जज्ञे ३५ सा तं नदीतोये तत्याज तां पांडुः उवाह ३६

॥७६॥

१ शुचिमितिपाठोपिक्वचित् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(ऋषिभिः सनत्कुमारैः शप्तः) ३७ (कैकयःकेकयवंशोत्पन्नः) ३८ आवंत्यौविंदानुविंदौ ३९ तदेवंवसुदेवस्यभगिनीनांपतीन् पुत्रांश्चोक्त्वा तद्भ्रातॄणांनवानांपत्नीःपुत्रांश्चाह । देवभागस्येतिनवभिः श्लोकार्धैः ४० ४१ ४२ ४३ ४४ वसुदेवस्यपत्नीः पुत्रांश्चाह पौरवीत्येकादशभिः ४५ ४६ ४७ कौशल्याभद्रा ४८ ४९ ५० ५१ ५२

टीका

॥७७॥ श्रुतदेवांतुकारूषोवृद्धशर्मासमग्रहीत् ॥ तस्यामभूद्दंतवक्त्रऋषिशप्तोदितेःसुतः ३७ कैकेयोधृष्टकेतुश्चश्रुतकीर्तिमविंदत ॥ शतर्दनादयस्तस्याःपंचासन्कैकयाःसुताः ३८ राजाधिदेव्यामावंत्यौजयसेनोजनिष्टह ॥ दमघोषश्चेदिराजःश्रुतश्रवसमग्रहीत् ३९ शिशुपालःसुतस्तस्याःकथितस्तस्यसंभवः ॥ देवभागस्यकंसायांचित्रकेतुबृहद्बलौ ४० कंसवत्यांदेवश्रवसःसुवीरइंदुमांस्तथा ॥ कंकायामानकाज्जातौसत्यजित्पुरुजित्तथा ४१ सृंजयोराष्ट्रपाल्यांच वृषदुर्मर्षणादिकान् ॥ हरिकेशहिरण्याख्यौसुरभूम्यांचश्यामकः ४२ मिश्रकेश्यामप्सरसिवृकादीन्वत्सकस्तथा ॥ तक्षपुष्कलशाल्वादीन्दुर्वाक्ष्यांवृकआदधे ४३ सुमित्रार्जुनपालादीञ्शमीकात्तुसुदामनी ॥ कंकश्चकर्णिकायांवैऋतधामजयावपि ४४ पौरवीरोहिणीभद्रामदिरारोचनाइडा ॥ देवकीप्रमुखाआसन्पत्न्यआनकदुंदुभेः ४६ बलंगदंसारणंचदुर्मदंविपुलंध्रुवम् ॥ वसुदेवस्तुरोहिण्यांकृतादीनुदपादयत् ४७ सुभद्रोभद्रबाहुश्चदुर्मदोभद्रएवच ॥ पौरव्यास्तनयाएतेभूताद्याद्वादशाभवन् ४८ नंदोपनंदकृतकशूराद्यामदिरात्मजाः ॥ कौशल्याकेशिनंत्वेकमसूतकुलनंदनम् ४९ रोचनायांततोजाताहस्तहेमांगदादयः ॥ इडायांमरुकल्कादीन्यदुमुख्यानजीजनत् ५० विधृष्टोधृतदेवायामेकआनकदुंदुभेः ॥ शांतिदेवात्मजाराजन्प्रशमप्रसितादयः ५१ राजानःकल्पवर्षाद्याउपदेव्याःसुतादश ॥ वसुहंससुहंसाद्याःश्रीदेवायास्तुषट्सुताः ५२

चूर्णिका

कारूषःवृद्धशर्मा श्रुतदेवायां दंतवक्त्रं जनयामास ३७ कैकयः धृष्टकेतुः श्रुतकीर्त्यां संतर्दनादीन् पंच पुत्रान् प्रासूत ३८ जयसेनः राजाधिदेव्यां विंदानुविंदौ अजनिष्ट चेदिराजः दमघोषः श्रुतश्रवसि शिशुपालं जनयामास ३९ अथ वसुदेवभ्रातृवंशमाह देवभागात् कंसायां चित्रकेतुवृहद्बलौ द्वौ पुत्रौ इति देवश्रवसः कंसवत्यां सुवीरः इषुमान् इति द्वौ पुत्रौ आनकात् कंकायां सत्यजित् पुरुजित् ४१ संजयात् राष्ट्रपाल्यां वृषदुर्मर्षणादयः श्यामकात् शूरभूम्यां हरिकेशहिरण्याक्षौ द्वौ पुत्रौ ४२ वत्सकात् मिश्रकेश्यामप्सरसि वृकादयः वृकात् दुर्वाक्ष्यां अप्सरसि तक्षपुष्करशालादयः ४३ शमीकात् सुदामिन्यां सुमित्रार्जुनपालादयः कंकात् कर्णिकायां ऋतधामजयौ ४४ ४५ वसुदेवःरोहिण्यां वलं गदं सारणं दुर्मदं विमलं ध्रुवं कृतादींश्च जनयायास ४६ वसुदेवस्य पौरव्यां सुभद्रः भद्रवाहः दुर्मदः भद्रः भूताद्याश्च द्वादश ४७ वसुदेवस्य मदिरायां नंदोपनंदकृतकशूराद्याः वसुदेवात् भद्रायां केशी ४८ वसुदेवस्य रोचनायां हस्तहेमांगदादयः तथा इलायां उरुवल्कादयः ४९ तथा धृतदेवायां विपृष्टः शांतिदेवायां श्रमप्रतिश्रुतादयः ५० उपदेवायां दश कल्पवर्षाद्याः श्रीदेवायां वसुहंससुहंसाद्याः षट् ५१ ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥७८॥

५३ ५४ अष्टमस्तुस्वयमेवासीत् । नतुकर्मादिनाहेतुनाताभ्यांजनितावा । यतोसौहरिः ५५ तदेवोपपादयति यदेतित्रिभिः ५६ ईशस्यमायानियंतुः । परस्यअसंगस्य । द्रष्टुः साक्षिणः । आत्मनः सर्वगतस्य । नह्येवंभूतस्यमायाविनोदंविनाजन्मनः कर्मणोवाहेतुः संभवतीत्यर्थः ५७ किंच । यस्यमायाचेष्टितंपुंसोजीवस्यानुग्रहः तस्य (सर्व) जीवानुग्राहकस्य कुतः कर्मादिपारतंत्र्येणजन्मादिसंभवः । अनुग्रहमेवाह । हियस्मात्तदेवस्थित्यादयेचेष्यते । प्रलयेलीनोपाधेर्जीवस्यधर्माद्यसंभवादुपाधिसृष्ट्यादिनाधर्मादिसंपादनेनानुग्रहोज्ञेयः । तथा आत्मलाभायचेष्यते । तत्रहेतुः । तेनैवश्रूयमाणेनतस्यस्थित्यादेर्निवृत्तेः ५८ तस्यचेष्टितंभूमेरप्यनुग्रहइत्याह । अक्षौहिणीनामितिद्वाभ्याम् अभारायभारहरणायेत्यर्थः ५९ सुरेश्वरैर्ब्रह्मादिभिरपिमनसापिअपरिमेयानिअवितर्क्याणिसंकर्षणसहितश्चक्रे ६० संकल्पमात्रेणभूभारहरणसमर्थस्यापिकर्मकरणंयशोविस्तारद्वाराभक्तानुग्रहार्थमित्याह कलावितिद्वाभ्याम् । दुःखशोकतमांसिनुदतीतितथा (तत्रतमोऽज्ञानम्) तद्यशः (यो) व्यतनोत् ६१ यस्मिन् सतांकर्णपीयूषयशोरूपेतीर्थवरेश्रोत्रमेवांजलिःपानसाधनंयस्यसपुरुषः सकृदपिउपस्पृश्य (स्पर्शमात्रंकृत्वायद्वाउपस्पृश्य) आचम्यतत्सौंदर्याकृष्टचित्तःकर्मवासनांधुनुते ६२ तदेवाह द्वाभ्याम् । भोजादिभिःश्लाघनीयं (प्रेम्णावर्णनीयम्) ईहितं (चेष्टितं) यस्य ६३ सर्वैरंगैः (अवयवैः) रम्ययामूर्त्या (स्निग्धाभ्यांस्मितेक्षिताभ्यांउदारैर्महद्भिः श्राव्यैरित्यर्थः) ६४

श्लोकाः ५३–६४

देवरंजितयालब्धानवचात्रगदादयः ॥ वसुदेवःसुतानष्टावादधेसहदेवया ॥ पुरुविश्रुतमुख्यांश्वसाक्षाद्धर्मोवसूनिव ५३ वसुदेवस्तुदेवक्यामष्टपुत्रानजीजनत् ॥ कीर्तिमंतंसुषेणंचभद्रसेनमुदारधीः ॥ ऋजुंसंमर्दनंभद्रंसंकर्षणमहीश्वरम् ५४ अष्टमस्तुतयोरासीत्स्वयमेवहरिःकिल ॥ सुभद्राचमहाभागतवराजन्पितामही ५५ यदायदाहिधर्मस्यक्षयोवृद्धिश्चपाप्मनः ॥ तदातुभगवानीशआत्मानंसृजतेहरिः ५६ नह्यस्यजन्मनोहेतुःकर्मणोवामहीपते ॥ आत्ममायांविनेशस्यपरस्यद्रष्टुरात्मनः ५७ यन्मायाचेष्टितंपुंसःस्थित्युत्पत्त्यप्ययायहि ॥ अनुग्रहस्तन्निवृत्तेरात्मलाभायचेष्यते ५८ अक्षौहिणीनांपतिभिरसुरैर्नृपलांछनैः ॥ भुवआक्रम्यमाणायाअभारायकृतोद्यमः ५९ कर्माण्यपरिमेयानिमनसापिसुरेश्वरैः ॥ सहसंकर्षणश्चक्रेभगवान्मधुसूदनः ६० कलौजनिष्यमाणानांदुःखशोकतमोनुदम् ॥ अनुग्रहायभक्तानांसुपुण्यंव्यतनोद्यशः ६१ यस्मिन्सत्कर्णपीयूषेयशस्तीर्थवरेसकृत् ॥ श्रोत्रांजलिरुपस्पृश्यधुनुतेकर्मवासनाम् ६२ भोजवृष्ण्यंधकमधुशूरसेनदशार्हकैः ॥ श्लाघनीयेहितःशश्वत्कुरुसृंजयपांडुभिः ६३ स्निग्धस्मितेक्षितोदारैर्वाक्यैर्विक्रमलीलया ॥ नृलोकंरमयामाससमूर्त्यासर्वांगरम्यया ६४

चूर्णिका

देवरक्षितायां गदादयः नव सहदेवायां पुरुविश्रुतादयः अष्ट देवक्यां पुत्राः अष्ट ५३ कीर्तिमान् सुषेणः भद्रसेनः ऋजुः संमर्दनः भद्रः संकर्षणः इति ५४ अष्टमस्तु तयोरासीत्स्वयमेव हरिः किल सुभद्रा कन्या तव पितामही आसीत् ५५ यदाइह धर्मक्षयः पापवृद्धिः स्यात् तदा हरिः आत्मानं सृजते ५६ यद्यशःश्रवणेन जनः कर्मवासनां धुनुते ५७ ५८ ५९ ६० ६१ ६२ सहसंकर्षणः हरिः अपरिमेयकर्माणि चक्रे भक्तानुग्रहार्थं पुण्यं यशः व्यतनोत् हरिः स्वमूर्त्या नृलोकं रमयामास ६३ ६४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अंगानांरम्यत्वं) तत् प्रदर्शनार्थंमुखशोभामाह । यस्याननंदृशिभिर्नेत्रैःपिबंत्योनार्योनराश्चनततृपुः नतृप्ताः निमेषोन्मेषमात्रव्यवधानमप्यसहमानाःतत्कर्तुर्निमेश्चकुपिताबभूवुः (निमेषोन्मेषौहिनि
मिः प्रवर्तयातियतउक्तंप्राक् “ विदेहउष्यतांकाम”मित्यादिना) कथंभूतमाननंमकरकुंडलाभ्यांचारुकर्णौभ्राजंतौकपालौचतैःसुभगंसुंदरम् । सविलासोहासोयस्मिन् । नित्यमुत्सवोयस्मिन् ६५ श्री
कृष्णचरितंसमासतोवर्णयाति द्वाभ्यां जातइति । तावन्निजेनजातःपश्चात्पुरुषोमनुष्याकारःसन् व्रजंगतः तत्रव्रजनिवासिनांएधिताअर्थायेन (रिपून्पूतनाकंसादीन् । कृताबहवोदारायेन) तेषुदारेषुसुता
नांशतानिउत्पाद्य आत्मनिगमंस्वकीयंवेदमार्गम् । (जनेषुविस्तारयन् आत्मानंसमीजे) ६६ अंतःसमुत्थेनकलिनानिमित्तेनभुवोगुरुभरंक्षपयन् दृष्टचैवभूपानांचमूर्विधूय (आयुर्हरणेनविनाश्य)
विजयेअर्जुनेजयमुद्घुष्यअर्जुनेनजितमितिसुघोषंकृत्वा परंतत्त्वमुद्धवायोपदिश्य स्वधामसमगात् सम्यक्तेनैवरूपेणजगामेति ६७ (नवभिर्लक्षणैर्लक्ष्यंनवभक्तिषुचेक्षितम् ॥ ब्रह्मतत्परमंवंदेपरमानंदवि
ग्रहम् ॥ १ ॥) ॥ ॥ इतिश्रीभागवतेमहापुराणेनवमस्कंधेश्रीधरस्वामिरचितायांभावार्थदीपिकायांचतुर्विंशोऽध्यायः २४ ॥ ॥ ७ ॥ ॥ श्रीधरस्वामिरचितशब्दरत्नावलीमया ॥ क्षि
प्तोमहेश्वरेणात्रशब्दःकाचमणेःसमः ॥ १ ॥) समाप्तोयंनवमःस्कंधः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥७९॥

श्लोकाः

यस्याननंमकरकुंडलचारुकर्णभ्राजत्कपोलसुभगंसविलासहासम् ॥ नित्योत्सवंनततृपुर्दृशिभिःपिबंत्योनार्योनराश्चमुदिताःकुपितानिमेश्च ६५ जातोग
तःपितृगृहाद्व्रजमेधितार्थोहत्वारिपून्सुतशतानिकृतोरुदारः ॥ उत्पाद्यतेषुपुरुषःक्रतुभिःसमीजेआत्मानमात्मनिगमंप्रथयञ्जनेषु ६६ पृथ्व्याःसर्वैपुरुभ
रंक्षपयन्कुरूणामंतःसमुत्थकलिनायुधिभूपचम्वः ॥ दृष्ट्याविधूयविजयेजयमुद्विघुष्यप्रोच्योद्धवायसपरंसमगात्स्वधाम ६७ ॥ ॥ इतिश्रीमद्भागवतेम ६५/६७
हापुराणेअष्टादशसाहस्र्यांसंहितायांनवमस्कंधेयदुवंशवर्णनंनामचतुर्विंशोऽध्यायः २४ ॥ ॥ श्रीशांतादुर्गाप्रीयताम् ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

तन्मुखं दृशिभिः पिबंत्यः नार्यः नराश्च न ततृपुः ६५ कृष्णचरित्रं समासेन वर्णयति आदौ निजरूपेण जातः पश्चात् मनुष्याकारः सन् व्रजंगतः तत्र व्रजवासिनां
मनोरथान् परिपूर्य रिपून् हत्वा दारान्कृत्वा तासु पुत्रशतानि उत्पाद्यजनेषु वेदमार्गं प्रथयन् यज्ञैः आत्मानं ईजे ६६ तथा कुरूणां अंतःसमुत्थकलिना पृथ्व्याः भरं
क्षपयन् युधि दृष्ट्या भूपचमूः विधूय अर्जुने जयं उद्विघोष्य उद्धवाय परं तत्वं उपदिश्य स्वधाम समगात् ६७ ॥ ॥ इति नवमस्कंधे चूर्णिकायांचतुर्विंशोऽध्यायः २४ ॥७९॥
इतिनवमस्कंधः समाप्तिमगमत् ॥ ॥ श्रीकृष्णो जयति तराम् ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत—नवमस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत–दशमस्कंधः प्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीशांतादुर्गामहालसाभ्यांनमः ॥ ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितम् । श्रीकृष्णाख्यंपरंधामजगद्धामनमामतत् ॥ १ ॥ दशमेदशमंलक्ष्यमाश्रिताश्रयविग्रहम् । क्रीडद्यदुकुलांभोधौपरानंदमुदीर्यते ॥ २ ॥ दशमेकृष्णसत्कीर्तिवितानायानुवर्ण्यते । धर्मग्लानिनिमित्तस्तुनिरोधोदुष्टभूभुजाम् ॥ ३ ॥ माकृतादिश्चतुर्धायोनिरोधःसतुवर्णितः । तत्तत्प्रसंगतःसृष्टिसंहारादिनिरूपणैः ॥ ४ ॥ कृतानवतिरध्यायादशमेकृष्णकीर्तये । आदौचतुर्भिरध्यायैर्ब्रह्मप्रार्थनयाऽवनेः । भारंहर्तुंहरेर्जन्मसप्रसंगंनिरूप्यते ॥ ५ ॥ गोकुलेमथुरायांचद्वारवत्यांततःक्रमात् । कृष्णलीलात्रिधाप्रोक्तातत्तद्भेदैस्त्वनेकधा ॥ ६ ॥ सपंचत्रिंशदध्यायैर्बृहद्वृंदावनादिषु । गोकुलेवसतोलीलावर्ण्यतेसुरदुष्करा ॥ ७ ॥ एकेनयमुनावारिण्यक्रूरेणकृतास्तुतिः । एकादशभिराख्यातालीलामधुवनेकृता ॥ ८ ॥ शेषैर्द्वारवतीलीलातन्निर्माणादिवर्ण्यते । एवंनवतिरध्यायादशमेविशदाःकथाः ॥ ९ ॥ तत्रतुप्रथमेकंसःस्वमृत्युंदेवकीसुतात् । श्रुत्वाभीतोऽवधीत्तस्याःषड्गर्भानितिवर्ण्यते ॥ १० ॥ कृष्णावतारचरितश्रवणामृतनिर्वृतः । उक्तानुवादेनौत्सुक्याद्राजापृच्छतितत्पुनः ॥ ११ ॥ कथितोवंशविस्तारइति (उभयवंश्यानांसोमसूर्यवंशजानां) १ (यदोश्चनितरांचरितंवर्णितंतत्रयदुवंशे) अंशेनेतिप्रतीत्यंभिप्रायेणोक्तं (वीर्याणिचरितानि) २ ननूक्तानिजातोगतःपितृगृहाद्व्रजमेधितार्थइत्यादिना । सत्यं । पुनर्विस्तरेणवदेत्याहअवतीर्येति (यद्वापूर्वश्लोकेअंशेनावतीर्णस्यबलरामस्यवीर्याणिपृष्टानिअत्रतुश्रीकृष्णस्येतिनपौनरुक्त्यं यानिकर्माणि) ३ अत्रलोकेत्रिविधाजनाःमुक्तामुमुक्षवोविषयैषिणश्चेति । तेषांमध्येनकस्याप्यलंप्रत्ययइत्याह । निवृत्ततर्षैःगततृष्णैर्मुक्तैरित्यर्थः । मुमुक्षूणामयमेवोपायइत्याह । भवौषधादिति । विषयैषिणांपरमोविषयोयमेवेत्याह । श्रोत्रमनोभिरामादिति । अपगताशुक्शोकोयस्मात्तंआत्मानहंतीत्यपशुघ्न (आत्मघाती) तस्मात्पशुघातिनइतिवा ४ किंच । अस्मत्कुलदैवतंश्रीकृष्णःअतोपितत्कथैवनित्यंश्रोतव्येत्याशयेनाह । पितामहाइति । अमरान्जयंतियेतैःदेवव्रतोभीष्मस्तदाद्यैरतिरथैः (अमितान्योधयेद्यस्तुसप्रोक्तोतिरथइतिलक्षणलक्षितैः) तिमिंगिलमत्स्यतुल्यैर्दुरत्ययंदुस्तरंवत्सपदमिवअत्यल्पंकृत्वातुच्छीकृत्यर्थःअतरन्स्म । (यतः) यःश्रीकृष्णएवप्लवोनौकायेषांते । तस्यवीर्याणिवदस्वेतितृतीयश्लोकेगतेनान्वयः ५ नकेवलंपांडवानेवारक्षत्इदंममशरीरमपिरक्षितवानित्याहद्रौण्यस्त्रविप्लुष्टमिति । द्रौणेरश्वत्थाम्नोब्रह्मास्त्रेणदग्धमिदंमच्छरीरंकुरूणांपांडवानांचसंतानस्यनिदानंममातुःकुक्षौप्रविष्टोधृतचक्रोजुगोपेति (कुरुपांडवानामितिगोबलीवर्दन्यायेनोक्तम्) ६

॥ राजोवाच ॥ कथितोवंशविस्तारोभवतासोमसूर्ययोः ॥ राज्ञांचोभयवंश्यानांचरितंपरमाद्भुतम् १ यदोश्चधर्मशीलस्यनितरांमुनिसत्तम ॥ तत्रांशेनावतीर्णस्यविष्णोर्वीर्याणिशंसनः २ अवतीर्ययदोर्वंशेभगवान्भूतभावनः ॥ कृतवान्यानिविश्वात्मातानिनोवदविस्तरात् ३ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् ॥ कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनापशुघ्नात् ४ पितामहामेसमरेऽमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः ॥ दुरत्ययंकौरवसैन्यसागरंकृत्वाऽतरन्वत्सपदंस्मयत्प्लवाः ५ द्रौण्यस्त्रविप्लुष्टमिदंमदंगंसंतानबीजंकुरुपांडवानाम् ॥ जुगोपकुक्षिंगतआत्तचक्रोमातुश्चमेयःशरणंगतायाः ६

श्लोकाः १–६

चूर्णिका

श्रीगणेशायनमः अथभागवतदशमस्कंधपूर्वार्धचूर्णिकाप्रारभ्यते ॥ राजोवाच ॥ कथितोवंशविस्तारोभवतासोमसूर्ययोः राज्ञांचोभयवंश्यानांचरितंपरमाद्भुतम् १ यदोश्चधर्मशीलस्यनितरांमुनिसत्तम तत्रअवतीर्णस्यविष्णोः वीर्याणिकथय २ किंच हरिः यदुवंशेअवतीर्ययानिकृतवान्तानिविस्ताराद्वद ३ हेशुक अत्रलोकेजनाः मुक्ताः मुमुक्षवःविषयिणश्चेतित्रिधातन्मध्ये अत्रनकस्यापि अलंबुद्धिरित्याह मुक्तैः गीयमानात् भवौषधात् श्रोत्रमनोभिरामात्ईशगुणानुवादात् पशुघ्नात् विनाकःपुमान्विरज्येत ४ किंच मेपितामहाः भीष्मादिरूपतिमिंगिलैःदुरत्ययंकौरवसैन्यसागरंवत्सपदंकृत्वायत्प्लवाःअतरन्स्म ५ किंच द्रौण्यस्त्रदग्धंइदंमेशरीरंमन्मातुः कुक्षिंगतःसन्चक्रंधृत्वायःजुगोप ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ २ ॥

अखिलदेहभाजांसर्वप्राणिनांअंतश्चबहिश्चपुरुषरूपेणकालरूपैश्च अंशाभिप्रायेणबहुवचनम् । मृत्युंसंसारंउतअपिअमृतम् (मोक्षंच) अपिप्रयच्छतोवीर्याणिवदस्वब्रूहि अयंभावःअंतर्यामिरूपेणअंतर्दृष्टीनांमुक्तिंबहिर्दृष्टीनांचकालरूपेणमृत्युंददातियतोऽतःविषयदृष्टिंविहायांतर्दृष्ट्यातद्वीर्याण्येवश्रोतव्यानीति ७ ननु " गदंबलंसारणंचदुर्मदंविपुलंध्रुवम् । वसुदेवस्तुरोहिण्यांकृतादीनुदपादयत् " इति रोहिण्यास्तनयोरामःप्रोक्तः " वसुदेवस्तुदेवक्यामष्टपुत्रानजीजनत् । कीर्तिमंतंसुषेणंचभद्रसेनमुदारधीः । मृदुसंतर्दनंभद्रंसंकर्षणमधीश्वरम् । अष्टमस्तुतयोरासीत्स्वयमेवहरिःकिल " इतिपुनर्देवक्यांगर्भसंबंधस्तस्यैवोक्तःसकुतोघटतइत्याक्षेपः ८ कस्मादिति । भगवतःकंसभयशंकाऽसंभवात्इत्यर्थः (ज्ञातिभिर्बलरामादिभिःक्ववासंकृतवान्) ९ (मधुपुर्यांमथुरायाम्) मातुर्भ्रातरंकंसंतस्मात्अतदर्हणंवधानर्हं अद्धासाक्षात्कस्मादवधीत् १० ११ (अन्यदपृष्टमपि) १२ ननुक्षुत्तृड्भ्यांपीडितस्यतवकुतःश्रवणावकाशस्तत्राहनैषेति (त्यक्तोदंत्यक्तोदकम्) त्यक्तोदकस्यापिममजीवनंहरिकथामृतपाननिमित्तम् । तदुपरमेसद्यएवजीवितंनस्यादितिभावः १३ (हेभृगुनंदनशौनक) एवंसाधुवादंसमीचीनंप्रश्नम् (प्रत्यर्च्यसभाजयित्वा) भागवतप्रधानःभागवतेषुश्रेष्ठः १४ व्यवसिताकृतनिश्चया । यद्यतोबुद्धेः (नैष्ठिकीआत्यंतिकी) १५(प्रश्नंस्तौतिवासुदेवेति । पुरुषानेवाह । वक्तारमिति । तत्पादसलिलंगंगायथास्वसेवयाकुलगतपुरुषान्वक्त्रादीन्वा) १६ तत्रतावत्प्रथमंभगवदवतारकारणमाह । भूमिरित्यादिभिर्नवभिःदृप्तनृपव्याजा (राजापदेशा) येदैत्यास्तेषामनीकशतानामयुतैर्योभूरिभारस्तेनाक्रांता १७

श्लोकाः ७/१७

वीर्याणितस्याखिलदेहभाजामंतर्बहिःपूरुषकालरूपैः ॥ प्रयच्छतोमृत्युमुतामृतंचमायामनुष्यस्यवदस्वविद्वन् ७ रोहिण्यास्तनयःप्रोक्तोरामःसंकर्षणस्त्वया ॥ देवक्यागर्भसंबंधःकुतोदेहांतरंविना ८ कस्मान्मुकुंदोभगवान्पितुर्गेहाद्व्रजंगतः ॥ क्ववासंज्ञातिभिःसार्धंकृतवान्सात्वतांपतिः ९ व्रजेवसन्किमकरोन्मधुपुर्यांचकेशवः ॥ भ्रातरंचावधीत्कंसंमातुरद्धाऽतदर्हणम् १० देहंमानुषमाश्रित्यकतिवर्षाणिवृष्णिभिः ॥ मधुपुर्यांसहावात्सीत्पत्न्यःकत्यभवन्प्रभोः ११ एतदन्यच्चसर्वंमेमुनेकृष्णविचेष्टितम् ॥ वक्तुमर्हसिसर्वज्ञश्रद्दधानायविस्तृतम् १२ नैषातिदुःसहाक्षुन्मांत्यक्तोदमपिबाधते ॥ पिबंतंत्वन्मुखांभोजच्युतंहरिकथामृतम् १३ ॥ सूतउवाच॥ एवंनिशम्यभृगुनंदनसाधुवादंवैयासकिःसभगवानथविष्णुरातम्॥प्रत्यर्च्यकृष्णचरितंकलिकल्मषघ्नंव्याहर्तुमारभतभागवतप्रधानः १४ ॥ श्रीशुकउवाच ॥ सम्यग्व्यवसिताबुद्धिस्तवराजर्षिसत्तम ॥ वासुदेवकथायांतेयज्जातानैष्ठिकीरतिः १५ वासुदेवकथाप्रश्नःपुरुषांस्त्रीन्पुनातिहि ॥ वक्तारंपृच्छकंश्रोतॄंस्तत्पादसलिलंयथा १६ भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः ॥ आक्रांताभूरिभारेणब्रह्माणंशरणंययौ १७

चूर्णिका ॥ २ ॥

तस्यमायामनुष्यस्यवीर्याणिवद ७ किंच त्वयानवमेरामः रोहिणीतनयः प्रोक्तः पुनः देवक्यागर्भसंबंधः तस्यैवोक्तः सः देहांतरंविनाकुतोघटते ८ किंच मुकुंदः पितुर्गेहात्कुतोव्रजंगतः तथाज्ञातिभिः सहक्ववासंकृतवान् ९ तथाव्रजेमथुरायांचवसन् किमकरोत् तथाभ्रातरंकंसंकुतः अवधीत् १० तथानृदेहंआश्रित्यकतिवर्षाणियदुपुर्यां अवात्सीत् तस्यकतिपत्न्यः अभवन् ११ एतत् अन्यच्च सर्वंत्वंब्रूहि १२ हेशुक एषाक्षुत् त्यक्तोदकमपिमांनबाधते यतः हरिकथामृतंपिबामि १३ सूतउवाच ॥ एतंप्रश्नंश्रुत्वा शुकः नृपंप्रत्यर्च्यकृष्णचरितंवक्तुंआरभत १४ ॥ श्रीशुकउवाच ॥ हेराजन् तवबुद्धिः सम्यग्व्यवसिता यतः बुद्धेः हरिकथायांनैष्ठिकीरतिः जाता १५ किंच वासुदेवकथाप्रश्नः वक्तृपृच्छकश्रोतॄन्पुनाति १६ हेनृपइयंभूमिः दृप्तनृपव्याजदैत्यानीकशतायुतैःभूरिभारेणव्याप्ताअश्रुमुखीगौर्भूत्वाब्रह्माणंशरणंगत्वातस्मैदुःखंउवाच १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विभोः (ब्रह्मणः) अंतिकेउपस्थितासती (तस्मैस्वंव्यसनंदुःखम्) १८ (क्षीरपयोनिधेः । क्षीरसमुद्रस्य । सत्रिनयनःसहरुद्रेण) १९ (तत्रतीरेवृषोधर्मःकपिर्वराहस्तद्रूपत्वाद्वृषाकपिस्तम्) २०
(वेधाब्रह्मागगनेभगवतासमीरितांगिरंसमाधौश्रुत्वादेवान्प्रत्युवाच) पौरुषींपुरुषेणभगवतामोक्तांगांवाचंमेमत्तःआशुशृणुतमाचिरमविलंबितंतथैवविधीयतांचेति २१ (" ऋषयोपितदादेशात्कल्पतांप
शुरूपिगः । पयोदानमुखेनापिकृष्णंतर्पमितुंसुराः । "अयंश्लोकःप्रत्यंतरे ।) विज्ञप्तेःपुरैवपुंसांतर्यामिणाईश्वरेणधरायाज्वरस्तापोऽवधृतोज्ञातः (पुंसेत्यनेनस्त्रीतापस्तस्याःपुरुषेणज्ञातुमर्हइत्यसूचि ।कियंतंका
लंतत्रस्थातव्यमित्यतआहसइति) २२ २३ (वासुदेवस्यकलासंकर्षणः) २४ (प्रभुणाआदिष्टासती) देवकीगर्भसंकर्षणयशोदामोहनादिकार्यार्थेयशोदायां (अंशेन) संभविष्यति २५ (प्रजापतीनां
॥ ३ ॥ दक्षादीनांपतिर्विभुर्ब्रह्मा) २६ भोजेंद्रबंधनागारेअवतारायप्रस्तावकथामाह । शूरसेनइत्यादिनायावदध्यायसमाप्ति । मथुरामावसन्मथुरायांवसन् । विषयान्देशान् २७ (ततआरभ्यसामथुराराजधा ॥ १ ॥
न्यभूत्) २८ सूर्ययानवोढयाप्रयाणेप्रयाणार्थं (इत्यर्थः) २९ (रौक्मैर्हिरण्मयैः) रश्मीन्प्रग्रहान् ३०

गौर्भूत्वाऽश्रुमुखीखिन्नाक्रंदंतीकरुणंविभोः ॥ उपस्थितांतिकेतस्मैव्यसनंस्वमवोचत १८ ब्रह्मातदुपधार्याथसहदेवैस्तयासह ॥ जगामसत्रिनयनस्तीरंक्षी
रपयोनिधेः १९ तत्रगत्वाजगन्नाथंदेवदेवंवृषाकपिम्॥ पुरुषंपुरुषसूक्तेनउपतस्थेसमाहितः २० गिरंसमाधौगगनेसमीरितांनिशम्यवेधास्त्रिदशानुवाचह॥
गांपौरुषींमेशृणुतामराःपुनर्विधीयतामाशुतथैवमाचिरम् २१ पुरैवपुंसाऽवधृतोधराज्वरोभवद्भिरंशैर्यदुषूपजन्यताम् ॥ सयावदुर्व्याभरमीश्वरेश्वरःस्वका श्लोकाः
लशक्त्याक्षपयंश्चरेद्भुवि २२ वसुदेवगृहेसाक्षाद्भगवान्पुरुषःपरः ॥ जनिष्यतेतत्प्रियार्थंसंभवंतुसुरस्त्रियः २३ वासुदेवकलाऽनंतःसहस्रवदनःस्वराट् ॥ १८/३०
अग्रतोभवितादेवोहरेःप्रियचिकीर्षया २४ विष्णोर्मायाभगवतीययासंमोहितंजगत् ॥ आदिष्टाप्रभुणांशेनकार्यार्थेसंभविष्यति २५ ॥ श्रीशुकउवाच ॥
इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः ॥ आश्वास्यचमहींगीर्भिःस्वधामपरमंययौ २६ शूरसेनोयदुपतिर्मथुरामावसन्पुरीम् ॥ माथुराञ्शूरसेनांश्च
विषयान्बुभुजेपुरा २७ राजधानीततःसाभूत्सर्वयादवभूभुजाम् ॥ मथुराभगवान्यत्रनित्यंसंनिहितोहरिः २८ तस्यांतुकर्हिचिच्छौरिर्वसुदेवःकृतोद्वहः ॥
देवक्यासूर्ययासार्धंप्रयाणेरथमारुहत् २९ उग्रसेनसुतःकंसःस्वसुःप्रियचिकीर्षया ॥ रश्मीन्हयानांजग्राहरौक्मैरथशतैर्वृतः ३०

चूर्णिका

१८ तद्दुःखंज्ञात्वाब्रह्मादेवैः तयाचसहक्षीराब्धितीरंययौ १९ तत्रगत्वासमाहितःसन्जगन्नाथंपुरुषंपुरुषसूक्तेनउपतस्थे २० ततः समाधौगगनेसमीरितांगिरंनिशम्यदेवानाह हे
देवाः मत्तः पौरुषींवाचंशृणुत तथाविधीयतांमाचिरम् २१ अहोईश्वरेण भूतापः पुरैवअवधारितः भवद्भिःअंशैः यदुषुउपजन्यताम् २२ किंच भगवान्वसुदेवगृहेजनिष्य
ते तत्प्रियार्थंसुरस्त्रियः संभवंतु २३ किंच सहस्रवदनः अनंतः हरेःप्रियार्थंआदौभविष्यति २४ तथाविष्णोर्मायाईशाज्ञयाकार्यार्थेयशोदायांसंभविष्यति २५ ॥ श्रीशुकउ
वाच ॥ एवंब्रह्मादेवानादिश्यमहींचआश्वास्यस्वलोकंययौ २६ हेनृप अथयदुपतिः शूरसेनः मथुरांवसन् माथुरादिदेशान्पुराबुभुजे २७ अतः सापुरीमथुरेत्यभवत्
यत्रहरिः नित्यंसन्निहितोऽस्ति २८ तस्यांकदाचित्कृतोद्वाहःशौरिः वसुदेवःदेवक्यासहप्रयाणार्थंरथमारुहत् २९ तदाउग्रसेनसुतःकंसःस्वसुः प्रियार्थंहयानांरश्मीन्जग्राह ३० ॥ ३ ॥

१ ' पुरुषस्यभगवतइयंपौरुषी ' इतिमु० पुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारिबर्हंउपस्करम् (प्रीतिदेयमित्यर्थः) ३१ (यानेगमनसमये) ३२ (समंयुगपत् । एकदैवाभ्यहन्यंतेत्यर्थः । तावत्सर्वंसुमंगलंसुशोभनमासीत्) ३३ आभाष्यरेरेकंसेतिसंबोध्य (हेअबुधमूढ) हंताहनिष्यति ३४ (खलोदुर्जनः) कुलपांसनःकुलदूषणः (भोजकुलस्यकलंकइत्यर्थः) आरब्धउद्युक्तःकचेकेशबंधे ३५ नृशंसंक्रूरं महाभागइति अयंभावःस्वजन्मनिहर्षेणदेवतैरानकदुंदुभिध्वनिकरणात्भाविभगवदवतारेण (संभावनया) शक्यप्रतीकारतासंभवतीति (निश्चित्यसांत्वयितुंप्रवृत्तइतिसूचितम्) सांत्वयन्स्तुत्योपपत्तिभिश्चसाममार्गेणबोधयन् ३६ श्लाघनीयाःस्तुत्यागुणायस्यसः । भोजकुलस्ययशःसंपादकः । स्त्रियंतत्रापिभगिनींतत्राप्युद्वाहपर्वणि ३७ ननुमरणभयान्निहन्मीतिचेत् (इत्याशंक्य) तथापिमरणस्यापरिहरणीयत्वाद्देहांतरस्यावश्यंभावित्वात्तत्रापिचभोगप्रेमास्पदत्वादीनामविशेषान्मरणभयेनपापाचरणमयुक्तमित्यभिप्रेत्याह । मृत्युर्जन्मवतामित्यादिना । देहेनसहेतिविधात्राललाटेलिखितत्वादिति (देहमालिंग्यैवातिष्ठतीतिभावः) तत्रापिकालविलंबार्थंहन्मीतिचेत्तत्राह । अद्यवेति (तत्तत्काले) अवश्यंभाविनिमरणे (व्यर्थ) विलंबमात्रायपापाचरणमयुक्तमितिभावः ३८ किंच । अस्मिन्देहेगतेयदिदेहांतरंनस्यात्तदायुज्येतपापेनापितत्पालनम् । नतुतदस्तीत्याह । देहेपंचत्वमिति । आपन्नेआपन्नप्रायेकर्मवशादयत्नतएवप्रथमंदेहांतरंप्राप्यपश्चात् (प्राक्तनंवपुस्त्यजते) पूर्वदेहंत्यजतीत्यर्थः ३९

श्लोकाः ३१/३९

चतुःशतंपारिबर्हंगजानांहेममालिनाम् ॥ अश्वानामयुतंसार्धंरथानांचत्रिषट्शतम् ३१ दासीनांसुकुमारीणांद्वेशतेसमलंकृते ॥ दुहित्रेदेवकःप्रादाद्याने दुहितृवत्सलः ३२ शंखतूर्यमृदंगाश्चनेदुर्दुंदुभयःसमम् ॥ प्रयाणप्रक्रमेतावद्वरवध्वोःसुमंगलम् ३३ पथिप्रग्रहिणंकंसमाभाष्याहाशरीरवाक् ॥ अस्यास्त्वामष्टमोगर्भोहंतायांवहसेऽबुध ३४ इत्युक्तःसखलःपापोभोजानांकुलपांसनः ॥ भगिनींहंतुमारब्धःखड्गपाणिःकचेऽग्रहीत् ३५ तंजुगुप्सितकर्माणंनृशंसंनिरपत्रपम् ॥ वसुदेवोमहाभागउवाचपरिसांत्वयन् ३६ ॥ वसुदेवउवाच ॥ श्लाघनीयगुणःशूरैर्भवान्भोजयशस्करः ॥ सकथंभगिनींहन्यात्स्त्रियमुद्वाहपर्वणि ३७ मृत्युर्जन्मवतांवीरदेहेनसहजायते ॥ अद्यवाब्दशतांतेवामृत्युर्वैप्राणिनांध्रुवः ३८ देहेपंचत्वमापन्नेदेहीकर्मानुगोऽवशः ॥ देहांतरमनुप्राप्यप्राक्तनंत्यजतेवपुः ३९

चूर्णिका ॥ ४ ॥

तदादेवकःदुहित्रेगजानांचतुःशतम् ४०० अश्वानांसार्धयुतम् १५००० रथानांत्रिषट्शतम् १८०० ३१ दासीनांशतद्वयम् २०० एवंपारिबर्हंददौ ३२ तदाशंखतूर्यादयः नेदुः ३३ ततः पथिप्रग्रहिणंकंसंरेरेकंसेतिसंबोध्यअशरीरवाक् आहहेअज्ञत्वंयांवहसे अस्याःअष्टमोगर्भःत्वांहनिष्यते ३४ इत्युक्तःसःपापःखड्गपाणिःसन्भगिनींहंतुंकचेऽग्रहीत् ३५ तदातंसांत्वयन् वसुदेवः आह ३८ ॥ वसुदेवउवाच ॥ हेकंसत्वंशूरैःवर्णनीयगुणोसि अतःविवाहपर्वणिभगिनींकथंहन्यात् मरणभयेनहन्मीतिचेत् तर्हिदेहवतांदेहेनसहमृत्युर्जायतेसःअद्यवा अब्दशतांतेवास्यात् अतःपापाचरणं अयुक्तम् ३७ ३८ किंच अस्मिन्देहेपंचत्वंआपन्नप्रायेसतिजीवःकर्मवशात् आदौदेहांतरंप्राप्यपश्चात्पूर्वदेहंतृणजलूकेवत्यजति ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रदृष्टांतः। व्रजन्निति। यथाव्रजन्पुरुषःएकेनअग्रतोनिहितेनपदातिष्ठन्भुवमवष्टभ्यदेहंबिभ्रत्पश्चादन्येनपूर्वप्रदेशादुत्थाप्यपुरोनिहितेनपदागच्छतितद्वत्। अत्रचस्वीकारपरित्यागौनात्यंतभिन्नविषयाविति स्पष्टंदृष्टांतांतरमाह। यथातृणजलूकेति। साहिदेहार्धेनतृणांतरमवष्टभ्यपूर्वंतृणंत्यजतिएवं कर्मपथेवर्तमानोजीवोपि। [1](अन्योपिदेहीकर्मगतिंगतःकर्मपथेवर्तमानः) ४० देहविषयावेवस्वीकारपरित्यागौ दर्शयितुंदृष्टांतांतरमाह। दृष्टंराजादिदर्शनंश्रुतंइंद्रादिश्रवणंताभ्यामाहितसंस्कारेणमनसातदेवानुचिंतयन्ईदृशंजाग्रद्दृष्टश्रुतसदृशंदेहंराजादिरूपंकिमपिअनिरुक्तम् (स्वप्ने) पश्यति क्षणांतरेचतदेवाहमि तिप्रपद्यतेऽभिमन्यतेततश्चजाग्रद्देहादपगतस्मृतिर्भवतिपुरुषोयथातथेति। जाग्रत्येवतद्दर्शयितुंदृष्टांतांतरमाह (यथावा) मनोरथेनेतिअत्रापिदृष्टश्रुताभ्यामित्यादिसर्वंयोज्यम् (अभिनिविष्टातदाकारतांप्राप्त चेतनाधीर्यस्य) तथाचवक्ष्यति "जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः। जन्मत्वात्मतयापुंसःसर्वभावेनभूरिद। विषयस्वीकृतिंप्राहुर्यथास्वप्नमनोरथः। स्वप्नंमनोरथंचेत्थंप्राक्तनंनस्मरत्यसौ" इत्यादि। तद्वदत्रापिकर्मवशाद्देहांतरंप्राप्यप्राक्तनंत्यजतीति ४१ ननुविचित्रदेहहेतूनांकर्मणांकृतत्वाद्देहविशेषप्राप्तौकिंकारणमतआह। यतोयतइति। देहस्यपंचत्वसमयेपंचसुगुणेषुभूतेषुमाययानानादेह रूपेणरचितेषुदैवेनफलाभिमुखेनकर्मणाचोदितंप्रेरितंनानाविकारात्मकंमनोयतोयतोयंयंदेहंदेवतिर्यगादिरूपंप्रतिधावतिधावच्चसत्यंयंआपअभिनिवेशेनप्रापतत्रतत्रअसौदेहीजायते ननुमनसःकर्तृत्वात्तदेव जायतांनत्वकर्तात्मेत्यतआह। प्रपद्यमानइतितदेवाहमितिमन्यमानस्तेनमनसासहजायते ४२ ननुसत्यंभविष्यत्येवकिमपिदेहमात्रंतथाप्यस्यातिप्रियस्यराजदेहस्यरक्षणायाकृत्यमपिक्रियतइतिचेत्त त्राहज्योतिरिति। अदश्चंद्रादिज्योतिःउदकयुक्तेषुपार्थिवेषुघटादिषुयद्वाउदकेषुपार्थिवेषुतैलघृतादिषुप्रतिबिंबत्वेनास्थितंसमीरस्यवायोर्वेगमनुगतंकंपादियुक्तंप्रतीयतेयथाएवंस्वाविद्यारचितेषुगुणेषुदेहेषु रागेणानुगतःप्रविष्टोमुह्यतिअभिनिवेशंप्राप्नोति। आत्मनस्तावद्देहाद्यध्यासात्जन्मोक्तंसहतेनजायतइति। ततश्चान्योन्यधर्माध्यासात्यथादेहधर्माःकार्श्यादयआत्मनिप्रतीयंतेएवमात्मधर्माःप्रेमास्पदत्वाद योपिदेहादिष्विति (स्वात्मैवातिप्रियोनतुदेहादिततो) राजसूकरदेहयोर्विशेषाभावात्व्यर्थोमृत्युप्रतीकारइतिभावः ४३ एवमुक्तंसामोपायंउपसंहरन्भेदमाह। तस्मादिति (सभवान्तथाविधःतज्जान नन्नद्रोहमाचरेदितिसामोपसंहृतम्। वैप्रसिद्धंद्रोग्धुः) परतोऽभिद्रुह्यमाणात्तत्संबंधिनश्चयमादपिइहामुत्रचभयमितिभेदोदर्शितः ४४

श्लोकाः ४०/४४

व्रजंस्तिष्ठन्पदैकेनयथैवैकेनगच्छति ॥ यथातृणजलूकैवदेहीकर्मगतिंगतः ४० स्वप्नेयथापश्यतिदेहमीदृशंमनोरथेनाभिनिविष्टचेतनः ॥ दृष्टश्रुताभ्यां मनसानुचिंतयन्प्रपद्यतेतत्किमपिह्यपस्मृतिः ४१ यतोयतोधावतिदैवचोदितंमनोविकारात्मकमापपंचसु ॥ गुणेषुमायारचितेषुदेह्यसौप्रपद्यमानःसह तेनजायते ४२ ज्योतिर्यथैवोदकपार्थिवेष्वदःसमीरवेगानुगतंविभाव्यते ॥ एवंस्वमायारचितेष्वसौपुमान्गुणेषुरागानुगतोविमुह्यति ४३ तस्मान्नक स्यचिद्द्रोहमाचरेत्सतथाविधः ॥ आत्मनःक्षेममन्विच्छन्द्रोग्धुर्वैपरतोभयम् ४४

चूर्णिका

४० ४१ किंच कर्मणाचोदितंमनः यंयंदेवादिरूपंदेहंधावति यंयंअभिनिवेशेनप्राप्नोति तत्रतत्र असौजीव.तदेवाहमितिमन्यमानःतेनसहजायते ४२ किंच हेकंसआत्म नस्तावत्देहाद्यध्यासात्जन्मोक्तम् ततश्चअन्योन्यधर्माध्यासात् यथादेहादिधर्माःकार्श्यादयःआत्मनिप्रतीयंतेएवंआत्मधर्माःप्रेमास्पदादयःदेहादिषुएवंराजसूकरयोर्देहयोर्विशे षाभावात् व्यर्थोमृत्युप्रतीकारः ४३ अतःकस्यचित्द्रोहंनाचरेदिति ४४

१ 'एवंकर्मपथेवर्तमानोजीवोपी' तिपाठांतरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पुनःसामाहएपेति । पुत्रिकोपमादारुमयीव (भयात्) अचेतनप्रायेत्यर्थः (यद्वासुतोपमा) ४५ बोध्यमानःउपदिश्यमानःस्वयंदारुणःपुनःपुरुषादान्दैत्याननुव्रतइति (अतितरांदारुणः) ४६ आनकदुंदुभिरितिपदंमहाभागइत्यत्रोक्ताभिप्रायम् (निर्बंधंआग्रहम्) प्रतिव्योढुंप्रतिकर्तुंवंचयितुमित्यर्थः । इदंवक्ष्यमाणंअपत्यार्पणमन्वपद्यतज्ञातवान् । (तमुपायंनिश्चितवान्) ४७ ननुखल्वयमेतदपिनमन्येतेत्याशंक्यस्वस्मिन्नेवाह । मृत्युरिति (अपोह्योनिवर्तनीयः । बुद्धिवलोदयानुसारेणनिवर्तितोपियदिननिवर्तेततर्हि) ४८ तस्मादुपेक्षादोषपरिहारायैवंकरिष्यामीत्याह । प्रदायेति । मृत्यवेऽस्मैकंसाय । नन्विदमपिनैवन्याय्यमित्याशंक्याह सुताइति । अस्यांयदिसुतामेजायेरन्तदायद्वावितद्वत्तुजीवनंतुतावदस्याभवेदेव । तदंतरायद्वयमेवम्रियेततदानांकिंचिदन्याय्यम् ४९ (ननुसुताभविष्यंत्येवास्याशरीरवाण्याःश्रद्धेयत्वात्तत्राहविपर्ययइति) यदिचसुताभविष्यंतिनचायंम्रियेततदामत्पुत्रादेवास्यमरणमितिविपर्ययोवाकिंनस्यात् ननुप्रौढस्यकंसस्यतवबालकात्कथंमृत्युःस्यात्तत्राह । गतिरिति । " अस्यास्त्वामष्टमोगर्भोहंते " त्युक्तवतोधातुः (गतिरघटितघटनारूपा) अतइदानीमपत्यार्पणप्रतिज्ञैवमंत्रः । तथासतिउपस्थितोमृत्युरयंतावन्निवर्तेत । निवृत्तःपुनःकालांतरेआपतेत्चेत्तदानापराधोममेत्यर्थः । अथवाऽस्यमत्पुत्रादुपस्थितोयोमृत्युरस्यावधान्निवर्तेतअन्यथास्यात्तदासपुनरनेनममंमंत्रेणनिवृत्तोप्यापतेत्भवेदेवतदिष्टमित्यर्थः । यद्वागतिर्धातुर्दुरत्ययेत्येतस्यैवप्रपंचउपस्थितइति५० प्राणिनामदृष्टंचपुनर्दुर्वितर्क्यमितिसदृष्टांतमाह । अग्नेरिति।वनेवृक्षान्प्रदहन्वह्निःसन्निहितानपिवृक्षान्परित्यज्यकदाचिद्दूरस्थानपिदहतिग्रामेगृहान्वा नह्यस्यप्राण्यदृष्टव्यतिरेकेणकिंचिन्नियामकमस्तियथा । एवंजंतोर्जन्ममरणयोरपिहेतुर्दुर्विभाव्यःअचिंत्यः (अतएतदुपर्यस्याअदृष्टमेवहेतुःइतिभावः) ५१ यावदात्मनिदर्शनंस्वप्रज्ञावधिविचार्य (शब्दरत्नैस्तंपूजयामास) ५२ तस्यविश्वासार्थंविकसितमुखांभोजः (दूयमानेनमनसोपलक्षितोपि) प्रहसन्नब्रवीत् ५३

॥ ६ ॥

श्लोकाः ४९/५३

एषातवानुजाबालाकृपणापुत्रिकोपमा ॥ हंतुंनार्हसिकल्याणीमिमांत्वंदीनवत्सल ४५ ॥ श्रीशुकउवाच ॥ एवंससामभिर्भेदैर्बोध्यमानोपिदारुणः ॥ नन्यवर्ततकौरव्यपुरुषादाननुव्रतः ४६ निर्बंधंतस्यतंज्ञात्वाविचिंत्यानकदुंदुभिः ॥ प्राप्तंकालंप्रतिव्योढुमिदंतत्रान्वपद्यत ४७ मृत्युर्बुद्धिमताऽपोह्योयावद्बुद्धिबलोदयम् ॥ यद्यसौननिवर्तेतनापराधोस्तिदेहिनः ४८ प्रदायमृत्यवेपुत्रान्मोचयेकृपणामिमाम् ॥ सुतामेयदिजायेरन्मृत्युर्वानम्रियेतचेत् ४९ विपर्ययोवाकिंनस्याद्गतिर्धातुर्दुरत्यया ॥ उपस्थितोनिवर्तेतनिवृत्तःपुनरापतेत् ५० अग्नेर्यथादारुवियोगयोगयोरदृष्टतोन्यन्ननिमित्तमस्ति ॥ एवंहिजंतोरपिदुर्विभाव्यःशरीरसंयोगवियोगहेतुः ५१ एवंविमृश्यतंपापंयावदात्मनिदर्शनम् ॥ पूजयामासवैशौरिर्बहुमानपुरःसरम् ५२ प्रसन्नवदनांभोजोनृशंसंनिरपत्रपम् ॥ मनसादूयमानेनप्रहसन्निदमब्रवीत् ५३

चूर्णिका

हेकंसएषातवानुजापुत्रिकोपमाऽस्तिइमांहंतुंत्वंनार्हसि ४५॥ श्रीशुकउवाच ॥ एवमुक्तोपिकंसःनन्यवर्तत ४६ तदातस्यनिर्बंधंज्ञात्वाप्राप्तंकालंवंचयितुंइदंज्ञातवान् ४७ तदाह यावद्बुद्धिवलोदयंतावत्बुद्धिमताम्मृत्युः अपोह्यः यदिननिवर्तेततर्हिदेहिनःअपराधोनास्ति ४८ अतः एवंकरिष्यामीत्याहमृत्यवेकंसायपुत्रान्दत्वाइमांमोचये यदिचमेसुताःजायेरन् मृत्युर्वानम्रियेतचेत् ४९ विपर्ययोवाकिंनस्यात् गतिर्धातुर्दुरत्ययाइत्यादिविमृश्य ५० ५१ शौरिः तंपूजयित्वावदनांभोजंप्रसार्यनृशंसंतंइदंअब्रवीत् ५२५३

१ ' सन्मंत्रेण ' इतिपाठांतरमस्मु॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यत्यथाअशरीरिणीवागाह तथाहि निश्चितम् । अस्याःसकाशात्तेभयंनास्ति । यतोयेभ्यः पुत्रेभ्यस्तेभयमुत्थितम् । अष्टमोहंतेत्युक्तेरन्योन्यापेक्षयासर्वेप्यष्टमाभवेयुरितिसर्वानर्पितानस्याःपुत्रान्सम
र्पयिष्ये ५४ तद्वाक्येसारःउपपत्तिःतद्वित् निववृतेनिवृत्तः ५५ (अथाकियताकालेन) प्रसूतिकालेउपावृत्तेप्राप्तेसर्वःसर्वात्माभगवानेवदेवतायस्याःसातथा। सर्वदेवतामयीतिवा भगवदाश्रयत्वात् ५६ (कृच्छ्रे
णविहरक्लेशेन । नन्वेवंकुतोर्पितवान्तत्राह । अनृतादिति) ५७ (ननुस्वयम्) मृत्यवेपुत्रंकथमर्पितवानित्यपेक्षायामाह । किंदुःसहमिति साधूनांसत्यसंधानाम् । पुत्रलालनसुखापेक्षाकथंत्यक्तेत्यतआह
विदुषामिति (विदुषां) भगवानेवतत्त्वंनान्यदितिजानतां(ज्ञानवैराग्ययुक्तानाम्) इत्यर्थः । ननुस्वयंनीतेसतिकंसोबालंनहन्यादितिमत्वानीतवानितिकिंनस्यादितिनेत्याहकिमकार्यमिति (कदर्यान्नविश्व
संतीत्यर्थः) ननुदेवकीकथंपुत्रंतत्याजेत्यतआह । दुस्त्यजमिति चित्तेधृतआत्माहरिर्यैस्तेषाम् ५८ (समत्वंसाम्येनशत्रुमित्रादीनांहिताचरणम् । व्यवस्थितिंनियतत्वं) ५९ (किलप्रसिद्धौ । अशरीरवा
॥ ७ ॥ चाविहितः) ६० (असतोऽसाधोःअविजितात्मनःअस्थिरबुद्धेः) ६१ कंसस्यशांतिर्देवकार्यानुगुणानभवतीतिनारदस्यमंत्यवस्थानमासीत्तदाह नंदाद्याइत्यादित्रयेण ६२ उभयोर्वसुदेवनंदकुलयोः (वि
द्यमानाःहेभारतयेचकंसमनुव्रताबंधुसुहृदस्तेचसर्वेदेवतामायाएतत्कंसायशशंस) ६३ वधोद्यमंदैवतकृतमितिशेषः ६४ (स्ववधंप्रतिविष्णुवंशंमत्वा) ६५

श्लोकाः ५४ ६५

॥ वसुदेवउवाच ॥ नह्यस्यास्तेभयंसौम्ययद्वैसाहाशरीरवाक् ॥ पुत्रान्समर्पयिष्येऽस्यायतस्तेभयमुत्थितम् ५४ ॥ श्रीशुकउवाच ॥ स्वसुर्वधान्निववृ
तेकंसस्तद्वाक्यसारवित् ॥ वसुदेवोपितंप्रीतःप्रशंस्यप्राविशद्गृहम् ५५ अथकालउपावृत्तेदेवकीसर्वदेवता ॥ पुत्रान्प्रसुषुवेचाष्टौकन्यांचैवानुवत्सरम् ५६
कीर्तिमंतंप्रथमजंकंसायानकदुंदुभिः ॥ अर्पयामासकृच्छ्रेणसोनृतादातिविह्वलः ५७ किंदुःसहंनुसाधूनांविदुषांकिमपेक्षितम् ॥ किमकार्यंकदर्याणांदुस्त्य
जंकिंधृतात्मनाम् ५८ दृष्ट्वासमत्वंतच्छौरेःसत्येचैवव्यवस्थितिम् ॥ कंसस्तुष्टमनाराजन्प्रहसन्निदमब्रवीत् ५९ प्रतियातुकुमारोयंनह्यस्मादस्तिमेभयम् ॥
अष्टमाद्युवयोर्गर्भान्मृत्युर्मेविहितःकिल ६० तथेतिसुतमादायययावानकदुंदुभिः ॥ नाभ्यनंदतत्तद्वाक्यमसतोविजितात्मनः ६१ नंदाद्यायेव्रजेगोपायाश्चा
मीषांचयोषितः ॥ वृष्णयोवसुदेवाद्यादेवक्याद्यायदुस्त्रियः ६२ सर्वेवैदेवताप्रायाउभयोरपिभारत ॥ ज्ञातयोबंधुसुहृदोयेचकंसमनुव्रताः ६३ एतत्कंसाय
भगवान्शशंसाभ्येत्यनारदः॥भूमेर्भारायमाणानांदैत्यानांचवधोद्यमम् ६४ ऋषेर्विनिर्गमेकंसोयदून्मत्वासुरानिति ॥देवकीगर्भसंभूतंविष्णुंवंशंस्ववधंप्रति६५

चूर्णिका

॥ वसुदेवउवाच ॥ हेकंसयत्साअशरीरवाक् आहतद्भयंते न यतःअस्याःपुत्रान्तेअर्पयिष्यामि ५४ ॥ श्रीशुकउवाच ॥ ततःकंसःस्वसुर्वधात्निवृत्तः वसुदेवोपितंप्रशस्यगृहं
विवेश ५५ अथप्रसूतिकालेप्राप्तेदेवकीअष्टौपुत्रान् एकांकन्यांचअनुवत्सरंसुषुवे ५६ ततःप्रथमजंकीर्तिमंतंकंसायवसुदेवःकृच्छ्रेणददौ ५७ हेनृपसाधूनांदुःसहंकिम् विदुषां
अपेक्षितंकिमित्यादि ५८ एवंशौरेःसमत्वंदृष्ट्वातुष्टःसन्कंसःइदंआह ५० हेवसुदेव अयंतेकुमारःगच्छतुअस्मात्मेभयंन युवयोः अष्टमात्गर्भात्मेमृत्युःविहितः ६० एवमुक्ते
शौरिःसुतंआदाययथौतथापितद्वचः नाभ्यनंदत् ६१ एतर्हिनारदःएत्यकंसंआह हेकंसव्रजेनंदाद्याःगोपाः तथातत्स्त्रियः तथामथुरायांवसुदेवाद्याः तत्स्त्रियश्चएतेसर्वेदेवताप्रायाःसं ॥ ७ ॥
ति इदंतथाभूमेः भारायमाणानांदैत्यानांचवधोद्यमंश्रावयित्वानारदःययौ ६२ ६३ ६४ ततःकंसः यदून्सुरानितिमत्वातथादेवक्यागर्भसंभूतंविष्णुंस्ववधंप्रतिकारणंमत्वा ६५

१ प्रत्यवस्थाविरोधनमित्यमरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२॥

निगडैःशृंखलैःअजनोविष्णुस्तच्छंकया (अन्योन्यापेक्षयाऽयमेवाष्टमःस्यादितिशंकयेत्यर्थः) ६६ (ननुशंकयाकथमहन्नित्याशंक्य नात्रचित्रमित्याह मातरमिति । असुतृपःस्वप्राणानृतर्पयंतः) ६७ (विष्णुपक्षैर्यदुभिःसहविरोधंकृतवानित्यर्थः) ६८ (शूरसेनसंज्ञान्देशान्) ६९ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांप्रथमोध्यायः १ ॥ ॥ ७ ॥ ॥ द्वितीयेकंसघाताय देवक्यागर्भगोहरिः । ब्रह्मादिभिःस्तुतःसाचसांत्वितेतिनिरूप्यते ॥ १ ॥ यदुभिःसव्यरुध्यतेत्युक्तंतमेवविरोधंप्रपंचयतित्वरयादेवकीगर्भस्यान्यत्रसंचारणेभगवतःप्रवेशंवक्तुम् प्रलंबेत्यादिसार्धत्रयेण । महाशनोअघासुरः १ २ ३ अनुरुंधानाअनुवर्तमानाः ४ धामकलातदेवसप्तमोगर्भोबभूव । किंतद्धामेत्यतआहयमनंतमिति । हर्षशोकविवर्धनः । आनंदरूपस्यावतीर्णत्वाद्धर्षःपूर्वगर्भसाधारणदृष्ट्याच शोकइति ५ (निजोनाथोयेषांतेषांभयम्) ६ ७ ननुसागोकुलेकिमित्यास्तेअतआह । अन्याश्चेति । नकेवलंसैवअन्याअपीति । विवरेषुअलक्ष्यस्थानेषु । जठरेसंतम् । ननुगर्भआकृष्यमाणःकथंजीवेत्अतआहमामकंधामेति तत्ततः ८

॥८॥

श्लोकाः ६६/८

देवकींवसुदेवंचनिगृह्यनिगडैर्गृहे ॥ जातंजातमहन्पुत्रंतयोरजनशंकया ६६ मातरंपितरंभ्रातॄन्सर्वांश्चसुहृदस्तथा ॥ घ्नंतिह्यसुतृपोलुब्धाराजानः प्रायशोभुवि ६७ आत्मानमिहसंजातंजानन्प्राग्विष्णुनाहतम् ॥ महासुरंकालनेमिंयदुभिःसव्यरुध्यत ६८ उग्रसेनंचपितरंयदुभोजांधकाधिपम् ॥ स्वयंनिगृह्यबुभुजेशूरसेनान्महाबलः ६९ इतिश्रीभागवतेमहापुराणेदशमस्कंधेप्रथमोऽध्यायः १ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ प्रलंबबकचाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः १ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः ॥ यदूनांकदनंचक्रेबलीमागधसंश्रयः २ तेपीडितानिविविशुःकुरुपांचालकेकयान् ॥ शाल्वान्विदर्भान्निषधान्विदेहान्कोशलानपि ३ एकेतमनुरुंधानाज्ञातयःपर्युपासत ॥ हतेषुषट्सुबालेषुदेवक्याऔग्रसेनिना ४ सप्तमोवैष्णवंधामयमनंतंप्रचक्षते ॥ गर्भोबभूवदेवक्याहर्षशोकविवर्धनः ५ भगवानपिविश्वात्माविदित्वाकंसजंभयम् ॥ यदूनांनिजनाथानांयोगमायांसमादिशत् ६ गच्छदेविव्रजंभद्रेगोपगोभिरलंकृतम् ॥ रोहिणीवसुदेवस्यभार्याऽऽस्तेनंदगोकुले ७ अन्याश्चकंससंविग्नाविवरेषुवसंतिहि ॥ देवक्याजठरेगर्भंशेषाख्यंधाममामकम् ८

चूर्णिका ॥८॥

वसुदेवदेवकींचगृहेशृंखलैःनिगृह्यतयोःजातंजातंपुत्रंअहन् ६६ हेराजन् असुतृपःराजानःमातृपित्रादीन्घ्नंति किमत्राश्चर्यं ६७ किंच प्राक्विष्णुनाहतंकालनेमिरूपंस्वात्मानंजानन्सःयदुभिःव्यरुध्यत ६८ उग्रसेनंचापितरंयदुभोजांधकाधिपम् स्वयंनिगृह्यबुभुजेशूरसेनान्महाबलः ६९॥ इतिश्रीमद्भागवतेदशमस्कंधेचूर्णिकायांप्रथमोऽध्यायः १ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः १ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः कंसःमागधाश्रयःसन् २ यदूनांकदनंचक्रे तेपीडिताःसंतः कुरुपांचालादिदेशान्विविशुः ३ एकेतंअनुवर्तमानाःपर्युपासत एवंदेवक्याःषट्सुबालेषुहतेषुसत्सु ४ सप्तमः अनंताख्यंविष्णोर्धामदेवक्याः हर्षशोकप्रदः गर्भोबभूव ५ भगवानपियदूनांकंसजंभयंज्ञात्वायोगमायांआदिशत् ६ हेदेविव्रजंगच्छतत्रवसुदेवस्त्रीरोहिणीअन्याश्चगुप्तस्थानेवसंति ७ तत्र गत्वादेवकीजठरेमेधामशेषाख्यंअस्तितत्आकृष्यरोहिण्युदरेस्थापय ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किमर्थमेवंकार्यमित्यतआह । अथेति । अनंतरमेवेत्यर्थः । अंशभागेनेति । अंशैःशक्तिभिर्भजतेअधितिष्ठतिसर्वान्ब्रह्मादिस्तंबपर्यंतानित्यंशभागःतेनपरिपूर्णेनरूपेणेत्यर्थः । यद्वा अंशैर्ज्ञानैश्वर्यबलादिभि र्भाजयतियोजयतिस्वीयानितितथातेनेति। यद्वा अंशेनपुरुषरूपेणमायायाभागोभजनंईक्षणंयस्यतेन यद्वा अंशेनमाययागुणावतारादिरूपाभागाभेदायस्यतेन। यद्वा अंशाएवमत्स्यादिरूपाभजनीया ननु साक्षात्स्वरूपंयस्यतेन । यद्वा । अंशैर्ज्ञानबलादिभिर्भजनमनुवर्तनंभक्तेषुयस्यतेन । सर्वथापरिपूर्णेनरूपेणेतिविवक्षितंकृष्णस्तुभगवान्स्वयमितिवचनादिति । तांप्रोत्साहयति । त्वंयशोदायामिविसार्द्धंच तुष्टयेन ९ सर्वान्पुत्रादीन्कामयंतेयेतेषांवरांईश्वरींश्रेष्ठांनियंत्रीम् । अर्चकानांसर्वान्कामवरान्प्रददातियाताम् १०(स्थानानिकामरूपादीनि) ११ १२ त्वद्विक्रमेणचतस्यव्यपदेशाभविष्यंतीत्याह ग र्भसंकर्षणादित्यादिना । रामेतिचसंबोधनंकरिष्यंति । त्वयासंकृष्टेनतेनलोकस्यरमणात्रत्युत्पादनात् १३ तथेतिपुनरपिओमितिआदरेणप्रतिगृह्यगांपृथ्वीम् १४ विस्रंसितःविभ्रष्टःविस्रस्तइत्यर्थः । इ

॥ ९ ॥ तिविचुक्रुशुः । ननुतद्विदुरित्यर्थः १५ मनआविवेशमनस्याविर्बभूव । जीवानामिवनधातुसंबंधइत्यर्थः । १६ धामश्रीमूर्तिम् १७ जगन्मंगलंजगतोमूर्तिमन्मंगलंअच्युतांशंअच्युताश्च्युतिरहिताअं शाऐश्वर्यादयोयस्यतम् । यद्वा । अच्युतस्यांशइवांशोभक्तानुग्रहार्थंपरिच्छिन्नवपुरित्यर्थःसमाहितंसम्यग्भूतमेवाहितंवैधदीक्षयार्पितम् । देवीद्योतमानाशुद्धसत्त्वेत्यर्थः । सर्वात्मकंसर्वस्यात्मानंअतएवा त्मभूतंस्वस्मिन्नादावेवसंतंमनस्तःमनसैवदधारधारणयाधृतवती । अत्रानुरूपंदृष्टांतमाह । यथाकाष्ठाप्राचीदिक्आनंदकरंचंद्रम् १८

श्लोकाः ९/१८

तत्संनिकृष्यरोहिण्याउदरेसंनिवेशय ॥ अथाहमंशभागेनदेवक्याःपुत्रतांशुभे ॥ प्राप्स्यामित्वंयशोदायांनंदपत्न्यांभविष्यसि ९ अर्चिष्यंतिमनुष्या स्त्वांसर्वकामवरेश्वरीम् ॥ धूपोपहारबलिभिःसर्वकामवरप्रदाम् १० नामधेयानिकुर्वंतिस्थानानिचनराभुवि ॥ दुर्गेतिभद्रकालीतिविजयावैष्णवीति च ११ कुमुदाचंडिकाकृष्णामाधवीकन्यकेतिच ॥ मायानारायणीशानीशारदेत्यंबिकेतिच १२ गर्भसंकर्षणात्तंवैप्राहुःसंकर्षणंभुवि ॥ रामेतिलोकरम णात्बलंबलवदुच्छ्रयात् १३ संदिष्टैवंभगवतातथेत्योमितितद्वचः ॥ प्रतिगृह्यपरिक्रम्यगांगतातत्तथाकरोत् १४ गर्भेप्रणीतेदेवक्यारोहिणींयोगनिद्रया ॥ अहोविस्रंसितोगर्भइतिपौराविचुक्रुशुः १५ भगवानपिविश्वात्माभक्तानामभयंकरः ॥ आविवेशांशभागेनमनआनकदुंदुभेः १६ सबिभ्रत्पौरुषंधामभ्राज मानोयथारविः ॥ दुरासदोतिदुर्धर्षोभूतानांसंबभूवह १७ ततोजगन्मंगलमच्युतांशंसमाहितंशूरसुतेनदेवी ॥ दधारसर्वात्मकमात्मभूतंकाष्ठायथानं दकरंमनस्तः १८

चूर्णिका

ततः अहमपिदेवक्याः पुत्रतांप्राप्स्यामि त्वंचनंदस्त्रियांयशोदायांभविष्यसि ९ एवंकृतेमनुजाः त्वांधूपोपहारादिभिः अर्चिष्यंति १० तेतवनामानिदुर्गाभद्रकालीविज यावैष्णवीइत्यादीनिस्थानानिचकुर्वंति ११ १२ किंच त्वयागर्भसंकर्षणात्तंसंकर्षणमितिवदंति लोकरमणात्राममिति बलवदुच्छ्रयात्बलमितिच १३ एवंहरिणाआदिष्टासा व्रजेआगत्यतथाऽकरोत् १४ एवंतयादेवक्याः गर्भेरोहिणीप्रणीतेसतिपौराः गर्भः विस्रस्तइतिचुक्रुशुः १५ अथभगवान् भक्ताभयदः वसुदेवमनसि आविर्बभूव १६ ततोवसुदेवः पौरुषंधामबिभ्रत् रविरिवतेजस्वीभूतानांदुर्धर्षश्चबभूव १७ ततः वसुदेवेनवैधदीक्षयाअर्पितांश्रीमूर्तिंदेवकीप्राचीचंद्रमिवमनसैवदधार १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.द.पू. सर्वजगन्निवासस्यश्रीहरेर्निवासभूतासत्यपिनितरांसर्वजनाह्लादकतयानरेजेकिंतुस्वाह्लादकतयैवरेजेस्वयमेव.नंदमन्वभवदित्यर्थः । यतःकंसस्यगृहेरुद्धाऽन्यैर्नदृश्यते । घटादिपुरुद्धाअग्निशिखादीपइव । अ०
तथासतीशोभनार्यासरस्वतीज्ञानखलेज्ञानवंचकेरुद्धायथान्येषामनुपकारिणीनराजतेतद्वत् (शुद्धत्वेदृष्टांतोयम्) १९ प्रभयाभवनंविरोचयंतींअजितःअंतरकुक्षिमध्येयस्यास्ताम् । एषविरोचमानःध्रुवंहरिरे
टीका व । यत्यस्मात्ईदृशीपूर्वंनासीत् २० ननुसंतिसामादयउपायाःनेतिस्वयमेवाह । अयमर्थंतंत्रोदेवकार्यप्रधानःनहिविक्रमंविहंतिमद्वधेपराक्रमंकरिष्यत्येवेत्यर्थः । यद्वा तर्हिइयमिदानीमेवहन्यतामितिवि ॥२॥
चित्याह । अर्थतंत्रोपिपुमान्स्वंविक्रमंनविहंतिननाशयतिस्त्रींवधेहितन्नाशःस्यादितिभावः । तदेवाहस्त्रियाइतिगुरुमत्यागुर्विण्याः २१ किंच । सएषजीवन्नपिमृतःस्यात् । नृशंसितेनक्रौर्येणयोवर्तेत । तं
॥१०॥ जीवंतमेवहिमनुजाःशपंति । दुर्वाक्यैर्धिक्कुर्वंति । देहेमृतेतुसःतनुमानिनःपापिनोनरस्य (अंधंतमोगंता) । नरकंगच्छति अथवा शापप्रकारमेवाहतनुमानिनोस्यदेहेमृतेऽयंध्रुवंअंधंतमोगमिष्यतीति २२
प्रभुरपिस्वयंसन्निवृत्तः २३ संविशन्शयानः २४ (सर्वे)रम्याभिर्गीर्भिर्वृषणंकामवर्षिणंऐडयन्तुष्टुवुः २५ प्रतिश्रुतंसत्यंकृतमितिहृष्टाःसत्यत्वेनैवप्रथमंस्तुवंतिसत्यव्रतमिति । सत्यंव्रतंसंकल्पोयस्यतम् । सत्य
परंश्रेष्ठंप्राप्तिसाधनंयस्मिन्तम् । त्रिसत्यंत्रिष्वपिकालेपुसृष्टेःपूर्वंप्रलयानंतरंचस्थितिसमयेचसत्यंअव्यभिचारेणवर्तमानम् । तदेवाहुः । सत्यस्ययोनिमिति । सच्छब्देनपृथिव्यप्तेजांसित्यच्छब्देनवाय्वाका
शौएवंसच्चत्यच्चसत्यंभूतपंचकम् “ तत्सत्यमित्याचक्षते ” इतिश्रुतेः । तस्ययोनिःकारणंअनेनपूर्ववर्तमानतोक्तातथासत्येतस्मिन्नेवनिहितंअंतर्यामितयास्थितंअनेनस्थितिसमयेपिसत्यत्वमुक्तम् । तथास
त्यस्यसत्यंतस्यैवसत्यस्यसत्यंपारमार्थिकंतन्नाशेप्यवशिष्यमाणंरूपंअनेनप्रलयेप्यवधित्वेनसत्यत्वंदर्शितम् । एवंत्रिसत्यत्वंउपपादितम् । तथाऋतसत्यनेत्रम् । ऋतंचसूनृतावाणीसत्यंचसमदर्शनं तथाभग
वताव्याख्यास्यमानत्वात् “ सत्यंचसमदर्शनंऋतंचसूनृतावाणीकविभिःपरिकीर्तिता ” इति । तयोर्नेत्रंनयनसाधनंनेतारंप्रवर्तकमितियावत् एवंसर्वप्रकारेणसत्यात्मकंत्वांभगवन्वयंशरणंप्रपन्नाःप्राप्ताः २६

सादेवकीसर्वजगन्निवासनिवासभूतानितरांनरेजे ॥ भोजेंद्रगेहेऽग्निशिखेवरुद्धासरस्वतीज्ञानखलेयथासती १९ तांवीक्ष्यकंसःप्रभयाऽजितांतरांविरोचयं श्लोकाः
तींभवनंशुचिस्मिताम् ॥ आहैषमेप्राणहरोहरिर्गुहांध्रुवंश्रितोयन्नपुरेयमीदृशी २० किमद्यतस्मिन्करणीयमाशुमेऽयमर्थतंत्रोनविहंतिविक्रमम् ॥ स्त्रियाः
स्वसुर्गुरुमत्यावधोयंयशःश्रियंहंत्यनुकालमायुः २१ सएषजीवन्खलुसंपरेतोवर्तेतयोत्यंतनृशंसितेन ॥ देहेमृतेतंमनुजाःशपंतिगंतातमोंधंतनुमानिनोध्रुव १९/२६
म् २२ इतिघोरतमाद्भावात्सन्निवृत्तःस्वयंप्रभुः ॥ आस्तेप्रतीक्षंस्तज्जन्महरेर्वैरानुबंधकृत् २३ आसीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्महीम् ॥ चिंतयानो
हृषीकेशमपश्यत्तन्मयंजगत् २४ ब्रह्माभवश्चतत्रैत्यमुनिभिर्नारदादिभिः ॥ देवैःसानुचरैःसाकंगीर्भिर्वृषणमैडयन् २५ सत्यव्रतंसत्यपरंत्रिसत्यंसत्यस्ययोनिं
निहितंचसत्ये ॥ सत्यस्यसत्यंऋतसत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपन्नाः २६

चूर्णिका सादेवकीश्रीहरेःनिवासभूतासत्यापिनातिरेजे यतःकंसगृहेरुद्धायथाघटादिषुरुद्धोदीपइव १९ एवंप्रभयाभवनंविरोचयंतीं तांदृष्ट्वाकंसःआहअहोमेप्राणहरोयः हरिःसःध्रुवंगुहांश्रि
तः २० सःमद्वधेपराक्रमंकरिष्यत्येव अतःतस्मिन् अद्यमयाकिंकरणीयम्ननुइयमेवहन्यतामितिचेत्तर्हिस्वसुःगर्भिण्याःस्त्रियःवधःयशःश्रियं आयुश्चनाशयति २१ किंचक्रौर्ये
णयोवर्ततेसः जीवन्नपिमृतःस्यात् किंच तंमनुजाःशपंति अस्मिन्मृतेसतिअंधंतमोगमिष्यतीति २२ इतिघोरतमाद्भावात्निवर्त्यहरेः जन्मप्रतीक्षन् आस्ते २३ किंच आसीनःति ॥१०॥
ष्ठन्भुंजानःपर्यटन् हरिंचिंतयानःतन्मयंजगत् अपश्यत् २४ तत्रदेवैःऋषिभिःसहब्रह्माभवश्चएत्यतुष्टुवुः २५ हेहरेसत्यसंकल्पंकालत्रयेपिसत्यंएवंसर्वप्रकारेणसत्यंत्वांवयंशरणं
प्रपन्नाःस्म २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

ननुभवंतोपिलोकेश्वरामत्तुल्याएवकिमितिमांशरणंप्रपद्यंते । नैवंवाच्यम् । त्वमेवैकःसर्वेश्वरःसर्वसृष्ट्यादिकारणत्वात्स्वयंतुत्वदेकशरणाएवलोकादिरूपंद्वैतंचसर्वंत्वद्व्यतिरेकेणनास्तीतिवक्तुंद्वैतप्रपंचंवृक्षरू
पकेणनिरूपयंतिएकायनइति । असौप्रपंचआदिवृक्षःवृश्च्यतइतिवृक्षःसमष्टिव्यष्टिदेहरूपः । कथंभूतः । एकायनःएकाप्रकृतिरयनमाश्रयोयस्यसः द्वेसुखदुःखेफलेयस्यसः । त्रयोगुणामूलानियस्यसःधर्मार्थका
मर्मोक्षाश्चत्वारोरसायस्यसः । पंचेंद्रियाणिविधाज्ञानप्रकारायस्यसः । षडूर्मयःकोशावाआत्मानःस्वभावायस्यसः । सप्तधातवस्त्वचोयस्यसः । पंचभूतानिमनोबुद्धिरहंकारश्चेत्यष्टौविटपाःशाखाविस्तारायस्यसः । नवद्वाराणिअक्षाश्छिद्राणियस्यसः । दशप्राणाःछदाःपत्राणिविद्यंतेयस्यसःदशच्छदी । द्वौजीवेश्वरौखगौयस्मिन्सःद्विखगः २७ एवंरूपस्यसंसारवृक्षस्यसतःकार्यस्यत्वमेकएवप्रकर्षेणसूतिर्जन्मयस्मात्सप्रसूतिःकारणमित्यर्थः । त्वंसन्निधानंत्वमेवसम्यग्निधीयतेऽस्मिन्नितिसंनिधानंलयस्थानम् । त्वमेवानुग्रहश्च अनुगृह्णातीतिपालकः । ननुब्रह्मविष्णुरुद्राएवंभूताःप्रसिद्धाःकथमहमेवेतिचेत्तत्राहुः । त्वन्माययेति । संवृतंपिहितंचेतोज्ञानंयेषांतेत्वामेवनानापश्यंतियेतुविपश्चितोविद्वांसस्तेतथानपश्यंति२८ननुदेवकीपुत्रंमांकथमेवंवर्णयथेतिचेत्तत्राहुः । बिभर्षीति । अवबोधैकस्वरूपआत्मात्वमेव(शुद्धसत्त्वात्मकानि)रूपाणिमूर्तीर्बिभर्षिधत्सेनतुत्वंकस्यापिपुत्रइत्यर्थः क्षेमायपालनाय सतांधर्मवर्तिनांसुखकराणि । खलानामभद्राणिनाशकानि २९ नकेवलमेतावद्भक्तानां मोक्षार्थमपीत्याहुः त्वयीति त्वयिसमाधिनाआवेशितचेतसानिश्चित्तेनत्वत्पादपोतेनाश्रितेनकेमुख्याःविवेकिनःमहद्भिः कृतेनसेव्यतयासंपादितेनयद्वाइदमपिमायामयमित्यनादरंपरित्यज्येदमेवमहत्सर्वोत्कृष्टमितिमनसिकृतेनबहुमतेनेत्यर्थःभवाब्धिंतुच्छीकुर्वंति । अनायासेनैवभजनानुसारिणींतपांमुक्तिरित्यर्थः ३० ननुतेनपोतेनपूर्वेचेत्पारंगतास्तर्हीदानींतनानांकागतिस्तत्राहुः । स्वयमिति । अयमर्थःहेद्युमन्स्वप्रकाशत्वत्पादपोतसामीप्यमात्रेणभवांबुधौ (भूगत-) -वत्सपदचिह्नमात्रजातेऽतस्तस्मिन्निरपेक्षेयथास्यात्तथास्वयमेवान्येषांभीमंदुस्तरमपिभवार्णवंसमुत्तीर्यभवत्पदांभोरुहरूपांनावमत्रैवनिधायभक्तिमार्गसंप्रदायंप्रवर्त्यैत्यर्थःपारंयाताः । तत्किम् । यतोऽदभ्रसौहृदाःसर्वभूतेष्वतिर्शयातियुक्ताः । अतस्तेऽन्येषांतरणायनिधायधाताइति । कथंमत्पादपोतेनउत्तीर्णाअतउक्तम् । भवान्सदनुग्रहः । सतोभक्तान्अनुगृह्णाति ३१

॥११॥

श्लोकाः २७—३१

एकायनोसौद्विफलस्त्रिमूलश्चतूरसःपंचविधःषडात्मा ॥ सप्तत्वगष्टविटपोनवाक्षोदशच्छदीद्विखगोह्यादिवृक्षः २७ त्वमेकएवास्यसतःप्रसूतिस्त्वंसन्निधानं
त्वदनुग्रहश्च ॥ त्वन्माययासंवृतचेतसस्त्वांपश्यंतिनानानविपश्चितोये २८ बिभर्षिरूपाण्यवबोधआत्माक्षेमायलोकस्यचराचरस्य ॥ सत्त्वोपपन्नानिसुखा
वहानिसतामभद्राणिमुहुःखलानाम् २९ त्वय्यंबुजाक्षाखिलसत्त्वधाम्निसमाधिनाऽऽवेशितचेतसैके ॥ त्वत्पादपोतेनमहत्कृतेनकुर्वंतिगोवत्सपदंभवाब्धिम्
३० स्वयंसमुत्तीर्यसुदुस्तरंद्युमन्भवार्णवंभीममदभ्रसौहृदाः ॥ भवत्पदांभोरुहनावमत्रतेनिधायययाताःसदनुग्रहोभवान् ३१

चूर्णिका

किंचहेकृष्णअयंसंसारवृक्षः प्रकृत्याश्रयः सुखदुःखफलः २ गुणत्रयमूलः ३ धर्मार्थादिरसः ४ सप्तधातुत्वक् ७ भूत ५ मनोबुद्ध्यहंकाराः ३ विटपः ८ नवद्वारच्छिद्रः ९ दशप्राणपर्णः १० जीवेश्वरखगः २ २७ एवंभूतवृक्षस्यउत्पत्त्यादिकर्त्तात्वमेवासि २८ एवंभूतः त्वंसर्वलोकानांक्षेमायसात्त्विकरूपाणिबिभर्षि २९ हेअंबुजाक्षत्वयिएकेचित्तंस्थाप्यत्वत्पादपोतेनभवाब्धिंगोवत्सपदंकुर्वंति ३० किंच तेदयालवः भवार्णवंउत्तीर्यभवत्पदांभोरुहरूपांनावंलोकतरणार्थं अत्रसंस्थाप्यपारंयाताः ३१

॥११॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. ननुविवेकिनांकिमद्भजनेनमुक्ताएवहितेतत्राहुःयेन्यइति विमुक्तमानिनःविमुक्तावयमितिमन्यमानाःत्वयिअस्तोनिरस्तोऽसन्योभावस्तस्माद्भक्तेरभावादित्यर्थःनविशुद्धाबुद्धिर्येषांतेतथा। यद्वा त्वयिअस्तभा अ०
इतिछेदःअस्तमतयःवादेष्वेवविशुद्धबुद्धयःकृच्छ्रेणबहुजन्मतपसापरंपदंमोक्षंसन्निहितंसत्कुलतपःश्रुतादिनावा । पतंतिविघ्नैरभिभूयंते । नआदृतायुष्मदंघ्रयोयैस्ते ३२ त्वदीयास्तुनकदाचिदपिपतंती
त्याहुःतथानेति । विनायकाविघ्नहेतवःतेषांअनीकानिस्तोमास्तानिपांतियेतेषांमूर्धसुविचरंतिविघ्नान्जयंतीत्यर्थः ३३ सतांसुखावहानिरूपाणिधारयसीत्युक्तंविभार्षिरूपाणीतितत्केनप्रकारेणसुखावहत्वमि
टीका त्यपेक्षायामाहुःसत्त्वंविशुद्धमिति । सत्त्वंवपुःश्रयतेइत्यन्वयःश्रेयउपायनंकर्मफलदातृ । कथम् येनवपुषाजनस्तवार्हणंपूजामीहतेकरोति । कैःवेदश्चक्रियायोगाश्चतपश्चसमाधिश्चतैःचतुराश्रमधर्मैरित्यर्थः ॥२॥
वपुषोऽनाश्रयणेऽर्हणासंभवान्नकर्मफलसिद्धिःस्यादिति ३४ त्वय्यंबुजाक्षेत्यादिनाश्लोकत्रयेणभगवद्भक्तानामेवमोक्षोनान्येषामित्युक्तम्। तत्रकर्मफलंभक्तिंविनामाभूत् । मोक्षस्यतुज्ञानैकसाध्यत्वा
॥१२॥ त्किंभक्त्येतिसानुशयान्प्रत्याहुःसत्त्वंनचेदिति । हेधातःइदंशुद्धंसत्त्वंनिजंतववपुर्नभवेच्चेर्त्तार्हिविज्ञानंविशिष्टंअपरोक्षंज्ञानंनभवेदित्यनुषंगः । कथंभूतंअज्ञानभिदापमार्जनं अज्ञानंचज्ञानंचतत्कृताभिदाचतयो
रपमार्जनंनिवर्त्तकम् । यद्वाअज्ञानंभिनत्तीतिअज्ञानभित्विज्ञानंमांर्जनंआपप्राप्तमेवेतिननुजडानांबुद्ध्यादीनांयतःप्रकाशस्तद्ब्रह्मेतिज्ञानंभवेदेव । न । गुणप्रकाशैःगुणावच्छिन्नैःप्रकाशैःभवान्सर्वसाक्षीपूर्णः
केवलमनुमीयतेकल्प्यतेनतुसाक्षात्क्रियतेइत्यर्थः । अनुमानप्रकारमाहुः । प्रकाशतेयस्यचयेनवागुणइति । यस्यसंबंधीअयंआभ्यंतरःबुद्ध्यादिर्गुणःप्रकाशतेयोगुणसाक्षीत्येवम् । येनवाबुद्ध्यारूढेनप्रमा
त्राशब्दादिःबाह्योगुणःप्रकाशतइत्यनुमीयतेइत्यर्थःशुद्धसत्त्ववपुषित्वयिसेव्यमानेतुतदाकारेंऽतःकरणेत्वत्प्रसादेनसाक्षात्कारोभवेदितिभावः ३५ एवंतावद्भक्तानामभ्युदयापवर्गार्थंरूपाणिबिभर्षीत्युक्तंता
न्यपिभजनीयानिकेवलम्नतुज्ञातुंशक्यंतेअनंतत्वादतर्क्यत्वाच्चमनोवचसोरगोचरत्वाच्चादित्याहुःननामरूपेइतिगुणाश्चजन्मानिचकर्माणिचतैर्निरूपितव्येनिरूपणार्हेनभवतः । कुतः । अनुमेयंवर्त्ममार्गोयस्यत
वेति अत्रापिहेतुःतस्यसाक्षिणइतिनहिसाक्षिणस्तत्त्वंमनोवचोगोचरइत्यर्थःहेदेवबहुधाद्योतमानअथापिक्रियायांउपासनादिलक्षणायांत्वांप्रतियंतिउपासकाःसाक्षात्पश्यंतिहिप्रसिद्धम् ३६ तस्माद्भक्त्यैवमो
क्षइत्युपसंहरंति । शृण्वन्निति । संस्मरन्अन्यानपिसंस्मारयन्नित्यर्थः । क्रियासुदेवार्चनादिषु ३७

येन्येऽरविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः॥ आरुह्यकृच्छ्रेणपरंपदंततःपतंत्यधोऽनादृतयुष्मदंघ्रयः ३२ तथानतेमाधवतावकाःक्वचिद्भ्रश्यं श्लोकाः
तिमार्गात्त्वयिबद्धसौहृदाः ॥ त्वयाभिगुप्ताविचरंतिनिर्भयाविनायकानीकपमूर्धसुप्रभो ३३ सत्त्वंविशुद्धंश्रयतेभवान्स्थितौशरीरिणांश्रेयउपायनंवपुः॥ वे
दक्रियायोगतपःसमाधिभिस्तवार्हणंयेनजनःसमीहते ३४ सत्त्वंनचेद्धातरिदंनिजंभवेद्विज्ञानमज्ञानभिदापमार्जनम् ॥ गुणप्रकाशैरनुमीयतेभवान्प्रकाशते ३२/३७
यस्यचयेनवागुणः ३५ ननामरूपेगुणजन्मकर्मभिर्निरूपितव्येतवतस्यसाक्षिणः ॥ मनोवचोभ्यामनुमेयवर्त्मनोदेवक्रियायांप्रतियंत्यथापिहि ३६
शृण्वन्गृणन्संस्मरयंश्चचिंतयन्नामानिरूपाणिचमंगलानिते॥क्रियासुयस्त्वच्चरणारविंदयोराविष्टचेतानभवायकल्पते ३७

चूर्णिका किंच हेहरेयेज्ञानिनः त्वत्पादसेवांनकुर्वंतितेपरंपदंआरुह्यततोऽधःपतंति ३२ तथातवभक्तास्तुनपतंति किंतुविघ्नमूर्धसुपदंदत्त्वानिर्भयाःसंतः विचरंति ३३ एवंभूतोभवान्
अस्यास्थितौजीवानांकर्मफलदातृवपुः श्रयते तेनवपुषाजनः तेपूजांकरोति ३४ ३५ हेदेवसर्वसाक्षिणः तेनामरूपेगुणजन्मकर्मभिःनिरूपणार्हेनभवतः अथापिउपासकाः ॥१२॥
उपासनादिलक्षणक्रियायांत्वांसाक्षात्पश्यंति ३६ किंच हेकृष्णतवनामरूपाणिशृण्वन्गृणन् त्वत्पादाब्जयोः निविष्टचेताःसन्भवायनकल्पते ३७

१ अभावमितियावत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विशेषतः श्रीकृष्णावतारमभिनंदंतिदिष्ट्येति । दिष्ट्याभद्रम् । तवपदःपादभूतायाःईश्वरस्यतवजन्ममात्रेणापनीतएव । त्वत्पदकैः (तव) कोमलैःपदैःसुशोभनैःवज्रांकुशादिशुभलक्षणैःगांपृथ्वींद्यांस्वर्गंचतव त्वयाऽनुकंपितां (द्रक्ष्यामद्रक्ष्यामः) ३८ तवजन्मनाभारोऽपनीतइत्युक्त्यामयापिकिंजीववत्संसारउक्तःनहिनहीत्याहुःनेति । बतहेईशअसंसारिणस्तेजन्मनःकारणंक्रीडांविनानतर्कयामः किंच । हेअभयाश्र यनभयमाश्रयतेइतितथातत्संबोधनंहेनित्यमुक्तेत्यर्थः तवजन्मकारणंनास्तीतिकिंवक्तव्यम् । यतोजीवात्मन्यपिभवादयस्त्वयिविषयेयाऽविद्यातयाकृतानपरमार्थतःसंतीति ३९ प्रस्तुतंप्रार्थयंते मत्स्याश्वेति । नोऽस्मांस्त्रिभुवनंचान्यदायथापासितथाधुनापिपाहि (हेईश) वंदनंतेइतिवदंतःसर्वेशिरोभिःप्रणमंति (अश्वोहयग्रीवःकल्किर्वाराजन्योदाशरथिःविप्रोजामदग्न्यःविबुधोवामनः) ४० देवकींप्रत्याहुःदिष्ट्येति (योंऽशेनापिसदा) अस्मदुद्भवाय (भवति) सपरःपुमान्साक्षात्तेकुक्षिंगतःअतोभयंमाभूत्इति ४१ यस्यरूपमनिदंसर्वप्रत्यग्रूपम् । यथायथावत् । अस्मान्वंचयित्वाएताविहस्थास्येतेइतिमन्यमानाब्रह्मेशा नौपुरोधायपुरतःकृत्वाययुरिति ४२ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांगर्भस्तुतिर्नामद्वितीयोऽध्यायः २ ॥ ॥ ७ ॥ ॥ तृतीयेनिजरूपेणसंभूतस्तुहरिःस्वयम् । पितृभ्यांसं स्तुतोनीतःपित्राभीतेनगोकुलम् ॥ १ ॥ अथेतिमंगलार्थं । यर्हिसर्वगुणोपेतःकालोवभूवतदादेवक्यांविष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः (तदाजनार्दनेजायमानेसतिप्राच्यामिंदुश्चतेजसाआह्लादादि गुणैरप्यर्धोपिपुष्कलइवाविरासीदितिच ।) परमशोभनत्वमेवाह यर्हीत्यादिना । अजनात्नारायणात्जन्मयस्यप्रजापतेस्तस्यऋक्षंरोहिणीनक्षत्रंकथंभूतंशांतानिऋक्षान्यश्विण्यादीनिग्रहाश्चतारकाश्चयस्मिं स्तत् । यर्हीतिसर्वत्रानुषज्जते १ निर्मलानामुडुगणानामुदयोयस्मिंस्तत्तथा । मंगलभूयिष्ठाःपुरादयोयस्याम् (मह्याम्) सा २

श्लोकाः ३८/२

दिष्ट्याहरेऽस्याभवतःपदोभुवोभारोऽपनीतस्तवजन्मनेशितुः ॥ दिष्ट्यांकितांत्वत्पदकैःसुशोभनैर्द्रक्ष्यामगांद्यांचतवानुकंपिताम् ३८ नतेऽभवस्येशभव स्यकारणंविनाविनोदंबततर्कयामहे ॥ भवोनिरोधःस्थितिरप्यविद्ययाकृतायतस्त्वय्यभयाश्रयात्मनि ३९ मत्स्याश्वकच्छपवराहनृसिंहहंसराजन्यवि प्रविबुधेषुकृतावतारः ॥ त्वंपासिनस्त्रिभुवनंचयथाधुनेशभारंभुवोहरयदूत्तमवंदनंते ४० दिष्ट्यांबतेकुक्षिगतःपरःपुमानंशेनसाक्षाद्भगवान्भवायनः ॥ मा भूद्भयंभोजपतेर्मुमूर्षोर्गोप्तायदूनांभवितातवात्मजः ४१॥ श्रीशुकउवाच ॥ ॥ इत्यभिष्टूयपुरुषंयद्रूपमनिदंयथा ॥ ब्रह्मेशानौपुरोधायदेवाःप्रतिययुर्दि वम् ४२॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेगर्भस्तुतिर्नामद्वितीयोऽध्यायः २ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अथसर्वगुणोपेतःकालः परमशोभनः ॥ यर्ह्येवाजनजन्मर्क्षंशांतर्क्षग्रहतारकम् १ दिशःप्रसेदुर्गगनंनिर्मलोडुगणोदयम् ॥ महीमंगलभूयिष्ठपुरग्रामव्रजाकरा २

चूर्णिका

तथाहरेःअस्याःभुवःभारः त्वयाजन्मनैवअपनीतःएतत्दिष्ट्या ३८ हेकृष्णअभवस्यतेजन्मकारणंक्रीडांविनानतर्कयामः ३९ किंच हेईशमत्स्यादियोनिषुकृतावतारः त्वं यथा त्रिभुवनंपासि तथाअधुनाभुवः भारंहर तेनमः ४० देवकींआहुः हेअंबसाक्षाद्भगवान् तेकुक्षिगतःअतः कंसात् तेभयंमाभूत् तवात्मजःयदूनांगोप्ताभविष्यति ४१ ॥ श्री शुकउवाच ॥ इत्यभिष्टूयपुरुषंयद्रूपमनिदंयथा ब्रह्मेशानौपुरोधायदेवाःप्रतिययुर्दिवम् ४२ ॥ इतिदशमेद्वितीयः २ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अथयदासर्वगुणो पेतः शुभकालआसीत् तथायदाशांतर्क्षग्रहतारकं रोहिण्यर्क्षंआसीत् १ यदाचदिशः प्रसेदुःयदानिर्मलोडुगणोदयंनभःआसीत् मंगलभूयिष्ठपुरग्रामव्रजाकारामहीआसीत् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

जलरुहैःश्रीःशोभायेषांते । द्विजालिकुलानांपक्षिभृंगसमूहानांसंनादोयेषुतेस्तबकायासुताः ३ समिंधत । आडागमोत्रद्रष्टव्यःसमैंधतेति (ञिइंधीदीप्तौ) सम्यग्दीप्ताबभूवुरित्यर्थः ४ असुरद्रुहांदेवानां कंसादिसुरशुग्भिन्नानांसर्वप्राणिनांचेति । स्वर्गेतुविशेषमाह ।जायमानइति।अजनेः (हरौ) जायमानेतदाआसन्नःप्रसवोयस्मिंस्तस्मिन्समये ५ ६ ७ तमसाउद्भूतेघनेतस्मिन्निशीथेअनुसागरंसागरनादमनु लक्ष्यसागरोपिमंदंजगर्जेतियथायथावत्ऐश्वरेणैवरूपेणपुष्कलःपूर्णः ८ तमद्भुतंबालकंवसुदेवऐक्षतेतिद्वितीयश्लोकेनान्वयःअद्भुतत्वेहेतुगर्भाणिविशेषणानिअंबुजेक्षणमित्यादीनि। श्रीवत्सलक्ष्माणमित्यर्थः (अरिचक्रंशंखादीन्युद्गतान्यायुधानियत्रतम्) गलेनशोभतेगलशोभीसकौस्तुभोयस्मिन् ९ किरीटकुंडलादीनांत्विषापरिष्वक्तसहस्रकुंतलंस्फुरदपरिमितकेशमित्यर्थः १० विस्मयेनोत्फुल्लेविशिष्टेलोचने यस्यसःगवामयुतमस्पृशत्मनसादत्तवान् । कंसनिगृहीतस्यदानासंभवात् । स्पृष्टौहेतुःकृष्णवतारेति । मुदाआप्लुतःव्याप्तःस्नातइतिवा ११ (परंपूरुषमवधार्यनिश्चित्य) कृतधीःशुद्धबुद्धिः (हेभारत) १२

॥१४॥

श्लोकाः ३/१२

नद्यःप्रसन्नसलिलाहृदाजलरुहश्रियः ॥ द्विजालिकुलसन्नादस्तवकावनराजयः ३ ववौवायुःसुखस्पर्शःपुण्यगंधवहःशुचिः ॥ अग्नयश्चद्विजातीनांशांतास्तत्रसमिंधत ४ मनांस्यासन्प्रसन्नानिसाधूनामसुरद्रुहाम् ॥ जायमानेऽजनेतस्मिन्नेदुर्दुंदुभयोदिवि ५ जगुःकिन्नरगंधर्वास्तुष्टुवुःसिद्धचारणाः॥विद्याधर्यश्चननृतुरप्सरोभिःसमंमुदा ६ मुमुचुर्मुनयोदेवाःसुमनांसिमुदान्विताः ॥ मंदंमंदंजलधराजगर्जुरनुसागरम् ७ निशीथेतमउद्भूतेजायमानेजनार्दने ॥ देवक्यांदेवरूपिण्यांविष्णुःसर्वगुहाशयः॥ आविरासीद्यथाप्राच्यांदिशींदुरिवपुष्कलः ८ तमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदार्युदायुधम्॥ श्रीवत्सलक्ष्मंगलशोभिकौस्तुभंपीतांबरंसांद्रपयोदसौभगम् ९ महार्हवैदूर्यकिरीटकुंडलत्विषापरिष्वक्तसहस्रकुंतलम् ॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानंवसुदेवऐक्षत १० सविस्मयोत्फुल्लविलोचनोहरिंसुतंविलोक्यानकदुंदुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मुदाद्विजेभ्योऽयुतमाप्लुतोगवाम् ११ अथैनमस्तौदवधार्यपूरुषंपरंनतांगःकृतधीःकृतांजलिः ॥ स्वरोचिषाभारतसूतिकागृहंविरोचयंतंगतभीःप्रभावविद् १२

चूर्णिका

यदाप्रसन्नजलाः नद्यः पद्मश्रियोह्रदाश्चतथाद्विजालिभिर्नादिताः वनपंक्तयः आसन् ३ यदासुखस्पर्शः वायुर्ववौ तथाविप्राग्नयः दीप्ताः बभूवुः ४ यदाच साधूनांमनांसि प्रसन्नानि आसन् किंच तस्मिन् अजनेजायमानेसतिदिविदुंदुभयः नेदुः ५ किन्नरगंधर्वाः जगुः सिद्धचारणास्तुष्टुवुः विद्याधर्यप्सरसः ननृतुः ६ मुनिदेवाः पुष्पाणिववृषुः मेघाः अब्धिअनुमंदंमंदंजगर्जुः ७ यदाचघनतमसिनिशीथे जायमानेसतितदादेवक्यांविष्णुःआविरासीत् ८ प्राच्यांदिशिपूर्णेंदुरिवतंपद्मेक्षणंचतुर्भुजंशंखाद्यायुधंश्रीवत्सचिह्नंकौस्तुभकंठंपीतांबरंमेघाभं ९ किरीटकुंडलत्विषास्फुरत्केशंकांच्यादिभीरोचमानं एवमादिविशिष्टं अद्भुतं बालंदृष्ट्वा १० फुल्लनेत्रोवसुदेवः हर्षितः सन्द्विजेभ्यः मनसागवांअयुतं दत्त्वा ११ एनं परपूरुषं स्वतेजसासूतीगृहंविरोचयंतंनिश्चित्यकृतांजलिर्भूत्वाअस्तौत् १२ ॥१४॥

१ समंतदाइत्यपिपाठ. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसुदेवःप्रथमंपुत्रबुद्ध्यापश्यन्तांपरित्यज्याह अहोविदितोसीति । कथंविदितोस्मि । भवान्प्रकृतेःपरःपुरुषइति । ननुकिमाश्चर्यंपुरुषस्यप्रकृतेरन्यत्वादेवेतिअतआह । साक्षादिति । प्रत्यक्षतइत्यर्थः नन्व
क्षिसन्निकृष्टंप्रत्यक्षतउपलभ्यतेकिंचित्रमित्यतआह केवलेति । कवलश्चासावनुभवश्चसचासावानंदश्चतदेवस्वरूपंयस्यसः किंचसर्वबुद्धिदृक् । नह्येवंभूतोदृश्योभवतीति (आश्चर्यं) इत्यर्थः १३ ननुदेवकीजठरेप्रवि
ष्टस्यकिमियमतिस्तुतिःअतआह सएवेतिसएवउक्तस्वरूपएवत्वमसिनदेवकीजठरेप्रविष्टइत्यर्थः ननुविश्वंसृष्ट्वातदनुप्रविष्टस्यकिमेतद्बहुअतआह । स्वप्रकृत्येति । स्वमाययासृष्ट्वातदनुत्वमप्रविष्टएवेति । ननुत
र्हिकथंश्रुत्योच्यतेतत्सृष्ट्वातदेवानुप्राविशदिति । अतआह प्रविष्टइवेति । भाव्यसेनिरूप्यसे । प्रत्यक्षतोवासद्रूपेणवाप्रविष्टइवलक्ष्यसे १४ अत्रदृष्टांतः । यथेति । इमेविकृताभावामहदादयोयथातथेति ।
दृष्टांतंविवृणोति । तेविकृतैरिति । तेमहदादयःविकृतैःषोडशविकारैःसहसन्निपत्यविराजंब्रह्मांडंजनयंति । संनिपतनेहेतुः । यतःपृथग्भूताःसंतोनानावीर्याःविशिष्टकार्यसमर्थानभवंतीत्यर्थः १९ अतः
सन्निपत्येति । एवंसमुत्पाद्यानुगताःप्रविष्टाइवदृश्यंते । नपुनःप्रविष्टाः कुतः । उत्पत्तेःप्रागेवकारणतयाविद्यमानत्वान्नतेषामिहसृष्टेकार्येपश्चात्संभवःप्रवेशइति १६ दार्ष्टांतिकेअतिदिशत्ति । एवंभवानिति ।
ननुयद्यहमप्रच्युतस्वरूपएवकारणतयाकार्येषुवर्तेतर्हितेष्विंद्रियैर्गृह्यमाणेषुममग्रहणंकिंनास्तितत्राह । बुद्ध्यनुमेयलक्षणैरिति । बुद्ध्यारूपादिज्ञानेनानुमेयंलक्षणंस्वरूपंयेषांतैर्गुणैरिंद्रियैर्ग्राह्यैर्गुणैर्विषयैः
सहसन्नपिवर्तमानोपितद्गुणाग्रहःतैर्गुणैःसहनगृह्यतेभवान् । अयंभावःनहिग्राह्यैःसहभावमात्रंग्रहणेकारणंकिंतुइंद्रियाणांशक्तिःसाचकार्यैकसमधिगम्यायथाकार्यमेवकल्प्यते अतः यथा (शक्त्यभावात्)
चक्षुषारूपग्रहणेपिरसादिग्रहणंनास्ति (तथैवविषयग्रहणेत्वद्ग्रहणमपीति) एवंसहभावेपिजिह्वयारसएवगृह्यतेनतुरूपंतथेति अविषयत्वेनचग्रहणानर्हत्वमुक्तमेवसर्वबुद्धिदृगित्यत्र । एवंतावत्प्रागेवविद्यमान
त्वात्प्रवेशोनास्तीत्युक्तंकिंचपरिच्छिन्नस्यनीडेपक्ष्यादेरिवप्रवेशोभवेत् । तवत्वनावृतत्वादपरिच्छिन्नत्वेनबहिरंतरभेदोनास्ति कुतःप्रवेशइत्याह । अनावृतत्वादिति । अनावृतत्वेहेतूनाह । सर्वस्येति । नहिसर्व
स्वरूपस्यअन्यदावरकमस्ति । सर्वात्मनःनह्येकेनावृतोऽन्यस्यात्माभवेत् । आत्मवस्तुनइतिआत्मनोवस्तुनश्चेतिहेतुद्वयम्‘अतसातत्यगमने’इत्यस्मात्अततिव्याप्नोतीत्यात्मा नहिव्यापकस्यावरणंघटते ।
तथावस्तुनःपरमार्थवस्तुनःआवरणंनघटतेइत्यर्थः । आवृतंहिनप्रकाशते । तस्माच्चवांतर्यामितयाप्रवेशोनमुख्योस्तिकुतस्तरांगर्भेप्रवेशःअतःकेवलानुभवानंदस्वरूपएवत्वंविदितोसीतिममभाग्यमित्यर्थः १७

॥ वसुदेवउवाच ॥ विदितोसिभवान्साक्षात्पुरुषःप्रकृतेःपरः ॥ केवलानुभवानंदस्वरूपःसर्वबुद्धिदृक् १३ सएवस्वप्रकृत्येदंसृष्ट्वाग्रेत्रिगुणात्मकम् ॥ तद श्लोकाः
नुत्वंह्यप्रविष्टःप्रविष्टइवभाव्यसे १४ यथेमेविकृताभावास्तथातेविकृतैःसह ॥नानावीर्याःपृथग्भूताविराजंजनयंतिहि १५ सन्निपत्यसमुत्पाद्यदृश्यंतेनुग
ताइव ॥ प्रागेवविद्यमानत्वान्नतेषामिहसंभवः १६ एवंभवान्बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैःसन्नपितद्गुणाग्रहः ॥ अनावृतत्वाद्बहिरंतरंनतेसर्वस्यसर्वात्मन १३/१७
आत्मवस्तुनः १७

चूर्णिका ॥ वसुदेवउवाच ॥ हेईशत्वंविदितोऽसिकथंप्रकृतेः परः पूरुषइति १३ सएवत्वंपूर्वंस्वमाययाइदंसृष्ट्वातदनुअप्रविष्टएवत्वं प्रविष्टवत्लक्ष्यसे १४ यथाइमेमहदादयोभावाः षोड ॥१५॥
शविकारैः १६ सहएकत्रमिलित्वाविराजंउत्पाद्य १५ तत्रप्रविष्टाइवदृश्यंते नपुनः प्रविष्टाः प्रागेवविद्यमानत्वादिति १६ एवंभवान्गुणैःसहवर्तमानोपित्वं इंद्रियैर्न
गृह्यसे किंच सर्वात्मनः तव अपरिच्छिन्नत्वात् बहिरंतर्भेदोनास्ति कुतः तेगर्भेप्रवेशः अतः केवलानुभवानंदरूपएवत्वं विदितोसिइतितिमेभाग्यम् १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नन्वेतद्धेतुचतुष्टयंप्रपंचस्यावस्तुत्वेघटेततत्तुनसंभवतिसत्यत्वेनप्रतीतेरित्याशंक्याह । यइति । आत्मनोदृश्येषुगुणेषुदेहादिषुस्वव्यतिरेकतःआत्मव्यतिरेकेणपृथक्सन्नयंदेहादिरितिव्यवस्यतेनिश्चिनोति यःपुमान्सोऽबुधःअविद्वान् । व्यतिरेकादर्शनात् । (व्यतिरेकेत्वात्मैवसन्) किंच । यनीषितंविचारितंतत्देहादिसर्वंयतःविनानुवादंवाचारंभणमात्रंविनासम्यग्नभवति । अतोऽवस्तुत्वेनत्यक्तंबाधितमे ववस्तुबुद्ध्याउपाददत्स्वीकुर्वन्अनुधइत्यर्थः १८ एवंपरमेश्वरेदृश्यस्यतद्व्यतिरेकेणासत्त्वमुक्तं । परमेश्वरोपादानत्वादपितद्व्यतिरेकेणासत्त्वमाह । त्वत्तोस्येति । नचैवंसत्यपिविकारित्वमित्याह । अनी हादितिअगुणत्वादनीहत्वंततोऽविकारित्वमित्यर्थः । नन्वनीहत्वेकथंकर्तृत्वंकर्तृत्वेकुतोऽविकारित्वंतत्राह । त्वयीश्वरइति । ब्रह्मत्वादविकारित्वमीश्वरत्वात्कर्तृत्वमिति नन्वेतदपिविरुद्धमेवनेत्याह । त दाश्रयत्वादिति । गुणैःकुर्वद्भिस्त्वयिसृष्ट्यादिकमुपचर्यते गुणाश्रयत्वात् यथाभृत्यकृत्यंराजनीति १९ एवंभूतस्यैवतवयथाविश्वस्थितिसर्गलयार्थंत्रिवर्णागुणावताराएवमयंभूभारापनयनार्थमितिज्ञातमि त्याह सत्वमितिश्लोकद्वयेन ।(सत्त्वंसत्त्वगुणरूपंआत्मनःशुक्लवर्णं । तमसोपबृंहितंकृष्णंच) २० रिरक्षिषुःरक्षितुमिच्छुःअवतीर्णोसिकृष्णेनवर्णेन । अतःसाधूनांरक्षार्थंराजन्यसंज्ञायेअसुरकोटियूथपाःवै र्निर्व्यूह्यमानाइतस्ततश्चाल्यमानाश्चमूःसेनाःनिहनिष्यसेसंहरिष्यासि २१ किंतुतथाप्यप्रमत्तेनत्वयाभाव्यमित्याह । अयंत्विति । असभ्यःखलःअयं (कंसःनोऽस्माकंगृहेजन्मश्रुत्वातवाग्रजान्विहतवान् । पुरुषैःसेवकैः) समर्पितं कथितंअभिरसतिआगमिष्यति २२ (महापुरुषस्याविष्णोर्लक्षणानिशंखादीनियत्रतं ।) उपाधावत्अस्तौत् २३

॥१६॥

श्लोकाः १८/२३

यआत्मनोदृश्यगुणेषुसन्निति व्यवस्यतेस्वव्यतिरेकतोबुधः ॥ विनानुवादंनचतन्मनीषितंसम्यग्यतस्त्यक्तमुपाददत्पुमान् १८ त्वत्तोस्यजन्मस्थितिसं यमान्विभोवदंत्यनीहादगुणादविक्रियात् ॥ त्वयीश्वरेब्रह्मणिनोविरुध्यतेतदाश्रयत्वादुपचर्यतेगुणैः १९ सत्त्वंत्रिलोकस्थितयेस्वमाययाबिभर्षिशुक्लं खलुवर्णमात्मनः ॥ सर्गायरक्तंरजसोपबृंहितंकृष्णंचवर्णंतमसाजनात्यये २० त्वमस्यलोकस्यविभोरिरक्षिषुर्गृहेऽवतीर्णोसिममाखिलेश्वर ॥ राजन्यसं ज्ञासुरकोटियूथपैर्निर्व्यूह्यमानानिहनिष्यसेचमूः २१ अयंत्वसभ्यस्तवजन्मनोगृहेश्रुत्वाऽग्रजांस्तेन्यवधीत्सुरेश्वर ॥ सतेऽवतारंपुरुषैःसमर्पितंश्रुत्वाधुनै वाभिसरत्युदायुधः २२ ॥ श्रीशुकउवाच ॥अथैनमात्मजंवीक्ष्यमहापुरुषलक्षणम् ॥ देवकीतमुपाधावत्कंसाद्भीताशुचिस्मिता २३

चूर्णिका

किंच हेविभोअस्यजन्मादीन् त्वत्तः वदंति १८ एतत्त्वयिनोविरुद्धम् यतस्तत्कुर्वद्भिर्गुणैःत्वयिसृष्ट्यादिकर्तृत्वंउपचर्यतेतेगुणाश्रयत्वात् यथाभृत्यकृत्यंराजनीति १९ एवं भूतः त्वंत्रिलोकस्थितयेमाययाशुक्लंवर्णंबिभर्षि तथासृष्टयेरक्तम् नाशायकृष्णमिति २० अपिच हेविभो अस्यलोकस्यरक्षणार्थं अधुनाममगृहेअवतीर्णोसिसःत्वंनृपसं ज्ञासुरैः चाल्यमानाः चमूर्हनिष्यसे २१ एवंसत्यपित्वया अप्रमत्तेनभाव्यमित्याह हेप्रभोयतः अयंखलः कंसः नौगृहेभावित्वज्जन्मश्रुत्वातेअग्रजान्अवधीत् एवंभूतः सः अधुनापुरुषैःकथितंतवावतारंजातमितिश्रुत्वाउदायुधः सन्अधुनैवागच्छति २२॥ श्रीशुकउवाच ॥ हेनृपअथदेवकीमहापुरुषलक्षणंपुत्रंदृष्ट्वाकंसात्भितासतीतंतुष्टाव २३

॥१६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१७॥

त्वयिभयशंकैवतावन्नास्तीतिश्लोकचतुष्टयेनाह देवकीकिंचिद्विज्ञापयितुंरूपमिति । यत्तत्किमपिरूपंवस्तुमाहुर्वेदाः । किंतद्वस्तुतदाह अव्यक्तं । अत्रहेतुः । आद्यंकारणं । किंपरमाणवः । न । ब्रह्मबृहत् । किंप्रधानंनज्योतिःचेतनंकिंवैशेषिकाणामिवज्ञानगुणंननिर्गुणंकिंमीमांसकानामिवज्ञानपरिमामिननिर्विकारंकिंपुष्कराक्षादीनामिवशक्तिविक्षेपेणपरिणामिनसत्तामात्रंतर्हिकिंसामान्यंनानिर्विशेषंतर्हिकिंकार णत्वात्सक्रियंननिरीहंसंनिधिमात्रेणकारणंएवंभूतंकिमपिकार्यकल्प्यंयद्वस्तुसएवसाक्षात्त्वंविष्णुरिति । नकेवलंकार्यकल्प्यस्त्वंअपरोक्षश्चेत्याहअध्यात्मदीपइतिबुद्ध्यादिकरणसंघातप्रकाशकइत्यर्थःअथवा अव्यक्तं नकेनापिप्रकारेणव्यज्यतइति तथा । कथं । उत्पत्त्यातावन्नव्यज्यतइत्याह आद्यंसर्वस्यकार्यस्याद्यंअनादीत्यर्थः । तथाब्रह्मज्योतिर्निर्गुणंनिर्विकारमितिचतुर्भिःपदैःदेशेनप्रकाशत्वेनगुणे नविकारेणचव्यक्तिंनिराकरोति । तथासत्तामात्रमितिविशेषेण । निर्विशेषमितिसामान्येननिरीहमितिक्रिययाचव्यक्तिंनिराकरोति । अन्यत्सप्रानं । एवंभूतस्यतवनभयशंकेतिभावः २४ किंचमहाप्रलये प्यवशिष्यमाणस्यकुतोभयमित्याह । नष्टेलोकइतिद्विपरार्धवसानेमहाप्रलयेचराचरेलोकेनष्टेमहाभूतेषुलीनेष्वप्यादिभूतंभूतसूक्ष्मंप्रविष्टेषुतस्मिन्नपिव्यक्तेअव्यक्तंप्रधानंप्राप्ते अशेषसंज्ञः अशेषात्मकेप्रधा नेसंज्ञायस्यएवंमयिलीनमिदमस्तिपश्चादेवमुद्बोधनीयमितिप्रज्ञायस्येत्यर्थःसःअशेषसंज्ञः (शिष्यमाणत्वात्) शेषसंज्ञइतिवा २५ किंच । एवंप्रलयहेतुर्योयंकालः (तं) एनंहेअव्यक्तबंधोप्रकृतिप्रवर्तकस्यप्रल यावधिभूतस्यतेतवचेष्टांलीलांआहुः चेष्टतेविपरिवर्तते । पुनःपुनर्वत्सरावृत्त्यामहीयान्द्विपरार्धरूपःयस्यचेष्टामाहुस्तंत्वात्वांक्षेमधामअभयस्थानंप्रपद्येशरणंभजे २६ क्षेमधामत्वमेवाहमर्त्यइति । मृत्युःसं सारःसएवव्यालस्तस्माद्भीतःलोकान्प्रति । यदृच्छयाकेनापिभाग्योदयेनहेआद्यअस्मान्त्वत्पादाब्जात्अपैतिपलायते । "मृत्युर्धावतिपंचम" इतिश्रुतेः २७ प्रस्तुतंविज्ञापयतिसत्वमितिभृत्यानांवित्रासं हंतीतिभृत्यवित्रासहा । भृत्यविदितिवाछेदः । पौरुषंऐश्वरंध्यानधिष्ण्यंध्यानास्पदंमांसदृशांमांसचक्षुषांप्रत्यक्षंमाकृथाः २८ माविद्यात्नजानातुभवतएवहेतोःनिमित्तभूतात्अहंकंसात्समुद्विजेविभेमि (ननुमयिभयाभावंप्रतिपाद्यकथमेवंब्रूषेतत्राह) यतः (अधीरधीः) अधीरचित्ता २९ ३०

श्लोकाः २४/३०

॥ देवक्युवाच ॥ रूपंयत्तत्प्राहुरव्यक्तमाद्यंब्रह्मज्योतिर्निर्गुणंनिर्विकारम् ॥ सत्तामात्रंनिर्विशेषंनिरीहंसत्वंसाक्षाद्विष्णुरध्यात्मदीपः २४ नष्टेलोकेद्वि
परार्धावसानेमहाभूतेष्वादिभूतंगतेषु ॥ व्यक्तेव्यक्तंकालवेगेनयातेभवानेकःशिष्यतेऽशेषसंज्ञः २५ योयंकालस्तस्यतेऽव्यक्तबंधोचेष्टामाहुश्चेष्टतेयेन
विश्वम् ॥ निमेषादिर्वत्सरांतोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्ये २६ मर्त्योमृत्युव्यालभीतःपलायन्लोकान्सर्वान्निर्भयंनाध्यगच्छत् ॥ त्वत्पादाब्जं
प्राप्ययदृच्छयाद्यस्वस्थःशेतेमृत्युरस्मादपैति २७ सत्वंघोरादुग्रसेनात्मजान्नस्त्राहित्रस्तान्भृत्यवित्रासहासि ॥ रूपंचेदंपौरुषंध्यानधिष्ण्यंमाप्रत्यक्षंमांसदृ
शांकृषीष्ठाः २८ जन्मतेमय्यसौपापोमाविद्यान्मधुसूदन ॥ समुद्विजेभवद्धेतोःकंसादहमधीरधीः २९ उपसंहरविश्वात्मन्नदोरूपमलौकिकम् ॥ शंखचक्र
गदापद्मश्रियाजुष्टंचतुर्भुजम् ३०

चूर्णिका ॥१७॥

देवक्युवाच हेभगवन्वेदाः निर्गुणंआद्यंनिर्विकारंयत्वस्तुआहुः तदेवत्वंविष्णुरसि २४ किंच अस्मिन्लोकेनष्टेसतियः त्वंएकएव अशेषसंज्ञः शिष्यसे एवंभूतस्यते नभयशंकेति २५ किंच हेविभोअयंनिमेषादिर्वत्सरांतः कालः तव चेष्टांआहुः तंत्वांनिर्भयंशरणंव्रजामि २६ हेआद्यअयंमर्त्यः मृत्युव्यालभीतः पलायन्सन्कुत्रापिनिर्भ यंस्थानंनप्राप ततः यदृच्छयात्वत्पादाब्जंप्राप्यस्वस्थः शेते २७ सः त्वंकंसात्त्रस्तान्नः त्राहि इदंतवपौरुषंरूपंध्यानार्हंमांसदृशांप्रत्यक्षंमाकृथाः २८ हेकृष्ण असौपापः मयित्वज्जन्मजातमितिमाविद्यात् यतोऽहंतस्माद्बिभेमि २९ हेविश्वात्मन् इदंचतुर्भुजंरूपंउपसंहर ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किमित्युपसंहर्तव्यंएवंभूतेनमयापुत्रेणतवमहतीश्लाघास्यादितितत्राह । विश्वमिति । निशांतेप्रलयावसानेयथावकाशंअसंकोचतःअसंभावितत्वादुपहास्यतैवस्यादित्यर्थः ३१ चतुर्भुजरूपेणाविर्भावेकारणं तावदाह । त्वमेवेत्यादिचतुर्दशभिः । पूर्वसर्गेप्रथमजन्मनिअभूःआसीः । पृश्निर्नाम । स्वायंभुवेमन्वंतरे । तदाऽयंवसुदेवः ३२ तेपाथेतपःकृतवंतौ ३३ (वर्षादीन्कालगुणान्) ३४ ईहतुः । कृतवंतावित्यर्थः ३५ तप्यतोराचरतोरीयुर्गतानि । मदात्मनोर्मच्चित्तयोः ३६ अमुनावपुषा । (अनयाचतुर्भुजमूर्त्याप्रादुरासंयतएताहशोहृदिभावितः) ३७ (प्रादुरासंप्रादुर्भूतोस्मि) वरदराट्वरदे पुश्रेष्ठः । तेनचसकृद्वरणेपिवारंवारमाविर्भावेकारणमुक्तं । मादृशःमयासदृशःकामस्यदित्सयादातुमिच्छया ३८ मेमत्तोपियुवांअपवर्गंनवव्राथेनवृतवंतौ । वरंदत्त्वामयिगते (मत्सदृशसुतरूपंवरंलब्ध्वाल ब्धमनोरथौसंतौ) ४० (सममंतुल्यम्) ४१ अदित्यांकश्यपाद्वामनआसेतियत्तदपितद्रूपयोर्युवयोरहमेवपुनरासमित्यर्थः ४२ (तयोरेवयुवयोरस्मिन्जन्मनितेनैववपुषाजातोहं) ४३ प्राक्प्रथमंताव देतद्रूपंमेजन्मेतिस्मरणायज्ञानायदर्शितंमद्भवंमद्विषयं । अनंतरंत्वदिच्छयाबालोपिभविष्यामीतिभावः ४४

श्लोकाः ३१/४४

विश्वंयदेतत्स्वतनौनिशांतेयथावकाशंपुरुषःपरोभवान् ॥ बिभर्तिसोयंममगर्भगोऽभूदहोनृलोकस्यविडंबनंहितत् ३१ ॥ श्रीभगवानुवाच ॥ त्वमेवपूर्वस र्गेभूःपृश्निःस्वायंभुवेसति ॥ तदायंसुतपानामप्रजापतिरकल्मषः ३२ युवांवैब्रह्मणादिष्टौप्रजासर्गेयदाततः ॥ संनियम्येंद्रियग्रामंतेपाथेपरमंतपः ३३ वर्ष वातातपहिमघर्मकालगुणाननु ॥ सहमानौश्वासरोधविनिर्धूतमनोमलौ ३४ शीर्णपर्णानिलाहारावुपशांतेनचेतसा ॥ मत्तःकामनभीप्संतौमदाराधनमीह तुः ३५ एवंवांतप्यतोस्तीव्रंतपःपरमदुष्करम् ॥ दिव्यवर्षसहस्राणिद्वादशेयुर्मदात्मनोः ३६ तदावांपरितुष्टोहममुनावपुषानघे ॥ तपसाश्रद्धयानित्यंभक्त्या चहृदिभावितः ३७ प्रादुरासंवरदराड्युवयोःकामदित्सया ॥ व्रियतांवरइत्युक्तोमादृशोवांवृतःसुतः ३८ अजुष्टग्राम्यविषयावनपत्यौचदंपती ॥ नवव्राथेऽप वर्गंमेमोहितौदेवमायया ३९ गतेमयियुवांलब्ध्वावरंमत्सदृशंसुतम् ॥ ग्राम्यान्भोगानभुजाथांयुवांप्राप्तमनोरथौ ४०अदृष्ट्वान्यतमंलोकेशीलौदार्यगुणैःसम म् ॥ अहंसुतोवामभवंपृश्निगर्भइतिश्रुतः ४१ तयोर्वांपुनरेवाहमदित्यामासकश्यपात् ॥ उपेंद्रइतिविख्यातोवामनत्वाच्चवामनः ४२ तृतीयेऽस्मिन्भवेहंवै तेनैववपुषायुवाम् ॥ जातोभूयस्तयोरेवसत्यंमेव्याहृतंसति ४३ एतद्वांदर्शितंरूपंप्राग्जन्मस्मरणायमे ॥ नान्यथामद्भवंज्ञानंमर्त्यलिंगेनजन्यते४४

चूर्णिका

किंच हेईशयःत्वंप्रलयांते इदंविश्वंयथावकाशंस्वतनौ विभर्षिसः त्वंमेगर्भगः अभूः इदंनृलोकस्यविडंबनम् ३१ अथचतुर्भुजरूपेणप्राकट्येकारणमाह ॥ श्रीभगवानुवा च ॥ हेमातः स्वायंभुवेंतरेपूर्वजन्मनित्वंपृश्निरिति अयंवसुदेवः सुतपाइति आसीत् ३२ तदायुवांब्रह्माज्ञयासृष्ट्यर्थंतपः तेपाथे तदावर्षवातादिकालगुणान्सहमानौ ३३ शी र्णपर्णानिलाहारैःमत्तःकामान्इच्छंतौसंतौमदाराधनंकृतवंतौ ३४ ३५ एवंतीव्रंतपः तप्यतोः सतोः दिव्यवर्षसहस्राणिद्वादशईयुः ३६ तदावां अहंअमुनावपुषाप्रादुरासम् ३७ ततः वरोव्रीयतामित्युक्ते युवाभ्यांअनपत्याभ्यांमादृशः पुत्रोवृतः ३८ नमोक्षः यतः देवमाययामोहितौ ३९ एवंवरंदत्त्वामयिगतेसतिप्राप्तमनोरथौभूत्वाग्राम्यभोगानभुंजाथाम् ४० ततः अहंलोकेमत्समं अन्यं अदृष्ट्वा अहमेववांपृश्निगर्भइतिसुतः अभवम् ४१ ततः अन्यजन्मनि अदित्यांकश्यपात्वामनरूपेणवांसुतः आसम् ४२ अधुनातृतीयेभवेपिते नैववपुषाजातोस्मि हेसातिएवंमेवचः सत्यम् ४३ किंच प्राग्जन्मस्मरणायइदंरूपंमयादर्शितं अन्यथामद्भवंज्ञानंमर्त्यलिंगेननोत्पद्यतेअतःपरंत्वदिच्छयाबालोपिभविष्यामि ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

ननुत्वयिप्रसन्नेपिकथमावयोःपुनःपुनर्जन्मेत्याशंक्यातःपरंनभविष्यतीत्याह युवामिति ४५ ४६ यदिकंसाद्बिभेषि तर्हिमांगोकुलंनययशोदायाश्चतांकन्यामन्मायामानयेतिप्रथममेवभगवताप्रचोदितो वसुदेवोयदागंतुमैच्छत् (तर्हि) तदैवअजापियायोगमायानंदजाययानिमित्तभूतयाअजनिजाता ४७ हृताःप्रत्ययायासांतथाभूताःसर्वावृत्तयोयेषां । अथवाहृताःप्रत्यअन्याश्चसर्वावृत्तयोयेषांजाग्रताम पितथाभूतेषुद्वारपारेषुसत्सु । बृहत्सुकपाटेषुलोहकीलकयुक्तशृंखलैःबृहद्भिःकपाटादिभिर्दुरत्ययाइतिवा ४८ (ताद्वारः) स्वयमेवव्यवर्यंतविवृताइत्यर्थःव्यव्रियंतेतिवक्तव्येगुणश्छांदसः। रवेर्निमित्तात् (तमो यथा) ४९ यमानुजायमुना गंभीरोयस्तोयौघस्तस्यजवेनयेऊर्मयस्तैःफेनिलाफेनव्याप्ताभयानकैरावर्तशतैर्व्याप्तापिश्रियःपतेःसीतापतेः ५० निद्रयाअजया ५१ पदोःपादयोःलोहंनिगडंप्रतिमुच्यब ध्वाआस्तेस्म ५२ जातंकिंचिदितिपरंकेवलंअबुध्यतनतुपुत्रःकन्यावेतितांल्लिंगम् यतोयोगनिद्रयाचापगतस्मृतिः ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांदशमेकृष्णजन्मनितृतीयोध्यायः ३

॥१९॥

श्लोकाः ४५/५३

युवांमांपुत्रभावेनब्रह्मभावेनवासकृत् ॥ चिंतयंतौकृतस्नेहौयास्येथेमद्गतिंपराम् ४५ ॥ श्रीशुकउवाच ॥ इत्युक्त्वासीद्धरिस्तूष्णींभगवानात्ममायया ॥
पित्रोःसंपश्यतोःसद्योबभूवप्राकृतःशिशुः ४६ ततश्चशौरिर्भगवत्प्रचोदितःसुतंसमादायससूतिकागृहात् ॥ यदाबहिर्गंतुमियेषतर्ह्यजायायोगमायाऽ
जनिनंदजायया ४७ तयाहृतप्रत्ययसर्ववृत्तिषुद्वास्थेषुपौरेष्वपिशायितेष्वथ ॥ द्वारस्तुसर्वाःपिहितादुरत्ययाबृहत्कपाटायसकीलशृंखलैः ४८ ताःकृ
ष्णवाहेवसुदेवआगतेस्वयंव्यवर्यंतयथातमोरवेः ॥ ववर्षपर्जन्यउपांशुगर्जितःशेषोन्वगाद्वारिनिवारयन्फणैः ४९ मघोनिवर्षत्यसकृद्यमानुजागंभीरतोयौ
घजवोर्मिफेनिला ॥ भयानकावर्तशताकुलानदीमार्गंददौसिंधुरिवश्रियःपतेः ५० नंदव्रजंशौरिरुपेत्यतत्रतान्गोपान्प्रसुप्तानुपलभ्यनिद्रया ॥ सुतंयशो
दाशयनेनिधायतत्सुतामुपादायपुनर्गृहानगात् ५१ देवक्याःशयनेन्यस्यवसुदेवोथदारिकाम् ॥ प्रतिमुच्यपदोर्लोहमास्तेपूर्ववदावृतः ५२ यशोदानं
दपत्नीचजातंपरमबुद्ध्यत ॥ नतल्लिंगंपरिश्रांतानिद्रयाऽपगतस्मृतिः ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकृष्णजन्मनितृतीयोध्यायः ३ ॥

चूर्णिका

हेपितरौयुवांपुत्रभावेनब्रह्मभावेनचिंतयंतौमद्गतिंयास्येथे ४५ ४६ ॥ श्रीशुकउवाच ॥ एवंहरिः उक्त्वापित्रोः पश्यतोः सतोः सद्यः प्राकृतः शिशुः बभूव ४७ ततः शौरिः भगवदाज्ञयासूतिकागृहात्सुतंआदाययदाबहिर्गंतुंऐच्छत् तदैवयोगमायायशोदायांजाता ४८ तयाहृतेंद्रियवृत्तिषुद्वाःस्थेषुपौरेषुचशायितेषुसत्सुसर्वाःपिहितद्वाराःबृह त्कपाटायसकीलशृंखलैःदुरत्ययाअपि ४९ कृष्णवाहेवसुदेवेप्राप्तेसातिताःविवृताःतदैवमंदगार्जितःपर्जन्यःववर्ष तदैवशेषःफणैःवारिनिवारयन्अगात् ततःमघोनिवर्षतिसति यमुनाजलौघजवोर्मिफेनिलाभयानकावर्तशताकुलासतीरामस्यसिंधुरिवमार्गंददौ ५० ततःशौरिःव्रजंएत्यअजयासुप्तान्गोपान्ज्ञात्वायशोदाशयनेसुतंस्थाप्यतत्सुतांआदायपुनः गृहान्गत्वा ५१ तांदेवकीशयनेन्यस्यपादयोःनिगडंबद्धापूर्ववदास ५२ यशोदानंदपत्नीचजातंपरमबुध्यत नतल्लिंगंपरिश्रांतानिद्रयापगतस्मृतिः ५३ इतिदशमेतृतीयः ३

॥१९॥

१ मोहितेति मु०पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चतुर्थेचंडिकावाक्यमाकर्ण्यातिभयाकुलः दुर्मंत्रिभिर्हितंमेनेकंसोबालादिहिंसनम् ॥२॥(आवृताःपिहिताबभूवुः)१ तत्अष्टमम् (गर्भ) जन्म २ कालोमृत्युः (भयात्प्रस्खलन्) ३ (करुणंदीनस्वरं यथाभवतितथा स्त्रियंहंतुंमार्हसि) ४ ५ अंगहेभ्रातः (प्रजांसुताम्) ६ दीनदीनवत् दीनादपिदीनवत्पुनतुतथादीनासापुत्रस्यान्यत्रनीतत्वात्साचयोगमायेतिज्ञातत्वात् याचितोपिआचिच्छेदेआकृष्य जग्राह ७ अपोथयत्बलेनचिक्षेप ८ सद्यएवदेवीभूत्वा ९ १० (उपाहृतःसमर्पितउरुबलिर्यैस्तैः) ११ कृपणानितिअन्यान्शिशून्हानिष्यतीतिज्ञात्वावारयतिपाठांतरेमामांकृपणाम् वृथाऽहिंसीःहिंसितवान सि १२ बहुनामनिकेतेषु (कामरूप) वाराणस्यादिस्थानेषु १३ परमाविस्मितःकथंदैवीवागनृताजातेति १४ भामहेभगिनीभर्तःपुरुषादोराक्षसोयथास्वापत्यंहिनस्तितद्वत् (त्वयासुताहिंसिताः) १५ १६

श्लोकाः १/१६

॥२०॥ ॥ श्रीशुकउवाच ॥ ॥ बहिरंतःपुरद्वारःसर्वाःपूर्ववदावृताः ॥ ततोबालध्वनिंश्रुत्वागृहपालाःसमुत्थिताः १ तेतुतूर्णमुपव्रज्यदेवक्यागर्भजन्म तत् ॥ आचख्युर्भोजराजाययदुद्विग्नःप्रतीक्षते २ सतल्पात्तूर्णमुत्थायकालोयमितिविह्वलः॥सूतीगृहमगात्तूर्णंप्रस्खलन्मुक्तमूर्धजः ३ तमाहभ्रातरंदे वीकृपयाकरुणंसती ॥ स्नुषेयंतवकल्याणस्त्रियंमाहंतुमर्हसि ४ बहवोहिंसिताभ्रातःशिशवःपावकोपमाः ॥ त्वयादैवनिसृष्टेनपुत्रिकैकाप्रदीयताम् ५ नन्व हंतेह्यवरजादीनाहतसुताप्रभो ॥ दातुमर्हसिमंदायाअंगेमांचरमांप्रजाम् ६ ॥ श्रीशुकउवाच ॥ उपगुह्यात्मजामेवंरुदंत्यादीनदीनवत् ॥ याचितस्तांविनि र्भर्त्स्यहस्तादाचिच्छिदेखलः ७ तांगृहीत्वाचरणयोर्जातमात्रांस्वसुःसुताम् ॥ अपोथयच्छिलापृष्ठेस्वार्थोन्मूलितसौहृदः ८ ॥ सातद्धस्तात्समुत्पत्यसद्योदे व्यंबरंगता ॥अदृश्यतानुजाविष्णोःसायुधाष्टमहाभुजा ९ दिव्यस्रगंबरालेपरत्नाभरणभूषिता ॥ धनुःशूलेषुचर्मासिशंखचक्रगदाधरा १० सिद्धचारण गंधर्वैरप्सरःकिंनरोरगैः ॥ उपाहृतोरुबलिभिःस्तूयमानेदमब्रवीत् ११ किंमयाहतयामंदजातःखलुतवांतकृत् ॥ यत्रक्कवापूर्वशत्रुर्माहिंसीःकृपणान्वृथा १२॥ श्रीशुकउवाच ॥ ॥ इतिप्रभाष्यतंदेवीमायाभगवतीभुवि॥बहुनामनिकेतेषुबहुनामाबभूवह १३तयाभिहितमाकर्ण्यकंसःपरमविस्मितः॥देवकींवसुदेवं चविमुच्यप्रश्रितोब्रवीत् १४ अहोभगिन्यहोभाममयावांबतपाप्मना ॥ पुरुषादइवापत्यंबहवोहिंसिताःसुताः १५ सत्वहंत्यक्तकारुण्यस्त्यक्तज्ञातिसु हृत्खलः ॥ काँल्लोकान्वैगमिष्यामिब्रह्महेवमृतःश्वसन् १६

चूर्णिका ॥ श्रीशुकउवाच ॥ ततःवहिरंतःपुरद्वारः सर्वाःपूर्ववदावृताः ॥ ततोबालध्वनिंश्रुत्वागृहपालाःसमुत्थिताः १ तेतुगत्वाकंसायतत्अष्टमंजन्मआचख्युः २ ततःकंसःतल्पात्उ त्थायकालोऽयमितिविह्वलःसन्सूतीगृहमगात् ३ तंदेवकीकरुणंआह हेभ्रातः इयंतवस्नुषाएनांहंतुंमार्हसि ४ किंच वहवःशिशवःत्वयाहताः ५ इयंचरमाप्रजामांदातुमर्ह सि ६ ॥ श्रीशुकउवाच ॥ एवंरुदत्यातयायाचितःकंसः तांनिर्भर्त्स्यतद्धस्तात्कन्यामाकृष्यजग्राह ७ ततःसः तांचरणयोः गृहीत्वाशिलापृष्ठेअपोथयत् ८ सातद्धस्तात्उ त्पत्यसद्यःदेवीभूत्वाखंगतासतीतत्रसायुधाष्टमहाभुजाअदृश्यत ९ तथादिव्यस्रगादिभिर्भूषिताधनुःशूलेषुचर्मासिशंखचक्रगदाधरा १० दत्तबलिभिःसिद्धचारणादिभिःस्तूय मानाइदंअब्रवीत् ११ हेमंदमयाहतयाकिंयत्रक्कवातवशत्रुःजातोस्तिदीनशिशून्माहिंसीः १२ एवंप्रभाष्यदेवीबहुनामनिकेतेषुबहुनामाबभूव १३ तयोक्तंश्रुत्वाविस्मितःकंसः देवकींवसुदेवंविमुच्यनम्रःसन्आह १४ हेभगिनिहेभाममयायुवयोःअपत्यानिबहूनिहिंसितानि १५ सोहंनिर्दयःसन्ब्रह्महेवश्वसन्कान्लोकान्गमिष्यामि १६ ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. १७ हेमहाभागौस्वकृतंभुजःस्वारब्धकर्मभोक्तॄन् किंचजंतवःप्राणिनःसदानासतेकिंतुअल्पकालमेव तदापिएकत्रैवनासतेतत्रसहैवनासतेकिंतुवियुज्यंतेपियतोदैवाधीनाः १८ सदानासत्तइत्यनेनयदुक्तंजन्म अ०
मरणादितदपिदेहानामेवनात्मनइत्याह भुवीति भूतानिदेहाएवयांतिअपयांतिचभवंतिनभवंतिचेत्यर्थःयथाभुविभौमानिघटादीनितद्वत्एतेषुजन्मादिभिर्विक्रियमाणेषुअयमपरोक्षतयाप्रत्यभिज्ञायमानो (आ
टीका त्मा) नविपर्येतिविपर्ययंनप्राप्नोतिएकरूपएववर्ततइत्यर्थः भौमेषुविक्रियमाणेषुयथाभूर्नविक्रियतेतथेति १९ एवंविचार्यमाणेसतिनशोकाद्यवकाशः अजानतस्तुशोकादिननिवर्ततइत्याह यथेति यथायथा
वदनेवंविदःएवमजानतःआत्मविपर्ययःदेहात्मबुद्धिर्भवति यतोविपर्ययाद्भेदोभवतिदेहाहंकारेणह्यात्मनिपरिच्छिन्नेसतीदंकारास्पदं भिन्नंभवतियतोभेदात्पुत्रादिदेहैर्योगवियोगश्चभवतिततःसंसृतिःसुखदुःखे ॥४॥
इतियावदज्ञानंनविवर्ततइत्यर्थः २० एवमुक्तप्रकारेणनैतेतवतनयाः अहंतुतान्नघातितवान् तथापिअज्ञानदृष्ट्यास्वतनयान्मयामारितानपिमानुशोचेतिसांत्वयंतितस्मादिति[1] अज्ञानाश्रयमेवकर्मवादमा
॥२१॥ हयतइति (अनुशोचेतिलोडंतम् स्वकृतंस्वारब्धं अवशःकर्माधीनः) २१ कथंतर्हिब्राह्मणादिहंतुस्तद्धतस्यचप्रायश्चित्तश्रवणंअज्ञानमूलमेवेत्याहयावदिति अस्वदृक्देहाभिमानी तदभिमानीतितस्यदेह
स्यहननमात्मन्यभिमन्यमानइत्यर्थः २२ श्यालःकंसः स्वस्रोरितिस्वसृशब्देनद्विवचनानुपपत्त्यामिथुनगुणद्वारामिथुनीलक्षणयास्वसृतत्पत्योरभिधानंलिंगेसमवायेनप्राणभृत्तउपदधातीत्तिवत्[2] देवकीवसुदे
वयोःप्रत्येकंपादावग्रहीदित्यर्थः अविसर्गपाठेश्यालशब्देनकथंचिद्वसुदेवाभिधानम् २३ आत्मसौहृदंप्रियवादादिनादर्शयन् २४ (व्यसृजत्गंतुमनुज्ञांददौ) २५ (देहिनांअहंधीर्देहात्मबुद्धिः) २६

देवमप्यनृतंवक्तिनमर्त्याएवकेवलम् ॥ यद्विस्रंभादहंपापःस्वसुर्निहतवान्शिशून् १७ माशोचतंमहाभागौस्वात्मजान्स्वकृतंभुजः ॥ जंतवोनसदैकत्रदै श्लोकाः
वाधीनाःसहासते १८ भुविभौमानिभूतानियथायांत्यपयांतिच ॥ नायमात्मातथैतेषुविपर्येतियथैवभूः १९ यथाऽनेवंविदोभेदोयतआत्मविपर्ययः ॥ दे
हयोगवियोगौचसंसृतिर्ननिवर्तते २० तस्माद्भद्रेस्वतनयान्मयाव्यापादितानपि ॥ मानुशोचयतःसर्वःस्वकृतंविंदतेऽवशः २१ यावद्धतोस्मिहंतास्मी १७/२६
त्यात्मानंमन्यतेस्वदृक् ॥ तावत्तदभिमान्यज्ञोबाध्यबाधकतामियात् २२ क्षमध्वंममदौरात्म्यंसाधवोदीनवत्सलाः ॥ इत्युक्त्वाश्रुमुखःपादौश्यालःस्व
स्रोरथाग्रहीत् २३ मोचयामासनिगडाद्विस्रब्धःकन्यकागिरा ॥ देवकींवसुदेवंचदर्शयन्नात्मसौहृदम् २४ भ्रातुःसमनुतप्तस्यक्षांतरोषाचदेवकी ॥ व्यसृज
द्वसुदेवश्चप्रहस्यतमुवाचह २५ एवमेतन्महाभागयथावदसिदेहिनाम् ॥ अज्ञानप्रभवाऽहंधीःस्वपरेतिभिदायतः २६

चूर्णिका किंच दैवमपिमिथ्यावक्तिनमर्त्याएव यतःयद्विश्रंभात् पापःअहंशिशून्निहतवान् १७ अतःयुवांसुतान्माशोचतम् यतःदैवाधीनाःजंतवःसदाएकत्रनासते १८ किंच देहाए
वभवंतिनभवंतिच यथाभुविघटादीनि १९ एवंदेहेषुविक्रियमाणेषुअयंएकरूपःआत्मानविपर्येति भौमेषुविक्रियमाणेषुयथाभूःएवंअजानतःपुंसःदेहात्मबुद्धिर्भवति तयाभेदःत
स्माद्देहयोगवियोगौ ततःसंसृतिः २० अतःहेभद्रेसुतान्मानुशोचयतःजंतुःअवशःसन्स्वकृतंभुंक्ते २१ २२ किंच ममदौरात्म्यंक्षमध्वं एवमुक्त्वा अश्रुमुखःकंसःतयोःपादौ
अग्रहीत् २३ ततःतौनिगडात्मोचयामास २४ ततःएवंअनुतप्तस्यभ्रातुःसतःश्रांतरोषादेवकीवसुदेवश्चतंउवाच २५ हेकंसयथात्वंवदसितथादेहिनांअज्ञानप्रभावाहंधीःवर्त्तते ॥२१॥
ययास्वःपरइतिभेदोभवति २६

१ ‘ सांत्वयित्वाऽज्ञानाश्रयमेवकर्मवादमाह तस्मादिति ’ इति नवापाठः । २ लिंगंवाच्योर्थः तस्यसमवायः समुदायप्रवेशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. स्वपरभेददर्शनेकिंभवतितदाह । शोकेति । भावैर्भूतैरेवानिमित्तभूतैर्मिथोभावान्घ्नंतंभावमीश्वरंपृथग्दृशस्तेनपश्यंतिकित्वहमेवहंताहतश्चेतिमन्यंतइत्यर्थः २७ विशुद्धंयथाभवति (तथा) २८ २९ नातिको अ०
विदाःदृष्टमात्रमतयःनदीर्घदर्शनाः ३० ननिर्गतानिदशदिनानियेषांतान्अन्यांश्च ३१ ३२ अस्यतोविध्यतस्तवसतःउत्सृज्यरणंत्यक्त्वा ३३ (स्मःअस्तेर्लट्) ३४ (विस्मृतशस्त्रास्त्रान्मूर्च्छितानि
टीका त्यर्थः) अन्यासक्तान्अन्येनसहयुध्यतःविमुखांश्च । नहंसिनहिनत्सि ३५ क्षेमेनिर्भयेदेशेशूरैःसंयुगादन्यत्रविकत्थनंप्रौढिवादोयेषांतैः । ननुहरेर्बिभेमिशंभोश्चेतिचेत्तत्राहुः । रहोजुषेतिसर्वस्याप्यंतःप्रवि
ष्टेनक्वचिदपिबहिरदृष्टेनेत्यर्थः । पुरुषप्रवेशरहितमिलावृतवनमोकोपस्यतेनशंभुनावा(किं । तपस्यतातपश्चरता) ३६ यद्यप्युद्यमैर्देवानकिंचिदपिकर्तुंसमर्थास्तथापिनीतिरनुसर्तव्यैवेत्याहुःतथापीति । ॥४॥
॥२२॥ (सापत्न्यात्सपत्नभावात् । नियुंक्ष्वआज्ञापय) ३७ (आमयोरोगः) रूढपदोरूढमूलः (अभिवृद्धइत्यर्थः) ३८

शोकहर्षभयद्वेषलोभमोहमदान्विताः ॥ मिथोघ्नंतंनपश्यंतिभावैर्भावंपृथग्दृशः २७ ॥ श्रीशुकउवाच ॥ कंसएवंप्रसन्नाभ्यांविशुद्धंप्रतिभाषितः ॥ दे श्लोकाः
वकीवसुदेवाभ्यामनुज्ञातोऽविशद्गृहम् २८ तस्यांरात्र्यांव्यतीतायांकंसआहूयमंत्रिणः ॥ तेभ्यआचष्टतत्सर्वंयदुक्तंयोगनिद्रया २९ आकर्ण्यभर्तुर्गदितंत
मूचुर्देवशत्रवः ॥ देवान्प्रतिकृतामर्षादैतेयानातिकोविदाः ३० एवंचेत्तर्हिभोजेंद्रपुरग्रामव्रजादिषु ॥ अनिर्दशान्निर्दशांश्चहनिष्यामोद्यवैशिशून् ३१ किमु २७/३८
द्यमैःकरिष्यंतिदेवाःसमरभीरवः ॥ नित्यमुद्विग्नमनसोज्याघोषैर्धनुषस्तव ३२ अस्यतस्तेशरव्रातैर्हन्यमानाःसमंततः ॥ जिजीविषवउत्सृज्यपलायनपरा
ययुः ३३ केचित्प्रांजलयोदीनान्यस्तशस्त्रादिवौकसः ॥ मुक्तकच्छशिखाःकेचिद्भीताःस्मइतिवादिनः ३४ नत्वंविस्मृतशस्त्रास्त्रान्विरथान्भयसन्नतान् ॥
हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः ३५ किंक्षेमशूरैर्विबुधैरसंयुगविकत्थनैः ॥ रहोजुषाकिंहरिणाशंभुनावावनौकसा ॥ किमिंद्रेणाल्पवीर्येणब्र
ह्मणावातपस्यता ३६ तथापिदेवाःसापत्न्यान्नोपेक्ष्याइतिमन्महे ॥ ततस्तन्मूलखननेनियुंक्ष्वास्माननुव्रतान् ३७ यथामयोंगेसमुपेक्षितोनृभिर्नशक्य
तेरूढपदश्चिकित्सितुम् ॥ यथेंद्रियग्रामउपेक्षितस्तथारिपुर्महान्बद्धबलोनचाल्यते ३८

चूर्णिका ततश्चशोकहर्षादयःएवंभावैःमिथःभावान्घ्नंतंईश्वरंपृथक्दृशःतेनपश्यंति किंतुअहमेवहंताहतश्चेतिमन्यंते २७ ॥ श्रीशुकउवाच ॥ एवंताभ्यांउक्तःकंसःतदाज्ञांगृहीत्वागृहंवि
वेश २८ ततःतस्यांरात्र्यांगतायांकंसःमंत्रिणआहूयतेभ्योयोगनिद्रयोक्तंसर्वंआह २९ एवभर्तुर्वचःश्रुत्वातेदेवशत्रवःतंऊचुः ३० हेभोजेंद्र एवंचेत्तर्हिपुरग्रामादिषुअनि
र्दशान्निर्दशान्शिशूनद्यहनिष्यामः ३१ किंच तेधनुर्ज्याघोषैःउद्विग्नमनसोदेवाःउद्यमैःकिंकरिष्यंति ३२ किंच तेशरव्रातैःहन्यमानाःदेवाःरणंउत्सृज्यपलायनंचक्रुः ३३
तत्रकेचित्प्रांजलयः केचिन्मुक्तकच्छशिखाः भीताःस्मइतिवादिनःस्युः ३४ ३५ किंचक्षेमशूरैःदैवैःकिम् रहोजुषाहरिणाकिम् वनौकसाशंभुनाकिम् ३६ अल्पवीर्ये
णइंद्रेणकिम् तपस्यताब्रह्मणावाकिम् अथापिसापत्न्यात्देवाःनोपेक्ष्याइतिमन्महे अतःतन्मूलखननेअस्मान्नियुंक्ष्व ३७ हेकंसयथाअंगेउपेक्षितःआमयःसःवृद्धःसन् ॥२२॥
चिकित्सितुंनशक्यते एवंबद्धबलःरिपुःनचाल्यते ३८

१ बद्धमूलइतिचपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवानांमूलंविष्णुःसचयत्रधर्मस्तत्रास्तेतस्यधर्ममूलंवेदादयइति ३९ (ब्रह्मवादिनोवेदविदः) ४० (हरेस्तनूःविष्णोस्तनवइत्यर्थः) ४१ किंचविप्रादयोहरेरेवतनवोमूलंचयस्मात्तस्मादयमेवतद्वधोपाय इत्याहुः। अयमिति (ऋषयोगवादीनामुपलक्षणम्) ४२ ४३ ४४ आरात्समीपमागतोमृत्युर्येषांते ४५ सतांविद्वेषोनमृत्युमात्रहेतुःकिंतुबह्वनर्थकारीत्याह । आयुःश्रियमिति ४६ ॥ ॥ इतिश्री भागवतेमहापुराणेदशमस्कंधेटीकायांचतुर्थोध्यायः ४ ॥ ॥ ७ ॥ ॥ पंचमेजातकंनंदःसूनोःकृत्वामहोत्सवम् । गत्वाथमथुरांप्रापवसुदेवागमोत्सवम् ॥ १ ॥ महामनाउदाराचित्तः १ २ नियुतेद्वे लक्षे । सप्ततिलपर्वतांश्चप्रादात् । कथंभूतान् । रत्नौघैःरत्नसमूहैःशातकौंभांबरैःस्वर्णरसाक्तैरंबरैश्चावृतान् (शातकौंभेनरक्तानिशातकौंभानि । यद्वाशातकौंभेनांबरैश्चावृतान् । तत्सहितानितियावत्) ३ द्रव्याणांगोहिरण्यादीनांमध्येकेषांचिद्दानैरेवशुद्धिर्यथातथादानादियुक्तजातकर्मादिसंस्कारैरेवगर्भाणांशुद्धिरितिदर्शयितुंप्रतिनियतानिशोधकानिदृष्टांतत्वेनोदाहरति। कालेनेति। कालेनभूम्यादि। स्नानेन देहादि। शौचेनामेध्यलिप्तादि। संस्कारैर्गर्भादि। तपसाइंद्रियादि। इज्ययाब्राह्मणादि। दानैर्द्रव्याणि। संतुष्ट्यामनः (एवंकालादिभिर्भूम्यादीनिद्रव्याणिशुध्यंति) आत्मात्वात्मविद्ययाशुध्यति ४

टीका ॥२३॥

श्लोकाः ३९/४

मूलंहिविष्णुर्देवानांयत्रधर्मःसनातनः ॥ तस्यचब्रह्मगोविप्रास्तपोयज्ञाःसदक्षिणाः ३९ तस्मात्सर्वात्मनाराजन्ब्राह्मणान्ब्रह्मवादिनः ॥ तपस्विनोयज्ञ शीलान्गाश्चहन्मोहविर्दुघाः ४० विप्रागावश्चवेदाश्चतपःसत्यंदमःशमः ॥ श्रद्धादयातितिक्षाचक्रतवश्चहरेस्तनूः ४१ सहिसर्वसुराध्यक्षोह्यसुरद्विड्गुहा शयः ॥ तन्मूलादेवताःसर्वाःसेश्वराःसचतुर्मुखाः ॥ अयंवैतद्वधोपायोयदृषीणांविहिंसनम् ४२ ॥ श्रीशुकउवाच ॥ एवंदुर्मंत्रिभिःकंसःसहसंमंत्र्यदुर्म तिः ॥ ब्रह्महिंसांहितंमेनेकालपाशावृतोऽसुरः ४३ संदिश्यसाधुलोकस्यकदनेकदनप्रियान् ॥ कामरूपधरान्दिक्षुदानवान्गृहमाविशत् ४४ तेवैरजःप्रकृ तयस्तमसामूढचेतसः॥सतांविद्वेषमाचेरुरारादागतमृत्यवः ४५ आयुःश्रियंयशोधर्मंलोकानाशिषएवच ॥ हंतिश्रेयांसिसर्वाणिपुंसोमहदतिक्रमः ४६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुर्थोध्यायः ४ ॥ श्रीशुकउवाच ॥ ॥ नंदस्त्वात्मजउत्पन्नेजाताह्लादोमहामनाः ॥ आहूयविप्रान्वेद ज्ञान्स्नातःशुचिरलंकृतः १ वाचयित्वास्वस्त्ययनंजातकर्मात्मजस्यवै ॥ कारयामासविधिवत्पितृदेवार्चनंतथा २ धेनूनांनियुतेप्रादाद्विप्रेभ्यःसमलंकृ ते ॥ तिलाद्रीन्सप्तरत्नौघशातकौंभांबरावृतान् ३ कालेनस्नानशौचाभ्यांसंस्कारैस्तपसेज्यया ॥ शुध्यंतिदानैःसंतुष्ट्याद्रव्याण्यात्मात्मविद्यया ४

चूर्णिका

हेप्रभोदेवानांमूलंविष्णुःतन्मूलंधर्मःतन्मूलंब्रह्मगोविप्रतपोयज्ञाः ३९ अतःविप्रान्तपस्विनःहविर्दुघाःगाश्चहन्मः ४० किंच विप्रगोवेदादयःएतेहरेस्तनवः ४१ सहरिः सर्व सुराध्यक्षःतन्मूलाःसर्वाःब्रह्मादिदेवताःअतःतद्वधोपायःअयंयदृषीणांविहिंसनमिति ४२ ॥ श्रीशुकउवाच ॥ एवंकंसःदुर्मंत्रिभिः सहसंमंत्र्यकालपाशावृतःसन् ब्रह्महिंसांहि तंमेने ४३ ततःदैत्यान्लोकनाशार्थंआदिश्यगृहंययौ ४४ ततःतेदैत्याःसतांद्वेषंआचेरुःयतःसमीपंप्राप्तमृत्यवः ४५ आयुःश्रियंयशोधर्मंलोकानाशिषएवचहंतिश्रेयांसिसर्वा णिपुंसोमहदतिक्रमः ४६ ॥ ॥ ७ ॥ इतिदशमेचतुर्थः ४ ॥ श्रीशुकउवाच ॥ नंदस्त्वात्मजउत्पन्नेजाताह्लादोमहामनाः आहूयविप्रान्वेदज्ञान्स्नातःशुचिरलंकृतः १ ततस्तैःस्वस्त्ययनंवाचयित्वापुत्रस्यजातकर्मकारयामास २ ततःनंदः कालादिनाभूम्यादिशुद्धिःदानेनद्रव्यशुद्धिःसंस्कारैःगर्भशुद्धिःस्यादितिज्ञात्वा ३ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सौमंगल्यगिरःस्वस्तिवाचकाविप्रादयोबभूवुः । तत्र " सूताःपौराणिकाःप्रोक्तामागधावंशशंसकाः । बंदिनस्त्वमलप्रज्ञाःप्रस्तावसदृशोक्तयः " । (नेदुर्नदंतिस्म) ५ संमृष्टानि (रजोपकर्षणेन) संसिक्तानि (चंदनोदकादिना) द्वारादीनियस्मिन्सः । तत्राजिराणिअंगणानिगृहांतराणि (गृहमध्यभागाः) यस्मिन्सतथाचित्रध्वजेषुपताकानांस्राग्भि :चैलपल्लवतोरणैश्चभूषितः ६ हरिद्रातैलाभ्यांरूषितालिप्ताः । विचित्राधातवश्चबर्हस्रजश्चवस्त्राणिचकांचनमालाश्चअलंकारतयाविद्यंतेयेषांतथाभूतागवादयोबभूवुरित्यर्थः ७ ८ आकल्पाअलंकाराः (आदिनाहरिद्रादि) ९ नवकुंकुम(रूप)ःकिंजल्कैः (केसरैः) मुखपंकजेषुभूतिःश्रीर्यासांताः (बलिभिःरुपायनैः) १० सुमृष्टानिउज्ज्वलितानिमणिमयानिकुंडलानियासांताःनिष्काःपदकानिकंठेषुयासांताश्चताः । शिखाभ्यश्च्युतानिमाल्यवर्षाणियासांताः । नंदालयंव्रजतीर्व्रजंत्यःपथिविरेजुःसवलयाःकंकणभूषिताःव्यालोलैःकुंडलादिभिःशोभायासांताः ११ (हेभगवन्इमंबालकंचिरंपाहीतिबालकेआशिषः) जनंसिंचंत्यःअजनमुज्जगुरितिवा १२ (अवाद्यंतवादितानि) १३ (हर्षोद्रेकाद्दध्यादिभिरासिंचंतोनवनीतैश्चविलिंपंतःपरस्परंचिक्षिपुः) १४ तेभ्यो (गोपेभ्यः) प्रादात् (सूतादिभ्यश्चयथोचितंप्रादात्येन्येविद्योपजीविनःतेभ्यश्च) १५

श्लोकाः

सौमंगल्यगिरोविप्राःसूतमागधबंदिनः ॥ गायकाश्वजगुर्नेदुर्भेर्योदुंदुभयोमुहुः ५ व्रजःसंमृष्टसंसिक्तद्वाराजिरगृहांतरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ६ गावोवृषावत्सतराहरिद्रातैलरूषिताः ॥ विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ७ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः ॥ गोपाःसमाययूराजन्नानोपायनपाणयः ८ गोप्यश्चाकर्ण्यमुदितायशोदायाःसुतोद्भवम् ॥ आत्मानंभूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ९ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलिभिस्त्वरितंजग्मुःपृथुश्रोण्यश्चलत्कुचाः १० गोप्यःसुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराःपथिशिखाच्युतमाल्यवर्षाः ॥ नंदालयंसवलयाव्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ११ ताआशिषःप्रयुंजानाश्चिरंपाहीतिबालके ॥ हरिद्राचूर्णतैलाद्भिःसिंचंत्योजनमुज्जगुः १२ अवाद्यंतविचित्राणिवादित्राणिमहोत्सवे ॥ कृष्णेविश्वेश्वरेऽनंतेनंदस्यव्रजमागते १३ गोपाःपरस्परंहृष्टादधिक्षीरघृतांबुभिः ॥ आसिंचंतोविलिंपंतोनवनीतैश्चचिक्षिपुः १४ नंदोमहामनास्तेभ्योवासोलंकारगोधनम् ॥ सूतमागधबंदिभ्योयेन्येविद्योपजीविनः १५

५/१५

चूर्णिका

विप्रेभ्यःधेनूनांलक्षद्वयंतथासप्ततिलाद्रीन्वस्त्रादियुतान्ददौ ततःविप्रसूतादयःस्वस्तिवाचकाबभूवुः गायकाःजगुःभेरीदुंदुभयःनेदुः ५ व्रजःचित्रध्वजपताकादिभिःभूषितोऽभूत् ६ गवादयःहरिद्रातैललिप्ताः विचित्रधातुस्रगादिभिःभूषिताबभूवुः ७ गोपाःमहार्हवस्त्रादिभिर्भूषिताः नानोपायनपाणयः तत्रसमाययुः ८ गोप्यःयशोदायाः सुतोद्भवंश्रुत्वा वस्त्रालंकारादिभिःआत्मानंअलंकृत्यतथापृथुश्रोण्यश्चलत्कुचाःसत्यःबलिभिःसहतत्रसंजग्मुः ९ १० एवंनंदालयंव्रजंत्यःचित्रांबराःपथिशिखाच्युतमाल्यवर्षाःसवलयाःगोप्यःमार्गेविरेजुः ११ ततःतत्रगत्वाचिरंपाहीतिबालकेआशिषःप्रयुंजानाःहरिद्राचूर्णतैलाद्भिःजनंसिंचंत्यःउज्जगुः १२ किंच तदामहोत्सवेवादित्राणिअवाद्यंत किंचश्रीकृष्णे व्रजंप्राप्तेसतिगोपाःमिथोहृष्टाःदधिक्षीरादिभिःसिंचंतःनवनीतैर्लिंपंतःतानिचमिथःचिक्षिपुः १३ १४अथनंदःतेभ्यःसूतादिभ्यश्चवासोलंकारादिप्रादात् १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यथोचितमन्यानपिअपूजयत् १६ १७ हरेर्निवासेनयेआत्मनिव्रजेगुणाआसंस्तैःरमायाआक्रीडंविहारस्थानम् (अतःसर्वसमृद्धिमान्) १८ वार्षिक्यंप्रतिवर्षदेयम् १९ भ्रातरंसखायम् । तदवमोचनं तस्यनंदस्यवसतिस्थानम् २० (तंवसुदेवं) २१ (स्वात्मजयोःरामकृष्णयोरासक्तधीर्वसुदेवः) २२ (समपद्यतजाता) २३ पुनर्भवःपुनर्जातइवतत्रहेतुगर्भविशेषणंसंसारचक्रेवर्तमानइति । दुर्लभमितिच २४ दुर्लभत्वमेवाह । नैकत्रेति । प्रियश्चासौसंवासश्चप्रियसंवासःहेप्रियेतिवा स्रोतसओघेननीयमानानांप्लुवंतीतिप्लवाःतृणकाष्ठादयस्तेषांयथाएकत्रस्थितिर्नास्तितद्वत् २५ कच्चिदिति । पशव्यादिरूपेतस्मिन्वनेनिर्दोषगोपयोदध्यादिप्रभूतगोपिकास्तन्यादिनापुत्रयोःक्षेम (संभवइतितत्) जिज्ञासयापृच्छतिप्रसक्तधीःस्वात्मजयोरित्युक्तत्वात् । (पशव्यंपशुभ्योहितम्) २६ (मात्रारोहिण्यासह) भवम्यासुपलालितःसन्वर्ततेकच्चित् २७ पुत्रादर्शनक्लेशानाह पुंसइति । सुहृदोबंधून्प्रत्यनुभावितःतदर्थंसंपादितःयःत्रिवर्गःसहिपुंसोविहितःयुक्तःशास्त्रेणवाप्रोक्तःनतुस्वमात्रपर्यवसितः । अतस्तेषुक्लिश्यमानेषुसोऽर्थायनकल्पतेसुखायनभवतीत्यर्थः २८ नंदोवसुदेवंसांत्वयन्नाह । अहोइति (पुत्रेषुदेवक्याःस्नेहातिशयात्तत्पुत्राइति) २९

॥२५॥ ॥ ५ ॥

श्लोकाः १६ — २९

तैस्तैःकामैरदीनात्मायथोचितमपूजयत् ॥ विष्णोराराधनार्थायस्वपुत्रस्योदयायच १६ रोहिणीचमहाभागानंदगोपाभिनंदिता ॥ व्यचरद्दिव्यवासःस्रक्कंठाभरणाभूषिता १७ ततआरभ्यनंदस्यव्रजःसर्वसमृद्धिमान् ॥ हरेर्निवासात्मगुणैरमाक्रीडमभून्नृप १८ गोपान्गोकुलरक्षायांनिरूप्य मथुरांगतः ॥ नंदःकंसस्यवार्षिक्यंकरंदातुंकुरूद्वह १९ वसुदेवउपाश्रुत्यभ्रातरंनंदमागतम् ॥ ज्ञात्वादत्तकरंराज्ञेययौतदवमोचनम् २० तंदृष्ट्वासहसोत्थायदेहःप्राणमिवागतम् ॥ प्रीतःप्रियतमंदोर्भ्यांसस्वजेप्रेमविह्वलः २१ पूजितःसुखमासीनःपृष्ट्वानामयमादृतः ॥ प्रसक्तधीःस्वात्मजयोरिदमाहविशांपते ॥ २२ दिष्ट्याभ्रातःप्रवयसइदानीमप्रजस्यते ॥ प्रजाशायानिवृत्तस्यप्रजायत्समपद्यत २३ दिष्ट्यासंसारचक्रेऽस्मिन्वर्तमानःपुनर्भवः ॥ उपलब्धोभवानद्यदुर्लभंप्रियदर्शनम् २४ नैकत्रप्रियसंवासःसुहृदांचित्रकर्मणाम् ॥ ओघेनव्यूह्यमानानांप्लवानांस्रोतसोयथा २५ कच्चित्पशव्यंनिरुजंभूर्यंबुतृणवीरुधम् ॥ बृहद्वनंतदधुनायत्रास्तेत्वंसुहृद्वृतः २६ भ्रातर्ममसुतःकच्चिन्मात्रासहभवद्व्रजे ॥ तातंभवंतंमन्वानोभवद्भ्यामुपलालितः २७ पुंसस्त्रिवर्गोविहितःसुहृदोह्यनुभावितः ॥ नतेषुक्लिश्यमानेषुत्रिवर्गोर्थायकल्पते२८॥ नंदउवाच ॥ अहोतेदेवकीपुत्राःकंसेनबहवोहताः ॥ एकाऽवशिष्टाऽवरजाकन्यासापिदिवंगता२९

चूर्णिका

तथायेऽन्येविद्योपजीविनःतान्स्वपुत्रोदयार्थकामैरपूजयत् १६ ततःरोहिणीदिव्यवस्त्रादिभिर्भूषितासतीतत्रव्यचरत् १७ ततआरभ्यनंदव्रजःसर्वसम्प्टाद्धिमान्आस १८ तथा हरेर्वासात्तद्गुणैरमाक्रीडःअभूत् अथैकदानंदःगोकुलरक्षार्थंगोपान्निरूप्यकंसस्यवार्षिकंकरंदातुंमथुरांगतः १९ ततःवसुदेवःनंदंप्राप्तंश्रुत्वाराज्ञेदत्तकरंज्ञात्वातस्यवासस्थानं शकटोत्तारभूमिंययौ २० तंदृष्ट्वाउत्थायप्रीतःसन्दोर्भ्यांसस्वजे २१ ततःतेनपूजितःअनामयंपृष्टःआसीनःवसुदेवःइदंआह २२ हेभ्रातःअप्रजस्यतेअधुनाप्रजायत्समपद्यत एतद्दिष्ट्या २३ किंच अत्रसंसारचक्रेवर्तमानःभवान्पुनर्जातइवमेउपलब्धःएतत्दिष्ट्या इदंप्रियदर्शनंदुर्लभम् २४ यतःप्रियसंवासः. एकत्रन यथास्रोतसःओघेनतृणादीनां तद्वत् २५ हेनंदतत्वनंनिरुजं काच्चित् यत्रत्वंसुहृद्वृतःआस्से २६ किंच हेभ्रातःमेसुतःमात्रासहत्वांतातंमन्वानःसुखीकाच्चित् २७ हेनंदबंधून्प्रतिसंपादितोयःत्रिवर्गःसएव पुंसोयुक्तः २८अतः तेषुक्लिश्यमानेषुसत्सुसः सुखायनभवति २८ ॥ नंदउवाच ॥ अहोतेपुत्राःकंसेनबहवोहताःकन्यैकाअवशिष्टासापिदिवंगता २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अदृष्टेएवनिष्ठासमाप्तिर्यस्यसः । यदैवपुत्रादिसुखप्रदंअदृष्टंहीयतेतदैवतेपुत्रादयोनभवंतीत्यर्थः । अदृष्टपरमःअदृष्टमेवपरमंयस्यसः । यद्यपिपुत्रादयोवियुक्तास्तथापितानदृष्टमेवपुनःसंगमयतीत्यर्थः ।
एवमदृष्टमात्मनस्तत्त्वंसुखदुःखयोरव्यभिचारिकारणंयोवेदनसमुह्यति । तस्मादिदानींत्वयानदुःखंभावनीयम् । मृतानामपिवियुक्तानामपिचकालांतरेदर्शनयोगयोःसंभवात् । अस्मदादिभिरपिकालांतरेताद्वि
योगेसत्यप्यतएवनदुःखंभावनीयमितिनंदस्यदैवीवागेषाभाविसूचिका ३० तांबुद्ध्वावसुदेवोदुःखंत्यक्त्वानंदमाह करोवैइति । वःयुष्माभिः ३१ ३२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांपंचमो
ध्यायः ॥ ५ ॥ ॥ छ ॥ ॥ षष्ठेसख्युर्गिरानंदोव्रजंगच्छन्मृतांपथि । दृष्ट्वातुराक्षसींतस्यामृत्युंश्रुत्वासविस्मितः ॥ १ ॥ (संत्युत्पाताश्चगोकुलेइतिशौरेर्वचोनमृषेति १ २ कृष्णविषयेशंक
मानंराजानंप्रतिअविषयेप्रवृत्तासैवमरिष्यतीतिसूचयन्नाह नयत्रेति । यत्रश्रीकृष्णस्यश्रवणादीनिनसंतितत्रैवतासांशक्तिःसाक्षात्तस्मिन्नेवसतिकाशंकेतिभावः ३ योषित्वावेषतोवरांनारीमिवात्मानंविधाय ।
ननुनिर्लज्जानिर्विशंकाचसतीकथंपरसद्मनिप्रविष्टेत्यतआह कामचारिणीति । नहिकामचारिणीष्विदंचित्रमित्यर्थः ४ तांवनितांपतिंद्रष्टुमागतामतिरूपवतींश्रियमिवगोप्योऽमंसतेत्युत्तरश्लोकस्थेनान्वयः
श्रीसाम्यार्थानिविशेषणानि । केशबंधव्यतिषक्तमल्लिकांधाम्मिल्लसंसक्तमल्लिकाकुसुमाम् । बृहतानितंबेनस्तनाभ्यांचउभयतआक्रांतमिवकृच्छ्रंकृशंमध्यममुदरंयस्यास्ताम् । सुवाससंरमणीयेवाससीयस्यास्ता
म् । कंपितयोःकर्णभूषणयोस्त्विषाउल्लसद्भिःकुंतलैर्मंडितमाननंयस्यास्ताम् ५

श्लोकाः

नूनंह्यदृष्टनिष्ठोयमदृष्टपरमोजनः ॥ अदृष्टमात्मनस्तत्त्वंयोवेदनसमुह्यति ३० ॥ वसुदेवउवाच ॥ करोवैवार्षिकोदत्तोराज्ञोदृष्टावयंचवः ॥ नेह
स्थेयंबहुतिथंसंत्युत्पाताश्चगोकुले ३१ ॥ श्रीशुकउवाच ॥ इतिनंदादयोगोपाःप्रोक्तास्तेशौरिणाययुः ॥ अनोभिरनडुद्युक्तैस्तमनुज्ञाप्यगोकुलम् ३२
॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचमोध्यायः ५ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ नंदःपथिवचःशौरेर्नमृषेतिविचिंतयन् ॥ हरिं
जगामशरणमुत्पातागमशंकितः १ कंसेनप्रहिताघोरापूतनाबालघातिनी ॥ शिशूंश्चचारनिघ्नंतीपुरग्रामव्रजादिषु २ नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु
कुर्वंतिसात्त्वतांभर्तुर्यातुधान्यश्चतत्रहि ३ साखेचर्येकदोपेत्यपूतनानंदगोकुलम् ॥ योषित्वामाययात्मानंप्राविशत्कामचारिणी ४ तांकेशबंधव्यतिषक्तम
ल्लिकांबृहन्नितंबस्तनकृच्छ्रमध्यमाम् ॥ सुवाससंकंपितकर्णभूषणत्विषोल्लसत्कुंतलभूषिताननाम् ५

३० / ५

चूर्णिका

हेवसुदेव अयंजनः अदृष्टनिष्ठः आस्तिस्वस्यसुखदुःखयोः कारणंअदृष्टमेवएवंयोवेदसःनमुह्यति अतः त्वयानदुःखंभावनीयम् ३० ॥ वसुदेवउवाच ॥ हेनंदत्वयाराज्ञे
वार्षिकः करोदत्तः युष्माभिर्वयंचदृष्टाः अत्रबहुकालंनस्थेयम् इदानींगोकुलेउत्पाताः संति ३१ ॥ श्रीशुकउवाच ॥ इतिनंदादयोगोपाः प्रोक्तास्तेशौरिणाययुः अनोभि
रनडुद्युक्तैस्तमनुज्ञाप्यगोकुलम् ३२ ॥ इतिदशमेपंचमः ५ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ अथनंदः शौरेःवचः नमृषेतिपथिचिंतयन्हरिंशरणंजगाम १
एतर्हिकंसेन प्रहिताबालघातिनीपूतनापुरादिषुशिशून्घ्नंतीसतीचचार २ हेनृपयत्रहरेः श्रवणादीनितत्रैवनरक्षोबलंकिंपुनर्वक्तव्यं ३ हरौनतद्भयमितिततः साखेचरी
एकदाव्रजंप्राविशत् ४ तांधम्मिल्लसंसिक्तमल्लिकाकुसुमांसुवाससंवल्गुस्मितादिभिःव्रजौकसांमनोहरंतींपातिदर्शनार्थंप्राप्तांश्रियमिवगोप्यःअमंसत ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वल्गुरम्यंस्मितंयेषुतेतथाभूताअपांगविसर्गायेषुतैर्वीक्षितैर्व्रजौकसांमनोहरंतीं । अतोगोपाहृतमनस्त्वेनतांननिवारितवंतइत्युक्तंभवति । गोप्यश्चश्रियमिवमत्वातूष्णीमासन् । अतःकेनाप्यनिवारितासतीप्र विवेशेतिभावः ६ बालग्रहःपूतनाअसदंतकंबालंददर्श।असतामंतकंदृष्ट्वाकथंनाबिभेतितत्राह । प्रतिच्छन्ननिजोरुतेजसम्।बालनाट्येनप्रतिच्छन्नंतिरोहितंनिजंउरुतेजोयेनतम्।कमिव।भासिभस्मन्याहितम ग्निमिवेति ७ चराचरात्मत्वादेवतांविबुध्यनिमीलितेक्षणआस । स्वयमनंतंदुष्टानामंतकंबालंमत्वाएवमपिसांकमारोपयत्यथोरगंसुप्तम् । अबुद्धिश्चासौरज्जुधीश्चसः । अज्ञानतोरज्जुबुद्ध्यागृह्णाति(यथा) तद्वदिति ८ ननुयशोदारोहिण्यौतांकथंनन्यवारयतांतत्राह तामिति । वामंवल्गुजनन्याइवचेष्टितंयस्यास्तांवरस्त्रियंचसहसैवअंतरागृहमध्येवीक्ष्य । अंतस्तैक्ष्ण्येबहिर्मार्दवेचदृष्टांतःकोशपरिच्छदासिवत्मृदु चित्रचर्ममयःकोशःपरिच्छदआवरणंयस्यसोऽसिःखड्गस्तद्वत् । तत्प्रभयाचधर्षितेअभिभूतेअहमस्यजननीइयंवेतिमोहितेचसत्यौ । जननीजनन्यौनिरीक्षमाणेएवकेवलमतिष्ठताम् । नतुनिवारितवत्यौ ९ तस्मिन्स्थाने।दुर्जरंवीर्यंविषंयस्मिन्तंस्तनं । तंश्रीकृष्णमंकमादायसाघोरातस्मैशिशवेददौ । अथअनंतरमेवप्रपीड्यकेवलंविषमपथ्यमितिमत्वेवतस्याःप्राणैः (समं) सहअपिबत् १० चरणौभुजौ चमुहुर्मुहुःक्षिपंती । निःस्विन्नानिप्रस्वेदयुक्तानिगात्राणियस्याःसा (हस्फुटंउच्चैरित्यर्थः) ११ रसाःरसातलानिच १२ व्यादायमुखंविवृत्यकेशादीन्प्रसार्यनिजरूपंआस्थितामरणसमयेकपटप्रयुक्तमिती व १३ पतन्नपितस्यादेहःषट्क्रोशमध्यवर्तिनोद्रुमांश्चूर्णीचकार १४

श्लोकाः ६/१४

वल्गुस्मितापांगविसर्गवीक्षितैर्मनोहरंतींवनितांव्रजौकसाम् ॥ अमंसतांभोजकरेणरूपिणींगोप्यःश्रियंद्रष्टुमिवागतांपतिम् ६ बालग्रहस्तत्रविचिन्वतीशिशू न्यदृच्छयानंदगृहेऽसदंतकम् ॥ बालंप्रतिच्छन्ननिजोरुतेजसंददर्शतल्पेऽग्निमिवाहितंभसि ७ विबुध्यतांबालकमारिकाग्रहंचराचरात्माऽऽसनिमीलितेक्षणः ॥ अनंतमारोपयदंकमंतकंयथोरगंसुप्तमबुद्धिरज्जुधीः ८ तांतीक्ष्णचित्तामतिवामचेष्टितांवीक्ष्यांतराकोशपरिच्छदासिवत् ॥ वरस्त्रियंतत्प्रभयाचधर्षितेनिरी क्षमाणेजननीह्यतिष्ठताम् ९ तस्मिन्स्तनंदुर्जरवीर्यमुल्बणंघोरांकमादायशिशोर्ददावथ ॥ गाढंकराभ्यांभगवान्प्रपीड्यतत्प्राणैःसमंरोषसमन्वितोऽपिबत् १० सामुंचमुंचालमितिप्रभाषिणीनिष्पीड्यमानाऽखिलजीवमर्मणि ॥ विवृत्यनेत्रेचरणौभुजौमुहुर्निःस्विन्नगात्राक्षिपतीरुरोदह ११ तस्याःस्वनेनातिगभी रंहसासाद्रिर्महीद्यौश्चचचालसग्रहा ॥ रसादिशश्चप्रतिनेदिरेजनाःपेतुःक्षितौवज्रनिपातशंकया १२ निशाचरीत्थंव्यथितस्तनाव्यसुर्व्यादायकेशांश्चरणौ भुजावपि ॥ प्रसार्यगोष्ठेनिजरूपमास्थितावज्राहतोवृत्रइवापतन्नृप १३ पतमानोपितद्देहस्त्रिगव्यूत्यंतरद्रुमान् ॥ चूर्णयामासराजेंद्रमहदासीत्तदद्भुतम् १४

चूर्णिका

६ ततः शिशून्विचिन्वतीसायदृच्छयानंदगृहेदुष्टांतकंबालंतल्पेआहितंददर्श ७ ततोहरिः बालकमारिकाग्रहंतांविबुध्यमीलितेक्षणः आस ८ ततः सातंबालंअंकमारोपयत् तांतीक्ष्णचित्तांवरस्त्रियंनिरीक्षमाणेतत्प्रभयाधर्षितेजनन्यौ अतिष्ठताम्ननिवारितवत्यौ ९ ततः सातस्मैदुर्जरविषंस्तनंददौ अथभगवान् तंस्तनंगाढंप्रपीड्यप्राणैःसहअपिबत् १० ततः सामुंचमुंचेतिभाषिणीनेत्रेविवृत्यचरणौभुजौचाक्षिप्त्वास्विन्नगात्रासतीरुरोद ११ तस्याः स्वनेनमहीचचालरसातलानिदिशश्चप्रतिनेदिरे तथाजनाः वज्रपातशंकयाक्षितौपेतुः १२ इत्थंनिशाचरीव्यसुः सतीमुखंविवृत्यकेशचरणभुजान् प्रसार्य व्रजेस्वस्वरूपं आस्थितासतीवज्रहतःवृत्रइवअपतत् १३ पतमानोपितद्देहः षट्क्रोशमध्यवर्तिद्रुमान्चूर्णीचकार १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ईषामात्रोग्रदंष्ट्रास्यंईषालांगलदंडस्तत्प्रमाणाउग्रादंष्ट्रायस्मिंस्तत्तथाभूतमास्यंयस्मिंस्तत्तस्याःकलेवरंवीक्ष्यगोपागोप्यश्चसंतत्रसुः । संत्रासहेतुत्वेनपुनरष्टभिःपदैर्विशिनष्टि । गिरिकंदरवत्नासिकेयस्मिंस्तत् । गिरेःच्युतौस्थूलोपलौगंडशैलौताविवस्तनौयस्मिंस्तत् । रौद्रंघोरंप्रकीर्णाअरुणामूर्धजायस्मिंस्तत् १५ अंधकूपाविवगभीरेअक्षिणीयस्मिन्तत् । पुलिनवदारोहौजघनेताभ्यांभीषणं । बद्धाःसेतव इवभुजौऊरूअंघ्रीचयस्मिन्तत् । (शून्यतोयह्रदोनिर्जलह्रदःसइवोदरंयास्मिन्तदिति १६ पूर्वमेवतस्याःशब्देनभीताःपुनर्दर्शनेनातितत्रसुरित्याह पूर्वंत्विति । तस्यानिस्वनितंशब्दस्तेननिर्भिन्नानिहृत्कर्णमस्तकानियेषांते १७ १८ (तागोप्यः) १९ (सशकृतागोरजसापुनःस्नापयित्वा) द्वादशांगेषुललाटादिषुकेशवादिद्वादशनामभिः (रक्षांचक्रुः । यद्वागोरजसाद्वादशांगेषुनामभिःतिलकंविदधत्यो रक्षांचक्रुः) २० अनाचांताएवप्रथमप्रतिसंभ्रमेणैवरक्षांकृत्वाकिंचिल्लब्धाश्वासाःपुनस्तात्पर्येणवीजन्यासमकुर्वतेत्याह । संस्पृष्टसलिलाआचांताःआत्मनिप्रथममंगेषुकरयोश्चपृथक्अजाद्येकादशबीजानांमध्येकरशुद्धौत्रीणिकरयोःसंधिषुचत्वारिचत्वारितथांघ्र्यादावेकैकस्मिन्नंगेअजाद्येकैकंबीजंन्यस्यबालस्याप्यंगेषुतथैवाकुर्वत २१ अंघ्रिअंघ्रीजानुजानुनीभुजंभुजौ । कंशिरः २२ तथादिक्षुरक्षामकुर्वन्नित्याह । चक्र्यग्रतइति । चक्रसहितोहरिस्तवाग्रतोऽस्तु । सहगदोगदासहितोहरिस्तवपश्चादस्तु । त्वत्पार्श्वयोर्धनुर्धरोमधुहा । असिधरोऽजनश्च । शंखधरउरुगायश्चतुष्कोणेषु । क्षितौअधस्तादित्यर्थः २३ एवंबहीरक्षांकृत्वांऽतरंगामकुर्वंस्तामाह । इंद्रियाणीति २४

॥२८॥

श्लोकाः १५ / २४

ईषामात्रोग्रदंष्ट्रास्यंगिरिकंदरनासिकम् ॥ गंडशैलस्तनंरौद्रंप्रकीर्णारुणमूर्धजम् १५ अंधकूपगभीराक्षंपुलिनारोहभीषणम् ॥ बद्धसेतुभुजोर्वंघ्रिशून्यतोयह्रदोदरम् १६ संतत्रसुःस्मतद्वीक्ष्यगोपागोप्यःकलेवरम् ॥ पूर्वंतुतन्निस्वनिताभिन्नहृत्कर्णमस्तकाः १७ बालंचतस्याउरसिक्रीडंतमकुतोभयम् ॥ गोप्यस्तूर्णंसमभ्येत्यजगृहुर्जातसंभ्रमाः १८ यशोदारोहिणीभ्यांताःसमंबालस्यसर्वशः ॥ रक्षांविदधिरेसम्यग्गोपुच्छभ्रमणादिभिः १९ गोमूत्रेणस्नापयित्वा पुनर्गोरजसार्भकम् ॥ रक्षांचक्रुःसशकृताद्वादशांगेषुनामभिः २० गोप्यःसंस्पृष्टसलिलाअंगेषुकरयोःपृथक् ॥ न्यस्यात्मन्यथबालस्यबीजन्यासमकुर्वत २१ अव्यादजोंघ्रिमणिमांस्तवजान्वथोरूयज्ञोऽच्युतःकटितटंजठरंहयास्यः ॥ हृत्केशवस्त्वदुरईशइनस्तुकंठंविष्णुर्भुजंमुखमुरुक्रमईश्वरःकम् २२ चक्र्यग्रतःसहगदोहरिरस्तुपश्चात्त्वत्पार्श्वयोर्धनुरसीमधुहाऽजनश्च ॥ कोणेषुशंखउरुगायउपर्युपेंद्रस्तार्क्ष्यःक्षितौहलधरःपुरुषःसमंतात् २३ इंद्रियाणिहृषीकेशःप्राणान्नारायणोवतु ॥ श्वेतद्वीपपतिश्चित्तंमनोयोगेश्वरोवतु २४

चूर्णिका

ततःतद्देहंहलदंडमितदंष्ट्रंगिरिकंदरनासिकं १७ अंधकूपगभीराक्षइत्यादिविशिष्टंदृष्ट्वागोपाःगोप्यश्चतत्रसुः १६ १७ ततःतदुरसिक्रीडंतंअभयंबालंदृष्ट्वागोप्यःएत्यतंजगृहुः १८ ततःयशोदारोहिणीभ्यांसहताःगोप्यःबालस्यगोपुच्छभ्रमणादिभिःरक्षांविदधिरे १९ ततःतंगोमूत्रेणस्नापयित्वागोरजसारक्षांकृत्वातथाललाटादिषुद्वादशांगेषुकेशवादिनामभिःशकृतारक्षांचक्रुः २० ततोगोप्यःआचम्यअंगेषुकरयोश्चस्वस्मिन्बालकेचबीजन्यासंअकुर्वत २१ तदाह हेश्रीकृष्णअजःतेअंघ्रीपातुमणिमान्जानुनीपातुयज्ञःऊरूपातु अच्युतःकटितटंपातु हयास्यउदरं केशवःहृदयंपातु ईशःउरःस्थलं इनःकंठं विष्णुःभुजौ उरुक्रमःमुखं ईश्वरःशिरः २२ चक्रीहरिःअग्रतःअस्तुसगदःहरिःपश्चात्चापखड्गधरौमधुहाजानौपार्श्वयोः कोणेषु शंखधरः ४ उरुगायःउपेंद्रःउपरि तार्क्ष्यःअधः हलधरःसमंतात् २३ हृषीकेशःइंद्रियाणिअवतुनारायणःप्राणान्श्वेतद्वीपपतिःचित्तंयोगेश्वरःमनः २४ ॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.द.पू. (आत्मानमहंकारम्) २५ (सर्वेषांग्रहाणांडाकिन्यादीनांभयंकरः) २६ २७ २८ २९ (प्रणयबद्धाभिःप्रेमकृतबंधनाभिरित्यर्थः । आत्मजम्) सन्यवेशयतशाययामास ३० ३१ विस्मयमेवाह । अ० ६
नूनमिति । बतविस्मये । सांप्रतंसवसुदेवऋषिःतपःप्रभाववान्योगेशोज्ञानीवासम्यगास । यतःयत्पंआहसएवोत्पातोदृष्टइति । ३२ ३३ विस्मयांतरमाहदह्यमानस्येति । कृष्णेननिर्भुक्तःअतएवसपद्या
हतःपाप्मायस्य ३४ प्रसंगात्कैमुत्यन्यायेनभक्तिवैभवमाहपूतनेति (आपलेभे) ३५ श्रद्धयाआस्तिक्येनभक्त्याप्रेम्णारक्ताःस्निग्धास्तन्मातरइतिवत्साहरणलीलाभिप्रायेणबहुवचनंतत्राहिगोगोपिकास्त ॥ ६ ॥
टीका न्मातरोऽभवन्निति ३६ (लोकवंदितैर्ब्रह्मादिभिः । यस्याःपूतनायाः) ३७ (अनुमातरोमातृरूपागोप्योगावोपिजननीगतिमवापुरितिकिमुवक्तव्यंकृष्णेनधृतवत्सगोपालरूपेणभुक्तंस्तनसंबंधिक्षीरं
यासांताः) ३८ ३९

श्लोकाः २५—३९

॥२९॥ पृश्निगर्भस्तुतेबुद्धिमात्मानंभगवान्परः ॥ क्रीडंतंपातुगोविंदःशयानंपातुमाधवः २५ व्रजंतमव्याद्वैकुंठआसीनंत्वांश्रियःपतिः ॥ भुंजानंयज्ञभुक्पातुसर्व
ग्रहभयंकरः २६ डाकिन्योयातुधान्यश्चकूश्मांडायेऽर्भकग्रहाः ॥ भूतप्रेतपिशाचाश्चयक्षरक्षोविनायकाः २७ कोटरारेवतीज्येष्ठापूतनामातृकादयः
॥ उन्मादायेह्यपस्मारादेहप्राणेंद्रियद्रुहः २८ स्वप्नदृष्टामहोत्पातावृद्धबालग्रहाश्चये ॥ सर्वेनश्यंतुतेविष्णोर्नामग्रहणभीरवः २९ इतिप्रणयबद्धा
भिर्गोपीभिःकृतरक्षणम् ॥ पाययित्वास्तनंमातासंन्यवेशयतात्मजम् ३० तावन्नंदादयोगोपामथुरायाव्रजंगताः ॥ विलोक्यपूतनादेहंबभूवुरतिविस्मि
ताः ३१ नूनंबतऋषिर्जातोयोगेशोवासमाससः ॥ सएवदृष्टोह्युत्पातोयदाहानकदुंदुभिः ३२कलेवरंपरशुभिश्छित्त्वातत्तेव्रजौकसः ॥ दूरेक्षिप्त्वाऽवयवशोन्य
दहन्काष्ठवेष्टितम् ३३ दह्यमानस्यदेहस्यधूमश्चागुरुसौरभः ॥ उत्थितःकृष्णनिर्भुक्तसपद्याहतपाप्मनः ३४ पूतनालोकबालघ्नीराक्षसीरुधिराशना ॥ जि
घांसयापिहरयेस्तनंदत्त्वापसद्गतिम् ३५ किंपुनःश्रद्धयाभक्त्याकृष्णायपरमात्मने॥यच्छन्प्रियतमंकिंनुरक्तास्तन्मातरोयथा ३६पद्भ्यांभक्तहृदिस्थाभ्यांवं
द्याभ्यांलोकवंदितैः ॥ अंगंयस्याःसमाक्रम्यभगवानपिबत्स्तनम् ३७ यातुधान्यपिसास्वर्गमवापजननीगतिम् ॥ कृष्णभुक्तस्तनक्षीराःकिमुगावोनुमात
रः ३८ पयांसियासामपिबत्पुत्रस्नेहस्नुतान्यलम् ॥ भगवान्देवकीपुत्रःकैवल्याद्यखिलप्रदः ३९

चूर्णिका पृश्निगर्भःबुद्धिं भगवान् अहंकारं गोविंदःक्रीडंतं माधवःशयानं २५ वैकुंठःव्रजंतं श्रीपतिःआसीनं यज्ञभुक्भुंजानंपातु २६ तथाडाकिन्यादयः भूतप्रेतादयः २७
तथाकोटरारेवतीज्येष्ठादयः २८ तथास्वप्नदृष्टामहोत्पाताःवृद्धबालग्रहाश्चएतेसर्वेविष्णोर्नामग्रहणात्नश्यंतु २९ एवंगोपीभिःकृतरक्षणंसुतंस्तनंपाययित्वामाताशाययामास
३० तावत्नंदादिगोपाःव्रजंएत्यतद्देहंदृष्ट्वाविस्मिताःअभूवन् आहुश्च ३१ अहोनूनंवसुदेवःऋषिःसंजातः यतःसःयदाहसोयंउत्पातोदृष्टइति ३२ ततोगोपाःपरशुभिःतद्देहं ॥२९॥
छित्त्वादूरेक्षिप्त्वान्यदहन् ३३ ततःतद्देहात् अगरुसौरभःधूमःउत्थितः ३४ हेनृप एवंसाराक्षसीहरयेजिघांसयास्तनंदत्त्वापिसद्गतिंआप ३५ किंपुनः श्रद्धयाभक्त्यातस्मैप्रियं
यच्छन् सद्गतिंप्राप्नोतीतिवक्तव्यम् ३६ किंच भक्तहृदिस्थाभ्यांपद्भ्यांयस्याः अंगंआक्रम्यस्तनंपपौ ३७ सायातुधान्यपिमातृगतिंस्वर्गंआप किंपुनर्वक्तव्यंकृष्णभुक्तस्तनक्षी
राःगावोमातरश्चप्राप्नुवंतीति ३८ किंच यासांपयांसिमोक्षदःकृष्णःअपिबत् ३९

CC-0. In Public Domain. Digitization by eGangotri

टीका

४० कटधूमस्यपूतनावयवराश्युत्पन्नधूमस्य ४१ तेनंदादयः (शिशोःस्वस्तिक्षेमंचश्रुत्वा) ४२ ४३ एतत्आर्भकंअर्भकचरितम् । किंतत्पूतनामोक्षमिति (पूतनायामोक्षणरूपमित्यर्थः) ४४ अत्तुंदैत्यकुलानीशःपूतनायाःशिशुच्छलात् । स्तन्यापोशनतःप्राणैःप्राणाहुतिमकल्पयत् १ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांपूतनामोक्षोनामषष्ठोऽध्यायः ६ ॥ ॥७॥ ॥ उत्क्षिपत्शकटंव्योम्नितृणावर्तमधःक्षिपन् । दर्शयन्विश्वमास्येचकृष्णःक्रीडतिसप्तमे ॥ १ ॥ कृष्णार्भकसुधासिंधुसंप्लुवानंदनिर्भरः । भूयस्तदेवसंप्रष्टुंराजान्यदभिनंदति येनयेनेति ॥ २ ॥ येनयेनमत्स्याद्यवतारेणापियानियानिकर्माणिकरोतितातिनःकर्णसुखावहानिमनःप्रीतिकराणीतिचभवंत्येव १ तथापियच्छृण्वतःपुंसःपुरुषमात्रस्यअरतिर्मनोग्लानिःतन्मूलभूताविविधातृष्णाचअपगच्छतितथासत्त्वशुद्धिर्हरिभक्तिर्हरिदाससख्यानिचभवंतितदेवहारंहरेश्चरितंमनोहरंवावद । मन्यसेचेत् । अनुग्रहंयादिकरोषीत्यर्थः २ अत्यौत्सुक्येनपुनर्विशिनष्टि । अथेति । अनुरुंधतोऽनुकुर्वतः ३ उत्थानंशिशोरंगपरिवर्तनंतत्रकरणीयेकौतुकाप्लवेउत्सवाभिषेकेतथातस्मिन्नेवदिनेजन्मर्क्षस्यापियोगेनअतिमहोत्सवेसमवेतयोषितांमिलितपुरंध्रीणांमध्येवादित्रादिभिःशोभितमभिषेचनंसतीयशोदाचकार (तत्राद्विजानांमंत्ररूपैर्वाचकैःशब्दैः) ४ अन्नादिभिःसुपूजितैर्विप्रैःकृतमंगलंसंजातनिद्रंअक्षिणीयस्यतंअशीशयत्शायितवतीशकटस्याधस्तात्प्रेंखे ५

श्लोकाः ४०/५

तासामविरतंकृष्णेकुर्वतीनांसुतेक्षणम् ॥ नपुनःकल्पतेराजन्संसारोऽज्ञानसंभवः ४० कटधूमस्यसौरभ्यमवघ्रायव्रजौकसः ॥ किमिदंकुतएवेतिव्रजंतोव्रजमाययुः ४१ तेतत्रवर्णितंगोपैःपूतनागमनादिकम् ॥ श्रुत्वातन्निधनंस्वस्तिशिशोश्चासंश्चविस्मिताः ४२ नंदःस्वपुत्रमादायप्रोष्यागतउदारधीः ॥ मूर्ध्न्युपाघ्रायपरमांमुदंलेभेकुरूद्वह ४३ यएतत्पूतनामोक्षंकृष्णस्यार्भकमद्भुतम् ॥ शृणुयाच्छ्रद्धयामर्त्योगोविंदेलभतेरतिम् ४४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपूतनामोक्षोनामषष्ठोऽध्यायः ६ ॥ ॥ ७ ॥॥ राजोवाच ॥ येनयेनावतारेणभगवान्हरिरीश्वरः ॥ करोतिकर्णरम्याणिमनोज्ञानिचनःप्रभो १ यच्छृण्वतोऽपैत्यरतिर्वितृष्णासत्त्वंचशुध्यत्यचिरेणपुंसः ॥ भक्तिर्हरौतत्पुरुषेचसख्यंतदेवहारंवदमन्यसेचेत् २ अथान्यदपिकृष्णस्यतोकाचरितमद्भुतम् ॥ मानुषंदेहमासाद्यतज्जातिमनुरुंधतः ३ ॥ श्रीशुकउवाच ॥ कदाचिदौत्थानिककौतुकाप्लवेजन्मर्क्षयोगेसमवेतयोषिताम् ॥ वादित्रगीतद्विजमंत्रवाचकैश्चकारसूनोरभिषेचनंसती ४ नंदस्यपत्नीकृतमज्जनादिकंविप्रैःकृतस्वस्त्ययनंसुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिःसंजातनिद्राक्षमशीशयच्छनैः ५

चूर्णिका

तासांकृष्णेसुतेक्षणंकुर्वतीनांनपुनःसंसारःकल्पते ४० कटधूमस्यसौरभ्यंअवघ्रायव्रजौकसःकिमिदंकुतएवेतिवदंतोव्रजमाययुः ३४ ततस्तेनंदादयःगोपैःपूतनागमनादिशिशोःस्वस्तिचउक्तांश्रुत्वाविस्मिताःआसन् ४२ ततोनंदःस्वपुत्रंप्रेत्यागतमिवआदायमूर्ध्निआघ्रायमुदंलेभे ४३ यएतत्पूतनामोक्षंकृष्णस्यार्भकमद्भुतं॥शृणुयाच्छ्रद्धयामर्त्योगोविंदेलभतेरतिम् ४४ ॥ इतिदशमेषष्ठः ६ ॥ ॥ ७ ॥ ॥ राजोवाच येनयेनावतारेणभगवान्हरिरीश्वरः करोतिकर्णरम्याणिमनोज्ञानिचनःप्रभो १ हेशुकयच्चरितंशृण्वतःपुंसःमनोग्लानिःतृष्णाचगच्छति तथाचित्तशुद्धिःभक्तसख्यानिचभवंति २ तदेवहरिचरितंवदअथअन्यत्हरेःतोकाचरितंवद ३॥ श्रीशुकउवाच ॥ हेनृपएकदाशिशोःअंगपरिवर्तनसमयेकरणीयोत्सवाभिषेकेतथाजन्मर्क्षयोगेचमिलितस्त्रीणांमध्येयशोदासूनोःअभिषेचनंचकार ४ ततःनंदस्त्रीविप्रैःअन्नादिनापूजितैःकृतमंगलंपुत्रंप्राप्तनिद्रंशकटाधःप्रेंखेशायितवती ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ७ ॥

(औत्थानिकेकर्मणियदौत्सुक्यंतन्मनाः) उदक्षिपत्ऊर्ध्वचालितवान् ६ अधःशयानस्यशिशोरल्पकश्चासौप्रवालवन्मृदुश्चयोंऽघ्रिस्तेनहतंअनःशकटंतदाकारोऽसुरःव्यवर्तत। विपरीतमपतत् । कथम्।
विध्वस्तानिनानारसवंतिकुप्यभाजनानिस्वर्णरजतातिरिक्तकांस्यादिमयानिभाजनानियथाभवंतितथा। चक्रेचअक्षश्चचक्राक्षाः व्यत्यस्ताश्चक्राक्षायस्मिन्। विभिन्नःकूबरोयुगंधरोयस्यतच्चतच्चयथाभवतित
थाव्यवर्ततेति ७ अद्भुतदर्शनेनआकुलाबभुवुःतदेवाह कथमिति। विपर्यगात्विपरीतमपतदिति ८ अव्यवसितमतीन्अनिश्चितमतीन्संशयालूनित्यर्थः ९ नश्रद्दधिरेविश्वासंनजग्मुःउतअपितेगोपाः।
बालस्यैतन्नसंभवतिएतेचबालाःकिंजानंतीति।(बालभाषितमित्यपि) १० रक्षोघ्नैःसूक्तैःकृत्वा ११ भगवत्प्रभावानभिज्ञाविप्रचेष्टितंविडंबयन्नाह । पूर्ववदित्यादिना । बलिभिःशक्तैः। यद्वा। अष्टदि
ग्बलिभिःसहितंसपरिकरंयथापूर्वंस्थापितंविप्रादध्यादिभिरर्चयामासुःहुत्वाग्रहादिहोमंविधाय १२ असूयागुणेषुदोषाविष्करणम्। ईर्ष्याअक्षांतिः तेषामाशिषःकृतास्तैःप्रयुक्ताः (यस्मान्नविफलाः)

॥३१॥ १३ इत्येवमभिप्रेत्यसामर्ग्यजुर्भिःउपाकृतैरभिमंत्रितैःपवित्राओषधयोयेषुजलेषुतैःकृत्वाद्विजोत्तमैःकर्तृभिरभिषिच्यअभिषेकंकारयित्वा १४ हुत्वाहावयित्वा (महागुणंसोपस्करम्) १५ गावःगाश्चप्रादात्।
अन्वयुंजतआशिषोयुयुजुः १६ (युक्ताजितेंद्रियमाणाअतः) तास्तथैवबभूवुरित्यर्थः। (यतस्ताआशिषोविफलानभविष्यंति) १७

श्लोकाः

औत्थानिकौत्सुक्यमनामनस्विनीसमागतान्पूजयतीव्रजौकसः ॥ नैवाशृणोद्वैरुदितंसुतस्यसारुदन्स्तनार्थीचरणावुदक्षिपत् ६ अधःशयानस्यशिशोरनो
ल्पकप्रवालमृद्वंघ्रिहतंव्यवर्तत ॥ विध्वस्तनानारसकुप्यभाजनंव्यत्यस्तचक्राक्षविभिन्नकूबरम् ७ दृष्ट्वायशोदाप्रमुखाव्रजस्त्रियऔत्थानिकेकर्मणियाःस
मागताः ॥ नंदादयश्चाद्भुतदर्शनाकुलाःकथंस्वयंवैशकटंविपर्यगात् ८ ऊचुरव्यवसितमतीन्गोपान्गोपीश्चबालकाः ॥ रुदतानेनपादेनाक्षिप्तमेतन्नसंश ६/१७
यः ९ नतेश्रद्दधिरेगोपाबालभाषितमित्युत ॥ अप्रमेयंबलंतस्यबालकस्यनतेविदुः १० रुदंतंसुतमादाययशोदाग्रहशंकिता ॥ कृतस्वस्त्ययनंविप्रैःसू
क्तैःस्तनमपाययत् ११ पूर्ववत्स्थापितंगोपैर्बलिभिःसपरिच्छदम् ॥ विप्राहुत्वाऽर्चयांचक्रुर्दध्यक्षतकुशांबुभिः १२ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः
॥ नतेषांसत्यशीलानामाशिषोविफलाःकृताः १३ इतिबालकमादायसामर्ग्यजुरुपाकृतैः॥ जलैःपवित्रौषधिभिरभिषिच्यद्विजोत्तमैः १४ वाचयित्वास्वस्त्य
यनंनंदगोपःसमाहितः॥ हुत्वाचाग्निंद्विजातिभ्यःप्रादादन्नंमहागुणम् १५ गावःसर्वगुणोपेतावासःस्रग्रुक्ममालिनीः ॥ आत्मजाभ्युदयार्थायप्रादात्तेचान्व
युंजत ॥ १६ विप्रामंत्रविदोयुक्तास्तैर्याःप्रोक्तास्तथाशिषः ॥ तानिष्फलाभविष्यंतिनकदाचिदपिपिस्फुटम् १७

चूर्णिका
ततःसातस्मिन्उत्सवेप्राप्तान्व्रजौकसःपूजयतीसतीसुतरोदनंन अशृणोत् ततःस्तनार्थीकृष्णःपादौऊर्ध्वंचालितवान् ६ ततःतदधःशयानस्यशिशोःपादाहतंविध्वस्तनानारस
वत् कांस्यादिभाजनंअनःविपरीतंपपात ७ ततःयशोदादयःनंदादयश्चतदद्भुतंदृष्ट्वाकथंविपर्यगादित्यूचुः ८ ततःबालकाःगोपगोपीःअनेनरुदताइदंक्षिप्तमित्याहुः ९ तत्बालभा
षितंगोपादयःनश्रद्दधिरे १० ततः यशोदारुदंतंशिशुंआदायग्रहशंकिताभूत्वाविप्रैः कृतस्वस्त्ययनंपुत्रंस्तनमपाययत् ११ ततः तत्रगोपैः अनः पूर्ववत्स्थापितम् ततोविप्राः ग्रहा ॥३१॥
दिहोमंकृत्वाअनःपूजयामासुः ११ किंच ये असूयादिभिर्वर्जिताःतेषांआशिषःव्यर्थानस्युरित्यभिप्रेत्यसुतंआदाय १२ अभिमंत्रितजलैःकृत्वाविप्रैःअभिषेचयित्वा १३
१४ स्वस्त्ययनंवाचयित्वानंदःअग्निंहुत्वाविप्रेभ्यः अन्नंगाश्चपुत्रोदयार्थंप्रादात् ततः ते आशिषोयुयुजुः १५ १६ ताश्चनिष्फलानबभूवुः १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उत्क्षिप्यमृदुपादेनशकटंव्योम्निलीलया ॥ तृणावर्तपदापीड्यभुव्यपातयदर्भकः । आरोहमुत्संगम् १८ तृणावर्तात्स्वमृत्युपरिहारायकृष्णेनैवात्मनउत्संगादुत्तारायकृतंभारमजानतीउत्पातशंकयामहापुरुषमादध्यौ । श्रीकृष्णोदरवर्तिनांजगतांभारेणपीडितावि‍स्मिताचसती । यद्वा जगतांमध्येकर्मसुआसबभूव(गृहकर्मकर्तुंप्रवृत्तेत्यर्थः) तस्मान्नतुजगदुदरंतंवेदेति १९ २० ईरयन्नुनिनादयन्नित्यर्थः २१ (स्वच्छंसुतं) यतःयत्रन्यस्तवतीतस्मिन्स्थानेतंनापश्यत् २२ (शर्कराभिःरजोभिः) २३ खरपवनचक्रात्पांसुवर्षेसाति (अविलक्ष्यअदृष्ट्वा) २४ उपारतःपांसुवर्षस्यवेगोयस्मिन्तथाभूतेपवनेसातितत्रतस्यारुदितमनुनिशम्यगोप्योरुरुदुः २५ वात्याचक्रवातःतद्रूपधरःकृष्णंहरन्शांतरयःकथंचिन्नभोगतःततःपरंगंतुंनाशक्नोदित्यर्थः (भूरिभारंहारिंबिभर्तीति) २६ गुरुमत्तयाऽतिगौरवेणतंतथाअश्मंतं (अश्मेवाचरतिअश्मतितथाभूतं) पर्वतप्रायंमन्यमानस्तेनैवआत्मनो गलेधृतःगृहीतस्तंत्यक्तुमिच्छन्नपिनाशक्नोदित्यर्थः २७ (व्यसुर्गतप्राणः) २८ २९

श्लोकाः १८—२९

एकदाऽऽरोहमारूढंलालयंतीसुतंसती ॥ गरिमाणंशिशोर्वोढुंनसेहेगिरिकूटवत् १८ भूमौनिधायतंगोपीविस्मिताभारपीडिता ॥ महापुरुषमादध्यौ
जगतामासकर्मसु १९ दैत्योनाम्नातृणावर्तःकंसभृत्यःप्रणोदितः ॥ चक्रवातस्वरूपेणजहारासीनमर्भकम् २० गोकुलंसर्वमावृण्वन्मुष्णंश्चक्षूंषिरेणुभिः
ईरयन्सुमहाघोरशब्देनप्रदिशोदिशः २१ मुहूर्तमभवद्गोष्ठंरजसातमसावृतम् ॥ सुतंयशोदानापश्यत्स्वयंन्यस्तवतीयतः २२ नापश्यत्कश्चनात्मानंपरं
चापिविमोहितः ॥ तृणावर्तनिसृष्टाभिःशर्कराभिरुपद्रुतः २३ इतिखरपवनचक्रपांसुवर्षेसुतपदवीमबलाऽविलक्ष्यमाता ॥ अतिकरुणमनुस्मरंत्यशोचद्भु
विपतितामृतवत्सकायथागौः २४ रुदितमनुनिशम्यतत्रगोप्योभृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ॥ रुरुदुरनुपलभ्यनंदसूनुंपवनउपारतपांसुवर्षवेगे २५
तृणावर्तःशांतरयोवात्यारूपधरोहरन् ॥ कृष्णंनभोगतोगंतुंनाशक्नोद्भूरिभारभृत् २६ तमश्मंतंमन्यमानआत्मनोगुरुमत्तया ॥ गलेगृहीतउत्स्रष्टुंनाशक्नो
दद्भुतार्भकम् २७ गलग्रहणनिश्चेष्टोदैत्योनिर्गतलोचनः ॥ अव्यक्तरावोन्यपतत्सहबालोव्यसुर्व्रजे २८ तमंतरिक्षात्पतितंशिलायांविशीर्णसर्वावयवंकरा
लम् ॥ पुरंयथारुद्रशरेणविद्धंस्त्रियोरुदंत्योददृशुःसमेताः २९

चूर्णिका

अथएकदाउत्संगं आरूढं सुतंलालयंतीसा।शिशोःभारंवोढुंनसेहे १८ ततः साविस्मितासती तंभुविस्थाप्यमहापुरुषंदध्यौ १९ गृहकृत्ये आसचतावत्तृणावर्तनामा दैत्यःकंसप्रेरितः सन्चक्रवातरूपेणएत्यव्रजंरेणुभिःआवृण्वन्दिशःघोरशब्देन नादयन् आसीनंशिशुंजहार २० २१ ततो मुहूर्तं गोष्ठंरजस्तमोभ्यांव्याप्तम् ततो यशोदासुतंनापश्यत् २२ तथाकोपिजनः मोहितः सन् आत्मानंपरंचनापश्यत् २३ एवंपवनचक्रात्पांसुवर्षेसातिमातासुतमार्गमज्ञात्वादीनमृतवत्सकागौरिवभुविनिपत्यअशोचत् २४ ततः यशोदारोदनंश्रुत्वाअश्रुपूर्णमुख्यःगोप्यःतदनुरुरुदुः २५ ततः सः दैत्यः कृष्णंहरन् कृच्छ्रात्नभोगतोऽपिततःपरंगंतुंनाशक्नोत् २६ ततः सः शिशुंपर्वतप्रायंमन्यमानः तेनगलेधृतः सन्उत्स्रष्टुंनाशक्नोत् २७ किंच गलग्रहणनिश्चेष्टोदैत्यःनिर्गतलोचनःव्यसुःसन्सहबालः व्रजे अपतत् २८ अंतरिक्षात् शिलायांपतितंअतएवविशीर्णावयवंतंरुदंत्यः स्त्रियः दृष्ट्वा २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तस्योरसिलंबमानंकृष्णमादायमात्रेप्रतिहृत्यसमर्प्यविस्मिताश्चबभूवुरिति । विहायसागगनमार्गेणपुरुषादेनदैत्येननीतंतथापिमृत्युमुखात्प्रमुक्तं । पुनर्लब्धामोदंप्रापुरिति ३० परस्परंहर्षकथामाहुः
अहोबतेति । निवृत्तिंगमितोमृत्युंप्रापितोपि । कोत्रविस्मयोयुज्यतएवैतदितितेष्वेवकेचिदाहुःहिंस्रइति ३१ नःअस्माभिःचीर्णंकृतंपूर्तं वापीकूपतडागादिनिर्माणं । इष्टंपंचयज्ञाग्निहोत्रादि । दत्तंदानं ।
यचस्मात्तपआदेः । प्रणयन्हर्षयन् ३२ ३३ ३४ तृणावर्तागमेदृष्टगौरवाशंकिनींप्रसूं । बोधयन्दर्शयामासजृंभमाणोमुखेजगत् । पीतप्रायस्यपीतप्रायःस्तनोयेनतस्य (जृंभतोजृंभमाणस्यमुखेइतिशेषः
इदंविश्वं) ३५ (तदेवाह) नगान्गिरीन्तेषांदुहितॄर्नदीः ३६ ३७ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांतृणावर्तमोक्षोविश्वरूपदर्शनंनामसप्तमोध्यायः ७ ॥ ॥ ७ ॥ ॥ अष्टमेनामकर्म
स्वबालक्रीडाकुतूहले । मृद्भक्षणाभियोगेचविश्वरूपंनिरूप्यते ॥ १ ॥ विश्वरूपादिबालस्यनिशम्याशंकिनःपितुः । नामकृद्गर्गवाक्येननिजंतत्त्वमसूसुचत् ॥ २ ॥ १ (तंगर्गंदृष्ट्वानंदः) २ ३

॥३३॥ श्लोकाः ३०/३

आदायमात्रेप्रतिहृत्यविस्मिताःकृष्णंचतस्योरसिलंबमानम् ॥ तंस्वस्तिमंतंपुरुषादनीतंविहायसामृत्युमुखात्प्रमुक्तम् ॥ गोप्यश्चगोपाःकिलनंदमुख्याल
ब्धाशिषःप्रापुरतीवमोदम् ३० अहोबतात्यद्भुतमेषरक्षसाबालोनिवृत्तिंगमितोभ्यगात्पुनः ॥ हिंस्रःस्वपापेनविहिंसितःखलःसाधुःसमत्वेनभयाद्वि
मुच्यते ३१ किंनस्तपश्चीर्णमधोक्षजार्चनंपूर्तेष्टदत्तमुतभूतसौहृदम् ॥ यत्संपरेतःपुनरेवबालकोदिष्ट्यास्वबंधून्प्रणयन्नुपस्थितः ३२ दृष्ट्वाद्भुतानिबहुशो
नंदगोपोबृहद्वने ॥ वसुदेववचोभूयश्चिंतयामासविस्मितः ३३ एकदाऽर्भकमादायस्वांकमारोप्यभामिनी ॥ प्रस्नुतंपाययामासस्तनंस्नेहपरिप्लुता ३४ पी
तप्रायस्यजननीसातस्यरुचिरस्मितम् ॥ मुखंलालयतीराजन्जृंभतोददृशेइदम् ३५ खंरोदसीज्योतिरनीकमाशाःसूर्येंदुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगां
स्तद्दुहितॄर्वनानिभूतानियानिस्थिरजंगमानि ३६ सावीक्ष्यविश्वंसहसाराजन्संजातवेपथुः ॥ संमील्यमृगशावाक्षीनेत्रेआसीत्सुविस्मिता ३७ ॥ इतिश्री
भागवतेमहापुराणेदशमस्कंधेतृणावर्तमोक्षोविश्वरूपदर्शनंनामसप्तमोध्यायः ७ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ गर्गःपुरोहितोराजन्यदूनां
सुमहातपाः ॥ व्रजंजगामनंदस्यवसुदेवप्रचोदितः ॥ १ तंदृष्ट्वापरमःप्रीतःप्रत्युत्थायकृतांजलिः ॥ आनर्चाधोक्षजधियाप्रणिपातपुरःसरम् २ सूपविष्टं
कृतातिथ्यंगिरासूनृतयामुनिम् ॥ नंदयित्वाऽब्रवीद्ब्रह्मन्पूर्णस्यकरवामकिम् ३

चूर्णिका

तदुरसिलंबमानंकृष्णंआदायमात्रेसमर्प्यगोपगोप्यःलब्धमनोरथाःभूत्वामुदंआपुःआहुश्च ३० अहोएषःबालःदैत्येनमृत्युंप्रापितोपिपुनःप्राप्तः ३१ इत्यद्भुतम् सपापस्तुस्व
पापेनैवमृतः किंच अस्माभिः तपअर्चनादिकिंचिचीर्णं यतःपरेतोपिबालः पुनःप्राप्तः ३२ एतद्दिष्ट्या एवंनंदःअद्भुतानिदृष्ट्वा वसुदेववचःसत्यमितिमानयामास ३३ ॥३३॥
अथैकदायशोदासुतंस्वांकमारोप्यस्तनंपाययामास ३४ ततः सापीतप्रायस्तनस्यतस्यजृंभतः सतः मुखंलालयंतीसतीजगत्इदंददृशे ३५ तदाह खंरोदसीज्योतिश्चक्रंसू
र्येन्दुवह्निश्वसनांबुधीश्चद्वीपगिरिनदीःवनानिस्थिरजंगमानि ३६ सावीक्ष्यविश्वंसहसाराजन्संजातवेपथुः संमील्यमृगशावाक्षीनेत्रेआसीत्सुविस्मिता ३७ ॥ ॥ इतिदशमे
सप्तमः ७ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ गर्गः पुरोहितो राजन्यदूनांसुमहातपाः व्रजंजगामनंदस्यवसुदेवप्रचोदितः १ तंदृष्ट्वानंदः उत्थायकृतांजलिःसन्ईं
शदृष्ट्यातंआनर्च २ एवंकृतातिथ्यंमुनिंसःअब्रवीत् हेब्रह्मन्पूर्णस्यतेकिंकरवाम ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पूर्णश्चेत्कथंधनिनांगृहमागतस्तत्राह । महद्विचलनमिति । महतांस्वाश्रमादन्यत्रविचलनंनस्वार्थकिंतुगृहिणांमंगलाय । ननुतर्हितएवमहद्दर्शनार्थकिमितिन गच्छंतितत्राह दीनचेतसांकृपणानांक्षणमपिगृहं त्यक्तुमशक्नुवतामित्यर्थः ४ त्वयाबालयोर्नामकरणादिकरणीयमितिवक्तुंतस्यज्ञानातिशयमाह । ज्योतिषामयनमिति । यदतींद्रियज्ञानसाधनंज्योतिषामयनंतत्प्रतिपादकंज्योतिःशास्त्रमित्यर्थः । तत्साक्षाद्भवताप्रणीतं । येनान्योपिपुमान्परावरंपरंकारणंपूर्वजन्मकृतंकर्म । अवरंकार्यंअस्मिज्जन्मनिभाविफलंतद्वेद । उक्तंचजातके । "यदुपचितमन्यजन्मनिशुभाशुभंतस्यकर्मणःप्राप्तिं । व्यंजयतिशास्त्रमेतत्तम सिद्रव्याणिदीपइव" ति ५ विवक्षितमाह त्वंहीति (ब्रह्मविदांवैदिकानां) दैवज्ञोमंत्रविच्चत्वंअतोनामकरणादिसंस्कारान्कर्तुमर्हसीत्यर्थः नन्वेतद्गुरुणाकरणीयमितिचेत्तत्राह । नृणामिति ६ अत्युत्साहितं नंदंप्रतिगुप्तमेतत्कार्यमित्यभिप्रायेणप्रत्याचक्षाणइवाह । यदूनामिति । भवतुतथापित्वमत्रागतइतिकोविचारइत्यतआह । ख्यातश्चेति ततः । किंअतआहसुतमिति । कंसोमन्यतेमन्येतकल्पयेदित्यर्थः ७ ननुयदुकुमारइतिकथंचिज्जानातु । तत्रवसुदेवस्यसुतस्तत्रापिदेवक्यांजातइतिकुतोजानीयात्तत्राह पापमतिरित्यादि ८ किंमयाहतयामंदेत्यादिदेवकीकन्यावचःश्रुत्वादेवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हतीतिनित्यंसंचिंतयन्सामान्येनक्वचिदस्तीतिज्ञात्वायुवयोश्चसख्यंसंचिंतयन्त्वद्गृहेभवेदितिसंभावयन्मत्संस्कारलिंगेनचआगताआशंकायस्यसःअपियदिहंताहनिष्यतितर्हितत्तदानो(ऽस्माकं)महानन्नयःस्यादिति ९ द्विजातिसंस्कारांद्विजातनामवश्यकर्तव्यंसंस्कारमात्रंकेवलंस्वस्तिवाचनपूर्वकंकुर्विति १० ११ यदूनामपृथग्भावात्कुतश्चिद्धेतोर्विप्रतिपद्यमानानांयदूनामपृथक्भावोभावनंतस्मात् । अन्योन्यशिक्षयासर्वैकमत्यकरणादित्यर्थः । सम्यक्कर्षतिएकीकरोतीतितंसंकर्षणमप्युशंतिइच्छंतिवक्ष्यंतीत्यर्थः । गर्भसंकर्षणंतुनप्रकाशयति(स्म) १२

श्लोकाः $\frac{४}{१२}$

महद्विचलनंनृणांगृहिणांदीनचेतसाम् ॥ निश्रेयसायभगवन्कल्पतेनान्यथाक्वचित् ४ ज्योतिषामयनंसाक्षाद्यत्तज्ज्ञानमतींद्रियम् ॥ प्रणीतंभवतायेन पुमान्वेदपरावरम् ५ त्वंहिब्रह्मविदांश्रेष्ठःसंस्कारान्कर्तुमर्हसि ॥ बालयोरनयोर्नृणांजन्मनाब्राह्मणोगुरुः ६ ॥ ॥ गर्गउवाच ॥ यदूनामहमाचार्यःख्यातश्चभुविसर्वतः ॥ सुतंमयासंस्कृतंतेमन्यतेदेवकीसुतम् ७ कंसःपापमतिःसख्यंतववचानकदुंदुभेः ॥ देवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हति ८ इतिसंचिंतयञ्छ्रुत्वादेवकीदारिकावचः ॥ अपिहंतागताशंकस्तर्हितन्नोऽनयोभवेत् ९ ॥ नंदउवाच ॥ अलक्षितोऽस्मिन्रहसिमामकैरपिगोव्रजे ॥ कुरुद्विजातिसंस्कारंस्वस्तिवाचनपूर्वकम् ॥ १० ॥ श्रीशुकउवाच ॥ एवंसंप्रार्थितोविप्रःस्वचिकीर्षितमेवतत् ॥ चकारनामकरणंगूढोरहसिबालयोः ११ अयंहि रोहिणीपुत्रोरमयन्सुहृदोगुणैः ॥ आख्यास्यतेरामइतिबलाधिक्याद्बलंविदुः ॥ यदूनामपृथग्भावात्संकर्षणमुशंत्युत १२

चूर्णिका

किंच त्वादृशांमहतांअन्यत्रगमनंनस्वार्थम् किंतुगृहिमंगलार्थम् ४ अपिच त्वयाअतींद्रियज्ञानसाधनंज्योतिः शास्त्रंकृतंयेनपुमान्भूतभाविफलंवेत्ति ५ किंच त्वंहिब्रह्मविदांश्रेष्ठोऽसिअतः मेसुतयोः नामकर्मादिसंस्कारान्कर्तुमर्हसि ६ ॥ गर्गउवाच ॥ हेनंदअहंयदूनांमाचार्यः ख्यातोस्मि मयासंस्कृतंते पुत्रंकंसः देवकीसुतमितिमन्येत ७ किंच पापधीः कंसस्तुकन्यागिरःश्रुत्वादेवक्याः अष्टमोगर्भः स्त्रीभवितुंनार्हति ८ इतिचिंतयन्युवयोः सख्यंचज्ञात्वाअत्रागत्ययदिहानिष्यतितर्हिनः अनयः स्यात् ९ ॥ नंदउवाच ॥ हे गर्गत्वंएकांते मामकैरपिअलक्षितः सन् स्वस्तिवाचनपूर्वकं अनयोः संस्कारंकुरु १० ॥ श्रीशुकउवाच ॥ एवं प्रार्थितः गर्गः बालयोः नामकरणं रहसिचकार ११ ॥ गर्गउवाच ॥ हेनंदअयंरोहिणीपुत्रः रमयन् सुहृदोगुणैः अख्यास्यतेरामइतिबलाधिक्याद्बलंविदुः यदूनामपृथग्भावात्संकर्षणमुशंत्युत १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(जातकमाह) अस्यतवपुत्रस्य । अतःकृष्णइत्येकंनामभविष्यति १३ प्रागयमितितवायमात्मजःप्रागितिसामान्योक्त्याऋषिरयंजन्मांतरगतंनामकथयतीतिनंदोमन्यतेस्म । अतएनंवासुदेवइतिसंप्रचक्ष
तइति १४ गुणानुरूपाणिईश्वरःसर्वज्ञइत्यादीनि । कर्मानुरूपाणिगोपतिर्गोवर्धनोद्धरणइत्यादीनि । तानिसर्वाण्यहमपिनोवेद । जनाअपिनोविदुरिति (अथवाबहूनिसंतीत्येववेदाहंनतुकर्तीति । अत्रत्यजना
स्तुतदपिनोविदुरिति) १५ जातकफलमाह । एषइति । आधास्यत्आधास्यति १६ (दुर्गाणिसंकटानि । अंजोऽनायासेन) अनेनरक्ष्यमाणाःसमेधिताश्चदस्यून्विजिग्युरिति १७ (विष्णुःपक्षोयेषांतान्) १८
(हेनंदअनुभावेनशक्त्या) १९ (नंद) इत्यात्मानंप्रतिसमादिश्यआत्मानंकृष्णंवा । गर्गेगतेसतिआशिषांआशीर्भिः २० बालक्रीडाचमत्कारैःकृष्णोरामेणसंयुतः । परमानंदमाधत्तव्रजेनंदयशोदयोः ॥ पूर्णत्वमेवद
र्शयन्नाह कालेनेति (अथाल्पेनकालेनव्रजतासतारिंखमाणौगच्छंतौचिक्रीडतुः) २१ अनुकृष्यपुनःपुनराकृष्यसरीसृपंतौअतिशयेनचलंतौ । कथम् । घोषाःकटिपादभूषणकिंकिण्यःतेषांप्रघोषेणनिनादे
नरुचिरंयथातथा । तेषांघोषाणांनादेनहृष्टंमनोययोस्तौ । लोकमितस्ततोगच्छंतंजनंअनुसृत्यत्रिचतुराणिपदान्यनुगम्यमुग्धवत्प्रभीतवन्मात्रोरंतिसमीपेउपेयतुरुपजग्मतुः २२ तदाचतन्मातरौनिजसुतौ
दोर्भ्यामुपगुह्यप्रमोदंययतुः । कथंभूते । घृणयाकृपयास्नुवंत्यौपयःपूर्णपयोधरेसत्यौ । (कथंभूतौ) पंकेनांगरागेणचरुचिरौ । मुग्धंमंदंस्मितंयस्मिन्अल्पादशनाश्चयस्मिन्तच्चतच्च । (एतादृशंमुखंनिरीक्ष्य) २३

॥३५॥

आसन्वर्णास्त्रयोह्यस्यगृह्णतोनुयुगंतनूः ॥ शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः १३ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः ॥ वासुदेवइतिश्रीमानभि
ज्ञाःसंप्रचक्षते १४ बहूनिसंतिनामानिरूपाणिचसुतस्यते ॥ गुणकर्मानुरूपाणितान्यहंवेदनोजनाः १५ एषवःश्रेयआधास्यद्गोपगोकुलनंदनः ॥ अनेन
सर्वदुर्गाणियूयमंजस्तरिष्यथ १६ पुरानेनव्रजपतेसाधवोदस्युपीडिताः ॥ अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः १७ यएतस्मिन्महाभागाःप्रीतिंकुर्वं
तिमानवाः ॥ नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः १८ तस्मान्नंदात्मजोयंतेनारायणसमोगुणैः ॥ श्रियाकीर्त्यानुभावेनगोपायस्वसमाहितः १९
इत्यात्मानंसमादिश्यगर्गेचस्वगृहंगते ॥ नंदःप्रमुदितोमेनेआत्मानंपूर्णमाशिषाम् २० कालेनव्रजताऽल्पेनगोकुलेरामकेशवौ ॥ जानुभ्यांसहपाणिभ्यांरिं
खमाणौविजहतुः २१ तावंघ्रियुग्ममनुकृष्यसरीसृपंतौघोषप्रघोषरुचिरंव्रजकर्दमेषु ॥ तन्नादहृष्टमनसावनुसृत्यलोकंमुग्धप्रभीतवदुपेयतुरंतिमात्रोः २२
तन्मातरौनिजसुतौघृणयास्नुवंत्यौपंकांगरागरुचिरावुपगृह्यदोर्भ्याम् ॥ दत्त्वास्तनंप्रपिबतोःस्ममुखंनिरीक्ष्यमुग्धास्मिताल्पदशनंययतुःप्रमोदम् २३

श्लोकाः १३/२३

चूर्णिका

किंच अस्यान्यपुत्रस्यतुप्रतियुगंतनूः गृह्णतः शुक्लः रक्तः पीतइतित्रयोवर्णा आसन् इदानींकृष्णतांगतः अतः कृष्णइत्येकंनामस्यात् १३ किंच अयंतवात्मजः प्राक्वसु
देवस्यक्वचिज्जातः अतः वासुदेवइतिवदंति १४ किंच अस्य गुणकर्मानुरूपनामानिबहूनिसंति १५ तान्यहंवेदनोजनाः किंचायंकृष्णः वः श्रेयः करिष्यति अनेनचसर्व
दुर्गाणियूयं तरिष्यथ अपिच पुराअराजकेचोरपीडिताःसाधवःअनेनरक्ष्यमाणाःसंतःदस्यून्जिग्युः १७ तथाचये अस्मिन् प्रीतिंकुर्वंतितान्शत्रवः नाभिभवंति विष्णु
पक्षान्दैत्याइवेति १८ तस्मान्नंदात्मजोऽयंतेनारायणसमोगुणैः अतः एनं पालयस्व १९ एवंनंदं आदिश्यगर्गेगृहंगतेसति नंदःप्रमुदितः सन्पूर्णाशिषं आत्मानंमेने २०
ततः स्वल्पकालेनव्रजेरामकेशवौजानुभ्यांपाणिभ्यांरिंगमाणौसंतौ विजह्रतुः २१ ततः तौअंघ्रियुग्मंआकृष्यव्रजकर्दमेषु चलंतौ चरणयोः भूषणशब्देनहृष्टमनसौसंतौ
मुग्धप्रभीतवत् मात्रोः अंतिकं प्रापतुः २२ तदामातरौतौसुतौदोर्भ्यांउपगुह्यमुखेस्तनंदत्वातन्मुखंवीक्ष्यमुदंययतुः २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यर्हिअंगनानांदर्शनीयाकुमारलीलाययोःतथाभूतौजातौ । तदांतर्व्रजेव्रजमध्ये । तदबलाव्रजांगनास्तौप्रेक्षंत्यःप्रेक्षमाणाविस्मृतगृहकृत्याहसंत्योजहृषुःहृष्टाबभूवुः।कथंभूतौ। ताभ्यांप्रगृहीतानिपुच्छानियेषांतैर्वत्सैरितस्ततोऽनुकृष्यमाणौ २४ अतिचपलौतौशृंग्यादिभ्योनिषेद्धुंगृहोचितानिकर्माणिचकर्तुंयत्रयदातज्जनन्यौनशेकातेतदालंमनसोऽनवस्थामापतुरितिगृहसौख्यस्यपराकाष्ठादर्शिता २५ (अघृष्टजानुभिर्जानुघर्षणंविनेत्यर्थःपद्भिरेवविचेलतुः) २६ २७ (कौमारेवयसियचापलंतत्शृण्वंत्याःसत्याः) २८ कृष्णचापलचौर्याणिसहैवाखिलसद्मतः । प्रजल्पंत्यःसमागत्यगोप्योगोप्यैमुदंददुः ॥ असमयेऽदोहकाले । क्रोशेसंजातोहासोयस्यसः (गोपीनांक्रोशेसतिहसत्ययमुचैरित्यर्थः) स्तेयंचौर्यार्जितंनतुदत्तं । तत्रापिस्वादुनेरतत् । दधिपयश्चात्ति । किंच (स्वयंकल्पितैःस्तेययोगैश्चौर्योपायैः) भोक्ष्यन्मर्कान्मर्कटान्प्रतिविभज्यददाति । तेषांमध्येतृप्तत्वेनकोपिनात्तिचेत्तर्हिभांडंभिनत्ति । क्वचित्द्रव्यस्यालाभेसतिसःगृहायधक्ष्यामीतिकुपितोयातियद्वासगृहाःगृहिणस्तेभ्यःकुपितःतर्षांतोकान् (बालान्) पर्यंक.दिषुसुप्तानुपक्रोश्यरोदयित्वायातीति २९ कल्पितैःस्तेययोगैरित्युक्तंतत्प्रपंचयति । हस्ताग्राह्यइति । तुंगशिक्यस्थभांडेषुअंतर्निहितेदध्यादौवयुनंज्ञानंयस्यसः । छिद्रंरचयति । तद्वित्छिद्ररचनादिवित् । ध्वांतयुक्तेगृहेस्वांगमेवार्थप्रदीपंरचयति । विशेषतोधृतमणिगणं । यर्हियस्मिन्काले ३०

॥३६॥

श्लोकाः २४/३०

यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजेतदबलाःप्रगृहीतपुच्छैः ॥ वत्सैरितस्ततउभावनुकृष्णमाणौप्रेक्षंत्यउज्झितगृहाजहृषुर्हसंत्यः २४ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यःक्रीडापरावतिचलौस्वसुतौनिषेद्धुम् ॥ गृह्याणिकर्तुमपियत्रनतज्जनन्यौशेकातआपतुरलंमनसोऽनवस्थाम् २५ कालेनाल्पेनराजर्षेरामःकृष्णश्चगोकुले ॥ अघृष्टजानुभिःपद्भिर्विचक्रमतुरंजसा २६ ततस्तुभगवान्कृष्णोवयस्यैर्व्रजबालकैः ॥ सहरामोव्रजस्त्रीणांचिक्रीडेजनयन्मुदम् २७ कृष्णस्यगोप्योरुचिरंवीक्ष्यकौमारचापलम् ॥ शृण्वंत्याःकिलतन्मातुरितिहोचुःसमागताः २८ वत्सान्मुंचन्क्वचिदसमयेक्रोशसंजातहासःस्तेयंस्वाद्वत्त्यथदधिपयःकल्पितैःस्तेययोगैः ॥ मर्कान्भोक्ष्यन्विभजतिसचेन्नात्तिभांडंभिनत्तिद्रव्यालाभेसगृहकुपितोयात्युपक्रोश्यतोकान् २९ हस्ताग्राह्येरचयतिविधिंपीठकोलूखलाद्यैश्छिद्रंह्यंतर्निहितवयुनःशिक्यभांडेषुतद्वित्॥ध्वांतागारेधृतमणिगणंस्वांगमर्थप्रदीपंकालेगोप्योयर्हिगृहकृत्येषुसुव्यग्रचित्ताः३०

चूर्णिका

यदास्त्रीदर्शनीयकुमारलीलौधृतपुच्छैःवत्सैःइतस्ततः आकृष्यमाणौतौ दृष्ट्वागोप्यः हर्षिताः आसन् २४ किंच शृंग्यग्निभ्यः चपलौसुतौनिषेद्धुंतज्जनन्यौनशेकाते तदामनसः अनवस्थांआपतुः २५ तावत्अल्पकालेनरामकृष्णौ अघृष्टजानुभिः पद्भिः विचक्रमतुः २६ ततःकृष्णः व्रजबालकैः रामेणसहस्त्रीणांमुदंजनयन्चिक्रीडे २७ तदागोप्यःएवंकृष्णस्यकौमारचापलंवीक्ष्यतन्मातुः शृण्वंत्याःएत्यऊचुः २८ अयंकृष्णाः अकालेवत्सान् मुंचतिकल्पितैःस्तेयोपायैःदधिपयःअत्तिमर्कांश्चददातितत्रकोऽपिनात्तिचेत्भांडंभिनत्ति द्रव्यालाभेसतिगृहान्धक्ष्यामीतिक्रुद्धः सन्बालान्रोदयित्वायाति २९ तथाहस्ताग्राह्ये सातिपीठकादिभिःविधिंप्रकल्प्यशिक्यभांडेषुछिद्रंरचयति ३०

॥३६॥

१' सम्मताः ' इतिवा पाठः ।

CC-0. In Public Domain. Digitization by eGangotri

टीका

रेरेचोरइत्यादिकुष्टःसन् उशतिजल्पतित्वमेवचोरःअहंगृहस्वामीत्यादीनिधाष्टर्यानिप्रागल्भ्यानि । अथवाउशतिभोकमनीयेयशोदे यद्वा उशतिवास्तौस्वांचितेगृहेमेहनीदानिपुरीषोत्सर्गादीनिकुरुतेएवंस्ते
योपायैर्विरचिताकृतिःकर्मयेनसत्वत्समीपेसुप्रतीकःसाधुरिवास्ते । (तच्छुत्वा) सभयेनयनेयस्मिंस्तच्चतच्छ्रीयुक्तंमुखंचतदालोकिनीभिःस्त्रीभिरित्थंव्याख्यातार्थंप्रख्यापिततत्तत्कर्मफलापि (यशोदाताद्दशं
सुतमुखमवलोक्यउपालब्धुं) आक्षेप्तुंनैच्छत् ३१ कदाचिदपराधांतरेउपालभततदातुमहदाश्चर्यमभूदितिकथयन्नाह एकदेति ३२ उपालभ्यनिर्भर्त्स्यभयेनसंभ्रांतप्रेक्षणेचपलनिरीक्षणेअक्षिणीयस्यतम् ३३
अदांतात्मन्चपलगात्र रहएकांते ३४ नाहंभक्षितवानिति । नहिबाह्यंकिंचिन्मयाभक्ष्यतेमत्कुक्षावादावेवसर्वमस्तीतिभावः । समक्षंप्रत्यक्षम् ३५ व्यादेहिमुखंप्रसारयेति । व्यादत्तप्रसारितवान् ३६ तत्र
तस्मिन्मुखेविश्वंददृशेददर्शतत्प्रपंचयति जगत्जंगमंस्थास्नुस्थावरंखंअंतरिक्षलोकंसाद्रिद्वीपाब्धिभूगोलंपर्वतद्वीपसमुद्रसहितंभूगोलंभूलोकं । वायुःप्रवहःअग्निर्वैद्युतःइंदुश्चतारकाश्चतत्सहितं ३७ ज्योति
श्चक्रंस्वर्लोकं वैकारिकाणिदेवाः । मनइतिवैकारिकशब्देनगृहीतमपिदेववैलक्षण्यात्पुनरुक्तं । इंद्रियाणिचतैजसानि । मात्रास्तामसाःशब्दादयः ३८ एवमेतद्विचित्रंविश्वंसहएकदैववीक्ष्य । विचि
त्रतामाह । जीवश्चगुणक्षोभकः कालश्चपरिणामहेतुः स्वभावश्चजन्महेतुः कर्मचतत्संस्कारभूतआशयश्च एतैर्लिंगानांचराचरशरीराणांभेदोयस्मिंस्तत् । तत्रव्रजंचसहात्मानंस्वसहितंक्वचिद्वीक्ष्यसूनोस्तनौ
अल्पेविदारितेआस्ये शंकामवाप ३९

॥३७॥

श्लोकाः ३१—३९

एवंधाष्टर्यान्युशतिकुरुतेमेहनादीनिवास्तौस्तेयोपायैर्विरचितकृतिःसुप्रतीकोयथास्ते ॥ इत्थंस्त्रीभिःसभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्थाप्रहसि
तमुखीनह्युपालब्धुमैच्छत् ३१ एकदाक्रीडमानास्तेरामाद्यागोपदारकाः ॥ कृष्णोमृदंभक्षितवानितिमात्रेन्यवेदयन् ३२ सागृहीत्वाकरेकृष्णमुपा
लभ्यहितैषिणी ॥ यशोदाभयसंभ्रांतप्रेक्षणाक्षमभाषत ३३ कस्मान्मृदमदांतात्मन्भवान्भक्षितवान्रहः ॥ वदंतितावकाह्येतेकुमारास्तेऽग्रजोप्ययम्
३४ नाहंभक्षितवानंबसर्वेमिथ्याभिशंसिनः ॥ यदिसत्यगिरस्तर्हिसमक्षंपश्यमेमुखम् ३५ यद्येवंतर्हिव्यादेहीत्युक्तःसभगवान्हरिः ॥ व्यादत्ताव्या
हतैश्वर्यःक्रीडामनुजबालकः ३६ सातत्रददृशेविश्वंजगत्स्थास्नुचखंदिशः ॥ साद्रिद्वीपाब्धिभूगोलंसवाय्वग्नींदुतारकम् ३७ ज्योतिश्चक्रंजलंतेजोन
भस्वान्वियदेवच ॥ वैकारिकाणींद्रियाणिमनोमात्रागुणास्त्रयः ३८ एतद्विचित्रंसहजीवकालस्वभावकर्माशयलिंगभेदम् ॥ सूनोस्तनौवीक्ष्यविदा
रितास्येव्रजंसहात्मानमवापशंकाम् ३९

चूर्णिका

एवंधाष्टर्यानिकुरुते तथागृहेमेहनादीनिकृत्वात्वत्समीपेसाधुरिवास्ते एवंक्रुद्धस्त्रीभिः कथितापियशोदासुतं आक्षेप्तुंनैच्छत् ३१ अथ एकदाक्रीडमानारामादिगोपदारकाः कृ
ष्णोमृदंभक्षितवानितिमात्रेन्यवेदयन् ३२ साकृष्णंकरेधृत्वानिर्भर्त्स्यभीतंतं आह ३३ हेसुतकस्मात्त्वंमृदंभक्षितवान् एतेबालाः अग्रजोपिवदति ३४ ततः कृष्णः आह
हेमातः मृदंनाहंभक्षितवान् एतेमिथ्यावदंति यदिसत्यगिरः तर्हिमेमुखं पश्य ३५ एवं चेत्तर्हिमुखंप्रसारयेतिमात्रोक्तेहरिःमुखंप्रसारितवान् ३६ ततः सातन्मुखेविश्वं
अद्रिद्वीपादिसहितंज्योतिः स्वर्लोकादिसहितं आत्मानंसहव्रजंदृष्ट्वाशंकां प्राप्याह ३७३८ ३९

॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तामेवाह । किंस्वप्नइति । परितोविलोक्याह नायंस्वप्नस्तर्हिकिंदेवस्यहरेर्मायेति । तथाचेदन्येकिंनपश्यंति । तर्हिकिंवामदीयएवकश्चिद्बुद्धिमोहोर्थाविपर्यासः । दर्पणेमुखवत् । एवंतर्हिअयंकृष्णोपि कथमंतःप्रतीयतेनहिदर्पणेदर्पणप्रतीतिःअंतर्बहिश्चैकरूपेणचकथंजगत्प्रतीयते । तथासतिबिंबप्रतिबिंबयोरिवपरस्परंवैपरीत्येनप्रतीतिःस्यादित्याशंक्यान्यथावितर्कयतिअथोइति । अथवाममैवामुष्यार्भकस्यापिसतोयःकश्चनाचिंत्यआत्मयोगःस्वीयमैश्वर्यंऔत्पत्तिकःस्वाभाविकः ४० चरमपक्षमाश्रित्यायमीश्वरइतिनिश्चित्याह । अथोइति । चेतःचित्तंतदादिभिर्नवितर्कगोचरंजगत्यदाश्रयंयदधिष्ठानं । येनकरणाधिष्ठात्रायतोबुद्धिवृत्त्यभिव्यक्तात्नन्विदमवितर्क्यंभवतुतत्पदंकीदृक् । अतआह । सुदुर्विभाव्यमिति । इदमत्यंतमचिंत्यमित्यर्थः ४१एवंप्रपंचप्रतीत्योन्नीतंतत्त्वंपुनर्जीवसंस्थितिहेतुमायाश्रयत्वेनोन्नयंत्याह । अहमिति । यशोदानामाहंअसौममपतिःअमुष्यव्रजेश्वरस्याखिलवित्तपाधिष्ठात्रीअहंसतीजाया । एषकृष्णोमेसुतः । गोप्यादयश्चमदीयाइतीत्थंकुमतिर्यन्मायायासएषमेशरणमिति ४२ वैष्णवींस्वीयां ४३ (आरोहंप्रत्यारोप्य) प्रवृद्धेनस्नेहेनकलिलंव्याप्तंहृदयं यस्याःसापुरेवासीत् ४४ मायाबलोद्रेकमाह । त्रय्येति । त्रय्याइंद्रादिरूपेणउपनिषद्भिर्ब्रह्मेतिसांख्यैःपुरुषइति । योगैःपरमात्मेति । सात्त्वतैर्भगवानिति । उपगीयमानंमाहात्म्यंयस्यतं ४५ अतिविस्मयेनपृच्छति नंदइतिमहोदयंमहानुदयोयस्मात्तत् ४६ ययोःप्रसन्नोऽवतीर्णस्तौपितरावपियन्नान्वविंदेतांनप्राप्नुतांकृष्णस्योदारंमहत्अर्भकेहितंबाललीलाम् । यच्चकवयोगायंति । तद्योऽविंदत्सकिंश्रेयोऽकरोदिति ४७ (धराख्यया) ब्रह्मणआदेशान्गोपालत्वादिलक्षणान् ४८ (नौआवयोः) ४९

॥३८॥

श्लोकाः ४०/४९

किंस्वप्नएतदुतदेवमायाकिंवामदीयोबतबुद्धिमोहः ॥ अथोअमुष्यैवममार्भकस्ययःकश्चनौत्पत्तिकआत्मयोगः ४० अथोयथावन्नवितर्कगोचरंचेतोमनःकर्मवचोभिरंजसा ॥ यदाश्रयंयेनयतःप्रतीयतेसुदुर्विभाव्यंप्रणतास्मितत्पदम् ४१ अहंममासौपतिरेषमेसुतोव्रजेश्वरस्याखिलवित्तपासती ॥ गोप्यश्चगोपाःसहगोधनाश्चमेयन्माययेत्थंकुमतिःसमेगतिः ४२ इत्थंविदिततत्त्वायांगोपिकायांसईश्वरः ॥ वैष्णवींव्यतनोन्मायांपुत्रस्नेहमयींविभुः ४३ सद्योनष्टस्मृतिर्गोपीसाऽऽरोप्यारोहमात्मजम् ॥ प्रवृद्धस्नेहकलिलहृदयासीद्यथापुरा ४४ त्रय्याचोपनिषद्भिश्चसांख्ययोगैश्चसात्त्वतैः ॥ उपगीयमानमाहात्म्यंहरिंसाऽमन्यतात्मजम् ४५ ॥ श्रीराजोवाच ॥ नंदःकिमकरोद्ब्रह्मन्श्रेयएवंमहोदयम् ॥ यशोदाचमहाभागापपौयस्याःस्तनंहरिः ४६ पितरौनान्वविंदेतांकृष्णोदारार्भकेहितम् ॥ गायंत्यद्यापिकवयोयल्लोकशमलापहम् ४७ ॥ शुकउवाच ॥ द्रोणोवसूनांप्रवरोधरयासहभार्यया ॥ करिष्यमाणआदेशान्ब्रह्मणस्तमुवाचह ॥ ४८ जातयोर्नौमहादेवेभुविविश्वेश्वरेहरौ ॥ भक्तिःस्यात्परमालोकेययांऽजोदुर्गतिंतरेत् ॥ ४९

चूर्णिका

अहोएतत्किंस्वप्नंउत देवमायावा अथवा अस्यार्भकस्यएतत् ऐश्वर्यंकिं ४० इत्युक्त्वाएवंचरमंपक्षंआश्रित्य अयंईशः इतिनिश्चित्याह यतः इदं प्रतीयतेतत् अहंप्रणतास्मि ४१ तथायन्मायया अहंममेतिकुबुद्धिर्भवतिसः मेगतिः स्यात् ४२ एवंज्ञाततत्वायांतस्यांईशः कृष्णः पुत्रस्नेहमयींस्वमायांव्यतनोत् ४३ ततः नष्टधीः गोपी तंआरोहं आरोप्य पूर्ववत् आसीत् ४४ किंच वेदादिभिःगीयमानमाहात्म्यंहरिंपुत्रमिति अमंसत ४५ ॥ राजोवाच ॥ हेब्रह्मन् नंदः एवंश्रेयः किंअकरोत् तथा यशोदाच यत्स्तनंहरिः पपौ ४६ किंच रामकृष्णयोः अर्भकचरितंतत्पितरौनाविंदेताम् एवंश्रेयः ताभ्यांकिंकृतमिति ४७ ॥ श्रीशुकउवाच ॥ हेनृपद्रोणोनामवसुर्धरयास्त्रियासहब्रह्मणः आदेशान्करिष्यमाणः तंआह ४८ हेब्रह्मन्नौजातयोः सतोः हरौभक्तिः स्यात्इतिअनुगृहाण ४९

॥३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सएवेहद्रोणोजज्ञेसचनंदइतिख्यातःसाचधरायशोदाऽभवत् ५० गोपगोपीनामपिवस्तुस्वभावादस्त्येकभक्तिःतयोःपुनर्नितरामिति ५१ स्वलीलयापुत्रभावानुकारिण्या ५२ इतिश्रीभागवतेमहापुराणे दशमस्कंधेटीकायांविश्वरूपदर्शनेअष्टमोऽध्यायः ८ ॥ ७ ॥ ॥ नवमेपर्येउद्रिक्तौगत्वागोप्यथतत्कृतं । विलोक्यभांडभंगादिकृष्णंदाम्नाबबंधतं । तनूदराश्रितंविश्वंदृष्ट्वाविस्मितचेतसः । बंधनद्व्यंगुलापूर्त्यापूर्णतामन्वदर्शयत् ॥१॥ स्वयंदधिनिर्ममंथ १ (इहगीतानिपूतनावधादीनि) तदाचागायतेतिचकारान्वयः २ सूत्रनद्धंकांचीबद्धं रज्ज्वाआकर्षणेनश्रमोययोस्तयोर्भुजयोश्चलंतौकंकणौच (कुंडलेचचलंतीवक्त्रंस्विन्नंस्वेदयुक्तंबिभ्रती) कवरात्केशपाशाद्विगलंत्योमालत्योयस्याःसा ३ ४ अधिश्रितेचुल्लीमारोपितेउत्सिच्यमानेअतितापेनोद्रिच्यमाने ५ दृषदश्मनाशिलापुत्रेण । अंतरंगृहमध्यंगतःरहएकांते (हैयंगवं) नवनीतमभक्षयत्६सुशृतंसुतप्तं । दधिमंथस्थानंप्रविश्यभिन्नंसंदृश्यदृष्ट्वा ७

॥३९॥

श्लोकाः

अस्त्वित्युक्तःसभगवान्व्रजेद्रोणोमहायशाः ॥ जज्ञेनंदइतिख्यातोयशोदासाधराऽभवत् ॥ ५० ततोभक्तिर्भगवतिपुत्रीभूतेजनार्दने ॥ दंपत्योर्नितरामा
सीद्गोपगोपीषुभारत ५१ विष्णुर्ब्रह्मणआदेशंसत्यंकर्तुंव्रजेविभुः ॥ सहरामोव्रजंश्चक्रेतेषांप्रीतिंस्वलीलया ५२ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशम
स्कंधेविश्वरूपदर्शनंनामअष्टमोऽध्यायः ८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एकदागृहदासीषुयशोदानंदगेहिनी ॥ कर्मांतरनियुक्तासुनिर्ममंथस्व ९० ७
यंदधि १ यानियानीहगीतानितद्बालचरितानिच ॥ दधिनिर्मंथनेकालेस्मरंतीतान्यगायत २ क्षौमंवासःपृथुकटितटेबिभ्रतीसूत्रनद्धंपुत्रस्नेहस्नुतकुचयुगं
जातकंपंचसुभ्रूः ॥ रज्ज्वाकर्षश्रमभुजचलत्कंकणौकुंडलेचास्विन्नंवक्त्रंकबरविगलन्मालतीनिर्ममंथ ३ तांस्तन्यकामआसाद्यमथ्नंतींजननींहरिः ॥ गृही
त्वादधिमंथानंन्यषेधत्प्रीतिमावहन् ४ तमंकमारूढमपाययत्स्तनंस्नेहस्नुतंसस्मितमीक्षतीमुखम् ॥ अतृप्तमुत्सृज्यजवेनसाययावुत्सिंच्यमानेपयसित्वधि
श्रिते ५ संजातकोपःस्फुरितारुणाधरंसंदश्यदद्भिर्दधिमंडभाजनम् ॥ भित्त्वामृषाश्रुर्दृषदश्मनारहोजघासहैयंगवमंतरंगतः ६ उत्तार्यगोपीसुशृतंपयःपुनः
प्रविश्यसंदृश्यचदध्यमत्रकम् ॥ भग्नंविलोक्यस्वसुतस्यकर्मतज्जहासतंचापिनतत्रपश्यती ,७

चूर्णिका

ततः सः अस्त्वित्युक्तः सन् इदानींनंदइतितत्स्त्रीयशोदाइतिचजज्ञे ५० तस्मात्पुत्रीभूतेहरौभक्तिः तयोः आसीत् ५१ कृष्णोब्रह्मणआदेशंसत्यंकर्तुंव्रजेविभुः सहरामो वसंश्चक्रेतेषांप्रीतिंस्वलीलया ५२ ॥ इतिदशमेअष्टमः ८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एकदागृहदासीषुयशोदानंदगेहिनी कर्मांतरनियुक्तासुनिर्ममंथस्वयंदधि १ तदापुत्रबालचरितानिस्मरंतीतानिअगायत २ हेनृपसाकटितटेकांचीबद्धंक्षौमंवासः तथास्नेहस्नुतकुचयुगंरज्ज्वाकर्षश्रमभुजचलत्कंकणौकुंडलेचास्विन्नंवक्त्रंधृतवतीकबरविगलन्मालतीसतीदधिममंथ ३ तदातांस्तन्यकामःहरिःप्राप्यदधिमंथानंधृत्वान्यषेधत् ४ तंअंकंआरूढंस्तनंपाययित्वासस्मितंमुखंवीक्षतीतावत् पयसिउत्सिच्यमानेसति अतृप्तंसुतंहित्वाशीघ्रंसाययौ ५ ततः कृष्णः क्रुद्धःसन् अधरंसंदश्यतत्पात्रं अश्मनाभित्त्वा ६ तदाहैयंगवंजघास ततो गोपीपयःउत्तार्यपुनः एत्यभग्नंपात्रं दृष्ट्वा तत्पुत्रकर्मज्ञात्वातंतत्रनदृष्ट्वाजहास ७

॥३९॥

१ उत्सिक्तइतिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उलूखलांघ्रेः परिवर्तितस्योलूखलस्योपरि। शिचिशिक्ये चौर्येणविशंकितचंचलमीक्षणंयस्यतंसुतं ८ तपसाऐकाग्र्येणईरितंतदाकारतांनीतंअतएवप्रवेष्टुंक्षमंयोग्यमपियोगिनांमनोपियंनापत्। अथवा अन्वधावत्केवलंनत्वाप। यतोयोगिनांमनोपियंप्रवेष्टुंनक्षममितिः ९ अन्वंचमानाएवंकृष्णमनुगच्छती। बृहत्योश्चलयोःश्रोण्योर्भरेणाक्रांतास्तब्धागतिर्यस्याःसा (जवेन) विस्रंसितात्केशबंधनाच्युतैःप्रसूनैरनुगतिरनुगमनंयस्याःसा यद्वाजवेनकंपितात्केशबंधात्पुरःपतितानिप्रसूनानिअनुपश्चाद्गतिर्यस्याःसा। परामृशत्धृतवती(इत्यर्थः) १० अंजन्मषिणीअंजंतीसर्वतःप्रसरंतीमषीययोस्तेअक्षिणीस्वपाणिनाकषंतंसंमर्दयंतंभिषयंतीह्रस्वश्छांदसःभीषयंतीभयमुत्पादयंतीअवागुरत्अभर्त्सयत् ११ इयेषऐच्छत्अतद्वीर्यकोविदा। तत्प्रभावानभिज्ञा १२ अकोविदत्वमेवाह। नचांतरितिपंचभिः। बंधनंबाहिःपरिवृतेनदाम्नाअंतरावृतस्यभवति। तथाचपूर्वापरविभागवतोवस्तुनःपूर्वतोदामधृत्वापरितःपरिवेष्टनेनसंभवति। नत्वेतदस्तीत्याह नचांतरिति। किंच। व्यापकेनव्याप्यस्यबंधोभवतितच्चविपरीतमित्याह पूर्वापरामिति (जगतोव्याप्यस्यपूर्वापरादिविभागोयद्रूपःव्यापकत्वात्सर्वावधिरूपत्वाच्चेतिभावः) किंच। तद्व्यतिरिक्तस्यचाभावान्नबंधइत्याह जगच्चयइति १३ तंमर्त्यलिंगं (अव) अधोक्षजंआत्मजंमत्वाबबंधेति १४ तद्दामद्व्यंगुलोनंद्वाभ्यामंगुलाभ्यामूनमपूर्णं १५ (बंधनंदामतच्चतथैवेति) १६ स्मितंकुर्वतीनांमध्येस्वयमपिहसंतीविस्मयमाप १७

॥४०॥

श्लोकाः ८/१७

उलूखलांघ्रेरुपरिव्यवस्थितंमर्कायकामंददतंशिचिस्थितम् ॥ हैयंगवंचौर्यविशंकितेक्षणंनिरीक्ष्यपश्चात्सुतमागमच्छनैः ८ तामात्तयष्टिंप्रसमीक्ष्यसत्वरस्ततोऽवरुह्यापससारभीतवत् ॥ गोप्यन्वधावन्नयमापयोगिनांक्षमंप्रवेष्टुंतपसेरितंमनः ९ अन्वंचमानाजननीबृहच्चलच्छ्रोणीभराक्रांतगतिःसुमध्यमा ॥ जवेनविस्रंसितकेशबंधनच्युतप्रसूनानुगतिःपरामृशत् १० कृतागसंतंप्ररुदंतमक्षिणीकषंतमंजन्मषिणीस्वपाणिना ॥ उद्वीक्षमाणंभयविह्वलेक्षणंहस्तेगृहीत्वाभिषयंत्यवागुरत् ११ त्यक्त्वायष्टिंसुतंभीतंविज्ञायार्भकवत्सला ॥ इयेषकिलतंबद्धुंदाम्नाऽतद्वीर्यकोविदा १२ नचांतर्नबहिर्यस्यनपूर्वंनापिचापरम् ॥ पूर्वापरंबहिश्चांतर्जगतोयोजगच्चयः १३ तंमत्वात्मजमव्यक्तंमर्त्यलिंगमधोक्षजम् ॥ गोपिकोलूखलेदाम्नाबबंधप्राकृतंयथा १४ तद्दामबध्यमानस्यसार्भकस्यकृतागसः ॥ द्व्यंगुलोनमभूत्तेनसंदधेऽन्यच्चगोपिका १५ यदासीत्तदपिन्यूनंतेनान्यदपिसंदधे ॥ तदपिद्व्यंगुलंन्यूनंयद्यदादत्तबंधनम् १६ एवंस्वगेहदामानियशोदासंदधत्यपि ॥ गोपीनामुत्स्मयंतीनांस्मयंतीविस्मिताऽभवत् १७

चूर्णिका

ततः साउलूखलोपरिस्थितं शिचिस्थं हैयंगवंमर्कायददंतंचौर्यशंकितेक्षणंसुतंदृष्ट्वाशनैः पृष्ठतः प्राप्ता ८ ततः कृष्णःधृतयष्टिंतांवीक्ष्यततः अवरुह्यभीतवत् अपलायत् योगिनांमनसापिदुष्प्रापंतमनुगोपीअन्वधावत् ९ तदनुगच्छती बृहच्चलच्छ्रोणीभराक्रांतागतिः सतीकृच्छ्रतः तंधृतवती १० ततः कृतागसंरुदंतंभयविह्वलेक्षणंसुतं हस्तेधृत्वाभीषयंतीसतीअभर्त्सयत् ११ तावत्भीतंसुतंज्ञात्वा यष्टिंहित्वातंदाम्नाबद्धुंऐच्छत् १२ यस्यअंतः बहिः न पूर्वअपरंचन १३ एवंभूतंईशंसुतमितिमत्वागोपीउलूखलेदाम्नाबबंध १४ तद्दामद्व्यंगुलोनंजातं तेन अन्यत्संदधे १५ तदपिन्यूनंजातम् १६ एवंयशोदास्वगेहदामानिसंदधत्यपितंबद्धुं अशक्तासती विस्मिताजाता १७

॥४०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एवंस्वस्यापारिच्छिन्नत्वंलीलयाप्रदर्श्यदयालुत्वंदर्शयति । स्वमातुरिति) १८ नचैवंस्वातंत्र्यभंगइत्याह । एवंसंदार्शितेति । सेश्वरमिदंविश्वंयस्यवशेयदधीनमित्यर्थः १९ भगवत्प्रसादमन्योपिभक्तोलभं
तेपरंतुइदमतिचित्रमितिसरोमांचितमाहनेममिति । विरिंच्यःपुत्रोपि । भवःस्वात्मापि । श्रीर्जायापि (लेभिरेलेभेइत्यर्थः । यद्वा विरिंच्यादयोनलेभिरेइतिनांकिंतुलेभिरेएवपरंतुगोपीयशोदायत्यंप्रसादंप्राप
तंनलेभिरेइत्यन्वयः) २० फलितमाह । नायमिति देहिनांदेहाभिमानिनांतापसादीनांज्ञानिनांनिवृत्ताभिमानानाम(पिनसुखापःअनायासेनलभ्यइत्यर्थःआत्मास्वयंभगवान्पोतोयेषांतेषांभक्तिमताम्) २१
भक्तैर्बद्धस्याप्यन्यमोचकत्वमाह कृष्णस्त्विति (अर्जुनौवृक्षविशेषौ) २२ २३ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांनवमोध्यायः ९ ॥ ॥ ७ ॥ ॥ दशमेऽपातयद्रिंगन्नंतरायमलार्जु
नौ । तत्रत्याभ्यांचदेवाभ्यांकृष्णःस्तुतइतीर्यते १ (शापस्यकारणभूतं) यद्विगर्हितंकर्म (अपराधइतियावत्) येनवादेवर्षेर्भागवतोत्तमस्यापितमःक्रोधस्तदेतत्कथ्यतामिति १ (सुहप्तौभूत्वा) २
॥४१॥ (वारुणींवरुणोद्भवांस्त्रीजनैःसह) ३ गंगायामंतर्मध्ये । कथंभूते । अंभोजानांवनानितेषांराजयस्ताविद्यंतेयत्रवस्मिन् ४ अपश्यत्दृष्ट्वाचक्षीबाणौमत्तौसमबुध्यत ५ कुतइत्यतआह । तंदृष्ट्वेति ६

स्वमातुःस्विन्नगात्राया विस्रस्तकबरस्रजः ॥ दृष्ट्वापरिश्रमंकृष्णःकृपयासीत्स्वबंधने १८ एवंसंदार्शिताह्यंगहरिणाभक्तवश्यता ॥ स्ववशेनापिकृष्णेनय
स्येदंसेश्वरंवशे १९ नेमंविरिंच्योनभवोनश्रीरप्यंगसंश्रया ॥ प्रसादंलेभिरेगोपीयत्तत्प्रापविमुक्तिदात् २० नायंसुखापोभगवान्देहिनांगोपिकासुतः॥
ज्ञानिनांचात्मभूतानांयथाभक्तिमतामिह ॥ २१ कृष्णस्तुगृहकृत्येषुव्यग्रायांमातरिप्रभुः ॥ अद्राक्षीदर्जुनौपूर्वंगुह्यकौधनदात्मजौ २२ पुरानारदशापेनवृ
क्षतांप्रापितौमदात् ॥ नलकूबरमणिग्रीवावितिख्यातौश्रियान्वितौ २३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेनवमोध्यायः ९ ॥ ॥ राजोवाच ॥
कथ्यतांभगवन्नेतत्तयोःशापस्यकारणम् ॥ यत्तद्विगर्हितंकर्मयेनवादेवर्षेस्तमः १ ॥ श्रीशुकउवाच ॥ रुद्रस्यानुचरौभूत्वासुदृप्तौधनदात्मजौ ॥ कैलासो
पवनेरम्येमंदाकिन्यांमदोत्कटौ ॥ २ वारुणींमदिरांपीत्वामदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुःपुष्पितेवने ३ अंतःप्रविश्यगंगायामंभोजवनरा
जिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविवकरेणुभिः ४ यदृच्छयाचदेवर्षिर्भगवांस्तत्रकौरव ॥ अपश्यन्नारदोदेवौक्षीबाणौसमबुध्यत ५ तंदृष्ट्वाव्रीडितादेव्यो
विवस्त्राःशापशंकिताः ॥ वासांसिपर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ ६

श्लोकाः १८/६

चूर्णिका

एवंस्विन्नगात्रायाः स्वमातुः श्रमंदृष्ट्वाकृष्णः स्वबंधने कृपया आसीत् १८ एवंहेनृपहारिणाभक्ताधीनतादर्शिता यस्येदंसेश्वरंवशे १९ इमप्रसादंविरिंच्यः भवः
श्रीः नलेभिरे यंगोपी आपेति २० किंच भगवान् यथाभक्तिमतांसुखापः तथायोगिनांनइति २१ अथकृष्णः गृहकृत्येषुमातरि व्यग्रायांपूर्वं कुबेरसुतौगुह्यकौसंतौइदा
नीं अर्जुनौ अद्राक्षीत् २२ पुरानारदशापेनवृक्षतांप्रापितौमदात् नलकूबरमणिग्रीवावितिख्यातौश्रियान्वितौ ॥ इतिदशमेनवमः ९ ॥ ७ ॥ ॥ राजोवाच ॥ ॥
कथ्यतांभगवन्नेतत्तयोःशापस्यकारणम् यत्तद्विगर्हितंकर्मयेनवादेवर्षेस्तमः १ ॥ श्रीशुकउवाच ॥ हेनृपकुबेरात्मजौशिवानुचरौ भूत्वाकैलासोपवने २ मंदाकिन्यांम
दिरांपीत्वागायद्भिः स्त्रीजनैः सहवनेचेरतुः ३ ततः तौगंगामध्ये प्रविश्य युवतीभिः चिक्रीडतुः ४ गजीभिः गजाःयथा तावत्यदृच्छयातत्रनारदः प्राप्तः सन् तौदृष्ट्वा
मत्तौ अबुध्यत ५ ततः ऋषिंदृष्ट्वानग्नाः देव्यः शापभीताः सत्यः वासांसिपर्यधुः न तौ ६ ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अनुग्रहार्थायअनुग्रहश्चमदनाशःअर्थश्चश्रीकृष्णदर्शनंतदर्थमिदंवक्ष्यमाणं नह्यन्यइत्यादि ७ जोष्यान्प्रियान्विषयान्जुषतःसेवमानस्यपुंसःश्रीमदादन्यआभिजात्यादिःसत्कुलं (जन्मादिः आदिशब्दात्)
विद्यादिजनितोमदःअन्योवारजोगुणःरजःकार्य-(-भूतो) हास्यहर्षादिरूपोनहितथाबुद्धिभ्रंशःबुद्धिंभ्रंशयतीतितथाकिंतुश्रीमदएव (यथाश्रीमदोबुद्धिंभ्रंशयतितथानान्यआभिजात्यादिरित्यर्थः) तदाह
यत्रेत्यादिचतुर्भिः । यत्रश्रीमदे (आसवोमद्यम्) ८ इमंनश्वरंदेहंअजरामृत्युअजरश्चअमृत्युश्चयथातथामन्यमानैः ९ नरदेवभूदेवसंज्ञितमपिश्वादिभिर्भक्षितंविड्संज्ञितंदग्धंभस्मसंज्ञितंअन्यदाकृमिसं
ज्ञितंतत्कृतेतदर्थंयोभूतधुक् (भूतेभ्योद्रुह्यति) यतोभूतद्रोहान्निरयोभवतिसकिंस्वार्थंवेदनवेदैवेत्यर्थः १० इदानींदेहेऽहंभावोनघटतेइत्याहदेहइतिनिषेक्तुःपितुः । (मातुर्जनन्याएववा) मातुःपितुर्मातामहस्य (वापुत्रिकाकरणे । क्रेतुर्मूल्यंदत्त्वाग्रहीतुः) ११ अव्यक्तप्रभवाप्ययंअव्यक्तात्प्रभवस्तस्मिन्नेवाप्ययोयस्यतं । आत्मसात्कृत्वाआत्मेतिमत्वा । असतोमूढाहते १२ एवंश्रीमदविचेष्टितमुक्त्वातत्प्रती
कारंनिश्चिनोति । असतइतिदारिद्र्यमेवपरम् (श्रेष्ठंआध्यनिवर्तकक्षमम्) परंकेवलंवा । कुतइत्यतआह । आत्मौपम्येनेति । ततोनद्रुह्यतीतिभावः १३ सदृष्टांतमाहयथेति । मुखम्लान्यादिलिं
गैःजीवसाम्यंगतःसर्वेषांजीवानांसुखदुःखेसमेइतिज्ञातवानित्यर्थः १४ किंचदारिद्र्यंमोक्षमपिसाधयतीत्याह । दरिद्रइतिश्लोकचतुष्टयेन । निरहंस्तंभोनिर्गतोऽहंकाररूपःस्तंभोयस्मात्सः १५ १६ युज्यं
तेस्वतएवसंगच्छंते । तर्षंतृष्णाम् १७

॥४२॥

श्लोकाः ७/१७

तौदृष्ट्वामदिरामत्तौश्रीमदांधौसुरात्मजौ ॥ तयोरनुग्रहार्थायशापंदास्यन्निदंजगौ ७ ॥ नारदउवाच ॥ नह्यन्योजुषतोजोष्यान्बुद्धिभ्रंशोरजोगुणः ॥ श्री
मदादाभिजात्यादिर्यत्रस्त्रीद्यूतमासवः ८ हन्यंतेपशवोयत्रनिर्दयैरजितात्मभिः ॥ मन्यमानैरिमंदेहमजरामृत्युनश्वरम् ९ देवसंज्ञितमप्यंतेकृमिविड्भस्मसंज्ञि
तम् ॥ भूतध्रुक्तत्कृतेस्वार्थंकिंवेदनिरयोयतः १० देहःकिमन्नदातुःस्वंनिषेक्तुर्मातुरेववा ॥ मातुःपितुर्वाबलिनःक्रेतुरग्नेःशुनोपिवा ११ एवंसाधारणं
देहमव्यक्तप्रभवाप्ययम् ॥ कोविद्वानात्मसात्कृत्वाहंतिजंतून्ऋतेऽसतः १२ असतःश्रीमदांधस्यदारिद्र्यंपरमांजनम् ॥ आत्मौपम्येनभूतानिदरिद्रःपरमी
क्षते १३ यथाकंटकविद्धांगोजंतोर्नेच्छातितांव्यथाम् ॥ जीवसाम्यंगतोलिंगैर्नतथाऽविद्धकंटकः १४ दरिद्रोनिरहस्तंभोमुक्तःसर्वमदैरिह ॥ कृच्छ्रंयदृच्छया
प्नोतितद्धितस्यपरंतपः १५ नित्यंक्षुत्क्षामदेहस्यदरिद्रस्यान्नकांक्षिणः ॥ इंद्रियाण्यनुशुष्यंतिहिंसापिविनिवर्तते १६ दरिद्रस्यैवयुज्यंतेसाधवःसमद
र्शिनः ॥ सद्भिःक्षिणोतितंतर्षंततआराद्विशुध्यति १७

चूर्णिका

अथनारदः तौमत्तौदृष्ट्वातयोः अनुग्रहार्थंशापंदास्यन्इदंजगौ ७ नारदउवाच विषयान् सेवमानस्यपुंसःबुद्धिभ्रंशकः श्रीमदात् अन्योमदोन यत्रमदेस्त्रीद्यूतमासवः ८
तथाइमंस्थिरंदेहंमत्वानिर्दयैः पुंभिः पशवः हन्यंते ९ किंच इदंनृपसंज्ञितमपिअंतेकृम्यादिसंज्ञं भवति एवंभूतदेहार्थंयः भूतध्रुक्सकिंस्वार्थंवेद नकिंच १० अयंदेहः
अन्नदातुः मातृपित्रादीनांवा ११ एवंसाधारणंदेहं अव्यक्तप्रभवाप्ययं आत्मसात्कृत्वाकोविद्वान्जंतून्हंति १२ किंच श्रीमदांधस्यपुंसः परमांजनंदारिद्र्यम् यतःदरिद्रः
सन्आत्मवत्परंपश्यति १३ किंच यथा कंटकाविद्धांगः तांव्यथांजंतोर्नेच्छतितथा अविद्धकंटकःन १४ एवंपुमान्दरिद्रः सन्कष्टमाप्नोति तदेवतस्यतपः १५ एवं
क्षुधाकृशदेहस्यपुंसः इंद्रियाणिशुष्यंति हिंसापि अपयाति १६ किंच दरिद्रस्यैवसाधुसंगमोभवतिततः सः शुध्यवति १७

॥४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुसाधूनामपिधनिकःप्रियःस्यान्नदरिद्रइतितत्राह साधूनामिति । धनेनस्तंभोगर्वोयेषांतैः (किंस्यात्नकिमपिकार्यमित्यर्थः) १८ तमोमदंअज्ञानकृतंमदं १९ तमःप्लुतौतमोव्याप्तौ २० शपति अतइ
ति (स्थावरतांवृक्षतांधनभोगायोग्यताम्) अनुगृह्णातिस्यातांनैवमित्यादिना मत्प्रसादेनस्मृतिःस्यात् (तत्रापिस्थावरत्वेपि) २१ स्वर्लोकतांदेवत्वंपुनर्लब्ध्वामदनुग्रहात्लब्धभक्तीभविष्यतइति २२
२३ प्रस्तुतमाहऋषेरिति (भागवतमुख्यस्यऋषेर्नारदस्य) २४ किमितिसत्यंकर्तव्यंतत्राह । देवर्षिरिति । यत्यतःतत्ततः २५ यमयोर्यमलयोःसहजातयोः आत्मनःकृष्णस्यतन्मध्येप्रवेशमात्रेण २६
अनु (पश्चात्) अंचतीतिअन्वक् (तांत्तिर्यग्गतमुलूखलंनिष्कर्षताआकर्षता) तत्रहेतुःदामोदरेणेति । उत्कलितउत्पाटितःअंघ्रिबंधोमूलबंधोययोस्तौ । परमस्यश्रीकृष्णस्यविक्रमितंविक्रमस्तेनातिवेपः (अ
ति)-कंपोयेषुतेस्कंधप्रवालविटपाययोस्तौ २७ ककुभःप्रति । सर्वतःस्फुरंतावित्यर्थः । यद्वादिशःप्रकाशयंताविति । तत्रकुजयोर्वृक्षयोःस्थितौचेत् (जातवेदा) अग्निर्यथामूर्तिमानुपैतितथोपेत्यविरजसौ
निर्गतमदौनिरहंकारिणौनष्टगर्वाविितियावत् २८ गोपालंमांयुवांदेवौकिमितिप्रणताविितिचेत्तत्राहतुः (कृष्णकृष्णेति) हेकृष्णकृष्णमहायोगिन्अचिंत्यप्रभावस्त्वंनगोपालः । किंतुपरःपुरुषःयतःआद्यः
कारणभूतः । तत्रापिर्ननिमित्तमात्रंकितुउपादानमपित्वमेवेत्याशयेनतुष्टुवतुः । व्यक्ताव्यक्तमिति । स्थूलसूक्ष्ममिदंतेरूपंविदुः २९

॥४३॥ श्लोकाः १८/२९

साधूनांसमचित्तानांमुकुंदचरणैषिणाम् ॥ उपेक्ष्यैःकिंधनस्तंभैरसद्भिरसदाश्रयैः १८ तदहंमत्तयोर्माध्व्यावारुण्याश्रीमदांधयोः ॥ तमोमदंहरिष्यामि
स्त्रैणयोरजितात्मनोः ॥ १९ यदिमौलोकपालस्यपुत्रौभूत्वातमःप्लुतौ ॥ नविवाससमात्मानंविजानीतःसुदुर्मदौ २० अतोऽर्हतःस्थावरतांस्यातांनैवंयथा
पुनः॥स्मृतिःस्यान्मत्प्रसादेनतत्रापिमदनुग्रहात् २१ वासुदेवस्यसांनिध्यंलब्ध्वादिव्यशरच्छते ॥ वृत्तेस्वर्लोकतांभूयोलब्धभक्तीभविष्यतः २२ ॥ श्री
शुकउवाच ॥ एवमुक्त्वासदेवर्षिर्गतोनारायणाश्रमम् ॥ नलकूबरमणिग्रीवावासतुर्यमलार्जुनौ २३ऋषेर्भागवतमुख्यस्यसत्यंकर्तुंवचोहरिः ॥ जगामशनकै
स्तत्रयत्रास्तांयमलार्जुनौ २४ देवर्षिर्मेप्रियतमोयदिमौधनदात्मजौ ॥ तत्तथासाधयिष्यामियद्गीतंतन्महात्मना २५ इत्यंतरेणार्जुनयोःकृष्णस्तुयमयोर्य
यौ ॥ आत्मनिर्वेशमात्रेणतिर्यग्गतमुलूखलम् २६ बालेननिष्कर्षयतान्वगुलूखलंतद्दामोदरेणतरसोत्कलितांघ्रिबंधौ ॥ निष्पेततुःपरमविक्रमितातिवे
पस्कंधप्रवालविटपौकृतचंडशब्दौ २७ तत्रश्रियापरमयाककुभःस्फुरंतौसिद्धावुपेत्यकुजयोरिवजातवेदाः ॥ कृष्णंप्रणम्यशिरसाऽखिललोकनाथं
बद्धांजलीविरजसाविदमूचतुःस्म २८ कृष्णकृष्णमहायोगिंस्त्वमाद्यःपुरुषःपरः ॥ व्यक्ताव्यक्तमिदंविश्वंरूपंतेब्राह्मणाविदुः ॥ २९

चूर्णिका

ननुसतामपिधानिकः प्रियःस्यात् नदरिद्रइतितत्राह साधूनांधनगर्वितैः पुंभिःकिम् नकिमपि १८ अतःअनयोःश्रीमदांधयोः अज्ञानजंमदंहरिष्यामि १९ यतः इमौलोक
पालसुतौभूत्वा आत्मानंविवस्त्रंनजानीतः २० तस्मात्स्थावरतां गच्छतां तत्रापिमत्प्रसादेनएतयोःस्मृतिःस्यात् २१ किंच शरच्छतेगतेहरेः सान्निध्यंप्राप्यपुनः देवत्वंप्राप्स्य
तः २२ ॥ श्रीशुकउवाच ॥ एवमुक्त्वानारदः नारायणाश्रमंगतः ततः तौनलकूबरमणिग्रीवौयमलार्जुनौ आसतुः २३ एवंमुनिवचः सत्यंकर्तुंयत्रतौआस्तांतत्रहरिः शनैः
जगाम २४ किंच देवर्षिर्मेप्रियतमःअतःतद्गीतंसाधयिष्यामीतिमनसिनिधाय २५ कृष्णः तयोर्मध्यतःनिर्ययौतन्निर्वेशमात्रेणतिर्यग्गतंउलूखलं २६ तत्कर्षयतादामोदरेणउ
त्पाटितमलबंधौतौचंडशब्दंकृत्वापेततुः २७ तत्रश्रियाककुभः स्फुरंतौसिद्धौउपेत्यकृष्णंनत्वाइदंऊचतुः २८ हेकृष्णत्वंआद्यःपुरुषः इदं विश्वंतेरूपं २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४४॥

नियंतापित्वमेवेत्यूचतुः । त्वमेकइतिदेहःअसवःप्राणाःआत्माऽहंकारःइंद्रियाणिचतेषामीश्वरो (नियंता) नन्वस्यकालोनिमित्तंप्रकृतिरुपादानंप्रकृतेर्जातोमहान्विश्वात्मतयापरिणमते । पुरुषःकर्तानियंता च। किमत्राहमतआहतुः त्वमेवकालइत्यादिनासार्धेन । यतोभगवानीश्वरोविष्णुस्त्वमतःकालोनामतवलीला ३०प्रकृतिःशक्तिः पुरुषोंशः । महान्कार्यं अतस्त्वमेवसर्वमित्यर्थः ३१नन्वहमेवचेत्सर्वंतर्हिघटादिज्ञानेमज्ज्ञांनंकिनभवति । भवतिचेत्सर्वोऽपिब्रह्मवित्स्यादित्यतआहतुः । गृह्यमाणैरिति । दृश्यत्वेनवर्तमानैर्बुद्ध्यहंकारेंद्रियादिभिः (गुणरूपैर्विकारैः) द्रष्टा (निर्विकारः) त्वं (न) गृह्यसेइतिभावः । ननुतर्हि जीवोजानातुनैवेत्याहतुः । कोन्विहेति । जीवाद्युत्पत्तेःप्रागेवस्वप्रकाशतयासिद्धंत्वांकोविजानाति । यतोगुणसंवृतःदेहाद्यावृतः ३२ अतोदुर्ज्ञेयत्वात्केवलंप्रणमतःतस्मैतुभ्यमिति । आत्मनःस्वस्मात्द्योतःप्रकाशोयेषांतैःप्रकाश्यैर्गुणैःछन्नोमहिमायस्यअभ्रैरिवरवेःतस्मै ३३ अहोअहमीश्वरइतिकुतोज्ञानंतत्राहतुःयस्येति (द्वाभ्यां अतुल्यातिशयैःयत्तुल्ययदधिकरहितैःसर्वोत्कृष्टैरित्यर्थःअतएवक्काप्यसंगतैर्वीर्यैःपराक्रमैःमत्स्यादिशरीरेषुयस्यावताराज्ञायंतेसभवानित्यन्वयः) ३४ (ससर्वेश्वरोभवान्) भवायाभ्युदयायेत्यर्थः विभवायविगतोभवोयस्मिन्तस्मैकैवल्यायेत्यर्थः ३५ (हेपरमकल्याणरूपतुभ्यंनमः । परमंमंगलंयस्मात्तत्संबोधनम्) ३६ नौआवां । अनुचरःकुबेरोनारदोवातस्यकिंकरौ । भगवतस्तवदर्शनम्३७ तत्रगतयोरावयोःपूर्वस्वभावोमाभूत् । किंतुवाणीगुणानुकथनइत्यादि । नः'अस्मदोद्वयोश्चे'तिद्विवचनस्थानेबहुवचनम् । अस्मत्संगिनांसर्वेषामपीतिवाबहुवचनम् (तवपादयोःस्मृत्यांस्मरणेमनोरतु) तवनिवासभूतंयज्जगत्तस्यप्रणामे । त्वन्निवासभूतमितिबहुमानेनजगतःप्रणामे शिरोऽस्त्वित्यर्थः । भवत्तनूनांभवतोमूर्तीनाम् (सताम्) ३८ संकीर्तितःसंस्तुतः ३९ वाग्भिर्नह्यन्योजुषतोजोष्यानित्याद्याभिःश्रीविभ्रंशरूपोनुग्रहःकृतइति (ममया) ४०

श्लोकाः ३०/४०

त्वमेकःसर्वभूतानांदेहास्वात्मेंद्रियेश्वरः ॥ त्वमेवकालोभगवान्विष्णुरव्ययईश्वरः ३० त्वंमहान्प्रकृतिःसूक्ष्मारजःसत्त्वतमोमयी ॥ त्वमेवपुरुषोध्यक्षःसर्वक्षेत्रविकारवित् ३१ गृह्यमाणैस्त्वमग्राह्योविकारैःप्राकृतैर्गुणैः ॥ कोन्विहार्हतिविज्ञातुंप्राक्सिद्धंगुणसंवृतः ३२ तस्मैतुभ्यंभगवतेवासुदेवायवेधसे ॥ आत्मद्योतगुणैश्छन्नमहिम्नेब्रह्मणेनमः ३३ यस्यावताराज्ञायंतेशरीरेष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३४ सभवान्सर्वलोकस्यभवायविभवायच ॥ अवतीर्णोंशभागेनसांप्रतंपतिराशिषाम् ३५ नमःपरमकल्याणनमःपरममंगल ॥ वासुदेवायशांताययदूनांपतयेनमः ॥ ३६ अनुजानीहिनौभूमंस्तवानुचरकिंकरौ ॥ दर्शनंनौभगवतऋषेरासीदनुग्रहात् ॥ ३७ वाणीगुणानुकथनेश्रवणौकथायांहस्तौचकर्मसुमनस्तवपादयोर्नः ॥ स्मृत्यांशिरस्तवनिवासजगत्प्रणामेदृष्टिःसतांदर्शनेऽस्तुभवत्तनूनाम् ३८ ॥ श्रीशुकउवाच ॥ इत्थंसंकीर्तितस्ताभ्यांभगवान्गोकुलेश्वरः ॥ दाम्नाचोलूखलेबद्धःप्रहसन्नाहगुह्यकौ ३९ ॥ श्रीभगवानुवाच ॥ ज्ञातंममपुरैवैतदृषिणाकरुणात्मना ॥ यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहःकृतः ४०

चूर्णिका ॥४४॥

किंच सर्वभूतानां देहादीनांईश कालश्चमहान् प्रकृतिश्चत्वमेव ३० एवंभूतायभगवतेतुभ्यंनमः ३१ ३२ ३३ ३४एवंभूतः त्वं लोकस्यउद्भवायमोक्षायचअधुनाअवतीर्णोऽसि ३५ तस्मैतुभ्यंयदूनांपतयेनमः ३६ हेकृष्णआवांअनुजानीहित्वद्दर्शनंऋषेः अनुग्रहात् आसीत् ३७ हेहरेइयंवाणीतेगुणकथनेअस्तुश्रवणौकथायां हस्तौकर्मसुमनःतेपादयोःस्मृत्यां शिरःतवनिवासजगत्प्रणामे दृष्टिःसतांदर्शनेअस्तु ३८ ॥ श्रीशुकउवाच ॥ एवंताभ्यांउक्तःकृष्णः दाम्नाउलूखलेबद्धःसन् तौआह ३९ ॥ श्रीभगवानुवाच ॥ हेगुह्यकौमयाएतत् नारदशापादिपुरैवज्ञातम् ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

युक्तमेवैतदित्याह । साधूनांस्वधर्मवर्तिनांसमचित्तानांआत्मविदाम् (तत्रापि) सुतरांमत्कृतात्मनांमय्यर्पितचित्तानांतेषांकृपातिरेकात्सुतरामित्युक्तम् । सवितुर्दर्शनादक्ष्णोर्यथाबंधोनभवेत्तद्वत् ४१ प्राधान्यादेकस्यसंबोधनम् । हेनलकूवरयुवांतत्तस्मात्सादनं (सदनं) स्वनिकेतनंमत्परभौ (अहंपरमोययोस्तौ) संतौगच्छतंवांयुवयोरीप्सितोऽपेक्षितोमयि (भावः) प्रेमाजातएव (परमःनिश्रेयसरूपःनभवोयस्मिन्सः(अभवोऽभ्युदयहेतुः) ४२ बद्धोलूखलंबद्धमुलूखलंयस्मिन्तम् ४३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांदशमोध्यायः १० ॥ ॥ छ ॥ ॥ एकादशे समागत्यवृंदावनमथार्भकैः । वत्सान्पालयतानेनहतौवत्सबकासुरौ ॥१॥ निर्घातोवज्रपातःस्यादितिभयेनशंकिताः १ तल्लक्ष्यंप्रत्यक्षतोदृश्यंपुरतोदृष्ट्वापीत्यर्थः। पतनकारणमविज्ञायबभ्रमुः २ लक्ष्यंकारणंदर्शयति । उलूखलमिति । भ्रमप्रकारमाह । कस्यराक्षसादेरिदंकर्म । कुतोवाकारणात्अहोआश्चर्यम् । उत्पातोयमितिभयेनकातराव्याकुलाःसंतोबभ्रमुरित्यर्थः ३ (नकेवलंप्रत्यक्षमपिकारणंस्वयमविज्ञाय बभ्रमुःकिंतुबालैर्बोधिताअपीत्याह । बालाइति) मध्यगेनवृक्षयोर्मध्यगतेन । (अनेनहेतुनांनिपतिताविति । नकेवलमेतावत्) वृक्षाभ्यांनिर्गतौदिव्यौपुरुषावप्यचक्ष्महिदृष्टवंतोवयमिति ४ नेति (तस्यबालस्यतत्नघटेतेति) केवलंतार्किकास्ते (तदुक्तं) नजगृहुरेव । अन्येतुसंदेहयुक्तचित्ताबभूवुरिति ५ भगवन्मायामोहितस्यनंदस्यतत्राचरितमाह उलूखलमिति ६ ज्ञास्यंतेमामितिशंकमानोऽतीवबाल्यमनुकरोतिस्म तदाहगोपीभिरिति । स्तोभितःकरतलादिनाप्रोत्साहितो (अनृत्यत्) ७

॥४५॥

श्लोकाः ४१/७

साधूनांसमचित्तानांसुतरांमत्कृतात्मनाम् ॥ दर्शनान्नोभवेद्बंधःपुंसोऽक्ष्णोःसवितुर्यथा ४१ तद्गच्छतंमत्परमौनलकूबरसादनम् ॥ संजातोमयिभावोवामीप्सितःपरमोभवः ४२ ॥ श्रीशुकउवाच ॥ इत्युक्तौतौपरिक्रम्यप्रणम्यचपुनःपुनः ॥ बद्धोलूखलमामंत्र्यजग्मतुर्दिशमुत्तराम् ४३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेदशमोऽध्यायः १० ॥ ॥ छ ॥ ॥ ॥ श्रीशुकउवाच ॥ गोपानंदादयःश्रुत्वाद्रुमयोःपततोरवम् ॥ तत्राजग्मुःकुरुश्रेष्ठनिर्घातभयशंकिताः १ भूम्यांनिपतितौतत्रददृशुर्यमलार्जुनौ ॥ बभ्रमुस्तदविज्ञायलक्ष्यंपतनकारणम् २ उलूखलंविकर्षंतदाम्नाबद्धंचबालकम् ॥ कस्येदंकुतआश्चर्यमुत्पातभयकातराः ३ बालाऊचुरनेनेतितिर्यग्गतमुलूखलम् ॥ विकर्षतामध्यगेनपुरुषावप्यचक्ष्महि ४ नतेतदुक्तंजगृहुर्नघटेतेतितस्यतत् ॥ बालस्योत्पाटनंतर्वोःकेचित्संदिग्धचेतसः ५ उलूखलंविकर्षंतंदाम्नाबद्धंस्वमात्मजम् ॥ विलोक्यनंदःप्रहसद्वदनोविमुमोचह ६ गोपीभिःस्तोभितोऽनृत्यद्भगवान्बालवत्क्वचित् ॥ उद्गायतिक्वचिन्मुग्धस्तद्वशोदारुयंत्रवत् ७

चूर्णिका

किंच साधूनांदर्शनात्बंधः नभवेत् यथासवितुःअक्ष्णोः४१ अतःमत्परौसंतौस्वस्थानंगच्छतम् युवयोःमयिभक्तिर्जाता४२॥श्रीशुकउवाच ॥ इत्युक्तौतौपरिक्रम्यप्रणम्यचपुनःपुनः बद्धोलूखलमामंत्र्यजग्मतुर्दिशमुत्तराम् ४३ ॥ इतिदशमेदशमः १० ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ गोपानंदादयःश्रुत्वाद्रुमयोःपततोरवम् तत्राजग्मुःकुरुश्रेष्ठनिर्घातभयशंकिताः १ ततःभुविपतितौवृक्षौदृष्ट्वातत्पतनकारणं नज्ञात्वाबभ्रमुः २ तावत्उलूखलंकर्षंतंदाम्नाबद्धंबालंदृष्ट्वाकस्येदंकर्मइत्याहुः ३ तदातत्रस्थाबालाउलूखलंकर्षता अनेन इदंकृतमित्यूचुः तत्रपुरुषावपिदृष्टौ ४ ततः बालवचः तेगोपाः नजगृहुः ५ तत्रउलूखलेदाम्नाबद्धंसुतंदृष्ट्वानंदः तंमुमोच ६ अथकंचित् कृष्णःप्रोत्साहितः सन्नृत्यति गायतिच ७

॥४५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इदमानयेत्याज्ञप्तःआनेतुमसमर्थइवकेवलंबिभर्ति (तत्रंपीठकंश्रीपर्ण्यादिपीठं । उन्मानंदारुमस्थादि । स्वानांप्रीतिमावहन्बाहुक्षेपंकक्षयोरधःचकारात्करताडनादिकुरुते) तद्विदांचेति (द्वितीय-) चकारस्यान्वयः ८ तत्ऐश्वर्यंविदंतिये (तेतद्विदः) तेषाम् (आत्मीयांभृत्यवशातांदर्शयन्) एवंव्रजस्यहर्षमुवाहेति ९ (अथमोचनानंतरंसरित्तीरगतंआह्वयत्रोहिणीतिशेषःजन्मर्क्षंजन्मनक्षत्रंअतःस्नात्वाशुचिःसन्) १० (मातृमृष्टान्मातृभिरुद्धर्तनपुरःसरंस्नापितानित्यर्थः)११ (उपेयातांउपागतौ) १२ (अशेषाणांशिखरंशिखामाल्यंविश्वचूडामणिमित्यर्थःतंइत्थंएवमेवपुनःपुनःसुतंमत्वाऽभ्युदयंकरोतिस्म) १३ (एवंतस्यास्तदेकपरत्वंदर्शयतिक्रीडंतमितिकदाचित्क्रीडासक्तंसाग्रजंकृष्णमजोहवीत्आह्वयत्) १४ १५ १६ (हेदाशार्हराम धेहिकुरु) १७ रंतुंवृंदावनंगंतुमंतःकृष्णेनयंत्रिताः । स्वतंत्राइवनंदाद्यामंत्रमेतममंत्रयन् ॥ व्रजकार्यंगोकुलस्यहितंकृत्यं १८ १९ २० (अनःशकटं) २१ विपदंवीनांपाक्षिणांपदंविहारस्थानंविगतप्रतिष्ठंवा (अपरिच्छिन्नमित्यर्थः एतादृशंवियत्गगनंनीतः) २२

॥४६॥ श्लोकाः ८/२२

बिभर्तिक्वचिदाज्ञप्तःपीठकोन्मानपादुकम् ॥ बाहुक्षेपंचकुरुतेस्वानांचप्रीतिमावहन् ८ दर्शयंस्तद्विदांलोकआत्मनोभृत्यवश्यताम् ॥ व्रजस्योवाहवैहर्षंभगवान्बालचेष्टितैः ९ “ सरित्तीरगतंकृष्णंभग्नार्जुनमथाह्वयत् ॥ जन्मर्क्षमद्यभवतोविप्रेभ्योदेहिगाःशुचिः १० पश्यपश्यवयस्यांस्तेमातृमृष्टान्स्वलंकृतान् ॥ त्वंचस्नातःकृताहारोविहरस्वस्वलंकृतः ११ नोपेयातांयदाहूतौक्रीडासंगेनपुत्रकौ ॥ यशोदांप्रेषयामासरोहिणीपुत्रवत्सलाम् १२ इत्थंयशोदातमशेषशेखरंमत्वासुतंस्नेहनिबद्धधीर्नृप ॥ हस्तेगृहीत्वासहराममच्युतंनीत्वास्ववाटंकृतवत्यथोदयम् १३ क्रीडंतंसासुतंबालैरतिवेलंसहाग्रजम् ॥ यशोदाजोहवीत्कृष्णंपुत्रस्नेहस्नुतस्तनी १४ कृष्णकृष्णारविंदाक्षतातएहिस्तनंपिब ॥ अलंविहारैःक्षुत्क्षांतःक्रीडाश्रांतोसिपुत्रक १५ हेरामागच्छताताशुसानुजःकुलनंदन ॥ प्रातरेवकृताहारस्तद्भवान्भोक्तुमर्हति १६ प्रतीक्षतेत्वांदाशार्हभोक्ष्यमाणोव्रजाधिपः ॥ एह्यावयोःप्रियंधेहिस्वगृहान्यातबालकाः ॥ १७” ॥ श्रीशुकउवाच ॥ गोपवृद्धामहोत्पाताननुभूयबृहद्वने ॥ नंदादयःसमागत्यव्रजकार्यममंत्रयन् १८ तत्रोपनंदनामाऽऽहगोपोज्ञानवयोधिकः ॥ देशकालार्थतत्त्वज्ञःप्रियकृद्रामकृष्णयोः १९ उत्थातव्यमितोस्माभिर्गोकुलस्यहितैषिभिः ॥ आयांत्यत्रमहोत्पाताबालानांनाशहेतवः २० मुक्तःकथंचिद्राक्षस्याबालघ्न्याबालकोह्यसौ ॥ हरेरनुग्रहान्नूनमनश्चोपरिनापतत् २१ चक्रवातेननीतोयंदैत्येनविपदंवियत् ॥ शिलायांपतितस्तत्रपरित्रातःसुरेश्वरैः २२

चूर्णिका

क्वचित्केनचित् आज्ञप्तःसन् पीठकोन्मानपादुकं बिभर्ति करचालनं च कुरुते ८ एवं कृष्णेनभृत्यवश्यतादर्शिता किंच भगवान् बालचेष्टितैः व्रजस्यएवंहर्षं चकार ९--१७ ततः गोपवृद्धाः बृहद्वने महोत्पातानुभूयसर्वे मिलित्वाव्रजस्य हितकृत्यं अमंत्रयन् १८ तत्रज्ञानवयोधिकः उपनंदनामागोपःआह १९अस्माभिः इतःशीघ्रंउत्थातव्यं अत्रउत्पाताः बालानांनाशहेतवः आयांति२०तदाह कथंचिद्बालघ्न्याः राक्षस्याः अयंकृष्णः मुक्तः तथाहरेःप्रसादात् अनः उपरिनापतत् २१ तथाचक्रवातेन अयंखंनीतः शिलायांपतितोपिदेवैः त्रातः २२

१ अत्रश्रीधरी–“केवलं पीठादि । २ बाहुक्षेपंकरचालनंच ” इत्येवमेव । ३ इतःदशप्रक्षिप्ताःश्लोकास्तत्रादाविमौद्वावपि । क्रीणिहिभोःफलानीतिश्रुत्वासत्वरमच्युतः । फलार्थीधान्यमादायययौसर्वफलप्रदः ॥ फलविक्रयिणीतस्यच्युतधान्यंकरद्वयम् । फलैरपूरयद्रत्नैःफलभांडमपूरिच ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अन्यतमोवाकश्चित्वालः । अच्युतेनैवरक्षणमासीत् २३ अरिष्टोऽनर्थः । इतःस्थानात् २४ पशव्यंपशुभ्योहितं । यतःनवानिकाननानिअवांतराणिविद्यंतेयस्मिन् तत् (पुण्याअद्रितृणवीरुधोयत्रअता गोपादीनांसेव्यम् २५ २६ एकाधियोविप्रतिपत्तिरहिताः । व्रजान्शकटयूथान् (समायुज्यव्यूह्य) रूढाःशकटान्यारोपिताःपरिच्छदायैरते २७ (अनःसुशकटेषुहेराजन्) यत्ताःकृतप्रयत्नाः २८ (शृंगाणिशृंगाकारान्वाद्यविशेषान्) २९ (रूढारथायाभिस्ताः)नूत्नैर्नवीनैःकुचगतैःकुंकुमैःकांतिर्यासांताःनूत्नेषुकुचेषुयत्कुंकुमंतेनकांतिः (शोभा) यासामितिवा ३० (तत्कथेतिगोपीभिर्गी यमानास्तत्कथाःसादरंशृण्वंत्यावित्यर्थः) ३१ व्रजावासंगोकुलस्यवसतिस्थानम् (समंतात्शकटानिस्थापयंतस्तैश्चक्रुः) ३२ ३३ (कलवाक्यैर्मधुरवचनैः) स्वकालेनवत्सपालनयोग्यकालेन (वत्सान्पालयामासतुरित्यर्थ.) ३४ कौमारलीलांनिरूपयति । अविदूरइत्यादिना (नानाविधाःक्रीडापरिच्छदायथोः) ३५ क्षेपणैःबिल्वामलकादिभिःक्वचित्किंकिणीयुक्तैःपादैः क्षिपतःताडयतः वृक्षादीनितिशेषः वत्सपालाएववृद्धित्राःकंबलादिपिहिताः वृषरूपमनुकुर्वाततैःसहस्वयमपितथैववृषायमाणौपरस्परंयुयुधातेनर्दंतौवृषशब्दमनुकुर्वंतौ ३६

॥४७॥ श्लोकाः २३/३६

यन्नम्रियेतद्रुमयोरंतरंप्राप्यबालकः ॥ असावन्यतमोवापितदप्यच्युतरक्षणम् २३ यावदौत्पातिकोऽरिष्टोव्रजंनाभिभवेदितः ॥ तावद्बालानुपादाययास्यामो ऽन्यत्रसानुगाः २४ वनंवृंदावनंनामपशव्यंनवकाननम् ॥ गोपगोपीगवांसेव्यंपुण्याद्रितृणवीरुधम् २५ तत्रचाद्यैवयास्यामःशकटान्व्यूह्यमाचिरम् ॥ गोध नान्यग्रतायांतुभवतांयदिरोचते २६ तच्छ्रुत्वैकधियोगोपाःसाधुसाध्वितिवादिनः ॥ व्रजान्स्वान्स्वान्समायुज्यययूरूढपरिच्छदाः २७ वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानिच ॥ अनःस्वारोप्यगोपालायत्ताआत्तशरासनाः २८ गोधनानिपुरस्कृत्यशृंगाण्यापूर्यसर्वतः ॥ तूर्यघोषेणमहताययुःसहपुरोहिताः २९ गोप्योरूढरथानूत्नकुचकुंकुमकांतयः ॥ कृष्णलीलाजगुःप्रीतानिष्ककंठ्यःसुवाससः ३० तथायशोदारोहिण्यावेकंशकटमास्थिते ॥ रेजतुःकृष्णरामा भ्यांतत्कथाश्रवणोत्सुके ३१ वृंदावनंसंप्रविश्यसर्वकालसुखावहम् ॥ तत्रचक्रुर्व्रजावासंशकटैरर्धचंद्रवत् ३२ वृंदावनंगोवर्धनंयमुनापुलिनानिच ॥ वीक्ष्यासी दुत्तमाप्रीतीराममाधवयोर्नृप ३३ एवंव्रजौकसांप्रीतिंयच्छंतौबालचेष्टितैः ॥ कलवाक्यैःस्वकालेनवत्सपालौबभूवतुः ३४ अविदूरेव्रजभुवःसहगोपालदार कैः ॥ चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ ३५ क्वचिद्वादयतोवेणूनक्षेपणैःक्षिपतःक्वचित् ॥ क्वचित्पादैःकिंकिणीभिःक्वचित्कृत्रिमगोवृषैः ३६

चूर्णिका

किंचद्रुमयोः अंतरंप्राप्य असौबालः अन्योवानम्रतः इदंईशेनरक्षणंआसीत् २३ अतः यावत् औत्पातिकःअनर्थःव्रजंनाभिभवेत् तावत्इतः बालान् आदायअन्यत्र या स्यामः २४ इतःसमीपंवृंदावनंनामवनं गोपगोपीगवां सेव्यंपुण्याद्रितृणवीरुधंवर्ततेतत्रअद्यैवयास्यामः २५ शकटान्व्यूह्यगोधनानिपुरतःयांतु भवतांयदिरोचते २६ त च्छ्रुत्वागोपाःसाध्वित्युक्त्वास्वव्रजान् समायुज्यशकटेषुपरिच्छदान्ततथावृद्धबालास्त्रियःस्थाप्य आत्तशरासनाः गोधनानिपुरस्कृत्यशृंगाणिआपूर्यतूर्यघोषेणसहसोपाध्याया. ययुः २७ २८ २९ तदागोप्यःरूढरथाःसत्यःकृष्णलीलाजगुः ३० तथायशोदारोहिण्यौ एकं शकटंस्थित्वापुत्राभ्यांरेजतुः ३१ एवंवृंदावनंप्रविश्यतत्रशकटैःअर्धेंदुवत्व्र जावासंचक्रुः ३२ किंचवृंदावनं गोवर्धनंयमुनापुलिनानिचदृष्ट्वारामकृष्णयोःपराप्रीतिरासीत् ३३ एवंबालचेष्टितैःव्रजौकसांप्रीतिं कृत्वाकालेनतौवत्सपालौबभूवतुः ३४ ॥४७॥ अथकौमारलीलामाह ततः तौव्रजभुवःसमीपेगोपबालैः सहवत्सान्चारयामासतुः ३५ क्वचिद्वेणुंवादयतः तथाविल्वफलादिभिः क्षिपतः क्वचित्किंकिणियुक्तपादैः ताडयतः क्वचित्कृत्रिमगोवृषैः सहस्वयंवृषायमाणौनर्दंतौसंतौमिथः युयुधातेकिंचहंसादीन्जंतून्रुतैः अनुकृत्यचेरतुः ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

रुतैःशब्दैर्जंतून्हंसमयूरादीन् (अनुकृत्यतदनुकारिशब्दान्कुर्वंतौइत्यर्थः) ३७ ३८ मुग्धइवाजानन्निवआसदत्समीपमागमत् ३९ सहलांगूलंयथाभवतितथाऽपरपादाभ्यांगृहीत्वा ४० ४१ सर्वेषांलोकानां एकौमुख्यौपालकौ (तौ)। प्रातराशःप्रातर्भोज्यमन्नंतत्साहितौ (तद्गृहीत्वेत्यर्थः) ४२ अभ्याशम्समीपम् ४३ (महासत्त्वंम्महांतंप्राणिनम्) ४४ ४५ रामआदिर्येषांते। नतुरामः ४६ (जगद्गुरोर्ब्रह्मणः। चच्छर्दववाम) ४७ तुंडयोःचंच्वोः। वीरिणवत्अग्रंथितृणविशेषवत्। (दिवौकसांमुदावहोहर्षजनकः) ४८ समीडिरे। तुष्टुवुः। आनकैः(पटहैः) शंखैः अन्यैश्चसंस्तवैःसह। ४९ (बकमुखान्मुक्तम् उपलभ्य) स्वस्थानमागतंप्राणमिवतंकृष्णम्। प्रणीयएकीकृत्य ५० अतिप्रियेणअतिप्रीत्याआदृताःसादराःप्रेत्यागतमिवलोकांतरादागतमिव। तृषितान्यतृप्तानिअमृतंपिबंतीवईक्षणानियेषांते ५१

॥४८॥ वृषायमाणौनर्दंतौयुयुधातेपरस्परम् ॥ अनुकृत्यरुतैर्जंतूंश्चेरतुःप्राकृतौयथा ३७ कदाचिद्यमुनातीरेवत्सांश्चारयतोःस्वकैः ॥वयस्यैःकृष्णबलयोर्जिघांसुर्दै
त्यआगमत् ३८ तंवत्सरूपिणंवीक्ष्यवत्सयूथगतंहरिः ॥ दर्शयन्बलदेवायशनैर्मुग्धइवासदत् ३९ गृहीत्वाऽपरपादाभ्यांसहलांगूलमच्युतः ॥ भ्रामयि
त्वाकपित्थाग्रेप्राहिणोद्गतजीवितम् ॥ सकपित्थैर्महाकायःपात्यमानैःपपातह ४० तंवीक्ष्यविस्मिताबालाःशशंसुःसाधुसाध्विति ॥ देवाश्चपरिसंतुष्टाबभू
वुःपुष्पवर्षिणः ४१ तौवत्सपालकौभूत्वासर्वलोकैकपालकौ ॥ सप्रातराशौगोवत्सांश्चारयंतौविचेरतुः ४२ स्वंस्वंवत्सकुलंसर्वेपाययिष्यंतएकदा ॥
गत्वाजलाशयाभ्याशंपाययित्वापपुर्जलम् ४३ तेतत्रददृशुर्बालामहासत्त्वमवस्थितम् ॥ तत्रसुर्वज्रनिर्भिन्नंगिरेःशृंगमिवच्युतम् ४४ सवैबकोनामम
हानसुरोबकरूपधृक् ॥ आगत्यसहसाकृष्णंतीक्ष्णतुंडोऽग्रसद्बली ४५ कृष्णंमहाबकग्रस्तंदृष्ट्वारामादयोऽर्भकाः ॥ बभूवुरिंद्रियाणीवविनाप्राणैर्विचेतसः
४६ तंतालुमूलंप्रदहंतमग्निवद्गोपालसूनुंपितरंजगद्गुरोः ॥ चच्छर्दसद्योतिरुषाऽक्षतंबकस्तुंडेनहंतुंपुनरभ्यपद्यत ४७ तमापतंतंसनिगृह्यतुंडयोर्दोर्भ्यांबकं
कंससखंसतांपतिः ॥ पश्यत्सुबालेषुददारलीलयामुदावहोवीरणवद्दिवौकसाम् ४८ तदाबकारिंसुरलोकवासिनःसमाकिरन्नंदनमल्लिकादिभिः ॥ समी
डिरेचानकशंखसंस्तवैस्तद्वीक्ष्यगोपालसुताविसिस्मिरे ४९ मुक्तंबकास्यादुपलभ्यबालकारामादयःप्राणमिवेंद्रियोगणः ॥ स्थानागतंतंपरिरभ्यनिर्वृताः
प्रणीयवत्सान्व्रजमेत्यतज्जगुः ५० श्रुत्वातद्विस्मितागोपागोप्यश्चातिप्रियादृताः ॥ प्रेत्यागतमिवौत्सुक्यादैक्षंततृषितेक्षणाः ५१

श्लोकाः ३७/५१

चूर्णिका ३७कदाचिद्बालैः सहवत्सान्चारयतोःसतोः तत्रजिघांसुः दैत्यः प्राप्तः ३८ तंवत्सरूपिणंवीक्ष्यहरिःरामायदर्शयित्वा अजानन्निवतत्समीपंगत्वातं अपरपादाभ्यां धृत्वा भ्राम यित्वाकपित्थाग्रेव्यसुंतं प्राहिणोत् समहाकायःकपित्थफलैःसहपपात ३९ ४० तंवीक्ष्यबालाःप्रशस्यसाध्वित्यूचुःदेवाश्चपुष्पवृष्टिंचक्रुः ४१ एवंतौवत्सगोपालौभूत्वासप्रात राशौवत्सांश्चारयंतौतत्रविचेरतु ४२ अथैकदासर्वेबालाःस्वंस्वंवत्सकुलंआदायजलसमीपंगत्वाजलंपाययित्वास्वयंपपुः ४३ तत्रतेबालाः स्थितंगिरिशृंगामिवसत्वंददृशुः ४४ हे राजन् सवैबकोनामासुरः सहसाएत्यतीक्ष्णतुंडःसन्कृष्णं अग्रसत् ४५ ततःतेनग्रस्तंकृष्णंदृष्ट्वारामंविनाबालाःविचेतसोबभूवुः ४६ ततः तालुमूलेअग्निवद्दहंतंसः चच्छर्द पुनश्चसः अतिरुषातुंडेनहंतुंप्राप्तः ४७ तावत्कृष्णः तंचंच्वोः दोर्भ्यां धृत्वालीलयाददार ४८ तदाबकारिंकृष्णंदेवाःपुष्पैः ववृषुः तथाः आनकशंखैःस्तवैश्चतुष्टुवुः ४९ एवं बकास्यात्मुक्तंकृष्णंप्राप्यरामादयःप्रीताःसंतःव्रजंएत्यतत्कर्मजगुः ५० ततः गोपगोप्यःतत्श्रुत्वाविस्मिताःभूत्वातृषितेक्षणाःसंतः तंदृष्ट्वाऊचुः ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अहोवतेत्यादिश्लोकत्रयस्यइतिनंदादयइत्यनेनान्वयः । अपिएवमपितेषामेवानिष्टमासीत् । यतस्तैःपूर्वमन्येषांभयंकृतम् ५२ अथतेघोरदर्शनाअपिनाभिभवंतिनधर्षयंत्येव ५३ गर्गोयदाहतस्मान्नंदा
त्मजोयंतेनारायणसमोगुणैरित्यादि । (अन्वभाविअनुभूतम्) ५४ ५५ (निलायनादिभिर्विहाराविशेषैः तत्रनिलयनंरहसिलीनस्यगवेषणादि) ५६ वत्सयूथगतंहत्वावत्सदंभासुरंहरिः । मुनियूथगतं
चाहन्नग्रण्यंदंभिनांबकं ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकादशोध्यायः ११ ॥ ॥ ७ ॥ ॥ द्वादशेतुमहासर्पवपुर्धरमघासुरं वत्सपालगिलंकुद्धोगलेऽहन्नितिवर्ण्यते ॥१॥
महाबकगलेक्रीडाकेवलस्यनकौतुकं इतिवाघासुरमुखेससखःमाविशद्धरिः २ क्वचितकदाचित वनाशाय वनेएवप्रथमंभोजनंकर्तुं (नतुगृहे)१तेनैवशृंगरवेणश्रीकृष्णेनवासहपृथुकाबालाःस्निग्धाःस्नेहयु
क्ताः(शोभनाः)रम्याः शिग्वेत्रादयोयेषांते (तत्र) शिक्यशिक्यं (वेत्रंकशाविषाणवेणुवाद्यविशेषः) सहस्राधिकसंख्ययायुक्तान्वत्सान् २ ३ काचादिभिःपूर्वंमातृभिर्भूषिताअपिपुनःस्वयंफलप्रवालादिभि
रात्मानमभूषयन्नित्यर्थः (फलमामलकादि धातुर्गैरिकम्) ४ मुष्णंतश्चोरयंतः (ग्रहीतुमागतेपुनस्तत्रत्यानूशिक्यादींस्ततोपिदूरात्क्षिपंतः) ५

॥४९॥ श्लोकाः ५२/५

अहोबतास्यकृष्णस्यबहवोमृत्यवोऽभवन् ॥ अप्यासीद्विप्रियंतेषांकृतंपूर्वंयतोभयम् ५२ अथाप्यभिभवंत्येनंनैवतेघोरदर्शनाः ॥ जिघांसयैनमासाद्यन
श्यंत्यग्नौपतंगवत् ५३ अहोब्रह्मविदांवाचोनासत्याःसंतिकर्हिचित् ॥ गर्गोयदाहभगवानन्वभावितथैवतत् ५४ इतिनंदादयोगोपाःकृष्णरामकथांमुदा ॥
कुर्वंतोरममाणाश्चनाविंदन्भववेदनाम् ५५ एवंविहारैःकौमारंवयस्तौजहतुर्व्रजे॥निलायनैःसेतुबंधैर्मर्कटोत्प्लवनादिभिः ५६॥ ॥इतिश्रीभागवतेमहापुरा
णेदशमस्कंधेवत्सबकवधोनामैकादशोध्यायः ११ ॥ श्रीशुकउवाच ॥ क्वचिद्वनाशायमनोदधद्व्रजात्प्रातःसमुत्थायवयस्यवत्सपान् ॥ प्रबोधयन्शृंगरवे
णचारुणाविनिर्गतोवत्सपुरःसरोहरिः १ तेनैवसाकंपृथुकाःसहस्रशःस्निग्धाःसुशिग्वेत्रविषाणवेणवः ॥ स्वकान्सहस्रोपरिसंख्ययान्वितान्वत्सान्पुरस्कृत्य
विनिर्ययुर्मुदा २ कृष्णवत्सैरसंख्यातैर्यूथीकृत्यस्ववत्सकान् ॥ चारयंतोऽर्भलीलाभिर्विजह्रुस्तत्रतत्रह ३ फलप्रवालस्तबकसुमनःपिच्छधातुभिः ॥
काचगुंजामणिस्वर्णभूषिताअप्यभूषयन् ४ मुष्णंतोन्योन्यशिक्यादीन्ज्ञातानाराच्चचिक्षिपुः ॥ तत्रत्यांश्चपुनर्दूराद्धसंतश्चपुनर्ददुः ५

चूर्णिका

अहोअस्यबालस्यबहवः मृत्यवःप्राप्ताः तथापितेषामेव अनिष्टं आसीत् ५२ ५३ किंच अहोब्रह्मविदांवाचः कदापिअसत्याःनभवंति यतःगर्गोयदाहतत्तथैवजातम् ५४
एवंनंदादयःकृष्णरामकथांकुर्वंतः संतः भववेदनांनाविंदन्५५एवंविहारैः कौमारैः कौमारंजहतुर्व्रजे निलायनैःसेतुबंधैर्मर्कटोत्प्लवनादिभिः ५६ ॥ इतिदशमेएकादशः ११ ॥
॥ श्रीशुकउवाच ॥ ॥ क्वचित्हरिः वनेप्रथमं भोजनंकर्तुंप्रातः उत्थायशृंगशब्देनबालान्प्रबोध्यवत्सपुरःसरः सन्निर्गतः ततः कृष्णेनसहसहस्रशः बालाः सहस्रा
धिकसंख्यायुतान्वत्सान्पुरस्कृत्यविनिर्ययुः २ ततः असंख्यकृष्णवत्सैः स्ववत्सानेकीकृत्यतेचारयंतः बाललीलाभिः तत्रतत्रविजह्रुः ३ तथाफलप्रवालपिच्छधातुकाच
गुंजामणिभिः आत्मानंभूषयन् ४ किंच अन्योन्यशिक्यादीन्चोरयंतः ज्ञातान्चिक्षिपुश्च ५

॥४९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(वनशोभांद्रष्टुं) यदिदूरंगतःकृष्णोभवतितर्हि (तमहंपूर्विकयासंस्पृश्येति) ६ ध्मांतोवादयंतःभृंगैःसह ७ विच्छायाभिःपक्षिच्छायाभिः (पक्षिच्छायांसंलक्ष्यतयैवसहप्रधावंतीत्यर्थः हंसैःसमंशोभनंगच्छंतः। बकैःसमंध्यायंतइवोपविशंतइत्यर्थः) कलापिभिर्मयूरैः ८ कीशवालान्वृक्षशाखासुलंबमानानिमर्कटलांगूलानि। आकर्षंतःलांगूलमसुंचतएवतैःसहद्रुमानारोहंतः (इत्यर्थः) तैःसहविकुर्वंतःदंतदर्शनभ्रूविजृंभादिभिर्विकारान्कुर्वंतः। फलाशिषुवृक्षेषु(तैःसह)प्लवंतःशाखायाःशाखांतरमुद्गच्छंतः ९ (सरित्प्रस्रवेसंप्लुतास्तरंतइत्यर्थः) प्रतिच्छायाःप्रतिबिंबानि १० तेनेतिविस्मयेनश्लोकद्वयेनाभिनंदति। इत्थमिति। सतांविदुषांब्रह्मचतत्सुखंचअनुभूतिश्चतयास्वप्रकाशपरमसुखेनेत्यर्थः। भक्तानांपरदैवतेनआत्मप्रदेननाथेन। मायाश्रितानांतुनरदारकतयाप्रतीयमानेनसहविजह्रुः। कृतानांपुण्यानांपुंजाःराशयोयेषांते। ब्रह्मविदांतदनुभवएव। भक्तानामतिगौरवेणैवभजनम्। एतेतुतेनसहसख्येनविजह्रुः। अहोभाग्यमितिभावः ११ बहुजन्मभिःकृच्छ्रेणधृतआत्मामनोयैस्तैरपि (सयेषांदृग्विषयस्तेषांव्रजौकसांदिष्टंभाग्यम्) १२ सुखक्रीडनवीक्षणेनास्तिक्षमायस्यसः। सकथंभूतःयस्यांतःअंतरंछिद्रंपीतामृतैरपि (अतएवामरैरपि) ततोमृत्युभीतैःअमरैःप्रतीक्ष्यतेकथंमरिष्यतिकदावेति। यद्वा कथंभूतंसुखक्रीडनम्। यत्अंतःहृदयेअमरैःप्रतीक्ष्यतेविचिंत्यते। पीतामृतैरपिनिजजीवितेप्सुभिः। अयंभावःनामृतपानमात्रेणजीवनंसफलंभवति। किंतुभगवल्लीलानुस्मरणेनेतितदेवनित्यमंताश्चिंत्यतइति १३ कृष्णप्रमुखानर्भकान्दृष्ट्वासइतिव्यवस्यनिश्चित्याजगरंवपुर्धृत्वातेषांग्रसनाशयापाथिव्यशेतेतितृतीयेनान्वयः। कंसेनानुशिष्टःप्रहितः। बकीपूतना (बकश्चतयोरनुजः) कथंव्यवस्यतदाह। अयंत्वितिसार्धेन (अयमेव) मम (सोदरयोर्नाशकृत् अतः) तयोर्द्वयोःसोदरयोःस्थानेएनंकृष्णंसबलंससैन्यंवत्सतत्पालसहितंहनिष्यामि १४

श्लोकाः ६/१४

यदिदूरंगतःकृष्णोवनशोभेक्षणायतम्॥ अहंपूर्वमहंपूर्वमितिसंस्पृश्यरेमिरे ६ केचिद्वेणून्वादयतोध्मांतःशृंगाणिकेचन॥केचिद्भृंगैःप्रगायंतःकूजंतःकोकिलैःपरे ७ विच्छायाभिःप्रधावंतोगच्छंतःसाधुहंसकैः॥ बकैरुपविशंतश्चनृत्यंतश्चकलापिभिः ८ विकर्षंतःकीशवालानारोहंतश्चतैर्द्रुमान्॥ विकुर्वंतश्चतैःसाकंप्लवंतश्चपलाशिषु ९ साकंभेकैर्विलंघंतःसरित्प्रस्रवसंप्लुताः॥ हसंतश्चप्रतिच्छायाःशपंतश्चप्रतिस्वनान् १० इत्थंसतांब्रह्मसुखानुभूत्यादास्यंगतानांपरदैवतेन॥ मायाश्रितानांनरदारकेणसाकंविजह्रुःकृतपुण्यपुंजाः ११ यत्पादपांसुर्बहुजन्मकृच्छ्रतोधृतात्मभिर्योगिभिरप्यगम्यः॥ सएषयद्दृग्विषयःस्वयंस्थितःकिंवर्ण्यतेदिष्टमहोव्रजौकसाम् १२ अथाघनामाभ्यपतन्महासुरस्तेषांसुखक्रीडनवीक्षणाक्षमः॥ नित्यंयदंतर्निजजीवितेप्सुभिःपीतामृतैरप्यमरैःप्रतीक्ष्यते १३ दृष्ट्वार्भकान्कृष्णमुखानघासुरःकंसानुशिष्टःसबकीबकानुजः॥अयंतुमेसोदरनाशकृत्तयोर्द्वयोर्ममैनंसबलंहनिष्ये १४

चूर्णिका

किंच कृष्णः वनशोभेक्षणाययदिदूरंगतोभवेत्तर्हितंअहंपूर्वमहंपूर्वं इतिसंस्पृश्यरेमिरे किंच केचित्गोपवालाः वेणून्वादयंतः केचनशृंगाणि केचित्भृंगैः प्रगायंतः केचित्कोकिलैः कूजंतः ७ केचित्पक्षिच्छायाभिः धावंतः के० हंसैर्गच्छंतः के०बकैरुपविशंतः के०मयूरैः नृत्यंतः ८ के०वृक्षशाखासुलंबमानान्कीशवालान् विकर्षयंतः के०तत्पुच्छैःद्रुमान्आरोहंतःके०दंतदर्शनादिभिस्तैःसहविकुर्वंतः ९ के०भेकैःविलंघंतःके० प्रतिच्छायाःविहसंतःके० प्रतिस्वनान्शपंतःसंतःरेमिरे १० एवंतेगोपबालाःपरब्रह्मरूपेणनरदारकेणाविजह्रुःअहोभाग्यंतेषां ११ किंचयस्यपादरेणुःयोगिभिरपिदुष्प्रापःसएवईशःयेषांदृग्विषयःतेषांव्रजौकसांकिंदिष्टंवर्ण्यते १३ अथो एवंतेषांक्रीडनवीक्षणाक्षमः अघासुरः प्राप्तः १३ ततःकृष्णादिबालान्दृष्ट्वाबकीबकानुजः सः आह अयंकृष्णः मे सोदरनाशकृत् अतः सबलंएनंहनिष्ये १४

१ तानति विस्मितइतिपाठांतरंअन्यपुस्तके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुतथापिव्रजस्थास्त्ववशिष्येरन् । नेत्याह । एतइति । कृताः (तिलयुक्ताआपःकृताः) तिलोदकतयाकल्पिता (इत्यर्थः) वर्ष्मसुदेहेषुप्रजाएवासवः (प्राणा) येषांतेतथा १५ सयोजनायामंयोजनप्रमाणेनदैर्घ्येणयुक्तंचतन्महाद्रिवत्पीवरंच । व्यात्तंप्रसारितंगुहातुल्यमाननंयस्मिंस्तत् १६ अद्भुतमितियदुक्तंएतद्दर्शयितुंविशिनष्टि । धरायामधरोष्ठोयस्यसःजलदेषुउत्तरोष्ठोयस्यसःदर्याविवआननस्यांतौसृक्किणीयस्यसः गिरेःशृंगाणीवदंष्ट्रायस्यसः ध्वांतवदंतरास्यंयस्यसःवितताध्ववज्जिह्वायस्यसः । परुषानिलवत्श्वासोयस्यसः । दववदीक्षणयोरुष्णो (यस्यसः) दाववद्दृष्टिरित्यर्थः । परुषानिलश्वासश्चासौदवेक्षणोष्णश्चतथा १७ वस्तुतोऽजगरमेवव्यात्ततुंडंदृष्ट्वावृंदावनस्यश्रीःसंपदेवैषेतिभ्रांत्यामत्वाविपरीतंव्यात्ताजगरास्यसादृश्येनोत्प्रेक्षितवंतः १८ उत्प्रेक्षामेवप्रश्नोत्तराभ्यांचाहुःअहोइति । सत्त्वकूटंप्राण्याभासमिदंनवा । तथाप्यस्मत्संग्रसनायव्यात्तंयद्व्यालतुंडंतद्वदाचरतिनवा (इदंपुरःस्थितंवृंदावनंप्रसारितमुखस्यव्यालस्यतुंडंकिमित्यर्थः) १९ निश्चितंतथैवेत्याहुः । सत्यमिति । अर्ककैरारक्तंघनंउत्तरोष्ठवत्पश्यत । तस्यघनस्यप्रतिच्छाययाऽरुणंरोधःस्थलंअधरोष्ठवत्पश्यत पश्यतेतिसर्वत्रान्वेति २० सृक्किभ्यांओष्ठप्रांताभ्यांप्रतिस्पर्धेते तत्तुल्यतयावर्तेते (इत्यर्थः) नगोदरेगिरिदर्यौएताःतुंगशृंगालयः (उच्चशिखरपंक्तयः) तस्यदंष्ट्राभिःस्पर्धमानाः २१ आस्तृतायाममार्गःविस्तृतोदैर्घ्यवान्मार्गः (जिह्वाम्) प्रतिगर्जतिप्रतिस्पर्धते (एषामित्यंगुल्यानिर्देशः) एषांशृंगाणामंतर्गतंमध्यगतंअंधकारंएतत्अंतराननंआननस्यमध्यंप्रतिगर्जति २२ दावेन (वनाग्निना) उष्णःखरवातोयं (तीक्ष्णोयंश्वासवद्भाति) तेनदावेनदग्धानांसत्त्वानांयोदुर्गंधःसएवसर्पस्यांतरगतामिषगंधवद्भाति २३

॥५१॥ श्लोकाः १९/२३

एतेयदामत्सुहृदस्तिलापःकृतास्तदानष्टसमाव्रजौकसः ॥ प्राणेगतेवर्ष्मसुकानुचिंताप्रजासवःप्राणभृतोहियेते १५ इतिव्यवस्याजगरंबृहद्वपुःसयोजनायाममहाद्रिपीवरम् ॥ धृत्वाऽद्भुतंव्यात्तगुहाननंतदापथिव्यशेतग्रसनाशयाखलः १६ धराधरोष्ठोजलदोत्तरोष्ठोदर्याननांतोगिरिशृंगदंष्ट्रः ॥ ध्वांतांतरास्योवितताध्वाजिह्वःपरुषानिलश्वासदवेक्षणोष्णः १७ दृष्ट्वातंतादृशंसर्वेमत्वावृंदावनश्रियम् ॥ व्यात्ताजगरतुंडेनह्युत्प्रेक्षंतेस्मलीलया १८ अहोमित्राणिगदत सत्त्वकूटंपुरःस्थितम् ॥ अस्मत्संग्रसनव्यात्तव्यालतुंडायतेनवा १९ सत्यमर्ककरारक्तमुत्तराहनुवद्घनम् ॥ अधराहनुवद्रोधस्तत्प्रतिच्छाययारुणम् २० प्रतिस्पर्धेतेसृक्किभ्यांसव्यासव्येनगोदरे ॥ तुंगशृंगालयोप्येतास्तद्दंष्ट्राभिश्चपश्यत २१ आस्तृतायाममार्गोयंरसनांप्रतिगर्जति ॥ एषामंतर्गतंध्वांतमेतदप्यंतराननम् २२ दावोष्णखरवातोयंश्वासवद्भातिपश्यत ॥ तद्दग्धसत्त्वदुर्गंधोप्यंतरामिषगंधवत् २३

चूर्णिका

किंच यदा एतेवालाः मत्सुहृदःतिलापःकृताः तदाव्रजौकसः नष्टतुल्याः भवंति यतः ते प्रजाऽसवएवसंति १५ इतिनिश्चित्य योजनदीर्घं अद्रिपीवरंगुहावत् प्रसारिताननं आजगरंवपुर्धृत्वाग्रसनाशयापथिव्यशेत १६ कथंभूतः सः धराधरोष्ठः मेघोत्तरोष्ठः दर्याननांतः गिरिशृंगदंष्ट्रः ध्वांतांतर्मुखः वितताध्वाजिह्वः इति १७ एवंतं तादृशं दृष्ट्वातंवृंदावनशोभैषेतिभ्रांत्यामत्वाव्यात्ताजगरतुंडसादृश्येनविपरीतंउत्प्रेक्षितवंतः आहुश्च १८ अहोमित्राणिगदतगदत इदंसत्त्वाभासंवानवा तत्रापि अस्मद्ग्रसनायव्यात्तव्यालतुंडवत् आचरतिवानवा १९ सत्यंसत्यं अर्ककरैःरक्तंमेघंऊर्ध्वोष्ठवत्पश्यत तत्प्रतिच्छाययारक्तं रोधस्तलं अधरोष्ठवत् पश्यत २० किंच दक्षिणोत्तरगिरिदर्यौ सृक्किभ्यांस्पर्धेतेइतिपश्यतएताःतुंगशृंगालयःतद्दंष्ट्राभिःपश्यत २१ अयंदीर्घमार्गःरसानांप्रातिस्पर्धतेपश्यत एषांशृंगाणांअंतर्ध्वांतंअंतराननवत्पश्यत २२ दावोष्णः वायुरयं श्वासवत्पश्यत तत्रदग्धसत्त्वदुर्गंधः अंतरामिषगंधवत्भातिप २३

॥५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंसत्यमप्यजगरंअन्यथोत्प्रेक्ष्यनिर्भयाः (तन्मुखं) ययुः किंग्रासिताग्रसिष्यति । अनेनश्रीकृष्णेनहंत्रा । बकारेः (श्रीकृष्णस्य) उशत्कमनीयंमुखं (वीक्ष्यउच्चैर्हसंतः) २४ (इत्थमहोइत्यादिषड्भि रुक्तंअतथ्यंविपरीतंश्रुत्वा) अमृषावरतुतःसर्पवपुरसुरएव (अयम्) मृषायतेस्वानांसर्पसादृश्यगोचरत्वेनप्रतीयतेइति (विचिंत्य) तान्निषेद्धुंवारयितुंयावन्मनोदधेतावत्प्रविष्टाइत्युत्तरेणान्वयः २५ तावत्प्रविष्टाएवकेवलंनतुते (शिशवः) तेनगीर्णाःगिलिताःजीर्णाइतिपाठेपिसएवार्थः । कथंभूतेन । हतयोःस्वकयोरंतंस्मरतिअनुध्याय तीतितथातेन । अतएवबकारेःश्रीकृष्णस्यप्रवेशंप्रतीक्षमाणे न (च) २६ स्वकरादवच्युतान्विनिःसृतान् (मृत्योरजगरस्यजठराग्नौवासोयेषांतान् घासानितिपाठेतृणसदृशान्करुणयार्दितो) विस्मितःसन् कृत्यंकिमत्रेत्यादिविचिंत्यतत्रोपायंज्ञात्वास्वयमप्यविशदित्य न्वयः २७ कथंविचिंत्य (तदाह) अस्यजीवनंअमीषांवाविहिंसनंइतिद्वयंवैनिश्चितंकथंनस्यादिति २८ घनच्छदामेघांतरिताः । कौणपाःकुणपाशिनोराक्षसाःकोणपोनिर्ऋतिस्तदीयाइतिवा २९ (अर्भैर्वत्सैश्चसहितमात्मानं) चूर्णीकर्तुमिच्छोस्तस्यगलेश्रादावेवतरसावृधेअवर्धत ३० निरुद्धोमुखादीनांमार्गभूतःकंठोयस्यास्वितस्यउद्गीर्णदृष्टेर्बहिर्निर्गतलोचनस्यअंतरंगेदेहमध्येपूर्णःपरिभृतःमूर्द्ध न्मूर्द्धनिब्रह्मरंध्रंनिर्भिद्यबहिर्गत (इतिवा) ३१ (तेनैवमार्गेण) प्राणेषुइंद्रियेषु स्वयाऽमृतवर्षिण्यादृष्ट्यैव (तदन्वितःसुहृद्वत्सयुतः) ३२

॥९२॥

श्लोकाः २४/३२

अस्मान्किमत्रग्रसितानिविष्टानयंतथाचेद्बकवद्विनंक्ष्यति ॥ क्षणादनेनेतिबकार्युशन्मुखंवीक्ष्योद्धसंतःकरताडनैर्ययुः २४ इत्थंमिथोऽतथ्यमतज्ज्ञभाषितं श्रुत्वाविचिंत्येत्यमृषामृषायते ॥ रक्षोविदित्वाऽखिलभूतहृत्स्थितःस्वानांनिषेद्धुंभगवान्मनोदधे २५ तावत्प्रविष्टास्त्वसुरोदरांतरेपरंनगीर्णाःशिशवःस वत्साः ॥ प्रतीक्षमाणेनबकारिवेशनंहतस्वकांतस्मरणेनरक्षसा २६ तान्वीक्ष्यकृष्णःसकलाभयप्रदोह्यनन्यनाथान्स्वकरादवच्युतान् ॥ दीनांश्चमृत्योर्जठरा ग्निघासान्घृणार्दितोदिष्टकृतेनविस्मितः २७ कृत्यंकिमत्रास्यखलस्यजीवनंनवाअमीषांचसतांविहिंसनम् ॥ द्वयंकथंस्यादितिसंविचिंत्यतज्ज्ञात्वाऽविशत्तुं डमशेषदृग्घरिः २८ तदाघनच्छदादेवाभयाद्धाहेतिचुक्रुशुः ॥ जहृषुर्येचकंसाद्याःकौणपास्त्वघबांधवाः २९ तच्छ्रुत्वाभगवान्कृष्णस्त्वव्ययःसार्भवत्सक म् ॥ चूर्णीचिकीर्षोरात्मानंतरसाववृधेगले ३० ततोतिकायस्यनिरुद्धमार्गिणोह्युद्गीर्णदृष्टेर्भ्रमतास्त्वितस्ततः ॥ पूर्णोतरंगेपवनोनिरुद्धोमूर्धन्विनिष्पाट्य विनिर्गतोबहिः ॥ ३१ तेनैवसर्वेषुबहिर्गतेषुप्राणेषुवत्सान्सुहृदःपरेतान् ॥ दृष्ट्यास्वयोत्थाप्यतदन्वितःपुनर्वक्त्रान्मुकुंदोभगवान्विनिर्ययौ ३२

चूर्णिका

किंच अयंकिंअस्मान्प्रविष्टान्ग्रसिता एवंचेत् अनेनकृष्णेनबकवत्नंक्ष्यति इत्युक्त्वा करताडनैः ययुः २४ एवंकृष्णः अतज्ज्ञभाषितं श्रुत्वाअयंरक्षइतिविदित्वा गोपान्रोद्धुंमनोदधेतावत् तदंतरंतेप्रविष्टाः तथापिकृष्णनिवेशनंप्रतीक्षमाणेननगीर्णाः २५ २६ ततः कृष्णः मृत्योर्जठराग्निघासान् तान्दृष्ट्वादिष्टकृतेनविस्मितः सन् २७ ए षांप्रविष्टानांजीवनं अजगरस्यनाशः एतदुभयंकथंस्यादितिविचिंत्यज्ञात्वासर्वज्ञः हरिः तत्तुंडंविवेश २८ तदाघनच्छदादेवाः हाहेतिचुक्रुशुः अघबांधवा जहृषुः २९ कृष्णः तच्छ्रुत्वासार्भवत्संआत्मानंचूर्णीचिकीर्षोः तस्यगलेववृधे ३० ततः निरुद्धमार्गिणः तस्यदेहांतर्गतोवायुः ब्रह्मरंध्रंनिर्भिद्यबहिर्निर्गतः ३१ तेनैवसर्वेषुइंद्रियेषुबहिर्गते षुतान्मृतान्स्वदृष्ट्याउत्थाप्यतदन्वितः मुकुंदः मुखात्बहिर्ययौ ३२

॥९२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२॥

अहिदेहोत्थितंशुद्धसत्त्वमयंज्योतिर्निर्गतं (ईशनिर्गमंप्रतीक्ष्य) खेऽवस्थितं (सत्निर्गते) तस्मिन्ईशेविवेश ३३ स्वकृतः स्वकार्यकृतः श्रीकृष्णस्यार्हणंअकृतपूजामकुर्वन् सुगाःसुष्टगायंतीतिसुगागंधर्वा
दयः ३४ किंच । तेषांयान्यद्भुतस्तोत्रादीनि (तथा) तेषांनैकोत्सवा (| अनेकोत्सवा) येमंगलस्वनास्तान्स्वधाम्नःअंतिसमीपेश्रुत्वाअजोब्रह्माआचिरादागतःईश्वरस्यश्रीकृष्णस्यमहिमाहिमानंदृष्ट्वावि
स्मयंप्रापेति ३५ बहुतिथंबहुकालम् । आक्रीडगह्वरंक्रीडार्थेमहाबिलम् ३६ अन्यच्चातिचित्रंवृत्तमित्याह । एतदिति "कौमारंपंचमाब्दांतपौगंडंदशमावधि । कैशोरमापंचदशाद्यौवनंतुततःपरमि " ति
हरेःकौमारजंपंचमाब्दकृतंकर्मतदेवदृष्ट्वापौगंडकेषष्ठेब्देबालाअद्यैवैतद्वृत्तमित्यूचुः । किंतत्कर्म । मृत्योःसकाशादात्मनांअहेः (अजगरस्य) मोक्षणम् । तत्रात्मनांप्रसिद्धान्मृत्योःअहेस्तुसंसारलक्षणात् ।
॥९३॥ अघासुरज्योतिषःश्रीकृष्णेप्रवेशमपितदादृष्टंकथितवंतइत्यर्थः ३७ नैतद्विचित्रंकिंतदित्यपेक्षायामाह । अघोपीति (परावराणांब्रह्मादिपिपीलिकांतानांस्थूलसूक्ष्माणांवावेधसःकर्तुः) आत्मसात्म्यंस्वस
मानरूपताम् ३८ यस्यांगंमूर्तिस्तस्यप्रतिमा । प्रतिकृतिःतत्रापिकेवलंमनोमयीसापिबलादंतराहितासतीभागवतींगतिंददौप्रह्लादादिभ्यःसएवसाक्षात्स्वयमंतर्गतःकिंपुनःनित्याचासावात्मसुखानुभूति
श्चतयाअभितोव्युदस्तामायायेनसः ३९ (हेद्विजाःयादवदेवदत्तःकृष्णरातःपरीक्षित्स्वरातुर्हरेः) येनश्रवणेननिगृहीतंवशीकृतंचेतोयस्यसः ४० कालांतरेकौमारेकृतं (यत्यस्मात्) पौगंडकेकथम् (अ
चेति) ज्ञात्वोचुरित्यर्थः ४१

पीनाहिभोगोत्थितमद्भुतंमहज्ज्योतिःस्वधाम्नाज्वलयद्दिशोदश ॥ प्रतीक्ष्यखेऽवस्थितमीशनिर्गमंविवेशतस्मिन्मिषतांदिवौकसाम् ३३ ततोतिहृष्टाः श्लोकाः
स्वकृतोऽकृतार्हणंपुष्पैःसुराअप्सरसश्चनर्तनैः ॥ गीतैःसुगावाद्यधराश्चवादकैःस्तवैश्चविप्राजयनिःस्वनैर्गणाः ३४ तदद्भुतस्तोत्रसुवाद्यगीतिकाजयादिनैको
त्सवमंगलस्वनान् ॥ श्रुत्वास्वधाम्नोंत्यजआगतोऽचिराद्दृष्ट्वामहीशस्यजगामविस्मयम् ३५ राजन्नाजगरंचर्मशुष्कंवृंदावनेऽद्भुतम् ॥ व्रजौकसांबहुतिथं ३३/४१
बभूवाक्रीडगह्वरम् ३६ एतत्कौमारजंकर्महरेरात्माहिमोक्षणम् ॥ मृत्योःपौगंडकेबालादृष्ट्वोचुर्विस्मिताव्रजे ३७ नैतद्विचित्रंमनुजार्भमायिनःपरावराणांपरम
स्यवेधसः ॥ अघोपियत्स्पर्शनधौतपातकःप्रापात्मसात्म्यंत्वसतांसुदुर्लभम् ३८ सकृद्यदंगप्रतिमांतराहितामनोमयीभागवतींददौगतिम् ॥ सएवनि
त्यात्मसुखानुभूत्यभिव्युदस्तमायःपरमोंगर्किपुनः ३९ ॥ सूतउवाच ॥ इत्थंद्विजायादवदेवदत्तःश्रुत्वास्वरातुश्चरितंविचित्रम् ॥ पप्रच्छभूयोपितदेवपु
ण्यंवैयासकिंयन्निगृहीतचेताः ४० ॥ ॥ राजोवाच ॥ ॥ ब्रह्मन्कालांतरकृतंतत्कालीनंकथंभवेत् ॥ यत्कौमारेहरिकृतंजगुःपौगंडकेऽर्भकाः ४१

चूर्णिका ततः तद्देहोत्थितंतेजः स्वेस्थितंसत् कृष्णनिर्गमंप्रतीक्ष्यतस्मिन्विवेश ३३ ततः देवाः पुष्पवृष्टिंचक्रुःअप्सरसः ननृतुः गंधर्वाजगुः ३४ ततः तेषांवाद्यगीतिकादीनांस्वनान्
सत्यलोकेश्रुत्वाआगतः ब्रह्माकृष्णस्यमाहिमत्वंदृष्ट्वाविस्मयं आप ३५ हेराजन् तत् आजगरंचर्मशुष्कंसत् वृंदावनेव्रजौकसांक्रीडार्थंमहाबिलं आसीत् ३६ एतत्हरेः कौ
मारजंकर्मबालाः व्रजं एत्य पौगंडकेऊचुः ३७ हेनृपमनुजार्भमायिनः कृष्णस्यएतन्नचित्रम् यतःपापोपि अघासुरः यत्समानरूपतां आप ३८ यस्यमूर्तिप्रतिकृतिःसकृ ॥९३॥
त्मनसि आहितासती प्रह्लादादिभ्यः गतिंददौ सएवयस्यांतर्गतः तस्यमोक्षोजातः इदंकिंचित्रम् ३९ ॥ सूतउवाच ॥ हेशौनकएवंकृष्णचरितं श्रुत्वाराजापुनः पप्रच्छ ४०
॥ राजोवाच ॥ हेशुककौमारेकृतंकर्मबालाःपौगंडकेकथंज्ञात्वाऊचुः ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

४२ (हेगुरेःक्षत्रवंधवोपिवयम्) ४३ तेनयःस्मारितोऽनंतःतेनहृतान्यखिलेंद्रियाणियस्यसः । तथाभूतोपिकथंचिल्लब्धबाहिर्दृष्टिः हेभागवतोत्तमशौनक (तमुत्तमंप्रत्याह) ४४ इतिश्रीभागवतेमहपुराणेदशमस्कंधेटीकायांद्वादशोध्यायः १२ ॥ ७ ॥ त्रयोदशेऽहरद्ब्रह्मावत्सान्पालांश्चमायया । तदातत्सर्वरूपोऽब्दंकृष्णःपूर्ववदाचरत् १ नूतनयसिनव्यवत्करोषि १ तथाहि । सारभृतांसारग्राहिणांअयंनिसर्गःस्वभावःकोसौअच्युतस्यवार्ताश्रुतासतीप्रतिक्षणंनव्यवद्भवतीतियतः । विटानांस्त्रैणानांस्त्रियाःकामिन्यावार्तेव । कथंभूतानामपिसताम् । याअच्युतस्यवार्तैवार्थोयेषांतानिवाणीश्रुतिचेतांसियेषांतथाभूतानामपि २ ३ (अघवदनान्मृत्योः) ४ भोजनविधानायपुलिनंस्तौति । अहोइति । स्वीयानांकेलीनांसंपदोविद्यंतेयस्मिन्तत् । मृदुलाअच्छावालुकायस्मिंस्तत् । किंच । स्फुटत्विकसत्सरःसरोजबाहुल्येनोपचारात्सरएवविकसदित्युक्तंतस्यगंधस्तेनहृताआकृष्टाअलयःपत्रिणश्चतेषांकेउदकेध्वनयस्तेषांप्रतिध्वानास्तैर्लसंतोद्रुमास्तैराकुलंव्याप्तं ५ दिवारूढं (दिनमुच्छ्रितं भोजन-)-वेलातीतेत्यर्थः ६ आरुध्यसंरुध्य । शाद्वलेहरिततृणदेशे ७

श्लोकाः ४२/७

तद्ब्रूहिमेमहायोगिन्परंकौतूहलंगुरो ॥ नूनमेतद्धरेरेवमायाभवतिनान्यथा ४२ वयंधन्यतमालोकेगुरोपिक्षत्रबंधवः ॥ यत्पिबामोमुहुस्त्वत्तःपुण्यंकृष्णकथामृतम् ४३ ॥ सूतउवाच ॥ इत्थंस्मपृष्टःसतुबादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियः ॥ कृच्छ्रात्पुनर्लब्धबहिर्दृशिःशनैःप्रत्याहतंभागवतोत्तमोत्तमम् ४४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्वादशोध्यायः १२ ॥ ॥ ७ ॥ श्रीशुकउवाच ॥ साधुपृष्टंमहाभागत्वयाभागवतोत्तम ॥ यन्नूतनयसीशस्यशृण्वन्नपिकथांमुहुः १ सतामयंसारभृतांनिसर्गोयदर्थवाणीश्रुतिचेतसामपि ॥ प्रतिक्षणंनव्यवदच्युतस्ययत्स्त्रियाविटानामिवसाधुवार्ता २ शृणुष्वावहितोराजन्नपिगुह्यंवदामिते ॥ ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ३ तथाघवदनान्मृत्योरक्षित्वावत्सबालकान् ॥ सरित्पुलिनमानीयभगवानिदमब्रवीत् ४ अहोऽतिरम्यंपुलिनंवयस्याःस्वकेलिसंपन्मृदुलाच्छवालुकम् ॥ स्फुटत्सरोगंधहृतालिपत्रिकध्वनिप्रतिध्वानलसद्द्रुमाकुलम् ५ अत्रभोक्तव्यमस्माभिर्दिवारूढंक्षुधाऽर्दिताः ॥ वत्साःसमीपेऽपःपीत्वाचरंतुशनकैस्तृणम् ६ तथेतिपाययित्वाऽर्भावत्सानारुध्यशाद्वले ॥ मुक्ताशिक्यानिबुभुजुःसमंभगवतामुदा ७

चूर्णिका

अत्र नः महत्कौतूहलंवर्तते तन्नूब्रूहि किंच ४२ वयंक्षत्रबंधवोपिधन्यतमाः यतः त्वत्तः कृष्णकथामृतंपिबामः ४३ ॥ सूतउवाच ॥ इत्थंस्मपृष्टः सतुबादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियःकृच्छ्रात्पुनर्लब्धबहिर्दृशिःशनैःप्रत्याहतंभागवतोत्तमोत्तम४४॥ इतिदशमेद्वादशः १२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ साधुपृष्टं महाभागत्वयाभागवतोत्तम यन्नूतनयसीशस्यशृण्वन्नपिकथांमुहुः १ किंच कृष्णकथाप्रतिक्षणं नव्यवत् भवति इतियत् सः सतांस्वभावएव २ तस्मात्हेनृपते इदंगुह्यमपिवदामि ३ तथा अघमुखात्वत्सान्पालांश्चरक्षित्वानदीपुलिनेतान् आनीयकृष्णः इदंआह ४ हेबालाः इदंपुलिनं अतिरम्यंकोमलस्वच्छवालुकं अस्ति ५ अतःअस्माभिः अत्रभोक्तव्यं यतः क्षुधिताः स्मः किंच एतेवत्साः अपःपीत्वातृणंचरंतु ६ ततः तथेत्युक्त्वाबालाःवत्सान्हरिततृणदेशे संरुध्य शिक्यानि मुक्त्वाकृष्णेनसहबुभुजुः ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदातेविरेजुः । कृष्णस्यविष्वक्परितः पुरुराजिमंडलैर्बहुभिःपंक्तिमंडलैः (मंडलाकारपंक्तिभिरित्यर्थः) सहनैरंतर्येणोपविष्टाः श्रीकृष्णाभिमुखान्याननानियेषांते । (अतएव) फुल्लदृशःविकसितन
यनाः । कमलकर्णिकायाःपरितः पत्राणियथातथेति ८ पुष्पैस्तद्दलैःअन्यैश्चपत्रैः कृतानिभाजनानि (भक्ष्यभोज्याद्याधारपात्राणि) यैस्ते ९ (स्वस्वभोज्यानां) रुचिंस्वादुविशेषं । अभ्यवजह्रुः बुभु
जिरे सहेश्वराःश्रीकृष्णसहिताः १० यज्ञभुगपितेषुबुभुजे । बालानामिवकेलिर्यस्यसः । तदाह । जठरस्तद्वस्त्रयोर्मध्येवेणुंबिभ्रद्दधदितिसर्वत्र । वामेइतिकक्षपाण्योर्विशेषणं । मसृणंस्निग्धंदध्योदनकवलं
तदुचितानिबिल्वामलकादिफलानिअंगुलीसंधिषु । कर्णिकेवसर्वाभिमुखोमध्येतिष्ठन्स्वस्यपरितउपविष्टान्सुहृदःस्वैर्नर्मभिःपरिहासवाक्यैःस्वर्गेस्वर्गनिवासिनिजनेमिषतिआश्चर्येणपश्यतिसतिलोकेजन
मध्येत्तुभुजे ११ (हेभारतअंतर्वनेवनमध्ये) १२ भीभयम् (भीभ्यो) भयहेतुभ्योभयंअस्यअपास्य । यद्वा अस्यविश्वस्यभियोपिभयंयःश्रीकृष्णः (सऊचेहेमित्राणि) आशात्भोजनात् अस्मिन्पादे
अक्षराधिक्यमार्षं १३ अद्रिषुतेषांदरीषु(कंदरेषु)कुंजेषुलतादिपिहितोदरविवरेषुगह्वरेषुसंकटस्थानेषुच १४ अंभोजन्मनःपद्माज्जानिर्यस्यसब्रह्मा तदंतरेतस्मिन्नवसरेगतआगतःतच्छिद्रंप्राप्तोवा (माययाऽर्भ
इवार्भकस्तस्यवस्तुतईशितुः) मंजुरुचिरंअन्यदपि (अलौकिकं) महित्वंमहिमानंद्रष्टुंतस्यवत्सान्इतःपुलिनाद्वत्सपांश्चान्यत्रनीत्वा । (हेकुरूद्वह) तिरोबभूव । प्रभवतःश्रीकृष्णस्य (तत्कर्तृकमित्यर्थः) १५

॥५५॥

श्लोकाः ८/१५

कृष्णस्यविष्वक्पुरुराजिमंडलैरभ्याननाःफुल्लदृशोव्रजार्भकाः ॥ सहोपविष्टाविपिनेविरेजुश्छदायथांभोरुहकर्णिकायाः ८ केचित्पुष्पैर्दलैःकेचित्पल्लवैरंकुरैः
फलैः ॥ शिग्भिस्त्वग्भिर्दृषद्भिश्चबुभुजुःकृतभाजनाः ९ सर्वेमिथोदर्शयंतःस्वस्वभोज्यरुचिंपृथक् ॥ हसंतोहासयंतश्चाभ्यवजह्रुःसहेश्वराः १० बिभ्र
द्वेणुंजठरपटयोःशृंगवेत्रेचकक्षेवामेपाणौमसृणकवलंतत्फलान्यंगुलीषु ॥ तिष्ठन्मध्येस्वपरिसुहृदोहासयन्नर्मभिःस्वैःस्वर्गेलोकेमिषतिबुभुजेयज्ञभुग्बाल
केलिः ११ भारतैवंवत्सपेषुभुंजानेष्वच्युतात्मसु ॥ वत्सास्त्वंतर्वनेदूरंविविशुस्तृणलोलुपाः १२ तान्दृष्ट्वाभयसंत्रस्तानूचेकृष्णोऽस्यभीभयम् ॥ मित्रा
ण्याशान्माविरमतेहानेष्येवत्सकानहम् १३ इत्युक्त्वाऽद्रिदरीकुंजगह्वरेष्वात्मवत्सकान् ॥ विचिन्वन्भगवान्कृष्णःसपाणिकवलोययौ १४ अंभोजन्मज
निस्तदंतरगतोमायार्भकस्येशितुर्द्रष्टुंमंजुमहित्वमन्यदपितद्वत्सानितोवत्सपान् ॥ नीत्वान्यत्रकुरूद्वहांतरदधात्खेऽवस्थितोयःपुराद्दृष्ट्वाऽघासुरमोक्षणंप्र
भवतःप्राप्तःपरंविस्मयम् १५

चूर्णिका

तदाकृष्णस्यसर्वतः संमुखाः अर्भकाः बहुपंक्तिमंडलैः स्थिता. संतः विरेजुः ८ कमलकार्णिकाः परितः पत्राणीव तत्रकेचित् पुष्पैः दलैः पल्लवैः फलैः केचित्शिग्भिः के
चिद्दृषद्भिः पात्राणिकृत्वा ९ सर्वेस्वस्वभोज्यरुचिंमिथःप्रदर्श्यबुभुजुः १० तदाकृष्णः तन्मध्यस्थः सन्उदरवस्त्रयोः मध्येवेणुंदधत् वामकक्षेशृंगवेत्रेदधत् वामकरेदध्योद
नग्रासं तदुचितफलानि अंगुलीसंधिषु एवंधृत्वासखीन् नर्मभिः हासयन्स्वर्गस्थजनेपश्यतिसतियज्ञभुक्तेषुबुभुजे ११ हेनृपएवंबालेषुभुंजानेषुवत्साः तृणलोभे
नदूरंविविशुः १२ ततः भीतान्गोपान्कृष्णः आह हेबालाः भोजनात्माविरमत वत्सान् अहं आनेष्ये १३ एवमुक्त्वाकृष्णः अद्रिदर्यादिषुवत्सान् विचिन्वन्सपाणिकव
लोययौ १४ तावत्ब्रह्मातदाकृष्णस्यमहित्वंद्रष्टुं तद्वत्सानितःबालांश्चअन्यत्रनीत्वास्वयंअंतर्बभूव १५

॥५५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(वत्सपांश्चादृष्ट्वा) उभावपिवत्सान्वत्सपांश्चेत्यर्थः । विचिकायान्वीक्षितवान् १६ विधिकृतंब्रह्मणाकृतं १७ उभयायितंवत्सतत्पालरूपेणवर्तमानमित्यर्थः । कस्यब्रह्मणः । अयंभावः । यदितूष्णीमासे तर्हितन्मातॄणांविषादःस्यात् । यदिचतानेवानयिष्यामितर्हिब्रह्मणोमोहोनस्यात् । इतितदुभयप्रीतयेपरमदयालुस्तथाचक्रेइति १८ तदेवदर्शयति । यावदिति । वत्सपानांवत्सकानांचाल्पकवपुः (यावत्) यत्प्रमाणकंप्रमाणमनतिक्रम्येत्यर्थः । एवमुपर्यपियोज्यम् । तत्रदलंपर्णरूपोवाद्यविशेषः यद्वा अत्रवेणुदलंवेणुखंडंशिक्शिक्यं यद्वा यावद्वत्सपादिवपुःतावन्मात्रमपिसर्वस्वरूपोऽजःकृष्णोबभाविति। उत्तरत्राप्येवं । कथम् । सर्वंविष्णुमयंजगदित्यत्रप्रसिद्धा (सर्वंविष्णुमयामिति) यागीस्तस्याअंगवत्सागीरेवअर्थस्वरूपेणप्रत्यक्षायथातथाबभूवेत्यर्थः (यद्वागिरोवेदस्यांगवत्अवयववत् । यथासर्ववेदस्यावयवजातंप्रणवरूपत्वाद्विष्णुमयंतथावत्सपादिसर्वंविष्णुमयमित्यर्थःएवमजःप्रणवोयथासर्वशब्दस्वरूपोभातितथावत्सपालादिरूपःकृष्णोबभाविवितिभावः । तथाचश्रुतिः । "तद्यथाशंकुनासर्वाणिपर्णानिसंतृणान्येवमोंकारेणसर्वावाक्संतृणोंकारएवेदंसर्व"मिति) १९ एवंसर्वात्मासन्व्रजंप्राविशत्कथंस्वयमात्मैवप्रयोजकःआत्मरूपान्गोवत्सान्इतिकर्मापिस्वयमेवेत्युक्तंआत्मरूपैर्वत्सपैःप्रतिवार्यःप्रयोज्यकर्तापिस्वयमेव । आत्मविहारैःक्रीडन्नितिक्रियापिकारकाण्यपिस्वयमेवेत्यर्थः २० तत्तदात्मातद्वद्गोपबालरूपोऽभवत् । ततस्तत्तत्सद्मप्रविष्टः (तत्तद्बालभावंस्वीकृत्यतत्तद्गृहंगतवानित्यर्थः) २१ गोपिकामोहनमाह । तन्मातरइति । तदातन्मातरोवेणुरवेणत्वरयाउत्थिताःसत्यःसुतान्मत्वापरंब्रह्मैवदोर्भिरुत्थाप्योद्गूह्यसुधावत्स्वादुआसववन्मादकंस्नेहस्नुतंस्तन्यंपयःपाययामासुरित्यर्थः २२ एवंयामयमेन) महरनियमेन) तत्तत्कालक्रीडानियमेन (यद्वायामान्यमयतीतियामयमःसूर्यस्तेनसह) सायंगतःप्राप्तःस्वाचरितैःस्वस्याचरितैःशोभनैराचरितैर्वामातॄःप्रहर्षयन्ततस्ताभिरुन्मर्दनादिभिरुपलालितइति (तत्रोन्मर्दनंतैलादिना । मज्जःस्नानं । लेपनंचंदनादिना । रक्षामंत्रपाठादिना । तिलकंकस्तूर्यादिना) २३

॥५६॥

श्लोकाः १६/२३

ततोवत्सानदृष्ट्वैत्यपुलिनेपिचवत्सपान् ॥ उभावपिवनेकृष्णोविचिकायसमंततः १६ क्वाप्यदृष्ट्वांतर्विपिनेवत्सान्पालांश्चविश्ववित् ॥ सर्वंविधिकृतंकृष्णः सहसाऽवजगामह १७ ततःकृष्णोमुदंकर्तुंतन्मातॄणांचकस्यच ॥ उभयायितमात्मानंचक्रेविश्वकृदीश्वरः १८ यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकंयावद्यष्टिविषाणवेणुदलशिक्यावद्विभूषांबरम् ॥ यावच्छीलगुणाभिधाकृतिवयोयावद्विहारादिकंसर्वंविष्णुमयंगिरोऽगवदजःसर्वस्वरूपोबभौ १९ स्वयमात्माऽऽत्मगोवत्सान्प्रतिवार्यात्मवत्सपैः ॥ क्रीडन्नात्मविहारैश्चसर्वात्माप्राविशद्व्रजम् २० तत्तद्वत्सान्पृथग्नीत्वातत्तद्गोष्ठेनिवेश्यसः ॥ तत्तदात्माऽभवद्राजंस्तत्तत्सद्मप्रविष्टवान् २१ तन्मातरोवेणुरवत्वरोत्थिताउत्थाप्यदोर्भिःपरिरभ्यनिर्भरम् ॥ स्नेहस्नुतस्तन्यपयःसुधासवंमत्वापरंब्रह्मसुतानपाययन् २२ ततोनृपोन्मर्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः ॥ संलालितःस्वाचरितैःप्रहर्षयन्सायंगतोयामयमेनमाधवः २३

चूर्णिका

ततः कृष्णः वनेवत्सान् अदृष्ट्वापुलिनेबालान् अदृष्ट्वासर्वत्रविचिकाय१६ततःवत्सान्वत्सपांश्चक्वापिनदृष्ट्वासर्वंविधिकृतंज्ञात्वा १७कृष्णः तन्मातॄणांकस्यचमुदंकर्तुं उभयायिनमात्मानंचक्रे १८ तदाह यावद्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकंयावद्यष्टिविषाणवेणुदलाशिग्यावद्विभूषांबरम् यावच्छीलगुणाभिधाकृतिवयोयावद्विहारादिकंसर्वंविष्णुमयंगिरोंगवदजःसर्वस्वरूपोबभौ१९ एवं सर्वात्माहरिः व्रजंविवेश २०ततःतत्तद्वत्सान्पृथक्नीत्वातत्तद्गोष्ठेस्थाप्यतत्तद्गृहं स्वयंविवेश २१ तदागोप्यः वेणुरवंश्रुत्वाउत्थिताः सत्यः सुतान्मत्वाब्रह्मैवदोर्भिरुत्थाप्यस्तनं अपाययन्२२एवंनित्यवत्माधवः स्वाचरितैः मातॄः प्रहर्षयन्सायंव्रजंप्राप्तःततःताभिर्मातृभिः मज्जनलेपनादिभिः लालितः २२

॥५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गवांमोहनमाहगावइति । परिहूताआहूताश्चतेसंगताश्चप्राप्तास्तान् २४ एतावत्तुवैषम्यंश्रीकृष्णस्यापिदुर्निवारमासीदित्याह । गोगोपीनामिति । गवांगोपीनांचास्मिन्वत्सतत्पालरूपेकृष्णेमातृताउपल
लनादिरूपापूर्ववत् (यथापूर्वं) आसीत् । किंतुस्नेहर्द्धिंकांविना । स्नेहाधिक्यंत्विदानीमितिविशेषइत्यर्थः । आसुगोगोपीषुहरेस्तोकताचबालभावनापिपूर्ववदेवासीत्किंतुमाययाविना । ममेयं
माताऽहमस्याःपुत्रइतिपूर्वंमोहआसीत् (इदानीं) तंविनेत्यर्थः २५ स्नेहर्द्धिमेवदर्शयति । व्रजौकसामिति (स्नेहवल्लीस्नेहर्द्धिरित्यर्थः) यथाकृष्णेयशोदानंदनेपूर्वंस्वपुत्रेभ्योपिस्नेहाधिक्यमासीत्तथैदा
नींस्वतोकेष्वपितदवर्धतेत्यर्थः । निःसीमयथाभवतितथा २६ एवमात्माश्रीकृष्णःवत्सपोभूत्वातत्रापिवत्सानांपालानांचमिषेणात्मानंआत्मना (स्वयम्) पालयन्क्रीडितवानित्यर्थः २७ एतावत्पर्यंतंरा
मस्यापिमोहएवासीत्संवत्सरांतेतुसज्ञातवानितिदर्शयन्नाह । एकदेति । पंचषासु (त्रियामासु) पंचसुवाषट्सुवारात्रिषुहायनापूरणीषु (वर्षस्य) पूरकतयाऽवशिष्टासुइत्यर्थः (अजोहरिः) २८ ततो
॥५७॥ दूरतएव गोवर्धनाशिखरेचरंत्योगावोव्रजसमीपेतृणंचरतोवत्सान्ददृशुः २९ तदैवसगोव्रजःगवांकलापःवत्स्नेहवशःतेषांवत्सानांस्नेहेनआकृष्टः । अतएवनस्मृतआत्मादेहोयेनसःजवेन (रंहसा हुंकृतैः)
उपव्रजमगात् । कथंभूतः । अत्यात्मपदुर्गमार्गः अतिक्रांतआत्मपान्गोपालान्अत्यात्मपः । दुर्गोदुर्गमोमार्गोयस्यसचसच । तथापरस्परयुक्ताभ्यांपद्भ्यांधावत्द्विपादिवमतीयमानःककुदिआकुंचिताग्रीवा
यस्यसः । उदास्यपुच्छःउन्नमितानिआस्यानिपुच्छानिचयेनसः । आस्नुपयाःसर्वतःस्रवंतिपयांसियस्य । आस्तुपयाइत्यपिपाठेसएवार्थः । गोव्रजइत्यनेनवृषभादयोप्युरित्युक्तम् ३० तत्रविशेषतोधेनू
नांचेष्टितमाह समेत्येति । गोवर्धनस्याधः (समेत्यअंगानिगिलंत्यइवस्नेहाधिक्याल्लिहंत्यः) वत्सवत्यःपुनःप्रसूताअपि (पुनःप्रसूतानांनूतनापेक्षयापूर्ववत्सेषुनस्नेहाधिक्यंआसांतुनतथेत्यर्थः ३१

श्लोकाः

गावस्ततोगोष्ठमुपेत्यसत्वरंहुंकारघोषैःपरिहूतसंगतान् ॥ स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहंत्यःस्रवदौधसंपयः २४ गोगोपीनांमातृतास्मिन्सर्वास्ने
हार्द्धिकांविना ॥ पुरोवदास्वपिहरेस्तोकतामाययाविना २५ व्रजौकसांस्वतोकेषुस्नेहवल्ल्याब्दमन्वहम् ॥ शनैर्निःसीमववृधेयथाकृष्णेत्वपूर्ववत् २६
इत्थमात्मात्मनात्मानंवत्सपालमिषेणसः ॥ पालयन्वत्सपोवर्षंचिक्रीडेवनगोष्ठयोः २७ एकदाचारयन्वत्सान्सरामोवनमाविशत् ॥ पंचषासुत्रियामासु 24/31
हायनापूरणीष्वजः २८ ततोऽविदूराच्चरतोगावोवत्सानुपव्रजम् ॥ गोवर्धनाद्रिशिरसिचरंत्योददृशुस्तृणम् २९ दृष्ट्वाथतत्स्नेहवशोऽस्मृतात्मासगोव्रजोत्या
त्मपदुर्गमार्गः ॥ द्विपात्ककुद्ग्रीवउदास्यपुच्छोऽगाद्धुंकृतैरास्नुपयाजवेन ३० समेत्यगावोऽधोवत्सान्वत्सवत्योप्यपाययन् ॥ गिलंत्यइवचांगानिलिहंत्यः
स्वौधसंपयः ३१

चूर्णिका

ततोगावः गोष्ठं एत्यस्वस्ववत्सान् लिहंत्यः सत्यः हुंकारंकृत्वापयः अपाययन् २४ हेनृपकृष्णे गोगोपीनांमातृभावः स्नेहर्द्धिंविनापूर्ववत् आसीत् आस्वपिहरेःतोकता ॥५७॥
माययाविनापूर्ववदासीत् १५ एवंस्वतोकेषुस्नेहवल्लीनित्यंवर्षपर्यंतंनिःसीमंववृधे २६ एवं कृष्णः वत्सपालमिषेणवर्षंवनगोष्ठयोःचिक्रीडे २७ एकदासरामः कृष्णः
वर्षस्यपंचषट्निशासुन्यूनासुसतीषुवनंविवेश २८ ततः गोवर्धनाशिखरेचरंत्यः गावः व्रजसमीपेवत्सान् चरतोददृशुः २९ततः सः गोसमूहः रक्षकान् अतिक्रम्यदुर्गमार्गा
न् उल्लंघ्यद्विपात् उन्नमितास्यपुच्छः हुंकृतैः व्रजसमीपंअगात् ३०ततोगावः वत्सान् समेत्य अंगानिगिलंत्यइवपयःअपाययन् ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

रामेणदृष्टंवत्सेषुगवांस्नेहाधिक्यंउक्त्वागोपानामपिदर्शयितुमाह ।गोपाइति ।तासांगवांरोधनेयआयासस्तस्यमौढ्येनमौघत्वेनलज्जयासहोरुमन्युनादुर्गमार्गजनितक्लेशेनचाभ्येत्यगोवत्सैःसहसुतान्ददृशुः ३२
ततश्चतेषामीक्षणेनउद्गतोयःप्रेमरसस्तस्मिन्नाप्लुतानिमग्नाआशया(अंतःकरणानि)येषांते । लज्जामन्युकृच्छ्रैस्तानपिताडयितुमागताःसंतोपिगतमन्यवःप्रत्युतजातोऽनुरागोयेषांतेमूर्धनिघ्राणैरवघ्राणैःपरमांमु
दमवापुः ३३ (ततइतिसुनिर्भराआनंदभरेणसंपन्नाइत्यर्थः) कृच्छ्रात्ततोऽपगताः(तस्मात्स्थानात् आश्लेषाद्वा) निवृत्ताः ।तेषांसुतानांअनुस्मृत्याउद्गच्छंत्यश्रूणियेषांते ३४प्रेमर्द्धेरौत्कंठ्यंअतिशयंमुक्तस्तनेषु
(स्तनपानेच्छारहितेष्वप्यपत्येषु तादृशम्) वीक्ष्य (अहेतुवित्)हेतुमजानन्नचिंतयत् ३५ चिंतामेवाहकिमेतदितिद्वाभ्यां वासुदेवेयथापुराप्रेमतथैवस्वतोकेष्वपिव्रजस्य (अपूर्वं) प्रेमवर्धतेकिमेतदद्भुतमि
ति । किंच । सात्मनःमत्सहितस्यव्रजस्य । ममापितेषुप्रेमातिशयस्तत्रकारणंकिमितिभावः ३६ केयंमायादेवानांवानराणांवाअसुराणांवाकुतोवा (आयाता) कस्मात्प्रयुक्तेत्यर्थःतत्रान्यमायानसंभवति
यतो (मेऽपिविमोहिनी) ममापिमोहोवर्तते । अतःप्रायशोमत्स्वामिनःश्रीकृष्णस्यैवमायेयंमस्त्वितिसंभावयति ३७ सवयसान्सखीनपिवयुनेनज्ञानमयेनचक्षुषावैकुंठंश्रीकृष्णमेवापश्यत् ३८ एवंकृष्ण
रूपान्सामांन्यतोज्ञात्वाकृष्णंपृष्टाकृष्णोपदेशेनविशेषतोज्ञातवानित्याहनैतइति (एतेगोपालाःसुरेशान । नाप्येतेवत्साऋषयोऽवतीर्णाः) अयमर्थः । पाल्यमानास्तावद्वत्साऋषीणामंशाःपालाश्चदेवानामं
शाइतितावदहंवेद्मिइदानींतुनतथा ।किंतुअस्मिन्भिदाश्रयेपित्वमेवाद्वितीयोभासि । अतस्त्वंसर्वंकथंवृत्तंतत्पृथक्त्ववदविविच्यब्रूहीत्युक्तेनप्रभुणादक्तानिगमात्संक्षेपतएवोक्तंवृत्तंबलोऽवैत्विदितवानित्यर्थः३९
ततःकिंवृत्तमित्यपेक्षायामाह । तावदिति (आत्मभूर्ब्रह्मा) वर्षेजातेपिआत्मनोमानेनत्रुट्यनेहसात्रुटिमात्रेणकालेन (तत्रैत्यपूर्ववत्क्रीडंतं) सकलंकलाभिःसहितंसानुचरंहरिंददर्श (आब्दंवर्षपर्यंतं) ४०

श्लोकाः ३२-४०

गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना ॥ दुर्गाध्वकृच्छ्रतोभ्येत्यगोवत्सैर्ददृशुःसुतान् ३२ तदीक्षणोत्प्रेमरसाप्लुताशयाजातानुरागागतमन्यवोऽर्भकान् ॥
उदूह्यदोर्भिःपरिरभ्यमूर्धनिघ्राणैरवापुःपरमांमुदंते ३३ ततःप्रवयसोगोपास्तोकाश्लेषसुनिर्वृताः ॥ कृच्छ्राच्छनैरपगतास्तदनुस्मृत्युदश्रवः ३४ व्रजस्य
रामःप्रेमर्द्धेर्वीक्ष्यौत्कंठ्यमनुक्षणम् ॥ मुक्तस्तनेष्वपत्येष्वप्यहेतुविदचिंतयत् ३५ किमेतदद्भुतमिववासुदेवेऽखिलात्मनि ॥ व्रजस्यसात्मनस्तोकेष्वपूर्वंप्रे
मवर्धते ३६ केयंवाकुतआयातादैवीवानार्युतासुरी ॥ प्रायोमायास्तुमेभर्तुर्नान्यामेपिविमोहिनी ३७ इतिसंचिंत्यदाशार्होवत्सान्सवयसानपि ॥ सर्वा
नाचष्टवैकुंठंचक्षुषावयुनेनसः३८ नैतेसुरेशाऋषयोनचैतेत्वमेवभासीशभिदाश्रयेपि ॥ सर्वंपृथक्त्वंनिगमात्कथंवदेत्युक्तेनवृत्तंप्रभुणाबलोऽवैत् ३९ तावदे
त्यात्मभूरात्ममानेनत्रुट्यनेहसा ॥ पुरोवदाब्दंक्रीडंतंददृशेसकलंहरिम् ४०

चूर्णिका

ततः गोपाः तद्रोधनायासादिनाजातमन्युनादुर्गाध्वकृच्छ्रतः एत्य वत्सैः सुतान्दृष्ट्वा ३२ क्रोधहीनाःसंतः दोर्भिः बालानालिंग्यमुदंप्रापुः ३३ ततः तेतेगोपाः निर्वृताः
आसन् ३४ अथरामः व्रजस्यप्रेमर्द्धेःकृष्णे अतिशयंदृष्ट्वातद्धेतुमचिंतयत् ३५ तदाह अहोव्रजस्यप्रेमयथा आसीत् तथा स्वतोकेषुअधुनावर्धते किमद्भुतमेतत् ३६ किंच
इयंमायादेवानांदैत्यानांवा यतः ममापिमोहयति अतः मद्भर्तुरेवेयम् ३७ एवंसंचिंत्यरामःवत्सान्बालांश्चसर्वंकृष्णरूपंज्ञानदृष्ट्याअपश्यत् ३८ ततः कृष्णंदृष्ट्वाआह
हेकृष्णएतेतावत् वत्साः ऋष्यंशाः पालास्तुदेवांशाः इत्यहंवेद्मि अधुनातुसर्वंत्वमेवभासि तत्कथंवृत्तम् एवमुक्तेनकृष्णेनसर्ववृत्तम् तद्बलः अवैत् ३९ अथब्रह्मात्रुटिमात्र
कालेनतत्रएत्यपुरावत् अब्दंसकलंक्रीडंतंहरिंदृष्ट्वाऽन्यतर्कयत् ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दृष्टाचव्यतर्कयदित्याहद्वाभ्यांयावंतइति । मेमायाशयेमन्मायातल्पे (शयानाःपुनरद्यापिनोत्थिताः) ४१ (इतएभ्योदृष्टेभ्योन्येएवेऽत्रमायाशयेकुत्रत्याः) मन्मायायोहितेभ्यःइतरे (तावंतएवतत्र क्रीडंतोदृश्यंतेते) कुत्रत्याः ४२ इतिवितर्कयन्नमुह्यदित्याह । एवमिति द्वाभ्याम् । एवमेतेषुभेदेषुचिरंध्यात्वा सआत्मभूरितिपाठः (भेदेषुवितर्कविशेषेषुचिरंध्यात्वापि । उभयेषांमध्येकतरेनसत्याःनेष्टे नसमर्थः) ४३ (स्वयैवहेतुभूतया) ४४ ननुमायाश्रयस्यतस्यकुतोमोहइत्यतआह । तम्यामिति । महामायाविनिभगवतिअन्यमायायाआवरणविक्षेपकत्वाभावेदृष्टांतद्वयमिदम् तम्यांतमिस्रायांरात्र्यांनै हारंहिमकणप्रभवंतमइव । तद्धितार्थोपसर्जनस्यापितमसोनैहारमितिविशेषणंछांदसम् । तत्तमोयथापृथगावरणंनकरोतिकिंतुतत्रैवलीयते यथाचखद्योतार्चिरहनिपृथक्प्रकाशंनकरोतिएवंमहतिपुरुषेयुंज तःपुंसःइतरानीचामायातत्रनकिंचित्करोतिकिंतुआत्मनिस्वस्मिन्नेवऐश्वर्यसामर्थ्यंनिहंतीति ४५ अन्यदप्याश्चर्यमाह तावदिति । वत्सपालाःवत्साःपालाश्चसर्वेयष्टिविषाणादयश्च (अजस्यब्रह्मणःव्यदृश्यं तदृष्टिगोचराअभवन्नित्यर्थः) ४६ ४७ श्रीवत्सप्रभायुक्तानिअंगदानिदोःषु (भुजेषु) येषांतेरत्नमयानिकंबुवत्त्रिधाराणिकंकणानिपाणिषुयेषांतेचतेच ४८ तथाभूरिपुण्यंबहुजन्मार्जितंपुण्यंतद्युक्तैर्जनै रर्पितैः (तुलसीनामम्लानदामभिरापूर्णाव्याप्ताः) ४९ चंद्रिकाविशदस्मितयुक्तैःसहारुणगुणेनचवर्तमानायेऽपांगास्तैर्वीक्षितैःस्वकार्थानांस्वभक्तमनोरथानांरजःसत्त्वाभ्यांस्रष्टृपालकाइवव्यदृश्यंत (स त्त्वंविशदंपालकंच । रजोऽरुणंस्रष्टृच । अतः) सत्त्ववाद्विशदस्मितेनपालकाइवरजोवदरुणगुणेनस्रष्टारइवताहक्कटाक्षैर्द्योतमानाइत्यर्थः ५० आत्माब्रह्मातदादिस्तंबपर्यंतैः (चराचरैः) अनेकार्हैरनेका र्हणैः ५१ (महिमभिरैश्वर्यैः) अजाद्याभिर्मायाऽविद्यादिभिर्विभूतिभिःशक्तिभिःमहदादिभिरितिमहत्सूत्रयोःपृथक्त्वविवक्षयाचतुर्विंशतिसंख्यैस्तत्त्वैर्जगत्कारणैः ५२

श्लोकाः ४१/५२

यावंतोगोकुलेबालाःसवत्साःसर्वएवहि ॥ मायाशयेशयानामेनाद्यापिपुनरुत्थिताः ४१ इतएतेत्रकुत्रत्यामन्मायामोहितेतरे ॥ तावंतएवतत्राब्दंक्रीडंतो विष्णुनासमम्४२एवमेतेषुभेदेषुचिरंध्यात्वासआत्मभूः ॥ सत्याःकेकतरेनेतिज्ञातुंनेष्टेकथंचन ४३ एवंसंमोहयन्विष्णुंविमोहंविश्वमोहनम् ॥ स्वयैव माययाऽजोपिस्वयमेवविमोहितः ४४ तम्यांतमोवन्नैहारंखद्योतार्चिरिवाहनि ॥ महतीतरमायैश्यंनिहंत्यात्मनियुंजतः ४५ तावत्सर्वेवत्सपालाःपश्यतो ऽजस्यतत्क्षणात् ॥ व्यदृश्यंतघनश्यामाःपीतकौशेयवाससः ४६ चतुर्भुजाःशंखचक्रगदाराजीवपाणयः ॥ किरीटिनःकुंडलिनोहारिणोवनमालिनः ४७ श्रीवत्सांगददोरत्नकंबुकंकणपाणयः ॥ नूपुरैःकटकैर्भाताःकटिसूत्रांगुलीयकैः ४८ आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः ॥ कोमलैःसर्वगात्रेषुभू रिपुण्यवदर्पितैः ४९ चंद्रिकाविशदस्मेरैःसारुणापांगवीक्षितैः ॥ स्वकार्थानामिवरजःसत्त्वाभ्यांस्रष्टृपालकाः ५० आत्मादिस्तंबपर्यंतैर्मूर्तिमद्भिश्चराचरैः॥ नृत्यगीताद्यनेकार्हैःपृथक्पृथगुपासिताः ५१ अणिमाद्यैर्महिमभिरजाद्याभिर्विभूतिभिः ॥ चतुर्विंशतिभिस्तत्त्वैःपरीतामहदादिभिः ५२

चूर्णिका

अहोएतेवत्साः पालाश्चमेमायातल्पेशयानाः नाद्यापिउत्थिताः ४१ अतः एते अत्रकुत्रत्याः ४२ एवंचिरंध्यात्वासत्याः के कतरेनेतिज्ञातुंनसमर्थःआसीत् ४३ एवंब्रह्मा विष्णुंमोहयितुंप्रवृत्तापि स्वमाययास्वयमेवमोहंप्राप ४४ तावत्सर्वेवत्साः तत्पालाश्चघनश्यामाः ४५ ४६ चतुर्भुजाः शंखादिपाणयः किरीटिनः ४७ श्रीवत्सादिलक्षिताः पीतवाससः तुलसीवनमालादिभिःआपूर्णाः ४८ ४९ ५० ब्रह्मादिस्तंबपर्यंतैश्चराचरैः नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिताः ५१ तथा अणिमाद्यैः महदादि तत्त्वैश्चतथाकालस्वभावादिभिः एतैः सर्वैः ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालादिभिश्चतत्सहकारिभिःतत्रकालःक्षोभकःस्वभावःपरिणामहेतुःसंस्कारोवासनायाउद्बोधकःस्वमहिध्वस्तमहिभिःभगवन्महिम्नातिरस्कृतस्वातंत्र्यैरुक्तैःसर्वैरणिमाद्यैः ५३ सर्वेषांमूर्तिमत्त्वेपिविशेषमाह। सत्येति । सत्याश्चज्ञानरूपाश्चअनंताश्चआनंदरूपाश्चतत्रापितदेकमात्राविजातीयसंभेदरहितास्तत्रापिचैकरसाःसदैकरूपामूर्तयोयेषांते। यद्वा सत्यज्ञानादिमात्रैकरसंयद्ब्रह्मतदेवमूर्तयोयेषांतइति । अतएवोपनिषदात्मज्ञानंसैवदृक्चक्षुर्येषांतेषामपिहिनिश्चितंअस्पृष्टभूरिमाहात्म्यानस्पृष्टंस्पर्शयोग्यंभूरिमाहात्म्यंयेषांतेतथाभूताःसंतोव्यदृश्यंतेति ५४ (परब्रह्मआत्मास्वरूपंयेषांतान्) एवंसकृत्एकदैवददर्श। परब्रह्मणोविशेषणंयस्येति ५५ अतिकुतुकेनआश्चर्येणउद्वृत्यदृष्टीःपरावृत्यहंसपृष्ठेनिपात्येतिवा । कुतुकशब्देतृतीयायाश्छांदसोलुक्पद्माउद्वृत्यःइतिछेदःअतिकुतुकेनउद्वृत्यःविचाल्यःविलोड्यः । विपर्यस्तःस्वस्मिन्नितियावत् । पाठांतरेतुअतिकुतुकेनउद्वृत्तःक्षुभितः । तेषांधाम्नातेजसास्तब्धसर्वेंद्रियोब्रह्मातूष्णीमभूत्निश्चलोऽभवत् । अत्रदृष्टांतः । पूर्देवीव्रजाधिष्ठात्रीकाचिद्देवतातस्याअंतिसमीपेपुत्रिकाचतुर्मुखीकृतकप्रतिमेव ५६ एवंमोहमग्नमुज्जहारेत्याह । इतीति । इरासरस्वतीतस्याईशेब्रह्मणिकिमिदमितिमुह्यतिसतिपश्चात्तद्द्रष्टुमप्यनीशेसतिपरमोजःश्रीकृष्णःतत्ज्ञात्वासपदिअजाजवनिकांमायारूपांतिरस्कारिणींययाऽद्भुतंदर्शितंतांचच्छादतांतिरोऽधत्त । अपसारितवानित्यर्थः । अथवाअयंलोकाभिमानीममैश्वर्यंद्रष्टुमयोग्यइतितस्योपरिमायांप्रसारितवान्इति । कस्मिन्स्वरूपेमुमोहतदाह । अतर्क्येतर्कागोचरे । निजःअसाधारणोमहिमायस्यतस्मिन्। इतिमोहेहेतुद्वयंउक्तम् । दर्शनायोग्यत्वायत्रीणिविशेषणानिस्वप्रमितिकेस्वप्रमितिस्वप्रकाशंतच्चतत्कंसुखंचयस्मिन्अतएवअजातःप्रकृतेःपरत्रपरस्मिन्। अतएवअतन्निरसनमुखेनब्रह्मकैःश्रुतिशिरोभिःमितिर्ज्ञानंयस्मिन्तस्मिन्स्वरूपे ५७ अर्वाक्बहिःप्रतिलब्धान्यक्षीणियेनसः (कोब्रह्मा) परेतवत् । मृतोयदिपुनःकथंचिदुत्तिष्ठतितथा। दृष्टीःनेत्राणि ५८ (दिशोऽभितःपश्यन्) जनानामाजीव्यैर्द्रुमैराकीर्णं समाप्रियंसंततानिप्रियाणियस्मिन्तत् ५९ तदाह । यत्रेति । नैसर्गदुर्वैराःस्वाभाविकाप्रतिकार्यवैरवंतोपिनराःसिंहादयश्चमित्राणीवयत्रसहैवासन् । अजितस्य (भगवतः) आवासेनद्रुताःपलायितारुट्तर्षादयःक्रोधलोभादयोयस्मात्तथाभूतंवृंदावनमपश्यदिति ६०

श्लोकाः ५३—६०

कालस्वभावसंस्कारकामकर्मगुणादिभिः ॥ स्वमहिध्वस्तमहिभिर्मूर्तिमद्भिरुपासिताः ५३ सत्यज्ञानानंतानंदमात्रैकरसमूर्तयः ॥ अस्पृष्टभूरिमाहात्म्या अपिह्युपनिषद्दृशाम् ५४ एवंसकृद्ददर्शाजःपरब्रह्मात्मनोऽखिलान् ॥ यस्यभासासर्वमिदंविभातिसचराचरम् ५५ ततोऽतिकुतुकोद्वृत्यस्तिमितैकादशेंद्रियः ॥ तद्धाम्नाभूदजस्तूष्णींपूर्देव्यंतीवपुत्रिका ५६ इतीरेशेऽतर्क्येनिजमहिमनिस्वप्रमितिकेपरत्राजातोऽतन्निरसनमुखब्रह्मकमितौ ॥ अनीशेपिद्रष्टुंकिमिदमितिवामुह्यतिसतिचच्छादाजोज्ञात्वासपदिपरमोऽजाजवनिकाम् ५७ ततोऽर्वाक्प्रतिलब्धाक्षःकःपरेतवदुत्थितः ॥ कृच्छ्रादुन्मील्यवैदृष्टीराचष्टेदंसहात्मना ५८ सपद्येवाभितःपश्यन्दिशोपश्यत्पुरःस्थितम् ॥ वृंदावनंजनाजीव्यद्रुमाकीर्णंसमाप्रियम् ५९ यत्रनैसर्गदुर्वैराःसहासन्नृमृगादयः ॥ मित्राणीवाजितावासद्रुतरुट्तर्षकादिकम् ६०

चूर्णिका

५३ मूर्तिमद्भिः सेविताः तथासच्चिदानंदमूर्तयः संतः सर्वेव्यदृश्यंत ५४ ५५ एवंब्रह्मासर्वान्विष्णुमयान् दृष्ट्वाआश्चर्येणदृष्टीः परावर्त्यतूष्णींस्थिरोभूत् ५६ हेनृपएवंब्रह्मणिकिमिदमिति मुह्यतिसतिश्रीकृष्णः तर्ह्येवस्वमायां अपसारितवान् ५७ ततः ब्रह्मामृतवदुत्थितः सन्नेत्राणिउन्मील्य ५८ सर्वतः पश्यन्पुरःस्थितंवृंदावनंददर्श ५९ तदेवाह यत्रवने स्वभावदुर्वैराः सिंहमृगादयः मित्राणीवसहैवासन् ६० ॥६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रचपरमेष्ठीब्रह्मापुरेवपूर्ववदेवब्रह्मअचष्टअपश्यत् । कथंभृतं पशुपवंशशिशुत्वनाट्यंउद्वहत् । नाट्यमित्यत्रहेतुः । अद्वयमित्यादि । अद्वयंचवत्सान्विचिन्वत् । एकंचसखीन् । अगाधबोधंचविचिन्वत्अनं
तंचपरितोविचिन्वत् । परंचाशिशुत्वमुद्वहत् । ब्रह्मचसपाणिकवलमितिनाट्यमेवोद्वहदित्यर्थः ६१ निजधोरणतःस्ववाहनात्त्वरेणवेगेनावतीर्य (कनकदंडमिवपृथिव्यांवपुरानिपात्य) दंडवन्नत्वा (इत्य
र्थः) चतुर्णांमुकुटानामग्रैरंघ्रियुग्मंस्पृष्ट्वामुदश्रुसुजलैरानंदाश्रुरूपैःसुजलैरभिषेकमकरोदिति ६२ चिरस्यचिरम् । पादयोःपतन्नास्ते ६३ सवेपथुःसकंपःअतएवगंद्गदया ! अनुकरणमेतत् । इलयावा
चाऐलतअस्तौत् ६४ ॥ इतिश्रीभागवतेमाहापुराणेदशमस्कंधेटीकायांत्रयोदशोध्यायः ॥ १३ ॥ ॥ ७ ॥ ॥ श्रीः । चतुर्दशेऽद्भुतंदृष्ट्वापूर्वागंतुकनिश्चयम् । अनीशःकर्तुमस्तौषीत्कृष्णं
ब्रह्माविमोहितः ॥१॥ स्वकृतापराधभियासकंपतयाभगवन्महिमानमनवगाहमानस्तावद्यथादृष्टरूपमेवकीर्तयन्नाह । नौमीति । हेईड्यस्तुत्यतेतुभ्यंनोमिस्तौमि । द्वितीयार्थेचतुर्थी । अथवानौमीत्युक्ताप्रस्तु
तस्यभगवतःकर्मत्वेज्ञातेप्रयोजनापेक्षायांएवंभूतोभगवानेवप्रयोजनमितितादर्थ्येचतुर्थी । यद्वातुभ्यंत्वामेवप्रसादयितुंत्वामेवस्तौमीत्यर्थः (अत्रक्रियार्थोपपदस्यचेतिचतुर्थी) अभ्रवद्वपुर्यस्यतस्मै (मेघ
श्यामायेत्यर्थः) तडिद्वदंबरे (वाससी) यस्यतस्मै । गुंजाभिरवतंसौकर्णभूषणेपरिपारितःपिच्छंचबर्हापीडंतैर्लसत्मुखंयस्यतस्मै (वन्यानिवनभवानिपत्रादीनितद्रचिता) स्रक्मालायस्यतस्मै । क
वलादिभिः (करधृतदध्योदनादिभिः) लक्ष्माभिःश्रीःशोभायस्यतस्मै । मृदूपादौयस्यतस्मै (पादयोर्मृदुत्वंप्रणामवशात्स्पर्शेनज्ञातंकीर्त्यते) पशुपस्यनंदस्यांगजाय १

श्लोकाः

तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यंब्रह्माद्वयंपरमनंतमगाधबोधम् ॥ वत्सान्सखीनिवपुरापरितोविचिन्वदेकंसपाणिकवलंपरमेष्ठ्यचष्ट ६१ दृष्ट्वात्वरेणनिजधो
रणतोवतीर्यपृथ्व्यांवपुःकनकदंडमिवाभिपात्य ॥ स्पृष्ट्वाचतुर्मुकुटकोटिभिरंघ्रियुग्मंनत्वामुदश्रुसुजलैरकृताभिषेकम् ६२ उत्थायोत्थायकृष्णस्याचिरस्य
पादयोःपतन् ॥ आस्तेमहित्वंप्राग्दृष्टंस्मृत्वास्मृत्वापुनःपुनः ६३ शनैरथोत्थायविमृज्यलोचनेमुकुंदमुद्वीक्ष्यविनम्रकंधरः ॥ कृतांजलिःप्रश्रयवान्समाहि
तःसवेपथुर्गद्गदयैलतेलया ६४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रयोदशोऽध्यायः १३ ॥ ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ नौमीड्यतेऽभ्रवपुषेतडिदं
बरायगुंजावतंसपरिपिच्छलसन्मुखाय ॥ वन्यस्रजेकवलवेत्रविषाणवेणुलक्ष्मश्रियेमृदुपदेपशुपांगजाय १

६१/१

चूर्णिका

तत्रब्रह्मापुरावत्वत्सान्सखीन्परितः शोधयंतंसपाणिकवलं ब्रह्मरूपंकृष्णंदृष्ट्वा ६१ स्ववाहात्भुविउत्तीर्यदंडवत्तं नत्वाचतुर्मुकुटाग्रैः आंघ्रियुगस्पृष्ट्वानेत्रोदैः अभ्यषिंचत्
६२ ततः सउत्थायोत्थायपूर्वदृष्टंमहिमत्वंस्मृत्वास्मृत्वाचिरंकृष्णपादयोः पतन्नास्तेस्म ६३ शनैरथोत्थायविमृज्यलोचने मुकुंदमुद्वीक्ष्यविनम्रकंधरः कृतांजलिःप्रश्रयवान्समा
हितःसवेपथुर्गद्गदयैलतेलया ६४ ॥ इतिदशमेत्रयोदशः १३ ॥ ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ हेस्तुत्यतुभ्यंअभ्रवपुषेतडिदंबरायगुंजावतंसपरिपिच्छ
लसन्मुखायवन्यस्रजेकवलवेत्रविषाणवेणुलक्ष्मश्रियेमृदुपदे पशुपांगजायनौमि १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नतुनौमीतिप्रतिज्ञायाकिंस्वरूपानुवादमात्रंक्रियते (नतुमहिमवर्णनमित्यतआह) अस्यापीति । भोदेवअस्यापिसुलभत्वेनप्रकाशितस्यापितववपुषःअवतारस्यमहिमहिमानंअवसितुंज्ञातुंकोपि ब्रह्मापिअ
हंनेशेनशक्रोमि । यद्वाकाश्चिदापिनेशेनसमर्थआसीत् । सुलभत्वायविशेषणद्वयम् । मदनुग्रहस्यममानुग्रहोयस्मात्तन्मदनुग्रहंतस्य । किंचस्वेच्छामयस्य । स्वानांभक्तानांयथायथेच्छातथातथा भवितुः
तर्हिकिमितिज्ञातुंनशक्यतेअतआह । नतुभूतमयस्यआचिंत्यशुद्धसत्त्वात्मकस्य । यदाऽस्यैवंतदाकिमुतकथंपुनः साक्षात्तवकेवलस्यआत्मसुखानुभूतेरेवआत्मसुखानुभवमात्रस्यावतारिणोगुणातीतस्य
महिमानंअंतरेणनिरुद्धेनापिमनसाकोपिज्ञातुंसमर्थोभवेत् । अथवाभूतमयस्यास्यापिविराड्रूपस्यतवत्वान्नियम्यस्यवपुषः महिअवासितुंकोपिनेशेनशक्तःतदासाक्षात्तवैवासाधारणस्यनियम्यनियंतृभेदरहित

॥६२॥ स्योक्तलक्षणस्यमहिमानमवसितुंकोपिनेशइतिकिमुवक्तव्यमित्यर्थः २ तर्हिअज्ञाःकथंसंसारंतरेयुरतआह । ज्ञानइति (ज्ञानविषयेप्रयासम्) उदपास्यईषदप्यकृत्वासाद्भिर्मुखरितांस्वतएव (मु
खतो) नित्यंप्रकटितांभवदीयवार्तांस्वस्वस्थानेएवास्थिताःसत्सान्निधिमात्रेणस्वतएवश्रुतिगतांश्रवणंप्राप्तांतनुवाङ्मनोभिःनमंतःसत्कुर्वंतोयेजीवंतिकेवलंपद्यापिनान्यत् (साधनं) कुर्वंति (तथापि)
तैःप्रायशस्त्रिलोक्यांअन्यैरजितोपितैर्जितोसिकिंज्ञानश्रमेणेत्यर्थः ३ भक्तिंविनाज्ञानंतुनैवसिध्येदित्याह । श्रेयःस्रुतिमिति । श्रेयसामभ्युदयापवर्गलक्षणानांस्रुतिःस्रवणंयस्याःसरसइवनिर्झराणां
(साश्रेयःस्रुतिः) तांतेतवभक्तिंव्युदस्यत्यक्त्वाश्रेयसांमार्गभूतामितिवा (केवलबोधलब्धयेभक्तिनिरपेक्षज्ञानावाप्तयेक्लिश्यंतिप्रयतंते) तेषांक्लेशलःक्लेशएवावशिष्यते (यथास्थूलतुषावघा
तिनाम्) अयंभावः । यथाऽल्पप्रमाणंधान्यंपरित्यज्यअंतःकणहीनान्स्थूलान्धान्याभासान्तुषानेवघ्नंतितेषांनकिंचित्फलंएवंभक्तिंतुच्छीकृत्ययेकेवलबोधायक्लिश्यंतितेषामपीति ४ (एवमन्वय
व्यतिरेकाभ्याम्) भक्त्यैवज्ञानंनान्यथेत्युक्तंतत्रसदाचारंप्रमाणयति । पुरेति । हेभूमन्इहलोकेपूर्वंयोगिनोपिसंतःयोगैर्ज्ञानंप्राप्याप्यपिपश्चात्त्वदर्पितेहाःत्वय्यर्पितालौकिक्यपिईहाचेष्टायैस्ते । निजकर्मलब्ध
यात्वदर्पितैर्निजैःकर्मभिर्लब्धया । त्वय्यर्पिता (-नि चतानि) ईहाचनिजानिकर्माणिचतैर्लब्धयेत्येकंपदंवा । कथोपनीतयाकथयात्वत्समीपंप्रापितयाभक्त्यैवविबुध्यविश्वव्यापकमात्मानंविज्ञायअंजःसु
खेनैवतेपरांगतिं (भागवतीं) प्राप्ताः (यद्वायोगिनःकर्मशीलाःत्वयिसमर्पितैरीहादिभिर्लब्धयाचित्तशुद्धिद्वाराप्राप्तयाभक्त्यैवविबुध्यज्ञानंप्राप्येति । अत्रनिजपदेनवर्णाश्रमविहितनित्यनैमित्तिकेगृह्येते) ५

श्लोकाः २/५

अस्यापिदेववपुषोमदनुग्रहस्यस्वेच्छामयस्यनतुभूतमयस्यकोपि ॥नेशेमहित्ववसितुंमनसांतरेणसाक्षात्तवैवकिमुतात्मसुखानुभूतेः २ ज्ञानेप्रयासमुदपा
स्यनमंतएवजीवंतिसन्मुखरितांभवदीयवार्ताम् ॥ स्थानेस्थिताःश्रुतिगतांतनुवाङ्मनोभिर्येप्रायशोऽजितजितोप्यसितैस्त्रिलोक्याम् ३ श्रेयःस्रुतिंभ
क्तिमुदस्यतेविभोक्लिश्यंतियेकेवलबोधलब्धये ॥ तेषामसौक्लेशलएवशिष्यतेनान्यद्यथास्थूलतुषावघातिनाम् ४ पुरेहभूमन्बहवोपियोगिनस्त्वदर्पिते
हानिजकर्मलब्धया ॥ विबुद्ध्यभक्त्यैवकथोपनीतयाप्रपेदिरेऽजोऽच्युततेगतिंपराम् ५

॥६२॥

चूर्णिका

भोदेवअस्यापिसुलभतयाप्रकाशितवपुषः महित्वंज्ञातुंअहं अन्योवाकोपिनसमर्थः २ किंच हेईशज्ञाने प्रयासंहित्वात्वत्कथांसंस्मृत्ययेजीवंतितैस्त्वंजितोसि ३ किंच हेविभो ये
भक्तिंहित्वाज्ञानप्राप्तयेयतंतेतेषांक्लेशएवशिष्यते यथातुषावघातिनां ४ किंच हेभूमन्पुराबहवोपियोगिनःयोगैर्ज्ञानंअप्राप्यपश्चाद्भक्त्यैवआत्मानंज्ञात्वासुखेनते गतिं प्रपेदिरे ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतावत्सगुणनिर्गुणयोरुभयोरपिज्ञानंदुर्घटमितित्वत्कथाश्रवणादिनैवत्वत्प्राप्तिर्नान्यथेत्युक्तं इदानींयद्युभयोरविशेषेणदुर्ज्ञेयत्वमुक्तंतथापिगुणातीतस्यज्ञानंकथंचिद्भवेत् । ननुसगुणस्यतवअचिंत्यानंतगुणत्वादितिस्तौतिश्लोकद्वयेन । तथापीति हेभूमन्अपरिच्छिन्न । अगुणस्यतेमहिमाअमलैरंतरात्मभिःप्रत्याहृतेंद्रियैःविबोद्धुंबोधगोचरीभवितुंअर्हतियोग्योभवति । अथवाविबोद्धुंज्ञातुंअर्हतिअर्ह्यते शक्यतइत्यर्थः । यद्वामहिमेतिमहिमानंकश्चिद्बोद्धुमर्हतीत्यर्थः । कथम् । स्वानुभवात्आत्माकारांतःकरणसाक्षात्कारात् । नन्वंतःकरणमपिसविकारमेवविषयीकरोतीतिकथमात्माकारतावस्येत्यत आह । अविक्रियादिति । विक्रियाविशेषाकारस्तद्रहितात् । एवंभूतात्स्वानुभवात् । विशेषपरित्यागएवात्मकारतेत्यर्थः । नन्वंतःकरणसाक्षात्कारविषयत्वेऽनात्मत्वप्रसंगःस्यादतआह । अरूपत इति । रूपंविषयः अविषयात् । वृत्तिविषयत्वमेवात्मनोनफलविषयत्वमतोनायंदोषइतिभावः (तथाचोक्तंब्रह्मण्यज्ञाननाशायवृत्तिव्याप्तिरिहेष्यते । स्वयंस्फुरणरूपत्वान्नाभासस्तत्रयुज्यतइत्यादि) कथं तर्हिस्फूर्तिःअनन्यबोध्यात्मतयास्वप्रकाशत्वेनैवत्वन्यथाइदंतदितिविषयत्वेनेत्यर्थः । अथवामासर्वतोंतरंगाल्लक्ष्मीरपिअगुणस्यतेमहिमहिमानंअमलैरंतर्वृत्तिभिरिंद्रियैरपियाहग्वस्तुतस्तेनरूपेणविबोद्धुंकिमर्हतिनार्हत्येवेत्यर्थः । कथंतर्ह्यर्हतितदाह । स्वानुभवादित्यादि । उक्तार्थमेवैतत् (अत्रचित्सुखाचार्यैर्व्याख्यातम् । ननुतर्हिपरमेश्वरमहिमानुभवेनिराशैर्जनैर्भाव्यंनेत्याह । तथापिभूमन्निति । यद्यपि भक्तिहीनानांदुर्घटस्तथाप्यमलांतरात्मभिस्तवमहिमाविबोद्धुमर्हति । कथंअनन्यबोध्यात्मतया । अनन्यःअन्यव्यतिरिक्तोबोध्यःप्रतिपाद्योयस्तत्पदार्थभूतःपरमात्मातद्रूपतया । कस्मादनन्यः । अविक्रियात्यद्विक्रियावत्तत्तदन्यत् । यथादेहघटादि । नन्वविक्रियत्वमसिद्धमितिचेत्तत्राह । स्वानुभवादितियद्यदस्वानुभवंतत्तद्विक्रियावत् । यथादेहघटादि । ननुस्वानुभवत्वमप्यसिद्धमितिचेत्तत्राह अरूपतइति यद्रूपवत्तदस्वानुभवंयथादेहघटादि । अयंतुतवमहिमा'अशब्दमस्पर्शमरूप'मित्यादिश्रुतेःअरूपःअतःस्वानुभवत्वादेवअविक्रियःअतोअनन्यइत्यर्थः।नचान्यथाभेदेनविबोद्धुमर्हति ।'अथयोन्यांदेवतामुपास्तेऽन्योसावन्योहमस्मीतिनसवेदयथापशु'रितिश्रुतेः)६ गुणात्मनःगुणानामात्मनोगुणाधिष्ठातुस्तेतवपुनगुणान्विमातुंएतावंतइतिगणयितुमपिकेईशिरे । समर्थाबभूवुः । दूरतस्त्वद्विशेषवार्ता । कथंभूतस्यतव । अस्यविश्वस्यहितायपालनायबहुगुणाविष्कारेणावतीर्णस्यापि । ननुकालेननिपुणैःकिमशक्यमित्यतआह । कालेनेति । वाशब्दोवितर्के । सुकल्पैरतिनिपुणैर्बहुजन्मनामहताकालेन (भूपांसवो) भूपरमाणवोविमिताविशेषेणगणिताभवेयुः । तथाखेनभसिमिहिकाहिमकणाअपितथाद्युभासःदिविनक्षत्रादिकिरणपरमाणवोपि (एवमपितेनैवेशिरेइति) ७ तस्माद्भक्तिरेवसंगच्छतइत्याह । तत्तेनुकंपामिति । सुसमीक्षमाणःकदाभविष्यतीतिबहुमन्यमानःस्वार्जितंचकर्मफलंअनासक्तःसन्भुंजानएवनातीवतपआदिनाक्लिश्यन्नेवंयोजीवेतसमुक्तौदायभाग्भवति (त्वदनुकंपयासोऽवश्यंमुक्तिंभजतेत्यर्थःतत्र) भक्तस्यजीवनव्यतिरेकेणदायप्राप्ताविवमुक्तौनान्यदुपयुज्यतइतिभावः ८

श्लोकाः ६–८

तथापिभूमन्महिमाऽगुणस्यतेविबोद्धुमर्हत्यमलांतरात्मभिः ॥ अविक्रियात्स्वानुभवादरूपतोह्यनन्यबोध्यात्मतयानचान्यथा ६ गुणात्मनस्तेपिगुणान्विमातुंहितावतीर्णस्यकईशिरेऽस्य ॥ कालेनयैर्वाविमिताःसुकल्पैर्भूपांसवःखेमिहिकाद्युभासः ७ तत्तेऽनुकंपांसुसमीक्षमाणोभुंजानएवात्मकृतंविपाकम् ॥ हृद्वाग्वपुर्भिर्विदधन्नमस्तेजीवेतयोमुक्तिपदेसदायभाक् ८

चूर्णिका

हेविभो अगुणस्यतेमहिमाप्रत्याहृतेंद्रियैः क्वचित्बोद्धुंअर्हति ६ सगुणस्यतेगुणान् विमातुंकेसमर्थाः नकेपि ७ तस्मात्तेकृपा कदा भविष्यतीतिमन्यमानः स्वार्जितकर्मफलं अनासक्तः सन्भुंजानएवतपआदिना अक्लिश्यन् यः जीवेत सः मुक्तौदायभाक्भवति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंस्तुत्वाभगवंतंक्षमापयितुंस्वापराधंनिवेदयति । पश्येति । हेईशमेअनार्यंदौर्जन्यंपश्य । यदहंमायिनामपिमायिनिविमोहकेत्वयिस्वमायांप्रसार्यआत्मवैभवम् (आत्मनस्तवैश्वर्यम्) ईक्षितुमैच्छंअभि
लषितवान्अहोएवंकर्तुंत्वयिअहंकियान्नाकिंचित् । यथाग्नेरुद्भूताज्वालाऽग्नौनाकिंचित्तद्वदिति ९ रजोभुवःरजसोजातस्यअतोऽजानतःअतएवाजावलेपांधतमोंधचक्षुषःअजोहंजगत्कर्ताहमितिमदेनगा
ढतमोरूपेणांधीभूतनेत्रस्यअतस्त्वत्तःपृथगीशमानिनः (ईशमात्मानंमन्यतेतथाभूतस्य) अन्यत्रप्रभुत्वेनवर्तमानोपिमयिनाथेसतिनाथवान्मद्भृत्यएवायंअतएषोऽनुकंप्यइतिमत्वाक्षमस्वेत्यर्थः १० ननु
ब्रह्मांडविग्रहस्त्वमपिईश्वरएवेतिचेत्तत्राह । क्वाहमिति । तमःप्रकृतिः । महान् महत्तत्वं । अहमहंकारः । खमाकाशः । चरोवायुः । अग्निः । वार्जलं भूश्चप्रकृत्यादिपृथिव्यंतैरष्टभिरेतैःसंवेष्टितोयोऽडघटःसए
वतस्मिन्वास्वमानेनसप्तवितास्तिःकायोयस्यसोहंक्व । क्वचतेमहित्वम् । कथंभूतस्य । ईदृग्विधानिप्रकृत्यादिभिःसंवेष्टितानिअविगणितानिअसंख्यानिअंडानितएवपरमाणवःतेषांचर्यापरिभ्रमणंतदर्थंवा
ताध्वानोगवाक्षाइवरोमविवराणियस्यतस्यतव । अतोऽतितुच्छत्वादहंत्वयानुकंप्यइति ११ अपिच । गर्भगतस्याशिशोःपादयोरुत्क्षेपणंमातुःकिमपराधायभवतिलोके । अस्तिनास्तिव्यपदेशाभ्यांभा
वाभावशब्दाभ्याम् । स्थूलसूक्ष्मकार्यकारणशब्दैर्वाभूषितमभिहितंएतेषांशब्दानांभुविविषयेउषितंस्थितंइतिवासर्ववस्तुइत्यर्थःहेअधोक्षजतवकुक्षेःअनंतःबहिःकियदपिकिंचिन्मात्रमपिकिमपिअस्तिनाकिंचि
दस्तीत्यर्थः । अतःसर्वस्यतवकुक्षिगतत्वेनममापितथात्वात्मातृवत्त्वयामेपराधःसोढव्यइतिभावः १२ किंच । विशेषतोपित्वत्तोममजन्मप्रसिद्धमित्याह । जगत्त्रयेति । जगत्त्रयस्यांतेप्रलयेयउदधीनांसं
प्लवःसंश्लेषःतस्मिन्नुदेउदकेनारायणस्योदरेनाभिस्तस्मान्नालादजोनिर्गतइतियावाक्सातावन्मृषानभवतिवैनिश्चितम् । तथापितुहेईश्वरत्वत्तःअहंकिंनविनिर्गतःनोत्पन्नोस्मिअपितुत्वत्तएवोत्पन्नइत्यर्थः १३

॥६४॥

श्लोकाः ९/१३

पश्येशमेऽनार्यमनंतआद्येपरात्मनित्वय्यपिमायिमायिनि ॥ मायांवितत्येक्षितुमात्मवैभवंह्यहंकियानैच्छमिवार्चिरग्नौ ९ अतःक्षमस्वाच्युतमेरजोभुवो
ह्यजानतस्त्वत्पृथगीशमानिनः ॥ अजावलेपांधतमोंऽधचक्षुषएषोऽनुकंप्योमयिनाथवानिति १० क्वाहंतमोमहदहंखचराग्निवार्भूसंवेष्टितांडघटसप्तवित
स्तिकायः ॥ क्वेदृग्विधाविगणितांडपराणुचर्यावाताध्वरोमविवरस्यचतेमहित्वम् ११ उत्क्षेपणंगर्भगतस्यपादयोःकिंकल्पतेमातुरधोक्षजागसे ॥ किम
स्तिनास्तिव्यपदेशभूषितंतवास्तिकुक्षेःकियदप्यनंतः १२ जगत्त्रयांतोदधिसंप्लवोदेनारायणस्योदरनाभिनालात् ॥ विनिर्गतोजस्त्वितिवाङ्नवैमृषा
किंत्वीश्वरत्वन्नविनिर्गतोस्मि १३

चूर्णिका

एवंस्तुत्वाअपराधंनिवेदयति हेईशमेदौर्जन्यंपश्य यतः अहं सर्वमोहकेत्वयिस्वमायांप्रसार्यतवैश्वर्यंद्रष्टुंऐच्छम् अहोत्वयिएवंकर्तुंअहंकियान् यथा अग्नेरुद्भूताः ज्वालाः
अग्नौनकिंचित् ९ अतः हे अच्युतपृथगीशमानिनः मे अपराधंक्षमस्व १० किंच हेईशप्रकृत्यादिपृथिव्यंतैः संवेष्टितांडघटेस्वमानेनअहंसप्तवितस्तिकायः क्व इदृ
ग्विधातेब्रह्मांडपरमाणुपरिभ्रमणार्थं गवाक्षाइवरोमरंध्राणियस्यतस्यतेमहिमत्वंक्व ११ अतः त्वयानुकंप्योऽऽहम् १२ अपिच हेईशगर्भगतस्याशिशोःपादयोः उत्क्षे
पणंमातुःअपराधायस्यात्किम् अतः सर्वस्यकुक्षिगतत्वेनममापितथात्वात् मातृवत् अपराधः सोढव्यः १५ किंच प्रलयेनारायणोदरनाभिनालात् निर्गतोऽजः इतिवाक्
तावत् न मृषा १३ तथापि हेईशत्वत्तः अहंनोत्पन्नोऽस्मि किंतुउत्पन्नएव १३

॥६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥६५॥

तर्हिनारायणस्यपुत्रःस्याःममकिमायातंतत्राह । नारायणस्त्वमिति । नहीतिकाकात्वमेवनारायणइत्यापादयति । कुतोऽहंनारायणइतिचेदतआह । सर्वदेहिनामात्मासि । एवमपिकिंनारायणोनभवसि । नारंजीवसमूहःअयनमाश्रयोयस्यसतथेतित्वमेवसर्वदेहिनामात्मत्वान्नारायणइतिभावः ।हेअधीशत्वंनारायणोनहीतिपुनःकाकुःअधीशःप्रवर्तकः । ततश्चनारस्यायनंप्रवृत्तिर्यस्मात्सतथेतिपुनस्त्वमेवासाविति । किंच । त्वमखिललोकसाक्षीअखिलंलोकंसाक्षात्पश्यसि ।अतोनारमयसेजानासीतित्वमेवनारायणइत्यर्थःनन्वेवंनारायणपदव्युत्पत्तौभवेदेवंतत्त्वन्यथाप्रसिद्धमित्याशंक्याह । नारायणोंगमिति । नरादुद्भूतायेअर्थाः (चतुर्विंशतितत्त्वानि) तथानराज्जातंयज्जलंतदयनायोनारायणःप्रसिद्धःसोपितवैवांगंमूर्तिःतथाचस्मर्यते । 'नराज्जातानितत्त्वानिनाराणीतिविदुर्बुधाः । तस्यतान्ययनंपूर्वंतेननारायणःस्मृत'इति । तथा'आपोनाराइतिप्रोक्ताआपोवैनरसूनवः । अयनंतस्यताःपूर्वंतेननारायणःस्मृत'इतिच । ननुमन्मूर्तेरपरिच्छिन्नायाःकथंजलाश्रयत्वंअतआह तच्चापिसत्यंनेति १४ अपरिच्छेदमेवोपपादयति । तच्चेदिति । जगदाश्रयभूतंतवतद्वपुःजलस्थमित्येवंयदिसत्यंस्यात्तर्हितदैवकमलनालमार्गेणांतःप्रविश्यसंवत्सरशतंविचिन्वतापिमयाहेभगवन्नाचिंत्यैश्वर्यतत्रकिमितिनदृष्टम् (ननुनचबाह्येंद्रियदृश्यांकिंतुअंतःकरणदृश्यंतत्राह) हृद्यपिकिमितिनोव्यदर्शिनदृष्टम् । तदैवतपःकरणानंतरंसपद्येवसुदृष्टंअतोमायैव । अतस्त्वन्मूर्तेःदेशविशेषपरिच्छेदःसत्योनभवतीत्यर्थः १५ अपिच । यदिजलादिप्रपंचःसत्यःस्यात्तर्हितेनतवपरिच्छेदोभवेत् । सतुमायाविलसितइतित्वयैवदर्शितमित्याह (अत्रैवेति) श्लोकत्रयेण । हेमायाधमनमायोपशमनअत्रैवावतारेबहिःस्फुटस्यापिआत्मनोजठरमध्येजनन्याःप्रदर्शनेन (त्वयैवमायात्वंप्रकटीकृतम्) १६ ननुबहिःसतएवांतर्जठरेप्रतिबिंबोस्तुतत्कुतःसर्वथामायात्वंतत्राह । यस्येति । यस्यतवकुक्षौसर्वमिदंयथाभातितत्सर्वंइहापिबहिरपितथैवभाति । किंच । सात्मंत्वत्सहितम् । तदिदंसर्वंत्वयिमाययाविनाकिंघटेत । अयंभावः त्वयिप्रतिबिंबश्चेत्तर्हिबाह्याद्विलोमतयाप्रतीयेतनतुतदस्ति तवचादर्शस्थानीयस्यत्वयिप्रतीतिर्नस्यात् । अतःसर्वथामिथ्यात्वमेवेति १७ अपिच । नकेवलंजनन्याःममापितथैवदर्शितमित्याह । अद्यैवेति । त्वदृतेत्वांविना । अस्यविश्वस्यमायात्वंत्वयाममैवचतदप्यद्यैवकिंनदर्शितम् । अपितुदर्शितमेव । तथाहि । (प्रथमम्) एकोसि (तदनंतरंवत्सपावत्साश्चसमस्ताअसि) ततस्तोमयासहाखिलैस्तत्त्वादिभिरुपासितास्तावंतश्चतुर्भुजाअसि । जगंतिब्रह्मांडानीतिप्रागनुक्तमपिदृष्टमितिज्ञातव्यम् १८

नारायणस्त्वंनहिसर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी ॥ नारायणोऽगंनरभूजलायनात्तच्चापिसत्यंनतवैवमाया १४ तच्चेज्जलस्थंतवसज्जगद्वपुःकिंमे
नदृष्टंभगवंस्तदैव ॥ किंवासुदृष्टंहृदिमेतदैवकिंनोसपद्येवपुनर्व्यदर्शि १५ अत्रैवमायाधमनावतारेह्यस्यप्रपंचस्यबहिःस्फुटस्य ॥ कृत्स्नस्यचांतर्जठरेजन
न्यामायात्वमेवंप्रकटीकृतंते १६ यस्यकुक्षाविदंसर्वंसात्मंभातियथातथा ॥ तत्त्वय्यपीहतत्सर्वंकिमिदंमाययाविना १७ अद्यैवत्वदृतेस्यकिंममनतेमायात्व
मादर्शितंएकोसिप्रथमंततोव्रजसुहृद्वत्साःसमस्ताअपि ॥ तावंतोसिचतुर्भुजास्तदखिलैःसाकंमयोपासितास्तावंत्येवजगंत्यभूस्तदमितंब्रह्माद्वयंशिष्यते १८

श्लोकाः १४—१८

चूर्णिका

ननुनारायणपुत्रएवत्वम् ममकिंप्राप्तं तत्राह नारायणःजलाश्रयः सर्वलोकसाक्षीत्वमेवासि १४ ननुअपरिच्छिन्नमूर्तेः कथंजलाश्रयत्वंतत्राह तदपिसत्यंनयतःतत् वपुः जलस्थमित्येवंयदिसत्यंस्यात् तर्हितदैवमयाकिमितिनदृष्टम् ततः तपःकरणानंतरंहृदिदृष्टं अतो मायैवअतः तेजलेनपरिच्छेदः सत्यो न १५ किंच अत्रैवावतारेत्वयाबहिःस्फुटस्यप्रपंचस्यमायात्वंजनन्याः जठरांतः जगत्प्रदर्शनेन प्रकटीकृतम् १६ किंच तेकुक्षौइदंसर्वं माययैवभाति १७ किंच ममापित्वया अद्यमायात्वंदर्शितं तदाह आदौएकः असि ततः सुहृद्वत्साः यावंतः तावंतश्चतुर्भुजाः असि अंतेत्वं एकएव अवशिष्टोसि १८

१ स्वेति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१४॥

ननुब्रह्मनूतवमयादर्शितंशुद्धमेवचैतन्यम् । कथंप्रपंचवन्मायेत्युच्यतेसत्यम् । किंतुअद्वितीयेत्वयिनानात्वंगुणावतारमत्स्यादिष्विवकार्यवशेनस्वतंत्रमायांनिबंधनमित्याह श्लोकद्वयेनअजानतामिति । त्वत्पदवींतवस्वरूपमजानतांअनात्मनिप्रकृतौस्थितआत्मैवत्वंआत्मनैवस्वातंत्र्येमायांवितत्याभासिकथम् । जगतःस्रष्टावहमिवब्रह्मेव । विधानेपालनेएष (प्रत्यक्ष-)-स्त्वमिव । अंतेसंहारेत्रिनेत्रइव १९ (सुरेष्विति । सुरेषुउपेंद्रःऋषिषुपरशुरामःनृष्वपिरामःएवमजनस्यापितेजन्मस्वतंत्रमाययाऽवतारः) २० ननुस्वातंत्र्येकथंकुत्सितेषुमत्स्यादिषुजन्मकथंवावामनाद्यवतारेयाच्ञादिकार्पण्यंकथंवाऽस्मिन्नेवकदाचिद्भयपलायनादी-(त्याशंक्याचिंत्यलीलावतारत्वात्सर्वंसंभवतीत्याह) कोवेत्तीति । अन्वर्थैःसंबोधनैर्दुर्ज्ञेयत्वमेवाह । भूमन्नित्यादिभिः । भगवतऊतीर्लीलास्त्रिलोक्यांकोवेत्तिक्ववाकथंवाकदावाकतिवेति । अचिंत्यंतवयोगमायावैभवमितिभावः २१ ननुभवत्ववताराणामचिंत्योमहिमाप्रपंचस्यह्यसत्त्वेकथंसत्त्वप्रतीतिरितीमामाशंकांसपरिकरमुपसंहरन्परिहरतितस्मादिति । अस्तधिषणंनिरस्तप्रतिभासंत्वय्येवउद्यत्उद्भवत् । अपियन्नश्यत् । सदिवेत्युपलक्षणम् एतन्नित्यमिवसुखमिवचेतनमिवचअधिष्ठानभूतस्यतवगुणैस्तथातथाभातीत्यर्थः (वस्तुतोमायामयःप्रपंचस्त्वंतुनित्यशुद्धबुद्धःपरिपूर्णरूपइत्यर्थः) २२ तदेवाह त्वमेवेति । एकस्त्वंसत्यःकुतःआत्मा । दृश्यमसत्यंदृष्टंनचात्माहृश्यःअतःसत्यः । किंचयद्विकारवत्तदसत्यंनचत्वयिजन्मादयोविकाराःसंतीत्याह । आद्यःकारणंअतोनजन्म । आद्यत्वेहेतुःपुराणःपुरापिभवःनवःकार्यात्पूर्वमपिवर्तमानइत्यर्थः । अत्रहेतुःपुरुषइति । तथाचश्रुतिःपूर्वमेवाहमिहासमितितत्पुरुषस्यपुरुषत्वमिति । जन्मानंतरास्तित्वलक्षणंविकारंवारयतिनित्यइति । सनातनइत्यर्थः । पूर्णः अजस्रसुखःअक्षरःअमृतइतिचतुर्भिःपदैःक्रमेणवृद्धिविपरिणामापक्षयाविनाशान्वारयति । पूर्णत्वेहेतुरनंतःअद्वयइतिचदेशकालपरिच्छेदरहितोवस्तुपरिच्छेदरहितापीत्यर्थः । अमृतत्वोपपादनायचतुर्विधक्रियाफलत्वंवारयतिस्वयंज्योति निरंजनःउपाधितोमुक्तइतिपदत्रयेण । अयंभावः । तत्रोत्पत्तिराद्यइत्यनेनैवनिराकृता । प्राप्तिरपिक्रियय्याज्ञानेनवाभवेत् । तत्रक्रियय्याप्राप्तिरात्मपदेनैवनिराकृता । ज्ञानतःप्राप्तिंवारयति स्वयंज्योतिरिरितिविकृतिरपितुषापाकरणेनघातेनव्रीहीणामिवउपाध्यपाकरणेनभवेत् । तच्चासंगत्वान्नसंभवतीत्याह मुक्तउपाधितइति । संस्कारोपिकिमतिशयाधानेनमलापाकरणेनवा । तत्रातिशयाधानंपूर्णत्वेनैवनिराकृतम् । मलापाकरणंवारयतिनिरंजनइति । निर्मलइत्यर्थः २३ तस्मादेवंभूतज्ञानान्मुच्यंतइत्याह । एवंविधमिति । त्वांयेविचक्षते । सम्यक्पश्यंति । कथम् । आत्मात्मतयाआत्माप्रत्यक्चैतन्यंतस्यस्वरूपत्वेन । नचैतत्पुत्रादिष्विवगौणमित्याह । सकलात्मनामपिस्वात्मानं । केन (कृत्वापश्यंति) । गुरुरेवार्कःतस्माल्लब्धंउपनिषज्ज्ञानंतदेवसुचक्षुस्तेन । तेभवएवानृतांबुधिस्तंतरंतीव २४

॥६६॥

श्लोकाः १९/२४

अजानतांत्वत्पदवीमनात्मन्यात्मात्मनाभासिवितत्यमायाम् ॥ सृष्टाविवाहंजगतोविधानेइवत्वमेषोंऽतइवत्रिनेत्रः ॥ १९ सुरेष्वृषिष्वीशतथैवनृष्वपितिर्यक्षुयादस्स्वपितेऽजनस्य ॥ जन्मासतांदुर्मदनिग्रहायप्रभोविधातःसदनुग्रहाय २० कोवेत्तिभूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्याम् ॥ क्वाहोकथंवाकतिवाकदेतिविस्तारयन्क्रीडसियोगमायाम् २१ तस्मादिदंजगदशेषमसत्स्वरूपंस्वप्नाभमस्तधिषणंपुरुदुःखदुःखम् ॥ त्वय्येवनित्यसुखबोधतनावनंतेमायातउद्यदपियत्सदिवावभाति २२ एकस्त्वमात्मापुरुषःपुराणःसत्यःस्वयंज्योतिरनंतआद्यः ॥ नित्योऽक्षरोऽजस्रसुखोनिरंजनःपूर्णोऽद्वयोमुक्तउपाधितोऽमृतः २३ एवंविधंत्वांसकलात्मनामपिस्वात्मानमात्मात्मतयाविचक्षते ॥ गुर्वर्कलब्धोपनिषत्सुचक्षुषायेतेतरंतीवभवानृतांबुधिम् २४

॥६६॥

चूर्णिका किंच तवस्वरूपंअजानतांप्रकृतिस्थः त्वंस्वातंत्र्येणमायांवितत्यभासि कथंजगत्सृष्ट्यादिषुअस्मदादिवत् १९ तथासुरादिषुते जन्मअसतांनिग्रहायसदनुग्रहायचवर्तते २० एवंभूतस्यतेविभूतीः कोवेत्ति अतः तवयोगमायावैभवंआचिंत्यम् २१ तस्मात्इदंअसत् जगत्सत्येत्वयिउद्भवत्नश्यत्सत् सदिव भाति सत्यस्तुत्वमेवेत्याह २२ एकः त्वं सत्यः स्वयंज्योतिः पुराणः पुरुषः असि २३ एवंभूतंत्वांयेगुर्वनुग्रहलब्धज्ञानचक्षुषापश्यंतिते एवभवांबुधिंतरंति २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रज्ञानेनतरंतीतितच्चतरंतीवेतितच्चात्मात्मतयाज्ञानेनेत्यर्थत्रयंप्रतिज्ञातंक्रमेणोपपाद्यते । तत्रात्मानमेवात्मतयेत्यनेनश्लोकेनज्ञानेनतरंतीत्येतदुपपाद्यते । अज्ञानसंज्ञावित्यनेनतरंतीवेत्येतत् । त्वामात्मा
नमित्यादिश्लोकद्वयेनतुआत्मात्मतये-(-ज्ञानेन-)-त्येतदुपपाद्यते । ननुज्ञानेनकथंभवंतरंतीति तस्याज्ञानमूलत्वादित्याह । आत्मानमेवेति ।(अविजानतांसाक्षादजानतां) तेनैवाज्ञानेनैव प्रपंचितंप्रपंचः
(-जातः) । रज्वामहेर्भोगभवाभवाविति । सर्पशरीरस्याध्यासतदपवादौरज्ज्वज्ञानेनयथेति २५ ननुज्ञानेनतरंत्येवकिमिदमुच्यतेतरंतीवेति । तत्राह । अज्ञानसंज्ञाविति । अज्ञानेनसंज्ञाययोस्तौभवबंध
मोक्षौभवेनबंधस्तस्मान्मोक्षश्चतौद्वौनामप्रसिद्धौऋतज्ञभावात्ऋतश्चासौज्ञश्चयोभावस्तस्मादन्यौनस्तः (सत्यज्ञानरूपात्मव्यतिरिक्तौनभवतइत्यर्थः) ननुकथंमहानपलापःक्रियते (इत्याशंक्य) परमार्थ
विचारादित्याह । अजस्रेति । अखंडानुभवरूपेपरेशुद्धेआत्मनिअज्ञानंनचबंधः अतएवनज्ञानंनचमोक्षःतरणौसूर्ये (अजस्रप्रकाशात्मके) रात्र्यहनीइवेति २६ ननुपरमार्थज्ञानादज्ञानकृतोबंधोनिवर्ततां ।
आत्मात्मतयैव-ज्ञानादितिकोयमाग्रहइत्याशंक्ययदध्यासादात्मनःपररूपास्फूर्तिःतदपवादेनतत्रैव (आत्मस्वरूप-)-ज्ञानंयुक्तं (सर्पापवादेनरज्जौरज्जुस्वरूपज्ञानं) इतीममर्थंविस्मयेनाक्रोशन्निवाह त्वा
मिति। त्वामात्मानंपरंदेहादिरूपंमत्वाआत्मनिदेहाद्यध्यस्येत्यर्थः । तथापरंदेहादिआत्मानं (आत्मरूपं) मत्वादेहादावात्मानमध्यस्येत्यर्थः एवमंतर्नष्टआत्मा (पुन-)-र्बहिर्मृग्यःइत्यहोचित्रंनहिगृहेनष्टं
वनेमृग्यते (इतिज्ञजनतायाअप्यज्ञत्वम् । मृग्यअहोइतिप्रयोगआर्षः) २७ विवेकवंतस्तुप्रत्यक्स्वरूपमेवपरमात्मानंविचिन्वंतीत्याह । अंतर्भवइति । भवतीतिभवःचिज्जडात्मकंशरीरंतन्मध्यएवहिप्र
सिद्धंत्वांमृगयंति। कथं । अतत्जडंत्यजंतः । अपवदंतः । ननुसतोज्ञानेनालंकिमसतोऽपवादेनेत्याशंक्यअध्यस्तापवादंविनाअधिष्ठानतत्त्वंनज्ञायतइतिसतांव्यवहारेणाह । असंतमिति । अंतिसमीपेअसं
तमपिअहिमंतरेणतन्निषेधंविनेत्यर्थः संतं (तंप्रत्यक्षमपि) गुणंरज्जुंसंतःकिमुयंतिजानंति अंतिसंतमपिगुणमितिवानजानंतीत्यर्थः तस्मादात्मतयैवज्ञानान्मुक्तिरितिभावः २८ नन्वेवंज्ञानैकसाध्येमोक्षे
किमितिभक्तिरुक्तोषितेत्यतआह । अथापीति । यद्यपिहस्तप्राप्यमिवज्ञानमुक्तंअथापिहेदेवतवपादांबुजद्वयमध्येएकदेशस्यापियःप्रसादलेशोपितेनानुगृहीतएवभगवतस्तवमहिम्नःतत्त्वंजानाति हे भगवन्
तवमहिम्नइतिवा । एकोपिकश्चिदपिचिरमपिविचिन्वन्नपिअतदंशापवादेनविचारयन्नपीत्यर्थः २९

श्लोकाः २५/२९

आत्मानमेवात्मतयाऽविजानतांतेनैवजातंनिखिलंप्रपंचितम् ॥ ज्ञानेनभूयोऽपिचतत्प्रलीयतेरज्वामहेर्भोगभवाभवौयथा २५ अज्ञानसंज्ञौभवबंधमोक्षौ
द्वौनामनान्यौस्तऋतज्ञभावात् ॥ अजस्रचित्यात्मनिकेवलेपरेविचार्यमाणेतरणाविवाहनी २६ त्वामात्मानंपरंमत्वापरमात्मानमेवच ॥ आत्मापुनर्बहि
र्मृग्यअहोज्ञजनताज्ञता २७ अंतर्भवेऽनंतभवंतमेवह्यतत्त्यजंतोमृगयंतिसंतः ॥ असंतमप्यंत्यहिमंतरेणसंतंगुणंतंकिमुयंतिसंतः ॥ २८ अथापितेदेवपदांबु
जद्वयप्रसादलेशानुगृहीतएवहि ॥ जानातितत्त्वंभगवन्महिम्नोनचान्यएकोपिचिरंविचिन्वन् २९

चूर्णिका

तदाह येषांआत्मतयाआत्मानं अजानतांइदंसर्वं अज्ञानेनैवजातंतत्ज्ञानेनलीयते रज्ज्वांसर्पाध्यासापवादवत् २५ एतौबंधमोक्षौऋतज्ञभावात् अन्यौनस्तः एवंविचार्यमाणे
नात्मनिबंधमोक्षौयथारवौरात्र्यहनी २६किंच आत्मनिदेहादिं अध्यस्यदेहादौ आत्मानं अध्यस्यअत्रनष्टः आत्माबहिर्मृग्यः इतिविचित्रं नहिगृहे नष्टंवनेमृग्यते २७ अतःविवे
किनः त्वांदेहमध्य एव अतत्त्यजंतः संतः मृगयंति एवंच आत्मतयैवज्ञानान्मुक्तिरितिभावः २८ अथापि हेदेवतवपादांबुजप्रसादलेशेन अनुग्रहीतएवपुमान् ते
तत्त्वंजानाति नान्यः २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्तस्मात्भूरिभागोमहद्भाग्यंअत्रभवेब्रह्मजन्मनितिरश्चामपिमध्येयज्जन्मतस्मिन्वान्यत्रयेनभाग्येनभवदीयानांजनानांएकोपियःकश्चिदपिभूत्वानिषेवेअत्यर्थंसेवेयेत्यर्थः ३० देवादिजन्मतोपियत्रकुत्रचित्त्वद्भक्तिमज्जन्मैवश्रेष्ठमित्यौत्सुक्येनसप्तभिःश्लोकैरभिनंदतिअहोतिधन्येत्यादिभिः । (अहोतीत्यत्रसंधिरार्षः) व्रजगोरमण्यः व्रजस्थागावो रमण्योगोप्यश्च (अतिशयेनपुण्यवत्यः) यतस्तेत्वया वत्सतरात्मजात्मना वत्सानां आत्मजानांचस्वरूपेण । यस्यतवतृप्तयेसर्वेपियज्ञा अद्यापिनालंनशक्ताइत्यर्थः तेनत्वयाप्रतिक्षणंतृप्यतासतायासांस्तन्यममृतरूपंपीतामिति ३१ अहोइतिपुनरुक्त्याभाग्यस्य सर्वथापरिच्छन्नत्वमुक्तं (भाग्यं दैवं । आदरातिशयेद्विरुक्तिः) ३२ किंच । एषांभाग्यस्यतावन्महितामहिमाआस्तांकस्तांवक्तुंशक्नोति । शर्वादयः शर्वोऽहंकाराधिष्ठाताआदिर्येषांचंद्रादीनामेकादशानांतेतथा (अतद्गुणसंविज्ञानोबहुव्रीहिः ।) वयंचवयमित्यात्मानमेवबहुमन्यमानआह । एवंमनोबुद्ध्यहंकारचक्षुराद्यधिष्ठातारस्त्रयोदशदेवा एवतावत्बतअहोभूरिभागाः यस्मादेतेषांनंदगोपव्रजौकसांहृषीकाणींद्रियाण्येवचषकानिपात्राणितैः तेतवचतुर्दशस्यचित्ताधिष्ठातुरंघ्रीएवोदजेवारिजेतयोर्मधुमकरंदः तदेवामृतंस्वादुआसवंमादकंपिबामः एतदुक्तंभवति । यदाप्रत्येकामिंद्रियाभिमानिनोवयंकीर्तिसौंदर्यसौगंध्याद्येकैकसेविनोपिकृतार्थाः तदासर्वैंद्रियैःसर्वसेविनामेषांकिंवर्ण्यतेभाग्यमिति ३३ अतोमयाप्रार्थितं तदस्तुमेनाथसभूरिभागइतियत्तदेवेत्याह । तद्भूरिभाग्यमिति । किंतत् । इहमनुष्यलोकेयत्किमपिजन्मतत्राप्यटव्यांयत्तत्रापिगोकुलेयत् । अहोसत्यलोकंविहायात्रजन्मनिजातेकोलाभइत्यतआहअपिकतमांघ्रिरजोभिषेकामिति । गोकुलवासिनांमध्येकतमस्ययस्यकस्याप्यंघ्रिरजसाअभिषेकोयस्मिन्तत् । ननुकुतोगोकुलवासिनएवातिधन्यास्तत्राह । यदिति । येषांजीवितंनिखिलंमुकुंदःमुकुंदपरमेवजीवनमित्यर्थः । दुर्लभतामाह । अद्यापीति । श्रुतिमृग्यंवेदैरपिमृग्यतएवनतुदृश्यतेइत्यर्थः ३४

॥६८॥

श्लोकाः ३०–३४

तदस्तुमेनाथसभूरिभागोभवेत्रवान्यत्रतुवातिरश्चाम्॥ येनाहमेकोपिभवज्जनानांभूत्वानिषेवेतवपादपल्लवम् ३० अहोतिधन्याव्रजगोरमण्यःस्तन्यामृतंपीतमतीवतेमुदा ॥ यासांविभोवत्सतरात्मजात्मनायत्तृप्तयेऽद्यापिनचालमध्वराः ३१ अहोभाग्यमहोभाग्यंनंदगोपव्रजौकसाम् ॥ यन्मित्रंपरमानंदंपूर्णंब्रह्मसनातनम् ३२ एषांतुभाग्यमहिमाऽच्युततावदास्तामेकादशैवहिवयंबतभूरिभागाः ॥ एतद्धृषीकचषकैरसकृत्पिबामःशर्वादयोंघ्र्युदजमध्वमृतासवंते ३३ तद्भूरिभाग्यमिहजन्मकिमप्यटव्यांयद्गोकुलेपिकतमांघ्रिरजोऽभिषेकम् ॥ यज्जीवितंतुनिखिलंभगवान्मुकुंदस्त्वद्यापियत्पदरजःश्रुतिमृग्यमेव ३४

चूर्णिका

तस्मात् हेनाथ अत्रब्रह्मजन्मनितिरश्चांमध्येयज्जन्म तस्मिन् वा मे तत् भूरिभाग्यं अस्तु येनभाग्येन अहंत्वद्भक्तानांमध्येकश्चित्भूत्वात्वत्पादपल्लवंसेवेयइति ३० किंच हे कृष्ण व्रजेगावो गोप्यश्चधन्याः यतः यासांस्तन्यंदिव्यरूपेणत्वयापीतं यस्यतृप्तये अद्यापि अध्वराः नालम् ३१ किंच अहोभाग्यमहोभाग्यंनंदगोपव्रजौकसाम् यन्मित्रं परमानंदंपूर्णंब्रह्मसनातनम् ३२ किंच तेषांभाग्यमहिमातावत् आस्तांवयमपिइंद्रियाधिष्ठातारोदेवाः भूरिभागाः यतः त्वद्रूपंइंद्रियपानपात्रैः मुहुः पिबामः ३३ इति किंच हेनाथ अत्रलोकेतत्राऽपि वनेतत्रापिव्रजेयत् जन्मव्रजवासिनांकतमांघ्रिरजोभिषेकंयत् तदेवभूरिभाग्यं ३४ ॥६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१४॥

॥६९॥

अपिच । किंवर्ण्यतेकृतार्थत्वमेषाम् । भक्त्याभवानपिऋणीवास्ते ननुकिंदातुमसमर्थोहंयेनऋणीस्यांअतआह । उतअपिभवानपिएषांकुत्रापिविश्वफलात्सर्वफलात्मकात्त्वत्तोऽपरंफलंकिंरातादास्यतीतिन
श्चेतः अयत्सर्वत्रगच्छत् विचारयत्मुह्यति । ननुमामेवदत्त्वाऽनृणःस्यामितिचेत्नहिनाहि सद्वेषादिव सतांभक्तानांयोवेषस्तदनुकारमात्रेणपापिष्ठापिपूतनात्वामेवापितामापिता । तर्हिएतत्मद्रूपंफलंएत
त्संबंधिनामपिनंदादीनामपीत्यर्थः मांदास्यामीतिचेत्तत्राह सकुलेति । बकाघसुरसहिता । एषामपितावदेवचेत्फलंतदपर्याप्तमित्याह । यदिति ।.येषांधामादयस्त्वत्कृतेतदर्थमेवेत्यर्थः ३५ ननुविगत
रागादिदोषाणांसंन्यासिनामपिनमत्तः परंकिंचिदस्तिकथमेषामपर्याप्तमित्यतआह । तावदिति । हेकृष्णरागादयस्तावदेवस्तेनाश्चोराभवंति । तथातावद्गृहमपिकारागृहबंधनागारं मोहोपितावदेवांघ्रि
निगडःपादशृंखला यावत्तेत्वदीयाजनानभवंति । त्वदीयानांतुरागादयोपित्वन्निष्ठामोचकाएवेति नयतिभ्योविशेषःभजनंत्वधिकमितिभावः ३६ नन्वतएवाहमेषांपुत्रादिरूपेणवर्तइतिचेत्तत्राह । प्रपंच
मिति । प्रपन्नायाजनताजनसमूहस्तस्याआनंदानांसंदोहंसमूहंप्रथयितुं (हेप्रभोप्रपंचंपुत्रत्वादिविडंबयसिअनुकरोषि । नत्वनृणीभवितुं) नहिकपटपुत्रत्वादिनाताद्दग्भक्तेरानृण्यंसंपद्यतेइत्यर्थः ३७
तदेवंआदितआरभ्यअचिंत्यानंतगुणत्वेनस्वयंदुर्ज्ञेयत्वमुक्तं । केचित्तुवयंजानीमइतिस्थितास्तान्(पंडितंमन्यान्) उपहसन्निवाह । जानंतइति (हेप्रभो) नतुमेमनआदीनांतववैभवंविषयइति ३८ जगदी
शत्वाद्यभिमानंपरित्यज्याह । अनुजानीहीति । स्वमहिमानमस्मदादीनांचज्ञानबलादिसर्वंत्वमेववेत्सियतःसर्वदृक् । जगतांनाथस्तुत्वमेवेत्येतावत्ज्ञानंअतोममतास्पदंजगदेतच्छरीरंचतवार्पितं ३९ तदे
वंकिंकरंमांप्रस्थापयेत्यत्यादरेणनमस्करोति। श्रीकृष्णेति वृष्णिकुलपद्मस्यप्रीतिदातृत्वेनहेसूर्योपम । क्ष्माचनिर्जरादेवाश्चद्विजाश्चपशवश्चतएवोदधयस्तेषांवृद्धिकारित्वेनहेचंद्रोपम (चंद्रोपिक्ष्मांचंद्रिकयाह्ला
दयतिनिर्जरानमृतंपाययतिद्विजान्शास्तिपशून्वर्धयत्योषधिद।नेनेतितदुपमत्वं) उद्धर्मःपाषंडधर्मःतदेवशार्वरंतमः तद्धरतीतितथा अनेनह्वयोपम । हेक्षितिराक्षसध्रुंकृक्षितौराक्षसाःकंसादयःउच्चन्नेवते
भ्योद्रुह्यतीतिपुनःसूर्योपम । सूर्याद्युपमापिन्यूनेतिमत्वाह । आर्कअर्कमभिव्याप्यसर्वेषांअर्हन्पूज्यभगवन्आकल्पंकल्पपर्यंतंतेतुभ्यंनमइति ४०

श्लोकाः

एषांघोषनिवासिनामुतभवान्किंदेवरातेतिनश्चेतोविश्वफलात्फलंत्वदपरंकुत्राप्ययन्मुह्यति ॥ सद्वेषादिवपूतनापिसकुलात्वामेवदेवापितायद्धामार्थसुहृ
त्प्रियात्मतनयप्राणाशयास्त्वत्कृते ३५ तावद्रागादयःस्तेनास्तावत्कारागृहंगृहम् ॥ तावन्मोहोंघ्रिनिगडोयावत्कृष्णनतेजनाः ३६ प्रपंचंनिष्प्रपंचोपिवि
डंबयसिभूतले ॥ प्रपन्नजनतानंदसंदोहंप्रथितुंप्रभो ३७ जानंतएवजानंतुकिंबहूक्त्यानमेप्रभो ॥ मनसोवपुषोवाचोवैभवंतवगोचरः ३८ अनुजानीहिमां ३९
कृष्णसर्वंत्वंवेत्सिसर्वदृक् ॥ त्वमेवजगतांनाथोजगदेतत्तवार्पितम् ३९ श्रीकृष्णवृष्णिकुलपुष्करजोषदायिन्क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् ॥ उद्धर्म ४०
शार्वरहरक्षितिराक्षसध्रुगाकल्पमार्कमर्हन्भगवन्नमस्ते ४०

चूर्णिका ॥६९॥

येषांमुकुंदएवजीवनं किंच येषांव्रजवासिनांभक्त्याभवान् ऋणीवास्ते ३५ ननुदातुं असमर्थोऽहंस्वरूपं दत्त्वाअनृणस्यांतत्राह सद्वेषापूतनासकुलापित्वांप्राप्ताअतस्त्वंऋ
णीवासि ३६ हेकृष्णयावत्त्वद्भक्ताः नजाताः तावद्रागादयः चोराः भवंति तथागृहंकारागृहं तावत् अंघ्रिनिगडः मोहः किंच ३७ त्वांजानंतएवजानंतुकिं बहूक्त्या
ममनसस्तुतववैभवंनगोचरम् ३८ हेकृष्णमांअनुज्ञांदेहि त्वं सर्वंवेत्सि त्वंजगतांनाथोसि अतः इदंमेशरीरंतेअर्पितम् ३९ हेकृष्णवृष्णिकुलपद्मस्यजोषदायिन्
तेनमः अस्तु ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ससखवत्सकमोक्षणकौतुकद्रुतविलंबितपुत्रमुदेऽद्रुतं । निखिलद्धपमतोदधदच्युतोऽवतुसवःकलयन्व्रजमंगलम् ॥ पादयोर्नत्वाअभीष्टंसर्वतःपूजितंअभिप्रेतंवा (स्वधामसत्यलोकम्) ४१ अनुज्ञाप्यअनुज्ञां प्रदाप्यपृष्टेत्यर्थः स्वभुवंब्रह्माणम् । यथापूर्वस्थिताः सखायोयस्मिंस्तत् स्वकंपुलिनंप्रागवस्थितान्वनंप्रतिपूर्ववदवस्थितान्वत्सानानिन्ये ४२ नन्वेतावंतंकालं कथंतेतत्रोपविष्टाः कथंचक्षुत्पिपासादिवि स्मरणंअतआह । एकस्मिन्निति श्लोकद्वयेन । अब्देपियातेआत्मनःप्राणेशमंतराचकृष्णंविनापिप्रियविरहेहिक्षणोपिवर्षाधिकोभवतितथापितन्माययाहताःक्षणार्धंमेनिरे ४३ यत्तयामाययामोहितंजग दभीक्ष्णंपुनःपुनर्विस्मृतआत्मैवयेनतत्तथा ४४ अतएवैवमूचुश्च । तेत्वयाअतिवेगेनस्वागतंसम्यक्वत्सानानीयआगतं । एकोपिग्रासस्त्वांविनाअस्माभिर्नाभोजिनभुक्तः इतएहिअत्रागच्छसाधुअविक्षेपेण भुज्यतामिति ४५ (तन्मोहंस्मृत्वाहसन्) अभ्यवहृत्यभुक्त्वा (आजगरंचर्मदर्शयन्नित्यनेनशुष्कंचर्मदृष्ट्वापिगतंकालंनाज्ञासिषुरितिमोहाधिकंसूचितम्) ४६ मोदामोयोवेण्वादिरवैरुत्सवस्तेनाढ्यः संपन्नः गृणन्नुपलालनैराह्वयन्गोपीदृगुत्सवदृशिःगोपीनांदृशांउत्सवरूपाहशिर्दर्शनंयस्यसः ४७ यशोदानंदसूनुनाइतिबहूनामुक्तिः सहैवदर्शिता । केचिदाहुर्यशोदासूनुनेतिअपरेतुनंदसूनुर्नेति । यद्वा यशोदांनंदयतीतियशोदानंदः सचासौसूनुश्चेति । तथातेनअस्मान्महाव्यालाद्वयंचाविताराक्षिताः ४८ व्रजौकसांस्वतोकेषुस्नेहवल्ल्याब्दमन्वहं । शनैर्निःसीमववृधेयथाकृष्णेत्वपूर्ववदित्यादिनास्व तोकेभ्योपिपरपुत्रेकृष्णेप्रेमाधिक्यमुक्तम् । तत्रपृच्छतिब्रह्मन्निति (स्वोद्भवेष्वपियःपूर्वमभूतः ॥) ४९ श्रीकृष्णस्यसाक्षादात्मत्वात्तस्मिन्नात्मीयेभ्योव्यवहितेभ्यः प्रेमाधिक्यंयुज्यतइतिवक्तुंप्रथमंतावदात्म नः स्वतःप्रेष्ठत्वंअन्येषांतुतदौपाधिकमितिदर्शयतिपंचभिः सर्वेषामिति (तद्वल्लभतयाआत्मप्रियत्वेनैवप्रियाः) ५०

॥७०॥

श्लोकाः ४१/५०

॥ ॥ श्रीशुकउवाच ॥ ॥ इत्यभिष्टूयभूमानंत्रिःपरिक्रम्यपादयोः ॥ नत्वाभीष्टंजगद्धातास्वधामप्रत्यपद्यत ४१ ततोऽनुज्ञाप्यभगवान्स्वभुवंप्रागव स्थितान् ॥ वत्सान्पुलिनमानिन्येयथापूर्वसखंस्वकम् ४२ एकस्मिन्नपियातेब्देप्राणेशंचांतरात्मनः ॥ कृष्णमायाहताराजन्क्षणार्धंमेनिरेऽर्भकाः ४३ किंकिंनविस्मरंतीहमायामोहितचेतसः ॥ यन्मोहितंजगत्सर्वमभीक्ष्णंविस्मृतात्मकम् ४४ ऊचुश्चसुहृदःकृष्णंस्वागतंतेऽतिरंहसा ॥ नैकोप्यभोजिकव लएहीतःसाधुभुज्यताम् ४५ ततोहसन्हृषीकेशोऽभ्यवहृत्यसहार्भकैः ॥ दर्शयंश्चर्माजगरंन्यवर्ततवनाद्व्रजम् ४६ बर्हप्रसूननवधातुविचित्रितांगःप्रोद्दामवे णुदलशृंगरवोत्सवाढ्यः ॥ वत्सान्गृणन्ननुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिःप्रविवेशगोष्ठम् ४७ अद्यानेनमहाव्यालोयशोदानंदसूनुना ॥ हतोऽवि तावयंचास्मादितिबालाव्रजेजगुः ४८ ॥ ॥ राजोवाच ॥ ॥ ब्रह्मन्परोद्भवेकृष्णेइयान्प्रेमाकथंभवेत् ॥ योऽभूतपूर्वस्तोकेषुस्वोद्भवेष्वपिकथ्यताम् ४९ ॥ श्रीशुकउवाच ॥ सर्वेषामपिभूतानांनृपस्वात्मैववल्लभः ॥ इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैवहि ॥ ५०

पूर्णिका

॥ श्रीशुकउवाच ॥ ब्रह्माकृष्णंएवंस्तुत्वात्रिःपरिक्रम्यनत्वाचस्वधामययौ ४१ ततः ब्रह्माणं अनुज्ञाप्यवत्सान्पालांश्चपुलिनंआनिन्ये ४२ हेनृप एवंकृष्णंविनाएकाब्देगते सतितेक्षणार्धंमेनिरेयतःईशमायाहताः ४३ ४४ ततस्तेऊचुः हेकृष्णतेस्वागतं त्वद्विनाएकोपिकवलः नभुक्तः अतःसाधुभुज्यताम् ४५ ततः कृष्णः तैः सहभुक्त्वाआजग रंचर्मदर्शयन् ४६ बर्हप्रसूनधातुविचित्रांगः वेणुरवाढ्यः सन्व्रजंप्राप्तः ४७ ततोबालाः एवंऊचुः अद्यअनेनमहाव्यालोहतः नः रक्षाचकृता ४८ ॥ राजोवाच ॥ हेब्रह्मन् परोद्भवेकृष्ण एवंप्रेमव्रजवासिनांकथं जातं इदं कथ्यताम् ॥ श्रीशुकउवाच ॥ हेनृपसर्वभूतानाआत्माअतिप्रियःतत्प्रियत्वात् अन्येपत्यादयःप्रियाः ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुतःतथादर्शनादित्याह । तदिति । तस्मात्कारणात् स्वस्वकात्मनिअहंकारास्पदेपिदेहे (यथातथाममतास्पदेषुनदृश्यते ।) ५१ आत्माध्यासतारतम्येनप्रेमतारतम्यंदृश्यमानंतन्निबंधनमेवेतिदर्शयि
तुंमूढामूढभेदेनविशेषमाह देहात्मवादिनामितिद्वाभ्यां । तंदेहमनुलक्ष्यभवंतियेपुत्रादयस्तेतुनतथा प्रियतमाः किंतुदेहःप्रियतमः तदर्थत्वेनतेप्रियाइत्यर्थत्वेनतेप्रियाइत्यर्थः ५२ (विवेकेनदेहोपिममता
भाक्चेत्तदासोपिनात्मवत्) यत्यस्मात्जीर्यत्यपिआसन्नमरणेपिजीविताशाबलीयसीभवति । अयंभावः नजीविष्यतीतिनिश्चितेपिदेहेजीविताशावशात्प्रेमास्पदत्वंदृश्यते तदात्मगतमेव नतुदे
हगतंतस्यमरणोन्मुखत्वात्बीभत्सत्वाच्चेति । अथवायद्यस्मिन्देहेजीर्यत्यपिजीविताशाअविवेकदशायांबलीयस्यासतिसातुविवेकिनो यदाममताभाग्भवतितदातत्रनातीवास्थेति ५३ तदर्थमेव (आत्मा
र्थमेव । आत्मशेषतयैव) सकलं प्रियंनतुस्वतइत्यर्थः ५४ प्रस्तुतमाह । कृष्णमेनमिति । (आत्मानंप्रत्यगभिन्नमित्यर्थः मायबाशुद्धसत्त्वात्मिकयानिजशक्त्या) ५५ नकेवलमात्मनामात्माअपि
तुजडानामपीत्याह । वस्तुतइति । (सच्चिदानंदरूपं) सर्वजगत्कारणमितिकृष्णंजानतांपुंसांस्थावरंजगमंचसर्वंभगवद्रूपंभगवानेवरूपंयस्यतत् । नान्यत् (जडांशमात्रस्यमिथ्यात्वात्) ५६ कुतइ
तितदाह । सर्वेषामिति । भावार्थः सद्रूपोर्थःपरमार्थइत्यर्थः भवतीतिभवत्परिणामंप्राप्नुवत्कारणंतस्मिन्भवतिपरिणामिनिस्थितः 'वाचारंभणंविकारोनामधेयंमृत्तिके'त्येवसत्यमित्यादिश्रुतेः तस्या
पिभवतःकारणस्यापिभावार्थोभगवान्कृष्णःपरमकारणमित्यर्थःअतःकिंअतत्श्रीकृष्णव्यतिरिक्तंवस्तुनिरूप्यताम् ५७ तस्माच्छ्रीकृष्णस्यैवपरमार्थत्वात्तदेकशरणानामयत्नसिद्धोमोक्षइतिप्रकरणार्थमुपसं
हरति।समाश्रिताइति।पुण्यंयशोयस्यसपुण्ययशाःसचासौमुरारिश्चतस्यपदपल्लवएवप्लवस्तंयेसम्यगाश्रिताः कथंभूतं।महत्पदंमहतांपदमाश्रयम् । यद्वामहच्चतत्पदामाश्रयरूपमितितथातेषांभवांबुधिर्वत्सपदमा
त्रंभवतिकिंचयत्परंपदंश्रीवैकुंठाख्यंतत्पदंस्थानंभवति । विपदांयत्पदंविषयःतत्पुनःकदाचिदपितेषांनभवति । नततःपुनरावर्ततइत्यर्थः ५८ (पौगंडेवयसिअघकृतामितिपरिकीर्तितंइहास्मिन्विषये) ५९

श्लोकाः ५१/५९

तद्राजेंद्रयथास्नेहःस्वस्वकात्मनिदेहिनाम् ॥ नतथाममतालंबिपुत्रवित्तगृहादिषु ५१ देहात्मवादिनांपुंसामपिराजन्यसत्तम ॥ यथादेहःप्रियतमस्तथानह्य
नुयेचतम् ५२ देहोपिममताभाक्चेत्तर्ह्यसौनात्मवत्प्रियः ॥ यज्जीर्यत्यपिदेहेऽस्मिन्जीविताशाबलीयसी ५३ तस्मात्प्रियतमःस्वात्मासर्वेषामपिदेहिना
म् ॥ तदर्थमेवसकलंजगदेतच्चराचरम् ५४ कृष्णमेनमवैहित्वमात्मानमखिलात्मनाम् ॥ जगद्धितायसोप्यत्रदेहीवाभातिमायया ५५ वस्तुतोजानताम
त्रकृष्णंस्थास्नुचरिष्णुच ॥ भगवद्रूपमखिलंनान्यदस्तीहकिंचन ५६ सर्वेषामपिवस्तूनांभावार्थोभवतिस्थितः ॥ तस्यापिभगवान्कृष्णःकिमतद्वस्तुरू
प्यताम् ५७ समाश्रितायेपदपल्लवप्लवंमहत्पदंपुण्ययशोमुरारेः॥ भवांबुधिर्वत्सपदंपरंपदंपदंपदंयद्विपदांनतेषाम् ५८ एवत्तेसर्वमाख्यातंयत्पृष्टोहमिहत्व
या ॥ यत्कौमारेहरिकृतंपौगंडेपरिकीर्तितम् ५९

चूर्णिका

तस्मात् स्वात्मनियथा सर्वेषांप्रीतिः तथाममतालंबिपुत्रादिषु न ५१ किंच देहात्मवादिनांपुंसांयथादेहः प्रियतमः न तथातदनुगाः ५२ किंच देहोऽपिममताभाक्चे
त्तर्हिनात्मवत्प्रियोऽयम् यतः जीर्यमाणेदेहेपिजीविताशाबलीयसी ५३ तस्मात् आत्मासर्वेषांप्रियतमः ५४ तदर्थमेवसर्वंप्रियंहेनृप अतः सर्वात्मानंकृष्णं अवेहि अतःतत्रस
र्वेषां प्रीतिर्जाता ५५ किंच इदंकृष्णरूपंनतद्भिनान्यदस्ति ५६ ५७ हेनृपयेकृष्णपादपल्लवप्लवंश्रिताःतेषांभवाब्धिः वत्सपदतुल्योभवति५८ एवंनृपत्वयायत्पृष्टंतत्सर्वंकथितम्५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. (मुरारेः) सुहृद्भिश्चरितंमुष्णंतोन्योन्यशिक्यादीनित्यादिनोक्तंअघार्दनंचशाद्वलेजेमनंभोजनंचव्यक्तेतरत्व्यक्ताज्जडात्इतरच्छुद्धसत्त्वात्मकंवत्सतत्पालरूपं यद्वा व्यक्तेतरत्चिद्विलासः तदेवरूप्यतइतिरूपं अ०
अजस्योरुर्महान्अभिष्टवस्तंब्रह्मकृतांस्तुतिंएतत्शृण्वन्शृणन्नरःसर्वपुरुषार्थान्आप्नोति ६० (कौमारंवयःनिलायनादिभिर्विहारैः) ६१ इतिश्रीपरमानंदनृसिंहपदषट्पदः। व्याकरोच्छ्रीधरस्वामीयथामति
टीका विधेःस्तुतिम् ॥ १ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ ७ ॥ ॥ ततःपंचदशेधेनुपालनंधेनुकार्दनम्। कालीयक्ष्वेडतोगोपरक्षणंचनिरूप्यते ॥१॥ अहिवक्त्रप्र ॥१५॥
वेशेनवृथाखिन्नान्सखीनतः। कृष्णःप्रावेशयत्पक्वफलंतालालिकाननम् २ पशुपालसंमतौपशूनांपालनेसंमतौपशुपालानांवासंमतौईषद्वयोबलातिरेकमनुकृतवंतावित्यर्थः (तौरामकृष्णौपुण्यंअतीवचक्रतुःप
॥७२॥ दैः-)-सर्वतःप्रसर्पणेन (पवित्रंकृतवंतावित्यर्थः) १ स्वयशोगृणद्भिर्वृतः तत् (पशुभ्योहितम्) वनंप्राविशत् २ तद्वनंनिरीक्ष्यरंतुंमनोदधे कथंभूतंमंजुघोषायेऽलिमृगद्विजाःभ्रमरमृगपक्षिणस्तैराकुलंव्याप्तम्।
महन्मनःप्रख्यपयःसरस्वतामहतांमनसाप्रख्यंतुल्यंस्वच्छंपयोयस्मिन्तत्सरआश्रयत्वेनास्तियस्यतेनवातेनेतिशैत्यमुक्तंशतपत्रगंधिनेतिपरिमलत्वंजुष्टंवनमितिमांद्यंचसूचितम् ३ अरुणपल्लवश्रियासह (फ
लपुष्पाणांमहताभरेणपादयोः) स्पृशंत्यःशिखाःशाखाग्राणियेषांतान् ४ तरुजन्मयेनकृतंतस्यतमसःपापस्यापहत्यैनाशाय अथवायेनत्वयाईश्वरेणसर्वोपकारकंतरुजन्मकृतंतंत्वांनमंति। एवंश्लाघ्येपिज
न्मनियदज्ञानरूपंतमोस्तितस्यापहत्यै (शिखाभिःसुमनःफलरूपमुपायनमुपादाय। हेदेववर) ५

एतत्सुहृद्भिश्चरितंमुरारेरघार्दनंशाद्वलजेमनंच ॥ व्यक्तेतरद्रूपमजोर्वभिष्टवंशृण्वन्गृणन्नेतिनरोऽखिलार्थान् ६० एवंविहारैःकौमारैःकौमारंजहतुर्व्रजे ॥ नि श्लोकाः
लायनैःसेतुबंधैर्मर्कटोत्प्लवनादिभिः ६१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुर्दशोऽध्यायः १४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ततश्चपौ
गंडवयःश्रितौव्रजेबभूवतुस्तौपशुपालसंमतौ ॥ गाश्चारयंतौसखिभिःसमंपदैर्वृंदावनंपुण्यमतीवचक्रतुः १ तन्माधवोवेणुमुदीरयन्वृतोगोपैर्गृणद्भिःस्वयशो ६०
बलान्वितः ॥ पशून्पुरस्कृत्यपशव्यमाविशद्विहर्तुकामःकुसुमाकरंवनम् २ तन्मंजुघोषालिमृगद्विजाकुलंमहन्मनःप्रख्यपयःसरस्वता ॥ वातेनजुष्टंशत ५
पत्रगंधिनानिरीक्ष्यरंतुंभगवान्मनोदधे ३ सतत्रतत्रारुणपल्लवश्रियाफलप्रसूनोरुभरेणपादयोः ॥ स्पृशच्छिखान्वीक्ष्यवनस्पतीन्मुदास्मयन्निवाहाग्रजमादि
पूरुषः ४ ॥ श्रीकृष्णउवाच ॥ अहोअमीदेववरामरार्चितंपादांबुजंतेसुमनःफलार्हणम् ॥ नमंत्युपादायशिखाभिरात्मनस्तमोपहत्यैतरुजन्मयत्कृतम् ५

चूर्णिका किंच इदंमुरारेः चरितंयः शृणोतिउच्चारयतिसः सर्वार्थान् आप्नोति ६७ एवंविहारैःकौमारैःकौमारंजहतुर्व्रजे निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ६१ ॥ इतिदशमेच
तुर्दशः ॥ १४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ततः कृष्णरामौपौगंडवयःश्रितौपशुपालसंमतौसखिभिः गाश्चारयंतौसंतौवृंदावनंस्वपदैः अतीवपु
ण्यंचक्रतुः १ ततश्चमाधवःबलरामादिभिर्वृतः वेणुंउदीरयन्पशव्यंवनंविवेश २ किंच तत्वनंमंजुघोषालिमृगद्विजाकुलं शतपत्रगंधिनावातेनजुष्टंदृष्ट्वातत्ररंतुंकृष्णः मनोद
धे ३ ततः सः रक्तपल्लवश्रियाफलादिभारेणस्वपादयोः स्पृशच्छिखान्वृक्षान्दृष्ट्वाहसन्निवकृष्णः रामंआह ४ ॥ श्रीभगवानुवाच ॥ हेरामअमीवृक्षाः सुमनःफलार्ह ॥७२॥
णंआदायशिखाभिः तेपदांबुजंस्वतमोनाशायनमंतितान्पश्य ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेअनघ वनेगूढमपित्वांनत्यजंति । त्वयिमनुष्यवेषेणनिगूढेसतिमुनयोप्यलिवेषेणनिगूढास्त्वांभजंतीत्यर्थः (भवदीयमुख्यास्त्वद्भक्तेषुश्रेष्ठाः हेआदिपुरुष) ६ (हेईड्यगृहमागतायतेतुभ्यंप्रियंकुर्वंति)
इयान्हिसतांनिसर्गःयदस्तिस्वास्मिन्तद्गृहमागतायमहतेमहापुरुषायसमर्पयंतीति ७ तृणवीरुधश्चतवपादौस्पृशंतीतितथा । करजाभिमृष्टाः (त्वया) नखैःस्पृष्टाःसदयैरवलोकनैः(अभिमृष्टाः) श्रीरपियस्मै
स्पृहयतिकेवलंतेनभुजयोरंतरेणवक्षसागोप्योधन्याइति ८ एवंश्रीमद्वृंदावनंप्रतिप्रीतःसन्अद्रेःसमीपवर्तिसरित्तटेषुपशून्संचारयन्सानुगःगोपैःसहवर्तमानःप्रीतमनारेमे ९ तामेवरतिमाह । क्वचिदित्यादिद
शभिः (अनुव्रतैरनुकूलैर्गोपैः) १० बर्हिणंनृत्यंतमन्वभिनृत्यतिवर्हिणमभिमुखोनृत्यतीतिवा । सखीन्हासयन् ११ (मनोज्ञयामनोहरयावाचा) १२चकोरादीननुकृत्यरौति (तच्छब्दसदृशान्शब्दान्करो
तीत्यर्थः) कदाचिच्चसत्त्वानाम् (प्राणिनाम्) मध्येव्याघ्रसिंहयोस्ताभ्यांभीतवद्द्रवति । सत्त्वेषुपलायमानेषु (तद्वत्) पलायतेइत्यर्थः । तयोःसत्त्वानांबलोद्रेकाणांभीतवद्द्रवतीतिवा १३ (गोपोत्संगएवो
॥७३॥ पबर्हणमुच्छीर्षकंयस्यतम्) आर्यमग्रजंविश्रमयतिविगतश्रमंकरोति १४ मिथोनृत्यादीन्कुर्वतोगोपान्प्रशशंसतुः १५ १६ व्यजनैःपल्लवादिनिर्मितैः (समवीजयन्मंदवातेनविश्रामयासुरित्यर्थः) १७

श्लोकाः ६/१७

एतेऽलिनस्तवयशोऽखिललोकतीर्थंगायंतआदिपुरुषानुपदंभजंते ॥ प्रायोअमीमुनिगणाभवदीयमुख्यागूढंवनेपिनजहत्यनघात्मदैवम् ६ नृत्यंत्यमीशि
खिनईड्यमुदाहरिण्यःकुर्वंतिगोप्यइवतेप्रियमीक्षणेन ॥सूक्तैश्चकोकिलगणागृहमागतायधन्यावनौकसइयान्हिसतांनिसर्गः ७ धन्येयमद्यधरणीतृणवीरुध
स्त्वत्पादस्पृशोद्रुमलताःकरजाभिमृष्टाः ॥ नद्योऽद्रयःखगमृगाःसदयावलोकैर्गोप्योंऽतरेणभुजयोरपियत्स्पृहाश्रीः ८ ॥ श्रीशुकउवाच ॥ एवंवृंदावनंश्री
मत्प्रीतःप्रीतमनाःपशून् ॥ रेमेसंचारयन्नद्रेःसरिद्रोधस्सुसानुगः ९ क्वचिद्गायतिगायत्सुमदांधालिष्वनुव्रतैः ॥ उपगीयमानचरितःस्रग्वीसंकर्षणान्वितः
१० क्वचिच्चकलहंसानामनुकूजतिकूजितम् ॥ अभिनृत्यतिनृत्यंतंबर्हिणंहासयन्क्वचित् ११ मेघगंभीरयावाचानामभिर्दूरगान्पशून् ॥ क्वचिदाह्वयतिप्री
त्यागोगोपालमनोज्ञया १२ चकोरक्रौंचचक्राह्वभारद्वाजांश्चबर्हिणः ॥ अनुरौतिस्मसत्त्वानांभीतवद्व्याघ्रसिंहयोः १३ क्वचित्क्रीडापरिश्रांतंगोपोत्संगो
पबर्हणम् ॥ स्वयंविश्रमयत्यार्यंपादसंवाहनादिभिः १४ नृत्यतोगायतःक्वापिवल्गतोयुध्यतोमिथः ॥ गृहीतहस्तौगोपालान्हसंतौप्रशशंसतुः १५ क्वचित्प
ल्लवतल्पेषुनियुद्धश्रमकर्शितः॥वृक्षमूलाश्रयःशेतेगोपोत्संगोपबर्हणः १६ पादसंवाहनंचक्रुःकेचित्तस्यमहात्मनः॥ अपरेहतपाप्मानोव्यजनैःसमवीजयन् १७

चूर्णिका

किंच एतेभ्रमराः तेयशः गायंति अतःइमेप्रायोमुनिगणाःवनेगूढमपित्वांनत्यजंति ६ किंच हेरामएतेमयूराः नृत्यंति तथाएताः हरिण्यः गोप्यइवदृष्ट्याप्रियंकुर्वंति तथाको
किलाः गृहंप्राप्तायते सूक्तैः सत्कुर्वंति अतःएतेवनस्थाःअपिधन्याः ७ किंच हेराम इयंभूः तृणवीरुधश्चतेपादस्पर्शात्धन्याः द्रुमलताः तेस्पर्शात् धन्याः नद्यद्रिखगमृगाः
तेकृपावलोकैःगोप्यः ते भुजांतरेण धन्याः ८ एवंवृंदावनंदृष्ट्वाप्रीतःअद्रेःसमीपसरित्तटेषुपशून्चारयन्रेमे ९ कचित् अलिषुगायत्सुस्वयंगायति १० कचित् कलहंसकूजितं
॥७३॥ अनुकरोतिकचित् मयूरंअभिनृत्यति ११ कचित् वा वादूरस्थपशून्आह्वयति १२ कचित् चकोरक्रौंचादीन्अनुकृत्यरौति कचित् व्याघ्रसिंहाभ्यांभीतवद्द्रवति १३ कचित् क्री
डाश्रांतंरामंपादसंवाहनादिभिःविश्रमयति १४ कचित् नृत्यतः गायतः गोपान्रामकृष्णौशशंसतुः १५ कचित् कृष्णः पल्लवतल्पेषुगोपोत्संगोपबर्हणःसन्वृक्षमूले
शेते १६केचित्तस्यपादसंवाहनंचक्रुः अपरेव्यजनैः अवीजयन् १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हेमहाराजतदनुरूपाणितस्मिन्कालेयोग्यानिगीतानि) १८ (विडंबयन्अनुकुर्वन्ग्राम्यैर्मूढैर्गोपैःसहमूढवद्रेमे) ईशचेष्टितइतिनिगूढस्वभावत्वेपिअंतरांतराईशस्यैवचेष्टितानिदृश्यंतेयस्मिन्सः १९ ईशचेष्टितत्वमेवदर्शयितुमाह । श्रीदामेति । स्तोककृष्णइतिकश्चित् २० तालालिसंकुलंतालानांपंक्तिभिर्व्याप्तम् २१ (धेनुकासुरेणावरुद्धानिरक्षितानीतिभावः) २२ २३ २४ (पूर्वमभुक्तानिफलानितत्रविद्यंते) विषूचीनःसर्वतःप्रसृतः (विगृह्यतेज्ञायते) २५ २६ २७ २८ सनगंसवृक्षम् २९ प्रत्यग्भ्यांपाश्चिमाभ्याम् (उभाभ्याम्) काशब्दमितिगर्दभजातिशब्दानुकरणम् (कुत्सितशब्दंवा) पर्यसरत्परितोऽधावदित्यर्थः ३० उपक्रोष्टागर्दभःपराक्प्रतिमुखः । अपरौपश्चिमौ बलायबलंहंतुम् ३१ तृणराजस्तालः (तदग्रे) ३२ (बृहत्शिरोऽग्रभागोयस्यसः । पार्श्वस्थंतालम् । सचकंपमानोन्यंकंपयन्भग्नः) ३३

श्लोकाः १८/३३

अन्येतदनुरूपाणिमनोज्ञानिमहात्मनः ॥ गायंतिस्ममहाराजस्नेहक्लिन्नधियःशनैः १८ एवंनिगूढात्मगतिःस्वमाययागोपात्मजत्वंचरितैर्विडंबयन् ॥ रेमेरमालालितपादपल्लवोग्राम्यैःसमंग्राम्यवदीशचेष्टितः १९ श्रीदामानामगोपालोरामकेशवयोःसखा ॥ सुबलस्तोककृष्णाद्याःगोपाःप्रेम्णेदमब्रुवन् २० रामराममहाबाहोकृष्णदुष्टनिबर्हण ॥ इतोऽविदूरेसुमहद्वनंतालालिसंकुलम् २१ फलानितत्रभूरीणिपतंतिपतितानिच ॥ संतिकिंत्ववरुद्धानिधेनुकेनदुरात्मना २२ सोतिवीर्योसुरोरामहेकृष्णखररूपधृक् ॥ आत्मतुल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः २३ तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्रहन् ॥ नसेव्यतेपशुगणैःपक्षिसंघैर्विवर्जितम् २४ विद्यंतेऽभुक्तपूर्वाणिफलानिसुरभीणिच ॥ एषवैसुरभिर्गंधोविषूचीनोविगृह्यते २५ प्रयच्छतानिनःकृष्णगंधलोभितचेतसाम् ॥ वांछास्तिमहतीरामगम्यतांयदिरोचते २६ एवंसुहृद्वचःश्रुत्वासुहृत्प्रियचिकीर्षया ॥ प्रहस्यजग्मतुर्गोपैर्वृतौतालवनंप्रभू २७ बलःप्रविश्यबाहुभ्यांतालान्सपरिकंपयन् ॥ फलानिपातयामासमतंगजइवौजसा २८ फलानांपततांशब्दंनिशम्यासुररासभः ॥ अभ्यधावत्क्षितितलंसनगंपरिकंपयन् २९ समेत्यतरसाप्रत्यग्द्वाभ्यांपद्भ्यांबलंबली ॥ निहत्योरसिकाशब्दंमुंचन्पर्यसरत्खलः ३० पुनरासाद्यसंरब्धउपक्रोष्टापराक्स्थितः ॥ चरणावपरौराजन्बलायप्राक्षिपद्रुषा ३१ सतंगृहीत्वाप्रपदोर्भ्रामयित्वैकपाणिना ॥ चिक्षेपतृणराजाग्रेभ्रामणत्यक्तजीवितम् ३२ तेनाहतोमहातालोवेपमानोबृहच्छिराः ॥ पार्श्वस्थंकंपयन्भग्नःसचान्यंसोपिचापरम् ३३

चूर्णिका

अन्ये तु तदनुरूपाणिगायंति १८ एवंकृष्णः ग्राम्यैःसमंचरितैः गोपपुत्रत्वंविडंबयन्रेमे १९ ततः श्रीदामागोपालः तथासुबलादयःइदंप्रेम्णाअब्रुवन् २० हेरामकृष्णौ इतः समीपेतालालिव्याप्तंमहद्वनं अस्ति २१ तत्रबहुफलानिसंति तथापि धेनुकेनरुद्धानि २२ सतुखररूपधृक्ज्ञातिभिः सहआस्ते २३ तस्मात् तद्वनंपशुपक्ष्यादिभिर्हीनमस्ति २४ तत्रतुअभुक्तपूर्वाणिफलानिसंति तद्गंधोयं वाति पश्य २५ किंच तानि नः प्रयच्छ अस्माकंवांच्छाऽस्तियदिरोचते तर्हिगम्यताम् २६ एवंतद्वचः श्रुत्वातौसखिप्रियार्थंगोपैः सहतत्रजग्मतुः २७ ततोबलःतत्वनंप्रविश्यबाहुभ्यांतालान्कंपयन्फलानिपातयामास २८ ततःफलपातनाद्दैत्यः श्रुत्वाभूतलंकंपयन् अधावत् २९ ततः बलं एत्यप्रत्यक्पादाभ्यांवक्षसिनिहत्यशब्दं कृत्वापरितः अधावत् ३० पुनः प्राप्यप्रतिमुखःस्थितः सन् अपरपादौबलायप्राक्षिपत् ३१ तावद्बलः तंपादयोः करेणधृत्वा भ्रामयित्वाचमृतंतंतालाग्रेचिक्षेप ३२ तेनहतः तालः पार्श्वस्थंवृक्षंकंपयन् भग्नः सःअन्यं सःअपरंएवंसर्वेतालाःअकंपंत ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उत्सृष्टेनखरदेहेनहतैस्तालैराहताश्वकंपिरेअकंपंत ३४ यस्मिन्निदंविश्वंओतंऊर्ध्वतंतुषुपटइवग्रथितंप्रोतंतिर्यक्तंतुषुपटवदेवसंग्रथितंसर्वतोऽनुस्यूतंवर्ततइत्यर्थः ३५ (हतोबांधवोधेनुकोयेषांतेक्रोष्टारः) ३६ (हेनृपतृणराजसुतृणराजेषु) ३७ घनैर्नभइवभुवस्तलंरराज । तत्रफलप्रकरसंकीर्णमितिदैत्यदेहैश्चसतालाग्रैःसंकीर्णमित्यनेनचारुणश्वेतनीलघनसादृश्यसंपादनम् (ज्ञातव्यम्) ३८ ३९ आदन्अ भयक्षन् (हतोधेनुकोयत्रतादृशेकानने) ४० ४१ गोरजोभिश्छुरितेषुकुंतलेषुबद्धंबर्हंवन्यानिप्रसूनानिचयस्य रुचिरेईक्षणेयस्यचारुहासश्चतंचतंच । दिदृक्षितदृशःदिदृक्षितादर्शनेनोत्कंठयायुक्ता दृशोय सांताः ४२ मुकुंदस्यमुखपद्मगतंसारघंमधु (सौंदर्यलक्षणंअक्षिभृंगद्वारापीत्वा) अह्नियोविरहस्तस्माज्जातंतापम् । सचतासांसत्कृतिंपूजाम् । कांसत्कृतिंकथंवाकृतांतामाह । सव्रीडेति । सव्रीडेनसल ज्जेनहासेनविनयोयथाभवतितथायदेतत्किंतत्अपांगमोक्षंकटाक्षदर्शनंतथा (कृतां) सत्कृतिंप्राप्येति ४३ ४४ (मज्जनादिभिर्गतमार्गश्रमौगोपालवेषयोग्यांनीवींवसित्वापरिधाय) ४५ (उपहृतंप रिविष्टमित्यर्थः) ४६ (कदाचित्रामंविनावृंदावनचरःसकालिंदींययौ) ४७

॥७५॥ ॥१५॥

बलस्यलीलयोत्सृष्टखरदेहहताहताः ॥ तालाश्चकंपिरेसर्वेमहावातहताइव ३४ नैतच्चित्रंभगवतिह्यनंतेजगदीश्वरे ॥ ओतप्रोतमिदंयस्मिंस्तंतुष्वंगयथाप टः ३५ ततःकृष्णंचरामंचज्ञातयोधेनुकस्यये ॥ क्रोष्टारोभ्यद्रवन्सर्वेसंरब्धाहतबांधवाः ३६ तांस्तानापततःकृष्णोरामश्चनृपलीलया ॥ गृहीतपश्चाच्चर णान्प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णंदैत्यदेहैर्गतासुभिः ॥ रराजभूःसतालाग्रैर्घनैरिवनभस्तलम् ३८ तयोस्तत्सुमहत्कर्मनिशम्यविबुधादयः ॥ मुमुचुःपुष्पवर्षाणिचक्रुर्वाद्यानितुष्टुवुः ३९ अथतालफलान्यादन्मनुष्यागतसाध्वसाः ॥ तृणंचपशवश्चेरुर्हतधेनुककानने ४० कृष्णःकमलपत्राक्षःपुण्य श्रवणकीर्तनः ॥स्तूयमानोऽनुगैर्गोपैःसाग्रजोव्रजमाव्रजत् ४१ तंगोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्षणचारुहासम् ॥ वेणुंक्वणंतमनुगैरनुगीतकी र्तिंगोप्योदिदृक्षितदृशोऽभ्यगमन्समेताः ४२ पीत्वामुकुंदमुखसारघमक्षिभृंगैस्तापंजहुर्विरहजंव्रजयोषितोह्नि ॥ तत्सत्कृतिंसमधिगम्यविवेशगोष्ठंसव्रीड हासविनयंयदपांगमोक्षम् ४३ तयोर्यशोदारोहिण्यौपुत्रयोःपुत्रवत्सले ॥ यथाकामंयथाकालंव्यधत्तांपरमाशिषः ४४ गताध्वानश्रमौतत्रमज्जनोन्मर्दना दिभिः ॥ नीवींवसित्वारुचिरांदिव्यस्रग्गंधमंडितौ ४५ जनन्युपहृतंप्राश्यस्वाद्वन्नमुपलालितौ ॥ संविश्यवरशय्यायांसुखंसुषुपतुर्व्रजे ४६ एवंसभगवा न्कृष्णोवृंदावनचरःक्वचित् ॥ ययौराममृतेराजन्कालिंदींसखिभिर्वृतः ४७

श्लोकाः ३४/४७

चूर्णिका

एतत् अनंते नहि चित्रम् ३४ ३५ ततः धेनुकस्यसर्वेज्ञातयः रामकृष्णौअभ्यद्रवन् ३६ तान् तान् आपततः रामः कृष्णश्चपश्चाच्चरणेषुधृत्वा तालाग्रे प्राहिणोत् ३७ फलप्रकारसंकीर्णदैत्यदेहैर्गतासुभिः रराजभूः सतलाग्रैर्घनैरिवनभस्तलम् ३८ एवंतयोः कर्म दृष्ट्वा देवादयः पुष्पवर्षाणिमुमुचुः ३९ वाद्यानिचक्रुः तुष्टुवुःततःतत्रनराः तत्फलानिआदन् पशवश्चतृणंचेरुः ४० ततः कृष्णः रामगोपैः सहव्रजंप्राप्तः ४१ तंवेणुंक्वणंतंगोरजोव्याप्तकेशेषुबद्धवर्हपुष्पंरुचिरेक्षणहासयुतंदृष्ट्वागोप्यः संमुखंप्राप्ताः ४२ ततः कृष्णमुखगतंमधुआक्षिभृंगैःपीत्वादिनाविरहजंतापंजहुः ततः कृष्णः तासांसत्कृर्तिकृत्वाव्रजंविवेश ४३ अथयशोदारोहिण्यौतयोः आशिषः व्यधत्ताम् ४४ तत स्तौमज्जनादिभिः गतश्रमौनीवींवसित्वा४५ मात्राआनीतं स्वाद्वन्नंप्राश्य शय्यांसुषुपतुः ४६ अथकचित् कृष्णः रामंविनागोपैः सहकालिंदींगतः ४७ ॥७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 (विषेणदूषितंअतएवदुष्टंघातुकम्) ४८ (उपस्पृश्यपीत्वा) ४९ ५० संप्रतिसचएवइतामाप्तास्मृतिर्यैस्तेसंप्रतीतस्मृतयःयद्वा सम्यक्प्रतीताप्रतिमाप्तास्मृतिर्यैस्तेतथेति ५१ (मृतस्यात्मनःपुनरुत्थानं
यत्तत्तस्माद्गोविंदेनानुग्रहेणेक्षितमित्यनुमेनिरेइत्यर्थः) ५२ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांपंचदशोऽध्यायः १५ ॥ ॥ ७ ॥ ॥ षोडशेकालियस्योक्तोनिग्रहोयमुना
टीका ह्रदे । तत्पत्नीभिःस्तुतेनाथकृष्णेनानुग्रहःपुनः ॥ १ ॥ हत्वारासभदैतेयान्जग्ध्वातालफलान्यलम् । प्रीतोऽनृत्यत्फणारंगेकालियस्यकलानिधिः ॥ २ ॥ (कृष्णांयमुनाम्) उदवासयत्निःसारितवान् ॥१५॥
१ बहूनियुगानिआवासोयस्यतमहिम् (कथंन्यग्रह्णात्) सर्वेअहिःअजलचरोपितस्मिन्नंतर्जलेयथायेनप्रकारेणासीत्अथवाबहूनियुगानिआवासोयथाभवतितथायेनप्रकारेणसर्वेतत्रासीदिति (हेविप्रतत्)
कथ्यताम् २ गोपालेनयदुदारंचरितम् (आचरणंकृतम्) तदेवामृतंअतःकथ्यतामिति ३ श्रप्यमाणंपच्यमानंपयोयस्यसः । अतउपरिगच्छंतःखगायस्मिन्पतंति ४ किंच । विप्रुष्मताअंबुकणयुक्तेनवि
 षोदकतरंगस्पर्शिमारुतेनस्पृष्टायस्य (ह्रदस्य) तीरगाम्रियंतेसह्रदआसीदिति ५

अथगावश्चगोपाश्चनिदाघातपपीडिताः ॥ दुष्टंजलंपपुस्तस्यास्तृषार्ताविषदूषितम् ४८ विषांभस्तदुपस्पृश्यदैवोपहतचेतसः ॥ निपेतुर्व्यसवःसर्वेसलि श्लोकाः
लांतेकुरूद्वह ४९ वीक्ष्यतान्वैतथाभूतान्कृष्णोयोगेश्वरेश्वरः ॥ ईक्षयाऽमृतवर्षिण्यास्वनाथान्समजीवयत् ५० तेसंप्रतीतस्मृतयःसमुत्थायजलांतिकात्॥
आसन्सुविस्मिताःसर्वेवीक्षमाणाःपरस्परम् ५१ अन्वमंसततद्राजन्गोविंदानुग्रहेक्षितम् ॥ पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ॥ ५२ ॥ इति ४८/५
श्रीभागवतेमहापुराणेदशमस्कंधेपंचदशोध्यायः १५ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ विलोक्यदूषितांकृष्णांकृष्णःकृष्णाहिनाविभुः ॥ तस्या
विशुद्धिमन्विच्छन्सर्पंतमुदवासयत् १ ॥ राजोवाच ॥ कथमंतर्जलेऽगाधेन्यगृह्णाद्भगवानहिम् ॥ सवैबहुयुगावासंयथासीद्विप्रकथ्यताम् २ ब्रह्मन्भग
वतस्तस्यभूम्नःस्वच्छंदवर्तिनः ॥ गोपालोदारचरितंकस्तृप्येतामृतंजुषन् ३ ॥ शुकउवाच ॥ कालिंद्यांकालियस्यासीद्ध्रदःकश्चिद्विषाग्निना ॥ श्रप्य
माणपयायस्मिन्पतंत्युपरिगाःखगाः ४ विप्रुष्मताविषोदोर्मिमारुतेनाभिमर्शिताः ॥ म्रियंतेतीरगायस्यप्राणिनःस्थिरजंगमाः ५

चूर्णिका अथगोपाः निदाघातपपीडिताः तृषार्ताः संतः विषदुष्टंतज्जलंपपुः ४८ ततस्तेतत्रव्यसवःनिपेतुः ४९ तान्योगेश्वरः हरिः दृष्ट्वा अमृतस्त्राविदृष्ट्याजीवयामास ५०
ततस्तेजलांतिकात् उत्थाय मिथः वीक्ष्यविस्मिताआसन् ५१ अन्वमंसततद्राजन्गोविंदानुग्रहोक्षितम् पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ५२ ॥ इतिदशमेपंच
दशः ॥ १५ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ विलोक्यदूषितांकृष्णांकृष्णःकृष्णाहिनाविभुः तस्याविशुद्धिमन्विच्छन्सर्पंतमुदवासयत् १ ॥ राजोवाच ॥ हे विप्र
भगवान् अगाधेजलेबहुयुगावासं सर्पंकथंन्यगृण्हात् २ किंच सः अजलचरोपितत्रकथमासीत तत्कथ्यताम् किंच हेद्विजकृष्णस्यचरितामृतं जुषन्कस्तृप्येत् ३ ॥ श्री
शुकउवाच ॥ हेनृपकालिंद्यांकालियस्य ह्रदः विषाग्निनाश्रप्यमाणपयाः आसीत् ४ यदुपरिगाः खगाः पतंति किंच यस्यतीरगाः स्थिरजंगमजीवाः अंबुकयुक्तविषो
दोर्मिवायुनास्पृष्टाः म्रियंते सः ह्रदः आसीत् ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका भगवंतंलक्षयंति (चिह्नविशेषै-)- यांनिपदानितैःसूचितयापदव्यामार्गेण १७ पदैर्मार्गसंज्ञानप्रकारमाह । तइति विश्यतेःश्रीकृष्णस्य (गवांमार्गे) अन्येषांपदानांअंतरांतरेमध्येमध्येतत्तदपोहेन (पश्यं
तःसत्वराययुःयथा)गवांश्रुतीनांपाथिसत्वराअप्रमत्तायोगिनःतत्तदुपाध्यपवादेनयथापरंतत्त्वंमृगयंतितद्वदितिभावः १८ ततश्च (अंतर्ह्रदे) सर्पशरीरवेष्टितंकृष्णंदूरान्निरीक्ष्य (तत्तटे) गोपांश्चपशूंश्चत
थातथानिरीक्ष्यार्ताःपरमकश्मलंपरंमोहंप्रापुः १९ प्रियेणश्रीकृष्णेनव्यातिहृतंविरहितंत्रैलोक्यंशून्यंददृशुः २० (तागोप्यः अनुप्रविष्टांअनुप्रवेष्टुंधावंतीमित्यर्थः समनुगृह्यसम्यग्धृत्वेत्यर्थः । शूचोऽश्रू
णि । व्रजप्रियस्यकृष्णस्यकथाः । मृतकप्रतीकामृतकतुल्याइत्यर्थः) २१ (कृष्णःप्राणोयेषांतान्तंह्रदंप्रविशतोनंदादीन्) २२ अनन्यगतिमात्मानंइत्थंनिरीक्ष्य अतएवात्महेतोः स्वगोकुलमतिदुः
खितमाज्ञायोरगबंधादुदतिष्ठदित्यन्वयः २३ (उत्थानप्रकारमाह) । तस्य (कृष्णस्य) प्रथ्यमानेनवपुषाव्यथितात्मशरीरः सर्पःकुंडलमुन्मुच्यतंत्यक्त्वाकुपितः स्वफणानुन्नमय्य श्वसन्केवलमीक्षमाण
॥७८॥ स्तस्थौ । कथंभूतः । श्वसनरंध्रेषुनासाविवरेषुविषंयस्यसतथांबरीषंमंडकपाकभाजनंतद्वत्संतप्तानिस्तब्धानिईक्षणानियस्यतथोल्मुकानिमुखेषुयस्यसचसचसच २४ हरिश्चक्रीडंस्तमसुंसर्पपरिससारपरि
तोबभ्राम । अतिकरालविषाग्नियुक्तादृष्टिर्यस्यतम् । (ससर्पोपितमभिभवितुमवकाशंप्रसमीक्षमाणोबभ्राम ।) जिह्वयाद्विशिखयेतिप्रतिमुखम् २५ ॥१६॥

तेन्वेषमाणादयितंकृष्णंसूचितयापदैः॥भगवल्लक्षणैर्जग्मुःपदव्यायमुनातटम् १७ तेतत्रतत्राब्जयवांकुशाशनिध्वजोपपन्नानिपदानिविश्पतेः ॥ मार्गेगवा श्लोकाः
मन्यपदांतरांतरेनिरीक्षमाणाययुरंगसत्वराः १८ अंतर्ह्रदेभुजगभोगपरीतमारात्कृष्णंनिरीहमुपलभ्यजलाशयांते ॥ गोपांश्चमूढधिषणान्परितःपशूंश्चसं
क्रंदतःपरमकश्मलमापुरार्ताः १९ गोप्योनुरक्तमनसोभगवत्यनंतेतत्सौहृदस्मितविलोकगिरःस्मरंत्यः ॥ ग्रस्तेऽहिनाप्रियतमेभृशदुःखतप्ताःशून्यंप्रि १७/२५
यव्यातिहृतंददृशुस्त्रिलोकम् २० ताःकृष्णमातरमपत्यमनुप्रविष्टांतुल्यव्यथाःसमनुगृह्यशुचःस्रवंत्यः ॥ तास्ताव्रजप्रियकथाःकथयंत्यआसन्कृष्णाननेऽ
र्पितदृशोमृतकप्रतीकाः २१ कृष्णप्राणान्निर्विशतोनंदादीन्वीक्ष्यतंह्रदम् ॥ प्रत्यषेधत्सभगवान्रामःकृष्णानुभाववित् २२ इत्थंस्वगोकुलमनन्यगतिंनि
रीक्ष्यसस्त्रीकुमारमतिदुःखितमात्महेतोः ॥ आज्ञायमर्त्यपदवीमनुवर्तमानस्थित्वामुहूर्तमुदतिष्ठदुरंगबंधात् २३ तत्प्रथ्यमानवपुषाव्यथितात्मभोगस्त्य
क्त्वोन्नमय्यकुपितःस्वफणान्भुजंगः ॥ तस्थौश्वसन्श्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुकमुखोहरिमीक्षमाणः ॥ २४ तंजिह्वयाद्विशिखयापरिलेलिहानंद्वेसृ
क्किणीअतिकरालविषाग्निदृष्टिम् ॥ क्रीडन्नमुंपरिससारयथाखगेंद्रोबभ्रामसोप्यवसरंप्रसमीक्षमाणः २५

चूर्णिका ततः तेकृष्णंअन्वेषमाणाः भगवत्पदैः सूचितमार्गेणयमुनातीरंजग्मुः १७ तदाते गोपाः कृष्णस्यध्वजयवादिभिः युतानिपदानिवीक्ष्यत्वरयाययुः १८ ततः ह्रदेसर्प
देहव्याप्तंकृष्णंदृष्ट्वाकश्मलं प्रापुः १९ तदागोप्यश्चकृष्णे अनुरक्तमनसः सत्यः कृष्णरहितंत्रैलोक्यंशून्यंददृशुः २० किंच तदागोपिकाः कृष्णमनुप्रविष्टां यशोदांस
मुद्गृह्यकृष्णमुखेअर्पितदृशः सत्यः मृततुल्या आसन् २१ यथाकृष्णप्राणान्निर्विशतो नंदादीन्दृष्ट्वारामः प्रत्यषेधत् २२ एवं अनन्यगतिं आत्महेतोः दुःखितंगोकुलं ॥७८॥
दृष्ट्वाकृष्णः तद्बंधात्उदतिष्ठत् २३ ततः हरेःप्रथ्यमानदेहेनव्यथितदेहः सर्पः तं त्यक्त्वा क्रुद्धःसन्फणान्उन्नमय्य तंईक्षमाणः तस्थौ २४ ततोहरिः तंद्विशिखजिह्वयासृ
क्किणीलिहंतंदृष्ट्वाक्रीडन्सन्तंपरितो बभ्राम २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तंकालियंचंडोवेगोयस्यतादृशंविषमेववीर्यंसामर्थ्यंयस्यतम्। कदंबमितिभाविनाश्रीकृष्णचरणस्पर्शभाग्येनसएको (वृक्षः) तत्तीरेनशुष्कइतिज्ञातव्यम्। अमृतमाहरतागरुत्मताक्रांतत्वादितिचपुराणांतरव शात्केचित्। आस्फोव्यबाहुंकरतलेनाहत्यगाढादृढबद्धारशनाकटिबंधवस्त्रंयेनसः ६ तदासर्पस्यह्रदःपुरुषश्रेष्ठस्यपतनभारेणसंक्षोभितानांउरगाणांविषैः (उरुच्छ्वसित-) उन्नतोअंबुराशिर्यस्यसःविषे णकषायीकृताभयंकराऊर्मयोयस्यसःधावन् (सन्) पर्यक्परितःधनुःशतंप्लुतःप्रसृतः। नैतच्चित्रमित्याह । अनंतबलस्येति ७ (अंगहेराजन्वरवारणोमत्तहस्तीतस्येवविक्रमोयस्यतस्य) ह्रदेविहरतो भुजदंडाहतोदकघोषंश्रुत्वातत्ततःस्वसदनाभिभवंचनिरीक्ष्यतदसहमानःसर्पःसमसरत्समाजगाम ८ प्रेक्षणीयश्चसुकुमारश्चघनवदुज्ज्वलश्चतंश्रीवत्सपीतवसनं ह्रदेविहरतःश्रीवत्सेनसंयुक्तंउच्चलत्पीतं वस्त्रंय स्यतंभुजयाभोगेनचच्छादअवेष्टयत् ९ सःप्रियोयेषांतेतत्प्रियाः तेचतेसखायश्चेतितथा (अदृष्टचेष्टंनिश्चेष्टमिववर्तमानमित्यर्थः) १० ११ भुविभूकंपादयःदिविउल्कापातादयः आत्मनिवामनेत्रस्फुरणा दयः। आसन्नभयंशंसितुंशीलंयेषांते १२ तानालक्ष्य गोकुलान्निर्जग्मुरितितृतीयेनान्वयः । भयोद्विग्नाभयहेतुभ्योभीताः भयेनकंपमानाइतिवा १३ (निधनंप्राप्तंमत्वा) नतंहरिंविदंतीत्यतद्विदः १४ पशुवृत्तयःअतिवत्सलाः १९ कातरान्भीतान् (माधवोमधुवंशजः) १६

॥७७॥

श्लोकाः ६/१६

तंचंडवेगविषवीर्यमवेक्ष्यतेनदुष्टांनदींचखलसंयमनावतारः ॥ कृष्णःकदंबमधिरुह्यततोतितुंगमास्फोट्यगाढरशनोन्यपतद्विषोदे ६ सर्पह्रदःपुरुषसार निपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः ॥ पर्यक्प्लुतोविषकषायितभीषणोर्मिर्धावन्धनुःशतमनंतबलस्यकिंतत् ७ तस्यह्रदेविहरतोभुजदंडघूर्ण वार्घोषमंगवरवारणविक्रमस्य ॥ आश्रुत्यतत्स्वसदनाभिभवंनिरीक्ष्यचक्षुःश्रवाःसमसरत्तदमृष्यमाणः ८ तंप्रेक्षणीयसुकुमारघनावदातंश्रीवत्सपीतवसनं स्मितसुंदरास्यम् ॥ क्रीडंतमप्रतिभयंकमलोदरांघ्रिंसंदश्यमर्मसुरुषाभुजयाचछाद ९ तंनागभोगपरिवीतमदृष्टचेष्टमालोक्यतत्प्रियसखाःपशुपाभृशा र्ताः ॥ कृष्णेर्पितात्मसुहृदर्थकलत्रकामादुःखानुशोकभयमूढधियोनिपेतुः १० गावोवृषावत्सतर्यःक्रंदमानाःसुदुःखिताः ॥ कृष्णेन्यस्तेक्षणाभीतारुदं त्यइवतस्थिरे ११ अथव्रजेमहोत्पातास्त्रिविधाह्यतिदारुणाः ॥ उत्पेतुर्भुविदिव्यात्मन्यासन्नभयशंसिनः १२ तानालक्ष्यभयोद्विग्नागोपानंदपुरोगमाः ॥ विनारामेणगाःकृष्णंज्ञात्वाचारयितुंगतम् १३ तैर्दुर्निमित्तैर्निधनंमत्वाप्राप्तमतद्विदः ॥ तत्प्राणास्तन्मनस्कास्तेदुःखशोकभयातुराः १४ आबालवृद्धवनिताः सर्वेऽगपशुवृत्तयः ॥ निर्जग्मुर्गोकुलाद्दीनाःकृष्णदर्शनलालसाः १५ तांस्तथाकातरान्वीक्ष्यभगवान्माधवोबलः ॥ प्रहस्यकिंचिन्नोवाचप्रभावज्ञोऽनुजस्यसः १६

चूर्णिका

ततःकृष्णः तत्रसर्पेनदुष्टांनदींचदृष्ट्वाकदंबं आरुह्य आस्फोट्य विषोदेपपात ६ तदासन्ह्रदः धनुःशतंपरितः प्रसृतः अनंतबलस्यनैतच्चित्रं ७ एवंनिपत्यविहरतः कृष्णस्य भुजंदडाहतोदकघोषंश्रुत्वासर्पः स्वगृहपराभवंदृष्ट्वाप्राप्तः ८ ततः कृष्णंनिर्भयंक्रीडंतंदृष्ट्वामर्मसुसंदश्यदेहेन तं अवेष्टयत् ९ ततूदृष्ट्वागोपाः आर्ताः संतः तीरेनिपेतुः १० किंच गवादयःकृष्णेन्यस्तेक्षणाः रुदंतइवतस्थिरे ११ अथव्रजेत्रिविधोत्पाताः पेतुः १२ तान्दृष्ट्वानंदादिगोपाः रामंविना गाश्चारयितुंगतंकृष्णंज्ञात्वा १३ तैर्दुर्निमित्तैः पुत्रनिधनंमत्वातत्प्राणाः तथाआबालवृद्धवनिताः सर्वेगोकुलात्निर्जग्मुः १४ १५ एवंभीतान्तान्दृष्ट्वाबलः प्रहस्यतत्प्रभावज्ञः किंचिन्नोवाच १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंपरिभ्रमेणैवहतमोजोयस्यतम् । (शिरसामवनामेन) उन्नतावंसौयस्यतम् । तस्यमूर्धसुयेरत्ननिकरास्तेषांस्पर्शेनअत्यरुणंपादांबुजंयस्यसः । ननुकथंचंचलेषुशिरस्सुननर्ततत्राह । अखिलकलानामादिगुरुः २६ (नर्तुंनर्तनंकर्तुंमृदंगादिभिः सहिता-)-उपसेदुःप्राप्ताः २७ (अंगराजन्) शतैकशीर्ष्णः शतंएकानिमुख्यानिशीर्षाणियस्यतस्यक्षीणायुषोपिपुनर्भ्रमतो यद्यच्छिरोननमतेस्तब्धतांनत्यजतिनृत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द तदाचआस्यतोमुखेभ्यः नस्तोनासाविवरेभ्यश्चासृग्वमन् (परमंकश्मलमाप) २८ पुनरपिरुषाउच्चैर्निश्वसतोयद्यत् (शिरः) समुन्नमतितत्तत्पदाघातेनानुनमयन् । इहास्मिन्नवसरेहृष्टैर्गंधर्वादिभिः शेषासनः पुराणःपुरुषइव (स) यशोदानंदनःपुष्पैःप्रपूजितः । यद्वा । तदागंधर्वादिभिःपुष्पैःप्रपूजितोगोपैःपुराणःपुमानिवदृष्टइति । यद्वा पुष्पैःसुपूजितइवप्रसन्नःसन्दमयांबभूवहितंकृतवानित्यर्थः २९ (तस्यचित्रेणतांडवेनविरुग्णाभग्नाः फणाएवातपत्रंयस्यसःहेनृप) अरणंशरणम् ३० गर्भेजगंतियस्यतस्यातिभरेणावसन्नंआक्रांतम् । पार्ष्णिःपादपृष्ठम् । आद्यंश्रीकृष्णंश्लथंतोविस्रंसमाना वसनादयोयासांताः ३१ ताःशरणंप्रपन्नाःसत्यःतंप्रणेमुः । सुविग्नमनसोतिविह्वलचित्ताः । भूवीतितस्मिन्स्थानेजलादधस्ताद्वातीरेवाशमलस्यपापात्मनोपि भर्तुर्मोक्षेच्छवःभर्तुःयत्शमलंतस्यवा भूतपतिंप्राणियाऽस्यपतिंशरणदंआश्रयप्रदम् ३२

॥७९॥

श्लोकाः २६—३२

एवंपरिभ्रमहतौजसमुन्नतांसमानम्यतत्पृथुशिरस्स्वधिरूढआद्यः ॥ तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादांबुजोऽखिलकलादिगुरुर्ननर्त २६ तन्नर्तुमुद्यतमवेत्यतदातदीयगंधर्वसिद्धमुनिचारणदेववध्वः ॥ प्रीत्यामृदंगपणवानकवाद्यगीतपुष्पोपहारनतिभिःसहसोपसेदुः २७ यद्यच्छिरोननमतेंऽगशतैकशीर्ष्णस्तत्तन्ममर्दखलदंडधरोंऽघ्रिपातैः ॥ क्षीणायुषोभ्रमतउल्बणमास्यतोऽसृङ्नस्तोवमन्परमकश्मलमापनागः २८ तस्याक्षिभिर्गरलमुद्वमतःशिरस्सुयद्यत्समुन्नमतिनिश्वसतोरुषोच्चैः ॥ नृत्यन्पदाऽनुनमयन्दमयांबभूवपुष्पैःसुवर्षितवपुःसपुमान्पुराणः २९ तच्चित्रतांडवविरुग्णफणातपत्रोरक्तंमुखैरुरुवमन्नृपभग्नगात्रः ॥ स्मृत्वाचराचरगुरुंपुरुषंपुराणंनारायणंतमरणंमनसाजगाम ३० कृष्णस्यगर्भजगतोऽतिभरावसन्नंपार्ष्णिप्रहारपरिरुग्णफणातपत्रम् ॥ दृष्ट्वाहिमाद्यमुपसेदुरमुष्यपत्न्यआर्ताःश्लथद्वसनभूषणकेशबंधाः ३१ तास्तंसुविग्नमनसोथपुरस्कृतार्भाःकायंनिधायभुविभूतपतिंप्रणेमुः ॥ साध्व्यःकृतांजलिपुटाःशमलस्यभर्तुर्मोक्षेप्सवःशरणदंशरणंप्रपन्नाः ३२

चूर्णिका

एवंभ्रमणेनहतबलं उन्नतांसं तं आनम्यतच्छिरस्सुननर्त २६ तदाकृष्णंनर्तुमुद्यतंदृष्ट्वागंधर्वसिद्धादयःमृदंगपणवादिभिःसहप्राप्ताः २७ ततः तस्यशतैकशीर्ष्णः यद्यत् शिरः ननमते तत्तत्कृष्णः अंघ्रिपातैः ममर्द ततः सः आस्यतः रक्तंवमन्मूर्च्छामाप २८ एवंकृतेपिपुनः तच्छिरः यद्यत्ननमतेतत्तत् पुनःनृत्यन्सन्दमयामास तदागंधर्वादिभिः पुष्पैः पूजितः आसीत् २९ हेनृपतस्यचित्रतांडवेनरुग्णफणच्छत्रः सः मुखैः रक्तंवमन् आदिपुरुषं स्मृत्वा तंमनसाशरणंजगाम ३० एवंगर्भजगतः कृष्णस्य भारेणव्याप्तं पतिंदृष्ट्वातत्पत्न्यः आर्ताः श्लथद्वसनाद्याः पुरस्कृतार्भाः कृतांजलिपुटाः भर्तुर्मोक्षार्थं भुविदेहंस्थाप्यकृष्णंप्रणेमुः ३१ ३२

॥७९॥

१. रुधिरमुल्बणमाशुवक्त्रादिति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथमंतावत्कुपितंभगवंतंदंडानुमोदनेनोपशमयंत्यः स्तुवंति न्याय्योहीति । तत्र दंडानुमोदनंषड्भिर्दशभिस्तुहरेर्नतिः । प्रार्थनंपंचभिःश्लोकैस्ततःपन्नगयोषिताम् १८ न्याय्योयुक्तः । यतोरिपुसुतांश्चसमं पश्यतस्तवहरेरयमवतारः ।) नचनिग्रहानुग्रहलक्षणंवैषम्यंतवास्तीत्याहुः धत्सेदममिति । (खलेपिदममेवहितरूपंधत्से) अनुशंसन्आलोचयन् ३३ निग्रहोप्यनुग्रहायेत्युक्तम् । इदानीमनुग्रहएवायंननिग्रहइत्याहुः । अनुग्रहइति । नोऽस्माकं (अनुग्रहएव । यतस्तेत्वत्कर्तृकोदंडःकल्मषापहः) यस्मादमुष्यसर्पत्वंदृश्यते ततस्तन्मूल- (- भूत-)-पापनिवर्तकोदंडोऽनुग्रहएवक्रोधत्वेनप्रतीयमानोपीत्यर्थः ३४ महांश्चायमनुग्रहइतितस्यपूर्वपुण्यमभिनंदंतितपइति (अनेनभर्त्रा) स्वयंमानरहितेनअन्येभ्योमानदेनच । सर्वंजीवयतीतिसर्वजीवः (यतस्तपआदेः)३५नतपआदिनिमित्तएवैषभाग्योदय. । किंत्वचिंत्यंतवकृपावैभवमित्याहुः । कस्यानुभावइति श्लोकत्रयेण । तपआदिनाब्रह्मादयोपियस्याःश्रियःप्रसादमिच्छंतिसाश्रीर्ललना(अपिश्रीरेवललना)उत्तमास्त्रीयस्यत्वदंघ्रिस्पर्शाधिकारस्य वांछयातप (- आदि) आचरत् अस्यसर्पस्यसकिमर्थं कृतइतिकोवेत्तीत्यर्थः ३६ यत्तवपादरजःप्रपन्नाःप्राप्ता-(-भक्ताः) पारमेष्ठ्याद्यपितुच्छंमन्यंते ३७ अहोतत् (रजः) एषः (अहीशः) अयत्नतएवप्राप । अन्यैःश्रीप्रभृतिभिरपि (दुर्लभम् ।) पुनःकथंभूतंपादरजः । यदिच्छतः सेव्यंमेभवत्वितिप्रार्थयतएवसमक्षःप्रत्यक्षएवविभवःअपेक्षितासंपद्भवति ।(हेनाथ) ३८नमस्तुभ्यंभगवतेअचिंत्यैश्वर्यादिगुणाय । तदुपपादनायदशभिः श्लोकैर्विशेषणानि । पुरुषायपूर्षुअंतर्यामिरूपेणवर्तमानाय । महात्मनेएवमप्यपरिच्छिन्नाय। कुतः । भूतावासायआकाशाद्याश्रयाय । एतदपिकुतःभूतायपूर्वमपिसते । कुतःपरायकारणाय । किंच परमात्मनेकारणातीताय ३९

श्लोकाः ३३—३९

॥ नागपत्न्यऊचुः ॥ न्याय्योहिदंडःकृतकिल्बिषेऽस्मिंस्तवावतारःखलनिग्रहाय ॥ रिपोःसुतानामपितुल्यदृष्टेर्धत्सेदमंखलएवानुशंसन् ३३ अनुग्रहोयंभवताकृतोहिनोदंडोऽसतांतेखलुकल्मषापहः ॥ यद्दंदशूकत्वममुष्यदेहिनःक्रोधोपितेऽनुग्रहएवसंमतः ॥ ३४ तपःसुतप्तंकिमनेनपूर्वंनिरस्तमानेनचमानदेन ॥ धर्मोथवासर्वजनानुकंपयायतोभवांस्तुष्यतिसर्वजीवः ॥ ३५ कस्यानुभावोऽस्यनदेवविद्महेतवांघ्रिरेणुस्पर्शाधिकारः ॥ यद्वांछयाश्रीर्ललनाऽचरत्तपोविहायकामान्सुचिरंधृतव्रता ३६ ननाकपृष्ठंनचसार्वभौमंनपारमेष्ठ्यंनरसाधिपत्यम् ॥ नयोगसिद्धीरपुनर्भवंवावांछंतियत्पादरजःप्रपन्नाः ३७ तदेषनाथापदुरापमन्यैस्तमोजनिःक्रोधवशोप्यहीशः॥ संसारचक्रेभ्रमतःशरीरिणोयदिच्छतःस्याद्विभवःसमक्षः ३८ नमस्तुभ्यंभगवतेपुरुषायमहात्मने॥ भूतावासायभूतायपरायपरमात्मने ३९

चूर्णिका ॥ नागपत्न्यऊचुः ॥ हेकृष्णअस्मिन्कृतापराधेत्वयाकृतोदंडः न्याय्यः यतः तेअवतारः खलनिग्रहार्थं ३३ हेकृष्णयतः अस्य सर्पत्वंदृश्यते अतस्तन्मूलपापापहः दंडोयं त्वयाअस्मदनुग्रहार्थमेवकृतः ३४ किंच हेकृष्ण अनेन पूर्वंकितप आदिकृतं यतः तवांघ्रिरेणुस्पर्शाधिकारोजातः अयंकस्यानुभावइतिनविद्महे ३५ ३६ ।किंच येत्वत्पादरजःप्रपन्नाः तेपारमेष्ठ्यादितथामोक्षमपिनेच्छंति ३७ एवंभूतंत्वत्पादरजः प्रति एषः अप्रयत्नतएवप्रापअहोभाग्यमिति ३८ अतः तुभ्यंभूतावासाय ब्रह्मणे अगुणाय कालायविश्वहेतवे सर्वकारकरूपाय अनंतायशास्त्रयोनये सात्वतांपतये अव्याकृतविहाराय तुभ्यंनमः ।किंच सर्वाध्यक्षाय अस्यजगतः हेतवे तुभ्यंनमः ३९ ॥८०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणत्वंकारणातीतत्वंचसमर्थयितुमाहुः ज्ञानविज्ञाननिधयेज्ञानंज्ञप्तिःविज्ञानंचिच्छक्तिःउभयोर्निधयेताभ्यांपूर्णाय । कथंतथात्वमतउक्तं ब्रह्मणेनंतशक्तये । कथंभूतायब्रह्मणे । अगुणायाविकाराय । पुनःकथंभूतायानंतशक्तये । प्राकृतायप्रकृतिप्रवर्तकाय । अप्राकृतायेतिवा । अप्राकृतानंतशक्तियुक्ताय । अयमर्थः अगुणत्वादविकारंब्रह्म । ज्ञप्तिमात्रत्वात्कारणातीतम् । प्रकृतिप्रकर्तकोऽनंतशक्तिः । विज्ञाननिधित्वादीश्वरःकारणंतदुभयात्मनेनमइति ४० अनंतशक्तित्वात्कालशक्त्याविश्वस्रष्टृत्वादिरूपेणनमस्यंति । कालायकालस्वरूपाय । कालनाभायकालशक्त्याश्रयाय । कालावयवानांसृष्ट्यादिसमयानांसाक्षिणे । ततश्चविश्वायविश्वरूपाय । तर्हिकिंजडोहम् । नहि । तदुपद्रष्ट्रे । नचद्रष्टृमात्राय । किंतुतत्कर्त्रे । नचकर्तृमात्राय (किंतु) विश्वहेतवेसर्वकारणरूपाय ४१ तदेवाहुः । भूतमात्रेति । भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने आशयश्चित्तम् । भूतादिरूपाय । अतःसर्वकारकरूपायेति । अहंकारात्मतयानमस्यंति । त्रिगुणेनेति । एवंसृष्टेकार्येयस्त्रिगुणोभिमानस्तेनगूढास्वांशभूतानामात्मनां जीवानामनुभूतिर्येनतस्मै ४२ त्वंतुअहंकारानावृतइतिस्तुवंति । नमोऽनंताय अहंकारापरिच्छेदात् । अतःसूक्ष्माय अदृश्यत्वात् । अतएवकूटस्थाय उपाधिकृतविकाराभावात् । अतएवविपश्चितेसर्वज्ञाय । एवंवस्तुतःस्तुत्वाऽचिंत्यमायात्वेनस्तुवंति । नानावादानुरोधाय अस्तिनास्तिसर्वज्ञःकिंचिज्ज्ञःबद्धःमुक्तःअनेकः एकःइत्यादीन्नानावादान्अनुरुणद्धिमाययानुवर्ततेयस्तस्मै । किंच वाच्यवाचकशक्तये अभिधानाभिधेयशक्तिभेदादपिनानात्वेनप्रतीतायेत्यर्थः ४३ अनावृतत्वमेवहेत्वंतरेणापिसूचयंत्यः स्तुवंति नमःप्रमाणमूलायचक्षुरादीनांचक्षुरादिरूपाय (चक्षुषश्चक्षुरित्यादिश्रुतेः ।) अतएवकवयेस्वयंतन्निरपेक्षज्ञानाय । कुतः शास्त्रयोनयेवेदात्मकनिश्वासाय । किंच प्रवृत्तायनिवृत्तायनिगमायनमोनमइति ४४ किंच अनावृतैश्वर्यत्वादेवचतुर्मूर्तिरूपेणसर्वोपास्यत्वंतेन (रूपेण) नमंतिनमःकृष्णायेतिश्लोकेन । रामायसंकर्षणाय । वसुदेवसुतायवसुदेवशब्दितंशुद्धंसत्त्वंतत्रप्रकाशमानायवासुदेवायेत्यर्थः (यदुक्तंचतुर्थस्कंधे । सत्त्वंविशुद्धंवसुदेवशब्दितंयदीयतेतत्रपुमानपावृतइत्यादि ।) सात्वतांएतदुपासकानांपतयेसालोक्यादिनापालकाय ।.एवं (रामादि) चतुर्मूर्तिरूपायकृष्णायतुभ्यंनमइति ४५ कथंचतुर्मूर्तित्वंतितदाहुः नमोगुणप्रदीपायेति । गुणाअंतःकरणानितान्प्रदीपयतिप्रकाशयतीतितथातस्मैचित्ताद्यधिष्ठातृत्वेनचतुर्मूर्तित्वेत्यर्थः ननुतथाप्येकस्यकथंचतुष्ट्वंअतआहुः गुणात्मच्छादनायच । तैरेवगुणैरुपासकानांफलवैचित्र्यायआत्मानमाच्छाद्यनानात्वेनप्रकाशमानायेत्यर्थः ननुकथंतर्हिप्रतीतिरतउक्तम् । गुणवृत्त्युपलक्ष्याय । चित्तादीनांचेतनाध्यवसायादिवृत्तिभिरुपलक्ष्याय । उपलक्ष्यत्वमेवाहुः । गुणद्रष्ट्रेतत्साक्षिणे । कथंचिदुपलक्ष्यएवनतुज्ञेयइत्याहुः स्वसंविदेअगोचरायेत्यर्थः ४६

श्लोकाः ४०/४६

ज्ञानविज्ञाननिधयेब्रह्मणेनंतशक्तये ॥ अगुणायाविकारायनमस्तेप्राकृतायच ४० कालायकालनाभायकालावयवसाक्षिणे ॥ विश्वायतदुपद्रष्ट्रेतत्कर्त्रेविश्वहेतवे ४१ भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने ॥ त्रिगुणेनाभिमानेनगूढस्वात्मानुभूतये ४२ नमोनंतायसूक्ष्मायकूटस्थायविपश्चिते ॥ नानावादानुरोधायवाच्यवाचकशक्तये ४३ नमःप्रमाणमूलायकवयेशास्त्रयोनये ॥ प्रवृत्तायनिवृत्तायनिगमायनमोनमः ४४ नमःकृष्णायरामायवसुदेवसुतायच ॥ प्रद्युम्नायानिरुद्धायसात्वतांपतयेनमः ४५ नमोगुणप्रदीपायगुणात्मच्छादनायच ॥ गुणवृत्त्युपलक्ष्यायगुणद्रष्ट्रेस्वसंविदे ४६

चूर्णिका

४० ४१ ४२ ४३ ४४ ४५ ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगोचरत्वमलक्ष्यत्वंचदर्शयंत्योनमंतिअव्याकृतविहारायअप्रतक्र्यमहिम्नेइत्यर्थः सर्वव्याकृतसिद्धये सर्वकार्योत्पत्तिप्रकाशहेतुत्वेनोपलक्षणयोग्यायेत्यर्थः उपलक्षणांतरमाहुः । हेहृषीकेशकरणप्रवर्तक । किंविषयलिप्सया । न । मुनयेआत्मारामाय । किंसाधनवशेन । नहिनहि । मौनशीलिने । मौनंआत्मारामतातत्स्वभावाय ४७ कुतः परावरगतिज्ञायस्थूलसूक्ष्माणांगतिज्ञत्वेननक्वापिसज्जमानायेत्यर्थः अपिचसर्वाध्यक्षाय सर्वस्याधिष्ठात्रे । कुतएतत् । अविश्वायनविश्वंयस्मिन्तस्मैतन्निषेधावधयेइत्यर्थः । विश्वायच । तद्विवर्ताधिष्ठानायेत्यर्थः । किंचतद्रष्ट्रे । अध्यासापवादसाक्षिणे । अपिच । अस्यचविश्वाध्यासस्यतदपवादस्यचविद्याविद्याभ्यांहेतवे । यद्वा । अविश्वायविश्वतैजसाद्यवस्थारहिताय । विश्वायचमाययास्वांशैस्तत्तदवस्थाय । तद्रष्ट्रेतासामवस्थानांभावाभावसाक्षिणे । अन्यत्समानम् । तस्मात्सर्वगतिज्ञत्वसर्वाधिष्ठातृत्वात्मारामत्वादिभिर्निरतिशयैश्वर्यायतुभ्यंनमइति । विशेषणैरसंकीर्णैःपंचपंचाशतानुतः । अहिस्त्रीभिःप्रसन्नोवस्तासामिवभवेद्धरिः ४८ एवंतावद्दंडानुमोदनेननमस्कारैश्चभगवंतंप्रसाद्येदानींत्वदधीनानांप्राणिनांकोपराधइत्याशयवत्यः प्रार्थयंते त्वंहीति । अस्यलोकस्यगुणैर्जन्मादींस्त्वमेवाकृतअकरोः । ततश्चतांस्तान्संस्काररूपेणसतः विद्यमानान्स्वभावान्घोरत्वादीन्प्रतिबोधयन्ईहसेक्रीडसि । यद्वा अस्यजन्मादींस्त्वमीहसे (इच्छसि) इत्यन्वयः अकृताअनादिर्याकालशक्तिस्तांधारयतीतितथाअन्यत्समानम् ४९ अतस्तस्यतवैवामूस्तनवस्तन्यंतइतिक्रीडोपस्कराः (कास्ताइत्यत्राहुःशांताइति । अशांताघोराः मूढयोनयोगूढस्वभावाः) तथापितवाधुनाशांताःप्रियाः । कुतः । सतांधर्मपरिपालनेच्छयाईहतःप्रवर्तमानस्य अतस्तानवितुंस्थातुःस्थितस्य ५० एवंचतवाप्रियाचरणाद्यपराधस्तर्हिसोढव्यइत्याहुः (अपराधइति । भर्त्रापालकेन ! मूढस्यापराधम्) ५१ ५२ युष्मदनुग्रहेऽन्येषांमृत्युरेवेतिचेन्नेत्याहुः विधेहीति । त्वदाज्ञयाप्राणिनोनाद्यामेतिभावः (विधेहिआज्ञापयेत्यर्थः ।) ५३ (अंघ्रिप्रहारैःभग्नशिरसम् ५४ ५५

श्लोकाः ४७ ५५

अव्याकृतविहारायसर्वव्याकृतसिद्धये ॥ हृषीकेशनमस्तेस्तुमुनयेमौनशीलिने ४७ परावरगतिज्ञायसर्वाध्यक्षायतेनमः ॥ अविश्वायचविश्वायतद्रष्ट्रेचास्यहेतवे ४८ त्वंह्यस्यजन्मस्थितिसंयमान्प्रभोगुणैरनीहोऽकृतकालशक्तिधृक् ॥ तत्तत्स्वभावान्प्रतिबोधयन्सतःसमीक्षयाऽमोघविहारईहसे ४९ तस्यैवतेऽमूस्तनवस्त्रिलोक्यांशांताअशांताउतमूढयोनयः ॥ शांताःप्रियास्तेह्यधुनाऽवितुंसतांस्थातुश्चतान्धर्मपरीप्सयेहतः ५० अपराधःसकृद्भर्त्रासोढव्यःस्वप्रजाकृतः ॥ क्षंतुमर्हसिशांतात्मन्मूढस्यत्वामजानतः ५१ अनुगृह्णीष्वभगवन्प्राणांस्त्यजतिपन्नगः ॥ स्त्रीणांनःसाधुशोच्यानांपतिःप्राणःप्रदीयताम् ५२ विधेहितेकिंकरीणामनुष्ठेयंतवाज्ञया ॥ यच्छ्रद्धयानुतिष्ठन्वैमुच्यतेसर्वतोभयात् ५३ ॥ शुकउवाच ॥ इत्थंसनागपत्नीभिर्भगवान्समभिष्टुतः ॥ मूर्छितंभग्नशिरसंविससर्जांघ्रिकुट्टनैः ५४ प्रतिलब्धेंद्रियप्राणःकालियःशनकैर्हरिम् ॥ कृच्छ्रात्समुच्छ्वसन्दीनःकृष्णंप्राहकृतांजलिः ५५

चूर्णिका

४७ ४८ एवं प्रसाद्यप्रार्थयंते हेहरेत्वं अस्यजन्मादीन्गुणैः स्वयंअनीहः सन् अकरोः एवं अमोघविहारः त्वंक्रीडसि ४९ एवंभूतस्यते अमूः त्रिलोक्यां शांताः अशांताः तनवः अधुनातेशांताःप्रियाः संति यतः सद्रक्षणार्थं अवतीर्णोसि ५० हेभगवन् अयंप्राणांस्त्यजति अतः नःपतिः प्राणोदीयताम् ५१ तथाएतत्कृतोपराधः त्वयासोढव्यः ५२ किंच तेदासीनांनः यदनुष्ठेयंतद्विधेहि यत् श्रद्धया अनुतिष्ठन् पुमान्सर्वभयात्मुच्यते ५३ ॥ श्रीशुकउवाच ॥ एवंनागपत्नीभिः स्तुतः कृष्णः मूर्छितं तंविससर्ज ५४ ततःसर्पः स्वस्थो भूत्वाकृतांजलिः सन्हरिं आह ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(सहोत्पत्त्यउत्पत्तिमारभ्येत्यर्थः ।) यदसद्ग्रहइति । यतःस्वभावोऽसद्ग्रहः (दुष्टग्रहरूपः) यद्वा यतःस्वभावादसतिदेहादौग्रहोभिमानः सदुस्त्यजइति ५६ (हेधातः) गुणैः विविधातयासृज्यतइतिगुण विसर्जनंतत्रापिनानास्वभावादयोयस्यतत् । (वीर्यं पराक्रमः योनयोदेवतिर्यङ्नरादयः आशयोंऽतःकरणंआकृतिर्मूर्तिः) ५७जात्याजन्मनैवऊरुर्मन्युर्येषांतेस्वयंकथंत्यजामः ५८ हियस्मात्तत्रत्वन्माया त्यागेभवानेवकारण।मित्यनुग्रहंविधेहिममाज्ञयास्वादंर्तांति । ईश्वरत्वान्निग्रहंवाविधेहीति ५९ यतोगोभिर्नृभिश्चनदीभुज्यतांइति ६० (यत्तुभ्यंमदनुशासनंएतत्) नयुष्मत्तोभयमाप्नुयात् । तस्ययुष्माभिर्भ यंनोत्पानीयमित्याज्ञा ६१ इतोपित्वयानिर्गतव्यमित्याह । योस्मिन्निति । त्वयिस्थितेतन्नसंभवतीतिभावः ६२ नचतवगरुडभयंभवेदित्याह । द्वीपामिति ६३ ६४ ६५ ६६ ६७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांषोडशोध्यायः १६ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥] ॥ ७ ॥ ॥ ७ ॥

श्लोकाः ५६—६७

॥ कालियउवाच ॥ वयंखलाःसहोत्पत्त्यातामसादीर्घमन्यवः ॥ स्वभावोदुस्त्यजोनाथलोकानांयदसद्ग्रहः ५६ त्वयासृष्टमिदंविश्वंधातर्गुणविसर्जनम् ॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृति ५७ वयंचतत्रभगवन्सर्पाजात्युरुमन्यवः ॥ कथंत्यजामस्त्वन्मायांदुस्त्यजांमोहिताःस्वयम् ५८ भवान्हिकारणंतत्रसर्वज्ञोजगदीश्वरः ॥ अनुग्रहंनिग्रहंवामन्यसेतद्विधेहिनः ५९ ॥ ॥ शुकउवाच ॥ इत्याकर्ण्यवचःप्राहभगवान्कार्यमानुषः ॥ नात्रस्थेयंत्वयासर्पसमुद्रंयाहिमाचिरम् ॥ स्वज्ञात्यपत्यदाराढ्योगोनृभिर्भुज्यतांनदी ६० यएतत्संस्मरेन्मर्त्यस्तुभ्यंमदनुशासनम् ॥ कीर्तयन्नुभयोःसंध्योर्नयुष्मद्भयमाप्नुयात् ६१ योऽस्मिन्स्नात्वामदाक्रीडेदेवादींस्तर्पयेज्जलैः ॥ उपोष्यमांस्मरन्नर्चन्सर्वपापैःप्रमुच्यते ६२ द्वीपंरमणकंहित्वाह्रदमेतमुपाश्रितः ॥ यद्भयात्ससुपर्णस्त्वांनाद्यान्मत्पादलांछितम् ६३ ॥ ऋषिरुवाच ॥ एवमुक्तोभगवताराजन्नद्भुतकर्मणा ॥ तंपूजयामाससुदानागपत्न्यश्चसादरम् ६४ दिव्यांबरस्रङ्मणिभिःपरार्ध्यैरपिभूषणैः ॥ दिव्यगंधानुलेपैश्चमहत्योत्पलमालया ६५ पूजयित्वाजगन्नाथंप्रसाद्यगरुडध्वजम् ॥ ततःप्रीतोभ्यनुज्ञातःपरिक्रम्याभिवंद्यतम् ॥ सकलत्रसुहृत्पुत्रोद्वीपमब्धेर्जगामह ६६ तदैवसामृष्टजलायमुनानिर्विषाभवत् ॥ अनुग्रहाद्भगवतःक्रीडामानुषरूपिणः ६७ ॥ ॥ इति श्रीभागवतेमहापुराणेदशमस्कंधेषोडशोध्यायः ॥ १६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

चूर्णिका

हेकृष्णवयंउत्पत्त्यासहखलाः दीर्घमन्यवः स्मः ५६ किंच हेधातः त्वयासृष्टंविश्वंनानास्वभावादिमदस्ति ५७ तत्रवयं उरुमन्यवः अतः त्वन्मायांकथंत्यजामः ५८ यतः तत्त्यागेत्वंकारणमसि अतः अनुग्रहं वामन्यसे तद्विधेहिनः ५९ ॥ श्रीशुकउवाच ॥ एवंतद्वचः श्रुत्वाकृष्णः आह हेसर्पत्वया अत्रनस्थेयंसमुद्रंस्वज्ञातिभिःसहयाहिइयं नदीगोनृभिर्भुज्यताम् किंच तेमच्छासनं जातं तत् यः स्मरेत् तथासंध्ययोः कीर्तयेत्सः युष्मद्भयंनाप्नुयात् किंच यःअत्रस्नात्वादेवादीन्तर्पयेत् तथाउपोष्यमांअर्चेत् सः पापैः मुच्यते त्वंतुन्हदं हित्वारमणकद्वीपंगच्छ मत्पादचिन्हितं त्वांगरुडः नाद्यात् ६० ६१ ६२ ६३ ॥ ऋषिरुवाच ॥ एवंकृष्णेनोक्तः नागः तत्स्त्रियश्चकृष्णं दिव्यांबरादिभिः दिव्यगंधादिभिः पद्ममालयाचपूजयामासुः ६४ ६५ एवंपूज्यजगन्नाथं प्रसाद्यपरिक्रम्यनमस्कृत्यतदाज्ञयासकलत्रसुहृत्पुत्रोद्वीपमध्येजगामह ६६तदैवसामृतजलायमुनानिर्विषाअभवत् ६७ ॥ इतिदशमेषोडशः ॥ १६ ॥ ॥ छ ॥ ॥ छ ॥

---

१ भुज्यतइति पाठान्तरम् टीकायामप्येतदेवास्ति । २ सामृतजला इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नागंसप्रदशेनागाल्यंतंनिरयाषयत् । बंगूंश्वदुःस्वतःश्रांतान्सुप्तांस्तत्रदवादपात् ॥ १ ॥ असमंजसंअप्रियम् १ सर्पजनैःसर्पायत्तैर्जनैःउपहार्यैःभक्ष्यपदार्थैःवानस्पत्यःवनस्पतेर्मूलेदेयःनागानांतद्बाधपरिहाराययोबलिःप्राक्निरूपितउपकल्पितः २ तेचनागाःतंस्वंस्वंभागंजनैर्दत्तंसुपर्णायप्रयच्छंति । ततोभीताःगोपीथायरक्षणाय ३ विषवीर्याभ्यांयोमदस्तेनाविष्टःकाद्रवेयःकद्रूपुत्रःगरुडंकदर्थीकृत्यअविगणय्य (तंजनैर्दत्तंबलिंस्वयंबुभुजे) यद्वा उपहार्यैःसुपर्णभक्ष्यैःसर्पाएवजनास्तैर्नागानांसंबंधीयस्मिन्नेकैकोनागोदीयतेतथाभूतोयोबलिःसुपर्णायनिरूपितःतत्रस्वंस्वंभागंसर्वेनागाःप्रयच्छंति । कालियस्तुनप्रयच्छति । किंत्वन्यैर्दत्तमपितंस्वयमेवबुभुजे ४ ५ विषमेवायुधंयस्यसः । प्रत्यभ्ययात्योद्धुंप्रतिजगाम । उच्छ्रितनैकमस्तकःउन्नमितानेकफणःददायुधःदंतायुधः । करालजिह्वश्वासावुच्छ्वसितोग्रलोचनश्चउच्छ्वसितानिउज्जृंभितानिउग्राणिलोचनानियस्यसः ६ (स) तार्क्ष्यपुत्रोगरुडः । मधुसूदनस्यासनंयस्मिन्सः ७ तस्यगरुडस्यागम्यम् । अगाधतयाचदुरासदम् ८ तदगम्यत्वेकारणमाह । तत्रेति । निवारितोपि ९ १० ११ (तत्रत्यानांक्षेमम्) लेलिहःसर्पः । अतस्तत्रावात्सीत् (सचकृष्णेनविवासितःपुनःस्वस्थानंप्रतियापितइत्यर्थः) १२ जाबूनदंसुवर्णंतेनालंकृतम् १३

श्लोकाः १/१३

राजोवाच ॥ नागालयंरमणकंकस्मात्तत्याजकालियः ॥ कृतंकिंवासुपर्णस्यतेनैकेनासमंजसम् १ ॥ शुकउवाच ॥उपहार्यैःसर्पजनैर्मासिमासीहयोबलिः॥ वानस्पत्योमहाभागोनागानांप्राङ्निरूपितः२ स्वंस्वंभागंप्रयच्छंतिनागाःपर्वणिपर्वणि॥गोपीथायात्मनःसर्वेसुपर्णायमहात्मने ३विषवीर्यमदाविष्टःकाद्रवेयस्तुकालियः ॥ कदर्थीकृत्यगरुडंस्वयंतंबुभुजेबलिम् ४ तच्छ्रुत्वाकुपितोराजन्भगवान्भगवत्प्रियः ॥ विजिघांसुर्महावेगःकालियंसमुपाद्रवत् ५ तमापतंतंतरसाविषायुधःप्रत्यभ्ययादुच्छ्रितनैकमस्तकः ॥ दद्भिःसुपर्णंव्यदशद्ददायुधःकरालजिह्वोच्छ्वसितोग्रलोचनः ६ तंतार्क्ष्यपुत्रःसनिरस्यमन्युमान्प्रचंडवेगोमधुसूदनासनः ॥ पक्षेणसव्येनहिरण्यरोचिषाजघानकद्रूसुतमुग्रविक्रमः ७ सुपर्णपक्षाभिहतःकालियोऽतीवविह्वलः ॥ ह्रदंविवेशकालिंद्यास्तदगम्यंदुरासदम् ८ तत्रैकदाजलचरंगरुडोभक्ष्यमीप्सितम् ॥ निवारितःसौभरिणाप्रसह्यक्षुधितोऽहरत् ९ मीनान्सुदुःखितान्दृष्ट्वादीनान्मीनपतौहते ॥ कृपयासौभरिःप्राहतत्रत्यक्षेममाचरन् १० अत्रप्रविश्यगरुडोयदिमत्स्यान्सखादति ॥ सद्यःप्राणैर्वियुज्येतसत्यमेतद्ब्रवीम्यहम् ११ तंकालियःपरंवेदनान्यःकश्चनलेलिहः॥ अवात्सीद्गरुडाद्भीतःकृष्णेनचविवासितः १२ कृष्णंह्रदाद्विहिःक्रांतंदिव्यस्रग्गंधवाससम् ॥ महामणिगणाकीर्णंजांबूनदपरिष्कृतम् १३

चूर्णिका ॥ राजोवाच ॥ ॥ नागालयंरमणकंकस्मात्तत्याजकालियः कृतंकिंवासुपर्णस्यतेनैकेनासमंजसम् १ ॥ श्रीशुकउवाच ॥हेनृपभक्ष्यैः सर्पाधीनैर्जनैः वृक्षमूलेप्रतिमासंनागानांबलिः उपकल्पितः २ तेचनागाः पर्वणि पर्वणि जनैर्दत्तं स्वंस्वंभागं सुपर्णायस्वरक्षार्थंप्रयच्छंति ३ तत्रकालियःगरुडंतुच्छीकृत्यतद्बलिंस्वयंबुभुजे ४ तच्छ्रुत्वाक्रुद्धः गरुत्मान्तंजिघांसुःप्राप्तः ५ तं प्राप्तं दृष्ट्वाकालियः विषायुधः सन्दद्भिः सुपर्णंव्यदशत् ६ तावत्गरुडः क्रुद्धः सन्वामपक्षेणतंजघान ७ तत्पक्षताडितः सर्पःविह्वलःसन्वेगेनागम्ययमुनाह्रदंविवेश ८ तत्रएकदागरुडः भक्ष्यं जलचरंसौभरिणावारितोपिप्रसह्य अहरत् ९ ततः सऋषिः मीनपतौहते दुःखितान्मीनान्दृष्ट्वा आह १० अत्र यदि गरुडः प्राप्य मत्स्यान् खादति तर्हिसद्यः प्राणैर्वियुज्यते एतत् सत्यं ब्रवीमि ११ हे नृपतंकालियः परंवेद नान्यः अतः तत्रगतः ततः सतस्मात्कृष्णेनविवासितः १२ ततः ह्रदात् निर्गतं कृष्णंदिव्यस्रग्गंधवाससंस्वर्णालंकृतंदृष्ट्वा १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

असवइंद्रियाणि । प्रमोदनिभृतात्मानःआनंदपूर्णमनसः १४ लब्धेहालब्धचेष्टाः १५ नगावृक्षाअपिपूर्वंशुष्काःसंतःसद्यएवविरूढाइत्यर्थः १६ तेविप्राऊचुः (पूर्वपुण्येनायंमुक्तःअतइतःपरमपिदानंदेहीति) १७ १८ नष्टलब्धप्रजा । नष्टप्रायापुनर्लब्धाप्रजाययासा १९ श्रमेणचकर्शिताः (क्षुत्तृड्भ्यांयःश्रमस्तेनकर्शिताइतिवा) ऊपकूलतःकूलप्रांते (ऊषुःवासंचक्रुः) २० (निशीथेअर्धरात्रेशुचौग्रीष्मे यद्वनंतदुत्पन्नःसुप्तंव्रजंसर्वतआवृत्य) २१ २२ २३ कालाग्नेःमृत्युरूपादग्नेःनमृत्योर्बिभीमःकिंतुत्वच्चरणवियोगादित्याहुःनशक्नुमइति २४ २५ विमोहानहिदंडेनततःस्वशंरणगतात् । गोपानपादनं तोसावनंतवनवह्नितः १६ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्तदशोध्यायः १७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥८५॥ श्लोकाः १४/२५

उपलभ्योत्थिताःसर्वेलब्धप्राणाइवासवः ॥ प्रमोदनिभृतात्मानोगोपाःप्रीत्याभिरेभिरे १४ यशोदारोहिणीनंदोगोप्योगोपाश्चकौरव ॥ कृष्णंसमेत्यल ब्धेहाआसन्लब्धमनोरथाः १५ रामश्चाच्युतमालिंग्यजहासास्यानुभाववित् ॥ नगागावोवृषावत्सालेभिरेपरमांमुदम् १६ नंदंविप्राःसमागत्यगुरवःस कलत्रकाः ॥ ऊचुस्तेकालियग्रस्तोदिष्ट्यामुक्तस्तवात्मजः १७ देहिदानंद्विजातीनांकृष्णनिर्मुक्तिहेतवे ॥ नंदःप्रीतमनाराजन्गाःसुवर्णंतथादिशत् १८ यशोदापिमहाभागानष्टलब्धप्रजासती ॥ परिष्वज्यांकमारोप्यमुमोचाश्रुकलांमुहुः १९ तांरात्रिंतत्रराजेंद्रक्षुत्तृड्भ्यांश्रमकर्शिताः ॥ ऊषुर्व्रजौकसोगावः कालिंद्याउपकूलतः २० तदाशुचिवनोद्भूतोदावाग्निःसर्वतोव्रजम् ॥ सुप्तंनिशीथआवृत्यप्रदग्धुमुपचक्रमे ॥ ततउत्थायसंभ्रांतादह्यमानाव्रजौकसः ॥ कृ ष्णंययुस्तेशरणंमायामानुषमीश्वरम् २२ कृष्णकृष्णमहाभागहेरामामितविक्रम ॥ एषघोरतमोवह्निस्तावकान्ग्रसतेहिनः २१ सुदुस्तरान्नःस्वान्पाहि कालाग्नेःसुहृदःप्रभो ॥ नशक्नुमस्त्वच्चरणंसंत्यक्तुमकुतोभयम् २४ इत्थंस्वजनवैक्लव्यंनिरीक्ष्यजगदीश्वरः ॥ तमग्निमपिबत्तीव्रमनंतोऽनंतशक्तिधृक् २५ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्तदशोऽध्यायः १७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

उत्थायगोपाः आनंदपूर्णमनसः संतः कृष्णं अभिरेभिरे १४ ततयशोदारोहिणीनंदःगोप्योगोपाश्चलब्धमनोरथाआसन् १५रामश्चतं आलिंग्यजहास वृक्षाः गवादयश्चमुदंले भिरे १६ ततोविप्राः सस्त्रीकाः नंदंएत्यऊचुःहेनंदतेसुतः सर्पग्रस्तोपिमुक्तः एतत्दिष्ट्या १७अतः विप्रेभ्यः दानंदेहि ततोनंदःप्रीतः सन् सुवर्णं गाश्चददौ १८ तदायशोदापि कृष्णं परिष्वज्य अंकमारोप्य अश्रुकलांमुमोच १९ हेनृप सर्वेव्रजौकसःगावश्च तांरात्रिंक्षुत्तृड्भ्याताः संतः यमुनातीरेऊषुः २० तदाशुचिवनोत्पन्नः अग्निः सुप्तंव्रजजनंनि शीथेसर्वतोव्याप्यतंदग्धुंउपचक्रमे २१ ततस्तेदह्यमानाः जनाः मायामनुजंकृष्णं शरणंप्राप्यआहुः २२ कृष्णकृष्णमहाभागहेरामामितविक्रम एषघोरतमोवह्निस्तावका न्ग्रसतेहिनः २३ अतः अस्मात्कालाग्नेः नः पाहि त्वच्चरणंत्यक्तुंवयंनशक्नुमः २४ इत्थंस्वजनवैक्लव्यंनिरीक्ष्यजगदीश्वरः तमग्निमपिबत्तीव्रमनंतोनंतशक्तिधृक् २५ ॥ इ तिदशमेसप्तदशः १७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

१ स्वंशरणागतान् इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अष्टादशेततोग्रीष्मेवसंतगुणलक्षिते । अघातयद्बलेनालंप्रलंबंलीलयाहरिः॥ १ ॥कृत्वानृत्यंफणाग्रेषुकालियस्यसकौतुकम् ।बलंप्रलंबतुंगांसमारोहयदमित्रहा॥२॥(गोकुलमंडितंगवांसमूहेनभूषितम्) १ गोपालच्छद्ममाययागोपालत्वमेवछद्मयस्यांतया २३ वसंतसाम्यमाहचतुर्भिः । यत्रग्रीष्मेपिनिर्झराणांनिह्रादेनघोषेणनिवृत्तस्वनाःछन्नध्वनयोझिल्लिकाःकठोरध्वनिसूक्ष्मकीटायस्मिन्तथाभूतंवृंदावनंभवति किंचशश्वत्तेषांनिर्झराणांशीकरैरंबुकणैःऋजीषाःस्निग्धायेद्रुमास्तेषांमंडलेनमंडितम् ४ यत्रग्रीष्मेवनेवा (सरिन्नदी।प्रस्रवणंउत्सःतदूर्मिस्पर्शिनावायुना । कथंभूतेनकह्लाराणिसौगंधिकानि । कंजानिपद्मानिउत्पलानिकुवलयानितेषांरेणून्हरतीतितथातेनदवस्तापोनविद्यते) निदाघोग्रीष्मःतेनतत्कालीनवह्न्यर्काभ्यांचभवतियस्तादृश. । अतिशाद्वलेअतिहरिततृणाकीर्णे । यद्वा अतिक्रांतशाद्वलेपिस्थाने ५ ननुशाद्वलमेवकुतस्त्यंतत्राह । अगाधेति । अगाधानितोयानियासांतासांह्रदिनीनांतटस्पर्शिभिरूर्मिभिःपुलिनैःसहद्रवत्पुरीषंपंकोयस्याः (साद्रवत्पुरीषी) तस्याभुवःरसंशाद्वलितंशाद्वलरूपतांच विषवदुल्वणाअपिसूर्यरश्मयोनगृह्णतेनहरंतियत्र ६ तद्वनं (इत्युत्तरश्लोकस्थेनतच्छब्देनान्वयः) नदंताश्चित्रामृगाद्विजाःपक्षिणश्चयत्र । गायंतोमयूराभ्रमराश्चयस्मिन् । कूजंतःकोकिलाःसारसाश्चयस्मिन् ७ ततअविशत् ८ ९ (वेणुभिःपाणितलैश्चअवादयत्) १० (कृष्णंरामंचेडिरे) ११ काकपक्षाश्चूडाकरणात्प्राक्तनकेशाः । भ्रमणादिप्रकारैःनियुद्धेनबाहुयुद्धेनएवंक्रीडाभेदैश्चिक्रीडतुः १२

॥८६॥

॥श्रीशुकउवाच ॥अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः॥ अनुगीयमानोन्यविशद्व्रजंगोकुलमंडितम् १ व्रजेविक्रीडतोरेवंगोपालच्छद्ममायया॥ग्रीष्मोनामर्तुरभवन्नातिप्रेयान्शरीरिणाम् २ सचवृंदावनगुणैर्वसंतइतिलक्षितः॥ यत्रास्तेभगवान्साक्षाद्रामेणसहकेशवः ३यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझिल्लिकम्॥ शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितम् ४ सरित्सरःप्रस्रवणोर्मिवायुनाकह्लारकंजोत्पलरेणुहारिणा॥ नविद्यतेयत्रवनौकसांदवोनिदाघवह्न्यर्कभवोतिशाद्वले ५ अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याःपुलिनैःसमंततः॥ नयत्रचंडांशुकराविषोल्बणाभुवोरसंशाद्वलितंचगृह्णते ६ वनंकुसुमितंश्रीमन्नदच्चित्रमृगद्विजम्॥गायन्मयूरभ्रमरंकूजत्कोकिलसारसम् ७ क्रीडिष्यमाणस्तत्कृष्णोभगवान्बलसंयुतः॥ वेणुंविरणयन्गोपैर्गोधनैःसंवृतोऽविशत् ८प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः॥ रामकृष्णादयोगोपाननृतुर्युयुधुर्जगुः ९ कृष्णस्यनृत्यतःकेचिज्जगुःकेचिदवादयन्॥ वेणुपाणितलैःशृंगैःप्रशशंसुरथापरे १० गोपजातिप्रतिच्छन्नादेवागोपालरूपिणः॥ईडिरेकृष्णरामौचनटाइवनटंनृप ११ भ्रामणैर्लंघनैःक्षेपैरास्फोटनविकर्षणैः॥ चिक्रीडतुर्नियुद्धेनकाकपक्षधरौक्वचित् १२

श्लोकाः १/१२

चूर्णिका

॥ श्रीशुकउवाच ॥ ॥ अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः अनुगीयमानोन्यविशद्व्रजंगोकुलमंडितम् १ एवंव्रजेगोपालनछद्मयामाययातयोःक्रीडतोःसतोः जीवानांनातिप्रियः ग्रीष्मऋतुः अभवत् २ सः वृंदावनगुणैः वसंतइवलक्षितः यत्रसरामः कृष्णः आस्ते ३ तस्यवसंतसाम्यमाह यत्रग्रीष्मेनिर्झरनादेनगतझिल्लीस्वनं वृंदावनं भवति किंच तेषांअंबुकणैः येस्निग्धद्रुमाःतैर्मंडितमिति ४ यत्रवने मंदसुगंधशीतवायुनावनस्थानांनिदाघवह्न्यर्कभवः तापः नविद्यते५किंच यत्रसूर्यकराः विषवदुल्वणाः भुवः रसंनगृह्णते ६ एवंकुसुमितं गायन्मयूरभ्रमरंकूजत्कोकिलसारसंवनंदृष्ट्वा ७ क्रीडेच्छुःसबलः गोपालगोधनैर्युतः कृष्णः वेणुंवादयन्तत्प्रविवेश ८ ततः प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः रामकृष्णादयोगोपाननृतुर्युयुधुर्जगुः ९ एवंकृष्णस्यनृत्यतः केचित्जगुः केचित् वेणुपाणितलशृंगैः अवादयन् अपरे प्रशशंसुः १० एवं गोपजातिच्छन्नाः देवाः गोपालरूपिणः तौईडिरे११ ततःतौकाकपक्षधरौसंतौभ्रामणलंघनास्फोटनाकर्षणैःबाहुयुद्धेनचिक्रीडतुः १२

॥८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका १३ कुंभैःकुंभवृक्षफलैः । अस्पृश्यत्वंनेत्रबंधश्चतदाद्यैःमृगाणांखगानांचचेष्टया १४ दर्दुरप्लवैर्मंडूकप्लुतिभिः । स्यंदोलिकयादोलालंबनेननृपाणामिवलीलया १५ नद्यःअद्रिद्रोणयःकुंजानिचएतेषु (कान नेषुगहनेषु) १६ चारयतोःसतोःतद्वनेतस्मिन्वने । तयोर्जिहीर्षया १७ १८ यथायथंवयोबलाद्यनुरूपंद्वंद्वीभूय ,१९ परिवृढौनायकौ । तत्रकेचनकृष्णसंघट्टिनःकृष्णपक्षीयाः (अपरेरामस्यसंघट्टिनः) २० (यत्रयासुक्रीडासुजेतारआरोहंतिपराजितास्तान्वहंति) २१ वाह्यमानाःपृष्ठेनोह्यमानाः २२ (यर्हियदाजयिनोबभूवुस्तदातांस्तानूऊहुर्वहंतिस्म) २३ २४ कृष्णदृष्टिवंचनाय । अवरुह्यतेऽस्मि न्नित्यवरोहणंमर्यादाततःपरंदूरमगात् २५ धरणिधरेंद्रवद्गौरवंयस्यतम् (रामम्)निजंआसुरंवपुरास्थितः पुरटपरिच्छदःसुवर्णालंकारः । तडिद्द्युमान्विद्युद्दीप्तिमान्इत्यलंकारोपमा उडुपतिवाडितिरा मोपमा । उडुपतिंवहतीत्युडुपतिवाट् । यदियथोचितस्थानेषुस्थिताविद्युतोभवंति उपरिचोडुपतिःतदासौंबुदोयथाभातितद्वद्बभावित्यर्थः (विगतरयःभारेणकुंठितवेगइत्यर्थः)२६ ॥१८॥

॥८७॥ क्वचिन्नृत्यत्सुचान्येषुगायकौवादकौस्वयम् ॥ शशंसतुर्महाराजसाधुसाध्वितिवादिनौ १३ क्वचिद्बिल्वैःक्वचित्कुंभैःक्वचामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबं श्लोकाः
धाद्यैःक्वचिन्मृगखगेहया १४ क्वचिच्चदर्दुरप्लावैर्विविधैरुपहासकैः ॥ कदाचित्स्यंदोलिकयाकर्हिचिन्नृपचेष्टया १५एवंतौलोकसिद्धाभिःक्रीडाभिश्चेरतुर्वने ॥
नद्यद्रिद्रोणिकुंजेषुकाननेषुसरस्सुच १६ पशूंश्चारयतोर्गोपैस्तद्वनेरामकृष्णयोः ॥ गोपरूपीप्रलंबोऽगादसुरस्तज्जिहीर्षया १७ तंविद्वानपिदाशार्होभगवा १३/२६
न्सर्वदर्शनः॥ अन्वमोदततत्सख्यंवधंतस्यविचिंतयन् १८ तत्रोपाहूयगोपालान्कृष्णःप्राहविहारवित्॥हेगोपाविहरिष्यामोद्वंद्वीभूययथायथम् १९तत्रचक्रुः
परिवृढौगोपारामजनार्दनौ ॥ कृष्णसंघट्टिनःकेचिदासन्रामस्यचापरे २० आचेरुर्विविधाःक्रीडावाह्यवाहकलक्षणाः ॥ यत्रारोहंतिजेतारोवहंतिचपराजि
ताः २१ वहंतोवाह्यमानाश्चचारयंतश्चगोधनम् ॥ भांडीरकंनामवटंजग्मुःकृष्णपुरोगमाः२२रामसंघट्टिनोयर्हिश्रीदामवृषभादयः ॥क्रीडायांजयिनस्तांस्ता
नूहुःकृष्णादयोनृप २३ उवाहकृष्णोभगवान्श्रीदामानंपराजितः॥वृषभंभद्रसेनस्तुप्रलंबोरोहिणीसुतम् २४अविषह्यंमन्यमानःकृष्णंदानवपुंगवः ॥ वहन्
द्रुततरंप्रागादवरोहणतःपरम् २५ तमुद्वहन्धरणिधरेंद्रगौरवंमहासुरोविगतरयोनिजंवपुः॥समास्थितःपुरटपरिच्छदाबभौतडिद्द्युमानुडुपतिवाडिवांबुदः २६

चूर्णिका क्वचित्अन्येषुनृत्यत्सुस्वयंगायकवादकौभूत्वासाध्वितिशशंसतुः १३ क्वचित् रामकृष्णौबिल्वैः कुंभैः आमलकमुष्टिभिः अस्पृश्यनेत्रबंधादिनाचिक्रीडतुःक्वचित् मृगखगचे ष्टया१४क्वचित् दर्दुरप्लुतिभिः क्वचित् दोलालंबनेन क्वचित् नृपलीलया १५ एवंतौक्रीडाभिः वनेनद्यद्र्यादिषुकाननेषुसरस्सुचचेरतुः१६एवंगोपैःसहतद्वनेतयोः पशून्चारय तोः सतोः तावत्गोपरूपीप्रलंबासुरः प्राप्तः १७ तंविद्वानपितद्वधोपायंविचिंत्यतेनसख्यंअन्वमोदत १८ ततःकृष्णः गोपान् आहूयआह हे गोपाः द्वंद्वीभूय वयआ द्यनुरूपं विहरिष्यामः १९ तत्रगोपाःरामकृष्णौनायकौचक्रुः तत्रकेचित्कृष्णपक्षीयाःअन्येरामपक्षीयाः आसन् २० ततः वाह्यवाहकलक्षणाः क्रीडाश्चक्रुः यत्रक्री डायांजेतारः आरोहंति पराजिताः वहंति २१ एवंवहंतोवाह्यमानाः गोपाः गोधनंचारयंतसंतः भांडीरकं नामवटंजग्मुः २२ यदारामपक्षीयाः श्रीदामवृषभादयःक्रीडायां ॥८७॥
जयिनः जाताः अतः कृष्णपुरोगमाः तानूहुः २३ तत्र श्रीकृष्णः श्रीदामानंउवाह वृषभंभद्रसेनः प्रलंबः रामंउवाह २४ ततः स दैत्यः असह्यं कृष्णंमत्वारामंवह न् मर्यादातः परंदूरंप्रागात् २५ ततः पर्वतवत्गुरुतंरामंवहन् दैत्यः स्ववपुःआस्थितःसुवर्णालंकृतः मेघवत्बभौ २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्वलंत्यः शिखाकेशायस्मिंस्तत् २७ आगत
अलंअतिवेगेन (चरत्) प्रदीप्तेदृशौयस्मिन्वपुषितत् । भ्रुकुटितटसंलग्नाउग्रादंष्ट्रायस्मिन्तत् यद्वा प्रदीप्तनेत्रंभ्रुकुटितटंयस्मिन्उग्रादंष्ट्रायस्मिन्तच्चतच्चेति । वज्ररंहसावज्रवेगेनमुष्टिना २८ अपस्मृतः गतस्मृतिः महारवं
स्मृतिरभयइवआत्मनःसार्थंगोपसमूहंविहाय (आत्मानम्) हरंतंरिपुंअहनत् । यद्वाविहायसागगनमार्गेणआत्मनःप्राप्तंअर्थमिवहरंतमिति । ॥ ऊनविंशेनिविष्टंतुगो
समीरयन् २९ ३० तदर्हणंप्रशंसार्हम् ३१ (परमनिर्वृताःअतिप्रमुदिताः) ३२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांअष्टादशोऽध्यायः १८ ॥ ॥ ७ ॥
पगोकुलमच्युतः । मुंजारण्यमरण्याग्नेररक्षतान्निपानतः । दूरचारिणीःदूरचारिण्यः (गह्वरंगहनम्) १ वनाद्वनांतरंनिर्विशंत्योदावेनतर्षिताःतृषिताःक्रंदंत्यःईषिकाटवींअत्युच्छ्रितघनतृणविशेषारण्यंनिर्विवि
शुः २ कृष्णरामावादीयेपांतेनतुतौ ३ तासांगवांखुरैर्दद्भिश्छिन्नैस्तृणैर्गोष्पदैरंकितैश्चभूप्रदेशैर्गवांमार्गमन्वगमन् । नष्टाजीव्यागतजीविकासाधनाः ४ मुंजाटव्यपिसैवयाइषीकाटवी (तत्रक्रंदमानम्) ५ ६

॥८८॥ निरीक्ष्यतद्वपुरलमंबरेचरत्प्रदीप्तदृक्भ्रुकुटितटोग्रदंष्ट्रकम् ॥ ज्वलच्छिखंकटककिरीटकुंडलत्विषाद्भुतंहलधरईषदत्रसत् २७ अथागतस्मृतिरभयोरिपुंबलो
विहायसार्थमिवहरंतमात्मनः ॥ रुषाहनच्छिरसिदृढेनमुष्टिनासुराधिपोगिरिमिववज्ररंहसा २८ सआहतःसपदिविशीर्णमस्तकोमुखाद्वमन्रुधिरमपस्मृतो
ऽसुरः ॥ महारवंव्यसुरपतत्समीरयन्गिरिर्यथामघवतआयुधाहतः २९ दृष्ट्वाप्रलंबंनिहतंबलेनबलशालिना ॥ गोपाःसुविस्मिताआसन्साधुसाध्वितिवादि
नः ३०आशिषोऽभिगृणंतस्तंप्रशशंसुस्तदर्हणम् ॥ प्रेत्यागतमिवालिंग्यप्रेमविह्वलचेतसः ३१ पापेप्रलंबेनिहतेदेवाःपरमनिर्वृताः ॥ अभ्यवर्षन्बलंमाल्यैः
शशंसुःसाधुसाध्विति ३२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेऽष्टादशोऽध्यायः १८ ॥ शुकउवाच ॥ क्रीडासक्तेषुगोपेषुतद्गावोदूरचारिणीः ॥ स्वैरंचरं
त्योविविशुस्तृणलोभेनगह्वरम् १ अजागावोमहिष्यश्चनिर्विशंत्योवनाद्वनम् ॥ इषीकाटवींविविशुःक्रंदंत्योदावतर्षिताः २ तेपश्यंतःपशून्गोपाःकृष्णरामादय
स्तदा॥ जातानुतापानविदुर्विचिन्वंतोगवांगतिम् ३ तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवाम् ॥ मार्गमन्वगमन्सर्वेनष्टाजीव्याविचेतसः ४ मुंजाटव्यांभ्रष्टमा
र्गंक्रंदमानंस्वगोधनम् ॥ संप्राप्यतृषिताःश्रांतास्ततस्तेसंन्यवर्तयन् ५ ताआहूताभगवतामेघगंभीरयागिरा ॥ स्वनाम्नांनिनदंश्रुत्वाप्रतिनेदुःप्रहर्षिताः ६

श्लोकाः २७/६

चूर्णिका अथप्राप्तस्मृतिः निर्भयः रामः आत्मानंगृह्णंतं दैत्यंरुषादृढमुष्टिनाशिरसि
ततः अंबरेचरत्तद्वपुः प्रदीप्तदृक्भ्रुकुटितटोग्रदंष्ट्रकंज्वलत्शिखंदृष्ट्वारामः ईषदत्रसत् ॥ २७ एवंरामेणनिहतं प्रलंबंदृष्ट्वागोपः साध्वित्युक्त्वाविस्मि
अहनत् २८ ततः सः सपदिभग्नमस्तकः मुखात्रक्तंवमन् महारवंकुर्वन्व्यसुः अपतत् वज्रहतः गिरिरिव २९ अभ्यवर्षन्बलंमाल्यैःशशंसुःसाधुसा
ताः आसन् ३० ततः आशिषः गृणंतः प्रेत्यागतमिवालिंग्यप्रेमविह्वलचेतसोबभूवुः ३१ पापेप्रलंबेनिहतेदेवाःपरमनिर्वृताः ॥ क्रीडासक्तेषुगोपेषुतद्गावोदूरचारिणीः स्वैरंचरंत्योविविशुस्तृणलो
ध्विति ३२ ॥ इतिदशमेअष्टादशः ॥ १८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ततः कृष्णरामादयोगोपाः पशून् अदृष्ट्वातद्गतिंविचिन्वंतोपिनविदुः ३
भेनगह्वरम् १ अजागावोमहिष्यश्चवनाद्वनंविशंत्यःदावतर्पिताःसत्यः इषीकाटवींविविशुः २ ततः तेगोपाः मुंजाटव्यांक्रंदमानं स्वगोधनंप्राप्यतृषिताः संतः सन्यवर्तयन्
ततः तासांखुरैः दद्भिश्चछिन्नतृणैः गोष्पदैश्चअंकितभूप्रदेशैश्चगवांमार्गं अन्वगमन् ४
५ तदाकृष्णेनागिराआहूताः स्वनामध्वनिंश्रुत्वाप्रतिनेदुः ६

॥८८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वनौकसांगोपानांनाशहेतुः (वनधूमकेतुः) वनवह्निःसमंततःसर्वतःप्रादुरभूत् । सारथिना।वायुना ७ (संसारभयपीडिताहरिंमुकुंदंयथा) ८ ९ १० ११ कृच्छ्राद्द्वन्द्वहरमवेशवृट्श्रमादिजनितात् (तत्क्षणमेवभांडीरंनीत्वातानमोचयादित्यर्थः) १२ क्षणेनैवभांडीरंमापितास्तत्राक्षीण्युन्मील्य (आत्मानंमोचितंगाँश्चमोचितानिशाम्य) विस्मिता (आसन्) १३ (कृष्णंअमरंमेनिरे .) १४ १५ १६ श्रीदामादिस्वगोपानांस्वांगमारुह्यहृष्यताम् । स्वैश्वर्यमाविरकरोद्वनवह्निनिपानतः १७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोनविंशतितमोध्यायः ॥ १९ ॥ ॥ ७ ॥ विशेषावृट्शरच्छोभावर्णनेनवनोचिताः । मावृट्क्रीडानिरूप्यंतेगोपरामयुजोहरेः ॥ १ ॥ हेयादेयोपमानेनप्रावृट्शरदृतुश्रियोः । वर्णनंत्वद्भुतैश्वर्यकृष्णलीलाविवक्षया १ २

॥८९॥

ततःसमंताद्वनधूमकेतुर्यदृच्छयाऽभूत्क्षयकृद्वनौकसाम् ॥ समीरितःसारथिनोल्बणोल्मुकैर्विलेलिहानःस्थिरजंगमान्महान् ७ तमापतंतंपरितोदवाग्निंगोपाश्चगावःप्रसमीक्ष्यभीताः ॥ ऊचुश्चकृष्णंसबलंप्रपन्नायथाहरिंमृत्युभयार्दिताजनाः ८ कृष्णकृष्णमहावीर्यहेरामामितविक्रम ॥ दावाग्निनादह्यमानान्प्रपन्नांस्त्रातुमर्हथः ९ नूनंत्वद्बांधवाःसर्वेनचार्हंत्यवसीदितुम् ॥ वयंहिसर्वधर्मज्ञत्वन्नाथास्त्वत्परायणाः १० ॥ ॥ शुकउवाच ॥ ॥वचोनिशम्यकृपणंबंधूनांभगवान्हरिः॥निमीलयतमाभैष्टलोचनानीत्यभाषत ११ तथेतिमीलिताक्षेषुभगवानग्निमुल्बणम् ॥ पीत्वामुखेनतान्कृच्छ्राद्योगाधीशोऽमोचयत् १२ ततश्चतेक्षिण्युन्मील्यपुनर्भांडीरमापिताः ॥ निशाम्यविस्मिताआसन्नात्मानंगाश्चमोचिताः १३ कृष्णस्ययोगवीर्यंतद्योगमायानुभावितम् ॥ दावाग्नेरात्मनःक्षेमंवीक्ष्यतेमेनिरेमरम् १४ गाःसंनिवर्त्यसायाह्नेसहरामोजनार्दनः ॥ वेणुंविरणयन्गोष्ठमगाद्गोपैरभिष्टुतः १५ गोपीनांपरमानंदआसीद्गोविंददर्शने ॥ क्षणंयुगशतमिवयासांयेनविनाऽभवत् १६ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेदावाग्निपानंनामएकोनविंशतितमोध्यायः १९ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ तयोस्तदद्भुतंकर्मदावाग्नेर्मोक्षमात्मनः ॥ गोपाःस्त्रीभ्यःसमाचख्युःप्रलंबवधमेवच १ गोपवृद्धाश्चगोप्यश्चतदुपाकर्ण्यविस्मिताः ॥ मेनिरेदेवप्रवरौकृष्णरामौव्रजंगतौ २

श्लोकाः ७/२

चूर्णिका

तावत्ततः समंताद्वनधूमकेतुः उल्मुकैः स्थिरजंगमान् लेलिहानः प्रादुरभूत् ७. तंदावाग्निंदृष्ट्वागोपाःगावश्चसबलंकृष्णंऊचुः ८ हेकृष्णहेकृष्णहेराम नः आग्निनादह्यमानान्त्रातुं अर्हथः ९ हेकृष्णत्वद्बांधवाः अवसादितुंनार्हंतिवयंहित्वन्नाथाः स्म १० ॥ श्रीशुकउवाच ॥ हेनृपश्रीकृष्णः बंधूनांदीनंवचः श्रुत्वाआह हेगोपाः माभैष्टनेत्राणिनिमीलयत ११ तथेत्युक्त्वामीलिताक्षेषुतेष्वग्निंपीत्वातान्कृच्छ्रात्व्यमोचयत् १२ ततश्चते गोपाअक्षीणिउन्मील्यभांडीरंप्रापिताः संतः हरेः कर्मनिशम्य विस्मिताः आसन् १३ ततः एवंकृष्णस्ययोगवीर्यंदावाग्नेः आत्मनःक्षेमंचदृष्ट्वातेगोपाः कृष्णंदेवंमेनिरे १४ ततः सायाह्नेसरामः कृष्णःगोपैःस्तुतःसन्गाः निर्वर्त्यवेणुंवादयन्व्रजंविवेश १५ गोपीनांपरमानंदआसीद्गोविंददर्शने क्षणंयुगशतमिवयासांयेनविनाभवत् १६ ॥ इतिदशमेएकोनविंशः ॥ १९ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥तयोस्तदद्भुतंकर्मदावाग्नेर्मोक्षमात्मनः गोपाःस्त्रीभ्यःसमाचख्युःप्रलंबवधमेवच १ ततः एवंतयोरद्भुतं कर्मश्रुत्वागोपागोप्यश्चकृष्णरामौ देवश्रेष्ठौमेनिरे २

॥८९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रप्रावृड्वर्णनंततइत्यादिद्वाविंशत्या । सर्वेषांप्राणिनांसमुद्भवउत्पत्तितोजीवनतश्चयस्यांसाप्रावृट् । विद्योतमानाःपरिधयःपरिवेषादिशोभायस्यांसा । विस्फूर्जितंसंक्षुभितंनभस्तलंयस्यांसा ३ सांद्रैर्नीलैर्नीलांबुदैर्विद्युद्गर्जितसहितैराच्छन्नम् (अस्पष्टज्योतिःअस्पष्टग्रहतारकंव्योमबभौ । किमिव) सगुणंगुणैराच्छन्नंजीवाख्यम् (ब्रह्मेवतदपिअस्पष्टप्रकाशम्) विद्युद्गर्जितांबुदानांसत्त्वरजस्तमोभिरुपमा ४ पर्जन्यःसूर्यःस्वगोभिःनिजरश्मिभिःकालेयथोचितसमये (उदमयंजलरूपम्) अत्रराजोपमा (समये) करादानतःसमयेपुनर्दानतश्चसूचिता५अस्यविश्वस्यप्रीणनंआप्यायनकरंजीवनमुदकंमुमुचुःरूपालवोयथातप्तम् (तापत्रयेण) जनंनिरीक्ष्यानुकंपमानास्तदाप्यायनायस्वजीवनमपित्यजंति । तद्वन्महांतोमेघास्तडिन्नेत्रैस्तप्तंनिरीक्ष्यविश्वंवायुभिर्वेपिताजीवनंमुमुचुरिति ६ तपसाग्रीष्मेणकृशादेवमीढापर्जन्यसिक्ताः(मिहसेचनेधातुः) वर्षीयसीउच्छूनापुष्टा (आसीत्) काम्यंतपोयस्यतस्यतनूःकामान्संप्राप्ययथेति । सापिदेवैःफलदानेनसिक्ता ७ ८ नित्यकर्मावसानेआचार्यनिनदंश्रुत्वाताच्छिष्यायथाअधीयते । तद्वदिति (मंडूकाइतरकालेतूष्णींशेरतेवर्षासुशब्दंकुर्वंति । ब्राह्मणाअपिनित्यकर्मादिनियमेमौनमाचरंतितदत्ययेपठंतिवेदमितिस्पष्टम्) ९ अनुशुष्यतीःअनुशुष्यंत्यःअस्वतंत्रस्यइंद्रियाधीनस्यस्वतंत्रस्यनिरंकुशस्येतिवा १० हरिभिर्नीलैःशष्पैर्बालतृणैर्नीलवर्णाक्वचित्क्वचिदिंद्रगोपैःकीटविशेषैर्लोहितातत्रतत्रउच्छिलींध्रैःछत्राकारैःउद्भिज्जैःकृतच्छायाभूर्नृणांराज्ञांश्रीःसेनारूपासंपदिव (सापितत्तद्वर्णैर्हरिभिरश्वैःहरितालोहिताछत्रैश्चकृतच्छायाभवति) ११ क्षेत्राणीतितदाहिवृष्टेरविच्छेदेलसंतःप्रियंग्वादयोमुदंददतिविच्छेदेशुष्यंतोऽनुतापंचेति (धनिनांचधनानिदैववशात्क्षयवृद्धिभ्यांउपतापंमुदंचयथाददतीतिदैवाधीनमजानतामित्युभयविशेषणम् १२ अबिभ्रत्अबिभरुः । यथाहरिंनिषेवयेतिहरिसेवायांप्रवृत्ताहिसद्यएवसर्वेरुचिराभवंतितस्याःपरमधर्मत्वात्परमसुखत्वाच्चतद्वदिति १३

श्लोकाः ३/१३

ततःप्रावर्ततप्रावृट्सर्वसत्त्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ३ सांद्रनीलांबुदैर्व्योमसविद्युत्स्तनयित्नुभिः ॥ अस्पष्टज्योतिराच्छन्नंब्रह्मेवसगुणंबभौ ४ अष्टौमासान्निपीतंयद्भूम्याश्चोदमयंवसु ॥स्वगोभिर्मोक्तुमारेभेपर्जन्यःकालआगते ५ तडित्वंतोमहामेघाश्चंडश्वसनवेपिताः ॥ प्रीणनंजीवनंह्यस्यमुमुचुःकरुणाइव ६ तपःकृशादेवमीढाआसीद्वर्षीयसीमही ॥ यथैवकाम्यतपसस्तनुःसंप्राप्यतत्फलम् ७ निशामुखेषुखद्योतास्तमसाभांतिनोग्रहाः ॥ यथापापेनपाषंडानहिवेदाःकलौयुगे ८ श्रुत्वापर्जन्यनिनदंमंडूकाव्यसृजन्गिरः ॥तूष्णींशयानाःप्राग्यद्वद्ब्राह्मणानियमात्यये९ आसन्नुत्पथवाहिन्यःक्षुद्रनद्योनुशुष्यतीः॥पुंसोयथाऽस्वतंत्रस्यदेहद्रविणसंपदः १०हरिताहरिभिःशष्पैरिंद्रगोपैश्चलोहिता॥उच्छिलींध्रकृतच्छायानृणांश्रीरिवभूरभूत् ११क्षेत्राणिसस्यसंपद्भिःकर्षकाणांमुदंददुः ॥ धनिनामुपतापंचदैवाधीनमजानताम् १२जलस्थलौकसःसर्वेनववारिनिषेवया॥ अबिभ्रद्रुचिरंरूपंयथाहरिनिषेवया १३

चूर्णिका

ततः सर्वप्राणिसमुद्भवाप्रावृट्प्रवृत्ता कथंभूतासाक्षुब्धनभस्तला ३ तदामेघैः व्योमगुणैः व्याप्तंजीवब्रह्मेव बभौ ४ तदासूर्यः गोभिः अष्टौमासानूपीतंयद्भूमेः उदकमयंवसु तत् मोक्तुं आरेभे ५ किंच मेघाः अस्यप्राणनंजलं करुणा इवमुमुचुः ६ तदाचमहीपुष्टा आसीत् ७ किंच निशामुखेषुखद्योताः नभांति नग्रहाः यथाकलौपापेन पाखंडाः नवेदाः तद्वत् ८ किंच पर्जन्यध्वनिं श्रुत्वामंडूकाः शब्दान्चक्रुः गुरुध्वनिंश्रुत्वाशिष्याः यथाअधीयतेतद्वत् ९ किंच क्षुद्रनद्यः उत्पथवाहिन्यः आसन् इंद्रियाधीनपुंसः द्रव्यसंपदइव १० किंच हरित्तृणैः इंद्रगोपैश्चहरितारक्ताचभूः राज्ञांसेनेवअभूत् ११ क्षेत्राणि सस्यसंपद्भिः कर्षकाणांमुदंददुः धनिनामुपतापंचदैवाधीनमजानताम् १२ किंच सर्वेप्राणिनः नवोदकसेवयारुचिरंरूपंदधुः यथाहरिसेवयाभक्ताः १३

॥९०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कामाक्तंकामवासनायुक्तमितिश्वसनोर्मिसाम्यम् । गुणैर्विषयैर्युज्यतइति (तथाइति) सरित्संगतिसाम्यम् १४ अधोक्षजेएवचेतोयेषांते (व्यसनैर्विपद्भिः) १५ असंस्कृताअक्षुण्णाः । नाभ्यस्यमानाइत्यसंस्कृतसाम्यम् । कालेनचाहताइतितृणाच्छादनसाम्यम् १६ यथाकामिन्यःपुंश्चल्यः १७ निर्गुणंज्यारहितमपिगुणिनिगर्जितशब्दवतिअभात्अशोभत (महेंद्रस्येदंमाहेंद्रं'इंद्रायुधंशक्रधनु'रित्यभिधानम्) गुणव्यतिकरात्मकेव्यक्तेप्रपंचेअगुणवान्निर्गुणःपुरुषोयथेति १८ स्वभासाभासितयाऽहंमत्येतिस्वचैतन्येनैवप्रकाशितेनअहंकारेणच्छन्नोजीवोयथा यद्वा अहंविद्वान्दातावेत्ताशूरइतिस्वमतीत्यैवारोपितयेति १९ मेघागमेनोत्सवोयेषाम् (ते) अतोहृष्टाः २० (पादपावृक्षाःपद्भिर्मूलैः) नानात्ममूर्तयः अनेकरूपदेहाः(पुष्पशाखापल्लवाद्युपलक्षितमूर्तयइत्यर्थः। यद्वा नानाशब्दोविभववाची । तेनपुष्टिर्लक्ष्यते) २१ अशांतानिपंककंटकादियुक्तानिरोधांसितटानियेषांतेष्वपि (सरस्सु) न्यूषुःनितरामवसन् । सारसाश्चक्रवाकाः (अशांतकृत्येषु) अशांतानिघोराणिअनुपरतानिवाकृत्यानियेषुतेष्वपिगृहेषु (मूढाइव) २२ ईश्वरेइंद्रे २३ नुन्नाःप्रेरिताः । आशिषःकामान् । विश्पतयोराजानःवणिजांपतयोवा । द्विजेरिताःपुरोहितैरुक्ताः २४ प्रावृषिकृताःक्रीडावर्णयति एवंवनमितिसप्तभिः । वर्षिष्ठंसमृद्धम्२५

॥९१॥

श्लोकाः १४/२५

सरिद्भिःसंगतःसिंधुश्चुक्षुभेश्वसनोर्मिमान् ॥ अपक्वयोगिनश्चित्तंकामाक्तंगुणयुग्यथा १४ गिरयोवर्षधाराभिर्हन्यमानानविव्यथुः ॥ अभिभूयमानाव्यसनैर्यथाधोक्षजचेतसः १५ मार्गाबभूवुःसंदिग्धास्तृणैश्छन्नाह्यसंस्कृताः ॥ नाभ्यस्यमानाःश्रुतयोद्विजैःकालहताइव १६ लोकबंधुषुमेघेषुविद्युतश्चलसौहृदाः ॥ स्थैर्यंनचक्रुःकामिन्यःपुरुषेषुगुणिष्विव १७ धनुर्वियतिमाहेंद्रंनिर्गुणंचगुणिन्यभात् ॥ व्यक्तेगुणव्यतिकरेगुणवान्पुरुषोयथा १८ नरराजोडुपश्छन्नःस्वज्योत्स्नाराजितैर्घनैः ॥ अहंमत्याभासितयास्वभासापुरुषोयथा १९ मेघागमोत्सवाहृष्टाःप्रत्यनंदन्शिखंडिनः ॥ गृहेषुतप्तानिर्विण्णायथाच्युतजनागमे २० पीत्वापःपादपाःपद्भिरासन्नानात्ममूर्तयः ॥ प्राक्क्षामास्तपसाश्रांतायथाकामानुसेवया २१ सरस्स्वशांतरोधस्सुन्यूषुरंगापिसारसाः ॥ गृहेष्वशांतकृत्येषुग्राम्याइवदुराशयाः २२ जलौघैर्निरभिद्यंतसेतवोवर्षतीश्वरे ॥ पाषंडिनामसद्वादैर्वेदमार्गाःकलौयथा २३ व्यमुंचन्वायुभिर्नुन्नाभूतेभ्योथामृतंघनाः ॥ यथाशिषोविश्पतयःकालेकालेद्विजेरिताः २४ एवंवनंतद्वर्षिष्ठंपक्वखर्जूरजंबुमत् ॥ गोगोपालैर्वृतोरंतुंसबलःप्राविशद्धरिः २५

चूर्णिका

किंच सरिद्भिः संगतः सिंधुः चुक्षुभे अपक्वयोगिनःचित्तमिव १४ किंच पर्वताः धाराभिः हन्यमानाअपिनाविव्यथुः व्यसनैः पराभूता अपिभक्ताः १५ किंच यथा मार्गाः तृणैः व्याप्ताः आसन् द्विजैः अनभ्यस्ताः श्रुतयः इव१६मेघेषुविद्युतः स्थैर्यंनचक्रुः पुरुषेषुपुंश्चल्यइव१७ किंच वियतिनिर्गुणमपिइंद्रधनुरभात् प्रपंचेनिर्गुणः पुमानिव १८ किंच घनैश्छन्नः चंद्रः नरराज अहंकारेणछन्नःजीवइव१९किंच तदामयूराः प्रत्यनंदन् यथागृहेखिन्नाः पुरुषाः भक्तसमागमे२० वृक्षाः पद्भिः अपः पीत्वा नानामूर्त्तयः आसन् यथातपसाश्रांताः नराः कामसेवया २१ किंच पंककंटकादियुक्तरोधस्सुसरःस्वपिचक्रवाकाः ऊषुः अशांतकार्येषुगृहेषुग्राम्यायथा २२ किंच जलौघैः सेतवः निरभिद्यंतकलौपाखंडिनांदुर्वादैः वेदमार्गायथा २३ किंच घनाः भूतेभ्यः जलंव्यमुंचन् यथाराजानः कामान् २४ एवंभूतं पक्वखर्जूरजंबुयुतं तद्वनंदृष्ट्वा गोगोपालैः सबलः हरिः तत्रविवेश २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(स्नुतस्तन्यः) २६ वनौकसःपुलिंदोःप्रमुदिताःभगवान्ददृशे । तथावनराजीर्मधुच्युतोमधुस्रवाददृशे । गिरेःसकाशाज्जलधाराश्चतासांनादाम् । आसन्नानिकटवर्तिनीर्गुहाश्च । यद्वा वनौकसप्रमुदिता आसन् तथावनराजीर्वनराजयः वनपरंपरामधुच्युताआसन्गिरेर्जलधाराआसन् तानेवंभूतान्आददृशे।सर्दतोददर्शभगवान् । तथाधाराणांनादान्गुहाश्चेति २७ २८ २९ (आत्मशक्त्युपबृंहितांस्वसन्निधान सामर्थ्येनोपचिताम् । पूजयांचक्रेअवलोकनादिनाबहुमेने) ३०(संविश्योपविश्यऊधोभरश्रमेणसहितागाश्चकंडूयनादिनापूजयांचक्रे)३१ अथशरदंवर्णयति। एवंनिवसतोरित्यष्टादशभिः। विगतानिअभ्राणिय स्यांसा।स्वच्छान्यंबूनियस्यांसा। अपरुषःशांतोऽनिलोयस्यांसाचसाच ३२ नीरजानांउत्पत्तिर्ययातया। शरदाकृत्स्नानीरजानांउत्पत्त्यावा ३३व्योम्नोद्धामिति व्योमादीनांचतुर्णांचतुरोमलान्शरदहरत् । आ

॥९२॥ श्रमाणांचतुर्णांकृष्णेजाताभक्तिर्यथाऽशुभंअसुखम् (चतुर्विधं) हरति । तथाहि । ब्रह्मचारिणोगुर्वर्थोदकाहरणकुंभश्रमंयथाभक्तिर्हरतितयापूर्णस्यतेनानुपयोगात् । गुरुभिरपिकृतार्थस्यतस्यानियोगा त् । एवंव्योम्नोब्दंजलदं शरज्जहार । यथागृहिणोपत्यादिसांकर्यंभक्तिर्हरतिविविक्तवासरत्यातथाभूतानांशाबल्यंसांकर्यंशरत् । वर्षासुहिवृष्टिभिया (हिमनिवृत्तयेचप्राणिनः) संकुलानिवसंति । य थाचवनस्थस्यमलधारणक्लेशंभक्तिर्हरति । एवंभुवःपंकंशरत् । यथाचयतीनांकामादिवासनामलंश्रीकृष्णभक्तिर्हरति । एवमपांमलंशरदिति ३४ त्यक्तैषणाःत्यक्ताःपुत्रवित्तलोकैषणायैस्ते ३५ गिरयइति अयंभावः । नह्युपाध्यायाःकर्मविद्यामिवज्ञानिनोज्ञानामृतंसर्वतोवितरंतिअपितुकृपयाक्वचिदेव (साधनसंपन्ने) एवंगिरयःशिवंनिर्मलंतोयंक्वचित् (मुमुचुःनिम्नस्थले) क्वचिन्न नपुनःप्रावृषीवसर्वतः ३६

धेनवोमंदगामिन्यऊधोभारेणभूयसा ॥ ययुर्भगवताहूताद्रुतंप्रीत्यास्नुतस्तनीः २६ वनौकसःप्रमुदितावनराजीर्मधुच्युतः ॥ जलधारागिरेर्नादानासन्नाददृशे गुहाः २७ क्वचिद्वनस्पतिक्रोडेगुहायांचाभिवर्षति ॥ निर्विश्यभगवान्रेमेकंदमूलफलाशनः २८ दध्योदनमुपानीतंशिलायांसलिलांतिके ॥ संभोजनी यैर्बुभुजेगोपैःसंकर्षणान्वितः २९ प्रावृट्श्रियंचतांवीक्ष्यसर्वलोकमुदावहाम् ॥ भगवान्पूजयांचक्रेआत्मशक्त्युपबृंहिताम् ३० शाद्वलोपरिसंविश्यचर्वतो मीलितेक्षणान् ॥ तृप्तान्वृषान्वत्सतरान्गाश्चस्वोधोभरश्रमाः ३१ एवंनिवसतोस्तस्मिन्रामकेशवयोर्व्रजे ॥ शरत्समभवद्व्यभ्रास्वच्छांब्वपरुषानिला ३२ शरदानीरजोत्पत्त्यानीराणिप्रकृतिंययुः ॥ भ्रष्टानामिवचेतांसिपुनर्योगनिषेवया ३३ व्योम्नोब्दंभूतशाबल्यंभुवःपंकमपांमलम् ॥ शरज्जहाराश्रमिणांकृष्णे भक्तिर्यथाऽशुभम् ३४ सर्वस्वंजलदाहित्वाविरेजुःशुभ्रवर्चसः ॥ यथात्यक्तैषणाःशांतामुनयोमुक्तकिल्बिषाः ३५ गिरयोमुमुचुस्तोयंक्वचिन्नमुमुचुःशिवम्॥ यथाज्ञानामृतंकालेज्ञानिनोददतेनवा ३६

श्लोकाः २६—३६

चूर्णिका

तदाधेनवःभगवताआहूताः सत्यः स्नुतस्तन्यः ययुः २६ किंच तदाहरिः प्रीताः पुलिंदीः ददृशे वनपंक्तयःमधुस्रवाः ददृशे गिरेर्जलधाराःददृशे तद्गुहाश्चददृशे २७ तत्रमे घेवर्षतिसातिकृष्णः क्वचिद्वृक्षक्रोडे प्रविश्यकंदमूलफलाशनः रेमे २८ किंच गृहात्आनीतंदध्योदनं शिलायांस्थाप्य सबलगोपैःबुभुजे २९ ततः तृणोपरिसंविश्यचर्वतः तृप्तान्वृषान्वत्सान्गाश्चऊधोभारश्रमाः ३० तथातांप्रावृट्श्रियंचदृष्ट्वापूजयांचक्रे ३१ एवंतत्ररामकेशवयोः सतोः व्यभ्रास्वच्छांब्वपरुषानिलाशरत्प्राप्ता शरदाजलानिप्रकृ तिंययुः योगसेवया भ्रष्टानांचेतांसीव ३२ ३३ किंच नभसः अब्दंभूतानांसांकर्यं भुवःपंकं अपांमलंचशरज्जहार आश्रमिणांचतुर्णांपापंकृष्णभक्तिरिव ३४ किंच मेघाः सर्वस्वंहित्वाशुभ्रकांतयोरेजुः त्यक्तैषणाः ऋषयइव ३५ किंच पर्वताः जलंक्वचित्मुमुचुः क्वचित्न यथाज्ञानिनः ज्ञानम् ३६ ॥९२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गाधेक्षुद्रेजलेचरंतीतितथातेमीनादयः (अन्वहंक्षीयमाणंजलम्) नैवाविंदन्लेभिरे । आयुःक्षय्यंयथाकुटुंबिनोनविंदंति३७ ३८शनैःशनैरिति । तत्रममतामिवपंकंअहंतामिवामतांअपक्कतांजहुरिवि (ओषधयःव्रीह्यादयः) ३९ आत्मन्युपगते (व्युपरतागमः) निवृत्तक्रियोमुनिरिवनिश्चलांबुःसएवव्युपरतागमोनिवृत्तवेदघोषइवतूष्णींबभूव ४० केदारेभ्योबद्धसेतुशालिक्षेत्रेभ्योदृढैःसेतुभिरपोऽगृ ह्णन्ततःपरंवृष्ट्यभावात् । प्राणैरिंद्रियैःतन्निरोधेनइंद्रियप्रत्याहारेण ४१ देहाभिमानजं (तापम्) बोधइव व्रजयोषितांतापंमुकुंदइवचेत्यर्थः (उडुपश्चंद्रः) ४२ शरदाविमलास्तारकायस्मिन्तत् (खमाकाशम्) शब्दब्रह्मणोवेदस्यार्थान्पूर्वोत्तरमीमांसाप्रणीतान्दर्शयतीतितथातदिव (सत्त्वयुक्तमितिअर्थाद्रजस्तमोमलराहित्यंतद्वदभ्रराहित्यंयथासत्त्वयोगेनवेदार्थदर्शनंतद्वच्छरद्योगेनविमलता रकाणांदर्शनमिति) ४३ ४४ समःअन्यूनाधिकःशीतउष्णश्चतम् (अनुष्णाशीतम्) नतुगोप्यःकृष्णापहृतचेतस्त्वेनतासांसंतापोदुःसहः (स) इति यद्वानकारउपमार्थःतदाकृष्णहृतचेतसइतिचेतसा कृष्णमाश्लिष्य (आलिंग्य)यथेत्यर्थः ४५ पुष्पिण्योगर्भिण्यःअन्वीयमानाःस्ववृषैःस्वपतिभिःअनिच्छंत्योपिबलादनुगम्यमानाःईश्वराराधनार्थाःक्रियाःबलात्फलैरनुगम्यमानाःसमस्तभोगगर्भायथेति ४६ कुमुत्कुमुदंकुत्सितेमुत्प्रीतिर्यस्येतिदस्युसाम्यम्[1] ४७

श्लोकाः ३७/४७

नैवाविंदन्क्षीयमाणंजलंगाधजलेचराः ॥ यथायुरन्वहंक्षय्यंनरामूढाःकुटुंबिनः ३७ गाधवारिचरास्तापमविंदन्शरदर्कजम् ॥ यथादरिद्रःकृपणःकुटुंब्य विजितेंद्रियः ३८ शनैःशनैर्जहुःपंकंस्थलान्यामंचवीरुधः ॥ यथाहंममतांधीराःशरीरादिष्वनात्मसु ३९ निश्चलांबुरभूत्तूष्णींसमुद्रःशरदागमे ॥ आत्म न्युपरतेसम्यग्मुनिर्व्युपरतागमः ४० केदारेभ्यस्त्वपोगृह्णन्कर्षकादृढसेतुभिः ॥ यथाप्राणैस्तत्त्वज्ञानंतन्निरोधेनयोगिनः ४१ शरदर्कांशुजांस्तापान्भू तानामुडुपोहरत् ॥ देहाभिमानजंबोधोमुकुंदोव्रजयोषिताम् ४२ खमशोभतनिर्मेघंशरद्विमलतारकम् ॥ सत्त्वयुक्तंयथाचित्तंशब्दब्रह्मार्थदर्शनम् ४३ अ खंडमंडलोव्योम्निरराजोडुगणैःशशी ॥ यथायदुपतिःकृष्णोवृष्णिचक्रावृतोभुवि ४४ आश्लिष्यसमशीतोष्णंप्रसूनवनमारुतम् ॥ जनास्तापंजहुर्गोप्यो नकृष्णहृतचेतसः ४५ गावोमृगाःखगानार्यःपुष्पिण्यःशरदाभवन् ॥ अन्वीयमानाःस्ववृषैःफलैरीशक्रियाइव ॥ ४६ उदहृष्यन्वारिजानिसूर्योत्थाने कुमुद्विना ॥ राज्ञातुनिर्भयालोकायथादस्यून्विनानृप ४७

चूर्णिका

किंच क्षीयमाणंजलंक्षुद्रजलेचराः नाविंदन् यथाक्षीयमाणं आयुः मूढानराः ३७ किंच क्षुद्रजलेचराः अर्कजंतापं अविंदन् यथाकुटुंबी दरिद्रः ३८ किंच स्थलानिपंकं जहुः वीरुधः अपक्कतांजहुः शरीरादौ अहंममतांधीराइव ३९ किंच अब्धिः स्थिरांबुः अभूत् त्यक्तक्रियोमुनिरिव ४० किंच शरदागमेकर्षकाः क्षेत्रेभ्यः सेतुभिःअपोज गृहुः यथायोगिनः इंद्रियरोधेनज्ञानम् ४१ किंच भूतानांअर्कांशुजतापान् चंद्रः जहारदे हाभिमानंबोधइव ४२ किंच खंनिर्मेघंस्वच्छर्क्षं शुशुभे सत्वयुक्तं चित्तमिव ४३ तदाचाविधुः ऋक्षैः पूर्णमंडलः शुशुभे यथायदुवृतःकृष्णइव ४४ किंच जनाः प्रसूनवनमारुतं आश्लिष्यतापंजहुः कृष्णहृतचित्ताः गोप्योनजहुः ४५ तदागोमृगखग स्त्रियः शरदागर्भिण्योऽपिस्वपतिभिः अन्वीयमाना अभवन् ४६ किंच सूर्योदयेकमलानिकुमुदंविनाहर्षआपुः यथाराज्ञादस्यून् विनालोकाः ४७ ॥९३॥

[1] कुत्सितामुद् यस्येति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

आग्रयणैर्नवान्नप्राशनार्थैर्वैदिकैःऐंद्रियैःइंद्रियार्थैश्चलौकिकैर्महोत्सवैःकलाभ्यांरामकृष्णाभ्यांदर्शनादिमहोत्सवाभ्याम् ४८ वणिजोयतयोनृपाःस्नातकाश्चदृष्टादृष्टाभ्यांवर्षरुद्धाःसंतः (तस्मिन्कालेआगते) निर्गम्यार्थान्वाणिज्यस्वाच्छंद्यदिग्विजयविद्यादीन्प्रपेदिरेप्रापचत यथामंत्रयोगादिसिद्धाःआयुषारुद्धाःकालेआगतेस्वपिंडान्योगादिप्राप्यान्देवादिदेहानिति ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांविंशोऽध्यायः २० ॥ ॥ ७ ॥ ॥ एकविंशेशरद्रम्यवृंदावनगतेहरौ । तद्वेणुस्वरमाकर्ण्यगोपीभिर्गीतमीर्यते ॥ १ ॥ इत्थमेवंभूतंवनंतदेवाह । शरदास्वच्छानिजलानियस्मिन्तत् । (पद्मसमूहसंपर्कात्सुगंधिना) वायुनावातंअनुगतंवनंतदेकव्याप्तमित्यर्थः १ ततश्चकुसुमितवनराजिषुशुष्मिणोमत्ताः भृंगाद्विजाःखगाश्चतेषांकुलानितैर्घुष्टाः सरांसिसरितोमहीधाश्चयस्मिन्तद्वनंकृष्णोऽवगाह्यप्रविश्यवेणुमवादयत् २ तत्कृष्णस्यवेणुगीतंस्मरस्यउदयोयस्मात्तत्आश्रुत्यश्रुत्वापरोक्षंयथाभवतितथाव्रजेस्थितत्वात् (व्रजस्त्रीणाम्) ३ विक्षिप्तमनसोव्याकुलचित्ताः ४ यादृक्कृष्णस्मरणंतासांमनसःक्षोभकंजातंतदाह बर्हापीडमिति । नटवत्वरंवपुर्बिभ्रत् । वृंदावनंप्राविशत् । कथंभूतंवनंस्वपदैरंकितैरमणंरतिजनकम् । गोपवृंदैर्गीतकीर्तिः । तथाबर्हमयमापीडंशिरोभूषणंबिभ्रत् । बर्हमापीडोयस्मिन्निर्तिवपुषोविशेषणंवा । वेणुवादनमुत्प्रेक्षते । रंध्रान्वेणोरिति । (अधरसुधयारंध्रान्पूरयाति) अतोनूनंपूर्णाद्वेणोःअधरसुधैवउच्चलंतीगीतवत्प्रसर्पितुं (अर्हतिबनेयतोऽमृतवन्मनोहरंगीतं) इतिभावः ५ वर्णयंत्योभिरेभिरेपदेपदेपरमानंदमूर्तिंकृष्णं (मनसा) परिरब्धवत्यः ६

॥९४॥

श्लोकाः ४८/६

पुरग्रामेष्वाग्रयणैरैंद्रियैश्चमहोत्सवैः ॥ बभौभूःपक्वसस्याढ्याकलाभ्यांनितरांहरेः ४८ वणिग्मुनिनृपस्नातानिर्गम्यार्थान्प्रपेदिरे ॥ वर्षरुद्धायथासिद्धाःस्वपिंडान्कालआगते ४९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेविंशोऽध्यायः २० ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्थंशरत्स्वच्छजलंपद्माकरसुगंधिना ॥ न्यविशद्वायुनावातंसगोगोपालकोऽच्युतः १ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रम् ॥ मधुपतिरवगाह्यचारयन्गाःसहपशुपालबलश्चुकूजवेणुम् २ तद्व्रजस्त्रियआश्रुत्यवेणुगीतंस्मरोदयम् ॥ काश्चित्परोक्षंकृष्णस्यस्वसखीभ्योन्यवर्णयन् ३ तद्वर्णयितुमारब्धाःस्मरंत्यःकृष्णचेष्टितम् ॥ नाशकन्स्मरवेगेनविक्षिप्तमनसोनृप ४ बर्हापीडंनटवरवपुःकर्णयोःकर्णिकारंबिभ्रद्वासःकनककपिशंवैजयंतींचमालाम् ॥ रंध्रान्वेणोरधरसुधयापूरयन्गोपवृंदैर्वृंदारण्यंस्वपदरमणंप्राविशद्गीतकीर्तिः ५ इतिवेणुरवंराजन्सर्वभूतमनोहरम् ॥ श्रुत्वाव्रजस्त्रियःसर्वावर्णयंत्योभिरेभिरे ६

चूर्णिका

किंच पुरग्रामादिषु आग्रयणाद्युत्सवैः पक्वधान्याढ्याभूः बभौ ४८ वणिक्मुनिनृपस्नातानिर्गम्यार्थान्प्रपेदिरे वर्षरुद्धायथासिद्धाःस्वपिंडान्कालआगते ४९ ॥ इतिदशमेविंशः ॥ २० ॥॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ इत्थंशरत्स्वच्छजलंपद्माकरसुगंधिना न्यविशद्वायुनावातंसगोगोपालकोच्युतः १ किंच पुष्पितवनराजिषुभृंगद्विजादिभिः नादितसरःसरिन्महीध्रंतद्वृंदावनंप्रविश्य सबलगोपालैः कृष्णः गाश्चारयन्वेणुंचुकूज २ तत् स्मरोदयंवेणुगीतंश्रुत्वागोप्यःकृष्णस्यपरोक्षंसखीभ्यः अवर्णयन् ३ तद्वर्णयितुंआरब्धाअपिस्मरवेगेन विक्षिप्तमनसः सत्यः वर्णयितुंनाशकन् ४ तदायादृशं कृष्णस्मरणं तासांमनःक्षोभकंजातंतदाह कृष्णः बर्हापीडं नटवरवपुः बिभ्रत् तथाकर्णयोःकर्णिकारपुष्पंबिभ्रत् तथाकनकवत्पीतंवासः वैजयंतींमालांचबिभ्रत् वेणोः रंध्रान् अधरसुधया आपूर्य गोपैः गीतकीर्तिः सन् वृंदावनंविवेश ५ हेनृपएवं वेणुरवंश्रुत्वा व्रजांगनाः वर्णयंत्यः सत्यः पदेपदेकृष्णं आश्लिष्य ऊचुः ६

॥९४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. अनुवर्णनमेवाह अक्षण्वतामितित्रयोदशाभिः। अक्षण्वतांचक्षुष्मतांतावदिदमेवफलम्। (यत्) प्रियदर्शनं। परमन्यत्रविदामः नविद्मइत्यर्थः। तच्चफलंसखिभिः सहपशून्वनेप्रवेशयतोःरामकृष्णयोर्वक्त्रंयै
निपीतं (सादरंदृष्टं) तैरेवजुष्टंसेवितंनान्यैरित्यर्थः कथंभूतंवक्त्रंअनुवेणुवेणुमनुवर्तमानंतंवादयत्। तथाअनुरक्तकटाक्षमोक्षंस्निग्धकटाक्षविसर्गम्। अथवायैर्निपीतंतयोर्वक्त्रंतैर्यज्जुष्टंइदमेवाक्षण्वतांअक्ष्णोः अ०
टीका फलमिति ७ अन्याआहुः। चूतेति। चूतप्रवालादीनांविचित्राभिर्मालाभिः अनुपृक्तेईषदंतरांतरतःसंयुक्तेपरिधानेनीलपीतांबरेताभ्यांविचित्रोवेषोययोस्तौ क्वचकदाचित् पशुपालगोष्ठ्यांगोपालसभायांमध्ये
अलंअत्यर्थंविरेजतुः अहोगोपालानांपुण्यमितिभावः। (चूतस्यप्रवालोनवपल्लवः स्तबकोगुत्सकः) ८ अन्याऊचुः हेगोप्यः अयंवेणुः किंस्मपुण्यमाचरत्कृतवान् कथंयत् (यस्मात्) गोपिकानामेवभोग्यां ॥२१॥
॥९५॥ सतीमपिदामोदराधरसुधांस्वयंस्वातंत्र्येणयथेष्टंभुंक्ते। कथंअवशिष्टःसंकेवलमवशिष्टंरसमात्रंयथाभवतितथायतःयासांह्रादिनीनांपयसापुष्टः तामातृतुल्याह्रादिन्यःहृष्यत्त्वचःविकसितकमलवनमिषेणरोमांचि
तालक्ष्यंतेयेषांवंशेजातो-(यं) तेतरवोमधुधारामिषेण आनंदाश्रुमुमुचुः यथाआर्याःकुलवृद्धाःस्ववंशेभगवत्सेवकंदृष्ट्वाहृष्यत्त्वचोश्रुमुंचंतितद्वदिति ९ काश्चिदाहुः हेसखिवृंदावनंभुवःकीर्तिंस्वर्गादपिविशेषे
णवितनोति कथंभूतं यद्देवकीसुतस्यपदांबुजाभ्यांलब्धालक्ष्मीःशोभासंपत्येनतत्। किंच। गोविंदस्यवेणुमनुवेणुध्वनिश्रवणानंतरंमंदगर्जितयुक्तंतंनीलमेघंमत्वामत्तायेमयूराःतैराचरितंनृत्यंप्रेक्ष्यसंघश
स्तत्रतत्रअद्रिसानुषुअवरतानिउपरतक्रियाणिअन्यानिसमस्तानिसत्त्वानियस्मिन्तन्नैतदन्येषुलोकेषुविद्यतेअतोलोकांतरापेक्षयाभुवःकीर्तिम् (विशेषेण) वितनोतीत्यर्थः १० अपराआहुः। हेसखिमूढ
मतयस्तिर्यग्जातयोपिएताहरिण्योधन्याःकृतार्थाःयावेणुरणितंवेणुनादमाकर्ण्यनंदनंदनंप्रतिप्रणयसहितैरवलोकैर्विराचितांपूजांसंमानंदधुःकृतवत्यः। किंच। कृष्णसारैःस्वपतिभिःसहिताएवदधुःअस्मत्पत
यस्तुगोपाःक्षुद्राःसमक्षंतन्नसहंतेइतिभावः (कृष्णसारशब्देनकृष्णेप्रेमाधिक्यात्तन्नामोचितमितिध्वनितम्) ११

॥ गोप्यऊचुः ॥ ॥ अक्षण्वतांफलमिदंनपरंविदामःसख्यःपशूननुविवेशयतोर्वयस्यैः ॥ वक्त्रंव्रजेशसुतयोरनुवेणुजुष्टंयैर्वानिपीतमनुरक्तकटाक्षमोक्षम्
७ चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ ॥ मध्येविरेजतुरलंपशुपालगोष्ठ्यांरंगेयथानटवरौक्वचगायमानौ ८ गोप्यःकिमाच श्लोकाः
रदयंकुशलंस्मवेणुर्दामोदराधरसुधामपिगोपिकानाम् ॥ भुंक्तेस्वयंयदवशिष्टरसंह्रदिन्योहृष्यत्त्वचोऽश्रुमुमुचुस्तरवोयथार्याः ९ वृंदावनंसखिभुवोवितनो
तिकीर्तिंयद्देवकीसुतपदांबुजलब्धलक्ष्मि ॥ गोविंदवेणुमनुमत्तमयूरनृत्यंप्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्त्वम् १० धन्याःस्ममूढमतयोपिहरिण्यएता ७/११
यानंदनंदनमुपात्तविचित्रवेषम् ॥ आकर्ण्यवेणुरणितंसहकृष्णसाराःपूजांदधुर्विरचितांप्रणयावलोकैः ११

चूर्णिका गोप्यऊचुः हेगोप्यः चक्षुष्मतांतावत्प्रियदर्शनंइदमेवफलंनान्यत् तच्चफलंरामकृष्णयोःमुखंवेणुंवादयत् यैःनिपीतंतैरेवजुष्टंनान्यैः ७ अन्याआहुः हेगोप्यः चूतप्रवालादि
भिः विचित्रवेषौगोपसभायांनटवराविवमध्येरेजतुः अहोगोपानांपुण्यमिति ८ किंच हेगोप्यः अयंवेणुः किंपुण्यंकृतवान् यतः अस्मद्भोग्यांकृष्णाधरसुधांस्वयंभुंक्ते किंच
यासांजलेनपुष्टः ताः नद्यः कमलादिनारोमांचितालक्ष्यंते येषांवंशेजातः तेवृक्षाः मधुधारामिषेण अश्रूणिमुमुचुः यथावृद्धाः स्ववंशेहरिसेवकंदृष्ट्वाअश्रूणिमुंचंति ९ किंच
हेसखिइदंवनंभुवः कीर्तिंवितनोति यतः कृष्णपादाब्जप्राप्तलक्ष्मि किंच इमंवेणुनादं तदनुमयूरनृत्यंचदृष्ट्वाअन्यसत्त्वाः अद्रिसानुषुनिश्चलाः स्युः १० किंच हेगोप्यः एताः ॥९५॥
हरिण्यः अन्याअपिधन्याः यतः वेणुगीतंश्रुत्वापातिभिःसहस्नेहावलोकैःकृष्णपूजांदधुः ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्याऊचुः । हेगोप्यःआश्चर्यंशृणुत । वनितानामुत्सवोयस्मात्तादृशंशीलंचयस्यतंश्रीकृष्णंनिरीक्ष्यतेनवादितवेणोरसंकीर्णंगीतंचश्रुत्वाविमानैर्गच्छंत्योदेव्योदेवानामंकेषुस्थिताअपिस्मरेणनुन्नसाराःप रिक्षिप्तधैर्यामुमुहुः । लेभेलिंगमाहुःभ्रश्यत्प्रसूनाःकबराश्चूडायासांताः । विगतानीव्योयासांताः । अत्रसर्वत्रवक्तृभेदान्नातिविसंर्गातिर्वक्तव्या १२ क्षरणशंकयैव (गावस्तावत्) उत्तभितैरुन्नमितैःकर्ण पुटैःपिबंत्यःसत्यःतथाशावाश्चवत्साःस्तनपानेप्रवृत्ताःसमनंतरमेवगीतंश्रुत्वातदेवपीयूषमुत्तंभितकर्णपुटैःपिबंतःस्नुतस्तनपयःकवलाःकेवलंस्तनेभ्यःक्षरितक्षीरग्रासामुखेषुयेषांते (तथा) तस्थुःविस्मृत (स्तनपान) क्रियाबभूवुरित्यर्थः । तत्रहेतुः । गोविंदंदृशामार्गेणआत्मनिमनसिस्पृशंत्यःआलिंगंत्यः । अतएवाश्रूणांकलालेशालोचनेषुयासांतागावस्तेचशावाः १३ भोअंबमातःअस्मिन्वनेयेवि हगाःपक्षिणःतेप्रायेणमुनयोभवितुमर्हंतिकुतःकृष्णेक्षितंकृष्णदर्शनंपुष्पफलाढ्यंतरुंविनायथाभवतिरुचिराःप्रवालायेषांतान्द्रुमभुजान्वृक्षशाखाआरुह्यवेनश्रीकृष्णेनउदितंप्रकटितंकलवेणुगीतम् (कृष्णे क्षितंकृष्णकर्तृककटाक्षावलोकनसहितंवा) केनापिसुखेनामीलितदृशःत्यक्तान्यवाचश्चसंतोयेशृण्वंतीति । तथाहि । मुनयःश्रीकृष्णदर्शनंयथाभवतितथावेदोक्तकर्मफलपरित्यागेनवेदद्रुमशाखारूढाःरुचि रप्रवालस्थानीयानिकर्माण्येवोपाददानाःसुखिनःसंतःश्रीकृष्णगीतमेवशृण्वंतिअतस्तएवतेभवितुमर्हंतीतिभावः१४ आस्तांचेतनानांकथा । नद्योपिआवर्तैःपरिभ्रमैर्लक्षितेनसूचितेनमनोभवेनकामेनभग्नो वेगोयासांताःआलिंगनेनस्थगितमाच्छादितंयथाभवतितथाऊर्मयएवभुजास्तैःकमलोपहाराःकमलान्युपहरंत्यःमुरारेःपादयुगलंगृह्णंति धारयंति १५ लोकार्तिहरणशीलत्वादिसाम्यात्सख्युःश्रीकृष्णस्य अंबुदस्तदुपरिउदितःपुनःप्रेम्णाप्रवृद्धःसन्कुसुमावलीभिःपुष्पसमूहैःतत्तुल्यैस्तुषारैः (बिंदुभिः) वा (मेघपुष्पंघनरसइत्यमरः) स्वस्ववपुषाछत्रंविहितवान् (शीतलच्छाययासेवितवानित्यर्थः) १६

कृष्णंनिरीक्ष्यवनितोत्सवरूपशीलंश्रुत्वाचतत्क्वणितवेणुविचित्रगीतम् ॥ देव्योविमानगतयःस्मरनुन्नसाराभ्रश्यत्प्रसूनकबरामुमुहुर्विनीव्यः १२ गाव श्चकृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैःपिबंत्यः ॥ शावाःस्नुतस्तनपयःकवलाःस्मतस्थुर्गोविंदमात्मनिदृशाश्रुमुखाःस्पृशंत्यः १३ प्रायो बतांबविहगामुनयोवनेस्मिन्कृष्णेक्षितंतदुदितंकलवेणुगीतम् ॥ आरुह्ययेद्रुमभुजान्रुचिरप्रवालाञ्छृण्वंत्यमीलितदृशोविगतान्यवाचः १४ नद्यस्तदात दुपधार्यमुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः ॥ आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंतिपादयुगलंकमलोपहाराः १५ दृष्ट्वातपेव्रजपशून्सहरामगोपैः संचारयंतमनुवेणुमुदीरयंतम् ॥ प्रेमप्रवृद्धउदितःकुसुमावलीभिःसख्युर्व्यधात्स्ववपुषांबुदआतपत्रम् १६

श्लोकाः
१२
१६

चूर्णिका

किंच हेगोप्यः देवांगनाः कृष्णंतद्वेणुगीतं दृष्ट्वाश्रुत्वाचदेवांकेषुस्थिताअपिविनीव्यः मुमुहुः १२ किंच हेगोप्यः गावः वेणुगीतामृतंकर्णपुटैः पिबंत्यः तस्थुः तथाव त्साः स्नुतस्तनपयःकवलाः संतः विस्मितक्रियाबभूवुः १३ किंचहेगोप्यः अत्रयेपाक्षिणः वृक्षशाखासुआरुह्यकृष्णस्यवेणुगीतंशृण्वंतितंचपश्यंति अतः तेप्रायः मुनयः भवितुं अर्हंति १४ किंच हेगोप्यः नद्यः कृष्णगीतं उपधार्यऊर्मिभुजैः मुरारेः पादयुगंगृह्णंति अतः ताः धन्याः १५ किंच हेगोप्यः मेघः आतपे सहरामगोपैः पशून् चारयंतं कृष्णंदृष्ट्वाउदितः सन्स्ववपुषाछत्रंव्यधात् किंतद्भाग्यम् १६

१ पुष्पफलाद्यन्तरं विनाइतिवापाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. साहंकारमाहुः पूर्णाःकृतार्थाःपुलिंद्यःशबरांगनाःकथमित्यतआहुः प्रथमंदयितानांस्तनेषुमंडितेनअनुलिप्तेन । पुनश्चरतिसमयेउरुगायस्यश्रीकृष्णस्यपदाब्जयोः (दाहशांत्यर्थंस्तनोपरिस्थापितयोः) अ०
रागेणआरुण्येनश्रीःकांतिर्यस्यतेनकुंकुमेनपुनस्तस्यवनस्थलीषुचंक्रमणेनतृणेषुरूषितेनलग्नेनतद्दर्शनेनतथाभूतस्यकुंकुमस्यदर्शनेनस्मरकृतारुक्तापोयासांताःतेनकुंकुमेनआननेषुकुचेषुचकामतप्तेषुलिंपं
टीका त्यःतदाधिंकामव्यथांजहुः अतस्ताःकृतार्थाःधिगन्यामादृशःयाएवंभूतमप्याधिशमनंनलभंतइतिभावः १७ हंतेतिहर्षे । हेसख्यःअयमद्रिर्गोवर्धनोध्रुवंहरिदासेषुश्रेष्ठःकुतइत्यतआह । यस्माद्रामकृष्णयो ॥२१॥
श्चरणस्पर्शेनप्रमोदोयस्यसः तृणाद्युद्गममिषेणरोमहर्षदर्शनात् किंच । यत्यस्मात्मानंतनोति सहगोभिर्गणेनसखिसमूहेनचवर्तमानयोस्तयोः । कैः (कृत्वा) पानीयैःसुयवसैःशोभनतृणैःकंदरैःकंदैर्मूलै
॥९७॥ श्चयथोचितम् । अतोयमतिधन्यइत्यर्थः १८ हेसख्यःइदंत्वतिचित्रम् । गोपैःसह (गाअनुवनम्) वनेवनेसंचारयतोस्तयोःरामकृष्णयोःमधुरपदैःमहावेणुनादैःशरीरिषुयेगतिमंतःतेषामस्पंदनंस्था
वरधर्मःतरूणांपुलकःजंगमधर्मइति । निर्युज्यंतेगावआभिरितिनियोगाःपादबंधनरज्जवःअधृष्यगवादीनांकर्षणार्थाःपाशाश्चतैःकृतंलक्षणंचिह्नंययोःशिरसिनियोगवेष्टनेनस्कंधस्थपाशेनचगोपपरिवृढ
श्रियाविराजमानयोरित्यर्थः १९ २० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायामेकविंशोध्यायः २१ ॥ ॥ ७ ॥, ॥ गोपीनांकामतःकृष्णोनिःसीमप्रेमसंगमः ।
कात्यायन्यर्चनोद्भूततत्प्रसादमहोदयः ॥ १ ॥ द्वाविंशेगोपकन्यानांवस्त्राहरणलीलया । वरंदत्त्वागतःकृष्णोयज्ञशालामितीर्यते ॥ २ ॥ प्रथमेमासिमार्गशीर्षे १ (अरुणेउदितेसाति प्रतिक्रांतिंप्रतिमाम् ।
प्रवालैःकोमलपल्लवैः । उपहारैर्नैवेद्यैः)२ ३

पूर्णाःपुलिंद्यउरुगायपदाब्जरागश्रीकुंकुमेनदयितास्तनमंडितेन ॥ तद्दर्शनस्मररुजस्तृणरूषितेनलिंपंत्यआननकुचेषुजहुस्तदाधिम् १७ हंतायमद्रिरबला श्लोकाः
हरिदासवर्योयद्रामकृष्णचरणस्पर्शप्रमोदः ॥ मानंतनोतिसहगोगणयोस्तयोर्यत्पानीयसूयवसकंदरकंदमूलैः १८ गागोपकैरनुवनंनयतोरुदारवेणुस्वनैः
कलपदैस्तनुभृत्सुसख्यः ॥ अस्पंदनंगतिमतांपुलकस्तरूणांनिर्योगपाशकृतलक्षणयोर्विचित्रम् १९ एवंविधाभगवतोयावृंदावनचारिणः ॥ वर्णयंतोमि १७/३
थोगोप्यःक्रीडास्तन्मयतांययुः २० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकविंशतितमोध्यायः २१ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥
हेमंतेप्रथमेमासिनंदव्रजकुमारिकाः ॥ चेरुर्हविष्यंभुंजानाःकात्यायन्यर्चनंव्रतम् १ आप्लुत्यांभसिकालिंद्याजलांतेचोदितेरुणे ॥ कृत्वाप्रतिकृतिंदेवीमानर्चु
र्नृपसैकतीम् २ गंधैर्माल्यैःसुरभिभिर्बलिभिर्धूपदीपकैः ॥ उच्चावचैश्चोपहारैःप्रवालफलतंडुलैः ३

चूर्णिका किंच हेगोप्यः एताः पुलिंद्याः पूर्णाः यतः स्त्रीस्तनलिप्तेनकृष्णपदाब्जरागयुतेन ततस्तृणरूषितेनश्रीकुंकुमेनजातस्मररुजः सत्यः ततूमुखस्तनेषुआलिंप्यकामाधिंजहुः अ
तः ताः धन्याः १७ किंच हेसख्यः अयं अद्रिः वैष्णवाग्र्योस्ति यतः सहगोगणयोस्तयोःजलतृणगुहादिभिः मानंतनोति १८ किंच हेसख्यः निर्योगपाशकृतलक्षणयोः
रामकृष्णयोः वेणुनादैः गतिमतांस्थावरधर्मः तरूणांजंगमधर्मः इदंचित्रंशृणुत १९ एवंविधाभगवतोयावृंदावनचारिणः वर्णयंत्योमिथोगोप्यःक्रीडास्तन्मयतांययुः २० ॥९७॥
॥ इतिदशमेएकविंशः ॥ २१ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेमंतेप्रथमेमासिनंदव्रजकुमारिकाः चेरुर्हविष्यंभुंजानाःकात्यायन्यर्चनव्रतम् १ ततः
अरुणोदयेकालिंद्याः जलेस्नात्वातीरेसैकतीं देवीं कृत्वा २ गंधमाल्यादिभिः उपहारैश्चतामानर्चुः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

महामायेइत्यादिसंबोधनैस्तवनांकिंचिदशक्यमितिसूचयंत्यःप्रत्येकंप्रार्थयंते ४ कृष्णचेतस्त्वमेवाह । भूयान्नंदसुतःपतिरित्यानर्चुरिति ५ व्रतस्यपूर्वांगमाह । उषसीति । गोत्रैर्नामभिः (संबोधनप्रयुक्त नामश्रवणैरित्यर्थः) अन्योन्याबद्धबाहवःपरस्परगृहीतपाणयः (कालिंद्यांस्नातुंयांत्यःकृष्णंजगुः)। ६ ७ योगेश्वराणामीश्वरइतिप्रत्येकंताहृङ्मनोरथपूरणसामर्थ्यंदर्शयति । तासांकर्मणःसिद्धये फलदानायेति ८ नीपंकदंबंबालैःसह (परिहासंनर्मवाक्यम्) ९ (ब्रुवाणिगुणाभावआर्षः) हेअबलाः । नोनर्मपरिहासःयस्माद्यूयंव्रतकर्शिताः १० (अनृतंहिमयानैवपूर्वमुदितंतदनृतस्यानुदितत्वं इमेवयस्याविदुरितिउदितपूर्वस्यवेदरूपत्वादेषांचऋषिरूपत्वादितिभावः) एकैकशोवाआगत्यवासांसिस्वीकुरुत सहैववा नतत्रास्माकमाग्रहइत्यर्थः ११ क्ष्वेलितंपरिहासंप्रेमपरिप्लुताःप्रेमरसमग्नाः १२ १३ तत्रमुग्धाऊचुः । अंगभोःश्रीकृष्णअनयमन्याय्यंमाकृथाः १४ (वयंतेदास्योवेपिताःस्यामभवेम) प्रौढाऊचुःदेहीतिनोचेद्राज्ञेनंदायकंसायवा ब्रुवामब्रवाम हेकृष्णेति १५ १६

॥९८॥

कात्यायनिमहामायेमहायोगिन्यधीश्वरि ॥ नंदगोपसुतंदेविपतिंमेकुरुतेनमः ॥ इतिमंत्रंजपंत्यस्ताःपूजांचक्रुःकुमारिकाः ४ एवंमासंव्रतंचेरुःकुमार्यःकृष्ण चेतसः ॥ भद्रकालींसमानर्चुर्भूयान्नंदसुतःपतिः ५ उषस्युत्थायगोत्रैःस्वैरन्योन्याबद्धबाहवः ॥ कृष्णमुच्चैर्जगुर्यांत्यःकालिंद्यांस्नातुमन्वहम् ६ नद्यांकदा चिदागत्यतीरेनिक्षिप्यपूर्ववत् ॥ वासांसिकृष्णंगायंत्योविजह्रुःसलिलेमुदा ७ भगवांस्तदभिप्रेत्यकृष्णोयोगेश्वरेश्वरः ॥ वयस्यैरावृतस्तत्रगतस्तत्कर्मसि द्धये ८ तासांवासांस्युपादायनीपमारुह्यसत्वरः ॥ हसद्भिःप्रहसन्बालैःपरिहासमुवाचह ९ अत्रागत्याबलाःकामंस्वंस्वंवासःप्रगृह्यताम् ॥ सत्यंब्रुवाणिनो नर्मयद्यूयंव्रतकर्शिताः १० नमयोदितपूर्वंवाअनृतंतदिमेविदुः ॥ एकैकशःप्रतीच्छध्वंसहैवोतसुमध्यमाः ११ तस्यतत्क्ष्वेलितंदृष्ट्वागोप्यःप्रेमपरिप्लुताः ॥ व्रीडिताःप्रेक्ष्यचान्योन्यंजातहासाननिर्ययुः १२ एवंब्रुवतिगोविंदेनर्मणाक्षिप्तचेतसः ॥ आकंठमग्नाःशीतोदेवेपमानास्तमब्रुवन् १३ मानयंभोःकृथास्त्वां तुनंदगोपसुतंप्रियम् ॥ जानीमोऽगव्रजश्लाघ्यंदेहिवासांसिवेपिताः १४ श्यामसुंदरतेदास्यःकरवामतवोदितम् ॥ देहिवासांसिधर्मज्ञनोचेद्राज्ञेब्रुवामहे १५ ॥ श्रीभगवानुवाच ॥ भवत्योयदिमेदास्योमयोक्तंवाकरिष्यथ ॥ अत्रागत्यस्ववासांसिप्रतीच्छंतुशुचिस्मिताः १६

श्लोकाः ४/१६

चूर्णिका

किंच कात्यायनिमहामायेमहायोगिन्यधीश्वरि नंदगोपसुतंदेहिपतिंमेकुरुतेनमः ४ एवंमंत्रंजपंत्यस्ताः पूजांचक्रुः एवंताः मासपर्यंतं व्रतंचेरुः ५ व्रतपूर्वांगमाह उषसिउ त्थायमिथः गृहीतपाणयः ६ स्नातुंयांत्यः कृष्णंजगुः एकदानद्यांएत्यतीरेपूर्ववत् ७ वासांसिस्थाप्यजलेविजह्रुः ८ तत्ज्ञात्वाकृष्णः गोपैः सहतत्रएत्य तासांवासांसिआदा यकदंबं आरुह्यबालैः सहहसन्सन्परिहासं आह ९ हे अबलाः अत्रागत्यस्वंस्वंवासः गृह्यतां १० अहंसत्यं ब्रवाणिनोनर्मयतः यूयंव्रतकृशाः स्थ अतः ११ अत्र एत्य एकैकशः सहैववा वासः गृह्यताम् हेनृपएवं कृष्णक्ष्वेलितंदृष्ट्वागोप्यः १२ व्रीडिताः सत्यः मिथः प्रेक्ष्यहास्यंकृत्वाबहिर्निर्ययुः एवंकृष्णेब्रुवतिताः शीतोदके आकंठमग्नाः वेपमानाः सत्यः कृष्णंऊचुः १३ हेकृष्ण अन्याय्यं माकृथाः नंदसुतंत्वांजानीमः नः वासांसिदेहियतः वयंवेपिताः १४ किंच हेश्यामसुंदरवयंतेदास्यः तेउदितंकरवा म नः वासांसिदेहिनोचेत् नंदायब्रुवामहे १५ ॥ श्रीकृष्णउवाच ॥ हेअबलाः यूयंयदिमेदास्यः तर्हिमदुक्तंकरिष्यथ अत्रागत्यवासांसिप्रतीच्छंतु १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोत्तेरुर्निर्गताः १७ आहताईषदक्षतयोनीर्वीक्ष्य (देहीतिशुद्धेनभावेनप्रसादितः अतएवस्कंधेवासांसिनिधायेति) १८ धृतव्रताःसत्योविवस्त्राअपोव्यगाहत । अप्सुस्नाताइतियत् । तदेतत् उएवदेवहे लनंअपराधएवेत्यर्थः । व्रतवैगुण्यभीतानांप्रायश्चित्तमिवाह । अस्यांहसः पापस्यनिवृत्तयेमूर्ध्न्यंजलिंबद्ध्वाऽधोनमःप्रणामंकृत्वेति १९ (अत्रास्तिकचिदधिकंश्लोकद्वयम् । एकेनपाणिनानेमुरेकेनाच्छा द्यचांगनाः । तावीक्ष्योवाचभगवान् भूयोधर्म्यमिदंवचः । एकेनपाणिनायोऽसौप्रणमेद्देवमच्युतम् । तस्यदंडःकरच्छेदइतिधर्मविदोविदुरिति ।) इतिदोषत्वेनाच्युतेनाभिहितास्ताविवस्त्राप्लवनंव्रत स्यच्युतिहेतुंमत्वातस्य (व्रतस्य) पूर्तिकामाःतदशेषकर्मणां तस्यव्रतस्यअन्येषांचअशेषकर्मणांसाक्षात्कृतंफलभूतंतमेवनेमुः (यतः) सएवावद्यमृक्पापमार्जनः २० २१ दृढमत्यर्थंप्रलब्धावंचिताः यूयंविवस्त्राइत्यादिना । त्रपयालज्जयाचहापितास्त्याजिताः अत्रागत्यस्ववासांसीत्याग्रहेणप्रस्तोभिताउपहसिताः सत्यंब्रुवाणिनोनर्मेत्यादिना । क्रीडनवत्कारिताश्चबद्धांजलिमित्यादिप्रायश्चित्तच्छ लेन । एवमपराधेपितानाभ्यसूयन्दोषदृष्ट्यानापश्यन् २२ प्रेष्ठसंगमेनसज्जिताः । वशीकृताःअतोगृहीताचित्ताःसत्योनोचेलुः । गृहीतचित्तत्वमाह । तस्मिन्कृष्णेलज्जायितेक्षणाः लज्जाविलसितमी क्षणंयासांताइत्यर्थः २३ (स्वपादसेवनकामनयाधृतंव्रतंयाभिस्तासाम् ।) दामोदरइति भक्तवात्सल्यंदर्शयति । अबलाःप्रति (आह) २४ भोसाध्व्यः भवतीनांमदर्चनमेवसंकल्पोमनोरथः सः लज्जयायुष्माभिरकथितोपिमयाविदितः । असौमयाऽनुमोदितश्चअतःसत्योभवतुमर्हति । अर्हतीतिसंभावनामात्रोक्त्याआत्यंतिकोनभविष्यतीतिसूचितम् २५ तत्कुतइत्यतआह नमय्यीति । कामायपुनः (पुनः) कामभोगाय । विषयमहिम्नाकामस्यापिशांतिहेतुत्वादितिभावः । कामाप्ररोहेदृष्टांतःभर्जितादग्धाः क्वथिताःपक्वाधानायवादि (बीजं) बीजायअंकुरोद्गमाय । प्रायइतिस्वेच्छयापुनःप्ररोहम पिसूचयति ध्रुवादीनांतथादर्शनात् २६

श्लोकाः १७/२६

ततोजलाशयात्सर्वादारिकाःशीतवेपिताः ॥ पाणिभ्यांयोनिमाच्छाद्यप्रोत्तेरुःशीतकर्शिताः १७ भगवानाहतावीक्ष्यशुद्धभावप्रसादितः ॥ स्कंधेनिधायवा सांसिप्रीतःप्रोवाचसस्मितम् १८ यूयंविवस्त्रायदपोधृतव्रताव्यगाहतैतत्तदुदेवहेलनम् ॥ बद्ध्वांजलिंमूर्ध्न्यपनुत्तयेंऽहसःकृत्वानमोधोवसनंप्रगृह्यताम् १९ इत्यच्युतेनाभिहिताव्रजाबलामत्वाविवस्त्राप्लवनंव्रतच्युतिम् ॥ तत्पूर्तिकामास्तदशेषकर्मणांसाक्षात्कृतंनेमुरवद्यमृग्यतः २० तास्तथाऽवनतादृष्ट्वाभगवा न्देवकीसुतः ॥ वासांसिताभ्यःप्रायच्छत्करुणस्तेनतोषितः २१ दृढंप्रलब्धास्त्रपयाचहापिताःप्रस्तोभिताःक्रीडनवच्चकारिताः ॥ वस्त्राणिचैवापहृतान्यथा प्यमुंतानाभ्यसूयन्प्रियसंगनिर्वृताः २२ परिधायस्ववासांसिप्रेष्ठसंगमसज्जिताः ॥ गृहीतचित्तानोचेलुस्तस्मिँल्लज्जायितेक्षणाः २३ तासांविज्ञायभगवान् स्वपादस्पर्शकाम्यया ॥ धृतव्रतानांसंकल्पमाहदामोदरोबलाः २४ संकल्पोविदितःसाध्व्योभवतीनांमदर्चनम् ॥ मयानुमोदितःसोसौसत्योभवितुमर्ह ति २५ नमय्यावेशितधियांकामःकामायकल्पते ॥ भर्जिताक्वथिताधानाप्रायोबीजायनेष्यते २६

चूर्णिका

ततः ताःपाणिभ्यांयोनिमाच्छाद्यवेपिताः सत्यः बहिर्निर्गताः १७ ततः कृष्णः ताः ईषदक्षतयोनीर्वीक्ष्यस्कंधे वासांसिगृहीत्वा आह १८ हे अबलाः यूयंव्रतंधृत्वाविवस्त्राः स्नानंचक्रुः तत्अपराधएवतत्पापनिवृत्तयेमूर्ध्नि अंजलिंबद्ध्वा अधःप्रणामंकृत्वावसनंगृह्यताम् १९ एवंकृष्णोक्तं व्रतवैगुण्यं मत्वा व्रतपूर्तयेतमेवनेमुः २० ततः कृष्णः अवनतास्ताः दृष्ट्वाताभ्यः वासांसिददौ २१ एवं कृष्णेनदृढंप्रलब्धा अपितंनाभ्यसूयन् २२ ततः ताः स्ववासांयिपरिधायतस्मिन्लज्जयितेक्षणाः सत्यः नोचेलुः २३ ता सांसंकल्पं ज्ञात्वा कृष्णः आह २४ हेसाध्व्यः युष्मत्संकल्पोमया अनुमोदितः अतः सः सत्योभवितुमर्हति २५ हेअबलाः व्रजंयात आगामिनीरात्रीः मयासहरंस्यथ २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिद्धाःपूर्णमनोरथाः तदाह । इमाआगामिनीरात्रीर्मयारंस्यथेति । आर्याकात्यायनी (तदर्चनम्) सतीःसत्यः (यातगच्छत) २७ २८ भक्त्यानुकंप्यकन्यास्तास्तद्विवर्जितयज्वनाम् । पत्न्यनुग्र
हतस्तेषामहन्कर्ममहामदम् २९ (निदाघोग्रीष्मःआतपत्रायितान् छत्रसमानित्यर्थः) ३० ३१ विप्रभार्यायाअनुग्रहायगज्ञवाटंगच्छन्विप्राणांकाठिन्यमभिप्रेत्यतेभ्योपिद्रुमाःश्रेष्ठाइतितानभिनंद
तिचतुर्भिः । पश्यतेति । हेस्तोककृष्णादयोगोपाःएतान् द्रुमान् पश्यत। परार्थमेवैकांतेनजीवितंयेषांतान्। तदाह । वातवर्षादीन्स्वयंसहमानाअस्माकंवारयंतीति ३२ (सर्वेषांप्राणिनामुपजीवनंजी
विकासाधनम्) सुजनस्यकृपालोरर्थिनः (याचका-)-इव ३३ निर्यासोघनरसः (अस्थीनिफलगताःकठिनांशाः) तोक्माःपल्लवाद्यंकुराः ३४ ३५ इत्यभिनंदन्प्रवालादीनां (उत्करैः) समूहैर्नं
तशाखानांतरूणांमध्यतोयमुनांप्राप्तः (तत्रस्तबकागुच्छकाः) ३६ (सुमृष्टाःस्वाद्वीः) ३७ (कृष्णरामौमति) कुमारिकाभ्यःपूर्वमेवतन्नर्मेच्छाकुलतयाअगृहीतभोज्यानामेवनिर्गमात्क्षुधार्ता
इत्युक्तम् ३८॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांद्वाविंशतितमोध्यायः २२॥ ॥७॥ ॥७॥ ॥७॥

श्लोकाः २७—३८

यातावलाव्रजंसिद्धामयेमारंस्यथक्षपाः ॥ यदुद्दिश्यव्रतमिदंचेरुरार्यार्चनंसतीः २७ ॥ शुकउवाच ॥ इत्यादिष्टाभगवतालब्धकामाःकुमारिकाः ॥ ध्यायं
त्यस्तत्पदांभोजंकृच्छ्रान्निर्विविशुर्व्रजम् २८ अथगोपैःपरिवृतोभगवान्देवकीसुतः ॥ वृंदावनाद्गतोदूरंचारयन्गाःसहाग्रजः २९ निदाघार्कातपेतिग्मेछा
याभिःस्वाभिरात्मनः ॥ आतपत्रायितान्वीक्ष्यद्रुमानाहव्रजौकसः ३० हेस्तोककृष्णहेअंशोश्रीदामन्सुबलार्जुन ॥ विशालर्षभतेजस्विन्देवप्रस्थवरूथप
३१ पश्यतैतान्महाभागान्परार्थैकांतजीवितान् ॥ वातवर्षातपहिमान्सहंतोवारयंतिनः ३२ अहोएषांवरंजन्मसर्वप्राण्युपजीवनम् ॥ सुजनस्येववये
षांवैविमुखायांतिनार्थिनः ३३ पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ॥ गंधनिर्यासभस्मास्थितोक्मैःकामान्वितन्वते ३४ एतावज्जन्मसाफल्यंदेहिना
मिहदेहिषु ॥ प्राणैरर्थैर्धियावाचाश्रेयएवाचरेत्सदा ३५ इतिप्रवालस्तबकफलपुष्पदलोत्करैः ॥ तरूणांनम्रशाखानांमध्येनयमुनांगतः ३६ तत्रगाः
पाययित्वापःसुमृष्टाःशीतलाःशिवाः ॥ ततोनृपस्वयंगोपाःकामंस्वादुपपुर्जलम् ३७ तस्याउपवनेकामंचारयंतःपशून्नृप ॥ कृष्णरामावुपागम्यक्षुधार्ता
इदमब्रुवन् ३८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्वाविंशतितमोध्यायः २२॥ ॥७॥ ॥ ॥७॥ ॥७॥ ॥

चूर्णिका

२७ ॥ श्रीशुकउवाच ॥ एवंकृष्णेनआदिष्टाः ताः कुमारिकाः व्रजंविविशुः २८ अथसबलः कृष्णः गोपैर्वृतः गाश्चारयन्वृंदावनात् दूरंगतः २९तदा निदाघार्कातपेछ
त्रायितान् द्रुमान्दृष्ट्वाकृष्णः गोपानाह ३० हेस्तोक हे कृष्ण हे अंशो हे श्रीदामन् हे सुबलइत्यादि ३१ एतान्वृक्षान्पश्यत स्वयंवातादीन् सहित्वा नः वारयंति ३२
अहो एषांवरंजन्म एतेपत्रपुष्पफलादिभिः सर्वेषांकामान्वितन्वते ३३ ३४ एतावदेव प्राणिनांजन्मसाफल्यम् तदाह प्राणार्थादिभिः सदा श्रेयएवाचरेत् ३५ एवंप्रवा
लस्तबकादिभिः नम्रशाखानांतरूणांमध्येनयमुनांगतः सन् ३६ तत्रगाः जलंपाययित्वा ततः स्वयंगोपाश्चजलंपपुः ३७ तस्याउपवनेकामंचारयंतःपशून्नृप कृष्णरामावु
पागम्यक्षुधार्ताइदमब्रुवन् ३८॥ इतिदशमेद्वाविंशः॥ २२ ॥ ॥७॥ ॥७॥ ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्रयोविंशेततोगोपैरन्नयाच्ञापदेशतः । तत्पत्न्यनुग्रहात्कृष्णोदीक्षितानन्वतापयत् ॥ १ ॥ (नःअस्मान्) १ भक्तायाइत्येकवचनंसद्यःसायुज्याभिप्रायेण २ ३ अस्मद्विसर्जिताःआवाभ्यांप्रहिताःसंतो याचध्वम् ।युष्माकं का तत्र लज्जा ननु तथाप्यपात्रत्वादस्मभ्यं किमितिदास्यंतिइतिचेत्तत्राह । कीर्तयंतइति (आर्यस्यरामस्य) ४ ५ ६ अविदूरेवर्तमानौसंतौवो (युष्माकम्) यत् (ओदनम्) अन्नंतल्लषतइच्छतः (भोद्विजाः) वःओदनंश्रद्धाचयद्यस्तितर्हियच्छतेति ७ दीक्षितावयमभोज्यान्नाइतिवदिष्यंतीतिस्वयमेवाशंक्याहुःदीक्षायाःआरभ्याग्नीषोमीयपश्वालंभात्पूर्वंदोषःनततोन्यत्र । तथा सौत्रामण्याश्चान्यत्रअन्यदा ८ (नशुश्रुवुःनादृतवंतइत्यर्थः) क्षुद्रेस्वर्गादावाशामात्रंयेषां (ते) भूरीणिक्लेशाधिकानिकर्माणियेषां (ते) अतोऽज्ञाःवृथाज्ञानवृद्धा-(-वयम्) इतिमानवंतः ९ ननुकर्म क्रममुल्लंघ्यादेशेकालेऽन्यार्थमन्नमन्यस्मैकथंदेयंतत्राह । देशइति । पृथक्चरुपुरोडाशादि (विविधं) द्रव्यम् । तंत्रंप्रयोगःधर्मोऽपूर्वः १०, मनुष्योयमितिदृष्ट्या (दुःप्रज्ञादुष्टबुद्धयोऽतएव) मर्त्या त्मानःब्राह्मणावयंमहांतइति (देहमुद्दिश्य) मन्यमानाइत्यर्थः ११ (नेतिचयदानप्रोचुः) १२

॥१०१॥

श्लोकाः $\frac{१}{१२}$

॥ गोपाऊचुः ॥ रामराममहावीर्यकृष्णदुष्टनिबर्हण ॥ एषावैबाधतेक्षुन्नस्तच्छांतिंकर्तुमर्हथः १ ॥ शुकउवाच ॥ ॥ इतिविज्ञापितोगोपैर्भगवान्दे वकीसुतः ॥ भक्तायाविप्रभार्यायाःप्रसीदन्निदमब्रवीत् २ प्रयातदेवयजनंब्राह्मणाब्रह्मवादिनः ॥ सत्रमांगिरसंनामह्यासतेस्वर्गकाम्यया ३ तत्रगत्वौदनं गोपायाचतास्मद्विसर्जिताः ॥ कीर्तयंतोभगवतआर्यस्यममचाभिधाम् ४ इत्यादिष्टाभगवतागत्वायाचंततेतथा ॥ कृतांजलिपुटाविप्रान्दंडवत्पतिताभु वि ५ हेभूमिदेवाःशृणुतकृष्णस्यादेशकारिणः ॥ प्राप्तान्जानीतभद्रंवोगोपान्नोरामचोदितान् ६ गाश्चारयंतावविदूरओदनंरामाच्युतौवोलषतोबुभुक्षितौ॥ तयोर्द्विजाओदनमर्थिनोर्यदिश्रद्धाचवोयच्छतधर्मवित्तमाः ७ दीक्षायाःपशुसंस्थायाःसौत्रामण्याश्चसत्तमाः ॥ अन्यत्रदीक्षितस्यापिनान्नमश्नन्हिदुष्यति ८ इतितेभगवद्याज्ञांशृण्वंतोपिनशुश्रुवुः ॥ क्षुद्राशाभूरिकर्माणोबालिशावृद्धमानिनः ९ देशःकालःपृथग्द्रव्यंमंत्रतंत्रर्त्विजोग्नयः ॥ देवतायजमानश्चक्रतुर्ध र्मश्चयन्मयः १० तंब्रह्मपरमंसाक्षाद्भगवंतमधोक्षजम् ॥ मनुष्यदृष्ट्यादुःप्रज्ञामर्त्यात्मानोनमेनिरे ११ नतेयदोमितिप्रोचुर्नेतिचपरंतप ॥ गोपानिराशाः प्रत्येत्यतथोचूरामकृष्णयोः १२

चूर्णिका

॥ श्रीगोपाऊचुः ॥ ॥ रामराममहावीर्यकृष्णदुष्टनिबर्हण एषावैबाधतेक्षुन्नस्तच्छांतिंकर्तुमर्हथः १ ॥ श्रीशुकउवाच ॥ एवं गोपैर्विज्ञापितः कृष्णः स्वभक्ताः विप्रस्त्रियः प्रसीदन्इदंआह २ हेगोपाः देवयजनंयात यत्रमुनयः आंगिरसंसत्रंस्वर्गेच्छया कुर्वते ३ तत्रगत्वाममरामस्यचनामगृहीत्वा अन्नंयाचत ४ ततः गोपाः तत्रग त्वाविप्रान्दंडवत्नत्वा अन्नं अयाचंत ५ हेविप्राः शृणुत नः कृष्णदासान्रामप्रेरितान् जानीत ६ किंच हेद्विजाः इतः समीपेगाश्चारयंतौरामकृष्णौक्षुधितौवर्तेते तयोः अन्नंदीयताम् वः यदिश्रद्धाचेत् ७ ननुवयंदीक्षिताः अभोज्यान्नाइतिचेत्तत्राहुःहेविप्राः दीक्षाया आरभ्य अग्नीषोमीयपशुबालंभनात्पूर्वं अन्नभक्षणेदोषः तथासौत्रामण्याश्च नान्यत्र ८ एवंभगवद्याज्ञांशृण्वंतोपिनशुश्रुवुः यतः तेबालिशाः ९ किंच हेनृपदेशकालद्रव्यादिसर्वंक्रतुश्चयन्मयः १० तंसाक्षाद्भगवंतंमनुष्यदृष्ट्यामेनिरे ११ ततश्च मुनयःओमितिनेतिचनोचुः ततोगोपाः निराशाभूत्वाएत्यरामकृष्णावूचुः १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

लौकिकींगतिमिति नहिकार्यार्थिनोनिर्विद्यंते । कोवायाचकोनपराभूयतइत्यादिलोकस्थितिंदर्शयन् १३ केवलंदेहेनगृहेवसंति धियातुमय्येवोषिताः यतोमयि स्निग्धाः । अतो दास्यंतीति १४ १५ इषिताः प्रेषिताः १६ सःकृष्णोगोपालैःसह (रामेणसहितः) १७ तत्कथाक्षिप्तमनस्त्वात्तद्दर्शनोत्सुकाःअतएवतमुपागतंश्रुत्वा जातसंभ्रमा बभूवुरिति १८ भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधंबहुगुणंसंस्कारविशेषैर्बहवोगुणारससौरभ्यादयोयास्मिंस्तत् । भाजनैःअमत्रैःभांडैर्वा । पत्यादिभिर्वार्यमाणाअपिप्रियम् (परमात्मानं) श्रीकृष्णंअभिसस्रुरभिजग्मुःअप्रतिबंधेदृष्टांतःसमुद्रंनिम्नगानद्यइवेति १९ (बंधुभिर्ज्ञातिभिः) अत्र (पत्यादीननादृत्यगमने) हेतुःभगवतीति । दीर्घबहुकालंश्रुतेन (असाधारणचरित्र-)-श्रवणेनधृतआशयोयाभिस्ताः २० तथागताःसत्योददृशुः २१ हिरण्यवत्परिधिःपरिधानंयस्यतंपीतांबरमित्यर्थः (यद्वा परिधिःकट्याभरणंसहिरण्मयोयस्यतम्) वनमाल्यैर्बर्हैर्धातुभिःप्रवालैश्चनटवद्वेषोयस्यतम् । अनुव्रतस्यसख्युःअंसेविन्यस्तोनिहितोहस्तोयेनतम् । इतरेणहस्तेनलीलयाब्जंधुनानंभ्रामयंतम् । कर्णयोरुत्पलेयस्यअलकाःकपोलयोर्यस्यमुखाब्जेहासोयस्यतंचतंचतंच २२ वृत्तेरपिलयेनसामरस्यमाह । प्रायइति । बहुशःश्रुतायेप्रियतमस्यउदयाःउत्कर्षाःतएवकर्णपूराःकर्णौपूरयंतिकृतार्थौकुर्वंतीतितथातैःकर्णाभरणैरितिवायस्मिन्श्रीकृष्णेनिमग्नमनसःआविष्टचेतसःतंलोचनद्वारैरंतःप्रवेश्यसुचिरमुपगुह्यतापंजहुः । अभिमतयोऽहंवृत्तयःप्राज्ञंसुषुप्तिसाक्षिणंपरिरभ्यतस्मिंल्लयंप्राप्ययथेति २३

॥१०२॥

श्लोकाः १३/२३

तमुपाकर्ण्यभगवान्प्रहस्यजगदीश्वरः ॥ व्याजहारपुनर्गोपान्दर्शयँल्लौकिकींगतिम् १३ मांज्ञापयतपत्नीभ्यःससंकर्षणमागतम् ॥ दास्यंतिकाममन्नं वःस्निग्धामय्युषिताधिया १४ गत्वाथपत्नीशालायांदृष्ट्वासीनाःस्वलंकृताः ॥ नत्वाद्विजसतीर्गोपाःप्रश्रिताइदमब्रुवन् १५ नमोवोविप्रपत्नीभ्योनिबोधतवचांसिनः ॥ इतोऽविदूरेचरताकृष्णेनेहेषितावयम् १६ गाश्चारयन्सगोपालैःसरामोदूरमागतः ॥ बुभुक्षितस्यतस्यान्नंसानुगस्यप्रदीयताम् १७ श्रुत्वाऽच्युतमुपायातंनित्यंतद्दर्शनोत्सुकाः ॥ तत्कथाक्षिप्तमनसोबभूवुर्जातसंभ्रमाः १८ चतुर्विधंबहुगुणमन्नमादायभाजनैः ॥ अभिसस्रुःप्रियंसर्वाःसमुद्रमिवनिम्नगाः १९ निषिध्यमानाःपतिभिर्भ्रातृभिर्बंधुभिःसुतैः ॥ भगवत्युत्तमश्लोकेदीर्घश्रुतधृताशयाः २० यमुनोपवनेऽशोकनवपल्लवमंडिते ॥ विचरंतंवृतंगोपैःसाग्रजंददृशुःस्त्रियः २१ श्यामंहिरण्यपरिधिंवनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे ॥ विन्यस्तहस्तमितरेणधुनानमब्जंकर्णोत्पलालककपोलमुखाब्जहासम् २२ प्रायःश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः ॥ अंतःप्रवेश्यसुचिरंपरिरभ्यतापंप्राज्ञंयथाभिमतयोविजहुर्नरेंद्र२३

चूर्णिका

तत्श्रुत्वाकृष्णः प्रहस्यपुनः गोपानाह हेगोपाः सबलंमांप्राप्तंविप्रपत्नीभ्यः ज्ञापयत ताः वः अन्नंदास्यंति १४ ततोगोपाः तत्रगत्वापत्नीशालायां आसीनाः ताः दृष्ट्वानत्वाचऊचुः १५ नमोवोविप्रपत्नीभ्यः नःवचांसिशृणुत इतःअविदूरे चरताकृष्णेन अत्र वयंप्रेषिताः १६ सः कृष्णः गाः चारयन् गोपालैः सरामः दूरंप्राप्तः तस्य गोपैः सहक्षुधितस्य अन्नंदीयतां १७ ततः ताः कृष्णंप्राप्तं श्रुत्वाजातसंभ्रमाः सत्यः १८ चतुर्विधमन्नंगृहीत्वासमुद्रंनद्यइवकृष्णं अभिजग्मुः १९ ततश्चताः पत्यादिभिर्निषेधिता अपि२० यमुनोपवनेगत्वासाग्रजंकृष्णंददृशुः २१ कथंभूतं तंश्यामंपीतांबरधरंसेवकांसेकृतहस्तं अन्यहस्तेन अब्जंधुनानं २२ ईदृशंतंदृष्ट्वा अक्षिरंध्रैः अंतः प्रवेश्य चिरं उपगुह्य तापंजहुः २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अखिलदृशांद्रष्टासर्वबुद्धीनांसाक्षी । तास्तथाप्राप्ताविज्ञायापि । तथेत्येतद्विवृणोति । त्यक्तसर्वाशाःत्यक्ताःसर्वाआशायाभिस्ताःकेवलमात्मनःस्वस्यैवादिदृक्षयेति २४ हेमहाभागाःवःस्वागतंशुभमागम
नम् । तदेवाह । यच्चस्मात्प्रतिबंधतिरस्कारेणास्माकंदिदृक्षयाप्राप्ताइतीदंवःउपपन्नंसंपन्नंयुक्तमितिवा २५ युक्तत्वमाह । नन्विति । आत्मप्रियेआत्माचासौप्रियश्चतस्मिन्मयिकुशलाःविवेकिनःअतएव
स्वस्यात्मनोर्थंपुरुषार्थंपश्यंतियेते यथा यथावद्भक्तिंकुर्वंति यथावद्भावमाह अद्धासाक्षात् । अत्रहेतुःअहैतुक्यव्यवहिताम् (अहैतुकीम्) फलाभिसंधिरहिताम् ।अतएवाव्यवहितांनिरंतराम् २६ आत्मनः
सर्वतःप्रेष्ठत्वमुपपादयति । प्राणेति । स्वाःज्ञातयः आत्मादेहः । एतेसर्वेयत्संपर्कात्यस्याध्यासेनउपकरणत्वेनवा २७ तत्तस्मात् (भक्तिमात्रेण) कृतार्थायूयंयजनंयज्ञवाटंयातगच्छत । ननुकृतार्थाः
किमितियास्यामइतिचेत्अतआह । पतयइति । पारयिष्यंतिसमापयिष्यंति । पतीनामनुग्रहायेत्यर्थः (हेसाध्व्यःपतिव्रताः) २८ नृशंसंपरुषम् निगमंप्रतिज्ञां'नमेभक्तःप्रणश्यती'ति (एंवरूपाम्)
वेदंवा'नसपुनरावर्तत'इति । पदावसृष्टंअवज्ञयापिदत्तम् (तुलसिदाम) बहुमानेनकेशैर्निवोढुम् (अंगीकर्तुम्) दासीभवितुं (इतिभावःतवपादमूलंप्राप्ताः) २९ किंच । नगृह्णंतिनोऽस्मान् । हेअरिं
दम कामलोभादिदमन भवतःपादाग्रयोःपतितदेहानां (त्वद्दास्यंविना) अन्यास्वर्गादिर्गतिरपिनभवेत् माभूत् तत्तस्माद्दास्यमेवविधेहीति ३० मया (अंतर्यामिणा)उपेताअनुज्ञाताः (यज्ञांगदेवताः)
प्रत्यक्षंदेवान्प्रदर्श्याह देवाअपीति (अनुमन्वतेअनुजानते । अतोनाभ्यसूयेरन्नित्यर्थः) ३१ तथापित्वांत्यक्तुंनशक्नुमइतिचेत्तत्राह । नेति (नृणांमद्भक्तानां) प्रीतयेसुखायअनुरागायस्नेहवृद्धयेअंग
संगःअंगाभ्यांसंगः (नभवतिकिंतुमनःसंगएव । 'मनःकृतंकृतंरामनशरीरकृतंकृत'मित्यादिस्मृतेरित्यर्थःतत्तस्मात्) ३२

श्लोकाः २४/३२

तास्तथात्यक्तसर्वाशाःप्राप्ताआत्मदिदृक्षया ॥ विज्ञायाखिलदृग्द्रष्टाप्राहप्रहसिताननः २४ स्वागतंवोमहाभागाआस्यतांकरवामकिम् ॥ यन्नोदिदृक्षयाप्रा
प्ताउपपन्नमिदंहिवः २५ नन्वद्धामयिकुर्वंतिकुशलाःस्वार्थदर्शनाः ॥ अहैतुक्यव्यवहितांभक्तिमात्मप्रियेयथा२६प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ॥
यत्संपर्कात्प्रियाआसंस्ततःकोन्वपरःप्रियः २७ तद्यातसाध्व्योयजनंपतयोवोद्विजातयः ॥ स्वसत्रंपारयिष्यंतियुष्माभिर्गृहमेधिनः २८ ॥ पत्न्यऊचुः ॥
मैवंविभोर्हतिभवान्गदितुंनृशंसंसत्यंकुरुष्वनिगमंतवपादमूलम् ॥ प्राप्तावयंतुलसिदामपदावसृष्टंकेशैर्निवोढुमतिलंघ्यसमस्तबंधून् ॥ २९ गृह्णंतिनो
नपतयःपितरौसुतावानभ्रातृबंधुसुहृदःकुतएवचान्ये ॥ तस्माद्भवत्प्रपदयोःपतितात्मनांनोनान्याभवेद्गतिररिंदमतद्विधेहि ३० ॥ ॥ श्रीभगवानु
वाच ॥ ॥ पतयोनाभ्यसूयेरन्पितृभ्रातृसुतादयः ॥ लोकाश्चयेमयोपेतादेवाअप्यनुमन्वते ३१ नप्रीतयेऽनुरागायह्यंगसंगोनृणामिह ॥ तन्मनोम
यियुंजानाअचिरान्मामवाप्स्यथ ३२

चूर्णिका

ततः कृष्णः त्यक्तसर्वाशाः ताः ज्ञात्वा आह २४ हेस्त्रियः वः स्वागतं आस्यतां किंकरवाम किंच नःदर्शनार्थंयूयंप्राप्ताः इदंवः युक्तं २५ ननुविवेकिनःआत्मनिप्रिये
मयिनिष्कामांभक्तिंकुर्वंतियतः २६ आत्मसंपर्कात्सर्वंप्रियंभवति ततः कोन्वपरः प्रियः २७ अतोयूयं धन्याः तस्मात् यज्ञवाटंगच्छत युष्मत्पतयःसत्रंसमापयिष्यंति
॥ पत्न्यऊचुः ॥ हेविभोएवंनृशंसंवक्तुंनार्हसि वयंबंधून् हित्वात्वद्दास्यार्थंप्राप्ताः अतः नः मात्यज २९ किंच अस्मत्पत्यादयः नगृण्हंति तस्मात् अस्माकंअन्यागतिः माभू
त् त्वद्दास्यमेवविधेहि ३० ॥ श्रीभगवानुवाच ॥ ॥ हेस्त्रियः युस्मासु पत्यादयः नाभ्यसूयेरन् किंच मयिमनोयुंजानाः सत्यः शीघ्रंमांप्राप्स्यथ ३१ ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(संनिकर्षेणप्रत्यासत्त्या) ३३ अनसूयवःतासुअदोषदृष्टयः ३४ देहमिति (तत्रगच्छंत्येकापूर्वविधृताआसीत्सा) तदीयं (तं) देहंतत्रविहायचैतन्येनभगवंतंप्रापेत्यर्थः ३५ (आशयित्वाभोजयित्वा) ३६ अनुशीलयन्अनुकुर्वन् । गोगोपगोपीनामितिकर्मणिषष्ठी । रूपवाक्कृतैःरूपेणवाचाकृतैःचरित्रैश्चरमयन्तारमयितुंरेमेइत्यर्थः ३७ अनुस्मृतिप्रकारमाह । नरानुकरणवतोर्विश्वेश्वरयोर्याच्ञांयत्अहन्महतवंतः । तत्कृतागलोवयमित्यनुस्मृत्येति ३८ तदाचभार्याःगुरूनिवमानयंतोभगवद्भक्तिराहितमात्मानंव्यनिंदन्नित्याह दृष्ट्वेति । अलौकिकींलोकातीताम् (पारमार्थिकीमित्यर्थः) ३९ त्रिवृत्शौक्लंसावित्रंदैक्षमितित्रिगुणंजन्म (तथानोऽस्माकंविद्याभ्यासंचधिक्) व्रतंब्रह्मचर्यंक्रियाःकर्माणिदाक्ष्यंचदक्षताम् । क्रियादाक्ष्यमित्येकंवापदम् । धिगित्यधिक्षेपे । येवयमधोक्षजेविमुखास्तेषांजन्मादितत्सर्वंधिगितिव्यगर्हयन्नित्यर्थः ४० ४१ योअविध्यत्अच्छिनत्तंदुरंतंभावं (अखंडं) भक्तिंपश्यतेति (गृहाभिधान्गृहासक्तिलक्षणानित्यर्थः) ४२ द्विजातिसंस्कारउपनयनम् (आत्ममीमांसाआत्मविचारः) क्रियाःसंध्योपासनादयः (चित्तशुद्धिहेतुभूताः) ४३ (एवंसत्यपिआसांकृष्णेदृढाभक्तिरस्ति । संस्कारादिमतामप्यस्माकंतु नैवेति) ४४

श्लोकाः ३३/४५

श्रवणाद्दर्शनाद्ध्यानान्मयिभावोनुकीर्तनात् ॥ नतथासंनिकर्षेणप्रतियाततताेगृहान्३३ ॥शुकउवाच॥ इत्युक्तायज्ञपत्न्यस्तायज्ञवाटंपुनर्गताः॥तेचानसूयवःस्वाभिःस्त्रीभिःसत्रमपारयन् ३४ तत्रैकाविधृताभर्त्राभगवंतंयथाश्रुतम् ॥ हृदोपगुह्यविजहौदेहंकर्मानुबंधनम् ३५ भगवानपिगोविंदस्तेनैवान्नेनगोपकान् ॥ चतुर्विधेनाशयित्वास्वयंचबुभुजेप्रभुः ३६ एवंलीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमेगोगोपगोपीनांरमयन्रूपवाक्कृतैः ३७ अथानुस्मृत्यविप्रास्तेअन्वतप्यन्कृतागसः॥ यद्विश्वेश्वरयोर्याच्ञामहन्मनृविडंबयोः ३८दृष्ट्वास्त्रीणांभगवतिकृष्णेभक्तिमलौकिकीम् ॥आत्मानंचतयाहीनमनुतप्ताव्यगर्हयन् ३९ धिग्जन्मनस्त्रिवृद्विद्यांधिग्व्रतंधिग्बहुज्ञताम् ॥ धिक्कुलंधिक्क्रियादाक्ष्यंविमुखायेत्वधोक्षजे ४० नूनंभगवतोमायायोगिनामपिमोहिनी ॥ यद्वयंगुरवोनृणांस्वार्थेमुह्यामहेद्विजाः ४१ अहोपश्यतनारीणामपिकृष्णेजगद्गुरौ ॥ दुरंतभावंयोऽविध्यन्मृत्युपाशान्गृहाभिधान् ४२ नासांद्विजातिसंस्कारोननिवासोगुरावपि ॥ नतपोनात्ममीमांसानशौचंनक्रियाःशुभाः ४३ अथापिह्युत्तमश्लोकेकृष्णेयोगेश्वरेश्वरे ॥ भक्तिर्दृढानचास्माकंसंस्कारादिमतामपि ४४

चूर्णिका

मत्कथाश्रवणेनमद्ध्यानेन यथामयिभक्तिः दृढाभवेत् नतथासन्निकर्षेण अतो गृहान्प्रातियात३३॥श्रीशुकवाच॥ एवंकृष्णेनोक्तास्ताः यज्ञवाटंगताः ततः पतयः तासुदोषमकृत्वाताभिः सत्रं अपारयन् ३४ किंच तत्रएकाभर्त्राधृतासतीयथाश्रुतं कृष्णं मनसाआश्लिष्यदेहंजहौ ३५ ततः कृष्णः तेनान्नेनगोपान् भोजयित्वा स्वयंबुभुजे ३६ एवं कृष्णः लोकं अनुकुर्वन्रेमे ३७ अथते विप्राः विश्वेश्वरयोः तयोः याच्ञांहतवंतोवयमित्यनुस्मृत्यअन्वतप्यन् ३८ततः तेस्त्रीणांकृष्णे भक्तिंदृष्ट्वातयाहीनंस्वात्मानंव्यगर्हयन् ३९ नः जन्मधिक्तथाव्रतंविद्यांकुलंधिक् यतः वयं कृष्णेविमुखाः ४० किंच ईशमाया योगिनामपि मोहिनी यतः वयं नृणांगुरवोपिस्वार्थेमुह्यामहे४१ अहोस्त्रीणांगोविंदेभावं पश्यत यः गृहरूपमृत्युपाशान् अविध्यत् ४१ किंच आसांद्विजातिसंस्कारः न न तपः अथापियोगेश्वरेश्वरेदृढाभक्तिर्जाता किमासांभाग्यम् ४३ ४४

१ अयंश्लोकः मुद्रितपुस्तकेनविद्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(नोऽस्माकम् । सतांगतिर्मगवान् । स्मारयामास आत्मस्मरणंकारयामासेत्यर्थः) ४५ (ईशितव्यैःशासनीयैःअस्माभिःकिंस्यात्कोलाभइत्यर्थः । एतदन्नयाच्ञादि । विडंबनंलोकानुकरणमात्रम्) ४६ स्वात्मदोषापवर्गेणचांचल्यगर्वादित्यागेन ४७ (धर्मोऽपूर्वम्) ४८ इत्यशृण्म एवंसर्वत्रश्रुतवंतोवयंहितथापि (मूढाःसंतोनतंविद्महे) ४९ (यासांभक्त्यायत्कर्तृकभक्त्या हेतुभूतयाअस्माकं मतिर्हरौजाताताहशःस्त्रियःपुण्यातिशयंविनानलभ्यंतइतिवयंधन्यतमाः) ५० (अकुंठामेधाज्ञानंयस्यतस्मै) ५१ (नविज्ञातोऽनुभावऐश्वर्यंयैस्तेषाम्) ५२ (स्वाघंस्वापराधम् । अच्युतयोः अच्युतौ । रामकृष्णौ) नचाचलन् । तयोर्दर्शनायनजग्मुरित्यर्थः ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांत्रयोविंशतितमोध्यायः ॥ २३ ॥ ॥ ७ ॥ ॥ श्रीः ॥ ॥२३॥

॥१०५॥ चतुर्विंशेमहेंद्रस्यमखंव्यावर्त्यहेतुभिः । कृष्णःप्रवर्तयामासगोवर्धनमखोत्सवम् ॥ १ ॥ भूसुराणांक्रियागर्वंनिरस्यस्वःसुरेषुच । मघवन्मदभंगायतन्मखंसमवारयत् २ ब्राह्मणाःकंसाद्भीताःस्वाश्रम स्थाएवभगवंतमभजन् । भगवानपितत्रैवनिवसन्इंद्रयागेकृतउद्यमोयैस्तान्गोपानपश्यदितिसंबंधः १ २ वृथासंभ्रमोनभवतिमखोयमितिचेत्किमत्रफलंकादेवताकेनाधिकारिणाकेनवासाधनेनसाध्यते ३

ननुस्वार्थविमूढानांप्रमत्तानांगृहेहया ॥ अहोनःस्मारयामासगोपवाक्यैःसतांगतिः ४५ अन्यथापूर्णकामस्यकैवल्याद्याशिषांपतेः ॥ ईशितव्यैःकिमस्मा भिरीशस्यैतद्विडंबनम् ४६ हित्वान्यान्भजतेयंश्रीःपादस्पर्शाशयाऽसकृत् ॥ स्वात्मदोषापवर्गेणतद्याच्ञाजनमोहिनी ४७ देशःकालःपृथग्द्रव्यमंत्रतंत्र र्त्विजोऽग्नयः ॥ देवतायजमानश्चक्रतुर्धर्मश्चयन्मयः ४८ सएषभगवान्साक्षाद्विष्णुर्योगेश्वरेश्वरः ॥ जातोयदुष्वित्यशृण्मह्यपिमूढानविद्महे ४९ अहोवयं धन्यतमायेषांनस्तादृशःस्त्रियः ॥ भक्त्यायासांमतिर्जाताअस्माकंनिश्चलाहरौ ५० नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे ॥ यन्मायामोहितधियोभ्रमामः कर्मवर्त्मसु ५१ सवैनआद्यःपुरुषःस्वमायामोहितात्मनाम् ॥ अविज्ञातानुभावानांक्षंतुमर्हत्यतिक्रमम् ५२ इतिस्वाघमनुस्मृत्यकृष्णेतेकृतहेलनाः ॥ दि दृक्षवोप्यच्युतयोःकंसाद्भीतानचाचलन् ५३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रयोविंशोध्यायः २३ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ भगवानपितत्रैवबलदेवेनसंयुतः ॥ अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमान् १ तदभिज्ञोपिभगवान्सर्वात्मासर्वदर्शनः ॥ प्रश्रयावनतोऽपृच्छद्वृद्धान्नं दपुरोगमान् २ कथ्यतांमेपितःकोयंसंभ्रमोवउपागतः ॥ किंफलंकस्यचोद्देशःकेनवासाध्यतेमखः ३

श्लोकाः ४९/३

चूर्णिका

किंच कृपालुःकृष्णः गृहेहयामत्तानांनः गोपवाक्यैःस्मारयामास ४५ अन्यथापूर्णस्यअन्नयाचनयाकिम् ४६ किंच अन्यान्हित्वायंश्रीर्भजते तद्याच्ञाजनमोहिनीखलु ४७ सएष भगवान् यदुषुजातइतिश्रुत्वापिवयंनविद्महे ४८ ४९ अहोवयं अतिधन्याः यतः नः स्त्रियः तादृश्यः यासांभक्त्यानः मतिः हरौस्थिराजाता ५० नमस्तुभ्यंभगवते यन्मा यामोहितधियः वयंकर्मवर्त्मसुभ्रमामः ५१ सः कृष्णः नः अतिक्रमंक्षंतुमर्हति ५२ इतिस्वाघमनुस्मृत्यकृष्णेतेकृतहेलनाः दिदृक्षवोऽप्यच्युतयोःकंसाद्भीतानचाचल न् ५३ ॥ इतिदशमेत्रयोविंशः ॥ २३ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ भगवानपितत्रैवबलदेवेनसंयुतः अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमा न् १ तत्ज्ञात्वापिकृष्णः नंदादीन्पप्रच्छ २ हेपितः कोयंसंभ्रमः प्राप्तः अस्यकिंफलं उद्देशश्चकः केनअयं मखः साध्यते एतत् मह्यंब्रूहि ३ ॥१०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. एतद्ब्रूहिमहान्कामः (इच्छा) ममश्रवणेवर्तते यद्वा तवमहान्कामोदृश्यतेइति तूष्णींस्थितंप्रत्याह नेति सर्वात्मनांसर्वत्रात्मदृष्टीनाम् ४ अतएवनविद्यतेस्वःपरइतिदृष्टिर्येषाम् । स्वपरइतिदृष्ट्यभावा अ०
देवतत्तद्भेदाद्यमित्रादयोपियेषांनसंतीत्याह । अमित्रेति । नमित्रंउदास्तउदासीनोविद्विट् (शत्रुः) येषांतेषां (हियस्मात्) कृत्यं (कर्तव्यं) सर्वंकर्मनैवगोपनीयं (अस्ति । (अभेददर्शिनांनगुह्यं)
टीका किंचिदस्तीत्यर्थः । सत्यपिभेददर्शनेउदासीनः शत्रुवद्वर्ज्यः । आत्मतुल्यत्वात्सुहृन्मंत्रेषुनवर्जनीयइत्याह । उदासीनइति ५ किंचसुहृद्भिःसह (रहसि)विचार्य (सिद्धांतं) ज्ञात्वैव कर्मकर्तव्यं ॥२४॥
नतुगतानुगतिकत्वमात्रमाह । ज्ञात्वेति । अज्ञात्वाच । तत्रविदुषः (ज्ञात्वाऽनुतिष्ठतः) यथावत्कर्मफलंस्यात्तथानाविदुषः ६ भवतामयंक्रियायोगःशास्त्रतोऽपिकिंविचारितः (किम्) प्रवृत्तः
लौकिकःआचारप्राप्तोवेति । साधु सोपपत्तिकंभण्यतां कथ्यताम् ७ आचारप्राप्तएवेतिसहेतुकमाह । पर्जन्यइति । (तस्यपर्जन्यस्वरूपस्येंद्रस्यमेघाअभ्राणि) आत्ममूर्तयःप्रियमूर्तयः (जीवनंजीवि
॥१०६॥ कासाधनमित्यर्थः) ८ ततःकिंअतआह । तमिंद्रंवार्मुचांमेघानांपतिंस्वामिनमीश्वरंनियंतारम् । तद्रेतसातद्वृष्टिपयसा ९ उपजीवंति उपजीविकांकल्पयंति धर्मार्थकामसिद्धये । ननुकृष्यादिभिर्जीवंति
किमिंद्रेणतत्राह । पुंसामिति (पुंसांयेपुरुषकाराःकृष्यादयःप्रयत्नास्तेषामिति) फलभावनःफलसाधकःपर्जन्यंविनाकृष्यादिवैफल्यादित्यर्थः १० (पारंपर्यागतंकुलपरंपरागतम्) ११ इंद्रायमन्युं
जनयन्निितिकोपजननद्वारागर्वपर्वतादिंद्रमवतारयितुंदेवतानिराकरणंनत्वयमेवाभिप्रायइत्यर्थः १२ प्रथमंतावत्कर्मवादेनदेवान्निराकरोति । कर्मणेति (जंतूनांसृष्टिस्थितिलयाःकर्मानुसाराइत्यर्थः ।
क्षेमंभयपरिहारम्) ननुजडात्कर्मणःकेवलात्कथंफलसिद्धिःस्यात् । इतिचेत्अहोअशीलितमीमांसानांस्वमतिविलसिताश्रद्धा (यतः) कर्मणःफलकारणत्वेवचनतोऽवगतेकिंततोनुपपन्नंनाम १३

एतद्ब्रूहिमहान्कामोमह्यंशुश्रूषवेपितः ॥ नहिगोप्यंहिसाधूनांकृत्यंसर्वात्मनामिह ४ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषाम् ॥ उदासीनोरिवद्वर्ज्य श्लोकाः
आत्मवत्सुहृदुच्यते ५ ज्ञात्वाज्ञात्वाचकर्माणिजनोयमनुतिष्ठति ॥ विदुषःकर्मसिद्धिःस्यात्तथानाविदुषोभवेत् ६ तत्रतावत्क्रियायोगोभवतांकिंविचा
रितः ॥ अथवालौकिकस्तन्मेपृच्छतःसाधुभण्यताम् ७ ॥ नंदउवाच ॥ पर्जन्योभगवानिंद्रोमेघास्तस्यात्ममूर्तयः ॥ तेभिवर्षंतिभूतानांप्राणनंजीवनंपयः ४/१३
८ तंतातवयमन्येचवार्मुचांपतिमीश्वरम् ॥ द्रव्यैस्तद्रेतसासिद्धैर्यजंतेक्रतुभिर्नराः ९ तच्छेषेणोपजीवंतित्रिवर्गफलहेतवे ॥ पुंसांपुरुषकाराणांपर्जन्यःफल
भावनः १० यएवंविसृजेद्धर्मंपारंपर्यागतंनरः॥ कामाल्लोभाद्भयाद्द्वेषात्सवैनाप्नोतिशोभनम् ११ ॥ शुकउवाच ॥ वचोनिशम्यनंदस्यतथान्येषांव्रजौक
साम् ॥ इंद्रायमन्युंजनयन्पितरंप्राहकेशवः १२ ॥ श्रीभगवानुवाच ॥ कर्मणाजायतेजंतुःकर्मणैवहिलीयते ॥ सुखंदुःखंभयंक्षेमंकर्मणैवाभिपद्यते १३

चूर्णिका अमित्रोदास्तविद्विषांसाधूनांकिमपिनगोप्यंकृत्यमस्ति ४ ५ किंच अयंजनः ज्ञात्वाऽज्ञात्वाकर्माणिकरोति तत्रयथाविदुषः कर्मफलंस्यात्तथाअविदुषोन ६
तत्रअयंक्रियायोगः शास्त्रतोविचारितः आचारप्राप्तोवाइदमुच्यताम् ७ ॥ नंदउवाच ॥ हेकृष्णपर्जन्योभगवानिंद्रः तत्प्रियमूर्तयः मेघाः तेभूतानांजीवनंपयः वर्षंति
८ तइंद्रंवयंअन्येचतद्रेतःसिद्धैर्द्रव्यैःक्रतुभिः यजंते ९ ततश्चहोमशेषेणधर्माद्यर्थसिद्धयेनराः उपजीवंति १० एवंपरंपरागतं धर्मंयः कामलोभादिनात्यजेत्सः ॥१०६॥
शुभंनाप्नोति ११ ॥ श्रीशुकउवाच ॥ एवंनंदस्यगोपानां च वचःश्रुत्वाइंद्राय मन्युंजनयन्कृष्णः नंदमाह १२ ॥ श्रीभगवानुवाच ॥ हेपितः अयंजंतुः कर्मणा
जायते म्रियतेच तथा सुखादि कर्मणैव प्राप्यते १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

केचित्पुनरतिसाहसभीताः कर्मपरतंत्रमीश्वरंमन्यंतेतन्मतमनूद्य निराकरोति अस्तिचेदिति । स्वयंकर्मभिरलिप्तःअन्येषांजीवानांकर्मणांफलरूपी (फलानिरूपयतितथा)फलदाता (सोपि) कर्तारंभज
तेतत्तत्कर्मफलदानेन (हियस्मादकर्तुःफलदानेप्रभुर्नेसः) १४ अतःकर्मणएवफलसिद्धेस्तत्पारतंत्र्येचअजागलस्तनतुल्यत्वान्नदेवतयाकृत्यमित्याह । किमिंद्रेणेति । ननुकर्मणोपिप्रवृत्तिरंतर्याम्यपेक्षै
वतत्कथंसर्वथादेवतायाअनुपयोगइत्याशंक्याह । स्वभावविहितमिति । स्वभावेनप्राक्तनसंस्कारेणैवविहितंयत्कर्मतदन्यथाकर्तुमनीशेन (किम्) १५ एतद्विवृणोति स्वभावतंत्रइति । प्रवृत्तेःसंस्का
राधीनत्वात्किमंतर्यामिणा (अंतर्गडुना) इत्यर्थः १६ तस्मात्स्वभावतोनिष्पन्नस्यकर्मणएवसर्वकारणत्वात्कर्मैवपूज्यमित्याह । देहानितिसार्धेन (जंतुःप्राणीकर्मणैवउच्चान्नीचान्वाप्राप्यत्यजति ।
शत्रुमित्रादिकंचसर्वंकर्मैव) १७ (स्वभावस्थःप्राक्तनसंस्कारेणवर्तमानः) संपूजयेत्संमानयेत् । ननुदेवतोद्देशेनद्रव्यत्यागात्मकत्वात्कर्मणः कथंदेवतांविनासिद्धिरित्याशंक्यकर्मांगमात्रंदेव
॥१०७॥ तेतिपक्षमुपसंहरन्निवहेतुवादमाश्रित्यान्यामिवदेवतांसमर्थयतेअंजसेति ।(वर्तेतजीवेत्तदेवजीवनसाधनमेवदैवतम् ।) १८ हेतुबलेनैवविपक्षेदोषमाह । आजीव्येति । (भावंपदार्थंआजीव्यततो
न्यं) उपजीवतिसेवते । (यथाअसतीस्वपतिमाजीव्योपपतिंसेवमानानगतिंलभतेतद्वदिति) १९ स्ववृत्तिवर्त्तुदृष्टांतत्वेनवर्णानांवृत्तिभेदमाह । वर्तेतेतिब्रह्मणावेदाध्यापनादिना ॥ २० वैश्यवृत्ते
श्चातुर्विध्यमाह । कृषीति । कृषिवाणिज्यसहितागोरक्षाएवंत्रयम् । कुसीदंवृद्धिजीवनंचतुर्थम् २१ ननुगवामपिवृत्तिर्महेंद्राधीनैवेत्याशंक्यनिरीश्वरसांख्यमताश्रयेणनिराकरोति । सत्त्वमितिश्लोकद्वये
न । अन्योन्यं पुरुषस्त्रीयोगेन २२

श्लोकाः १४/२२

अस्तिचेदीश्वरःकश्चित्फलरूप्यन्यकर्मणाम् ॥ कर्तारंभजतेसोपिनह्यकर्तुःप्रभुर्हिसः १४ किमिंद्रेणेहभूतानांस्वस्वकर्मानुवर्तिनाम् ॥ अनीशेनान्यथाक
र्तुंस्वभावविहितंनृणाम् १५ स्वभावतंत्रोहिजनःस्वभावमनुवर्तते ॥ स्वभावस्थमिदंसर्वंसदेवासुरमानुषम् १६ देहानुच्चावचान्जंतुःप्राप्योत्सृजतिकर्मणा॥
शत्रुर्मित्रमुदासीनःकर्मैवगुरुरीश्वरः १७ तस्मात्संपूजयेत्कर्मस्वभावस्थःस्वकर्मकृत् ॥ अंजसायेनवर्तेततदेवास्यहिदैवतम् १८ आजीव्यैकतरंभावंयस्त्व
न्यमुपजीवति ॥ नतस्माद्विंदतेक्षेमंजारंनार्यसतीयथा १९ वर्तेतब्रह्मणाविप्रोराजन्योरक्षयाभुवः ॥ वैश्यस्तुवार्तयाजीवेच्छूद्रस्तुद्विजसेवया २० कृषिवाणिज्य
गोरक्षाकुसीदंतुर्यमुच्यते ॥ वार्ताचतुर्विधातत्रवयंगोवृत्तयोऽनिशम् २१ सत्त्वंरजस्तमइतिस्थित्युत्पत्त्यंतहेतवः ॥ रजसोत्पद्यतेविश्वमन्योन्यंविविधंजगत् २२

चूर्णिका

यदि च फलरूपी ईश्वरःकश्चिदस्ति तर्हिसोपिकर्तारंभजते १४ नहि अकर्तुः सप्रभुः अतः भूतानां स्वस्वकर्मानुवर्तिनांप्राक्तनसंस्कारकर्मअन्यथाकर्तुमनीशेन इंद्रेणकिं नकिंचि
त् १५ किंच स्वभावाधीनोयंजनः स्वभावमनुवर्ततेइदंसर्वं स्वभावस्थमेव १६ अयंजंतुः कर्मणाउच्चावचान्देहान्प्राप्यत्यजतिच तथा शत्रुमित्रादिर्गुरुः ईश्वरश्च कर्मैव
१७ तस्मात्स्वभावस्थः सन् जनः कर्मैवपूजयेत् तदेवास्यजीवितं १८ किंच यः एकतरंभावं अजीव्यान्यंसेवते सः तस्मात् क्षेमंनाप्नोति जारंनार्यसती यथा १९ स्ववृत्तिव ॥१०७॥
र्त्तुदृष्टांतत्वेनवर्णानांवृत्तिभेदमाह तत्रविप्रः वेदाध्ययनादिनावर्तेत राजन्यः भुवोरक्षया वैश्यः कृष्यादिरूपयावार्तया शूद्रस्तुद्विजसेवया २० तत्रवैश्यवृत्तेश्चातुर्विध्यमाह कृ
षिः १ वाणिज्यम् २ गोरक्षा ३ वृद्धिजीवनम् ४ तत्र वयंसदैव गोवृत्तयः २१ किंच सत्त्वादिगुणाः अस्यस्थित्यादिहेतवः संति तत्ररजसा विश्वंउत्पद्यते २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(चोदिताः प्रेरिताः) सर्वतइतिसमुद्रशिलोखरादिष्वपिवृष्टिदर्शनान्नप्रेक्षावत्पूर्वकत्वंवृष्टेरितिभावः । तैरेवमेघैरेवसिध्यंतिजीवंति २३ तथापियोगक्षेमार्थंदेवतापेक्षेतिचेत्तत्राह । नेति (नोऽस्माकं) पुरः पत्तनानि (नसंति । नापि) जनपदादेशाः (किंतुवयंवनौकसःअतः) २४ अस्माकंयोगक्षेमहेतुर्वनशैलादयएवेतिभावः । ब्राह्मणानपिसंगृह्णन्निगमयाति । तस्मादिति । स्वयमुत्प्रेक्षितयागप्रयोगकल्पनामाह । यइंद्रमखसंभाराइतिसार्धपंचभिः । संभाराः साधनानि २५ सूपो मौद्गं (व्यंजनम्) पायसंकेवलेपयसिपक्वम् । संयावादयोगोधूमादिविक्रियाः । क्रमश्चसूपपायसयोःश्रुत्या । दोहस्यार्थतोऽन्येषांपाठतः २६ यागशोभार्थंश्रद्धोत्पादनार्थंचाह । हूयंतामिति । धेनुसहितादक्षिणास्ताएववादक्षिणाः वोयुष्माभिः २७ यवसंतृणम् । (गिरयेगोवर्धनाय) २८ २९ सर्वान्शिरःकंपेनानुमोदयन्नाह । गोब्राह्मणाद्रीणामिति । मह्यंममच । (दयितःप्रियः ।) ३० ३१ तद्द्रव्येणतेनमहेंद्रमखद्रव्येण । गिरिद्विजान्प्रतियथायथम् ३२ बलीन् (उपहारान् ।) उपहृत्यदत्त्वा आदृताः सादराः ३३ अनडुद्युक्तानिउत्तमवृषभैर्युक्तानि । सद्द्विजाशिषःद्विजाशीर्भिःसहिवाः ३४

॥१०८॥

श्लोकाः २३/३४

रजसाचोदितामेघावर्षंत्यंबूनिसर्वतः ॥ प्रजास्तैरेवसिध्यंतिमहेंद्रःकिंकरिष्यति २३ ननःपुरोजनपदानग्रामानगृहावयम् ॥ वनौकसस्तातनित्यंवनशैलनिवासिनः २४ तस्माद्गवांब्राह्मणानामद्रेश्चारभ्यतांमखः ॥ यइंद्रयागसंभारास्तैरयंसाध्यतांमखः २५ पच्यंतांविविधाःपाकाःसूपांताःपायसादयः ॥ संयावापूपशष्कुल्यःसर्वदोहश्चगृह्यताम् २६ हूयंतामग्नयःसम्यग्ब्राह्मणैर्ब्रह्मवादिभिः ॥ अन्नंबहुविधंतेभ्योदेयंवोधेनुदक्षिणाः २७ अन्येभ्यश्चाश्वचांडालपतितेभ्योयथार्हतः ॥ यवसंचगवांदत्त्वागिरयेदीयतांबलिः २८ स्वलंकृताभुक्तवंतःस्वनुलिप्ताःसुवाससः ॥ प्रदक्षिणंचकुरुतगोविप्रानलपर्वतान् २९ एतन्ममसमतंतातक्रियतांयदिरोचते ॥ अयंगोब्राह्मणाद्रीणांमह्यंचदयितोमखः ३० ॥ शुकउवाच ॥ कालात्मनाभगवताशक्रदर्पंजिघांसता ॥ प्रोक्तंनिशम्यनंदाद्याःसाध्वगृह्णंततद्वचः ३१ तथाचव्यदधुःसर्वंयथाहमधुसूदनः ॥ वाचयित्वास्वस्त्ययनंतद्द्रव्येणगिरिंद्विजान् ३२ उपहृत्यबलीन्सर्वानादृतायवसंगवाम् ॥ गोधनानिपुरस्कृत्यगिरिंचक्रुःप्रदक्षिणम् ३३ अनांस्यनडुद्युक्तानितेचारुह्यस्वलंकृताः ॥ गोप्यश्चकृष्णवीर्याणिगायंत्यःसद्द्विजाशिषः ३४

चूर्णिका

तथारजसाप्रेरिताः मेघाः जलंवर्षंति तैरेवप्रजाः सिद्ध्यंति तत्रइंद्रः किंकरिष्यति २३ तथा हे नंद नः पुरः देशाः ग्रामाः न वयंतुनित्यंवनशैलवासिनः स्म २४ तस्मात् गवांविप्राणांअद्रेश्चमखः इंद्रयागार्थं सिद्धैः संभारैः साध्यताम् २५ तत्रविविधाः पायसादयः सूपांताः पाकाः पच्यंताम् तथासंयावापूपशष्कुल्यः सर्वदोहश्चगृह्यताम् २६ तथाविप्रैः अग्नयः हूयंताम् तेभ्यः अन्नंधेनुदक्षिणाश्चदेयाः २७ तथाअन्येभ्यःआश्वचाडालपतितेभ्यः अन्नं देयम् तथा गवां तृणां दत्त्वा गिरयेबलिः दीयताम् २८ तथायूयंस्वलंकृताभुक्तवंतः संतः गोविप्रानलपर्वतान् प्रदक्षिणंकुरुत २९ हेनंद एतन्ममसमतंयदिरोचतेतर्हिक्रियताम् किंच अयंगवादीनांयज्ञः मेप्रियोऽस्ति ३० ॥ श्रीशुकउवाच ॥ एवंशक्रदर्पहंत्रा कृष्णेन उक्तंश्रुत्वानंदाद्याः तद्वचः अगृह्णंत ३१ तथाच कृष्णेनोक्तवत् सर्वेचक्रुः ततः स्वस्त्ययनंवाचयित्वातद्द्रव्येणगिरिद्विजान्गवां चतृणंदत्वा ३२ गोधनानिपुरस्कृत्यअनःसु आरुह्य स्वलंकृताः नंदाद्याः कृष्णवीर्याणि गायंत्यो गोप्यश्च गिरिं प्रदक्षिणंचक्रुः ३३ ३४

॥१०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका गोपविश्रंभणंगोपानांविश्वासजनकंरूपंगतःप्राप्तः सन् वलिमुपहारंआदत्अभक्षयत् ३५ तस्मैआत्मनेआत्मनास्वयंव्रजजनैःसहनमश्चक्रेअहोइतिसार्धश्लोकंपठन् ३६ (एष ःैलः) कामरूपीसर्पादिरूपः (सन्मर्त्यान्नःअवजानतःवनौकसः हियस्मात्हंतिअतः) अस्मैअद्रयेशर्मणेक्षेमाय ३७ (यथायथावत्विधायकृत्वा) ३८ कर्मैवालंप्राक्स्वभावोगुणोवाकर्तागंवातद्वशोवामहेशः । वार्ताकर्त्री देवतेतीयमुक्तादेवक्षोभेषणमतीनत्वभीष्टा ॥ १ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुर्विंशोऽध्यायः २४ ॥ ॥ ७ ॥ ॥ पंचविंशेरुषाशक्रेव्रजनाशायवर्षति । उद्धृत्यगिरिमासारादरक्षद्गोकुलंप्रभुः ॥ १ ॥ कृष्णोनाथोयेषांतेभ्यः १ क्रुद्धश्चसान्निंद्रः सांवर्तकंनामसंवर्तःप्रलयस्तत्कर्तारंप्रसिद्धं मेघानांगणंप्राचोदयत्प्रेषयामास । ननुकृष्णनाथानांतेषांघातेकथंप्रवृत्तइत्याशंक्यात्मसंभावनयानिरस्तविवेकत्वादित्याशयेनाह । वाक्यंचाहेत्यादिपंचभिः । ईशमानीअहमेवशेइतिगर्ववान् २ देवहेलनंदेवस्यममावज्ञाम् ३ अदृढैःअसमर्थैःकर्ममयैः क्रियानिर्वर्त्यैःअतएवनामनौनिभैःनाममात्रेणयानावइतिव्यवह्रियंतेतत्सदृशैः (स्वप्नस्थनौनिभैःक्रतुभिः) आन्वीक्षिकींआत्मानुस्मृतिरूपां (विद्यांहित्वायथाभवसमुद्रंतितीर्षंति) ४ तथावाचालंबहुभाषिणंबालिशंशिशुंपंडितमानिनंपंडितंमन्यंअतःस्तब्धमविनीतंइतिनिंदायांयोजितापींद्रस्यभारतीश्रीकृष्णंस्तौति । तथाहि । वाचालंशास्त्रयोनिं । बालिशंएवमपिशिशुवन्निरभिमानिनं । स्तब्धंअन्यस्यवंद्यस्यभावादनम्रं । अज्ञं नास्तिज्ञोयस्मात्तंसर्वज्ञमित्यर्थः । पंडितमानिनंब्रह्मविदांबहुमाननीयंकृष्णंसदानंदरूपंपरंब्रह्ममर्त्यंतथापिभक्तवात्सल्येनमनुष्यतयाप्रतीयमानमिति ५ ॥२४॥

॥१०९॥

श्लोकाः ३५/५

कृष्णस्त्वन्यतमंरूपंगोपविश्रंभणंगतः ॥ शैलोस्मीतिब्रुवन्भूरिबलिमादद्बृहद्वपुः ३५ तस्मैनमोव्रजजनैःसहचक्रेऽऽत्मनात्मने ॥ अहोपश्यतशैलोसौ रूपीनोऽनुग्रहंव्यधात् ३६ एषोऽवजानतोमर्त्यान्कामरूपीवनौकसः ॥ हंतिह्यस्मैनमस्यामःशर्मणेआत्मनोगवाम् ३७ इत्यद्रिगोद्विजमखंवासुदेवप्रणोदिताः ॥ यथाविधायतेगोपाःसहकृष्णाव्रजंययुः ३८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुर्विंशतितमोध्यायः २४ ॥ ॥ शुकउवाच ॥ इंद्रस्तदात्मनःपूजांविज्ञायविहतांनृप ॥ गोपेभ्यःकृष्णनाथेभ्योनंदादिभ्यश्चुकोपसः १ गणंसांवर्तकंनाममेघानांचांतकारिणाम् ॥ इंद्रःप्राचोदयत्क्रुद्धोवाक्यंचाहेशमान्युत २ अहोश्रीमदमाहात्म्यंगोपानांकाननौकसाम् ॥ कृष्णंमर्त्यमुपाश्रित्yयेचक्रुर्देवहेलनम् ३ यथाऽदृढैःकर्ममयैःक्रतुभिर्नामनौनिभैः ॥ विद्यामान्वीक्षिकींहित्वातितीर्षंतिभवार्णवम् ४ वाचालंबालिशंस्तब्धमज्ञंपंडितमानिनम् ॥ कृष्णंमर्त्यमुपाश्रित्यगोपामेचक्रुरप्रियम् ५

चूर्णिका तदाकृष्णः गोपविश्वासार्थंअन्यरूपंधृत्वाशैलोस्मीतिब्रुवन्बलिं अदात् ३५ किंच सकृष्णः व्रजजनैः सहआत्मना आत्मनेतस्मैनमस्कृत्वाह अहोपश्यतशैलोऽसौ नः अनुग्रहंव्यधात् ३६ अयंकामरूपीशैलः अवजानतोमर्त्यान्हंतिअतः गवां स्वस्यचसुखार्थं अस्मैनमस्यामः ३७ इत्यद्रिगोद्विजमखंवासुदेवप्रणोदिताः यथाविधायतेगोपाः सहकृष्णाव्रजंययुः ३८ ॥ इतिदशमेचतुर्विंशः ॥ २४ ॥ ७ ॥ श्रीशुकउवाच ॥ ॥ इंद्रस्तदात्मनःपूजांविज्ञायविहतांनृप गोपेभ्यःकृष्णनाथेभ्योनंदादिभ्यश्चुकोपसः १ ततःइंद्रःसांवर्तकंमेघगणंप्रेषयामास आह च २ अहो गोपानांश्रीमदमाहात्म्यंपश्यत येगोपाः कृष्णंमर्त्यमुपाश्रित्यमेदेवस्यअवज्ञांचक्रुः ३ किंच कर्ममयैःयज्ञैः आन्वीक्षिकीं विद्यांहित्वाकथं भवाब्धितितीर्षंति ४ किंच एते गोपाः बालिशंअज्ञंकृष्णंआश्रित्यमेअप्रियं चक्रुः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवलिप्तानांमत्तानांध्मायितात्मनांबृंहितदेहानां (वंचितबुद्धीनामितिवा) धुनुतअपनयत । श्रीमदेनयःस्तंभोगर्वस्तं ६ बिभ्यतस्तान्प्रत्याह । अहंचेति । अनुव्रजेअन्वनंतरमेवआगमिष्यामि । मरुद्गणैर्देवगणैःसह ७ मघवताइंद्रेण । निर्मुक्तबंधनंयेषांते ।[1] प्रलयाभिप्रायेणबद्धाआसन्तदानिर्मुक्तबंधनाःसंतःआसारैर्धारासंपातैः पीडयामासुः ८ स्तनयित्नुभिःअशनिध्वनिभिःस्तनंतःगर्जंतः मरुद्गणैः आवहप्रवहादिवायुसमूहैः नुन्नाः प्रेरिताः जलशर्कराजलोपलान् ९ स्थूणावत्स्थूला (मुसलसंकाशाइत्यर्थः) अभ्रेषुमेघेषुमुंचत्सुसत्सुनतोन्नतंनतंनिम्नंउन्नतंतद्विपरीतंयथाभवतितथाभूर्नादृश्यत (यद्धानतोन्नतप्रदेशाश्चनादृश्यंतेत्यर्थः) १० (अतिवृष्ट्याऽतिवातेनच) जातवेपनाजातकंपाः ११ तत्रपशूनांयानंविशिनष्टि । शिरइति । (गात्रसंकोचनशिरःपिधायसुतांश्चोदरतलेनिवेश्ये त्यर्थः) १२ गोपीनांप्रार्थनामाह । कृष्णेति । त्वमेवनाथोयस्येतितद्गोकुलंगवांकुलंवंशंनःअस्मांश्चदेवादिंद्रात्त्रातुंरक्षितुमर्हसि १३ विज्ञापनात्पूर्वमेवकुपितेनेंद्रेणकृतंतद्वर्षमेने १४ कथंमेनेतदाह । अपर्त्विति । अपगतऋतुर्यस्यतद्वर्षं (ऋतुमतिक्रम्यापीत्यर्थः) अतिशयितोवातोयस्मिन् तत् अतिवातं । शिलामयंशिलाप्रचुरम् । (करकाबहुलमित्यर्थः तादृशंवर्षम्)१५ तत्र प्रतिज्ञापूर्वकं गोवर्धनोद्धरणमाह । तत्रेति । प्रतिविधिंप्रतीकारम् । स्वसामर्थ्येनसाधयिष्यामि । तेनचमौढ्यात्लोकेशमानिनांश्रीमदलक्षणंतमोहरिष्यामि । बहुवचनेनवरुणादीनभिप्रैति १६

श्लोकाः ६/१६

एषांश्रियाऽवलिप्तानांकृष्णेनध्मायितात्मनाम् ॥ धुनुतश्रीमदस्तंभंपशून्नयतसंक्षयम् ६ अहंचैरावतंनागमारुह्यानुव्रजेव्रजम् ॥ मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ७ ॥ शुकउवाच ॥ इत्थंमघवताऽऽज्ञप्तामेघानिर्मुक्तबंधनाः ॥ नंदगोकुलमासारैःपीडयामासुरोजसा ८ विद्योतमानाविद्युद्भिर्नदंतस्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणैर्नुन्नाववृषुर्जलशर्कराः ९ स्थूणास्थूलावर्षधारामुंचत्स्वभ्रेष्वभीक्ष्णशः ॥ जलौघैःप्लाव्यमानाभूर्नादृश्यतनतोन्नतम् १० अत्यासारातिवातेनपशवोजातवेपनाः ॥ गोपागोप्यश्चशीतार्तागोविंदंशरणंययुः ११ शिरःसुतांश्चकायेनप्रच्छाद्यासारपीडिताः ॥ वेपमानाभगवतःपादमूलमुपाययुः १२ कृष्णकृष्णमहाभागत्वन्नाथंगोकुलंप्रभो ॥ त्रातुमर्हसिदेवान्नःकुपिताद्भक्तवत्सल १३ शिलावर्षनिपातेनहन्यमानमचेतनम् ॥ निरीक्ष्यभगवान्मेनेकुपितेंद्रकृतंहरिः १४ अपर्त्वत्युल्बणंवर्षमतिवातंशिलामयम् ॥ स्वयागेनिहतेस्माभिरिंद्रोनाशायवर्षति १५ तत्रप्रतिविधिंसम्यगात्मयोगेनसाधये ॥ लोकेशमानिनांमौढ्याद्धरिष्येश्रीमदंतमः १६

चूर्णिका

ततः तेषांश्रीमदमर्वंअपनयत पशूंश्चक्षयंनयत ६ किंच अहं ऐरावतं आरुह्य नंदगोष्ठंहंतुंमरुद्गणैः सहआगमिष्यामि ७ ॥ ऋषिरुवाच ॥ एवंइंद्रेणआज्ञप्ताः मुक्तबंधनामेघाः आसारैः नंदव्रजंपीडयामासुः ८ ततस्तेगर्जंतः विद्युद्भिः प्रकाशिताः संतः जलशर्कराः ववृषुः ९ तदा जलौघैः प्लाव्यमाना भूः नतोन्ननानादृश्यत १० ततः अत्यासारातिवातेनकंपिताः पशवः गोपाः गोप्यश्च आर्ताःसंतः गोविंदंशरणं ययुः ११ तत्र गावः शिरःपुत्रांश्चकायेन आच्छाद्य कृष्णपादमूलं ययुः १२ ततो गोपादयः आहुः हेकृष्णइदं गोकुलंकुपितेंद्रात् त्रातुमर्हसि १३ ततः शिलावर्षपातेन हन्यमानंव्रजंदृष्ट्वाहरिः इंद्रकृतंसर्वंमत्वाऽह १४ अस्माभिः स्वयज्ञेहतेइंद्रःनाशायवर्षति१५तत्रप्रतीकारं स्वसामर्थ्येनसाधये किंच एषांलोकेशमानिनांश्रीमदंहरिष्ये १६

[1] यदिनिर्बंधनाःस्युस्तर्हिप्रलयंकुर्वीरन्नित्यभिप्रायेणेत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुदेवाःसात्विकास्त्वद्भक्ताश्चकुतस्तेषांतमस्तत्राह । नहीति सद्भावः सत्त्वंमद्भक्तिर्वातद्युक्तानांसुराणांईशावयमितिविस्मयोगर्वोहियस्मान्नघटतेअतोऽसंतस्ते किंच तेषांमानभंगोऽनुग्रहएवेत्याह ।
मत्तइति१७(अहंशरणंगृहंयस्य । अहंपरिग्रहः परिजनोयस्यतत् गोष्ठंगोस्थानं) गोपायेरक्षिष्यामि ।(व्रजवासिनःसंरक्षामीत्यर्थः ।) किंच । सोयं (भक्तसंरक्षणरूपो) मेमयाव्रतोनियमः संकल्पो
वाआहितोधृतइत्यर्थः १८ कृत्वाउत्कृत्य (उद्धृत्य) छत्राकंउच्छिलीध्रं (यथा) १९ यथोपजोषंयथासुखम् २० (इहमद्धस्तात् अद्रिर्निपतिष्यतीतिवोयुष्माभिस्त्रासोभयम् २१) सव्रजाः
शकटमंडलीसहिताः सोपजीविनः भृत्यपुरोहितादिसहिताः २२ (व्रजवासिभिःक्षुत्तृट्पीडांविषयसुखापेक्षांचहित्वावीक्ष्यमाणोनिरंतरमवलोक्यमानोऽतएवतेषांक्षुदादिकंनवर्ततेस्मेतिज्ञेयम् ।) पदा
॥१११॥ त्स्थानात् २३ २४ (आकाशंविगतमेघंवातवर्षंचोपरतमालोच्य) २५ व्युदप्रायाः विगतोदकप्रायाः स्वल्पजलाइत्यर्थः । (निम्नगानद्यः ।) २६ शकटोढोपकरणंशकटैरूढमुपकरणंयथा
भवतितथा २७ २८ निभृताःपूर्णाः (प्रेमवेगात्) परिरंभणादिभिः यथायथोचितं (तंश्रीकृष्णं) समीयुः उपजग्मुःसदाशिषः श्रेष्ठानाशीर्वादान् (युयुजुश्च) २९

नहिसद्भावयुक्तानांसुराणामीशविस्मयः ॥ मत्तोऽसतांमानभंगःप्रशमायोपकल्पते १७ तस्मान्मच्छरणंगोष्ठंमन्नाथंमत्परिग्रहम् ॥ गोपायेस्वात्मयोगे श्लोकाः
नसोयंमेव्रतआहितः १८ इत्युक्त्वैकेनहस्तेनकृत्वागोवर्धनाचलम् ॥ दधारलीलयाकृष्णश्छत्राकमिवबालकः १९ अथाहभगवान्गोपान्हेंऽबतातव्रजौ
कसः ॥ यथोपजोषंविशतगिरिगर्तंसगोधनाः २० नत्रासइहवःकार्योमद्धस्ताद्रिनिपातने ॥ वातवर्षभयेनालंतत्त्राणंविहितंहिवः २१ तथानिर्विविशुर्ग १७/२९
र्तंकृष्णाश्वासितमानसाः ॥ यथावकाशंसधनाःसव्रजाःसोपजीविनः २२ क्षुत्तृड्व्यथांसुखापेक्षांहित्वातैर्व्रजवासिभिः ॥ वीक्ष्यमाणोदधावद्रिंसप्ताहंनाच
लत्पदात् २३ कृष्णयोगानुभावंतंनिशम्येंद्रोऽतिविस्मितः ॥ निस्तंभोभ्रष्टसंकल्पःस्वान्मेघान्सन्यवारयत् २४ खंव्यभ्रमुदितादित्यंवातवर्षंचदारुणम् ॥
निशम्योपरतंगोपान्गोवर्धनधरोऽब्रवीत् २५ निर्यातत्यजतत्रासंगोपाःसस्त्रीधनार्भकाः ॥ उपारतंवातवर्षंव्युदप्रायाश्चनिम्नगाः २६ ततस्तेनिर्ययुर्गोपाः
स्वंस्वमादायगोधनम् ॥ शकटोढोपकरणंस्त्रीबालस्थविराःशनैः २७ भगवानपितंशैलंस्वस्थानेपूर्ववत्प्रभुः ॥ पश्यतांसर्वभूतानांस्थापयामासलीलया
२८ तंप्रेमवेगान्निभृताव्रजौकसोयथासमीयुःपरिरंभणादिभिः ॥ गोप्यश्चसस्नेहमपूजयन्मुदादध्यक्षताद्भिर्युयुजुःसदाशिषः २९

चूर्णिका तथासात्विकानां एषांविस्मयः नयुक्तः अतोमत्तः एषांमानभंगःशांतयेकल्पते १७ तस्मान्मन्नाथंगोष्ठंस्वात्मयोगेनगोपाये १८ एवमुक्त्वाकृष्णः एकहस्तेनगोवर्धनमुत्कृत्य
दधार छत्राकमिववालकः १९ अथकृष्णःआह हे अंबहेतात हे गोपाः यथोपजोषंसगोधनाःगिरिगर्तंविशत २० मत्करादद्रिः पतेदिति त्रासोनकार्यः वातवर्षभयेन
अलं २१ तत्त्राणंविहितं ततो गोपादयः गर्तंविविशुः २२ ततः तैर्व्रजवासिभिः क्षत्तृट्व्यथांहित्वावीक्षमाणः कृष्णः सप्ताहमद्रिंदधौ स्थानाच्च नाचलत् २३ एवं
कृष्णयोगानुभावंदृष्ट्वाइंद्रः निस्तंभः सन्स्वमेघान्न्यवारयत् २४ ततः व्यभ्रंउदितादित्यंखंतथाउपरतंवातवर्षंदृष्ट्वागोपान्कृष्णः आह २५ हेगोपाः वहिर्नियात त्रासं ॥१११॥
त्यजत वातवर्षंउपारतं नद्यश्चउदितप्रायाः जाताः २६ततोगोपाः गोधनंशकटाढोपकरणंच आदायतथास्त्रीबालवृद्धाश्चबहिर्निर्ययुः २७ ततः कृष्णः सर्वेषांपश्यतांपूर्व
वत्स्थाने अद्रिंस्थापयामास २८ ततोव्रजौकसः कृष्णंआश्लेषादिभिः उपजग्मुः गोप्यश्चसस्नेहं अपूजयन् तथादध्यक्षताद्भिः आशिषोयुयुजुः२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(स्नेहकातराःप्रेमभीरवः) ३० ३१ ३२ ततोगोवर्धनस्थानात्अस्यकृष्णस्यतथाविधानिगोवर्धनोद्धरणादिरूपाणितानिकृतानिकर्माणिगायंत्यईयुःययुः । कथंभूताः एवंप्रेम्णाहृदिपृशंतीतिहृदिस्पृशः ताः यद्वा कथंभूतस्यास्य । प्रेष्ठत्वेनतासांहृदिस्पृशतीतिहृदिस्पृक्तस्य ३३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांपंचविंशोध्ययः २५ ॥ ॥ ७ ॥ ॥ षड्विंशेविस्मितान्गोपान्कृष्णस्याद्भुतकर्मभिः । नंदोगर्गोक्तिमाश्राव्यतदैश्वर्यमवर्णयत् ॥१ ॥ समभ्येत्यनंदंसमभिगम्य १ यदूचुस्तदाह बालस्येति । यत्यस्मात्अद्भुतानिकर्माणितस्मात्ग्राम्येषु (मूढेषु) गोपालेषुकथं जन्मार्हतिआत्मजुगुप्सितंआत्मानर्हं २ अद्भुतानिकर्माण्याहुः (द्वादशभिः ।) यःसप्तहायनइति । कथंबिभ्रत्स्थितइति (शेषः) पुष्करंपद्मंगजराट्महागजइव ३ (आमीलिताक्षेणईषन्निमीलितनयनेन) महौजसोमहाबलापाः । तनोर्वयआयुर्यौवनंवाकालेनयथापीयते (यौवनपक्षेप्राणैरिंद्रियशक्तिभिःसहेत्यर्थः) तद्वत् कथमित्यनुवर्तते ४ अनसोऽधःशयानस्यमास्यस्यमासाःत्रयःपरिच्छेदका यस्य (तस्य) उदक्ऊर्ध्वचरणौहिन्वतश्चालयतःप्रपदेनपादाग्रेणहतंविपर्यस्तंअनः (शकटम्) कथमपतत् ५ यःकृष्णोदैत्येन (गगनमार्गेण) ह्रियमाणःसन् (सबालः) तंतृणावर्तंदैत्यंकथम हान्नित्यर्थः ६ हैयंगवस्तैन्येनवनीतचौर्येवाहुभ्यांगच्छन्रिंगन्नित्यर्थः ७

॥११२॥

श्लोकाः ३०/७

यशोदारोहिणीनंदोरामश्चबलिनांवरः ॥ कृष्णमालिंग्ययुयुजुराशिषःस्नेहकातराः ३० दिविदेवगणाःसाध्याःसिद्धगंधर्वचारणाः ॥ तुष्टुवुर्मुमुचुस्तुष्टःपुष्पवर्षाणिपार्थिव ३१ शंखदुंदुभयोनेदुर्दिविदेवप्रणोदिताः ॥ जगुर्गंधर्वपतयस्तुंबुरुप्रमुखान्नृप ३२ ततोनुरक्तैःपशुपैःपरिश्रितोराजन्सगोष्ठंसबलोऽव्रजद्धरिः तथाविधान्यस्यकृतानिगोपिकागायंत्यईयुर्मुदिताहृदिस्पृशः ३३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचविंशोध्यायः २५ ॥ शुकउवाच ॥ एवंविधानिकर्माणिगोपाःकृष्णस्यवीक्ष्यते ॥ अतद्वीर्यविदःप्रोचुःसमभ्येत्यसुविस्मिताः १ बालकस्ययदेतानिकर्माण्यत्यद्भुतानिवै ॥ कथमर्हत्यसौजन्मग्राम्येष्वात्मजुगुप्सितम् २ यःसप्तहायनोबालःकरेणैकेनलीलया ॥ कथंबिभ्रद्गिरिवरंपुष्करंगजराडिव ३ तोकेनामीलिताक्षेणपूतनायामहौजसः ॥ पीतःस्तनःसहप्राणैःकालेनेववयस्तनोः ४ हिन्वतोऽधःशयानस्यमास्यस्यचरणावुदक् ॥ अनोऽपतद्विपर्यस्तंरुदतःप्रपदाहतम् ५ एकहायनआसीनोह्रियमाणोविहायसा ॥ दैत्येनसतृणावर्तमहन्कंठग्रहातुरम् ६ क्वचिद्धैयंगवस्तैन्येमात्राबद्धउलूखले ॥ गच्छन्नर्जुनयोर्मध्येबाहुभ्यांतावपातयत् ७

चूर्णिका

ततः यशोदारोहिणीनंदःरामश्चकृष्णमालिंग्यआशिषोयुयुजुः ३० तदा दिविदेवसाध्यसिद्धगंधर्वचारणाः तुष्टुवुः पुष्पाणिमुमुचुः ३१ शंखदुंदुभयोनेदुः गंधर्वाजगुः ततो गोपैः श्रितः सबलः कृष्णः व्रजंविवेश ३२ तथाविधान्यस्यकृतागोपिकागायंत्यईयुः मुदिताह्रदिस्पृशः ३३ ॥ ॥ इतिदशमेपंचविंशः ॥ २५ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ ॥ एवंविधानिकर्माणिगोपाःकृष्णस्यवीक्ष्यते अतद्वीर्यविदःप्रोचुःसमभ्येत्यसुविस्मिताः १ हेनंदअस्यअद्भुतानिकर्माणि अतः असौग्राम्येषुकथं जन्मार्हति २ तान्याह यः सप्तहायनोबालः एकेनकरेणकथंगिरिंदधार ३ तथामीलिताक्षेणतोकेनपूतनायाः स्तनः सप्राणः कथंपीतः ४ किंच अनसः अधःशयानस्य त्रिमासस्यस्य ऊर्ध्वेचरणौचालयतः पदाग्रेणहतमनः विपर्यस्तंकथमपतत् ५ किंच एकवर्षः तेपुत्रः दैत्येनविहायसानीतः सन् तमेवकथं अहनत् ६ क्वचिद्धैयंगवस्तैन्ये मात्राउलूखलेबद्धः सः अर्जुनयोर्मध्येगत्वातौबाहुभ्यांअपातयत् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मुखतोहंतुंकामोयस्यतंबकवेषमरिंबाहुभ्यांमुखतःकथमपाटयत् ८ (तेनवत्सासुरेणकृत्वाकपित्थानिचन्यपातयत्) ९ (रासभदैतेयंधेनुकासुरम् । क्षेमंनिष्कंटकम्) १० ११ आशीविषतमःआति क्रूरविषइत्यर्थः । सचासावहींद्रश्चतम् (विमर्दसंतंह्रदादुद्वास्य) १२ (नोस्माकंहेनंदतवतनयेऽनुरागःतस्यतनयस्याप्यस्मासुअनुरागः) औत्पत्तिकःस्वाभाविकःकथमिति । किंसर्वेषामात्मायस्यादि तिशंका १३उक्तमप्यतिविस्मयेनाभिनयेन वदंति क्वसप्तहायनइति (हेव्रजनाथ) १४ प्राक्श्रुतमेवगर्गाचार्यवाक्यंतच्चरित्रपरिशीलनेननिवृत्तासंभावनस्यनंदस्यकृष्णस्यतत्त्वावबोधकंजातम् । सइदानींतेनैववाक्येनगोपानुपादिशति श्रूयतामिति १९ (वर्णाइत्यादिपादोनसप्तश्लोकीगर्गोक्ताव्याख्याताऽष्टमेध्याये) १६ १७ १८ १९ २०

॥११३॥ श्लोकाः ८/२०

वनेसंचारयन्वत्सान्सरामोबालकैर्वृतः ॥ हंतुकामंबकंदोर्भ्यांमुखतोरिमपाटयत् ८ वत्सेषुवत्सरूपेणप्रविशंतंजिघांसया ॥ हत्वान्यपातयत्तेनकपित्थानिचलीलया ९ हत्वारासभदैतेयंतद्बंधूंश्चबलान्वितः ॥ चक्रेतालवनंक्षेमंपरिपक्वफलान्वितम् १० प्रलंबंघातयित्वोग्रंबलेनबलशालिना ॥ अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ११ आशीविषतमाहींद्रंदमित्वाविमदंह्रदात् ॥ प्रसह्योद्वास्ययमुनांचक्रेऽसौनिर्विषोदकाम् १२दुस्त्यजश्चानुरागोऽस्मिन्सर्वेषांनोव्रजौकसाम् ॥ नंदतेतनयेऽस्मासुतस्याप्यौत्पत्तिकःकथम् १३ क्वसप्तहायनोबालःक्वमहाद्रिविधारणम् ॥ ततोनोजायतेशंकाव्रजनाथतवात्मजे १४ ॥ नंदउवाच ॥ श्रूयतांमेवचोगोपाव्येतुशंकाचवोऽर्भके ॥ एनंकुमारमुद्दिश्यगर्गोमेयदुवाचह १५ वर्णास्त्रयःकिलास्यासन्गृह्णतोऽनुयुगंतनूः ॥ शुक्लोरक्तस्तथापीतइदानींकृष्णतांगतः १६ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः ॥ वासुदेवइतिश्रीमानभिज्ञाःसंप्रचक्षते १७ बहूनिसंतिनामानिरूपाणिचसुतस्यते ॥ गुणकर्मानुरूपाणितान्यहंवेदनोजनाः १८ एषवःश्रेयआधास्यद्गोपगोकुलनंदनः ॥ अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ १९ पुरानेनव्रजपतेसाधवोदस्युपीडिताः ॥ अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः २०

चूर्णिका

किंच वनेरामगोपैर्वृतः कृष्णः गोवत्सान्चारयन्तावत् प्राप्तंबकं मुखतःदोर्भ्यांअपाटयत्८किंच वत्सेषुप्राप्तं वत्सरूपिणंदैत्यंहत्वातेनकपित्थानि अपातयत्९ ततः रासभदैतेयंतद्बंधूंश्चहत्वातालवनंक्षेमंचक्रे १० ततः हेनंदप्रलंबं बलरामेणघातयित्वा अरण्यवह्नितः पशून्गोपांश्च अमोचयत् ११ ततः अतिक्रूरंविषसर्पंदमित्वाह्रदात्उद्वास्य यमुनांनिर्विषजलांचक्रे १२ किंच हेनंदतेपुत्रे नःसर्वव्रजौकसांदुस्त्यजः अनुरागोस्ति तथाअस्मासुतस्यास्ति १३ अतः सर्वेषांआत्माअयंस्यादितिनः शंका किंच अहोअयं सप्तहायनोबालः क्व अद्रिधारणं क्व अतोनोजायते शंकाव्रजनाथतवात्मजे १४॥ नंदउवाच ॥ हेगोपाः एनंउद्दिश्यगर्गोयत् आह तद्वचः श्रूयतां तेनवः शंकागच्छतु १५ तदाह प्रतियुगंतनूः गृण्हतः अस्य शुक्लः रक्तः पीतइतित्रिवर्णाआसन् इदानीं कृष्णतांप्राप्तः १६ किंच अयंतेसुतः प्राक्क्वचित् वसुदेवस्यजातः अतः एनंवासुदेवइतिवदंति १७ किंच अस्यगुणकर्मयोग्यानिनामरूपाणिबहूनिसंति तान्यहंवेदनोजनाः १८ किंच एषः वः श्रेयः करिष्यति अनेनसर्वदुर्गाणियूयंतरिष्यथ १९ किंच पुरा अराजकेदस्युपीडिताः साधवः अनेनरक्षिताः संतः चोरान्जिग्युः २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तस्मात्तस्यकर्मसुविस्मयोनास्तीतिनंदस्योक्तिः २२ इत्यद्धासाक्षात्मांप्रतिसमादिश्यगर्गेस्वगृहंगतेसातितदानींतथाऽमन्यमानोपिइदानींकृष्णंनारायणस्यांशंमन्ये अत्रहेतुःअक्लिष्टकारिणामिति (अन्यै रायासेनापिदुष्करंगोवर्धनोद्धरणादिअयमनायासेनकरोतितच्छीलमित्यर्थः २३(स्वयंदृष्टोगर्गोक्तयाश्रुतश्चानुभावःसामर्थ्यंयैस्तेआनर्चुस्तुष्टुवुरित्यर्थः) २४ गोवर्धनोद्धरणंसपरिकरमनुस्मरन् (मुनिः) प्रकटितैश्वर्यस्यश्रीकृष्णस्यप्रीतिंप्रार्थयतेदेवेइति यज्ञविप्लुवेनयारुट्तयादेवेइंद्रेवर्षतिसतिवज्राश्मपर्षानिलैः अशनिजलोपलतीव्रवायुभिःसीदत्पालपशुस्त्रिआत्मशरणंसीदंतःपालाःपशवःस्त्रियश्चयस्मिंस्तत् तथाआत्मास्वयमेव । शरणं (त्राता) यस्यतद्गोष्ठम् (तादृशम्) दृष्ट्वाऽनुकंपीउत्स्मयन् (इंद्रस्यमौढ्यंज्ञात्वा) हसन्प्रौढिमाविष्कुर्वन् (स -)- शैलमुत्पाट्यअवलोबालोलीलार्थमुच्छिलींध्रम् (छत्राकम्)यथातथैकेनकरेणबिभ्रत्दधत्गोष्ठमपात्पालितवान् एवंमहेंद्रमदभित् गवामिंद्रःइत्युत्तराध्यायार्थंचस्मरतिसएवंभूतःश्रीकृष्णोनः प्रीयात्प्रीयताम् २५षड्विंशेदशमेव्यक्तःषड्विंशोदशमोहरिः । व्यनक्तुपंचविंशंमांचतुर्विंशतितःपृथक् १ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांषड्विंशतितमोध्यायः॥ २६ ॥ ॥ ७ ॥ ॥ सप्तविंशेतदालक्ष्यकृष्णस्यप्राभवंपरम् । वर्ण्यते सुरभींद्राभ्यांअभिषेकमहोत्सवः ॥ १ ॥ गोवर्धनेधृतेशैलइतिशक्रस्यभयेनागमनेहेतुः । आसाराद्रक्षितेव्रजइतिसुरभेर्हर्षेणागमने (हेतुः सुरभिर्गोलोकात्गोलोकसंज्ञकात्लोकात् । शक्रश्चस्वर्गलोकात्) तत्रेंद्रआगत्यकिंकृतवान्तदाह । विविक्त उपसंगम्येत्यादिना अथाहसुराभिरित्यतःप्राक्तनेनग्रंथेन । विविक्तेएकांते । पादयोः (एनंकृष्णं) पस्पर्शनमश्चकार २

॥११४॥

श्लोकाः

यएतस्मिन्महाभागाःप्रीतिंकुर्वंतिमानवाः॥नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः २१तस्मान्नंदकुमारोयंनारायणसमोगुणैः॥श्रियाकीर्त्यानुभावेनतत्क र्मसुनविस्मयः २२ इत्यद्धामांसमादिश्यगर्गेचस्वगृहंगते ॥ मन्येनारायणस्यांशंकृष्णमक्लिष्टकारिणम् २३इतिनंदवचःश्रुत्वागर्गगीतंव्रजौकसः॥दृष्टश्रुतानु भावास्तेकृष्णस्यामिततेजसः ॥ मुदितानंदमानर्चुःकृष्णंचगतविस्मयाः २४ देवेवर्षतियज्ञविप्लवरुषावज्राश्मपर्षानिलैःसीदत्पालपशुस्त्रिआत्मशरणंदृष्ट्वानु कंप्युत्स्मयन्॥उत्पाट्यैककरेणशैलमबलेलीलोच्छिलींध्रंयथाबिभ्रद्गोष्ठमपान्महेंद्रमदभित्प्रीयान्नइंद्रोगवाम्२५॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेष ड्विंशोऽध्यायः२६॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ गोवर्धनेधृतेशैलेआसाराद्रक्षितेव्रजे ॥ गोलोकादाव्रजत्कृष्णंसुरभिःशक्रएवच १ विविक्तउ पसंगम्यव्रीडितःकृतहेलनः ॥ पस्पर्शपादयोरेनंकिरीटेनार्कवर्चसा २

२१/२

चूर्णिका

किंच येअस्मिन्प्रीतिंकुर्वंतितान्शत्रवः माभिभवंति २१ विष्णुपक्षान्दैत्याइव तस्मात् हेनंदतेपुत्रः गुणैः श्रियाकीर्त्यादिनानारायणसमः अतस्तत्कर्मसुनाश्चर्यम् २२ एवमादिश्यगर्गेगृहंगते अहं एनंनारायणांशंमन्ये २३ एवंगर्गगीतंनंदवचः श्रुत्वागोपाः गतस्मयाः संतः कृष्णंनंदंचानर्चुः २४ ततः भगवतः प्रीतिंप्रार्थयंतेयज्ञनाश रुषाइंद्रेवर्षतिसतिसीदत्पालपशुस्त्रि व्रजंदृष्ट्वाअनुकंप्यएककरेण अद्रिंउत्पाट्यउच्छिलींध्रमिवधृत्वागोष्ठं अपात् एवंइंद्रमदभित्गवांइंद्रः नः प्रीयताम् ॥ २५॥ ॥ इति दशमेषड्विंशः ॥ २६ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ गोवर्धनेधृतेशैलेआसाराद्रक्षितेव्रजे गोलोकादाव्रजत्कृष्णंसुरभिःशक्रएवच १ ततइंद्रः लज्जितः सन् रहः कृष्णं एत्य तत्पादयोः किरिटेननत्वा २

॥११४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अस्यश्रीकृष्णस्यश्रुतश्चासावनुभावश्चश्रुतानुभावःदृष्टःश्रुतानुभावोयेनसःइंद्रःनष्टात्रिलोकेशोहमितिमदोयस्यसः ३ तत्रममापराधंक्षमस्वेतिवक्तुंतवतावदपराधोनास्त्येवत्वयानुग्रहएवकृतइत्याह चतुर्भिः विशुद्धसत्त्वामिति । तवधामस्वरूपम् (विशुद्धंसत्त्वंयत्रतत् अतएव) शांतंएकरूपंअतश्चतपोमयंप्रचुरज्ञानंसर्वज्ञमित्यर्थः । कुतः । ध्वस्तरजस्तमस्कंध्वस्तेअविद्यमानेरजस्तमसीयस्मिन् । अतएवअयंअस्मदादिषुदृश्यमानःमायाकार्यरूपःगुणसंप्रवाहःगुणैःसंप्रोह्यतेइतितथासंसारइत्यर्थः सःतेतवनविद्यते । यतःअग्रहणेनअज्ञानेनअनुबध्यतइतितथाससर्वज्ञस्यतेनास्तीत्यर्थः । अज्ञानसंबंधोवा ४ यदाअज्ञानतत्कृतदेहसंबंधौनस्तस्तदातत्कृतानांलोभादीनांकावार्तेत्याह । कुतोन्विति । तत्कृतादेहसंबंधकृताः । तद्धेतवःपुनरन्यस्यदेहस्यहेतवः । ननुज्ञानिनामपितेदृश्यंते अतआह अबुधलिंगभावाः । अज्ञानिनांगमकाःयावद्रागादिमत्त्वंतावत्ज्ञानित्वमेवनसिद्धमित्यर्थः । लोभाद्यभावेपिमन्मानभंगोदंडार्थमित्याह । तथापीति । (दंडंदमनमित्यर्थःयथागुरुःशिष्येषु ।खलनिग्रहायखलत्वस्यशमनायेत्यर्थः) ५ ननु त्वदंडेच मम गोपपुत्रस्य का शक्तिः किंच कारणं कोवा दंडो मया कृत इत्यतआह । पितेति जगतां त्वंपिता जनकःगुरुरुपदेष्टाअधीशोनियंता इतिदंडधारणेहेतुत्रयम्।कालत्वात्समर्थःतस्मादुपात्तदंडोहितायकल्याणायस्वेच्छातनुभिर्लीलावतारैःसमीहसे। तवसमीहालीलैवजगदीशमानिनामस्माकंमानधूननमित्यर्थः ६ कथमेतदित्यतआह । यइति । मद्विधाश्चतेअज्ञाश्च । ते । अतोजगदीशमानिनःकालेभयकालेपियथाधुनैवातिवृष्टौत्वामभयंभयमगणयंतंवीक्ष्य आशु तन्मदंजगदीशइतिमदंहित्वाविगतगर्वाः संतः आर्यमार्गंत्वद्भक्तिलक्षणंभजंति । अतस्तवईहैवखलानांअनुशासनंदंडइत्यर्थः ७ एवंभगवत्स्वरूपंअभिप्रायंचानुवर्ण्य क्षमापयतिसत्त्वमिति । एवंभूताअसतीमतिर्मेपुनर्माभूदितिप्रार्थनांतरम् ८ महानयमपराधःकथंक्षंतव्यइतिचेदतआह । तवेति । स्वयंभराणां (भूभारभूतानां) पुनश्चउरुभारजन्मनांबहूनांभाराणांजन्मयेभ्यस्तेषां (असुराणां) अभवायनाशाययुष्मच्चरणसेविनांतुभवाय (श्रेयसे) अतोममत्वत्सेवकत्वादत्यंतापराधिनोपिक्षंतव्यमितिभावः ९

श्लोकाः ३–९

दृष्टश्रुतानुभावोस्यकृष्णस्यामिततेजसः ॥ नष्टत्रिलोकेशमदइदमाहकृतांजलिः ३॥ इंद्रउवाच ॥ विशुद्धसत्त्वंतवधामशांतंतपोमयंध्वस्तरजस्तमस्कम् ॥ मायामयोयंगुणसंप्रवाहोनविद्यतेतेऽग्रहणानुबंधः ४ कुतोनुतद्धेतवईशतत्कृतालोभादयोयेऽबुधलिंगभावाः ॥ तथापिदंडंभगवान्बिभर्तिधर्मस्यगुप्त्यैखलनिग्रहाय ५ पितागुरुस्त्वंजगतामधीशोदुरत्ययःकालउपात्तदंडः ॥ हितायचेष्टातनुभिःसमीहसेमानंविधुन्वन्जगदीशमानिनाम् ६ येमद्विधाज्ञाजगदीशमानिनस्त्वांवीक्ष्यकालेऽभयमाशुतन्मदम् ॥ हित्वार्यमार्गंप्रभजंत्यपस्मयाईहाखलानामपितेऽनुशासनम् ७ सत्वंममैश्वर्यमदप्लुतस्यकृतागसस्तेऽविदुषःप्रभावम् ॥ क्षंतुंप्रभोथार्हसिमूढचेतसोनैवंपुनर्भून्मतिरीशमेऽसती ८ तवावतारोयमधोक्षजेहस्वयंभराणामुरुभारजन्मनाम् ॥ चमूपतीनामभवायदेवभवाययुष्मच्चरणानुवर्तिनाम् ९

चूर्णिका

नष्टत्रिलोकेशमदः कृतांजलिः सन् आह ३ ॥ इंद्रउवाच ॥ हे कृष्ण तेस्वरूपंशुद्धसत्त्वं अतः ध्वस्तरजस्तमस्कंशांतमस्ति अतःअयंसंसारः सर्वज्ञस्यतेनास्ति ४ तत्कृताः लोभादयः कुतः स्युः तथापित्वंधर्मस्यगुप्त्यैखलनिग्रहायदंडंबिभर्षि ५ किंच हेईशत्वंजगतांपितागुरुः धृतदंडः कालः असि अतः जगदीशमानिनां अस्माकंमानंविधुन्वन्हितायलीलावतारैः समीहसे ६ किंच हेहरेयेमद्विधाज्ञाः ईशमानिनः तेभयकालेअभयंत्वांदृष्ट्वामदंहित्वासन्मार्गंभजंति अतः तवईहैवखलानांदंडः ७ एवंभूतः त्वंमएैश्वर्यमदव्याप्तस्यकृतागसः तेप्रभावंअज्ञस्य अपराधं क्षंतुमर्हसि ८ हेअधोक्षज अयं ते अवतारः स्वयंभराणांचमूपतीनांनाशाय सतां भवायअस्ति ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

क्षमापयन्नमस्करोति नमइति तुभ्यंभगवते कृष्णायनमः । पुरुषायसर्वांतर्यामिणे । महात्मने अंतस्थत्वेप्यपरिच्छिन्नाय । कुतः वासुदेवाय सर्वनिवासाय सात्वतांयादवानां पतये नमः १० ताहिंकिमहंया दवः । न । स्वच्छंदोपात्तदेहायस्वेषांभक्तानांच्छंदेनइच्छयायादवादिपुस्वीकृतदेहाय । तत्रापिविशुद्धंज्ञानमेवमूर्तिर्यस्यतस्मै । मायया सर्वस्मैसर्वरूपाय । कुतः सर्वस्यबीजायकारणाय(उपादानायेत्यर्थः) अतएवसर्वभूतात्मनेनमइति ११ कृतागसइत्यनेनोक्तमपराधंनिवेदयति । मयेदमिति । आसारैर्वायुभिश्चगोष्ठनाशायमयेदमकृत्यचेष्टितंकृतम् १२ तथापिभोईशत्वयानुगृहीतोस्मि । अनुग्रहंदर्शयति । ध्वस्तस्तंभइति १ हतोद्यमइतिच १३ (मघोनाइंद्रेण ।) १४ इंद्रेणस्वाभिप्रायोनिवेदितेभगवानपितथैवाह । मयेति । (अकारिकृतः ।) इंद्रश्रियादेवराज्येन १५ (यतएश्वर्येणश्रियाचयोमदस्तेनां धोमांनपश्यति । अतोयस्यानुग्रहमिच्छामितंभ्रंशयामि) १६ वोयुष्माभिः बहुवचनंवरुणाद्यभिप्रायेण । क्रगंतव्यम् । स्वर्गेपितवैवेश्वरत्वादितिचेत्तत्राह क्रियतामिति । मदनुशासनेनयथापूर्वंतत्रस्थी यतामित्यर्थः । युक्तैरप्रमत्तैः । स्तंभवर्जितैर्निरहंकारैः १७ स्वसंतानैर्गोभिःसह । उपामंत्र्यकृष्णकृष्णेत्यादिसंबोध्य १८ इंद्रेणहताअपि (वयंगावः) भवतासनाथाःकृताःरक्षिताइत्यर्थः १९ त्वंनःपर मंदैवतंदेवता । अतःहेजगत्पतेगोविप्रदेवानांयेन्येचसाधवस्तेषांभवायाभ्युदयायत्वमेवनोस्माकंइंद्रोभव २० ननुभवतामिंद्रोस्तीतिचेत् । अतआह । इंद्रमिति । (नोऽस्माकमिंद्रत्वात्वाम् ।) अलंपुरं दरस्येंद्रतयेत्यर्थः । ननुदेवइंद्रोभवतिकथमहंभवेयमितिचेदतआह । अवतीर्णोसीति २१

श्लोकाः १०/२१

नमस्तुभ्यंभगवतेपुरुषायमहात्मने ॥ वासुदेवायकृष्णायसात्वतांपतयेनमः १० स्वच्छंदोपात्तदेहायविशुद्धज्ञानमूर्तये ॥ सर्वस्मैसर्वबीजायसर्वभूतात्म
नेनमः ११ मयेदंभगवन्गोष्ठनाशायासारवायुभिः ॥ चेष्टितंविहतेयज्ञेमानिनातीव्रमन्युना १२ त्वयेशानुगृहीतोस्मिध्वस्तस्तंभोहतोद्यमः ॥ ईश्वरंगुरु
मात्मानंत्वामहंशरणंगतः १३ ॥ शुकउवाच ॥ एवंसंकीर्तितःकृष्णोमघोनाभगवानमुम् ॥ मेघगंभीरयावाचाप्रहसन्निदमब्रवीत् १४ ॥ श्रीभगवानुवाच ॥
मयातेऽकारिमघवन्मखभंगोऽनुगृह्णता ॥ मदनुस्मृतयेनित्यंमत्तस्येंद्रश्रियाभृशम् १५ मामैश्वर्यश्रीमदांधोदंडपाणिंनपश्यति ॥ तंभ्रंशयामिसंपद्भ्योयस्य
चेच्छाम्यनुग्रहम् १६ गम्यतांशक्रभद्रंवःक्रियतांमेनुशासनम् ॥ स्थीयतांस्वाधिकारेषुयुक्तैर्वःस्तंभवर्जितैः १७ अथाहसुरभिःकृष्णमभिवंद्यमनस्विनी॥
स्वसंतानैरुपामंत्र्यगोपरूपिणमीश्वरम् १८॥ सुरभिरुवाच ॥ कृष्णकृष्णमहायोगिन्विश्वात्मन्विश्वसंभव ॥ भवतालोकनाथेनसनाथावयमच्युत १९ त्वं
नःपरमकंदैवंत्वंनइंद्रोजगत्पते॥ भवायभवगोविप्रदेवानांयेचसाधवः २०इंद्रंनस्त्वाभिषेक्ष्यामोब्रह्मणाचोदितावयम्॥अवतीर्णोसिभगवन्भूमेर्भारापनुत्तये२१

चूर्णिका

एवंक्षमाप्य नमस्करोति हे कृष्ण ते वासुदेवाय स्वच्छंदोपात्तदेहाय सर्वबीजाय तुभ्यंनमः १० ११ हेभगवन् गोष्ठनाशार्थं इदंकर्मयज्ञेविहितेकृतं तत् सोढव्यम् १२ किंच त्वया अनुगृहीतः अहमस्मि अतईश्वरं गुरुमात्मानं त्वामहंशरणंगतः १३ ॥ श्रीशुकउवाच ॥ एवंकीर्तितः कृष्णः प्रहस्य इदमाह १४ ॥श्रीभगवानुवाच ॥ हेइंद्र श्रियामत्तस्यते अनुग्रहार्थंमयामखभंगः कृतः१५किंच ऐश्वर्यमदांधः पुमान् दंडपाणिंमां न पश्यति अतः तंभ्रंशयामि संपद्भ्योयस्यचेच्छाम्यनुग्रहम्१६हेशक्रतेभद्रंस्वाधिका रेस्थित्वास्तंभवर्जितैः युष्माभिः मच्छासनंक्रियतां१७अथ सुरभिः गोभिः सहकृष्णंनत्वा आह १८ ॥सुरभिरुवाच ॥ हेकृष्णहेविश्वात्मन् लोकनाथेन त्वयावयं इंद्रेणहता अपिसनाथाःकृताः१९किंच हेजगत्पते त्वंनःदैवं इंद्रश्च असि अतः गोविप्रदेवसाधूनांअभ्युदयार्थं अद्यत्वमेव इंद्रोभव२०किंच ब्रह्मणाप्रेरितावयं इंद्रत्वांअभिषेक्ष्यामः२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरभिरात्मनःपयसाऽभ्यषिंचत । इंद्रश्चाकाशगंगायामंदाकिन्याजलैरभ्यषिंचत् २२ देवमातृभिरदित्यादिभिःदेवैर्मातृभिश्चेतिवा । (मातरोब्राह्म्यादयोऽदित्यादयोवा) गाःपशून्गांस्वर्गंवाइंद्रत्वेनाविंदतीतिकृत्वागोविंदइत्यभ्यधात् । नामकृतवानित्यर्थः २३ २४ देवनिकायेषुकेतवइवदर्शनीयामुख्याइत्यर्थः । गावःगांपृथिवींपयोभिर्द्रुतांआर्द्रांअनयन्अकुर्वन्नित्यर्थः २५ नानारसौघाःक्षीरादिवाहिन्यःअकृष्टपच्याःकर्षणंविनैवपक्वाओषधयोव्रीह्यादयआसन् । संधिरार्षः । यद्वा अकृष्टपच्याओषधयोयेषुतेगिरयःउन्मणीन्गर्भगतान्मणीन्उद्गतान्बहिःप्रकटान्अबिभ्रदबिभरुः २६ (निसर्गतःक्रूराण्यपिव्याघ्रादीनिसत्त्वानित्यक्तगर्वाणिवैराण्यभवन्) २७ (गोःस्वर्गस्यगोकुलस्यचपतिम्) २८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्तविंशोऽध्यायः ॥ २७ ॥ ॥ ॥ ७ ॥

अष्टाविंशेततोनंदानयनंवरुणालयात् । वैकुंठदर्शनंचाथगोपानामनुवर्ण्यते ॥ १ ॥ गोवर्धनंसमुद्धृत्यवशेकृत्वामरेश्वरम् । नंदानयनतःकृष्णोवरुणंचवशेनयत् ॥२॥ १ कलामात्रायांद्वादश्यांपारणादराभिनिवेशेनासुरींवेलामविज्ञायअरुणोदयात्पूर्वमेवशास्त्रबलेननिशिउदकंप्रविष्टंतदनभिज्ञोवरुणस्यभृत्योऽनयदिति । तथाचशास्त्रम् । " कलार्धांद्वादशींदृष्ट्वानिशीथादूर्ध्वमेवहि । आमध्याह्नात्क्रियाःसर्वाःकर्तव्याःशंभुशासनादि " ति । वक्ष्यतिचवरुणः । अजानतामामकेनेति । भगवद्धर्ममजानतेत्यर्थः २

श्लोकाः

एवंकृष्णमुपामंत्र्यसुरभिःपयसात्मनः ॥ जलैश्चाकाशगंगायाऐरावतकरोद्धृतैः २२ इंद्रःसुरर्षिभिःसाकंचोदितोदेवमातृभिः ॥ अभ्यषिंचतदाशार्हंगोविंदमितिचाभ्यधात् २३ तत्रागतास्तुंबुरुनारदादयोगंधर्वविद्याधरसिद्धचारणाः ॥ जगुर्यशोलोकमलापहंहरेःसुरांगनाःसंननृतुर्मुदान्विताः २४ तंतुष्टुवुर्देवनिकायकेतवोह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः ॥ लोकाःपरांनिर्वृतिमाप्नुवंस्त्रयोगावस्तथागामनयन्पयोद्रुताम् २५ नानारसौघाःसरितोवृक्षाआसन्मधुस्रवाः ॥ अकृष्टपच्यौषधयोगिरयोबिभ्रदुन्मणीन् २६ कृष्णेभिषिक्तएतानिसत्त्वानिकुरुनंदन ॥ निर्वैराण्यभवंस्तातक्रूराण्यपिनिसर्गतः २७ इतिगोगोकुलपतिंगोविंदमभिषिच्यसः ॥ अनुज्ञातोययौशक्रोवृतोदेवादिभिर्दिवम् २८ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्तविंशोऽध्यायः २७ ॥ ७ ॥

॥ शुकउवाच ॥ एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनम् ॥ स्नातुंनंदस्तुकालिंद्यांद्वादश्यांजलमाविशत् १ तंगृहीत्वाऽनयद्भृत्योवरुणस्यासुरोंतिकम् ॥ अविज्ञायासुरींवेलांप्रविष्टमुदकंनिशि २

२२/२

चूर्णिका

॥ श्रीशुकउवाच ॥ एवंसुरभिः कृष्णं प्रार्थ्य स्वपयसा तथाइंद्रः आकाशगंगायाःऐरावतकरोद्धृतैः जलैः अभ्यषिंचत् ततः गोविंदइतिनामकृतवान् २२ २३ तत्रप्राप्ताः तुंबरुनारदादयः गंधर्वविद्याधरसिद्धचारणाः हरेर्यशः जगुः देवांगनाः ननृतुः २४ तदादेवमुख्याः कृष्णंस्तुत्वापुष्पवृष्टिंचक्रुः त्रयोलोकाः सुखंआपुः गावः पयोव्याप्तांभुवंअकुर्वन् किंच क्षीरादिरसवाहिन्यः नद्यः आसन् वृक्षाः मधुस्रवाः आसन् अकृष्टपच्यौषधयः पर्वताः बहिः प्रकटान्मणीन् अबिभरुः २६ एवंकृष्णे अभिषिक्ते क्रूराण्यपिसत्वानिनिर्वैराण्यासन् २७ इतिगोगोकुलपतिंगोविंदमभिषिच्यसः अनुज्ञातोययौशक्रोवृतोदेवादिभिर्दिवम् २८ ॥ ॥ इतिदशमेसप्तविंशः ॥ २७ ॥ ॥ ७ ॥

॥ श्रीशुकउवाच ॥ ॥ एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनम् नंदः कलामात्रावशिष्टद्वादश्यांपारणादराभिनिवेशेनदैत्यवेलामज्ञात्वाऽरुणोदयात्पूर्वंनिशिकालिंदीजलंस्नातुंविवेश १ तंधृत्वावरुणदूतः वरुणांतिकंअनयत् २

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्वानांभगवद्धर्मपराणांअभयदोमाभैष्टेत्यभयंददत् (तदंतिकेवरुणांतिकेगतः) ३ सपर्ययाअर्हणेन ४ अद्येदानींमेमयादेहोनिभृतःधृतः । यदात्वद्दर्शनंजातंतदैवजन्मसाफल्यंलब्धमित्यर्थःयद्वा निभृतः पूर्णमनोरथइत्यर्थः । किंचअद्यैवार्थोऽधिगतः । सर्वरत्नाकरपतिनापीतःपूर्वम् (मया) नैवंविधोर्थःपूर्वप्राप्तइत्यर्थः । किंच । संसारोपिनिवृत्तएवेत्याशयेनाह । त्वत्पादभाजइति । अध्वनःपारंमोक्षम् ५ भगवतेनिरातिशयैश्वर्यायब्रह्मणेपूर्णायपरमात्मनेसर्वजीवनियंत्रे । तत्रहेतुः । नयत्रेति । लोकसृष्टिंविकल्पयति (विविधाकारेणकरोति) यामायासायत्रनश्रूयतेअविद्यमानेवतिष्ठतीत्यर्थः ६ अजानता (मामकेन) मद्भृत्येन (कस्मिन्समयेकिंकार्यंतन्नवेत्तीतितथातेन) त्वत्पित्राहरणंयत्कृतंतत् ७ नंदंविमुच्यसमर्पयतिगोविंदेति ८ ९ अतींद्रियंअदृष्टपूर्वंलोकपालस्यमहोदयमैश्वर्यम् १० अत्यौत्सुक्ययुक्ताधीर्येषांतेअपिकिंस्वगतिंस्वस्थानम् (वैकुंठाख्यम्) सूक्ष्मांब्रह्माख्यांचउपाधास्यत्उपधास्यतिनःअस्मान्प्रापयिष्यतीतिसंकल्पितवंतइत्यर्थः ११ इत्येवंभूतंस्वानां (ज्ञातीनाम्) संकल्पमखिलदृक्सर्वज्ञःस्वयमेवविज्ञायतेषांसंकल्पसिद्ध्येकृपयाएतद्वक्ष्यमाणमचिंतयत् १२ अविद्यादेहाद्यहंबुद्धिः ततःकामःततःकर्म ततउच्चावचासुदेवतिर्यगादिषुयोनिषुभ्रमन्स्वीयांगतिंनवेद १३

॥११८॥

श्लोकाः $\frac{३}{१३}$

चुक्रुशुस्तमपश्यंतःकृष्णरामेतिगोपकाः ॥ भगवांस्तदुपश्रुत्यपितरंवरुणाहृतम् ॥ तदंतिकेगतोराजन्स्वानामभयदोविभुः ३ प्राप्तंवीक्ष्यहृषीकेशंलोकपालःसपर्यया ॥ महत्यापूजयित्वाहतद्दर्शनमहोत्सवः ४ ॥ वरुणउवाच ॥ अद्यमेनिभृतोदेहअद्यार्थोधिगतःप्रभो ॥ त्वत्पादभाजोभगवन्नवापुःपारमध्वनः ५ नमस्तुभ्यंभगवतेब्रह्मणेपरमात्मने ॥ नयत्रश्रूयतेमायालोकसृष्टिविकल्पना ६ अजानतामामकेनमूढेनाकार्यवेदिना ॥ आनीतोयंतवपितातद्भवान्क्षंतुमर्हति ७ गोविंदनीयतामेषपितातेपितृवत्सल ॥ ममाप्यनुग्रहंकृष्णकर्तुमर्हस्यशेषदृक् ८ ॥ शुकउवाच ॥ एवंप्रसादितःकृष्णोभगवानीश्वरेश्वरः ॥ आदायागात्स्वपितरंबंधूनांचावहन्मुदम् ९ नंदस्त्वतींद्रियंदृष्ट्वालोकपालमहोदयम् ॥ कृष्णेचसंनतिंतेषांज्ञातिभ्योविस्मितोऽब्रवीत् १० तेऽत्यौत्सुक्यधियोराजन्मत्वागोपास्तमीश्वरम् ॥ अपिनःस्वगतिंसूक्ष्मामुपाधास्यदधीश्वरः ११ इतिस्वानांसभगवान्विज्ञायाखिलदृक्स्वयम् ॥ संकल्पसिद्धयेतेषांकृपयैतदचिंतयत् १२ जनोवैलोकएतस्मिन्नविद्याकामकर्मभिः ॥ उच्चावचासुगतिषुनवेदस्वांगतिंभ्रमन् १३

चूर्णिका

ततस्तंअपश्यंतोगोपाः हेकृष्णहेरामेतिचुक्रुशुः तच्छ्रुत्वा कृष्णः वरुणांतिकंययौ ३ ततः प्राप्तंहरिंदृष्ट्वा तद्दर्शनाज्जातोत्सवोवरुणः तंसपर्यया पूजयित्वा आह ४ ॥ वरुण उवाच ॥ ॥ हेकृष्णअद्यमयादेहसाफल्यंप्राप्तंतथाअर्थश्चप्राप्तः किंच हेहरे त्वत्पादभाजः येतेअध्वनः पारंआपुः ५ नमस्तुभ्यं ब्रह्मणेपरमात्मनेनमः ६ किंच हे कृष्णअजानतामद्भृतेनत्वत्पितुराहरणंयत् कृतंतत्क्षंतुं तथा मामपि अनुग्रहंकर्तुंअर्हसि ७ हेगोविंदएषः तेपितानीयताम् ८ ॥ ॥ श्रीशुकउवाच॥ ॥ एवंवरुणेनप्रसादितः कृष्णः स्वपितरं आदाय स्वानांमुदंकुर्वन्अगात् ९ नंदस्तुअदृष्टपूर्वं वरुणैश्वर्यंतथातेषांलोकपालानांकृष्णेसन्नतिंचदृष्ट्वाव्रजंएत्यज्ञातिभ्यःअब्रवीत् १० ततोगोपाः तंईश्वरंमत्वाअयंकृष्णः स्वगतिंब्रह्माख्यांनःप्रापयिष्यतीतिसंकल्पितवंतः ११ ततः सर्वज्ञः कृष्णः तेषां संकल्पसिद्धये एतदचिंतयत् १२ अयंजनः अत्रलोके अविद्याकामकर्मभिः तिर्यगादियोनिषुभ्रमन्स्वांगतिंनवेद १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२८॥

॥११९॥

स्वंब्रह्मस्वरूपंलोकंवैकुंठाख्यंचतमसःप्रकृतेःपरम् १४ देहादिपिहितानांतद्दर्शनमशक्यमितिप्रथमंदेहादिव्यतिरिक्तंब्रह्मस्वरूपंदर्शयामासेत्याह । सत्यमिति । सत्यंअबाध्यंज्ञानंअजडंअनंतंअपरिच्छिन्नंज्यो
तिःस्वप्रकाशंसनातनंशश्वत्सिद्धंब्रह्मगुणापायेगुणापोहेज्ञानिनोयत्पश्यंतितत्कृपयैवदर्शयामास १५ एवंतेब्रह्महृदंब्रह्मैवहृदइवहृदःतत्रनिमग्नस्याविशेषविज्ञानाभावात्तंब्रह्महृदंतेतुनीताःप्रापिताःअथत
स्मिन्मग्नाःतुशब्दोक्तंविशेषमाह । पुनःकृष्णेनोद्धृताःसमाधेरिवोत्थापिताःसंतोब्रह्मणस्तस्यैवलोकंवैकुंठाख्यंददृशुरिति । ननुब्रह्मनिमग्नानांपुनर्लोकदर्शनमघटितमेवेत्याशंक्याह यत्रेतियत्रयस्मिन्कृ
ष्णोनिमित्तेसति । (हेराजन्) पूर्वमक्रूरोऽध्यगात्दृष्टवान् । (अक्रूरकर्तृकवैकुंठदर्शनस्य) शुकपरीक्षित्संवादात्प्राक्तनत्वात्पुरेतिभूतनिर्देशः (संगतः) नह्यतर्क्यैश्वर्येभगवतिकिंचिदप्यसंभावि
तमितिभावः । अथवाअक्रूरोयेत्रदृष्टवान् । तस्ययमुनाहृदस्यब्रह्महृदइतिनाम । तंहृदंनीताःसंतोब्रह्मलोकंददृशुःपुनश्चकृष्णेनोद्धृताःपूर्ववत्तंदृष्ट्वाविस्मिताबभूवुरितिव्यवहितान्वयोऽप्रसिद्धकल्पनाचसोढ
व्येति १६ १७ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायामष्टाविंशतितमोध्यायः ॥ २८ ॥ ॥ ७ ॥ ऊनविंशेतुरासार्थमुक्तिप्रत्युक्तयोहरेः ॥ गोपीभीरासंरंभेतस्यचांतर्द्धि
कौतुकम् ॥१॥ ब्रह्मादिजयसंरूढदर्पकंदर्पदर्पहा । जयतिश्रीपतिर्गोपीरासमंडलमंडनः २ ननुविपरीतमिदं परदारविनोदेनकंदर्पविजेतृत्वप्रतीतेः । मैवम् । योगमायामुपाश्रितः । आत्मारामोप्यरीरमत् ।
साक्षान्मन्मथमन्मथःआत्मन्यवरुद्धसौरतइत्यादिषुस्वातंत्र्याभिधानात् । तस्माद्रासक्रीडाविडंबनंकामविजयख्यापनायेत्येवतत्त्वं किंचशृंगारकथापदेशेनविशेषतोनिवृत्तिपरेयंपंचाध्यायीतिव्यक्तीकरि
ष्यामः (तत्रेंद्रादिदर्पहरणप्रसंगेनमदनदर्पहरणमत्याश्चर्यकरंवक्तुंतावच्छृंगारोद्दीपनमाहभगवानिंतित्रिभिः) तारात्रीरितियाताबलाव्रजंसिद्धामयेमारंस्यथक्षपाइतिप्रातिश्रुताइत्यर्थः १ तदातस्मिन्नेवक्षणे
तत्प्रीतयेउडुराजश्चंद्रउदगात् । उदितः किंकुर्वन् । दीर्घकालेनदर्शनंयस्यसाप्रियः (पतिः) स्वप्रियायामुखंअरुणेनकुंकुमेनयथाविलिंपतितथाप्राच्याःककुभोदिशःसुखंशंतमैःसुखतमैःकरैःरश्मिभिः ।
(करस्थानीयैः) अरुणेनउदयरागेणविलिंपन्अरुणीकुर्वन्नित्यर्थःसप्रसिद्धःउडुराजः तथा चर्षणीनां जनानांशुचस्तापग्लानीः मृजन् अपनयन् २

श्लोकाः १४/२

इतिसंचिंत्यभगवान्महाकारुणिकोहरिः ॥ दर्शयामासलोकंस्वंगोपानांतमसःपरम् १४सत्यंज्ञानमनंतंयद्ब्रह्मज्योतिःसनातनम् ॥ यद्धिपश्यंतिमुनयोगुणापाये
समाहिताः १५ तेतुब्रह्महृदंनीतामग्नाःकृष्णेनचोद्धृताः ॥ ददृशुर्ब्रह्मणोलोकंयत्राक्रूरोध्यगात्पुरा १६ नंदादयस्तुतंदृष्ट्वापरमानंदनिर्वृताः ॥ कृष्णंचतत्रछं
दोभिःस्तूयमानंसुविस्मिताः १७ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअष्टाविंशतितमोध्यायः २८ ॥ ॥७ ॥ ॥ श्रीशुकउवाच ॥ भगवानपि
तारात्रीःशरदोत्फुल्लमल्लिकाः ॥ वीक्ष्यरंतुंमनश्चक्रेयोगमायामुपाश्रितः १ तदोडुराजःककुभःकरैर्मुखंप्राच्याविलिंपन्नरुणेनशंतमैः ॥ सचर्षणीनामुदगाच्छु
चोमृजन्प्रियःप्रियायाइवदीर्घदर्शनः २

चूर्णिका

एवंदयालुः कृष्णः विचिंत्य स्वलोकं वैकुंठाख्यंगोपानांदर्शयामास १४ देहादिपिहितानांलोकदर्शनं अशक्यमिति आदौदेहादिव्यतिरिक्तं ब्रह्मरूपंदर्शयामास तदाह
सत्यंस्वप्रकाशं एवंब्रह्मप्रथमंदर्शयित्वा ततोलोकमिति १५ तेतुगोपाः ब्रह्महृदंकृष्णेननीताःमग्नाश्चपुनःकृष्णेनोद्धृताः संतः तेवैकुंठंददृशुः यस्मिन्कृष्णेनिमित्तेसतिपूर्व
यंअक्रूरः दृष्टवान् तमिति १६ नदादयस्तु तंदृष्ट्वापरमानंदनिर्वृताः कृष्णंचतत्रछंदोभिः स्तूयमानंसुविस्मिताः १७ ॥ ॥ इतिदशमेअष्टाविंशः ॥ २८ ॥ ॥ ७ ॥ ॥११९॥
॥ श्रीशुकउवाच ॥ ॥ भगवानपितारात्रीःशरदोत्फुल्लमल्लिकाः वीक्ष्यरंतुंमनश्चक्रेयोगमायामुपाश्रितः १ तदाविधुः पूर्वदिशायाः मुखं करैः उदयरागेणविलिंपन्
उदितः प्रियायाः मुखंप्रियइव २

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. कुमुत् कुमुदंविकासनीयंविद्यतेयस्यतंकुमुद्वंतंनखंडं मंडलंयस्यरमायाआननस्यआभेवआभायस्यतम् । नवकुंकुममिवारुणंएवंविधंचंद्रंदृष्ट्वा तथावनंचतस्यकोमलैर्गोभिः रश्मिभिरभिरंजितंदृष्ट्वा कलंमधुरं अ०
जगौ । अगायत । कथम् । वामदृशांवामामनोहराहृशोयासांतासांमनोहरं यथा ३ (तथा) असापत्न्यायअन्योन्यंअलक्षितः (अदर्शितः) नज्ञापितः उद्यमोयाभिस्ताःसकांतोयत्रतत्रगीतध्वनिमार्गे
टीका णजग्मुः । जवेनवेगेनलोलानिचंचलानिकुंडलानियासांताः४ श्रीकृष्णसूचकशब्दश्रवणेनतत्प्रवणचित्तानांतत्क्षणमेवत्रैवर्गिककर्मनिवृत्तिंद्योतयंत्यइवार्धावसितंकर्मविहाययुः । तदाह दुहंत्यइति ।
पयःस्थालीस्थंचुल्ल्यांअधिश्रित्यैतत्क्वाथंअप्रतीक्षमाणाःकाश्चिद्ययुः । संयावंगोधूमकणान्नंपक्वमनुद्वास्यअनवतार्य ५ (परिवेषयंत्यःअन्नानिपात्रेनिक्षिपंत्यःतत्परिवेषणम्) ६ (कुंकुमादिलिंपंत्यः) ॥२९॥
अन्याःप्रमृजंत्योअंगोद्वर्तनादिकुर्वंत्यः । काश्चकाश्चित्कृष्णतुष्ट्यर्थंकर्मतदासक्तमनसामन्यथाकृतमपिफलत्येवेतिद्योतयन्नाह । व्यत्यस्तेति । स्थानतःस्वरूपतश्चोर्ध्वाधोधारणेनविपर्ययंप्राप्तानिवस्त्राभरणा
॥१२०॥ नियासांताः ७ नचकृष्णाकृष्टमनसांविघ्नाःप्रभवंतीत्याह । तावार्यमाणाइति ८ नलब्धोविनिर्गमोयाभिस्ताःप्रागपितद्भावनायुक्तास्तदानितरांदध्युरित्यर्थः ९ किंच । तदानीमेवतंपरमात्मानंश्रीकृष्णं
ध्यानतःप्राप्ताःसत्योगुणमयंदेहंजहुरित्याह श्लोकद्वयेन । दुःरुहेति ननुकथंजहुःपरमात्मेतिज्ञानाभावादित्याशंक्याह । जारबुद्ध्यापीति । नहिवरतुशक्तिर्बुद्धिमपेक्षते । अन्यथामत्वापिपीतामृतवत्इति
भावः । ननुतथापिप्रारब्धकर्मबंधनेसतिकथंजहुस्तत्राह सद्यः प्रक्षीणबंधनाइति ननुकथंभोगमंतरेणप्रारब्धकर्मक्षीणंइत्याशंक्यभोगेनैवसद्यःक्षीणमित्याह । दुःसहेति । दुःसहोयःप्रेष्ठस्य (प्रियतमस्यह
रेः) विरहस्तेनयस्तीव्रस्तापस्तेनधुतानिगतान्यशुभानियासां (ताः)तदप्राप्तिपरमदुःखभोगेनपापंक्षीणमित्यर्थः । तथाध्यानेनप्राप्ताऽच्युतस्याश्लेषेणयानिर्वृतिःपरमसुखभोगस्तयाक्षीणंमंगलंपुण्यबं
धनंयासांताःअतोध्यानेनपरमात्मप्राप्तेःतत्कालसुखदुःखाभ्यांनिःशेषकर्मक्षयात् (प्रक्षीणपुण्यपापबंधनाःसत्यो) गुणमयंदेहंजहुरिति १०

दृष्ट्वाकुमुद्वंतमखंडमंडलंरमाननाभंनवकुंकुमारुणम् ॥ वनंचतत्कोमलगोभिरंजितंजगौकलंवामदृशांमनोहरम् ३ निशम्यगीतंतदनंगवर्धनंव्रजस्त्रियःकृष्ण
गृहीतमानसाः ॥ आजग्मुरन्योन्यमलक्षितोद्यमाःसयत्रकांतोजवलोलकुंडलाः ४ दुहंत्योभिययुःकाश्चिद्दोहंहित्वासमुत्सुकाः ॥ पयोधिश्रित्यसंयावमनुद्वा श्लोकाः
स्यापरेययुः ५ परिवेषयंत्यस्तद्धित्वापाययंत्यःशिशून्पयः ॥ शुश्रूषंत्यःपतीन्काश्चिदश्नंत्योऽपास्यभोजनम् ६ लिंपंत्यःप्रमृजंत्योन्याअंजंत्यःकाश्चलोचने ३
व्यत्यस्तवस्त्राभरणाःकाश्चित्कृष्णांतिकंययुः ७ तावार्यमाणाःपतिभिःपितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानोनन्यवर्तंतमोहिताः ८ अंतर्गृहगताःका १०
श्चिद्गोप्योऽलब्धविनिर्गमाः ॥ कृष्णंतद्भावनायुक्तादध्युर्मीलितलोचनाः ९ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृत्याक्षीणमंगलाः १०

चूर्णिका एवंपूर्णमंडलंविधुंतथाकोमलकररंजितं वनंचदृष्ट्वा हरिःस्त्रीणांमनोहरंमधुरंजगौ ३ ततःकामवर्धनंगीतंश्रुत्वाव्रजांगनाः मिथः अलक्षितोद्यमाः सत्यः यत्रकांतः आसी
त् तत्राजग्मुः ४ तत्रकाश्चिद्दुहंत्यःदोहंहित्वाअभिययुः तथाअन्याः चुल्यांपयः अधिश्रित्यक्वाथंअप्रतीक्षमाणाः ययुः काश्चित्तुसंयावमनुद्वास्यययुः ५ काश्चित्परिवेषयंत्यः
तद्धित्वाययुः काश्चित् शिशून्पाययंत्यः तद्धित्वा काश्चित् पतीन्शुश्रूषंत्यः ययुःकाश्चित्अश्नंत्यः ६ काश्चित् प्रमृजंत्यःकाश्चित्नेत्रेअजंत्यःतद्धित्वाययुःकाश्चित्व्यत्यस्तवस्त्रा
भरणाः ययुः ७ एवंताः पतिपित्रादिभिः वार्यमाणाः अपिप्राप्ताः ८ काश्चित् अंतर्गृहगताः अलब्धनिर्गमाः सत्यः कृष्णं दध्युः ९ ततः कृष्णविरहतापेनक्षीणाशुभाः तद्ध्या ॥१२०॥
नेनप्राप्ताश्लेषसुखेनक्षीणमंगलाः जारबुद्ध्यासंगताअपिदेहंजहुः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२१॥

११ ननु यथापतिपुत्रादीनां वस्तुतो ब्रह्मत्वेपिनतद्भजनान्मोक्षः तथाबुद्ध्यभावात् । एवंकृष्णेपिब्रह्मनुद्ध्यभावेनतत्संगतिःकथंमोक्षहेतुरितिशंकते । कृष्णंविदुरिति । परंकेवलंकांतंकमनीयं(जारम्)१२
परिहरति । उक्तमिति (पुरस्तात्सप्तमस्कंधे । चैद्यःशिशुपालः) अयंभावःजीवेष्वावृतंब्रह्मत्वं (अतस्तत्राविचारापेक्षा) कृष्णस्यतुहृषीकेशत्वात् अनावृतंततोनतत्रबुद्ध्यपेक्षेति १३ ननुदेहीकथमना
वृतःस्यात्अतआह । नृणामिति । गुणात्मनःगुणानियंतुःभगवतएवएवंरूपाभिव्यक्तिःअतोनदेहिसादृश्यंअत्रवक्तुंयुज्यतेइतिभावः १४ अतोयथाकथंचित्तदासक्तिर्मुक्तिकारणमित्याह । काममिति । ऐक्यं
संबंधं (बंधुत्वादिरूपं) सौहृदंभक्तिम् १५ नचभगवतोयमतिभारइत्याह । नचैवमिति । यतःश्रीकृष्णादेतत्स्थावरादिकमपिमुच्यते १६ प्रस्तुतमाह । तादृष्ट्वेति । वाचःपेशैःवाग्विलासैः १७ सर्वाःससं
भ्रममागताःविलोक्यसभयामिवाह । व्रजस्येति १८ लज्जयामंदहसितमालक्ष्याह । रजनीति । (घोररूपाभयंकरी । तत्रहेतुः । घोरसत्त्वैर्व्याघ्रादिभिर्नितरांसेविता) १९ किंचमातरइति । विचिन्वं
तिमृगयंते । बंधूनांसाध्वसंभयं (युष्मददर्शनात् तत्) माकुरुतेत्यर्थः २० ईषत्प्रणयकोपेनान्यतोविलोकयंतीःप्रत्याह । दृष्टमिति । राकेशस्यपूर्णचंद्रस्यकरैःरंजितम् । यमुनास्पर्शिनोऽनिल
स्यलीलामंदगतिस्तयाएजंतःकंपमानास्तरूणांपल्लवाःतैःशोभितं (वनंयुष्माभिर्दृष्टंकिम्) २१ सतीःहेसत्यः (दृष्टंचेत्तर्हियात) २२

श्लोकाः ११/२२

तमेवपरमात्मानंजारबुद्ध्यापिसंगताः ॥ जहुर्गुणमयंदेहंसद्यःप्रक्षीणबंधनाः ११ ॥ राजोवाच ॥ कृष्णंविदुःपरंकांतंनतुब्रह्मतयामुने ॥ गुणप्रवाहोपरम
स्तासांगुणधियांकथम् १२ ॥ शुकउवाच ॥ उक्तंपुरस्तादेतत्तेचैद्यःसिद्धिंयथागतः ॥ द्विषन्नपिहृषीकेशंकिमुताधोक्षजप्रियाः १३ नृणांनिःश्रेयसार्थायव्य
क्तिर्भगवतोनृप ॥ अव्ययस्याप्रमेयस्यनिर्गुणस्यगुणात्मनः १४ कामंक्रोधंभयंस्नेहमैक्यंसौहृदमेवच ॥ नित्यंहरौविदधतोयांतितन्मयतांहिते १५ नचै
वंविस्मयःकार्योभवताभगवत्यजे ॥ योगेश्वरेश्वरेकृष्णेयतएतद्विमुच्यते १६ तादृष्ट्वांतिकमायाताभगवान्व्रजयोषितः ॥ अवदद्वदतांश्रेष्ठोवाचःपेशैर्विमो
हयन् १७ ॥ श्रीकृष्णउवाच ॥ स्वागतंवोमहाभागाःप्रियंकिंकरवाणिवः ॥ व्रजस्यानामयंकच्चिद्ब्रूतागमनकारणम् १८ रजन्येषाघोररूपाघोरसत्त्वनिषे
विता ॥ प्रतियातव्रजंनेहस्थेयंस्त्रीभिःसुमध्यमाः १९ मातरःपितरःपुत्राभ्रातरःपतयश्चवः ॥ विचिन्वंतिह्यपश्यंतोमाकृढ्वंबंधुसाध्वसम् २० दृष्टंवनंकुसुमितं
राकेशकररंजितम् ॥ यमुनानिललीलैजत्तरुपल्लवशोभितम् २१ तद्यातमाचिरंगोष्ठंशुश्रूषध्वंपतीन्सतीः ॥ क्रंदंतिवत्साबालाश्चतान्पाययतदुह्यत २२

चूर्णिका

११ ॥ राजोवाच ॥ हेब्रह्मन् गोप्यः कृष्णं विदुः न ब्रह्म एवंसति तासां संसारोपरमःकथं १२ ॥ श्रीशुकउवाच ॥ हेनृपएतत्पूर्वं ते उक्तंयथाद्विषन्नपिचैद्यः सिद्धिंगतः हरिप्रियाः
किमुत १३ किंच हेनृप अयंकृष्णस्यव्यक्तिः नृणांमोक्षायैव १४ किंच कामक्रोधभयादि हरौकुर्वंतः पुमांसः तन्मयतांयांति १५ एवंभूतेअजेएवंविस्मयोनकार्यः यतः
एतद्विमुच्यते१६ततः कृष्णः प्राप्ताः गोपीः दृष्ट्वा वाग्विलासैः ताः मोहयन् उवाच १७॥ श्रीभगवानुवाच ॥ हेगोप्यः वः स्वागतम् व्रजस्यानामयं कच्चित् आगमनकारणं
ब्रूत१८एषारजनी घोररूपा अतः व्रजंयात अत्र स्त्रीभिः नस्थेयं १९ वःपितृपत्यादयः मृगयंते बंधुसाध्वसंमाकुरुत २० किंच इदंकुसुमितं वनंदृष्टम् २१ अतः गोष्ठं
यात पतीन् शुश्रूषध्वम् वत्साः बालाश्च क्रंदंतितान्पाययत दुह्यत २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[टीका

संरंभक्षुभितदृष्टीःप्रत्याह । अथवेति । यंत्रिताशयावशीकृतचिताः । उपपन्नंयुक्तम् । प्रीयंतेप्रीताभवंति (प्रीतिंकुर्वंतीत्यर्थः) २३ दृष्टादृष्टभयप्रदर्शनेननिवर्तयति भर्तुरित्यादिश्लोकत्रयेण २४ (दुर्भग कुरूपः । जडोमूर्खः । अपातकीअपतितश्चेदित्यर्थःनहेयःकिंतुसेव्यःपतितस्तुआशुद्धेःसंप्रतीक्ष्योहि) २५ फल्गुतुच्छम् । कृच्छ्रंदुःसंपादम् (सर्वत्रइहामुत्रापीत्यर्थःभयावहंजुगुप्सितंच) औपपत्यंजारसौख्यम् २६ किंचश्रवणादिति (यथाश्रवणादिनामयिभावोवर्ततेनतथासंनिकर्षेणसंनियानेनततोगृहान्प्रतियातेति) २७ २८ चिंतांप्राप्तानांस्थितिमाह । कृत्वेति । शुचःशोकान्उद्गतेनश्वसनेनशुष्यंतोबिंबफलसदृशाअधरायेषुमुखेषुतानिअवअर्वांचिकृत्वातथाचरणांगुष्ठेनमहींलिखंत्यः । तथागृहीतकज्जलैरश्रुभिःकुचकुंकुमानिक्षालयंत्यःतूष्णींस्थिताःयतउरुर्महान्दुःखभरोयासांताः २९ किंच । प्रेष्ठमिति । किंचित्संरंभेणकोपावेशेनगद्गदागिरोयासांताःअब्रुवत (वदंति स्म) । संरंभेकारणम् । प्रेष्ठमित्यादि । प्रियेतरमिवप्रतिभाषमाणंप्रत्याचक्षाणम् ३० एवंनृशंसंक्रूरं (वक्तुंमार्हतिभवान्) हेदुरवग्रहस्वच्छंदतवपादमूलंभक्ताःसेवितवतीःअस्मान्भजस्वमात्यजेति (भजतेअनुगृह्णाति) ३१

॥१२२॥

श्लोकाः २३/३१

अथवामदभिस्नेहाद्भवंत्योयंत्रिताशयाः ॥ आगताह्युपपन्नंवःप्रीयंतेमयिजंतवः २३ भर्तुःशुश्रूषणंस्त्रीणांपरोधर्मोह्यमायया ॥ तद्बंधूनांचकल्याण्यःप्रजानांचानुपोषणम् २४ दुःशीलोदुर्भगोवृद्धोजडोरोग्यधनोपिवा ॥ पतिःस्त्रीभिर्नहातव्योलोकेप्सुभिरपातकी २५ अस्वर्ग्यमयशस्यंचफल्गुकृच्छ्रंभयावहम् ॥ जुगुप्सितंचसर्वत्रऔपपत्यंकुलस्त्रियः २६ श्रवणाद्दर्शनाद्ध्यानान्मयिभावोनुकीर्तनात् ॥ नतथासंनिकर्षेणप्रतियाततततोगृहान् २७ ॥ शुकउवाच ॥ इतिविप्रियमाकर्ण्यगोप्योगोविंदभाषितम् ॥ विषण्णाभग्नसंकल्पाश्चिंतामापुर्दुरत्ययाम् २८ कृत्वामुखान्यवशुचःश्वसनेनशुष्यद्बिंबाधराणिचरणेनभुवंलिखंत्यः ॥ अस्रैरुपात्तमषिभिःकुचकुंकुमानितस्थुर्मृजंत्यउरुदुःखभराःस्मतूष्णीम् २९ प्रेष्ठंप्रियेतरमिवप्रतिभाषणंकृष्णंतदर्थविनिवर्तितसर्वकामाः ॥ नेत्रेविमृज्यरुदितोपहतेस्मकिंचित्संरंभगद्गदगिरोब्रुवतानुरक्ताः ३० ॥ गोप्यऊचुः ॥ मैवंविभोर्हतिभवान्गदितुंनृशंसंसंत्यज्यसर्वविषयांस्तवपादमूलम् ॥ भक्ताभजस्वदुरवग्रहमात्यजास्मान्देवोयथादिपुरुषोभजतेमुमुक्षून् ३१

चूर्णिका

किंवामत्स्नेहात् अत्र यूयंप्राप्ताः इदंयुक्तं मयिजंतवः प्रीयंते २३ किंच स्त्रीणांपरोधर्मःभर्तुः तद्बंधूनांच सेवनं हेगोप्यः स्वपतिः दुःशीलः दुर्भगः वृद्धः जडः रोगी अधनोपिस्त्रीभिः न त्याज्यः अपातकीचेत् २५ किंचकुलस्त्रियः औपपत्यंअस्वर्ग्यंअयशस्यंनिंद्यंचेति २६ किंच श्रवणदर्शनादिनामयियथाभावः स्यात् तथासन्निकर्षेण न अतः गृहान् यात २७ ॥ श्रीशुकउवाच ॥ एवंअप्रियंकृष्णवचः श्रुत्वा चिंतांआपुः २८ ततोगोप्यः मुखानिअधःकृत्वा चरणेन भुवंलिखंत्यः वस्त्रैः कुचकुंकुमानि मृजंत्यः तूष्णीं तस्थुः २९ किंचप्रियेतरमिवभाषमाणं कृष्णं संरंभगद्गदगिरोगोप्यः ऊचुः ३० हेविभो त्वंएवंक्रूरं वक्तुं नार्हसि वयं विषयान् हित्वा ते पादमूलं प्राप्ताः नः भजस्व ३१ ॥१२२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिच । यदुक्तं पत्यपत्येत्यादि । त्वयाधर्मविदेतिसोपहासम् । एवमेतदुपदेशानांपदेविषये त्वय्येवास्तु । उपदेशपदत्वेहेतुः । ईशेइति (तमेतमित्यादि) विविदिषावाक्येनसर्वोपदेशानामीशपरत्वाव गमात्इतिभावः । ईशत्वेहेतुःआत्माकिलभवानिति । भोग्यस्यहिसर्वस्यभोक्तात्मैवेशइति । अतःप्रेष्ठोबंधुश्चभवानेवेति (भर्तुःशुश्रूषणंस्त्रीणामित्यादिनोक्तं) सर्वबंधुषुकरणीयं (तत्सर्वात्मनि) त्वय्ये वास्त्वित्यर्थः अथवाधर्मोपदेशानांपदेस्थानेधर्मोपदेष्टरित्वयिसतिअस्मासुचधर्मजिज्ञासमानासुसतीषुत्वयाधर्मविदायदुक्तंएवमेतदस्तु । नतुत्वंधर्मोपदेष्टा (नापिवयंधर्मजिज्ञासमानाः) किंतुभवानात्मा (वयंत्वद्दास्यः)-इति । अथवायदुक्तंएतदुपदेशपदेतद्गोचरेपुरुषेस्तुनाम । त्वयितुईशेस्वामिनिसतिएवं । (किं) काकुरियम् नैवमित्यर्थः । यतस्तनुभृतांत्वमात्माफलरूपइति । यद्वा यदुक्तंपत्यां दिशुश्रूषणंधर्मइत्येवमेतत्त्वय्येवास्तु कुतः उपदेशपदेशुश्रूषणीयत्वेनउपदिश्यमानानांपत्यादीनांपदेअधिष्ठाने कुतः ईशे। ईश्वरमधिष्ठानंविनाकोपिपतिपुत्रादिर्नाम(नास्ती-)-ति । अन्यत्समानम् । अलम तिविस्तरेण ३२ एतत्सदाचारेणदृढयंत्यःप्रार्थयंते । कुर्वंतीति । कुशलाःशास्त्रनिपुणाः। तथाचशास्त्रम्। "किंप्रजयाकरिष्यामोयेषांनोयमात्मालोक"इत्यादि ३३ किंच । प्रतियातेतियदुक्तंतदशक्यंत्व यैवचित्तादीनामपहृतत्वादित्याहुः । चित्तमिति । यदस्माकंचित्तमेतावंतंकालंसुखेनगृहेषुनिर्विशति । तत्त्वयापहृतंकरावपियौगृहकृत्येनिर्विशतःतावपि । सुखात्मनात्वयेतिवा ३४ अतःअंगहेकृष्णनो ऽस्माकंतवाधरामृतस्यपूरकेण (पूरेणकृत्वा) तवैवहाससहितेनावलोकेनकलगीतेनच (मधुरवेणुध्वनिना) जातोयोहृच्छयाग्निःकामाग्निःतंसिंच (अमृतसेकेनवह्निःशाम्यति किल) नोचेदयंतावदे कोग्निस्तथाग्निरहाज्जनिष्यतेयोग्निस्तेनचोपयुक्तदेहादग्धशरीरायोगिनइवतेपदवींअंतिकंध्यानेनयामप्राप्नुयाम (हेसखेइति) ३५ ननुस्वपतीनेवोपगच्छततएनमग्निंसिंचेयुरिति । तत्राहुः । यर्हीति । रमायालक्ष्म्यादत्तक्षणंदत्तउत्सवोयेनतत् । दत्तावसरंवा तदपिक्वचिदेव नसर्वदा । अरण्यजनाःप्रियायस्यतस्यतवअरण्यजनप्रियत्वादरण्येक्वचित् (तत्) यर्हिअस्प्राक्ष्मस्पृष्टवत्योवयं तत्र चत्वयाभिर मिताआनंदिताः सत्यः तदारभ्य अन्यसमक्षंस्थातुमपिनपारयामः (किमुरंतुं) तुच्छास्ते (अस्मभ्यं) नरोचंतेइत्यर्थः ३६

श्लोकाः ३२—३६

यत्पत्यपत्यसुहृदामनुवृत्तिरंगस्त्रीणांस्वधर्मइतिधर्मविदात्वयोक्तम् ॥ अस्त्वेवमेतदुपदेशपदेत्वयीशेप्रेष्ठोभवांस्तनुभृतांकिलबंधुरात्मा ३२ कुर्वंतिहि त्वयिरतिंकुशलाःस्वआत्मन्नित्यप्रियेपतिसुतादिभिरार्तिदैःकिम् ॥ तन्नःप्रसीदपरमेश्वरमास्मच्छिंद्याआशांधृतांत्वयिचिरादरविंदनेत्र ३३ चित्तंसुखेनभ वतापहृतंगृहेषुयन्निर्विशत्युतकरावपिगृह्यकृत्ये ॥ पादौपदंनचलतस्तवपादमूलाद्यामःकथंव्रजमथोकरवामकिंवा ३४ सिंचांगनस्त्वदधरामृतपूरकेणहा सावलोककलगीतजहृच्छयाग्निम् ॥ नोचेद्वयंविरहजाग्न्युपयुक्तदेहाध्यानेनयामपदयोःपदवींसखेते ३५ यर्ह्यंबुजाक्षतवपादतलंरमायादत्तक्षणंक्वचिदरण्य जनप्रियस्य ॥ अस्प्राक्ष्मतत्प्रभृतिनान्यसमक्षमंगस्थातुंत्वयाऽभिरमिताबतपारयामः ३६

चूर्णिका

किंच पत्यादीनांसेवनंस्त्रीणांपरोधर्मः इतियत्त्वयोक्तं तत् त्वयिइशेअस्तुयतःतनुभृतांप्रेष्ठोबंधुश्चत्वमसि ३२ किंच हे कृष्णप्रियेत्वयिकुशलाः रतिंकुर्वंतिदुःखदैः पत्या दिभिः किम् अतः नः प्रसीद त्वयिअस्माभिः धृतांआशांमाछिंद्याः ३३ किंच अस्माच्चित्तं एतावत् कालंगृहंविशति तत् इदानीं त्वया अपहृतं एवंकरावपि तथा पादावपि स्थानात् नचलतः कथंव्रजंयामः किंकरवाम ३४ अतः हेकृष्णनःकामाग्निंअधरामृतपूरेणासिंच एवं नोचेत् तर्हि कामविरहाग्निभ्यां दग्धदेहाः वयं ध्यानेन ते पदवींयाम ३५ किंच हेहरे रमायाः दत्तावसरंतेपादतलं यदा अस्प्राक्ष्म तत्प्रभृति अन्यसमक्षं स्थातुं न पारयामः ३६

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्वत्पादसौभाग्यंत्वतिचित्रमित्याहुः । श्रीरिति । वक्षसि (पदं) असापत्न्यंस्थानंलब्धापि (लब्धवत्यपि) तवपदांबुजरजः । सपत्न्यातुलस्यासहकामयतेस्म । भृत्यैःसर्वैर्जुष्टमितिसौभाग्यातिरेकोक्तिः (कथंभूताश्रीः) यस्याःस्ववीक्षणकृते । याश्रीःआत्मनोविलोकयत्वित्येतदर्थंअन्येषां (सुराणां) ब्रह्मादीनांतपोभिःप्रयासःसा । तद्वद्वयमपितद्रजःप्रपन्नाःइति ३७ हेवृजिनार्दनदुःखहंतः । त्वदुपासनेत्व द्भजनएवआशायासांतावयंवसतीःगृहान्विसृज्यहित्वायोगिनइवप्राप्ताः । त्वत्कर्तृकसुंदरस्मितविलसितनिरीक्षणेनयस्तीव्रःकामस्तेनतप्तचित्तानां (नः) हेपुरुषरत्नदास्यंदेहि ३८ ननु गृहस्वाम्यंविहायदा स्यंकिमितिप्रार्थ्यतेअतआहुः । वीक्ष्येति । अलकावृतमुखंकेशांतैरावृतंमुखंतथाकुंडलयोःश्रीर्ययोस्तेगंडस्थलेयस्मिन्अधरेसुधायस्मिन्तच्चतच्चतवमुखंवीक्ष्यदत्ताभयंभुजदंडयुग्मंचवक्षश्चश्रियाएकमेवरमणं रतिजनकंवीक्ष्यदास्यएवभवामेति३९ननुजुगुप्सितमौपपत्यमित्युक्तंतत्राहुः । कास्त्रीतिअंगहेकृष्णकलानि(अव्यक्तमधुराणि)पदानियस्मिन्तत्आयतंदीर्घंमूर्छितस्वरालापभेदःतेनपाठांतरेकलपदामृतमयंयद्वे णुगीतंतेनसंमोहिता (सती) कावास्त्रीआर्यचरितात्निजधर्मात्नचलेत् । यन्मोहिताःपुरुषाअपिचलिताः (तत्रस्त्रीचलेदितिकावार्ता) किंच । त्रैलोक्यसौभगं (लोकत्रयसुंदरंइदंप्रत्यक्षंरूपं) इतियत्यतः (ग वादयोपि) अविभ्रन्अबिभरुः (मूढेष्वपिगोमृगाद्विजद्रुमाउत्तममध्यमकानिष्ठातिकनिष्ठादर्शिताः) त्वद्द्योतकशब्दश्रवणमात्रेणापितावन्निजधर्मत्यागोयुक्तःकिंपुनस्त्वदनुभवेनेतिभावः ४० व्यक्तंनिश्चि तं (यथादिपुरुषोभगवान्विष्णुःसुरलोकस्यार्तिहरस्तथाभवान् । विधेहिकुरुस्थापयेत्यर्थः) ४१ विक्लवितंपारवश्यंप्रलपितम् । गोपीररीरमत्रमयामास ४२ प्रियस्य (कृष्णस्ये-)- क्षणेनउत्फुल्लानि मुखानियासांताभिः । उदारहासश्चाद्विजा -(-दंताश्च) तेषुकुंदकुसुमवद्दीधितिर्यस्यसः (यद्वा द्विजाएवकुंदानिकुंदकुसुमदलानि । उदारहासस्यद्विजकुंदानांचदीधतयोयस्मिन्अतएव) एणांकश्चंद्रः ४३

श्लोकाः ३७—४३

श्रीर्यत्पदांबुजरजश्चकमेतुलस्यालब्धापिवक्षसिपदंकिलभृत्यजुष्टम् ॥ यस्याःस्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयंचतवपादरजःप्रपन्नाः ३७ तन्नःप्रसी दवृजिनार्दनतेऽङ्घ्रिमूलंप्राप्ताविसृज्यवसतीस्त्वदुपासनाशाः ॥ त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनांपुरुषभूषणदेहिदास्यम् ३८ वीक्ष्यालकावृतमु खंतवकुंडलश्रीगंडस्थलाधरसुधंहसितावलोकम् ॥ दत्ताभयंचभुजदंडयुगंविलोक्यवक्षःश्रियैकरमणंचभवामदास्यः ३९ कास्त्र्यंगतेकलपदायतवेणुगी तसंमोहितार्यचरितान्नचलेत्त्रिलोक्याम् ॥ त्रैलोक्यसौभगमिदंचनिरीक्ष्यरूपंयद्गोद्विजद्रुममृगाःपुलकान्यबिभ्रन् ४० व्यक्तंभवान्व्रजजनार्तिहरोभिजा तोदेवोयथादिपुरुषःसुरलोकगोप्ता ॥ तन्नोविधेहिकरपंकजमार्तबंधोतप्तस्तनेषुचशिरस्सुचकिंकरीणाम् ४१ ॥ ॥ शुकउवाच ॥ ॥ इतिविक्ल वितंतासांश्रुत्वायोगेश्वरेश्वरः ॥ प्रहस्यसदयंगोपीरात्मारामोप्यरीरमत् ४२ ताभिःसमेताभिरुदारचेष्टितःप्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहासद्वि जकुंददीधितिर्व्यरोचतैणांकइवोडुभिर्वृतः ४३

चूर्णिका

किंच श्रीः वक्षसिपदंलब्ध्वापि तुलस्यासह यत्पदांबुरजः चकमे तद्वत् वयं ते पादरजः प्राप्ताः ३७ किंच हेहरे वयंस्ववसतीः हित्वा तेअंघ्रिमूलं प्राप्ताः नः प्रसीद तयाते अवलोकनेनतप्तात्मनां नः दास्यंदेहि ३८ किंच ते अलकावृतंहासितावलोकमुखंश्रियैकरमणंवक्षःस्थलंचदृष्ट्वातेदास्यएववयंभवाम ३९ किंच हेकृष्णतेवेणुगीतमो हिताकास्त्रीत्रैलोक्येस्वधर्मात् नचलेत् किंच इदंरूपंवीक्ष्यद्विजद्रुममृगाः पुलकानिअविभरुः ४० किंच हेहरेत्वं व्रजभयार्तिहरः आदिपुरुषवत् जातः अतः नः दासीनांत प्तस्तनेषु शिरस्सुच कराब्जंनिधेहिइति ४१ ॥श्रीशुकउवाच ॥ एवंतासांविक्लवितंश्रुत्वा प्रहस्यताः रमयामास ४२ ततस्ताभिः प्रियेक्षणोत्फुल्लमुखीभिः अच्युतः व्यरोचत् ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(गोपीभिरुपगीयमानःस्वयंचोद्गायन् । व्यचरत्विचरतिस्म) ४४ (कुमुदानांआमोदोयत्रतेनवायुनापलक्षितंतस्यानद्यास्तरलैस्तरंगैरानंदयतितच्छीलंपुलिनम्) ४५ (बाहुप्रसारेणपरिरंभः) बाहुप्रसारश्चपरिरंभश्च (इतिवा) कराभ्यामलकादीनांआलभनंस्पर्शश्चनर्मपरिहासश्चनखाग्रपातश्चतैःक्ष्वेल्याक्रीडयाचअवलोकैश्चहासितैश्चकामंतासामुद्दीपयन्ताःरमयामास ४६ महात्मनश्चविमुक्तचित्ता त् (लब्धोमानोयाभिरतएवभुविस्त्रीणांमध्येआत्मानमभ्यधिकंमेनिरे) ४७ तादृशंसौभगेनमदमस्वाधीनतांमानंचगर्वंकेशवःकश्चईशश्चकेशौतौवशयतीतितथासः (अंतरधीयत राधयासहेतिशेषः''माधवो राधयासार्धमंतर्धानंचकारहे''तिब्रह्मवैवर्तात्) ४८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोनत्रिंशोध्यायः २९ ॥ ॥ छ ॥ ॥ त्रिंशेविरहसंतप्तगोपीभिःकृष्णमार्गणम् । उन्म त्तवन्ननियतंभ्रमंतीभिर्वनेवने ॥ १ ॥ अचक्षाणाअपश्यंत्यः । (अकस्मादंतर्हितेसति । करिण्योहस्तिन्यः) १ गत्याचअनुरागस्मिताभ्यांविभ्रमेक्षितानिसविलासनिरीक्षितानितैश्चमनोरमाआलापा श्चविहाराः क्रीडाश्चविभ्रमाअन्येचविलासभेदाःतैश्च । रमापतेर्गत्यादिभिरेतैराक्षिप्तानिआकृष्टानिचित्तानियासांताः अतस्तस्मिन्नेवआत्मायासांताः तस्यविविधाश्चेष्टाजगृहुः तदनुकरणेनाक्रीडन् २ अपिच । गतिस्मितेति प्रियस्यगत्यादिषुप्रतिरूढाः आविष्टामूर्तयोयासांताःअतःकृष्णविहारविभ्रमाःकृष्णस्येवविहारविभ्रमाःक्रीडाविलासाश्चयासांताः अहमेवकृष्णइतिपरस्परंनिवेदितवत्यः ३

॥१२९॥

श्लोकाः ४४/२

उपगीयमानउद्गायन्वनिताशतयूथपः ॥ मालांबिभ्रद्वैजयंतींव्यचरन्मंडयन्वनम् ४४ नद्याःपुलिनमाविश्यगोपीभिर्हिमवालुकम् ॥ रेमेतत्तरलानंदिकुमु दामोदवायुना ४५ बाहुप्रसारपरिरंभकरालकोरुनीविस्तनालभननर्मनखाग्रपातैः ॥ क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिंरमयांचकार ४६ एवंभगवतःकृष्णाल्लब्धमानामहात्मनः ॥ आत्मानंमेनिरेस्त्रीणांमानिन्योऽभ्यधिकंभुवि ४७ तासांतत्सौभगमदंवीक्ष्यमानंचकेशवः ॥ प्रशमायप्रसादाय तत्रैवांतरधीयत ४८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकोनत्रिंशोध्यायः २९ ॥ ॥ छ ॥ ॥ शुकउवाच ॥ अंतर्हितेभगवतिसहसै वव्रजांगनाः ॥ अतप्यंस्तमचक्षाणाःकरिण्यइवयूथपम् १ गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताःप्रमदारमापतेस्ता स्ताविचेष्टाजगृहुस्तदात्मिकाः२गतिस्मितप्रेक्षणभाषणादिषुप्रियाःप्रियस्यप्रतिरूढमूर्तयः॥असावहंत्वित्यबलास्तदात्मिकान्यवेदिषुःकृष्णविहारविभ्रमाः३

चूर्णिका

ततः वनिताशतयूथपः कृष्णः वैजयंतीमालांधृत्वा वनं मंडयन्व्यचरत् ४४ ततः गोपीभिः सहहिमवालुकंनद्याः पुलिनंप्रविश्यरेमे ४५ तदाह बाहुप्रसारपरिरंभकरालको रुनीवीस्तनालभननर्मनखाग्रपातैः क्ष्वेल्यावलोकहासितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिंरमयांचकार ४६ एवंकृष्णाल्लब्धमानाः गोप्यः भुविस्त्रीणांमध्येआत्मानं अधिकंमेनिरे ४७ तासांतत्सौभगमदंवीक्ष्यमानंचकेशवः प्रशमायप्रसादायतत्रैवांतरधीयत ४८ ॥ इतिदशमेएकोनत्रिंशः ॥ २९ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ अंतर्हिते भगवतिसहसैवव्रजांगनाः अतप्यंस्तमचक्षाणाःकरिण्यइवयूथपम् १ ततः ताः रमापतेः गतिस्मितविलासेक्षितादिभिः आक्षिप्तचित्ताः सत्यः भगवल्लीलानुकरणेनआ क्रीडन् २ किंचहरेः गतिस्मितप्रेक्षणादिषु आविष्टमूर्तयस्ताःकृष्णविहारविभ्रमाः अहमेवकृष्ण इति मिथः निवेदितवत्यः ३

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच । गायंत्यइतिवनाद्वनांतरंगच्छंत्योविचिक्युः अमृगयन् उन्मत्तकतुल्यत्वमाह । (भूतेषुअंतरंमध्येसंतंबाहिश्चसंतंपुरुषं) वनस्पतीन् इतिपप्रच्छुः (इति) ४ तत्प्रपंचयति नवभिः । तत्र महत्त्वादेते पश्येयुरित्याशया (अस्वस्था)-अश्वत्थादीन् (तावत्) पृच्छंति दृष्टइति । प्रेमहासविलसितैरवलोकनैरस्माकंमनोहृत्वा चोरइवगतः युष्माभिः किंदृष्टइति ५ (अथ) महांतःस्वपुष्पैर्बहूपकारिणश्चेतिकुरवकादीन्पृच्छंति । कच्चिदिति । हेकुरबकादयः दर्पहरंस्मितंयस्यस-(-रामानुजःकृष्णः)-इतोगतःकच्चिद्दृष्टइति ६ अलिकुलैःसहत्वात्वांबिभ्रत्तवातिप्रियस्त्वयाकिंदृष्टइति ७ गुणातिरेकेपिनम्रत्वादिमाः पश्येयुरिति पृच्छंति मालतीति । हेमालतिहेमल्लिकेहेजाति यूथिके वःयुष्माभिःकिंअदर्शि दृष्टःकरस्पर्शेनवःप्रीतिंजनयन् किंयातइतिअत्रमालतीजात्योरवांतरविशेषोद्रष्टव्यः ८ फलादिभिःसर्वप्राणिनांसंतर्पकाएतेपश्येयुरितिपृच्छंति । चूतेति । चूताम्रयोरवांतरजातिभेदःनीपकदंबयोश्चहेच्यूतादयः हेअन्येचपरार्थभविकाः परार्थेएवभवोजन्मयेषांते । यमुनोपकूलाःयमुनातीरसमीपेवर्तमानाःतीर्थवासिनइत्यर्थः । तेभवंतःरहितात्मनांशून्यचेतसांनःकृष्णपदवींकृष्णस्यमार्गंशंसंतु कथयंतु ९ हेक्षितिहेक्षितेत्वयाकिंसुकृतंकृतंयतोयात्वंकेशवांघ्रिस्पर्शोत्सवाकेशवस्यांघ्रिस्पर्शेनोत्सवोयस्याः सा कुतः अंगरुहैः (तृणादिलक्षणैःरोमभिः) उत्पुलकितारोमांचिताविभासिशोभसे । तत्रविशेषंपृच्छंति । अपिकिंअयमुत्सवःअंघ्रिसंभवः अधुनातवैकदेशांघ्रिस्पर्शसंभवः यद्वा नैतावत्किंतुउरुक्रमविक्रमात्पूर्वमेवत्रिविक्रमस्यपदासर्वाक्रमणात् । आहोअथवानैतावदेव । अपितुततोपिपूर्ववराहस्यवपुषःपरिरंभणेनेति । अतस्त्वयानूनंदृष्टस्तंदर्शयेति १०

॥१२६॥

श्लोकाः ४/१०

गायंत्यउच्चैरमुमेवसंहताविचिक्युरुन्मत्तकवद्वनाद्वनम् ॥ पप्रच्छुराकाशवदंतरंबहिर्भूतेषुसंतंपुरुषंवनस्पतीन् ॥ ४ दृष्टोवःकच्चिदश्वत्थप्लक्षन्यगोधनोमनः ॥ नंदसूनुर्गतोहृत्वाप्रेमहासावलोकनैः ५ कच्चित्कुरबकाशोकनागपुन्नागचंपकाः ॥ रामानुजोमानिनीनांगतोदर्पहरस्मितः ६ कच्चित्तुलसिकल्याणिगोविंदचरणप्रिये ॥ सहत्वालिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः ७ मालत्यदर्शिवःकच्चिन्मल्लिकेजातियूथिके ॥ प्रीतिंवोजनयन्यातःकरस्पर्शेनमाधवः ८ चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः ॥ येऽन्येपरार्थभविकायमुनोपकूलाःशंसंतुकृष्णपदवींरहितात्मनांनः ९ किंतेकृतंक्षितितपोबतकेशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि ॥ अप्यंघ्रिसंभवउरुक्रमविक्रमाद्वाआहोवराहवपुषःपरिरंभणेन १०

चूर्णिका

ततः उच्चैः कृष्णमेवगायंत्यः मत्तवत् एकत्र संहत्य वनाद्वनं अमृगयन् तथाअंतर्बहिः आकाशइवस्थितंपुरुषंवृक्षान्प्रपप्रच्छुः ४ हे अश्वत्थ हे प्लक्ष हे वटनोमनः हृत्वा गतः कृष्णः युष्माभिर्दृष्टः कच्चित् ५हेकुरवकाशोकनागपुन्नागचंपकाः नः दर्पहरस्मितः सः इतोगतः कच्चित् ६ हेतुलसिअलिकुलैः सहत्वांबिभ्रत् ते अतिप्रियःत्वयाकिंदृष्टः ७ किंच हेमालति हेमल्लिके हेजातियूथिके वः करस्पर्शेनप्रीतिंकृत्वा यातः दृष्टः कच्चित् ८ किंच हेचूतप्रवालपनसादयः यूयंयमुनातीरेस्थिताः स्थ अतः शून्यचेतसांनः कृष्णमार्गंकथयत ९ हेक्षिते त्वयाकितपः कृतं यात्वंकेशवांघ्रिस्पर्शोत्सवारोमांचिताशोभसे अयमुत्सवः तेअधुनाहरेःएकदेशांघ्रिस्पर्शसंभूतः किम् यद्वा त्रिविक्रमविक्रमात् वातत्पूर्ववराहदेहाश्लेषात् जातः अतः त्वयानूनंदृष्टः तंदर्शय १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हरिण्या (आयतनेत्रत्वात्) दृष्टिप्रत्यासत्त्याकृष्णदर्शनंसंभाव्याहुः । अपीति । हेसखिएणपत्निअपिकिंउपगतः समीपंप्राप्तः गात्रैः सुंदरैःमुखबाह्वादिभिः (दृशांआनंदंतन्वन्) प्रिययासहेतियदु
क्तंतत्रद्योतकम् । कांतायाअंगसंगः तेनकुचकुंकुमेनरंजितायाः कुंदकुसुमस्रजोगंधः कुलपतेःश्रीकृष्णस्यवातिआगच्छति । (अतःप्रियया सहोपगतः किमित्यर्थः) ११ फलभारेणनतांस्तरून्कृष्णं
दृष्ट्वाप्रणताइतिमत्वातयाप्रिययासहतस्यगतिविलाससंभावयंत्यःपृच्छंति बाहुमिति तुलसिकायाअलिकुलैः (तुलसिकामालायांभ्रमद्भिरलिकुलैरित्यर्थः) अतस्तदामोदमदांधैरन्वीयमानः अनुगम्यमान
इहचरन् (प्रियायाअंसेबाहुंनिधाय) इति १२ काश्चिदाहुः हेसख्यः इमालतानूनंकृष्णेनसंगताअतइमाःपृच्छत । ननुस्वपतिसंगतौतत्संगतिर्दुर्घटेतिचेन्न । वनस्पतेः पत्युःबाहून् (शाखारूपान्)
आश्लिष्टाअपिनूनंतत्करजस्पृष्टाःकृष्णकरनखस्पर्शप्राप्ताअहोभाग्यंयतः उत्पुलकानिबिभ्रति । नहिस्वपतिसंगतौईदृक्पुलकसंभवइतिभावः (कोरकोद्गमंदृष्ट्वातंपुलकत्वेनकल्पितवत्यः) १३ उन्मत्तक
वत्पप्रच्छुरित्येतत्प्रपंचितम् । इदानींरमापतेस्तास्ताविचेष्टाजगृहुस्तदात्मिकाइतियदुक्तंतत्प्रपंचयति । इतीति । उन्मत्तवचोगोप्यः । उन्मत्तवचसश्चतागोप्यश्च । कृष्णस्यान्वेषणेनकातराःअतिविह्वलाः
अनुचक्रुरनुकृतवत्यः १४ कस्याश्चिदित्यादिचतुर्भिरनुकरणंप्रपंच्यते । ततश्चतुर्भिः (तदात्मिकाइत्यनेनोक्तं) तन्मयत्वंपुनरेकेनानुकरणामीतिविवेकः पूतनायंत्याः पूतनावदाचरंत्याः (कस्याश्चिद्गो
प्याः) कृष्णवदाचरंतीगोपीस्तनमपिबत् । तोकायित्वातोकवदात्मानंकृत्वा (अहन् । ताडितवती ।) १५ दैत्यायित्वादैत्यवत् तृणावर्तवदात्मानंकृत्वाएका (काचित्) कृष्णगार्भभावनांकृष्णस्य
आर्भबाल्यंभावयतियातामन्यांजहार १६ (काश्चनगोपायंत्योबभूवुः । तत्रवत्सवदाचरंतींप्रतीताडितवतीत्यर्थः) १७

॥१२७॥

श्लोकाः ११/१७

अप्येणपत्न्युपगतःप्रिययेहगात्रैस्तन्वन्दृशांसखिसुनिर्वृतिमच्युतोवः ॥ कांतांगसंगकुचकुंकुमरंजितायाःकुंदस्रजःकुलपतेरिहवातिगंधः ११ बाहुंप्रियांस
उपधायगृहीतपद्मोरामानुजस्तुलसिकालिकुलैर्मदांधैः ॥ अन्वीयमानइहवस्तरवःप्रणामंकिंवाभिनंदतिचरन्प्रणयावलोकैः १२ पृच्छतेमालताबाहूनप्या
श्लिष्टावनस्पतेः ॥ नूनंतत्करजस्पृष्टाबिभ्रत्युत्पुलकान्यहो १३ इत्युन्मत्तवचोगोप्यःकृष्णान्वेषणकातराः ॥ लीलाभगवतस्तास्ताह्यनुचक्रुस्तदात्मिकाः
१४ कस्याश्चित्पूतनायंत्याःकृष्णायंत्यपिबत्स्तनम् ॥ तोकायित्वारुदंत्यन्यापदाहन्शकटायतीम् १५ दैत्यायित्वाजहारान्यामेकाकृष्णार्भभावनाम् ॥
रिंगयामासकाप्यंघ्रीकर्षंतीघोषनिस्वनैः १६ कृष्णरामायितेद्वेतुगोपायंत्यश्चकाश्चन ॥ वत्सायतींघ्नतीचान्यातत्रैकातुबकायतीम् १७

चूर्णिका

हेहरिणिहरिः प्रिययासह वः दृशांमुखादिभिःप्रियंकुर्वन् गतः किं यतःकांतांगसंगकुचकुंकुमरंजितायाः कुंदस्रजः गंधोवाति ११ किंचहेवृक्षाः कृष्णः प्रियांसेबाहुंस्थाप्य
भ्रमरैः गम्यमानः सन् वः प्रणामंस्नेहावलोकैअभिनंदतिकिं १२ काश्चिदाहुः हेसख्यः एताः लताः पृच्छत यतः पत्युः बाहून् आश्लिष्टा अपिउत्पुलकानिबिभ्रति अतः
नूनंतन्नखस्पृष्टाः संति १३ एवंउन्मत्तवचसोगोप्यः तच्छोधनेन व्याकुलाः सत्यः हरेस्तास्ताः लीलाः अनुचक्रुः १४ काचित्कृष्णायंतीकस्याश्चित्पूतनायंत्याःस्तनंअ
पिबत् अन्यातोकायित्वारुदंती अन्यांशकटायंतीं पदा अहन् १५ काचित् दैत्यायित्वाकृष्णरूपा अन्यां जहार कापिअंघ्रिंकर्षयंतीरिंगयामास १६ ततः द्वे कृष्णरामा
यिते काश्चन गोपायंत्यः तत्र एकावत्सायंतीं अन्याबकायतींचहंति १७

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दूरगादूरेवर्तमानाः गाःयद्वत् यथाकृष्णस्तथाआहूयतंकृष्णमनुवर्ततींअनुवर्तमानां (कृष्णायमानामित्यर्थः) अनुकुर्वतीमितिपाठः (अन्यागोपायंत्यः) १८ (सखिवदाचरंत्यांकस्यांचित्स्वभुजंन्यस्य नन्वहंकृष्णोममगतिंपश्यतेत्यपराप्रत्याहतन्मनास्तदाभिनिवेशवती) १९ यतंतीयत्नंकुर्वतीअंबरम् (गोवर्धनस्थानीयम्) उत्तरीयंवस्त्रंउन्निदधे (अंगुल्या) ऊर्ध्वंधृतवती २० (शिरस्यारुह्य पदा आक्रम्यहेदुष्टअहेकालिय) २१ अपिदध्वंनिमीलयत (आशुशीघ्रम्) २२ सुदृक्सुनयनंआस्यंपिधाय (नयनयोःशोभनत्वंचांचल्येनकज्जलादिनाच (यद्वा) सुदृक्वराक्षीतिवा (स्रजादामस्था नीयया) भीतिविडंबनंभयानुकरणम् २३ एवंपुनरपिवृंदावनेलतास्तरूंश्चकृष्णंपृच्छंत्यःवनोद्देशेवनप्रदेशेव्यचक्षतअपश्यन् २४ २५ सुपृक्तानि (संसिक्तानि) संमिश्राणि (आतांमत्सरेणतप्राइत्यर्थः) २६ तेनअंसेन्यस्तःप्रकोष्ठोयस्याः । करेणोःहस्तिन्या-(-अंसेहस्तिनायथाशुंडाग्रम्) २७ (नूनंराधितःआराधितःयत्यतःनोऽस्मान्) रहःएकांतस्थानम् (भगवंतंराधितवतीयतस्तस्माद्राधेतिप्र सिद्धासेतिराधितइत्यनेनतन्नामाप्यसूसुचत्) २८ हेआल्यःसख्यःअमीगोविंदांघ्य्रब्जरेणवः (अहोधन्याःअतिशयेनपुण्यतमाः) तत्रहेतुःयानिति (ईशःशिवःअघनुत्तयेदुःखनाशाय । अतः) अस्माभि रप्येतद्रेण्वभिषेकेणतथैवविरहशांत्यासुखंप्राप्तुंशक्यमितिभावः २९

श्लोकाः १८/२९

आहूयदूरगायद्वत्कृष्णस्तमनुवर्ततीम् ॥ वेणुंक्वणंतींक्रीडंतीमन्याःशंसंतिसाध्विति १८ कस्यांचित्स्वभुजंन्यस्यचलंत्याहापराननु ॥ कृष्णोहंपश्यतग तिंललितामितितन्मनाः १९ माभैष्टवातवर्षाभ्यांतत्त्राणंविहितंमया ॥ इत्युक्त्वैकेनहस्तेनयतंत्युन्निदधेऽबरम् २० आरुह्यैकापदाक्रम्यशिरस्याहापरा नृप ॥ दुष्टाहेगच्छजातोहंखलानांननुदंडधृक् २१ तत्रैकोवाचहेगोपादावाग्निंपश्यतोल्बणम् ॥ चक्षूंष्याश्वपिदध्वंवोविधास्येक्षेममंजसा २२ बद्धान्यया स्रजाकाचित्तन्वीतत्रउलूखले ॥ भीतासुदृक्पिधायास्यंभेजेभीतिविडंबनम् २३ एवंकृष्णंपृच्छमानावृंदावनलतास्तरून् ॥ व्यचक्षतवनोद्देशेपदानि परमात्मनः २४ पदानिव्यक्तमेतानिनंदसूनोर्महात्मनः ॥ लक्ष्यंतेहिध्वजांभोजवज्रांकुशयवादिभिः २५ तैस्तैःपदैस्तत्पदवीमन्विच्छंत्योग्रतोबलाः ॥ वध्वाःपदैःसुपृक्तानिविलोक्यार्ताःसमब्रुवन् २६ कस्याःपदानिचैतानियातायानंदसूनुना ॥ अंसन्यस्तप्रकोष्ठायाःकरेणोःकरिणायथा २७ अनयाराधितो नूनंभगवान्हरिरीश्वरः ॥ यन्नोविहायगोविंदःप्रीतोयामनयद्रहः २८ धन्याअहोअमीआल्योगोविंदांघ्य्रब्जरेणवः ॥यान्ब्रह्मेशोरमादेवीदधुर्मूर्ध्न्यघनुत्तये२९

चूर्णिका

एकां कृष्णइवदूरस्थागाः आहूय तदनुकरणं कृत्वा वेणुंक्वणंतीं क्रीडंतीं अन्याः साध्वितिशंसंति १८ कस्यांचित्स्वभुजंन्यस्य चलंती आह अहंकृष्णः मेगतिंपश्यत १९ वातवर्षाभ्यांमाभैष्ट तत्त्राणंमयाकृतमित्युक्त्वा हस्तेन वस्त्रंऊर्ध्वंकृतवती२०तदाएकांपदाक्रम्य शिरसि आरुह्य हेदुष्टाकालियहेइतः गच्छगच्छइत्याह २१ तथैकाआह हेगोपाः वनाग्निंपश्यत नेत्राणिनिमीलयत वः क्षेमंविधास्ये २२ तत्रएकाउलूखले अन्ययास्रजाबद्धानुकरणंमुखंभेजे २३ एवंवृक्षादीन् पृच्छमानाः गोप्यः वनप्रदेशे कृष्णपदानिअपश्यन् २४ ततः आहुः एतानिपदानिव्यक्तंकृष्णस्यैव यतः ध्वजादिभिश्चिह्नितानि २५ ततः तैस्तैः पदैः तन्मार्गंइच्छंत्यः अग्रतोगत्वा तत्र तानिवध्वाः पदैः संपृक्तानि दृष्ट्वा आर्ताः सत्यः आहुः २६ कृष्णेनसहयातायाः कस्याः एतानिपदानि २७अनयैवनूनंहरिः आराधितः यतः नः हित्वा यां रहः अनयत्२८हे आल्य एतेकृष्णपदाब्जरेणवः धन्याः यतः यान् ब्रह्मादयः अघनाशार्थंदधुः २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अन्याआहुःतस्याइति (तस्यास्तेनसाकंगतायाःउच्चैःक्षोभंमहद्दुःखं । याह्येकासर्वासाम्) गोपीनांसर्वस्वम् (अच्युताधरंअपहृत्यभुंक्ते) अयंभावःभवेदेवम् (तद्रेण्वभिषेकेणास्माकंसुखम्) यदित
स्याःपदानिसंपृक्तानिनस्युःतानितुदुःखंनःकुर्वंतीति ३० तदसंपृक्तान्केवलकृष्णपादरेणूनेव (स्नातुम्) विचिन्वंत्यस्तान्दृष्ट्वापुनरत्यंतंसमतपन्तदाहश्लोकत्रयेणनलक्ष्यंतइति (अत्रतस्याःपदानिनलक्ष्यं ॥३०॥
तेतत्रनूनमयंहेतुः) खिद्यतीसुजातेसुकुमारेअंघ्रितलेयस्यास्तामुन्निन्येस्कंधमारोप्यनीतवान् ३१ (अत्रापिहेतुःइमानीति । कृष्णस्येमानियतोधिकमग्नानितस्मात्तामुन्निन्येइत्यर्थः) प्रपदाभ्यामाक्रमणं
क्षोणीसंमर्दनंययोस्तेअतएवासकलेपदेपश्यतेति (प्रसूनावचयज्ञानेहेतुःअत्रप्रसूनावचयःशाखाग्रात्पुष्पग्रहणमित्यर्थः) ३२ तस्याःकृष्णजान्वंतरुपविष्टायाश्चिह्नंदृष्ट्वाहुःकेशप्रसाधनामिति (केशप्रसाधनं
॥१२९॥ केशालंकरणं) कांतामधिकृत्यतानिप्रसूनानिचूडयताचूडानुकारेणबध्नतातेनेहध्रुवमुपविष्टम् ३३ अथरेमेइत्यादिःशुकोक्तिः । आत्मरतःस्वतस्तुष्टः । आत्मारामःस्वक्रीडः । अखंडितःस्त्रीविभ्रमैरनाकृष्टो
पितयारेमे । तथाचेत्किमितिरेमेतत्राह । कामिनामिति ३४ (एवंचेष्टांदर्शयंत्यःविचेतसोविह्वलाश्चेरुः) स्त्रीणांदुरात्मतामाहयामितिद्वाभ्यांसार्धाभ्याम् । कामोयानमागमनसाधनंयासांताःगोपीर्हि
त्वामामेवभजतइतिहेतोःसर्वयोषितांमध्येआत्मानंवरिष्ठंमेनेइति ३५ ३६ (दृप्तासौभाग्यमदेनगर्वितानपारयेनशक्नोमि)३७कामिनांदैन्यंदर्शयति । एवमुक्तमितिअखंडितत्वमाह । ततश्चेति । तस्यांस्कं
धारोहेउद्यतायां (अंतर्दधे) (अंतर्हितःअकस्माददृश्योभूदित्यर्थः) ३८

श्लोकाः ३०/३८

तस्याअमूनिनःक्षोभंकुर्वंत्युच्चैःपदानियत् ॥ यैकापहृत्यगोपीनांरहोभुंक्तेच्युताधरम् ३० नलक्ष्यंतेपदान्यत्रतस्यानूनंतृणांकुरैः ॥ खिद्यत्सुजातांघ्रि
तलामुन्निन्येप्रेयसींप्रियः ३१ इमान्यधिकमग्नानिपदानिवहतोवधूम्॥गोप्यःपश्यतकृष्णस्यभाराक्रांतानिकामिनः ॥ अत्रावरोपिताकांतापुष्पहेतोर्महात्मना
१अत्रप्रसूनावचयःप्रियार्थेप्रेयसाकृतः ॥ प्रपदाक्रमणेएतेपश्यतासकलेपदे३२ केशप्रसाधनंत्वत्रकामिन्याःकामिनाकृतम् ॥ तानिचूडयताकांतामुपविष्टमि
हध्रुवम् ३३ रेमेतयाचात्मरतआत्मारामोप्यखंडितः ॥ कामिनांदर्शयन्दैन्यंस्त्रीणांचैवदुरात्मताम् ३४ इत्येवंदर्शयंत्यस्ताश्चेरुर्गोप्योविचेतसः ॥ यांगो
पीमनयत्कृष्णोविहायान्याःस्त्रियोवने ३५ साचमेनेतदात्मानंवरिष्ठंसर्वयोषिताम् ॥ हित्वागोपीःकामयानामामसौभजतेप्रियः ३६ ततोगत्वावनोद्देशंदृ
प्ताकेशवमब्रवीत् ॥ नपारयेहंचलितुंनयमांयत्रतेमनः ३७ एवमुक्तःप्रियामाहस्कंधआरुह्यतामिति ॥ ततश्चांतर्दधेकृष्णःसावधूरन्वतप्यत ३८

चूर्णिका

किंच हेसख्यः तस्याएतानिपदानि नः क्षोभंकुर्वंति यतः एकारहः अच्युताधरंभुंक्ते ३० अहोसख्यः अत्रतस्याः पदानि न लक्ष्यंते यतः तृणांकुरैः खिद्यत्सुजातांघ्रितलांतां
स्कंधेधृतवान् ३१ तथातदर्थंअत्रकृष्णेनपुष्पावचयः कृतः यतः प्रपदाक्रमणे असकले पदेपश्यत ३२ किंच कामिना तेन अत्र तस्याः केशप्रसाधनंकृतं ३३ तानि
चूडयताकांतांउपविष्टमिहध्रुवम् तथातयासह आत्मारामोपि कृष्णः कामिनांदैन्यंस्त्रीणांदुःखभावंचदर्शयन् रेमे ३४ एवं कृष्णंपश्यंतोगोप्यः वने चेरुः अन्याः विहाय
यांरहः निन्ये सासर्वस्त्रीणांश्रेष्ठं आत्मानंमेने ३५ ३६ ततः सावनोद्देशंगत्वादृप्तासती केशवं आह हे कृष्ण अहंचलितुंनपारये यत्र तेमनः तत्रमांनय ३७ एवमुक्तः प्रि ॥१२९॥
यामाह स्कंधमारुह्यतामिति ततः सः अंतर्दधेसावधूश्च अतप्यत ३८

१. अयंसार्धश्लोकः केषुचिन्मुद्रितपुस्तकेषुवर्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अनुतापमाह । हानाथेति ३९ अन्विच्छंत्योमृगयमाणाःअविदूरतःसमीपे ४० ४१ ततस्तयापिसहिताःकृष्णान्वेषणायवनमंविशन् ततोहरेरन्वेषणान्निवृत्ताः ४२ एवंतमप्राप्ताअपिस्वगृहान्नैवस्मृतवत्यः । तदात्मिकाःसएवआत्मायासांतास्तन्मयाइत्यर्थः ४३ किंतुपूर्वंयत्रश्रीकृष्णेनसंगतिरासीत्तदेवकालिंद्याःपुलिनंपुनरागत्यकृष्णंभावयंतिध्यायंतीतितथाताःकृष्णस्यागमनंकांक्षितंयाभिस्ताः (समवेता मीलिताःसत्यःकृष्णमेवजगुरिति ४४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांत्रिंशोऽध्यायः ३० ॥ ॥ ७ ॥ ॥ एकत्रिंशेनिराशास्ताःपुनःपुलिनमागताः । कृष्णमेवानुगायंत्यःप्रार्थयंतेतदागमम् ॥ १ ॥ जयतीति (अत्रप्रतिश्लोकंप्रायशश्चरणचतुष्टयेपिद्वितीयाक्षरैक्यंएकैकचरणेप्रायेणप्रथमसप्तमाक्षरव्यंजनैक्यंचशब्दालंकारः) हेदयित (हेभगवन्) तेजन्मना (सर्वोपि) व्रजःअधिकंयथाभवतियाजयति । उत्कर्षेणवर्तते । यस्मात्त्वमत्रजातस्ततइंदिरा (हि) लक्ष्मीः (अपि) अत्रश्रयतेव्रजमलंकृत्यवर्ततेइत्यर्थःएवंव्रजेसर्वस्मिन्मोदमानेत्रतुतावकास्त्वदीयाजना गोपी -(- लक्षणाः) त्वयित्वदर्थमेवकथंचिद्धृताअसवः (प्राणा) यैस्ते (तथाभूताअपि) त्वांविचिन्वते (नतुत्वांपश्यंत्यधुनात्वद्विरहेणक्लेशमनुभवंतिअहोदैवमितिभावः अतस्त्वयादृश्यताम् । प्रत्यक्षीभूयताम् । यद्वाअस्माभिर्भवान्दृश्यताम् यद्वा एवंत्वयादृश्यताम् (अवलोक्यताम्) एते (आत्मानम्) विचिन्वतइति १

श्लोकाः ३९/१

हानाथरमणप्रेष्ठक्कासिक्कासिमहाभुज ॥ दास्यास्तेकृपणायामेसखेदर्शयसंनिधिम् ३९ अन्विच्छंत्योभगवतोमार्गंगोप्योऽविदूरतः ॥ ददृशुःप्रियविश्लेषमोहितांदुःखितांसखीम् ४० तयाकथितमाकर्ण्यमानप्राप्तिंचमाधवात् ॥ अवमानंचदौरात्म्याद्विस्मयंपरमंययुः ४१ ततोऽविशन्वनंचंद्रज्योत्स्नायावद्विभाव्यते ॥ तमःप्रविष्टमालक्ष्यततोनिववृतुर्हरेः ४२ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥ तद्गुणानेवगायंत्योनात्मागाराणिसस्मरुः ४३ पुनःपुलिनमागत्यकालिंद्याःकृष्णभावनाः ॥ समवेताजगुःकृष्णंतदागमनकांक्षिताः ४४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रिंशोऽध्यायः ३० ॥ ७ ॥
॥ गोप्यऊचुः ॥ ॥ जयतितेधिकंजन्मनाव्रजः श्रयतइंदिराशश्वदत्रहि ॥ दयितदृश्यतांदिक्षुतावकास्त्वयिधृतासवस्त्वांविचिन्वते १

चूर्णिका

हानाथ हे रमण क्कासिक्कासि हेसखेतेसन्निधिंदर्शय ३९ ॥ श्रीशुकउवाच ॥ एवंकृष्णमार्गं इच्छंत्योगोप्यः समीपेतद्विरहमोहितांतांददृशुः ४० ततः तयोक्तंकृष्णात् मानाप्तिं दौरात्म्यादवमानं चश्रुत्वाविस्मयंप्रापुः ४१ ततः ताः सर्वाः यावत् चंद्रज्योत्स्नातावत्वनेगत्वापरंतमःप्रविष्टमालक्ष्य ततोनिववृतुः ४२ ततस्ताः तन्मनस्काः तदात्मिकाः तद्गुणानेवगायंत्यः स्वगृहाणिनसस्मरुः ४३ पुनःपुलिनमागत्यकालिंद्याःकृष्णभावनाः समवेताजगुःकृष्णंतदागमनकांक्षिणः ४४ ॥ इतिदशमेत्रिंशः ॥ ३० ॥
॥ गोप्यऊचुः ॥ हे दयिततेजन्मनाव्रजः अधिकंजयति यतः त्वमत्र जातः तस्माल्लक्ष्मीः व्रजमंगलंकृत्यवर्त्तते एवंव्रजेहर्षिते सति त्वदीयाः गोपिकाः त्वयिधृतप्राणाः सत्यः दिक्षु त्वां विचिन्वते अतः त्वया दृश्यताम् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र स्वतंत्राणांबहूनांवकृत्वादपराआहुरितिसर्वश्लोकेष्ववतारणास्ति तथापि संगति (पूर्वकमाहुरितिसंगतिः) उच्यते । तत्रविचिन्वंतु (नाम) ममकिंइतिचेत्त्राहुः । शरदिति । शरदुदाशयेशरत्का
लीनेसरासि (साधुजातसत्सरसिजोदरश्रीमुषादृशा) साधुजातंसम्यग्जातम् (सुंदरमित्यर्थः) यत्सत्सरसिजंसुविकसितंपद्मंतस्योदरेगर्भेयाश्रीस्तांमुष्णातिअपहरतीतितथातयादृशानेत्रेणहेसुरतनाथ
संभोगपतेवरदअभीष्टप्रदअशुल्कदासिकाअमूल्यादासीर्नःनिघ्नतोमारयतस्तेतवत्वयाक्रियमाणइहलोकेअयंवधोनभवति (हत्यानसंपद्यते) किं । किंशस्त्रेणैववधोवधः । किंदृशावधोवधोनभवति । अपि
तुभवत्येव । अतस्तवदृशाऽपहृतप्राणप्रत्यर्पणायत्वयादृश्यतामितिभावः (यद्वा दृशानिमित्तभूतयाजाताःअशुल्कदासिकावयंताविरहेणनिघ्नतस्तवेहवधोदोषायनकिम्) अतस्त्वयादृश्यतामिति यथासं
भवंसर्वत्रवाक्यशेषः २ किंच । बहुभ्यःमृत्युभ्यःकृपयारक्षित्वा किमितीदानींदृशामन्मथंअस्मद्धातायजनयसीत्याहुः । विषेति । हेऋषभश्रेष्ठ विषमयात् (कालियविषसंपृक्तात्) जलाद्योऽप्ययोनाश
स्तस्मात् तथा व्यालराक्षसात्अघासुरात्वर्षात्मारुताच्चवैद्युतादनलात् । अशनिपातात्वृषोरिष्टस्तस्मान्मयासुरात्व्योमासुरात् (यद्वा हेवृषेतिच्छेदः) विश्वतःअन्यस्मादपिसर्वतोभयाच्चकालियदम
नादिनारक्षिताःकिमिदानीमुपेक्षसेइतिभावः ३ अपिचविश्वपालनायावतीर्णस्यतवभक्तोपेक्षात्यंतमनुचितेत्याशयेनाहुः । नखल्विति । हेसखेभवान्खलुनिश्चितंयशोदासुतोनभवति । किंतुसर्वप्राणिनां
(अंतरात्मदृक्) बुद्धिसाक्षी । ननु सकिंदृश्योभवतितत्राहुः । विखनसाब्रह्मणाविश्वपालनायार्थितःप्रार्थितःसन्सात्वतांसात्वतानांकुलेउदेयिवान्उदितइति ४ तस्मात्त्वद्भक्तानामस्माकंएतत्प्रार्थनाचतुष्टयं
संपादयेत्याहुःविरचिताभयमित्यादिचतुर्भिः । हेवृष्णिधुर्यसंसृतेर्भयात्तेचरणमीयुषांशरणंप्राप्तानांविरचितंदत्तमभयंयेनतत्तथाहेकांतकामदंवरदंतथाश्रियःकरंगृह्णातीतितथातत्भवत्करसरोरुहंनःशिरसि
धेहि ५ हेव्रजजनार्तिहन्हेवीरनिजजनानांयःस्मयोगर्वःतस्यध्वंसननंनाशकंस्मितंयस्यतेतथाभूतहेसखेभवत्किंकरीर्नोऽस्मान्भजआश्रय स्मेतिनिश्चितम् । प्रथमंतावज्जलरुहाननंचारुसुंदरंयोषितांनो
स्माकंदर्शय ६ अविशेषेणप्रणतानांदेहिनांपापकर्शनंपापहंतृ । तृणचरान्पशूनप्यनुगच्छतिकृपयेतितथा । सौभाग्येनश्रियोनिकेतनम् । वीर्यातिरेकेणफणिनःफणास्वर्पितंतेपदांबुजंनःकुचेषुकृणुकुरु ।
किमर्थं हृच्छयंकामंकृंधिछिंधि(कालियफणेष्विवस्तनेपुनिधायकालियमिवमन्मथंमर्दयेतिभावः) ७

शरदुदाशयेसाधुजातसत्सरसिजोदरश्रीमुषादृशा ॥ सुरतनाथतेऽशुल्कदासिकावरदनिघ्नतोनेहकिंवधः २ विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतान
लात् ॥ वृषमयात्मजाद्विश्वतोभयादृषभतेवयंरक्षितामुहुः ३ नखलुगोपिकानंदनोभवानखिलदेहिनामंतरात्मदृक् ॥ विखनसार्थितोविश्वगुप्तयेसखउदे
यिवान्सात्वतांकुले ४ विरचिताभयंवृष्णिधुर्यतेचरणमीयुषांसंसृतेर्भयात् ॥ करसरोरुहंकांतकामदंशिरसिधेहिनःश्रीकरग्रहम् ५ व्रजजनार्तिहन्वीरयो
षितांनिजजनस्मयध्वंसनस्मितम् ॥ भजसखेभवत्किंकरीःस्मनोजलरुहाननंचारुदर्शय ६ प्रणतदेहिनांपापकर्शनंतृणचरानुगंश्रीनिकेतनम् ॥ फणि
फणार्पितंतेपदांबुजंकृणुकुचेषुनःकृंधिहृच्छयम् ७

श्लोकाः २/७

चूर्णिका

किंच अन्याआहुः हेसुरतनाथ नेत्रेणअमूल्यदासीः निघ्नतस्तेअयंवधोनभवतिकिम् किंतुभवत्येव अतः तवदृशाऽपहृतप्राणप्रत्यर्पणाय त्वयादृश्यतां २ किंच हेश्रेष्ठ त्वयाविष
मयजलनाशात् तथा अघासुरात् वर्षमारुताशनिपातेभ्योरिष्टव्योमादिभ्यश्चवयंरक्षिताः किमिदानीमुपेक्षसे ३ आपिच हे सखेत्वंगोपीसुतः न किंतुजीवानां बुद्धिसाक्षी
ब्रह्मणाविश्वरक्षार्थं प्रार्थितः सन् यदुकुलेउदितोसि अतस्तेभक्तोपेक्षा अनुचिता ४ किंच हेवृष्णिधुर्य भवभयात् तेचरणंसंविनांदत्ताभयंकरपद्मंनः शिरसिधेहि ५ किंच हेव्रज
नार्तिहन् हेसखेभवत्किंकरीः नः आश्रय आदौतावत्जलरुहाननंदर्शय ६ किंचहेसखे प्रणतदेहिनांपापापहं पशूननुगं फणिफणार्पितं तेपदांबुजं नः कुचेपु कृत्वा कामं छिंधि ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेपुष्करेक्षण (पुष्करंपद्मंतन्निभेक्षण) तवैवमधुरया गिरावल्गूनि (मनोहराणि) वाक्यानि यस्यांतया बुधानांमनोज्ञयां हृद्ययागंभीरयेत्यर्थःमुह्यतीरिमाः नः विधिकरीर्दासीः अधरसीधुना (अधरामृतेन अप्यायस्वसंजीवयेति ८ किंचअस्माकंत्वद्विरहेप्राप्तमेवमरणंकिंतुत्वत्कथामृतंपाययाद्भिः सुकृतिभिर्वंचितमित्याहुः तवेति । कथैवामृतम् । अत्रहेतुःतप्तजीवनम् प्रसिद्धादमृतादुत्कर्षमाहुः । कविभिर्ब्रह्मविद्भिरपीडितं स्तुतम् । देवभोग्यंत्वमृतं तैस्तुच्छीकृतम् । किंच कल्मषापहंकामकर्मनिरसनं तत्त्वमृतं नैवंभूतम् । किंच । श्रवणमंगलंश्रवणमात्रेणमंगलप्रदं तत्त्वनुष्ठानापेक्षम् । किंच । श्रीमत्सुशांतं तत्तु मादकम् । एवंभूतंत्वत्कथामृतंआततंयथाभवतिभुवियेगृणंतिनिरूपयंतितेजनाःभूरिदाःभूरिदातारःजीवितंददतीत्यर्थः । भूरिजीवितदानफलंलभंतेइतिभावः । यद्वा एवंभूतंत्वत्कथामृतंयेभुविगृणंतितेभूरिदाःपूर्वजन्मसु बहुदत्तवंतःसुकृतिनइत्यर्थः । एतदुक्तंभवति । येकेवलंकथामृतंगृणंतितेपितावदतिधन्याःकिंपुनर्येत्वांपश्यंतिअतःप्रार्थयामहेत्वयादृश्यतामिति ९ ननुतर्हिमत्कथाश्रवणेनैवनिर्वृताभवत किंमद्दर्शनेनेत्यत्रत्वद्विलसक्षुभिताचित्तावयंतत्रापिशांतिंनविदामइत्याहुः प्रहसितमिति । हेप्रियहेकुहककपट (ध्यानेचिंतनेमंगलंकल्याणंपरमसुखास्पदमितिभावः) संविदःसंकेतनर्माणि १० किंचत्वयिवयमतिप्रेमार्द्रचित्ताःत्वंपुनरस्मासुकेनहेतुनाकापट्यमाचरसीत्याहुः श्लोकद्वयेन चलसीति । हेनाथकांतयद्यदाव्रजाच्चलसिपशूंश्चारयन् तदातन्नलिनसुंदरं (कमल) कोमलंतेपदंशिलैःकणिशैःतृणैरंकुरैश्चसीदतिक्लिश्येदितिअस्माकंमनः कलिलतांअस्वास्थ्यंगच्छतिप्राप्नोति । एवंभूतास्त्वद्दुःखशंकितचित्तावयम् ११ त्वंतुदिनपरिक्षयेसायंकालेनीलकुंतलैरावृतंघनरजस्स्वलंगोरजश्छुरितंवनरुहाननंअलिमालाकुलपरागच्छुरितपद्मतुल्यमाननंबिभ्रत्सन्तच्चतादृशंमुहुर्मुहुर्दर्शयन्अस्माकंमनसिकेवलंस्मरंयच्छसि अर्पयसि नतु संगंददासीतिकपटोसीतिभावः १२ अतोधुनाकापट्यंविहायैवंकुर्विति प्रार्थयंतेश्लोकद्वयेन प्रणतकामदमितिहेआधिहन्हेरमणपद्मजेनार्चितंआपदिध्येयंध्यानमात्रेणापन्निवर्तकंशंतमंचसेवासमयेचापिसुखतमंतवचरणपंकजंकामतापशांतयेनःस्तनेष्वर्पयेति १३

॥१३२॥

श्लोकाः ८/१३

मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण ॥ विधिकरीरिमावीरमुह्यतीरधरसीधुनाप्याययस्वनः ८ तवकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहम् ॥ श्रवणमंगलंश्रीमदाततंभुविगृणंतितेभूरिदाजनाः ९ प्रहसितंप्रियप्रेमवीक्षणंविहरणंचतेध्यानमंगलम् ॥ रहसिसंविदोयाहृदिस्पृशःकुहकनोमनः क्षोभयंतिहि १० चलसियद्व्रजाच्चारयन्पशून्नलिनसुंदरंनाथतेपदम् ॥ शिलतृणांकुरैःसीदतीतिनःकलिलतांमनःकांतगच्छति ११ दिनपरिक्षयेनीलकुंतलैर्वनरुहाननंबिभ्रदावृतम् ॥ घनरजस्वलंदर्शयन्मुहुर्मनसिनःस्मरंवीरयच्छसि १२ प्रणतकामदंपद्मजार्चितंधरणिमंडनंध्येयमापदि ॥ चरणपंकजंशंतमंचतेरमणनस्तनेष्वर्पयाधिहन् १३

चूर्णिका

किंच हेपुष्करेक्षण तवमधुरवाण्या मुह्यतीर्नःदासीः अधरामृतेनसंजीवय ८ किंच हेहरे तेकथामृतं तप्तजीवनंपापापहं कर्णमंगलं एवंभूतं येभुविगृणंति ते धन्याः किंपुनः त्वां येपश्यंति अतः प्रार्थयामहे त्वयादृश्यतामिति ९ किंच हे सखेतेहास्यं तथाप्रेमवीक्षणं तथातेविहरणंतथाते रहसिसंविदः हेकपट एतानिनः क्षोभयंति १० किंचयदात्वं व्रजात् पशून्चारयन् चलसितदातेपदं हेनाथशिलतृणांकुरैः सीदतीतिनः मनः अस्वास्थ्यंगच्छति ११ किंच हेवीर त्वंसायंकाले नीलकुंतलैर्व्याप्तंगोरजश्छुरितंजलरुहाननं नः मुहुर्दर्शयन् मनसि स्मरंअर्पयसि नतुसंगंददासि अतःकपटः १२ किंच हे आधिहन् प्रणतकामदंलक्ष्म्यार्चितंतेयदाज्जं नः स्तनेषुकामतापशांतये अर्पय १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

अपिचहेवीरतेऽधरामृतंनोस्मभ्यंवितरदेहि । स्वरितेननादितेनवेणुनासुष्ठुचुंबितंयथेष्टमास्वादितमिति । नादामृतमिषेणोद्गीर्णमितिभावः इतररागविस्मारणंनृणाम् । इतरेषु सार्वभौमादिसुखेषु रागमिच्छांविस्मारयति विलापयतीतितथातत् १४ किंच क्षणमपित्वददर्शनेदुःखंदर्शनेसुखंदृष्ट्वासर्वसंगपरित्यागेनयतयइववयंत्वामुपागताःत्वंतुकथमस्मांस्त्यक्तुमुत्सहसइतिसकरुणमूचुः अटतीतिद्वयेन यत् यदा भवान् काननं वृंदावनंप्रतिअटतिगच्छतितदा (अह्नि)त्वामपश्यतांप्राणिनां (त्रुटिर्नामनिमेषस्यत्रिसहस्रतमभागः।तदुक्तं। स्वस्थेनरेसमासीनेयावत्स्पंदतिलोचनम्। तस्यात्रिंशत्तमोभागस्तत्परःपरिकीर्तितः। तत्परस्यशतांशस्तुत्रुटिरित्यभिधीयतइति) त्रुटिःक्षणार्धमपियुगवद्भवति । एवंमदर्शनेदुःखमुक्तम् । पुनश्चकथंचिद्दिनांतेसायंकालेतेतवश्रीमुखंकुटिलाःकुंतलाःकेशायस्मिन्तादृशंउत्उच्चैरीक्षमाणानांयादृशोदृष्टयस्तासांपक्ष्मकृत्पक्ष्मलक्षणंव्यवधानंकृतवान्ब्रह्माजडःमंदःएवंनिमेषमात्रमप्यंतरंअसह्यमितिदर्शनेसुखमुक्तम् १५ तस्मात्हेअच्युतपतीन्सुतान्अन्वयान्तत्संबंधिनःभ्रातॄन्बांधवांश्चातिविलंघ्यतेअंतितवसमीपमागतावयम् । कथंभूतस्यगतिविदःअस्मदागमनंजानतःसर्वस्वंविहाययदर्थमागमनंतत्तात्पर्यंजानतइतिभावः । गीतगतीर्वाजानतः । याभिर्वयंमोहितास्तादृशीः । गतिविदोवयंवा । तवोद्गीतेनउच्चैर्गीतेनमोहिताःहेकितवशठएवंभूतायोषितोनिशिस्वयमागताःत्वामृतेकस्त्यजेन्नकोपीत्यर्थः १६ अतस्त्वयात्यक्तानामस्माकंप्राक्तनत्वद्दर्शननिदानस्यहृद्रोगस्यत्वत्संगत्यैवचिकित्सांकुर्वित्याहुर्द्वयेन रहसीति । श्रियोधामतेबृहद्विशालंउरश्चवीक्ष्यातिस्पृहाभवति। तयाचमुहुर्मनोमुह्यति १७ तवचव्यक्तिरभिव्यक्तिर्व्रजवनौकसांसर्वेषांअविशेषेणवृजिनहंत्रीदुःखनिरसनीविश्वमंगलंसर्वमंगलरूपाचअतस्त्वत्स्पृहात्मनांत्वत्स्पृहारूढमनसांनःमनाक्ईषत्किमपित्यजमुंच । कार्पण्यमकुर्वन्देहीत्यर्थः । किंतत् । स्वजनहृद्रोगाणांयदतिगोप्यंनिषूदनंनिवर्तकंऔषधंतत्त्वमेववेत्सीतिगूढाभिप्रायम् १८

॥१३३॥

श्लोकाः १४/१८

सुरतवर्धनंशोकनाशनंस्वरितवेणुनासुष्ठुचुंबितम् ॥ इतररागविस्मारणंनृणांवितरवीरनस्तेऽधरामृतम् १४ अटतियद्भवानह्निकाननंत्रुटिर्युगायतेत्वामपश्यताम् ॥ कुटिलकुंतलंश्रीमुखंचतेजडउदीक्षतांपक्ष्मकृद्दृशाम् १५ पतिसुतान्वयभ्रातृबांधवानतिविलंघ्यतेंत्यच्युतागताः ॥ गतिविदस्तवोद्गीतमोहिताःकितवयोषितःकस्त्यजेन्निशि १६ रहसिसंविदंहृच्छयोदयंप्रहसिताननंप्रेमवीक्षणम् ॥ बृहदुरःश्रियोवीक्ष्यधामतेमुहुरतिस्पृहामुह्यतेमनः १७ व्रजवनौकसांव्यक्तिरंगतेवृजिनहंत्र्यलंविश्वमंगलम् ॥ त्यजमनाक्चनस्त्वत्स्पृहात्मनांस्वजनहृद्रुजांयन्निषूदनम् १८

चूर्णिका

किंच हेसखेसुरतवर्धनंस्वरितवेणुना सुष्ठुचुंबितं एवंते अधरामृतंनःदेहि १४ किंच हेकृष्ण अह्नियदात्वंवनंअटसितदात्वां अपश्यतां नः त्रुटिः युगायते तथाकुटिलकुंतलंते श्रीमुखंपश्यतां नः दृशां यः पक्ष्मकृत् सजडः १५ तस्मात् हेअच्युत पतिसुतादीन् हित्वावयं तवगीतमोहिताः सत्यः ते अंतिकेप्राप्ताः हेकितव एवंभूताः स्त्रियः निशि स्वयंआगतास्त्वांविनाकः त्यजेत् १६ किंच हेकृष्ण तवरहसिसंविदंतथाप्रहसिताननं प्रेमवीक्षणंतथाश्रियो धामतेउरःदृष्ट्वा नः अतिस्पृहाभवति मनश्चमुह्यति १७ किंच हेसखे ते इयंव्यक्तिः व्रजवासिनां[1]दुःखहंत्रीविश्वमंगलरूपाअतःत्वत्स्पृहारूढमनसांनः ईषत्किमपि कार्पण्यमकृत्वा देहि १८ ॥१३३॥

१ वासितइतिपाठभेदोदृश्यतेऽन्यपुस्तके

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतिप्रेमधर्षितारुरुदंत्यःप्राहुः । यदिति । हेप्रियत्तेतवसुकुमारंपदाब्जंकठिनेषुकुचेषु संमर्दनशंकिताःशनैःशनैर्दधीमहिधारयेमवयम् । तेनाटवीमटसिसंचरसि । नयसीतिपाठेपशून्वाकांश्चिदन्यान्वा आत्मानमेववानयसिप्रापयसि । तत्ततःतत्पदांबुजंवाकूर्पादिभिःसूक्ष्मपाषाणादिभिःकिंस्विन्नव्यथते । कथंतुनामनव्यथेतेति । भवानेवआयुर्जीवितंयासांतासांनोधीर्भ्रमतिमुह्यतीति ॥ १९ ॥ ॥ इति श्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ ७ ॥ ॥ द्वात्रिंशेविरहालापविक्लिन्नहृदयोहरिः । तत्राविर्भूयगोपीस्ताःसांत्वयामाससमानयन् ॥ १ ॥ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः । मदयन्नंदयन्गोपीरुद्गतोनंदनंदनः ॥ २ ॥ इतिगोप्यइति । इतिएवंप्रभृतिचित्रधाअनेकधा सुस्वरंउच्चैः(अत्रचित्रशब्देनशब्दालंकारःसुस्वरमित्यनेनच्छंदसोरम्यत्वंचसूचितम्) कृष्णदर्शनेलालसाऽतिस्पृहायासांताः १ साक्षान्मन्मथमन्मथः । जगन्मोहनस्यकामस्यापिमनस्युद्भूतःकामः । साक्षात्कामस्यापिमोहकइत्यर्थः २ तन्वःकरचरणादयः ३ ४ अजलिनासंहतहस्तद्वयेन ५ भ्रुकुटिमाबध्यकुटिलीकृत्यप्रेमसंरंभेणप्रणयकोपावेशेनविह्वलाविवशादष्टाधरोष्ठाकटाःकटाक्षास्तैर्येआक्षेपाःपरिभवास्तैःताडयंतीवऐक्षत ६ अनिमिषतीभ्याअनिमीलिताभ्यांदृग्भ्यांआपीतमपिसम्यक्सादरंदृष्टमपिपुनर्जुषाणानातृप्यत् ७ हृदिकृत्यहृदयंनीत्वेत्यर्थः (पुलकयुक्तान्यंगानियस्याःसा उपगुह्यचेतसैक्यंनीत्वेत्यर्थः) ८

॥१३४॥

यत्तेसुजातचरणांबुरुहंस्तनेषुभीताःशनैःप्रियदधीमहिकर्कशेषु ॥ तेनाटवीमटसितद्व्यथतेनकिंस्वित्कूर्पादिभिर्भ्रमतिधीर्भवदायुषांनः १९ ॥ इतिश्री भागवतेमहापुराणेदशमस्कंधेएकत्रिंशोध्यायः ३१॥ ॥७ ॥ ॥ शुकउवाच ॥ इतिगोप्यःप्रगायंत्यःप्रलपंत्यश्चचित्रधा ॥ रुरुदुःसुस्वरंराजन्कृष्णदर्शन लालसाः १ तासामाविरभूच्छौरिःस्मयमानमुखांबुजः ॥ पीतांबरधरःस्रग्वीसाक्षान्मन्मथमन्मथः २ तंविलोक्यागतंप्रेष्ठंप्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वःप्राणमिवागतम् ३ काचित्करांबुजंशौरेर्जगृहेंजलिनामुदा ॥ काचिद्दधारतद्बाहुमंसेचंदनरूषितम् ४ काचिदंजलिनाऽगृह्णात्तन्वीतांबूलचर्वितम् ॥ एकातदंघ्रिकमलंसंतप्तास्तनयोरधात् ५ एकाभ्रुकुटिमाबध्यप्रेमसंरंभविह्वला ॥ घ्नंतीवैक्षत्कटाक्षेपैःसंदष्टदशनच्छदा ६ अपराऽनिमिषद्दृग्भ्यांजुषाणातन्मुखांबुजम् ॥ आपीतमपिनातृप्यत्संतस्तच्चरणंयथा ७ तंकाचिन्नेत्ररंध्रेणहृदिकृत्यनिमील्यच ॥ पुलकांग्युपगुह्यास्तेयोगीवानंदसंप्लुतः ८

श्लोकाः १९/८

चूर्णिका

किंतत् स्वजनत्वद्रोगाणांयदतिगोप्यंऔषधंतत्त्वमेववेत्सिइतिगूढाभिप्रायम् किंच हेप्रियतेसुकुमारंपदाब्जंवयंतेकर्कशस्तनेषुसंमर्दनशंकयाभीताःसत्यःशनैःधारयेम तेनत्वं वनंअटासिअतःतत्कूर्पादिभिः नव्यथते किं किंतुव्यथेत् तस्मात्भवदायुषानःधीर्भ्रमति १९ ॥ ॥ इतिदशमेएकत्रिंशः ३१ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ इतिगोप्यःप्रगायंत्यःप्रलपंत्यश्चचित्रधा रुरुदुःसुस्वरंराजन्कृष्णदर्शनलालसाः १ तदाशौरिःपीतांबरधरः काममोहकः तासांआविर्बभूव २ तंप्रियंदृष्ट्वाउत्फुल्लदृशोगोप्यः युगपत्उत्तस्थुःतन्वःप्राणमिवागतम् ३ तत्र काचित्शौरेः करांबुजंअंजलिनाजगृहे काचित् तद्बाहुंस्वांसेदधार ४ काचित् तस्यतांबूलचर्वितंअगृह्णात् एकातत्पदाब्जंततस्तनयोरधात् ५ एकाभ्रुवंचक्रीकृत्यतंकटाक्षेपैःघ्नंतीवऐक्षत् ६ अन्यातन्मुखाब्जंजुषाणापिनातृप्यत्संतस्तच्चरणंयथा ७ काचित् नेत्ररंध्रेणतंहृदयंनीत्वानेत्रेनिमील्यउपगुह्ययोगीवानंदसंप्लुताआस्ते ८

॥१३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्राज्ञंईश्वरंप्राप्ययथामुमुक्षवोजनाः । यद्वा प्राज्ञंब्रह्मज्ञंप्राप्ययथासंसारिणः यद्वा प्राज्ञंसुषुप्तिसाक्षिणंप्राप्ययथाविश्वतैजसावस्थाजीवाः (अवस्थाद्वयसंबंधिनंतापंजहाति) ९ पुरुषःपर मात्माशक्तिभिःसत्त्वादि
भिर्यथा यद्वाउपासकःपुरुषोज्ञानवीर्यबलादिभिः यद्वा पुरुषोऽनुशयीप्रकृत्याद्युपाधिभिर्वृतोयथाविरोचतेतद्वत् १० विकसत्कुंदमंदारैःसुरभिर्योनिलस्तस्मात्षट्पदायास्मिन्तत्पुलिनम् ११ शरच्चंद्रांशू
नांसंदोहैःसमूहैर्ध्वस्तंदोषातमःरात्रिगतंतमोयस्मिन्तत् अतःशिवंसुखकरम् । (कृष्णायायमुनायाः)हस्तरूपैस्तरलैस्तरंगैराचिताआस्तृताकोमलवालुकायस्मिन्एवंभूतंपुलिनंताःसमादायनिर्विश्यतत्रताभि
र्वृतोऽधिकंव्यरोचतेतिपूर्वेणान्वयः १२ ताश्चमनोरथानामंतंययुः पूर्णकामाबभूवुरित्यर्थः । श्रुतयोयथेति । अयमर्थः । कर्मकांडेश्रुतयःपरमेश्वरमपश्यंत्यःतत्तत्कामानुबंधैरपूर्णाइवभवंतिज्ञानकांडे
तुपरमेश्वरंदृष्ट्वातदापूर्णाइवकामानुबंधंजहतितद्वदिति । आप्तकामाअपिप्रेम्णातमभजन्नित्याह । स्वैरिति (आसनं) अचीक्लृपन्रचयामासुःआत्मबंधनेअंतर्यामिणे (प्रत्यक्षाय) १३ गोपीसभागतः
ताभिःसंमानितःसन्चकासशुशुभे । त्रैलोक्येयालक्ष्मीःशोभातस्याएकमेवपदंस्थानंतद्वपुर्दधत्दर्शयन् १४ सहासलीलेक्षणेनविभ्रमोविलासोयस्यांतयाभ्रुवाउपलक्षिताः । (अंकेकृतौअंघ्रीयस्यांक्रिया
यांयथाभवतितथाहस्तयोः)संस्पर्शनेनशनैर्मर्दनेन (सभाजयित्वासंसेव्यहस्ताभ्यांस्वांकेचरणसंवाहनंकुर्वंत्यइत्यर्थः) १५ तत्रभगवतोऽकृतज्ञतांतद्वचनेनैवापादयितुकामाःगूढाभिप्रायालोकवृत्तांतमि
वपृच्छंतिभजतइति । भजतःप्राणिनःअनुअनंतरंकेचित्तद्भजनानुसारेणभजंति । केचिदेतद्विपर्ययंयथाभवतितथातद्भजनानपेक्षम् । अभजतोपिभजंति । अन्येतुनोभयान् (भजतोऽभजतश्चनैवभजं
तीत्यर्थःभोभगवन्एतन्नःपृष्टंसाधुविविच्यब्रूहि) १६

श्लोकाः ९/१६

सर्वास्ताःकेशवालोकपरमोत्सवनिर्वृताः ॥ जहुर्विरहजंतापंप्राज्ञंप्राप्ययथाजनाः ९ ताभिर्विधूतशोकाभिर्भगवानच्युतोवृतः ॥ व्यरोचताधिकंतातपुरुषः
शक्तिभिर्यथा १० ताःसमादायकालिंद्यानिर्विश्यपुलिनंविभुः ॥ विकसत्कुंदमंदारसुरभ्यनिलषट्पदम् ११ शरच्चंद्रांशुसंदोहध्वस्तदोषातमःशिवम् ॥ कृ
ष्णायाहस्ततरलाचितकोमलवालुकम् १२ तद्दर्शनाह्लादविधूतहृद्रुजोमनोरथांतंश्रुतयोयथाययुः ॥ स्वैरुत्तरीयैःकुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे
१३ तत्रोपविष्टोभगवान्सईश्वरोयोगेश्वरांतर्हृदिकल्पितासनः ॥ चकासगोपीपरिषद्गतोर्चितस्त्रैलोक्यलक्ष्म्येकपदंवपुर्दधत् १४ सभाजयित्वातमनंगदीप
नंसहासलीलेक्षणविभ्रमभ्रुवा ॥ संस्पर्शनेनांककृतांघ्रिहस्तयोःसंस्तुत्यईषत्कुपिताबभाषिरे १५ ॥ गोपिकाऊचुः ॥ भजतोऽनुभजंत्येकएकएतद्विपर्ययम्
॥ नोभयांश्चभजंत्येकएतन्नोब्रूहिसाधुभोः १६

चूर्णिका

एवंसर्वास्ताःभगवद्दर्शनेननिर्वृताः सत्यःविरहजंतापंजहुः ईश्वरंप्राप्यमुमुक्षवो यथा९ ततः गतशोकाभिः ताभिः वृतः अच्युतः अधिकंबभौ १० पुरुषः सत्त्वादिशक्तिभिर्य
थातथा कृष्णः ताःआदायकालिंदीपुलिनंशरच्चंद्रांशुसंदोहध्वस्तदोषातमः शिवंनदीतरंगैः आस्तृतवालुकंएवंभूतंप्रविश्यबभौ ११ १२ ततश्चताः पूर्णकामाः सत्यःस्वैः
कुचकुंकुमांकितैः उत्तरीयैः अंतर्यामिणेतस्मैआसनंरचयामासुः १३ तत्रउपविष्टः ईश्वरः गोपीसभांगतःसन् ताभिःसंमानितः शुशुभे १४ ततोगोप्यः श्रीकृष्णंसत्कृ
त्यसहासललिक्षणवत्याभ्रुवाउपलक्षिताःसत्यः अंककृतांघ्रिहस्तयोः संमर्दनेनसंस्तुत्यईषत्कुंपिताः बभाषिरे १५ ॥ गोप्यऊचुः ॥ हेकृष्ण एकेभजतः तद्भजनानुसारेण
भजंति एकेअभजतोपितद्भजनानपेक्षंभजंति अन्येतुनोभयान् एतत्कथमितिब्रूहि १६

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३२॥

विदिताभिप्रायोभगवानुत्तरमाह (यावदध्यायसमाप्तिमिथइति) हेसख्यःउपकारप्रत्युपकारतयायेमिथोभजतेतेऽन्यंनभजंतिकिंत्वात्मानमेवकुतः हियस्मात् (प्रत्युपकारलिप्सया) स्वार्थएवैकांततःउद्य
मोयेषांतेतत्रचनसौहृदंअतोनसुखंनचधर्मः किंत्वर्थएवदृष्टोद्देशात् (पयउद्दिश्य) गोमहिष्यादिभजनवत्इत्यर्थः । इतिभजतोनुभजंत्येक-(-इत्यस्योत्तरम्) १७ येतुअभजतोभजंतितेद्विविधाःकरुणाः
स्निग्धाश्चतत्रतुयथाक्रमंधर्मकामौभवतःइत्याहभजंत्यभजतइति । (यथाकरुणादयालवोयेथादीनजनादीन्कारुण्येनोपकुर्वंतितत्रनिश्चितोधर्मःयथावापितरोर्भकादीन्प्रीत्याभजंतितत्रसौहृदंहेसुमध्याअभ
जंतमपिमांभजंत्योयूयमोदृश्यएवेतिभावः । इतिएकएतद्विपर्ययमित्यस्योत्तरम्)१८ तृतीयप्रश्नस्योत्तरंभजतोपीति । अयमर्थः (नोभयांश्चभजंति) तेचतुर्विधाः । एकेआत्मारामाअपराग्दृशः । केचि
दाप्तकामाः । विषयदर्शनेपिपूर्णकामत्वेनभोगेच्छारहिताः । अन्येअकृतज्ञाःसंमूढाःअन्येगुरुद्रुहःअतिकठिनाः । सपितायस्तुपोषकइतिन्यायादुपकर्तागुरुतुल्यःतस्मैद्रुह्यंतितथाते १९ अत्रचरमकोटिगत
मात्मानंमत्वाऽक्षिसंनिकोचैः (सूचयंतीः) परस्परगूढस्मितमुखीस्तादृष्ट्वाह नाहंत्विति । हेसख्यःअहंतेषांमध्येनकोपिकिंतुपरमकारुणिकःपरमसुहृच्च । कथम् । अमीषांभजतांअनुवृत्तिवृत्तयेनिरंतर
ध्यानप्रवृत्त्यर्थंतान्नभजामि । अत्रदृष्टांतमाह । यथेति । तस्यधनस्यैवचिंतयानिभृतःपुर्णोऽव्याप्तइतियावत् । अन्यत्क्षुत्पिपासाद्यपिनवेद (धनयोगापेक्षयातन्नाशेध्यानस्यतीव्रतादृश्यतेइत्यर्थः) २०
एवंमदर्थोज्झितलोकवेदस्वानांमदर्थेउज्झितःलोकोयुक्तायुक्ताप्रतीक्षणात्वेदश्चधर्माधर्माप्रतीक्षणात्स्वाज्ञातयश्चस्नेहत्यागात्याभिस्तासांवोयुष्माकंपरोक्षं अदर्शनं यथाभवतितथाभजतायुष्मत्प्रेमालापान्
शृण्वतैवतिरोहितंअंतर्धानेनस्थितम्।तत्तस्मात् हेअबलाःहेप्रियाःमामांअसूयितुंदोषारोपेणद्रष्टुंयूयंमार्हथ नयोग्याःस्थ २१

॥१३६॥

श्लोकाः

॥ श्रीभगवानुवाच ॥ मिथोभजंतियेसख्यःस्वार्थैकांतोद्यमाहिते ॥ नतत्रसौहृदंधर्मःस्वार्थार्थंतद्धिनान्यथा १७ भजंत्यभजतोयेवैकरुणाःपितरोयथा ॥
धर्मोनिरपवादोत्रसौहृदंचसुमध्यमाः १८ भजतोपिनवैकेचिद्भजंत्यभजतःकुतः ॥ आत्मारामाह्याप्तकामाअकृतज्ञागुरुद्रुहः १९ नाहंतुसख्योभजतोपिजं
तून्भजाम्यमीषामनुवृत्तिवृत्तये ॥ यथाऽधनोलब्धधनेविनष्टेतच्चिंतयान्यन्निभृतोनवेद २० एवंमदर्थोज्झितलोकवेदस्वानांहिवोमय्यनुवृत्तयेऽबलाः ॥
मयापरोक्षंभजतातिरोहितंमाऽसूयितुंमार्हथतत्प्रियंप्रियाः २१

१७/२१

चूर्णिका

॥ श्रीभगवानुवाच ॥ हेसख्यः येमिथोभजंति तेस्वार्थैकांतोद्यमाः तत्र सौहृदं न धर्मश्च न १७ अभजतः ये भजंति ते करुणाः तत्रनिरपवादोधर्मोस्ति १८ येकेचित् भ
जतोपि नभजंति अभजतः कुतः तेतु चतुर्विधाः आत्मारामाः आप्तकामाः मूढाःअतिकठिनाः तत्राहं नकोऽपि किंतु दयालुः १९ हेसख्यः अहंभजतोपि जंतून्नभजामि कु
तः अमीषांनिरंतरध्यानप्रवृत्त्यर्थेयथाअधनः लब्धधनेनष्टेतच्चिंतयाअन्यत्नवेत्तितद्वत् २० एवंमदर्थत्यक्तलोकवेदस्वानां वः अनुवृत्तयेमया युष्मत्प्रेमालापान् शृण्वतैवतिरोहि
तम्अतःमांदोषारोपेणद्रष्टुं नयोग्याः स्थ २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सयथाताभिःशुशुभे तथाताअपितेनाविरेजुरित्याह । पादन्यासैरिति । भुजाविधुतिभिःकरचालनैःभज्यन्मध्यैःभज्यमानमध्यैःचलद्भिःकुचैश्चपटैश्चगंडलोलैः गंडेषुचंचलैःस्विद्यन्मुख्यःस्विद्यंतिस्वेदमुद्गिरंति मुखानि यासांताः कबरेषुरशनासु चदृढाग्रंथयो यासांताः । कबरान्रशनाश्चशैथिल्यभियादृढंबद्ध्वानृत्यंत्यइत्यर्थः यद्वा तेषुतासुचअग्रंथयःनृत्यवशात्शिथिलग्रंथयइत्यर्थः । तत्रनानामूर्तिःकृष्णोमेघचक्र मिवतास्तुबहुविधास्तडितइवस्वेदस्तुषारइवगीतंगर्जितमिवचेतियथासंभवमूह्यं (तंकृष्णंगायंत्योविरेजुः) ८ नृत्यमानाःनृत्यंत्यः । रक्तकंठ्योनानारागैरनुरंजितकंठ्यः । कृष्णस्याभिमर्शेनसंस्पर्शेनमुदिताः । इदंविश्वम् ९ मुकुंदेनसहस्वरजातीःषड्जादिस्वरालापगतीःअमिश्रिताःकृष्णोन्नीताभिरसंकीर्णाः (उन्निन्येउच्चैर्ध्रुवंनीतवतीतेनप्रीयता) प्रीयमाणेन (साधुसाध्वितिपूजिता) संमानिता (सती तदैव) तज्जात्युन्नयनमेवपुनर्ध्रुवंध्रुवाख्यंतालविशेषंकृत्वाउन्निन्येउन्नीतवती (तदाचपूर्वापेक्षयाधिकंमानमदात्) १० एवंनृत्यगीतादिनाश्रीकृष्णसंमानितानांतासामतिप्रीतिविलसितंवृत्तमाह । काचिदिति (रासेननृत्यविशेषेणपरिश्रांतासतीगदाभृतःस्कंधंस्वबाहुनाजग्राह । अवलंब्यविशश्रामेत्यर्थः) श्लथंतिवलयानिमल्लिकाश्चयस्याःसा ११ उत्पलस्यसौरभमिवसौरभंयस्यतंबाहुं (अंसगतंअंसेनिधाये त्यर्थः) १२ नाट्येननृत्येनविक्षिप्तयोःचंचलयोःकुंडलयोःत्विषामंडितंगंडं (भगवतः) कपोलंतथाभूतेस्वगंडेसंदधत्याःसंयोजयंत्याः (कस्याश्चित्) १३ कूजतीनूपुरेमेखलाचयस्याःसा (शिवं सुखकरंअधात्आधत्त) १४ एवमन्याअपिगोप्यो (गृहीतःकंठोयासांताः) यथायथंनानाविभ्रमैर्विजहुःइत्याह गोप्यइति १५

॥१३८॥

श्लोकाः

पादन्यासैर्भुजविधुतिभिःसस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैःकुंडलैर्गंडलोलैः ॥ स्विद्यन्मुख्यःकबररशनाग्रंथयःकृष्णवध्वोगायंत्यस्तंतडितइवतामे घचक्रेविरेजुः ८ उच्चैर्जगुर्नृत्यमानारक्तकंठ्योरतिप्रियाः ॥ कृष्णाभिमर्शमुदितायद्गीतेनेदमावृतम् ९ काचित्समंमुकुंदेनस्वरजातीरमिश्रिताः ॥ उन्निन्ये पूजितातेनप्रीयतासाधुसाध्विति ॥ तदेवध्रुवमुन्निन्येतस्यैमानंचबह्वदात् १० काचिद्रासपरिश्रांतापार्श्वस्थस्यगदाभृतः ॥ जग्राहबाहुनास्कंधंश्लथद्वलय मल्लिका ११ तत्रैकांऽसगतंबाहुंकृष्णस्योत्पलसौरभम् ॥ चंदनालिप्तमाघ्रायहृष्टरोमाचुचुंबह १२ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितम् ॥ गंडंगं डेसंदधत्याअदात्तांबूलचर्वितम् १३ नृत्यंतीगायतीकाचित्कूजन्नूपुरमेखला ॥ पार्श्वस्थाच्युतहस्ताब्जंश्रांताधात्स्तनयोःशिवम् १४ गोप्योलब्ध्वाच्युतं कांतंश्रियएकांतवल्लभम् ॥ गृहीतकंठ्यस्तद्दोर्भ्यांगायंत्यस्तंविजह्रिरे १५

८/१५

चूर्णिका

तथाताःपादन्यासैः करचालनैः चलकुचपटैःगंडलोलैः कुंडलैःस्विद्यन्मुखाःगोप्यः तेनमेघसमूहेतडितइवविरेजुः ८ किंच ताःनृत्यमानाः रतिप्रियाःसत्यःउच्चैःजगुः यासां गीतेनविश्वंव्याप्तम् ९ तत्रकाचित्मुकुंदेनसमस्वरजातीः उन्निन्ये ततस्तेनसाधुसाधुइतिपूजितासतीतदेव ध्रुवाख्यतालविशेषेणपुनः उन्निन्ये तस्यै सः मानंअदात् १० काचित्रासश्रांताकृष्णस्यस्कंधंबाहुनाजग्राह ११ एकाअंसगतंबाहुंचंदनेनालिप्तंआघ्रायहृष्टरोमाचुचुंब १२ कस्याश्चित् गंडंगंडेसंदधत्याः कृष्णः तांबूलचर्वितंअदात् १३ काचित्नृत्यंतीश्रांतासतीकृष्णकराब्जंस्तनयोरधात् १४ ततोगोप्यः अच्युतंकांतंलब्ध्वातद्दोर्भ्यांगृहीतकंठ्यःगानंकुर्वत्यो विजह्रिरे १५

॥१३८॥

CC-0. In Public Domain. Digitization by eGangotri

टीका

आस्तामिदं परमार्थंतु शृणुतेत्याह । नेति । निरवद्यसंयुजांनिरवद्यानिर्दोषानिष्कपटासंयुक्संयोगोयासांतासांवःविबुधायुषापिचिरकालेनापिस्वीयंसाधुकृत्यंप्रत्युपकारंकर्तुंनपारयेनशक्नोमि । कथंभू
तानाम् । याभवत्योदुर्जराअजरायागृहशृंखलास्ताःसंवृश्च्यनिःशेषंछित्त्वामामांअभजन्मदेकानिष्ठाचित्ताअभूवन्तासाम् । मच्चित्तंबहुषुप्रेमयुक्ततयानैकनिष्ठंतस्माद्वःयुष्माकमेवसाधुनासाधुकृत्येनतद्यु
ष्मत्साधुकृत्यंप्रतियातुप्रतिकृतंभवतु । युष्मत्सौशील्येनैवममानृण्यंनतुमत्कृतप्रत्युपकारेणेत्यर्थः ॥ २२ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांद्वात्रिंशत्तमोऽध्यायः ॥३२ ॥ ॥
त्रयस्त्रिंशेततोगोपीमंडलीमध्यगोहरिः । प्रियास्तारमयामासह्लादिनीवनकेलिभिः ॥ १ ॥ तत्तदाअंगहेराजन् । यद्वा तस्यभगवतोंगेनवपुषाकरचरणाद्यवयवैर्वाउपचिताःसमृद्धाआशिषोयासांताः १
रासक्रीडांरासोनामबहुनर्तकीयुक्तोनृत्यविशेषः ('नर्तकीनांभवेद्रासोमंडलीभूयनर्तन'मितिलक्षणात्) तांक्रीडांअन्योन्यमाबद्धाःसंग्रथिताबाहवोयैस्तैःसह २ तत्साहित्यमभिनयेनदर्शयति । रासोत्स
वइत्यादिना अक्षरचतुष्टयाधिकेनसार्धेन । तासांमंडलरूपेणावस्थितानांद्वयोर्द्वयोर्मध्येप्रविष्टेनतेनैवकंठेगृहीतानांउभयतआलिंगितानाम् । कथंभूतेन यंसर्वाःस्त्रियःस्वस्वनिकटंमामेवाश्लिष्टवानितिमन्येरन्
तेनएतदर्थंद्वयोर्द्वयोर्मध्येप्रविष्टेनेत्यर्थः । नन्वेकस्यकथंतथाप्रवेशःसर्वसंनिहितत्वेवाकुतःस्वैकनिकटत्वाभिमानस्तासामित्यतउक्तंयोगेश्वरेणेति । अचिंत्यशक्तिनेत्यर्थः ३ तावत्तत्क्षणमेवअत्यौ
त्सुक्यव्याप्तमनसांसस्त्रीकाणांदेवानांविमानशतैःसंकीर्णंनभोबभूव ४ तच्चस्यभगवतःकृष्णस्यामलंनिर्मलंयशोजगुरिति ५ सप्रियाणांकृष्णसहितानांतुमुलःसंकीर्णः ६ महामरकतोनीलमणिरिवहै
मानांमणीनांमध्येमध्ये । ताभिःस्वर्णवर्णाभिराश्लिष्टाभिःशुशुभे । गोपीदृष्ट्यभिप्रायेणवाविनैवमध्यपदावृत्तिमेकवचनम् ७

॥१३७॥

श्लोकाः २२/७

नपारयेहंनिरवद्यसंयुजांस्वसाधुकृत्यंविबुधायुषापिवः ॥ यामाऽभजन्दुर्जरगेहशृंखलाःसंवृश्च्यतद्वःप्रतियातुसाधुना २२ इतिश्रीभागवतेमहापुराणे
दशमस्कंधेद्वात्रिंशत्तमोऽध्यायः ३२ ॥ ॥ छ ॥ ॥ शुकउवाच ॥ इत्थंभगवतोगोप्यःश्रुत्वावाचःसुपेशलाः ॥ जहुर्विरहजंतापंतदंगोपाचि
ताशिषः १ तत्रारभतगोविंदोरासक्रीडामनुव्रतैः ॥ स्त्रीरत्नैरन्वितःप्रीतैरन्योन्याबद्धबाहुभिः २ रासोत्सवःसंप्रवृत्तोगोपीमंडलमंडितः ॥ योगेश्वरेणकृष्णे
नतासांमध्येद्वयोर्द्वयोः ॥ प्रविष्टेनगृहीतानांकंठेस्वनिकटंस्त्रियः ३ यंमन्येरन्नभस्तावद्विमानशतसंकुलम् ॥ दिवौकसांसदाराणामौत्सुक्यनिभृतात्मनाम्
४ ततोदुंदुभयोनेदुर्निपेतुःपुष्पवृष्टयः ॥ जगुर्गंधर्वपतयःसस्त्रीकास्तद्यशोऽमलम् ५ वलयानांनूपुराणांकिंकिणीनांचयोषिताम् ॥ सप्रियाणामभूच्छ
ब्दस्तुमुलोरासमंडले ६ तत्रातिशुशुभेताभिर्भगवान्देवकीसुतः ॥ मध्येमणीनांहैमानांमहामरकतोयथा ७

चूर्णिका

किंच हेप्रियाः निरवद्यसंयुजां वः चिरकालेनापिप्रत्युपकारं कर्तुंनशक्नोमि याःदुर्जरगेहशृंखलाः छित्त्वा मांअभजन् तासांवःसाधुकृत्यंयुष्मत्सौशील्येनैवप्रतियातु नतुमत्कृत
प्रत्युपकारेणेत्यर्थः २२ ॥ इतिदशमेद्वात्रिंशः ३२ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ हेनृपएवंकृष्णवचः श्रुत्वागोप्यः विरहजंतापंजहुः १ तत्रगोविंदः
अन्योन्याबद्धबाहुभिः स्त्रीरत्नैः सहरासक्रीडामारभत २ ततः मंडलत्वेनस्थितानांतासांद्वयोर्द्वयोः मध्येप्रविष्टेनश्रीकृष्णेनरासोत्सवःसंप्रवृत्तः ३ यंगोप्यःमामेवाश्लिष्यती
तिमन्येरन् तावत् सदाराणांदेवानांविमानशतसंकुलंनभः बभूव ४ दुंदुभयोनेदुः पुष्पवृष्टयः पेतुः सस्त्रीकाःगंधर्वाः तद्यशोजगुः ५ तदास्त्रीणांवलयनूपुरकिंकिणीनांशब्दः
रासमंडलेतुमुलःअभूत् ६ तत्रताभिःकृष्णः स्वर्णमणिमध्येमारकतइवशुशुभे ७

॥१३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३३॥ ॥१३९॥

तत्रवादकेषुगायकेषु (चसखीकेषु) गंधर्वकिंनरादिषुरसावेशेनमुह्यत्सुनृत्यत्सुवाऽन्यामेववाद्यादिसंपत्तिंदर्शयन्रासस्संभ्रममाह । कर्णोत्पलेति । कर्णोत्पलैश्चअलकविटंकैरलकालंकृतैःकपोलैश्चघर्मैश्चवक्त्रेषुश्रीःशोभायासांताः । घोषाःकिंकिण्यः । वलयनूपुरघोषैर्वाद्यैर्वादित्रैः (उपलक्षिताः) स्वकेशेभ्यःस्रस्ताःस्रजोयासांताः ।। एतेनतालगतिसंतुष्टाःकेशाःसाशिरःकंपंपादेषुपुष्पवृष्टिमकुर्वन्निवेत्युत्प्रेक्षितम् । भगवतासहननृतुः । क्व । भ्रमराएवगायकायस्यांरासस्सभायाम् १६ यथागोप्योनानाविभ्रमैर्भगवतासहविजह्रुः एवंभगवानपिस्वविलासैस्ताभिःसहरेमेइत्याह । एवमिति । तद्विलासानभिभूतस्यैवरतौदृष्टांतः । यथार्भकइति । स्वप्रतिबिंबैर्विभ्रमःक्रीडायस्यसइव । अनेनैतद्दर्शितम् । स्वीयमेवसर्वकलाकौशलंसौगंध्यलावण्यमाधुर्यादिचतासु संधार्य ताभिःसहरेमे यथार्भकःस्वप्रतिबिंबैरिति १७ तास्तुभगवद्विलासैराकुलाबभूवुरित्याह । तदंगेति । तस्यांगसंगेनप्रकृष्टामुत्प्रीतिस्तयाआकुलान्यवशानींद्रियाणियासांताः । विश्लथबंधान्केशादीन्अंजसाप्रतिव्योढुंयथापूर्वधर्तुंनालंनसमर्थाबभूवुः । विस्रस्तामालाआभरणानिचयासांताः १८ नकेवलंताएवाकुलेंद्रियाःकिंतुदेव्योपीत्याह । कृष्णविक्रीडितमिति (खेचरस्त्रियःदेवांगनाआकाशेमुमुहुः) किंच । शशांकश्चेति । अनेनैतत्सूचितम् । शशांकेनविस्मितेनगतौविस्मृतायांतत्प्राकृताःसर्वेपिग्रहास्तत्रतत्रैवतस्थुःततश्चातिदीर्घासुरात्रिषुयथासुखंविजह्रुःरिति १९ किंचकृत्वेति । अयंभावः । " कात्यायनिमहामायेमहायोगिन्यधीश्वरि । नंदगोपसुतंदेविपतिंमेकुरुतेनमः" इतिप्रत्येकंताभिःप्रार्थितत्वात् । भगवतापि "याताबलाव्रजंसिद्धामयेमारंस्यथक्षपाः" इतितथैवप्रतिश्रुतत्वात्तावंतमात्मानंकृत्वारेमेइति । यावतीर्यावत्यः २० कृपातिशयमाह तासामिति (अंगहेराजन् । शंतमेन अतिशयितसुखकरेण) २१ ततोतिहृष्टानांगोपीनांचरितमाह । गोप्य इति । स्फुरतांस्वर्णकुंडलानांकुंतलानांचत्विषा गंडेषु याश्रीस्तया सुधितेन (संजातसुधेन)अमृतायितेनहाससहितेननिरीक्षणेनचऋषभस्य पत्युःकृष्णस्य मानंदधत्यःपूजांकुर्वंत्यः तस्यकृतानिकर्माणिजगुः तस्यकररुहैर्नखैःस्पर्शेनप्रमोदोयासांताः २२

श्लोकाः १६/२२

कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियोवलयनूपुरघोषवाद्यैः ॥ गोप्यःसमंभगवताननृतुःस्वकेशस्रस्तस्रजोभ्रमरगायकरासगोष्ठ्याम् १६ एवंपरिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः ॥ रेमेरमेशोव्रजसुंदरीभिर्यथार्भकःस्वप्रतिबिंबविभ्रमः १७ तदंगसंगप्रमुदाकुलेंद्रियाःकेशान्दुकूलंकुचपट्टिकांच ॥ नांजःप्रतिव्योढुमलंव्रजस्त्रियोविस्रस्तमालाभरणाःकुरूद्वह १८ कृष्णविक्रीडितंवीक्ष्यमुमुहुःखेचरस्त्रियः ॥ कामार्दितःशशांकश्चसगणोविस्मितोभवत् १९ कृत्वातावंतमात्मानंयावतीर्व्रजयोषितः ॥ रेमेसभगवांस्ताभिरात्मारामोपिलीलया २० तासामतिविहारेणश्रांतानांवदनानिसः ॥ प्रामृजत्करुणःप्रेम्णाशंतमेनांगपाणिना २१ गोप्यःस्फुरत्पुरटकुंडलकुंतलत्विड्गंडश्रियासुधितहासनिरीक्षणेन ॥ मानंदधत्यऋषभस्यजगुःकृतानिपुण्यानितत्कररुहस्पर्शप्रमोदाः २२

चूर्णिका ॥१३९॥

ततोगोप्यः कर्णोत्पलादिभिः वक्त्रेषुशोभायासांताः स्वकेशस्रस्तस्रजःसत्यः वलयनूपुरघोषरूपवाद्यैः भ्रमरगायकरासस्सभायांभगवतासमंननृतुः १६ एवंभगवानपिआलिंगनकरस्पर्शवीक्षणविलासहासैः ताभिःसहरेमेयथावालः स्वप्रतिबिंबैः १७ गोप्यः तदंगसंगहर्षेणव्याप्तेंद्रियाः सत्यः केशान्दुकूलंकुचपट्टिकांत्राधर्तुंनालंबभूवुः १८ ततः एवंकृष्णविक्रीडितंदृष्ट्वाखेचरस्त्रियोमुमुहुः चंद्रोपिसगणः कामार्दितः सन्विस्मितोबभूव १९ ततः कृष्णः यावंत्योगोपांगनाः तावंतः आत्मानंकृत्वाताभिः सहरेमे २० ततः तासांविहारेणश्रांतानांवदनानिसः पाणिना प्रामृजत् २१ ततो गोप्यः सुधायितहासावलोकनेन तस्मै मानं दधत्यः कृष्णस्य कर्माणि जगुः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अथजलकेलिमाह । ताभिरिति तासामंगसंगेनधृष्टासंमर्दिता या स्रक्तस्याः अतएव तासां कुचकुंकुमेनरंजितायाः संबंधिभिः गंधर्वपालिभिःगंधर्वपा गंधर्वपतयः इवगायंतोयेऽलयःतैरनुद्रुतःअनुगतःसक्र ष्णःवाःउदकंआविशत्(गजपक्षे)भिन्नसेतुर्विदारितवप्रः। (भगवत्पक्षे) अतिक्रांतलोकवेदमर्यादः २३ स्वरतिःआत्मारामोपिरेमे । अत्रगोपीमंडले। अत्रांभसीतिवा२४ स्थलजलक्रीडे दर्शिते । वनक्रीडां दर्शयति। ततश्चेति कृष्णाया यमुनाया उपवने जलस्थलप्रसूनानांगंधोयोस्मिस्तेनानिलेनजुष्टानिदिशांतटानिअंतायस्मिन् यद्वा दिशश्चतटंस्थलंचयास्मिन्वने । भृंगाणांप्रमदानांचगणैरावृतः करेणुभिर्गजीभिरावृतोमदस्रावीगजो यथा २५ रासक्रीडानिगमनं एवमिति । सकृष्णःसत्यसंकल्पःअनुरताबलागणःअनुरागिस्त्रीकदंबस्थ-(-इत्यर्थः) एवंसर्वानिशाःसेवितवान् । शरत्काव्यकथारसाश्रयाः । शरदिभवाःकाव्येषुकथ्यमानायेरसास्तेषामाश्रयभूतानिशाः यद्वा निशाइतिद्वितीयाऽत्यंतसंयोगे शृंगाररसाश्रयाः शरदिप्रसिद्धाःकाव्येषु याः कथास्ताःसिषेवइति । एवमप्यात्मन्येवअवरुद्धःसौरतःचरमधातुर्नतुस्खलितोयस्येति कामजयोक्तिः २६ २७ (हेब्रह्मन्) प्रतीपंप्रतिकूलंअधर्ममित्यर्थः । अचरत्कृतवान् नचेदंअधर्ममात्रं कलंजभक्षणादिवत् । किंतु महासाहसमित्याह । परदाराभिमर्शनामिति२८आप्तकामस्यनायमधर्मइतिचेत् तर्हियद्येवंकामाभावान्निंदितंकेनाभिप्रायेणकृतवानितिपृच्छति । आप्तकामइति २९ परमेश्वरे कैमुत्यन्यायेन परिहर्तुंसामान्यतो महतां वृत्तमाह । धर्मव्यतिक्रम इति । साहसंचदृष्टंप्रजापतींद्रसोमविश्वामित्रादीनाम् । तच्चतेषांतेजस्विनांदोषायनभवतीति । (अत्रदृष्टांतः वह्नेरिति यथासर्वभुक्नंनदोषायेति) ३०

श्लोकाः

२३/३०

ताभिर्युतःश्रममपोहितुमंगसंगघृष्टस्रजःस्वकुचकुंकुमरंजितायाः ॥ गंधर्वपालिभिरनुद्रुतआविशद्वाःश्रांतोगजीभिरिभराडिवभिन्नसेतुः २३ सोंभस्यलं युवतिभिःपरिषिच्यमानःप्रेम्णेक्षितःप्रहसतीभिरितस्ततोंग ॥ वैमानिकैःकुसुमवर्षिभिरीड्यमानोरेमेस्वयंस्वरतिरत्रगजेंद्रलीलः २४ ततश्चकृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे ॥ चचारभृंगप्रमदागणावृतोयथामदच्युद्द्विरदःकरेणुभिः २५ एवंशशांकांशुविराजितानिशाःससत्यकामोऽनुरताबलागणः ॥ सिषेवआत्मन्यवरुद्धसौरतःसर्वाःशरत्काव्यकथारसाश्रयाः २६ ॥ ॥ राजोवाच ॥ संस्थापनायधर्मस्यप्रशमायेतरस्यच ॥ ॥ अवतीर्णोहिभगवानंशेनजगदीश्वरः २७ सकथंधर्मसेतूनांवक्ताकर्ताभिरक्षिता ॥ प्रतीपमाचरद्ब्रह्मन्परदाराभिमर्शनम् २८ आप्तकामोयदुपतिःकृतवान्वैजुगुप्सितम् ॥ किमभिप्रायएतन्नःसंशयंछिंधिसुव्रत २९ ॥ शुकउवाच ॥ धर्मव्यतिक्रमोदृष्टईश्वराणांचसाहसम् ॥ तेजीयसांनदोषायवह्नेःसर्वभुजोयथा ३०

चूर्णिका

ततःकृष्णः श्रमंदूरीकर्तुंताभिः सहउदकंविवेश गजीभिः गजइव २३ सःअलंयुवतीभिः परिषिच्यमानः कुसुमवर्षिभिः देवैः ईड्यमानः गोपीमंडले रेमे २४ ततः कृष्णः यमुनोपवनेभृंगस्त्रीगणावृतः सन्गजीभिःगजइवचचार २५ एवंसः चंद्रांशुविराजिताः निशाः अस्मानिरुद्धचरमधातुः सन्सिषेवे ॥ राजोवाच ॥ हेब्रह्मन्भगवान् धर्मस्थापनार्थइतरनाशार्थं अवतीर्णः २७ तथा धर्मसेतूनांवक्ताकर्ताऽपिसन् कथंपदाराभिमर्शनंप्रतीपमाचरत् २८ किंच पूर्णकामोपि सः निंद्यं कर्म कृतवान् किमभिप्रायःएतंनःसंशयंछिंधिसुव्रत २९ ॥ श्रीशुकउवाच ॥ हेनृप महतां धर्मव्यतिक्रमः साहसं च दृष्टं तत् तेषांतेजीयसांदोषायनस्यात् वह्नेः सर्वभुजोयथा ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तर्हि " यद्यदाचरतिश्रेष्ठ-" इतिन्यायेनान्योपितत्कुर्यादित्याशंक्याह । नैतदिति । अनीश्वरःदेहादिपरतंत्रः यथा रुद्रव्यतिरिक्तोविषमाचरन्भक्षयन् (नश्येत् तद्वदिति) ३१ कथंतदाचारस्यप्रामाण्यमिति अतआह ईश्वराणामिति । तेषांवचःसत्यंअतस्तदुक्तंआचरेदेव । आचरितंतुक्वचित्सत्यंअतःस्ववचोयुक्तंतेषांवचसायद्युक्तम् । अविरुद्धम् । तत्तदेवाचरेत् ३२ ननु तर्हितेपिकिमेवंसाहसमाचरंति तत्राह कुशलेति (एषांकुशलाचारितेनपुण्यकर्मणा । विपर्ययेणपापकर्मणानर्थश्चनविद्यते) प्रारब्धकर्मक्षपणमात्रमेव तेषांकृत्यंनान्यदित्यर्थः ३३ प्रस्तुतमाह । किमुतेति (एषांयदा) कुशलाद्यन्वयो (नघटतेतदासर्वेश्वरस्यकुशलाकुशलान्वयःपुण्यपापसंबंधो) नविद्यतइतिकिंपुनर्वक्तव्यमित्यर्थः ३४ एतदेव स्फुटीकरोति । यस्यपादपंकजपरागस्यनिषेवोनिषेवणंतेनतृप्ताः यद्वा यस्यपादपंकजपरागेनितरांसेवायेषांतेतथातेचतेतृप्ताश्चेतिभक्ताइत्यर्थः । तथा (मुनयोमननशीला-)-ज्ञानिनश्चननह्यमानाबंधनमप्राप्नुवंतः (स्वैरंचरंति स्वेच्छया गृहीतावतारस्य तस्यभगवतः कुतोबंधइति) ३५ परदारत्वंगोपीनामंगीकृत्य परिहृतम् । इदानींभगवतःसर्वांतर्यामिणःपरदारसेवनंनामनकिंचिदित्याह गोपीनामिति । योंतश्चरत्यध्यक्षोबुद्ध्यादिसाक्षी सएव क्रीडनेनदेहभाक् नत्वस्मदादितुल्यः येन दोषःस्यात् । सर्वात्मनिस्वपरभेदोनसंभवतीतिभावः३६नन्वेवंचेत् आप्तकामस्यतस्यानिंदितेकर्मणिकुतःप्रवृत्तिरित्यतआह । अनुग्रहायेति । तत्परोभवेत्भगवतितत्परचित्तोभवेत् । शृंगाररसाकृष्टचेतसोऽतिबहिर्मुखानपिस्वपरान्कर्तुंताद्दशीःक्रीडाबभाजेतिभावः ३७ नन्वन्येपिभिन्नाचाराःस्वचेष्टितमेवेतिवदंतितत्राह । नासूयन्निति (व्रजौकसोगोपाःकृष्णपार्श्वस्थानपिस्वान्स्वान्दारान्स्वपार्श्वस्थान्मन्यमानाःकृष्णायनाद्रुह्यन्इत्यर्थः) एवंभूतैश्वर्याभावेतथाकुर्वतःपापाइतिभावः ३८

श्लोकाः ३१—३८

नैतत्समाचरेज्जातुमनसापिह्यनीश्वरः ॥ विनश्यत्याचरन्मौढ्याद्यथाऽरुद्रोऽब्धिजंविषम् ३१ ईश्वराणांवचःसत्यंतथैवाचरितंक्वचित् ॥ तेषांयत्स्ववचोयुक्तंबुद्धिमांस्तत्समाचरेत् ३२ कुशलाचरितेनैषामिहस्वार्थोनविद्यते ॥ विपर्ययेणचानर्थोनिरहंकारिणांप्रभो ३३ किमुताखिलसत्त्वानांतिर्यङ्मर्त्यदिवौकसाम् ॥ ईशितुश्चेशितव्यानांकुशलाकुशलान्वयः ३४ यत्पादपंकजपरागनिषेवतृप्तायोगप्रभावविधुताखिलकर्मबंधाः॥ स्वैरंचरंतिमुनयोपिननह्यमानास्तस्येच्छयात्तवपुषःकुतएवबंधः ३५ गोपीनांतत्पतीनांचसर्वेषामेवदेहिनाम्॥योंतश्चरतिसोध्यक्षःक्रीडनेनेहदेहभाक्३६अनुग्रहायभूतानांमानुषंदेहमास्थितः॥ भजतेताद्दशीःक्रीडायाःश्रुत्वातत्परोभवेत् ३७ नासूयन्खलुकृष्णायमोहितास्तस्यमायया ॥ मन्यमानाःस्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः ३८

चूर्णिका

अतः इदंमहत्कर्मअनीश्वरः मनसापिनाचरेत् यथाऽरुद्रोऽब्धिजंविषं ३१ किंच महतांवचः सत्यं आचारितंक्वचित् अतः तैः वचसायदुक्तं तदेवाचरेत् ३२ एषांकुशलाचरितेनस्वार्थो न विपर्ययेणअनर्थोन किंतुप्रारब्धकर्मक्षपणमात्रमेवतेषां कृत्यं नान्यत् ३३ प्रस्तुतमाह सर्वसत्त्वानांईशितुः हरेः कुशलाकुशलान्वयः नेतिकिंपुनर्वक्तव्यं ३४ किंच यत्पादपंकजपरागसेवनेनतृप्ताः मुनयः अबद्ध्यमानाः संतः सर्वत्र स्वैरंचरंति तस्य इच्छयात्तवपुषः बंधः कुतएव ३५ किंच हेनृप गोपीनांतत्पतीनां सर्वदेहिनांयः अंतः चरति ३६ सः भूतानांअनुग्रहार्थंआस्थितः सन् ताद्दशीः क्रीडाः भजते याः श्रुत्वा नरः तत्परोभवेत् ३७ तथाव्रजौकसः स्वस्वदारान् स्वपार्श्वस्थान्मत्वातन्माययामोहिताः संतः कृष्णाय नासूयन् ३८

CC-0. In Public Domain. Digitization by eGangotri

टीका

ब्रह्मरात्रेब्राह्मेमुहूर्तेउपावृत्तेप्राप्ते (गंतुमनिच्छंत्योपिवासुदेवानुमोदिताययुः) ३९ भगवतःकामविजयरूपरासक्रीडाश्रवणादेःकामविजयमेवफलमाह विक्रीडितमिति । व्रजवधूभिःसहविष्णोर्विक्रीडितम् । अचिरेणधीरःसन्हृद्रोगंकामंआशुअपहिनोतिपरित्यजतीति ॥ सेयंश्रीपरमानंदसेविश्रीधरनिर्मिता । श्रीभागवतभावार्थदीपिकादशमाश्रया (टीकायांश्रीधरोक्तायामस्यांयद्दृश्यतेऽधिकम् । आगोमहेश्वरस्यैतत्क्षमंतांश्रीधरांघ्रयः) ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांत्रयस्त्रिंशोध्यायः ॥ ३३ ॥ ॥ ७ ॥ ॥ चतुस्त्रिंशेऽहिनाग्रस्तंनंदंहरिरमूमुचत् । विद्याध्रंचांगिरःशापाच्छंखचूडंतथावधीत् ॥ १ ॥ रासापदेशतःकामंकिंकरीकृत्यकामतः । अनुगृह्णन्वशंनिन्येतथाविद्याधराधिपम्॥ २ ॥ (तदेवंकामानुग्रहमुखेनकामजयंप्रतिपाद्य तथैव विद्याधरजयंप्रतिपादयितुं तत्प्रसंगंदर्शयति एकदेति) १ (पशुपतिंमहादेवम्) २ गावोगाः। मधुमधुरं मध्वन्नंमधुनासहितमन्नम् ३ जलमात्रंप्राश्य उपोषितास्तां निशां तत्र ऊषुर्न्यवसन् (नंदःसुनंदकश्चादीयेषांते)४ महानहिरजगरः उरगःउरसागच्छन्नित्यलक्षितत्वमुक्तम्। अग्रसीज्जग्रास ५ (प्रपन्नंआपन्नमित्यर्थः) ६ विव्यधुःताडयामासुः उल्मुकैःज्वलत्काष्ठैः ७ अलातैस्तैरेव । उरंगमोऽजगरः ८ विद्याधरेष्वर्चितंपूजितम् ९

॥१४२॥

श्लोकाः ३९/९

ब्रह्मरात्रउपावृत्तेवासुदेवानुमोदिताः ॥ अनिच्छंत्योययुर्गोप्यःस्वगृहान्भगवत्प्रियाः ३९ विक्रीडितंव्रजवधूभिरिदंचविष्णोःश्रद्धान्वितोऽनुशृणुयादथवर्णयेद्यः ॥ भक्तिंपरांभगवतिप्रतिलभ्यकामंहृद्रोगमाश्वपहिनोत्यचिरेणधीरः ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रयस्त्रिंशोध्यायः ३३ ॥७ ॥
॥ शुकउवाच ॥ ॥ एकदादेवयात्रायांगोपालाजातकौतुकाः ॥ अनोभिरनडुद्युक्तैःप्रययुस्तेंबिकावनम् १ तत्रस्नात्वासरस्वत्यांदेवंपशुपतिंविभुम् ॥
आनर्चुरर्हणैर्भक्त्यादेवींचनृपतेंऽबिकाम् २ गावोहिरण्यंवासांसिमधुमध्वन्नमादृताः ॥ ब्राह्मणेभ्योददुःसर्वेदेवोनःप्रीयतामिति ३ ऊषुःसरस्वतीतीरेजलंप्राश्यधृतव्रताः ॥ रजनींतांमहाभागानंदसुनंदकादयः ४ कश्चिन्महानहिस्तस्मिन्विपिनेतिबुभुक्षितः ॥ यदृच्छयागतोनंदंशयानमुरगोऽग्रसीत् ५ सचुक्रोशाहिनाग्रस्तःकृष्णकृष्णमहानयम् ॥ सर्पोमांग्रसतेतातप्रपन्नंपरिमोचय ६ तस्यचाक्रंदितंश्रुत्वागोपालाःसहसोत्थिताः ॥ ग्रस्तंचदृष्ट्वासंभ्रांताःसर्पंविव्यधुरुल्मुकैः ७ अलातैर्दह्यमानोपिनामुंचत्तमुरंगमः ॥ तमस्पृशत्पदाभ्येत्यभगवान्सात्वतांपतिः ८ सवैभगवतःश्रीमत्पादस्पर्शहताशुभः ॥ भेजेसर्पवपुर्हित्वारूपंविद्याधरार्चितम् ९

चूर्णिका

ततोगोप्यः ब्राह्मेमुहूर्ते प्राप्तेकृष्णाज्ञया अनिच्छंत्योपिगृहान् ययुः ३९ इदंव्रजांगनाभिः सहविष्णोः क्रीडितंप्रति यः शृणुयात् वर्णयेच्च सः हरौभक्तिंप्राप्य हृद्रोगंकामंआशु अपहिनोति ॥ ४० ॥ इतिदशमस्कंधेत्रयस्त्रिंशः ॥ ३३ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥एकदादेवयात्रायां गोपालाजातकौतुकाः ॥ अनोभिरनडुद्युक्तैःप्रययुस्तेंऽबिकावनम् १ तत्रसरस्वत्यांस्नात्वाशिवं अंबिकांचआनर्चुः ॥ २ ततः सर्वेगोपा ब्राह्मणेभ्यः गोसुवर्णवस्त्रान्नानि देवोनःप्रीयतामितिददुः ३ ततः तत्रजलंप्राश्य धृतव्रताः नंदादयः तांरात्रिंनदीतीरेन्यवसन् ४ तस्मिन्वनेअतिबुभुक्षितः अहिः शयानं नंदंअग्रसीत् ५ सः नंदः कृष्णकृष्णेति आक्रोश्य हेतात अयंसर्पः मांग्रसते प्रपन्नंमांमोचय ६ ततोगोपाः नंदाक्रंदितं श्रुत्वा उत्थायतेनग्रस्तंतंदृष्ट्वा उल्मुकैः सर्पं ताडयामासुः ७ सः अलातैः ताडितोपि नंदं नामुंचत् तदा कृष्णः एत्य पदा तंअस्पृशत् ८ ततः सः भगवत्पादस्पर्शात्हताशुभः सन् सर्पवपुर्हित्वा विद्याधरपूजितंरूपंभेजे ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. गोपेष्वात्मनऐश्वर्यप्रकाशयितुमविद्वानिवतमपृच्छत् दीप्यमानेनवपुषासमवस्थितम् १० यःपरयाशोभयारोचतेप्रकाशते स भवान् कः (कथंकेनकर्मणाकेनवापुरुषेणप्रापितः) ११ (श्रियोपलक्षितः अ०
स्वरूपसंपत्त्यासुदर्शनइतिख्यातः) १२ प्राहसंउपहसितवानस्मि । प्रलब्धैःउपहसितैः । मदीयेनैवपापेननिमित्तेन । (अंगिरसःअत्रिभृग्विवतिगोत्रप्रत्ययस्यलुक्) १३ यत् यतःशापात् १४ त्वा
टीका त्वांआपृच्छेस्वलोकंगंतुंअनुज्ञांयाचे । अमीवहन् दुःखनाशन १५ (प्रपन्नःशरणंगतः) १६ (आत्मानंवक्तारम् । तस्यतेपदास्पृष्टःपूयेतेतिकिंभूयःकिंपुनर्वक्तव्यम्) १७ १८ (तत् विद्याधरेणस्तुतं ॥३४॥
श्रीकृष्णस्यनिजवैभवं हेनृप पुनराययुः) १९ " अहिदेहंनिहत्यैवंप्रागुन्मत्तसुदर्शनं । तद्वद्दुन्मादिनंकृष्णःशंखचूडमताडयत् ॥ १ ॥ " तत्प्रसंगमाह कदाचिदिति २० (स्त्रीजनैर्ललितंयथास्यात्तथा
उपगीयमानौ) विरजसीनिर्मलेअंबरेययोस्तौ २१ किंच । निशाप्रवेशंसत्कुर्वतौ । उदितउडुपस्तारकाश्चयस्मिन्तत् (मल्लिकागंधेनमत्ताअलयोयस्मिंस्तत् । कुमुदगंधिनावायुनाजुष्टम्) २२

॥१४३॥ तमपृच्छद्धृषीकेशःप्रणतंसमवस्थितम् ॥ दीप्यमानेनवपुषापुरुषंहेममालिनम् १० कोभवान्परयालक्ष्म्यारोचतेऽद्भुतदर्शनः ॥ कथंजुगुप्सितामेतांग श्लोकाः
तिंवाप्रापितोऽवशः ११ ॥ ॥ सर्पउवाच ॥ अहंविद्याधरःकश्चित्सुदर्शनइतिश्रुतः ॥ श्रियास्वरूपसंपत्त्याविमानेनाचरंदिशः १२ ऋषीन्विरूपानं
गिरसःप्राहसंरूपदर्पितः ॥ तैरिमांप्रापितोयोनिंप्रलब्धैःस्वेनपाप्मना १३ शापोमेऽनुग्रहायैवकृतस्तैःकरुणात्मभिः ॥ यदहंलोकगुरुणापदास्पृष्टोहता १०/२२
शुभः १४ तंत्वाहंभवभीतानांप्रपन्नानांभयापहम् ॥ आपृच्छेशापनिर्मुक्तःपादस्पर्शादमीवहन् १५ प्रपन्नोस्मिमहायोगिन्महापुरुषसत्पते ॥ अनुजा
नीहिमांदेवसर्वलोकेश्वरेश्वर १६ ब्रह्मशापाद्विमुक्तोहंसद्यस्तेच्युतदर्शनात् ॥ यन्नामगृह्णन्नखिलान्श्रोतृनात्मानमेवच ॥ सद्यःपुनातिकिंभूयस्तस्यस्पृष्टः
पदाहिते १७ इत्यनुज्ञाप्यदाशार्हंपरिक्रम्याभिवंद्यच ॥ सुदर्शनोदिवंयातःकृच्छ्रान्नंदश्चमोचितः १८ निशम्यकृष्णस्यतदात्मवैभवंव्रजौकसोविस्मितचे
तसस्ततः ॥ समाप्यतस्मिन्नियमंपुनर्व्रजंनृपाययुस्तत्कथयंतआदृताः १९ कदाचिदथगोविंदोरामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वनेरात्र्यांमध्यगौव्रजयो
षिताम् २० उपगीयमानौललितंस्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौस्रग्विणौविरजोंबरौ २१ निशामुखंमानयंतावुदितोडुपतारकम् ॥ मल्लि
कागंधमत्तालिजुष्टंकुमुदवायुना २२

चूर्णिका तंहेममालिनंप्रणतंकृष्णः अपृच्छत् १० हेसर्पत्वं अद्भुतदर्शनः कः कथं एतांदुर्गतिंप्रापितः ११ ॥ सर्पउवाच ॥ हे कृष्ण अहंसुदर्शन इतिकश्चिद्विद्याधरः स्वरूपसंप
त्यायुतःसन्विमानेनदिशः अचरम् १२ तदाविरूपान् अंगिरसः ऋषीन्दृष्ट्वा रूपदर्पितः सन्उपहासितवान् तैः इमांयोनिंप्रापितः १३ दयालुभिस्तैः शापोमेनुग्रहायैव
कृतः यतःशापात् अहंलोकगुरुणात्वयापदास्पृष्टः हताशुभोजातः १४ एवंभूतंत्वां अहंस्वलोकंगंतुं अनुज्ञांयाचे १५ हेकृष्णमांगंतुं अनुज्ञांदेहि १६ हेअच्युत ते दर्शना
त्वब्रह्मशापान्मुक्तोहं यन्नामगृण्हन्पुमान् श्रोतॄन् आत्मानंचसद्यःपुनाति १७ किंभूयः तस्यस्पृष्टः पदाहिते एवंकृष्णं अनुज्ञाप्यप्रदक्षिणानमस्कारं कृत्वासुदर्शनो दिवंयातः ॥१४३॥
कृच्छ्रान्नंदश्चमोचितः १८ ततोव्रजौकसः एवंकृष्णवैभवंदृष्ट्वातत्रनियमं समाप्य पुनर्व्रजं आययुः १९ अथैकदारामकृष्णौस्त्रीणांमध्यगौसंतौवनेरात्र्यांविजह्रतुः २० तौ
स्त्रीजनैः उपगीयमानौस्रग्विणौ २१ उदितचंद्रतारकंनिशामुखंमानयंतौसंतौ सर्वभूतानांमनःश्रवणमंगलं यथा तथा अगायतां २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिबद्धत्वादन्यैर्युगपत्कल्पयितुमशक्यमपितौस्वरमंडलमूर्छितं (षड्जादिस्वरसमूहस्यआरोहावरोहक्रमभेदं) युगपत्कल्पयंतौमनःश्रवणयोर्मंगलं (सुखकरं) यथाभवतितथा जगतुःअगायतामिति २३ मूर्छितास्तद्गीतलीनचित्ताःस्रंसत्भ्रश्यत्दुकूलंयस्मात्तमात्मानंदेहंस्रस्ताःकेशेभ्यःस्रजोयस्यतंचततोनाविंदन् २४ (एवंविक्रीडतोःसतोः) २५ निरीक्षतोःनिरीक्षमाणयोः (सतोः) तौनाथौयस्यतंकालयामास हठात्प्रेरयामास २६ दस्युनाव्याघ्रेण २७ माभैष्ट भयंमाप्राप्नुतेत्यभयवाचौ (शालवृक्षौहस्तयोर्ययोस्तौ । आसेदतुःप्रापतुः) २८ (उद्विजन्बिभ्यत्सन्)२९(सशंखचूडःयत्र धावतितत्रतमन्वधावत्) ३० अविदूरेसमीपतइवाभ्येत्याशिरसासहचूडामणिंजहारेत्यर्थः ३१ ३२ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुस्त्रिंशतितमोध्यायः ॥ ३४ ॥ ॥ ७ ॥ पंचत्रिंशेवनंयातेकृष्णेगोकुलयोषितः । युग्मश्लोकानुगीतेननिन्युर्दुःखेनवासरान् । एवंरात्रिषुकृष्णेनस्वैरमभिरमितानां दिवा तद्विरहितानां अनुगीतेन दिननिस्तारप्रकारमाह गोप्य इति । दुःखेन कृच्छ्रेण वामबाहुकृतवामकपोल इत्यादीनि द्वादशयुगलानीति १

जगतुःसर्वभूतानांमनःश्रवणमंगलम् ॥ तौकल्पयंतौयुगपत्स्वरमंडलमूर्छितम् २३ गोप्यस्तद्गीतमाकर्ण्यमूर्छितानाविदन्नृप ॥ स्रंसद्दुकूलमात्मानंस्रस्तकेशस्रजंततः २४ एवंविक्रीडतोःस्वैरंगायतोःसंप्रमत्तवत् ॥ शंखचूडइतिख्यातोधनदानुचरोभ्यगात् २५ तयोर्निरीक्षतोराजंस्तन्नाथंप्रमदाजनम् ॥ क्रोशंतंकालयामासदिश्युदीच्यामशंकितः २६ क्रोशंतंकृष्णरामेतिविलोक्यस्वपरिग्रहम् ॥ यथागादस्युनाग्रस्ताभ्रातरावन्वधावताम् २७ माभैष्टेत्यभयारावौशालहस्तौतरस्विनौ ॥ आसेदतुस्तंतरसात्वरितंगुह्यकाधमम् २८ सवीक्ष्यतावनुप्राप्तौकालमृत्यूइवोद्विजन् ॥ विसृज्यस्त्रीजनंमूढःप्राद्रवज्जीवितेच्छया २९ तमन्वधावद्गोविंदोयत्रयत्रसधावति ॥ जिहीर्षुस्तच्छिरोरत्नंतस्थौरक्षन्स्त्रियोबलः ३० अविदूरइवाभ्येत्यशिरस्तस्यदुरात्मनः ॥ जहारमुष्टिनैवांगसहचूडामणिंविभुः ३१ शंखचूडंनिहत्यैवंमणिमादायभास्वरम् ॥ अग्रजायाददात्प्रीत्यापश्यंतीनांचयोषिताम् ३२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुस्त्रिंशोध्यायः ३४ ॥ ॥ ७ ॥ ॥ शुकउवाच ॥ गोप्यःकृष्णेवनंयातेतमनुद्रुतचेतसः ॥ कृष्णलीलाःप्रगायंत्योनिन्युर्दुःखेनवासरान् १

२३ तद्गीतंश्रुत्वागोप्यः गतवस्त्रंदेहंनाविंदन् २४ एवंक्रीडतोः गायतोः सतोः तावत्कुबेरानुचरःशंखचूडइति अभ्यगात् २५ ततः हेनृप तयोः ईक्षतोः सतोः तन्नाथंक्रोशंतंस्त्रीजनंसःनिर्भयः सन् कालयामास२६ततः कृष्णरामेतिक्रोशंतंस्त्रीगणंदृष्ट्वा तौ अन्वधावतां २७ कथंभूतौ तौ माभैष्टेत्यभयशब्दौशालहस्तौसंतौतंगुह्यकाधमं शीघ्रंप्रापतुः २८ ततः सः कालमृत्यूइवप्राप्तौतौदृष्ट्वास्त्रीजनांहित्वाजीवितेच्छयाप्राद्रवत् २९ सः गुह्यकःयत्रयत्रधावतितत्रतत्रश्रीकृष्णः तच्छिरोरत्नंजिहीर्षुः सन् अधावत् ३० वलस्तुस्त्रियोरक्षन् तस्थौ ३१ अविदूरइवाभ्येत्यशिरस्तस्यदुरात्मनः जहारमुष्टिनैवांगसहचूडामणिंविभुः शंखचूडंनिहत्यैवंमणिमादायभास्वरं अग्रजायाददत्प्रीत्यापश्यंतीनांचयोषितां ॥ ३२ इतिदशमस्कंधेचतुस्त्रिंशः ॥ ३४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ गोप्यःकृष्णेवनंयातेतमनुद्रुतचेतसः कृष्णलीलाः प्रगायंत्योनिन्युर्दुःखेनवासरान् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेगोप्यः वामेबाहौतन्मूलेकृतःअर्पितःवामकपोलोयेनसः वल्गितेनर्तितेभ्रुवौयेनसवल्गितभ्रूः मुकुंदः अधरेअर्पितंवेणुंकोमलाभिरंगुलीभिराश्रितामार्गाः सप्तस्वरच्छिद्राणियस्यतं यत्र यदाईरयतिवादयति २
तदाव्योमयानानांसिद्धानांवनिताःसिद्धैःस्वपतिभिःसहवर्तमानाअपितद्वेण्वीरणमुपधार्य आकर्ण्य प्रथमंविस्मिताःततःकाममार्गणेभ्यःसमर्पितानिचित्तानियाभिस्ताः (कामबाण-) -परवशाइत्यर्थः। सल
ज्जाःसत्यःकश्मलंमोहंययुः अत्रालिंगम्। अपस्मृतानीव्योयाभिरिति (नीवी परिहितवाससोग्रंथिः) अतएवंभूतस्यविरहंकथं सहामहइतिसर्वत्र वाक्यशेषः ३ हंतहेअबलाः इदंचित्रंशृणुत। (पशूनामपी
दमाश्चर्यंश्रोतव्यमित्यर्थः) हारहासः हारवाद्विशदोहासोयस्यसःयद्वा वेणुवादनेअधोवदनेनहसतस्तस्यहारेषुस्फुरन्हासोयस्यहारवद्वावक्षसिशोभमानोहासोयस्यसः यद्वा हाराणांहासइव (हासो) वि
शदास्फूर्तिर्यस्मिन्नुरसीति। तस्मिन्उरसिस्थिराविद्युदिवलक्ष्मीर्यस्यसः (आर्तजनानामपिनर्मदः) यर्हियदाकूजितवेणुर्भवति ४ तदाव्रजेयेवृषामृगागावश्ववेणुवाद्येनहृतानिचेतांसियेषांतेआरात्दूरादे
वदंतैर्दष्टा -(- नतुगिलिताः) कवलाग्रासायैस्तेधृताउत्तंभिताःकर्णायैस्ते (सुखेन) निद्रिताइवलिखितचित्रमिवचासन् ५ किंच। अचेतनासुसरित्सुतदतीवचित्रमित्याहुः (बर्हिणइति) हेआलिस
खिबर्हिगस्यमयूरस्यस्तबकाःपिच्छाःधातवोगैरिकादयःपलाशानिपल्लवास्तैर्बद्धश्चासौमल्लानांपरिबर्हःपरिकरस्तंविडंबयतिअनुकरोतीतितथासमुकुंदोगोपैःसहवेणुनेत्युपरितनंअत्रापिज्ञातव्यम्। यत्रय
दागाःसमाह्वयति। तर्हितदाध्वनिश्रवणादनिलेनानीतंतस्यपदांबुजरजःस्पृहयंत्यइवभग्नगतयःसरितःवैनिश्चितंवयामिवतावताअप्यबहुपुण्याःयतोनप्राप्नुवंति। केवलंप्रेम्णावेपिताःकंपिताभुजास्तरंगायया
सांताः। स्तिमितानिश्चलाआपोयासांताःगोप्योपिलोचनयोःस्तिमितजलाभवंतीति ६ ७ स्थावरेष्वपिअतिचित्रंदृश्यतइत्याहुः। अनुचरैर्गोपैःदेवादिभिर्वा। मुग्धानांवाक्यंआदिपुरुषइवेति। अचलभू
तिर्निश्चलश्रीः। वेणुनातत्तन्नाम्नागानेन ८

॥१४५॥

॥ गोप्यऊचुः ॥ वामबाहुकृतवामकपोलोवल्गितभ्रूरधरार्पितवेणुम् ॥ कोमलांगुलिभिराश्रितमार्गंगोप्यईरयातियत्रमुकुंदः २ व्योमयानवनिताःसह
सिद्धैर्विस्मितास्तदुपधार्यसलज्जाः ॥ काममार्गणसमर्पितचित्ताःकश्मलंययुरपस्मृतनीव्यः ३ हंतचित्रमबलाःशृणुतेदंहारहासउरसिस्थिरविद्युत् ॥ नं
दसूनुरयमार्तजनानांनर्मदोयर्हिकूजितवेणुः ४ वृंदशोव्रजवृषामृगगावोवेणुवाद्यहृतचेतसआरात् ॥ दंतदष्टकवलाधृतकर्णानिद्रितालिखितचित्रमिवासन्
५ बर्हिणस्तबकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः ॥ कर्हिचित्सबलआलिसगोपैर्गाःसमाह्वयतियत्रमुकुंदः ६ तर्हिभग्नगतयःसरितोवैतत्पदांबुजरजोऽ
निलनीतम् ॥ स्पृहयतीर्वयमिवाबहुपुण्याःप्रेमवेपितभुजाःस्तिमितापः ७ अनुचरैःसमनुवर्णितवीर्यआदिपूरुषइवाचलभूतिः ॥ वनचरोगिरितटेषुचरं
तीर्वेणुनाह्वयतिगाःसयदाहि ८

श्लोकाः २/८

चूर्णिका

॥ गोप्यऊचुः ॥ हेगोप्यः वामबाहौकृतवामकपोलो मुकुंदः अधरार्पितवेणुंकोमलांगुलिभिः आश्रितसप्तस्वरछिद्रंयदावादयति २ तदातच्छ्रुत्वा सिद्धस्त्रियः सिद्धैः सह
वर्तमानाअपिकामबाणेभ्यः अर्पितचित्ताः सत्यः मोहंययुः यतः गतनीव्यः एवंभूतस्यकृष्णस्य विरहं कथंसहामइतिसर्वत्र ३ किंच हे अबलाः इदंचित्रंशृणुत अयंनं
दसूनुः आर्तजनानांनर्मदः यदाकूजितवेणुर्भवति ४ तदाव्रजवृषाः मृगगावः वाद्येनहृतचेतसः दंतदष्टग्रासाः धृतकर्णाः लिखितंचित्रमिवासन् ५ २ हेसखियदास
बलः मुकुंदः मयूरपिच्छधातुपल्लवैःबद्धमल्लपरिबर्हविडंबः सन् वेणुना गाः समाह्वयति ६ तदाभग्नगतयोनद्यः वायुनीतंतत्पादाब्जरजः वयमिवस्पृहयंत्यः स्थिरोदकाः
भवंतितस्यविरहंकथंसहेमइति ७ ३ किंच हेसखि हरिः गोपैः वर्णितवीर्यः गिरितटेषुचरतिगाःयदावेणुनासमाह्वयति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदा (पुष्पफलैःसमृद्धाःअतएव)प्रणताभारेणविटपाःशाखायासांताःफलपुष्पपाणयःप्रणमंत्यइववनगतालताःस्वास्मिन्विष्णुंप्रकाशमानंसूचयंत्यइवमधुधारावृषुः स्मेतिविस्मये । तरवश्चतथा । तत्पतीनाम
पितथैवानंदइतिविस्मयइतिभावः । एतानिविष्णुव्यक्तिलक्षणानि९किंच । सरसिकमलवनेषुविहरतांपक्षिणामप्याकर्षकंतद्गीतं किंपुनरन्येषामित्याहुः । दर्शनीयेतिदर्शनीयस्तिलकोयस्यदर्शनीयानांसुंदराणां
मध्येमुख्यइतिवावनमालासुयादिव्यगंधातुलसीतस्यामधुनामत्तैरलिकुलैरलघुउच्चैरभीष्टमनुकूलंगीतमाद्रियन्आदरेणगृह्णन्यर्हिअधरेसंधितवेणुर्भवति १० तदायेसरसिसारसाहंसाःअन्येचविहंगाःचारु
णागीतेनहृतचेतसएत्यततआगत्यहरिंउपासतअभजन् । तत्समीपेउपविविशुर्वा । हंतेतिविषादे ११ मेघोपिहरिंसेवतेइत्याहुः । सहबलइति भोव्रजदेव्योगोप्यःसहबलःसरामःकृष्णःस्रग्भिःनिर्मिताभ्यामवतं
साभ्यांकर्णभूषणाभ्यांविलासोयस्य । यद्वा मुक्ताफलस्रगापीडेनविलासोयस्येति । क्षितिभृतःसानुषुगिरेस्तटेषुवर्तमानःस्वयंजातहर्षोविश्वंहर्षयन्यदावेणुरवेणोपरंभतिनिनादयतिनादेनपूरयतीत्यर्थः १२
तदामेघःमहतःश्रीकृष्णस्यातिक्रमणेनशंकितंचेतोयस्यसःनपुनरुपरिअतियाति । नचोच्चैर्गर्जति । किंतु तत्रैवस्थितःसन्वेणुरवमनुमंदंमंदंगर्जति । किंचसुहृदंविश्वार्तिहरणादिसाम्यात् (वर्णसाम्याद्वा)
सुहृत्सखा (कृष्णः) तंसुमनोभिरभ्यवर्षत् । अदृश्यैर्देवैःक्रियमाणंकुसुमवर्षंमेघेकल्पयित्वोक्तंतुषारोवाकुसुमतयाकल्पितःसएववादेवतारूपोभ्यवर्षीदिति । प्रतपादातपात्त्रायतइतिप्रतपत्रंछत्रंतच्छाययाकु
र्वन्निति १३ अपिचमहदेतदाश्चर्यमित्याहुः विविधेति । हेसतियशोदेतवसुतोनानागोपक्रीडासुविदग्धोनिपुणःवेणुवाद्यविषयेनिजैवशिक्षायासुताःस्वोत्प्रेक्षितानत्वन्यतःश्रुताइत्यर्थःस्वरजातीर्निषादर्षभादि
स्वरालापभेदान्अनयत्उन्नीतवान् १४

॥१४६॥

श्लोकाः ९/१४

वनलतास्तरवआत्मनिविष्णुंव्यंजयंत्यइवपुष्पफलाढ्याः ॥ प्रणतभारविटपामधुधाराःप्रेमहृष्टतनवःससृजुःस्म ९ दर्शनीयतिलकोवनमालादिव्यगंधतुल
सीमधुमत्तैः ॥ अलिकुलैरलघुगीतमभीष्टमाद्रियन्यर्हिसंधितवेणुः १० सरसिसारसहंसविहंगाश्चारुगीतहृतचेतसएत्य ॥ हरिमुपासततेयतचित्ताहं
तमीलितदृशोधृतमौनाः ११ सहबलःस्रगवतंसविलासःसानुषुक्षितिभृतोव्रजदेव्यः ॥ हर्षयन्यर्हिवेणुरवेणजातहर्षउपरंभतिविश्वम् १२ महदतिक्रमण
शंकितचेतामंदमंदमनुगर्जतिमेघः ॥ सुहृदमभ्यवर्षत्सुमनोभिश्छाययाचविदधत्प्रतपत्रम् १३ विविधगोपचरणेषुविदग्धोवेणुवाद्यउरुधानिजशिक्षाः ॥
तवसुतःसतियदाधरबिंबेदत्तवेणुरनयत्स्वरजातीः १४

चूर्णिका

तदातरवः वनलताश्चस्वस्मिन् विष्णुंव्यंजयंत्यइवपुष्पफलाढ्याः संतः मधुधाराः ससृजुः स्म तस्य ९ ४ किंच हेसखियदादर्शनीयतिलकः कृष्णः भ्रमराणांउच्चैर्गी ॥१४६॥
तंआद्रियन्संधितवेणुर्भवति १० तदासरसिसारसहंसविहंगाः गीतहृतचेतसः संतः एत्यमौनंधृत्वाहरिंउपासतेतस्य ११ ५ किंच भोव्रजदेव्यः यदाकृष्णः सरामः स्रग
वतंसविलासः गिरितटेषुवर्तमानः सन् विश्वंहर्षयन् वेणुनादेनविश्वंपूरयति १२ तदामेघःमहदतिक्रमणशंकितचेताः मंदंमंदंगर्जतितथापुष्पैःवर्षतिछाययाचछत्रंविदधा
तितस्यविरहं० १३ ६ किंच हेयशोदेतवसुतः नानागोपक्रीडासुनिपुणः सन् यदा अधरबिंबेदत्तवेणुः स्वरजातीः अनयत् १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्ताः स्वरजातीः सवनशः मंद्रमध्यमतारभेदेन यतो गतिध्वनिरागतस्तत्र आनताकंधराचित्तं च येषां ते उपधार्य सम्यगाकर्ण्य कवयः कोविदा अपि नानिश्चितं तत्त्वं तद्भेदो यैस्ते कश्मलं मोहं ययुरिति १५ अस्माकं तु मोहं किं ब्रूम इत्याहुः निजपदेति । ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैर्निजानि पदान्येवाब्जदलानि तैर्व्रजभुवः खुरतोदं खुराक्रमणव्यथां शमयन् वर्ष्मणा धुर्यो गजस्तद्वद्गतिर्यस्य सः कृष्णो वादितवेणुः सन् यद्व्रजति १६ तेन निमित्तेन सविलासवीक्षणेनार्पितो मनोभववेगो यासु ता वयं कुजा वृक्षास्तेषां गतिं गमिताः सत्यः मोहेन न विदामः कबरं वा वसनं वेति १७ किंच । मणिधरः मणीन् ग्रथितवान् गोगणनार्थं धरतीति मणिधरः क्वचित्प्रदेशे मणिभिस्तैरासंमताद्गाः गणयन् तथा दयितगंधाया तुलसीतस्या मालया सहवर्तमानः प्रणयिनः प्रियस्यानुचरस्यांसे भुजं प्रक्षिपन् यत्र यदा कदाचिदगायत १८ तदा क्वणितवेणुरवेण वंचितान्यपहृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य गृहिण्यो भार्याः गुणगणार्णं गुणगणसमुद्रं कृष्णमनुगत्य प्राप्य ताः कृष्णमन्वसत अन्वासत अन्ववर्ततइत्यर्थः कुतः यतो विमुक्ता गृहाशायाभिस्ताः गोपिका इव ता अपि ह्येवमेवान्वासतेति १९ तदेवं वृंदावनप्रदेशेषु क्रीडित्वा सायाह्ने गोधनानि परावृत्य यमुनायां क्रीडतस्तस्य सौभाग्यमनुवर्णयंति । कुंदेति । गोपीनां उत्सवाय कुंददामभिः कृतः कौतुकेन उत्सवे नवेषो ऽलंकारो येन सः । हे अनघे यशोदे तव वत्सः पुत्रः नंदसूनुः कृष्णः यद्वा सहैव बह्व्यः कथयंत्यः काश्चित्तव वत्स इति काश्चन नंदसूनुरिति चाहुः नर्मदः हर्षदः सन् यदा विजहार क्रीडति स्म २० तदा मलयजस्पर्शेन मलयजस्य चंदनस्येव सुरभिः शीतलश्च यः स्पर्शस्तेन तं कृष्णं मानयन् अनुकूलं यथा तथोपवाति वीजयति । यद्वा मलयजो दक्षिणो वायुः. यद्वा मलयजस्य कृष्णेन स्वांगेनुलिप्तस्य चंदनस्य स्पर्शेन मानयन्निति किंच वंदिन इव स्तावकाः संतः गंधर्वादीनां गणा वाद्यगीतपुष्पवर्षादिभिः परिवव्रुः परितउपासत २१

श्लोकाः १९/२१

सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥ कवय आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्त्वाः १५ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवः शमयन् खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः १६ व्रजति तेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥ कुजगतिं गमिता न विदामः कश्मलेन वसनं कबरं वा १७ मणिधरः क्वचिदागणयन् गा मालया दयितगंधतुलस्याः ॥ प्रणयिनो ऽनुचरस्य कदांसे प्रक्षिपन् भुजमगायत यत्र १८ क्वणितवेणुरववंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः १९ कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायाम् ॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार २० मंदवायुरुपवात्यनुकूलं मानयन् मलयजस्पर्शेन ॥ बंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः परिवव्रुः २१

चूर्णिका

तदा तच्छ्रुत्वा शक्रशर्वब्रह्ममुख्याः देवाः नतकंठचित्ताः संतः अनिश्चिततत्त्वाः मोहं ययुः तस्य॰ १५ ७ हे सखि श्रीकृष्णः ध्वजादिचिह्नितैः स्वपदाब्जदलैः व्रजभुवः खुरतोदं शमयन् यर्हि वादितवेणुः सन् व्रजति १६ तदा तद्वीक्षणार्पितकामवेगाः वयं वृक्षगतिं गताः सत्यः मोहेन कबरं वसनं वा न विदामः त॰ १७ ८ किंच श्रीहरिः क्वचिद्देशे गोगणनार्थं मणिधरः सेवकांसे भुजं स्थाप्य यदा अगायत १८ तदा क्वणितवेणुरववंचितचित्ताः कृष्णहरिण्यः वयमिव त्यक्तगृहाशाः सत्यः कृष्णं अन्वासत तद्विरहे॰ १९ ९ किंच हे सखि नंदसूनुः गोपगोधनवृतः यदा यमुनायां विजहार २० तदा वायुः मलयजस्पर्शेन तं मानयन् अनुवाति किंच तदा गंधर्वादिगणाः वाद्यगीतपुष्पवर्षादिभिः परितः उपासितस्य॰ २१ १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 आयांतमालोक्य हृष्यंत्यःपरस्परमूचुः वत्सलइतिव्रजस्यगवांच । यद्वा व्रजेनिबद्धानांगवांअनुकंप्यानामस्माकमित्यर्थः वत्सलो हितकृत् कुतः यद्यस्मादगधःअगं धरतीतिगिरिगोवर्धनोद्धरणःबहुशोरक्षण
स्योपलक्षणमेतत् । वृद्धैर्ब्रह्मादिभिःपर्यीतिसेव्यमेतत् । शीघ्रमागंतुंनददतिहिते । सर्वैर्वंद्यमानचरणइत्यर्थःउपोह्य एकीकृत्य गीतयुक्तोवेणुर्यस्य २२ (अनुगैर्गोपालैरनुवेणु ईडिताकीर्तिर्यस्यसः) श्रमयुं
टीका क्तयापि कांत्या नेत्राणां हर्षमुन्नयन् उच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ताः स्रजो यस्य । सुहृदामस्माकंआशिषोमनोरथस्यदित्सयादातुमिच्छयादेवक्याजठरेभवतीतितथासएवोडुराजश्चंद्रोनिर्वृतिहे
तुत्वेन । सएषएतीति २३ अतिसंभ्रमेणकाश्चित्समीपमायांतंकथयंति मदेति । ईषन्मदेनविघूर्णितेविह्वलितेलोचनेयस्यसः । बदरपांडुवदनःईषत्पक्वबदरवत्पांडुरंवदनंयस्यसः । अत्रहेतुःकनककुंड
लयोःलक्ष्म्याकांत्यामृदूकोमलौगंडौयस्मिंस्तद्वदनंमंडयन्कोमलंगंडस्थलंवाशोभयन्निति २४ यदुपतिरिति देवकीजठरभूरिति च "प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मज" इत्यादिगर्गवाक्यप्रसिद्धत्रो
 क्तम् । यद्वा "सखउदेयिवान्सात्वतांकुले" इतिवत्ज्ञात्वाकाश्चिद्वदंतीति । गजेंद्रस्येवगतिर्यस्यचंद्रइवप्रसन्नवक्त्रोव्रजगवामस्माकंअनंतंदिनतापंचशमयन् उपयाति एषसमीपमायातीति २५ एवंविरहदुःखे
नापितुअहोकृष्णलीलाएवगायंत्यःतस्मिन्चितंचेतनाजीवितंयासांताः तस्मिन्नेवमनःसंकल्परूपंयासांताःअतोमहानुदयउत्सवोयासांताःअहस्सुरेमिरे २६ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कं
धेटीकायांपंचत्रिंशोध्यायः ॥ ३५ ॥ ॥ ७ ॥ ॥ षट्त्रिंशेनिहतेरिष्टेनारदोक्त्यावलाच्युतौ । वसुदेवसुतौज्ञात्वाकंसोऽक्रूरमथादिशत् ॥ १ ॥ गोपरिरासांतरायातंशंखचूडंनिहत्यसः । अ
हन्गोपीमहानंदासंदुष्टमरिष्टकम् ॥ २ ॥ एवंदेवगंधर्वादिगीतनृत्यवाद्यकुसुमवर्षादिभिः कृष्णंप्राप्तंहृष्ट्वाव्रजस्यपरमोत्सवेवर्तमानेतद्विरुद्धार्थांतराधिकारार्थंअथशब्दः तर्हितदावृषभाकृतिरसुरः । (अरिष्टसं
ज्ञकः) तंवर्णयति सार्धत्रयेण । महांतौककुत्कायौयस्यसः । खुरैर्विदारितांमहींकंपयन् १

वत्सलोव्रजगवांयदगध्रोवंद्यमानचरणःपथिवृद्धैः॥ कृत्स्नगोधनमुपोह्यदिनांतेगीतवेणुरनुगेडितकीर्तिः२२उत्सवंश्रमरुचापिदृशीनामुन्नयन्खुररजश्छुरितस्र
क् ॥ दित्सयैतिसुहृदाशिषएषदेवकीजठरभूरुडुराजः २३ मदविघूर्णितलोचनईषन्मानदःस्वसुहृदांवनमाली ॥ बदरपांडुवदनोमृदुगंडंमंडयन्कनककुंड
ललक्ष्म्या २४ यदुपतिर्द्विरदराजविहारोयामिनीपतिरिवैषदिनांते ॥ मुदितवक्त्रउपयातिदुरंतंमोचयन्व्रजगवांदिनतापम् २५ ॥ श्रीशुकउवाच ॥ एवंव्रज
स्त्रियोराजन्कृष्णलीलानुगायतीः ॥ रेमिरेऽहस्सुतच्चित्तास्तन्मनस्कामहोदयाः २६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचत्रिंशोध्यायः ३५ ॥ ७ ॥
॥ श्रीशुकउवाच ॥ अथतर्ह्यागतोगोष्ठमरिष्टोवृषभासुरः ॥ महींमहाककुत्कायःकंपयन्खुरविक्षताम् १

चूर्णिका किंच हेसखियदाव्रजगवांवत्सलः पथिवृद्धैः ब्रह्मादिभिः वंद्यमानचरणः दिनांतेसर्वंगोधनंअपोह्यगीतवेणुःसन् २२ खुररजश्छुरितस्रक् नः दृशांहर्षंप्रापयन् तथानः
सुहृदांआशिषोदित्सयाअयंएतीतिपश्य तस्य ०२३ ११ किंच हेसखिश्रीकृष्णः मदविघूर्णितनेत्रः बदरपांडुवदनःउदितवक्त्रः दिनांतेव्रजेगोतुल्यानांनः दिनतापंमो
चयन्समीपंआयातीतितंपश्य १२ एवंव्रजस्त्रियोराजन्कृष्णलीलानुगायतीः रेमिरेहस्सुतच्चित्तास्तन्मनस्कामहोदयाः २४ २५ २६ ॥ ॥ इतिदशमेपंचत्रिंशः ॥ ३५ ॥
॥ श्रीशुकउवाच ॥ हेराजन्एवंव्रजेउत्सवेवर्तमानेतदाव्रजंवृषभाकृतिः अरिष्टासुरः खुरैः विदारितांभुवंकंपयन् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३६॥

रंभमाणःवृषभजातिशब्दंकुर्वन् । विलिखन्विदारयन् । उद्यम्यऊर्ध्वंकृत्वावप्राणितटानिउत्क्षिपन् २ किंचित्किंचित्शकृत्मध्येमध्येईषत्पुरीषंमुंचन्तथामूत्रमुत्सृजन्स्तब्धलोचनःअनिमिषनेत्रः यस्य ध्वनिनाआकर्णितेनगवांनारीणांच ३ तत्र"आचतुर्थाद्भवेत्स्रावःपातःपंचमषष्ठयोः । अतऊर्ध्वंप्रसूतिःस्या"दितिविभागः । ककुदि । (शृंगाकारे) गलपृष्ठमांसपिंडेअचलोयमितिभ्रांत्यावर्षंतीत्यर्थः । घनोहिप्रायेणगिरौवर्षति । तीक्ष्णेशृंगाग्रेयस्यतंवीक्ष्य ४ ५ कृष्णकृष्णरक्षेति ६ (उपाह्वयत्संबोधयामास त्वद्विधानांबलदर्पस्यहंताहंअतोमांप्रत्याहीति) ७ इत्येवंवदन् । आस्फोट्यकरतलेनबाहु माहत्यतेनतलशब्देनकोपयन् ८ भुजाभोगभुजाभुजःसएवभोगस्तंसर्पदेहाकारंभुजमित्यर्थः । स्वयमच्युतःअन्यान्दुष्टान्हरतीतिहरिः उद्यताऊर्ध्वंगच्छत्रापुच्छेनभ्रमंतोमेघायस्मात्सः (उपाद्रवत्उपाग मत्) ९ (आगमनप्रकारमाह अग्रेति) अग्रे (पुरतः) न्यस्तेविषाणाग्रेयेनसः । स्तब्धेअसृक्तुल्येलोचनेयस्यसः । कटाक्षिप्यकटाक्षेगतिर्यङ्निरीक्ष्येत्यर्थः (तूर्णमागतः) १० प्रत्यपोवाहप्रतिलोमं
॥१४९॥ व्यनुदत्त ११ अपविद्धःअपक्षिप्तःआपतत्आद्रवत् । (आईषत्)स्विन्नानिस्वेदयुक्तानिसर्वांगानियस्यसः । क्रोधमूर्छितःक्रोधेनव्याप्तः १२

श्लोकाः २/१२

रंभमाणःखरतरंपदाचविलिखन्महीम् ॥ उद्यम्यपुच्छंवप्राणिविषाणाग्रेणचोद्धरन् २ किंचित्किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्धलोचनः ॥ यस्यनिर्ह्रादिते नांगनिष्ठुरेणगवांनृणाम् ३ पतंत्यकालतोगर्भाःस्रवंतिस्मभयेनवै ॥ निर्विशंतिघनायस्यककुद्यचलशंकया ४ तंतीक्ष्णशृंगमुद्वीक्ष्यगोप्योगोपाश्चतत्रसुः ॥ पशवोदुद्रुवुर्भीताराजन्संत्यज्यगोकुलम् ५ कृष्णकृष्णेतितेसर्वेगोविंदंशरणंययुः ॥ भगवानपितद्वीक्ष्यगोकुलंभयविद्रुतम् ६ माभैष्टेतिगिराश्वास्यवृषासु रमुपाह्वयत् ॥ गोपालैःपशुभिर्मंदत्रासितैःकिमसत्तम ७ बलदर्पहाहंदुष्टानांत्वद्विधानांदुरात्मनाम् ॥ इत्यास्फोट्याच्युतोऽरिष्टंतलशब्देनकोपयन् ८ सख्युरंसेभुजाभोगंप्रसार्यावस्थितोहरिः ॥ सोप्येवंकोपितोरिष्टःखुरेणावनिमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघःक्रुद्धःकृष्णमुपाद्रवत् ९ अग्रन्यस्तविषा णाग्रःस्तब्धासृग्लोचनोऽच्युतम् ॥ कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोशनिर्यथा १० गृहीत्वाशृंगयोस्तंवाअष्टादशपदानिसः ॥ प्रत्यपोवाहभगवान्गजःप्र तिगजंयथा ११ सोपविद्धोभगवतापुनरुत्थायसत्वरः ॥ आपतत्स्विन्नसर्वांगोनिःश्वसन्क्रोधमूर्छितः १२

चूर्णिका

तीक्ष्णशब्दंकुर्वन्महींपदाविलिखन्पुच्छंउद्यम्यतटानिशृंगाग्रेणउद्धरन् २ किंचित् शकृन्मूत्रमुत्सृजन्सन्प्राप्तः यस्यशब्देन गवांनृणांगर्भा'अकालेपतंतिस्रवंति यस्यककुदिपर्व तशंकयामेघाः विशंति ३ ४ एवंतीक्ष्णशृगंदैत्यंदृष्ट्वागोप्योगोपाः तत्रसुः पशवः व्रजंहित्वादुद्रुवुः ५ ततः सर्वेगोपाः कृष्णकृष्णेतिगोविंदंशरणंययुः भगवान् भयविद्रुतंव्रजं दृष्ट्वा ६ माभैष्टेतिगिराआश्वास्यतंआह्वयत् हेमंदत्रासितैः गोपैः पशुभिः किम् ७ त्वादृशानांदुष्टानांबलदर्पहाअहमास्मिइत्युक्त्वाकरतलेनबाहुमाहत्यतलशब्देनतंकोपय न् ८ सख्युः अंसेभुजंस्थाप्यहरिः स्थितः एवंकोपितोदैत्यःखुरेणभुवंउल्लिखन्क्रुद्धः सन् कृष्णं उपाद्रवत् ९ अग्रन्यस्तशृंगाग्रः सः कटाक्षेगवक्रंदृष्ट्वाइंद्रमुक्तः अश निरिवप्राद्रवत् १० ततः कृष्णःतंशृंगयोःधृत्वाअष्टादशपदानिपश्चात् अपोवाह ११ गजंप्रतिगजइव एवंअपविद्धः सः पुनःउत्थाय निःश्वसन्कृष्णंआद्रवत् १२ ॥१४९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(शृंगयोर्निगृह्यभूतलेनिपात्य आर्द्रंवस्त्रमिव पदासमाक्रम्यनिष्पीडयामास) विषाणंकृत्वाउत्कृत्यउत्पाट्यतेनैवजघानसचअपतत् १३ मूत्रशकृत्मूत्रंचशकृच्चएकवद्भावःतदुभयंसमुत्सृजन्नित्यर्थःपादान्क्षि
पन्इतस्ततश्चालयन्अनवस्थितेक्षणःप्रचलितनेत्रःकृच्छ्रंकष्टंजगाम अथ निर्ऋतेर्मृत्योःक्षयंनिवासंजगामकृच्छ्रंयथाभवतितथामृतइतिवा १४ नयनोत्सवःनयनानांमूर्तिमानुत्सवः (स्वजातिभिर्गोपालैः)
१५ कामंव्रजेवसंतंतंकंसस्यांतंगतस्मृतिम् । नारदःस्मारयामासकंसदूतगिरेवतु ॥ तदाहअरिष्टइति । देवदर्शनःदेवर्षिःयद्वाएवंकृतेएवंभविष्यतीतिसाक्षाद्देवस्येवदर्शनंज्ञानंयस्यसः १६ आप्तेनेवनारदे
नोक्तमाह । यशोदायाइति । देवक्याअष्टमगर्भत्वेनप्रसिद्धांकन्यांयशोदायाःसुतामाह । यशोदायाःसुतत्वेनप्रसिद्धंकृष्णंतुदेवक्याःसुतमाह रोहिणीपुत्रंरामंदेवक्याःसप्तमंसुतमाह । यद्वानंदसुतत्वेनप्र
॥१५०॥ सिद्धंरामंवसुदेवभार्यायारोहिण्याःपुत्रमाह । वसुदेवसुतौचेत्कथंव्रजंगतौतत्राह । वसुदेवेनेति । तेतवपुरुषाःसेवकाः १७ (निशातंतीक्ष्णम्) १८ निवारितइतिहत्वेवसुदेवेतौपलायेताम् । अतोबध्यता
मितिमंत्रंवदतानारदेनेति १९ २० २१ २२ मह्यंमममनिदर्शितःधात्रानारदेनवा । व्रजंगंतुमुद्यतौतावाह । भवद्भ्यामिति २३

श्लोकाः

तमापतंतंसनिगृह्यशृंगयोःपदासमाक्रम्यनिपात्यभूतले ॥ निष्पीडयामासयथार्द्रमंबरंकृत्वाविषाणेनजघानसोऽपतत् १३ असृग्वमन्मूत्रशकृत्समुत्सृजन्
क्षिपंश्चपादाननवस्थितेक्षणः ॥ जगामकृच्छ्रंनिर्ऋतेरथक्षयंपुष्पैःकिरंतोहरिमीडिरेसुराः १४ एवंककुद्मिनंहत्वास्तूयमानःस्वजातिभिः ॥ विवेशगोष्ठं
सबलोगोपीनांनयनोत्सवः १५ अरिष्टेनिहतेदैत्येकृष्णेनाद्भुतकर्मणा ॥ कंसायाथाहभगवान्नारदोदेवदर्शनः १६ यशोदायाःसुतांकन्यांदेवक्याःकृष्णमे १३/२३
व च ॥ रामंचरोहिणीपुत्रंवसुदेवेनबिभ्यता ॥ न्यस्तौस्वमित्रेनंदेवैयाभ्यांतेपुरुषाहताः १७ निशम्यतद्भोजपतिःकोपात्प्रचलितेंद्रियः ॥ निशातमसिमाद
त्तवसुदेवंजिघांसया १८ निवारितोनारदेनतत्सुतौमृत्युमात्मनः ॥ ज्ञात्वालोहमयैःपाशैर्बबंधसहभार्यया १९ प्रतियातेतुदेवर्षौकंसआभाष्यकेशिनम् ॥
प्रेषयामासहन्येतांभवतारामकेशवौ २० ततोमुष्टिकचाणूरशलतोशलकादिकान् ॥ अमात्यान्हस्तिपांश्चैवसमाहूयाहभोजराट् २१ भोभोनिशम्यतामे
तद्वीरचाणूरमुष्टिकौ ॥ नंदव्रजेकिलासातेसुतावानकदुंदुभेः २२ रामकृष्णौततोमह्यंमृत्युःकिलनिदर्शितः ॥ भवद्भ्यामिहसंप्राप्तौहन्येतांमल्ललीलया २३

चूर्णिका

तंप्राप्तंकृष्णः भूतलेनिपात्यआर्द्रांबरमिवपीडयामासशृंगेगचजघान तदासः अपतत् १३ ततः सः रक्तंवमन्पादान्क्षिपन्शकृन्मूत्रंसृजन्मृत्योःक्षयंजगामततोदेवाः
पुष्पवृष्टिंकृत्वाहरिंईडिरे १४ एवंदैत्यंहत्वासबलः कृष्णः गोष्ठंविवेश १५ एवंकृष्णेनदैत्येहतेनारदः एत्य कंसायाह १६ अष्टमगर्भत्वेनप्रसिद्धांकन्यांयशोदायाः सुतांआह
यशोदासुतत्वेनप्रसिद्धंकृष्णंदेवकीसुतमाह रोहिणीसुतंरामंदेवक्याः सप्तमंसुतमाह १७ तौवसुदेवेनस्वमित्रेनंदेन्यस्तौयाभ्यांतेपुरुषाहताः १८ तच्छ्रुत्वाकंसः वसुदेवंहं
तुंअसिंजगृहेतदानारदेननिवारितः १९ ततः कंसः तौस्वमृत्यूज्ञात्वावसुदेवंदेवकींचलोहमयपाशैःबबंध एवंकृत्वानारदेगतेकंसः केशिनंआभाष्य २० त्वयारामकृष्णौ ॥१५०॥
हन्येतांइतिप्रेषयामास ततः कंसः मुष्टिकचाणूरशलतोशलकादीन् २१ अमात्यान्हस्तिपांश्चाहूयआहभोभोचाणूरादयः मेवचः श्रूयताम् २२ नंदव्रजेवसुदेवसुतावासाते
ताभ्यांमह्यंमृत्युर्विधात्रादर्शितः २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मंचाः (आसनार्थं) उत्तुंगानिस्तंभादिरचितस्थानानि (मल्लरंगसमाश्रिताःपुरवासिनोदेशवासिनश्चसर्वेमल्लानांस्वैरक्रीडांपश्यंतु) २४ (हेमहामात्र हस्तिपकहेभद्र कुवलयापीडसंज्ञकोहस्ती) अहितौ शत्रू २५ (मेध्यान्यागार्हान्) मीढुषेवरदाय २६ अर्थतंत्रज्ञःअर्थशास्त्रमेवजानातीत्यर्थः (तंत्रज्ञःततोऽक्रूरमाहूय) २७ दानपतेहेअक्रूर । मैत्रंमित्रकृत्यंत्वयाक्रियताम् । त्वत्तोन्यआदृतःसादरोहि ततमश्चनविद्यते २८ २९ ३० (इति) तौमेमृत्युर्नितरांसृष्टःवैकुंठसंश्रयैःदेवैः ३१ किंततस्तत्राह । घातयिष्यइति । कालकल्पेनमृत्युतुल्येन । वैद्युतोपमैरशनितुल्यैः ३२ ३३ ३४ (नष्टकंटकानष्टशत्रुः । हेमित्र । ननुकतिपयसुहृद्वधेननष्टकंटकाकथंस्यात्तत्राह । जरासंधइति) ३५ ३६ द्रष्टुंचेति (तत्स्वास्ति) ३७

॥१५१॥ श्लोकाः २४/३७

मंचाःक्रियंतांविविधामल्लरंगपरिश्रिताः ॥ पौराजानपदाःसर्वेपश्यंतुस्वैरसंयुगम् २४ महामात्रत्वयाभद्ररंगद्वार्युपनीयताम् ॥ द्विपःकुवलयापीडोजहितेनममाहितौ २५ आरभ्यतांधनुर्यागश्चतुर्दश्यांयथाविधि ॥ विशसंतुपशून्मेध्यान्भूतराजायमीढुषे २६ इत्याज्ञाप्याथतंत्रज्ञआहूययदुपुंगवम् ॥ गृहीत्वापाणिनापाणिंततोऽक्रूरमुवाचह २७ भोभोदानपतेमह्यंक्रियतांमैत्रमादृतः ॥ नान्यस्त्वत्तोहिततमोविद्यतेभोजवृष्णिषु २८ अतस्त्वामाश्रितःसौम्यकार्यगौरवसाधनम् ॥ यथेंद्रोविष्णुमाश्रित्यस्वार्थमध्यगमाद्विभुः २९ गच्छनंदव्रजंतत्रसुतावानकदुंदुभेः ॥ आसातेताविहानेनरथेनानयमाचिरम् ३० निसृष्टःकिलमेमृत्युर्देवैर्वैकुंठसंश्रयैः ॥ तावानयसमंगोपैर्नंदाद्यैःसाभ्युपायनैः ३१ घातयिष्यइहानीतौकालकल्पेनहस्तिना ॥ यदिमुक्तौततोमल्लैर्घातयेवैद्युतोपमैः ३२ तयोर्निहतयोस्तप्तान्वसुदेवपुरोगमान् ॥ तद्बंधून्निहनिष्यामिवृष्णिभोजदशार्हकान् ३३ उग्रसेनंचपितरंस्थविरंराज्यकामुकम् ॥ तद्भ्रातरंदेवकंचयेचान्येविद्विषोमम ३४ ततश्चैषामहीमित्रभवित्रीनष्टकंटका ॥ जरासंधोममगुरुर्द्विविदोदयितःसखा ३५ शंबरोनरकोबाणोमय्येवकृतसौहृदाः ॥ तैरहंसुरपक्षीयान्हत्वाभोक्ष्येमहींनृपान् ३६ एतज्ज्ञात्वाऽऽनयक्षिप्रंरामकृष्णाविहार्भकौ ॥ धनुर्मखनिरीक्षार्थंद्रष्टुंयदुपुरश्रियम् ३७

चूर्णिका

इहप्राप्तौतौभवद्भ्यांमल्ललीलयाहन्येतांविविधामंचाः क्रियंतां २४ सर्वेपौराजानपदाः संयुगंपश्यंतु हेमाहामात्रत्वयारंगद्वारि कुवलयापीडः द्वीपआनीयतां २५ तेन तौ जहि २६ किंच चतुर्दश्यांधनुर्यागः आरभ्यतां तत्रपशून् भूतराजायविशसंतु एवं आज्ञाप्य कंसः अक्रूरं आहूय पाणिना पाणिं गृहीत्वा आह २७ हे अक्रूरममाभीष्टंक्रियताम् त्वत्तः अन्यः भोजवृष्णिषुहिततमोनास्ति २८ अतस्त्वांकार्यार्थं आश्रितोस्मि यथेंद्रः विष्णुमाश्रित्यस्वार्थं आप्नोति २९ अतः नंदव्रजंगच्छ तत्रवसुदेवसुतौ आसाते तौ अनेनरथेन आनय ३० मेताभ्यांदेवैः मृत्युः सृष्टः अतः तौसाभ्युपायनंदादिगोपैः समं आनय ३१ इहानीतौतौकालकल्पेनहस्तिनाघातयिष्ये यदिततो मुक्तौतर्हि मल्लैर्घातयिष्ये ३२ एवंतयोर्हतयोः सतोः तद्बंधून्वसुदेवमुखान् वृष्णिभोजादीन् ३३ तथावृद्धं राज्यकामुकं मेपितरं तद्बंधुंदेवकंचयेन्येमद्विषः तानापिहनिष्यामि ३४ ॥१५१॥ ततश्चेयंमहीनष्टकंटकाभविष्यति जरासंधः ममगुरुः द्विविदः नरकः शंबरः बाणः एतेमेसखायः तैरहंदेवपक्षीयन्नृपान् हत्वा महीं भोक्ष्ये ३५ ३६ हे अक्रूरएतत् ज्ञात्वाधनुर्मखावलोकार्थंयदुपुरश्रियंचद्रष्टुंतौशीघ्रं आनय ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मनीषितंविचारितंसम्यक्सम्यक् । स्वस्यावचंमरणंतन्मार्जनंतथाप्येतावानभिनिवेशोनकार्यइतिभविष्यत्सूचयन्नाह ।' सिद्ध्यसिद्ध्योरिति ३८ पुरुषकारस्यव्यभिचारमाह मनोरथानिति ३९ ४० ॥
इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांषट्त्रिंशोध्यायः ॥ ३६ ॥ ॥ ७ ॥ ॥ सप्तत्रिंशेहतेकेशिन्यच्युतोभाविकर्मभिः । नारदेनस्तुतःक्रीडन्व्योमासुरमथावधीत् ॥ १ ॥ वृषवेषासु
रंयद्वत्केशिनंहयवेषिणम्। कंसप्राणसमंहत्वाकंसंव्यसुमिवाकरोत् ॥२॥ केशीतिवति । कंसप्रेषितःसकेशीतुनंदस्यव्रजंजगामेतिद्वितीयेनान्वयः । महाहयःसन्महींनिर्जरयन्श्लथयन् । विदारयन्नित्यर्थः ।
सटाभिःकेसरैरवधूतानिइतस्ततःक्षिप्तानिअभ्राणिविमानानिचतैःसंकीर्णंनभःकुर्वन् । हेषितैरश्वजातिशब्दैर्भीषितमखिलंविश्वंयेनतम्(विकटमास्यविवरंयस्यसः) १ तद्धेषितैः । तैरतिनिष्ठुरैर्हेषितैःवालैःपु
च्छलोमभिःविघूर्णिताःपरिभ्रामिताअंबुदायेनतम्। आजौसंग्रामार्थम्। आत्मानंकृष्णंअग्रणीःपुरतोनिर्गतःसन्नित्यर्थः। उपाह्वयत्स्वसमीपमाजुहाव। सचकेशीतन्निशम्यमृगेंद्रवत्व्यनदत्सिंहनादमकरोदि
त्यर्थः२ ततःसकेशीतंकृष्णंनिशम्यदृष्ट्वामुखेनखंपिबन्निवमुखंव्यादायाभिमुखमभ्याजगाम । किंच । अत्यमर्षणःअतिकुपितःअत्यंतमसहमानोवा। प्रत्यक्पद्भ्यांजघान। दुरासदःअन्यैरभिभवितुमशक्यः
दुरत्ययःउग्रतःसन्दुरतिक्रमः। अत्रहेतुःचंडजवः ३ तत्हननंवंचयित्वातंचहननायप्रसारितयोःप्रत्यक्पादयोःहस्ताभ्यगृहीत्वापरिविध्यभ्रामयित्वाव्यवस्थितःतथैवस्थितोबभूव । ४

॥१५२॥

श्लोकाः ३८/४

॥ अक्रूरउवाच ॥ ॥ राजन्मनीषितंसध्र्यक्तवस्वावद्यमार्जनम् ॥ सिद्ध्यासिद्ध्योःसमंकुर्याद्दैवंहिफलभावनम् ३८ मनोरथान्करोत्युच्चैर्जनोदैवहतानपि ॥ युज्यतेहर्षशोकाभ्यांतथाप्याज्ञांकरोम्यहम् ३९ एवमादिश्यचाक्रूरंमंत्रिणश्चविसृज्यसः ॥ प्रविवेशगृहंकंसस्तथाऽक्रूरःस्वमालयम् ४० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेषट्त्रिंशोऽध्यायः ३६ ॥ ॥ ध ॥ ॥ श्रीशुकउवाच ॥ केशीतुकंसप्रहितःखुरैर्महींमहाहयोनिर्जरयन्मनोजवः ॥ सटावधूताभ्रविमानसंकुलंकुर्वन्नभोहेषितभीषिताखिलः १ "विशालनेत्रोविकटास्यकोटरोबृहद्गलोनीलमहांबुदोपमः ॥ दुराशयःकंसहितंचिकीर्षुर्व्रजंसनंदस्यजगामकंपयन्" १ तंत्रासयंतंभगवान्स्वगोकुलंतद्धेषितैर्वालविघूर्णितांबुदम् ॥ आत्मानमाजौमृगयंतमग्रणीरुपाह्वयत्सव्यनदन्मृगेंद्रवत् २ सतंनिशम्याभिमुखंमुखेनखंपिबन्निवाभ्यद्रवदत्यमर्षणः ॥ जघानपद्भ्यामरविंदलोचनंदुरासदश्चंडजवोदुरत्ययः ३ तद्वंचयित्वातमधोक्षजोरुषाप्रगृह्यदोर्भ्यांपरिविध्यपादयोः ॥ सावज्ञमुत्सृज्यधनुःशतांतरेयथोरगंतार्क्ष्यसुतोव्यवस्थितः ४

चूर्णिका

॥ अक्रूरउवाच ॥ हेकंस ते मनीषितं स्वमरणनिवर्तकंसम्यक् परंतुसिद्ध्यसिद्ध्योः समंकुर्यात् यतः फलसाधनंदैवं ३८ किंच अयंजनः दैवहतोपिमनोरथान्करोति तथापिहर्षशोकाभ्यांयुज्येत अथापिते आज्ञांकरोमि ३९ एवमादिश्यचाक्रूरंमंत्रिणश्चविसृज्यसः प्रविवेशगृहंकंसस्तथाऽक्रूरःस्वमालयम् ४० ॥ ॥ इति दशमेषट्त्रिंशः ॥ ३६ ॥ ॥ ध ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् हयाकृतिः केशीतुकंसप्रहितः खुरैः महीं विदारयन्सटाभिः इतस्ततः क्षिप्providedाभ्र विमानैः व्याप्तंनभः कुर्वन्स्वशब्दैः विश्वंभीषयन्व्रजंजगाम १ तंस्वगोकुलं हेषितैः त्रासयंतं आत्मानंयुद्धेमृगयंतं दृष्ट्वाकृष्णः पुरतोनिर्गत्यसमीपं आह्वयत् तत् श्रुत्वा दैत्यः सिंहइवननाद२ततः केशीकृष्णं दृष्ट्वा मुखेनखं पिबन्निव अभिमुखः सन् अभिजगाम ततः प्रत्यक्पद्भ्यांकृष्णंजघान ३ तद्वंचयित्वा कृष्णः तंदोर्भ्यांपादयोर्धृत्वापरिविध्यधनुःशतांतरेउत्सृज्यस्थितः गरुडः सर्पमिव ४

॥१५२॥

१ विशालनेत्रेत्ययंश्लोकःबहुपुस्तकेषुनअत्रतुटीकाकारेणापिगृहीतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१५३॥ व्यादाय मुखंप्रसार्यवेगेनहरिंपुनरापतत्प्रत्याद्रवत् । सोपिहरिःहसन्उत्तरंसव्यंभुजं निर्भयत्वेदृष्टांतःयथोरगंबिलइति ५ ६ ततःकिंतदाह । दंताइति । चर्वणायभगवद्भुजंस्पृशंतीतितथातेव्यादाने नयेविवृताः । अयोलोहंस्पृशंतीतिस्पशः यद्वा (प्राचुर्येमयट्) तप्तमयंअतितप्तंलोहादिस्पृशंतोयथेति । आमयोजलोदराख्योरोगः (उपेक्षितोऽचिकित्सितः) (सकेशीसमेधमानेनअभिवर्धमानेन) लेंडंपुरीषमुत्सृजन् (विगतप्राणःपपात) ७ कर्कटिकाफलंहिपक्वंसत्साद्यंतंविदीर्णंभवति तद्वद्विदीर्णात्तस्यदेहात् विगतप्राणात् (अपाकृष्यास्थितोदेवैरीडितः) अविस्मितोगर्वरहितःअयत्नेनहतोरिर्येनसः ८ "कंसायकृष्णमादिश्यतद्रहस्यादिपैशुनैः । कंसघातादिकृष्णस्यकार्यमावेदयन्मुनिः"। तदाह देवर्षिरित्यादिना । नचायंसूचकः किंतु सर्वसुहृदित्याह । भागवतप्रवरइति ९ अस्मद्रहस्यंवैरिणिकंसेसूचितवानिति माशंकीरित्याह । कृष्णकृष्णेत्यादिना । अयंभावः । त्वमीश्वरोभूभारदैत्यसंहारायावतीर्णोसि । अतस्तदनुरूपाचरणेनविश्वं परिपालयेति । तत्रत्वयि तावद्भयशंकैवनास्तीत्याह। अप्रमेयात्मन्अपरिच्छिन्नस्वरूप। योगेशाचिंत्यप्रभाव । जगदीश्वरविश्वनियंतः । वासुदेवसर्वभूतेषुवर्तमान । अखिलावासर्वस्याश्रय । संप्रतिसात्त्वतानांप्रवरश्रेष्ठ । प्रभोसर्वशक्ते १० कथमेवंरूपोहमितिचेदतआह । त्वमात्मेति । नहित्वंजीववत्परिच्छिन्नः किंतु सर्वभूतानामंतरःएकोनुस्यूतआत्मा । अंतरनुस्यूतत्वेदृष्टांतः। एधसांकाष्ठानामंतर्ज्योतिरिवेति । भूतेषुस्थितोपितैर्नदृश्यसइत्याह । गूढइति । अत्रहेतवः । गुहाशयःबुद्धेरप्यंतरः किंचसाक्षी । नहिसाक्षीदृश्यतेइत्यर्थः । अपिचमहापुरुषःअतःपरिच्छिन्नमतिभिर्नज्ञायसइत्यर्थः तर्हिसर्वांतरत्वेकिंप्रमाणमतआह । ईश्वरइति । नहिईश्वरंविनापरतंत्राणांजीवानांप्रवृत्तिर्घटतइत्यर्थः ११ अहमीश्वरःअन्यस्सर्वमीशितव्यमित्येतदेव कुतःअतआह । आत्मनेति । साधनांतरनिरपेक्षएव आत्माश्रयः स्वतंत्रः मायया शक्त्या भवान्गुणान्ससृजेसृष्ट्वान्।तैःसृष्टैर्गुणैरिदंविश्वंसृजसि अत्सिसंहरसिअवसिपालयसि ननुसृष्ट्यादिक्रियाषट्कारकसाध्यैवदृष्टेत्यतआह। सत्यसंकल्पइति नहिसंकल्पैकसाध्येबहिःसाधनापेक्षाविभावः अतस्त्वमीश्वरइत्युपसंहारः १२

सलब्धसंज्ञःपुनरुत्थितोरुषाव्यादायकेशीतरसाऽपतद्धरिम् ॥ सोप्यस्यवक्त्रेभुजमुत्तरंस्मयन्प्रवेशयामासयथोरगंबिले ५ दंतानिपेतुर्भगवद्भुजस्पृशस्ते श्लोकाः
केशिनस्तप्तमयस्पृशोयथा ॥ बाहुश्चतद्देहगतोमहात्मनोयथामयःसंववृधेउपेक्षितः ६ समेधमानेनसकृष्णबाहुनानिरुद्धवायुश्चरणांश्चविक्षिपन् ॥ प्रस्वि
न्नगात्रःपरिवृत्तलोचनःपपातलेंडंविसृजन्क्षितौव्यसुः ७तद्देहतःकर्कटिकाफलोपमाद्व्यसोरपाकृष्यभुजंमहाभुजः ॥ अविस्मितोऽयत्नहतारिरुत्स्मयैःप्रसूनवर्षै ५/१२
र्वर्षद्भिरीडितः ८ देवर्षिरुपसंगम्यभागवतप्रवरोनृप ॥ कृष्णमक्लिष्टकर्माणंरहस्येतदभाषत ९ कृष्णकृष्णाप्रमेयात्मन्योगेशजगदीश्वर ॥ वासुदेवाखि
लावाससात्त्वतांप्रवरप्रभो १० त्वमात्मासर्वभूतानामेकोज्योतिरिवैधसाम् ॥ गूढोगुहाशयःसाक्षीमहापुरुषईश्वरः ११ आत्मनात्माश्रयःपूर्वंमाययाससृजे
गुणान् ॥ तैरिदंसत्यसंकल्पःसृजस्यत्स्यवसीश्वरः १२

चूर्णिका

पुनः सः लब्धसंज्ञः उत्थाय मुखंव्यादाय हरिं अपतत् कृष्णोऽपितन्मुखेसव्यंभुजंबिले सर्पमिवप्रवेशयामास ५ ततः हरेर्भुजस्य स्पर्शात् तद्दंताः निपेतुः तद्देहगतो ॥१५३॥
बाहुश्चउपेक्षितो रोगइववववृधे ६ एवं एधमानेन श्रीकृष्णबाहुनारुद्धवायुः दैत्यः चरणान् क्षिपन्परिवृत्तनेत्रः लेंडंव्यसृजन् क्षितौव्यसुः पपात ७ ततः कृष्णः कर्कटिकाफलोपमात् तद्देहात् भुजंआकृष्य पुष्पवर्षैः देवैः स्तुतः सन्स्थितः ८ तावत्देवर्षिः एत्यरहसिकृष्णं इदं अभाषत ९ कृष्णकृष्णाप्रमेयात्मन्योगेशजगदीश्वर हे प्रभो १० सर्वभूतानां आत्मात्वंसाक्षी ११ त्वंमाययापूर्वं गुणान् ससृजे तैः इदंसृजसि अवसि अत्सि १२

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रस्तुतमाह । सत्वमिति । भूधर भूतानांभुवंधरंतीतिभूधराराजानस्तद्रूपाणां (दैत्यादनिांसेतूनांधर्ममर्यादानाम्) १३ (तेत्वया) १४ परश्वोहनीति । अद्यैवाक्रूरएष्यति । श्वोमथुरांगतांसि परश्वश्चाणूरादीनूतेत्वयानिहतान्द्रक्ष्यामीतिसिद्धवन्निर्देशोविज्ञापनाप्रकारविशेषः १५ तस्यानुतदनंतरंशंखादीनांशंखःपंचजनःवधंद्रक्ष्यामीतिशेषःभाविनिर्देशमात्रमेतत्नत्वानंतर्यंविवक्षितम् १६(वीरकन्यानांराजकन्यानाम् । वीर्यपराक्रमःतदेवशुल्कंजामातृदेयविशेषःतदादिलक्षणम्)१७ भार्ययाजांबवत्यासह (आदानं) स्वधामतःमहाकालपुरात्१८ (महाक्रतौराजसूयेचैद्यस्याशिशुपालस्य) १९ द्वारकामावसन्द्वारकायांचवसन्कर्ताकरिष्यति । २० अमुष्यविश्वस्यभूभारस्यवा(क्षपयिष्णुःसंहर्तातस्यतेतवत्वत्कर्तृकमित्यर्थः अक्षौहिणीनांकुरुपांडवसंबंधिनीनाम्) २१ एवंविज्ञाप्यकृताभि नंदनंभगवंतंनमस्यतिद्वयेनविशुद्धविज्ञानघनमिति।केवलज्ञानैकमूर्तिमित्यर्थः । अतएवस्वसंस्थयास्वरूपसम्यक्स्थित्यैवपरमानंदरूपयासम्यगाप्ताःसर्वेऽर्थायेनतम् । आप्तकामतोक्ता । सत्यसंकल्पतामाह । अमोघवांछितमिति । ननुवांछावेदस्तितर्हिदुर्निवारासंसृतिःअतआह स्वतेजसेति चिच्छक्त्यानित्यनिवृत्तोमायाकार्यरूपोगुणप्रवाहः (संसारः) यस्मात्तम् । अतोभगवंतंनिरतिशयैश्वर्यंईमहिशरणंव्रजेमेति २२ ननुत्रिकालज्ञस्त्वंकथंमत्प्रपंचंनजानासिजानासिचेत्कथमगुणप्रवाहंब्रवीषितत्राह त्वामिति । ईश्वरंअन्यस्यवशयितारंस्वाश्रयंअन्यस्यावश्यम् । अतआत्माधीनयामाययाविनिर्मिताअशेषविशेषामहदाद्यायादवादिरूपावाकल्पनायेनतंधुर्यंश्रेष्ठंनतोस्मीति २३

॥१५४॥

श्लोकाः १३/२३

सत्वंभूधरभूतानांदैत्यप्रमथरक्षसाम् ॥ अवतीर्णोविनाशायसेतूनांरक्षणायच १३ दिष्ट्यातेनिहतोदैत्योलीलयाऽयंहयाकृतिः ॥ यस्यहेषितसंत्रस्तास्त्यजंत्यनिमिषादिवम् १४ चाणूरंमुष्टिकंचैवमल्लानन्यांश्चहस्तिनम् ॥ कंसंचनिहतंद्रक्ष्येपरश्वोऽहनितेविभो १५ तस्यानुशंखयवनमुराणांनरकस्यच ॥ पारिजातापहरणमिंद्रस्यचपराजयम् १६ उद्वाहंवीरकन्यानांवीर्यशुल्कादिलक्षणम् ॥ नृगस्यमोक्षणंपापाद्द्वारकायांजगत्पते १७ स्यमंतकस्यचमणेरादानंसहभार्यया ॥ मृतपुत्रप्रदानंचब्राह्मणस्यस्वधामतः १८ पौंड्रकस्यवधंपश्चात्काशिपुर्याश्चदीपनम् ॥ दंतवक्रस्यनिधनंचैद्यस्यचमहाक्रतौ १९ यानिचान्यानिवीर्याणिद्वारकामावसन्भवान् ॥ कर्ताद्रक्ष्याम्यहंतानिगेयानिकविभिर्भुवि २० अथतेकालरूपस्यक्षपयिष्णोरमुष्यवै ॥ अक्षौहिणीनांनिधनंद्रक्ष्याम्यर्जुनसारथेः २१ विशुद्धविज्ञानघनंस्वसंस्थयासमाप्तसर्वार्थममोघवांछितम् ॥ स्वतेजसानित्यनिवृत्तमायागुणप्रवाहंभगवंतमीमहि २२ त्वामीश्वरंस्वाश्रयमात्ममाययाविनिर्मिताशेषविशेषकल्पनम् ॥ क्रीडार्थमभ्यात्तमनुष्यविग्रहंनतोस्मिधुर्यंयदुवृष्णिसात्वताम् २३

चूर्णिका

सः त्वंदैत्यप्रमथः रक्षसांनाशायसेतूनांरक्षणायअवतीर्णोऽसि १३ किंच हेकृष्ण अयंलीलयाहतोदैत्यः एतत् दिष्ट्या यच्छब्देन त्रस्ताः देवाः स्वर्गंत्यजंति १४ किंच चाणूरं मुष्टिकं अन्यमल्लांश्चहस्तिनंकंसंचपरश्वोहनि निहतंद्रक्ष्ये १५ किंच वीरकन्यानांविवाहं द्वारकायांपापात्नृगस्यमोक्षणं १६ १७ भार्ययासहस्यमंतकमणेरादनं महाकालपुरात् द्विजस्यमृतपुत्रदानं १८ ततः पौंड्रकवधंकाशिपुरीदीपनंदंतवक्रनिधनंराजसूये चैद्यस्यनिधनं १९ तथायानिअन्यानिवीर्याणि द्वारकांस्थित्वा त्वंकरिष्यसितान्यहंद्रक्ष्यामि २० अथकालरूपस्य अर्जुनसारथेः ते अक्षौहिणीनां निधनंद्रक्ष्यामि २१ एवंविज्ञाप्यनमस्करोति विशुद्धविज्ञानघनंभगवंतंईश्वरंयदुवृष्णिसात्वतांधुर्यंत्वांनतोऽस्मि २२ २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

२४ २५ ननुनारदेनव्योमवधोनदृष्टस्तत्कथंव्योमवधप्रसक्तिरितितत्रोच्यते प्रातरेवकेशिवधानंतरंनारदोक्तमंगीकृत्यपुनस्तथैवपशूंश्चारयताव्योमोहतः । यद्वा व्योमवधःपूर्वमेववृत्तोपिवेषधारिवधप्र
संगात्अत्रोच्यतइतिद्रष्टव्यम् । केचित्तुशंखचूडवधात्पूर्वमेवपठंति ।.तमाहएकदेति । (विजह्रुः विहरंतिस्म) २६ २७ मेषवदाचरितान्स्वयंचोरवदाचरितःसन्अपोवाह । अपकृष्यनिनाय २८ (गि
रिदर्यांगिरिगुहायां) पिदधेछादितवान् २९ शरणदआश्रयप्रदः । हरिःसिंहइव ३० ३१ पशुमारंपशुमारोयथाभवतितथाअनिश्वासमित्यर्थः ३२ भुविगोपैःस्तूयमानःउपरिवैमानिकैर्देवैरिति ३३
इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्तत्रिंशतितमोध्यायः ॥ ३७ ॥ ॥ ७ ॥ ॥ अष्टत्रिंशेयथाध्यायत्रक्रूरोगोकुलंगतः । तथैवरामकृष्णाभ्यांगृहंनीत्वाससत्कृतः ॥ १ ॥ प्रातः
॥१५५॥ केशिवधेवृत्तेद्वादश्यांनिर्गतेमुनौ।ततोव्योमेहतेऽक्रूरःसायंगोकुलमागमत् ॥२ ॥ तदेवंनारदेनकंसवधादिकार्येविज्ञापितेश्रीकृष्णोमथुरांगंतुमुद्यतोवर्तते तावदक्रूरोपिगोकुलमगादित्याह अक्रूरोपीति १ २

॥ श्रीशुकउवाच ॥ एवंयदुपतिंकृष्णंभागवतप्रवरोमुनिः ॥ प्रणिपत्याभ्यनुज्ञातोययौतद्दर्शनोत्सवः २४ भगवानपिगोविंदोहत्वाकेशिनमाहवे ॥ पशूनपा
लयत्पालैःप्रीतैर्व्रजसुखावहः २५ एकदातेपशून्पालाश्चारयंतोऽद्रिसानुषु ॥ चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः २६ तत्रासन्कतिचिच्चोराःपालाश्चक श्लोकाः
तिचिन्नृप ॥ मेषायिताश्चतत्रैकेविजह्रुरकुतोभयाः २७ मयपुत्रोमहामायोव्योमोगोपालवेषधृक् ॥ मेषायितानपोवाहप्रायश्चोरायितोबहून् २८ गि २४/२
रिदर्यांविनिक्षिप्यनीतंनीतंमहासुरः ॥ शिलयापिदधेद्वारंचतुःपंचावशेषिताः २९ तस्यतत्कर्मविज्ञायकृष्णःशरणदःसताम् ॥ गोपान्नयंतंजग्राहवृकंह
रिरिवौजसा ३० सनिजंरूपमास्थायगिरींद्रसदृशंबली ॥ इच्छन्विमोक्तुमात्मानंनाशक्नोद्ग्रहणातुरः ३१ तंनिगृह्याच्युतोदोर्भ्यांपातयित्वामहीतले ॥
पश्यतांदिविदेवानांपशुमारममारयत् ३२ गुहापिधानंनिर्भिद्यगोपान्निःसार्यकृच्छ्रतः ॥ स्तूयमानःसुरैर्गोपैःप्रविवेशस्वगोकुलम् ३३ इतिश्रीभागवते
महापुराणेदशमस्कंधेसप्तत्रिंशोध्यायः ३७॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अक्रूरोपिचतांरात्रिंमधुपुर्यांमहामतिः ॥ उषित्वारथमास्थायप्रययौनंदगो
कुलम् १ गच्छन्पथिमहाभागोभगवत्यंबुजेक्षणे ॥ भक्तिंपरामुपगतएवमेतदचिंतयत् २

चूर्णिका

॥ श्रीशुकउवाच ॥ एवंकृष्णंनारदः प्रणिपत्य ययौ २४ ततः कृष्णोपिएवंकेशिनंहत्वागोपालैःसहपशून् अपालयत् २५ एकदातेगोपाः अद्रिसानुषुपशून् चारयंतः सं
तः २६ चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः तत्रकतिचित्चोराः कतिचित्पालाः कतिचित्मेषायिताः संतः निर्भयाः विजह्रुः २७ तत्रमयपुत्रः व्योमासुरः गो
पालवेषंधृत्वाचोरायितः सन् प्रायः मेषायितान्गोपान् अपोवाह २८ ततः सः दैत्यः नीतंनीतंगोपं गिरिदर्यांनिक्षिप्य शिलया द्वारं पिदधे चतुःपंचावशेषिताः २९ तस्यत
त्कर्मज्ञात्वा कृष्णः तं हरिः वृकमिवजग्राह ३० सः स्वंरूपंगिरींद्रतुल्यं आस्थाय आत्मानंमोक्तुंइच्छन्नपिनाशक्नोत् ३१ ततः कृष्णः तंदोर्भ्यांधृत्वाभूतलेनिपात्यदिविदेवा
नांपश्यतांपशुमारममारयत् ३२ गुहापिधानंनिर्भिद्यगोपान्निःसार्यकृच्छ्रतः स्तूयमानःसुरैर्गोपैःप्रविवेशस्वगोकुलम् ३३ ॥ इतिदशमेसप्तत्रिंशः ॥ ३७ ॥ ७ ॥ श्रीशुकउ ॥१५५॥
वाच ॥ ॥ अक्रूरोपिचतांरात्रिंमधुपुर्यांमहामतिः उषित्वारथमास्थायप्रययौनंदगोकुलम् १ सः गच्छन्पथिकृष्णेपरांभक्तिंप्राप्य इदं अचिंतयत् २

CC-0. In Public Domain. Digitization by eGangotri

टीका

अपीतिसंभावनायाम् । अथवाअर्हतेयोग्याय ३ स्वस्यकृष्णदर्शनेऽसंभवमाशंक्यपुनस्तत्संभावयाति । ममैतदितिद्वयेन । विषयात्मनःविषयाविष्टचित्तस्यमम (एतन्मनसिसंकल्पितं)शूद्राज्जन्मयस्य
तस्यब्रह्मकीर्तनंवेदोच्चारणंयथेति ४ यद्वामैवम् । किंतु । अधमस्यनीचस्यापिममस्यादेव । कुतइत्यतआह । ह्रियमाणःकालनद्येति । अयंभावः । यथानद्याह्रियमाणानांतृणादीनांकिंचित्कदाचित्तर
ति । तथाकर्मवशेनकालेनह्रियमाणानांजीवानामपिकश्चित्तरेदितिसंभवतीति ५ अतोऽनयाप्रवृत्त्यैवममामंगलंध्रुवंनष्टमेवेतिज्ञायते । जन्मचसफलंजातमिति । यतःनमस्करिष्यामि । ६ अमंगलनाशेसूच
कांतरमाह । कंसइति । बतेत्याश्चर्ये । अविखलःकंसोपिममात्यंतमनुग्रहं (अकृत) कृतवान् । यतोमुनाकंसेनप्रहितोहरेरंघ्रिपद्मंद्रक्ष्येद्रक्ष्यामीति । पूर्वेअंबरीषादयःतमःसंसारं (यन्नखचंद्रकांत्या)
अतरन्तीर्णाःतत् ७ अंघ्रिपद्मंविभाव यतियदिति । ब्रह्मादिभिरर्चितमितिपरमैश्वर्यमाह । श्रियाचेतिसौभाग्यातिशयम् । मुनिभिर्भक्तसहितैरितिपरमपुरुषार्थत्वम् । गोचारणायेतिकृपालुत्वम् । यद्गो
पिकानामितिप्रेममात्रसुलभत्वं (अनुचरैःसहेति) ८ मनोरथांतरंकरोति । द्रक्ष्यामीति । शोभमानौकपोलौनासिकाचयस्मिन्तत्स्मितसहितःअवलोकोयस्मिन्अरुणेकंजवल्लोचनेयस्मिन्तच्चतच्चमुखं
गुडालकावृतंवक्रकेशावृतम् । तदानीमेवशुभसूचकंदृष्टांतिहृष्यन्नाह । प्रदक्षिणमिति ९ पुनरप्यन्यच्चिंतयति । अप्यद्येति (भुवोभारावतारायमनुजत्वं) ईयुषःप्राप्तवतःलावण्यस्यधामआश्रयस्तस्यवि
ष्णोःयद्वाविष्णोर्लावण्ययुक्तंयद्धामवपुस्तस्यउपलंभनंदर्शनंभविताभविष्यति । अपियद्येवंस्यात् (तर्हिमह्यंममदृशोलोचनस्यफलंनस्यादितिन । अपितुस्यादेवेत्यर्थः)१०

॥१५६॥

श्लोकाः 3/10

किंमयाचरितंभद्रंकिंतप्तंपरमंतपः ॥ किंवाथाप्यर्हतेदत्तंयद्द्रक्ष्याम्यद्यकेशवम् ३ ममैतद्दुर्लभंमन्येउत्तमश्लोकदर्शनम् ॥ विषयात्मनोयथाब्रह्मकीर्तनंशूद्र
जन्मनः ४ मैवंममाधमस्यापिस्यादेवाच्युतदर्शनम् ॥ ह्रियमाणःकालनद्याक्वचित्तरतिकश्चन ५ ममाद्यामंगलंनष्टंफलवांश्चैवमेभवः ॥ यन्नमस्येभगव
तोयोगिध्येयांघ्रिपंकजम् ६ कंसोबताद्याकृतमेऽत्यनुग्रहंद्रक्ष्येंघ्रिपद्मंप्रहितोऽमुनाहरेः ॥ कृतावतारस्यदुरत्ययंतमःपूर्वेऽतरन्यन्नखमंडलत्विषा ७ यदर्चि
तंब्रह्मभवादिभिःसुरैःश्रियाचदेव्यामुनिभिःससात्वतैः ॥ गोचारणायानुचरैश्चरद्वनेयद्गोपिकानांकुचकुंकुमांकितम् ८ द्रक्ष्यामिनूनंसुकपोलनासिकंस्मिता
वलोकारुणकंजलोचनम् ॥ मुखंमुकुंदस्यगुडालकावृतंप्रदक्षिणंमेप्रचरंतिवैमृगाः ९ अप्यद्यविष्णोर्मनुजत्वमीयुषोभारावतारायभुवोनिजेच्छया ॥
लावण्यधाम्नोभवितोपलंभनंमह्यंननस्यात्फलमंजसादृशः १०

चूर्णिका

मयाकिंभद्रंकृतंकिंतपश्चरितम् किं वा योग्यायदत्तम् यतः अद्यहरिंद्रक्ष्यामि ३ विषयात्मनः मेहरिदर्शनंदुर्लभंइति मन्ये ४ यद्वा नीचस्यापिमेदर्शनं स्यात् यतः कालनद्या ॥१५६॥
ह्रियमाणः कश्चित् यथा तरति तद्वत् ५ किंच मे अद्य पापंनष्टम् मे भवश्च सफलः यतः हरिंनमस्ये ६ किंच अद्य कंसः मे अनुग्रहं अकृत यतः हरेः पदाब्जंद्रक्ष्यामि ७
यतः ब्रह्मादिभिः श्रियासात्वतैश्चअर्चितम् किंच गोचारणार्थंगोपालैः सहवनेअचरत् ८ तथासुकपोलनासिकंमुकुंदमुखंद्रक्ष्यामि ततोमृगाः दक्षिणतः चरंति ९ अपिचस्वे
च्छयाभूभारावताराय मनुजत्वं प्राप्तवतः हरेः दर्शनं भविष्यतिचेत्तर्हि मेलोचनस्यफलंस्यादेव १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यईक्षितेतिचतुर्भिःकुलकम् । तत्रैवंशंका । नन्वस्मदादिवदेवकर्तृत्वभोक्तृत्वादिधर्मैस्तत्रतत्र प्रतीयमानस्य कथंविष्णुत्वमितीमांशंकांश्लोकत्रयेणापाकुर्वन् चतुर्थेनतमहंद्रक्ष्यामीति मनोरथंकरोति। तथाहि। यईक्षितेति (ईक्षणमात्रकर्ता) असत्सतोःकार्यकारणयोःईक्षितापिईक्षणमात्रेणकर्तापिअहंरहितःअहंकारहीनः । तथापास्ततमोभिदाभ्रमः । तमःस्वाज्ञानंततोभिदाभेदःततोभ्रमःअभिनिवेशादि अपास्ताअपाकृतास्तमआदयोयास्मिन्सः । कुतएतत्तत्राह । स्वतेजसाचिच्छक्त्यानित्यस्वरूपसाक्षात्कारेण । तथापिस्वमाययास्वाधीनयामाययातदीक्षयातस्यैवेक्षयाप्राणाक्षधीभिःसहितैःआत्मन्आत्म निस्वस्मिन्नेवरचितैर्जीवैःसदनेषुवृंदावनतरुषुगोपीगृहेषुचलीलयाकर्माणिकुर्वन् सक्तवदभीयतेआभिमुख्येनप्रतीयते ११ ननुसर्वथाअहंकारादिरहितस्यआत्मारामस्यलीलापिकुतइत्याशंक्यपरानुग्रहार्थं त्याशयेनाह । यस्येति । अखिलानिअखिलस्यवाअमीवानिपापानिघ्नंतीति अखिलामीवहानि । तैः । तथासुमंगलैः शोभमानानिमंगलानियेभ्यः तैः गुणाः करुणादयः कर्माणिजन्मानिचतैर्विमिश्रायु क्तावाचोजगत्प्राणंति जीवयंति शुंभंतिशोभयंतिपुनंतिपवित्रयंति । व्यतिरेकमाह । याइति । तैर्विरक्तारहितास्तास्तुवाचः स्वलंकृताअपिवस्त्राद्यलंकृतशववच्छोभमानामताः १२ स्वयंरचितान्सेतून्व र्णाश्रमधर्मान्पालयतामरवर्याणांसुखकर्तासन्नवतीर्णः यत्यशो (गायंति । अशेषस्यमंगलंयस्मात्तत् । यद्वा अशेषेषुमंगलेषुमंगलं परममंगलरूपमित्यर्थः) १३ त्रैलोक्येएकमेवकांतम् । दृ शिदृष्टिस्तद्वतांमहानुत्सवोयस्मात् । यद्वा महानुत्सवएवअतएवश्रियाईप्सितमास्पदं एवंभूतंरूपंश्रीमूर्तिंदधानंतमीश्वरंद्रक्ष्यामीति । अत्रालिंगम् । उषसः प्रभातसमयाः सुदर्शनाःसुप्रसन्नंदर्शनंयेषांते । सुखंप्रभातारजन्यः शुभसूचिकाअभूवन्नित्यर्थः १४ । किंच । अथदर्शनानंतरंसपदितत्क्षणमेव रथादवतीर्णःसन्प्रधानयोःपुरुषयोः रामकृष्णयोः चरणंयोगिभिरप्यात्मलाभायकेवलंधियैवधृतंसाक्षाद हंनमस्यामि । आभ्यांसहअनयोः सखीन्गोपांश्चनमस्यामीति १५ किंच । अप्ययास्यत्आधास्यति । तद्विभावयति दत्ताभयमितिसार्धेन १६

॥१५७॥

श्लोकाः ११/१६

यईक्षिताहंरहितोप्यसत्सतोःस्वतेजसापास्ततमोभिदाभ्रमः ॥ स्वमाययात्मन्रचितैस्तदीक्षयाप्राणाक्षधीभिःसदनेष्वभीयते ११ यस्याखिलामीवहभिः सुमंगलैर्वाचोविमिश्रागुणकर्मजन्मभिः ॥ प्राणंतिशुंभंतिपुनंतिवैजगद्यास्तद्विरक्ताःशवशोभनामताः १२ सचावतीर्णःकिलसात्त्वतान्वयेस्वसेतुपालामरवर्यशर्मकृत् ॥ यशोवितन्वन्व्रजआस्तईश्वरोगायंतिदेवायदशेषमंगलम् १३ तंत्वद्यनूनंमहतांगतिंगुरुंत्रैलोक्यकांतंदृशिमन्महोत्सवम् ॥ रूपंदधानंश्रियईप्सितास्पदंद्रक्ष्येममासन्नुषसःसुदर्शनाः १४ अथावरूढःसपदीशयोरथात्प्रधानपुंसोश्चरणंस्वलब्धये ॥ धियाधृतंयोगिभिरप्यहंध्रुवंनमस्यआभ्यांचसखीन्वनौकसः १५ अप्यंघ्रिमूलेपतितस्यमेविभुःशिरस्यधास्यन्निजहस्तपंकजम् ॥ दत्ताभयंकालभुजंगरंहसाप्रोद्वेजितानांशरणैषिणांनृणाम् १६

चूर्णिका

किंच यः कार्यकारणयोः द्रष्टा तथापि अहंकाररहितः एवंविधोपि हरिः गोपीगृहेषु लीलया कर्माणि कुर्वन् सक्तवत् प्रतीयते ११ किंच यस्यगुणकर्मजन्मभिर्युक्ताः याः वाचः ताः जगज्जीवयंतिशोभयंति पुनंति तैर्हीनावाचस्तुशववत् शोभनामताः १२ सः यादवान्वये अवतीर्णः सन्व्रजे आस्ते यद्यशः सर्वमंगलं देवाः गायंति १३ तं सतां गतिं अद्य नूनं द्रक्ष्यामि यतः मे प्रभातसमयाः शुभसूचकाः बभूवुः १४ अथ रथात् अहं अवरूढः सन् रामकृष्णयोश्चरणं योगिभिरपिधियाधृतंनमस्ये तथातौ तत्सखींश्चनमस्यामि १५ किंच कृष्णः अंघ्रिमूले पतितस्यमेशिरसि स्वहस्ताब्जंधारयतिकिम् १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका. बलिनातावत्पदत्रयपरिमितभूदानसमयेतस्यहस्तेउदकंनिहितंकौशिकइंद्रः तेनापिकदाचित्किंचिन्निहितमितिज्ञातव्यम् । (अतः यत्रहस्तपंकजेइंद्रः बलिश्चसमर्हणंअर्घ्यम्) । मुमुक्षूणांसंसारभयनिवर्तकंसकामानांअभ्युदयप्रदंचेत्युक्तम् । अथानुरक्तानांपरमसुखदंचेत्याह । यद्वेति । वाशब्दोवितर्केयत्करपंकजम् । विहारेरासक्रीडायांसौगंधिकस्यकल्हारस्यगंधइवगंधोयस्यतत्सौगंधिकगंधि १७ एवंपरमानुग्रहंसंभाव्य पुनरप्यसंभवमाशंक्यपरिहरति नमयीति । यद्यप्यहंकंसेनप्रहितः अतस्तस्यदूतःतथापिमयिअरेरयमितिबुद्धिंनउपैष्यति । नकरिष्यतीत्यर्थः यतोविश्वदृक्सर्वज्ञः । अतोममचेतसोंऽतश्चबहिश्चयदीहितंचेष्टितंएतत्यःक्षेत्रज्ञःअंतर्यामीनित्यज्ञानेनेक्षते । अयंभावः चेतसोबहिरेवचेष्टितंकंसमनुवर्ततेअंतस्तुकृष्णमेवतदसौहृदिस्थोजानातीति । यद्वा एतस्यजगतईहितमिति । अतः १८ अपियादिअंघ्रिमूलेचरणोपांतेअवहितंसंयंतकृपामृतेनार्द्रयादृशामांईक्षितादृक्ष्यति । तर्हिसपद्येवविनष्टाखिलकल्मषःपरांमुदंवोढाप्राप्स्यामीति । (वीतविशंकः निर्विचिकित्सः) १९ अथमांपरिरप्स्यतेआलिंगिष्यतियदातदैवतेनमेआत्मादेहः तीर्थीक्रियतेअतिपवित्रीकरिष्यते बंधश्चअतोदेहात्उच्छ्वसिष्यतिशिथिलोभविष्यतीति २० (हेअक्रुर) ततभोतातेतितदा (वयं) जन्मभृतः सफलजन्मानःअन्यथातज्जन्मैवनभवतीत्याह । महीयसेति महीयसाश्रीकृष्णेनयोऽनादृतः तस्यामुष्यजंतोः जन्मधिक् । (लब्धोअंगसंगोयेनतंवक्ष्यतेवक्ष्यति) २१ ननुसुहृदादिपुपरिष्वंगादयोजीवधर्माः कथमीश्वरेसंगच्छतेअतआह । नतस्येति । दयितःप्रियः तद्विपरीतोऽप्रियः । सुहृत्तमोहितःतद्विपरीतोद्वेष्यः एतत्सर्वव्यतिरिक्तः उपेक्ष्यइति । (सत्यं ।) तथापिभक्तान्भजते । यथाभक्तोभजति । तथा"येयथामांप्रपद्यंतेतांस्तथैवभजाम्यह"मितिभगवद्वचनात् । अविषमत्वेपिभक्तेभ्यएवफलंददातीत्यत्रदृष्टांतः यद्वत्सुरद्रुमइति २२ योमयांजलिःकरिष्यतेतस्मिन्नेवांजलौगृहीतंस्वकरेणधृतंमांआप्तानिसमस्तानिअर्चादिसत्कृतानियेनतंगृहंप्रवेश्य २३

॥१५८॥

श्लोकाः १७/२३

सम्मर्हणंयत्रविधायकौशिकस्तथाबलिश्चापजगत्त्रयेंद्रताम् ॥ यद्वाविहारेव्रजयोषितांश्रमंस्पर्शेनसौगंधिकगंध्यपानुदत् १७ नमय्युपैष्यत्यरिबुद्धिमच्युतः कंसस्यदूतःप्रहितोपिविश्वदृक् ॥ योंऽतर्बहिश्चेतसएतदीहितंक्षेत्रज्ञईक्षत्यमलेनचक्षुषा १८ अप्यंघ्रिमूलेऽवहितंकृतांजलिंमामीक्षितासस्मितमार्द्रयादृशा ॥ सपद्यपध्वस्तसमस्तकिल्बिषोवोढामुदंवीतविशंकऊर्जिताम् १९ सुहृत्तमंज्ञातिमनन्यदैवतंदोर्भ्यांबृहद्भ्यांपरिरप्स्यतेथमाम् ॥ आत्माहितीर्थीक्रियतेतदैवमेबंधश्चकर्मात्मकउच्छ्वसित्यतः २० लब्धांगसंगंप्रणतंकृतांजलिंमांवक्ष्यतेऽक्रूरततेत्युरुश्रवाः ॥ तदावयंजन्मभृतोमहीयसानैवादृतोयोधिगमुष्यजन्म तत् २१ नतस्यकश्चिद्दयितःसुहृत्तमोनवाप्रियोद्वेष्यउपेक्ष्यएववा ॥ तथापिभक्तान्भजतेयथातथासुरद्रुमोयद्वदुपाश्रितोऽर्थदः २२ किंचाग्रजोमावनतंयदूत्तमःस्मयन्परिष्वज्यगृहीतमंजलौ ॥ गृहंप्रवेश्याप्तसमस्तसत्कृतंसंप्रक्ष्यतेकंसकृतंस्वबंधुषु २३

चूर्णिका यत्र इंद्रः अर्हणंनिधाय जगत्त्रयेंद्रतामाप १७ किंच अहंकंसदूतस्तथापि अच्युतः मयि अरिबुद्धिंनकरिष्यति यतः सर्वज्ञः १८ किंच यदंघ्रिमूलेकृतांजलिंमां आर्द्रयादृशा द्रक्ष्यति तर्हि अहं परांमुदंप्राप्स्यामि १९ किंचकृष्णः यदामांदोर्भ्यांआलिंगिष्यति तदैवमेदेहः तीर्थीक्रियते २० किंच श्रीकृष्णः प्रणतंमां हे अक्रूर ततेति यदावक्ष्यतेतदावयंजन्मभृतः भवेम यः महीयसा नादृतः तस्यजन्माधिक् २१ एवंभूतस्यहरेः कश्चित् दयितः सुहृत्तमः प्रियः द्वेष्यः उपेक्ष्यः न तथापिभक्तान् भजते कल्पद्रुमइव २२ किंवा रामः अवनतंआलिंग्य अंजलौ धृत्वा गृहं प्रवेश्य स्वबंधुषुकंसकृतंप्रवक्ष्यते २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३८॥

॥१५९॥

एवंप्रकारेणाध्वनिसांचेंतयन् सतुमार्गमपिनवेद तथापिसूर्योस्तगमने रथेनगोकुलंप्राप्तइति २४ अखिलैर्लोकपालैः किरीटेषुजुष्टाः अमलाःपादरेणवोयस्यतस्यक्षितिकौतुकानिक्षितेरलंकाररूपाणि २५ ते पांपदानांदर्शनेनयआह्लादः तेनाविवृद्धः संभ्रमोयस्यसः प्रेम्णाऊर्ध्वानिरोमाणियस्यसः । अश्रूणांकलाभिर्लेशैराकुलेईक्षणेयस्यसः । अवस्कंद्यअवप्लुत्यतेषुपदेषुअचेष्टतव्यलुठत् अहोइतिदुर्लभतांभावयन् २६ ननुकिमर्थमेवंव्यलुठत्नास्तिप्रेमसंभ्रमेफलोद्देशइत्यतआहदेहंभृतामिति । देहभाजांएतावानेषपुरुषार्थःकःकंसस्यसंदेशात् संदेशमारभ्यहरेर्लिंगदर्शनश्रवणादिभिर्दंभादिहित्वायोयमक्रूरस्यवर्णितः (स) इति संदेशआद्योयस्यार्थस्यससंदेशाद्योयावानक्रूरस्यजातइतिवा २७ ततःकृष्णंरामंचददर्श गावोदुह्यंतेस्मिन्निति गोदोहनंगोदोहस्थानंगतौप्राप्तौ । (पीतनीलांबरयोर्धरौयथाक्रमम् ।) २८ (श्रीनिकेतौशोभायाः स्थानभूतौ । बालद्विरदविक्रमौकरिशावगमनौ) २९ (ध्वजादिभिश्चिह्नितायेअंघ्रयस्तैः ।) अनुक्रोशेनुकंपातद्विलसितस्मितयुक्तमीक्षणंययोस्तौ ३० उदाराऽरुचिराक्रीडाययोस्तौ स्रग्विणौ । रत्नस्रग्भिरलंकृतौ । विरजेनिर्मलेवाससीउत्तरीयेययोः ३१ प्रधानभूतौपुरुषौप्रकृतिपुरुषात्मकौवा । कुतः आद्यौ । तदपिकुतः जगद्धेतू । अतएवजगत्पती । विपरीतोवाचतुर्णांपदानांहेतुहेतुमद्भावः । जगत्यर्थेपृथिव्या भारापनयनायस्वांशेनमूर्तिभेदेनबलकेशवौसंतौ ३२ स्वप्रभयादिशः विगततिमिराःकुर्वाणौकनकाचितौसुवर्णव्याप्तावितिसालंकारयोः शैलसादृश्यार्थमुक्तम् ३३ ३४ भगवद्दर्शनाह्लादेनयद्बाष्पंतेनपर्याकुलेईक्षणेयस्यसः । पुलकैराचितंव्याप्तमंगंयस्यसः स्वाख्यानेक्रूरोहंनमस्करोमीतिकथनेनाशकत्नाशक्नोत् ३५

श्लोकाः २४/३५

॥ श्रीशुकउवाच ॥ ॥ इतिसंचिंतयन्कृष्णंश्वफल्कतनयोऽध्वनि ॥ रथेनगोकुलंप्राप्तःसूर्यश्चास्तगिरिंनृप २४ पदानितस्याखिललोकपालकिरीटजुष्टामलपादरेणोः ॥ ददर्शगोष्ठेक्षितिकौतुकानिविलक्षितान्यब्जयवांकुशाद्यैः २५ तद्दर्शनाह्लादविवृद्धसंभ्रमःप्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः ॥ रथादवस्कंद्यसतेष्वचेष्टतप्रभोरमून्यंघ्रिरजांस्यहोइति २६ देहंभृतामियानर्थोहित्वादंभंभियंशुचम् ॥ संदेशाद्योहरेर्लिंगदर्शनश्रवणादिभिः २७ ददर्शकृष्णंरामंचव्रजेगोदोहनंगतौ ॥ पीतनीलांबरधरौशरदंबुरुहेक्षणौ २८ किशोरौश्यामलश्वेतौश्रीनिकेतौबृहद्भुजौ ॥ सुमुखौसुंदरवरौबालद्विरदविक्रमौ २९ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजम् ॥ शोभयंतौमहात्मानौसानुक्रोशस्मितेक्षणौ ३० उदाररुचिरक्रीडौस्रग्विणौवनमालिनौ ॥ पुण्यगंधानुलिप्तांगौस्नातौविरजवाससौ ३१ प्रधानपुरुषावाद्यौजगद्धेतूजगत्पती ॥ अवतीर्णौजगत्यर्थेस्वांशेनबलकेशवौ ३२ दिशोवितिमिराराजन्कुर्वाणौप्रभयास्वया ॥ यथामारकतःशैलोरौप्यश्चकनकाचितौ ३३ रथात्तूर्णमवप्लुत्यसोऽक्रूरःस्नेहविह्वलः ॥ पपातचरणोपांतेदंडवद्रामकृष्णयोः ३४ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः ॥ पुलकाचितांगऔत्कंठ्यात्स्वाख्यानेनाशकन्नृप ३५

चूर्णिका ॥१५९॥

॥ श्रीशुकउवाच ॥ एवं अक्रूरः मार्गेकृष्णंचिंतयन् २४ रथेनगोकुलंप्राप्तः सूर्यश्चास्तगिरिंनृप ततः सः हरेः पदानि अब्जादिचिन्हैः अंकितानिगोष्ठेदृष्ट्वा २५ तद्दर्शनात् वृद्धसंभ्रमः ऊर्ध्वरोमा सन् रथात् अवप्लुत्य प्रभोरमून्यंघ्रिरजांस्यहोइति व्यलुठत् २६ देहिनांएतावानेव पुरुषार्थइति २७ ततःव्रजेगोदोहनं गतौरामकृष्णौपीतनीलांबरधरौ श्यामलश्वेतौ बालद्विरदविक्रमौ स्वपदैः व्रजंशोभयंतौवनमालिनौस्नातौ निर्मलवाससौ जगत्पती स्वप्रभया वितिमिराः दिशः कुर्वाणौ एवं भूतौ तौ दृष्ट्वा अक्रूरः रथात्अवप्लुत्यतयोश्चरणोपांतेदंडवत्पपात २८ २९ ३० ३१ ३२ ३३ ३४ ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० ३८

भा.द.पू. टीका ॥१६०॥

अभिप्रेत्यअक्रूरोयमेतदर्थमागतइतिज्ञात्वाकंसहननसामर्थ्यंद्योतयन्निवरथांगेनचक्रेणांकितोयःपाणिस्तेनाभ्युपाकृष्य स्वसमीपमाकृष्य तमालिंगितवान् ३६ पाणीअंजलिरूपेणसंहतावेवस्वपाणिनागृहीत्वा (अक्रूरंगृहमनयत्)३७ (अथस्वागतंपृष्ट्वा) मधुपर्कएवार्हणं (तस्मिन्वायदुचितमर्हणं) तदाहरत्।आनीयसमर्पितवानित्यर्थः३८(गांधेनुम् । संवाह्यपादशुश्रूषयाविश्राम्य) ३९ (मुखवासैर्लवंगतांबूलादिभिः) ४० सत्कृतंसंमानितंनिरनुग्रहेनिर्दयेकथंकेनप्रकारेण स्थ जीवथेत्यर्थः सौनःपशुघातीसएवपालकोयेषामवीनांमेषाणांतइवतत्तुल्याइत्यर्थः ४१ निरनुग्रहतामाह । योवधीदिति । तोकान्तोकानि । असुतृप्असूनेवतर्पयतियः अतः खलः तस्यकंसस्यप्रजानांहेअक्रूरयेषांजीवनमात्रमपिदुर्लभंतेषांवः किंकुशलंविचारयामीति ४२ मधुरयावाचाइत्थंसत्कृतः तयैवाचापरिपृष्टेनपरिप्रश्नेन भावेक्तः अध्वपरिश्रमंसंसारश्रमम् ४३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांअष्टात्रिंशोध्यायः ३८ ॥ ॥ ७ ॥ ॥ नवत्रिंशेपुरींगच्छत्यच्युतेगोपिकोक्तयः । अक्रूरेणाथकालिंद्यां विष्णुलोकस्यदर्शनम् । (भगवद्भक्तानाम्) मनोरथाःसत्याभवंतीतिद्योतयन्नाह । सुखोपविष्टइति । रामकृष्णाभ्यांउरुअधिकंमानितः (सोऽक्रूरः) १ (तत्पराभगवद्भक्ताः) २ (सायंतनाशनंसायंकालीनंभोजनम् । सुहृत्सुवसुदेवादिषु) ३

श्लोकाः ३६/३

भगवांस्तदभिप्रेत्यरथांगांकितपाणिना ॥ परिरेभेभ्युपाकृष्यप्रीतःप्रणतवत्सलः ३६ संकर्षणश्चप्रणतमुपगुह्यमहामनाः ॥ गृहीत्वापाणिनापाणीअन
यत्सानुजोगृहम् ३७ पृष्ट्वाथस्वागतंतस्मैनिवेद्यप्रवरासनम् ॥ प्रक्षाल्यविधिवत्पादौमधुपर्कार्हणमाहरत् ३८ निवेद्यगांचातिथयेसंवाह्यश्रांतमादृतः ॥
अन्नंबहुगुणंमेध्यंश्रद्धयोपाहरद्विभुः ३९ तस्मैभुक्तवतेप्रीत्यारामःपरमधर्मवित् ॥ मुखवासैर्गंधमाल्यैःपरांप्रीतिंव्यधात्पुनः ४० पप्रच्छसत्कृतंनंदःकथं
स्थनिरनुग्रहे ॥ कंसेजीवतिदाशार्हसौनपालाइवावयः ४१ योऽवधीत्स्वस्वसुस्तोकान्क्रोशंत्याअसुतृप्खलः ॥ किंनुस्वित्तत्प्रजानांवःकुशलंविमृशाम
हे ४२ इत्थंसूनृतयावाचानंदेनसुसभाजितः ॥ अक्रूरःपरिपृष्टेनजहावध्वपरिश्रमम् ४३ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअष्टत्रिंशोध्यायः ३८
॥ श्रीशुकउवाच ॥ सुखोपविष्टःपर्यंकेरामकृष्णोरुमानितः ॥ लेभेमनोरथान्सर्वान्पथियान्सचकारह १ किमलभ्यंभगवतिप्रसन्नेश्रीनिकेतने ॥ तथा
पितत्पराराजन्नहिवांछंतिकिंचन २ सायंतनाशनंकृत्वाभगवान्देवकीसुतः ॥ सुहृत्सुवृत्तंकंसस्यपप्रच्छान्यच्चिकीर्षितम् ३

चूर्णिका

ततः तद्दर्शनात् पुलकाचितांगः सन् अक्रूरोहंनमस्करोमि इतिवक्तुं नाशक्नोत् भगवानपितंज्ञात्वा चक्रांकितहस्तेन आकृष्य प्रीतः सन् परिरेभे ३६ रामश्चतं आलिंग्य पाणिना पाणीधृत्वा सानुजःगृहं अनयत् ३७ अथ स्वागतं पृष्ट्वातस्मै आसनंदत्त्वा पादौ प्रक्षाल्य मधुपर्कार्हणमाहरत् ३८ तथा तस्मै अतिथयेगांनिवेद्यतं श्रांतं संवाह्य विभुःतस्मैबहुगुणं अन्नंददौ ३९ ततः भुक्तवते तस्मैरामः मुखवासैः गंधमाल्यैः परांप्रीतिं चक्रे ४० ततोनंदः तंपप्रच्छ हे अक्रूरक्रूरेकंसेजीवतिसतियूयंकथजीवथ सौनपालाः अवयइव ४१ यःकंसः क्रोशंत्या स्वसुः तोकान् अवधीत् तत्प्रजानांवःकिंनुकुशलंविचारयामेति ४२ इत्थंसूनृतयावाचानंदेनसुसभाजितः अक्रूरःपरिपृष्टेनजहावध्वपरिश्रमम् ४३ इतिदशमेअष्टत्रिंशः ३८ ॥ ॥ ७ ॥ श्रीशुकउवाच ॥ ॥ सुखोपविष्टःपर्यंकेरामकृष्णोरुमानितः लेभेमनोरथान् सर्वान्पथियान्सचकारह १ हेनृपहरौप्रसन्नेकिमलभ्यम् तथापि तत्पराः किमपिनेच्छंति २ ततः कृष्णः सायंतनाशनं कृत्वा सुहृत्सुकंसस्यचिकीर्षितंवृत्तंपप्रच्छ ३ ॥१६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेतातहेसौम्यस्वागतंयथातथाआगतः (कच्चित्) स्वज्ञातिबंधूनाम्। स्वेसुहृदः। ज्ञातयःसपिंडाः। बंधवोऽसपिंडाःसंबंधिनः। तेषामपिकच्चित्किंअनमीवंअपापंअदुःखंसुखमितियावत्। अनामय
मारोग्यम् ४ एवंप्रश्नोऽपिममनातीवसंगच्छतइत्याह। किंन्विति। अंगहेअक्रूरपृच्छेपृच्छामि। नःअस्माकंकुलस्यामयेरोगेनोमातुलइतिनामयस्यतस्मिन्नःस्वानांज्ञातीनांतस्य (कंसस्य) प्रजासुच (ज्ञाती
नामपत्येषुवा) ५ अस्मदस्मन्निमित्तंवृजिनंदुःखंआर्ययोःनिरपराधयोःयद्धेतोःयोहमेवहेतुःतस्मात् ६ हेसौम्यस्वानांवःदर्शनंअद्य (मह्यं) ममसंजातम्। तत्दिष्ट्याभद्रंभद्रम् ७ माधवःमधुवंशजः ८
यःधनुर्मखच्छद्मासंदेशोयस्य। यदर्थंचाणूरादिभिर्घातनार्थंस्वयंसंप्रेषितः। अस्यकंसस्यआनकदुंदुभेःसकाशात् (स्वजन्मस्वस्यआत्मनःकृष्णस्यजन्मन.रदेनोक्तंयत्तच्चवर्णयामास) ९ विजज्ञतुःविशे
षेणज्ञापयामासतुरित्यर्थः १० सोपिनंदोपिगोपान्समादिशत्। तदेवदर्शयति। गृह्यतामित्यादिना। गोरसःक्षीरादि। उपायनानि। राज्ञेनिवेदनीयानिउत्तमवस्तूनि ११ रसान्घृतादीन्। शब्दच्छले
नेदंसूचयति। अचिकित्स्यस्यरोगम्यचिकित्सार्थंरसान्दास्यामइति। क्षत्राव्रजरक्षाधिकृतेनआघोषयत्सर्वतोघोषितवान् १२ ताःकृष्णैकजीवनागोप्यःतत्तदाअक्रूरमागतमुपश्रुत्येति १३ ०१४थालिंगा
न्याहपंचभिः। काश्चिदिति। तेनश्रवणेनवृत्तोहृत्तापःतेनयःश्वासःतेनम्लानामुखश्रीर्यासांताःबभूवुरिति, । दुकूलानिचवलयानिचकेशग्रंथयश्चस्रस्तंतोदुकूलादयोयासांतथाभूताःकाश्चनबभूवुरित्यर्थः १४

॥१६१॥

श्लोकाः ४/१४

॥ श्रीभगवानुवाच ॥ तातसौम्यागतःकच्चित्स्वागतंभद्रमस्तुवः ॥ अपिस्वज्ञातिबंधूनामनमीवमनामयम् ४ किंनुनःकुशलंपृच्छेएधमानेकुलामये ॥
कंसेमातुलनाम्न्यंगस्वानांनस्तत्प्रजासुच ५ अहोअस्मदभूद्भूरिपित्रोर्वृजिनमार्ययोः ॥ यद्धेतोःपुत्रमरणंयद्धेतोर्बंधनंतयोः ६ दिष्ट्याद्यदर्शनंस्वानांमह्यंवः
सौम्यकांक्षितम् ॥ संजातंवर्ण्यतांताततवागमनकारणम् ७ ॥ श्रीशुकउवाच ॥ पृष्टोभगवतासर्वंवर्णयामासमाधवः ॥ वैरानुबंधंयदुषुवसुदेववधोद्यमम्
८ यत्संदेशोयदर्थंवादूतःसंप्रेषितःस्वयम् ॥ यदुक्तंनारदेनास्यस्वजन्मानकदुंदुभेः ९ श्रुत्वाऽक्रूरवचःकृष्णोबलश्चपरवीरहा ॥ प्रहस्यनंदंपितरंराज्ञादि
ष्टंविजज्ञतुः १० गोपान्समादिशत्सोपिगृह्यतांसर्वगोरसः ॥ उपायनानिगृह्णीध्वंयुज्यंतांशकटानिच ११ यास्यामःश्वोमधुपुरींदास्यामोनृपतेरसान् ॥
द्रक्ष्यामःसुमहत्पर्वयांतिजानपदाःकिल ॥ एवमाघोषयत्क्षत्रानंदगोपःस्वगोकुले १२ गोप्यस्तास्तदुपश्रुत्यबभूवुर्व्यथिताभृशम् ॥ रामकृष्णौपुरींने
तुमक्रूरंव्रजमागतम् १३ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः ॥ स्रंसद्दुकूलवलयकेशग्रंथ्यश्चकाश्चन १४

चूर्णिका

॥ श्रीभगवानुवाच ॥ हेसौम्य तेस्वागतम् स्वज्ञातिबंधूनामारोग्यं अस्ति कच्चित् ४नः कुलामयमातुलनाम्नि कंसे एधमानेसतिस्वज्ञातीनां किंनुकुशलंपृच्छामि ५ किंच
अस्मन्निमित्तं पित्रोः दुःखंपुत्रमरणंचजातम् ६ हे अक्रूर अद्यतेदर्शनंजातंइदंभद्रम् तवागमनकारणवर्ण्यताम् ७ ॥ श्रीशुकउवाच ॥ एवंपृष्टः अक्रूरः यदुषुवैरानुबं
धंवसुदेववधोद्यमंएवंसर्वमाह ८ किंच कंसेनयदर्थं अक्रूरः प्रेषितः तत् नारदोक्तंचसर्वं आह ९ एवंकृष्णरामौ तद्वचः श्रुत्वा कंसादिष्टं पितरंप्रति ज्ञापयामासतुः १० ततो
नंदः गोपान्समादिशत् हेगोपाः गोरसःसान् उपायनानिगृह्णीध्वं शकटानियुज्यंताम् ११ श्वः पुरींयास्यामः राज्ञेरसान् दास्यामः महत्पर्व द्रक्ष्यामः एवंनंदः व्रजरक्षणकर्तृद्वारासर्व
तोव्रजे घोषितवान् १२ ततः गोप्यः रामकृष्णौ प्रतिनेतुंआगतंअक्रूरंश्रुत्वादुःखिताबभूवुः १३ काश्चित् तत्कृतहृत्तापश्वासम्लानमुखश्रियः काश्चनस्रसद्दुकूलादयः १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.द.पू. तस्यश्रीकृष्णस्यानुध्यानेननिवृत्ताअशेषाश्चक्षुरादिवृत्तयोयासांताइमलोकंदेहमापिनजानंतिस्मभुक्ताइवेति १५ अपराःस्त्रियःशौरेर्गिरःस्मरंत्यःसंमुमुहुः । कथंभूताः अनुरागेणयत्स्मितंतेनईरिताःहृदिस्पृ अ०
शंतीतिहृदिस्पृशःमनोज्ञाः । चित्राणिपदानियासुताः १६ (गतिंचेष्टांचसुललितांस्निग्धोहासोयत्रतादृशंअवलोकनंचाचिंतयंत्यः) १७ विरहेणकातराःविह्वलाःअच्युतेआशयश्चित्तंयासांताः १८ कृष्ण
संगतिंविधायविघटयतीतिविधातारंप्रत्येकमाक्रोशंत्यआहुः । अहोइति । मैत्र्याहिताचरणेनप्रणयेनस्नेहेनच । अकृतार्थान्अप्राप्तभोगान्तान्वियुनक्षि । वियोजयसि । तस्मान्नतवदया बालिशोपित्वमि टीका
त्याहुः । अपार्थकमिति १९विगर्हितंतवेदंकर्मेत्याहुः । यस्त्वमिति । शोकमपनुदतीतिशोकापनोदः सचासौस्मितलेशश्चगूढहासस्तेनसुंदरंमुकुंदस्यवक्त्रंसकृत्प्रदर्श्यपुनस्तस्यपारोक्ष्यमदृश्यतांकरोष्यत ॥३९॥
स्तवकृतंकर्मासाधुनिंद्यमित्यर्थः २० किंच । दत्तापहारित्वेनातिक्रूरस्त्वमित्याहुः । क्रूरस्त्वमिति । नन्वक्रूरोहरतिनाहमितिचेदतआहुः । अक्रूरसमाख्ययेति । नह्येवंकर्तुमन्यःप्रभवत्यतोनामांतरेणस्म
॥१६२॥ ध्रुवंत्वमेवाऽगतोऽसि । कृष्णंहरामिनयुष्मच्चक्षुरितिचेन्न । येनत्वद्दत्तेनचक्षुषामधुद्विषएकदेशेनेत्रवक्त्रादौत्वदीयंसमग्रंसृष्टिनैपुणमद्राक्ष्म दृष्टवत्योवयंतच्चक्षुः । अयंभावः । ममसर्वरहस्यमाभिर्ज्ञातमित्य
मर्षेणैवकृष्णंवियोजयन्नस्मानंधीकरोषीति २१ विधातारंविहायपरस्परमूचुः । ननंदसूनुरिति । बतेतिखेदे । क्षणभंगमस्थिरंसौहृदंयस्यसः । गृहादीन्विहायाद्धासाक्षात्तस्यैवदास्यमुपगताःस्वकृतातुरास्त
त्कृतेनैवस्मितादिनापरवशाअपिनोस्मान्नसमीक्षते । नवंनवंप्रियंयस्यसः । अतएनंनिवारयामइतिभावः २२

अन्याश्चतदनुध्याननिवृत्ताशेषवृत्तयः ॥ नाभ्यजानन्निमंलोकमात्मलोकंगताइव ॥ १५ स्मरंत्यश्चापराःशौरेरनुरागस्मितेरिताः ॥ हृदिस्पृशश्चित्रप श्लोका
दागिरःसंमुमुहुःस्त्रियः १६ गतिंसुललितांचेष्टांस्निग्धहासावलोकनम् ॥ शोकापहानिनर्माणिप्रोद्दामचरितानिच १७ चिंतयंत्योमुकुंदस्यभीतावि १५
रहकातराः ॥ समेताःसंघशःप्रोचुरश्रुमुख्योच्युताशयाः १८ गोप्यऊचुः ॥ अहोविधातस्तवनक्वचिद्दयासंयोज्यमैत्र्याप्रणयेनदेहिनः ॥ तांश्चाकृतार्थान् २२
वियुनंक्ष्यपार्थकंविक्रीडितंतेऽर्भकचेष्टितंयथा १९ यस्त्वंप्रदर्श्यासितकुंतलावृतंमुकुंदवक्त्रंसुकपोलमुन्नसम् ॥ शोकापनोदस्मितलेशसुंदरंकरोषिपारोक्ष्यम
साधुतेकृतम् २० क्रूरस्त्वमक्रूरसमाख्ययास्मनश्चक्षुर्हिदत्तंहरसेबताज्ञवत् ॥ येनैकदेशेऽखिलसर्गसौष्ठवंत्वदीयमद्राक्ष्मवयंमधुद्विषः २१ ननंदसूनुःक्ष
णभंगसौहृदःसमीक्षतेनःस्वकृतातुराबत ॥ विहायगेहान्स्वजनान्सुतान्पतीनतद्दास्यमद्धोपगतानवप्रियः २२

चूर्णिका अन्याश्चतद्ध्यानेन निवृत्तेंद्रियवृत्तयः सत्यः इमंदेहंमुक्ताइवनजानंतिस्म १५ अन्याः हरेःचित्रपदाः गिरःस्मरंत्यः सत्यः मुमुहुः एवंसर्वाः एकत्र मिलित्वा अश्रुमुख्यः सत्यः
प्रोचुः १६ १७ १८ ॥ गोप्यऊचुः ॥ हेविधातः तव क्वचिद्दया न यतः त्वं जीवान्मैत्र्या एकत्र संयोज्य अप्राप्तभोगानपि तान् वियोजयसि अतस्तेक्रीडितंबालइवव्यर्थम् १९ ॥१६२॥
किंच यः त्वंअसितकुंतलावृतं मुकुंदवक्त्रं सकृत्प्रदर्श्य अदर्शनं करोषि अतस्तेकर्मनिंद्यं २० किंच हे ब्रह्मन् अक्रूरनाम्नात्वंक्रूरएवासि यतः नः चक्षुर्हरसे येन चक्षुषाहरेः
अवयवादौत्वदीयं सृष्टिनैपुण्यं अद्राक्ष्म तदिति २१ अथ मिथः ऊचुः अयंनंदसूनुः क्षणभंगसौहृदः यतः वयंगृहादीन् विहाय तद् स्वंप्राप्ताः नः नेक्षते यतो नवप्रियः २२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.पू. सेर्ष्यमूचुः सुखंप्रभातेति । व्रजस्पतेः श्रीकृष्णस्यमुखंपास्यंत्यादरेण द्रक्ष्यंति । कथंभूतम् । अपांगेननेत्रप्रांतेनोत्कलितमुज्जृंभितंस्मितमेवाऽऽसवोरसोयस्मिंस्तत् । यद्वा अपांगोत्कलितस्मितेनाऽऽसवरूपं अ०
यन्मुखम् । ततश्चपानंमुख्यमेवसंभावयंति २३ ननुद्वित्राणिदिनानितथाभवतुनामतथाऽप्यस्मत्स्नेहाकृष्टःपित्रादिभिश्चपरावर्तितआगमिष्यतीत्याशंक्याऽऽहुः । हेअबलास्तासांमधुवन्मंजुभिर्भाषितैर्वशी
टीका कृतचित्तस्तथातासांसलज्जस्मितैर्विभ्रमैःभ्रमन्परवान्पित्रादिपरतंत्रोऽपि । यद्वा व्रजेपरेऽन्येबंधवःसंतियस्य । तथामनस्वीधीरोऽपिग्राम्याआविदग्धानःकथंप्रतियास्यतेप्रत्येष्यतिनकथंचिदित्यर्थः २४ ॥२९॥
किंच । अस्मदुत्सवभाजोऽन्यएवाचभविष्यंतीत्याहुः । अद्येति । तत्रपुरेदाशार्हादीनांदृशोदृष्टेर्महानुत्सवोभविष्यतेभविष्यति । येदेवकीसुतंद्रक्ष्यंति । तथायेचाध्वनिगच्छंतंद्रक्ष्यंतितेषामपिदृशोभवि
ष्यतीति । यद्वा । दृशइतिद्वितीया । तेषांदृशोनेत्राणिमहोत्सवोभविष्यतेप्राप्स्यतिप्राप्त्यर्थस्यभवतेरात्मनेपदित्वात् २५ अक्रूरंशपंत्यआहुः । मैतद्विधस्येति । एषाविधाविधानंकर्मयस्य । अतएव
॥१६३॥ निष्कृपस्याक्रूरइतिशोभनंनाममाभूत् । तत्रहेतुः । अतीवदारुणइत्यादि । प्रियात्प्राणादपिप्रियतरंकृष्णमध्वनःपारमस्मदृगगोचरत्वादतिदूरंदेशंनेष्यति २६ अहोधिगस्मज्जीवितमित्याहुः । अनार्द्रधी
रिति । अनार्द्राकठिनाधीर्यस्यसतावदेषकृष्णोरथमधिरूढः । अस्याविनयमालक्ष्यस्थविरैश्चोपेक्षितम् । ते ननिवारितवंतइत्यर्थः । किंच । दैवंचेति । अयंभावः । यदिदैवमस्माकमनुकूलंभवेत्तर्हिविघ्नैः
कश्चिदेषांमध्येप्रतिहन्येत । अकस्माद्वज्रपातोवाभवेत् । अन्यद्वाकिंचिदनिष्टंस्यान्नतुतत्किंचिदस्तीति २७ परस्परंसंमंत्र्य साहसमधिरुह्याऽऽहुः । निवारयामइति । अकरिष्यन्कारिष्यंति । निमिषार्धदु
स्त्यजन्मुकुंदसंगाद्विध्वंसितानिवियोजितान्यतएवदीनानिचेतांसियासाम् । एवंभूतानामस्माकंनमृत्योरपिभयमित्यर्थः २८

सुखंप्रभातारजनीयमाशिषःसत्याबभूवुःपुरयोषितांध्रुवम् ॥ याःसंप्रविष्टस्यमुखंव्रजस्पतेःपास्यंत्यपांगोत्कलितस्मितासवम् २३ तासांमुकुंदोमधुमं श्लोकाः
जुभाषितैर्गृहीतचित्तःपरवान्मनस्व्यपि ॥ कथंपुनर्नःप्रतियास्यतेऽबलाग्राम्याःसलज्जस्मितविभ्रमैर्भ्रमन् २४ अद्यध्रुवंतत्रदृशोभविष्यतेदाशार्हभोजां
धकवृष्णिसात्वताम् ॥ महोत्सवःश्रीरमणंगुणास्पदंद्रक्ष्यंतियेचाध्वनिदेवकीसुतम् २५ मैतद्विधस्याकरुणस्यनामभूदक्रूरइत्येतदतीवदारुणः ॥ योसा २३/२८
वनाश्वास्यसुदुःखितंजनंप्रियात्प्रियंनेष्यतिपारमध्वनः २६ अनार्द्रधीरेषसमास्थितोरथंतमन्वमीचत्वरयंतिदुर्मदाः ॥ गोपाअनोभिःस्थविरैरुपेक्षितंदैवं
चनोद्यप्रतिकूलमीहते २७ निवारयामःसमुपेत्यमाधवंकिंनोऽकरिष्यन्कुलवृद्धबांधवाः ॥ मुकुंदसंगान्निमिषार्धदुस्त्यजाद्दैवेनविध्वंसितदीनचेतसाम् २८

चूर्णिका इयंनिशासुप्रभाता जाता अतः पुरस्त्रीणां आशिषः सत्याः स्युः याः प्रविष्टस्यहरेः मुखंपास्यंति २३ किंच तासांमंजुभाषितैः गृहीतचित्तः कृष्णः ग्राम्याः नः प्रतिकथं
पुनर्यास्यते २४ किंच अद्यतत्रदाशार्हभोजादीनांदृष्टेः महोत्सवः भविष्यति यतः देवकीसुतं तेद्रक्ष्यंति २५ ततोऽक्रूरं शपंत्यः आहुः अस्यानिर्दयस्य अक्रूरः इतिशुभं ॥१६३॥
नाम माभूत् यः दुःखितंजनं अनाश्वास्य हरिं अध्वनः पारंनेष्यति २६ अयंकठिनधीः कृष्णः अहोरथंस्थितः अमीगोपाः त्वरयंति एतेवृद्धाः नवारयंति अतः नोदैवं
प्रतिकूलंकिंकुर्मः २७ हेस्त्रियः वयंमिलित्वा माधवंनिवारयामः वृद्धादयः नः किंकरिष्यंति २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१६४॥

इतोऽपिकारणावदश्यंसाहसमेवावलंबनीयमित्याहुः । हेगोप्योयस्यललितंस्मितंचवल्गुमंत्रश्चलीलाऽवलोकश्चपरिरंभणंचानुरागेणैतानियस्यांरासगोष्ठ्यांरासक्रीडासभायांनोऽस्माभिःक्षणदारात्रयःक्षणमि
वनीतास्तममुंकृष्णंविनादुरंतंतमोविरहदुःखंकथंनुआतितरेम ।नकथंचिदित्यर्थः २९ किंच । आस्तांतावत्तमोतितरणंजीवनमपेकथंस्यादित्याहुः । यइति । अह्नःक्षयेदिनावसानेखुररजोभिश्छुरिताधूसराअ
लकाःस्रजश्चयस्यसव्रजंविशन्स्मितेनयत्कटाक्षनिरीक्षणंतेननश्चित्तंक्षिणोतिहरति । अमुंकृष्णंविनातावत्कथंभवेमजीवेमेति ३० कृष्णेविषक्तानिमानसानियासांताः सुस्वरमुच्चैः (हेगोविंदइत्यादिशब्दा
न्कुर्वंत्योरुरुदुः) क्रूरमक्रूरतःश्रुत्वाकंसंकंसनिषूदनः।गोपीमनोरथारामःसरामः स्वपुरंययौ ३१ स्त्रीणामिति । त.अनाहृत्यः । कृतमैत्रादिकःमैत्रंमित्रदेवत्यंप्रातःसंध्योपासनंकृतंतदादिकर्मयेनसः ३२
(गोरससंभृतकुंभरूपमुपायनं) अन्वसज्जंत । अन्वगच्छन् ३३ अनुरंजिताःपरावृत्यानिरीक्षणादिभिःकिंचिदानंदिताःप्रत्यादेशंप्रत्याख्यानम् ३४ तप्यतीःसंतप्यमानाः । ताःआयास्येशीघ्रमागमिष्या
मीतिदौत्यकैर्दूतवाक्यैः (प्रेमगर्भैः) ३५ कृष्णमनुप्रस्थापिता आत्मानश्चित्तानियाभिस्ताःलेख्यमयपुत्रिकाइवानिश्चलाः ३६ (गोविंदस्यपरावर्तनेनिराशाः कृष्णचरित्रंगायंत्यस्तेनविगतशोकाःअहोरात्रं
निन्युः) ३७ ३८ (उपस्पृश्यआचम्यमणिप्रभंमरकतोज्ज्वलंमृष्टंशुद्धं) वृक्षाणांखंडंसमूहम् । ३९

श्लोकाः २९/३९

यस्यानुरागललितस्मितवल्गुमंत्रलीलाऽवलोकपरिरंभणरासगोष्ठ्याम् ॥ नीताःस्मनःक्षणमिवक्षणदाविनातंगोप्यःकथंन्वतितरेमतमोदुरंतम् २९ योऽ
ह्नःक्षयेव्रजमनंतसखःपरीतोगोपैर्विशन्खुररजश्छुरितालकस्रक् ॥ वेणुंक्वणन्स्मितकटाक्षनिरीक्षणेनचित्तंक्षिणोत्यमुमृतेनुकथंभवेम ३० ॥ श्रीशुकउवा
च ॥ एवंब्रुवाणाविरहातुराभृशंव्रजस्त्रियःकृष्णविषक्तमानसाः ॥ विसृज्यलज्जांरुरुदुःस्मसुस्वरंगोविंददामोदरमाधवेति ३१ स्त्रीणामेवंरुदंतीनामुदितेस
वितर्यथ ॥ अक्रूरश्चोदयामासकृतमैत्रादिकोरथम् ३२ गोपास्तमन्वसज्जंतनंदाद्याःशकटैस्ततः ॥ आदायोपायनंभूरिकुंभान्गोरससंभृतान् ३३ गोप्य
श्चदयितंकृष्णमनुव्रज्यानुरंजिताः ॥ प्रत्यादेशंभगवतःकांक्षंत्यश्चावतस्थिरे ३४ तास्तथातप्यतीर्वीक्ष्यस्वप्रस्थानेयदूत्तमः ॥ सांत्वयामाससप्रेमैरायास्य
इतिदौत्यकैः ३५ यावदालक्ष्यतेकेतुर्यावद्रेणूरथस्यच ॥ अनुप्रस्थापितात्मानोलेख्यानीवोपतस्थिरे ३६ तानिराशानिववृतुर्गोविंदविनिवर्तने ॥ वि
शोकाअहनीनिन्युर्गायंत्यःकृष्णचेष्टितम् ३७ भगवानपिसंप्राप्तोरामाक्रूरयुतोनृप ॥ रथेनवायुवेगेनकालिंदीमघनाशिनीम् ३८ तत्रोपस्पृश्यपानी
यंपीत्वामृष्टंमणिप्रभम् ॥ वृक्षखंडमुपव्रज्यसरामोरथमाविशत् ३९

चूर्णिका

किंच हेगोप्यः रासस्भायामस्माभिः येनक्षणमिवरात्रयोनीताः तंविनाविरहदुःखंकथंअतितरेम २९ किंच यः कृष्णः दिनांतेरामगोपैः व्रजंविशन् स्वावलोकनेन नः चि
त्तंहरति तंविनाकथंजीवेम ३० ॥ श्रीशुकउवाच ॥ एवंब्रुवाणाः गोप्यः लज्जांहित्वा गोविंददामोदरमाधवेतिउच्चैः रुरुदुः ३१ एवंतासांरुदंतीनां सूर्येउदिते सतिनित्यंसं ॥१६४॥
ध्यादि कृत्वाऽक्रूरोनः चोदयामास ३२ तमनुनंदाद्याः उपायनंगोरसकुंभांश्च आदायशकटैः अगच्छन् ३३ गोप्यश्चतमनुव्रज्यहरेः प्रत्यादेशंकांक्षंत्यःस्थिताः ३४ एवं
कृष्णः तप्यतीस्ताः दृष्ट्वा दूतवाक्यैः आयास्ये इत्यसांत्वयत् ३५ ततः ताः यावत् रथस्यध्वजः रेणुश्चलक्ष्यते तावत्पुत्तलिकाइवास्थिताः ३६ ततःनिराशाभूत्वा परावृत्य त
च्चेष्टितंगायंत्यः अहानिनिन्युः ३७ ततोहरिः रामाक्रूरयुतः रथेनयमुनांप्राप्य ३८ तत्रजलंपीत्वा वृक्षसमूहं प्राप्य सरामः रथमाविशत् ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

शप्रुभ्यःशंकितःसन्रथोपरिनिवेश्य (स्नातुंतदमुज्ञांगृहीत्वास्नानमाचरत्) ४० ब्रह्मवेदंसावित्रीमित्यर्थः । एवशब्दःप्रतिबिंबव्यावृत्त्यर्थः । क्वेमौबालौक्वतौमह्लाविवितिशंकितचेतसे । अक्रूरायजलेरूपम
त्याश्चर्यंव्यदर्शयत् ४१ (यदितावेवैतौर्तर्हिरथेइदानींनस्तइतिजलादुन्मज्य) ४२ (तत्रापिचयथापूर्वंव्यचष्ट । तयोर्यत्सलिलेदर्शनंसभ्रमःकिंइतिविमृशन्पुनरपिन्यमज्जत्) ४३ (भूयस्तत्रजलेपि) सि
द्धादिभिःस्तूयमानम् ४४ सहस्रंशिरांसियस्यतम् । सहस्रंफणेषुमौलयःकिरीटानिअस्यसंतीतितथातम् (नीलेअंबरेयस्यतं) बिसवत्कमलकंदवत्श्वेतंशुभ्रम् । शृंगैःशिखरैःश्वेतमिवकैलासमिवास्थितं
(शृंगाणिशिरसामुपमानानि) ४५ तस्योत्संगेकुंडलीकृतदेहार्धेविलोक्येत्येकादशेनश्लोकेनान्वयः ४६ (चारुहासयुक्तंनिरीक्षणंयस्यतं) शोभनेभ्रुवौयस्यउन्नतानासिकायस्यतंचतंच । शोभनौकपो
लौयस्यअरुणोअधरोयस्यतंचतंच ४७ तुंगावंसौयस्य । उरस्यऊश्रीर्यस्यतंचतंव । वलिवत्पल्लवोदरंवलयस्तिर्यक्निम्नारेखाःयस्यसंतियद्वलिवत्तच्चतत्पल्लववत्अश्वत्थदलसदृशंउदरंयस्यतम् ४८
कटितटंचश्रोणिश्वकरभसदृशमूरुद्वयंचबृहच्चतत्कटितटश्रोणिकरभोरुद्वयंचतेनान्वितंयद्वाबृहद्भ्यांकटितटश्रोणिभ्यांकरभोरुद्वयेनचान्वितम् ४९ तुंगौईषदुन्नतौगुल्फौअरुणनखव्रातश्चतेषांदीधितिभिः ।
तथानवाःकोमलाःअंगुल्योअंगुष्ठौचतान्येवदलानितैश्चविलसच्छोभमानंपादपंकजंयस्यतम् ५०सुमहार्हामणिव्रातायेषुतैः किरीटादिभिर्भ्राजमानम् ५१ ५२ ५३

॥१६५॥

॥३९॥

श्लोकाः ४०/५३

अक्रूरस्तावुपामंत्र्यनिवेश्यचरथोपरि ॥ कालिंद्याह्रदमागत्यस्नानंविधिवदाचरत् ४० निमज्ज्यतस्मिन्सलिलेजपन्ब्रह्मसनातनम् ॥ तावेवददृशेऽक्रू
रोरामकृष्णौसमन्वितौ ४१ तौरथस्थौकथमिहसुतावानकदुंदुभेः ॥ तर्हिस्वित्स्यंदनेनस्तइत्युन्मज्ज्यव्यचष्टसः ४२ तत्रापिचयथापूर्वमासीनौपुनरेवसः
॥ न्यमज्जद्दर्शनंयन्मेमृषाकिंसलिलेतयोः ४३ भूयस्तत्रापिसोऽद्राक्षीत्स्तूयमानमहीश्वरम् ॥ सिद्धचारणगंधर्वैरसुरैर्नतकंधरैः ४४ सहस्रशिरसंदेवंसहस्र
फणमौलिनम् ॥ नीलांबरंबिसश्वेतंशृंगैःश्वेतमिवस्थितम् ४५ तस्योत्संगेघनश्यामंपीतकौशेयवाससम् ॥ पुरुषंचतुर्भुजंशांतंपद्मपत्रारुणेक्षणम् ४६ चा
रुप्रसन्नवदनंचारुहासनिरीक्षणम् ॥ सुभ्रून्नसंचारुकर्णंसुकपोलारुणाधरम् ४७ प्रलंबपीवरभुजंतुंगांसोरस्थलश्रियम् ॥ कंबुकंठंनिम्ननाभिंवलिवत्पल्ल
वोदरम् ४८ बृहत्कटितटश्रोणिकरभोरुद्वयान्वितम् ॥ चारुजानुयुगंचारुजंघायुगलसंयुतम् ४९ तुंगगुल्फारुणनखव्रातदीधितिभिर्वृतम् ॥ नवांगुल्यं
गुष्ठदलैर्विलसत्पादपंकजम् ५० सुमहार्हमणिव्रातकिरीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ५१ भ्राजमानंपद्मकरंशंखचक्रगदाधरम् ॥
श्रीवत्सवक्षसंभ्राजत्कौस्तुभंवनमालिनम् ५२ सुनंदनंदप्रमुखैःपार्षदैःसनकादिभिः ॥ सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्चद्विजोत्तमैः ५३

चूर्णिका

अक्रूरः तौरथोपरिस्थाप्य यमुनाह्रदं आप्लुत्य स्नानंचकार४०तत्रनिमज्ज्यब्रह्मजपन् अक्रूरः तत्रतौददृशे ४१ तौरथस्थौ इहकथं एवंसतिरथे नस्तः इतिउन्मज्ज्य सः
व्यचष्ट ४२ तदापूर्ववद्रथेतौदृष्ट्वा तयोर्जलेयद्दर्शनंजातं तन्मृषावासत्यमिति पुनर्ममज्ज ४३ पुनश्चसः जलेसिद्धादिभिः स्तूयमानं ४४ सहस्रशिरसंनीलांबरं अही
श्वरं देवंदृष्ट्वा ४५ तस्योत्संगेघनश्यामंचतुर्भुजं ४६ चारुप्रसन्नवदनंप्रलंबपीवरभुजं चारुजानुयुगं महार्हकिरीटादिभिः ४७ ४८ ४९ ५० ५१ भ्राजमानंश्री
वत्सवक्षसं ५२ सुनंदनंदादिभिः ब्रह्मरुद्राद्यैः ५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पृथक्पृथक्भावोभिमायोयेषांतैः तत्रपार्षदैः स्वामीतिस्तूयमानम् । सनकादिभिर्ब्रह्मेति । ब्रह्माद्यैःसुरेशैर्महेश्वरइति मरीचिरत्र्यंगिरसौपुलस्त्यःपुलहःक्रतुः भृगुर्वसिष्ठोदक्षश्चेतिनवभिर्द्विजोत्तमैःपरः प्रजापतिरिति । वसुरुपरिचरः । प्रह्लादनारदवसवः प्रमुखामुख्यायेषांतैः परंदैवतमितिच ।श्रेष्ठैर्वचोभिः पृथग्भावैर्वचोभिरितित्रा ५४ इलाभूःऊर्जाबलंविद्याविद्येजीवानांमुक्तिसंसृतिहेतू । मायातुतयोः कारणम् । शक्तिर्ह्लादिनीसंवित्ज्ञानम् । आभिरन्याभिश्चनिषेवितम् ५५ विलोक्यसुभृशंप्रीतः अस्मत्कृष्णोसावेवंभूतःपरमे वरइतिज्ञात्वा (अतितरांप्रीतः । भावेनपरिक्लिन्नआत्मालोचनेचयस्येति) ५६ (सत्त्वंधैर्यम् । अवहितः सावधानः अस्तौषीत्) ५७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोनचत्वारिंशोध्यायः ॥ ३९ ॥ ॥ ७ ॥ ॥ चत्वारिंशेततोक्रूरः कृष्णं मत्वेश्वरेश्वरम् । प्रणम्यभक्त्यातुष्टावसगुणागुणभेदतः ।१ श्रीकृष्णंप्रणमति । नतोस्मीति । हेकृष्णत्वात्वांनतोस्मि । त्वमस्मत्पितृव्यः कुतोमांबालंनतोसितत्राह । आद्यंपुरुषंअव्ययम् । अनादिनिधन मित्यर्थः । कुतएतत् । अखिलहेतूनांहेतुंसतुनारायणोनाहमितिचेत् । न । नारायणंत्वाम् । किंनारायणइतिमांस्तौषि । कात्रस्तुतिः । सत्यमेवेत्याह । यन्नाभिजातादिति । यतोब्रह्मणःएषलोकआ विरासीत्अनेननारंजीवसमूहस्तस्यायनत्वान्नारायणइतिसूचितम् १ अखिलहेतुहेतुत्वंप्रपंचयति । भूरिति । (खमाकाशः) खस्यादिरहंकारः । (महान्महत्तत्वम् ।) अजामायातदादिपूरुषः एतेये जगतोहेतवः तेसर्वेतवअंगभूताः । अंगात्श्रीमूर्तेर्भूताः जाताः उपसर्जनभूतावा (तस्माच्चवनारायणत्वंयुक्तमित्यर्थः) २ नन्वतिस्तुतिःकथंक्रियतेअहमेवान्यतउत्पन्नस्ततपरतंत्रश्चेत्याशंक्यतवैषामा यात्वत्पारमार्थ्यंतुनकोपिवेदेत्याह । नैतइति । एतेअजआदिर्येषांतेआत्मनस्तेस्वरूपंनविदुः । अनात्मतयाजडत्वेनकारणेनजडत्वेहेतुः ग्रहीताः प्रत्यक्षादिभिर्दृष्टाः नह्यजडोदृग्गोचरइतिभावः । ननुजडामांमाजानंतुजीवस्तुज्ञास्यतीत्यतआह । अजइति । सःअजोब्रह्मापिअजायागुणैरनुबद्धआवृतःगुणातीतंतेस्वरूपंनवेदअतःअन्यःकुतोज्ञास्यतीति । यद्वा प्रकृत्यादयआत्मनः स्वरूपंतवस्वरूपं चनविदुर्जडत्वादेवजीवस्तुतान्आत्मानंचवेत्तिनपुनस्त्वत्स्वरूपमिति । यथोक्तंहंसगुह्ये । ''देहोऽसवोक्षामनवोभूतमात्रानात्मानमन्यंचविदुः परंयत् । सर्वंपुमान्वेदगुणांश्चतज्ज्ञोनवेदसर्वज्ञमनंतमीडे '' ३

श्लोकाः ५४/३

प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानंपृथग्भावैर्वचोभिरमलात्मभिः ५४ श्रियापुष्ट्यागिराकांत्याकीर्त्यातुष्ट्येलयोर्जया ॥ विद्ययाऽविद्ययाश त्त्यामायया ऽऽभिर्निषेवितम् ५५ विलोक्यसुभृशंप्रीतोभक्त्यापरमयायुतः ॥ हृष्यत्तनूरुहोभावपरिक्लिन्नात्मलोचनः ५६ गिरागद्गदयाऽस्तौषी त्सत्त्वमालंव्यसात्वतः ॥ प्रणम्यमूर्ध्नावहितःकृतांजलिपुटःशनैः ५७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकोनचत्वारिंशोध्यायः ३९ ॥७ ॥ ॥ अक्रूरउवाच ॥ नतोस्म्यहंत्वाऽखिलहेतुहेतुंनारायणंपूरुषमाद्यमव्ययम् ॥ यन्नाभिजातादरविंदकोशाद्ब्रह्माविरासीद्यतएषलोकः १ भूस्तोयमग्निःपवनः खमादिर्महानजादिर्मनइंद्रियाणि ॥ सर्वेंद्रियार्थाविबुधाश्चसर्वेयेहेतवस्तेजगतोऽगभूताः २ नैतेस्वरूपंविदुरात्मनस्तेह्यजादयोनात्मतयागृहीताः ॥ अजो नुबद्धःसगुणैरजायागुणात्परंवेदनतेस्वरूपम् ३

चूर्णिका

पृथक्भावैः स्तूयमानं ५४ श्रीपुष्ट्यादिशक्तिभिः सेवितं ५५ एवंभूतंश्रीहरिंदृष्ट्वाप्रीतः अक्रूरः रोमांचितः सन्हरिंनत्वाकृतांजलिपुटोभूत्वागद्गदयागिराअस्तौषी त् ५७ ॥ ॥ इतिदशमेएकोनचत्वारिंशः ॥ ३९ ॥ ॥ ७ ॥ ॥ अक्रूरउवाच ॥ ॥ हेकृष्णत्वांनारायणंनतोऽस्मि यन्नाभिजातकमलकोशात्ब्रह्मा आविरासीत् १ किंच हेहरेयेजगतः हेतवः पृथिव्यादयः तेसर्वेत्वदंगात् जाताः २ एतेसर्वेमायाद्याः तेरूपंनविदुः जीवोपितेरूपंनवेद अन्यः कुतोज्ञास्यतइति ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुयदिकेपिनजानंतिकथंतर्हिसंसारनिवृत्तिर्जीवानामित्याशंक्य साक्षादगोचरत्वेपियेनकेनापिमार्गेणभजतांत्वंगम्योसीत्याह । त्वांयोगिनइति । हैरण्यगर्भादयोऽध्यात्माधिभूताधिदैवसाक्षिणंमहापुरुषंत
दंतर्यामिस्वरूपंईश्वरंनियंतारंचयजंति । तदेवंसांख्ययोगावेकीकृत्योक्तौ ४ अथत्रयीमार्गीकर्मज्ञानभेदेनदर्शयति त्रय्याचेतिश्लोकद्वयेन । वैतानिकाः कर्मयोगिनः त्वांवैत्वामेवयजंते । ननुतेइंद्रवरुणवा
य्वादीन्यजंतेनतुमामित्यतआह । नानावज्रहस्तादीनिरूपाणियेषांतेयेऽमराः तेषामाख्ययानाम्नात्वामेवयजंतइति । अयंभावः ऐंद्रवारुणादिसूक्तैरिंद्रादयः सर्वैश्वर्येणप्रकाश्यंतेनचसर्वेश्वराबहवःसंति
अतोनामभेदेनत्वामेवयजंतइति । तथाचश्रुतिः "सप्रथमःसंप्रकृतिःश्वकर्मासप्रथमोमित्रोवरुणोअग्निः । सप्रथमोबृहस्पतिश्चिकित्वांस्तस्माइंद्रायहविराजुहोती" ति ५ (संन्यस्यसंत्यज्य) ज्ञानयज्ञेनसमा
धिना ६ सांख्ययोगत्रयीमार्गाउक्ताः वैष्णवशैवमार्गावाह द्वयेन । अन्येचेति । संस्कृतात्मानः वैष्णवशैवदीक्षयादीक्षिताःसंतस्त्वेत्वयाऽभिहितेनपंचरात्रादिविधिनात्वन्मयाः त्वन्मयत्वेनात्मानंचिंतयं
तः त्वदेकप्रधानाइतिवा वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदेनबहुमूर्तिंनारायणरूपेणैकमूर्तिंचत्वामेवयजंति ७ बह्वाचार्यविभेदेनेति । नानाशैवपाशुपतादिमार्गेण । (हेभगवंस्त्वामेवसमुपासते।) ८
(इति "त्रयीसांख्यंयोगःपशुपतिमतंवैष्णवमिति" प्रस्थानभेदमुक्त्वा) येक्षुद्रदेवताभक्तास्तेपित्वामेवयजंतीत्याह । सर्वएवेति । हेसर्वदेवमय (त्वामेवेश्वरम् ।) नन्वेतेपरस्परदेवताधिक्षेपकलहव्याकुल
चित्ताः कथमेकमेवयजंतीत्युच्यतेतत्राह । यद्यप्यन्यधियइति । बुद्धिमात्रभेदोनवस्तुभेदइत्यर्थः ९ तस्मात्सर्वेमार्गास्त्वय्येवपर्यवस्यंतीतिसदृष्टांतमाह । यथेति । अद्रेःसकाशात्सर्वतःप्रभवंतिया
नद्यः ताःपुनः पर्जन्येनापूरिताःबहुस्रोतसः सत्यः सर्वतोनानापथैःसिंधुमेवविशंतियथातद्वदेतागतयोमार्गाऋजुकुटिलाअप्यंततः त्वामेवविशंति १० अत्रहेतुमाह । सत्वमिति । भवतः शक्तिर्याप्रकृ
तिः तस्याः सत्त्वादयोगुणाः अतःप्राकृताः प्रकृतिकार्योपाधयोब्रह्मपर्यंताः स्थावरादयोजीवाः स्वोपाधिद्वारातेषुगुणेषुप्रोताः प्रविष्टाः तेचप्रकृतौसाचत्वयीति । अतःक्रमेणोपाधिलयात् सर्वेपित्वामे
वविशंतीति यद्वा । भवतःप्रकृतेर्गुणेषुप्रोताब्रह्मादयोभवद्व्यतिरिक्तानसंतिअतस्त्वमेव सर्वदेवमयइति ११

॥१६७॥

श्लोकाः ४/११

त्वांयोगिनोयजंतेद्धामहापुरुषमीश्वरम् ॥ साध्यात्मंसाधिभूतंचसाधिदैवंचसाधवः ४ त्रय्याचविद्ययाकेचित्त्वांवैवैतानिकाद्विजाः ॥ यजंते
विततैर्यज्ञैर्नानारूपामराख्यया ५ एकेत्वाऽखिलकर्माणिसंन्यस्योपशमंगताः ॥ ज्ञानिनोज्ञानयज्ञेनयजंतिज्ञानविग्रहम् ६ अन्येचसंस्कृतात्मानोवि
धिनाभिहितेनते ॥ यजंतित्वन्मयास्त्वांवैबहुमूर्त्येकमूर्तिकम् ७ त्वामेवान्येशिवोक्तेनमार्गेणशिवरूपिणम् ॥ बह्वाचार्यविभेदेनभगवन्समुपासते ८ सर्व
एवयजंतित्वांसर्वदेवमयेश्वरम् ॥ येप्यन्यदेवताभक्तायद्यप्यन्यधियःप्रभो ९ यथाद्रिप्रभवानद्यःपर्जन्यापूरिताःप्रभो ॥ विशंतिसर्वतःसिंधुंतद्वत्त्वांगतयो
ऽन्ततः १०सत्त्वंरजस्तमइतिभवतःप्रकृतेर्गुणाः ॥ तेषुहिप्राकृताःप्रोताआब्रह्मस्थावरादयः ११

चूर्णिका

एवंभूतंत्वांमहापुरुषं योगिनः साधवश्चयजंति ४ केचित्तुकर्मयोगिनः यज्ञैः नानारूपंत्वामेवयजंते ५ एकेज्ञानिनः सर्वकर्माणिसंन्यस्यज्ञानयज्ञेनज्ञानरूपिणंत्वांयजं
ति ६ अन्येशिवविष्णुदीक्षयादीक्षिताः संतः त्वदुक्तपंचरात्रविधिनासंकर्षणादिबहुमूर्तिंनारायणरूपेणएकमूर्तिंत्वांयजंति ७ तथा अपरेशिवोक्तमार्गेणशिवरूपिणं त्वांउ
पासते ८ येचक्षुद्रदेवताभक्ताः तेपिसर्वदेवमयंत्वांयजंति ९ एवंसर्वेमार्गाः त्वयिपर्यवस्यंति यथासिंधुंनद्यइव १० अत्रहेतुमाह तेमायागुणाः सत्त्वादयः त्रयः तेषुसर्वे
षुआब्रह्मणस्थावरादयः प्रोताः अतः तेत्वद्भिन्नाः न ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वनुभवतःप्रकृतेरितिवदन्ममापिप्रकृतिसंबंधंब्रवीषि । ततश्चतेषांममचकोविशेषःस्यादित्याशंक्यविशेषमाह । तुभ्यमिति । अविषक्तदृष्टयेअलिप्तबुद्धये । कुतःसर्वात्मने । स्वव्यतिरिक्ताभावादविषक्तदृष्टयइत्यर्थः । किंच । सर्वधियांसाक्षिणे । सर्वबुद्धिसाक्षित्वान्नकोपिबुद्धिलेपइत्यर्थः इतरेतुसंसरंतीत्याहगुणप्रवाहइति देवनृतिर्यंचआत्मानोदेहायेषांतेषुदेवादिशरीराभिमानिष्वित्यर्थः । त्वदविद्ययाकृतोयंगुणप्रवाहः प्रवर्ततेअतस्तवैषांचमहान्विशेषइत्यर्थः १२ सर्वात्मनेइत्यनेनोक्तंसगुणंरूपंस्तौति अग्निर्मुखमितिद्वाभ्याम् । अग्न्यादीननूद्येश्वरावयवताविधीयते । योयमग्निःसतवमुखमित्यादिवचनव्यक्त्या । ईक्षणंचक्षुः श्रुतिःश्रवणेंद्रियम् । कंमूर्धा । प्राणश्चबलंचतत् । (मरुद्वायुः) १३ (वृक्षाश्चओषधयश्चस्थूलसूक्ष्मरोमाणि ।) अद्रयःस्थूलसूक्ष्मगिरयः परस्यतेअस्थिनखानि निमेषणंनिमेषोन्मेषावित्यर्थः १४ नकेवलमेतावत् । किंतुसर्वोप्ययंप्रपंचः त्वदवयवभूतएवेतिवदन्नेवंसत्यपिप्रपंचस्यषड्जन्मादयोविकारास्त्वयिनप्रसज्यंतेतस्यत्वयिकल्पितत्वादित्याह । त्वयीति । अव्ययात्मनिपुरुषेपूर्णेलोकादयः संजिहते । प्रचलंतिहेअव्ययात्मन्नितिवा । कथंभूतेत्वयि । मनोमयेमनःप्रधाने । मनोवृत्तिव्यंग्ये । "दृश्यतेत्वग्र्ययाबुध्यामनसैवानुद्रष्टव्य"मित्यादिश्रुतेः । जलेयथाजलौकसः सूक्ष्मप्राण्यंडराशयः यथाचोदुंबरांतः केसरेषुपरस्परवार्तानभिज्ञाः एवमनंतानिब्रह्मांडानित्वयिसंचरंतीत्यर्थः १५ यस्मादेवंभूतंतवस्वरूपंदुरवगाहमितित्वदवतारकथामृतमेवसंतःसेवंतइत्याह । यानियानीति । आमृष्टापरिमार्जिताशुक्येषांते १६ अतःस्वयमप्यवतारान् (तत्तत्क्रिडांदर्शयन्) नमस्यतिनमइति । हयशीर्ष्णेहयग्रीवाय । मधुकैटभयोर्मृत्यवेनिहंत्रे १७ अकूपारायकूर्माय । क्षित्युद्धारोविहारोयस्यतस्मै १८ (विक्रमत्रयेणक्रांतंत्रिभुवनंयेनतस्मै) १९ भृगूणांपतयेपरशुरामाय (रावणस्यांतकरायविनाशकाय) २०

श्लोकाः १२/२०

तुभ्यंनमस्तेस्त्वविषक्तदृष्टयेसर्वात्मनेसर्वधियांचसाक्षिणे ॥ गुणप्रवाहोयमविद्ययाकृतःप्रवर्ततेदेवनृतिर्यगात्मसु १२ अग्निर्मुखंतेऽवनिरंघ्रिरीक्षणंसूर्योनभोनाभिरथोदिशःश्रुतिः ॥ द्यौःकंसुरेंद्रास्तवबाहवोऽर्णवाःकुक्षिर्मरुत्प्राणबलंप्रकल्पितम् १३ रोमाणिवृक्षौषधयःशिरोरुहामेघाःपरस्यास्थिनखानितेऽद्रयः ॥ निमेषणंरात्र्यहनीप्रजापतिर्मेढ्रस्तुवृष्टिस्तववीर्यमिष्यते १४ त्वय्यव्ययात्मन्पुरुषेप्रकल्पितालोकाःसपालाबहुजीवसंकुलाः ॥ यथाजलेसंजिहतेजलौकसोप्युदुंबरेवामशकामनोमये १५ यानियानीहरूपाणिक्रीडनार्थंबिभर्षिहि ॥ तैरामृष्टशुचोलोकामुदागायंतितेयशः १६ नमःकारणमत्स्यायप्रलयाब्धिचरायच ॥ हयशीर्ष्णेनमस्तुभ्यंमधुकैटभमृत्यवे १७ अकूपारायबृहतेनमोमंदरधारिणे ॥ क्षित्युद्धारविहारायनमःसूकरमूर्तये १८ नमस्तेऽद्भुतसिंहायसाधुलोकभयापह ॥ वामनायनमस्तुभ्यंक्रांतत्रिभुवनायच १९ नमोभृगूणांपतयेदृप्तक्षत्रवनच्छिदे ॥ नमस्तेरघुवर्यायरावणांतकरायच २०

चूर्णिका

अतः त्वमेवसर्वदेवमयः एवंभूतायसर्वधियांसाक्षिणेतुभ्यंनमोऽस्तु १२ अथसगुणंस्तौति हेहरेतेमुखं अग्निः भूः अंघ्रि सूर्यः नेत्रम् नभः नाभिः दिशः श्रोत्रम् स्वर्गः शिरः देवाः भुजाः सागराःकुक्षिः वायुः प्राणः बलंच १३ वृक्षौषधयः रोमाणि केशाः मेघाः अस्थिनखानि अद्रयः निमेषणंरात्र्यहनी प्रजापतिः शिश्नम् वृष्टिः वीर्यम् १४ एवंसर्वेलोकाः त्वयिकल्पिताः संतः प्रचलंति उदुंबरेयथामशकाः १५ हेदेवइहक्रीडार्थंत्वं यानियानिरूपाणिबिभर्षितैः दूरीकृतशोकाः लोकाः तेयशः गायंति १६ अतःप्रलयाब्धिचराय कारणमत्स्याय तेनमः तथामधुकैटभहंत्रेहयशीर्ष्णेतेनमः १७ मंदरधारिणेकूर्मायतेन० भूम्युद्धारविहारायवराहमूर्तये० १८ अद्भुतसिंहाय० क्रांतत्रैलोक्याय वामनायते० १९ क्षत्रहंत्रेपरशुरामायते० रावणहंत्रेरामाय० २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(संकर्षणंरामं) चतुर्व्यूहरूपेणप्रणमतिनमस्तइति २१ २२ एवंस्तुत्वा बंधमोक्षंप्रार्थयितुमाह ।भगवन्निति ।असतिदेहादौग्राहआग्रहोयस्यसः ।असन्ग्राहोपस्येतिवा २३ नकेवलमयंलोकः अहमपितथैवेत्या
ह । अहंचेति (आत्मादेहःअर्थोधनम् । स्वप्नतुल्येषुशश्वद्बुद्ध्यामुह्यामि) २४ मूढत्वमेवप्रकटयति । विपर्ययमतिरिति । अनित्येकर्मफलेनित्यामिति अनात्मनिदेहेआत्मेति । दुःखरूपे (जायापत्य-)-
गृहादौसुखमितिविपरीतमतिरित्यर्थः । द्वंद्वेषुसुखदुःखादिषुआरमतिक्रीडतीतितथासः । ननु (सुखेरतिस्तु) दुःखेकथंरतिस्तत्राह तमोविष्टःतमसाव्याप्तः (दुःखंजानन्नपिमोहात्तत्ररममाणइत्यर्थः)
अतआत्मनःप्रियंप्रेमास्पदंत्वात्वांनजानेइत्यर्थः २५ तदेवसदृष्टांतमाह । यथेति । तस्माज्जलादुद्भवंतीतितदुद्भवानि तृणादीनितैः (पिहितंसत्यमपिजलंहित्वाजलाभासरूपांमृगतृष्णामबुधोभ्येति
जलबुद्ध्या) तथामायाछन्नंत्वात्वामहंहित्वा पराङ्मुखोदेहाद्यभिमुखोवर्तेइति २६ नन्वेवंजानतःकुतोविषयाभिमुखतातत्राह नोत्सहइति । कृपणाविषयवासनायुक्ताधीर्यस्यसः अतएवकामकर्मभ्यांहतं
क्षुभितं (तत्रकामोविषयाभिलाषःकर्मतत्प्रयुक्तोव्यापारः) इंद्रियैश्चबलिभिर्विषयसंयुक्तैरितस्ततआकृष्यमाणं (एतादृशं) मनःरोद्धुंनियंतुंनशक्नोमीति २७ तदेवमस्वतंत्रोयःसोहंतवांघ्रिमुपगतः
शरणंप्राप्तः । नन्विंद्रियपरतंत्रस्यैतदपिकुतस्तत्राह । तच्चापीति । हेईश अंतर्यामिन्तत्त्वदंघ्र्युपगमनंचासतांदुरापंअतस्तत्प्राप्तिर्भवतोऽनुग्रहएवेत्यहंमन्ये । अनुग्रहेसतीतिवा । ननुसतांसेवयेदंभवति
किंमदनुग्रहेणेत्यतआह । पुंसइति । जीवस्यसंसरणापवर्गःसंसारस्यसमाप्तिर्यदात्वत्कृपयाभवेत् । संभावनास्पदंभवति । हेअब्जनाभ तदासदुपासनासंपद्यतेतयैवत्वायिमतिर्भवेत् । नत्वत्कृपांविनास
त्सेवा । नतरांत्वन्मतिः । नतमांमुक्तिरित्यर्थः २८

श्लोकाः २१/२८

नमस्तेवासुदेवायनमःसंकर्षणायच ॥ प्रद्युम्नायानिरुद्धायसात्वतांपतयेनमः २१ नमोबुद्धायशुद्धायदैत्यदानवमोहिने ॥ म्लेच्छप्रायक्षत्रहंत्रेनमस्तेक
ल्किरूपिणे २२ भगवन्जीवलोकोयंमोहितस्तवमायया ॥ अहंममेत्यसद्ग्राहोभ्राम्यतेकर्मवर्त्मसु २३ अहंचात्मात्मजागारदारार्थस्वजनादिषु ॥ भ्रमा
मिस्वप्नकल्पेपुमूढःसत्यधियाप्रभो २४ अनित्यानात्मदुःखेषुविपर्ययमतिर्ह्यहम् ॥ द्वंद्वारामस्तमोविष्टोनजानेत्वात्मनःप्रियम् २५ यथाऽबुधोजलं
हित्वाप्रतिच्छन्नंतदुद्भवैः ॥ अभ्येतिमृगतृष्णांवैतद्वत्त्वाहंपराङ्मुखः २६ नोत्सहेहंकृपणधीःकामकर्महतंमनः ॥ रोद्धुंप्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्त
तः २७ सोहंतवांघ्र्युपगतोस्म्यसतांदुरापंतच्चाप्यहंभवदनुग्रहईशमन्ये ॥ पुंसोभवेद्यर्हिसंसरणापवर्गस्त्वय्यब्जनाभसदुपासनयामतिःस्यात् २८

चूर्णिका

वासुदेवादिचतुर्मूर्तयेते० २१ दैत्यादिमोहकर्त्रेबुद्धायन० म्लेंछप्रायक्षत्रहंत्रेकल्किरूपिणेतेनमोस्तु २२ हेभगवन् अयंलोकः तेमायामोहितःसन् कर्मवर्त्मसु भ्राम्यते २३
अहमपिस्वप्नतुल्यदेहादिषुसत्यधियाभ्रमामि २४ एवंदेहगेहादौविपरीतबुद्धिरहंआत्मनः प्रियंत्वांनजाने २५ यथा अज्ञःतृणादिभिःछिन्नंजलंहित्वामृगजलंगच्छति तद्वत्
त्वांपराङ्मुखोऽहंवर्ते २६ किंच इंद्रियैरितस्ततःह्रियमाणंमेमनः रोद्धुंनशक्नोमि २७ सोऽहंअसतांदुरापंतेचरणंशरणंप्राप्तोऽस्मि २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पादयोःपतन्प्रार्थयतेद्वयेन नमइति । विज्ञानमेवमात्रामूर्तिर्यस्यतस्मै (आत्मानुभवमूर्तयेइत्यर्थः) अतएवसर्वप्रत्ययहेतवे । समस्तज्ञानकारणाय ('येनाश्रुतंश्रुतंभवती' त्यादिश्रुतेः । किंच । पुरुषेशप्रधानाय) पुरुषस्ययेईशाःसुखदुःखप्रापकाःकालकर्मस्वभावादयःतेषांप्रधानायनियंत्रे । कुतः । ब्रह्मणेपरिपूर्णाय । किंच । अनंतशक्तये अनंताः शक्तयोयस्य । यद्वा । अनंतःमायाख्याशक्तिर्यस्य तस्मै । अथवाप्रधानंप्रकृतिःपुरुषस्तत्प्रवर्तकःईशःकालःएतत्त्रितयात्मनेब्रह्मणे । वक्ष्यतिहिभगवान् । "प्रकृतिर्ह्यस्योपादानमाधारःपुरुषःपरः। सतोभिव्यंजकःकालोब्रह्मतत्त्रितयंत्वह"मिति २९ सर्वप्रत्ययहेतुत्वमभिव्यंजयन्स्तौति । नमस्तइति । वासुदेवायचित्ताधिष्ठात्रे । सर्वभूतक्षयाय । क्षयआश्रयः । अहंकारश्चप्राणिनामाश्रयः । ततश्चाहंकाराधिष्ठात्रेसंकर्षणायेत्यर्थः । हृषीकेशेतिबुद्धिमनसोरधिष्ठात्रोःप्रद्युम्नानिरुद्धयोरेकीकृत्यग्रहणम् । शरणागतंमांपाहीतिप्रार्थनम् ३० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचत्वारिंशतितमोध्यायः ॥ ४० ॥ ॥ छ ॥ ॥ एकचत्वारिंशकेऽहन्रजकंप्राविशत्पुरीम् । ततोवरानदात्तुष्टःसुदाम्नोवायकस्यच ॥ १ ॥ सशंकमक्रूरमनःप्रमोद्यस्वधामसंदर्शनसत्कृपातः । स्वराजधानींमथुरामपश्यदलंकृतानंतमहोत्सवाढ्याम् ॥ २ ॥ १ (आवश्यकंकर्मकृत्वा) २ (तेत्वयाअद्भुतमिवाकिंदृष्टम् । तथासाश्चर्यमुखंत्वां) ३ भूमौवियतिजले (वा) यावंत्यद्भुतानितानित्वय्येवसंति । तंत्वांविपश्यतोमेकिमद्भुतमदृष्टंअपितुसर्वंदृष्टमेव (सर्वात्मकत्वात्तवेत्यर्थः)४ ननुमत्प्राप्तेःपूर्वमेवत्वंविस्मितमुखोलक्षितोसिअतः-(- इतःपूर्वंभूमौवियतिजलेवाकिमप्यद्भुतंदृष्टंवदेत्यतआह) यत्रेति । यत्रत्वयिसर्वाण्यद्भुतानिसंतितंसर्वाद्भुताधिष्ठानंत्वामिहपश्यतोमेत्वत्तोऽन्यत्रभूम्यादौकिमद्भुतंदृष्टम् । त्वांविनानतत्रकिंचिदद्भुतम् (किंतुत्वमेवदृष्टोसीत्यर्थः) हेब्रह्मन् । हेपरमेश्वरेत्यर्थःब्रह्मेतिवापाठः ५ गांदिनीसुतःअक्रूरः ६ दृष्टिनाददुःपश्यंतएवस्थिताइत्यर्थः ७

॥१७०॥

श्लोकाः

नमोविज्ञानमात्रायसर्वप्रत्ययहेतवे ॥ पुरुषेशप्रधानायब्रह्मणेऽनंतशक्तये २९ नमस्तेवासुदेवायसर्वभूतक्षयायच ॥ हृषीकेशनमस्तुभ्यंप्रपन्नंपाहिमांप्रभो ३० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचत्वारिंशोध्यायः ४० ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ स्तुवतस्तस्यभगवान्दर्शयित्वाजलेवपुः ॥ भूयःसमाहरत्कृष्णोनटोनाट्यमिवात्मनः १ सोपिचांतर्हितंवीक्ष्यजलादुन्मज्ज्यसत्वरः ॥ कृत्वाचावश्यकंसर्वंविस्मितोरथमागमत् २ तमपृच्छद्धृषीकेशःकिंतेदृष्टमिवाद्भुतम् ॥ भूमौवियतितोयेवातथात्वांलक्षयामहे ३ ॥ अक्रूरउवाच ॥ अद्भुतानीहयावंतिभूमौवियतिवाजले ॥ त्वयिविश्वात्मकेतानिकिंमेऽदृष्टंविपश्यतः ४ यत्राद्भुतानिसर्वाणिभूमौवियतिवाजले ॥ तंत्वानुपश्यतोब्रह्मन्किंमेदृष्टमिहाद्भुतम् ५ इत्युक्त्वाचोदयामासस्यंदनंगांदिनीसुतः ॥ मथुरामानयद्रामंकृष्णंचैवदिनात्यये ६ मार्गेग्रामजनाराजंस्तत्रतत्रोपसंगताः ॥ वसुदेवसुतौवीक्ष्यप्रीतादृष्टिंनचाददुः ७

२९/७

चूर्णिका

अयंतेअनुग्रहइत्यहंमन्ये अतःविज्ञानमूर्तयेकालकर्मादीनांनियंत्रे २९ अनंतशक्तयेतेनमः नमस्तेवासुदेवायसर्वभूतक्षयायच हृषीकेशनमस्तुभ्यंप्रपन्नंपाहिमांप्रभो ॥ ३० इतिदशमेचत्वारिंशः ४० ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ स्तुवतस्तस्यभगवान्दर्शयित्वाजलेवपुः भूयःसमाहरत्कृष्णोनटोनाट्यमिवात्मनः १ सोपिअंतर्हितंदृष्ट्वाजलादुन्मज्ज्यआवश्यकंकर्मकृत्वारथंप्राप्तः २ तंहरिःप्राहहेअक्रूरत्वयाअद्भुतंभूमौजलेखेचकिंदृष्टम् २ अक्रूरउवाच हेहरेभूम्यादिषुयावंति अद्भुतानितानित्वय्येवसंतितंत्वांपश्यतामयासर्वंदृष्टम् ४ एवमुक्त्वारथंनोदयामास ततः रामंकृष्णंवदिनांतेमथुरामनयत् ५ ६ तदामार्गेजनाः तत्रतत्रतौदृष्ट्वा भीताः संतःदृष्टिंनचाददुः ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

(येमथुरांगंतुमागतानंदगोपादयस्तेतावत्अग्रतोरामकृष्णागमनात्पूर्वमेवतदागमनम्) प्रतीक्षमाणाःस्थिताः ८ (समेत्यसंप्राप्य) प्रश्रितंविनीतम् ९ (अग्रेआदौभवान्पुरीम्) स्वगृहंच (सहयानोरथेनसह) प्रविशतां। (वयंत्वत्र) अत्रमुच्यउतार्येविश्राम्येत्यर्थः १० ११ साग्रजःसहगोपालैरित्यर्थः १२यच्छौचेनयस्यपादरजसःक्षालनोदकेनगृहांगणास्थितेन देवाःपितरश्चतुष्टाभवंति १३ श्लोक्यःपुण्यकीर्त्यर्हः। एकांतभक्तानांयागतिःतांगतिंवलेभे १४,अपुनन्पवित्रीकृतवत्यः। (शर्वःशंभुः) याभिरद्भिः स्वः स्वर्गं (याताः) प्राप्ताः। (अंघ्रीअवनेनेक्तिक्षालयत्याभिस्ताः) १५ प्रार्थयमानोनमस्करोति। देवदेवेति। अतःपरमन्यच्छ्रेयोनास्तीतिमत्वाबहुधासंबोधयति। (उत्तमाउत्कृष्टाःश्लोकायशांसियस्य) १६ आदौतावत्यदुचक्रायद्रुह्यतीतियदुचक्रध्रुक्तंकंसंहत्वासुहृदांप्रियंवितरिष्येदास्यामि १७ (स्वगृहंसच्योनैतीतिविमनाइव) रामकृष्णावानीतावितिस्वकृतंकर्मविद्यसमर्प्येति १८ गोपैःपरिवारितःप्राविशत् १९ कृष्णदृष्टांपुरीमनुवर्णयतिचतुर्भिःददर्शेति। स्फाटिकानि (स्फटिकमयानि) तुंगानिगोपुरलक्षणानिपुरद्वाराणियस्यांतांबृहंतिहेममयानिकपाटानितोरणानिचयस्यांतांताम्रंचआरआरकूटश्चतन्मयाःकोष्ठाधान्यागाराश्वशालादयोयस्यांतां। परिखाःपरितःखातगर्ताःताभिर्दुरासदांदुर्गमां। उद्यानानीहदूरस्थानिकृत्रिमवनानिरम्याण्युपवनानिचनिकटानितैरुपशोभिताम् २०

॥१७१॥

तावद्व्रजौकसस्तत्रनंदगोपादयोऽग्रतः॥ पुरोपवनमासाद्यप्रतीक्षंतोवतस्थिरे ८ तान्समेत्याहभगवानक्रूरंजगदीश्वरः॥ गृहीत्वापाणिनापाणिंप्रश्रितंप्रहसन्निव ९ भवान्प्राविशतामग्रेसहयानःपुरींगृहम्॥ वयंत्विहावमुच्याथततोद्रक्ष्यामहेपुरीम् १०॥ ॥ अक्रूरउवाच॥ नाहंभवद्भ्यांरहितःप्रवेक्ष्येमथुरांप्रभो॥ त्यक्तुंनार्हसिमांनाथभक्तंतेभक्तवत्सल ११ आगच्छयामगेहान्नःसनाथान्कुर्वधोक्षज॥ सहाग्रजःसगोपालैःसुहृद्भिश्चसुहृत्तम १२ पुनीहिपादरजसागृहान्नोगृहमेधिनाम्॥ यच्छौचेनानुतृप्यंतिपितरःसाग्नयःसुराः १३ अवनिज्यांघ्रियुगलमासीच्छ्लोक्योबलिर्महान्॥ ऐश्वर्यमतुलंलेभेगतिंचैकांतिनांतुया १४ आपस्तेंऽघ्र्यवनेजन्यस्त्रींल्लोकान्शुचयोऽपुनन्॥ शिरसाऽधत्तयाःशर्वःस्वर्याताःसगरात्मजाः १५ देवदेवजगन्नाथपुण्यश्रवणकीर्तन॥ यदूत्तमोत्तमश्लोकनारायणनमोस्तुते १६ आयास्येभवतोगेहमहमार्यसमन्वितः॥ यदुचक्रद्रुहंहत्वावितरिष्येसुहृत्प्रियम् १७॥ श्रीशुकउवाच॥ एवमुक्तोभगवतासोऽक्रूरोविमनाइव॥ पुरींप्रविष्टःकंसायकर्मावेद्यगृहंययौ १८ अथापराह्णेभगवान्कृष्णःसंकर्षणान्वितः॥ मथुरांप्राविशद्गोपैर्दिदृक्षुःपरिवारितः १९ ददर्शतांस्फाटिकतुंगगोपुरद्वारांबृहद्धेमकपाटतोरणाम्॥ ताम्रारकोष्ठांपरिखादुरासदामुद्यानरम्योपवनोपशोभिताम् २०

श्लोकाः ८/२०

चूर्णिका

तावत् नंदादयः पुरोपवनंप्राप्यतत्रागमनंप्रतीक्षमाणाः स्थिताः ८ ततः कृष्णः तान्प्राप्य अक्रूरंप्राह ९ हेसखेत्वंसरथः अग्रेगृहंगच्छवयंतुअत्रविश्राम्यततःपुरींद्रक्ष्यामहे १० अक्रूरउवाच भवद्भ्यांहीनः अहंपुरींनप्रवेक्ष्ये हेनाथमांत्यक्तुंनार्हसि ११ किंचसबलः गोपैःसह नःगृहान् एत्य सनाथान्कुरु १२ तथानःगृहान्पादरजसापुनीहि ते पादक्षालनोदकेनपित्रादयःतृप्यंति १३ किंचतेअंघ्रियुगंप्रक्षाल्यबलिःसद्गतिंलेभे १४ तथातेपादक्षालनोदकानित्रिलोकींपुनंति किंच यानि शर्वःशिरसाआधत्त सगरसुताअपियैःस्वर्याताः १५ हेदेवदेवएवंभूतायतेनमोऽस्तु १६ श्रीभगवानुवाच हेअक्रूरआदौकंसंहत्वासबलः अहंतेगृहंएत्य सुहृत्प्रियंदास्यामि १७ एवमुक्तःसःपुरींप्रविश्यकृतंकर्मकंसायनिवेद्यगृहंययौ १८ ततः कृष्णःरामगोपैःसहअपराह्णेमथुरायांविवेश १९ किंभूतांताम् स्फटिकतुंगगोपुरद्वाराम् परिखयादुरासदाम् २०

॥१७१॥

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१७२॥

सौवर्णाः (हिरण्मयाः) शृंगाटकाश्चतुष्पथाःहर्म्याणिधनिनांगृहाणिनिष्कुटागृहोचिताआरामाश्चतैःश्रेणीनांएकद्रव्यशिल्पोपजीविनांसभाभिरुपसंवेशनस्थानैश्चभवनैरन्यगृहैश्चोपस्कृतांअलंकृतांअमलःस्फटिकःहरितोमरकतःवैदूर्यादिरत्नैर्जुष्टेषुवलभ्यादिषुआविष्टैरुपविष्टैःपारावतैर्बर्हिभिश्चनादिताम् । तत्रवलभ्योगृहपुरोभागेषुवक्रदारुच्छादनानि । वेदयोवलभीनामधोदेशेविरचितावष्टंभवेदिकाः । जालमुखरंध्राणिगवाक्षाच्छिद्राणि (गवाक्षस्थावकाशाइत्यर्थः) कुट्टिमानिमणिबद्धाभूमयःतेष्विति २१ रथ्याराजमार्गाःआपणाःपण्यवीथयः मार्गाअन्येच (आपणसंबंधिनोमार्गाइतिवा) चत्वराण्यंगणानिसंसिक्तानि (चंदनोदकादिभिः) रथ्यादीनियस्यांतां । प्रकीर्णमाल्यादयोयस्यांतां २२ तथाआपूर्णैःकुंभैः स्वलंकृतानिद्वाराणियेषांतादृशागृहायस्यांतां । कथंभूतैःकुंभैःदध्नाचंदनेनचोक्षितैः सिक्तैः प्रसूनानांदीपानांचावलयोयेषुतैः वृंतैःफलगुच्छैरुपलक्षितारंभाः क्रमुकाश्चतत्सहितैः सकेतुभिः केतवोध्वजास्तत्सहितैः पट्टिकावितस्तिविस्तारपट्टवस्त्राणितत्सहितैः। तत्रेयंरीतिः। द्वारेषूभयतस्तंडुलानामुपरिपूर्णकुंभास्तत्परितःप्रसूनावलयः कंठेपट्टिकाःमुखेचूतादिपल्लवाः । तदुपरिपात्रांतरेदीपालयः । तत्सांनिधौसवृंतरंभाःक्रमुकस्तंभाःकेतवस्तोरणानिचेति २३ नरदेववर्त्मनाराजमार्गेणतांपुरींसंप्रविष्टाविति द्वितीयांतम् । (उत्सुकाःसत्योद्रष्टुंसमीयुः हर्म्याणिगवाक्षवंत्युपरिगृहाणीत्यर्थः आरुरुहुश्च हेनृपेति) २४ औत्सुक्यमेवाहद्वयेनकाश्चिदिति । विपर्यक्विपरीतंधृतानिवस्त्राणिभूषणानिचयाभिस्ताः (संभ्रमवशात्परिधानीयस्थानेप्रावरणंप्रावरणस्थानेपरिधानीयंतथाकरेपादभूषणंपादेचकरभूषणामित्यादिरीत्याव्यत्यस्तवस्त्राभरणाइत्यर्थः) अथयुगलेषुधार्येषुकुंडलकंकणादिषुएकंविस्मृत्यएकमेवधृत्वाऽपराःसमीयुः तदेवोदाहरति । कृतं एकमेवपत्रंययोस्ते श्रवणेयासांएकमेवनूपुरंचरणाभरणंयासांताश्चताश्च । नाक्त्वाअनक्त्वाएकस्मिन्नेवलोचनेकज्जलंनिधायैव २५ तत्भोजनंहित्वा (सोत्सवाहर्षात्सत्वराइत्यर्थः) अभ्यज्यमानःसखीभिःक्रियमाणतैलाभ्यंगाःअकृतस्नानाः । (निस्वनंरामकृष्णौआगतौद्रष्टुमायातेतिशब्दंश्रुत्वाशयानाउत्थायपनिपायपंत्यःस्तनपानंकारयंत्यो) अर्भकमपोह्यानिरस्य २६ प्रगल्भाःयालीलास्ताभिर्हसितानीक्षणानिचतैःश्रियंरमयतीतिश्रीरमणस्तेनात्मनावपुषातासांदृशांउत्सवंददत्मनांसिजहार २७

श्लोकाः २१/२७

सौवर्णशृंगाटकहर्म्यनिष्कुटैःश्रेणीसभाभिर्भवनैरुपस्कृताम् ॥ वैदूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वलभीषुवेदिषु २१ जुष्टेषुजालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादिताम् ॥ संसिक्तरथ्यापणमार्गचत्वरांप्रकीर्णमाल्यांकुरलाजतंडुलाम् २२ आपूर्णकुंभैर्दधिचंदनोक्षितैःप्रसूनदीपावलिभिःसपल्लवैः ॥ सवृंतरंभाक्रमुकैःसकेतुभिःस्वलंकृतद्वारगृहांसपट्टिकैः २३ तांसंप्रविष्टौवसुदेवनंदनौवृतौवयस्यैर्नरदेववर्त्मना ॥ द्रष्टुंसमीयुस्त्वरिताःपुरस्त्रियोहर्म्याणिचैवारुरुहुर्नृपोत्सुकाः २४ काश्चिद्विपर्यग्धृतवस्त्रभूषणाविस्मृत्यचैकंयुगलेष्वथापराः ॥ कृतैकपत्रश्रवणैकनूपुरानाङ्क्त्वाद्वितीयंत्वपराःस्वलोचनम् २५ अश्नंत्यएकास्तदपास्यसोत्सवाअभ्यज्यमानाअकृतोपमज्जनाः ॥ स्वपंत्यउत्थायनिशम्यनिस्वनंनिपाययंत्योर्भमपोह्यमातरः २६ मनांसितासामरविंदलोचनःप्रगल्भलीलाहसितावलोकनैः ॥ जहारमत्तद्विरदेंद्रविक्रमोदृशांददच्छ्रीरमणात्मनोत्सवम् २७

चूर्णिका ॥१७२॥

उद्यानादिभिःशोभिताम् स्वर्णनिर्मितैश्चतुष्पथादिभिः अलंकृतां २१ २२ आपूर्णकुंभैःस्वलंकृतद्वारगृहाम् २३ एवंभूतांतांप्रविष्टौरामकृष्णौप्रतिद्रष्टुंपुरस्त्रियःईयुः हर्म्याण्यारुरुहुश्च २४ काश्चित् व्यत्यस्तधृतवस्त्रभूषणाः ईयुःअपराःएकनेत्रेअंजनंनिधायान्यत्रांजनंत्यक्त्वाईयुः २५ २६ काश्चित् भोजनंहित्वाईयुः काश्चित् अर्भंपाययंत्यस्तद्धित्वाईयुःतासांमनांसिकृष्णःहास्यादिभिर्जहार २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(दृष्ट्वेति) मुहुःश्रुतत्वात्तद्गतचेतसःसद्यस्तंदृष्ट्वातस्यप्रेक्षणंच उत्स्मितंचतदेवसुधातयोक्षणंसेवनंतेनलब्धोमानोयाभिस्ताःदृशाउद्घाटितेननेत्रद्वारेणात्मनिमनसिलब्धंप्राप्तंपरिष्वज्यतदप्राप्तिजनितमनंतमा
धिंत्यजुः । हेअरिंदमनिर्जितकामेतिसंबोधनम् । (ताःस्मृत्वा) शृंगाररसेमग्नोमाभूरिति २८ सौमनस्यैःकुसुमसमूहैःशोभनमनोभवैर्वा (रामकेशवावभ्यवर्षन्) २९ (अभ्युपायनैःअर्पणीयवस्तुवि
शेषैः सोदपात्रैःपाद्यादिपात्रसहितैः) ३० पौराःपुरस्त्रियः । (नरलोकस्यमहान्उत्सवोयाभ्यांसकाशात्तौ) ३१ रजकोवस्त्रनिर्णेजकःसएववस्त्राणांरंगमपिकुर्वन्रंगकारस्तम् । (अत्युत्तमानिमहामूल्या
नि) ३२ (समुचितानियोग्यानिअनन्यधारितानीत्यर्थः । सर्वशःसर्वार्थैरित्यर्थः) ३३ रुषितःकुपितः (साक्षेपंभर्त्सनासहितंयथास्यात्तथा) ३४ (ईदृशानिराजभिर्धार्याणि)हेउद्वृत्ताःगिरौवनेचरथये
यूयंनित्यंकिंपरिधत्तेतिसंभावनायांलोट् । अभीप्सथप्रार्थयध्वम् ३५ राजकुलानिराजकीयाः । लुंपंतिनिःस्वंकुर्वंति ३६ ३७ वासःकोशान्वस्त्रपुटकान् ३८ (वसित्वापरिधाय । आत्मप्रियेमहामूल्येपी

॥१७३॥ तनीले । कानिचिदनुपयुक्तानिभुवित्यक्त्वाशेषाणिगोपेभ्योददावित्यर्थः)३९वायकस्तंतुवायविशेषःवेषंअलंकारंचैलेयैर्वस्त्रमयैरनुरूपैराकल्पैर्भूषणैः ४०पर्वणिउत्सवे। सितेतरौश्वेतकृष्णौगजशावाविव ४१

दृष्ट्वामुहुःश्रुतमनुद्रुतचेतसस्तंतत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः ॥ आनंदमूर्तिमुपगुह्यदृशात्मलब्धंहृष्यत्त्वचोजहुरनंतमरिंदमाधिम् २८ प्रासादशि — श्लोकाः
खरारूढाःप्रीत्युत्फुल्लमुखांबुजाः ॥ अभ्यवर्षन्सौमनस्यैःप्रमदाबलकेशवौ २९ दध्यक्षतैःसोदपात्रैःस्रग्गंधैरभ्युपायनैः ॥ तावानर्चुःप्रमुदितास्तत्रतत्रद्वि
जातयः ३० ऊचुःपौराअहोगोप्यस्तपःकिमचरन्महत् ॥ याह्येतावनुपश्यंतिनरलोकमहोत्सवौ ३१ रजकंकंचिदायांतंरंगकारंगदाग्रजः ॥ दृष्ट्वाऽयाचत — २८/४१
वासांसिधौतान्यत्युत्तमानिच ३२ देह्यावयोःसमुचितान्यंगवासांसिचार्हतोः ॥ भविष्यतिपरंश्रेयोदातुस्तेनात्रसंशयः ३३ सयाचितोभगवतापरिपूर्णे
नसर्वशः ॥ साक्षेपंरुषितःप्राहभृत्योराज्ञःसुदुर्मदः ३४ ईदृशान्येववासांसिनित्यंगिरिवनेचराः ॥ परिधत्तकिमुद्वृत्ताराजद्रव्याण्यभीप्सथ ३५ याताशुबा
लिशामैवंप्रार्थ्यंयदिजिजीविषा ॥ बध्नंतिघ्नंतिलुंपंतिदृप्तंराजकुलानिहि ३६ एवंविकत्थमानस्यकुपितोदेवकीसुतः ॥ रजकस्यकराग्रेणशिरःकायादपा
हरत् ३७ तस्यानुजीविनःसर्वेवासःकोशान्विसृज्यवै ॥ दुद्रुवुःसर्वतोमार्गेवासांसिजगृहेऽच्युतः ३८ वसित्वाऽऽत्मप्रियेवस्त्रेकृष्णःसंकर्षणस्तथा ॥ शे
षाण्यदत्तगोपेभ्योविसृज्यभुविकानिचित् ३९ ततस्तुवायकःप्रीतस्तयोर्वेषमकल्पयत् ॥ विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ४० नानालक्षणवेषाभ्यां
कृष्णरामौविरेजतुः ॥ स्वलंकृतौबालगजौपर्वणीवसितेतरौ ४१

चूर्णिका

एवंविधंकृष्णंदृष्ट्वादृशाऽऽलिंग्यआधिंजहुः २८ ततः प्रासादशिखरारूढाःस्त्रियः तौप्रतिपुष्पवृष्टिंचक्रुः २९ तत्रतत्रद्विजातयःतौदध्यक्षतादिभिःउपायनैःआनर्चुः ३० ततः
पुरस्त्रियःऊचुःअहो गोप्यः किंतपःआचरन्याःएतौनित्यंपश्यंति ३१ तावत्कृष्णःरजकंरंगकारंप्राप्तंदृष्ट्वाश्रेष्ठवासांसिअयाचत ३२ हेरजकआवयोःयोग्यवस्त्राणिदेहि तेश्रेयः
भविष्यति ३३ एवंयाचितःसःदुर्मदःक्रुद्धःसन्आह ३४ हेउद्वृत्ताः गिरिवनेचराःईदृक्वस्त्राणिपरिधत्तकिम् ३५ होबालिशाः यात यदि जिजीविषातर्हिएवंमाप्रार्थयत: ॥१७३॥
दृप्तंनरं राजदूताः बध्नंति घ्नंति लुंपंति ३६ एवंवदतः तस्यशिरः हरिः कराग्रेण अपातयत् ३७ ततस्तत्सेवकाःवस्त्राणिहित्वादुद्रुवुः ३८ ततः कृष्णःरामश्चस्वप्रियेवस्त्रे धृत्वा
शेषाणि गोपेभ्यः ददतुः ३९ततः वायकःप्रीतः सन् वस्त्रभूषणैः तयोः वेषं चकार ४० ततःतौस्वलंकृतौ विरेजतुः ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इहलोकेपरमांश्रियंचबलंचऐश्वर्यंचस्मृतिंचइंद्रियंतत्पाटवचप्रादात् ४२ ४३ (अर्हणादिभिःअर्घ्यादिभिः ४४ (नः अस्माकम् वांयुवयोः) ४५ क्षेमायअभयाय । भवायउद्भवाय ४६ रजकवधे नवायकानुग्रहेणचयुवयोर्विषमदृष्टितयाऽनीश्वरतानशंकनीयेत्याह । नहिवामिति । अत्रहेतुःसमयोरिति (रागद्वेषरहितयोरित्यर्थः) अत्रापिहेतुद्वयम् जगदात्मनोरितिसुहृदोरिति । कथंतर्हिवैषम्यं दृश्यतेतत्राह । भजंतमिति । कल्पतरोरिवेत्यर्थः ४७ (तौयुवां । भवद्भिर्नियुज्यतेप्रेर्यतइतियत्एषहिपरमोनुग्रहः) ४८ (हेराजेंद्र इतिएवंविज्ञापयन्अभिप्रेत्यतन्मतंज्ञात्वामालाःकृष्णरामादिभ्योददौ ४९ (ताभिःमालाभिः । सहानुगैरनुगाश्चालंकृताइत्यर्थः) ५० (सौहार्दस्नेहम्) ५१ अन्वयवर्धिनींअन्वयेवंशेवृद्धिमतीमित्यर्थः । अप्रार्थितंश्रीप्रभृतिकंचदत्त्वाततोनिर्जगामेति ५२ स्वैरंचरन्मधुपुरेरजकं निकृत्यकृष्णःप्रदायचवरानथवायकाय । मालाकृतंसमनुकंप्यचकारकुब्जामृज्वींधनुश्चसहसोन्नमयन्बभंज ५२ ॥ ॥ इतिश्रीभागवतेमहापुराणदशमस्कंधेएकचत्वारिंशोध्यायः ४१ ॥ ७ ॥

॥१७४॥ द्विचत्वारिंशकेकुब्जोन्नमनंधनुषोभिदा । वयस्तद्रक्षिणांकंसारिष्टिरंगोत्सवादिच ॥ १ ॥ अंगविलेपाश्चंदनादयःगृहीतान्यंगविलेपानांभाजनानियया तां । (युवतींतरुणींकुब्जांन्युब्जदेहांअतएततसंज्ञांस्त्रियंपप्रच्छ)रसप्रदःसुखप्रदः १

श्लोकाः ४२/१

तस्यप्रसन्नोभगवान्प्रादात्सारूप्यमात्मनः ॥ श्रियंचपरमांलोकेबलैश्वर्यस्मृतींद्रियम् ४२ ततःसुदाम्नोभवनंमालाकारस्यजग्मतुः ॥ तौदृष्ट्वाससमुत्थाय ननामशिरसाभुवि ४३ तयोरासनमानीयपाद्यंचार्घ्यार्हणादिभिः ॥पूजांसानुगयोश्चक्रेस्रक्तांबूलानुलेपनैः ४४ प्राहनःसार्थकंजन्मपावितंचकुलंप्रभो ॥ पितृदेवर्षयोमह्यंतुष्टाह्यागमनेनवाम् ४५ भवंतौकिलविश्वस्यजगतःकारणंपरम् ॥ अवतीर्णाविहांशेनक्षेमायचभवायच ४६ नहिवांविषमादृष्टिःसुहृदोर्जगदात्मनोः ॥ समयोःसर्वभूतेषुभजंतंभजतोरपि ४७ तावाज्ञापयतंभृत्यंकिमहंकरवाणिवाम् ॥ पुंसोऽत्यनुग्रहोह्येषभवद्भिर्यन्नियुज्यते ४८ इत्यभिप्रेत्यराजेंद्रसुदामाप्रीतमानसः ॥ शस्तैःसुगंधैःकुसुमैर्मालाविरचिताददौ ४९ ताभिःस्वलंकृतौप्रीतौकृष्णरामौसहानुगैः ॥ प्रणतायप्रपन्नायददतुर्वरदौवरान् ५० सोपिवव्रेऽचलांभक्तिंतस्मिन्नेवाखिलात्मनि ॥ तद्भक्तेषुचसौहार्दंभूतेषुचदयांपराम् ५१ इतितस्मैवरंदत्त्वाश्रियंचान्वयवर्धिनीम् ॥ बलमायुर्यशःकीर्तिंनिर्जगामसहाग्रजः ५२ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकचत्वारिंशोध्यायः ४१ ॥ ॥ ७ ॥ ॥ बादरायणिरुवाच ॥ अथव्रजन्राजपथेनमाधवःस्त्रियंगृहीतांगविलेपभाजनाम् ॥ विलोक्यकुब्जांयुवतींवराननांपप्रच्छयांतींप्रहसन्रसप्रदः १

चूर्णिका

तस्य प्रसन्नः हरिः स्वसारूप्यं श्रियंच ददौ ४२ ततःसुदाम्नः मालाकारस्य गृहं जग्मतुः तौदृष्ट्वा सःउत्थाय ४३ तावासनंदत्वापूजांकृत्वाप्राह ४४ नःजन्मसार्थकंजातं कुलंचपावितम्अद्यपित्रादयः वांआगमनेनतुष्टाः४५ भवंतौविश्वस्यहेतू इहअस्यक्षेमायअवतीर्णौ ४६ भृत्यंमांआज्ञापयतम् वांकिंकरवाणि ४७ ४८एवंविज्ञापयन् सुदामा तन्मतंज्ञात्वा पुष्पमालैर्ददौ ४९ ततः प्रीतौरामकृष्णौ तस्मैवरान् ददतुः ५० सोपिहरौभक्तिं सत्सुस्नेहंभूतेषुदयांवव्रे ५१ इतितस्मैवरंदत्वाश्रियंचान्वयवर्धिनीम् बलमायुर्यशःकांतिंनिर्जगामसहाग्रजः ५२ ॥ इतिदशमेएकचत्वारिंशः ॥ ४१ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेनृप माधवःराजपथेन गच्छन् गृहीतांगविलेपभाजनां यांतीं कुब्जांदृष्ट्वा प्रपच्छ १

॥१७४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

हेअंगनेहेवरोरुइतिसोपहासंसंबोध्यपृच्छति । त्वं का । एतदनुलेपनंकस्यवा । उहइतिनिपातौभ्रूविक्षेपयुक्तेवितर्के । अस्मत्सेवासद्यःफलेत्याह । नाचिरादिति । (ततोविलेपदानात्) २ तिस्रोग्रीवोरः कट्योवक्राइतित्रिवक्रेतिनामयस्याःसा (हेसुंदरवर्य) अनुलेपनसाधनक्रियायांकंसस्य (संमता) बहुमतादास्यस्मि । (मयासाधितंअनुलेपनंकंसस्यातिंप्रियं) ३ रूपंचअंगसौष्ठवंपेशलंचसौकुमार्यं माधुर्यंचरसिकताहसितंचआलापाश्चवीक्षितंचतैर्धर्षितात्मामोहितचित्तासाददौसांद्रंघनं ४ स्ववर्णेतरशोभिनारामकृष्णयोर्वर्णाभ्यामितरःपीतादिवर्णस्तेनशोभितुंशीलंयस्यतेनसंप्राप्तपरभागेनसंप्राप्तःपरोनाभेरुपरितनोभागोयेनसःसंप्राप्तःपरभागःशोभातिशयोयेनेतिवातेनानुरंजितौ ५ स्वदर्शनेसद्यःफलंदर्शयन् ६ तस्याःप्रपदेपादाग्रद्वयंपद्भ्यामापीड्यद्वेअंगुल्यौउत्तानेउन्नतेयस्मिन्पाणौतेनचिबुकेमुखस्याधोभागेधृत्वाऽध्यात्मंदेहंउन्नमयामास ७ तदैवऋजुसरलंसमानंतुल्यावयवंअंगंयस्याःसा । बृहत्यौश्रोणीपयोधरौचयस्याःसा । मुकुंदस्पर्शनादितिमुख्यंकारणम् ८ (जातोहृच्छयोमदनोयस्याः) ९ (त्वयानिमित्तेनउन्मथितंक्षुभितंचित्तंयस्यास्तस्याः) १० (पश्यतःसतःअनुगानांमुखंवीक्ष्य) ११ आधिविकर्षणंमनःपीडाशमनम् । कंससवधेनसाधितोर्थःसुहृदांप्रयोजनंयेनसः । अगृहाणांअकृतदाराणांपांथानांप्रवासिनांपरंअयनंआश्रयस्त्वम् १२ मधुरयागिरातांप्रस्थाप्यव्रजन्वणिक्पथैःवणिग्भिरनेकोपायनादिभिःपथिअर्चितः १३

॥१७५॥

कात्वंवरोर्वेतदुहानुलेपनंकस्यांगनेवाकथयस्वसाधुनः ॥ देह्यावयोरंगविलेपमुत्तमंश्रेयस्ततस्तेनचिराद्भविष्यति २ ॥ सैरंध्र्युवाच ॥ दास्यस्म्यहंसुंदरवर्यसंमतात्रिवक्रनामाह्यनुलेपकर्मणि ॥ मद्भावितंभोजपतेरतिप्रियंविनायुवांकोन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसितालापवीक्षितैः ॥ धर्षितात्मा ददौसांद्रमुभयोरनुलेपनम् ४ ततस्तावंगरागेणस्ववर्णेतरशोभिना ॥ संप्राप्तपरभागेनशुशुभातेऽनुरंजितौ ५ प्रसन्नोभगवान्कुब्जांत्रिवक्रांरुचिराननाम् ॥ ऋज्वींकर्तुंमनश्चक्रेदर्शयन्दर्शनेफलम् ६ पद्भ्यामाक्रम्यप्रपदेद्व्यंगुल्युत्तानपाणिना ॥ प्रगृह्यचिबुकेध्यात्ममुदनीनमदच्युतः ७ सातदर्जुसमानांगीबृहच्छ्रोणिपयोधरा ॥ मुकुंदस्पर्शनात्सद्योबभूवप्रमदोत्तमा ८ ततोरूपगुणौदार्यसंपन्नाप्राहकेशवम् ॥ उत्तरीयांतमाकृष्यस्मयंतीजातहृच्छया ९ एहिवीरगृहंयामोनत्वांत्यक्तुमिहोत्सहे ॥ त्वयोन्मथितचित्तायाःप्रसीदपुरुषर्षभ १० एवंस्त्रियायाच्यमानःकृष्णोरामस्यपश्यतः ॥ मुखंवीक्ष्यानुगानांचप्रहसंस्तामुवाचह ११ एष्यामितेगृहंसुभ्रूःपुंसामाधिविकर्षणम् ॥ साधितार्थोगृहाणांनःपाथानांत्वंपरायणम् १२ विसृज्यमाध्व्यावाण्यातांव्रजन्मार्गेवणिक्पथैः ॥ नानोपायनतांबूलस्रग्गंधैःसाग्रजोऽर्चितः १३

श्लो २/१३

चूर्णिका

हे वरोरु त्वं का इदंलेपनं कस्येति नः वद आवयोः विलेपंदेहि तेश्रेयः भविष्यति २ ॥ सैरंध्र्युवाच ॥ हेकृष्णअहंत्रिवक्रनाम्नीदासी अनुलेपकर्मणिकंससंमितास्मि मद्भावितंतस्यातिप्रियंस्यात् तत् युवांविनाकोऽन्यः अर्हति ३ एवमुक्त्वा साहरेः रूपादिभिः मोहितचित्तासती उभयोः लेपनंददौ ४ ततस्तौतेनांगरागेण अनुरंजितौशुशुभाते ५ ततः प्रसन्नः हरिः तांत्रिवक्रांऋज्वींकर्तुं मनश्चक्रे ६ स्वपद्भ्यांतत्प्रपदे आक्रम्य द्व्यंगुल्युत्तानपाणिनाचुबुकेधृत्वा देहं उन्नमयामास ७ सातदैवप्रमदोत्तमाबभूव ८ ततः साउत्तरीयांतमाकृष्य कृष्णमाह९ हेवीर एहि गृहंयामःत्वांहातुं नोत्सहे त्वं प्रसीद १० एवंयाच्यमानः कृष्णः रामादीनांमुखंवीक्ष्य तामाह ११ हेसुभ्रूःअहंकंसवधेनसाधितसुहृत्प्रयोजनः सन् ते गृहं एष्यामि यतः त्वं अगृहाणांपांथानां नः परमाश्रयः असि १२ एवंतांविसृज्यव्रजमार्गे वणिक्पथैः उपायनादिभिः साग्रजः अर्चितः १३

CC-0. In Public Domain. Digitization by eGangotri

टीका

लेख्यांश्चित्रन्यस्ताइवमूर्तयोयासांताः १४ धनुषःस्थानंधनुर्मखस्यशालामित्यर्थः । पृच्छमानःपृच्छन् (ददर्शऐंद्रंइंद्रायुधं)१५ (गुप्तंरक्षितं) प्रसह्यबलात् १६ निमिषेणातिशीघ्रं (सज्जंकृत्वानृणां पश्यतांसतां) मदकरीमत्तहस्ती १७ (रोदसीद्यावापृथिव्यौ) १८ (आततायिनःवधोद्यताःशस्त्रपाणयः) गृह्यतांवध्यतामितिवदंतोजिघृक्षवआवृतवंतः १९ (दुरभिप्रायान्हंतुकामानित्यर्थः) न केवलंक्रुद्धौकिंतुभग्नस्यधनुषःशकलेगृहीत्वाजघ्नतुश्चेति २० परतःप्रातरेवगंतव्यमितिनिश्चित्यशालामुखादेवपुनर्निष्क्रम्य (परावृत्येति) २१ तेजःप्रभावंप्रागल्भ्यंधृष्टताम् २२ शकटंशकटावमोचनस्थानं (यत्रनंदादयआसन्) २३ मुकुंदस्यविगमेनिर्गमनसमये (विरहातुरागोप्यो) याआशिषआशासतसुखंप्रभातारजनीयंअद्यध्रुवंतत्रद्दशोभविष्यतेइत्यादियदुक्तवत्यःताःकृताःसत्याबभूवुःकेषाम् । मधुपुरिमथुरायांपुरुषभूषणस्यश्रीकृष्णस्यगात्रलक्ष्मींदिहेशाभांसंपश्यताम् । कथंभूतस्यगात्रस्यनुअहोइतरान्ब्रह्मादीन्हित्वापदयनंआश्रयंश्रीःकामयामास । यांगात्रलक्ष्मीमितिवा २४ अवनिक्तंक्षालितंअंघ्रियुगुलंययोस्तौक्षीरमिश्रमन्नंभुक्त्वातांरात्रिंसुखंन्यवसताम् २५ परंकेवलंगोविंदरामयोर्विक्रीडितंतत्नतुपराक्रमःकश्चित् २६

श्लोकाः १४/२६

तद्दर्शनस्मरक्षोभादात्मानंनाविदन्स्त्रियः ॥ विस्रस्तवासःकबरवलयालेख्यमूर्तयः १४ ततःपौरान्पृच्छमानोधनुषःस्थानमच्युतः ॥ तस्मिन्प्रविष्टोदद्दशेधनुरैंद्रमिवाद्भुतम् १५ पुरुषैर्बहुभिर्गुप्तमर्चितंपरमर्धिमत् ॥ वार्यमाणोनृभिःकृष्णःप्रसह्यधनुराददे १६ करेणवामेनसलीलमुद्धृतंसज्जंचकृत्वानिमिषेण पश्यताम् ॥ नृणांविकृष्यप्रबभंजमध्यतोयथेक्षुदंडंमदकर्युरुक्रमः १७धनुषोभज्यमानस्यशब्दःखंरोदसीदिशः ॥ पूरयामासयंश्रुत्वाकंसस्त्रासमुपागमत् ८ तद्रक्षिणःसानुचराःकुपिताआततायिनः ॥ गृहीतुकामाआवव्रुर्गृह्यतांवध्यतामिति १९ अथतान्दुरभिप्रायान्विलोक्यबलकेशवौ ॥ क्रुद्धौधन्वनआदाय शकलेतांश्चजघ्नतुः २० बलंचकंसप्रहितंहत्वाशालामुखात्ततः ॥ निष्क्रम्यचेरतुर्हृष्टौनिरीक्ष्यपुरसंपदः २१ तयोस्तदद्भुतंवीर्यंनिशम्यपुरवासिनः ॥ तेजःप्रागल्भ्यंरूपंचमेनिरेविबुधोत्तमौ २२ तयोर्विचरतोःस्वैरमादित्योस्तमुपेयिवान् ॥ कृष्णरामौवृतौगोपैःपुराच्छकटमीयतुः २३ गोप्योमुकुंदविगमेविरहातुरायाआशासताशिषऋतामधुपुर्यभूवन् ॥ संपश्यतांपुरुषभूषणगात्रलक्ष्मींहित्वेतरान्नुभजतश्चकमेऽयनंश्रीः २४ अवनिक्तांघ्रियुगुलौभुक्त्वाक्षीरोपसेचनम् ॥ ऊषतुस्तांसुखंरात्रिंज्ञात्वाकंसचिकीर्षितम् २५ कंसस्तुधनुषोभंगंरक्षिणांस्वबलस्यच ॥ वधंनिशम्यगोविंदरामविक्रीडितंपरम् २६

चूर्णिका

तद्दर्शनस्मरक्षोभात् स्त्रियः आत्मानंनाविंदन् १४ ततः कृष्णः पौरान्धनुःस्थानंपृष्ट्वा तत्रगत्वाधनुः ददृशे १५ तत् बहुपुरुषैः गुप्तंधनुः नृभिर्वारितोपिकृष्णः आददे १६ ततः वामकरेण सज्जं कृत्वा मध्यतः बभंज इक्षुदंडंकरीव १७ ततः भज्यमानधनुःशब्दः खंरोदसीदिशः पूरयामास १८ तंश्रुत्वाकंसः त्रासमाप तद्रक्षिणः क्रुद्धाः संतः गृह्यतांबध्यतामितितं आवव्रुः १९ तान्दृष्ट्वारामकृष्णौधनुःशकलेआदायतान् जघ्नतुः २० तथाकंसप्रहितं बलंचहत्वाततः शालामुखान्निर्गम्यपुरसंपदः दृष्ट्वा चेरतुः २१ तयोः तत्वीर्यं दृष्ट्वानागराः देवोत्तमौ मेनिरे २२ एवंतयोः चरतोः सूर्यः अस्तंजगाम तावत्कृष्णः रामाद्यैर्वृतः शकटस्थानं जगाम २३ हेनृपगोप्यः व्रजात् हरेः निर्गमनसमये याः आशिषः आशासत ताः हरिमूर्तिशोभांपश्यतांमधुपुरिसत्याःअभवन् २४ ततः कृष्णरामौपादौ प्रक्षाल्य दुग्धान्नं भुक्त्वा तांरात्रिंन्यवसताम् २५कंसस्तु धनुर्भंगं रक्षिणां घातंचश्रुत्वा २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(दीर्घःप्रजागरोयस्य)उभयथास्वप्नजागरितभेदेन । प्रत्येकंमृत्योर्दौत्यकराणिच (मृत्युसूचकानीत्यर्थः) तथामंत्रः । इत्थादुलूकश्चापप्तन्‌हिरण्याक्षोअयोमुखः । रक्षसांदूतआगतइत्यादिः । यदेतद्भूता निअन्वाविश्यदैर्वीवाचंवदसीत्यादिश्च २७ तानिदर्शयतिश्लोकत्रयेण । जलादौप्रतिरूपेदृश्यमानेस्वशिरसस्तत्रादर्शनम् । असत्यपिद्वितीयेचक्षुर्षोतर्धानेअंगुल्यादौज्योतिषांचंद्रादीनांद्वित्वम् २८ छायायांप्रतिबिंबेछिद्रप्रतीतिः । पिहितकर्णपुटस्यर्योतःश्रूयमाणोध्वनिःसप्राणघोषःतस्यानुपश्रुतिरश्रवणम् । वृक्षेषुस्वर्णवर्णप्रतीतिः । रजःकर्दमादिषुस्वपदानामदर्शनम् । एतानिजागरितानिदुर्निमित्तानि २९ स्वप्नान्याह । स्वप्नइति प्रेतैर्मृतैःपरिष्वंगः खरमारुह्ययानं विषभक्षणं नलदमालीजपाकुसुममालीयायादितियत्तदप्येकंदुर्निमित्तमिति ३० (स्वप्नसंज्ञकानिजागरितसंज्ञकानिच) ३१ (व्युष्टायां) कष्टेनकथंचित्प्रभातायांपुनःसूर्येचाद्भ्यःसमुत्थितइति । तथाचश्रुतिः । "यउदगान्महतोर्णवाद्विभ्राजमानःसलिलस्यमध्यात् । समावृषभोलोहिताक्षःसूर्योविपश्चिन्मनसापुनात्वि"ति ३२ (पुरुषाःसेवकाःआनर्चुरलंचक्रुः । तूर्याणिभेर्यश्चजघ्निरेवादिताः) ३३ (तेषुमंचेषु) यथोपजोषंयथासुखं (यथायोग्यमित्यर्थः) ३४ (विदूयताचिंतयादह्यमानेनोपलक्षितः) ३५ मल्लतालउत्तरउपरि उच्चैःश्रूयतेयेषुतूर्येषुउपाध्यायामल्लाचार्याः (तैःसहदीप्ताःप्रकाशमानाःउत्साहयुक्ताइत्यर्थःमल्लाबाहुयुद्धेनक्रीडंतोवीरविशेषाः) ३६ उपस्थानंमल्लरंगंआसेदुरागताः ३७

श्लोकाः २७/३७

दीर्घप्रजागरोभीतोदुर्निमित्तानिदुर्मतिः ॥ बहून्यचष्टोभयथामृत्योर्दौत्यकराणिच २७ अदर्शनंस्वशिरसःप्रतिरूपेचसत्यपि ॥ असत्यपिद्वितीयेचद्वैरूप्यं ज्योतिषांतथा २८ छिद्रप्रतीतिश्छायायांप्राणघोषानुपश्रुतिः ॥ स्वर्णप्रतीतिर्वृक्षेषुस्वपदानामदर्शनम् २९ स्वप्नेप्रेतपरिष्वंगःखरयानंविषादनम् ॥ यायान्नलदमाल्येकस्तैलाभ्यक्तोदिगंबरः ३० अन्यानिचेत्थंभूतानिस्वप्नजागरितानिच ॥ पश्यन्मरणसंत्रस्तोनिद्रांलेभेनचिंतया ३१ व्युष्टायांनिशिकौरव्यसूर्येचाद्भ्यःसमुत्थिते ॥ कारयामासवैकंसोमल्लक्रीडामहोत्सवम् ३२ आनर्चुःपुरुषारंगंतूर्यभेर्यश्चजघ्निरे ॥ मंचाश्चालंकृताःस्रग्भिःपताकाचैलतोरणैः ३३ तेषुपौराजनपदाब्रह्मक्षत्रपुरोगमाः ॥ यथोपजोषंविविशूराजानश्चकृतासनाः ३४ कंसःपरिवृतोमात्यैराजमंचउपाविशत् ॥ मंडलेस्वरमध्यस्थोहृदयेनाविदूयता ३५ वाद्यमानेषुतूर्येषुमल्लतालोत्तरेषुच ॥ मल्लाःस्वलंकृतादीप्ताःसोपाध्यायाःसमासत ३६ चाणूरोमुष्टिकःकूटःशलस्तोशलएवच ॥ तआसेदुरुपस्थानंवल्गुवाद्यप्रहर्षिताः ३७

चूर्णिका ॥१७७॥

भीतः सन् दुर्निमित्तानिददर्श २७ तान्याह प्रतिरूपेसति स्वशिरसः अदर्शनम् तथाज्योतिषांद्वैरूप्यम् २८ छायायांछिद्रप्रतीतिः प्राणघोषस्याश्रवणम् वृक्षेषुस्वर्णप्रतीतिः स्वपदानामदर्शनम् २९ स्वप्नेप्रेतालिंगनम् खरयानम् विषादनम् यायान्नलदमाल्येकस्तैलाभ्यक्तोदिगंबरः ३० इत्यादीनिकंसः दृष्ट्वा मरणत्रस्तः सन्निद्रांनलेभे ३१ ततः प्रातः कंसः मल्लक्रीडामहोत्सवंकारयामास ३२ पुरुषाः रंगं आनर्चुः तूर्यभेर्यः जघ्निरे मंचाः स्रगादिभिः अलंकृताः ३३ तेषुसर्वेजनाः राजानश्चोपविविशुः ३४ सामात्यःकंसश्चकंपितहृदयेनराजमंचेउपविवेश ३५ एवंतूर्येषुवाद्यमानेषुसत्सुमल्लाः चाणूरमुष्टिककूटशलतोशलाः मल्लरंगंआसेदुः ३६ ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कंसेनसमाहुताःसमाहूताः निवेदितान्युपायनानियैस्ते ३८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांद्विचत्वारिंशतितमोध्यायः ॥ ४२ ॥ ॥ ७ ॥ ॥ त्रिचत्वारिंशकेहत्वाग
जेंद्रंरामकृष्णयोः । रंगप्रवेशसौभाग्यंचाणूरेणचभाषणम् ॥ १ ॥ पूर्वेद्युरेवकृतंशौचंशुद्धत्वंनिरपराधत्वंयाभ्यांतौ । एतदुक्तंभवति । धनुर्भंगादिनाआवाभ्यांनिजैश्वर्येसूचितेपिपितरौनमुंचति । आवां
चपुनर्जिघांसति । अतोस्यमातुलस्यवधेपिनावयोर्दोषइत्येवंकृतापराधपरिहाराविति । मल्लानांदुंदुभीनांचनिर्घोषंमल्लतालदुंदुभिनिर्घोषंवा १ कुवलयापीडसंज्ञकंनागंहस्तिनंअबष्ठोहस्तिपस्तेनचोदितम्
२ परिकरंबद्धायुद्धोचितंपरिधानंकृत्वासमूह्यनिबध्य ३ (अद्य त्वात्वां) ४ अंतकोमृत्युःकालस्तन्निमित्तंयमस्तंन्नियंता । तैरुपमायस्यतम् ५ (तंकृष्णमभिगम्यकरेणशुंडया) विगलितःविच्युतः
(अमुंहस्तिनं)मुष्टिनानिहत्यचरणेष्वलीयत अदृश्यो बभूव ६ अचक्षाणःअपश्यन्घ्राणमवघ्राणंतेनदृष्टिर्दर्शनंयस्यसः । लोचनागोचरमपिपशवोहिघ्राणेनजानंतीतिप्रसिद्धम् । परामृशत्धृतवान्पुष्करे
णशुंडाग्रेण । स.कृष्णःप्रसह्यबलेन ७धनुषःधनुषांपंचविंशतिंहस्तशतमितियावत्तावंतंदेशंगजंविचकर्षआकृष्यनीतवान् । कंकइवविचकर्ष । यथानागंसर्पवद्वर्तमानंगजंसुपर्णइव (गरुडवद्वर्तमानः)स्वय
मित्यर्थः । "आविरासीद्यथाप्राच्यांदिशींदुरिवपुष्कल"इतिवत् । प्राचीदिगिववर्तमानायांदेवक्यांइंदुरिववर्तमानःकृष्णः८सपर्यावर्तमानेनेति । पुच्छग्राहिणंकृष्णंग्रहीतुंयदिदक्षिणतःपरिवर्ततेगजः । त
र्हिसव्यतोभ्रामयतितंकृष्णःयदासव्यतःपरिवर्ततेगजस्तदादक्षिणतोभ्रामयन्भ्राम्यमाणेनतेनसहसबभ्राम । गोवत्सेनभ्राम्यमाणेनबालकः सएवकृष्णोयथा । अन्योवाबालकइवेति ९

॥१७८॥

श्लोकाः ३८/९

नंदगोपादयोगोपाभोजराजसमाहुताः ॥ निवेदितोपायनास्तेएतस्मिन्मंचआविशन् ३८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्विचत्वारिंशो
ध्यायः ४२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अथकृष्णश्चरामश्चकृतशौचौपरंतप ॥ मल्लदुंदुभिनिर्घोषंश्रुत्वाद्रष्टुमुपेयतुः १ रंगद्वारंसमासा
द्यतस्मिन्नागमवस्थितम् ॥ अपश्यत्कुवलयापीडंकृष्णोऽबष्ठप्रचोदितम् २ बद्धापरिकरंशौरिःसमूह्यकुटिलालकान् ॥ उवाचहस्तिपंवाचामेघनादग
भीरया ३ अंबष्ठांबष्ठमार्गंनौदेह्यपक्रममाचिरम् ॥ नोचेत्सकुंजरंत्वाद्यनयामियमसादनम् ४ एवंनिर्भर्त्सितोंबष्ठःकुपितःकोपितंगजम् ॥ चोदयामासकृ
ष्णायकालांतकयमोपमम् ५ करींद्रस्तमभिद्रुत्यकरेणतरसाऽग्रहीत् ॥ कराद्विगलितःसोमुंनिहत्यांघ्रिष्वलीयत ६ संक्रुद्धस्तमचक्षाणोघ्राणदृष्टिःसकेशव
म् ॥ परामृशत्पुष्करेणसप्रसह्यविनिर्गतः ७ पुच्छेप्रगृह्यातिबलंधनुषःपंचविंशतिम् ॥ विचकर्षयथानागंसुपर्णइवलीलया ८ सपर्यावर्तमानेनसव्यद
क्षिणतोच्युतः ॥ बभ्रामभ्राम्यमाणेनगोवत्सेनेवबालकः ९

चूर्णिका

नंदगोपादयोगोपाभोजराजसमाहुताः निवेदितोपायनास्तेएकस्मिन्मंचमाविशन् ३८ ॥ इतिदशमेद्विचत्वारिंशः ॥ ४२ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥
हेराजन् अथरामकृष्णौमल्लदुंदुभिनादंश्रुत्वा तं द्रष्टुं १ रगद्वारंप्राप्य अंबष्ठप्रेरितं स्थितंकुवलयापीडंददर्शतुः २ ततः कृष्णः परिकरंबध्वा हस्तिपंआह ३ हे अंबष्ठ नौ
मार्गंदेहि नोचेत् सराजं त्वांयमालयंनयामि ४एवंनिर्भर्त्सितोऽवष्ठः क्रुद्धः सन् कृष्णायगजंचोदयामास५ततोगजःकृष्णंकरेणजग्राह करात् विच्युतः हरिः मुष्टिनातं हत्वा अं
घ्रिषुअलीयत६ततोगजः तंअपश्यन्क्रुद्धः सन् घ्राणदृष्टिः भूत्वातंशुंडयादधार कृष्णः प्रसह्यनिर्गतः सन् ७ पुच्छे धृत्वा धनुषांपंचविंशतिर्यावत् तावंतंदेशंविचकर्ष ८
तथासव्यदक्षिणतः भ्राम्यमाणेनतेनसहव्यस्तंबभ्राम ९

॥१७८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

वारणंगजम् । प्राद्रवन्प्रकर्षेणासमंताद्धावन्पातयामास यथापततितथातंवंचयन्प्राद्रवदित्यर्थः (पदेपदेस्पृश्यमानोपि) १० किंच । सधावन्निति (सकृष्णोभूमौपतित्वापतितमात्मानंयावद्दंताभ्यांहं तितावदुत्थितइत्यर्थः) ११ (महामात्रैर्हस्तिपकैः । कृष्णमभ्यगच्छत्) १२ (हस्तंशुंडां । एवंपातयामास) १३ (चकाराद्धस्तिनमहनत्) १४ रंगंसमाविशत् । तदावीरश्रियाबभौकथंभूतः । अंसेन्यस्तंविषाणंगजदंतोयेनसः । असृजोरक्तस्यमदस्यचबिंदुभिःपरितोंऽकितः । विरूढाउद्गताःस्वेदकणिकास्ताभिरुपलक्षितंवदनांबुरुहंयस्यसः १५ नकेवलंसएकःसमाविशत्किंतुवृतौगोपैरिति १६ तत्रत्त्वशृंगारादिसर्वरसकदंबकमूर्तिर्भगवान्तत्तदभिप्रायानुसारेणतत्तद्रूपोबभौनतुसाकल्येनसर्वेषामित्याह मल्लानामिति । मल्लादीनामज्ञानांद्रष्टॄणांअशन्यादिरूपेणदशधाविदितः सन् साग्रजोरंगं गतइत्यन्वयः । मल्लादिष्वभिव्यक्तारसाःक्रमेणश्लोकेननिबध्यंते । रौद्रोऽद्भुतश्चशृंगारोहास्यंवीरोदयातथा । भयानकश्चबीभत्सःशांतःसप्रेमभाक्तिकइति । अविदुषांविराड्विकलः अपर्याप्तोराजतेवि राट्अनेनबीभत्सउक्तः । विकलत्वंचक्कवज्रसारसर्वांगावित्यादिनावक्ष्यते । (परंतत्त्वंपरदेवतेतिप्रकारद्वयेनाप्येकएवशांतोरसउक्तः । उभयत्रस्थायिभावस्यनिर्वेदस्यैक्यात् । विभावानुभावसात्विकव्य भिचारिभावैरुपचीयमानःस्थायिभावः परिपूर्णोरसः । निबद्धानांरौद्रादीनांक्रमेणस्थायिभावास्तुक्रोधविस्मयरतिहासोत्साहशोकभयजुगुप्सानिर्वेदाः विभावादीनांस्वरूपकथनादिरसशास्त्रेज्ञेयम् ।) १७ (मन्वस्वीधीरोपि) उद्विग्निजेभीतोबभूव १८ (वेषोरचनाविशेषः विचित्राणिवषादीनिययोस्तौ । निरीक्षमाणानांमनः क्षिपंतौस्वप्रभयादर्शनाक्षमंकुर्वतावित्यर्थः) यथानटाविति निर्भयत्वंदर्शितम् १९

॥१७९॥

श्लोकाः १०/१९

ततोभिमुखमभ्येत्यपाणिनाऽऽहत्यवारणम् ॥ प्राद्रवन्पातयामासस्पृश्यमानःपदेपदे १० सधावन्क्रीडयाभूमौपतित्वासहसोत्थितः ॥ तंमत्वापतितंक्रुद्धो दंताभ्यांसोऽहनत्क्षितिम् ११ स्वविक्रमेप्रतिहतेकुंजरेंद्रोत्यमर्षितः ॥ चोद्यमानोमहामात्रैःकृष्णमभ्यद्रवद्रुषा १२ तमापतंतमासाद्यभगवान्मधुसूदनः॥ निगृह्यपाणिनाहस्तंपातयामासभूतले १३ पतितस्यपदाक्रम्यमृगेंद्रइवलीलया ॥ दंतमुत्पाट्यतेनैनवहस्तिपांश्चाहनद्धरिः १४ मृतकंद्विपमुत्सृज्यदंत पाणिःसमाविशत् ॥ अंसन्यस्तविषाणोऽसृङ्मदबिंदुभिरंकितः ॥ विरूढस्वेदकणिकावदनांबुरुहोबभौ १५ वृतौगोपैःकतिपयैर्बलदेवजनार्दनौ ॥ रंगंवि विशतूराजन्गजदंतवरायुधौ १६ मल्लानामशनिर्नृणांनरवरःस्त्रीणांस्मरोमूर्तिमान्गोपानांस्वजनोऽसतांक्षितिभुजांशास्तास्वपित्रोःशिशुः ॥ मृत्युर्भो जपतेर्विराडविदुषातत्त्वंपरंयोगिनांवृष्णीनांपरदेवतेतिविदितोरंगंगतःसाग्रजः १७ हतंकुवलयापीडंदृष्ट्वातावतिदुर्जयौ ॥ कंसोमनस्व्यपितदाभृशमुद्विवि जेनृप १८ तौरेजतूरंगगतौमहाभुजौविचित्रवेषाभरणस्रगंबरौ ॥ यथानटावुत्तमवेषधारिणौमनःक्षिपंतौप्रभयानिरीक्षताम् १९

चूर्णिका

ततः संमुखंएत्यतं पाणिनाहत्वा प्राद्रवन्सन् तंपातयामास १० एवंकृष्णः भूमौपतित्वा सहसोत्थितः तदागजः तंपतितं मत्वादंताभ्यांभुवंजघान ११ एवंविक्रमेनष्टेक्रुद्धो गजः रुषाकृष्णंदुद्राव १२ तंप्राप्तंदृष्ट्वाकृष्णः पाणिनाधृत्वाभूतलेनिपात्य १३ पदाआक्रम्य दंतंउत्पाट्यचतेनैवतंहस्तिपांश्चजघान १४ ततःतंहित्वादंतपाणिः असृङ्मदबिंदुभिः अंकितः सन्बभौ १५ एवं रामकृष्णौगोपैः सहगजदंतायुधौरंगंविविशतुः १६ तदासः कृष्णःमल्लानामशनिर्नृणांनरवरःस्त्रीणांमदनः गोपानांस्व जनः दुष्टराज्ञांशास्तापित्रोः शिशुः कंसस्यमृत्युः अज्ञानांअपर्याप्तः योगिनांतत्वं यदूनांपरदेवताइतिविदितः सन्साग्रजः १७ रंगंगतः एवंहतं गजंदृष्ट्वाशूरोपिकंसः भयं प्राप १८ ततस्तौरंगगतौ नटाविवरेजतुः १९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(नगरभवाराष्ट्रभवाश्चजनाः) प्रहर्षवेगेनउत्कलितानिउज्जृंभितानीक्षणानिआननानिचयेषांतेतयोराननंपरंपपुः नतुतृप्ताः निराकांक्षानबभूवुरित्यर्थः २० तदेवाह पिबंतइवेति । श्लिष्यंतइवपारष्वं गंकुर्वंतइवलक्षिताइत्यर्थः २१ यथादृष्टं धनुर्भंगादि यथाश्रुतंगोवर्धनोद्धरणादितत्तदनतिक्रम्यतदनुरूपमित्यर्थः । (परस्परंऊचुः ।) प्रत्यक्षंचतयोरूपंगजदंतादियुक्तं गुणाः शौर्यादयः माधुर्यंहसिताल पादि । प्रागल्भ्यंधाष्टर्यंतैः स्मारिताइव (तत्कृतलीलया) स्मरणंप्रापिताइत्यर्थः २२ (विस्मितानांवाक्यान्याहाष्टभिः एतावित्यादिभिः । (नारायणस्यांशेनेत्यन्वयः) २३ किलेतिसर्वत्रान्वेति २४ (अर्जुनौवृक्षौ) गुह्यकः शंखचूडः अन्येचाघासुरादयः २५ । २६ (गोकुलंचपरित्रातंरक्षितम् । २७ (हसितयुक्तंप्रेक्षणंयत्रनित्यमुदितंचतद्धसितप्रेक्षणंच) आश्रमंईषच्छ्रमयुक्तम् । अश्रमं श्रमरहितंसुखरूपमितिवा । यद्वा अश्रमं यथा भवतितथा तापांस्तरंतिस्मेति २८ अनेनपरिरक्षितोयदोर्वंशः सुबहुविश्रुतः सन् श्रयादिलप्स्यतेइतिवदंतीति २९ धेनुकबकवत्सासुरेषुविपर्ययोक्तिर्ज नवादेष्वनिश्चयात् ३० जनेष्वेवंवदत्सुसत्सुतदसहमानश्चाणूरोऽब्रवीत् । (समाभाष्यसंबोध्य) ३१ ३२

॥१८०॥

श्लोकाः २०—३२

निरीक्ष्यतावुत्तमपूरुषौजनामंचस्थितानागरराष्ट्रकान्नृप ॥ प्रहर्षवेगोत्कलितेक्षणाननाःपपुर्नतृप्तानयनैस्तदाननम् २०पिबंतइवचक्षुर्भ्यांलिहंतइवजिह्वया॥ जिघ्रंतइवनासाभ्यांश्लिष्यंतइवबाहुभिः २१ ऊचुःपरस्परंतेवैयथादृष्टंयथाश्रुतम् ॥ तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिताइव २२ एतौभगवतःसाक्षाद्धरेर्नारायणस्यहि ॥ अवतीर्णाविहांशेनवसुदेवस्यवेश्मनि २३ एषवैकिलदेवक्यांजातोनीतश्चगोकुलम् ॥ कालमेतंवसन्गूढोववृधेनंदवेश्मनि २४ पूतनानेननीतांतंचक्रवातश्चदानवः ॥ अर्जुनौगुह्यकःकेशीधेनुकोऽन्येचतद्विधाः २५ गावःसपालाएतेनदावाग्नेःपरिमोचिताः ॥ कालियोदमितःसर्पइंद्रश्चविमदःकृतः २६ सप्ताहमेकहस्तेनधृतोऽद्रिप्रवरोमुना ॥ वर्षवाताशनिभ्यश्चपरित्रातंचगोकुलम् २७ गोप्योऽस्यनित्यमुदितहसितप्रेक्षणंमुखम् ॥ पश्यंत्योविविधांस्तापांस्तरंतिस्माश्रमंमुदा २८ वदंत्यनेनवंशोयंयदोःसुबहुविश्रुतः ॥ श्रियंयशोमहत्त्वंचलप्स्यतेपरिरक्षितः २९ अयंचास्याग्रजःश्रीमान्रामःकमललोचनः ॥ प्रलंबोनिहतोयेनवत्सकोन्येबकादयः ३० जनेष्वेवंब्रुवाणेषुतूर्येषुनिनदत्सुच ॥ कृष्णरामौसमाभाष्यचाणूरोवाक्यमब्रवीत् ३१ हेनंदसूनोहेरामभवंतौवीर्यसंमतौ ॥ नियुद्धकुशलौश्रुत्वाराज्ञाहूतौदिदृक्षुणा ३२

चूर्णिका

एवंभूतौतौदृष्ट्वामंचस्थाः सर्वेजनाः तन्मुखंनयनैः पीत्वा २० जिह्वयालिहंतइवबाहुभिः आश्लिष्यंतइवतेमिथः ऊचुः २१ २२ एतौहरेः अंशेन वसुदेवगृहे अवतीर्णौ २३ एषः देवक्यां किल जातः ततोगोकुलंनीतः एतावत् नंदगृहेगूढः सन् ववृधे २४ अनेन पूतना चक्रवातःअर्जुनौ शंखचूडः केशी धेनुकः अन्येच अंतंनीताः २५ एतेनदावाग्नेः सपालाः गावः मोचिताः कालियः दमितः इंद्रश्चविमदः कृतः २६ तथाऽनेनसप्ताहं एककरेणाद्रिर्धृतः वातादिभ्यः गोकुलंचत्रातं २७ तथागोप्यः अस्यमुखं पश्यंत्यः तापान्जहुः २८ तथा अनेन यदोर्वंशः विश्रुतः सन् श्रियंयशः महत्त्वंलप्स्यते २९ अयंचअस्याग्रजः रामः अनेनप्रलंबः वत्सकः बकादयः निहताः ३० एवंजनेषुब्रुवाणेषुतूर्येषुनिनदत्सुचकृष्णरामौ आभाष्यचाणूरः आह ३१ हेकृष्णरामौयुवांवीरमान्यौ युद्धनिपुणौज्ञात्वाकंसेन आहूतौ ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(कायवाङ्मनोभिः प्रियंकुर्वंत्यः प्रजाःश्रेयः अन्यथाविपरीतमश्रेयः । गोपालावत्सपालाश्चस्फुटंयथा तथा) ३३ ३४ हेकृष्णंप्रियंकरवामेति । राज्ञिप्रीतेभूतानिचप्रसीदेयुः । (तत्रहेतुःसर्वेति) ३५ (अ
भिनंचसाधुसाध्वितिस्तुत्वा) ३६ (अस्यभोजपतेःकंसस्यवनेचरावयंप्रजाःस्मःचकाराद्यूयमपि ।) ३७ नियुद्धंबाहुयुद्धं हियथोचितंभवेत् । मल्लसभासदः मल्लसभाधिकृतान् । अधर्मोमास्पृशेत् । न
स्पृशत्वित्यर्थः (प्रबलदुर्बलयोर्नियुद्धमधर्म्यमित्यर्थः) हेमल्लेतिवा३८ (इभोहस्ती) सहस्रहस्तिनांसत्त्वंबलंबिभर्तीतितथा ३९ बलिभिर्मादृशैःसहभवद्भ्यांबलिभ्याम् । अत्रयुद्धे नानयो नाधर्मः । वि
क्रमपराक्रमंकुरु । मुष्टिकोविक्रमतात् इत्यनुषंगः ४० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांत्रिचत्वारिंशोध्यायः ४३ ॥ ॥ ७ ॥ ॥ चतुश्चत्वारिंशकेतुमल्लकंसादिमर्दनम् । कंसयोषित्स
माश्वासरताभ्यांपित्रोश्चदर्शनम् ॥१॥ चर्चितःनिश्चितःस्वसंकल्पएवयस्यसः । आससाद जग्राहेत्यर्थः १ (बद्धाबंधनंकृत्वाअन्योन्यंविजिगीषया)२ बाहुमध्याकनिष्ठांगुलिव्यतिरेकेणकृतमुष्टिर्हस्तोऽरत्निः
३ परिभ्रामणंहस्तादिषुगृहीत्वाऽरितश्चालनंविक्षेपोनोदनम् । परिरंभोबाहुभ्यांनिष्पीडनम् । अवपातनंअधःक्षेपः उत्सर्पणंउत्सृज्यपुरतोगमनंअपसर्पणंपृष्ठतोगमनंएतैरन्योन्यंप्रत्यरुंधतांप्रत्यावृतवंतौ ४

॥१८१॥

श्लोकाः ३३/४

प्रियंराज्ञःप्रकुर्वंत्यःश्रेयोविंदंतिवैप्रजाः ॥ मनसाकर्मणावाचाविपरीतमतोन्यथा ३३ नित्यंप्रमुदितागोपावत्सपालायथास्फुटम् ॥ वनेषुमल्लयुद्धेन
क्रीडंतश्चारयंतिगाः ३४ तस्माद्राज्ञःप्रियंयूयंवयंचकरवामहे ॥ भूतानिनःप्रसीदंतिसर्वभूतमयोनृपः ३५ तन्निशम्याब्रवीत्कृष्णोदेशकालोचितंवचः ॥
नियुद्धमात्मनोऽभीष्टंमन्यमानोभिनंद्यच ३६ प्रजाभोजपतेरस्य वयंचापिवनेचराः ॥ करवामप्रियंनित्यंतन्नःपरमनुग्रहः ३७ बालावयंतुल्यबलैःक्रीडि
ष्यामोयथोचितम् ॥ भवेन्नियुद्धंमाऽधर्मःस्पृशेन्मल्लसभासदः ३८ ॥ चाणूरउवाच ॥ नबालोनकिशोरस्त्वंबलश्चबलिनांवरः ॥ लीलयेभोहतोयेनसह
स्रद्विपसत्वभृत् ३९ तस्माद्भवद्भ्यांबलिभिर्योद्धव्यंनानयोत्रवै ॥ मयाविक्रमवार्ष्णेयबलेनसहमुष्टिकः ४० इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रिच
त्वारिंशोध्यायः ४३ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एवंचर्चितसंकल्पोभगवान्मधुसूदनः ॥ आससादाथचाणूरंमुष्टिकंरोहिणीसुतः १ हस्ता
भ्यांहस्तयोर्बद्ध्वापद्भ्यामेवचपादयोः ॥ विचकर्षतुरन्योन्यंप्रसह्यविजिगीषया २ अरत्नीद्वेअरत्निभ्यांजानुभ्यांचैवजानुनी ॥ शिरःशीर्ष्णोरसोरस्तावन्यो
न्यमभिजघ्नतुः ३ परिभ्रामणविक्षेपपरिरंभावपातनैः ॥ उत्सर्पणापसर्पणैश्चान्योन्यंप्रत्यरुंधताम् ४

चूर्णिका

किंच राज्ञः प्रियंकुर्वंत्यः प्रजाः श्रेयोविंदंति अन्यथान ३३ किंच नित्यंगोपाः वनेषुमल्लयुद्धेनक्रीडंतः गाश्चारयंति ३४ तस्माद्राज्ञःप्रियंयूयंवयंचकरवामहे भूतानि नः
प्रसीदंतिसर्वभूतमयोनृपः ३५ एवंश्रुत्वाकृष्णः आह अस्यराज्ञः यूयंवयंचप्रजाः अतोऽस्यप्रियंकरवाम ३६ ३७ तथापिवयं बालाःतुल्यबलैः क्रीडिष्यामः बाहुयु
द्धंस्यात् मल्लसभास्थान् अधर्मः मास्पृशेत् ३८ ॥ चाणूरउवाच ॥ हेकृष्णत्वंबालः न बलश्चबलिनांवरः येनसहस्रद्विपसत्त्वभृद्गजःहतः ३९ तस्माद्भवद्भ्यांब
लिभिर्योद्धव्यंनानयोऽत्रवै मयिविक्रमवार्ष्णेयबलेनसहमुष्टिकः ४२ ॥ इतिदशमेत्रिचत्वारिंशः ॥ ४३ ॥ ॥ ७॥ ॥ श्रीशुकउवाच ॥ एवंचर्चितसं
कल्पोभगवान्मधुसूदनः आससादाथचाणूरंमुष्टिकंरोहिणीसुतः १ हस्ताभ्यांहस्तयोर्बध्वापद्भ्यामेवचपादयोः जानुभ्यांजानुनी शिरःशीर्ष्णा उरसाउरः एवंबद्ध्वा अन्यो
न्यंउत्थापनैः उन्नयनैः चालनैः मिथः जिगीषंतौ तौ आकृष्य अपकारंकृतवंतौ २ ३ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१८२॥

उत्थापनं पादौजानुनीच पिंडीकृत्य पतितस्योच्चाटनम्। उन्नयनं हस्ताभ्यामुद्धृत्य नयनं चालनं कंठादिलग्नस्य निःसारणम्। स्थापनंपाणिपादादिपिंडीकरणं एवंपरस्परमात्मनोदेहस्यअपचक्रतुः अपकारंक्रतवंतौ ५ तद्युद्धंबलाबलवदूचुः । एकतोबलंअन्यतोअबलंतद्युक्तंत्रलाबलव्रत् विषममित्यूचुरित्यर्थः वरूथशः समेताः संघशोमीलिताः यद्वा तद्बलाबलवतोर्युद्धंदृष्ट्वामहानयमधर्मइत्यूचुरित्यन्वयः अत्रदृष्ट्वेत्यध्याहार्यम् ६ तदेवदर्शयतिमहानिति । बालयोर्बलवतोश्चयुद्धंराजाचेत्पश्येत् सस्वयंवारणीयः । एतेतुराज्ञःपश्यतःस्वयमप्यन्विच्छंतिअनुमन्यंतइतिबतायंमहानधर्मइत्यर्थः ७ बलाबलवद्युद्धतांप्रपंचयतिपंचभिः । क्वेति । वज्रसाराणिवज्रवत्कठिनानिसर्वाण्यंगानिययोस्तौ ८समाजस्यसभायाः। (धर्मव्यतिक्रमः धर्ममर्यादातिक्रमइत्यर्थः ।) ९ अपराऊचुः नसभामिति । अब्रुवन् ज्ञात्वापितूष्णींतिष्ठन् विब्रुवन् विपरीतंब्रुवन् अज्ञः नजानामीतिब्रुवन् अतः प्राज्ञोनसभांप्रविशेदिति १० वल्गतइति । शत्रुमभितो (वल्गतः) शत्रोःपरितोधावतःकृष्णस्यश्रमवारिणाउप्तंव्याप्तंवदनांबुजं (वीक्ष्यतां) दृश्यताम् ११ अन्याऊचुः । किंनपश्यतेति । सामर्षसक्रोधम् । हासेनसंरंभआवेशः तेनशोभितम् । (मुष्टिकस्यवृथासंरंभमवलोक्यहास्यरसावेशेनशोभितमित्यर्थः) १२ अन्याऊचुः पुण्याबतेति ।(पुण्याधन्याइत्यर्थः) । नृलिंगेनमनुष्यदेहेनगूढःवनस्थानिचित्राणिमाल्यानियस्यसः । गिरित्रःशिवःरमाचताभ्यामर्चितावंघ्रीयस्यसः । अयंभावः । धिगिमांसभांयस्यामयंपराभूयते । तास्तुव्रजभुवोपिपुण्याःयतोयासुअयंकृष्णोविविधक्रीडयानानाविधविहारेणअंचातिगच्छतीति १३

श्लोकाः

उत्थापनैरुन्नयनैश्चालनैःस्थापनैरपि ॥ परस्परंजिगीषंतावपचक्रतुरात्मनः ५ तद्बलाबलवद्युद्धंसमेताःसर्वयोषितः ॥ ऊचुःपरस्परंराजन्सानुकंपावरूथशः ६ महानयंबताधर्मएषांराजसभासदाम् ॥ येबलाबलवद्युद्धंराज्ञोऽन्विच्छंतिपश्यतः ७ क्ववज्रसारसर्वांगौमल्लौशैलेंद्रसन्निभौ ॥ क्वचातिसुकुमारांगौकिशोरौनाप्तयौवनौ ८ धर्मव्यतिक्रमोह्यस्यसमाजस्यध्रुवंभवेत् ॥ यत्राधर्मःसमुत्तिष्ठेन्नस्थेयंतत्रकर्हिचित् ९ नसभांप्रविशेत्प्राज्ञःसभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्नज्ञोनरःकिल्बिषमश्नुते १० वल्गतःशत्रुमभितःकृष्णस्यवदनांबुजम् ॥ वीक्ष्यतांश्रमवार्युप्तंपद्मकोशमिवांबुभिः ११ किंनपश्यतरामस्यमुखमाताम्रलोचनम् ॥ मुष्टिकंप्रतिसामर्षंहाससंरंभशोभितम् १२ पुण्याबतव्रजभुवोयदयंनृलिंगगूढःपुराणपुरुषोवनचित्रमाल्यः ॥ गाःपालयन्सहबलःक्वणयंश्चवेणुंविक्रीडयांऽचतिगिरित्ररमार्चितांघ्रिः १३

५/१३

चूर्णिका ॥१८२॥

५ तत्बलाबलवद्युद्धंदृष्ट्वामिथःस्त्रियः ऊचुः ६ अहोएषांसभासदांमहानयं अधर्मः पश्यत ७ एतौमल्लौशैलोपमौ क्व एतौसुकुमारांगौ क्व ८ अतः अस्यसमाजस्य धर्मव्यतिक्रमः भवेत् यत्र अधर्मःउत्तिष्ठेत् तत्रनस्थेयम् ९ किंच प्राज्ञः सभ्यदोषान्स्मरन्सभांन विशेत् यतःअब्रुवन् विब्रुवन्नरः किल्बिषमश्नुते १० हेस्त्रियः शत्रुंसर्वतो धावतः कृष्णस्यश्रमवारिव्याप्तंमुखांबुजंदृश्यताम् ११ अन्याऊचुः किंनपश्यतरामस्यमुखमाताम्रलोचनम् १२ अन्याऊचुः अहोव्रजभुवः पुण्याः यतः अयंपुराणपुरुषः वेणुंक्वणयन् विक्रीडयासत्करोति १३

CC-0. In Public Domain. Digitization by eGangotri

अहोकष्टमल्पपुण्यावयंयतोऽस्माभिरनवसरेदृष्टोयं गोप्यस्तुवहुपुण्याइत्याहुस्त्रिभिःगोप्यइति । अमुष्यश्रीकृष्णस्यरूपंअंगलावण्येनसारंश्रेष्ठम् । किंच । असमोर्ध्वं नाविद्यतेसममूर्ध्वमधिकंचयस्यतत् । तदपिनान्येनआभरणादिनासिद्धम् । किंतुस्वतएव । ऐश्वरस्यऐश्वर्यस्य एकांतधामअव्यभिचारिस्थानम् । पाठांतरेअमुष्येश्वरस्येत्यन्वयः । एवंभूतंनित्यनवीनंरूपंयानेत्रैःपश्यंतीति १४ किंच । यादोहनादिपुएनंगायंति । ताव्रजस्त्रियोधन्याः (अवहननेकंडनेउपलेपेगोमयादिनाभूम्युपलेपने) प्रेंखेंखनंदोलांदोलनंतत्र (अर्भरुदितंबालानांरोदनंतच्छमनार्थमित्यर्थः) उक्षणंसेचनं (आदिशब्दात्पेषगादौ) कथंभूताः । उरुक्रमेचित्तंतेनैवयानंसर्वविषयप्राप्तिर्यासांताः (उरुक्रमेचित्तस्ययानंगतिर्यासांताइतिवा) पाठांतरेउरुक्रमंचिंतयंत्यइत्यर्थः । कुतः । अनुरक्तधियः । तत्रलिंगंअश्रुकंठ्यः १५ प्रातरिति । याअबलाः (प्रातःगोभिःसमंव्रजाद्व्रजतःसायंताभिःसमंव्रजेआविशतश्चकालद्वयेपि) वादयतोवेणुंनिशम्यगृहात्तूर्णंनिर्गम्यपथिसस्मितमुखंपश्यंतिताःभूरिपुण्याइति १६ एवंसभयंब्रुवाणासुस्त्रीपुतासांभयनिवृत्तयेकृष्णःशत्रुंहंतुंमनश्चक्रे (निश्चितवानित्यर्थः) १७ सभयाःस्त्रीणांगिरःश्रुत्वापुत्रयोःस्नेहेनयाशुक्तयाआतुरौविह्वलौपुत्रयोर्बलं (अबुधौ) अजानंतौपितरौअनुतापंप्राप्ताविति १८ (अच्युतेतरौकृष्णचाणूरौयथायुयुधातेतथैवबलमुष्टिकावपि) १९ ततोभगवतोगात्राणांअरत्निजान्वादीनांनिपपातैःप्रहारैःवज्रस्यनिष्पेषःतीव्रप्रपातःतद्वन्निष्ठुरैःभज्यमानांगःश्लथद्गात्रः २० श्येनस्येववेगोयस्यःचाणूरःअबाधतअताडयत् २१ २२ भूपृष्ठेभुवउपरिपोथयामासआस्फालयत् । इंद्रध्वजोवज्रम् । यद्वा इंद्रध्वजोनामगौडदेशेषुप्रसिद्धःकश्चिश्चिदुत्सवेमहान्स्तंभोध्वजपताकाद्यलंकृतःपुरुषाकृतिरुच्छ्रीयतेसयथापततितद्वत्एषइति २३

गोप्यस्तपःकिमचरन्यदमुष्यरूपंलावण्यसारमसमोर्ध्वमनन्यसिद्धम् ॥ दृग्भिःपिबंत्यनुसवाभिनवंदुरापमेकांतधामयशसःश्रियऐश्वरस्य १४ यादोहनेऽवहननेमथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ ॥ गायंतिचैनमनुरक्तधियोऽश्रुकंठ्योधन्याव्रजस्त्रियउरुक्रमचित्तयानाः १५ प्रातर्व्रजाद्व्रजतआविशतश्चसायंगोभिःसमंक्वणयतोस्यनिशम्यवेणुम् ॥ निर्गम्यतूर्णमबलाःपथिभूरिपुण्याःपश्यंतिसस्मितमुखंसदयावलोकम् १६ एवंप्रभाषमाणासुस्त्रीषुयोगेश्वरोहरिः ॥ शत्रुंहंतुंमनश्चक्रेभगवान्भरतर्षभ १७ सभयाःस्त्रीगिरःश्रुत्वापुत्रस्नेहशुचातुरौ ॥ पितरावन्वतप्येतांपुत्रयोरबुधौबलम् १८ तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ ॥ युयुधातेयथान्योन्यंतथैवबलमुष्टिकौ १९ भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः ॥ चाणूरोभज्यमानांगोमुहुर्ग्लानिमवापह २० सश्येनवेगउत्पत्यमुष्टीकृत्यकरावुभौ ॥ भगवंतंवासुदेवंक्रुद्धोवक्षस्यबाधत २१ नाचलत्तत्प्रहारेणमालाहतइवद्विपः ॥ बाह्वोर्निगृह्यचाणूरंबहुशोभ्रामयन्हरिः २२ भूपृष्ठेपोथयामासतरसाक्षीणजीवितम् ॥ विस्रस्ताकल्पकेशस्रगिंद्रध्वजइवापतत् २३

चूर्णिका

किंच हेस्त्रियः गोप्यः किंतपःअचरन् याः अस्यरूपंलावण्यसारंनित्यंदृग्भिः पिबंति १४ किंच याः गोप्यः दोहनावहननमथनादौएनं गायंति अतः ताः धन्याः १५ किंच प्रातः व्रजात्गच्छतः सायंप्रविशतः १६ अस्यवेणुरवंश्रुत्वावहिर्निर्गत्य अस्यसस्मितंमुखंपश्यंति अतः ताः बहुपुण्याः १७ एवंब्रुवतीषुस्त्रीषुश्रीकृष्णः शत्रुंहंतुंमनश्चक्रे एवंस्त्रीणांगिरः श्रुत्वापुत्रबलंअबुधौ पितरौ अतप्येताम् १८ ततः रामकृष्णौतैस्तैः युद्धमार्गैः ताभ्यांसहयुयुधाते १९ ततः भगवद्गात्रप्रहारैः शिथिलांगः चाणूरः ग्लानिंप्राप २० ततः सः मुष्टीकृत्यउत्पत्यचहरिं वक्षसि अबाधत२१तत्प्रहारेणहरिः अचलितः सन् तंबाह्वोर्निगृह्य भूतले पोथयामास२२ततः सः वज्रइव अपतत् २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (मुष्टिकस्यमुष्ट्याभिहतेनरामेणकरतलेनाभिहतः) २४ (मुखतोरुधिरं) आर्दितःपीडितः । उर्व्युपस्थेधरातले २५ २६ (कृष्णेनपदैवापहृतंशिरोयस्यतोशलकस्तुद्विधाविदीर्णःएवमुभावपि) २७ २८ (आकृष्यस्वसमीपमानीयतैःसंमृज्यसंमील्यचिक्रीडतुः) वल्गन्तौनृत्यादिकुर्वंतौ (रुतानिनूपुराणियपोस्तौक्कणन्नूपुरावित्यर्थः) २९ यःसाधुसाध्वितिवदंतः ३० (मल्लवर्येषुचाणूरादिषुइतरेषुविद्रुतेषु) ३१ ३२ (उग्रसेनोपिहन्यतांहंतव्यः) ३३ अव्ययःअश्रमःलघिम्नालाघवेन ३४ (स्वमंचेआविशंतंमृत्युमालोक्यसहसाआसनादुत्थायअसिंखड्गम्) ३५ (दक्षिणसव्यंविचरंतंअंबरेआकाशे) दुर्विषहं अविषह्यंउग्रतेजायस्यसःश्रीकृष्णः ३६ (चलत्किरीटंचलितमुकुटमित्यर्थः । रंगोपरिरंगभूमौ) गरिष्ठत्वायविश्वाश्रयत्वमुक्तंतत्रहेतुःअब्जनाभः । कुतस्तस्योपर्येवपपात । यतआत्मतंत्रः ३७ (संपरेतंमृतम् । हरिःसिंहः) ३८

श्लोकाः २४/३८

तथैवमुष्टिकःपूर्वंस्वमुष्ट्याभिहतेनवै ॥ बलभद्रेणबलिनातलेनाभिहतोभृशम् २४ प्रवेपितःसरुधिरमुद्वमन्मुखतोर्दितः ॥ व्यसुःपपातोर्व्युपस्थे वाताहतइवांघ्रिपः २५ ततःकूटमनुप्राप्तंरामःप्रहरतांवरः ॥ अवधील्लीलयाराजन्सावज्ञंवाममुष्टिना २६ तर्ह्येवहिसलःकृष्णपदापहृतशीर्षकः ॥ द्विधाविदीर्णस्तोशलकउभावपिनिपेततुः २७ चाणूरेमुष्टिकेकूटेशलेतोशलकेहते ॥ शेषाःप्रदुद्रुवुर्मल्लाःसर्वेप्राणपरीप्सवः २८ गोपान्वयस्यानाकृष्यतैःसंसृज्यविजह्रतुः ॥ वाद्यमानेषुतूर्येषुवल्गंतौरुतनूपुरौ २९ जनाःप्रजहृषुःसर्वेकर्मणारामकृष्णयोः ॥ ऋतेकंसंविप्रमुख्याःसाधवःसाधुसाध्विति ३० हतेषुमल्लवर्येषुविद्रुतेषुचभोजराट् ॥ न्यवारयत्स्वतूर्याणिवाक्यंचेदमुवाचह ३१ निःसारयतदुर्वृत्तौवसुदेवात्मजौपुरात् ॥ धनंहरतगोपानांनंदंबध्नीतदुर्मतिम् ३२ वसुदेवस्तुदुर्मेधाहन्यतामाश्वसत्तमः ॥ उग्रसेनःपिताचापिसानुगःपरपक्षगः ३३ एवंविकत्थमानेवैकंसेप्रकुपितोऽव्ययः ॥ लघिम्नोत्पत्यतरसामंचमुत्तुंगमारुहत् ३४ तमाविशंतमालोक्यमृत्युमात्मनआसनात् ॥ मनस्वीसहसोत्थायजगृहेसोऽसिचर्मणी ३५ तंखड्गपाणिंविचरंतमाशुश्येनंयथादक्षिणसव्यमंबरे ॥ समग्रहीद्दुर्विषहोग्रतेजायथोरगंतार्क्ष्यसुतःप्रसह्य ३६ प्रगृह्यकेशेषुचलत्किरीटंनिपात्यरंगोपरितुंगमंचात् ॥ तस्योपरिष्टात्स्वयमब्जनाभःपपातविश्वाश्रयआत्मतंत्रः ३७ तंसंपरेतंविचकर्षभूमौहरिर्यथेभंजगतोविपश्यतः ॥ हाहेतिशब्दःसुमहांस्तदाभूदुदीरितःसर्वजनैर्नरेंद्र ३८

चूर्णिका २३ तथैवबलेनताडितः मुष्टिकः रुधिरंवमन् भूतलेव्यसुः पपात २४ २५ ततः कूटंप्राप्तंरामः मुष्टिना अहनत् २६ तर्ह्येवशलतोशलकौ प्राप्तौतावपिकृष्णपदाहतशीर्षकौनिपेततुः २७ एवंचाणूरादिषुमृतेषुशेषामल्लाः दुद्रुवुः २८ ततः रामकृष्णौगोपान् आकृष्यतैः सहविजह्रतुः २९ तदाजनाः प्रजहृषुः साधवः साधुसाध्वितिऊचुः ३० एवंमल्लवर्येषुहतेषुकंसःवाद्यानिनिवार्य आह ३१ एतौदुर्वृत्तौवसुदेवसुतौ पुरान्निःसारयत गोपानांधनंहरत नंदंबध्नीत ३२ वसुदेवः तथाउग्रसेनः पिताहन्यतां ३३ एवंकंसेविकत्थमानेसतिक्रुद्धः कृष्णः उत्पत्यउत्तुंगंमंचकं आरुहत् ३४ तंस्वमृत्युंप्राप्तंदृष्ट्वा कंसः उत्थाय असिचर्मणीजगृहे ३५ तंखड्गपाणिंचरंतंकृष्णः समग्रहीत् गरुडः सर्पमिव ३६ ततः कृष्णः कंसंकेशेषुधृत्वा मंचात् रंगोपरिनिपात्य तस्योपरि स्वयं पपात ३७ तावतामृतंकंसंहरिः विचकर्ष तदाहाहेतिशब्दः अभूत् ३८ ॥१८४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 (सकंसःअदन्भुंजानःसन्सर्वकालंउद्विग्नधियापुरतोयतईश्वरंददर्शततोदुरवापमपिसदेवरूपंप्राप) ३९ (तस्यकंसस्य) निर्वेशोनिष्कृतिःआनृण्यमित्यर्थः तत्कारिणःसंतःतेअभ्यधावन् ४० तथा
ताहक्अतिरभसोवेगोयेषांतान्संयतान्उद्युक्तान् ४१ ४२ (तेषांकंसकंकादीनांसुहृदांभर्तृणांमरणेनदुःखिताःअभिजग्मुः) ४३ (शोचतीः) शोचंत्यःविलापांश्चक्रुः । शुचोश्रूणि (मुंचंत्यः) ४४ हे
टीका धर्मज्ञहेकरुणहेदनिवत्सलोतिविलापेप्रेमसंबोधनानि । तेतववयम् ४५ त्वयापत्याविरहितापुरीयंनशोभतइतिस्वदृष्ट्याभिधानम् ४६ अनागसामितितुपरमार्थाभिधानं (तेनद्रोहेणभोराजन्इमांमृतिरूपां)
४७ एषकृष्णःप्रभवंत्यस्मादितिप्रभवः आपियंतिप्रलयंतिोस्मिन्नित्यप्ययःसचसच । तदवध्यानं (तस्य) कृष्णस्यावज्ञातत्कर्तुशीलंयस्य (तच्छब्देनभूतपरामर्शोवा) ४८ (संस्थांस्थितिंतांसमका
 रयत्) ४९ आस्पृश्यईषत्स्पृष्ट्वा ५०

सनित्यदोद्विग्नधियातमीश्वरंपिबन्वदन्वाविचरन्स्वपन्श्वसन् ॥ ददर्शचक्रायुधमग्रतोयतस्तदेवरूपंदुरवापमाप ३९ तस्यानुजाभ्रातरोष्टौकंकन्यग्रोधकाद श्लोकाः
यः ॥ अभ्यधावन्नभिक्रुद्धाभ्रातुर्निर्वेशकारिणः ४० तथातिरभसांस्तांस्तुसंयतान्रोहिणीसुतः ॥ अहन्परिघमुद्यम्यपशूनिवमृगाधिपः ४१ नेदुर्दुंदुभयो
व्योम्निब्रह्मेशाद्याविभूतयः ॥ पुष्पैःकिरंतस्तंप्रीताःशशंसुर्नऋतुःस्त्रियः ४२ तेषांस्त्रियोमहाराजसुहृन्मरणदुःखिताः ॥ तत्राभीयुर्विनिघ्नंत्यःशीर्षाण्यश्रु ३९/५०
विलोचनाः ४३ शयानान्वीरशय्यायांपतीनालिंग्यशोचतीः ॥ विलेपुःसुस्वरंनार्योविसृजंत्योमुहुःशुचः ४४ हानाथप्रियधर्मज्ञकरुणानाथवत्सल ॥
त्वयाहतेननिहतावयंतेसगृहप्रजाः ४५ त्वयाविरहितापत्यापुरीयंपुरुषर्षभ ॥ नशोभतेवयमिवनिवृत्तोत्सवमंगला ४६ अनागसांत्वंभूतानांकृतवान्द्रो
हमुल्बणम् ॥ तेनेमांभोदशांनीतोभूतध्रुक्कोलभेतशम् ४७ सर्वेषामिहभूतानामेषहिप्रभवाप्ययः ॥ गोप्ताचतदवध्यायीनक्वचित्सुखमेधते ४८ ॥ श्री
शुकउवाच ॥ ॥ राजयोषितआश्वास्यभगवान्लोकभावनः ॥ यामाहुर्लौकिकींसंस्थांहतानांसमकारयत् ४९ मातरंपितरंचैवमोचयित्वाथबंधनात् ॥
कृष्णरामौववंदातेशिरसाऽऽस्पृश्यपादयोः ५०

चूर्णिका हेनृप सः कंसः नित्यदाउद्विग्नधियाहरिंप्राशनादिषु यतः अपश्यत् अतः तत्स्वरूपं प्राप ३९ ततः तद्भ्रातरः कंकन्यग्रोधकादयः भ्रात्रानृण्यार्थंअभ्यधावन् ४० ततः अ
तिवेगवत्तरान्तान्रामः परिघंउद्यम्य अहन् ४१ ४२ ततः तेषांस्त्रियः शीर्षाणिनिघ्नंत्यः तत्र अभिजग्मुः ४३ तदावीरशय्यायांशयानान्स्वपतीनालिंग्यसुस्वरविलापंच
क्रुः ४४ हानाथप्रियधर्मज्ञकरुणानाथवत्सल त्वयाहतेननिहतावयंतेसगृहप्रजाः ४५ किंच इयंपुरीत्वयापत्याहीनावयमिवनशोभते ४६ हे कंस त्वं निरपराधिभूता
नां द्रोहंकृतवान् तेनइमांदशांनीतः ४७ किंच एषकृष्णः सर्वेषां गोप्ताजन्ममृतिकारणं अस्ति एवंभूतस्य अवज्ञाकर्ताक्वचिन्नसुखमेधते ४८ ॥ श्रीशुकउवाच ॥ त
तः कृष्णः राजपत्नीः आश्वास्य हतानां पारलौकिकं कर्म अकारयत् ४९ ततः मातरं पितरं बंधात् मोचयित्वा रामकृष्णौ ववंदाते ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥४५॥

पुत्रभ्रांतिंविहायजगदीश्वराविति ज्ञात्वा शंकितौनसस्वजाते नालिंगितवंतौ । किंतुबद्धांजलीतस्थतुरित्यर्थः ५१ प्रसह्यहत्वाहस्तींद्रंमल्लेंद्रान्मल्ललीलया । बीभत्सचारितंकंसंसबीभत्सममारयत् ५२॥ इति
श्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुश्चत्वारिंशत्तितमोध्यायः ४४ ॥ ॥ ७ ॥ ॥ पंचचत्वारिंशकेथपितॄनंदादिसांत्वनम् । उग्रसेनाभिषेकश्चगुरौवासात्पुरागमः ॥ १ ॥ उपलब्धा
र्थौ विदित्वेति अयमर्थः उपसमीपेआवयोः पुत्रत्वुद्धयायःसांसारिकपरमसुखभोगस्तस्मात् । पूर्वमेवलब्धार्थौलब्धआवामीश्वराविति प्राप्तः परमज्ञानरूपोऽर्थोयाभ्यांतथाभूतौतौज्ञात्वामयिप्रसन्नेसति अन
योर्ज्ञानंनामांकंदुर्लभंस्यात् । दुर्लभंतुमयिप्रेम । तत्प्रेमययापुत्रतयाभवति नतथाईश्वरत्वेनअतइदानीमेवतज्ज्ञानंमाभूदितिनिजांस्वाधीनांमायांतयोःप्रसारितवानिति । (ननुपुत्रतयाप्रेमबंधायस्यादि
त्यतउक्तं पुरुषोत्तमइति । पुत्रतयाज्ञानमपितस्यपुरुषोत्तमत्वात् परमपुरुषार्थहेतुरेति ।) मायाप्रसारणमेवदर्शयति । उवाचेत्यादिभिरष्टभिः । प्रीणन्प्रीणयन्सादरमुवाच २ अस्मत्तः अस्मन्निमित्तं
॥१८६॥ नित्यमुत्कंठितयोरपियुवयोः पुत्राभ्यामावाभ्यांकृत्वाबाल्यपौगंडकैशोराः ततदवस्थानुभवसुखानीत्यर्थः तानिनाभवन्निति । अस्मत्तः पुत्राभ्यामितिसामानाधिकरण्यंवा । (बाल्यपौगंडकैशोराइत्यत्र
विहाराइत्यध्याहारोवा । तत्सुखंयुवाभ्यांनानुभूतमितिभावः) ३ किंच आवामेवदैवहीनावित्याह । नलब्धइति । (वासोनलब्धः) पितृगेहस्थाबालाः (पितृभ्यांलालिताःसंतो) यांमुदंविंदंतेलभंते
साचनलब्धेति ४ एवंतावच्छ्लोकद्वयेनयुवयोरावयोश्चकामहानिर्जातेत्युक्तम् । आवयोःपुनर्युष्मत्परिचर्यालोपेनधर्महानिरपिजातेत्याह । सर्वेति । सर्वेषांधर्माद्यर्थानांसंभवोयस्मिन्सदेहः यतः याभ्यांज
नितः पोषितश्चतयोःपित्रोर्निर्वेशमानृण्यंमर्त्यःशतसंवत्सरमात्रेणायुषानप्राप्नोति ५ तन्मध्येपितुरपेक्षया,यःपुत्रःकल्पःसमर्थःसन्नपिदेहेनधनेनचपित्रोर्वृत्तिंजीविकांनसंपादयेत्तंप्रेत्यलोकांतरेयमदूताःस्व
स्यैवमांसंखादयंतिहि ६ किंचमात्रादिशुश्रूषामकुर्वन्विफलजीवितश्चभवतीत्याह । मातरमिति । प्रपन्नंआपन्नमित्यर्थः । नबिभर्तीति । अबिभ्रत्अपुष्णन्श्वसन्नपिमृततुल्यएवेति ७

श्लोकाः ५१ / ७

देवकीवसुदेवश्चविज्ञायजगदीश्वरौ ॥ कृतसंवंदनौपुत्रौसस्वजातेनशंकितौ ५१ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकंसवधोनामचतुश्चत्वारिंशो
ध्यायः ४४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ पितरावुपलब्धार्थौविदित्वापुरुषोत्तमः ॥ माभूदितिनिजांमायांततानजनमोहिनीम् १ उवाच
पितरावेत्यसाग्रजःसात्वतर्षभः ॥ प्रश्रयावनतःप्रीणन्नंबतातेतिसादरम् २ नास्मत्तोयुवयोस्तातनित्योत्कंठितयोरपि ॥ बाल्यपौगंडकैशोराःपुत्राभ्याम
भवन्क्वचित् ३ नलब्धौदैवहतयोर्वासोनौभवदंतिके ॥ यांबालाःपितृगेहस्थाविंदंतेलालितामुदम् ४ सर्वार्थसंभवोदेहोजनितःपोषितोयतः ॥ नतयो
र्यातिनिर्वेशंपित्रोर्मर्त्यःशतायुषा ५ यस्तयोरात्मजःकल्पआत्मनाचधनेनच ॥ वृत्तिंनदद्यात्तंप्रेत्यस्वमांसंखादयंतिहि ६ मातरंपितरंवृद्धंभार्यांसाध्वींसुतं
शिशुम् ॥ गुरुंविप्रंप्रपन्नंचकल्पोऽबिभ्रत्श्वसन्मृतः ७

चूर्णिका ॥१८६॥

ततः देवकीवसुदेवश्चविज्ञायजगदीश्वरौ कृतसंवंदनैःपुत्रौसस्वजातेनशंकितौ ५१ ॥ ॥ इतिदशमेचतुश्चत्वारिंशः ४४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ पितरावुपल
ब्धार्थौविदित्वापुरुषोत्तमः माभूदितिनिजांमायांततानजनमोहिनीम् १ ततः सबलः कृष्णः अंबताततिपितरौप्रीणयन्नाह २ हेपितरौअस्मत्तः युवयोः बाल्याद्यवस्था
सुखानिनाभवन् ३ किंच आवयोः वासः भवदंतिकेनजातः ४ तथायंदेहः याभ्यांजनितः तयोः आनृण्यंमर्त्यः शतवर्षेणापिनाप्नोति ५ किंच यः सुतः समर्थः
सन्पित्रोः देहादिनाजीविकांनसंपादयेत् ६ तंलोकांतरेयमदूताः स्वमांसं खादयंति ६ किंच वृद्धपितरौसाध्वींस्त्रियं शिशुंसुतंगुरुंविप्रंपन्नंचकल्पःअबिभ्रत्श्वसन्मृत इव ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्तस्मान्नौआवयोः (अकल्पयोरसमर्थयोः) मोघंव्यर्थं अनर्चतोरपूजयतोः (असेवमानयोरित्यर्थः) ८ दुर्हृदाशत्रुणाकंसेनकृत्वा ९ १० ११ आश्वास्यसांत्वयित्वा (मातामहंमातुःपितृव्यम्) १२
त्वमेवाज्ञापयेतिमावदेत्याह ययातिशापादिति । तवतुयादवत्वेपिनदोषः (मदाज्ञावशाद्) इतिभावः १३ ममताद्दशीशक्तिर्नास्तीतिचेत्तत्राह । मयीति । मत्प्रसादेन सर्वंसिद्धंभविष्यतीत्यर्थः १४
स्वान्ज्ञातीन्संबंधांश्चदिग्भ्यआनाय्येति १५ १६ सिद्धाःपूर्णाःकृष्णरामाभ्यांगतोनिवृत्तोज्वरस्तापोयेषांते १७ सदयंस्मितयुक्तंवीक्षणंयत्रतत् (वीक्षमाणागृहेषुरेमिरे) १८ प्रवयसोवृद्धाअपिअतिश
यितंबलमोजश्चयेषांते (युवानआसन् । अत्रहेतुःपिबंतइति । अक्षैश्चक्षुरादिभिः) १९ २० (हेपितः)भृशंआत्मनोप्याधिक्येनपोषितौ (क्षीरादिनाप्रालितौकंटकादिभ्यः)नचाश्चर्यमेतदित्याह (हिप्रसि
द्धंहियस्मादितिवा) आत्मनोदेहादपिआत्मजेषुपित्रोरभ्यधिकाप्रीतिः२१देवकीवसुदेवयोःपुत्रौयुवांनास्मत्पुत्रावित्यापिनवाच्यमित्याह सापितेति(पोषणरक्षणेचासमर्थैःपित्रादिभिरुत्सृष्टान्यौपुष्णीतां) २२

॥१८७॥ श्लोकाः ८/२२

तन्नावकल्पयोःकंसान्नित्यमुद्विग्नचेतसोः ॥मोघमेतेव्यतिक्रांतादिवसावामनर्चतोः८तत्क्षंतुमर्हथस्तातमातर्नौपरतंत्रयोः ॥अकुर्वतोर्वांशुश्रूषांक्लिष्टयोर्दुर्हृदाभृ
शम् ९ ॥ श्रीशुकउवाच ॥ इतिमायामनुष्यस्यहरेर्विश्वात्मनोगिरा ॥ मोहितावंकमारोप्यपरिष्वज्यापतुर्मुदम् १०सिंचंतावश्रुधाराभिःस्नेहपाशेनचावृतौ
॥ नकिंचिदूचतूराजन्बाष्पकंठौविमोहितौ ११ एवमाश्वास्यपितरौभगवान्देवकीसुतः ॥ मातामहंतूग्रसेनंयदूनामकरोन्नृपम् १२ आहचास्मान्महारा
जप्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नासितव्यंनृपासने १३ मयिभृत्यउपासीनेभवतोविबुधादयः ॥ बलिंहरंत्यवनताःकिमुतान्येनराधिपाः १४
सर्वान्स्वान्ज्ञातिसंबंधान्दिग्भ्यःकंसभयाद्गतान् ॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् १५ सभाजितान्समाश्वास्यविदेशावासकर्शितान् ॥ न्यवास
यत्स्वगेहेषुवित्तैःसंतर्प्यविश्वकृत् १६ कृष्णसंकर्षणभुजैर्गुप्तालब्धमनोरथाः ॥ गृहेषुरेमिरेसिद्धाःकृष्णरामगतज्वराः १७ वीक्षंतोहरहःप्रीतामुकुंदवदनांबु
जम् ॥ नित्यप्रमुदितंश्रीमत्सदयस्मितवीक्षणम् १८ तत्रप्रवयसोप्यासन्युवानोतिबलौजसः ॥ पिबंतोक्षैर्मुकुंदस्यमुखांबुजसुधांमुहुः १९ अथनंदंसमा
साद्यभगवान्देवकीसुतः ॥ संकर्षणश्चराजेंद्रपरिष्वज्येदमूचतुः २० पितर्युवाभ्यांस्निग्धाभ्यांपोषितौपालितौभृशम् ॥ पित्रोरभ्यधिकाप्रीतिरात्मजेष्वा
त्मनोपिहि २१ सपितासाचजननीयौपुष्णीतांस्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टानकल्पैःपोषरक्षणे २२

चूर्णिका

तस्मात्कंसाद्भीतयोःवां अनर्चतोः आवयोः एतेदिवसाः व्यर्थंगताः ८ अतः युवांक्षंतुं अर्हथः ९ ॥ श्रीशुकउवाच ॥ एवंहरेर्गिरामोहितौ पितरौसुतौ अंकमा
रोप्य अश्रुधाराभिःसिंचंतौ मुदं प्राप्य १० नकिंचनोचतुः ११ एवंकृष्णः पितरौआश्वास्य उग्रसेनंयदूनां नृपं कृत्वा आह १२हेमहाराज नः प्रजाः आज्ञप्तुमर्हसि ययाति
शापात्यदुभिः नृपासने नस्थेयम् तव तु ममाज्ञया न दोषइति १३ किंच भृत्येमयि अंतिकेसतिदेवादयः बलिंहरंति किमुनृपाः १४ ततः कृष्णः सर्वान्स्वज्ञातिसंबंधान्य
दुवृष्ण्यादींश्चदिग्भ्यःआनाय्य १५ वित्तैः संतर्प्यस्वगेहेषु स्थापयामास १६ ततः सर्वेयादवाः पूर्णाः संतः नित्यं कृष्णमुखांबुजं वीक्षंतः संतः गृहेषु रेमिरे १७ १८ ॥१८७॥
तत्रयेवृद्धाः ते युवानःआसन् यतः कृष्णमुखांबुजसुधां पिबंतिस्म १९ अथ रामकृष्णौनंदंएत्य ऊचतुः २० हेपितः युवाभ्यांआवांलालितौपालितौ च नाश्चर्यमेतत् यतः पि
त्रोः स्वदेहादपि पुत्रेषुअधिकाप्रीतिः स्यात् २१ किंच सः पिता सा माता यौ स्वपुत्रवत् बंधुभिस्त्यक्तान्शिशून्पुष्णीयाताम् २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

२३ (सांत्वय्यसांत्वयित्वा) सव्रजंव्रजवासिभिःसहितम् । कुप्यानिस्वर्णरजतातिरिक्तकांस्य -(- ताम्रादि -)- पात्रादीनितत्प्रभृतिभिः २४ (प्रणयेनप्रेम्णाविकलःरामकृष्णौआलिंग्य) २५ पुरोधसा गर्गाचार्येणअन्यैश्चब्राह्मणैःद्विजसंस्कृतिंउपनयनम् २६ गावोगाः । रुक्मस्यमालाविद्यंतेयासांताः । क्षौमवस्त्राणिमालावतीः (पुष्पमालाश्चसंतियासांताःक्षौममालिनीः) २७ याःपूर्वंमनोदत्तागावआ सन्ताःस्वाएवाददात् । ननुताःकंसेनहृताःसत्यम् राजगोष्ठादाच्छिद्यदत्ताइत्याह । कंसेनाधर्मतइति २८ गायत्रंव्रतंब्रह्मचर्यम् २९ प्रकर्षेणभवंत्याभ्यामितिप्रभवौ । अतएवसर्वज्ञौ (नान्यासिद्धम्) स्वतःसिद्धम्अमलंज्ञानंनरचेष्टितैःप्रच्छादयंतौ ३० (काश्यगोत्रोत्पन्नंसांदीपिनिंगुरुंउपजग्मतुः) ३१ यथाययथावत् (गुरुवृत्तिं) उपसाद्यप्राप्य (तां) गुरौवृत्तिंअन्यान्ग्राहयंतौ (" यद्यदाचरतिश्रेष्ठ " इतिन्यायेन) शिक्षयंतौगुरुमुपेतौउपगतौसेवितवंतावित्यर्थः ३२ शुद्धोभावोयासुताभिरनुवृत्तिभिः (निखिलान्ऋगादीन्) सांगोपनिषदःअंगानि (शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषंछंद इत्येतैः) उपनिषद्भिश्चैतरेयादिभिःसहितान् ३३ सरहस्यंमंत्रदेवताज्ञानसहितम् । धर्मान्मन्वादिधर्मशास्त्राणि । न्यायपथान्मीमांसादीन् । आन्वीक्षिकींतर्कविद्याम् । षड्विधां 'संधिर्नाविग्रहोयानमासनं द्वधमाश्रय ' इत्यमरसिंहोक्तभेदेनषट्प्रकारांराजनीतिं ३४ सकृन्निगदमात्रेणएकवारगुरूच्चारणमात्रेण । (तौप्रोक्तंसर्वंसंजग्रहतुः) ३५

श्लोकाः २३—३५

यातयूयंव्रजंतातवयंचस्नेहदुःखितान् ॥ ज्ञातीन्वोद्रष्टुमेष्यामोविधायसुहृदांसुखम् २३ एवंसांत्वय्यभगवान्नंदंसव्रजमच्युतः ॥ वासोलंकारकुप्याद्यैरर्हयामाससादरम् २४ इत्युक्तस्तौपरिष्वज्यनंदःप्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रेसहगोपैर्व्रजंययौ २५ अथशूरसुतोराजन्पुत्रयोःसमकारयत् ॥ पुरोधसाब्राह्मणैश्चयथावद्द्विजसंस्कृतिम् २६ तेभ्योऽदाद्दक्षिणागावोरुक्ममालाःस्वलंकृताः ॥ स्वलंकृतेभ्यःसंपूज्यसवत्साःक्षौममालिनीः २७ याःकृष्णरामजन्मर्क्षेमनोदत्तामहामतिः ॥ ताश्चाददादनुस्मृत्यकंसेनाधर्मतोहृताः २८ ततश्चलब्धसंस्कारौद्विजत्वंप्राप्यसुव्रतौ ॥ गर्गाद्यदुकुलाचार्याद्गायत्रंव्रतमास्थितौ २९ प्रभवौसर्वविद्यानांसर्वज्ञौजगदीश्वरौ ॥नान्यसिद्धामलंज्ञानंगूहमानौनरेहितैः ३० अथोगुरुकुलेवासमिच्छंतावुपजग्मतुः ॥ काश्यंसांदीपिनिंनामह्यवंतिपुरवासिनम् ३१ यथोपसाद्यतौदांतौगुरुवृत्तिमनिंदिताम् ॥ ग्राहयंतावुपेतौस्मभक्त्यादेवमिवादृतौ ३२ तयोर्द्विजवरस्तुष्टःशुद्धभावानुवृत्तिभिः ॥ प्रोवाचवेदान्निखिलान्सांगोपनिषदोगुरुः ३३ सरहस्यंधनुर्वेदंधर्मन्न्यायपथांस्तथा ॥ तथाचान्वीक्षिकींविद्यांराजनीतिंचषड्विधाम् ३४ सर्वंनरवरश्रेष्ठौसर्वविद्याप्रवर्तकौ ॥ सकृन्निगदमात्रेणतौसंजगृहतुर्नृप ३५

चूर्णिका

हेतातयूयंव्रजंयात वः ज्ञातीन्द्रष्टुं एष्यामः २३ एवंकृष्णः सव्रजंनंदंसांत्वय्य वासोलंकारकांस्यपात्रादिभिः पूजयामास २४ एवंउक्तः नंदः अश्रुभिः नेत्रेआपूर्यगोपैः सहव्रजंययौ २५ हेराजन् अथ वसुदेवः पुत्रयोः व्रतबंधंगर्गादिभिः कारयित्वा २६तेभ्यः दक्षिणाः गाः सवत्साः ददौ २७किंच सुतयोः जन्मनि याः मनोदत्ताःगाः ता अपि स्मृत्वा ददौ २८ ततः कृष्णरामौद्विजत्वंप्राप्य जगदीश्वरौतौ स्वकुलाचार्यात् गर्गात् ब्रह्मचर्यं लब्ध्वा गुरुकुलेवासं इच्छंतौ अवंतीपुरस्थंकाश्यंसांदीपनिंजग्मतुः २९ ३० ३१ ततः तौगुरौवृत्तिं अन्यान् शिक्षयंतौ गुरुभक्त्यासेवितवंतौ ३२ तयोः तुष्टः गुरुः वेदान् धनुर्वेदं धर्मशास्त्राणि मीमांसां तर्कविद्यां राजनीतिं च प्राह ३३ ३४ तौसर्वविद्याप्रवर्तकौसकृदुच्चारणमात्रेणजगृहतुः ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चतुःषष्ट्याअहोरात्रैःतावतीश्चतुःषष्टिसंख्याकाःकलाःसंजगृहतुः । ताश्चशैवतंत्रप्रोक्तालिख्यंते । यथा। गीतम् १ वाद्यम् २ नृत्यम् ३ नाट्यम् ४ आलेख्यम् ५ विशेषकच्छेद्यम् ६ तंडुलकुसुमविकाराः ७ पुष्पास्तरणम् ८ दशनवसनांगरागाः ९ मणिभूमिकाकर्म १० शयनरचनम् ११ उदकवाद्यम् १२ उदकयानम् १३ चित्रयोगाः १४ माल्यग्रथनविकल्पाः १५ शेखरापीडयोजनम् १६ नेपथ्ययोगाः १७ कर्णपत्रभंगाः १८ गंधयुक्तिः १९ भूषणयोजनम् २० ऐंद्रजालम् २१ कौचुमारयोगाः २२ हस्तलाघवम् २३ चित्रशाकापूपभक्तविकारक्रिया २४ पानकरसरागासवयोजनम् २५ सूचीवायकर्म २६ सूत्रक्रीडा २७ वीणाडमरुकवाद्यानि २८ प्रहेलिका २९ प्रतिमाला ३० दुर्वचकयोगाः ३१ पुस्तकवाचनम् ३२ नाटकाख्यायिकादर्शनम् ३३ काव्यसमस्यापूरणम् ३४ पट्टिकावेत्रबाणविकल्पाः ३५ तर्ककर्माणि ३६ तक्षणम् ३७ वास्तुविद्या ३८ रूपरत्नपरीक्षा ३९ धातुवादः ४० मणिरागज्ञानम् ४१ आकरज्ञानम् ४२ वृक्षायुर्वेदयोगाः ४३ मेषकुक्कुटलावकयुद्धविधिः ४४ शुकसारिकाप्रलापनम् ४५ उत्सादनम् ४६ केशमार्जनकौशलम् ४७ अक्षरमुष्टिकाकथनम् ४८ म्लेच्छितविकल्पाः ४९ देशभाषाज्ञानम् ५० पुष्पशकटिका ५१ निमित्तज्ञानम् ५२ यंत्रमातृकाधारणम् ५३ मातृकासंवाच्यम् ५४ मानसीकाव्यक्रिया ५५ अभिधानकोशः ५६ छंदोज्ञानम् ५७ क्रियाविकल्पाः ५८ छलितकयोगाः ५९ वस्तुगोपनानि ६० द्यूतविशेषः ६१ आकर्षक्रीडाः ६२ बालक्रीडनकानि ६३ वैनायकानांवैजयिकानांवैयासिकानांचविद्यानांज्ञानानि ६४ ॥ इतिचतुःषष्टिकलाः (कदिशदाक्षिणेष्टेति)छंदयामासतुःउपलोभितवंतावित्यर्थः ३६ (अतिमानुषींदिव्यांमतिंज्ञानम् । महिमानंसामर्थ्यंचाद्भुतंज्ञात्वा) प्रभासेक्षेत्रेमहार्णवेमृतंबालंवरयामास ३७ ईश्वराविति विदित्वासमुद्रस्तयोरर्हणमाजहारेति ३८ ३९ पंचजनस्त्वसुरोऽहार्षीरत्सचमहान्ममासाध्यइत्यर्थः । ४० ४१

॥१८९॥

अहोरात्रैश्चतुःषष्ट्यासंयतौतावतीःकलाः ॥ गुरुदक्षिणयाचार्यंच्छंदयामासतुर्नृप ३६ द्विजस्तयोस्तन्महिमानमद्भुतंसंलक्ष्यराजन्नतिमानुषींमतिम् ॥ संमंत्र्यपत्न्यासमहार्णवेमृतंबालंप्रभासेवरयांबभूवह ३७ तथेत्यथारुह्यरथंमहारथौप्रभासमासाद्यदुरंतविक्रमौ ॥ वेलामुपव्रज्यनिषीदतुःक्षणंसिंधुर्विदित्वार्हणमाहरत्तयोः ३८ तमाहभगवानाशुगुरुपुत्रःप्रदीयताम् ॥ योसाविहत्वयाग्रस्तोबालकोमहतोर्मिणा ३९ ॥ समुद्रउवाच ॥ नैवाहार्षमहंदेवदैत्यःपंचजनोमहान् ॥ अंतर्जलचरःकृष्णशंखरूपधरोऽसुरः ४० आस्तेतेनाहृतोनूनंतच्छ्रुत्वासत्वरंप्रभुः ॥ जलमाविश्यतंहत्वानापश्यदुदरेऽर्भकम् ॥ तदंगप्रभवंशंखमादायरथमागमत् ४१

श्लोकाः ३६/४१

चूर्णिका

ततःचतुःषष्ट्यहोरात्रैः तावतीः कलाः जगृहतुः ततः रामकृष्णौगुरुंदक्षिणार्थंछंदयामसतुः ३६ ततोगुरुः तयोः अद्भुतंमहिमानंदृष्ट्वापत्न्यासमं संमंत्र्यप्रभासेऽब्धौमृतंबालंवरयामास ३७ तथेत्युक्त्वातौरथमारुह्यप्रभासेवेलांगत्वा निषेदतुः तावीश्वराविति ज्ञात्वासिंधुः तयोः अर्हणंददौ ३८ तंहरिः आह हेसिंधो त्वयायः मद्गुरुबालः ऊर्मिणाग्रस्तः सः दीयताम् ३९ ॥ अब्धिरुवाच ॥ हेदेव अहंबालंनाहार्षं किंतुमदंतः पंचजननामाशंखरूपधरोऽसुरः आस्ते तेननूनंहृतः तच्छ्रुत्वाप्रभुः जलंप्रविश्यदैत्यं हत्वातदुदरे बालंनापश्यत् ४० ४१

॥१८९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हलायुधेनरामेणसहितः) ४२ (सपर्यांपूजाम्) ४३ सर्वेषांभूतानामाशयाअंतःकरणानितानिआलयोनिवासोयस्यतं (हेललिामनुष्यरूप ।)४४निजंकर्मैवनितरांबंधनंयस्यतम् । तथाभूतमपि मदाज्ञापुरस्कारेणायतस्तेनदोषइत्याह (मच्छासनेति) ४५ ४६ वत्सेतिप्राधान्येनैकस्यसंबोधनम् । गुरोर्निष्क्रयोगुरुदक्षिणा । युष्मद्विधयोःशिष्ययोर्गुरोर्मम्कामानांमध्येकोनुकामोऽवशिष्यते । नकोपि । पत्न्यभीप्सितयादत्तयापुत्रदानलक्षणयादक्षिणयैवालमित्यर्थः ४७ हेवीरौ (छंदांसिवेदाः) ४८ अनिलवद्रंहोयस्यतेन । पर्जन्योमेघस्तद्वन्निनदोयस्यतेन (समनंदन्सम्यक्ननंदुः । बह्वहानिगुरुगृहेस्थितौतौअपश्यंत्यः) नष्टंअदृष्टंतत्पुनर्लब्धंधनंयाभिःताइव ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांपंचचत्वारिंशोध्यायः ॥ ४५ ॥ ॥ ७ ॥ ॥ षट्चत्वारिंशकेघोषमुद्धवंप्रेष्यतद्गिरा ॥ यशोदानंदयोश्चक्रेकृष्णःशोकापनोदनम् ॥१॥कामचारंद्विजातिःसन्परित्यज्यातिसंयतः । गुरोर्ज्ञानमनुप्राप्यसख्यागोपीरुपादिशत् ॥२॥ गोपीनांसांत्वनमतिरहस्यंसन्मंत्रिसाध्यमितितदर्थंउद्धवंविशिनष्टि । वृष्णीनामिति । बुद्धिसत्तमःस्वयंबुद्ध्यातिश्रेष्ठः १ (प्रेष्ठंअतिशयेनप्रियं । एकांतिनंएकनिश्चयंतंकाचिदाह । पाणिगृहीत्वेतिकार्यादरोद्योतितः) २ (पित्रोःयशोदानंदयोःप्रीतिमावहअस्मत्क्षेमकथनेनसुखमुत्पादयेत्यर्थः) ३

॥१९०॥

श्लोकाः ४२/३

ततःसंयमिनींनामयमस्यदयितांपुरीम् ॥ गत्वाजनार्दनःशंखंप्रदध्मौसहलायुधः ४२शंखनिर्ह्रादमाकर्ण्यप्रजासंयमनोयमः ॥ तयोःसपर्यांमहतींचक्रे भक्त्युपबृंहिताम् ४३ उवाचावनतःकृष्णंसर्वभूताशयालयम् ॥ लीलामनुष्यहेविष्णोयुवयोःकरवामकिम् ४४ श्रीकृष्णउवाच ॥ गुरुपुत्रमिहानीतंनिजकर्मनिबंधनम् ॥ आनयस्वमहाराजमच्छासनपुरस्कृतः ४५ तथेतितेनोपानीतंगुरुपुत्रंयदूत्तमौ ॥ दत्त्वास्वगुरवेभूयोवृणीष्वेतितमूचतुः ४६ सम्यक्संपादितोवत्सभवद्भ्यांगुरुनिष्क्रयः ॥ कोनुयुष्मद्विधगुरोःकामोनामावशिष्यते ४७ गच्छतंस्वगृहंवीरौकीर्तिर्वामस्तुपावनी ॥ छंदांस्ययातयामानिभवंत्विहपरत्रच ४८ गुरुणैवमनुज्ञातोरथेनानिलरंहसा ॥ आयातौस्वपुरंतातपर्जन्यनिनदेनवै ४९ समनंदन्प्रजाःसर्वादृष्ट्वारामजनार्दनौ ॥ अपश्यंत्योबह्वहानिनष्टलब्धधनाइव ५० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचचत्वारिंशोध्यायः ४५ ॥ ॥ ७ ॥ ॥॥ श्रीबादरायणिरुवाच ॥ वृष्णीनांप्रवरोमंत्रीकृष्णस्यदयितःसखा ॥ शिष्योबृहस्पतेःसाक्षादुद्धवोबुद्धिसत्तमः १ तमाहभगवान्प्रेष्ठंभक्तमेकांतिनंक्वचित् ॥ गृहीत्वापाणिनापाणिंप्रपन्नार्तिहरोहरिः २ गच्छोद्धवव्रजंसौम्यपित्रोर्नौप्रीतिमावह ॥ गोपीनांमद्वियोगाधिमत्संदेशैर्विमोचय ३

चूर्णिका

किंच तदंगजंशंखं आदायसंयमनींगत्वा ४२ सबलः कृष्णः शंखंदध्मौ तंनादंश्रुत्वायमः ४३ तयोः पूजांकृत्वाकृष्णं आह हेविष्णोयुवयोःकिंकरवाम ४४ ॥ श्रीभगवानुवाच ॥ हेयमत्वयाइहआनीतंगुरुपुत्रं मदाज्ञयादेहि ४५ तथेतितेनदत्तंबालंगृहीत्वाभुविएत्यगुरवेदत्वापुनः वृणीष्वेत्यूचतुः ४६ ततोगुरुराह युवाभ्यांगुरुदक्षिणासम्यक्संपादिता ४७ अतः स्वगृहंगच्छतं वांकीर्तिः पावनी अस्तु तथाइहपरत्रचवेदाः अगतसाराः संतु ४८ एवंगुरुणानुज्ञातौ तौरथेनपुरींप्राप्तौ ४९ तौदृष्ट्वाबह्वहानि अपश्यंत्यः प्रजाः समनंदन् नष्टलब्धधनाइव ५० ॥ इतिदशमेपंचचत्वारिंशः ४५ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ वृष्णीनांप्रवरोमंत्रीकृष्णस्यदयितःसखा शिष्योबृहस्पतेःसाक्षादुद्धवोबुद्धिसत्तमः १ तंप्रियं भक्तंहरिः आह २ हेउद्धवत्वंव्रजंगच्छ नौपित्रोः प्रीतिंकुरु गोपीनांचमद्वियोगाधिमत्संदेशैः दूरीकुरु ३

॥१९०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गोपीनांविशेषतःसंदेशेकारणमाह ताइति ।मय्येवसंकल्पात्मकंमनोयासांताःअहमेवप्रा गोयासांता॰ मदर्थेत्यक्तादैहिकाःपतिपुत्रादयोयाभिस्ताः।ततःकिमतआह।येत्यक्तलोकधर्माश्चेति मन्निमित्तंत्यक्तौलोक
धर्मौइहामुत्रसुखेतत्साधनानिचयैस्तेतानहंबिभर्मिपुष्णामिसंवर्धयामिसुखयामीत्यर्थः (धारयामीतिवाअस्मिन्पक्षेमनसीतिशेषः।)४तासांवियोगाधिंदर्शयति द्वयेन मयीति । (अंगहेउद्धवप्रेयसांप्रेष्ठेप्राणे
भ्योपिप्रियतमेदूरस्थेसति) विरहेणौत्कंठ्यंतेनविह्वलाः (परवशाःविशेषेणमुह्यंति) ५ (ननुजगदात्मनस्तवविरहेतासांकथंजीवनंतत्राह धारयंतीति । प्रायःबहुधा ।) मेमदीयावल्लव्योगोप्यःमम
गोकुलान्निर्गमनसमयेशीघ्रमागमिष्यामीतियेप्रत्यागमनसंदेशास्तैःमदात्मिकाइतितासामात्मास्वदेहेयदिस्यात्तर्हिविरहतापेनदह्येतैवतस्यमयिवर्तमानत्वात्कथंचिद -(-तिकृच्छ्रेणापि) जीवंतीतिभावः ६
संदेशंभवतीनांवियोगोमेनाहिसर्वात्मनाक्वचिदित्यादिकं ७ (विभावसौसूर्ये) निम्लोचतिअस्तंगच्छतिसति(व्रजंप्रतिप्रविशतांगवादीनां) छन्नंयानंरथोयस्येतितदागोपीभिरज्ञातत्वेननंदसंगंसलब्धवानि
॥१९१॥ तिसूचयति ८ व्रजंवर्णयतिपंचभिःवासितार्थेइत्यादिभिः । वासिताःपुष्पवंत्योगावःतन्निमित्तमभितोयुध्यद्भिःशुष्मिभिर्मत्तैर्गोवृषैर्नादितं । वास्राभिर्धेनुभिःस्ववत्सकान्प्रति ९ (सितैःशुभ्रैः) विलंघद्भि
रुत्पतद्भिःगोदोहशब्दैःसहअभितोरवाःमुंचमामुंचनयआनयगृहाणदेहीत्यादयोयस्मिन्तत् । वेणूनांनिःस्वनेनचमंडितं १० गायंतीभिर्गोपीभिर्गोपैश्चगायद्भिःसुविराजितं ११ अग्न्याद्यर्चनान्वितैर्गोपगृ
हैर्धूपादिभिश्चमनोरमं १२ (द्विजाःपक्षिणः) पद्मखंडैःकमलसमूहैः १३ आर्चयत्पूजयामास १४ (संविष्टंशयितं । पादयोःसंमर्दनादिभिर्गतश्रमंकशिपौशय्यायांसंविष्टं) १५

श्लोकाः ४/१५

तामन्मनस्कामत्प्राणामदर्थेयक्तदैहिकाः॥येत्यक्तलोकधर्माश्चमदर्थेतान्बिभर्म्यहम्४मयिताःप्रेयसांप्रेष्ठेदूरस्थेगोकुलस्त्रियः ॥स्मरंत्योंगविमुह्यंतिविरहौत्कं
ठ्यविह्वलाः ५ धारयंत्यतिकृच्छ्रेणप्रायःप्राणान्कथंचन ॥ प्रत्यागमनसंदेशैर्बल्लव्योमेमदात्मिकाः ७ ॥श्रीशुकउवाच॥ इत्युक्तउद्धवोराजन्संदेशंभर्तुरा
दृतः ॥आदायरथमारुह्यप्रययौनंदगोकुलम् ७ प्राप्तोनंदव्रजंश्रीमन्निम्लोचतिविभावसौ ॥ छन्नयानःप्रविशतांपशूनांखुररेणुभिः ८ वासितार्थेभियुध्य
द्भिर्नादितंशुष्मिभिर्वृषैः ॥ धावंतीभिश्चवास्राभिरूधोभारैःस्ववत्सकान् ९ इतस्ततोविलंघद्भिर्गोवत्सैर्मंडितंसितैः ॥ गोदोहशब्दाभिरवंवेणूनांनिःस्वने
नच १० गायंतीभिश्चकर्माणिशुभानिबलकृष्णयोः ॥ स्वलंकृताभिर्गोपीभिर्गोपैश्चसुविराजितम् ११ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः ॥ धूप
दीपैश्चमाल्यैश्चगोपावासैर्मनोरमम् १२ सर्वतःपुष्पितवनंद्विजालिकुलनादितम् ॥ हंसकारंडवाकीर्णैःपद्मखंडैश्चमंडितम् १३ तमागतंसमागम्यकृष्ण
स्यानुचरंप्रियम् ॥ नंदःप्रीतःपरिष्वज्यवासुदेवधियाऽऽर्चयत् १४ भोजितंपरमान्नेनसंविष्टंकशिपौसुखम् ॥ गतश्रमंपर्यपृच्छत्पादसंवाहनादिभिः १५

चूर्णिका

यतः ताः मत्प्राणाः तथामयिदूरस्थेसति मांस्मरंत्यः विमुह्यंति ४ ५ तथाअतिकृच्छ्रेणप्राणान्धारयंति अतस्ताः मेप्रत्यागमनसंदेशैः उपदेष्टव्याः ६ ॥ श्रीशुकउवाच ॥
एवमुक्तः उद्धवः रथमारुह्यसूर्यास्तसमये पशूनांखुररेणुभिः छन्नयानः सन्व्रजंप्राप्तः ७ ८ तदेववर्णयति वासितार्थेयुद्ध्यद्भिर्वृषैः तथास्ववत्सान् धावंतीभिर्नादितम् किंच
इतस्ततः उत्पतद्भिः वत्सैः मंडितं किंच गोदोहशब्दैः सह मुंच आनय इत्यादिशब्दैश्चमंडितं किंच बलकृष्णयोः कर्माणिगायंतीभिःगोपीभिर्गोपैश्चविराजितम् अपिच ॥१९१॥
अग्न्यर्कादीनांपूजया अन्वितैः गोपगृहैर्मनोरमम् सर्वतः पुष्पितवनम् भ्रमरपक्षिनादितम् ९ १० ११ १२ १३ एवंभूतंव्रजंप्राप्तं उद्धवंदृष्ट्वानंदः आलिंग्यअर्चयत्
१४ ततः स्वान्नेनभोजितंकशिपौउपविष्टं पादसंवाहननेविश्रांतंनंदः पप्रच्छ १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (शूरनंदनःवसुदेवः)१६।यदूनामितिकर्मणिषष्ठी१७(अपिकिं)गावोगाः।गिरिंगोवर्धनम्।(आत्मानाथोयस्यतद्व्रजम्)१८अप्यायास्यति आगमिष्यति किंसकृदपि ।(तर्हितदा) १९श्रीकृष्णोपकारस्मरणादिभिरतुपमानंदेनाभिभूयमानआह । दावाग्नेरित्यादिना । वाताद्वर्षाच्चेति । वृषात्सर्पाच्चाघासुरात् ।(कालियाद्वा) अन्येभ्यश्चदुरतिक्रमेभ्योमृत्युभ्यःश्रीकृष्णेनरक्षिताःस्म२०किंचस्मरतामिति । लीलयाअपांगेननिरीक्षितं अंगहे उद्धव २१ नकेवलंशिथिलाएवकिंतुशनैःशनेरुपरमंतीत्याहसरिच्छैलेति । सरितश्चशैलाश्चवनोदेशाश्चतान्आक्रीडान्क्रीडास्थानानितदात्मतांमुकुंदरूपतां२२सुराणामर्थायेहप्राप्तौ । महत्गंभीरंगर्गस्यवचनंयथा २३ नकेवलंतद्वचनानुसारेणैव । किंतुव्यवहारसंवादादपीत्याह । कंसमिति । (मल्लौमुष्टिकचाणूरौ । गजपतिंकुवलयापीडं । अवधिष्टांहतवंतौ) २४ इभराट्यष्टिमिवतालत्रयप्रमाणंधनुर्बभंज । (महान्सारोयस्य । दृढतममित्यर्थः) २५ (सुरासुराणामपिजेतारोलीलयाहताः) २६ (अतिशयिताउत्कंठायस्य) २७ (अवास्राक्षीत्अवासृजत्) २८ २९

श्लोकाः १६/२९

कच्चिदंगमहाभागःसखानःशूरनंदनः ॥ आस्तेकुशल्यपत्याद्यैर्युक्तोमुक्तःसुहृद्वृतः १६ दिष्ट्याकंसोहतःपापःसानुगःस्वेनपाप्मना ॥ साधूनांधर्मशीलानां यदूनांद्वेष्टियःसदा १७ अपिस्मरतिनःकृष्णोमातरंसुहृदःसखीन् ॥ गोपान्व्रजंचात्मनाथंगावोवृंदावनंगिरिम् १८ अप्यायास्यतिगोविंदःस्वजनान्सकृद्दीक्षितुम् ॥ तर्हिद्रक्ष्यामस्तद्वक्त्रंसुनासंसुस्मितेक्षणम् १९ दावाग्नेर्वातवर्षाच्चवृषसर्पाच्चरक्षिताः ॥ दुरत्ययेभ्योमृत्युभ्यःकृष्णेनसुमहात्मना २० स्मरतांकृष्णवीर्याणिलीलापांगनिरीक्षितम् ॥ हसितंभाषितंचांगसर्वानःशिथिलाःक्रियाः २१ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्षमाणानां मनोयातितदात्मताम् २२ मन्येकृष्णंचरामंचप्राप्ताविहसुरोत्तमौ ॥ सुराणांमहदर्थायगर्गस्यवचनंयथा २३ कंसंनागायुतप्राणंमल्लौगजपतिंतथा ॥ अवधिष्टांलीलयैवपशूनिवमृगाधिपः २४ तालत्रयंमहासारंधनुर्यष्टिमिवेभराट् ॥ बभंजैकेनहस्तेनसप्ताहमदधाद्गिरिम् २५ प्रलंबोधेनुकोऽरिष्टस्तृणावर्तोबकादयः ॥ दैत्याःसुरासुरजितोहतायेनेहलीलया २६ ॥ श्रीशुकउवाच ॥ इतिसंस्मृत्यसंस्मृत्यनंदःकृष्णानुरक्तधीः ॥ अत्युत्कंठोऽभवत्तूष्णींप्रेमप्रसरविह्वलः २७ यशोदावर्ण्यमानानिपुत्रस्यचरितानिच ॥ शृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा २८ तयोरित्थंभगवतिकृष्णेनंदयशोदयोः ॥ वीक्ष्यानुरागंपरमंनंदमाहोद्धवोमुदा २९

चूर्णिका हेउद्धव नः सखा वसुदेवः अपत्यादिभिः युक्तः सुखीकच्चित् १६ किंच पापः कंसोमृतः एतद्दिष्ट्या १७ किंच कृष्णः आंवांपितरौसखीन्गाः वृंदावनंगिरिंचस्मरतिकिम् १८ किंच गोविंदः स्वजनान्सकृत् द्रष्टुं एष्यतिकिम् तर्हितन्मुखंद्रक्ष्यामः १९ किंच कृष्णेन दुरत्ययमृत्युभ्यः वयंरक्षिताः स्मः अतः तद्वीर्यहास्यभाषणानि स्मरतां नः सर्वाक्रियाः शिथिलाः स्म २१ तथा सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् द्रष्टॄणांनोमनः तन्मयतांयाति २२ किंच एतौदेवोत्तमौ अत्रप्राप्तौ इतिमन्ये २३ किंच नागायुतप्राणंकंसंतथामल्लौगजं यौलीलयाअवधिष्टां२४ तथातालत्रयमितंधनुः वभंज गिरिंसप्ताहं दधौ प्रलंबादिदैत्याः येनहताः अतस्तौदेवावेव २५ २६॥श्रीशुकउवाच ॥ इतिसंस्मृत्यसंस्मृत्यप्रेमप्रसरविह्वलः सन्तूष्णींअभवत् २७ एवंयशोदा पुत्रचरितानिशृण्वंतीअश्रूणिमुमोच २८ एवंकृष्णेतयोःप्रीतिंदृष्ट्वाउद्धवः नंदंआह २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देहिनांमध्येश्लाघ्यतमौयद्यतःईदृशीअनुरक्ता)३०अखिलगुरुत्वमेवजनकत्वेननियंतृत्वेनचाहएताविति रामोमुकुंदश्चेत्येतौविश्वस्यबीजयोनीनिमित्तोपादाने।ननुपुरुषप्रधानयोर्बीजयोनित्वंप्रसिद्धंअतआह। पुरुषःप्रधानमिति।पुरुषांशःप्रधानंशक्तिःअतःप्रधानपुरुषावप्येतावेवेत्यर्थः।एवंजनकत्वमुक्तम्। किंच।अन्वीयभूतेषु।भूतेष्वनुप्रविश्यभूतानांतदुपहितस्यविलक्षणस्यचनानाभेदस्यज्ञानस्यजीवस्यईशातेईश्वरौ नियंतारौभवतः। कुतःपुराणौअनादीअनादित्वात्कारणत्वंततश्चनियंतृत्वमित्यर्थः ३१ ननुसृष्ट्यादिकर्मावेशान्मनुष्यादिजन्मदर्शनाच्चतस्यान्येभ्यःकोविशेषइत्याशंक्याह। यस्मिन्निति द्वाभ्याम्। यस्मिन्क्षणमपिमनःसमावेश्यकर्माशयंकर्मवासनांनिर्हृत्यत्यक्त्वाब्रह्ममयःस्वरूपज्ञानवान्। अर्कवर्णःशुद्धसत्त्वमूर्तिःसन्परांगतिंतत्पदंयाति ३२ अखिलस्यात्माचहेतुश्चतस्मिन्कारणमर्त्यमूर्तौकेनापि कारणेनमनुष्याकृतौतथापिमहात्मन्महात्मनिपरिपूर्णेभवंतौभावंविधत्तःभक्तिंकुरुतःअतःकृतकृत्यावित्यर्थः ३३ प्रस्तुतमाहआगमिष्यतीति। पित्रोर्युवयोः ३४ (सर्वसात्त्वतांप्रतिकूलंकंसंहत्वा) "यातयूयंव्रजंतातवयंचस्नेहदुःखितान्। ज्ञातीन्वोद्रष्टुमेष्यामोविधायसुहृदांसुखं" इतियदाहकृष्णस्तत्सत्यंकरिष्यतीति ३५ कालविलंबमसहमानौप्रत्याह। माखिद्यतमिति। हेमहाभागौ। खेदं माकुरुतंअंतिकेइदानीमेवसमीपेवाद्रक्ष्यथःकुतइत्यतआह। अंतर्हृदीति। तर्हिसर्वैःकिमितिनदृश्यते तत्राह। ज्योतिरिति। तद्यथामथनंविनानदृश्यतेतथाभक्तिंविनाकृष्णोपीतिभावः ३६अहोआस्तामेव तत्स्यत्विहागमनंस्वस्यातिप्रियान्पित्रादीन्विहायनसंगच्छतइतिमन्येहंतत्राह। नह्यस्येति। अस्यप्रियादयोनहिसंतितत्रेमौहेतू। अमानिनःसमानस्येति। निरभिमानत्वात्रागादिरहितत्वाच्चेत्यर्थः ३७३८(अस्यकर्मवानसंभवति) सोपिजन्मकर्मादिरहितोपिक्रीडाप्रयोजनःसन्साधूनांपरिपालनायसदसन्मिश्रयोनिषुसात्त्विकतामसराजसयोनिषु यद्वादेवादिनृसिंहादियोनिषुकल्पतेआविर्भवतीत्यर्थः३९

श्लोकाः ३०—३९

॥उद्धवउवाच॥ युवांश्लाघ्यतमौनूनंदेहिनामिहमानद ॥ नारायणेऽखिलगुरौयत्कृतामतिरीदृशी ३० एतौहिविश्वस्यचबीजयोनीरामोमुकुंदःपुरुषः प्रधानम् ॥ अन्वीयभूतेषुविलक्षणस्यज्ञानस्यचेशातइमौपुराणौ ३१ यस्मिञ्जनःप्राणवियोगकालेक्षणंसमावेश्यमनोविशुद्धम् ॥ निर्हृत्यकर्माशयमा शुयातिपरांगतिंब्रह्ममयोऽर्कवर्णः ३२ तस्मिन्भवंतावखिलात्महेतौनारायणेकारणमर्त्यमूर्तौ ॥ भावंविधत्तांनितरांमहात्मन्किंवाऽवशिष्टंयुवयोःसुकृत्य म् ३३ आगमिष्यत्यदीर्घेणकालेनव्रजमच्युतः ॥ प्रियंविधास्यतेपित्रोर्भगवान्सात्वतांपतिः ३४ हत्वाकंसंरंगमध्येप्रतीपंसर्वसात्वताम् ॥ यदाहवांस मागत्यकृष्णःसत्यंकरोतितत् ३५ माखिद्यतंमहाभागौद्रक्ष्यथःकृष्णमंतिके ॥ अंतर्हृदिसभूतानामास्तेज्योतिरिवैधसि ३६ नह्यस्यातिप्रियःकश्चिन्ना प्रियोवास्त्यमानिनः ॥ नोत्तमोनाधमोवापिसमानस्यसमोपिच ३७ नमातानपितातस्यनभार्यानसुतादयः ॥ नात्मीयोनपरश्चापिनदेहोजन्मएववा ३८ नचास्यकर्मवालोकेसदसन्मिश्रयोनिषु ॥ क्रीडार्थःसोपिसाधूनांपरित्राणायकल्पते ३९

चूर्णिका हेनंदयुवांश्लाघ्यतमौ यतः ईदृक्बुद्धिः हरौकृता ३० एतौरामकृष्णौहिविश्वस्यनियंतारौस्तः यस्मिन् जनः अंते क्षणंमनः आवेश्य वासनां त्यक्त्वा परांगतिं याति ३१ ३२ तस्मिन्नारायणेयुवांभावंविधत्ताम्अतः युवांकृतकृत्यौ ३३ हेनंदकृष्णः व्रजंशीघ्रं एत्य पित्रोः प्रियंकरिष्यति ३४ किंच कंसंहत्वा वः समीपं एत्य कृष्णः यदाह तदपि सत्यं करिष्यति ३५ किंच हे महाभागौकृष्णं अंतिके द्रक्ष्यथः यतः सः सर्वभूतानां अंतर्हृदिकाष्ठेऽग्निरिव आस्ते ३६ तस्यनिरहंकारिणः प्रियाप्रियादयः मातृपित्रादयश्च न देहः जन्म च न ३७ ३८ एवंभूतोऽपिसद्रक्षणार्थंदेवादियोनिषुआविर्भवति ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुजन्मंकर्मादिरहितस्यकुतएतदित्यतआह सत्त्वमिति । क्रीडामतीतोपिक्रीडन् । तथापिमायागुणैःसर्वंघटतेइत्यर्थः(गुणानांकार्यंतदुपहितेब्रह्मण्युपचारात्कल्प्यतइतिभावः) ४० अत्राविद्योपाधे जीवस्यकर्तृत्वंदृष्टांतीकुर्वंस्तस्याविद्ययैवकर्तृत्वमितिसदृष्टांतमाह । यथेति । भ्रमरिकापरिभ्रमणंतयोपलक्षितयादृष्ट्यामहीभूमिर्भ्राम्यतीतियथेयतेप्रतीयतेएवंचित्तेकर्तरिसतितत्रचित्तेविक्षिप्तेअहंधिया आत्माध्यासेनआत्माकर्तास्मृतोयथातद्व-(-द्गुणानांकर्तृत्वेतत्रपरमात्माध्यासात्परमात्मनिकर्तृत्वादिकंकल्प्यते)इति ४१ किंच युवयोरेवनायमात्मजःकिंतुसर्वेषामपितत्रापिनात्मजएवकिंतुशत्रुमित्रा दिरूपोपीतिसर्वात्मत्वनिरूपणेनतयोर्मोहनिवृत्तयेसंबंधमनैकांतिकीकरोति युवयोरितिद्वाभ्याम् (हियस्मात्सर्वेषामात्मा । ईश्वरःशास्ता) ४२ (सर्वात्मत्वमेवाह । दृष्टमिति) अच्युताद्विना (परमात्म व्यतिरिक्तं)तरांनितरांतत्त्वतःवाच्यंनिर्वचनार्हंवस्तुनास्ति (अतःसएवसर्ववस्तुभूतइति) ४३ दीपान्निरूप्यप्रज्वाल्यवास्तून् (गृहप्रदेशान्) देहल्यादीन् ४४ दीपप्रकाशेनदीप्तैर्मणिभिःकांच्यादिषुस्थितै रत्नैस्तागोप्यस्तदाविरेजुः । कथंभूताः । रज्जूर्विकर्षत्सुभुजेषुअर्थाच्चलतांकंकणानांस्रजःसमूहायासांमथ्नंतीनांताः । चलंतोनितंबाःस्तनाहाराश्चयासाम् । कुंडलैस्त्विषंतःस्फुरंतःकपोलायासाम् । अ रुणानिकुंकुमानियेषुतान्याननानियासांताश्चताश्चताश्च ४५ (दिवमाकाशम्) ४६ तदाव्रजौकसोगोप्यः (शातकौंभंसौवर्णंनंदद्वारसमीपेदृष्ट्वा) ४७ सक्रोधमाहुः । अक्रूरइति । अर्थंसाधितवान्इत्यर्थ साधनःतदाहुःयेननीतइति (यःकंसस्यसखापितच्छत्रुंतत्रनीत्वातेनतंघातितवान्सएवप्रायेणपुनरागतइत्यर्थः) ४८

श्लोकाः ४०/४८

सत्त्वंरजस्तमइतिभजतेनिर्गुणोगुणान् ॥ क्रीडन्नतीतोत्रगुणैःसृजत्यवतिहंत्यजः४० यथाभ्रमरिकादृष्ट्याभ्राम्यतीवमहीयते ॥ चित्तेकर्तरितत्रात्माकर्ते वाहंधियास्मृतः ४१ युवयोरेवनैवायमात्मजोभगवान्हरिः ॥ सर्वेषामात्मजोह्यात्मापितामातासईश्वरः ४२ दृष्टंश्रुतंभूतभवद्भविष्यत्स्थास्नुश्चरिष्णु र्महदल्पकंच ॥ विनाऽच्युताद्वस्तुतरांनवाच्यंसएवसर्वंपरमार्थभूतः ४३ एवंनिशासाब्रुवतोर्व्यतीतानंदस्यकृष्णानुचरस्यराजन् ॥ गोप्यःसमुत्थाय निरूप्यदीपान्वास्तून्समभ्यर्च्यदधीन्यमंथन् ४४ तादीपदीप्तैर्मणिभिर्विरेजूरज्जूर्विकर्षद्भुजकंकणस्रजः ॥ चलन्नितंबस्तनहारकुंडलत्विष्यत्कपोलारुण कुंकुमाननाः ४५ उद्गायतीनामरविंदलोचनंव्रजांगनानांदिवमस्पृशद्ध्वनिः ॥ दध्नश्चनिर्मंथनशब्दमिश्रितोनिरस्यतेयेनदिशाममंगलम् ४६ भगवत्यु दितसूर्येनंदद्वारिव्रजौकसः ॥ दृष्ट्वारथंशातकौंभंकस्यायमितिचाब्रुवन् ४७ अक्रूरआगतःकिंवायःकंसस्यार्थसाधनः ॥ येननीतोमधुपुरींकृष्णःकमललोचनः४८

चूर्णिका

किंच स्वयंनिर्गुणोपिगुणान्भजते तथातैर्गुणैः विश्वंसृजति अवति हंति ४० ४१ किंच हेनंद अयंहरिः युवयोरेवपुत्रः इतिन किंतु सर्वेषामात्मजोह्यात्मापितामातास ईश्वरः ४२ किंच दृष्टंश्रुतमित्यादिमहदल्पंच अच्युताद्भिन्नंकिमपिन ४३ किंतुसर्वंसएव एवंब्रुवतोस्तयोः साराविर्गता तावत्गोप्यः उत्थाय दीपान्निरूप्य गेहानभ्यर्च्य दधीनि अमंथन् ४४ तदा ताः रज्जूर्विकर्षद्भुजकंकणस्रजः सत्यः विरेजुः ४५ तासांकृष्णंगायंतीनांशब्दः दधिमंथनशब्दमिश्रितः सन् दिवंपस्पर्श येनदिशां अमंगलं निरस्यते ४६ तावत्सूर्ये उदितेसति व्रजद्वारि रथंदृष्ट्वा जनाः कस्यायमित्यूचुः ४७ येनपुरीं कृष्णोनीतः सः कंसार्थसाधकः अक्रूरः आगतः ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कंसंघातयित्वापुनःकिमर्थमागतइत्याशंक्यकार्यंसंभावयंति किमिति ।तदातथासाधितेनकार्येणप्रीतस्यभर्तुःपाठांतरेप्रेतस्यमृतस्यकंसस्यनिष्कृतिमानृण्यम् (और्ध्वदेहिकामित्यर्थः) अस्माभिःकृत्वासाधयिष्यतिकिम् । अस्मद्रक्तमांसैस्तिलोदकपिंडांश्चकृत्वादत्वातस्यौर्ध्वदेहिकंसंपादयिष्यतिकिमितिभावः । एवंवदंतीनांस्त्रीणांततस्तस्मिन्नवसरेकृतस्नानादिनियमउद्धवआगतइति ॥ ४९ ॥ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ ॥ ७ ॥ ॥ ॥-सप्तचत्वारिंशकेथकृष्णादेशेनगोपिकाः । बोधयित्वोद्धवस्तत्त्वमनुज्ञाप्यागमत्पुरीम् । ॥१॥(मणियुक्तेमृष्टेकुंडलेयस्यतम् एवंभूतंवीक्ष्य)१(सुविस्मिताःसत्यःनायमक्रूरः)अपीच्यंसुंदरंदर्शनंयस्यसःकोयंकुतोवाकस्यवायंअच्युतस्येववेषोभूषणानिचयस्यसः(अतःप्रायेणतस्यसखास्यात्)इतिवदंत्यस्तंपरिवव्रुः(यतउत्सुकाः । उत्तमश्लोकस्यपदांबुजेआश्रयोयस्येतिपरकीयत्वनिरासः) २ (प्रश्रयेणविनयेनेत्यर्थः । सूनृतंप्रियहितवचनम् । संदेशहरंदूतम्) ३ पार्षदंसेवकम् (पित्रोर्यशोदानंदयोः संतोपंकर्तुमिच्छयाप्रेषितइतिजानीमःतर्कयामइत्यर्थः) ४ (अन्यथाताभ्यांविनेत्यर्थः । गोव्रजेगोकुलेस्मरणीयंस्मृत्यर्हं । युक्तमेतत् इत्याहुः स्नेहेति। बंधूनांपित्रादीनाम्) ५ अन्यथागोव्रजेतस्येत्यत्र हेतुः । अन्येष्विति । अर्थकृतास्वार्थनिमित्ता। विडंबनंमैत्र्यनुकरणमात्रम् । नतुतात्विकीमैत्रीत्यर्थः । पुंभिरितिदृष्टांतौ ६ अस्यैवान्यार्थदर्शनैःप्रपंचः । निःस्वमित्यादिना । निःस्वंनिर्धनम् । दत्तादक्षिणायेनतंयाज्यम् ७ पक्षिणोविगतफलंवृक्षम् । रतांआसक्तांअतृप्तामित्यर्थः ८

श्लोकाः ४९–८

किंसाधयिष्यत्यस्माभिर्भर्तुःप्रीतस्यनिष्कृतिम् ॥ इतिस्त्रीणांवदंतीनामुद्धवोऽगात्कृताह्निकः ४९ ॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेषट्चत्वारिंशोऽध्यायः ४६ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ तंवीक्ष्यकृष्णानुचरंव्रजस्त्रियःप्रलंबबाहुंनवकंजलोचनम् ॥ पीतांबरंपुष्करमालिनंलसन्मुखारविंदंमणिमृष्टकुंडलम् १ सुविस्मिताःकोयमपीच्यदर्शनःकुतश्चकस्याच्युतवेषभूषणः ॥ इतिस्मसर्वाःपरिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयम् २ तंप्रश्रयेणावनताःसुसत्कृतंसव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छन्नुपविष्टमासनेविज्ञायसंदेशहरंरमापतेः ३ जानीमस्त्वांयदुपतेःपार्षदंसमुपागतम् ॥ भर्त्रेहप्रेषितःपित्रोर्भवान्प्रियचिकीर्षया ४ अन्यथागोव्रजेतस्यस्मरणीयंनचक्ष्महे ॥ स्नेहानुबंधोबंधूनांमुनेरपिसुदुस्त्यजः ५ अन्येष्वर्थकृतामैत्रीयावदर्थविडंबनम् ॥ पुंभिःस्त्रीषुकृतायद्वत्सुमनस्स्विवषट्पदैः ६ निःस्वंत्यजंतिगणिकाअकल्पंनृपतिंप्रजाः ॥ अधीतविद्याआचार्यमृत्विजोदत्तदक्षिणम् ७ खगावीतफलंवृक्षंभुक्त्वाचातिथयोगृहम् ॥ दग्धंमृगास्तथारण्यंजारोभुक्त्वारतांस्त्रियम् ८

चूर्णिका

किंच अयं अक्रूरः साधितकार्येणतुष्टस्यभर्तुः निष्कृतिं अस्माभिः साधयिष्यतिकिम् इतिस्त्रीणांवदंतीनामुद्धवोगात्कृताह्निकः ४९ ॥ ॥ इतिदशमेषट्चत्वारिंशः ४६ ॥ श्रीशुकउवाच ॥ हेराजन्ततोगोप्यः तंहरिदासंपीतांवरंकमलमालिनं प्रलंबबाहुं उद्धवंदृष्ट्वा १ शुचिस्मिताः सत्यःअच्युतवेषभूषणकोऽयमितिमत्वापरिवव्रुः २ ततश्चतं आसनेस्थितंहरेः संदेशहरंज्ञात्वा पप्रच्छुः ३ हेउद्धव त्वांहरेः सेवकंजानीमः इहभर्त्रा पित्रोः प्रियंकर्तुंप्रेषितः ४ अन्यथा तस्यव्रजे स्मरणीयं न बंधूनां स्नेहानुबंधस्तुमुनेरपि दुस्त्यजः ५ किंच अन्येषुकार्यनिमित्तमैत्री नसत्या सुमनःस्विवषट्पदैः ६ अस्यप्रपंचः गणिकाः निःस्वंत्यजंति प्रजाःअसमर्थंनृपंत्यजंति प्राप्तविद्याः गुरुं त्यजंति ऋत्विजः दत्तदक्षिणंत्यजंति ७ खगाः दग्धंवनंत्यजंति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(गोविंदएवगतावागादीनांव्यापारायासांताइत्यर्थः) त्यक्तलौकिकात्यक्तलोकव्यवहाराः ९ प्रियस्यकर्माणिगायंत्यः । तथातस्यबाल्यैकैशोरेचवयसियानिकर्माणितानिसंस्मृत्यसंस्मृत्यगतह्रियोनिर्लज्जाः
सत्यो (रुदंत्यश्च)तमपृच्छन्नितिपूर्वक्रियपैवसंबंधः१० (मधुकरंभ्रमरं।तस्यकृष्णसंगमंचिंतयंती) प्रियेणश्रीकृष्णेनमांप्रसादयितुंप्रस्थापितोयंदूतइतिकल्पयित्वाऽब्रवीत् ।यद्वातस्मिन्प्रियप्रस्थापितोद्धवदृ
ष्टिंकृत्वेत्यर्थः।मधुकरापदेशेनोद्धवमेवाप्रस्तुतप्रशंसयाऽब्रवीदितिभावः११ हेमधुप कितवस्यधूर्तस्यबंधोनोऽस्माकंअंघ्रिंमास्पृश । मामांनमस्कारेणप्रार्थयस्वेत्यर्थः। तत्किमित्यपेक्षायांकृष्णवर्णस्यतस्यश्म
श्रूणांलोहितत्वेकारणमुत्प्रेक्षमाणाह। सपत्न्याःकुचविलुलिताकुचाभ्यांसंमर्दितायाकृष्णस्यवनमालाकुचकुंकुमसंलिप्तातस्याःकुंकुमंयेषुतैःश्मश्रुभिरुपलक्षितः (तांमालांसेवमानस्यतवश्मश्रुषुतद्गतकुंकुम
लेपोदृश्यतेऽतोंघ्रिस्पर्शेनालमिति । किंतु) तन्मानिनीनांतासामेव (मधुपुरस्थानांप्रियापराधनिमित्तकोरोषोमानस्तद्वतीनाम्) प्रसादंमधुपतिः कृष्णोवहतु (त्वन्मुखेनताःप्रसादयत्वितिभावः)
तिभाव किमस्मत्प्रसादनेनतस्य (किं भूतंप्रसादंयदुसदसिविडंब्यंउपहासास्पदं।कुतः) यस्यदूतस्त्वमीदृक्।ईदृशोऽविवेकीति १२ ननुकिमित्येवमवजानीथ । किंवस्तेनापकृतंअतआह सकृदिति । भवादृ
क्त्वादृशःकृष्णवर्णोदुर्मनाःसुमनसइवकुसुमानियथा (भवान्) त्यजतितद्वत्शोभनमनसोऽस्मान्सद्यस्तत्यजे । अहोबतअकृतज्ञस्यपादपद्मंश्रीःकथंसेवतेविदितंमयेत्याह । अपीति । बतेतिखेदे । उत्तम
श्लोकजल्पैः (उत्तमश्लोकस्य) मिथ्याकथाभिःमायोहृतचेताःवयंतुनलक्ष्मीवदतिविचक्षणाः (कोस्माकमपराध) इतिभावः १३ झंकारान्बहुधाकुर्वंतमस्मत्प्रसादलाभायकृष्णंगायतीतिमत्वाह । किमि
हेति (हेषडंघ्रेअगृहाणांवनचरीणांनःपुरतोवहुकिंगायसि । षडंघ्रेइत्यनेनचतुष्पादापेक्षयाऽधिकोसीतिध्वनितं) पुराणंपुरातनंबहुशोऽनुभूतमित्यर्थः । विजयसखस्यकृष्णस्यसांप्रतंयाःसख्यस्तासामग्रत
स्तत्प्रसंगः (कृष्णप्रसंगो) गीयताम् । संदेशःकथ्यतामित्यर्थः ।इष्टाःकृष्णस्यप्रियाःतेनगीतेनपूजिताइतिवा । आलिंगितेनतेनक्षपिताकुचरुक्स्तनगतविकारोयासांताः तवेष्टंअपेक्षितंदास्यंतीति १४

श्लोकाः ९—१४

इतिगोप्योहिगोविंदेगतवाक्कायमानसाः ॥ कृष्णदूतेव्रजंयातेह्युद्धवेत्यक्तलौकिकाः ९ गायंत्यःप्रियकर्माणिरुदंत्यश्चगतह्रियः ॥ तस्यसंस्मृत्यसंस्मृत्य
यानिकैशोरबाल्ययोः १० काचिन्मधुकरंदृष्ट्वाध्यायंतीकृष्णसंगमम् ॥ प्रियप्रस्थापितंदूतंकल्पयित्वेदमब्रवीत् ११ ॥ गोप्युवाच ॥ मधुपकितवबंधो
मास्पृशांघ्रिंसपत्न्याःकुचविलुलितमालाकुंकुमश्मश्रुभिर्नः ॥ वहतुमधुपतिस्तन्मानिनीनांप्रसादंयदुसदसिविडंब्यंयस्यदूतस्त्वमीदृक् १२ सकृदधर
सुधांस्वांमोहिनींपाययित्वासुमनसइवसद्यस्तत्यजेस्मान्भवादृक् ॥ परिचरतिकथंतत्पादपद्मंतुपद्माह्यपिबतहृतचेताउत्तमश्लोकजल्पैः १३ किमिहबहु
षडंघ्रेगायसित्वंयदूनामधिपतिमगृहाणामग्रतोनःपुराणम् ॥ विजयसखसखीनांगीयतांतत्प्रसंगःक्षपितकुचरुजस्तेकल्पयंतीष्टमिष्टाः १४

चूर्णिका

एवंगोप्यः गोविंदेगतवाक्कायमानसाः सत्यः हरेः कर्माणिगायंत्यरुदंत्यः सत्यः उद्धवमपृच्छन्९ १० तावत्काचिद्गोपी प्राप्तं अलिं दृष्ट्वा तं कृष्णेनप्रस्थापितंदूतं कल्प
यित्वा आह ११ गोप्युवाच॥ हेमधुप त्वंनः अंघ्रिंमास्पृश यतः त्वंसपत्न्याः कुचसंमर्दितकृष्णमालायाः कुंकुमयुतश्मश्रुभिरुपलक्षितोऽसि अतः तेसखातासांमानिनीनांप्रसा
दंवहतु १२ किंच सः स्वां अधरसुधांसकृत्पाययित्वा नःतत्यजे एवंभूतस्यपादाब्जंलक्ष्मीः कथंसेवते सातु अज्ञा १३ किंच हेषडंघ्रे नः अग्रेकृष्णं किमितिबहुगायसि
याः इदानींतत्प्रियाः तदग्रेतत्प्रसंगः गीयतां ताएवतवेष्टंदास्यंति १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥१९७॥

भोमातमैवंवोचस्त्वामनुस्मृत्यानंगविक्लवस्त्वांप्रसादयितुंमामादिष्टवानित्यतआह दिवीति । दिविभुविरसातलेन्नयाःस्त्रियःस्युःताःकानामतस्यदुरापाः (दुर्लभाः) नकाश्चन।तदित्यव्ययंतस्येत्यर्थे (अत्रहेतुः) कपटेनरुचिरेणहासेनभ्रूविजृंभोयस्यतस्य । हेकपटेतिवा । किंच ।यस्यचरणरजःश्रीःसेवतेतत्रवयंका। अपिचयद्यप्येवं तथापिकृपणपक्षेकृपणपक्षपातिनिदीनानुकंपिनिपुरुषेउत्तमश्लोकशब्दःसंभवतीति तयातंप्रतिकथनीयंत्वयेतिभावः १५ पादमूलेप्रविशंतंक्षमापयिष्यंतमिवमत्वाहविसृजेति।शिरशिन्यस्तंपादंविसृज । तथाप्यंमुंचंतमाह। वेद्मीति । मुकुंदादभ्येत्यततःशिक्षितेत्वत्यर्थः। दौत्यैर्दूतकर्मभिःचाटुकारैः।प्रियोक्तिरचनाभिःअनुनयःसांत्वनंतत्रविदुषःप्रार्थनाचतुरस्यतेसर्वमहंवेद्मि । मुकुंदवत्त्वमप्यविश्वसनीयइतिभावः । ननुतेनकिमपराद्धंतत्राह।स्वकृतेइति । स्वकृतेतदर्थमेव । विसृष्टाअपत्यपत्यन्यलोकाः अपत्यानिपतयश्चेहलोकः अन्यलोकोधर्मसाध्यश्चस्वर्गादिर्याभिस्ताअस्मान्अकृतचेता असंयतचित्तःचंचलःयोव्यसृजत् तत्पाजअस्मिन् किंतुसंधेयंकिमनुसंधातव्यंकिंतथ्यंज्ञातव्यमित्यर्थः १६ किंच ।कृष्णस्यपूर्वाणिकर्माणिअनुसंदधानाहंबिभेम्यस्मादित्याह। मृगयुरिति ।लुब्धकइवयःकपींद्रंवालिनंविव्यधेअविध्यत्। लुब्धधर्माक्रौर्यधर्मवान्। लुब्धधर्मेतिवालुब्धकोहितन्मांसमत्तुकामोविध्यति । अयंतुनतथा । अतोवृथाकठिनइत्यर्थः । तथास्त्रियंचशूर्पणखां स्त्रीजितः सीतापरतंत्रःकामएवयानंप्राप्तिसाधनंयस्यास्तां (कामचारिणीं) विरूपांछिन्नकर्णनासिकांअकरोदाशरथिरूपेण । तथाबलिमपिवैरोचनिंतदत्तंबलिं (त्रैलोक्यलक्षणं) अत्त्वाभक्षयित्वागृहीत्वेत्यर्थः ध्वांक्षवत् काकवदवेष्टयत्बबंध । (कश्चित्काकोप्यकस्मादागत्ययजमानेनदीयमानंबलिंसपदिगृहीत्वास्पर्शादिनातंप्रतिबध्नातितद्वद्वामनरूपेणायमितिदृष्टांतोयुक्तः ।) बलिमत्त्वाधोक्षिपद्विष्टपाचइतिपाठेबलिंपूजांगृहीत्वाविष्टपात्स्वर्गादधोक्षिपदित्यर्थः । तचस्मादसितस्यकृष्णस्यसख्यैरलंनोकिंचित्कार्यमित्यर्थः । एवंचेत्किमितिनित्यंगायथतत्राह । दुस्त्यजस्तुतस्यकथारूपोर्थइति १७

श्लोकाः १५/१७

दिविभुविचरसायांकाःस्त्रियस्तद्दुरापाःकपटरुचिरहासभ्रूविजृंभस्ययाःस्युः ॥ चरणरजउपास्तेयस्यभूतिर्वयंकाअपिचकृपणपक्षेह्युत्तमश्लोकशब्दः १५
विसृजशिरसिपादंवेद्म्यहंचाटुकारैरनुनयविदुषस्तेऽभ्येत्यदौत्यैर्मुकुंदात् ॥ स्वकृतइहविसृष्टापत्यपत्यन्यलोकाव्यसृजदकृतचेताःकिंनुसंधेयमस्मिन् १६ मृग
युरिवकपींद्रंविव्यधेलुब्धधर्मास्त्रियमकृतविरूपांस्त्रीजितःकामयानाम् ॥ बलिमपिबलिमत्त्वाऽवेष्टयद्ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कृतार्थः १७

चूर्णिका ॥१९७॥

किंच तस्यहरेः त्रैलोक्येदुरापाः स्त्रियः काः नकाःपि अस्यपादरजः श्रीः सेवते तत्रवयंकाः १५ हेभ्रमर नः शिरसिन्यस्तंपादंविसृज तव सर्वं अहंवेद्मि कृष्णवत्त्वमपि अविश्वसनीयः अहो याः वयंत्यक्तपत्यादयः ताः नः यतस्तत्याज तत्रकिंनुसंधातव्यम् १६ किंच यः वालिनंलुब्धकइवविव्यधे तथास्त्रीजितः सन् शूर्पणखांविरूपांचक्रे तथा तद्दत्तंवलिं अत्त्वा तंबलिंकाकवत् यः बबंध एवंभूतस्यसख्यैः अलं परंतु तत्कथार्थः दुस्त्यजः १७

CC-0. In Public Domain. Digitization by eGangotri

आपिचजानीमिएवतत्कथापित्रिवर्गलतोन्मूलनीतितथापिनत्यक्तुंशक्नुमः किंकुर्मइत्याह । यदनुचरितेति । यस्यानुचरितमेवलीलातदेवकर्णपीयूषंतस्यविप्रुट्कणिकातस्याः सकृददनंसेवनंते नविधूतानिरस्ताद्वंद्वधर्मारागादयोयेषांतेअतएवविनष्टाःअस्मत्तुल्याः दीनंदुःखितंगृहकुटुंबं विहायदीनाभोगहीनाविहंगाइवभिक्षुचर्यांप्राणवृत्तिमात्रंचरंति । अतस्त-(-त्कथार्थ-)- स्त्याज्यस्त थास्त्यक्तुंनशक्नुमइतिनिंदापरत्वेऽयंतावच्छ्लोकोर्थः । दुस्त्यजत्वेपिपारमार्थिकोयमर्थः । विधूतद्वंद्वधर्माइत्यंतःसमासःपूर्ववत् । ततस्तेचतेअविनष्टाश्चेतिसमासः । इतरेपुनर्द्वंद्वधर्मा णोविनष्टाएव । सपदितत्क्षणमेवदीनंतुच्छंगृहसहितंकुटुंबं विहायदीनाइवाकिंचनाः धीराइतिवापाठः बहवोविहंगाः हंसाः सारासारविवेकचतुराः भिक्षुचर्यांपारमहंस्यंचरंति । तस्मादेवंपरम पुरुषार्थरूपत्वाद्दुस्त्यजस्तत्कथार्थइति १८ ननुकिमेवंब्रूषे पूर्वंत्वयैव साकंरहसिकिमेवंनावोचद्यथाचेत्यत आह ।, वयमिति । हेउपमंत्रिन्दूत आस्तामियंवार्ता यतः कुलिकस्यमृगयोःरुतं गीतंअज्ञायथाऋतंसत्यमितिश्रद्दधानाः कृष्णस्यहरिणस्यवध्वःभार्याःहरिण्यः शरैः क्षताःसत्योरुजोददृशुः एवंजिह्मस्यकुटिलस्यव्याहृतंऋतमिवश्रद्दधानाःस्पृहयंत्योवयंअसकृदेतत्ददृशिम । किंतत् तस्यनखैः स्पर्शःतेनतीव्रःस्मरःतेनरुजःपीडाः । तस्मादन्यावार्ताभण्यतांकथ्यतामिति १९ परावृत्यगत्वापुनरागतंप्रत्याह । प्रियसखेति । हेप्रियस्यकृष्णस्यसखेप्रेयसाश्रीकृष्णेनपुनःप्रेषितः किं त्वमागतोसि । अंगहेदूतमेमाननीयः पूज्योसि । (यतःप्रेयसाप्रेषितत्वात्तद्वशवर्तिनोदूतस्यतेऽपराधाभावः ।) अतोभवान्किमनुरुंधेप्राप्तुमिच्छतीत्यर्थः तद्वरयवृणीष्व । एवंसंमानितंप्रत्याह नयसी ति । इहात्रसतीःअस्मान् दुस्त्यजंद्वंद्वंमिथुनीभावोपस्यतस्यप्रेयसःपार्श्वंसमीपंकथंनयसि । (कृतघ्नस्यापितस्यसंगमोहिदुस्त्यजस्ततस्तंइष्टतममपिकथंसाधयसीत्यर्थः ।) तथाहि । हेसौम्यश्रीर्नामव धूःसाकंसहैवसंततमास्ते । तत्राप्युरासिवक्षस्येव २० तेनसंमंत्रितासतीब्रूतेअपिबतेति बतहर्षे । हेसौम्यगुरुकुलादागत्यआर्यपुत्रःकृष्णःअधुनाकिंमधुपुर्यांवर्तते । पितृगृहंबंधूंश्चकिंस्मरति । कदाचिद पिप्रसंगवशान्नोऽस्माकंवार्ताःकिंब्रूते । अगुरुवत्सुगंधंभुजंनोमूर्ध्निकदानुधास्यतीति २१ श्रीकृष्णदर्शनोत्सुकाःगोपीःप्रियस्यसंदेशैः सांत्वयन्प्रथमंतावदिदमभाषत २२

श्लोकाः १८ २२

यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्माविनष्टाः ॥ सपदिगृहकुटुंबंदीनमुत्सृज्यदीनाबहवइवविहंगाभिक्षुचर्यांचरंति १८ वयमृतमिव जिह्मव्याहृतंश्रद्दधानाःकुलिकरुतमिवाज्ञाःकृष्णवध्वोहरिण्यः ॥ ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुजउपमंत्रिन्भण्यतामन्यवार्ता १९ प्रियसखपुन रागाःप्रेयसाप्रेषितःकिंवरयकिमनुरुंधेमाननीयोसिमेंग ॥ नयसिकथमिहास्मान्दुस्त्यजद्वंद्वपार्श्वंसततमुरसिसौम्यश्रीवधूःसाकमास्ते २० अपिबतम धुपुर्यामार्यपुत्रोऽधुनास्तेस्मरतिसपितृगेहान्सौम्यबंधूंश्चगोपान् ॥ क्वचिदपिसकथांनःकिंकरीणांगृणीतेभुजमगुरुसुगंधंमूर्ध्न्यधास्यत्कदानु २१ ॥ श्रीशुक उवाच ॥अथोद्धवोनिशम्यैवंकृष्णदर्शनलालसाः ॥ सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत २२

चूर्णिका

किंच यस्यचरितलीलामृतलेशस्य सकृददनात् गतद्वंद्वधर्माः असत्तुल्याः विहंगा अपि दुःखितंकुटुंबंविहायभोगहीनाः संतः प्राणवृत्तिमात्रंचरंति १८ अतः त्याज्यः तथा पितत्कथार्थं त्यक्तुं नशक्नुमः किंच हेदूत वयंऋतमेववचः श्रद्दधानाः एतद्ददृशिम अतः अन्यवार्ताकथ्यताम् १९ किंच हेषट्पदत्वंकृष्णेन प्रेषितः किम् किंप्राप्तु मिच्छसितद्वरय हेदूतकथंअस्मान् दुस्त्यजद्वंद्वपार्श्वंनेष्यसि २० किंच हेद्विरेफश्रीकृष्णः गुरुकुलात् एत्य अधुनापुर्यांवर्ततेकच्चित् अस्माकंवार्ताः ब्रूतेकिम् स्वभुजं नः मूर्ध्निकदानुधास्यतीति २१ ॥ श्रीशुकउवाच ॥ एवंश्रुत्वा उद्धवः ताः हरेः संदेशैः सांत्वयन् इदमाह २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदाहषड्भिःअहोइति। स्मनूनंयूयंपूर्णार्थाःकृतार्थाः(तत्रहेतुः यासांइत्येवंमनःभगवत्यर्पितम्। अतोभवत्योलोकैर्लोकेषुवापूजिताः)२३ (कृतार्थत्वमेवाहचतुर्भिःदानेति) श्रेयोभिःश्रेयःसाधनैः२४ (अतएवमुनीनामपिदुर्लभा)अनुत्तमाअतिश्रेष्ठासर्वोत्कृष्टेत्यर्थः साभवतीभिःप्रवर्तितेति२५अवृणीतवृतवत्यः (इतियत्तत्दिष्ट्याभद्रम्)२६ सर्वात्मभावःएकांतभक्तिःअधिकृतःप्राप्तः।(यद्वा भगवतासंदिश्यमानःसर्वत्रभगवद्भावः सविरहेणाधिकृतोभवतीनामितिहेमहाभागाः संप्रति भगवत्प्रेमसुखदर्शनेनममैवमहाननुग्रहः कृतइति २७(हेभद्राःकल्याण्यः) भर्तुःकृष्णस्यरहस्करःरहस्यकार्यकर्ता २८ भवतीनांमेमयासह वियोगोनास्ति । कुतः । सर्वात्मनासर्वस्योपादानकारणेन । अतएवसर्वेषुमनआदिकार्येषुअहमनुगतत्वेनस्थितइतिसदृष्टांतमाह । यथेति । भूतेषुचराचरेषुभूतानिखादीनियथा । वाय्वग्निःवायुसहितोग्निः । वायुश्चअग्निश्चेत्यर्थः । तथाहंचेति । मनआदीनिकार्याणिगुणाःकारणंतेषामाश्रयत्वेनानुगतइत्यर्थः २९ ननुकारणत्वेसर्वानुगतत्वेचकार्यकारणभेदःस्यात्अतआह । आत्मन्येवेति । (आत्मनि अधिष्ठानमात्मैवेत्यर्थः आत्मनाकरणान्यपिआत्मैव । आत्मास्रष्टव्योहंतव्योऽनुपालयितव्यश्चात्मैव । अर्थात्सर्वमप्यात्मेति) ननुनित्यसिद्धस्यकुतः सृष्टयादिरूपताऽतआह । भूतेंद्रियगुणात्मना । बुद्धींद्रियगुणात्मनेतिवापाठः (अत्रगुणाःशब्दादयः ।) भूतेंद्रियादिरूपणेति । ननुनिर्विकारस्यकुतस्तद्रूपेणेति तत्राह । आत्ममायानुभावेनेति ३० नन्वात्मनोभूतादिरूपत्वेतद्दोषप्रसंगस्तत्राह । आत्मेति । आत्मातुशुद्धः । कुतः अगुणान्वयः।नगुणेष्वन्वेतीतितथा । तत्कुतः।व्यतिरिक्तः । तदपिकुतः । ज्ञानमयः ज्ञानस्वरूपः।नन्वहंप्रत्ययेस्वसंवेद्यमेवात्मनोनानावस्थात्वमितिकुतस्तस्यशुद्धतेतितत्राह । सुषुप्तेति । मायाकार्यमनोवृत्तिभिः विश्वतैजसप्राज्ञरूपेणप्रतीयतेनस्वतइत्यर्थः ३१

श्लोकाः २३/३१

॥ उद्धवउवाच ॥ अहोयूयंस्मपूर्णार्थाभवत्योलोकपूजिताः ॥ वासुदेवेभगवतियासामित्यर्पितंमनः २३ दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैःकृष्णेभक्तिर्हिसाध्यते २४ भगवत्युत्तमश्लोकेभवतीभिरनुत्तमा ॥ भक्तिःप्रवर्तितादिष्ट्यामुनीनामपिदुर्लभा २५ दिष्ट्यापुत्रान्पतीन्देहान्स्वजनान्भवनानिच ॥ हित्वाऽवृणीतयूयंयत्कृष्णाख्यंपुरुषंपरम् २६ सर्वात्मभावोऽधिकृतोभवतीनामधोक्षजे ॥ विरहेणमहाभागामहान्मेऽनुग्रहःकृतः २७ श्रूयतांप्रियसंदेशोभवतीनांसुखावहः ॥ यमादायागतोभद्राअहंभर्तूरहस्करः २८ ॥ श्रीभगवानुवाच ॥ भवतीनांवियोगोमेनहिसर्वात्मनाक्वचित् ॥ यथाभूतानिभूतेषुखंवाय्वग्निर्जलंमही ॥ तथाहंचमनःप्राणबुद्धींद्रियगुणाश्रयः २९ आत्मन्येवात्मनात्मानंसृजेहन्म्यनुपालये ॥ आत्ममायानुभावेनभूतेंद्रियगुणात्मना ३० आत्माज्ञानमयःशुद्धोव्यतिरिक्तोऽगुणान्वयः ॥ सुषुप्तस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ३१

चूर्णिका

॥ उद्धवउवाच ॥ हेगोप्यः यूयंकृतार्थाः यतः हरौ एवं मनः अर्पितम् २३ किंच दानव्रतादिभिः कृष्णेभक्तिःसाध्यते २४ सामुनिभिर्दुर्लभा भक्तिः कृष्णे भवतीभिः प्रवर्तिता एतत् दिष्ट्या २५ किंच पुत्रादीन्हित्वा परं पुरुषं अवृणीत इदमपि भद्रम् २६ किंच भगवतिप्रेमसुखदर्शनेनैवमेऽनुग्रहः कृतः २७ अतःपरं हरेः संदेशः मत्तः श्रूयताम् २८ ॥ ॥ श्रीभगवानुवाच ॥ हेगोप्यः वः मयासहक्वापिवियोगः न यथाभूतानिभूतेषु तथा अहं उपादानकारणत्वेन सर्वकार्येषु अनुगतोऽस्मि २९ किंच आत्मन्येवइदं अहंसृजे हन्मि पालये ३० आत्मातुशुद्धः सः विश्वतैजसप्राज्ञरूपेणप्रतीयते न स्वतः ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतत्कुतः । मनोनिरोधेतदभावादितिव्यतिरेकंदर्शयितुंमनोनिरोधंविधत्ते । येनेति । उत्थितः पुमान्यथामिथ्याभूतमेवस्वप्नंध्यायतिएवंबाधितानपींद्रियार्थान्शब्दादीन्येनमनस.ध्यायेतध्यायेत् चिंतयत् । ध्यायंश्चयेनेंद्रियाणिप्रत्यपद्यतप्राप । तन्मनः विनिद्रः अनलसःसन्निरुंध्यात् नियच्छेदिति । ३२ तावताचकृतार्थोभवतीत्याह । एतदंतइति । एषमनोनिरोधः अंतः समाप्तिःफलंयस्यसः । समाम्नायेवेदः सतत्रपर्यवस्यतीत्यर्थः । योगोऽष्टांगः । सांख्यमात्मानात्मविवेकः । त्यागः संन्यासःतपःस्वधर्मः । दमइंद्रियदमनम् । मार्गभेदेप्येकत्रपर्यवसानेदृष्टांतः । समुद्रांताआपगानद्यइवेति ३३ ननु किमन्यानिवास्मानात्मविद्ययाप्रलोभयसि । वयंतुसर्वसुंदरसकलगुणगणालंकृतेनत्वयाविरहंनैवसहामहइतिचेदतआह ।यत्त्वहमिति दृशांदूरेयद्वर्ते तन्मदनुध्यानार्थं । तच्चध्यानंमनसःसंनिकर्षार्थमिति३४ एतदुपपादयतित्रयेण । यथादूरचरइति । (स्त्रीणांमनःदूरस्थेप्रेयसि विरहवशात्समग्रमाविश्ययथातमनुस्मरति । तथाऽक्षिगोचरेऽतएवाचेतःसंनिकृष्टेतन्नाविशतीत्यर्थः) ३५ (विमुक्ताशेषवृत्तिविषयांतरानुसंधानरहितमित्यर्थः) ३६ उपैष्यथेतिमाधुर्यमात्रमितिचेदतआह याइति । हेकल्याण्यःयाःस्वभर्तृभिःप्रतिबद्धावनेक्रीडतामयासहअलब्धक्रीडाःतास्तदैवमत्कृतलीलानुस्मृत्यामामांआपुःप्रापुः ३७ तस्यसंदेशेनआगतास्मृतिर्यासांताः । प्रथमार्थेद्वितीया ३८ यदूनांअहितःशत्रुःअघकृत्दुःखदःदिष्ट्येत्यानंदे । आप्तैःप्राप्तैःहितैर्वासह ३९ अन्याऊचुः कच्चिदिति । नःअस्माकंउचितांअस्मासुकरणीयामित्यर्थः प्रीतिंकच्चित्पुरयोषितांकरोति स्निग्धंचतत्सव्रीडहासेनोदारंसुंदरमीक्षणंचतेनार्चितःताभिरस्माभिर्वा४०अन्याऊचुःकथमिति । तासांवाक्यैर्विभ्रमैश्चानुभाजितःपूजितः(अनुबध्येतवशीक्रियेतेत्यर्थः) ४१

श्लोकाः ३२/४१

येनेंद्रियार्थान्ध्यायेतमृषास्वप्नवदुत्थितः ॥ तन्निरुंध्यादिंद्रियाणिविनिद्रःप्रत्यपद्यत ३२ एतदंतःसमाम्नायोयोगःसांख्यंमनीषिणाम् ॥ त्यागस्तपोदमःसत्यंसमुद्रांताइवापगाः ३३ यत्त्वहंभवतीनांवैदूरेवर्तेप्रियोदृशाम् ॥ मनसःसंनिकर्षार्थंमदनुध्यानकाम्यया ३४ यथादूरचरेप्रेष्ठेमनआविश्यवर्तते ॥ स्त्रीणांनचतथाचेतःसंनिकृष्टेऽक्षिगोचरे ३५ मय्यावेश्यमनःकृत्स्नंविमुक्ताशेषवृत्तियत् ॥ अनुस्मरंत्योमांनित्यमचिरान्मामुपैष्यथ ३६ यामयाक्रीडतारात्र्यांवनेऽस्मिन्व्रजआस्थिताः ॥ अलब्धरासाःकल्याण्योमापुर्मद्वीर्यचिंतया ३७ ॥ श्रीशुकउवाच ॥ एवंप्रियतमादिष्टमाकर्ण्यव्रजयोषितः ॥ ताऊचुरुद्धवंप्रीतास्तत्संदेशागतस्मृतीः ३८ ॥ गोप्यऊचुः ॥ दिष्ट्याऽहितोहतःकंसोयदूनांसानुगोऽघकृत् ॥ दिष्ट्याऽऽप्तैर्लब्धसर्वार्थैःकुशल्यास्तेच्युतोऽधुना ३९ कच्चिद्गदाग्रजःसौम्यकरोतिपुरयोषिताम् ॥ प्रीतिंनःस्निग्धसव्रीडहासोदारेक्षणार्चितः ४० कथंरतिविशेषज्ञःप्रियःसपुरयोषिताम् ॥ नानुबध्येततद्वाक्यैर्विभ्रमैश्चानुभाजितः ४१

चूर्णिका

किंच पुमान् येन मनसाविषयान् चिंतयेत् तन्मनः नियच्छेत् ३२ एवंसर्वोपियोगः मनोनियमनांत एव यथा समुद्रांता नद्यः३३किंच हेगोप्यः युष्मद्दृशां यत् अहं दूरेवर्ते तन्मनः सन्निकर्षार्थम् ३४ यथादूरेप्रेष्ठेमनः वर्तते तथा अक्षिगोचरे न ३५ किंच यूयंमयिमनः स्थाप्य मांएवंस्मरंत्यः शीघ्रं मांप्राप्स्यथ ३६ ॥ श्रीशुकउवाच ॥ एवंकृष्णोपदेशंश्रुत्वाप्रीताः सत्यः उद्धवंप्राहुः ३८ ॥ गोप्यऊचुः ॥ हेउद्धवपापी कंसः कृष्णेन हतः एतद्दिष्ट्या किंच कृष्णः पुरस्त्रीणांप्रीतिंकरोतिकिम् ३९ ४० ॥ अन्या ऊचुः ॥ अहोरतिविशेषज्ञः सः तद्वाक्यैः विभ्रमैश्चकथंनानुबध्येत ४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥२०१॥ अन्याऊचुःअपीति । किमनयाचिंतया । क्वचित् (स्वैरकथांतरेप्रस्तुते) ग्राम्याअविदग्धाअस्मान्स्मरतिकिम् ४२ अन्याऊचुः । ताःकिमिति । कुमुदैःकुंदैःशशांकेन च रम्येवृंदावने क्वणं तिचरणनुपुराणियस्यांतस्यांरासगोष्ठ्यांअस्माभिः प्रियाभिरीडितामनोज्ञाः कथायस्यसतदायासुनिशासुरेमेताः कदाचित्किमनुस्मरतिनवेति ४३ स्वनिमित्तेनशोकेनतप्ताः नःअस्मान्गात्रैःकरस्प र्शादिभिःसंजीवयन्किंतुइहैष्यतीति ४४ अन्याऊचुः । कस्मादिति । अनन्यगतित्वेनपूर्वमत्रावसत्संप्रतिमहदैश्वर्यंप्राप्तःकस्मादिहागमिष्यतीति ४५ अन्यास्तुपरमार्थमूचुः । किमस्माभिरिति । वन मेवौकोगृहंयासांताभिर्वनचरीभिरस्माभिःअन्याभिःवाराजकन्याभिःमहात्मनोधीरस्य । किंच । श्रीपतेःतदप्यास्तांस्वतएवाप्तकामस्य अतएवकृतात्मनःपूर्णस्यकिंकोप्यर्थःक्रियेतनकश्चिदिति ४६ यतोऽघ टमानापियाकृष्णसंगतिःसैवास्मानाकुलयति । अतोनैराश्यमेवपरंसुखंतच्चातिदुष्करमित्याहुः । परंसौख्यमिति । स्वैरिणीकामचारिणी (पिंगलानामस्त्रीजारंप्रतीक्षमाणातदनागमनात्विरक्तासती'आशा हिपरमंदुःखंनैराश्यंपरमंसुखमि'त्याहेति । दुरत्ययादुरंतादुस्त्यजेत्यर्थः) ४७ संविदंएकांतवार्ताम् ४८ किंचतद्विस्मृतौनतावद्दुःखमस्तिसापिनास्माकंसंभवतीत्याहुः । सरिच्छैलेतित्रिभिः । आचरिताः सेविताः (मुहुःस्मारयंति) ४९ (तत्पदकैःतस्यकोमलैःपदैः) ५० (गत्यादिभिश्चहृतधियोवयं) हेउद्धवतंकथंविस्मराम(नैवविस्मर्तुंशक्नुमइति)५१ ५२कृष्णमधोक्षजंज्ञात्वातंचस्वात्मानंज्ञात्वा ५३

श्लोकाः ४२—५३ अपिस्मरतिनःसाधोगोविंदःप्रस्तुतेक्वचित् ॥ गोष्ठीमध्येपुरस्त्रीणांग्राम्याःस्वैरकथांतरे ४२ ताःकिंनिशाःस्मरतियासुतदाप्रियाभिर्वृंदावनेकुमुदकुं दशशांकरम्ये ॥ रेमेक्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथःकदाचित् ४३ अप्येष्यतीहदाशार्हस्तप्ताःस्वकृतयाशुचा ॥ संजीवयन्नुनोगा त्रैर्यथेंद्रोवनमंबुदैः ४४ कस्मात्कृष्णइहायातिप्राप्तराज्योहताहितः ॥ नरेंद्रकन्याउद्वाह्यप्रीतःसर्वसुहृद्वृतः ४५ किमस्माभिर्वनौकोभिरन्याभिर्वामहात्मनः श्रीपतेराप्तकामस्यक्रियेतार्थःकृतात्मनः ४६ परंसौख्यंहिनैराश्यंस्वैरिण्यप्याहपिंगला ॥ तज्जानतीनांनःकृष्णेतथाप्याशादुरत्यया ४७ कउत्सहेतसं त्यक्तुमुत्तमश्लोकसंविदम् ॥ अनिच्छतोपियस्यश्रीरंगान्नच्यवतेक्वचित् ४८ सरिच्छैलवनोद्देशागावोवेणुरवाइमे ॥ संकर्षणसहायेनकृष्णेनाचरिताःप्रभो ४९ पुनःपुनःस्मारयंतिनंदगोपसुतंबत ॥ श्रीनिकेतैस्तत्पदकैर्विस्मर्तुंनैवशक्नुमः ५० गत्याललितयोदारहासलीलावलोकनैः ॥ माध्व्यागिराहृतधियः कथंतंविस्मरामहे ५१ हेनाथहेरमानाथव्रजनाथार्तिनाशन ॥ मग्नमुद्धरगोविंदगोकुलंवृजिनार्णवात् ५२ ॥ श्रीशुकउवाच ॥ ततस्ताःकृष्णसंदेशैर्व्यपे तविरहज्वराः ॥ उद्धवंपूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजम् ५३

चूर्णिका ॥ अपराऊचुः ॥ हेसाधोपुरस्त्रीगोष्ठीमध्ये नः स्मरतिकिम् ४२ किंच यासुरात्रिषु अस्माभिः सहरेमे ताः निशाः स्मरति किम् ४३ किंच तप्ताः नः करस्पर्शादिभिः जीवयन् इह एष्यति किम् ४४ ॥ इतराऊचुः अहोकस्मात्सः इहआयाति यतः प्राप्तराज्यः किंचतेन राजकन्याश्च परिणीताः ४५ अतः वनौकोभिः अस्माभिः तस्यश्री पतेः किम् ४६ किंच स्वैरिण्यपिपिंगला परं सौख्यंनैराश्यमित्याह तज्जानतीनामपि नः दुरत्यया आशा वर्तते किंकुर्मः ४७ तथाचतस्य एकांतवार्तां कः त्यक्तुंउत्सहेत ॥२०१॥ यतः अनिच्छतोपियस्य अंगात् श्रीः न च्यवते ४८,हे उद्धव एते सरिच्छैलवनोद्देशादयः रामकृष्णेन सेविताः मुहुः नः कृष्णंस्मारयंति ४९ ५० किंच हरेः गत्यादिभिः हृतधियः वयंकथंतद्विस्मरामहे ५१ हेनाथ हेरमानाथ दुःखार्णवेमग्नंगोकुलंउद्धर५२॥ श्रीशुकउवाच ॥ततः ताः कृष्णं आत्मानं ज्ञात्वा उद्धवं पूजयांचक्रुः ५३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(शुचः) विनुदन्अपनयन् (रमयामासहर्षयामासेत्यर्थः) ५४ (क्षणप्रायाणिक्षणतुल्यानि) ५५ (वीक्षन्वीक्षमाणः) सरिद्वन्गिरिदर्यादिषुप्रत्येकंकृष्णलीलासंप्रश्नादिभिःव्रजौकसांतंसंस्मा रयन्रेमे ५६ (एवमादि) कृष्णावेशेनात्मनोमनसोविक्लवंवैक्लव्यंदृष्ट्वाताःगोपीर्नमस्यन्नमस्करिष्यन्उत्तमस्यास्मनोगोपस्त्रीनमस्कृतिरन्याय्यानभवतीतिदर्शयितुंतासांमहत्त्वंपंचभिर्जगौउवाच ५७ ए ताइति । एताःपरंकेवलंतनुभृतःसफलजन्मानः (यतोगोविंद एव) । रूढभावाः परमप्रेमवत्यः । यदितियंरूढभावंभवभियोमुमुक्षवःमुनयोमुक्ताअपिवांछंतिवयंभक्ताअपि अतःअनंतस्यकथासुरसोरागो यस्यतस्यब्रह्मजन्मभिःविप्रसंबंधिभिःशौक्लसावित्रयाज्ञिकैस्त्रिभिःजन्मभिःकिंकोतिशयः । यत्रतत्रजातःसएवसर्वोत्तमइत्यर्थः । यद्वा अनंतकथासु रसोयस्यतस्यब्रह्मजन्मभिः चतुर्मुखजन्मभिरपिकिम् । न किमपीत्यर्थः ५८ किंच । ईश्वरप्रसादोमहत्त्वेकारणंतस्यचनजातिराचारोज्ञानंवाकारणंकिंतुकेवलंभजनमेवेत्याह । क्वेमाइति (वनचरीःमतुपुरवासिन्यःप्रथमार्थेद्वितीया । व्यभिचारदुष्टाःव्यभिचारेणप्र सिद्धाइत्यर्थः । रूढश्चासौभावश्चभक्तिः) साक्षाद्भजतः(सेवमानस्याज्ञस्यापि)पुंसः (श्रेयःपरमप्रसादलक्षणं) ननुअहोउपयुक्तः सेवितःअगदराजःअमृतंयथा (मूढस्याप्यजरामरत्वलक्षणंश्रेय)इति ।(यद्वा साक्षाच्छ्रेयःप्रत्यक्षंकल्याणंनतुस्वर्गादिवत्परोक्षं)५९अत्यंतापूर्वश्चायंगोपीषुभगवतःप्रसादइत्याह । नायमिति अंगेवक्षसिउअहोनितांतरतेःएकांतरतिमत्याःश्रियोपिनायंप्रसादःअनुग्रहोस्ति ।नलिनस्येवगं धोरुक्कांतिश्चयासांस्वर्गांगनानामप्सरसामपिनास्ति । अन्याःपुनर्दूरतोनिरस्ताःरासोत्सवेकृष्णस्यभुजदंडाभ्यांगृहीतआलिंगितःकंठस्तेनलब्धाआशिषोयाभिस्तासांगोपीनांयःप्रसादउदगात्प्रादुर्बभूव ६० किंच । आस्तांतावद्गोपीनांभाग्यंममत्वेतावत्प्रार्थ्यमित्याह । आसामिति । गोपीनांचरणरेणुभाजांगुल्मादीनांमध्येपत्किमप्यहंस्यामित्याशंयासांलिङ् । कथंभूतानांगोपीनांयाइति । आर्यागांमार्गंधर्मं चहित्वामुकुंदस्यपदवींमार्गम् ६१

श्लोकाः ५४/६१

उवासकतिचिन्मासान्गोपीनांविनुदन्शुचः ॥ कृष्णलीलाकथागायन्रमयामासगोकुलम् ५४ यावंत्यहानिनंदस्यव्रजेवात्सीत्सउद्धवः ॥ व्रजौकसांक्षणप्राया ण्यासन्कृष्णस्यवार्तया ५५ सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् ॥ कृष्णंसंस्मारयन्रेमेहरिदासोव्रजौकसाम् ५६ दृष्ट्वैवमादिगोपीनांकृष्णावेशात्मविक्लवम् ॥ उद्धवःपरमप्रीतस्तानमस्यन्निदंजगौ ५७ एताःपरंतनुभृतोभुविगोपवध्वोगोविंदएवनिखिलात्मनिरूढभावाः ॥ वांछंतियद्भवभियोमुनयोवयंच किंब्रह्मजन्मभिरनंतकथारसस्य ५८ क्वेमाःस्त्रियोवनचरीर्व्यभिचारदुष्टाःकृष्णेक्वचैषपरमात्मनिरूढभावः ॥ नन्वीश्वरोनुभजतोऽविदुषोपिसाक्षाच्छ्रेयस्तनो त्यगदराजइवोपयुक्तः५९नायंश्रियोंगउनितांतरतेःप्रसादःस्वर्योषितांनलिनगंधरुचांकुतोऽन्याः ॥ रासोत्सवेस्यभुजदंडगृहीतकंठलब्धाशिषांयउदगाद्व्रज बल्लवीनाम्६०आसामहोचरणरेणुजुषामहंस्यांवृंदावनेकिमपिगुल्मलतौषधीनाम् ॥यादुस्त्यजंस्वजनमार्यपथंचहित्वाभेजुर्मुकुंदपदवींश्रुतिभिर्विमृग्याम्६१

चूर्णिका

ततः उद्धवः तत्रकतिचिन्मासान्स्थित्वाकृष्णलीलांगायन् गोकुलंरमयामास ५४ उद्धवः यावंतिदिनानितत्रस्थितः तावंतिदिनानि व्रजौकसांक्षणमिव आसन् ५५ एवं सः हरिदासः सरिद्वनादीन् दृष्ट्वा व्रजौकसांकृष्णंस्मारयन्रेमे ५६ हेनृपएवंगोपीनां मनोवैक्लव्यंदृष्ट्वाताः नमस्यन् उद्धवः इदंजगौ ५७ इहभुविगोपस्त्रियएवसफलजन्मा नः ५८ किंच इमाः व्यभिचारदुष्टाः स्त्रियः क्व कृष्णेरूढभावः क्व अथापिईशः भजतः पुंसः श्रेयस्तनोति ५९ किंच अयंहरेः प्रसादः देवस्त्रीणां श्रियोऽपिन यः रासोत्सवे व्रजवल्लवीनांप्राप्तः सः इति ६० अतएव अहं अत्रवने आसांपादरेणुजुषांगुल्मादीनांमध्येयत्किमपिस्यामितियाञ्चा ६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.द.पू. पुनस्ताएवविशिनष्टियावाइति । योगेश्वरैर्ब्रह्मादिभिरप्यात्मन्येवार्चितंतद्रासमंडलेस्तनेषुन्यस्तंपरिरभ्ययास्तापंतत्यजुरिति ६२ एवंमहत्त्वंप्रतिपाद्यनमस्करोति वंदइति (यासांहरि अ०
कथासंबंधिउच्चैर्गीतं) ६३ अनुज्ञाप्यअनुज्ञांयाचित्वा । आमंत्र्यपृष्ट्वा ६४ (निर्गतंबाहिर्निःसृतं) ६५ नोऽस्माकंमनसोवृत्तयःकृष्णपादांबुजाश्रयाःस्युः । अभिधायिनीरभिधायिन्यः ।
टीका (वाचोवाण्यः । तत्प्रह्वणादिषुकृष्णप्रणामादिषु) ६६ (यत्रक्वापिपुण्यकर्माचरणैः) कृष्णेरतिःस्यात् ६७ (कृष्णभक्त्यातद्भक्तउद्धवःपूजितःसन्पुनर्मथुरामागच्छत्) ६८व्रजवासिनांभक्त्युद्रेकंकृष्णा ॥४७॥
दिभ्यआहउपायनानिचादादिति ६९ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्तचत्वारिंशतितमोध्यायः ॥ ४७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥
अष्टचत्वारिंशकेथकृष्णःकुब्जामरीरमत् । अक्रूरस्यगृहंगत्वातंगजाह्वयमादिशत् ॥१ ॥ सैरंध्रीकाममापूर्वंपूरयित्वामनोरथान् । अक्रूरस्यततःकृष्णस्तेनपार्थानसांत्वयत् ॥२॥(अथेति । एवंउद्धवमुखेनगो
॥२०३॥ पीवृत्तंसर्वदर्शनोपिविज्ञायअथकुब्जायागृहंययौ । यद्वाविज्ञायएष्यामितेगृहमितिकुब्जांप्रतियत्प्रतिश्रुतंतत्स्मृत्वेत्यर्थः) १ महार्हैरनर्घ्यैरुपस्करैर्गृहोपस्करणैरन्वितंकामोपायैस्तदुद्दीपकैःसुरतबंधादिले
ख्यैरादर्शादिभिरुपबृंहितम् २

यावैश्रियाऽर्चितमजादिभिराप्तकामैर्योगेश्वरैरपियदात्मनिरासगोष्ठ्याम् ॥ कृष्णस्यतद्भगवतश्चरणारविंदंन्यस्तंस्तनेषुविजहुःपरिरभ्यतापम् ६२ श्लोकाः
वंदेनंदव्रजस्त्रीणांपादरेणुमभीक्ष्णशः ॥ यासांहरिकथोद्गीतंपुनातिभुवनत्रयम् ६३ ॥ श्रीशुकउवाच ॥ अथगोपीरनुज्ञाप्ययशोदांनंदमेवच ॥ गोपा ६२/२
नामंत्र्यदाशार्होयास्यन्नारुरुहेरथम् ६४ तंनिर्गतंसमासाद्यनानोपायनपाणयः ॥ नंदादयोनुरागेणप्रावोचन्नश्रुलोचनाः ६५ मनसोवृत्तयोनःस्युःकृष्णपा
दांबुजाश्रयाः ॥ वाचोभिधायिनीर्नाम्नांकायस्तत्प्रह्वणादिषु ६६ कर्मभिर्भ्राम्यमाणानांयत्रक्वापीश्वरेच्छया ॥ मंगलाचरितैर्दानैरतिर्नःकृष्णईश्वरे ६७ ए
वंसभाजितोगोपैःकृष्णभक्त्यानराधिप ॥ उद्धवःपुनरागच्छन्मथुरांकृष्णपालिताम् ६८ कृष्णायप्रणिपत्याहभक्त्युद्रेकंव्रजौकसाम् ॥ वसुदेवायरामाय
राज्ञेचोपायनान्यदात् ६९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्तचत्वारिंशोऽध्यायः ४७ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अथवि
ज्ञायभगवान्सर्वात्मासर्वदर्शनः ॥ सैरंध्र्याःकामतप्तायाःप्रियमिच्छन्गृहंययौ १ महार्होपस्कराढ्यंवैकामोपायोपबृंहितम् ॥ मुक्तादामपताकाभिर्वितान
शयनासनैः ॥ धूपैःसुरभिभिर्दीपैःस्रग्गंधैरपिमंडितम् २

चूर्णिका किंच याः गोप्यः हरेः चरणारविंदंब्रह्मादिभिःअर्चितंस्तनेषुस्थाप्य तापंजहुः ६२ अतएव अहंनंदव्रजस्त्रीणां पादरेणुंवंदे यासांहरिकथोद्गीतंपुनातिभुवनत्रयम् ६३ ॥
श्रीशुकउवाच ॥ अथउद्धवः गोपीः नंदादींश्चपृष्ट्वागच्छन्रथं आरुरोह ६४ तदानानोपायनपाणयः नंदादयः अश्रुनेत्राः संतः ऊचुः ६५ हेउद्धव नः मनोवृत्तयः हरि
पदांबुजाश्रयाः स्युः तथातन्नामकीर्तन्यः वाचः स्युः ६६ किंच कर्मभिः यत्रक्वापिभ्राम्यमाणानां नः मंगलाचरितैः कृष्णेमतिः स्यात् ६७ एवंतैः सत्कृतः उद्धवः मथुरां ॥२०३॥
पुनर्ययौ ६८ कृष्णायप्रणिपत्याहभक्त्युद्रेकंव्रजौकसाम् वसुदेवायरामायराज्ञेचोपायनान्यदात् ६९ ॥ ॥ इतिदशमेसप्तचत्वारिंशः ॥ ४७ ॥ श्रीशुकउवाच ॥
अथविज्ञायभगवान्सर्वात्मासर्वदर्शनः सैरंध्र्याःकामतप्तायाःप्रियमिच्छन्गृहंययौ १ तद्वर्णयति अनर्घ्यगृहोपस्करणैः सुरतबंधादिलेख्यैः धूपदीपादिभिश्चयुतं २

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एतादृशंगृहमायांतंअवेक्ष्यसाकुब्जा) यथायथेरितंसद्भिरासनादिभिः ३ (तथासाधुसम्यगभिपूजितः आसनंस्वीकृत्यभूमौन्यषीदत् । लोकेति । लौकिकरीतिमनुकुर्वन्नित्यर्थः)
४ । (सुधासवादिभिःअमृतोपममादकद्रव्यादिभिः) प्रसाधितोयोग्यतामापादितआत्मादेहोययासा । सव्रीडंयल्लीलयोद्गतंस्मितंतत्चेषुविभ्रमेषुभ्रूविक्षेपादिविलासेषुतद्युक्तैरीक्षितैरुपलक्षिता
(माधवमुपसृता) ५ अनुलेपार्पणादन्यत्तस्याःपुण्यंनास्तीतिदर्शयितुंपुण्यलेशचेत्युक्तं नतुपुण्यस्याल्पत्वविवक्षया (भगवदंगलग्नंयत्किंचिदपिपुण्यंमहाफलमितिभावः) ६ (अनंतचरणस्पर्शेन)
कुचादीनांरुजोमृजंती (अतःप्रेम्णाजिघ्रंती) चरणमित्यर्थः ७ (दुष्प्राप्यमपिअंगरागार्पणेनप्राप्तमहोप्राप्यदुर्भगासतीदमयाचत) काममेवप्राकृतदृष्ट्याऽयाचत । नगोप्यइवसातन्निष्ठेतिदुर्भगेत्युक्तम्
। कृतार्थत्वेतुतस्यानसंदेहः ८ (आहब्रवीतिस्म) कामएववरस्तंदत्त्वामानयित्वाचालंकारादिदानैः १० मनोग्राह्यंविषयसुखंतस्यासत्त्वात्तुच्छत्वात् (तद्योवृणीतेअसौकुब्जेवकुमनीषीति) ११ किं
चिच्चिकीर्षयन्हस्तिनापुरप्रस्थानंकारयितुमिच्छन्नित्यर्थः । अक्रूरप्रियकाम्यया (अक्रूरस्यप्रियंकर्तुमिच्छयाचेत्यर्थः ।) १२ आरादूरतएव १३ (कृतआसनपरिग्रहोयैस्तान्) १४

॥२०४॥

श्लोकाः $\frac{३}{१४}$

गृहंतमायांतमवेक्ष्यसासनात्सद्यःसमुत्थायहिजातसंभ्रमा ॥ यथोपसंगम्यसखीभिरच्युतंसभाजयामाससदासनादिभिः ३ तथोद्धवःसाधुतयाभिपूजितो
न्यषीददुर्व्यामभिमृश्यचासनम् ॥ कृष्णोपितूर्णंशयनंमहाधनंविवेशलोकाचरितान्यनुव्रतः ४ सामज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवादिभिः ॥
प्रसाधितात्मोपससारमाधवंसव्रीडलीलोत्स्मितविभ्रमेक्षितैः ५ आहूयकांतांनवसंगमह्रियाविशंकितांकंकणभूषितेकरे ॥ प्रगृह्यशय्यामधिवेश्यरामया
रेमेनुलेपार्पणपुण्यलेशया ६ सानंगतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रंत्यनंतचरणेनरुजोमृजंती ॥ दोर्भ्यांस्तनांतरगतंपरिरभ्यकांतमानंदमूर्तिमजहादति
दीर्घतापम् ७ सैवंकैवल्यनाथंतंप्राप्यदुःप्राप्यमीश्वरम् ॥ अंगरागार्पणेनाहोदुर्भगेदमयाचत ८ आहोष्यतामिहप्रेष्ठदिनानिकतिचिन्मया ॥ रमस्वनो
त्सहेत्यक्तुंसंगंतेऽम्बुरुहेक्षण ९ तस्यैकामवरंदत्त्वामानयित्वाचमानदः ॥ सहोद्धवेनसर्वेशःस्वधामागमदर्चितः १० दुराराध्यंसमाराध्यविष्णुंसर्वेश्वरेश्वरम् ॥
योवृणीतेमनोग्राह्यमसत्त्वात्कुमनीष्यसौ ११ अक्रूरभवनंकृष्णःसहरामोद्धवःप्रभुः ॥ किंचिच्चिकीर्षयन्प्रागादक्रूरप्रियकाम्यया १२ सतान्नरवरश्रेष्ठानारा
द्वीक्ष्यस्वबांधवान् ॥ प्रत्युत्थायप्रमुदितःपरिष्वज्याभ्यनंदच १३ ननामकृष्णंरामंचसतैरप्यभिवादितः ॥ पूजयामासविधिवत्कृतासनपरिग्रहान् १४

चूर्णिका

गृहंप्राप्तंकृष्णंदृष्ट्वा कुब्जातंउपसंगम्य आसनादिभिः सभाजयामास ३ तथा एवंतयापूजितः उद्धवःआसनंस्पृष्ट्वाभुविस्थितः तावत्कृष्णः शयनंविवेश ४ ततःसास्नानाले
पादिभिःयोग्यंस्वदेहंकृत्वा माधवं उपससार ५ ततः कृष्णः शंकितांतांकरेधृत्वाशय्यां निवेश्यतयासहरेमे ६ ततः सास्तनांतरगतं कृष्णंदोर्भ्यांआलिंग्य दीर्घं तापंजहौ
७ हेनृपएवंसामोक्षदंदुष्प्रापंईश्वरं अंगरागार्पणेन प्राप्यदुर्भगा इदं अयाचत ८ हेकृष्ण इहकतिचित्दिनानि स्थित्वा मयासहरमस्व त्वांत्यक्तुंनोत्सहे ९ ततः कृष्णः तस्यै
कामवरंदत्त्वासोद्धवः स्वगृहं अगात् १० हेनृपएवं दुराराध्यंविष्णुं आराध्य यः विषयंवृणीते सः दुर्मतिः ११ अथसहरामोद्धवः प्रभुः अक्रूरगृहं अगात् १२ ततोऽक्रूरः
तान्दृष्ट्वाउत्थाय कृष्णंरामंच आलिंग्य १३ तैः नमस्कृतः सन् ननाम पूजयामास १४

॥२०४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

आअपइतिच्छेदः अपःआरुर्वतोधारयन्नित्यन्वयः (अर्हणेनअर्घ्यादिना) १५ (आनम्यनमस्कृत्य) १६ वांयुवयोरिदं (अस्मल्लक्षणं) कुलंगृहंवाभवद्भ्यामुहूर्तंसमेधितंच १७ वामिदंकुलमित्या
दिव्यवहारदृष्ट्योक्त्वापरमार्थमाह । युवामिति । जगन्मयौयुवांकुतःजगद्धेतू । तदपिकुतःप्रधानपुरुषौतदात्मकौ । अतोभवद्भ्यांविनाऽपरंकारणंपरंकार्यंचनास्तीति १८ ननुप्रत्यक्षादिसिद्धंकथंना
स्तीत्युच्यतेअतआह । आत्मसृष्टमिति । हेब्रह्मन्परमेश्वर । ब्रह्मेतिवापाठः । रजआदिस्वशक्तिभिरात्मनैवसृष्टमिदंविश्वमन्वाविश्यकारणत्वादननुप्रविष्टोप्यनुप्रविश्येवस्थितःश्रुतप्रत्यक्षगोचरंयथाभव
िततथाबहुधाभवानेवप्रतीयते १९ एकस्यैवबहुधाप्रतीतिसदृष्टांतमाह । यथाहीति । योनिषुस्वस्यैवरूपांतरेणाभिव्यक्तिस्थानेषुचराचरेषुभूतेषुयथामहीमुखानिकारणान्येवनानाभांति तथात्मयोनिषु
स्वकारणेषुभूतभौतिकेषुभवान्केवलोपिबहुधाविभाति । ननुजीवोपिनरमृगादिशरीरेषुबालयुवाचवस्थासुचतथातथाप्रतीयतइत्याशंक्यतद्व्यवच्छेदार्थमात्मतंत्रग्रहणम् २० ननुसृष्ट्यादिकर्तृत्वेन
रजोगुणत्वेनमम्किंजीववद्बंधउक्तःनहिनहीत्याह । सृजसीति । तद्गुणकर्मभिर्वातैर्गुणैःकर्मभिर्वेत्यर्थः । यतःक्वचतेबंधहेतुः । कदाचिदपिबंधहेतुरविद्यातवनास्ति । कुतइत्यतआह ज्ञानात्मनइति ।
मायायाआश्रयानावस्कत्वादितिभावः २१ किंचआस्तांतावद्बंधशंका यतोअविद्योपाधेर्जीवात्मनोपिनवस्तुतोबंधोस्तीत्याह । देहाद्युपाधेरिति । अनिरूपितत्वात्मिथ्यात्वादित्यर्थः । आ
त्मनोभवोजन्मतन्मूलाभिदाचसाक्षात्स्वरूपतोनस्यादिति । ननुममबंधाभावंवदतात्वयाकिंमोक्षोऽगीकृतःओमितिचेत्तर्हिबंधाभावेमोक्षासंभवात्आपत्तोबंधोपीत्याशंक्याह । अतइति । यतोनाविद्या
अतोनबंधश्चमोक्षश्चएवमुभौनस्याताम् (कार्यस्यकारणाभावेदुर्घटत्वादित्यर्थः) ननुउलूखलेमांबद्धंश्रुतवान् । यमुनाह्रदेतुमुक्तंदृष्टवानासि । अतःकथमुभयंनास्तीत्यतआह । निकामइति । स्वाभि
प्रायानुरूपस्त्वादिनःअस्माकंअविवेकएव । परमेवंभूतइति । यद्वानोविवेकएवतवोभौस्याताम्िति (अस्मद्बुद्धिकल्पिताविवेतिभावः) २२

श्लोकाः १५–२२

पादावनेजनीरापोधारयन्शिरसानृप ॥ अर्हणेनांबरैर्दिव्यैर्गंधस्रग्भूषणोत्तमैः १५ अर्चित्वाशिरसानम्यपादावंकगतौमृजन् ॥ प्रश्रयावनतोऽक्रूरःकृष्ण
रामावभाषत १६ दिष्ट्यापापोहतःकंसःसानुगोवामिदंकुलम् ॥ भवद्भ्यामुद्धृतंकृच्छ्राद्दुरंताच्चसमेधितम् १७ युवांप्रधानपुरुषौजगद्धेतूजगन्मयौ ॥
भवद्भ्यांनविनाकिंचित्परमस्तिनचापरम् १८ आत्मसृष्टमिदंविश्वमन्वाविश्यस्वशक्तिभिः ॥ ईयतेबहुधाब्रह्मन्श्रुतप्रत्यक्षगोचरम् १९ यथाहिभूतेषुचरा
चरेषुमह्यादयोयोनिषुभांतिनाना ॥ एवंभवान्केवलआत्मयोनिष्वात्मात्मतंत्रोबहुधाविभाति २० सृजस्यथोलुंपसिपासिविश्वंरजस्तमःसत्त्वगुणैः
स्वशक्तिभिः ॥ नबध्यसेतद्गुणकर्मभिर्वाज्ञानात्मनस्तेक्वचबंधहेतुः २१ देहाद्युपाधेरनिरूपितत्वाद्भवोनसाक्षान्नभिदात्मनःस्यात् ॥ अतोनबंधस्तव
नैवमोक्षःस्यातांनिकामस्त्वयिनोविवेकः २२

चूर्णिका

ततःतत्पादक्षालनजलानि शिरसाधारयन् १५ वस्त्रभूषणादिभिः तौप्रतिपूज्यनत्वाचअंकगतौ पादौमृजन्सन् अक्रूरः आह १६ हेकृष्णहेरामअयंसानुगः पापः
कंसः हतः एतद्दिष्ट्या तथाइदंकुलंच दुरंतदुःखात्वर्धितम् १७ किंच युवांप्रधानपुरुषौ भवद्भ्यांविनाकार्यंकारणंनकिंचित् १८ किंच इदंस्वसृष्टं विश्वं प्रवि
श्यकारणत्वात् अप्रविष्टोपिप्रविश्येवस्थितः सन् त्वंबहुधाप्रतीयसे १९ यथाभूतेषुभूतानि २० किंच इदंजगत् स्वशक्तिभिः त्वं सृजसि पासि हरसि तथापि तद्गुणकर्म
भिः त्वं न बध्यसे २१ अतोनबंधःनचमोक्षः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुतर्हिममावतारास्तच्चरित्राणिचशुक्तिरजतवदविद्याकल्पितान्येवकिम् नहिनहि। इयंतुतवलीलेत्याहद्वयेन त्वयोदितइति (अयंभावः । यथाजीवाविद्याकल्पितानिशुक्तिकारजतादीनिजीवसंमोहकानिनैवमवतारादिकंमायिकंत्वयैवस्वेच्छयाशुद्धसत्त्वात्मिकयादर्शितत्वादिति) २३ इहवसुदेवगृहेअवतीर्णोसित्वंस्वांशेनरामेणसह। (किंकर्तुं) सुरेतरांशायेराजानस्तेषामक्षौहिणीशतानांवधेनभूमेर्भारमपनेतुम् (किंकुर्वन् । अमुष्यवसुदेवस्ययत्कुलंतस्यकीर्तिंवितन्वन्) २४ अतएवंभूतस्यतवागमनेनकृतार्थोस्मीत्याहत्रयेण । अद्येति । हेईशअद्यनोवसतयोगृहाःतपोवनादपिबहुपुण्याः । कुतः । यावसतीस्त्वंसाक्षात्प्रविष्टः । कथंभूतःयस्यतवपादसलिलमेवगंगात्रिजगत्पुनाति । यश्चत्वंसर्वदेवादिपंचयज्ञदेवतामूर्तिःसत्वंजगद्गुरुरिति २५ स्वमनोरथःपरिपूरितइतितुष्यन्नाह कःपंडितइति ऋतगिरःसत्यवाचः (भक्ताःप्रियायस्यतस्मात्) त्वत्तोऽपरंशरणंकःसमीयात्गच्छेत्यतोभवान्भजतोपुंसोभक्तस्यसर्वानभितःकामांश्चददातिआत्मानमपि (यस्यात्मनोऋद्धिक्षयौनस्तःतादृशमव्ययानंदरूपम्) २६ नःअविवेकिनांतत्रापिइहगृहे (प्रतीतःदिष्टयाअहोभाग्यमित्यर्थः) २७ २८ वःयुष्माकंप्रजाःपुत्राहिवयम् २९ ननुनृभिर्देवाःसेव्याइतिप्रसिद्धंतत्राह । देवाइति (अर्हसत्तमाःपूज्येषुश्रेष्ठाः) स्वार्थाःस्वकार्यसाधनपराः साधवस्तुकेवलंपरानुग्रहपराः । परमार्थतस्तुसाधवएवदेवाइतितएवसेव्याइत्यर्थः ३० तर्हिमृच्छिलादिमयाःकिंदेवादयोनैवस्युरित्यतआह । नहीति । अम्मयानिजलरूपाणितीर्थानि मृन्मयाःशिलामयाश्चदेवानभवंतीतिन । अपितुभवंत्येव । तथापिसाधूनांतेषांचमहदंतरमित्याह । तेपुनंतीति ३१

त्वयोदितोयंजगतोहिताययदायदावेदपथःपुराणः ॥ बाध्येतपाखंडपथैरसद्भिस्तदाभवान्सत्त्वगुणंबिभर्ति २३ सत्वंप्रभोद्यवसुदेवगृहेवतीर्णःस्वांशेनभारमपनेतुमिहासिभूमेः ॥ अक्षौहिणीशतवधेनसुरेतरांशराज्ञाममुष्यचकुलस्ययशोवितन्वन् २४ अद्येशनोवसतयःखलुभूरिभागायःसर्वदेवपितृभूतनृदेवमूर्तिः ॥ यत्पादशौचसलिलंत्रिजगत्पुनातिसत्वंजगद्गुरुरधोक्षजयाःप्रविष्टः २५ कःपंडितस्त्वदपरंशरणंसमीयाद्भक्तप्रियादृतगिरःसुहृदःकृतज्ञात् ॥ सर्वान्ददातिसुहृदोभजतोभिकामान्आत्मानमप्युपचयापचयौनयस्य २६ दिष्ट्याजनार्दनभवानिहनःप्रतीतोयोगेश्वरैरपिदुरापगतिःसुरेशैः ॥ छिंध्याशुनःसुतकलत्रधनाप्तगेहदेहादिमोहरशनांभवदीयमायाम् २७ इत्यर्चितःसंस्तुतश्चभक्तेनभगवान्हरिः ॥ अक्रूरंसस्मितंप्राहगीर्भिःसंमोहयन्निव २८ ॥ श्रीभगवानुवाच ॥ त्वन्नोगुरुःपितृव्यश्चश्लाघ्योबंधुश्चनित्यदा ॥ वयंचरक्ष्याःपोष्याश्चअनुकंप्याःप्रजाहिवः २९ भवद्विधामहाभागानिषेव्याअर्हसत्तमाः ॥ श्रेयस्कामैर्नृभिर्नित्यंदेवाःस्वार्थानसाधवः ३०नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनंत्युरुकालेनदर्शनादेवसाधवः ३१

हेकृष्ण अयं पुराणः वेदपंथाः यदा पाखंडपथैः बाध्यते तदा त्वं गुणं बिभर्षि २३ एवंभूतः त्वंअद्यभूभारंहर्तुं वसुदेवगृहे अवतीर्णोसि २४ किंच हेकृष्ण अद्यनोवसतयः बहुपुण्याः यतः सर्वदेवादिमूर्तिः त्वं याः प्रविष्टोऽसि २५ २६ किंच हेजनार्दन देवादिभिः दुर्दर्शोपि त्वं नः प्रतीतोऽसि इदं दिष्ट्या अतः त्वंसुतकलत्रादिमोहरशनांत्वन्मायां नः छिंधि २७ एवंभक्तेनस्तुतः हरिः अक्रूरं मोहयन्निव आह २८ ॥ श्रीकृष्णउवाच ॥ हे अक्रूरत्वं नः गुरुः पितृव्यश्च वयंतुवः प्रजाः अतः पोष्याःअनुकंप्याश्च २९ किंच त्वादृशाः साधवः श्रेयस्कामैर्नृभिः सेव्याः ३० किंच नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः तेपुनंत्युरुकालेनदर्शनादेवसाधवः ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंचिच्चिकीर्षयन्नागादितियदुक्तंतत्कार्यमादिशति । सइति । नःसुहृदांमध्येभवान्श्रेयान्श्रेष्ठः । अतःपांडवानांश्रेयश्चिकीर्षया (तद्वृत्तजिज्ञासार्थं) गजसाह्वयंहास्तिनपुरंगच्छस्वगच्छेति । पद्भ्यास्वे
तिपृथक्पदं हेस्व आत्मीयेत्यर्थः ३२ राज्ञाधृतराष्ट्रेण (मात्रासहस्वपुरमानीताः) वसंतेनिवसंतीतिशुश्रुमश्रुतवंतोवयम् ३३ (अंबिकापुत्रोधृतराष्ट्रः) दुष्टा ये स्वपुत्रा दुर्योधनादयःतद्वशेनगच्छ
तीतितथायतोऽधदृक्अंधनेत्रः (अतएवदीनधीःभ्रातृपुत्रेषु नूनंसमोनेति) ३४ (तद्वृत्तंसाधुअसाधुवाजानीहि । सुहृदांपांडवानांयथाशंस्यात्तत्करिष्यामः) ३५ ३६ ॥ ॥ इतिश्रीभागवतेमहा
पुराणेदशमस्कंधेटीकायांअष्टचत्वारिंशोऽध्यायः ४८ ॥ ॥ ७ ॥ ॥ ऊनपंचाशत्तमेतुगत्वाऽक्रूरोगजाह्वयम् । राज्ञःस्वभ्रातृपुत्रेषुबुद्ध्वावैषम्यमागमत् ॥ १ ॥ पौरवेंद्राणां (पुरुवंशभवा
नांराज्ञाम्) यशोभिस्तत्कृतदेवब्राह्मणायतनादिभिरंकितम् १ बाह्लीकपुत्रःसोमदत्तः । भारद्वाजोद्रोणः । गौतमःकृपः २ (गांदिनीसुतोऽक्रूरःधृतराष्ट्रादीन्यथायोग्यमुपसंगम्यतैर्धृतराष्ट्रादिभिःसुहृ
द्भिःपांडवैश्चसुहृद्वार्तांसंपृष्टः) स्वयंचाव्ययंकुशलमपृच्छत् ३ (अथतत्र) दुःप्रजस्यअसत्पुत्रस्यअल्पसारस्यमंदधृतेःखलानांकर्णादीनांच्छंदमिच्छामनुवर्तितुंशीलंयस्येतितथातस्य(राज्ञः) ४ तेजः
प्रभावंओजःशस्त्रादिनैपुण्यंवीर्यंशौर्यं (पांडवानामेतत्सर्वं -)- मसहद्भिरसहमानैर्धार्तराष्ट्रैश्चिकीर्षितमितउपरिकर्तुमिष्टम् ५

॥२०७॥

श्लोकाः ३२/५

सभवान्सुहृदांवैनःश्रेयान्श्रेयश्चिकीर्षया ॥ जिज्ञासार्थंपांडवानांगच्छस्वगजसाह्वयम् ३२ पितर्युपरतेबालाःसहमात्रासुदुःखिताः ॥ आनीताःस्वपुरं
राज्ञावसंतइतिशुश्रुम ३३ तेषुराजांबिकापुत्रोभ्रातृपुत्रेषुदीनधीः ॥ समोनवर्ततेनूनंदुःपुत्रवशगोंधदृक् ३४ गच्छजानीहितद्वृत्तमधुनासाध्वसाधुवा ॥
विज्ञायतद्विधास्यामोयथाशंसुहृदांभवेत् ३५ इत्यक्रूरंसमादिश्यभगवान्हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यांवैततःस्वभवनंययौ ३६ ॥ ॥ इतिश्री
भागवतेमहापुराणेदशमस्कंधेअष्टचत्वारिंशोऽध्यायः ४८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ सगत्वाहास्तिनपुरंपौरवेंद्रयशोंकितम् ॥
ददर्शतत्रांबिकेयंसभीष्मंविदुरंपृथाम् १ सहपुत्रंचबाह्लीकंभारद्वाजंसगौतमम् ॥ कर्णंदुर्योधनंद्रौणिंपांडवान्सुहृदोऽपरान् २ यथावदुपसंगम्यबंधु
भिर्गांदिनीसुतः ॥ संपृष्टस्तैःसुहृद्वार्तांस्वयंचापृच्छदव्ययम् ३ उवासकतिचिन्मासान्राज्ञोवृत्तविवित्सया ॥ दुःप्रजस्याल्पसारस्यखलच्छंदानुवर्तिनः
४ तेजओजोबलंवीर्यंप्रश्रयादींश्चसद्गुणान् ॥ प्रजानुरागंपार्थेषुनसहद्भिश्चिकीर्षितम् ५

चूर्णिका

तस्मात् हे अक्रूरत्वं नः सुहृन्मध्ये श्रेष्ठोसि अतः पांडवानां जिज्ञासार्थंगच्छ ३२ तेबालाः पांडौमृतेसति धृतराष्ट्रेणस्वपुरं आनीताः वसंतेइतिशुश्रुम ३३ तेषुसराजास
मोनवर्तते यतोदुष्पुत्रवशगः ३४ अतः त्वंगच्छ अधुना तद्वृत्तं साध्वसाधुवाजानीहि ततः यथासुहृदांशं भवेत् तथाविधास्यामः ३५ इत्यक्रूरंसमादिश्यभगवान्हरिरीश्वरः
संकर्षणोद्धवाभ्यांवैततःस्वभवनंययौ ३६ ॥ इतिदशमेअष्टचत्वारिंशः ॥ ४८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ सगत्वाहास्तिनपुरं
पौरवेंद्रयशोऽकितम् ददर्शतत्रांबिकेयंसभीष्मंविदुरंपृथाम् १ तथाबाह्लीकम् तत्सुतंसोमदत्तम् द्रोणंकृपं कर्णं सुयोधनंद्रौणिंपांडवान् अन्यसुहृदांश्चदृष्ट्वा २ तैःसंगम्य
सुहृद्वार्तापृष्टः स्वयंतेषांकुशलं पप्रच्छ ३ तत्र धृतराष्ट्रस्यवृत्तविवित्सयाकतिचिन्मासान्उवास ४ किंच पार्थेषुप्रभावादिसर्वंप्रजानुरागं असहद्भिः धार्तराष्ट्रैःकर्तुमि
ष्टं तथाकृतंचयद्गरदानादितत्सर्वं पृथाविदुरश्च अक्रूरायप्राह ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

क्रुतंचगरस्यविषस्यदानादिअपेशलंअनार्यंतेजओजइत्यादिचसर्वमस्मैकथयामास ६ तत्कथनात्पूर्वतरंपृथायावृत्तमाह पृथात्विति ।(जन्मानिलयंपितृगृहम्) अश्रूणांकलालेशाययोस्तेईक्षणेयस्याःसा ७ जामय.कुलस्त्रियःअपिकिं (स्मरंति) ८ पैतृष्वस्रेयान्मत्पुत्रान् ९ (सपत्नानांदायादानांमध्ये) सांत्वयिष्यतिकिम् १० हेमहायोगिन् महान्योगउपायोमायाख्योऽस्यास्तीति । हेविश्वात्मन्सर्वांतर्यामिन् हेविश्वभावनविश्वपालक । प्रपन्नांशरणागताम् । अवसीदतींक्लिश्यंतीम् ११(ईश्वरस्यतव) आपवर्गिकात्मोक्षप्रदात् (शरणंरक्षकम्) १२ शुद्धायधर्मात्मनेब्रह्मणेअपरिच्छिन्नायपरमात्मनेजीवसखाययोगेश्वरायअणिमादियुक्काययोगायज्ञानात्मने १३ (हेराजन्भवतां)प्रपितामहःपांडुस्तस्यभार्याअरुदत्रुरोद १४ पृथयासहसमंदुःखंसुखंचयस्यसःतस्याःपुत्राणांउत्पत्तिहेतुभिर्जनकैर्धर्मानिलेंद्रादिभिःतत्प्रभावकथनैरित्यर्थः १५ बंधुभिःरामकृष्णादिभिःसौहृदेनउदितंउक्तंयत्तदवददिति १६ (हेविचित्रवीर्यात्मज)भ्रातर्युपरतेइतिपांडोःपुत्रेषुत्सुराजासनंत्वमास्थितइतिकटाक्षः १७

॥२०८॥

कृतंचधार्तराष्ट्रैर्यद्गरदानाद्यपेशलम् ॥ आचख्यौसर्वमेवास्मैपृथाविदुरएवच ६ पृथातुभ्रातरंप्राप्तमक्रूरमुपसृत्यतम् ॥ उवाचजन्मनिलयंस्मरंत्यश्रुकलेक्षणा ७ अपिस्मरंतिनःसौम्यपितरौभ्रातरश्चमे ॥ भगिन्योभ्रातृपुत्राश्चजामयःसख्यएवच ८ भ्रात्रेयोभगवान्कृष्णःशरण्योभक्तवत्सलः ॥ पैतृष्वस्रेयान्स्मरतिरामश्चांबुरुहेक्षणः ९ सपक्षमध्येशोचंतींवृकाणांहरिणीमिव ॥ सांत्वयिष्यतिमांवाक्यैःपितृहीनांश्चबालकान् १० कृष्णकृष्णमहायोगिन्विश्वात्मन्विश्वभावन ॥ प्रपन्नांपाहिगोविंदशिशुभिश्चावसीदतीम् ११ नान्यत्तवपदांभोजात्पश्यामिशरणंनृणाम् ॥ बिभ्यतांमृत्युसंसारादीश्वरस्यापवर्गिकात् १२ नमःकृष्णायशुद्धायब्रह्मणेपरमात्मने ॥ योगेश्वराययोगायत्वामहंशरणंगता १३॥ श्रीशुकउवाच ॥ इत्यनुस्मृत्यस्वजनंकृष्णंचजगदीश्वरम् ॥ प्रारुदद्दुःखिताराजन्भवतांप्रपितामही १४ समदुःखसुखोऽक्रूरोविदुरश्चमहायशाः ॥ सांत्वयामासतुःकुंतींतत्पुत्रोत्पत्तिहेतुभिः १५ यास्यन्राजानमभ्येत्यविषमंपुत्रलालसम्॥ अवदत्सुहृदांमध्येबंधुभिःसौहृदोदितम् १६ ॥ अक्रूरउवाच ॥ भोभोवैचित्रवीर्यत्वंकुरूणांकीर्तिवर्धन ॥ भ्रातर्युपरतेपांडावधुनाऽऽसनमास्थितः १७

श्लोकाः ६—१७

चूर्णिका

६ पृथातुप्राप्तं अक्रूरं उपगत्वाजन्मस्थानंस्मृत्वा आह ७ हेभ्रातः नः पितरौ भ्रातृभगिन्यः भ्रातृपुत्रादयश्चनः स्मरंतिकिं ८ तथा शरण्यः कृष्णः रामश्चमेसुतान्स्मरति किं ९ किंच शत्रुमध्येशोचंतींमां वृकाणांहरिणीमिव पितृहीनान् मेबालांश्चहरिः सांत्वयिष्यतिकिम् १० हेकृष्णहेगोविंदपुत्रैः सहक्लिश्यंतीं शरणागतां मांपाहि ११ हे कृष्णमृत्युसंसारात्भीतानांनृणांत्वत्पादाब्जात् अन्यत्शरणंन पश्यामि १२ अतस्तेयोगेश्वरायनमः त्वांशरणंगताहम् १३ ॥ श्रीशुकउवाच ॥ हेनृपतेप्रपितामही एवंस्वजनंकृष्णंचस्मृत्वाप्रारुदत् १४ तदासमदुःखसुखोक्रूरः विदुरश्चतांतत्सुतोत्पत्तिहेतुभिः सांत्वयामास १५ततोऽक्रूरः गच्छन्सन्धृतराष्ट्रं एत्य सुहृन्मध्येरामकृष्णादिभिः यदुक्तंतदाह १६ भोभोधृतराष्ट्रत्वंभ्रातरिपांडौ मृतेसति अधुना आसनंस्थितः १७

॥२०८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

भवतु तथाप्येवंवर्तमानःश्रेयोवाप्स्यसीत्याह धर्मेणेति १८ तमःनरकं इहवमहद्दुःखमितिभावः १९ नन्वात्मजानात्मजादिषुकथंसमत्वंस्यात्तत्राह । नेहचेतिषड्भिः । अत्यंतंनित्यंसंवासःसम्यक्स्थितिः (स्वेनाप्यहंतास्पदेन । किमुममतास्पदैर्जायादिभिः) २० तत्रतावदुत्पत्तिमरणयोःसुखदुःखयोश्चकेनापिसाहित्यंनास्तीत्याह । एकइति २१ किंचयदाचसहसंत्रसंति तदापिक्लेशोपार्जितवित्तापहारितया पुत्रानामशत्रव एवज्ञेया इत्याह अधर्मेति । संभोजनीयाःपोष्याःपुत्रादयइतिव्यपदेशैःअन्येशत्रवोऽल्पमेधसोमूढस्यवित्तंहरंति । जलौकसोमत्स्यस्यजीवनभूतानिजलानि यथातत्पुत्रादयोहरंति स्वत्वेनाश्रयंते तद्वत् २२ किंच यानेवंपुष्णाति तेधनमादाय मृतांजीवंतोवा जीवंतंमृतंवात्यजंतीत्याह । पुष्णातीति । स्वबुद्ध्यास्वीयाइत्याभिमानेनरायःअर्थाः । अकृतार्थमप्राप्तभोगम् २३ सपुनः पापैकपाथेयोनरकंविशतीत्याह । स्वयमितिपुरुषार्थकुशलोनभवतीतिनार्थकोविदः । असिद्धार्थःअपूर्णमनोरथः । (अंधंतमःविशति) २४ स्वप्नश्चमायाचमनोरथश्चतत् । तेनतुल्यंआत्मनाबुद्ध्या विवेकयुक्तयाआत्मानंमनःआयम्यनियम्यशांतःसन्समोभव (रागद्वेषरहितोवर्तस्वेत्यर्थः) २५ हेदानपतेअक्रूर (तथाताहश्याप्रियाहितया) नतृप्यामिअलमितिनमन्ये २६

॥२०९॥

श्लोकाः १८—२६

धर्मेणपालयन्नुर्वीं प्रजाःशीलेनरंजयन् ॥ वर्तमानःसमःस्वेषुश्रेयःकीर्तिमवाप्स्यसि १८ अन्यथात्वाचरँल्लोकेगर्हितोयास्यसेतमः ॥ तस्मात्समत्वेवर्तस्व पांडवेष्वात्मजेषुचं १९ नेहचात्यंतसंवासःकर्हिचित्केनचित्सह ॥ राजन्स्वेनापिदेहेनकिमुजायात्मजादिभिः २० एकःप्रसूयतेजंतुरेकएवप्रलीयते ॥ एकोनुभुंक्तेसुकृतमेकएवचदुष्कृतम् २१ अधर्मोपचितंवित्तंहरंत्यन्येऽल्पमेधसः ॥ संभोजनीयापदेशैर्जलानीवजलौकसः २२ पुष्णातियानधर्मेणस्वबुद्ध्या तमपंडितम् ॥ तेऽकृतार्थंप्रहिण्वंतिप्राणारायःसुतादयः २३स्वयंकिल्बिषमादायतैस्त्यक्तोनार्थकोविदः ॥ असिद्धार्थोविशत्यंधंस्वधर्मविमुखस्तमः २४ तस्माल्लोकमिमंराजन्स्वप्नमायामनोरथम् ॥ वीक्ष्यायम्यात्मनात्मानंसमःशांतोभवप्रभो २५ ॥ धृतराष्ट्रउवाच ॥ यथावदतिकल्याणींवाचंदानपतेभवान् ॥ तथाऽनयानतृप्यामिमर्त्यःप्राप्ययथाऽमृतम् २६

चूर्णिका

अस्तु तथापिप्रजाः पालयन्स्वेषुसमः वर्तमानः सन्श्रेयः कीर्तिंप्राप्स्यसि १८ अन्यथानरकंयास्यसे अतः त्वंस्वपुत्रेषुपांडवेषुचसमत्वेनवर्तस्व १९ किंच हेराजन् अत्र लोके कर्हिचित्केनापिदेहेनचसंवासोन किमुजायादिभिः २० किंच जंतुः एकएवप्रसूयतेनश्यति पुण्यंपापंचएकएवभुंक्ते २१ अधर्मार्जितंद्रव्यं अन्येहरंति पुत्रादिमिषेण २२ किंच यान्अधर्मेणपुष्णाति तंतेप्राणादयः त्यजंति २३ एवंतैः त्यक्तः स्वयं अपूर्णः सन् अंधंतमोविशति २४ तस्मात् त्वं इमंलोकंस्वप्नमायामनोरथवत्वीक्ष्य मनः नियम्यसमः शांतोभव २५ ॥ धृतराष्ट्रउवाच ॥ हेदानपतेयथात्वंवदसितथाअनयावाचानतृप्यामि मर्त्यःप्राप्ययथाऽमृतम् २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सूनृताप्रियापिवाक्चलेअस्थिरेहृदिनस्थीयते । नतिष्ठतीत्यर्थः । सुदामापर्वतःतत्रभवाविद्युदिव । तस्मिन्स्फटिकशिलामयेसहसैवातिस्फुरितापिविद्युद्यथालीयतेतद्वदित्यर्थः । यद्वा सुदामामालातस्याइयं सौदामिनी। मालाकारेत्यर्थः २७ नन्वेवंजानतोपिकथमेवंमोहयतिचेदतआह । ईश्वरस्येति विधिंविधानंमायामितियावत् २८ अतस्तमेवनमस्यति यइति । दुर्विमर्शपथयाअवितर्क्यमार्गयागुणान्कर्माणितत्फलानिचविभजतेविविच्यददाति । दुरवबोधोयोविहारस्तस्यक्रीडासातंत्रंप्रधानंमुख्यंकारणंयस्यसंसारचक्रस्यअतएवतस्यगतिर्यस्मात्तस्मैनमइति २९ अभिप्रेत्यज्ञात्वा ३० (पांडवान्प्रति धृतराष्ट्रस्यविचेष्टितंयत्तद्रामायकृष्णायचशशंस) ३१ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांभावार्थदीपिकायांएकोनपंचाशत्तमोध्यायः ॥ ४९ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ इतिदशमस्कंधस्यपूर्वार्धसमाप्तम् तेन श्रीः प्रीयताम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

श्लोकाः २७—३१

तथापिसूनृतासौम्यहृदिनस्थीयतेचले ॥ पुत्रानुरागविषमेविद्युत्सौदामिनीयथा २७ ईश्वरस्यविधिंकोनुवितनोत्यन्यथापुमान् ॥ भूमेर्भारावताराययोऽवतीर्णोयदोःकुले २८ योदुर्विमर्शपथयानिजमाययेदंसृष्ट्वागुणान्विभजतेतदनुप्रविष्टः ॥ तस्मैनमोदुरवबोधविहारतंत्रसंसारचक्रगतयेपरमेश्वराय २९ ॥ श्रीशुकउवाच ॥ इत्यभिप्रेत्यनृपतेरभिप्रायंसयादवः ॥ सुहृद्भिःसमनुज्ञातःपुनर्यदुपुरीमगात् ३० शशंसरामकृष्णाभ्यांधृतराष्ट्रविचेष्टितम् ॥ पांडवान्प्रतिकौरव्ययदर्थंप्रेषितःस्वयम् ३१ ॥ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांदशमस्कंधेएकोनपंचाशत्तमोऽध्यायः ४९ ॥ ॥ छ ॥ ॥ इतिपूर्वार्धसमाप्तम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

चूर्णिका

तथापिइयंतेवाक् हेसाधोमेचलेहृदिपुत्रानुरागविषमेविद्युदिवनस्थीयते २७ किंच भूभारनाशाययदुकुले अवतीर्णस्यहरेः विधिंकोनुपुमान् अन्यथाकरोति २८ एवंभूताय परमेश्वरायनमः २९ ॥ श्रीशुकउवाच ॥ एवंधृतराष्ट्राभिप्रायज्ञोऽक्रूरःसुहृद्भिःअनुज्ञातः सन्मथुरामगात् ३० शशंसरामकृष्णाभ्यांधृतराष्ट्रविचेष्टितम् पांडवान्प्रतिकौरव्य यदर्थंप्रेषितःस्वयम् ३१ ॥ ॥ इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेएकोनपंचाशत्तमोध्यायः ४९ ॥ ॥ छ ॥ ॥ छ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥ इतिपूर्वार्धसमाप्तम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत—दशमस्कंधपूर्वार्धः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत—दशमस्कंधोत्तरार्धः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. श्रीशांतादुर्गाजयति ॥ ॥ ततःपंचाशत्तमेतुजरासंधभयादिव । कारयित्वांबुधौदुर्गंतंनिनायनिजंजनम् ॥१॥ कपटान्कपटैरेवहत्वादैत्यानयत्नतः । अजयच्चजरासंधंधर्मेणैवतुधार्मिकम् ॥२॥ अस्तिप्राप्ति अ०
संज्ञिके (कंसस्यमहिष्यौकृताभिषेकेस्त्रियौपितुर्जरासंधस्यगृहान्प्रति) ईयतुर्जग्मतुः १ २ कंसेशोकःकृष्णेअमर्षःताभ्यांयुतः (उद्यमंसेनासंभारम्) ३ (विंशत्यातिसृभिश्चत्रयोविंशत्येत्यर्थः)
न्यरुणत्रुरोध ४ तस्यबलंसैन्यं उद्वेलंलंघितमर्यादंसागरमिवतेनतस्यवलेनसंरुद्धम् ५ (देशकालानुरूपंस्वावतारस्यप्रयोजनंभूभारहरणलक्षणंतत्) किंवलमेवहन्मिनमागधंमागधंवाहत्वाबलंग्रह्णा ॥५०॥
टीका मि । यद्वा समागधंसर्वंहन्मीतिचिंतयामास । ननुप्रथमंकथंजेष्यामीत्येवंचिंतयितुंयुक्तम् । तत्राह । कारणमानुषइति । भूभारावतारकारणेनमानुषः नतत्त्वतइति ६ एवंत्रिधाविचिंत्यप्रथमंपक्षंनिर्धारि
तवांस्तदाह चतुर्भिर्हनिष्यामीति ७ (भटाश्वरथकुंजरैःचतुर्भिरंगैर्लक्षितं) यतांबलायोद्यमं (भूयः) कर्ता (पुनः) करिष्यतीति ८ नन्वतएवहंतव्यस्तत्राह । एतदर्थइति । एतच्छब्दार्थंस्पष्टयति
॥ १ ॥ भूभारहरणायेति ९ अयमेतदर्थोवतारइत्युपलक्षणमित्याह । अन्योपीति (नकेवलमयंअन्योपिसंश्रियते) प्रभवतःउद्भवतः (अधर्मस्यांताय) १० ससूतौसारथिसहितौ । परिच्छदःपरिकरोध्वज
कवचादिस्तत्सहितौ ११ (पुराणानिपुरातनानि । यदृच्छयोपस्थितानि) १२

॥ श्रीशुकउवाच ॥ अस्तिःप्राप्तिश्चकंसस्यमहिष्यौभरतर्षभ ॥ मृतेभर्तरिदुःखार्तेईयतुःस्मपितुर्गृहान् १ पित्रेमगधराजायजरासंधायदुःखिते ॥ वेदयां श्लोकाः
चक्रतुःसर्वमात्मवैधव्यकारणम् २ सतदप्रियमाकर्ण्यशोकामर्षयुतोनृप ॥ अयादवींमहींकर्तुंचक्रेपरमसुद्यमम् ३ अक्षौहिणीभिर्विंशत्यातिसृभिश्चापिसं
वृतः ॥ यदुराजधानींमथुरांन्यरुणत्सर्वतोदिशम् ४ निरीक्ष्यतद्बलंकृष्णउद्वेलमिवसागरम् ॥ स्वपुरंतेनसंरुद्धंस्वजनंचभयाकुलम् ५ चिंतयामासभगवा १/१२
न्हरिःकारणमानुषः ॥ तद्देशकालानुगुणंस्वावतारप्रयोजनम् ६ हनिष्यामिबलंह्येतद्भुविभारंसमाहितम् ॥ मागधेनसमानीतंवश्यानांसर्वभूभुजाम् ७
अक्षौहिणीभिःसंख्यातंभटाश्वरथकुञ्जरैः ॥ मागधस्तुनहंतव्योभूयःकर्ताबलोद्यमम् ८ एतदर्थोवतारोहिभूभारहरणायमे ॥ संरक्षणायसाधूनांकृतोन्येषां
वधायच ९ अन्योपिधर्मरक्षायैदेहःसंश्रियतेमया ॥ विरामायाप्यधर्मस्यकालेप्रभवतःक्वचित् १० एवंध्यायतिगोविंदआकाशात्सूर्यवर्चसौ ॥ रथावुप
स्थितौसद्यःससूतौसपरिच्छदौ ११ आयुधानिचदिव्यानिपुराणानियदृच्छया ॥ दृष्ट्वातानिहृषीकेशःसंकर्षणमथाब्रवीत् १२

चूर्णिका श्रीगणेशायनमः ॥ श्रीशुकउवाच ॥ हेराजन् अस्तिःप्राप्तिश्च कंसस्य स्त्रियौ भर्तरि मृते सति दुःखार्तेपितुः गृहं जग्मतुः १ ततः जरासंधाय स्ववैधव्यकारणं वेदयांचक्रतुः २
ततोजरासंधः क्रुद्धःसन् महींअयादवींकर्तुं उद्यमंचक्रे ३ ततः त्रयोविंशत्यक्षौहिणीभिर्युक्तः सः मथुरां रुरोध ४ ततः श्रीकृष्णःतद्बलंतेनरुद्धं स्वपुरंभयाकुलंस्वजनं च दृष्ट्वा चिं
तयामास ५ ६ किंतत् इदंभूभारभूतंसैन्यं हनिष्यामि ७ मागधस्तुनहंतव्योभूयःकर्ताबलोद्यमम् ८ मेअवतारः भूभारहरणायैवास्ति ९ १० एवंगोविंदे ध्यायति स
ति आकाशात्ससूतौध्वजकवचादियुक्तौद्वौरथौप्राप्तौ ११ तथाआयुधानिचप्राप्तानि तानि दृष्ट्वा केशवःराममब्रवीत् १२ ॥ १ ॥

१ अक्षौहिण्यामित्यधिकैःसप्तत्याह्यष्टभिःशतैः ॥ संयुक्तानिसहस्राणिगजानामेकविंशतिः ॥ एवमेवरथानांतुसंख्यानंकीर्तितंबुधैः ॥ पंचषष्टसहस्राणिषट्शतानिदशैवतु ॥ संख्यातास्तुरगास्तज्ज्ञैर्विनारथतुरंगमैः ॥
नृणांशतसहस्राणिसहस्राणितथानव । शतानित्रीणिचान्यानिपंचाशच्चपदातयइति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हेआर्य) त्वंअदन्रक्षकोनाथोएषांतेत्वादंतत्तेषा (त्वावताम् । पृष्टोदरादिवत् । यद्वा त्वंविद्यतेदषांतेतथातेषां आसर्वनाम्नइत्यात्वं) १३ (एतदर्थंदुष्टहननार्थम्) १४ दंशितौबद्धकवचौ १५
स्वायुधाढ्यौशोभनायुधसंपन्नौ (वित्रासवेपथुः भयेनकंपः । ततःशंखनादात्) १६ हेपुरुषाधमपुरुषाअधमायस्मादितिवास्तवोर्थः । हेपुरुषोत्तमेति (एकेनकेवलेन । वस्तुतस्तुमुख्येनेति) १७
(गुप्तेनअप्रसिद्धेनमंदअल्पत्रपधुहन्बंधुमातुलस्तंहंतीति । वस्तुवस्तु) गुप्तेनसर्वांतरत्वाद्दर्शनानर्हेण । हेअमंद । बध्नातीतिबंधुरविद्यातांहंतीतितथाहेअविद्यानिरसनेति(हेरामत्वंचतथा । तथापिय
दिश्रद्धेति मदग्रेस्थिरोभव याहिप्राप्नुहि १८ अच्छेद्यदेहोऽसावितिस्वयमेवमत्वाअपरितोषात्पक्षांतरमाह । यद्वामांजहीति १९ यथाश्रुतार्थग्रहणेनभगवतउत्तरम् । नवैशूराइति । विकत्थंते
श्लाघंते २० माधवौमधुवंशसंभवौ । महतासैन्यसमूहेनावृतवान् । (सैन्यादिभिःसहितौ) वायुरभ्रैःसूर्यंरेणुभिश्चाग्निंयथा । इत्यदर्शनमात्रमेवावरणमितिसूचितम् । २१ (पुरंगृहोपरिगृहम् । अट्टा
लकउपरितनभूमिः । हर्म्यंतुधनिनांवासः पुरद्वारंतुगोपुरं) २२

॥२॥

श्लोकाः १३/२२

॥ श्रीभगवानुवाच ॥ पश्यार्यव्यसनंप्राप्तंयदूनांत्वावतांप्रभो ॥ एषतेरथआयातोदयितान्यायुधानिच १३ यानमास्थायजह्येतद्व्यसनात्स्वान्समुद्धर ॥
एतदर्थंहिनोजन्मसाधूनामीशशर्मकृत् १४ त्रयोविंशत्यनीकाख्यंभूमेर्भारमपाकुरु ॥ एवंसंमन्त्र्यदाशार्हौदंशितौरथिनौपुरात् १५ निर्जग्मतुःस्वायु
धाढ्यौबलेनाल्पीयसावृतौ ॥शंखंदध्मौविनिर्गत्यहरिर्दारुकसारथिः १६ ततोऽभूत्परसैन्यानांहृदिवित्रासवेपथुः ॥ तावाहमागधोवीक्ष्यहेकृष्णपुरुषाधम
१७ नत्वयायोद्धुमिच्छामिबालेनैकेनलज्जया ॥ गुप्तेनहित्वयामंदनयोत्स्येयाहिबंधुहन् १८ तवरामयदिश्रद्धायुध्यस्वधैर्यमुद्वह ॥ हित्वावामच्छरैश्छि
न्नंदेहंस्वर्याहिमांजहि १९ ॥ श्रीभगवानुवाच ॥ नवैशूराविकत्थंतेदर्शयंत्येवपौरुषम् ॥ नगृह्णीमोवचोराजन्नातुरस्यमुमूर्षतः २० जरासुतस्तावभि
सृत्यमाधवौमहाबलौघेनबलीयसाऽऽवृणोत् ॥ ससैन्ययानध्वजवाजिसारथीसूर्यानलौवायुरिवाभ्ररेणुभिः २१ सुपर्णतालध्वजचिह्नितौरथावलक्षयंत्यो
हरिरामयोर्मृधे ॥ स्त्रियःपुराट्टालकहर्म्यगोपुरंसमाश्रिताःसंमुमुहुःशुचार्दिताः २२

चूर्णिका

हेआर्य यदूनांप्राप्तं व्यसनंपश्य तथाएषः रथःआयुधानिचआयातानि पश्य १३ अधुनारथमास्था यएतत्सैन्यंजित्वा व्यसनात् स्वान्उद्धर नौजन्मएतदर्थं १४ किंच त्रयोविंशत्य
क्षौहिणीमितंभूमेर्भारंअपाकुरु एवंसंमंत्र्यतौरामकृष्णौस्वायुधाढ्यौअल्पसैन्यावृतौ संतौरथाभ्यांपुरात् निर्जग्मतुः ततः हरिः शंखंदध्मौ १५ १६ तेननादेनशत्रुसैन्यानां हृदि
कंपोऽभूत् ततःमागधः तौप्रति आह १७ हेकृष्णबालेनत्वयासह योद्धुंनेच्छामि कुतः त्वंबंधुहंतासि अतोयाहि १८ हेरामतवयुद्धे श्रद्धास्तिचेत् तर्हिधैर्यंधृत्वा युध्यस्व मयाजितश्चे
त्मच्छरैःछिन्नंदेहंहित्वा स्वर्याहि अथवा मांजहि १९ ॥ श्रीभगवानुवाच ॥ हेमागध शूराःएवंनविकत्थंते पौरुषमेवदर्शयंति अतःआतुरस्यतेवचो नगृह्णीमः २० ॥ श्रीशुक
उवाच॥हेराजन्मागधःतौप्रतिगत्वामहाबलौघेन सैन्यरथध्वजाश्वसूतैःसह तौआवृणोत् २१ तदापुराट्टालादिषुस्थिताः स्त्रियः रामकृष्णरथौ नपश्यंत्यःसत्यःशुचार्दिताःमुमुहुः २२

॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

परस्यअनीकानिसैन्यानितान्येवपयोमुचोमेघास्तेषांशिलीमुखाबाणास्तेषामत्युल्बणंवर्षंतेनपीडितं (आलोक्यसुरासुरपूजितं) व्यस्फूर्जयत्उज्जृंभितवान् २३ तदाह गृह्णन्निति । निषंगात्इषुधेःशरा न्गृह्णन्अथतान्गुणेसंदधत्गुणमाकृष्यनिशितबाणसमूहान्मुंचन् निघ्नन्प्रहरन् पत्तिःपदातिःनिरंतरमितिग्रहणादिक्रियाविशेषणम् । ज्वलत्काष्ठभ्रमणेयथाचक्रवत्तेजोभवतितद्वद्व्यस्फूर्जयदिति २४ हताअश्वाध्वजाःसूतानायकारथिनश्चयेषुते २५ संछिद्यमानाद्विपदाइभावाजिनश्चतेषामंगेभ्यःप्रसूताअसृगापगारुधिरनद्यःपरस्परंप्रवर्तिताइतितृतीयेनान्वयः । प्रसिद्धनदीरूपकमाह । भुजाएवअहयो जलसर्पायासुताः । पुरुषाणांशीर्षाण्येवकच्छपायासुताः । हताद्विपा -(- गजास्त -)- एवद्वीपाअंतर्वर्तितटानितथाहयाएवग्रहाग्राहास्तैश्चाकुलाःव्याप्ताः २६ कराऊरवश्चमीनायासुताः । नराणांकेशाए वशैवलंयासुताः धनूंष्येवतरंगाआयुधान्येवगुल्मास्तैश्चतैश्चसंकुलाःअच्छूरिकाश्चर्माणिचक्राणिवातान्येवावर्तास्तैर्भयानकाः । महामणीनांप्रवेकाउत्तमाआभरणानिचयथायथमश्मानःशर्कराश्चयासुताः २७ भीरूणांभयावहाः । मनस्विनांहर्षकर्यः किंचसंकर्षणेनापीति २८ तद्बलंक्षयंप्रणीतम् । अंगहेराजन् । अर्णववत्दुर्गमंभैरवंभयंकरंचयतःदुरंतपारं अंतोऽन्त्रतलंपारमवधिःदुःशब्दोनिषेधे विक्रमे णागाधंदेशतश्चनिरवधिकमित्यर्थः । किंच । मगधेंद्रेणचपालितंबलं यदेवंभूतंरामकृष्णयोःकर्मोक्तंतत्परंकेवलंतयोर्विक्रीडितंनतुपराक्रमः २९ नचैतदाश्चर्यमित्याह । स्थित्युद्भवांतमिति (स्थित्युत्प त्तिभंगंस्वलीलयैव समीहतेकरोतीत्यर्थः) तर्हिकिमित्याश्चर्यमिववर्णितंतत्राह । तथापीति । मर्त्यान्अनुविधत्तेअनुकरोतीति । मर्त्यानुविधस्तस्य ३०

॥ ३ ॥

श्लोकाः २३/३०

हरिःपरानीकपयोमुचांमुहुःशिलीमुखात्युल्बणवर्षपीडितम् ॥ स्वसैन्यमालोक्यसुरासुरार्चितंव्यस्फूर्जयच्छार्ङ्गशरासनोत्तमम् २३ गृह्णन्निषंगादथसंदधच्छरान्विकृष्य मुंचञ्शितबाणपूगान् ॥ निघ्नन्रथान्कुंजरवाजिपत्तीन्निरंतरंयद्वदलातचक्रम् २४ निर्भिन्नकुंभाःकरिणोनिपेतुरनेकशोश्वाःशरवृक्णकंधराः ॥ रथाहताश्वध्वजसूतनायकाःपदातयश्छिन्नभुजोरुकंधराः २५ संछिद्यमानद्विपदेभवाजिनामंगप्रसूताःशतशोऽसृगापगाः ॥ भुजाहयःपूरुषशीर्षकच्छपाहतद्विपद्वीपहयग्रहाकुलाः २६ करोरुमीनानरकेशशैवलाधनुस्तरंगायुधगुल्मसंकुलाः ॥ अच्छूरिकावर्तभयानकामहीमणिप्रवेकाभरणाश्मशर्कराः २७ प्रवर्तिताभीरुभयावहामृधेमनस्विनांहर्षकरीःपरस्परम् ॥ विनिघ्नतारीन्मुशलेनदुर्मदान्संकर्षणेनापरिमेयतेजसा २८ बलंतदंगार्णववदुर्गभैरवंदुरंतपारंमगधेंद्रपालितम् ॥ क्षयंप्रणीतंवसुदेवपुत्रयोर्विक्रीडितंतज्जगदीशयोःपरम् २९ स्थित्युद्भवांतंभुवनत्रयस्ययःसमीहतेऽनंतगुणःस्वलीलया ॥ नतस्यचित्रंपरपक्षनिग्रहस्तथापिमर्त्यानुविधस्यवर्ण्यते ३०

चूर्णिका

तदाश्रीकृष्णः स्वसैन्यंशत्रुसैन्यशरैःपीडितंदृष्ट्वा स्वशार्ङ्गधनुः उज्जृंभितवान् २३ ततःनिषंगात् शरान् गृहीत्वा गुणेसंधायतक्ष्णिबाणौघान् मुंचन्सन्रथगजाश्वपदातीन् जघान २४ तदागजाःनिर्भिन्नकुंभाःपेतुः अश्वाःछिन्नग्रीवाः रथाः हताश्वध्वजसूतनायकाः पेतुः पदातयःछिन्नभुजोरुग्रीवाः पेतुः २५ एवंछिन्नदेहानांतेषांअंगेभ्यः प्रसूताःरुधिरनद्यःपरस्परंमिलिताःआसन्तास्तुवहमानाः भुजाःसर्पाः शिर्षाणिकच्छपाः गजाःद्वीपानि अश्वाःनक्राः २६ कराउरवश्चमीनाः नृकेशाःशैवलानि धनूंषि तरंगाः आयुधानि गुल्माःचर्माणिआवर्ताः मणयःवालुकाः २७ ततः एवंसंकर्षणेनापितद्बलंक्षयंनीतं २८ तत् वसुदेवपुत्रयोःपरंविक्रीडनं नतुपराक्रमः २९ अहोयःत्रिभुवनस्यस्थित्यादिस्वलीलयैवविधत्ते तस्यशत्रुपक्षनिग्रहःचित्रंन ३०

॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंचजग्राहेति । हतान्यनीकानियस्य । अवशिष्टाअसवएवयस्यतंचतंच ३१ हताबहुशोअरातयोयेनतथाभूतमपिजरासंधंबध्यमानंवारयामास (तत्रहेतुः । तेनजरासंधेनयत्कार्यंभूभारभूतवीरान
यनरूपंतस्यचिकीर्षयेति) ३२ (लज्जयातपोवनंगंतुकामःपथिवारितः) कैः पवित्रार्थानिधर्मोपदेशपराणिपदानियेषुतैर्वाक्यैःनयनैर्नीतिभिःप्राकृतैर्लौकिकैरपि ३३ तत्रलौकिकन्यायमाहुः । स्वकर्मे
ति । यदुभिरल्पकैःकृत्वा तेमहतःपराभवःकेवलंकर्मबंधेनैवप्राप्तोऽतस्त्वयानलज्जितव्यमिति ३४ (शुकोक्तिःहतेष्विति) बार्हद्रथोजरासंधः ३५ मुकुंदोपियपावित्यनुषंगः । नक्षतंबलंयस्यसःतस्यैवामृ
तदृष्ट्याऽक्षतत्वप्रतिसंधानादितिभावः । निस्तीर्णःअनायासेनैवतीर्णःअरिबलार्णवोयेन । देवैःसाधुसाधुइत्यनुमोदितश्च ३६ प्रत्युद्गतैर्मथुरावासिभिर्जनैरुपसंगम्यमिलित्वा (विज्वरैर्निश्चिंतैः) ३७
तदाचप्रभौपुरंप्रविशतिसति शंखादयोनेदुः ३८ कथंभूतांपुरींतदाह । सिक्तमार्गामिति । ब्रह्मघोषेणवेदघोषेणनिर्घुष्टांनिनादिताम् । कौतुकेनोत्सवेन आसर्वतोबद्धानितोरणानियस्यां तां ३९ निची
यमानःविकीर्यमाणः प्रविवेशेति विपरिणतानुषंगः ४० आयोधनंरणभूमिः तत्ररथांवित्तंवीराणांभूषणं (प्रादिशत्ददौ) ४१ तावतिइतिच्छेदः । तावतिसति पराजयेवर्तमानेपीत्यर्थः अक्षौहिण्यो
बलं यस्य । सप्तदशकृत्वःसप्तदशवारान्युयुधे । अक्षिप्वन् क्षयंनिःयुः (अरिभिर्यदुभिस्त्यक्तःनतुधृतः) ४३ अष्टादशमेअष्टादशेसंग्रामेभाव्येतन्मध्येऽकस्मान्नारदेनप्रेरितःकालयवनः प्राप्तः ४४ आ
त्मसंमितान् स्वतुल्यान् (मत्वा नविद्यतेप्रतिस्पर्धीयस्यसोऽप्रतिद्वंद्वः) ४५

॥४॥

श्लोकाः ३१/४५

जग्राहविरथंरामोजरासंधंमहाबलम् ॥ हतानीकावशिष्टासुंसिंहःसिंहमिवौजसा ३१ बध्यमानंहतारातिंपाशैर्वारुणमानुषैः ॥ वारयामासगोविंदस्तेनकार्यचिकीर्षया ३२ समुक्तोलोकनाथाभ्यांव्रीडितोवीरसंमतः ॥ तपसेकृतसंकल्पोवारितःपथिराजभिः ३३ वाक्यैःपवित्रार्थपदैर्नयनैःप्राकृतैरपि ॥ स्वकर्मबंधःप्राप्तोयंयदुभिस्तेपराभवः ३४ हतेषुसर्वानीकेषुनृपोबार्हद्रथस्तदा ॥ उपेक्षितोभगवतामगधान्दुर्मनाययौ ३५ मुकुंदोप्यक्षतबलोनिस्तीर्णारिबलार्णवः ॥ विकीर्यमाणःकुसुमैस्त्रिदशैरनुमोदितः ३६ माथुरैरुपसंगम्यविज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयःसूतमागधबंदिभिः ३७ शंखदुंदुभयोनेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदंगानिपुरंप्रविशतिप्रभौ ३८ सिक्तमार्गांहृष्टजनांपताकाभिरलंकृताम् ॥ निर्घुष्टांब्रह्मघोषेणकौतुकाबद्धतोरणाम् ३९ निचीयमानोनारीभिर्माल्यदध्यक्षतांकुरैः ॥ निरीक्ष्यमाणःसस्नेहंप्रीत्युत्कलितलोचनैः ४० आयोधनगतंवित्तमनंतंवीरभूषणम् ॥ यदुराजायतत्सर्वमाहृतंप्रादिशत्प्रभुः ४१ एवंसप्तदशकृत्वस्तावत्यक्षौहिणीबलः ॥ युयुधेमागधोराजायदुभिःकृष्णपालितैः ४२ अक्षिण्वंस्तद्बलंसर्वंवृष्णयःकृष्णतेजसा ॥ हतेषुतेष्वनीकेषुत्यक्तोऽगादरिभिर्नृपः ४३ अष्टादशमसंग्रामआगामिनितदंतरा ॥ नारदप्रेषितोवीरोयवनःप्रत्यदृश्यत ४४ रुरोधमथुरामेत्यतिसृभिर्म्लेच्छकोटिभिः ॥ नृलोकेचाप्रतिद्वंद्वोवृष्णीन्मत्वात्मसंमितान् ४५

चूर्णिका

ततोरामेणविरथंजरासंधंवारुणैःपाशैर्बध्यमानंदृष्ट्वागोविंदःवारयामास ३१ ३२ एवंलोकनाथाभ्यांमुक्तःसःलज्जितोभूत्वा तपसे कृतसंकल्पःसः पथि नीतिवाक्यैः राजभिर्वारि
तः सन् दुर्मनाः मागधान्ययौ ३३ ३४ ३५ ततः अक्षीणबलः कृष्णः देवैःपुष्पैःविकीर्यमाणः ३६ प्रत्युद्यतैःमथुरास्थजनैः मिलित्वास्वलंकृतांमथुरांप्रविश्यरणगतंवित्तंयदुरा
जायददौ३७ ३८ ३९ ४० ४१एवंसप्तदशवारान्युयुधे४२ ४३अष्टादशसंग्रामेभाव्येसतितन्मध्ये नारदप्रेषितः कालयवनः एत्य ४४तिसृभिर्म्लेच्छकोटिभिः मथुरांरुरोध ४५

॥४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥५॥

वृजिनंदु॰खंउभयतोयवनाज्जरासंधाच्च ४६ तदाहद्वयेन । निरुंधेरुणद्धि ४७ अस्यअनेन (सहवंधून्यदून्) ४८ (द्विपददुर्गमंमानवानांगंतुमशक्यं) ४९ (समुद्र) समुद्रमध्ये दुर्गं (अंतः) तन्मध्येनगरं कृत्स्नाद्भुतं (कृत्स्नानिअद्भुतानियत्रतत्) सर्वाश्चर्यमयंअचीकरत्कारयामास (त्वष्ट्रा) ५०(यत्रदुर्गेनगरेच) त्वष्टाविश्वकर्मातदीयं (विज्ञानांशिल्पंदृश्यते तत्स्रष्टनगरांतरापेक्षयात्र) शिल्पनैपुणंच क्रियाकौशलंहिप्रसिद्धम् । तदाहसार्धैस्त्रिभि॰रथ्येति । रथ्याराजमार्गाः पुरतः । वीथ्यउपमार्गाः पश्चिमतः मार्गस्योभयतोपिचत्वराण्यंगणानि । तन्मध्येकोष्ठाः ततोप्यंतः सुवर्णभवनानि । तदुपरिस्फाटिकाट्टालिकाः तदुपरिहेमकुंभाइतिवहुभूमिकं यथावास्तु वास्तु गृहादिनिर्माणस्थानंतदनतिक्रम्यानिर्मितम् ५१ सुराणांद्रुमालताश्चयेषुतान्युद्यानानिविचित्रोपवनानिचतैरन्वितंहेभमयानिशृंगाणियेषांतैर्दिविस्पृग्भिरत्युच्चैः स्फाटिकाअट्टालाउपरिभूमिकागोपुराणिचद्वाराणितैर्निर्मितमित्युत्तरेणान्वयः ५२ राजतारकुटैः रजतंचआरकुटंचपीतलोहंताभ्यांनिर्मिताः राजतारकुटास्तैः कोष्ठैः अश्वशालान्नशालादिभिः । कथंभूतैः हेमकुंभैरलंकृतैः । तथारत्नकूटैः पद्मरागादिरत्नशिखरैः हैमैः सौवर्णैः महामरकतमयानिस्थलानियेषुतैर्गृहैश्च ५३ किंच नगरेगृहादौचवास्तोष्पतीनां देवताविशेषाणांचगृहैः वलभीभिश्चंद्रशालिकाभिश्चनिर्मितं । यदुदेवगृहैः राजगृहैरुल्लसच्छोभमानं ५४ (सुधर्मां देवसभां ।) पारिजातं चप्राहिणोत् प्रस्थापयामासेतिशुकपरीक्षित्संवादात्पूर्वभावित्वात्भूतनिर्देशः । मर्त्यधर्मैःक्षुत्पिपासादिभिः षडूर्मिभिः ५५ निधिपतिः कुबेरः अष्टकोशान्नानिधीन् । पद्मश्चैवमहापद्मोमत्स्यकूर्मौतथौदकः । नीलोमुकुंदःशंखश्चनिधयोऽष्टौप्रकीर्तिताः । इतिप्रसिद्धान् । निजोदयान्निजविभूतीः ५६

श्लोकाः ४६/५६

तंदृष्ट्वाऽचिंतयत्कृष्णःसंकर्षणसहायवान् ॥ अहोयदूनांवृजिनंप्राप्तंह्युभयतोमहत् ४६ यवनोयंनिरुंधेऽस्मानद्यतावन्महाबलः ॥ मागधोप्यद्यवाश्वोवापरश्वोवाऽऽगमिष्यति ४७ आवयोर्युध्यतोरस्ययद्यागंताजरासुतः ॥ बंधून्वधिष्यत्यथवानेष्यतेस्वपुरंबली ४८ तस्मादद्यविधास्यामोदुर्गंद्विपददुर्गमम् ॥ तत्रज्ञातीन्समाधाययवनंघातयामहे ४९ इतिसंमंत्र्यभगवान्दुर्गंद्वादशयोजनम् ॥ अंतःसमुद्रेनगरंकृत्स्नाद्भुतमचीकरत् ५० दृश्यतेयत्रहित्वाष्ट्रंविज्ञानंशिल्पनैपुणम् ॥ रथ्याचत्वरवीथीभिर्यथावास्तुविनिर्मितम् ५१ सुरद्रुमलतोद्यानविचित्रोपवनान्वितम् ॥ हेमशृंगैर्दिविस्पृग्भिःस्फाटिकाट्टालगोपुरैः ५२ राजतारकुटैःकोष्ठैर्हेमकुंभैरलंकृतैः ॥ रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ५३ वास्तोष्पतीनांचगृहैर्वलभीभिश्चनिर्मितम् ॥ चातुर्वर्ण्यजनाकीर्णंयदुदेवगृहोल्लसत् ५४ सुधर्मांपारिजातंचमहेंद्रःप्राहिणोद्धरेः ॥ यत्रचावस्थितोमर्त्योमर्त्यधर्मैर्नयुज्यते ५५ श्यामैककर्णान्वरुणोहयाञ्शुक्लान्मनोजवान् ॥ अष्टौनिधिपतिःकोशाल्लोकपालोनिजोदयान् ५६

चूर्णिका ॥५॥

तंदृष्ट्वा रामकृष्णौअचिंतयताम् अहोयदूनांउभयतोदुःखंप्राप्तं ४६ तदाह अद्य श्वः परश्वो वा मागधः एष्यति ४७ अनेनआवयोर्युध्यतोः सतोः जरासुतः यदिआगमिष्यतितर्हिबंधून्वधिष्यति वास्वपुरंनेष्यति ४८ तस्मात् अद्यद्विपददुर्गमंदुर्गं कृत्वा तत्रज्ञातीन्संस्थाप्ययवनंघातयामहे ४९ ॥ ॥ इतिसंमंत्र्यभगवान्समुद्रमध्येद्वादशयोजनंदुर्गंतन्मध्येसर्वाश्चर्यमयंचातुर्वर्ण्यजनाकीर्णराजगृहैरुल्लसत्नगरंकारयामास ५० यत्रत्वष्टुःक्रियाकौशलंदृश्यते ५१ ५२ ५३ ५४ ततःइंद्रःहरेः सुधर्मांसभांपारिजातंचप्राहिणोत् ५५ वरुणः श्यामैककर्णान् अश्वान् कुबेरःअष्टौनिधीन् अन्येलोकपालाः निजविभूतीः ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अन्येचसिद्धादयोभगवतास्वाधिकारसिद्धयेयद्यदाधिपत्यंदत्तमासीत्तत्सर्वंप्रत्यर्पयामासुरिति ५७ यथाकालयवनोनवेत्तिनचासौजनःतथायोगप्रभावेनतत्रसर्वजनंनीत्वा त्वमत्रस्थित्वाप्रजाः पालया
हं पलायिष्ये इतिरामेणसमनुमंत्रितः कृतानुमंत्रइत्यर्थः ५८ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंदेटीकायांपंचाशत्तमोध्यायः ५० ॥ ॥ छ ॥ ॥ एकपंचाशत्तमेऽहन्मुचुकुंदंदशाहारिः ।
यवनंमुचुकुंदेनस्तुतःसन्नन्वकंपत ॥ १ ॥ यवनेंद्रसुतात्कालयवनाद्यदुभीषणात् । हारिर्हरगिरःस्वैरंपालनयापलायत ॥ २ ॥ यदागार्ग्यःश्यालेनषंढइत्युक्तस्तदायादवैरुपहासितेक्रुद्धोसौश्रीमहेशंप्रसा
द्ययदुभीषणंपुत्रंलब्धवान्ततश्चयवनेंद्रेणस्वक्षेत्रेपुत्रोत्पादनाय प्रार्थितोगार्ग्यः कालयवनमजीजनदितिपुराणप्रसिद्धं । पुरद्वाराद्विनिष्क्रांतंउज्जिहानंउद्गच्छंतं १ (दर्शनीयतमं अतिशयेनसुंदरं । भ्राज
त्कौस्तुभआमुक्तः पिनद्धोयत्रतादृशीकंधरायस्य । यद्वा भ्राजताकौस्तुभेनअमुक्तानत्यक्ताग्रीवायस्येति) २ नित्यप्रमुदितमितिमुखारविंदविशेषणम् (विभ्राणंदधततंविलोक्येति) ३ ४ नारदप्रोक्तैरेतै
॥ ६ ॥ र्लक्षणैरयंपुमान्वासुदेवएवनान्योभवितुमर्हति । अयंचनिरायुधः अतोनेनपद्भ्यामेवचलन्निरायुधोहंयोत्स्यामि ५ इतिनिश्चित्यतंपराङ्मुखंप्राद्रवंतंअन्वधावदित्यन्वयः ६ आत्मानंहस्तप्राप्तमिवदर्शयताद्दू
रमाद्रिकंदरंसनीतइत्यन्वयः७ (एनंहरिंनप्रपानाधार्षीदित्यर्थः) अहताशुभः अक्षीणकर्मा ८ सयवनोपिप्रविष्टः (तत्रगिरिगुहायांअन्यंकंचननरंददर्श ९ तंशयानमच्युतंमत्वापदासम्यगताडयदिति १०

श्लोकाः ५७/१०

यद्यद्भगवतादत्तमाधिपत्यंस्वसिद्धये ॥ सर्वंप्रत्यर्पयामासुर्हरौभूमिगतेनृप ५७तत्रयोगप्रभावेननीत्वासर्वजनंहरिः ॥ प्रजापालेनरामेणकृष्णःसमनुमंत्रि
तः ॥ निर्जगामपुरद्वारात्पद्ममालीनिरायुधः ५८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेदुर्गनिवेशनंनामपंचाशत्तमोध्यायः५० ॥ ॥ छ ॥
॥ श्रीशुकउवाच ॥ तंविलोक्यविनिष्क्रांतमुज्जिहानमिवोडुपम् ॥ दर्शनीयतमंश्यामंपीतकौशेयवाससम् १ श्रीवत्सवक्षसंभ्राजत्कौस्तुभामुक्त
कंधरम् ॥ पृथुदीर्घचतुर्बाहुंनवकंजारुणेक्षणम् २ नित्यप्रमुदितंश्रीमत्सुकपोलंशुचिस्मितम् ॥ मुखारविंदंबिभ्राणंस्फुरन्मकरकुंडलम् ३ वासुदेवोह्यय
मितिपुमान्श्रीवत्सलांच्छनः ॥ चतुर्भुजोरविंदाक्षोवनमाल्यतिसुंदरः, ४ लक्षणैर्नारदप्रोक्तैर्नान्योभवितुमर्हति ॥ निरायुधश्चलन्पद्भ्यांयोत्स्येऽनेननिरा
युधः ५ इतिनिश्चित्ययवनःप्राद्रवंतंपराङ्मुखम् ॥ अन्वधावज्जिघृक्षुस्तंदुरापमपियोगिनाम् ६ हस्तप्राप्तमिवात्मानंहरिणासपदेपदे ॥ नीतोदर्शयता
दूरंयवनेशोद्रिकंदरम् ७ पलायनंयदुकुलेजातस्यतवनोचितम् ॥ इतिक्षिपन्ननुगतोनैनंप्रापाहताशुभः ८ एवंक्षिप्तोपिभगवान्प्राविशद्गिरिकंदरम् ॥ सो
पिप्रविष्टस्तत्रान्यंशयानंददृशेनरम् ९ नन्वसौदूरमानीयशेतेमामिहसाधुवत् ॥ इतिमत्वाच्युतंमूढस्तंपदासमताडयत् १०

चूर्णिका

अन्येचसिद्धादयः भगवतास्वाधिकारसिद्धयेयद्यदाधिपत्यंदत्तं तत्सर्वं प्रत्यर्पयामासुः ५७ ततः श्रीकृष्णः योगप्रभावेणतत्रसर्वजनंनीत्वारामेणसह संमंत्र्यनिरायुधः सन्पुरद्वा
रान्निर्जगाम ५८ ॥ ॥ इतिदशमेपंचाशत्तमः ५० ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ ततःपुरद्वारान्निर्गतंश्यामंश्रीवत्सवक्षसंपीतांबरंचतुर्भुजंश्रीकृष्णंवीक्ष्य
नारदोक्तैर्लक्षणैः अयंवासुदेवइतिज्ञात्वाअयंनिरायुधः अतोहमपिनिरायुधःसन् अनेनसहयोत्स्यामीतिविनिश्चित्य सः यवनः प्राद्रवंतंश्रीकृष्णंजिघृक्षुः सन्अन्वधावत् १ २ ३ ॥ ६ ॥
४ ५ ६ ततःआत्मानंहस्तप्राप्तमिवदर्शयताहरिणादूरंगिरेः गुहांनीतः ७ ततःतेनयवनेनयदुकुले जातस्यतव पलायनंनोचितम् ८ एवंक्षिप्तोपिकृष्णःगुहांप्राविशत् सोपितद
नुगुहांप्रविष्टः सन् तत्रअन्यंनरंशयानंदृष्ट्वा ९ कृष्णएवायं इतिमत्वातंपदाअताडयत् १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(तंयवनं) ११ तस्यक्रुद्धस्यदृष्टिपातेनसंदीप्तोयः स्वदेहजोग्निस्तेन १२ यवनमर्दयतिहिनरतीतियवनार्दनः तथासकस्यवंश्यः किंवीर्यः कीदृक्प्रभाववान् किंतेजः कस्यवीर्यं कस्यपुत्रइत्यर्थः । शि
श्येअशयिष्ट १३ सत्यःसंगरोयुद्धंप्रतिज्ञावायस्यसः १४ (तद्रक्षांतेपांदेवानांरक्षणं) १५ (तेदेवा -)- गुहंकार्तिकेयंस्वःपालंस्वर्गपालकंसेनान्यम् १६ (तेतवसर्वेकामाविषयाः) उज्झितास्त्यक्तागता
इत्यर्थः १७ किंच सुताइति । तुल्यकालीयाःत्वत्समानकालीनाःकालिताविचालिताः १८ मत्प्रजाःकोन्यःकालयेदितिचेदतआहुः । कालइति । कालयतेइतस्ततश्चालयति १९ तस्यकैवल्यस्य (ई
श्वरःस्वामी) २० (निद्रांयाचितैर्देवैर्दत्तयातया) गुहायांप्रविष्टःशेतेस्म २१ (वरांतरंचतैर्दत्तंतदाहस्वपंतमिति । निद्रांप्राप्तंत्वाम्) २२ (प्रकृतमाहयवनइति) २३ २४ २५

सउत्थायचिरंसुप्तःशनैरुन्मील्यलोचने ॥ दिशोविलोकयन्पार्श्वेतमद्राक्षीदवस्थितम् ११ सतावत्तस्यरुष्टस्यदृष्टिपातेनभारत ॥ देहजेनाग्निनादग्धोभस्म
सादभवत्क्षणात् १२ ॥ राजोवाच ॥ कोनामसपुमान्ब्रह्मन्कस्यकिंवीर्यएवच ॥ कस्माद्गुहांगतःशिश्येकिंतेजोयवनार्दनः १३ ॥ श्रीशुकउवाच ॥ सइ
क्ष्वाकुकुलेजातोमांधातृतनयोमहान् ॥ मुचुकुंदइतिख्यातोब्रह्मण्यःसत्यसंगरः १४ सयाचितःसुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यःपरित्रस्तैस्तद्रक्षांसो
ऽकरोच्चिरम् १५ लब्ध्वागुहंतेस्वःपालंमुचुकुंदमथाब्रुवन् ॥ राजन्विरमतांकृच्छ्राद्भवान्नःपरिपालनात् १६ नरलोकंपरित्यज्यराज्यंनिहतकंटकम् ॥ अ
स्मान्पालयतोवीरकामास्तेसर्वउज्झिताः १७ सुतामहिष्योभवतोज्ञातयोऽमात्यमंत्रिणः ॥ प्रजाश्चतुल्यकालीयानाधुनासंतिकालिताः १८ कालोबली
यान्बलिनांभगवानीश्वरोऽव्ययः ॥ प्रजाःकालयतेक्रीडन्पशुपालोयथापशून् १९ वरंवृणीष्वभद्रंतेऋतेकैवल्यमद्यनः ॥ एकएवेश्वरस्तस्यभगवान्विष्णु
रव्ययः २० एवमुक्तःसवैदेवानभिवंद्यमहायशाः ॥ अशयिष्टगुहाविष्टोनिद्रयादेवदत्तया २१ स्वपंतंयस्तुमध्येवैबोधयेत्त्वामचेतनम् ॥ सत्वयादृष्टमात्र
स्तुभस्मीभवतुतत्क्षणात् २२ यवनेभस्मसान्नीतेभगवान्सात्वतर्षभः ॥ आत्मानंदर्शयामासमुचुकुंदायधीमते २३ तमालोक्यघनश्यामंपीतकौशेयवा
ससम् ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभेनविराजितम् २४ चतुर्भुजंरोचमानंवैजयंत्याचमालया ॥ चारुप्रसन्नवदनंस्फुरन्मकरकुंडलम् २५

चूर्णिका

ततः सः नरः उत्थायनेत्रेउन्मील्यपार्श्वेतंयवनं अपश्यत् ११ ततः क्रुद्धस्यतस्यदेहजेनाग्निना भस्मसात् अभवत् १२ ॥ राजोवाच ॥ हेब्रह्मन्सः पुमान् कः कुतः गुहांशिश्येतत्कथय १३ ॥ श्रीशुकउवाच ॥ हेराजन्सः इक्ष्वाकुकुलजस्यमांधातुः पुत्रः मुचुकुंदइतिख्यातः १४ सः देवैः स्वरक्षणेप्रार्थितः सन्चिरंरक्षांअकरोत् १५ ततः तेदेवाः गुहंसेनान्यंलब्ध्वामुचुकुंदमूचुः हेराजन् नः पालनात् विरम्यतां १६ अस्मान्पालयतः तवसर्वेकामाः उज्झिताः १७ तवस्त्रीपुत्रादयोपि अधुनानसंति १८ १९ तवभद्रमस्तुवरंवृणीष्व २० एवं देवैरुक्तः मुचुकुंदः तान्नत्वागुहांप्रविष्टः सन्देवदत्तयानिद्रयाअशयिष्ट २१ मुचुकुंदंप्रतिनिद्रांदत्वा ॥ देवाऊचुः ॥ हेराजन्सुप्तंत्वांमध्येयः बोधयेत्सः त्वयादृष्टमात्रः सन्भस्मीभवतु २२ एवंयवनेभस्मीभूतेसातिहरिः मुचुकुंदायआत्मानंअदर्शयत् २३ तंचतुर्भुजंश्यामंश्रीवत्सकौस्तुभादिभिर्विरोचमानं दृष्ट्वा शनैः उवाच २४ २५

१ 'निद्रामेवततोवव्रेसराजाश्रमकर्शितः । यःकश्चिन्ममनिद्रायाभंगंकुर्यात्सुरोत्तमाः । सहिभस्मीभवेदाशुतथोक्तैश्चसुरैस्तदा' इत्यधिकंमूलेमु०पु० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अपीच्यंसुंदरंवयोयस्यतम्) २६ धर्षितःअभिभूतः । दुर्धर्षअधृष्यम् २७ विपिनेअरण्येतत्रापिगिरेर्गह्वरेदुःप्रवेशस्थाने । तत्रापिउरवःकंटकायत्रतादृशेपद्मपलाशसदृशाभ्यांपद्भ्यांविचरति २८ तेजोमूर्तिःप्रभावोदीप्तिर्वा २९ सर्वत्रापरितोषादाह । मन्यइति । पुरुषर्षभंश्रीविष्णुंगुहाध्वांतंअंतस्तमः ३० (अव्यलीकंनिष्कपटंश्रोतुमिच्छताम्) ३१ (युष्मद्गोत्रादिकंतावत्कथ्यतामितिचेदाह) वयंत्विति । वंश्याभिप्रायेणबहुवचनम् ऐक्ष्वाकाःइक्ष्वाकोर्वंश्याः । तेष्वहंमुचुकुंदइतिप्रोक्तःयुवनाश्वोमांधातुःपिताअतोमांधातायौवनाश्वः (तस्यात्मजः)३२ शयेस्वपिमि । सुप्तोस्मीत्यर्थः ३३ (अमित्रशातनशत्रुनिबर्हण । अनेनभस्मीभूतःसप्रायेणतवशत्रुःस्यादतःस्वपाप्मनाभस्मीकृतइतिसूचितम्) ३४ (अविषह्येणतेजसाहतमोजोनेत्रपाटवंयेषांतेवयम्) ३५ ३६ (जन्माभिधानानिवासुदेवइत्यादीनि । कर्माभिधानानिकंसप्रमथनइत्यादीनि तेषांअनंतत्वात्नत्वसार्वज्ञात्)३७क्वचित्कदाचित्कश्चित् (अनेकजन्मभिः)पचपिरजांसिविममेगणितवान्तथापिजन्मानिगुणादीनिचनविमिमीते ३८ ३९ ४० ४१

श्लोकाः २६/४१

प्रेक्षणीयंनृलोकस्यसानुरागस्मितेक्षणम् ॥ अपीच्यवयसंमत्तमृगेंद्रोदारविक्रमम् २६ पर्यपृच्छन्महाबुद्धिस्तेजसातस्यधर्षितः ॥ शंकितःशनकैराजादुर्धर्षमिवतेजसा २७ ॥ मुचुकुंदउवाच ॥ कोभवानिहसंप्राप्तोविपिनेगिरिगह्वरे ॥ पद्भ्यांपद्मपलाशाभ्यांविचरस्युरुकंटके २८ किंस्वित्तेजस्विनांतेजोभगवान्वाविभावसुः ॥ सूर्यःसोमोमहेंद्रोवालोकपालोऽपरोपिवा २९ मन्येत्वांदेवदेवानांत्रयाणांपुरुषर्षभम् ॥ यद्बाधसेगुहाध्वांतंप्रदीपःप्रभयायथा ३० शुश्रूषतामव्यलीकमस्माकंनरपुंगव ॥ स्वजन्मकर्मगोत्रंवाकथ्यतांयदिरोचते ३१ वयंतुपुरुषव्याघ्रऐक्ष्वाकाःक्षत्रबंधवः ॥ मुचुकुंदइतिप्रोक्तोयौवनाश्वात्मजःप्रभो ३२ चिरप्रजागरश्रांतोनिद्रयोपहतेंद्रियः ॥ शयेऽस्मिन्विजनेकामंकेनाप्युत्थापितोऽधुना ३३ सोपिभस्मीकृतोनूनमात्मीयेनैवपाप्मना ॥ अनंतरंभवान्श्रीमान्लक्षितोऽमित्रशातन ३४ तेजसातेऽविषह्येणभूरिद्रष्टुंनशक्नुमः ॥ हतौजसोमहाभागमाननीयोसिदेहिनाम् ३५ एवंसंभाषितोराज्ञाभगवान्भूतभावनः ॥ प्रत्याहप्रहसन्वाण्यामेघनादगभीरया ३६ ॥ श्रीभगवानुवाच ॥ जन्मकर्माभिधानानिसंतिमेंऽगसहस्रशः ॥ नशक्यंतेनुसंख्यातुमनंतत्वान्मयापिहि ३७ क्वचिद्रजांसिविममेपार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानिनमेजन्मानिकर्हिचित् ३८ कालत्रयोपपन्नानिजन्मकर्माणिमेनृप ॥ अनुक्रमंतोनैवांतंगच्छंतिपरमर्षयः ॥ तथाप्यद्यतनान्यंगशृणुष्वगदतोमम ३९ विज्ञापितोविरिंचेनपुराहंधर्मगुप्तये ॥ भूमेर्भारायमाणानामसुराणांक्षयायच ४० अवतीर्णोयदुकुलेगृहआनकदुंदुभेः ॥ वदंतिवासुदेवेतिवसुदेवसुतंहिमाम् ४१

चूर्णिका

२६ २७ कः त्वंइहसंप्राप्तः २८ त्वंसूर्यःकिंवा अग्निः चंद्रः इंद्रोलोकपालोवात्वांब्रह्मादीनांमध्येविष्णुंमन्ये यतः गुहाध्वांतंनाशयसि २९ ३० अतः शुश्रूषतांनः स्वजन्मकर्माणिवद ३१ अहंतुइक्ष्वाकुकुलोत्पन्नस्ययौवनाश्वस्यपुत्रः मुचुकुंदः अस्मि ३२ किंच अहंचिरप्रजागरश्रांतः सन् अस्यांशये अधुनाकेनापिउत्थितः ३३ सोपिभस्मीकृतः अनंतरंत्वांअपश्यं ३४ इदानींत्वत्तेजसात्वांद्रष्टुंनशक्नोमि ३५ एवमुक्तोभगवानाह ३६ श्रीभगवानउवाच मेजन्मकर्माणिसहस्रशः संति अतः संख्यातुंनशक्यंते ३७ ३८ तथापि अद्यतनानि नामानिशृणुष्व ३९ पुराब्रह्मणाभूभारहरणार्थंधर्मगुप्तयेचप्रार्थितोहं ४० यदुकुलेवसुदेवगृहेजातः अतोमांवासुदेवइतिवदंति ४१ ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तेतिग्मचक्षुषानिमित्तेनमयैवदग्धः (सतःसाधून्द्विषंतीतिसद्विषः) ४२ (प्रचुरंबहुप्रार्थितोहम् ४३ (शोचितुम्) अपूर्णोहमितिशोकंकर्तुं यद्वा अन्यैर्दत्तेषुक्षीयमाणेषुयथाशोचतिनैवंमांप्रपन्नःमद्दत्तवराणामक्षयत्वादितिभावः ४४ अष्टाविंशतिमेयुगेभगवानवतरिष्यतीतिवृद्धगर्गवाक्यमनुस्मरन्नित्यर्थः ४५ त्वद्भक्तिरेवकेवलंदुर्लभाकामास्तु तुच्छा नवरंणयोग्या इत्याशयेनाभक्तानांसंसारमष्टभिःप्रपंचयन्स्तौति । विमोहितइति । हेईशयोषित्पुरुषश्चेतिद्विविधोप्ययंजनःत्वदीययामाययाविमोहितःअतोऽनर्थदृक्अर्थंपरमार्थंपरमसुखरूपंत्वांनपश्यतीतितथा । अतस्त्वांनभजाति । किंतुपरस्परंवंचितोपिसन्सुखेच्छयादुःखानामेवप्रभवोयेषुतेषुगृहेष्वेवसज्जतइति ४६ किंवकामसुखंसूकरादिष्वपिसंभवति । भगवद्भजनंतुनमानुष्यव्यतिरेकेणेतिमानुषत्वंप्राप्य त्वामभजन्नतिमूढइत्याह लब्ध्वेति । अत्रकर्मभूमौअव्यंगं अविकलांगम् । किंचअसतिविषयसुखेमतिर्यस्यसः । गृहमेवांधकूपस्तस्मिन्पतितःयथापशुस्तृणलुब्धोंऽधकूपेपततीति ४७ नकेवलमस्य जनस्येयंगतिः । किंतुममापितथैवेत्याहममेति । मर्त्येशरीरेआत्मबुद्धिर्यस्यतस्यममअतएवसुतादिष्वासज्जमानस्य (राज्यसंपदांउन्नद्धोमदोयस्यतस्य) ४८ उन्नद्धमदत्वंप्रपंचयति । कलेवरइति । घटकुड्यादिसदृशेअनात्मनिदेहेयतएवंदुर्मदोऽभवंअतोममैषकालोनिष्फलोगतइति (त्वात्वांअगणयन्)४९त्वामगणयंतंत्वमाक्रमसीत्याह । प्रमत्तमिति । प्रमत्तंअनवहितंत्वामंतकमविगणय्यदेहादिष्वासक्तमितियावत् । कुतःप्रमत्तंइतिकृत्यचिंतयाएवमेवंकरणीयमितिमनोरथपरंपरया । मनोरथेभ्योपिविषयेषुलालसंउत्सुकंप्राप्तेपिपुनःप्रवृद्धोलाभस्तृष्णायस्यतंअंतकस्त्वमभिपद्यसेअभिभवसीत्यर्थः । क्षुधासृक्किणीलेलिहानोऽहिराखुंमुषकमिवेति ५०

१९॥

श्लोकाः ४२/५०

कालनेमिर्हतःकंसःप्रलंबाद्याश्चसद्विषः ॥ अयंचयवनोदग्धोराजंस्तेतिग्मचक्षुषा ४२ सोहंतवानुग्रहार्थंगुहामेतामुपागतः ॥ प्रार्थितःप्रचुरंपूर्वंत्वयाहंभक्तवत्सलः ४३ वरान्वृणीष्वराजर्षेसर्वान्कामान्ददामिते ॥ मांप्रपन्नोजनःकश्चिन्नभूयोर्हतिशोचितुम् ४४ ॥ श्रीशुकउवाच ॥ इत्युक्तस्तंप्रणम्याह मुचुकुंदोमुदान्वितः ॥ ज्ञात्वानारायणंदेवंगर्गवाक्यमनुस्मरन् ४५ ॥ मुचुकुंदउवाच ॥ विमोहितोयंजनईशमाययात्वदीययात्वांनभजत्यनर्थदृक् ॥ सुखायदुःखप्रभवेषुसज्जतेगृहेषुयोषित्पुरुषश्चवंचितः ४६ लब्ध्वाजनोदुर्लभमत्रमानुषंकथंचिदव्यंगमयत्नतोऽनघ ॥ पादारविंदंनभजत्यसन्मतिर्गृहांधकूपेपतितोयथापशुः ४७ ममेष्टकालोऽजितनिष्फलोगतोराज्यश्रियोन्नद्धमदस्यभूपतेः ॥ मर्त्यात्मबुद्धेःसुतदारकोशभूष्वासज्जमानस्यदुरंतचिंतया ४८ कलेवरेऽस्मिन्घटकुड्यसंनिभेनिरूढमानोनरदेवइत्यहम् ॥ वृतोरथेभाश्वपदात्यनीकपैर्गांपर्यटंस्त्वागणयन्सुदुर्मदः ४९ प्रमत्तमुच्चैरितिकृत्यचिंतयाप्रवृद्धलोभंविषयेषुलालसम् ॥ त्वमप्रमत्तःसहसाऽभिपद्यसेक्षुल्लेलिहानोऽहिरिवाखुमंतकः ५०

चूर्णिका

मयाकालनेमिर्हतः कंसः प्रलंबाद्याश्चसद्विषःअयंयवनोपितेचक्षुषादग्धः ४२ सोहंतव अनुग्रहायगुहांप्राप्तः ४३ वरान्वृणीष्वभद्रंते सर्वान्कामान्ददामितेमांप्राप्तोजनः पुनःशोचितुंनार्हति ४४ ॥ श्रीशुकउवाच ॥ इत्युक्तः मुचुकुंदः तंनारायणंज्ञात्वाप्रणम्याह ४५ ॥ मुचुकुंदउवाच ॥ हेभगवन् अयंजनः त्वन्मायामोहितः सन् त्वांन भजते ४६ किंच अत्रमानुषंजन्मप्राप्यतव पादकमलंनभजति यः सः पशुरेव ४७ किंच श्रीमदांधस्यगृहासक्तस्यममकालः निष्फलोगतः ४८ किंच अस्मिन्शरीरेराजाहंइत्यभिमानेनत्वांअविगणय्यविषयेषुलालसंमांअंतकस्त्वंअभिभवसि ४९ ५० ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच कालात्मनात्वयाभिपन्नोदेहएवंभवतीत्याह पुरेति हेमालंकृतैर्हस्तिभिर्वाचरन् यः पुरा सएवांते श्वसृगालादिभिर्भक्षितोविट्संज्ञितः तैरभक्षितःकृमिसंज्ञितः दग्धो भस्मसंज्ञितो भवतीति बुद्ध्या वि
चार्यैवंभूतेदेहममतांकुर्वतोजनाहरिनाराधयंतितेआत्मनिशत्रुभूताज्ञेयाःसततंयतः। "योनेःसहस्राणिबहूनिगत्वादुःखेनलब्ध्वापिचमानुषत्वम्। सुखावहंयेनभजंतिविष्णुंतेवैमनुष्यात्मनिशत्रुभूता" इति५१
किंचअंतकप्राप्तेःप्रागपिदिग्विजयिनोराज्ञोपिपारतंत्र्यंदुःखंतदवस्थमेवेत्याह । निर्जित्येति । अभूतविग्रहः अविद्यमानसंग्रामःपूर्वंयेसमास्तैःराजभिर्वंदितोपिमिथुनीभावसुखमेवपरंयेषुतेषुयोषितांगृहेषुक्री
डामृगइवइतस्ततोनीयतेयोषिद्भिः५२किंच तत्रातितृष्णाकुलस्पनभोगक्षणःकश्चिदस्तीत्याह । करोतीति तपसिअधःशयनब्रह्मचर्यादौसुनिष्ठितःपुनःस्वराट्इंद्रःस्यामिति यद्वा जन्मांतरेष्वेवमेवचक्रवर्ती
स्यामिति (संकल्पेनतपोनियमापेक्षयानिवृत्तभोगः ददत्दानंकुर्वन्नसुखायकल्पते । परलोकस्याप्येवमेवकर्मजन्यत्वात्तत्रापिएवमेवनसुखायकल्पतइतिविषयकामनादुःखदैवेतिभावः ५३ तदेवमष्ट
भिःश्लोकैरीशबहिर्मुखानांसंसारंप्रपंच्यभक्त्यातन्निवृत्तिक्रममाह । भवापवर्गइति । भोअच्युत भ्रमतःसंसारतोजनस्ययदत्वनुग्रहेण (भवापवर्गः) भवस्यबंधस्यापवर्गअंतोभवेत्प्राप्तकालःस्यादित्य
र्थः तर्हितदासतांसंगमोभवेत् । यदाचसत्संगमोभवेत्तदैवसर्वसंगनिवृत्त्याकार्यकारणनियंतरित्वयिभक्तिर्भवतिततोमुच्यतइत्यर्थः ५४ ममतुसत्संगमात्पूर्वमेवयोराज्यादिसंगविच्छेदोजातः सोयंत्वया
महाननुग्रहःकृतइत्याहमन्यइति (हेईश) तेत्वया । साधुभिर्विवेकिभिःतपसेवनंप्रवेष्टुमिच्छद्भिः स्वयंत्यक्तुमलभमानैः (योराज्यानुबंधापगमः) प्रार्थ्यते (एकचर्ययाएकाकिप्रस्थानेन । अखंडभूमि
पैः सार्वभौमैः) ५५ तदेवंविषयसेवामार्गंभगवत्सेवामार्गंचविविच्यवरान्वृणीष्वेतियदुक्तंतत्रोत्तरमाह नकामयइति । अकिंचनानिवृत्ताभिमानास्तैः (प्रार्थ्यतमात् त्वपादसेवनादन्यंवरं । क) आर्यो
विवेकी (आत्मबंधनंविषयलक्षणंवरम्) ५६

॥१०॥

श्लोकाः ५१/५६

पुरारथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वानरदेवसंज्ञितः ॥ सएवकालेनदुरत्ययेनतेकलेवरोविट्कृमिभस्मसंज्ञितः ५१ निर्जित्यदिक्चक्रमभूतविग्रहोवरासनस्थः
समराजवंदितः ॥ गृहेषुमैथुन्यसुखेषुयोषितांक्रीडामृगःपूरुषईशनीयते ५२ करोतिकर्माणितपःसुनिष्ठितोनिवृत्तभोगस्तदपेक्षयाददत् ॥ पुनश्चभूयेयमहं
स्वराडितिप्रवृद्धतर्षोनसुखायकल्पते ५३ भवापवर्गोभ्रमतोयदाभवेज्जनस्यतर्ह्यच्युतसत्समागमः ॥ सत्संगमोयर्हितदैवसद्गतौपरावरेशेत्वयिजायतेमतिः
५४ मन्येममानुग्रहईशतेकृतोराज्यानुबंधापगमोयदृच्छया ॥ यःप्रार्थ्यतेसाधुभिरेकचर्ययावनंविवक्षद्भिरखंडभूमिपैः ५५ नकामयेन्यंतवपादसेवनाद
किंचनप्रार्थ्यतमाद्वरंविभो ॥ आराध्यकस्त्वांह्यपवर्गदंहरेवृणीतआर्योवरमात्मबंधनम् ५६

चूर्णिका

किंच यः राजापुरा रथादिभिर्वृतः आसीत् सएवकालेन कृमिविट्भस्मसंज्ञः कृतः ५१ किंच यः राजापूर्वं तुल्यराजभिर्वंदितः सएवस्त्रीगृहेषुक्रीडाम्रगवइतस्ततेनीयते
५२ किंच यः राजापुनः राज्यप्राप्तयेकर्माणिकरोति सः प्रवृद्धतृष्णः सन् सुखं नाप्नोति ५३ किंच भोअच्युत संसारेभ्रमतः जनस्य त्वत्कृपया यदा संसारनिवृत्तिर्भवति
तदासत्संगमः स्यात् ततः त्वयिभक्तिः ततोमुक्तिरिति ५४ किंच हेभगवन्ममतुसत्संगात्पूर्वमेवयोराज्यादिसंगविच्छेदोजातः सोयंत्वयामहान् अनुग्रहः कृतइतिमन्ये
५५ किंच हेविभोत्वत्पादसेवनात् अन्यं वरं नवृणे ५६

॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रजस्तमःसत्त्वगुणैरनुबध्यंतइतितथाताः ऐश्वर्यादिशत्रुमरणादिधर्मादिरूपाः (आशिषःकामना-)- विसृज्यपरंपुरुषंईश्वरंज्ञप्तिमात्रंज्ञानघनम्। कुतःनिरंजनंतत्कुतःनिरंतरं निर्गुणंतदपिकुतः अद्वयं
अतएवाक्षरंत्वांशरणंव्रजामीति ५७ भुंक्ष्वतावत् भोगान्कैवल्यंतुकरस्थमेवेतिपुनर्वरैः प्रलोभयंतंश्रीकृष्णंपादोपग्रहणेनप्रार्थयते । चिरमिति। वृजिनैः स्वकर्मफलैरार्तः पुनस्तद्वासनादिभिस्तप्यमानः
तथापिअवितृषषडमित्रः । तृडेवतृषा । नाविगततृषाः षट्अमित्राः शत्रवइवइंद्रियलक्षणायस्यसः अतएवालब्धशांतिः कथंचिदैववशेनलब्धशांतिरितिवाशरणंस्वज्ञानंतद्ददातीति तथाहशरणदसमुपे
तः प्राप्तोहंअशोकत्वेहेतुः अभयंतत्रापिहेतुःऋतं(हेईश)आपन्नंआपदाव्याप्तं (मामां) पाहीति ५८ ५९(तत्प्रलोभनं) अप्रमादायप्रमादायनभवत्येव। कुतइत्यतआह। नधीरिति । एकांतभक्तानां(अव्य
भिचारिभक्तिनिष्ठानां) धीराशीर्भिः वरैः प्राप्तैरपिनभिद्यतेनासज्जतइत्यर्थः ६० व्यतिरेकमाह।युंजानानामिति । (मनःप्राणायामादिभिः शोधयतामपि) उत्थितंविषयाभिमुखम् ६१ तुभ्यंतव ६२
(अथ) पुत्त्रयाभासेनभीषयंस्तपसिलोकसंग्रहेप्रवर्तयतिक्षात्रधर्मेति (मदुपाश्रितः मत्प्रीत्यर्थंतपः कुर्वन्समाहितः एकाग्रचित्तो भूत्वातदघंजहि) ६३ ६४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कं
धे टीकायामेकपंचाशत्तमोध्यायः ५१ ॥ ॥ ७ ॥ ॥ द्विपंचाशत्तमेधावम्भयादिवगतःपुरीं । अन्वमोदतसंदेशंरुक्मिण्याद्विजवर्णितं १ १ क्षुल्लकान्-ह्रस्वप्रमाणान् २ तपसिश्रद्धायुतः ३

श्लोकाः ५७/३

तस्माद्विसृज्याशिषईशसर्वतोरजस्तमःसत्त्वगुणानुबंधनाः॥ निरंजनंनिर्गुणमद्वयंपरंत्वांज्ञप्तिमात्रंपुरुषंव्रजाम्यहम् ५७ चिरमिहवृजिनार्तस्तप्यमानोनुता
पैरवितृषषडमित्रोऽलब्धशांतिःकथंचित् ॥ शरणदसमुपेतस्त्वत्पदाब्जंपरात्मन्नभयमृतमशोकंपाहिमापन्नमीश ५८ ॥ श्रीभगवानुवाच ॥ सार्वभौ
ममहाराजमतिस्तेविमलोर्जिता ॥ वरैःप्रलोभितस्यापिनकामैर्विहतायतः ५९ प्रलोभितोवरैर्यत्त्वमप्रमादायविद्धितत् ॥ नधीर्मय्येकभक्तानांमाशी
र्भिर्भिद्यतेक्वचित् ६० युंजानानामभक्तानांप्राणायामादिभिर्मनः ॥ अक्षीणवासनंराजन्दृश्यतेपुनरुत्थितम् ६१ विचरस्वमहींकामंमय्यावेशितमानसः ॥
अस्त्वेवनित्यदातुभ्यंभक्तिर्मय्यनपायिनी ६२ क्षात्रधर्मस्थितोजंतून्वधीर्मृगयादिभिः ॥ समाहितस्तत्तपसाजह्यघंमदुपाश्रितः ६३ जन्मन्यनंतरेराजन्
सर्वभूतसुहृत्तमः ॥ भूत्वाद्विजवरस्त्वंवैमामुपैष्यसिकेवलम् ६४ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेमुचुकुंदस्तुतिरेकपंचाशत्तमोध्यायः ५१ ॥छ॥
॥ श्रीशुकउवाच ॥ इत्थंसोनुगृहीतोंगकृष्णेनेक्ष्वाकुनंदनः ॥ तंपरिक्रम्यसंनम्यनिश्चक्रामगुहामुखात् १ संवीक्ष्यक्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन्
॥ मत्वाकलियुगंप्राप्तंजगामदिशमुत्तराम् २ तपःश्रद्धायुतोधीरोनिःसंगोमुक्तसंशयः ॥ समाधायमनःकृष्णेप्राविशद्गंधमादनम् ३

चूर्णिका

अतः आशिषस्त्यक्त्वा निर्गुणं त्वांशरणंव्रजामि ५७ किंच इहसंसारे अनुतापैस्तप्यमानोहं त्वांशरणंप्राप्तः अतोमांपाहि ५८ ॥ श्रीभगवानुवाच ॥ हेराजन्
तवमतिर्निर्मला यतः कामैर्नविहन्यते ५९ किंच मयावरैः प्रलोभितस्त्वं तत् अप्रमादायविद्धि ६० अतः मयि मनः निवेश्य महीं विचरस्व तवमयि अव्यभिचारिणीभ
क्तिरस्तु ६१ ६२ त्वंक्षात्रधर्मेणजंतून् अवधीः तत्पापंतपसाजहि ६३ हेराजन् जन्मांतरेविप्रोभूत्वामांप्राप्स्यसि ६४ ॥ इतिदशमेएकपंचाशत्तमः ॥ ५१ ॥ ॥ छ ॥ ॥११॥
॥ श्रीशुकउवाच ॥ ॥ हेराजन्इत्थंकृष्णेन अनुगृहीतः मुचुकुंदः तंपरिक्रम्य नत्वा च गुहायाः निर्गत्यक्षुद्रान्मनुष्यपश्वादीन् दृष्ट्वा कलियुगंप्राप्तंज्ञात्वाउत्तरांदिशंजगा
१ २ ततः कृष्णे मनः समाधाय नरनारायणालयं वदर्याश्रमं प्राप्य तपसा हरिं आराधयत् ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रबदर्याश्रमं। नरनारायणयोरालयोयत्रतम्। सर्वेषांद्वंद्वानांशीतोष्णादीनांसोढा ४ निन्येनयन्मार्गेचलतिस्म ५ (गोभिर्वृषैः) (त्रयोविंशत्यक्षौहिणीपतिः) ६ वेगरभसंवेगोद्रेकं ७ (प्रचुरंबहु। अभीतावपि भीरुभीतवत्) भीरोरपिभीतवत् अतिभीतवदित्यर्थः बहुयोजनदेशं चेलतुःपलायेतां ८ अप्रमाणवित्प्रमाणामियत्तातन्नवेत्तीतितथा ९ तुंगंएकादशयोजनोन्नतं । प्रकर्षेणवर्षत्यस्मिन्नितिप्रवर्षणइत्याख्या यस्यतं । तदाह । भगवानिंद्रः १० तत्राविचिन्वन्नापितयोः पदंनिलयस्थानंअनधिगम्य (एधोभिरिंधनैः) ११ ततोगिरेः दशचएकंच (यानि) योजनानितावदुत्तुंगात् । मागधसंरोधदेशमतिक्रम्यपरतोऽधोनिपेततुः १२ समुद्रः परिखायस्यतत् (द्वारकारूपं) १३ (मगधान्देशान्। बलमाक्रम्यसेनांगृहीत्वा) १४ श्रीकृष्णस्यविवाहान्निरूपयितुंबलदेवविवाहंनवमस्कंधोक्तमनुस्मारयतिब्रह्मणेति १५ मात्रांकलां १६ गरुडोयथादेवान्प्रमथ्यसुधामहरत्तथेति १७ राक्षसो युद्धहरणादितिस्मृतेः राज्ञःप्रमथ्येतिवक्ष्यदुक्तयाराक्षसेनाविधानेनोपयेमेपरिणीतवान् इतिश्रुतंपूर्वमेववा सामान्यतएवश्रुतम् १८

॥१२॥

बदर्याश्रममासाद्यनरनारायणालयम् ॥ सर्वद्वंद्वसहःशांतस्तपसाराधयद्धरिम् ४ भगवान्पुनराव्रज्यपुरींयवनवेष्टिताम् ॥ हत्वाम्लेच्छबलंनिन्येतदीयंद्वारकांधनम् ५ नीयमानेधनेगोभिर्नृभिश्चाच्युतनोदितैः ॥ आजगामजरासंधस्त्रयोविंशत्यनीकपः ६ विलोक्यवेगरभसंरिपुसैन्यस्यमाधवौ ॥ मनुष्यचेष्टामापन्नौराजन्दुद्रुवतुर्द्रुतम् ७ विहायवित्तंप्रचुरमभीतौभीरुभीतवत् ॥ पद्भ्यांपद्मपलाशाभ्यांचेलतुर्बहुयोजनम् ८ पलायमानौतौदृष्ट्वामागधःप्रहसन्बली ॥ अन्वधावद्रथानीकैरीशयोरप्रमाणवित् ९ प्रद्रुत्यदूरंसंश्रांतौतुंगमारुहतांगिरिम् ॥ प्रवर्षणाख्यंभगवान्नित्यदायत्रवर्षति १० गिरौनिलीनावाज्ञायनाधिगम्यपदंनृप॥ ददाहगिरिमेधोभिःसमंतादग्निमुत्सृजन् ११ ततउत्पत्यतरसादह्यमानतटादुभौ ॥ दशैकयोजनोत्तुंगान्निपेततुरधोभुवि १२ अलक्ष्यमाणौरिपुणासानुगेनयदूत्तमौ ॥ स्वपुरंपुनरायातौसमुद्रपरिखंनृप १३ सोपिदग्धावितिमृषामन्वानोबलकेशवौ ॥ बलमाकृष्यसुमहन्मगधान्मागधोययौ १४ आनर्ताधिपतिःश्रीमान्रैवतोरेवतींसुताम् ॥ ब्रह्मणानोदितःप्रादाद्बलायेतिपुरोदितम् १५ भगवानपिगोविंदउपयेमेकुरुद्वह॥वैदर्भींभीष्मकसुतांश्रियोमात्रांस्वयंवरे १६ प्रमथ्यतरसाराज्ञःशाल्वादींश्चैद्यपक्षगान् ॥ पश्यतांसर्वलोकानांतार्क्ष्यपुत्रःसुधामिव १७ ॥ राजोवाच ॥ भगवान्भीष्मकसुतांरुक्मिणींरुचिराननाम् ॥ राक्षसेनविधानेनउपयेमइतिश्रुतम् १८

श्लोकाः ४/१८

चूर्णिका

४ तदाश्रीकृष्णः पुनः मथुरांएत्ययवनसैन्यंहत्वातदीयंधनंद्वारकांनिन्ये ५ एतस्मिन्काले त्रयोविंशत्यक्षौहिणीसैन्ययुतः जरासंधः आजगाम ६ तत्सैन्यवेगंदृष्ट्वा वित्तं त्यक्त्वा रामकृष्णौ दुद्रुवतुः ७ ८ पलायमानौतौदृष्ट्वामागधः प्रहस्यरथानीकैः सहअन्वधावत ९ ततः तौदूरंप्रद्रुत्यप्रवर्षणाख्यंगिरिं आरुहतां १० ततोमागधः तौगिरौलीनौज्ञात्वातंगिरिं काष्ठैः संवेष्ट्य ददाह ११ ततः तौएकादशयोजनोत्तुंगात्दह्यमानात् गिरितटात् अधः भुविनिपेततुः १२ एवंरिपुणाअलक्ष्यमाणौतौद्वारकांपुनः आयातौ १३ सोपिमागधः तौदग्धावितिमत्वास्वबलंगृहीत्वामागधान् ययौ १४ हेराजन् श्रीमान्रैवतः ब्रह्मणचोदितः सन् स्वसुतांरेवतींबलायप्रादादितिनवमस्कंधेउक्तम् १५ हे भारत भगवान् श्रीकृष्णोपिस्वयंवरे चैद्यपक्षीयान् शाल्वादीन् प्रमथ्य भीष्मकसुतांरुक्मिणींराक्षसविधिना उपयेमेइतिश्रुतम् १६ १७ ॥ राजोवाच ॥ हेशुकःश्रीकृष्णः शाल्वादीन् जित्वा कन्यां यथा अहरत् तत् श्रोतुमिच्छामि १८

॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका
(येनप्रकारेणोपाहरत्तंभगवतो विवाहस्यप्रकार-)-विशेषंतुश्रोतुमिच्छामः (हेभगवन् ।) १९ श्रवणौत्सुक्यमाविष्करोतिब्रह्मन्निति । पुण्यामहाफलाःमाध्वीः श्रुतिसुखाः लोकस्यमलापहा
श्च । शृणुवन्शृण्वन्नित्यर्थः श्रुतज्ञःश्रुतसारवित् । नित्यनूतनाःप्रतिक्षणमाश्चर्यवत्प्रतीयमानाः २० २१ (तेषांक्रमेणनामानि । रुक्मीति) २२ (सारुक्मिणी । वीर्यंप्रभावः) २३ (बुद्ध्यादीनांआश्रयं
अधिष्ठानं) २४ चैद्यं (शिशुपालं) अमन्यततस्यावरमित्यर्थः २५ अवेत्यज्ञात्वाअसितापांगीसुनीलकटाक्षीकृष्णापकृष्णमानेतुंप्रेषयामास २६ प्रतीहारैर्द्वारपालैः २७ आत्मानंश्रीकृष्णं (देवा
यथा) २८ अभिमृशन् (श्रमपरिहाराय) शनैःसंमर्दयन्२९(हेब्राह्मणश्रेष्ठ वृद्धसंमतः वृद्धपरंपरामातइतिभावःनातिकृच्छ्रेण निर्विघ्नंयथास्यात्तथेति भावः । संतुष्टचेतसस्तव) ३० धर्मोस्यब्राह्म
णस्य । अखिलकामदोग्धाभवति । यद्वा सब्राह्मणोस्यविश्वस्याखिलकामधुगिति ३१

॥१३॥ श्लोकाः १९/३१

॥ कोनुत
भगवन्श्रोतुमिच्छामःकृष्णस्यामिततेजसः ॥ यथामागधशाल्वादीन्जित्वाकन्यामुपाहरत् १९ ब्रह्मन्कृष्णकथाःपुण्यामाध्वीर्लोकमलापहाः ॥ कोनुतृ
प्येतशृणुवन्श्रुतज्ञोनित्यनूतनाः २० ॥ श्रीशुकउवाच ॥ राजासीद्भीष्मकोनामविदर्भाधिपतिर्महान् ॥ तस्यपंचाभवन्पुत्राःकन्यैकाचवरानना २१
रुक्म्यग्रजोरुक्मरथोरुक्मबाहुरनंतरः ॥ रुक्मकेशोरुक्ममालीरुक्मिण्येषांस्वसासती २२ सोपश्रुत्यमुकुंदस्यरूपवीर्यगुणश्रियः॥ गृहागतैर्गीयमानास्तं
मेनेसदृशंपतिम् २३ तांबुद्धिलक्षणौदार्यरूपशीलगुणाश्रयाम् ॥ कृष्णश्चसदृशींभार्यांसमुद्वोढुंमनोदधे २४ बंधूनामिच्छतांदातुंकृष्णायभगिनींनृप ॥
ततोनिवार्यकृष्णद्विट्रुक्मीचैद्यममन्यत २५ तदवेत्यासितापांगीवैदर्भीदुर्मनाभृशम् ॥ विचिंत्याप्तंद्विजंकंचित्कृष्णायप्राहिणोद्द्रुतम् २६ द्वारकांसत
मभ्येत्यप्रतीहारैःप्रवेशितः ॥ अपश्यदाद्यंपुरुषमासीनंकांचनासने २७ दृष्ट्वाब्रह्मण्यदेवस्तमवरुह्यनिजासनात् ॥ उपवेश्यार्हयांचक्रेयथात्मानंदिवौकसः
२८ तंभुक्तवंतंविश्रांतमुपगम्यसतांपतिः ॥ पाणिनाभिमृशन्पादावव्यग्रस्तमपृच्छत् २९ कच्चिद्द्विजवरश्रेष्ठधर्मस्तेवृद्धसंमतः॥वर्ततेनातिकृच्छ्रेणसंतुष्टम
नसःसदा ३० संतुष्टोयर्हिवर्तेतब्राह्मणोयेनकेनचित् ॥ अहीयमानःस्वाद्धर्मात्सह्यस्याखिलकामधुक् ३१

चूर्णिका
१९ २० ॥ श्रीशुकउवाच ॥ हेराजन् विदर्भाधिपतिः भीष्मकोनामराजा आसीत् तस्यपंचपुत्राः एकाकन्याच आसन् २१ तेच रुक्मी १ रुक्मरथः २ रुक्मबा
हुः ३ रुक्मकेशः ४ रुक्ममाली ५ एषांस्वसारुक्मिणी २२ श्रीकृष्णगुणान्श्रुत्वातंस्वयोग्यंपतिंमेने २३ कृष्णोपिस्वयोग्यांतांउद्वोढुंमनोदधे २४ तांरुक्मिणींकृष्णाय
दातुंइच्छतः बंधून् निवार्य कृष्णद्विट् रुक्मीचैद्यंवरं अमन्यत २५ सातत्ज्ञात्वादुर्मनासती कंचन आप्तंद्विजंकृष्णाय प्राहिणोत् २६ सः विप्रः द्वारकांएत्य द्वारपैः प्रवेशि
तः सन् सुवर्णासनेस्थितंकृष्णं अपश्यत् २७ ततः कृष्णः ब्राह्मणंदृष्ट्वा आसनादवरुह्य तत्र तंउपवेश्य २८ संपूज्यभुक्तवंतंविश्रांतंतंउपगम्य पाणिनापादौसंमर्दयन् सन्अपृ
च्छत् २९ हेद्विज संतुष्टमनसः तेधर्मः अतिकृच्छ्रेणनवर्तते कच्चित् ३० ब्राह्मणःसंतुष्टश्चेत् तर्हि तस्यधर्मःकामधुक्भवति ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

लोकानाप्नोतिलोकाल्लोकांतरंपर्यटन्नैकत्रनिर्वृतास्तिष्ठतीत्यर्थः । नाप्नोतिइतिपाठेसुरेश्वरोपिभूत्वालोकान्नाप्नोति । उत्तमलोकान्प्राप्तोपिअप्राप्तइवक्लिश्यतीत्यर्थः । शेतेसुखमास्तेइत्यर्थः । तदेवाह । सर्वेष्वंगेषुवाक्पाण्यादिषुविज्वरस्तापरहितः (निश्चिंतइत्यर्थः) ३२ स्वलाभः स्वतएवप्राप्तोलाभआत्मलाभोवातेनसंतुष्टान्पूर्णान्साधून्स्वधर्मनिष्ठान् ३३ (राजवः सकाशात्कुशलंकच्चित्) यस्यराज्ञोविषयेदेशे सराजा ३४ यतः स्थानात्यदिच्छयायस्यकार्यस्येच्छयादुर्गंसमुद्रं (तत्स्थानंतत्कार्यंचसर्वंब्रूहिस्फुटंत्क्रुमर्हंचेदित्यर्थः) ३५ (एवं) संपृष्टः संप्रश्नः प्रष्टव्योर्थोयंसः परमेष्ठिनापरमेश्वरेणबंधूनामभिप्रेतंरुक्मिणश्चेष्टितमित्यादिसर्वमकथयत् ३६ रुक्मिण्यास्वयमेकांतेलिखित्वादत्तपत्रिकां । मुद्रामुन्मुच्यकृष्णायप्रेमाचिह्नामदर्शयत् । ब्राह्मणः श्रीकृष्णाज्ञयावाचयति । श्रुत्वेति अयमर्थः । हेअच्युत भुवनसुंदरइत्यौत्सुक्यंद्योतयाति । क्वतवमहिमा क्वचाहंकुलरूपशीलादियुक्तापि । तथापिअपगतात्रपायस्मात्तन्मेचित्तंत्वयिआविशतिआसज्जते । तत्कुतस्तत्राह । शृण्वतांकर्णविवरैरंतःप्रविश्यांगतापंअंगेतिपृथक्संबोधनंवाहरतस्तवगुणान्श्रुत्वातथादृशिमतांचक्षुष्मतांदृशामखिलार्थलाभात्मकंरूपंचश्रुत्वेति ३७ अहोकुलकन्यानाभिदमतिधाष्टर्यमितिमाशंकीरित्याह । कात्वेति । हे मुकुंदहेनृसिंहहेनरश्रेष्ठकानामकन्याकुलवतीतथामहतीगुणरूपादिभिरुदारातथाधीराधीमतीत्वात्वांपतिंनवृणीत । मय्येवकेयंदोषशंकेतिभावः । कथंभूतं । गुणशीलादिभिः आत्मनैवतुल्यंनत्वन्येन निरुपममित्यर्थः । द्रविणंद्रव्यसंपत् । धामप्रभावः । तथानरलोकस्यमनसामभिरामोऽभिरमणंयस्मात्तं । किंच । कालेविवाहावसरे ३८ (अंग) हेविभोतत्तस्मान्मेमयाभवान्खलुपतिर्वृतः आत्माचभवतोऽर्पितः अतस्त्वमत्रागत्यमांभवतोजायांविधेहि । विपक्षेबाधकंद्योतयंत्याह। मावीरभागमिति । वीरस्यतवभागंआरात्शीघ्रमेत्यआगत्यचैद्योमाभिमर्शतुमाभिमृशतु । मृगपतेः (सिंहस्य) बलिंगोमायुः शृगालइवेति ३९

श्लोकाः ३२ / ३९

असंतुष्टोऽसकृल्लोकानाप्नोत्यपिसुरेश्वरः ॥ अकिंचनोपिसंतुष्टःशेतेसर्वांगविज्वरः ३२ विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणःशांतान्नमस्येशिरसाऽसकृत् ३३ कच्चिद्वःकुशलंब्रह्मन्राजतोयस्यहिप्रजाः ॥ सुखंवसंतिविषयेपाल्यमानाःसमेप्रियः ३४ यतस्त्वमागतोदुर्गंनिस्तीर्येहयदिच्छया ॥ सर्वंनोब्रूह्यगुह्यंचेत्किंकार्यंकरवामते ३५ एवंसंपृष्टसंप्रश्नोब्राह्मणःपरमेष्ठिना ॥ लीलागृहीतदेहेनतस्मैसर्वमवर्णयत् ३६ ॥ रुक्मिण्युवाच ॥ श्रुत्वागुणान्भुवनसुंदरशृण्वतांतेनिर्विश्यकर्णविवरैर्हरतोऽगतापम् ॥ रूपंदृशांदृशिमतामखिलार्थलाभंत्वय्यच्युताविशतिचित्तमपत्रपंमे ३७ कात्वामुकुंदमहतीगुणशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यम् ॥ धीरापतिंकुलवतीनवृणीतकन्याकालेनृसिंहनरलोकमनोभिरामम् ३८ तन्मेभवान्खलुवृतःपतिरंगजायामात्माऽर्पितश्चभवतोऽत्रविभोविधेहि ॥ मावीरभागमभिमर्शतुचैद्यआराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष ३९

चूर्णिका

असंतुष्टोविप्रश्चेत् लोकात् लोकांतरं पर्यटति ३२ अहंस्वलाभसंतुष्टान् शांतान् द्विजान् शिरसानमस्ये ३३ हेद्विज राजतः वः कुशलंकच्चित् यस्यदेशेप्रजाः सुखंवसंति समेप्रियः ३४ हेद्विज यतस्त्वंआगतः तत् अगुह्यंचेत् सर्वंब्रूहि तेकार्यं किंकरवाम ३५ एवंपृष्टः विप्रः तस्मैसर्वंअवर्णयत् ३६ ॥ रुक्मिण्युवाच ॥ हेकृष्णतवगुणान् रूपंच श्रुत्वामेचित्तं त्वयिआविशति ३७ किंच हेमुकुंद कुशीलादिभिः स्वतुल्यंपतिंत्वांमहतीकन्याकानवृणीत ३८ तस्मात्मया भवान् वृतः तव देहश्च अर्पितः अतः त्वमत्रागत्य मांभवतोजायांविधेहि इमंतवभागं चैद्यः मास्पृशतु ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अनेकजन्मकृतैःसुकृतैरिदमेवभूयादितिप्रार्थयते । पूर्तेति । पूर्तंकूपादि । इष्टमग्निहोत्रादि । दत्तंहिरण्यदानादि । नियमस्तीर्थाटनादि व्रतंकृच्छ्रादि (दमघोषसुतः शिशुपालः) ४० चैद्यायबंधुभिरर्पितायां
त्वयिकिमधुनाकरणीयमित्यपेक्षायामाह । श्वोभाविनीति । हेअजितश्वोभाविनि उद्वहनेविवाहेप्रथमंगुप्तःअलक्षितएवागत्य पश्चात्पृतनापतिभिःपरिवृतः सन् चैद्यादिबलंनिर्मथ्य प्रसह्य बलात् वीर्यं
प्रभावदर्शनमेवशुल्कंवैवाहिकंदेयंयस्यास्तांमां अनेनराक्षसविधिनोद्वहेतिउपदेशरहस्यम् ४१ ननुभवतुशिशुपालादिबलप्रमथनं अंतःपुरमध्यगतायास्तवहरणेत्वद्बंधुवधोपिप्रसज्येतेत्यतआह । अंतः
पुरेति । यस्यांयात्रायांपुराद्बहिर्वर्तमानांगिरिजामंबिकां (नववधूरुपेयात्) अंबिकागृहादेवममहरणंसुकरमितिभावः ४२ ननुकिमनेननिर्बंधेनानर्थकारिणा चैद्योपितावत्प्रख्यातगुणकर्मायोग्यएववर
इतितत्राह । यस्येति । हेअंबुजाक्षयस्यभवतोऽङ्घ्रिपंकजरजोभिःस्नपनंआत्मनस्तमसोऽपहत्यैउमापतिरिवमहांतोवांच्छंति । तस्यभवतः प्रसादंयद्यहंनलभेय नप्राप्नुयांतर्हिव्रतैरुपवासादिभिःकृशान्
असून्प्राणान्जह्यांत्यजेयं । ततःकिमित्यतआह । शतजन्मभिरिति । एवमेववारंवारजह्यांयावच्छतजन्मभिरपितवप्रसादःस्यादिति ४३ अत्रयत्कर्तुंकरणीयंतद्विमृश्यक्रियताम् । तच्चानंतरमेवक्रियता
मिति ४४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांद्विपंचाशत्तमोध्यायः ५२ ॥ ॥ ७ ॥ ॥ त्रिपंचाशत्तमेगत्वाविदर्भानद्भुतोहितः ॥ रुक्मिणिमहरत्कृष्णोमिषतांद्विषतांब
लात् ॥ १ ॥ (ब्राह्मणस्यपाणिंप्रगृह्य) १

॥१५॥

श्लोकाः

पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलंभगवान्परेशः ॥ आराधितोयदिगदाग्रजएत्यपाणिंगृह्णातुमेनदमघोषसुतादयोन्ये ४० श्वोभाविनित्वमजितो
द्वहनेविदर्भान्गुप्तःसमेत्यपृतनापतिभिःपरीतः ॥ निर्मथ्यचैद्यमगधेशबलंप्रसह्यमांराक्षसेनविधिनोद्वहवीर्यशुल्काम् ४१ अंतःपुरांतरचरीमनिहत्यबंधूं
स्त्वामुद्वहेकथमितिप्रवदाम्युपायम् ॥ पूर्वेद्युरस्तिमहतीकुलदेवयात्रायस्यांबहिर्नववधूर्गिरिजामुपेयात् ४२ यस्यांघ्रिपंकजरजःस्नपनंमहांतोवांच्छंत्युमा
पतिरिवात्मतमोपहत्यै ॥ यर्ह्यंबुजाक्षनलभेयभवत्प्रसादंजह्यामसून्व्रतकृशाञ्शतजन्मभिःस्यात् ४३ ॥ ब्राह्मणउवाच ॥ इत्येतेगुह्यसंदेशायदुदेवमयाहृ
ताः ॥ विमृश्यकर्तुंयच्चात्रक्रियतांतदनंतरम् ४४ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्विपंचाशत्तमोध्यायः ५२ ॥ ॥ ७ ॥ ॥ श्रीशुकउ
वाच ॥ वैदर्भ्याःसतुसंदेशंनिशम्ययदुनंदनः ॥ प्रगृह्यपाणिनापाणिंप्रहसन्निदमब्रवीत् १

४०/१

चूर्णिका

किंच मयापूर्तेष्टादिभिः भगवान् अराधितश्चेत् तर्हिअत्रैत्यमेपाणिंगृह्णातु नान्ये ४० हे अजितश्वो भाविनिविवाहे प्रथमंगुप्तः एत्य पश्चात् सेनायुतः सन् चैद्यादिबलं
निर्मथ्य राक्षसविधिना मां उद्वह ४१ हेकन्ये तवबंध्वादीन्अनिहत्य त्वांकथमुद्वहे इतिचेदुपायंवच्मि शृणु पूर्वेद्युः कुलदेवियात्रास्ति तस्यांनववधूः गिरिजांउपेयात् ४२
किंच यत्पादरजःप्रति भवादयः पापहत्यै वांच्छंतितस्यभवतः प्रसादं अहंयदि नलभेयं तर्हिव्रतकृशान्प्राणान्त्यजेयम् ४३ ॥ विप्रउवाच ॥ हेभगवन् एतेगुह्यसंदेशाः
मया आहृताः यत् अत्रकर्तुंतत् विमृश्य क्रियताम् ४४ ॥ इतिदशमेद्विपंचाशत्तमः ॥ ५२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन्सःकृष्णः
एवंरुक्मिण्याः संदेशंश्रुत्वा प्रहसन्निदमब्रवीत् १

॥१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका
निद्रायाअलभेकारणांतरंवेदेति । तयाऽकथितमपिअहंजानामीति २ आनयिष्येआनेष्यामि । राजन्यापसदान्राजसुहीनान् उन्मथ्यानयनेदृष्टांतः एधसइति ३ उद्वाहर्क्षमिति परश्वो रात्रौ (रु
क्मिण्या) विवाहनक्षत्रमितिविज्ञाय तस्यांरात्र्यांप्रस्थाय प्रातर्विदर्भदेशानगमत् । श्वोभाविनित्वमजितोद्वहनेविदर्भान्गुप्तःसमेत्येतिरुक्मिणीसंदेशात् ४ शैब्यइत्यादीनिचत्वार्यश्वनामानि ५ (तूर्ण
गैःशीघ्रगामिभिःहयैः) ६ पुत्रस्यरुक्मिणःस्नेहेनतद्वशमनुगच्छतीतितथा । अनेनशिशुपालेतदनभिरुचिंद्योतयति । कर्माणिपुरालंकारपितृदेवार्चनादीनि ७ तान्येवाह । पुरमित्यादिचतुर्भिः । सं ||५३||
मृष्टाःसंसिक्ताश्चमार्गादयोयस्मिंस्तत् । चित्रध्वजेषुपताकास्ताभिःसमलंकृतमकारयत् ८ स्रग्गंधमाल्याभरणैरित्यत्रमतर्थोद्रष्टव्यः । यद्वा स्रग्गंधमाल्यान्याबिभ्रतीतितथातैःतथाविरजोंबरैश्चस्त्रीपुरु
षैर्जुष्टम् । तथाश्रीमद्भिर्गृहैश्चजुष्टम् ९ यथान्यायमन्यांश्चभोजयित्वा कन्यांप्रति मंगलं वाचयामास १० कृतंकौतुकेनविवाहसूत्रेण मंगलंयस्यास्ताम् । अहतंनवीनंअंशुकद्वयंवस्त्रोपवस्त्रेतेन भूषणोत्तमै
||१६|| श्चभूषिताम् ११ वध्वास्तस्याःकन्यायाः (सामादिमंत्रैः रक्षांविधिविशेषंचक्रुः ।) अथर्ववित्आथर्वणमंत्रवित् १२ १३ (चेदिदेशपतिःशिशुपालस्यपितासोपिएवमेव) अभ्युदयेउचितम् १४

श्लोकाः
॥ श्रीभगवानुवाच ॥ तथाहमपितच्चित्तोनिद्रांचनलभेनिशि ॥ वेदाहंरुक्मिणाद्वेषान्ममोद्वाहोनिवारितः २ तामानयिष्यउन्मथ्यराजन्यापसदान्मृधे ॥
मत्परामनवद्यांगीमेधसोऽग्निशिखामिव ३ उद्वाहर्क्षंचविज्ञायरुक्मिण्यामधुसूदनः ॥ रथःसंयुज्यतामाशुदारुकेत्याहसारथिम् ४ सचाश्वैःशैब्यसुग्रीवमे
घपुष्पबलाहकैः ॥ युक्तंरथमुपानीयतस्थौप्रांजलिरग्रतः ५ आरुह्यस्यंदनंशौरिर्द्विजमारोप्यतूर्णगैः ॥ आनर्तादेकरात्रेणविदर्भानगमद्धयैः ६ राजासकुं $\frac{२}{१४}$
डिनपतिःपुत्रस्नेहवशंगतः ॥ शिशुपालायस्वांकन्यांदास्यन्कर्माण्यकारयत् ७ पुरंसंमृष्टसंसिक्तमार्गरथ्याचतुष्पथम् ॥ चित्रध्वजपताकाभिस्तोरणैःसम
लंकृतम् ८ स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः ॥ जुष्टंस्त्रीपुरुषैःश्रीमद्गृहैरगुरुधूपितैः ९ पितॄन्देवान्समभ्यर्च्यविप्रांश्चविधिवन्नृप ॥ भोजयित्वायथा
न्यायंवाचयामासमंगलम् १० सुस्नातांसुदतींकन्यांकृतकौतुकमंगलाम् ॥ अहतांशुकयुग्मेनभूषितांभूषणोत्तमैः ११ चक्रुःसामर्ग्यजुर्मंत्रैर्वध्वारक्षांद्विजो
त्तमाः ॥ पुरोहितोऽथर्वविद्वैजुहावग्रहशांतये १२ हिरण्यरूप्यवासांसितिलांश्चगुडमिश्रितान् ॥ प्रादाद्धेनूश्चविप्रेभ्योराजाविधिविदांवरः १३ एवंचे
दिपतीराजादमघोषःसुतायवै ॥ कारयामासमंत्रज्ञैःसर्वमभ्युदयोचितम् १४

चूर्णिका
॥ श्रीभगवानुवाच ॥ हेद्विज अहमपितच्चित्तः सन्निशिनिद्रांनलभे किंच रुक्मिणाद्वेषात् ममोद्वाहो निवारितः तदपि अहंजानामि २ अतः मृधे राज्ञः उन्मथ्य म
त्परांतांरुक्मिणीं आनेष्यामि ३ किंच श्रीकृष्णः रुक्मिण्याः विवाहर्क्षंपरश्वोरात्रौ अस्तीतिज्ञात्वासारथिं आह हेदारुक मेरथः आशु संयुज्यताम् ४ ततःसः दारुकःअश्वैः
युक्तं रथं उपानीयअग्रतः प्रांजलिःसन् तस्थौ ५ ततः शौरिः रथंस्वयंआरुह्यद्विजंचारोप्यतूर्णगैरश्वैः एकरात्रेण विदर्भदेशानगमत् ६ राजाभीष्मकस्तुपुत्रस्नेहवद्धः सन्
शिशुपालायस्वांकन्यांदास्यन्कर्माण्यकारयत् ७ ततः पुरंचित्रध्वजपताकातोरणस्रग्गंधमाल्याभरणवस्त्रादिभिः समलंकृतंकारयित्वा ८ ९ पितृदेवविप्रानभ्यर्च्यविप्रान्भो ||१६||
जयित्वाकन्यांप्रतिमंगलंवाचयित्वा १० सुस्नातांकृतकौतुकमंगलांतांकन्यांभूषितांचक्रुः ११ द्विजाः ऋगादिमंत्रैः तस्याः रक्षांचक्रुः ततःपुरोहितः ग्रहशांतयेजुहाव १२
ततोराजाविप्रेभ्यः सुवर्णरूप्यवासोगुडमिश्रतिलान् धेनूश्चप्रादात् १३ एवं चैद्यः दमघोषः मंत्रज्ञैः सर्वंअभ्युदयेउचितंपुत्राय कारयित्वा १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ततश्चतुरंगसैन्यैःपरीतःपरिवृतःकुंडिनंभीष्मकपुरंययौ । मदंच्यवंतेमदच्युतःतैः । स्यंदनैःरथैः । हेमरथिनामालाविद्यंतेयेषुतैः १५ कल्पितंरचितंयदन्यन्निवेशनंगृहंतस्मिन् १६ यदिश्रीकृष्णोहरे दितिशंकिताः(तां)कन्यां (चैद्याय साधितुं) साधयितुमित्यर्थः (यत्ताःयत्नयुक्ताइत्यर्थः) १७ (यदुभिर्वृतआगत्ययादिहरेत्तर्हितेनसहयोत्स्यामइति) १८ १९ (एतंशत्रुबलोद्यमंश्रुत्वागजाद्यंगेनम हतासैन्येनसहरामोपिप्रागादिति) २० २१ सूर्योदयात्पूर्वमेवौत्सुक्येनरुक्मिण्यचिंतयदित्याह । भीष्मकन्येति । प्रत्यापत्तिंप्रत्यागमनम् २२ त्रियामारात्रिःतावन्मात्रेणांतरितःव्यवहितः अल्प राधसःमंदभाग्यायाः २३ जुगुप्सितंधार्ष्ट्यादि । अपीतिशंकायाम् । नायातिहिकृतोद्यमइति । अयमर्थः । आदौकृतोद्यमत्वात्तंनप्रस्थापितवान् । प्रस्थानावसरेचकिंचिन्मायिजुगुप्सितंमत्वाप्रत्याच ष्टअतःसोपिद्विजोद्यापिनूनंनायातीति २४ यद्वा ततोनिर्गतोपिश्रीकृष्णोमदैवमुख्यात्क्वचित्प्रतिबद्धोभवेदित्याह । दुर्भगायाइति २५ कालज्ञाऽधुनापिनगोविंदागमनकालइतिमन्वानाकिंचिदाश्व स्तचित्तासतीचिंतास्तब्धेलोचनेनिमीलितवतीत्यर्थः २६ प्रियभाषिणः प्रिय (-प्राप्ति) सूचकाइत्यर्थः २७

॥१७॥

श्लोकाः १५/२७

मदच्युद्भिर्गजानीकैःस्यंदनैर्हेममालिभिः ॥ पत्त्यश्वसंकुलैःसैन्यैःपरीतःकुंडिनंययौ १५ तंवैविदर्भाधिपतिःसमभ्येत्याभिपूज्यच ॥ निवेशयामाससुदाक ल्पितान्यनिवेशने १६ तत्रशाल्वोजरासंधोदंतवक्त्रोविदूरथः ॥ आजग्मुश्चैद्यपक्षीयाःपौंड्रकाद्याःसहस्रशः १७ कृष्णरामद्विषोयत्ताःकन्यांचैद्यायसाधि तुम् ॥ यद्यागत्यहरेत्कृष्णोरामाद्यैर्यदुभिर्वृतः १८ योत्स्यामःसंहतास्तेनइतिनिश्चितमानसाः ॥ आजग्मुर्भूभुजःसर्वेसमर्थबलवाहनाः १९ श्रुत्वैतद्भ गवान्रामोविपक्षीयबलोद्यमम् ॥ कृष्णंचैकंगतंहर्तुंकन्यांकलहशंकितः २० बलेनमहतासार्धंभ्रातृस्नेहपरिप्लुतः ॥ त्वरितःकुंडिनंप्रागाद्गजाश्वरथपत्तिभिः २१ भीष्मकन्यावरारोहाकांक्षंत्यागमनंहरेः ॥ प्रत्यापत्तिमपश्यंतीद्विजस्याचिंतयत्तदा २२ अहोत्रियामांतरितउद्वाहोमेऽल्पराधसः ॥ नागच्छत्यर विंदाक्षोनाहंवेद्म्यत्रकारणम् २३ सोपिनावर्ततेद्यापिमत्संदेशहरोद्विजः ॥ अपिमय्यनवद्यात्मादृष्ट्वाकिंचिज्जुगुप्सितम् ॥ मत्पाणिग्रहणेनूनंनायातिहि कृतोद्यमः २४ दुर्भगायानमेधातानानुकूलोमहेश्वरः ॥ देवीवाविमुखागौरीरुद्राणीगिरिजासती २५ एवंचिंतयतीबालागोविंदहृतमानसा॥न्यमीलयत कालज्ञानेत्रेचाश्रुकलाकुले २६ एवंवध्वाःप्रतीक्षंत्यागोविंदागमनंनृप ॥ वामऊरुर्भुजोनेत्रमस्फुरन्प्रियभाषिणः २७

चूर्णिका

चतुरंगसैन्ययुक्तः कुंडिनंभीष्मकपुरंययौ १५ भीष्मकः तंसमभ्येत्य संपूज्यनिर्मितान्यनिवेशनेनिवेशयामास १६ तत्रजरासंधदंतवक्त्रादयश्चैद्यपक्षीयाःराजानः श्रीकृष्णः आगत्यकन्यांयदिहरेत्तर्हितेनसहयोत्स्याम इति निश्चितमानसाः संतः कन्यांचैद्यायसाधितुं सबलवाहनाः आजग्मुः १७ १८ १९ एतद्भगवान्बलःश्रुत्वाकन्यांहर्तुंश्री कृष्णंचएकाकिनंगतंश्रुत्वामहत्याचतुरंगसेनयासहकुंडिनंययौ २० २१ तदासारुक्मिणीहरेः द्विजस्यच आगमनंकांक्षंतीसतीएवमचिंतयत् २२ अहोरात्र्यंतरितः मेविवाहः अद्यापिश्रीकृष्णः द्विजश्चनायाति तत्रकारणंनजाने २३ मयिकिंचिद्धार्ष्ट्यादिकंदृष्ट्वा नायाति २४ किंदुर्भगायाः मेदैवंनानुकूलं किंवामहेश्वरः वा गौरी वा पार्वती नानुकूला किं २५ एवंचिंतयतीरुक्मिणीनेत्रेन्यमीलयत् २६ एवंचिंतयंत्याः तस्याः वामोरुभुजनेत्राणि अस्फुरन् २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पुरोपवनंप्राप्तेनश्रीकृष्णेनविनिर्दिष्टःप्राप्तंमांकथयेत्यादिष्टः २८ नव्यग्राआत्मनोदेहस्यगतिर्यस्यतम् । लक्षणाभिज्ञादूतस्यलक्षणंतत्तत्कार्यसूचकमभिजानातीतितथा २९ तस्यैप्राप्तंयदुनंदनंआवेदितवान् । तच्चशशंस । (यत्) आत्मोपनयनंप्रतिआत्मनास्वयंकृष्णस्य नयनंप्रतितेनद्विजेनसत्यवचनंप्रोक्तमिति । आत्मनःप्राणेश्वरस्येतिवा । (एवमत्रात्मशब्दोद्विजपरःकृष्णपरोवा ।) यद्वा आत्मनस्तस्याःउपनयनं (विवाहंप्रतिआनयनं) प्रति (वा) श्रीकृष्णेनयदुक्तंसत्यवचनंतामानयिष्यइत्यादितच्चशशंसअवर्णयदित्यर्थः ३० तंश्रीकृष्णंज्ञात्वाअस्मिन्कार्येसर्वस्वार्पणमप्यपर्याप्तमितितदुचित (अपरंब्राह्मणाय) प्रियंनपश्यंतीतदाकेवलंननामपश्चात्तस्मैबहुददावित्यर्थः । यद्वा मांश्रियंयेनमंति तेतावत्सर्वसंपदामास्पदंभवंति । किंपुनर्मयिप्रणतायामिति । ततोधिकमन्यत् प्रियमपश्यंतीननामेति ३१ (अथभीष्मकःरामकृष्णौप्राप्तौश्रुत्वापूजोपचारैःसहाभ्ययात्) ३२ (उपानीयसमर्प्य) ३३ महामतिरित्यनेनश्रीकृष्णगोत्राढंकन्यामुद्वोढुमेवागतःस्यात्इति (बुद्धिवैभवेनकल्पयित्वा) वराचितेनविधिनासमपूजयदितिसूचितम् । यथायथावत् ३४ समेतानांराज्ञांमध्येतंतं (राजानं) वीर्याद्यनतिक्रम्य (ततत्प्रभावाद्यनुसारेणेत्यर्थः । समर्हयत्) समर्हितवानित्यर्थः ३५ श्रीकृष्णेभाविकर्मसूचकंजनानुरागंदर्शयति । कृष्णमागतमितित्रिभिः । (मुखपंकजंमपुरितिनकेवलंपंकजगतंमधुकिंतुपंकजमेवमधुरितिदर्शनेआदरातिशयोदर्शितः) ३६ (अस्येति) अस्यैवरुक्मिण्येवअर्हत्येवअसाविवभैष्म्याएवसमुचितएवेतिषडवधारणानितत्रैकस्मिन्व्यतिरेकप्रदर्शनंउपलक्षणार्थंनापरेतिनचवाक्यभेददोषः अनूद्यविधेयभेदेनविभिन्नानामेववाक्यानांसहप्रयोगात् ग्रहंसंमार्ष्टीत्यादिवदिति ३७ (नोऽस्माकंयत्किंचित्सुचरितंसुकृतंतेनतुष्टोस्मानतुगृह्णातु) अयमेवात्रानुग्रहइतिनिर्दिशंति गृह्णात्विति ३८ प्रेमकलाभिराबद्धाः वदंतिस्मसंपूर्णप्रेमतेषांहृद्येवावर्ततइत्यर्थः । ३९

श्लोकाः २८/३९

अथकृष्णविनिर्दिष्टःसएवद्विजसत्तमः ॥ अंतःपुरचरींदेवींराजपुत्रींददर्शह २८ सातंप्रहृष्टवदनमव्यग्रात्मगतिंसती ॥ आलक्ष्यलक्षणाभिज्ञासमपृच्छच्छुचिस्मिता २९ तस्याआवेदयत्प्राप्तंशशंसयदुनंदनम् ॥ उक्तंचसत्यवचनमात्मोपनयनंप्रति ३० तमागतंसमाज्ञायवैदर्भीहृष्टमानसा ॥ नपश्यंतीब्राह्मणायप्रियमन्यन्ननामसा ३१ प्राप्तौश्रुत्वास्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ ॥ अभ्ययात्तूर्यघोषेणरामकृष्णौसमर्हणैः ३२ मधुपर्कमुपानीयवासांसिविरजानिच ॥ उपायनान्यभीष्टानिविधिवत्समपूजयत् ३३ तयोर्निवेशनंश्रीमदुपकल्प्यमहामतिः ॥ ससैन्ययोःसानुगयोरातिथ्यंविदधेयथा ३४ एवंराज्ञांसमेतानांयथावीर्यंयथावयः ॥ यथाबलंयथावित्तंसर्वैःकामैःसमर्हयत् ३५ कृष्णमागतमाकर्ण्यविदर्भपुरवासिनः ॥ आगत्यनेत्रांजलिभिःपपुस्तन्मुखपंकजम् ३६ अस्यैवभार्याभवितुंरुक्मिण्यर्हतिनापरा ॥ असावप्यनवद्यात्माभैष्म्याःसमुचितःपतिः ३७ किंचित्सुचरितंयन्नस्तेनतुष्टस्त्रिलोककृत् ॥ अनुगृह्णातुगृह्णातुवैदर्भ्याःपाणिमच्युतः ३८ एवंप्रेमकलाबद्धावदंतिस्मपुरौकसः ॥ कन्याचांतःपुरात्प्रागाद्भटैर्गुप्तांबिकालयम् ३९

चूर्णिका

तस्मिन्कालेसः द्विजः तांदृष्ट्वा साचप्रहृष्टवचनं तंदृष्ट्वा अपृच्छत् २८ २९ ततः सः द्विजः प्राप्तंकृष्णंतेनोक्तं सत्यवचनंचतस्यै अकथयत् ३० तदासाब्राह्मणायदातुं अन्यत्त्वपश्यती सतीननाम ३१ ततः भीष्मकः रामकृष्णौ प्राप्तौश्रुत्वामधुपर्कादिभिः संपूज्यतयोर्निवेशनं उपकल्प्यआतिथ्यंचक्रे ३२ ३३ ३४ एवंसर्वेषांराज्ञांआतिथ्यं अकरोत् ३५ ततः पौराः प्राप्तं कृष्णंश्रुत्वा आगत्य तन्मुखंवीक्ष्य ३६ अस्यैवरुक्मिणी स्त्रीयोग्या भैष्म्याःअयमेवपतिर्योग्यः ३७ अतः भैष्म्याः असावेवपाणिंगृह्णातुइत्यूचुः ३८ ततः सा रुक्मिणीकृष्णचरणांबुजंध्यायती यतवाक् शूरैः गुप्तासतीसखीभिः सहगौर्याः पादपद्मंद्रष्टुंपद्भ्यांगौर्यालयंविवेश ३९ ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(साकन्याचप्रागात्भटैर्योधैः । तस्या)गमनंविज्ञिनष्टिद्वयेन पद्भ्यामिति ४० (उपमातृभिःसह । राजसमीपवर्तिभिश्चयोधैर्गुप्ताराजरूपैर्भटैर्वा) ४१ अपिच । मृदंगेति । जघ्निरेआहतावादिताइत्यर्थः ।
(नानाविधाउपहाराउपायनानिबलयश्चपूजोपचाराःतैःसह ।) वारमुख्यागणिकोत्तमाः ४२ ४३ उपस्पृश्यआचम्य ४४ प्रवयसोवृद्धाः । भवान्वितामितिभवस्योपसर्जनत्वंस्त्रीकर्मोचितमुक्तम् । (तत्रांबि
कायाउपास्यत्वात्प्राधान्यद्योतनार्थंवा ।) ४५ नमस्यइतिरुक्मिण्यातदैवदृष्टोयंमंत्रः । स्वसंतानयुतांगणेशादिसहिताम् । आत्मारामोसौकथंत्वत्पतिर्भवेदितिचेदतआह । अनुमोदतामितिभवतीश्रीकृ
ष्णएववा ४६ (प्रदीपावलिभिःदीपमालाभिः) वासः स्रग्गंधादिभिरंबिकांसमपूजयत् ४७ तथाविप्रस्त्रियोपिसुवासिनीःतैर्द्रव्यैःलवणादिभिश्चसमपूजयदिति४८शेषांनिर्माल्यम् ४९ मुनिव्रतंमौनादि।
भृत्यांसखीं (रत्नांगुलीयकैरुपशोभितेनताहशेनपाणिना) ५० तांविलोक्यवीरासुमुहुरितितृतीयेनान्वयः । श्यामांअजातरजस्कां (व्यंजत्स्तनींप्रकाशमानकुचाम् । वयःसंधिरुक्तः ।) कुंतले
भ्यःशंकितेइवचपलेईक्षणेयस्यास्ताम् ५१ द्विजादंताएवकुंदानांकुड्मलानिमुकुलानिबिंबफलवद्योधरःतस्यद्युतिभिःशोणायमानानियस्यास्ताम् । कलाशोभातद्युक्तंनूपुरंकलानूपुरंसिंजच्चतत्कलानू
॥१९॥ पुरंचतस्यधामदीप्तिःतेनशोभितुंशीलमस्यतेनपदाचलंतीम् (यशस्विनोपिदर्शनजनितकामविकारेणार्दिताः) ५२

श्लोकाः ४०/५२

पद्भ्यांविनिर्ययौद्रष्टुंभवान्याःपादपल्लवम् ॥ साचानुध्यायतीसम्यग्मुकुंदचरणांबुजम् ४० यतवाङ्मातृभिःसार्धंसखीभिःपरिवारिता ॥ गुप्ताराजभटैःशूरैः
सन्नद्धैरुद्यतायुधैः ४१ मृदंगशंखपणवास्तूर्यभेर्यश्चजघ्निरे ॥ नानोपहारबलिभिर्वारमुख्याःसहस्रशः ॥ स्रग्गंधवस्त्राभरणैर्द्विजपत्न्यःस्वलंकृताः ४२
गायंतश्चस्तुवंतश्चगायकावाद्यवादकाः ॥ परिवार्यवधूंजग्मुःसूतमागधवंदिनः ४३ आसाद्यदेवसदनंधौतपादकरांबुजा ॥ उपस्पृश्यशुचिःशांताप्रविवे
शांबिकांतिकम् ४४ तांवैप्रवयसोबालांविधिज्ञाविप्रयोषितः ॥ भवानींवंदयांचक्रुर्भवपत्नींभवान्विताम् ४५ नमस्येत्वांबिकेभीक्ष्णंस्वसंतानयुतांशिवा
म् ॥ भूयात्पतिर्मेभगवान्कृष्णस्तदनुमोदताम् ४६ अद्भिर्गंधाक्षतैर्धूपैर्वासःस्रग्माल्यभूषणैः ॥ नानोपहारबलिभिःप्रदीपावलिभिःपृथक् ४७ विप्रस्त्रि
यःपतिमतीस्तथातैःसमपूजयत् ॥ लवणापूपतांबूलकंठसूत्रफलेक्षुभिः ४८ तस्यैस्त्रियस्ताःप्रददुःशेषांयुयुजुराशिषः ॥ ताभ्योदेव्यैनमश्चक्रेशेषांचजगृ
हेवधूः ४९ मुनिव्रतमथत्यक्त्वानिश्चक्रामांबिकागृहात् ॥ प्रगृह्यपाणिनाभृत्यांरत्नमुद्रोपशोभिना ५० तांदेवमायामिववीरमोहिनींसुमध्यमांकुंडलमंडि
ताननाम् ॥ श्यामांनितंबार्पितरत्नमेखलांव्यंजत्स्तनींकुंतलशंकितेक्षणाम् ५१ शुचिस्मितांबिंबफलाधरद्युतिशोणायमानद्विजकुंदकुड्मलाम् ॥ पदा
चलंतींकलहंससगामिनींसिंजत्कलानूपुरधामशोभिना ॥ विलोक्यवीरासुमुहुःसमागतायशस्विनस्तत्कृतहृच्छयार्दिताः ५२

चूर्णिका ४० तदनु विप्रपत्न्यः गायकाः सूतादयश्च वाद्यघोषैः वधूंपरिवार्य जग्मुः ४१ ४२ ४३ ततः वृद्धस्त्रियः तांवधूं भवानींवंदयांचक्रुः ४४ ४५ नमस्येत्वांबिकेभीक्ष्णंस्वसं
तानयुतांशिवाम् भूयात्पतिर्मेभगवान्कृष्णस्तदनुमोदताम् ४६ ततः साकन्यावासःस्रगादिभिःअंबिकांअपूजयत् ४७ एवंविप्रस्त्रियोपितैर्द्रव्यैर्लवणादिभिश्चतां अपूजयन् ॥१९॥
४८ ततः ताः स्त्रियः तस्यैअशिषोददुः ततोरुक्मिणी ताभ्योदेव्यैच नमस्कृत्यनिर्माल्यंगृहीत्वा ४९ मौनंत्यक्त्वाअंबिकालयात् निश्चक्राम ५० ततः तांस्वपाणिना सखीं
धृत्वायांतींवीरमोहिनींशुचिस्मितांपदाचलंतीं हरयेस्वशोभांअर्पयंतींतांवीक्ष्यतत्कृतकामार्दिताः वीराः मुमुहुः क्षितौपेतुश्च ५१ ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नेकवलंमुमुहुः । पेतुश्चेत्याह । यामिति।यात्राभिषे गहरयेस्वलावण्यंसमर्पयंतींयांवीक्ष्यक्षितौपेतुः ।(तस्याउदारोहासःव्रीडायुक्तोवलोकश्चताभ्यांहृतचेतसः । उज्झितास्त्रागलितशस्त्राइत्यर्थः)५३ सातान्
प्राप्तान्ह्रियैक्षत । तदैवाच्युतंचददर्शेत्युत्तरेणान्वयःचलपद्मकोशतुल्यौचरणौचालयंती५४चलन्सुपर्णलक्षणंगरुडध्वजम् । हरिःसिंहः ५५ (तंस्वपराभवंअपकीर्तिंचपरेजरासंधादयोनसहंतेस्म) ते
षामाक्रोशमाह । अहोधिगस्मान्यतोस्माकंयशोगोपैर्हृतम् (केसरिणांसिंहानाम् । ५६)॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांरुक्मिणीहरणंत्रिपंचाशतमोऽध्यायः ५३ ॥ ॥ ७ ॥
चतुःपंचाशत्तमेतुजित्वाराज्ञोऽरिपक्षगान् ॥ रुक्मिणंचाविरूप्यायभैम्याःपाणिपुरेऽग्रहीत् ॥ १ ॥ इतीतिअहोधिगस्मानित्येवंवदंतःसुसंरब्धाःक्रोधाविष्टाःदंशिताःकृतसंनाहाःपरिक्रांताःपरिवृताःअन्वी
युरन्वधावन् १ (यादवानामनीकेषुयूथपाइवगदादयः) विस्फूर्ज्यटंकारयित्वा २ परेषांशूराणांवाहुल्येयादवानामचलत्वेचदृष्टांतः ३ मेघाइति (अंभोजलानि । शरासारैःशररूपधारासंपातैः ।) ऐ
॥२०॥ क्षत्ऐक्षत ४ मास्मभैःमाभयंकुरु । हेवामलोचनेवराक्षितावकैःत्वदीयैःकृत्वा ५ सवासौविक्रमश्चतं (असहमानाः) ६ उष्णीषाणिशिरोवतंसवस्त्राणितत्सहितानिशिरांसि।(अश्विनामश्वारोहाणाम्) ७

श्लोकाः

यांवीक्ष्यतेनृपतयस्तदुदारहासव्रीडावलोकहृतचेतसउज्झितास्त्राः ॥ पेतुःक्षितौगजरथाश्वगताविमूढायात्राच्छलेनहरयेऽर्पयतींस्वशोभाम् ५३ सैवंशनै
श्चलयतीचलपद्मकोशौप्राप्तिंतदाभगवतःप्रसमीक्षमाणा ॥ उत्सार्यवामकरजैरलकानपांगैःप्राप्तान्ह्रियैक्षतनृपान्ददृशेऽच्युतंसा ५४ तांराजकन्यांरथमा
रुरुक्षतींजहारकृष्णोद्विषतांसमीक्षताम् ॥ रथंसमारोप्यसुपर्णलक्षणंराजन्यचक्रंपरिभूयमाधवः ॥ ततोययौरामपुरोगमैःशनैःसृगालमध्यादिवभागहृद्धरिः
५५ तंमानिनःस्वाभिभवंयशःक्षयंपरेजरासंधवशानसेहिरे ॥ अहोधिगस्मान्यशआत्तधन्वनांगोपैर्हृतंकेसरिणांमृगैरिव ५६ ॥ इतिश्रीभागवतेमहापुराणे
दशमस्कंधेरुक्मिणीहरणंनामत्रिपंचाशत्तमोऽध्यायः ५३ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ इतिसर्वेसुसंरब्धावाहानारुह्यदंशिताः ॥ स्वैःस्वैर्ब
लैःपरिक्रांताअन्वीयुर्धृतकार्मुकाः १ तानापततआलोक्ययादवानीकयूथपाः ॥ तस्थुस्तत्संमुखाराजन्विस्फूर्ज्यस्वधनूंषिते २ अश्वपृष्ठेगजस्कंधेरथोप
स्थेचकोविदाः ॥ मुमुचुःशरवर्षाणिमेघाअद्रिष्वपोयथा ३ पत्युर्बलंशरासारैश्छन्नंवीक्ष्यसुमध्यमा ॥ सव्रीडमैक्षत्तद्वक्त्रंभयविह्वललोचना ४ प्रहस्यभग
वानाहमास्मभैर्वामलोचने ॥ विनंक्ष्यत्यधुनैवैतत्तावकैःशात्रवंबलम् ५ तेषांतद्विक्रमंवीरागदसंकर्षणादयः ॥ अमृष्यमाणानाराचैर्जघ्नुर्हयगजान्रथान् ६
पेतुःशिरांसिरथिनामश्विनांगजिनांभुवि ॥सकुंडलकिरीटानिसोष्णीषाणिचकोटिशः ७

५३/७

चूर्णिका

५३ ५४ एवंसाशनैश्चरणौचालयंती प्राप्तान् नृपान् अच्युतंचह्रियाऐक्षत ५५ तदाहरिः तां रथं आरुरुक्षतीं हृत्वास्वरथं आरोप्य राजन्यचक्रंपरिभूयरामादिभिः सहययौ
ततः मानिनः तेराजानः जरासंधादयः स्वपराभवं नसेहिरेअहोअस्मान् धिक् यतः आत्तधन्विनांनःयशः गोपैः हृतंइति ॥ ५७ ॥ इतिदशमेत्रिपंचाशत्तमः ॥५३॥
॥ श्रीशुकउवाच ॥ ॥ हेराजन्ततः सर्वेराजानः क्रुद्धाः संतःस्वसैन्यैः सहतंअनुययुः १ ततः यादवाः तान्दृष्ट्वासंमुखाः तस्थुः २ ततः अन्योन्यंशरान् चिक्षि
पुः ३ तदारुक्मिणीपत्युर्बलंशरैश्छिन्नंदृष्ट्वाचकितनेत्रासती कृष्णमुखंऐक्षत ४ ततः भगवान्प्रहस्यतां आह त्वंमाभैः अधुनैव शत्रुबलं नंक्ष्यति ५ ततः गदसंकर्षणादयः
शत्रुवीर्यंअसहमानाः शरैः अश्वादीन् जघ्नुः तदाशत्रूणांकोटिशः शिरांसिपेतुः ६ ७

॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करभाःप्रकोष्ठाःऊरुविशेषणंवा ८ (हन्यमानानिबलानीकानिबलवत्सैन्यानियेषांतेराजानः) ९ अप्राप्तदारमेवतंहृतदारमिवातुरम् १० निष्ठास्थैर्यम् ११ कुहकोनर्तयितातस्येच्छया (एवमीहतेचेष्ट अ०
भा.द.उ. ते) दुःखेपीहमानत्वेनपारवश्यंव्यक्तंदर्शितम् १२ अत्रचाहमेवदृष्टांतइत्याहजरासंधः । शौरेरिति । अहंशौरेःकृष्णात्सकाशात्(सप्तदशसंयुगानिपराजितोस्मि) । परंकेवलमंतिमंवाएकंसंयुगंजिग्ये जित
वानहम् १३ दैवमदृष्टंतद्युक्तेन (विद्रावितंविचालितम्) १४ (वीरयूथपानांयूथानिपांतीतितथा) फल्गुतंत्रैःस्वल्पसैन्यैः १५ (आत्मानुसारिणिस्वानुकूले) प्रदक्षिणमनुकूलंस्यात् १६ १७ ॥५४॥
टीका (अक्षौहिण्यासैन्येनावृतः) १८ (अमर्षीअसहनः) १९ (अप्रत्युह्यअपरावर्त्य) २० २१ (नेष्येहरिष्यामीत्यर्थः) गोपालस्यवेदपालकस्येतिवास्तवोर्थः । तथासुदुर्मतेरितिशोभनाअनुग्रहवती
दुष्टेष्वपिमतिर्यस्येति २२ २३ यदूनांकुलपांसन कुलदूषण । वस्तुतस्तुयदूनांकुलस्यपतेहेअंसनस्वयंचरिपुहननचतुर । अंससमाधातेइत्यस्माद्धातोःकर्तरिल्युट्प्रत्ययोनंद्यादिविहितः २४

॥२१॥ हस्ताःसासिगदेष्वासाःकरभाऊरवोंघ्रयः॥अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरांसिच ८ हन्यमानबलानीकावृष्णिभिर्जयकांक्षिभिः॥राजानोविमुखाजग्मुर्जरासंध श्लोकाः
पुरःसराः९शिशुपालंसमभ्येत्यहृतदारमिवातुरम्॥नष्टत्विषंगतोत्साहंशुष्यद्वदनमब्रुवन् १० भोभोपुरुषशार्दूलदौर्मनस्यमिदंत्यज ॥ नप्रियाप्रिययोराजन्
निष्ठादेहिषुदृश्यते११यथादारुमयीयोषिन्नृत्यतेकुहकेच्छया॥एवमीश्वरतंत्रोयमीहतेसुखदुःखयोः १२शौरेःसप्तदशाहंवैसंयुगानिपराजितः॥त्रयोविंशतिभिः ८/२४
सैन्यैर्जिग्यएकमहंपरं१३तथाप्यहंनशोचामिनप्रहृष्यामिकर्हिचित्॥कालेनदैवयुक्तेनजानन्विद्रावितंजगत् १४ अधुनापिवयंसर्वेवीरयूथपयूथपाः॥पराजि
ताःफल्गुतंत्रैर्यदुभिःकृष्णपालितैः १५रिपवोजिग्युरधुनाकालआत्मानुसारिणि॥तदावयंविजेष्यामोयदादैवंप्रदक्षिणं१६एवंप्रबोधितोमित्रैश्चैद्योऽगात्सानुगः
पुरं॥हतशेषाःपुनस्तेपिययुःस्वंस्वंपुरंनृपाः१७रुक्मीतुराक्षसोद्वाहंकृष्णद्विडसहन्स्वसुः॥पृष्ठतोऽन्वगमत्कृष्णमक्षौहिण्यावृतोबली १८ रुक्म्यमर्षीसुसंर
ब्धःशृण्वतांसर्वभूभुजाम् ॥ प्रतिजज्ञेमहाबाहुर्दंशितःसशरासनः १९ अहत्वासमरेकृष्णमप्रत्युह्यचरुक्मिणीम् ॥ कुंडिनंनप्रवेक्ष्यामिसत्यमेतद्ब्रवीमिवः
२० इत्युक्त्वारथमारुह्यसारथिंप्राहसत्वरः ॥ नोदयाश्वान्यतःकृष्णस्तस्यमेसंयुगंभवेत् २१ अद्याहंनिशितैर्बाणैर्गोपालस्यसुदुर्मतेः ॥ नेष्येवीर्यमदंयेन
स्वसामेप्रसभंहृता २२ विकत्थमानःकुमतिरीश्वरस्याप्रमाणवित् ॥ रथेनैकेनगोविंदंतिष्ठतिष्ठेत्यथाह्वयत् २३ धनुर्विकृष्यसुदृढंजघ्नेकृष्णंत्रिभिःशरैः ॥
आहचात्रक्षणंतिष्ठयदूनांकुलपांसन २४

चूर्णिका ८ ततः हन्यमानबलाः जरासंधादयः विमुखाः संतः शुष्यद्वदनंशिशुपालं एत्य अब्रुवन् ९ १० हेचैद्य दौर्मनस्यं त्यज अहंसप्तदशवारान्कृष्णेनपराजितोऽपिमयासोऽपि
एकवारंजितः तथापि अहंनशोचामि नहृष्यामि अधुनापि यदुभिः पराजिताः वयं यदा कालः अनुकूलः स्यात्तदा तान् जेष्यामः ११ १२ १३ १४ १५ १६ एवंबो
धितः चैद्यः स्वपुरं अगात् तदाजरासंधादयोपिस्वंस्वंपुरंअगमन् १७ रुक्मीतु अक्षौहिण्यावृतः सन् कृष्णं अन्वगमत् १८ तदाराज्ञांशृण्वतांसतां प्रतिजज्ञे तां आह ॥२१॥
युद्धेकृष्णं अजित्वा रुक्मिणीं अगृहीत्वा कुंडिनंनप्रवेक्ष्यामि १९ २० इत्युक्त्वा रथं आरुह्य सारथिं आह हेसूत यत्र कृष्णः तत्र रथंनय अद्यशरैः तस्यवीर्यमदं
नेष्ये २१ २२एवंविकत्थमानः कृष्णंतिष्ठतिष्ठेति आहूय तं त्रिभिः शरैः जघ्ने आहच २३ २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ध्वांक्षःकाकःसयथाहविर्मुष्णातितद्वत् । वस्तुतस्तुअध्वांक्षवदितिच्छेदःसहस्राक्षवदित्यर्थःहेमंदस्थिरेत्यर्थः २५ (ममबाणैर्हतःसन्यावन्नशयीथाःतावद्दारिकांकन्यांमुंच । व्यर्थविकत्थनमितिस्मयन्)
२६ (सचरुक्मी) २७ (तैःरुक्मिप्रेरितैस्ताडितःतत्रुक्मिणोधनुः) २८ २९ ३० (तस्यखड्गंचर्मंचबाणैश्छित्त्वा) ३१ ३२ ३३ परित्रासेनविकंपितान्यंगानियस्याःतया । शुचाशोकेनावशुष्य
न्मुखंयस्याःरुद्धःकंठोयस्याः । साचसाचतया । कातर्येणवैक्लव्येनविस्रंसिताहेममयीमालायस्यास्तयागृहीतौपादौयस्यसः ३४ (चैलेनवस्त्रेण) सश्मश्रुकेशंस्थानेस्थानेअवशिष्टानिश्मश्रूणिकेशाश्च
यथाभवतितथातेनैवासिनाप्रवपन्मुंडयन्व्यरूपयत्विरूपमकरोत् ३५ (संकर्षणादयोयदुप्रवीरास्तत्ररुक्मिणंददृशुः) तथाभूतंहतप्रायमित्युत्तरवाक्येप्यनुषंगः ३६ (वपनरूपंवैरूप्यंवधप्रायमित्यर्थः)
३७ रुक्मिणींसांत्वयति । मैवास्मानिति । (हेसाध्विअसूयेथादोषदृष्ट्यापश्येरित्यर्थः) ३८

श्लोकाः २५/३८

कुत्रयासिस्वसारंमेमुषित्वाध्वांक्षवद्धविः ॥ हरिष्येद्यमदंमंदमायिनःकूटयोधिनः २५ यावन्नमेहतोबाणैःशयीथामुंचदारिकाम् ॥ स्मयन्कृष्णोधनुश्छि
त्वापड्भिर्विव्याधरुक्मिणम् २६ अष्टभिश्चतुरोवाहान्द्वाभ्यांसूतंध्वजंत्रिभिः ॥ सचान्यद्धनुरादायकृष्णंविव्याधपंचभिः २७ तैस्ताडितःशरौघैस्तच्चिच्छे
दधनुरच्युतः ॥ पुनरन्यदुपादत्ततदप्यच्छिनदव्ययः २८ परिघंपट्टिशंशूलंचर्मासीशक्तितोमरौ ॥ यद्यदायुधमादत्ततत्सर्वमच्छिनद्धरिः २९ ततोर
थादवप्लुत्यखड्गपाणिर्जिघांसया ॥ कृष्णमभ्यद्रवत्क्रुद्धःपतंगइवपावकम् ३० तस्यचापततःखड्गंतिलशश्चर्मचेषुभिः ॥ छित्त्वाऽसिमाददेतिग्मंरुक्मिणं
हंतुमुद्यतः ३१ दृष्ट्वाभ्रातृवधोद्योगंरुक्मिणीभयविह्वला ॥ पतित्वापादयोर्भर्तुरुवाचकरुणंसती ३२ योगेश्वराप्रमेयात्मन्देवदेवजगत्पते ॥ हंतुंनार्ह
सिकल्याणभ्रातरंमेमहाभुज ३३ ॥श्रीशुकउवाच ॥ तयापरित्रासविकंपितांगयाशुचाऽवशुष्यन्मुखरुद्धकंठया ॥ कातर्यविस्रंसितहेममालयागृहीतपादः
करुणोन्यवर्तत ३४ चैलेनबद्ध्वातमसाधुकारिणंसश्मश्रुकेशंप्रवपन्व्यरूपयत् ॥ तावन्ममर्दुःपरसैन्यमुद्भतंयदुप्रवीरानलिनींयथागजाः ३५ कृष्णांति
कमुपव्रज्यददृशुस्तत्ररुक्मिणम् ॥ तथाभूतंहतप्रायंदृष्ट्वासंकर्षणोविभुः ॥ विमुच्यबद्धंकरुणोभगवान्कृष्णमब्रवीत् ३६ असाध्विदंत्वयाकृष्णकृतमस्मज्जु
गुप्सितम् ॥ वपनंश्मश्रुकेशानांवैरूप्यंसुहृदोवधः ३७मैवास्मान्साध्व्यसूयेथाभ्रातुर्वैरूप्यचिंतया ॥ सुखदुःखदोनचान्योस्तियतःस्वकृतभुक्पुमान्३८

चूर्णिका

अरेमेभगिनीं हृत्वा क्व यास्यसि २५ हेमंद यावत् मच्छरैःनहतोसि तावत्रुक्मिणींमुंच तदाकृष्णःविस्मितःसन् तस्यधनुःछित्त्वातंषड्भिर्बाणैःविव्याध २६अश्वान् अष्टभिःसूतं
द्वाभ्यां त्रिभिःध्वजम् विव्याध सचरुक्मी अन्यत् धनुरादाय पंचभिः शरैः कृष्णंविव्याध २७ तदपि धनुः कृष्णः चिच्छेद तदाकृष्णंप्रतिपरिघशूलखड्गशक्तितोमरान्
चिक्षेपतान् कृष्णः चिच्छेद २८ २९ तदा रुक्मी रथादवप्लुत्यजिघांसयाखड्गपाणिः कृष्णं अधावत् तदाकृष्णः बाणेनखड्गंछित्त्वातंहंतुं असिं आददे ३० ३१ ततः
रुक्मिणी भीतासती भर्तुः पादयोः पतित्वा करुणं उवाच ३२ हेभगवन् मे भ्रातरंहंतुं नार्हसि ३३ एवंतयागृहीतचरणः हरिः वधात् निवृत्तः सन् तं वस्त्रेणबद्ध्वावपनं
कृत्वा व्यरूपयत् ३४ ३५ ततः रामः कृष्णांतिकं आगत्य तथाभूतंरुक्मिणंदृष्ट्वा बद्धंतंविमुच्यकृष्णं अब्रवीत् ३६ हेकृष्ण त्वयाइदंअसाधुकृतम् ३७ हेसाध्विअस्मान्
भ्रातुर्वैरूप्यचिंतयामासूयेथाः यतः सुखदुःखदः अन्योनास्ति ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पुनःकृष्णमाक्षिपति बंधुरिति (वधार्होदोषोऽपराधोयस्यतादृशोपिबंधुर्बंधोःसकाशाद्वधंनार्हति । किंतुबंधुनासत्याज्यः .) ३९ पुनर्देवींप्रत्याह । क्षत्रियाणामिति । येनधर्मेणभ्रातापिभ्रातरंहन्यात् । ततस्तस्मात्घोरतरःअतिदारुणःधर्मश्च । अतःकोऽस्माकमपराधइतिभावः ४० पुनःश्रीकृष्णंप्रत्याह राज्यस्येति । (राज्यादेरन्यस्यवाविषयस्यहेतोर्मानिनःपात्रभूतानपिश्रीमदांधाःहियस्मात्क्षिपंतित स्मादंड्याएवते) तथाप्यस्माकमेतदनुचितमितिभावः ४१ पुनर्देवींप्रत्याह तवेयमिति । सर्वभूतेषुदुर्हृदांअहितानांभ्रातॄणांअज्ञवत्भद्रंमन्यसेइच्छसिइयंतवविषमाअसमीचीनाबुद्धिः कुतःयतस्तदेवसु हृदामभद्रमिति । यद्वा सर्वभूतेषुदुर्हृदामपिस्वसुहृदांभद्रमेवेदंदंडरूपंमुंडनंअभद्रंयन्मन्यसेतवेयंविषमाबुद्धिरिति । अथवा सर्वभूतेषुमध्येदुर्हृदांशिशुपालादीनांअभद्रंसुहृदां (रुक्म्यादीनां) भद्रंचयन्मन्य सेतवेयंविषमाबुद्धिःसमानभवतिअज्ञवत्अज्ञानामिव ४२ कुतइत्यतआह । आत्ममोहइति । (देहएवात्मेतिमंतुंशीलंयेषांतेषामयंआत्मविषयकोमोहोभ्रांतिः) ४३ परमार्थमाह एकएवेति परःशुद्धः । ज्योतिश्चंद्रादि यथोदकेषु नभोयथा घटादिषु इति (एकस्यशुद्धस्यचनानात्वेदृष्टांतौ) ४४ कुतस्तर्हिचंद्रादिवदात्मानंएकंशुद्धंनप्रतीमस्तत्राह । देहइति । द्रव्यमधिभूतंप्राणाइंद्रियाण्यध्यात्मंगुणश ब्देनाधिदैवंतत्त्रितयात्मकःदेहोपाधिनाशुद्धएकोनप्रतीयतइत्यर्थः ४५ ननुदेहसंबंधेनापिसंसारेसतिशुद्धत्वंगतमेव तत्राह नात्मनइति । हेसतिअन्येनअधिभूतादिनाआत्मनःसंयोगवियोगौनस्तःकुतः असतःअसत्त्वादन्यस्येत्यर्थः । कुतोऽसत्त्वंतत्राह । तद्धेतुत्वादिति । तस्यान्यस्यभूतेंद्रियादेःप्रसिद्धेःप्रकाशस्यतद्धेतुत्वादात्महेतुकत्वात् । ननु देवैरधिष्ठितेभ्यइंद्रियेभ्योभूतानांप्रतीतिःप्रसिद्धा । भूत प्रतीत्याचतत्प्रसिद्धिर्नात्मनइत्यतआह । दृग्रूपाभ्यांयथारवेः । यथाप्रकाश्यप्रकाशकत्वेनवर्तमानयोरपिचक्षूरूपयोःरवेःसकाशात्प्रसिद्धिःद्वयोरपितैजसत्वात्तदभेदश्च । तथा भूतेंद्रियादीनांपरस्परासिद्धाना मपिचैतन्याधीनएवप्रकाशः । तत्कार्यत्वाच्चतद्व्यतिरेकेणासत्त्वंचेत्यर्थः तथाचद्वादशे वक्ष्यति । 'दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेत् । एवंधीःखानिमात्राश्चनस्युरन्यतमादृतादि'ति । यद्वा रवेःप्रसि द्धाभ्याभेवदृग्रूपाभ्यांपरस्परसिद्धिर्यथातद्वदिति ४६ देहसंबंधाभावादेवनात्मनोजन्मादयो ऽतिवक्तुंजन्मादीनांदेहधर्मत्वमाह । जन्मादयस्त्विति । (ननु) कथंतर्हिजातोहंबालोहंवृद्धोहमितिआत्म निजन्मादिप्रतीतिः । देहजन्यादिनैवेतिसदृष्टांतमाह । कलानामिवेति । इंदोःकलानामेवजन्मादयोनैवेंदो -(-रम्मयस्य) यथातद्वत् । यथाचकलानाशादेवकुहूरमावास्याइंदुक्षयउच्यते तद्वदस्या त्मनोदेहनाशादेवमृतिव्यवहारइत्यर्थः ४७

श्लोकाः ३९—४७

बंधुर्वधार्हदोषोपिनबंधोर्वधमर्हति ॥ त्याज्यःस्वेनैवदोषेणहतःकिंहन्यतेपुनः ३९ क्षत्रियाणामयंधर्मःप्रजापतिविनिर्मितः ॥ भ्रातापिभ्रातरंहन्याद्ये नघोरतरस्ततः ४० राज्यस्यभूमेर्वित्तस्यस्त्रियोमानस्यतेजसः ॥ मानिनोन्यस्यवाहेतोःश्रीमदांधाःक्षिपंतिहि ४१ तवेयंविषमाबुद्धिःसर्वभूतेषुदुर्हृदाम् ॥ यन्मन्यसेसदाऽभद्रंसुहृदांभद्रमज्ञवत् ४२ आत्ममोहोनृणामेषकल्पतेदेवमायया ॥ सुहृद्दुर्हृदुदासीनइतिदेहात्ममानिनाम् ४३ एकएवपरोह्यात्मासर्वेषाम पिदेहिनाम् ॥ नानेवगृह्यतेमूढैर्यथाज्योतिर्यथानभः ४४ देहआद्यंतवानेषद्रव्यप्राणगुणात्मकः ॥ आत्मन्यविद्ययाक्लृप्तःसंसारयतिदेहिनम् ४५ नात्मनोन्येनसं योगोवियोगोवासतःसति ॥ तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यांयथारवेः ४६ जन्मादयस्तुदेहस्यविक्रियानात्मनःक्वचित् ॥ कलानामिवनैवेंदोर्मृतिर्ह्यस्यकुहूरिव ४७

चूर्णिका

किंच भ्राता भ्रातरं हन्यात् अयंक्षत्रियाणांधर्मएव ३९ ४० हेदेवि देहिनां आत्मा एक एव तस्मिन् अविद्ययाक्लृप्तः देहः आत्मानंसंसारयति जन्मादिविकाराअपिदेहस्यैवना त्मनः अतः अज्ञानजं शोकं तत्ज्ञानेन निर्वर्त्य स्वस्था भव ४१ ४२ ४३ ४४ ४५ ४६ ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नन्वात्मनोदेहादिसंबंधाभावेकथंभोक्तृभोग्यभोगप्रतीतीरित्याशंक्यस्वप्नदृष्टांतनसमर्थयति । यथाशयानइति । आत्मानंभोक्तारंविषयान्भोग्यान्फलंभोगंअसत्यप्यर्थेअन्वनुभुंक्तेतथाऽबुधःसंसारंप्राप्नोती
ति ४८ आत्मानंशोषयतिविमोहयतिचेतितथातंनिर्हृत्यअपाकृत्य ४९ (बुद्ध्याज्ञानेन) समादधेसमाहितमकरोत् ५० रुक्मिणस्त्वेवंश्रुतवतोपिनाज्ञानंनिवृत्तमितिदर्शयन्नाह प्राणावशेषइति । ॥५४॥
(प्राणाएवावशेषोयस्यसःद्विड्भिःशत्रुभिः बलंसैन्यंशरीरसामर्थ्यंवा) ५१ अहत्वाऽज्ञात्वाऽदुर्मतिमितिचसत्योर्थः । अप्रत्यूह्यअनावर्त्यअप्रतिबुध्येतितुसत्यम् । यवीयसींस्वसारम् ५२ यत्रविरूपि
तस्तत्रैवावसत्यत्रचभोजकटंनामपुरमभवत् ५३ (उपयेमेपरिणीतवान्) ५४ ५५ वरयोःवरवध्वोः । पारिबर्हंदेयमुपस्करम् (अतएवचित्राणिवासांसिययोः) ५६ (साद्वारिका) उत्तभितैरिंद्रकेतु
भिर्ध्वजविशेषैरुपक्लृप्तानिमंगलानिलाजांकुरपुष्पप्रकारादीनितैः ५७ (द्वाःसु) आहूताआहूताःप्रेष्ठाभूभुजस्तेषांगजैःपरामृष्टाः संस्पृष्टारंभाश्चपूगाश्चतैरुपशोभिता । यद्वा गजैःपरामृष्टाउच्छ्रितारंभाश्च

॥२४॥ पूगाश्चतैरुपशोभिता । (कथंभूतैः मदच्युद्भिः मदस्राविभिः अतएवमदेनसिक्तोमार्गोयस्याःसा । अथवागंधोदकादिभिः सिक्तमार्गा)५८ संभ्रमादौत्सुक्यात्परिधावतांबंधूनांमध्येमिथःसमेत्य (कुरु
प्रभृतयस्तस्मिन्पुरे) मुदंप्रापुः ५९ ६० (महामोदःमहान्हर्षः) ६१ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुःपंचाशत्तमोध्यायः ५४ ॥ ॥ ७ ॥

श्लोकाः ४८ / ६१

यथाशयानआत्मानंविषयान्फलमेवच ॥ अनुभुंक्तेप्यसत्यर्थेतथाप्नोत्यबुधोभवम् ४८ तस्मादज्ञानजंशोकमात्मशोषविमोहनम् ॥ तत्त्वज्ञानेननिर्हृ
त्यस्वस्थाभवशुचिस्मिते ४९ श्रीशुकउवाच ॥ एवंभगवतातन्वीरामेणप्रतिबोधिता ॥ वैमनस्यंपरित्यज्यमनोबुद्ध्यासमादधे ५० प्राणावशेषउत्सृष्टो
द्विड्भिर्हतबलप्रभः ॥ स्मरन्विरूपकरणंवितथात्ममनोरथः ५१ चक्रेभोजकटंनामनिवासायमहत्पुरम् ॥ अहत्वादुर्मतिंकृष्णमप्रत्यूह्ययवीयसीम् ५२ कुं
डिनंनप्रवेक्ष्यामीत्युक्त्वातत्रावसद्रुषा ५३ भगवान्भीष्मकसुतामेवंनिर्जित्यभूमिपान् ॥ पुरमानीयविधिवदुपयेमेकुरूद्वह ५४ तदामहोत्सवोनॄणांयदुपु
र्यांगृहेगृहे ॥ अभूदनन्यभावानांकृष्णेयदुपतौनृप ५५ नरानार्यश्चमुदिताःप्रमृष्टमणिकुंडलाः ॥ पारिबर्हमुपाजह्रुर्वरयोश्चित्रवाससोः ५६ सावृष्णिपुर्युत्त
भितेंद्रकेतुभिर्विचित्रमाल्यांबररत्नतोरणैः ॥ बभौप्रतिद्वार्युपक्लृप्तमंगलैरापूर्णकुंभागुरुधूपदीपकैः ५७ सिक्तमार्गामदच्युद्भिराहूतप्रेष्ठभूभुजाम् ॥ गजैर्द्वाः
स्सुपरामृष्टरंभापूगोपशोभिता ५८ कुरुसृंजयकैकेयविदर्भयदुकुंतयः ॥ मिथोमुमुदिरेतस्मिन्संभ्रमात्परिधावताम् ५९ रुक्मिण्याहरणंश्रुत्वागीयमानं
ततस्ततः ॥ राजानोराजकन्याश्चबभूवुर्भृशविस्मिताः ६० द्वारकायामभूद्राजन्महामोदःपुरौकसाम् ॥ रुक्मिण्यारमयोपेतंदृष्ट्वाकृष्णंश्रियःपतिम् ६१
॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुःपंचाशत्तमोऽध्यायः ५४ ॥ ॥ छ ॥ ॥

चूर्णिका

४८ ४९ ॥ श्रीशुकउवाच ॥ एवंरामेण बोधितारुक्मिणीखेदंत्यक्त्वा मनः समाहितं अकरोत् ५० ततः रुक्मीशत्रुभिः उत्सृष्टः सन् विरूपकरणं स्मरन् प्रतिज्ञापालनाय
तत्रैवस्थित्वा स्वनिवासाय भोजकटं नामपुरं चक्रे ५१ ५२ ५३ भगवान् रुक्मिणीं पुरं आनीय विधिवत् उपयेमे ५४ तदायदुपुर्यांगृहे गृहे उत्सवः आसीत् ५५ ॥२४॥
तदानरानार्यश्चमुदिताः सत्यः पारिबर्हं उपजह्रुः एवंसाद्वारका तोरणैः पूर्णकुंभादिभिश्चबभौ ५६ ५७ ५८ तदाकुरुसृंजयादयः मिथः समेत्य मुमुदिरे ५९ एवंरु
क्मिण्याहरणं श्रुत्वा राजानो राजकन्याश्च विस्मिता बभूवुः ततः रुक्मिण्यायुक्तं श्रीकृष्णं दृष्ट्वा पौराणां हर्षोभूत् ६० ॥ इतिदशमेचतुःपंचाशत्तमः ॥ ५४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पंचपंचाशत्तमेतुप्रद्युम्नोऽजनिकृष्णतः । शंबरेणहृतःसोथहत्वातंकांतयाऽऽगमत् ॥ १ ॥ प्रद्युम्नहानिलाभाद्यैःशंबराहरणादिना । कुटुंबिनामपत्यादिसुखदुःखमसूसुचत् ॥२॥ जांबवत्यादिविवाहेभ्यः
प्रागेवप्रद्युम्नजन्मततोविवाहाःततःशंबरगृहात्प्रद्युम्नप्रत्यागमनम् । अतः पुत्रकथनाप्रस्तावेपिप्रथमंप्रद्युम्नस्यजातमात्रस्यशंबरेणहरणंनिरूप्यते । प्रत्यागमनंतूत्तरकालीनमपिकथापर्यवसानायात्रोक्तमि
ति । वासुदेवाधिष्ठितचित्तप्रभवत्वाद्वासुदेवांशः । सृष्टिहेतुत्वाच्च । देहोपपत्तयेदेहप्राप्तये १ (वैदर्भ्यांरुक्मिण्यां) अनवमः अन्यूनः (सर्वावयवैःपितुःसमइत्यर्थः) २ सप्रसिद्धःकामशत्रुःशंबरःतंप्रद्युम्नमात्म
नः शत्रुंविदित्वा (कामरूपीमायावीत्यर्थः अनिर्दशंननिर्गतानिदशदिनानियस्मात्ताद्दशंसद्योजातमित्यर्थः) हृत्वासमुद्रेप्रास्य प्रक्षिप्य गृहमगादिति ३ (तंमीनो)-निर्जगारगिलितवान् (सोपिमीनःअपरै
र्मीनैःसहवृतोरुद्धःगृहीतःअथतंकैवर्ताः शंबरायददुरित्यर्थः) ४ (सूदाः पाचकाः) स्वधितिनाशस्त्रिकयाअवचन् (अवाद्यन्) खंडितवंतइत्यर्थः (दोअवखंडनेधातुः । मायावतीनामशंबरस्यमहानसा
ध्यक्षस्त्रीतस्यै) ५ तत्त्वंकामोयंतवभर्तेतिउत्पत्तिंश्रीकृष्णाद्रुक्मिण्यामुत्पन्नइति ६ (साचमायावती) यशस्विनीपतिव्रता । भर्तृदेहप्राप्तिंप्रतीक्षमाणा ७ (सारतिःशंबरेणसूपौदनसाधनेओदनःप्रसिद्धः
सूपोमुद्गान्नंतत्साधनेनिरूपितासती) तंशिशुंकामदेवंबुद्ध्वा ८ (सप्रद्युम्नःरूढंअंकुरितंयौवनंयस्यसः) विभ्रमसंमोहम् ९ अंगहेराजन् (सारतिः) सौरतैर्भावैः तमुपतस्थेअभजत् (सव्रीडहासे
नोत्तभितयाभ्रुवापश्यंतीति) १० (मतिरन्यथावर्तते । अतिक्रम्यत्यक्त्वेत्यर्थः) ११

॥२५॥

॥ श्रीशुकउवाच ॥ कामस्तुवासुदेवांशोदग्धःप्राग्रुद्रमन्युना ॥ देहोपपत्तयेभूयस्तमेवप्रत्यपद्यत १ सएवजातोवैदर्भ्यांकृष्णवीर्यसमुद्भवः ॥ प्रद्युम्नइतिवि
ख्यातःसर्वतोऽनवमःपितुः २ तंशंबरःकामरूपीहृत्वातोकमनिर्दशम् ॥ सविदित्वात्मनःशत्रुंप्रास्योदन्वत्यगाद्गृहम् ३ तंनिर्जगारबलवान्मीनःसोप्यपरैः
सह ॥ वृतोजालेनमहतागृहीतोमत्स्यजीविभिः ४ तंशंबरायकैवर्ताउपाजह्रुरुपायनम् ॥ सूदामहानसंनीत्वाऽवद्यन्स्वधितिनाऽद्भुतम् ॥ दृष्ट्वातदुदरेबालंमा
यावत्यैन्यवेदयन् ५ नारदोऽकथयत्सर्वंतस्याःशंकितचेतसः ॥ बालस्यतत्त्वमुत्पत्तिंमत्स्योदरनिवेशनम् ६ साचकामस्यवैपत्नीरतिर्नामयशस्विनी ॥ प
त्युर्निर्दग्धदेहस्यदेहोत्पत्तिंप्रतीक्षती ७ निरूपिताशंबरेणसासूपौदनसाधने ॥ कामदेवंशिशुंबुद्ध्वाचक्रेस्नेहंतदार्भके ८ नातिदीर्घेणकालेनसकार्ष्णीरूढयौ
वनः ॥ जनयामासनारीणांवीक्षंतीनांचविभ्रमम् ९ सातंपतिंपद्मदलायतेक्षणंप्रलंबबाहुंनरलोकसुंदरम् ॥ सव्रीडहासोत्तभितभ्रुवेक्षतीप्रीत्योपतस्थेरतिरंगसौ
रतैः १० तामाहभगवान्कार्ष्णिर्मातस्तेमतिरन्यथा ॥ मातृभावमतिक्रम्यवर्तसेकामिनीयथा ११

श्लोकाः १/११

चूर्णिका

॥ श्रीशुकउवाच ॥ ॥ प्राक्रुद्रमन्युनादग्धः कामः भूयः देहप्राप्तयेवासुदेवंप्राप १ सएवरुक्मिण्यांप्रद्युम्नइतिप्रसिद्धः जातः २ तदाशंबरः तंबालकं आत्मशत्रु
मिति ज्ञात्वा अनिर्दशंतंहृत्वा समुद्रे प्रक्षिप्य गृहंययौ ३ तंमत्स्यः गिलितवान् स मीनः अन्यैः सहकैवर्तैः धृतः तं शंबराय उपायनं ददुः ४ ततः सूदाः तंमत्स्यं
महानसंनीत्वा शस्त्रेण खंडितवंतः तदा तदुदरे बालंदृष्ट्वा मायावत्यै न्यवेदयन् ५ ततः नारदः तत्रागत्य बालस्य उत्पत्तिंमत्स्योदरनिवेशनंचतस्यै अकथयत् ६ साच
कामपत्नीरतिर्नाम्नीस्वपत्युः देहोत्पत्तिप्रतीक्षती शंबरेणसूपौदनसाधनेनियुक्ता सतीशिशुंकामं बुद्ध्वास्नेहंचक्रे ७ ८ सः शिशुः स्वल्पकालेनप्राप्तयौवनः सन् नारीणांमो
हं जनयामास ९ ततः सा तंनरलोकसुंदरं सौरतैः भावैः उपतस्थे १० तां प्रद्युम्नः आह हेमातः त्वंमातृभावं त्यक्त्वा कामिनीव वर्तसे ११

॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.द.उ. अधिकृतापत्नीत्यत्रहेतुः । रतिरहंभवान्कामइति १२ (त्वात्वांअनिर्दशंदशाहनिर्गमात्पूर्वमेवेत्यर्थः) १३ (जहिमारय । दुर्धर्षंदुर्धरमित्यर्थः) दुर्जयत्वेहेतुः । मायाशतविदमिति । तर्हिकथंहंतव्यस्त अ०
त्राहमायाभिरिति १४नात्रविलंबःकार्यइत्याह परिशोचतिरोदितीत्यर्थः१५ (शंबरप्रयुक्तानांसर्वासांमायानांविनाशनशीलांअतएवमहामायांविद्यांमायावतीसाददौ) १६ (सचकामःसंयुगाययुद्धायआ
टीका क्षेपैर्भर्त्सनाभिःतंशंबरम्) १७ (अमर्षात्क्रोधात्) १८ (आविध्यकंपयित्वा) वज्रस्याशनेर्निष्पेषेनिर्घातेयथानिष्ठुरस्तीव्रोनादोभवतितथाभूतंनादंव्यनदत् । सामान्यविशेषतयाव्याप्यव्यापकत्वं
ओदनंपाकंपचतीतिवत् । अतिनिष्ठुरंनादमकरोदित्यर्थः १९ (अपास्यनिरस्यस्वकीयांगदांप्राहिणोत्प्राक्षिपत्) २० (मयदर्शितांमयासुरेणप्रकटितामित्यर्थः । दैतेयींदैतेयेभ्यआगतांतामसीमि ॥५५॥
त्यर्थः) वैहायसःआकाशेस्थितः (कार्ष्णौप्रद्युम्ने) २१ सत्त्वात्मिकांसत्त्वगुणमयींप्रायुंक्तेत्युत्तरस्यानुषंगः । (बाध्यमानोरौक्मिणेयःप्रद्युम्नः) २२ (दैत्यःशंबरःप्रायुंक्त) ताःमायाःकार्ष्णिर्व्य
॥२६॥ धमयत्व्यनाशयत् (गौह्यकींगुह्यकेभ्यआगतां) २३ ताम्राणिश्मश्रूणियस्मिन्तत् । ओजसाबलेन २४

॥ रतिरुवाच ॥ भवान्नारायणसुतःशंबरेणाहृतोगृहात् ॥ अहंतेऽधिकृतापत्नीरतिःकामोभवान्प्रभो १२ एषत्वाऽनिर्दशंसिंधावक्षिपच्छंबरोऽसुरः ॥ श्लोकाः
मत्स्योऽग्रसीत्तदुदरादिहप्राप्तोभवान्प्रभो १३ तमिमंजहिदुर्धर्षंदुर्जयंशत्रुमात्मनः ॥ मायाशतविदंत्वंचमायाभिर्मोहनादिभिः १४ परिशोचतितेमाता
कुररीवगतप्रजा ॥ पुत्रस्नेहाकुलादीनाविवत्सागौरिवातुरा १५ प्रभाष्यैवंददौविद्यांप्रद्युम्नायमहात्मने ॥ मायावतीमहामायांसर्वमायाविनाशिनीम् १६ १२
सचशंबरमभ्येत्यसंयुगायसमाह्वयत् ॥ अविषह्यैस्तमाक्षेपैःक्षिपन्संजनयन्कलिम् १७ सोभिशप्तोदुर्वचोभिःपदाहतइवोरगः ॥ निश्चक्रामगदापाणिरमर्षा २४
ताम्रलोचनः १८ गदामाविध्यतरसाप्रद्युम्नायमहात्मने ॥ प्रक्षिप्यव्यनदन्नादंवज्रनिष्पेषनिष्ठुरम् १९ तामापतंतींभगवान्प्रद्युम्नोगदयागदाम् ॥ अपा
स्यशत्रवेक्रुद्धःप्राहिणोत्स्वगदांनृप २० सचमायांसमाश्रित्यदैतेयींमयदर्शिताम् ॥ मुमुचेऽस्त्रमयंवर्षंकार्ष्णौवैहायसोऽसुरः २१ बाध्यमानोऽस्त्रवर्षेणरौ
क्मिणेयोमहारथः ॥ सत्त्वात्मिकांमहाविद्यांसर्वमायोपमर्दिनीम् २२ ततोगौह्यकगांधर्वपैशाचोरगराक्षसीः ॥ प्रायुंक्तशतशोदैत्यःकार्ष्णिर्व्यधमयत्सताः
२३ निशातमसिमुद्यम्यसकिरीटंसकुंडलम् ॥ शंबरस्यशिरःकायात्ताम्रश्मश्र्वोजसाऽहरत् २४

चूर्णिका ॥ रतिरुवाच ॥ त्वंकृष्णसुतः शंबरेण अत्रानीतः अतः त्वंकामोसि अहंतवपत्नीरतिः १२ एषः शंबरः अनिर्दशंत्वां हृत्वा सिंधौप्राक्षिपत् तत्र त्वांमत्स्यः अग्रसीत्
तदुदरात् इह त्वंप्राप्तोसि १३ अतः इमंशत्रुंजहि १४ तवमाता कुररीवशोचति १५ ॥ श्रीशुकउवाच ॥ हेराजन् एवंप्रभाष्य रतिः सर्वमायाविनाशिनीं विद्यांप्र
द्युम्नायददौ १६ सचशंबरंप्राप्य आक्षिपन्सन्युद्धाय समाह्वयत् १७ तदाशंबरः गदापाणिः सन् गृहान्निर्गत्यगदयाप्रद्युम्नं आविध्यनादं अकरोत् १८ १९ ततः प्रद्यु ॥२६॥
म्नोपितांगदां अपास्य तं गदया अताडयत् २० सचमायां आश्रित्यनभसिस्थितः सन् अस्त्रमयंवर्षंमुमुचे २१ ततः प्रद्युम्नः सात्विकीं विद्यांप्रायुंक्त २२ ततः दैत्यः
गौह्यकगांधर्वपैशाचोरगराक्षसीः मायाः प्रायुंक्त ताः सर्वाः कार्ष्णिः अनाशयत् २३ ततः खड्गंगृहीत्वा शंबरस्यशिरः अहरत् २४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(देवैःपुष्पसमूहैराकीर्यमाणःगगनगामिन्याभार्ययाविहायसागगनमार्गेणपुरंद्वारकांनीतः) २५ विद्युतासहबलाहकोमेघइव (पत्न्यासहगगनादंतःपुरवरंअंतःपुरेषुश्रेष्ठंरुक्मिण्यगारंविवेश) २६ २७ नीलाश्चतेवक्रायेअलकास्तएवालयस्तैः । ह्रीतालज्जिता २८ (सस्त्रीरत्नंस्त्रीपुरत्नं) श्रेष्ठारतिस्ततसहितंप्रद्युम्नंईषद्वैलक्षण्येनश्रीकृष्णोनभवतीत्यवधार्यशनैरुपजग्मुः २९ (असितौरक्तौअपांगौयस्याः सारुक्मिणी) ३० सुतंस्मरंत्याह कोन्वयमिति । नरवैदूर्योनरश्रेष्ठः । (केयंकांतालब्धाअनेननरश्रेष्ठेन) ३१ एतेनतुल्यंवयोरूपंचयस्यसभवेत् (यदिसकश्चिज्जीवतितर्हि) ३२ तस्यस्वपुत्रत्वंसं भावयंत्याह । कथंत्विति (आकृत्यारूपेण । सारूप्यंसाम्यमित्यर्थः) ३३ तदेवाधिकंसंभावयति सएवेति । (नूनंनिश्चयेतर्केवा । सएवेत्यत्रहेतुःअमुष्मिन्निति ।) ३४ (मीमांसंमानायांविचारयं त्यांरुक्मिण्याम् । उत्तमश्लोकःश्रीकृष्णः) देवक्यानकदुंदुभ्याम् । (नामैकदेशग्रहणेनामग्रहणमिति) देवक्यानकदुंदुभिभ्यांसहेत्यर्थः ३५ (शंबरेणयत्तस्याहरणंतदादिसर्ववृत्तंनारदस्तेभ्योऽकथय त्) ३६ (बहूनिवर्षाणिनष्टंतंमृतमागतमिवाभ्यनंदन्) ३७ (तौरतिप्रद्युम्नौ । ययुःप्रापुः) ३८ ३९

॥२७॥

श्लोकाः २५/३९

आकीर्यमाणोदिविजैःस्तुवद्भिःकुसुमोत्करैः ॥ भार्ययांबरचारिण्यापुरंनीतोविहायसा २५ अंतःपुरवरंराजन्ललनाशतसंकुलम् ॥ विवेशपत्न्यागगना द्विद्युतेवबलाहकः२६ तंदृष्ट्वाजलदश्यामंपीतकौशेयवाससम् ॥ प्रलंबबाहुंताम्राक्षंसुस्मितंरुचिराननम् २७ स्वलंकृतमुखांभोजंनीलवक्रालकालिभिः ॥ कृष्णंमत्वास्त्रियोह्रीतानिलिल्युस्तत्रतत्रह २८ अवधार्यशनैरीषद्वैलक्षण्येनयोषितः ॥ उपजग्मुःप्रमुदिताःसस्त्रीरत्नंसुविस्मिताः २९ अथतत्रासि तापांगीवैदर्भीवल्गुभाषिणी ॥ अस्मरत्स्वंसुतंनष्टंस्नेहस्नुतपयोधरा ३० कोन्वयंनरवैदूर्यःकस्यवाकमलेक्षणः ॥ धृतःकयावाजठरेकेयंलब्धात्वने नवा ३१ ममचाप्यात्मजोनष्टोनीतोयःसूतिकागृहात् ॥ एतत्तुल्यवयोरूपोयदिजीवतिकुत्रचित् ३२ कथंत्वनेनसंप्राप्तंसारूप्यंशार्ङ्गधन्वनः ॥ आकृत्याऽवयवैर्गत्यास्वरहासावलोकनैः ३३ सएववाभवेन्नूनंयोमेगर्भेधृतोऽर्भकः ॥ अमुष्मिन्प्रीतिरधिकावामःस्फुरतिमेभुजः ३४ एवंमीमांस मानायांवैदर्भ्यांदेवकीसुतः ॥ देवक्यानकदुंदुभ्यामुत्तमश्लोकआगमत् ३५ विज्ञातार्थोपिभगवान्तूष्णीमासजनार्दनः ॥ नारदोऽकथयत्सर्वंशंबराहरणा दिकम् ३६ तच्छ्रुत्वामहदाश्चर्यंकृष्णांतःपुरयोषितः ॥ अभ्यनंदन्बहूनब्दान्नष्टंमृतमिवागतम् ३७ देवकीवसुदेवश्चकृष्णरामौतथास्त्रियः ॥ दंपतीतौपरिष्व ज्यरुक्मिणीचययुर्मुदम् ३८ नष्टंप्रद्युम्नमायातमाकर्ण्यद्वारकौकसः ॥ अहोमृतइवायातोबालोदिष्ट्येतिहाब्रुवन् ३९

चूर्णिका

तदादेवैः पुष्पैः आकीर्यमाणः प्रद्युम्नः तयास्त्रियाविहायसापुरंनीतः २५ ततः स्त्रियः तंचतुर्भुजंपीतांबरंरुचिराननंकृष्णंमत्वा लज्जिताः सत्यः तत्रतत्र निलिल्युः २६ २७ २८ ततः ताःस्त्रियः किंचिद्वैलक्षण्येनकृष्णो नेति निश्चित्यविस्मिताः सत्यः तत्समीपं आययुः २९ ततः रुक्मिणीनष्टंस्वसुतंस्मृत्वा आह३०कंजनेत्रःअयंकः कया वा जठरे धृतः अनेन का इयं लब्धा ३१ ममनष्टः पुत्रः कुत्रजीवतिचेत् वयआदिना एतत्तुल्योस्ति ३२ अनेनकृष्णसारूप्यंकथंप्राप्तं ३३ तस्मात्यः मयागर्भेधृतः सएव वाभवेत् अतः अस्मिन्मे अधिकाप्रीतिर्भवति ३४ एवंविचार्यमाणायां वैदर्भ्यांसत्यांवसुदेवदेवकीभ्यां सहकृष्णः आगत्य तूष्णीं आसीत् ततोनारदः सर्वं अकथयत् ३५ ३६ तच्छ्रुत्वाकृष्णस्त्रियः अभ्यनंदन् ततः देवक्यादयः तौ दंपती परिष्वज्य मुदंप्रापुः ३७ ३८ ततः नष्टंप्रद्युम्नंआयातमाकर्ण्य पौराः एतत्दिष्ट्याइतिअब्रुवन् ३९

॥२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतिसौंदर्येणप्रद्युम्नमनुवर्णयति । यमिति । पिताश्रीकृष्णः तत्सरूपेप्रद्युम्नेनिजआत्मीयईशोभर्तेतिभावोभावनायासांतास्तन्मातरोपिकृष्णपत्न्यःरहेरहसिरूढभावाःसत्योमोहेनयमभजन्सेवितुंप्रवृत्तायत्
यदातन्नखलुचित्रम् । कथंसति स्मरेस्मर्यमाणत्वेनैवक्षोभकेकामेअक्षिविषयेसति । किंच । रमास्पदबिंबबिंबेरमास्पदंश्रीकृष्णस्तस्यबिंबंमूर्तिस्तस्यबिंबेप्रतिबिंबेपुत्रे । तदाकिमुतवक्तव्यंअन्यनार्योंभेजुरि
ति ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधटीकायांशंबरवधोनामपंचपंचाशत्तमोऽध्यायः ५५ ॥ ॥ ७ ॥ ॥ षट्पंचाशत्तमेमिथ्याभियोगेमणिमाहरत् ॥ कन्यांजांबवतःप्रापकृष्णः
सत्राजितस्ततः ॥ १ ॥ पुत्रादिकामसौख्यस्यनिष्ठामुक्त्वातिचंचलाम् ॥ अर्थस्यानर्थतामाहस्यमंताहरणादिना ॥ २ ॥ सत्यभामाजांबवत्योर्विवाहप्रस्तावायस्यमंतकाख्यानमाह । सत्रेति । सत्राजि
तइत्यकरांतक्वचिच्चतकारांतोप्यन्वयानुसारेणद्रष्टव्यःकृतापराधस्तच्छांतयेस्वयमेवोद्यमंकृत्वामणिनासहप्रादादिति १ २ भक्तस्यसत्राजितःसूर्यःस्वाम्यपिसखेवासीदित्यर्थः सच सूर्यस्तुष्टस्तस्मैस्य
मंतकंनाममणिंप्रादात्प्रीतःस्निग्धः ३ (ससत्राजित्रविरिवतेजसाभ्राजमानो) नोपलक्षितःसत्राजिदसावित्यविज्ञातः ४ दीव्यतेक्रीडतेसूर्योयमितिशंकिताःसंतःकथयामासुरिति ५ सूर्यनमस्कारार्थ
मागतंकल्पयित्वोद्रिक्तभक्तीनांसंबोधनानिनारायणेत्यादीनि ६ गभस्तिचक्रेणरश्मिजालेनमुष्णन्प्रतिघ्नन्तिग्मास्तीक्ष्णागावोरश्मयोयस्यसः ७ नचेदमघटमानमित्याहुः। नन्विति । अन्विच्छंति मृग
यंते (अद्यत्वांयदुपुगूढंज्ञात्वा) अजःसूर्यः ८ बालानामज्ञानांवचनंमणिनाज्वलन्विद्योतमानः ९

॥२८॥

श्लोकाः ४०/९

यंवैमुहुःपितृसरूपनिजेशभावास्तन्मातरोयदभजन्रहरूढभावाः ॥ चित्रंनतत्खलुरमास्पदबिंबबिंबेकामेस्मरेऽक्षिविषयेकिमुतान्यनार्यः४० ॥ इतिश्री०
भा०म०द०शंबरवधोनामपंचपंचाशत्तमोऽध्यायः ५५ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ सत्राजितःस्वतनयांकृष्णायकृतकिल्बिषः ॥ स्यमंतकेनमणिना
स्वयमुद्यम्यदत्तवान् १ ॥ राजोवाच ॥ सत्राजितःकिमकरोद्ब्रह्मन्कृष्णस्यकिल्बिषम् ॥ स्यमंतकःकुतस्तस्यकस्माद्दत्तासुताहरेः २ ॥ श्रीशुकउवाच ॥
आसीत्सत्राजितःसूर्योभक्तस्यपरमःसखा ॥ प्रीतस्तस्मैमणिंप्रादात्सूर्यस्तुष्टःस्यमंतकम् ३ सतंबिभ्रन्मणिंकंठेभ्राजमानोयथारविः ॥ प्रविष्टोद्वारकांराजं
स्तेजसानोपलक्षितः ४ तंविलोक्यजनादूरात्तेजसामुष्टदृष्टयः ॥ दीव्यतेऽक्षैर्भगवतेशशंसुःसूर्यशंकिताः ५ नारायणनमस्तेस्तुशंखचक्रगदाधर ॥ दामो
दरारविंदाक्षगोविंदयदुनंदन ६ एषआयातिसवितात्वांदिदृक्षुर्जगत्पते ॥ मुष्णन्गभस्तिचक्रेणनृणांचक्षूंषितिग्मगुः ७ नन्वन्विच्छंतितेमार्गंत्रिलोक्यांविबु
धर्षभाः ॥ ज्ञात्वाद्यगूढंयदुषुद्रष्टुंत्वांयात्यजःप्रभो८॥श्रीशुकउवाच॥निशम्यबालवचनंप्रहस्यांबुजलोचनः॥प्राहनासौरविर्देवःसत्राजिन्मणिनाज्वलन् ९

चूर्णिका ४० ॥ इतिदशमेपंचपंचाशत्तमः ॥ ५५ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् कृतापराधः सत्राजित् स्वकन्यांस्यमंतकेनमणिनासह कृ
ष्णायददौ १ ॥ राजोवाच ॥ हेब्रह्मन् सत्राजित् कृष्णस्य कं अपराधं अकरोत् तस्य स्यमंतकः कुतः प्राप्तः हरये कन्या कस्माद्धेतोः दत्ता तद्वद २ ॥ श्रीशुक
उवाच ॥ सत्राजितस्य सखा सूर्यः आसीत् सः तस्मै स्यमंतकमणिं ददौ ३ सः सत्राजित् कदाचित् मणिंकंठेधृत्वा द्वारकांप्रविष्टः ४ तंविलोक्य जनाः सूर्योयमितिशं
किताः संतः कृष्णायशशंसुः ५ हेकृष्णयदुपुगूढं त्वां ज्ञात्वा एषः सूर्यः त्वांद्रष्टुं आयाति ६ ७ ८ ॥ श्रीशुकउवाच ॥ एवंबालवचः श्रुत्वा प्रहस्य कृष्णः आह नासौर
विः किंतु सत्राजित् मणिनाज्वलन् ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. क्रतानिकौतुकेनोत्सवेनमंगलानियस्मिंस्तत् । विप्रैःकृत्वा १०(समणिःप्रतिदिनमष्टौभारान्स्वर्णददातीत्यर्थः) भारप्रमाणंच ' चतुर्भिर्व्रीहिभिर्गुंजंगुंजान्पंचपणंपणान् । अष्टौधरणमष्टौचकर्षंतांश्चतुरःपल अ०
म् । तुलांपलशतंप्राहुर्भारःस्याद्विंशतिस्तुला ' इतिदुर्भिक्षंप्रसिद्धंमारीनामअकालमृत्युःअरिष्टमभद्रं (आधिर्मानसीव्यथा ।) अशुभाःदुःखहेतवः (एतेयत्रसमणिःपूजितोस्तितत्रनसंतिमायिनश्चकूटका
रिणोनसंति) ११ क्वापिकदाचित् (शौरिणाकृष्णेनयदुराजायमणिंदातुंसःसत्राजिद्याचितःअतर्कयन्अगणयन्नित्यर्थः) अनेनभगवत्यसमर्प्यस्वयमग्रभोजिनःसर्वानिष्टनिवर्तकमपिअनिष्टहेतुरेवभ ॥५६॥
टीका वतीतिसूचितम् १२ तदेवदर्शयितुमाह तमेकदेति । प्रतिमुच्यबध्वाप्रसेनःसत्राजिद्भ्राता १३ (हयसहितंहत्वा) आच्छिद्यआकृष्यगृहीत्वा (केसरीसिंहःगिरिंप्रतिविशन्ऋक्षराजेनजांबवताहतः)
१४ (क्रीडजनकंक्रीडोपकरणम् । बिलेगुहायाम् । भ्रातरंप्रसेनम्) १५ (मणिग्रीवायांयस्यताद्दशोवनंगतःयाच्ञाभंगंस्मरताहतइतितद्भाषणंश्रुत्वा) अजपन्उपांशुअवोचन् १६ १७ १८ १९
॥२९॥ २० (अन्वपद्यतअनुलक्ष्यंजगामनागरैःसह) २१ (स्वामिनारामचंद्ररूपेण) २२ क्रव्यार्थेआमिषार्थे २३

सत्राजित्स्वगृहंश्रीमत्कृतकौतुकमंगलम् ॥ प्रविश्यदेवसदनेमणिंविप्रैर्न्यवेशयत् १० दिनेदिनेस्वर्णभारानष्टौसस्रजतिप्रभो ॥ दुर्भिक्षमार्यरिष्टानि श्लोकाः
सर्पाधिव्याधयोऽशुभाः ॥ नसंतिमायिनस्तस्ययत्रास्तेभ्यर्चितोमणिः ११ सयाचितोमणिंक्वापियदुराजायशौरिणा ॥ नैवार्थकामुकःप्रादाद्याच्ञा
भंगमतर्कयन् १२ तमेकदामणिंकंठेप्रतिमुच्यमहाप्रभम् ॥ प्रसेनोहयमारुह्यमृगयांव्यचरद्वने १३ प्रसेनंसहयंहत्वामणिमाच्छिद्यकेसरी ॥ गिरिंविशन् १०/२३
जांबवतानिहतोमणिमिच्छता १४ सोपिचक्रेकुमारस्यमणिंक्रीडनकंबिले ॥ अपश्यन्भ्रातरंभ्रातासत्राजित्पर्यतप्यत १५ प्रायःकृष्णेननिहतोमणिग्री
वोवनंगतः॥भ्राताममेतितच्छ्रुत्वाकर्णेकर्णेजपन्जनाः १६ भगवांस्तदुपश्रुत्यदुर्यशोलिप्तमात्मनि ॥ मार्ष्टुंप्रसेनपदवीमन्वपद्यतनागरैः १७हतंप्रसेनमश्वंचवी
क्ष्यकेसरिणावने॥तंचाद्रिपृष्ठेनिहतमृक्षेणददृशुर्जनाः १८ ऋक्षराजबिलंभीममंधेनतमसावृतं॥एकोविवेशभगवानवस्थाप्यबहिःप्रजाः १९तत्रदृष्ट्वामणिश्रेष्ठंबा
लक्रीडनकंकृतम् ॥ हर्तुंकृतमतिस्तस्मिन्नवतस्थेऽर्भकांतिके २० तमपूर्वंनरंदृष्ट्वाधात्रीचुक्रोशभीतवत् ॥ तच्छ्रुत्वाऽभ्यद्रवत्क्रुद्धोजांबवान्बलिनांवरः २१सवै
भगवतानेनयुयुधेस्वामिनात्मनः॥पुरुषंप्राकृतंमत्वाकुपितोनानुभाववित् २२द्वंद्वयुद्धंसुतुमुलमुभयोर्विजिगीषतोः।आयुधाश्मद्रुमैर्दोर्भिःक्रव्यार्थेश्येनयोरिव२३

चूर्णिका ततः सत्राजित्स्वगृहं प्रविश्यविप्रैः देवालयेमणिं न्यवेशयत् १० सः मणिः दिनेदिने अष्टौस्वर्णभारान् सृजति किंच यत्रमणिः आस्ते तत्रदुर्भिक्षादयोनसंति ११
एकदाकृष्णः तंमणिं अयाचत् सतु अर्थकामुकः नप्रादात् १२ ततः एकदासत्राजितस्य भ्राताप्रसेनः तंमणिंकंठे बध्द्वा अश्वं आरुह्य मृगयार्थंवनं ययौ १२ तत्रसिं
हः साश्वं तं हत्वा मणिं आच्छिद्य गिरिं अविशत् तत्र तंसिंहंजांबवान् निहत्यमणिंगृहीत्वास्वबिलेपुत्रस्यक्रीडनकंचक्रे तदासत्राजित् भ्रातरंअदृष्ट्वा संततः सन्उवाच १४ १५
मणिग्रीवः ममभ्राताप्रायः कृष्णेन हतइति तच्छ्रुत्वाजनाः कर्णेकर्णे अजपन् १६ कृष्णोपितच्छ्रुत्वादुर्यशः मार्ष्टुं प्रसेनपदवींगतःसन्वनेसाश्वंप्रसेनंसिंहेनहतं वीक्ष्य सिं ॥२९॥
हमपिगिरिपृष्ठेऋक्षेण हतंवीक्ष्यप्रजाः बहिः स्थाप्यऋक्षराजबिलंविवेश १७ १८ १९ तत्रमणिंदृष्ट्वातंहर्तुं बालसमीपं तस्थौ २० ततः अपूर्वनरंदृष्ट्वाधात्री चुक्रोश तच्छ्रु
त्वाजांबवान्क्रुद्धः सन्कृष्णेनसहयुयुधे २१ २२ २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अष्टाविंशाहंअष्टचविंशतिश्चाहानियास्मिन्युद्धे तत् । अष्टाविंशत्यहम् । विंशतिशब्देतिलोपआर्षः । वज्रनिष्पेषोनिर्घातःतद्वत्परुषैर्निष्ठुरैः (अविश्रमंनिरंतरंदिवाचरात्रौचासीत्) २४ श्रीकृष्णस्यमुष्टीनांविनिष्पातैराघातैर्विनिष्पिष्टानिविश्लथान्यंगानामुरूणिबंधनानिसंधिस्थानानियस्यसः । (क्षीणंसत्त्वंबलंयस्य । स्वेदयुक्तंगात्रंयस्य) २५ अस्मिँल्लोकेकोवायंमत्तोबलीयानितिविस्मितःसन्विमृश्याहजानेइति । सर्वभूतानांयःप्राणस्तत्रवयदोजःसहोबलंचक्रमादिंद्रियहृदयदेहबलानितत्सर्वंत्वमितिस्वाऽहंजानेकथंतथात्वमतआह विष्णुमित्यादि पुराणत्वेहेतुः (विश्वसृजांब्रह्मादीनामपि) स्रष्टानेमित्तंपुरुषत्वेहेतुःयच्चसत् उपादानंअतःपुराणपुरुषः । प्रभविष्णुत्वेहेतुःकालइति (कलयतांसंख्यानंकुर्वतांप्रभूणामपि) अधीश्वरत्वमप्यतएवेत्याह । ईशःपरइति । (कालरूपत्वात्प्रभवनशीलःपरमेश्वरश्चत्वामित्यर्थःसचनपृथक्) नचतटस्थइत्याह । आत्मनामात्मेति (जीवात्मनांवस्तुभूतचैतन्यमित्यर्थः) २७ यतएवंभूतोऽतोममेष्टदेवंरघुनाथएवत्वमित्याह । यस्येति । ईषदुत्कलितउद्दीपितोयोरोषस्तेनयेकटाक्षमोक्षास्तैःक्षुभितानक्राग्राहास्तिमिंगिलामहामत्स्याश्चयस्मिन्सोऽब्धिर्वर्त्ममार्गमदिशत्दत्तवान्तथापितस्मिन्येनस्वयशएवसेतुःकृतः । (सेतुरूपंयशोविस्तारितम्) उज्ज्वलितादग्धा । यस्येषुभिःक्षतानिच्छिन्नानिरक्षसोदशग्रीवस्य । शिरांसिभुविपेतुःसएवत्वमित्यहंजाने २८ इतिविज्ञातंविज्ञानंयेनसःतंविज्ञानशब्दःकरणसाधनःकर्मसाधनोवा । ऋक्षाणामच्छभल्लानांराजानंजांबवंतमुक्तवान् २९ (अभिमृश्यस्पृष्ट्वा) ३० वयंहिबहवोबिलद्वारंप्राप्ताः । तत्रमिथ्याभिशापं (प्रसेनहननपूर्वकर्मणिहरणरूपं) अमुनामणिनाप्रमृजन्प्रमार्ष्टुंअहमेकएवांतर्बिलमिहमाप्तइत्यर्थः ३१ सहमणिनेत्यर्थः (सःजांबवानितिउपजहार) समर्पयामास ३२ ३३ (बिलादनिर्गतंकृष्णंअशोचन्) ३४

श्लोकाः २४/३४

आसीत्तदष्टाविंशाहमितरेतरमुष्टिभिः ॥ वज्रनिष्पेषपरुषैरविश्रममहर्निशम् २४ कृष्णमुष्टिविनिष्पातनिष्पिष्टांगोरुबंधनः ॥ क्षीणसत्वःखिन्नगात्रस्तमाहातीवविस्मितः २५ जानेत्वांसर्वभूतानांप्राणओजःसहोबलम् ॥ विष्णुंपुराणपुरुषंप्रभविष्णुमधीश्वरम् २६ त्वंहिविश्वसृजांस्रष्टास्रष्ट्यानामपियच्चसत् ॥ कालःकलयतामीशःपरआत्मातथात्मनाम् २७ यस्येषदुत्कलितरोषकटाक्षमोक्षैर्वर्त्मादिशत्क्षुभितनक्रतिमिंगिलोऽब्धिः ॥ सेतुःकृतःस्वयशउज्ज्वलिताचलंकारक्षःशिरांसिभुविपेतुरिषुक्षतानि २८ इतिविज्ञातविज्ञानमृक्षराजानमच्युतः ॥ व्याजहारमहाराजभगवान्देवकीसुतः २९ अभिमृश्यारविंदाक्षःपाणिनाशंकरेणतम् ॥ कृपयापरयाभक्तंप्रेमगंभीरयागिरा ३० मणिहेतोरिहप्राप्तावयमृक्षपतेबिलम् ॥ मिथ्याभिशापंप्रमृजन्नात्मनोमणिनामुना ३१ इत्युक्तःस्वांदुहितरंकन्यांजांबवतींमुदा ॥ अर्हणार्थंसमणिनाकृष्णायोपजहारह ३२ अदृष्ट्वानिर्गमंशौरेःप्रविष्टस्यबिलंजनाः ॥ प्रतीक्ष्यद्वादशाहानिदुःखिताःस्वपुरंययुः ३३ निशम्यदेवकीदेवीरुक्मिण्यानकदुंदुभिः ॥ सुहृदोज्ञातयोऽशोचन्बिलात्कृष्णमनिर्गतम् ३४

चूर्णिका

तयोः अष्टाविंशति दिनानि अहर्निशंद्वंद्वयुद्धं अभूत् २४ ततः कृष्णमुष्टिभिःश्लथितांगः जांबवान् विस्मितः सन् कृष्णं आह २५ हेभगवन् त्वांपुराणपुरुषंजाने २६ किंच हेहरेत्वंविश्वसृजांस्रष्टा कालश्च असि २७ २८ २९ ततः कृष्णः तंपाणिना अभिमृश्य कृपयाआह ३० हेजांबवन् अहंमिथ्याभिशापंअनेनमणिनाप्रमार्ष्टुंइह अंतर्बिलंप्राप्तः ३१ इत्युक्तः जांबवान्मणिनासहजांबवतीं कन्यांकृष्णायददौ ३२ ततःबिलद्वारस्थाः यादवाः कृष्णस्यनिर्गमंद्वादशाहानि प्रतीक्ष्य दुःखिताः द्वारकां एत्य सर्वे ऊचुः ३३ तच्छ्रुत्वा रुक्मिणी देवक्यादयः ज्ञातयः अशोचन् ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अंतरमवसरम् । शतधन्वाकृतवर्मणोभ्रातातमक्रूरःकृतवर्माचोचतुः) ३ ननुजीवन्सत्राजित्कथंमणिंदास्यति तत्रोचतुःयोस्मभ्यमिति ।(संप्रतिश्रुत्यददामीतिवचनंदत्त्वा) भ्रातरंमसेनंमृतंकस्मान्नान्वियात् । नानुगच्छेत्त्रियतामित्यर्थः ४ (सशतधन्वा) ५ (क्रंदंतीनांरुदंतीनांअनाथमिव । सौनिकवत्पशुघातीव ।) जग्मिवान्जगाम ६ (शुचापिताशोकेनव्याप्तेत्यर्थः) ७ (पत्नीसत्यभामाभर्त्रेकृष्णायआचख्यौकथयामास । तैलद्रोण्यांतैलकटाहेइत्यर्थः) ८ (सर्वज्ञोपिनृलोकतांमनुष्यरीतिमित्यर्थः । अस्राक्षौसाश्रुनेत्रौ) ९ (तस्मात्हस्तिनापुरात्) १० ११ हेलनंप्रतिकूलंवृजिनंअपराधम् १२ अपीतोमृतः । सप्तदशसंख्यान्संयुगान् (संग्रामान्) १३ (प्रत्याख्यातोनिराकृतःपार्ष्णिग्राहंरक्षकमित्यर्थः) १४ (विरुध्येतविरोधमाचरेदित्यर्थः) १५ तौरामकृष्णौएकमेवतत्त्वमित्यभिप्रेत्याह यइदमिति । अजयामाययामोहिताः । मोहिताजयेतिसंधिरार्षः १५ (उच्छिलींध्रंछत्राकम् । शैलंगोवर्धनम्) १६ (कूटस्थायनिर्विकाराय) १७

॥३२॥ लब्ध्वैतदंतरंराजन्शतधन्वानमूचतुः ॥ अक्रूरकृतवर्माणौमणिःकस्मान्नगृह्यते ३ योस्मभ्यंसंप्रतिश्रुत्यकन्यारत्नंविगर्ह्यनः ॥ कृष्णायादान्नसत्राजित्कस्माद्भ्रातरमन्वियात् ४ एवंभिन्नमतिस्ताभ्यांसत्राजितमसत्तमः ॥ शयानमवधील्लोभात्सपापःक्षीणजीवितः ५ स्त्रीणांविक्रोशमानानांक्रंदंतीनामनाथवत् ॥ हत्वापशून्सौनिकवन्मणिमादायजग्मिवान् ६ सत्यभामाचपितरंहतंवीक्ष्यशुचार्पिता ॥ व्यलपत्ताततातेतिहाहतास्मीतिमुह्यती ७ तैलद्रोण्यांमृतंप्रास्यजगामगजसाह्वयम् ॥ कृष्णायविदितार्थायपत्न्याचख्यौपितुर्वधम् ८ तदाकर्ण्येश्वरौराजन्अनुसृत्यनृलोकताम् ॥ अहोनःपरमंकष्टमित्यस्राक्षौविलेपतुः ९ आगत्यभगवांस्तस्मात्सभार्यःसाग्रजःपुरम् ॥ शतधन्वानमारेभेहंतुंहर्तुंमणिंततः १० सोपिकृष्णोद्यमंज्ञात्वाभीतःप्राणपरीप्सया ॥ साहाय्येकृतवर्माणमयाचतसचाब्रवीत् ११ नाहमीश्वरयोःकुर्यांहेलनंरामकृष्णयोः ॥ कोनुक्षेमायकल्पेततयोर्वृजिनमाचरन् १२ कंसःसहानुगोऽपीतोयद्द्वेषात्त्याजितःश्रिया ॥ जरासंधःसप्तदशसंयुगान्विरथोगतः १३ प्रत्याख्यातःसचाक्रूरंपार्ष्णिग्राहमयाचत ॥ सोप्याहकोविरुध्येतविद्वानीश्वरयोर्बलम् १४ यइदंलीलयाविश्वंसृजत्यवतिहंतिच ॥ चेष्टांविश्वसृजोयस्यनविदुर्मोहिताऽजया १५ यःसप्तहायनःशैलमुत्पाट्यैकेनपाणिना ॥ दधारलीलयाबालउच्छिलींध्रमिवार्भकः १६ नमस्तस्मैभगवतेकृष्णायाद्भुतकर्मणे ॥ अनंतायादिभूतायकूटस्थायात्मनेनमः १७

श्लोकाः ३/१७

चूर्णिका हेराजन् एतदंतरलब्ध्वा अक्रूरकृतवर्माणौशतधन्वानंगत्वामणिःकुतोनगृह्यते त्वया इत्यूचतुः ३ यः सत्राजित् अस्मभ्यंकन्यांदातुं प्रतिश्रुत्यनः विगर्ह्यकृष्णाय अदात् सः कुतोनाम्रियताम् ४ एवंताभ्यांभिन्नमतिः शतधन्वाशयानं सत्राजितं हत्वा मणिं आदायजगाम ५ ६ तदासत्यभामा हतंपितरंवीक्ष्य विलप्य तंतैलद्रोण्यां प्रास्य गजाह्वयं गत्वा कृष्णायपितुर्वधं अकथयत् ७ ८ तदातौरामकृष्णौ विलप्य ९ द्वारकांएत्यततः कृष्णः शतधन्वानं हंतुंमणिंहर्तुंच आरेभे १० ततः सः शतधन्वाभीतः सन् साहाय्येकृतवर्माणं अयाचत ततः सः अब्रवीत् ११ अहंईश्वरयोः तयोः अपराधंनकुर्यां १२ येनअपराधेनकंसोमृतः जरासंधः सप्तदशवारं विरथोगतः १३ एवं तेनप्रत्याख्यातःशतधन्वा अक्रूरंसाहाय्ये अयाचत सोप्याह ईश्वरयोः बलंविद्वान्कः विरुध्येत १४ भगवान् लीलयाविश्वसृष्ट्यादिकरोति १५ यः सप्तवर्षः पाणिनाशैलं दधार १६ तस्मैभगवतेनमः १७ ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीकृष्णप्राप्तयेचंद्रभागांनामदुर्गांअभजन्सचकृष्णस्तेषांप्रादुर्बभूव । असवइतिपाठेअसवइंद्रियाणि ३५ तेषांप्रेष्ठइत्यर्थः । कदादेव्याउपस्थानात् । तयादेव्यातान्प्रतिआदिष्टादत्तायाआशीःकृष्णं द्रक्ष्यथेतितदासहैव ३६ (यदिलोकेजनाः) कथंचिन्मृतंबंधुं पुनरागतमुपलभंतेतद्वदुपलभ्यसर्वेजातमहोत्सवाआसन्निति ३७ (मणेःप्राप्तिलाभम्) ३८ (स्वेन) पाप्मनाअपराधेनानुतप्यमानः ३९ अघंदोषम् । आत्मनोरजःमलंअपराधमिति ४० किंकृत्वाकस्मिन्कार्येकृतेइत्यर्थः साधुभद्रम् । अदीर्घदर्शनंअविचारवंतंमांक्षुद्रंकृपणंमूढंमंदमतिं (येनप्रकारेणनशपेत्) ४१ एवंध्यायन्नुपायंनिश्चिनोति । दास्येइति । स्त्रीरत्नंदुहितरंतावद्दास्यामितदनंतरंपारिबर्हत्वेनरत्नमपीति (अन्यथातस्याघस्य) ४२ ४३ बहुभिःकृतवर्मादिभिः ४४ मणिंनप्रतीच्छामःनस्वीकुर्मः । देवःसूर्यस्तद्भक्तस्येतिकटाक्षः । फलभागिनइतितवापुत्रत्वात्त्वदर्थंधनमस्माकमेवेतिगूढोभिप्रायः ४५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांषट्पंचाशत्तमोऽध्यायः ५६ ॥ ॥ ७ ॥ ॥ सप्तपंचाशत्तमेतुपुनःशतधनुर्वधे । प्राप्तंस्मदुर्यशोमार्ष्टिकृष्णोऽक्रूराहृतान्मणेः ॥१॥ अक्रूरमुररीकृत्यमणेःपात्रमथाच्युतः । उपामंत्र्यतमेकांतेसरामोगाद्गजाह्वयम् ॥२॥सत्राजितःकृष्णाज्ञाभंगफलंव्यक्तीकर्तुमाह । विज्ञातार्थोपीति । पांडवाबिलद्वारेणजतुगृहान्निर्गताइत्येवंविज्ञातोऽर्थोयेनसः कुंतींचदग्धामाकर्ण्यकुल्यकरणेकुलोचितसंव्यवहारार्थं (कुरून्ययौ)१ अन्येषांतद्दाहदुःखाभावात्भीष्मादीन्संगम्येत्युक्तम् २

॥३१॥

श्लोकाः

सत्राजितंशपंतस्तेदुःखिताद्वारकौकसः॥उपतस्थुर्महामायांदुर्गांकृष्णोपलब्धये३५तेषांतुदेव्युपस्थानात्प्रत्यादिष्टाशिषासच॥प्रादुर्बभूवसिद्धार्थःसदारोहर्षयन्हरिः ३६ उपलभ्यहृषीकेशंमृतंपुनरिहागतम् ॥ सहपत्न्यामणिग्रीवंसर्वेजातमहोत्सवाः ३७ सत्राजितंसमाहूयसभायांराजसंनिधौ ॥ प्राप्तिंचाख्यायभगवान्मणिंतस्मैन्यवेदयत् ३८ सचातिव्रीडितोरत्नंगृहीत्वाऽवाङ्मुखस्ततः ॥ अनुतप्यमानोभवनमगमत्स्वेनपाप्मना ३९ सोनुध्यायंस्तदेवावंबलवद्विग्रहाकुलः ॥ कथंमृजाम्यात्मरजःप्रसीदेद्वाऽच्युतःकथम् ४० किंकृत्वासाधुमह्यंस्यान्नशपेद्वाजनोयथा ॥ अदीर्घदर्शनंक्षुद्रंमूढंद्रविणलोलुपम् ४१ दास्येदुहितरंतस्मैस्त्रीरत्नंरत्नमेवच ॥ उपायोऽयंसमीचिनस्तस्यशांतिर्नचान्यथा ४२ एवंव्यवसितोबुद्ध्यासत्राजित्स्वसुतांशुभाम् ॥ मणिंचस्वयमुद्यम्यकृष्णायोपजहारह ४३ तांसत्यभामांभगवानुपयेमेयथाविधि ॥ बहुभिर्याचितांशीलरूपौदार्यगुणान्विताम् ४४ भगवानाहनमणिंप्रतीच्छामोवयंनृप ॥ तवास्तांदेवभक्तस्यवयंचफलभागिनः ४५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेषट्पंचाशत्तमोध्यायः ५६ ॥ श्रीशुकउवाच ॥ विज्ञातार्थोपिगोविंदोदग्धानाकर्ण्यपांडवान् ॥ कुंतींचकुल्यकरणेसहरामोययौकुरून् १ भीष्मंकृपंसविदुरंगांधारींद्रोणमेवच ॥ तुल्यदुःखौसमागम्यहाकष्टमितिहोचतुः २

३९/२

चूर्णिका

ततः द्वारकौकसः सत्राजितंशपंतः संतः कृष्णप्राप्तयेदुर्गांउपतस्थुः ३५ ततः सस्त्रीकः श्रीकृष्णः प्रादुर्बभूव ततः सर्वेजनाः तंप्राप्यजातोत्सवाः आसन् ३६ ३७ ततः कृष्णःसभायांसत्राजितं आहूयमणिप्राप्तिं आख्यायतस्मैमणिंददौ ३८ सः लज्जितः सन्मणिंगृहीत्वास्वगृहंगत्वाएवं अचिंतयत् ३९ तदाह अच्युतः कथं प्रसीदति किंकृत्वाममभद्रंस्यात् मूढंलुब्धंमांजनः कथंनशपेत् ४० ४१ एवंध्यायन् कृष्णाय कन्यांदास्यामीनिश्चित्यमणिना सहस्वसुतां सत्यभामांददौ ४२ ४३ ततो भगवान् तांयथाविधि उद्वाह्याह ४४हेसत्राजितवयंमणिंनस्वीकुर्मः अयंमणिः तवास्तां वयंतुफलभागिनः ४५ ॥ इतिदशमेषट्पंचाशत्तमः ॥ ५६ ॥ ॥ ७ ॥
॥ श्रीशुकउवाच ॥ ॥ हेराजन् विज्ञातार्थोपि कृष्णः पांडवान्दग्धान् श्रुत्वासरामः कुरून्ययौ १ तत्रभीष्मादीन्संगम्यहाकष्टमित्यूचतुः २

॥३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अंतर्यामिकृष्णनियुक्तः (शतधन्वा)तस्मिन्नक्रूरेमणिंन्यस्ययंयौअपलायत । (शतयोजनगंमध्येविश्रांतिमंतरेणशतयोजनगामिनमित्यर्थः१८ गुरुःश्वशुरस्तद्धंतारं (अन्वयातांअनुगतौ) १९ शतयो
जनगामित्वात्ततःपरंगंतुमशक्तस्तत्रपतितस्तंहयंविसृज्य (कृष्णोपिअन्वद्रवत्पद्भ्यामेवान्वधावदित्यर्थः) २० (पद्भ्यामततिगच्छतिसततमितिपदातिः वाससोर्वस्त्रोपवस्त्रयोर्मध्ये) व्यचिनोत्मृगयामास
२१ अक्रूरेमणिरस्तीतिसर्वज्ञतयाविदित्वापिरामवंचनायतथाकृतवानितिभावः २२ अन्वेषअन्विच्छगवेषयेत्यर्थः २३ सर्वज्ञस्यास्यैवंचेष्टितंमद्वंचनायेतिमत्वागूढमन्युराहअहमिति २४ (समर्हणैःपाद्या
दिभिः) २५ कतिचित्समाःसंवत्सरान् । प्रासंगिकमाह ततइति २६ सत्यभामामप्यवंचयदितिसूचयन्नाह । केशवइति २७ बंधोःसत्राजितः । सांपरायिकाःपारलौकिकाः २८ द्वारकायाः सकाशात्
व्यूषतुः (विवासंचक्रतुः) क्वापिपलायितौ । (यतः) प्रयोजकौमणिहरणेशतधन्वनःप्रवर्तकौ । तत्राक्रूरःकृष्णानुमतेनैवगतः । कृतवर्मातुभक्तपक्षपातप्राकट्यभयादिवोपेक्षितइतिगम्यते । कथमन्यथा
सर्वज्ञेश्वरवंचनंतयोःसंभवतीति २९

श्लोकाः १८/२९

प्रत्याख्यातःसतेनापिशतधन्वामहामणिम् ॥ तस्मिन्न्यस्याश्वमारुह्यशतयोजनगंययौ १८ गरुडध्वजमारुह्यरथंरामजनार्दनौ ॥ अन्वयातांमहावेगैरश्वैराजन्गु
रुद्रुहम् १९ मिथिलायाउपवनेविसृज्यपतितंहयम् ॥ पद्भ्यामधावत्संत्रस्तःकृष्णोप्यन्वद्रवद्रुषा २० पदातेर्भगवांस्तस्यपदातिस्तिग्मनेमिना ॥ चक्रेणशिरउ
त्कृत्यवाससोर्व्यचिनोन्मणिम् २१ अलब्धमणिरागत्यकृष्णआहाग्रजांतिकम् ॥ वृथाहतःशतधनुर्मणिस्तत्रनविद्यते २२ ततआहबलोनूनंसमणिःशतधन्वना
॥ कस्मिंश्चित्पुरुषेन्यस्तस्तमन्वेषपुरंव्रज २३ अहंविदेहमिच्छामिद्रष्टुंप्रियतरंमम ॥ इत्युक्त्वामिथिलांराजन्विवेशयदुनंदनः २४ तंदृष्ट्वासहसोत्थायमै
थिलःप्रीतमानसः ॥ अर्हयामासविधिवदर्हणीयंसमर्हणैः २५ उवासतस्यांकतिचिन्मिथिलायांसमाविभुः ॥ ततोऽशिक्षद्गदांकालेधार्तराष्ट्रःसुयोधनः ॥ मा
नितःप्रीतियुक्तेनजनकेनमहात्मना २६ केशवोद्वारकामेत्यनिधनंशतधन्वनः ॥ अप्राप्तिंचमणेःप्राहप्रियायाःप्रियकृद्विभुः २७ ततःसकारयामासक्रियाबं
धोर्हतस्यवै ॥ साकंसुहृद्भिर्भगवान्यायाःस्युःसांपरायिकाः २८ अक्रूरःकृतवर्माचश्रुत्वाशतधनोर्वधम् ॥ व्यूषतुर्भयवित्रस्तौद्वारकायाःप्रयोजकौ २९

चूर्णिका

एवं अक्रूरेण प्रत्याख्यातः शतधन्वा मणिं अक्रूरेन्यस्य शतयोजनगं अश्वं आरुह्य ययौ १८ तदा रामकृष्णौ रथं आरुह्य तं अन्वीयाताम् १९ ततः शतधन्वा मिथि
लायाउपवने पतितं अश्वं त्यक्त्वा पद्भ्यां अधावत् २० कृष्णोपि तं अनुद्रुत्य चक्रेणशिरः छित्वा वस्त्रयोः मणिं व्यचिनोत् २१ ततः अप्राप्तमणिः श्रीकृष्णः आग
त्य रामंप्रति आह मयाशतधन्वा वृथा हतः तत्रमणिर्नास्ति २२ ततोरामः आह हेकृष्ण स मणिः शतधन्वना कस्मिंश्चित्पुरुषे न्यस्तः तमन्वेष पुरं व्रज २३ अहंजनकं
द्रष्टुं इच्छामीत्युक्त्वा रामः मिथिलां विवेश २४ ततोजनकः रामंदृष्ट्वा उत्थाय पूजयामास २५ एवंतेनमानितः तत्रकतिचित्संवत्सरान् उवास ततःकाले दुर्योधनः
गदांअशिक्षत् २६ ततः केशवः द्वारकां एत्य शतधन्वनः मरणं मणेः अप्राप्तिंचसत्यायै आह २७ ततः सत्राजितस्य क्रियाः कारयामास २८ ततः शतधनोर्वधंश्रुत्वा
अक्रूरकृतवर्माणौद्वारकायाः पलायितौ २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंश्रीवाराणस्यदिानपतिसमाख्ययामणिहस्तेऽक्रूरेरुक्मवेदिकैर्महाध्वरैर्यजमानेनिवसतिसतिपुनः श्रीकृष्णेनैवप्रस्थापितोऽक्रूरइतिकर्णेकर्णेजपतिजनेसत्यभामारामादीनामप्यविश्वासेजनसंग्रहायाक्रूरमाहूयसाक्षेपंश्रीकृष्णःप्राह । इदंचभगवन्मतंसंगोप्यकेचनऋषयोऽन्यत्कारणमक्रूरानयनेवर्णयंति तचथा श्रुतंदूषयितुमनुवदतिअक्रूरेप्रोषितइति । (अरिष्टान्याध्यात्मिकादितापलक्षणान्यासन्नित्यर्थः) ३० दूषयति । इतीतिअंगहेराजन् (प्रागुक्तं) श्रीकृष्णमाहात्म्यंविस्मृत्येति । तदेवाह । मुनिवासनिवासइतिमुनीनांवासोयस्मिन्सःश्रीकृष्णस्तस्यनिवासेसति (यत्रमुनयस्तत्रनारिष्टानिमुनयोहियंनिषेवंते) तन्निवासेसतिअक्रूरापगममात्रेणारिष्टदर्शनंकिंघटेत । तदिच्छांविनानैवघटेतेत्यर्थः ३१ पुनस्तन्मतमेवानुवर्णयति । देवइतिकाशिदेशेषुदेवेमघवतिअवर्षतिसति(आगतायश्वफल्काय) ३२ (तस्यश्वफल्कस्यसुतोयमक्रूरोपितस्येवप्रभावोयस्य । देवःपर्जन्यः । उपतापारोगाः) ३३ इत्येवंभूतमक्रूरमाहिमप्रतिपादनपरंवृद्धानां वचःश्रुत्वा सत्यमेवं तथाप्येतावदेवकारणं नभवति किंतु मणेरप्यपगमइतिमत्वेति । एतदंतंपरमत-(-मुक्तंश्रीशुकमतंतुकृष्णलीलावशादेवारिष्टदर्शनंमुनिवासनिवासइत्याद्युक्तेः) ३४ विज्ञातमखिलंयेनसचासौअतएवाचित्तज्ञश्च । अयंभावः । महाभागवतस्यास्यमयादत्तेपिमणावपेक्षानास्त्येव यस्मादाहूतोमणिनासहैवागतइति (तच्चित्तं) ज्ञात्वा (पूजादिपुरःसरमुवाचे-)- ति ३५ ३६ ततःकिमतआह । सत्राजितइति । अप-(-स्तिलोदकं) पिंडांश्चनिनीयदत्त्वाऋणंचविमुच्यापाकृत्यशेषितंअवशिष्टंदायं (तदीयमृक्थम्) दुहितुःसत्यभामायाःसुताग्रहीयुरितिशास्त्रं । तथाचस्मरंति । ' पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा । तत्सुतागोत्रजावंधुःशिष्याःसब्रह्मचारिण ' इति ३७ (तथापिसुव्रतत्वात्तद्धारणेत्वंयोग्यइत्याह तथापीति ।) अग्रजोपिनप्रत्येतिनविश्वसितीति ३८ नास्तीतिनवक्तव्यंयतःअव्युच्छिन्नाःसंततामखावर्तंते । (रुक्ममयीवेदिर्येषांते । दीक्षितेनभिथ्यानवक्तव्यमित्यर्थः) ३९

॥३४॥

श्लोकाः ३०/३९

अक्रूरेप्रोषितेरिष्टान्यासन्वैद्वारकौकसाम् ॥ शारीरामानसास्तापामुहुर्दैविकभौतिकाः ३० इत्यंगोपदिशंत्येकेविस्मृत्यप्रागुदाहृतम् ॥ मुनिवासनिवासेकिंघटेतारिष्टदर्शनम् ३१ देवेऽवर्षतिकाशीशःश्वफल्कायागतायवै ॥ स्वसुतांगांदिनींप्रादात्ततोऽवर्षत्स्मकाशिषु ३२ तत्सुतस्तत्प्रभावोसावक्रूरोयत्रयत्रह ॥ देवोभिवर्षतेतत्रनोपतापानमारिकाः ३३ इतिवृद्धवचःश्रुत्वानैतावदिहकारणम् ॥ इतिमत्वासमानय्यप्राहाक्रूरंजनार्दनः ३४ पूजयित्वाभिभाष्यैनंकथयित्वाप्रियाःकथाः ॥ विज्ञाताखिलचित्तज्ञःस्मयमानउवाचह ३५ ननुदानपतेन्यस्तस्त्वय्यास्तेशतधन्वना ॥ स्यमंतकोमणिःश्रीमान्विदितःपूर्वमेवनः ३६ सत्राजितोऽनपत्यत्वाद्गृह्णीयुर्दुहितुःसुताः ॥ दायंनिनीयापःपिंडान्विमुच्यर्णंचशेषितम् ३७ तथापिदुर्धरस्त्वन्यैस्त्वय्यास्तांसुव्रतेमणिः ॥ किंतुममाग्रजःसम्यग्नप्रत्येतिमणिंप्रति ३८ दर्शयस्वमहाभागबंधूनांशांतिमावह ॥ अव्युच्छिन्नामखास्तेद्यवर्ततेरुक्मवेदयः ३९

चूर्णिका

ततः अक्रूरेगतेसति द्वारकायां शारीरादयस्तापाः अभूवन् ३० इत्थंएके उपदिशंति यत्र कृष्णनिवासः तत्र अरिष्टदर्शनंघटेतकिं ३१ किंच प्राक् काश्यां अनावृष्टौ सत्यां आगताय श्वफल्काय काशिराजः स्वसुतां गांदिनीं प्रादात् ततो वृष्टिरभवत् ३२ तत्सुतः अक्रूरोपि तत्प्रभावः यत्रतिष्ठति तत्रउपतापादयो न भवंतीति ३३ एवं वृद्धवचः श्रुत्वा अक्रूरं आनाय्य कृष्णः तंसंपूज्यस्मयमानः उवाच ३४ ३५ हेअक्रूरशतधन्वनास्यमंतकमणिः त्वयिन्यस्तः सः अस्माभिःपूर्वमेवविदितः ३६ किंच सत्राजितः अनपत्यत्वात् दायं सत्यायाः सुताः गृण्हीयुः ३७ तथापि समणिः त्वयि आस्ताम् ३८ परंतु रामः मणिविषये मां प्रति नविश्वसिति अतोमणिं दर्शयित्वा बंधूनां शांतिं कुरु ३९ ॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥५८॥

आलब्धउक्तः । हृदिस्पृष्टइतिवा ४० रजःमिथ्याभिशापंसंमृज्य । अन्यैर्दुर्धरइत्यादिमिषेणप्रीत्याभूयस्तस्मैप्रत्यर्पितवानिति ४१ (वीर्यप्रभावस्तद्युक्तम् । वृजिनहरंक्लेशापहम्) दुःकीर्तिंदुर्य
शस्तन्मूलंदुरितंचेति ४२ ॥ ॥ इतिश्रीभागवतेमाहापुराणेदशमस्कंधेटीकायांस्यमंतकोपाख्यानेसप्तपंचाशत्तमोऽध्यायः ५७ ॥ ॥ ७ ॥ ॥ अष्टपंचाशत्तमेतुकृष्णःपंचकरेऽ
ग्रहीत् । कालिंदींमित्रविंदांचसत्यांभद्रांचलक्ष्मणाम् ॥ १ ॥ कालिंदींनिजलाभायतपःपरमुपेयुषीम् । परिणेष्यन्प्रियावासमिंद्रप्रस्थमथागमत् ॥ २ ॥ प्रतीतान्ज्ञातान्नष्टानपिद्रुपदगेहेपुनःसंर्वैर्दृष्टान्
युयुधानःसात्यकिः १ (पार्थायुधिष्ठिरादयः) प्राणाइंद्रियाणि । मुख्यंपंचवृत्तिंप्राणमिव २ (अंगसंगेनहतमेनःकलुषंयेषाम् । सानुरागंस्मितंयत्रतत्तस्यवक्त्रम्) ३ ज्येष्ठयोःप्रणामंकृत्वासमेनालिं
गितःकनिष्ठाभ्यांअभिवंदितोबभूव ४ कृष्णाद्रौपदबिहूनांभार्यासत्यपि (अनिंदिता) निंदारहितापार्थैर्नवंअचिरमूढापरिणीता (अतएवव्रीडिता) ५ (अभिनंदितःस्वीकृतसत्कारः । पर्युपासत
परितोनिषेदुरित्यर्थः) ६ अतिहार्देनस्नेहेनआर्द्रेसजलेदृशौयस्यास्तयापरिष्वक्तः । तयापरिपृष्टाबांधवायस्यसः (सहस्नुषांद्रौपद्यासहितांताम्) ७ (प्रेम्णावैक्लव्यंतेनरुद्धःकंठोयस्याः) क्लेशापा
येआत्मनिदर्शनंयस्यतम् । भजतां (भक्तानां) क्लेशापायायआत्मानंदर्शयतीतिवा ८

॥३९॥ श्लोकाः ४०/८

एवंसामभिरालब्धःश्वफल्कतनयोमणिम् ॥ आदायवाससाच्छन्नंददौसूर्यसमप्रभम् ४० स्यमंतकंदर्शयित्वाज्ञातिभ्योरजआत्मनः ॥ विमृज्यम
णिनाभूयस्तस्मैप्रत्यर्पयत्प्रभुः ४१ यस्त्वेतद्भगवतईश्वरस्यविष्णोर्वीर्याढ्यंवृजिनहरंसुमंगलंच ॥ आख्यानंपठतिशृणोत्यनुस्मरेद्वादुःकीर्तिंदुरितम
पोह्ययातिशांतिम् ४२ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेस्यमंतकोपाख्यानेसप्तपंचाशत्तमोऽध्यायः ५७ ॥ ॥ श्रीशुकउवाच ॥
एकदापांडवान्द्रष्टुंप्रतीतान्पुरुषोत्तमः ॥ इंद्रप्रस्थंगतःश्रीमान्युयुधानादिभिर्वृतः १ दृष्ट्वातमागतंपार्थामुकुंदमखिलेश्वरम् ॥ उत्तस्थुर्युगपद्वीराःप्राणा
मुख्यमिवागतम् २ परिष्वज्याच्युतंवीराअंगसंगहतैनसः ॥ सानुरागस्मितंवक्त्रंवीक्ष्यतस्यमुदंययुः ३ युधिष्ठिरस्यभीमस्यकृत्वापादाभिवंदनम् ॥
फाल्गुनंपरिरभ्याथयमाभ्यांचाभिवंदितः ४ परमासनआसीनंकृष्णाकृष्णमनिंदिता ॥ नवोढाव्रीडिताकिंचिच्छनैरेत्याभ्यवंदत ५ तथैवसात्यकिः
पार्थैःपूजितश्चाभिनंदितः ॥ निषसादासनेऽन्येचपूजिताःपर्युपासत ६ पृथांसमागत्यकृताभिवंदनस्तयातिहार्दार्द्रदृशाभिरंभितः ॥ आपृष्टवांस्तांकु
शलंसहस्नुषांपितृष्वसारंपरिपृष्टबांधवः ७ तमाहप्रेमवैक्लव्यरुद्धकंठाश्रुलोचना ॥ स्मरंतीतान्बहून्क्लेशान्क्लेशापायात्मदर्शनम् ८

चूर्णिका

एवंभगवतासामभिः उक्तः अक्रूरः तस्मैमणिंददौ ४० ततः कृष्णः तंमणिंज्ञातिभ्योदर्शयित्वा अक्रूराय ददौ ४१ यः एतत् श्रीकृष्णस्य आख्यानं पठति शृणोति
वा सः शांतिंप्राप्नोति ४२ ॥ इतिदशमेसप्तपंचाशत्तमः ॥ ५७ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् एकदाकृष्णः सात्यक्यादिभिः सह
पांडवान् द्रष्टुंइंद्रप्रस्थंगतः १ ततः पार्थाःतंकृष्णं दृष्ट्वा उत्थाय परिष्वज्य तन्मुखं दृष्ट्वा मुदंप्रापुः २ ततः कृष्णः भीष्मयुधिष्ठिरौप्रति नत्वा अर्जुनंआलिंग्य यमाभ्यां वं
दितः सन् ३ ४ आसने उपविवेश ततः द्रौपदीतंननाम ५ तथैव सात्यकिरपि तैः पूजितः सन् अन्यासने उपविष्टः ६ ततः कृष्णः पृथांनत्वा कुशलं पृष्टवा
न् तदा पृथा तान् क्लेशान् स्मरंती सती तं आह ७ ८

॥३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ज्ञातीन्बंधूश्चनोऽस्मान्स्मरतात्वयायदामेभ्राताऽक्रूरःप्रेषितस्तदैव ९ज्ञातीनितिवचनात्प्राप्तंमोहंवारयंतीस्तौति। नतेस्तीति । तत्रहेतुःविश्वस्येति । सुहृच्चआत्माचतस्यतेस्वपरमोहोनभवति । हंसि नाशयसि १० कुमेधसांविषयासक्तचित्तानांअस्माकंयदृष्टोसि । (तस्माच्छ्रेयःसुकृतम्) ११ सुखमवसदितिशेषः । सुखमभ्यर्थितइतिवाक्रियासमाप्तिः १२ कालिंदीदर्शनप्रसंगमाह । एकदेति । अक्षयाः सायकाययोस्तौतूणौइषुधी । (विजयोऽर्जुनः) १३ १४ (शशशल्लकान्शशान्शल्लकांश्चेत्यर्थः) १५ राज्ञेयुधिष्ठिराय । मेध्यान्कर्माहान् । बीभत्सुरर्जुनः १६ (कृष्णौकृष्णार्जुनौ) १७ सख्याश्रीकृष्णेन । (सुद्विजांशोभनदंतीम्) १८ १९ २० अयंमांकामयेदितिशंकायामाह । नान्यमिति । (अनाथसंश्रयोदीनबंधुः) २१ २२ (कालिंदीतिसमाख्यातावसामियमुनाजले । निर्मितेभवनेपित्रायावदच्युतदर्शनम्) (इतियथातयोक्तंतथा । सोपिवासुदेवोपि) आदावेवतद्विद्वान् २३

श्लोकाः ९/२३

॥३६॥ तदैवकुशलंनोऽभूत्सनाथास्तेकृतावयम् ॥ ज्ञातीन्नःस्मरताकृष्णभ्रातामेप्रेषितस्त्वया ९ नतेस्तिस्वपरभ्रांतिर्विश्वस्यसुहृदात्मनः ॥ तथापिस्मरतांशश्वत्क्लेशान्हंसिहृदिस्थितः १० ॥ युधिष्ठिरउवाच ॥ किंनआचरितंश्रेयोनवेदाहमधीश्वर ॥ योगेश्वराणांदुर्दर्शोयन्नोदृष्टःकुमेधसाम् ११ इतिवैवार्षिकान्मासान्राज्ञासोभ्यर्थितःसुखम् ॥ जनयन्नयनानंदमिंद्रप्रस्थौकसांविभुः १२ एकदारथमारुह्यविजयोवानरध्वजम् ॥ गांडीवंधनुरादायतूणौचाक्षयसायकौ १३ साकंकृष्णेनसन्नद्धोविहर्तुंगहनंवनम् ॥ बहुव्यालमृगाकीर्णंप्राविशत्परवीरहा १४ तत्राविध्यच्छरैर्व्याघ्रान्सूकरान्महिषान्रुरून् ॥ शरभान्गवयान्खड्गान्हरिणाञ्शशशल्लकान् १५ तान्निन्युःकिंकराराज्ञेमेध्यान्पर्वण्युपागते ॥ तृट्परीतःपरिश्रांतोबीभत्सुर्यमुनामगात् १६ तत्रोपस्पृश्यविशदंपत्वावारिमहारथौ ॥ कृष्णौददृशतुःकन्यांचरंतींचारुलोचनाम् १७ तामासाद्यवरारोहांसुद्विजांरुचिराननाम् ॥ पप्रच्छप्रेषितःसख्याफाल्गुनःप्रमदोत्तमाम् १८ कात्वंकस्यासिसुश्रोणिकुतोवाकिंचिकीर्षसि ॥ मन्येत्वांपतिमिच्छंतींसर्वंकथयशोभने १९ ॥ कालिंद्युवाच ॥ अहंदेवस्यसवितुर्दुहितुःपतिमिच्छती ॥ विष्णुंवरेण्यंवरदंतपःपरममास्थिता २० नान्यंपतिंवृणेवीरतमृतेश्रीनिकेतनम् ॥ तुष्यतांमेसभगवान्मुकुंदोनाथसंश्रयः २१ कालिंदीतिसमाख्यातावसामियमुनाजले ॥ निर्मितेभवनेपित्रायावदच्युतदर्शनम् २२ तथाऽवदद्गुडाकेशोवासुदेवायसोपिताम् ॥ रथमारोप्यतद्विद्वान्धर्मराजमुपागमत् २३

चूर्णिका

हेकृष्ण त्वयायदा अक्रूरः प्रेषितः तदैव नः कुशलं अभूत् ९ १० ॥ युधिष्ठिरउवाच ॥ हेकृष्ण अस्माभिः श्रेयः किमाचरितंयतः त्वंदृष्टः ११ ॥ श्रीशुकउवाच ॥ हे राजन् ततः युधिष्ठिरेणप्रार्थितः भगवान् तत्रैववार्षिकान् मासान् अवसत् १२ एकदाअर्जुनः कृष्णेनसह रथं आरुह्य धनुर्गृहीत्वा विहर्तुंवनंप्राविशत् १३ १४ तत्रमेध्यान् व्याघ्रसूकरमहिषहरिणादीन् शरैः अविध्यत् १५ ततः भृत्याः तान्युधिष्ठिरायानिन्युः अर्जुनस्तुतृषितः सन् यमुनां अगात् १६ तत्र आगम्यजलंपीत्वा कृष्णपार्थौ कन्यांददृशतुः १७ ततः कृष्णेनप्रेषितः अर्जुनः तांप्राप्य पप्रच्छ १८ हेकन्ये त्वं का अत्र कुतः प्राप्ता किं चिकीर्षसि अहंत्वांपतिमिच्छंतींमन्ये अतः सर्वंकथय १९ ॥ कालिंद्युवाच ॥ हेपार्थ अहंसूर्यसुता विष्णुंपतिं इच्छतीसती तपः अकरवम् २० अन्यंपतिं न वृणे सः मुकुंदः मे तुष्यतां अहं कालिंदी यावत् विष्णुदर्शनंस्यात् तावत् अत्रयमुनातीरेएव वसामि २१ २२ ॥ श्रीशुकउवाच ॥ ततः पार्थः कृष्णाय तथैव अवदत् सः कृष्णः तांरथं आरोप्य धर्मराजं उपागमत् २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसंगात्तत्कालीनंचरित्रांतरमाह । यदैवेति । पार्थैर्यदैव (कंचित्कालंस्थातुं) संदिष्टोविज्ञापितोभगवान्कृष्णस्तदैवतेषांविश्वकर्मणादेवशिल्पिनाकृत्वानगरंकारयामास २४ किंच । भगवान्निर
तिशयैश्वर्यगुणवानपिअर्जुनस्यधनुरादिलाभायसारथिरास । खांडवंनामेंद्रवनम् २५ अक्षयौअक्षयसायकौ २६ खांडवदाहकाद्वह्नेः । सख्येअर्जुनाय (सभांस्वरचितांउपाहरत् समर्पितवान् ।)
यस्मिन्निति सामान्यतोनिर्देशःयस्यामित्यर्थः । जलस्थलयोर्दृशेर्दृष्टेर्भ्रमः यद्वा जलेस्थलवत्दृक्दृष्टिर्यस्मिन् तत्जलस्थलदृक् तस्मिन् भ्रमआसीदिति २७ (सभगवान्) २८ सुपुण्यःप्रशस्तऋतु
र्ऋक्षंचयस्मिन् । (तस्मिन्समये । स्वानांपरमआनंदोयस्मिन्तत्उर्जितंसमृद्धंपरममंगलंविवाहकौतुकम्) २९ पंचमंमित्रविंदाविवाहमाह । विंदानुविंदावितिद्वाभ्याम् । आवंत्यौ । अवंतीराजौ ।
(निषेधेहेतुःदुर्योधनेति ।) ३० (नाम्नाराजाधिदेव्याःपितृभगिन्याः अतएवस्वभगिनीमित्युक्तम् ।) ३१ षष्ठमाह । नग्नजिदिति । कौशल्यःअयोध्यापतिः । सत्यानामकन्याऽभवत् । देवीं
कांतिमती । नाग्निजितीपितृनाम्नाप्रसिद्धेत्यर्थः ३२ वीरस्यगंधमपिनसहंतेइतितथातान् । खलान्दुर्वृत्तान् । (सुदुर्धर्षान् । सुतरांदुर्धरान् ।) (गोवृषान्वृषभश्रेष्ठान्) ३३ वृषान्जयतियस्ते
नलभ्याम् ३४ प्रतिनंदितःतंप्रतिनंदितवान्सन् । श्रीकृष्णेनवासप्रतिनादितः ३५

श्लोकाः २४—३५

यदैवकृष्णःसंदिष्टःपार्थानांपरमाद्भुतम् ॥ कारयामासनगरंविचित्रंविश्वकर्मणा २४ भगवांस्तत्रनिवसन्स्वानांप्रियचिकीर्षया ॥ अग्नयेखांडवदातुमर्जुन
स्यासससारथिः २५ सोग्निस्तुष्टोधनुरदाद्धयान्श्वेतान्रथंनृप ॥ अर्जुनायाक्षयौतूणौवर्मचाभेद्यमस्त्रिभिः २६ मयश्चमोचितोवह्नेःसभांसख्येउपाहरत् ॥
यस्मिन्दुर्योधनस्यासीत्जलस्थलदृशिभ्रमः २७ सतेनसमनुज्ञातःसुहृद्भिश्चानुमोदितः ॥ आययौद्वारकांभूयःसात्यकिप्रमुखैर्वृतः २८ अथोपयेमेकालिं
दींसुपुण्यर्त्वृक्षऊर्जितम् ॥ वितन्वन्परमानंदंस्वानांपरममंगलम् २९ विंदानुविंदावावंत्यौदुर्योधनवशानुगौ॥स्वयंवरेस्वभगिनींकृष्णेसक्तांन्यषेधताम् ३० रा
जाधिदेव्यास्तनयांमित्रविंदांपितृष्वसुः ॥ प्रसह्यहृतवान्कृष्णोराजन्राज्ञांप्रपश्यताम् ३१ नग्नजिन्नामकौशल्यआसीद्राजातिधार्मिकः ॥ तस्यसत्याऽभ
वत्कन्यादेवीनाग्नजितीनृप ३२ नतांशेकुर्नृपावोढुमजित्वासप्तगोवृषान् ॥ तीक्ष्णशृंगान्सुदुर्धर्षान्वीरगंधासहान्खलान् ३३ तांश्रुत्वावृषजिल्लभ्यांभग
वान्सात्वतांपतिः ॥ जगामकौशलपुरंसैन्येनमहतावृतः ३४ सकोशलपतिःप्रीतःप्रत्युत्थायासनादिभिः ॥ अर्हणेनापिगुरुणाऽपूजयत्प्रतिनंदितः ३५

चूर्णिका

ततः पार्थैः विज्ञापितः कृष्णः विश्वकर्मणा तेषांनगरं कारयित्वा तत्रवसन् सन् २४अग्नये खांडवं वनं दातुं अर्जुनस्य सारथिः आस २५ ततः तुष्टोग्निः अर्जुनाय धनुः
अश्वान् रथं अक्षयसायकौ तूणौ वर्मच अदात् २६ अग्नेः मोचितः मयः अर्जुनाय सभां अदात् तस्यां दुर्योधनस्य जलस्थलयोः दृष्टेः भ्रमः आसीत् २७ ततः
युधिष्ठिरेण अनुज्ञातः कृष्णः सात्यकिप्रमुखैर्वृतः सन् द्वारकां एत्य सुमुहूर्ते कालिंदीं उपयेमे २८ २९ ततः आवंत्यौ विंदानुविंदौस्वयंवेकृष्णे सक्तांस्वभगिनींन्यषे
धतां ३० ततः कृष्णः तांमित्रविंदांराज्ञांपश्यतांसतां प्रसह्य हृतवान् ३१ अथकौसल्यः नग्नजिन्नामराजा आसीत् तस्यसत्यानामकन्या आसीत् ३२ तां राजानः सप्त
गोवृषान् अजित्वा वोढुंनशेकुः ३३ एवंभूतां तां श्रुत्वा कृष्णः सेनया सहकौसल्यपुरं जगाम ३४ ततः तंविलोक्यप्रीतः कौसल्यः अपूजयत् ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (आशिषःकामनाःमेमयाव्रतैर्नियमैःतर्हिंअयंमेपतिर्भूयात् ।)३६(नग्नजित्तुअर्चिततंप्रत्याह) ३७(अजाजोब्रह्मा । यःस्वकृतधर्ममर्यादारक्षणेच्छयालीलातनूर्दधाति) ३८ ३९हेनरेंद्रराजन्यबंधोःक्षत्रियस्यविग
हिंता । नहिशुल्कदाः द्रव्यादिप्रदाः ४० गुणानामेकंधामस्थानंत्वंतथाभूतस्ययस्यतवांगे ४१ (कन्यायावरपरीप्सयाचपणविशेषःकृतोस्ति ।) ४२ दुर्दांताअशिक्षिताःदुरवग्रहाअपरायत्ताःकुतःतदाह
एतैरीति (भग्नाः) भंगंप्रापिताः ४३ यत्यदिइमेगोवृषाः तर्हिभवानेववरः ४४ एतान्योनिगृह्णातितस्यकन्येतिसमयम् । सप्तधाकृत्वेतिबह्वीनामपियोषितांसंपूर्णएवाहंसंभोगयोग्यःस्यामितिसत्यां
प्रतिअसापत्न्यप्रदर्शनार्थमात्मनःसप्तधाकरणं । नत्वेकस्यसप्तानांनिग्रहोऽशक्यइति ४५ । ४६ । ४७ । ४८ । (गीतादिकंआसीत् । सुवाससश्चसमलंकृताश्च ।) ४९

॥३८॥ वरंविलोक्याभिमतंसमागतंनरेंद्रकन्याचकमेरमापतिम् ॥ भूयादयंमेपतिराशिषोऽमलाःकरोतुसत्यायदिमेधृतोव्रतैः ३६ अर्चितंपुनरित्याहनारायणजग
त्पते ॥ आत्मानंदेनपूर्णस्यकरवाणिकिमल्पकः ३७ यत्पादपंकजरजःशिरसाबिभर्तिश्रीरब्जजःसगिरिशःसहलोकपालैः ॥ लीलातनूःस्वकृतसेतुपरीप्स
येशःकालेदधत्सभगवान्ममकेनतुष्येत् ३८ ॥ श्रीशुकउवाच ॥ तमाहभगवान्कृष्णःकृतासनपरिग्रहः ॥ मेघगंभीरयावाचासस्मितंकुरुनंदन ३९ ॥
श्रीभगवानुवाच ॥ नरेंद्रयाञ्चाकविभिर्विगर्हिताराजन्यबंधोर्निजधर्मवर्तिनः ॥ तथापियाचेतवसौहृदेच्छयाकन्यांत्वदीयांनहिशुल्कदावयम् ४० ॥ रा
जोवाच ॥ कोन्यस्तेभ्यधिकोनाथकन्यावरइहेप्सितः ॥ गुणैकधाम्नोयस्यांगेश्रीर्वसत्यनपायिनी ४१ किंत्वस्माभिःकृतःपूर्वंसमयःसात्वतर्षभ ॥ पुंसांवी
र्यपरीक्षार्थंकन्यावरपरीप्सया ४२ सप्तैतेगोवृषावीरदुर्दांतादुरवग्रहाः ॥ एतैर्भग्नाःसुबहवोभिन्नगात्रान्नृपात्मजाः ४३ यदिमेनिगृहीताःस्युस्त्वयैवयदुनं
दन ॥ वरोभवानभिमतोदुहितुर्मेश्रियःपते ४४ एवंसमयमाकर्ण्यबद्ध्वापरिकरंप्रभुः ॥ आत्मानंसप्तधाकृत्वान्यगृह्णाल्लीलयैवतान् ४५ बध्वातान्दामभिः
शौरिर्भग्नदर्पान्हतौजसः ॥ व्यकर्षल्लीलयाबद्धान्बालोदारुमयान्यथा ४६ ततःप्रीतःसुतांराजाददौकृष्णायविस्मितः ॥ तांप्रत्यगृह्णाद्भगवान्विधिवत्सदृ
शींप्रभुः ४७ राजपत्न्यश्चदुहितुःकृष्णंलब्ध्वाप्रियंपतिम् ॥ लेभिरेपरमानंदंजातश्चपरमोत्सवः ४८ शंखभेर्यानकानेदुर्गीतवाद्यद्विजाशिषः ॥ नरानार्यः
प्रमुदिताःसुवासःस्रगलंकृताः ४९

श्लोकाः ३६—४९

चूर्णिका ततः सत्या रमापतिं विलोक्य तंवरं चकमे अयंमे पतिर्भूयात् इति ३६ किंच यत्पादरजः शिवादयः शिरसा बिभ्रति सः श्रीशः ममकेनतुष्येत् ३७ ३८ ॥ श्रीशुक
उवाच ॥ ॥ ततः कृष्णः राजानं आह ३९ हेनरेंद्र क्षत्रियस्ययाच्ञानिंदिता तथापि तवसौहृदेच्छयात्वदीयां कन्यांयाचे न वयंशुल्कदाः ४० ॥ राजोवाच ॥ हेनाथ
त्वत्तोधिकः वरः कोन्योऽस्ति ४१ परंतु पुंसांवीर्यपरीक्षणार्थं पणः कृतः अतः एतेसप्तवृषाः त्वयानिग्रहीतायदिस्युः तर्हिमेकन्यायाःवरः भवान् अभिमतः ४२ ४३
४४ ॥ श्रीशुकउवाच ॥ एवंसमयंश्रुत्वा आत्मानंसप्तधाकृत्वा लीलयैव वृषान् दामभिः बध्वाव्यकर्षयत् ४५ ४६ ततः प्रीतः कौसल्यः तांकृष्णाय ददौ ततः कृष्णः
तां प्रत्यगृह्णात् तदा राजपत्न्यः स्वदुहितुः कृष्णंपतिं लब्ध्वा मुमुदिरे ४७ ४८ तदा शंखभेर्यादयो नेदुः ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निष्कग्रीवाश्चताःसुवाससश्चतासांयुवतीनांचदासीनाम् ५० नागात् नागेभ्यो हस्तिभ्यः शतगुणान् नवलक्षाणि । रथात् रथेभ्यः शतगुणाम् नवकोटीः । अश्वात् अश्वेभ्यः शतगुणान् नवपद्मानि ५१ (याप
पामासप्रेषयामास) ५२ यदुभिर्गोवृषैश्चभग्नवीर्याःपराजिताअपिसुदुर्मर्षाःस्पर्धातिशययुक्ताःरुरुधुः ५३ अस्यतःक्षिपतःप्रयुंजानानितियावत् । (गांडीवसंज्ञंधनुरस्यास्तीतितथा) ५४ (पारिबर्ह
तुराजार्हवस्तुन्यपिपरिच्छदइत्यभिधानम् ।) ५५ सप्तमंविवाहमाह । श्रुतकीर्तेरिति । श्रुतकीर्तिर्नामयापितृष्वसातस्याःसुतांभद्रांनामकैकयींतद्देशजां (उपयेमेउदवहत् ।) ५६ अष्टममाह । सुतां
चेति । एकएवश्रीकृष्णोमद्रदेशाधिपतेःसुतांलक्ष्मणांजहार । (स्वःस्वर्गेविद्यमानांसुधांगरुडइव) ५७ तस्यानिरोधोऽतःपुरंतस्मात् ५८ ॥ भैष्मीजांबवतीभामासत्याभद्राचलक्ष्मणा । कालिंदीमित्र
विंदाचेत्यष्टौपट्टमहास्त्रियः ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांअष्टपंचाशत्तमोध्यायः ॥ ५८ ॥ ॥ ७ ॥ ॥ ऊनषष्टितमेभौमंहत्वातेनाहृतादरिः । कन्याःसहस्रशःप्राप्यपा
रिजातंदिवोऽहरत् ॥ १ ॥ परिणीयततस्ताभिस्तन्मनोरथपूरणैः । आत्मारामोप्यसौरेमेतद्गृहेषुगृहस्थवत् ॥ २ ॥ येनताःस्त्रियोनिरुद्धाःसभौमःचकारात्येनकारणेनहतः (एतद्रूपंविक्रमं) आचक्ष्वेति १

श्लोकाः ५०/१

दशधेनुसहस्राणिपारिबर्हमदाद्विभुः ॥ युवतीनांत्रिसाहस्रंनिष्कग्रीवसुवाससाम् ५० नवनागसहस्राणिनागाच्छतगुणान्रथान् ॥ रथाच्छतगुणानश्वा
नश्वाच्छतगुणान्नरान् ५१ दंपतीरथमारोप्यमहत्यासेनयावृतौ ॥ स्नेहविक्लिन्नहृदयोयापयामासकौशलः ५२ श्रुत्वैतद्रुरुधुर्भूपानयंतंपथिकन्यकाम् ॥
भग्नदर्पाःसुदुर्मर्षायदुभिर्गोवृषैःपुरा ५३ तानस्यतःशरव्रातान्बंधुप्रियकृदर्जुनः ॥ गांडीवीकालयामाससिंहःक्षुद्रमृगानिव ५४ पारिबर्हमुपागृह्य
द्वारकामेत्यसत्यया ॥ रेमेयदूनामृषभोभगवान्देवकीसुतः ५५ श्रुतकीर्तेःसुतांभद्रांउपयेमेपितृष्वसुः ॥ कैकयींभ्रातृभिर्दत्तांकृष्णःसंतर्दनादिभिः ५६
सुतांचमद्राधिपतेर्लक्ष्मणांलक्षणैर्युताम् ॥ स्वयंवरेजहारैकःस्वःसुपर्णःसुधामिव ५७ अन्याश्चैवंविधाभार्याःकृष्णस्यासन्सहस्रशः ॥ भौमंहत्वातन्निरो
धादाहृताश्चारुदर्शनाः ५८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअष्टमहिष्युद्वाहोनामाष्टपंचाशत्तमोध्यायः ५८ ॥ ॥ छ ॥ ॥ राजोवाच ॥
यथाहतोभगवताभौमोयेनचताःस्त्रियः ॥ निरुद्धाएतदाचक्ष्वविक्रमंशार्ङ्गधन्वनः १

चूर्णिका

५० ततः राजादुहित्रेदशसहस्रंगाःस्त्रीणांत्रिसाहस्रं नवसहस्राणिनागान् नागेभ्यः शतगुणान् रथान्तच्छतगुणानश्वान् तच्छतगुणान् नरान्ददौ ५१ ततः दंपती रथं आरोप्य प्र
स्थापयामास ५२ तच्छ्रुत्वाभग्नवीर्याः भूपाः कन्यांनयंतं कृष्णंपथिरुरुधुः ५३ ततः शरान्प्रक्षिपतस्तान् अर्जुनः कालयामास ५४ ततः कृष्णः द्वारकां एत्य तयासहरेमे
५५ ततः श्रुतकीर्तेः सुतांभद्रांउपयेमे ५६ ततः मद्राधिपतेः सुतांलक्ष्मणां एक एवस्वयंवरे जहार ५७ एवंभौमंहत्वातद्गृहात् आनीताः सहस्रशः कन्याः ताः कृष्ण
स्यअन्याः स्त्रियः आसन् ५८ ५९ ॥ इतिदशमेऽष्टपंचाशत्तमः ॥ ५८ ॥ ॥ छ ॥ ॥ छ ॥ ॥ राजोवाच ॥ हेब्रह्मन्भगवतायथाभौमोहतः
येन कारणेन तदाचक्ष्व १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥४०॥ इंद्रेणभौमविचेष्टितंविज्ञापितःसन् । प्राग्ज्योतिषपुरंभौमनगरंययावित्यन्वयः । कथंभूतेन । हृतंछत्रंयस्यतेन । लोकपालप्रधानत्वादिंद्रस्यवरुणच्छत्रहरणोपतस्पवमानभंगइतितथोक्तम् । हृतेकुंडलेयस्याःसाअदितिर्बंधुर्मातायस्यतेन । हृतममराद्रौस्थानंमणिपर्वतलक्षणंयस्यतेन । सत्यभामायागृहेइंद्रआगत्यभगवंतं (प्रति भौमासुरचेष्टितं) विज्ञापितवान् तदा तस्याःकौतुकायतयाभार्ययासहययाविति । यद्वा त्वदनुज्ञयैवत्वत्पुत्रंहनिष्यामीतिइतिहासोक्तंभूम्यैवरंदत्तंसत्यकर्तुंसत्यभामायाभूम्यंशत्वात्तयासहययौ यद्वा नारदानीतेपारिजातेककुसुमेप्रीत्यारुक्मिण्यैदत्तेसतिकुपितांसत्यभामांसांत्वयित्वातुभ्यंपारिजातमेवदास्यामीतिश्रीकृष्णेनप्रतिश्रुतमितिहरिवंशेप्रसिद्धम् । तदकृत्वाभौमंहंतुंप्रस्थितेसापुनःक्रुध्येदितितदर्थंतांचनीतवानिति (ज्ञेयम्) २ गरुडारोहणयानेकारणं गिरिदुर्गैरित्यादि । तैरुपलक्षितम् । जलाग्न्यनिलैश्चसर्वतोवर्तमानैर्दुर्गमं (मुरदैत्यरचितपाशानामयुतैः) ३ (मनस्विनांवीराणां) ४ ५ युगांताशनेर्ध्वनिवद्भीषणं (शंखध्वनिं) परिखायाजलात् (उत्तस्थौ) ६ (अभ्यद्रवत्अभिजगामहरिमितिशेषः) ७ आविध्यआतोल्य (समुरासुरः) समहान्नादइत्यन्वयः ८ (गरुत्मदुपरिआपतत्तच्छूलंत्रिधाऽच्छिनत् । तंमुरंचमुखेष्वताडयत्सोपि) तस्मैकृष्णायगदांव्यमुंचत् ९ १० इंद्रतेजसावज्रेण । प्रतिक्रिययाहेतुभूतयाअमर्षजुषः । (प्रतिक्रियांकर्तुंक्रुद्धाबभूवुरित्यर्थः) ११ पीठंपीठनामानंनिरगन् । निरगमन् १२

श्लोकाः २/१२

॥ श्रीशुकउवाच ॥ इंद्रेणहृतच्छत्रेणहृतकुंडलबंधुना ॥ हृतामराद्रिस्थानेनज्ञापितोभौमचेष्टितम् २ सभार्योगरुडारूढःप्राग्ज्योतिषपुरंययौ ॥ गिरिदुर्गैःशस्त्रदुर्गैर्जलाग्न्यनिलदुर्गमम् ॥ मुरपाशायुतैर्घोरैर्दृढैःसर्वतआवृतम् ३ गदयानिर्बिभेदाद्रीञ्शस्त्रदुर्गाणिसायकैः॥ चक्रेणाग्निंजलंवायुंमुरपाशांस्तथासिना ४ शंखनादेनयंत्राणिहृदयानिमनस्विनाम् ॥ प्राकारंगदयागुर्व्यानिर्बिभेदगदाधरः ५ पांचजन्यध्वनिंश्रुत्वायुगांताशनिभीषणम् ॥ मुरःशयानउत्तस्थौदैत्यःपंचशिराजलात् ६ त्रिशूलमुद्यम्यसुदुर्निरीक्षणोयुगांतसूर्यानलरोचिरुल्बणः ॥ ग्रसंस्त्रिलोकीमिवपंचभिर्मुखैरभ्यद्रवत्तार्क्ष्यसुतंयथोरगः ७ आविध्यशूलंतरसागरुत्मतेनिरस्यवक्त्रैर्व्यनदत्सपंचभिः ॥ सरोदसीसर्वदिशोऽबरंमहानापूरयन्नंडकटाहमावृणोत् ८ तदापतद्वैत्रिशिखंगरुत्मतेहरिःशराभ्यामच्छिनत्त्रिधौजसा ॥ मुखेषुतंचापिशरैरताडयत्तस्मैगदांसोपिरुषाव्यमुंचत ९ तामापतंतींगदयागदांमृधेगदाग्रजोनिर्बिभिदेसहस्रधा ॥ उद्यम्यबाहूनभिधावतोऽजितःशिरांसिचक्रेणजहारलीलया १० व्यसुःपपातांभसिकृत्तशीर्षोनिकृत्तशृंगोद्रिरिवेंद्रतेजसा ॥ तस्यात्मजाःसप्तपितुर्वधातुराःप्रतिक्रियामर्षजुषःसमुद्यताः ११ ताम्रोंतरिक्षःश्रवणोविभावसुर्वसुर्नभस्वानरुणश्चसप्तमः ॥ पीठंपुरस्कृत्यचमूपतिंमृधेभौमप्रयुक्तानिरगन्धृतायुधाः १२

चूर्णिका

॥ श्रीशुकउवाच ॥ एकदाइंद्रेण विज्ञापितः भगवान् सभार्यो गरुडारूढः प्राग्ज्योतिषपुरंययौ २ तत्रगत्वागदयाअद्रीन्निर्बिभेद शरैः शस्त्रदुर्गाणि चक्रेण अग्निंजलंवायुंचनिर्बिभेद असिनामुरपाशान्निर्बिभेद ३ ४ शंखनादेनयंत्राणिविभेद गदयाप्राकारंचविभेद ५ ततः शंखध्वनिं श्रुत्वा शयानः पंचमुखः मुरः जलात् उत्थाय ६ शूलं उद्यम्य कृष्णं अभिद्रुत्य गरुडाय शूलं प्रक्षिप्य पंचवक्त्रैः व्यनदत् सः शब्दः ब्रह्मांडं आवृणोत् ७ ८तदाहरिः तच्छूलं शराभ्यां त्रिधा भंक्त्वा तंमुखेषुशरैः अताडयत् सोपिमुरः तस्मै गदांव्यमुंचत् ९ तांगदांकृष्णः स्वगदयासहस्रधानिर्भिद्य चक्रेणतस्य शिरांसि चिच्छेद १० ततः तस्य सप्तपुत्राः ११ ताम्रः १ अंतरिक्षः २ सुत्रलः ३ विभावसुः ४ वसुः ५ नभस्वान् ६ अरुणः ७ एतेभौमप्रयुक्ताः संतः चमूपतिं पीठंपुरस्कृत्यनिरगमन् १२ ॥४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 (आसाद्यप्राप्य । अजितेहरौ । तच्छस्त्रवृंदं चकर्त चिच्छेद) निकृत्तानिशीर्षादीनियेषांतान् (यमक्षयंयमधाम) १३ (स्वसेनानायकान् निरस्तान्निरीक्ष्यनरकोभौमासुरोनिरगच्छत्)
१४ शतघ्नींशक्तिविशेषम् १५ विचित्रावाजाः पत्राणियेषांतैर्बाणैर्निकृत्तावाहवऊरवःशिरोधाःकंधराविग्रहादेहाश्चयस्यतत् । तर्ह्येवयदाविव्यधुस्तस्मिन्नेवक्षणे १६ अत्याश्चर्यंकुरूद्वहेतिसंबोधनं तथाहि ।
तैर्योनिप्रयुक्तानिशस्त्राणिबहुभिर्बहूनितत्प्राप्तेःपूर्वमेवएकोहरिस्तत्सैन्यंसर्वहत्वापश्चात्तानिशस्त्राणिचचिच्छेदतत्राप्येकैकंशस्त्रमस्त्रंचत्रिभिःत्रिभिःशरैरित्याश्चर्यं (हरिशब्देनविश्वंहरतस्तस्येदंनाश्चर्यमपीत्य
टीका सूचि) १७ किंचगरुत्मतेति (पुरमेवाविशन्नतुरणभूमिम् । यतआर्ताः । नरकस्तुयुधिसंग्रामेअयुध्यत नन्यवर्तत) १८ यतःययाशक्त्यावज्रःप्रतिहतआसतयातंगरुडम् १९ गरुडस्तुनाकंपत । ग ॥५९॥
रुडेदितथोद्यमःसन् । (ततोऽच्युतंहंतुम्)शूलंत्रिशूलमाददेधृतवान् २० २१ २२ प्रतप्ते (सर्वकालंप्रतप्ततुल्ये) जांबूनदेयानिरत्नानितैर्भास्वरे (अदित्याःकुंडले) मेर्वंशभूतमंदराशिखर-(-रूपं)
॥४१॥ महामणिं (वरुणस्यछत्रंचयत्पूर्वंभौमेनहृतंतद्वैजयंत्या) चसहार्पयादिति २३

प्रायुंजतासाद्यशरानसीन्गदाःशक्त्यृष्टिशूलान्यजितेरुषोल्बणाः ॥ तच्छस्त्रकूटंभगवान्स्वमार्गणैरमोघवीर्यस्तिलशश्चकर्तह ॥ तान्पीठमुख्याननन श्लोकाः
यद्यमक्षयंनिकृत्तशीर्षोरुभुजांघ्रिवर्मणः १३ स्वानीकपानच्युतचक्रसायकैस्तथानिरस्तान्नरकोधरासुतः ॥ निरीक्ष्यदुर्मर्षणआस्रवन्मदैर्गजैःपयोधिप्र
भवैर्निराक्रमत् १४ दृष्ट्वासभार्यंगरुडोपरिस्थितंसूर्योपरिष्टात्सतडिद्घनंयथा ॥ कृष्णंसतस्मैव्यसृजच्छतघ्नींयोधाश्चसर्वेयुगपत्स्मविव्यधुः १५ तद्भौमसै १३/२३
न्यंभगवान्गदाग्रजोविचित्रवाजैर्निशितैःशिलीमुखैः ॥ निकृत्तबाहूरुशिरोध्रविग्रहंचकारतर्ह्येवहताश्वकुंजरम् १६ यानियोधैःप्रयुक्तानिशस्त्रास्त्राणिकुरू
द्वह ॥ हरिस्तान्यच्छिनत्तीक्ष्णैःशरैरेकैकशस्त्रिभिः ॥ उह्यमानःसुपर्णेनपक्षाभ्यांनिघ्नतागजान् १७ गरुत्मताहन्यमानास्तुंडपक्षनखैर्गजाः ॥ पुरमेवावि
शन्नार्तानरकोयुध्ययुध्यत १८ दृष्ट्वाविद्रावितंसैन्यंगरुडेनार्दितंस्वकम् ॥ तंभौमःप्राहरच्छक्त्यावज्रःप्रतिहतोयतः १९ नाकंपततयाविद्धोमालाहतइवद्वि
पः ॥ शूलंभौमोऽच्युतंहंतुमाददेवितथोद्यमः २० तद्विसर्गात्पूर्वमेवनरकस्यशिरोहरिः ॥ अपाहरद्गजस्थस्यचक्रेणक्षुरनेमिना २१ सकुंडलंचारुकिरी
टभूषणंबभौपृथिव्यांपतितंसमुज्ज्वलत् ॥ हाहेतिसाध्वित्यृषयःसुरेश्वरामाल्यैर्मुकुंदंविकिरंतईडिरे २२ ततश्चभूःकृष्णमुपेत्यकुंडलेप्रतप्तजांबूनदरत्नभास्वरे ॥
सवैजयंत्यावनमालयार्पयत्प्राचेतसंछत्रमथोमहामणिम् २३

चूर्णिका कृष्णं आसाद्य शरखड्गशक्तिशूलानि कृष्णेप्रायुंजत ततःकृष्णःतच्छस्त्रकूटंस्वशरैः तिलशः छित्वा तान्सर्वान् यमालयम् अनयत् १३ तन्निरीक्ष्य नरकः गजैः
निर्गत्य १४ गरुडोपरिस्थितं सभार्यंकृष्णं दृष्ट्वा शतघ्नींमुमोच तदायोधाअपिविव्यधुः १५ तदाकृष्णः बाणैः भौमसैन्यं छिन्नावयवंचकार शरैः प्रयुक्तानिशस्त्राणि शरैः
अच्छिनत् १६ गरुडेन ताडिताः गजाः पुरंविविशुः तदा नरकःअयुध्यत १७ १८ ततोनरकः स्वसैन्यंगरुडेनार्दितं दृष्ट्वा तं गरुडंशक्त्या प्राहरत् १९ तयाविद्धोपि ॥४१॥
गरुडः नाकंपत ततोभौमः कृष्णं हंतुंशूलं आददे २० तद्विसर्गात् पूर्वमेवहरिःचक्रेण तच्छिरः चिच्छेद २१ ततः हाहेतिसाध्विति शब्दोऽभूत् ऋषयो देवाश्च
माल्यैः कृष्णंविकिरंतः संतः ईडिरे २२ ततः भूमिः कृष्णंउपेत्य कुंडलेवरुणच्छत्रंवनमालांमहामणिंच दत्त्वा अस्तौत् २३

CC-0. In Public Domain. Digitization by eGangotri

टीका २४ ऐश्वर्यंज्ञात्वाभूमिःस्तौति नमस्तइति । हेपरमात्मन् देवाद्यंतर्यामिन् (भक्तानामिच्छयोपात्तंरूपंयेनतस्मैते) २५ येनमंत्रेणकुंत्याःप्रसन्नःपूर्वमासीत्तेनमंत्रेणनमस्यति । नमइति । पंकजंनाभौयस्य तस्मैजगत्कारणायेत्यर्थः । अतएवसत्कीर्तिमयीपंकजानांमालाविद्यतेयस्यतस्मै । एवंभूतंध्यायतांपंकजवत्सुप्रसन्नेतापोपशमनेनेत्रेयस्यतस्मै । पंकजवत्सुसेव्यौपंकजांकितौवाअंघ्रीयस्यतस्मैनमइ ति २६ किंच । भगवतेनिरतिशयैश्वर्यायवासुदेवायसर्वभूताश्रयाय । अतएवविष्णवेव्यापिने । नहिसर्वभूताश्रयत्वंपरिच्छिन्नस्यसंभवतीति । कुतःसर्वाश्रयत्वंतत्राह । पुरुषायसर्वस्मात्कार्यात्पूर्वमे वसते । 'पूर्वमेवाहमिहासमितितत्पुरुषस्यपुरुषत्वमिति' श्रुतेः । एतदपिकुतः । आदिबीजायआदेर्जगत्कारणस्यापिकारणाय । एवमपिनमृदादिवज्जाड्यमित्याह । पूर्णबोधायेति २७ नन्वेवमपिस्व कारणात्पूर्वंसत्त्वंनस्यादतआह । अजायेति । स्वयमजाय । अन्यस्यचजनयित्रे । उभयत्रापिक्रमेणहेतुद्वयम् । ब्रह्मणेबृहते । अनंतशक्तयइतिच । बृहत्त्वादजत्वम् । अनंतशक्तित्वाज्जनयितृत्वमि
॥४२॥ त्यर्थः । ननुपित्रादयःपुत्रादीनांजनकाःतेषांचतत्पूर्वेतेषांचभूतानितेषांचस्वकर्मद्वारेणजीवाः । किमत्राहंतत्राह । परावरात्मन्नित्यादि । पुत्राद्यात्मत्वात्त्वमेवजनकइत्यर्थः । (अत्रपरेपित्रादीनांजनकाः अवरेपित्रादयस्तेषांआत्मन् । परमात्मन्जीवांतर्यामिन्) २८ ननुगुणाविश्वोत्पत्त्यादिहेतवः तेचप्रधानस्यैव । तस्यचपुरुषःक्षोभकः तत्रकालोनिमित्तमितिप्रसिद्धं किमत्राहंतत्राह । त्वंवाइति (सिसृ क्षुःसन्रजोबिभर्षिनिरोधायसंहाराय) तमसोधारणेप्यसंवृतएव । स्थानायपालनाय । जगतःसृष्ट्याद्यर्थंउत्कटंरजआदिकंत्वमेवबिभर्षिसृजसीत्यर्थः । कालप्रधानपुरुषाश्चत्वद्व्यतिरिक्तानसंति । त्वंतुप रःसर्वव्यतिरिक्तःअतस्त्वमेवजनयितेत्यर्थः २९ कार्यकारणरूपस्यप्रपंचस्यतदव्यतिरेकंतस्यतुसर्वव्यतिरेकंउपपादयति अहमिति । अहंभूमिः । मात्राणिदेवामनइंद्रियाणीतितामसादित्रिविधाहंकारका र्याणि । (तत्रदेवामनश्चवैकारिकस्यकार्यं) कर्ताऽहंकारः । ३० एवंस्तुत्वाप्रार्थयते । तस्येति । हेप्रपन्नार्तिहर । तस्यनरकस्यायंभगदत्तोनामभीतःअतएवमयातवपादपंकजमुपसादितः । (त त्तस्मात् । करकमलंशिरसिकुरु) ३१

श्लोकाः अस्तौषीदथविश्वेशंदेवीदेववरार्चितम् ॥ प्रांजलिःप्रणताराजन्भक्तिप्रवणयाधिया २४ ॥ भूमिरुवाच ॥ नमस्तेदेवदेवेशशंखचक्रगदाधर ॥ भक्तेच्छो पात्तरूपायपरमात्मन्नमोस्तुते २५ नमःपंकजनाभायनमःपंकजमालिने ॥ नमःपंकजनेत्रायनमस्तेपंकजांघ्रये २६ नमोभगवतेतुभ्यंवासुदेवायविष्णवे
२४/३१ पुरुषायादिबीजायपूर्णबोधायतेनमः २७ अजायजनयित्रेस्यब्रह्मणेनंतशक्तये ॥ परावरात्मन्भूतात्मन्परमात्मन्नमोस्तुते २८ त्वंवैसिसृक्षूरजउत्कटं प्रभोतमोनिरोधायबिभर्ष्यसंवृतः ॥ स्थानायसत्त्वंजगतोजगत्पतेकालःप्रधानंपुरुषोभवान्परः २९ अहंपयोज्योतिरथानिलोनभोमात्राणिदेवामनइं द्रियाणि ॥ कर्तामहानित्यखिलंचराचरंत्वय्यद्वितीयेभगवन्नयंभ्रमः ३० तस्यात्मजोयंतवपादपंकजंभीतःप्रपन्नार्तिहरोपसादितः ॥ तत्पाह्येनंकुरुह स्तपंकजंशिरस्यमुष्याखिलकल्मषापहम् ३१

चूर्णिका २४ ॥ भूमिरुवाच ॥ नमस्तेदेवदेवेशशंखचक्रगदाधर भक्तेच्छोपात्तरूपायपरमात्मन्नमोस्तुते २५ नमःपंकजनाभायनमःपंकजमालिने नमःपंकजनेत्रायनमस्तेपंक जांघ्रये २६ नमो भगवतेतुभ्यंवासुदेवायविष्णवे परमात्मन्नमोस्तुते २७ हेईश त्वंजगतः सृष्ट्यादौ सत्त्वादीन् गुणान् धत्से २८ २९ ३० हेभगवन् अयंनरकः मेलप्यैवदत्तः निहतश्च तस्यायंपुत्रः भीतः सन् तवपादपंकजंप्रापितः अतः अभयंदत्वा पाहि ३१ ॥४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अभयं (तस्मै) दत्त्वा ३२ (राजभ्योभौमेनाहृतानां) शताधिकमित्यपिज्ञातव्यम् । तथाहश्रीपराशरः । "कन्यापुरेसकन्यानांषोडशातुलविक्रमः । शताधिकानिददृशेसहस्राणिमहामतेइति" । राज
भ्यइत्युपलक्षणंसिद्धादिभ्योपीति । तथातेनैवोक्तम् । "देवसिद्धासुरादीनांनृपाणांचजनार्दन । हृत्वाहिसोऽसुरःकन्यारुरोधनिजमंदिरे"इति ३३ ३४ (तदनुमोदतांतत्सत्यंकरोत्वितिभावः । इतिभावे
नकृष्णेहृदयंनिहितवत्यः) ३५ प्राहिणोत्प्रस्थापयामास । सुमृष्टाःकमनीयाइत्यर्थःताश्चताविरजोंबराश्चताःनरयानैःशिबिकाभिः अपिचमहाकोशानिति ३६ (ऐरावतवंशजान्अतएवचतुर्दंतानिभान्)
३७ सप्रियःसत्यभामासहितः (अमरावतींप्रतिगत्वा नोदितःप्रेरितः) ३८ ३९ गृहोद्यानंनिष्कुटंतदुपशोभयतिय -(- स्तथाभूतःस्थापितःतत्रतस्यगंधासवयोःसौरभ्यमकरंदयोर्लंपटाःस्वर्गात्तम
न्वगुःएवंभूतःपारिजातः) ४० (ननु) सेंद्रान्विबुधान्निर्जित्येतींद्रकृष्णयोःसंग्राम उक्तःतत्रकथंप्रसाधितस्वमनोरथेनश्रीकृष्णेनसहइंद्रस्यसंग्रामइत्याशंक्याह ययाचइति । अच्युतंअर्थसाधनमितिचकर्म
द्वयंयाचतिधातोः । विगृह्यतेविग्रहंकरोतिमहानपि । अहोइत्याश्चर्ये । देवानामपितमःक्रोधः (तत्रहेतुभूतां) आढ्यतांधनिकतांधनमदमितियावत् ४१ यथाययथावत् अनेनदेववक्यादिबंधुजनसमा
गमेपिप्रतिगृहंयौगपद्येनसूचितः । अव्ययःसर्वत्रापिसंपूर्णएव ४२

।४३॥

श्लोकाः ३२/४२

॥ श्रीशुकउवाच ॥ इतिभूम्यार्थितोवाग्भिर्भगवान्भक्तिनम्रया ॥ दत्त्वाऽभयंभौमगृहंप्राविशत्सकलर्द्धिमत् ३२ तत्रराजन्यकन्यानांषट्सहस्राधिकायुत
म् ॥ भौमाहृतानांविक्रम्यराजभ्योददृशेहरिः ३३ तंप्रविष्टंस्त्रियोवीक्ष्यनरवीरंविमोहिताः ॥ मनसावव्रिरेभीष्टंपतिंदैवोपसादितम् ३४ भूयात्पतिरयंम
ह्यंधातातदनुमोदताम् ॥ इतिसर्वाःपृथक्कृष्णेभावेनहृदयंदधुः ३५ ताःप्राहिणोद्द्वारवतींसुमृष्टविरजोंबराः ॥ नरयानैर्महाकोशान्रथाश्वान्द्रविणंमहत् ॥
३६ ऐरावतकुलेभांश्चचतुर्दंतांस्तरस्विनः ॥ पांडुरांश्चचतुःषष्टिंप्रेषयामासकेशवः ३७ गत्वासुरेंद्रभवनंदत्त्वाऽदित्यैचकुंडले ॥ पूजितस्त्रिदशेंद्रेणमहेंद्रा
ण्याचसप्रियः ३८नोदितोभार्ययोत्पाट्यपारिजातंगरुत्मति ॥ आरोप्यसेंद्रान्विबुधान्निर्जित्योपानयत्पुरम् ३९स्थापितःसत्यभामायागृहोद्यानोपशोभनः ॥अ
न्वगुर्भ्रमराःस्वर्गात्तद्गंधासवलंपटाः ४० ययाचआनम्यकिरीटकोटिभिःपादौस्पृशन्नच्युतमर्थसाधनम् ॥ सिद्धार्थएतेनविगृह्यतेमहानहोसुराणांचतमो
धिगाढ्यताम् ४१ अथोमुहूर्तएकस्मिन्नानागारेषुताःस्त्रियः ॥ यथोपयेमेभगवांस्तावद्रूपधरोव्ययः ४२

चूर्णिका

॥ श्रीशुकउवाच ॥ एवं भूम्याप्रार्थितः भगवान् तस्यअभयंदत्त्वा भौमगृहंप्राविश्य ३२ भौमाहृतानांकन्यानां शतैकाधिकषोडशसहस्रं ददृशे ३३ ततः ताः कृष्णं
दृष्ट्वामनसातं पतिंवृत्वा३४ पृथक् पृथक्ऊचुः अयंममपतिर्भूयात् धाता अनुमोदतांइति ३५ तत्र कृष्णः ताः कन्याः नरयानैः द्वारकांप्राहिणोत् ३६ तथाकोशान्
रथान्अश्वान् चतुर्दंतान् गजान् चतुःषष्टिसंख्याकान्प्राहिणोत् ३७ततःकृष्णः इंद्रभवनंगत्वा अदित्यैकुंडले दत्त्वाइंद्रेण पूजितः ३८ भार्ययाचोदितः सन् पारिजातं उत्पाट्य गरु
डे आरोप्य सेंद्रान् देवान् जित्वा द्वारकां एत्य ३९ तंपारिजातं सत्यभामायाउद्यानेस्थापितवान् ४० किंच अहो यः इंद्रः पूर्वं अर्थसाधनाय अच्युतं प्रार्थितवान् सएवसिद्धा
र्थः सन् तेनसाकं विग्रहंकरोति अतस्तस्य धिक् ४१ अथहरिः एकस्मिन्मुहूर्तेनानागृहेषु तावद्रूपधरः सन् ताः कन्याः उपयेमे ततः तासांगृहेषुस्थितः सन् रेमे ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अहोभाग्यंनारीणामित्याहात्रिभिः । गृहेष्विति । अतर्क्याणिकर्माणिकरोतीतितथासः । निरस्तंसाम्यमतिशयश्चयैरन्येषांतेषुगृहेषुअनपायी (परिपूर्णो -)-ऽवस्थितः रमाभिःलक्ष्म्याअंशभूताभिः निजकामसंप्लुतःस्वानंदपरिपूर्ण गार्हमेधिकान्गृहस्थधर्मान् ४३ (कथंभूतंरमापातिंयस्यपदवींब्रह्मादयोपिनविदुः । तादृशंपातिंलब्ध्वा) अनुरागहाससहितमवलोकंचतत्पर्वकंनवसंगमंचतद्गतंजल्पंचतस्मिन्लज्जांचभेजुः ४४ (अत्रप्रत्युद्गमोऽभ्युत्थानपूर्वकंसमीपगमनम् । आसनवरेअर्हणंसंमानः) विश्रमणंपादसंवाहनम् । केशप्रसारःकेशप्रसाधनं (इत्यादिभिः) दासीनांशतानिविद्यंतेयासांतथाभूताअपि (प्रीत्या) स्वयमेवविभोर्दास्यंविदधुरिति ४५ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोनषष्टितमोऽध्यायः॥ ५९ ॥ ॥ ७ ॥ ॥ अथषष्टितमेकृष्णःपरिहासेनरुक्मिणीम् ॥ कोपयित्वाततःप्रेमकलहेतामसांत्वयत् ॥ १ ॥ रामारामजनानंदमहोदयविडंबनैः ॥ रुक्मिण्याप्रेमकलहछद्मनैश्वर्यमीर्यते ॥ २ ॥ स्वतल्पस्थंस्वपर्यंकस्थं (सखीजनैःसहव्यजनेनचामरेण) १ वक्ष्यमाणंरुक्मिण्याः (स्त्रियाः) कृष्णेपरमप्रेमसंभावयितुंतस्योक्तमेवतत्त्वंअनुस्मारयाति यास्त्विति।(यईश्वरःअत्तिसंहरति । गोपीथायरक्षणाय) २ आदौतावत्त्रिभिःश्लोकैर्मंदिरमनुवर्णयति तस्मिन्निति । तच्छब्देनातिप्रसिद्धमाह । भ्राजंतिमुक्तादामानितेषांविलंबा (लंबमानसमूहविशेषाः) संतियस्मिंस्तत् । तेनविराजिते । तृतीयांतानांविराजितपदेनान्वयः ३ सुगंधितयाद्विरेफकुलैर्नादिते (यतःपुष्पैर्विकासितैर्मल्लिकादामाभिर्विराजिते) प्रविशाद्भिश्चंद्ररश्मिभिः ४ उद्यानेशालतेताद्दशेनअतएवपारिजातस्यामोदोयत्रतेनवायुना निर्गच्छद्भिरगुरुसंभवधूपैश्चातिमनोहरत्वंदर्शितम् ५ पयसःक्षीरस्यफेनइवमृदुनिशुभ्रेचपर्यंकस्थेकशिपूत्तमेहंसतूलिकायांउपतस्थेअसेवत ६ तदेवाभिनीयदर्शयति । वालव्यजनमिति ७

श्लोकाः

गृहेषुतासामनपाय्यतर्क्यकृन्निरस्तसाम्यातिशयेष्ववस्थितः ॥ रेमेरमाभिर्निजकामसंप्लुतोयथेतरोगार्हकमेधिकांश्चरन् ४३ इत्थंरमापतिमवाप्यपतिंस्त्रियस्ताब्रह्मादयोपिनविदुःपदवींयदीयाम् ॥ भेजुर्मुदाऽविरतमेधितयानुरागहासावलोकनवसंगमजल्पलज्जाः ४४ प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसारशयनस्नपनोपहार्यैर्दासीशताअपिविभोर्विदधुःस्मदास्यम् ४५ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधे एकोनषष्टितमोऽध्यायः ५९ ॥ ॥ ७ ॥ ॥ ॥ श्रीशुकउवाच ॥ कर्हिचित्सुखमासीनंस्वतल्पस्थंजगद्गुरुम् ॥ पतिंपर्यचरद्भैष्मीव्यजनेनसखीजनैः १ यस्त्वेतल्लीलयाविश्वंसृजत्यत्त्यवतीश्वरः ॥ सहिजातःस्वसतूनांगोपीथाययदुष्वजः २ तस्मिन्नंतर्गृहेभ्राजन्मुक्तादामविलंबिना ॥ विराजितेवितानेनदीपैर्मणिमयैरपि ३ मल्लिकादामभिःपुष्पैर्द्विरेफकुलनादितैः ॥ जालरंध्रप्रविष्टैश्चगोभिश्चंद्रमसोमलैः ४ पारिजातवनामोदवायुनोद्यानशालिना ॥ धूपैरगुरुजैराजन्जालरंध्रविनिर्गतैः ५ पयःफेननिभेशुभ्रेपर्यंकेकशिपूत्तमे ॥ उपतस्थेसुखासीनंजगतामीश्वरंपतिम् ६ वालव्यजनमादायरत्नदंडंसखीकरात् ॥ तेनवीजयतीदेवीउपासांचक्रईश्वरम् ७

४३/७

चूर्णिका

४३ इत्थंरमापतिं पतिंप्राप्य ताः दासीशताअपिविभोर्दास्यंस्वयंविदधुः ४४ ४५ ॥ ॥ इतिदशमेएकोनषष्टितमः ॥ ५९ ॥ ॥ ७ ॥ ॥ श्रीबादरायणिरुवाच ॥ हेराजन् कदाचित् स्वतल्पस्थंकृष्णंपतिं भैष्मीव्यजनेनपर्यचरत् १ तदाकृष्णः श्रीरूपिणींहास्यमुखीं तां दृष्ट्वाप्रीतः सन् आबभाषे २ ३ ४ ५ ६ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपाच्युतंअच्युतस्यसमीपेसामणिनूपुराभ्यांरेजे । कथंभूता । क्वणयतीमणिमयौनूपुरौकूजयंती । तथाअंगुलीयवलयवालव्यजनानि अग्रहस्तेहस्ताग्रेयस्याःसा । वस्त्रांतेनगूढौस्थगितौकुचौतयोःकुं
कुमंतेनशोणोहारस्तस्यभासा तथानितंबेधृतायापरार्ध्याअग्र्याअमूल्याकांचीतयाचरेजे ८ तांनिरीक्ष्य प्रीतःसन् स्मयमानोहरिराबभाषे (किंचिदुवाच) कथंभूताम् । यालीलयाधृतनरतनोस्तस्यअनुरू
परूपाअनुरूपंरूपंयस्याःसा (एतादृशीं) यथोक्तंश्रीपराशरेण । 'देवत्वेदेवदेहेयंमनुष्यत्वेचमानुषी । विष्णोर्देहानुरूपावैकरोत्येषाऽऽत्मनस्तनु 'मिति । किंच । अलकैःकुंडलाभ्यांनिष्ककंठेनचपदकालं
कृतकंठेन चतुर्दिक्षु शोभितेवक्त्रेउल्लसंतीस्मितसुधायस्यास्ताम् ९ सर्वगुणयुक्तायाअपितवबुद्धिर्मंदेत्याशयेनाह । राजपुत्रीतिएकादशभिः । हेराजपुत्रि । लोकपालानामिवविभूतिरैश्वर्यंयेषांतैःतथामहा
प्रभावैःआढ्यैःरूपादिभिरूर्जितैश्चपूर्वमीप्सितासि १० तान्हित्वानोऽस्मान्असमान्कस्माद्ववृषेवृतवतीत्वम् ११ किंच । प्रायशःराजभ्योजरासंधादिभ्योबिभ्यतःभयंप्राप्नुवतः (हेसुभ्रूःशरणमाश्रयं)
१२ अस्पष्टवर्त्मनांअविज्ञाताचाराणांअलोकपथंअस्त्रीपारतंत्र्यंगतानांपदवींमार्गं (सेवामितियावत्) आस्थिताअनुश्रिताः (सीदंति) १३ किंच । निष्किंचनाइति १४ आत्मसमंपरस्परमनुरूपम् ।
जन्मैश्वर्याभ्यांसहिताआकृतिःरूपंजातिर्वा । समा भव आयतिः (आयतिः फलमुत्तरंश्रेयोवा) १५ नदीर्घासमीक्षाविचारोयस्यास्तया । ननुब्राह्मणमुखात्तवगुणाःश्रुताइत्यत्राह । भिक्षुभिरिति १६
अथेदानीमपि (येनभजनेनआशिषःकामनाःसत्यानत्वस्मास्विवविफलाः) १७ तर्हिकिमित्यानीताहमितिचेत्तत्राह । चैद्येति । ममद्विषंति १८

श्लोकाः ८/१८

सोपाच्युतंक्वणयतीमणिनूपुराभ्यांरेजेंऽगुलीयवलयव्यजनाग्रहस्ता ॥ वस्त्रांतगूढकुचकुंकुमशोणहारभासानितंबधृतयाचपरार्ध्यकांच्या ८ तांरूपिणीं
श्रियमनन्यगतिंनिरीक्ष्ययालीलयाधृततनोरनुरूपरूपा ॥ प्रीतःस्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसुधांहरिराबभाषे ९ ॥ श्रीभगवानुवाच ॥
राजपुत्रीप्सिताभूपैर्लोकपालविभूतिभिः ॥ महानुभावैःश्रीमद्भीरूपौदार्यबलोर्जितैः १० तान्प्राप्तानर्थिनोहित्वाचैद्यादीन्स्मरदुर्मदान् ॥ दत्ताभ्रात्रास्व
पित्राचकस्मान्नोववृषेऽसमान् ११ राजभ्योबिभ्यतःसुभ्रूःसमुद्रंशरणंगतान् ॥ बलवद्भिःकृतद्वेषान्प्रायस्त्यक्तनृपासनान् १२ अस्पष्टवर्त्मनांपुंसामलोक
पथमीयुषाम् ॥ आस्थिताःपदवींसुभ्रूःप्रायःसीदंतियोषितः १३ निष्किंचनावयंशश्वन्निष्किंचनजनप्रियाः ॥ तस्मात्प्रायेणनह्याढ्यामांभजंतिसुमध्यमे
१४ ययोरात्मसमंवित्तंजन्मैश्वर्याकृतिर्भवः ॥ तयोर्विवाहोमैत्रीचनोत्तमाधमयोःक्वचित् १५ वैदर्भ्येतदविज्ञायत्वयाऽदीर्घसमीक्षया ॥ वृतावयंगुणैर्हीना
भिक्षुभिःश्लाघितामुदा १६ अथात्मनोऽनुरूपंवैभजस्वक्षत्रियर्षभम् ॥ येनत्वमाशिषःसत्याइहामुत्रचलप्स्यसे १७ चैद्यशाल्वजरासंधदंतवक्त्रादयोनृपाः
ममद्विषंतिवामोरुरुक्मीचापितवाग्रजः १८

चूर्णिका

८ ९ ॥ श्रीभगवानुवाच ॥ हेराजपुत्रि त्वंश्रीमद्भिः भूपैः ईप्सितासती भ्रातृपितृभ्यांदत्ताच सती तान् शिशुपालादीन् हित्वा असदृशान्नः कस्मात् वृतवती १० ११
कीदृशान् नः जरासंधादिभ्यः भीतान् समुद्रंशरणंगतान् त्यक्तनृपासनान् १२ १३ किंच वयंनिष्किंचनाः निष्किंचनजनप्रियाः तस्मात् आढ्याः मांनभजंति १४ किंच
ययोः वित्तजन्मैश्वर्यादि समं अस्ति तयोः विवाहोमैत्रीच अन्योन्यंभवति नोत्तमाधमयोः १५ हेवैदर्भि एतत् अविज्ञाय गुणैर्हीनाः वयंवृताः १६ अथ आत्मनः अनु
रूपंक्षत्रियर्षभंभजस्व येनत्वंमनोरथान्लप्स्यसे १७ किंच हेसुभ्रु चैद्यादीनांमदांधानांगर्वनाशायमया त्वं आनीता परंतु वयं स्त्रीपुत्रकामुका न १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्मयनुत्तयेगर्वापनयनाय । (असतांतेजः ।) १९ स्त्रीणामतिदुःसहमौदासीन्यमकामत्वंचाह । उदासीनाइति गेहयोःदेहगेहयोःउदासीनाःअतएवज्योतिरक्रियाःज्योतिःप्रदीपादितद्वत्साक्षिमात्रतया क्रियारहिताआस्महेवर्तामहेइति २० अविश्लेषादवियोगाद्धेतोर्वल्लभामिवेतिएवार्थेइवशब्दः (आत्मानमेववल्लभांसर्वासुस्त्रीषुमध्येअहमेवास्यवल्लभानान्येतिमन्यमानांभगवतोऽतिपरिचयेनगर्वितामित्यर्थः) २१ (आत्मनःपत्युरित्यश्रुतपूर्वंभाषणमाश्रुत्यदेवीरुक्मिणीत्यागाद्भीताचिंतामाप ।) २२ चिंतालक्षणमाह पदेति । नखैररुणाश्रीःकांतिर्यस्यतेनसुकोमलेनपदा (भुवंलिखंतीअधोमुखीतस्थौ) २३ सुदुःखंअप्रियश्रवणात् । भयंत्यागशंकया । शोकोऽनुतापःतैर्विनष्टाबुद्धिर्यस्याःसातस्याःश्लथंतिपतंतिचलंतिवलयानियस्मात् । तस्मात् हस्तात् व्यजनं देहश्चपपात । विक्लवाअवशाधीर्यस्याः (मुह्यन्मूर्छांप्राप्नुवन् । रंभेवकदलीव) २४ हास्यस्यप्रौढिंगांभीर्यम् २५ चतुर्भुजइतिउत्थापनाश्लेषणवक्त्रपरिमार्जनाद्यर्थमाविष्कृतचतुर्भुजइत्यर्थः । समूह्यनिबध्य २६ अश्रुकलेअश्रुभिःशोभिते । शुचाशोकाश्रुभिः (नअन्यःकृष्णाद्विषयोयस्याःअतएवसतीं) २७ सांत्वयामासअनुनीतवान् । किं स्त्रैणः न । किंतुकृपया । यतःकृपणाम् । हास्यरसस्यगांभीर्यवशाद्भ्रमत्व्याकुलंचित्तंयस्यास्ताम् २८ मामां त्वद्वचःकिंत्वंवादिष्यसीतिश्रोतुकामेनश्रोतुमिच्छता । क्ष्वेल्यानर्मणाएवमाचरितंउक्तम् । नतत्त्वतः । हेअंगनेसुंदरि २९ प्रेमसंरंभेणप्रणयकोपेनस्फुरितःकंपितोऽधरोयस्मिन्तत् कटाशब्देन कटाक्षाःतैराक्षेपेअरुणावपांगौयस्मिंस्तत् । अतएवसुंदरंकुटिलंभ्रूकुटीतटंयस्मि -(- स्तादृशंमुखमीक्षितुंचोक्तम् -)- ३०

॥४६॥

श्लोकाः १९/३०

तेषांवीर्यमदांधानांदृप्तानांस्मयनुत्तये ॥ आनीतासिमयाभद्रेतेजोपहरताऽसताम् १९ उदासीनावयंनूनंनस्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्यास्महेपूर्णागेहयोर्ज्योतिरक्रियाः २० ॥ श्रीशुकउवाच ॥ एतावदुक्त्वाभगवानात्मानंवल्लभामिव ॥ मन्यमानामविश्लेषात्तद्दर्पघ्नउपारमत् २१ इतित्रिलोकेशपतेस्तदात्मनःप्रियस्यदेव्यश्रुतपूर्वमप्रियम् ॥ आश्रुत्यभीताहृदिजातवेपथुश्चिंतांदुरंतांरुदतीजगामह २२ पदासुजातेननखारुणश्रियाभुवंलिखंत्यश्रुभिरंजनासितैः आसिंचतीकुंकुमरूषितौस्तनौतस्थावधोमुख्यतिदुःखरुद्धवाक् २३ तस्याःसुदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्लथद्वलयतोव्यजनंपपात ॥ देहश्चविक्लवधियःसहसैवमुह्यन्रंभेववातविहताप्रविकीर्यकेशान् २४ तद्दृष्ट्वाभगवान्कृष्णःप्रियायाःप्रेमबंधनम् ॥ हास्यप्रौढिमजानंत्याःकरुणःसोन्वकंपत २५ पर्यंकादवरुह्याशुतामुत्थाप्यचतुर्भुजः ॥ केशान्समुह्यतद्वक्त्रंप्रामृजत्पद्मपाणिना २६ प्रमृज्याश्रुकलेनेत्रेस्तनौचोपहतौशुचा ॥ आश्लिष्यबाहुनाराजन्अनन्यविषयांसतीम् २७ सांत्वयामाससांत्वज्ञःकृपयाकृपणांप्रभुः ॥ हास्यप्रौढिभ्रमच्चित्तामतदर्हांसतांगतिः २८ ॥ श्रीकृष्णउवाच ॥ मामावैदर्भ्यसूयेथाजानेत्वांमत्परायणाम् ॥ त्वद्वचःश्रोतुकामेनक्ष्वेल्याचरितमंगने २९ मुखंचप्रेमसंरंभस्फुरिताधरमीक्षितुम् ॥ कटाक्षेपारुणापांगसुंदरभ्रूकुटीतटम् ३०

चूर्णिका

१९ २० ॥ श्रीशुकउवाच ॥ भगवान् आत्मानंवल्लभांमन्यमानांतां एतावदुक्त्वा उपारमत् २१ साभैष्मी प्रियस्य अश्रुतपूर्वंआप्रियंवचः श्रुत्वा भीतासती चिंतां प्राप २२ तदा पदा भुवंलिखंती सती अधोमुखी तूष्णीं तस्थौ २३ तस्याहस्ताद्व्यजनं तदनुदेहश्चपपात २४ ततः कृष्णः प्रियायाः प्रेमबंधनं दृष्ट्वा करुणः सन् २५ अनुकंप्य तल्पात् अवरुह्य तां उत्थाप्य केशान् समूह्य तद्वक्त्रंपाणिना प्रमृज्य तांबाहुना आश्लिष्य सांत्वयामास २५ २६ २७ २८ ॥ श्रीभगवानुवाच ॥ हेवैदर्भिमामासूयेथाः त्वद्वचः श्रोतुकामेन मया नर्मणा एवं उक्तम् हेभीरु नर्मभिः कालोनीयते इतियत् अयं हि गृहिणांपरमोलाभः २९ ३०

॥४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥४७॥

ननुकलहकिंकौतुकंसुखंवातआह । अयंहीति । नर्मैर्नर्मभिः । यामःकालः ३१ ३२ भगवतस्तस्यभगवत् ऐश्वर्ययुक्तंमुखंसव्रीडेनहासेनरुचिरेणस्निग्धेनचापांगेनवीक्षमाणा ३३ "असमत्वंभयंदुर्गाश्रयणं प्रबलैःकलिः।अराजत्वमविज्ञातालौकिकेहावसादनम् । निष्किंचनत्वंतत्प्रीतिराढ्यानादरणीयता । अनौचित्यंनिर्गुणत्वंवृथाश्लाघाचाभिक्षुभिः । औदासीन्यमकामत्वंस्वदोषान्षोडशासतः।अज्ञात्वादीर्घदर्शित्वेभैष्म्याराज्ञांबहून्गुणान् कृष्णनर्मोदितान्भैष्मीन्यषेधत्तद्गुणस्तवैः"। भगवतःस्वनिंदापराणीवयानिवचनानितानिसर्वोत्कर्षपरतयाऽव्याचक्षाणाप्रतिभाषतेस्म। तत्रयदुक्तं"कस्मान्नोववृषेऽसमानि"तितत्रासाम्यंसत्यमेवेत्याह । नन्वेवमिति । हेअरविंदलोचनभगवतोविभून्नःअसदृशीतियद्भवानाह तदेतदेवमेव । त्र्यधीशःत्रयाणांब्रह्मादीनामप्यधीशोनियंतात्वंक्व। क्वचाहंगुणप्रकृतिःत्रिगुणस्वभावामाकृता । गुणमयीप्रकृतिर्वा ननुत्वमेवाधीश्वरीश्रीःसर्वैरुपास्यत्वात्। इत्यतआह । अज्ञैःसकामैर्गृहीतौपादौयस्याःसा३४ यदुक्तं"राजभ्योविभ्यतःसुभ्रूःसमुद्रंशरणंगतानि"ति। तत्राह । सत्यमिति । हेउरुक्रमेति भयाभावंदर्शयति । गुणाःशब्दादयएवराजंतइतिराजानःतेभ्योभयादिवेति अंतःहृदयेसमुद्रेसमुद्रवदगाधेविषयाकारैरपरिच्छिन्नइत्यर्थः शेतेनिश्चलतयाप्रकाशते । उपलंभनमात्रम् । चैतन्यघनआत्माभवानीति ।"बलवद्भिःकृतद्वेषानि"तियदुक्तंतदपिसत्यमित्याह । नित्यमिति । कार्दिंद्रियगणैःकुत्सितैर्बहिर्मुखैरिंद्रियगणैर्वृन्त्यभिप्रायेणबहुवचनम्। कुत्सितइंद्रियगणोयेषामितिवा। तैस्त्वंनित्यंकृतविग्रहःतेषुतवाप्रीतेः । यदुक्तं"त्यक्तनृपासनानि"ति । तद्युक्तमेवेत्याह । त्वत्सेवकैरिति । नृपाणांपदमासनंअंधंगाढंतमएववत् । अविवेकबहुलत्वात्त्वत्सेवकैरपित्यक्तंकिंपुनर्वक्तव्यंत्वयात्यक्तमिति ३५ "अस्पष्टवर्त्मनांपुंसामलोकपथमीयुषा"मितियदुक्तंतदपितथैवेत्याह त्वत्पादेति। वर्त्ममार्गः यतोनृपशुभिर्निराकारैःपशुभिर्दुर्विभाव्यंकिंपुनर्वक्तव्यंतववर्त्मास्फुटमिति। किंच । यस्माचेभवंतमनुवर्ततेतेषामपीहितंअलौकिकमिव । अथोअतःकारणात् । हेभूमंस्तवेश्वरस्येहितंअलौकिकमितिकिमुवक्तव्यमित्यर्थः । "आस्थिताःपदवींसुभ्रुप्रायःसीदंतियोषित" इत्यस्यपरिहारंवक्ष्यातियद्वांछयेतिपंचमश्लोके ३६

श्लोकाः ३१—३६

अयंहिपरमोलाभोगृहेषुगृहमेधिनाम् ॥ यन्नर्मैर्नीयतेयामःप्रिययाभीरुभामिनि ३१ ॥ श्रीशुकउवाच ॥ सैवंभगवताराजन्वैदर्भीपरिसांत्विता ॥ ज्ञात्वा तत्परिहासोक्तिंप्रियत्यागभयंजहौ ३२ बभाषेऋषभंपुंसांवीक्षंतीभगवन्मुखम् ॥ सव्रीडहासरुचिरस्निग्धापांगेनभारत ३३ ॥ रुक्मिण्युवाच ॥ नन्वेवमेतदरविंदविलोचनाहयद्वैभवान्भगवतोऽसदृशीविभून्नः ॥ क्वस्वेमहिम्न्यभिरतोभगवांस्त्र्यधीशःक्वाहंगुणप्रकृतिरज्ञगृहीतपादा ३४ सत्यंभयादिवगुणेभ्यउरुक्रमांतःशेतेसमुद्रउपलंभनमात्रमात्मा ॥ नित्यंकदिंद्रियगणैःकृतविग्रहस्त्वंत्वत्सेवकैर्नृपपदंविधुतंतमोंधम् ३५ त्वत्पादपद्ममकरंदजुषांमुनीनांवर्त्माऽस्फुटंनृपशुभिर्ननुदुर्विभाव्यम् ॥ यस्मादलौकिकमिवेहितमीश्वरस्यभूमंस्तवेहितमथोअनुयेभवंतम् ३६

चूर्णिका

३१ ॥ श्रीशुकउवाच ॥ एवंभगवता सांत्विता वैदर्भीतांनर्मोक्तिं ज्ञात्वा प्रियत्यागभयं जहौ ३२ततः तस्य मुखवीक्षती सती बभाषे ३३ ॥ रुक्मिण्युवाच ॥ हेअरविंदाक्षत्र्यधीशः त्वं क्व गुणमयीप्रकृतिः अहं क्व ३४ किंच हेहरेत्वंशब्दादिविषयेभ्योभीतइव हृदयेप्रकाशसे किंच नृपासनं नरकतुल्यमिति ज्ञात्वा त्वत्सेवकैरपि त्यक्तं किंपुनर्वक्तव्यं त्वयात्यक्तमिति ३५ किंच ब्रह्मादयः यस्मैतुभ्यंबलिं हरंति तस्यते दरिद्रता नघटते किंचब्रह्मादीनांत्वंप्रेष्ठः तेच तवप्रेष्ठाः किंचयेस्वाढ्यतया अंधाः ते अतस्त्वां नजानंति ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ''निंष्किचनावयंशश्वन्निःष्किंचनजनप्रियाः। तस्मात्प्रायेणनह्याढ्यामांभजंतिसुमध्यमे''। इत्येतच्छ्लोकोक्तदोषत्रयंपरिहरतिःनिःष्किंचनइति। दरिद्रतालक्षणंनिंष्किचनत्वंतुतवनघटतइत्याह। यस्माइति। अन्यतोबलिभुजःपूज्याअपिब्रह्मादयोयस्मैभवतेबलिंहरंतितस्यसर्वेश्वरस्यभवतोदरिद्रतानघटतइत्यर्थः। किंतुयतोयस्मिन् किंचित्कार्यकारणात्मकंनास्तिसनिंष्किचनोब्रह्मभवान्। निंष्किचनजनप्रियाइत्यत्रतत्पुरुषेणबहुव्रीहिणावानिंदास्यात्। इतिस्वयमप्युभयथास्तौति। प्रेष्ठोभवानिति। बलिभुजांब्रह्मादीनांलोकेश्वराणांत्वंप्रेष्ठःतेपितुभ्यंतवेति। तस्मात्प्रायेणनह्याढ्यामांभजंतीत्यस्योत्तरंतु नत्वाविदंतीति। आढ्यतयांधाअज्ञास्त्वात्वांअंतकंनविदंति अतस्तेअसुतृपःअसूनेवतर्पयंतिनत्वांभजंतीत्यर्थः ३७ बलिभुजामपिभवान्प्रेष्ठइत्यत्रहेतुंवदती''ययोरात्मसमंवित्तमि''त्यनेनोक्तमनौचित्यंपरिहरति त्ववाइति। फलात्मापरमानंदरूपः। ''एतस्यैवानंदस्यांन्यानिभूतानिमात्रामुपजीवंती''तिश्रुतेः। अतएवसमस्तपुरुषार्थमयः। यस्यवांच्छयासुमतयःसर्वविषयजातंविसृजंति। तेषांसुमतीनांसमाजःसेव्यसेवकलक्षणःसंबंधः। नतुपुंसःस्त्रियाश्चमिथोरतयोःअतएवतत्कृतेसुखदुःखिनोःतदाकुलयोरित्यर्थः ३८ ''भिक्षुभिःश्लाघितामुधे''त्यस्यपरिहारः। त्वामिति। भिक्षुपदव्याख्यानंन्यस्तदंडैर्मुनिभिरिति। मुधेत्यस्यपरिहारःआत्मेति। यदर्थेसर्वंप्रियंभवतितस्यजगतामात्मनस्तववर्णनंनवृथेत्यर्थः। किंच। आत्मदइति।'' वेदभ्यैतदविज्ञायत्वयाऽदीर्घसमीक्षये''तिस्वस्मिन्नुक्तंदोषद्वयंपरिहरति। इतीति। ज्ञात्वैवमेमयावृतोसीत्यज्ञानपरिहारः। हित्वेत्यदीर्घसमीक्षापरिहारःभवतोभ्रुवःसकाशादुदीरितोयःकालःतस्यवेगःतेनध्वस्ताआशिषोयेषांतान्ब्रह्मेंद्रादीनपिविहायतत्रकुतोन्येवराकाइत्यर्थः ३९ स्वाज्ञानंपरिहृत्यपुरुषांतरगुणवर्णनप्रदीप्तकोपसंरंभेणतस्मिन्नेवाज्ञानमापादयति। जाड्यमिति सिंहोयथापशून्विद्राव्यस्वबालिंहरति तथाशार्ङ्गधनुर्निनादेनैवजरासंधादीन्विद्राव्यमांस्वभागंश्रियंयस्त्वंहृतवानसि। तस्यतवराजभ्योभयादुदधिंप्रपन्नइति यद्वचोभाषणंतज्जाड्यंमांद्यम् तन्नघटतइत्यर्थः ४० यच्चान्य''दस्पष्टवर्त्मना''मित्यादिनाऽर्थाच्चांभजंतःसीदंतीत्यवसादनंश्रमावहत्वमुक्तम्। तदपिमंदमेवेत्याह। यद्वांच्छयेतियस्यतवभजनवांच्छयानृपोत्तमाअंगोवेनस्यपिता। वैन्यःपृथुः जायंतोभरतः। नाहुषोययातिः गयश्चादिर्येषांते। यएतेतवपदवींमार्गंआश्रिताःतेकिंसीदंतिनसीदंत्येव। अपितुत्वत्पदंप्राप्ताइत्यर्थः। एवंचकोपावेशेनावसादनस्यपरिहारात्अस्पष्टवर्त्मनामित्येतदानंतर्यंविहायात्रोक्तम् ४१

॥४८॥

श्लोकाः ३७/४१

निंष्किचनोननुभवान्नयतोस्तिकिंचिद्यस्मैबलिंबलिभुजोपिहरंत्यजाद्याः ॥ नत्वाविदंत्यसुतृपोऽतकमाढ्यतांधाःप्रेष्ठोभवान्बलिभुजामपितेपितुभ्यम् ३७ त्वंवैसमस्तपुरुषार्थमयःफलात्मायद्वांच्छयासुमतयोविसृजंतिकृत्स्नम् ॥ तेषांविभोसमुचितोभवतःसमाजःपुंसःस्त्रियाश्चरतयोःसुखदुःखिनोर्न ३८ त्वंन्यस्तदंडमुनिभिर्गदितानुभावआत्मात्मदश्चजगतामितिमेवृतोसि ॥ हित्वाभवद्भ्रुवउदीरितकालवेगध्वस्ताशिषोब्जभवनाकपतीन्कुतोन्ये ३९ जाड्यंवचस्तवगदाग्रजयस्तुभूपान्विद्राव्यशार्ङ्गनिनदेनजहर्थमांत्वम् ॥ सिंहोयथास्वबलिमीशपशून्स्वभागंतेभ्योभयाद्यदुदधिंशरणंप्रपन्नः ४० यद्वांच्छयानृपशिखामणयोऽगवैन्यजायंतनाहुषगयादयएकपत्यम् ॥ राज्यंविसृज्यविविशुर्वनमंबुजाक्षसीदंतितेनुपदवींतइहास्थिताःकिम् ४१

॥४८॥

चूर्णिका ३७ किंच त्वं जगदात्मा आत्मदश्चइति ज्ञात्वैव ब्रह्मादीनपिहित्वा मयावृतोसि ३८ ३९ अपिचयः त्वं धनुःशब्देन जरासंधादीन् विद्राव्य मां हृतवानसि अतः समुद्रं प्रपन्नःइतियत् तववचः तदेवमंदं ४० किंच तवभजनेच्छया गयादयः राज्यं त्यक्त्वा वनंगत्वा तवपदवीं आश्रिताः ते किं सीदंति नेत्यर्थः अतः मांभजंतः सीदंतीत्युक्तमपिमंदं ४१

टीका

यचोक्तंआत्मनांनुरूपमितितत्राह । कान्यमितिश्लोकद्वयेन । गुणानामालयस्यतवपादसरोजगंधंजनतायाअपवर्गंमोक्षरूपंलक्ष्म्याआलयंतत्सेव्यंसद्भिर्मुखरितंवर्णितमाघ्राय तंअविगणय्य मर्त्या मरणधर्मिकाकास्त्रीसदाउरुअनेकविधंभयंयस्यतमन्यंश्रयेतसेवेत । नकापीत्यर्थः । अर्थेविविक्ताद्दष्टिर्यस्याःसा । अनेनयासेवेतसात्यतमूढेत्यर्थः । गुणालयस्येत्यनेनगुणैर्हीनाइतियदुक्तंतदपास्तम् ४२ अतस्त्वामेवाहमभजमित्याह । तंत्वेति । अत्रचपरत्रचकामपूरंऐहिकामुष्मिककामानांदातारमित्यर्थः । प्रार्थयते स्यादिति । अरणंशरणंसृतिभिर्देवतिर्यगादिभिःपाठांतरेत्वर्थवादबहुलकर्मश्रवणैरित्यर्थः । कथंभूतस्यतव । योभवान्अनृतस्यसंसारस्यापवर्गोनाशोयस्मात्सःभजंतमुपयाति । आत्मसात्करोति । तस्यतवांघ्रिरिति । भीतस्यशरणमेवानुरूपंभजनयोग्यंअतस्त्वामभजमित्यर्थः ४३ येचोक्ताराज्ञांबहवोगुणाः"राजपुत्रीप्सिताभूपैर्लोकपालविभूतिभि"रित्यादिनातत्रसेर्ष्यसशापसांगुलिभंगंचाहद्वाभ्यां । तस्याःस्युरिति । खरांइवकेवलंभारवाहाः । गावोबलीवर्दाइवनित्यंव्यापारक्लिष्टाः । श्वानइवावमताः । बिडालाइवकृपणाहिंस्राश्च । भृत्याइवांकिंकराःनृपास्तस्यादुर्भगायाःपतयःस्युःयस्याःकर्णपथंत्वत्कथानप्राप्नुयात् (हे अरिकर्षणेति) ४४ तथाहि । तेतवपदाब्जमकरंदमजिघ्रतीसतीयास्त्रीविमूढासाकांतोयमितिमतिर्यस्याःसाकांतमतिर्जीवच्छवंभजति । त्वगादिभिर्बहिःपिनद्धंच्छन्नंअंतर्मांसादिमयमिति४५ यदुक्तंउदासीनावयामित्यत्राह । अस्त्विति। यद्यपित्वंनिरपेक्षस्तथापिममतेचरणानुरागोस्तु । मयिचमय्यपिनातिरिक्तानातिशयवतीदृष्टिर्यस्यतस्यतेआत्मन्आत्मन्येवरतस्य । तर्हितवतेनकोलाभःत्वच्चरणानुरागएवमहान्लाभः । किंच । यर्हिअस्यविश्वस्यवृद्धयेउपात्तारजसःअतिमात्राऔत्कंर्स्व्येनसःतथाभूतःसन्मांसमीक्षसे तदुहडएवार्थेहहर्षे तदेवनःपरमानुकंपाअत्यनुग्रहइति ४६ तदेवंतदुक्तंसर्वंप्रतिव्याख्यायप्रसन्नचित्तामंत्रमुपदिशंत्याहद्वाभ्यां नैवेति। "अथात्मनोनुरूपामि"त्यादितेवचःअलीकंमिथ्येतिनैवमन्येयतोलोकेकन्यायाएवक्वचिद्रतिर्भवति । यथाकाशिराजकन्यानांअंबांऽबिकांऽबालिकानांतिसृणांमध्येअंबायाःकन्यायाएवशाल्वेरतिर्जातातद्वत् ४७ व्यूढायाःपरिणीतायाअपि (नवंनवंपुरुषंमनोभ्येती-)-ति । (असतींपुंश्चलीं) उभयस्मादिहपरलोकद्वयात्च्युतोभ्रष्टइति ४८

श्लोकाः ४२—४८

कान्यंश्रयेततवपादसरोजगंधमाघ्रायसन्मुखरितंजनतापवर्गम् ॥ लक्ष्म्यालयंत्वविगणय्यगुणालयस्यमर्त्यासदोरुभयमर्थविविक्तदृष्टिः ४२ तंत्वानुरूपमभजंजगतामधीशमात्मानमत्रचपरत्रचकामपूरम् ॥ स्यान्मेतवांघ्रिरणंसृतिभिर्भ्रमंत्यायोवैभजंतमुपयात्यनृतापवर्गः ४३ तस्याःस्युरच्युतनृपाभवतोपदिष्टाःस्त्रीणांगृहेषुखरगोश्वबिडालभृत्याः ॥ यत्कर्णमूलमरिकर्षणनोपयायाद्युष्मत्कथामृडविरंच्यसभासुगीता ४४ त्वक्श्मश्रुरोमनखकेशपिनद्धमंतर्मांसास्थिरक्तकृमिविट्कफवातपित्तम् ॥ जीवच्छवंभजतिकांतमतिर्विमूढायातेपदाब्जमकरंदमजिघ्रतीस्त्री ४५ अस्त्वंबुजाक्षममतेचरणानुरागआत्मन्रतस्यमयिचानतिरिक्तदृष्टेः ॥ यर्ह्यस्यवृद्धयउपात्तरजोतिमात्रोमामीक्षसेतदुहनःपरमानुकंपा ४६ नैवालीकमहंमन्येवचस्तेमधुसूदन ॥ अंबायाइवहिप्रायःकन्यायाःस्याद्रतिःक्वचित् ४७ व्यूढायाश्चापिपुंश्चल्यामनोभ्येतिनवंनवम् ॥ बुधोऽसतींनबिभृयात्तांबिभ्रदुभयच्युतः ४८

चूर्णिका

किंच गुणालयस्य तव पादकमलंगंधआघ्राय का स्त्री न आश्रयेत ४२ अतः जगतां अधीशंत्वां अहं अभजं ४३ किंच हेअच्युत त्वयोक्ताराजानस्तु यस्याः कर्णपथं त्वत्कथा न प्राप्ता तस्याः दुर्भगायाः पतयो भवंतु ४४ हेहरे त्वत्पादाब्जमकरंदं अजिघ्रती यास्त्री सा मूढासती जीवत्शवंभजति ४५ अतः हेअंबुजाक्ष यद्यपित्वं निरपेक्षः तथापि तवचरणयोः मम प्रीतिरस्तु ४६ हेभगवन् तेवचः मिथ्या न मन्ये यतः लोके कन्याया एवकाचिद्रतिर्भवति अतः ममरतिस्तु त्वय्येव ४७ किंच विवाहिताया अपि जारिण्याः मनः नवंनवंपुरुषं एति तथापि बुधः तां नविभृयात् ४८

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥५०॥

(हेसाध्वि) प्रलंभिताउपहासितासि । अन्वात्थअन्वाख्यातवती ४९ मयिएकांतभक्तायास्तेकामाःसंत्येव । (किमर्थं ।) अकामायकामनिवृत्तये । मोक्षपर्यवसायिनः (संत्वित्यर्थः) ५० अनुवादे नवरान्दत्त्वातामभिनंदाति । उपलब्धामिति (पातिविषयकंप्रेमज्ञातमित्यर्थः) यद्यस्मान्मयिप्रवर्तमानाधीर्नापकर्षितानान्यविषयाजाता ५१ एकांतभक्तिमभिनंद्यतामेवदृढीकर्तुंसकामान्भक्तान्निंद तियेमामिति । दांपत्येदंपत्युपभोग्यसुखार्थं । (तेमोहिताः ।) ५२ मायामोहितत्वमेवोपपादयति । मांप्राप्येति । अपवर्गेणसहसंपदोयस्मिन्तंमांप्राप्यप्रसाद्ययेकेवलंसंपदएवविषयान्वांच्छंतिनतु मांतत्पातिंतासांसंपदामपियोहमेवपतिस्तम् । येविषयानिरयेपिअतिनिकृष्टयोनावपिस्युःतान् । किंच । तेषांमात्रात्मकत्वात्विषयात्मकत्वात्निरयःसुसंगमःशोभनसंगमएवस्यात् । अतोमंदभाग्याइ त्यर्थः (हेभामिनि) ५३ तस्मात्हेगृहेश्वरित्वयामयिभवमोचनीनिष्कामाऽनुवृत्तिःकृताएतद्दिष्ट्या । भद्रम् । कथंभूता । खलैःसुदुष्करा । दुराशिषोदुरभिप्रायायाःअतएवासुंभरायाःप्राणतर्पणपरायाः निकृतिंजुषःवंचनपरायाःस्त्रियाःसुतरांअसावनुवृत्तिःसुदुष्करेति ५४ किंच । संतिनिष्कामाःप्रेम्णैवमय्यनुवर्तमानाःबह्व्यःस्त्रियःकिंतुत्वयासदृशींकापिनपश्यामीतितस्याभक्तिंबहुमानेनाभिनंदति । न त्वादृशीतित्रिभिः । प्रणयःप्रेमास्तियस्याःसाप्रणयिनी । तां । रहोहरःगुप्तसंदेशहरःउपश्रुताःसत्यःकथायस्यमे ५५ तथाप्रोद्वाहपर्वणिअनिरुद्धविवाहेअक्षगोष्ठ्यांद्यूतसभायांतस्यभ्रातुर्वधंतस्मिन्काले कालांतरेचतदनुस्मरणतःपुनःपुनःसमुत्थंदुःखंअस्माभिरयोगोवियोगस्तद्भीत्याऽसहःसोढवत्यासि । अनेनैवानिरुद्धविवाहानंतर्यमस्यसंवादस्यज्ञातव्यम् ५६ अपिच दूतइति । अ.त्मलभनेमत्प्राप्त्यर्थं मयिचिरायतिश्वोभाविनिविवाहेआगंतव्यमितिकृतेसमयेकथंचिदप्राप्तवतिसतिएतद्विश्वंशून्यंमत्वाइदंअनन्ययोग्यंअंगंदेहंजिहासेत्यक्तुमिच्छामीत्येवंसुविविक्तमंत्रःरहस्यमंत्रयुक्तःदूतःप्रस्थापितः । तथा ह्युक्तंत्वया । ''यर्ह्यंबुजाक्षनलभेयभवत्प्रसादंजह्यामसून्व्रतकृशान्शतजन्मभिःस्यादि''ति । यद्वाअजिहासइतिच्छेदः । त्यक्तुमैच्छइत्यर्थः । तत्तवकर्मत्वय्येवतिष्ठेत्नवत्प्रातिकर्तुंशक्यमित्यर्थः । किंतुके वलंत्वांप्रतिनंदयामःहर्षयामइति ५७

श्लोकाः ४९—५७

॥ श्रीकृष्णउवाच ॥ साध्व्येतच्छ्रोतुकामैनराजपुत्रिप्रलंभिता ॥ मयोदितंयदन्वात्थसर्वंतत्सत्यमेवहि ४९ यान्यान्कामयसेकामान्मय्यकामायभामिनि ॥ संतिह्येकांतभक्तायास्तवकल्याणिनित्यदा ५० उपलब्धंपतिप्रेमपातिव्रत्यंचतेनघे ॥ यद्वाक्यैश्चाल्यमानायानधीर्मय्यपकर्षिता ५१ येमांभजंतिदांपत्येतपसाव्रतचर्यया ॥ कामात्मानोपवर्गेशंमोहितामममायया ५२ मांप्राप्यमानिन्यपवर्गसंपदंवांच्छंतियेसंपदएवतत्पतिम् ॥ तेमंदभाग्यानिरयेपियेनॄणांमात्रात्मकत्वान्निरयःसुसंगमः ५३ दिष्ट्यागृहेश्वर्यसकृन्मयित्वयाकृतानुवृत्तिर्भवमोचनीखलैः ॥ सुदुष्करासौसुतरांदुराशिषोह्यसुंभरायानिकृतिंजुषःस्त्रियाः ५४ नत्वादृशींप्रणयिनींगृहिणींगृहेषुपश्यामिमानिनिययास्वविवाहकाले ॥ प्राप्तान्नृपानवगणय्यरहोहरोमेप्रस्थापितोद्विजउपश्रुतसत्कथस्य ५५ भ्रातुर्विरूपकरणंयुधिनिर्जितस्यप्रोद्वाहपर्वणिचतद्वधमक्षगोष्ठ्याम् ॥ दुःखंसमुत्थमसहोऽस्मदयोगभीत्यानैवाब्रवीःकिमपितेनवयंजितास्ते ५६ दूतस्त्वयात्मलभनेसुविविक्तमंत्रःप्रस्थापितोमयिचिरायतिशून्यमेतत् ॥ मत्वाजिहासइदमंगमनन्ययोग्यंतिष्ठेततत्त्वयिवयंप्रतिनंदयामः ५७

चूर्णिका ॥५०॥

॥ श्रीकृष्ण उवाच ॥ हेसाध्वि त्वद्वचः शुश्रूषुणा मया यदुक्तं तत् त्वं अन्वाख्यातवती तत्सत्यमेव ४९ किंच त्वयापातिव्रत्यंउपलब्धम् ५० ५१ किंच ये मोक्षदं मांसुखाद्यर्थं भजंति ते मंदभाग्याः स्युः५२ ५३ तस्मात् हेस्त्रि त्वया मयि निष्कामा अनुवृत्तिः कृता एतत् दिष्ट्या ५४ किंच त्वादृशींगृहिणीं न पश्यामि यतः विवाहकालेप्राप्तान् नृपान् अविगणय्य संदेशहरो द्विजः प्रेषितः ५५ तयाविवाहे स्वभ्रातुर्विरूपकरणं मत्वानिरुद्धविवाहेतद्वधंचस्मरत्यपि अस्मद्वियोगभीत्यातद्दुःखंसोढवती तेनवयंजिताःस्म ५६ ५७

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एवमात्मरतोपिमनुष्यरीतिमनुकुर्वन्) सौरतसंलापैःसुरतनर्मगोष्ठीभिः ५८ ५९ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांकृष्णरुक्मिणीसंवादेषष्टितमोऽध्यायः ६० ॥ ॥ ७ ॥
एकषष्टितमेशौरेःपुत्रपौत्रादिसंततिः ॥ अनिरुद्धविवाहेचरुक्मिणोरामतोवधः ॥ १ ॥ अष्टाधिकशतद्व्यष्टसहस्रस्त्रीसमुद्भवान् ॥ कोटिशःपुत्रपौत्रादीन्हरिर्दारैरयोजयत् ॥ २ ॥ तदेववक्तुमाह । एकै
कशइति । कृष्णस्यअबलाभार्याःसर्वास्ताः । याआत्मनिसंपत्तयापितुःसकाशादनवमान्अन्यूनान् १ प्रेष्ठंन्यमंसत । अच्युतस्यप्रियतमंप्रत्येकंस्वंस्वंमेनिरे । (सर्वाअपिअहमच्युतस्यप्रेष्ठेत्यमन्यते
त्यर्थः । यद्वाप्रत्येकंस्वीयमेवप्रेष्ठंतंअमंसत) नतस्यतत्त्वंआत्मारामत्वंविदंतिताः २ आत्मारामत्वंव्यनक्तिद्वयेन । चार्वब्जकोशवत्वदनंचआयतानिबाहुनेत्राणिचसप्रेम्णाहासरसेनवीक्षितानिचव
ल्गुजल्पाश्चभगवतएतैःसंमोहितावनिताःस्वैःस्वैरनेकैर्विभ्रमैस्तस्यमनोविजेतुंहर्तुंनसमशकन्नशक्ताबभूवुः । विभूम्नःपारिपूर्णस्य ३ तासांविभ्रमान्वर्णयन्एतद्विवृणोति । स्मायेति । स्मायोगूढह
सितंतद्युक्तोऽवलोकलवःकटाक्षःतेनदर्शितःसूचितोभावोऽभिप्रायःतेनहारिमनोहरणशीलंयद्भ्रूमंडलंतेनप्रहिताःप्रस्थापिताःयेसौरतमंत्राः (सुरतसमयोक्तरहस्यवादाःतेषु) शौंडैःप्रगल्भैः (तत्क्षोभकै
रितियावत्) अनंगस्यबाणैःशरैरन्यैश्चकरणैःकामशास्त्रप्रसिद्धैःसाधनैर्यस्येंद्रियंमनोविमथितुंक्षोभयितुंषोडशसहस्रमपिपत्न्योनशेकुरिति ४ (अविरतमेधितयानित्यंसंवर्धितयामुदाप्रीत्या) अनुरागे
णहासोऽवलोकश्चनवसंगमेलालसाऔत्सुक्यंचतेआद्यायस्यविभ्रमकदंबस्यतंभेजुः (यद्वालालसांतानांद्वंद्वैक्यंतस्मात्) अनुरागहासावलोकनवसंगमलालसात्यंभेजुःतस्यमनोविजेतुंनशेकुरिति ।
(यद्वाअनुरागहासादीनांआद्यआश्रयमित्यर्थः) ५ किंतुप्रत्युद्गमनादिभिःविभोस्तस्यदास्यंनित्यंविदधुरिति । (आसनवरेउत्तमासनेअर्हणंपूजनंआसनोपवेशनादिना) प्रौढभावेपिनवसंगमाद्य
भिधानंअगतसारत्वेनौत्सुक्येनचतथाप्रतीतेः । तेषामेवश्लोकानांप्रस्तावांतरेपुनःपुनरावृत्तिरतिसौंदर्यात् ६

॥५१॥

॥ श्रीशुकउवाच ॥ एवंसौरतसंलापैर्भगवाञ्जगदीश्वरः ॥ स्वरतोरमयारेमेनरलोकंविडंबयन् ५८ तथान्यासामपिविभुर्गृहेषुगृहवानिव ॥ आस्थितोगृह
मेधीयान्धर्माँल्लोकगुरुर्हरिः ५९ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेकृष्णरुक्मिणीसंवादेषष्टितमोध्यायः ६० ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ए
कैकशस्ताःकृष्णस्यपुत्रान्दशदशाबलाः ॥ अजीजनन्ननवमान्पितुःसर्वात्मसंपदा १ गृहादनपगंवीक्ष्यराजपुत्र्योऽच्युतंस्थितम् ॥ प्रेष्ठंन्यमंसतस्वंस्वं
नतत्तत्त्वविदःस्त्रियः २ चार्वब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ॥ संमोहिताभगवतोनमनोविजेतुंस्वैर्विभ्रमैःसमशकन्वनिताविभू
म्नः ३ स्मायावलोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तुषोडशसहस्रमनंगबाणैर्यस्येंद्रियंविमथितुंकरणैर्नशेकुः ४ इत्थंरमाप
तिमवाप्यपतिंस्त्रियस्ताब्रह्मादयोपिनविदुःपदवींयदीयाम् ॥ भेजुर्मुदाऽविरतमेधितयानुरागहासावलोकनवसंगमलालसाद्यम् ५ प्रत्युद्गमासनवरार्हण
पादशौचतांबूलविश्रमणवीजनगंधमाल्यैः ॥ केशप्रसाधशयनस्नपनोपहार्यैर्दासीशताअपिविभोर्विदधुःस्मदास्यम् ६

श्लोकाः ५८/६

चूर्णिका

॥ श्रीशुकउवाच ॥ एवंजगदीश्वरः नर्मगोष्ठीभिः रमयासहरेमे ५८ तथा अन्यासामपि गृहेषु गृहवान्इवरेमे ॥ ५९ ॥ इतिदशमेषष्टितमः ॥ ६० ॥ ॥ ७ ॥
॥ श्रीशुकउवाच ॥ हेराजन् कृष्णस्यताः स्त्रियः प्रत्येकं पितृसमान् दशदश पुत्रान् अजीजनन् १ ताः गृहात् अनपगतं कृष्णं वीक्ष्य स्वंस्वंप्रेष्ठं मत्वापि यस्यमनः
स्वहावभावादिभिः क्षोभयितुं समर्थानबभूवुः २ ३ ४ किंतुदासीशताअपिविभोः स्वयंदास्यंचक्रुः ५ ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रासंगिकमुक्त्वाप्रस्तुतमाह । तासामिति । दशदशपुत्रायासांतादशपुत्रास्तासांमध्येअष्टौमहिष्योयाःप्रागुक्तास्तत्पुत्रानिति ७ (प्रद्युम्नःप्रमुखआद्योयेषांते । वीर्यवानितिविशेषणंचारुदेहस्य) ८
(नावमारूपादिभिरन्यूनाः) ९ १० ११ श्रीमानितिवसोःकुंतेर्वाविशेषणम् १२ भद्रोनामएकलःएकः । सोमकःअवरःकनीयान् । एतेकालिंद्याःसुताइति १३ माद्र्यालक्ष्मणायाः १४ क्षुधिर्दशमः
एतेमित्रविंदात्मजाः १५ संग्रामजित्प्रमुखाःसत्यकपर्यंताःभद्रायाःसुताः । शैब्यानामापिसैव (अथहरेःपत्नीयारोहिणीतस्यास्तनयाइत्यर्थः) रोहिण्याःसुतानामुक्तिरन्यासामुपलक्षणार्थं १६ (रु
क्मिण्याःपुत्रात्प्रद्युम्नादनिरुद्धोभूत्) १७

श्लोकाः ७/१७

तासांयादशपुत्राणांकृष्णस्त्रीणांपुरोदिताः ॥ अष्टौमहिष्यस्तत्पुत्रान्प्रद्युम्नादीन्गृणामिते ७ चारुदेष्णःसुदेष्णश्चचारुदेहश्चवीर्यवान् ॥ सुचारुश्चारुगु
॥५२॥ प्तश्चभद्रचारुस्तथापरः ८ चारुचंद्रोविचारुश्चचारुश्चदशमोहरेः ॥ प्रद्युम्नप्रमुखाजातारुक्मिण्यांनावमाःपितुः ९ भानुःसुभानुःस्वर्भानुःप्रभानुर्भानुमांस्त
था ॥ चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥ श्रीभानुःप्रतिभानुश्चसत्यभामात्मजादश १० सांबःसुमित्रःपुरुजिच्छतजिच्चसहस्रजित् ॥ विजयश्चित्र
केतुश्चवसुमान्द्रविडःक्रतुः ॥ जांबवत्याःसुताह्येतेसांबाद्याःपितृसंमताः ११ वीरश्चंद्रोऽश्वसेनश्चचित्रगुर्वेगवान्वृषः ॥ आमःशंकुर्वसुःश्रीमान्कुंतिर्नाग्न
जितेःसुताः १२ श्रुतःकविर्वृषोवीरःसुबाहुर्भद्रएकलः ॥ शांतिर्दर्शःपूर्णमासःकालिंद्याःसोमकोऽवरः १३ प्रघोषोगात्रवान्सिंहोबलःप्रबलऊर्ध्वगः ॥
माद्र्याःपुत्रामहाशक्तिःसहओजोऽपराजितः १४ वृकोहर्षोनिलोगृध्रोवर्धनोऽन्नादएवच ॥ महीशःपावनोवह्निर्मित्रविंदात्मजाःक्षुधिः १५ संग्रामजि
द्बृहत्सेनःशूरःप्रहरणोऽरिजित् ॥ जयःसुभद्रोभद्रायावामआयुश्चसत्यकः ॥ दीप्तिमांस्ताम्रतप्ताद्यारोहिण्यास्तनयाहरेः १६ प्रद्युम्नाच्चानिरुद्धोऽभूद्रुक्म
वत्यांमहाबलः ॥ पुत्र्यांतुरुक्मिणोराजन्नाम्नाभोजकटेपुरे १७

चूर्णिका

तासां मध्ये याः पूर्वमुक्ता अष्टौमहिष्यः तत्पुत्रान्गृणामि ७ तत्र प्रद्युम्नः १ चारुदेष्णः २ सुदेष्णः ३ चारुदेहः ४ सुचारुः ५ चारुगुप्तः ६ भद्रचारुः ७ चारुचंद्रः
८ विचारुः ९ चारुः १० एतेरुक्मिण्यांजाताः ८ ९ भानुः १ सुभानुः २ स्वर्भानुः ३ प्रभानुः ४ भानुमान् ५ चंद्रभानुः ६ बृहद्भानुः ७ अतिभानुः ८ श्रीभानुः
९ प्रतिभानुः १० एते सत्यभामात्मजाः १० सांबः १ सुमित्रः २ पुरुजित् ३ शतजित् ४ सहस्रजित् ५ विजयः ६ चित्रकेतुः ७ वसुमान् ८ द्रविडः ९ क्रतुः १० एते
जांबवत्याःपुत्रः ११ वीरः १ चंद्रः २ अश्वसेनः ३ चित्रगुः ४ वेगवान् ५ वृषः ६ आमः ७ शंकुः ८ वसुः ९ श्रीमान् १० नाग्नजितेः सत्यायाःएतेपुत्राः १२ श्रुतः
१ कविः २ वृषः ३ वीरः ४ सुवाहुः ५ भद्रः ६ शांतिः ७ ईशः ८ पूर्णमासः ९ सोमकः १० कालिंद्याएतेपुत्राः १३ प्रघोषः १ गात्रवान् २ सिंहः ३ बलः ४ प्रब
लः ५ ऊर्ध्वगः ६ महाशक्तिः ७ सहः ८ ओजः ९ अपराजितः १० लक्ष्मणायाएतेपुत्राः १४ वृकः १ हर्षः २ अनिलः ३ गृध्रः ४ वर्धनः ५ अन्नादः ६ महाशः ७
पावनः ८ वह्निः ९ क्षुधिः १० एते मित्रविंदात्मजाः १५ संग्रामजित् १ बृहत्सेनः २ शूरः ३ प्रहरणः ४ अपराजित् ५ जयः ६ सुभद्रः ७ वामः ८ आयुः ९
सत्यकः १० भद्राया एते पुत्राः दीप्तिमांस्ताम्रतप्ताद्यारोहिण्यास्तनयादश १६ प्रद्युम्नात्रुक्मवत्यां अनिरुद्धोऽभूत् एषांपुत्रपौत्राः कोटिशोबभूवुः १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतषांचेति । अन्येषामपिश्रीकृष्णपुत्राणांशतसंख्यस्त्रीषुपुत्राःपौत्राश्चकोटिशोबभूवुः । तत्रहेतुत्वेनश्रीकृष्णपत्नीनांबाहुल्यमनुस्मारयति । मातरइति । कृष्णाज्जातानांपुत्राणाम् । च शब्देनाधिकाश्चेत्युक्तम् । १८ यःकृष्णंहंतुंरंध्रंप्रतीक्षतेसकथंप्रादादिति । वैवाहिकंविवाहस्यनिमित्तम् १९ (ननु) रुक्मिणोऽभिप्रायंकथंजानीमइतिचेतत्राह । अनागतमिति । अतींद्रियंअस्मदादींद्रियागोचरम् । विप्रकृष्टंदूरस्थम् । व्यवहितंकुड्याद्यंतरितम् २० तत्रोत्तरम् । वृतइति । (अंगयुतोदेहधारीअनंगोमदनःसाक्षात्अतः) स्वयंवरेरुक्मवत्यावृतःसन् (एकरथःसहायरहितोपिसमेतान्) राज्ञोनिर्जित्यजहारेति २१ यद्यपिश्रीकृष्णावमानितःतथापिवैरंअनुस्मरन्नपिव्यतरत्प्रादात् । अन्वमोदतेत्यर्थः २२ सर्वासामप्येकैकाकन्यातत्सर्वकन्याविवाहोपलक्षणार्थंज्येष्ठकन्याविवाहमाह । रुक्मिण्याइति (नाम्नाचारुमतीम्) २३ (हरेर्बद्धवैरोपि । नाम्नारोचनाम्) यौनंविवाहः । तद्यौनमधर्मंजानन्निति । "द्विषदन्नंनभोक्तव्यंद्विषंतंनैवभोजये"दित्यादिलोकविरोधात् "अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्वि"तिनिषेधाच्चाधर्मत्वमितिज्ञेयम् २४ लोकविरुद्धाचरणफलंवक्तुमाह । तस्मिन्निति । (अक्षैर्नियोजयपाशकैःक्रीडितुमाह्वयेत्यर्थः) २५ २६ (तद्व्यसनंअक्षद्यूतासक्तिः) (निष्कशतादिकंपणंआददेजग्राहकृतवानित्यर्थः) २७ (नामृष्यत्नसेहे) २८

श्लोकाः १८/२८

एतेषांपुत्रपौत्राश्चबभूवुःकोटिशोनृप ॥ मातरःकृष्णजातानांसहस्राणिचषोडश १८ ॥ राजोवाच ॥ कथंरुक्म्यरिपुत्रायप्रादाद्दुहितरंयुधि ॥ कृष्णेनपरिभूतस्तंहंतुंरंध्रंप्रतीक्षते ॥ एतदाख्याहिमेब्रह्मन्द्विषोर्वैवाहिकंमिथः १९ अनागतमतीतंचवर्तमानमतींद्रियम् ॥ विप्रकृष्टंव्यवहितंसम्यक्पश्यंतियोगिनः २० ॥ श्रीशुकउवाच ॥ वृतःस्वयंवरेसाक्षादनंगोऽगयुतस्तया ॥ राज्ञःसमेतान्निर्जित्यजहारैकरथोयुधि २१ यद्यप्यनुस्मरन्वैरंरुक्मीकृष्णावमानितः ॥ व्यतरद्भागिनेयायसुतांकुर्वन्स्वसुःप्रियम् २२ रुक्मिण्यास्तनयांराजन्कृतवर्मसुतोबली ॥ उपयेमेविशालाक्षींकन्यांचारुमतींकिल २३ दौहित्रायानिरुद्धायपौत्रींरुक्म्यददाद्धरेः ॥ रोचनांबद्धवैरोपिस्वसुःप्रियचिकीर्षया ॥ जानन्नधर्मंतद्यौनंस्नेहपाशानुबंधनः २४ तस्मिन्नभ्युदयेराजन्रुक्मिणीरामकेशवौ ॥ पुरंभोजकटंजग्मुःसांबप्रद्युम्नकादयः २५ तस्मिन्निवृत्तउद्वाहेकालिंगप्रमुखान्नृपाः ॥ दृप्तास्तेरुक्मिणंप्रोचुर्बलमक्षैर्विनिर्जय २६ अनक्षज्ञोह्ययंराजन्नपितद्व्यसनंमहत् ॥ इत्युक्तोबलमाहूयतेनाक्षैरुक्म्यदीव्यत ॥ शतंसहस्रमयुतंरामस्तत्राददेपणम् २७ तंतुरुक्म्यजयत्तत्रकालिंगःप्राहसद्बलम् ॥ दंतान्संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः २८

चूर्णिका

१८ ॥ राजोवाच ॥ रुक्मीअरिपुत्रायप्रद्युम्नाय कन्यांकथं प्रादात् यः कृष्णेनपरिभूतः तं हंतुंरंध्रं प्रतीक्षते तद्वद १९ २० ॥ श्रीशुकउवाच ॥ ततः स्वयंवरे रुक्मवत्या वृतः अनिरुद्धः युधि राज्ञः निर्जित्य तां जहार २१ रुक्मी पूर्ववैरं स्मरन्नपिस्वसुः प्रियंकुर्वन्सन् भागिनेयाय सुतांप्रादात् २२ रुक्मिण्याः तनयां चारुमतीं कृतवर्मसुतो बली उपयेमे २३ किंच रुक्मीबद्धवैरोपि स्वपौत्रीं रोचनानाम्नीं दौहित्राय अनिरुद्धायददौ २४ हेराजन् तस्मिन्विवाहेरामकृष्णाद्याः यादवाः भोजकटंपुरं जग्मुः २५ विवाहे निवृत्तेसति दृप्ताः नृपाः रुक्मिणं ऊचुः हेराजन् अयं रामः अनक्षज्ञोऽस्ति अतः एनं अक्षैः विनिर्जय २६ इत्युक्तः रुक्मीबलं आहूय तेनसहक्रीडितवान् तत्र रामः शतंसहस्रं अयुतं पणं आददे २७ तं पणं रुक्मीअजयत् यदा कालिंगः दंतान् संदर्शयन् बलं प्राहसत् तत् बलः नामृष्यत् २८

॥५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

निष्काणांलक्षंग्लहंपणंकृतवान्तंतुबलरामोजितवान् । तत्रकैतवंकपटम् २९ क्षुभितोरामः (तावज्ज्ञात्याजन्मनाऽरुणाक्षःरुषात्वतिशयेनारुणाक्षइत्यर्थः) न्यर्बुदंदशकोटीग्लंहमाददे ३० (तमपि धर्मेणरामोजितवान्रुक्मीतु) छलमाश्रितोमयाजितमित्याह (प्रश्नमर्हंतिप्राश्निकाःप्रश्नेक्तेयथार्थवक्तारइत्यर्थः)३१ (बलेनधर्मतोजितःनतुकपटेन । रुक्मीतुवचनेनैवजितइतिवदति) ३२ (तांन भोवाणींवैदर्भोरुक्मी) ३३ (अक्षैरितिराजानएवाक्षकोविदायुद्धकोविदाश्चेत्यर्थः) ३४ नृपसंसदिमंगलसभायाम् ३५ (पलायमानंदशमेपदेगृहीत्वा) ३६ (परिघेणार्दिताः) ३७ ३८ सूर्ययानवोढया । सिद्धाअखिलार्थाअभ्युदयशत्रुवधादयोयेषांते ३९ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांरुक्मिवधोनामैकषष्टितमोऽध्यायः ६१ ॥ ॥ छ ॥ ॥ द्वियुक्षष्टितमे प्रोक्तमनिरुद्धस्यरोधनम् । कन्यदारममाणस्यबाणेनबहुबाहुना ॥ १ ॥ अनिरुद्धोद्वहेन्यस्मिन्बाणयादवसंयुगे । श्रीकृष्णःश्रीहरंजित्वाबाणबाहूनथाच्छिनत् ॥ २ ॥ (यदूत्तमोऽनिरुद्धः) १

॥५४॥

श्लोकाः

२९ / १

ततोलक्षंरुक्म्यगृह्णाद्ग्लहंतत्राजयद्बलः ॥ जितवानहमित्याहरुक्मीकैतवमाश्रितः २९ मन्युनाक्षुभितःश्रीमान्समुद्रइवपर्वणि ॥ जात्यारुणाक्षोतिरुषा न्यर्बुदंग्लहमाददे ३० तंचापिजितवान्रामोधर्मेणच्छलमाश्रितः ॥ रुक्मीजितंमयात्रेमेवदंतुप्राश्निकाइति ३१ तदाब्रवीन्नभोवाणीबलेनैवजितोग्लहः ॥ धर्मतोवचनेनैवरुक्मीवदतिवैमृषा ३२ तामनादृत्यवैदर्भोदुष्टराजन्यचोदितः ॥ संकर्षणंपरिहसन्बभाषेकालचोदितः ३३ नैवाक्षकोविदायूयंगोपालावनगोचराः ॥ अक्षैर्दीव्यंतिराजानोबाणैश्चनभवादृशाः ३४ रुक्मिणैवमधिक्षिप्तोराजभिश्चोपहासितः ॥ क्रुद्धःपरिघमुद्यम्यजघ्नेतंनृपसंसदि ३५ कलिंगराजंतरसागृहीत्वादशमेपदे ॥ दंतानपातयत्क्रुद्धोयोहसद्विवृतैर्द्विजैः ३६ अन्येनिर्भिन्नबाहूरुशिरसोरुधिरोक्षिताः ॥ राजानोदुद्रुवुर्भीताबलेनपरिघार्दिताः ३७ निहतेरुक्मिणिश्यालेनाब्रवीत्साध्वसाधुवा ॥ रुक्मिणीबलयोराजन्स्नेहभंगभयाद्धरिः ३८ ततोऽनिरुद्धंसहसूर्ययावरंरथंसमारोप्ययुयुःकुशस्थलीम् ॥ रामादयोभोजकटाद्दशार्हाःसिद्धाखिलार्थामधुसूदनाश्रयाः ३९ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेरुक्मिवधोनामैकषष्टितमोऽध्यायः ६१ ॥ ॥ छ ॥ ॥ राजोवाच ॥ ॥ बाणस्यतनयामूषामुपयेमेयदूत्तमः ॥ तत्रयुद्धमभूद्घोरंहरिशंकरयोर्महत् ॥ एतत्सर्वंमहायोगिन्समाख्यातुंत्वमर्हसि १

चूर्णिका

ततः रुक्मी लक्षंपणं अगृह्णात् तत्रबलः अजयत् रुक्मीतु अहंजितवान् इति मिथ्याह २९ तदाक्रुद्धः रामः अर्बुदपणं आददे ३० तंचापिरामः धर्मेणजितवान् रुक्मीतु कपटं आश्रित्य मयाजितमित्याह हेसभासदः यूयं ब्रूत ३१ तदाब्रवीन्नभोवाणीबलेनैवजितोग्लहः धर्मतोवचनेनैवरुक्मीवदतिवैमृषा ३२ ततः रुक्मी तां अनादृत्य संकर्षणं परिहसन्बभाषे ३३ अहो अक्षैः बाणैश्च राजनः क्रीडंति न गोपालाः ३४ रुक्मिणा एवं अधिक्षिप्तः रामः परिघंउद्यम्य तंरुक्मिणं हत्वा ३५ कलिंगराजं दशमे पदेगृहीत्वातस्यदंतान् अपातयत् ३६ ततः अन्येराजानः बलेन परिघार्दिताःसंतः दुद्रुवुः ३७ रुक्मिणि श्याले निहतेसति हरिः रुक्मिणीबलयोः स्नेहभंगभयात्साधुअसाधुवा न अब्रवीत् ३८ ततः नवोढयासह अनिरुद्धं रथे आरोप्य रामकृष्णादयः भोजकटात् द्वारकांययुः ३९ ॥ ॥ इतिदशमेएकषष्टितमः ६१ ॥ ॥ छ ॥ ॥ राजोवाच ॥ हेब्रह्मन्अनिरुद्धः बाणस्य तनयांऊषांउपयेमेतत्र हरिशंकरयोः महद्युद्धं अभूत् तत्सर्वं कथयितुं अर्हसि १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पुत्रशतमध्येज्येष्ठः । येनबलिनाअदायिदत्ता) २ (औरसोमुख्यः । वदान्योदानशौंडः) ३ (प्रतिकूलाअप्यमराःकिंकराइवानुकूलाआसन्) ४ (वरेणच्छंदयामासवरंवृणुष्वेतिउक्तवानित्यर्थः । सबाणस्तम्) पुराधिपंपुरपालकम् (ममपुरंरक्षेतिवव्रेइत्यर्थः) ५ (सबाणःसंस्पृशन्प्रणमन्नित्यर्थः) ६ कामान्पूरयतीतिकामपूरःसचासावमरांघ्रिपःकल्पतरुस्तंत्वाम् ७ (मयासमंप्रतियोद्धारंत्वां विनानलभेअतोबाहुसहस्रंकेवलंभारायाभूत्) ८ हेआद्यनिभृतैर्भरितैर्दोर्भिरद्रींश्चूर्णयन्अयामगच्छम् ९ १० स्ववीर्यस्यनशनंनाशनंकेतुभंगंप्रतीक्षमाणः ११ श्रीमहेशादिष्टसंग्रामस्यप्रसंगमाह । तस्योपेति । प्राद्युम्निनाअनिरुद्धेन १२ तत्रापिस्वप्नेतंकांतमपश्यंतीसाउत्तस्थौ १३ ततःकिंवृत्तंतदाह । बाणस्येति १४ हेराजपुत्रिहस्तग्राहंभर्तारम् (नोपलक्षये । अविवाहितत्वात् । अतःकंमृगयसे) १५

॥५५॥ ॥ श्रीशुकउवाच ॥ बाणःपुत्रशतज्येष्ठोबलेरासीन्महात्मनः ॥ येनवामनरूपायहरयेऽदायिमेदिनी २ तस्यौरसःसुतोबाणःशिवभक्तिरतःसदा ॥ मान्यो वदान्योधीमांश्चसत्यसंधोजितेंद्रियः ३ शोणिताख्येपुरेरम्येसराज्यमकरोत्पुरा ॥ तस्यशंभोःप्रसादेनकिंकराइवतेऽमराः ॥ सहस्रबाहुर्वाद्येनतांडवेऽतोषयन्मृडम् ४ भगवान्सर्वभूतेशःशरण्योभक्तवत्सलः ॥ वरेणच्छंदयामाससतंवव्रेपुराधिपम् ५ सएकदाहगिरिशंपार्श्वस्थंवीर्यदुर्मदः ॥ किरीटेनार्कवर्णेनसंस्पृशंस्तत्पदांबुजम् ६ नमस्येत्वांमहादेवलोकानांगुरुमीश्वरम् ॥ पुंसामपूर्णकामानांकामपूरामरांघ्रिपम् ७ दोःसहस्रंत्वयादत्तंपरंभारायमेऽभवत् ॥ त्रिलोक्यांप्रतियोद्धारंनलभेत्वदृतेसमम् ८ कंडूत्यानिभृतैर्दोर्भिर्युयुत्सुर्दिग्गजानहम् ॥ आद्यायांचूर्णयन्नद्रीन्भीतास्तेपिप्रदुद्रुवुः ९ तच्छ्रुत्वाभगवान्क्रुद्धःकेतुस्तेभज्यतेयदा ॥ त्वद्दर्पघ्नंभवेन्मूढसंयुगंमत्समेनते १० इत्युक्तःकुमतिर्हृष्टःस्वगृहंप्राविशन्नृप ॥ प्रतीक्षन्गिरिशादेशंस्ववीर्यनशनंकुधीः ११ तस्योषानामदुहितास्वप्नेप्राद्युम्निनारतिम् ॥ कन्याऽलभतकांतेनप्रागदृष्टश्रुतेनसा १२ सातत्रतमपश्यंतीक्वासिकांतेतिवादिनी ॥ सखीनांमध्यउत्तस्थौविह्वलाव्रीडिताभृशम् १३ बाणस्यमंत्रीकुंभांडश्चित्रलेखाचतत्सुता ॥ सख्यपृच्छत्सखीमूषांकौतूहलसमन्विता १४ कंत्वंमृगयसेसुभ्रूःकीदृशस्तेमनोरथः ॥ हस्तग्राहंनतेद्यापिराजपुत्र्युपलक्षये १५

श्लोकाः २/१५

चूर्णिका

॥ श्रीशुकउवाच ॥ महात्मनः बलेः पुत्रशतज्येष्ठः बाणः पुत्रः आसीत् सः शिवभक्तिरतः सन् २ ३ शोणितपुरेराज्यं अकरोत् तस्यशंभोः प्रसादेनदेवाः किंकराइव आसन् सः सहस्रबाहुः सन् तांडवे शिवंअतोषयत् ४ ततः भक्तवत्सलः शिवः तं वरेण छंदयामास सःबाणः तंशिवं पुररक्षणार्थंवव्रे ५ सः एकदावीर्यदुर्मदः सन् किरीटेन तत्पदांबुजंस्पृशन् आह ६ हेदेवदेवेश मह्यं दोःसहस्रं त्वया दत्तं परंतु मेभाराय अभवत् यतः त्रिलोक्यांत्वदृते समं योद्धारं नलभे ७ ८ किंच हेआद्य अहं कंडूत्यापूर्णैः भुजैः अद्रीन् चूर्णयन् दिग्गजान् अगच्छम् तेपिभीताः संतः दुद्रुवुः ९ एवंतद्वचः श्रुत्वा क्रुद्धः शिवः आह यदा तवकेतुः भज्यते तदा तवमत्समेनत्वद्दर्पघ्नंयुद्धंभ तु १० इत्युक्तः बाणः हृष्टः सन् गिरिशादेशंप्रतीक्षन्स्वगृहंप्राविशत् ११ तस्यउषानामकन्याआसीत् सास्वप्ने अनिरुद्धेनसह रतिंप्राप ततः सास्वप्ने एव कांतं तं अपश्यंती हेकांत त्वं क्वासि क्वासि इतिवादिनीसती उत्तस्थौ १२ १३ ततः बाणस्यमंत्री कुंभांडः तत्सुताचित्रलेखा उषां अपृच्छत् १४ हेसुभ्रूः त्वं कं मृगयसे ते मनोरथः कः हेराजपुत्रि अद्यापि तवभर्तारंनपश्यामि १५ ॥५५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

१६ (अधररूपंमधु) १७ (यद्यसौनरस्त्रिलोक्यांभाव्यतेज्ञायतेइत्यर्थः) १८ त्वयादृष्टएषांमध्येकोवाभवेदितिप्रष्टुंदेवादीन् (मुख्यान्)यथावत्पटेऽलिखत् १९ प्रद्युम्नंलिखितंवीक्ष्यश्वशुरोयमितिलज्जिता २० (असावुषासोसाविितिप्राह) २१ (कृष्णस्यपौत्रंततयादृष्टंज्ञात्वा) २२ (तत्रद्वारकायाम् । योगमास्थितायोगप्रभावमाश्रित्येत्यर्थः) शोणितपुरंनीत्वा (सख्यैउषायै) २३ पुंभिर्दुःप्रेक्ष्येप्रेक्षितुमशक्ये २४ सचपरार्ध्यैरमूल्यैर्वासःस्रगादिभिःशुश्रूषणपूर्वकमर्चितःसन् २५ (कन्यायाःपुरेगृहे) तयापहृतेंद्रियोऽहर्गणान्दिनसमूहान्नबुबुधे २६ (हतंकन्याव्रतंययाताम्) आप्रीतांअतिहृष्टांदुरवच्छदैराच्छादयितुमशक्यै-(-हेतुभिःदंतक्षतादिचिह्नैर्लक्षयांचक्रुः) २७ (कुलंदूषयतितथाभूतंकन्यायाअनूढायाः) विचेष्टितंविरुद्धाचरणम् २८ अनपायिभिःअपायोऽपसर्पणंप्रमादोवातद्रहितैः(रक्षितायाअपिपुंभिर्दुःप्रेक्षायाअपियद्दूषणंतन्नजानीमः) पाठांतरेदुष्टप्रेष्यासखीयस्यास्तस्याःपुंभिर्दूषणंकुतोवेतिनविद्मइति २९

॥५६॥ श्लोकाः १६/२९

॥ उषोवाच ॥ दृष्टःकश्चिन्नरःस्वप्नेश्यामःकमललोचनः ॥ पीतवासाबृहद्बाहुर्योषितांहृदयंगमः १६ तमहंमृगयेकांतंपाययित्वाऽधरंमधु ॥ क्वापियातःस्पृहयतींक्षिप्त्वामांवृजिनार्णवे १७ ॥ चित्रलेखोवाच ॥ व्यसनंतेऽपकर्षामित्रिलोक्यांयदिभाव्यते ॥ तमानेष्येनरंयस्तेमनोहर्तातमादिश १८ इत्युक्त्वादेवगंधर्वसिद्धचारणपन्नगान् ॥ दैत्यविद्याधरान्यक्षान्मनुजांश्चतथाऽखिलान् १९ मनुजेषुचसावृष्णीञ्शूरमानकदुंदुभिम् ॥ व्यलिखद्रामकृष्णौचप्रद्युम्नंवीक्ष्यलज्जिता २० अनिरुद्धंविलिखितंवीक्ष्योषाऽवाङ्मुखीह्रिया ॥ सोसावसावितिप्राहस्मयमानामहीपते २१ चित्रलेखातमाज्ञायपौत्रंकृष्णस्ययोगिनी ॥ ययौविहायसाराजन्द्वारकांकृष्णपालिताम् २२ तत्रसुप्तंसुपर्यंकेप्राद्युम्निंयोगमास्थिता ॥ गृहीत्वाशोणितपुरंसख्यैप्रियमदर्शयत् २३ साचतंसुंदरवरंविलोक्यमुदितानना ॥ दुःप्रेक्ष्येस्वगृहेपुंभीरेमेप्राद्युम्निनासमम् २४ परार्ध्यवासःस्रग्गंधधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्चवाक्यैःशुश्रूषयार्चितः २५ गूढःकन्यापुरेशश्वत्प्रवृद्धस्नेहयातया ॥ नाहर्गणान्सबुबुधेउषयापहृतेंद्रियः २६ तांतथायदुवीरेणभुज्यमानांहतव्रताम् ॥ हेतुभिर्लक्षयांचक्रुरापीतांदुरवच्छदैः २७ भटाआवेदयांचक्रूराजंस्तेदुहितुर्वयम् ॥ विचेष्टितंलक्षयामःकन्यायाःकुलदूषणम् २८ अनपायिभिरस्माभिर्गुप्तायाःस्वगृहेप्रभो ॥ कन्यायादूषणंपुंभिर्दुःप्रेक्ष्यायानविद्महे २९

चूर्णिका

॥ उषोवाच ॥ हेसखि मया स्वप्नेकश्चित् नरश्रेष्ठःदृष्टः सः मां अधरमधुपाययित्वा दुःखाब्धौ क्षिप्त्वाक्वापि यातः तं अहं मृगये १६ १७ ॥ चित्रलेखोवाच ॥ हेसखि तव दुःखं हरानि यः तवमनोहर्तासः त्रैलोक्येयदिस्यात्तर्हितं आनेष्ये तं नरं आदिश १८ इत्युक्त्वा देवगंधर्वसिद्धचारणपन्नगदैत्यविद्याधरयक्षमनुजान् अलिखत् १९ मनुजानांमध्ये वृष्णीन् रामकृष्णौ प्रद्युम्नं अनिरुद्धंच अलिखत् २० तत्र अनिरुद्धं वीक्ष्य ह्रियाअवाङ्मुखीसती सः असौइति प्राह २१ ततः साचित्रलेखातंकृष्णस्यपौत्रंज्ञात्वा विहायसा द्वारकां एत्य २२ तत्रपर्यंकेसुप्तं अनिरुद्धं गृहीत्वा शोणितपुरंआनीयसख्यै प्रियं अदर्शयत् २३ साउषातंविलोक्य मुदितानना सती स्वगृहे प्राद्युम्निनासहरेमे २४ ततः वासःस्रग्गंधादिभिः सेवयाच उषयार्चितः सन् अहर्गणान् नबुबुधे २५ २६ ततोभटाः तांयदुवीरेण भुज्यमानां हेतुभिः ज्ञात्वा राजानं अकथयन् २७ २८ हेराजन् तव कन्यायाः कुलदूषणं विचेष्टितं लक्षयामः तत्कुतः इतिनजानीमः २९

॥५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

३० कामस्यात्मनादहाज्जातम् (अतोभुवनैकसुंदरम्) ३१ अभिनृम्णयासर्वमंगलया (सर्वांगशोभनयेत्यर्थः) तस्या अंगसंगेन स्तनकुंकुमं यस्यां स्रजि तांबाह्वोर्मध्येवक्षासि दधानम् । मधुमल्लिकाः
वसंतभवामाल्लिकास्तदाश्रितां तस्याग्रइतिआर्षःसंधिः तस्याअग्रतइत्यर्थः(दीव्यंतंक्रीडंतम्) ३२ समाधवोऽनिरुद्धःआततायिभिरुद्यतशस्त्रै-(-र्वृतंतंबाणंविलोक्य) मौर्वंमुरुर्लोहविशेषःतन्निर्मितम् ३३
(तस्यजिघृक्षयासमंतात्प्रसर्पतोभ्रमतस्तान्अहनत्) ३४ (स्वसैन्यंताडयंतम्) शोकविषादविह्वलाविवशा । अश्रूणांकलाबिंदवोययोस्तेअक्षिणीयस्याःसा (अरोदीत्) ३५ ॥ ॥ इतिश्री
भागवतेमहापुराणेदशमस्कंधेटीकायांअनिरुद्धबंधोनामद्विषष्टितमोऽध्यायः ६२॥ ॥ ७ ॥ ॥ त्रियुक्षष्टितमेचाथवाणयादवसंगरे । स्तुतिर्ज्वरेणरुद्रेणबाणबाहुभिदोहरेः ॥१॥(अपश्यतांअ
तोनुशोचतांचतद्बंधूनांचकारादन्येषांचपौराणाम्) १ कर्मचयुद्धादिकम् २ रामकृष्णानुवर्तिनइति तौपुरतोनिर्गतावित्यर्थः ३ सर्वतोदिशमित्यस्योत्तरेणान्वयः । (बाणस्यनगरंसर्वासुदिक्षुसमंताद्रु
रुधुरिति) ४ भज्यमानानिपुरोद्यानादीनिद्वंद्वैकवद्भावः । अट्टालाःप्राकारादुपरितनानिउन्नतस्थानानिगोपुरंतुबहिर्द्वारम् । अभिनिर्ययौबाणः (तुल्यसैन्यःअक्षौहिणीद्वादशकेनसहितइत्यर्थः) ५

श्लोकाः ३०–५

ततःप्रव्यथितोबाणोदुहितुःश्रुतदूषणः ॥ त्वरितःकन्यकागारंप्राप्तोऽद्राक्षीद्यदूद्वहम् ३० कामात्मजंतंभुवनैकसुंदरंश्यामंपिशंगांबरमंबुजेक्षणम् ॥ बृहद्भुजं
कुंडलकुंतलत्विषास्मितावलोकेनचमंडिताननम् ३१ दीव्यंतमक्षैःप्रिययाभिनृम्णयातदंगसंगस्तनकुंकुमस्रजम् ॥ बाह्वोर्दधानंमधुमल्लिकाश्रितांतस्याग्रआ
सीनमवेक्ष्यविस्मितः ३२ सतंप्रविष्टंवृतमाततायिभिर्भटैरनेकैरवलोक्यमाधवः ॥ उद्यम्यमौर्वंपरिघंव्यवस्थितोयथांतकोदंडधरोजिघांसया ३३ जिघृक्षयाता
न्परितःप्रसर्पतःशुनोयथाशूकरयूथपोऽहनत् ॥ तेहन्यमानाभवनाद्विनिर्गतानिर्भिन्नमूर्धोरुभुजाःप्रदुद्रुवुः ३४ तंनागपाशैर्बलिनंदनोबलीघ्नंतंस्वसैन्यंकुपि
तोबबंधह ॥ उषाभृशंशोकविषादविह्वलाबद्धंनिम्याश्रुकलाक्ष्यरोदीत् ३५ ॥ इतिश्रीभा०महापु०दशमस्कंधेअनिरुद्धबंधोनामद्विषष्टितमोध्यायः ६२ ॥
॥ श्रीशुकउवाच ॥ अपश्यतांचानिरुद्धंतद्बंधूनांचभारत ॥ चत्वारोवार्षिकामासाव्यतीयुरनुशोचताम् १ नारदात्तदुपाकर्ण्यवार्तांबद्धस्यकर्मच ॥ प्रययुः
शोणितपुरंवृष्णयःकृष्णदेवताः २ प्रद्युम्नोयुयुधानश्चगदःसांबोथसारणः ॥ नंदोपनंदभद्राद्यारामकृष्णानुवर्तिनः ३ अक्षौहिणीभिर्द्वादशभिःसमेताःसर्व
तोदिशम् ॥ रुरुधुर्बाणनगरंसमंतात्सात्वतर्षभाः ४ भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ॥ प्रेक्षमाणोरुषाविष्टस्तुल्यसैन्योविनिर्ययौ ५

चूर्णिका

ततः तच्छ्रुत्वा बाणः व्यथितः सन् कन्यागृहं एत्य तत्र कामात्मजं भुवनैकसुंदरं तयासह अक्षैः क्रीडंतंवीक्ष्य विस्मितः अभवत् ३० ३१ ३२ ततः अनिरुद्धः ससैन्यं
तं दृष्ट्वा परिघं उद्यम्य ३३ जिघृक्षयाप्रसर्पतः तान् अहनत् तेहन्यमानाः भवनात् विनिर्गताः संतः प्रदुद्रुवुः ३४ ततः बाणः कुपितः सन् तंनागपाशैः बबंध ततः
तंबद्धंदृष्ट्वा उषा अरोदीत् ३५ ॥ इतिदशमेद्विषष्टितमः ॥ ६२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् अनिरुद्धं अपश्यतां अनुशोचतां कृ
ष्णादीनां सतां चत्वारो वार्षिका मासाः व्यतीयुः १ ततः एकदा नारदात् बद्धस्य अनिरुद्धस्यवार्तां तत्कृतं युद्धादिकं चश्रुत्वावृष्णयः शोणितपुरंययुः २ ततःतेप्रद्युम्न
सात्यकिसांबादयः द्वादशाक्षौहिणीसैन्यैः समंतात् बाणनगरंरुरुधुः ३ ४ ततोबाणः भज्यमानपुरोद्यानादिकं प्रेक्षमाणः सन् ससैन्यः ययौ ५ ॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(नंदयतिसमरेइतिनंदीसचासौवृषभश्चेतितम्)सुतःस्कंदःतत्सहितैःप्रमथैर्गणैःरामकृष्णाभ्यांयुयुधे ६ गुहःस्कंदः ७(कुंभांडकूपकर्णाभ्यां बाणस्य मंत्रिभ्यां सह रामस्य संयुगः संग्रामः) ८(विष्णुशंकरयोर्युद्धकौतुकंद्रष्टुंब्रह्मादयआगमन् ९(शौरिःकृष्णोद्रावयामासअपक्रामयामास) १० ११ १२ (अस्त्र-)- प्रत्यस्त्राण्येवाह । ब्रह्मास्त्रस्येत्यादिना। नैजंनारायणास्त्रम् १३(जृंभितंकृतजृंभंमोहितवान्) १४ शिखिनामयूरेणवाहनेन (सहापचक्राम) १५ तयोरनीकानि हतानाथौयेषांतानि १६ (विशीर्यमाणंछिद्यमानंदृष्ट्वाकृष्णमेवाभ्यपद्यत) १७ १८ १९ (पुत्रस्यप्राणान्रक्षितुमिच्छयेत्यर्थः) २०

श्लोकाः ६/२०

बाणार्थेभगवान्रुद्रःससुतैःप्रमथैर्वृतः॥आरुह्यनंदिवृषभंयुयुधेरामकृष्णयोः ६ आसीत्सुतुमुलंयुद्धमद्भुतंरोमहर्षणम्॥कृष्णशंकरयोराजन्प्रद्युम्नगुहयोरपि ७ कुं
भांडकूपकर्णाभ्यांबलेनसहसंयुगः॥सांबस्यबाणपुत्रेणबाणेनसहसात्यकेः ८ ब्रह्मादयःसुराधीशामुनयःसिद्धचारणाः॥गंधर्वाप्सरसोयक्षाविमानैर्द्रष्टुमाग
मन् ९ शंकरानुचराञ्शौरिर्भूतप्रमथगुह्यकान् ॥ डाकिनीर्यातुधानांश्ववेतालान्सविनायकान् १० प्रेतमातृपिशाचांश्चकूश्मांडान्ब्रह्मराक्षसान् ॥ द्राव
यामासतीक्ष्णाग्रैःशरैःशार्ङ्गधनुश्च्युतैः ११ पृथग्विधानिप्रायुंक्तपिनाक्यस्त्राणिशार्ङ्गिणे ॥ प्रत्यस्त्रैःशमयामासशार्ङ्गपाणिरविस्मितः १२ ब्रह्मास्त्रस्यचब्र
ह्मास्त्रंवायव्यस्यचपार्वतम् ॥ आग्नेयस्यचपार्जन्यंनैजंपाशुपतस्यच १३ मोहयित्वातुगिरिशंजृंभणास्त्रेणजृंभितम् ॥ बाणस्यपृतनांशौरिर्जघानासिगदेषु
भिः १४ स्कंदःप्रद्युम्नबाणौघैरर्द्यमानःसमंततः ॥ असृग्विमुंचन्गात्रेभ्यःशिखिनाऽपाक्रमद्रणात् १५ कुंभांडःकूपकर्णश्चपेततुर्मुसलार्दितौ ॥ दुद्रुवुस्तद
नीकानिहतनाथानिसर्वतः १६ विशीर्यमाणंस्वबलंदृष्ट्वाबाणोऽत्यमर्षणः ॥ कृष्णमभ्यद्रवत्संख्येरथीहित्वैवसात्यकिम् १७ धनूंष्याकृष्ययुगपद्बाणःपंच
शतानिवै ॥ एकैकस्मिन्शरौद्वौद्वौसंदधेरणदुर्मदः १८ तानिचिच्छेदभगवान्धनूंषियुगपद्धरिः ॥ सारथिंरथमश्वांश्चहत्वाशंखमपूरयत् १९ तन्माताकोट
रानामनग्नामुक्तशिरोरुहा ॥ पुरोऽवतस्थेकृष्णस्यपुत्रप्राणरिरक्षया २०

चूर्णिका

तदाबाणार्थेश्रीशिवः प्रमथैः वृतः सन् वृषं आरुह्य युधि आगत्य रामकृष्णाभ्यांसह युयुधे ६ तदा अद्भुतंयुद्धं आसीत् तत्र कृष्णशंकरयोः प्रद्युम्नगुहयोः ७ कुंभांडकूपकर्णाभ्यां बलस्य सांबस्य बाणपुत्रेण सात्यकेः बाणेनसहयुद्धं आसीत् ८ तदा ब्रह्मादयोदेवाः विमानैः युद्धंद्रष्टुं आगमन् ९ ततः श्रीकृष्णः शंकरानुचरान् भूतप्रमथगुह्यकडाकिनीकूश्मांडादीन् शरैः द्रावयामास १० ११ तदाशिवः कृष्णायपृथग्विधानि अस्त्राणि प्रायुंक्त तानिभगवान् प्रत्यस्त्रैः शमयामास १२ ब्रह्मास्त्रस्यब्रह्मास्त्रं वायव्यस्यपार्वतम् आग्नेयस्यपार्जन्यं पाशुपतस्य नारायणास्त्रं १३ ततः कृष्णः जृंभमाणास्त्रेणशिवंमोहयित्वा बाणस्यसेनां जघान १४ ततः स्कंदः प्रद्युम्नबाणैः पीडितः सन् असृक्विमुंचन् रणात् अपाक्रमत् १५ कुंभांडकूपकर्णौ मुशलार्दितौसंतौपेततुः तदा बाणसैन्यानि दुद्रुवुः १६ ततो बाणः स्वसैन्यंविशीर्यमाणं दृष्ट्वा संख्येसात्यकिंहित्वा कृष्णं अभ्यद्रवत् १७ ततः सः पंचशतानि धनूंषि आकृष्य युगपत् एकैकस्मिन् द्वौ द्वौ शरौ संदधे १८ हरिः तानि धनूंषियुगपच्छित्त्वा सारथिं रथं अश्वांश्चहत्वा शंखं अपूरयत् १९ तदा बाणस्य माता कोटरानाम्नी नग्ना सती पुत्रप्राणरिरक्षया कृष्णस्य पुरः अवतस्थे २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. अनिराक्षमाणस्तिर्यङ्मुखोबभूव (तावद्बाणश्चपुरमविशत्) २१ (अथ रुद्रेणविसृष्टो) ज्वरस्तु योद्धुमभ्यधावत् अथ नारायणः शीतज्वरमसृजत् २२ (ज्वरार्दितःस्वयमेवज्वरपीडितःसन्) माहेश्वरो(ज्वरः) अ०
समाक्रंदन्युयुधे २३२४ आत्मानंपरमशक्तिमंतंमन्यमानःश्रीकृष्णंतापयितुंप्रवृत्तःस्वयमेवतप्तःसन्तंपरमेश्वरंज्ञात्वास्तुवन्नमस्करोति नमामीति।त्वात्वांअनंतशक्तिंनमामि अनंतशक्तित्वंकुतः। परेषांब्रह्म
टीका दीनामीशम् । तत्रहेतुः सर्वात्मानंसर्वस्यात्मानंचेतयितारम् । तत्कुतःकेवलंशुद्धंज्ञप्तिमात्रंचै न्यघनम् । तदेवंसर्वचेतयितृत्वेनपरमेश्वरत्वमुक्तम् । किंचविश्वसृष्ट्यादिहेतुत्वादपीत्याह । विश्वोत्पत्तीति
नन्वेवंभूतंब्रह्मप्रसिद्धंनाहमितितत्राह । यत्तद्ब्रह्मेति । यत्तद्ब्रह्मतदेवत्वमित्यर्थः किंतद्ब्रह्मेत्यतआह । ब्रह्मलिंगंब्रह्मणावेदनंलिंग्यतेयोत्यतइति । तत्कुतःप्रशांतंसर्वविक्रियारहितत्वात् नसाक्षाद्वाच्यमि ॥६३॥
तिभावः २५ किंच । यावत्सविशेषंवस्तुतत्रवयंप्रभवामः । त्वयितुसर्वविशेषातीतेनकस्यापिप्रभुत्वम् किंतुत्वमेवसर्वप्रभुरितिज्ञप्तिमात्रत्वंविवृण्वन्स्तौति । कालइति । कालःक्षोभकः । कर्मनिमि
॥५१॥ त्तम् । तदेवफलाभिमुखमभिव्यक्तंदैवम् । स्वभावस्तत्संस्कारःजीवस्तद्वान् । द्रव्यंभूतसूक्ष्माणि । क्षेत्रं (बीजोप्तिस्थानं) शरीरम् । प्राणःसूत्रम् । आत्माऽहंकारःविकारएकादशेंद्रियाणिमहाभूतानि
चेतिषोडशकः । तत्संधातोलिंगदेहः । एतस्यचबीजरोहवत्प्रवाहः । रोहोऽकुरः । देहाद्बीजरूपंकर्म । ततोंकुररूपोदेहः । ततःपुनरेवमितिप्रवाहः। एषात्वन्माया । तस्यानिषेधोअपोहोयस्मिन्तंत्वां
निषेधावधिभूतंप्रपद्येभजेइति २६ ननुदेवकीतनयस्यकथमेवंभूतत्वंतत्राह । नानाभावैरिति । सर्वोपाधिविनिर्मुक्तएवत्वंयथालीलयास्वीकृतैर्मत्स्याद्यवतारैर्देवादीन्बिभर्षिपालयसि । तदर्थंलोकसेतून्वर्णा
श्रमधर्मान् । तदर्थंतदनुष्ठातॄन्साधून्तदंगत्वेनउन्मार्गान्दैत्यादीन्हंसिसंहरासि । एवमेतदपितवजन्मभूमेर्भारहरणायलीलावतारोयंनकस्यापितनयस्त्वमित्यर्थः २७ अतोअज्ञानतस्त्वदभिभवेप्रवृत्तं
मांतप्तंरक्षेत्याशयेनाह । तप्तोहमिति । तेतेजसात्वत्सृष्टेन (तेजोरूपेण) ज्वरेणशांतोग्रेण (शांतश्चासावुग्रश्चेतितेन) शीतज्वरेणेत्यर्थः । (अत्युल्बणेनअतिभयंकरेणतप्तोहमस्मि ।) परसंताप
करस्ययुक्तएवतापइतिचेत्अतआह । तावदिति । (आशानुबद्धाः विषयतृष्णायुक्ताः यावन्नोसेवरन्तावदुचितः) सेवायांप्रवृत्तानांत्वनुचितइतिभावः २८

ततस्तिर्यङ्मुखोनग्नामानिरीक्षन्गदाग्रजः॥ बाणश्चतावद्विरथश्छिन्नधन्वाऽविशत्पुरम् २१ विद्राविते भूतगणेज्वरस्तुत्रिशिरास्त्रिपाद् ॥ अभ्यपद्यतदाशार्हं श्लोकाः
दहन्निवदिशोदश ॥ अथनारायणोदेवस्तंदृष्ट्वाव्यसृजज्ज्वरम् २२ माहेश्वरोवैष्णवश्चयुयुधातेज्वरावुभौ ॥ माहेश्वरःसमाक्रंदन्वैष्णवेनज्वरार्दितः २३ अल
ब्ध्वाऽभयमन्यत्रभीतोमाहेश्वरोज्वरः ॥ शरणार्थीहृषीकेशंतुष्टावप्रयतांजलिः २४॥ ज्वरउवाच ॥ नमामित्वाऽनंतशक्तिंपरेशंसर्वात्मानंकेवलंज्ञप्तिमात्र २१/२८
म् ॥ विश्वोत्पत्तिस्थानसंरोधहेतुंयत्तद्ब्रह्मब्रह्मलिंगंप्रशांतम् २५ कालोदैवंकर्मजीवःस्वभावोद्रव्यंक्षेत्रंप्राणआत्माविकारः ॥ तत्संघातोबीजरोहप्रवाह
स्त्वन्मायैषातन्निषेधंप्रपद्ये २६ नानाभावैर्लीलयैवोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसयावर्तमानाञ्जन्मैतत्तेभारहारायभूमेः २७
तप्तोहंतेतेजसादुःसहेनशांतोग्रेणात्युल्बणेनज्वरेण ॥ तावत्तापोदेहिनांतेंघ्रिमूलंनोसेवेरन्यावदाशानुबद्धाः २८

चूर्णिका कृष्णः तां अनिरीक्ष्यमाणः सन् तिर्यङ्मुखोबभूव तावत् बाणःपुरं आविशत् २१ एवंभगवता भूतगणे विद्राविते सति शैवः ज्वरः कृष्णं अभ्यपद्यत अथ कृष्णः तंज्वरं
दृष्ट्वा शीतज्वरं असृजत् २२ ततः तौ ज्वरौ युयुधाते तदा वैष्णवेनपीडितः शैवोज्वरः भीतः सन् कृष्णं तुष्टाव २३ २४ ॥ ज्वरउवाच ॥ हेभगवन् अनंतशक्तिं त्वां
नमामि किंच कालादिकंसर्वं एषा त्वन्मायैव अतः तन्नाशकंत्वांभजे किंच एतत् तव जन्म भूमेर्भारहरणायास्ति २५ २६ २७ किंच हेविभो तवशीतज्वरेण अहंतप्तोऽ ॥५१॥
स्मियावत्तेंघ्रिमूलं नो सेवेरन् तावद्देहिनां तापो युक्तः सेवायां प्रवृत्तानांत्वनुचितइति २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

हेत्रिशिरः व्यतुअपयातु । मदाज्ञापालकःसन् सुखंसुविचर । कासावाज्ञातामाह ।यो नाविति । नौआवयोरिमंसंवादंयःस्मरेत् तस्यत्वत्त्वत्तः नभयंभवेत् । त्वयाभयंनोत्पादनीयमित्यर्थः २९ ३० ३१
३२ ३३ (अथ) भक्तरक्षणार्थंश्रीरुद्रोभगवंतंस्तौति । त्वंहीति । अयमर्थः त्वांअज्ञात्वाऽयंयुध्यतइतिनचित्रम् । यतस्त्वंवाङ्मयेब्रह्मण्यपिगूढंब्रह्मअभिधाऽविषयत्वात् । कुतःपरंज्योतिः ज्योतिषाम
.पिप्रकाशकत्वात् (अभिधाया) अविषयइत्यर्थः । कथंतर्हिप्रतीतिरित्यतआह । यमिति । अमलात्मनांस्वतःप्रकाशसेइत्यर्थः ३४ आस्तांतावन्निर्गुणस्यतवज्ञानंलीलयाधिष्ठितस्त्वयायोविराड्विग्रहःसो
पिनज्ञायतेउदुंबरफलांतर्वर्तिमशकैरिवोदुंबरफलमित्याशयेनविराड्रूपेणस्तौति द्वाभ्यांनाभिरिति । यस्यनभआदयोनाभ्याद्यवयवाः सभवाँल्लोककल्पःपुरुषइत्युत्तरेणान्वयः । नभोयस्यनाभिः । अग्नि
॥६०॥ र्मुखम् । जलंरेतः । द्यौःशीर्षं । आशादिशः श्रुतिःश्रवणेंद्रियम् । भूमिरंघ्रिः । चंद्रोमनः । अर्कोदृक् । अहंशिवःआत्माअहंकारः । समुद्रोजठरम् । इंद्रोभुजाबाहुः । इंद्रादयोलोकपालाबाहव
इत्यर्थः ३५ ओषधयोरोमाणि । यच्छब्दस्यावृत्तिःस्पष्टतार्था । अंबुवाहायस्यकेशाः । विरंच्योधिषणाबुद्धिः । प्रजापतिर्विसर्गोमेढ्रम् । धर्मोहृदयम् । लोकैःकल्प्यतेअवकल्पतेइतिलोककल्पः
३६ ननुप्रादेशिकशरीरस्यकथंनभोनाभित्वादीत्यतआह तवेति । हेअकुंठधामन् । अप्रच्युतस्वरूप । भवायाभ्युदयाय । नकेवलमेतावत् । किंतुअस्मदनुग्रहार्थमपीत्याह वयंचेति । सर्वेलोकपालास्त्वयापा
लिताः सप्तापिभुवनानिपालयामइति ३७

श्लोकाः २९—३७

॥ श्रीभगवानुवाच ॥ त्रिशिरस्तेप्रसन्नोस्मिव्येतुतेमज्ज्वराद्भयम् ॥ योनौस्मरतिसंवादंतस्यत्वन्नभवेद्भयम् २९ इत्युक्तोऽच्युतमानम्यगतोमाहेश्वरो
ज्वरः ॥ बाणस्तुरथमारूढःप्रागाद्योत्स्यन्जनार्दनम् ३० ततोबाहुसहस्रेणनानायुधधरोऽसुरः ॥ मुमोचपरमक्रुद्धोबाणांश्चक्रायुधेनृप ३१ तस्यास्यतोऽ
स्त्राण्यसकृच्चक्रेणक्षुरनेमिना ॥ चिच्छेदभगवान्बाहूञ्शाखाइववनस्पतेः ३२ बाहुषुच्छिद्यमानेषुबाणस्यभगवान्भवः ॥ भक्तानुकंप्युपव्रज्यचक्रायु
धमभाषत ३३ ॥ श्रीरुद्रउवाच ॥ त्वंहिब्रह्मपरंज्योतिर्गूढंब्रह्मणिवाङ्मये ॥ यंपश्यंत्यमलात्मानआकाशमिवकेवलम् ३४ नाभिर्नभोग्निर्मुखमंबुरेतोद्यौः
शीर्षमाशाःश्रुतिरंघ्रिरुर्वी ॥ चंद्रोमनोयस्यदृगर्कआत्माअहंसमुद्रोजठरंभुजेंद्रः ३५ रोमाणियस्यौषधयोऽम्बुवाहाःकेशाविरंच्योधिषणाविसर्गः ॥ प्रजाप
तिर्हृदयंयस्यधर्मःसवैभवान्पुरुषोलोककल्पः ३६तवावतारोयमकुंठधामन्धर्मस्यगुप्त्यैजगतोभवाय॥वयंचसर्वेभवतानुभाविताविभावयामोभुवनानिसप्त ३७

चूर्णिका

॥ श्रीभगवानुवाच ॥ हेत्रिशिरः ते प्रसन्नोस्मि ते मज्ज्वरात् भयं व्येतु यः नौ इमंसंवादंस्मरति तस्यत्वयाभयंनोत्पादनीयम् २९ इत्युक्तः शैवज्वरः अ
च्युतं नत्वा गतः बाणस्तुरथं आरूढः सन् योत्स्यन् कृष्णं अगात् ३० ततः अच्युते बाहुसहस्रेणबाणान् मुमुचे ३१ ततः कृष्णः चक्रेण तस्य बाहून् चिच्छेद ३२ तदा
भक्तानुकंपी शिवः कृष्णसमीपं एत्य तं अभाषत ३३ ॥ रुद्रउवाच ॥ त्वंपरंब्रह्मासि यस्य नभ आदयो नाभ्याद्यवयवाः सभवान्लोककल्पः पुरुषः असि ३४ ३५ ३६
विराड्रूपस्य तवायं अवतारः धर्मस्य गुप्त्यै जगतः अभ्युदयायवर्तते ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥६३॥

ननुयदिविभावयितारोयूयंविभाव्यानिभुवनानिसंतितर्हिकथमुक्तंत्वंहिब्रह्मेति नहिब्रह्मत्वेममसजातीयविजातीयभेदःसंभवतीत्यत आह । त्वमेकइति । एकः सजातीयरहितः कुतःआद्यःपुरुषःपुरुषा
णामवस्थात्रयवतामाद्यः प्रकृतिभूतःपुरुषः । कुतःतुरीयः । शुद्धइत्यर्थः । तदपिकुतः । स्वदृक्स्वप्रकाशज्ञानरूपः । शुद्धादेवह्युपाधियोगाज्जीवाजायंते । यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मा
दात्मनः । सर्वएवात्मानोव्युच्चरंतीतिश्रुतेः । अतःसजातीयरहितः । किंच । अद्वितीयःविजातीयरहितोपि । कुतःहेतुःसर्वस्य । तथास्वयंहेतुरहितश्चेति । कथंतर्हिप्रतिशरीरंजीवभेदः प्रतीयतेअत
आह । प्रतीयसइति । सर्वगुणप्रसिद्ध्यैसर्वविषयप्रकाशनाय ३८ तर्हिकिमहमेवसंसारीत्युच्यतेनहिनहीतिदृष्टांतमाह । यथैवेति । हेभूमन् स्वयाछाययामेघलक्षणयापरदृष्ट्यापिहितःछादितोपिसूर्यः
छायांमेघंचरूपाणिचमेघांतरितान्घटादीनपिसंचकास्ति । प्रकाशयति । एवंगुणेनाहंकारेणस्वकार्येणजीवावरकेणतदृष्ट्यापिहितोपिगुणान्सत्त्वादीन्उपाधीन् गुणिनश्चउपहितान्जीवानपिचका
॥६१॥ स्ति । आत्मप्रदीपः स्वप्रकाशः अतःसर्वसाक्षिणस्तवनसंसारइत्यर्थः ३९ किंच । मायाश्रयस्यान्यान्मोहयतस्तवकुतःसंसृतिरित्याशयेनाह । यन्मायेति । पुत्रादिषुप्रसक्तावृजिनार्णवेदुःखसागरेदेवा
दियोनिरूपेउन्मज्जंति । स्थावरादियोनिरूपेनिमज्जंतितदुक्तम् । वायवीये । विपर्ययश्चभवतिब्रह्मत्वस्थावरत्वयोरिति ४० एवंजीवेश्वरव्यवस्थांनिरूप्येदानीमभजंतंनिंदतिद्वाभ्यां देवेति । देवेनत्वयाक
र्माध्यक्षेणदत्तंनृदेहमिमंलब्ध्वापि (नाद्रियेतनभजेत) ४१ शोच्यत्वेहेतुः यस्त्वामिति । विपर्ययाविपरीता अनात्माप्रियाऽनीश्वराः यइंद्रियार्थाः पुत्रादयस्तदर्थं (त्वांविसृजते । अत्तिभुंक्ते) ४२ अह
मन्येचशुद्धमनसस्त्वामेवभक्ताइत्याह । अहमिति ४३ भगवतोभजनीयत्वेहेतून्वदन्तद्भक्तिंप्रार्थयते । तंत्वेति । समत्वेहेतुःप्रशांतमिति । सुसेव्यत्वमाह । सुहृदात्मदैवम् । सुहृत्बुद्धिप्रवर्तकत्वात् ।
आत्माचसर्वात्मकत्वात् । एवंभूतंदैवंईश्वरंत्वां (भवापवर्गायसंसारमोक्षायभजाम) नचान्योभजनीयोस्तीत्याह । अनन्यमेकंसमानासमानजातीयराहितं तत्कुतः जगतामात्मनांचकेतमधिष्ठानम्
४४ (एवं) स्वयंभक्तिमाशास्यस्वभक्तस्याभीष्टमाशास्ते । अयमिति । (संपद्यतांघटताम् ।) दैत्यपतौप्रह्लाद (तेतव यद्वा हितेइष्टे ।) ४५ (मेमया) ४६

श्लोकाः ३८/४६

त्वमेकआद्यःपुरुषोऽद्वितीयस्तुर्यःस्वदृग्घेतुरहेतुरीशः ॥ प्रतीयसेथापियथाविकारंस्वमाययासर्वगुणप्रसिद्ध्यै ३८ यथैवसूर्योऽपिहितःस्वच्छाययाच्छा
यांचरूपाणिचसंचकास्ति ॥ एवंगुणेनापिहितोगुणांस्त्वमात्मप्रदीपोगुणिनश्चभूमन् ३९ यन्मायामोहितधियःपुत्रदारधनादिषु ॥ उन्मज्जंतिनिमज्जंति
प्रसक्तावृजिनार्णवे ४० देवदत्तमिमंलब्ध्वानृलोकमजितेंद्रियः ॥ योनाद्रियेतत्वत्पादौसशोच्योह्यात्मवंचकः ४१ यस्त्वांविसृजतेमर्त्यआत्मानंप्रियमीश्वर
म् ॥ विपर्ययेंद्रियार्थार्थंविषमत्त्यमृतंत्यजन् ४२ अहंब्रह्माथविबुधामुनयश्चामलाशयाः ॥ सर्वात्मनाप्रपन्नास्त्वामात्मानंप्रेष्ठमीश्वरम् ४३ तंत्वाजग
त्स्थित्युदयांतहेतुंसमंप्रशांतंसुहृदात्मदैवम् ॥ अनन्यमेकंजगदात्मकेतंभवापवर्गायभजामदेवम् ४४ अयंममेष्टोदयितोऽनुवर्तीमयाऽभयंदत्तममुष्यदेव ॥
संपद्यतांतद्भवतःप्रसादोयथाहितेदैत्यपतौप्रसादः ४५ श्रीभगवानुवाच ॥ यदात्थभगवंस्त्वंनःकरवामप्रियंतव ॥ भवतोयद्व्यवसितंतन्मेसाध्वनुमोदितम् ४६

चूर्णिका ॥६१॥

३८ ३९ यन्मायामोहिताः पुत्रादिषुप्रसक्ताः दुःखसागरेउन्मज्जंतिनिमज्जंति ४० किंच इमंनृदेहंलब्ध्वा यः त्वत्पादौनाद्रियेत सः शोच्यः किंच यः ईश्वरंविसृजते सः
अमृतंत्यक्त्वा विषं अत्ति ४१ ४२ अतः अस्यविश्वस्यस्थित्यादिहेतुंत्वां भवापवर्गाय भजामइति ४३ ४४ किंच अयंबाणः ममप्रियः अस्यमया अभयंदत्तं अतः
अस्मिन् प्रसादः संपाद्यताम् ४५ ॥ श्रीभगवानुवाच ॥ हेभगवन् त्वंयत् आत्थ तत् तवप्रियंकरवाम किंच भवता यन्निश्चितं तत् मया अनुमोदितम् ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वैरोचनोवलिर्मद्भक्तस्तत्सुतत्वादयमवध्यस्तावत् । किंच । प्रह्लादायेति । अन्वयोवंशः (नवध्यइति) ४७ तर्हिकिमित्येवंकृतंतत्राह । दर्पोपशमनायेति । (प्रवृक्णाःछिन्नाः) ४८ अनुगृह्णाति
चत्वारइति । (नकुतश्चिदपिभयमस्यएतादृशोयंतवपार्षदमुख्योभविष्यति) ४९ सवध्वासहोषया (समुपानयत्पुरंप्रापितवान्) ५० रुद्रानुमोदितइति । तदभिप्रेतस्यैवबाणभुजभंगस्यकृतत्वात् ।
(सपत्नीकमनिरुद्धंपुरस्कृत्यभगवान्ययौ ।) ५१ पौरैः (सुहृद्भिर्द्विजै-)-श्चाभ्युद्यतः अभिमुखमागत्यसत्कृत (इत्यर्थः) ५२ (शंकरेणसहकृष्णस्यसंयुगंच) ५३ ॥ ॥ इतिश्रीभागवतेम
हापुराणेदशमस्कंधेटीकायांत्रिषष्टितमोध्यायः ॥ ६३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ चतुःषष्टितमेकृष्णोनृगंपापादमोचयत् । ब्रह्मस्वहारिदोषोक्त्याराज्ञोदृष्टानशिक्षयत् ॥ १ ॥ विभूतिभा
ग्यभोगादिमदोन्नद्धमनोरथान् । अन्वशासद्यदून्कृष्णोनृगोद्धारप्रसंगतः॥२॥(पौत्रंपाशबंधाद्विमुच्यबाणबाहुमदंचिच्छेदतत्प्रसंगात्सूचितंनृगस्यपापान्मोचनंराजमदच्छेदंचवक्तुमाह एकदेति)१ पिपासि
तास्तृषिताजलंविचिन्वंतःसत्त्वंजीवम् २ तंचकृकलासंवीक्ष्य ३ चर्मभिश्चर्ममयैःपाशैःतांतवैःतंतुमयैश्च ४ (सभगवान्वामेनकरेणतंलीलयोज्जहार) ५

॥६२॥

श्लोकाः

४७/५

अवध्योयंमयाप्येषवैरोचनसुतोऽसुरः ॥ प्रह्लादायवरोदत्तोनवध्योमेतवान्वयः ४७ दर्पोपशमनायास्यप्रवृक्णाबाहवोमया॥ सूदितंचबलंभूरियच्चभारा
यितंभुवः ४८ चत्वारोस्यभुजाःशिष्टाभविष्यंत्यजरामराः ॥ पार्षदमुख्योभवतोनकुतश्चिद्भयोऽसुरः ४९ इतिलब्ध्वाऽभयंकृष्णंप्रणम्यशिरसाऽसुरः ॥
प्राद्युम्निंरथमारोप्यसवध्वासमुपानयत् ५० अक्षौहिण्यापरिवृतंसुवासःस्रगलंकृतम् ॥ सपत्नीकंपुरस्कृत्यययौरुद्रानुमोदितः ५१ सराजधानींसमलंकृतां
ध्वजैःसतोरणैरुक्षितमार्गचत्वराम् ॥ विवेशशंखानकदुंदुभिस्वनैरभ्युद्यतःपौरसुहृद्द्विजातिभिः ५२ यएवंकृष्णविजयंशंकरेणचसंयुगम् ॥ संस्मरेत्प्रात
रुत्थायनतस्यस्यात्पराजयः ५३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअनिरुद्धानयनंनामत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ श्रीशुकउवाच ॥ एक
दोपवनंराजन्जग्मुर्यदुकुमारकाः ॥ विहर्तुंसांबप्रद्युम्नचारुदेष्णगदादयः १ क्रीडित्वासुचिरंतत्रविचिन्वंतःपिपासिताः ॥ जलंनिरुदकेकूपेददृशुःसत्त्वम
द्भुतम् २ कृकलासंगिरिनिभंवीक्ष्यविस्मितमानसाः ॥ तस्यचोद्धरणेयत्नंचक्रुस्तेकृपयान्विताः ३ चर्मजैस्तांतवैःपाशैर्बद्धापतितमर्भकाः ॥ नाशक्नुव
न्समुद्धर्तुंकृष्णायाचख्युरुत्सुकाः ४ तत्रागत्यारविंदाक्षोभगवान्विश्वभावनः॥वीक्ष्योज्जहारवामेनतंकरेणसलीलया ५

चूर्णिका

अयंः बाणः ममापि अवध्योस्ति यतः प्रह्लादायवरोदत्तोनवध्योमेतवान्वयइति ४७ तथापि अस्यगर्वनाशार्थंबाहवः छिन्नाः भुवः भारभूतं बलंच नाशितम् ४८ अस्य
अवशिष्टाः चत्वारो भुजाः अजरामराः भविष्यंति अयंबाणः तवपार्षदमुख्योभविष्यति४९ इति अभयंलब्ध्वा शिरसाकृष्णं प्रणम्य उषयासहप्राद्युम्निंरथं आरोप्य समुपान
यत् ५० ततः कृष्णः सपत्नीकं प्राद्युम्निपुरस्कृत्य ध्वजादिभिरलंकृतां स्वराजधानींविवेश ५१ ५२ यःप्रातः उत्थाय एवंकृष्णविजयं स्मरेत् तस्यपराजयो न
स्यात् ५३ ॥ इतिदशमेत्रिषष्टितमः ॥ ६३ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेराजन् एकदासांबप्रद्युम्नादयः यदुकुमाराः विहर्तुं उपवनंजग्मुः १ त
त्रसुचिरं क्रीडित्वा तृषिताः जलंविचिन्वंतः संतः निरुदके कूपे गिरिनिभंकृकलासं वीक्ष्य विस्मिताःसंतः कृपया तस्यउद्धरणे यत्नंचक्रुः २ ३ यदापतितंतंपाशैः ब
द्धासमुद्धर्तुं नाशक्नुवन् तदाकृष्णायआचख्युः ४ ततः कृष्णः तत्रागत्य तंवीक्ष्य लीलया वामकरेण उज्जहार ५

॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

संतप्तंचामीकरंसुवर्णंतद्वद्वर्णोयस्यसः अद्भुताअलंकारांवरस्त्रजोयस्यसस्वर्गीदेवोबभूवेति ६ (तन्निदानं तज्जन्मनःकारणमित्यर्थः । तस्यदानामितिपाठेदानशूरत्वमित्यर्थः) ७ (केनवाकर्मणासंप्रापितोसि । अतदर्हःतत्प्रापणायोग्यः । हेसुभद्र । विवित्सतांविदितुमिच्छतामित्यर्थः) यत्यदिक्षमंयोग्यम् ८ (सराजानृगः) ९ यदितेकर्णमस्पृशंइत्यसंदेहेसंदेहवचनं यदिवेदाःप्रमाणंस्युरितिवत् । कर्णपर्यंनूनंप्राप्तःस्यामित्यर्थः१०किंच । काविति । सर्वेषांभूतानांआत्मनोबुद्धेःसाक्षिणस्तेअविदितंकिंनुनकिंचिदिति ११ (भूमेःसिकताःसूक्ष्मोपलाः । असंख्यागादत्तवानित्यर्थः)१२ (ताश्चकल्पोक्ताइत्याह पयस्विनीरिति । शीलेतिशोभनवृत्तरूपलक्षणसंपन्नाइत्यर्थः । न्यायार्जिताःनीत्यासंपादितानतुबलात्) १३(गुणःसौजन्यादिः । शीलंसद्वृत्तम्) ऋतव्रतेभ्यःअदंभाचारेभ्यः । तपसाश्रुताःप्रख्याताश्चतेब्रह्मणिवदान्याःअत्युदाराःअध्यापनशीला -(- इत्यर्थः ।) तेचतेसंतश्चतेभ्यः (एतादृशेभ्यःपात्रेभ्यः) १४ (नकेवलंगावःअन्यच्चदत्तमित्याह । गोभूइति । आयतनंयज्ञियंस्थानं । नकेवलंदत्तंअपितुयज्ञैरिष्टं) पूर्तंचवापीकूपादिचरितंकृतम् १५

॥६३॥

श्लोकाः ६/१५

सउत्तमश्लोककराभिमृष्टोविहायसद्यःकृकलासरूपम् ॥ संतप्तचामीकरचारुवर्णःस्वर्ग्यद्भुतालंकरणांबरस्रक् ६ पप्रच्छविद्वानपितन्निदानंजनेषुविख्यापयितुंमुकुंदः ॥ कस्त्वंमहाभागवरेण्यरूपोदेवोत्तमंत्वागणयामिनूनम् ७ दशामिमांवाकतमेनकर्मणासंप्रापितोऽस्यतदर्हःसुभद्र ॥ आत्मानमाख्याहिविवित्सतांनोयन्मन्यसेनःक्षममत्रवक्तुम् ८ ॥ श्रीशुकउवाच ॥ इतिस्मराजासंपृष्टःकृष्णेनानंतमूर्तिना ॥ माधवंप्रणिपत्याहकिरीटेनार्कवर्चसा ९ ॥ नृगउवाच ॥ नृगोनामनरेंद्रोहमिक्ष्वाकुतनयःप्रभो ॥ दानिष्वाख्यायमानेषुयदितेकर्णमस्पृशम् १० किंतुतेऽविदितंनाथसर्वभूतात्मसाक्षिणः ॥ कालेनाव्याहतदृशोवक्ष्येथापितवाज्ञया ११ यावंत्यःसिकताभूमेर्यावंत्योदिवितारकाः ॥ यावंत्योवर्षधाराश्चतावतीरददंस्मगाः १२ पयस्विनीस्तरुणीःशीलरूपगुणोपपन्नाःकपिलाहेमशृंगीः ॥ न्यायार्जितारूप्यखुराःसवत्सादुकूलमालाभरणाददावहम् १३ स्वलंकृतेभ्योगुणशीलवद्भ्यःसीदत्कुटुंबेभ्यऋतव्रतेभ्यः ॥ तपःश्रुतब्रह्मवदान्यसद्भ्यःप्रादांयुवभ्योद्विजपुंगवेभ्यः १४ गोभूहिरण्यायतनाश्वहस्तिनःकन्याःसदासीस्तिलरौप्यशय्याः ॥ वासांसिरत्नानिपरिच्छदान्रथानिष्टंचयज्ञैश्चरितंचपूर्तम् १५

चूर्णिका

ततः श्रीकृष्णकरस्पृष्टः सः तद्रूपंसद्यः विहाय तप्तसुवर्णवर्णः देवोबभूव ६ ततः भगवान् विद्वानपिजनेषु तन्निदानं विख्यापयितुं पप्रच्छ हेमहाभागत्वं कोसि अहंत्वांदेवोत्तमं गणयानि ७ त्वं केन कर्मणा इमां दशां प्रापितः हेसुभद्र अत्र नः वक्तुं योग्यं यदिमन्यसे तर्हि आख्याहि८॥ श्रीशुकउवाच॥ इतिकृष्णेनपृष्टः राजा माधवंप्रणिपत्याह ९ ॥ नृगउवाच ॥ हेप्रभो अहं इक्ष्वाकुपुत्रः नृगोनाम राजास्मि दानिष्वाख्यायमानेषु यदितेकर्णमस्पृशम् १० किंच हेनाथ तव अविदितंकिंनु तथापितवाज्ञयावक्ष्ये ११ हेभगवन् यावंत्यः भूमेः सिकताः तथा दिवि तारकाः तथा वर्षधाराः तावंत्यः पयस्विनीः कपिलवर्णाः सवत्साः सालंकृताः गाः स्वलंकृतेभ्यः द्विजपुंगवेभ्यः अहं प्रादाम् १२ १३ १४ तथागोभूहिरण्यगृहाश्वहस्तिकन्यादासीतिलरूप्यशय्यावस्त्ररत्नरथांश्च प्रादाम् तथायज्ञैः इष्टंपूर्तंच चरितम् १५

॥६३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंवर्तमानस्यममसंकटंकिंचिदापन्नंशृण्वित्याह । कस्यचिदिति । द्विजमुख्यस्यप्रतिग्रहनिवृत्तस्य । संपृक्तामिलिताऽऽसीत् । अविदुषाब्राह्मणस्येयमित्यजानता (सादत्ता) १६ (प्रतिग्राहीचममेत्याह) १७ प्रतिग्राहिगोक्तंदातेति । स्वामिनोक्तंअपहर्तेति । अभवद्भ्रमःव्याकुलोऽभवमित्यर्थः १८ तदा (धर्मसंकटंगतेनमया) उभावपिप्रत्येकमनुनीतौप्रार्थितौ ! कथंतदाह । गवामितिसार्धेन (अनुगृह्णीतांअनुग्रहंकुरुताम् । कृच्छ्रात्संकटात्) १९ २० अपरःप्रतिग्राहीदुराग्रहोपलक्षंत्वयोक्तंअन्यदपिगवामयुतंयदि (दास्यसि) तदपिइमांविहायनेच्छामीत्युक्त्वागांत्यक्त्वाययावित्यर्थः २१ एतस्मिन्नंतरइति । इतःपूर्वपापाभावात्नेतुमसमर्थाइतिभावः (हेदेवदेवभगवन्यमेनाहंसत्रपृष्टः) २२उताहोइत्येकंपदम् । अथवा (हेनृपते) पूर्वंशुभं (भुंक्षे) नांतमितियमस्यस्वस्यवावाक्यम् । (धर्मस्यफलभूतोयोभास्वान्प्रकाशवद्बहलःस्वर्गाख्योलोकस्तस्यांतंन) पश्येपश्यामि २३ हेदेवयमपूर्वमशुभंभुंजइतिमयोक्तेसयमःपतेतिप्राह २४ २५ दुर्घटेनश्रीकृष्णदर्शनेनविस्मितःसन्आत्मनोभाग्यमभिनंदति । सत्वमिति । हेविभोसःत्वममाक्षिपथःलोचनगोचरःसन्कथंसाक्षात्प्रत्यक्षोसीत्यर्थः । किमत्राश्चर्यंतदाह । परःआत्मा । अतएवयोगेश्वरैरपिश्रुतिदृशाउपनिषत्सुचक्षुषाअमलेहृदिविभाव्यःचिंत्यः । यतोऽधोक्षजः । अक्षजमैंद्रियंज्ञानंतत्अधःअर्वागेवयस्मात्सः । यस्येहभवापवर्गोभवमोक्षोभवेत्तस्यैवभवान्अनुदृश्यःस्यात् । उरुव्यसनेनकृकलासभवदुःखेनअंधबुद्धेस्तुममैतत्दर्शनांचित्रमित्यर्थः २६

॥६४॥ श्लोकाः १६ / २६

कस्यचिद्द्विजमुख्यस्यभ्रष्टागौर्ममगोधने ॥ संपृक्ताविदुषासाचमयादत्ताद्विजातये १६ तांनीयमानांतत्स्वामीदृष्ट्वोवाचममेतिच ॥ ममेतिप्रतिग्राह्याहनृगोमेदत्तवानिति १७ विप्रौविवदमानौमामूचतुःस्वार्थसाधकौ ॥ भवान्दाताऽपहर्तेतितच्छ्रुत्वामेऽभवद्भ्रमः १८ अनुनीतावुभौविप्रौधर्मकृच्छ्रगतेनवै ॥ गवांलक्षंप्रकृष्टानांदास्याम्येषाप्रदीयताम् १९ भवंतावनुगृह्णीतांकिंकरस्याविजानतः ॥ समुद्धरतमांकृच्छ्रात्पतंतंनिरयेऽशुचौ २० नाहंप्रतीच्छेवैराजन्नित्युक्त्वास्वाम्यपाक्रमत् ॥ नान्यद्गवामप्ययुतमिच्छामीत्यपरोययौ २१ एतस्मिन्नंतरेयाम्यैर्दूतैर्नीतोयमालयम् ॥ यमेनपृष्टस्तत्राहंदेवदेवजगत्पते २२ पूर्वंत्वमशुभंभुंक्षउताहोनृपतेशुभम् ॥ नांतंदानस्यधर्मस्यपश्येलोकस्यभास्वतः २३ पूर्वंदेवाशुभंभुंजेइतिप्राहपतेतिसः ॥ तावदद्राक्षमात्मानंकृकलासंपतन्प्रभो २४ ब्रह्मण्यस्यवदान्यस्यतवदासस्यकेशव ॥ स्मृतिर्नाद्यापिविध्वस्ताभवत्संदर्शनार्थिनः २५ सत्वंकथंममाविभोक्षिपथःपरात्मायोगेश्वरैःश्रुतिदृशाऽमलहृद्विभाव्यः ॥ साक्षादधोक्षजउरुव्यसनांधबुद्धेःस्यान्मेनुदृश्यइहयस्यभवापवर्गः २६

चूर्णिका

एवंभूतस्यममकिंचित्संकटंप्राप्तंतत् शृणु कस्याचित् द्विजमुख्यस्य भ्रष्टागौः ममगोधनेमिलिता साच अविदुषामया अन्यस्मै विप्राय दत्ता १६ ततः तेननीयमानांतां दृष्ट्वातत्स्वामी ममेति तं आह प्रतिग्राही नृगोमे दत्तवान् इति आह १७ एवंविवदमानौतौविप्रौमांऊचतुः भवान्दाता वाअपहर्तेति तच्छ्रुत्वामेभ्रमः अभवत् १८ ततः मयाउभौविप्रौ प्रार्थितौ स्वामिनं प्रत्युक्तं गवांलक्षं प्रदास्यामि एषाप्रदीयताम् प्रतिग्राहिणमपिएवमुक्तं भोद्विजौनरकेपतंतंमांसमुद्धरतम् ततः स्वामी अहंनप्रतीच्छे इत्युक्त्वा गतः प्रतिग्राह्यपि तथैवोक्त्वागतः १९ २० २१ तदायाम्यैः यमलोकं अहंनीतः सन् तत्रयमेनपृष्टः २२ पूर्वंत्वं अशुभं भुंक्षे उतशुभमिति तदापूर्वं अशुभं भुंजे२३ इतिमयोक्तेसति सः पतइति प्राह तावत् अहंपतन्सन् आत्मानं कृकलासं अद्राक्षम् २४ हेकेशव तवदासस्य मे स्मृतिः अद्यापि न विभ्रष्टा २५ हे कृष्ण देवगतिंयांतमां आज्ञांदेहि २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उद्रिक्तभक्तिर्बहुधासंबोधयन् (ननुज्ञापयतिसार्धेन) देवदेवेति २७ अनुज्ञापयति अनुजानीहीति । देवलोकेपिवर्तमानस्यात्मनोमनसः संनिधिंप्रार्थयते । यत्रकापीति । त्वत्पदंआस्पदंविषयोयस्य तथाभूतंभूयादिति २८ यास्यन्नमस्यति । नमइति । सर्वभावाय सर्वस्यभावोजन्मयेनतस्मै । ब्रह्मणेकर्तृत्वेप्यविकाराय । कुतःअनंतशक्तये । अनंतामायाख्याशक्तिर्यस्यतस्मैवासुदेवायसर्वभूताश्र यायेत्युपादानत्वमुक्तम् । श्रीकृष्णायसदानंदरूपायेति । पुरुषार्थत्वमुक्तम् । "कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः । तयोरैक्यंपरंब्रह्मकृष्णइत्यभिधीयत"इतिस्मृतेः । किंच । योगानांइष्टपूर्तादिकर्म णांपतयेफलदात्रे । अयंभावः । एवंभूतंत्वांविहायगंतुमनिच्छुरपिगामिष्यामित्वद्दत्तकर्मफलभोगायेति । २९ (पश्यतासतांम्) ३० (राजन्यान्क्षत्रियान्अनुशासत्सन्सेवकजनंप्राह) ३१ मनां क्ईषदपिभुक्तंसत् अग्नेरग्निसदृशस्यतेजीयसोऽतितेजस्विनोपिदुर्जरं (आत्मानंईश्वरंमन्यंतेएतादृशामभिमानिनांदुर्जरमिति किमुतेति) ३२ (यस्याविषस्यप्रतिक्रियायतोस्तिअतस्तत्केवलंविषंनभव
॥६५॥ ति) ३३ किंचविषादपीदंघोरमित्याह हिनस्तीति । (अत्तारंभोक्तारमेवनतुतद्वंश्यान् । तर्हि) संसर्गिसंसर्गेणमारकत्वादाग्नितुल्यतास्यात् । तदपिनेत्याह । वह्निरिति । किंचसमूलमिति । वह्निर्मूला न्यवशेषयति । ब्रह्मस्वलक्षणारणिजःपापपावकःकुलंतदपिसमूलमिति ३४ दुरनुज्ञातंयथावदननुज्ञातंत्रिपूरुषंकुलंस्वयंपुत्रंपौत्रंच । प्रसह्यहठात् बलात्राजाद्याश्रयात् ३५ ये (राजानोराजल क्ष्म्याकृत्वाअंधाःसंतो) ब्रह्मस्वंअभिमन्यंतेवांछंति तेनिरयमेवाभिमन्यंतेअतोबालिशाअज्ञाआत्मपातंनप्रचक्षते (नपश्यंति) ३६ अपिच । गृह्णंतीति (हृतवृत्तीनांअतएवक्रंदतांरुदतांअश्रुबिं दवःयावतःपांसून्भुवोरजांसिस्पृशंतितावतोब्दान् । ब्रह्मस्वापहारिणोराजानःतद्वंश्याश्चकुंभीपाकेषुपच्यंत इतिद्वयोरन्वयः) ३७ ३८

श्लोकाः

देवदेवजगन्नाथगोविंदपुरुषोत्तम ॥ नारायणहृषीकेशपुण्यश्लोकाच्युताव्यय २७ अनुजानीहिमांकृष्णयांतंदेवगतिंविभो ॥ यत्रकापिसतश्चेतोभूया न्मेत्वत्पदास्पदम् २८ नमस्तेसर्वभावायब्रह्मणेऽनंतशक्तये ॥ कृष्णायवासुदेवाययोगानांपतयेनमः २९ इत्युक्त्वातंपरिक्रम्यपादौस्पृष्ट्वास्वमौलिना ॥ अनुज्ञातोविमानाग्र्यमारुहत्पश्यतांनृणाम् ३० कृष्णःपरिजनंप्राहभगवान्देवकीसुतः ॥ ब्रह्मण्यदेवोधर्मात्माराजन्याननुशिक्षयन् ३१ दुर्जरंबत ब्रह्मस्वंभुक्तमग्नेर्मनागपि ॥ तेजीयसोपिकिमुतराज्ञामीश्वरमानिनाम् ३२ नाहंहालाहलंमन्येविषंयस्यप्रतिक्रिया ॥ ब्रह्मस्वंहिविषंप्रोक्तंनास्यप्रतिविधि र्भुवि ३३ हिनस्तिविषमत्तारंवह्निरद्भिःप्रशाम्यति ॥ कुलंसमूलंदहतिब्रह्मस्वारणिपावकः ३४ ब्रह्मस्वंदुरनुज्ञातंभुक्तंहंतित्रिपूरुषम् ॥ प्रसह्यतुबलाद्भु क्तंदशपूर्वान्दशापरान् ३५ राजानोराजलक्ष्म्यांऽधानात्मपातंप्रचक्षते ॥ निरयंयेभिमन्यंतेब्रह्मस्वंसाधुबालिशाः ३६ गृह्णंतियावतःपांसून्क्रंदतामश्रु बिंदवः ॥ विप्राणांहृतवृत्तीनांवदान्यानांकुटुंबिनाम् ३७ राजानोराजकुल्याश्चतावतोऽब्दान्निरंकुशाः ॥ कुंभीपाकेषुपच्यंतेब्रह्मदायापहारिणः ३८

२७
३८

चूर्णिका

२७ २८ इत्युक्त्वातंपरिक्रम्यस्वमौलिनापादौ स्पृष्ट्वा कृष्णेन अनुज्ञातः विमानं आरुहत् २९ ३० ततः कृष्णः राज्ञः शिक्षयन् परिजनं प्राह ३१ भोजनाः ब्रह्मस्वंई षदपि अग्नेरपिदुर्जरं बत किमुतराज्ञां ३२ नाहंहालाहलंमन्येविषंयस्यप्रतिक्रिया ब्रह्मस्वंहिविषंप्रोक्तंनास्यप्रतिनिधिर्भुवि ३३ हिनस्तिविषमत्तारंवह्निरद्भिःप्रशाम्यति कुलंसमूलं दहति ब्रह्मस्वारणिपावकः ३४ ब्रह्मस्वंभुक्तंचेत् त्रिपुरुषंहंति प्रसह्यभुक्तंचेत् दशपूर्वान् दशापरान् हंति ३५ किंच हृतवृत्तीनांविप्राणांक्रंदतांसतां अश्रु बिंदवः यावतः पांसून्गृह्णंति तावतोऽब्दान् ब्रह्मस्वहारिणः कुंभीपाकेषुपच्यंते ३६ ३७ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(षष्टिसंख्यानिवर्पसहस्राणि) ३९ (ब्रह्मस्वंममोस्तु । यतोयत्) गृद्धाअभिकांक्ष्य (नृपाइहशत्रुभ्यःपराजिताराज्याद्भ्रष्टाश्चभवंति परत्रतुउद्वेजिनोभयंकराअहयःसर्पाः) ४० (हेमामकाःकृतागसं कृतापराधमपि) ४१ (अनुकालं) प्रणमेनमामि ४२ नकेवलमर्थवादविभीषिकेयं किंतुप्रत्यक्षमित्याह । ब्राह्मणार्थंइति । (अर्थोधनं) ४३ (विश्राव्यश्रावयित्वा) ४४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुःषष्टितमोध्यायः॥ ६४ ॥ ॥ ७ ॥ ॥ पंचषष्टितमेरामश्चक्रेगोकुलमागतः ॥ रममाणस्तुगोपीभिःकालिंद्याःकर्षणंमदात् ॥ १ ॥ रामस्यचरितंचित्रंकालिंद्याकर्षणादियत् । पौंड्रकांतादिकृष्णस्यपृथगुक्तमतःपरं ॥ २ ॥ १ (पितरौयशोदानंदौ) आशीर्भिरभिनंदितोबभूव । २ तदाहचिरमिति । (नेत्रैःनेत्रसंबंधिभिः) ३ गोपवृद्धांश्चविधिवदभिवंद्ययविष्ठैरभिवंदितोबभूवेत्यर्थः । अपिचयथावयइति (वयआदिनायथायोग्यंसमुपेत्यसंगमे) ४ (अथ) तेसर्वे (तंरामं) स्वेषुयादवेषुअनामयंआरोग्यंपप्रच्छुःतेचतेनपृष्टाइति ५ कृष्णेकृष्णप्राप्त्यर्थंसंन्यस्ताखिलराधसः । त्यक्तसर्वविषयाः ६ (नोऽस्मान्स्मरथकच्चित् । दारेति । दाराणांसुतानांचस्नेहोह्यन्यस्नेहंक्षिणोतीतिनापराधोभवतामितिभावः) ७ (दुर्गंद्वारकां) ८

॥६६॥ श्लोकाः ३९—८

स्वदत्तांपरदत्तांवाब्रह्मवृत्तिंहरेच्चयः ॥ षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिः ३९ नमेब्रह्मधनंभूयाद्यद्गृद्ध्वाऽल्पायुषोनृपाः ॥ पराजिताश्च्युताराज्याद्भवंत्युद्वेजिनोऽहयः ४० विप्रंकृतागसमपिनैवद्रुह्यतमामकाः ॥ घ्नंतंबहुशपंतंवानमस्कुरुतनित्यशः ४१ यथाहंप्रणमेविप्राननुकालंसमाहितः ॥ तथानमतयूयंचयोऽन्यथामेसदंडभाक् ४२ ब्राह्मणार्थोह्यपहृतोहर्तारंपातयत्यधः ॥ अजानंतमपिह्येनंनृगंब्राह्मणगौरिव ४३ एवंविश्राव्यभगवान्मुकुंदोद्वारकौकसः ॥ पावनंसर्वलोकानांविवेशनिजमंदिरम् ४४ ॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेनृगोपाख्यानंनामचतुःषष्टितमोध्यायः ६४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ बलभद्रःकुरुश्रेष्ठभगवान्रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठःप्रययौनंदगोकुलम् १ परिष्वक्तश्चिरोत्कंठैर्गोपैर्गोपीभिरेवच ॥ रामोभिवाद्यपितरावाशीर्भिरभिनंदितः २ चिरंनःपाहिदाशार्हसानुजोजगदीश्वर ॥ इत्यारोप्यांकमालिंग्यनेत्रैःसिषिचतुर्जलैः ३ गोपवृद्धांश्चविधिवद्यविष्ठैश्चाभिवंदितः ॥ यथावयोयथासख्यंयथासंबंधमात्मनः ४ समुपेत्याथगोपालान्हास्यहस्तग्रहादिभिः ॥ विश्रांतंसुखमासीनंपप्रच्छुःपर्युपागताः ५ पृष्टाश्चानामयंस्वेषुप्रेमगद्गदयागिरा ॥ कृष्णेकमलपत्राक्षेसंन्यस्ताखिलराधसः ६ कच्चिन्नोबांधवारामसर्वेकुशलमासते ॥ कच्चित्स्मरथनोरामयूयंदारसुतान्विताः ७ दिष्ट्याकंसोहतःपापोदिष्ट्यामुक्ताःसुहृज्जनाः ॥ निहत्यनिर्जित्यारिपून्दिष्ट्यादुर्गंसमाश्रिताः ८

चूर्णिका

स्वदत्तांपरदत्तांवाब्रह्मवृत्तिंहरेच्चयः षष्टिवर्षसहस्राणि विष्ठायांजायतेकृमिः ३९ अतः मेब्रह्मस्वंनभूयात् हेमामकाः कृतागसमपिविप्रं नमस्कुरुत ४० ४१ योननमेत् सः मत्तोदंडभाक्स्यात् ४२ अपहृतः विप्रार्थः हर्तारं अधः पातयति नृगंब्राह्मणगौरिव ४३ भगवान् एवंविश्राव्य निजमंदिरंविवेश ४४ ॥ इतिदशमेचतुःषष्टितमः ६४ ॥ ॥ श्रीशुकउवाच ॥ हेकुरुश्रेष्ठ सुहृद्दिदृक्षुः बलभद्रः रथं आस्थितः सन् गोकुलंययौ १ ततः गोपगोपीभिः परिष्वक्तः रामः पितरौ अभिवाद्य आशीर्भिः अभिनंद्य २ हेदाशार्ह नः चिरंपाहि इत्युक्त्वा अंकं आरोप्य आलिंग्य नेत्रोदकैः सिषिचतुः ३ ततोरामः गोपवृद्धान् नत्वाकनिष्ठैः वंदितः ४ ततोगोपालाः रामंस्वेषु आरोग्यंपप्रच्छुः ५ ६ हेरामसर्वे बांधवाः कुशलं आसतेकच्चित् यूयं नः स्मरतकिम् ७ किंच भवद्भिः कंसोहतः सुहृज्जनाः मुक्ताः रिपून्निर्जित्यदुर्गंआश्रिताः एतद्दिष्ट्या ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(मधुमद्यंतस्यधारायाः । स्त्रीभिःसमंसह) २० क्षीबोमत्तः २१ (एकंकुंडलंयस्य । वैजयंत्यामालयास्रग्वी ।) स्वेदएवप्रालेयंहिमंतेनभूषितम् (स्मितयुक्तंमुखांभोजंबिभ्रत्) २२ मत्तोयमित्यना
दृत्यानागतांआपगांनदीम् २३ आहुताआहूतायद्यस्मान्नागच्छतितस्मान्नेष्येगमयिष्यामि (शतधाशतशकलत्वमित्यर्थःकामचारिणींस्वच्छंदगामिनीं) २४ चकिताकंपिता २५ एकांशेनशेषा
टीका ख्येन २६ (भगवतस्तवपरंभावंअजानतींमांभगवांस्त्वम्) २७ (याचितःप्रार्थितःजलं) विजगाहअवगाहनंकृतवान् । २८ उत्तीर्णायनिर्गताय । असितांबरे (नीलेवाससी) । भूषणानिकुंड ॥६५॥
लादीनि (मालांच) कांतिर्ददौ । कांतिर्लक्ष्मीः । यथोक्तंवैष्णवे ।"वरुणप्रहिताचास्मैमालामम्लानपंकजाम् । समुद्राभेतथावस्त्रेनीलेलक्ष्मीरयच्छते"ति । हरिवंशेच "बलंप्रतिलक्ष्मीवाक्यम् । जातरू
पमयंचैकंकुडलंवज्रभूषणम् । आदिपद्मंचपद्माख्यंदिव्यंश्रवणभूषणम् । देवेमांप्रतिगृह्णीष्वपौराणींभूषणाक्रिया"मित्यादि २९ वसित्वापरिधाय । आमुच्यकंठेनिधाय । चंदनादिभिरालिप्तः । (वारणो
॥६८॥ हस्ती ।) ३० (अनंतवीर्यंसामर्थ्यंयस्यतस्यवीर्यं । कृष्टेनवर्त्मनासूचयतीवदृश्यते) ३१ (माधुर्यैर्विलासैराकृष्टमनसोरामस्यरमतोनिशा) एकेवएकैवयथातथायाताः ३२ ॥ ॥ इतिश्रीभागवते
महापुराणेदशमस्कंधेटीकायांयमुनाकर्षणंनामपंचषष्टितमोऽध्यायः ६५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः २०/३२

तंगंधंमधुधारायावायुनोपहृतंबलः ॥ आघ्रायोपगतस्तत्रललनाभिःपपौसमम् २० उपगीयमानचरितोवनिताभिर्हलायुधः ॥ वनेषुव्यचरत्क्षीबो
मदविह्वललोचनः २१ स्रग्व्येककुंडलोमत्तोवैजयंत्याचमालया ॥ बिभ्रत्स्मितमुखांभोजंस्वेदप्रालेयभूषितम् २२ सआजुहावयमुनांजलक्रीडार्थमीश्वरः
निजंवाक्यमनादृत्यमत्तइत्यापगांबलः ॥ अनागतांहलाग्रेणकुपितोविचकर्षह २३ पापेत्वंमामवज्ञाययन्नायासिमयाहुताम् ॥ नेष्येत्वांलांगलाग्रेणशतधाका
मचारिणीम् २४ एवंनिर्भर्त्सिताभीतायमुनायदुनंदनम् ॥ उवाचचकितावाचंपतितापादयोर्नृप २५ रामराममहाबाहोनजानेतवविक्रमम् ॥ यस्यै
कांशेनविधृताजगतीजगतःपते २६ परंभावंभगवतोभगवान्मामजानतीम् ॥ मोक्तुमर्हसिविश्वात्मन्प्रपन्नांभक्तवत्सल २७ ततोव्यमुंचद्यमुनांयाचितोभग
वान्बलः ॥ विजगाहजलंस्त्रीभिःकरेणुभिरिवेभराट् २८ कामंविहृत्यसलिलादुत्तीर्णायासितांबरे ॥ भूषणानिमहार्हाणिददौकांतिःशुभांस्रजम् २९ व
सित्वावाससीनीलेमालामामुच्यकांचनीम् ॥ रेजेस्वलंकृतोलिप्तोमाहेंद्रइववारणः ३० अद्यापिदृश्यतेराजन्यमुनाकृष्टवर्त्मना ॥ बलस्यानंतवीर्यस्यवीर्यं
सूचयतीवहि ३१ एवंसर्वानिशायाताएकेवरमतोव्रजे ॥ रामस्याक्षिप्तचित्तस्यमाधुर्यैर्व्रजयोषिताम् ३२ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेय
मुनाकर्षणंनामपंचषष्टितमोध्यायः ६५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका बलः तंगंधं आघ्राय तत्रगतः सन्स्त्रीभिःसहमादिरां पपौ २० ततःस्रग्वीमत्तः बलः जलक्रीडार्थंयमुनां आजुहाव ततः निजंवाक्यंअनादृत्य अनागतां तांहलाग्रे
ण आकृष्य आह २१ २२ २३ हेपापेमां अवज्ञायनायासि अतः हलाग्रेणत्वांशतधानेष्यामि २४ ततः यमुनाभीता तंनत्वा आह २५ हेरामतवविक्रमंनजाने ॥६८॥
अतः हेभक्तवत्सलमांमोक्तुं अर्हसि २६ २७ एवंयाचितः रामः यमुनां विसृज्यस्त्रीभिःसहजले विहृत्य बहिर्ययौ २८ २९ तदालक्ष्मीःतस्मैनीलांबरे भूषणानिमा
लांचददौ ततोरामः तैः स्वलंकृतः सन् शुशुभे ३० अद्यापियमुनाबलस्यवीर्यंसूचयतीव दृश्यते ॥३१ एवंव्रजेरमतः रामस्य सर्वाः निशाःएकनिशेवयाताः ३२
॥ इतिदशमेपंचषष्टितमः ॥ ६५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

रामस्यसंदर्शनेआदृताःसादराः ।(समत्सरमाहुःपुरस्त्रीति ।) ९ १० (जहिमतत्यजिम) ११ तांहं (युष्माभि -)-स्तद्गमनेप्रतिबंधःकिंनकृतः । तद्वाक्यविश्वासादितिचेत् । (सोपि ।) ननुविश्वासःकिमितिकृतस्तत्राहुः कथंनुताहशमिति (ताहशंप्रसिद्धंचाटुरूपंनश्रद्धीयेत श्रद्धयागृह्येतेत्यर्थः ।) वक्तृबहुत्वान्नानाविधानिवाक्यानि १२ तत्रान्या ऊचुः । कथंनुगृह्णंतीति ।(अनवस्थितात्मनश्चंचलचित्तस्य । बुधाबुद्धिमत्यः ।) अन्याऊचुः गृह्णंतिवाइति । चित्रकथस्यचित्रकथनकोविदस्य । किंच । सुंदरंस्मितंयस्मिन् । तेनावलोकनेनउच्छ्वसितःक्षुभितोयःस्मरस्तेनआतुराः (पीडिताः अतोबुधाअपितास्तद्वचःश्रद्दधतीत्यर्थः) १३ अपराऊचुः । किं नइति । कालस्तावत् तस्यचास्माकंचयात्येवकिंतुतस्यसुखेन (पुरस्त्रीसंयोगात्) अस्याकंतुदुःखेन (तद्विरहात्) एतावानेवविशेषइतिध्वनितम् १४ १५ नानाविधेष्वनुनयेषुसांत्वनेषुकोविदः (कुशलः) १६ (तत्रनंदगोकुले) मधुंचैत्रंमाधवंवैशाखं (रामोऽवात्सीत्) गोपीनांरतिमिति । श्रीकृष्णक्रीडासमयेऽनुत्पन्नरतीच्छानांअतिबालानामन्यासामित्यभियुक्तप्रसिद्धिः १७ पूर्णचंद्रस्यकलाभिर्मरीचिभिरामृष्टेउज्ज्वलेकौमुदीगंधवायुनाकुमुद्वतीगंधवातेनसेविते । यद्वा कौमुदीशब्देनचंद्रिका विकासितानिकुमुदानिलक्ष्यंतेकुमुद्गंधवातेनेत्यर्थः । (यद्वा कौमुद्यांचंद्रिकायांयोगंधयुक्तोवातस्तेन । अनेन शैत्यसौरभयोगउक्तःसेवितेइत्यनेनमांद्यंचसूचितम्) १८ वारुणी (नाम) सुधयासहोत्पन्नामदिरा (सावरुणप्रेरितासतीदेवीद्योतमानाअध्यवासयत्सुरभीचकार) १९

॥६७॥

श्लोकाः ९/१९

गोप्योहसंत्यःपप्रच्छूरामसंदर्शनादृताः ॥ कच्चिदास्तेसुखंकृष्णःपुरस्त्रीजनवल्लभः ९ कच्चित्स्मरतिवाबंधून्पितरंमातरंचसः ॥ अप्यसौमातरंद्रष्टुंसकृदप्यागमिष्यति ॥ अपिवास्मरतेस्माकमनुसेवांमहाभुजः १० मातरंपितरंभ्रातॄन्पतीन्पुत्रान्स्वसॄरपि ॥ यदर्थेजहिमदाशार्हदुस्त्यजान्स्वजनान्प्रभो ११ तानः सद्यःपारित्यज्यगतःसंच्छिन्नसौहृदः ॥ कथंनुतादृशंस्त्रीभिर्नश्रद्धीयेतभाषितम् १२ कथंनुगृह्णंत्यनवस्थितात्मनोवचःकृतघ्नस्यबुधाःपुरस्त्रियः ॥ गृह्णंतिवैचित्रकथस्यसुंदरस्मितावलोकोच्छ्वसितस्मरातुराः १३ किंनस्तत्कथयागोप्यःकथाःकथयतापराः ॥ यात्यस्माभिर्विनाकालोयदितस्यतथैवनः १४ इतिप्रहसितंशौरेर्जल्पितंचारुवीक्षितम् ॥ गतिंप्रेमपरिष्वंगंस्मरंत्योरुरुदुःस्त्रियः १५ संकर्षणस्ताःकृष्णस्यसंदेशैर्हृदयंगमैः ॥ सांत्वयामासभगवान्नानानुनयकोविदः १६ द्वौमासौतत्रचावात्सीन्मधुंमाधवमेवच ॥ रामःक्षपासुभगवान्गोपीनांरतिमावहन् १७ पूर्णचंद्रकलामृष्टेकौमुदीगंधवायुना ॥ यमुनोपवनेरेमेसेवितेस्त्रीगणैर्वृतः १८ वरुणप्रेषितादेवीवारुणीवृक्षकोटरात् ॥ पतंतीतद्वनंसर्वंस्वगंधेनाध्यवासयत् १९

चूर्णिका

ततोगोप्यः पप्रच्छुः हेराम कृष्णः सुखं आस्तेकिम् ९ तथामातापितरौस्मरतिकिम् असौपितरौद्रष्टुं आगमिष्यतिकिम् १० किंच अस्माकंसेवां अनुस्मरते किम् हेराम यदर्थेपतिपुत्रादीन् जाहिम ११ ताः नः सद्यः त्यक्त्वा गतः १२ तस्यकृतघ्नस्यवचः पुरस्त्रियः कथंगृह्णंति १३ हेगोप्यः तत्कथया नः किं अपराः कथाः कथयत यदि अस्माभिर्विना तस्यकालोयातितर्हितथैव तेनाविना अस्माकं परंतुतस्यसुखेन अस्माकंतुदुःखेनेति विशेषः १४ [illegible] १५ तदारामः कृष्णस्यसंदेशैः ताः सांत्वयामास १६ तत्रमधुमाधवौद्वौमासौवसन्सन् रामः क्षपासुस्त्रीगणैर्वृतः सन् यमुनोपवनेरेमे १७ १८ तदा वरुणप्रेषितावारुणीदेवीवृक्षकोटरात् पतंती स्वगंधेनतद्वनं अध्यवासयत् १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

षट्सुषष्टितमेकाशींगत्वाऽहन्पौंड्रकंहरिः ॥ तन्मित्रंचततोवृत्तंसुदक्षिणवधादिकम् ॥ १ ॥ (करूषाधिपतिःपौंड्रकः) १ (अत्रहेतुमाह । त्वमिति । हेकरूषाधिपते त्वंभगवान्वासुदेवोसीत्यादिना)
बालैरज्ञैःप्रस्तोभितःस्तुत्याप्रोत्साहितः (बालवदात्मानंअच्युतंमेने । दूतंचप्राहिणोत्) २ (मंदोमूढः ।) बालकृतोनृपःबालैर्नृपत्वेनक्रीडायांपरिकल्पितो (बालोयथा) ३ ४ (अहंपौंड्रकः)
५ (आहवंयुद्धम्) ६ ७ (परिहासकथामनु । नर्मोक्तिभिरिस्यर्थः) हेमूढ (चिह्नानिचक्रादीनि) उत्स्रक्ष्ये । त्वयिप्रक्षेप्स्यामियैःसहत्वमेवंविकत्थसेतेष्वपीत्यर्थः । यद्वायैःकृत्रिमैःसुदर्शनादिभि
स्त्वमेवंश्लाघसेतान्युत्स्रक्ष्येत्याजयिष्यामीत्यर्थः ८ मांशरणमेहीत्यस्योत्तरं मुखमिति (येनविकत्थसेतन्मुखंअपिधायपव्यादायेत्यर्थःअच्छाद्येतिवा) वटाःकंकादिपक्षिविशेषाः । तत्रतदाशुनांशरणमा
श्रयोभवितासि ९ (तस्यभगवतआक्षेपंभर्त्सनवचनम्) काशीमितिपौंड्रकस्यापितदामित्रपुरेऽवस्थानात् १० (द्रुतंशीघ्रम्) ११ पार्ष्णिग्राहःपृष्ठतोरक्षकः १२ १३ (वसानंपरिहितवंतम् । गरुडः
कृत्रिमोध्वजेयस्यतम् । अमूल्योऽनर्घ्योमौलिःकिरीटमाभरणंचयस्यतम् १४

॥६९॥ ॥६६॥

श्लोकाः $\frac{१}{१४}$

॥ श्रीशुकउवाच ॥ नंदव्रजंगतेरामेकरूषाधिपतिर्नृप ॥ वासुदेवोहमित्यज्ञोदूतंकृष्णायप्राहिणोत् १ त्वंवासुदेवोभगवानवतीर्णोजगत्पतिः ॥ इति
प्रस्तोभितोबालैर्मेनआत्मानमच्युतम् २ दूतंचप्राहिणोन्मंदःकृष्णायाव्यक्तवर्त्मने ॥ द्वारकायांयथाबालोनृपोबालकृतोऽबुधः ३ दूतस्तुद्वारकामेत्यस
भायामास्थितंप्रभुम् ॥ कृष्णंकमलपत्राक्षंराजसंदेशमब्रवीत् ४ वासुदेवोऽवतीर्णोहमेकएवनचापरः ॥ भूतानामनुकंपार्थंत्वंतुमिथ्याभिधांत्यज ५
यानित्वमस्मच्चिह्नानिमौढ्याद्बिभर्षिसात्वत ॥ त्यक्त्वैहिमांत्वंशरणंनोचेद्देहिममाहवम् ६ ॥ श्रीशुकउवाच ॥ कत्थनंतदुपाकर्ण्यपौंड्रकस्याल्पमेधसः ॥
उग्रसेनादयःसभ्याउच्चकैर्जहसुस्तदा ७ उवाचदूतंभगवान्परिहासकथामनु ॥ उत्स्रक्ष्येमूढचिह्नानियैस्त्वमेवंविकत्थसे ८ मुखंतदपिधायाज्ञकंकगृध्रव
टैर्वृतः ॥ शयिष्यसेहतस्तत्रभविताशरणंशुनाम् ९ इतिदूतस्तदाक्षेपंस्वामिनेसर्वमाहरत् ॥ कृष्णोपिरथमास्थायकाशीमभिजगामह १० पौंड्रकोपि
तदुद्योगमुपलभ्यमहारथः ॥ अक्षौहिणीभ्यांसंयुक्तोनिश्चक्रामपुराद्द्रुतम् ११ तस्यकाशीपतिर्मित्रंपार्ष्णिग्राहोन्वयान्नृप ॥ अक्षौहिणीभिस्तिसृभिरप
श्यत्पौंड्रकंहरिः १२ शंखार्यसिगदाशार्ङ्गश्रीवत्साद्युपलक्षितम् ॥ बिभ्राणंकौस्तुभमणिंवनमालाविभूषितम् १३ कौशेयवाससीपीतेवसानंगरुडध्वजम् ॥ अमूल्यमौल्याभरणंस्फुरन्मकरकुंडलम् १४

चूर्णिका

॥ श्रीशुकउवाच ॥ हेराजन् रामेव्रजंगतेसति पौंड्रकः अहं वासुदेवइतिदूतंकृष्णायप्राहिणोत् १ २ ३ दूतस्तुद्वारकांएत्य सभायांस्थितंकृष्णं राजसंदेशं अब्रवीत् ४
अहं वासुदेवः एक एव न चापरः अतः त्वंमिथ्याभिधात्यज ५ किंचयानि अस्मच्चिह्नानिमौढ्यात्बिभर्षि तानि त्यक्त्वा मांशरणं एहि नोचेद्युद्धंदेहि ६ ॥ श्रीशुकउवाच
॥ एवंतत्कथनं श्रुत्वा उग्रसेनादयः जहसुः ७ ततः परिहासकथांअनु दूतं कृष्णःआह हेमूढ मच्चिन्हानि त्वयि प्रक्षेप्स्यामि हेअज्ञयुद्धेहतः त्वंकंकगृध्रवटैर्वृतः सन् शुनां
शरणं भविष्यसि ८ ९ ततः दूतः तंआक्षेपं स्वामिने सर्वं अकथयत् कृष्णोपिरथंआस्थायकाशीं जगाम १० तदापौंड्रकोपि तदुद्योगंज्ञात्वा अक्षौहिणीभ्यां संयुक्तः
सन् पुरात् निश्चक्राम ११ तस्यपृष्ठतोरक्षकः काशीपतिरपि तिसृभिः अक्षौहिणीभिः अन्वयात् १२ तदा हरिः कृत्रिमवेषेण स्वसदृशं पौंड्रकं दृष्ट्वा जहास १३ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका
(आत्मनस्तुल्यवेषंनिजवेषसदृशंवेषम्) १९ (अरयःशत्रवः शक्तिरायुधविशेषः) १६ गजस्यंदनादिचतुरंगबलंअर्दितवान् । पृथक्प्रजाः (जरायुजादि-) चतुर्विधंभूतग्रामंयथायुगांताग्निरिति १७
(आयोधनंरणस्थानंअरिणाचक्रेण । चितंआचितं) आकीर्णं (अतएवोल्बणम् ।) आक्रीडनमिवकल्पांतेरुद्रस्यक्रीडास्थानमिव १८ (तेत्वयिउत्सृजामिप्रक्षिपामि । तव त्याजयिष्यामीतिवा ।)
१९ २० गिरेः (शिरः) शृंगंयथेति । (अवृश्चदच्छिनत्) २१ (पत्रिभिर्बाणैः) २२ २३ (सपौंड्रकः । हरेःस्वरूपंचाबिभ्राणः अतस्तद्रूपोऽभूत्) २४ प्रथमंकिमिदमितिपश्चाद्वक्रमितिविभा
व्यकस्यचेति संशिशियिरेसंशयंकृतवंतः २५ (काशिपतेरिदंशिरइतिनिश्चित्यमहिष्योराज्ञः ।) २६ संस्थाविधिंउत्तराक्रियांअपचितिंनिष्कृतिं (आनृण्यमितियावत्) २७ आत्मनाभिसंधायबुद्ध्याव्य
वस्य । सुदक्षिणः अत्युदारः । २८

॥७०॥ श्लोकाः १९–२८
दृष्ट्वातमात्मनस्तुल्यवेषंकृत्रिममास्थितम् ॥ यथानटंरंगगतंविजहासभृशंहरिः १५ शूलैर्गदाभिःपरिघैःशक्त्यृष्टिप्रासतोमरैः ॥ असिभिःपट्टिशैर्बाणैः
प्राहरन्नरयोहरिम् १६ कृष्णस्तुतत्पौंड्रककाशिराजयोर्बलंगजस्यंदनवाजिपत्तिमत् ॥ गदासिचक्रेषुभिरार्दयद्भृशंयथायुगांतेहुतभुक्पृथक्प्रजाः १७
आयोधनंतद्रथवाजिकुंजरद्विपत्खरोष्ट्रैररिणाऽवखंडितैः ॥ बभौचितंमोदवहंमनस्विनामाक्रीडनंभूतपतेरिवोल्बणम् १८ अथाहपौंड्रकंशौरिर्भोभोपौं
ड्रकयद्भवान् ॥ दूतवाक्येनमामाहतान्यस्त्राण्युत्सृजामिते १९ त्याजयिष्येऽभिधानंमेयत्त्वयाज्ञमृषाधृतम् ॥ व्रजामिशरणंतेद्ययदिनेच्छामिसंयुगम् २०
इतिक्षिप्त्वाशितैर्बाणैर्विरथीकृत्यपौंड्रकम् ॥ शिरोऽवृश्चद्रथांगेनवज्रेणेंद्रोयथागिरेः २१ तथाकाशीपतेःकायाच्छिरउत्कृत्यपत्रिभिः ॥ न्यपातयत्काशि
पुर्यांपद्मकोशमिवानिलः २२ एवंमत्सरिणंहत्वापौंड्रकंससखंहरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः २३ सनित्यंभगवद्ध्यानप्रध्वस्ताखिलबं
धनः ॥ बिभ्राणश्चहरेराजन्स्वरूपंतन्मयोऽभवत् २४ शिरःपतितमालोक्यराजद्वारेसकुंडलम् ॥ किमिदंकस्यवावक्त्रमितिसंशिशियिरेजनाः २५ राज्ञः
काशिपतेर्ज्ञात्वामहिष्यःपुत्रबांधवाः ॥ पौराश्चहाहताराजन्नाथनाथेतिप्रारुदन् २६ सुदक्षिणस्तस्यसुतःकृत्वासंस्थाविधिंपितुः ॥ निहत्यपितृहंतारं
यास्याम्यपचितिंपितुः २७ इत्यात्मनाभिसंधायसोपाध्यायामहेश्वरम् ॥ सुदक्षिणोर्चयामासपरमेणसमाधिना २८

चूर्णिका
१५ तदा अरयः शूलगदापरिघशक्त्यृष्टिप्रासतोमरासिपट्टिशबाणैः कृष्णं प्राहरन् १६ कृष्णस्तु पौंड्रककाशिराजयोः चतुर्विधं बलंगदासिचक्रेषुभिः अर्दयत् १७ १८
ततः पौंड्रकं आह हेपौंड्रक दूतवाक्येन भवान् यत् मां आह तानि अस्त्राणि उत्सृजामि १९ किंच त्वयामृषाधृतंमे अभिधानं त्याजयिष्ये किंच अहंयदियुद्धंनेच्छामि
तर्हिशरणं व्रजामि २० इतिक्षिप्त्वाबाणैः पौंड्रकं विरथीकृत्य चक्रेण तच्छिरः अहरत् २१ तथाकाशीपतेः शिरः बाणैः छित्वा काशिपुर्यां अपातयत् २२ एवं ससखं
पौंड्रकं हत्वा द्वारकां अविशत् २३ ततःसः पौंड्रकः हरेः रूपंबिभ्राणः तन्मयोभवत् २४ ततः राजद्वारे पतितं काशीपतेः शिरः आलोक्य जनाः किमिदं कस्यवा वक्त्रं
इतिसंशशियिरे २५ ततः काशिपतेः शिरःइतिज्ञात्वा तत्स्त्रियः पुत्राबांधवाश्च हाहताः इत्युक्त्वा प्रारुदन् २५ ततः तस्यपुत्रः सुदक्षिणः पितुः उत्तरक्रियां कृत्वा निहत्य पि ॥७०॥
तृहंतारं यास्याम्यपचितिं पितुः २७ इतिबुद्ध्या निश्चित्य सोपाध्यायः सुदक्षिणः शिवं पूजयामास २८

१ संशयिरे इति मुद्रितपु० पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका (अविमुक्तोविश्वेश्वरः) वरमदात्वृणीष्वेत्युक्तवानित्यर्थः २९ ऋत्विजंऋत्विजमिवस्वनियोगकारिणम् । 'यज्ञस्यदेवमृत्विजमि'तिश्रुतेः । (दक्षिणाग्निंपरिचर भज।) अब्रह्मण्येप्रयोजितइतिकृष्णेप्रयोजितोग्निर्विपरीतोभविष्यतीतिसूचितम् ३० अभिचरन्अभिचारंकुर्वन् व्रतीगृहीतनियमः ३१ तप्तंताम्रमिवशिखा श्मश्रूणि च यस्यसःअंगारोद्गारीणि (ज्वलदंगारान्वमंति) लोचनानियस्यसः ३२ दंष्ट्राभिःउग्रैर्भ्रुकुटीदंडैश्चकठोरंक्रूरमास्यंयस्यसः । त्रिशिखंशूलं (कंपयन्ज्वलन्ज्वालामुद्गिरन् ।) दिशःप्रदहन् (द्वारकामभ्यधावत् ।) ३४ ३५ त्राहित्राहीति आहुरितिशेषः । ३६ (साध्वसंभयम् ।) अहमवितास्मिरक्षिष्यामीति । ३७ (तस्याःकृत्यायाःप्रतिघातार्थंचक्रंप्रेषितवानित्यर्थः ।) ३८ रोदसीचप्रकाशयदितिशेषः । यद्वा स्वतेजसाखादीन्प्रति जाज्वल्यमानं अत्यर्थंप्रकाशमानमित्यर्थः) । आर्दयत्अपीडयत् । ३९ अर्दितोऽग्निर्यत्कृतवान्तदाह कृत्यानलइति । (हेनृपसकृत्यानलः प्रतिहतःसन्भग्नमुखोभूत्वायजमानमेवहंतुंनिवृत्तःप्रत्यावृत्यगतइत्यर्थः ।) सहर्त्विग्भिर्जनैश्चवर्तमानम् । अभिचर्यतेमार्यतेऽनेनेत्यभिचारः कृत्यानलः ४०

॥७१॥ ॥६६॥

श्लोकाः २९/४०

प्रीतोऽविमुक्तोभगवांस्तस्मैवरमदाद्वरः ॥ पितृहंतुर्वधोपायंसवव्रेवरमीप्सितम् २९ दक्षिणाग्निंपरिचरब्राह्मणैःसममृत्विजम् ॥ अभिचारविधानेनसचाग्निःप्रमथैर्वृतः ॥ साधयिष्यतिसंकल्पमब्रह्मण्येप्रयोजितः ३० इत्यादिष्टस्तथाचक्रेकृष्णायाभिचरन्व्रती ॥ ततोग्निरुत्थितःकुंडाद्वमूर्तिमानतिभीषणः ३१ तप्तताम्रशिखाश्मश्रुरंगारोद्गारिलोचनः ॥ दंष्ट्रोग्रभ्रुकुटीदंडकठोरास्यःस्वजिह्वया ३२ आलिहन्सृक्किणीनग्नोविधुन्वंस्त्रिशिखंज्वलन् ३३ पद्भ्यांतालप्रमाणाभ्यांकंपयन्नवनीतलम् ॥ सोभ्यधावद्वृतोभूतैर्द्वारकांप्रदहन्दिशः ३४ तमाभिचारदहनमायांतंद्वारकौकसः ॥ विलोक्यतत्रसुःसर्वेवनदाहेयथामृगाः ३५ अक्षैःसभायांक्रीडंतंभगवंतंभयातुराः ॥ त्राहित्राहित्रिलोकेशवह्नेःप्रदहतःपुरम् ३६ श्रुत्वातज्जनवैक्लव्यंदृष्ट्वास्वानांचसाध्वसम् ॥ शरण्यःसंप्रहस्याहमाभैष्टेत्यवितास्म्यहम् ३७ सर्वस्यांतर्बहिःसाक्षीकृत्यांमाहेश्वरींप्रभुः ॥ विज्ञायतद्विघातार्थंपार्श्वस्थंचक्रमादिशत् ३९ तत्सूर्यकोटिप्रतिमंसुदर्शनंजाज्वल्यमानंप्रलयानलप्रभम् ॥ स्वतेजसाखंककुभोथरोदसीचक्रंमुकुंदास्त्रमथाग्निमार्दयत् ३९ कृत्यानलःप्रतिहतःसरथांगपाणेरस्त्रौजसासनृपभग्नमुखोनिवृत्तः ॥ वाराणसींपरिसमेत्यसुदक्षिणंतंसर्त्विग्जनंसमदहत्स्वकृतोभिचारः ४०

चूर्णिका ततः शिवः प्रीतः सन् तस्मैवरं वृणीष्वेत्युक्तवान् सः पितृहंतृवधोपायंवव्रे २९ तदाशिवः आह हेसुदक्षिण त्वं ब्राह्मणैःसह अभिचारविधानेनदक्षिणाग्निंयज सः अग्निः अब्रह्मण्ये प्रयोजितश्चेत्तव संकल्पं साधयिष्यति ३० इत्यादिष्टः सुदक्षिणः तथाचक्रे ततःकुंडात् मूर्तिमान् अग्निः उत्पन्नः ततः सोऽग्निः अतिभीषणः सन् द्वारकां ययौ ३१ ३२ ३३ तंविलोक्य सर्वेद्वारकौकसः तत्रसुः ३४ ३५ ततः ते सर्वे भयातुराः संतः भगवंतंआहुः हेत्रिलोकेश पुरं प्रदहतः वह्नेः त्राहि त्राहि ३६ ततो भगवान् स्वानांभयं दृष्ट्वा प्रहस्य माभैष्ट अहंरक्षिष्यामि इत्याह ३७ ततः कृष्णः तां शैवीं कृत्यां ज्ञात्वा तन्नाशार्थं चक्रं आदिशत् ३८ तत्सूर्यकोटिप्रतिमं सुदर्शनं कृत्याग्निं अपीडयत् ३९ ततः अस्त्रौजसा प्रतिहतः कृत्यानलःकाशीं गत्वा सर्त्विक्जनं सुदक्षिणं समदहत् ४० ॥७१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(चक्रंचसमग्रांवाराणसींसमदहादित्याह । चक्रमिति ।) अट्टादिसहितांतत्राट्टामंचाः । (अट्टालकागृहविशेषाः । आपणोविपणिः । कोशोहिरण्यंहस्त्यादयःप्रसिद्धाःतेषांशालाभिःसाहिताम्) ४१ ४२ ४३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांषट्षष्टितमोध्यायः ६६ ॥ ॥ ७ ॥ ॥ सप्तषष्टितमेरामोगिरौरैवतकेमदात् । स्वैरंयुवतिभिःक्रीडन्नवधीद्द्विविदंखलम् ॥१॥कालिंदीविदारणानंतरंरामचरितंद्विविदवधादिसंगतमप्यनुक्तातत्पूर्वभावित्वेनपौंड्रकवधादिनिरूप्येदानींतदेवप्रस्तौति । भूयोहमित्यादिना। रामचरितश्रवणेच्छायामद्भुतकर्मत्वंहेतुः। तत्रचानंतत्वम् तत्राप्यप्रमेयत्वम् (प्रभुःश्रीरामोयंदन्यत्कृतवान्तस्यतदहंपुनःश्रोतुमिच्छामीति) १ नरकस्यसखेति (नरकासुरंहतवता) हरिणावैरेकारणंसुग्रीवसचिवइतितस्यमंत्रबलंमैंदस्यभ्रातेतिरामायणेऽतिप्रसिद्धत्वेन (मैंदस्य तद्भ्रातुस्तत्तुल्यत्वेन) बलाधिक्यमुक्तमिति २ सख्युर्नरकस्यापचितिमानृण्यम् । राष्ट्रस्यविप्लवोनाशोयथाभवतितथापुरादीनदहत् । (यद्वा राष्ट्रस्याविप्लवोयस्मात्ताहशंवह्निम्) ३ क्वचिदितिकदाचित्सद्विविदः मित्रहासखिहंता ४ तस्यसमुद्रस्यजलंबाहुभ्यामुत्क्षिप्यवेलायाःकूलेवर्तमानान्देशान्विप्लावयामासेति ५ (भग्नावनस्पतयोयत्रएताहशान्कृत्वा) आश्रमस्थान्वनस्पतीन्भंक्त्वेत्यर्थः । आहवनीयाद्यग्निषुमूत्रादिकृतवान् ६ (शैलैः) अप्यधात्पिदधे । पेशस्कारीभ्रमरभेदः (सयथाकीटकंकुड्यांनिधायमृदापिधत्ते ७ (विप्रकुर्वन्उपद्रवन्) ८ (स्त्रीयूथस्यमध्येवर्तमानम्) ९

श्लोकाः ४१/९

चक्रंचविष्णोस्तदनुप्रविष्टंवाराणसींसाट्टसभालयापणाम् ॥ सगोपुराट्टालककोष्ठसंकुलांसकोशहस्त्यश्वरथान्नशालाम् ४१ दग्ध्वावाराणसींसर्वांविष्णोश्चक्रंसुदर्शनम्॥भूयःपार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः४२यएनंश्रावयेन्मर्त्यउत्तमश्लोकविक्रमम्॥समाहितोवाशृणुयात्सर्वपापैःप्रमुच्यते४३॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेषट्षष्टितमोऽध्यायः ६६ ॥ राजोवाच ॥ भूयोऽहंश्रोतुमिच्छामिरामस्याद्भुतकर्मणः ॥ अनंतस्याप्रमेयस्ययदन्यत्कृतवान्प्रभुः १ ॥ श्रीशुकउवाच ॥ नरकस्यसखाकश्चिद्द्विविदोनामवानरः ॥ सुग्रीवसचिवःसोथभ्रातामैंदस्यवीर्यवान् २ सख्युःसोपचितिंकुर्वन्वानरोराष्ट्रविप्लवम् ॥ पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन् ३ क्वचित्सशैलानुत्पाट्यतैर्देशान्समचूर्णयत् ॥ आनर्तान्सुतरामेवयत्रास्तेमित्रहाहरिः ४ क्वचित्ससमुद्रमध्यस्थोदोर्भ्यामुद्धृत्यतज्जलम् ॥ देशान्नागायुतप्राणोवेलाकूलान्यमज्जयत् ५ आश्रमानृषिमुख्यानांकृत्वाभग्नवनस्पतीन् ॥ अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः ६ पुरुषान्योषितोदृप्तःक्ष्माभृद्द्रोणीगुहासुसः ॥ निक्षिप्यचाप्यधाच्छैलैःपेशस्कारीवकीटकम् ७ एवंदेशान्विप्रकुर्वन्दूषयंश्चकुलस्त्रियः ॥ श्रुत्वासुललितंगीतंगिरिंरैवतकंययौ ८ तत्रापश्यद्यदुपतिंरामंपुष्करमालिनम् ॥ सुदर्शनीयसर्वांगंललनायूथमध्यगम् ९

चूर्णिका

तदनुप्रविष्टं सुदर्शनं सर्वांकाशीं दग्ध्वा भूयः कृष्णस्य पार्श्वं उपातिष्ठत्४१ ४२ यः एनं उत्तमश्लोकविक्रमं श्रावयेत् शृणुयात् सः सर्वपापैः प्रमुच्यते ४३ ॥ इतिदशमेषट्षष्टितमः ॥ ६६ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ ॥ हेब्रह्मन् अद्भुतकर्मणः रामस्य चरितं भूयः श्रोतुं इच्छामि १ ॥ श्री शुकउवाच ॥ हेराजन् नरकस्य सखा द्विविदोनाम वानरः सख्युः आनृण्यं कुर्वन् सन् पुरग्रामाकरगोष्ठान् अदहत् २ ३ क्वचित्शैलान्उत्पाट्यतैः देशान् अचूर्णयत् ४ कदाचित्समुद्रमध्यस्थः सन् दोर्भ्यांजलं उद्धृत्य तीरेवर्तमानान् देशान् प्लावयामास ५ तथाऋषिमुख्यानां आश्रमान् भग्नवनस्पतीन् कृत्वा विष्ठामूत्रैः अग्नीन् अदूषयत् ६ तथापुरुषान्स्त्रीश्चगिरिगुहासु निक्षिप्य शैलैः पिदधे ७ एवंदेशान् अपकुर्वन्स्त्रीः दूषयन् रैवतकं गिरिंययौ ८ तत्र स्त्रीयूथगं रामंवारुणीं मदिरांपीत्वा गायंतं दृष्ट्वा९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

(वरुणप्रेषितांवारुणींमदिरांपीत्वा) प्रभिन्नंमत्तम् १० (किलकिलेतिवानरशब्दानुकरणम्) ११ जात्यास्वभावेनैवचापलंयासांताः (बलदेवस्यपरिग्रहाःस्त्रियः) १२ (तास्तरुणीः) हेलयामास अवजज्ञे । (सम्यक्सरलंमुखंआदिर्येषांदंतदर्शनादीनांतैश्च ।) निरीक्षतोनिरीक्षमाणस्य (सतः) तमनादृत्येत्यर्थः १३ (ग्राव्णाप्रस्तरेण ।) १४ (मदिरायाःकलशंगृहीत्वाहेलयामासकंपयामासेत्यर्थः । धूर्तःशठः । धृष्टःप्रगल्भः । कलशंनिर्भिद्यतंकोपयन्) योषितांवासांसि आस्फालयत्आकृष्यपाटितवान् १५ एवं (बलंकदर्थीकृत्य) विप्रचक्रेअपकृतवानित्यर्थः १६ शालंवृक्षम् १७ सुनंदेनमुसलेनाहनत्अहन्नित्यर्थः । तंवानरम् १८ (मुसलेनाहतं) मस्तिष्कंमस्तकावयवोयस्य । गैरिकयालोहितयाधातुधारया नानुचिंतयन्अगणयन् १९ (अन्यंवृक्षम् । निष्पत्रंपत्ररहितंकृत्वा) २० (एवंभग्नेभग्नेसति ।) २१ २२ (मुष्टीकृत्यबद्धमुष्टीकृत्वा । ताभ्यांबाहुभ्यां) अरूरुजत् ताडयामास २३ यादवेंद्रःसंकर्षणःक्रुद्धः सन्जत्रौकंठबाहुमूले (अभ्यर्दयदताडयत्) २४

॥७३॥ गायंतंवारुणींपीत्वामदविह्वललोचनम् ॥ विभ्राजमानंवपुषाप्रभिन्नमिववारणम् १० दुष्टःशाखामृगःशाखामारूढःकंपयन्द्रुमान् ॥ चक्रेकिलकिलाशब्दं आत्मानंसंप्रदर्शयन् ११ तस्यधार्ष्ट्यंकपेर्वीक्ष्यतरुण्योजातिचापलाः ॥ हास्यप्रियाविजहसुर्बलदेवपरिग्रहाः १२ ताहेलयामासकपिर्भ्रूक्षेपैःसंमुखादिभिः॥ दर्शयन्स्वगुदंतासांरामस्यचनिरीक्षतः १३ तंग्राव्णाप्राहरत्क्रुद्धोबलःप्रहरतांवरः॥ सवंचयित्वाग्रावाणंमदिराकलशंकपिः १४गृहीत्वाहेलयामासधूर्तस्तंकोपयन्हसन् ॥ निर्भिद्यकलशंधृष्टोवासांस्यास्फालयद्बलम् ॥ कदर्थीकृत्यबलवान्विप्रचक्रेमदोद्धतः १५ तंतस्याविनयंदृष्ट्वादेशांश्चतदुपद्रुतान् ॥ क्रुद्धो मुसलमादत्तहलंचारिजिघांसया १६ द्विविदोपिमहावीर्यःशालमुद्यम्यपाणिना ॥ अभ्येत्यतरसातेनबलंमूर्धन्यताडयत् १७ तंतुसंकर्षणोमूर्ध्निपतंतमचलोयथा ॥ प्रतिजग्राहभगवान्सुनंदेनाहनच्चतम् १८ मुसलाहतमस्तिष्कोविरेजेरक्तधारया ॥ गिरिर्यथागैरिकयाप्रहारंनानुचिंतयन् १९ पुनरन्यंसमुत्क्षिप्यकृत्वानिष्पत्रमोजसा ॥ तेनाहनत्सुसंक्रुद्धस्तंबलःशतधाच्छिनत् २० ततोन्येनरुषाजघ्नेतंचापिशतधाऽभिनत् ॥ एवंयुध्यन्भगवताभग्नेभग्नेपुनःपुनः ॥ आकृष्यसर्वतोवृक्षान्निर्वृक्षमकरोद्वनम् २१ ततोऽमुंचच्छिलावर्षंबलस्योपर्यमर्षितः ॥ तत्सर्वंचूर्णयामासलीलयामुसलायुधः २२ सबाहूतालसंकाशौमुष्टीकृत्यकपीश्वरः॥आसाद्यरोहिणीपुत्रंताभ्यांवक्षस्यरूरुजत्२३यादवेंद्रोपितंदोर्भ्यांत्यक्त्वामुसललांगले ॥जत्रावभ्यर्दयत्क्रुद्धःसोऽपतद्रुधिरंवमन् २४

श्लोकाः १०/२४

चूर्णिका

१० वानरःशाखां आरुह्य द्रुमान् कंपयन् आत्मानं दर्शयन् किलकिलाशब्दंचक्रे ११ ततः तरुण्यः तस्य कपेः धार्ष्ट्यं वीक्ष्य जहसुः १२ सः कपिः रामस्य पश्यतः सतः तासां स्वगुदं दर्शयन् ताः हेलयामास १३ ततः बलः क्रुद्धः सन् ग्राव्णातं प्राहरत् कपिः ग्रावाणं वंचयित्वा मदिराकलशं गृहीत्वा १४ तंनिर्भिद्य रामं कोपयन् योषितां वासांसि आस्फालयत् १५ एवंतस्यकपेःधार्ष्ट्यं दृष्ट्वारामः क्रुद्धः सन् तंहंतुं मुशलं हलंच आदत्त १६ ततः द्विविदोपिपाणिना शालवृक्षं उत्पाट्य बलरामं मूर्द्धनि अताडयत् १७ रामः तंवृक्षंमूर्ध्निगृहीत्वा तं कपिंमुसलेन अहनत् १८ तदाकपिः हतमस्तकावयवः सन् गैरिकया गिरिरिवशुशुभे १९ ततः अन्येन वृक्षेणरामं अहनत् रामः तंवृक्षंशतधा आच्छिनत् २० एवंयुध्यन्वनंनिर्वृक्षं अकरोत् २१ ततः कपिः बलरामोपरिशिलावर्षंअकरोत् बलः तत्सर्वं चूर्णयामास २२ ततः कपीश्वरः मुष्टिभ्यांरामवक्षसि अताडयत् २३ रामोपि क्रुद्धः सन् बाहुभ्यां कंठमूले तं पीडयामास सः रुधिरं वमन् अपतत् २४

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका टंकाः (कृत्रिमाणि) सतोयविवराणितत्सहितः २५ (जयजयनमोनमइत्यादिशब्दोदेवादीनामाकाशेआसीत् ।) २६ जगतोव्यतिकरंनाशमावहतीतितथातम् । (जनैःसंस्तूयमानः) २७ ॥
इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्तषष्टितमोध्यायः ६७ ॥ ॥ ७ ॥ ॥ अष्टषष्टितमेसांबेनिबद्धेकौरवैर्युधि । तद्विमोक्षायरामेणगजाह्वयविकर्षणम् ॥ १ ॥ रामचरित्रांतरंनि
रूपयितुमाह । दुर्योधनसुतामिति । समितिंजयःसंग्रामजित् १ २ (अस्मत्प्रसादेनोपचिताऋद्धा) नोस्माकंमहींअस्माभिर्दत्तांनतेभूपतयइतिभावः ३ यांतियास्यंति । प्राणाइंद्रियाणीवसुसंयताः
प्राणायामादिभिर्दमिताः ४ कुरुवृद्धोभीष्मःतेनानुमोदिताःतत्सहिताःषडेतेइत्यर्थः ५ (एकलएकाकी) ६ कर्णोऽग्रणीर्येषांते ७ नामृष्यत्नासहत् । यतःअचिंत्यस्यातर्क्यस्यभगवतोऽर्भोऽर्भकः । अ
चिंत्यश्चासावर्भश्चेतिवा ८ (कर्णादीन्षट्तद्रथांश्चपृथग्युगपदुत्सृष्टैस्तावद्भिःसायकैर्विव्याध ।) ९ तत्प्रपंचयति । चतुर्भिश्चतुरइत्यत्रवीप्सानुसंधेया । तत्कर्मतेसंमानितवंतः १० ११

॥७४॥ चकंपेतेनपततासटंकःसवनस्पतिः ॥ पर्वतःकुरुशार्दूलवायुनानौरिवांभसि २५ जयशब्दोनमःशब्दःसाधुसाध्वितिचांबरे ॥ सुरसिद्धमुनींद्रा श्लोकाः
णामासीत्कुसुमवर्षिणाम् २६ एवंनिहत्यद्विविदंजगद्व्यतिकरावहम् ॥ संस्तूयमानोभगवाञ्जनैःस्वपुरमाविशत् २७ ॥ ॥ इतिश्रीभागवतेमहापुरा २५
णेदशमस्कंधेसप्तषष्टितमोध्यायः ६७ ॥ ॥ ६ ॥ ॥ श्रीशुकउवाच ॥ दुर्योधनसुतांराजन्लक्ष्मणांसमितिंजयः ॥ स्वयंवरस्थामहरत्सांबो ११
जांबवतीसुतः १ कौरवाःकुपिताऊचुर्दुर्विनीतोयमर्भकः ॥ कदर्थीकृत्यनःकन्यामकामामहरद्बलात् २ बध्नीतेमंदुर्विनीतंकिंकरिष्यंतिवृष्णयः ॥ येस्मत्प्र
सादोपचितांदत्तांनोभुंजतेमहीम् ३ निगृहीतंसुतंश्रुत्वायद्येष्यंतीहवृष्णयः ॥ भग्नदर्पाःशमंयांतिप्राणाइवसुसंयताः ४ इतिकर्णःशलोभूरिर्यज्ञकेतुःसुयो
धनः ॥ सांबमारेभिरेबद्धुंकुरुवृद्धानुमोदिताः ५ दृष्ट्वानुधावतःसांबोधार्तराष्ट्रान्महारथः ॥ प्रगृह्यरुचिरंचापंतस्थौसिंहइवैकलः ६ तंतेजिघृक्षवःक्रुद्धास्तिष्ठ
तिष्ठेतिभाषिणः ॥ आसाद्यधन्विनोबाणैःकर्णाग्रण्यःसमाकिरन् ७ सोपविद्धःकुरुश्रेष्ठकुरुभिर्यदुनंदनः ॥ नामृष्यत्तदचिंत्यार्भःसिंहःक्षुद्रमृगैरिव ८ वि
स्फूर्ज्यरुचिरंचापंसर्वान्विव्याधसायकैः ॥ कर्णादीन्षड्रथान्वीरस्तावद्भिर्युगपत्पृथक् ९ चतुर्भिश्चतुरोवाहानेकैकेनचसारथीन् ॥रथिनश्चमहेष्वासांस्तस्य
तत्तेऽभ्यपूजयन् १० तंतुतेविरथंचक्रुश्चत्वारश्चतुरोहयान् ॥ एकस्तुसारथिंजघ्नेचिच्छेदान्यःशरासनम् ११

चूर्णिका पतता तेनपर्वतःचकंपे २५ ततः अंबरे पुष्पवर्षिणां सुरादीनांजयशब्दः नमःशब्दः साधुसाधु इति शब्दः अभूत् २६ एवं द्विविदं हत्वा जनैः स्तूयमानः रामः स्वपुरं
आविशत् २७ ॥ ॥ इतिदशमेसप्तषष्टितमः ६७ ॥ ॥ ६ ॥ ॥ श्रीशुकउवाच ॥ हेराजन् दुर्योधनसुतां लक्ष्मणां स्वयंवरस्थां सांबः अहरत् १ तदा कौरवाः
क्रुद्धाः संतः ऊचुः अयं दुर्विनीतः अस्मान् कदर्थीकृत्य बलात् कन्यां अहरत् २ अतः इमं बध्नीत वृष्णयः किं करिष्यंति ये अस्मद्दत्तां महीं भुंजते ३ निगृहीतं पुत्रं श्रु ॥७४॥
त्वा यदि इहएष्यंति तर्हि भग्नदर्पाः शांतिंयास्यंति ४ इति कुरुवृद्धानुमोदिताः कर्णशलभूरियज्ञकेतुसुयोधनाः सांबंबद्धुं आरेभिरे ५ ततः सांबः तान् दृष्ट्वा चापं प्रगृह्य
तस्थौ ६ ७ तेसांबं आसाद्यबाणैः समाकिरन् ८ सांबोपिचापं विस्फूर्ज्य कर्णादीन् बाणैः विव्याध ९ चतुर्भिः चतुरोवाहान् एकैकेनसारथीन् एकैकेन रथिनः विव्याध
तेषड्वीराः तस्य तत् कर्म अपूजयन् १० ततः तेचत्वारः वीराः सांबस्य चतुरो हयान् जघ्नुः एकः सारथिं जघ्ने अन्यः धनुः चिच्छेद ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एवंतमेकंसर्वेमिलित्वाविरथीकृत्यबद्धा) स्वस्य (स्वकीयस्य) दुर्योधनस्यकन्यांचनीत्वेतिशेषः १२ नारदोक्तेन (नारदस्यवचनेनतत्तस्यबंधनम्) १३ यतःकलिंनैच्छत् । अतःसांत्वयित्वा (स्वयं) जगामेति १४ (ग्रहैश्चंद्रइवब्राह्मणैर्वृतः) १५ धृतराष्ट्रंप्रतिबुभुत्सयेतिअभिप्रायजिज्ञासयेत्यर्थः १६ विधिवदभिवंद्य (अंबिकापुत्रंधृतराष्ट्रम्) १७ तमुद्धवमर्चयित्वासत्कृत्यमंगलपाणयः उपायनहस्ताः १८ (यथान्यायंयथायोग्यम् ! तेषांमध्येयेतन्महत्त्वंविदुस्ते) वृद्धाअपिप्रणेमुः १९ (शिवंकल्याणंअनामयमारोग्यंपृष्ट्वाअविक्लवंवीर्यशौर्ययुक्तमित्यर्थः ।) २० २१ यद्यूयमित्युग्रसेनवाक्यम् । मृष्येसहे । आथशुतमानीयसमर्पयेतेतिशेषः २२ वीर्यंप्रभावःशौर्यमुत्साहः बलंसत्त्वंतैरुन्नद्धंउच्छृंखलम् । कथंआत्मनःशक्तेःसमम् । अनुरूपम् २३ उपानत् पादत्राणं शिरआरोढुमिच्छति । हीनाअस्मानाज्ञापयंतीत्यर्थः २४ अस्यैवप्रपंचः । एतइतिचतुर्भिः । यौनेनपृथायाविवाहेन (तुल्यतांनीताअस्माभिरितिशेषः) २५

॥७५॥ श्लोकाः १२/२५

तंबद्ध्वाविरथीकृत्यकृच्छ्रेणकुरवोयुधि ॥ कुमारंस्वस्यकन्यांचस्वपुरंजयिनोऽविशन् १२ तच्छ्रुत्वानारदोक्तेनराजन्संजातमन्यवः ॥ कुरून्प्रत्युद्यमंचक्रुरुग्रसेनप्रचोदिताः १३ सांत्वयित्वातुतान्रामःसंनद्धान्वृष्णिपुंगवान् ॥ नैच्छत्कुरूणांवृष्णीनांकलिंकलिमलापहः १४ जगामहास्तिनपुरंरथेनादित्यवर्चसा ॥ ब्राह्मणैःकुलवृद्धैश्चवृतश्चंद्रइवग्रहैः १५ गत्वागजाह्वयंरामोबाह्योपवनमास्थितः ॥ उद्धवंप्रेषयामासधृतराष्ट्रंबुभुत्सया १६ सोभिवंद्यांबिकापुत्रंभीष्मंद्रोणंचबाह्लिकम् ॥ दुर्योधनंचविधिवद्राममागतमब्रवीत् १७ तेतिप्रीतास्तमाकर्ण्यप्राप्तंरामंसुहृत्तमम् ॥ तमर्चयित्वाभिययुःसर्वेमंगलपाणयः १८ तंसंगम्ययथान्यायंगामर्घ्यंचन्यवेदयन् ॥ तेषांयेतत्प्रभावज्ञाःप्रणेमुःशिरसाबलम् १९ बंधून्कुशलिनःश्रुत्वापृष्ट्वाशिवमनामयम् ॥ परस्परमथोरामोबभाषेऽविक्लवंवचः २० उग्रसेनःक्षितीशेशोयद्वआज्ञापयत्प्रभुः ॥ तदव्यग्रधियःश्रुत्वाकुरुध्वंमाऽविलंबितम् २१ यद्यूयंबहवस्त्वेकंजित्वाऽधर्मेणधार्मिकम् ॥ अबध्नीताथतन्मृष्येबंधूनामैक्यकाम्यया २२ वीर्यशौर्यबलोन्नद्धमात्मशक्तिसमंवचः ॥ कुरवोबलदेवस्यनिशम्योचुःप्रकोपिताः २३ अहोमहच्चित्रमिदंकालगत्यादुरत्यया ॥ आरुरुक्षुरुपानद्वैशिरोमुकुटसेवितम् २४ एतेयौनेनसंबद्धाःसहशय्यासनाशनाः ॥ वृष्णयस्तुल्यतांनीताअस्मद्दत्तनृपासनाः २५

चूर्णिका

एवंकुरवः तंसांवं विरथीकृत्य बद्धातं स्वकन्यांच गृहीत्वा स्वपुरं विविशुः १२ ततोयादवाः नारदात् तच्छ्रुत्वाक्रुद्धाः संतः कुरून् प्रतिउद्यमंचक्रुः १३ तदारामः तान्सांत्वयित्वातेषांवृष्णीनांचकलहं अनिच्छन् १४ ब्राह्मणैः कुलवृद्धैश्चसह हास्तिनपुरंजगाम १५ ततः गजाह्वयं गत्वा उपवनं आस्थितः सन् धृतराष्ट्रं प्रति उद्धवं प्रेषयामास १६ सः उद्धवः तत्रगत्वा धृतराष्ट्रादीन्नत्वारामं आगतं अब्रवीत् १७ तच्छ्रुत्वाप्रीताः संतः तं अर्चयित्वा उपायनहस्ताः रामं अभिययुः १८ ततः तेकुरवोरामं संगम्यविधिवत् संपूज्य शिरसाप्रणेमुः १९ ततःपरस्परंकुशलं अपृच्छन् अथारामः तान् बभाषे २० हेकुरवः उग्रसेनो राजा वः यत् आज्ञापयत् तत् श्रुत्वा शीघ्रंकुरुध्वं २१ यूयं बहवः अधर्मेण एकंधार्मिकंजित्वाअवध्नीत तत् बंधूनां ऐक्यकाम्ययाअहं सहे परंतुतं आनीय आशुसमर्पयत २२ एवंबलदेवस्यवचः श्रुत्वा कुरव क्रुद्धाः संतः ऊचुः २३ अहोपादरक्षा शिरः आरोढुं इच्छति इदं महच्चित्रम् २४ किंच एते अस्मद्दत्तनृपासनाः संतः अस्मदुपेक्षया चामरव्यजनशंखछत्रकिरीटासनशय्याः उपभुंजते २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच । चामरव्यजनेइति । भुंजतिउपभुंजतइत्यर्थः । अस्मदुपेक्षयाअस्माकमनाग्रहेण २६ अलमिति (सर्पाणांदत्तंक्षीरंयथादातुरेवप्रतीपंएवंदातुःप्रतीपैर्नृपलाञ्छनैश्चामरादिभिरलं) अतःपरंतान्य पहरिष्यामइत्यर्थः (येहिअस्मत्प्रसादेनसमृद्धाअस्मानाज्ञापयंतिबत) २७ (आस्तांतावदेषांकथा । इंद्रोपिकुरुभिरदत्तम्) कथमवरुंधीतस्वीकुर्यात् (शक्रोप्यस्मदनुमोदनंविनाकिंराजचिह्नान्युपभुं जीतेत्यर्थः) उरणोमेषः २८ जन्मनाबंधुभिश्चोपलक्षितयाश्रियाउन्नद्धउत्कटोमदोयेषांते । (राजकुलप्रसूत्यादायादाभिवृद्ध्यासंपदाचमत्ताइत्यर्थः) दुर्वाच्यंपरुषंवाक्यंअसभ्यादुर्जनाः २९ (अच्यु तोरामः) ३० नानाधनाभिजनादिमदैरुन्नद्धाःतेषांदंडएवप्रशमःप्रकर्षेणशमयतीतितथा । यथालगुडोदंडः ३१ ३२ (तंप्रसिद्धंमांरामम्) दुर्भाषानअवाच्यान्शब्दान् ३३ दुर्भाषणमनुस्मरतिषड्भिः नोग्रसेनइति । विभुःआज्ञापयितुंसमर्थः (यस्योग्रसेनस्याज्ञामनुवर्तितुंशीलंयेषांते) ३४ अहोधृष्टाःश्रीकृष्णमधिक्षिपंतीतिकुपितआह । सुधर्मेत्यादित्रिभिः (सुधर्मादेवसभा । येनकृष्णेन । सनृपास नयोग्योनकिल) ३५ (नरदेवस्यपरिच्छदान्छत्रचामरादीन्) ३६ मौल्युत्तमैर्मौलियुक्तैरुत्तमांगैःउत्तमैर्मौलिभिरितिवा । (मौलिःकिरीटम् । मस्तकश्रेष्ठैरितिवा) उपासितानितीर्थानियैर्योगि भिःतेषामपितीर्थं (परममुपास्यमित्यर्थः) यद्वाउपासितंसर्वैःसेवितंयत्तीर्थंगंगातस्यतीर्थत्वनिमित्तम् । किंचब्रह्माभवःश्रीश्चाहमपि (संकर्षणः) उद्वहेम । कथंभूतावयम् । यस्यकलायाअंशस्यकला अंशाः । (अस्यनृपासनंतुक्केतिकाक्कोक्तिःक्वास्ति) ३७

श्लोकाः २६/३७

चामरव्यजनेशंखमातपत्रंचपांडुरम् ॥ किरीटमासनंशय्यांभुंजत्यस्मदुपेक्षया २६ अलंयदूनांनरदेवलाञ्छनैर्दातुःप्रतीपैःफणिनामिवामृतम् ॥ येनः प्रसादोपचिताहियादवाआज्ञापयंत्यद्यगतत्रपाबत २७ कथमिंद्रोपिकुरुभिर्भीष्मद्रोणार्जुनादिभिः ॥ अदत्तमवरुंधीतसिंहग्रस्तमिवोरणः २८ ॥ श्रीशुक उवाच ॥ जन्मबंधुश्रियोन्नद्धमदास्तेभरतर्षभ ॥ आश्राव्यरामंदुर्वाच्यमसभ्याःपुरमाविशन् २९ दृष्ट्वाकुरूणांदौःशील्यंश्रुत्वाऽवाच्यानिचाच्युतः ॥ अवोचत्कोपसंरब्धोदुःप्रेक्ष्यःप्रहसन्मुहुः ३० नूनंनानामदोन्नद्धाःशांतिंनेच्छंत्यसाधवः ॥ तेषांहिप्रशमोदंडःपशूनांलगुडोयथा ३१ अहोयदून्सुसं रब्धान्कृष्णंचकुपितंशनैः ॥ सांत्वयित्वाहमेतेषांशममिच्छन्निहागतः ३२ तइमेमंदमतयःकलहाभिरताःखलाः ॥ तंमामवज्ञायमुहुर्दुर्भाषान्मानिनोऽ ब्रुवन् ३३ नोग्रसेनःकिलविभुर्भोजवृष्ण्यंधकेश्वरः ॥ शक्रादयोलोकपालायस्यादेशानुवर्तिनः ३४ सुधर्माऽऽक्रम्यतेयेनपारिजातोऽमरांघ्रिपः ॥ आनी यभुज्यतेसोसौनकिलाध्यासनार्हणः ३५ यस्यपादयुगंसाक्षाच्छ्रीरुपास्तेऽखिलेश्वरी ॥ सनार्हतिकिलश्रीशोनरदेवपरिच्छदान् ३६ यस्यांघ्रिपंकजरजोऽ खिललोकपालैर्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ॥ ब्रह्माभवोऽहमपियस्यकलाःकलायाःश्रीश्चोद्वहेमचिरमस्यनृपासनंक्व ३७

चूर्णिका

२६ अधुनायदूनां राजचिह्नैःअलम् यतः गतत्रपाः संतः यादवाः अस्मान् आज्ञापयंति २७ २८ ॥ श्रीशुकउवाच ॥ हेराजन् ते असभ्याः रामं एवं परुषंवचः आश्रा व्य पुरंअविशन् २९ एवंकुरूणांदौःशल्यंदृष्ट्वा रामः क्रुद्धः सन् अवोचत् ३० अहो अहंएतेषां शमंइच्छन् क्रुद्धान् यदून् कृष्णंच सांत्वयित्वा इहआगतः ३१ ३२ तेइमे मंदमतयः मां अवज्ञाय अवाच्यशब्दान् अब्रुवन् ३३ किंच यस्य आज्ञावर्तिनः लोकपालाः सः उग्रसेनः विभुर्नकिल किंच येनश्रीकृष्णेन पारिजातः आनीय भुज्यते यस्य पादयुगं श्रीःउपास्ते सः कृष्णः राजचिह्नार्हो नभवतिकिम् किंच यस्य अंघ्रिरजः लोकपालैः ब्रह्मादिभिश्चशिरोभिः धृतं तस्य नृपासनं क्व ३४ ३५ ३६ ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·द·उ· (कुरवस्तुशिरःशिरोरूपाःकिलेदंश्रूयते) ३८ (मत्तानांमदयुक्तानां) मत्तानामिवमद्यादिना । रूक्षाःपरुषाः । अनुशासितास्वयंदंडधरःसन् ३९ ४० (प्रहरिष्यन्पातयिष्यन्) लांगलाग्रेणदक्षि अ०
णतःप्राकारमूलेनखातेनउद्धिदार्यउत्पाट्य ४१ (जलयानंनौकातद्वदाघूर्णवलितम्) ४२ जिजीविषवइत्यक्षराधिक्यंसोढव्यम् (लक्ष्मणयासहितम्) ४३ मूढानांप्रभावानभिज्ञानांअतिक्रमंमर्यादालं
घनम् ४४ (निजाश्रयःनतुतवाप्यन्योहेतुरित्यर्थः । क्रीडनकानिक्रीडोपकरणानि) ४५ (अद्वितीयः) शेषेशयनंकरोपिशेषपर्यंकेपारिशिष्यमाणोयःसचत्वमेवेतिवा ४६ अस्मासुकोपश्चतवायमनुचितएवे
टीका त्याहुः । कोपस्तइति (हेभगवन्सत्त्वंबिभ्रतस्तव ।) स्थितिपालनेमर्यादा-(-रक्षणे) तत्परःतात्पर्यवान्कोपः । पाठांतरेसंबोधनं ४७ विश्वंकर्मकृत्यंयस्यसत्वामितिसंबोधनम् ४८ (संविग्नैर्भीतैः) ॥६८॥
वेपमानमयनंपुरंयेषांतैः ४९ (षष्टिहायनान्षष्टिवर्षवयस्कान् । द्वादशशतानिददौ) तुरंगमांश्चद्वादशायुतानि ५० ५१ सुहृद्भिःकौरवैः ५२

॥७७॥ भुंजतेकुरुभिर्दत्तंभूखंडंवृष्णयःकिल ॥ उपानहःकिलवयंस्वयंतुकुरवःशिरः ३८ अहोऐश्वर्यमत्तानांमत्तानामिवमानिनाम् ॥ असंबद्धागिरोरूक्षाःकः श्लोकाः
सहेतानुशासिता ३९ अद्यनिष्कौरवींपृथ्वींकरिष्यामीत्यमर्षितः ॥ गृहीत्वाहलमुत्तस्थौदहन्निवजगत्त्रयम् ४० लांगलाग्रेणनगरमुद्विदार्यगजाह्वयम् ॥
विचकर्षसगंगायांप्रहरिष्यन्नमर्षितः ४१ जलयानमिवाघूर्णंगंगायांनगरंपतत् ॥ आकृष्यमाणमालोक्यकौरवाजातसंभ्रमाः ४२ तमेवशरणंजग्मुः ३८/५२
सकुटुंबाजिजीविषवः ॥ सलक्ष्मणंपुरस्कृत्यसांबंप्रांजलयःप्रभुम् ४३ रामरामाखिलाधारप्रभावंनविदामते ॥ मूढानांनःकुबुद्धीनांक्षंतुमर्हस्यतिक्रमम्
४४ स्थित्युत्पत्त्यप्ययानांत्वमेकोहेतुर्निजाश्रयः॥ लोकान्क्रीडनकानीशक्रीडतस्तेवदंतिहि ४५ त्वमेवमूर्ध्नीदमनंतलीलयाभूमंडलंबिभर्षिसहस्रमूर्धन् ॥
अंतेचयःस्वात्मनिरुद्धविश्वःशेषेऽद्वितीयःपरिशिष्यमाणः ४६ कोपस्तेऽखिलशिक्षार्थंनद्वेषान्नचमत्सरात् ॥ बिभ्रतोभगवन्सत्त्वंस्थितिपालनतत्परः ४७
नमस्तेसर्वभूतात्मन्सर्वशक्तिधराव्यय ॥ विश्वकर्मन्नमस्तेस्तुत्वांवयंशरणंगताः ४८ ॥ श्रीशुकउवाच ॥ एवंप्रपन्नैःसंविग्नैर्वेपमानायनैर्बलः ॥ प्रसादि
तःसुप्रसन्नोमाभैष्टेत्यभयंददौ ४९ दुर्योधनःपारिबर्हंकुजरान्षष्टिहायनान् ॥ ददौचद्वादशशतान्ययुतानितुरंगमान् ५० रथानांषट्सहस्राणिरौक्माणां
सूर्यवर्चसाम् ॥ दासीनांनिष्ककंठीनांसहस्रंदुहितृवत्सलः ५१ प्रतिगृह्यतुतत्सर्वंभगवान्सात्वतर्षभः ॥ ससुतःसस्नुषःप्रायात्सुहृद्भिरभिनंदितः ५२

चूर्णिका किंच वृष्णयः कुरुभिर्दत्तं भूखंडं भुंजते वयं वृष्णयः उपानहः कुरवः शिरः ३८ अहो एवं मत्तानां रूक्षाः गिरः कः सहेत ३९ इत्युक्त्वा अद्य निष्कौरवीं पृथ्वीं करि
ष्यामीति क्रुद्धः सन् हलंगृहीत्वा उत्तस्थौ ४० ततः हलाग्रेणपुरं उत्पाट्य गंगायांविचकर्ष ४१ तदा कौरवाः जातसंभ्रमाः संतः ४२ लक्ष्मणयासह सांबंपुरस्कृत्य
तमेव शरणंजग्मुः ४३ हेरामहेराम तवप्रभावंनविदाम मूढानांनः अपराधंक्षंतुं अर्हसि ४४ किंच हेराम अस्यजगतः स्थित्यादीनां त्वमेव हेतुः ४५ किंच हे अनंत
इदंभूमंडलं लीलया त्वमेवमूर्ध्निबिभर्षि ४६ तवकोपः अखिलशिक्षार्थं अस्ति ४७ हेविश्वकर्मन् तेनमोस्तु त्वांवयं शरणंगताः ४८ ॥ श्रीशुकउवाच ॥ एवं प्रपन्नैस्तैः ॥७७॥
प्रसादितः रामः माभैष्टेत्यभयंददौ ४९ तदादुर्योधनः कुंजरान् द्वादशशतानि अश्वान् द्वादशायुतानि रथान् षट्सहस्राणि दासीः सहस्रं एवंपारिबर्हंददौ ५१ ततोरामः
तत्सर्वंप्रतिगृह्य ससुतः सस्नुषः प्रायात् ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥७८॥

मध्येसभायांसभामध्ये ५३ (एतद्गजाह्वयम् । दक्षिणतोनिखातेनहलेनकृष्टत्वात्तत्रोन्नतमद्यापिगंगायामनुदृश्यते) ५४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांरामविजयोनामाष्टषष्टितमोऽध्यायः ६८ ॥ ॥ ७ ॥ ॥ एकोनसप्ततितमेगार्हस्थ्यंप्रतिमंदिरम् ॥ कृष्णस्यनारदोदृष्ट्वाविस्मितोऽगात्ततःस्तुवन् ॥ १ ॥ (तदेकेनानेकस्त्रीणामुद्वहनंतल्लक्षणंगार्हस्थ्यंद्रष्टुमिच्छुरित्यर्थः १ दिदृक्षामभिनयेनाह चित्रमिति (पृथग्गृहेषुएकदैव) षोडशसहस्रस्त्रीःउदावहत्परिणीतवान् (एतच्चित्रंबत) २ तांद्वारवतीमनुवर्णयतिसार्धत्रयेण (पुष्पितेति) पुष्पितेषुवनेष्वारामेषुच द्विजानां (कोकिलादीनां) अलीनांकुलानितैर्नादिताम् (अत्रारामोपवनयोरवांतरभेदः । तत्रारामाउद्यानानीतिज्ञेयम्) ३ (उत्फुल्लैरिंदीवरादिभिः) छुरितेषुव्याप्तेषु । (तत्रेंदीवरंनीलमुत्पलम् । अंभोजंदिनविकाशिपद्ममात्रम् । कल्हारंसंध्याविकाशिशुक्लसरोजम् । कुमुदंशुभ्रमुत्पलम् । उत्पलंतुरक्तकुमुदमितिभेदः) ४ (स्फाटिकैःराजतैश्च) महामरकतैःप्रख्यायंतैप्रकाशंतइतितथातैः (च प्रासादानांलक्षैर्जुष्टाम् । कथंभूतैः।) स्वर्णरत्नमयाःपरिच्छदाःपरिकरायेषुतैः५ (विभक्तैरथ्यापथैश्चत्वरोपलक्षितैरापणैश्चरुचिरांमनोहराम् । संसिक्ताश्चंदनोदकादिनामार्गाअंगणादयश्चयस्यास्ताम्) पतंत्यःप्रचलंत्यःपताकायेषुतैर्ध्वजैर्वारितआतपोयस्यांताम् ६ तस्यांद्वारकायांसर्वैर्धिष्ण्यपैर्लोकपालैरर्चितं (त्वष्ट्राविश्वकर्मणासाकल्येनस्वशिल्पंयत्रदर्शितम् ।) ७ (यत्रस्थितैः) षोडशभिःसद्मसहस्रैःसमलंकृतंतादृशंहरेरंतःपुरं । (नारदो) विवेश। तत्रचतस्यशौरेःपत्नीनांभवनेषुमहदेकतमंभवनंविवेशेत्यन्वयः यत्रस्वकौशलंत्वष्ट्रादर्शितमितिभवनस्यापिविशेषणंज्ञेयम् ८

श्लोकाः

ततःप्रविष्टःस्वपुरंहलायुधःसमेत्यबंधूननुरक्तचेतसः ॥ शशंससर्वंयदुपुंगवानांमध्येसभायांकुरुषुस्वचेष्टितम् ५३ अद्यापिचपुरंह्येतत्सूचयद्रामविक्रमम् ॥ समुन्नतंदक्षिणतोगंगायामनुदृश्यते ५४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेरामविजयोनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ ॥ ७ ॥
॥ श्रीशुकउवाच ॥ ॥ नरकंनिहतंश्रुत्वातथोद्वाहंचयोषिताम् ॥ कृष्णेनैकेनबह्वीनांतद्दिदृक्षुःस्मनारदः १ चित्रंबतैतदेकेनवपुषायुगपत्पृथक् ॥ गृहेषुद्व्यष्टसाहस्रंस्त्रियएकउदावहत् २ इत्युत्सुकोद्वारवतींदेवर्षिर्द्रष्टुमागमत् ॥ पुष्पितोपवनारामद्विजालिकुलनादिताम् ३ उत्फुल्लेंदीवरांभोजकह्लारकुमुदोत्पलैः ॥ छुरितेषुसरस्सूच्चैःकूजितांहंससारसैः ४ प्रासादलक्षैर्नवभिर्जुष्टांस्फाटिकराजतैः ॥ महामरकतप्रख्यैःस्वर्णरत्नपरिच्छदैः ५ विभक्तरथ्यापथचत्वरापणैःशालासभाभीरुचिरांसुरालयैः ॥ संसिक्तमार्गांगणवीथिदेहलींपतत्पताकध्वजवारितातपाम् ६ तस्यामंतःपुरंश्रीमदर्चितंसर्वधिष्ण्यपैः ॥ हरेःस्वकौशलंयत्रत्वष्ट्राकार्त्स्न्येनदर्शितम् ७ यत्रषोडशभिःसद्मसहस्रैःसमलंकृतम् ॥ विवेशैकतमंशौरेःपत्नीनांभवनंमहत् ८ ५३/८

चूर्णिका

ततः स्वपुरं प्रविष्टः सन् बंधून् समेत्यसभामध्ये स्वचेष्टितं शशंस ५३ अद्यापि एतत् पुरं रामविक्रमं सूचयत् गंगायांदक्षिणतःउन्नतं अनुदृश्यते ५४ ॥ इतिदशमेऽष्टषष्टितमः ६८ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेराजन् नरकंनिहतं श्रुत्वा तथा एकेन कृष्णेन बह्वीनांयोषितां विवाहंच श्रुत्वा एकेनवपुषा युगपत् पृथग्गृहेषुषोडशसहस्रास्त्रियः कथंपरिणीतवान् एतत् चित्रं द्रष्टुं नारदः सर्वशोभाढ्यां द्वारकां अगात् १ २ ३ ४ ५ ६ ७ तस्यांषोडशसहस्रगृहैः समलंकृतं श्रीकृष्णस्य गृहंविवेश तत्रहरेः पत्नीनां भवनेषुमध्ये एकतमंगृहं विवेश ८ ॥७८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदनुवर्णयतिचतुर्भिः । विष्टब्धमिति । विद्रुमस्तंभैर्विष्टब्धंविधृतंवैदूर्यमयानिफलकोत्तमानिस्तंभाश्रयाणिछादनानितैः । इंद्रनीलमयैःकुड्यैर्भित्तिभिःइंद्रनीलमय्याजगत्याभूमिकयाचोपलक्षितम् । नहता
त्विट्कांतिर्यस्यास्तया ९ मुक्तादाम्नांविलंबाःविविधानिलंबनानिविद्यंतेयेषुतैः (उल्लोचैःतथा) मण्युत्तमैःपरिष्कृतैर्भूषितैः (दांतैर्गजदंतमयैरासनःपर्यंकैश्चोपलक्षितम् ।) १० (शोभनानिकं
चुकादीनियेषांतैःपुंभिश्चालंकृतम्) ११ (अक्षैर्जालरंध्रैर्निर्यातंधूमं) ईक्ष्यसमीक्ष्यघनोमेघोयमितिबुद्धिर्येषांते (उच्चैर्नदंतोविचित्रपटलप्रांतेषुनृत्यंति । रत्नान्येवप्रदीपनिकरास्तेषांदीप्तिभिः) १२
(तस्मिन्भवने) अनुसवंसर्वकालंआत्मनासमानानिगुणरूपवयांसिसुवेषोलंकारश्चयस्यतेनदासीसहस्रेणयुतया (चमरव्यजनेपरिवीजयंत्या) गृहिण्या (रुक्मिण्या) सह (यदुपतिंददर्श) १३
(तंसहसासंनिरीक्ष्य) श्रियारुक्मिण्याःपर्यंकतः (उत्थितःकिरीटयुक्तेनशिरसानत्वा) अवीविशत्उपवेशयामास १४ अबिभ्रत् अविभः दधारेत्यर्थः । बिभ्रदितिशत्रंतंवा । तदाचसंपूज्याभिभाष्यच
॥७९॥ प्राहेत्युत्तरेणान्वयः कथंभूतःयस्यचरणशौचंगंगाअशेषतीर्थंसः (विश्वंपावयतीत्यर्थः) अतएवजगद्गुरुतरोपिसतांधर्मभृतां (पतिर्हि) पतित्वादेवमकरोदित्यर्थः । सतांपतित्वेहेतुः । ब्रह्मण्यदेवइति
यद्गुणकृतंनामतत्तस्यैवयतोयुक्तंसमंजसम् । अतस्तद्धर्मप्रवर्तनायैवमाचरणमित्यर्थः । (उक्तंचगीतासु । " यद्यदाचरतिश्रेष्ठ "इत्यादि। ब्रह्मणिसाधवोब्रह्मण्यास्तेषांदेवः ब्रह्मण्यश्चासौदेवइतिवा) १५
(ऋषिःसर्वज्ञोवेदस्यद्रष्टानारायणोवेदोक्तेनविधिनानारदंसंपूज्य) अभिभाष्यदिष्ट्यात्वदागमनमित्यादिप्रियमुक्त्वा (हेप्रभोभगवतेतुभ्यंकिंकरवामेतिअमृतवन्मिष्टयास्वाद्वयाप्राह) १६ भगवतास्व
स्याहणमनर्हंमन्यमानस्तत्संभावयन्नाह । नैवेति । (हेविभोत्वय्येतन्नवाद्भुतम् । यतस्तवसकलेषुजनेषुमैत्री) सर्वत्रमित्रत्वादेवमर्हणम् । नतुममगौरवात् । तर्हिकथंकंसादिष्वमैत्रीतत्राह । खलानांदमश्चनै
वाद्भुतमिति । कुतः । जगतःस्थितिर्धारणंरक्षणंपालनंताभ्यांसहतस्यानिःश्रेयसाय (मोक्षाय) तवायंस्वेच्छावतारःइतिवयंसुष्ठुसम्यक् (विदाम) विद्मःअतःखलदमःसाधुसंमाननंचयुक्तमितिभावः १७

श्लोकाः

विष्टब्धंविद्रुमस्तंभैर्वैदूर्यफलकोत्तमैः ॥ इंद्रनीलमयैःकुड्यैर्जगत्याचाहतत्विषा ९ वितानैर्निर्मितैस्त्वष्ट्रामुक्तादामविलंबिभिः ॥ दांतैरासनपर्यंकैर्मण्युत्तम
परिष्कृतैः १० दासीभिर्निष्ककंठीभिःसुवासोभिरलंकृतम् ॥ पुंभिःसकंचुकोष्णीषसुवस्त्रमणिकुंडलैः ११ रत्नप्रदीपनिकरद्युतिभिर्निरस्तध्वांतंविचित्रव
लभीषुशिखंडिनोंग ॥ नृत्यंतियत्रविहितागुरुधूममक्षैर्निर्यांतमीक्ष्यघनबुद्धयउन्नदंतः १२ तस्मिन्समानगुणरूपवयःसुवेषदासीसहस्रयुतयाऽनुसवंगृहि
ण्या ॥ विप्रोददर्शचमरव्यजनेनरुक्मदंडेनसात्वतपतिंपरिवीजयंत्या १३ तंसंनिरीक्ष्यभगवान्सहसोत्थितःश्रीपर्यंकतःसकलधर्मभृतांवरिष्ठः ॥ आनम्य
पादयुगलंशिरसाकिरीटजुष्टेनसांजलिरवीविशदासनेस्वे १४ तस्यावनिज्यचरणौतदपःस्वमूर्ध्नाबिभ्रज्जगद्गुरुतरोपिसतांपतिर्हि ॥ ब्रह्मण्यदेवइतियद्गुणना
मयुक्तंतस्यैवयच्चरणशौचमशेषतीर्थम् १५ संपूज्यदेवऋषिवर्यमृषिःपुराणोनारायणोनरसखोविधिनोदितेन ॥ वाण्याभिभाष्यमितयामृतमिष्टयातंप्राहप्र
भोभगवतेकरवामहेकिम् ॥ १६ नारदउवाच ॥ नैवाद्भुतंत्वयिविभोऽखिललोकनाथेमैत्रीजनेषुसकलेषुदमःखलानाम् ॥ निश्रेयसायहिजगत्स्थिति
रक्षणाभ्यांस्वैरावतारउरुगायविदामसुष्ठु १७

$\frac{९}{१७}$

चूर्णिका

९ १० ११ १२ ततो नारदः तस्मिन्गृहेव्यजनेनपरिवीजयंत्यारुक्मिण्यासह श्रीकृष्णं ददर्श १३ ततो भगवान् तंनारदं वीक्ष्य श्रीपर्यंकात् उत्थाय तं शिरसा प्रणम्य
सांजलिः सन् स्वे आसने उपवेशयामास १४ ततः भगवान् तच्चरणौप्रक्षाल्य १५ तंसंपूज्याह हेब्रह्मन् वयं तव किंकरवाम १६ ॥ श्रीनारदउवाच ॥ हेविभो अयंते
अवतारः जगतः निःश्रेयसाय अस्ति अतः खलानांदमः साधुसंमाननंच युक्तम् १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यदुक्तंप्रभोकिंकरवामेति । तत्राह । दृष्टमिति । भक्तजनतायाअपवर्गरूपं किंच अतिदुर्लभतयाब्रह्मादिभिर्योगेश्वरैरपिहृदिविचिंत्यम् । किंच संसारकूपेपतितानामुत्तरणायावलंबंआश्रयंएवंभू
तंतवांघ्रियुगलंमयादृष्टंअतःकृतकृत्योस्मितथापित्वत्स्मृतिर्यथास्यात्तथानुगृहाणेतिततस्तद्ध्यायन्नेवनित्यंचरामीति १८ (योगेश्वराब्रह्मादयस्तेषामीश्वरस्यहरेर्योगमायांवेदितुमिच्छया) १९ अक्षै
र्दीव्यंतमित्यादौददर्शेतिज्ञातव्यम् । (प्रिययाउद्धवेनचसहदीव्यंतम् । तत्रापिमुनिःपूजितः) २० (अविदुषाअजानतेवपृष्टश्च) २१ (अथापिपूर्णत्वेपिअस्मज्जन्मसाफल्यायकामपिसे
वांब्रूहीत्यर्थः) २२ (मज्जनायस्नानायअपश्यद्ददर्श) २३ वितानाग्नीनाहवनीयादीन्अग्निहोत्रेण (क्वचिज्जुह्वतम् । क्वापि) पंचभिर्मखैर्महायज्ञैर्यजंतम् । (क्वापिद्विजान्भोजयंतम् । द्विजेभ्यः
समर्प्यावशेषितम्) २४ (वाग्यतंवाचंनियम्येत्यर्थःब्रह्मगायत्रीं । असिवर्मसुखड्गर्गतिषुतदनुसारंचरंतमित्यर्थः) २५ २६ (वारमुख्याबलाभिर्गणिकाभिर्वृतम्) २७ (मंगलानिरामायणादीनि)
२८ २९ (कामैःकाम्यमानैःभोगैःपादसंवाहनादिभिःशुश्रूषंतम) ३०

श्लोकाः १८/३०

दृष्टंतवांघ्रियुगलंजनतापवर्गंब्रह्मादिभिर्हृदिविचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबंध्यायंश्चराम्यनुगृहाणयथास्मृतिःस्यात् १८ ॥ श्रीशुकउवा
च ॥ ततोऽन्यदाविशद्गेहंकृष्णपत्न्याःसनारदः ॥ योगेश्वरेश्वरस्यांगयोगमायाविवित्सया १९ दीव्यंतमक्षैस्तत्रापिप्रिययाचोद्धवेनच ॥ पूजितःपरयाभक्त्या
प्रत्युत्थानासनादिभिः २० पृष्टश्चाविदुषेवासौकदाऽऽयातोभवानिति ॥ क्रियतेकिंनुपूर्णानामपूर्णैरस्मादादिभिः २१ अथापिब्रूहिनोब्रह्मन्जन्मैतच्छो
भनंकुरु ॥ सतुविस्मितउत्थायतूष्णीमन्यदगाद्गृहम् २२ तत्राप्यचष्टगोविंदंलालयंतंसुतान्शिशून् ॥ ततोन्यस्मिन्गृहेऽपश्यन्मज्जनायकृतोद्यमम् २३
जुह्वतंचवितानाग्नीन्यजंतंपंचभिर्मखैः ॥ भोजयंतंद्विजान्क्वापिभुंजानमवशेषितम् २४ क्वापिसंध्यामुपासीनंजपंतंब्रह्मवाग्यतम् ॥ एकत्रचासिचर्मभ्यांच
रंतमसिवर्त्मसु २५ अश्वैर्गजैरथैःक्वापिविचरंतंगदाग्रजम् ॥ क्वचिच्छयानंपर्यंकेस्तूयमानंचबंदिभिः २६ मंत्रयंतंचकस्मिंश्चिन्मंत्रिभिश्चोद्धवादिभिः ॥
जलक्रीडरतंक्वापिवारमुख्याबलावृतम् २७ कुत्रचिद्द्विजमुख्येभ्योददतंगाःस्वलंकृताः ॥ इतिहासपुराणानिशृण्वंतंमंगलानिच २८ हसंतंहास्यकथ
याकदाचित्प्रिययागृहे ॥ क्वापिधर्मंसेवमानमर्थकामौचकुत्रचित् २९ ध्यायंतमेकमात्मानंपुरुषंप्रकृतेःपरम् ॥ शुश्रूषंतंगुरून्क्वापिकामैर्भोगैःसपर्यया ३०

चूर्णिका

हहेरे तव अंघ्रियुगुलं दृष्टं अतः कृतकृत्योस्मि १८ ॥ श्रीशुकउवाच ॥ ततोनारदः अन्यत् गेहंप्राविशत् १९ तत्रापि स्त्रियाउद्धवेनचसह अक्षैः क्रीडंतं ददर्श ततः
तेनभक्त्या पूजितः २० हेनारद त्वं कदा आयातः इतिपृष्टः किंच अपूर्णैः अस्मदादिभिः पूर्णानां वः किंकर्तव्यम् २१ तथापिनः जन्मशोभनंकुरु ततः तूष्णीमुत्थाय अ
न्यत्गेहं अगात् २२ तत्रापिशिशून् लालयंतं गोविंदं अचष्ट ततोन्यस्मिन्गृहे स्नानाय उद्युक्तं अपश्यत् २३ कुत्रचित् वितानाग्नीन् जुह्वतं० कुत्रचित् पंचमहायज्ञैः
यजंतंकुत्रचिन्द्विजान्भोजयंतं कुत्रचित् अवशेषितं भुंजानं२४कुत्र० संध्यांउपासीनं कुत्र० ब्रह्मजपंतं कुत्र० असिवर्मसुखड्गचर्माभ्यांचरंतं२५कुत्र० अश्वादिभिश्चरंतं कुत्र
पर्यंकेशयानं कुत्रचित् वंदिभिस्तूयमानं२६क० उद्धवादिभिः मंत्रयंतं कु० जलक्रीडारतं २७ कु० द्विजेभ्यःगाः ददंतं कु० इतिहासपुराणाणिशृण्वंतं २८ कु० हास्य
कथयाहसंतं क्वापि धर्मसेवमानं क्वापि अर्थकामौसेवमानम् २९ कु० परंपुरुषंध्यायंतं कु० गुरून् शुश्रूषयंतं ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥६९॥

(विग्रहंकलहंसंधिंसाम) ३१ कालेयोग्यसमयेविधिनाउपयापनंविवाहमित्यर्थः (पुत्रादीनांसदृशैर्योग्यैः) कल्पयंतंघटयंसंविभूतिभिर्विभवैः (विभवानुसारेणेत्यर्थः) ३२ प्रस्थापनंदुहितृजामात्रादी
नांस्वगृहात्तत्तद्गृहंप्रतिनयनं । उपानयनंतत्तद्गृहात्पुनरानयनंतैर्महोत्सवान् कल्पयंतंयोगेश्वरेशस्य (तत्कर्तृकानित्यर्थः) येषामपत्यानांमहोत्सवान्वीक्ष्यलोकाःसर्वेविसिस्मिरेविस्मयंचक्रुःतथाभूतान्
(तेषां) कल्पयंतं (ददर्शेति) ३३ (कूपादीनांनिर्माणैःपूर्तयंतंधर्मपूर्तलक्षणंधर्मंकुर्वंतमित्यर्थः स्वांशभूतान्देवान्यजंतंइष्टलक्षणंधर्ममाचरंतमित्यर्थः) ३४ (सैंधवंसिंधुदेशोद्भवं) ३५ (प्रकृ
तिषुअमात्यादिषुअंतःपुरादिषुचचरंतं) अव्यक्तलिंगंवेषांतरेणच्छन्नम् (तेषांतेषांभावबुभुत्सयाअभिप्रायजिज्ञासया) ३६(ईयुषःप्राप्तवतःयोगमायायाउदयंउत्कर्षं) ३७ हेयोगेश्वरआत्मन्आत्म
निममनसितवस्वरूपेवानिर्भाताप्रतीताःतवयोगमायाःकेवलंविदामविद्मःनतुत्वत्परमार्थमितिभावः (तच्चवेदनंभवत्पादनिषेवयासीत् । अन्यथामायिनामपिदुर्दर्शाः) ३८ त्वन्मानुष्यनाट्येनमुह्यामि ।
अतोमांप्रस्थापयेत्याह । अनुजानीहीति ३९ तत्तस्माल्लोकंशिक्षयन्इमंधर्ममास्थितः । नतुतत्त्वतः । हेपुत्रमाखिदमोहंमाप्राप्नुहीति ४० (गृहमेधिनांगृहस्थानां ।) इतिएवमनुगृहीतस्तमेकमेवददर्शे
ति ४१ मुहुर्मुहुर्दृष्ट्वाजातकौतुकोमुनिर्विस्मितोभूदिति ४२ श्रद्धितःश्रद्धायुक्तआत्मायस्यतेन (सभाजितःपूजितोमुनिर्ययौ)४३

॥८१॥

श्लोकाः ३१/४३

कुर्वंतंविग्रहंकैश्चित्संधिंचान्यत्रकेशवम् ॥ कुत्रापिसहरामेणचिंतयंतंसतांशिवम् ३१ पुत्राणांदुहितॄणांचकालेविध्युपयापनम् ॥ दारैर्वरैस्तत्सदृ
शैःकल्पयंतंविभूतिभिः ३२ प्रस्थापनोपानयनैरपत्यानांमहोत्सवान् ॥ वीक्ष्ययोगेश्वरेशस्ययेषांलोकाविसिस्मिरे ३३ यजंतंसकलान्देवान्क्वा
पिक्रतुभिरूर्जितैः ॥ पूर्तयंतंक्वचिद्धर्मंकूपारामालयादिभिः ३४ चरंतंमृगयांक्वापिहयमारुह्यसैंधवम् ॥ घ्नंतंततःपशून्मेध्यान्परीतंयदुपुंगवैः ३५ अव्य
क्तलिंगंप्रकृतिष्वंतःपुरगृहादिषु ॥ क्वचिच्चरंतंयोगेशंतत्तद्भावबुभुत्सया ३६ अथोवाचहृषीकेशंनारदःप्रहसन्निव ॥ योगमायोदयंवीक्ष्यमानुषीमीयुषोगति
म् ३७ विदामयोगमायास्तेदुर्दर्शाअपिमायिनाम् ॥ योगेश्वरात्मन्निर्भाताभवत्पादनिषेवया ३८ अनुजानीहिमांदेवलोकांस्तेयशसाप्लुतान् ॥ पर्यटामि
तवोद्गायन्लीलांभुवनपावनीम् ३९ ॥ श्रीभगवानुवाच ॥ ब्रह्मन्धर्मस्यवक्ताहंकर्तातदनुमोदिता ॥ तच्छिक्षयंल्लोकमिममास्थितःपुत्रमाखिद ४०
॥ श्रीशुकउवाच ॥ इत्याचरंतंसद्धर्मान्पावनान्गृहमेधिनाम् ॥ तमेवसर्वगेहेषुसंतमेकंददर्शह ४१ कृष्णस्यानंतवीर्यस्ययोगमायामहोदयम् ॥ मुहुर्दृ
ष्ट्वाऋषिरभूद्विस्मितोजातकौतुकः ४२ इत्यर्थकामधर्मेषुकृष्णेनश्रद्धितात्मना ॥ सम्यक्सभाजितःप्रीतस्तमेवानुस्मरन्ययौ ४३

चूर्णिका

कुत्र॰ कैश्चित् विग्रहंकुर्वंतं कु॰ मैत्रींकुर्वंतम् कु॰ सतां संचिंतयंतम् ३१ कु॰ पुत्रान् कन्याश्चविवाहयंतम् ३२ कुत्र॰ दुहितृजामात्रादीन् स्वगृहात् तद्गृहं प्रतिन
यंतं कु॰ तत्तद्गृहात्पुनरानयंतम् ३३ कुत्र॰देवान्यजंतं कुत्र॰ पूर्तयंतं ३४ कु॰मृगयांचरंतं क्वाचित् तत्तद्भावबुभुत्सयागृहादिषुवेषांतरं धृत्वा चरंतम् ३५ ३६ एवं ह
रिं दृष्ट्वा नारदः प्रहसन् उवाच ३७ हेयोगेश्वर तेयोगमायाः विदाम ३८ हेदेवमांअनुज्ञांदेहि अहंतवलीलांगायन् लोकान्पर्यटामि ३९ ॥ श्रीभगवानुवाच ॥ हेब्र
ह्मन् अहंधर्मस्यकर्तावक्ता अनुमोदिताऽस्मि अतः धर्मे लोकान् शिक्षयन् आस्थितः हे पुत्रत्वंमाखिद ४० ॥ श्रीशुक उवाच ॥ हेराजन् नारदः एवं भगवतः योगमाया
महोदयं दृष्ट्वाविस्मितः अभूत् ४१ ४२ ततः श्रीकृष्णेनधर्मार्थकामेषु सत्कृतः नारदः तंकृष्णं स्मरन् ययौ ४३

CC-0. In Public Domain. Digitization by eGangotri

टीका

नारदद्दष्टाःश्रीकृष्णलीलानिगमयति । एवमिति । अखिलस्य (विश्वस्य) भवायउद्भवायगृहीताःशक्तयोनानामूर्तयोयेनसः । सव्रीडंचतत्सौहृदंचस्नेहस्तेननिरीक्षणंहासश्चताभ्यांजुष्टः ४४ (वृत्तिर्वर्तनंस्थितिरित्यर्थः तत्कारणभूतः) अनन्यविषयाणिअसाधारणानिअपवर्गमार्गेमोक्षप्रदे (तस्यभक्तिर्भवेत्) ४५ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोनसप्ततितमोऽध्यायः ६९ ॥ ॥ ७ ॥ ॥ ततस्तुसप्ततितमेकृष्णस्याह्निककर्मणि ॥ दूतनारदयोःकार्येकार्यमंत्रविचारणम् ॥ १ ॥ जगन्मंगलचारित्र्यमाह्निकंजगदीशितुः ॥ नारदेनकचित्किंचिद्दृष्टमाहयथाक्रमम् ॥ २ ॥ अथेति इत्यर्थधर्मकामेषुकृष्णेनश्रद्धितात्मनेतिप्रस्तुतस्यश्रीकृष्णस्याह्निकस्याधिकारेऽथशब्दःउपवृत्तायांआसन्नायां (कूजतः कुक्कुटान्) पातिभिःश्रीकृष्णेन (आलिंगितकंठ्यो) माधव्योमाधवस्यभार्याः (तच्छब्दश्रवणेनोषःकालंविज्ञायास्मान्त्यक्त्वागमिष्यतीतितद्विरहातुराअशपन्) १ बंदिनइवश्रीकृष्णंबोधयंतिसंतिवयांसिपक्षिणोऽरोरुवन् । अतिशयेनाकूजन् । मंदारवनवायुभिर्गायत्स्वलिष्वनिद्राणिनिद्रारहितानिवयांसि २ वैदर्भीत्युपलक्षणं (अन्यासामपि ') परिरंभणविश्लेषात् (ल्यब्लोपेपंचमी) तंपर्यालोच्येत्यर्थः (अतिशोभनंसात्विकमपितंमुहूर्तंनामृष्यत्नसेहे) ३ ४ एकंअखंडं । तत्रहेतुःअनन्यंनिरुपाधिअतएवाव्ययंनित्यंस्वयंज्योतिष्ट्रहेतुःनित्यनिरस्तंनित्यनिवृत्तंकल्मषंअविद्यायस्मात्तं । उपलक्षणमाह । अस्येति । अस्यविश्वस्य । (स्वशक्तिभिःगुणक्षोभरूपाभिः) लक्षितभावश्चासौनिर्वृतिश्च (लक्षितभावनिर्वृतिः) भावःसत्ता । निर्वृतिरानंदः । तथाहि । गुणक्षोभात्पूर्वंसत्तामात्रंयः । ' सदेवसौम्येदमग्रआसी ' दित्यादिश्रुतेः । सएवानंदश्च । ' विज्ञानमानंदमि ' त्यादिश्रुतेः । तंसदानंदमित्यर्थः । (एतादृशमात्मानंदध्यौचिंतितवान्) ५ आप्लुतःस्नातःसंध्यायाउपागमउपासनंआदिर्यथाभवतितथायथाविधिक्रियाकलापंचकार । काण्वत्वादुदयात्पूर्वमेवहुतानलःब्रह्मगायत्रींजजाप ६

॥८२॥

श्लोकाः

४४/६

एवंमनुष्यपदवीमनुवर्तमानोनारायणोऽखिलभवायगृहीतशक्तिः ॥ रेमेंऽगषोडशसहस्रवरांगनानांसव्रीडसौहृदनिरीक्षणहासजुष्टः ४४ यानीहविश्वविलयोद्भववृत्तिहेतुःकर्माण्यनन्यविषयाणिहरिश्चकार ॥ यस्त्वंगगायतिशृणोत्यनुमोदतेवाभक्तिर्भवेद्भगवतिह्यपवर्गमार्गे ४५ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकोनसप्ततितमोध्यायः ६९ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अथोषस्युपवृत्तायांकुक्कुटान्कूजतोऽशपन् ॥ गृहीतकंठ्यःपतिभिर्माधव्योविरहातुराः १ वयांस्यरूरुवन्कृष्णंबोधयंतीवबंदिनः ॥ गायत्स्वलिष्वनिद्राणिमंदारवनवायुभिः २ मुहूर्तंतंतुवैदर्भीनामृष्यदतिशोभनम् ॥ परिरंभणविश्लेषात्प्रियबाह्वंतरंगता ३ ब्राह्मेमुहूर्तउत्थायवार्युपस्पृश्यमाधवः ॥ दध्यौप्रसन्नकरणआत्मानंतमसःपरम् ४ एकंस्वयंज्योतिरनन्यमव्ययंस्वसंस्थयानित्यनिवृत्तकल्मषम् ॥ ब्रह्माख्यमस्योद्भवनाशहेतुभिःस्वशक्तिभिर्लक्षितभावनिर्वृतिम् ५ अथाप्लुतोऽम्भस्यमलेयथाविधिक्रियाकलापंपरिधायवाससी ॥ चकारसंध्योपगमादिसत्तमोहुतानलोब्रह्मजजापवाग्यतः ६

चूर्णिका

एवं वर्तमानः भगवान् स्त्रीणां गृहेषुरेमे ४४ यः हरेःकर्माणि गायति शृणोति अनुमोदते तस्य भगवति भक्तिर्भवति ४५ ॥ इतिदशमेएकोनसप्ततितमः॥ ६९ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेराजन् उषसिप्राप्तायां सत्यां श्रीकृष्णैः गृहीतकंठ्यः माधवास्त्रियः कूजतः कुक्कुटान् अशपन् १ तदापक्षिणः बंदिनइवश्रीकृष्णंबोधयंतः संतः अकूजन् २ तंमुहूर्तंरुक्मिण्यादयः स्त्रियः पत्यालिंगनवियोगात् नामृष्यन् तदाश्रीकृष्णः ३ ब्राह्मेमुहूर्ते उत्थाय आचम्य आत्मानं दध्यौ ४ ५ अथ अंभसि स्नात्वा वाससीपरिधाय संध्यांउपास्य अग्निं हुत्वा गायत्रींजजाप ६ ॥८२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलाअंशान्देवानृषीन्पितृंश्चतर्पयित्वा ७ (रुक्मभूषितानिशृंगाणियासां । मौक्तिकानांस्रजोयासु तासां) गृष्टीनांप्रथमप्रसूतानां ८ (रूप्यभूषितानिखुराग्राणियासांतासां) बद्धमिति । "हिरण्येनपरीवृतान्कृष्णान्शुक्लदतोमृगान् । मष्णारेभरतोऽददाच्छतंबद्धानिसप्तचे " तिश्रुत्युक्तानिसप्तोत्तरशतंबद्धानिएकीकृत्यपुराणेचतुर्दशलक्षत्वेनगणितानि । यथोक्तं भरतमेवाधिकृत्यनवमस्कंधे " मृगान्शुक्लदतःकृष्णान्सुवर्णेनपरिष्कृतान् । अदात्कर्मणिमष्णारेनियुतानिचतुर्दशे"ति । ततश्चेयंबद्धसंख्याश्लोकेनसंगृह्यते ।"चतुर्दशानालक्षाणांसप्ताधिकशतांशकः । बद्धंचतुरशीत्यग्रसहस्राणित्रयोदशे"ति । दिनेदिनेचप्रतिगृहंचेति ९ आत्मसंभूतीःस्वविभूतीःमंगलानिकपिलादीनि १० नरलोकस्यविभूषणरूपंआत्मानंस्वीयैःपीतांबरकौस्तुभादिभिः (वैजयंत्यादिभिश्च) ११ (आज्यादिमंगलान्यवलोक्यपौरांतःपुरवर्तिनांसर्वेषांवर्णानां) कामानभिलषितानर्थान् (प्रदाप्यप्रकृतीश्चामात्यमुख्याः) १२ (तत्रापिक्रममाह । अग्रतआदौ) विप्रान्स्रगादिभिः संविभज्यतेभ्यस्तानिदत्त्वेत्यर्थः (ततःसुहृदादीन्विभज्यपश्चात्स्वयं) उपायुंक्तभोगार्थमग्रहीत् १३ (सुग्रीवादिसंज्ञैः) १४ पाणीकृतंजलौगृहीत्वा (अवलंब्यपूर्वाद्रिंउदयाचलंभास्करोबुधशुक्रसंयुक्तोयथेतिज्ञातव्यम् ।) १५ सव्रीडप्रेमवीक्षितैरीक्षितः क्षणंस्थितः ताभिरेववीक्षितैःकृच्छ्राद्विसृष्टोनिरगादिति १६ एवंसर्वेभ्योगृहेभ्यः पृथक्पृथक्निर्गत्यानंतरंएकएवसन्सुधर्मांप्राविशत् । यन्निविष्टानांयत्रप्रविष्टानां । (षडूर्मयःक्षुत्पिपासादयःकामक्रोधलोभादयोवा) १७ नृसिंहैःनृषुश्रेष्ठैः १८

श्लोकाः ७/१८

उपस्थायार्कमुद्यंतंतर्पयित्वात्मनःकलाः ॥ देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्यचात्मवान् ७ धेनूनांरुक्मशृंगीणांसाध्वीनांमौक्तिकस्रजाम् ॥ पयस्विनीनांगृष्टीनांसवत्सानांसुवाससाम् ८ ददौरूप्यखुराग्राणांक्षौमाजिनतिलैःसह ॥ अलंकृतेभ्योविप्रेभ्योबद्धंबद्धंदिनेदिने ९ गोविप्रदेवतावृद्धगुरून्भूतानिसर्वशः ॥ नमस्कृत्यात्मसंभूतीर्मंगलानिसमस्पृशत् १० आत्मानंभूषयामासनरलोकविभूषणम् ॥ वासोभिर्भूषणैःस्वीयैर्दिव्यस्रगनुलेपनैः ११ अवेक्ष्याज्यंतथादर्शंगोवृषद्विजदेवताः ॥ कामांश्चसर्ववर्णानांपौरांतःपुरचारिणाम् ॥ प्रदाप्यप्रकृतीःकामैःप्रतोष्यप्रत्यनंदत १२ संविभज्याग्रतोविप्रान्स्रक्तांबूलानुलेपनैः ॥ सुहृदःप्रकृतीर्दारानुपायुंक्ततत:स्वयम् १३ तावत्सूतउपानीयस्यंदनंपरमाद्भुतम् ॥ सुग्रीवाद्यैर्हयैर्युक्तंप्रणम्यावस्थितोग्रतः १४ गृहीत्वापाणिनापाणीसारथेस्तमथारुहत् ॥ सात्यक्युद्धवसंयुक्तःपूर्वाद्रिमिवभास्करः १५ ईक्षितोऽतःपुरस्त्रीणांसव्रीडप्रेमवीक्षितैः ॥ कृच्छ्राद्विसृष्टोनिरगाज्जातहासोहरन्मनः १६ सुधर्माख्यांसभांसर्वैर्वृष्णिभिःपरिवारितः ॥ प्राविशद्यन्निविष्टानांनसंत्यंगषडूर्मयः १७ तत्रोपविष्टःपरमासनेविभुर्बभौस्वभासाककुभोऽवभासयन् ॥ वृतोनृसिंहैर्यदुभिर्यदूत्तमोयथोडुराजोदिवितारकागणैः १८

चूर्णिका ॥८३॥

ततः सूर्यंउपस्थाय देवर्षिपितॄन् तर्पयित्वा विप्रानभ्यर्च्य ७ दिने दिने स्वलंकृतेभ्यः विप्रेभ्यः स्वलंकृताः सवत्साः गाः बद्धंबद्धं ददौ ८ ९ ततः गुर्वादीन् नत्वा मंगलानि स्पृष्ट्वा १० वस्त्रभूषणादिभिः आत्मानं भूषयामास ११ ततः आज्यंआदर्शंच अवलोक्य सर्ववर्णान् अमात्यादिसेवकांश्च कामैःप्रतोष्य १२ विप्रादीन् स्रक्तांबूलादीनि दत्त्वा स्वयं अग्रहीत् १३ तावत् सूतः रथं आनीय प्रणम्य अग्रतः स्थितः १४ ततो भगवान् सात्यक्युद्धवयुतः सन् रथं आरुहत् १५ १६ ततः सुधर्माख्यां सभां प्रविश्य परमासने उपविष्टः सन् वृष्णिभिर्वृतः चंद्रइवशुशुभे १७ १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपमंत्रिणः परिहासकाः पृथक्पृथक्स्वस्वसमुदायैः १९ मृदंगादयः प्रसिद्धाः । (मुरजो मृदंगभेदः ।) दरः शंखः । सूतादयस्तुष्टुवुः २० ब्राह्मणा ब्रह्मवेदमाहुः मंत्रान्व्याचख्युरित्यर्थः । वादिनः वदनचतुराः २१ (प्रतीहारैर्द्वाःस्थैः ।) २२ २३ (ये) गिरिव्रजे तत्संज्ञके दुर्गे तेन रुद्धा आसन् तेषां च दुःखमावेदयदित्यन्वयः २४ कृष्णकृष्णेति षट्श्लोकी राज्ञां विज्ञप्तिः तत्र प्रथमेन शरणाश्रणम् । त्रिभिर्भयानुवादः । द्वाभ्यां प्रार्थनमिति । (पृथग्धियः देहात्मबुद्धयः ।) २५ पृथग्दर्शिनो लोकस्य भवभयं विवृण्वंतो नमंति । लोकइति । विकर्म निषिद्धं काम्यं च तस्मिन्नितरां रतः स्वे कुशले धर्मे भवतोऽर्चने त्वयाउदिते उक्ते पंचरात्रे सामान्यतश्च गीतासु । 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं' मिति वा तत्र प्रमत्तोऽनवहितो यावदयं लोकः तावदेवास्य लोकस्य यः सद्यो जीविताशां छिनत्ति तस्मै तुभ्यमनिर्मिषाय कालात्मने नमः इति २६ सेयं लोकस्य गतिः वयं तु त्वद्भक्ताः अतोऽस्माकं कुत एतद्दुःखमापन्नमित्याश्चर्येणाहुः लोकइति । भोईश जगतः इनः ईश्वरः त्वं साधुसंरक्षणाय दुष्टनिग्रहणाय चावतीर्णोसि (कलयांऽशेन ।) एवं सत्यपि चेदस्माकं दुःखं स्यात् तर्हि किमन्यः कश्चिज्जरासंधादिस्त्वदाज्ञामतिलंघयति किं वा त्वया रक्ष्यमाणोपि जनः स्वकर्मजं दुःखं प्राप्नोत्येवेति न विद्मः । न चैतदुभयमपि युक्तमिति भावः २७ किं दुःखं तदाहुः । स्वप्नायितमिति । स्वप्नवज्जातं नृपसुखं नृपोचितं सुखं यतः परतंत्रं विषयसाध्यम् । किंच । संप्रति शश्वद्भयं यस्मिन् तेन मृततुल्येन शरीरेण धुरं पुत्रदारादिचिंतां केवलं वहामः अहो कष्टं नः येवयमितः पूर्वमेव निष्कामाः संतस्त्वां नाश्रिता इत्याहुः हित्वेति । हेईश त्वत् त्वत्तः यदनीहैर्निष्कामैर्लभ्यं आत्मनि स्वतः सिद्धं सुखं तद्धित्वा क्लिश्यामः । (अतिकृपणाः अतिशयेनदीनाः) २८ त्वन्मायाकृतं कर्मबंधं त्वमेव निवर्तयेति प्रार्थयंते तन्न इति । (बद्धानस्मान्) वियुंक्ष्व विमोचय । मगधो जरासंधः तत्संज्ञकात् कर्मपाशात् । ननु भवद्भिरेव विक्रम्य ततो निर्गम्यतामिति चेदत आहुः । यइति । यएकएवायुतमतंगजानां वीर्यं वलं विभ्रत्सन् स्वभवने भूभुजोऽस्मान् रुरोध सिंहो मेषीरिव २९

श्लोकाः १९/२९

तत्रोपमंत्रिणो राजन्नानाहास्यरसैर्विभुम् ॥ उपतस्थुर्नटाचार्या नर्तक्यस्तांडवैः पृथक् १९ मृदंगवीणामुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुश्च सूतमागधबंदिनः २० तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः ॥ पूर्वेषां पुण्ययशसां राज्ञां चाकथयन्कथाः २१ तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः ॥ विज्ञापितो भगवते प्रतीहारैः प्रवेशितः २२ स नमस्कृत्य कृष्णाय परेशाय कृतांजलिः ॥ राज्ञामावेदयद्दुःखं जरासंधनिरोधजम् २३ ये च दिग्विजये तस्य संनतिं न ययुर्नृपाः ॥ प्रसह्य रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे २४ कृष्ण कृष्णाप्रमेयात्मन्प्रपन्नभयभंजन ॥ वयं त्वां शरणं यामो भयभीताः पृथग्धियः २५ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोस्तु तस्मै २६ लोके भवाञ्जगदिनः कलयाऽवतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः ॥ कश्चित्त्वदीयमतियाति निदेशमीश किं वा जनः स्वकृतमृच्छति तन्न विद्मः २७ स्वप्नायितं नृपसुखं परतंत्रमीश शश्वद्भयेन मृतकेन धुरं वहामः ॥ हित्वा तदात्मनि सुखं त्वदनीहलभ्यं क्लिश्यामहेऽतिकृपणास्तव माययेह २८ तन्नो भवान्प्रणतशोकहरांघ्रियुग्मो बद्धान्वियुंक्ष्व मगधाह्वयकर्मपाशात् ॥ यो भूभुजोऽयुतमतंगजवीर्यमेको बिभ्रद्रुरोध भवने मृगराडिवावीः २९

चूर्णिका

तत्र परिहासकाः नानाहास्यरसैः विभुं तोषयामासुः नटाचार्याः १९ नर्तक्यश्च ननृतुः जगुश्च सूताद्याः तुष्टुवुः २० ब्राह्मणाः राज्ञां कथाः चक्रुः २१ तदा एकः पुरुषः आगतः सः द्वारपालैः प्रवेशितः सन् २२ कृष्णं नत्वा राज्ञां जरासंधनिरोधजं दुःखं अकथयत् २३ हेहरे येनृपाः जरासंधस्य दिग्विजये नम्रतां न ययुः ते द्वे अयुते जरासंधेन दुर्गे निरुद्धाः आसन् २४ ते त्वां ऊचुः हे कृष्ण कृष्ण वयं त्वां शरणं याताः २५ अतः मागधाह्वयकर्मपाशात् नः मोचय युष्मत्प्रजाः नः पीडयति तत्र यद्युक्तं तद्विधेहि २६ २७ २८ २९ ॥८४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

किंच । युष्मदीयावयमित्यस्मानधिकंबाधतइत्याहुः । योवाइति । हेउदात्तचक्रउद्यतसुदर्शनयोवैद्विनवकृत्वः अष्टादशवारान् । त्वयासहमृधेवर्तमानेतत्रसप्तदशकृत्वः त्वयाखलुभग्नःपराजितं
पश्चादनंतवीर्यमपिनृलोकेनिरतंनरशरीरविनोदंभगवंतंसकृज्जित्वाऊढदर्पःप्राप्तगर्वः युष्मत्प्रजाःनःरुजतिपीडयति । तत्तत्रयत्युक्तंतद्विधेहीत्यर्थः ३० दूतआहइतीति ३१ (यथारविरंशुभारंबिभ्रत्)
३२ (शिरसाववंदे) ३३ (सभाजयित्वापूजयित्वेत्यर्थः) । (प्रियहितवचनैःसंतोषयन्बभाषे) ३४ (अपीति । लोकत्रयस्यकिंस्विदिदानींकुशलमित्यर्थः । लोकान्पर्यटतोभगवतोभवतःसकाशा
त्) भूयान्महागुणोलाभोयमस्माकंयत्सर्ववृत्तांतज्ञानमिति ३५ ईश्वरःकर्तायेषांतेषु (सर्वेष्वपिलोकेषुतवकिमप्यविदितंनास्ति) ३६ एवमविदुषेवसर्वज्ञेनजरासंधवधार्थमेवपांडवचिकीर्षितंपृष्टोनार
दोमायेयं (भगवत) इतिज्ञात्वाह । दृष्टाइतित्रिभिः विश्वसृजश्चब्रह्मणोपिमायिनोमोहकस्यतेस्वशक्तिभिर्विद्यादिभिर्भूतेष्वंतर्यामितयाचरतोवर्तमानस्य । यद्यहंभूतेषुवर्तेतर्हिभूतानिमांकिंनपश्यंतितत्राह
वह्नेरिवच्छन्नरुचइति । स्वशक्तिभिरेवच्छन्नारुक्प्रकाशोयस्यतस्यतव । अतइदंप्रश्नादिनमेद्भुतम् ३७ इदंजगत्सृजतः (संहरतश्चतवचेष्टितम् ।) कथंभूतम् (जगत्) असदेवयत्तवमाययाविद्यमाना
त्मतयाऽवभासते । (सदिवभातीत्यर्थः) किंतुकेवलंतुभ्यंनमनमेवशक्यमित्याह । तस्मैनमइति । कुतःस्वेनरूपेणसर्वतोविलक्षणात्मने । अचिंत्यायेत्यर्थः ३८ नन्वेवंभूतस्यकिंमायाचेष्टितैरित्यतआह
जीवस्येति । अविद्या-(-रूप-)-तमसाऽऽवृतत्वेनअनर्थप्रापकाच्छरीरात्संसरतः (कर्मणापुनःपुनर्जन्मादिलक्षणंसंसारंगच्छतः) तेनैवतमसातस्माच्छरीराद्विमोक्षोपायंनजानतः (जीवस्यस्वयशोल
क्षणंप्रदीपकम्) प्राज्वालयत् । प्रदीपितवान् श्रवणादिभिस्तस्यमोक्षार्थंयशोविस्तारितवानित्यर्थः । तंत्वात्वाम् (प्रपद्ये) ३९ आश्रावयेश्रावयिष्यामि । नरलोकविडंबनम् (नरलोकानुकारिणं
त्वाम्) हेब्रह्मन्हेपरमात्मन् (ब्रह्मेतिपाठेनरलोकविडंबनम्) वस्तुतोब्रह्मत्वांश्रावयिष्यामीति (राज्ञोयुधिष्ठिरस्य) ४०

श्लोकाः ३०/४०

योवैत्वयाद्विनवकृत्वउदात्तचक्रभग्नोमृधेखलुभवंतमनंतवीर्यम् ॥ जित्वान्नृलोकनिरतंसकृदूढदर्पोयुष्मत्प्रजारुजतिनोऽजिततद्विधेहि ३० इतिमागधसं
रुद्धाभवद्दर्शनकांक्षिणः ॥ प्रपन्नाःपादमूलंतेदीनानांशंविधीयताम् ३१ राजदूतेब्रुवत्येवंदेवर्षिःपरमद्युतिः ॥ बिभ्रत्पिंगजटाभारंप्रादुरासीद्यथारविः ३२
तंदृष्ट्वाभगवान्कृष्णःसर्वलोकेश्वरेश्वरः ॥ ववंदउत्थितःशीर्ष्णाससभ्यःसानुगोमुदा ३३ सभाजयित्वाविधिवत्कृतासनपरिग्रहम् ॥ बभाषेसूनृतैर्वाक्यैः
श्रद्धयातर्पयन्मुनिम् ३४ अपिस्विदद्यलोकानांत्रयाणामकुतोभयम् ॥ ननुभूयान्भगवतोलोकान्पर्यटतोगुणः ३५ नहितेऽविदितंकिंचिल्लोकेष्वी
श्वरकर्तृषु ॥ अथपृच्छामहेयुष्मान्पांडवानांचिकीर्षितम् ३६ ॥ नारदउवाच ॥ दृष्टामयातेबहुशोदुरत्ययामायाविभोविश्वसृजश्चमायिनः ॥ भूतेषुभूमं
श्चरतःस्वशक्तिभिर्वह्नेरिवच्छन्नरुचोनमेद्भुतम् ३७ तवेहितंकोर्हतिसाधुवेदितुंस्वमाययेदंसृजतोनियच्छतः ॥ यद्विद्यमानात्मतयाऽवभासतेतस्मैनमस्तेस्व
विलक्षणात्मने ३८ जीवस्ययःसंसरतोविमोक्षणंनजानतोऽनर्थवहाच्छरीरतः ॥ लीलावतारैःस्वयशःप्रदीपकंप्राज्वालयत्त्वातमहंप्रपद्ये ३९ अथाप्याश्राव
येब्रह्मन्नरलोकविडंबनम् ॥ राज्ञःपैतृष्वसेयस्यभक्तस्यचचिकीर्षितम् ४०

॥८५॥

चूर्णिका

३० दूतः आह इतितेपादमूलंप्रपन्नानां तेषांशंविधीयताम् ३१ ॥ श्रीशुकउवाच ॥ इतिदूते प्रवदति सति नारदः प्रादुरासीत् ३२ भगवान् तं दृष्ट्वा उत्थाय शीर्ष्णा ववं
दे ३३ ततः विधिवत्संपूज्य तं मुनिंबभाषे ३४ हेमुने त्रयाणां लोकानां अभयं अस्तिकिं ३५ किंच लोके तवअविदितं किंचिन्नास्ति अतः पांडवानां चिकीर्षितं पृच्छा
महे ३६ ॥ श्रीनारदउवाच ॥ हेविभो ते दुरत्ययाः मायाः मयाबहुशोदृष्टा तवेहितंकः वेदितुं अर्हति ३७ ३८ ३९ हेब्रह्मन् अथापियुधिष्ठिरस्यचिकीर्षितंकथयामि ४०

CC-0. In Public Domain. Digitization by eGangotri

टीका

४१ नचात्रैवानुमोदनंकार्यंकिंतुतत्रागंतव्यमित्याशयेनाह । तस्मिन्निति । (हेदेव) ४२ तत्रागताश्चसर्वेत्वद्दर्शनादिनापूताभविष्यंतीत्याह । श्रवणादिति । अंतेऽवसायिनः श्वपचाअपि (पूयंते) ब्रह्ममयस्यब्रह्मघनमूर्तेःईक्षा (दर्शनम्) अभिमर्शःस्पर्शनम् (ईक्षाभिमर्शौ) विद्येतेयेषांते ४३ कैमुत्यमतिशयेनाहयस्येति । हेभुवनानांमंगलरूप । दिविपातालेभूमौचप्रथितंयस्यतेयशोविश्वंपुनाति । कथंप्रथितम् । दिग्वितानंदिग्गतानांभुवनानांवितानवदलंकरणम् । तथाचरणांबुचप्रथितंपुनाति । कथंतत्प्रथितम् । दिविमंदाकिनीति । अधश्चभोगावतीति । इहचभूमौगंगेति । तस्यतवागमनात्सर्वंमंगलंपवित्रंचभविष्यतीतिभावः ४४ तत्रैवंनारदेनोक्तेतेषुतत्रवर्तमानेषुआत्मपक्षेषु (स्वपक्षभूतेषु) यादवेषुजरासंधस्यजिगीषयाअगृह्णत्सु (देवर्षिमतम्) अमन्यमानेषुवाचःपेशैःपेशलवाग्भिरित्यर्थः ४५ चक्षुर्द्रष्टेहेतुःमंत्रार्थानांमंत्रसाध्यानांतत्त्ववित्परिपाकवेदिता (मंत्रीभवसि । अत्रकार्यद्वये । तत्त्वदुक्तंश्रद्दध्मःकरवामच । श्रद्धयाकरिष्यामइत्यर्थः) ४६ ४७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्ततितमोऽध्यायः ७० ॥ ॥ ७ ॥ ॥ अथैकसप्ततितमउद्धवस्यतुमंत्रतः । इंद्रप्रस्थंगतेकृष्णेपार्थानांपरमोत्सवः ॥ १ ॥ राजसूयमिषंकृत्वाभीमदुर्योधनादिषु । कलिमुत्पाद्य तद्वाराभूभारमहरत्प्रभुः ॥ २ ॥ (इतिभगवदुदीरितमाकर्ण्य) देवर्षेर्मतं राजसूयगमनं सभ्यानांमतं राजरक्षा कृष्णस्यतूभयम् । (तत्ज्ञात्वा) १ यक्ष्यतःयागंकरिष्यतःपैतृष्वस्रेयस्यपितृष्वसुःपुत्रस्यसाचिव्यंसाहाय्यंतच्चकार्यंतथाशरणार्थिनांराज्ञांरक्षाचकार्या २ तत्रप्रथमंराजसूयार्थंगंतव्यंततोराजरक्षाकर्तव्येत्याह । यष्टव्यमित्यष्टभिः । अतःदिग्विजयहेतोः उभयार्थःराजसूयार्थः शरणागतरक्षार्थश्च ३

॥८६॥

श्लोकाः

यक्ष्यतित्वांमखेंद्रेणराजसूयेनपांडवः ॥ पारमेष्ठ्यकामोनृपतिस्तद्भवाननुमोदताम् ४१ तस्मिन्देवक्रतुवरेभवंतंवैसुरादयः ॥ दिदृक्षवःसमेष्यंतिराजानश्चयशस्विनः ४२ श्रवणात्कीर्तनाद्ध्यानात्पूयंतेऽतेवसायिनः ॥ तवब्रह्ममयस्येशकिमुतेक्षाभिमर्शिनः ४३ यस्यामलंदिवियशःप्रथितंरसायांभूमौचतेभुवनमंगलदिग्वितानम् ॥ मंदाकिनीतिदिविभोगवतीतिचाधोगंगेतिचेहचरणांबुपुनातिविश्वम् ४४ ॥ श्रीशुकउवाच ॥ तत्रतेष्वात्मपक्षेष्वगृह्णत्सुविजिगीषया ॥ वाचःपेशैःस्मयन्भृत्यमुद्धवंप्राहकेशवः ४५ ॥ श्रीभगवानुवाच ॥ त्वंहिनःपरमंचक्षुःसुहृन्मंत्रार्थतत्त्ववित् ॥ तथात्रब्रूह्यनुष्ठेयंश्रद्दध्मःकरवामतत् ४६ इत्युपामंत्रितोभर्त्रासर्वज्ञेनापिमुग्धवत् ॥ निदेशंशिरसाधायउद्धवःप्रत्यभाषत ४७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्ततितमोऽध्यायः ७० ॥

४१/३

॥ श्रीशुकउवाच ॥ इत्युदीरितमाकर्ण्यदेवर्षेरुद्धवोऽब्रवीत् ॥ सभ्यानांमतमाज्ञायकृष्णस्यचमहामतिः १ ॥ उद्धवउवाच ॥ यदुक्तमृषिणादेवसाचिव्यंयक्ष्यतस्त्वया ॥ कार्यंपैतृष्वस्रेयस्यरक्षाचशरणैषिणाम् २ यष्टव्यंराजसूयेनदिक्चक्रजयिनाविभो ॥ अतोजरासुतजयउभयार्थोमतोमम ३

चूर्णिका

हेविभो युधिष्ठिरः राजसूयेनत्वां यष्टुं इच्छति तत् भवान् अनुमोदताम् ४१ तस्मिन् यज्ञेत्वां दिदृक्षवः सुरादयः राजानश्चसमेष्यंति ४२ किंच तत्रागताः सर्वेत्वद्दर्शनादिनापूताः भविष्यंति ४३ ४४ ॥ श्रीशुकउवाच ॥ हेराजन् तत् नारदोक्तंश्रुत्वा केशवःउद्धवं आह ४५ ॥ श्रीभगवानुवाच ॥ हेउद्धव त्वंनः सुहृत् अतः अत्र यत् कर्तव्यम् तत् ब्रूहि तत्करवाम ४६ एवंउक्तः उद्धवः भगवदाज्ञांशिरसा धृत्वा अभाषत ४७ ॥ इतिदशमेसप्ततितमः ॥ ७० ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् उद्धवः एवंश्रीकृष्णोक्तं श्रुत्वा नारदस्य सभ्यानां कृष्णस्य च मतं ज्ञात्वा अब्रवीत् १ ॥ उद्धवउवाच ॥ हेदेव ऋषिणा यदुक्तं युधिष्ठिरस्य साहाय्यं तत् कार्यम् तथा राज्ञांरक्षाच कार्या २ तत्रादौ राजसूयार्थं गंतव्यम् तेन उभयमपि सेत्स्यति ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अर्थःप्रयोजनंजरासंधवधादि) ४ अत्युत्सुकतया सद्यएव जरासंधंहंतुमिच्छतोयादवानालक्ष्याह । सवाइति । अन्येषांततोबलिनामपि (सजरासंधोदुर्विषहः) यद्यपिसमबलएवभीमस्तथापितं विना । भीमादेवतस्यमृत्युर्विहितइतिभावः ५ ननुभीमबलस्यतद्बलसाम्येपिसेनाबलंतस्याधिकमितिचेदतआह । द्वैरथइति । द्वंद्वयुद्धेजेतव्यः (अन्यथा) शतेनाक्षौहिणीभिर्युतोऽसौमाजेतव्यः (नजेतुंशक्यइत्यर्थः ।) नन्वसौस्वसैन्यमेवयुद्धायनियुंजीतकुतस्तेनद्वैरथमितितत्राह । ब्रह्मण्यइति । नप्रत्याख्यातिननिराकरोति ६ भिक्षेतद्वंद्वयुद्धंयाचताम् । तथापिसमबलत्वात्साम्यमेवस्यादत आह तवसन्निधाविति ७ ननुअकिंचित्कुर्वतोममसंनिधानात्किंस्यादतआह । निमित्तमिति । अयमर्थःयथा (सर्वेश्वरस्य) तवारूपस्यकालात्मनोविश्वसर्गेनिमित्तंकेवलंहिरण्यगर्भःतथाचशर्वश्चतन्निरोधे । तथात्रत्वमेव सन्निधिमात्रेण हंता भीमोनिमित्तमात्रमिति ८ अतोनेनोपायेनत्वयासशीघ्रंहंतव्यइत्याशयेनाह । गायंतीति । जरासंधधृतानांराज्ञांदेव्यःपत्न्यःतेविशदंकर्मस्वगृहेषु बालकलालनादौ गायंति । किंतत्कर्म । स्वशत्रोर्जरासंधस्य वधं आत्मनां(आत्मवत्प्रियाणां) पतीनां मोक्षणंच वत्समारोदीः (दयालुः) श्रीकृष्णएवंकरिष्यतीति । अत्रदृष्टांताःगोप्यश्चेत्यादयः यथागोप्यः (आत्मशत्रोः) शंखचूडस्य वधं तत आत्ममोक्षं च गायंति अवतारांतरगतंचकुंजरपतेर्गजेंद्रस्यनक्रात् जनकात्मजायाश्च रावणात् पित्रोर्देवकीवसुदेवयोश्च कंसगृहान्मोक्षं (मुनयोवयंचगायामः) अतएवं भूतानांतासांकृपयात्वयातथैवकर्तव्यमितिभावः ९ किंचजरासंधवधइति । भूर्यर्थायेति (महतेप्रयोजनाय ।) ततःशिशुपालवधादयोपिसुखसाध्याभविष्यंतीतिभावः । एतच्चसर्वंभविष्यत्येवेतिसंभावयन्नाह । प्रायइति । पच्यतइतिपाकःकर्मतस्याविपाकःफलंतेन । राज्ञांपुण्यविपाकेनजरासंधादीनांपापविपाकेनेति । पाठांतरेजरासंधस्यपापविपाकेनेतिस्पष्टम् । तेनायंक्रतुस्तवाभिप्रेतः । अतस्तत्रगते त्वयिसर्वंभविष्यतीत्यर्थः १० अच्युतंउपपत्तियुक्तमित्यर्थः । यदुवृद्धाइतिवदन्ननिरुद्धादयस्तथानापूजयन्नितिसूचितवान् ११ (आदिशत्आज्ञापयामास) अनुज्ञाप्यअनुज्ञांप्रार्थ्यगुरून्वसुदेवादीन् १२

॥८७॥

अस्माकंचमहानर्थोह्येतेनैवभविष्यति ॥ यशश्चतवगोविंदराज्ञोबद्धान्विमुंचतः ४ सवैदुर्विषहोराजानागायुतसमोबले ॥ बलिनामपिचान्येषांभीमंसमबलंविना ५ द्वैरथेसतुजेतव्योमाशताक्षौहिणीयुतः ॥ ब्रह्मण्योऽभ्यर्थितोविप्रैर्नप्रत्याख्यातिकर्हिचित् ६ ब्रह्मवेषधरोगत्वातंभिक्षेतवृकोदरः ॥ हनिष्यतिनसंदेहोद्वैरथेतवसंनिधौ ७ निमित्तंपरमीशस्यविश्वसर्गनिरोधयोः ॥ हिरण्यगर्भःशर्वश्चकालस्यारूपिणस्तव ८ गायंतितेविशदकर्मगृहेषुदेव्योराज्ञांस्वशत्रुवधमात्मविमोक्षणंच ॥ गोप्यश्चकुंजरपतेर्जनकात्मजायाःपित्रोश्चलब्धशरणामुनयोवयंच ९जरासंधवधःकृष्णभूर्यर्थायोपकल्पते ॥ प्रायःपाकविपाकेनतवचाभिमतःक्रतुः १० ॥ श्रीशुकउवाच ॥ इत्युद्धववचोराजन्सर्वतोभद्रमच्युतम् ॥ देवर्षिर्यदुवृद्धाश्चकृष्णश्चप्रत्यपूजयन् ११ अथादिशत्प्रयाणाय भगवान्देवकीसुतः ॥ भृत्यान्दारुकजैत्रादीन्अनुज्ञाप्यगुरून्विभुः १२

श्लोकाः ४/१२

चूर्णिका

किंच हेगोविंद राज्ञः विमुंचतः तवयशो भविष्यति ४ सः जरासंधः भीमसेनं विना अन्येषां दुःसहः ५ अतः भीमेन द्वंद्वयुद्धे जेतव्यः सः विप्रैः अर्थितः सन् न प्रत्याख्याति ६ अतः ब्रह्मवेषं धृत्वा भीमेन तंप्रति युद्धं भिक्षितव्यम् ततोभीमः तवसन्निधौ तं हनिष्यति ७ ८हेभगवन् जरासंधेन रुद्धानां राज्ञां स्त्रियः तव विशदंकर्म गृहेषु गायंति अतः एवंभूतानांतासां कृपयात्वया तथवकर्तव्यं ९ हेभगवन् जरासंधवधः कृतश्चेत् शिशुपालवधादयोऽपिसुलभाः भविष्यंति १० ॥ श्रीशुकउवाच ॥ हेराजन् इति उद्धववचः नारदः यदुवृद्धाः कृष्णश्च अपूजयन् ११ अथ कृष्णः इंद्रप्रस्थंप्रति गमनाय दारुकादीन् आदिशत् १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अवरोधान् स्वान् दारान्निर्गमय्य प्रयाणंकारयित्वा (यदुराजमुग्रसेनंचानुज्ञाप्य) १३ (द्विपाःगजाः) भटाःपदातयः । सादिनोऽश्वारोहाः । रथादि-(चतुरंगसेना)-नायकैःकरालयातीव्र
याआत्मसेनयापरिवृतोनिराक्रमत् । निरगात् (कुतःसकाशात्) मृदंगादिभिर्वाद्यैःप्रघोषेणघोषितायाःककुभः (स्वाधिष्ठितदिशः) १४ नृवाजीति । नरयानैःअश्वैश्चकांचनशिबिकाभिश्चअच्युतं
 पतिमनुययुः । सुव्रताःपतिव्रताः । वराण्यंवरादीनियासांताः १५ नरोष्ट्रादिभिर्यानैः (तत्रगौर्वृषभः) अश्वतरीगर्दभ्यामश्वाज्जाता । अनःशकटम् । करेणुर्गजी । परिजनयोषितोवारयोषितश्चययुः ।
कटकुट्यःउशीरादितृणनिर्मितगृहविशेषाः । कंबलांबरादयश्चोपस्कराःकुड्यादिरूपायासांताःअधियुज्यबलीवर्दादिषुतानुपस्करान्दृढंसंनह्येत्यर्थः १६ (बृहद्भिर्ध्वजादिभिः वृहदितिबलस्यवाविशेष
णम् । वरैरायुधादिभिश्च) रवरंशुभिश्चतद्बलंदिवाबभौ । कथंभूतंतुमुलरवंआकुलस्वनम् । क्षुभितैस्तिमिंगिलैरूर्मिभिश्च (तुमुलस्वनोऽर्णवोयथा । सूर्यकिरणवशात्दीप्यमानैरायुधादिभिःक्षुभितैस्तिमिं
 गिलादिभिश्चबलमर्णवश्चदिवायथाभातिनतथारात्राविितिसूचनार्थं दिवेत्युक्तिः) १७ मुनिर्नारदः (सभाजितःप्रमोदितस्तंकृष्णंहृदि दधत्) विहायसाययाविितिशेषः । (मुकुंदसंदर्शनेनानिर्वृतानिसुख
मयानिइंद्रियाणियस्य) १८ माभैष्टेतिवहुत्वंराजाभिप्रायेण १९ प्रत्यैक्षन्प्रत्यैक्षंत (प्रतीक्षांचक्रिरे ।) यत्यस्मान्मुमुक्षवः २० आनर्तादयोमार्गस्थादेशास्तांस्तीर्त्वाअतिक्रम्यविनशनंकुरुक्षेत्रंअती
यायअतिक्रम्यययौ २१ शक्रप्रस्थंइंद्रप्रस्थम् २२ (दुर्दर्शनंदुर्लभदर्शनम् । अजातशत्रुर्युधिष्ठिरः) २३

निर्गमय्यावरोधान्स्वान्ससुतान्सपरिच्छदान् ॥ संकर्षणमनुज्ञाप्ययदुराजंचशत्रुहन् ॥ सूतोपनीतंस्वरथमारुहद्गरुडध्वजः १३ ततोरथद्विपभटसादि
नायकैःकरालयापरिवृतआत्मसेनया ॥ मृदंगभेर्यानकशंखगोमुखैःप्रघोषघोषितककुभोनिराक्रमत् १४ नृवाजिकांचनशिबिकाभिरच्युतंसहात्मजाःपति
मनुसुव्रतायुः ॥ वरांबराभरणविलेपनस्रजःसुसंवृतान्नृभिरसिचर्मपाणिभिः १५ नरोष्ट्रगोमहिषखराश्वतर्यनःकरेणुभिःपरिजनवारयोषितः ॥ स्वलं
कृताःकटकुटिकंबलांबराद्युपस्कराययुरधियुज्यसर्वतः १६ बलंबृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांशुभिस्तुमुलरवंबभौरवेर्यथा
ऽर्णवःक्षुभिततिमिंगिलोर्मिभिः १७ अथोमुनिर्यदुपतिनासभाजितःप्रणम्यतंहृदिविदधद्विहायसा ॥ निशम्यतद्व्यवसितमाहृतार्हणोमुकुंदसंदर्शननिर्वृतें
द्रियः १८ राजदूतमुवाचेदंभगवान्प्रीणयन्गिरा ॥ माभैष्टदूतभद्रंवोघातयिष्यामिमागधम् १९ इत्युक्तःप्रस्थितोदूतोयथावदवदन्नृपान् ॥ तेपिसंदर्शनं
शौरेःप्रत्यैक्षन्यन्मुमुक्षवः २० आनर्तसौवीरमरूंस्तीर्त्वाविनशनंहरिः ॥ गिरीन्नदीरतीयायपुरग्रामव्रजाकरान् २१ ततोदृषद्वतींतीर्त्वामुकुंदोथसरस्वतीम् ॥
पंचालानथमत्स्यांश्चशक्रप्रस्थमथागमत् २२ तमुपागतमाकर्ण्यप्रीतोदुर्दर्शनंनृणाम् ॥ अजातशत्रुर्निरगात्सोपाध्यायःसुहृद्वृतः २३

चूर्णिका ततः वसुदेवादीन् प्रणम्य स्त्रीभिः प्रयाणं कारयित्वा सूतानीतंस्वरथं आरुह्य चतुरंगसेनयासह निराक्रामत् १३ १४ १५ १६ १७ ततोनारदः श्रीकृष्णे
न सत्कृतः सन् तं प्रणम्य तन्निश्चितंनिशम्य विहायसा ययौ १८ ततोभगवान् राजदूतं उवाच वः भद्रमस्तु यूयंमाभैष्ट जरासंधं घातयिष्यामि १९इत्युक्तः दूतः तत्र ग
त्वा नृपान् यथावत् अवदत् तेपि श्रीकृष्णस्य दर्शनं प्रत्यैक्षंत २० ततोहरिः आनर्तादिदेशान् अतिक्रम्य इंद्रप्रस्थं अगमत् २१ २२ ततः तंश्रीकृष्णं आगतं श्रुत्वा
युधिष्ठिरः सोपाध्यायः सत्सुहृद्वृतः सन् हृषीकेशं अभ्येत्य भ्रातृभिः सह परिषस्वजे २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्राणाइंद्रियाणिप्राणमिवमुख्यंप्राणंयथा २४ सस्वजेपेरिरेभे २५ रमायाअमलंनिर्दोषमालयं (परिष्वज्यपरमानंदंलेभे ।) विस्मृतोलोकव्यवहारोयेनसः २६ (स्मयनूमंदंहसनूतंपरिरभ्यनिर्वृतः) २७
अर्जुनेनसमत्यात्परिष्वक्तएवकेवलंपादौप्रीत्यतिशयान्नमस्कुर्वन् अर्जुनःकृष्णेनभुजाभ्यांधृतइतिभावः । नकुलसहदेवाभ्यांअभिवादितः परिरब्धश्चेति २८ (कुरुसृंजयादीन्‌यथायोग्यंमानयामास) २९
(सूतेति । गंधर्वागायनाः । मृदंगादिभिर्वाद्यैःसहितान्नृतुर्जगुश्च । सूतादयोब्राह्मणाश्चारविंदाक्षंकृष्णंतुष्टुवुः) ३० ३१ (संसिक्तानिवर्त्मानियस्यतत्) चित्रध्वजादिभिर्विराजमानम् (मृष्टःस्नाना
दिभिरात्मादेहोयेषांतैःनवानिदुकूलादीनियेषांतैर्नृभिस्तथाभूताभिर्युवतिभिश्च) ३२ प्रतिसद्मउद्दीप्तैर्दीपैर्बलिभिःपुष्पादिप्रकरैश्चजुष्टंजालेभ्योगवाक्षेभ्योनिर्गतैर्धूपैःरुचिरंविलसंत्यःपताकायस्मिन्तत् ।
मूर्धन्यामूर्ध्निभवाःहेमकलशायेषांतैःरजतमयानिरूप्यमयानिउरूणिस्थूलानिशृंगाणिकलशाधस्तनोच्चभूमिकायेषांतैर्भवनैर्जुष्टंकुरुराजस्यधामपुरंददर्श ३३ नराणांलोचनानितेषांपानस्यसादरवीक्षणस्य
पात्रंविषयम् । किंचपुनर्नारीणामित्यर्थः ३४ सुष्ठुआगतंस्वागतप्रश्नादिकंप्रियंउत्स्मयवीक्षितेनैवविदधुः (उपगुह्यआलिंग्य) ३५ उडुपसहाश्चंद्रसहचराइत्यर्थः । अमूभिःकिंपुण्यमकारि (कृतं) ३६

॥८९॥

गीतवादित्रघोषेणब्रह्मघोषेणभूयसा ॥ अभ्ययात्सहृषीकेशंप्राणाःप्राणमिवादृतः २४ दृष्ट्वाविक्लिन्नहृदयःकृष्णंस्नेहेनपांडवः ॥ चिराद्दृष्टंप्रियतमंसस्वजे
थपुनःपुनः २५ दोर्भ्यांपरिष्वज्यरमामलालयंमुकुंदगात्रंनृपतिर्हताशुभः ॥ लेभेपरांनिर्वृतिमश्रुलोचनोहृष्यत्तनुर्विस्मृतलोकविभ्रमः २६ तंमातुलेयं
परिरभ्यनिर्वृतोभीमःस्मयन्प्रेमजवाकुलेंद्रियः ॥ यमौकिरीटीचसुहृत्तमंमुदाप्रवृद्धबाष्पाःपरिरेभिरेच्युतम् २७ युधिष्ठिरस्यभीमस्यकृत्वापादाभिवंदन
म् ॥ अर्जुनेनपरिष्वक्तोयमाभ्यामभिवादितः २८ ब्राह्मणेभ्योनमस्कृत्यवृद्धेभ्यश्चयथार्हतः ॥ मानितोमानयामासकुरुसृंजयकैकयान् २९ सूतमागधगं
धर्वाबंदिनश्चोपममंत्रिणः ॥ मृदंगशंखपटहवीणापणवगोमुखैः ॥ ब्राह्मणाश्चारविंदाक्षंतुष्टुवुर्ननृतुर्जगुः ३० एवंसुहृद्भिःपर्यस्तःपुण्यश्लोकशिखामणिः ॥
संस्तूयमानोभगवान्विवेशालंकृतंपुरम् ३१ संसिक्तवर्त्मकरिणांमदगंधतोयैश्चित्रध्वजैःकनकतोरणपूर्णकुंभैः ॥ मृष्टात्मभिर्नवदुकूलविभूषणस्रग्गंधैर्नृभि
र्युवतिभिश्चविराजमानम् ३२ उद्दीप्तदीपबलिभिःप्रतिसद्मजालनिर्यातधूपरुचिरंविलसत्पताकम् ॥ मूर्धन्यहेमकलशैरजतोरुशृंगैर्जुष्टंददर्शभवनैःकुरुरा
जधाम ३३ प्राप्तंनिशम्यनरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबंधाः ॥ सद्योविसृज्यगृहकर्मपतींश्चतल्पेद्रष्टुंययुर्युवतयःस्मनरेंद्रमार्गे ३४ त
स्मिन्सुसंकुलइभाश्वरथद्विपद्भिःकृष्णंसभार्यमुपलभ्यगृहाधिरूढाः ॥ नार्योविकीर्यकुसुमैर्मनसोपगुह्यसुस्वागतंविदधुरुत्स्मयवीक्षितेन ३५ ऊचुःस्त्रियःप
थिनिरीक्ष्यमुकुंदपत्नीस्तारायथोडुपसहाःकिमकार्यमूभिः ॥ यच्चक्षुषांपुरुषमौलिरुदारहासलीलावलोककलयोत्सवमातनोति ३६

श्लोकाः २४/३६

चूर्णिका

२४ २५ २६ ततः श्रीकृष्णः युधिष्ठिरंभीमंच नत्वार्जुनेन आलिंगितः यमाभ्यांवंदितः सन् ब्राह्मणान् वृद्धान् नमस्कृत्य कौरवादीन् मानयामास २७ २८ २९ ३०
ततो भगवान् सुहृद्वृतः सन् स्वलंकृतंइंद्रप्रस्थपुरंविवेश ३१ ३२ ३३ तदापौराः स्त्रियः तल्पे पतीन् गृहकर्मचविसृज्य कृष्णंसभार्यंद्रष्टुंआगताःसत्यःगृहान् अधिरुह्यतं
पुष्पैर्विकीर्य मनसा उपगुह्य वीक्षितेन स्वागतंविदधुः३४ ३५ किंच कृष्णपत्नीः वीक्ष्य ऊचुः अमूभिः किंपुण्यंकृतं यासांचक्षुषाहरिः उत्सवं ददाति ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रेण्यएकशिल्पोपजीविनांसंघास्तेषुमुख्याश्च ३७ (अंतःपुरवासिभिर्जनैः) अभ्युपेतःअभिगमनेनसत्कृतः ३८ सस्नुषाद्रौपदीसहिता (पर्यंकादुत्थायभ्रात्रेयंभ्रातुःपुत्रम्) ३९ कृत्यंप्रकारविशे
षंनाविदत् । तत्रहेतुःप्रमोदेनोपहतोऽभिभूतः ४१(पितृष्वसुः) गुरुस्त्रीणांचपूज्यस्त्रीणाम् । कृष्णयाचद्रौपद्याभगिन्यासुभद्रया ४१ (श्वश्र्वापत्युर्जनन्यापृथया) आनर्चअर्चितवती ४२ अन्याश्चयाः
कृष्णपत्न्योऽभ्यागतास्ताअपि ४३ प्रत्यहंनवंनवंयथाभवतितथासुखंनिवासयामास४४ कथंभूतंयो (जनार्दनः) प्रेम्णानित्यंफाल्गुनेनअर्जुनेनसंयुतःअतएवतस्यसाहाय्येनसतायेमखांडवेनखांडववनदा
नेनवह्नितर्पयित्वातत्रचमयंमोचयित्वातंमयंप्रयुज्ययुधिष्ठिरायदिव्यासभाकृता । तंश्रीजनार्दनम् । अनेनराज्ञःकृष्णोपकारानुस्मरणंदिव्यत्वात्सभायायथामनोरथंसर्वावकाशसंपादनंचदर्शितम् ४५
४६ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकसप्ततितमोऽध्यायः ७१ ॥ ७ ॥ ॥ ततोद्विसप्ततितमेराज्ञाकार्येनिवेदिते ॥ दुर्जयंमागधंबुद्ध्याभीमेनाघातयद्धरिः ॥ १ ॥ आस्थितःआस
॥९०॥ नमितिशेषः १ (ज्ञातिबांधवयोरवांतरभेदऊह्यः) शृण्वतामेवेति । यत्प्रसन्नःकृष्णःकरोतिनतदन्यःकश्चिदपिकर्तुंसमर्थइतिनिश्चित्यसर्वानेवताननादृत्यकृष्णमुवाचेत्यर्थः । आभाष्यभोभोकृष्णभक्तव
त्सलेत्येवंसंबोध्य २

श्लोकाः ३७/२

तत्रतत्रोपसंगम्यपौरामंगलपाणयः ॥ चक्रुःसपर्यांकृष्णायश्रेणीमुख्याहतैनसः ३७ अंतःपुरजनैःप्रीत्यामुकुंदःफुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतःप्राविश
द्राजमंदिरम् ३८ पृथाविलोक्यभ्रात्रेयंकृष्णंत्रिभुवनेश्वरम् ॥ प्रीतात्मोत्थायपर्यंकात्सस्नुषापरिषस्वजे ३९ गोविंदंगृहमानीयदेवदेवेशमादृतः॥ पूजा
यांनाविदत्कृत्यंप्रमोदोपहतोनृपः ४० पितृष्वसुर्गुरुस्त्रीणांकृष्णश्चक्रेऽभिवादनम् ॥ स्वयंचकृष्णयाराजन्भगिन्याचाभिवंदितः ४१ श्वश्र्वासंचोदिताकृ
ष्णाकृष्णपत्नीश्चसर्वशः ॥ आनर्चरुक्मिणींसत्यांभद्रांजांबवतींतथा ४२ कालिंदींमित्रविंदांचशैब्यांनाग्नजितींसतीम् ॥ अन्याश्चाभ्यागतायास्तुवासः
स्रग्मंडनादिभिः ४३ सुखंनिवासयामासधर्मराजोजनार्दनम् ॥ ससैन्यंसानुगामात्यंसभार्यंचनवंनवम् ४४ तर्पयित्वाखांडवेनवह्निंफाल्गुनसंयुतः ॥
मोचयित्वामयंयेनराज्ञेदिव्यासभाकृता ४५ उवासकतिचिन्मासान्राज्ञःप्रियचिकीर्षया ॥ विहरन्रथमारुह्यफाल्गुनेनभटैर्वृतः ४६ ॥ ॥ इतिश्रीभा
गवतेमहापुराणेदशमस्कंधेएकसप्ततितमोध्यायः ७१ ॥ श्रीशुकउवाच ॥ एकदातुसभामध्येआस्थितोमुनिभिर्वृतः ॥ ब्राह्मणैःक्षत्रियैर्वैश्यैर्भ्रातृभिश्चयु
धिष्ठिरः १ आचार्यैःकुलवृद्धैश्चज्ञातिसंबंधिबांधवैः ॥ शृण्वतामेवचैतेषामाभाष्येदमुवाचह २

चूर्णिका

ततःपौराः तत्र तत्र कृष्णं अपूजयन् ३७ एवंसत्कृतः भगवान् राजमंदिरंप्राविशत् ३८ततः पृथा कृष्णं विलोक्य पर्यंकादुत्थाय परिषस्वजे ३९ ततोयुधिष्ठिरःगोविंदंगृहं
आनीय हर्षेण अभिभूतः सन् पूजां नाविदत् ४० ततः कृष्णः पितृष्वसुःगुरुस्त्रीणांचवंदनंचक्रे द्रौपद्या सुभद्रया स्वयंचवंदितः४१ततः द्रौपदी रुक्मिण्याद्याः कृष्णपत्नीः
वस्त्रभूषणादिभिः आनर्च४२ ४३ततो युधिष्ठिरः ससैन्यंसभार्यंकृष्णं सुखंनिवासयामास४४ ततः श्रीकृष्णः अर्जुनयुतः सन् खांडवेन वह्नितर्पयित्वा तत्रमयंमोचयित्वा ॥९०॥
राज्ञः प्रियचिकीर्षया तत्रकतिचिन्मासान् उवास ४५ ४६ ॥ ॥ इतिदशमेएकसप्ततितमः ॥ ७१ ॥ ॥ ७ ॥ श्रीशुकउवाच ॥ ॥ हेराजन् एकदामुनिविप्रक्ष
त्रियवैश्यभ्रात्राचार्यकुलवृद्धादिभिर्वृतः युधिष्ठिरः सभामध्ये स्थितः सन् १ एषां शृण्वतां सतां श्रीकृष्णं आह २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विभूतीःअंशान् (तत्राजसूयं) ३ एवंचक्रवर्तिनांमनोरथःकंथत्वयाक्रियतइतिचेत्अतआह । त्वत्पादुकेइति । परियेचरंतीतियच्छब्दव्यवधानमार्षं । येपरिचरंतिदेहेन । ध्यायंतिम
नसा । अभद्रस्यनशनेनाशकेगृणंतिवाचा । तेभवस्यापवर्गंमोक्षंविंदंति (शुचयःशुद्धानिष्कामाइत्यर्थः) यद्याशासतेतर्हिंआशिषः (कामान्) अपितएवविंदतिनान्येचक्रवर्तिनोपि (हेकमलना
भ) भगवनोभक्तपक्षपातमाविष्कारयन्नाह । तद्देवदेवेति । हेदेवदेवतत्तस्मात्पश्यतुसाक्षात् (चरणकमलसेवायाःअनुभावंप्रभावम्) एवंनिश्चितेपियेकर्मादिप्रधानाःकेचित्कुरुसृंजयाःभगवद्भक्तिनबहुमन्यं
तेतेषांमोहनिवृत्तयेयेत्वांभजंतियदिवानभजंतितेषामुभयेषांनिष्ठांस्थितिंप्रदर्शय ५ ननुरागादिरहितेमयिकथमिदंवैषम्यंस्यात्तत्राह । नेति । स्वःपरइतिभेदमतिस्तवनस्यादेव । कुतःब्रह्मणोनिरुपाधेः ।
॥९१॥ किंच सर्वस्यात्मनः । अत समदृशः (रागद्वेषरहितस्य ।) किंच स्वसुखानुभूतेःएवंरागाद्यभावात् (भेदबुद्ध्यभाव -)- इति (भावः) तथापिसंसेवमानानामेवत्वत्प्रसादोनान्येषां । तत्रापिसेवानुरू
पमुदयःफलम् । नत्वत्रविपर्ययोऽन्यथाभावः । यथाकल्पद्रुमस्यरागादिराहित्येपिसेवकेष्वेवफलजनकत्वंनान्येषु ६ सत्यंमद्भक्तानामेवकैवल्यादि । नान्येषामित्यनुमोदमानआह।सम्यागिति । शत्रुकर्शि
नेतिसंबोधयन्सर्वराजविजयशक्तिंसंचारयति । अनुभविष्यतिद्रक्ष्यतिसर्वलोकव्याप्तोभविष्यतीत्यर्थः ७ ८ किमत्रमयान्येनवासंपादनीयंतवसुकरएवराजसूयइत्याह । विजित्येति । जगतींसर्वांपृथि
वीं । संभारान्यज्ञोपस्करान् । संभृत्य संपाद्य आहरस्व (आहर) अनुतिष्ठेत्यर्थः ९ ननुनृपतिविजयादिकथंशक्यंस्यादतआह । एतइति (अतएषांराजविजयःशक्यइत्यर्थः) किंचआत्मवताजि
तेंद्रियेणतत्वयाअहंचजितोस्मिवशीकृतोस्मि । अकृतात्मभिःअजितेंद्रियैः । (मांवशीकृतवतात्वयासर्ववशीकृतमेवेति) १० आस्तांतावदेवंभूतस्यतवपरैरभिभवशंका । अकिंचनमपिमत्परंकोपिनाभि
भवितुंप्रभवतीत्याह । नकश्चिदिति । तेजसाप्रभावेन । विभूतिभिःसैन्यादिसामग्रीभिः ११ अयुंक्त नियुंक्तवान् । विष्णोस्तेजसाउपबृंहितान्संवर्धितान् । तेजोपबृंहितानितिसंधिरार्षः १२

॥ युधिष्ठिरउवाच ॥ क्रतुराजेनगोविंदराजसूयेनपावनीः ॥ यक्ष्येविभूतीर्भवतस्तत्संपादयनःप्रभो ३ त्वत्पादुकेअविरतंपरियेचरंतिध्यायंत्यभद्रनशनेशुच
योगृणंति ॥ विंदंतितेकमलनाभभवापवर्गमाशासतेयदितआशिषईशनान्ये ४ तद्देवदेवभवतश्चरणारविंदसेवानुभावमिहपश्यतुलोकएषः ॥ येत्वांभजंति
नभजंत्युतवोभयेषांनिष्ठांप्रदर्शयविभोकुरुसृंजयानाम् ५ नब्रह्मणःस्वपरभेदमतिस्तवस्यात्सर्वात्मनःसमदृशःस्वसुखानुभूतेः ॥ संसेवतांसुरतरोरिवतेप्रसा
दःसेवानुरूपमुदयोनविपर्ययोत्र ६ ॥ श्रीभगवानुवाच ॥ सम्यग्व्यवसितंराजन्भवताशत्रुकर्शन ॥ कल्याणीयेनतेकीर्तिर्लोकाननुभविष्यति ७ ऋषी
णांपितृदेवानांसुहृदामपिनःप्रभो ॥ सर्वेषामपिभूतानामीप्सितःक्रतुराडयम् ८ विजित्यनृपतीन्सर्वान्कृत्वाचजगतींवशे ॥ संभृत्यसर्वसंभारानाहरस्व
महाक्रतुम् ९ एतेतेभ्रातरोराजँल्लोकपालांशसंभवाः ॥ जितोस्म्यात्मवतातेहंदुर्जयोयोऽकृतात्मभिः १० नकश्चिन्मत्परंलोकेतेजसायशसाश्रिया ॥ वि
भूतिभिर्वाभिभवेद्देवोपिकिमुपार्थिवः ११ ॥ श्रीशुकउवाच ॥ निशम्यभगवद्गीतंप्रीतःफुल्लमुखांबुजः ॥ भ्रातृन्दिग्विजयेऽयुंक्तविष्णुतेजोपबृंहितान् १२

श्लोकाः ३/१२

चूर्णिका

॥ युधिष्ठिरउवाच ॥ हेगोविंद अहं राजसूययज्ञेन तवविभूतीर्यक्ष्ये तत् संपादय ३ किंच एषःलोकःतवपादकमलसेवानुभावंपश्यतु ४ ५ ६ ॥ श्रीभगवानुवाच ॥ हे
राजन् त्वया सम्यक् निश्चितम् येनकर्मणातवकीर्तिः सर्वलोकव्याप्ता भविष्यति ७ किंच अयंक्रतुराट् ऋषिपितृदेवसुहृदांईप्सितोस्ति ८ अतः सर्वान् राज्ञः विजित्य पृथ्वीवशे
कृत्वा संभारान् संपाद्य क्रतुंअनुतिष्ठ ९ १० ११ ॥ श्रीशुकउवाच ॥ हेराजन् एवं भगवद्वाक्यं श्रुत्वायुधिष्ठिरः प्रीतःसन् दिग्विजयार्थंभ्रातृन् अयुंक्त १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नकुलादीनांमत्स्यादिभिःसहायैर्यथासंख्येनसंबंधः १३ कथंभूताय । यक्ष्यते (यक्ष्यमाणाय) यागंकारिष्यते (हेनृप) १४(अजितंश्रुत्वाचिंतयतोनृपतेः) आद्योहरिःश्रीकृष्णः १५ ब्रह्मलिंगधराब्राह्मण लिंगधारिणः । यतः यत्रबृहद्रथसुतोजरासंधः १६ तेराजन्याःआतिथ्यवेलायां (अतिथिसमये) गृहेषुवर्तमानं (गृहमेधिनं) समयाचेरन्सम्यक्अयाचंतेत्यर्थः १७(विद्धिजानीहि ।) १८ नन्विदंका मयामहइतिविशेषोनिर्दिश्यतां । अन्यथायस्यपुत्रादेर्वियोगोदुःसहःसकथंदेयः । तथाराजमंडनंकिरीटाद्यदेयंपत्ताद्भिक्षुभ्यःकथंदेयं । तथातिरम्यंरत्नाभरणादियत्पुत्रादियोग्यंतत्कथंपरस्मैदेयंइति चेदतआहुः । किंदुर्मर्षमित्यादि । अथदृष्टांतत्वेनार्थांतरमाहुः । किमकार्यमिति । यथासाधूनांअकार्यंनास्तितथातिविक्षूणांदुर्मर्षंदुःसहंनास्ति । वदान्यानामत्युदाराणामदेयंनास्ति । समदर्शिनांपरश्च नास्ति । अतःकिंविशेषनिर्देशेनेत्यर्थः १९ किंच अर्थिनेधीरेणमुद्गलादिवत्प्राणाअपिनवंचनीयाइत्याशयेनाहुः योऽनित्येनेति (योऽनित्येनशरीरेणास्थिरंसाधुभिः स्तुत्यंयशः शक्तःसन्) नाचि नोतिनसंपादयतिसवाच्यःनिंद्यः(सएवशोच्यश्चलोकनिंदायाआप्तशोकस्यचविषयइत्यर्थः)२० विश्वामित्रार्थानृण्याय हरिश्चंद्रो भार्यात्मजादि सर्वविक्रीय स्वयंचंडालतांप्राप्तोप्यनिर्विण्णःसहायोध्यावासि भिर्जनैःस्वर्गंगतः । रंतिदेवःसकुटुंबोऽष्टाचत्वारिंशदहान्यलब्धोदकोपिकथंचिल्लब्धान्नोदकाद्यर्थिभ्योदत्त्वाब्रह्मलोकंगतः । उंछवृत्तिर्मुद्गलःषण्मासंसीदत्कुटुंबोप्यातिथ्यदानेनब्रह्मलोकंगतः । शिबिःशर णागतकपोतरक्षणायस्वमांसंश्येनायदत्त्वादिवंगतः । बालिःसर्वस्वंब्राह्मणवेषधारिणेहरयेदत्त्वातमेवात्मसाच्चकार कपोतश्चातिथयेव्याधायकपोत्यासहात्ममांसंदत्त्वाविमानेनदिवंगतः । व्याधस्तुतयोः सत्त्वंवीक्ष्यस्वयमतिनिर्विण्णोमहाप्रस्थानेवनाग्निदग्धदेहोनिष्कल्मषोदिवमारुरोह । एवमन्येच (दध्यङ्प्रभृतयो) बहवोह्यध्रुवेणशरीरेणध्रुवंलोकंगताइति २१

॥९२॥

श्लोकाः १३/२१

सहदेवंदक्षिणस्यामादिशत्सहसृंजयैः ॥ दिशिप्रतीच्यांनकुलमुदीच्यांसव्यसाचिनम् ॥ प्राच्यांवृकोदरंमत्स्यैःकेकयैःसहमद्रकैः १३ तेविजित्यनृपान्वी राआजह्रुर्दिग्भ्यओजसा ॥ अजातशत्रवेभूरिद्रविणंनृपयक्ष्यते १४ श्रुत्वाऽजितंजरासंधंनृपतेर्ध्यायतोहरिः ॥ आहोपायंतमेवाद्यउद्धवोयमुवाचह १५ भीमसेनोऽर्जुनःकृष्णोब्रह्मलिंगधरास्त्रयः ॥ जग्मुर्गिरिव्रजंतातबृहद्रथसुतोयतः १६ तेगत्वातिथ्यवेलायांगृहेषुगृहमेधिनम् ॥ ब्रह्मण्यंसमयाचेरन्रा जन्याब्रह्मलिंगिनः १७ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनोदूरमागतान् ॥ तन्नःप्रयच्छभद्रंतेयद्वयंकामयामहे १८ किंदुर्मर्षंतितिक्षूणांकिमकार्यमसाधु भिः ॥ किमदेयंवदान्यानांकःपरःसमदर्शिनाम् १९ योऽनित्येनशरीरेणसतांगेयंयशोध्रुवम् ॥ नाचिनोतिस्वयंकल्पःसवाच्यःशोच्यएवसः २० हरिश्चंद्रो रंतिदेवउंच्छवृत्तिःशिबिर्बलिः ॥ व्याधःकपोतोबहवोह्यध्रुवेणध्रुवंगताः २१

चूर्णिका

दक्षिणस्यांसृंजयैःसहसहदेवं प्रतीच्यांमत्स्यैःसहनकुलं उदीच्यांकैकयैःसहअर्जुनं प्राच्यांमद्रकैः सहभीमम् १३ ततः तेनृपान् विजित्य दिग्भ्यः धनं आनीययुधिष्ठिराय ददुः १४ ततः हरिःजरासंधं अजितं श्रुत्वा नृपतेः ध्यायतःसतः उद्धवोक्तंउपायंआह १५ ततः भीमः अर्जुनः श्रीकृष्णश्चएते त्रयः ब्राह्मणाः भूत्वा गिरि व्रजंजग्मुः १६ ततः तेआतिथ्यवेलायां तत्र गत्वा जरासंधंअयाचेरन् १७ हेराजन् दूरंआगतान् अतिथीन् विद्धि तेभद्रं अस्तु यत् वयं कामयामहे तत् प्रयच्छ १८ ॥९२॥
किंच यथासाधूनांअकार्यंनास्ति तथातितिक्षूणांदुःसहंनास्ति तथादातॄणांअदेयंनास्ति समदर्शिनांशत्रुर्नास्ति अतः किंविशेषनिर्देशेन १९ किंच यः अनित्येन शरीरेण य शः नसंपादयति सशोच्यः निंद्यश्च २० हरिश्चंद्रोरंतिदेवउंच्छवृत्तिःशिबिर्बलिः व्याधःकपोतोबहवोह्यध्रुवेणध्रुवंगताः २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. ज्याहतैःज्याघातकिणांकितैःदृष्टपूर्वान्द्रौपदीस्वयंवरादिषु २२ (एतेहिराजन्यबंधवःवंचकाअपिब्रह्मलिंगानिबिभ्रति । अतोवंचकेभ्योपिदुस्त्यजमपिआत्मानमपिभिक्षितंददामीति) २३ इंद्रस्य अ०
श्रियंजिहीर्षताविप्रव्याजेनविष्णुनाभ्रंशितस्यापिबलेर्नुअहो (दिक्षुवितताकीर्तिःश्रूयते) नेतिपाठेनश्रूयतेकिंअपितुश्रूयतेइति २४ तंश्लाघतेविष्णवइति । शुक्रेणवार्यमाणोपिअतएव (इंद्रस्यकार्य
साधको) विष्णुरयमितिजानन्नपि (महींसर्वांप्रादात्) २५ पतमानेनपतताक्षत्रबंधुनादेहेन (जीवतासता) ब्राह्मणार्थायविपुलंयशः (दानादिजन्यं) नेहतानेहमानेनअसंपादयताकोन्वर्थः नकोपी ॥७२॥
टीका त्यर्थः (यद्वा ब्राह्मणार्थायजीवतेत्यन्वयः ।) २६ इत्येवंनिश्चित्यप्राह । हेविप्राः (कामोभीष्टंव्रियताम्) इति २७ २८ राजन्यतामेवप्रपंचयातिअसाविति २९ ३० यतोमाद्भियासमुद्रंशरणंगतः
(आश्रयंकृतवानासि ।) ३१ वयसाप्यतुल्यःनातिसत्त्वःअनतिबलश्च । (निर्बलइत्यर्थः ।) नचदेहेनमयासमः । अतोऽर्जुनोयोद्धानभवेत् (प्रतिभटोमेनस्यात् ।) भीमस्तुभवेत्यतोममतुल्यबलः
॥९३॥ ३२ प्रादायदत्त्वेत्यर्थः । (आदायगृहीत्वा) ३३ समेखले (समभूमिके) युद्धांगणे ३४

॥ श्रीशुकउवाच ॥ स्वैरैराकृतिभिस्तांस्तुप्रकोष्ठैर्ज्याहतैरपि ॥ राजन्यबंधून्विज्ञायदृष्टपूर्वानचिंतयत् २२ राजन्यबंधवोह्येतेब्रह्मलिंगानिबिभ्रति ॥ श्लोकाः
ददामिभिक्षितंतेभ्यआत्मानमपिदुस्त्यजम् २३ बलेर्नुश्रूयतेकीर्तिर्विततादिक्ष्वकल्मषा ॥ ऐश्वर्याद्भ्रंशितस्यापिविप्रव्याजेनविष्णुना २४ श्रियंजिही २२/३४
र्षतेंद्रस्यविष्णवेद्विजरूपिणे ॥ जानन्नपिमहींप्रादाद्वार्यमाणोपिदैत्यराट् २५ जीवताब्राह्मणार्थायकोन्वर्थःक्षत्रबंधुना ॥ देहेनपतमानेननेहताविपुलं
यशः २६ इत्युदारमतिःप्राहकृष्णार्जुनवृकोदरान् ॥ हेविप्रावियतांकामोददाम्यात्मशिरोपिवः २७॥ श्रीभगवानुवाच ॥ युद्धंनोदेहिराजेंद्रद्वंद्वशोयदि
मन्यसे ॥ युद्धार्थिनोवयंप्राप्ताराजन्यानान्नकांक्षिणः २८ असौवृकोदरःपार्थस्तस्यभ्रातार्जुनोह्ययम् ॥ अनयोर्मातुलेयंमांकृष्णंजानीहितेरिपुम् २९
एवमावेदितोराजाजहासोच्चैःसमागधः ॥ आहचामर्षितोमंदायुद्धंतर्हिददामिवः ३० नत्वयाभीरुणायोत्स्येयुधिविक्लवचेतसा ॥ मथुरांस्वपुरींत्यक्त्वासमु
द्रंशरणंगतः ३१ अयंतुवयसातुल्योनातिसत्त्वोनमेसमः ॥ अर्जुनोनभवेद्योद्धाभीमस्तुल्यबलोमम ३२ इत्युक्त्वाभीमसेनायप्रादायमहतींगदाम् ॥ द्वि
तीयांस्वयमादायनिर्जगामपुराद्बहिः ३३ ततःसमेखलेवीरौसंयुक्तावितरेतरौ ॥ जघ्नतुर्वज्रकल्पाभ्यांगदाभ्यांरणदुर्मदौ ३४

चूर्णिका ॥ श्रीशुकउवाच॥ हेराजन् ततः जरासंधः आकृत्यादिभिः तान्क्षत्रियान् ज्ञात्वा अचिंतयत् २२ एते ब्रह्मलिंगधराः राजन्यबंधवः संति तथापि तेभ्यः आत्मानमपि भिक्षितं
ददामि २३ यतःविप्रव्याजेन विष्णुनाऐश्वर्यात् भ्रंशितस्यबलेः कीर्तिः श्रूयते २४ गुरुणावारितोऽपिबलिः द्विजरूपिणेविष्णवेमहींप्रादात् २५ किंच ब्राह्मणकार्यार्थेवि
पुलंयशः असंपादयता क्षात्रदेहेन कोनुअर्थः २६ नकोपीतिनिश्चित्यकृष्णार्जुनभीमानाह हेविप्राः कामःव्रियताम् वः आत्मशिरोपिददामि २७ ॥ श्रीभगवानुवाच ॥ हेरा
जेंद्र नः द्वंद्वयुद्धंदेहि वयं युद्धार्थिनः प्राप्ताः अन्नार्थिनो न २८ असौवृकोदरः अयंअर्जुनःअनयोः मातुलेयंमांकृष्णं ते रिपुंविद्धि २९ एवंश्रुत्वा राजा उच्चैःप्रहस्यअमार्षितः स ॥९३॥
न् आह हे मंदाः तर्हि वःयुद्धंददामि ३० परंतुहेकृष्ण भीरुणा त्वयानयोत्स्ये ३१ अयं अर्जुनोपि मेसमो न भीमस्तुल्यबलोऽस्ति ३२ इत्युक्त्वा भीमसेनाय महतीं गदां दत्त्वा द्वि
तीयां स्वयं आदाय पुरात् बहिर्निर्जगाम ३३ ततः रणांगणे अन्योन्यसंयुक्तौ भूत्वा गदाभ्यां जघ्नतुः ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मंडलानिगदायुद्धगतिभेदान् । सव्यंदक्षिणंचयथाभवतितथा (चरतोः) रंगिणोःरंगगतयोःनटयोरिवेतिनिर्भयत्वेनोपमा ३५ चटचटेतिगदयोःपरस्पराघातशब्दानुकरणम् । वज्रस्यनिष्पेषःपातः तत्सदृशःयुध्यतोर्दंतिनोर्दंताघातशब्दइवशुशुभे ३६ (भुजयोर्वेगेनअन्योन्यस्मिन्निपात्यमानेतेअंसकट्यादीनुपेत्य (चूर्णीबभूवतुः ।) दीप्तोमन्युःक्रोधोययोस्तयोर्द्विरदयोर्गजयोरर्कशाखाभ्यांसमं युध्यतोस्तेयथाचूर्णीभवतस्तद्वत् ३७ (गदयोःप्रहतयोश्चूर्णीभूतयोःसत्योःअयसःस्पर्शइवस्पर्शोयेषांतैरयोगोलकतुल्यैः) अपिष्टांचूर्णांचक्रतुः । (इभयोरिवप्रहरतोः तलताडनादुत्थः) ३८ शिक्षाअभ्यासःबलंसत्त्वंओजःप्रभावःसमानितानियंयोस्तयोः । (नक्षीणोजवःक्रोधवेगोययोस्तयोर्निर्विशेषंसमम्) ३९ (दिवायुध्यतोर्निशिमित्रवत्तिष्ठतोस्तयोर्निरगन्निर्गतानि) ४० ४१ जन्म शकलरूपम् । मृतिःपुनःशकलीभावम् । (विनानस्यात्एवं) तेविद्वान्जरानामराक्षसीतत्कृतं (संधानंचविद्वान्तेजसाआप्याययन्तेजस्विनंकुर्वन्नित्यर्थः) अचिंतयत्कथमसौपुनःशकलीभवेदिति ४२ (अमोघंदर्शनंज्ञानंयस्य ।) विटपंशाखाम् । कराभ्यांविटपंगृहीत्वाहरिर्भीमस्ययथाहंविटपंपाटयामितथात्वमेनंविपाटयेतिसंज्ञयासंकेतेनअरिवधोपायंदर्शयामासेत्यर्थः ४३ ४४ ४५ एके कःपादादिरवयवोययोस्तेशकले ४६ (जयोऽर्जुन. ।) ४७

॥९४॥

मंडलानिविचित्राणिसव्यंदक्षिणमेवच ॥ चरतोःशुशुभेयुद्धंनटयोरिवरंगिणोः ३५ ततश्चटचटाशब्दोवज्रनिष्पेषसंनिभः ॥ गदयोःक्षिप्तयोराजन्दंतयोरिवदंतिनोः ३६ तेवैगदेभुजवेगेननिपात्यमानेअन्योन्यतोंऽसकटिपादकरोरुजत्रून् ॥ चूर्णीबभूवतुरुपेत्ययथार्कशाखेसंयुध्यतोर्द्विरदयोरिवदीप्तमन्य्वोः ३७ इत्थंतयोःप्रहतयोर्गदयोर्नृवीरौक्रुद्धौस्वमुष्टिभिरयस्स्पर्शैरपिष्टाम् ॥ शब्दस्तयोःप्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताडनोत्थः ३८ तयोरेवंप्रहरतोःसमशिक्षाबलौजसोः ॥ निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ३९ एवंतयोर्महाराजयुध्यतोःसप्तविंशतिः ॥ दिनानिनिरगंस्तत्रसुहृद्वन्निशितिष्ठतोः ४० एकदामातुलेयंवैप्राहराजन्वृकोदरः ॥ नशक्तोहंजरासंधंनिर्जेतुंयुधिमाधव ४१ शत्रोर्जन्ममृतीविद्वान्जीवितंचजराकृतम् ॥ पार्थमाप्याययन्स्वेनतेजसाऽचिंतयद्धरिः ४२ संचिंत्यारिवधोपायंभीमस्यामोघदर्शनः ॥ दर्शयामासविटपंपाटयन्निवसंज्ञया ४३ तद्विज्ञायमहासत्त्वोभीमःप्रहरतांवरः ॥ गृहीत्वापादयोःशत्रुंपातयामासभूतले ४४ एकंपादंपदाऽऽक्रम्यदोर्भ्यामन्यंप्रगृह्यसः ॥ गुदतःपाटयामासशाखामिवमहागजः ४५ एकपादोरुवृषणकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णेशकलेददृशुःप्रजाः ४६ हाहाकारोमहानासीन्निहतेमगधेश्वरे ॥ पूजयामासतुर्भीमंपरिरभ्यजयाच्युतौ ४७

श्लोकाः ३५—४७

चूर्णिका

ततः विचित्राणि मंडलानि चरतोस्तयोः युद्धं शुशुभे ३५ ततः गदयोः चटचट इतिशब्दः अभवत् ३६ एवं तयोःप्रहरतोः निर्विशेषं युद्धं अभूत् ३७ ३८ ३९ एवं दिवा युध्यतोः निशिसुहृद्वत्तिष्ठतोः सतोः सप्तविंशतिदिनानि निरगन् ४० ततः एकदा भीमः कृष्णं प्राह हेमाधव जरासंधंजेतुं अहंनशक्तः ४१ ततः शत्रोः जन्ममृती जराकृतं जीवितंच्चविद्वान् श्रीकृष्णः स्वतेजसा भीमं अप्याययन् अचिंतयत् ४२ ततः हरिः करेणशाखां गृहीत्वा पाटयन्निवभीमंसंकेतेनदर्शयामास ४३ भीमः तद्विज्ञाय शत्रुपादयोः गृहीत्वा भूमौनिपात्य ४४ एकंपादं पदाक्रम्य दोर्भ्यां अन्यंपादं प्रगृह्य गुदतः पाटयामास ४५ ततः एकपादोरुवृषणकटिस्तनांसबाह्वक्षिभ्रूकर्णे द्वेशकले प्रजाददृशुः ४६ एवंमगधेनिहते सतिमहान् हाहाकारः आसीत् ततः कृष्णार्जुनौभीमंआलिंग्य पूजयामासतुः ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा·द·उ· दुर्वृत्तत्वादसौहतःनतुराज्याभिलाषेणेतिदर्शयन्नाह (सहदेवमिति तस्यजरासंधस्यतनयं सहदेवसंज्ञम् । येमागधेनजरासंधेनपूर्वंसंरुद्धाः) ४८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांद्विसप्त अ०
तितमोऽध्यायः ७२ ॥ ॥ ७ ॥ ॥ ततस्त्रिसप्ततितमेमोचयित्वानृपान्हरिः ॥ राजार्हभोगैःस्वान्देशान्प्रस्थाप्यपुनरागमत् ॥ १ ॥ अत्युन्नद्धजरासंधवधात्तद्बद्धभूपतीन् ॥ विमोक्ष्यकृपयाकृष्णो
निजंरूपमदर्शयत् ॥ २ ॥ येनिर्जिताजरासंधेननिरुद्धाश्चगिरिद्रोण्यांतेततोनिर्गताःसंतोघनश्याममंददृशुरित्युत्तरेणान्वयः । (मलानिमलिनानिवासांसियेषाम्) १ क्षुधाक्षामाःकृशाःसंरोधनपरिकर्शि ॥७३॥
टीका ताःपीडिताइत्यर्थः २ ३ (किरीटादिभिरंचितंआचितमितिपाठःयुक्तमित्यर्थः) ४ भ्राजन्भ्राजमनोवरमणिःकौस्तुभोययासाग्रीवायस्यतम् । निवीतंकंठलंबितयाव्याप्तम् । पिबंतइवेत्यादीनांहरः
पादयोःप्रणेमुरित्युत्तरेणान्वयः ५ रंभंतःपरिरंभमाणाइव ६ श्रीकृष्णदर्शनाह्लादेनध्वस्तःसंरोधनक्लमोयेषांते ७ संरोधाद्रक्षितानस्मान्घोरायाःसंसृतेरपिग्राहिरक्षमोचयेत्यर्थः ८ ननुभवंतोजरासंधा
॥९५॥ सूयाविष्टाइहामुत्रभोगासक्ताश्चकथंसंसृतेर्मोचनीयाइत्याशंक्यसंप्रतिनवयंतथाभूताइत्याहुः नैनमित्यष्टभिः । हेनाथवयमेनं (जरासंधं) नान्वसूयामःअन्वनुदोषदृष्ट्यानपश्यामः कुतइत्यतआहुःअनु
ग्रहइंतियत् यस्मात् (राज्यच्युतिलक्षणोऽनुग्रहएवभवताजरासंधद्वाराकृतइत्यर्थः) ९ एतदेवव्यतिरेकेणोपपादयंति । राज्यैश्वर्येति । राज्यैश्वर्याभ्यांमदस्तेनोन्नद्धउच्छृंखलोनित्याअचलाश्चसं
पदोमन्यते । यद्वा अनित्याःसतीःअचलाःशाश्वतीर्मन्यते१० किंच अवस्तु सत्वस्तुतया पश्यंतीत्याहुः मृगतृष्णामिति । वैकारिकींसृष्ट्यादिविकारापन्नांअयुक्ताअविवेकिनः (सत्यांपश्यंतीति) ११

श्लोकाः
सहदेवंतत्तनयंभगवान्भूतभावनः ॥ अभ्यषिंचदमेयात्मामगधानांपतिंप्रभुः ॥ मोचयामासराजन्यान्संरुद्धामागधेनये ४८ ॥ ॥ इतिश्रीभागवते
महापुराणेदशमस्कंधेजरासंधवधोनामद्विसप्ततितमोध्यायः ७२ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ अयुतेद्वेशतान्यष्टौलीलयायुधिनिर्जिताः ॥ तेनि ४८/११
र्गतागिरिद्रोण्यांमलिनामलवाससः १ क्षुत्क्षामाःशुष्कवदनाःसंरोधपरिकर्शिताः ॥ ददृशुस्तेघनश्यामंपीतकौशेयवाससम् २ श्रीवत्सांकंचतुर्बाहुंपद्मगर्भा
रुणेक्षणम् ॥ चारुप्रसन्नवदनंस्फुरन्मकरकुंडलम् ३ पद्महस्तंगदाशंखरथांगैरुपलक्षितम् ॥ किरीटहारकटककटिसूत्रांगदांचितम् ४ भ्राजद्वरमणिग्रैवंनि
वीतंवनमालया ॥ पिबंतइवचक्षुर्भ्यांलिहंतइवजिह्वया ५ जिघ्रंतइवनासाभ्यांरंभंतइवबाहुभिः ॥ प्रणेमुर्हतपाप्मानोमूर्धभिःपादयोर्हरेः ६ कृष्णसंदर्श
नाह्लादध्वस्तसंरोधनक्लमाः ॥ प्रशशंसुर्हृषीकेशंगीर्भिःप्रांजलयोनृपाः ७ ॥ राजानऊचुः ॥ नमस्तेदेवदेवेशप्रपन्नार्तिहराव्यय ॥ प्रपन्नान्पाहिनःकृष्णनि
र्विण्णान्घोरसंसृतेः ८ नैनंनाथान्वसूयामोमागधंमधुसूदन ॥ अनुग्रहोयद्भवतोराज्ञांराज्यच्युतिर्विभो ९ राज्यैश्वर्यमदोन्नद्धोनश्रेयोविंदतेनृपः ॥ त्वन्मा
यामोहितोनित्यामन्यतेसंपदोचलाः १० मृगतृष्णांयथाबालामन्यंतउदकाशयम् ॥ एवंवैकारिकींमायामयुक्तावस्तुचक्षते ११

चूर्णिका ततो भगवान् जरासंधपुत्रं सहदेवं मागधानांपतिं अभ्यषिंचत् ततः मागधेन रुद्धान्राज्ञः मोचयामास ४८ ॥ ॥ इतिदशमेद्विसप्ततितमः ॥ ॥ छ ॥ ॥ श्रीशुकउ
वाच ॥ हेराजन् ये अष्टाशताधिकविंशतिसहस्रं राजानः दिग्विजये जरासंधेन निर्जिताः गिरिद्रोण्यां रुद्धाश्च ते मलिनाः १ शुष्कमुखाः संरोधपरिकर्शिताः ततो निर्ग
ताः संतः कृष्णं ददृशुः कथंभूतं घनश्यामं श्रीवत्सांकं शंखचक्रगदापद्मधरं वनमालायुतं एवंभूतंकृष्णं दृष्ट्वा मूर्द्धभिः प्रणम्य प्रांजलयः संतः गीर्भिः प्रशशंसुः २ ३ ४ ॥९५॥
५ ६ ७ ॥ राजानऊचुः ॥ हेदेवतुभ्यंनमः घोरसंसृतेः निर्विण्णान्नः पाहि ८ हेनाथ एवंजरासंधंवयं दोषदृष्ट्या नपश्यामः ततः राज्ञांराज्यच्युतिः तवानुग्रहः ९ किंच म
दोन्नद्धः नृपः श्रेयो नविंदते तवमायामोहितः सन् संपदः अचलाः मन्यते १० वयंपुरामदांधाः संतः त्वांअविगणय्य स्थिताः ते एव वयं अद्य तवचरणौस्मराम ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

राज्यस्ययोगवियोगयोरनर्थार्थविहत्वमस्मास्त्रेवाम्माभिर्हष्टमित्याहुर्वयमितिद्वाभ्याम् । श्रीमदेननष्टाहष्टिर्येषांतेअस्याःपृथिव्याः(जिगीषया) इतरेतरस्पृधःपरस्परंस्पर्धमानाःपुरःपुरतस्त्वात्वांमृत्युम
विगणय्य पुरायेदुर्मदावयम् १२हेकृष्णतएववयमद्यविनष्टदर्पास्तेतवचरणौस्मरामःस्मर्तुमाशास्महे कथंभूताः भवतस्तन्वामूर्त्याकालेनश्रियोविचालिताः विभ्रंशिताअतोराज्यच्युतिर्भवदनुग्रहएवेत्यर्थः
१३ अतएवअथोअनंतरंमृगतृष्णिसदृशंराज्यंशश्वत्पततापि क्षणंक्षीयमाणेनतथारुजांरोगाणांभुवाजन्मक्षेत्रेणदेहेनउपासितव्यंसेव्यंनस्पृहयामहे । प्रेत्यपरलोकेचाक्रियाफलंस्वर्गादिभोगंउपासितव्यं
नस्पृहयामहे । कथंभूतम् । कर्णयोःरोचनंरुचिजनकमात्रंतत्रगतस्यस्पर्धाद्यनपगमेनसुखाभावादित्यर्थः १४ यद्येवंभूतायूयतर्हिममचरणास्मरततोऽनायासेनमुक्तिर्भविष्यतीतिकिंमदपेक्षयेतिचेदतआहुः
तन्नइति । (समादिशाज्ञापय) । येनोपायेनयथानविरमेत् ननश्येत् तेनप्रकारेणतमुपायंकथयेति ।) त्वच्चरणस्मृतिरपित्वत्प्रसादफलमेवातःप्रसन्नोभवेत्यर्थः १५ (कृतमुपकारंस्मरंतःप्रणमंति
कृष्णायेति । प्रणतानांक्लेशनाशोयस्मात्तस्मै।)१६ श्लक्ष्णयामंजुलया १७ यथाभवद्भिराशंसितंतथाबाढंनिश्चितंवोमयिभक्तिर्जायतेजायतामित्यर्थः १८ हेभूपाःमद्भजनमेवकर्तव्यमितिभवद्भिर्व्यवसितंसं
कल्पितंतत्दिष्ट्याभद्रम्। भवद्भिरुक्तंवसत्यमेवेत्याह भवंतइति । श्रीश्चऐश्वर्यंचताभ्यांमदस्तेनोन्नाहंउद्बंधनंस्वैराचारमित्यर्थः पश्येपश्यामि । (धनंप्रभुत्वंचोन्मादयतीत्यर्थः ।)१९ तदेवाह हैहयइति । है
हयःकार्तवीर्यःचक्रवर्तीनरेश्वरःपितुःकामधेनुहरणात्परशुरामेणसपुत्रोहतः । नहुषोदेवेंद्रतांप्राप्तउन्मत्तःशचीसंगायब्राह्मणान्शिबिकांवाहयन् तैरेवतताभ्रंशितोऽजगरत्वमवाप । वेनोप्युन्मत्तोब्राह्म
णान्अधिक्षिपंस्तैरेवहुंकृतैर्हतः रावणोराक्षसेश्वरःसीतामभिलषन्राघवेणहतः । नरकोदैत्येश्वरोऽदितिकुंडलाद्याहरणान्मयैवहतःअपरेपि (देवदैत्यनरेश्वराः) श्रीमदात्स्थानात्दुर्वासआदिभिर्भ्रं
शिताः २० यदुत्पाद्यंदेहादितदंतवत्एवंविज्ञाययुक्ताअप्रमत्तारक्षथरक्षतेत्यर्थः २१

श्लोकाः १२/२१

वयंपुराश्रीमदनष्टदृष्टयोजिगीषयास्याइतरेतरस्पृधः ॥ घ्नंतःप्रजाःस्वाअतिनिर्घृणाःप्रभोमृत्युंपुरस्त्वाऽविगणय्यदुर्मदाः १२ तएवकृष्णाद्यगभीररंहसादु
रंतवीर्येणविचालिताःश्रियः ॥ कालेनतन्वाभवतोनुकंपयाविनष्टदर्पाश्चरणौस्मरामते १३ अथोनराज्यंमृगतृष्णिरूपितंदेहेनशश्वत्पततारुजांभुवा ॥ उ
पासितव्यंस्पृहयामहेविभोक्रियाफलंप्रेत्यचकर्णरोचनम् १४ तन्नःसमादिशोपायंयेनतेचरणाब्जयोः ॥ स्मृतिर्यथानविरमेदपिसंसरतामिह १५ कृष्णाय
वासुदेवायहरयेपरमात्मने ॥ प्रणतक्लेशनाशायगोविंदायनमोनमः १६ ॥ श्रीशुकउवाच ॥ संस्तूयमानोभगवान्राजभिर्मुक्तबंधनैः ॥ तानाहकरुण
स्तातशरण्यःश्लक्ष्णयागिरा १७ ॥ श्रीभगवानुवाच ॥ अद्यप्रभृतिवोभूपामय्यात्मन्यखिलेश्वरे ॥ सुदृढाजायतेभक्तिर्बाढमाशंसितंयथा १८ दिष्ट्याव्य
वसितंभूपाभवंतऋतभाषिणः ॥ श्रियैश्वर्यमदोन्नाहंपश्यउन्मादकंनृणाम् १९ हैहयोनहुषोवेनोरावणोनरकोऽपरे ॥ श्रीमदाद्भ्रंशिताःस्थानाद्देवदैत्यनरे
श्वराः २० भवंतएतद्विज्ञायदेहाद्युत्पाद्यमंतवत् ॥ मायजंतोऽध्वरैर्युक्ताःप्रजाधर्मेणरक्षथ २१

चूर्णिका

१२ १३ अतः वयंराज्यं नस्पृहयामहे १४ तस्मात् तवचरणाब्जयोः अविस्मृतिः येनस्यात् तथाउपायंसमादिश १५ कृष्णायवासुदेवायहरयेपरमात्मने प्रणतक्लेशनाशाय
गोविंदायनमोनमः १६ ॥ श्रीशुकउवाच ॥ एवंराजभिः स्तूयमानः भगवान् तान्आह १७ ॥ श्रीभगवानुवाच ॥ हेभूपाः अद्यप्रभृति वः मयि सुदृढभक्तिः अस्तु १८
भवद्भिः मद्भजनं कर्तव्यमितिनिश्चितं एतद्दिष्ट्या किंच नृणांश्रीमदेन उद्बंधनं पश्यामि १९ यतः हैहयोनाहुषोवेनोरावणोनरकोपरे एतेश्रीमदेन स्थानात् भ्रंशिताः
२० यूयंएतत् ज्ञात्वा मां यज्ञैः यजंतः संतः धर्मेणप्रजाः रक्षत २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रजातंतून्पुत्रादिसंततीः (संतन्वंतःविस्तारयंतः) (प्राप्तंप्राप्तंसुखदुःखादि) रागद्वेषराहित्येनसेवमानाइत्यर्थः । (तत्रभवः श्रेयः अभवस्तद्विलक्षणम्) २२ मांब्रह्मयास्यथ । (व्रतंनियमः) २३
(पुरुषान्) स्त्रियश्चतेषांमज्जनकर्मणिअभ्यंगस्नानादौन्ययुंक्त (प्रेरितवान्) २४ २५ सुस्नातान्सम्यगलंकृतान्नृपोचितैर्विविधैर्भोगैश्च (गंधमाल्यादिभिः) युक्तान्तान्वरेणान्नेनभोजयित्वापुनःपु
नस्तेषां (नरदेवोचितैर्वस्त्रादिभिः) सपर्यांसहदेवेन (राज्ञा) कारयामास इतिद्वयोरन्वयः २६ ग्रहाश्चंद्रादयः २७ (साधवोअश्वायेषांतान्मणिभिःकांचनैश्चभूषितात्रथान्आरोप्य) प्रीणय्यनं
दयित्वा (प्रत्ययापयत्प्रेषयामास) २८ २९ (प्रकृतिभ्यःस्वस्वामात्यादिभ्यःभगवच्चेष्टितं) जगदुःऊचुः ३० (पार्थाभ्यांभीमार्जुनाभ्यां) ३१ खांडवप्रस्थंइंद्रप्रस्थम् (दुर्हृदामसुखकराः) ३२
(जरासंधं) शांतंमृतं । आप्तमनोरथोबभूवेतिशेषः ३३ ३४ (अनुकंपितंअनुकंपयातुष्ठितमित्यर्थः) ३५ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांत्रिसप्ततितमोऽध्यायः ७३ ॥ ॥ ७ ॥

॥९७॥ श्लोकाः २२/३५

संतन्वंतःप्रजातंतून्सुखंदुःखंभवाभवौ ॥ प्राप्तंप्राप्तंचसेवंतोमच्चित्ताविचरिष्यथ २२ उदासीनाश्चदेहादावात्मारामाधृतव्रताः ॥ मय्यावेश्यमनःसम्यङ्मामं
तेब्रह्मयास्यथ २३ ॥ श्रीशुकउवाच ॥ इत्यादिश्यनृपान्कृष्णोभगवान्भुवनेश्वरः ॥ तेषांन्ययुंक्तपुरुषान्स्त्रियोमज्जनकर्मणि २५ सपर्यांकारयामासस
हदेवेनभारत ॥ नरदेवोचितैर्वस्त्रैर्भूषणैःस्रग्विलेपनैः २५ भोजयित्वावरान्नेनसुस्नातान्समलंकृतान् ॥ भोगैश्चविविधैर्युक्तांस्तांबूलाद्यैर्नृपोचितैः २६
तेपूजितामुकुंदेनराजानोमृष्टकुंडलाः ॥ विरेजुर्मोचिताःक्लेशात्प्रावृडंतेयथाग्रहाः २७ रथान्सदश्वानारोप्यमणिकांचनभूषितान् ॥ प्रीणय्यसूनृतैर्वाक्यैः
स्वदेशान्प्रत्ययापयत् ॥ तएवंमोचिताःकृच्छ्रात्कृष्णेनसुमहात्मना ॥ ययुस्तमेवध्यायंतःकृतानिचजगत्पतेः २९ जगदुःप्रकृतिभ्यस्तेमहापुरुषचेष्टितम् ॥
यथान्वशासद्भगवांस्तथाचक्रुरतंद्रिताः ३० ॥ श्रीशुकउवाच ॥ जरासंधंघातयित्वाभीमसेनेनकेशवः ॥ पार्थाभ्यांसंयुतःप्रायात्सहदेवेनपूजितः ३१ ग
त्वातेखांडवप्रस्थंशंखान्दध्मुर्जितारयः ॥ हर्षयंतःस्वसुहृदोदुर्हृदांचासुखावहाः ३२ तच्छ्रुत्वाप्रीतमनसइंद्रप्रस्थनिवासिनः ॥ मेनिरेमागधंशांतंराजाचा
प्तमनोरथः ३३ अभिवंद्याथराजानंभीमार्जुनजनार्दनाः ॥ सर्वमाश्रावयांचक्रुरात्मनायदनुष्ठितम् ३४ निशम्यधर्मराजस्तत्केशवेनानुकंपितम् ॥ आनं
दाश्रुकलामुंचन्प्रेम्णानोवाचकिंचन ३५ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्रिसप्ततितमोऽध्यायः ७३ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

किंच देहादौ उदासीनाः संतः मयिमनः आवेश्य अंतेमांयास्यथ २२ २३ ॥ श्रीशुकउवाच ॥ कृष्णः नृपान् इत्यादिश्य ततस्तेषांमज्जनकर्मणिपुरुषान् स्त्रियश्च न्ययुंक्त
२४ ततः तेषांसहदेवेन वस्त्रभूषणादिभिः पूजां कारयामास २५ एवंमुकुंदेन पूजिताः राजानःतंकृष्णंध्यायंतः संतः रथान् आरुह्य स्वदेशान् आगत्य कृष्णचेष्टितं
प्रकृतिभ्यः जगदुः २६ २७ २८ २९ ३० ततः श्रीकृष्णः सहदेवेन पूजितः सन् ३१ पार्थाभ्यांसंयुतः प्रायात् ततः तेजितारयः इंद्रप्रस्थंगत्वा शंखान्दध्मुः ३२
तच्छ्रुत्वाजनाः मागधंशांतंमेनिरे युधिष्ठिरः पूर्णमनोरथः आस ३३ ततः भीमार्जुनजनार्दनाः युधिष्ठिरं नत्वा सर्वं अकथयन् ३४ तत् भगवदनुकंपितं ज्ञात्वा युधिष्ठिरः आ
नंदाश्रुकलाःमुंचन् सन् किंचन नोवाच ३५ ॥ ॥ इतिदशमेत्रिसप्ततितमः ॥ ७३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चतुर्युक्सप्ततितमेराजसूयक्रियाद्विजैः ॥ अग्रपूजाप्रसंगेनचैद्यघातादिवर्ण्यते ॥ १ ॥ राजसूयमखेहत्वाजरासंधंतदंतरे ॥ चैद्यंतदंतेकुर्वतेवीजंकालिमिवावपत् ॥२॥ तंकृष्णस्यअनुभावंप्रभावंचकारात्तस्याज्ञानुविधायित्वंचालक्ष्येत्यर्थः १ तदाह येस्युरिति । येत्रैलोक्यस्यापिगुरवःस्युःसनकादयःसर्वेचलोकाःलोकपालाश्चतेशिरसैवतवानुशासनंवहंतिदुर्लभंलब्ध्वेतिभाग्येनैतल्लब्धमितिबहुमानेनेत्यर्थः २ स भवान्परमेश्वरोस्माकंअनुशासनंधत्तेतदत्यंतविडंबनंअननुरूपमनुकरणं । स्वतेजोहानिप्रसंगादित्यर्थः (ननुयूयमपिप्रभवइत्यतआह । ईशमानिनांईशंमन्यानांवस्तुतोदीनानांअकिंचनानां) ३ अथवा तवपूर्णस्यआज्ञापनाज्ञाधारणाभ्यांनतेजोहानिवृद्धीअतःकृपयासर्वंसंगच्छतइत्याह।नह्येकस्याद्वितीयस्येति(एकस्यसजातीयभेदरहितस्यअद्वितीयस्यविजातीयभेदरहितस्यएवं)समानासमानरहितस्यब्रह्मणःपूर्णस्यतवोभयंमाया । परमात्मनइतिसर्वजीवनियंतुस्तवनियम्यत्वंसुतरांनवास्तवम् । अतःपरानुग्रहार्थैरेतैःकर्मभिस्तवतेजोनवर्धतेनचह्रसति (क्षीयते ।) रवेरिवोदयास्तमयादिकर्मभिरित्यर्थः । तथाचश्रुतिः" नकर्मणावर्धतेनोकनीयानि"ति ४ नन्वेवमप्यहंपरमेश्वरःममेदंनीचंकर्मायोग्यमितिमनसिकथंनभवेदतआह । नवैतइति । हेअजिततेतवभक्तानामेवतावदियंनानाथीर्भेदमतिर्नास्ति । यथापशूनामज्ञानांवैकृताविकृतंशरीरंतद्विषया । तत्रतवतुनास्तीतिकिंपुनर्वक्तव्यमित्यर्थः ५ यज्ञियेयज्ञोचिते वसंतादिकालेयुक्तान्आभियुक्तान्सयुधिष्ठिरःऋत्विजोहोतृप्रमुखान्वव्रेवृतवान् ६ तानाह द्वैपायनइतित्रिभिः ७ ८ अकृतव्रणांतानेतानृत्विगुपद्रष्ट्रादिभेदेनवव्रे ९ अन्येचोपहूतायज्ञादिदृक्षवस्तत्रेयुरित्यन्वयः १०

॥९८॥

॥ श्रीशुकउवाच ॥ एवंयुधिष्ठिरोराजाजरासंधवधंविभोः ॥ कृष्णस्यचानुभावंतंश्रुत्वाप्रीतस्तमब्रवीत् १ ॥ युधिष्ठिरउवाच ॥ येस्युस्त्रैलोक्यगुरवःसर्वेलोकमहेश्वराः ॥ वहंतिदुर्लभंलब्ध्वाशिरसैवानुशासनम् २ सभवानरविंदाक्षोदीनानामीशमानिनाम् ॥ धत्तेनुशासनंभूमंस्तदत्यंतविडंबनम् ३ नह्येकस्याद्वितीयस्यब्रह्मणःपरमात्मनः ॥ कर्मभिर्वर्धतेतेजोह्रसतेचयथारवेः ४ नवैतेऽजितभक्तानांममाहमितिमाधव ॥ त्वंतवेतिचनानाधीःपशूनामिववैकृता ५ ॥ श्रीशुकउवाच ॥ इत्युक्त्वायज्ञियेकालेवव्रेयुक्तान्सऋत्विजः ॥ कृष्णानुमोदितःपार्थोब्राह्मणान्ब्रह्मवादिनः ६ द्वैपायनोभरद्वाजःसुमंतुर्गौतमोऽसितः ॥ वसिष्ठश्च्यवनःकण्वोमैत्रेयःकवषस्त्रितः ७ विश्वामित्रोवामदेवःसुमतिर्जैमिनिःक्रतुः ॥ पैलःपराशरोगर्गोवैशंपायनएवच ८ अथर्वाकश्यपोधौम्योरामोभार्गवआसुरिः ॥ वीतिहोत्रोमधुच्छंदावीरसेनोऽकृतव्रणः ९ उपहूतास्तथाचान्येद्रोणभीष्मकृपादयः ॥ धृतराष्ट्रःसहसुतोविदुरश्चमहामतिः १०

श्लोकाः १/१०

चूर्णिका

॥श्रीशुकउवाच ॥ हेराजन् युधिष्ठिरः एवंकृष्णस्यअनुभावं श्रुत्वाप्रीतः सन् तं अब्रवीत् १ ॥ युधिष्ठिरउवाच ॥ हेभगवन् येसनकादयः त्रैलोक्यगुरवोपियस्यतव आज्ञां शिरसावहंति २ सःत्वंईशमानिनांनः आज्ञां धत्से तत् अत्यंतविडंबनम् ३ तथापिपरमात्मनः तव तेजः कर्मभिः नवर्धते नह्रसतेच ४ हेअजित तवभक्तानां अहंममेतित्वंतवेति भेदबुद्धिर्नास्ति किंपुनस्तवनास्तीतिवक्तव्यम् ५ ॥ श्रीशुकउवाच ॥ इत्युक्त्वा कृष्णानुमोदितः युधिष्ठिरः यज्ञोचिते वसंतादिकाले होतृप्रमुखान् ऋत्विजः वव्रे ६ तेच व्यासः १ भरद्वाजः २ सुमंतुः ३ गौतमः ४ असितः ५ वसिष्ठः ६ च्यवनः ७ कण्वः ८ मैत्रेयः ९ कवषः १० त्रितः ११ ७ विश्वामित्रः १२ वामदेवः १३ सुमतिः १४ जैमिनिः १५ क्रतुः १६ पैलः १७ पराशरः १८ गर्गः १९ वैशंपायनः ८ २० अथर्वाः २१ कश्यपः २२ धौम्यः २३ रामः २४ भार्गवः २५ ८ आसुरिः २६ वीतिहोत्रः २७ मधुच्छंदाः २८ वीरसेनः २९ अकृतव्रणः ३० ९ तथा अन्येद्रोणभीष्मकृपादयः सुतैःसहधृतराष्ट्रः विदुरः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

...यच्चराजन्यादयःसमाहूतास्तित्रसमीयुः... कृष्णभक्तस्यपांडुसुतस्यराज्ञो...जसूयं आविस्मिताःसंतःसूपपन्नं सुसंपन्नं मेनिरे(इतित्रयाणां) अन्वयः (अत्रकृष्णभक्तत्वम विस्मयेहेतुः) १३ १४ १५ याजकाःऋत्विजः (देवानांवर्चइववर्चस्तेजोयेषांते वरुणंअमराइव यथाविधिराजसूयेनयुधिष्ठिरमयाजयन्राजसूयमकारयन्नित्यर्थः) १६ सुत्येऽहनिसोमाभिषवदिने १७ अग्राहणंअग्रपूजातस्याहयोग्यंअनैकांत्यात्योग्यानांबहुत्वेनैकस्यानिश्चयात् (ननिश्चिक्युः । तदा सहदेवो जरासंधस्य पुत्रः) १८ (श्रैष्ट्येहेतवःभगवानित्यादयः । देशकालद्रव्यदेवतादि यज्ञांगान्येष एवेति १९ (किंच यदात्मकमिति) साख्यंज्ञानं योगउपासना २० ननु सांख्यंकेवलपरं योगःसविशेषणपरः कथमुभयोरेकपरत्वंतत्राह । एकएवाद्वितीयोसाविति (सजातीयस्वगत ॥९९॥ विजातीयभेदशून्योसावित्यर्थः) अतःसांख्यस्यैतत्परत्वंयुक्तम् । अथविशेषणभूतस्यसर्वप्रपंचस्यतन्मयत्वात्सविशेषणविषयस्ययोगस्यापियुक्तमद्वितीयपरत्वमित्याह ऐतदात्म्यामिति । एषश्रीकृष्ण आत्मायस्यतत्एतदात्मंतस्यभावऐतदात्म्यंभवितर्येवभावनिर्देशः । 'ऐतदात्म्यमिदंसर्वं'मितिश्रुतेः अत्रहेतुः आत्मनेति । हेसभ्याःआत्माश्रयःअनन्यापेक्षःस्वयमजःजन्मशून्यःइदंजगत्आत्मनैवो पादानभूतेन सृजतिअवतिहंतिच । (एवमभिन्नोपादानानिमित्तानतिरिक्तत्वात्कार्यस्य योगश्चयत्परइतिभावः) २१

श्लोकाः

ब्राह्मणाःक्षत्रियावैश्याःशूद्रायज्ञदिदृक्षवः ॥ तत्रेयुःसर्वराजानोराज्ञांप्रकृतयोनृप ११ ततस्तेदेवयजनंब्राह्मणाःस्वर्णलांगलैः ॥ कृष्ट्वातत्रयथाम्नायंदीक्षयांच
क्रिरेनृपम् १२ हैमाःकिलोपकरणावरुणस्ययथापुरा ॥ इंद्रादयोलोकपालाविरिंच्यभवसंयुताः १३ सगणाःसिद्धगंधर्वाविद्याधरमहोरगाः ॥ मुनयो ११/२१
यक्षरक्षांसिखगकिन्नरचारणाः १४ राजानश्चसमाहूताराजपत्न्यश्चसर्वशः॥ राजसूयंसमीयुःस्मराज्ञःपांडुसुतस्यवै ॥ मेनिरेकृष्णभक्तस्यसूपपन्नमाविस्मि
ताः १५ अयाजयन्महाराजंयाजकादेववर्चसः ॥ राजसूयेनविधिवत्प्राचेतसमिवामराः १६ सुत्येऽहन्यवनीपालोयाजकान्सदसस्पतीन् ॥ अपूजयन्म
हाभागान्यथावत्सुसमाहितः १७ सदस्यग्रार्हणार्हंवैविमृशंतःसभासदः ॥ नाध्यगच्छन्ननैकांत्यात्सहदेवस्तदाब्रवीत् १८ अर्हतिह्यच्युतःश्रैष्ठ्यंभगवा
न्सात्वतांपतिः ॥ एषवैदेवताःसर्वदेशकालधनादयः १९ यदात्मकमिदंविश्वंक्रतवश्चयदात्मकाः ॥ अग्निराहुतयोमंत्राःसांख्यंयोगश्चयत्परः २० ए
कएवाद्वितीयोसावैतदात्म्यमिदंजगत् ॥ आत्मनाऽऽत्माश्रयःसभ्याःसृजत्यवतिहंत्यजः २१

चूर्णिका

चत्वारोवर्णाश्चतत्रईयुः ११ ततः तेब्राह्मणाः स्वर्णलांगलैः कर्षणादिभिः भूमिंसंशोध्य नृपंदीक्षासंस्कारयुक्तं अकुर्वन् १२ तत्र यज्ञेउपस्कराः हैमाः आसन् ततः विरिंचि भवसंयुताः इंद्रादिलोकपालाः १३ सिद्धगंधर्वविद्याधरोरगाः मुनयः यक्षरक्षांसिखगकिन्नरचारणाः १४ राजानः राजपत्न्यश्च राजसूयंसमीयुः १५ ततो ऋत्विजःमहाराजं राज सूयेन अयाजयन् १६ ततः सोमाभिषवदिने युधिष्ठिरः ऋत्विजःसभ्यांश्च अर्चितुं सभांप्राप्तः १७ तदासभासदः अग्रपूजार्हं विमृशंतः संतः योग्यानां बाहुल्यात् यदा ॥९९॥ नाध्यगच्छन् तदा सहदेवः अब्रवीत् १८ हेसभ्याः एषः अच्युतःअग्रपूजांअर्हति १९ यतः यदात्मकंइदं विश्वं च क्रतवश्चयदात्मकाः किंचस्वयंअजः सन् इदंविश्वं सृजत्यवतिहंतिच २० २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच । विविधानीति । यस्यावेक्षयाअनुग्रहेणविविधानिकर्माणितपोयोगादीनिजनयन्कुर्वन्यत्यस्मात्अयंसर्वोपिजनोधर्मादिलक्षणंश्रेयःईहतेसाधयति । कर्माणितत्फलानिचयदधीनानीत्यर्थः २२ (महतेविश्वाधिकायपरमार्हणमग्रपूजा) २३ नन्वात्मना (पात्रमुद्दिश्य) क्रियमाणमर्हणंआत्मनःकथंस्यात्तत्राह । सर्वभूतानामात्मभूताय । अतएवानन्यदर्शिनेनिरस्तभेदमतये २४ सहदेवइत्युक्त्वा तूष्णीमभून् । (शिशुपालादीनामसह्यंकथमुक्तवान्तत्राह) कृष्णानुभाववित् । (कृष्णप्रभावस्यज्ञाता) २५ द्विजेरितंसाधुसाध्विवितिघोषंश्रुत्वा । हार्दमभिप्रायम् । समर्हयत्पूजितवानित्यर्थः २६ २७ २८ (सभाजितंपूजितं) २९ (दमघोषसुतःशिशुपालःअभीतोनिर्भयःनिर्दाक्षिण्यइत्यर्थःअमर्षोकोपयक्तः) ३० (दुरत्ययोदुरतिक्रमः । यद्यतःकालात्) ३१ हेसदसस्पतयःसर्वेयूयंबालभाषितंमामन्यध्वंमाजानीतमागृह्णीतेत्यर्थः । यद्यतोभाषितात्कृष्णोर्हणेअग्रपूजायांसंगतस्तत् । वास्तवोर्थस्तुइदंबालभाषितमितिमामंध्वंकिंतुबालभाषितमपिवृद्धभाषितमेवैतत्प्रमाणत्वात् ३२ ३३

श्लोकाः २२—३३

ईहतेयदयंसर्वःश्रेयोधर्मादिलक्षणम् २२ तस्मात्कृष्णायमहतेदीयतांपरमार्हणम् ॥ एवंचेत्सर्वभूतानामात्मनश्चसमर्हणम् २३ सर्वभूतात्मभूतायकृष्णायानन्यदर्शिने ॥ देयंशांतायपूर्णायदत्तस्यानंत्यमिच्छता २४ इत्युक्त्वासहदेवोऽभूत्तूष्णींकृष्णानुभाववित् ॥ तच्छ्रुत्वातुष्टुवुःसर्वेसाधुसाध्विवितिसत्तमाः २५ श्रुत्वाद्विजेरितंराजाज्ञात्वाहार्दंसभासदाम् ॥ समर्हयद्धृषीकेशंप्रीतःप्रणयविह्वलः २६ तत्पादाववनिज्यापःशिरसालोकपावनीः ॥ सभार्यःसानुजामात्यःसकुटुंबोऽवहन्मुदा २७ वासोभिःपीतकौशेयैर्भूषणैश्चमहाधनैः ॥ अर्हयित्वाऽश्रुपूर्णाक्षोनाशकत्समवेक्षितुम् २८ इत्थंसभाजितंवीक्ष्यसर्वेप्रांजलयोजनाः ॥ नमोजयेतिनेमुस्तंनिपेतुःपुष्पवृष्टयः २९ इत्थंनिशम्यदमघोषसुतःस्वपीठादुत्थायकृष्णगुणवर्णनजातमन्युः ॥ उत्क्षिप्यबाहुमिदमाहसदस्यमर्षीसंश्रावयन्भगवतेपरुषाण्यभीतः ३० ईशोदुरत्ययःकालइतिसत्यवतीश्रुतिः ॥ वृद्धानामपियद्बुद्धिर्बालवाक्यैर्विभिद्यते ३१ यूयंपात्रविदांश्रेष्ठामामंध्वंबालभाषितम् ॥ सदसस्पतयःसर्वेकृष्णोयत्संमतोऽर्हणे ३२ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान् ॥ परमर्षीन्ब्रह्मनिष्ठाँल्लोकपालैश्चपूजितान् ३३

चूर्णिका

२२ तस्मात् कृष्णायपरमार्हणंदीयतांएवंकृतेसति सर्वेषांपूजनंस्यात् २३ २४ इत्युक्त्वासहदेवः तूष्णींअभूत् तच्छ्रुत्वा सर्वेसभ्याः साधुसाधुइतितुष्टुवुः २५ ततः राजाविप्राणां साधुसाधु इतिघोषंश्रुत्वा सभासदां अभिप्रायंच ज्ञात्वा प्रीतः सन्हृषीकेशं अपूजयत् २६ तदा तत्पादौप्रक्षाल्य तदपः सहकुटुंबः शिरसिधृत्वा वस्त्रभूषणादिभिः श्रीकृष्णंपूजयित्वा अश्रुपूर्णाक्षः सन् तंईक्षितुंनाशकत् २७ २८ इत्थंपूजितं कृष्णंवीक्ष्य सर्वेजनाः तंनेमुः तदा पुष्पवृष्टयः पेतुः २९ ततःशिशुपालः सत्सर्वंदृष्ट्वाक्रुद्धः सन् आसनात् उत्थाय बाहुंउत्क्षिप्यभगवते परुषवाक्यानिश्रावयन् सन् इदंआह ३० हेसभ्याः कालोदुरत्ययः इतिश्रुतिः सत्या यतः वृद्धानामपिबुद्धिः बालवाक्यैर्भिद्यते ३१ हेसभ्याः पात्रविदांश्रेष्ठाः यूयं कृष्णःसमर्हणेसंमतइति बालभाषितंमागृह्णीत ३२ अहोतपआदियुक्तान् ऋषीन् अतिक्रम्य गोपालः सपर्यांकथंअर्हति यथाकाकःपुरोडाशंतथा ३३

१ आत्मनश्चार्हणंभवेदित्यपिपा...

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ||७४||

गोपालशत... कुत्सितवद... ...पंतिभाषंतेकलपाःपापंतानः... ...समाघातयतीति तथासः । अकाल इतिच्छेदःकंचभकं
चकाकेसुखदुःखेतेनविद्येतेयस्यसः अकाकःआप्तकामइत्यर्थः । सयथाआप्तकामोदेवयोग्यंकेवलंपुरोडाशं... नाहति । अपितुसर्वस्वमपि तथाज्यंश्रीकृष्णोपिब्रह्मर्षियोग्यंसपर्यामात्रंकथमर्हति । किंत्वा
त्मसमर्पणमप्यर्हतीत्यर्थः । (बहिरर्थपक्षेतुकुलपांसनःकुलदूषणः) ३४ वर्णाश्रमकुलेभ्योऽपेतोब्रह्मत्वात् । "अनामगोत्र" मितिश्रुतेः । अतएवानाधिकारित्वात्सर्वैर्धर्मैःबहिष्कृतः । स्वैरवर्तीपरमे
श्वरत्वात् । अतएवनिर्गुणःतमआदिरहितः । एवंभूतंजीवानांयोग्यंतुच्छंसपर्यामात्रंकथमर्हतीत्यर्थः ३५ अपिचकथंवर्णनीयोमादृशैरेषांयदूनांमहिमा (यस्मादेषांकुलंययातिनाशप्तमपिकिंसद्भिर्बहिष्कृतं
अपितुशिरसाधृतं । किंच । अस्मदादिकुलवत्किंवृथापानरतंअपित्वतिनियताचारमित्यर्थः । अहोयदूनामेवतावदीदृशंमाहात्म्यंयदुकुलवृद्धस्ययथातेःशापोनप्राभूदित्यादि । अयंतुसाक्षादीश्वरःअतः
||१०१|| सपर्यामात्रंकथमर्हतीत्यर्थः ३६ किंच । येराजानोदुष्टानुच्चाटयंतेतदर्थंकीकटादिदेशानप्याश्रयंति एतेतुब्रह्मर्षिसेवितानेवदेशानाश्रित्यअब्रह्मवर्चसंसमुद्रंदुर्गमपिहित्वा हापयित्वेत्यर्थः बाधंतेतथायाः
दस्यवःप्रजास्ताश्च । अयमर्थः वेदतदर्थाभियोगोब्रह्मवर्चसंतद्विरुद्धंअब्रह्मवर्चसंसमुद्रंमुद्रात्रलिंगंतत्सहितंवेदविरुद्धलिंगधारिणंपाषंडमित्यर्थःतल्लिंगंत्याजयित्वा बाधंतेदंडयंति कथंभूतंदुर्गं धर्मवत्प्रतीते
रधर्मतयादुर्ज्ञेयमित्यर्थः तथादस्यवःप्रजाःदस्यूनपिप्रजावेषेणवर्तमानान्दंडयंतिअतोयदुभ्योऽन्यःकोनामधार्मिकोस्तीतिवास्तवोर्थःपारुष्यंतूत्तानार्थमेव ३७ शिवाफेरुस्तद्रुतंश्रुत्वायथासिंहोनकिंचिद्ब्रूते
तद्वत् ३८ (चेदिपंशिशुपालं) ३९ (तत्परस्यतद्भक्तस्य) ४० ४१ (असंभ्रांतःधृष्टः)४२तावदुत्थायेत्यस्यायमभिप्रायः एषमत्पार्षदोमहाबलःसर्वानेतान्हन्यादेवअतोमयैवशीघ्रंहंतव्यइतितत्क्षणमे
वोत्थाय (पततआपततस्तस्यक्षुरांतवत्तीक्ष्णेनचक्रेण) शिरोजहारेति ४३

सदसस्पतीनतिक्रम्ययगोपालःकुलपांसनः ॥ यथाकाकःपुरोडाशंसपर्यांकथमर्हति ३४ वर्णाश्रमकुलापेतःसर्वधर्मबहिष्कृतः ॥ स्वैरवर्तीगुणैर्हीनःसप श्लोकाः
र्यांकथमर्हति ३५ ययातिनैषांहिकुलंशप्तंसद्भिर्बहिष्कृतम् ॥ वृथापानरतंशश्वत्सपर्यांकथमर्हति ३६ ब्रह्मर्षिसेवितान्देशान्हित्वैतेऽब्रह्मवर्चसम् ॥
समुद्रंदुर्गमाश्रित्यबाधंतेदस्यवःप्रजाः ३७ एवमादीन्यभद्राणिबभाषेनष्टमंगलः ॥ नोवाचकिंचिद्भगवान्यथासिंहःशिवारुतम् ३८ भगवन्निंदनंश्रुत्वा ३४/४३
दुःसहंतत्सभासदः ॥ कर्णौपिधायनिर्जग्मुःशपंतश्चेदिपंरुषा ३९ निंदांभगवतःशृण्वंस्तत्परस्यजनस्यवा ॥ ततोनापैतियःसोपियात्यधःसुकृताच्च्युतः
४० ततःपांडुसुताःक्रुद्धामत्स्यकैकयसृंजयाः ॥ उदायुधाःसमुत्तस्थुःशिशुपालजिघांसवः ४१ ततश्चैद्यस्त्वसंभ्रांतोजगृहेखड्गचर्मणी ॥ भर्त्सयन्कृ
ष्णपक्षीयान्राज्ञःसदसिभारत ४२ तावदुत्थायभगवान्स्वान्निवार्यस्वयंरुषा ॥ शिरःक्षुरांतचक्रेणजहारपततोरिपोः ४३

चूर्णिका ३४ किंच अयंसर्वधर्मबहिष्कृतः स्वैरवर्ती अतः पूजांकथंअर्हति ३५ किंच येषांकुलंययातिना शप्तम् ३६ तेएव समुद्रेदुर्गंकृत्वा प्रजाः बाधंते ३७ सः चैद्यः एवमादीनिपरुष
वाक्यानिबभाषे तथापि भगवान् किंचिन्नोवाच यथा सिंहः शिवारुतम् ३८ तदासभ्याः कर्णौपिधाय शिशुपालंशपंतः संतः निर्जग्मुः ३९ अतः यः पुमान् भगवतः ||१०१||
तद्भक्तस्यच निंदांशृण्वन् ततो नापैति सः अधोयाति ४० ततः पांडवाः मत्स्यकैकयसृंजयाश्च क्रुद्धाः संतः शिशुपालंहंतुंउत्तस्थुः ४१ ततः चैद्यः कृष्णपक्षीयान् भर्त्सय
न् खड्गचर्मणी जगृहे ४२ तावत्कृष्णः उत्थाय स्वान् निवार्य चक्रेण रिपोः शिरः जहार४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

४४ (वासुदेवंप्रतिप्राविशत् । उल्काज्वाला । खादाकाशात्) ४५ नन्वेवंनिंदकस्यकथंवासुदेवेप्रवेशःतत्राह । जन्मत्रयेति । जन्मत्रयेअनुगुणितंअनुवर्तितं । (सनकादिवचनवशान्निरंतरं)
यद्वैरंतेनसंरब्धयाआविष्टया (धियाध्यायन्) तन्मयतांयातःतत्स्वरूपतांप्राप्तः पुनःपार्षदोबभूवेत्यर्थः । अत्रहेतुः । भावोहीति । भावोभावनाअनुध्यानंभवस्यध्येयाकारजन्मनःकारणंपशस्कारि
ध्यानेनकीटेपुतथादृष्टत्वादित्यर्थः ४६ (एकराट्महाराजोयुधिष्ठिरः) ४७ ४८ (अनुज्ञादानमनिच्छंतमपिराजानंअनुज्ञाप्यतदनुज्ञांगृहीत्वेत्यर्थः) ४९ (शिशुपालस्यगतिंस्मृत्वाश्चर्यमन्वानंप्रत्याह ।
वर्णितमिति । तस्यशिशुपालस्योपाख्यानंमयातेसप्तमेपिवर्णितं । एवंवैकुंठवासिनोर्विष्णुपार्षदयोर्विप्रशापात्पुनःपुनस्त्रिवारंजन्मतद्वर्णितमिति) ५० (एवंराजसूयसंबंधिनाआवभृथ्येनकर्मणास्नातोदे
वसभायामिंद्रइवशुशुभे) ५१ सुरामानवाःखेचराश्चप्रमथाः ५२ पापंधर्मद्विषम् । अत्रहेतुःकलिंकलेरंशम् । अतएवकुरुकुलस्यामयंव्याधिंनाशकमित्यर्थः (तांराजसूयेप्रसिद्धांश्रियंसंपदंस्फीतांअभि
॥१०२॥ वृद्धाम्) ५३ वितानंयज्ञंच ५४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांदशमेचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ ॥ ७ ॥ ॥ पंचयुक्सप्ततितमेयज्ञावभृथसंभ्रमः । सुयो
धनस्यचाक्षांत्यामानभंगोदृशिभ्रमात् ॥ १ ॥ दुर्योधनस्यैवदुःखकारणंप्रष्टुमुक्तमनुवदतिअजातशत्रोरिति १

श्लोकाः ४४—१

शब्दःकोलाहलोप्यासीच्छिशुपालेहतेमहान् ॥ तस्यानुयायिनोभूपादुद्रुवुर्जीवितैषिणः ४४ चैद्यदेहोत्थितंज्योतिर्वासुदेवमुपाविशत् ॥ पश्य
तांसर्वभूतानामुल्केवभुविखाच्च्युता ४५ जन्मत्रयानुगुणितवैरसंरब्धयाधिया ॥ ध्यायंस्तन्मयतांयातोभावोहिभवकारणम् ४६ ऋत्विग्भ्यः
ससदस्येभ्योदक्षिणांविपुलामदात् ॥ सर्वान्संपूज्यविधिवच्चक्रेऽवभृथमेकराट् ४७ साधयित्वाक्रतुंराज्ञःकृष्णोयोगेश्वरेश्वरः ॥ उवासकतिचिन्मासान्
सुहृद्भिरभियाचितः ४८ ततोनुज्ञाप्यराजानमनिच्छंतमपीश्वरः ॥ ययौसभार्यःसामात्यःस्वपुरंदेवकीसुतः ४९ वर्णितंतदुपाख्यानंमयातेबहुविस्तरम् ॥
वैकुंठवासिनोर्जन्मविप्रशापात्पुनःपुनः ५० राजसूयावभृथ्येनस्नातोराजायुधिष्ठिरः ॥ ब्रह्मक्षत्रसभामध्येशुशुभेसुरराडिव ५१ राज्ञासभाजिताःसर्वेसुरमा
नवखेचराः ॥ कृष्णंक्रतुंचशंसंतःस्वधामानिययुर्मुदा ५२ दुर्योधनमृतेपापंकलिंकुरुकुलामयम् ॥ योनसेहेश्रियंस्फीतांदृष्ट्वापांडुसुतस्यताम् ५३यइदंकी
र्तयेद्विष्णोःकर्मचैद्यवधादिकम् ॥ राजमोक्षंवितानंचसर्वपापैःप्रमुच्यते ५४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुःसप्ततितमोध्यायः ॥ ७४ ॥
॥ राजोवाच ॥ अजातशत्रोस्तंदृष्ट्वाराजसूयमहोदयम् ॥ सर्वेमुमुदिरेब्रह्मन्नृदेवायेसमागताः १

चूर्णिका

तदा कोलाहलः आसीत् ततः तदनुयायिनः भूपाः दुद्रुवुः ४४ चैद्यदेहोत्थंज्योतिः श्रीकृष्णं अविशत् ४५ ४६ ततोधर्मः ऋत्विग्भ्यः सदस्येभ्यः दक्षिणांदत्त्वा अवभृथं
चक्रे ४७ ततः कृष्णःराज्ञः क्रतुंसाधयित्वा तत्र कतिचिन्मासान् उवास ४८ततः राजानं अनुज्ञाप्य स्वपुरंययौ ४९ हेपरीक्षित् विप्रशापात् वैकुंठवासिनोः जन्म तेअनुव
र्णितम् ५० ततो युधिष्ठिरः इंद्रइवशुशुभे ५१ ततः राज्ञासत्कृताः सर्वेकृष्णंक्रतुंचशंसंतः स्वधामानियुयुः ५२ दुर्योधनस्तुतदसहन् न मुमुदे ५३ यः इदंचैद्यवधादिकं
कर्म राजमोक्षंयज्ञंचकीर्तयेत् सःसर्वपापैः प्रमुच्यते ५४ इतिदशमेचतुःसप्ततितमः ७४ ॥ राजोवाच ॥ हेब्रह्मन् युधिष्ठिरस्य यज्ञमहोदयं दृष्ट्वा दुर्योधनंविनासर्वे
मुमुदिरे इतित्वन्मुखात् श्रुतम् [illegible] तताम् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(एकंदुर्योधनंवर्जयित्वा सर्वेनृदेवानृपतयः राजानः क्षत्रिया मुमुदिरे) इति (नोस्माभिः) श्रुतंत्वन्मुखादेवेत्यर्थः २ दुर्योधनस्यासहनकारणत्वेन यागमहोत्सवमेवपुनःसिंहावलोकनन्यायेनानिरूपय ति । पितामहस्येत्यादिनाएकदांतःपुरतस्येत्यतःप्राक्तनेनग्रंथेन । प्रेमबंधनाःप्रेमयंत्रिताः ३ (महानसंपाकस्थानंतदध्यक्षः) पूजायांसंमानने । द्रव्यसाधने नानावस्तुसंपादने ४ गुरूणांशुश्रूषणेचं दनालेपनादौ ५ ६ (एवमौदार्यादिभिस्तत्तत्कर्मणियोग्याभीमादयोयुयुधानादयश्च) निरूपितानियुक्ताःसंतोनानाकर्मसुप्रवर्ततेस्मेत्यर्थः ७ ऋत्विजश्चसदस्याश्चसभासदःबहुविदश्चतेषुसुहृत्तमे षुचस्विष्टेषुसम्यक्पूजितेषु । सुनृतंप्रियवाक् । समर्हणमलंकारादि । दक्षिणाश्चप्रसिद्धागोहिरण्यादयस्ताभिः (सात्त्वतपतेःकृष्णस्य) द्युनद्यांगंगायां ८ (अवभृथसंबंधिन्युत्सवे) ९ (तेषांगायका नांसंवीणाद्युन्नादः दिवमस्पृशत् अत्युच्चैरभवदित्यर्थः) १० चित्राग्निध्वजपताकाग्राणियेषुतैरिभेंद्रैःस्यंदनैःअर्वभिःअश्वैःभटैश्चएवंचतुरंगैःसेन्यैः(भूपा) निर्ययुः ११यजमानोयुधिष्ठिरःपुरःसरोयेषांते १२ सदस्याऋत्विजोऽन्येचद्विजश्रेष्ठाः (ब्रह्मघोषेणोपलक्षिताः) निर्ययुः १३ किंच । गंधादिभिःस्वलंकृताः (रसैर्मिथोविलिंपंतो) नराःनार्यश्चमिथो (विलिंपंत्यो) विजहुः १४ रसानेवाह । तैलेति । (तत्रगोरसोदधिनवनीतादि । गंधोदं गंधद्रव्यैःसंस्कृतंजलम् । तैलंचतथैवज्ञेयं) किंच । सांद्रकुंकुमादिभिःपुंभिर्लिप्तावारयोषितस्तांश्चप्रलिंपंत्योविजहुः (गंगायांविहरंतिस्मेत्यर्थः) १५

॥१०३॥

श्लोकाः २/१९

पितामहस्यतेयज्ञेराजसूयेमहात्मनः ॥ बांधवाःपरिचर्यायांतस्यासन्प्रेमबंधनाः ३ भीमोमहानसाध्यक्षोधनाध्यक्षःसुयोधनः ॥ सहदेवस्तुपूजायांनकुलोद्रव्यसाधने ४ गुरुशुश्रूषणेजिष्णुःकृष्णःपादावनेजने ॥ परिवेषणेद्रुपदजाकर्णोदानेमहामनाः ५ युयुधानोविकर्णश्चहार्दिक्योविदुरादयः ॥ बाह्लीकपुत्राभूर्याद्यायेचसंतर्दनादयः ६ निरूपितामहायज्ञेनानाकर्मसुतेतदा ॥ प्रवर्ततेस्मराजेंद्रराज्ञःप्रियचिकीर्षवः ७ ऋत्विक्सदस्यबहुवित्सुसुहृत्तमेषुस्विष्टेषुसूनृतसमर्हणदक्षिणाभिः ॥ चैद्येचसात्वतपतेश्चरणंप्रविष्टेचक्रुस्ततस्त्ववभृथस्नपनंद्युनद्याम् ८ मृदंगशंखपणवधुंधुर्यानकगोमुखाः ॥ वादित्राणिविचित्राणिनेदुरावभृथोत्सवे ९ नर्तक्योननृतुर्हृष्टागायकायूथशोजगुः ॥ वीणावेणुतलोन्नादस्तेषांसदिवमस्पृशत् १० चित्रध्वजपताकाग्रैरिभेंद्रस्यंदनार्वभिः ॥ स्वलंकृतैर्भटैर्भूपानिर्ययूरुक्ममालिनः ११ यदुसृंजयकांबोजकुरुकेकयकोशलाः ॥ कंपयंतोभुवंसैन्यैर्यजमानपुरःसराः १२ सदस्यर्त्विग्द्विजश्रेष्ठाब्रह्मघोषेणभूयसा ॥ देवर्षिपितृगंधर्वास्तुष्टुवुःपुष्पवर्षिणः १३ स्वलंकृतानरानार्योगंधस्रग्भूषणांबरैः ॥ विलिंपंत्योऽभिषिंचंत्योविजह्रुर्विविधैरसैः १४ तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः ॥ पुंभिर्लिप्ताःप्रलिंपंत्योविजह्रुर्वारयोषितः १५

चूर्णिका

२ ॥ ऋषिरुवाच ॥ तेपितामहस्ययज्ञेबांधवाः परिचर्यायां आसन् ३ तेच यथा महानसाध्यक्षोभीमः धनाध्यक्षः सुयोधनः पूजायांसहदेवः नानावस्तुसाधने नकुलः ४ गुरुशुश्रूषणेऽर्जुनःपादप्रक्षालने कृष्णः परिवेषणे द्रौपदी दानेकर्णः तथा सात्यक्यादयःयोजिताःसंतः नानाकर्मसुप्रवर्ततेस्म ६ ७ एवंयज्ञंसमाप्य गंगायां अवभृथस्नपनंचक्रुः ८ तदा वादित्राणिनेदुः नर्तक्यः ननृतुः गायकाः जगुः ९ १० ११ तदा यदुसृंजयाद्याः यजमानपुरःसराः संतः चतुरंगसैन्यैःसहनिर्ययुः तथाऋत्विगादयः ब्रह्मघोषेणनिर्ययुः देवादयः पुष्पवृष्टिंकुर्वंतः संतः तुष्टुवुः १२ १३ स्वलंकृताःनराः नार्यश्चमिथोविजह्रुः १४ १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नृभिर्भटैर्गुप्तानृदेव्योराजपत्न्योरथादियानैर्निरगमन् । निरगुः । एतदुपलब्धुं (द्रष्टुं) विमानवरैर्देव्योयथानिर्गतास्तद्वत् । ताराज्ञःमातुलेयैःसखिभिश्चपरितःसिच्यमानाः । सव्रीडेनहासेनविकसंति वदनानियासांताः । (यद्वा मातुलेयःश्रीकृष्णस्तस्यसख्योरुक्मिण्याद्यास्ताभिःपरिषिच्यमानाइति । अस्मिन्पक्षेह्रस्वआर्षः । विरेजुःशुशुभिरे) १६ देवरान्पतिभ्रातॄन् उत सखीन् मित्राण्यपी त्यर्थः । दृतीभिःउदकनोदनचर्मयंत्रैःनलिकाकारैःसिषिचुः (स्नपयामासुःसेचनेनेत्यर्थः । क्लिन्नानिअंबराणियासांताः । अतएवविवृतानिप्रकटानिवस्त्रांतरितानिगात्रादीनियासांताः । औत्सुक्यावि शेषेणमुक्तात्केशपाशात् । च्यवमानानिमाल्यानियासांता विहारैः- मलधियां (पापबुद्धीनां) कामिनामित्यर्थः (क्षोभंचेतसिकामविकारमित्यर्थः) १७ क्रियाभिरंगक्रियाभिःक्रतुराट्सशरीरो राजसूयइव १८ पत्नीसंयाजोयागविशेषःअवभृथसंबंधिआवभृथ्यंचतेचरित्वाअनुष्ठायेत्यर्थः (आचांतंकृताचमनंतंयजमानंकृष्णयाद्रौपद्यासह) १९ २० २१ अहतेनूतने । आनर्चअर्चितवान् २२ (बंधुज्ञात्योरवांतरभेदःसुहृदआप्ताःमित्राणिसखायःएतानन्यांश्चनारायणपरःनारायणप्रीत्यर्थमित्यर्थः) २३ सुराणामिवरुक्कांतिर्येषांते । मणिकुंडलैःसहिताःस्रगुष्णीषादयोयेषांते (तथाना र्यश्च) कुंडलयुगेनालकवृंदेनचजुष्टावक्त्रश्रीर्यासांताः २४ (महत्शीलंयेषांते) २५ २६ (दुर्लभममृतंप्राप्यपिबन्मर्त्योयथानतृप्यतितद्वत्) २७

॥१०४॥

श्लोकाः १६/२७

गुप्तानृभिर्निरगमन्नुपलब्धुमेतद्देव्योयथादिविविमानवरैर्नृदेव्यः ॥ तामातुलेयसखिभिःपरिषिच्यमानाःसव्रीडहासविकसद्वदनाविरेजुः १६ तादेवरानुत सखीन्सिषिचुर्दृतीभिःक्लिन्नांबराविवृतगात्रकुचोरुमध्याः ॥ औत्सुक्यमुक्तकबराच्यवमानमाल्याःक्षोभंदधुर्मलधियांरुचिरैर्विहारैः १७ ससम्राड्रथ मारूढःसदश्वंरुक्ममालिनम् ॥ व्यरोचतस्वपत्नीभिःक्रियाभिःक्रतुराडिव १८ पत्नीसंयाजावभृथ्यैश्चरित्वांतेतमृत्विजः ॥ आचांतंस्नापयांचक्रुर्गंगायां सहकृष्णया १९ देवदुंदुभयोनेदुर्नरदुंदुभिभिःसमम् ॥ मुमुचुःपुष्पवर्षाणिदेवर्षिपितृमानवाः २० सस्नुस्तत्रततःसर्वेवर्णाश्रमयुतानराः ॥ महापा तक्यपियुतःसद्योमुच्येतकिल्बिषात् २१ अथराजाहतेक्षौमेपरिधायस्वलंकृतः ॥ ऋत्विक्सदस्यब्रह्मादीनानर्चाभरणांबरैः २२ बंधुज्ञातिनृपान्मित्र सुहृदोऽन्यांश्चसर्वशः ॥ अभीक्ष्णंपूजयामासनारायणपरोनृपः २३ सर्वेजनाःसुररुचोमणिकुंडलस्रगुष्णीषकंचुकदुकूलमहार्घ्यहाराः ॥ नार्यश्चकुंड लयुगालकवृंदजुष्टवक्त्रश्रियःकनकमेखलयाविरेजुः २४ अथर्त्विजोमहाशीलाःसदस्याब्रह्मवादिनः ॥ ब्रह्मक्षत्रियविट्शूद्राराजानोयेसमागताः २५ देवर्षिपितृभूतानिलोकपालाःसहानुगाः ॥ पूजितास्तमनुज्ञाप्यस्वधामानिययुर्नृप २६ हरिदासस्यराजर्षेराजसूयमहोदयम् ॥ नैवातृप्यन्प्रशंसंतः पिबन्मर्त्योऽमृतंयथा २७

चूर्णिका

तथाराजपत्न्यः मातुलेयैः सखिभिश्चसिच्यमानाः सत्यः विरेजुः ताः देवान्सखींश्चदृतीभिः सिषिचुः १६ १७ तदायुधिष्ठिरः रथंआरूढः सन् स्वपत्नीभिः शुशु भे क्रियाभिः क्रतुराडिव ततः तेऋत्विजः पत्नीसंयाजान् आवभृथसंबंधिकर्माणिअनुष्ठाययुधिष्ठिरं स्नापयांचक्रुः १९ तदानरदुंदुभिःसमंदेवदुंदुभयोनेदुः देवर्षिपितृमानवाः पुष्पवर्षाणिमुमुचुः २० ततः सर्वे नराः तत्र सस्नुः २१ अथ राजा क्षौमेवाससी परिधाय ऋत्विगादीन् अभरणांबरैः आनर्च २२ ततोनृपः बंधुज्ञातिनृपमित्रसुहृदादीन्पूजया मास २३ ततः सर्वेजनाः नार्यश्चविरेजुः २४ततः ऋत्विजः सदस्याः अन्येब्राह्मणादयश्चदेवर्षिपितृभूतानिलोकपालाःतेनपूजिताःसंतः तं अनुज्ञाप्यस्वधामानिययुः २५ २६ २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(त्यागकातरःविरहभीरुः) २८ (सांबादीन्कृष्णपुत्रांश्चकुशस्थलींद्वारकांप्रतिप्रस्थापयामास) २९ (मनोरथमहार्णवंराजसूयलक्षणंअभीष्टमहासमुद्रंतरितुमशक्यमपिकृष्णेननाविकेनसमुत्तीर्य) गतज्वरःनिश्चिंतआसीत् ३० अच्युतेआत्मायस्यतस्य (राजसूयसंबंधिनंमहिमानंचदृष्ट्वाऽतप्यत्स्पर्धयेतिशेषः) ३१ (यस्मिन्नंतःपुरे) नरेंद्रादीनांलक्ष्मीःलक्ष्म्यःविभूतयःविश्वसृजामयेनउपक्लृप्ताः विरचिताः (नानाविधाविभांति) ताभिः (राजलक्ष्मीभिः) सह (यस्यांद्रौपद्यांसंलग्नमनाः) कुरुराट्दुर्योधनःअतप्यत् ३२ मधुपतेःकृष्णस्य। महिषीसहस्रमितिबहुत्वोपलक्षणं। (श्रोणीभरवशाच्छनकैः) क्वणद्भिरंघ्रिभिःशोभायस्यतत्। मध्येसुचारु। सुचारुमध्यमित्यर्थः। कुचकुंकुमैःशोणाहारायस्यतत्। यद्वा मध्यप्रदेशेलंबमानत्वेनसुशोभनाःकुचकुंकुमशोणहारायस्य। श्रीमंतिमुखानियस्यतत्। चलैःकुंडलैःकुंतलैश्चआढ्यंसपत्नमशोभतेतिशेषः ३३ क्वापिकदाचित् (सभायांकांचनेआसनेआसीनोधर्मसुतःसाक्षादिंद्रइव) विरेजेइतिशेषः (बंधुभिर्बांधवैः) स्वस्यचक्षुषाहिताहितज्ञापकेन ३४ ३५ मानीसाहंकारः। किरीटंचमालाचविद्येतेयस्यसः। न्यविशत् विवेश। क्षिपन्द्वास्थादीन्कांश्चिदधिक्षिपन् ३६ तत्रस्थलेवस्त्रांतमभ्यगृह्णात्आकुंचितवान्। कुतःतस्मिन्स्थलेएवभ्रांत्याजलंमत्वा। अथजलेचापतत्कुतःस्थलवद्भ्रांत्या (तत्रहेतुःमयेति) ३७ (राज्ञायुधिष्ठिरेणनिवार्यमाणाअपिजहसुःतत्रहेतुःकृष्णेनतत्रसंकेतादिनाऽनुमोदितादत्तानुमोदनाः) ३८

॥१०५॥

श्लोकाः २८/३८

ततोयुधिष्ठिरोराजासुहृत्संबंधिबांधवान् ॥ प्रेम्णानिवासयामासकृष्णंचत्यागकातरः २८ भगवानपितत्रांगन्यवात्सीत्तत्प्रियंकरः ॥ प्रस्थाप्ययदुवीरांश्च सांबादींश्चकुशस्थलीम् २९ इत्थंराजाधर्मसुतोमनोरथमहार्णवम् ॥ सुदुस्तरंसमुत्तीर्यकृष्णेनासीद्गतज्वरः ३० एकदांतःपुरेतस्यवीक्ष्यदुर्योधनःश्रियम् ॥ अतप्यद्राजसूयस्यमहित्वंचाच्युतात्मनः ३१ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नानाविभांतिकिलविश्वसृजोपक्लृप्ताः ॥ ताभिःपतीन्द्रुपदराजसुतोपतस्थे यस्यांविषक्तहृदयःकुरुराडतप्यत् ३२ यस्मिंस्तदामधुपतेर्महिषीसहस्रंश्रोणीभरेणशनकैःक्वणदंघ्रिशोभम् ॥ मध्येसुचारुकुचकुंकुमशोणहारंश्रीमन्मुखं प्रचलकुंडलकुंतलाढ्यम् ३३ सभायांमयक्लृप्तायांक्वापिधर्मसुतोधिराट् ॥ वृतोऽनुजैर्बंधुभिश्चकृष्णेनापिस्वचक्षुषा ३४ आसीनःकांचनेसाक्षादासनेमघवानिव ॥ पारमेष्ठ्यश्रियाजुष्टःस्तूयमानश्चबंदिभिः ३५ तत्रदुर्योधनोमानीपरीतोभ्रातृभिर्नृप ॥ किरीटमालीन्यविशदसिहस्तःक्षिपन्रुषा ३६ स्थलेऽभ्यगृह्णाद्वस्त्रांतंजलंमत्वास्थलेपतत् ॥ जलेचस्थलवद्भ्रांत्यामयमायाविमोहितः ३७ जहासभीमस्तंदृष्ट्वास्त्रियोनृपतयोऽपरे ॥ निवार्यमाणाअप्यंगराज्ञाकृष्णानुमोदिताः ३८

चूर्णिका

ततो युधिष्ठिरः सुहृदादीन्कृष्णंच निवासयामास २८ भगवानपिसांबादीन् द्वारकां प्रस्थाप्य स्वयं तत्र न्यवात्सीत् २९ ३० एकदा दुर्योधनः युधिष्ठिरस्यश्रियं यज्ञमहत्त्वं च दृष्ट्वा अतप्यत् ३१ यस्मिन् गृहे नरेंद्रादीनां विभूतयः भांति ताभिःसहद्रौपदी पतीन् उपतस्थे ३२ ३३ कदाचित्सभायां बंधुभिः कृष्णेनच वृतः युधिष्ठिरः कांचनासने आसीनः वंदिभिः स्तूयमानः सन् विरेजे ३४ ३५ तदा बंधुभिः सह दुर्योधनःअसिहस्तः तत्र विवेश ३६ ततः तस्यां जलभ्रांत्या स्थले वस्त्रांतं आकुंचितवान् तथा अग्रेस्थलभ्रांत्याजले अपतत् ३७ तदा भीमः स्त्रियः अपरे नृपतयः राज्ञा निवार्यमाणा अपि जहसुः ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(सदुर्योधनःजातलज्जःअधोमुखःहास्तिनपुरंप्रतिययौ) भुवोभरंसमुज्जिहीर्षुरीति । अद्यसंपादितेनकलहवीजेनकुरूणांसंहारंकरिष्यामीतिमत्वेतिकिंच । यस्यदृशाद्दृष्टिमात्रेणदुर्योधनोभ्रमतिस्म । मयमायातुनिमित्तमात्रम् । सःभूभारहरणवीजंदुर्योधनभ्रमंभीमादिहास्येनचतस्यपराभवंविधायतूष्णीमासीदित्यर्थः ३९ (राजसूयमहोदयासहनरूपंयद्दौरात्म्यमहंपृष्टस्तदेतन्मयाभिहितमिति) ४० इतिश्रीभागवतमहापुराणेदशमस्कंधेटीकायांपंचसप्ततितमोऽध्यायः ७५ ॥ ॥ ७ ॥ ॥ ततःषट्सप्ततितमेवृष्णिशाल्वमहामृधे । द्युमद्गदाप्रहारेणरणात्प्रद्युम्ननिर्गमः ॥ १ ॥ संपाद्यधर्मराजस्यराजसूयमहोदयम् । निहत्यसौभराजादीनयोपारमदच्युतः॥२॥यथासौभपतिर्हतः (तदन्यदपिकर्मशृणु) १ (संख्येयुद्धेतथाजरासंधादयोपियदुभिर्निर्जिताः) २ ३ (मूढःप्रतिज्ञायाःसाफल्यवैफल्यानभिज्ञः) प्रत्यहंसकृत्पांसुमुष्टिमेकांग्रसन्भक्षयन् ४ संवत्सरांतइतिआशुतोषोपिभगवानुमापतिःश्रीकृष्णविद्विषिशाल्वेवरस्यवैफल्यंमन्यमानोनशीघ्रंप्रादुरभूत्तस्यार्तिनिर्बंधमालक्ष्यसंवत्सरांतेचवरेणच्छंदयामासइच्छांकारितवान्वरंवृणीष्वेतिउवाचेत्यर्थः ५ (सशाल्वः) ६ तथेतिप्रतिज्ञानवतागिरीशेनादिष्टःमयःअयस्मयंलोहमयंपुरंसौभसंज्ञंनिर्माय (रचयित्वाशाल्वाय) प्रादात् ७ (कामगंइच्छागामि) तमसोंऽधकारस्यधामआश्रयभूतंअन्यैर्दुरासदंदुष्प्रापम् (अगम्यमित्यर्थः) ८

श्लोकाः ३९–८

सव्रीडितोऽवाग्वदनोरुषाज्वलन्निष्क्रम्यतूष्णींप्रययौगजाह्वयम्॥ हाहेतिशब्दःसुमहानभूत्सतामजातशत्रुर्विमनाइवाभवत् ॥ बभूवतूष्णींभगवान्भुवोभरंसमुज्जिहीर्षुर्भ्रमतिस्मयद्दृशा ३९ एतत्तेऽभिहितंराजन्यत्पृष्टोहमिहत्वया ॥ सुयोधनस्यदौरात्म्यंराजसूयेमहाक्रतौ ४०॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचसप्ततितमोध्यायः ७५ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ अथान्यदपिकृष्णस्यशृणुकर्माद्भुतंनृप ॥ क्रीडानरशरीरस्ययथासौभपतिर्हतः १ शिशुपालसखःशाल्वोरुक्मिण्युद्वाहआगतः ॥ यदुभिर्निर्जितःसंख्येजरासंधादयस्तथा २ शाल्वःप्रतिज्ञामकरोच्छृण्वतांसर्वभूभुजाम् ॥अयादवींक्ष्मांकरिष्येपौरुषंममपश्यत ३ इतिमूढःप्रतिज्ञायदेवंपशुपतिंप्रभुम् ॥ आराधयामासनृपपांसुमुष्टिंसकृद्ग्रसन् ४ संवत्सरांतेभगवानाशुतोषउमापतिः॥ वरेणच्छंदयामासशाल्वंशरणमागतम् ५ देवासुरमनुष्याणांगंधर्वोरगरक्षसाम्॥अभेद्यंकामगंवव्रेसयानंवृष्णिभीषणम् ६ तथेतिगिरिशादिष्टोमयःपरपुरंजयः ॥पुरंनिर्मायशाल्वायप्रादात्सौभमयस्मयम् ७ सलब्ध्वाकामगंयानंतमोधामदुरासदम्॥ ययौद्वारवतींशाल्वोवैरंवृष्णिकृतंस्मरन् ८

चूर्णिका

तदा दुर्योधनः व्रीडितः सन् तूष्णीं गजाह्वयं प्रययौ तदा हाहेतिशब्दोऽभूत्युधिष्ठिरःविमनाः अभवत् भगवान् भूभारं जिहीर्षुः तूष्णींआस ३९ हे राजन् यज्ञे दुर्योधनस्य दौरात्म्यं यत्पृष्टं तत्ते कथितम् ४० इतिदशमेपंचसप्ततितमः ७५ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हे राजन् अथान्यदपि कृष्णस्य अद्भुतं कर्म शृणु १ एकदा रुक्मिण्युद्वाहे आगताः शाल्वजरासंधादयश्च ते यदुभिर्निर्जिताः २ तदा सर्वराज्ञांशृण्वतां सतां शाल्वः प्रतिज्ञां अकरोत् अद्य अयादवीं महीं करिष्ये मम पौरुषं पश्यत ३ इति प्रतिज्ञाय पांसुमुष्टिं सकृत् ग्रसन् शिवं आराधयामास ४ ततः वर्षांते शिवः तुष्टः सन् शाल्वंप्रति वरं वृणीष्व इत्युवाच ५ तदा शाल्वः देवासुरादीनां अभेद्यं वृष्णिभीषणं विमानं वव्रे ६ तदा शिवः तथेति प्रतिज्ञाय मयं आदिष्टवान् ततः मयः लोहमयं सौभसंज्ञं पुरं निर्माय शाल्वाय प्रादात् ७ ततः शाल्वः कामगं यानं लब्ध्वा द्वारकां आगत्य सेनया तां पुरीं रुद्ध्वा उपवनोद्यानानि बभंज ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(गोपुरसहितानिनगरद्वाराणि) प्रासादाःश्रीमद्गृहाःअट्टालास्तदुपारिगृहाःतोलिकास्ततपर्यंतकुड्यानिताः । विहारान्क्रीडास्थानानिचस (शाल्वो) बभंज । किंच विमानाग्र्यात्तस्मात् (सौभ
संज्ञकात्) शस्त्रवृष्ट्यादयःपेतुः १० (अशनयोवज्रपाताः) आसारशर्कराःधारासंपातवज्जलोपलाः ११ शंसुखंनाभ्यपद्यत १२ १३ १४ (रथानांयूथपानांचगजेंद्राणांयूथंसमूहंपांतीतिरथयूथप
यूथपाः । दंशिताःसन्नद्धाः रथेभादिचतुरंगसेनाभिराभिरक्षितानिर्ययुः) १५ तुमुलंव्याकुलम् । रोमहर्षणंरौद्रम् (शाल्वानांशाल्वसंबंधिनांयुद्धंप्रवृत्तम्) १६ (सौभपतेःशाल्वस्य) नैशंनिशिभवंत
मःउष्णगुःसूर्यइव १७ किंच विव्याधेति । स्वर्णमयानिपुंखानिमूलप्रांतायेषांतैःअयोलोहंतन्मयानिमुखान्यग्राणियेषांतैः । संनतानिनिम्नानिपर्वाणिग्रंथयोयेषांतैःशरैर्ध्वजिनीपालंसेनान्यम् १८ सैनि
कान्भटान् । नेतॄन्सारथीन् १९ स्वपरसेनयोर्वर्तमानाःसर्वे (तदनेकेषुअनेकशरनिपातनलक्षणंमहत्कर्मदृष्ट्वातंप्रद्युम्नं) पूजयामासुःसंमानितवंतः २० कदाचिद्बहुरूपंकदाचिदेकरूपंकचित्दृश्यतेक
चिन्नदृश्यतेएवंदुर्विभाव्यंदुर्वितर्क्यमभूत् २१

॥१०७॥

निरुध्यसेनयाशाल्वोमहत्याभरतर्षभ ॥ पुरींबभंजोपवनान्युद्यानानिचसर्वशः ९ सगोपुराणिद्वाराणिप्रासादाट्टालतोलिकाः ॥ विहारान्सविमानाग्र्या
न्निपेतुःशस्त्रवृष्टयः १० शिलाद्रुमाश्चाशनयःसर्पाआसारशर्कराः ॥ प्रचंडश्चक्रवातोभूद्रजसाच्छादितादिशः ११ इत्यर्द्यमानासौभेनकृष्णस्यनगरीभृशम् ॥
नाभ्यपद्यतशंराजंस्त्रिपुरेणयथामही १२ प्रद्युम्नोभगवान्वीक्ष्यबाध्यमानानिजाःप्रजाः ॥ माभैष्टेत्यभ्ययाद्वीरोरथारूढोमहारथः १३ सात्यकिश्चारुदे
ष्णश्चसांबोऽक्रूरःसहानुजः ॥ हार्दिक्योभानुविंदश्चगदश्चशुकसारणौ १४ अपरेचमहेष्वासारथयूथपयूथपाः ॥ निर्ययुर्दंशितागुप्तारथेभाश्वपदातिभिः
१५ ततःप्रववृतेयुद्धंशाल्वानांयदुभिःसह ॥ यथासुराणांविबुधैस्तुमुलंरोमहर्षणम् १६ ताश्चसौभपतेर्मायादिव्यास्त्रैरुक्मिणीसुतः ॥ क्षणेननाशयामा
सनैशंतमइवोष्णगुः १७ विव्याधपंचविंशत्यास्वर्णपुंखैरयोमुखैः ॥ शाल्वस्यध्वजिनीपालंशरैःसंनतपर्वभिः १८ शतेनाताडयच्छाल्वमेकैकेनास्यसैनि
कान् ॥ दशभिर्दशभिर्नेतॄन्वाहनानित्रिभिस्त्रिभिः १९ तदद्भुतंमहत्कर्मप्रद्युम्नस्यमहात्मनः ॥ दृष्ट्वातंपूजयामासुःसर्वेस्वपरसैनिकाः २० बहुरूपैकरूपंत
दृश्यतेनचदृश्यते ॥ मायामयंमयकृतंदुर्विभाव्यंपरैरभूत् २१

श्लोकाः ९/२१

चूर्णिका

९ किंच विमानाग्र्यात् शस्त्रवृष्टयः शिलाः द्रुमाः अशनयः सर्पाः जलोपलाश्च निपेतुः १० ११ एवं सौभेन पीड्यमाना द्वारका शं नाभ्यपद्यत १२ तदा प्रद्युम्नः तेन
बाध्यमानाः प्रजाः वीक्ष्य माभैष्टेत्युक्त्वा रथारूढः सन् निर्ययौ १३ तदनु सात्यकिः चारुदेष्णः सांबः अक्रूरः हार्दिक्यः भानुविंदः गदः शुकसारणौ १४ एते अपरे च
चतुरंगसेनया सह निर्ययुः १५ ततः शाल्वानां यदुभिः सह युद्धं प्रवृत्तं १६ तदा प्रद्युम्नः दिव्यास्त्रैः शाल्वस्य मायाः नाशयामास १७ ततः शाल्वस्य सेनान्यंपंचविंशति
बाणैः विव्याध १८ शाल्वं शतेन तत्सैनिकान् एकैकेन सारथीन् दशभिः वाहनानि त्रिभिःत्रिभि अताडयत् १९ तत् प्रद्युम्नस्य अद्भुतं कर्म दृष्ट्वा सैनिकाः तं पूजयामासुः
२० ततः तत्सौभं कदाचित् बहुरूपं कदाचित् एकरूपं कचित् दृश्यते कचित् न दृश्यते एवं परैः अवितर्क्यं अभूत् । किंच कचित् भूमौ कचित् आकाशे कचित् गिरिमूर्द्धनि २१

१ पृष्ठप्रांताइत्यपिपाठो मु. मु. पुस्तकेषु।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच । क्वचिदिति (अलातचक्रवत्उल्मुकमंडलवत) एवंतत दुरवस्थितंअनवस्थितंचाभूत् २२(ततस्ततःतत्रतत्रयदुसेनापतयःशरानमुंचन्) २३ अग्निवद्दाहकःअर्कवद्युगपत्सर्वतःसंस्पर्शोयेषांतैःआशीविष
वदेकदेशस्पर्शमात्रेणमारकत्वात् दुरासदैः दुःसहैः पीड्यमानंपुरमनीकानिचयस्यसः । मुमोह परैःशुत्रभिर्यदुभिरीरितैर्मुक्तैः २४ (शाल्वसेनाधिपप्रेरितशस्त्रवृंदैः) भृशार्दिताअपिस्वंरणंस्वांस्वांयुद्धभूमि
म् २५ (प्राक्प्रद्युम्नेनप्रपीडितःप्रद्युम्नमासाद्य) मौर्व्याकार्ष्णायसमय्यागदयाव्याहत्यप्रहृत्य २६ अपोवाहअन्यतोनिनाय २७ (लब्धासंज्ञाचेतनायेन) २८ मत्मत्तोविना । क्लीबंचित्तंयस्यतेनत्व
यासूतेन (निमित्तेनप्राप्तंकल्मषंयेनतस्मात्) २९ पितरौरामकृष्णावभिसंगम्यतत्पार्श्वंगत्वाताभ्यांपृष्टः (आत्मनःक्षमं) स्वयोग्यंकिंनुवक्ष्यामीति ३० भ्रातृजामयोभ्रातृभार्याःव्यक्तंनिश्चितंमत्क्लैब्यंकथ
यिष्यंति । तत्कथनमनुकरोति । कथंकथमिति (हेवीरतवपरैःसहमृधेकेनकेनप्रकारेणवृत्तंतत्कथ्यतामिति) ३१ हेविभोसमर्थहेआयुष्मन्एतदपसर्पणम् । धर्ममाह सूतइति (सारथिंतुकृच्छ्रगतंरथीरक्षेदि
ति) ३२ अपोवाहितःअपनीतः । उपसृष्टःउपसर्गंपीडांप्राप्तइतिकृत्वा । यतःपरेणशत्रुणागदयाहतःसन्मूर्च्छितोनिःसंज्ञतांगतोभवानिति ३३ ॥ इतिश्रीभा०द०म०टीकायांषट्सप्ततितमोऽध्यायः ७६

॥१०८॥

श्लोकाः २२/३३

क्वचिद्भूमौक्वचिद्व्योम्निगिरिमूर्ध्निजलेक्वचित् ॥ अलातचक्रवद्भ्राम्यत्सौभंतद्दुरवस्थितम् २२ यत्रयत्रोपलक्ष्येतससौभःसहसैनिकः ॥ शाल्वस्ततस्ततो
मुंचञ्शरान्सात्वतयूथपाः २३ शरैरग्न्यर्कसंस्पर्शैराशीविषदुरासदैः ॥ पीड्यमानपुरानीकःशाल्वोऽमुह्यत्परेरितैः २४ शाल्वानीकपशस्त्रौघैर्वृष्णिवराभृ
शार्दिताः ॥ नतत्यजूरणंस्वंस्वंलोकद्वयजिगीषवः २५ शाल्वामात्योद्युमान्नामप्रद्युम्नंप्राक्प्रपीडितः ॥ आसाद्यगदयामौर्व्याव्याहत्यव्यनदद्बली २६
प्रद्युम्नंगदयाशीर्णवक्षःस्थलमरिंदमम् ॥ अपोवाहरणात्सूतोधर्मविद्दारुकात्मजः २७ लब्धसंज्ञोमुहूर्तेनकार्ष्णिःसारथिमब्रवीत् ॥ अहोअसाध्विदंसूतय
द्रणान्मेऽपसर्पणम् २८ नयदूनांकुलेजातःश्रूयतेरणविच्युतः ॥ विनामत्क्लीबचित्तेनसूतेनप्राप्तकल्मषात् २९ किंनुवक्ष्येऽभिसंगम्यपितरौरामकेशवौ ॥
युद्धात्सम्यगपक्रांतःपृष्टस्तत्रात्मनःक्षमम् ३० व्यक्तंमेकथयिष्यंतिहसंत्योभ्रातृजामयः ॥ क्लैब्यंकथंकथंवीरतवान्यैःकथ्यतांमृधे ३१ ॥ सारथिरुवाच ॥
धर्मंविजानतायुष्मन्कृतमेतन्मयाविभो ॥ सूतःकृच्छ्रगतंरक्षेद्रथिनंसारथिंरथी ३२ एतद्विदित्वातुभवान्मयापोवाहितोरणात् ॥ उपसृष्टःपरेणेतिमूर्च्छि
तोगदयाहतः ३३ ॥ ॥इतिश्रीभागवतेमहापुराणेदशमस्कंधेषट्सप्ततितमोऽध्यायः ७६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

चूर्णिका

क्वचित् जले एवं भ्राम्यत् सत् सौभं अनवस्थितं अभूत् २२ तदा यत्र यत्र स सौभः शाल्वः दृश्यते तत्र तत्र वृष्णियूथपाः शरान् अमुंचन् २३ एवं शरैः पीड्यमान
पुरानीकः शाल्वः अमुह्यत् २४ २५ ततः द्युमान् नाम शाल्वामात्यः प्रद्युम्नं आसाद्य गदया आहत्य व्यनदत् २६ तदा सूतः विशीर्णवक्षसं प्रद्युम्नं रणात् अन्यत्र नि
नाय २७ ततः प्रद्युम्नः मुहूर्तेन लब्धसंज्ञः सन् सारथिं अब्रवीत् हे सूत यत् रणात् मम अपसरणं कृतं तत् असाधु २८ यतः सूतेन त्वयाप्राप्तकिल्बिषात् मत्तो विना
यदुकुलजः रणविच्युतः कोपि न श्रूयते २९ किंच पितरौ अभिसंगम्य ताभ्यां पृष्टः आत्मनः योग्यं किंनु वक्ष्ये ३० किंच भ्रातृभार्याः मां हसंत्यः सत्यः मत्क्लैब्यं
कथयिष्यंति ३१ ॥ सारथिरुवाच ॥ हे आयुष्मन् सूतः रथिनं रथी सूतं च रक्षेदिति धर्मं विजानता मया एतत् कृतं ३२ किंच त्वं शत्रुणा गदया हतः मूर्छितः अतो
मया रणात् अपनीतः ३३ ॥ इतिदशमेषट्सप्ततितमः ७६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सम्प्रयुक्तसम्प्रतितमेनानामायाविचक्षणः ॥ कृष्णेनागत्यशाल्वस्तुहतःसौभंचचूर्णितम् ॥ १ ॥ दंशितःसंनद्धः १ विधमंतंक्षपयंतंप्रतिहृत्यप्रतिरुध्य (स्मयन्मंदंहसन्) २ अष्टानांविनियोगमाह । चतुर्भिरिति (केतुंध्वजम्)३सौभेयाःसौभस्थाः४नवानांरात्रीणांनवरात्राणांसमाहारोनवरात्रंत्रयाणांनवरात्राणांसमाहारस्त्रिणवरात्रम् । सप्तविंशतिमहोरात्राणियुद्धमभूदित्यर्थः । तुमुलमाकुलम् । उल्बणंघोरम् ५ (अथ) परमतमुपन्यस्यति । इंद्रप्रस्थंगतइत्यादिना (संस्थितेमृते) ६ (अतिघोराणिभयंकराणि) ७ आहचेतिस्वगतमेवपथिचिंताविजृंभितमाभाषणम् । इहइंद्रप्रस्थेआर्यमिश्राभिसंगतः (आर्योमिश्रोयेषांतैर भिसंगतः) बलभद्रादिसहितइत्यर्थः (नूनंनिश्चितम्) ८ दुर्निमित्तदर्शनाकुलचित्तएवंचिंतयन्द्वारकामागत्यस्वानांतत्कदनंवीक्ष्य सौभंचशाल्वराजंचवीक्ष्य रामंपुररक्षणंप्रतिनिरूप्य नियुज्य दारुकं प्राहेत्यन्वयः ९ तेत्वया (अयंसौभराट्मायावी अतस्तस्यमायायांसंभ्रभो नकर्तव्यइति) १० आस्थाय सम्यगधिष्ठाय । अरुणानुजंध्वजेवर्तमानंगरुडं (ददृशुःतेनगरुडध्वजःश्रीकृष्णआगतइतिस र्वैर्ज्ञातवंतइत्यर्थः) ११ हतमायस्यबलस्येश्वरः (भीमोरौद्रोरवोयस्यास्तां) १२ (महोल्कामिवउत्पातविशेषमिव) १३

॥१०९॥

श्लोकाः १/१३

श्रीशुकउवाच ॥ सउपस्पृश्यसलिलंदंशितोधृतकार्मुकः ॥ नयमांद्युमतःपार्श्वंवीरस्येत्याहसारथिम् १ विधमंतंस्वसैन्यानिद्युमंतंरुक्मिणसुतः ॥ प्रति हृत्यप्रत्यविध्यन्नाराचैरष्टभिःस्मयन् २ चतुर्भिश्चतुरोवाहान्सूतमेकेनचाहनत् ॥ द्वाभ्यांधनुश्चकेतुंचशरेणान्येनवैशिरः ३ गदसात्यकिसांबाद्याजघ्नुःसौ भपतेर्बलम् ॥ पेतुःसमुद्रेसौभेयाःसर्वेसंच्छिन्नकंधराः ४ एवंयदूनांशाल्वानांनिघ्नतामितरेतरम् ॥ युद्धंत्रिणवरात्रंतदभूत्तुमुलमुल्बणम् ५ इंद्रप्रस्थंगतःकृ ष्णआहूतोधर्मसूनुना ॥ राजसूयेऽभिनिर्वृत्तेशिशुपालेचसंस्थिते ६ कुरुवृद्धाननुज्ञाप्यमुनींश्चससुतांपृथाम् ॥ निमित्तान्यतिघोराणिपश्यन्द्वारवतींययौ ७ आहचाहमिहायातआर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीयानूनंहन्युःपुरींमम ८ वीक्ष्यतत्कदनंस्वानांनिरूप्यपुररक्षणम् ॥सौभंचशाल्वराजंचदारुकं प्राहकेशवः ९रथंप्रापयमेसूतशाल्वस्यांतिकमाशुवै ॥ संभ्रमस्तेनकर्तव्योमायावीसौभराडयम् १० इत्युक्तश्चोदयामासरथमास्थायदारुकः ॥ विशंतंददृ शुःसर्वेस्वेपरेचारुणानुजम् ११ शाल्वश्चकृष्णमालोक्यहतप्रायबलेश्वरः ॥ प्राहरत्कृष्णसूतायशक्तिंभीमस्वांमृधे१२ तामापतंतींनभसिमहोल्कामिवरंह सा ॥ भासयंतींदिशःशौरिःसायकैःशतधाच्छिनत् १३

चूर्णिका

॥ श्रीशुकउवाच ॥ हे राजन् ततः सः प्रद्युम्नः सलिलं उपस्पृश्य धृतकार्मुकः सन् द्युमतः पार्श्वं मां नयेति सारथिं आह १ ततः प्रद्युम्नः द्युमंतं प्रतिरुद्ध्य अष्टभिः शरैः अविध्यत् २ तत्र जतुरोश्वान् चतुर्भिःबाणैः एकेन सूतं द्वाभ्यां धनुःकेतुं च एकेन शिरः अहन् ३ तदा गदादयः सौभपतेः बलं जग्मुः ततः सौभेयाः छिन्नग्रीवाः संतः समुद्रे पेतुः ४ एवं यदूनां शाल्वानां सप्तविंशत्यहोरात्राणियुद्धं अभूत् ५ तदा इंद्रप्रस्थंगतः कृष्णः घोराणि निमित्तानिपश्यन् कुरुवृद्धान् अनुज्ञाप्य द्वारकां ययौ ६ ७ तदा पथि एवं अचिंतयत् अहंरामसहितः इह आयातः अतः चैद्यपक्षीयाः राजानः नूनंमे पुरीं हन्युः ८ एवं चिंतयन् द्वारकां एत्य स्वानां तत्कदनंवीक्ष्य सौभं शाल्वं च वीक्ष्य पुररक्षणे रामं नियोज्य केशवःदारुकं प्राह ९ मम रथं शाल्वस्य अंतिकंशीघ्रं प्रापय १० इत्युक्तः दारुकः रथं आस्थाय चोदयामास ११ ततः शाल्वः युद्धे प्रविशंतं कृष्णं आलोक्य सूतायशक्तिं प्राहरत् १२ ततः कृष्णः तांशक्तिं शरैः शतधाच्छिनत् १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. तंचशाल्वंशरसंदोहैःशरजालैः (सौभंचाविध्यत) खंसूर्यइवरश्मिभिरिति । सुनीलत्वविपुलत्वादिभिराकाशोपमासौभस्य । अचिंत्यवेगत्वबाहुल्यादिभिःशराणांरश्मिसादृश्यम् अयत्नेनैवरश्मि-(-प्रसार अ०
टीका ण-)-वत्शरजालप्रसारणात्सूर्यतुल्यःश्रीकृष्णइति (श्रमदितिसौभस्यविशेषणमस्थिरत्वेननान्यस्यभेत्तुंशक्यमितिज्ञापनाय) १४ दोर्बाहुं (शार्ङ्गयुक्तंबिभेद तदाहस्ताद्धनुर्निपपात) १५ १६ सख्युः शिशुपालस्य । ईक्षतां (ईक्षमाणानां) अस्माकंप्रमत्तःअनवहितःव्यापादितोनिहतः १७ अपराजितमानिनं (नकेनापिपराजितोऽहमित्यभिमानवंतं) अपराजितोऽहमितिमानवंतम् । अपुनरावृत्तिं मृत्युं (मापयामि) तिष्ठेःस्थास्यसि १८ (बहुभाषिणस्तुनदर्शयंतीतिकिंतुभाषंतएवेति) १९ (जत्रौबाहुगलसंधौविव्याध । सशाल्वोरक्तंवमन्चकंपे) २० (अथमुहूर्तमात्रेगतेशाल्वरचितोमायाम ॥७७॥
॥११०॥ यःपुरुषोऽच्युतंनत्वा) २१ (सौनिकःपशुघातीतेन) २२ घृणीदयावान् २३ (असंभ्रांतंसावधानंसुरासुरैरप्यजेयम् । अहोविधिर्दैवम्) २४ (वसुदेवमिववसुदेवाकारंपुरुषम्) २५ जनिताजन यिता (तववीक्षमाणस्यसतः) ईशश्चेत्शक्तश्चेत्पाहिरक्ष २६

तंचषोडशभिर्विद्ध्वाबाणैःसौभंचखेभ्रमत् ॥ अविध्यच्छरसंदोहैःखंसूर्यइवरश्मिभिः १४ शाल्वःशौरेस्तुदोःसव्यंसशार्ङ्गंशार्ङ्गधन्वनः ॥ बिभेदन्यपतद्धस्ता श्लोकाः
च्छार्ङ्गमासीत्तदद्भुतम् १५ हाहाकारोमहानासीद्भूतानांतत्रपश्यताम् ॥ विनद्यसौभराडुच्चैरिदमाहजनार्दनम् १६ यत्त्वयामूढनःसख्युर्भ्रातुर्भार्याहृतेक्ष
ताम् ॥ प्रमत्तःससभामध्येत्वयाव्यापादितःसखा १७ तंत्वाद्यनिशितैर्बाणैरपराजितमानिनम् ॥ नयाम्यपुनरावृत्तिंयदितिष्ठेर्ममाग्रतः १८ ॥ श्रीभग १४/२६
वानुवाच ॥ वृथात्वंकत्थसेमंदनपश्यस्यंतिकेंतिकम् ॥ पौरुषंदर्शयंतिस्मशूरानबहुभाषिणः १९ इत्युक्त्वाभगवाञ्शाल्वंगदयाभीमवेगया ॥ तताडजत्रौसं
क्रुद्धःसचकंपेवमन्नसृक् ॥ गदायांसंनिवृत्तायांशाल्वस्त्वंतरधीयत २० ततोमुहूर्तआगत्यपुरुषःशिरसाऽच्युतम् ॥ देवक्याप्रहितोस्मीतिनत्वाप्राहवचोरुद
न् २१ कृष्णकृष्णमहाबाहोपितातेपितृवत्सल ॥ बद्ध्वाऽपनीतःशाल्वेनसौनिकेनयथापशुः २२ निशम्यविप्रियंकृष्णोमानुषींप्रकृतिंगतः ॥ विमनस्को
घृणीस्नेहाद्बभाषेप्राकृतोयथा २३ कथंराममसंभ्रांतंजित्वाऽजेयंसुरासुरैः ॥ शाल्वेनाल्पीयसानीतःपितामेबलवान्विधिः २४ इतिब्रुवाणेगोविंदेसौभराट्
प्रत्युपस्थितः ॥ वसुदेवमिवानीयकृष्णंचेदमुवाचसः २५ एषतेजनितातातोयदर्थमिहजीवसि ॥ वधिष्येवीक्षतस्तेमुमीशश्चेत्पाहिबालिश २६

चूर्णिका तथा शाल्वं षोडशभिर्बाणैः विद्धा शरजालैःसौभं अविध्यत् १४ ततः शाल्वः शौरेः सव्यंभुजंबाणैः विभेद तदा हस्तात् शार्ङ्गं अपतत् १५ तदा हाहाकारः आसीत् ततःशाल्वः उच्चैः विनद्य जनार्दनं आह १६ हे मूढ त्वयामे सख्युः शिशुपालस्य भार्याहृता सच सभामध्ये हतः १७ तंत्वां अद्य बाणैः मृत्युं नयामि यदिममाग्रतः स्थास्यसि १८ ॥ श्रीभगवानु वाच ॥ हे मंद त्वं वृथा कत्थसे अंतिकेमृत्युं न पश्यसि किंच शूराः पौरुषं दर्शयंति न बहु भाषंते १९ इत्युक्त्वा कृष्णः गदया शाल्वं जत्रौ अताडयत् ततः सः रक्तं वमन् चकंपे तदा गदायां निवृत्तायां शाल्वः अंतरधीयत २० ततः मुहूर्तेन मायामयः पुरुषआगत्य अच्युतं नत्व देवक्या प्रहितोस्मि इति रुदन् वचः प्राह २१ हे ॥११०॥
कृष्ण शाल्वेन तव पिता बद्धानीतः २२ ततःकृष्णः विप्रियं निशम्य प्राकृतवद् बभाषे २३ अरे अजेयं रामं जित्वा शाल्वेनमे पिता कथं नीतः तस्मात् विधिर्बलवान् २४ इति गोविंदे वदति सति शाल्वः वसुदेवमिव आनीय कृष्णं उवाच २५ हे कृष्ण एषः तेपिता अमुं तव वीक्षितः सतः वधिष्ये त्वं ईशश्चेत्पाहि २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

२७स्वबोधःस्वतःसिद्धज्ञानवानपिस्वजनस्नेहतःप्रकृतौमानुषस्वभावेउपप्लुतःनिमग्नःआस्तेआतिष्ठत्। तत्सर्वंआसुरींमायां अबुध्यत् मायेयमितिज्ञातवान् (मयासुरेणोपदिष्टांशाल्वप्रसृतांशाल्वेनेदानींप्रयुक्ता मित्यर्थः) २८ स्वाप्नंस्वप्नप्रपंचंयथा (तथासमपश्यत् । आजौयुद्धे) २९एवंपरमतमुपन्यस्तंनिराकरोति। एवमिति । केचकेचनेत्यर्थः नान्विताःअनन्विताःपूर्वापरानुसंधानरहिताः तदाहयत्स्ववाचइति । तत्रानुस्मरंतीत्यर्थः । अयमभिप्रायःनतावद्राजसूयार्थंरामेणसहगतःश्रीकृष्णःसंकर्षणमनुज्ञाप्येति पूर्वमुक्तत्वात् ३० असंभावितंचेदमित्याह । क्वशोकमोहाविति । भयंवाद्दुर्निमित्तदर्शनकृतम् ।"नूनंहन्युः पुरींममे" तियदुक्तंयचहस्ताच्छार्ङ्गंन्यपतदित्युक्तंतद्द्वयंवाक्वेति अज्ञेषुसंभवोयेषांते (शोकादयोऽज्ञेष्वेव संभवंति नतुज्ञानिषु भगवतितुसुतरामसंभवइत्यर्थः) अखंडितानिविज्ञानज्ञानैश्वर्याणियस्यसः । तत्रवि ज्ञानंस्वरूपविषयम्। ज्ञानंबाह्यविषयं (अत्रहेतुःअखंडितःअपरिच्छिन्नः ३१ किंच यस्य पादसेवयाऊर्जितापुष्कलायाआत्मविद्यातयाअनादिश्चासावात्मविपर्ययग्रहश्चअहंकृशःसुखीदुःखीत्यादिलक्षणःतंहि न्वंति विनाशयंतिसंतः।ऐश्वरंपदंचअनंतंशश्वत्। तस्य (परमस्य) सतांगतेःकुतोनुमोहइति (परंकेवलमितिवा) अतोनैतद्वचनंसत्यमित्यर्थः (ननुमाययामनुष्यनाट्यमंगीकृतवतोभगवतः किमयुक्तमितिचे दस्तुतदप्यविरुद्धमिति ऋषिशब्दप्रयोगेण सूचितम् ।ऋषयोहिनभ्रांताः नान्विताइतिविशेषणंतुतद्भाषणंतथैवेतिपारमार्थिकत्वेन नग्राह्यमिति सूचनायेतिज्ञेयम् ३२ किंतर्हिसत्यंतदाह। तंशस्त्रपूगैरिति (श स्त्रसमूहैरोजलाप्रहरंतमपितंशाल्वम्) वर्मकवचं । रुरोज बबंध ३३(तत्सौभं तद्विसृज्य भूतलमास्थितः) ३४ (भल्लेनबाणेन) लयार्कसंनिभंप्रलयकालीनसूर्यसदृशं (रथांगंचक्रंबिभ्रदुदयाचलइवबभौ)३५

॥१११॥

श्लोकाः २७–३५

एवंनिर्भर्त्स्यमायावीखड्गेनानकदुंदुभेः ॥ उत्कृत्यशिरआदायखस्थंसौभंसमाविशत् २७ ततोमुहूर्तंप्रकृतावुपप्लुतःस्वबोधआस्तेस्वजनानुषंगतः ॥ महा नुभावस्तदबुध्यदासुरींमायांसशाल्वप्रसृतांमयोदिताम् २८ नतत्रदूतंनपितुःकलेवरंप्रबुद्धआजौसमपश्यदच्युतः ॥ स्वाप्नंयथाचांबरचारिणंरिपुंसौभस्थ मालोक्यनिहंतुमुद्यतः २९ एवंवदंतिराजर्षेऋषयःकेचनान्विताः ॥ यत्स्ववाचोविरुध्येतनूनंतेनस्मरंत्युत ३० क्वशोकमोहौस्नेहोवाभयंवायेऽज्ञसंभवाः ॥ क्वचाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ३१ यत्पादसेवोर्जितयाऽऽत्मविद्ययाहिन्वंत्यनाद्यात्मविपर्ययग्रहम् ॥ लभंतआत्मीयमनंतमैश्वरंकुतोनुमोहःपरम स्यसद्गतेः ३२ तंशस्त्रपूगैःप्रहरंतमोजसाशाल्वंशरैःशौरिरमोघविक्रमः ॥ विद्ध्वाऽच्छिनद्वर्मधनुःशिरोमणिंसौभंचशत्रोर्गदयारुरोजसः ३३ तत्कृष्णहस्ते रितयाविचूर्णितंपपाततोयेगदयासहस्रधा ॥ विसृज्यतद्भूतलमास्थितोगदामुद्यम्यशाल्वोच्युतमभ्यगाद्द्रुतम् ३४ आधावतःसगदंतस्यबाहुंभल्लेनछित्त्वा ऽथरथांगमद्भुतम् ॥ वधायशाल्वस्यलयार्कसंनिभंबिभ्रद्बभौसार्कइवोदयाचलः ३५

चूर्णिका

सः एवं निर्भर्त्स्य खड्गेन वसुदेवशिरः छित्त्वा आदाय सौभं आविशत् २७ ततःकृष्णः स्वतःसिद्धज्ञानवानपि मुहूर्तं मानुषस्वभावे निमग्नः आस्ते ततःतत्सर्वं मायाइति ज्ञातवान् २८ तदा तत्र दूतं पितुर्देहं च नापश्यत् ततः सौभस्थं रिपुं वीक्ष्य तं हंतुं उद्यतः २९ हेराजर्षे केचनऋषयः पूर्वापरानुसंधानरहिताः संतः एवं वदंति ३० परंतु यत्पादसेवया ऐश्वरं पदं लभंते तस्यशोकादिकंकुतः अतो नैतद्वचनं सत्यं ३१ ३२ ततः कृष्णः तंशाल्वंशरैः विध्वा वर्म धनुश्च शिरोमणिंच छित्त्वा गदया सौभंच बभंज ३३ ततः तत् सौभंतोये पपात ततः शाल्वः सौभं त्यक्त्वा गदां गृहीत्वा भूतलेस्थितः सन् अच्युतं अभ्यगात् ३४ तदा कृष्णः तस्य बाहुं भल्लेन छित्त्वा तद्वधाय चक्रं गृहीत्वा तेनैव चक्रेणकुंडलकिरीटयुक्तं शाल्वस्यशिरः जहार ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पुरवोबह्वयोमायाःसंति यस्मिन्तस्यशिरः) ३६ देवगणैरीरिताः । किंच । सखीनामिति (अपचितिंआनृण्यम्) ३७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्तसप्ततितमोऽध्यायः ७७
ततोऽष्टसप्ततितमेदंतवक्त्रविदूरथौ ॥ हत्वाहरिःपुरेरेमेरामःसूतंततोऽवधीत् ॥ १ ॥ सखीनामपचितिंकुर्वन्नित्युक्तंतदेवाह । शिशुपालस्येति (शिशुपालादीनां) पारोक्ष्यसौहृदंपरोक्षेकरणीयंसुहृत्कृत्यं (कुर्व
न्महींप्रकंपयन्दंतवक्त्राख्योमहासत्त्वोव्यदृश्यत) १ २ (सिंधुंसमुद्रंआयांतंवेलेवतं) प्रत्यधात्प्रतिरुरोध ३ मुकुंदंप्राह (कारूषोदंतवक्त्रः) दुष्टोमदोयस्यसःएवंरूक्षवाक्यानांअधिक्षेपपरतास्फुटैव । परमार्थ
स्तुगतमदःप्राह । मुकुंदंतृतीयेजन्मनिमुक्तिदानार्थमागतम् । अद्येति । जन्मत्रयेऽन्विष्यमाणोऽद्यब्रह्मशापावसानेभवान् ममस्वामीदृष्टिपथंगतःप्राप्तः । एतत् दिष्ट्यादिष्ट्या भद्रंभद्रं अतिहर्षेणवीप्सा ४
किंच हेकृष्णत्वमस्माकं मातुलेयोबंधुः । एवमपिमित्रध्रुक्मित्राणिघातितवान्मांचजिघांससितस्मादस्माकंत्वत्तोमृत्युःसनकाद्यनुग्रहप्राप्तोनूनंदुर्वारःअतस्त्वामेतावन्मात्रमहंयाचे । किंतदाह । हेअमंद
सर्वसहनसमर्थ क्षात्रधर्मेणसेवितुंगदयात्वांहनिष्येप्रहरिष्यामितामेकवारंसहस्वेति । ननु वज्रतुल्यांत्वद्गदांकोवासहेतनैवमित्याह । अवज्रकल्पयाउत्पलमालावदतिकोमलयेत्यर्थः ५ नन्वेवंहननेकस्तव
पुरुषार्थः । तमाह तर्हीति । अज्ञःनविद्यतेज्ञोयस्मात्हेसर्वज्ञेत्यर्थः (बंधुरूपंमातुलेयरूपधरंशत्रुम्) परमार्थतःस्वामिनंएतद्देहसंबंधेनबंधुरूपं अरिंब्रह्मशापेनशत्रुत्वेनप्रतीतंत्वांहत्वा मित्राणामानृण्यं उपै
मिउपैष्यामि (मित्रवत्सलोमित्रस्नेहयुक्तः) विशेषेणआधीयतेमनसिचिंत्यतइतिव्याधिःदेहेअंतर्यामितयाचरतीतितथातमीश्वरंहत्वाक्षात्रधर्मेणाराध्य । हंतेर्गत्यर्थस्यज्ञानार्थत्वात्ज्ञात्वेतिवा । तेनयथापि
त्रादीनामानृण्यमुपयांतितद्वदिति (रोगपक्षेदेहचरंदेहसंबंधिनंअनेनरोगस्येवशत्रोर्बंधुत्वमकिंचित्करमित्यर्थः) ६ रूक्षैरित्यादितुप्रतीत्यभिप्रायेण । तोत्रैरंकुशादिभिः (अताडयज्जघान व्यनदच्च) ७

श्लोकाः ३६—७

जहारतेनैवशिरःसकुंडलंकिरीटयुक्तंपुरुमायिनोहरिः ॥ वज्रेणवृत्रस्ययथापुरंदरोबभूवहाहेतिवचस्तदानृणाम् ३६ तस्मिन्निपतितेपापेसौभेचगदयाहते ॥
नेदुर्दुंदुभयोराजन्दिविदेवगणेरिताः ॥ सखीनामपचितिंकुर्वन्दंतवक्त्रोरुषाऽभ्यगात् ३७ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्तसप्तति
तमोऽध्यायः ७७ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ शिशुपालस्यशाल्वस्यपौंड्रकस्यापिदुर्मतिः ॥ परलोकगतानांचकुर्वन्पारोक्ष्यसौहृदम् १ एकः
पदातिःसंक्रुद्धोगदापाणिःप्रकंपयन् ॥ पद्भ्यांमहींमहाराजमहासत्त्वोव्यदृश्यत २ तंतथाऽऽयांतमालोक्यगदामादायसत्वरः ॥ अवप्लुत्यरथात्कृष्णःसिंधुंवे
लेवप्रत्यधात् ३ गदामुद्यम्यकारूषोमुकुंदंप्राहदुर्मदः ॥ दिष्ट्यादिष्ट्याभवानद्यममदृष्टिपथंगतः ४ त्वंमातुलेयोनःकृष्णमित्रध्रुग्मांजिघांससि ॥ अतस्त्वां
गदयामंदहनिष्येवज्रकल्पया ५ तर्ह्यानृण्यमुपैम्यज्ञमित्राणांमित्रवत्सलः ॥ बंधुरूपमरिंहत्वाव्याधिंदेहचरंयथा ६ एवंरूक्षैस्तुदन्वाक्यैःकृष्णंतोत्रैरिव
द्विपम् ॥ गदयाताडयन्मूर्ध्निसिंहवद्व्यनदच्चसः ७

चूर्णिका

तदा नृणांहाहेतिशब्दः बभूव ३६ तस्मिन्निपतितेपापेसौभेचगदयाहते नेदुर्दुंदुभयोराजन्दिविदेवगणेरिताः सखीनामपचितिंकुर्वन्दंतवक्त्रोरुषाभ्यगात् ३७ ॥ ॥ इति
दशमेसप्तसप्ततितमः ॥ ७७ ॥ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ हेराजन् ततःसःदंतवक्त्रः मृतानां चैद्यपौंड्रकशाल्वानां पारोक्ष्यसौहृदं कुर्वन् १ एकः पदातिः
गदापाणिः सन् व्यदृश्यत २ तदाकृष्णःतंआलोक्य रथादुत्तीर्य तं रुरोध ३ ततः सः कारूषः गदांउद्यम्य मुकुंदंप्राह हेभगवन् त्वं अद्य मम दृष्टिपथंगतः ४ एतद्दि
ष्ट्या हेकृष्ण त्वं नः मातुलेयः मां जिघांससि अतः त्वां गदया हनिष्ये ५ तर्हि मित्राणां आनृण्यं उपैमि ६ एवं रूक्षवाक्यैः कृष्णं व्यथयन् सन् गदयामूर्ध्नि अताडयत् ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 (आजौरणे) ८ (व्यसुर्निःप्राणः) ९ (यथाशिशुपालस्यवधेतज्ज्योतिःकृष्णेनिविष्टंतद्वद्दंतवक्रज्योतिरपीति) १० (उच्छ्वसन्उच्चैःश्वासमुत्सृजन्) ११ १२ (अनुजेनविदूरथेनसहितम्) १३
१४ १५ एवंश्रीकृष्णोमहाबलानपिलीलयाद्विषतोजयत्येवेतिकृत्वा सकदाचित्जरासंधादिभिर्निर्जितइतिपशुदृष्टीनामीयते। नित्यजयेहेतवःयोगेश्वरःभगवान्जगदीश्वरइति १६ ॥ विदूरथांतमामथ्य
टीका पूतनादिदनोःकुलम्। कृष्णस्तूपारमन्नाराद्रामोऽहन्सूतबल्वलौ ॥ तत्प्रसंगमाहश्रुत्वेति (मध्यस्थःकुरुपांडवान्यतमपक्षपातशून्यः) १७ प्रतिस्रोतंप्रतिलोमंपयौ १८ सुदर्शनंतत्संज्ञंतीर्थं । चक्रंच
क्रतीर्थं १९ यमुनामनुयानितीर्थानिगंगामनुचयानितानिसर्वाणिगत्वानैमिषमरण्यंजगाम (यत्रनैमिषेऋषयःशौनकादयः) २० (दीर्घसत्रमस्तियेषांतेमुनयोपि) अभिप्रेत्यभगवान्श्रीरामइतिज्ञात्वा
(आर्चयन्पूजयामासुः) २१ महर्षेर्व्यासस्य २२

गदयाभिहतोप्याजौनचचालयदूद्वहः ॥ कृष्णोपितमहन्गुर्व्याकौमोदक्यास्तनांतरे ८ गदानिर्भिन्नहृदयउद्वमन्रुधिरंमुखात् ॥ प्रसार्यकेशबाह्वंघ्रीन्धरण्यां श्लोकाः
न्यपतद्व्यसुः ९ ततःसूक्ष्मतरंज्योतिःकृष्णमाविशदद्भुतम् ॥पश्यतांसर्वभूतानांयथाचैद्यवधेनृप १० विदूरथस्तुतद्भ्राताभ्रातृशोकपरिप्लुतः ॥ आगच्छदसिच
र्मभ्यामुच्छ्वसंस्तज्जिघांसया ११ तस्यचापततःकृष्णश्चक्रेणक्षुरनेमिना ॥ शिरोजहारराजेंद्रसकिरीटंसकुंडलम् १२ एवंसौभंचशाल्वंचदंतवक्रंसहानुजम् ॥ ८/२२
हत्वादुर्विषहानन्यैरीडितःसुरमानवैः १३मुनिभिःसिद्धगंधर्वैर्विद्याधरमहोरगैः ॥ अप्सरोभिःपितृगणैर्यक्षैःकिन्नरचारणैः १४ उपगीयमानविजयःकुसुमैरभिव
र्षितः ॥ वृतश्चवृष्णिप्रवरैर्विवेशालंकृतांपुरीम् १५ एवंयोगेश्वरःकृष्णोभगवान्जगदीश्वरः ॥ ईयतेपशुदृष्टीनांनिर्जितोजयतीतिसः १६ श्रुत्वायुद्धोद्यमंरामःकु
रूणांसहपांडवैः ॥ तीर्थाभिषेकव्याजेनमध्यस्थःप्रययौकिल १७ स्नात्वाप्रभासेसंतर्प्यदेवर्षिपितृमानवान् ॥ सरस्वतींप्रतिस्रोतंययौब्राह्मणसंवृतः १८पृथूदकं
बिंदुसरस्त्रितकूपंसुदर्शनम् ॥विशालंब्रह्मतीर्थंचचक्रंप्राचींसरस्वतीम् १९यमुनामनुयान्येवगंगामनुचभारत ॥ जगामनैमिषंयत्रऋषयःसत्रमासते२०तमागत
मभिप्रेत्यमुनयोदीर्घसत्रिणः॥अभिनंद्ययथान्यायंप्रणम्योत्थायचार्चयन्२१सोऽर्चितःसपरीवारःकृतासनपरिग्रहः ॥ रोमहर्षणमासीनंमहर्षेःशिष्यमैक्षत २२

चूर्णिका ततः कृष्णोपि कौमोदक्या स्तनांतरे अहनत् ८ तदा दंतवक्रः मुखाद्रुधिरंवमन् केशबाह्वंघ्रीन् प्रसार्य व्यसुः धरण्यां अपतत् ९ तदा सर्वेषां पश्यतां सतां तदुत्थं
ज्योतिः कृष्णं प्राविशत् १० ततः तद्भ्राता विदूरथः शोकव्याप्तः सन् असिचर्मभ्यांतज्जिघांसया आगच्छत् ११ तदा कृष्णः चक्रेण तस्य शिरोजहार १२ एवं सौभशा
ल्वादीन् हत्वा सुरमानवमुनिसिद्धादिभिःउपगीयमानविजयः वृष्णिभिर्वृतः सन् अलंकृतांपुरीं विवेश १३ १४ १५ एवं योगेश्वरः कृष्णः बलिष्ठानपिजयति तथा
पि पशुदृष्टीनां क्वचिन्निर्जितइति प्रतीयते १६ ततः एकदारामः कुरूणांपांडवैःसह युद्धोद्यमं श्रुत्वा तीर्थयात्राव्याजेन प्रययौ १७ ततः सः प्रभासे स्नात्वा देवर्षिपि
तृमानवान् संतर्प्य संमुखं सरस्वतींययौ १८ १९ ततः पृथूदकं बिंदुसरः त्रितकूपं सुदर्शनतीर्थं विशालं ब्रह्मतीर्थं चक्रतीर्थं प्राचीं सरस्वतीं यमुनां गंगां तदनु यानि
तीर्थानि तानिसर्वाणि गत्वा यत्र ऋषयः सत्रं आसते तन्नैमिषंजगाम २० तदामुनयः तंरामं इति ज्ञात्वा उत्थाय प्रणम्य अर्चयन् २१ ततः पूजितः सः रामः
अप्रत्युत्थायिनं रोमहर्षणं ऐक्षत २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(प्रत्युत्थानमकुर्वंतं) सूतंप्रतिलोमजं नकृतंप्रह्वणंअंजलिश्चयेनतम् । अध्यासीनंचतान्तेभ्योप्युच्चैरासीनमित्यर्थः । अधिशीङ्स्थासामितिकर्मसंज्ञा २३ (प्रतिलोमजःसन्इमानस्मांश्चा ध्यास्तेअस्मदपेक्षयाकुतउच्चैरासनमस्येत्यर्थः (अतोयंवधमर्हति) २४ अज्ञानन्नध्यास्तेइतिचेन्नैवमित्याहऋषेरीति (ऋषेर्व्यासस्य । अधीत्याप्यध्यास्तेअतोवधमर्हतीति) २५ ननुबहुज्ञः कथमेवं कुर्यात्तत्राह । अदांतस्येति (अधीतान्यपिधर्मशास्त्रादीनि) गुणाययथोचितानुष्ठानाय (नभवंति) २६ विप्रानध्यास्ताम् अन्यद्वाकिंचित्करोतु किंतवेतिचेत्अतआह एतदर्थइति । धर्मध्वजि नःउत्तमलिंगधारिणः २७ भावित्वादिति । नहिभवितव्यंकेनापिपरिहर्तुंशक्यतइत्यर्थःअहनत् । अहन् २८ तेत्वया २९ अधार्मिकप्रतिलोमजवधःकोयमधर्मइतिचेत्तत्राहुः । अस्येति । पुराणप्रवचना यब्रह्मासनं आत्मनःशरीरस्यनास्तिक्लमोयस्मिन्तदायुश्चदत्तम् (कियत्पर्यंतंतत्राहुः तावदिति । अतस्त्वयाचरितोयंवधोब्रह्मवधसमइत्यर्थः) ३० ब्रह्मवधेपिकिंममेश्वरस्येतिचेत्सत्यमेवम् तथापि प्रायश्चित्तंकर्तव्यमित्याशयेनाहुः । योगेश्वरस्येतिसार्धेन । आम्नायोब्राह्मणोनहंतव्यइत्यादिलक्षणः (सोपिभवतःशास्तानभवति) ३१ तथापिएतस्याब्रह्महत्यायाःपावनंप्रायश्चित्तं हेलोकपावन नान्य चोदितः (अनन्यचोदितः) स्वयमेवभवान्यदिकरिष्यतितर्हिलोकसंग्रहोभविष्यतिनान्यथेति ३२ वधस्यनिर्वेशंप्रायश्चित्तंप्रथमेकल्पेमुख्यकल्पे (नत्वनुकल्पे) विधीयतांउपादिश्यताम् ३३

श्लोकाः २३/३३

अप्रत्युत्थायिनंसूतमकृतप्रह्वणांजलिम् ॥ अध्यासीनंचतान्विप्रांश्चुकोपोद्वीक्ष्यमाधवः २३ कस्मादसाविमान्विप्रानध्यास्तेप्रतिलोमजः ॥ धर्मपालां स्तथैवास्मान्वधमर्हतिदुर्मतिः २४ ऋषेर्भगवतोभूत्वाशिष्योधीत्यबहूनिच ॥ सेतिहासपुराणानिधर्मशास्त्राणिसर्वशः २५ अदांतस्याविनीतस्यवृथापं डितमानिनः ॥ नगुणायभवंतिस्मनटस्येवाजितात्मनः २६ एतदर्थोहिलोकेस्मिन्नवतारोमयाकृतः ॥ वध्यामेधर्मध्वजिनस्तेहिपातकिनोऽधिकाः २७ एतावदुक्त्वाभगवान्निवृत्तोऽसद्वधादपि ॥ भावित्वात्तंकुशाग्रेणकरस्थेनाहनत्प्रभुः २८ हाहेतिवादिनःसर्वेमुनयःखिन्नमानसाः ॥ ऊचुःसंकर्षणंदेवमधर्म स्तेकृतःप्रभो २९ अस्यब्रह्मासनंदत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लमंतावद्यावत्सत्रंसमाप्यते ३० अजानतेवाचरितस्त्वयाब्रह्मवधोयथा ॥ योगे श्वरस्यभवतोनाम्नायोपिनियामकः ३१ यद्येतद्ब्रह्महत्यायाःपावनंलोकपावन ॥ चरिष्यतिभवाँल्लोकसंग्रहोनान्यचोदितः ३२ ॥ श्रीभगवानुवाच ॥ क रिष्येवधनिर्वेशंलोकानुग्रहकाम्यया ॥ नियमःप्रथमेकल्पेयावान्सतुविधीयताम् ३३

चूर्णिका

तदाक्रुद्धः सन् आह २३ अहो असौ प्रतिलोमजः सूतः विप्रेभ्यः उच्चासने आस्ते अतः वधं अर्हति २४ किंच अयं ऋषेः शिष्योभूत्वाऽनेन सेतिहासपुराणा नि धर्मशास्त्राणि अधीतानि २५ तथापि अविनीतस्य गुणायनभवंतीत्युक्त्वा असद्वधान्निवृत्तोपि करस्थेन कुशाग्रेण अहनत् २६ २७ २८ तदा खिन्नमानसाः मुनयः संकर्षणंऊचुः हेप्रभो त्वया अधर्मः कृतः २९ यावत् सत्रं समाप्यते तावत् अस्य अस्माभिः ब्रह्मासन आयुश्चदत्तम् ३० अजानता त्वयाब्रह्मवधः कृतः यदिहि तवनियामकः वेदो न तथापि हेलोकपावन त्वं ब्रह्मवधप्रायश्चित्तंयदिकरिष्यसि तर्हिलोकसंग्रहः स्यात् अन्यथा न ३१ ३२ ॥ श्रीभगवानुवाच ॥ हेऋषयःअहंवध प्रायश्चित्तं करिष्ये अतः मुख्यकल्पे यावान् नियमः तावान् उपदिश्यताम् किंच एतस्य दीर्घ आयुः बलं इंद्रियपाटवं चयत्भवद्भिः अपेक्षितं तद्ब्रूत सर्वंसाधये ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंन्नबतहेमुनयःएतस्य (सूतस्य) दीर्घमायुःसत्त्वंबलम् इंद्रियंबतपाटवंअन्यच्चयद्भवद्भिराशासितंअपेक्षितंतत्त्ब्रूतसर्वं (साधये) ३४ अस्त्रादीनांसत्यतायथाभवेत्अस्माकंचवचःसत्यंयथाभवेत्तथाविधी
यतामित्यर्थः (तत्रास्त्रंकुशाग्ररूपम् वीर्यंप्रभावःमृत्युरस्यपरेतत्वम्) ३५ तथासंपादयन्नाह"अंगादंगात्संभवसिहृदयादधिजायसे आत्मावैपुत्रनामासिसजीवशरदःशत"मित्यादिवेदानुशासनंवेदवचनम् ।
तस्मादस्यरोमहर्षणस्यपुत्रउग्रश्रवारोमहर्षणरूपः भवतांपुराणप्रवक्ताभवेत् सचआयुरादिमांश्चभवेत् । अतःसाक्षादजीवनादस्त्रस्यमृत्योश्चसत्यता । पुत्ररूपेणविद्यमानस्यचायुरादिसिद्धेर्युष्मद्वचनस्या
पिसत्यतास्यादितिभावः ३६ (किंच) प्रथमंतावद्ब्रह्मदंडार्थमपेक्षितंकथयत तदहंकरिष्यामीत्याह किंवःकामइति । किंविषयोवः कामोवर्ततेतत्ब्रूतेति । अथानंतरंब्रह्मदंडंगृहीत्वेत्यर्थः । अपचितिं
निष्कृतिमजानतोमे हेबुधाःयथावच्चिंत्यतामपचितिरिति ३७ प्रथमंतावदपेक्षितंकर्तव्यंकथयंति । इल्वलस्येतिद्वाभ्याम् ३८ ३९ प्रायश्चित्तमाहुः ततश्चेति । परीत्यप्रदक्षिणीकृत्यसुसमाधानादिगुणविशे
॥११५॥ षादेकाब्दमात्रमुक्तमित्यविरोधः सुसमाहितःकामक्रोधादिभिरहतः । चरित्वाकृच्छ्राणिविशुध्यसेपूतोभवसि ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांअष्टसप्ततितमोऽध्यायः ७८ ॥ ७ ॥
ऊनाशीतितमेरामोबल्वलंद्विजतुष्टये । निहत्यतीर्थस्नानाद्यैःसूतहत्यामपानुदत् ॥ १ ॥ उपावृत्तेप्राप्ते (सर्वशःपूयगंधोप्यभूत्) १ (अमेध्यमयंविण्मयम् । अनंतरंसबल्वलोऽदृश्यतदृष्टः) २

श्लोकाः ३४/२

दीर्घमायुर्बतैतस्यसत्त्वमिंद्रियमेवच ॥ आशासितंचयद्ब्रूतसाधयेयोगमायया ३४ ॥ ऋषयऊचुः ॥ अस्त्रस्यतववीर्यस्यमृत्योरस्माकमेवच ॥ यथाभवे
द्वचःसत्यंतथारामविधीयताम् ३५ ॥ श्रीभगवानुवाच ॥ आत्मावैपुत्रउत्पन्नइतिवेदानुशासनम् ॥ तस्मादस्यभवेद्वक्ताआयुरिंद्रियसत्त्ववान् ३६ किंवः
कामोमुनिश्रेष्ठाब्रूताहंकरवाण्यथ । अजानतस्त्वपचितिंयथामेचिंत्यतांबुधाः ३७ ॥ ऋषयऊचुः ॥ इल्वलस्यसुतोघोरोबल्वलोनामदानवः ॥ सदूषयति
नःसत्रमेत्यपर्वणिपर्वणि ३८ तंपापंजहिदाशार्हतन्नःशुश्रूषणंपरम् ॥ पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणम् ३९ ततश्चभारतंवर्षंपरीत्यसुसमाहितः ॥
चरित्वाद्वादशमासांस्तीर्थस्नायीविशुध्यसे ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेअष्टसप्ततितमोध्यायः ७८ ॥ ॥ ७ ॥ ॥
॥श्रीशुकउवाच ॥ ततःपर्वण्युपावृत्तेप्रचंडःपांशुवर्षणः ॥ भीमोवायुरभूद्राजन्पूयगंधस्तुसर्वशः १ ततोऽमेध्यमयंवर्षंबल्वलेनविनिर्मितम् ॥ अभव
द्यज्ञशालायांसोन्वदृश्यतशूलधृक् २

चूर्णिका

३४ ॥ ऋषयऊचुः ॥ हे राम तव अस्त्रस्य मृत्योश्च अस्मद्वचसः सत्यत्वं यथास्यात्तथा विधीयताम् ३५ ॥ श्रीभगवानुवाच ॥ हेमुनयः पुत्रः आत्मैव उत्पन्नोस्ति अतः
अस्यपुत्रः रोमहर्षणः आयुरिंद्रियबलवान् भवेत् ३६ वः अन्यः कः कामोऽस्तितद्ब्रूत ३७ ॥ ॥ ऋषयऊचुः ॥ ॥ हेभगवन् बल्वलो नामदैत्यः पर्वणि पर्वणि एत्यनः ॥११५॥
सत्रं दूषयति ३८ तंपापं जहितन्नःशुश्रूषणंपरं ३९ ततः भारतं वर्षं प्रदक्षिणीकृत्य द्वादशान् मासान् तीर्थस्नायीसन् चत्वारि कृच्छ्राणिचरित्वा विशुध्यसे ४० ॥ इति
दशमेऽष्टसप्ततितमः ॥ ७८ ॥ ७ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हेराजन् ततः पर्वणिप्राप्तेसति पांसुवर्षणः पूयगंधः वायुरभूत् १ ततः यज्ञशालायांअ
मेध्यमयं वर्षं अभवत् ततः शूलधृक् बल्वलः अदृश्यत १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

भिन्नोविदीर्णोऽजनचयःउपमायस्यतम् । अतिकृष्णमित्यर्थः । तप्तताम्रवत् शिखाश्मश्रूणिचयस्यतम् । दंष्ट्राभिरुग्रंभृकुटीयुतंमुखंयस्यतम् ३ (तेहलमुसलेशीघ्रमुपास्थिते) ४ ५ (वज्रेणताडितःशैलोयथा) तत्ररुधिरेणारुणोदैत्यः शैलस्तुधातुभिः ६ (अवितथाःसत्याश्चताआशिषश्चताःप्रयुज्यवृत्रेहतेइंद्रंयथेत्यर्थः) ७ श्रियोधामानिअम्लानानिपंकजानियस्यांताम् ८ (तैर्ब्राह्मणैः) किंतत्सरःतत्राहयतइाति आस्रवत्उदगात् ९ सरयूमनुस्रोतेनअनुलोमतःपुलहाश्रमंहरिक्षेत्रम् १० गोमत्यां गंडक्यां विपाशायां च स्नात्वा शोणेचआप्लुतः । पितॄनिष्ट्वासंपूज्य ११ (रामंभार्गवं) १२ (स्कंदंकार्तिकेयम् । महापुण्यमितिश्रीशैलवेंकटाभ्यांसंबध्यते । गिरिशस्यमल्लकार्जुनस्यालयं) श्रीशैलंश्रीपर्वतम् १३ कांचीपुरीम् १४ (महत्पुण्यंयत्रतादृशंक्षेत्रम् ।) १५ (तत्रसेतौ) १६ दक्षिणमर्णवं (गतइत्यन्वयः) १७

॥११६॥ श्लोकाः ३/१७

तंविलोक्यबृहत्कायंभिन्नांजनचयोपमम् ॥ तप्तताम्रशिखाश्मश्रुंदंष्ट्रोग्रभ्रुकुटीमुखम् ३ सस्मारमुसलंरामःपरसैन्यविदारणम् ॥ हलंचदैत्यदमनंतेतूर्णमुपतस्थतुः ४ तमाकृष्यहलाग्रेणबल्वलंगगनेचरम् ॥ मुसलेनाहनत्क्रुद्धोमूर्ध्निब्रह्मद्रुहंबलः ५ सोऽपतद्भुविनिर्भिन्नललाटोऽसृक्समुत्सृजन् ॥ मुंचन्नार्तस्वरंशैलोयथावज्राहतोऽरुणः ६ संस्तुत्यमुनयोरामंप्रयुज्यावितथाशिषः ॥ अभ्यषिंचन्महाभागावृत्रघ्नंविबुधायथा ७ वैजयंतींददुर्मालांश्रीधामाम्लानपंकजाम् ॥ रामायवाससीदिव्येदिव्यान्याभरणानिच ८ अथतैरभ्यनुज्ञातःकौशिकीमेत्यब्राह्मणैः ॥ स्नात्वासरोवरमगाद्यतःसरयुरास्रवत् ९ अनुस्रोतेनसरयूंप्रयागमुपगम्यसः ॥ स्नात्वासंतर्प्यदेवादीन्जगामपुलहाश्रमम् १० गोमतींगंडकींस्नात्वाविपाशांशोणआप्लुतः ॥ गयांगत्वापितॄनिष्ट्वागंगासागरसंगमे ११ उपस्पृश्यमहेंद्राद्रौरामंदृष्ट्वाऽभिवाद्यच ॥ सप्तगोदावरींवेणींपंपांभीमरथींततः १२ स्कंदंदृष्ट्वाययौरामःश्रीशैलंगिरिशालयम् ॥ द्रविडेषुमहापुण्यंदृष्ट्वाद्रिंवेंकटंप्रभुः १३ कामकोष्णींपुरींकांचींकावेरींचसरिद्वराम् ॥ श्रीरंगाख्यंमहापुण्यंयत्रसंनिहितोहरिः १४ ऋषभाद्रिंहरेःक्षेत्रंदक्षिणांमथुरांतथा ॥ सामुद्रंसेतुमगमन्महापातकनाशनम् १५ तत्रायुतमदाद्धेनूर्ब्राह्मणेभ्योहलायुधः ॥ कृतमालांताम्रपर्णींमलयंचकुलाचलम् १६ तत्रागस्त्यंसमासीनंनमस्कृत्याभिवाद्यच ॥ योजितस्तेनचाशीर्भिरनुज्ञातोगतोर्णवम् ॥ दक्षिणंतत्रकन्याख्यांदुर्गांदेवींददर्शसः १७

चूर्णिका

तं दृष्ट्वा रामः मुशलं हलंच अस्मरत् तदा तेतूर्णं उपतस्थतुः ३ ४ ततः गगने चरंतं हलाग्रेण आकृष्य मुसलेन मूर्ध्नि अहन् ५ तदा सः असृक् वमन् आर्तस्वरंच मुंचन् भुवि अपतत् ६ ततः ऋषयः रामं संस्तुत्य आशिषः प्रयुज्य अभ्यषिंचन् ७ ततः रामाय वैजयंतीं मालांदिव्यवस्त्राभरणानिच ददुः ८ अथतैःअनुज्ञातः रामःकौशिकीं एत्य तत्रस्नात्वा सरयूद्गमसरोवरं अगात् ९ ततःप्रयागंगत्वा तत्रस्नात्वा देवादीन्संतर्प्य पुलहाश्रमं जगाम १० ततः गोमतीं गंडकीं विपाशां शोणहृदंच स्नात्वा गयांगत्वा पितॄन् इष्ट्वा गंगासागरसंगमे ११ उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वा संपूज्य सप्तगोदावरीं वेणां पंपां भीमरथीं गत्वा १२ ततः स्कंदं दृष्ट्वा श्रीशैलंययौ ततः द्रविडेषु वेंकटं दृष्ट्वा १३ ततः कामकोष्णीं कांचीपुरीं कावेरीं श्रीरंगं १४ ऋषभाद्रिं दक्षिणमथुरांसामुद्रसेतुं गत्वा १५ तत्र ब्राह्मणेभ्यःअयुतधेनूः अदात् ततः कृतमालां ताम्रपर्णीं मलयं कुलाचलंगत्वा १६ तत्रसमासीनं अगस्त्यं नमस्कृत्य तेनानुज्ञातः सन् दक्षिणसमुद्रं गत्वा तत्रकन्याख्यां दुर्गां ददर्श १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. टीका

फाल्गुनंअनंतपुरम् । पंचाप्सरसंसरःअस्पर्शत्अस्पृशत् । (ददावित्यर्थः । गवामयुतम् ।) १८ केरलादींन्देशान् (शिवस्यमहाबलेश्वरस्यक्षेत्रम्) १९ द्वीपमयनंयस्यास्तां (स्वार्थेऽण् । आर्यां दुर्गेतिप्रसिद्धाम्) २० २१ २२ (सयदुनंदनोरामः) विनशनंकुरुक्षेत्रम् २३ (यमौनकुलसहदेवौ) विवक्षुःवक्तुमिच्छुः (इहागतः) किंवदिष्यतीतिभियातूष्णीमासन्निति २४ (उभौभीमदुर्यो धनौ) २५ (हेराजन्दुर्योधन) प्राणाधिकंबलाधिकम् २६ (समवीर्यसामर्थ्ययोःतयोरेकतरस्य) अन्यःपराजयोवा । रणःसंग्रामः २७ (हेनृप) अर्थवत् (अपि) वाक्यम् २८ दिष्टं प्राचीनंकर्म । समुपागतःसंगतः २९ (तंबलरामम्) क्रत्वंगं (क्रतुरूपमंगंयस्यतम्) यज्ञमूर्तिं (निवृत्ताखिलविग्रहम् । सर्वभूतसुहृदमित्यर्थः) ३० आत्मनिअधिष्ठानेविश्वंगंसर्वांतुस्यूतं येनैव विदुः पश्यंतितद्विशुद्धंविज्ञानं व्यतरत् अदात् ३१

अ० ॥७९॥

॥११७॥

ततःफाल्गुनमासाद्यपंचाप्सरससमुत्तमम् ॥ विष्णुःसंनिहितोयत्रस्नात्वाऽस्पर्शद्गवायुतम् १८ ततोभिव्रज्यभगवान्केरलांस्तुत्रिगर्तकान् ॥ गोकर्णाख्यं शिवक्षेत्रंसांनिध्यंयत्रधूर्जटेः १९ आर्यांद्वैपायनींदृष्ट्वाशूर्पारकमगाद्बलः ॥ तापींपयोष्णींनिर्विंध्यामुपस्पृश्याथदंडकम् २० प्रविश्यरेवामगमद्यत्रमाहि ष्मतीपुरी ॥ मनुतीर्थमुपस्पृश्यप्रभासंपुनरागमत् २१ श्रुत्वाद्विजैःकथ्यमानंकुरुपांडवसंयुगे ॥ सर्वराजन्यनिधनंआरंमेनेहृतंभुवः २२ सभीमदुर्योधनयो र्गदाभ्यांयुध्यतोर्मृधे ॥ वारयिष्यन्विनशनंजगामयदुनंदनः २३ युधिष्ठिरस्तुतंदृष्ट्वायमौकृष्णार्जुनावपि ॥ अभिवाद्याभवंस्तूष्णींकिंविवक्षुरिहागतः २४ गदापाणीउभौदृष्ट्वासंरब्धौविजयैषिणौ ॥ मंडलानिविचित्राणिचरंताविदमब्रवीत् २५ युवांतुल्यबलौवीरौहेराजन्हेवृकोदर ॥ एकंप्राणाधिकंमन्ये उतैकंशिक्षयाधिकम् २६ तस्मादेकतरस्येहयुवयोःसमवीर्ययोः ॥ नलक्ष्यतेजयोऽन्योवाविरमत्वफलोरणः २७ नतद्वाक्यंजगृहतुर्बद्धवैरौनृपार्थवत् ॥ अनुस्मरंतावन्योन्यंदुरुक्तंदुष्कृतानिच २८ दिष्टंतदुपमन्वानोरामोद्वारवतींययौ ॥ उग्रसेनादिभिःप्रीतैर्ज्ञातिभिःसमुपागतः २९ तंपुनर्नैमिषंप्राप्तमृषयोऽ याजयन्मुदा ॥ क्रत्वंगंक्रतुभिःसर्वैर्निवृत्ताखिलविग्रहम् ३० तेभ्योविशुद्धविज्ञानंभगवान्व्यतरद्विभुः ॥ येनैवात्मन्यदोविश्वमात्मानंविश्वगंविदुः ३१

श्लोकाः १८/३१

चूर्णिका

ततः अनंतपुरं आगत्य पंचाप्सरसं सरःगत्वा तत्रस्नात्वा गवायुतं ददौ १८ ततः केरलादिदेशान् गत्वा गोकर्णाख्यं शिवक्षेत्रं आगत्य १९ ततः द्वैपायनीं आर्यां दृष्ट्वा शूर्पारकं अगात् ततः तापीं पयोष्णीं निर्विंध्यां उपस्पृश्य दंडकं प्रविश्य रेवांअगमत् ततः मुनितीर्थं उपस्पृश्य प्रभासं पुनरागमत् २० २१ तत्र द्विजैः कथ्यमानं कुरुपांडवयुद्धे सर्वराजन्यनिधनं श्रुत्वा भूभारं हृतं मेने २२ ततः भीमदुर्योधनयोः गदाभ्यां युध्यतोः सतोः तौ प्रति वारयिष्यन् कुरुक्षेत्रं जगाम २३ तं दृष्ट्वा युधिष्ठिरः नकुलसहदेवौ कृष्णार्जुनौचअभिवाद्य किं वदिष्यतीति भिया तूष्णीं अभवन् २४ ततः रामः उभौ भीमदुर्योधनौ गदापाणी मंडलानि चरंतौदृष्ट्वा इदमब्रवीत् २५ हे राजन् हेवृकोदर युवां तुल्यबलौ स्तः यतः एकं बलाधिकं अपरं शिक्षयाधिकंअहं मन्ये २६ तस्मात् युवयोर्मध्ये एकतरस्य जयः पराजयो वा न दृश्यते अतः विफलः रणः विरमतु २७ एवंउक्तौतौ तद्वाक्यं न जगृहतुः २८ तदिष्टं मन्वानः रामः द्वारवतीं ययौ ततः उग्रसेनादीन् संगम्य पुनर्नैमिषं अगात् २९ ततः तं रामं ऋषयः क्रतुभिः अयाजयन् ततो भगवान् रामः तेभ्यः विशुद्धविज्ञानं ददौ ३० ३१

॥११७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

१ स्वपत्न्यासहअवभृथेस्नातः । स्वज्योत्स्नयाचंद्रइवस्वपत्न्यारेजे । ईदृग्विधानिकर्माणि ३२ ३३ ३४ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोनाशीतितमोऽध्यायः ७९ ॥ ७ ॥
अथाशीतितमेकृष्णःश्रीदामानंगृहागतम् । संपूज्यापृच्छदर्थेप्सुंगुरुवासकथांमुदा ॥ १ ॥ सुरारिमारकोहारिःपुराचक्रारशंसताम् । अतःपरंविनैवतांनिजोपकारमाचरत्॥२॥रामचरितानिश्रुत्वापुनर्मुकुंदवी
र्याणिपृच्छति । हेभगवन् (वीर्याणिचरितानि) श्रोतुमिच्छामीत्यन्वयः १ उत्तमश्लोकस्यश्रीकृष्णस्यसत्योमनोहराःविषयवैतृष्ण्यजनिकाःकथाः (असकृदपिश्रुत्वा कोनु) विशेषज्ञःसारवित्
(कामबाणैः) विषण्णोविषादंप्राप्तः २ कथाश्रवणंस्तुवन्दृष्टांततयाऽन्यार्थानाह सावागिति । तावेवकरौ यौ तत्कर्मकर्तारौ । तदेवमनः यत्स्थिरजंगमेषु वसंतंविष्णुं स्मरेत् । यस्तस्यपुण्यकथाः
शृणोति सएवकर्णः ३ उभयलिंगंस्थिरजंगमंचतस्यैवलिंगमितिमत्वा आनमेत्तदेव शिरः । तदेवउभयंतस्यलिंगमित्येवयत्पश्यति (तद्धि) तदेवचक्षुः । तान्येवांगानि यानिपादोदकंभजंतीति ४
॥११८॥ (विष्णुरातेनपरीक्षिता) ५ ६ (कुत्सितेचैलेवाससीयस्यतस्य) तथाविधाकुचैलाकिंचक्षुत्क्षामास्यात्किंचित्संपन्नमन्नंतस्मैपरिविष्यस्वयंक्षुधाजीर्णा ७ पतिव्रतासतीम्लायताशुष्यतावदनेन । सीदमानाभर्तृ
भोगसंपादनाशक्त्यासीदंतीवेपमानाभयेनकंपमाना ८

स्वपत्न्यावभृथस्नातोज्ञातिबंधुसुहृद्वृतः ॥ रेजेस्वज्योत्स्नयेवेंदुःसुवासाःसुष्ठ्वलंकृतः ३२ ईदृग्विधान्यसंख्यानिबलस्यबलशालिनः ॥ अनंतस्याप्रमे श्लोकाः
यस्यमायामर्त्यस्यसंतिहि ३३ योनुस्मरेतरामस्यकर्माण्यद्भुतकर्मणः ॥ सायंप्रातरनंतस्यविष्णोःसदयितोभवेत् ३४ ॥ ॥ इतिश्रीभागवतेमहापुरा
णेदशमस्कंधेएकोनाशीतितमोध्यायः ७९ ॥ ॥ राजोवाच ॥ भगवन्यानिचान्यानिमुकुंदस्यमहात्मनः ॥ वीर्याण्यनंतवीर्यस्यश्रोतुमिच्छामिहे ३२/८
प्रभो १ कोनुश्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः ॥ विरमेतविशेषज्ञोविषण्णःकाममार्गणैः २ सावाग्ययातस्यगुणान्गृणीतेकरौचतत्कर्मकरौमनश्च ॥ स्म
रेद्वसंतंस्थिरजंगमेषुशृणोतितत्पुण्यकथाःसकर्णः ३ शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतितद्धिचक्षुः ॥ अंगानिविष्णोरथतज्जनानांपादोदकंयानि
भजंतिनित्यम् ४॥ सूतउवाच ॥ विष्णुरातेनसंपृष्टोभगवान्बादरायणिः ॥ वासुदेवेभगवतिनिमग्नहृदयोऽब्रवीत् ५ ॥ श्रीशुकउवाच ॥ कृष्णस्यासी
त्सखाकश्चिद्ब्राह्मणोब्रह्मवित्तमः ॥ विरक्तइंद्रियार्थेषुप्रशांतात्माजितेंद्रियः ६ यदृच्छयोपपन्नेनवर्तमानोगृहाश्रमी ॥ तस्यभार्याकुचैलस्यक्षुत्क्षामाचत
थाविधा ७ पतिव्रतापतिंप्राहम्लायतावदनेनसा ॥ दरिद्रासीदमानासावेपमानाभिगम्यच ८

चूर्णिका

ततः स्वपत्न्या सह अवभृथस्नातः ज्ञातिबंधुसुहृद्वृतः सन् स्वप्रभया चंद्र इव शुशुभे ३२एवं बलस्य असंख्यानि कर्माणि संति तानि यः सायंप्रातः स्मरेत् सः विष्णोः
दयितो भवेत् ३३ ३४ ॥ इति दशमे एकोनाशीतितमोऽध्यायः॥ ७९ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ हे ब्रह्मन् मुकुंदस्य अन्यानि वीर्याणि श्रोतुं इच्छा
मि१ हे ऋषे उत्तमश्लोकसत्कथाः श्रुत्वा सारवित्कःविरमेत २ किंच या भगवद्गुणान्गृणीते सा वाक् यौ तत्कर्मकरौ तौ हस्तौ यत् श्रीहरिं स्मरेत् तत् मनः यः भगवत्क ॥११८॥
थाः शृणोति सः कर्णः ३ यत् भगवंतं नमेत् तच्छिरः यत् श्रीहरिं पश्यति तच्चक्षुः यानि विष्णोर्भक्तानां च पादोदकं भजंति तानिअंगानि४ ॥सूतउवाच॥ एवं परीक्षिता
पृष्टःशुकः तं अब्रवीत्५ ॥ श्रीशुकउवाच हे राजन् कश्चित् द्विजः विषयेषुविरक्तः सन् श्रीकृष्णस्य सखा आसीत् ६ तस्य स्त्री क्षुत्क्षामा सती एकदा पतिंअभिगम्य प्राह ७ ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हेब्रह्मन्वेदमूर्तेभगवतोभवतःसखामित्रम्) ९ (परायणंपरमाश्रयम्) १० भोजवृष्ण्यंधकेश्वरइतितत्स्वीकारमात्रेगसर्वोपितेदास्यंतीतिभावः (भजतोऽर्थकामान्विषयभोगान्यच्छतीतिकिंपुनर्वक्तव्य मित्यर्थः) नात्यभीष्टान्परिपाकविरसत्वात् ११ १२ अप्यास्ति किमस्तीतिप्रश्नः (पृथुकतंडुलान्चिपिटान्) १३ १४ मह्यंमम (दीनस्य) १५ गुल्मादिरक्षार्थंसैन्यस्थानानि । कक्षाःप्रतोलीःअतीया यअतिक्रम्यजगाम । सद्विजःद्विजैःसहितः । ततश्चअगम्याद्दुर्गमायेंऽधकावृष्णयश्चतेषां (भागवतानां) गृहेषु (मध्ये) १६ तथाहरेर्द्व्यष्टसहस्राणांमहिषीणांचयेगृहास्तेषुमध्येश्रीमत्एकतमंगृहंविवेश । तदाचसद्विजोब्रह्मानंदंगतोयथातथाबभूवेतिशेषः १७ (दूराद्विलोक्यसहसोत्थायतमभ्येत्य) पर्यग्रहीत्परिरेभे १८ अब्बिंदून्आनंदाश्रूणि १९ (अथतंपर्यंकेउपवेश्यतस्मै) समर्हणंउपायनंउपहृत्यसमर्प्य (स्वयंपादौप्रक्षाल्य) पादावनेजनीरपः (शिरसाग्रहीत्) २० २१

॥११९॥ श्लोकाः ९/२१

ननुब्रह्मन्भगवतःसखासाक्षाच्छ्रियःपतिः ॥ ब्रह्मण्यश्चशरण्यश्चभगवान्सात्वतर्षभः ९ तमुपैहिमहाभागसाधूनांचपरायणम् ॥ दास्यतिद्रविणंभूरिसीदतेतेकुटुंबिने १० आस्तेधुनाद्वारवत्यांभोजवृष्ण्यंधकेश्वरः ॥ स्मरतःपादकमलमात्मानमपियच्छति ११ किंत्वर्थकामान्भजतोनात्यभीष्टाञ्जगद्गुरुः ॥ सएवंभार्ययाविप्रोबहुशःप्रार्थितोमृदु १२ अयंहिपरमोलाभउत्तमश्लोकदर्शनम् ॥ इतिसंचिंत्यमनसागमनायमतिंदधे १३ अप्यस्त्युपायनंकिंचिद्गृहेकल्याणिदीयताम् ॥ याचित्वाचतुरोमुष्टीन्विप्रान्पृथुकतंडुलान् ॥ चैलखंडेनतान्बद्ध्वाभर्त्रेप्रादादुपायनम् १४ सतानादायविप्राग्र्यःप्रययौद्वारकांकिल ॥ कृष्णसंदर्शनंमह्यंकथंस्यादितिचिंतयन् १५ त्रीणिगुल्मान्यतीयायतिस्रःकक्षाश्चसद्विजः ॥ विप्रोऽगम्यांधकवृष्णीनांगृहेष्वच्युतधर्मिणाम् १६ गृहंद्व्यष्टसहस्राणांमहिषीणांहरेर्द्विजः ॥ विवेशैकतमंश्रीमद्ब्रह्मानंदंगतोयथा १७ तंविलोक्याच्युतोदूरात्प्रियापर्यंकमास्थितः ॥ सहसोत्थायचाभ्येत्यदोर्भ्यांपर्यग्रहीन्मुदा १८ सख्युःप्रियस्यविप्रर्षेरंगसंगातिनिर्वृतः ॥ प्रीतोव्यमुंचदब्बिंदून्नेत्राभ्यांपुष्करेक्षणः १९ अथोपवेश्यपर्यंकेस्वयंसख्युःसमर्हणम् ॥ उपहृत्यावनिज्यास्यपादौपादावनेजनीः २० अग्रहीच्छिरसाराजन्भगवाँल्लोकपावनः ॥ व्यलिंपद्दिव्यगंधेनचंदनागुरुकुंकुमैः २१

चूर्णिका

हे ब्रह्मन् तव साक्षात् श्रीपतिः ब्रह्मण्यः सखा अस्ति तं त्वं उपैहि सः सीदते तुभ्यं द्रविणं दास्यति १० सः अधुना द्वारवत्यां आस्ते सः पादकमलं स्मरतः पुंसः आत्मानमपि यच्छति किं पुनः अर्थकामान् यच्छतीतिवक्तव्यम् ११ एवं भार्यया प्रार्थितः विप्रः श्रीकृष्णदर्शनं अयमेव परो लाभ इति संचिंत्य गमनाय मतिं दधे १२ १३ हे कल्याणि गृहे किंचित् अस्ति चेद्दीयताम् ततः सा स्त्री चतुरो मुष्टीन् पृथुकणान् याचित्वा वस्त्रखंडेन बद्ध्वा भर्त्रे प्रादात् १४ ततः स तान् आदाय मह्यं कृष्णदर्शनं कथं स्यात् इति चिंतयन् द्वारकांप्रययौ १५ ततः सः त्रीणि गुल्मानि तथा तिस्रः प्रतोलीश्च अतिक्रम्य अंधकवृष्णीनां गृहेषु मध्ये ये हरेः षोडशसहस्रमहिषीणां गृहाः तेषुमध्ये श्रीमत् एकतमं गृहं विवेश १५ १६ तदा श्रीकृष्णः दूरात् तं विप्रं विलोक्य सहसा उत्थाय अभ्येत्य मुदा आलिंगितवान् १८ ततः प्रियस्य अंगसंगेन निर्वृतः कृष्णः नेत्राभ्यां अश्रूणिव्यमुंचत् १९ ततः तं द्विजं पर्यंके उपवेश्य स्वयं तस्य उपायनं दत्त्वा तस्य पादौ प्रक्षाल्य तदपः शिरसा अग्रहीत् ततः चंदनादिभिः २० २१

॥११९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(स्वागतमितिगांवाणींस्वागतंपप्रच्छेत्यर्थः । यद्वा गांधेनुंचावेद्येति) २२ (क्षामंकृशं) धमनिभिःशिराभिः संततंव्याप्तम् । (शैब्यानामभगवतःपत्नीचामरेणपरिचचार) २३ अवधूतंमलिनं (कृष्णेनसभाजितम्) २४ विस्मयमाहकिमनेनेतिद्वाभ्यां (अवधूतेनमलिनेनभिक्षुणाभैक्षजीविना । श्रियाकांत्या । गर्हितेनानिंदितेन । अधमेननिकृष्टेन) २५ संभृतःसंमानितः २६ सतोःवसतोः (आत्मनोर्ललितागाथाःकथयासमासतुः । करौ) गृह्यगृहीत्वा २७ (समावृत्तेनकृतसमावर्तनेनभवतासदृशीकुलशीलादिनायोग्या) भार्याऊढापरिणीतानवा । इतिगृहस्थलिंगदर्शनात्भोगादर्शनाच्च संशयादिवप्रश्नः २८ अप्रतिषेधादुद्वाहमनुमतंमत्वाह । प्रायइति । तर्हितेचित्तंनूनमकामविहतंकामैर्विहतंनभवतीतिमेविदितम् । तथाहि । धनेषुवस्त्रादिषुनैवातिप्रीयसे । हेविद्वन्इतिविदुषस्तवैतद्युक्तमितिभावः २९ कामहतत्वाभावेकिंगृहधर्मक्लेशेनेत्याशंक्याह । केचिदिति (कामैर्विषयैरहतचेतसःअतो) दैवीः देवस्येश्वरस्यमाययारचिताः (एवंभूताअपि) प्रकृतीर्विषयवासनास्त्यजंतः (एवंभूताअपिकेचित्कर्माणिकुर्वंति) कामैरनाकृष्टचेतसामपिकर्मकरणेदृष्टांतः । यथाहमिति लोकसंग्रहंलोकस्यसंग्रहोग्रहणंयथाभवतितथाअहमीश्वरोपिकर्माणियथाकरोमितद्वत् ३० नौआवयोःयतोगुरोःविज्ञेयंपरमात्मतत्त्वं (साक्षात्कृत्य) तमसःसंसारस्य ३१

धूपैःसुरभिभिर्मित्रंप्रदीपावलिभिर्मुदा ॥ अर्चित्वावेद्यतांबूलंगांचस्वागतमब्रवीत् २२ कुचैलंमलिनंक्षामंद्विजंधमनिसंततम् ॥ देवीपर्यचरच्छैब्या चामरव्यजनेनवै २३ अंतःपुरजनोदृष्ट्वाकृष्णेनामलकीर्तिना ॥ विस्मितोभूदतिप्रीत्याअवधूतंसभाजितम् २४ किमनेनकृतंपुण्यमवधूतेनाभिक्षुणा ॥ श्रियाहीनेनलोकेस्मिन्गर्हितेनाधमेनच २५ योसौत्रिलोकगुरुणाश्रीनिवासेनसंभृतः ॥ पर्यंकस्थांश्रियंहित्वापरिष्वक्तोऽग्रजोयथा २६ कथयांचक्रतुर्गाथाःपूर्वागुरुकुलेसतोः ॥ आत्मनोर्ललिताराजन्करौगृह्यपरस्परम् २७ ॥ श्रीभगवानुवाच ॥ अपिब्रह्मन्गुरुकुलात्भवताल्ब्धदक्षिणात् ॥ समावृत्तेनधर्मज्ञभार्योढासदृशीनवा २८ प्रायोगृहेषुतेचित्तमकामविहतंतथा ॥ नैवातिप्रीयसेविद्वन्धनेषुविदितंहिमे २९ केचित्कुर्वंतिकर्माणिकामैरहतचेतसः ॥ त्यजंतःप्रकृतीर्दैवीर्यथाहंलोकसंग्रहम् ३० कच्चिद्गुरुकुलेवासंब्रह्मन्स्मरसिनौयतः ॥ द्विजोविज्ञायविज्ञेयंतमसःपारमश्नुते ३१

मित्रं अर्चयित्वा तांबूलंगांच दत्त्वास्वागतमित्यब्रवीत् २२ तदा रुक्मिणी तंमलिनंद्विजं चामरव्यजनाभ्यां पर्यचरत् २३ ततः कृष्णेनप्रीत्या सत्कृतं अवधूतं दृष्ट्वा अंतःपुरजनः विस्मितोभूत् २४ अहो अनेन किं पुण्यंकृतम् २५ योसौ श्रीहरिणा पर्यंकस्थां श्रियंहित्वा संमानितः आलिंगितश्च २६ ततः तौद्विजकृष्णौ परस्परं करौ गृहीत्वा गुरुकुले वसतोः आत्मनोः पूर्वाः कथाःकथयांचक्रतुः २७ ॥ श्रीभगवानुवाच ॥ हे ब्रह्मन् गुरुकुलात् समावृत्तेनत्वया सदृशी भार्या परिणीता नवा २८ किंच तवचित्तं कामैर्विहतं न भवतीतिमे विदितम् किंच हे विद्वन् त्वंद्रव्यवस्त्रादिषुनैव अतिप्रीयसे विदुषस्तव एतत् युक्तम् २९ ३० किंच हे ब्रह्मन् कच्चित् आवयोः गुरुकुलेवासंस्मरसि यतः गुरोः सकाशात्आत्मतत्वं ज्ञात्वा संसारस्य पारं अश्नुते ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२१॥

तत्रात्मज्ञानप्रदस्यगुरोरत्यंतंपूज्यत्वंवक्तुंपुरुषस्यत्रीन्गुरूनाह । सवाइति । इहसंसारेयत्रसंभवोजन्ममात्रंसपितातावदाद्यःप्रथमोगुरुःपूज्यः । अथकर्मविद्याप्रदंगुरुनाह । द्विजातेःसतःपुंसःसत्कर्मणां (उपनयनपूर्वकाध्ययनानां) यत्रसंभवःउपनीयवेदाध्यापकइत्यर्थः । सद्वितीयोगुरुः । यथाहमीश्वरस्तथाप्रथमादपिपूज्यइत्यर्थः । ब्रह्मविद्याप्रदंगुरुमाह । आश्रमिणांसर्वेषामपिज्ञानप्रदोयःसतुसाक्षादहमेवेति ३२ अतोज्ञानप्रदंगुरुरूपंमामाश्रित्ययेसंसारंतरंतितेतुद्धिमंतइत्याह । नन्विति । हेब्रह्मन्वर्णाश्रमवतांमध्येतएवार्थकोविदाःयेइहमनुष्यजन्मनितत्रापिवर्णाश्रमवत्त्वेसतिमयागुरुणागुरुरूपेणवक्त्रावाचाउपदेशमात्रेणांजःसुखेनैवभवार्णवंतरंतीतिज्ञानप्रदाद्गुरोराधिकःसेव्योनास्तीत्युक्तम् ३३ अतएवतद्भजनादधिकोधर्मश्चनास्तीत्याह । नाहमिति । इज्यागृहस्थधर्मःप्रजातिःप्रकृष्टंजन्मउपनयनलक्षणंतेनब्रह्मचारिधर्मउपलक्ष्यते । ताभ्यां । तथा तपसावनस्थधर्मेणउपशमेनवायतिधर्मेणवाहंपरमेश्वरःतथानतुष्येयम् । यथासर्वभूतात्मापिगुरुशुश्रूषया (तुष्यामि) ३४ किंच । अस्माकंगुरुशुश्रूषणंकिमपिदैवादेवसंपन्नंतत्किं त्वयास्मर्यतेइतिपृच्छति । अपिनइति (अपिकिम्) गुरुगृहेनिवसतांनःअस्माकंयत्किमपिवृत्तंतत्क्वचित्कदाचित् (इंधनानयनेप्रेरितानाम्) ३५ (अतोमहदरण्यंप्रविष्टानां वृत्तमाह) अपर्तौअपगतवर्षर्तौअकालेइत्यर्थः (सुमहत्अधिकं) वातश्चवर्षंचतयोःसमाहारःस्तनयित्नवोगर्जितानिच (निष्ठुराणि) अभवन् ३६ निम्नंकूलंनतमुन्नतंचस्थानं (नज्ञायतेस्म) ३७ अंबूनांसंप्लवोव्यामिश्रणंयस्मिन्तस्मिन्नेकोदकेवनेइत्यर्थः परिबभ्रिम । भृञ्भरणेइत्यस्माद्धातोःरूपं । परिपारितःबभ्रिमइडागमश्छांदसः (इंधन-)-भारान्धृतवंतइत्यर्थः (अविदंतोअजानानाः) ३८ (एतद्वातवर्षादि । सांदीपिनिनामकोगुरुःपूज्यःआचार्योध्यापकः) ३९ (स) उवाचकृपयाश्लोकत्रयींययावयंकृतार्थाइत्याह । अहोइति (प्राणिनां) आत्मादेहः (सर्वेभ्यःश्रेष्ठःअहंतास्पदत्वात् ततोप्यहमेवपरोयेषांतेतथाभूताःसंतोऽस्मदर्थेऽतिदुःखिताअभूवन्) ४०

श्लोकाः ३२ ४०

सवैसत्कर्मणांसाक्षाद्द्विजातेरिहसंभवः ॥ आद्योऽगयत्राश्रमिणांयथाहंज्ञानदोगुरुः ३२ नन्वर्थकोविदाब्रह्मन्वर्णाश्रमवतामिह ॥ येमयागुरुणावाचातरंत्यंजोभवार्णवम् ३३ नाहमिज्याप्रजातिभ्यांतपसोपशमेनवा ॥ तुष्येयंसर्वभूतात्मागुरुशुश्रूषयायथा ३४ अपिनःस्मर्यतेब्रह्मन्वृत्तंनिवसतांगुरौ ॥ गुरुदारैश्चोदितानामिंधनानयनेक्वचित् ३५ प्रविष्टानांमहारण्यमपर्तौसुमहद्द्विज ॥ वातवर्षमभूत्तीव्रंनिष्ठुराःस्तनयित्नवः ३६ सूर्यश्चास्तंगतस्तावत्तमसाचावृतादिशः ॥ निम्नंकूलंजलमयंनप्राज्ञायतकिंचन ३७ वयंभृशंतत्रमहानिलांबुभिर्निहन्यमानामुहुरंबुसंप्लवे ॥ दिशोऽविदंतोथपरस्परंवनेगृहीतहस्ताःपरिबभ्रिमातुराः ३८ एतद्विदित्वाउदितेरवौसांदीपिनिर्गुरुः ॥ अन्वेषमाणोनःशिष्यानाचार्योपश्यदातुरान् ३९ अहोहेपुत्रकायूयमस्मदर्थेऽतिदुःखिताः ॥ आत्मावैप्राणिनांश्रेष्ठस्तमनादृत्यमत्पराः ४०

चूर्णिका ॥१२१॥

किंच हे द्विज अहं गुरुशुश्रूषया यथा तुष्येयं तथा गृहस्थादिधर्मैःन ३२ ३३ ३४ किंच हे ब्रह्मन् एकदा गुरुदारैः काष्ठानयनार्थं चोदितानां नः वृत्तं स्मर्यते ३५ किमु तदा महारण्ये प्रविष्टानां सतां अकालेवातः वर्षंच अभूत् ३६ तावत्सूर्योपि अस्तंगतः तदातमसादिशः आवृताः तदा नतोन्नतस्थानंनप्राज्ञायत ३७ तदा वयं महानिलांबुभिः तत्र पीडिताः दिशः अविदंतः अन्योन्यगृहीतहस्ताःधृतकाष्ठभाराः संतः परिबभ्रिम ३८ एतद्विदित्वा रवौ उदिते सति सांदीपिनिः गुरुः शिष्यान्अन्वेषमाणः आतुरान् नः अपश्यत् ३९ हे पुत्रकाः अस्मदर्थेयूयं अतिदुःखिताः सच्छिष्यैः गुरुनिष्कृतं एतदेव कर्तव्यं गुरौ देहार्पणमितियत् ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गुरोर्निष्कृतंप्रत्युपकारःसर्वेअर्थायस्मात्सआत्मादेहस्तस्यार्पणंविनियोगः (विशुद्धभावेनानिष्कपटांतःकरणेनयत्क्रियत्तेएतदिति) ४१ अयातयामानियातोयामोयस्यपक्वस्यान्नस्यतद्गतसारंभवतितद्व
दन्यदपिगतसारंगौण्यावृत्त्यायातयाममित्युच्यते । मत्तोधीयमानानिच्छंदांस्यगतसाराणिभवंत्वित्यर्थः । इत्थंविधानिएवंप्रकाराणिअनेकानिवृत्तानिकिंत्वयास्मर्यंतेइतिशेषः (स्मर्तव्यः) फलितमु
पसंहरति । गुरोरिति (प्रशांतयेपरमसुखायपूर्णःपर्याप्तःसमर्थोभवतीत्यर्थः । यद्वाअनुग्रहेणपूर्णोव्याप्तइत्यर्थःसएवप्रशांतयेभवति ४३ (ब्राह्मणःश्रीदामा) अस्माभिःकिमनिर्वृत्तंअसंपन्नंयेषामस्मा
कं (सत्याःकामायस्मात्तेनभवता) सहवासोऽभूत् ४४ भवतस्तुसर्वमेतद्विडंवनमात्रमित्याह । यस्येति यस्यतवदेहोमूर्तिःछंदोमयंवेदरूपंब्रह्म । तथाश्रेयसामावपनंतदुद्भवस्थानम् (छंदोमयमू
र्तेश्छंदोध्ययनंलोकसंग्रहार्थमेवेतिनान्यथेतिभावः) ४५ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांअशीतितमोऽध्यायः ८० ॥ ॥ ७ ॥ ॥ एकाशीतितमेसख्यु
||१२२|| र्नग्ध्वापृथुकंतंडुलान् ॥ श्रियंनिर्मितवानिंद्रदुर्लभांतुतदाश्रमे ॥ १ ॥ संकथयन्सुखगोष्ठीःकुर्वन् सर्वभूतानांमनसोभिज्ञः । मदर्थंपृथुकानानीयदातुंलज्जितइतिजानन्नित्यर्थः १ (तंप्रियंब्राह्मणं
श्रीदामानं) प्रहसन्क्ष्वेलींकुर्वन् २ लज्जयात्वकथयतस्तामपानुदन्नाहअण्वपीतिद्वाभ्यां (भूरिबहु) ३ (प्रयतात्मनःशुद्धबुद्धेःतत्पत्रपुष्पादितुच्छमपिभक्त्युपहृतंप्रीत्यासमर्पितंभक्त्याप्रयच्छतीत्युक्ते
पिपुनरुक्तिःब्राह्मणस्वतपस्वित्वश्रीमत्त्वादितत्स्वीकारनिमित्तंनभवतीतिसूचनार्था । अश्नामिअशनवत्प्रीत्यास्वीकृत्यतृप्यामिभक्तिप्रतिबद्धविचारःसाक्षादेवभक्षयामीतिवा) ४

श्लोकाः ४१/४

एतदेवहिसच्छिष्यैःकर्तव्यंगुरुनिष्कृतम् ॥ यद्वैविशुद्धभावेनसर्वार्थात्मार्पणंगुरौ ४१ तुष्टोऽहंभोद्विजश्रेष्ठाःसत्याःसंतुमनोरथाः ॥ छंदांस्ययातयामानि
भवंत्विहपरत्रच ४२ इत्थंविधान्यनेकानिवसतांगुरुवेश्मसु ॥ गुरोरनुग्रहेणैवपुमान्पूर्णःप्रशांतये ४३ ॥ ब्राह्मणउवाच ॥ किमस्माभिरनिर्वृत्तंदेवदे
वजगद्गुरो ॥ भवतासत्यकामेनयेषांवासोगुरावभूत् ४४ यस्यच्छंदोमयंब्रह्मदेहआवपनंविभो ॥ श्रेयसांतस्यगुरुषुवासोऽत्यंतविडंबनम् ४५ ॥ ॥ इति
श्रीभागवतेमहापुराणेदशमस्कंधेअशीतितमोध्यायः ८० ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ सइत्थंद्विजमुख्येनसहसंकथयन्हरिः ॥ सर्वभूतमनो
भिज्ञःस्मयमानउवाचतम् १ ब्रह्मण्योब्राह्मणंकृष्णोभगवान्प्रहसन्प्रियम् ॥ प्रेम्णानिरीक्षणेनैवप्रेक्षन्खलुसतांगतिः २ ॥ श्रीभगवानुवाच ॥ किमुपा
यनमानीतंब्रह्मन्मेभवतागृहात् ॥ अण्वप्युपाहृतंभक्तैःप्रेम्णाभूर्येवमेभवेत् ॥ भूर्यप्यभक्तोपहृतंनमेतोषायकल्पते ३ पत्रंपुष्पंफलंतोयंयोमेभक्त्याप्रय
च्छति ॥ तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः ४

चूर्णिका

४१ हे द्विजश्रेष्ठाः वः मनोरथाः सत्याः संतु किंच छंदांसि इहामुत्रच अगतसाराणि भवंतु ४२ एवं विधानि वृत्तानित्वयास्मर्यंते किम् किंच गुरुप्रसादेनैव पुमान्
पूर्णो भवति ४३ ॥ ब्राह्मणउवाच ॥ हे देवदेव अस्माभिः किं असंपन्नं यतः येषांनः त्वया सह गुरौ वासः अभूत् ४४ किंच यस्यतववेदाख्यंवपुः तस्यगुरौ
वासः अत्यंतानुकरणम् ४५॥ ॥ इतिदशमेअशीतितमः ८० ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हे राजन् सः कृष्णः द्विजमुख्येन सह इत्थं
सुखगोष्ठीः कुर्वन् स्मयमानः सन् द्विजं उवाच १ २ ॥ श्रीभगवानुवाच ॥ हे ब्रह्मन् त्वया गृहात् मह्यं उपायनं किं आनीतं यतः भक्तैः प्रेम्णा अण्वपि उपाहृतंमे
भूर्येव भवेत् किंच अभक्तोपहृतं भूर्यपिममतोषाययोग्यंन भवति ३ किंच पत्रं पुष्पं फलं तोयं योमे भक्त्या प्रयच्छति तदहं भक्त्युपहृतमश्नामिप्रयतात्मनः ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ९ सर्वभूतानामात्मदृक्अंतःकरणसाक्षी (चिंतितवान् नायंश्रीकामोमामांअभजत् तथापिपतिव्रतायाःप्रियचिकीर्षयामांप्राप्तोऽतोस्य) ६ अमर्त्यानांदेवानामपिदुर्लभाः ७ अतिजीर्णत्वाद्वसनस्यपुनस्तन्मध्येचीरेणबद्धान् (पृथुकान्किमिदमितिपृच्छन्द्विजस्यवसनात्स्वयंजहार) ८ अंगहेसखेविश्वंविश्वात्मानंमाम् ९ इतिवदन्नेकांमुष्टिंजग्ध्वा (भक्षयित्वा) तत्परेति । अयंभावः । एतावतापुंसइहामुत्रचमत्कत्याक्षविलासभूतानांसर्वसंपदांसमृद्धयेअलंअतःपरंद्वितीयमुष्ट्यदनेनमामामेतदधीनांकुर्विति (सभगवानेवपरोनत्वन्योयस्याःसातत्परा) १० त्वत्तोषकारणंतवतोषस्यकारणंयथाभवेत् तथासर्वसंपत्समृद्धये यांभक्तस्य (संपदं) समृद्धिहष्टात्वंतुष्येरित्यर्थः (एतावतामुष्टिमात्रपृथुकादनेन) ११ स्वर्गतंस्वर्गवासिनम् (इवआत्मानंसुखंमेने) १२ (हेतात) श्वोभूतेउदितेरवौविश्वंभावयतीतिविश्वभावस्तेनेतिपुरतोभाविनंइंद्रदुर्लभंविभवंसूचयति । स्वसुखेनस्वानंदपूर्णेनेतिदानेऽदीनतांदर्शयति । नंदितोविनयोक्तिभिः १३ व्रीडितःस्वाचित्तकार्पण्येनलज्जितः महतः श्रीकृष्णस्यदर्शनेननिर्वृतःसौख्यंप्राप्तः १४ निर्वृतिमेवाह । अहोइतिचतुर्भिः । यत्यतः लक्ष्मीमुरसिबिभ्रता (भगवता) आश्लिष्टोहं (अतोमयाब्रह्मण्यताब्रह्मवात्सल्यमित्यर्थः) १९

॥१२३॥

श्लोकाः ५/१९

इत्युक्तोपिद्विजस्तस्मैव्रीडितःपतयेश्रियः ॥ पृथुकप्रसृतिंराजन्नप्रायच्छदवाङ्मुखः ५ सर्वभूतात्मदृक्साक्षात्तस्यागमनकारणम् ॥ विज्ञायाचिंतयन्नायंश्री
कामोमाऽभजत्पुरा ६ पत्न्याःपतिव्रतायास्तुसखाप्रियचिकीर्षया ॥ प्राप्तोमामस्यदास्यामिसंपदोऽमर्त्यदुर्लभाः ७ इत्थंविचिंत्यवसनाच्चीरबद्धान्द्वि
जन्मनः ॥ स्वयंजहारकिमिदमितिपृथुकतंडुलान् ८ नन्वेतदुपनीतंमेपरमप्रीणनंसखे ॥ तर्पयंत्यंगमांविश्वमेतेपृथुकतंडुलाः ९ इतिमुष्टिंसकृज्जग्ध्वाद्वि
तीयांजग्धुमाददे ॥ तावच्छ्रीर्जगृहेहस्तंतत्परापरमेष्ठिनः १० एतावतालंविश्वात्मन्सर्वसंपत्समृद्धये ॥ अस्मिँल्लोकेथवामुष्मिन्पुंसस्त्वत्तोषकारणम् ॥
११ ब्राह्मणस्तांतुरजनीमुषित्वाऽच्युतमंदिरे ॥ भुक्त्वापीत्वासुखंमेनेआत्मानंस्वर्गतंयथा १२ श्वोभूतेविश्वभावेनस्वसुखेनाभिवंदितः ॥ जगामस्वालयं
तातपथ्यनुव्रज्यनंदितः १३ सचालब्ध्वाधनंकृष्णान्नतुयाचितवान्स्वयम् ॥ स्वगृहान्व्रीडितोगच्छन्महद्दर्शननिर्वृतः १४ अहोब्रह्मण्यदेवस्यदृष्टाब्र
ह्मण्यतामया ॥ यद्दरिद्रतमोलक्ष्मीमाश्लिष्टोबिभ्रतोरसि १५

चूर्णिका इत्युक्तोपिद्विजः लज्जया अवाङ्मुखः सन् तस्मै पृथुकप्रसृतिं नददौ ५ ततः सर्वभूतानांमनसः साक्षी भगवान् तस्यागमनकारणं विज्ञाय अचिंतयत् ५ अयं पुरा श्रीकामनया मां नाभजत् ६ इदानींतुपत्न्याः प्रियचिकीर्षयामां प्राप्तः अतः अस्मै देवदुर्लभाः संपदः दास्यामि ७ इत्थं विचिंत्य भगवान् द्विजस्यवस्त्रखंडे बद्धान् पृथुकान् इदं किमिति स्वयं जहार ८ हेसखे इदंमम परमप्रीणनं उपानीतम् एतेपृथुकतंडुलाः विश्वात्मानं तर्पयंति ९ इतिवदन् कृष्णः एकां मुष्टिंजग्ध्वा द्वितीयां जग्धुं आददे तावत् लक्ष्मीः हस्तं जगृहे १० हे विश्वात्मन् सर्वसंपत्समृद्धये एतावताऽलं ततः स ब्राह्मणः तांरात्रिं अच्युतमंदिरेउषित्वा तत्र भुक्त्वा पीत्वा आत्मानं स्वर्गतं मेने १२ ततः श्वोभूते रवौ उदिते सति श्रीकृष्णेन अभिवंदितः सः स्वालयं जगाम १३ सः कृष्णात् धनं अलब्ध्वापि स्वयं अयाचितवान् किंतु श्रीकृष्णदर्शन निर्वृतः सन् स्वगृहं अगच्छत् निर्वृतिमेवाह अहो श्रीकृष्णस्य ब्रह्मण्यता अद्य मया दृष्टा यतः लक्ष्मीं उरसि बिभ्रता भगवता दरिद्रतमोहं आश्लिष्टः १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पापीयान्नीचः । (दरिद्रोहंक्वपरब्रह्मश्रीनिकेतनः क्व । ब्रह्मबंधुर्द्विजाधमःइत्येवमपिपरिरंभितःस्मविस्मये) १६ १७ पूजितश्चंदनलेपनादिभिः १८ एवंसंपूज्यापिधनस्यादानेकारणंकल्पयति स्वर्गापवर्गयोरितिद्वाभ्याम् । (पुंसांस्वर्गस्यापवर्गस्यचतथारसायांभुविचयाःसंपदस्तासांसर्वासांसिद्धीनां १९ स्वर्गादीनांयद्यपितस्यचरणार्चनमेव (मूलं) कारणंतथापिकारुणिकत्वात्अभूरिस्वल्पमपिधनंमह्यंनाददात् २० इत्येवं (अंतरंगे) चिंतयन् निजगृहस्यांतिकंतत्प्रांतं तस्यविशेषणंसूर्येति । (सूर्यानलेंदुमंडलनिभैः) २१ विचित्रोपवनादिभिश्चवृतम् । कथंभूतैः । कूजद्भिर्द्विजकुलैःपक्षिसंघैराकुलैः व्याप्तैः तथाप्रोत्फुल्लानिकुमुदादीनियेषुतानिवारीणियेषुतथातैः २२ किंच जुष्टमिति हरिणीनामिवाक्षीणियासांताभिः । तदैश्वर्यंदृष्ट्वावितर्कितवान् तदाह किंमिदमितिप्रथमं (दूरतः) तेजःपुंजंदृष्ट्वाकिमिदमिति । पश्चाद्विमानानिदृष्ट्वाकस्यवेति । ततःस्थानंचस्वीयमितिज्ञात्वाकथंतदिदंस्थानमित्येवंरूपमभूत्इति २३ अमरप्रभातत्तुल्यकांतयःप्रत्यगृह्णन्उपायनादिभिरादृतवंतः २४ उद्भूतो
॥१२४॥ हर्षोयस्याःसा । अतिसंभ्रमआदरोयस्याःसा । आलयात्कमलवनात्रूपिणीरूपधारिणीश्रीरिव । स्वर्गस्यतत्रभगवताआनीतत्वात्स्वर्गिणामिवतयोरूपंचबभूवेतिभावः २५ बुद्ध्याअयमेववंचइतिनिश्चयेन (नतुशिरसाऽनमत्) मनसासंकल्पेनैव (नतुकायेन) २६ (विमानेनचरतिवैमानिकीताम् । देवीमिव) २७

श्लोकाः १६ २७

क्वाहंदरिद्रःपापीयान्क्वकृष्णःश्रीनिकेतनः ॥ ब्रह्मबंधुरितिस्माहंबाहुभ्यांपरिरंभितः १६ निवासितःप्रियाजुष्टेपर्यंकेभ्रातरोयथा ॥ महिष्यावीजितःश्रांतोवालव्यजनहस्तया १७ शुश्रूषया परमया पादसंवाहनादिभिः ॥ पूजितोदेवदेवेनविप्रदेवेनदेववत् १८ स्वर्गापवर्गयोःपुंसांरसायांभुविसंपदाम् ॥ सर्वासामपिसिद्धीनांमूलंतच्चरणार्चनम् १९ अधनोयंधनंप्राप्यमाद्यन्नुच्चैर्नमांस्मरेत् ॥ इतिकारुणिकोनूनंधनंमेऽभूरिनाददात् २० इतितच्चिंतयन्नंतःप्राप्तोनिजगृहांतिकम् ॥ सूर्यानलेंदुसंकाशैर्विमानैःसर्वतोवृतम् २१ विचित्रोपवनोद्यानैःकूजद्द्विजकुलाकुलैः ॥ प्रोत्फुल्लकुमुदांभोजकल्हारोत्पलवारिभिः २२ जुष्टंस्वलंकृतैःपुंभिःस्त्रीभिश्चहरिणाक्षिभिः ॥ किमिदंकस्यवास्थानंकथंतदिदमित्यभूत् २३ एवंमीमांसमानंतंनरानार्योऽमरप्रभाः ॥ प्रत्यगृह्णन्महाभागंगीतवाद्येनभूयसा २४ पतिमागतमाकर्ण्यपत्न्युद्धर्षातिसंभ्रमा ॥ निश्चक्रामगृहात्तूर्णंरूपिणीश्रीरिवालयात् २५ पतिव्रतापतिंदृष्ट्वाप्रेमोत्कंठाश्रुलोचना ॥ मीलिताक्ष्यनमद्बुद्ध्यामनसापरिषस्वजे २६ पत्नींवीक्ष्यविस्फुरंतींदेवींवैमानिकीमिव ॥ दासीनांनिष्ककंठीनांमध्येभांतींसविस्मितः २७

चूर्णिका

अहो अहं पापीयान् क्व श्रीनिवासः क्व तथापि तेन बाहुभ्यां अहं आलिंगितः १६ किंच स्वपर्यंके अहं निवासितः अपि च वालव्यजनेन रुक्मिण्या वीजितः १७ तथा देवेन पादसंवाहनादिशुश्रूषयापूजितः १८ ततः स्वस्य द्रव्यादानेकारणं कल्पयति अधनः अयं धनं प्राप्य मां न स्मरेत् इति हेतोःमे धनं भूरि नाददात् १९ २० इति संचिंतयन् सन् द्विजः निजगृहांतिकं प्राप्तः दीदृशं गृहं विमानैः सर्वतोवृतम् २१ विचित्रोपवनोद्यानैर्वेष्टितम् २२ तथास्वलंकृतस्त्रीपुरुषैः जुष्टम् एवंभूतं गृहं दृष्ट्वा किमिदं कस्य वा स्थानं कथं तत् एवं रूपमभूत् ३३ इति तर्कयंतं तं नरानार्यश्च उपायनादिभिः आदृतवंतः २४ तदा पतिं आगतं श्रुत्वा तत्पत्नी तूर्णं गृहात् निश्चक्राम २५ ततः सा पतिव्रता प्रेमोत्कंठाश्रुलोचना सती पतिं मनसा परिषस्वजे २६ तदा दासीनांमध्ये स्फुरंतीं पत्नीं वीक्ष्य प्रीतः सन् तया सह सर्वोपस्करयुतं निजमंदिरं प्रविष्टः २७ ॥१२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

२८ यत्रमंदिरे पयःफेननिभाः शय्याआस्तरणानि । इत्यादिसंपदः तत्रसर्वसंपदां समृद्धीर्विलोक्य तर्कयत्समासेतिचतुर्थेनान्वयः। यत्रचदांताःगजदंतमयाःपर्यंकाः। (हेमदंडानिछत्राणि । व्यजनानां विशेषणंवा) २९ यत्र (हैमानि) आसनानिचमृदूनिउपस्तरणानितूलादिमयानियेषुतानि । यत्रचमुक्तादामविलंबवंतिद्युमंति (द्युतिमंति) वितानानिच ३० (महामरकतनिबद्धस्थलेषुचस्त्री रत्नसहितारत्नदीपाभ्राजमानाःप्रतिबिंबिताःस्फुरंतीत्यर्थः) ३१ सब्राह्मणोनिर्व्यग्रःसन्स्थिरःसन्नहैतुकींआकस्मिकींस्वस्यसमृद्धिंतर्कयामास कुतएषासमृद्धिरागतेति ३२ निश्चिनोति नूनमिति । एत न्ममेतिएषचासावहंचतस्यएतन्मम (एतद्रूपस्यममेत्यर्थः दुर्भगस्यदैवहीनस्य) महतीविभूतिर्यस्यतस्यश्रीपतेरवलोकादन्यः ३३ ननुसचेदवलोकनमात्रेणमहदैश्वर्यंदत्तवान् तर्हीदंतुभ्यंमयादत्तमिति किंनावोचदतआह । नन्विति । ननु मेसखासमक्षमब्रुवाणएवयाचिष्णवेयाचकायभूरिबह्वपिदिशतेददाति अत्रहेतुः । भूरिभोजःस्वयंतद्देयं पर्जन्यवदीक्षमाणइति अयमर्थः स्वयंतावद्भूरिभोजःबहुभोजः आप्तकामत्वात्लक्ष्मीपतित्वाच्च । अतोयथा पारावारपरिपूरकोऽतिवदान्यःकदाचिद्बह्वपिवर्षंअल्पमेवमन्यमानोलज्जयेवसमक्षमवर्षन्रात्रौनिद्राणेकर्षकेतत्क्षेत्रमाप्लावयति । एवंश्रीकृष्णोपिस्वभोगापे क्षयातद्देयामिंद्रादिपदमप्यतितुच्छंमन्वानः तस्यचभजनंबहुमन्यमानःसमक्षमब्रुवाणएवददाति ३४ तदेवाह । किंचिदिति । ऊरुबह्वपिस्वदत्तंयत्किंचित्करोतिअल्पंमन्यते । सुहृत्कृतंसख्यर्पितंफल्गुआति तुच्छमपिभूरिकारीबहुमन्यतेइत्यर्थः । अतएवमयाउपनीतंसमीपंनीतंप्रीतियुतःस्वयमेवप्रतिगृहीतवान् ३५ श्रीकृष्णस्यभक्तवात्सल्यंदृष्ट्वातद्भक्तिंप्रार्थयते । तस्येति । सौहृदंप्रेमचसख्यंहिताशंसनंचमै त्रीउपकारकत्वंचदास्यंसेवकत्वंचतत्समाहारैकवचनं तस्यतत्संबंधिनो । मेममस्यात् । नतुविभूतिः किंच । महानुभावेनतेनैवविषज्जतांविशेषेणसंगंप्राप्नुवतस्तद्भक्तेषुप्रकृष्टःसंगःस्यादिति ३६

॥१२५॥

श्लोकाः २८/३६

प्रीतःस्वयंतयायुक्तःप्रविष्टोनिजमंदिरम् ॥ मणिस्तंभशतोपेतंमहेंद्रभवनंयथा २८ पयःफेननिभाःशय्यादांतारुक्मपरिच्छदाः ॥ पर्यंकाहेमदंडानि चामरव्यजनानिच २९ आसनानिचहैमानिमृदूपस्तरणानिच ॥ मुक्तादामविलंबीनिवितानानिद्युमंतिच ३० स्वच्छस्फटिककुड्येषुमहामारकतेषुच ॥ रत्नदीपाभ्राजमानाललनारत्नसंयुताः ३१ विलोक्यब्राह्मणस्तत्रसमृद्धीःसर्वसंपदाम् ॥ तर्कयामासनिर्व्यग्रःस्वसमृद्धिमहैतुकीम् ३२ नूनंबतैतन्ममदुर्भ गस्यशश्वद्दरिद्रस्यसमृद्धिहेतुः ॥ महाविभूतेरवलोकतोन्योनैवोपपद्येतयदूत्तमस्य ३३ नन्वब्रुवाणोदिशतेसमक्षंयाचिष्णवेभूर्यपिभूरिभोजः ॥ पर्जन्यव त्तत्स्वयमीक्षमाणोदाशार्हकाणामृषभःसखामे ३४ किंचित्करोत्युर्वपियत्स्वदत्तंसुहृत्कृतंफल्ग्वपिभूरिकारी ॥ मयोपनीतंपृथुकैकमुष्टिंप्रत्यग्रहीत्प्रीति युतोमहात्मा ३५ तस्यैवमेसौहृदसख्यमैत्रीदास्यंपुनर्जन्मनिजन्मनिस्यात् ॥ महानुभावेनगुणालयेनविषज्जतस्तत्पुरुषप्रसंगः ३६

चूर्णिका

२८ २९ ३० ३१ ततः सः ब्राह्मणः तत्र सर्वसंपदां समृद्धीः विलोक्य स्थिरः सन् तर्कयामास ३२ दुर्भगस्य मम समृद्धिहेतुः यदूत्तमस्य अवलोकः अन्यो नैव ३३ किंच मे सखा भगवान् अब्रुवाण एव याचकाय असमक्षं ददाति पर्जन्यवत् ३४ किंच स्वदत्तं बह्वपि अल्पं मन्यते सुहृत्कृतं अल्पमपि बहुमन्यते अतएव मया उपनीतं पृथुकैकमुष्टिं प्रीतियुतःसन् स्वयं प्रतिगृहीतवान् ३५ तस्य भगवतः सौहृदंसख्यं मैत्री दास्यं मम जन्मनिजन्मनि स्यात् तथा तद्भक्तसंगश्च ३६

१ रत्नदीपान्भ्राजमानाँछलनारत्नसंयुतानिति मु०पु० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननुभक्तेःफलंसंपदंप्राप्यपुनर्भक्तिंकिमितिप्रार्थयसेअतआह । भक्तायेति । संपदःकोशादीन् राज्यमैश्वर्यं विभूतीःकलत्रपुत्रादीन् । नसमर्धयतिनददातिअपितुदृढांभक्तिमेव । कुतः । अदीर्घबोधायअविवेकिनोममतुभक्त्यभावादेवंजातं अतस्तद्भक्तिरेवस्यादितिभावः ३७ त्यक्ष्यन्शनैःशनैस्त्यागमभ्यस्यन्जाययासहबुभुजे ३८ श्रीकृष्णस्यैवंब्रह्मण्यतानातिचित्रमित्याह । तस्येति ३९ (भगवतःसुहृत्सखासविप्रः) अन्यैरजितमपिस्वभृत्यैः पराजितंदृष्ट्वातस्यध्यानंतस्यवेगः (सांतत्यं) तेनोद्ग्रथितमात्मबंधनमहंकारोयस्यसः । गतिमित्याविष्टलिंगंधामविशेषणम् । सतां (गतिं) ब्रह्मविदांप्राप्यमित्यर्थः ४० एतत्पृथुकोपाख्यानंश्रुत्वातत्रब्रह्मण्यतांविशेषतःश्रुत्वेति ४१ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकाशीतितमोऽध्यायः ॥ ८१ ॥ ॥ ७ ॥ ॥ द्व्यशीतितमआगत्यकुरुक्षेत्रंरविग्रहे । वृष्णीन्दृष्ट्वामुदाभूपाश्चक्रुःकृष्णकथामिथः ॥ १ ॥ श्रीदामसुहृदेकृष्णःप्रकल्प्यैंद्रपदंभुवि । नंदादिसुहृदानंदीकुरुक्षेत्रंजगामसः ॥ २ ॥ कल्पक्षये यथा सर्वग्रासइत्यर्थः १ ज्योतिर्विद्भिःकथ्यमानमादावेवज्ञात्वास्यमंतपंचकंक्षेत्रंकुरुक्षेत्रं (पुण्यचिकीर्षयाययुः) २ अब्रह्मण्यक्षत्रियवधस्थानत्वेनपरशुरामस्याघापनुत्तिस्थानत्वेनचक्षेत्रस्यपापनिरासकत्वमाह । निःक्षत्रियामितिद्वाभ्याम् (यत्रकुरुक्षेत्रे)३(कर्मणाअस्पृष्टोपिवस्तुतोऽकर्तापीत्यर्थःलोकस्यकर्मग्राहयन्)अन्योऽविद्वान्यथा(अघापनुत्तयेयजतेतद्वत्) ४ आगन्आजग्मुःभारतीःभारत्यः (भरतवर्षभवाइत्यर्थः)५

श्लोकाः ३७/८

भक्तायचित्राभगवान्हिसंपदोराज्यंविभूतीर्नसमर्धयत्यजः ॥ अदीर्घबोधायविचक्षणःस्वयंपश्यन्निपातंधनिनांमदोद्भवम् ३७ इत्थंव्यवसितोबुद्ध्याभक्तो
तीवजनार्दने ॥ विषयान्जाययात्यक्ष्यन्बुभुजेनातिलंपटः ३८ तस्यवैदेवदेवस्यहरेर्यज्ञपतेःप्रभोः ॥ ब्राह्मणाःप्रभवोदैवंनतेभ्योविद्यतेपरम् ३९ एवंस
विप्रोभगवत्सुहृत्तदादृष्ट्वास्वभृत्यैरजितंपराजितम् ॥ तद्ध्यानवेगोद्ग्रथितात्मबंधनस्तद्धामलेभेऽचिरतःसतांगतिम् ४० एतद्ब्रह्मण्यदेवस्यश्रुत्वाब्रह्मण्यतां
नरः ॥ लब्धभावोभगवतिकर्मबंधाद्विमुच्यते ४१ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेएकाशीतितमोध्यायः ८१ ॥ ॥ ७ ॥ ॥
॥ श्रीशुकउवाच ॥ अथैकदाद्वारकायांवसतोरामकृष्णयोः ॥ सूर्योपरागःसुमहानासीत्कल्पक्षयेयथा १ तंज्ञात्वामनुजाराजन्पुरस्तादेवसर्वतः ॥ स्यमं
तपंचकंक्षेत्रंययुःश्रेयोविधित्सया २ निःक्षत्रियांमहींकुर्वन्रामःशस्त्रभृतांवरः ॥ नृपाणांरुधिरौघेणयत्रचक्रेमहाह्रदान् ३ ईजेचभगवान्रामोयत्रास्पृष्टो
पिकर्मणा ॥ लोकस्यग्राहयन्नीशोयथान्योऽघापनुत्तये ४ महत्यांतीर्थयात्रायांतत्रागन्भारतीःप्रजाः ॥ वृष्णयश्चतथाक्रूरवसुदेवाहुकादयः ५

चूर्णिका

किंच अहो भगवान् धनिनां मदोद्भवं निपातं पश्यन् भक्ताय संपदो राज्यं विभूतीश्च न ददाति मम तु भक्त्यभावात् एवं जातं अतः तद्भक्तिरेव स्यात् ३७ इत्थं बुद्ध्या निश्चित्य विषयाणां त्यागं अभ्यस्यन् जायया सह विषयान् बुभुजे ३८ ३९ एवं सः विप्रः भक्तैः पराजितं भगवंतं दृष्ट्वा तद्ध्यानेन गताहंकारः सन् तद्धाम लेभे ४० एतत् पृथुकोपाख्यानं श्रुत्वा भगवति लब्धभक्तिः सन् कर्मबंधान्मुच्यते ४१ ॥ ॥ इतिदशमे एकाशीतितमः ॥ ८१ ॥ ॥ ७ ॥ ॥ ॥ श्रीशुकउवाच ॥ हे राजन् एकदा द्वारवत्यां रामकृष्णयोः वसतोः सतोः सूर्यग्रहः आसीत् १ तं ज्ञात्वा मनुजाः पूर्वमेव स्यमंतपंचकं ययुः २ यत्र परशुरामः नृपाणां रुधिरौघेण महाह्रदांश्चक्रे ३ किंच कर्मणा अस्पृष्टोपि रामः यत्र लोकसंग्रहार्थं ईजे ४ तत्र भारत्याः प्रजाः वृष्णयश्च तथा अक्रूरवसुदेवाहुकादयः ययुः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हेभारततथागदादयश्चययुः) सुचंद्रशुकसारणैःसह । अनिरुद्धोद्वारकारक्षायामास्ते तथाकृतवर्माचयूथपतिःसेनानीः ६ (तेऽक्रूरादयः) देवधिष्ण्याभैःविमानसंकाशैः । तरलास्तरंगास्तद्वत्प्लवोगति येषांतैःविद्याधरद्युभिःविद्याधराणामिवद्युतिर्येषांते ७ महातेजाःमहातेजसः । दिव्याअत्युत्तमाःस्रग्वस्त्रसंनाहायेषांते (कलत्रैःस्त्रीभिःसह । गंधर्वाइव) ८ (वासआदयःसंतियासुताः) ९ पुनरन्ये द्युःआप्लुत्ययद्वातस्मिन्नेवाहनिमुक्तिस्नानंकृत्वा(स्वन्नंस्वादुअन्नम् । नोऽस्माकम् । कृष्णप्रीत्यर्थमित्यर्थः) १० स्निग्धाशीतलाच्छायायेषांअंघ्रिपानांतेषामंघ्रिपुमूलेषु ११ १२ १३ प्रोत्फुलैःहृद्वक्त्रसरोरुहैःश्रीःशोभायेषांते१४अतिसौहृदेनयत्स्मितंतेनअमलाअपांगैर्दृशोदृष्टयोयासांताः मिथःसंवीक्ष्यदोर्भिरभिरेभिरेआलिंगनंकृतवत्यः १५ १६ संकथयामिथःसप्रेमगोष्ठ्या १७ तामेववसुदेवपृथयोःसंकथा माहआर्येत्यादिचतुर्भिः । अकृताशिषंअपूर्णमनोरथंयद्वाशिष्टाशीर्वादरहितम् (यद्यस्मात्सत्तमाअपियूयम्) १८

॥१२७॥ श्लोकाः ६/१८

ययुर्भारततत्क्षेत्रंस्वमघंक्षपयिष्णवः ॥ गदप्रद्युम्नसांबाश्चसुचंद्रशुकसारणैः ॥ आस्तेऽनिरुद्धोरक्षायांकृतवर्माचयूथपः ६ तेरथैर्देवधिष्ण्याभैर्हयैश्चतरलप्लवैः ॥ गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः ७ व्यरोचंतमहातेजाःपथिकांचनमालिनः ॥ दिव्यस्रग्वस्त्रसन्नाहाःकलत्रैःखेचराइव ८ तत्रस्नात्वामहाभागाउपोष्यसुसमाहिताः ॥ ब्राह्मणेभ्योददुर्धेनूर्वासःस्रग्रुक्ममालिनीः ९ रामह्रदेषुविधिवत्पुनराप्लुत्यवृष्णयः ॥ ददुःस्वन्नंद्विजाग्र्येभ्यःकृष्णेनोभक्तिरस्त्विति १० स्वयंचतदनुज्ञातावृष्णयःकृष्णदेवताः ॥ भुक्त्वोपविविशुःकामंस्निग्धच्छायांघ्रिपांघ्रिषु ११ तत्रागतांस्तेददृशुःसुहृत्संबंधिनोनृपान् ॥ मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान् १२ कांबोजकैकयान्मद्रान्कुंतीनानर्तकेरलान् ॥ अन्यांश्चैवात्मपक्षीयान्परांश्चशतशोनृप ॥ नंदादीन्सुहृदोगोपान्गोपीश्चोत्कंठिताश्चिरम् १३ अन्योन्यसंदर्शनहर्षरंहसाप्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ॥ आश्लिष्यगाढंनयनैःस्रवज्जलाहृष्यत्त्वचोरुद्धगिरोययुर्मुदम् १४ स्त्रियश्चसंवीक्ष्यमिथोतिसौहृदस्मितामलापांगदृशोऽभिरेभिरे ॥ स्तनैःस्तनान्कुंकुमपंकरूषितान्निहत्यदोर्भिःप्रणयाश्रुलोचनाः १५ ततोभिवाद्यतेवृद्धान्यविष्ठैरभिवादिताः ॥ स्वागतंकुशलंपृष्ट्वाचक्रुःकृष्णकथामिथः १६ पृथाभ्रातॄन्स्वसॄर्वीक्ष्यतत्पुत्रान्पितरावपि ॥ भ्रातृपत्नीर्मुकुंदंचजहौसंकथयाशुचः १७ ॥ कुंत्युवाच ॥ आर्यभ्रातरहंमन्येआत्मानमकृताशिषम् ॥ यद्वाआपत्सुमद्वार्तांनानुस्मरतसत्तमाः १८

चूर्णिका

अनिरुद्धो द्वारकाया रक्षार्थं आस्ते ६ ततः ते यादवाः चतुरंगसैन्यैः पथि व्यरोचंत ७ ८ ततः ते तत्र स्नात्वा उपोष्य ब्राह्मणेभ्यः सालंकृता धेनूः ददुः ९ ततः ते वृष्णयः रामह्रदेषु मुक्तिस्नानं कृत्वा कृष्णे नः भक्तिरस्त्विति द्विजाग्र्येभ्यः स्वन्नं ददुः १० ततः विप्रानुज्ञातास्ते वृष्णयः स्वयं भुक्त्वा वृक्षमूलेषु कामं विविशुः ११ ततस्ते वृष्णयः तत्रागतान् सुहृत्संबंधिनो मत्स्योशीनरकौसल्यविदर्भकुरुसृंजयान् १२ कांबोजकैकयमद्रकुंतीन् आनर्तकेरलान् अन्यांश्च नृपान् १३ नंदादीन् गोपान् गोपीश्च ददृशुः १३ ततस्ते अन्योन्यसंदर्शनहर्षरंहसा गाढं आलिंग्य मुदं ययुः १४ तथास्त्रियश्च अन्योन्यंवीक्ष्य मुदिताः सत्यः अभिरेभिरे ततः तेयादवाः वृद्धान् अभिवाद्य यविष्ठैः अभिवादिताः संतः कुशलं पृष्ट्वा मिथः कृष्णकथाश्चक्रुः १५ १६ ततः पृथा भ्रातृस्वस्रादीन् मुकुंदं च वीक्ष्य मिथः सप्रेमगोष्ठीभिः शोकान् जहौ १७ ॥ कुंत्युवाच ॥ हे भ्रातः अहं अपूर्णमनोरथं आत्मानं मन्ये यतः आपत्सु मद्वार्तां नानुस्मरथ १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यस्यदैवमदाक्षिणंअननुकूलंतंस्वजनमपिसंतंसुहृदादयोनानुस्मरंति । अतोममदैवंप्रतिकूलंयुष्माकंकोपराधइत्यर्थः १९ (दैवक्रीडनकान्दैवाधीनानित्यर्थः) २० ईशवशत्वमेवाह कंसप्रतापिताइति हेस्वसः
एतर्ह्येवसंप्रत्येव २१ (अच्युतस्यसंदर्शोदर्शनंतेनयःपरमानंदस्तेननिर्वृताःसंपन्नाइत्यर्थः) २२ २३ २४ २५ युधिष्ठिरंयेऽनुव्रतास्तेन राजसूयेजितत्वात्(तेचतेषांस्त्रियश्च) २६ कृष्णस्यपरिग्रहान्परिज
नभूतान्) २७ जन्मभाजःनृणांमध्येसफलजन्मानः (हेभोजपतेहेउग्रसेन)२८ किंच । नकेवलंतस्यदर्शनमेवअपितुअन्यच्चात्यंतदुर्लभंबहुयुष्माकंस्वतःसंपन्नमित्याहुः यद्विश्रुतिरितिद्वाभ्याम् । यदितिपृथ
थक्पदंयस्येत्यर्थः विश्रुतिःकीर्तिःश्रुतिभिर्नुतास्तुताइदंविश्वमलमत्यर्थंपुनातियस्यपादावनेजनपयोगंगाच (विश्वंपुनाति) यस्यवचोवाक्यरूपंशास्त्रंचवेदाख्यंविश्वंपुनातिकिंचकालेनभर्जितंदग्धंभगंमाहा
त्म्यंयस्याःसातथाविधापिभूःयस्यांघ्रिपद्मस्पर्शेनोत्थाआविर्भूताशक्तिर्यस्याःसानोऽस्माकमखिलानर्थानभितोवर्षति २९ दर्शनंचस्पर्शनंचअनुपथःअनुगतिश्चप्रजल्पोगोष्ठीचशय्याशयनंचआसनंचअशनं
चभोजनंयौनं(बंधः)विवाहसंबंधःतेनसहवर्तमानःसपिंडसंबंधःदैहिकसंबंधःतेनश्रीकृष्णेनसहदर्शनाद्युपलक्षितःसयौनःसपिंडबंधोयेषांवो (युष्माकं) अस्ति किंच येषांवोगृहेविष्णुःस्वयमासआविरभू
त् । निरयवर्त्मनिप्रवृत्तिमार्गेवर्तमानानाम् । स्वर्गापवर्गाभ्यांविरमयतिवितृष्णान्करोति (स्वर्गापवर्गदानेनतत्तत्कामनांशमयतीतियावत्) तथा-(भूतः) सः तेयूयंजन्मभाजइति । यद्वा तदितिसामा
न्यनिर्देशः । सइत्यर्थः । सविष्णुःस्वयंयेषांवोनिरयवर्त्मनिसंसारकारणेगृहेवर्तमानानामपिबध्यतेसंबध्यतेइतिबंधःदर्शनादिभिर्बंधःसंबध्यमानःसन्स्वर्गापवर्गविरमआस । परमसुखप्रदोबभूवेत्यर्थः ३०

॥१२८॥

श्लोकाः १९ / ३०

सुहृदोज्ञातयःपुत्राभ्रातरःपितरावपि ॥ नानुस्मरंतिस्वजनंयस्यदैवमदाक्षिणम् १९ ॥ वसुदेवउवाच ॥ अंबमास्मानसूयेथादैवक्रीडनकान्नरान् ॥ ईशस्य
हिवशेलोकःकुरुतेकार्यतेथवा २० कंसप्रतापिताःसर्वेवयंयातादिशंदिशम् ॥ एतर्ह्येवपुनःस्थानंदैवेनासादिताःस्वसः २१ ॥ श्रीशुकउवाच ॥ वसुदेवो
ग्रसेनाद्यैर्यदुभिस्तेऽर्चितानृपाः ॥ आसन्नच्युतसंदर्शपरमानंदनिर्वृताः २२ भीष्मोद्रोणोंऽबिकापुत्रोगांधारीससुतातथा ॥ सदाराःपांडवाःकुंतीसंजयोवि
दुरःकृपः २३ कुंतिभोजोविराटश्चभीष्मकोनग्नजिन्महान् ॥ पुरुजिद्द्रुपदःशाल्वोधृष्टकेतुःसकाशिराट् २४ दमघोषोविशालाक्षोमैथिलोभद्रकैकयौ ॥
युधामन्युःसुशर्माचससुताबाह्लिकादयः २५ राजानोऽन्येचराजेंद्रयुधिष्ठिरमनुव्रताः ॥ श्रीनिकेतंवपुःशौरेःसस्त्रीकंवीक्ष्यविस्मिताः २६ अथतेराम
कृष्णाभ्यांसम्यक्प्राप्तसमर्हणाः ॥ प्रशशंसुर्मुदायुक्तावृष्णीन्कृष्णपरिग्रहान् २७ अहोभोजपतेयूयंजन्मभाजोनृणामिह ॥ यत्पश्यथासकृत्कृष्णंदुर्दर्श
मपियोगिनाम् २८ यद्विश्रुतिःश्रुतिनुतेदमलंपुनातिपादावनेजनपयश्चवचश्चशास्त्रम् ॥ भूःकालभर्जितभगापियदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षतिनोऽ
खिलार्थान् २९ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिंडबंधः ॥ येषांगृहेनिरयवर्त्मनिवर्ततांवःस्वर्गापवर्गविरमःस्वयमासविष्णुः ३०

चूर्णिका

किंच यस्य दैवं नानुकूलं तं सुहृदो नानुस्मरंति १९ ॥ वसुदेव उवाच ॥ हे अंब अस्मान् मासूयेथाः २० यतः कंसेन तापिताः वयं दिशं दिशं याताः संप्रत्येव पुनः
दैवेन स्थानं प्राप्ताः २१ ॥ श्रीशुक उवाच हे राजन् यदुभिरर्चिताः नृपाः कृष्णदर्शनेन निर्वृता आसन् २२ ततः कौरवपांडवादयःराजानः कृष्णस्य श्रीनिकेतं वपुः वी
क्ष्य विस्मिताः बभूवुः२३ २४ २५ २६ततः रामकृष्णाभ्यां पूजितास्तेराजानः वृष्णीन् मुदाप्रशशंसुः२७अहो भोजपते नृणां यूयं सफलजन्मानः यतः असकृत् श्रीकृष्णं
पश्यथ२८किंच यस्य श्रीकृष्णस्य कीर्तिः पादोदकं गंगा वाक्यरूपो वेदश्च विश्वंपुनाति२९किंच येषां वः गृहे स्वयं विष्णुः आविर्भूतः सन् युष्मान् सुखप्रदो बभूव३०

॥१२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अनरथार्थैरिति (यत्रयदवः) तत्रैववासचिकीर्पयाशकटेषुस्थापितैरर्थैः सहागतइत्यर्थः ३१ (चिरकालेनयद्दर्शनंतेनकातराःससंभ्रमाःतन्वोअवयवाइत्यर्थः) ३२ वसुदेवस्तंपरिष्वज्यप्रेमविह्वलोबभू
वेतिशेषः । (पुत्रन्यासंचस्मरन्) ३३(पितरौनंदंयशोदांच) ३४ तौसुतौपरिरभ्ययशोदा (चकारान्नंदश्चोभौ) विरहशोकान् । विजहतुस्तत्यजतुः । यद्वा शुचोऽश्रूणिविजहतुर्मुमुचतुः ३५
व्रजेश्वरींयशोदां ३६ (वांयुवयोर्मैत्रीमुपकारमित्यर्थः) अनिवृत्तांनिवृत्तिकारणेसत्यपिअनुवर्तमानांऐंद्रंऐश्वर्यमवाप्यापियस्याःप्रतिक्रियाकर्तुंनशक्यतेइत्यर्थः ३७ तत्कृतांमैत्रीमाहतुः एताविति । नदृष्टौ
पितरौयाभ्यांतौ वस्तुतस्तु अजन्मत्वाद्देवादृष्टपितरौ । हेभवातियशोदेयुवयोः । पित्रोर्न्यस्तावेतौसंप्रीणनादीनिप्राप्यअकुत्रचभयौ (नास्तिकुत्रचभयंययोस्तौ) क्वचिदपिभयरहितौ भूत्वाऊषतुः
वासंचक्रतुः । कथंभूतयोः अक्ष्णोर्नेत्रयोःरक्षकंपक्ष्मयद्वत् । तथारक्षकयोः ।(यद्वाभवतीतिलडंतमत्रसंबध्यतेपक्ष्मयद्वद्भवतितथाभूतयोरिति) युक्तंयुवयोरेतत् । यतःसतांपरःस्वइतिनास्तिवैषम्यम्
३८ अभीष्टत्वेलिंगंयद्यस्यश्रीकृष्णस्यप्रेक्षणेदृशिपुनेत्रेपुव्यवधायकंपक्ष्मकृतंविधातारंशपंति । दृग्भिर्नेत्रद्वारैः (हृदीकृतं) हृदयेप्रवेशितंपरिरभ्य (मनसालिंग्य) तद्भावंतदात्मतांप्रापुः । अपि
नित्ययुजांआरूढयोगिनामपि । (दुरापंदुर्लभं) ३९

श्लोकाः ३१/३९

॥ श्रीशुकउवाच ॥ नंदस्तत्रयदून्प्राप्तान्ज्ञात्वाकृष्णपुरोगमान् ॥ तत्रागमद्वृतोगोपैरनस्थार्थैर्दिदृक्षया ३१ तंदृष्ट्वावृष्णयोहृष्टास्तन्वःप्राणमिवोत्थिताः ॥
परिषस्वजिरेगाढंचिरदर्शनकातराः ३२ वसुदेवःपरिष्वज्यसंप्रीतःप्रेमविह्वलः ॥ स्मरन्कंसकृतान्क्लेशान्पुत्रन्यासंचगोकुले ३३ कृष्णरामौपरिष्वज्य
पितरावभिवाद्यच ॥ नकिंचनोचतुःप्रेम्णासाश्रुकंठौकुरूद्वह ३४ तावात्मासनमारोप्यबाहुभ्यांपरिरभ्यच ॥ यशोदाचमहाभागासुतौविजहतुःशुचः
३५ रोहिणीदेवकीचाथपरिष्वज्यव्रजेश्वरीम् ॥ स्मरंत्यौतत्कृतांमैत्रींबाष्पकंठ्यौसमूचतुः ३६ काविस्मरेतवांमैत्रीमनिवृत्तांव्रजेश्वरि ॥ अवाप्याप्यैंद्रमैश्व
र्यंयस्यानेहप्रतिक्रिया ३७ एतावदृष्टपितरौयुवयोःस्मपित्रोःसंप्रीणनाभ्युदयपोषणपालनानि ॥ प्राप्योषतुर्भवतिपक्ष्महयद्वदक्ष्णोर्न्यस्तावकुत्रचभयौनस
तांपरःस्वः ३८ ॥ श्रीशुकउवाच ॥ गोप्यश्चकृष्णमुपलभ्यचिरादभीष्टंयत्प्रेक्षणेदृशिषुपक्ष्मकृतंशपंति ॥ दृग्भिर्हृदीकृतमलंपरिरभ्यसर्वास्तद्भावमापुर
पिनित्ययुजांदुरापम् ३९

चूर्णिका

॥ श्रीशुक उवाच ॥ नंदः तत्र यदून् प्राप्तान् ज्ञात्वा गोपैर्वृतः सन् तद्दिदृक्षया स्वयं अगमत् ३१ वृष्णयः तं नंदं दृष्ट्वा गाढं परिपस्वजिरे ३२ ततो वसुदेवः संप्रीतः
सन् तान् वृष्णीन् परिष्वज्य कंसकृतान् क्लेशान् तथा गोकुले पुत्रन्यासं च स्मरन् प्रेमविह्वलो वभूव ३३ ततः कृष्णरामौ पितरौ प्रतिपरिष्वज्य प्रेम्णा साश्रुकंठौ
संतौ किंचन नोचतुः ३४ तदा यशोदानंदौ रामं कृष्णं च उत्संगासनं आरोप्य वाहुभ्यां आलिंग्य विरहशोकान् विजहतुः ६५ ततः रोहिणी देवकी च यशोदां परि
ष्वज्य तत्कृतां मैत्रीं स्मरंत्यौ उचतुः ३६ हे यशोदे वां मैत्रीं का विस्मरेत् ३७ यतः हेदेवि एतौ रामकृष्णौ युवयोः न्यस्तौ संतौ पोपणपालनादिप्राप्य ऊषतुः ३८
॥ श्रीशुक उवाच ॥ हे राजन् ततो गोप्यः चिरात् कृष्णं उपलभ्य दृष्टिपु पक्ष्मकृतं शपंत्यः सत्यः दृग्भिः तं हृदिकृत्य आलिंग्य च ताः सर्वाः तदात्मतां आपुः ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(विविक्तएकांते) ४० (हेसख्यःस्वानांज्ञातीनामर्थंसाधयितुंगतान् । तत्र) चिरायितान् । विलंवितान् । अत्रहेतुः शत्रूणांपक्षस्यक्षपणेचेतोयेषांतान् ४१ अपिस्वित् । अस्मान
वध्यायथअवजानीथ अकृतज्ञाएतइत्याविशंकयाइंपच्छंकया । नशंकामात्रंनिश्चितमेवैतत् । परित्यज्यगतत्वा.दितिचेदतआह । नूनमिति ४२ एतत्सदृष्टांतमाह । वायुरिति । आक्षिपतंपृथक्करोतीत्य
र्थः ४३ अपिचअतिभद्रमिदंयदुतभवतीनांमद्वियोगेनमत्प्रेमा.तिशयोजातइत्याह । मयीति । मयिभक्तिमात्रमेवतावदमृतत्वायकल्पते यत्तुभवतीनांमत्स्नेहआसीत्तत्दिष्ट्याअतिभद्रम् । कुतः । मदा
पनः (मांआपयतीति) मत्प्रापणइत्यर्थः ४४ कीदृशस्त्वंयं (त्वां) वयंस्नेहेनप्राप्स्यामइत्यपेक्षायामात्मस्वरूपमाह अहंहीति । हेअंगनाः । भौतिकानां शरावसैंधवादीनांयथाआकाशादिपंचमहाभूता
निआद्यंतादिरूपाणिएवंचसर्वभूतानांजरायुजादीनांअहं (आदिरित्यादि) अतोऽव्यापकंमांभवत्यः (स्नेहातिशयेन) प्राप्ताएवेति ४५ ननुचतुर्विधभूतग्रामाणांतद्वोक्तात्मैवाद्यंतादिरूपःतस्मिंश्चसर्वव्या
पकेसर्वभूतानिवर्त्तंतइतिकुतस्त्वत्प्राप्तिरस्माकमित्यतआह एवंहीति अयमर्थः यथाशरावादीनांभौतिकानांमहाभूतान्याद्यंतरूपाणिएवमेवैतानिचतुर्विधानिभूतान्यपिभौतिकत्वाविशेषात्स्वकारणेषुभूतेष्वे
ववर्तंतेनतुभोक्तर्यात्मनि । आत्मातुतेषुभूतेषुह्यात्मनाभोक्तृरूपेणततःव्याप्तः । नत्कारणत्वेन । अथैतदुभयंभूतानिभौतिकरूपंभोग्यंचभोक्तारंचात्मानंमय्यक्षरेपरिपूर्णे (परेब्रह्मणि) आभातंपश्यतेति ।
(भोक्तृभोग्यरूपंद्वयमपिपरमात्मनिमय्याभातमितिस्पष्टोर्थः) ४६ (आध्यात्मशिक्षयास्वरूपोपदेशेनशिक्षिताबोधिताः तस्यानुस्मरणेनध्वस्तोजीवकोशोलिंगंयासांताःतमेवाध्यगन्प्रापुः ४७ एवं
प्राप्तोपिकृष्णःपुनर्गृहव्यासंगेनमापयात्वितितच्चरणस्मरणंप्रार्थयामासुरित्याह । आहुश्चेति गोप्यआहुश्चप्रार्थयंतेस्म हेनलिननाभतेपदारविंदंगेहंजुषांगृहसेविनीनामपिनोमनसिसदाउदियात्आविर्भवेत्
४८ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्व्यशीतितमोऽध्यायः ८२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

भगवांस्तास्तथाभूताविविक्तउपसंगतः ॥ आश्लिष्यानामयंपृष्टाःप्रहसन्निदमब्रवीत् ४० अपिस्मरतनःसख्यःस्वानामर्थचिकीर्षया ॥ गतांश्चिरायिताञ्छ श्लोकाः
त्रुपक्षक्षपणचेतसः ४१ अप्यवध्यायथास्मान्स्विदकृतज्ञाविशंकया ॥ नूनंभूतानिभगवान्युनक्तिवियुनक्तिच ४२ वायुर्यथाघनानीकंतृणंतूलंरजांसिच ॥
संयोज्याक्षिपतेभूयस्तथाभूतानिभूतकृत् ४३ मयिभक्तिर्हिभूतानाममृतत्वायकल्पते॥ दिष्ट्यायदासीन्मत्स्नेहोभवतीनांमदापनः ४४ अहंहिसर्वभूतानामा ४०/४८
दिरंतोऽतरंवहिः ॥ भौतिकानांयथाखंवार्भूर्वायुर्ज्योतिरंगनाः ४५ एवंह्येतानिभूतानिभूतेष्वात्मात्मनाततः॥ उभयंमय्यथपरेपश्यताभातमक्षरे ४६ ॥ श्री
शुकउवाच॥ अध्यात्मशिक्षयागोप्यएवंकृष्णेनशिक्षिताः॥ तदनुस्मरणध्वस्तजीवकोशास्तमध्यगन् ४७ आहुश्चतेनलिननाभपदारविंदंयोगेश्वरैर्हृदिविचिं
त्यमगाधबोधैः ॥ संसारकूपपतितोत्तरणावलंबंगेहंजुषामपिमनस्युदियात्सदानः ४८॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेद्व्यशीतितमोध्यायः ८२

चूर्णिका
भगवानपि विविक्ते ताः उपलभ्य आश्लिष्य कुशलं पृष्ट्वा अब्रवीत् ४० हे सख्यः यूयं नः स्मरथकिं किंच अकृतज्ञा एते इति अस्मान् अवजानीत किं ४१ ओमिति
चेत् आह हेसख्यः भगवान् भूतानि युनक्ति वियुनक्ति च ४२ वायुः घनादिकं यथा ४३ किंचमयि भूतानां भक्तिः मोक्षाय कल्पते किंच भवतीनां मयि स्नेहः आसीत् एत
दिष्ट्या ४४ हे अंगनाः अहं सर्वभूतानां आदिः अंतः अंतरं वहिश्च अतः एतत् भूतभौतिकरूपं भोग्यं भोक्तारमात्मानं च मयि आभातं पश्यत ४५ ४६ ॥ श्रीशुक उवाच ॥ एवं
श्रीकृष्णेन शिक्षिताः ताः गोप्यः तमेव प्रापुः ४७ आहुश्च हे भगवन् गेहंजुषामपि नः मनसि योगेश्वरैः हृदि विचिंत्यं ते पदारविंदं आविर्भवतु ४८ इतिद्व्यशीतितमः ८२ ॥१३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥८३॥

न्यशीतितमएवंचस्त्रीणांकृष्णकथोत्सवे । द्रौपद्यैकृष्णभार्याभिरुक्ताःस्वस्वकरग्रहाः ॥ १ ॥ (गोपीनां गुरुरुपदेष्टा गतिरुपदिश्यमाना स्वात्मगतिश्चसभगवान्तथाताःअनुगृह्य) अव्ययंकुशलम् १ तत्पादेक्षया
हतमंहोयेषांते २ महतांमनस्तःसकाशात्मुखद्वारतोनिःसृतं (यशोलक्षणंत्वच्चरणांबुजमकरंदंयेपिबंतितेषामाशिवमकुशलंकुतः) क्वचित्कदाचिदपि । देहंभृतांदेहधारिणांदेहकृच्चासावस्मृतिश्चअविद्यातां
च्छिनत्तीतितथातम् । देहकृदीश्वरस्तद्विषयाज्ञानच्छिदंवा ३ हित्वेतिपदद्वयंत्वात्वांहिएवत्वामेवनताःस्मेत्यर्थः । कथंभूतम् । आत्मधाम्नास्वरूपप्रकाशेनाविधुतानिरस्ताआत्मकृताबुद्धिनिमित्तास्तिस्रो
ऽवस्थायस्मिंस्तंअतएवआनंदसंप्लवंसर्वानंदकदंबरूपंअखंडंअपरिच्छिन्नंयतःनकुंठितोबोधश्चिच्छक्तिर्यस्यतं नन्वेवंरूपताश्रीकृष्णस्यकुतोस्मदादिवदेवप्रतीतेःअतआह । कालोपसृष्टेति । कालेनउपसृष्टा
विलुप्ताश्चतेनिगमाश्चतेषामवनेरक्षार्थंआत्ताउपात्तायोगमाययाआकृतिर्निराकाराम्ूर्तिर्येनतंपरमहंसानांगतिंत्वांअतस्तवैवंरूपत्वादस्माकंचत्वन्माययाएतत्सर्ववैपरीत्यात्त्वामेवनताःस्मेति । यद्वा त्वद्यामितिप्र
॥१३१॥ करणात्ज्ञातव्यम् । त्वांनताःस्म । किंकृत्वा । हित्वा (त्यक्त्वा) किंआत्मधामआत्माशरीरंधामगृहंतच्चतच्च । देहदैहिकसंगंपरित्यज्येत्यर्थःसमानमन्यत् ४ (अभिष्टुवत्सुसत्सुवृष्णीनांकौरवाणांचस्त्रियः
परस्परंसमेत्य) त्रिषुलोकेषुगीताः (अगृणन्) ५ कौसल्येहेसत्येशैब्येहेमित्रविंदे । रोहिणीनामकाचित्पट्टमहिषीतुल्या ६ हेअन्याःकृष्णपत्न्यःश्रीकृष्णस्यस्त्रियः (लोकमनुकुर्वन्यथोपयेमेपरिणीतवान्)
७ मामांअर्पयितुंसंपादयितुंराजसुजरासंधादिपुउद्यतकार्मुकेषु सत्सु अजेयायेभटास्तेषांशेखरिता मुकुटवत्कृता अंघ्रिरेणवोयेनतेषां मूर्ध्निपदंदधदित्यर्थः तस्यश्रीनिकेतस्य चरणोममार्चनायास्तु ८

श्लोकाः १/८

॥ श्रीशुकउवाच ॥ तथानुगृह्यभगवान्गोपीनांसगुरुर्गतिः ॥ युधिष्ठिरमथापृच्छत्सर्वांश्चसुहृदोऽव्ययम् १ तएवंलोकनाथेनपरिपृष्टाःसुसत्कृताः ॥ प्रत्यूचुर्हृष्टमनसस्तत्पादेक्षाहतांहसः २ कुतोऽशिवंत्वच्चरणांबुजासवंमहन्मनस्तोमुखनिःसृतंक्वचित् ॥ पिबंतियेकर्णपुटैरलंप्रभोदेहंभृतांदेहकृदस्मृतिच्छिदम् ३ हित्वात्मधामविधुतात्मकृतत्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधम् ॥ कालोपसृष्टनिगमावनआत्तयोगमायाकृतिंपरमहंसगतिंनताःस्म ४ ॥ श्रीशुकउवाच ॥ इत्युत्तमश्लोकशिखामणिंजनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः ॥ समेत्यगोविंदकथामिथोगृणंस्त्रिलोकगीताःशृणुवर्णयामिते ५ ॥ द्रौपद्युवाच ॥ हेवैदर्भ्यच्युतोभद्रेहेजांबवतिकौसले ॥ हेसत्यभामेकालिंदिशैब्येरोहिणिलक्ष्मणे ६ हेकृष्णपत्न्यएतन्नोब्रूतवोभगवान्स्वयम् ॥ उपयेमेयथालोकमनुकुर्वन्स्वमायया ७ ॥ रुक्मिण्युवाच ॥ चैद्यायमार्पयितुमुद्यतकार्मुकेषुराजस्वजेयभटशेखरितांघ्रिरेणुः ॥ निन्येमृगेंद्रइवभागमजावियूथात्तच्छ्रीनिकेतचरणोस्तुममार्चनाय ८

चूर्णिका ॥ श्रीशुक उवाच ॥ हे राजन् ततो भगवान् युधिष्ठिरादीन् कुशलं अपृच्छत् १ एवं लोकनाथेन सत्कृतास्ते युधिष्ठिरादयः ऊचुः २ हे प्रभो तव कीर्तिं कर्णपुटैः ये पिबंति तेषां अभद्रं कुतः हे भगवन् परमहंसगतिं त्वां नता स्म ३ ४ ॥ श्रीशुकउवाच ॥ हे राजन् एवं श्रीकृष्णं जनेषु स्तुवत्सु यादवकौरवस्त्रियः मिथः समेत्य गोविंदकथाः अगृणन् ताः ते वर्णयामि शृणु ५ द्रौपद्युवाच हे वैदर्भि हे भद्रे हे जांबवति हे सत्ये हे सत्यभामे हे कालिंदि हे मित्रविंदे हे रोहिणि हे लक्ष्मणे हे अन्याः कृष्णपत्न्यः भगवान् वः यथा उपयेमे तत् नः ब्रूत ६ ७ ॥ रुक्मिण्युवाच ॥ हे कृष्णे चैद्याय मां संपादयितुं उद्यतकार्मुकेषु राजसु सत्सु तेषां मूर्ध्नि पदं दत्वा कृष्णः मां निन्ये तस्य चरणः मम अर्चनाय अस्तु ८ ॥१३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.द.उ. सनाभेर्भ्रातुः प्रसेनस्यवधेनासिंहकृतेनतत्संहृत्यस्यतेनमेममततेनतातेनालिप्तंअभिशापंदुर्यशःअपमार्ष्टुंपरिहर्तुंऋक्षराजं (जांबवंतं) जित्वारत्नंस्यमंतकमुपाजहार आनीतवान् अथानंतरंमत्पित्रेरत्नमदा अ०
त् । तेनस्वापराधेनभीतःसमेपिताप्रभवेश्रीकृष्णायमामदिशद्ददौ । दत्तांअक्रूरादिभ्यःप्रतिश्रुतामपीत्यर्थः ९ देहकृत्मेपिताअमुंश्रीकृष्णंनिजनाथंस्वस्वामिनंदेवमीश्वरंसीतापतिंप्राज्ञायअविज्ञाय त्रि
टीका नवहानि ह्रस्वश्छंदोनुरोधेनत्रिनवाहानिसप्तविंशतिदिनानीत्यर्थः अमुना(श्रीकृष्णेन)अभ्ययुध्यत् । परीक्षितःसंजातापरीक्षायस्यसपरीक्षितःतंज्ञात्वासाक्षात्सीतापतिरेवासावितिविज्ञायपादौप्रगृह्यमणि
नास्यमंतकेनसहमामर्हणमुपाहरत् । अर्हणतयासमर्पितवान् । अहोतर्हित्वमतिश्रेष्ठासिनेत्याह । अमुष्याहंदासीति १० (स्वचरणलाभेच्छयातपःकुर्वतींज्ञात्वा) सख्याऽर्जुनेनसह । तस्यगृहमार्जनीगृहेसं ॥८३॥
॥१३२॥ मार्जनकर्त्री (दासीत्यर्थः) ११ शुनांयूथेगतंस्वबलिद्विपारिःसिंहइवेति (मांस्वपुरंनिन्येनीतवान्) मेभ्रातॄंश्चापकुरुतःअपकारंकुर्वतोविजित्य । श्रियौकःलक्ष्मीनिवासः तस्यांघ्र्यवनेजनत्वंचरण
क्षालनकर्तृत्वंअनुभवंप्रतिजन्ममेस्तु १२ सप्तोक्ष्णोवृषभान् बलंचवीर्यं (प्रभावश्च) तीक्ष्णशृंगाणिचअतिशयितानियेषांतान्मंपित्राकृतान्संपादितान् बलीयसेमांदातुंक्षितिपानांवीर्यस्यबलस्यपरी
क्षणाय । तान्अतिप्रसिद्धान्वीराणांदुर्मदंघ्नंतियेतान्तरसाशीघ्रमेवनिगृह्यदमयित्वाक्रीडन्अनायासेनैवबबंध । अजतोकान्अजापत्यानि १३ वीर्यमेवशुल्कंदेयंयस्यास्तांदासीभिःसहचतुरंगिणींगजा
श्वादिसेनायुक्तांमांपुरंनिन्ये (तदसहमानान्राजन्यान्पार्थिनिर्जित्य) १४

॥ सत्यभामोवाच ॥ योमेसनाभिवधतप्तहृदाततेनलिप्ताभिशापमपमार्ष्टुमुपाजहार ॥ जित्वर्क्षराजमथरत्नमदात्सतेनभीतःपिताऽदिशतमांप्रभवेपिदत्ता श्लोकाः
म् ९ ॥ जांबवत्युवाच ॥ प्राज्ञायदेहकृदमुंनिजनाथदैवंसीतापतिंत्रिनवहान्यमुनाभ्ययुध्यत् ॥ ज्ञात्वापरीक्षितउपाहरदर्हणंमांपादौप्रगृह्यमणिनाऽहममु ९/१४
ष्यदासी १० ॥ कालिंद्युवाच ॥ तपश्चरंतीमाज्ञायस्वपदस्पर्शनाशया ॥ सख्योपेत्याग्रहीत्पाणिंयोहंतद्गृहमार्जनी ११ ॥ मित्रविंदोवाच ॥ योमांस्व
यंवरउपेत्यविजित्यभूपान्निन्येश्वयूथगमिवात्मबलिंद्विपारिः ॥ भ्रातॄंश्चमेऽपकुरुतःस्वपुरंश्रियौकस्तस्यास्तुमेऽनुभवमंघ्र्यवनेजनत्वम् १२ ॥ सत्योवाच ॥
सप्तोक्षणोऽतिबलवीर्यसुतीक्ष्णशृंगान्पित्राकृतान्क्षितिपवीर्यपरीक्षणाय ॥ तान्वीरदुर्मदहनस्तरसानिगृह्यक्रीडन्बबंधहयथाशिशवोऽजतोकान् १३ यइ
त्थंवीर्यशुल्कांमादासीभिश्चतुरंगिणीम् ॥ पथिनिर्जित्यराजन्यान्निन्येतद्दास्यमस्तुमे १४ ॥

चूर्णिका ॥ सत्यभामोवाच ॥ यः मे पित्रालिप्तं दुर्यशः परिहर्तुं ऋक्षराजं जित्वा स्यमंतकं आनीय मत्पित्रे दत्तवान् ततः मत्पिता स्वापराधेन भीतः सन् श्रीकृष्णाय मां ददौ ९
॥ जांबवत्युवाच ॥ मत्पिता अमुं श्रीकृष्णं निजनाथं राममिति अविज्ञाय सप्तविंशति दिनानि अमुनाऽयुध्यत् ततः असौ रामएवेतितं ज्ञात्वा पादौप्रगृह्य मणिनासह मां
तस्मै समर्पितवान् अतः अहं अमुष्य दास्यस्मि १० ॥ कालिंद्युवाच ॥ स्वपादस्पर्शनाशया तपश्चरंतीं मां ज्ञात्वा अर्जुनेनसह उपेत्य यः पाणिअग्रहीत् अहं तस्य गृहसं
मार्जनकर्त्रीअस्मि ११ ॥ मित्रविंदोवाच ॥ यः मम स्वयंवरे भूपान् मे भ्रातॄंश्च विजित्य मां स्वपुरं निन्ये तस्य चरणक्षालनकर्तृत्वं जन्मनिजन्मनिमेस्तु १२ ॥ सत्योवाच मम ॥१३२॥
पित्रा राजवीर्यपरीक्षार्थं संपादितान् वीरदुर्मदनाशकान् सप्तवृषभान् निगृह्य यः बबंध किंच पथि राजन्यान् निर्जित्य मां निन्ये तस्य मम दास्यं अस्तु १३ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हेकृष्णेद्रौपदितस्मिन्नेवकृष्णेचित्तंयस्यास्तांमांअक्षौहिण्यासेनयासहसखीजनैश्च सह (दत्तवान्दत्त्वाप्रेषितवानित्यर्थः) १५ येनपादसंस्पर्शेनआत्मनोमेतत्कैवल्याख्यंश्रेयोभवेत् । यद्वा येनका
रणेनआत्मनोजीवस्यतत्श्रेयःसएवगुरुपार्थइति १६ राज्ञिहेद्रौपादि यथामित्रींविदायारतथाममापिचित्तंमुकुंदविषयमासआसीत् । सुसंमृश्य सुविचार्य लोकपालान्हित्वा पद्महस्तयाश्रियासवृतः किल ।
अतोपिममचित्तं श्रीमुकुंदे आसेति१७तत्रश्रीकृष्णप्राप्तौउपायमचीकरत् कारयामास १८ यथाहेराज्ञितवस्वयंवरेपार्थस्येप्सया आप्तुमिच्छया कृतःतथामत्स्यंकारितवान् । पाठांतरेपार्थस्येषुणाऽपाकृतः
विद्धइत्यर्थः । तर्हीदमपिअर्जुनएवकिंनाविध्यत् । तत्राह । अयंत्विति । समत्स्योबहिरेवाच्छन्नोनांतः अतःस्तंभसंलग्नयोर्ध्वदृष्ट्यासंलक्ष्यते अयंतुनतथा किंतुस्तंभमूलेनिहितकलशजलेकेवलं दृश्यते ।
अतोदृष्टिरधस्तादुपरिचलक्ष्यमिति श्रीकृष्णव्यतिरेकेणनकस्यापिभेद्यइतिभावः १९ (सोपाध्यायाःधनुर्वेदाध्यापकैःसहिताः) २० मत्स्यवेद्धुंपर्षदिसंसादिमाद्धियःमय्येवधीर्येषामितिअन्यचित्तत्वान्नवेद्धुंशक्ता
इतिभावः २१ तदेवाहआदायेति । मच्चित्तत्वात्सज्यमपिकर्तुमसमर्थाश्चापमेवव्यसृजन् । कोष्ठःकूर्परस्याधोभागस्तत्पर्यंतंज्यांसमुत्कृष्य अमुना (महता) चापेन (हताःविह्वलिताअभूवन्नित्यर्थः)
२२ (अपरेमागधादयश्चापंसज्यंकृत्वापितदवस्थितिंतस्यलक्ष्यस्यावस्थानं) नाविदन्निति मागधादीनांक्रियाशक्तिरेवनतुलक्ष्याभिज्ञतेत्यर्थः २३ यत्तोयत्नवान्असृजत्मुमोच । सबाणोमत्स्यंनाच्छि
नत्किंतुपरंकेवलंपस्पर्श । लक्ष्यावस्थितिज्ञातवानपिसोर्जुनोबलेनापूर्णइत्यर्थः २४ २५

श्लोकाः १५/२५

भद्रोवाच ॥ पितामेमातुलेयायस्वयमाहूयदत्तवान् ॥ कृष्णेकृष्णायतच्चित्तामक्षौहिण्यासखीजनैः १५ अस्यमेपादसंस्पर्शोभवेज्जन्मनिजन्मनि ॥ कर्मभिर्भ्रा
म्यमाणायायेनतच्छ्रेयआत्मनः १६ ॥ लक्ष्मणोवाच ॥ ममापिराज्ञ्यच्युतजन्मकर्मचश्रुत्वामुहुर्नारदगीतमासह ॥ चित्तंमुकुंदेकिलपद्महस्तयावृतःसुसं
मृश्यविहायलोकपान् १७ ज्ञात्वाममममतंसाध्विपितादुहितृवत्सलः ॥ बृहत्सेनइतिख्यातस्तत्रोपायमचीकरत् १८ यथास्वयंवरेराज्ञिमत्स्यःपार्थेप्सयाकृ
तः ॥ अयंतुबहिराच्छन्नोदृश्यतेसजलेपरम् १९ श्रुत्वैतत्सर्वतोभूपाआययुर्मत्पितुःपुरम् ॥ सर्वास्त्रशस्त्रतत्त्वज्ञाःसोपाध्यायाःसहस्रशः २० पित्रासंपूजि
ताःसर्वेयथावीर्यंयथावयः ॥ आददुःसशरंचापंवेद्धुंपर्षदिमद्धियः २१ आदायव्यसृजन्केचित्सज्यंकर्तुमनीश्वराः ॥ आकोष्ठंज्यांसमुत्कृष्यपेतुरेकेऽमुनाह
ताः २२ सज्यंकृत्वाऽपरेवीरामागधांबष्ठचेदिपाः ॥ भीमोदुर्योधनःकर्णोनाविदंस्तदवस्थितिम् २३ मत्स्याभासंजलेवीक्ष्यज्ञात्वाचतदवस्थितिम् ॥ पा
र्थोयत्तोऽसृजद्बाणंनाच्छिनत्पस्पृशेपरम् २४ राजन्येषुनिवृत्तेषुभग्नमानेषुमानिषु ॥ भगवान्धनुरादायसज्यंकृत्वाथलीलया २५

चूर्णिका

॥ भद्रोवाच ॥ हे द्रौपदि मे पिता श्रुतकीर्तिः मातुलेयाय कृष्णाय आहूय तच्चित्तां मां दत्तवान् तस्य पादस्पर्शः जन्मनिजन्मनि भूयात् १५ १६ ॥ लक्ष्मणो
वाच ॥ हे राज्ञि नारदेन गीतं अच्युतजन्मकर्म श्रुत्वा मम चित्तं मुकुंदे आसीत् १७ तदा मे पिता बृहत्सेनः एवंमम मतं ज्ञात्वा तत्र उपायं अकरोत् १८ हे राज्ञियथा
तव स्वयंवरे पार्थेप्सया मत्स्यः कृतः तथा मत्स्यं कारितवान् अयं तु बहिराच्छन्नो न किंतु स्तंभमूले निहितकलशजले केवलं दृश्यते अतः दृष्टिःअधः उपरि लक्ष्यं
तस्मात् श्रीकृष्णं विना न कस्यापि भेद्यः १९ तच्छ्रुत्वा भूपाः मत्पितुः पुरं आययुः २० ततः पित्रा पूजितास्ते सशरं चापं अददुः २१ तत्र केचित् चापंआदाय व्यसृ
जन् केचित् सज्जं कर्तुं असमर्थाः केचित् ज्यां आकृष्य चापेन निहताः पेतुः २२ अपरे मागधाद्याः सज्यं कृत्वातदवस्थितिं नाविंदन् २२ ततः पार्थः मत्स्यावस्थितिं
ज्ञात्वा बाण असृजत् सः बाणः तं नाच्छिनत् किंतु पस्पर्श २४ एवं भग्नमानेषु राजन्येषु सत्सु भगवान् धनुरादाय सज्यं कृत्वा २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिजितिसर्वार्थसाधकेमुहूर्ते २६ (कुसुमासारान्कुसुमवृष्टीरित्यर्थः) २७ भगवत्प्राप्तिहर्षनिर्भरेणात्मानमेवानुवर्णयंत्याहद्वाभ्यां । तद्रंगामिति ।तत्तदाऽहंकलैःकलस्वनौनूपुरौययोस्ताभ्यांपद्भ्यांरंगं प्राविशम् । कनकेनोज्ज्वलांरत्नमालांप्रगृह्यकौशिकाग्र्येउत्तमकौशेयवस्त्रे निवीय प्रावृत्य तथापरिधाय च नीवींबंधेन । सव्रीडोहासोयस्मिंस्तद्वदनंयस्याःसा । कबर्यांधृताःस्रजोययासा २८ उरवःकुंतलायस्मिन् कुंडलयोस्त्विषो ययोस्ते गंडस्थले यस्मिन् तदेव तच्च वक्रं उन्नीय ।शिशिरः संतापहरो हासो येषु तैःकटाक्षमोक्षैरपांगवीक्षणविलासैः (नृपान्निरीक्ष्य) अनुरक्तंहृदयंयस्याः साहं (मालांनिहितवती) २९ ३० हेयाज्ञसेनिद्रौपदि भगवतिश्रीकृष्णेईशेमयावृतेसाति स्पर्धंतःस्पर्धमानाः (नृपश्रेष्ठास्तत्रनसेहिरे) नन्वेवंपरमैश्वर्यंदृष्ट्वतांकुतःस्पर्धावसरइत्यत्तआह । हृच्छयातुराइति हृच्छयेनकामेनआतुराःविवशाःकामविजृंभितयास्पर्धया (भगवदैश्वर्यंनलक्षयांचक्रुः) इतिभावः ३१ हयरत्नानांचतुष्टयंयस्मिन्तंरथम् । आजौयुद्धेबिभ्यतींमांद्वाभ्यामालिंग्यद्वाभ्यांधनुर्बाणौगृहीत्वाचतुर्भुजस्तस्थावितिज्ञातव्यम् ३२ (मिषतांपश्यतांहेराज्ञि) मृगाणांमिषतांमृगराडिव तदासहरिर्जगामेति शेषोज्ञातव्यः । दारुकस्यैववामृगराजोपमा ३३ अन्वसज्जंत पृष्ठतःसक्ताबभूवुः निषेद्धुंकेचनप्रतिबंधंकर्तुंपुरतोगत्वापथिसंयत्तायत्नयुक्ताबभूवुरित्यर्थः । उद्धृतेष्वासाः ऊर्ध्वीकृतचापाः । ग्रामसिंहाःश्वानःहरिंसिंहंयथेति३४ (कृत्ताश्छिन्नाबाह्वादयोयेषाम् । तत्रकेचित्प्रधनेरणेनिपेतुः एकेरणंसंत्यज्य) ३५ रविंच्छादयंतीतिरविच्छदाध्वजेषुपटायस्यां चित्राणितोरणानियस्यांसैवसाचताम् । कुशस्थलींस्वस्यपुरींयदुपतिःसमाविशत् । स्वकेतनंनिजमंडलंअस्ताचलंवा ३६

तस्मिन्नसंधायविशिखंमत्स्यंवीक्ष्यसकृज्जले ॥ छित्त्वेषुणाऽपातयत्तंसूर्येचाभिजितिस्थिते २६ दिविदुंदुभयोनेदुर्जयशब्दयुताभुवि ॥ देवाश्चकुसुमासारान्मुमुचुर्हर्षविह्वलाः २७ तद्रंगमाविशमहंकलनूपुराभ्यांपद्भ्यांप्रगृह्यकनकोज्ज्वलरत्नमालाम् ॥ नूत्नेनिवीयपरिधायचकौशिकाग्र्येसव्रीडहासवदनाकबरीधृतस्रक् २८ उन्नीयवक्त्रमुरुकुंतलकुंडलत्विड्गंडस्थलंशिशिरहासकटाक्षमोक्षैः ॥ राज्ञोनिरीक्ष्यपरितःशनकैर्मुरारेरंसेनुरक्तहृदयानिदधेस्वमालाम् २९ तावन्मृदंगपटहाःशंखभेर्यानकादयः ॥ निनेदुर्नटनर्तक्योननृतुर्गायकाजगुः ३० एवंवृतेभगवतिमयेशेनृपयूथपाः ॥ नसेहिरेयाज्ञसेनिस्पर्धंतोहृच्छयातुराः ३१ मांतावद्रथमारोप्यहयरत्नचतुष्टयम् ॥ शार्ङ्गमुद्यम्यसन्नद्धस्तस्थावाजौचतुर्भुजः ३२ दारुकश्चोदयामासकांचनोपस्कररंथम् ॥ मिषतांभूभुजांराज्ञिमृगाणांमृगराडिव ३३ तेन्वसज्जंतराजन्यानिषेद्धुंपथिकेचन ॥ संयत्ताउद्धृतेष्वासाग्रामसिंहायथाहरिम् ३४ तेशार्ङ्गच्युतबाणौघैःकृत्तबाह्वंघ्रिकंधराः ॥ निपेतुःप्रधनेकेचिदेकेसंत्यज्यदुद्रुवुः ३५ ततःपुरींयदुपतिरभ्यलंकृतांरविच्छदध्वजपटचित्रतोरणाम् ॥ कुशस्थलींदिविभुविचाभिसंस्तुतांसमाविशत्तरणिरिवस्वकेतनम् ३६

चूर्णिका

तत्र बाणं संधाय जले सकृद्वीक्ष्य इषुणा मत्स्यं छित्त्वा अपातयत् २६ तदा दिवि दुंदुभयो नेदुः देवाःपुष्पाणि मुमुचुः २७ तदा अहं हस्ते रत्नमालां गृहीत्वा पद्भ्यां तद्रंगं प्रविश्य ततः परितः राज्ञः निरीक्ष्य मुरारेः अंसे मालां निदधे २८ २९ तदा मृदंगादयोनेदुः नटादयो ननृतुः गायकाः जगुः ३० हे द्रौपदि मया एवं भगवति वृते सति नृपाः न सेहिरे ३१ ततः मां रथं आरोप्य शार्ङ्गं उद्यम्य चतुर्भुजः हरिः आजौ तस्थौ ३२ तदा दारुकः रथं चोदयामास ३३ ततः केचन राजानः पथि प्रतिषेद्धुं पुरतो गत्वा पथि संयत्ता बभूवुः ३४ ते बाणौघैः छिन्नबाह्वंघ्रिग्रीवाः पेतुः एकेरणंत्यक्त्वा दुद्रुवुः ३५ ततः कृष्णः स्वलंकृतां द्वारकां प्राविशत् ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महार्हवासःप्रभृतिभिःसुहृदादीन्पूजयामास ३७ दास्यादिभिःसहआयुधानि (महामूल्यानि) पूर्णकामस्यापिददौ (तत्रहेतुःभक्तितइति) ३८ इमाअष्टौवयंसर्वसंगनिवृत्त्यातपसास्वधर्मेणचश्रद्धासाक्षात्तस्यगृहदासिकाबभूविम ३९ क्षितिजयेदिग्विजयेजितानांराज्ञांकन्याःनःअस्मान्तेनभौमेनरुद्धाःज्ञात्वाततोनिर्मुच्यसंसृतेर्विमोक्षोयस्मात्तत्पदांबुजंअनुस्मरंतीर्नःपरिणिनायउदवहत् आप्तकामोपियः ४० नवयमिति । साम्राज्यादि नकामयामहे । किंतुएतस्यश्रीमत्पादरजोमूर्ध्नावोढुकामयामहइति । ननुतस्यगृहिण्योयूयंसर्वसंपद्भाजः (अतः) किमेवंकाम्यतेअतआहुः हेसाध्विसाम्राज्यंसार्वभौमंपदम् । स्वाराज्यमैंद्रंपदम् । भौज्यंतदुभयभोगभाक्कम् । विविधंराजतइतिविराट्तस्यभावोवैराज्यंअणिमादिसिद्धिभाक्कमित्यर्थः पारमेष्ठ्यंब्रह्मपदम् । आनंत्यंमोक्षम् । हरेःपदंतत्सालोक्यादि नतुकामयामहइत्यादि यद्वा बह्वृचब्राह्मणोक्तक्रमेणप्रागादिदिक्चतुष्टयाधिपत्यानिसाम्राज्यभौज्यस्वाराज्यवैराज्यानिव्याख्येयानि (शेषंपूर्ववत्) ४१ तत्किंतत्पादरजएवकाम्यतेतआहुः श्रियःकुचकुंकुमगंधाढ्यमिति । ब्रह्मादिसेव्यया श्रियापिसेवितत्वादितिभावः ४२ ननुतर्हिअतिदुर्लभत्वात्किंतद्वांच्छयेत्यतआहुःव्रजस्त्रियइति । यद्व्रजः (नकेवलंव्रजस्त्रियःपुलिंद्योपि । नकेवलंपुलिंद्यःतृणवीरुधोपि) गावःगाः । महात्मनोपिगाश्चारयतःपादस्पर्शंचगोपा (निकृष्टाअपि) यथावांच्छंतितद्वत् । तत्पराणांसुलभइतिभावः ४३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांत्र्यशीतितमोऽध्यायः ८३
चतुर्भिरधिकाशीतितमेमुनिसमागमे ॥ वसुदेवमखोत्साहबंधुप्रस्थापनादिकम् ॥ १ ॥ सुबलपुत्रीगांधारीयाज्ञसेनीद्रौपदी । माधवीसुभद्रा । क्षितिपानांराज्ञांपत्न्यःस्वगोप्यःकृष्णभक्तागोप्य (इत्यर्थः रुक्मिण्यादिभिरुक्तंहरौप्रणयानुबंधंश्रुत्वा) विसिस्म्युःविस्मयंचक्रुः १

पितामेपूजयामाससुहृत्संबधिबांधवान् ॥ महार्हवासोलंकारैःशय्यासनपरिच्छदैः ३७ दासीभिःसर्वसंपद्भिर्भटेभरथवाजिभिः ॥ आयुधानिमहार्हाणिददौ पूर्णस्यभक्तितः ३८ आत्मारामस्यतस्येमावयंवैगृहदासिकाः ॥ सर्वसंगनिवृत्त्याद्धातपसाचबभूविम ३९ ॥ महिष्यऊचुः ॥ भौमंनिहत्यसगणंयुधितेनरुद्धाज्ञात्वाथनःक्षितिजयेजितराजकन्याः ॥ निर्मुच्यसंसृतिविमोक्षमनुस्मरंतींपादांबुजंपरिणिनाययआप्तकामः ४० नवयंसाध्विसाम्राज्यंस्वाराज्यंभौज्यमप्युत ॥ वैराज्यंपारमेष्ठ्यंचआनंत्यंवाहरेःपदम् ४१ कामयामहएतस्यश्रीमत्पादरजःश्रियः ॥ कुचकुंकुमगंधाढ्यंमूर्ध्नावोढुंगदाभृतः ४२ व्रजस्त्रियोयद्वांच्छंतिपुलिंद्यस्तृणवीरुधः ॥ गावश्चारयतोगोपाःपादस्पर्शंमहात्मनः ४३ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेत्र्यशीतितमोध्यायः ॥ ८३ ॥
॥ श्रीशुकउवाच ॥ श्रुत्वापृथासुबलपुत्र्यथयाज्ञसेनीमाधव्यथक्षितिपपत्न्यउतस्वगोप्यः ॥ कृष्णेऽखिलात्मनिहरौप्रणयानुबंधंसर्वाविसिस्म्युरलमश्रुकलाकुलाक्ष्यः १

चूर्णिका तदा मे पिता सुहृदादीन् वस्त्रादिभिरपूजयत् ३७ श्रीकृष्णाय आयुधानि ददौ इमाः अष्टौ वयंआत्मारामस्य गृहदासिकाः बभूविम ३८ ३९ ॥ महिष्य ऊचुः ॥ हे राज्ञि क्षितिजये भौमेन जितानां राज्ञां कन्याः नः रुद्धाः इति ज्ञात्वा कृष्णः भौमं हत्वा नः निर्मुच्य आप्तकामोपि उदवहत् ४० हे साध्वि वयं साम्राज्यादि न कामयामहे किंतु अस्य श्रीमत्पादरजः मूर्ध्ना वोढुं कामयामहे ४१ ४२ यतः गोपिकाः पुलिंद्यःगावः गोपाश्च महात्मनः पादस्पर्शं वाञ्छंति ४३ इतिदशमेत्र्यशीतितमः ८३ ॥ छ ॥ ॥ श्रीशुकउवाच ॥ हे राजन् ततः पृथा गांधारी द्रौपदी सुभद्रा तथा राजपत्न्यः गोप्यश्च श्रीकृष्णे तासां स्नेहानुबंधं श्रुत्वा विस्मयं चक्रुः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. (इत्येवंस्त्रीभिःसंभाष्यमाणासुस्त्रीषुतथानृषुनृभिःसंभाष्यमाणेषुसत्सुमुनयआगताः) २ ३ (रामोजामदग्न्यः) ४ ५ (तदागमनात्प्राक्पूर्वमासीनाः सर्वे तान्मुनीन्) ६ (सर्वेयथा) आनर्चुः अ०
अर्चितवंतः (तथाऽच्युतोप्यर्चयत्अर्चितवानित्यर्थः) ७ धर्मगोप्त्रीतनुर्यस्यसधर्मगुप्तनुः । यतानियतावाग्यस्यतस्यसदसः अनुशृण्वतःसतः ८ जन्मभृतःसफलजन्मानः तत्फलंजन्मफलम् । किं
टीका तत्यत्योगेश्वरदर्शनम् ९ किंचयुष्माकंदर्शनमेवतावद्देवानामपिदुष्प्रापम् (एवंसति) अस्माकंतत्स्पर्शनादिकमपिकथंनुघटितमितिविस्मयेनाह । किमिति । स्वल्पतपसांतीर्थस्नानादिमात्रेतपोवु
द्धिर्येषां । तथार्चायांप्रतिमायांदेवइतिचक्षुर्दृष्टिर्येषांतेषांयोगेश्वरदर्शनस्पर्शनादिकंइदंकिम् । अहोअसंभावितमित्यर्थः (प्रह्वोनतिरित्यर्थः) १० एतत्प्रपंचयति नह्यम्मयानीतित्रिभिः (अम्मयानिजलरू ॥८४॥
पाणितेतीर्थदेवाः । साधवस्तुदर्शनादेवपुनंतिअतस्तएवतीर्थानिदेवाश्चेति) ११ वाङ्मनसयोरप्युपासनाविषयत्वं "योवाचंब्रह्मेत्युपास्तेयोमनोब्रह्मेत्युपास्ते" इतिश्रुतेः (अग्न्यादयउपासिताः) अघं
॥१३६॥ (दुःखं) तन्मूलमज्ञानंनहरंति । अत्रहेतुःभेदकृतःभेदकर्तारः । यद्वा भेदबुद्धिंकुर्वतःपुंसः । विपश्चितोनिरस्तभेदा (मुनयः) तेतुमुहूर्तमात्रसेवयैवाघंघ्नंतीति (अग्न्यादयउपासिताःपापमात्रंहरंतिनतुत
न्मूलमज्ञानम् । विपश्चितस्तुक्षणमात्रसेवयाअज्ञानमपीत्यर्थः) १२

इतिसंभाष्यमाणासुस्त्रीभिःस्त्रीषुनृभिर्नृषु ॥ आययुर्मुनयस्तत्रकृष्णरामदिदृक्षया २ द्वैपायनोनारदश्चच्यवनोदेवलोऽसितः ॥ विश्वामित्रःशतानंदोभार श्लोकाः
द्वाजोथगौतमः ३ रामःसशिष्योभगवान्वसिष्ठोगालवोभृगुः ॥ पुलस्त्यःकश्यपोऽत्रिश्चमार्कंडेयोबृहस्पतिः ४ द्वितस्त्रितश्चैकतश्चब्रह्मपुत्रस्तथांगिराः ॥
अगस्त्योयाज्ञवल्क्यश्चवामदेवादयोऽपरे ५ तान्दृष्ट्वासहसोत्थायप्रागासीनानृपादयः ॥ पांडवाःकृष्णरामौचप्रणेमुर्विश्ववंदितान् ६ तानानर्चुर्यथासर्वेसह २/१२
रामोच्युतोर्चयत् ॥ स्वागतासनपाद्यार्घ्यमाल्यधूपानुलेपनैः ७ उवाचसुखमासीनान्भगवान्धर्मगुप्तनुः ॥ सदसस्तस्यमहतोयतवाचोऽनुशृण्वतः
८ ॥ श्रीभगवानुवाच ॥ अहोवयंजन्मभृतोलब्धंकात्स्न्र्येनतत्फलम् ॥ देवानामपिदुष्प्रापंयद्योगेश्वरदर्शनम् ९ किंस्वल्पतपसांनृणामर्चायांदेवचक्षुषा
म् ॥ दर्शनस्पर्शनप्रश्नप्रह्वापादार्चनादिकम् १० नह्यम्मयानितीर्थानिनदेवामृच्छिलामयाः ॥ तेपुनंत्युरुकालेनदर्शनादेवसाधवः ११ नाग्निर्नसूर्यो
नचचंद्रतारकानभूर्जलंखंश्वसनोथवाङ्मनः ॥ उपासिताभेदकृतोहरंत्यघंविपश्चितोघ्नंतिमुहूर्तसेवया १२

चूर्णिका इति स्त्रीभिः स्त्रीषु नृभिः नृषु संभाष्यमाणेषु सत्सु कृष्णरामदिदृक्षया मुनयः तत्र आययुः २ ते च व्यासः नारदः च्यवनः देवलः असितः शतानंदः भारद्वाजः गौत
मः ३ रामः वसिष्ठः गालवः भृगुः पुलस्त्यः कश्यपः अत्रिः मार्कंडेयः बृहस्पतिः ४ द्वितः त्रितः एकतः ब्रह्मपुत्रः अंगिराः अगस्त्यः याज्ञवल्क्यः वामदेवादयश्च
५ एतान् ऋषीन् दृष्ट्वा पांडवादयः रामकृष्णौ च उत्थाय प्रणेमुः ६ ततः तेसर्वे रामकृष्णौ च तान् आनर्चुः ७ ततः भगवान् तान् उवाच ८ ॥ श्रीभगवानु ॥१३६॥
वाच ॥ अहो वयं सफलजन्मानः यतः योगेश्वरदर्शनं जातं ९ १० किंच नह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ते पुनंत्युरुकालेन दर्शनादेव साधवः ११
किंच अग्निसूर्यचंद्रतारकाभूजलखवायुवागादयः देवाः उपासिताः संतः अघं हरंति न तु तन्मूलमज्ञानं साधवस्तु मुहूर्तसेवया समूलं पापं घ्नंति १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतःसाधून्विहायान्यत्रात्मादिवुद्ध्यासज्जमानोऽतिमंदइत्याह यस्येति त्रयोधातवोतापित्तश्लेष्माणःप्रकृतयोयस्यतस्मिन्कुणपेशरीरे आत्मबुद्धिरहमितिबुद्धिः (तथास्त्रीपुत्रादिषुस्वधीःस्वीयाइतिबुद्धिः) भौमेभूविकारेप्रतिमायांइज्यधीःदेवताबुद्धिः । यत् यस्यतीर्थबुद्धिः तीर्थमितिबुद्धिः अभिज्ञेषुतत्त्ववित्सुजनेषुयस्यताःबुद्धयोनसंतिसएवगोष्वपिखरःतीक्ष्णःअत्यविवेकीत्यर्थः । यद्वागवांतृणादिभारवाहः खरोगर्दभःवृषभादपिनीचइति १३ दुरन्वयंवस्तुतोऽननुरूपंभ्रमंतीअनवस्थितायींबुद्धिर्येषांते १४ (ईश्वरस्यापीदृशी-)-मीशितव्यतांअनीश्वरतांकर्माधिकारितांविमृश्यजनसंग्रहमात्रमेतदित्यूचुः स्मयंतोहसंतः १५ दुरन्वयत्वंविवृण्वंतआहुर्द्वाभ्याम् । यन्माययेति । तत्त्ववित्सुउत्तमाअपिवयंयस्यमाययाविमोहिताः । कासौमायाययाविमोहिताइतितामाहुः । यदिति । यत्यस्मात्ईहयाचेष्टितेनमानवधर्मानुकरणेनगूढःसन्ईशितव्यायतिअनीश्वरवदाचरतिभवान् । नन्वहमीश्वरश्चेत्किमित्येवमाचरेयंतत्राहुः अहोइति । भगवतस्तवविचेष्टितंविचित्रंअवितर्क्यम् १६ भगवत्त्वमेवाहुः । अनीहइति । अनीहःअक्रियएवआत्मनास्वरूपमात्रेण । वहुधेत्यत्रदृष्टांतः । यथाभौमैरिति । भौमैर्घटादिविकारैरुपलक्षिता (वहुनामरूपिणीवस्तुतस्त्वेका)"वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमिति"श्रुतेः (एवंस्वरूपतस्त्वेकापिवहुधासृजत्यवतिसंहरतिचेत्यर्थःएवमप्यनीहत्वान्नबध्यते) ननुकथमहंजगत्सृष्ट्यादिकर्तावसुदेवपुत्रत्वादितितत्राहुः । अहोइति विभून्नःपरिपूर्णस्यतवइदंजन्मादिचारितंविडंबनंअनुकरणमात्रंनतुतत्त्वमिति १७ जनसंग्रहमाहुः । अथापीतित्रिभिः । सत्त्वंशुद्धसत्त्वात्मकंरूपंबिभर्षि । स्वलीलयाआचारेणवेदपथंचबिभर्षि (वर्णाश्रमात्माधृतवर्णाश्रमरूपइत्यर्थः वस्तुतःपरोभवान्) १८ अतएवब्राह्मणेषुबहुमानमपिकरोषीतिसहेतुकमाहुः । ब्रह्मेति । ब्रह्मवेदाख्यंशुक्लंशुद्धंतेहृदयंअंतरंगंरूपम् । कुतइत्यतआहुःयत्रेति यत्रब्रह्मणिव्यक्तंकार्यंअव्यक्तंकारणंततःपरंसत्सन्मात्रंब्रह्मचतपआदिभिरुपलब्धंतत्ब्रह्म १९ तस्माद्वेदहृदयत्वात्वेदप्रवर्तकंब्राह्मणकुलंशास्त्रयोनेरात्मनःवेदप्रमाणकस्यतवसद्धामश्रेष्ठमुपलब्धिस्थानंसभाजयासिसंपूजयसितच्चस्मादेवकारणात्ब्रह्मण्यानामग्रणीर्मुख्यः । तत्प्रवर्तकःसन्कर्माचरसीत्यर्थः २०

॥१३७॥

श्लोकाः १३—२०

यस्यात्मबुद्धिःकुणपेत्रिधातुकेस्वधीःकलत्रादिषुभौमइज्यधीः ॥ यत्तीर्थबुद्धिःसलिलेनकर्हिचिज्जनेष्वभिज्ञेषुसएवगोखरः १३ ॥ श्रीशुकउवाच ॥ निशम्येत्थंभगवतःकृष्णस्याकुंठमेधसः॥ वचोदुरन्वयंविप्रास्तूष्णीमासन्भ्रमद्धियः १४ चिरंविमृश्यमुनयईश्वरस्येशितव्यताम् ॥ जनसंग्रहइत्यूचुःस्मयंतस्तंजगद्गुरुम् १५ ॥ मुनयऊचुः ॥ यन्माययातत्त्वविदुत्तमावयंविमोहिताविश्वसृजामधीश्वरः ॥ यदीशितव्यायतिगूढईहयाअहोविचित्रंभगवद्विचेष्टितम् १६ अनीहएतद्बहुधैकआत्मनासृजत्यवत्यत्तिनबध्यतेयथा ॥ भौमैर्हिभूमिर्बहुनामरूपिणीअहोविभूम्नश्चरितंविडंबनम् १७ अथापिकालेस्वजनाभिगुप्तयेबिभर्षिसत्त्वंखलनिग्रहाय ॥ स्वलीलयावेदपथंसनातनंवर्णाश्रमात्मापुरुषःपरोभवान् १८ ब्रह्मतेहृदयंशुक्लंतपःस्वाध्यायसंयमैः ॥ यत्रोपलब्धंसद्व्यक्तमव्यक्तंचततःपरम् १९ तस्माद्ब्रह्मकुलंब्रह्मन्शास्त्रयोनेस्त्वमात्मनः ॥ सभाजयसिसद्धामतद्ब्रह्मण्याग्रणीर्भवान् २०

चूर्णिका

१३ ॥ श्रीशुक उवाच ॥ विप्राः कृष्णस्य वचः निशम्य तूष्णीं आसन् १४ ततो मुनयः चिरं विमृश्य जनसंग्रहमात्रमेतदितिजगद्गुरुं ऊचुः १५ ॥ मुनय ऊचुः ॥ हे कृष्ण यन्माययावयंविमोहिताः सः त्वं अनीश्वरवत् आचरसि अहो तव विचेष्टितंअतर्क्यं १६ अथापि भक्तरक्षार्थं दुष्टनिग्रहाय च सत्त्वात्मकं रूपं बिभर्षि १७ १८ अतएव ब्रह्मकुलं सभाजयसि१९ २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्मादीश्वरस्यतवेदंजनसंग्रहमात्रंवयंतुतवसंगत्याकृतार्थाइत्याहुः । अद्येतिषड्भिः । सतांगत्यात्वयासंगम्यसंगंप्राप्ययद्यस्मात्त्वंश्रेयसांपरोवधिः (अद्यास्माकंजन्मनःसाफल्यंजातम् । विद्यायाःवेदाभ्या
सस्यदृशोज्ञानस्यचसाफल्यंजातम् । यत्यस्मात्त्वंश्रेयसांपरोअंतःपरमोऽवधिः) २१ (अकुंठमेधसेअखंडितज्ञानाय) २२ एकस्मिन्नेवस्थानेआरामोयेषांतेपि (अव्यग्रबुद्धयोपीत्यर्थः) कालंसृष्ट्या
दिकारणंईश्वरंनियंतारम् २३ एतत्सदृष्टांतमाहुः यथेति (द्वाभ्यां) शयानःस्वप्नान्पश्यन्गुणतत्त्वदृक्गुणेषुस्वप्नविषयेषुतत्त्वदृष्टिःनाममात्रंइंद्रियेणमनसाआभातं (मनोमयमित्यर्थः) सिंहव्याघ्रादिरू
पंआत्मानंवेद । तद्रहितंदेवदत्तादिरूपंआत्मानंनवेदयथा २४ एवंत्वांनाममात्रेषुस्वप्नादितुल्यविषयेषुइंद्रियैर्याईहाप्रवृत्तिःसैवमायातयाविभ्रमच्चित्तोनवेद । स्मृतेर्विवेकस्यउपप्लुवान्नाशात् २५ अघौघस्यमर्षो
यस्मात्पातकसमूहस्यनाशंकरोतियत्गंगाख्यंतीर्थंतस्यास्पदंआश्रयभूतंसुपक्वयोगैरपिहृदिकृतंकेवलंनतुदृष्टंतादृशमपितस्यतेअंघ्रिंअद्यददृशिमदृष्टवंतोवयंबहुभिःपुण्यैः । अतोस्मान्भक्ताननुगृहाणभक्ता
न्कृत्वाऽनुग्रहंकुर्वित्यर्थः । ननुकिंभक्त्यायथापूर्वंतपएवतप्यतामिति । नेत्याहुः । उत्सिक्ताउद्रिक्तायाभक्तिस्तयाउपहतआश्रयलक्षणोजीवकोशोयेषामतएवपूर्वेभवद्गातिमापुर्नान्यइति २६ (हेराजर्षेश्रीकृ
ष्णादीननुज्ञाप्यगंतुंनिश्चितवंतः) २७ उपसंगृह्यचरणौपाणिभ्यांधृत्वा (सुयंत्रितःनम्रः) बभाषेदमितिसंधिरार्षः २८ सर्वेदेवायेषुतेभ्यो (युष्मभ्यंनमः । सर्वदेवेभ्यइत्यत्रश्रुतिः) 'यावतीर्वैदेवतास्ताःसर्वा
वेदविदिब्राह्मणेवसंती ' ति । येनकर्मणायथाकृतेनवाकर्मणांनिर्हारोनिरासोभवतितदुच्यताम् २९ श्रीकृष्णंहित्वाऽस्मान्पृच्छतीतिविस्मितान्प्रत्याहनारदः । नातीतिचतुर्भिः । बुभुत्सयाबोद्धुमिच्छया ३०

श्लोकाः २१/३०

अद्यनोजन्मसाफल्यंविद्यायास्तपसोदृशः ॥ त्वयासंगम्यसद्गत्यायदंतःश्रेयसांपरः २१ नमस्तस्मैभगवतेकृष्णायाकुंठमेधसे ॥ स्वयोगमाययाच्छन्नम
हिम्नेपरमात्मने २२ नयंविदंत्यमीभूपाएकारामाश्चवृष्णयः ॥ मायाजवनिकाच्छन्नमात्मानंकालमीश्वरम् २३ यथाशयानःपुरुषआत्मानंगुणतत्त्वदृक् ॥
नाममात्रेंद्रियाभातंनवेदरहितंपरम् २४ एवंत्वांनाममात्रेषुविषयेष्विंद्रियेहया ॥ माययाविभ्रमच्चित्तोनवेदस्मृत्युपप्लवात् २५ तस्याद्यतेददृशिमांघ्रिमघौ
घमर्षतीर्थास्पदंहृदिकृतंसुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजीवकोशाआपुर्भवद्गतिमतोनुगृहाणभक्तान् २६ ॥ श्रीशुकउवाच ॥ इत्यनुज्ञाप्य
दाशार्हंधृतराष्ट्रंयुधिष्ठिरम् ॥ राजर्षेस्वाश्रमान्गंतुंमुनयोदधिरेमनः २७ तद्वीक्ष्यतानुपव्रज्यवसुदेवोमहायशाः ॥ प्रणम्यचोपसंगृह्यबभाषेदंसुयंत्रितः
२८ ॥ वसुदेवउवाच ॥ नमोवःसर्वदेवेभ्यऋषयःश्रोतुमर्हथ ॥ कर्मणाकर्मनिर्हारोयथास्यान्नस्तदुच्यताम् २९ ॥ नारदउवाच ॥ नातिचित्रमिदंवि
प्रावसुदेवोबुभुत्सया ॥ कृष्णंमत्वार्भकंयन्नःपृच्छतिश्रेयआत्मनः ३०

चूर्णिका

अद्य नः जन्मसाफल्यं जातम् भगवतेकृष्णाय तुभ्यं नमः २१ २२ हे ईश अमी भूपाः वृष्णयश्च ईश्वरं त्वां न विंदंति २३ २४ २५ तस्य तवांघ्री वयं ददृशिम अतो
ऽस्मान् अनुगृहाण २६ ॥ श्रीशुक उवाच ॥ इति कृष्णं अनुज्ञाप्य ऋषयः स्वाश्रमान् गंतुं मनो दधिरे २७ तदा वसुदेवः तान् उपव्रज्य प्रणम्य इदं बभाषे २८
॥ वसुदेव उवाच ॥ हे ऋषयः वः नमः येन कर्मणा कर्मणो निरासो भवति तत् नः उच्यतां २९ तदा श्रीकृष्णं हित्वा अस्मान् पृच्छतीति विस्मितान् मुनीन्
नारदः आह हे विप्राः कृष्णं अर्भकं मत्वा वसुदेवः आत्मनः श्रेयःपृच्छतीति न चित्रम् ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(संनिकर्षःसहवासः) तत्रत्योगंगातीरवासी (संनिकृष्टत्वात्तांहित्वाऽन्यत्तीर्थंयथायाति) ३१ श्रीकृष्णेऽर्भकत्वमानोऽविद्याविजृंभितइत्याह । यस्येतिद्वाभ्याम् । यस्यभगवतोऽनुभूतिःज्ञानंकुतश्चिदपिनारिष्यतिननश्यति । तदेवाह । कालेनककटिकाफलवत् । अस्यविश्वस्यलयोत्पत्त्यादिनापि(यस्यननाशः) स्वतश्चविद्युदादिवत् । अन्यस्माच्चमुद्गरादिर्घटादिवत् गुणतोरूपाद्यंतरोत्पत्तेःपूर्वरूपादिनादेहादिरिष्यति । सातुनैवं ३२ तंएवंकुतश्चिदप्यव्याहतानुभवंअतएवेश्वरं किंच अद्वितीयंकृष्णंअन्यः प्राकृतः उपगूढंआच्छन्नंअतःमनुष्यंमन्येत । कैराच्छन्नम् । क्लेशकर्मादिभिः । तत्रक्लेशारागादयश्चतत्पूर्वकाणिकर्माणिचतत्परिपाकरूपेसुखदुःखेचसत्त्वादिगुणानांपुनःप्रवाहश्चतैःप्राणादिभिश्चस्वविभवैःस्वकार्यैः । अत्रदृष्टांतः । मेघहिमोपरागैःअभ्रतुषारराहुभिः स्वविभवैः (सूर्यप्रकाशितैः) सूर्यमिवेति ३३ (सर्वेषांशृण्वतांसतांआभाष्यहेवसुदेवेतिसंबोध्य) ३४ (कर्मणाकर्माचरणेनकर्मणांनिर्हारोनिरासःकर्मण्यकर्मतेत्यर्थः । श्रद्धयानिष्कामतयेत्यर्थः) ३५ चित्तस्योपशमः उपशमहेतुः योगोमोक्षोपायश्च । यतःशनैरात्ममुदमावहतीतितथा । सुगमःप्रवृत्त्याश्रयत्वात् । धर्मश्चआवश्यकः । अन्यथाविहिताकरणेनमालिन्यप्रसंगात् ३६ ननु'नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशु' रित्यादिनात्यागस्यैवविहितत्वात्कथंकर्ममोक्षोपायइत्याशंक्यआदावेवत्यागस्याशक्यत्वादित्याशयेनाहुः । अयमितिसार्धैश्चतुर्भिः (गृहमेधिनः) स्वस्त्ययनःस्वस्तिक्षेमईयतेअनेनेति (तथाक्षेमंकरइत्यर्थः) कः । श्रद्धयानिष्कामतया शुक्लेनशुद्धेनआप्तेनवित्तेनपूरुषईश्वरः इज्येतेतियत्एषपंथाः ३७ स्वस्त्ययनत्वमाहुः । वित्तैषणामिति । वित्तफलभूतैर्यज्ञैर्दानैश्चवित्तैषणांवित्तेच्छांविसृजेत् । गृहैर्गृहोचितैर्भोगैर्दारसुतैषणांविसृजेत् । तदनुभवेनैवतदौत्सुक्यनिवृत्तेः । (आत्मलोकैषणां) देहेमृतेआत्मनः स्वर्गादिलोकैषणांचकालेनक्षयानुसंधानेनविसृजेत् । हेदेवहेवसुदेवेति । यद्वा देवकालेनदेवानामपिमृत्युनामृत्युहेतुभूतेनेत्यर्थः । अत्राचारंप्रमाणयति ग्रामइति ३८ किंच ऋणैस्त्रिभिरिति । तथाचश्रुतिः । " जायमानोवैब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान्जायते ब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्य " इत्यादि । तान्यनिस्तीर्यतेषामृणान्यनपाकृत्यत्यजन्त्यागंकुर्वन्पतितोभवेत् । तथाचमनुः । " ऋणानित्रीण्यपाकृत्यमनोमोक्षेनिवेशयेत् । अनपाकृत्यमोक्षंतुसेवमानोव्रजत्यध " इति ३९

॥१३९॥

श्लोकाः ३१ — ३९

संनिकर्षोत्रमर्त्यानामनादरणकारणम् ॥ गंगांहित्वायथाऽन्यांभस्तत्रत्योयातिशुद्धये ३१ यस्यानुभूतिःकालेनलयोत्पत्त्यादिनास्यवै ॥ स्वतोन्यस्माच्चगुणतोन कुतश्चनरिष्यति ३२ तंक्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयम् ॥ प्राणादिभिःस्वविभवैरुपगूढमन्योमन्येतसूर्यमिवमेघहिमोपरागैः ३३ अथोचुर्मुनयोराजन्नाभाष्यानकदुंदुभिम् ॥ सर्वेषांशृण्वतांराज्ञांतथैवाच्युतरामयोः ३४ कर्मणाकर्मनिर्हारएषसाधुनिरूपितः ॥ यच्छ्रद्धयायजेद्विष्णुं सर्वयज्ञेश्वरंमखैः ३५ चित्तस्योपशमोयंवैकविभिःशास्त्रचक्षुषा ॥ दर्शितःसुगमोयोगोधर्मश्चात्ममुदावहः ३६ अयंस्वस्त्ययनःपंथाद्विजातेर्गृहमेधिनः ॥ यच्छ्रद्धयाप्तवित्तेनशुक्लेनेज्येतपूरुषः ३७ वित्तैषणांयज्ञदानैर्गृहैर्दारसुतैषणाम् ॥ आत्मलोकैषणांदेवकालेनविसृजेद्बुधः ॥ ग्रामेत्यक्तैषणाःसर्वेययुर्धीरास्तपोवनम् ३८ ऋणैस्त्रिभिर्द्विजोजातोदेवर्षिपितृणांप्रभो ॥ यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्यत्यजन्पतेत् ३९

॥१३९॥

चूर्णिका

यतः मर्त्यानां संनिकर्षः अनादरे कारणं भवति यथा गंगां हित्वा तत्रत्यः शुद्धये अन्यांभः याति ३१ ३२ ३३ अथमुनयः वसुदेवं ऊचुः ३४ हे वसुदेव कर्मणाकर्मनिर्हारः एषः निरूपितः स एवाहुः मखैः विष्णुं श्रद्धया यजेत् ३५ ३६ ३७ यज्ञदानैःवित्तैषणां त्यजेत् गृहोचितभोगैःदारसुतैषणां त्यजेत् क्षयानुसंधानेन स्वर्गादिलोकैषणां त्यजेत् एवं त्यक्तैषणाः धीराः संतः वनं ययुः ३८ किंच अयं द्विजः त्रिभिः ऋणैः सह जातोस्ति अतः यज्ञाध्ययनपुत्रैः तानि ऋणानि अनपाकृत्य देहं त्यजन् अधः पतेत् ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥८४॥

॥१४०॥ ऋषिपितृसंबंधिभ्यांऋणाभ्यांमुक्तः । उन्मुच्यअपाकृत्य । निर्ऋणः निर्मुक्तऋणः । अशरणोभव । नविद्यतेशरणंगृहंयस्यसः गृहात्प्रव्रजेत्यर्थः ४० किंच । अविशुद्धचित्तानामयंक्रमः । त्वंतुकृतार्थएवेत्याहुः वसुदेवेति । प्रार्चःअर्चितवान्पूर्वजन्मस्वितिशेषः (यचस्मात्वांयुवयोः ४१ ४२ (एवंवसुदेवम् । तस्मिन्स्यमंतपंचके । मुख्यकल्पकैः) ४३ ४४ आलिप्ताःकुंकुमादिभिः । वस्तुगाणयो गृहीतार्हणहस्ताः ४५ (सम्यक्गीतंजगुः ।) ४६ अक्तनेत्रयोः (अंजनेन) अभ्यक्तंसर्वांगेषुनवनीतेन (पत्नीभिःसहितंतम्) ४७ (दुकूलवलयादिभिर्विभवैः वित्तैःस्वलंकृताभिः) ताभिःपत्नीभिःसहितोदीक्षितोविरेजे ४८ (वृत्रहणइंद्रस्य) '४९ जीवेशौसर्वजीवानामीशौ ५० अनुयज्ञंप्रतियज्ञंआम्नातसर्वांगाःप्राकृताःज्योतिष्टोमदर्शपूर्णमासादयः । तेभ्यश्चोदनालिंगादिभिरतिदेशप्राप्तांगा वैकृताःसौर्यसत्रादयः तैःअग्निहोत्रादिलक्षणैः सर्वैर्यज्ञैः । द्रव्यंपुरोडाशादि । ज्ञानंमंत्रः । क्रियाकर्म । तेषामीश्वरम् ५१ (यथाम्नातंयथोक्तम् । सयजमानः कालेयथोक्तसमयेऋत्विग्भ्यः स्वलंकृतेभ्यःगोभूकन्याअलंकृत्यतद्रूपादक्षिणाअददात्) ५२

श्लोकाः ४०/५२

त्वंत्वद्यमुक्तोद्वाभ्यांवैऋषिपित्रोर्महामते ॥ यज्ञैर्देवर्णमुन्मुच्यनिर्ऋणोऽशरणोभव ४० वसुदेवभवान्नूनंभक्त्यापरमयाहरिम् ॥ जगतामीश्वरंप्रार्चःसयद्वांपुत्रतांगतः ४१ ॥ श्रीशुकउवाच ॥ इतितद्वचनंश्रुत्वावसुदेवोमहामनाः ॥ तानृषीनृत्विजोवव्रेमूर्ध्नाऽऽनम्यप्रसाद्यच ४२ तएनमृषयोराजन्वृताधर्मेणधार्मिक ॥ तस्मिन्नयाजयन्क्षेत्रेमखैरुत्तमकल्पकैः ४३ तद्दीक्षायांप्रवृत्तायांवृष्णयःपुष्करस्रजः ॥ स्नाताःसुवाससोराजन्राजानःसुष्ठ्वलंकृताः ४४ तन्महिष्यश्चमुदितानिष्ककंठ्यःसुवाससः ॥ दीक्षाशालामुपाजग्मुरालिप्तावस्तुपाणयः ४५ नेदुर्मृदंगपटहशंखभेर्यानकादयः ॥ ननृतुर्नटनर्तक्यस्तुष्टुवुःसूतमागधाः ॥ जगुःसुकंठ्योगंधर्व्यःसंगीतंसहभर्तृकाः ४६ तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः ॥ पत्नीभिरष्टादशभिःसोमराजमिवोडुभिः ४७ ताभिर्दुकूलवलयैर्हारनूपुरकुंडलैः ॥ स्वलंकृताभिर्विभवैर्दीक्षितोऽजिनसंवृतः ४८ तस्यर्त्विजोमहाराजरत्नकौशेयवाससः ॥ ससदस्याविरेजुस्तेयथावृत्रहणोऽध्वरे ४९ तदारामश्चकृष्णश्चस्वैःस्वैर्बंधुभिरन्वितौ ॥ रेजतुःस्वसुतैर्दारैर्जीवेशौस्वविभूतिभिः ५० ईजेऽनुयज्ञंविधिनाअग्निहोत्रादिलक्षणैः ॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ५१ अथर्त्विग्भ्योददात्कालेयथाम्नातंसदक्षिणाः ॥ स्वलंकृतेभ्योलंकृत्यगोभूकन्यामहाधनः ५२

चूर्णिका त्वं तु ऋषिपित्रोः ऋणाभ्यां मुक्तोसि अथ यज्ञैः देवऋणं उन्मुच्य गृहात् प्रव्रज ४० हेवसुदेव अयं क्रमः अविशुद्धचित्तानां त्वं तु कृतार्थ एव स्यात् भगवान् युवयोः पुत्रतांगतः ४१ ॥ श्रीशुक उवाच ॥ एवं तेषांवचनं श्रुत्वा वसुदेवः तान् प्रणम्यऋत्विजोवव्रे ४२ ततः ते ऋषयः तस्मिन् क्षेत्रे मखैः वसुदेवं अयाजयन् ४३ एवं यज्ञदीक्षायां प्रवृत्तायां वृष्णयः राजानः महिष्यश्च वस्तुपाणयः सत्यः यज्ञशालां उपाजग्मुः ४४ ४५ तदा मृदंगादयो नेदुः नटादयो ननृतुः सूतादयस्तुष्टुवुः सधवाः गंधर्व्यः जगुः ४६ ततः ऋत्विजः सपत्नीकं वसुदेवं अभ्यषिचन् ४७४८ तदा वसुदेवः स्त्रीभिः सह शुशुभे तथा ससदस्याः ऋत्विजः विरेजुः ४९ तथा रामकृष्णौ स्वपुत्रदारैः रेजतुः ५० ५१ अथ वसुदेवः ऋत्विग्भ्यो दक्षिणागोभूकन्याश्च ददौ ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पत्नीसंयाजैरावभृथ्यैश्चेष्ट्वा) सस्नुःस्नानंचक्रुः ५३ (तथास्त्रियश्चअलंकारादीनदुः ।) आश्वभ्यःशुनोऽभिव्याप्य (वर्णान्ब्राह्मणादीन्अन्नेनपूजयत् तर्पयामास) ५४ बंध्वादीन्चारणांतान्पारिबर्हेणप्रीतिदानेनचापूजयत् । तचसर्वं ५५ (श्रीनिकेतंकृष्णमनुज्ञाप्यतत्कर्मशंसंतः) प्रययुः ५६ प्रयाणेकेषांचिद्विशेषमाहद्वाभ्यांधृतराष्ट्रइति अनुजोविदुरः (धृतराष्ट्रादयः यदून्बंधून्आलिंग्य) सौहृदेनआक्लिन्नानिचेतांसियेषांते । विरहजन्यक्लेशेनोपलक्षिताःसंतोययुरित्यन्वयः तत्रानुजोविदुरः) पार्था युधिष्ठिरभीमार्जुनाः । यमौनकुलसहदेवौ ५७ ५८ (कृष्णादिभिर्बृहत्यापूजयार्चितोनंदोन्यवात्सीत्न्यवसत्) ५९ मनोरथोयज्ञविषयः तमेवमहार्णवंउत्तीर्य ६० (हेभ्रातः) शूराणांबलेनयोगिनांज्ञानेनापि (दुस्त्यजमित्यर्थः यतईशेनकृतः ।) ६१ तत्कुतस्तत्राह ।अस्मास्विति । कृताज्ञेषुकृतमुपकारमजानत्सुसत्तमैर्भवद्भिरप्रतिकल्पाअनुपमामैत्रीयमर्पिताअफलापिप्रत्युपकारशून्यापिकर्हिचिद्यद्यस्मान्ननिवर्तततस्मादीश्वरकृतः पाशोयंभवतामितिगम्यतइत्यर्थः ६२ अफलत्वमेवाहप्रागिति । हेभ्रातः अकल्पादकल्पत्वादसमर्थत्वात्वःकुशलंप्रियंनहिआचरामकृतवंतोवयम् । श्रीमदेनांधान्यक्षीणियेषांते (पुरः सत·विद्यमानानपि) ६३ राज्यश्रीर्माभूत्छांदसोऽडागमः (यया राज्यलक्ष्म्या) ६४ ६५

॥१४१॥

श्लोकाः ५३/६५

पत्नीसंयाजावभृथ्यैश्चरित्वातेमहर्षयः ॥ सस्नूरामह्रदेविप्रायजमानपुरःसराः ५३ स्नातोलंकारवासांसिबंदिभ्योदात्तथास्त्रियः ॥ ततःस्वलंकृतोवर्णानाश्भ्योऽन्नेनपूजयत् ५४ बंधून्सदारान्ससुतान्पारिबर्हेणभूयसा ॥ विदर्भकोसलकुरून्काशिकैकयसृंजयान् ५५ सदस्यर्त्विक्सुरगणान्नृभूतपितृचारणान् ॥ श्रीनिकेतमनुज्ञाप्यशंसंतःप्रययुर्द्रुतम् ५६ धृतराष्ट्रोऽनुजःपार्थाभीष्मोद्रोणःपृथायमौ ॥ नारदोभगवान्व्यासःसुहृत्संबंधिबांधवाः ५७ बंधून्परिष्वज्ययदून्सौहृदाक्लिन्नचेतसः ॥ ययुर्विरहकृच्छ्रेणस्वदेशांश्चापरेजनाः ५८ नंदस्तुसहगोपालैर्बृहत्यापूजयार्चितः ॥ कृष्णरामोग्रसेनाद्यैर्न्यवात्सीद्बंधुवत्सलः ५९ वसुदेवोंजसोत्तीर्यमनोरथमहार्णवम् ॥ सुहृद्वृतःप्रीतमनानंदमाहकरेऽस्पृशन् ६० ॥ वसुदेवउवाच ॥ भ्रातरीशकृतःपाशोनृणांयःस्नेहसंज्ञितः ॥ तंदुस्त्यजमहंमन्येशूराणामपियोगिनाम् ६१ अस्मास्वप्रतिकल्पेयंयत्कृताज्ञेषुसत्तमैः ॥ मैत्र्यर्पिताऽफलावापिनानिवर्तेतकर्हिचित् ६२ प्रागकल्पाच्चकुशलंभ्रातर्वोनाचरामहि ॥ अधुनाश्रीमदांधाक्षानपश्यामपुरःसतः ६३ माराज्यश्रीरभूत्पुंसःश्रेयस्कामस्यमानद ॥ स्वजनानुतबंधून्वानपश्यतिययांधदृक् ६४ ॥ श्रीशुकउवाच ॥ एवंसौहृदशैथिल्यचित्तआनकदुंदुभिः ॥ रुरोदतत्कृतांमैत्रींस्मरन्नश्रुविलोचनः ६५

चूर्णिका

ततः पत्नीसंयाजौ चरित्वा यजमानपुरःसराः सर्वे रामह्रदे स्नानंचक्रुः ५३ ततो वसुदेवः अलंकारवासांसि वंदिभ्यः अदात् ततः आ श्वभ्यः अन्नेन संतर्प्य ५४ ततः सुतदारसहितान् बंधून् विदर्भादीन् राज्ञः सदस्यर्त्विक्सुरगणान् नृभूतपितृचारणान् अपूजयत् ततस्ते श्रीकृष्णं अनुज्ञाप्य प्रययुः ५५ ५६ ततः धृतराष्ट्रविदुरौ युधिष्ठिरभीमार्जुनाः भीष्मः द्रोणः नकुलसहदेवौ नारदः व्यासः सुहृदादयः ५७ अन्येजनाश्च यदून् परिष्वज्य स्वदेशान् ययुः ५८ नंदस्तु कृष्णरामोग्रसेनाद्यैः अर्चितः सन् गोपालैः सहन्यवात्सीत् ५९ ६० तदा वसुदेवः नंदं आह हे भ्रातः इमं स्नेहपाशं दुस्त्यजंमन्ये ६१ हेभ्रातः वयंप्राक् असामर्थ्यात् वः कुशलं नाचराम अधुना तु श्रीमदांधाक्षाः वः नपश्यामः अतः श्रेयस्कामस्य पुंसः राज्यश्रीः माभूत् ६२ ६३ ६४ ॥श्रीशुकउवाच॥ एवं वसुदेवः नंदकृतां मैत्रीं स्मरन्रुरोद ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अद्य श्वइति । प्रातर्निर्गमेअद्यैवापराह्णेगम्यतामिति । अपराह्णेनिर्गमेश्वोगम्यतामितिपुनःपुनरेवंमानितः ६६ (पराध्यैरर्घ्यैराभरणादिभिःकामैःपूर्यमाणः सव्रजोव्रजजनसहितः ।) ६७ (वसुदेवादिभिः दत्तंपारिबर्हंप्रीतिदानम्) यापितःमहतासैन्येनप्रस्थापितः ६८ ६९ (बंधुषुनंदादिषु ।) ७० (यदुदेवस्यवसुदेवस्यमहोत्सवंयज्ञादिलक्षणंसुहृत्संदर्शनादिकं (यदासीत्तच्चकथितवंतः) ७१ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांचतुरशीतितमोऽध्यायः ॥ ८४ ॥ ॥ ७ ॥ ॥ पंचाशीतितमेरामकृष्णौसंप्रार्थितौसुतौ । पित्रेज्ञानमथोमात्रेमृतान्पुत्रानयच्छताम् ॥ १ ॥ नंदयित्वाकुरुक्षेत्रयात्रायांसुहृदोबहून् । तत्त्वज्ञानंततःपित्रोरादिशन्मृतसूनुभिः ॥ २ ॥ १ धामप्रभावस्तत्सूचकं (यन्मायेयेत्यादि) जातविस्रंभः उत्पन्नविश्वासः । परिभाष्यसंबोध्य २ अस्यविश्वस्ययत्साक्षात्स्वरूपभूतंक रणंप्रधानपुरुषौनामपरौतयोरपिकारणत्वेनेश्वरौचेतिसाक्षादितिवांयुवांजाने ३ नन्विदंविश्वमनेकैःकारकैर्जायमानंकुतः प्रधानपुरुषात्मकंकुतस्तरामावयोस्तत्करणत्वेनेश्वरत्वंतत्राह । यत्रेति । यत्राधिकरणेयेनकर्त्राकरणेनचयतोऽपादानात्यस्यसंबंधेनषष्ठ्यर्थस्याकारकत्वेपिनिमित्ततोक्ता । यस्मैसंप्रदानाययद्यदितिप्रयोज्यकर्तृकर्मकारकेदर्शिते । ननुतयोर्नास्तिभेदः । यथोक्तम् "करोतिःक्रियमाणेननकश्चित्कर्मणाविना । भवत्यर्थस्यकर्ताचकरोतेःकर्मजायते । तथा । करोत्यर्थस्ययःकर्ताभवितुः सप्रयोजकः । भवितातमपेक्ष्याथप्रयोज्यत्वंप्रपद्यत" इतिच । सत्यम् । तथाप्यवस्थाभेदेनभेदोविवक्षितः । दृश्यतेचावस्थाभेदः । तंडुलानोदनंपचति मृदंघटंकरोति । तदेवंसप्तविभक्त्यर्था दर्शिताः । यथेतियदेतिचक्रियाविशेषणभूतानामन्येषांचाव्ययानामर्थाः । स्यादितिक्रियापदार्थोपलक्षणम् । एवंसर्वप्रपंचमनूद्यतस्यतत्कारणस्यभगवद्रूपतांविधत्ते । इदंसाक्षादिति । प्रधानंभोग्यंपुरुषोभोक्तातयोरीश्वरोभगवांस्त्वमेवसाक्षादितितयोरैक्यमभिप्रेत्यैकवचनम् ४

२॥

श्लोका

नंदस्तुसख्युःप्रियकृत्प्रेम्णागोविंदरामयोः ॥ अद्यश्वइतिमासांस्त्रीन्यदुभिर्मानितोऽवसत् ६६ ततःकामैःपूर्यमाणःसव्रजःसहबांधवः ॥ पराध्याभरणक्षौमनानानर्घ्यपरिच्छदैः ६७ वसुदेवोग्रसेनाभ्यांकृष्णोद्धवबलादिभिः ॥ दत्तमादायपारिबर्हंयापितोयदुभिर्ययौ ६८ नंदोगोपाश्चगोप्यश्चगोविंदचरणांबुजे ॥ मनःक्षिप्तंपुनर्हर्तुमनीशामथुरांययुः ६९ बंधुषुप्रतियातेषुवृष्णयःकृष्णदेवताः ॥ वीक्ष्यप्रावृषमासन्नांययुर्द्वारवतींपुनः ७० जनेभ्यःकथयांचक्रुर्यदुदेवमहोत्सवम् ॥ यदासीत्तीर्थयात्रायांसुहृत्संदर्शनादिकम् ७१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेचतुरशीतितमोध्यायः ८४ ॥७॥ श्रीशुकउवाच ॥ अथैकदात्मजौप्राप्तौकृतपादाभिवंदनौ ॥ वसुदेवोभिनंद्याहप्रीत्यासंकर्षणाच्युतौ १ मुनीनांसवचःस्मृत्वापुत्रयोर्धामसूचकम् ॥ तद्वीर्यैर्जातविस्रंभःपरिभाष्याभ्यभाषत २ कृष्णकृष्णमहायोगिन्संकर्षणसनातन ॥ जानेवामस्ययत्साक्षात्प्रधानपुरुषौपरौ ३ यत्रयेनयतोयस्ययस्मैयद्यद्यथायदा ॥ स्यादिदंभगवान्साक्षात्प्रधानपुरुषेश्वरः ४

६६/४

चूर्णिका

ततः नंदः रामकृष्णयोः प्रेम्णा त्रीन् मासान् तत्रावसत् ६६ ततः वसुदेवोग्रसेनकृष्णोद्धवबलादिभिः दत्तं पारिबर्हं आदाय नंदः गोप्यः गोपाश्च गोविंदचरणांबुजे क्षिप्तं मनः पुनर्हर्तुं अनीशाः संतः मथुरां ययुः ६७ ६८ ६९ ततो वृष्णयः आसन्नां प्रावृषं वीक्ष्य पुनर्द्वारकांएत्यतीर्थयात्रायां जातं यज्ञोत्सवं सुहृत्संदर्शनादिकं च जनेभ्यः कथयांचक्रुः ७० ७१ ॥ ॥ इतिदशमेचतुरशीतितमः ॥ ८४ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ हे राजन् एकदा वसुदेवः पुत्रयोः प्रभावसूचकं ऋषिवचः श्रुत्वा तद्वीर्यै जातविश्वासः सन् प्राप्तौ रामकृष्णौ सत्कृत्य अभ्यभाषत १ २ हेकृष्णहेराम युवां प्रधानपुरुषेश्वरौ जाने ३ ४

१ टीकाकारोदाहृतस्यकरोतिरित्यादिकारिकाद्वयस्यार्थः । कश्चिदपिकरोतिःक्रियमाणनकर्मणाविनानप्रयुज्यते । भवत्यर्थस्ययःकर्तासापिकरोतेर्योगेकर्मजायते । यथाघटोभवतीत्यत्रभवत्यर्थस्यभवनस्यकर्ताघटःसकरोतेर्योगेकर्मसंज्ञःदेवदत्तःघटंकरोतीत्यत्र । तथाकरोत्यर्थस्यघटस्ययःकर्तापुरुषःसभावितुर्घटस्यप्रयोजकोभवति । घटंभावयतीत्यत्रयःप्रयोजकस्तस्यैवघटंकरोतीत्यत्रकर्तृत्वदर्शनात् । भविताघटःतंप्रयोजकमपेक्ष्यप्रयोज्यत्वंप्रपद्यतेप्रयोज्यकर्मत्वंप्राप्नोतीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच धारणपोषणकर्तापित्वमेवेत्याह । एतदिति । हेआत्मन् । प्राणःक्रियाशक्तिः । जीवोज्ञानशक्तिश्चसन्एतद्विश्वंत्वमेवाबिभर्षि (भृञ्धारणपोषणयोः । अनुप्रविश्येत्यत्रश्रुतिः । "तत्सृष्ट्वातदेवानुप्रा विशातिदि" ति) ५ ननुप्राणादीनांविचित्रशक्तीनांकारणत्वावगमात्कथंपरमेश्वरस्यैवकारणत्वेनसर्वात्मकत्वमुच्यतइत्याशंक्य प्राणादिशक्त्योपितस्यैवेत्याह । प्राणादीनामिति । प्राणःसूत्रंतदादीनांवि श्वसृजांविश्वकारणानांयाःशक्तयस्ताः परस्यपरमकारणस्येश्वरस्यैव । कुतः । पारतंत्र्यात् । यथावेधशक्तिर्नबाणस्यअपितुपुरुषस्यतद्वदित्यर्थः । ननुभगवतः प्राणादिवर्गस्यचस्वातंत्र्यमेवाकिंनस्या त्अतआह । वैसादृश्याद्वयोरिति । चेतनाचेतनत्वेनविसदृशत्वाद्द्वयोः । अचेतनप्राणादिवर्गस्यचेतनपारतंत्र्यमेवयुक्तमित्यर्थः । यद्वा प्राणादिषुद्वयोर्द्वयोरेवतावद्विसदृशत्वम् । विरुद्धक्रियाकारित्वा त् । किंपुनर्बहूनाम् । तस्मादेकेनसर्वज्ञेनसर्वशक्तिनाऽधिष्ठितानामेवविशिष्टकार्यारंभकत्वंयुक्तं नस्वतंत्राणामिति तथाचोक्तं "यदैतेऽसंहताभावाभूतेंद्रियमनोगुणाः । यदायतननिर्माणेनशेकुर्ब्रह्मवि त्तम । तदासंहत्यचान्योन्यंभगवच्छक्तिचोदिताः । सदसत्त्वमुपादायचोभयंससृजुर्ह्यद" इति । तथा । "नानात्वात्स्वक्रियानीशाःप्रोचुःप्रांजलयोविभु"मित्यादि । ननुप्राणादीनांक्रियाकारित्वंशक्त्यभावे कुतःस्यादित्याह । चेष्टैवचेष्टतामिति । चेष्टमानानामेषांचेष्टैव (सा) नशक्तिः । यथावायोःशक्त्यातृणादीनांचलनं यथाचपुरुषस्यशक्त्याशराणांवेगइति ६ पारतंत्र्यमेवप्रपंचयति । कांतिरितिपंच भिः । चंद्रस्यकांतिः । अग्नेस्तेजः । अर्कस्यप्रभा । ऋक्षविद्युतांसत्तास्फुरणमात्रेणसत्त्वम् । अर्थतोवस्तुतोभवान् । तथाचश्रुतिः । "नतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः । तमेवभांतमनुभा तिसर्वंतस्यभासासर्वमिदंविभाती" ति । स्मृतिश्च । "यदादित्यगतंतेजोजगद्भासयतेऽखिलम् । यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमामक"मिति । भूमेर्वृत्तिःप्राणिनामाधारत्वेनवर्तनं गंधश्चभवान् । तवै वशक्तिरित्यर्थः ७ किंच हेदेवअपांतर्पणंतृप्तिजनकत्वंप्राणनंजीवनहेतुत्वंताआपश्चतासांरसः त्वमेव । किंच । वायोरोजःसहआदितवैवशक्तिः (ओजआदित्रयंप्राणेंद्रियशरीरगतावायोःशक्तिविशेषाः) ८ दिशामुपाधिकृताकाशप्रदेशानांअवकाशस्त्वम् । दिशश्चत्वम् । खंचसामान्याकाशःतदाश्रयःस्फोटश्चशब्दतन्मात्रंपरावस्थावागित्यर्थः । नादःपश्यंती । ओंकारोमध्यमावाक् । वर्णश्चआकृती नांपदार्थानांपृथकूकृतिःपृथक्करणंअभिधानंयस्मात्तत्पदं (सःपदरूपोवर्णसमूहः) वर्णपदाद्यात्मिकावैखरीचत्वमित्यर्थः ९ इंद्रियाणामिंद्रियंविषयप्रकाशनशक्तिः देवाश्चेंद्रियाधिष्ठातारः । तदनुग्र हस्तेषामधिष्ठानशक्तिश्चत्वम् । अवबोधोध्यवसायशक्तिः । अनुस्मृतिः प्रतिसंधानशक्तिः १० भूतानांकारणंभूतादिस्तामसोहंकारस्त्वमसि । इंद्रियाणांकारणंतैजसोराजसाहंकारस्त्वम् । विविधम् । अधिदैवाध्यात्मभेदेनविकल्पंतइतिविकल्पादेवास्तेषांकारणंवैकारिकःसात्विकोऽहंकारश्चत्वम् । अनुशायिनांजीवानांसंसारकारणंप्रधानंत्वम् ११

श्लोकाः ५–११

एतन्नानाविधंविश्वमात्मसृष्टमधोक्षज ॥ आत्मनानुप्रविश्यात्मन्प्राणोजीवोबिभर्ष्यजः ५ प्राणादीनांविश्वसृजांशक्तयोयाःपरस्यताः ॥ पारतंत्र्याद्वैसादृ श्याद्द्वयोश्चेष्टैवचेष्टताम् ६ कांतिस्तेजःप्रभासत्ताचंद्राग्न्यर्कर्क्षविद्युताम् ॥ यत्स्थैर्यंभूभृतांभूमेर्वृत्तिर्गंधोर्थतोभवान् ७ तर्पणंप्राणनमपांदेवत्वंताश्चतद्रसः ॥ ओजःसहोबलंचेष्टागतिर्वायोस्तवेश्वर ८ दिशांत्वमवकाशोसिदिशःखंस्फोटआश्रयः ॥ नादोवर्णस्त्वमोंकारआकृतीनांपृथक्कृतिः ९ इंद्रियंत्विंद्रियाणांत्वं देवाश्चतदनुग्रहः ॥ अवबोधोभवान्बुद्धेर्जीवस्यानुस्मृतिःसती १०भूतानामसिभूतादिरिंद्रियाणांचतैजसः ॥ वैकारिकोविकल्पानांप्रधानमनुशायिनाम् ११

चूर्णिका

किंच एतद्विश्वं त्वं विभर्षि ५ किंच प्राणादीनां याः शक्तयः चंद्रस्य कांतिः अग्नेस्तेजः अर्कस्यप्रभा ऋक्षविद्युतांस्फुरणं भूभृतांस्थैर्यम् भूमेः गंधः अपां रसः वायोः गतिः एषा तवैव शक्तिः ६ ७ ८ किंच दिशः अवकाशः त्वमेव ९ इंद्रियाणां विषयप्रकाशनशक्तिः त्वं बुद्धेः व्यवसायशक्तिःत्वं १० भूतेंद्रियदेवतानां कारणं त्रिविधोऽहंकारस्त्वं ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अपिच । नश्वरेषुनाशशीलेषुइहैतेषुभावेषुयदनश्वरंअवशिष्यमाणं रूपंतत्त्वमसि । द्रव्यविकारेषुमृत्सुवर्णादिकार्येषुघटकुंडलादिषुनश्वरेषुचद्रव्यमात्रंमृत्सुवर्णादिमात्रंअनश्वरंयथानिरूपितं''वाचारंभणंविकारोनामधेयंमृ''त्तिकेत्येवसत्यमितिश्रुतेस्तद्वत् १२ ननुत्रिगुणात्मककार्यरूपोपित्वमित्युक्तत्वात् कथमनश्वरत्वंतत्राह । सत्त्वमिति । तद्वृत्तयस्तत्परिणामाश्रमहदादयः । अद्धासाक्षात्त्वयिपरेब्रह्मणिकल्पिताः १३ तस्मात् (अमीभावागुणतद्वृत्तिरूपाः) नसंति । नन्वसतांकथंप्रतीतिरतआह । यर्हीति । यदाविकल्पितास्तदैवप्रतीतिमात्रेणत्वयिसंतित्वंचामीषुतदैवकारणतयाअनुगतः । अन्यदातुअव्यावहारिकोऽविकल्पितस्त्वमेवावशिष्यसइत्यर्थः १४एवंरूपत्वादज्ञानंनिबंधनश्चसंसारइत्याहगुणप्रवाहइति(एतस्मिन्संसारेअखिलात्मनस्तव) सूक्ष्मांगुरुमुखैकगम्यांनिष्प्रपंचांगतिंअबुधाअविद्वांसः अबुद्धेतिवापाठः अतः अबोधेनदेहाभिमानेनकृतैःकर्मभिरिहसंसरंतीति १५ एवंतयोस्तत्त्वंनिरूप्यतदप्राप्त्याशोचतियदृच्छयेति । नृतांमनुष्यताम् । सुकल्पांपटुतरेंद्रियाम् (दुर्लभांपुनरिमामेवप्राप्नुयादितिर्निश्चयाभावात् । यदृच्छयादैववशात्प्राप्यत्वन्माययाप्रमत्तस्यवयोवृथैवगतमित्यर्थः । स्वार्थेमोक्षलक्षणे) १६ अहोकिमितिप्रमत्तोसित्वयावहुभिःपाशैर्निबद्धत्वादित्याह (असाविति । देहे) असावहमिति अस्यदेहस्यान्वयादिषुपुत्रादिषुममैवैतइति (चस्नेहलक्षणैःपाशैः) १७ अहोत्वत्पुत्रयोरावयोःकिमिदमारोप्यतेअतआह । युवामितिभूभारक्षत्रक्षपणार्थअवतीर्णौ (प्रधानपुरुषयोरीश्वरौअस्माकंसुतौनभवथः)तथाह । निश्चितंआत्थकथयासि१८तत्तस्मात्अरणंशरणंआपन्नानांप्राप्तानांसंसृतिभयमपहंतीतितथा (तत्पदारविंदंअरणंगतोस्मि) ननुत्वमतिसुखीवृथाकिंनिर्विद्यसेअतआह एतावतेति । इंद्रियलालसेनइंद्रियार्थतृष्णया । यत्येनेंद्रियलालसेनमर्त्येशरीरेआत्मदृक्आत्मबुद्धिरहम् । त्वयिचपरेपरमेश्वरेअपत्यबुद्धिरास्मि । तेनअलंपर्याप्तमिति १९ ननुकुतएतत्अहंपरमेश्वरइति तत्राह । सूतीगृहइति । अनुयुगंप्रतियुग्मंयदासुतपाःपृश्निरिति (नौआवयोः) युग्मंयदाचकश्यपोऽदितिश्चेतिनौयुग्मंअधुनाचवसुदेवोदेवकीतियुग्मंएवंहिप्रतियुग्मंअजएवाहंसंजज्ञेअवतीर्णःइतिभवान्नूनंजगाद । ननुअन्योसौचतुर्भुजोदेवइतितत्राह । नानातनूरिति । गगनवदसंगएवत्वंभूम्नःसर्वगतस्यविभूतिरूपांमायांकोवेद (हेउरुगाय) २०

॥१४४॥

श्लोकाः १२—२०

नश्वरेष्विहभावेषुतदसित्वमनश्वरम् ॥ यथाद्रव्यविकारेषुद्रव्यमात्रंनिरूपितम् १२ सत्त्वंरजस्तमइतिगुणास्तद्वृत्तयश्चयाः ॥ त्वय्यद्धाब्रह्मणिपरेकल्पिता
योगमायया १३ तस्मान्नसंत्यमीभावार्यर्हित्वय्येवकल्पिताः ॥ त्वंचामीषुविकारेषुह्यन्यदाव्यावहारिकः १४ गुणप्रवाहएतस्मिन्नबुधास्त्वखिलात्मनः ॥
गतिंसूक्ष्मामबोधेनसंसरंतीहकर्मभिः १५यदृच्छयानृतांप्राप्यसुकल्पामिहदुर्लभाम् ॥ स्वार्थेप्रमत्तस्यवयोगतंत्वन्माययेश्वर १६असावहंममैवैतेदेहेचास्या
न्वयादिषु ॥ स्नेहपाशैर्निबध्नातिभवान्सर्वमिदंजगत् १७ युवांननःसुतौसाक्षात्प्रधानपुरुषेश्वरौ ॥ भूभारक्षत्रक्षपणेअवतीर्णौतथात्थह १८ तत्तेगतोऽस्म्य
रणमद्यपदारविंदमापन्नसंसृतिभयापहमार्तबंधो ॥ एतावतालमलमिंद्रियलालसेनमर्त्यात्मदृक्त्वयिपरेयदपत्यबुद्धिः १९ सूतीगृहेननुजगादभवानजोनौ
संजज्ञइत्यनुयुगंनिजधर्मगुप्त्यै ॥ नानातनूर्गगनवद्विदधज्जहासिकोवेदभूम्नउरुगायविभूतिमायाम् २०

चूर्णिका

१२ किंच हे विभो एतेत्रयो गुणाः तद्वृत्तयश्च परेब्रह्मणि त्वयि माययाकल्पिताः संति १३ अतः वस्तुतोते त्वयि नसंति १४ एवं तव सूक्ष्मां गतिं अबुद्धा देहाभिमानेन कृतैः कर्मभिः संसरंति १५ किंच अयं जनः यदृच्छया मनुष्यदेहं प्राप्य यः स्वार्थे प्रमत्तःतस्य वयो वृथा गतम् १६ किंच असौ अहं मम एते एवं इदं जगत् त्वं स्नेहपाशैः वध्नासि १७ किंच युवां ममसुतौ न किंतु साक्षात् प्रधानपुरुषेश्वरौ १८ अतः ते पादारविंदं शरणं प्राप्तोऽस्मि अतःपरं देहे आत्मबुद्धिः त्वयि पुत्रबुद्धिश्च मास्तु १९ २०

॥१४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(प्रश्रयेणविनयेनईषन्नम्रः) २१ (समवेतार्थंयथार्थमित्यर्थः) उपमन्महेउपमन्यामहे (नःअस्मान्पुत्रान्) उद्दिश्यविषयीकृत्य (जानेवामस्येत्यादिना) तत्त्वग्रामस्तत्त्वसमूहःउदाहृतःसम्यङ्नि
रूपितः (युवांपरमेश्वरौजानेइत्यादियत्तत्त्वमुक्तंतत्सम्यगित्यर्थः)२२ इमामेवदृष्टिंसर्वत्रविधत्स्वेत्याह । अहमिति । (आर्यःसंकर्षणः) एवंविमृश्याःब्रह्मत्वेनैवान्वेषणीयाः । किंच सचराचरंजगदपि
२३ ननुनानाविकारवतांकुतोब्रह्मत्वंइत्याशंक्यब्रह्मणएवोपाधिधर्मभेदैर्बहुधाप्रतीतेरितिसदृष्टांतमाहद्वाभ्यां आत्माहीति यथाखादिभूतानितत्कृतेषु (भौतिकेषु) घटादिषुआविस्तिरोभावादियांतितत्रभू
रिभावोमहत्त्वं । एवमसावात्मापिआत्मसृष्टैःगुणैः (रजआदिभिः) कृत्वातत्कृतेषु (भूतेषुदेहेषु) बहुधाईयते । पुनश्चयथाशयंयथोपाधिआविर्भावतिरोभावादिरूपेणप्रतीयते । नवस्तुतः । कुतः ।
एकोबहुधा । स्वयंज्योतिर्दृश्यत्वेन । नित्योऽनित्यत्वेन । अन्योऽनन्यत्वेन । निर्गुणः सगुणत्वेनेत्यादिबहुधात्वंप्रपंचनीयम् २४ २५ (एवंभगवतोदाहृतंवसुदेवःश्रुत्वा) २६ (भगवन्मातृत्वात्स
वैषांदेवतापूज्येत्यर्थः) सुविस्मितासती २७ समाश्राव्यसंबोध्य २८ २९ (कालेनविध्वस्तंसत्त्वंस्वभावोब्रह्मण्यतादिलक्षणोयेषांतेषां) भूमेर्भारायमाणानांराज्ञांअर्थेतेषांनिधनार्थंमेमयिनिःलावतीर्णौ
हेआद्य ३० यस्यांशःपुरुषःतस्यांशोमायातस्याअंशागुणाःतेषांभागेनपरमाणुमात्रलेशेनविश्वोत्पत्त्यादयोभवंति ।तंत्वात्वांगतिंशरणंगतास्मि ३१

श्लोकाः २१/३१

॥ श्रीशुकउवाच ॥ आकर्ण्येत्थंपितुर्वाक्यंभगवान्सात्वतर्षभः ॥ प्रत्याहप्रश्रयानम्रःप्रहसन्श्लक्ष्णयागिरा २१ ॥ श्रीभगवानुवाच ॥ वचोवःसमवे
तार्थंतातैतदुपमन्महे ॥ यन्नःपुत्रान्समुद्दिश्यतत्त्वग्रामउदाहृतः २२ अहंयूयमसावार्यइमेचद्वारकौकसः ॥ सर्वेप्येवंयदुश्रेष्ठविमृश्याःसचराचरम् २३
आत्माह्येकःस्वयंज्योतिर्नित्योन्योनिर्गुणोगुणैः ॥ आत्मसृष्टैस्तत्कृतेषुभूतेषुबहुधेयते २४ खंवायुर्ज्योतिरापोभूस्तत्कृतेषुयथाशयम् ॥ आविस्तिरोल्पभू
र्येकोनानात्वंयात्यसावपि २५ ॥श्रीशुकउवाच॥ एवंभगवताराजन्वसुदेवउदाहृतम् ॥ श्रुत्वाविनष्टनानाधीस्तूष्णींप्रीतमनाअभूत् २६ अथतत्रकुरुश्रेष्ठ
देवकीसर्वदेवता ॥ श्रुत्वानीतंगुरोःपुत्रमात्मजाभ्यांसुविस्मिता २७ कृष्णरामौसमाश्राव्यपुत्रान्कंसविहिंसितान् ॥ स्मरंतीकृपणंप्राहवैक्लव्यादश्रुलोच
ना२८ ॥ देवक्युवाच ॥ रामरामाप्रमेयात्मन्कृष्णयोगेश्वरेश्वर ॥ वेदाहंवांविश्वसृजामीश्वरावादिपूरुषौ २९ कालविध्वस्तसत्त्वानांराज्ञामुच्छास्त्रवर्ति
नाम् ॥ भूमेर्भारायमाणानामवतीर्णौकिलाद्यमे ३० यस्यांशांशांशभागेनविश्वोत्पत्तिलयोदयाः ॥ भवंतिकिलविश्वात्मंस्तंत्वाद्याहंगतिंगता ३१

चूर्णिका

॥ श्रीशुक उवाच ॥ हे राजन् श्रीकृष्णः इत्थंपितुर्वाक्यं श्रुत्वातंप्राह २१ ॥ श्रीभगवानुवाच ॥ हेतात नः पुत्रान् उद्दिश्य त्वया तत्त्वग्रामः निरूपितः एतत् तेवचः
यथार्थं मन्यामहे २२ हे पितः अहं असौ रामः एते सर्वे एवंचराचरं विश्वं ब्रह्मत्वेन अन्वेषणीयम् २३ २४ २५ ॥ श्रीशुक उवाच ॥ एवमुक्तः वसुदेवःवि
नष्टनानाधीः सन् तूष्णी अभूत् २६ अथ देवकी आत्मपुत्राभ्यां रामकृष्णाभ्यां गुरोः पुत्रं आनीतं श्रुत्वा २७ कंसविहिंसितान् स्वपुत्रान् स्मरंती तौ आह २८
॥ देवक्युवाच ॥ हे राम हेकृष्ण युवां आदिपुरुषौ अहं जाने २९ किंच युवां भूमेः भारायमाणानां राज्ञां निधनार्थं मयि अवतीर्णौ ३० अतः युवां अहं शरणं
गतास्मि किंच गुरुणा मृतसुतादाने नोदितौ संतौ पितृस्थानात् तत्सुतौआनीतवंतौ ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(मृतस्यसुतस्यादानेआनयने । पुत्ररूपांगुरुदक्षिणां)आनिन्यथुःआनीतवंतौ । पितृस्थानात्यमसदनात् ३२ (भोजराजेनकंसेनहतान् । आनीतान्द्रष्टुमिच्छामि ३३ ३४ दैत्यराड्बलिः (प्रविष्टौरा मकृष्णौज्ञात्वा) कथंभूतौविश्वस्यात्मभूतंदैवं (आत्मनस्तुविशेषेणात्मभूतंदैवम् । तयोर्दर्शनमात्रेणयआह्लादस्तेनपरिप्लुतआशयोंतःकरणंयस्य) सान्वयःसपरिवारः ३५ (समानीयसमर्प्य) सवृंदः सपरिजनः । कथंभूतौपादौ अवनिज्य यदंबुययोरवनेजनोदकं आब्रह्मब्रह्माणमभिव्याप्यजगत्पुनत्पवित्रयत्वर्ततेतौ (हस्फुटं)३६(सःबलिःविभूतिभिः संपद्भिः अमृतंघृतंक्षीरंवा । गोत्रंपुत्रादि । आत्मदेहः) ३७ इंद्रसेनोबलिः (भगवतःपदांबुजम्) प्रेमविभिन्नयाप्रेमार्द्रयाधियाबिभ्रत्धारयन् (हेनृपहेतिस्फुटंउवाच) ३८ अनंतायशेषायबृहतेफणैकदेशेविश्वधारणात् बृहत्महान्तस्मै । कृ ष्णायचसदानंदरूपायवेधसेजगद्विधात्रे । सांख्ययोगवितानायेत्यादिपदत्रयंद्वयोरैक्यविवक्षया (साधारणम् । सांख्ययोगयोर्ज्ञानकर्मणोर्वितानोविस्तारोयस्मात्तस्मै) (यद्वासांख्यंकापिलं योगः पा तंजलंतयोर्वितानोवस्तुतोयस्मात्) ३९ योगेश्वराणामपिदुर्दर्शौयुवांअस्माभिर्दृष्टावित्येतन्नातिचित्रमित्याह । दर्शनमिति । दुःप्रापमपियुष्मत्कृपयाकेषांचिदतिदुर्लभम् (सत्) सुलभमपिभवतितदा ह । रजस्तमःस्वभावानामिति । नः (अस्माकम्) दर्शनंप्राप्तौ ४० अहोविद्विषोवयंसात्विकभक्तेभ्योपिसभाग्याइत्याह । दैत्येत्यादित्रिभिः ४१

॥१४६॥

श्लोकाः ३२/४१

चिरान्मृतसुतादानेगुरुणाकिलचोदितौ ॥ आनिन्यथुःपितृस्थानाद्गुरवेगुरुदक्षिणाम् ३२ तथामेकुरुतंकामंयुवांयोगेश्वरेश्वरौ ॥ भोजराजहतान्पुत्रान् कामयेद्रष्टुमाहृतान् ३३ ॥ श्रीशुकउवाच ॥ एवंसंनोदितोमात्रारामःकृष्णश्चभारत ॥सुतलंसंविविशतुर्योगमायामुपाश्रितौ ३४ तस्मिन्प्रविष्टावुप लभ्यदैत्यराट्विश्वात्मदैवंसुतरांतथात्मनः ॥ तद्दर्शनाह्लादपरिप्लुताशयःसद्यःसमुत्थायननामसान्वयः ३५ तयोःसमानीयवरासनंमुदानिविष्टयोस्तत्रमहा त्मनोस्तयोः ॥ दधारपादाववनिज्यतज्जलंसवृंदआब्रह्मपुनद्यदंबुह ३६ समर्हयामाससतौविभूतिभिर्महार्हवस्त्राभरणानुलेपनैः ॥ तांबूलदीपामृतभक्षणा दिभिःस्वगोत्रवित्तात्मसमर्पणेनच ३७ सइंद्रसेनोभगवत्पदांबुजंबिभ्रन्मुहुःप्रेमविभिन्नयागिरा ॥ उवाचहानंदजलाकुलेक्षणःप्रहृष्टरोमानृपगद्गदाक्षरः ३८ ॥ बलिरुवाच ॥ नमोऽनंतायबृहतेनमःकृष्णायवेधसे ॥ सांख्ययोगवितानायब्रह्मणेपरमात्मने ३९ दर्शनंवांहिभूतानांदुष्प्रापंचातिदुर्लभम् ॥ रजस्तमःस्वभावानांयन्नःप्राप्तौयदृच्छया ४० दैत्यदानवगंधर्वाःसिद्धविद्याध्रचारणाः ॥ यक्षरक्षःपिशाचाश्चभूतप्रमथनायकाः ४१

चूर्णिका

३२ तथा मे कामं कुरुतं कंसहतान् पुत्रान् द्रष्टुं इच्छामि ३३ ॥ श्रीशुकउवाच ॥ एवं मात्रा नोदितौ रामकृष्णौ सुतलंगतौ संतौ बलेः सद्म विविशतुः ३४ तदा बलिः तौ उपलभ्य सद्यः उत्थाय सान्वयः ननाम ३५ तयोः वरासनं दत्त्वा तत्र निविष्टयोः तयोः पादौ प्रक्षाल्य तज्जलं सकुटुंबः दधार ३६ ततः तौ प्रति वस्त्राभरणादिभिः पूजयामास ३७ ततः बलिः भगवत्पदांबुजं बिभ्रत्सन् गद्गदाक्षरं उवाच ३८ ॥ बलिरुवाच ॥ नमोऽनंताय बृहते नमः कृष्णाय वेधसे सांख्ययोगवि तानाय ब्रह्मणे परमात्मने ३९ किंच रजस्तमःस्वभावानां नः तव दर्शनं दुर्लभम् ४० किंच दैत्यदानवादयो त्वयि नित्यं बद्धवैराः ते तादृशाः वयं अन्ये च यथा त्व दात्मतां प्राप्ताः तथा देवादयः सत्त्वाविष्टा अपि त्वदात्मतां न प्राप्ताः ४१

॥१४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१४७॥

(विशुद्धंसत्त्वमेवधामशरीरंयस्यतस्मिन्अतएवाद्धासाक्षात्त्वयि तेरजस्तमःस्वभावा दैत्याद्या नित्यंनिबद्धवैरा अन्येच चैद्यशाल्वादयस्तादृशाः । शास्त्रंवेदरूपंशरीरमस्यास्तीतितथातस्मिन्) ४२ उ
द्बद्धवैरेण (निरंतरद्वेषेण) याभक्तिस्तया केचनेति चैद्यादयः । कामतोभक्त्यागोप्यादयोयथासंनिकृष्टास्त्वदात्मतांप्राप्ताः । तथासत्त्वसंरब्धाःसत्त्वाविष्टाअपिसुरादयोनसंनिकृष्टाइति ४३ ननुसा
त्विकेभ्योपिराजसादयःसन्निकृष्टा इतिचित्रंतत्राह । इदमित्थमिति (तवयोगमायांइदमितिस्वरूपतःइत्थमिति) विशेषतश्च (योगेश्वराअपिनाविदंति) ४४ तदेवंयद्यपिवैरभावेनापित्वत्प्राप्तिर्भवेत्
तथापिमांसात्विकंकुर्वितिप्रार्थयते।तन्नइति। तत्तथानःप्रसीद । यथानिरपेक्षैराप्तकामैरपिविमृग्यंयुष्मत्पादारविंदंतदेवधिषणंधिष्ण्यमाश्रयस्तस्मादन्यद्गृहंतदेवांधकूपःतस्मान्निष्क्रम्यनिर्गत्यविश्वस्यशरणं
रक्षितारोवृक्षास्तेषामंघ्रिषुमूलेषुस्वतएवगलितैःफलादिभिःउपलब्धाप्राप्तावृत्तिर्जीविकायेनसोहंशांतःसन्एकएवचरामि । उतअथवासर्वेषांसखायोयेमहांतस्तैःसहयथाचरामीति ४५ कथमल्पपुण्यानामेवं
भावःसंभवतीतिचेत्तर्हियथैतत् भवेत्तथास्मान्अनुशिक्षयेत्याह शाधीति । हेप्रभोईशितव्याःसर्वेजीवास्तेषामीश । यत्तवानुशासनमातिष्ठन्आश्रयन्चोदनायाविधिनिषेधलक्षणायाःसकाशात् ।
विमुच्यते नखलुत्वद्भक्तोविधिकिंकरःस्यादितिभावः ४६ तदुक्तंसर्वमनुमोद्यस्वागमनकारणंसप्रपंचंकथयति आसन्नितिपंचभिः । ऊर्णायांभार्यायांप्रथमेंतरेस्वायंभुवमन्वंतरेतेदेवाःसुतांवाचंयभितुंयब्धुंमै
थुनेनक्रीडितुमुद्यतंउद्युक्तंकंप्रजापतिंजहसुःउपहासितवंतः ४७ तेनउपहासलक्षणेनावद्यकर्मणापापेनआसुरींयोनिमगन्अधुनातत्क्षणमेवहिरण्यकशिपोर्जाताइत्यर्थः । तेचयोगमाययाततोनीताःसंतः
४८ देवक्याउदरेजाताः । हेराजन्हेबलेतेचकंसेनविहिंसिताः । साचतान्आत्मजान्मत्वाशोचति । तेचेमेतवांतिकेअध्यासते ४९ लोकंदेवलोकं (विज्वराविशोकाः) ५०

श्लोकाः ४२/५०

विशुद्धसत्त्वधाम्न्यद्धात्वयिशास्त्रशरीरिणि ॥ नित्यंनिबद्धवैरास्तेवयंचान्येचतादृशाः ४२ केचनोद्बद्धवैरेणभक्त्याकेचनकामतः ॥ नतथासत्त्वसंरब्धाः
संनिकृष्टाःसुरादयः ४३ इदमित्थमितिप्रायस्तवयोगेश्वरेश्वर ॥ नविदंत्यपियोगेशायोगमायांकुतोवयम् ४४ तन्नःप्रसीदनिरपेक्षविमृग्ययुष्मत्पादारविंद
धिषणान्यगृहांधकूपात् ॥ निष्क्रम्यविश्वशरणांघ्र्युपलब्धवृत्तिःशांतोयथैकउतसर्वसखैश्चरामि ४५ शाध्यस्मानीशितव्येशनिष्पापान्कुरुनःप्रभो ॥
पुमान्यच्छ्रद्धयातिष्ठंश्चोदनायाविमुच्यते ४६ ॥ श्रीभगवानुवाच ॥ आसन्मरीचेःषट्पुत्राऊर्णायांप्रथमेंतरे ॥ देवाःकंजहसुर्वीक्ष्यसुतांयभितुमुद्यतम्
४७ तेनासुरीमगन्योनिमधुनाऽवद्यकर्मणा ॥ हिरण्यकशिपोर्जातानीतास्तेयोगमायया ४८ देवक्याउदरेजाताराजन्कंसविहिंसिताः ॥ सातान्शोचत्या
त्मजान्स्वांस्तइमेऽध्यासतेंऽतिके ४९ इतएतान्प्रणेष्यामोमातृशोकापनुत्तये ॥ ततःशापाद्विनिर्मुक्ताल्लोकंयास्यंतिविज्वराः ५०

चूर्णिका

४२ ४३ हे योगेश्वर योगेशाः तव योगमायां न विंदंति वयं तु कुतः हे भगवन् नः शिक्षय निष्पापान् कुरु ४४ ४५ ४६ ॥ श्रीभगवानुवाच ॥ हे बले स्वायं
भुवमन्वंतरे मरीचेः सकाशात् ऊर्णायां षट्पुत्राः आसन् ते सुतां यभितुमुद्यंतं ब्रह्माणं जहसुः ४७ ततः ते तेन पापेन आसुरीं योनिं प्राप्ताः संतः हिरण्यकशिपोः
सकाशात् जाताः तस्मात् ते योगमायया नीताः संतः ४८ देवक्याउदरे जाताः तेच कंसेन विहिंसिताः अतः सा तान् शोचति ते इमे तवांतिके अध्यासते ४९ अतः
इतः मातृशोकापनुत्तये एतान् प्रणेष्यामः ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्मरोद्गीथःस्मरसहितउद्गीथः (यद्वासंधिरार्षः) सद्गतिंमोक्षम् । स्मरस्यैवपूर्वकीर्तिमानितिनाम अतः कीर्तिमंतंप्रथमजंकंसायानकदुंदुभिः । अर्पयामासेत्युक्तम् ५१ (इंद्रसेनेनबलिना) अयच्छतांअ
र्पयामासतुः ५२ ५३ (प्रीतासंतुष्टा । स्नुतस्पर्शेनपरिस्नुतास्पर्शजन्यसुखेनव्याप्तेत्यर्थःययामायया । तत्रैकस्यामोहेकिंचित्रमित्यर्थः) ५४ अमृतत्वेहेतुः । गदाभृतःश्रीकृष्णस्यपीतशेषमिति । नारा
यणांगसंस्पर्शेनप्रतिलब्धंदेवावयमित्यात्मदर्शनंयैस्ते ५५ (दिवौकसां) धामदेवलोकम् ५६ (आगमनंचनिर्गमश्चद्वंद्वैक्यम्) मृतानांआगमनंपुनर्निर्गमंच (दृष्ट्वा) श्रीकृष्णस्यमायांमेनेतेनैवाप
त्यादिरूपेणरचिताम् (गतमोहासीदित्यर्थः) ५७ ५८ अमृतंकीर्तिर्यस्यतस्य । व्यासपुत्रैरितिबहुवचनंपूजार्थम् । जगतांअघंभिनत्तीतितथातत् । अलंनिःशेषंयथाभवतितथा । नतुकृच्छ्रादिवत्स
शेषम् । तदेवंमोक्षहेतुत्वंसमूलपापक्षयहेतुत्वंचोक्तम् । तद्भक्तानांतुसत्कर्णपूरंपरमसुखावहंकर्णाभरणमितिस्वयंसुखरूपतामाह । किंच भगवतिकृतमावेशितंचित्तंयेनसतथाभूत्वातस्यक्षेमधामकालादिभय
रहितंलोकंयातीति ५९ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांपंचाशीतितमोऽध्यायः ८५ ॥ ॥ छ ॥ ॥ षडशीतितमेदंभात्सुभद्रामर्जुनोऽहरत् ॥ गत्वाचमिथिलांकृष्णो
नृपविप्रावनंदयत् ॥ १ ॥ पित्रोःस्वज्ञानमादिश्यसुभद्रांफाल्गुनायच ॥ जगाममिथिलांकृष्णःस्वभक्तप्रियकृत्तमः ॥ २ ॥ देवक्यामृतपुत्रलाभवत् अर्जुनस्यसुभद्रालाभोपिरामप्रातिकूल्यात्दुर्घटइति
मन्यमानःप्रसंगात्पृच्छति ब्रह्मन्निति (विजयोऽर्जुनः) १

श्लोकाः ५१/१

स्मरोद्गीथःपरिष्वंगःपतंगःक्षुद्रभुग्घृणी ॥ षडिमेमत्प्रसादेनपुनर्यास्यंतिसद्गतिम् ५१ इत्युक्तातान्समादायइंद्रसेनेनपूजितौ ॥ पुनर्द्वारवतीमेत्यमातुःपुत्रा
नयच्छताम् ५२ तान्दृष्ट्वाबालकान्देवीपुत्रस्नेहस्नुतस्तनी ॥ परिष्वज्यांकमारोप्यमूर्ध्न्यजिघ्रदभीक्ष्णशः ५३ अपाययत्स्तनंप्रीतासुतस्पर्शपरिस्नुता ॥
मोहितामाययाविष्णोर्ययासृष्टिःप्रवर्तते ५४ पीत्वाऽमृतंपयस्तस्याःपीतशेषंगदाभृतः ॥ नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ५५ तेनमस्कृत्यगो
विंदंदेवकींपितरंबलम् ॥ मिषतांसर्वभूतानांययुर्धामदिवौकसाम् ५६ तद्दृष्ट्वादेवकीदेवीमृतागमननिर्गमम् ॥ मेनेसुविस्मितामायांकृष्णस्यरचितांनृप
५७ एवंविधान्यद्भुतानिकृष्णस्यपरमात्मनः ॥ वीर्याण्यनंतवीर्यस्यसंत्यनंतानिभारत ५८ ॥ सूतउवाच ॥ यइदमनुशृणोतिश्रावयेद्वामुरारेश्चरितममृत
कीर्तेर्वर्णितंव्यासपुत्रैः ॥ जगदघभिदलंतद्भक्तसत्कर्णपूरंभगवतिकृतचित्तोयातितत्क्षेमधाम ५९ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेपंचाशीति
तमोध्यायः ८५ ॥ ॥ छ ॥ ॥ राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामःस्वसारंरामकृष्णयोः ॥ यथोपयेमेविजयोयाममासीत्पितामही १

चूर्णिका

ते च स्मरः प्रथमः उद्गीथः द्वितीयः परिष्वंगः तृतीयः पतंगः चतुर्थः क्षुद्रभुक् पंचमः घृणी षष्ठः इमे मत्प्रसादेन सद्गतिं यास्यंति ५१ इत्युक्त्वा तान् आदाय पुनःद्वारव
तीं एत्य मातुः पुत्रान् अयच्छताम् ५२ ततो देवकी तान् पुत्रान् दृष्ट्वा अंकं आरोप्य परिष्वज्य प्रीता सती स्तनं अपाययत् ५३ ५४ ततः तेतस्याः अमृतमयं पयःपीत्वा
नारायणांगस्पर्शेन देवा लब्धज्ञानाः संतः गोविंदं देवकीं वसुदेवं रामंच नमस्कृत्य सर्वभूतानां पश्यतां सतां देवलोकं ययुः ५५ ५६ तत् दृष्ट्वा देवकी कृष्णस्यमायां मेने
५७ हे राजन् एवं विधानि वीर्याणि अनंतस्य अनंतानि संति ५८ ॥ सूत उवाच ॥ इदं व्यासपुत्रेण वर्णितं मुरारेः चरित्रं यः शृणोति श्रावयेद्वा सः भगवति कृतचि
त्तः सन् तद्धाम याति ५९ ॥ इति दशमे पंचाशीतितमः ८५ ॥छ॥ ॥ राजोवाच ॥ हे ब्रह्मन् अर्जुनः रामकृष्णयोः स्वसारं सुभद्रां उपयेमे एतद्वेदितुं इच्छामः १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(आत्मनःमातुलेयींमातुलकन्याम्) २ कथमशृणोत् तदाह दुर्योधनायेति । अपरेवसुदेवादयोनदास्यंतीति । तल्लिप्सुःतस्यांमातुलेय्यांलिप्सुःरामंवंचयितुं पूज्यतमंत्रिदंडिवेषंविधायगतइत्याह । सयतिरिति ३ स्वार्थसाधकःकन्यांप्रेप्सुः (वार्षिकान्वर्षाकालेभवान्) ४ तमातिथ्येननिमंत्र्यगृहमानीयबलेनरामेणयच्छ्रद्धयोपहृतंपरिविष्टंतद्भैक्ष्यंकिलार्जुनोबुभुजेइत्यन्वयः ५ भावेनरत्यभिप्रायेणक्षुभितंमनोदधे ६ व्रीडितापांगीसव्रीडकटाक्षा । तस्मिन्नेवन्यस्तंहृदयमीक्षणंचययासा ७ (तामेवसमनुचिंतयन्) अंतरंहर्तुमवसरंप्रेप्सुःप्राप्तुमिच्छुःकामेनभ्रमचित्तंयस्यसः । शं रामादिसंमाननिमित्तंसुखं (नलेभे तत्कृतादरोऽस्मैनरुरुचेइत्यर्थः) ८ (दुर्गमस्थानाद्बहिर्निर्गतां । पित्रोःकृष्णस्यचानुमतिंगृहीत्वेत्यर्थः) ९ आसमंतात्रुंधतःआवरणंकुर्वतः १० ११ पारिबर्हाणिवरवध्वोःप्रीतिदेयानि (महाधनामहामूल्यायेउपस्करास्तान्नरयोषितःदासान्दासीश्चददावित्यर्थः) १२ १३ (विदेहदेशेषुमिथिलायांनगर्यां) अनीहयाअनुद्यमेनैवागतंप्राप्तंयदाहार्यंभोज्यंतेननिर्वर्तितानिजाक्रियायेनसः (अयाचितवृत्तिरित्यर्थः) १४

श्लोकाः २/१४

श्रीशुकउवाच ॥ अर्जुनस्तीर्थयात्रायांपर्यटन्नवनींप्रभुः ॥ गतःप्रभासमशृणोन्मातुलेयींसआत्मनः २ दुर्योधनायरामस्तांदास्यतीतिनचापरे ॥ तल्लिप्सुःसयतिर्भूत्वात्रिदंडीद्वारकामगात् ३ तत्रैववार्षिकान्मासानन्यवासीत्स्वार्थसाधकः ॥ पौरैःसभाजितोभीक्ष्णंरामेणाजानताचसः ४ एकदागृहमानीयआतिथ्येननिमंत्र्यतम् ॥ श्रद्धयोपहृतंभैक्ष्यंबलेनबुभुजेकिल ५ सोपश्यत्तत्रमहतींकन्यांवीरमनोहराम् ॥ प्रीत्युत्फुल्लेक्षणस्तस्यांभावक्षुब्धंमनोदधे ६ सापितंचकमेवीक्ष्यनारीणांहृदयंगमम् ॥ हसंतीव्रीडितापांगीतन्न्यस्तहृदयेक्षणा ७ तांपरंसमनुध्यायन्नंतरंप्रेप्सुरर्जुनः ॥ नलेभेशंभ्रमच्चित्तःकामेनातिबलीयसा ८ महत्यांदेवयात्रायांरथस्थांदुर्गनिर्गताम् ॥ जहारानुमतःपित्रोःकृष्णस्यचमहारथः ९ रथस्थोधनुरादायशूरांश्चारुंधतोभटान् ॥ विद्राव्यक्रोशतांस्वानांस्वभागंमृगराडिव १० तच्छ्रुत्वाक्षुभितोरामःपर्वणीवमहार्णवः ॥ गृहीतपादःकृष्णेनसुहृद्भिश्चान्वशाम्यत ११ प्राहिणोत्पारिबर्हाणिवरवध्वोर्मुदाबलः ॥ महाधनोपस्करेभरथाश्वनरयोषितः १२ ॥ श्रीशुकउवाच ॥ कृष्णस्यासीद्द्विजश्रेष्ठःश्रुतदेवइतिश्रुतः ॥ कृष्णैकभक्त्यापूर्णार्थःशांतःकविरलंपटः १३ सउवासविदेहेषुमिथिलायांगृहाश्रमी ॥ अनीहयागताहार्यनिर्वर्तितनिजक्रियः १४

चूर्णिका

॥ श्रीशुक उवाच ॥ अर्जुनः तीर्थयात्रायां पृथ्वीं पर्यटन् प्रभासं गतः २ तत्र रामः सुभद्रां दुर्योधनाय दास्यति अपरे वसुदेवादयो नेत्यशृणोत् तां सुभद्रां इच्छुः अर्जुनः त्रिदंडी यतिर्भूत्वा द्वारकां अगात् ३ तत्र द्वारकायां वार्षिकान् मासान् उवास ४ ततः एकदा अजानता रामेण तं यतिं गृहं आनीय श्रद्धया परिविष्टं भैक्ष्यं अर्जुनः बुभुजे ५ तदा सोऽर्जुनः तत्र महतीं कन्यां वीक्ष्य तस्यां भावक्षुब्धं मनो दधे ६ सापि तं वीक्ष्य हसंती सती तं चकमे ७ ततोऽर्जुनः तां हर्तुं अवसरं प्रेप्सुः कामेन भ्रमच्चित्तःसन् शं नलेभे ८ ततः एकदा देवयात्रायां रथस्थां तां अर्जुनः पित्रोः कृष्णस्यचानुमतेन रथस्थः सन् धनुरादाय आवरणं कुर्वतो भटान् विद्राव्य स्वभागं सिंह इव जहार ९ १० तच्छ्रुत्वा क्षुभितो रामः कृष्णेन गृहीतपादः अन्वशाम्यत ११ ततः बलः वरवध्वोः महाधनोपस्करेभरथाश्वनरयोषितः पारिबर्हाणि प्राहिणोत् १२ ॥ श्रीशुक उवाच ॥ हे राजन् श्रीकृष्णस्य सखा श्रुतदेव इति विप्रः आसीत् १३ सः गृहास्थाश्रमी शांतः सन् मिथिलायां उवास सः दैवात् लब्धेन संतुष्टः सन् यथोचिताः क्रियाः चक्रे १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यात्रामात्रंशरीरादिनिर्वाहमात्रंभोज्यंउपनमतितंप्रत्यागच्छति (तावतैवतुष्टःसन्यथोचिता वैश्वदेवाद्याः) १५ मिथिलस्यजनकस्यवंश्योमैथिलः १६ प्रभुरेवस्वयंविदेहान्देशान्प्रययौ (मुनिभिःसाकं रथमारुह्य) १७ कृष्णोव्यासः । रामोभार्गवः । अहंशुकःएवमादिभिःसह १८ (ग्रहैःसहोदितंसूर्यमिवमुनिभिःसहितंतंसार्धहस्ताःसोपायनपाणयइत्यर्थः) १९ आनर्ताद्यर्णातास्तत्तद्देशवर्तिनो नराश्चनार्यश्चउदारहासंस्निग्धमीक्षणंयस्मिन्तच्चतत् । दृशिभिर्नेत्रैः २० स्ववीक्षणेनैवविनष्टंतमिस्रं (यासांतथाविधानिर्मला) दृशोयेषांतेभ्यःक्षेमंअभयंअर्थदृशंतत्त्वज्ञानंच(ददत्)दिगंताअपिधवलाःशुद्धा येनतादृशंशुद्धंसुरैर्नृभिश्चगीतंअशुभघ्नंपापहरंशृण्वन्) २१ अभीयुःप्रत्युज्जग्मुः २२ प्रीत्याउत्फुल्लानि (विकसितानिआननानि) आशयाअंतःकरणानिचयेषां (तेधृताअंजलयोयेषुतैः) कैःशिरोभिः (प्रणेमुः) २३ (मन्वानौविदंतौ) २४ (संहतांजलीसंतौएकदैवन्यमंत्रयतामित्यर्थः आतिथ्येनआतिथ्यायेत्यर्थः) २५ तन्निमंत्रणमभिप्रेत्यअंगीकृत्यतत्तदाउभाभ्यामपिताभ्यांमद्गृहादन्यस्यगेहं यातीत्यलक्षितः । अविदितः (किंतुप्रीत्यामद्गृहमेवायमायातीतिलक्षितइत्यर्थः) यद्वाउभाभ्यांरूपाभ्यां (आविशत्) तदलक्षितःताभ्यामलक्षितइति २६

॥१५०॥

श्लोकाः १५—२६

यात्रामात्रंत्वहरहर्दैवादुपनमत्युत ॥ नाधिकंतावतातुष्टःक्रियाश्चक्रेयथोचिताः १५ तथातद्राष्ट्रपालोंगबहुलाश्वइतिश्रुतः ॥ मैथिलोनिरहंमानउभावप्य च्युतप्रियौ १६ तयोःप्रसन्नोभगवान्दारुकेणाहृतंरथम् ॥ आरुह्यसाकंमुनिभिर्विदेहान्प्रययौप्रभुः १७ नारदोवामदेवोत्रिःकृष्णोरामोऽसितोऽरुणिः ॥ अहंबृहस्पतिःकण्वोमैत्रेयश्च्यवनादयः १८ तत्रतत्रतमायांतंपौराजानपदान्नृपाः ॥ उपतस्थुःसार्घहस्ताग्रहैःसूर्यमिवोदितम् १९ आनर्तधन्वकुरुजांगलकं कमत्स्यपांचालकुंतिमधुकेकयकोशलार्णाः ॥ अन्येचतन्मुखसरोजमुदारहासस्निग्धेक्षणंनृपपपुर्दृशिभिर्नृनार्यः २० तेभ्यःस्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमंत्रिलोकगुरुरर्थदृशंचयच्छन् ॥ शृण्वन्दिगंतधवलंस्वयशोऽशुभघ्नंगीतंसुरैर्नृभिरगाच्छनकैर्विदेहान् २१ तेऽच्युतंप्राप्तमाकर्ण्यपौराजानपदान्नृप ॥ अभीयुर्मुदितास्तस्मैगृहीतार्हणपाणयः २२ दृष्ट्वातउत्तमश्लोकंप्रीत्युत्फुल्लाननाशयाः ॥ कैर्धृतांजलिभिर्नेमुःश्रुतपूर्वांस्तथामुनीन् २३ स्वानुग्रहायसंप्राप्तं मन्वानौतंजगद्गुरुम् ॥ मैथिलःश्रुतदेवश्चपादयोःपेततुःप्रभोः २४ निमंत्रयेतांदाशार्हमातिथ्येनसहद्विजैः ॥ मैथिलःश्रुतदेवश्चयुगपत्संहतांजली २५ भगवांस्तदभिप्रेत्यद्वयोःप्रियचिकीर्षया ॥ उभयोराविशद्गेहमुभाभ्यांतदलक्षितः २६

चूर्णिका

१५ तथा बहुलाश्व इति श्रुतः तद्राष्ट्रपालः आसीत् १६ एतौ उभावपि अच्युतप्रियौ अतः तयोः प्रसन्नो भगवान् रथं आरुह्य मुनिभिः सह विदेहान् प्रययौ ते च ऋषयः नारदः वामदेवः अत्रिः व्यासः भार्गवरामः शुकः असितः अरुणिः बृहस्पतिः कण्वः मैत्रेयः च्यवनादयः १७ १८ एवमादिमुनिभिः सह प्राप्तं श्रीकृष्णं श्रुत्वा पौराः जानपदाः सार्घहस्ताः उपतस्थुः १९ ततः आनर्तादिदेशवर्तिन्यो नृनार्यः दृग्भिः तन्मुखकमलं पपुः २० सः कृष्णोपि तेभ्यः अभयं यच्छन् तैः गीतं स्वयशः शृण्वन् विदेहान् ययौ २१ ततः ते पौराः जानपदाः प्राप्तं अच्युतं आकर्ण्य प्रत्युज्जग्मुः २२ ततः ते उत्तमश्लोकं दृष्ट्वा कृष्णं ऋषींश्च शिरोभिः प्रणेमुः २३ तथा मैथिलश्रुतदेवौ स्वानुग्रहाय प्राप्तं कृष्णं मत्वा तस्य पादयोः पेततुः २४ ततः मैथिलःश्रुतदेवश्च युगपत् द्विजैः सह कृष्णं आतिथ्येन निमंत्रयेताम् २५ ततः भगवान् तत् अंगीकृत्यद्वयोः प्रियचिकीर्षया उभाभ्यां अलक्षितः सन् उभयोर्गृहं प्राविशत् २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(असतांश्रोतुमपिदूरान्श्रवणेंद्रियस्याप्यविषयान् । महत्मनोयस्यसः । येषांश्रवणमपिदुर्लभंतेस्वगृहागताइतिहर्षातिशयान्महामनाइत्यर्थः) २७ उद्धर्षउद्गतहर्षंहृदयंयस्य । अस्रैराविलेक्लिन्नेईक्षणे यस्यसएवसच २८ ईश्वरान् ईश्वरंतत्तुल्यान्-(-मुनींश्चेत्यर्थः । गंधादिभिःपूजयामास तत्रआकल्पआभरणशोभा । अर्घःपूजाविधिः) २९ (अन्नेनतर्पितान्) प्रीणन्प्रीणयन्संस्पृशन्संमर्दयन् (विष्णोर्जगदात्मनः) ३० आत्माचेतयिता । साक्षीप्रकाशकः । स्वदृक्स्वप्रकाशःअथअतःकारणात् (दर्शनंगतोसि) ३१ (ऋतंसत्यंकर्तुंअस्मदृग्विषयोजातः । एकांतोऽव्यभिचारीतादृशाद्भक्तात्) अनंतोबंधुरपिश्रीर्भार्यापिअजःपुत्रोपि ३२ (एवंवेत्तीतितथासन्कः । निष्किंचनानांएकांतभक्तानांशांतानांस्वस्थमनसांआत्मानमपिददातीत्यात्मदः) ३३ तच्छांत्यैसंसारोपशमाय ३४ (अकुंठमेधसेअपरिच्छिन्नबुद्धये । सुशांतंलोकहितावहं । ईयुषेप्राप्तवतेआचरतेइत्यर्थः) ३५ (अस्माकं) गृहान् गृहेष्वित्यर्थः (द्विजैःसमेतैःसह) ३६ ३७ (जनकोमैथिलइवहर्षातिशयवशात्) धुन्वन्परिभ्रामयन् (वासउत्तरीयांबरं) ३८ (आनीतेषुतृणपीठबृसिषु । "व्रतिनामासनंबृसिरि"त्यमरः । अंघ्रीन्) अवनिजेअवनिनिजेप्रक्षालितवान् ३९

॥१५१॥

श्लोकाः २७/३९

श्रोतुमप्यसतांदूराञ्जनकःस्वगृहागतान् ॥ आनीतेष्वासनाग्र्येषुसुखासीनान्महामनाः २७ प्रवृद्धभक्त्याउद्धर्षहृदयास्राविलेक्षणः ॥ नत्वातदंघ्रीन्प्रक्षाल्यतदपोलोकपावनीः २८ सकुटुंबोवहन्मूर्ध्नापूजयांचक्रईश्वरान् ॥ गंधमाल्यांबराकल्पधूपदीपार्घगोवृषैः २९ वाचामधुरयाप्रीणन्निदमाहान्नतर्पितान् ॥ पादावंकगतौविष्णोःसंस्पृशन्शनकैर्मुदा ३० ॥ राजोवाच ॥ भवान्हिसर्वभूतानामात्मासाक्षीस्वदृक्प्रभो ॥ अथनस्त्वत्पदांभोजंस्मरतांदर्शनंगतः ३१ स्ववचस्तदृतंकर्तुमस्मद्दृग्गोचरोभवान् ॥ यदात्थैकांतभक्तान्मेनानंतःश्रीरजःप्रियः ३२ कोनुत्वच्चरणांभोजमेवंविद्विसृजेत्पुमान् ॥ निष्किंचनानांशांतानांमुनीनांयस्त्वमात्मदः ३३ योवतीर्ययदोर्वंशेनृणांसंसरतामिह ॥ यशोवितेनेतच्छांत्यैत्रैलोक्यवृजिनापहम् ३४ नमस्तुभ्यंभगवतेकृष्णायाकुंठमेधसे ॥ नारायणायऋषयेसुशांतंतपईयुषे ३५ दिनानिकतिचिद्भूमन्गृहान्नोनिवसन्द्विजैः ॥ समेतःपादरजसापुनीहीदंनिमेःकुलम् ३६ इत्युपामंत्रितोराज्ञाभगवाँल्लोकभावनः ॥ उवासकुर्वन्कल्याणंमिथिलानरयोषिताम् ३७ श्रुतदेवोच्युतंप्राप्तंस्वगृहाञ्जनकोयथा ॥ नत्वामुनीन्सुसंहृष्टोधुन्वन्वासोननर्तह ३८ तृणपीठबृसिष्वेतानानीतेषूपवेश्यसः ॥ स्वागतेनाभिवंद्यांघ्रीन्सभार्योऽवनिजेमुदा ३९

चूर्णिका

ततो जनकः गृहागतान् तान् सह कृष्णान् मुनीन्नत्वा तदंघ्रीन् प्रक्षाल्य तदपः सकुटुंबः मूर्ध्ना वहन् गंधमाल्यादिभिः तान् संपूज्य अंकगतौ पादौ संमर्दयन् उवाच २७ २८ २९ ३० ॥ राजोवाच ॥ हे भगवन् त्वं भूतानां आत्मासि ३१ ३२ अतः त्वच्चरणांभोजं कोनु पुमान् विसृजेत् ३३ यः भगवान् यदुवंशे अवतीर्य यशःवितेने ३४ तस्मै कृष्णाय तुभ्यं नमः किंच हे भूमन् मुनिभिः सह कतिचिद्दिनानि नःगृहान् उषित्वा पादरजसा निमेः कुलं पुनीहि ३५ ३६ इति राज्ञा उपामंत्रितः भगवान् पौराणां कल्याणं कुर्वन् उवास ३७ तथा श्रुतदेवोपि स्वगृहान् मुनिभिः सह प्राप्तं अच्युतं नत्वा संहृष्टः सन् वासोधुन्वन् ननर्त ३८ ततः तान् तृणपीठादिषु उपवेश्य तदंघ्रीन् प्रक्षाल्य तदंभसा आत्मानं स्वगृहान्वयं स्नापयांचक्रे ३९

॥१५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(तदंभसाअवनेजनजलेनसगृहंसान्वयंआत्मानंस्नापितवान् । तदालब्धाःसर्वेमनोरथायेन) ४० फलैरामलकादिभिरर्हणेनउशीरैस्तृणविशेषमूलैःसुवासितैः (शिवामृतांबुभिः) शिवैःस्वच्छैःअमृतवत्स्वादुभिश्चांबुभिः सुरभ्यामृदाकस्तूरीप्रमुखया । सपर्ययापूजयायथोपपन्नयाअनायासेनसंपन्नयाभूतानुपद्रवलब्धत्वात् सत्त्वविवर्धनं (सत्त्वंविवर्धयतीतितथाभूतंसात्त्विकं) यदंधःअन्नंतेनच ४१ (अहो कृष्णेन) अस्यकृष्णस्यआत्मामूर्तिस्तस्यनिकेतैः (सदनैः) भूसुरैश्च (भगवद्भक्तैर्मुनिभिश्चेत्यर्थः) सर्वेषांतीर्थानामास्पदभूताःपादरेणवोयेषांकृष्णादीनांतैर्यःसंगमःसममकुतोन्वभूदिति । अन्विति विस्मये । यद्वा आइतिवितर्के नुइतिविस्मये ४२ (कृतमातिथ्यंयेषांतान्) उपस्थितः तत्समीपउपविष्टः भार्याभर्तव्याःस्वजनाअपत्यानिचतैःसहितः श्रीकृष्णस्यांघ्रिमभिमृशतिसंमर्दयतीत्यंघ्र्यभिमर्शनः ४३ यर्हीदंप्रविष्टस्तदैवास्माकंदर्शनंप्राप्तःनकेवलमद्योति । सएवसन्मात्रोद्यतनीभूतस्त्वमसीत्यर्थः । यद्वानःअस्मान्अद्यैवप्राप्तइतिन । किंतुतदैवप्राप्तःयर्हीदंविश्वंशक्तिभिःसत्त्वादिभिःसृष्ट्वास्वसत्तयानुप्रविष्टस्त्वं (घटःसन्पटःसन्इतिसर्वत्रसत्तानुगमात्) त्वद्दर्शनंतुपरंकेवलंअद्यैवप्राप्तइति (हेपरमपूरुष) ४४ मायासृष्टिप्रवेशयोरविद्यासृष्टिप्रवेशौदृष्टांततयाह यथेति । मनोरूपयाआत्ममाययास्वाविद्यया यद्वा आत्मनस्तवमाययेति (स्वाप्नंस्वप्नसंबंधिनंलोकंनिर्माय) ४५ किंचशृण्वतामिति । नित्यंश्रवणकीर्तनादिपराणाममलात्मनामपिहृद्येवत्वंभासिममतुलोचनगोचरस्त्वमहोभाग्यमितिभावः (त्वात्वां । स्वंवदतांअन्योन्यंकथयताम्) ४६ ननुसर्वेषांहृदिस्थितःकथंकेषांचिदेवहृदिभाति । मेघैःसूर्यवत्जीवोपाधिभिरंतरितत्वादितियद्युच्येततर्हिनकस्यापिभायादित्यतआह । हृदिस्थोपीति । कर्मभिर्विक्षिप्तंचेतोयेषांतेषा-(-मतिदूरस्थः) आत्मशक्तिभिरहंकारादिभिरग्राह्योव्यवहितोपिउपेतगुणःप्राप्तश्रवणकीर्तनादिसंस्कारआत्माअंतःकरणंयेषांतेषांअंतिसमीपेअव्यवहितस्त्वमित्यर्थः ४७ एतदेवप्रपंचयन्नमस्यति । नमोस्त्विति । तेतुभ्यंनमोस्तुअध्यात्मविदांनिवृत्तदेहाद्यहंकाराणां (ज्ञानिनां) परात्मनेपरमात्मत्वेनप्रकाशमानायमोक्षप्रदायेत्यर्थः । अनात्मनेदेहाद्यभिमानिनेजीवायपरत्वेनाप्रकाश-(-मानत्वात्स्वात्मविभक्तमृत्यवे) स्वात्मनःसकाशात्विभक्तःसमर्पितःमृत्युःसंसारोयेनतस्मैकुतएतत्तत्राह । सकारणंमहदादिकार्यंअकारणंप्रकृतिःतदुभयंलिंगंउपाधिंनियम्यतयाईयुषेप्राप्तवतेअतउभयनियंतुःस्वस्मात्सकाशात्तदुभयवश्यायजीवायविभक्तमृत्यवेइत्यर्थः नियंतृनियम्यत्वेकारणंवदन्आह । हेस्वमाययाऽसंवृतेति । अतोऽलुप्तैश्वर्यत्वान्नियंत्रेतुभ्यंनमः । किंच । रुद्धदृष्टयेमायावित्वादेवअन्येषांरुद्धाआवृताहष्टिर्येनतस्मै । यद्वा स्वमाययास्वस्यासंवृताअन्येषांचरुद्धाहष्टिर्येनतस्मैइत्येकंपदम् ४८

॥१५२॥

श्लोकाः ४०—४८

तदंभसामहाभागआत्मानंसगृहान्वयम् ॥ स्नापयांचक्रउद्धर्षोलब्धसर्वमनोरथः ४० फलार्हणोशीरशिवामृतांबुभिर्मृदासुरभ्यातुलसीकुशांबुजैः ॥ आराधयामासयथोपपन्नयासपर्ययासत्त्वविवर्धनांधसा ४१ सतर्कयामासकुतोममान्वभूद्गृहांधकूपेपतितस्यसंगमः ॥ यःसर्वतीर्थास्पदपादरेणुभिःकृष्णेनचास्यात्मनिकेतभूसुरैः ४२ सूपविष्टान्कृतातिथ्याञ्श्रुतदेवउपस्थितः ॥ सभार्यस्वजनापत्यउवाचांघ्र्यभिमर्शनः ४३ ॥ श्रुतदेवउवाच ॥ नाद्यनोदर्शनंप्राप्तःपरंपरमपूरुषः ॥ यर्हीदंशक्तिभिःसृष्ट्वाप्रविष्टोह्यात्मसत्तया ४४ यथाशयानःपुरुषोमनसैवात्ममायया ॥ सृष्ट्वालोकंपरंस्वाप्नमनुविश्यावभासते ४५ शृण्वतांगदतांशश्वदर्चतांत्वाभिवंदताम् ॥ नृणांसंवदतामंतर्हृदिभास्यमलात्मनाम् ४६ हृदिस्थोप्यतिदूरस्थःकर्मविक्षिप्तचेतसाम् ॥ आत्मशक्तिभिरग्राह्योप्यंत्युपेतगुणात्मनाम् ४७ नमोस्तुतेऽध्यात्मविदांपरात्मनेह्यनात्मनेस्वात्मविभक्तमृत्यवे ॥ सकारणाकारणलिंगमीयुषेस्वमाययाऽसंवृतरुद्धदृष्टये ४८

॥१५२॥

चूर्णिका

४० ४१ ४२ ततः तान् संपूज्य तेषां समीपे सभार्यः उपविष्टःसन् उवाच ४३ हे भगवन् अस्मान् अद्यैव दर्शनं प्राप्तः इति न किंतु यदा शक्तिभिः इदं विश्वं सृष्ट्वा तस्मिन् स्वसत्तया प्रविष्टः तदैव प्राप्तोसि किंच त्वं हृदिस्थोपि कर्मविक्षिप्तचेतसां अतिदूरस्थोसि सः त्वं नः भृत्यान् शाधि ४४ ४५ ४६ ४७ ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सएवंभूतःपरमेश्वरस्त्वंनोऽस्मान्स्वभृत्यान् (शाधि) अनुशिक्षय (यत्यदाअक्षिगोचरःप्रत्यक्षःएतदंतःएतत्कालपर्यंतएवेत्यर्थः) ४९ ५० स्वस्मिन्नादरमधिकंब्राह्मणेषुमंदमिवालक्ष्यलोकसंग्रहपरो भगवान्मत्तोपिब्राह्मणेषुश्रद्धातिरेकंकुर्वित्येवंतमनुशास्ति । ब्रह्मन्नितिसप्तभिः । मयाहृदिस्थेन-(-सहअतएवपादरेणुभिःपुनंतः) ५१ देवादिभ्योपिब्राह्मणाःश्रेष्ठाइत्याह । देवाइति (देवादीनिदर्शना दिभिःकालेनबहुना) शनैःपुनंति । एतेतुसद्यः । किंच देवादीनियत्पुनंतितदप्यर्हत्तमेक्षया (साधुदर्शनमहिम्नेत्यर्थः) ५२ (सर्वेषांप्राणिनांमध्येजन्ममात्रेणश्रेयान्तत्रतपआदिभिर्युतःकिमुवक्तव्यंत त्रापि)। ममकलागरिकलनंउपास्तिःतयायुतः (मद्भक्तइतियावत् । एतादृशोब्राह्मणःसर्वेभ्यःश्रेयानितिकिंपुनः) ५३ किंच । ब्राह्मणाराधनमेवममप्रेष्ठमित्याह (नेति । दयितंप्रियम्) हेतुमाह । सर्ववेदमयोविप्रइति । प्रमाणाधीनत्वात्प्रमेयस्य । (देवास्तज्जीवनंचयागादिसर्ववेदाधीनमिति) वेदमयोविप्रोदेवमयादस्माद्रूपात्प्रेष्ठइत्यर्थः ५४ (दुष्प्रज्ञादुर्बुद्धयः । एवमज्ञात्वा) असूयवोदोषदृष्ट यः (गुर्वादिरूपंमांअवजानंति)। प्रतिमादाविज्यबुद्धयःपूज्यबुद्धयः ५५ अस्यविश्वस्यहेतवोयेचभावामहदादयः (तानिमद्रूपाणीति) मदीक्षयाममैवसर्वत्रेक्षया (चेतसिमांआधत्ते) ५६ (मच्छ्रद्ध यामद्वाक्येविश्वासंधृत्वेत्यर्थः । यद्वा मद्रूपाएतेइति विश्वासेनेत्यर्थः) ५७ ५८ (स्वभक्तयोःश्रुतदेवमैथिलयोःसमीपेउषित्वा)। सन्मार्गं सतांवेदानांत्रिकांडविषयाणांप्रवृत्तिप्रकारं आदिश्य ५९

॥१९३॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांषडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ ॥८६॥

श्लोकाः ४९/५९

सत्वंशाधिस्वभृत्यान्नःकिंदेवकरवामते ॥ एतदंतोनृणांक्लेशोयद्भवानक्षिगोचरः ४९ ॥ श्रीशुकउवाच ॥ तदुक्तमित्युपाकर्ण्यभगवान्प्रणतार्तिहा ॥ गृहीत्वापाणिनापाणिंप्रहसंस्तमुवाचह ५० ॥ श्रीभगवानुवाच ॥ ब्रह्मंस्तेनुग्रहार्थायसंप्राप्तान्विद्ध्यमून्मुनीन् ॥ संचरंतिमयालोकान्पुनंतःपादरेणुभिः ५१ देवाःक्षेत्राणितीर्थानिदर्शनस्पर्शनार्चनैः ॥ शनैःपुनंतिकालेनतदप्यर्हत्तमेक्षया ५२ ब्राह्मणोजन्मनाश्रेयान्सर्वेषांप्राणिनामिह ॥ तपसाविद्ययातुष्ट्या किमुमत्कलयायुतः ५३ नब्राह्मणान्मेदयितंरूपमेतच्चतुर्भुजम् ॥ सर्ववेदमयोविप्रःसर्वदेवमयोह्यहम् ५४ दुष्प्रज्ञाअविदित्वैवमवजानंत्यसूयवः ॥ गुरुंमांविप्रमात्मानमर्चादाविज्यदृष्टयः ५५ चराचरमिदंविश्वंभावायेचास्यहेतवः ॥ मद्रूपाणीतिचेतस्याधत्तेविप्रोमदीक्षया ५६ तस्माद्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय ॥ एवंचेदर्चितोस्म्यद्धानान्यथाभूरिभूतिभिः ५७ ॥ श्रीशुकउवाच ॥ सइत्थंप्रभुणादिष्टःसहकृष्णान्द्विजोत्तमान् ॥ आराध्यैकात्मभावेनमैथिलश्चापतद्गतिम् ५८ एवंस्वभक्तयोराजन्भगवान्भक्तभक्तिमान् ॥ उषित्वादिश्यसन्मार्गंपुनर्द्वारवतीमगात् ५९ ॥ ॥ इतिश्रीभागवतेमहापुराणे दशमस्कंधेषडशीतितमोध्यायः ८६ ॥ ॥ छ ॥

चूर्णिका

४९ ॥ श्रीशुक उवाच ॥ हे राजन् भगवान् तच्छ्रुत्वा पाणिना पाणिंगृहीत्वा आह ५० ॥ श्रीभगवानुवाच ॥ हे ब्रह्मन् ते अनुग्रहाय प्राप्तान् अमून् मुनीन् विद्धि ५१ हे विप्र देवादयः कालेन पुनंति एते तु सद्यः ५२ किंच ब्राह्मणात्अन्यद्रूपं मे प्रियं न ५४ ५५ ५६ तस्मात् एतान् ब्रह्मर्षीन् मच्छ्रद्धया अर्चय तेनाहं अर्चितोऽस्मि ५७ ॥ श्रीशुक उवाच ॥ इत्थं प्रभुणा आदिष्टः श्रुतदेवःसकृष्णान् द्विजान् आराध्य श्रुतदेवः मैथिलश्च सद्गतिं आपतुः ५८ हे राजन् भगवान् एवं तयोः सन्मार्गं उपादिश्य द्वारकां अगात् ५९ ॥ ॥ इति दशमे षडशीतितमः ॥ ८६ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥१९३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.द.उ. सप्ताशीतितमेनारायणनारदवादतः ॥ वेदस्तुतिर्गुणालंत्रानिर्गुणावाधिवर्ण्यते ॥ १ ॥ वागशीयस्यवदनेलक्ष्मीर्यस्यचवक्षसि ॥ यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे ॥ २ ॥ संप्रदायविशुद्ध्यर्थस्वीयनिर्बंधय अ०
त्रितः ॥ श्रुतिस्तुतिमितव्याख्यांकरिष्यामियथार्मति ॥ ३ ॥ श्रीमद्भागवतंपूर्वैःसारतःसंनिषेवितम् । मयातुतदुपस्पृष्टमुच्छिष्टमुपचीयते ॥ ४ ॥ पूर्वाध्यायांते " एवंस्वभक्तयोराजन्भगवान्भक्तभ
टीका क्तिमान् । उषित्वादिश्यसन्मार्गंपुनर्द्वारवतीमगादि"त्यत्रसन्मार्गंसतांस्वतःप्रमाणभूतानांअप्रामाण्यकारणराहितानांवेदानांमार्गंब्रह्मपरत्वमुपदिश्यभगवानगादित्युक्तंतत्रवेदानांब्रह्मपरत्वमघटमानंमन्वा ॥८७॥
नः (परीक्षित्) पृच्छति । ब्रह्मन्निति । तत्रतावन्मुख्यालक्षणागुणभेदेनत्रिधाशब्दप्रवृत्तिः । मुख्यापिरूढियोगभेदेनद्विधा । रूढिश्वस्वरूपेणजात्यागुणेनवानिर्देशार्हेवस्तुनिसंज्ञासंज्ञिसंकेतेनप्रवर्तते ।
यथा डित्थःगौःशुक्लइति । लक्षणाचतेनैवसंकेतेनाभिहितार्थसंबंधिनि । यथागंगायांघोषइति । गौणीचाभिहितार्थलक्षितगुणयुक्तेतत्सदृशेयथासिंहोदेवदत्तइति । यथाहुः । " अभिधेयाविनाभूतप्रवृत्ति
॥१५४॥ र्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टातुगौणते"ति । योगवृत्तिस्तुएतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोःप्रकृतिप्रत्ययार्थयोर्वायोगेन । यथापंकजंऔपगवःपाचकइत्यादि । तत्रतावद्ब्रह्मणिरूढिवृत्ति
र्नसंभवतीत्याह । साक्षात्कथंचरंतीति । तत्रहेतुःअनिर्देश्यइति (स्वरूपादिभिर्निर्देष्टुमनर्हेइत्यर्थः) अनिर्देश्यत्वेपिहेतुंवदन्गुणवृत्तिंनिराकरोति निर्गुणेगुणवृत्तयइति । गुणैर्वर्तमानाः (श्रुतयोनिर्गुणे
गुणसंबंधरहिते) कथंचरंतीत्यर्थः । निर्गुणत्वेहेतुंवदन्लक्षणांयोगंचनिराकरोति । सदसतःपरइति । कार्यकारणाभ्यांपरस्मिन्नसंगेकेनचिदपिसंबंधाभावात्नलक्षणायोगवृत्तीसंभवतइत्यर्थः । एवंपदा
र्थत्वायोगादपदार्थस्यचवाक्यार्थत्वायोगान्नश्रुतिगोचरत्वंब्रह्मणइत्यभिप्रायः १ उत्तरमाह बुद्धींद्रियेति । बुद्ध्यादीनुपाधीञ्जनानामनुशायिनांजीवानांमात्राद्यर्थं प्रभुरीश्वरोऽसृजत् । मीयंतइतिमात्रा
विषयास्तदर्थम् । भवार्थं । भवोजन्मलक्षणंकर्मतत्प्रभृतिकर्मकरणार्थमित्यर्थः । आत्मनेलोकांतरगामिनेआत्मनस्तत्तल्लोकभोगायेत्यर्थः । अकल्पनायकल्पनानिवृत्तयेमुक्तयेइत्यर्थः । अर्थधर्मकाममो
क्षार्थमितिक्रमेणपदचतुष्टयस्यार्थः (अनेनैतादृशोपाधिकत्वाज्जीवानामेवोपाधिवश्यतादर्शिता) । जनानामितिवदञ्जीवार्थमीश्वरस्यसृष्ट्यादिषुप्रवृत्तिरितिदर्शयति । प्रभुरितीश्वरस्योपाधिवश्यता
ऽभावेननित्यमुक्त-(-ब्रह्म-)-तांदर्शयाति । अयममिप्रायः (अपदार्थस्यब्रह्मणःप्रतिपादनासंभवेपिशुद्धसत्त्वोपहितस्यनित्यमुक्तस्यतस्यपदार्थत्वात्संभवत्तत्प्रतिपादनंनिर्गुणपरमेवशुद्धसत्त्वोपहितातुपाहि
तयोर्घनविलीनभावापन्नघृतस्येवभेदाभावात् । तथाच) सगुणमेवगुणैरनभिभूतंसर्वज्ञंसर्वशक्तिंसर्वेश्वरंसर्वनियंतारंसर्वोपास्यंसर्वकर्मफलदातारंसमस्तकल्याणगुणनिलयंसच्चिदानंदंभगवंतंश्रुतयःप्रतिपा
पादयंति । "यःसर्वज्ञःसर्ववित् । यस्यज्ञानमयंतपः । सर्वस्यवशीसर्वस्येशानः । यःपृथिव्यांतिष्ठन्पृथिव्याअंतरः । सोकामयतबहुस्याम् । सऐक्षतततत्तेजोऽसृजत सत्यंज्ञानमनंतंब्रह्मे"त्याद्याः । तथाभू

॥ राजोवाच ॥ ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः ॥ कथंचरंतिश्रुतयःसाक्षात्सदसतःपरे १ ॥ श्रीशुकउवाच ॥ बुद्धींद्रियमनःप्राणाञ्जनानामसृज श्लोका
त्प्रभुः ॥ मात्रार्थंचभवार्थंचआत्मनेऽकल्पनायच २

१/२

चूर्णिका ॥ परीक्षिदुवाच ॥ पूर्वाध्यांयाते भगवान् स्वभक्तयोः स्वतःप्रमाणभूतवेदानां ब्रह्मपरत्वं उपदिश्य अगात् इत्युक्तं तत्र वेदानां ब्रह्मपरत्वं अघटमानं मन्वानः राजा पृच्छति
॥ परीक्षिदुवाच ॥ हे ब्रह्मन् अनिर्देश्ये निर्गुणे सदसतः परे ब्रह्मणि गुणैर्वर्तमानाः श्रुतयः कथं चरंति १ श्रीशुकउवाच हे राजन् प्रभुः जीवानां चतुर्विधपुरुषार्थसि ॥१५४॥
द्धये बुद्धींद्रियमनःप्राणान् ससर्ज अयमभिप्रायः सगुणमेव ईश्वरं गुणैः अनभिभूतं सर्वज्ञं सर्वेश्वरं सर्वोपास्यं सच्चिदानंदं भगवंतं श्रुतयः प्रतिपादयंति एवं च साक्षा
दुपाधिनिषेधेन श्रुतीनां निर्गुणे एव पर्यवसानम्॥ अत्र च अनादिशिष्टपरंपरागतत्वान्नसंदेहोयुक्त इत्याह १ २

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. ३० ॥८७॥ ।.३५५॥

टीका

वेश्वरतांतावत् (बुद्धींद्रियाद्युपाधिमतः) संसारिणोजीवस्यतन्निवृत्तये "तत्त्वमसी"त्यादिवाक्यानिबोधयंति । तत्रचतत्त्वंपदयोःसामानाधिकरण्यंप्रतीयते तच्चप्रकारांतरेणाघटमानंब्रह्मणिपर्यवसानंग मयति । तथाहि । नतावद्वैश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधानेनसामानाधिकरण्यम् । यथोक्तं " आमिक्षांदेवतायुक्तांवदत्येवैषतद्धितः । आमिक्षापदसांनिध्यात्तस्यैवविषयार्पणमि"ति । कुतः । भिन्नार्थत्वात् । नचाजहत्स्वार्थयोर्निरूढलक्षणयाविशेषणविशेष्यभावेननीलमुत्पलमितिवत् । यथोक्तम् । "स्वबुद्ध्यारज्यतेयेनविशेष्यंतद्विशेषण"मित्यादि । कुतः । विरुद्धार्थत्वेनतदयोगात् । नचज हत्स्वार्थत्वेनसंबंधिलक्षणयांकुसुमितद्रुमागंगेतिवत् । कुतःएकार्थत्वस्यविवक्षितत्वात् । अतोजहदजहत्स्वार्थलक्षणयासोयंदेवदत्तइतिवत्विरुद्धांशत्यागेनानुगतचिदंशेनैकार्थेनसामानाधिकरण्ये ननिर्गुणेपर्यवसानम् । अस्थूलादिवाक्यानांतुसाक्षादुपाधिनिषेधेनतत्पदार्थशोधनयोगान्निर्गुणएवपर्यवसानम् । तथाचात्रैवोपक्रमे " स्वसृष्टमिदमापीये"त्यादिनाविशिष्टमालंबनंवक्ष्यति । अंतेच श्रुतयः " त्वयिहिफलंत्यतन्निरसनेनभवन्निधना"इत्युपसंहरिष्यंति । उपासनादिवाक्यानांक्रियार्थप्रवृत्तसृष्ट्याद्यवलंबनेनज्ञानसाधनविधानेनतत्परत्वमित्येषादिक् २ अत्रचानादिशिष्टपरंपरागत त्वात्नसंदेहोयुक्तइत्याह । सैषेति । सैषायथोक्तालंबनात्राह्मीब्रह्मपरा (उपनिषत् रहस्योक्तिःपूर्वेषांमरीच्यादीनामपिपूर्वजैःसनंदनादिभिर्धृता । तां) श्रद्धयाआदरेणवैतंडिकतर्कानभिनिवेशेनयःश्रव णादिनाधारयेत् सोऽकिंचनःनिरस्तदेहाद्युपाधिःसन्परंपदंप्राप्नुयादिति ३ एतदेवसर्वश्रुत्यर्थनिरूपणेनप्रपंचयितुमितिहासमवतारयति । अत्रतइति । नारायणान्विताम् । नारायणःप्रवक्तृत्वेनान्वितोय स्यांतांगाथामितिहासम् ४ (सनातनंनारायणम्) ५ (नृणांस्वस्तयेशोभनस्थितयेधर्मज्ञानवैराग्योपेतंतपःआस्थितः) ६ (ऋषिभिःपरीतंपरिवृतंनारायणम् इदमेवापृच्छत्यत्त्वंमांपृष्टवान्) ७ (इदंकिम् । योब्रह्मवादः) ८ (मानसानांसनंदनादीनां) ब्रह्मसत्रमितियथायजमानाएवसमानाऋत्विगादिरूपेणयत्रकर्मकुर्वंतितत्कर्मसत्रंप्रसिद्धम् । तथायत्रसमानाएववक्तृश्रोतृभावेनब्रह्ममीमांसं तेतद्ब्रह्मसत्रम् ९ अहोतर्हिमयाकथंतन्नज्ञातमित्यतआह । श्वेतद्वीपमिति । तदीश्वरंतत्रस्थंमामेवानिरुद्धमूर्तिम् (यत्रशेरतेसंविशंतितत्स्यवादस्यश्रुतिरहस्यरूपत्वात्) १०

श्लोकाः ३/१०

सैषाह्युपनिषद्ब्राह्मीपूर्वेषांपूर्वजैर्धृता ॥ श्रद्धयाधारयेद्यस्तांक्षेमंगच्छेदकिंचनः ३ अत्रतेवर्णयिष्यामिगाथांनारायणान्विताम् ॥ नारदस्यचसंवादमृषेर्ना रायणस्यच ४ एकदानारदोलोकान्पर्यटन्भगवत्प्रियः ॥ सनातनमृषिंद्रष्टुंययौनारायणाश्रमम् ५ योवैभारतवर्षेस्मिन्क्षेमायस्वस्तयेनृणाम् ॥ धर्मज्ञा नशमोपेतमाकल्पादास्थितस्तपः ६ तत्रोपविष्टमृषिभिःकलापग्रामवासिभिः ॥ परीतंप्रणतोऽपृच्छदिदमेवकुरूद्वह ७ तस्मैह्यवोचद्भगवानृषीणांशृ ण्वतामिदम् ॥ योब्रह्मवादःपूर्वेषांजनलोकनिवासिनाम् ८ ॥ श्रीभगवानुवाच ॥ स्वायंभुवब्रह्मसत्रंजनलोकेभवत्पुरा ॥ तत्रस्थानांमानसानांमुनीनामू र्ध्वरेतसाम् ९ श्वेतद्वीपंगतवतित्वयिद्रष्टुंतदीश्वरम् ॥ ब्रह्मवादःसुसंवृत्तःश्रुतयोयत्रशेरते ॥ तत्रहायमभूत्प्रश्नस्त्वंमांयमनुपृच्छसि १०

चूर्णिका

सा एषा उपनिषत् ब्रह्मपरा अस्ति एतां यः श्रद्धयाधारयेत् सः परं पदं प्राप्नुयात् ३ अत्रार्थे इतिहासमाह हे राजन् अत्र ते नारायणनारदसंवादरूपं इतिहासं वर्णयिष्या मि ४ एकदा नारदः लोकान् पर्यटन् ऋषिं नारायणं द्रष्टुं वदरिकाश्रमं ययौ ५ यः अस्मिन् भारतवर्षे नृणां स्वस्तये आकल्पात् तपः अस्थितः ६ तत्र गत्वा ऋषि भिः परीतं स्थितं नारायणं इदमेव पप्रच्छ तत्र नारायणः ऋषीणां शृण्वतां सतांयः पूर्वं सनकादीनां जनलोकवासिनां ब्रह्मवादोऽभूत् तं नारदाय आह ७ ८ ॥ श्री नारायण उवाच ॥ हे नारद पुरा जनलोके तत्रस्थानां सनकादीनां ब्रह्मसत्रं अभूत् ९ तदा त्वयि अनिरुद्धं ईशं द्रष्टुं श्वेतद्वीपं गते सति सब्रह्मवादः प्रवृत्तः तत्र हायमभूत्प्रश्नः त्वं मां यमनुपृच्छसि १० ॥१५५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१५६॥

ननु(सर्वे) सर्वज्ञास्तेकस्तत्रवक्ताप्रष्टावातत्राह । तुल्यश्रुतेति । श्रुतादिभिरविशेषाःअरिमित्रोदासीनहीनत्वेननिरुपमकरुणाअतःसर्वेप्रवचनयोग्याअपिकेनापिकौतुकेनैकंप्रवक्तारंकृत्वाऽन्येपप्रच्छुरित्यर्थः ११ स्वसृष्टमिति । स्वयंनिर्मितमिदंविश्वंप्रलयसमयेआपीयसंहृत्य (शक्तिभिःसत्त्वादिभिः) शयानंयोगेननिद्राणमिववर्तमानंतदंतेप्रलयांतेतल्लिंगैस्तत्प्रतिपादकैर्वाक्यैःपरंईश्वरंसृष्टिसमयेप्रथमनिश्वासप्रसूताःश्रुतयःप्रबोधयामासुः १२ सुश्लोकैः शोभनाःश्लोकाःकीर्तयोयेषांतैःपराक्रमैः (प्रत्यूषेऽहर्मुखे) १३ जयजयेति । भोअजितजयजयउत्कर्षमाविष्कुरु । आदरेवीप्सा । केनव्यापारेण । अगजगदोकसांअगानिस्थावराणिजगंतिजंगमानिचओकांसिशरीराणियेषांजीवानांतेषांअजामविद्यांजहिनाशय । किमितिगुणवतींहंतव्येत्यतआह । दोषगृभीतगुणांदोषायआनंदाद्यावरणायगृहीतागुणायया ताम् । “ हृग्रहोर्भश्छंदसी”तिहस्यभकारः । इयंस्वैरिणीवपरप्रतारणायगुणान्गृह्णातिअतोहंतव्येति । तर्हिमय्यपिदोषमावहेदितिममापितत्रकाशक्तिःस्यादतआहुः । त्वमिति । यत्यस्मात्त्वंआत्मनास्वरूपेणैवसमवरुद्धसमस्तभगःसंप्राप्तसमस्तैश्वर्योसि । वशीकृतमायत्वादितिभावः । ननुस्वयमेवतेज्ञानवैराग्यादिनाकिंनहन्युरित्यतआहुः । अखिलशक्त्यवबोधकेति । तेषांत्वमेवांतर्यामीसर्वशक्त्युद्बोधकःअतोनतेज्ञानादौस्वतंत्राइतिभावः । नन्वहमकुंठज्ञानैश्वर्यादिगुणोजीवानांकर्मज्ञानादिशक्त्यवबोधनेनाविद्याहंतेत्यत्रकिंप्रमाणमितिचेत् वयमेवप्रमाणमित्याहुःनिगमोवेदः (तेतवअनुचरेत्त्वांप्रतिपादयेत्इत्यर्थः) ननुएवंभूतेमयिकथंश्रुतीनांप्रवृत्तिस्तत्राह । क्वचिदिति । कदाचित्सृष्ट्यादिसमयेअजयामाययाचरतःक्रीडतःनित्यंचालुप्तभगतयासत्यज्ञानानंतानंदैकरसेनात्मनाचचरतोवर्तमानस्यनिगमोनुचरेत् । प्रतिपादयेत् कर्मणिषष्ठ्यौ । “ यतोवाइमानिभूतानिजायंते । योब्रह्माणंविदधातिपूर्वं योवैवेदांश्चप्रहिणोतितस्मै । तंहदेवमात्मबुद्धिप्रकाशंमुमुक्षुर्वैशरणमहंप्रपद्ये । यआत्मनितिष्ठन् । सत्यंज्ञानमनंतंब्रह्म । यःसर्वज्ञःसर्ववित् ” । इत्याद्यागमकदंबस्त्वामेवंभूतंप्रतिपादयतीत्यर्थः (इदंनर्कुटकंछंदः) । जयजयाजितजह्यगजंगमावृतिमजामुपनीतमृषागुणाम् । नहिभवंतमृतेप्रभवंत्यमीनिगमगीतगुणार्णवतातव १ १४

श्लोकाः ११/१४

तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः ॥ अपिचक्रुःप्रवचनमेकंशुश्रूषवोपरे ११ ॥ सनंदनउवाच ॥ स्वसृष्टमिदमापीयशयानंसहशक्तिभिः ॥ तदंतेबोधयांचक्रुस्तल्लिंगैःश्रुतयःपरम् १२ यथाशयानंसम्राजंवंदिनस्तत्पराक्रमैः ॥ प्रत्यूषेभ्येत्यसुश्लोकैर्बोधयंत्यनुजीविनः १३ ॥ श्रुतयऊचुः ॥ जयजयजह्यजामजितदोषगृभीतगुणांत्वमसियदात्मनासमवरुद्धसमस्तभगः ॥ अगजगदोकसामखिलशक्त्यवबोधकतेक्वचिदजयात्मनाचचरतोनुचरेन्निगमः १४ १

चूर्णिका

तत्र सर्वे सनकाद्याः श्रुततपआदिभिस्तुल्या अपि एकं प्रवक्तारं कृत्वा अन्ये पप्रच्छुः ११ ॥ सनंदनउवाच ॥ हे ऋषयःइदं स्वसृष्टं प्रलये संहृत्य शक्तिभिः सह शयानं ईश्वरं प्रलयांतेप्रथमनिःश्वासभूताः श्रुतयः तत्प्रतिपादकवाक्यैः प्रबोधयामासुः १२ यथा शयानं नृपं बंदिनः उषसि एत्य तत्पराक्रमैः बोधयंति तद्वत् १३ ॥ श्रुतय ऊचुः ॥ हे अजितउत्कर्षं आविष्कुरु केन व्यापारेण सर्वजीवानां आनंदाद्यावरणाय गृहीतगुणांअविद्यां नाशय यतः त्वं प्राप्तसमस्तैश्वर्योसि ननु जीवा एव तां किं न हन्युः अत आह तेषां त्वमेवांतर्यामी सर्वशक्त्युद्बोधकः अतो न ते स्वतंत्राः ननु अहमेव अविद्याहंतेत्यत्र किं प्रमाणमिति चेत् तर्हि अहमेव प्रमाणं ननु एवं भूते मयि कथं वेदप्रवृत्तिः तत्राह कदाचित् सृष्ट्यादिसमये मायया क्रीडंतं त्वां वेदः प्रतिपादयति १ १४

॥१५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ननुकथंमामेव (समवरुद्धसमस्तभगइत्यादिनासर्वेश्वरं) प्रतिपादयंति यत "इंद्रोयातोवसितस्यराजे"त्यादिभिरिंद्रःयातोजंगमस्यअवसितस्यस्थावरस्यचराजेतिप्रतिपाद्यते तथा । "अग्निर्मूर्द्धादिव" इत्यादिभिश्चैवंभूतत्वेनाग्न्यादयःप्रतिपाद्यंते । तत्राह बृहदुपलब्धमेतादिति अयमर्थःएतदुपलब्धंदृष्टमिंद्रादिसर्वंबृहत्ब्रह्मत्वमित्येवावयंतिजानंति । कथं बृहतएवावशेषतयाऽवशिष्यमाणत्वेनकुतःयतोबृहतःसर्वस्योदयास्तमयौउत्पत्तिलयौभवतःसर्वोपादानत्वात् तर्हिकिंविकारित्वंबृहतः न अविकृतात् (अधिष्ठानज्ञाननाश्योऽन्यथाभावोविवर्तः) वर्ताधिष्ठानत्वेनाविकारादित्यर्थः वाशब्दउपमार्थः । यथाघटादेर्विकृतेर्मृदि उदयास्तमयौ तद्वत् । "वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं सर्वंखल्विदंब्रह्म"त्यादिभिस्तथाप्रतिपादनादित्यर्थः अतःकारणात्ऋषयोमंत्रास्तद्रष्टारोवात्वय्येवमनोवचनाचरितंदधुः । मनसाआचरितंतात्पर्यंवचनाचरितमभिधानंन्त्रधृतवंतः । नपृथग्विकारोष्वित्यर्थः । अत्रनिदर्शनम् । कथमयथेति । नृणांभूचराणांयत्रकुत्रापिदत्तानिनिक्षिप्तानिपदानिभुविकथमयथाभवंतिअदत्तानिभवंतिअतोयथामृत्पाषाणेष्टकादिषुदत्तानिपदानिभुवंनव्यभिचरंति । तथायत्किमपिविकारजातंवदंतोवेदास्त्वामेवसर्वकारणंपरमार्थभूतंप्रतिपादयंतीत्यर्थः । द्रुहिणवह्निरवींद्रमुखामराजगदिदंनभवेत्पृथगुत्थितम् । बहुमुखैरपिमंत्रगणैरजस्त्वगुरुमूर्तिरतोविनिगद्यसे १५ २ त्वमेवसर्वनिगमगोचरइतिसतांप्रवृत्त्याद्रढयति । इतितवेति । त्वमेवसर्वकारणत्वेनपरमार्थ इतिकृत्वा भोत्र्यधिपते त्रिगुणमायामृगीनर्तक सूरयोविवेकिनस्तवाखिललोकमलक्षपणकथामृताब्धि सकलजनवृजिननिरसनहेतुंकीर्तिसुधासिंधुंअवगाह्य निषेव्य तपंति दाहंकुर्वंतीतितपांसिपापानिदुःखानिवाजहुःत्यक्तवंतः त्वदीयकथामात्रेणयदापापत्यागः । तदाकिमुवक्तव्यंयेपुनःस्वधामविधुताशयकालगुणाःस्वधाम्नास्वरूपस्फुरणेविधुतास्त्यक्ताआशयगुणाअंतःकरणधर्माःरागादयःकालगुणाजरादयश्चयैस्तेतथाहेपरमतवाजस्रसुखानुभवं अखंडानंदानुभवंपदंस्वरूपंभजंतिसेवंतेतथाभूताःदुःखानित्यजंति । तद्यथा पुष्करपलाशआपोनश्लिष्यंतेएवमेवंविदिपापंकर्मनश्लिष्यते । "नकर्मणालिप्यतेपापकेन । तत्सुकृतदुष्कृतेविधुनुते । एतंहवावनतपतिकिमहंसाधुनाकरवंकिमहंपापमकरव"मित्यादिश्रुतेरित्यर्थः सकलवेदगणेरितसद्गुणस्त्वमितिसर्वमनीषिजनारताः । त्वयिसुभद्रगुणश्रवणादिभिस्तवपदस्मरणेनगतक्लमाः१६ ३

॥१५७॥

श्लोकाः बृहदुपलब्धमेतदवयंत्यवशेषतयायतउदयास्तमयौविकृतेर्मृदिवाऽविकृतात् ॥ अतऋषयोदधुस्त्वयिमनोवचनाचरितंकथमयथाथावंतिभुविदत्तपदानिनृणाम् १५ २ इति वसूरयस्त्र्यधिपतेखिललोकमलक्षपणकथामृताब्धिमवगाह्यतपांसिजहुः ॥ किमुतपुनःस्वधामविधुताशयकालगुणाःपरमभजंतियेपदमजस्रसुखानुभवम् १६ ३

१५/१६

चूर्णिका ननु श्रुतिभिः इंद्राग्न्यादयः प्रतिपाद्यंते कथं मामेवेत्युच्यंते तत्राह हे ईश एतत् उपलब्धं इंद्रादिसर्वं ब्रह्मत्वमेवेति अवशेषतया जानंति कुतः यतः सर्वस्य उत्पत्तिलयौस्तः तर्हि किं ब्रह्मणः विकारित्वं न विवर्ताधिष्ठानत्वेन अविकारात् यथा घटादेः उत्पत्तिलयौ मृदि तद्वत् अतो मंत्राः त्वय्येव मनोवचनयोः तात्पर्याभिधाने धृतवंतः अत्र दृष्टांतः यथा नृणां कुत्रापि क्षिप्तानि पदानि भुवि अदत्तानि न भवंति तथा यत् किमपि विकारजातं वदंतो वेदाः परमार्थभूतं त्वामेव प्रतिपादयंति १५ २ किंच हे त्रिगुणमायामृगीनर्तक विवेकिनः तव सर्वजनपापनाशहेतुं कीर्तिसुधाब्धिं निषेव्य पापानि जहुः यदा त्वत्कथामात्रेण पापत्यागः तदा किं वक्तव्यं ये तव अखंडानंदानुभवंस्वरूपं सेवंते ते दुःखानित्यजंतीति १६ ३

॥१५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. " असुर्यानामतेलोकाअंधेनतमसावृताः । तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः "। तथा । " नचेदवेदीन्महतीविनष्टिः यएतद्विदुरमृतास्तेभवन् यथेतरेदुःखमेवोपयन्ति " इत्याद्याःश्रुतयः अ०
पूर्वश्लोकोक्तोभयविधभजनहीनान्निंदंति दृतयइवेति । असुभृतोनरायदितेऽनुविधाअनुविदधतीत्यनुविधाअनुवर्तिनोभक्ताइतियावत् । तर्हिश्वसंतिजीवंतिसफलजीवनाभवंति । इतरथादृतयइव
टीका भस्त्राइववृथाश्वासाइत्यर्थः । नन्वभक्तानामपिकामादिफलमस्त्येव न । कार्यकारणानुग्राहकत्वेनजीवनहेतोस्तवाभजनेकृतघ्नानांतदपिनसिध्येदित्याशयेनाहुः । महदहमादयइतिमहान्अहंकारश्चआदि
येषांतेयदनुग्रहतः (यस्यानुग्रहतः) यस्यानुप्रवेशेनलब्धसामर्थ्याःसंतःअंडंदेहंसमष्टिव्यष्टिरूपंसृष्टवंतःतत्रचपंचापिकोशानन्नमयादीनाविश्यतत्तदाकारःसन्यश्चेतयतेसःत्वम् । तदाह । पुरुषविधइति ॥८७॥
पुरुषस्यान्नमयादेर्विधेवविधाआकारोयस्यसतथा । ननुचिदेकरसस्यकथंतत्तदाकारता । अतआहुः । अन्वयोत्रेति । अत्रएष्वन्नमयादिषुअन्वेतीत्यन्वयः । अतस्तदाकारतेति । एवंतर्हिसत्यत्वमसं
।१५८॥ गत्वंचकथंतत्राहुः । चरमोन्नमयादिषुयइति । अन्नमयादिषूपदिश्यमानेषुय " श्चरमोब्रह्मपुच्छंप्रतिष्ठे" तिपुच्छत्वेनोक्तःसःत्वमितिसंबंधः । ननुतथाप्यन्नमयादिष्वन्वितत्वेऽसंगत्व्याहतिरेवतत्राहुःस
दसतःपरंत्वमथयदेष्ववशेषमृतमितिसदसतः स्थूलसूक्ष्मादन्नमयादेःपरंव्यतिरिक्तंतत्साक्षिभूतंअवशेषंअवशिष्यतइत्यवशेषमबाध्यं अथातएवऋतंसत्यंतर्हिकिमर्थंतेष्वन्वयउक्तःशाखाचंद्रवच्छुद्धस्वरूपलक्ष
णार्थं तथाहि " सवाएषपुरुषोऽन्नरसमयस्तस्येदमेवशिरः " इत्यादिनास्थूलसूक्ष्मक्रमेणपंचकोशानुपदिश्यतस्यपुरुषविधतामन्वयंपुरुषविधइतिपुनःपुनस्तदन्वितत्वेनाऽऽलक्ष्यब्रह्मपुच्छंप्रतिष्ठतिसर्वसाक्षि
शुद्धस्वरूपनिरूपणमित्यनवद्यम् । नरवपुःप्रतिपद्ययदित्वयिश्रवणवर्णनसंस्मरणादिभिः । नरहरेनभजंतिनृणामिदंदृतिवदुच्छ्वसितंविफलंततः १७ ४ एवंतावत्सर्वात्मकेपरमेश्वरेसर्वश्रुतिसमन्वये
नसद्वजनीयत्वमुक्त्वाअभक्तनिंदयाचतदेवदृढीकृत्येदानीमनवगाह्यमहिमनिप्रथमंतावउ " उपाध्यालंबनमुपासनंउदरंब्रह्मेतिशार्कराक्षाउपासतेहृदयंब्रह्मेत्यारुणयोब्रह्महैवताइतऊर्ध्वंत्वेवोदसर्पत्तच्छिरोश्रय
ते"त्याद्याःश्रुतयोविदधतीत्याह । उदरमुपासतइति । ऋषिवर्त्मसुऋषीणांसंप्रदायमार्गेषुयेकूर्पदृशः उदरालंबनंमणिपूरकस्थंब्रह्मोपासतेध्यायंति शार्कराक्षाइतिश्रुतिपदस्यप्रतिपदंकूर्पदृशइति । कूर्पं
शर्करारजोविद्यतेदृक्षुअक्षिषुयेषांतेतथारजःपिहितदृष्टयः स्थूलदृष्टयइतियावत् । उदरस्यहृदयापेक्षयास्थूलत्वात् । यद्वा कूर्पंसूक्ष्मं सूक्ष्मदृशइत्यर्थः । तदाहृदयस्थंसूक्ष्ममेवालक्ष्यतत्प्रवेशायप्रथममुदरस्य
मुपासतइतिभावः । आरुणयस्तुसाक्षाद्धृदयस्थंदहरंसूक्ष्ममेवोपासतेहृदयविशेषणंपारिसरपद्धतिमिति । परितःसरंतिप्रसर्पंतीतिपारिसरानाड्यः तासांपद्धतिंमार्गंप्रसरणस्थानमित्यर्थः । विशेषणस्यफ

दृतयइवश्वसंत्यसुभृतोयदितेऽनुविधामहदहमादयोंऽडमसृजन्यदनुग्रहतः ॥ पुरुषविधोऽन्वयोत्रचरमोन्नमयादिषुयःसदसतःपरंत्वमथयदेष्ववशेषमृतम् १७ श्लोकाः
४ उदरमुपासतेयऋषिवर्त्मसुकूर्पदृशःपरिसरपद्धतिंहृदयमारुणयोदहरम् ॥ ततउदगादनंतवधामशिरःपरमंपुनरिहयत्समेत्यनपतंतिकृतांतमुखे १८ ५

भूमिका अथ पूर्वोक्तोभयविधभजनहीनान्निंदंति हे ईश नराः यदि ते भक्ताः भवंति तर्हि सफलजीविनःस्युः अन्यथा भस्त्रा इव वृथाश्वासाः ननु तेषां कामादिफलमस्त्येव १७/१८
नेत्याह यतः महदादयः यस्यानुप्रवेशेन वीर्यं प्राप्य इदं समष्टिव्यष्टिरूपं सृष्टवंतः तत्र पंचकोशान् अन्नमयादीन् प्रविश्य तत्तदाकारः सन् यः चेतयते सः पुरुष
विधः त्वम् ननुचिद्घनस्य कथं तत्तदाकारता तत्राह एष्वन्नमयादिषु तव अन्वयात् एवं तर्हि सत्यत्वमसंगत्वं कथं तत्राह अन्नमयादिषु यश्चरमः पुच्छत्वेनोक्तः सः त्वं
तथापि असंगत्वहानिरेव तत्राह स्थूलसूक्ष्मान्नमयादेः व्यतिरिक्तं तत् साक्षिभूतं अबाध्यं तत् त्वम् तर्हि किमर्थं तेष्वन्वय उक्तः शाखाचंद्रवत् स्वरूपलक्षणार्थम् १७ ॥१५८॥
४ अथ भजनमेव दृढीकृत्य श्रुतयः स्तुवंति ये ऋषिसंप्रदायमार्गेषु स्थूलदृष्टयः ते उदरालंबनं मणिपूरकस्थं ब्रह्म ध्यायंति आरुणयस्तु साक्षात् हृदयस्थं सूक्ष्ममेवो
पासते ततो हृदयात् ब्रह्मरंध्रं प्रति तवोपलब्धिस्थानं सुषुम्नाख्यं उद्गतं यत्प्राप्य जनाः पुनः संसारे न पतंति १८ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

लमाह । ततइतिततोहृदयात् भोअनंततवधामउपलब्धिस्थानंसुषुम्नाख्यंपरमंश्रेष्ठंज्योतिर्मयंशिरः मूर्द्धानंप्रतिउदगात् उदसर्पत् । मूलाधारादारभ्यहृदयमध्यात् ब्रह्मरंध्रंप्रत्युद्गतंइत्यर्थः । कथंभूतंधा
मयत्समेत्यप्राप्यपुनरिहकृतांतमुखेमृत्युमुखेसंसारेनपतंति तथाचश्रुतिः । " शतंचैकाचहृदयस्यनाड्यस्तासांमूर्द्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेतिविष्वङ्‌अन्याउत्क्रमणेभवंती"ति । उदरादि
षुयः पुंसांचिंतितोमुनिवर्त्मभिः । हंतिमृत्युभयंदेवोहृद्गतंतमुपास्महे ५ १८ ननुईश्वरस्यापितर्हिजीववत्हृदुदरादिसंबंधेतदनुप्रविष्टस्यचतारतम्येसतिकेनविशेषेणोपास्यत्वमितीमामाशंकांपरिहरंत्यः "ए
कोदेवः सर्वभूतेषुगूढः सर्वव्यापीसर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षीचेताकेवलोनिर्गुणश्चे"त्याद्याः श्रुतयः स्तुवंतीत्याह । स्वकृतविचित्रयोनिष्विति । स्वयकृतासुउच्चनीचमध्यमासुयोनि
षुअभिव्यक्तिस्थानेषुकार्येषुहेतुतयाउपादानतयाप्रागेवविद्यमानत्वेनमुख्यप्रवेशासंभवात् विशन्निववर्तमानस्तरतमतः न्यूनाधिकभावेनचकास्सिअवभाससे । स्वकृताःयोनीः अनुकरोतीतिस्वकृतानुकृ
तिः । अनलवत् । अग्निर्यथास्वतस्तारतम्यहीनोपिकाष्ठानुसारेणतथातथाप्रकाशतेतद्वत् । अथअतोवितथासुमिथ्याभूतासुअमूषुयोनिषुअवितथंसत्यंयतः समंविशेषंअतः सत्यंतवधामस्वरूपंविरजधियः
निर्मलमतयः अन्वयंतिजानंति । नुइतिपृथक्पदंवा । तत्रहेतुः अभिविपन्यवइति । अभितोविगतव्यवहाराः पनव्यवहारइत्यस्यरूपंपन्युरिति । ऐहिकामुष्मिकफलकर्मरहिताइत्यर्थः । अविशेषत्वादेवैकरसं
सन्मात्रम् । अतस्तवोपाधिकृततारतम्याभावादप्रच्युतैश्वर्यस्योपास्यत्वमितिभावः । स्वनिर्मितेषुकार्येषुतारतम्यविवर्जितम् । सर्वानुस्यूतसन्मात्रंभगवंतंभजामहे ६ १९ अपिचकुतोनुइयमाशंकास्यात् ।
भगवतोदेहाद्युपाधिकृतदोषप्रसंगइति । यतोअविद्याकामकर्मभिः संसरतोजीवस्यापिभगवद्भावंलक्षणयाबोधयंत्यस्तंदोषंनिषेधयंति "सयश्चायंपुरुषेयश्चासावादित्येसएकः तत्त्वमसी"त्याद्याः श्रुतयः ! ननुक्त
त्वर्थस्यात्मनः स्तुतिरियमीश्वरत्वेनक्रियतेननुतस्येश्वरत्वंबोध्यते'' नैतद्युज्यते । यतस्तत्रयस्यदेवेपराभक्तिर्यथादेवेतथागुरौ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनः"इत्याद्याः श्रुतयः कृतावतारस्यभगव
तश्चरणभजनमुपायंवदंतीत्याह । स्वकृतपुरेष्विति । स्वधर्मोपार्जितेषुपुरेषुदेहेषुअमीषुनरादिषुभोक्तृत्वेनवर्तमानंपुरुषंअखिलशक्तिधृतः सर्वशक्त्याश्रयस्यपूर्णस्यतवांशकृतंवदंति । अंशइवअंशः
कृतइवकृतः त्वद्रूपंवदंतीत्यर्थः । ननुकार्यकारणसंवृतस्यकुतएवंभूतत्वंतत्राहुः अबहिरंतरसंवरणमिति । बहिःकार्यंअंतरंकारणं (तत्संवरणंतदावरणम्) वस्तुतस्तदावरणशून्यंतयोरसत्वादित्यर्थः ।
इतिएवंनृगतिंतुजीवस्यगतिंतत्त्वंविविच्यविशोध्य कवयः अन्यथेदंनप्राप्यतइतिजानंतः निगमावपनंनिगमोक्तकर्मणामावपनंआसमंतादुप्यंतेस्मिन्नित्यावपनंक्षेत्रंसर्वकर्मार्पणविषयमित्यर्थः ;। यत्रार्पिता
निकर्माणिमुक्तिफलंफलंतितंभवतोऽघ्रिमभवंभवनिवर्तकंविश्वसिताः कृतविश्वासाः उपासतेअर्चनवंदनादिभिः सेवंते । भुवीतिमर्त्यलोकइदमेवोचितमितिदर्शयंति ।. त्वदंशस्यममेशानत्वन्मायाकृतबंधनम्
त्वदंघ्रिसेवामादिश्यपरानंदनिवर्तय ७ २०

श्लोकाः १९/२०

स्वकृतविचित्रयोनिषुविशन्निवहेतुतयातरतमतश्चकास्स्यनलवत्स्वकृतानुकृतिः ॥ अथवितथास्वमूष्ववितथंतवधामसमंविरजधियोन्वयंत्यभिविपन्यव एकरसम् ६ १९ स्वकृतपुरेष्वमीष्वबहिरंतरसंवरणंतवपुरुषंवदंत्यखिलशक्तिधृतोंशकृतम् ॥ इतिनृगतिंविविच्यकवयोनिगमावपनंभवतउपासतेंऽघ्रिमभवंभुविविश्वसिताः ७ २०

चूर्णिका

ननु ईशस्यापि जीववत् उदरादिसंबंधे सति केन विशेषेण उपास्यत्वं इतीमां शंकां परिहरंत्यः श्रुतयः स्तुवंति हे ईश त्वया कृतेषुउच्चावचादिदेहेषुकारणतया विशन्निव वर्तमानः त्वं न्यूनाधिकभावेन अवभाससे अग्निरिव अतः एषु मिथ्याभूतदेहेषु सत्यं तव स्वरूपं निर्मलधियः जानंति अतः अप्रच्युतैश्वर्यस्य तवैवोपास्यत्वमिति ६ १९ अथ श्रुतयः जीवस्य भगवद्भावं वदंति स्वकर्मोपार्जितनरादिदेहेषु भोक्तृत्वेन वर्तमानं पुरुषं त्वद्रूपं वदंति एवं जीवस्य तत्वं विशोध्य कवयः भवनिवर्तकं तेंघ्रिं सेवंते मर्त्यलोके इदमेवउचितम् ७ २०

भा.द.उ. भक्तिरन्यविषयसाधनमितिवचनमनुचितामिवमन्वानोभक्तिंगुरूकरोति दुरवगमेति भोईश्वरदुरवगमंदुर्वोधंयदात्मतत्त्वंतस्यनिगमायज्ञापनायतवात्ततनोराविष्कृतमूर्तेश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ३०
चरितमेवमहामृताब्धिःतस्मिन्परिवर्तोऽवगाहस्तेनपरिश्रमणाःपरित्यक्तश्रमणाःपरिवर्जनार्थःश्रमणंश्रमःगतश्रमाइत्यर्थः । अपवर्गमपिकेचिन्नपरिलर्षंतिनेच्छंति कुतोन्यत् । केचिदिति एवंभूताभक्तिर
टीका सिकाविरलाइतिदर्शयंति । नकेवलमन्यन्नेच्छंति किंतु तेनैवसुखेनपूर्णाः संतःपूर्वसिद्धंगृहादिसुखमप्युपेक्षंतइत्याहुः । तवचरणसरोजहंसकुलसंगविसृष्टगृहा इति । तवचरणसरोजेहंसाइवरममाणा
येभक्तास्तेषांकुलंतेनसंगस्तेनविसृष्टागृहायैस्तेतथा । अनेनश्रवणकीर्तनेदर्शिते । श्रुतिश्च मुक्तेरप्याधिक्यंभक्तेर्दर्शयति । यथाह । यंसर्वेदेवानमंति मुमुक्षवो ब्रह्मवादिनश्चेति । व्याख्यातंचसर्वज्ञैर्भा ॥८७॥
ष्यकृद्भिः । मुक्ताअपिलीलाविग्रहंकृत्वाभजंतइति । त्वत्कथामृतपाथोधौविहरंतोमहामुदः । कुर्वंतिकृतिनःकेचिच्चतुर्वर्गंतृणोपमम् ८ २१ “ आराममस्यपश्यंतिनतंपश्यंतिकश्चन । नतंविदाथयइमा
॥१६०॥ जजानान्यद्युष्माकमंतरंबभूव । नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंति”इत्याद्याःश्रुतयोऽनुक्रोशंत्योजगदात्मनीश्वरेरतिमुपदिशंतीत्याह । त्वदनुपथमिति । त्वदनुवर्तित्वात्त्वत्सेवौपयिक
मिदंकुलायं कौ पृथिव्यां लीयतइतिकुलायं शरीरं आत्मसुहृत्प्रियवत्आत्माचसुहृच्चप्रियश्चतद्वच्चरति स्वाधीनतयावर्ततेइत्यर्थः । तथापित्वयिउन्मुखेहितेप्रियेआत्मनिच अप्यर्थेचकारः । एवंभूतेसुसेव्ये
पित्वयिवतअहोकष्टंनरमंति नसख्यादिनाभजंति असदुपासनयादेहाद्युपलालनेन आत्महनः । प्रमादिनःकुतःयदनुशयाःयस्यामसदुपासनायांअनुशयोवासनायेषांतेकुशरीरभृतः संतःउरुभयेसंसारेभ्रमंति
परिवर्तंते अतआत्महनइतिभावः । त्वय्यात्मनिजगन्नाथेमन्मनोरमतामिह कदाममेदृशंजन्ममानुषंसंभविष्यति ९ २२ इदानीं “मात्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्यासितव्य”इत्याद्याःश्रुतयोध्यान
मंगत्वेनोपदिशंतीत्याह । निभृतमरुन्मनोक्षदृढयोगयुजइति । मरुत्प्राणःमनश्चअक्षाणींद्रियाणिचनिभृतानिसंयमितानियैस्तेचतेदृढंयोगंयुंजंतीतिदृढयोगयुजश्चतथाभूतामुनयोहृदियत्तत्त्वमुपासते तदेवार
योपितवस्मरणात्ययुःप्रापुः । स्त्रियोपिकामतःउरगेंद्रभोगभुजदंडविषक्तधियःअहींद्रदेहसदृशयोर्भुजदंडयोर्विषक्ताविशेषेणसंगंप्राप्ताधीर्यासांताःपरिच्छिन्नदृष्टयःसमदृशःसममपरिच्छिन्नंत्वांपश्यंत्योवयं
श्रुत्याभिमानिन्योदेवताअपितेसमाएवकृपाविषयतयाअंघ्रिसरोजसुधाअंघ्रिसरोजंसुष्ठुधारयंत्यः अयंभावःइत्थंभूतस्तवस्मरणानुभावःयेयोगिनस्त्वांहृद्यालंबनंउपासते । याश्चवयंत्वांसमंपश्यामः । याश्चस्त्रियः
कामतःपरिच्छिन्नंध्यायंति । येचद्वेषिणोद्वेषेणाखंडंस्मरंति । सर्वानपितांस्त्वामेवप्रापयतीति । चरणस्मरणंप्रेम्णातवदेवसुदुर्लभम् । यथाकथंचिन्नृहरेममभूयादहर्निशम् १० २३

दुरवगमात्मतत्त्वनिगमायतवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ॥ नपरिलषंतिकेचिदपवर्गमपीश्वरतेचरणसरोजहंसकुलसंगविसृष्टगृहाः श्लोकाः
८ २१ त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रियआत्मनिच ॥ नबतरमंत्यहोअसदुपासनयात्महनोयदनुशयाभ्रमंत्युरु
भयेकुशरीरभृतः ९ २२ निभृतमरुन्मनोक्षदृढयोगयुजोहृदियन्मुनयउपासतेतदरयोपिययुःस्मरणात् ॥ स्त्रियउरगेंद्रभोगभुजदंडविषक्तधियोवयम २१/२३
पितेसमाःसमदृशोंघ्रिसरोजसुधाः १० २३

चूर्णिका अथ पुनश्च भक्तिमेव दृढीकरोति भो ईश्वर दुर्वोधस्य स्वरूपस्य ज्ञानार्थं आविष्कृतमूर्तेः तव चरितमहामृताब्धौ अवगाहेन गतश्रमाः ये ते मोक्षमपि नेच्छंति कुतो
न्यत् एवं तावत् भक्तेराधिक्यं सूचितम् ८ २१ किंच श्रुतयः ईश्वरे रतिं उपदिशंतीत्याह हे ईश त्वत्सेवौपयिकं इदं शरीरं स्वाधीनत्वेन वर्तमानमपि ये सख्या ॥१६०॥
दिना त्वां न भजंति ते आत्महनः संतः संसारे भ्रमंति ९ २२ अथ ध्यानम् अंगत्वेनोपदिशंतीत्याह हे प्रभो मुनयः प्राणादीन् जित्वा हृदि यत्तत्त्वं उपासते
तत् अरयोपि तव स्मरणात् स्त्रियोपि कामतः प्रापुः किंच वयं श्रुतयः अपरिच्छिन्नं त्वांपश्यंत्योपिकृपाविषयतया ते तत्समा एवेति १० २३

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

"यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह । कोअद्धावेदकइहप्रवोचत्कुतआजाताकुतइयंविसृष्टिः । अर्वाग्देवाअस्यविसर्जनेनाथाकोवेदयतआबभूव । अनेजदेकंमनसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्शन् । तद्धावतोऽन्यानत्येतितिष्ठन्तस्मिन्नपोमातरिश्वादधाती"त्याद्याःश्रुतयोभगवत्तत्त्वंदुर्ज्ञेयंवदंत्योभक्तिमेवोररीकुर्वंतीत्याह । कइहनुवेदेतिबतअहोभगवन्इहजगति अग्रसरंपूर्वसिद्धंत्वांअवरजन्मलयःअर्वाचीनोत्पत्तिनाशवान्कोनुपुमान्वेदजानाति । ईश्वरस्यपूर्वसिद्धौअन्यस्यार्वाचीनत्वेप्रमाणंवदनज्ञानकारणाभावमाह । यतउदगादिति । यतःत्वत्तःऋषिर्ब्रह्माउत्पन्नःयंब्राह्मणमनुउभयेआध्यात्मिकाधिदैविकादेवगणाउत्पन्नाःशारीरमानसभेदेनवाद्विविधाब्रह्मणःपुत्राःततोऽप्यर्वाचीनाःसर्वेयदातुभवान्सर्वमवकृष्यउपसंहृत्यशयीत । तर्हितदाअनुशायिनांजीवानांज्ञानसाधनंनास्तियतस्तदानसत्स्थूलंआकाशादिनचासत्सूक्ष्मंमहदादिनचउभयंसदसद्रूपामारब्धंशरीरंनचकालजवःतन्निमित्तभूतंकालवैषम्यं एवंसतितत्रतदानकिमपिइंद्रियप्राणाद्यपिनचज्ञापकंशास्त्रमपि अयमभिप्रायः अर्वाक्सृष्टिगतानांदेहाद्युपाधिकृतांतराणांकालवशेनचमलिनसत्त्वानांनतावद्भगवज्ज्ञानसामर्थ्यं तथाचश्रुतिः । "नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूवे"त्याद्या । यदातुप्रलयसमयेनवह्वंतरमस्तितदापिसाधनाभावान्नभगवज्ज्ञानसामर्थ्यंअतस्त्वदेकशरणतयाश्रवणकीर्तनादिभक्तिरेवसुकरेति। "काहंबुद्ध्यादिसंरुद्धःक्वचभूमन्महस्तव । दीनबंधोदयासिंधोभक्तिंमेनृहरेदिश" १२२४ इतोपिनज्ञानंसुशकंउपदिशतामपिश्रमबाहुल्यादित्याहुः । जनिमसतइति । असतोजगतोजनिमुत्पत्तिंयेवैशेषिकादयोवदंति असतएवब्रह्मत्वस्योत्पत्तिंयेचपातंजलादयः । सतएवैकविंशतिप्रकारस्यनाशंमोक्षंवदंतियेनैयायिकाः । उतअपियेचसांख्यादयःआत्मनिभिदांभेदम् । येचमीमांसकाःविपणंकर्मफलव्यवहारंऋतंसत्यंस्मरंतिवदंतितेसर्वेआरुपितैःआरोपितैःभ्रमैरेवोपदिशंति नतत्त्वदृष्ट्या । "सदेवसोम्येदमग्रआसीत् । ब्रह्मैवसन्ब्रह्माप्येति । अनीशयाशोचतिमुह्यमानः । अविद्यायामपरेवर्तमानाः । स्वयंधीराःपंडितंमन्यमानाः । जंघन्यमानाअपियंतिमूढा । अंधेनैवनीयमानायथांधाः । एकमेवाद्वितीयंब्रह्म । एकएवहिभूतात्माभूतेभूतेव्यवस्थितः एकदाबहुधाचैवदृश्यतेजलचंद्रवत्" इत्यादिश्रुतिविरोधात् । किंचवस्तुतःपुरुषस्यत्रिगुणमयत्वेसर्वमिदंसंगच्छेत । ननुतदस्तीत्याहुः । त्रिगुणमयःपुमानितिभिदायदबोधकृतात्वयीति । त्रिगुणमयःपुमानित्यनेनहेतुनायाभिदाउपलक्षणमेतत्भिदादि । सायत्यस्मात्त्वयिविषयेअबोधकृतात्वद्विषयाज्ञानविजृंभिता । तर्हिकिमज्ञानमस्तिवस्तुतःपुंसि नैवेत्याहुः । ततःअबोधात्परत्रपरेअसंगेऽवबोधरसेज्ञानघनेसःअबोधोनभवेत् । नसंभवतीत्यर्थः । मिथ्यातर्ककुकर्कशेरितमहावादांधकारांतरभ्राम्यन्मंदमतेरमंदमहिमंस्त्वज्ञानवर्त्मास्फुटम् । श्रीमन्माधववामनत्रिनयनश्रीशंकरश्रीपतेगोविंदेतिमुदावदन्मधुपतेमुक्तःकदास्यामहम् १२ २५

॥१६१॥

श्लोकाः

कइहनुवेदबतावरजन्मलयोग्रसरंयतउदगादृषिर्यमनुदेवगणाउभये॥तर्हिनसन्नचासदुभयंनचकालजवःकिमपिनतत्रशास्त्रमवकृष्यशयीतयदा ११ २४ जनिमसतःसतोमृतिमुतात्मनियेचभिदांविपणमृतंस्मरंत्युपदिशंतितआरुपितैः ॥त्रिगुणमयःपुमानितिभिदायदबोधकृतात्वयिनततःपरत्रसभवेदवबोधरसे १२ २५

२४
२५

चूर्णिका

किंच ईशतत्वं दुर्ज्ञेयं वदंत्यः भक्तिं उररीकृत्य स्तुवंतीत्याह हे भगवन् इह जगति पूर्वसिद्धं त्वां अर्वाचीनः को नु पुमान् जानाति यतः त्वत्तो ब्रह्मादयः उत्पन्नाः किंच यदा त्वं इदं संहृत्य शयीत तदा जीवानां ज्ञानसाधनं स्थूलसूक्ष्मादिशरीरं च शास्त्रमपि नास्ति एवं तत्रस्वरूपज्ञानस्याशक्यत्वात् भक्तिरेव सुकरा ११ २४ इतोपि ज्ञानं न सुशकं उपदिशतामपि श्रमबाहुल्यादित्याहुः ये वैशेषिकादयः जगतः उत्पत्तिं वदंति ते चपातंजलादयः ते ब्रह्मत्वस्योत्पत्तिं वदंति एवमादिवादिनः यद्यदुपदिशंति तत् भ्रांत्यैव न तत्त्वदृष्ट्या कुतः एकमेवाद्वितीयंब्रह्मेत्यादिश्रुतिविरोधात् ननु पुरुषस्य त्रिगुणमयत्वे इदं संगच्छेत तन्नेत्याह त्रिगुणमयः पुमानिति यो भेदः सः त्वद्विषयाज्ञानविजृंभितः किंच ज्ञानघने त्वयि अवबोधोपि न संभवति १२ २५

॥१६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. ननुयद्यसन्नोत्पद्यतेयदिचत्रिगुणमयः पुरुषोनभवतितर्हीदंप्रपंचजातंपुरुषश्चपृङ्नास्तीत्युक्तंस्यात् । कथंतर्हितयोःसत्त्वेनप्रतीतिरतआहुः । सदिवमनइति मनःमनोमात्रविलसितमिदं त्रिवृत्त्रिगुणात्मकं अ०
प्रपंचजातमसदेवसदिवभाति । कथमितिचेत्तत्राहुः । त्वयीति । त्वय्यधिष्ठानेअधिष्ठानसत्तयासद्वत्प्रतीयतइत्यर्थः । नकेवलमिदंकारास्पदंकिंतुआमनुजात्मनुजःपुरुषःअभिविधावाकारःपुरुषमभिव्याप्ये
ति । पुरुषस्यापिपृथक्सत्त्वप्रतीतिर्मायामात्रविलसितेत्यर्थः तथाचश्रुतिः । "असतोधिमनोऽसृजत मनःप्रजापतिमसृजत प्रजापतिःप्रजाअसृजत । तद्वा इदंमनस्येवपरमंप्रतिष्ठितंयदिदंकिंचे"ति नन्वा
टीका त्मविदामपिविश्वंसदेवस्फुरति । अतःकथमसत्स्यादित्यतआहुः । सदभिमृशंतीति । आत्मविदस्त्वशेषमिदंभोक्तृभोग्यात्मकंविश्वमात्मतयैवसदभिमृशंति । सदितिजानंति । आत्मकार्यत्वान्नपृथगित्य ॥८७॥
र्थः । तथाहियदुपादानकंयत्कार्यंभवतितत्तेनैवरूपेणप्रतीयतेउपादीयतेचेतिलोकाचारेणदर्शयंति । नहिविकृतिमिति । कनकस्य विकृतिंकुंडलादि कनकार्थिनोनहित्यजंति । अत्रहेतुः । तदात्मतयाकुंड
॥१६२॥ लादेः कनकरूपत्वेनेत्यर्थः अतःस्वकृतमिदंविश्वमनुप्रविष्टंचपुरुषरूपमात्मतयैवावसितंनिश्चितम् । यत्स्वतःसदाभातिजगदेतदसत्स्वतः । सदाभासमसत्यस्मिन्भगवंतंभजामतम् १३ २६ ननु "सत्यं
ज्ञानमनंतंब्रह्म । नेहनानास्तिकिंचन । मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यती"त्यादिश्रुतिभिरेवंभूतस्यभगवतःप्रतिपादनात्तज्ज्ञानंसुकरमेवेतिकृतंभक्त्येत्यतआहुःतवपरियेचरंतीति । तवेतिकर्मणि
षष्ठी । त्वांयेपरिचरंति "छंदसिव्यवहिताश्चे"तियच्छब्देनव्यवधानमदोषः। केनरूपेणअखिलसत्त्वनिकेततया अखिलानिसत्त्वानिप्राणिनोनिकेतोनिलयोयस्यसतथातस्यभावस्तत्तातया सर्वभूतावासतये
त्यर्थः। उतएव (मृत्युं) अविगणय्यतिरस्कृत्यतएवनिर्ऋतेःमृत्योःशिरोमूर्धानंपदापादेनआक्रमंति । मृत्योर्मूर्ध्निपदंदधतितंतरंतिमुच्यंतइत्यर्थः। येपुनर्विमुखाअभक्तास्तान्गिरावाचापशूनिवविबुधान्विदुषोपि
परिवयसेबध्नासि । कुतः (ये) त्वयिकृतसौहृदाःत्वयिकृतंसौहृदंप्रेमयैस्तेखलुनिश्चितंपुनंतिपवित्रयंतिआत्मानमन्यानपीतिशेषः । नतुविमुखाःनेतरेइत्यर्थः तथाचश्रुतिः । "तस्यवाक्तंतिर्नामानिदामानित
दस्येदंवाचातंत्यानामभिर्दामभिःसर्वंसित"मिति । अयमभिप्रायः सत्यमेवंभूतमात्मानंश्रुतयः प्रतिपादयंति तत्रचयद्यपिवस्तुनोऽपरोक्षत्वादपरोक्षमेवज्ञानमुत्पद्यते तथाप्यसंभावनाविपरीतभावनातिर
स्कृतत्वान्मलिनचित्तेषुपरोक्षमिवभवतीति नापरोक्षसंसारभ्रमनिवृत्तिसमर्थम् । भगवत्परिचर्ययातुसम्यगमलचित्तानांतत्प्रसादेनलब्धापरोक्षज्ञानानामपलतएवकरकलितोमोक्षइति तथाचश्रुतयः । "दे
हांतेदेवःपरंब्रह्मतारकंव्याचष्टे । यमेवैषवृणुतेतेनलभ्यः । यस्यदेवेपराभक्तिरि"त्यादयः । तपंतुतापैःप्रपतंतुपर्वतादटंतुतीर्थानिपठंतुचागमान् । यजंतुयागैर्विवदंतुयोगैर्हरिंविनानैवमृतिंतरंति १४ २७

सदिवमनस्त्रिवृत्त्वयिविभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः ॥ नहिविकृतिंत्यजंतिकनकस्यतदात्मतयास्वकृतमनुप्रविष्टमिदमात्मत श्लोकाः
याऽवसितम् १३ २६ तवपरियेचरंत्यखिलसत्त्वनिकेततयातउतपदाक्रमंत्यविगणय्यशिरोनिर्ऋतेः ॥ परिवयसेपशूनिवगिराविबुधानपितांस्त्वयि
कृतसौहृदाःखलुपुनंतिनयेविमुखाः १४ २७ २६—२७

चूर्णिका ननु यद्यसन्नोत्पद्यते त्रिगुणमयः पुरुषो न भवति तर्हि इदं प्रपंचजातं पुरुषश्च पृथक् नास्तीत्युक्तं स्यात् तर्हि कथं तयोः सत्त्वप्रतीतिरित आह इदं मनोमात्रविलसितं गुणात्म
कं प्रपंचजातं सदिव भाति कथं अधिष्ठानसत्तया सत्यवत्प्रतीयते किंच पुरुषस्यापि पृथक् सत्त्वप्रतीतिः मनोमात्रविलसितैव ननु आत्मविदामपि विश्वं सदेव स्फुरति
कथं मिथ्येत्यत आह आत्मविदस्तु इदं विश्वं आत्मकार्यत्वात् तदेव तत् इति जानंति न भिन्नं अत्र दृष्टांतः यथा कनकार्थिनः सुवर्णविकारं कुंडलादिकं तदात्मतयैव ॥१६२॥
गृह्णंति अतः इदं सर्वं आत्मतयैव निश्चितं १३ २६ भक्त्या तु ईश्वरज्ञानं सुकरमेवेत्याह हे ईश त्वां सर्वभूतावासतया ये सेवंते ते एव मुच्यंते एवंभूताः भक्ताः
आत्मानं अन्यानपि पवित्रयंति येअभक्ताः तान् त्वं पशूनिव बध्नासि १४ २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतावत्परमात्मनःसकाशादविद्याकृतकार्योपाश्रयस्तदंशाएवजीवाजाताःसंसरंतोभजंतीत्युक्तं तत्रयद्येकोऽविद्यातदाजीवस्याप्येकत्वादेकमुक्तौसर्वमुक्तिप्रसंगःअथनानाविद्यास्तर्हितस्यैवांशांतरेणसंसारानपगमादनिर्मोक्षइत्यादितर्कबलेनवस्तुतएवनानात्मानःतत्रचतेषामणुत्वेदेहव्यापिचैतन्यंनस्यात् । देहपरिमाणत्वेचमध्यमपरिमाणानांसावयवत्वेनानित्यत्वंस्यात् । अतःसर्वगतानित्याश्चेतिकेचनमन्यंते तत्रनतावदुक्तदोषप्रसंगःअविद्याभेदेनतच्छक्तिभेदेनवाबद्धमुक्तव्यवस्थासंभवात् । ईश्वरस्यतुनकेनाप्यंशेनसंसारशंकेत्युक्तमेव । प्रसिद्धंचात्मैक्यंसर्वश्रुतिषु । किंचेमंपक्षंअंतर्यामिब्राह्मणमपिनसहतइत्याहुः अपरिमिताइति । वस्तुतएवानंताध्रुवास्तेनैवरूपेणनित्याःसर्वगताश्चतनुभृतोजीवायदिस्युःतर्हितेषांसमत्वात्शास्यतानघटतेइतिक्रत्वाहेध्रुवनियमोनियमनंत्वयानस्यात् । इतरथातुघटेत । कथम् यन्मयंउपाधितो (यस्यतवअंतर्यामिणःविकारइव) यद्विकारप्रायंयज्जीवाख्यंअजनिजातंतत्तस्य (जीवस्य) स्वविकारस्यअंतर्यामिचैतन्यंनियंतृनियामकंभवेत् अविमुच्यकारणतयाअपरित्यज्य । किंतत् समंअनुस्यूतम् । ननुकिंयत्तच्छब्दैः (ज्ञायते) चेदुच्यतांइदंतादितिअतआहुः । अनुजानतांयदमतमिति । जानीमइतिवदतांयदमतंअविज्ञातप्रायंअविषयत्वात् । तथाचश्रुतिः । " यस्यामतंतस्यामतंमतंयस्यनवेदसः । अविज्ञातंविजानतांविज्ञातमविजानताम् । अवचनेनेवप्रोवाच । सहतूष्णींबभूवे"त्यादिः । किंच । मतस्यज्ञातस्यदुष्टतयादुष्टत्वात्दोषश्रवणादित्यर्थः । तथाचश्रुतिः । " यदिमन्यसेसुवेदेति दहरमेवापिनूनंत्वंवेत्यब्रह्मणोरूपंयदस्यत्वम् यदस्यदेवेषु " इत्यादि । तस्माद्यत्तच्छब्दावद्योत्यंअतर्क्यंकिमपिसर्वानुस्यूतत्वेनसमंनियंतृभवेदित्यर्थः । अंतर्यंतासर्वलोकस्यगीतःश्रुत्यायुक्त्याचैवमेवावसेयः । यःसर्वज्ञःसर्वशक्तिर्नृसिंहःश्रीमंतंतंचेतसैवावलंबे १७ ३० ननुचयदिपरमात्मनोजीवाजायंतेइतिनियंतृनियम्यभावउच्यतेतथासतिजीवानामनित्यत्वप्रसंगेनप्रतिदिनंकृतनाशाकृताभ्यागमप्रसंगःस्यात् । किंच तदामोक्षोनामजीवस्यस्वरूपहानिरेवस्यात् । नचैतद्युक्तम् । स्वप्रकाशानंदात्मनोऽविद्याकृतानर्थनिवृत्तिमात्रस्यमोक्षत्वाभ्युपगमादित्याशंक्योपाधिजन्मनैवजन्मजीवानामुच्यतेनस्वतोऽघटनादित्याहुः । नघटतइति । तत्रकिंप्रकृतेर्जीवरूपेणोद्भवःस्यात्पुरुषस्यवाउभयोर्वा । आद्येजीवानांजडत्वापत्तिः । द्वितीयेपुरुषस्यविकारित्वप्रसंगः । अतएवनतृतीयइत्याशयेनोक्तंप्रकृतिपूरुषयोरुद्भवोनघटतइति । श्रुत्याऽजत्वप्रतिपादनादपीत्याहुः । अजयोरिति । तथाचश्रुतिः ।"अजामेकांलोहितशुक्लकृष्णांबह्वींप्रजांजनयंतींसरूपाम् । अजोह्येकोजुषमाणोनुशेतेजहात्येनांभुक्तभोगामजोन्य"इति उभययुजातुभवंति । उभयंचतद्युज्यतइतियुक्संबद्धंपरस्पराध्यस्तमितियावत् तेन । असुभृतःप्राणाद्युपाधयोजीवाजायंतइत्यर्थः । जलबुद्बुदवदिति । यथाकेवलेनानिलेनवाजलेनवाजलबुद्बुदानभवंति । किंतुमिलिताभ्यांतद्वत् । तत्रचयथाऽनिलोनिमित्तंजलमुपादानंएवमत्रापिप्रकृतिर्निमित्तंपुरुषउपादानं " तस्माद्वाएतस्मादात्मनआकाशःसंभूतःसोऽकामयतबहुस्यांप्रजायेयेति । यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिसर्वएतआत्मानोव्युच्चरंति"त्यादिश्रुतिषुचेतनाचेतनप्रपं

श्लोकाः

अपरिमिताध्रुवास्तनुभृतोयदिसर्वगतास्तर्हिनशास्यतेतिनियमोध्रुवनेतरथा ॥ अजनिचयन्मयंतदविमुच्यनियंतृभवेत्सममनुजानतांयदमतंमतदुष्टतया १७
३०नघटतउद्भवःप्रकृतिपूरुषयोरजयोरुभययुजाभवंत्यसुभृतोजलबुद्बुदवत् ॥त्वयितइमेततोविविधनामगुणैःपरमेसरितइवार्णवेमधुनिलिल्युरशेषरसाः १८३१

चूर्णिका

किंच हे ध्रुव जीवाः अनंताः नित्याः सर्वगताश्च यदि स्युः तर्हि तेषां समत्वात् साम्यता न घटते इतरथा तु घटेत कथं यदुपाधितः यज्जीवाख्यं विकारप्रायं जातं तत् स्वविकारस्य नियामकं भवेत् किं तत् जानीम इति वदतांअविज्ञातप्रायं न जानीम इति वदतां ज्ञातप्रायम् एवंभूतं किमपि समं नियंतृ भवेत् १७ ३० अथ जीवानां उपाधिजन्मनैव जन्मोच्यते न स्वतःअघटनादित्याह अजयोः प्रकृतिपुरुषयोः जीवरूपेणोद्भवः न घटते उभयोः परस्पराध्यासेन जीवाः जायंते यथा जलबुद्बुदाः केवलेन जलेन अनिलेन वा न भवंतिकिंतु मिलिताभ्यां तद्वत् एवं भूताः जीवाः त्वयि अनेकप्रकरकार्योपाधिभिः सहलीनाः स्युः तत्र सुषुप्तिप्रलययोः क्रमात् मधुनि सर्वेरसा इव सरितः समुद्र इव लीयंते १८ ३१

३०
३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१६३॥

ननुयद्यखिलसत्त्वनिकेतत्वेनभगवतः सेव्यत्वमुच्यतेतर्हितत्करणसंबंधात् कर्तृत्वभोक्तृत्वेप्रसज्येयाताम् । नवस्तुतस्तथात्वमितिचेत्तर्हिजीवानामपितत्तुल्यत्वमितिकेनविशेषेणपुनः सेव्यसेवकत्वमितीमामाशंकांपरिहरंत्यः “ अपाणिपादोजवनोग्रहीतापश्यत्यचक्षुःसशृणोत्यकर्णः । सवेत्तिवेद्यंनहितस्यवेत्तातमाहुरग्र्यंपुरुषंपुराणमि”त्याद्याःश्रुतयःस्तुवंतीत्याह । त्वमकरणइति । करणसंबंधरहितएवाखिलकारकशक्तिधरः अखिलानांप्राणिनांयानिकारकाणिइंद्रियाणितेषांशक्तीर्धारयतिप्रवर्तयतीति तथा । कुतः स्वराट्स्वेनैवराजसेदीप्यसेनहिस्वतःसिद्धज्ञानशक्तेरिंद्रियापेक्षेत्यर्थः । अतस्तवबलिमुद्वहंतिपूजांकुर्वंति । अजयाअविद्ययासहितास्तयाआवृताइत्यर्थः । अनिमिषादेवाइंद्रादयस्तत्पूज्याविश्वसृजोब्रह्मादयोपियथासस्त्रीकाएवकिंकराःस्वामिनंसेवंतेतथाऽविद्यायुक्तादेवादयस्त्वामितिलोकोक्तिः । समदंतिचमनुष्यैर्दत्तंहव्यकव्यादिलक्षणंबलिंभक्षयंति । अत्रदृष्टांतः । वर्षभुजोऽखिलक्षितिपतेरिवेति । यथावर्षभुजः खंडमंडलपतयोऽखिलक्षितिपतेर्महामंडलेश्वरस्यस्वप्रजादत्तंबलिमुद्वहंतितद्वदिति । कथंबलिंवहंतितदाहुः विदधतियत्रयेत्वधिकृताभवतश्चकिताइति । त्वत्तोभीताःसंतोयस्मिन्कर्मणियेनियुक्तास्तेतत्तत्कुर्वंतीति । त्वदाज्ञापालनमेवबलिवहनमित्यर्थः तथाचश्रुतिः “ भीषास्माद्वातःपवतेभीषोदेतिसूर्यः । भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचम”इति । अनिंद्रियोपियोदेवःसर्वकारकशक्तिधृक् । सर्वज्ञःसर्वकर्ताचसर्वसेव्यंनमामितम् १५ २८ तदेवंकरणप्रवर्तकमीश्वरंकरणपरतंत्रानराभजंतीत्युक्तम् । नकेवलमियदेवकारणंतत (ईश्वरात्) उत्पन्नत्वेनापितत्परतंत्रत्वादितिवदंति “ यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंतिएवमेवास्मादात्मनःसर्वेप्राणाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिसर्वएतआत्मानोव्युच्चरंती”त्यादिश्रुतयइत्याह (सनंदनः) स्थिरचरजातयइति । हेविमुक्तयदियदातवअजयामाययाविहारोविहारःक्रीडाभवतितदास्थिरचरजातयःस्थिराश्चराश्चजातयःजात्यालिंगितादेहायेषांतेजीवाःस्युर्भवेयुःकथंभूतस्य । ततःअजातःपरस्यदूरेवर्तमानस्यासंगस्येत्यर्थः । कथंविहारः । उदीक्षयाईक्षणलेशेन (तदैक्षतेतिश्रुत्यादर्शितेन) ननुमयिलीनानांजीवानांकथंजन्मस्यात्तत्राह । उत्थनिमित्तयुजइति । ईक्षयैवउत्थानिउत्थितानिआविर्भूतानिनिमित्तानिकर्माणितद्युक्तानिलिंगशरीराणिवातैर्युज्यंतइतितेतथा । ननुकिंनिमित्तोत्थानेनमदिच्छयैवभवंतु । न । त्वयिवैषम्याभावात् । विषमसृष्टेरयोगादित्याह परमस्येति । तवपरमस्यउत्तमस्यपरमकारुणिकस्यवियतइवआकाशसदृशस्यसमस्येत्यर्थः । कश्चिदपरःस्वीयःपरोऽस्वीयश्चनभवेत् । नसंभवतीत्यर्थः । “ असद्वाइदमग्रआसीत्ततोवैसदजायते ” त्यादिश्रुत्याशून्यपूर्वकत्वमिवप्रतीयतेतदर्थंपुनर्विशिनष्टि । शून्यतुलांदधतःशून्यसाम्यंभजतः तदेवदर्शयितुंपुनर्विशिनष्टि । अपदस्येति । नपद्यतइत्यपदःतस्यवाङ्मनसयोरगोचरस्येत्यर्थः । त्वदीक्षणवशक्षोभमायाबोधितकर्मभिः । जातान्संसरतःखिन्नान्नृहरेपाहिनःपितः १६ २९

श्लोकाः २८—२९

त्वमकरणःस्वराडखिलकारकशक्तिधरस्तवबलिमुद्वहंतिसमदंत्यजयाऽनिमिषाः ॥ वर्षभुजोऽखिलक्षितिपतेरिवविश्वसृजोविदधतियत्रयेत्वधिकृताभवतश्चकिताः १५ २८ स्थिरचरजातयःस्युरजयोत्थनिमित्तयुजोविहरउदीक्षयायदिपरस्यविमुक्ततः ॥ नहिपरमस्यकश्चिदपरोनपरश्चभवेद्वियतइवापदस्यतवशून्यतुलांदधतः १६ २९

चूर्णिका ॥१६३॥

ननु ईश्वरस्य सर्वभूतावासत्वात् कर्तृत्वादिप्राप्ते अतः जीवेश्वरयोः तुल्यत्वात् कथं सेव्यसेवकत्वमित्याशंकां हरंत्यः श्रुतयः स्तुवंति हे ईश त्वं इंद्रियहीनोपि सर्वेंद्रियशक्तिधरोसि अतस्तव पूजां ब्रह्मादयः कुर्वंति तथा मनुष्यैर्दत्तं बलिं स्वयं भक्षयंति यथा मांडलिकाः नृपाः सार्वभौमाय बलिं वहंति तद्वत् एवं च सर्वेदेवादयः त्वत्कर्मणि युक्ताः संतः त्वदाज्ञापालनमेव कुर्वंति १५ २८ किंच हे नित्यमुक्त यदा तव मायया क्रीडा भवति तदा सर्वे जीवाः स्युः ननु मयि लीनानां जीवानां कथं जन्म स्यात् तत्राह त्वदीक्षयैव आविर्भूतकर्मभिः संयुज्य उत्पद्यंते ननु किंनिमित्तोत्थानेन मदिच्छयैव भवंतु न त्वयिवैषम्याभावादित्याह तव समस्य स्वीयः परश्च नास्ति १६ २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१६५॥

चस्यपरमात्मोपादानत्वश्रवणात् नचविकारित्वंपरिणामानंगीकारात् केचित्पुनःपरिणाममंगीकृत्यात्मनोविकारभियाविपरीतंनिमित्तोपादानभावमिच्छंति सर्वथा तावत्प्रकृतिपुरुषैक्याद्भवतीतिसिद्धम्
तदेवं " एकमेवाद्वितीयंब्रह्म अजामेकां अविनाशीवाअरेयमात्मा"इत्यादिश्रुतिबलात्उत्पत्तिश्रवणाच्चजीवानामौपाधिकमेवजन्म नस्वतइत्युक्तम् । उपाधिलयेन परमात्मनिपुनर्लयश्रवणादपि नवास्तव
जन्मेत्याहुःत्वयितइति त्वयिकारणात्मनितेइमेजीवाःततइतियतोनवास्तवंजन्मतस्मात्विविधनामगुणैरनेकप्रकारकार्योपाधिभिःसहलिल्युःलीनावभूवुः। तत्रसुषुप्तिप्रलययोर्मधुन्यशेषरसाइवलीयंते यथा
मधुनि सकलकुसुमरसा विशेषतोनुपलक्ष्यमाणाअपि सामान्येनोपलक्ष्यंते एवंस्वापादौविशेषमात्रलयात् कारणस्यविद्यमानत्वात् सामान्यतोवर्तंते मुक्तौतु कारणस्यापिलयात् त्वयिपरमेनिरुपाधौसरितइ
वार्णवेलीयंतेइतिविवेकः । तथाचश्रुतयः ।" यथासौम्यमधुनिमधुकृतोनिस्तिष्ठंतिनानात्ययानांवृक्षाणांरसान्समवहारमेकतांगमयंतितेतथातत्रनविवेकंलभंतेअमुष्याहंवृक्षस्यरसोस्मीत्येवमेवखलुसौम्ये
माःप्रजाःसतिसंपद्यनविदुःसतिसंपद्यामहइति यथानद्यःस्यंदमानाःसमुद्रेऽस्तंगच्छंतिनामरूपेविहायतथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यामि"त्याद्याः । यस्मिन्नुद्यद्विलयमपियद्भातिवि
श्वंलयादौजीवोपेतंगुरुकरुणयाकेवलात्मावबोधे ।अत्यंतांतंव्रजतिसहसासिंधुवत्सिंधुमध्येमध्येचित्तंत्रिभुवनगुरुंभावयेतंनृसिंहम् १८ ३१ एवंतावत्परमेश्वराज्जीवाजायंतेतद्वशेनचकर्माणिकुर्वंतिपुनस्त
त्रलीयंतइतिसंसारचक्रभ्रमणमुक्तम् । इदानींतन्निवृत्तये"परीत्यभूतानिपरीत्यलोकान्परीत्यसर्वाःप्रदिशोदिशश्च । उपस्थायप्रथमजामृतस्यात्मनात्मानमभिसंविवेशे"त्याद्याभगवदनुवृत्तिंविदधतीत्याह ।
नृपुतवेति । नृषुजीवेषुअमीषुतवमाययाभ्रममुक्तलक्षणमवगत्यज्ञात्वासुधियःभृशंत्वयिअभवेभवनिवर्तकेभावंस्वभावमनुवृत्तिंविदधतिकुर्वंति। अनुप्रभवंअन्वनुप्रभवोयस्मिन्तंभ्रमम्। ततःकिमतआहुःकथमि
ति। अनुवर्ततांअनुवर्तमानानांत्वामेवशरणंभजतांभवभयंसंसारभयंकथंभवेत्नकथंचिदपीत्यर्थःकुतःयत्यस्मात्तवभृकुटिःभ्रूभंगरूपस्त्रिणेमिस्त्रिस्त्रोनेमयइवचक्रप्रांताइवअवच्छेदाःशीतोष्णवर्षाकालायस्य
संवत्सरात्मकस्यकालस्यसःअभवच्छरणेपुनभवान्शरणंरक्षितायेषांतेष्वेवभयंजन्ममरणादिलक्षणंसृजतिकरोति । अतएवंभूतंसंसारमाकलय्यतन्निवृत्तयेसुधियस्त्वयिभावंदधतीति । संसारचक्रक्रकचैर्वि
दीर्णमुदीर्णनानाभवतापतप्तम् । कथंचिदापन्नमिहप्रपन्नंत्वमुद्धरश्रीनृहरेनृलोकम् १९ ३२ सचभगवतिभावोमनोनियमेसतिभवति । सोपिगुरूपसदनादितिगुरूपसदनंविदधाति " तद्विज्ञानार्थंसगु
रुमेवाभिगच्छेत्समित्पाणिःश्रोत्रियंब्रह्मनिष्ठम् । आचार्यवान्पुरुषोवेद । नैषातर्केणमतिरापनेयाप्रोक्तान्येनैवसुज्ञानायप्रेष्ठे"त्याद्याःश्रुतयइत्याह । विजितहृषीकवायुभिरिति । विजितानिहृषी
काणींद्रियाणिवायुश्चप्राणोयैस्तैरपिअदांतमनस्तुरगंअदांतमदमितंमनएवतुरगःदुर्दमत्वादिसाम्यात्तंयेयंतुंनियंतुंयतंतेप्रयतंते (कथंभूतं) अतिलोलमतिचंचलम् । किंकृत्वा । गुरोश्चरणंसमवहा

नृषुतवमाययाभ्रममभीष्ववगत्यभृशंत्वयिसुधियोऽभवेदधतिभावमनुप्रभवम् ॥ कथमनुवर्ततांभवभयंतवयद्भृकुटिःसृजतिमुहुस्त्रिणेमिरभवच्छरणेषुभय
म् १९ ३२ विजितहृषीकवायुभिरदांतमनस्तुरगंयइहयतंतियंतुमतिलोलमुपायखिदः ॥ व्यसनशतान्विताःसमवहायगुरोश्चरणंवणिजइवाजसंत्यक्
तकर्णधराजलधौ २० ३३ श्लोकाः ३२/३३

चूर्णिका अथेदानीं संसारनिवृत्तये भगवद्भावं श्रुतयः विदधतीत्याह हेईश जीवेषुत्वन्माययाभ्रमणंज्ञात्वा सुधियःत्वयिभावंकुर्वंति एवंत्वांभजतांभवभयंनस्यात् कुतःयस्मात्
तवभ्रूभंगरूपः कालः अभक्तेष्वेव भवभयं करोति अतःत्वांभजंतीति १९ ३२ अथ श्रुतयः गुरूपसदनं विदधतीत्याह हे अज ये पुरुषाः गुरोश्चरणं हित्वा जितेंद्रियप्राणैर्नरैर
पि दुर्दमनं मनोरूपं तुरंगं नियंतुं प्रयतंते ते वहुव्यसनाकुलाः संतः इह संसारे दुःखमेवाप्नुवंति यथा अकृतकर्णधाराः वणिजः तद्वत् गुरुणादर्शितहरिभजनसुखानुभू ॥१६५॥
तौ तु स्वत एव मनो निश्चलं भवति नान्यथेति २० ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यत्यक्त्वाअनाश्रित्यतेउपायेषुखिद्यंतेक्लिश्यंतीत्युपायखिदःसतःव्यसनशतान्विताःबहुव्यसनाकुलाःइहसंसारसमुद्रेसंतितिष्ठंति । दुःखमेवप्राप्नुवंतीत्यर्थः । हेअज अकृतकर्णधराःअस्वीकृतनाविकावणि जोजलधौयथातद्वत् (उक्तंच "नृदेहमाद्यंसुलभंसुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारम् । मयानुकूलेननभस्वतेरितंपुमान्भवाब्धिंनतरेत्सआत्महा" । " प्राकृतैःसंस्कृतैश्चैवगद्यपद्याक्षरैस्तथा । देशभाषादिभिः शिष्यंबोधयेत्सगुरुःस्मृतः") गुरुणोपदर्शितभगवद्भजनसुखानुभूतौतुस्वतएवमनोनिश्चलंभवति । नान्यथेतिभावः । यदापरानंदगुरोभवत्पदेपदंमनोमभगवँल्लभेत । तदानिरस्ताखिलसाधनश्रमःश्रेयसौ ख्यंभवतःकृपातः २० ३३ "परीक्ष्यलोकान्कर्मचितान्ब्राह्मणोनिर्वेदमायात् नास्त्यकृतःकृतेन"तथा । "यदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः । अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुते"इत्याद्यावैराग्य विदधतीत्याह । स्वजनसुतेति । आत्मादेहः । धामगृहंअसवःप्राणाःस्वजनादिभिःनृणांकिंस्यात् । क्वसति । सर्वरसंसर्वैरसाःसुखानिविद्यंतेयस्मिन्तस्मिन्त्वयिपरमानंदे " एतस्यैवानंदस्यान्यानि मंगंभूतानिमात्रामुपजीवंतो"तिश्रुतेः । श्रयतस्त्वांसेवमानस्यपुंसःआत्मनिसति । नृणांतुच्छैरेतैःस्वजनादिसुखैःकउपयोगइत्यर्थः । इतिसतसत्यंपरमार्थसुखंअजानतांअतएवामिथुनतःस्त्रियामिथुनीभूय रतयेमायासुखायचरतांप्रवर्तमानानां । कर्मणिषष्ठ्यौ । अजानतश्चरतःपुरुषान्कोनुअर्थःसुखयतिआनंदयतिनकोपीत्यर्थः । इहसंसारे । कथंभूते । स्वविहतेस्वतएवनश्वरे स्वनिरस्तभगेस्वतएवगत सारे । पाठांतरेकोन्वित्यस्यैतद्विशेषणद्वयम् । अतस्त्वद्भजनमेवोचितमित्यर्थः । भजतोहिभवान्साक्षात्परमानंदचिद्घनः । आत्मैवकिमतःकृत्यंतुच्छदारसुतादिभिः २१ ३४ एवंगुरूपदेशेनतत्त्वमवगम्य सारासारविवेकेनचसर्वतोनिर्विंद्यतदेवमहत्संगेनोपपत्तिभिःसम्यगवधारयितुंतीर्थसदनानिमुनयःपर्यटंतीति"श्रोतव्योमंतव्योनिदिध्यासितव्य"इत्यादिश्रुत्यर्थमाह । भुविपुरुपुण्यतीर्थसदनानीति । तेउक्त लक्षणाऋषयोविमदानिरहंकाराःयतोभवत्पदांबुजहृदःभवतःपदांबुजंहृदियेषांते । अतःस्वयमेवअघभित्पापापहारिअंघ्रिजलंयेषांते । उतअपि । तथाविधाअपिपुरूणिबहूनिपुण्यानितीर्थानिसदनानिच क्षेत्राणितान्येवोपासतेसेवंतेप्रायस्तत्रमहत्संगोभवतीति । अथवापुरुअधिकंभगवद्भजनलक्षणंपुण्यंयेषांतानिचतानितीर्थानिचगुरवःमहांतइत्यर्थःतेषांसदनानिआश्रमान् । यदाहामरसिंहः "निपानागमयो स्तीर्थमृषिजुष्टजलेगुराविं"ति । नपुनः पुरुषसारहरावसथानुपासते । पुरुषाणांसारंविवेकस्थैर्यधैर्यक्षमाशांतिप्रमुखंहरंतीतितथातेचतेआवसथागृहास्तान् । नचतेषांगृहादिभवंकुत्सितसुखापेक्षेत्याहुः । दधतिसकृन्मनस्त्वयियआत्मनिनित्यसुखेइतिसकृदपित्वयियेमनोदधतितेपिगृहाद्यासक्तानभवंति । किंपुनरेवंभूताइत्यर्थः । मुंचन्नंगतदंगसंगमनिशंत्वामेवसंचिंतयन्संतःसांतियतोपतोगतमदास्तानाश्रमा नावसन् । नित्यंतन्मुखपंकजाद्विगलितत्वत्पुण्यगाथाभृतस्रोतःसंप्लवसंप्लुतोनरहरेनस्यामहंदेहभृत् २२ ३५

श्लोकाः स्वजनसुतात्मदारधनधामधरासुरथैस्त्वयिसतिकिंनृणांश्रयतआत्मनिसर्वरसे ॥ इतिसदजानतांमिथुनतोरतयेचरतांसुखयतिकोन्विहस्वविहतेस्वनिरस्तभ गे २१ ३४ भुविपुरुपुण्यतीर्थसदनान्यृषयोविमदास्तउतभवत्पदांबुजहृदोऽघभिदंघ्रिजलाः ॥ दधतिसकृन्मनस्त्वयियआत्मनिनित्यसुखेनपुनरुपासते पुरुषसारहरावसथान् २२ ३५

३४/३५

चूर्णिका अथ श्रुतयः भक्तेः अंगं वैराग्यं विदधतीत्याह हे ईश सुखरूपे त्वयि सति नृणां तुच्छैः स्वजनसुतदेहादिभिः कः उपयोगः एवं सत्यं परमार्थ सुखं अजानतः अत एव स्त्रिया सह मिथुनीभूय वर्तमानान् पुरुषान् इह संसारे को नु अर्थः सुखयति न कोपि अतस्त्वद्भजनमेवोचितम् २१ ३४ अथ श्रुतयः सत्संगेन तत्त्वज्ञानं दृढं स्यात् इत्याहुः मुनयः स्वयं पूता अपि भुवि पुण्यतीर्थक्षेत्राण्येव सेवंते यतः तत्रैव सत्संगो भवति एवंभूता ये ते न पुनः गृहान् उपासते एवं च सकृदपि त्वयि ये मनो दधति तेपि गृहाद्यासक्ताः न भवंति किं पुनः एवं भूताः इति २२ ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नन्वाम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानाम् तद्भूतानांक्रियार्थेनसमन्वयइतितत्रतत्रजैमिनिनावेदस्यक्रियापरत्वाभिधानादुपनिषदामपितदेवयुक्तम् । यथोक्तंतंत्रवार्तिककृता । एतेनक्रत्वर्थकर्तृप्रतिपादनेनोपनिषदांनैराकांक्ष्यंव्याख्यातम् । न । " एकमेवाद्वितीयंब्रह्म । विज्ञानमानंदंब्रह्म । अचक्षुरश्रोत्र"मित्येवंतद्विपरीतात्मप्रतिपादनात् । नह्यद्वितीयपरमानंदरूपस्यकर्मांगत्वंयुज्यते । अननुमतंचैतद्वार्तिककृतः । कथं । " सर्वत्रैवहिविज्ञानंसंस्कारत्वेनगम्यते । परांगंचात्मविज्ञानादन्यत्रेत्यवधार्यता"मितितेनैवोक्तत्वात् । एतदर्थमेवमननायमुनयःपर्यटंतीतिपूर्वश्लोकेदर्शितम् । तत्रतावत् द्वैतस्यसत्यत्वेभवेदप्येवंतदेवतुनसंभवतीतिप्रश्नोत्तराभ्यांमननेनतत्त्वावधारणप्रकारमाहुः । सतइदमुत्थितंसदिति । इदंविश्वंधर्मिसदितिसाध्योधर्मः (सतउत्थितमिति । विश्वंसत् ।) सतउत्पन्नत्वाद्धेतुः यद्यतउत्पन्नंतत्तदात्मकमेवदृष्टंयथाकनकादुत्पन्नंकुंडलादितदात्मकंतद्वदिति । तत्रयदिसदभेदःसाध्यतेतदाअपादानत्वनिर्देशेनैवभेदप्रतीतेर्विरुद्धोहेतुरित्याह । ननुतर्कहतमिति । (भेदोपस्थापक हेतुनाव्याहतत्वादनुग्राहकतर्कविकलमित्यर्थः । ननुनाभेदंसाधयामः किंतुतदुत्पन्नत्वेनकुंडलवद्भेदंप्रतिषेधामः तत्राभेदएवस्यादितिचेदित्याशंक्यानैकांतिकत्वेनदूषयंति व्यभिचरतिक्वचेति । पितृपुत्रादिषुमुद्गरघटप्रध्वंसादिपुचतथादर्शनादितिभावः । ननु तदुत्पन्नत्वं नामतदुपादानत्वं नतुतन्निमित्तत्वंअतोनानैकांतिकत्वमित्याशंक्य दूषयंति क्वचमृषेति । गुणोपादानस्यापिफणिनोनगुणत्वंकिंतुमिथ्यात्वम् । अन्यथाकुंडलादिवदबाधप्रसंगात् । अतःपुनरप्यनैकांतिकत्वमेवेतिभावः । ननुतत्रनकेवलंगुणमात्रंफणिनउपादानं किंतुअविद्यायुक्तम्तथाभूतस्यावस्तुत्वाद्युक्तंफणिनोमिथ्यात्वमित्याशंक्यततुल्यमत्रातिदूषयंतिनतथोभययुगिति । अयमर्थः । अत्राप्यविद्यायुक्तस्यैवसतउपादानत्वंएवंभूतस्यचनवस्तुसत्त्वं अतःसदुपादानत्वमसिद्धमितिनवस्तुसत्त्वंप्रपंचस्येति । ननुमाभूदनेनहेतुनाप्रपंचस्यसत्त्वंहेत्वंतरेणतुसाधयामः । तथाहि । सदिदंअर्थक्रियाकारित्वात् नयदेवंनतदेवंयथाशुक्तिरजतमिति । तत्राहुः । व्यवहृतयेविकल्पइषितइति । व्यवहारायअर्थक्रियार्थविकल्पोभ्रमःइषितः इष्टएव । कूटकार्षापणादिनापिक्वचिद्व्यवहारदर्शनात् । नन्वेकत्रसतोऽन्यत्रारोपोभ्रमः प्रसिद्धः । अत्यंतासत्त्वेकथंप्रपंचोभ्रमःस्यात् (क्वचित्) सत्त्वेवानाद्वैतसिद्धिः । उक्तंचभट्टैः । " अध्यस्यतेखपुष्पत्वमसत्कथमवस्तुनि । प्रज्ञातगुणसत्ताकमध्यारोप्येतवानवे"ति । नेत्याहुः । अंधपरंपरयेति । अंधपरंपरयायोविकल्पइत्यन्वयः । अयंभावः । संस्कारजन्योभ्रमःसंस्कारसिद्धयेपूर्वप्रतीतिमात्रमपेक्षते नवस्तुसत्त्वम् । प्रतीतासैत्यांवस्तुसत्यत्वाभावेनभ्रमव्यतिरेकादर्शनात् । अतोनादित्वात् पूर्वपूर्वभ्रमदृष्टस्योत्तरोत्तरआरोपोभविष्यति अंधपरंपरान्यायेन । तेनव्यवहारः सेत्स्यतीत्यप्रयोजकोहेतुरिति । ननु "अक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवति अपामसोमममृताअभूमे"त्यादिभिः कर्मफलस्यनित्यत्वप्रतिपादनादसत्त्वंनघटते । नहिनित्यंवस्तुअसद्भवतितस्माद्वेदप्रतिपादितत्वात् द्वैतंसदेवेत्याशंक्याह भ्रमयतीति । हेभगवन् तेतवभारतीवेदलक्षणाउरुवृत्तिभिः बह्वीभिर्गौणलक्षणादिवृत्तिभिः उक्थजडान्कर्मश्रद्धाभराक्रांतमंदमतीन् भ्रमयति मोहयति । अयंभावः नहिवेदःकर्मफलस्यनित्यत्वमभिप्रैति । किंतुलक्षणयाप्राशस्त्यमात्रम् । विध्येकवाक्यत्वात् । अन्यथावाक्यभेदप्रसंगात् । " तद्यथेहकर्मजितोलोकः क्षीयतेएवमेवामुत्रपुण्यजितोलोकः क्षीयते"इतिन्यायोपवृंहितश्रुत्यंतरविरोधाच्च । अतः कर्मजडानामिदंभ्रममात्रमिति । एतेनैव " तस्माद्वाएतस्मादात्मनआकाशःसंभूत"इत्यादीनामप्यन्य परत्वंदर्शितंभवति । उद्भूतंभवतःसतोपिभुवनंस्रैवसर्पस्रजःकुर्वत्कार्यमपीहकूटकनकंवेदोपिनैवंपरः । अद्वैतंतवसत्परंतुपरमानंदंपदंतन्मुदावंदेसुंदरमिंदिरानुतहरेमामुंचमामानतम् २३ ३६

सतइदमुत्थितंसदितिचेन्ननुतर्कहतंव्यभिचरतिक्वचक्वचमृषानतथोभययुक् ॥ व्यवहृतयेविकल्पइषितोंधपरंपरयाभ्रमयतिभारतीतउरुवृत्तिभिरुक्थजडान् २३ ३६ श्लोकः ३६

चूर्णिका इदं विश्वं सत्यरूपात् उत्पन्नं अतः असदितिचेन्न यतः तर्कबाधितम् एवंप्रपंचसत्त्वे साधनाभावात् तदसत्त्वे च साधनाधिक्यात् प्रपंचो मिथ्यैव स्रजि सर्पइव २३ ३६

१ स्वार्थेतात्पर्याभावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१६८॥

तदिदंप्रपंचस्यसत्त्वेसाधकं (प्रमाणं) नास्तीत्युक्तम् । इदानीमसत्त्वेसृष्टिप्रलयश्रुतयो " यतोवाइमानिभूतानिजायंते"इत्याद्यास्तन्मूलमनुमानंचप्रमाणमित्याह । नयदिदमिति । यत्यस्मात् इदंविश्वंअग्रेसृष्टेःपूर्वंनआसआसीत् । " सदेवसोम्येदमग्रआसीत् । आत्मावाइदमेकएवाग्रआसीदि"त्यादिश्रुतेः । नचनिधनात्प्रलयात्अनुअनंतरंभविष्यत् (प्रलयेपिन) भविष्यतीत्यर्थः । "नासदासीन्नोसदासीत्तदानीमि"त्यादिश्रुतेः । अतःकारणात्अंतरामध्येपिएकरसेकेवलेत्वयिमृषामिथ्यारूपमेवविभातीतिमितंनिश्चितम् । यतएवंअतःश्रुत्याद्रविणजातिविकल्पपथैःद्रविणजातीनांद्रव्यमात्राणांमृल्लोहकार्ष्णायसरूपाणांविकल्पाभेदाःघटकुंडलादयःतेषांपंथानोमार्गाःप्रकाराःतैरुपमीयतेसदृशतयानिरूप्यते । यथातत्रकार्याकाराणांनामधेयमात्रताकारणंमृत्सुवर्णाद्येवतुसत्यंतथात्राप्याकाशादीनांनाममात्रताब्रह्मैवसत्यंतथाचश्रुतिः । " वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यम्" । यथासौम्यैकेन मृत्पिंडेनविज्ञातेनसर्वंमृन्मयंविज्ञातंभवति । तथाएकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्यात् । तथाएकेननखनिकृंतनेनसर्वंकार्ष्णायसमित्यादि । तस्मादस्यसत्वेप्रमाणाभावात्असत्वेप्रमाणस्याविद्यमानत्वात् वितथमनोविलासंमिथ्यामनोविलसितमात्रंऋतंसत्यमितियेअवयंतिजानंतितेअबुधाअज्ञाइत्यर्थः । अत्रैवंप्रयोगः । विवादाध्यासितंनसत् । आद्यंतयोरविद्यमानत्वात् । विकारित्वात्दृश्यत्वात्वाशुक्तिरजतादिवदित्यन्वये । आत्मवच्चेतिव्यतिरेकेदृष्टांतः मुकुटकुंडलकंकणकिंकिणीपरिणतंकनकंपरमार्थतः । महदहंकृतिरवप्रमुखंतथानरहरेर्नपरंपरमार्थतः २४ ३७ ननुयदिप्रपंचोनामनास्त्येवनचासतातेनचैतन्यस्यसंबंधगंधोपिताहंकिमपराद्धंजीवेनयतोऽयंसंसरति । किंवाबहुपुण्यमीश्वरस्ययतोसौनित्यमुक्त । किंविषयंचतदाकर्मकांडमित्यपेक्षायांजीवेश्वरविशेषं "द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते । तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति । अजामेकांलोहितशुक्लकृष्णांबह्वींप्रजांजनयंतींसरूपाम् । अजोह्येकोजुषमाणोनुशेते"इत्याद्यावदंतीत्याह । सयदजयेति । सतुजीवःयत्यस्मात् अजयामाययाअजांअविद्यांअनुशयीत । आलिंगेत । ततःगुणांश्चदेहेंद्रियादीन्सेवमानःआत्मतयाध्यस्यन्तदनुतदनंतरंसरूपतांतद्धर्मयोगंचजुषन्अपेतभगःपिहितानंदादिगुणःसन्मृत्युंसंसारंभजतिप्राप्नोति । तद्विषयमेवचकर्मकांडमितिभावः । त्वमुतत्वंतुजहासितामजांमायांननुसामय्येवास्तिकथंतत्त्यागस्तत्राह । अहिरिवत्वचमिति । अयंभावः । यथाभुजंगःस्वगतमपिकंचुकंगुणबुद्ध्यानाभिमन्यते (किंतूपेक्षतेएव) तथात्वमजां नहिनिरंतराह्लादिसंवित्कामधेनुवृंदपतेरजयाकृत्यमितितांउपेक्षसएवेति । कुतएतत्तदाह । आत्तभगःनित्यप्राप्तैश्वर्यः । महसिपरमैश्वर्येऽष्टगुणितेअणिमाद्यष्टविभूतिमतिमहीयसेपूज्यसेविराजसे । कथंभूतःअपरिमेयभगः । अपरिमितैश्वर्यः । नह्यन्येषामिवदेशकालादिपरिच्छिन्नंतवाष्टगुणितमैश्वर्यंअपितुपरिपूर्णस्वरूपानुबंधित्वादपरिमितमित्यर्थः । नृत्यंतीतववीक्षणांगणगताकालस्वभावादिभिर्भावान्सत्वरजस्तमोगुणमयानुन्मीलयंतीबहून् । मामाक्रम्यपदाशिरस्यतिभरंसंमर्दयंत्यातुरंमायातेशरणंगतोस्मिनृहरेत्वामेवतांवारय २५ ३८

श्लोकाः ३७ ३८

नयदिदमग्रआसनभविष्यदतोनिधनादनुमितमंतरात्वयिविभातिमृषैकरसे ॥ अतउपमीयतेद्रविणजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः २४ ३७ सयदजयात्वजामनुशयीतगुणांश्चजुषन्भजतिसरूपतांतदनुमृत्युमपेतभगः ॥ त्वमुतजहासितामहिरिवत्वचमात्तभगोमहसिमहीयसेऽष्टगुणितेऽपरिमेयभगः २५ ३८

चूर्णिका

किंच इदं विश्वं सृष्टेः पूर्वं नासीत् तथा लयानंतरमपि न भविष्यति अतो मध्येपि न तथापि त्वयि सत्ये मिथ्यारूपमेवेदं भाति यथा घटादीनां कार्याणां नाममात्रता मृदाद्येवसत्यं तद्वत् अतःये इदं सत्यमिति जानंति ते अज्ञाः २४ ३७अथ जीवेश्वरयोर्विशेषमाहुः हे ईश यः मायया अविद्यां आलिंगेत् तथा देहादीन् सेवमानः पिहितानंदादिगुणः सन्संसारं प्राप्नोति सः जीवः तदर्थं कर्मकांडं त्वं तु मायां तां जहासि कथम् अपरिमितैश्वर्यः सन् कंचुकं अहिरिव अतः तवैव सेव्यत्वमिति २५ ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंतावदुक्तसाधनकदंबनयेभगवंतंभजंति तेमृत्युंतरंतीत्युक्तम् । इदानींयेबहिःसंगंपरित्यज्य भगवन्मार्गेप्रवृत्ताअपि कथंचिदंतर्वार्ताशिनः कामान्नमुंचंतिनतेभगवंतंप्राप्नुवंति "नचेहसुखंलभंतेकुयोर्नारे वप्राप्नुवंतीतितान्शोचंत्यःकामान्यःकामयतेमन्यमानःसकर्मभिर्जायतेतत्रतत्रे"त्यादिश्रुतयआहुः यदिनलमुद्धरंतीति । हेभगवन्येयतयोहृदिस्थिताःकामजटाःकामस्यजटामूलानिवासनाःयदिनसमुद्ध रंतिनोत्पाटयंति तर्हितेषांअसतांभवान्हृदिगतोपिदुरधिगमःदुष्प्रापःकथंअस्मृतकंठमणिः विस्मृतकंठमणिस्तत्तुल्यः । सयथाकंठेवर्तमानोप्यस्मृतश्चेदप्राप्तइवभवतितद्वदिति । नकेवलमेतावत् । किंतुअ सुतृपयोगिनांइंद्रियतर्पणपराणांयोगच्छद्मनामुभयतोप्यसुखम् इहामुत्रदुःखमेव । तदाह । अनपगतांतकात् अनिवृत्तान्मृत्योः लोकाराधनधनार्जनादिक्लेशात्भोगवैभवप्राकट्यभयाच्चेहतावदुःखम् । भवतईश्वरादपिदुःखम् । कथंभूतात्अनधिरूढपदात् । अनधिरूढंअप्राप्तंपदंस्वरूपंयस्यतस्मात् । त्वत्स्वरूपप्राप्त्यभावात्अविद्यावद्विषयत्वेनप्राप्तनिजधर्मातिक्रमनिबंधनत्वदंडरूपनरकप्राप्तेरमुत्राप्यसु खमित्यर्थः ॥ दंभन्यासमिषेणवंचितजनंभोगैकचिंतातुरंसंमुह्यंतमहर्निशंविरचितोद्योगक्लमैकाकुलम् । आज्ञालंघिनमज्ञमज्ञजनतासंमाननासंमदंदीनानाथदयानिधानपरमानंदप्रभोपाहिमाम् २६ ३९ ननु यतेर्नकिमपि कृत्यमस्ति प्रारब्धमेवसुखोपभोगेनापक्षिप्यते अतः किमिति वृथाशप्यते उभयतोप्यसुखमिति । श्रूयतेच । एषनित्योमहिमा ब्राह्मणस्यनकर्मणा वर्धतेनोकनीयानित्यादि तत्राहुः । त्व दवगमीति । हेसगुणषड्गुणैश्वर्ययुक्तत्वदवगमीत्वज्ज्ञानवान् भवदुत्थशुभाशुभयोर्भवतः कर्मफलदातुरीश्वराद्धेतोरुत्थयोराविर्भूतयोः शुभाशुभयोः प्राचीनपुण्यापुण्यकर्मणोः फलभूतान् गुणविगुणान्वयान् सुखदुःखसंबंधान्नवेत्तिनानुसंधत्ते । तर्हितदानींचदेहभृतांदेहाभिमानिनांप्रवृत्तिनिवृत्तिकरीर्गिरः विधिनिषेधलक्षणानवेत्तिविगतदेहाभिमानतयाकार्याकार्यबोधाभावात्ताभिर्ननियुज्यतइत्यर्थः । युक्तंचैत त् । यतः कारणान्मनुजैरन्वहंश्रवणभृतः अनुदिनंश्रवणेनचेतसिधृतः त्वं तेषांअपवर्गगतिः अपवर्गरूपागतिर्भवसि कथंश्रवणभृतः अनुयुगंप्रतियुगंयागीतपरंपरा उपदेशसंततिः तया सत्संप्रदायानुसारे णेत्यर्थः । एतदुक्तंभवति । येतावत्तत्त्वज्ञानिनः नतेषां कर्माधिकारशंकापि । येचानवरतंत्वत्कथाश्रवणादिनिष्ठास्तेषामप्यासन्नभवत्पदानां नविधिनिषेधबाधः । इतरेषांतुयोगच्छद्मनेंद्रियलालसानां उभयतोप्यसुखमित्युक्तमेवेति । अवगमंतवमेदिशमाधवस्फुरतियन्नसुखासुखसंगमः । श्रवणवर्णनभावमथापिवानहिभवामियथाविधिकिंकरः २७ ४०

श्लोकाः ३९/४०

यदिनसमुद्धरंतियतयोहृदिकामजटादुरधिगमोऽसतांहृदिगतोस्मृतकंठमणिः ॥ असुतृपयोगिनामुभयतोप्यसुखंभगवन्ननपगतांतकादनधिरूढपदाद्भवतः २६ ३९ त्वदवगमीनवेत्तिभवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हिदेहभृतांचगिरः ॥ अनुयुगमन्वहंसगुणगीतपरंपरयाश्रवणभृतोयतस्त्वमपवर्गग तिर्मनुजैः २७ ४०

चूर्णिका

किंच हे ईश ये दांभिकाः यतयः त्वदि स्थिताः कामवासनाः यदि नोत्पाटयंति तर्हि तेषां त्वद्गतोपि त्वं दुष्प्रापः कथम् विस्मृतकंठमणिरिव किंच तेषांइहामुत्र दुः खमेवेत्याहअत्र लोकाराधनधनार्जनादिक्लेशात् दुःखम् परत्र भवतो दुःखमिति २६ ३९ ननु यतेः न किमपि कृत्यमस्ति किमिति वृथा शप्यते तत्राह हे भगवन् त्वज्ज्ञानवान् पुमान् प्राचीनपुण्यापुण्यकर्मणोः सुखदुःखसंबंधान् नानुसंधत्ते तथा विधिनिषेधलक्षणा गिरश्च इदं तस्य युक्तं यतः मनुजैः नित्यं श्रवणेन चेतसि धृतस्त्वं तेषांअपवर्गरूपा गतिर्भवसि अतः योगच्छद्मना इंद्रियलालसानां उभयतोप्यसुखं २७ ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका त्वदवगमीनवेत्ति सुखदुःखे नचविधिनिषेधावित्युक्तं तत्र ननु कथमवगंतुंशक्यंदुरवगमत्वस्योक्तत्वात् इत्येवमाशंक्य सत्यमेवमनवगाह्यममहिम्नोवाङ्मनसागोचरत्वादविषयत्वेनैवज्ञानमितिदर्शयन् "यदूर्ध्वंगार्गिदिवोयदर्वाक्पृथिव्या यदंतराद्यावापृथिवीइमे यद्भूतंभवच्च भविष्यच्चे"त्यादि श्रुतिप्रतिपादितमपरिमितंमहिमानमाह । द्युपतयएवेति । हेभगवन् ते अंतंद्युपतयः स्वर्गादिलोकमतयो ब्रह्मादयोपिनययुः नप्रापुः । तत्कुतः । यदंतवद्वस्तुतत्किमपित्वंनभवसि । आस्तांद्युपतयोनययुरिति । यत्यस्मात्त्वमपिआत्मनोंतंनयासि । कुतस्तर्हिसर्वज्ञतासर्वशक्तितावा । अतआहुः । अनंततया अंताभावेन । नहिशशविषाणाज्ञानंसार्वज्ञंतदप्राप्तिर्वाशक्तिवैभवंविहंति । अनंतत्वमेवाह । यदंतरेति । यस्यतवअंतरामध्येननुअहोसावरणाःउत्तरोत्तरदशगुणसप्तावरणयुक्ताअंडनिचया ब्रह्मांडसमूहा वांतिपरिभ्रमंति वयसाकालचक्रेण । खेरजांसीव । सहएकदैवनतुपर्यायेण । हियस्मादेवंअतःश्रुतयस्त्वयिफलंति तात्पर्यवृत्त्यापर्यवस्यंति नतुसाक्षाद्वदंति अयमेतावानिति । सगुणस्यगुणानंत्यात् । निर्गुणस्यागोचरत्वात् (वक्तुमशक्यत्वमित्यर्थः) कथंतर्ह्यपदार्थेतात्पर्यमिति । तत्र विधिमुखेवाक्येभवेदयंनियमः पदार्थस्यैववाक्यार्थत्वमिति । निषेधमुखेतुनायंनियमइत्याह । अतन्निरसनेनेति । "अन्यदेवतद्विदितादथो अविदितादनुअन्यत्रधर्मादन्यत्राधर्मादन्यस्मात्कृताकृतात्" । अस्थूलमनण्वित्यादिप्रकारेणलक्षणयाच "तत्त्वमसी"त्यादयः पर्यवस्यंति । नचवाच्यंनिषेधैःशून्यमेवज्ञाप्यतइति । यतोनिषेधावधिभूतस्यभवतः सत्त्वादित्याह । भवन्निधनाः । भवतित्वयिनिधनंसमाप्तिर्यासांतास्तथा । नहिनिरवधिनिषेधः संभवति । अतोऽवधिभूतेत्वयिफलंतीत्यर्थः (सगुणस्यतुगुणानंत्येपि "नभःपतंत्यात्मसमंपतत्रिण" इतिन्यायेनवाङ्मनसगम्यत्वंविधिमुखेनापियुक्तमित्यवधेयम्) । द्युपतयोविदुरंतमनंततेनचभवान्नगिरःश्रुतिमौलयः । त्वयिफलंति यतोनमइत्यतोजयजयेतिभजेतवतत्पदम् ४१ २८ (आत्मानुशासनंआत्मविषयंशास्त्रंश्रुत्वाआत्मनोगतिंज्ञात्वाच) ४२ इत्यशेषसमाम्नायपुराणोपनिषद्रसइतिसर्वश्रुतिपुराणरहस्यतात्पर्यमित्यर्थः । (व्योम्नियानंगतिर्येषांतैः सनंदनादिभिः ४३ ब्रह्मदायादेतिब्रह्मैवदायमप्रयत्नप्राप्यम्अत्तिभुंक्तेसेवतेइतितथाब्रह्मपुत्रेतिवा (हेनारदेत्यर्थः नृणांकामानांभर्जनमेतद्धारयन्पृथ्वींचर । नृणामुद्धारार्थमितिभावः) ४४ (गृहीत्वाश्रुत्वा) श्रुतधरः श्रुतमर्थंमनसिधारयन् । पूर्णः कृतकृत्यः वीरव्रतोनैष्ठिकः (नारदआह) ४५

श्लोकाः ४१—४५

द्युपतयएवतेनययुरंतमनंततयात्वमपियदंतरांडनिचयाननुसावरणाः ॥ खइवरजांसिवांतिवयसासहयच्छ्रुतयस्त्वयिहिफलंत्यतन्निरसनेनभवन्निधनाः २८ ४१ ॥ श्रीभगवानुवाच ॥ इत्येतद्ब्रह्मणःपुत्राआश्रुत्यात्मानुशासनम् ॥ सनंदनमथानर्चुःसिद्धाज्ञात्वात्मनोगतिम् ४२ इत्यशेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतःपूर्वजातैर्व्योमयानैर्महात्मभिः ४३ त्वंचैतद्ब्रह्मदायादश्रद्धयात्मानुशासनम् ॥ धारयंश्चरगांकामंकामानांभर्जनंनृणाम् ४४ ॥ श्रीशुकउवाच ॥ एवंसऋषिणादिष्टंगृहीत्वाश्रद्धयात्मवान् ॥ पूर्णःश्रुतधरोराजन्नाहवीरव्रतोमुनिः ४५

चूर्णिका किंच हे भगवन् ब्रह्मादयो द्युपतयः ते अंतं न प्रापुः कुतः अनंतत्वात् आस्तां ते न प्रापुरिति यतः त्वमपि स्वांतं न यासि कुतस्तर्हि मे सर्वज्ञता तत्राह अंताभावेन न हि शशशृंगाज्ञानं सार्वज्ञं हंति अनंतत्वमेवाह यस्य तव मध्ये ब्रह्मांडसमूहाः खे रजांसीव परिभ्रमंति अतः श्रुतयः अतन्निरसनेन तात्पर्यवृत्त्या त्वयि पर्यवस्यंति एवं तावत् अवधिभूते त्वयि श्रुतयः फलंतीति २८ ४१ श्रीभगवानुवाच हे नारद एवं ब्रह्मपुत्राः आत्मनुशासनं श्रुत्वा सनंदनं आनर्चुः ४२ एवं सर्वश्रुतिपुराणरहस्यतात्पर्यं सनकादिभिः उद्धृतं ४३ हे नारद एतत् त्वं धारयन् गां कामंचर ४४ श्रीशुक उवाच एवं नारायणेनादिष्टं गृहीत्वा नारदः पूर्णः सन् आह ४५ ॥१७०॥

१ नतादिति वा पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमइति । कृष्णावतारतयाऋषिंनारायणंनमस्यति । उक्तंहि । "एतेचांशकलाःपुंसःकृष्णस्तुभगवा न्स्वय"मिति (अभवायमोक्षायउशतीः कमनीयाः) ४६ (अथशुकोक्तिः इत्याद्यमिति । ततो नारायणाश्रमात् । मेमम) साक्षात्पितुरितियोनिव्यवधानंविनाजनकस्य । अग्निमथनावसरेकथंचिदरणौरेतःपतितंममंथव्यासस्तदैवततउत्पन्नःशुकइतिहिवदंति ४७ ४८ (यस्मात्त्वयाऽस्मान्प्रतिप्रश्नःकृतःअतोयथाब्रह्मणिमनश्चरेत्तथाएतद्वर्णितमिति) ४९ समस्तवेदस्तुत्यर्थंसंगृह्यानुस्मारयति । योस्योत्प्रेक्षकइति । यःअस्यविश्वस्यउत्प्रेक्षकः । एवमिदमनुशायिनांसमस्तपुरुषार्थसिद्धयेसृष्टिस्थितिप्रलयादिप्रापणीयमित्यालोचकइत्यर्थः ।"तदैक्षते"त्यादिश्रुतेः अनेननिमित्तत्वमुक्तम् । एवमालोच्यअस्यादिमध्यनिधनेआदिर्जन्म । मध्यंपालनम् । निधनमंतः एषुकर्मसुयोवर्तते "(यतोवाइमानिभूतानिजायंत " इत्यादिश्रुतेः) अनेनोपादानत्वमुक्तम् । ननुप्रकृतिपुरुषयोरुपादाननिमित्तत्वेप्रसिद्धे । सत्यम् । तयोरपिततएवोद्भूतत्वान्मूलकारणंसएवेत्याह योऽव्यक्तजीवेश्वरइति । प्रकृतिपुरुषयोरपीश्वरः । प्रवेशनियमनेदर्शयति । यःसृष्ट्वेति । पूर्वोक्तप्रकारेणेदंसृष्ट्वायदर्थमेतत्सृष्टंतेनऋषिणासृष्टेकार्येअहमितिदर्शनाद्दषिर्जीवःतेनसहानुप्रविष्टःपुरःशरीराणितस्यभोगायतनानि चक्रे ताःपुरःशास्ति तस्यभोगंददत्परिपालयति । उपासकस्यचकैवल्यरूपोभवतीत्याह । यंसंपद्यप्राप्यानुशायीअन्वनुदंडवत्प्रणामैश्चरणमूले शेते इतितथासजीवः अजांकार्यकारणलक्षणामविद्यांत्यजति । ननुब्रह्मसंपन्नस्यापिजीवतस्तत्संबंधोदृश्यतेअतआह । सुप्तःकुलायंयथेति (कुलायंशरीरम्) अयंभावः । यथासुप्तंशरीरवंतमन्येपश्यंति सतुनात्मानं तथापश्यति एवंजीवन्मुक्तमप्यन्येदेहवंतंपश्यंति सतुनेक्षिचित्पश्यतीति । तंहरिंअजस्रंअनवरतंध्यायेत् । किमित्यतआह । अभयम् । नभयंयस्माद्भयनिवर्तकमित्यर्थः । कुतएतत् । कैवल्यनिरस्तयोनिंकैवल्येनाप्रच्युतस्वरूपावस्थानेननिरस्तातिरस्कृतायोनिर्मूलकारणंमायायेनतम् सर्वश्रुतिशिरोरत्ननीराजितपदांबुजम् । भोगयोगप्रदंवंदेमाधवंकर्मिनम्रयोः ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांसप्ताशीतितमोऽध्यायः ८७ ॥ ॥ ७ ॥

श्लोकाः ४६—५०

॥ नारदउवाच ॥ नमस्तस्मैभगवतेकृष्णायामलकीर्तये ॥ योधत्तेसर्वभूतानामभवायोशतीःकलाः ४६ इत्याद्यमृषिमानम्यतच्छिष्यांश्चमहामनाः ॥ ततोगादाश्रमंसाक्षात्पितुर्द्वैपायनस्यमे ४७ सभाजितोभगवताकृतासनपरिग्रहः ॥ तस्मैतद्वर्णयामासनारायणमुखाच्छ्रुतम् ४८ इत्येतद्वर्णितंराजन् यन्नःप्रश्नःकृतस्त्वया ॥ यथाब्रह्मण्यनिर्देश्येनिर्गुणेपिमनश्चरेत् ४९ योऽस्योत्प्रेक्षकआदिमध्यनिधनेयोऽव्यक्तजीवेश्वरोयःसृष्ट्वेदमनुप्रविश्यऋषिणाचक्रे पुरःशास्तिताः॥ यंसंपद्यजहात्यजामनुशयीसुप्तःकुलायंयथातंकैवल्यनिरस्तयोनिमभयंध्यायेदजस्रंहरिम् ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्ताशीतितमोऽध्यायः ८७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

नारद उवाच यः ईशः भूतानां मोक्षार्थं कलाः धत्ते तस्मै कृष्णाय नमोऽस्तु ४६ एवं नारदः नारायणं तच्छिष्यांश्च नत्वा मम पितुः आश्रमं अगात् ४७ तेन सभाजितः व्यासाय नारायणमुखोक्तं अवर्णयत् ४८ एवं हे राजन् त्वया ब्रह्मणिश्रुतिःकथं चरेत् इति यत्पृष्टं तदुक्तम् ४९ किंच यः ईशः प्रकृतिपुरुषेश्वरः इदं सृष्ट्वा तदनुविश्य शरीराणि कृत्वा तानि शास्ति यं प्राप्य जीवः अविद्यां जहाति तंहरिं अजस्रं ध्यायेत् ५० इतिश्रीभागवते महापुराणे दशमस्कंधे पारमहंस्यां संहितायांवैयासिक्यांवेदस्तुतिर्नामसप्ताशीतितमोऽध्यायः ८७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अष्टाशीतितमेविष्णुभक्तःकैवल्यमश्नुते । ततोवाग्देवभक्तस्तुविभूतिमितिवर्ण्यते । हरिर्भजतांमुक्तिदइत्युक्तअभयंध्यायेदजस्रहारिमितितत्रशंकतेदेवासुरेति । अशिवंअवधीरितभोगम् । भोजाभोगिनः (भवंति ।) लक्ष्म्याःपतिंसर्वभोगयुक्त-(-मपिभजंतः प्रायेणभोजानभवंतिकिंतुभोगान्मुक्ताइत्यर्थः) १ (विरुद्धागतिःफलमितियत्एतद्वेदितुमिच्छामः ।) २ (गुणसंवृतः गुणोपहितः । गुणानां) अन्योन्योपमर्देनतमसस्त्रैविध्यात्रिलिंगः । त्रिलिंगत्वमाह । वैकारिकइति । अहंअहंकारः ३ (ततोहंकारात्रिविधात्) विकारामनइंद्रियभूतरूपाः (क्रमेण ।) षोडशेति इंद्रियदेवानामभेदविवक्षया (अमीषुविकारेषु) कंचनेतियत्किंचिद्विकारोपाधिकंभजन्उपाध्यनुरूपाणांविभूतीनां (गतिं) स्वरूपंप्राप्नोति ४ (यतः) उपद्रष्टासाक्षीसन्सर्वदृक्सर्वंपश्यति अतः प्रकृतेःपरइति । अत्रेदंतत्त्वम् । "वस्तुनोगुणसंबंधेरूपद्वयमिहेष्यते । तद्धर्मायोगयोगाभ्यांबिंबवत्प्रतिबिंबवत् । गुणाःसत्त्वादयः शांतघोरमूढाःस्वभावतः । ब्रह्मविष्णुशिवानांचगुणयंतृस्वरूपिणाम् । नातिभेदोभवेद्भेदोगुणधर्मैरिहांशतः । सत्त्वस्यशांत्यानोजातुविष्णोर्विक्षपमूढते । रजस्तमोगुणाभ्यांतुभवेतांब्रह्मरुद्रयोः । गुणोपमर्दतोभूयस्तदंशानांचभिन्नता । अतःसमग्रसत्त्वस्यविष्णोर्मोक्षकरीमतिः । अंशतोभूतिहेतुश्चतथानंदमयीस्वतः । अंशतस्तारतम्येनब्रह्मरुद्रादिसेविनाम् । विभूतयोभवंत्येवशनैर्मोक्षोप्यनंशतः"।इदमेवाभिप्रेत्यतत्रतत्रोच्यते । "श्रेयांसितत्रखलुसत्त्वतनोर्नृणांस्यु"रिति । तथा "सत्त्वंततीर्थसाधन"मिति । तथा "त्रयाणामेकभावानांयोनुपश्यतिवैभिदा"मिति । तथा"नतेमय्यच्युतेऽजेचभिदामण्वपिचक्षत"इत्यादि । एवंसतिनकिंचिदसमंजसम् । तत्तद्भक्तानांतुकलहोमोहमात्रमिति ५ (भगवतःसकाशाद्धर्मान्शृण्वन्प्रसंगादिदमेवतंपृष्टवानित्यर्थः) ६ (निश्रेयसार्थायमोक्षरूपप्रयोजनाय) ७ यस्याहमनुगृह्णामीति अयमर्थः । यो-(-ऽनुग्रहाधिकारी) विषयान्परिजिहीर्षुरपिकथंचिद्विद्यमानेषुसज्जतेक्लिश्यतिचतस्यविषयापहारएवानुग्रह इति । यथाश्रुतत्वेध्रुवादीनामैश्वर्यविरोधात् । अथवाप्रथमंविभूतीःकामनानुरूपादत्त्वाशनैर्विषयभोगावसानेतस्यनिर्वेदमुत्पाद्यहरिष्यामिपरमानुग्रहंकर्तुमितितदुक्तंभगवतैव ।"नमय्यावेशिताधियांकामःकामायकल्पत"इति (ततोऽस्यस्वजनाएनमधनंत्यजंति) दुःखदुःखितंदुःखादनुपुनर्दुःखितमिवप्रतीयमानमित्यर्थः (वस्तुतस्तुनिर्वेदाददुःखितम् । यद्वास्वजनसंबंधाचदुःखंतेनदुःखितम्) ८

॥१७२॥

॥राजोवाच ॥देवासुरमनुष्येषुयेभजंत्याशिवंशिवम्॥प्रायस्तेधनिनोभोजानतुलक्ष्म्याःपतिंहरिं १एतद्वेदितुमिच्छामःसंदेहोत्रमहान्हिनः ॥ विरुद्धशीलयोः
प्रभ्वोर्विरुद्धाभजतांगतिः २ ॥ श्रीशुकउवाच॥ शिवःशक्तियुतःशश्वत्रिलिंगोगुणसंवृतः ॥ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिधा ३ततोविकाराअभवन्षो
डशामीषुकंचन ॥ उपधावन्विभूतीनांसर्वासामश्नुतेगतिम् ४ हरिर्हिनिर्गुणःसाक्षात्पुरुषःप्रकृतेःपरः ॥ ससर्वदृगुपद्रष्टातंभजन्निर्गुणोभवेत् ५ निवृत्तेष्व
श्वमेधेषुराजायुष्मान्पितामहः ॥ शृण्वन्भगवतोधर्मानपृच्छदिदमच्युतम् ६ सआहभगवांस्तस्मैप्रीतःशुश्रूषवेप्रभुः ॥ नृणांनिश्रेयसार्थाययोऽवतीर्णोय
दोःकुले ७ ॥ श्रीभगवानुवाच ॥ यस्याहमनुगृह्णामिहरिष्येतद्धनंशनैः ॥ ततोऽधनंत्यजंत्यस्यस्वजनादुःखदुःखितम् ८

श्लोकाः १/८

चूर्णिका राजोवाच ॥ हे ब्रह्मन् देवासुरमनुष्येषु अशिवंशिवं ये भजंति ते प्रायः भोगिनो धनिनश्च भवंति ये लक्ष्मीपतिं हरिं भजंति ते तु न १एतत् ज्ञातुं इच्छामः २ ॥ श्रीशुक उवाच ॥ हे राजन् शिवः शश्वत् शक्तियुक्तः अतः तं भजन् संपत्तिं प्राप्नोति ३ ४ हरिस्तु निर्गुणः अतः तं भजन् निर्गुणोभवति ५ हे राजन् अश्वमेधेषु सत्सुयुधिष्ठिरः अच्युतं इदमेव अपृच्छत् ६ तदा भगवान् तस्मै आह७ ॥ श्रीभगवानुवाच॥हे धर्म अहं यं अनुगृह्णामि तस्य धनं शनैः हरिष्ये ततः अधनं तं स्वजनाः त्यजंति ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सपुनर्बंधूनामाग्रहेणधनेहयाप्रवृत्तोपिमदनुग्रहेणयदानिष्फलोद्यमोनिर्विण्णःस्यात् । तदामदनुग्रहमितिममासाधारणमनुग्रहमहं (करिष्ये । कथंभूतस्य । मत्परैःमद्भक्तैःकृतमैत्रस्य) ९ स्वानुग्रहमेवाह । तद्ब्रह्मेति । अतःपश्चादपिमोक्षमरोचयन्सुदुराराध्यत्वान्मांहित्वाऽन्यासक्तोभवतिजनइत्यर्थः १० (आशुस्वल्पेनैवकालेनतोषोयेषांतेभ्योलब्धयाराज्यश्रियाप्रमत्ताअनवहिताः) ११ एतदेवेतिहासेनस्पष्टयितुमाह । शापप्रसादयोरिति (सद्यएवशापःप्रसादश्चयस्यसः शिवो) ब्रह्माचेत्यन्वयः १२ १३ शकुनेःपुत्रः (त्रिषुब्रह्मादिषुआशुतुष्यतिकइतिपप्रच्छेत्यर्थः) १४ (उपाधावभज । अल्पेनगुणेनाशुतुष्यति । अल्पेनदोषेणाशुकुप्यतिच ।) १५ सुसंकटमाप (रावणात्) कैलासोत्पाटनं (बाणस्य) पुरपालनंच (आप्तवान्) १६ (केदारेक्षेत्रविशेषे) स्वगात्रतः (स्वशरीरेण) उपाधावत् । कथम् । आत्मक्रव्येणस्वमांसेन (अग्निर्मुखंयस्यतं) जुह्वानइति १७ (देवस्योपलब्धिर्दर्शनम् । स्वधितिनाखड्गेन । तस्मिन्क्षेत्रेयत्तीर्थंतेनक्लिन्नाः केशायस्य तच्छिरः) अवृश्चत् च्छेत्तुमुद्यतइत्यर्थः १८

॥१७३॥

श्लोकाः ९/१८

सयदावितथोद्योगोनिर्विण्णःस्याद्धनेहया ॥ मत्परैःकृतमैत्रस्यकरिष्येमदनुग्रहम् ९ तद्ब्रह्मपरमंसूक्ष्मंचिन्मात्रंसदनंतकम् ॥ विज्ञायात्मतयाधीरःसंसारात्परिमुच्यते ॥ अतोमांसुदुराराध्यंहित्वान्यान्भजतेजनः १० ततस्तआशुतोषेभ्योलब्धराज्यश्रियोद्धताः ॥ मत्ताःप्रमत्तावरदान्विस्मरंत्यवजानते ११ ॥ श्रीशुकउवाच ॥ शापप्रसादयोरीशाब्रह्मविष्णुशिवादयः ॥ सद्यःशापप्रसादोंगशिवोब्रह्मानचाच्युतः १२ अत्रैवोदाहरंतीममितिहासंपुरातनम् ॥ वृकासुरायगिरिशोवरंदत्त्वापसंकटम् १३ वृकोनामासुरःपुत्रःशकुनेःपथिनारदम् ॥ दृष्ट्वाशुतोषंपप्रच्छदेवेषुत्रिषुदुर्मतिः १४ सआहदेवंगिरिशमुपाधावाशुसिध्यसि ॥ योऽल्पाभ्यांगुणदोषाभ्यामाशुतुष्यतिकुप्यति १५ दशास्यबाणयोस्तुष्टःस्तुवतोर्बंदिनोरिव ॥ ऐश्वर्यमतुलंदत्त्वाततआपसुसंकटम् १६ इत्यादिष्टस्तमसुरउपाधावत्स्वगात्रतः ॥ केदारआत्मक्रव्येणजुह्वानोऽग्निमुखंहरम् १७ देवोपलब्धिमप्राप्यनिर्वेदात्सप्तमेहनि ॥ शिरोऽवृश्चत्स्वधितिनातत्तीर्थक्लिन्नमूर्धजम् १८

चूर्णिका

ततः सः धनेहया यदा निर्विण्णः स्यात् तदा अनुग्रहं करिष्ये ९ १० अतो मां हित्वा जनः अन्यं भजते ११ ॥ श्रीशुक उवाच ॥ हे राजन् शापप्रसादयोरीशा ब्रह्मविष्णुशिवादयः तेषां मध्ये सद्यः शापप्रसादकः शिवो ब्रह्मा च न अच्युतः १२ हे राजन् अत्रैवोदाहरंतीमिमितिहासं पुरातनम् वृकासुराय गिरिशो वरं दत्वाप संकटम् १३ एकदा शकुनेः पुत्रः वृको नाम असुरः पथि नारदं दृष्ट्वा त्रिषु देवेषु मध्ये शीघ्रं कः तुष्यतीति प्रपच्छ १४ तदा नारदः आह गिरिशं देवं भज सः अल्पाभ्यां गुणदोषाभ्यां आशु तुष्यति कुप्यतिच १५ सः एकदा रावणबाणासुरयोः तुष्टः सन् अतुलं ऐश्वर्यं दत्वा संकटं आप १६ इत्यादिष्टो वृकासुरः केदारे गत्वा स्वमांसेन अग्निमुखे हरं जुह्वन् सन् १७ देवप्राप्तिं अप्राप्य सप्तमेऽहनि शिरः छेत्तुं उद्यतोभूत् १८

१ इदंअर्धंकेषुचिदंकितपुस्तकेषुनदृश्यते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका मूर्त्तिमानाग्निरिवदेदीप्यमानः (यथा) वयमधुनातना यथाकथंचिद्दुःखेनमर्तुकामं (द्रष्टुमक्षमाःकरुणया) वारयामस्तद्वत् (समहाकारुणिकस्तंस्वदोर्भ्यांभुजयोर्धृत्वान्यवारयत् । यद्वा यथावयम ग्निनिभाअरणिसंभवादग्नेरुत्थितास्तथासोऽनलादुत्थितइतिप्रादुर्भावमात्रेदृष्टांतः । तस्यस्पर्शनात्पुनः) उपस्कृताकृतिः परिपूर्णदेहोभवत् १९ तंन्यवारयदाहचेत्यन्वयः (अंगहेवृकअलमलमनेन । मत्तोवृणीष्ववरंतेददामि) तोयेन (जलमात्रेणा) पिभजतां (प्रीयेय) प्रीतःस्यांत्वयातुदेहो वृथा (ऽर्द्यते) पीड्यतेइति २० (देवंवरंवव्रेवृतवान् । याचितवान्) २१ (भूतभयावहत्वाद्दुर्मनाइ वतथाप्योमित्यंगीकृत्यतस्यमौढ्यंभाविफलंचज्ञात्वाप्रहसन्) दातुमनर्हमपिददेदत्तवान् (अहेरमृतंयथा) सर्पायक्षीरमिवेति २२ (सोसुरोनूनंगौरीहरणलालसः आसीत् । अतओमित्युक्तः सन् सोसुरः तस्यैशिरासितद्वरपरीक्षाव्याजेनस्वकरंस्थापयितुमारेभेइत्यर्थः) २३ उपसृष्टः अनुगतःसन् (दिवःस्वर्गस्य । नूनंकाष्ठानांदिशांयावदंतं) उदगात्अन्वधावत्उदक्उत्तरतः (प्रतिवि धिंप्रतिक्रियांवृकस्यनिवारणमित्यर्थः) २० वैकुंठंश्वेतद्वीपम् २५ (न्यस्तदंडानांपरमहंसानाम्) २६ तंवृकासुरंतथाव्यसनंताहक्कृव्यसनमापात्तिर्यस्मात्तम् (वृजिनार्दनोदुःखहंता । दूरतएवदृष्ट्वा मायावीबटुकोभूत्वाप्रत्युदियात्वृकंप्रत्यागतइत्यर्थः २७ मेखलादिभिरुपलक्षितः । (विनीतएवतंवृकं) २८

॥१७४॥

श्लोकाः १९/२८

तदामहाकारुणिकःसधूर्जटिर्यथावयंचाग्निरिवोत्थितोऽनलात् ॥ निगृह्यदोर्भ्यांभुजयोर्न्यवारयत्तत्स्पर्शनाद्भूयउपस्कृताकृतिः १९ तमाहचांगालमलंवृ णीष्वमेयथाभिकामंवितरामितेवरम् ॥ प्रीयेयतोयेननृणांप्रपद्यतामहंत्वयाऽऽत्माभृशमर्द्यतेवृथा २० देवंसवव्रेपापीयान्वरंभूतभयावहम् । यस्ययस्यक रंशीर्ष्णिधास्येसम्रियतामिति २१ तच्छ्रुत्वाभगवान्रुद्रोदुर्मनाइवभारत ॥ ओमितिप्रहसंस्तस्मैददेऽहेरमृतंयथा २२ इत्युक्तःसोसुरोनूनंगौरीहरणला लसः ॥ सतद्वरपरीक्षार्थंशंभोर्मूर्ध्निकिलासुरः ॥ स्वहस्तंधातुमारेभेसोऽबिभ्यत्स्वकृताच्छिवः २३ तेनोपसृष्टःसंत्रस्तःपराधावत्सवेपथुः ॥ यावदंतंदि वोभूमेःकाष्ठानामुदगादुदक् २४ अजानंतःप्रतिविधिंतूष्णीमासन्सुरेश्वराः ॥ ततोवैकुंठमगमद्भास्वरंतमसःपरम् २५ यत्रनारायणःसाक्षान्न्यासिनांपर मागतिः ॥ शांतानांन्यस्तदंडानांयतोनावर्ततेगतः २६ तंतथाव्यसनंदृष्ट्वाभगवान्वृजिनार्दनः ॥ दूरात्प्रत्युदियाद्भूत्वाबटुकोयोगमायया २७ मेखला जिनदंडाक्षैस्तेजसाग्निरिवज्वलन् ॥ अभिवादयामासचतंकुशपाणिर्विनीतवत् २८

चूर्णिका तदा महाकारुणिकः शिवः अनलात् उत्थितः सन् तं दोर्भ्यां भुजयोः निगृह्य न्यवारयत् १९ आह च हेवृक अलं अलं वृणीष्व तुभ्यंवरं ददानि एवं उक्तः सः पापी यान् भूतभयावहं वरं वव्रे २० हे हर अहं यस्ययस्य शीर्ष्णि करं धास्ये सः म्रियतां इति २१ तच्छ्रुत्वा रुद्रः दुर्मना इव भूत्वा अहेः अमृतमिव तस्मै वरं ददौ २२ ततो वृकः गौरीहरणलालसःसन् तद्वरपरीक्षार्थं शंभोर्मूर्ध्नि हस्तं धातुं आरेभे तदा स्वकृतात् भातः २३ शिवः संत्रस्तः सन् ब्रह्मांडं अधावत २४ तदा दे वाः प्रतिविधिं अजानंतः संतः तूष्णीं आसन् ततः शिवः वैकुंठं अगमत् २५ यत्र नारायणः आस्ते तदा हरिः २६ तं शिवं व्यसनिनं दृष्ट्वा मेखलाजिनदंडाद्यैर्वटुर्भू त्वा संमुखं एत्य तं अभिवादयामास २७ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

व्यक्तंनिश्चितं (श्रांतोसि क्षणंविश्रम्यताम् । विश्रांतिःसेव्यताम् । इयद्दूरं) किमर्थमागतोसि । अयमात्मादेहः सर्वपुरुषार्थहेतुः अतोमापीडयेति २९ प्रायशःपुंभिर्धृतैः भवान्स्वार्थान्समीहते
साधयितुमिच्छति (पलायमानान्पुरुषान्धृत्वातैःकोप्यर्थोभवतासमीहितइत्यर्थः) अथ (वा धृतैःस्वहितायस्वीकृतैः) पुंभिःसहायैः स्वकार्याणि (जनः) साधयति । अतः (सहायभूतान्) नः
कथ्यतां (व्यवसितमिति अलंशक्यमित्यर्थः) ३० (गतक्लमःनिर्गतग्लानिः) ३१ पैशाच्यंपिशाचानामिववृत्तिम् ३२ (हेदानवेंद्रतत्रजगद्गुरुत्वेनयदिविश्वासस्तर्हिप्रतीतिर्गृह्यताम्) ३३ (असती
मिथ्यावाग्यस्य ।) यद्यथावक्तावदिष्यति ३४ चित्रैर्भ्रामकैः । सुपेशलैरतिरम्यैःभिन्नधीर्भ्रंशितमतिः ३५ ३६ (वृकासुरान्मोचितः) ३७ (अतउपकारंस्मरंतंप्रत्याहअहोइति । अयंवृकःस्वेनैवपा
पेनकर्मणाहतः) ३८ (नात्रविस्मयः । महत्सुसाधारणेष्वपिकृतकिल्बिषःकःक्षेमवान्स्यात् तत्र) किमुवक्तव्यं (जगद्गुरौ) विश्वेशेत्वयिकृतागाःकृतापराधइति ३९ अव्याकृतशक्त्युदन्वतःवाङ्मनसागो
चरसामर्थ्यसमुद्रस्य । गिरित्रमोक्षंशिवमोचनरूपंचरित्रम् । संसृतिभिःनानारूपसंचारैः ४० ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांरुद्रमोक्षणंनामाष्टाशीतमोऽध्यायः ८८ ॥ ॥ ७ ॥

श्लोकाः २९/४०

॥ श्रीभगवानुवाच ॥ शाकुनेयभवान्व्यक्तंश्रांतःकिंदूरमागतः ॥ क्षणंविश्रम्यतांपुंसआत्माऽयंसर्वकामधुक् २९ यदिनःश्रवणायालंयुष्मद्व्यवसितंवि
भो ॥ भण्यतांप्रायशःपुंभिर्धृतैःस्वार्थान्समीहते ३० ॥ शुकउवाच ॥ एवंभगवतापृष्टोवचसाऽमृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मैयथापूर्वमनुष्ठितम्
३१ ॥ श्रीभगवानुवाच ॥ एवंचेत्तर्हितद्वाक्यंनवयंश्रद्दधीमहि ॥ योदक्षशापात्पैशाच्यंप्राप्तःप्रेतपिशाचराट् ३२ यदिवस्तत्रविश्रंभोदानवेंद्रजगद्गुरौ ॥
तर्ह्यंगाशुस्वशिरसिहस्तंन्यस्यप्रतीयताम् ३३ यद्यसत्यंवचःशंभोःकथंचिद्दानवर्षभ ॥ तदैनंजह्यसद्वाचंनयद्वक्तानृतंपुनः ३४ इत्थंभगवतश्चित्रैर्वचोभिः
ससुपेशलैः ॥ भिन्नधीर्विस्मृतःशीर्ष्णिस्वहस्तंकुमतिर्न्यधात् ३५ अथापतद्भिन्नशिरावज्राहतइवक्षणात् ॥ जयशब्दोनमःशब्दःसाधुशब्दोऽभवद्दिवि ३६
मुमुचुःपुष्पवर्षाणिहतेपापेवृकोदरे ॥ देवर्षिपितृगंधर्वामोचितःसंकटाच्छिवः ३७ मुक्तंगिरिशमभ्याहभगवान्पुरुषोत्तमः ॥ अहोदेवमहादेवपापोयंस्वेन
पाप्मना ३८ हतःकोनुमहत्स्वीशजंतुर्वैकृतकिल्बिषः ॥ क्षेमीस्यात्किमुविश्वेशेकृतागस्कोजगद्गुरौ ३९ यएवमव्याकृतशक्त्युदन्वतःपरस्यसाक्षात्परमात्म
नोहरेः ॥ गिरित्रमोक्षंकथयेच्छृणोतिवाविमुच्यतेसंसृतिभिस्तथारिभिः ४० ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेरुद्रमोक्षणंनामाष्टाशीतितमोऽध्यायः ८८

चूर्णिका

श्रीभगवानुवाच हे वृक त्वंदूरं आगतः अतः श्रांतोसि तस्मात् क्षणं विश्रम्यताम् किंच तव यत् निश्चितं तत् भण्यताम् २९ ३० श्रीशुक उवाच एवं भगवता पृष्टः वृकः यथा
पूर्वं अनुष्ठितं तस्मै अब्रवीत् ३१ श्रीभगवानुवाच ॥ हे वृक एवं चेत्तर्हि शिववाक्यं वयं न श्रद्दधीमहि यः दक्षशापात् पैशाच्यं प्राप्तः ३२ तव तस्मिन् शिवे विश्वास
श्चेत् तर्हि स्वशिरसि हस्तं न्यस्य प्रतीयताम् ३३ शंभोर्वचः असत्यं चेत्स्यात् तर्हि एनं जहि ३४ इत्यादि भगवद्वाक्यैर्मोहितः सः कुमतिः स्वशिरसि हस्तं व्यधात् ३५
तदैव भिन्नशिराः सन् अपतत् ततः जयशब्दो नमः शब्दः साधुशब्दोभवत् ३६ दिवि देवादयः पुष्पवर्षाणि मुमुचुः एवं शिवः संकटात् मोचितः ३७ ततः मुक्तं गि
रिशं भगवान् आह अहो देव महादेव अयं पापः स्वपापेनैव हतः ३८ हे ईश महत्सु कृतापराधः पुमान् कोनु क्षेमी स्यात् ३९ एवं यः हरेः शिवमोचनचरितं क
थयेत् शृणोति वा सः अरिभयात् संसाराच्च मुच्यते ४० ॥ ॥ इतिदशमेऽष्टाशीतितमः ॥ ८८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नवाशीतितमेदेवःकोमहानितिसंशये । परीक्ष्यविष्णोरुत्कर्षमुनिभ्योऽवर्णयद्भृगुः । इतिहासांतरमाह सरस्वत्याइति १ (तस्यमहतोजिज्ञासया । तस्यज्ञानायसोभ्यगात्) २ (तस्मैब्रह्मणेप्र
ह्वणंनमनम्) ३ स्वयोन्यास्वस्यैवरूपांतरेणाभिव्यक्तिस्थानेनस्वकार्येणेत्यर्थः । तेनयथाकश्चिद्वह्निंशमयतितथास्वकार्येणपुत्रेणनिमित्तेनक्रोधंशमयामासेत्यर्थः ४ (त्वमुत्पथगइतिब्रुवन्तदालिंगनंनै
च्छत् । तदासदेवश्चुकोप) ५ (देवीभवानी) ६ ७ ८ (युष्मानागतान्अजानतामस्माकम्) ९ (अतीवकोमलौसुखस्पर्शौइतिवदन्पाणिनापरामृशन्प्रक्षालितवानित्यर्थः) १० तीर्थका
रिणातीर्थत्वनिमित्तेन ११ (भवतःपादस्पर्शेनहतमंहोयस्यतस्यमेवक्षसिवत्स्यतिवासंकरिष्यतिहेभगवन्) १२ तस्यमंद्रयागंभीरयागिरा (तर्पितो) निर्वृतः (सुखंप्राप्तः) तूर्ष्णींबभूवेतिशेषः १३

॥१७६॥ ॥श्रीशुकउवाच ॥ सरस्वत्यास्तटेराजनृषयःसत्रमासत ॥ वितर्कःसमभूत्तेषांत्रिष्वधीशेषुकोमहान् १ तस्यजिज्ञासयातेवैभृगुंब्रह्मसुतंनृप ॥ तज्ज्ञप्त्यैप्रेष ॥८९॥
यामासुःसोभ्यगाद्ब्रह्मणःसभाम् २ नतस्मैप्रह्वणंस्तोत्रंचक्रेसत्त्वपरीक्षया ॥ तस्मैचुक्रोधभगवान्प्रज्वलन्स्वेनतेजसा ३ सआत्मन्युत्थितंमन्युमात्मजाया श्लोकाः
त्मनाप्रभुः ॥ अशीशमद्यथावह्निंस्वयोन्यावारिणात्मभूः ४ ततःकैलासमगमत्सतंदेवोमहेश्वरः ॥ परिरब्धुंसमारेभउत्थायभ्रातरंमुदा ॥ नैच्छत्त्वमस्युत्प १/१३
थगइतिदेवश्चुकोपह ५ शूलमुद्यम्यतंहंतुमारेभेतिग्मलोचनः ॥ पतित्वापादयोर्देवीसांत्वयामासतंगिरा ६ अथोजगामवैकुंठंयत्रदेवोजनार्दनः ॥ श
यानंश्रियउत्संगेपदावक्षस्यताडयत्७ ततउत्थायभगवान्सहलक्ष्म्यासतांगतिः ॥ स्वतल्पादवरुह्याशुननामशिरसामुनिम् ८ आहतेस्वागतंब्रह्मन्निषी
दात्रासनेक्षणम् ॥ अजानतामागतान्वःक्षंतुमर्हसिनःप्रभो ९ अतीवकोमलौतातचरणौतेमहामुने ॥ इत्युक्त्वाविप्रचरणौमर्दयन्स्वेनपाणिना १० पुनी
हिसहलोकंमांलोकपालांश्चमद्गतान् ॥ पादोदकेनभवतस्तीर्थानांतीर्थकारिणा ११ अद्याहंभगवँल्लक्ष्म्याआसमेकांतभाजनम् ॥ वत्स्यत्युरसिमेभूतिर्भ
वत्पादहतांहसः १२ ॥ श्रीशुकउवाच ॥ एवंब्रुवतिवैकुंठेभृगुस्तन्मंद्रयागिरा ॥ निर्वृतस्तर्पितस्तूष्णींभक्त्युत्कंठोऽश्रुलोचनः १३

चूर्णिका

॥ श्रीशुक उवाच ॥ हे राजन् एकदा सरस्वत्याः तटे ऋषयः सत्रं अकुर्वत तदा त्रिष्वधीशेषु को महानिति तेषां वितर्कः समभूत् १ ततः ते ऋषयः तज्जिज्ञासया
भृगुं संप्रेषयामासुः ततः सः भृगुः ब्रह्मणः सभां गत्वा २ तत्सत्त्वपरीक्षार्थं तस्मै नमस्कारादिकं न चक्रे ततः ब्रह्मा तस्मै भृगवे क्रुद्धोपि ३ आत्मन्युत्थितं मन्युं
स्वयमेव अशीशमत् ततः सः भृगुः कैलासं अगमत् ४ तदा शिवः उत्थाय मुदा तं परिरब्धुं आरेभे तदा भृगुः त्वं उत्पथग इत्युक्त्वा तत् नैच्छत् ५ तदा क्रुद्धः
शिवः शूलं उद्यम्य तं हंतुं आरेभे तद्दृष्ट्वा पार्वती शिवस्य पादयोः पतित्वा सांत्वयामास ६ ततो भृगुः वैकुंठं गत्वा श्रियः उत्संगे शयानं विष्णुं पदावक्षस्यताडयत्
७ तदा हरिः लक्ष्म्या सह उत्थाय तल्पात् आशु अवरुह्य तं शिरसा नत्वा स्वागतमित्युक्त्वा ८ हे ब्रह्मन् आसने निषीदेत्याह हे ब्रह्मन् आगतान् वः अजानतां नः
क्षंतुअर्हथ ९ हेमुने ते चरणौ अतीव कोमलौ इत्युक्त्वा विप्रचरणौ स्वहस्तेन मर्दयन् आह १० हे मुने पादोदकेन सह लोकं मां पुनीहि ११ हे भगवन् अद्य अहं ॥१७६॥
लक्ष्म्याः एकांतभाजनं आसं हे विप्र भवत्पादहतपापस्य मे उरसि इदं लांच्छनं वत्स्यति १२ ॥ श्रीशुक उवाच ॥ एवं वैकुंठे ब्रुवति सति भृगुः तन्मंद्रया
गिरा निर्वृतः सन् तूष्णीमास १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. टीका ॥१७७॥

१४ विस्मिताअपराधातिरेकेपिनिर्विकारत्वेन । भूयांसंश्रद्दधुःमहत्तमंनिश्चितवंतः (महत्तमत्वेयःसंशयःसमुक्तोयेषां) यतःयस्मिन् (शांतिः । अभयंभयराहित्यम्) १५ (तदन्वितंज्ञानान्वि
तम्) वैराग्यंचचतुर्विधमितिपाठेतच्चातुर्विध्यमेवंद्रष्टव्यम् । विषयांस्त्यक्तुमशक्नुवतोपिसंमानेच्छात्यागोनामाद्यंवैराग्यम् (ततो) विषयाणांमध्येलवणादिव्यतिरेकेणापिवृत्तिर्द्वितीयम् । तथावृत्ता
वपिमनसिरागशैथिल्येनबाह्येंद्रियैरेवविषयसेवनंतृतीयं तत्राप्यौदासीन्यंचतुर्थम् । तथाहुः । ''वैराग्यमाद्यंयतमानसंज्ञंकचिद्विरागोव्यतिरेकसंज्ञकः । एकेंद्रियाख्यंहृदिरागमोक्ष्यंतस्याप्यभावस्तुवशी
कृताख्यमि''ति १६ १७ (यस्यभगवतएवमूर्तिराकृतिः । अनाशिषोनिष्कामाः) १८ तस्यभगवतएवयद्यपित्रिविधाआकृतयः -(- तस्यमाययात्रिगुणमय्यासृष्टाअसुरामनुष्याः) तत्तासुसत्त्वमेवती
र्थसाधनंपुरुषार्थहेतुः १९(संशयनुत्तयेप्रवृत्ताः) एवंनिश्चित्यसरस्वतीतीरवासिनोविप्राहरिसेवयामुक्तिंप्रापुरिति २० (मुनितनयस्य) व्यासनंदनस्यमुखपद्माद्उद्गतंगंधयुक्तपीयूषतुल्यं (परस्यपुंसो)
हरेःसुश्लोक्यंप्रशस्तंयशःयःसंसारीसेवतेसमुक्तोभवतीति २१ सचोक्तलक्षणोभगवान् कृष्णएवेतिदर्शयितुंआख्यानांतरमाह एकदेति २२ (उपधायनिधाय) २३ (पंचत्वंमरणम्) २४ २५

श्लोकाः १४/२५

पुनश्चसत्रमाव्रज्यमुनीनांब्रह्मवादिनाम् ॥ स्वानुभूतमशेषेणराजन्भृगुरवर्णयत् १४ तन्निशम्याथमुनयोविस्मितामुक्तसंशयाः ॥ भूयांसंश्रद्दधुर्विष्णुं
यतःशांतिर्यतोऽभयम् १५ धर्मःसाक्षाद्यतोज्ञानंवैराग्यंचतदन्वितम् ॥ ऐश्वर्यंचाष्टधायस्माद्यशश्चात्ममलापहम् १६ मुनीनांन्यस्तदंडानांशांतानांसम
चेतसाम् ॥ अकिंचनानांसाधूनांयमाहुःपरमांगतिम् १७ सत्त्वंयस्यप्रियामूर्तिर्ब्राह्मणास्त्विष्टदेवताः ॥ भजंत्यनाशिषःशांतायंवानिपुणबुद्धयः १८ त्रिवि
धाकृतयस्तस्यराक्षसाअसुराःसुराः ॥ गुणिन्यामाययासृष्टाःसत्त्वंतत्तीर्थसाधनम् १९ ॥ श्रीशुकउवाच ॥ एवंसारस्वताविप्रानृणांसंशयनुत्तये ॥ पुरुष
स्यपदांभोजसेवयातद्गतिंगताः २० ॥ सूतउवाच ॥ इत्येतन्मुनितनयास्यपद्मगंधपीयूषंभवभयभित्परस्यपुंसः ॥ सुश्लोक्यंश्रवणपुटैःपिबत्यभीक्ष्णं
पांथोऽध्वभ्रमणपरिश्रमंजहाति २१ ॥ श्रीशुकउवाच ॥ एकदाद्वारवत्यांतुविप्रपत्न्याःकुमारकः ॥ जातमात्रोभुवंस्पृष्ट्वाममारकिलभारत २२ विप्रो
गृहीत्वामृतकंराजद्वार्युपधायसः ॥ इदंप्रोवाचविलपन्नातुरोदीनमानसः २३ ब्रह्मद्विषःशठधियोलुब्धस्यविषयात्मनः ॥ क्षत्रबंधोःकर्मदोषात्पंचत्वंमे
गतोर्भकः २४ हिंसाविहारंनृपतिंदुःशीलमजितेंद्रियम् ॥ प्रजाभजंत्यःसीदंतिदरिद्रानित्यदुःखिताः २५

चूर्णिका

ततो भृगुः पुनः सत्रं एत्य स्वानुभूतं सर्वं अवर्णयत् १४ तन्निशम्य मुनयः विस्मिताः संतः विष्णुं भूयांसं निश्चितवंतः यतः शांतिः अभयं १५ किंच यतः धर्मः
ज्ञानं किंच यं साधूनां गतिं आहुः १६१७ किंच यस्य सत्त्वं प्रिया मूर्तिः यस्य इष्टदेवताः ब्राह्मणाः स एव श्रेष्ठः १८१९ श्रीशुक उवाच ॥ एवं सारस्व
ताः विप्राः पुरुषस्यसेवया सद्गतिं गताः २० ॥ ॥ सूत उवाच ॥ ॥ हे ऋषयः एतत् श्रीशुकमुखपंकजात् उद्गतं हरेः प्रशस्तं यशः यः संसारी सेवते सः मुक्तो
भवति २१ श्रीशुक उवाच ॥ एकदा द्वारवत्यां विप्रपत्न्याः पुत्रः जातमात्रः सन् भुवं स्पृष्ट्वा ममार ततः विप्रः तं मृतपुत्रं गृहीत्वा राजद्वारि निधाय विलपन् इदं
प्रोवाच २२२३ब्रह्मद्विषः शठधियो लुब्धस्य विषयात्मनः क्षत्रबंधोः कर्मदोषात्पंचत्वं मे गतोर्भकः २४ २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(एवमेवद्वितीयमपिजातमात्रंमृतंद्वारिनिधायतां) ब्रह्मद्विषइत्यादिकांगाथांवाक्यं (समगायत ।) मयिनकश्चिद्दोषः अतोराजदोषेणैवमत्पुत्रान्म्रियंतइतिवारंवारंचुक्रोशेत्यर्थः २६ (परेतेमृतेतांगाथाम्) २७ ब्रह्मन्किंस्विदितिकिमर्थंवृथारोदिषि । यतस्त्वन्निवासे (तवनिवासस्थानेस्मिन्नगरे) धनुर्धरमात्रोराजन्यबंधुरपिनास्तिब्रह्मण्यस्यतुकावार्ता । एतेतुसत्रेयागेइवब्राह्मणामिलिताभवितुमहंति (नतुक्षत्रिया) इत्यर्थः २८तदेवाह । धनदारात्मजापृक्ताइति । धनादिभिः (अपृक्ताः) वियुक्ताः संतो (ब्राह्मणा) यत्रयेषुजीवत्सुराजन्येषुशोचंतिते (नटा) जीवंति केवलंजीविकांसंपादयंति२९(हेभगवन् द्विजोत्तम युवयोःप्रजाःपुत्रान्) हतकल्मषइतिअग्निप्रवेशेनब्राह्मणविलापश्रवणपातकात् पूतोभवेयमित्यर्थः । अहतकल्मषश्चेतिवा ३० नविद्यतेप्रतियोद्धायस्यसोऽप्रतिरथः ३१ (तत्तस्मात्भवान्कथंनुशक्नोति । संकर्षणादिभिर्दुष्करंत्वंमौढ्याच्चिकीर्षसि) अतस्तन्नश्रद्दध्महेनसंप्रतीमः ३२ (स्वमौढ्यंदर्शयतिद्वाभ्यांनाहमिति । कार्ष्णिःप्रद्युम्नः) ३३ यत्किरातवेषिणंत्र्यंबकमतोषयत् तादृशंवीर्यंसामर्थ्यंप्रधनेयुद्धे) ३४ एवंमौढ्यवादेविश्रंभितः विश्वासंप्रापितः । निशामयन्शृण्वन् ३५ ३६ (सोर्जुनोनिर्मलंतोयमाचम्य) ब्राह्मणोपेक्षकत्वेनकृष्णावज्ञयामहेश्वरंनमस्कृत्य ३७

श्लोकाः २६ ३७

एवंद्वितीयंविप्रर्षिस्तृतीयंत्वेवमेवच ॥ विसृज्यसनृपद्वारितांगाथांसमगायत २६ तामर्जुनउपश्रुत्यकर्हिचित्केशवांतिके । परेतेनवमेबालेब्राह्मणंसमभाषत २७ किंस्विद्ब्रह्मंस्त्वन्निवासेइहनास्तिधनुर्धरः ॥ राजन्यबंधुरेतेवैब्राह्मणाःसत्रमासते २८ धनदारात्मजापृक्तायत्रशोचंतिब्राह्मणाः ॥ तेवैराजन्यवेषेणनटाजीवंत्यसुंभराः २९ अहंप्रजावांभगवन्रक्षिष्येदीनयोरिह ॥ अनिस्तीर्णप्रतिज्ञोग्निंप्रवेक्ष्येहतकल्मषः ३० ॥ ब्राह्मणउवाच ॥ संकर्षणोवासुदेवःप्रद्युम्नोधन्विनांवरः ॥ अनिरुद्धोऽप्रतिरथोनत्रातुंशक्नुवंतियत् ३१ तत्कथंनुभवान्कर्मदुष्करंजगदीश्वरैः ॥ चिकीर्षसित्वंबालिश्यात्तन्नश्रद्दध्महेवयम् ३२ ॥ अर्जुनउवाच ॥ नाहंसंकर्षणोब्रह्मन्नकृष्णःकार्ष्णिरेवच ॥ अहंवाअर्जुनोनामगांडीवंयस्यवैधनुः ३३ मावमंस्थाममब्रह्मन्वीर्यंत्र्यंबकतोषणम् ॥ मृत्युंविजित्यप्रधनेआनेष्येतेप्रजांप्रभो ३४ एवंविश्रंभितोविप्रःफाल्गुनेनपरंतप ॥ जगामस्वगृहंप्रीतःपार्थवीर्यंनिशामयन् ३५ प्रसूतिकालआसन्नेभार्यायाद्विजसत्तमः ॥ पाहिपाहिप्रजांमृत्योरित्याहार्जुनमातुरः ३६ सउपस्पृश्यशुच्यंभोनमस्कृत्यमहेश्वरम् ॥ दिव्यान्यस्त्राणिसंस्मृत्यसज्यंगांडीवमादधे ३७

चूर्णिका एवं द्वितीयं तृतीयं पुत्रं राजद्वारे त्यक्त्वा तां गाथां अगायत २६ कदाचित् केशवांतिके स्थितः अर्जुनः तां गाथां श्रुत्वा ब्राह्मणं समभाषत २७ हे ब्रह्मन् त्वन्निवासे इह धनुर्धरः नास्ति किं २८ किंच यस्मिन् राज्ये धनदारादिवियुक्ताःब्राह्मणाः शोचंति ते ते राजानः राजवेषेण नटा इव जीविकां संपादयंति १ हे ब्रह्मन् वां प्रजाः अहं रक्षिष्ये हतप्रतिज्ञश्चेत् अग्निं प्रवेक्ष्ये ३० ब्राह्मण उवाच हेअर्जुन संकर्षणः वासुदेवः प्रद्युम्नः अनिरुद्धः एते मे प्रजाः त्रातुं न शक्नुवंति तत्कर्म बालिश्यात् त्वं कथं चिकीर्षसि अतः वयं ते वचः न श्रद्दध्महे ३१ ३२ अर्जुन उवाच हे ब्रह्मन् अहं संकर्षणो न कृष्णो न तर्हि यस्य गांडीवं धनुः ३३ त्र्यंबकतोषणं वीर्यं च सोहं अर्जुनः युद्धे मृत्युं विजित्य तव प्रजा आनेष्ये ३४ एवं अर्जुनेन विश्वासं प्रापितः विप्रः स्वगृहं जगाम ३५ ततः सः द्विजः भार्यायाः प्रसूतिकाले आगते सति मृत्योः प्रजां पाहि इति अर्जुनं आह ३६ ततोऽर्जुनः आचम्य शिवं नत्वा दिव्यास्त्राणि स्मृत्वा गांडीवं आददे ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(नानास्त्रप्रयोगयुक्तैःशरैः) न्यरुणत्आवृतवान् । तदेवाह तिर्यगूर्ध्वमिति ३८ अदर्शनमापेदे । देहोपिनावशिष्टइत्यर्थः ३९ (तदाविजयमर्जुनंविनिंदन् आह) ४० यस्यप्रजाइतिशेषः (यस्ये तिकर्मणिषष्ठीवा) तत्तत्र (अवितारक्षिता) ४१ (आत्मश्लाघिनस्तवगांडीवमपिधिक्दैवेनउपसृष्टंहतम् ।) ४२ ४३ ४४ (विविक्षुःप्रवेष्टुमिच्छुः ।) प्रत्युक्तःवारितः । उपपत्तिभिःप्रतिषेधंकुर्वताकृष्णेन ४५ मावज्ञमावजानीहि । येनिंदंतितएवमनुष्या नः अस्माकंकीर्तिंस्थापयिष्यंतिनिश्चलांकरिष्यंति पाठांतरंतुछंदोभंगभयादागंतुकमिति ४६ ४७ सप्तसप्तसंख्यामर्यादागिरयोयेषुद्वीपेषुतान् ४८ (तत्रतमसि शैब्यादिसंज्ञकारथाश्वाः) ४९ ५० कृतमितिप्रकृतिपरिणामरूपं नावलोकाभावमात्रम् (सुघोरंअतिभयंकरम् । तत्तमःरोचिषाविदारयत्सुदर्शनम् ! गुणात्च्युतोमुक्तोरामबाणइव) ५१

श्लोकाः ३८/५१

॥१७९॥ न्यरुणत्सूतिकागारंशरैर्नानास्त्रयोजितैः ॥ तिर्यगूर्ध्वमधःपार्थश्चकारशरपंजरम् ३८ ततःकुमारःसंजातोविप्रपत्न्यारुदन्मुहुः ॥ सद्योऽदर्शनमापेदेसश
रीरोविहायसा ३९ तदाहविप्रोविजयंविनिंदन्कृष्णसंनिधौ ॥ मौढ्यंपश्यतमेयोहंश्रद्दधेक्लीबकत्थनम् ४० नप्रद्युम्नोनानिरुद्धोनरामोनचकेशवः ॥ यस्य
शेकुःपरित्रातुंकोन्यस्तदवितेश्वरः ४१ धिगर्जुनंमृषावादंधिगात्मश्लाघिनोधनुः ॥ दैवोपसृष्टंयोमौढ्यादानिनीषतिदुर्मतिः ४२ एवंशपतिविप्रर्षौविद्यामा
स्थायफाल्गुनः ॥ ययौसंयमनीमाशुयत्रास्तेभगवान्यमः ४३ विप्रापत्यमचक्षाणस्ततऐंद्रीमगात्पुरीम् ॥ आग्नेयींनैर्ऋतींसौम्यांवायव्यांवारुणीमथ
रसातलंनाकपृष्ठंधिष्ण्यान्यन्यान्युदायुधः ४४ ततोऽलब्धद्विजसुतोह्यनिस्तीर्णप्रतिश्रुतः ॥ अग्निंविविक्षुःकृष्णेनप्रत्युक्तःप्रतिषेधता ४५ दर्शयेद्विजसू
नूंस्तेमावज्ञात्मानमात्मना ॥ येतेहिकीर्तिंविमलांमनुष्याःस्थापयिष्यंतिनः ४६ इतिसंभाष्यभगवानर्जुनेनसहेश्वरः ॥ दिव्यंस्वंरथमास्थायप्रतीचींदि
शमाविशत् ४७ सप्तद्वीपान्सप्तसिंधून्सप्तसप्तगिरीनथ ॥ लोकालोकंतथातीत्यविवेशसुमहत्तमः ४८ तत्राश्वाःशैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ तमसि
भ्रष्टगतयोबभूवुर्भरतर्षभ ४९ तान्दृष्ट्वाभगवान्कृष्णोमहायोगेश्वरेश्वरः ॥ सहस्रादित्यसंकाशंस्वचक्रंप्राहिणोत्पुरः ५० तमःसुघोरंगहनंकृतंमहद्विदा
रयद्भूरितरेणरोचिषा ॥ मनोजवंनिर्विविशेसुदर्शनंगुणच्युतोरामशरोयथाचमूः ५१

चूर्णिका

ततः सूतिकागारंशरैः आवृत्य शरपंजरं चकार ३८ ततः विप्रपत्न्याः कुमारः संजज्ञे स कुमारः सदेहः अदर्शनं आपेदे ३९ तदा विप्रः कृष्णसन्निधौ अर्जुनंनिंदन् आह अहो मे मौढ्यं पश्यत योऽहं क्लीबकत्थनंसंदधे ४० ४१ अहो यस्य प्रजाः रक्षितुं कृष्णादयो न शेकुः ताः अन्यः कः रक्षिष्यति एनंमृषावादं अर्जुनं धिक् तस्य धनुः धिक् ४२ एवंविप्रे शपति सति अर्जुनः विद्यां आस्थाय यमपुरीं आशु ययौ ४३ तत्रविप्रापत्यं अदृष्ट्वा ऐंद्रीं अगात् एवं अग्निनिर्ऋतिसोमवायुवरुणानां पुरीः रसातलं स्वर्गं अन्यस्थानानि च गत्वा अलब्धद्विजपुत्रः सन् पुनः एत्य अग्निं विविक्षुः सः कृष्णेन निषेधितः ४४ ४५ ततो भगवान् आह हे अर्जुन अहं द्विजपुत्रान् दर्शये ४६ इत्युक्त्वा अर्जुनेन सह दिव्यं रथं आस्थाय प्रतीचीं दिशं गत्वा सप्तद्वीपान् सप्तसमुद्रान् सप्तगिरीन् लोकालोकं च अतीत्य महत् तमः विवेश ४७४८ तदा अश्वाः भ्रष्टगतयो बभूवुः भगवान् कृष्णः तान् दृष्ट्वा स्वचक्रं पुरः प्राहिणोत् ४९ ५० ततः घोरं तमः विदार्य सलिलं प्रविष्टः तत्र सलिले महाकालपुरं दृष्ट्वा तस्मिन् महाभीमं शेषं ददर्श ५१ ॥१७९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चक्रानुपथेनचक्रमनुगतेनद्वारेणतत्तमःपरंतस्मात्तमसःपरंदूरेवर्तमानंपरंश्रेष्ठंभागवतंज्योतिःसमश्नुवानंव्याप्नुवत् प्रसमीक्ष्यप्रताडिताक्षोनेत्रे (अपिदधे) न्यमीलयदिति ५२ (प्रबलेनवातेन) एजं
तःउच्चलंतःबृहंतः महांतः ऊर्मयोभूषणंयस्यतत् । तत्रसलिलेभवनंमहाकालपुरंद्युमत्तमंद्युतिमत्सुश्रेष्ठम् ५३ सहस्रंमूर्ध्निभवाःफणाः तासुमणयस्तेषां (द्युभि -)- र्द्युतिभिः (द्विगुणेक्षणैः) द्विसहस्रनेत्रै
रूर्जितंस्फटिकागिरिसंकाशम् । शितिकंठजिह्वंकंठाश्चजिह्वाश्च (शितयोनीलाः) कंठजिह्वायस्यतम् ५४ तद्भोगसुखासीनंतस्यानंतस्यभोगोदेहः सुखकरमासनंयस्यतम् ५५ महांतो (अनर्घा) मणि
व्रातायेषुतेषांकिरीटकुंडलानांप्रभातयापरिक्षिप्ताः सर्वतःस्फुरंतःसहस्रमपरिमिताःकुंतलायस्यतम् । (शोभनः कौस्तुभोयत्रतम् । श्रीवत्सशोभयोपलक्षितम्) ५६ कीर्त्यंजयाकीर्तिसहितयाअजया (की
र्त्या) प्रकृत्याचेत्यर्थः अखिलर्द्धिभिरणिमादिविभूतिभिःमूर्तिधराभिः५७ऊर्जयाऊर्जितयागिरा ५८ मे (मम) कलावतीर्णौ (अंशेनावतीर्णौ इतिसंबोधनम्) (अवनेर्भरासुरान्भारभूतानसुरान् त्वरया)
शीघ्रंमेअंतिसकाशंइतमागच्छतम् ५९ (लोकसंग्रहं) धर्मंआचरतां आचरतम् ६० इदंभारतयुद्धात्पूर्वमेवकृतमपिश्रेष्ठचकथजप्रस्तावेनात्रोक्तम् (ओमित्यंगीकृत्यतदादेशम् । द्विजदारकान्द्विजपु
त्रान्) ६१ (यथारूपंयथावयः । येषांयादृशंरूपंयादृशंवयश्चासीत्तत्तदनतिक्रम्यतान् पुत्रान्ददतुः) ६२

॥१८०॥

श्लोकाः ५२—६२

द्वारेणचक्रानुपथेनतत्तमःपरंपरंज्योतिरनंतपारम् ॥ समश्नुवानंप्रसमीक्ष्यफाल्गुनःप्रताडिताक्षोपिदधेक्षिणीउभे ५२ ततःप्रविष्टःसलिलंनभस्वताबली
यसैजद्बृहदूर्मिभूषणम् ॥ तत्राद्भुतंवैभवनंद्युमत्तमंभ्राजन्मणिस्तंभसहस्रशोभितम् ५३ तस्मिन्महाभीममनंतमद्भुतंसहस्रमूर्द्धन्यफणामणिद्युभिः ॥ विभ्रा
जमानंद्विगुणेक्षणोल्बणंसिताचलाभंशितिकंठजिह्वम् ५४ ददर्शतद्भोगसुखासनंविभुंमहानुभावंपुरुषोत्तमोत्तमम् ॥ सांद्रांबुदाभंसुपिशंगवाससंप्रसन्नवक्त्रं
रुचिरायतेक्षणम् ५५ महामणिव्रातकिरीटकुंडलप्रभापरिक्षिप्तसहस्रकुंतलम् ॥ प्रलंबचार्वष्टभुजंसुकौस्तुभंश्रीवत्सलक्ष्म्यावनमालयाऽऽवृतम् ५६ सु
नंदनंदप्रमुखैःस्वपार्षदैश्चक्रादिभिर्मूर्तिधरैर्निजायुधैः ॥ पुष्ट्याश्रियाकीर्त्यजयाखिलर्द्धिभिर्निषेव्यमाणंपरमेष्ठिनांपतिम् ५७ ववंदआत्मानमनंतमच्यु
तोजिष्णुश्चतद्दर्शनजातसाध्वसः ॥ तावाहभूमापरमेष्ठिनांप्रभुर्बद्धांजलीसस्मितमूर्जयागिरा ५८ द्विजात्मजामेयुवयोर्दिदृक्षुणामयोपनीताभुविधर्मगुप्तये ॥
कलावतीर्णाववनेर्भरासुरान्हत्वेहभूयस्त्वरयेतमंतिमे ५९ पूर्णकामावपियुवांनरनारायणावृषी ॥ धर्ममाचरतांस्थित्यैऋषभौलोकसंग्रहम् ६० इत्या
दिष्टौभगवतातौकृष्णौपरमेष्ठिना ॥ ओमित्यानम्यभूमानमादायद्विजदारकान् ६१ न्यवर्ततांस्वकंधामसंप्रहृष्टौयथागतम् ॥ विप्रायददतुःपुत्रा
न्यथारूपंयथावयः ६२

चूर्णिका ॥१८०॥

५२ ५३ ५४ ततः शेषदेहे स्थितं विभुं अष्टभुजं प्रसन्नवक्त्रं सुनंदादिभिः सेव्यमानं परमेश्वरं दृष्ट्वा अर्जुनः कृष्णश्च तं ववंदे ततो भूमा तौ प्रति आह ५५ ५६
५७ ५८ भोकृष्णौ एते द्विजपुत्राः युवयोर्दिदृक्षया आनीताः युवां धर्मगुप्तये भुवि अवतीर्णौ अतः भूमेर्भारभूतान् असुरान् हत्वा शीघ्रं मे अंतिके आगच्छतम्
५९ ६० इत्यादिष्टौ तौ ओमित्युक्त्वा भूमानं नत्वा द्विजपुत्रान् गृहीत्वा स्वकं धाम आगत्य विप्राय पुत्रान् प्रददतुः ६१ ६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(धामप्रभावम् । कृष्णानुकंपितंकृष्णकृपाधीनमित्यर्थः) ६३ ६४ ६५ ६६ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांएकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ ७ ॥ ॥ चरमेतुपुनःप्रोक्ताकृष्णलीलासमासतः । यदुवंशप्रसूतानामानंत्यंचसकारणम् ॥ १ ॥ श्रीकृष्णविभूतिंसमासेनदर्शयति । सुखंस्वपुर्यामिति । सर्वसंपदादिविशिष्टायां (द्वारकायांनिवसन्) श्रियःपतिः षोडशसाहस्रपत्नीनामेकवल्लभः सन् तासांगृहेपुरेमेइति (पंचमेन)- अन्वयः १ (तडिदिवद्युर्दीप्तिर्यासांताभिः । नवायौवनशोभायासांताभिः ।) २ (मतंगजादिभिःसर्वदासंकुलोव्याप्तोमार्गोयस्यास्तस्याम्) ३ (पुष्पितासुद्रुमपंक्तिषुनिर्विशंतउपभोगंकुर्वंतोयेभृंगादयस्तैः ।) ४ (तावंतिषोडशसहस्राणिविचित्राणिरूपाणियस्य । कथंभूतेषुगेहेषु । महतीऋद्धिर्येषुतेषु ।) ५ गेहानामेवविशेषणंप्रोत्फुल्लेत्यादिश्लोकेन ६ तथाह्रादिनीषुचअंभोविगाह्यविजहार । महान्उदयोवैभवंयस्यसः । योषितांकुचकुंकुमैर्लिप्तांगः । यतस्ताभिःपरिरब्धः ७ (मृदंगादीन्वीणांचवादयद्भिर्गंधर्वैः) सूतमागधबंदिभिश्चोपगीयमानः ८ (रेचकैःजलसंभृतैर्नलिकाविशेषैः प्रतिसिंचन् विचिक्रीडे । जलक्रीडांकृतवान् । यक्षराट्धनदइव) ९

॥१८९॥

निशम्यवैष्णवंधामपार्थःपरमविस्मितः ॥ यत्किंचित्पौरुषंपुंसांमेनेकृष्णानुकंपितम् ६३ इतीदृशान्यनेकानिवीर्याणीहप्रदर्शयन् ॥ बुभुजेविषयान्ग्राम्यानीजेचात्यूर्जितैर्मखैः ६४ प्रववर्षाखिलान्कामान्प्रजासुब्राह्मणादिषु ॥ यथाकालंयथैवेंद्रोभगवान्श्रेष्ठ्यमास्थितः ६५ हत्वान्नृपानधर्मिष्ठान्घातयित्वार्जुनादिभिः ॥ अंजसावर्तयामासधर्मंधर्मसुतादिभिः ६६ ॥ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेनवाशीतितमोऽध्यायः ८९ ॥ ॥ ७ ॥

श्लोकाः ६३ / ९

॥ श्रीशुकउवाच ॥ सुखंस्वपुर्यांनिवसन्द्वारकायांश्रियःपतिः ॥ सर्वसंपत्समृद्धायांजुष्टायांवृष्णिपुंगवैः १ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः ॥ कंदुकादिभिर्हर्म्येषुक्रीडंतीभिस्तडिद्युभिः २ नित्यंसंकुलमार्गायांमदच्युद्भिर्मतंगजैः ॥ स्वलंकृतैर्भटैरश्वैरथैश्चकनकोज्ज्वलैः ३ उद्यानोपवनाढ्यायांपुष्पितद्रुमराजिषु ॥ निर्विशद्भृंगविहगैर्नादितायांसमंततः ४ रेमेषोडशसाहस्रपत्नीनामेकवल्लभः ॥ तावद्विचित्ररूपोसौतद्गेहेषुमहर्द्धिषु ५ प्रोत्फुल्लोत्पलकह्लारकुमुदांभोजरेणुभिः ॥ वासितामलतोयेषुकूजद्द्विजकुलेषुच ६ विजहारविगाह्यांभोह्रादिनीषुमहोदयः ॥ कुचकुंकुमलिप्तांगःपरिरब्धश्चयोषिताम् ७ उपगीयमानोगंधर्वैर्मृदंगपणवानकान् ॥ वादयद्भिर्मुदावीणांसूतमागधबंदिभिः ८ सिच्यमानोच्युतस्ताभिर्हसंतीभिःस्मरेचकैः ॥ प्रतिसिंचन्विचिक्रीडेयक्षीभिर्यक्षराडिव ९

चूर्णिका

ततः पार्थः वैष्णवं धाम दृष्ट्वा विस्मितः सन् पुंसां यत्किंचित् पौरुषं तत् कृष्णानुकंपितं मेने ६३ भगवान् एवं अनेकानि वीर्याणि दर्शयन् विषयान् भुंजन् सन् विप्रादिषु अखिलान् कामान् ववर्ष ६४ ६५ एवं अधर्मिष्ठान्नृपान् हत्वा अर्जुनादिभिश्च घातयित्वा युधिष्ठिरादिभिः धर्मं वर्तयामास ६४ ॥ ॥ इति दशमे एकोननवतितमः ८९ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ एकदा द्वारकायांश्रीकृष्णः सुखं निवसन् षोडशसहस्रस्त्रीणां वल्लभः तावद्रूपः सन् तासां गृहेषु रेमे १ २ ३ ४ ५ तथा कमलरेणुभिः वासितामलतोयेषु ह्रादिनीषु जलं विगाह्य स्त्रीणां कुचकुंकुमैर्लिप्तांगः सन् ताभिः सह विजहार ६ ७ तदा गंधर्वैःगीयमानः स्त्रीभिः स्मरेचकैःसिच्यमानः सन् स्वयं ताः प्रतिषिंचन् चिक्रीडे ८ ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द.उ. ताः (योषितः) क्लिन्नवस्त्राःअतएवविवृताः (ईषत्प्रकाशाः -)- ऊरु (प्रदेशाः) कुचप्रदेशाः (चयासांताः) उद्धृतानिविस्रस्तानिबृहत्कबरेभ्यःप्रसूनानियासांताः (रेचकानांसेचनयंत्राणांजिही अ०
र्षयाजिघृक्षयाकांतमालिंग्यविरेजुः) जातेनस्मरेणयउत्सवस्तेनलसंतिवदनानियासांताः १० तासांस्तनेभ्योविषज्जितकुंकुमा (विलेपितकुंकुमा) स्रग्यस्यसः । क्रीडायाअभिषंगेणअभिनिवेशेनधुतः
टीका कंपितःकुंतलवृंदबंधोयस्यसः (युवतिकृतप्रतिषेचनवशादार्द्रकुंतलसमूहंधुन्वन्रेमेइत्यर्थः) ११ क्रीडार्थधृतान्यलंकारवासांसि । स्त्रियश्चादुः । कृष्णस्यगत्यादिभिःस्त्रीणांधियोहृताः १२ १३ मुकुं ॥९०॥
दैकधियःसमाहिताइवक्षणमगिरःसत्यःपुनस्तमेवेशंचिंतयंत्योजडंयथाभवतितथायानिवाक्यानिऊचुस्तानिमेमत्तोगदतःशृण्वित्यर्थः १४ ईश्वरःश्रीकृष्णः(रात्र्याम्) स्वपिति । त्वंतुनिद्राभंगंकुर्वतीविलप
सि नशेषेनस्वपिषि तदनुचितमित्यर्थः । (गुप्तोऽप्रकटोबोधोयस्यसःस्वस्थःस्वपितीत्यर्थः । त्वंतुवीताविगतानिद्रायस्याःसा ।) अथवानापराधस्तवापीत्याशयेनाहुः । नलिननयनस्यहासेनसहितं
॥१८२॥ उदारंयल्लीलेक्षितंतेनकाचिद्गाढंनिर्विद्धचेतास्त्वम् (यथावय-)- मिति १५ नक्तंरात्रौ अदृष्टबंधुः (नदृष्टोबंधु र्भर्ताचक्रवाकोययाएवंभूता) सतीरोरवीषि (भृशंरौषि) । किंवानैतावत् । अपिचवयमिव (अ
च्युतचरणार्पितांमालां) स्पृहयसे (तदर्थंरौरवीषिकिमित्यर्थः) १६ (हेउदन्वन्समुद्रत्वंलब्धप्रजागरो) अलब्धनिद्रःसन्सदानिष्टनसेक्रोशसि। किंवास्माभिःप्राप्ताम् (दुरत्ययाम्) दशांकामातिरे
कहृपांत्वमपिगतोसि । अहोकष्टंयथावयंसंभोगेनमुकुंदापहृतकुचकुंकुमादिलांच्छनाःतथात्वमपियतोपहृतश्रीकौस्तुभादिलांच्छनोलक्ष्यसे १७

ताःक्लिन्नवस्त्रविवृतोरुकुचप्रदेशाःसिंचंत्यउद्धृतबृहत्कबरप्रसूनाः ॥ कांतंस्मरेचकजिहीर्षयोपगुह्यजातस्मरोत्सवलसद्वदनाविरेजुः १० कृष्णस्तुतरस्तन श्लोकाः
विषज्जितकुंकुमस्रक्क्रीडाभिषंगधुतकुंतलवृंदबंधः ॥ सिंचन्मुहुर्युवतिभिःपरिषिच्यमानोरेमेकरेणुभिरिवेभपतिःपरीतः ११ नटानांनर्तकीनांचगीतवाद्यो १०
पजीविनाम् ॥ क्रीडालंकारवासांसिकृष्णोऽदात्तस्यचस्त्रियः १२ कृष्णस्यैवंविहरतोगत्यालापेक्षितस्मितैः ॥ नर्मक्ष्वेलिपरिष्वंगैःस्त्रीणांकिलहृताधि १७
यः १३ ऊचुर्मुकुंदैकधियोऽगिरउन्मत्तवज्जडम् ॥ चिंतयंत्योरविंदाक्षंतानिमेगदतःशृणु १४ ॥ महिष्यऊचुः ॥ कुररिविलपसित्वंवीतनिद्रानशेषेस्वपि
तिजगतिरात्र्यामीश्वरोगुप्तबोधः ॥ वयमिवसखिकच्चिद्गाढनिर्भिन्नचेतानलिननयनहासोदारलीलेक्षितेन १५ नेत्रेनमीलयसिनक्तमदृष्टबंधुस्त्वंरोरवीषि
करुणंबतचक्रवाकि ॥ दास्यंगतावयमिवाच्युतपादजुष्टांकिंवास्रजंस्पृहयसेकबरेणवोढुम् १६ भोभोसदानिष्टनसेउदन्वन्नलब्धनिद्रोऽधिगतप्रजागरः ॥
किंवामुकुंदापहृतात्मलांच्छनःप्राप्तांदशांत्वंजगतोदुरत्ययाम् १७

चूर्णिका तदा ताःस्त्रियःस्मरेचकजिहीर्षया कांतं उपगुह्य जातस्मरोत्सवलसद्वदनाः विरेजुः १० तदा श्रीकृष्णः स्त्रियश्च अलंकारवासांसि ददुः ११ १२ एवं विहरता कृष्णेन नर्म
क्ष्वेलिपरिष्वंगैः हृतधियः स्त्रियःश्रीकृष्णं चिंतयंत्यः सत्यः यानि वाक्यानि ऊचुः तानि मत्तः शृणु १३ १४ ॥ महिष्य ऊचुः ॥ हे कुररि श्रीकृष्णे स्वपति सति ॥१८२॥
त्वं निद्राभंगं कुर्वती सती वयमिव विलपासि एतत्तव अनुचितम् १५ किंच हे चक्रवाकि त्वं अदृष्टबंधुः सती नेत्रे निमील्य रोरवीषि अतःवयमिव अच्युतपादजु
ष्टां स्रजं कबरेण वोढुं इच्छसि किम् १६ भो उदन्वन् अलब्धनिद्रःसन् सदा क्रोशसि अतः अस्माभिः प्राप्तां दशां त्वमपि प्राप्तोऽसि किम् १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हेचंद्रयक्ष्मणारोगविशेषेण । अतएवक्षीणःसन्तमोनक्षिणोषि । मुकुंदगदितानिश्रीकृष्णोक्तानिरहस्यानिविस्मृत्य तदेकचिंतयाकच्चित्त्वंक्षीणोसि)। वयमिव । स्थगितगीःस्तब्धवाक् भोइंदो नस्तथै
वोपलक्ष्यसे १८ (किंवेति) अप्रियाचरणंविनास्मरोदीरणेन (हृदि) व्यथाजननंमलयानिलतवानुचितमित्यर्थः १९ मेघेति । (सवर्णत्वात्) आतपार्तिहरणादिसामान्याच्चत्वंयादवेंद्रस्यनूनंदयि
तःसखासि । अतोभवांस्तंध्यायति । ध्यानेलिंगान्याहुः । अत्युत्कंठइत्यादि । (अतिशयेनउद्गतःकंठोयस्यसउच्चैर्गर्जन्नित्यर्थः । अन्यत्रअतिशयितउत्कंठायासांताइतिवचनविपरिणामः । शबलंनी
लादिवर्णविशेषैर्मिश्रंहृदयंअंतरंयस्यसः ।) अहोकिमितित्वयातेनसख्यंकृतंयतोदुःखदस्तत्प्रसंगइति २० हेकोकिलमेप्रियरावस्यप्रियंवदस्यश्रीकृष्णस्यपदानीवपदानिशब्दान्त्वंभाषसे । मृतान्संजी
वयतीतितथातयाअनयाकोमलयागिरा वल्गितकंठ रमणीयकंठ कोकिल मे कथय किंतवप्रियं करवाणीति २१ हेक्षितिधर त्वंनवदसि नापिचलसि अतो नूनंमहांतमर्थंचिंतयसे बततर्हिअपिकिंयथास्तनै
विंधर्तुवयंकामयामहे तथात्वंस्तनतुल्यैःशृंगैर्वोढुंकामयसे । ओमितिचेत्तर्हि तवाप्यस्मदवस्थाभविष्यतीतिभावः २२ भोसिंधुपत्न्यःनद्यःसंप्रतिग्रीष्मे (इष्टभर्तुःसमुद्रस्यप्रणयावलोकमप्राप्य) सिंधुर्मे
घद्वाराअमृतवृष्ट्यायुष्मान् ननंदयतीत्यर्थःबतअहोकष्टम् । अतःशुष्यंतोह्रदायासांताःअपगतकमलशोभाःकृशाश्च । वयंयथाप्रियतमस्य भर्तुर्मधुपतेःस्मप्रसिद्धम् (प्रणयावलोकमप्राप्यअपहृतहृदयाः
अपास्ताकमलस्यकमलसदृशस्यमुखस्यश्रीर्यासांता)२३

॥१८३॥

श्लोकाः १८/२३

त्वंयक्ष्मणाबलवतासिगृहीतइंदोक्षीणस्तमोननिजदीधितिभिःक्षिणोषि ॥ कच्चिन्मुकुंदगदितानियथावयंत्वंविस्मृत्यभोस्थगितगीरुपलक्ष्यसेनः १८ किंवा
चरितमस्माभिर्मलयानिलतेऽप्रियम् ॥ गोविंदापांगनिर्भिन्नेहृदीरयसिनःस्मरम् १९ मेघश्रीमंस्त्वमसिदयितोयादवेंद्रस्यनूनंश्रीवत्सांकंवयमिवभवान्ध्या
यतिप्रेमबद्धः ॥ अत्युत्कंठःशबलहृदयोऽस्मद्विधोबाष्पधाराःस्मृत्वास्मृत्वाविसृजसिमुहुर्दुःखदस्तत्प्रसंगः २० प्रियरावपदानिभाषसेमृतसंजीविकयाऽ
नयागिरा ॥ करवाणिकिमद्यतेप्रियंवदमेवल्गितकंठकोकिल २१ नचलसिनवदस्युदारबुद्धेक्षितिधरचिंतयसेमहांतमर्थम् ॥ अपिबतवसुदेवनंदनांघ्रिं
वयमिवकामयसेस्तनैर्विधर्तुम् २२ शुष्यद्ध्रदाःकर्शिताबतसिंधुपत्न्यःसंप्रत्यपास्तकमलश्रियइष्टभर्तुः ॥ यद्वद्वयंमधुपतेःप्रणयावलोकमप्राप्यमुष्टहृदयाः
पुरुकर्शिताःस्म २३

चूर्णिका

अहो कष्टं हेइंदो त्वं यक्ष्मणा गृहीतः अतएव क्षीणः सन् स्वकिरणैः तमः न क्षिणोषि तत्किं कृष्णगदितानि विस्मृत्य तच्चिंतया वयमिव क्षीणोसि कच्चित् १८ हे
मलयानिल तव अप्रियं अस्माभिः किं कृतं यः त्वं कृष्णकटाक्षैर्भिन्ने नः हृदि स्मरं प्रेरयसि १९ तत्तु तवानुचितम् हे मेघ त्वं श्रीकृष्णस्य सखा असि अतः वय
मिव तं ध्यात्वाअत्युत्कंठः सन् बाष्पधाराः मुहुर्मुहुः विसृजसि अहो एषः प्रसंगः दुःखदोस्ति २० हे कोकिल त्वं कृष्णस्य शब्दा इव शब्दान् भाषसे अतः ते ॥१८३॥
प्रियं अद्य किंकरवाणि २१ हे पर्वत त्वं न चलसि न वदसि तत्किं कृष्णांघ्रिं स्तनैः धर्तुं वयमिव कामयसे २२ हे नद्यः वयं कृष्णस्य प्रणयावलोकं अप्राप्य
यथा कृशाः स्मतद्वत् यूयमपि शुष्यद्ध्रदाः स्थ २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदैवदैवादागतंहंसंदूतंकल्पयित्वाहुः। हंसेति(हेहंस) नःअस्मान्प्रतिपुरारहसिउक्तंकिंवा चलसौहृदःस्मरति। स्मृत्वैवमांप्रस्थापितवानितिचेदतआहुःहेक्षौद्र क्षुद्रस्यदूतकस्माद्वयंतंभजामः। कामार्थमाह्वयति युष्मान्(कायुष्मदाज्ञा)इतिचेदतआहुः। अहोतर्हितंइहालापयआकारय। ओमितिगच्छंतमिवतंपुनराहुः। याऽस्मान्वंचयित्वाएकाकिनीरमतेतांश्रियमृतेविनातमेवालापय। सातदेकनिष्ठाकथंपरिहर्तुंशक्यते। इतिचेदतआहुः। स्त्रियांजातावेकवचनम्। अस्मासुस्त्रीषुमध्येकिंसैवैकानिष्ठा नतुवयमित्यर्थः। पाठांतरेतुक्षौद्रंमधु तद्वन्मधुरालापमात्रंयस्यतं अकामदंअरतिप्रदम्। श्रियमृतेवयंकस्माद्भजामः। किंतु अनादृतापिसतीपुनःपुनःसैवभजतु। यतोऽस्मादृशोमानिन्यःस्त्रियएकनिष्ठाःएकत्रैवस्वसंमानसिद्धौनिष्ठायासामिति २४ (माधव्योमाधवस्यस्त्रियः) २५ तासांकृष्णेएवंभूतोभावोनातिचित्रमित्याह। श्रुतमात्रोपीति। उरुभिर्गायैर्गीतैरुरुधागीतोवायैःकैश्चिदपिगीतैर्यथाकथंचिदपिगीतोवेत्यर्थः (पश्यंतीनामस्माकंमनआकर्षतेइतिकुतःपुनःकिमुवक्तव्यमित्यर्थः) २६ (संपर्यचरन्सम्यक्सिषेविरे) २७ पदंस्थानम् २८ (परंउत्कृष्टंअन्येषामाश्रमाणामुपकारकंगृहमेधिनांधर्मम्) २९ यारुक्मिणीप्रमुखाअष्टौतास्तत्पुत्राश्चानुपूर्वशउदाहृताःप्राक् ३० (यावत्यआत्मनोभार्यास्तासांस्त्रीरत्नभूतानामात्मजान् एकैकस्यांदशदशसंख्याकान्अजीजनत्जनयामास।) एवमष्टोत्तरशताधिकषोडशसहस्रमहिषीणांपुत्रालक्षमेकमशीत्युत्तरैकषष्टिसहस्राणिच (१६१०८०) भवंति। (ननुप्रतिस्त्रियाःदशैवेतिचित्रमित्यत आह। अमोघगतिरितितत्रहेतुरीश्वरइति) ३१ (उदारंमहत्यशोयेषाम्। विख्यातकीर्तयइत्यर्थः) ३२

॥१८४॥

श्लोकाः २४ — ३२

हंसस्वागतमास्यतांपिबपयोब्रूह्यंगशौरेःकथांदूतंत्वांतुविदामकच्चिदजितःस्वस्त्यास्तउक्तंपुरा ॥ किंवानश्चलसौहृदःस्मरतितंकस्माद्भजामोवयंक्षौद्रालापय कामदंश्रियमृतेसैवैकनिष्ठास्त्रियाम् २४ इतीदृशेनभावेनकृष्णेयोगेश्वरेश्वरे ॥ क्रियमाणेनमाधव्योलेभिरेपरमांगतिम् २५ श्रुतमात्रोपियःस्त्रीणांप्रसह्याकर्षतेमनः ॥ उरुगायोरुगीतोवापश्यंतीनांकुतःपुनः २६ याःसंपर्यचरन्प्रेम्णापादसंवाहनादिभिः ॥ जगद्गुरुंभर्तृबुद्ध्यातासांकिंवर्ण्यतेतपः २७ एवंवेदोदितंधर्ममनुतिष्ठन्सतांगतिः ॥ गृहंधर्मार्थकामानांमुहुश्चादर्शयत्पदम् ॥ २८ आस्थितस्यपरंधर्मंकृष्णस्यगृहमेधिनाम् ॥ आसन्षोडशसाहस्रंमहिष्यश्चशताधिकम् २९ तासांस्त्रीरत्नभूतानामष्टौयाःप्रागुदाहृताः ॥ रुक्मिणीप्रमुखाराजंस्तत्पुत्राश्चानुपूर्वशः ३० एकैकस्यांदशदशकृष्णोऽजीजनदात्मजान् ॥ यावत्यआत्मनोभार्याअमोघगतिरीश्वरः ३१ तेषामुद्दामवीर्याणामष्टादशमहारथाः ॥ आसन्नुदारयशसस्तेषांनामानिमेशृणु ३२

चूर्णिका

हे हंस तव स्वागतम् अत्रास्यताम् पयः पिब शौरेः कथां ब्रूहि त्वां कृष्णदूतं विदाम सः स्वस्त्यास्ते हे क्षौद्र सः प्राक् रहसिउक्तं तत्स्मरति किम् ओमितिचेदाहुः वयं तं कस्मात् भजामः अहो सः युष्मान् आह्वयति तर्हि तं आलापय २४ एवं माधव्यः ईदृशेन भावेन परमां गतिं लेभिरे २५ यः श्रुतमात्रोपि स्त्रीणां मनः कर्षति सःभगवान् आत्मानं पश्यंतीनां मनः कर्षतीति किं वक्तव्यम् २६ किंच याः स्त्रियः जगद्गुरुं पर्यचरन् तासां तपःकिं वर्ण्यते २७ एवं भगवान् वेदोक्तं धर्मं अनुतिष्ठन् गृहं धर्मार्थकामानां पदमिति अदर्शयत् २८ एवं गृहस्थाश्रमधर्मं आस्थितस्य कृष्णस्य अष्टोत्तरशताधिकषोडशसहस्रस्त्रियः आसन् २९ तेषां मध्ये रुक्मिण्यादयः अष्टौ प्रागुक्ताः तेषां पुत्राश्चोक्ताः ३० हे राजन् श्रीकृष्णः एकैकस्यां दश दश पुत्रान् अजीजनत् ३१ एवं अष्टोत्तरशताधिकषोडशसहस्रस्त्रीणां पुत्राः लक्षमेकं अशीत्युत्तरैकषष्टिसहस्राणि १६१०८० भवंति तेषां मध्ये अष्टादश महारथाः तन्नामानि शृणु ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अनिरुद्धश्चेति(प्राद्युम्निग्रहणम्) अतःपुत्राणांमध्येमहारथाःसप्तदशैवज्ञेयाः। अथवाअनिरुद्धनामापिकश्चित्पुत्रएवेति ।(महारथलक्षणंतु।"एकोदशसहस्राणियोधयेद्यस्तुधन्विनाम्।शस्त्रशास्त्रप्रवीणश्च महारथइतिस्मृतइति") ३३ ३४ (मधुद्विषोहरेस्तनुजानांप्रथमःपितृवत्सौंदर्यादिनापितृतुल्यः) ३५ (रुक्मिणोमातुलस्यउपयेमेपरिणीतवान्) ३६ (सचानिरुद्धःस्वमातुलकन्यामुपयेभेइत्यर्थः मौसलात्मुसलप्रभवान्नाशादवशेषितः) ३७ ३८ (एतस्मिन्कुलेयेजातास्तेअबहुप्रजाअल्पसंतानाःअब्रह्मण्याब्रह्मणेतपसेवेदायब्राह्मणायवाहितानभवंतितथानजज्ञिरेनजाताः ।) ३९ ४० सहस्राणामपरिमितानांकुमाराणामित्यन्वयः । (तेषामध्यापकायदुकुलाचार्याएतावत्संख्याकाआसन्नित्यर्थः । इतिश्रुतिर्वार्ता) ४१ यदाबहूनध्यापयतामाचार्याणामियंसंख्यातदपिश्रुतिमात्रम् नतुसम्यक्ज्ञायतेतदाकुमाराणामेवंसंख्यानंनकर्तुंशक्यतएवतत्रकुतःपुनःसर्वयादवानामिति । (अयुतानामप्ययुतलक्षेणसहसदास्तेस्म ।) ४२ तेचोत्पन्नाइति (देवासुराणामाहवेयुद्धेहतायेदैतेयास्तेचोत्पन्नामनुष्येषु) प्रत्येकंबहुभीरूपैः प्रजाबबाधिरेपीडितवंतः४३

॥१८५॥

श्लोकाः ३३/४३

प्रद्युम्नश्चानिरुद्धश्चदीप्तिमान्भानुरेवच ॥ सांबोमधुर्बृहद्भानुश्चित्रभानुर्वृकोऽरुणः ३३ पुष्करोवेदबाहुश्चश्रुतदेवःसुनंदनः ॥ चित्रबाहुर्विरूपश्चकविर्न्यग्रोधएवच ३४ एतेषामपिराजेंद्रतनुजानांमधुद्विषः ॥ प्रद्युम्नआसीत्प्रथमःपितृवद्रुक्मिणीसुतः ३५ सरुक्मिणोदुहितरमुपयेमेमहारथः ॥ तस्मात्सुतोऽनिरुद्धोभून्नागायुतबलान्वितः ३६ सचापिरुक्मिणःपौत्रींदौहित्रोजगृहेततः ॥ वज्रस्तस्याभवद्यस्तुमौसलादवशेषितः ३७ प्रतिबाहुरभूत्तस्मात्सुबाहुस्तस्यचात्मजः ॥ सुबाहोःशांतसेनोभूच्छतसेनस्तुतत्सुतः ३८ नह्येतस्मिन्कुलेजाताअधनाअबहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्चअब्रह्मण्याश्चजज्ञिरे ३९ यदुवंशप्रसूतानांपुंसांविख्यातकर्मणाम् ॥ संख्यानशक्यतेकर्तुमपिवर्षायुतैर्नृप ४० तिस्रःकोटयःसहस्राणामष्टाशीतिशतानिच ॥ आसन्यदुकुलाचार्याःकुमाराणामितिश्रुतिः ४१ संख्यानंयादवानांकःकरिष्यतिमहात्मनाम् ॥ यत्रायुतानामयुतलक्षेणास्तेसदाहुकः ४२ देवासुराहवहतायेदैतेयाःसुदारुणाः ॥ तेचोत्पन्नामनुष्येषुप्रजादृप्ताबबाधिरे ४३

चूर्णिका

प्रद्युम्नः प्रथमः अनिरुद्धः द्वितीयः दीप्तिमान् तृतीयः भानुः चतुर्थः सांबः पंचमः मधुः षष्ठः बृहद्भानुः सप्तमः चित्रभानुः अष्टमः वृकः नवमः अरुणः दशमः पुष्करः एकादशः देववाहुः द्वादशः श्रुतदेवः त्रयोदशः सुनंदनः चतुर्दशः चित्रवाहुः पंचदशः विरूपः षोडशः कविःसप्तदश. न्यग्रोधः अष्टादशः एतेषांमध्येप्रथमः प्रद्युम्नः पितृवदासीत्सःरुक्मिणःदुहितरम् उपयेमे तस्मादनिरुद्धोभूत्सः रुक्मिणः पौत्रींउ पयेमेत स्मात् वज्रःयःमौशलात्अवशेषितः ३६ ३७ तस्मात् प्रतिवाहुः तस्मात् सुवाहुः तस्मात् शांतसेनः तस्मात्शतसेनः ३८ एतस्मिन् कुले अल्पधनप्रजायुर्वीर्याः अब्रम्हण्याश्च न जज्ञिरे ३९ हे राजन् यदुवंशप्रसूतानां पुंसां वर्षशतैरपि संख्या कर्तुं नशक्यते ४० अपरिमितानां यदुकुमाराणां आचार्याः तिस्रः कोट्यः अष्टाशीतिशतानि च आसन् इति श्रुतम् ४१ हेराजन् यादवानां संख्यानं कः करिष्यति यत्र अयुतानां अयुतलक्षेण सः आहुकः आस्ते ४२ किंच हे राजन् देवासुरयुद्धे ये मृताः दैत्याः ते मनुष्येषु उत्पन्नाः संतः प्रजाः बबाधिरे ४३

१ सआहुकइत्यपिपाठान्तरंक्वचित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवमेव (तेषांदैतेयानांनिग्रहायभवद्भिरंशैर्यदुषूपजन्यतामितिहरिणाऽऽज्ञप्ता) देवा यदोःकुले(अवतीर्णा-)-इति तथाचोक्तं''सहस्रशःसमुद्भूतादेवायदुकुलेपृथगि''ति४४ (तेषांअवतीर्णानांप्रमाणंदेवांशत्वज्ञापक मित्यर्थःयद्वाप्रमाणंवृद्धिजनकः) ४५ (आत्मानंशय्यादिषुसंतंनविदुः । किमहंशय्यायामस्मि उतआसनेइत्यादि किमपि नानुसंदधिरेइत्यर्थः । तत्रहेतुः । कृष्णेएवचेतोयेषांते) ४६ तस्मा त्कृष्णकीर्तेःसर्वतीर्थोत्तमत्वंकृष्णस्यचसर्वदेवोत्तमत्वंनचित्रमित्याह । तीर्थचक्रइति । इतःपूर्वंस्वःसरिदेवसर्वतोधिकंतीर्थमित्यासीत् । इदानींतुयदुषुयदजनिजातंश्रीकृष्णकीर्तिरूपं तीर्थंएतत्कर्तृस्वः सरिद्रूपंपादशौचंतीर्थंकर्म (हेनृप) ऊनंअल्पंचक्रेस्वयमेवतीर्थोपरिविराजतेइत्यर्थः । (कीर्तिर्हिसर्वांगसंबंधिनी । गंगातुपादशौचमात्रम्) । श्रीकृष्णस्यविद्विषाःस्निग्धाश्चतत्सारूप्यंययुरित्यपिनचित्रं तस्यपरमकारुणिकत्वात् । तथेदंचनचित्रंकिंतत् । अजितपरा (अजिताचासौपराच ।) आजताकैश्चिदप्यप्राप्तापरासर्वतः परिपूर्णा । (अजितःपरोयस्याइतिवासा) श्रीःकृष्णस्यैवनान्यस्ये ति । तदेवाह । यदर्थे (यस्याः श्रियः अर्थे) अन्येषांब्रह्मादीनांयत्नइति ननुनिरपेक्षंतमेवलक्ष्मीःश्रयतेइतिचित्रमेवेतिचेत्नहि परममंगलनामधेयत्वात्तस्येत्याह ।यन्नामेति । तदपिनार्थस्मरणापेक्ष मित्याह । श्रुतमथगदितमिति । सर्वधर्माश्रयत्वादपीत्याह । यत्कृतोगोत्रधर्मइति । गोत्रेषुतत्तदृषिवंशेषुधर्मोयत्कृतः येन (सर्वज्ञेन) प्रवर्तितः । (''पवित्राणांपवित्रंयोमंगलानांचमंगलमि''त्यतस्त मेवसर्वोत्कृष्टापिश्रीःसेवतेइत्यर्थः) तस्यक्षितिभरहरणंनैवाचित्रमित्याह । कृष्णस्यैतदिति । कालचक्रायुधस्येति । (कालश्चासौचक्रायुधश्चतस्य) सर्वसंहारककालमूर्तेःविशेषतोदुरंतप्रभावचक्रायुधस्य (इत्यर्थः । कालचक्रमेवआयुधंयस्येतिवा । तस्य) कियदेतदित्यर्थः ४७ यतएवंभूतःश्रीकृष्णस्ततःसर्वसर्वोत्तमइत्याह । जयतीति । जनानांजीवानांनिवासआश्रयःतेषुवानिवसतिअंतर्यामितयात थासकृष्णोजयति देवक्यांजन्मेतिवादमात्रंयस्यसः । वस्तुतोअजन्मायदुवराः। पर्षत्सभासेवकरूपायस्य । (यद्वा यदुवरपर्षदिमुख्यत्वात्तद्रूपोलक्षितः ।) इच्छामात्रेणनिरसनसमर्थोपिक्रीडार्थंदोर्भिरधर्मं अस्यन्क्षिपन् । दैत्यान्संहरन्नित्यर्थः । स्थिरचरवृजिनघ्नःअधिकारिविशेषानपेक्षमेववृंदावनगततरुलतादीनाम् (स्थिराणांगोगोपपूतनादीनांचराणांच) संसारदुःखहंता ।(अधर्मनिरसनेनपृथिव्यानि ष्कंटकत्वात्स्थिरचरदुःखहंतेतितुस्पष्टोर्थः) । तथाविलासवैदग्ध्यानपेक्षंव्रजवनितानांपुरवनितानांचसुस्मितेनश्रीमतामुखेनैवकामदेवंवर्धयन्कामश्चासौदीव्यतिविजिगीषतिसंसारमितिदेवस्तंभोगद्वा रामोक्षप्रदम् (कामंवितन्वन्नित्यर्थः) ४८

॥१८६॥

श्लोकाः ४४/४८

तन्निग्रहायहरिणाप्रोक्तादेवायदोःकुले ॥ अवतीर्णाःकुलशतंतेषामेकाधिकंनृप ४४ तेषांप्रमाणंभगवान्प्रभुत्वेनाभवद्धरिः ॥ येचानुवर्तिनस्तस्यववृधुः सर्वयादवाः ४५ शय्यासनाटनालापक्रीडास्थानाशनादिषु ॥ नविदुःसंतमात्मानंवृष्णयःकृष्णचेतसः ४६ तीर्थंचक्रेनृपोनंयदजनियदुषुस्वःसरित्पा दशौचंविद्विट्स्निग्धाःस्वरूपंययुरजितपराश्रीर्यदर्थेऽन्ययत्नः ॥ यन्नामामंगलघ्नंश्रुतमथगदितंयत्कृतोगोत्रधर्मःकृष्णस्यैतन्नचित्रंक्षितिभरहरणंकालचक्रा युधस्य४७ जयतिजननिवासोदेवकीजन्मवादोयदुवरपर्षत्स्वैर्दोर्भिरस्यन्नधर्मम् ॥ स्थिरचरवृजिनघ्नःसुस्मितश्रीमुखेनव्रजपुरवनितानांवर्धयन्कामदेवम्४८

चूर्णिका

तेषां निग्रहाय हरिणा प्रोक्ताः देवाः यदोः कुले अवतीर्णाः तेषां एकाधिकं शतं कुलानि आसन् ४४ तेषां मध्ये प्रभुत्वेन भगवानासीत् ४५ यादवाः तं कृष्णं परमात्मानं न विदुः ४६ हेनृप यदुषु यत्कृष्णकीर्तिरूपं तीर्थं जातं तत् गंगारूपं तीर्थं अल्पं चक्रे एवं भूतस्य क्षितिभारहरणादि न चित्रम् ४७ हे राजन् सः श्रीकृष्णः स्थिरचरवृजिनघ्नः सन् जयति ४८ ॥१८६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(इत्थमिति । निजवर्त्मनोनिजवैदिकमार्गस्यरिरक्षयारक्षणेच्छया ।) तत्तत्कार्यविशेषैःस्वीकृतमत्स्यकूर्मादिनानामूर्तेर्विशेषतोयदुत्तमस्यसतः परस्यतदनुरूपानुकारीणिकर्मकषणानि (कर्मबंधनि
मूलनक्षमाणि) कर्माणिचरितानिश्रूयात्शृणुयादित्यर्थः । (अमुष्यकृष्णस्यपदयोरनुवृत्तिंसेवाम्) ४९ अनुवृत्तेःफलमाह । मर्त्यइति मुकुंदस्यश्रीमत्याःकथायाःश्रवणकीर्तनयुक्तयाचिंतया -(- ऽनुसवंत्रि
कालंनिरंतरमित्यर्थः) संवर्धितयाऽनुवृत्त्यातयातन्निष्ठत्वेनतस्यधामलोकमेतिगच्छति । लोकत्वेपितस्यकालानाकलितत्वमाह । दुस्तरेति । दुस्तरोदुष्परिहरोयःकृतांतजवःकालवेगस्तद्रहितम् ।, नित्य
मितियावत् दुर्लभपुरुषार्थत्वमाह ग्रामादिति (क्षितिभुजःसार्वभौमाअपियत्प्राप्तीच्छयाराज्यंविहायवनंविविशुरित्यर्थः) ५० चित्रमिति उरुगायस्यश्रीकृष्णस्यपवित्रलीलाभिःविध्वस्तंकल्मषकदंब
कंयस्यतस्यप्राणिमात्रस्यमुक्तिरूपंएतद्धामतादृशस्त्रीणांसंभूतमितिचनचित्रमिति ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कंधेटीकायांश्रीधरस्वामिविरचितायांभावार्थदीपिकायांनवतितमोऽध्यायः)
॥१८७॥ ९० ॥ (व्याख्यानेश्रीधरकृतेदृश्यतेयद्वचोऽधिकम् । महेश्वरेणतन्न्यस्तंगव्येक्षीरेजलंयथा ॥ १ ॥) सयाप्तोयंदशमस्कंधः॥

श्लोकाः

इत्थंपरस्यनिजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरूपविडंबनानि ॥ कर्माणिकर्मकषणानियदूत्तमस्यश्रूयादमुष्यपदयोरनुवृत्तिमिच्छन् ४९ मर्त्यस्तयानुस
वमेधितयामुकुंदश्रीमत्कथाश्रवणकीर्तनचिंतयैति ॥ तद्धामदुस्तरकृतांतजवापवर्गंग्रामाद्वनंक्षितिभुजोपियपुर्यदर्थाः ५० चित्रंनचैतदुरुगायपवित्रलीला
विध्वस्तकल्मषकदंबकमुक्तिरूपम् ॥ स्त्रीणांसुदुस्त्यजकृतांतजवापवर्गंग्रामाद्वनंक्षितिभुजोपिययुर्यदर्थाः ५१ ॥ इतिश्रीभागवतेमहापुराणेदशमस्कं
धेश्रीकृष्णलीलाचरितानुवर्णनंनामनवतितमोऽध्यायः ९० ॥ श्रीकृष्णःप्रीयताम् ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

४९/५१

चूर्णिका

एवंभूतस्य श्रीकृष्णस्य भक्तिं इच्छन् तत्कर्माणि शृणुयात् ४९ यतः मर्त्यः श्रीकृष्णकथाश्रवणकीर्तनचिंतया तद्धाम एति ५० ५१ इति श्रीमद्भागवते महापुराणे
दशमस्कंधचूर्णिकायां नवतितमोध्यायः ९० समाप्तोऽयं दशमस्कंधः ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत— दशमस्कंधोत्तरार्धः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत—एकादशस्कंधः प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीगणपतिलक्ष्मीनारायणकुलदेवताभ्यश्चनमोनमः ॥ ॥ विजयंतेपरानंदकृष्णपादरजःस्रजः । याधृतामूर्ध्निजायंतेमहेंद्रादिमहास्रजः ॥ १ ॥ उक्तैकत्रिंशताध्यायैर्मुक्तिरेकादशेततः । जायंतेयोति हासाद्यैः समासव्यासरूपतः ॥ २ ॥ नारदोवसुदेवायसमासेनव्यवर्णयत् ॥ भगवानुद्धवायाथविस्तरेणोपपत्तिभिः ॥ ३ ॥ तत्रतुप्रथमेऽध्यायेयदुवंशस्यसंक्षयः ॥ उपक्षिप्तोविरागायमौसलव्यपदे शतः ॥ ४ ॥ प्रवृत्तितःपरानंदकृष्णक्रीडानुवर्णिता ॥ तन्निवृत्त्यापरानंदपदारोहोनुवर्ण्यते ॥ ५ ॥ एवंतावद्दशमस्कंधेभूभारावतारणायनिजभूतिविभूषितयदुवंशस्ययदुवंशावतारितसकलसुरांशस्य भगवतःश्रीकृष्णस्यतदुचितप्रवृत्तिविडंबनेनतच्छ्रवणस्मरणपराणांपरेषामानंदकारणंक्रीडानिरूपिता । अथेदानीमपरिमितयोगमायावैभवस्यभक्तानामात्मतत्त्वोपदेशपूर्वकं क्रीडार्थंभूतलेवतारितानां चाधिकारिणांसुरांशानांमौसलापदेशेनतत्तदधिकारिपदप्रापणपूर्वकंचब्रह्माद्यनुग्रहायनिजपदारोहोनिरूप्यते । तत्र कुरुक्षेत्रयात्रायां अविरक्तस्यवसुदेवस्य "कर्मणःकर्मनिर्हारोयथास्यान्नस्तदु च्यतां"मित्येवंकर्मयोगंपृष्टवतोनारदादिभिः कर्मयोगोनिरूपितः । "कर्मणाकर्मनिर्हारएषसाधुनिरूपितः । यच्छ्रद्धयायजेद्विष्णुंसर्वयज्ञेश्वरंमखै"रित्यादिना । तेनचाविशुद्धसत्त्वस्यश्रीकृष्णरामौपरमेश्वर त्वेनज्ञातवतःषड्गर्भानयनाध्यायेश्रीकृष्णेनात्मतत्त्वमुपदिष्टम् । "वचोवःसमवेतार्थंतातैतदुपमन्महे । यन्नःपुत्रान्समुद्दिश्यतत्त्वग्रामउदाहृत"इत्यादिना । तच्चाविषयभोगातिशयेनपुनस्तिरोहितमिवासीत् । तदेवेदानींनारदमुखेनप्रथमंपंचाध्याय्यानिरूप्यते । तत्रप्रथमाध्यायेवैराग्योत्पादनाययदुकुलस्यब्रह्मशापापदेशेनात्युन्नतविषयसुखानामप्यानित्यताप्रतिपाद्यते । ततश्चतुर्भिर्निमिजायंतेयसंवादेनसपरि करंपरमार्थतत्त्वानिरूपणम् । ततःषष्ठेभगवदुद्धवसंवादप्रस्तावः । ततस्त्रयोविंशत्याउद्धवंप्रतिभगवत्तत्त्वनिरूपणम् । ततो द्वाभ्यांमौसलक्रीडेत्येवमेकत्रिंशताऽध्यायैरेकादशस्कंधस्यप्रवृत्तिस्तस्यचयथाम तिव्याख्यानमारभ्यते तत्र मौसलप्रसंगार्थंपूर्वस्कंधार्थंद्वाभ्यामनुवदति । कृत्वेति अवतारयदित्यत्राडागमोद्रष्टव्यः । जविष्ठंवेगवत्तरम् । हिंसापर्यवसायिनमित्यर्थः कलिंकलहम् १ एतद्विवृणोति येको पिताइति । सपत्नैर्दुर्योधनादिभिः सुबहुयथाभवतितथा । बहुवारमित्यर्थः । तदेवाह । दुर्द्यूतेति । दुर्द्यूतंकपटद्यूतं हेलनमवज्ञा । कचग्रहणं दुःशासनेन द्रौपद्याः केशाकर्षणम् । एतानिआदिर्येषांगर दानजतुगृहदाहा दीनांतैःकृत्वायेकोपिताः कोपंप्रापितास्तान्पांडुसुतान्निमित्तंकृत्वा इतरेतरतःउभयोःपक्षयोःसमेतात् नृपान् हत्वा क्षितेर्भारंनिरहरत् जहार । यद्वा येकोपितायैश्चकोपितास्तानितरेतरतःपरस्परंनिमित्तंकृत्वेत्यन्वयः । येतावत्प्रकटदैत्याःपूतनादिरूपास्तान् स्वयमेवहतवान् । ये तु बांधवच्छद्मनास्थितास्तान् परस्परंनिमित्तंविधायहत्वाभूभारमपाकृतवानित्यर्थः २

श्लोकाः १/२

॥ श्रीबादरायणिरुवाच ॥ कृत्वादैत्यवधंकृष्णःसरामोयदुभिर्वृतः ॥ भुवोऽवतारयद्भारंजविष्ठंजनयन्कलिम् १ येकोपिताःसुबहुपांडुसुताःसपत्नैर्दुर्द्यूतहेलनकचग्रहणादिभिस्तान्[1] ॥ कृत्वानिमित्तमितरेतरतःसमेतान्हत्वान्नृपान्निरहरत्क्षितिभारमीशः २

चूर्णिका ॥ १ ॥

॥ श्रीगणेशाय नमः ॥ ॥ श्रीकुलदेवतायै नमः ॥ ॥ अथैकादशस्कंधो व्याख्यायते ॥ ॥ श्रीशुक उवाच ॥ अथ सरामः कृष्णः दैत्यवधं कृत्वा जविष्ठं कलिं जनयन् भुवः भारं अवतारयत् १ किंच सपत्नैः दुर्द्यूतादिना कोपिताः ये पांडवाः तान् निमित्तं कृत्वा उभयोः पक्षयोः समेतान् नृपान् हत्वा ईशः भूभारं जहार २

१ दूर्द्यूतहेलनकचग्रहणादिभिरिति मु० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अपिच भूभारेति । अन्वाश्चभूभारभूताराजन्यपृतनाःराज्ञांपृतनाःसेनाः राजानश्चतेषांपृतनाश्चेतिवा स्वबाहुभिर्गुप्तैःपरिरक्षितैः यदुभिःविवाहादिच्छलेनहत्वाऽचिंतयत् । नन्वेवंकृष्णश्चिकीर्षतीतिज्ञात्वा कथं
तस्मैयादवानद्रुह्यंतिस्मेत्यत्राह अप्रमेयः प्रमातुमशक्यः । चिंतामेवाह । मन्यइति । नन्वितिवितर्केअवनेर्भूमेर्भारोयद्यपिलोकप्रतीत्यागतस्तथापिअगतमेवमन्ये । हिनिश्चितंयद्यस्मात् अविषह्यंसोढुमश
क्यंयादवंकुलंअनेनैवस्ववंशत्वात्स्वयंहननमनुचितमितिसूचितम् ३ तर्हीदमप्यन्यैर्घात्यतांतत्राह । नैवेति । अन्यतःदेवादिभ्योपियादवकुलस्यपरिभवस्तिरस्कारोनभवेत् । कुतः । मत्संश्रयस्य (अहं
संश्रयआश्रयोयस्यतत् मत्संश्रयंतस्य) किंच । नित्यंविभवोन्नहनस्यविभवैर्गजतुरंगादिभिरुच्छृंखलस्य । यद्वा । तर्हीदंकिमितिसंहर्तव्यम् । तत्राह । विभवोन्नहनस्येति । तस्मादेवंकरिष्यामीत्याह ।
अंतःकलिमिति (यथावेणुस्तंबेनपरस्परघर्षणेनैवस्वनाशायांतर्वह्निरुत्पाद्यतेतथाविधाय) शांतिमुपशममुपैमि । "वर्तमानसामीप्येवर्तमानवद्वा" । उपैष्यामि । तदनंतरंधामवैकुंठाख्यंउपैष्यामीत्यर्थः
४ व्यवसितःकृतनिश्चयः । संजह्रेउपसंहृतवान् ५ तदेवमवतारप्रयोजनंसर्वंसंपाद्य स्वलोकंजगामेत्याह स्वमूर्त्येतिद्वाभ्याम् । लोकानांलावण्यस्यानिर्मुक्तिस्त्यागोयया । यामपेक्ष्यलोकेषुलावण्यंनास्ती
त्यर्थः । यद्वा लोकेभ्योलावण्यस्यानिर्मुक्तिर्दानंयतःयत्संपर्केणलोकालावण्यवंतोभवंतीत्यर्थः । तयास्वमूर्त्यानृणांलोचनमाच्छिद्यआकृष्य । ततोऽन्यस्यावलोकनेलोचनस्याप्रवृत्तेः । तथास्वगीर्भिस्ताः
गिरःस्मरतांचित्तंचआच्छिद्य तथापदैस्तत्रतत्रांकितैःतानिपदानीक्षतामीक्षमाणानांअन्यतोगमनादिकाःक्रियाआच्छिद्य तदानींतनानांचक्षुरादिप्रवृत्तीःस्वैकनिष्ठाः कृत्वेत्यर्थः (स्वंपदमगादित्युत्तरेणान्व
यः) ६ किंच । इतउपरिजनिष्यमाणानांसंसारतरणायकौपृथिव्यांशोभनाःश्लोकाः सुश्लोकाःकवीनांयस्यांतांस्वकीर्तिंवितत्यविस्तार्यअनयाकीर्त्याजसासुखेनैवनुनिश्चितंतमस्तरिष्यंतीत्यभिप्रेत्यईश्वरः स्वं
पदंस्थानमगादिति ७ अब्रह्मण्येभ्यःअदातृभ्योवाअसेवकेभ्योवाविप्राः कुप्यंति वृष्णयस्तुनतथेत्याह । ब्रह्मण्यानामिति । किंच । कोपेजातेपिकृष्णचेतसां (विप्रशापः) कथमभूत् कथंप्रादुरभूदित्यर्थः ८

॥ २ ॥ भूभारराजपृतनायदुभिर्निरस्यगुप्तैःस्वबाहुभिरचिंतयदप्रमेयः ॥ मन्येऽवनेर्ननुगतोप्यगतंहिभारंयद्यादवंकुलमहोअविषह्यमास्ते ३ नैवान्यतःपरिभवो
ऽस्यभवेत्कथंचिन्मत्संश्रयस्यविभवोन्नहनस्यनित्यम् ॥ अंतःकलिंयदुकुलस्यविधायवेणुस्तंबस्यवह्निमिवशांतिमुपैमिधाम ४ एवंव्यवसितोराजन्सत्य
संकल्पईश्वरः ॥ शापव्याजेनविप्राणांसंजह्रेस्वकुलंविभुः ५ स्वमूर्त्यालोकलावण्यनिर्मुक्त्यालोचनंनृणाम् ॥ गीर्भिस्ताःस्मरतांचित्तंपदैस्तानीक्षतांक्रि
याः ६ आच्छिद्यकीर्तिंसुश्लोकांवितत्यह्यंजसानुकौ ॥ तमोनयातरिष्यंतीत्यगात्स्वंपदमीश्वरः ७ ॥ राजोवाच ॥ ब्रह्मण्यानांवदान्यानांनित्यंवृद्धोपसे
विनाम् ॥ विप्रशापःकथमभूद्वृष्णीनांकृष्णचेतसाम् ८

श्लोकाः ३/८

चूर्णिका

अपि च यदुभिः भूभारराजसेनाः हत्वा ईशः इदं अचिंतयत् अहो भूभारः यद्यपि लोकप्रतीत्या गतः तथापि अगतमेव अहं मन्ये ३ यतः असह्यं यदुकुलं आस्ते
हि मदाश्रयस्य अन्यतः कथंचित् परिभवो न भवेत् अतः यदुकुलस्य अंतः कलिं विधाय शांतिं प्राप्य ततः वैकुंठं उपैष्यामि ४ एवं कृतनिश्चयः ईश्वरः विप्राणां
शापव्याजेन स्वकुलं संजह्रे ५ एवं अवतारप्रयोजनं संपाद्य तदानींतनानां सर्वेषां चक्षुरादिप्रवृत्तीः स्वैकनिष्ठाः कृत्वा इत उपरिजनिष्यमाणानां संसारतरणार्थं स्व
कीर्तिं विस्तार्य अनया कीर्त्या तमः तरिष्यंतीत्यभिप्रेत्य प्रभुः स्वस्थानं अगात् ६ ७ ॥ राजोवाच ॥ हे मुने ब्रह्मण्यानां वदान्यानां कृष्णचेतसां यदूनां विप्रशापः कथं अभूत् ८

१ बाहुभिरितिबहुवचनंवस्तुतस्तुचतुर्भुजाभिप्रायेणमु० । २ मांसंश्रयतेइतिमत्संश्रयंकुलंतस्यइतिमु० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥ ३ ॥

अतः स्पष्टस्यनिमित्तस्याभावान्निमित्तांतरंपृच्छति यन्निमित्तइति । एकात्मनांएकचित्तानांकथंभेदः कलहः ९ ईश्वरेच्छानिमित्तमितिपरिहरति बिभ्रदिति । सकलानांसुंदरवस्तूनांसंनिवेशोविन्यास
विशेषोयस्मिंस्तद्वपुर्बिभ्रत् । तर्हिंकिमतिसौंदर्यादिविषयपरः । न । सुमंगलंकर्माचरन् । तत्किंकयापिकामनया । न । आप्तकामः । तर्हिंकिमिति कर्माचरति । धामद्वारवत्याख्यंगृहमास्थाय रम
माणः । गृहेरममाणान् कर्मग्राहयितुमित्यर्थः ननु किमाप्तकामस्यगृहरत्याकर्मभिर्वातत्राह । उदारकीर्तिः उदाराबहुफलप्रदाकीर्तिर्यस्य । कीर्तिवितानार्थमित्यर्थः एवंपरमैश्वर्येणवर्तमानएवकुलंसंहर्तु
मैच्छत् । तत्कस्यहेतोः । स्थितः कृत्येभूभारहरणेतावन्मात्रः शेषोयस्य १० ईश्वरेच्छयोत्थितंब्रह्मशापनिमित्तंवक्तुमाह । कर्माणीति । कर्मार्थमाहूतामुनयः कर्माणिकृत्वा भगवतानिसृष्टाः प्रस्था
पिताः पिंडारकंनामततोनातिदूरेतीर्थविशेषंसमगमन् । विसृष्टाप्रस्थापितापूर्वोक्तांउदारकीर्तितांविवृण्वन्कर्माणिविशिनष्टि । पुण्यनिवहानीत्यादिपदत्रयेण । कानिचिदश्वमेधादिकर्माणिपुण्यमेवजनयं
ति । पुत्रोपलालनादीनितुतत्कालेसुखमेवकुर्वंति । प्रायश्चित्तानितुपापमेवहरति । एतानितुसर्वतोमुखानीत्याह । पुण्यनिवहानिकीर्तनादिनापुण्यानिनिवहंतिप्रापयंतीति । सुमंगलानिअतिसुखात्मका
नि । गायतोजगतःकलिमलापहराणि । मुनिप्रस्थापनेहेतुः (यदुदेवगेहेवसुदेवगृहेनिवसता) कालात्मनासंहाररूपेण । स्वकुलंसंजिहीर्षतेत्यर्थः ११ १२ तान्मुनीन्उपसंगृह्य पादग्रहणंकृत्वा १३
प्रश्नप्रकारमाह द्वयेन तेवेषयित्वेतिद्वयेन । हेअमोघदर्शनाः विप्राःएषाअंतर्वत्नीगर्भिणी वः युष्मान्साक्षात्प्रष्टुंविलज्जतीलज्जमानाअस्मन्मुखेनपृच्छति । प्रसोष्यंतीआसन्नप्रसवाकिंस्विस्संजनयिष्पति क
न्यांवापुत्रंवातद्ब्रूत (इतिद्वयोरन्वयः) १४ १५

श्लोकाः ९—१५

यन्निमित्तःसवैशापोयादृशोद्विजसत्तम ॥ कथमेकात्मनांभेदएतत्सर्वंवदस्वमे ९ ॥ श्रीशुकउवाच ॥ बिभ्रद्वपुःसकलसुंदरसन्निवेशंकर्माचरन्भुवि
सुमंगलमाप्तकामः ॥ आस्थायधामरममाणउदारकीर्तिःसंहर्तुमैच्छतकुलंस्थितकृत्यशेषः १० कर्माणिपुण्यनिवहानिसुमंगलानिगायज्जगत्कलिमलापह
राणिकृत्वा ॥ कालात्मनानिवसतायदुदेवगेहेपिंडारकंसमगमन्मुनयोनिसृष्टाः ११ विश्वामित्रोऽसितःकण्वोदुर्वासाभृगुरंगिराः ॥ कश्यपोवामदेवोऽत्रिर्व
सिष्ठोनारदादयः १२ क्रीडंतस्तानुपव्रज्यकुमारायदुनंदनाः ॥ उपसंगृह्यपप्रच्छुरविनीताविनीतवत् १३ तेवेषयित्वास्त्रीवेषैःसांबंजांबवतीसुतम् ॥ एषापृ
च्छतिवोविप्राअंतर्वत्न्यसितेक्षणा १४ प्रष्टुंविलज्जतीसाक्षात्प्रब्रूतामोघदर्शनाः ॥ प्रसोष्यंतीपुत्रकामाकिंस्वित्संजनयिष्यति १५

चूर्णिका

॥ ३ ॥

किंच सः शापः यन्निमित्तः यादृशः जातः तथा एकचित्तानां तेषां भेदश्च कथं एतत्सर्वं वद ९ ॥ श्रीशुक उवाच ॥ हे नृप भगवान् सुंदरंवपुर्बिभ्रत् आप्तकामोपि
द्वारवत्यां गृहं आस्थाय गृहे रममाणान् कर्म ग्राहयितुं स्वयं कर्म आचरन् रममाणः सन् स्वकुलं संहर्तुं ऐच्छत् १० तथा कर्मार्थं आहूताःमुनयः पुण्यप्रदानि कर्मा
णि कृत्वा श्रीकृष्णेन विसृष्टाः संतः पिंडारकं तीर्थं अगमन् ११ ते च विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगिराः कश्यपो वामदेवोऽत्रिर्वसिष्ठो नारदादयः १२
तत्र क्रीडंतः यदुकुमाराः तान् उपव्रज्य तेषां पादग्रहणं कृत्वा पप्रच्छुः १३ प्रश्नमाह ते कुमाराः स्त्रीवेषैः सांबं वेषयित्वा ऊचुः हे विप्राःएषा गर्भिणी युष्मान् साक्षात्
प्रष्टुं विलज्जमाना सती अस्मन्मुखेनैव पृच्छति १४ अतः इयं आसन्नप्रसवा किंस्वित् कन्यां वा पुत्रं वा जनयिष्यतीति ब्रूत १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रलब्धावंचिताः (वः कुलनाशनम्) १६ तस्मिन्नुदरेअयस्मयंलोहमयम् १७मंदभाग्यैर्नोऽस्माभिः किमेतत्कृतम् । नोऽस्मान्किंवदिष्यंतीतिविह्वलिताः संतः मुसलमादाय गेहान्ययुः १८ राज्ञे उग्रसेनाय नतु श्रीकृष्णाय १९ २० आहुकउग्रसेनः सोपिश्रीकृष्णमपृष्ट्वैवप्रास्यत् चूर्णंप्रक्षिप्तवान् । अस्यमुसलस्यचूर्णीक्रियमाणस्यावशेषितंसूक्ष्मंलोहंचप्रास्यत् २१ तरलैस्तरंगैः (एरकाख्यधारतृणविशेषाः) २२ (येनलोहंग्रस्तंसमत्स्यः) अन्यैर्मत्स्यैः सह । शल्येशराग्रे २३ ज्ञाताःसर्वेर्थायेन सईश्वरोपि सन्अन्यथाकर्तुं नैच्छत् किंत्वन्वमोदत यतः कालरूपी २४ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांप्रथमोध्यायः १ ॥ ॥ ७ ॥ ॥ द्वितीयेनिमिजायंतसंवादेनाहनारदः । धर्मान्भागवतान्भक्त्यावसुदेवायपृच्छते ॥ १ ॥ अभीक्ष्णंप्रस्थापितोपिपुनःपुनरवात्सीदित्यर्थः । ननु नारदस्यदक्षादिशापान्नैकत्रवासः संभवति इत्याशंक्याह । गोविंदभुजगुप्तायामिति । नतस्यांशापादेःप्रभावइत्यर्थः । कृष्णोपासनेलालसाऔत्सुक्यंयस्यसः १ यद्व्रजनेमुक्तानामपीदृशमौत्सुक्यंतत्कोनुनामनभजेदित्याह । कोन्विति । इंद्रियवानिति । इंद्रियवत्त्वमात्रंयत्राधिकारिविशेषणमित्यर्थः । सर्वतः सर्वेष्वपिलोकेषुमृत्युर्यस्यसः २

॥ ४ ॥

श्लोकाः $\frac{१६}{२}$

एवंप्रलब्धामुनयस्तानूचुःकुपितान्नृप ॥ जनयिष्यतिवोमंदामुसलंकुलनाशनम् १६ तच्छ्रुत्वातेऽतिसंत्रस्ताविमुच्यसहसोदरम् ॥ सांबस्यददृशुस्तस्मिन्मुसलंखल्वयस्मयम् १७ किंकृतंमंदभाग्यैर्नःकिंवदिष्यंतिनोजनाः ॥ इतिविह्वलितागेहानादायमुसलंययुः १८ तच्चोपनीयसदसिपरिम्लानमुखश्रियः ॥ राज्ञआवेदयांचक्रुःसर्वयादवसंनिधौ १९ श्रुत्वाऽमोघंविप्रशापंदृष्ट्वाचमुसलंनृप ॥ विस्मिताभयसंत्रस्ताबभूवुर्द्वारकौकसः २० तच्चूर्णयित्वामुसलंयदुराजःसआहुकः ॥ समुद्रसलिलेप्रास्यल्लोहंचास्यावशेषितम् २१ कश्चिन्मत्स्योऽग्रसील्लोहंचूर्णानितरलैस्ततः ॥ उह्यमानानिवेलायांलग्नान्यासन्किलैरकाः २२ मत्स्योगृहीतोमत्स्यघ्नैर्जालेनान्यैःसहार्णवे ॥ तस्योदरगतंलोहंसशल्येलुब्धकोऽकरोत् २३ भगवान्ज्ञातसर्वार्थईश्वरोपितदन्यथा ॥ कर्तुंनैच्छद्विप्रशापंकालरूप्यन्वमोदत २४ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेप्रथमोध्यायः १ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ गोविंदभुजगुप्तायांद्वारवत्यांकुरूद्वह ॥ अवात्सीन्नारदोभीक्ष्णंकृष्णोपासनलालसः १ कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजम् ॥ नभजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः २

चूर्णिका

एवं वंचिताः मुनयः कुपिताः संतः ऊचुः हे मंदाः इयं वः कुलनाशनं मुसलं जनयिष्यतीति १६ तच्छ्रुत्वा ते बालाः अतिसंत्रस्ताः सहसा तदुदरं विमुच्य तत्र लोहमयं मुशलं ददृशुः १७ किं कृतं मंदभाग्यैर्नः किं वदिष्यंति जनाः एवं विह्वलंतः ते मुशलं आदाय गेहान् ययुः १८ तत् मुशलं सदसि उपनीय उग्रसेनाय आवेदयां चक्रुः न तु कृष्णाय १९ ततः सर्वे द्वारकौकसः अमोघं विप्रशापं श्रुत्वा मुशलं च दृष्ट्वा भयसंत्रस्ताः बभूवुः २० ततः यदुराजः तन्मुशलं चूर्णयित्वा समुद्रोदके प्रास्यत् तस्यावशिष्टं लोहं च २१ तत् लोहं कश्चिन्मत्स्यः अग्रसीत् तच्चूर्णानि तरंगैः उह्यमानानि वेलायां लग्नानि तानि एरका आसन् २२ ततः सः मत्स्यः अब्धौ अन्यमत्स्यैः सह मत्स्यघ्नैः जालेन गृहीतः तदुरःस्थं लोहं लुब्धकः शराग्रे अकरोत् २३ भगवान् ज्ञातसर्वार्थ ईश्वरोपि तदन्यथा कर्तुं नैच्छत् विप्रशापं कालरूप्यन्वमोदत २४ ॥ ॥ इत्येकादशे प्रथमः ॥ १ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ हे राजन् गोविंदभुजगुप्तायां द्वारवत्यां अभीक्ष्णं प्रस्थापितोपि नारदः कृष्णोपासनलालसः पुनः पुनः अवात्सीत् १ हे नृप एवं भूतं मुकुंदचरणांबुजं सर्वतो मृत्युः इंद्रियवान् पुमान् कोनु न भजेत् २

॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ९ ॥

३ यथापित्रोर्यात्राआगमनंअपत्यानांस्वस्तयेमंगलाय । यथाचउत्तमश्लोकस्यवर्त्मभूतानां (उत्तमश्लोकोवर्त्मयेषांतेषामितिवा) महतांयात्राकृपणानांस्वस्तये तथा हेभगवन्भगवद्रूपस्यभवतोयात्रासर्वं
देहिनांस्वस्तये ४ देवैरपिमहतासुपमानमनुचितमित्याह भूतानामिति देवानांचरितमतिवृष्ट्यादिना भूतानांदुःखायापिभवति । त्वादृशांत्वयासदृशां अच्युतआत्मायेषांतेषाम् ५ किंच । सुखंकुर्वंतोपि
देवा भजनानुसारेणकुर्वंतिनतथासाधवइत्याह भजंतीति । छायेव । यथापुरुषोयावत्करोतितावदेवतस्यच्छायापि । तथाकर्मसचिवाःकर्मसहायादेवाः । (साधवस्तुदीनवत्सलाः) ६ तदाएवंयद्यपि
भवतआगमनमात्रेणैववयंकृतार्थास्तथापिपृच्छामः । तवेति । तवयैर्धर्मैः प्रसन्नोभगवांस्तानित्यर्थः ७ ननु त्वत्तोपिकिमन्योभगवत्प्रसादपात्रमस्तितत्राह । अहंकिलेति । भुविप्रजार्थेअपूजयंपुत्रलाभप्रयो
जनः सन्पूजितवान् । किलेतिसूतीगृहेभगवदुक्तमनुस्मरति ८ अतोयथामुच्येमहितथानोऽस्मान् शाधिशिक्षय । विचित्राणिव्यसनानियस्मिंस्तस्मात्संसारात् । तथा विश्वतःसर्वतोभयंयस्मिंस्तस्मा
त् भवद्भिर्हेतुभूतैःअंजसाअनायासेनअद्धासाक्षात् ९ हरेर्गुणैःवर्णनीयत्वेनप्रस्तुतैःस्मारितःहरिस्मरणंकारितइत्यर्थः १० प्रीतिमाविष्करोति सम्यगितित्रिभिः । पृच्छसेपृच्छसि । विश्वभावनान् सर्वशो
धकान् ११ आदृतः आस्तिक्येनगृहीतः अनुमोदितःपरैःक्रियमाणःसंस्तुतः सद्धर्मोभागवतोधर्मः देव हेवसुदेवेत्यर्थः । यद्वा देवेभ्योविश्वस्मैचद्रुह्यंतियेतानपि १२

श्लोकाः ३/१२

तमेकदातुदेवर्षिंवसुदेवोगृहागतम् ॥ अर्चितंसुखमासीनमभिवाद्येदमब्रवीत् ३ ॥ वसुदेवउवाच ॥ भगवन्भवतोयात्रास्वस्तयेसर्वदेहिनाम् ॥ कृपणानांय
थापित्रोरुत्तमश्लोकवर्त्मनाम् ४ भूतानांदेवचरितंदुःखायचसुखायच ॥ सुखायैवहिसाधूनांत्वादृशामच्युतात्मनाम् ५ भजंतियेयथादेवान्देवाअपित
थैवतान् ॥ छायेवकर्मसचिवाःसाधवोदीनवत्सलाः ६ ब्रह्मंस्तथापिपृच्छामोधर्मान्भागवतांस्तव ॥ यान्श्रुत्वाश्रद्धयामर्त्योमुच्यतेसर्वतोभयात् ७
अहंकिलपुरानंतंप्रजार्थोभुविमुक्तिदम् ॥ अपूजयंनमोक्षायमोहितोदेवमायया ८ यथाविचित्रव्यसनाद्भवद्भिर्विश्वतोभयात् ॥ मुच्येमह्यंजसैवाद्धातथानः
शाधिसुव्रत ९ ॥ श्रीशुकउवाच ॥ राजन्नेवंकृतप्रश्नोवसुदेवेनधीमता ॥ प्रीतस्तमाहदेवर्षिर्हरेःसंस्मारितोगुणैः १० ॥ नारदउवाच ॥ सम्यगेतद्व्यवसितं
भवतासात्वतर्षभ ॥ यत्पृच्छसेभागवतान्धर्मांस्त्वंविश्वभावनान् ११ श्रुतोऽनुपठितोध्यातआदृतोवाऽनुमोदितः॥सद्यःपुनातिसद्धर्मोदेवविश्वद्रुहोपिहि १२

चूर्णिका ॥ ९ ॥

अथ एकदा वसुदेवः गृहागतं नारदं सुखमासीनं अभिवाद्य इदमाह ३ ॥ वसुदेव उवाच ॥ हे भगवन् यथा पित्रोः आगमनं अपत्यानां मंगलाय तथा भवतः यात्रा सर्व
देहिनां स्वस्तये ४ किं च देवानामपि चरितं भूतानां सुखदुःखाय भवति त्वादृशानां साधूनां तु सुखायैव ५ अपि च ये यथा देवान् भजंति तथैव तान् देवा अ
पि छायेव साधवस्तु दीनवत्सला एव हे ब्रह्मन् अतः भागवतान् धर्मान् पृच्छामः यान् श्रुत्वा मर्त्यः सर्वभयात् मुच्यते ७ हे ऋषे पुरा प्रजार्थः अहं मुक्तिदं अनं
तं अपूजयं न तु मोक्षाय ८ अतः विचित्रव्यसनात् संसारात् भवद्भिः हेतभूतैः यथा वयं मुच्येम तथा नः शाधि ९ ॥ श्रीशुक उवाच ॥ एवं वसुदेवेन कृतप्रश्नः नार
दः प्रीतः सन् तमाह १० ॥ नारद उवाच ॥ हे वसुदेव त्वया एतत् सम्यक् निश्चितम् यतः सर्वशोधकान् भगवद्धर्मान् पृच्छसे ११ श्रुतोनुपठितो ध्यात आदृ
तो वानुमोदितः सद्यः पुनाति सद्धर्मो देवविश्वद्रुहोपि हि १२

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच (ममापि) त्वयामहानुपकारःकृतइत्याह त्वयेति । पुण्येश्रवणकीर्तनेयस्यसः १३ अत्रापिभगवद्धर्मनिर्णयेपि । विदेहस्यजनकस्य १४ आर्षभाणामुत्पत्तिंसान्वयांविविच्य कथयति प्रियव्रतइति सप्तभिः (तस्यनाभेःसुतः) १५ (तंऋषभं) मोक्षधर्माणांविवक्षयाप्रवर्तनेच्छयाअवतीर्णवासुदेवांशमाहुः तस्यचवेदपारगंसुतशतमासीत् १६ तेषांऋषभसुतानांमध्येनवयोगीश्वराणांचरितंवक्तुंइतरेषांचरितंततोविविच्याह तेषामिति । अजनाभंनामएतद्वर्षखंडंयस्यनाम्नाभारतमित्यद्भुतंविख्यातमासीत् । एतेनतस्यधर्मातिरेकोनिरूपितः १७ (सभरतः) इमांपृथ्वीं । गृहान्निर्गतःहरिमुपासीनःसेवमानःसन् १८ (तेषांनवाधिकनवतिसुतानांमध्ये) नवसुताअस्यभारतस्यवर्षस्यसमंततः नवद्वीपपतयःनवानांद्वीपानांब्रह्मावर्तादिखंडविशेषाणांपतयः । एकाशीतिःसुताःकर्ममार्गप्रवर्तकाःब्राह्मणाअभूवन् १९ अर्थशंसिनःपरमार्थनिरूपकाः । श्रमणाःश्रमवंतःआत्माभ्यासेकृतश्रमाइत्यर्थः । वातरशनादिगंबराः । आत्मविद्यायांविशारदानिष्णाताः २० २१ तेषांपारमहंस्यचरितमाह द्वाभ्यां तएतइति । भगवद्रूपंविश्वंपश्यंतःसदसदात्मकंस्थूलसूक्ष्मरूपंतच्चआत्मनोऽव्यतिरेकेणस्वाभेदेनपश्यंतः २२ अव्याहताअप्रतिहताइष्टाअभिमेतागतिर्येषांतेमुक्ताअनासक्ताः २३

श्लोकाः १३/२३

त्वयापरमकल्याणःपुण्यश्रवणकीर्तनः ॥ स्मारितोभगवानद्यदेवोनारायणोमम १३ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ आर्षभाणांचसंवादंविदेहस्य महात्मनः १४ प्रियव्रतोनामसुतोमनोःस्वायंभुवस्यसः ॥ तस्याग्नीध्रस्ततोनाभिर्ऋषभस्तुसुतःस्मृतः १५ तमाहुर्वासुदेवांशंमोक्षधर्मविवक्षया ॥ अवतीर्णं सुतशतंतस्यासीद्ब्रह्मपारगम् १६ तेषांतुभरतोज्येष्ठोनारायणपरायणः ॥ विख्यातंवर्षमेतद्यन्नाम्नाभारतमद्भुतम् १७ सभुक्तभोगांत्यक्त्वेमांनिर्गतस्तपसाहरिम् ॥ उपासीनस्तत्पदवींलेभेवैजन्मभिस्त्रिभिः १८ तेषांनवनवद्वीपपतयोस्यसमंततः ॥ कर्मतंत्रप्रणेतारएकाशीतिर्द्विजातयः १९ नवाभवन्महाभागामुनयो ह्यर्थशंसिनः ॥ श्रमणावातरशनाआत्मविद्याविशारदाः २० कविर्हरिरंतरिक्षःप्रबुद्धःपिप्पलायनः ॥ आविर्होत्रोऽथद्रुमिलश्चमसःकरभाजनः २१ तएते भगवद्रूपंविश्वंसदसदात्मकम् ॥ आत्मनोऽव्यतिरेकेणपश्यंतोव्यचरन्महीम् २२ अव्याहतेष्टगतयःसुरसिद्धसाध्यगंधर्वयक्षनरकिंनरनागलोकान् ॥ मुक्ताश्चरंतिमुनिचारणभूतनाथविद्याधरद्विजगवांभुवनानिकामम् २३

चूर्णिका

अहो वसुदेव त्वया पुण्यश्रवणकीर्तनः नारायणो देवः मम संस्मारितः किं मे भाग्यम् १३ अत्र त्वत्पृष्टभगवद्धर्मनिर्णये आर्षभाणां विदेहस्य संवादरूपं इतिहासं उदाहरंति तं शृणु १४ मनोः सुतः प्रियव्रतः तस्य आग्नीध्रः तस्य नाभिः तस्य ऋषभः १५ तं वासुदेवांशं मोक्षधर्मविवक्षया अवतीर्णं आहुः तस्य पुत्रशतं आसीत् १६ तत्र नारायणपरः भरतो ज्येष्ठः तन्नाम्ना इदं अजनाभं वर्षं सत् भारतं जातम् १७ सः भुक्तभोगां इमां महीं त्यक्त्वा गृहात् निर्गतः सन् हरिं सेवमानः त्रिभिर्जन्मभिः तत्पदवीं लेभे १८ तत्र नवसुताः नवानां ब्रह्मावर्तादीनां भरतवर्षखंडानां पतयः आसन् तत्र एकाशीतिः सुताः ब्राह्मणाः अभवन् १९ तत्र च नव महाभागाः मुनयः वातरशनाः आत्मविद्याविशारदाः अभवन् २० ते च कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः आविर्होत्रोऽथद्रुमिलश्चमसः करभाजनः २१ एते भगवद्रूपं इदं विश्वं स्वाव्यतिरेकेण पश्यंतः महीं व्यचरन् २२ अव्याहतेष्टगतयः मुक्ताः ते सुरसिद्धसाध्यगंधर्वादिलोकान् तथा मुनिचारणभूतनाथविद्याधरद्विजगवां भुवनानि कामं चरंति २३

॥ ६ ॥

१ वेदपारगमित्यपिपाठःक्वचित्पुस्तकेष्वस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

भागवतस्य भवंतीत्युक्ते तस्यलक्षणं पृच्छति । अथेति । यद्धर्मः यस्मिन्धर्मे परिनिष्ठितः । यादृशः यत्स्वभावः यथाचरतिवर्तते । यद्ब्रूतेवदाति । यैर्लक्षणैः भगवतःप्रियोभवति ४४ यद्धर्मइत्यस्योत्तरमाह । सर्वभूतेष्विति । आत्मनः स्वस्यसर्वभूतेषुब्रह्मभावेनसमत्वं यः पश्येत्तथाब्रह्मरूपेआत्मन्यधिष्ठानेभूतानिच यः पश्येत् यद्वा"आततत्वात्प्रमातृत्वादात्माहिपरमोहरि"रितितंत्रोक्तेः। आत्मनोहरेः सर्वभूतेषुमशकादिष्वपि नियंतृत्वेनवर्तमानस्यभगवद्भावंनिरतिशयैश्वर्यमेव यःपश्येत् ! नतुतस्यतारतम्यं तथात्मनिहरावेवभूतानिचपश्येत् कथंभूतेभगवति अप्रच्युतैश्वर्यादिरूपे न पुनर्जडमलिनरूपाश्रयत्वेनजाड्यादिप्रसक्त्याऐश्वर्यादिप्रच्युतिंपश्येत् । ससर्वत्रपरिपूर्णभगवत्तत्त्वंपश्यन् भागवतोत्तमइत्यर्थः ४५ प्रेम च मैत्री च कृपा च उपेक्षा च ताः ईश्वरादिषुचतुर्षुक्रमेण यः करोतिसमध्यमो भागवतः एवंभूतस्यभेदस्यदर्शनात् ४६ अर्चायांप्रतिमायांपूजामीहतेकरोति नतद्भक्तेषुअन्येषुचसुतरांनकरोति । प्राकृतः (कनिष्ठः) प्रकृतप्रारंभः । अधुनैवप्रारब्धभक्तिः शनैरुत्तमोभविष्यतीत्यर्थः

॥१०॥ ४७ पुनरष्टभिःश्लोकैरभ्यर्हितत्वादुत्तमभागवतस्यैवलक्षणान्याह । गृहीत्वापीति । श्रीवासुदेवाविष्टचित्तोनगृह्णातितावादिंद्रियैरर्थान् इत्यपिशब्दार्थः । गृहीत्वापिनतत्ररागद्वेषवान् यतइदंविश्वं (मायामात्रंपश्यन्) ४८ किंच देहादीनांसंसारधर्मैर्जन्माप्ययादिभिः योहरेः स्मृत्याअविमुह्यमानः सभागवतप्रधानः । तत्रदेहस्यजन्माप्ययौ । प्राणस्यक्षुत्पिपासे । मनसोभयम् । बुद्धेस्तर्षस्तृष्णाइंद्रियाणांकृच्छ्रंश्रमः तैः ४९ कामश्चकर्माणिचबीजानिचवासनाः तेषाम् । वासुदेवएकोनिलयआश्रयोयस्यसः । एतेनगृहीत्वापीत्यादिश्लोकत्रयेणद्वेषहर्षमोहकामादिरहितश्चरतीतियथाचरतीत्यस्योत्तरमुक्तम् ५० यैर्लिंगैर्भगवत्प्रियइत्यस्योत्तरमाह । नयस्येति जातयःअनुलोमप्रतिलोमजामूर्धावसिक्तादयः । अस्मिन् देहे (अहंकुलीनइत्यादि-)-अहंकाररहितैः जन्मकर्मादिलिंगैर्हरेः प्रियोभवतीत्यर्थः ५१ वित्तेषुस्वीयं परकीयमिति । आत्मनिदेहे स्वः पर इति भेदोनास्ति ५२

श्लोकाः ४४/५२

॥ राजोवाच ॥ अथभागवतंब्रूतयद्धर्मोयादृशोनृणाम् ॥ यथाचरतियद्ब्रूतेयैर्लिंगैर्भगवत्प्रियः ४४ ॥ हरिरुवाच ॥ सर्वभूतेषुयःपश्येद्भगवद्भावमात्मनः ॥ भूतानिभगवत्यात्मन्येषभागवतोत्तमः ४५ ईश्वरेतदधीनेषुबालिशेषुद्विषत्सुच ॥ प्रेममैत्रीकृपोपेक्षायःकरोतिसमध्यमः ४६ अर्चायामेवहरयेपूजांयःश्रद्धयेहते ॥ नतद्भक्तेषुचान्येषुसभक्तःप्राकृतःस्मृतः ४७ गृहीत्वापींद्रियैरर्थान्योनद्वेष्टिनहृष्यति ॥ विष्णोर्मायामिदंपश्यन्सवैभागवतोत्तमः ४८ देहेंद्रियप्राणमनोधियांयोजन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानःस्मृत्याहरेर्भागवतप्रधानः ४९ नकामकर्मबीजानांयस्यचेतसिसंभवः ॥ वासुदेवैकनिलयःसवैभागवतोत्तमः ५० नयस्यजन्मकर्मभ्यांनवर्णाश्रमजातिभिः ॥ लक्ष्यतेऽस्मिन्नहंभावोदेहेवैसहरेःप्रियः ५१ नयस्यस्वःपरइतिवित्तेष्वात्मनिवाभिदा ॥ सर्वभूतसमःशांतःसवैभागवतोत्तमः ५२

चूर्णिका

॥ राजोवाच ॥ भागवतस्य लक्षणंपृच्छति हे ऋषयः यद्धर्मेनिष्ठितः यत्स्वभावः यथा वर्तते यैःलिंगैः हरिप्रियो भवति तं भागवतं ब्रूत ४४ ॥ हरिरुवाच ॥ यः स्वस्य सर्वभूतेषु भगवद्भावं तथा भूतानि भगवति पश्यति सः भागवतोत्तमः ४५ यः ईश्वरे भक्तेषु अज्ञेषु शत्रुषु प्रेममैत्रीकृपोपेक्षाः करोति सः मध्यमः ४६ यश्च प्रतिमायामेव पूजां करोति न तद्भक्तेष्वन्येषु च सः प्राकृतः शनैः श्रेष्ठः स्यात् ४७ किंच इंद्रियैः विषयान् गृहीत्वापि न द्वेष्टि न हृष्यति सः उत्तमः ४८ किंच देहेंद्रियादीनां जन्मनाशादिसंसारधर्मैः यः न मुह्यति सः श्रेष्ठः ४९ किंच यस्य चेतसि कामकर्मवासनानां न संभवः सोपि श्रेष्ठः ५० यस्य च जन्मादिना अत्र देहे अहंभावो न सः हरेः प्रियः ५१ अपि च यस्य स्वः पर इति वित्तेष्वात्मनि च भेदो न सः उत्तमः ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुविषयविक्षिप्तस्यकुतोऽव्यभिचारिणीभक्तिः अतः कुतस्तरामभयं (इत्याशंक्य) तत्रनतावद्विषयोनामवास्तवोस्ति किंतु मनोविलासमात्रंअतोमनोनियमनेनभजनादभयंस्यादित्याह । अविद्यमानोपीति । द्वयः द्वैतप्रपंचः ध्यातुः पुंसः धियामनसास्वप्नश्चमनोरथश्चयथातथेत्यर्थः । तत्तस्मात्कर्माणिसंकल्पयतिविकल्पयतिचयन्मनस्तन्निरुंध्यान्नियच्छेत् । ततश्चैकयाभक्त्याभजनादभयं स्यादित्यर्थः ३८ एतदत्यंताशक्यमित्याशंक्य सुगममार्गमाह । शृण्वन्निति । तदर्थकानितानिजन्मानिकर्माणिचअर्थोयेषांतानि । एतान्यपिसाकल्येनज्ञातुमशक्यानीत्यत्राह । यानिलोकेगीतानिप्रसिद्धानितानि (सुभद्राणिसुमंगलानि) शृण्वन् गायंश्चविचरेत् असंगोनिस्पृहः ३९ एवंचभजतः संप्राप्तप्रेमलक्षणभक्तियोगस्यसंसारधर्मातीतांगतिमाह । एवंव्रतंवृत्तंयस्यसः । स्वप्रियस्यहरेः नामकीर्तनेनजातोऽनुरागः प्रेमयस्यसः । अतएवद्रुतचित्तः श्लथहृदयः कदाचिद्भक्तपराजितंभगवंतमाकलय्योच्चैर्हसति एतावंतंकालमुपेक्षितोस्मीति रोदिति । अत्यौत्सुक्याद्रौति क्रोशति । हेहरेमामनुगृहाणेति अतिहर्षेणगायति जितंजितमिनिनृत्यति । किंदांभिकवत् परान् प्रतिप्रकाशयितुम् । न । उन्मादवत् ग्रहगृहीतवत् । लोकबाह्यः विवशः ४० किंच खमिति । सत्त्वानिभूतानि । आकाशादियत्किंचित्भूतमात्रंहरेः शरीरमिति मत्वा प्रणमेत् । संभावनायांलिङ् ४१ नन्वियमारूढयोगानामपिबहुजन्मभिरपिदुर्लभागतिः । कथंनामकीर्तनमात्रेणएकस्मिञ्जन्मनिभवेत् इत्याशंक्य सदृष्टांतमाह । भक्तिरिति । प्रपद्यमानस्यहरिंभजतः पुंसः भक्तिः प्रेमलक्षणा । परेशानुभवः प्रेमास्पदभगवद्रूपस्फूर्तिः । तयानिर्वृतस्यततोऽन्यत्र गृहादिषुविरक्तिः इत्येषत्रिकः एककालः भजनसमकालएव स्यात् । यथाश्नतोभुंजानस्यतुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च प्रतिग्रासंस्युः उपलक्षणमेतत् । प्रतिसिक्थमपि यथास्युः तद्वत् ४२ एवमेकैकस्मिन्भजनेकिंचित्प्रेमादित्रिकेजायमानेऽनुवृत्त्याभजतःपरमप्रेमादिजायतएव बहुग्रासभोजिनइव परमपुष्ट्यादि । ततश्चभगवत्प्रसादेनकृतार्थोभवतीत्याह इत्यच्युतांघ्रिमिति ४३

श्लोकाः ३८—४३

अविद्यमानोप्यवभातिहिद्वयोध्यातुर्धियास्वप्नमनोरथौयथा ॥ तत्कर्मसंकल्पविकल्पकंमनोबुधोनिरुंध्यादभयंततःस्यात् ३८ शृण्वन्सुभद्राणिरथांगपाणेर्जन्मानिकर्माणिचयानिलोके ॥ गीतानिनामानितदर्थकानिगायन्विलज्जोविचरेदसंगः ३९ एवंव्रतःस्वप्रियनामकीर्त्याजातानुरागोद्रुतचित्तउच्चैः ॥ हसत्यथोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः ४० खंवायुमग्निंसलिलंमहींचज्योतींषिसत्त्वानिदिशोद्रुमादीन् ॥ सरित्समुद्रांश्चहरेःशरीरंयत्किंचभूतंप्रणमेदनन्यः ४१ भक्तिःपरेशानुभवोविरक्तिरन्यत्रचैषत्रिकएककालः ॥ प्रपद्यमानस्ययथाश्नतःस्युस्तुष्टिःपुष्टिःक्षुदपायोऽनुघासम् ४२ इत्यच्युतांघ्रिंभजतोऽनुवृत्त्याभक्तिर्विरक्तिर्भगवत्प्रबोधः ॥ भवंतिवैभागवतस्यराजंस्ततःपरांशांतिमुपैतिसाक्षात् ४३

चूर्णिका

अपिच अयं प्रपंचः अवास्तवोपि ध्यातुः मनसा स्वप्नमनोरथाविव भाति अतः तन्मनो निरुंध्यात् ततः अभयं स्यात् ३८ किंच हरेः सुभद्राणि जन्मकर्माणि तदर्थकानि नामानि च गायन् शृण्वंश्च असंगः लोके विचरेत् ३९ एवंव्रतः पुमान् हरिनामकीर्त्या जातप्रेमा सन् हसति रोदिति क्रोशति गायति ४० किंच खंवाय्वग्न्यादि सर्वं भूतमात्रं हरेः शरीरमिति ज्ञात्वा प्रणमेत् ४१ किंचहरिंभजतः पुंसः एकदैव भक्तिः भगवद्रूपस्फूर्तिः वैराग्यं च एतत् त्रिकं भवति यथा अश्नतः पुंसः सुखं उदरभरणं क्षुन्नाशः तथा ४२ एवं अच्युतांघ्रिं भजतः भागवतस्य भक्तिवैराग्यभगवत्प्रबोधाः भवंति ततः शांतिं आप्नोति ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रथममात्यंतिकक्षेमंकथयति मन्यइति । नकुतश्चिद्भयंयस्मात्तदकुतश्चिद्भयम्। अत्रसंसारेअसदात्मभावात् असतिदेहादावात्मभावनातःनित्यंसर्वदाउद्विग्नबुद्धेः विश्वात्मनासर्वथानिःशेषं यत्रपादांबुजोपासने सतिभीर्निवर्ततेतत् ३३ भागवतधर्मलक्षणमाह । येवाइति । मन्वादिमुखेनवर्णाश्रमादिधर्मानुक्त्वाऽतिरहस्यत्वात्स्वमुखेनैवभगवताऽविदुषामपिपुंसांअंजःसुखेनैवात्मलब्धयेयेवैउपायाःप्रोक्तास्तान्भागवतधर्मान् विद्धि ३४ अंजःपदेनोक्तंसुकरत्वंविवृणोति यानिति । यानाश्रित्ययोगादिष्विवनप्रमाद्येतविघ्नैर्नविहन्येत । किंच निमील्यनेत्रेधावन्नपिइहएषुभागवतधर्मेषुनस्खलेत् । निमीलनं नामाज्ञानम् । यथाहुः " श्रुतिस्मृतीउभेनेत्रेविप्राणांपरिकीर्तिते । एकेनविकलः काणोद्वाभ्यामंधःप्रकीर्तित"इति । अज्ञात्वापीत्यर्थः । पदन्यासस्थानमतिक्रम्यशीघ्रंपरतः पदन्यासेनगतिर्धावनं तद्वदत्रापिकिंचिदतिक्रम्यातिशीघ्रमनुष्ठानंधावनम् । तथानुतिष्ठन्नपिनस्खलेत् । नप्रत्यवायीस्यात् तथानपतेत् फलान्नभ्रश्येत् ३५ ननु केतेभागवताधर्माईश्वरार्पितानिसर्वकर्माण्यपीत्याह । कायेनेति । आत्मनाचित्तेनाहंकारेणवा । अनुसृतोयःस्वभावस्तस्मात् । अयमर्थः । नकेवलंविधितःकृतमेवेतिनियमः स्वभावानुसारिलौकिकमपीति । तथाचभगवद्गीतासु । " यत्करोषियदश्नासि यज्जुहोषिददासियत् । यत्तपस्यसिकौंतेयतत्कुरुष्वमदर्पण"मिति । यद्वा ननुकायादीनामेवकर्मनात्मनइत्याशंक्याह । अध्यासेनानुसृतात्ब्राह्मणत्वादिस्वभावात्यद्यत्करोतीत्यर्थः । तत्सकलंपरस्मै परमेश्वरायनारायणायेतिसमर्पयेत्(नारायणार्थमेवतदितिभावयन् निवेदयेत्) तथासतिसकलमपिकर्मभागवतोधर्मोभवतीतिभावः ३६ ननु किमेवंपरमेश्वरभजनेनअज्ञानकल्पितभयस्यज्ञानैकनिवर्त्यत्वादित्याशंक्याह । भयमिति । यतोभयंतन्मायययाभवेत् । अतोवुधोवुद्धिमान् तमेवाभजेत् ननु भयंदेहाद्यभिनिवेशतोभवति । सच्चदेहाहंकारतः सचस्वरूपास्मरणात् । किमत्रतस्यमायाकरोति तत्राह । ईशादपेतस्याविमुखस्यतन्माययाऽस्मृतिः भगवत्स्वरूपास्फूर्तिः । ततोविपर्ययोदेहोस्मीति । ततोद्वितीयाभिनिवेशाद्भयंभवति । एवंहिप्रसिद्धंलौकिकीष्वपिमायासु । उक्तंचभगवता । " दैवी ह्येषागुणमयीममामायादुरत्यया । मामेवयेप्रपद्यंतेमायामेतांतरंतिते " इति एकयाअव्यभिचारिण्याभजेत् किंचगुरुदेवतात्मा गुरुरेवदेवताईश्वरआत्माप्रेष्ठश्चयस्यतथादृष्टिःसन्नित्यर्थः ३७

श्लोकाः ३३—३७

॥ कविरुवाच ॥ मन्येऽकुतश्चिद्भयमच्युतस्यपादांबुजोपासनमत्रनित्यम् ॥ उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मनायत्रनिवर्ततेभीः ३३ येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये ॥ अंजःपुंसामविदुषांविद्धिभागवतान्हितान् ३४ यानाश्रित्यनरोराजन्नप्रमाद्येतकर्हिचित् ॥ धावन्निमील्यवानेत्रेनस्खलेन्नपतेदिह ३५ कायेनवाचामनसेंद्रियैर्वाबुद्ध्यात्मनावानुसृतस्वभावात् ॥ करोमियद्यत्सकलंपरस्मैनारायणायेतिसमर्पयेत्तत् ३६ भयंद्वितीयाभिनिवेशतःस्यादीशादपेतस्यविपर्ययोऽस्मृतिः ॥ तन्माययाऽतोबुधआभजेत्तंभक्त्यैकयेशंगुरुदेवतात्मा ३७

चूर्णिका

॥ कविरुवाच ॥ हे नृप अत्र भवे अच्युतस्य पादांबुजोपासनं निर्भयं मन्ये यत्र निःशेषं भीः निवर्तते ३३ श्रीभगवता स्वमुखेनैव अविदुषामपि पुंसां अंजः आत्मलब्धये ये उपायाः प्रोक्ताः तान् भागवतान् धर्मान् विद्धि ३४ नरः यान् आस्थाय योगादिष्विव विघ्नैर्न विहन्येत नेत्रेनिमील्य धावन्नपि एषु नस्खलेन्नपतेत् ३५ कायेन वाचा मनसा इंद्रियबुद्धिचित्तैः अनुसृतस्वभावेन च यद् यत् करोति तत् तत् सर्वं नारायणाय अर्पयेत् ३६ एवं कृते सकलंकर्म भगवद्धर्मोभवति किंच ईशपराङ्मुखस्य तन्मायया भयं भवति अतः बुधः भक्त्या तमेव भजेत् ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

महात्मनोनिमेः । वितायमानमनुष्ठीयमानं अजनाभेभारतवर्षे २४ यजमानोनिमिःअग्नयआहवनीयादयः । विप्राऋत्विगादयः २५ (विदेहोनिमिः) अभिप्रेत्य ज्ञात्वा (यथार्हतोयथायोग्यम्) २६ स्वरुचैवरोचमानान् नतुआभरणादिप्रकाशैःब्रह्मपुत्रोपमान्सनकादिसदृशान् २७ परमप्रीत्यातद्दर्शनमभिनंदति द्वाभ्याम् । मन्यइति (वोयुष्मान्) ननु भगवतःपार्षदानांकथमत्रोपलब्धिस्तत्राह । विष्णोरिति । विष्णुभक्तालोकानांपावनायपावित्र्यार्थंसर्वत्रपर्यटंतीत्यर्थः २८ मयादुर्लभंलब्धंअहोभाग्यमित्याह । दुर्लभइति । बहवोदेहाभवंतियेषांते । देहिनोजीवास्तेषांक्षणभंगुरोपिमानुषोदेहो दुर्लभः परमपुरुषार्थसाधनत्वात् ।वैकुंठःप्रियायेषांवैकुंठस्यवाप्रियास्तेषांदर्शनम् २९ हेअनघा निरवद्या भवतोयुष्मान् आत्यंतिकंक्षेमं (परमंकल्याणम्) पृच्छामःयतःक्षणार्धकालभवोपिसत्संगःशेवधिर्नि धिःनिधिलाभेयथानंदोभवतितथात्रपरमानंदइत्यर्थः ३० तदर्थंचभागवतधर्मान्ब्रूतेतियदिनोऽस्माकंश्रुतयेश्रवणायक्षमंयोग्यंभवति । (योग्यतास्तीत्यर्थः) कथंभूतान् । यैर्धर्मैःप्रपन्नायभक्तायअजोह रिरात्मानमपिदास्यातितान् ३१ सहसदस्यैर्ऋत्विग्भिश्चवर्तमानं तेपिभगवद्धर्मश्रवणतत्पराबभूवुरित्यर्थः " भगवद्धर्मतद्भक्तमायातत्तरणानिच । ब्रह्मकर्मावतारेहाभक्तप्राप्त्युंगक्रमान् । ज्ञातुंक्रमे णकृतवान्नवप्रश्नान्निमिर्नव । एकैकस्योत्तरंप्रोचुःकविमुख्यामुनीश्वराः" ३२

॥ ७ ॥

श्लोकाः २४/३२

तएकदानिमेःसत्रमुपजग्मुर्यदृच्छया ॥ वितायमानमृषिभिरजनाभेमहात्मनः २४ तान्दृष्ट्वासूर्यसंकाशान्महाभागवतान्नृप ॥ यजमानोऽग्नयोविप्राःसर्व एवोपतस्थिरे २५ विदेहस्तानभिप्रेत्यनारायणपरायणान् ॥ प्रीतःसंपूजयांचक्रेआसनस्थान्यथार्हतः २६ तान्रोचमानान्स्वरुचाब्रह्मपुत्रोपमान्नव ॥ पप्रच्छपरमप्रीतःप्रश्रयावनतोनृपः २७ ॥ ॥ विदेहउवाच ॥ मन्येभगवतःसाक्षात्पार्षदान्वोमधुद्विषः ॥ विष्णोर्भूतानिलोकानांपावनायचरंतिहि २८ दुर्लभोमानुषोदेहोदेहिनांक्षणभंगुरः ॥ तत्रापिदुर्लभंमन्येवैकुंठप्रियदर्शनम् २९ अतआत्यंतिकंक्षेमंपृच्छामोभवतोऽनघाः ॥ संसारेस्मिन्क्षणार्धोपिसत्सं गःशेवधिर्नृणाम् ३० धर्मान्भागवतान्ब्रूतयदिनःश्रुतयेक्षमम् ॥ यैःप्रसन्नःप्रपन्नायदास्यत्यात्मानमप्यजः ३१ ॥ ॥ श्रीनारदउवाच ॥ एवंतेनिमिनापृष्टावसुदेवमहत्तमाः ॥ प्रतिपूज्याब्रुवन्प्रीत्याससदस्यर्त्विजंनृपम् ३२

चूर्णिका

ते एकदा ऋषिभिः वितायमानं निमेः सत्रं यदृच्छया उपजग्मुः तान् सूर्यप्रभान् महाभागवतान् दृष्ट्वा निमिः अग्नयः विप्राश्च उपतस्थिरे २५ ततः नारायणपरान् तान् ज्ञात्वा विदेहः प्रीतः सन् तेषां पूजां कृत्वा ब्रह्मपुत्रोपमान् तान् पप्रच्छ२६ २७ ॥ विदेह उवाच ॥ अहं वः भगवतः पार्षदान् मन्ये यतः विष्णुभक्ताः लो कपावनार्थं सर्वत्र चरंति २८ मया दुर्लभं लब्धं अहो भाग्यमित्याह दुर्लभोमानुषो देहो देहिनां क्षणभंगुरः तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनम् २९ हे ऋषयः अतः युष्मान् आत्यंतिकं क्षेमं पृच्छामः यतः अत्र भवे क्षणार्धेपि सत्संगः निधिलाभवत् आनंदकरः ३० तदर्थं च धर्मान् भागवतान् ब्रूत यैस्तुष्टः प्रपन्नाय आत्मा नमपि दास्यति ३१ ॥ नारद उवाच ॥ हे वसुदेव एवं निमिना पृष्टाः ते ससदस्यर्त्विजं निमिं अब्रुवन् ३२ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच । त्रिभुवनविभवहेतवेपि त्रैलोक्यराज्यार्थमपिलवार्धमपिनिमिषार्धमपि भगवत्पदारविंदभजनाद्योनचलति सवैष्णवाग्र्यः। ननु लवार्धमात्रभजनेपरमेचेत्तावान् लाभोभवतु तत्कुतोनचलेत्। तत्राह।
अकुंठस्मृतिः भगवत्पदतोन्यत्सारंनास्तीत्येवंरूपा अकुंठाअनपगतास्मृतिर्यस्यसः भगवत्पदारविंदादन्यत्सारंनास्तीति कुतः अजितेहरावेवआत्मा(चित्तं) येषां (अजितःआत्मास्वरूपंयेषामितिवा)
तथाभूतैः सुरादिभिरपिदुर्लभात् किंतु केवलंविमृग्यात् (विमृश्यात्) तदपेक्षयासर्वस्यतुच्छत्वंस्मरन् नचलतीत्यर्थः ५३अपि च विषयाभिसंधानाच्चलनंकामेनातिसंतापेसतिभवेत् । सतुभगवत्सेवा
निर्वृतौनसंभवतीत्याह भगवतइति उरुक्रमौचतौअंघ्रीचतयोःशाखाअंगुलयः तासुनखानिचतानिमणयश्चतेषां चंद्रिकाशीतलादीप्तिः तयानिरस्तःकामादितापोयस्मिन् तस्मिन् उपसीदतां भजतां पुं
सांहृदि कथंपुनः संतापः प्रभवति (पूर्णे) चंद्रेउदितेसतिअर्कस्यतापइव ५४ "नयस्यस्वःपर"इत्यादिनाश्लोकत्रयेण यादृशइत्यस्योतरमुक्तंवेदितव्यम् यद्ब्रूते इत्यस्यचहरिनामानीति अर्थात् ज्ञात
व्यम् । उक्तसमस्तलक्षणसारमाह। विसृजतीति । हरिरेवस्वयंसाक्षाद्यस्यहृदयं नविसृजति नमुंचति । कथंभूतः अवशेनाप्यभिहितोअघौघं नाशयति यः सः तत्किनविसृजति । यतः प्रणयरशनयाधृ
तंहृदयेनिबद्धंअंघ्रिपद्मंयस्यसः भागवतप्रधानउक्तोभवति ५५ ॥ ॥ इतिश्रीभागवतमहापुराणेएकादशस्कंधेटीकायांद्वितीयोऽध्यायः २ ॥ ॥ ७ ॥ ॥ मायातत्तरणब्रह्मकर्मप्रश्नचतुष्टये ।
तृतीयेत्तूत्तरंदत्तमार्षभैर्मुनिभिः पृथक् ॥ १ ॥ विष्णोर्मायामिदंपश्यन्नित्युक्तं अतोमायांपृच्छति परस्येति हेभगवंतः भवंतोऽस्मान् ब्रुवंतु १ ननूक्तलक्षणोभागवतोभूत्वा कृतार्थः स्याः किंबहुप्रश्नैरतआ
ह । नानुतृप्यइति । संसारतापैर्निरंतरंतप्तोहंतस्यतापस्यभेषजंहरिकथामृतरूपंयुष्मद्वचोजुषन् जुषमाणः नानुतृप्यामि २ मायायाःस्वरूपतोनिरूपणासंभवात् सृष्ट्यादिकार्यद्वारेण निरूपयितुमाह ।
एभिरिति आद्यः पुरुषः ययाशक्त्याभूतानामात्माकारणभूतः एभिः स्वसृष्टैर्महाभूतैरुच्चावचानिभूतानिससर्ज ।'एषामायाभगवत' इतिचरमश्लोकपादस्यप्रतिश्लोकमनुषंगः। किमर्थं ससर्ज स्वमात्रात्मप्र
सिद्धये । स्वंमिमीतेप्रमिमीतेयःसस्वमातातस्यात्मनोजीवस्यप्रकृष्टायैसिद्धये । यद्वा स्वांशभूतानांजीवानांमात्राप्रसिद्धयेविषयभोगायआत्मप्रसिद्धयेमोक्षायचेत्यर्थः तदुक्तंवेदस्तुतौ । "बुद्धींद्रियमनः
प्राणान्जनानामसृजत्प्रभुः । मात्रार्थंचभवार्थंचआत्मनेऽकल्पनायचे"ति । (यद्वा स्वस्मिन् लीनत्वात्स्वरूपमात्रोयआत्माजीवस्तस्यप्रसिद्धये) ३

श्लोकाः ५३/३

त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ॥ नचलतिभगवत्पदारविंदाल्लवनिमिषार्धमपियःसवैष्णवाग्र्यः ५३ भगवतउरुविक्रमां
घ्रिशाखानखमणिचंद्रिकयानिरस्ततापे ॥ हृदिकथमुपसीदतांपुनःसप्रभवतिचंद्रइवोदितेर्कतापः ५४ विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितोप्यघौ
घनाशः ॥ प्रणयरशनयाधृतांघ्रिपद्मःसभवतिभागवतप्रधानउक्तः ५५ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेनारदवसुदेवसंवादेद्वितीयोध्यायः २ ॥
॥ राजोवाच ॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीम् ॥ मायांवेदितुमिच्छामोभगवंतोब्रुवंतुनः १ नानुतृप्येजुषन्युष्मद्वचोहरिकथामृतम् ॥ सं
सारतापनिस्तप्तोमर्त्यस्तत्तापभेषजम् २ ॥ अंतरिक्षउवाच ॥ एभिर्भूतानिभूतात्मामहाभूतैर्महाभुज ॥ ससर्जोच्चावचान्याद्यःस्वमात्रात्मप्रसिद्धये ३

चूर्णिका

किंच त्रैलौक्यराज्यार्थं निमिषार्धमपि भगवत्पदारविंदभजनात् यो न चलति सः वैष्णवाग्र्यः ५३ किंच हृदि हरिं भजतां पुंसां कामतापः न संभवति उदिते चंद्रे अर्क
तापवत् ५४ विसृजति हृदयं न यस्य साक्षाद्धरिः अवशाभिहितोप्यघौघनाशः प्रणयरशनया धृतांघ्रिपद्मः सभवति भागवतप्रधानउक्तः ५५ इत्येकादशेद्वितीयः ॥ २ ॥
॥ राजोवाच ॥ हे ऋषयः विष्णोः मायिनामपि मोहिनीं मायां वेदितुमिच्छामः नः ब्रुवंतु १ संसारतापतप्तोहं युष्मद्वचः हरिकथामृतं शृण्वन् जुषन् नतृप्ये २ ॥
अंतरिक्ष उवाच ॥ हे राजन् हरिः एभिः महाभूतैः भूतानि जीवस्य विषयभोगार्थं ससर्ज ३

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२॥

एवंजीवोपकरणार्थंपंचधातुभिर्महाभूतैः सृष्टानिभूतानिअंतर्यामिरूपेणप्रविष्टः एकधा मनसा दशधा बाह्येंद्रियरूपेण आत्मानं विभजन् गुणान् तत्तद्विषयान् जुषते जोषयतीत्यर्थः (अंतर्भूतोण्यर्थः) यद्वा तमात्मानंप्रति गुणान् विभजन् जुषतेप्रीयतेइत्यर्थः ४ सचजीवआत्मनांतर्यामिणाप्रद्योतितैर्गुणैरिंद्रियैर्गुणान् विषयान् भुंजानइदंसृष्टंशरीरंआत्मानंमन्यमान इह शरीरादौ सज्जते । अतएवसंसरतीतिभावः ५ ननु कर्माणिभुंजानःकथंसज्जतेभुंजानोभोगसमाप्तौमुच्यतइतिचेत्तत्राह कर्माणीति कर्मभिः कर्मेंद्रियैश्चसनिमित्तानिसवासनानिकर्माणिकुर्वन् तत्तत्पूर्वकर्मफलं च गृह्णन्नयं देहभृद्भ्रमतीहसंसारेनतुमुच्यते कथंभूतं कर्मफलम् सुखेतरंसुखदुःखात्मकं (तत्तत्कर्मफलम्) ६ कियंतंकालं भ्रमते तदाह इत्थमिति– बहूनिअभद्राणिवहंतीतितथाताः । सर्गप्रलयौउत्पत्तिमरणे ७ एवं मायामयीं सृष्टिमुक्त्वा प्रलयंदर्शयितुं आरभते । धातूनांमहाभूतानांउपप्लुवेनाशहेतौ आसन्ने व्यक्तंकार्यं द्रव्यंस्थूलं गुणःसूक्ष्मंतदात्मकंअव्यक्तायअव्यक्तंप्रतिनेतुंआकर्षति ८ नाशहेतूनाह । शतवर्षेति । तस्मिन्कालेउपचितश्चासौउष्णश्चासावर्कश्च । यद्वा तेनकालेनोपचितमुष्णत्वंयस्यसः ९ ऊर्ध्वशिखऊर्ध्वज्वालः । विष्वक्परितः १० सांवर्तकः प्रलयकर्ता । धाराभिर्नतुबिंदुभिः । हस्तिहस्ताभिःतत्प्रमाणाभिः ११ ततउपाधिलयाद्वैराजः पुरुषोऽव्यक्तंकारणंप्रविशति । ननु"ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे । परस्यांतेकृतात्मानःप्रविशंतिपरंपदमि"तिस्मृतेर्यावदधिकारिणामवस्थितिस्तावदधिकारकाणामितिन्यायाच्च वैराजशब्दाभिधेयस्यचब्रह्मणः परमभागवतत्वात् मोक्षएवसंगच्छते । नान्येषामिवकारणमात्रप्रवेशः । सत्यम् । अश्वमेधादिनासत्यलोकंगतानामप्यभक्तानामावृत्तिश्रवणादभक्तत्वे ब्रह्मणोपिप्रकृतौ लयः पुनरुत्पत्तिश्चेतिमोक्षदौर्लभ्यसूचनायैवमुक्तं वस्तुतस्तुतस्यमोक्षएव । यद्वा केनापिप्रमाणेननव्यज्यतइत्यव्यक्तंब्रह्मैव तत्प्रवेशेनचमोक्षएवोक्तइतिद्रष्टव्यम् १२

श्लोकाः ४/१२

एवंसृष्टानिभूतानिप्राविष्टःपंचधातुभिः ॥ एकधादशधात्मानंविभजन्जुषतेगुणान् ४ गुणैर्गुणान्सभुंजानआत्मप्रद्योतितैःप्रभुः ॥ मन्यमानइदंसृष्टमात्मानमिहसज्जते ५ कर्माणिकर्मभिःकुर्वन्सनिमित्तानिदेहभृत् ॥ तत्तत्कर्मफलंगृह्णन्भ्रमतीहसुखेतरम् ६ इत्थंकर्मगतीर्गच्छन्बह्वभद्रवहाःपुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुतेऽवशः ७ धातूपप्लवआसन्नेव्यक्तंद्रव्यगुणात्मकम् ॥ अनादिनिधनःकालोह्यव्यक्तायापकर्षति ८ शतवर्षाह्यनावृष्टिर्भविष्यत्युल्बणाभुवि ॥ तत्कालोपचितोष्णार्कोलोकांस्त्रीन्प्रतपिष्यति ९ पातालतलमारभ्यसंकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखोविष्वग्वर्धतेवायुनेरितः १० सांवर्तकोमेघगणोवर्षतिस्मशतंसमाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयतेसलिलेविराट् ११ ततोविराजमुत्सृज्यवैराजःपुरुषोनृप ॥ अव्यक्तंविशतेसूक्ष्मंनिरिंधनइवानलः १२

चूर्णिका

एवं भूतानि सृष्ट्वा अंतर्यामितया तेषु प्रविश्य एकधा दशधा आत्मानं विभज्य विषयान् जोषयति ४ सः जीवः ईश्वरेण प्रकाशितैः इंद्रियैः विषयान् भुंजन् शरीरंप्रति आत्मानं मन्वानः शरीरादौ सज्जते ५ किंच कर्मेंद्रियैः सवासनानि कर्माणिकुर्वन् तत्तत्पूर्वकर्मफलंचगृह्णन् अयंजीवः इहसंसारे भ्रमति न मुच्यते ६ एवं जीवःकर्मगतीः भ्रमन् प्रलयपर्यंतं उत्पत्तिमरणे अश्नुते ७ एवं उक्त्वा प्रलयंदर्शयति महाभूतानां नाशहेतौ प्राप्तेसति कार्यंप्रति अव्यक्ताय नेतुं कालः आकर्षति ८ नाशहेतूनाह आदौ वर्षशतं अनावृष्टिर्भुवि स्यात् ततः अर्कः लोकत्रयं प्रतपिष्यति ९ ततः संकर्षणमुखानलः पातालतलमारभ्य सर्वतः दहन् वर्धते १० ततोमेघगणः हस्तिशुंडातुल्यधाराभिः वर्षति तदा विराट् जले लीयते ११ ततः वैराजः पुरुषः विराड्रूपंहित्वा कारणं प्रविशति १२ ॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

एवंविराजोलयमुक्त्वातत्कारणानांमहदादिपृथिव्यंतानांप्रातिलोम्येनलयमाह ।वायुनेति वायोर्हिगंधरसहारित्वंप्रसिद्धम्।सांवर्तकेनवायुनाहृतगंधाअतएवगंधस्यव्यावर्तकस्यगतत्वात् सलिलत्वायकल्पते सलिलेलीयतेइत्यर्थः । तद्धृतरसंतेनवायुनैवहृतोरसोयस्यतत् १३तमसश्चरूपतिरस्कारित्वंप्रसिद्धम्। सांवर्तकेनतमसा। अवकाशेनस्वकारणेन १४ कालात्मनाशब्दस्यहिकालतएवनाशः प्रसिद्धः ।तद्रूपेणात्मनाईश्वरेण ।आत्मनितामसाहंकारे ।इंद्रियाणिबुद्धिश्चराजसाहंकारंप्रविशंतिमनोवैकारिकैर्देवैःसहसात्त्विकाहंकारं एवंत्रिविधैः स्वगुणैः स्वकार्यैः सहितः अहम् अहंकारः आत्मनिमहति । सचप्रकृतावितिद्रष्टव्यम् १५ त्रिवर्णात्रिगुणामायाश्रवणभीतंराजानंतन्निवृत्त्युपायश्रवणेस्वच्छंदयाति । किंभूयइति १६ एवमनुकंपितस्तन्निवृत्त्युपायमेवपृच्छति । यथैतामिति। यद्यपित"न्मायायातोबुधआभजेत्त"मिति भक्तिस्तत्तत्तारकत्वेनोक्तैव । तथापिकिंभक्तिरेवअन्योपिवातत्रोपायोस्तीतिज्ञातुंपुनः प्रश्नः । अकृतात्मभिः अवशीकृतांतःकरणैः । स्थूलधियः स्थूलेशरीरेअहंधीर्येषांते १७ भक्तिव्यतिरेकेणनास्त्यन्यउपायइत्यभिप्रेत्यभक्तिमेवससाधनांनिरूपयति तत्रप्रथमंवैराग्यद्वारागुरूपसत्तिमाह चतुर्भिः । कर्माणीति । दुःखहत्यैदुःखप्रतीकाराय । पाकविपर्यासंफलवैपरीत्यम् । मिथुनीचारिणांमिथुनीभूय प्रवर्तमानानाम् १८ कर्मभिःसाधिताअपिवित्तादयोनसुखहेतवइतिचपश्येदित्याह । नित्यार्तिदेनेति । आत्मनःस्वस्यमृत्युरूपेण (दुर्लभेनापिसाधितेनतथागृहादिभिः) चलैरनित्यैरपायिभिश्च १९ एवंलोकंपरामिति । कर्मनिर्मितत्वान्नश्वरं तथाचश्रुतिः"तद्यथेहकर्मचितोलोकः क्षीयतेएवमेवामुत्रपुण्यचितोलोकःक्षीयत"इति । किंच ।वर्तमानसमयेपिदुःखयुक्तंपश्येत्। इत्याह ।सतुल्यातिशयध्वंसम् । सहतुल्येनअतिशयेनध्वंसेनचवर्तमानंअतस्तुल्येस्पर्धाअतिशयेअसूयाध्वंसालोचनभयादिकंचापरिहार्यमित्यर्थः यथाखंडमंडलवर्तिनांतत्पतीनांमिथःस्पर्धादितद्वत् २० उत्तमंश्रेयोज्ञातुमिच्छुः शाब्देब्रह्मणिवेदाख्येन्यायतोनिष्णातंतत्त्वज्ञंअन्यथासंशयनिरासकत्वायोगात् । परेब्रह्मण्यपरोक्षानुभवेननिष्णातंअन्यथाबोधसंचारायोगात् । परब्रह्मनिष्णातत्वद्योतकमाह । उपशमाश्रयमिति २१

श्लोकाः १३/२१

वायुनाहृतगंधाभूःसलिलत्वायकल्पते॥सलिलंतद्धृतरसंज्योतिष्ट्वायोपकल्पते१३हृतरूपंतुतमसावायौज्योतिःप्रलीयते॥हृतस्पर्शोऽवकाशेनवायुर्नभसिलीयते१४कालात्मनाहृतगुणंनभआत्मनिलीयते॥ इंद्रियाणिमनोबुद्धिःसहवैकारिकैर्नृप॥प्रविशंतिह्यहंकारंस्वगुणैरहमात्मनि१५एषामायाभगवतःसर्गस्थित्यंतकारिणी ॥ त्रिवर्णावर्णितास्माभिःकिंभूयःश्रोतुमिच्छसि १६ ॥ राजोवाच ॥ यथैतामैश्वरींमायांदुस्तरामकृतात्मभिः ॥ तरंत्यंजःस्थूलधियोमहर्षइदमुच्यताम् १७ ॥ प्रबुद्धउवाच ॥ कर्माण्यारभमाणानांदुःखहत्यैसुखायच ॥ पश्यन्पाकविपर्यासंमिथुनीचारिणांनृणाम् १८ नित्यार्तिदेनवित्तेनदुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिःकाप्रीतिःसाधितैश्चलैः १९ एवंलोकंपरंविंद्यान्नश्वरंकर्मनिर्मितम् ॥ सतुल्यातिशयध्वंसंयथामंडलवर्तिनाम् २० तस्माद्गुरुंप्रपद्येतजिज्ञासुःश्रेयउत्तमम् ॥ शाब्देपरेचनिष्णातंब्रह्मण्युपशमाश्रयम् २१

चूर्णिका

ततः गंधहीनाभूः जले लीयते तत् जलं ज्योतिषि लीयते १३ तत्तेजः वायौ लीयते सवायुः नभसि लीयते १४ तन्नभःतामसाहंकारे लीयते बुद्धींद्रियाणि राजसाहंकारे लीयंते मनो देवाः सात्विकाहंकारे लीयंते एवं त्रिविधः अहंकारः महति लीयते स महान् प्रकृतौ लीयते १५ एषा माया भगवतः सर्गस्थित्यंतकारिणी त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि १६ ॥ राजोवाच ॥ हे महर्षे एतां दुस्तरां मायां स्थूलधियः सुखेन यथा तरंति तथा उच्यताम् १७ ॥ प्रबुद्ध उवाच ॥ हे नृप दुःखहत्यै सुखाप्त्यै च कर्माणि कुर्वतां नृणां फलवैपरीत्यं पश्येत् १८ तथा नित्यार्तिदेन वित्तेन गृहापत्याप्तपशुभिः ॥ एतैः चलैः का प्रीतिः न कापीति पश्येत् १९ एवं कर्मनिर्मितं परलोकमपि नश्वरं पश्येत् २० तस्मात् श्रेयो जिज्ञासुः पुमान् शाब्दे परे च ब्रह्मणि निष्णातं गुरुं प्रपद्येत २१

॥१३॥

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ३ ॥

॥१४॥ गुरुरेवआत्मादैवतंचयस्यसः अनुवृत्त्यासेवयायैर्धर्मैःवस्तुतआत्माआत्मप्रदश्चोपासकानांयथाबलिप्रभृतीनाम् २२ यथोचितमिति । दीनेषुदयांसमेषुमैत्रींउत्तमेषुप्रश्रयंचशिक्षेदित्यर्थः २३ शौचंत्राह्यंमृज्जलादिभिः । आभ्यंतरंचअदंभामानित्वादिशिक्षेत् । तपः स्वधर्माचरणम् । तितिक्षां क्षमाम् । मौनंवृथावाचामनुच्चारणम् । स्वाध्यायं अधिकारानुरूपं वेदपाठादि । आर्जवंस्वच्छताम् । ब्रह्मचर्यंयस्ययाहगुचितंऋतौस्वदारनियमादि । अहिंसांभूतेष्वद्रोहम् । द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोर्हर्षविषादराहित्यम् २४ आत्मेश्वरान्वीक्षाम् । चिद्रूपेणात्मेक्षाम् । नियंतृरूपेणेश्वरान्वीक्षांवा । कैवल्यमेकांतशीलत्वं अनिकेततां गृहाद्यभिमानराहित्यम् । विविक्तचीरवसनंविजनपतितानांवस्त्रखंडानांशुद्धानांवल्कलानांवापरिधानम् २५ भागवतेभगवत्प्रतिपादके अन्यत्रशास्त्रादौयाअनिंदाताम् । मनसःप्राणायामैः वाचोमौनेन कर्मणोनीहया दंडं । सत्यंयथार्थभाषणं । शमदमौअंतःकरणबाह्येंद्रियनिग्रहौ २६ हरेर्जन्मकर्मगुणानांश्रवणादि । तदर्थेहर्युद्देशेन (नतुस्वर्गाद्युद्देशेन) अखिलचेष्टितंयजनादिसर्वकर्मशिक्षेत् २७ इष्टंदत्तमित्यादयोभावेनिष्ठाः । वृत्तंसदाचारः । आत्मनः प्रियंगंधपुष्पादिदारादीनप्यालक्ष्यपरस्मैपरमेश्वरायनिवेदनंतत्सेवकतयासमर्पणंयत् तच्छिक्षेत् (यद्वयथापरस्मैनिवेदनंभवतितथाइष्टादिकंदारादींश्चशिक्षेदितिवाऽन्वयः) २८ कृष्णएवआत्मानाथश्चयेषांकृष्णआत्मनोजीवस्यनाथोयेषामितिवा । उभयत्रस्थावरेजंगमेचयापरिचर्यातां विशेषतोनृषु तत्रापिसाधुषु स्वधर्मशीलेषुततोपिमहत्सुश्रीभागवतेषु २९ तैश्चसहसंगम्य यत्पावनंभगवद्यशः तस्यपरस्परानुकथनंशिक्षेत् । यद्वा (परस्परानुकथनंयथाभवतितथाभगवद्यशः शिक्षेत्) यशसः कथनेसंस्पर्धादिपरित्यागेनआत्मनोमिथोयारातिःरमणंयाचतुष्टिःसुखंयाचनिवृत्तिःसमस्तदुःखहानिःतांचशिक्षेत् (यद्वा यशसिकथ्यमानेमिथोरत्यादिकंभवति) ३०

श्लोकाः २२/३०

तत्रभागवतान्धर्मान्शिक्षेद्गुर्वात्मदैवतः ॥ अमाययाऽनुवृत्त्यायैस्तुष्येदात्मात्मदोहरिः २२ सर्वतोमनसोऽसंगमादौसंगंचसाधुषु ॥ दयांमैत्रींप्रश्रयंचभूतेष्वद्धायथोचितम् २३ शौचंतपस्तितिक्षांचमौनंस्वाध्यायमार्जवम् ॥ ब्रह्मचर्यमहिंसाचसमत्वंद्वंद्वसंज्ञयोः २४ सर्वत्रात्मेश्वरान्वीक्षांकैवल्यमनिकेतताम् ॥ विविक्तचीरवसनंसंतोषंयेनकेनचित् २५ श्रद्धांभागवतेशास्त्रेऽनिंदामन्यत्रचापिहि ॥ मनोवाक्कर्मदंडंचसत्यंशमदमावपि २६ श्रवणंकीर्तनंध्यानंहरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानांचतदर्थेऽखिलचेष्टितम् २७ इष्टंदत्तंतपोजप्तंवृत्तंयच्चात्मनःप्रियम् ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मैनिवेदनम् २८ एवंकृष्णात्मनाथेषुमनुष्येषुचसौहृदम्॥परिचर्यांचोभयत्रमहत्सुनृषुसाधुषु२९परस्परानुकथनंपावनंभगवद्यशः॥मिथोरतिर्मिथस्तुष्टिर्निवृत्तिर्मिथआत्मनः३०

चूर्णिका तत्र गुर्वात्मदैवतः सन् भगवद्धर्मान् शिक्षेत् यैः हरिः तुष्यति २२ किंच सर्वतो मनसः असंगं आदौ साधुसंगं च हीनसमोत्तमेषु भूतेषु दयां मैत्रीं प्रश्रयं च शिक्षेत् २३ तथा शौचं तपः क्षमां मौनं स्वाध्यायं स्वच्छतां ब्रह्मचर्यं अहिंसां द्वंद्वसहत्वं च २४ सर्वत्र आत्मेश्वरवीक्षांम् मोक्षम् अनिकेतताम् वल्कलपरिधानम् २५ भागवते शास्त्रे श्रद्धाम् अन्यशास्त्रे अनिंदाम् मनोवाक्कर्मणां प्राणायाममौनानीहाभिः दंडं २६ हरेः जन्मकर्मगुणानां श्रवणं कीर्तनं ध्यानं च हरौ सर्वकर्मार्पणं च शिक्षेत् २७ इष्टदानतपआदि सर्वं दारान् सुतान् गृहान् प्राणान् आलक्ष्य परस्मै समर्पणं यत् तत् शिक्षेत् २८ किंच एवं कृष्णात्मनाथेषु नृषु सख्यं स्थावरजंगमयोः परिचर्याम् तत्रापि नृषु तत्रापि साधुषु तत्रापि महत्सु च शिक्षेत् २९ मिथः भगवद्यशःकथनं मिथो रतिर्मिथस्तुष्टिर्निर्वृत्तिर्मिथ आत्मनः एतत् शिक्षेत् ३० ॥१४॥

१ हीनेषु इतिपाठः मु. मु. पुस्तकेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ३ ॥

एवंवर्तमानानांपरमानंदप्राप्तिमाह । स्मरंतइतिद्वयेन । भक्त्यासाधनभक्त्यासंजातयाप्रेमलक्षणया (भक्त्याबिभ्रातिदधति) ३१ अजंहरिंअनुशीलयंति । तल्लीलांअभिनयंति । एवंपरंब्रह्मएत्य प्राप्यानिर्वृता
हृष्टाःसंतः तूष्णींभवंति ३२ उपसंहरति इतीति । भागवतधर्मोत्पन्नयाभक्त्या ३३ नारायणपरोमायांतरतीत्युक्तेपृच्छति । नारायणाभिधानस्येति । निष्ठां स्वरूपम् । अयंभावः । ब्रह्मैवतावन्नारायणइ
ति भगवानितिपरमात्मेतिचोच्यते । तदुक्तम् । "वदंतितत्तत्त्वविदस्तत्त्वंयज्ज्ञानमद्वयं । ब्रह्मेतिपरमात्मेतिभगवानितिशब्द्यत"इति ।तथा "नारायणेभगवतितदिदंविश्वमाहितम् । गृहीतमायोरुगुणः
स्वर्गादावगुणः स्वत" इत्यादिषु । तत्रकिमेभिःशब्दैःनिर्विशेषंतदेववस्तूच्यतेअस्तिवाकोपिविशेषांशइति ३४अत्रोत्तरं स्थित्युद्भवेति अयमर्थः अस्याविश्वस्यस्थित्युद्भवप्रलयानांहेतुः स्वयंचअहेतुःहेतुरहि
तः सनारायणइतिपरमेव तत्त्वमवेहि ।स्वप्नजागरसुषुप्तिषुसत् अनुवर्तमानं यद्वक्ष्यति"तुरीयंत्रिषुसंततामि"ति । बहिश्चसमाध्यादौयत्सत् तद्ब्रह्मेतिपरमेवतत्त्वमवेहि । देहेंद्रियप्राणमनांसियेनसंजीविता
॥१५॥ निसंति चरंतिप्रवर्तंते तत्परमात्मेतिपरमेवतत्त्वमवेहि । एवंलक्षणभेदैर्नारायणादिनामभिः परमेव (निर्विशेषं) तत्त्वंजानीहि ३५ अवेहीत्यनेनविषयत्वंप्राप्तंनिषेधति । नैतदिति । एतत्परंतत्त्वंमनोनविश
ति । नविषयीकरोति । वागुतवागपिचक्षुश्चआत्माबुद्धिः प्राणश्चक्रियाशक्त्यानप्राप्नोति । अन्यानिचेंद्रियाणियथाऽनलंस्वाःस्वांशभूताअर्चिषोविस्फुलिंगादयःनप्रकाशयंति नदहंतिच तथा जडासुम
नआदिवृत्तिष्वभिव्यज्यमानस्यात्मप्रकाशस्यचतत्तद्वृत्तिप्रकाशकस्यनतत्प्रकाशविषयत्वम् । प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रमन्नस्यान्नंमनसोयेमनोविदुरिति । तथा । "यतोवाचोनिवर्तंते
अप्राप्यमनसासहे"त्यादिश्रुतेः । ननु"त्वौपनिषदंपुरुषंपृच्छामी"तिश्रुतेः शब्दगोचरत्वंप्रतीयते तत्राह । शब्दोपिआत्ममूलंआत्मनिप्रमाणंसत् अर्थोक्तंअर्थादुक्तंयथाभवतितथाह । नसाक्षात् ।कुतः ।
बोधकनिषेधतया स्वस्यैवबोधकस्यनिषेधरूपत्वात् । "यद्वाचानभ्युदितंयेनवागभ्युद्यते तदेवब्रह्म त्वंविद्धि । यन्मनोनमनुतेनचक्षुषापश्यतिकश्चनैनमि"त्यादिश्रुतेः । ननु तर्हिनैवाहश्रुतिः किमिदमुच्यते
अर्थोक्तमाहेति तत्राह यद्तइति"अथातआदेशोनेतिनेतिअस्थूलमनणुयतोवाचोनिवर्त्ततेयद्वाचाऽनभ्युदितामि"त्यादिनिषेधस्ययत् अवधिभूतंब्रह्मतद्दतेविनासिद्धिर्नास्ति । सर्वस्यनिषेधस्यसावधित्वात् ३६

श्लोकाः ३१/३६

स्मरंतःस्मारयंतश्चमिथोऽघौघहरंहरिम् ॥ भक्त्यासंजातयाभक्त्याबिभ्रत्युत्पुलकांतनुम् ३१ क्वचिद्रुदंत्यच्युतचिंतयाक्वचिद्धसंतिनंदंतिवदंत्यलौकिकाः ॥
नृत्यंतिगायंत्यनुशीलयंत्यजंभवंतितूष्णींपरमेत्यनिर्वृताः ३२ इतिभागवतान्धर्मान्शिक्षेद्भक्त्यातदुत्थया ॥ नारायणपरोमायामंजस्तरतिदुस्तराम् ३३
॥ राजोवाच ॥ नारायणाभिधानस्यब्रह्मणःपरमात्मनः ॥ निष्ठामर्हथनोवक्तुंयूयंहिब्रह्मवित्तमाः ३४ ॥ श्रीपिप्पलायनउवाच ॥ स्थित्युद्भवप्रलयहे
तुरहेतुरस्ययत्स्वप्नजागरसुषुप्तिषुसद्बहिश्च ॥ देहेंद्रियासुहृदयानिचरंतियेनसंजीवितानितदवेहिपरंनरेंद्र ३५ नैतन्मनोविशतिवागुतचक्षुरात्माप्राणेंद्रिया
णिचयथाऽनलमर्चिषःस्वाः ॥ शब्दोपिबोधकनिषेधतयात्ममूलमर्थोक्तमाहयद्दतेननिषेधसिद्धिः ३६

चूर्णिका

एवं वर्तमानानां परमानंदप्राप्तिमाह एवं अघौघहरं हरिं स्मरंतः ये ते संजातयाभक्त्या रोमांचितां तनुं बिभ्रति ३१ क्वचिद्रुदंति क्वचिद्धसंति क्वचिन्नृत्यंति एवं परं प्राप्य
निर्वृताः संतः तूष्णीं भवंति ३२ इति भागवतान् धर्मान् शिक्षन् नारायणपरः पुमान् अंजः मायां तरति ३३ ॥ राजोवाच ॥ हे आर्षभाः नारायणाभिधानस्य ब्रह्मणः
स्वरूपं नः वक्तुं अर्हथ ३४ ॥ पिप्पलायन उवाच ॥ यः स्थित्यादीनां हेतुः यश्च स्वप्नादिषु समाध्यादौ च अनुवर्तमानः येन च संजीवितानि देहेंद्रियादीनि प्रवर्तंते
तं नारायणं परमात्मानं ब्रह्म तत्वं अवेहि ३५ एतत्तत्वं प्रति मनः वाक् चक्षुः बुद्धिः प्राणः अन्येंद्रियाणि च न विशंति यथा स्वांशभूताः विस्फुलिंगादयः अग्निं न दहं
ति तद्वत् शब्दोपि बोधकनिषेधतया अर्थोक्तं यथा तथा आह न साक्षात् तदेव परब्रह्म अवेहि ३६

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननु तर्हिप्रमाणाविषयत्वान्नास्तिब्रह्मेतिप्रसज्जेते । अतआह । सत्त्वमिति । सत् स्थूलंकार्यंअसत् सूक्ष्मंकारणं तत्सर्वंब्रह्मैवभाति । कुतः । यत् यस्मात् तयोः सदसतोःपरंकारणम् । कार्यंहि कारणाद्भिन्नंनभवति''वाचारंभणमि''त्यादिश्रुतेः ननुकथमेकंबहुविधस्यकारणंतत्राह । उरुशक्तियत् । उरुर्महतीमायालक्षणाशक्तिर्यस्यतत् उरुरनेकविधाशक्तिर्यस्यतदितिवा । बहुधाभानमेवदर्शयति । आदौयदेकंब्रह्मतेदवसत्त्वंरजस्तमइतित्रिवृत्प्रधानंप्रवदंति । ततःक्रियाशक्त्यासूत्रं ज्ञानशक्त्यामहानितितदेवप्रवदंति । ततःअहमितिजीवोपाधिमहंकारंचतदेवप्रवदंति । ततश्चज्ञानक्रियार्थफलरूपतया ज्ञानशब्देनदेवताः क्रियाइंद्रियाणिअर्थाविषयाःफलंतत्प्रकाशःसुखदुःखादिर्वातद्रूपतयाब्रह्मैवभाति नहिसर्वरूपेणस्वतोभासमानस्यब्रह्मणः स्वसिद्धौप्रमाणापेक्षेतिभावः ३७ ननु सर्वात्मकंचेद्ब्रह्म तर्हिसर्वस्यकार्यस्य जन्मादिविकारवत्त्वात् ब्रह्मणोपितत्प्रसंगः स्यादतआह । नात्मेति । आत्माब्रह्मनजजान नजातः । जन्माभावादेवतदनंतरास्तितालक्षणोपिविकारोनास्ति । नैधते नवर्धते । वृद्ध्यभावादेवविपरिणामोपिनिरस्तः । कुतः । हियस्मात् व्यभिचारिणांआगमापायिनांबाल्युवादिदेहानांसवनवित् । तत्तत्कालद्रष्टानह्यवस्थावतांद्रष्टा तदवस्थोभवतीत्यर्थः । निरवस्थःकोसावात्मेत्यतआह । उपलब्धिमात्रमिति । नन्वायातंतर्हिक्षणिकत्वम् नेत्याह सर्वत्रेति । सर्वत्रदेशेशश्वत्सर्वदाअनपायिअनुवर्तमानम् । ननु नीलज्ञानंजातंपीतज्ञानंनष्टमितिप्रतीतेर्नज्ञानस्यानपायित्वं अतआह । इंद्रियबलेनेति । सदेवज्ञानंइंद्रियबलेनविविधंकल्पितं नीलाद्याकारावृत्तयएवजायंतेनश्यंतिचनज्ञानमितिभावः । व्यभिचारिष्वव्यभिचारेदृष्टांतः प्राणोयथेति ३८ दृष्टांतंविवृण्वन् इंद्रियादिलयेननिर्विकारात्मोपलब्धिंदर्शयति अंडेष्विति । पेशिषुजरायुजेषु । तरुषुउद्भिज्जेषु । अविनिश्चितेषुस्वेदजेषु उपधावतिअनुवर्ततेएवंदृष्टांतेनिर्विकारत्वंप्रदर्श्य दार्ष्टांतिकेपिदर्शयति । कथं तदेवात्मासविकारइवप्रतीयते । यत् यदाजागरेइंद्रियगणः यदाचस्वप्नेतत्संस्कारवानहंकारः । यदातुप्रसुप्तंतदातस्मिन् प्रसुप्तेसुषुप्तौइंद्रियगणेसन्नेलीनेअहमिअहंकारेचसन्नेकूटस्थः निर्विकारएवात्मा । कुतः आशयमृतेलिंगशरीरमुपाधिंविना । विकारहेतोरुपाधेरभावादित्यर्थः । नन्वहंकारपर्यंतस्यसर्वस्यलयेशून्यमेवावशिष्यते क्वतदाकूटस्थआत्माअतआह । तदनुस्मृतिर्नः । तस्यदर्शनस्पर्शनादिविशेषज्ञानशून्यस्यसुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नः अस्माकंभवति । एतावंतंकालंसुखमहंसुप्तः नाकिंचिदवेदिषमिति । अतोऽननुभूतस्यास्मरणादस्त्येवसुषुप्तावात्मानुभवः विषयसंबंधाभावात्तुनस्पष्टइतिभावः । तथा चश्रुतिः । " यद्वैतन्नपश्यति पश्यन्वैतन्नपश्यति नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यते " इति ३९

॥१६॥

श्लोकाः ३७-३९

सत्त्वंरजस्तमइतित्रिवृदेकमादौसूत्रंमहानहमितिप्रवदंतिजीवम् ॥ ज्ञानक्रियार्थफलरूपतयोरुशक्तिब्रह्मैवभातिसदसच्चतयोःपरंयत् ३७ नात्माजजानन मरिष्यतिनैधतेऽसौनक्षीयतेसवनविद्व्यभिचारिणांहि ॥ सर्वत्रशश्वदनपाय्युपलब्धिमात्रंप्राणोयथेंद्रियबलेनविकल्पितंसत् ३८ अंडेषुपेशिषुतरुष्वविनिश्चितेषुप्राणोहिजीवमुपधावतितत्रतत्र ॥ सन्नेयदिंद्रियगणेऽहमिचप्रसुप्तेकूटस्थआशयमृतेतदनुस्मृतिर्नः ३९

॥१६॥

चूर्णिका

किं च आदौ एकं सत् सत्त्वं रजस्तम इति त्रिवृत् प्रधानं वदंति ततः सूत्रं महान् इत्यादि सकलं ब्रह्मैव भाति एवं जानीहि ३७ ब्रह्मणः जन्मादि षट् विकाराः न संति ३८ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नतु सुषुप्तौकूटस्थात्मानुभवोभवेच्चेत् कथंपुनरपिसंसारः स्यात् अविद्यातत्संस्कारणांविद्यमानत्वादितिचेत् कदा तर्हितन्निवर्तकोनुभवोभवेत् अतआह यर्हीति। वित्तैषणादिविहाय केवलमब्जनाभस्यैवच रणेच्छयायाउरुभक्तिस्तयापुमान् चेतसोमलानिविधमेत् नाशयेत्। चेतएवकर्तृ स्वगतानिमलानियया भक्त्याविधमेज्ज्वालयेदितिवा तदातस्मिन् विशुद्धेचेतसिसाक्षादव्यवधानेनात्मतत्त्वमुपलभ्यते। अम लयोर्हशोः सत्योर्यथापूर्वमेवसिद्धः सवितृप्रकाशइति ४० भक्तेः कर्मयोगाधीनत्वात्तंपृच्छति। कर्मयोगमिति। नैष्कर्म्यंकर्मनिवृत्तिसाध्यंज्ञानम् ४१ प्रश्नांतरमाह । एवमिति (कर्मयोगंवदतनइत्युक्त प्रकारेणप्रश्नंप्रष्टव्यमर्थं) पितुः इक्ष्वाकोः ब्रह्मणः पुत्राः सनकादयः सर्वज्ञाअपिनाब्रुवन् ४२ (कर्मणो -)- गहनत्वद्योतनायप्रथमंद्वितीयप्रश्नस्योत्तरंतावदाह। कर्मेति। कर्मविहितंअकर्मतद्विपरीतं निषिद्धकरणम् । विकर्मविगतंकर्मकर्मानाचरणम् । एतत्त्रयंवेदवादोवेदैक्यगम्यं नलौकिकःवेदस्यईश्वरात्मत्वात् ईश्वरादुद्भूतत्वात् अपौरुषेयत्वादित्यर्थः । पुंवाक्येहिवक्तुरभिप्रायतोऽर्थज्ञानंशक्यं अपौरुषेयेतुकेवलं वाक्यपौर्वापर्येणैवतात्पर्यावधारणंतचदुष्करमिति तत्रकर्मादौविद्वांसोपिमुह्यंति । किमुतान्ये । (बालस्तुसुतरांनैवाधिकारी।) अतस्तवतदाबालत्वात्सर्वज्ञाअपितेनैवाब्रुवन्निति ४३ दुर्ज्ञेयंवेदतात्पर्यमाह । परोक्षवादइतियत्राऽन्यथास्थितोऽर्थः संगोपायितुमन्यथाकृत्वोच्यतेसपरोक्षवादः । तथा चश्रुतिः "तंवाएतंचतुर्हूतं॰संतंचतुर्होतेत्याचक्षतेपरोक्षेणपरोक्षप्रियाइवहिदेवा" इति। परोक्षवादत्वमेवाह। कर्ममोक्षायेति। ननु स्वर्गाद्यर्थंकर्माणिविधत्ते नकर्ममोक्षार्थं तत्राह । बालानामनुशासनं यथा भवति तथा। अत्रदृष्टांतः अगदंऔषधं यथा । पिताबालमगदंपाययन् गुडलड्डुकादिभिः प्रलोभयन् पाययति ददातिचतानि । नैतावताऽगदपानस्यतल्लाभः प्रयोजनम्। किंत्वारोग्यम्। तथा । वेदोप्यवांतरफलैःप्रलोभयन् कर्ममोक्षायैवकर्माणिविधत्ते ४४ ननु कर्ममोक्षश्चेत्पुरुषार्थः तर्हिप्रथममेवकर्मत्यज्यताम्अतआह। नाचरेदिति। अजितेंद्रियत्वात् । अज्ञः स्वयंयदिनाचरेत् तर्हिविकर्मणाविहिताकरणलक्षणेनाधर्मेणमृत्योरनंतरंमृत्युमेवप्राप्नोति। तथा चश्रुतिः । "मृत्वापुनर्मृत्युमापद्यंतेअद्यमानाःस्वकर्मभि"रिति ४५

॥१७॥

श्लोकाः ४०/४५

यर्ह्यब्जनाभचरणैषणयोरुभक्त्याचेतोमलानिविधमेद्गुणकर्मजानि ॥ तस्मिन्विशुद्धउपलभ्यतआत्मतत्त्वंसाक्षाद्यथाऽमलदृशोःसवितृप्रकाशः ४० ॥ राजोवाच ॥ कर्मयोगंवदतनःपुरुषोयेनसंस्कृतः ॥ विधूयेहाशुकर्माणिनैष्कर्म्यंविंदतेपरम् ४१ एवंप्रश्नमृषीन्पूर्वमपृच्छंपितुरंतिके ॥ नाब्रुवन्ब्रह्मणःपुत्रास्तत्रकारणमुच्यताम् ४२ ॥ आविर्होत्रउवाच ॥ कर्माकर्मविकर्मेतिवेदवादोनलौकिकः ॥ वेदस्यचेश्वरात्मत्वात्तत्रमुह्यंतिसूरयः ४३ परोक्षवादोवेदोयंबालानामनुशासनम् ॥ कर्ममोक्षायकर्माणिविधत्तेह्यगदंयथा ४४ नाचरेद्यस्तुवेदोक्तंस्वयमज्ञोऽजितेंद्रियः ॥ विकर्मणाह्यधर्मेणमृत्योर्मृत्युमुपैतिसः ४५

चूर्णिका

यदा भगवच्चरणेच्छया या उरुभक्तिः तया पुमान् चेतोमलानि नाशयेत् तदा शुद्धे चेतसि सति अव्यवधानेन आत्मतत्वं उपलभ्यते यथा पूर्वसिद्धः सूर्यप्रकाशः अमलदृशोः तद्वत् ४० ॥ राजोवाच ॥ हेऋषयः नः कर्मयोगं वदत येन पुमान् इह कर्माणि विधूय ज्ञानं विंदते ४१ इममेव प्रश्नं पूर्वं सनकादीन् अपृच्छं ते नाब्रुवन् तत्रकारणंउच्यतां ४१ ॥ आविर्होत्र उवाच ॥ वेदविहितं कर्म अकर्म निषिद्धम् विकर्म विहिताकरणं इदं त्रयं वेदैकगम्यम् तच्च दुष्करम् अतः तदा तव बालत्वात् नैवाब्रुवन् ४३ अयं वेदः परोक्षवादः कर्ममोक्षाय कर्माणि विधत्ते पिता पुत्राय अगदं यथा ४४ अज्ञः वेदोक्तं नाचरेत् तेनाधर्मेण मृत्युं प्राप्नोति ४५

CC-0. In Public Domain. Digitization by eGangotri

टीका

'तस्माद्वेदोक्तमेवकुर्वाणोनतुनिषिद्धं ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलं च स्यान्नतुनैष्कर्म्यरूपासिद्धिरतआह' (ननु फलस्यश्रुत्युक्तत्वात् कर्मणिकृतेफलंचस्यात् नकेवलंनैष्कर्म्यमित्यत आह)। वेदोक्तमिति । निःसंगः अनभिनिवेशवान् ईश्वरेर्पितंनतुफलोद्देशेनकृतम् । ननु तथापिफलंस्यादेवश्रुतत्वात् । न । रोचनार्थेति । कर्मणिरुच्युत्पादनार्थंअगदपानेखंडगुडलड्डुका दिवत् । ततश्चकर्माभिरुच्यावेदार्थसम्यग्विचारयति । तदाचयोवाएतदक्षरमविदित्वागार्ग्यस्माल्लोकात्प्रैत्यकृपणतामेतितमेतंवेदानुवचनेनब्राह्मणाविविदिषंतिब्रह्मचर्येणतपसाश्रद्धयायज्ञेनानाशकेने त्यादिनायज्ञादीनांज्ञानशेषतांचावधार्यनिष्कामेषुकर्मसुप्रवर्ततेततश्चस्वर्गकामोयजेतेत्यादिभिः कामितस्यैवस्वर्गादेः फलत्वेनावगमादकामितोसौनभवतीतिनैष्कर्म्यसिद्धिर्भवतीतिभावः ४६ वैदिकंकर्मो क्त्वा तांत्रिकमाह।यआश्विति परात्मनः परस्यैवसतआत्मनोजीवस्यहृदयग्रंथिंअहंकारबंधंनिर्हर्तुमिच्छुः सः तंत्रोक्तेनचविधिनाप्रकारेणभजेत् । तंत्रमागमः (पांचरात्रादिः) चकाराद्वैदिकेनसहसमु च्चयः ४७ तमेवविधिमाह । लब्ध्वेति (अनुग्रहंद्वादशाक्षरादिमंत्रोपदेशलक्षणम् ।) तेनआचार्येणसंदर्शितआगमोऽर्चनप्रकारोयस्य ४८ मूर्तेः संमुखमासीनः आदिशब्देनभूतशुद्ध्याचपिंडंदेहंसंशो ध्य सद्भिर्न्यासैर्मातृकान्यासादिभिः कृतारक्षायेनसः ४९ आदावेवद्रव्याणिपुष्पादीनिजंत्वादिशोधनेन । क्षितिंसंमार्जनादिना । आत्मानमव्यग्रतया लिंगंमूर्तिंअनुलेपक्षालनादिनानिष्पाद्य योग्यानि कृत्वा ५० पाद्यादिपात्राण्युपकल्प्य सन्निधाप्याथ हृदि देवंध्यात्वा संपूजितंश्रीमूर्तौसंनिधाप्य हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैर्मूलमंत्रेणचतस्मिन् कृतन्यासोमूलमंत्रेणार्चयेत् ५१ अंगानि हृदयादीनिउपांगानि सुदर्शनादीनि तत्सहितां सपार्षदांसपरिवाराम् । कैरुपचारैरर्चयेत्तदाह । पाद्येति । आदिशब्देनमधुपर्काचमने ५२ अक्षतास्तिलकालंकारे नतुपूजायां"नाक्षतैरर्चयेद्विष्णुंनके तक्यामहेश्वरंमि"तिनिषेधात् । उपहारोनैवेद्यम् ५३

॥१८॥

श्लोकाः ४६—५३

वेदोक्तमेवकुर्वाणोनिःसंगोर्पितमीश्वरे ॥ नैष्कर्म्यांलभतेसिद्धिंरोचनार्थाफलश्रुतिः ४६ यआशुहृदयग्रंथिंनिर्जिहीर्षुःपरात्मनः ॥ विधिनोपचरेद्देवंतंत्रोक्ते नचकेशवम् ४७ लब्ध्वानुग्रहमाचार्यात्तेनसंदर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयापुनः ४८ शुचिःसंमुखमासीनःप्राणसंयमनादिभिः ॥ पिंडं विशोध्यसन्न्यासकृतरक्षोर्चयेद्धरिम् ४९ अर्चादौहृदयेवापियथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानिनिष्पाद्यप्रोक्ष्यचासनम् ५० पाद्यादीनुपक ल्प्याथसन्निधाप्यसमाहितः ॥ हृदादिभिःकृतन्यासोमूलमंत्रेणचार्चयेत् ५१ सांगोपांगांसपार्षदांतांतांमूर्तिंस्वमंत्रतः ॥ पाद्यार्घाचमनीयाद्यैःस्नानवासो विभूषणैः ५२ गंधमाल्याक्षतस्रग्भिर्धूपदीपोपहारकैः ॥ सांगंसंपूज्यविधिवत्स्तवैःस्तुत्वानमेद्धरिम् ५३

चूर्णिका

वेदोक्तमेव कुर्वाणः नरः नैष्कर्म्यां सिद्धिं लभते फलश्रुतिस्तु रोचनार्थैव ४६ किंच यः जीवस्यहृद्ग्रंथिं जिहीर्षुः सः तत्र निगमोक्तविधिना हरिं भजेत् ४७ आचार्यात् पूजाप्रकारं ज्ञात्वा स्वाभीष्टमूर्त्या हरिं अर्चेत् ४८ शुचिः मूर्तेः संमुख आसीनः प्राणायामभूतशुद्ध्यादिभिः देहं संशोध्य कृतन्यासरक्षः हरिं अर्चेत् ४९ तथा शुद्धपु ष्पादीनि संपाद्य प्रोक्ष्य च पाद्यादिपात्राणि च उपकल्प्य ५० मूर्तौकृतन्यासः मूलमंत्रेण अर्चादौ हृदये चापि यथालब्धोपचारैः सांगोपांगां सपार्षदां इष्टमूर्तिं पाद्या र्घ्याद्युपचारैः संपूज्य स्तवैः स्तुत्वा हरिं नमेत् ५१ ५२ ५३

१ इदमवतरणं मुम्बयीमुद्रितपुस्तके । २ 'मूर्त्याभिमतयात्मन' इतिमुद्रितपुस्तकेपाठोवर्तते. । ३ 'अर्चादौ हृदये चापि' इत्यपिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

शेषंनिर्माल्यंस्वधाम्निस्वस्थानेदेवंहृदिमूर्तिंकरंडकेउद्वास्य स्थापयित्वा पूजाविधिंसमापयेदितिशेषः ५४ तांत्रिककर्मयोगमुपसंहरति एवमिति ५५ ॥ ॥ इतिश्रीभागवते महापुराणे एकादशस्कंधे टीकायांतृतीयोऽध्यायः ३ ॥ ॥ ७ ॥ ॥ चतुर्थेत्ववतारेहाप्रश्नस्योत्तरमुक्तवान् । जयंतीनंदनोनाम्नाद्रुमिलोनरसप्तमः ॥ १ ॥ "मूर्त्याभिमतयात्मन" इत्यनेनआत्मनःप्रियमवतारंपूजयेदित्युक्तेऽवतारज्ञानमपेक्षितं तथा "स्तवैः स्तुत्वानमेद्धरि" मित्युक्तेगुणकर्मज्ञानंचापेक्षितंअतः पृच्छति यानियानीति । कर्ताकरिष्यति १ त्वयापृष्टानिकालत्रयसंबंधिसकलावतारगुणकर्माणि कथयितुमशक्यानिसंक्षेपतस्तुकानिचित्कथयिष्यामीत्याह । योवाइत्यादिना । अनुक्रमिष्यन् गणयितुमिच्छतियः सतुबालानामिवबुद्धिर्यस्यसमंदमतिः कालेनमहताकोपिमहामतिः रजांसिगणयेदपिअखिलशक्तिधाम्नः सर्वशक्त्याश्रयस्यभगवतोगुणांस्तुनैवगणयेत् । तथा च श्रुतिः । "विष्णोर्नुकं वीर्याणिप्रवोचंयः पार्थिवानिविममेरजांसी" त्यादि २ तत्रादौपुरुषावतारमाह । भूतैरिति । यदास्वसृष्टैर्भूतैर्वैराजं ब्रह्मांडंपुरंनिर्मायतस्मिन् लीलयाप्रविष्टः नतु भोक्तृत्वेन प्रभूतपुण्यस्यजीवस्यतत्रभोक्तृत्वात् ३ अस्यगुणकर्माण्याहद्वयेन । यत्कायइति । यस्याधिष्ठेयः कायएषः । कायइतिसप्तमीवा । तनुभृतां समष्टिव्यष्टिजीवानां ज्ञानकर्मेंद्रियाणि । यस्यस्वतः स्वरूपभूतात्सत्वात् तनुभृतां ज्ञानम् । यस्य स्वतःसिद्धं ज्ञानं इतिवा । यस्यश्वसनतः प्राणात् बलं देहशक्तिः । ओजः प्राणशक्तिः ईहाक्रिया । यश्चसत्वादिभिः विश्वस्थितिलयोद्भवेआदिकर्ता ४

॥१९॥

श्लोकाः

आत्मानंतन्मयंध्यायन्मूर्तिंसंपूजयेद्धरेः ॥ शेषमाधायशिरसास्वधाम्न्युद्वास्यसत्कृतम् ५४ एवमग्न्यर्कतोयादावतिथौहृदयेचयः ॥ यजतीश्वरमात्मानमचिरान्मुच्यतेहिसः ५५ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेतृतीयोऽध्यायः ३ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ यानियानीहकर्माणियैर्यैःस्वच्छंदजन्मभिः ॥ चक्रेकरोतिकर्तावाहरिस्तानिब्रुवंतुनः १ ॥ द्रुमिलउवाच ॥ योवाअनंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः ॥ रजांसिभूमेर्गणयेत्कथंचित्कालेननैवाखिलशक्तिधाम्नः २ भूतैर्यदापंचभिरात्मसृष्टैःपुरंविराजंविरचय्यतस्मिन् ॥ स्वांशेनविष्टःपुरुषाभिधानमवापनारायणआदिदेवः ३ यत्कायएषभुवनत्रयसंनिवेशोयस्येंद्रियैस्तनुभृतामुभयेंद्रियाणि ॥ ज्ञानंस्वतःश्वसनतोबलमोजईहासत्त्वादिभिःस्थितिलयोद्भवआदिकर्ता ४

५४ — ४

चूर्णिका

तन्मयं आत्मानं ध्यायन् निर्माल्यं शिरसि आधाय मूर्तिं उद्वास्य पूजाविधिं समापयेत् ५४ एवमग्न्यर्कतोयादावतिथौ हृदये च यः यजतीश्वरमात्मानं अचिरान्मुच्यते हि सः ५५ इतिएकादशेतृतीयः ३ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ इह हरिः यैःयैः स्वच्छंदजन्मभिः यानि यानि कर्माणि चक्रे करोति करिष्यति तानि नः ब्रुवंतु १ ॥ द्रुमिल उवाच ॥ हे नृप यः पुमान् अनंतस्य अनंतगुणान् संख्यातुं इच्छति सः मंदमतिः विद्वानपि भूमेः रजांसि महता कालेन गणयेत् परंतु ईश्वरस्य गुणान् नैव गणयेत् अतः संक्षेपतः तान् वक्ष्यामि २ आदौ पुरुषावतारमाह यदा ईशः पंचभूतैः विराजं पुरं निर्माय तत्र स्वांशेन प्रविष्टः सन् पुरुषाभिधानं प्राप ३ अस्य गुणकर्माण्याह यस्य एषः भुवनत्रयरूपो देहः यस्य इंद्रियैः जीवानां इंद्रियाणि यस्य सत्त्वात् ज्ञानम् यत्प्राणतः देहेंद्रियकर्मशक्तयः यश्च सत्त्वादिभिः स्थित्यादौ आदिकर्ता सः ४

१ शिरसीतिपाठोपिकचित्पुस्तकेष्वस्ति ।

CC-0. In Public Domain. Digitization by eGangotri

भा.ए आदिकर्तेत्यनेनंतत्पूर्वकंकर्त्रंतरमपिसूचितम् । तद्दर्शयितुंगुणावतारद्वाराचराचरसृष्ट्यादिकर्तृत्वमाह आदाविति । यस्येत्यनुषंगः यस्य रजसा अस्यजगतः सर्गेकार्येशतधृतिर्ब्रह्माऽभूत् । स्थितौ अ०
चाविष्णुः । स्वस्यसत्त्वेनेतिशेषः । क्रतुपतिस्तत्फलदाता द्विजातीनांतद्धर्माणांचसेतुः पालकइत्यर्थः । यस्य तमसा अस्याप्ययाय(संहाराय) रुद्रोऽभूत् इति एतैर्ब्रह्मादिभिर्निमित्तभूतैःप्रजासुउद्भवाद
योयतोभवंति सआद्यः पुरुषइत्यन्वयः ५ नरनारायणावतारमाह धर्मस्येति धर्मस्यभार्यायांदक्षदुहितरिमूर्तिसंज्ञायां नारायणोनरइति मूर्तिद्वयेन अजनिष्ट जातः तच्चरितमाह नैष्कर्म्यंआत्मस्वरूपं
टीका लक्ष्यते येन तत्कर्म (निवृत्तसंज्ञं) निर्हाररूपंवा उवाच नारदादिभिः स्वयंचचार योद्यापिकर्माचरन्नास्ते । ऋषिवर्यैर्निषेवितावंघ्रीयस्यसः ६ भगवदवतारद्योतकं परमोपशमंदर्शयितुमितिहासमाह । ॥ ४ ॥
इंद्रइतिदशभिः । धामस्थानंतपसागृहीतुमिच्छतीतिविशंक्य तपोनाशायकामंसपरिवारंप्रेषयामास । सः कामः । बदरीभिरुपाख्यायतेयस्तंतस्याश्रमंअप्सरोगणादिभिःसहगत्वास्त्रीणांप्रेक्षणान्येवइषवो
॥२०॥ बाणास्तैर्नतस्यमहिमहिमानंजानातिअतन्महिज्ञः ७ अक्रमंअपराधं अहोअहंधीरइतिविस्मयोगर्वःतद्रहितःएजमानान् शापभियाकंपमानान्भोमदनमारुतदेववध्वः कामवाय्वप्सरसः माभैष्ट । बलिंआ
तिथ्यम् । तान्प्रार्थयते । इममस्माकमाश्रमंअशून्यंपूर्णंकुरुध्वंआतिथ्याभावेशून्यप्रायोभवेदित्यर्थः ८ हेनरदेवअभयदेश्रीनारायणेइत्थंब्रुवतिसतिदेवाःकामादयःसव्रीडानिनम्राणिशिरांसियेषांते
लज्जाभारेणैवावनताशिरस्काइत्यर्थः । सघृणं यथा भवति तथा कृपांजनयंतइत्यर्थः कृपायुक्तंतमितिवा । (भोविभोसमर्थ ।) मायातः परेअतोऽविकृतेस्वारामाश्चतेधीराश्चतेषां निकरैरानतं पादपद्मं
यस्यतस्मिन् त्वयिएतदक्षोभानुकंपादिनचित्रम् ९

आदावभूच्छतधृतीरजसाऽस्यसर्गेविष्णुःस्थितौक्रतुपतिर्द्विजधर्मसेतुः ॥ रुद्रोऽप्ययायतमसापुरुषःसआद्यइत्युद्भवस्थितिलयाःसततंप्रजासु ५ धर्मस्यद श्लोकाः
क्षदुहितर्यजनिष्टमूर्त्यांनारायणोनरऋषिप्रवरःप्रशांतः ॥ नैष्कर्म्यलक्षणमुवाचचचारकर्मयोद्यापिचास्तऋषिवर्यनिषेवितांघ्रिः ६ इंद्रोविशंक्यममधामजि
घृक्षतीतिकामंन्ययुंक्तसगणंसबदर्युपाख्यम् ॥ गत्वाऽप्सरोगणवसंतसुमंदवातैःस्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ७ विज्ञायशक्रकृतमक्रममादिदेवःप्राहप्रह ५/९
स्यगतविस्मयएजमानान् ॥ माभैष्टभोमदनमारुतदेववध्वोगृह्णीतनोबलिमशून्यमिमंकुरुध्वम् ८ इत्थंब्रुवत्यभयदेनरदेवदेवाःसव्रीडनम्रशिरसःसघृणं
तमूचुः ॥ नैतद्विभोत्वयिपरेऽविकृतेविचित्रंस्वारामधीरनिकरानतपादपद्मे ९

चूर्णिका अस्य सर्गे रजसा आदौ ब्रह्माभूत् स्थितौ सत्त्वेन विष्णुरभूत् तथास्य नाशे तमसा रुद्रोभूत् इति ५ ततः दक्षदुहितरि धर्मस्त्रियां मूर्त्यां नारायणो नर इति द्विमूर्त्या जातः
सन् कर्मयोगं नारदादिभ्यः उक्त्वा स्वयं चचार ६ सः अद्यापि आस्ते ततः स ईशः तपसा स्वस्थानं गृहीष्यतीति इंद्रः विशंक्य तपोनाशाय बदर्याश्रमं प्रति अ ॥२०॥
प्सरोगणवसंतसुमंदवातैः सह कामं न्ययुंक्त सः तत्र गत्वा स्त्र्यवलोकनेषुभिः तं अविध्यत् ७ एवं शक्रकृतं अपराधं ज्ञात्वा प्रहस्य कंपितान् तान् माभैष्टेत्याह किंच
भो कामादयः मत्तः आतिथ्यं स्वीकुरुत अन्यथा ममाश्रमः शून्यः स्यात् ८ एवं ईशे ब्रुवति सति कामादयः सघृणंतमूचुः हे विभो मायायाः परे त्वयि एतत् अक्षो
भानुकंपादि नचित्रमिति अस्माकं च अपराधाचरणं स्वभावत्वात् न चित्रमित्याहुः ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अस्माकंचापराधाचरणंस्वभावत्वान्नचित्रमित्याहुः त्वामिति । त्वां सेवतां सेवमानानांसुरैरिंद्रादिभिः कृताः अंतरायाविघ्नाभवंति । कस्मादित्यत्राहुः स्वौकइति । स्वस्थानंस्वर्गमतिक्रम्य परमंतवस्थानंव्रजताम् । नान्यस्यत्वामसेवमानस्य । कुतः । बर्हिषियज्ञेस्वभागान् पुरोडाशादीन् बलीन् करान् कृषिकइवराजेंद्रादिभ्योददतः प्रयच्छतः तर्हिकिंमद्भक्तोविघ्नैर्भ्रंश्यतिनेत्याहुः धत्तइति यदीति निश्चये यतस्त्वंसर्वसुराधीश्वरोअवितारक्षकः अतोऽसौविघ्नानांमूर्ध्निपदंअंघ्रिंधत्तेकुतस्त्वयिविघ्नशंकेतिभावः १० त्वदभक्तानांतुकेवलंतपश्चरतामियंद्वयीगतिः । अस्माकं वावशंयांति क्रोधस्यवा । तत्रास्मद्वशाःकामोपभोगमपितावदनुभवंति क्रोधस्यवशाःपुनरतिमंदाइत्याहुः । क्षुत्तृडिति । क्षुच्चतृट्त्रिकालगुणाश्चशीतोष्णवर्षाणिमारुतश्चप्राणोबाह्योवाजैह्वाःजिह्वाभोगाश्च शैश्नाः गुह्योपभोगाश्चएतानस्मानपारजलधिरूपांश्चातितीर्यविलंघ्यगोष्पदेमज्जंति कुतः यतः क्रोधस्यविफलस्यवशंयांतिगच्छंति । किंच जलेमज्जंतोयथाविवशाःसंतोमस्तकारोपितंभारमुत्सृजंति तथावृथैव नमोक्षायनचभोगायशापादिनादुश्चरंतपउत्सृजंति ११ (विभुर्नारायणः) स्त्रियोयोगनिर्मिताः स्त्रीःशुश्रूषांकुर्वतीःस्वर्चिताःसुष्ठुअलंकृतास्तेषांस्वलावण्यादिदर्पोपशमायदर्शयामास १२ रूपिणीर्मूर्तिमतीः श्रीरिवताःस्त्रीःदृष्ट्वातासांतुरूपस्यौदार्येणमहत्वेनहताश्रीःकांतिर्येषांते १३ वृङ्ध्वंवृणीध्वम् । क्ववयंवराकाः क्वेमा इतिचेत्तत्राह । सवर्णांसमानरूपाम् । नैकाप्यस्मदनुरूपेतिचेत् माभवतु । तथापिस्वर्गस्यभूषणरूपाम् । स्वर्गंनेतुमर्हामित्यर्थः १४ सुरबंदिनःदेवभृत्याः (उर्वशींनामनारायणदत्तां) १५ इंद्रायइंद्रंप्रतिनारायणबलमूचुः । शक्रस्तत्रास त्रासंप्राप्तः विस्मितआसेतिवा१६

श्लोकाः १०/१६

त्वांसेवतांसुरकृताबहवोंतरायाःस्वौकोविलंघ्यपरमंव्रजतांपदंते ॥ नान्यस्यबर्हिषिबलीन्ददतःस्वभागान्धत्तेपदंत्वमवितायदिविघ्नमूर्ध्नि १० क्षुत्तृट्त्रिकालगुणमारुतजैह्व्यशैश्नानस्मानपारजलधीनतितीर्यकेचित् ॥ क्रोधस्ययांतिविफलस्यवशंपदेगोर्मज्जंतिदुश्चरतपश्चवृथोत्सृजंति ११ इतिप्रगृणतांतेषांस्त्रियोऽत्यद्भुतदर्शनाः ॥ दर्शयामासशुश्रूषांस्वर्चिताःकुर्वतीर्विभुः १२ तेदेवानुचरादृष्ट्वास्त्रियःश्रीरिवरूपिणीः ॥ गंधेनमुमुहुस्तासांरूपौदार्यहृतश्रियः १३ तानाहदेवदेवेशःप्रणतान्प्रहसन्निव ॥ आसामेकतरांवृङ्ध्वंसवर्णांस्वर्गभूषणाम् १४ ओमित्यादेशमादायनत्वातंसुरबंदिनः ॥ उर्वशीमप्सरःश्रेष्ठांपुरस्कृत्य दिवंययुः १५ इंद्रायानम्यसदसिशृण्वतांत्रिदिवौकसाम् ॥ उचुर्नारायणबलंशक्रस्तत्रासविस्मितः १६

चूर्णिका

स्वस्थानं स्वर्गं विहाय त्वत्पदं गच्छतां सतां देवकृताः विघ्नाः भवंति अन्यस्यअभक्तस्य न तथापि त्वद्भक्तः विघ्नमूर्ध्नि पदं धत्ते १० कुतः पुनस्त्वयि विघ्नशंकेति किंच केचित् क्षुत्तृट्शीतोष्णवर्षाप्राणजिह्वाशिश्नोपभोगान् अपारजलधिरूपान् अस्मान् विलंघ्य गोष्पदे मज्जंति यतः विफलक्रोधस्य वशं यांति ते तु शापादिना वृथा तपः उत्सृजंति ११ एवं ब्रुवतां तेषां स्वसेवांकुर्वतीः योगनिर्मिताः अद्भुतदर्शनाः स्त्रियः तेषां विभुः दर्शयामास १२ ते कामादयः ताः श्रीरिव रूपिणीः स्त्रियोदृष्ट्वा तासां गंधेन मुमुहुः १३ ततः ईशः तान्प्रति आह आसां एकां स्वर्गभूषणरूपां वृङ्ध्वमिति १४ एवं ईशाज्ञामादाय तं नत्वा श्रेष्ठां उर्वशींपुरस्कृत्य दिवं ययुः १५ इंद्रायानम्य सदसि शृण्वतां त्रिदिवौकसां ऊचुर्नारायणबलं शक्रस्तत्रास विस्मितः १६

CC-0. In Public Domain. Digitization by eGangotri

अन्यानप्यवतारांस्तच्चरितानिचाह । हंसस्वरूपीति । दत्तः दत्तात्रेयः । कुमारःसनकादिः । नःपिताऋषभः (एतद्रूपो) विष्णुरेवकलयाऽवतीर्णः सन् आत्मयोगं (आत्मलाभोपायं) अवदत् । तेनविष्णुनाहयास्येहयग्रीवावतारेमधुभिदासताततः श्रुतयआहृताः १७ (मनुर्वैवस्वतःअप्ययेप्रलये) इलापृथ्वीओषधयश्चगुप्ताः । क्रौडेवराहावतारे (दितिजोहिरण्याक्षः) ग्राहात्गजेंद्रंअमुंचत्मोचयामास । एवमादौयत्रावतारनामनोक्तंतत्रविष्णुःशिवायजगतांकलयावतीर्णइत्यनुवर्तनीयम् १८संस्तुन्वतःस्तुतिंकुर्वणान् ऋषीन् वालखिल्यान् कश्यपार्थंसमिदाहरणेगोष्पदेनिमग्नान् उद्धृत्य तस्मात्संकटादमुंचदित्यनुषंगः । तमसिब्रह्महत्यायांप्रविष्टंमोचयामास । असुरगृहेपिहितानिरुद्धायादेवस्त्रियः ताश्चामुंचदनेकावतारैः १९ (देवासुरकर्तृकेयुधि) अंतरेषुसमस्तमन्वंतरेषु । कलाभिर्मूर्तिभिर्भुवनानिअदधात् अपालयत् । इमांक्ष्मांसमदात् ददौ २० हैहयानांकुलस्याप्ययायभार्गवरूपोऽग्निः (त्रिःसप्तकृत्वएकविंशतिवारं) ससीतापतीरामः सलंकंलंकायांस्थितं (रावणमहत् हतवान्) सचजयतिवर्तमानकालीनोऽवतारइत्यर्थः २१ भाविनंरामकृष्णावतारमाह । भूमेरिति । बुद्धावतारमाह वादैरिति । अतदर्हान् यज्ञानर्हान् दैत्यान् विमोहयिष्यति । कल्क्यवतारमाह शूद्रानिति । न्यहनिष्यत् हनिष्यति २२

श्लोकाः १७/२२

हंसस्वरूप्यवददच्युतआत्मयोगंदत्तःकुमारऋषभोभगवान्पितानः ॥ विष्णुःशिवायजगतांकलयावतीर्णस्तेनाहृतामधुभिदाश्रुतयोहयास्ये १७ गुप्तोऽप्ययेमनुरिलौषधयश्चमात्स्येक्रौडेहतोदितिजउद्धरताऽम्भसःक्ष्माम् ॥ कौर्मेधृतोऽद्रिरमृतोन्मथनेस्वपृष्ठेग्राहात्प्रपन्नमिभराजममुंचदार्तम् १८ संस्तुन्वतोऽब्धिपतितांच्छ्रमणानृषींश्चशक्रंचवृत्रवधतस्तमसिप्रविष्टम् ॥ देवस्त्रियोऽसुरगृहेपिहिताअनाथाजघ्नेऽसुरेंद्रमभयायसतांनृसिंहे १९ देवासुरेयुधिचदैत्यपतीन्सुरार्थेहत्वाऽन्तरेषुभुवनान्यदधात्कलाभिः ॥ भूत्वाथवामनइमामहरद्बलेःक्ष्मांयाञ्चाच्छलेनसमदाददितेःसुतेभ्यः २० निःक्षत्रियामकृतगांचत्रिःसप्तकृत्वोरामस्तुहैहयकुलाप्ययभार्गवाग्निः ॥ सोऽब्धिबबंधदशवक्त्रमहत्सलंकंसीतापतिर्जयतिलोकमलघ्नकीर्तिः २१ भूमेर्भरावतरणाययदुष्वजन्माजातःकरिष्यतिसुरैरपिदुष्कराणि ॥ वादैर्विमोहयतियज्ञकृतोऽतदर्हाञ्शूद्रान्कलौक्षितिभुजोन्यहनिष्यदंते २२

चूर्णिका

अथान्यानवतारानाह ईशः हंसो भूत्वा आत्मयोगं अवदत् तथा दत्तः कुमारः मत्पिता ऋषभश्च ततः हयग्रीवो भूत्वा पातालतः वेदान् आनीतवान् १७ तथा प्रलये मत्स्योभूत्वा तनमनुरिलौषधयोगुप्ताः तथा क्रौडरूपेण हिरण्याक्षः हतः किंच कूर्मावतारे अमृतमथने पृष्ठे अद्रिः धृतः तथा प्रपन्नं गजेंद्रं ग्राहात् अमुंचत् १८ तथा च गोष्पदे निमग्नान् वालखिल्यानुद्धृत्य आपदः अमोचयत् किं च वृत्रवधतः ब्रह्महत्यायां प्रविष्टं इंद्रं अमोचयत् तथा अनाथाः दैत्यगृहे पिहिताः देवस्त्रियः अमोचयत् तथा नृसिंहरूपेण हिरण्यकशिपुर्हतः १९ देवदैत्ययुद्धे सुरार्थेदैत्यान् हत्वा मन्वंतरेषु भुवनानि कलाभिः अपालयत् तथा वामनो भूत्वा बलेः लक्ष्मीं याञ्चाछलेन हृत्वा देवेभ्योऽदात् २० तथा भार्गवः एकविंशतिवारं क्ष्मां निःक्षत्रियां अकरोत् तथा सीतापतिः रामः सेतुं बद्ध्वा दशास्यं अहन् सः जयति २१ तथा भूभारनाशाय अजः यदुषु जातः सन् दुष्कराणि कर्माणि करिष्यति तथा बुद्धः यज्ञकृतः अतदर्हान् दैत्यान् वादैर्विमोहयिष्यति तथा कलौ कल्किः अंते क्षितिभुजः शूद्रान् हनिष्यति २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

२३ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेचतुर्थोऽध्यायः ४ ॥ ॥ ७ ॥ ॥ पंचमेभक्तिहीनानांकानिष्ठाकोयुगेयुगे । पूजाविधिरितिप्रश्नद्वयस्योत्तरमुच्यते ॥ १॥ "त्वांसेवतांसुरकृताबहवोंत राया"इत्यनेनश्रीहरिभक्ताविघ्नमूर्ध्निपदंदत्वापरांगातिंयांतिअभक्तानांतुनविघ्नाभवंतीत्युक्तेतेषांतर्हिकागतिर्भवतीतिपृच्छति । भगवंतमिति । हे आत्मवित्तमाःअविजितात्मनांअतएवाशांतकामानांकानिष्ठा किंप्राप्यमित्यर्थः १ स्वजनकस्यगुरोर्भगवतोऽनादराद्गुरुद्रोहेणदुर्गतिंयांतीतिवक्तुंभगवतःसकाशाद्वर्णाश्रमाणामुत्पत्तिमाह । मुखेति । गुणैःसत्त्वेनविप्रः सत्वरजोभ्यांक्षत्रियः रजस्तमोभ्यांवैश्यः तमसाशूद्र इति २ एषांमध्येयेऽज्ञात्वातंनभजंति येचज्ञात्वाप्यवजानंति । आत्मनः प्रभवोजन्मयस्मात्तम् । तदभजनेकृतघ्नतामप्याह ईश्वरमिति । स्थानाद्वर्णाश्रमलक्षणाद्भ्रष्टाः ३ तत्रयेऽज्ञास्तेभव द्विधानामनुग्राह्याइत्याह । दूरइति । दूरेहरिकथाश्रवणंयेषांते (दूरेहरिकथाः) अतएवदूरेवाअच्युतकीर्तनंयेषांते दूरेवाच्युतकीर्तनाः ४ ज्ञानलवदुर्विदग्धास्त्वाचिकित्स्यत्वादुपेक्ष्याइत्याशयेनाह । वि प्रइति (राजन्यसहितोवैश्यः राजन्योवैश्यश्चेत्यर्थः) श्रौतेनउपनयनाख्येनउपलक्षणमेतत् । अध्ययनादिनापिहरेः पदांतिकंतद्भजनोत्तमाधिकारंप्राप्ताअपिमुह्यंति कर्मफलेषुसज्जंते । कुतः आम्नायेषुवादा अर्थवादास्तेमोहकतयाविद्यंतेयेषांते । तदुक्तंगीतासु । "यामिमांपुष्पितांवाचंप्रवदंत्यविपाश्चितः । वेदवादरताः पार्थनान्यदस्तीतिवादिन"इत्यादिना ५ भक्तिमार्गदाढर्यायतेषांमोहंप्रपंचयन् तान्निंद ति कर्मणीत्यादिना । अकोविदाः यथानबंधकंभवतितथाकर्तुमज्ञाः । नचाभिज्ञान्पृच्छंति यतः स्तब्धाअनम्राः स्तब्धत्वेहेतुः यतोमूर्खाअपिपंडितावयमितिमानवंतः । अतः । "अपामसोमममृताअभूम । अक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवतियत्रनोष्णंनशीतमि"त्यादिकयामाध्व्या (मधुरया) ययागिरोत्सुकाःसंतोमूढाः तयाचाटुकान् अप्सरोभिःसहविहरिष्यामइत्यादीन् प्रियशब्दान्वदंति ६

॥२३॥

श्लोकाः २३/६

एवंविधानिकर्माणिजन्मानिचजगत्पतेः ॥ भूरीणिभूरियशसोवर्णितानिमहाभुज २३ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेचतुर्थोऽध्यायः ४ ॥ ॥ राजोवाच ॥ भगवंतंहरिंप्रायोनभजंत्यात्मवित्तमाः ॥ तेषामशांतकामानांकानिष्ठाऽविजितात्मनाम् १ ॥ श्रीचमसउवाच ॥ मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैःसह ॥ चत्वारोजज्ञिरेवर्णागुणैर्विप्रादयःपृथक् २ यएषांपुरुषंसाक्षादात्मप्रभवमीश्वरम् ॥ नभजंत्यवजानंतिस्थानाभ्रष्टाःपतंत्यधः ३ दूरे हरिकथाःकेचिद्दूरेवाच्युतकीर्तनाः॥ स्त्रियःशूद्रादयश्चैवतेनुकंप्याभवादृशाम् ४ विप्रोराजन्यवैश्यौवाहरेःप्राप्ताःपदांतिकम् ॥ श्रौतेनजन्मनाथापिमुह्यंत्या म्नायवादिनः ५ कर्मण्यकोविदाःस्तब्धामूर्खाःपंडितमानिनः॥वदंतिचाटुकान्मूढाययामध्व्यागिरोत्सुकाः ६

चूर्णिका

एवंविधानि कर्माणि जन्मानि च जगत्पतेः भूरीणि भूरियशसो वर्णितानि महाभुज २३ ॥ ॥ इतिएकादशेचतुर्थः ४ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ हे आत्मवित्तमाः हरिं प्रायः ये न भजंति तेषां अशांतकामानां प्राप्यं किं तत् वदत १ ॥ चमस उवाच ॥ हेराजन् आदौ ईशमुखात् सत्वेन विप्रोभूत् तथा बाह्वोः सत्वरजोभ्यां क्षत्रियः ऊरोः रजस्तमोभ्यां वैश्यः पादात् तमसा शूद्रः २ एवं एते चतुर्भिः आश्रमैः सह जाताः तत्र स्वजनकं ईश्वरं ये न भजंति अवजानंतिच ते वर्णाश्रमहीनाः संतः अधः पतंति ३ तत्र ये अज्ञाः दूरे अच्युतकीर्तनाः स्त्रीशूद्रादयः ते भवादृशैः अनुकंप्याः ज्ञानलवदुर्विदग्धास्तुउपेक्ष्या इत्याह विप्रक्षत्रियवैश्याः उपनयनादिना हरिभजने श्रेष्ठाधिकारं प्राप्ता अपि वेदार्थवादैः कर्मफलेषु सज्जंते ५ किं च ये एवंभूताः मूर्खाः कर्म कर्तुं अज्ञाः पंडितमानिनः अक्षय्यंहवैइत्यादि माध्व्या वेदवाण्या मूढाः अप्सरोभिः सह विहरिष्याम इति प्रियशब्दान् वदंति ६

॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच । तेषांकर्माभिनिवेशात् कामक्रोधदंभादयोवर्धंतइत्याहत्रयेण रजसेति । घोरोऽभिचारादिः संकल्पोयेषांते अहिवन्मन्युर्येषांते ७ कामुकत्वंप्रपंचयति वदंतीति । उपासिताःस्त्रियोनतुवृद्धायैस्ते (उपासितस्त्रियः) मैथुन्यंमिथुनसुखमेवपरं नत्वातिथ्यादि येषुगृहेषुतेषुआशिषः वदंति "इदमद्यमयालब्धमिमंप्राप्स्येमनोरथम् । इदमस्तीदमापिमेभविष्यतिपुनर्धनं" मित्यादिकावदंति । दांभिकतांप्रपंचयति । यजंतीति असृष्टान्नविधानदक्षिणंनसृष्टाः नसंपादिताः अन्नविधानदक्षिणायथातथायजंति । तदाचवृत्त्यैजीविकार्थंपरंकेवलंपशून् घ्नंति । अतद्विदःहिंसादोषानभिज्ञाः ८ मानितांप्रपंचयति । श्रियेति । श्रियाधनादिसंपदा विभूत्याऐश्वर्येण श्र्यादिना (नियंतृतयाअभिजनेनकुलेनविद्यादिनाच) जातोयःस्मयोगर्वस्तेनअंधाधीर्येषांतेईश्वरसहितान् सतोऽवमन्यंते ९ किंच।एवंवर्तमानास्तेवेदतत्त्वार्थंस्फुटमपिनजानंतीत्याह सर्वेष्विति केनरूपेणावस्थितंतदाह । आत्मानंईश्वरंआत्मतयाईश्वरतयाचावस्थितं एवमप्यसंगतामाह यथाखंआकाशम् (श्रवणे) पुरुषार्थतामाह । अभीष्टम् । स्फुटत्वमाह । वेदोपगीतंचेति । तत्कुतो (नशृण्वते) यतोमनोरथानांव्यवायामिषमद्यसेवाविषयाणांवार्तयाप्रवदंति निवृत्तिपरंसंतंवेदंप्रवृत्तिपरंवर्णयंति (अबुधाश्च) १० ननुव्यवायादीनामपि "ऋतौभार्यामुपेयात् हुतशेषंभक्षयेदि"त्यादिनाविहितत्वात्किमेवंनिंद्यते । अतआह । लोकइति । व्यवायःस्त्रीसंगः आमिषंमांसम् । नित्या रागतएवनित्यंप्राप्ताः जंतोः प्राणिमात्रस्य । अतस्तत्रचोदनाविधिर्नास्ति ("विधिरत्यंतमप्राप्तेनियमःपाक्षिकेसति । तत्रचान्यत्रचप्राप्तौपरिसंख्येतिगीयत"इत्युक्तेः) ननुऋतावुपेयादित्यादिर्विधिर्दर्शितः । सत्यम् । नत्वयमपूर्वविधिःरागतः प्राप्तत्वात् । किंतु नियमविधिरूपेणरागिणामभ्यनुज्ञामात्रंक्रियते । तदाह व्यवस्थितिरिति । तेषुव्यवायादिषु । कैः । विवाहयज्ञसुराग्रहैः । विवाहपूर्वकएवव्यवायःकार्यः यज्ञएवामिषसेवा ।"सौत्रामण्यांसुराग्रहान्गृह्णाती"तिश्रुतेस्तत्रैवमद्यसेवेतिनियमःक्रियते । ननुचनियमपक्षेप्यावश्यकत्वान्ननिंदायुक्ताअतआह । आसुनिवृत्तिरिष्टेति । अयंभावः । नायंनियमविधिरपि । नित्यप्राप्तत्वात् । अतआसुव्यवायामिषमद्यसेवासुनिवृत्तिरिष्टापरिसंख्याविधिरेवेष्टः । कथंतर्हिव्यवस्थितिरित्युक्तम् । उच्यते । नतावत्परिसंख्याविधिनाश्रुत्यानिवृत्तिरुच्यते । तथासतिस्वार्थत्यागः परार्थकल्पनाप्राप्तबाधश्चेतिदोषत्रयंस्यात् । अतःक्वचित्प्राप्स्यतोप्यर्थस्यप्रापणमनर्थकमित्यपूर्वविधिद्वाराअन्यनिवृत्तिः फलतोभवति । तद्यथा । इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तेइत्यत्ररशनालिंगतोगर्दभाश्वाभिधानीरशनाद्वयेप्राप्स्यतोमंत्रस्याऽपूर्वविधिद्वारापरिसंख्योच्यते । यथोक्तंतंत्रवार्तिके । " अप्राप्तविधिरेवायमतोमंत्रस्यनिश्चितः । परिसंख्याफलेनोक्तानविशेषःपुनःश्रुते " रिति । क्वचित्तुरागतोनित्यप्राप्तस्याप्राप्तांशपूर

॥२४॥

श्लोकाः

रजसाघोरसंकल्पाःकामुकाअहिमन्यवः ॥ दांभिकामानिनःपापाविहसंत्यच्युतप्रियान् ७ वदंतितेन्योन्यमुपासितस्त्रियोगृहेषुमैथुन्यसुखेषुचाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणंवृत्त्यैपरंघ्नंतिपशूनतद्विदः ८ श्रियाविभूत्याऽभिजनेनविद्ययात्यागेनरूपेणबलेनकर्मणा ॥ जातस्मयेनांधधियःसहेश्वरान् सतोऽवमन्यंतिहरिप्रियान्खलाः ९ सर्वेषुशश्वत्तनुभृत्स्ववस्थितंयथाखमात्मानमभीष्टमीश्वरम् ॥ वेदोपगीतंनचशृण्वतेऽबुधामनोरथानांप्रवदंतिवार्तया १० लोकेव्यवायामिषमद्यसेवानित्यास्तुजंतोर्नहितत्रचोदना ॥ व्यवस्थितिस्तेषुविवाहयज्ञसुराग्रहैरासुनिवृत्तिरिष्टा ११

७/११

चूर्णिका

अत एव स्वयं ते अभिचारादिसंकल्पाः दांभिकाः पापाः संतः अच्युतप्रियान् विहसंति ७ किं च उपासितस्त्रियः संतः मैथुन्यसुखेषु गृहेषु आशिषो वदंति किंच अविधिना यजंति तदैव जीविकार्थंपशुन्घ्नंति ८ तथा च श्रीविभूतिसत्कुलजन्मादिना जातगर्वेण अंधधियः संतः हरिं भक्तांश्च अवमन्यंते ९ एवं वर्तमानास्ते सर्वप्राणिषु समवस्थितंईशं वेदगीतमपि न शृण्वते यतः व्यवायादिवार्तया निवृत्तिपरमपिवेदं प्रवृत्तिपरं वर्णयंति १० अहो व्यवायादीनां विहितत्वात् किमेवं निंद्यते अत आह लोके व्यवायामिषमद्यसेवाः जंतोः रागत एव नित्यं प्राप्ताः अतः तासु विधिर्नास्ति तर्हि किं तासु विवाहयज्ञसुराग्रहैः अनुज्ञारूपो नियमः क्रियते एवं च तासु निवृत्तिरिष्टेति ११

॥२४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

णलक्षणस्यनियमफलस्याप्यभावात् नियमविधिद्वाराफलतः परिसंख्याभवति । यथा'पंचपंचनखाभक्ष्या'इति तथारागतोनित्यवत्प्राप्तस्यव्यवायादेर्विवाहादिनियमेनाभ्यनुज्ञाद्वारापरिसंख्यैवेति । ननु यद्य भ्यनुज्ञामात्रमेतद्भवेत् । तर्हि"ऋतुस्नातांतुयोभार्यांसान्निध्येनोपगच्छति । घोरायांभ्रूणहत्यायांपच्यतेनात्रसंशय"इत्यादिदोषश्रवणंनस्यात् । नैषदोषः । मनसिकामेसत्यपितस्यामरुच्याद्द्वेषादिनावाता मनुपगच्छतोदोषश्रवणोपपत्तेरितिसर्वमनवद्यम् ११ तदेवंव्यवायादिमनोरथाकुलितत्वादभीष्टमात्मानंनशृण्वंतीत्युक्तम् । इदानींधनस्यापिधर्मद्वारापरमात्मप्रापकस्यदृष्टोपभोगार्थविनियोगान्नात्मज्ञान गंधोपीत्याह । धनंचेति । धर्मएवैकंमुख्यंफलंयस्यतत् । यतोधर्मात् सविज्ञानंअपरोक्षज्ञानसहितंदृढंपरोक्षज्ञानंभवति । कथंभूतं । अनुप्रशांति अनुअनंतरमेवप्रकृष्टाशांतिःनिर्वाणलक्षणायस्यतत् । एवंभूतंधनंगृहेषुदेहाद्यर्थंयुंजंति १२ किंच । व्यवस्थयातद्व्यवायाद्यभ्यनुज्ञातमपिनयथेष्टंअपितुअन्यथैवेत्याह यदिति । यस्मात्सुरायाघ्राणभक्षः अवघ्राणमात्रविहितं नपानम् । तथा पशोरप्यालभनमेवविहितंनतुहिंसा । अयमर्थः । देवतोद्देशेनयत्पशुहननंतदालभनम् । "वायव्यंश्वेतमालभेते"तिश्रुतेः । नतुहिंसा । "यावेदविहिताहिंसानसाहिंसेतिकीर्त्यते" इतिवचनात् । भक्षणोद्देशेनक्रियमाणंलौकिकहननंतद्धिंसैव । अत्रत्वालभनमेवविहितंनतुहिंसा । अतोनयथेष्टभक्षणाभ्यनुज्ञेत्यर्थः । व्यवायोपिप्रजयानिमित्तभूतया नतुरत्यै अतोमनोरथवादिनइमंविशुद्धं स्वधर्मंनविदुरिति १३ एवंभगवत्पराङ्मुखानांबहुदोषतांप्रपंच्यतन्निष्ठांप्रपंचयतिपंचभिः । येत्विति । अनेवंविदःनैवंधर्मंविदंतियतःस्तब्धाःनिःशंकाःअनेनमनोरथोभविष्यतीतिविश्वस्तावातदानींतनपोषणेनवातैः पशुभिर्विश्वस्ताः । तेचपरासवःप्रेत्यअमुत्रतान्खादंति ।"मांसभक्षयितामुत्रयस्यमांसमिहाद्म्यहम् । एतन्मांसस्यमांसत्वंप्रवदंतिमनीषिण"इतिवचनात् १४ अभिचारादिनाद्विषंतःमृतकेदेहे । सानुबंधेपुत्रादिसहिते १५ अज्ञास्तत्त्वज्ञैरनुकंपितास्तरंति । तत्त्वज्ञास्तुस्वतः । येतुनात्यंतमज्ञाःनचतत्त्वज्ञाःतेऽतरालवर्तिनःपतंतीत्याह । यइति । कैवल्यंतत्त्वज्ञानमसंप्राप्ताःअत्रहेतुःत्रिवर्गप्रधानाःअक्षणिकाःउपशांत्यवसररहिताःदेहादिस्थैर्यबुद्धयोवास्वयमेवात्मानंघातयंति १६ तदाह एतइतिआत्महनःआत्मापह्नवकर्तारः । अज्ञानेकर्मणि । तथाचश्रुतिः । "असुर्यानामतेलोकाअंधेनतमसावृताः । तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः" इति १७

॥२५॥

श्लोकाः १२/१७

धनंचधर्मैकफलंयतोवैज्ञानंसविज्ञानमनुप्रशांति ॥ गृहेषुयुंजंतिकलेवरस्यमृत्युंनपश्यंतिदुरंतवीर्यम् १२ यद्घ्राणभक्षोविहितःसुरायास्तथापशोरालभनं नहिंसा ॥ एवंव्यवायःप्रजयानरत्याइमंविशुद्धंनविदुःस्वधर्मम् १३ येत्वनेवंविदोऽसंतःस्तब्धाःसदभिमानिनः ॥ पशून्द्रुह्यंतिविस्रब्धाःप्रेत्यखादंतितेचतान् १४ द्विषंतःपरकायेषुस्वात्मानंहरिमीश्वरम् ॥ मृतकेसानुबंधेऽस्मिन्बद्धस्नेहाःपतंत्यधः १५ येकैवल्यमसंप्राप्तायेवाऽतीताश्चमूढताम् ॥ त्रैवर्गिकाह्यक्षणिकाआत्मानंघातयंतिते १६ एतआत्महनोऽशांताअज्ञानेज्ञानमानिनः ॥ सीदंत्यकृतकृत्यावैकालध्वस्तमनोरथाः १७

चूर्णिका

किंच प्रवृत्तिवादिनः ये ते धर्मद्वारा आत्मप्रापकं धनं गृहेषु देहाद्यर्थं युंजंति यतः देहस्य मृत्युं ते न पश्यंति १२ किं च व्यवस्थयापि व्यवायाद्यभ्यनुज्ञापि न यथेष्टम् तर्हि यज्ञे सुरायाः अवघ्राणं विहितम् तथा पशोः आलभनम् न हिंसा एवं मैथुनमपि प्रजार्थं एवं शुद्धं धर्मं ते न विदुः १३ ये तु एवं शुद्धं धर्मं अज्ञात्वा पशून् द्रुह्यंति ते च पशवः प्रेत्य अमुत्र तान् खादंति १४ अत एव अन्यदेहेषु स्वात्मानं हरिं द्विषंतः अत्र देहे बद्धस्नेहाः संतः अधः पतंति १५ किं च ये नात्यंतं अज्ञाः न च तत्त्वज्ञाः ते स्वात्मानं स्वयमेव घातयंति १६ तथा कालध्वस्तमनोरथाः सीदंति १७

॥२५॥

Nepal Sanskrit University, Balmiki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

याग्रहापत्यसुहृच्छ्रियस्ताहित्वा १८ तदेवंभगवद्भक्तिरेवकर्तव्येतिस्थितेतत्रविशेषंपृच्छति कस्मिन्काल इति । किंवर्णःकीदृग्वर्णवान् । कीदृशःकीदृशाकारःकेनवानाम्नाकेनवाविधिना (कीदृशैर्नृभिः)
१९ एषुकृतादिकालेषुनानामकारावर्णाभिधाकारादयोयस्य । नानैवविधिनाविविधेनैवमार्गेण २० तदेववर्णादिकमाह । कृतेइत्यादिना । कृष्णजिनादीन्बिभ्रदितिब्रह्मचारिवेषोदर्शितः (अक्षम
क्षमालाम्) २१ तपसाध्यानेन २२ २३ त्रिगुणादीक्षांगभूतामेखलायस्यसःयज्ञमूर्तिः । हिरण्यकेशःपिशंगकेशः २४ त्रय्याविद्ययावेदत्रयोक्तकर्मभिः २५ पृश्निगर्भःपृश्निःसुतपसःप्रजापतेःपत्नीत
स्याःपुत्रः । वृषाकपिः । स्मृतःसन्वर्षतिकामान्आकंपयतिक्लेशानितितथावृषाकपिर्यज्ञवराहमूर्तिः । जयत्येवसर्वदाजयंतः २६ श्यामोऽतसीपुष्पाभःनिजानिचक्रादीन्यायुधानियस्यसः । श्रीवत्सो
नामवक्षसोदक्षिणभागोरोम्णःप्रदक्षिणावर्तलांछितःसआदिर्येषांकरचरणादीनांतैःअंकैःअंकितैःलांछितःचिह्नैःलक्षणैर्बाह्यैश्चकौस्तुभादिभिः २७ महाराजोपलक्षणंछत्रचामरादियुक्तम् । वेदतंत्राभ्यांवैदिके
॥२६॥ नआगमिकेनचमार्गेणयजंतिपूजयंति । परंईश्वरंज्ञातुमिच्छवः २८ नामान्याह नमस्तइति २९ ३० नानातंत्रविधानेनेतिकलौतंत्रमार्गस्यप्राधान्यंदर्शयति । (यथायजंति तच्छृणु ।) ३१

हित्वाऽत्र्यायासरचिताग्रहापत्यसुहृच्छ्रियः ॥ तमोविशंत्यनिच्छंतोवासुदेवपराङ्मुखाः १८ ॥ राजोवाच ॥ कस्मिन्कालेसभगवान्किंवर्णःकीदृशोनृभिः ॥ श्लोकाः
नाम्नावाकेनविधिनापूज्यतेतदिहोच्यताम् १९ ॥ श्रीकरभाजनउवाच ॥ कृतंत्रेताद्वापरंचकलिरित्येषुकेशवः ॥ नानावर्णाभिधाकारोनानैवविधिनेज्यते २०
कृतेशुक्लश्चतुर्बाहुर्जटिलोवल्कलांबरः ॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू २१ मनुष्यास्तुतदाशांतानिर्वैराःसुहृदःसमाः ॥ यजंतितपसादेवंशमे १८/३१
नचदमेनच २२ हंसःसुपर्णोवैकुंठोधर्मोयोगेश्वरोऽमलः ॥ ईश्वरःपुरुषोऽव्यक्तःपरमात्मेतिगीयते २३ त्रेतायांरक्तवर्णोसौचतुर्बाहुस्त्रिमेखलः ॥ हिरण्य
केशस्त्रय्यात्मास्रुक्स्रुवाद्युपलक्षणः २४ तंतदामनुजादेवंसर्वदेवमयंहरिम् ॥ यजंतिविद्ययात्रय्याधर्मिष्ठाब्रह्मवादिनः २५ विष्णुर्यज्ञःपृश्निगर्भःसर्वदेवउरुक्र
मः ॥ वृषाकपिर्जयंतश्चउरुगायइतीर्यते २६ द्वापरेभगवान्श्यामःपीतवासानिजायुधः ॥ श्रीवत्सादिभिरंकैश्चलक्षणैरुपलक्षितः २७ तंतदापुरुषंमर्त्या
महाराजोपलक्षणम् ॥ यजंतिवेदतंत्राभ्यांपरंजिज्ञासवोनृप २८ नमस्तेवासुदेवायनमःसंकर्षणायच ॥ प्रद्युम्नायानिरुद्धायतुभ्यंभगवतेनमः २९ नाराय
णायऋषयेपुरुषायमहात्मने ॥ विश्वेश्वरायविश्वायसर्वभूतात्मनेनमः ३० इतिद्वापरउर्वीशस्तुवंतिजगदीश्वरम् ॥ नानातंत्रविधानेनकलावपियथाशृणु ३१

चूर्णिका तथाच देहायासरचिताः गृहापत्यसुहृच्छ्रियः हित्वा तमो विशंति यतः ईशपराङ्मुखा इति १८ ॥ राजोवाच ॥ कस्मिन्कालेस भगवान् किं वर्णः कीदृशो नृभिः नाम्ना
वाकेन विधिना पूज्यते तदिहोच्यताम् १९ ॥ करभाजन उवाच ॥ कृतादिचतुर्युगेषु केशवः नानावर्णाभिधाकारः नानामार्गेण पूज्यते २० तत्र विशेषमाह कृते शुक्लः
चतुर्बाहुः वल्कलांबरः कृष्णाजिनादिधारी ईश्वरः वर्तते २१ तदा शांताः निर्वैराः नराः तपसा शमदमाभ्यां देवं च यजंति २२ हंसः सुपर्णो वैकुंठः इत्यादिनामाभिर्गी
यते २३ अथ त्रेतायां रक्तवर्णः चतुर्बाहुः यज्ञमूर्तिः आस्ते २४ तं तदा मनुजाः ब्रह्मवादिनः त्रय्या विद्यया यजंति २५ विष्णुः यज्ञः उरुक्रमः जयंत इतिनामभिर्गी ॥२६॥
यते २६ अथ द्वापरे श्यामः पीतवासाः श्रीवत्सादिचिह्नैरुपलक्षितः आस्ते २७ तं तदा मनुजाः परं जिज्ञासवः वेदतंत्राभ्यां पूजयंति २८ नमस्ते वासुदेवाय नमः संक
र्षणाय च प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नम इत्यादि नामभि. नानातंत्रमार्गेण स्तुवंति २९ ३० ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

रुक्षतांव्यावर्तयति (त्विषेति) त्विषाकांत्याऽकृष्णंइंद्रनीलमणिवदुज्ज्वलमित्यर्थः । (वस्तुतःअकृष्णम्) यद्वा कृष्णंतन्नामकमवतारम् । अनेनकलौकृष्णावतारप्राधान्यंदर्शयति । अंगानिहृदयादी
निउपांगानिकौस्तुभादीनिअस्त्राणिसुदर्शनादीनिपार्षदाःसुनंदादयःतत्सहितम् । यज्ञैःअर्चनैःसंकीर्तनंनामोच्चारणंस्तुतिश्चतत्प्रधानैःसुमेधसोविवेकिनः ३२ स्तुतिमाह ध्येयमिति । हेप्रणतपाल हेमहा
पुरुष तवचरणारविंदंवंदे कथंभूतंध्येयंध्यातुंयोग्यम् । सदेतिसर्वत्रसंबध्यते । ध्येयत्वेहेतवः । इंद्रियकुटुंबादिभिःपरिभवस्तिरस्कारस्तंहंतीतितथातत् । किंच अभीष्टदोहंमनोरथपूरकं । किंच तीर्थास्पदं
गंगाद्याश्रयेणपरमंपावनम् । शिवविरिंचाभ्यांनुतंस्तुतम् । ननु महत्तमौतौकृतार्थावेव । किमर्थंताभ्यांनुतम् । तत्राह । शरण्यंआश्रययोग्यंआत्मसुखात्मकमित्यर्थः । तर्हिब्रह्मादिस्तुत्यंप्राकृतस्यकथंगो
चरस्तत्राह । भृत्यार्तिहम् । यस्यकस्यापिभृत्यमात्रस्यआर्तिहंतृनकेवलंआगंतुकार्तिमात्रंहंति । किंचभवाब्धिपोतंसंसारार्णवतारकम् ३३ इदानींस्वयमाप्तकामत्वान्निरपेक्ष्यंभक्तार्थंचसापेक्षतांदर्शयन्श्री
रामचंद्रंस्तौति । त्यक्त्वेति । अन्यैःसुदुस्त्यजायासुरैरपीप्सिताराज्यलक्ष्मीस्तांत्यक्त्वायादितियइत्यर्थः योऽरण्यमगात् । किंराज्यवैकल्यदर्शनेन । न । धर्मिष्ठः । कुतः । आर्यस्यगुरोर्दशरथस्यवच
सा । किंच । एवंराज्यंत्यक्त्वापिभक्तवात्सल्येनदयितयासीतयेप्सितंमायामृगंस्वर्णाकारंयोन्वधावत् । तस्यभगवतश्चरणारविंदंवंदे । यद्वा हेधर्मिष्ठेतिसंबोधनम् । अविवक्षितत्वादार्षपदेनसंधिर्नभवति ।
तथायदगादितिचरणारविंदमेवोच्यते । यच्चमायामृगमन्वधावत्तत्तेपदारविंदमिति अन्यत्समानम् ३४ युगानुरूपाभ्यांनामरूपाभ्याम् ३५ एषुचतुर्षुयुगेषुकलिरेवश्रेष्ठइत्याह । कलिमिति । गुणज्ञाः
कलेर्गुणंजानंति ये ते । ननु दोषाणांवहुत्वात्कथंसभाजयंति तत्राह । सारभागिनः । गुणांशग्राहिणः । कोसौगुणः तमाह । यत्रेति । तदुक्तम् । " ध्यायन् कृतेयजन्यज्ञैस्त्रेतायांद्वापरेऽर्चयन् ।
यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवमि"ति ३६ तस्मात्कलौअतोऽस्मात्संकीर्तनादन्यः परमोलाभोनास्ति । यतःसंकीर्तनात् ३७ किंच कृतादिष्विति ३८

श्लोकाः ३२/३८

कृष्णवर्णंत्विषाऽकृष्णंसांगोपांगास्त्रपार्षदम् ॥ यज्ञैःसंकीर्तनप्रायैर्यजंतिहिसुमेधसः ३२ ध्येयंसदापरिभवघ्नमभीष्टदोहंतीर्थास्पदंशिवविरिंचिनुतं
शरण्यम् ॥ भृत्यार्तिहंप्रणतपालभवाब्धिपोतंवंदेमहापुरुषतेचरणारविंदम् ३३ त्यक्त्वासुरेप्सितसुदुस्त्यजराज्यलक्ष्मींधर्मिष्ठआर्यवचसायदगादरण्यम् ॥
मायामृगंदयितयेप्सितमन्वधावद्वंदेमहापुरुषतेचरणारविंदम् ३४ एवंयुगानुरूपाभ्यांभगवान्युगवर्तिभिः ॥ मनुजैरिज्यतेराजञ्श्रेयसामीश्वरोहरिः ३५
कलिंसभाजयंत्यार्यागुणज्ञाःसारभागिनः ॥ यत्रसंकीर्तनेनैवसर्वःस्वार्थोऽभिलभ्यते ३६ नह्यतःपरमोलाभोदेहिनांभ्राम्यतामिह ॥ यतोविंदतपरमांशां
तिंनश्यतिसंसृतिः ३७ कृतादिषुप्रजाराजन्कलाविच्छंतिसंभवम् ॥ कलौखलुभविष्यंतिनारायणपरायणाः ३८

चूर्णिका

अथकलौ इंद्रनीलमणिवत् उज्ज्वलं त्विषा कृष्णं श्रीकृष्णं संकीर्तनप्रायैः यज्ञैः सुमेधसो जनाः स्तुवंति ३२ स्तुतिमाह हे महापुरुष ते चरणारविंदं वंदे कथंभूतं तत् का
मपूरकं शिवविरिंचिनुतं संसारार्णवतारकं इति ३३ किं च यः ईश्वरः सुरेप्सितराज्यलक्ष्मीं हित्वा पितृवचसा अरण्यं अगात् तथा सीतयेप्सितं मायामृगं यः अन्वधाव
त तस्य भगवतः चरणारविंदं वंदे ३४ एवं नामरूपाभ्यां युगवर्तिभिर्मनुजैः हरिरिज्यते ३५ एषु युगेषु कलिरेवश्रेष्ठ इत्याह गुणज्ञाः आर्याः कलिं सभाजयंति यत्र
हरिकीर्तनेनैव सर्वस्वार्थो लभ्यते ३६ तस्मात् कलौ संकीर्तनात् परमो लाभो नास्ति यतः संसृतिर्नश्यति ३७ अतः कृतादिषु वर्तमानाः प्रजाः कलौ संभवमिच्छंति
यतो नारायणपराः सर्वे नराः भविष्यंति ३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ५ ॥

॥२८॥

(द्रविडेषुदेशेषु) ३९ (येतासांजलंपिबंतितेतत्तीरवासिनोऽ)-मलाशयाःसंतःप्रायःप्रायशोभगवतिभक्ताभविष्यंति ४० भक्तस्यविधिनिषेधनिवृत्तेः कृतकृत्यतामाह । देवर्षीति । आप्ताः पोष्याः कुटुंबिनः इतरेदेवादयःपंचयज्ञदेवताः । एतेषांभक्तास्तुपूजाकरानऋणिनइति भावः ४१ हे राजन् देवर्ष्यादीनांकिंकरःऋणीचतदर्थंनित्यंपंचयज्ञादिकर्ता तथात्रस्मृतिः । "हीनजातिंपरिक्षीणमृणार्थंकर्मकारयेदि"ति । अयंतुनतथा । कोसौ । यःसर्वभावेनश्रीमुकुंदंशरणंगतः । कर्तंकृत्यंपरिहृत्य । यद्वा कर्तंभेदंपरिहृत्य कृतीछेदनइत्यस्मात् । वासुदेवःसर्वमितिबुद्ध्येत्यर्थः ४२ विहितकर्मणि निवृत्तिमुक्त्वानिषिद्धनिमित्तप्रायश्चित्तनिवृत्तिमाह । स्वपादमूलमिति । त्यक्तःअन्यस्मिन्देहादौदेवतांतरेवाभावोयेन । अतएवतस्यविकर्मणिप्रवृत्तिर्नसंभवति । यच्चकथंचित्प्रमादादिना विकर्मोत्पतति तंप्राप्तंतदपिहरिर्धुनोति । ननु नयमस्तन्मन्यते तत्राह परेशः। ननु श्रुतिस्मृतीममैवाज्ञेइति भगवद्वचनात्कथंस्वाज्ञाभंगंसहेत तत्राह प्रियस्य । ननु नायंपापक्षयार्थंभजते तत्राह हृदिसंनिविष्टइति । नहि वस्तुशक्तिरर्थितामपेक्षतइत्यर्थः (तदुक्तं"अनिच्छयापिसंस्पृष्टोदहत्येवहिपावक"इति) ४३ जायंतेयान् जयंत्याःपुत्रान् ४४ (राजानिमिः) उपातिष्ठन् अनुतिष्ठन् ४५ निःसंसंगोभूत्वा (परंवैकुंठम्) ४६ शास्त्रप्रक्रियेयमुक्ता । युवांतुसंगतएवकृतार्थावित्याह । युवयोरिति। वांयुवयोः ४७ नचसर्वकर्मसमर्पणादिभागवतधर्मैरन्येषामिवयुवयोःसत्त्वशुद्धिरापादनीयापुत्रोपलालनेनैवभागवतधर्मसर्वस्वनिष्पत्तेरित्याह । दर्शनेति कृष्णेपुत्रइति स्नेहंप्रकुर्वतोर्वांयुवयोः तस्यदर्शनादिभिरात्मापावितःशोधितः ४८

श्लोकाः

क्वचित्क्वचिन्महाराजद्रविडेषुचभूरिशः ॥ ताम्रपर्णीनदीयत्रकृतमालापयस्विनी ३९ कावेरीचमहापुण्याप्रतीचीचमहानदी ॥ येपिबंतिजलंतासांमनुजा
मनुजेश्वर ४० प्रायोभक्ताभगवतिवासुदेवेऽमलाशयाः ॥ देवर्षिभूताप्तनृणांपूजाकरान्नृप ४१ देवर्षिभूतात्मनृणांपितृणांनकिंकरोनायमृणीचराजन् ॥
३९ सर्वात्मनायःशरणंशरण्यंगतोमुकुंदंपरिहृत्यकर्तम् ४२ स्वपादमूलंभजतःप्रियस्यत्यक्तान्यभावस्यहरिःपरेशः ॥ विकर्मयच्चोत्पतितंकथंचिद्धुनोतिसर्वंहृदि
४८ संनिविष्टः ४३ ॥ नारदउवाच ॥ धर्मान्भागवतानित्थंश्रुत्वाथमिथिलेश्वरः ॥ जायंतेयान्मुनीन्प्रीतःसोपाध्यायोह्यपूजयत् ४४ ततोंऽतर्दधिरेसिद्धाः
सर्वलोकस्यपश्यतः ॥ राजाधर्मानुपातिष्ठन्नवापपरमांगतिम् ४५ त्वमप्येतान्महाभागधर्मान्भागवताञ्श्रुतान् ॥ आस्थितःश्रद्धयायुक्तोनिःसंगो
यास्यसेपरम् ४६ युवयोःखलुदंपत्योर्यशसापूरितंजगत् ॥ पुत्रतामगमद्यद्वांभगवानीश्वरोहरिः ४७ दर्शनालिंगनालापैःशयनासनभोजनैः ॥ आत्मा
वांपावितःकृष्णेपुत्रस्नेहंप्रकुर्वतोः ४८

चूर्णिका

क्वचित् क्वचित् द्राविडेषु च वहुशः तत्रापि यत्र ताम्रपर्णी कृतमाला पयस्विनी कावेरी प्रतीची इति महानद्यः संति ३९ तासां जलं च ये पिबंति ते प्रायः भक्ताः भविष्यंति ४० ४१ अथ भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह यः भक्तः भेदं हित्वा सर्वभावेन मुकुंदं शरणं गतः सः देवर्षिपित्रादीनां ऋणी न स्यात् ४२ किं च स्वपादमूलं भजतः भक्तस्य विकर्म यदि स्यात् तर्हि तदपि हृदिस्थः हरिः धुनोति ४३ ॥ नारद उवाच ॥ एवं मिथिलेश्वरः भगवद्धर्मान् श्रुत्वा जायंतेयान् मुनी
॥२८॥
न् अपूजयत् ४४ ततः ते सिद्धाः अंतर्दधिरे ततः राजा तान् धर्मान् आस्थितः सन् परमां गतिं आप ४५ हे वसुदेव त्वमपिएतान् धर्मान् आस्थितः सन् निःसंगो भूत्वा परं यास्यसे ४६ किं च यतः वां पुत्रतां हरिः प्राप्तः अतः युवयोर्यशसा जगत्पूर्णम् ४७ तथा कृष्णे पुत्रस्नेहं कुर्वतोःवां देहः तस्य दर्शनादिभिःशोधितः ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतदेवकैमुत्यन्यायेनस्फुटयति । वैरेणेति यंशयनासनादौवैरेणापिध्यायतस्तस्यगतिविलासाद्यैराकृतधियस्तत्तदाकाराढ्याधीर्येषांतेतत्सारूप्यमापुः । किंपुनर्वक्तव्यमनुरक्तधियांतत्साम्यंभवतीति ४९
ननु पुत्रस्नेहश्चेन्मोक्षहेतुस्तर्हिसर्वेमुच्येरन् । तत्राह । अपत्यबुद्धिमाकृथाः । अडागमश्छांदसः ५० ननु कथमीश्वरोमानुषः कथंवातस्यविश्वसृष्ट्यादिकर्तुः पूतनाशोषणादिकमाश्चर्यमिवनिरूप्यते त
त्राह । भूभाररूपाअसुराएवयेराजन्यास्तेषांहंतवेतान्हंतुं निवृत्त्यैमोक्षाय ५१ ५२ इहअस्मिन्नेवदेहे । शमलंमोहंविधूयब्रह्मभूयायब्रह्मत्वायकल्पते ५३ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधे
टीकायांपंचमोऽध्यायः ५ ॥ ॥ छ ॥ ॥ षष्ठेब्रह्मादिभिः स्तुत्वागंतुंविज्ञापितंहरिं । उद्धवः प्रार्थयामासस्वधामनयमामिति ॥ १ ॥ अतःपरंविस्तरेणात्मविद्यांनिरूपयितुं ॥ ५ ॥
तत्प्रस्तावमाह । आत्मजैः सनकादिभिः अभ्यगात् । द्वारकामितिचतुर्थेनान्वयः १ २ ३ ननु तेषांउपेंद्रादिरूपंभगवंतंनित्यंपश्यतां केयं दिदृक्षेत्यतआह वपुषेति । येनवपुषानरलोकेषुयशोवितेने
॥२९॥ तदतिसुंदरं वपुर्दिदृक्षवः ४ व्यचक्षत अपश्यन् ५

वैरेणयंनृपतयःशिशुपालपौंड्रशाल्वादयोगतिविलासविलोकनाद्यैः ॥ ध्यायंतआकृतधियःशयनासनादौतत्साम्यमीयुरनुरक्तधियांपुनःकिम् ४९ माप श्लोकाः
त्यबुद्धिमकृथाःकृष्णेसर्वात्मनीश्वरे ॥ मायामनुष्यभावेनगूढैश्वर्येपरेऽव्यये ५० भूभारासुरराजन्यहंतवेगुप्तयेसताम् ॥ अवतीर्णस्यनिर्वृत्यैयशोलोकेवि
तन्यते ५१ ॥ श्रीशुकउवाच ॥ एतच्छ्रुत्वामहाभागोवसुदेवोतिविस्मितः ॥ देवकीचमहाभागाजहतुर्मोहमात्मनः ५२ इतिहासमिमंपुण्यंधारयेद्यः ४९/५
समाहितः ॥ सविधूयेहशमलंब्रह्मभूयायकल्पते ५३ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपंचमोध्यायः ५ ॥ ॥ छ ॥ ॥
॥ श्रीबादरायणिरुवाच ॥ अथब्रह्मात्मजैर्देवैःप्रजेशैरावृतोऽभ्यगात् ॥ भवश्चभूतभव्येशोययौभूतगणैर्वृतः १ इंद्रोमरुद्भिर्भगवानादित्यावसवोऽश्विनो ॥
ऋभवोंगिरसोरुद्राविश्वेसाध्याश्चदेवताः २ गंधर्वाप्सरसोनागाःसिद्धचारणगुह्यकाः ॥ ऋषयःपितरश्चैवसविद्याधरकिंनराः ३ द्वारकामुपसंजग्मुःसर्वे
कृष्णदिदृक्षवः ॥ वपुषायेनभगवान्नरलोकेमनोरमः ॥ यशोवितेनेलोकेषुसर्वलोकमलापहम् ४ तस्यांविभ्राजमानायांसमृद्धायांमहर्षिभिः ॥
व्यचक्षतावितृप्ताक्षाःकृष्णमद्भुतदर्शनम् ५

चूर्णिका

किं च यं शिशुपालपौंड्रशाल्वादयः वैरेण ध्यायंतः तत्सारूप्यमापुः अनुरक्तधियां सारूप्यं स्यादिति किं वक्तव्यम् ४९ एवमपि हे वसुदेव कृष्णे अपत्यबुद्धिं मा कु
थाः ५० यतः भूभारहरणार्थं मोक्षार्थं च लोके अवतीर्णस्य यशः वितन्यते ५१ ॥ श्रीशुक उवाच ॥ एतत् वसुदेवः देवकी च श्रुत्वा मोहं जहतुः ५२ इतिहास
मिमं पुण्यं धारयेद्यः समाहितः सविधूयेह शमलं ब्रह्मभूयाय कल्पते ५३ इत्येकादशे पंचमः ५ ॥ ॥ छ ॥ ॥ श्रीशुक उवाच ॥ अथ ब्रह्मा सनकादिभिः
प्रजेशैश्च नुतः तथा भूतगणैः भवः मरुद्भिः इंद्रः तथा आदित्याः वसवः अश्विनौ ऋभवः अंगिरसः रुद्राः विश्वेसाध्याः गंधर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ऋष ॥२९॥
यः पितरः विद्याधराः किन्नराः एवं एते सर्वे येन वपुषा श्रीहरिः मनोरमः सन् लोकेषु यशो वितेने तत् सुंदरं वपुः द्रष्टुं प्राप्ताः १ २ ३ ४ ततः द्वारकायां श्रीकृ
ष्णं दृष्ट्वा स्वर्गोद्यानस्थैर्माल्यैः कृष्णं छादयंतः गीर्भिः तुष्टुवुः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्वर्गोद्यानस्थैर्माल्यैः चित्राणि शृंखलाबंधमायाणिपदानिअर्थाश्चयासुताभिर्गीर्भिः ६ बुद्धींद्रियादिभिर्दर्शनादिनाप्राणेनचबलहेतुनादंडवत्प्रणिपातेनवयंनताः नमस्कृतवंतः । स्मेतिविस्मये । यथाहुः "दोर्भ्यां पद्भ्यांचजानुभ्यामुरसाशिरसादृशा । मनसावचसाचेतिप्रणामोष्टांगईरित" इति । स्मशब्दोक्तविस्मयायविशेषणं कर्ममयादुरुपाशान्मुमुक्षुभिः भावयुक्तैरपियत्केवलमंतर्हृदिचिंत्यतेनतुदृश्यतेतद्वयं नताअहोभाग्यमित्यर्थः ७ ननु ममापिदृश्यकर्मकरणात्कुतोमत्पादारविंदचिंतनंकर्मपाशान्मुमुक्षुभिःक्रियतेतत्राहुः । त्वमिति । हे अजित । आस्तामिदानींतनमिदमल्पंकर्म । त्वंअव्यक्तमहदादिप्रपंचंसृजसि पालयसि संहरसि च । तदप्यात्मन्येवनपृथक्दुर्विभाव्यंमनसाप्यन्यैरवितर्क्यं । तद्गुणस्थः तस्यामायायागुणेषुनियंतृत्वेनस्थितः अथ च एतैः कर्मभिः भवान्नाज्यते नलिप्यते कुतः योभवाननवद्यः रागादिरहितः यतः स्वेआत्मरूपेसुखेअव्यवहितेअनावृतेअभिरतः अतस्त्वंकर्मकुर्वन्नप्यात्मारामःपरमेश्वरइतिमुमुक्षुभिश्चिंत्यत इतिभावः ८ नन्वात्मारामस्यकिंकर्मकरणेन अतआहुः शुद्धिरिति हेईश दुष्टाशयानांरागिणांविद्याउपासना । विद्यादिभिस्तथाशुद्धिर्नभवति । सत्त्वात्मनां (सात्विकानां) सतां तेयशसिश्रवणेनसंभृतयापरिपुष्टयाअतिवृद्धयासच्छ्रद्धयायथास्यात् । परमपावनस्य यशसोवितानायतवकर्माचरणमितिभावः ९ तदेवंत्वद्यशसिश्रद्धैवशुद्धिहेतुरस्तुअस्माभिस्तुतवांघ्रिर्दृष्टः अतस्तवांघ्रिर्नोऽस्माकं अशुभाशयानांविषयवासनानांधूमकेतुःतद्दाहकःस्यात्। कथंभूतः यःक्षेमाय मोक्षाय मुनिभिः मुमुक्षुभिः प्रेमार्द्रहृदा ऊह्यमानःचिंत्यमानःयश्चसात्वतैर्भक्तैःसमविभूतयेसमानैश्वर्यायवासुदेवादिव्यूहेऽर्चितः तेषुचकैश्चिदात्मवद्भिः जितात्मभिर्धीरैःस्वरतिक्रमायस्वर्गमतिक्रम्यवैकुंठप्राप्तये सवनशस्त्रिकालमर्चितः १०किंचप्रयतपाणिभिः संयतहस्तैर्हविर्गृहीत्वा अध्वराग्नौआहवनीयादौ याज्ञिकैर्यश्चिंत्यते । ननु "यस्यैदेवतायैहविर्गृहीतंस्यात्तांध्यायेद्वषट्करिष्यन्नि" तिवचनात्तत्तद्देवताश्चिंत्यंते अतआहुः । त्रय्यानिरुक्तेनविधिना । इंद्रादिरूपेणत्वमेवयज्ञपुरुषश्चिंत्यतइत्यर्थः । उतकिंच । अध्यात्मयोगेआत्माधिकारेयोगेयोगिभिरपिआत्मनस्तवमायांअणिमादिंजिज्ञासुभिस्तत्कामैर्यश्चिंत्यते । परमभागवतैरपिमुक्तैर्यःपरीष्टःसर्वतःपूजितःसतवांघ्रिर्नोऽशुभाशयधूमकेतुःस्यादितिपूर्वेणान्वयः ११

श्लोकाः ६—११

स्वर्गोद्यानोपगैर्माल्यैश्छादयंतोयदूत्तमम् ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरम् ६॥ देवाऊचुः ॥ नताःस्मतेनाथपदारविंदंबुद्धींद्रियप्राणमनोवचोभिः ॥
यच्चिंत्यतेंऽतर्हृदिभावयुक्तैर्मुमुक्षुभिःकर्ममयोरुपाशात् ७त्वंमाययात्रिगुणयात्मनिदुर्विभाव्यंव्यक्तंसृजस्यवसिलुंपसितद्गुणस्थः ॥ नैतैर्भवानजितकर्मभिरज्य
तेवैयत्स्वेसुखेऽव्यवहितेऽभिरतोऽनवद्यः८शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रुताध्ययनदानतपःक्रियाभिः ॥सत्त्वात्मनामृषभतेयशसिप्रवृद्धसच्छ्रद्धया
श्रवणसंभृतयायथास्यात्९स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुःक्षेमाययोमुनिभिरार्द्रहृदोह्यमानः ॥ यःसात्त्वतैःसमविभूतयआत्मवद्भिर्व्यूहेऽर्चितःसवनशःस्वर
तिक्रमाय१०यश्चिंत्यतेप्रयतपाणिभिरध्वराग्नौत्रय्यानिरुक्तविधिनेशहविर्गृहीत्वा ॥अध्यात्मयोगउतयोगिभिरात्ममायांजिज्ञासुभिःपरमभागवतैःपरीष्टः११

चूर्णिका

६ ॥ देवा ऊचुः ॥ हे नाथ मुमुक्षुभिः यत् हृदि चिंत्यते तत् ते चरणारविंदं नताः स्म७ किं च त्वं मायया स्वात्मनि इदं सृजसि पासि अत्सि तथापि तैः त्वं न लिप्यसे८ अपि च हे ईश त्वद्यशःश्रद्धया सतां यथा शुद्धिःस्यात् तथा नृणां विद्याश्रुतादिभिर्न ९ किं च अस्माभिः तवांघ्रिः दृष्टः सः अस्मद्विषयवासनानां दाहकः स्यात् किंभूतः सः मुमुक्षुभिः मोक्षार्थं चिंत्यमानः तथा भक्तैः समविभूतये अर्चितः धीरैः वैकुंठप्राप्तये अर्चितः १० तथा हविर्गृहीत्वा यज्ञे याज्ञिकैः यः चिंत्यते योगिभिः अणिमाद्यर्थं यः चिंत्यते तथा मुक्तैः सर्वतः पूजित इति ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.ए. एतेषांचमुनिसात्वतादीनांषण्णांसेवकानांमध्येपरमभागवतेषुलक्ष्म्याअपितवप्रीतिरधिकेतिस्तुवंति । पर्युष्टयेति । इडभावश्छांदसः । अहंयत्रवसामितत्रैववक्षसिपर्युषितापीयंवसतीतिप्रतिपत्निवत्सप अ० त्नीवत्श्रीःसंस्पर्धमानाभवति । तथापितांस्पर्धमानांश्रियमनादृत्य योभवान्पर्युषितयापिअमुयावनमालयाभक्तैरर्पितेयमितिप्रीत्यासुप्रणीतंसुष्ठुसंपादितंयथाभवतितथाऽर्हणंपूजामाददत्स्वीकृतवान् ।

टीका सुप्रणीतमित्यर्हणविशेषणंवा । तस्यतवांघ्रिर्नोऽशुभाशयधूमकेतुर्भूयात् । यद्वा योंऽघ्रिरमुयाकृत्वा सुप्रणीतंसमर्पितंअर्हणमाददत्सनोऽशुभाशयधूमकेतुरित्यन्वयः । अथचैवंसंबंधः । एतेभ्योऽध्यानार्च नादिनिष्ठेभ्योपि त्वद्यशसिप्रवृद्धसच्छ्रद्धावंतएवकृतार्थाभगवतोयशःप्रियत्वादित्याहुः । पर्युष्टया वशकांतावित्यस्मात्परितः सर्वांगेउष्टया कांतयाशोभितयावनमालयावक्षसिएकदेशेवर्तमानाश्रीःसं ॥ ६ ॥ स्पर्धमानाभवतितथाप्याम्नायमधुव्रतैर्बहुधावर्णितयाकीर्तिमय्यावैजयंत्यावनमालयैवयोभवान्सुप्रणीतमर्हणमाददादित्यादिपूर्ववत् १२ त्वच्चरणस्यभक्तपक्षपातः प्रसिद्धएवेतिस्तुवंतः प्रार्थयंते केतुरिति ।

॥३१॥ बलिबंधनेत्रिभिर्विक्रमैर्युतः । तत्रद्वितीयविक्रमेसत्यलोकंगतस्तवपादः केतुः अत्युच्छ्रितोविजयध्वजइव । तत्संपादयंति त्रिपतत्पताकः त्रिधापतंतीत्रिषुलोकेषुवापतंतीगंगापताकायस्यसः तथाअसुरदे वचम्वोः तत्सेनयोरुभयोः (क्रमेण) भयाभयकरः । साधुषुसुरेषुस्वर्गायखलेष्वसुरेष्वितरायअधोगमनाय । यएवंकेतुरूपस्तेपादः सभजतांनःअघंपुनातुशोधयतु अघादितिपाठेभजतांनः इतिकर्मणिषष्ठ्यौ । अघाद्भजतोऽस्मान्पुनात्विति । तथाचश्रुतिः । "चरणंपवित्रंविततंपुराणंयेनपूतस्तरतिदुष्कृतानि । तेनपवित्रेणशुद्धेनपूताअतिपाप्मानमरातिंतरेम । लोकस्यद्वारमर्चिमत्पवित्रंज्योतिष्मद्भ्राजमानं महस्वत् । अमृतस्यधाराबहुधादोहमानंचरणंनोलोकेसुधितांदधात्वि"ति १३ ननु युद्धेदेवासुरादयः परस्परंजयंतिजीयंतेचकिमहंतत्रेत्याहुः । नसीति । मिथुर्मिथः । अर्द्यमानाः युद्धादिभिः पीड्य मानाः ब्रह्मादयोपियस्यतववशेभवंति नतुजयेपराजयेवास्वतंत्राः । कइव । नसिनासिकायांओताः नासिकामाविध्यबद्धाः गावोबलीवर्दाइव । कुतः कालस्यकलयितुः प्रवर्तकस्य । तदेवकुतः । प्रकृ तिपूरुषयोरपिपरस्यतवपुरुषोत्तमस्यपादोनः शंतनोतु १४ प्रकृतिपूरुषाभ्यांपरत्वमुपपादयंतः कालत्वेनपुरुषोत्तमत्वमाहुः । अस्येति । अस्यजगतः उदयादीनांहेतुरसि । कुतः । अव्यक्तंप्रकृतिः जी वः पुरुषः महान्महत्तत्त्वम् । तेषांकालंनियंतारंत्वामाहुः । "अक्षरात्परतः परः महतःपरमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्नपरंकिंचित्साकाष्ठासापरागति"रितिश्रुतेः । किंच । अयंसंवत्सरात्म कोयःकालस्त्रिनाभिः त्रीणिचातुर्मास्यानिनाभयोयस्यसोपित्वमेव । अतस्त्वमुत्तमपूरुषइति । तथाचगीतासु । "यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः । अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तम"इति १५

पर्युष्टयातवविभोवनमालयेयंसंस्पर्धिनीभगवतीप्रतिपत्निवच्छ्रीः ॥ यःसुप्रणीतममुयार्हणमाददन्नोभूयात्सदांघ्रिरशुभाशयधूमकेतुः १२ केतुस्त्रिविक्रमयु श्लोकाः
तस्त्रिपतत्पताकोयस्तेभयाभयकरोऽसुरदेवचम्वोः ॥ स्वर्गायसाधुषुखलेष्वितरायभूमन्पादःपुनातुभगवन्भजतामघंनः १३ नस्योतगावइवयस्यवशेभवं
तिब्रह्मादयस्तनुभृतोमिथुरर्द्यमानाः ॥ कालस्यतेप्रकृतिपूरुषयोःपरस्यशंनस्तनोतुचरणःपुरुषोत्तमस्य १४ अस्यासिहेतुरुदयस्थितिसंयमानामव्यक्त १२/१५
जीवमहतामपिकालमाहुः ॥ सोयंत्रिनाभिरखिलापचयेप्रवृत्तःकालोगभीररयउत्तमपूरुषस्त्वम् १५

चूर्णिका किं च सपत्नीवत् भक्तार्पितवनमालया स्पर्धमानां श्रियं अनादृत्य भक्तार्पितामिति प्रीत्या वनमालामेव स्वीकृतवान् तस्य तेंघ्रिर्नः विषयवासनानाशाय स्यात् १२ किं च यः ते चरणः बलिबंधने त्रिविक्रमैः युतः उच्छ्रितः विजयध्वज इव त्रिलोक्यां पतत्पताका गंगारूपा यस्य तथा देवासुरचम्वोः अभयभयकरः नः अघं ॥३१॥ पुनातु हे ईश ब्रह्मादयः सर्वे अर्द्यमानाः संतः १३ कालरूपस्य ते वशे नस्योतगाव इव भवंति एवंभूतस्य तेंघ्रिः नः शं तनोतु १४ किं च अस्य जगतः सर्ग स्थितिनाशानां हेतुर्यः कालः सोपि त्वमेव पुरुषः असि १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्वमेवप्रकृत्यादिद्वाराजगत्सृष्ट्यादिहेतुरित्युक्तम् । तत्केनप्रकारेणतदाहुः । त्वत्तइति । त्वत्तः पुरुषोवीर्यंशक्तिंसमधिगम्य प्राप्य ययामायया महांतंधत्ते । किमिव । अस्यविश्वस्यगर्भमिव । सोयंमहा
न्तयैवमाययाऽनुगतःसन् आत्मनः सकाशात्आंडकोशंससर्ज । त्वयानुगतइतिपाठेपितयामाययात्वयाचाधिष्ठितः सन्नित्यर्थः १६ नन्वेवंभूतमीश्वरत्वंममकुतोवगतंतदाहुः । तदिति । तत्तस्मात्तस्थुषः
स्थावरस्यजगतोजंगमस्यचभवानधीशः । यद्यस्मान्माययाउत्थाउज्जृंभितायागुणविक्रियाइंद्रियवृत्तिः तयोपनीतानर्थान्विषयाञ्जुषमाणोपिहेहृषीकपतेनलिप्तस्त्वंयेत्वन्येजीवायोगिनोवास्वतःपरिहृ
तादपिअविद्यमानात्त्यक्ताद्वाविषयजोषणाद्बिभ्यति । वासनामात्रेणबध्यंतइत्यर्थः १७ अलिप्तत्वमाहुः स्मायेति । स्मायावलोकःमंदस्मितविलसितोऽवलोकः तस्यलवःकटाक्षः तेनदर्शितोयोभावो
ऽभिप्रायस्तेनमनोहारियद्भ्रूमंडलंतेनप्रहितायेसौरतामंत्रास्तैःशौंडैः प्रगल्भैः अनंगबाणैः समोहनैःकरणैःकामकलाभिःषोडशसहस्रंपत्न्यःयस्येंद्रियंमनःविमथितुंक्षोभयितुंनविभ्व्यः नसमर्थाः सभवान्नालि
प्तइतिपूर्वेणान्वयः १८ तत्तस्मात्तवअमृतरूपायाकथातदेव (उदं) उदकंवहंतीतितथाकीर्तिनद्यः तथापादावनेजसरितः पादोदकनद्योगंगाद्याश्चत्रिलोक्याः शमलानिहंतुंविभ्व्यः केनप्रकारेण । आ
नुश्रवंगुरोरुच्चारणमनुश्रूयतेइत्यनुश्रवोवेदस्तत्रभवंकीर्तिरूपंतीर्थं श्रुतिंभिःश्रवणेंद्रियैः अंघ्रिजंचांगसंगैः एवंशुचिषदः स्वाश्रमधर्मस्थिताः तवतीर्थद्वयंउपस्पृशंतिसेवंते १९ विबुधैःसह २० २१ वि
क्षिप्ताविस्तारिता २२ उद्दामानिवृत्तानिविक्रमायेषुतानिकर्माणि २३ २४

॥३२॥

श्लोकाः १६/२४

त्वत्तःपुमान्समधिगम्ययथास्यवीर्यंधत्तेमहांतमिवगर्भममोघवीर्यः ॥ सोयंतयानुगतआत्मनआंडकोशंहैमंससर्जबहिरावरणैरुपेतम् १६ तत्तस्थुषश्च
जगतश्चभवानधीशोयन्माययोत्थगुणविक्रिययोपनीतान् ॥ अर्थाञ्जुषन्नपिहृषीकपतेनलिप्तोयेन्येस्वतःपरिहृतादपिबिभ्यतिस्म १७ स्मायावलोकलव
दर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तुषोडशसहस्रमनंगबाणैर्यस्येंद्रियंविमथितुंकरणैर्नविभ्व्यः १८ विभ्व्यस्तवामृतकथोदवहास्त्रिलो
क्याःपादावनेजसरितःशमलानिहंतुम् ॥ आनुश्रवंश्रुतिभिरंघ्रिजमंगसंगैस्तीर्थद्वयंशुचिषदस्तउपस्पृशंति १९ ॥ श्रीशुकउवाच ॥ इत्यभिष्टूयविबुधैः
सेशःशतधृतिर्हरिम् ॥ अभ्यभाषतगोविंदंप्रणम्यांबरमाश्रितः २० ॥ श्रीब्रह्मोवाच ॥ भूमेर्भारावतारायपुराविज्ञापितःप्रभो ॥ त्वमस्माभिरशेषात्मंस्त
त्तथैवोपपादितम् २१ धर्मश्चस्थापितःसत्सुसत्यसंधेषुवैत्वया ॥ कीर्तिश्चदिक्षुविक्षिप्तासर्वलोकमलापहा २२ अवतीर्ययदोर्वंशेबिभ्रद्रूपमनुत्तमम् ॥ कर्मा
ण्युद्दामवृत्तानिहितायजगतोऽकृथाः २३ यानितेचरितानीशमनुष्याःसाधवःकलौ ॥ शृण्वंतःकीर्तयंतश्चतरिष्यंत्यंजसातमः २४

चूर्णिका

किं च हे विभो पुरुषः त्वत्तः शक्तिं प्राप्य मायया अस्य गर्भमिव महत्तत्वं धत्ते सोयं महान् सावरणं आंडकोशं ससर्ज १६ अत एव त्वं जगतः अधीशोसि १७ किं
च षोडशसहस्रं पत्न्यस्तु कामबाणैः यस्य ते मनः क्षोभयितुं न समर्थाः सः भवान् कर्मभिरलिप्त इति १८ हेईश तव अमृतकथोद्वाहाः कीर्तिनद्यः तथापादावने
जसरितः गंगाद्याः त्रिलोक्याः शमलानि हंतुं विभ्व्यः केन प्रकारेण तदुभयं तीर्थंश्रवणेंद्रियैः अंगसंगैश्चयेसेवंते तेषामिति १९ ॥ श्रीशुक उवाच ॥ एवं स्तुत्वा देवैः
सह ब्रह्मा हरिं प्रणम्य खमाश्रित्य उवाच ॥ २० हे प्रभो अस्माभिः भूभारहरणाय पुरा यथा विज्ञापितः तथैव संपादितम् २१ तथा सत्सु धर्मः स्थापितः कीर्तिश्च
दिक्षु विस्तारिता २२ किं च यदुवंशे अवतीर्य हितार्थं कर्माणि अकृथाः २३ यानि ते चरितानीश मनुष्याः साधवः कलौ शृण्वंतः कीर्तयंतश्च तरिष्यंत्यंजसा तमः २४ ॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२५ २६ २७ २८ वीर्यशौर्ययुक्तयाश्रिया (लोकंजिघृक्षत्पीडयितुमिच्छदित्यर्थः) २९ उद्वेलेनलंघितमर्यादेन । ३० वैकुंठंयास्यन् तवभवनंयास्यामि ३१ ३२ ३३ (ब्राह्मणेभ्यःसकाशात्) ३४ प्रभासंयास्यामइतिवदतोऽयमभिप्रायः । एतेदेवांशाः स्वाधिकारानेवार्हंति नतु सद्योमोक्षं द्वारवत्यांतुमृताविमुच्येरन् । तस्मादभ्युदयफलं प्रभासंनेष्यामीति (माचिरंविलंबोनकर्तव्यइत्यर्थः) ३५ दक्षशापाद्यक्ष्मरोगेणगृहीतश्चंद्रोयत्रस्नात्वैवकिल्बिषाद्रोगदुःखात्सद्योमुक्तः सन् भूयः कलावृद्धिंभेजे (तंप्रभासं) ३६ उशिजःकमनीयान् अंधसाअन्नेन ३७ उस्वेति (पदेन) यथासुक्षेत्रेबीजमुप्तंबहुफलं भवति तथादानंसत्पात्रइतिद्योतितं ३८

॥३३॥ यदुवंशेऽवतीर्णस्यभवतःपुरुषोत्तम ॥ शरच्छतंव्यतीयायपंचविंशाधिकंप्रभो २५ नाधुनातेऽखिलाधारदेवकार्यावशेषितम् ॥ कुलंचविप्रशापेननष्ट प्रायमभूदिदम् २६ ततःस्वधामपरमंविशस्वयदिमन्यसे ॥ सलोकांल्लोकपालान्नःपाहिवैकुंठकिंकरान् २७ ॥ श्रीभगवानुवाच ॥ अवधारितमेतन्मे यदात्थविबुधेश्वर ॥ कृतंवःकार्यमखिलंभूमेर्भारोवतारितः २८ तदिदंयादवकुलंवीर्यशौर्यश्रियोन्नतम् ॥ लोकंजिघृक्षद्रुद्धंमेवेलयेवमहार्णवः २९ यद्यसंहृ त्यदृप्तानांयदूनांविपुलंकुलम् ॥ गंतास्म्यनेनलोकोयमुद्वेलेनविनंक्ष्यति ३० इदानींनाशआरब्धःकुलस्यद्विजशापतः ॥ यास्यामिभवनंब्रह्मन्नेतदंतेतवा नघ ३१ ॥ श्रीशुकउवाच ॥ इत्युक्तोलोकनाथेनस्वयंभूःप्रणिपत्यतम् ॥ सहदेवगणैर्देवःस्वधामसमपद्यत ३२ अथतस्यांमहोत्पातान्द्वारवत्यांसमुत्थि तान् ॥ विलोक्यभगवानाहयदुवृद्धान्समागतान् ३३ ॥ श्रीभगवानुवाच ॥ एतेवैसुमहोत्पाताव्युत्तिष्ठंतीसहर्वशः ॥ शापश्चनःकुलस्यासीद्ब्राह्मणे भ्योदुरत्ययः ३४ नवस्तव्यमिहास्माभिर्जिजीविषुभिरार्यकाः ॥ प्रभासंसुमहापुण्यंयास्यामोऽद्यैवमाचिरम् ३५ यत्रस्नात्वादक्षशापाद्गृहीतोयक्ष्मणो डुराट् ॥ विमुक्तःकिल्बिषात्सद्योभेजेभूयःकलोदयम् ३६ वयंचतस्मिन्नाप्लुत्यतर्पयित्वापितॄन्सुरान् ॥ भोजयित्वोशिजोविप्रान्नानागुणवतांऽधसा ३७ तेषुदानानिपात्रेषुश्रद्धयोप्त्वामहांतिवै ॥ वृजिनानितरिष्यामोदानैर्नौभिरिवार्णवम् ३८

श्लोकाः २५/३८

चूर्णिका किं च हे कृष्ण यदुवंशे अवतीर्णस्य ते पंचविंशाधिकं शरच्छतं व्यतीयाय २५ तथा देवकार्यमपि नावशिष्टं इदं कुलं च शापतः नष्टप्रायम् २६ अतः यदि मन्यसे तर्हि वैकुंठं विशस्व नः लोकपालान् पाहि २७ ॥ श्रीभगवानुवाच ॥ हे ब्रह्मन् यत् त्वं आत्थ तत् अवधारितं वः सर्वं कार्यं कृतम् २८ इदं यादवकुलं लोकं जिघृक्षत् मया रुद्धम् २९ यदि इदं असंहृत्य गमिष्यामि तर्हि अनेन लोकः नंक्ष्यति ३० अतः एतत्कुलस्य नाशः आरब्धःतदंते अहं वैकुंठं यास्यन् ते भवनं यास्यामि ३१ ॥ श्रीशुक उवाच ॥ एवं श्रीकृष्णेन उक्तः ब्रह्मा देवैः सह स्वधाम अगात् ३२ अथ द्वारवत्यां महोत्पातान् दृष्ट्वा श्रीकृष्णः यदुवृद्धानाह ३३ ॥ श्रीभगवानुवाच ॥ हे यादवाः एते उत्पाताः सर्वतः उत्तिष्ठंति नः कुलस्य विप्रशापः आसीत् ३४ अतोत्र न वस्तव्यम् अद्यैव पुण्यं प्रभासं यास्यामः माचिरम् ३५ चंद्रः दक्षशापात् क्षयरोग्यपि यत्र स्नात्वा मुक्तः सन् पुनः कलावृद्धिं भेजे ३६ अतः वयं तत्र गत्वा स्नात्वा पितृसुरान् तर्पयित्वा विप्रांश्च भोजयित्वा ३७ तेभ्यः दानानि दत्वा नौभिः अर्णवमिव दुःखानि तरिष्यामः ३८ ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

३९ ४० ४१ लोकंमर्त्यलोकंयद्यस्मान्नप्रत्यहन्प्रतिहतवान् ४२ ४३ ४४ शय्यादिषुत्वांभक्तानित्यंसेवितवंतोवयंकथंत्यजेम ४५ त्यक्तुमशक्नुवन्प्रार्थयते । नमायाभयादित्याह त्वयेति । चर्चिता
अलंकृताः हिनिश्चितं ४६ संन्यासिनोहिब्रह्मचर्यादिक्लेशैः कथंचित्तरंतिवयंत्वनायासेनैवतरिष्यामइत्याह । वातरशनाइति । ऊर्ध्वमंथिनः ऊर्ध्वरेतसः (वातरशनानग्नाइत्यर्थः) ४७ तावकैर्भक्तैः
सहत्वद्वार्तया । दुस्तरंतमः संसारम् ४८ क्ष्वेलिःपरिहासः । द्वंद्वैकत्वं । (नृलोकानुकरणंयद्गत्यादितच्चस्मरंतः) ४९ एकांतिनमित्यादिस्वाभिप्रायावंचनेहेतुः ५० ॥ ॥ इतिश्रीभागवतेमहापुराणे
एकादशस्कंधेषष्ठोध्यायः ६ ॥ ७ ॥ ॥ सप्तमेतूद्धवायात्मज्ञानसिद्ध्यैहरिःस्वयं । अवधूतेतिहासोक्तगुरुष्वष्टाववर्णयत् ॥१॥ यदात्थसंहृत्यैतत्कुलमितिममस्ववर्गासंवैकुंठवासंप्रति (प्रार्थितवंतः) १ २

॥३४॥ ॥ श्रीशुकउवाच ॥ एवंभगवतादिष्टायादवाःकुलनंदन ॥ गंतुंकृतधियस्तीर्थंस्यंदनान्समयूयुजन् ३९ तन्निरीक्ष्योद्धवोराजञ्छ्रुत्वाभगवतोदितम् ॥ दृष्ट्वा
रिष्टानिघोराणिनित्यंकृष्णमनुव्रतः ४० विविक्तउपसंगम्यजगतामीश्वरेश्वरम् ॥ प्रणम्यशिरसापादौप्रांजलिस्तमभाषत ४१ ॥ उद्धवउवाच ॥ देवदेवेशयो
गेशपुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलंनूनंलोकंसंत्यक्ष्यतेभवान् ॥ विप्रशापंसमर्थोपिप्रत्यहन्नयदीश्वरः ४२ नाहंतवांघ्रिकमलंक्षणार्धमपिकेशव ॥ त्य
क्तुंसमुत्सहेनाथस्वधामनयमामपि ४३ तवविक्रीडितंकृष्णनृणांपरममंगलम् ॥ कर्णपीयूषमास्वाद्यत्यजत्यन्यस्पृहांजनः ४४ शय्यासनाटनस्थान
स्नानक्रीडाशनादिषु ॥ कथंत्वांप्रियमात्मानंवयंभक्तास्त्यजेमहि ४५ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः ॥ उच्छिष्टभोजिनोदासास्तवमायांजये
महि ४६ वाताशनायऋषयःश्रमणाऊर्ध्वमंथिनः ॥ ब्रह्माख्यंधामतेयांतिशांताःसंन्यासिनोऽमलाः ४७ वयंत्विहमहायोगिन्भ्रमंतःकर्मवर्त्मसु ॥ त्व
द्वार्तयातरिष्यामस्तावकैर्दुस्तरंतमः ४८ स्मरंतःकीर्तयंतस्तेकृतानिगदितानिच ॥ गत्युत्स्मितेक्षणक्ष्वेलियन्नृलोकविडंबनम् ४९ एवंविज्ञापितोराजन्
भगवान्देवकीसुतः ॥ एकांतिनंप्रियंभृत्यमुद्धवंसमभाषत ५० ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेषष्ठोध्यायः ६ ॥ ॥ ७ ॥ ॥ ७ ॥
॥ श्रीभगवानुवाच ॥ यदात्थमांमहाभागतच्चिकीर्षितमेवमे ॥ ब्रह्माभवोलोकपालाःस्वर्वासंमेऽभिकांक्षिणः १ मयानिष्पादितंह्यत्रदेवकार्यमशेषतः ॥
यदर्थमवतीर्णोहमंशेनब्रह्मणार्थितः २

श्लोकाः ३९/२

चूर्णिका

॥ श्रीशुकउवाच ॥ एवं भगवता आदिष्टाः यादवाः गमनार्थं रथान् अयूयुजन् ३९ ततः एतत्सर्वं श्रुत्वा अरिष्टानि च दृष्ट्वा ४० उद्धवः श्रीकृष्णं एकांते संगम्य
प्रांजलिः आह ४१ हे देवदेवेश एतत्कुलं संहृत्य लोकं नूनं त्यक्ष्यसे यतः समर्थोऽपि शापं न प्रतिहतवान् ४२ अतः तवांघ्रिकमलं क्षणार्धमपि त्यक्तुं नोत्सहे हे
नाथ मां स्वधाम नय४३हे कृष्ण ते क्रीडितं नृणां मंगलं४४किं च शय्यासनादिषु वर्तमानं त्वां वयं कथं त्यजेम ४५ त्वया उपभुक्तस्रगादिभिः अलंकृताः उच्छिष्टभो
जिनः ते मायां जयेम ४६ किं च ऊर्ध्वरेतसः ऋषयः यत् धाम यांति४७ तद्धाम भक्तैः सह त्वद्वार्तया संसारं तीर्त्वा४८तेकृतानि गदितानि च स्मरंतःकीर्तयंतश्च त्वद्धाम
यास्यामः ४९ ॥ श्रीशुक उवाच ॥ एवं विज्ञापितो राजन् भगवान् देवकीसुतः एकांतिनं प्रियं भक्तमुद्धवं समभाषत ५० ॥ ॥ इतिएकादशे षष्ठोऽध्यायः ६ ॥ ॥ ७ ॥
॥ श्रीभगवानुवाच ॥ यथात्थमां महाभाग तच्चिकीर्षितमेव च ब्रह्मा भवो लोकपालाः स्वर्वासं मेभिकांक्षिणः १ किं च हे उद्धव यदर्थं अहं अवतीर्णः तदेवकार्यंसंपादितम् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

त्वंसर्वत्यागेनआत्मनिष्ठोभवेतिवक्तुमाह कुलमितित्रयेण । (सप्तमेदिवसेआप्लावयिष्यतिनिमज्जयिष्यति) ३ तदैवायंनष्टमंगलोभविष्यतीतिनिराकृतोनितरामाक्रांतः ४ नवस्तव्यमेवत्वया ५ (तुर वधारणे परित्यज्यैव । गांपृथ्वीम्) ६ ननु गुणदोषाभ्यांविषमेलोकेकुतःसमदृष्टिःस्यामतआह । यदिदमिति । मनआदिभिर्गृह्यमाणंमनोमयत्वान्मायेतिविद्धि । तदपिनस्थिरंकिंतुनश्वरंचविद्धि ७ मनोमयत्वेहेतुः पुंसइति । अयुक्तस्यविक्षिप्तमनसः नानार्थोभेदविषयोभ्रमः सभ्रमएवगुणदोषभाक् । ननु वेदेनैवविधिनिषेधाभ्यांभेदस्यसत्यतोक्ता ।न भ्रमविजृंभितगुणदोषबुद्धेः पुंसःकर्मविहितं । अकर्मतल्लोपः विकर्मनिषिद्धमितिभिदाभेदः प्रोक्तः । अविद्यावद्विषयएववेदइत्यर्थः ८ कथमात्मनिपरिच्छिन्नेविततंजगदीक्षणीयं तत्राह । आत्मानमिति मयिब्रह्मणितद्रूपेणेक्षस्व ९ नन्वेवंयुक्तचित्तत्वेनकर्माकरणेदेवादयोविघ्नान्करिष्यंतितत्राहज्ञानेति । ज्ञानंवेदतात्पर्यनिश्चयः विज्ञानंतदर्थानुभवः । ताभ्यांसम्यग्युक्तः ततआत्मानुभवेनैवतुष्टचित्तः अतः शरीरिणांदेवादीनांआत्मभूतअंतरायैर्नप्रतिहन्यसे । अयंभावः यावदनुभवंयथासंभवंकर्माणिकुर्यादेव । तदनंतरंसर्वेषामात्मभूतत्वान्नकोपिविघ्नानाचरतीति । तथाचश्रुतिः । "तस्यहनदेवाश्चनाभूत्याईशतेआत्माह्येषांसंभवती"ति १० नचोत्पन्नज्ञानस्यापियथेष्टाचरणप्रसंगइत्याह दोषबुद्ध्येति । उभयातीतोगुणदोषबुद्ध्यतीतोपि प्राक्तनसंस्कारान्निषेधान्निवर्ततएव । किंतु नदोषबुद्ध्या (तथा) विहितंचप्रायशः करोति नगुणबुद्ध्या । यथार्भकः संकल्पविकल्परहितः किंचित्करोति कुतश्चिन्निवर्तते तद्वत् ११ यवंभूतस्यनपुनः संसारइत्याह । सर्वभूतेति । नविपद्येत नपुनः संसरेत् ।(ज्ञानविज्ञानयोर्निश्चयोयस्य) १२

श्लोकाः ३/१२

कुलंवैशापनिर्दग्धंनंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रःसप्तमेह्न्येतांपुरीमाप्लावयिष्यति ३ यर्ह्येवायंमयात्यक्तोलोकोयंनष्टमंगलः ॥ भविष्यत्यचिरात्साधोकलिनापिनिराकृतः ४ नवस्तव्यंत्वयैवेहमयात्यक्तेमहीतले ॥ जनोऽधर्मरुचिर्भद्रभविष्यतिकलौयुगे ५ त्वंतुसर्वंपरित्यज्यस्नेहंस्वजनबंधुषु ॥ मय्यावेश्यमनःसम्यक्समदृग्विचरस्वगाम् ६ यदिदंमनसावाचाचक्षुर्भ्यांश्रवणादिभिः ॥ नश्वरंगृह्यमाणंचविद्धिमायामनोमयम् ७ पुंसोऽयुक्तस्यनानार्थोभ्रमःसगुणदोषभाक् ॥ कर्माकर्मविकर्मेतिगुणदोषधियोभिदा ८ तस्माद्युक्तेंद्रियग्रामोयुक्तचित्तइदंजगत् ॥ आत्मनीक्षस्वविततमात्मानंमय्यधीश्वरे ९ ज्ञानविज्ञानसंयुक्तआत्मभूतःशरीरिणाम् ॥ आत्मानुभवतुष्टात्मानांतरायैर्विहन्यसे १० दोषबुद्ध्योभयातीतोनिषेधान्ननिवर्तते ॥ गुणबुद्ध्याचविहितंनकरोतियथाऽर्भकः ११ सर्वभूतसुहृच्छांतोज्ञानविज्ञाननिश्चयः ॥ पश्यन्मदात्मकंविश्वंनविपद्येतवैपुनः १२

चूर्णिका

इदं यदुकुलंच अन्योन्यविग्रहात् नंक्ष्यति ततः सप्तमेऽह्नि एतां पुरीं समुद्रः प्लावयिष्यति ३ यदा अहं इमं लोकं त्यक्ष्ये तदैव अयं लोक. अभद्रः कलिव्याप्तश्च भविष्यति ४ अतः हे सखे अत्र त्वया न वस्तव्यम् यतः अयं जनः कलौ अधर्मरुचिः स्यात् ५ तस्मात् त्वं तु स्वजनबंधुषु स्नेहं हित्वा मयि मनः स्थाप्य समदृक् सन् गां विचरस्व ६ किं च मनोवचनादिभिः गृह्यमाणं इदं प्रपंचमात्रं मायेति नश्वरमिति च विद्धि मनोमयत्वात् मनोमयत्वे हेतुः ७ विक्षिप्तमनसः पुंसः भेदविषयो यं भ्रमः स एव गुणदोषभाक् तथा कर्माकर्मविकर्मेति गुणदोषधियः भेदतः स्युः एवं च अविद्यावद्वि यो वेद इति ८ तस्मात् युक्तचित्तः त्वं इदं विश्वं आत्मनि आत्मानं च मयि पश्यन् ९ ज्ञानविज्ञानसंयुक्तः स्वानुभवतुष्टः सन् विघ्नैः न विहन्यसे १० किं च कर्मणि गुणदोषबुद्ध्यतीतोपि योगीबालक इव कश्चित्कर्म करोति ११ कुतश्चित् निवर्तते एवं वर्तमानो यः मदात्मकं विश्वं पश्यति सः पुनः न संसरति १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

१३ त्वंतुसर्वंपरित्यज्येत्याद्युक्तंआत्मनोऽयोग्यंमन्वानः पृच्छति योगेशेति । योगफलदायिन् । योगविदांन्यास । न्यासोनामअतिगोप्योनिक्षेपविशेषः । यद्वा योगोविन्यस्यतेक्रियतेयस्मिन् । योगे आत्माप्रकटीभावोयस्य । योगस्वरूपेतिवा । योगस्यसंभवोयस्मात् । चतुर्भिरेतैः संबोधनैः स्वमहिम्नाकेवलंत्वयोपदिष्टं नतुमदाधिकारंपर्यालोच्येति द्योतितम् । तदाह । निश्रेयसायेति । नचारोग्याद्यर्थंसर्वस्वदानादिवदयंत्यागः किंतु संन्यासलक्षणः अप्रत्यापत्तिरूपः १४ १५ यंप्रतित्यागाद्युपदिष्टंसोहंमूढमतिः कुतः ममेतिअहमितिचसानुबंधेपुत्रादिसहितेत्वन्माययाविरचितेआत्मनिदेहेविगाढोनिमग्नः अतस्तत्तुभवतानिगदितंयथाहमंजसासंसाधयामि तथाभूतंयंमामनुशाधि शनैः शिक्षय १६ मयासंक्षेपतउक्तंविस्तरतस्त्वन्यान्पृच्छेतिचेत्अतआह । सत्यस्येति । स्वदृशः स्वप्रकाशस्यसत्यस्यात्मनः स्वस्वरूपस्यआत्मनोमांप्रतिवक्तारंतेत्वत्तः अन्यंनानुचक्षे नपश्यामि स्वदृशः स्वतःसिद्धज्ञानात् त्वत्तोऽन्यमितिवा । कुतइत्यतआह । सर्वइति । बहिरर्थभावाविषयेष्वर्थबुद्धयः १७ केचिद्दुःशीलाभवंति । केचित्सेविताः फलकालेविनश्यंति केचिदज्ञाः केचिद्रक्षणेऽसमर्थाः केचित्तुस्वस्थानभ्रष्टाः तद्व्यावृत्यर्थमनवद्यमित्यादीनिपंचविशेषणानि । नअंतः कालतः पारंदेशतश्चयस्यतंकालादिभिरकुंठोविकुंठलोकोधिष्ण्यंस्थानंयस्यतम् । उहेभगवन् । हस्फुटम् । निर्वेदेहेतुः वृजिनैर्दुःखैरभितप्तः । हकारगौरवायवृकारोयुक्तइवपठनीयः । नन्वनवद्यत्वादीनिकुतोममतदाह । नारायणमिति । अनुकंपितामाह । नरोजीवस्तस्यसखायंभवंतंशरणंप्रपद्ये १८ तदेवमसंभावनाविपरीतभावनाभ्यामुपदिष्टंतत्त्वमनवगाहमानंप्रतितन्निवृत्तयेगुरूपदेशंविनापि स्वान्वयव्यतिरेकाभ्यामेवतत्त्वप्रतिपत्तिर्भवतीति दर्शयितुमाह प्रायेणेति लोकतत्त्वस्यविचक्षणाः परीक्षकाः । अशुभाशयात् विषयवासनातः १९ तदुपपादयाति । आत्मनःपश्वादिशरीरेप्यात्मैवहिताहितज्ञानेगुरुः (असौपुरुषः) २०

श्लोकाः १३/२०

॥ श्रीशुकउवाच ॥ इत्यादिष्टोभगवतामहाभागवतोनृप ॥ उद्धवःप्रणिपत्याहतत्त्वजिज्ञासुरच्युतम् १३ ॥ उद्धवउवाच ॥ योगेशयोगविन्यासयोगात्मन्योगसंभव ॥ निश्रेयसायमेप्रोक्तस्त्यागःसंन्यासलक्षणः १४ त्यागोयंदुष्करोभूमन्कामानांविषयात्मभिः ॥ सुतरांत्वयिसर्वात्मन्नभक्तैरितिमेमतिः १५ सोहंममाहमितिमूढमतिर्विगाढस्त्वन्माययाविरचितात्मनिसानुबंधे ॥ तत्त्वंजसानिगदितंभवतायथाहंसंसाधयामिभगवन्ननुशाधिभृत्यम् १६ सत्यस्यतेस्वदृशआत्मनआत्मनोन्यंवक्तारमीशविबुधेष्वपिनानुचक्षे ॥ सर्वेविमोहितधियस्तवमाययेमेब्रह्मादयस्तनुभृतोबहिरर्थभावाः १७ तस्माद्भवंतमनवद्यमनंतपारंसर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यम् ॥ निर्विण्णधीरहमुहत्वृजिनाभितप्तोनारायणंनरसखंशरणंप्रपद्ये १८ ॥श्रीभगवानुवाच॥ प्रायेणमनुजालोकेलोकतत्त्वविचक्षणाः॥समुद्धरंतिह्यात्मानमात्मनैवाशुभाशयात् १९ आत्मनोगुरुरात्मैवपुरुषस्यविशेषतः॥ यत्प्रत्यक्षानुमानाभ्यांश्रेयोसावनुविंदते २०

चूर्णिका

॥ श्रीशुक उवाच ॥ ॥ एवं भगवतादिष्टः उद्धवः हरिं नत्वा आह १३ ॥ ॥ उद्धव उवाच ॥ ॥ हे योगेश अयं संन्यासलक्षणः त्यागः मे निश्रेयसाय त्वया उक्तः १४ तथापि सः विषयात्मभिः दुष्करः इति मे मतिः १५ एवं उपदेशपात्रः अहं ममाहमिति मूढबुद्ध्या त्वन्मायारचिते देहे निमग्नःअतः त्वदुक्तं यथाहं जानामि तथा मां शनैः शिक्षय १६ त्वद्विना उपदेशकर्तारं देवेष्वपि अन्यं न पश्यामि यतः ब्रह्मादयः त्वन्मायया मोहितधियः १७ अतः दुःखतप्तोहं नारायणं त्वामेव शरणं प्रपद्ये १८ ॥ श्रीभगवानुवाच ॥ हे उद्धव लोकतत्वपरीक्षकाः आत्मानं स्वयमेव प्रायः विषयवासनातः उद्धरंति १९ तदेवाह पश्वादिदेहे हिताहितज्ञाने आत्मनः आत्मैव गुरुः पुरुषस्य तु विशेषतः यत्प्रत्यक्षानुमानाभ्यांश्रेयोसौविंदते २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रप्रत्यक्षंदर्शयतिपुरुषत्वेचेति (आविस्तरांप्रकटतरम्) तथाचश्रुतिः । "पुरुषत्वेचाविस्तरामात्मासहिप्रज्ञानेनसंपन्नतमोविज्ञानंवदतिविज्ञानंपश्यतिवेदश्वस्तनंवेदलोकालोकौमर्त्येनामृतमीप्सत्येवंसंपन्नोपीतरेषांपशूनामशनापिपासेएवाभिविज्ञान"मिति २१ अतःपुरुषत्वंस्तौति एकेति । (पुरोदेहानि) २२ अनुमानमाह । अत्रपौरुष्यांपुरियुक्ताअप्रमत्ता अग्राह्यंगाह्येभ्योऽहंकारादिभ्योव्यतिरिक्तंमांअद्धासाक्षान्मृगयंति । मार्गणेप्रकारद्वयमाह । गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः जडानांप्रकाशः स्वप्रकाशमेकंविनानघटतइत्यनुपपत्तिमुखेनलक्षकैः । तथातैरेवलिंगैर्व्याप्तिमुखेनानुमानतईश्वरंप्रवर्तकंमृगयंते । बुद्ध्यादिकरणानिकर्तृप्रयोज्यानि । करणत्वात्वास्यादिवदिति । तदुक्तं । "भगवान्सर्वभूतेषुलक्षितःस्वात्मनाहरिः । दृश्यैर्बुद्ध्यादिभिर्द्रष्टालक्षणैरनुमापकै"रिति । नचैतावताआनुमानिकआत्मेतिमंतव्यम् । देहादिव्यतिरिक्तत्वेनत्वंपदार्थशुद्धिमात्रस्यैवानुमानेनविवक्षितत्वात् २३ भूयोन्वयव्यतिरेकाभ्यामसंभावनादिनिवृत्तावितिहासमाह अत्रापीति २४ २५ (इयमव्यापारास्थितिरूपा) सुविशारदाअतिनिपुणासर्वलोकविलक्षणा २६ सर्वलोकवैलक्षण्यमेवाह । प्रायइति । धर्मादिषुविवित्सायांआत्मविचारेचमानवाः समीहंतेप्रवर्तंते । तत्रापि आयुरादेर्हेतुनाकामनयैव २७ त्वंतुनकस्यचित्कर्मणः कर्ताभवसि नचकिंचिदीहसेइच्छसि । नन्वशक्त्यावाअज्ञानेनवाअनैपुण्येनवाविरूपत्वेनवाऽवाग्मितयावाऔदासीन्यंघटतएव । नेत्याह । कल्पइति (कल्पःसमर्थः । कविः करणज्ञानसंपन्नः । दक्षःहस्तलाघवादियुक्तः सुभगः सर्वावयवसंपन्नः अमृतभाषणः अमृतवन्मधुरंवदसि) २८ महानानंदश्चतवकुतइति पृच्छति जनेष्विति (दवानलान्मुक्तोहस्तीव) २९ स्पर्शविहीनस्यविषयभोगरहितस्य । अत्रहेतुः केवलात्मनः कलत्रादिशून्यस्य ३०

श्लोकाः २१/३०

पुरुषत्वेचमांधीरासांख्ययोगविशारदाः ॥ आविस्तरांप्रपश्यंतिसर्वशक्त्युपबृंहितम् २१ एकद्वित्रिचतुष्पादोबहुपादस्तथाऽपदः ॥ बह्व्यःसंतिपुरःसृष्टास्तासांमेपौरुषीप्रिया २२ अत्रमांमार्गयंत्यद्धायुक्ताहेतुभिरीश्वरम् ॥ गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः २३ अत्राप्युदाहरंतीममितिहासंपुरातनम् ॥ अवधूतस्यसंवादंयदोरमिततेजसः २४ अवधूतंद्विजंकंचिच्चरंतमकुतोभयम् ॥ कविंनिरीक्ष्यतरुणंयदुःपप्रच्छधर्मवित् २५ ॥ यदुरुवाच ॥ कुतोबुद्धिरियंब्रह्मन्नकर्तुःसुविशारदा ॥ यामासाद्यभवांल्लोकेविद्वांश्चरतिबालवत् २६ प्रायोधर्मार्थकामेषुविवित्सायांचमानवाः ॥ हेतुनैवसमीहंतेआयुषोयशसःश्रियः २७ त्वंतुकल्पःकविर्दक्षःसुभगोऽमृतभाषणः ॥ नकर्तानेहसेकिंचिज्जडोन्मत्तपिशाचवत् २८ जनेषुदह्यमानेषुकामलोभदवाग्निना ॥ नतप्यसेऽग्निनामुक्तोगंगांभस्थइवद्विपः २९ त्वंहिनःपृच्छतांब्रह्मन्नात्मन्यानंदकारणम् ॥ ब्रूहिस्पर्शविहीनस्यभवतःकेवलात्मनः ३०

चूर्णिका

तत्र प्रत्यक्षमाह बुद्धिमंतो ये ते नृदेहे आविस्तरां मां पश्यंति २१ यतः एकद्व्यादिपादाः बह्व्यः पुर्यः संति तत्र मे पौरुषी प्रियेति २२ अनुमानमाह अत्र नृदेहे मां ज्ञानिनः अनुमानतः मार्गयंति २३ अत्रापि अवधूतस्य यदोश्च संवादरूपं इतिहासं उदाहरंति २४ हे उद्धव यदुः कंचित् अवधूतं तरुणं निर्भयं चरंतं दृष्ट्वा पप्रच्छ २५ यदुरुवाच कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत् २६ हे द्विज प्रायो मानवाःआयुरादिकामनया धर्मार्थादिषु प्रवर्तंते २७ त्वं तु कल्पः कविः दक्षोऽपि जडोन्मत्तपिशाचवत् न कर्म करोषि न च किंचिदिच्छसि २८ तथा कामलोभदवाग्निनादह्यमानेषु जनेषु न तप्यसे २९ एवं तव आनंदकारणं किमस्ति तत् नः ब्रूहि ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

३१ बुद्ध्यैवोपाश्रिताःस्वीकृतानतूपदेशेन । अटामिभर्यटामि ३२ गुरूनाह पृथिवीति ३३ शोभनंरूपंकीटस्यकरोतीतिसुपेशकृत् ३४ मेमयाआश्रितास्तदाह । एतेषांवृत्तिभिः आत्मनः शिक्षाः शिक्षणीयानर्थान् हेयोपादेयादीन् अन्वशिक्षं अनुशिक्षितवानस्मि ३५ नाहुषोययातिः ३६ क्षितेःक्षमांशिक्षितवानस्मीत्याह । भूतैरिति । आक्रम्यमाणः संपीड्यमानः तद्विद्वान् भूतानां दैववशवर्तित्वांविद्वान् व्रतंनियमम् ३७ पर्वतरूपा वृक्षरूपा च यापृथ्वी तस्याः शिक्षितमाह । शश्वदिति । सर्वदापरार्थाःपरोपकारार्थाः सर्वाईहायस्यसः । परार्थएवएकांततः संभवोयस्यसः । भूभृत्तः पर्वतात्तस्यहिवृक्षतृणनिर्झरप्रसवक्रियाःपरार्थाएवयथा तद्वत् । तथा नगशिष्यः वृक्षशिष्यः सन्परात्मतांपराधीनात्मतांपरार्थमात्मायस्यतद्भावस्तत्ता ताम् । वृक्षोयथा परैरवखंड्योत्पाट्य वा नयनमनुमन्यते (किंपुनः पत्रपुष्पादिनापरात्मतां) तद्वत् ३८वायुरपिद्विविधः । प्राणोबाह्यश्च । तत्रप्राणस्यगुरुत्वमाह । प्राणवृत्त्येति । प्राणोह्याहारादिमात्रेणप्रवर्तते । रूपरसादीनिंद्रियविषयांस्तुनापेक्षते । तथामुनिरपिभवेदित्यर्थः ।प्राणवृत्तेरकरणेमनोवैकल्येनज्ञाननाशः स्यात् । अतोदेहनिर्वाहः कर्तव्यः गुणलिप्सायांतुवाक्मनश्चविक्षिप्येत । अतोनाधिकंलिप्सेदित्याह । ज्ञानमिति नावकीर्येत नविक्षिप्येत३९

॥३८॥ ॥ ७ ॥

श्लोकाः ३१/३९

॥ श्रीभगवानुवाच ॥ यदुनैवंमहाभागोब्रह्मण्येनसुमेधसा ॥ पृष्टःसभाजितःप्राहप्रश्रयावनतंद्विजः ३१ ॥ ब्राह्मणउवाच ॥ संतिमेगुरवोराजन्बहवोबुद्ध्युपाश्रिताः ॥ यतोबुद्धिमुपादायमुक्तोटामिहताञ्छृणु ३२ पृथिवीवायुराकाशमापोग्निश्चंद्रमारविः ॥ कपोतोऽजगरःसिंधुःपतंगोमधुकृद्गजः ३३ मधुहाहरिणोमीनःपिंगला कुररोऽर्भकः ॥ कुमारीशरकृत्सर्पऊर्णनाभिःसुपेशकृत् ३४ एतेमेगुरवोराजंश्चतुर्विंशतिराश्रिताः ॥ शिक्षावृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ३५ यतोयदनुशिक्षामियथावानाहुषात्मज ॥ तत्तथापुरुषव्याघ्रनिबोधकथयामिते ३६ भूतैराक्रम्यमाणोपिधीरोदैववशानुगैः ॥ तद्विद्वान्नचलेन्मार्गादन्वशिक्षंक्षितेर्व्रतम् ३७ शश्वत्परार्थसर्वेहःपरार्थैकांतसंभवः ॥ साधुःशिक्षेतभूभृत्तोनगशिष्यःपरात्मताम् ३८ प्राणवृत्त्यैवसंतुष्येन्मुनिर्नैवेंद्रियप्रियैः ॥ ज्ञानंयथानतश्येतनावकीर्येतवाङ्मनः ३९

चूर्णिका

॥ श्रीभगवानुवाच एवं यदुना पृष्टः द्विजः तं आह ३१ ॥ द्विज उवाच ॥ हेराजन् मे गुरवः बुद्ध्युपाश्रिताः बहवः संति येभ्यः यां बुद्धिं आदाय मुक्तः अटामि तान् शृणु ३२ भूः प्रथमः वायुः द्वितियः खं तृतीयः आपः चतुर्थः अग्निः पंचमः चंद्रः षष्ठः रविः सप्तमः कपोतः अष्टमः अजगरःनवमः सिंधुः दशमः पतंगःएकादशः मधुकृत्द्वादशः गजः त्रयोदशः ३३ मधुहा चतुर्दशः हरिणः पंचदशः मीनः षोडशः पिंगला सप्तदशः कुररः अष्टादशः अर्भकःएकोनविंशः कुमारी विंशः शरकृत् एकविंशः सर्पः द्वाविंशः ऊर्णनाभिः त्रयोविंशः पेशसुकृत्चतुर्विंशः एतेगुरवः चतुर्विंशतिसंख्याकाः मयाआश्रिताः एतेषां वृत्तिभिः हेयोपादेयादीन् अर्थान् अशिक्षम् ३५ हे यदो यतः यत् शिक्षितं तत्निबोध ३६ तत्र पृथ्व्याः शिक्षितमाह दैवाधीनैः भूतैः पीड्यमानोपि भूतानांदैवाधीनत्वं विद्वान् स्वमार्गान्नचलेत् ३७ तथा परार्थसर्वव्यापारः तथा पराधीनवर्तित्वं च इदं सर्वं भूमेः शिक्षितम्अशिक्षम् ३८ अथ वायोः शिक्षितमाह यथा प्राणः आहारादिमात्रेण प्रवर्तते विषयांस्तु नापेक्षते तथा मुनिनापि भाव्यम् किंच ज्ञाननाशःयथा नस्यात् वाङ्मनश्चनावकीर्येतएवं तथा देहनिर्वाहः कर्तव्यः इति प्राणवायोः शिक्षितं ३९

॥३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विषयान्सेवमानोपितदनासक्तिंबाह्याद्वायोः क्षिक्षेदित्याह । विषयेष्विति । नानाधर्मेषुशीतोष्णादिधर्मकेषु । नहिवायुर्वने (गेहे) वासज्जतेतद्वत् ४० यथावायुर्गंधादिधर्मयोगेनप्रतीयमानोपिवस्तुतो नतद्योगी एवंदेहादिधर्मयोगेनाहंप्रत्ययेनप्रतीयमानोप्यात्मा नतद्धर्मवानीतिसंभावितामिति वायोरेवाशिक्षितमित्याह पार्थिवेष्विति । तद्गुणाश्रयः देहधर्माणामाश्रयोपि ४१ आकाशाच्छिक्षितंसंभावना द्वयमाह । अंतर्हितश्चदेहांतर्गतोपिमुनिरात्मनोदेहाद्यसंगंअतएवाव्यवच्छेदंचभावयेत् । कुतः स्थिरजंगमेषुसमन्वयेनयाव्याप्तिस्तया । किंमणिषुसूत्रस्येवव्याप्तिः न । विततस्यसर्वगतस्य । तत्कुतः । ब्रह्मात्मभावेनब्रह्मस्वरूपभावनया । ''तत्त्वमसी''तिश्रुतेः । नन्वेतत्सर्वंकथंसंभवति । तत्राह । नभस्त्वंतत्तुल्यत्वंसंभावयेत् । यथानभसःसर्वगतस्यनघटादिभिःसंगः परिच्छेदोवा एवमात्मनोपिसंभवती ति ४२ किंच । कूटस्थस्यात्मनोनागमापायिदेहादिसंबंधइत्याह । तेजोबन्नमयैः तेजश्चआपश्चअन्नंपृथिवीचतन्मयैः (मेघाद्यैर्भावैर्नभइव) कालसृष्टैः (तेजोबन्नमयैः)-गुणैर्देहादिभिःपुमान्नसंस्पृश्यतइति नभोवत्संभवतीति ४३ स्वच्छत्वादिभिर्गुणैरुदकंजगत्पुनातीति तद्गुणामयाशिक्षिताइत्याह । स्वच्छः निर्मलःप्रकृतितः स्वभावतःस्निग्धः जनेष्वनुरागवान् । माधुर्योमधुरालापी तीर्थभूस्तीर्थस्थानं अपांमित्रंउदकतुल्यः अघादितिपाठे सखायंपापात्पुनाति । स्वच्छत्वादिगुणैरर्थादुदकसादृश्यंज्ञातव्यम् ४४ अग्नेःशिक्षितमाह । तेजस्वीति । तेजस्वीज्ञानातिशयवान् । विशेषतः तपसादीप्तःदुर्धर्षः अक्षोभ्यःसचासावुदरभाजनश्च (उदरमेवभाजनंपात्रंयस्य) अपरिग्रहइत्यर्थः युक्तात्मामुनिः ४५ अग्नेरेवशिक्षांतरमाह । क्वचिदिति । यथाग्निःपरेच्छयैवहविर्गृह्णाति तथामुनिरित्याह । दातृणा मिति । प्रागुत्तराशुभंभूतंभविष्यच्चपापम् ४६

॥३९॥

श्लोकाः ४०—४६

विषयेष्वाविशन्योगीनानाधर्मेषुसर्वतः ॥ गुणदोषव्यपेतात्मानविषज्जेतवायुवत् ४० पार्थिवेष्विहदेहेषुप्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्नयुज्यतेयोगीगंधैर्वायु रिवात्मदृक् ४१ अंतर्हितश्चस्थिरजंगमेषुब्रह्मात्मभावेनसमन्वयेन ॥ व्याप्त्याऽव्यवच्छेदमसंगमात्मनोमुनिर्नभस्त्वंविततस्यभावयेत् ४२ तेजोबन्नमयैर्भा वैर्मेघाद्यैर्वायुनेरितैः ॥ नस्पृश्यतेनभस्तद्वत्कालसृष्टैर्गुणैःपुमान् ४३ स्वच्छःप्रकृतितःस्निग्धोमाधुर्यस्तीर्थभूर्नृणाम् ॥ मुनिःपुनात्यपांमित्रंईक्षो पस्पर्शकीर्तनैः ४४ तेजस्वीतपसादीप्तोदुर्धर्षोदरभाजनः ॥ सर्वभक्षोपियुक्तात्मानादत्तेमलमग्निवत् ४५ क्वचिच्छन्नःक्वचित्स्पष्टउपास्यःश्रेयइच्छ ताम् ॥ भुंक्तेसर्वत्रदातृणांदहन्प्रागुत्तराशुभम् ४६

चूर्णिका

किंच विषयेषु योगी विशन्नपि तेषुवायुवन्नसज्जेत इति बाह्यवायोःशिक्षितं ४० किंच इह देहेषु योगी प्रविष्टोपि देहगुणैर्न युज्यते गंधैर्वायुरिव इति च वायोः शिक्षितं ४१ अथ आकाशाच्छिक्षितं ततः मुनिः देहांतर्गतोपि आत्मनः अव्यवच्छेदं भावयेत् नभोवत् ४२ तथा देहादिगुणैः पुमान् वायुनेरितैर्मेघाद्यैर्नभःन स्पृश्यते तद्वत् इति आकाशाच्छिक्षितं ४३ उदकाच्छिक्षितमाह ततः स्वच्छत्वमाधुर्यादिगुणैः ईक्षणादिभिश्च उदकं यथा जगत्पुनाति तद्वत् मुनिरपि भवेत् इति उदका च्छिक्षितं ४४ अग्नेः शिक्षितमाह यथाअग्निः तेजस्वी दीप्तः सर्वभक्षोपि मलं नादत्ते ४५ किंच क्वचिच्छन्नः क्वचित् स्पष्टः परेच्छया हविर्गृह्णाति दातॄणां पापं चनाशयति तथा मुनिरपि भवेत् ४६

॥३९॥

१ देहधर्मान्वात्यादीन् आश्रित्यवर्तमानः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनोदेहोपाधिकमेवोच्चनीचत्वादि न स्वाभाविकमित्यप्यग्निदृष्टांतेनसंभावितमित्याह । स्वमाययेति स्वाविद्ययासृष्टं सदलल्लक्षणं (स्थूलसूक्ष्मात्मकम्) देवतिर्यगादिरूपंवाविप्रशूद्रादिरूपंवा (स्वमाययास्वाविद्ययासृष्टम् । एधसिकाष्ठे) आत्मनोजन्मादिषड्विकाराभावश्चंद्रदृष्टांतेनसंभावितइत्याह । विसर्गाद्याइति । विसर्गोजन्म श्मशानंनाशः (आद्यशब्दादस्ति वर्धते विपरिणमतेऽपक्षीयत इतिग्राह्याः) अत्रेयंज्योतिःशास्त्रप्रक्रिया । आप्यमंडलंचंद्रः तेजोमयमंडलंआदित्यः तयोरेकनक्षत्रावस्थानेचंद्रोनदृश्यते । चक्षुषःआदित्यमंडलेनसमदेशस्थितेनव्यवधानात् । साअमावास्या । अथ षष्टिघटिकाभिश्चंद्रोनक्षत्रांतरंगच्छति । आदित्यस्तुत्रयोदशभिरहोरात्रैः । अतः प्रतिपदमारभ्य विषमस्थितस्यआदित्यमंडलस्यपंचदशः पंचदशोभागआप्यमंडले (चंद्रे) प्रतिबिंबितोदृश्यते साकलेत्युच्यते एवंपंचदशेऽह्नित्रयोदशभिर्नक्षत्रैरंतरंभवतीतिराशिचक्रस्यसप्तविंशतिनक्षत्रात्मकस्यमध्येसंमुखौचंद्रादित्यौतिष्ठतः तदासंपूर्णप्रतिबिंबंभूच्छाययालांच्छितंदृश्यते सापूर्णिमा । तस्याममावास्याप्रतिबिंबेनसहषोडशकलश्चंद्रउपचर्यते । ततः पुनः प्रतिपदमारभ्यमंडलयोर्विषमीभावात्कलाह्रासः तत्रयथाकलानामेवोत्पत्त्यादयो (विकाराः) नत्वाप्यमंडलस्यतथा (देहस्यैवविकाराः) नत्वात्मनइत्याह कलानामिवेति ४८ सिंहावलोकनेनाग्निदृष्टांतेनैवदेहानांक्षणभंगुरतयावैराग्यंशिक्षितमित्याह । कालेनेति । ओघवद्वेगोयस्यतेनआत्मनः संबंधिनांभूतानांदेहानामित्यर्थः (नित्यावविच्छिन्नौपथाग्ने-)-रार्चिषांज्वालानाम् ४९ आदित्याच्छिक्षितमाह । गुणैरिति । गुणैरिंद्रियैर्गुणान्विषयानुपादत्ते यथाकालमर्थिन्यागतेसतिविमुंचति च न तेषुयुज्यते लब्धमितिदत्तमितिचाभिनिवेशं नकरोति । गोभिः किरणैः गाः सलिलानिगोपतिः सूर्योयथा ५० स्वतोभेदशून्यस्याप्यात्मनोभेदप्रतीतिरुपाधिवशादित्यादित्यदृष्टांतेनैवसंभावितमित्याह बुध्यतइति । स्वेस्वरूपेऽवस्थितआत्मा भेदेननबुध्यते (औपाधिकभेदेननानुभूयते) अभिव्यनक्ति (प्रतिबिंबमिति) व्यक्तिरुपाधिः व्यक्तिस्थउपाधौप्रतिबिंबितस्तुतद्गतइवउपाधिप्रविष्टइवभेदेनस्थूलमतिभिर्लक्ष्यते। अर्कवत् (जलादौप्रतिबिंबितोरविर्यथा) ५१ कपोताच्छिक्षितमाह । नातिस्नेहः इति । स्नेहः प्रीतिः प्रसंगउपलालनाद्यासक्तिः ५२

श्लोकाः ४७—५२

स्वमाययासृष्टमिदंसदसल्लक्षणंविभुः ॥ प्रविष्टईयतेतत्तत्स्वरूपोऽग्निरिवैधसि ४७ विसर्गाद्याःश्मशानांताभावादेहस्यनात्मनः ॥ कलानामिवचंद्रस्यकालेनाव्यक्तवर्त्मना ४८ कालेनह्योघवेगेनभूतानांप्रभवाप्ययौ ॥ नित्यावपिनदृश्येतेआत्मनोग्नेर्यथार्चिषाम् ४९ गुणैर्गुणानुपादत्तेयथाकालंविमुंचति ॥ नतेषुयुज्यतेयोगीगोभिर्गाइवगोपतिः ५० बुध्यतेस्वेनभेदेनव्यक्तिस्थइवतद्गतः ॥ लक्ष्यतेस्थूलमतिभिरात्माचावस्थितोऽर्कवत् ५१ नातिस्नेहःप्रसंगोवाकर्तव्यःक्वापिकेनचित् ॥ कुर्वन्विंदेतसंतापंकपोतइवदीनधीः ५२

चूर्णिका

किंच इदंविश्वं प्रविष्टः आत्मा श्रेष्ठत्वादिकं काष्ठे अग्निरिव लभते न वस्तुतः इत्यग्नेः शिक्षितं ४७ चंद्राच्छिक्षितमाह यथा चंद्रस्य कलानां उत्पत्त्यादयः भवंति तथा देहस्य जन्मादिविकाराः न आत्मन इतिचंद्रात् शिक्षितं ४८ हे यदो कालेन देहानां जन्ममृत्यू नित्यौ अपि न दृश्येते अग्निज्वालावत् इदं वैराग्यार्थं पुनः अग्नेः शिक्षितं ४९ आदित्याच्छिक्षितमाह योगी इंद्रियैः विषयान् उपादत्ते अर्थिनि प्राप्ते ददाति च तेषु न सज्जते गोभिर्जलानि सूर्य इव ५० किं च आत्मा भेदहीनोपि उपाधिवशात् भेदरूपेभाति घटादिषु प्रविष्टोर्कइव इति सूर्याच्छिक्षितं ५१ अथकपोताच्छिक्षितमाह हे यदो क्वापि केनचित् अतिस्नेहः संगो वा न कर्तव्यः कृतश्चेत्कपोत इव संतापं विंदते अत्र दृष्टांतं विवृणोति ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दृष्टांतंप्रपंचयति। कपोतः कश्चनेति (समावर्षाणि) ५३ तयोर्मिथः स्नेहप्रसंगौदर्शयति। कपोताविति त्रयेण। स्नेहेनगुणितं निबद्धंहृदयंययोस्तौ। (दृष्ट्यादीनिपरस्परस्योपरि बबंधतुः निदधतुरित्यर्थः) ५४ (शय्यासनादिषु मिथुनीभूयअवियोगेनवर्तमानौ) विश्रब्धौनिःशंकौ ५५ साकपोतीतर्पयंती सहासवीक्षितालापादिभिः प्रीणयंती अतएवतेनानुकंपितासतीयंयंवांछतितंतंकामंसमनंयत्सं पादयामास । राजन्नितित्वंयथेतिसूचनार्थं ५६ ५७ तेषुजरूभरितेष्वंडेषु (कालेयथाकालं) हरेः स्वभावकर्मादिशक्तिभिः रचितावयवाः कोमलान्यंगानितनूरुहाश्चयेषांतेपक्षिणोजाताः ५८ ५९ पतत्रैः पक्षैः अदीनानांहृष्टानां (तासांप्रजानां । मुग्धचेष्टितैः बालचरित्रैः । प्रत्युद्गमैः समीपागमनैः) ६० शिशून्बालान् (स्वल्पवयस्कानित्यर्थः) प्रजाः पुत्रान् ६१ (अर्थिनौदीनौ) ६२ स्वालयांतिकेचरतः क्रीडतः तान्कपोतपुत्रान् आतत्यप्रसार्य ६३ उत्सुकत्वादेवचतत्पोषणार्थंगतौसंतौपोषणं भक्ष्यं ६४ ६५ शिचा जालेन (स्वयं च स्नेहवशात्तत्रगताऽबध्यत) ६६ आत्मानु रूपांभार्यांचविलप्य शुशोच ६७

श्लोकाः ५३—६७

कपोतःकश्चनारण्येकृतनीडोवनस्पतौ ॥ कपोत्याभार्ययासार्धमुवासकतिचित्समाः ५३ कपोतौस्नेहगुणितहृदयौगृहधर्मिणौ ॥ दृष्टिंदृष्ट्यांऽगमंगेनबुद्धिं बुद्ध्याबबंधतुः ५४ शय्यासनाटनस्थानवार्ताक्रीडाशनादिषु ॥ मिथुनीभूयविश्रब्धौचेरतुर्वनराजिषु ५५ यंयंवांच्छतिसाराजंस्तर्पयंत्यनुकंपिता ॥ तंतं समनयत्कामंकृच्छ्रेणाप्यजितेंद्रियः ५६ कपोतीप्रथमंगर्भंगृह्णतीकालआगते ॥ अंडानिसुषुवेनीडेस्वपत्युःसंनिधौसती ५७ तेषुकालेव्यजायंतरचितावय वाहरेः ॥ शक्तिभिर्दुर्विभाव्याभिःकोमलांगतनूरुहाः ५८ प्रजाःपुपुषतुःप्रीतौदंपतीपुत्रवत्सलौ ॥ शृण्वंतौकूजितंतासांनिर्वृतौकलभाषितैः ५९ तासांप तत्रैःसुस्पर्शैःकूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानांपितरौमुदमापतुः ६० स्नेहानुबद्धहृदयावन्योन्यंविष्णुमायया ॥ विमोहितौदीनधियौशिशून्पुपुष तुःप्रजाः ६१ एकदाजग्मतुस्तासामन्नार्थंतौकुटुंबिनौ ॥ परितःकाननेतस्मिन्नर्थिनौचेरतुश्चिरम् ६२ दृष्ट्वातांल्लुब्धकःकश्चिद्यदृच्छातोवनेचरः ॥ जगृहे जालमातत्यचरतःस्वालयांतिके ६३ कपोतश्चकपोतीचप्रजापोषेसदोत्सुकौ ॥ गतौपोषणमादायस्वनीडमुपजग्मतुः ६४ कपोतीस्वात्मजान्वीक्ष्यबाल कान्जालसंवृतान् ॥ तानभ्यधावत्क्रोशंतीक्रोशतोभृशदुःखिता ६५ साऽसकृत्स्नेहगुणितादीनचित्ताऽजमायया ॥ स्वयंचाबध्यतशिचाबद्धान्पश्यत्यपस्मृ तिः ६६ कपोतःस्वात्मजान्बद्धानात्मनोभ्यधिकान्प्रियान् ॥ भार्यांचात्मसमांदीनोविललापातिदुःखितः ६७

चूर्णिका

हेराजन् कश्चित् कपोतः वने वृक्षेकृतनीडः सन् कपोत्या पत्न्या सह कतिचित् समाः उवास ५३ ५४ ततः तौ स्नेहबद्धहृदयौ शय्यासनादिषु मिथुनीभूय निःशंकौ वनराजिषु चेरतुः ५५ सा कपोती यं यं कामं वांच्छति तं तं कपोतः संपादयामास ५६ ततः सा तस्मात् आद्यगर्भं धृत्वा कालेअंडानि सुषुवे५७ तेषु हरेः शक्तिभिः कोमलांगकेशाः पक्षिणो जाताः ५८ ततः तौ दंपती तेषां कलभाषणैः सुखं प्रत्युद्गमैः मुदं च प्राप्य ५९ ६० विष्णुमायया मोहितौ स्नेहेन बद्धहृदयौ तौ शिशून् पुपुषतुः ६१ एकदा तेषां अन्नार्थं तौ तत्र कानने चेरतुः ६२ तदैव कश्चिल्लुब्धकः तान् दृष्ट्वा जालं विस्तीर्य जगृहे६३ ततः तौ अन्नं आदाय स्वनीडं प्रति प्राप्तौ ६४ ततः कपोती स्वात्मजान् जालसंवृतान् दृष्ट्वा क्रोशंती स्वयं च अबध्यत ६५ ६६ ततःकपोतः भार्यांबालकांश्च बद्धान् वीक्ष्य विललाप ६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विलापमाहत्रयेण अहोइति । अतृप्तस्य दृष्टसुखेअकृतार्थस्य अदृष्टमसंपादयतः (त्रिवर्गसाधनभूतो गृहाश्रमोहतः) ६८ (रूपेणवयसाचानुरूपाकर्मणाचानुकूला पतिरेवदेवतायस्याः ६९ ७०
तानावृतान्पश्यन्नपि शिक्षु जालेषु (अबुधोऽविवेकी) ७१ ७२ दार्ष्टांतिकेयोजयति एवमिति ७३ एवं गृहासक्तिस्विरश्रामप्यनर्थहेतुः मनुष्यस्यसुतरांनिंदितेत्याह । यःप्राप्येति (आरूढमपिस्वग
मिववृक्षाद्भ्रष्टंविदुः) ७४ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांसप्तमोऽध्यायः ७ ॥ ॥ ७ ॥ ॥ अष्टमेऽजगरादिभ्योनवभ्यः शिक्षितंहरिः । अवधूतगिराप्राहविवेकायोद्धवंप्र
ति ॥ १ ॥ प्रारब्धकर्मभोगस्यावश्यंभावित्वात्तदर्थोद्यमैर्नायुर्व्ययोवृथाकर्तव्यइति अजगराच्छिक्षितमित्याह । सुखमित्यादिना । यदैंद्रियकं सुखं तत्स्वर्गेनरकेच भवत्येव। यथादुःखं । तस्माद्बुध
स्तन्नेच्छेत् १ शरीरनिर्वाहमात्रंअन्नंतच्चयथालब्धेनकर्तव्यमित्याह । ग्रासंत्विति । अजगरः अजगरवृत्तिः अक्रियउदासीनः २ यदा नापततितदाकिंकर्तव्यं तत्राह । शयीतेति । अनुपक्रमः निरुद्य
मः दिष्टभुक् दैवमेवप्रापकमितिधैर्यवान् ३

॥४२॥

श्लोकाः ६८/३

अहोमेपश्यतापायमल्पपुण्यस्यदुर्मतेः ॥ अतृप्तस्याकृतार्थस्यगृहस्त्रैवर्गिकोहतः ६८ अनुरूपानुकूलाचयस्यमेपतिदेवता ॥ शून्येगृहेमांसंत्यज्यपुत्रैःस्व
र्यातिसाधुभिः ६९ सोहंशून्येगृहेदीनोमृतदारोमृतप्रजः ॥ जिजीविषेकिमर्थंवाविधुरोदुःखजीवितः ७० तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः ॥
स्वयंचकृपणःशिक्षुपश्यन्नप्यबुधोऽपतत् ७१ तंलब्ध्वालुब्धकःक्रूरःकपोतंगृहमेधिनम् ॥ कपोतकान्कपोतींचसिद्धार्थःप्रययौगृहम् ७२ एवंकुटुंब्यशां
तात्माद्वंद्वारामःपतत्रिवत् ॥ पुष्णन्कुटुंबंकृपणःसानुबंधोऽवसीदति ७३ यःप्राप्यमानुषंलोकंमुक्तिद्वारमपावृतम् ॥ गृहेषुखगवत्सक्तस्तमारूढच्युतंवि
दुः ७४ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेसप्तमोऽध्यायः ७ ॥ ॥ ७ ॥ ॥ ब्राह्मणउवाच ॥ सुखमैंद्रियकंराजन्स्वर्गेनरकए
वच॥ देहिनांयद्यथादुःखंतस्मान्नेच्छेतत्तद्बुधः १ ग्रासंसुमृष्टंविरसंमहांतंस्तोकमेववा ॥ यदृच्छयैवापतितंग्रसेदजगरोऽक्रियः २ शयीताहानिभूरीणिनिरा
हारोनुपक्रमः ॥ यदिनोपनमेद्ग्रासोमहाहिरिवदिष्टभुक् ३

चूर्णिका

अहो अल्पपुण्यस्य मे नाशं पश्यत यतः त्रैवर्गिको गृहाश्रमो नष्टः किं च इयं मे स्त्री पतिदेवता मां हित्वा पुत्रैः सह स्वर्याति ६९अतः मृतदारप्रजः किमर्थं जिजी
विषे ७० एवं तान् विलप्य स्वयं कृपणः सन् तेषां बंधनं पश्यन्नपि स्वयं शिक्षु अपतत् ७१ ततो लुब्धकः तान् सर्वान्लब्ध्वा सिद्धार्थः सन् गृहं प्रययौ ७२
हे राजन् एवं द्वंद्वारामः कुटुंबी पुमान् कुटुंबं पुष्णन् सानुबंधः कपोतवत् अवसीदति ७३ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतम् गृहेषु खगवत्सक्तस्तमा
रूढच्युतं विदुः ७४ इत्येकादशेसप्तमः ॥ ७ ॥ ॥ ७ ॥ ॥ ब्राह्मणउवाच ॥ अथाजगरात्शिक्षितमाह हे राजन् यत् ऐंद्रियकं सुखं तत् स्वर्गे
नरके च भवत्येव यथा दुःखं तस्मात् बुधः तन्नेच्छेत् १ किंच ग्रासं सुमृष्टं विरसं महांतं स्तोकमेव वा यदृच्छया प्राप्तं अजगरवत् ग्रसेत २ किं च यदि ग्रासः
नोपलभेत तर्हि निराहारः दिष्टभुक् निरुद्यमः अहिरिव बह्वहानिशयीत ३

॥४२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननु समर्थोपिशयीतैवकिंओमित्याह । ओजइति ! ओजइंद्रियबलं सहोमनोबलं । बलंशारीरमेवतद्युक्तमपिदेहमकर्मकमेव बिभ्रत्शयानएवभवेत् । वीतनिद्रः स्वार्थेदत्तदृष्टिश्चभवेत् । न पुनरीहेतांकिं चित्इंद्रियवानपीतिदर्शनादिव्यापारमपिनिवारयाति ४ समुद्राच्छिक्षितमाह । मुनिरिति । बहिः प्रसन्नश्चासावंतर्गंभीरश्चदुर्विगाह्यश्चएवंभूतइति परिकलयितुमशक्यः अलक्ष्याभिप्रायत्वात् । दुरत्ययः अनतिक्रमणीयः । तेजस्वित्वात् । अनंतपारः कालतोदेशतश्चापरिच्छेद्यः स्वरूपाविर्भावात् । अक्षोभ्यः अविकार्यः रागाद्यभावात् । स्तिमितोदः निश्चलोदकोऽर्णवोयथा तद्वदेतैर्गुणैर्भवेदित्यर्थः ५ किंचवर्षासुसरिद्भिःसमृद्धोपिसागरो यथा नोत्सर्पेत् । ग्रीष्मेताद्भिर्हीनोपि नशुष्येत् । तथा समृद्धकामस्तद्विहीनोवा नहृष्येन्नचशोचेदित्यर्थः । अत्रहेतुः नारायणपरःनतुविषयपरइति ६ रूपगंधस्पर्शश ब्दरसैः पंचभिर्विषयैर्मोहिताः पतंगमधुकरगजहरिणमीनाहताअतस्तेष्वनासक्तौपंचैतेगुरवः तदुक्तं"पतंगमातंगकुरंगभृंगमीनाहताःपंचभिरेवपंच । एकःप्रमादीसकथंनहन्यतेयःसेवतेपंचभिरेवपंचे"ति। तत्ररूपविलासमोहितो नश्यतीतिपतंगाच्छिक्षितमाह । दृष्ट्वेति तस्याभावैः प्रलोभितः ७ स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयति योषिदिति । उपभोगबुद्ध्यासुखसाधनबुद्ध्याप्रलोभितात्मा ८ मधुकरा च्छिक्षितमाह । स्तोकमिति गृहान्गृहस्थान् अहिंसन्अपीडयन् । अयंभावःयथामधुकरोविशिष्टगंधलोभेनैकस्मिन्नेवपद्मेवसन्नस्तसमयेमुकुलितेतस्मिन्बध्यते । एवंमुनिरपिगुणलोभेनैकमेवगृहमाश्रित स्तन्मोहेनबध्येतेति ९ किंचअणुभ्यश्चेति १० द्विविधोमधुकृत् । मधुकृंततिपुष्पादाच्छिद्यगृह्णातीतिमधुकृत्भ्रमरः मधुकरोतिआहारत्वेनस्वरूपेणचेतिमधुमक्षिकाच तत्रप्रथमाच्छिक्षितमुक्तम्। द्वि याच्छिक्षतिमाहसायमिदंभोक्ष्ये श्वइदंभोक्ष्येइतिभिक्षितमन्नादि नसंगृह्णीत किंतु पाणिपात्रस्तन्मात्रग्राही यद्वा उदरमेवामत्रंपात्रंयस्यसः एकस्मिन्नेवगृहेभिक्षायांतूदरपात्रग्राहीभवेत् मक्षिकेवसंग्रही नभवे त्नजीवतीत्यर्थः ११ एतद्विवृणोति । पुनः सायंतनमिति (तेनसंग्रहेणसह) १२

॥४३॥

श्लोकाः ४/१२

ओजःसहोबलयुतंबिभ्रद्देहमकर्मकम् ॥ शयानोवीतनिद्रश्चनेहेतेंद्रिवानपि ४ मुनिःप्रसन्नगंभीरोदुर्विगाह्योदुरत्ययः ॥ अनंतपारोह्यक्षोभ्यःस्तिमितोदइवा र्णवः ५ समृद्धकामोहीनोवानारायणपरोमुनिः ॥ नोत्सर्पेतनशुष्येतसरिद्भिरिवसागरः ६ दृष्ट्वास्त्रियंदेवमायांतद्भावैरजितेंद्रियः ॥ प्रलोभितःपतत्यंधेतमस्य ग्नौपतंगवत् ७ योषिद्धिरण्याभरणांबरादिद्रव्येषुमायारचितेषुमूढः ॥ प्रलोभितात्माह्युपभोगबुद्ध्यापतंगवन्नश्यतिनष्टदृष्टिः ८ स्तोकंस्तोकंग्रसेद्ग्रासंदेहोवर्ते तयावता ॥ गृहानहिंसन्नातिष्ठेद्वृत्तिंमाधुकरींमुनिः ९ अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यःकुशलोनरः ॥ सर्वतःसारमादद्यात्पुष्पेभ्यइवषट्पदः १० सायंतनंश्व स्तनंवानसंगृह्णीतभिक्षितम् ॥ पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही ११ सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षितम् ॥ मक्षिकाइवसंगृह्णन्सहतेनविनश्यति १२

चूर्णिका

किं च इंद्रियमनःशारीरबलयुतं देहं बिभ्रत् कर्म त्यक्त्वा शयानः एव भवेत् एवं कृते इंद्रियवानपि दर्शनादिव्यापारहीनो भवति ४ अथाब्धेःशिक्षितमाह मुनिःगंभीरः आकलयितुमशक्यः अनंतपारः स्थिरोदकाब्धिवत् ५ किं च पूर्णकामः तद्विहीनो वा मुनिः ईशपरः सन् सरिद्भिः सागरवत् न हृष्येत न शोचेत् ६ अथ पतंगाच्छिक्षितमाह अजितेंद्रियः पुमान् स्त्रियंदृष्ट्वा तद्भावैः लोभितः सन् अग्नौ पतंग इव अंधेतमसि पतति ७ किं च मायारचितेषु योषिद्धिरण्यादिषु भोगबुद्ध्या लोभितश्चेत् पतंगवत् नश्यति ८ अथमधुकराच्छिक्षितमाह पुमान्सूक्ष्ममहच्छास्त्रेभ्यः सारं आदद्यात् पुष्पेभ्यः भ्रमरवत् ९ १० भिक्षितं अन्नादि इदं सायंतनं श्वस्तनंवा न संगृह्णीत किंतु उदरपूर्तिमात्रं ग्राह्यम् संग्रहीष्यति चेत् मक्षिकेव तेन सह नश्यति ११ १२

॥४३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.ए स्पर्शासाक्तिनाशहेतुरितिगजाच्छिक्षितमाह । पदापीति । पादेनापिदारुमयीमपिनस्पृशेत् । गजोहिकारेणींगदर्श्य तृणादिपिहितगर्तेनिपात्यबध्यते १३ किंच नाधिगच्छेदितिनोपगच्छेत् (गजोंगच्छन् अ० गजइवहन्येत) १४ त्यागभोगविहीनोधनसंचयः परगामीभवतीत्यत्रमधुहागुरुरित्याह नदेयामिति । तदन्योत्रलवान्भुंक्ते । तदप्यन्यस्तत्रान्यःमक्षिकाभिः संचितंमधुयथा मधुहाभुंक्ते अन्योवाव

टीका लवान्भुंक्तेतद्वत् ननु सुगुप्तंधनंकथमन्योज्ञास्यति हरिष्यतिचेतितत्राह अर्थवित् लिंगैरर्थंतदुपायंचवेत्तीतिअर्थवित्यथामधुहातरुकोटरादिगतंमधुवेत्तिहरतिच १५ स्वोद्यमंविनापिभोगः संभवतीत्यत्रा ॥८॥

पिसएवगुरुरित्याह । सुदुःखेति । आशासानानामितिवक्तव्येवर्णलोपआर्षः "यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ । तयोरन्नमदत्वातुभुक्त्वाचांद्रायणंचरेदि" ति गृहिणामावश्यकत्वेनदानविधानात् १६

५॥ हरिणाच्छिक्षितमाह । ग्राम्येति । भगवद्गीतंतुशृणुयादेव । मृगयोर्लुब्धकस्य १७ हरिणशब्दादेवहरिणीसुतऋष्यशृंगोपिगुरुर्ज्ञातव्यइत्याह । नृत्येति । वश्योबभूवेतिशेषः १८ रसासाक्तिर्नाशहेतुरि

तिमीनाच्छिक्षितमित्याह जिह्वयेति । अतिप्रमाथिन्याअतिक्षोभिकयादुर्जयया ऋच्छतिप्राप्नोतिबडिशैःआमिषयुक्तैर्लोहकंटकैः १९ दुर्जयत्वमुपपादयति । इंद्रियाणीतिद्वाभ्यां । अयंभावः । यद्याहार

स्त्यज्यतेतर्हिकेवलमन्येंद्रियजयोभवतिरसनेंद्रियंतुवर्धते । यदितुभुज्यते तर्हिपुनश्चरसासक्त्यासर्वेंद्रियक्षोभःस्यात्अतोरसासाक्तिंपरित्यज्यौषधवद्भुंजीतेति । प्राणवृत्त्यैवसंतुष्येदित्यत्रोक्तमपिरसनस्याति

दुर्जयत्वज्ञापनायोच्यतइतिविशेषः २१२१ पिंगलायानैराश्यंशिक्षितमितिवक्तुंतदाख्यानमाह पिंगलेत्यादिना । मेमयाशिक्षितं २२

पदापियुवतींभिक्षुर्नस्पृशेद्दारवीमपि ॥ स्पृशन्करीवबद्ध्येतकरिण्याअंगसंगतः १३ नाधिगच्छेत्स्त्रियंप्राज्ञःकर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैःसहन्येतग श्लोकाः

जैरन्यैर्गजोयथा १४ नदेयंनोपभोग्यंचलुब्धैर्यद्दुःखसंचितम् ॥ भुंक्तेतदपितच्चान्योमधुहेवार्थविन्मधु १५ सुदुःखोपार्जितैर्वित्तैराशासानांगृहाशिषः ॥

मधुहेवाग्रतोभुंक्तेयतिर्वैगृहमेधिनाम् १६ ग्राम्यगीतंनशृणुयाद्यतिर्वनचरःक्वचित् ॥ शिक्षेतहरिणाद्बद्धान्मृगयोर्गीतमोहिताद् १७ नृत्यवादित्रगीतानि १३/२२

जुषन्ग्राम्याणियोषिताम् ॥ आसांक्रीडनकोवश्यऋष्यशृंगोमृगीसुतः १८ जिह्वयातिप्रमाथिन्याजनोरसविमोहितः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तुबडि

शैर्यथा १९ इंद्रियाणिजयंत्याशुनिराहारामनीषिणः ॥ वर्जयित्वातुरसनंतन्निरन्नस्यवर्धते २० तावज्जितेंद्रियोनस्याद्विजितान्येंद्रियःपुमान् ॥ नजये

द्रसनंयावज्जितंसर्वंजितेरसे २१ पिंगलानामवेश्यासीद्विदेहनगरेपुरा ॥ तस्यामशिक्षितंकिंचिन्निबोधनृपनंदन २२

चूर्णिका अथगजाच्छिक्षितमाह भिक्षुः पदापि दारवीं स्त्रियं न स्पृशेत् स्पृशन् हस्तिन्यंगसंगात् करीव बध्येत १३ किं च प्राज्ञः स्त्रियं नाधिगच्छेत् गच्छन् बलाधिकैःगजैः गजवद्धन्येत

१४ अथ मधुहंतुः शिक्षितमाह यद्धनं लुब्धैः संचितं न देयं नोपभोग्यं चेत् तर्हि तत् अन्यः उपायं ज्ञात्वा मधुहेव भुंक्ते १५ किंच ग्रहाश्रमिणां अन्नादि यतिः

मधुहेव अग्रतः भुंक्ते अनेन उद्यमेन विनापि भोगः संभवतीत्युक्तम् १६ अथ हरिणाच्छिक्षितमाह यतिः ग्राम्यगीतं नशृणुयात् इदंमृगयुगीतमोहिताद्धरिणात् शिक्षितम् ॥४४॥

१७ किं च स्त्रीणां नृत्यगीतानि जुषन्नरः तासां वश्यो भवति मृगीसुतः ऋष्यशृंग इव १८ अथ मीनाच्छि क्षितमाहजनः जिव्हाया रसेनमोहितश्चेत् मृत्युं प्राप्नोति ब

डिशैर्मीनवत् १९ किं च धीमंतः आहारं हित्वा रसनेंद्रियं विना इंद्रियाणि जयंति तानि निरन्नस्य वर्धते२० तावत् जितान्येंद्रियोपिजितेंद्रियो न स्यात् यावत् रसनेंद्रियं

न जयेत् रसे जिते सर्वं जितं स्यात् २१ अर्थपिंगलायाः शिक्षितं वक्तुं तदाख्यानमाह हे नृप पुरा विदेहनगरे पिंगला नाम वेश्या आसीत् तस्याः शिक्षितं शृणु २२

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्वैरिणीकामचारिणीसंकेतेरतिस्थाने २३ तान्वित्तवतः सधनान्अतएवशुल्कदान्मूल्यदान्कांतान्सुरतार्हान्मेने (अर्थकामुकावित्ताभिलाषिणी) २४ अपिःसंभावनायां । अप्यन्यः कश्चिन्मामुपे ष्यतीत्येवंदुराशयेत्युत्तरेणान्वयः २५ द्वार्यवलंबती अवलंबमानापुनःप्रविशतीपुनर्निर्गच्छंतीएवंकुर्वतीनिशीथमर्धरात्रंभाप २६ निर्वेदःअलंबुद्धिः । वित्तचिंतैवहेतुर्यस्यसः २७ यथायथावत् । ममसत्तःशृणु २८ ननुकिंनिर्विण्णायागीतश्रवणेनतत्राह । हियस्मात्पुरुषस्याशापाशानांनिर्वेदोयथाअसिः (छेत्तातथान्योनास्तीत्यर्थः) तत्रहेतुःनहीति अंगहेराजन् २९ अविजितात्मत्वेहेतुः याऽहंबालिशाविवेकशून्यातस्याःमे कुतः । येनकारगेनअसतस्तुच्छान्नरात्कामंकामये ३० बालिशत्वंप्रपंचयति । संतमितिचतुर्भिः । समीपेसंतंअंतर्यामित्वात् (रमणंकांतं) इमंअपरोक्षंईश्वरं ३१ अतिविगर्ह्याविनिंद्यायावार्ताजीविकातया कुतः सांकेत्येनयावृत्तिः तया । बहुव्रीहिणास्त्रविशेषगंदा । परितापंप्रपंचयति । स्त्रैणादिति । स्त्रीलंपटात् । अथ च अर्थतृषः लुब्धात् । अतएवानुशोच्यात् नरात्याऽहं वित्तंरतिंचेच्छती (तया) मयावृथात्मापरितापितः । केनवित्तमिच्छती । तेननरेणक्रीतेनस्वयंविक्रीतेनआत्मनादेहेन (देहविक्रयेणपरपुरुषाद्वित्तादिकमिच्छामीत्यर्थः) ३२ अहोधिङ्मां याऽहमतिबीभत्सितंभजामीत्याह । यदिति । वंशोनामस्थूणासुनिहितास्तिर्यग्वेणुः वंश्यास्तस्मिन्नुभयतोनिहितावेणवः । अस्थिभिरेव निर्मितावंशादयोयस्मिन्तत् । तत्रपृष्ठेयद्दीर्घमस्थियत्सवंशः पार्श्वास्थीनिवंश्यानिस्थूणाहस्तपादास्थीनि । तथारोमभिर्नखैश्चापिनद्धंछादितं । तथापिक्षरंतिनवद्वाराणि यस्मिन्तत् । एवंभूतागाररूपं नरशरीरमेतन्मत्तोऽन्याकावाकांतबुद्ध्याउपैतिसेवते ३३

श्लोकाः २३/३३

सास्वैरिण्येकदाकांतंसंकेतउपनेष्यती ॥ अभूत्कालेबहिर्द्वारिबिभ्रतीरूपमुत्तमम् २३ मार्गआगच्छतोवीक्ष्यपुरुषान्पुरुषर्षभ ॥ तान्शुल्कदान्वित्तवतः कांतान्मेनेर्थकामुका २४ आगतेष्वपयातेषुसासंकेतोपजीवना ॥ अप्यन्योवित्तवान्कोपिमामुपेष्यतिभूरिदः २५ एवंदुराशयाध्वस्तनिद्राद्वार्यवलंबती ॥ निर्गच्छंतीप्रविशतीनिशीथंसमपद्यत २६ तस्यावित्ताशयाशुष्यद्वक्त्रायादीनचेतसः ॥ निर्वेदःपरमोजज्ञेचिंताहेतुःसुखावहः २७ तस्यानिर्विण्णचित्तायागीतंशृणुयथामम २८ निर्वेदआशापाशानांपुरुषस्ययथाह्यसिः ॥ नह्यंगाजातनिर्वेदोदेहबंधंजिहासति २९ ॥ पिंगलोवाच ॥ अहोमेमोहविततिं पश्यताविजितात्मनः ॥ याकांतादसतःकामंकामयेयेनबालिशा ३० संतंसमीपेरमणंरतिप्रदंवित्तप्रदंनित्यमिमंविहाय ॥ अकामदंदुःखभयाधिशोकमोहप्रदंतुच्छमहंभजेऽज्ञा ३१ अहोमयात्मापरितापितोवृथासांकेत्यवृत्त्याऽतिविगर्ह्यवार्तया ॥ स्त्रैणान्नराद्यार्थतृषोऽनुशोच्यात्क्रीतेनवित्तंरतिमात्मनेच्छती ३२ यदस्थिभिर्निर्मितवंशवंश्यस्थूणंत्वचारोमनखैःपिनद्धम् ॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णंमदुपैतिकान्या ३३

चूर्णिका

एकदा सा रतिस्थाने कांतं नेष्यती सती उत्तमं रूपं धृत्वा २३ सायंकाले द्वारि स्थित्वा मार्गे धनदान् पुरुषान् वीक्ष्य सुरतार्हान्मेने २४ एवं तेषुगतेषु सत्सु सा मां अन्यः भूरिदः एष्यति २५ इति दुराशया ध्वस्तनिद्रा द्वारि निर्गच्छती प्रविशती सती निशीथं समपद्यत २६ एवं धनाशया शुष्कमुखायाः तस्याः सुखदः निर्वेदो जज्ञे २७ ततः खिन्नायाः तस्याः गीतं मत्तः शृणु २८ २९ पिंगलोवाच अहो मे मोहविततिं पश्यत या अहं तुच्छनरात् कामं कामये ३० किं च स्वसमीपे संतं नित्यं सर्वार्थदं इमं ईश्वरं विहाय दुःखादियुक्तं नरं भजे अतोहमज्ञा ३१ अहो एतावत्पर्यंतं देहं क्रीत्वा अनया निंद्यवार्तया वृथा देहस्तापितः ३२ किं च इदं शरीररूपं गृहं त्वचारोमनखैः पिनद्धं क्षरन्नवद्वारं विण्मूत्रपूर्णं मदन्या का भजेत् अतो मां धिक् ३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्संगतौसत्यामप्यहोममभोहइत्याह । विदेहानामिति । याऽहमसती । अच्युतादन्यं कामं भोगमिच्छती ३४ साएवं निर्विण्गासतीअतःपरमेवं करिष्यामीत्याह । सुहृदिति अयमीश्वरः ।
आत्मैवत्मनेवात्मानमेवानिवेद्यतं विक्रीय विशेषेणक्रीत्वाअनेनैवसहरमे । रमालक्ष्मीर्यथा ३५ अन्यस्यासेव्यत्वंदर्शयाति । कियादिति । आद्यंतवंतायेकामास्त्रिषयाः कामदानरावा । देवावाकालकलिताः ।
भार्यायाः कियात्प्रियंकृतवंतः नकिंचिदतोनेहामुत्र च यद्व्यतिरिक्तः कोपिसेव्योस्तीत्यर्थः ३६ एवंनिश्चित्यस्वभाग्यमभिनंदति नूनमिति । दुष्टाआशायस्यास्तस्यामे ३७ ननुधनाप्राप्त्याक्लिष्टासि कथं
विष्णुः प्रीतस्तत्राह । मैवमिति । मंदभाग्याचेदहंस्यांतर्ह्येवंनिर्वेदहेतवः क्लेशानस्युरित्यर्थः । येनानिर्वेदेनअनुबंधंगृहादिकंनिर्हृत्यपरित्यज्य ३८ अतस्तेनश्रीविष्णुनाउपकृतंकृतमुपकारंनिर्वेदलक्षणं ग्रा
म्येपुनरेषुविषयेषुवासंगताः ३९ कथंव्रजसितदाह संतुष्टेति । (एतदधीश्वरसेवनंश्रद्दधाना)४० ननुब्रह्मादीन्हित्वाअमुनैवेतिकोयंनियमः । तत्राह । संसारेति मुषितेक्षणंअपहृतविवेकम् ४१ तर्हिकिमात्म
त्राणोपाधिनाभजसि । न । तत्रसर्वतोनिर्विद्यभगवद्भजनेप्रवृत्तस्यात्मनएवसमर्थत्वादित्याह आत्मैवेति । यदाएवंजगत्पश्येत्ततश्चाप्रमत्तःसन्नखिलादिहामुत्रभोगान्निर्विद्यतेतदाहिआत्मैवात्मनोगोप्तेत्य
न्वयः अतः केवलंप्रेम्णैवभजामीतिभावः ४२ कांतस्यतर्षोभिलाषस्ततोजाताम् ४३ फलितमाहआशाहीति ४४॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांऽष्टमोध्यायः ८ ॥ ॥ ७ ॥

श्लोकाः ३४/४४

विदेहानांपुरेह्यस्मिन्नहमेकैवमूढधीः ॥ याऽन्यमिच्छत्यसत्यस्मादात्मदात्काममच्युतात् ३४ सुहृत्प्रेष्ठतमोनाथआत्माचायंशरीरिणाम् ॥ तंविक्रीयात्म
नैवाहंरमेऽनेनयथारमा ३५ कियत्प्रियंतेव्यभजन्कामायेकामदानराः ॥ आद्यंतवंतोभार्यायादेवावाकालविद्रुताः ३६ नूनंमेभगवान्प्रीतोविष्णुःकेनापि
कर्मणा ॥ निर्वेदोयंदुराशायायन्मेजातःसुखावहः ३७ मैवंस्युर्मंदभाग्यायाःक्लेशानिर्वेदहेतवः ॥ येनानुबंधंनिर्हृत्यपुरुषःशममृच्छति ३८ तेनोपकृत
मादायशिरसाग्राम्यसंगताः ॥ त्यक्त्वादुराशाःशरणंव्रजामितमधीश्वरम् ३९ संतुष्टाश्रद्दधत्येतद्यथालाभेनजीवती ॥ विहराम्यमुनैवाहमात्मनारमणे
नवै ४० संसारकूपेपतितंविषयैर्मुषितेक्षणम् ॥ ग्रस्तंकालाहिनात्मानंकोन्यस्त्रातुमधीश्वरः ४१ आत्मैवह्यात्मनोगोप्तानिर्विद्येतयदाऽखिलात् ॥ अप्रमत्त
इदंपश्येद्ग्रस्तंकालाहिनाजगत् ४२ ॥ ब्राह्मणउवाच ॥ एवंव्यवसितमतिर्दुराशांकांततर्षजाम् ॥ छित्त्वोपशममास्थायशय्यामुपविवेशसा ४३ आशा
हिपरमंदुःखंनैराश्यंपरमंसुखम् ॥ यथासंछिद्यकांताशांसुखंसुष्वापपिंगला ४४ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेऽष्टमोध्यायः ८ ॥ ७ ॥

चूर्णिका

किंच अत्र विदेहानां पुरे अहमेकैव अज्ञा यतः अंतर्यामिणं हरिं हित्वाऽन्यं भजे ३४ अतःपरं एनं देहं विक्रीय आत्मनैव रमावत् रमे ३५ ३६ किंच अद्य के
नापि भाग्योदयेन विष्णुः मे प्रीतः यतः एवं मे निर्वेदो जातः ३७ किंच अहं मंदभाग्या चेत् स्यां तर्हि एवं निर्वेदहेतवः क्लेशाः न स्युः येन निर्वेदेन गृहादिकं
निर्हृत्य पुरुषःशममृच्छति ३८ अतःतेन विष्णुना कृतमेनं उपकारं शिरसा आदाय आशाः हित्वा तमेव शरणं व्रजामि ३९ तथा यथालाभेन जीवती अहं अमुना
रमणेनैव विहरामि ४० किं च संसारकूपे पतितं कालाहिना ग्रस्तं आत्मानं अन्यः कस्त्रातुं ईशः ४१ अतः तमेवेत्याग्रहः किंच इदं जगत् कालग्रस्तं दृष्ट्वा सर्व
तो निर्विद्येत इति ४२ ॥ ब्राह्मण उवाच ॥ एवं व्यवसितमतिर्दुराशां कांततर्षजाम् छित्त्वोपशममास्थाय शय्यामुपाविवेश सा ४३ आशा हि परमं दुःखं नैराश्यं परमं
सुखं यथा संछिद्य कांताशां सुखं सुष्वापपिंगला ४४ इत्येकादशेअष्टमः ८ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ९ ॥

नवमेकुररादिभ्योदेहतश्चोपशिक्षितम् । श्रुत्वायदुःकृतार्थोऽभूदितिकृष्णेनवर्णितम् ॥ १ ॥ कुरराच्छिक्षितमाह । परिग्रहोहीति । यद्यत्प्रियतमंतस्यतस्यपरिग्रहः तद्विद्वान्परिग्रहोदुःखमितिविद्वान् सन्यस्त्वकिंचनः त्यक्तपरिग्रहः नतुदरिद्रः १ तदाह सामिषमिति । (आमिषंचंचुपुटेगृहीत्वागच्छंतंकुररंपक्षिणम् । सकुररः) २ अर्भकशिक्षामाह नेति । गेहपुत्रिणांतद्वतांयाचिंताभवतिसाचमेनास्ति । आत्मनैवक्रीडायस्यसः । आत्मनिरतिः प्रीतिर्यस्यस. ३ नन्वज्ञसर्वज्ञयोः किंसादृश्यंनैश्चिंत्यंपरमसुखमित्याह । द्वाविति । विमुग्धः अज्ञः जडः अनुद्यमः एवंभूतोयोबालः यश्चप्रकृतेः परमीश्वरं प्राप्तः तौद्वौ ४ कुमार्याःशिक्षितंवक्तुमाख्यायिकामाह । क्वचिदित्यादिनावृणानान्स्ववरणायआगतान्बंधुषुपित्रादिषु ५ (अभ्यवहारार्थभोजनार्थं) शंखाः शंखकंकणानि । महद्यथाभवतितथास्वनं चक्रुः ६ सामहतीबुद्धिमतीवत्स्वयंशाल्यवहननंजुगुप्सितंदरिद्रताद्योतकंएकैकशः क्रमेणएकमेकंबभंजकरादपसारितवती ७ निरभिदत्पृथक्कृतवती ८ ननुकुमार्यास्तवचकथंसंगतिस्तत्राह । लोकानिति ९ वासइतिप्रथमांतपाठेकलहः कलहहेतुः । वार्तागोष्ठीहेतुर्भवेदित्यर्थः (द्वयोरपिवासः) १०

॥४७॥

श्लोकाः १/१०

॥ ब्राह्मणउवाच ॥ परिग्रहोहिदुःखाययद्यत्प्रियतमंनृणाम् ॥ अनंतंसुखमाप्नोतितद्विद्वान्यस्त्वकिंचनः १ सामिषंकुररंजघ्नुर्बलिनोयेनिरामिषाः ॥ तदामिषंपरित्यज्यससुखंसमविंदत २ नमेमानापमानौस्तोनचिंतागेहपुत्रिणाम् ॥ आत्मक्रीडआत्मरतिर्विचरामीहबालवत् ३ द्वावेवचिंतयामुक्तौपरमानंदआप्लुतौ ॥ योविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः ४ क्वचित्कुमारीत्वात्मानंवृणानान्गृहमागतान् ॥ स्वयंतानर्हयामासक्वापियातेषुबंधुषु ५ तेषामभ्यवहारार्थंशालीन्रहसिपार्थिव ॥ अवघ्नंत्याःप्रकोष्ठस्थाश्चक्रुःशंखाःस्वनंमहत् ६ सातज्जुगुप्सितंमत्वामहतीव्रीडिताततः ॥ बभंजैकैकशःशंखान्द्वौद्वौपाण्योरशेषयत् ७ उभयोरप्यभूद्घोषोह्यवघ्नंत्याःस्मशंखयोः ॥ तत्राप्येकंनिरभिदद्देकस्मान्नाभवद्ध्वनिः ८ अन्वशिक्षमिमंतस्याउपदेशमरिंदम ॥ लोकाननुचरन्नेताँल्लोकतत्त्वविविसया ९ वासेबहूनांकलहोभवेद्वार्ताद्वयोरपि ॥ एकएवचरेत्तस्मात्कुमार्याइवकंकणः १०

चूर्णिका ॥ ब्राह्मण उवाच ॥ अथ कुरराच्छिक्षितमाह हे यदो यत् यत् नृणां प्रियतमं तत्तद्ग्रहणं दुःखमितिज्ञात्वा त्यक्तपरिग्रहः स्यात् १ यथाह सामिषं कुररं मांसहीनाः अन्ये कुरराः तं जघ्नुः सः तदामिषं त्यक्त्वा सुखं प्राप्तः २ अथार्भकशिक्षितमाह हे नृप मे मानापमानौ गृहपुत्रवतां चिंता च न अहं तु आत्मक्रीडः बालवद्विचरामि ३ किंच अत्र लोके चिंताहीनौ आनंदव्याप्तौ च द्वावेव योज्ञः यश्चेशं प्राप्तः ४ अथ कुमार्याः शिक्षितं वक्तुं तत्कथामाह कदाचित् कुमारीआत्मानं वरयितुं प्राप्तान् पुरुषान् दृष्ट्वा अन्यत्र बंधुषु गतेषु स्वयं तान् पूजयामास ५ ततः तेषां भोजनार्थं रहः शालीन् अवघ्नंत्यास्तस्याः करस्थाः शंखाः शब्दं चक्रुः ६ इदं निंद्यमिति मत्वा करात् एकैकं निःसृत्य पुनरवघ्नंत्यास्तस्याः शंखाः स्वनं चक्रुः ७ ततः कराभ्यामेकैकं निःसृत्य एकैकमशेषयत् ततः शब्दो नाभवत् ८ लोकाननुचरन् तस्याः इमं उपदेशं अन्वशिक्षम् ९ एवं बहूनां एकत्रवासे कलहः द्वयोस्तु वार्ता स्यात् अतः तत्कंकणवत् एकएव चरेत् १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ. ए. चित्तैकाग्र्यं द्वतारकृतिंलक्षणसमाधिहेतुरितिशरकाराच्छिक्षितमाह । मनइति । तत्रोपायमाह । जितेति । आसनजयेश्वासजयः तस्यजयेश्वासाधीनंमनोनिश्चलंभवति । ननु क्षणंनिश्चलंसदपिमनोवि अ०
षयवासनयायदिविक्षिप्येतसुषुप्ताविवसर्वथालीयेतवातदाकिंतत्राह । वैराग्येति वैराग्येणाविक्षिप्यमाणंअभ्यासयोगेनलक्ष्येधियमाणंस्थिरीक्रियमाणं (सत्एकत्रसंयुज्यात्) ११ एकत्रेतिकुत्रतदाह ।
टीका यास्मिन्निति । यल्लयविक्षेपात्मकंमनःयस्मिन्परमानंदरूपेश्रीभगवतिलब्धास्पदंसत्कर्मरेणून्कर्मवासनाः मुंचतितस्मिन् (संयुज्यात्) । ननुकर्मवासनात्यागेपिसुषुप्तिवल्लयोदुर्वारः । न । सत्त्वेनेति ।
वृद्धेनउपशमात्मकेनरजस्तमसोरभावेविक्षेपलयाभावात्निर्वाणमवृत्तिकंध्येयाकारेणावस्थानमुपैति । कुतः । अनिंधनंगुणैस्तत्कार्येणचरहितम् । तदुक्तंयोगशास्त्रे । "मनसोवृत्तिशून्यस्यब्रह्माकारतया ॥ ९ ॥
स्थितिः । याऽसंप्रज्ञातनामासौसमाधिरभिधीयते" इति १२ ततश्चनद्वैतास्फूर्तिरित्याह । तदेति । बहिर्दर्शनादिना । अंतरंस्मृत्या । इषौगतात्मातस्यऋजुकरणेदत्तचित्तः (इषुकारोबाणस्यकर्ता) भेरी
''४८॥ घोषैः सेनयाचसहांतिके व्रजंतंनृपतिमपि नवेदतद्वत् १३ सर्पाच्छिक्षितमाह । एकचारीति । योगिसंमर्दस्यापित्यागेकुमारीगुरुरुक्तः । जनसंगत्यागेतुसर्पः सयथाजनाच्छंकमानएकाकीविचरति ।
नियतनिकेतरहितश्च । सदाऽप्रमत्तश्चएकांतवासीचआचारैर्गतिभिः सविषोनिर्विषोवेति नलक्ष्यतेचअसहायश्चमितभाषीचतद्वन्मुनिर्वर्ततेत्यर्थः १४ किंचगृहारंभइति । अध्रुवात्मनः नश्वरदेहस्यसुखं
यथाभवतितथावर्धते १५ कारकसामग्रीनिरपेक्षात्केवलादीश्वराद्विश्वसृष्टिसंहारावूर्णनाभिदृष्टांतेनमयासंभाविताविति त्र्यक्तुंप्रथमंसंहारप्रकारमाह । एकइतिसार्धत्रयेण । एकः कारकनिरपेक्षः पूर्वंसृष्ट
मिदंजगत् । कालकलयाकालशक्त्यासंहृत्य १६ एकएवाद्वितीयः सजातीयविजातीयभेदशून्योभूत् । कारणभूतासु सत्त्वादिषु शक्तिष्वपि साम्यंनीतासुसतीषु १७ गुणसाम्यंप्रधानंतदुपाधिः पुरुषः
तयोरीश्वरः परावराणां परेब्रह्मादयः अवरेअन्येचमुक्ताजीवास्तेषांपरमः प्राप्य आस्तेकुतः कैवल्यसंज्ञितः मोक्षशब्दाभिधेयः १८

मनएकत्रसंयुज्याज्जितश्वासोजितासनः ॥ वैराग्याभ्यासयोगेनध्रियमाणमतंद्रितः ११ यस्मिन्मनोलब्धपदंयदेतच्छनैःशनैर्मुंचतिकर्मरेणून् ॥ सत्त्वेनवृ श्लोकाः
द्धेनरजस्तमश्चविधूयनिर्वाणमुपैत्यनिंधनम् १२ तदैवमात्मन्यवरुद्धचित्तोनवेदकिंचिद्बहिरंतरंवा ॥ यथेषुकारोनृपतिंव्रजंतमिषौगतात्मानददर्शपार्श्वे १३
एकचार्यनिकेतःस्यादप्रमत्तोगुहाशयः ॥ अलक्ष्यमाणआचारैर्मुनिरेकोऽल्पभाषणः १४ गृहारंभोहिदुःखायविफलश्चाध्रुवात्मनः ॥ सर्पःपरकृतंवेश्मप्र ११/१८
विश्यसुखमेधते १५ एकोनारायणोदेवःपूर्वसृष्टंस्वमायया ॥ संहृत्यकालकलयाकल्पांतइदमीश्वरः १६ एकएवाद्वितीयोभूदात्माधारोखिलाश्रयः ॥
कालेनात्मानुभावेनसाम्यंनीतासुशक्तिषु १७ सत्त्वादिष्वादिपुरुषःप्रधानपुरुषेश्वरः ॥ परावराणांपरमआस्तेकैवल्यसंज्ञितः १८

चूर्णिका अथ शरकारात् शिक्षितमाह मुनिः आसनप्राणौजित्वा मनः एकत्र युंज्यात् ११ एवं कृते स्थिरं सत् मनः कर्मवासनाःमुंचति ततः वृद्धेन सत्त्वेन रजस्तमसीविधूय
ध्येयाकारेण अवस्थानं उपैति १२ एवं मनसि स्थिरे जाते पुमान् बहिरंतरं न वेद यथा इषुकारः इषौ दत्तचित्तः पार्श्वेगतं नृपतिं न ददर्श १३ अथ सर्पाच्छि
क्षितमाह मुनिः एकचारी अनिकेतः आचारैः अलक्ष्यमाणः भवेत् १४ किं च गृहारंभः दुःखदो भवति इति ज्ञात्वा सर्पःपरकृतं गृहं प्रविश्य सुखं प्राप्नोति यथा ॥४८॥
तद्वत् गृहारंभोपि न कार्यः १५ अथ ऊर्णनाभेः शिक्षितमाह नारायणः देवः स्वमायया सृष्टमिदं कल्पांते संहृत्य एक एव आत्माधारः कैवल्यसंज्ञितः परमानंदरूपः
आस्ते अनेन लयो दर्शितः १६ १७ किंच त्रिगुणात्मिकां मायां कालेन निमित्तेन क्षोभयन् १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रहेतुः केवलेति । निर्विषयः स्वप्रकाशः । आनंदानांसंदोहः समूहः परमानंदइत्यर्थः । कुतः निरुपाधिकः ततः केवलादेवसृष्टिंदर्शयाति । केवलेनआत्मानुभावेनकालेन १९ (संक्षोभयन्) सूत्रं
क्रियाशक्तिप्रधानंमहत्तत्त्वं सृजति । जीवसंसारहेतुभूतेसूत्रेसृष्टेपित्वंमाभैषीरितिसंबोधयतिआरंदम । अरीन्रागादीन्दमयितुंसमर्थ सूत्रस्यैवव्यक्तिशब्देनोच्यमानस्यतामितिस्त्रीलिंगेनपरामर्शः त्रिगुण
व्यक्तिगुणत्रयस्यकार्यंअतएवविश्वतोमुखंनानाविधंत्रिगुणात्मकंविश्वमहंकारद्वारेणसृजंतीम् २० त्रिगुणकार्यस्यसूत्रसंज्ञायांकारणमाह । यस्मिन्निति । कारणभूतेसमष्टिरूपेयस्मिन्निदंविश्वंप्रोतंग्रथितम् ।
“ वायुर्वैगौतमतत्सूत्रंवायुनावैगौतमसूत्रेणायंलोकःपरश्चलोकः सर्वाणिभूतानिसंदृब्धा”तिश्रुतेः । येनवाय्वात्मप्राणरूपेणजीवः संसरति । तदेवंशिक्षितमर्थमुक्त्वादृष्टांतमाह । यथेति । हृदयादुद्गतांव
॥४९॥ क्त्रतः वक्रेणसंतत्य प्रसार्य विहृत्य क्रीडित्वा २१ (तयाऊर्णयाविहृत्यक्रीडित्वापुनर्ग्रसतिएवंमहेश्वरोपितयात्रिगुणव्यक्त्याविहृत्यतांसंहरतीति) भगवद्ध्यानपरायणानांतत्सारूप्यंनचित्रमिति पेशस्कृतो
भ्रमराविशेषाज्ज्ञातमित्याह । यत्रयत्रेति । सकलंएकाग्रं २२ कुड्यां (गृहकोष्ठके) प्रवेशितोनिरुद्धः भयेनध्यायन्सात्मतांतत्सारूप्यं साम्यतामितिपाठेपिसएवार्थः पूर्वरूपमसंत्यजन्इत्यस्यायमभि
प्रायः । यदातेनैवदेहेनान्यसारूप्यंदृश्यतेतदाकिंवक्तव्यंदेहांतरेणसारूप्यंघटतइति २३ (उपसंहरतिएवमिति । अथ) स्वदेहादेवशिक्षितमाह स्वात्मेति। स्वात्मनोदेहाच्छिक्षिताम् २४ गुरुत्वेहेतुः विर
क्तिविवेकयोर्हेतुरिति । विरक्तिहेतुत्वमाह । सत्त्वनिधनंउत्पत्तिनाशौविभ्रत्स्म । किंचसततंसंततंआर्त्युदर्कंआर्तिदुःखंतदेवोदर्कउत्तरफलंतंबिभ्रत् । यद्वा सततार्तिरेवउदर्कउत्तरफलंयस्यतत्सत्त्व
निधनंबिभ्रत् । विवेकहेतुत्वमाह तत्त्वानीति (विमृशामिविचारयामि) यथायथावत् । एवमत्युपकारित्वेपिशरीरेनैवास्थाकार्येत्याह तथापीति पारक्यंश्वसृगालादिभक्ष्यंइतिनिश्चितवान् २५

केवलानुभवानंदसंदोहोनिरुपाधिकः ॥ केवलात्मानुभावेनस्वमायांत्रिगुणात्मिकाम् १९ संक्षोभयन्सृजत्यादौतयासूत्रमरिंदम ॥ तामाहुस्त्रिगुणव्यक्तिंसृ श्लोकाः
जंतींविश्वतोमुखम् २० यस्मिन्प्रोतमिदंविश्वंयेनसंसरतेपुमान् ॥ यथोर्णनाभिर्हृदयादूर्णांसंतत्यवक्त्रतः २१ तयाविहृत्यभूयस्तांग्रसत्येवंमहेश्वरः ॥
यत्रयत्रमनोदेहीधारयेत्सकलंधिया ॥ स्नेहाद्द्वेषाद्भयाद्वापियातितत्तत्सरूपताम् २२ कीटःपेशस्कृतोध्यायन्कुड्यांतेनप्रवेशितः ॥ यातितत्साम्यतांराजन् १९/२५
पूर्वरूपमसंत्यजन् २३ एवंगुरुभ्यएतेभ्यएषामेशिक्षितामतिः ॥ स्वात्मोपशिक्षितांबुद्धिंशृणुमेवदतःप्रभो २४ देहोगुरुर्ममविरक्तिविवेकहेतुर्बिभ्रत्स्मसत्त्व
निधनंसततार्त्युदर्कम् ॥ तत्त्वान्यनेनविमृशामियथातथापिपारक्यमित्यवसितोविचराम्यसंगः २५

चूर्णिका

१९ आदौ महत्तत्वं सृजति यत्र इदं विश्वं प्रोतम् येन सूत्रेण पुमान् संसरते अनेन सृष्टिः दर्शिता २० यथा ऊर्णनाभिः हृदयात् निर्गतां ऊर्णां वक्रेण प्रसार्य क्रीडि
त्वा पुनः ग्रसति एवं ईश्वरः २१ अथ पेशस्कृतः शिक्षितमाह यथा पेशस्कृता कुड्यां रुद्धः कीटः तं ध्यायन् पूर्वरूपं असंत्यजन् तद्रूपं प्राप्नोति २२ तथा देही यत्र ॥४९॥
यत्र स्नेहादिना मनो धारयेत् तत्तत्स्वरूपतां प्राप्नोति २३ एवंएभ्यो गुरुभ्यः एषा बुद्धिः शिक्षिता २४ अथ स्वदेहाच्छिक्षितमाह हे नृप अयं देहः मे गुरुः यतः विर
क्तिविवेकयोर्हेतुः तदपि कुतः जन्मनिधने बिभ्रत्स्म किंच अनेन तत्त्वानि विमृश्यापि पारक्यमिति ज्ञात्वा असंगः चरामि २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

सततात्युदर्कतांप्रपंचयति । जायेतिद्वाभ्याम् । यस्यदेहस्यप्रियचिकीर्षया भोगसंपादनेच्छयाजायादिवर्गान् वितन्वन् संपादयन्पुष्णाति पुरुषः । कथंभूतः । सकृच्छ्रंसायासंयथाभवतितथाअवरुद्धानिसंचितानिधनानियेनसः देहविशेषणंवा । सःदेहः स्वांतेस्वस्यायुषोंऽतेअवसीदतिनश्यति । किंच । देहनाशेपिनदुःखसमाप्तिरित्याह अस्यपुरुषस्यदेहांतरोत्पादकंबीजंकर्मसृष्ट्वेति । वृक्षस्येवधर्मोयस्यसः २६ किंच जिह्वेति । अमुंदेहंतदभिमानिनंपुरुषंवाएकतः रसंप्रति अपकर्षति आच्छिनत्ति । कर्हिकदाचित् तर्षापिपासाजलंप्रति । शिश्नोव्यवायंप्रति । त्वक्स्पर्शंप्रति । उदरंअन्नमात्रंप्रति । श्रवणं शब्दंप्रति । घ्राणोगंधंप्रति । चपलदृक्रूपंप्रति । क्वचक्वचित् स्वस्वविषयंप्रतिकर्मशक्तिः वागादिकर्मेंद्रियं लुनंतित्रोटयंति (बह्व्यः सपत्न्यः स्वस्वविषयंप्रतियथा) २७ तदेवंदेहोगुरुरित्यादित्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्यदेहस्यातिदुर्लभतांदर्शयन्नीश्वरनिष्ठांविधत्ते । सृष्ट्वेतिद्वाभ्याम् । पुराणिशरीराणि (वृक्षाद्यनेकरूपाणिसृष्ट्वा) पुरुषंनृदेहंब्रह्मणोऽवलोकायअपरोक्षज्ञानायधिषणाबुद्धिर्यस्मिन्तम् । तदुक्तम् । "तासांमेपौरुषीप्रिये"ति । श्रुतिश्च । "पुरुषत्वेचाविस्तरामात्मे"ति । ईश्वरोहिकरणाधिष्ठात्रीरग्न्यादिदेवतावागादिभिः सहसृष्टवान् । ताश्चतंप्रतिभोगार्थंशरीरमयाचंत सचताभ्योगोशरीरमश्वशरीरंपुरुषशरीरंयथाक्रममानीतवान् ततस्तादेवताःसोऽब्रवीत्यथायतनंचक्षुरादिस्थानमस्मिन्देहेप्रविशतेति तदाह ताभ्यइत्यादितथाताभ्योगामानयत्ताअब्रुवन्नवैनोऽयमलमितिताभ्योऽश्वमानयत्ताअब्रुवन्नवैनोऽयमलमितिताभ्यः पुरुषमनयत्ताअब्रुवन् सुकृतंबतेतिच २८ तस्मात्बहूनां संभवानांजन्मनामंते मानुष्यमनित्यमप्यर्थदं पुरुषार्थप्रापकं (पुनर्जन्मांतरेसुदुर्लभं) दैवाल्लब्ध्वाइदं अनुमृत्युअन्वनुनिरंतरंमृत्यवोयस्यतत् । यावन्नपतेत् तावदेव (धीरोऽनुद्विग्नः) तूर्णं शीघ्रं निश्रेयसाययतेत । विषयस्तुपुनः सर्वतः पश्वादियोनिष्वपिस्यादेव २९ तदेवं हेयोपादेयविवेकंबहुधानिरूप्येदानींयदुक्तंत्वंतुकल्पःकविर्दक्षइत्यादितत्रोत्तरमाह एवमिति एवं बहुभ्यो गुरुभ्यः शिक्षितेन । विशिष्टं ज्ञानमेवालोकः प्रदीपोयस्यसः सप्तम्यंतं वा आत्मविशेषणं आत्मनिस्वस्वरूपेस्थितएवमहींविचरामि ३० ननुकिंबहुभिर्गुरुभिः नहिश्वेतकेतुभृगुप्रभुखैर्बहवोगुरवआश्रितास्तत्राह । नह्येकस्मादिति । बहुधासप्रपंचनिष्प्रपंचभेदादिभिः । अयंभावः नैतेपरमार्थोपदेशगुरवःकिंत्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रानिवर्तकाः अतस्त्वेषां बहुत्वंयुक्तमेवेति । ज्ञानप्रदंतुगुरुमेकमेववक्ष्यति । मदभिज्ञं गुरुंशांतमुपासीतेति । उक्तं च । "तस्माद्गुरुंप्रपद्येताजिज्ञासुःश्रेयउत्तमम्"ति ३१

॥५०॥

श्लोकाः २६/३१

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णातियत्प्रियचिकीर्षयावितन्वन् ॥ स्वांतेसकृच्छ्रमवरुद्धधनःसदेहःसृष्ट्वास्यबीजमवसीदतिवृक्षधर्मः २६ जिह्वैकतोऽमुमपकर्षतिकर्हितर्षाशिश्नोऽन्यतस्त्वगुदरंश्रवणंकुतश्चित् ॥ घ्राणोऽन्यतश्चपलदृक्क्वचकर्मशक्तिर्बह्व्यःसपत्न्यइवगेहपतिंलुनंति २७ सृष्ट्वापुराणिविविधान्यजयात्मशक्त्यावृक्षान्सरीसृपपशून्खगदंशमत्स्यान् ॥ तैस्तैरतुष्टहृदयःपुरुषंविधायब्रह्मावलोकधिषणंमुदमापदेवः २८ लब्ध्वासुदुर्लभमिदंबहुसंभवांतेमानुष्यमर्थदमनित्यमपीहधीरः ॥ तूर्णंयतेतनपतेदनुमृत्युयावन्निश्रेयसायविषयःखलुसर्वतःस्यात् २९ एवंसंजातवैराग्योविज्ञानालोकआत्मनि ॥ विचरामिमहीमेतांमुक्तसंगोऽनहंकृतिः ३० नह्येकस्माद्गुरोर्ज्ञानंसुस्थिरंस्यात्सुपुष्कलम् ॥ ब्रह्मैतदद्वितीयंवैगीयतेबहुधर्षिभिः ३१

चूर्णिका

किंच यत्प्रियं कर्तुं पुमान् जायात्मजादीन् पुष्णाति सः देहः आयुषोंऽते तान् विसृज्य नश्यति २६ अपिच अमुं देहं जिव्हादिसर्वेंद्रियाणि स्वस्वविषयं प्रति अपकर्षंति यथा बह्व्यः सपत्न्यः गेहपतिं त्रोटयंति तद्वत् २७ इदानीं ईश्वरनिष्ठां विधत्ते अहो देवः विविधानि वृक्षादिपुराणि सृष्ट्वा तैः तैः अतुष्टहृदयः नृशरीरं निर्माय मुदं आप २८ एवं इदं शरीरं बहुजन्मांते लब्ध्वा तत्रापि अर्थदं इति ज्ञात्वा धीरः यावत् मृत्युर्नपतेत् तावत् मोक्षाय यतेत न विषयार्थम् २९ हे नृप एवं संजातवैराग्यः निरहंकारश्चाहं संगं हित्वा महीं चरामि ३० किंच एकस्मात् गुरोः स्थिरं पुष्कलं च ज्ञानं नप्राप्नोति यतः इदं अद्वितीयं ब्रह्म ऋषिभिः बहुधा गीयते ३१

॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रोदत्तात्रेयः 'योगर्द्धिमापुरुभर्यींयदुर्हैहयाद्या'इत्युक्तत्वात् । यथागतंतथैवचयदृच्छयायाविंत्यर्थः ३२ श्रीभगवान् स्वीयं ब्रह्मवित् कुलमितिश्लाघते । नः पूर्वेषांपूर्वजइति । समचित्तोब्रह्मनिष्ठः ।
अत्र संग्रहश्लोकाः । " कपोतमीनहरिणकुमारीगजपन्नगाः । पतंगःकुररश्चाष्टौहेयार्थेगुरवोमताः । मधुकृन्मधुहर्ताचपिंगलाचद्वयोस्त्रयः । उपादेयार्थविज्ञानेशेषाःपृथ्व्यादयोमताः । तदवांतर
भेदश्चतत्रतत्रस्फुटीकृतः । अध्यायत्रितयेचाष्टनवाष्टावीरिताःक्रमादि"ति ३३ ॥ ॥ इति श्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांनवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ ७ ॥
चतुर्विंशतिगुर्वाख्यालब्धसंभावनस्यहि । उद्धवस्यात्मतत्त्वाप्त्यैसाधनोक्तिरतःपरम् ॥ १ ॥ दशमेदेहसंबंधात्संसृतिर्नात्मनःस्वतः ।इत्येतद्वर्णयामासमतांतरनिरासतः ॥२॥तदेवमन्वयव्यतिरेकाभ्यामुत्पन्न
विवेकज्ञानस्यतत्त्वज्ञानायादितआरभ्य साधनान्युपदिशति भगवान् । मयेति मया पंचरात्रादावुक्तेषुवैष्णवधर्मेषुअवहितः अप्रमत्तः सन् तदविरोधेनवर्णाद्याचारंसमाचरेत् अनुतिष्ठेत् । (अकामात्मा
फलकामनारहितः ।) १ कथमकामात्मतासंभवति तत्राह । अन्वीक्षेतेति । स्वधर्मैर्विशुद्धचित्तः सन् देहिनां विषयेषु सत्यत्वाभिनिवेशेनयेसर्वेआरंभास्तेषांकालेवैपरीत्यं पश्येत् । एवंफलवैपरीत्या
दकामः स्यात् २ किंच । काम्यविषयाणांमिथ्यात्वादपीत्याह । सुप्तस्येति । विफलः अर्थशून्यः अत्रैवंप्रयोगः । इंद्रियैर्याबहिर्नाना (रूप) बुद्धिः साविफला । नानात्मकत्वात् ऐंद्रियकत्वाच्च म
नोजन्यस्वप्नमनोरथवदिति (गुणैरिंद्रियैः) ३ "मोक्षार्थीनप्रवर्तेततत्रकाम्यनिषिद्धयोः । नित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासये"तिस्मृतिः । अतः प्रवृत्तंकाम्यंकर्मत्यजेत् । निवृत्तंनित्यनैमित्तिकमेव
कुर्यात् । आत्मविचारेतु सम्यक्प्रवृत्तोनिवृत्तकर्मचोदनामपिनाद्रियेत ४ किंतुयमान् अहिंसादीन् अभीक्ष्णमादरेण सेवेत । शौचादींस्तु नियमान् क्वचिद्यथाशक्ति । आत्मज्ञानाविरोधेन । यमा
न्द्वादशनियमांश्चैकोनविंशेध्यायेवक्ष्यति किंच यमेष्वप्यादरंपरित्यज्य गुरुमुपासीतेत्याह । मदभिज्ञमिति । मदात्मकंमद्रूपम् ५

श्लोकाः ३२/५

॥ श्रीभगवानुवाच ॥ इत्युक्त्वासयदुंविप्रस्तमामंत्र्यगभीरधीः ॥ वंदितोभ्यर्चितोराज्ञाययौप्रीतोयथागतम् ३२ अवधूतवचःश्रुत्वापूर्वेषांनःसपूर्वजः ॥
सर्वसंगविनिर्मुक्तःसमचित्तोबभूवह ३३ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेनवमोऽध्यायः ९ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥
मयोदितेष्ववहितःस्वधर्मेषुमदाश्रयः ॥ वर्णाश्रमकुलाचारमकामात्मासमाचरेत् १ अन्वीक्षेतविशुद्धात्मादेहिनांविषयात्मनाम् ॥ गुणेषुतत्त्वध्यानेनसर्वा
रंभविपर्ययम् २ सुप्तस्यविषयालोकोध्यायतोवामनोरथः ॥ नानात्मकत्वाद्विफलस्तथाभेदात्मधीर्गुणैः ३ निवृत्तंकर्मसेवेतप्रवृत्तंमत्परस्त्यजेत् ॥ जिज्ञा
सायांसंप्रवृत्तोनाद्रियेत्कर्मचोदनाम् ४ यमानभीक्ष्णंसेवेतनियमान्मत्परःक्वचित् ॥ मदभिज्ञंगुरुंशांतमुपासीतमदात्मकम् ५

चूर्णिका ॥ श्रीभगवानुवाच ॥ इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गभीरधीः वंदितोभ्यर्थितो राज्ञा ययौ प्रीतो यथागतम् ३२ अवधूतवचः श्रुत्वा पूर्वेषां नः स पूर्वजः सर्वसंगवि
निर्मुक्तः समचित्तो बभूव ह ३३ ॥ इत्येकादशे नवमः ॥ ९ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ हे उद्धव मया उक्तेषु वैष्णवधर्मेषु अप्रमत्तः वर्णाश्रमकुला
चारं तदविरोधेन निष्कामतया अनुतिष्ठेत् १ किंच विषयात्मनां देहिनां विषयेषु सत्यत्वेन ये आरंभाः तेषांफलवैपरीत्यं पश्येत् २ किंच यथा सुप्तस्य स्वप्ने विषयालो
कः तथा मनोरथश्च विफलः एवं आत्मनि इंद्रियैः याबहिर्नानाबुद्धिः सा विफला ३ किंच मत्परः पुमान् निवृत्तंकर्म सेवेत प्रवृत्तंकर्म त्यजेत् तत्रापि आत्मविचारे
प्रवृत्तस्तु निवृत्तकर्मचोदनामपि नाद्रियेत ४ किंच यमान् पुनः पुनः सेवेत नियमांस्तु यथाशक्ति यमेष्वपि आदरंहित्वा गुरुं मद्रूपं शांतं उपासीत ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

गुरुसेवकस्यधर्मानाह । अमानीति (अमानीनिरहंकारः) दक्षोऽनलसः । निर्ममः जायादिषुममताशून्यः । गुरौतुदृढसौहृदः । असत्वरःअव्यग्रः । अमोघवाक् व्यर्थालापरहितः । एतान्येवशिष्यस्य लक्षणानिज्ञेयानि ६ ननु स्वजायादिषुकथंनिर्ममः स्यात्तत्राह । जायेति । औदासीन्यहेतुंविवेकंदर्शयति । आत्मनोर्थंप्रयोजनंसर्वत्रसममिवपश्यन्निति । अयंभावः सर्वदेहेष्वात्मनएकत्वात् जायादिदेहेऽन्यस्मिंश्चदेहे आत्मनोर्थः सुखादिः समएव । केनविशेषेणैतेष्वेवममत्वाभिनिवेशइत्येवमुदासीनः सन्गुरुंप्रपद्येतेति ७ अहोकोसौदेहव्यतिरिक्तआत्मायस्यैक्यादर्थः सर्वेषु समः स्यात्तमाह विलक्षण इति । स्थूलसूक्ष्मदेहद्वयादात्मान्यः यतोविलक्षणः । द्वेधावैलक्षण्यं दर्शयति । ईक्षिता स्वदृगिति । द्रष्टाहिदृश्याद्विलक्षणः स्वप्रकाशश्च जडाद्विलक्षणः । तस्यान्यत्वेदृष्टांतः । यथाग्निर्दाहकः प्रकाशकश्चदाह्यात्प्रकाश्याच्च दारुणः काष्ठादन्यस्तद्वदिति ८ अनेनैवदृष्टांतेनानित्यत्वानादित्वविभुत्वैकत्वादयोपि सिध्यंतीत्याह । निरोधेति । यथाचदारुष्वंतःप्रविष्टोऽग्निस्तत्कृतान्नाशादीन् प्राप्नोति । नतुस्वतोनाशादिमान् । एवंदेहगुणाननित्यत्वादीन्देहात्परोनित्यादिस्वरूपोप्यात्मानुभवति । ततश्चनित्यत्वादिभिरपिवैलक्षण्यादन्यत्वमितिभावः ९ नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वंघटते । आत्मनस्त्वसंगत्वात्कथंदेहेनतद्धर्मैर्वासंबंधः संबंधेवाकुतस्तन्निवृत्तिस्तत्राह । योसाविति । पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योसौसूक्ष्मः अयंचस्थूलोदेहोविरचितः पुंसोजीवस्यायं संसारः तन्निबंधनः तदध्यासकृतः (रज्जुसर्पवद्भ्रांतिजन्यइत्यर्थः) हियस्मादेवंतस्मादात्मविद्यातन्निवर्तिकेत्याह । आत्मनोविद्याआत्मानुभवः तस्य संसारस्यछित् छेत्री । आच्छिदितिवापदच्छेदः १० यस्मादेवंतस्मात् जिज्ञासयाविचारेण आत्मस्थं आत्मनिकार्यकारणसंघातएव स्थितं सम्यक् ज्ञात्वा एतस्मिन्देहादौवस्तुबुद्धिंस्थूलसूक्ष्मक्रमेणनिरसेत् त्यजेत् ११ गुरोर्लब्धाविद्याअज्ञानतत्कार्यनिरसनक्षमेति स्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूपकेणनिरूपयति । आचार्यइति । आद्यः अधरः तत्संधानंतयोर्मध्येमंथनकाष्ठं प्रवचनं उपदेशः विद्यातुसंधिः संधौभवोग्निरिव । तथा च श्रुतिः"आचार्यः पूर्वरूपं अंतेवास्युत्तररूपं विद्यासंधिः प्रवचनं संधानमि"ति १२

॥५२॥

श्लोकाः ६/१२

अमान्यमत्सरोदक्षोनिर्ममोदृढसौहृदः ॥ असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृहक्षेत्रस्वजनद्रविणादिषु ॥ उदासीनःसमंपश्यन्सर्वेष्वर्थमिवात्मनः ७ विलक्षणःस्थूलसूक्ष्माद्देहादात्मेक्षितास्वदृक् ॥ यथाग्निर्दारुणोदाह्याद्दाहकोन्यःप्रकाशकः ८ निरोधोत्पत्त्यणुबृहन्नानात्वंतत्कृतान्गुणान् ॥ अंतःप्रविष्टआधत्तेएवंदेहगुणान्परः ९ योसौगुणैर्विरचितोदेहोयंपुरुषस्यहि ॥ संसारस्तन्निबंधोयंपुंसोविद्याच्छिदात्मनः १० तस्माज्जिज्ञासयात्मानमात्मस्थंकेवलंपरम् ॥ संगम्यनिरसेदेतद्वस्तुबुद्धिंयथाक्रमम् ११ आचार्योऽरणिराद्यःस्यादंतेवास्युत्तरारणिः ॥ तत्संधानंप्रवचनंविद्यासंधिःसुखावहः १२

चूर्णिका

सेवकधर्मानाह अमानी दक्षः गुरौ दृढसौहृदः ६ जायापत्यादिषु उदासीनः सर्वेषु आत्मनः प्रयोजनम् समं पश्यन् सन् गुरुं उपासीत ७ कोसौ आत्मा तमाह स्थूलसूक्ष्मदेहद्वयात् आत्मा अन्यः यथा अग्निः दाहकः प्रकाशकः काष्ठात् भिन्नः तद्वत् ८ अपिच यथा अग्निः दारुषु प्रविष्टः सन् तत्कृतनाशादीन् प्राप्नोति एवं परोपि आत्मा देहगुणान् उत्पत्त्यादीन् अनुभवति किंच ईशस्य मायागुणैः रचितदेहात् जीवस्य संसारो भवति वस्तुतः जीवो देहात् परः ९ १० तस्मात् विचारेण देहस्थितं आत्मानं ज्ञात्वा देहादौ सत्यबुद्धिं त्यजेत् ११ अथ गुरोः अविद्यानाशकविद्योत्पत्तिप्रकारं अग्निरूपकेण आह आचार्यः अधरारणिः शिष्यः उत्तरारणिः तयोर्मध्ये मथनकाष्ठं उपदेशः विद्या तु तदुद्भवाग्निरिव १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥५३॥

अग्निसादृश्यमेवाह । वैशारदीति । विशारदोऽतिनिपुणः तेनशिष्येण प्राप्तातेनगुरुणोपदिष्टावाअतिविशुद्धाबुद्धिर्गुणकार्यरूपां मायांनिवर्तयति । यदात्मकमेतद्विश्वंजीवस्यसंसृतिनिमित्तं तान् गुणां श्चदग्ध्वाअसमिन्निरिंधनः तस्मात्कार्येणकारणेनविद्ययाचव्यवधानाभावात्साक्षात्परमानंदरूपोभवतीति । एवंतावत्स्वप्रकाशज्ञानस्वरूपोनित्यएकएवात्माकर्तृत्वादयश्चधर्मास्तस्यदेहोपाधिकाः तद्व्य तिरिक्तं च सर्वमनित्यंमायामयं च । अतः सर्वतोविरक्तः सन्नात्मज्ञानेनमुच्यतइत्युक्तं । विलक्षणःस्थूलसूक्ष्मादित्यादिना १३ तदेवं श्रुतिसमन्वयेननिर्णीतेऽप्यर्थेमतांतरविरोधेनसंदेहोमाभू दितितन्मतंनिराकर्तुंसंभावयति । अथेति । अथमन्यसेएषांजीवानांकर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणांचनानात्वमिति । एवंहिजैमिनीयामन्यंते । अहंप्रत्ययविज्ञेयएवआत्मा सचप्रतिशरीरंभिन्नः कर्तृभोक्तृरूपश्चनतुतत्स्वरूपभूतोनिर्विकारएकःपरमात्मास्तीति । यथाहुः ।"अहंप्रत्ययविज्ञेयोज्ञातव्यःसर्वदैवही"ति । तथावैराग्यंचनसंभवति । तथाहि । भोगस्थानानामनित्यत्वेवैराग्यंभवेत् । भोग कालस्यवा । तदुपायकर्मबोधकागमस्यवाभोक्तुरात्मनोवा । नत्वेतदस्तीत्याह । अथनित्यत्वंलोककालागमात्मनांमन्यस इति १४ न चसर्वभोग्यानांविच्छेदान्मायामयत्वाद्वावैराग्यंस्यादित्याह । मन्यस इति । सर्वभावानांस्रक्चंदनादीनां संस्थास्थितिः औत्पत्तिकीप्रवाहरूपेणनित्या । तथा च वदंति । न कदाचिदनीदृशं जगदिति । अतस्तत्कर्ताकश्चिदीश्वरोपिनास्तीतिभावः । किंच । यथायथावत् । नतुमायामयीत्यर्थः । नचात्मस्वरूपभूतंनित्यमेकंज्ञानमस्तीत्याह । तत्तदिति घटपटाद्याकारभेदेनधीर्जायतेअतोऽनित्याभिद्यतेच । अयंगूढोभिप्रायः । नहिनित्यज्ञानरूपआत्मा । अपि तुज्ञानपरिणामवान् । नचविकारित्वेनानित्यत्वप्रसंगः यथाहुः"विक्रियाज्ञानरूपास्यननित्यत्वेविरोत्स्यत"इति । अतोमुक्ताविंद्रियादिरहितस्यपरिणामासंभवात् जडत्वेनतत्प्राप्तेरपुरुषार्थत्वात्प्रवृत्ति रेवश्रेयसीननिवृत्तिरिति १५ तत्रतावदुक्तमंगीकृत्यवैराग्योपपादनायप्रवृत्तिमार्गस्यानर्थहेतुत्वंप्रपंचयति । एवमपीत्यादिना लोकानांलोकपालानामित्यतः प्राक्तनेन ग्रंथेन । अंगहेउद्धव । कालाव यवतः संवत्सरादिरूपात् १६ तत्रापीति स्वातंत्र्यपक्षेपीत्यर्थः दुष्कर्मणोदुःखभोगस्यवासंभवादित्यर्थः (विवशंअस्वतंत्रं) १७

॥१०॥

श्लोकाः

वैशारदीसाऽतिविशुद्धबुद्धिर्धुनोतिमायांगुणसंप्रसूताम् ॥ गुणाश्चसंदह्ययदात्ममेतत्स्वयंचशाम्यत्यसमिद्यथाग्निः १३ अथैषांकर्मकर्तॄणांभोक्तॄणांसुखदुःख योः ॥ नानात्वमथनित्यत्वंलोककालागमात्मनाम् १४ मन्यसेसर्वभावानांसंस्थाह्यौत्पत्तिकीयथा ॥ तत्तदाकृतिभेदेनजायतेभिद्यतेचधीः १५ एवमप्यंगस र्वेषांदेहिनांदेहयोगतः ॥ कालावयवतःसंतिभावाजन्मादयोऽसकृत् १६ तत्रापिकर्मणांकर्तुरस्वातंत्र्यंचलक्ष्यते ॥ भोक्तुश्चदुःखसुखयोःकोन्वर्थोविवशंभजेत् १७

१३/१७

चूर्णिका

एवं भूता विद्या मायां धुनोति किंच यथा निरिंधनः अग्निः स्वयं शाम्यति १३ एवं विद्यया आत्मा आनंदरूपो भवति एवं तावत् नित्यः एक एव आत्मा कर्तृत्वादि धर्माः तस्य देहोपाधिकाः तद्भिन्नं सर्वमनित्यं अतः सर्वतो विरक्तः सन् आत्मज्ञानेन मुच्यते इत्युक्तम् एवं निर्णीतेप्यर्थे मतांतरविरोधेन संदेहो माभूत् इति मतांतरं अ नूद्य परिहरति १४ हेउद्धवसुखदुःखभोक्तॄणां कर्मकर्तॄणां च जीवानां तथा लोककालागमात्मनां नानात्वं मन्यसे एवं हि जैमिनीया मन्यंते तदाह सर्वभावानां स्रक्चंदनादीनां स्थितिः प्रवाहरूपेण नित्या अतः तत्कर्तापि ईश्वरो नास्तीति एवमंगीकृत्य निराकरोति १५ हेउद्धव सर्वदेहिनां जन्मादयो भावाः कालात् असकृत् संति १६ किंच कर्मणां कर्तुः सुखदुःखभोक्तुश्च पुंसः अत्रापि स्वातंत्र्यं नास्ति १७

॥५३॥

१ 'अत्रापि'इतिपाठभेदोदृश्यते मु० मु०पुस्तकेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ननु येसम्यक्कर्मकर्तुंजानंतितेसुखिनएवयेतुनजानंतितेएव दुःखिनइतिचेत्तत्राह नेति । विदुषामपिकचित्सुखंनविद्यते । तथामूढानामपिदुःखंनविद्यते । अतोवयंकर्मकुशलत्वात्सुखिनइति तेषांकेवलं वृथैवाहकारइत्यर्थः १८ अंगीकृत्याप्याह यदीति । तंयोगंउपायंनविदुर्यथासाक्षान्मृत्युर्नप्रभवेत् १९तथापियावज्जीवंसुखंभविष्यतीतिचेन्नेत्याह । यतः अंतिकेवर्तमानोमृत्युर्नतुष्टिदः तुष्टिंनददाति । आघातं वधस्थानं प्रतिनीयमानस्यवध्यस्यस्रक्चंदनादियथानसुखयेत् २० एवमस्मिंल्लोकेसुखंनास्तीत्युक्तंलोकांतरेपितथैवेत्याह । श्रुतमिति श्रुतंस्वर्गादि तदपिदुष्टं । स्पर्धा परसुखासहनं । असूया परगुणेदोषाविष्करणं अत्ययोनाशः व्ययोऽपक्षयःतैर्दुष्टं यद्वा व्ययोनाशःअत्ययोऽन्यस्यातिशयः तंदृष्ट्वातदप्राप्तौदुःखमित्यर्थः । किंचबहवोंतरायावैगुण्यादिरूपाविघ्नायस्मिन्कामेसुखेतस्यभावस्तत्त्वं तस्मात् कृषिर्यथाबहुविघ्नातद्वत् । बहुविघ्नत्वेनचश्रुतमपिनिष्फलं २१ विघ्नवैगुण्याद्यभावमंगीकृत्यापिनाशदुःखंदुष्परिहरंइत्याह । अंतरायैरितिपंचभिः निर्जितंसाधितं २२ यज्ञैर्देवताइंद्रादिरूपाइष्ट्वा२३स्वपुण्यैरुपचितेसर्वभोगसंपन्नेदेवीनांमध्येविहरन् गंधर्वैरुपगीयते २४ कामगेनइच्छयागच्छताविमानेन किंकिणीजालमालिना क्षुद्रघंटिकासमूहशोभिना सहस्त्रीभिः सुराक्रीडेषुनंदनादिषुक्रीडन्नात्मपातंनवेद २५ कालेनचलितः पातितः (पतनमनिच्छन्) २६ प्रवृत्तिर्द्विविधाविध्यनुसारेणकाम्यैकर्मणिवा तल्लंघनेनाधर्मेवा । तत्रकाम्यप्रवृत्तेर्गतिरुक्ता । अधर्मप्रवृत्तेर्गतिमाह । यदीति यदिचेत्यन्वयः । अजितेंद्रियत्वात्कामात्मा । अतःकृपणोदीनः अतोलुब्धोभोगतृष्णाकुलः । अतःस्त्रैणः स्त्रीलंपटः तदर्थंभूतविहिंसकः २७

॥५४॥ नदेहिनांसुखंकिंचिद्विद्यतेविदुषामपि ॥ तथाचदुःखंमूढानांवृथाऽहंकरणंपरम् १८ यदिप्राप्तिंविघातंचजानंतिसुखदुःखयोः ॥ तेप्यद्धानविदुर्योगंमृत्युर्नप्रभवेद्यथा १९ कोन्वर्थःसुखयत्येनंकामोवामृत्युरंतिके ॥ आघातंनीयमानस्यवध्यस्येवनतुष्टिदः २० श्रुतंचदृष्टवद्दुष्टंस्पर्द्धासूयात्ययव्ययैः ॥ बह्वंतरायकामत्वात्कृषिवच्चापिनिष्फलम् २१ अंतरायैरविहतोयदिधर्मःस्वनुष्ठितः ॥ तेनापिनिर्जितंस्थानंयथागच्छतितच्छृणु २२ इष्ट्वेहदेवतायज्ञैःस्वर्लोकंयातियाज्ञिकः ॥ भुंजीतदेववत्तत्रभोगान्दिव्यान्निजार्जितान् २३ स्वपुण्योपचितेशुभ्रेविमानउपगीयते ॥ गंधर्वैर्विहरन्मध्येदेवीनांहृद्यवेषधृक् २४ स्त्रीभिःकामगयानेनकिंकिणीजालमालिना ॥ क्रीडन्नवेदात्मपातंसुराक्रीडेषुनिर्वृतः २५ तावत्प्रमोदतेस्वर्गेयावत्पुण्यंसमाप्यते ॥ क्षीणपुण्यःपतत्यर्वागनिच्छन्कालचालितः २६ यद्यधर्मरतःसंगादसतांचाजितेंद्रियः ॥ कामात्माकृपणोलुब्धःस्त्रैणोभूतविहिंसकः २७

श्लोकाः १८/२७

चूर्णिका तथा विदुषामापि सुखं न विद्यते तथा मूढानां दुःखं न अतः वयं कर्मकुशलत्वात् सुखिन इति तेषां वृथैवाहंकारः १८ एवंभूताः ये ते सुखदुःखप्राप्तिनाशौ जानंति तथापि येन मृत्युर्न स्यात् तं उपायं न विदुः १९ अतः एनं पुरुषं कोनु अर्थः सुखयाति यतः मृत्युः अंतिके वर्तते यथा वधस्थानं नीतस्यापि पशोः अर्थः न तुष्टिदः तद्वत् २० किं च श्रुतं स्वर्गादि तत् दृष्टवत् स्पर्धासूयादिभिर्दुष्टं निष्फलं च बहुविघ्नवैगुण्यत्वात् २१ किंच यद्यपि धर्मः अंतरायैः अविहतः स्वनुष्ठितः तेन धर्मेण जितं स्थानं पुमान् यथा गच्छति तच्छृणु २२ याज्ञिकः इह यज्ञैः देवानिष्ट्वा स्वर्याति तत्र दिव्यान् भोगान् भुंक्ते २३ ततः शुभ्रे विमाने श्रेष्ठवेषधृक् देवीनां मध्ये विहरन् गंधर्वैः उपगीयते२४ तथा कामगेन तेनविमानेन विचरन् स्त्रीभिः देवोद्यानेषु क्रीडन् आत्मपातंन वेद २५ एवंभूतः पुमान् यावत् पुण्यं तावत् स्वर्गे मोदते क्षीणपुण्यः अधः पतति २६ अथ यदि पुमान् अधर्मरतः स्त्रैणः भूतहिंसकः सन् २७ ॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

किंच दुष्टजनप्रलोभितोधनाद्यर्थंपशूनविधिनाहत्वातमःस्थावरतांयाति २८ एवंकर्मसुप्रवृत्तस्यनसुखंनचनिवृत्तिरित्युपसंहरति । कर्माणीति २९ तथापिलोकानांनित्यत्वादमर्त्यधर्मत्वाच्चलोकपालान।सुखमस्तीतिचेत्तत्राह । लोकानामिति । द्वौपरार्धौ परमायुर्यस्यतस्यब्रह्मणोपि तथाचश्रुतिः"भीषास्माद्वातःपवतेभीषोदेतिसूर्यः । भीषास्मादग्निश्चेंद्रश्चमृत्युर्धावतिपंचम"इति । अतः प्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्विरक्त्याततोनिवृत्तिरेवयुक्तेतितात्पर्यार्थः । एतेनैवस्वयमीश्वरत्वाविशेषेणेश्वराभावांगीकारःपरिहृतः ३० अन्यदपिप्रौढ्यापूर्वमंगीकृतंनिराकरोतिचतुर्भिः तत्रयदुक्तं कर्तृभोक्तृरूपएवआत्मेतितन्निराकरोति । गुणाइति । गुणाइंद्रियाणिकर्माणिसृजंतिनत्वात्मा । आत्मैवेंद्रियाणिप्रवर्तयन्कर्माणिकरोतीतिचेन्नेत्याह । गुणइति । गुणः सत्त्वादिः गुणानिंद्रियाणिअनुसृजतेप्रवर्तयति । नत्वात्मा अतः आत्मनः कर्तृत्वंतावन्नास्ति । भोक्तृत्वमप्यौपाधिकमित्याह । जीवस्त्विति । गुणसंयुक्तः इंद्रियादिसंयुक्तः कुतइत्यतआह । असौतेष्वहंकारवानित्यर्थः ३१ यच्चोक्तमात्मनोनानात्वं तदप्यौपाधिकमित्याह । यावत्स्यादिति । गुणानांवैषम्यंअहंकरादिकार्यरूपम् । नन्वात्मनएकत्वेकथंपारतंत्र्यमुक्तम् । कथंवालोकपालादीनामपिमद्भयमित्युक्तंत्वयेत्यत्राह । नानात्वमिति ३२ यच्चगूढमभिप्रेतंप्रवृत्तिरेवश्रेयसीति तत्राह । यएतदिति । एतद्गुणवैषम्यंतत्कृतंभोगंकर्मचेत्यर्थः उपासीरन् सेवेरन् तल्लोकादीनामनित्यत्वाच्छुचार्पिताः प्रोताःसंतोमुह्यंति ३३ नकेवलं (लोकादीनां) अनित्यतामात्रंकिंतुमायामयत्वमपीत्याह । कालइति । स्वभावोदैवत्वादिपरिणामहेतुः । धर्मस्तद्भोगकारणं (आगमस्तद्बोधकः) गुणव्यतिकरेमायाक्षोभेसति मामेवमाहुः नतुमद्व्यतिरिक्ताः संति ततो निवृत्तिरेवमुक्तिहेतुत्वाच्छ्रेयसीतिसिद्धम् ३४

श्लोकाः २८—३४

पशूनविधिनाऽऽलभ्यप्रेतभूतगणान्यजन् ॥ नरकानवशोजंतुर्गच्छन्यात्युल्बणंतमः २८ कर्माणिदुःखोदर्काणिकुर्वन्देहेनतैःपुनः ॥ देहमाभजतेतत्रकिं
सुखंमर्त्यधर्मिणः २९ लोकानांलोकपालानांमद्भयंकल्पजीविनाम् ॥ ब्रह्मणोपिभयंमत्तोद्विपरार्धपरायुषः ३० गुणाःसृजंतिकर्माणिगुणोनुसृजतेगुणान् ॥
जीवस्तुगुणसंयुक्तोभुंक्तेकर्मफलान्यसौ ३१ यावत्स्याद्गुणवैषम्यंतावन्नानात्वमात्मनः ॥ नानात्वमात्मनोयावत्पारतंत्र्यंतदैवहि ३२ यावदस्यास्वतंत्रत्वं
तावदीश्वरतोभयम् ॥ यएतत्समुपासीरंस्तेमुह्यंतिशुचार्पिताः ३३ कालआत्मागमोलोकःस्वभावोधर्मएवच ॥ इतिमांबहुधाप्राहुर्गुणव्यतिकरेसति ३४

चूर्णिका

पशून् अविधिना आलभ्य प्रेतभूतगणान् यजति स नरकान् गत्वा ततः स्थावरतां याति २८ एवं देहेन दुःखोदर्काणि कर्माणि यः करोति सः पुनर्देहं भजते अतः अत्र मर्त्यधर्मिणः किं सुखं स्यात् २९ अपिच लोकानां तत्पालानां च द्विपरार्धायुषो ब्रह्मणोपि च मत्तः भयमस्ति किं पुनः अन्येषाम् ३० अथ पूर्वं यदुक्तं कर्तृभोक्तृरूप एव आत्मा तन्निराकरोति इंद्रियाणि कर्माणि सृजंति सत्वादिगुणः इंद्रियाणि सृजति जीवस्तु उभयसंयुक्तः कर्मफलानि भुंक्ते ३१ तथा जीवस्य यावत् गुणवैषम्यं तावत् नानात्वम् यावत् नानात्वं तावत् पारतंत्र्यम् ३२ यावत् पारतन्त्र्यं तावत् मत्तो भयम् एतत् ये सेवेरन् ते शुचार्पिताः मुह्यंति ३३ किंच गुणव्यतिकरे जाते सति कालात्मादिरूपं मामेव बहुधा प्राहुः न मद्भिन्नाः कालादयः संति एवं च निवृत्तिरेव श्रेष्ठा इत्युक्तम् ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंतावदेकएवआत्मा तस्यचगुणकार्यदेहसंबंधकृतःसंसारः आत्मज्ञानाच्चमुक्तिरित्युक्तं विलक्षणःस्थूलसूक्ष्मादित्यादिना । तदेवचमतांतरनिरासेनदृढीकृतम् । अथैषामित्यादिना । तत्रपृच्छति गुणेष्विति अयमर्थः गुणेष्वसत्सुमुक्तिः सत्स्वेववा । आद्येज्ञानसाधनाभावान्नमुक्तिः । द्वितीयेगुणेषुवर्तमानोपितत्कार्यदेहजेषुकर्मसुसुखादिषुचकथंनबध्यतेतथापितैराकाशवदनावृतत्वान्नबध्यतइतिचेत्तर्हिबंधो नसंभवतीत्याह । अनपावृतः कथंबध्यतइति ३५ यदितुसत्स्वेवतदहंकारेणबध्यतेतान्निवृत्त्याचमुच्यते इतिमतंतर्हितत्कथंज्ञातव्यमितिपृच्छति । बद्धोमुक्तोवाकथंवर्तेतेत्यादि । किंभुंजीतकथंभुंजीते त्यर्थः ३६ एतत् एतद्विषयंप्रश्नम् । किंच । एकएवात्माऽनादिगुणसंबंधान्नित्यबद्धःमुक्तेर्जन्यत्वेअनित्यत्वप्रसंगान्नित्यमुक्तइत्यप्यंगीकार्यंस्यात् तत्रमेभ्रमोभवतीत्याह । नित्यबद्धइति ३७ ॥ इति श्री भागवतेमहापुराणे एकादशस्कंधे टीकायां दशमोऽध्यायः ॥ १० ॥ ॥छ॥ ॥ एकादशेतुबद्धानां मुक्तानां चाथलक्षणम् । साधूनांचतथाभक्तेर्लक्षणंहरिणेरितम् ॥ १ ॥ "नित्यबद्धोनित्यमुक्तएकएवे तिमेभ्रम"इतियदुक्तंतत्किंवस्तुतोविरोधः प्रतीतितोवा । नाद्यः । बंधमोक्षयोर्वास्तवत्वाभावादित्याह । बद्धोमुक्तइतिद्वाभ्याम् । आत्माबद्धोमुक्तश्चमेगुणतःमदधीनसत्त्वादिगुणोपाधितः । नतुवस्तुतः । नन्वौपाधिकत्वेपितंडुलपाकादिवद्वास्तवत्वंकिंनस्यात् तत्राह । गुणस्यमायामूलत्वाद्बंधनंनास्ति । अतएवमोक्षश्चनास्तीति । ननु कथंसर्वशास्त्रविरुद्धमुच्यते । तत्राह । इतिमेव्याख्येति । एवंमत्कृतोनिर्णयः । अलमतिकुतर्कैरित्यर्थः अथवैवमन्वयः । आत्माबद्धोमुक्तइतियाव्याख्याउक्तिः सामेगुणतः मद्गुणपारतंत्र्यात् । अत्रहेतुत्वेनगुणानियंतरिस्वस्मिंस्तद्व्यतिरेकमाह । अतएवनमेबंधनंमोक्षश्चेति अन्यत्समानम् १ एवंकारणभूतगुणानांमायामयत्वात् तत्कार्यंसंसृतिर्मायेतिप्रपंचयति । शोकमोहाविति यथास्वप्नआत्मनोबुद्धेरेवख्यातिः विवर्तः तद्वत् । अतोवस्तुविरोधस्तावन्नास्ति २ प्रतीतिस्त्वौपाधिकीघटतइत्याह । विद्याविद्येइति । तन्वेतेमोक्षबंधावाभ्यांइतितनूशक्ती कुतः मेमाययाविनिर्मिते । मायावृत्तिरूपत्वात् बंधमोक्षकरीत्येकवचनंद्विवचनार्थं । ननु तत्कार्यत्वेबंधमोक्षयोरनादित्वनित्यत्वेनस्याताम् । न । आद्येअनादी । अतोयावदविद्यांप्रवर्तयामितावद्बंधः । यदाविद्यांददामितदामोक्षः स्फुरतीत्यर्थः । तथाचस्कंदपुराणे । "बंधकोभवपाशेनभवपाशाच्चमोचकः । कैवल्यदःपरंब्रह्मविष्णुरेवसनातन"इति ३

श्लोकाः ३५/३

॥ उद्धवउवाच ॥ गुणेषुवर्तमानोपिदेहजेष्वनपावृतः ॥ गुणैर्नबध्यतेदेहीबध्यतेवाकथंविभो ३५ कथंवर्तेतविहरेत्कैर्वाज्ञायेतलक्षणैः ॥ किंभुंजीतोतविसृजेच्छयीतासीतयातिवा ३६ एतदच्युतमेब्रूहिप्रश्नंप्रश्नविदांवर ॥ नित्यमुक्तोनित्यबद्धएकएवेतिमेभ्रमः ३७ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेदशमोऽध्यायः १० ॥ ॥ छ ॥ ॥ श्रीभगवानुवाच ॥ बद्धोमुक्तइतिव्याख्यागुणतोमेनवस्तुतः ॥ गुणस्यमायामूलत्वान्नमेमोक्षोनबंधनम् १ शोकमोहौसुखंदुःखंदेहापत्तिश्चमायया ॥ स्वप्नोयथात्मनःख्यातिःसंसृतिर्नतुवास्तवी २ विद्याविद्येममतनूविद्ध्युद्धवशरीरिणाम् ॥ मोक्षबंधकरीआद्येमाययामेविनिर्मिते ३

चूर्णिका

॥ उद्धव उवाच देहजेषु गुणेषु वर्तमानो जीवः अनपावृतः सन् गुणैः न बध्यते बध्यते वा कथमिति वद ३५ किंच बद्धमुक्तो जीवः कथं वर्तेत किं भुंजीत कैर्लक्षणैर्ज्ञायतेकथं याति इत्यादि ३६ एतदच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रमः ३७ इत्येकादशे दशमोऽध्यायः १० ॥ छ ॥ श्रीभगवानुवाच ॥ हे उद्धव जीवः बद्धो मुक्तश्च मदधीनगुणोपाधितः नवस्तुतः कुतः गुणानां मायामूलत्वात् बंधो न मोक्षोपि न इति मे व्याख्या अलमतिकुतर्कैः १ किंच शोकमोहौ सुखं दुःखं देहोत्पत्तिश्च मायया तथा संसृतिश्च यथा स्वप्नः बुद्धेर्विवर्तस्तद्वत् २ हे उद्धव शरीरिणां विद्याविद्येइमे मायानिर्मिते मम शक्ती मोक्षबंधकर्यौ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रशरीरिणामितिबहुवचननिर्देशात्विषयभेदेनाविरोधउक्तइतिभ्रांतिंव्यावर्तयन्बंधमोक्षव्यवस्थामुपपादयति । एकस्यैवेति । तर्हिकिमात्माभेदात्तवापिबंधः नहीत्याह । अस्यजीवस्यैवेति । नन्वात्मा भेदेजीवोनामकोन्योस्तिपृथक् कथंबंधमोक्षसुखदुःखादिव्यवस्थातत्राह । ममांशस्य । अयंभावः । यथैकस्यापिचंद्रादेर्जलाद्युपाधिनाबिंबप्रतिबिंबरूपोभेदः यथाच तत्रजलकृताः कंपादयः प्रतिबिंब स्यैव । तथाच तत्रप्रतिबिंबानामप्युपाधिभेदेनभेदादेकस्मिन्नुदककुंभभग्नेतद्गतप्रतिबिंबस्यैवबिंबैक्यं नान्यगतस्य । तथाऽविद्यायांप्रतिबिंबितस्यमदंशस्यजीवस्यैवतत्कृतोबंधः तस्यचोपाधितोभेदान्ना व्यवस्थेति । तथाचाहुः । "यथैकस्मिन्घटाकाशेरजोधूमादिभिर्युते । नसर्वेसंप्रयुज्यंतेतथाजीवाःसुखादिभि"रिति । एतच्चातिरहस्यंस्वबुद्ध्यानिश्चेतव्यमितिसंबोधयति हेमहामते इतरोमोक्षः ४ तदेवं व्यवस्थामुपपाद्य कथंवर्तेतेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह । अथेति । तच्चवैलक्षण्यंद्विविधं जीवेश्वरयोरेकं जीवानांचैकम् । तत्रजीवेश्वरयोर्वैलक्षण्यमाह । विरुद्धधर्मिणोरितिसार्धद्वयेन । शोकानंदधर्म वतोः एकस्मिन्धर्मिणिशरीरेनियम्यनियंतृत्वेनस्थितयोः ५सुपर्णौवृक्षात्पक्षिणाविव देहात्पृथग्भूतौ । सदृशौचिद्रूपत्वात् । सखायौअवियोगादैकमत्याच्चयदृच्छयाअनिरुक्तयामायया वृश्च्यतइतिवृक्षोदेहः "ऊर्ध्वमूलमवाक्शाखंवृक्षंयोवेदसंप्रतीतिश्रुतेः" । ऊर्ध्वमूलमधःशाखमश्वत्थंप्राहुरव्ययमि"तिस्मृतेश्च । तस्मिन्कृतंनीडंनिकेतनंहृदयरूपंयाभ्यांतौ तयोर्मध्येएकोजीवः पिप्पलान्नंपिप्पलोश्वत्थः दे हस्तस्मिन्अदनीयंकर्मफलमित्यर्थः ।खादतिभक्षयति अन्यईश्वरः निरन्नोऽभोक्तापिनिजानंदतृप्तोबलेनज्ञानादिशक्त्याभूयान् अधिकः । श्रुतिश्च । "द्वासुपर्णासयुजासखायासमानंवृक्षंपरिषस्वजाते । तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीती"ति ६ बलाधिक्यमेवाह आत्मानमिति । अतोयोऽविद्ययायुक्युक्तःसतुनित्यबद्धः । अनादिबद्धः यस्तुविद्याप्रधानः सतुनित्यमुक्तः मायायाअ नावरकत्वात् आश्रयाव्यामोहकत्वाच्च ७ इदानींबद्धमुक्तजीवानामेवमिथोवैलक्षण्यमाह । देहस्थोपीतिदशभिः । विद्वान् मुक्तः । संस्कारवशेनदेहस्थोपिदेहस्थोनभवति । यथास्वप्नादुत्थितः स्मर्यमाणेस्वप्नदेहेस्थितोपि तत्रस्थोनभवति तद्गतसुखदुःखाद्यभावात् । तथावस्तुतोअदेहस्थोपि कुमतिः अविद्वान् देहस्थः तन्निमित्तसुखदुःखभाक्त्वात् । यथास्वप्नगतइति ८ अत्रहेतुत्वेनवैलक्षण्यां तरमाहद्वाभ्याम् । इंद्रियैरिंद्रियार्थेषुगृह्यमाणेष्वपियस्तुविद्वान्सःनाहंकुर्यात् । अहंगृह्णामीतिमतिंनकुर्यादित्यर्थः । कुतः गुणैर्गुणेषुगृह्यमाणेषुअतएवअविक्रियः । रागादिशून्यः तदुक्तंगीतासु । "तत्त्व वित्तुमहाबाहोगुणकर्मविभागयोः । गुणागुणेषुवर्ततइतिमत्वानसज्जत"इति ९

॥५७॥

श्लोकाः ४/९

एकस्यैवममांशस्यजीवस्यैवमहामते ॥ बंधोस्याविद्ययाऽनादिर्विद्ययाचतथेतरः ४ अथबद्धस्यमुक्तस्यवैलक्षण्यंवदामिते ॥ विरुद्धधर्मिणोस्तातस्थि तयोरेकधर्मिणि ५ सुपर्णावेतौसदृशौसखायौयदृच्छयाकृतनीडौचवृक्षे ॥ एकस्तयोःखादतिपिप्पलान्नमन्योनिरन्नोपिबलेनभूयान् ६ आत्मानमन्यं चसवेदविद्वानपिप्पलादोनतुपिप्पलादः ॥ योऽविद्ययायुक्सतुनित्यबद्धोविद्यामयोयःसतुनित्यमुक्तः ७ देहस्थोपिनदेहस्थोविद्वान्स्वप्नाद्यथोत्थितः ॥ अदेहस्थोपिदेहस्थःकुमतिःस्वप्नदृग्यथा ८ इंद्रियैरिंद्रियार्थेषुगुणैरपिगुणेषुच ॥ गृह्यमाणेष्वहंकुर्यान्नविद्वान्यस्त्वविक्रियः ९

चूर्णिका

एवं च यावदविद्यां प्रवर्तयामि तावत् बंधः यदा विद्यां ददामि तदामोक्षः ४ अथबद्धमुक्तयोः वैलक्षण्यं वदामि ५ एतौ सुपर्णौ एकवृक्षे स्थितौ सखायौ वर्तेते तयोः एकः जीवः कर्मणः फलं खादति अन्यः ईशः अभोक्तापि ज्ञानादिशक्त्याअधिकः ६ सः आत्मानं अन्यं च वेद जीवस्तु न तथा अतः यः अविद्यायुक्तः स नि त्यबद्धः यः विद्यायुक् सः नित्यमुक्तः ७ यः मुक्तः सः देहस्थोपि न देहस्थः स्वप्नात् उत्थित इव तथा यः बद्धः सः अदेहस्थोपि तत्स्थो भवति स्वप्नवत् ८ यः मुक्तःसः इंद्रियैः गृह्यमाणेषु विषयेषु सत्सु अहं न करोति यस्तु अज्ञः सः अहं कर्तास्मीति बध्यते विद्वांस्तु न बध्यते ९

॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अबुधस्तुपूर्वकर्माधीनेऽस्मिन्शरीरेवर्तमानः गुणैरिंद्रियैर्भाव्येनकर्मणातत्रदेहादौनिबध्यते कुतः कर्तास्मीत्यहंकारेण । तदुक्तंतत्रैव । “प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः । अहंकारविमूढात्मा कर्ताहमितिमन्यत”इति १० एभिस्त्रिभिः श्लोकैः कथंवर्तेतेत्यस्यप्रश्नस्यसुखदुःखशून्योनिरभिमानश्चदेहेवर्तेतेत्युत्तरमुक्तंभवति । वैलक्षण्यांतरंवदन् किंभुंजीतेत्यादिप्रश्नस्योत्तरमाह । एवमितित्रिभिः अन्यगतमेवकर्ममांबध्नातीत्येवंविरक्तोविद्वान् तथाऽविद्वानिवशयनासनादिषुनबद्ध्यते । कुतः । तत्रतत्रविषयेषुगुणानिंद्रियाणि आदयन्भोजयन् । तत्साक्षित्वेनवर्तमानः नतुस्वयमदन् । एतदेवकु तस्तत्राह । प्रकृतिस्थोपीतिसार्धेन । यथा खंसर्वत्रस्थितमपिनसज्जते यथासविताजलेप्रतिबिंबितोपि यथाऽनिलः सर्वत्रसंचरन्नपितद्वत् ११ १२असंगेनवैराग्येणशितयातीक्ष्णयाच्छिन्नाः संशयाअसंभाव नादयोयस्यसः । नानात्वात् देहादिप्रपंचात् १३ कथंविहरेदित्यस्योत्तरत्वेनवैलक्षण्यांतरमाह । यस्यस्युरिति तद्गुणैः देहगुणैः संकल्पशून्याभिः प्राणादिवृत्तिभिर्विहरन्मुक्तइत्यर्थः १४ एवंतावद्बद्धमु क्तयोः स्वसंवेद्यमेववैलक्षण्यमुक्तम् । इदानींकैर्वाज्ञायेतलक्षणैरित्यस्योत्तरतया परैरपिसुज्ञेयंवैलक्षण्यमाह । यस्यात्मेतित्रिभिः । हिंस्रैर्दुर्जनैरन्यैर्वाप्राणिभिः यस्यात्मादेहः पीड्यते यदृच्छयायेनकेनापि क्वचित्किंचिदर्च्यते वा सः बुधश्चेत्तत्रनव्यतिक्रियतइत्यर्थः । तदुक्तंयाज्ञवल्क्येन“यःकंटकैर्वितुदतिचंदनैर्यश्चलिंपति । अक्रुद्धोपरितुष्टश्चसमस्तस्यचतस्यचे”ति १५ किंचसाध्वसाधुवाकुर्वतोवदतोवाज नान्नस्तुवीतनचौनिंदेत् । योलौकिकव्यवहारेविमुखः समुक्तइत्यर्थः १६ अपिच । नकुर्यादिति । योदैहिकेपिकर्मण्युदासीनः समुक्तः इतरोबद्धइत्यर्थः (आत्मारामआत्मक्रीडः ।) १७ एतान्येवसर्वाणि मुमुक्षोः साधनानिज्ञातव्यानि । यस्तुकेवलंशब्दब्रह्मण्यभिज्ञः पांडित्यमात्रश्लाघी । नतूक्तैः साधनैः तदर्थनिष्ठोभवेत् । तंनिंदति । शब्दब्रह्मणिनिष्णातः पारंगतोपिपरेब्रह्मणि । ननिष्णायात् । ध्यानाद्यभियोगंनकुर्यात् । तस्यशास्त्रश्रमः श्रमैकफलः । नतु पुरुषार्थपर्यवसायी । अधेनुंचिरप्रसूतांगाम् १८

श्लोकाः १० / १८

दैवाधीनेशरीरेस्मिन्गुणभाव्येनकर्मणा ॥ वर्तमानोऽबुधस्तत्रकर्तास्मीतिनिबध्यते १० एवंविरक्तःशयनआसनाटनमज्जने ॥ दर्शनस्पर्शनघ्राणभोजनश्र वणादिषु ११ नतथाबध्यतेविद्वांस्तत्रतत्रादयन्गुणान् ॥ प्रकृतिस्थोप्यसंसक्तोयथाखंसविताऽनिलः १२ वैशारद्येक्षयाऽसंगशितयाछिन्नसंशयः ॥ प्र तिबुद्धइवस्वप्नान्नानात्वाद्विनिवर्तते १३ यस्यस्युर्वीतसंकल्पाःप्राणेंद्रियमनोधियाम् ॥ वृत्तयःसविनिर्मुक्तोदेहस्थोपिहितद्गुणैः १४ यस्यात्माहिंस्यतेहिंस्रैर्येनकिंचिद्यदृच्छया ॥ अर्च्यतेवाक्वचित्तत्रनव्यतिक्रियतेबुधः १५ नस्तुवीतननिंदेतकुर्वतःसाध्वसाधुवा ॥ वदतोगुणदोषाभ्यांवर्जितःसमदृङ्मुनिः १६ नकुर्यान्नवदेत्किंचिन्नध्यायेत्साध्वसाधुवा ॥ आत्मारामोऽनयावृत्त्याविचरेज्जडवन्मुनिः १७ शब्दब्रह्मणिनिष्णातोननिष्णायात्परेयदि ॥ श्रमस्तस्य श्रमफलोह्यधेनुमिवरक्षतः १८

चूर्णिका

एवं अन्यगतमेव कर्म मां बध्नातीत्येवंविरक्तः विद्वान् शय्यासनदर्शनादिषु इंद्रियैः गुणान् आसादयन्नपि न तथा बध्यते यथा खम् १० ११ १२ एवं ज्ञानेन छिन्नसं शयः पुमान् देहादिप्रपंचात् निवर्तते १३ यस्य प्राणादीनां वृत्तयः संकल्पहीनाः स्युः सः देहस्थोपि तद्गुणैः मुक्तःस्यात् १४ किंच यस्य देहः हिंस्रैः हिंस्यते अर्च्य ते वा तत्र यः न विक्रियते सः बुधः १५ किंच मुनिः स्वाध्वसाधु कुर्वतः न स्तुवीत न निंदेत तथा साधु असाधु वा न कुर्यात् न ध्यायेत् १६ एवं वृत्त्या जडवत् विचरेत् १७ यस्तु वेदब्रह्मणि अर्थतो निपुणः सन् परे ब्रह्मणि अनुभवेन न निपुणश्चेत् तर्हि तस्य श्रमः अधेनुंरक्षत इव व्यर्थः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतदेवान्यार्थनिदर्शनैः प्रपंचयति । गामिति । दुह्यतइतिदोहः । दुग्धोदोहो नोत्तरत्र दोह्योस्ति यस्यास्तां (दुग्धरहितां) अर्थशून्यामित्यर्थः । असतीं (असाध्वीं) कामशून्यामित्यर्थः देहंपराधीनंप्रतिक्षणंदुःखहेतुम् । असत्प्रजां दृष्टादृष्टसाधनशून्यंपुत्रं अतीर्थीकृतंआगतेपात्रेअदत्तंवित्तंदुष्कीर्तिदुरितापादकं (धर्मशून्यम्) हेअंगउद्धव (मयाभगवताहीनांवाचम्) । दुःखानंतरंदुःखमेवयस्यसः रक्षति-१९ मयाहीनांवाचमित्युक्तमेवविवृणोति । यस्यांवाचिजगतःशोधकंमेचरित्रंनस्यात् । किंतत् । अस्यविश्वस्यस्थित्यादिरूपंतद्धेतुरित्यर्थः । लीलावतारेषुईप्सितंजगतः प्रेमास्पदम् । श्रीरामकृष्णादिजन्मवानस्यात्तांनिष्फलांगिरंधीरोधीमान्नधारयेत् २० उक्तंज्ञानमार्गमुपसंहरति एवंनिश्चित्य विचारेणात्मनिनानात्वभ्रमंदेहाद्यध्यासंनिरस्यनिर्मलंमनोमयिसर्वगेपरिपूर्णे (अर्प्य) समर्प्यसंधार्यउपारमेत नशास्त्रपांडित्यमात्रेणेत्यर्थः २१ यद्यनीशः अशक्तः तर्हिआस्तामिदम् । मद्भक्त्यैवकृतार्थोभविष्यसीत्याह मयीति । मयिमदर्पणेनेत्यर्थः २२ कर्मभिर्विशुद्धसत्वस्यांतरंगांभक्तिमाह । श्रद्धालुरिति । अभिनयन्स्वयमनुकुर्वन् २३ आचरन्सेवमानः । (मदपाश्रयः मत्तोऽनन्याश्रयः) २४ ततश्चानेनप्रकारेणमयिसत्संगेनलब्धयाभक्त्यासःभक्तः मांउपासिता ध्याताभवति । सचध्यानशीलः सद्भिर्दर्शितंवैनिश्चितंसुखेनैवमेपदंस्वरूपंप्राप्नोति २५ सत्संगलब्धयाभक्त्येत्युक्तं तत्रसतांभक्तेश्चविशेषंपृच्छति साधुरिति । साधवः स्वस्वमतिपरिकल्पिताः संतिबहवः तवतु (हेउत्तमश्लोक) कीदृशोमतःसंमतः । भक्तिरपिबहुविधालोके । कीदृशीपुनस्त्वय्युपयुज्येतसद्भिश्चनारदादिभिरादृता २६ एतच्चमह्यंकथ्यताम् । इदंचातिगुह्यंत्वयैववक्तव्यमित्यैश्वर्यमाविष्करोति । हेपुरुषाध्यक्षेत्यादिना । (पुरुषाणां) ब्रह्मादीनांनियंतः २७

श्लोकाः १९/२७

गांदुग्धदोहामसतींचभार्यांदेहंपराधीनमसत्प्रजांच ॥ वित्तंत्वतीर्थीकृतमंगवाचंहीनांमयारक्षतिदुःखदुःखी १९ यस्यांनमेपावनमंगकर्मस्थित्युद्भवप्राणनिरोधमस्य ॥ लीलावतारेप्सितजन्मवास्याद्वंध्यांगिरंतांबिभृयान्नधीरः २० एवंजिज्ञासयाऽपोह्यनानात्वभ्रममात्मनि ॥ उपारमेतविरजंमनोमय्यर्प्यसर्वगे २१ यद्यनीशोधारयितुंमनोब्रह्मणिनिश्चलम् ॥ मयिसर्वाणिकर्माणिनिरपेक्षःसमाचर २२ श्रद्धालुर्मेकथाःशृण्वन्सुभद्रालोकपावनीः ॥ गायन्ननुस्मरन्कर्मजन्मचाभिनयन्मुहुः २३ मदर्थेधर्मकामार्थानाचरन्मदपाश्रयः ॥ लभतेनिश्चलांभक्तिंमय्युद्धवसनातने २४ सत्संगलब्धयाभक्त्यामयिमांसउपासिता ॥ सवैमेदर्शितंसद्भिरंजसाविंदतेपदम् २५ ॥ उद्धवउवाच ॥ साधुस्तउत्तमश्लोकमतःकीदृग्विधःप्रभो ॥ भक्तिस्त्वय्युपयुज्येतकीदृशीसद्भिरादृता २६ एतन्मेपुरुषाध्यक्षलोकाध्यक्षजगत्प्रभो ॥ प्रणतायानुरक्तायप्रपन्नायानुकथ्यताम् २७

चूर्णिका

एतदेवाह दुग्धदोहां गां कामहीनां स्त्रियं पराधीनं देहम् दुष्टं पुत्रम् पात्रे अदत्तं वित्तम् मया हीनां वाचं एतान् यः रक्षति सः दुःखदुःखी १९ किंच यस्यां वाचिपावनं मेकर्म जन्म वा नास्ति तां गिरं धीरः न बिभृयात् २० एवं विचारेण आत्मनि देहाद्यध्यासं हित्वा पूर्णे मयि निर्मलं मनः संधार्य उपारमेत् २१ हे उद्धव ब्रह्मणि स्थिरं मनः धारयितुं अशक्तश्चेत् तर्हि मयि सर्वकर्माणि समाचर २२ तथा श्रद्धालुः मे कथाः शृण्वन् २३ मदर्थे धर्मकामार्थानाचरन्यः वर्तते सः मयि स्थिरां भक्तिं लभते २४ एवं सत्संगलब्धया भक्त्या मां उपासीत ततः पुमान् मत्पदं प्राप्नोति २५ ॥ उद्धव उवाच ॥ हे कृष्ण तव साधुः कीदृग्विधो मतः तथा त्वयि कीदृशी भक्तिः उपयुज्येत २६ एतत् प्रणताय मे वद २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अत्रहेतुः त्वमिति । व्योमवदसंगः यतःप्रकृतेः परः । स्वेषामिच्छया उपात्तं (गृहीतं) पृथक्पारिमितंवपुर्येन २८ तत्रत्रिंशल्लक्षणैः साधुंनिरूपयति । कृपालुरितिपंचभिः । कृपालुः परदुःखासहि ष्णुः । सर्वदेहिनांकेषांचिदपि अकृतद्रोहः । तितिक्षुः क्षमावान् । सत्यंसारः (स्थिरांशो) बलंवायस्य । अनवद्यात्माअसूयादिरहितः सुखदुःखयो समः हर्षविषादरहितः यथाशक्तिसर्वेषामुपकार कः । २९ कामैरक्षुभितचित्तः । दांतः संयतबाह्येंद्रियः । मृदुः अकठिनचित्तः । शुचिः सदाचारः । अकिंचनः अपरिग्रहः । अनीहः दृष्टक्रियाशून्यः । मितभुक् लघ्वाहारः । शांतः नियतांतःकरणः । स्थि रः स्वधर्मे । मच्छरणोमदेकाश्रयः । मुनिर्मननशीलः ३० अप्रमत्तः सावधानः । गभीरात्मानिर्विकारः । धृतिमान्विपद्यप्यकृपणः । जितषड्गुणः । 'क्षुत्पिपासेशो कमोहौजरामृत्यूषडूर्मय' एतेजितायेन सः । अमानी नमानाकांक्षी । अन्येभ्योमानदः । कल्पः परबोधनेदक्षः । मैत्रः अवंचकः । कारुणिकः करुणयैवप्रवर्तमानः नदृष्टलोभेन । कविः सम्यग्ज्ञानी । ३१ किंच मयावेदरूपेणादिष्टानपिस्वधर्मा न्संत्यज्य योमांभजेत् । सोपिएवंपूर्वोक्तवत्सत्तमः । किमज्ञानान्नास्तिक्याद्वा (स्वधर्मत्यागः) । न । धर्माचरणेसत्त्वशुद्ध्यादीन्गुणान्विपक्षेदोषांश्चआज्ञायज्ञात्वापिमद्ध्यानविक्षेपकतयामद्भक्त्यैवसर्वंभ विष्यंतीतिदृढनिश्चयेनैवधर्मान् संत्यज्ययोमांभजेदिति । (यद्वा भक्तिदार्ढ्येननिवृत्ताधिकांरतयासंत्यज्य । अथवाविद्धैकादश्युपवासकृष्णैकादश्यनुपवासानिवेद्यश्राद्धादयोयेभक्तिविरुद्धाधर्मास्तान् सं त्यज्येत्यर्थः) ३२ किंच । यावान् देशकालापरिच्छिन्नःयश्चसर्वात्मायादृशः सच्चिदानंदादिरूपः तंमांज्ञात्वाअज्ञात्वापि यद्वा विशेषतः पुनःपुनर्ज्ञात्वाएकांतभावेनयेभजंतीति (तदुक्तम् । "ज्ञात्वापि ममामाहात्म्यंतत्रोत्सुकतयापुनः । विशेषाच्चविशेषेणज्ञात्वामामश्नुतेधिकमि" ति) ३३ साधुलक्षणमुक्तम् । भक्तेर्लक्षणमाह । मल्लिंगेत्यष्टभिः । लिंगानिप्रतिमादीनि (परिचर्यासेवा । प्रह्वशब्देननम्रता ३४ सर्वलाभोपहरणंसर्वस्यलब्धस्यसमर्पणम् । दासभावेनआत्मसमर्पणम्) ३५ पर्वाणिजन्मोत्सवादीनि । तेषामनुमोदनम् (ममगृहेउत्सवः) ३६

॥ ६० ॥

श्लोका॰ २८—३६

त्वंब्रह्मपरमंव्योमपुरुषःप्रकृतेःपरः ॥ अवतीर्णोसिभगवन्स्वेच्छोपात्तपृथग्वपुः २८ ॥ ॥ श्रीभगवानुवाच ॥ ॥ कृपालुरकृतद्रोहस्तितिक्षुःस र्वदेहिनाम् ॥ सत्यसारोऽनवद्यात्मासमःसर्वोपकारकः २९ कामैरहतधीर्दांतोमृदुःशुचिरकिंचनः ॥ अनीहोमितभुक्शांतःस्थिरोमच्छरणोमुनिः ३० अ प्रमत्तोगभीरात्माधृतिमान्जितषड्गुणः ॥ अमानीमानदःकल्पोमैत्रःकारुणिकःकविः ३१ आज्ञायैवंगुणान्दोषान्मयादिष्टानपिस्वकान् ॥ धर्मान्संत्य ज्ययःसर्वान्मांभजेतससत्तमः ३२ ज्ञात्वाज्ञात्वाथयेवैमांयावान्यश्चापियादृशः ॥ भजंत्यनन्यभावेनतेमेभक्ततमामताः ३३ मल्लिंगमद्भक्तजनदर्शनस्प र्शनार्चनम् ॥ परिचर्यास्तुतिप्रह्वगुणकर्मानुकीर्तनम् ३४ मत्कथाश्रवणेश्रद्धामदनुध्यानमुद्धव ॥ सर्वलाभोपहरणंदास्येनात्मनिवेदनम् ३५ मज्जन्म कर्मकथनंममपर्वानुमोदनम् ॥ गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः ३६

चूर्णिका

यतस्त्वं परं ब्रह्म अवतीर्णोसि २८ ॥ श्रीभगवानुवाच ॥ हे उद्धव कृपालुः सुखदुःखसमः सर्वोपकारकः कामैः अक्षुब्धचित्तः मितभुक् शांतः मदाश्रयः अमानी मैत्रः कविः २९ ३० ३१ एवं गुणान् अनुक्तदोषांश्च ज्ञात्वा धर्मान् संत्यज्ययः मां भजेत सः सत्तमः किंच यावान् यादृशः अहमस्मि तथा मां ३२ ज्ञात्वाऽज्ञात्वापि ये भजंति ते मे भक्ततमाः मताः अथ भक्तिलक्षणमाह मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनम् मे गुणकर्मकीर्तनम् ३४ मत्कथाश्रवणे श्रद्धा दास्येन आत्मसमर्पणम् ३५ सज्जन्मकर्मकथनं ममपर्वानुमोदनं गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः ३६

॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

बलिविधानंपुष्पोपहारादिसमर्पणम् । सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषुविशेषः ३७ उद्यानादिकरणेसामर्थ्येंसतिस्वतः असतिचान्यैःसंभूयोद्यमः । उद्यानंपुष्पप्रधानं । उपवनंफलप्रधानं वनम् । आक्रीडःक्रीडास्थानम् ३८ संमार्जनंरजोऽपाकरणम् । उपलेपोगोमयोदकादिभिरालेपनम् । सेकश्चंदनोदकादिभिः प्रोक्षणम् । मंडलवर्तनंसर्वतोभद्रादिकरणम् । मद्यंमम ३९ कृतस्यधर्मस्यापारिकीर्तनंस्वयमन्येनवानिवेदितं (दीपावलोकमपि किंपुनरन्नादिकं नोपयुंज्यात् स्वप्रयोजनाय) नस्वीकुर्यात् । एतच्चसाधारणंस्थावरविषयंरागप्राप्तविषयंवा । भक्त्यातुग्राह्यमेव । "षड्भिर्मासोपवासैस्तुयत्फलंपरिकीर्तितम् । विष्णोर्नैवेद्यसिक्थेनपुण्यंतद्भुंजतांकलौ । हृदिरूपंमुखेनामनैवेद्यमुदरेहरेः । पादोदकंचनिर्माल्यंमस्तकेयस्यसोच्युत"इति वचनेभ्यः । यद्वा अन्यस्मैनिवेदितं मेनोपयुंज्यात् मह्यंनानिवेदयेत् । "विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरम् । पितृभ्यश्चैवतद्देयंतदानंत्यायकल्पते । पितृशेषंतुयोदद्याद्धरयेपरमात्मने । रेतोधाःपितरस्तस्यभवंतिक्लेशभागिन"इति वचनेभ्यः ४० ४१ इदानीमेकादशपूजाधिष्ठानान्याह । सूर्यइति हेभद्र (आत्मास्वशरीरम्) ४२ अधिष्ठानभेदेनपूजासाधनान्याह । सूर्येइति त्रिभिः । त्रय्याविद्यया सूक्तैरुपस्थानादिना । अंग हेउद्धव यवसादिनातृणादिना ४३बंधुसत्कृत्याबंधुवत्संमानेन । हृदिखे हृदयाकाशे । मुख्यधिया प्राणदृष्ट्या तोये जलादिभिर्द्रव्यैस्तर्पणादिना ४४ स्थंडिलेभुविमंत्रहृदयैः रहस्यमंत्रन्यासैः ४५ सर्वाधिष्ठानेषुध्येयमाह । धिष्ण्येष्विति । इति अनेनप्रकारेणएषुधिष्ण्येषु ४६ उक्तायाभक्तेः फलमाह । इष्टापूर्तेनेति । सद्भक्तिंदृढांभक्तिम् । अस्याभक्तेरंतरंगंसाधनमाह । इत्थंमत्स्मृतिः साधुसेवयाभवति । यद्वा स्मृतिर्ज्ञानंततश्चदृढभक्तिमतः पुंसः साधुसेवयामज्ज्ञानंभवतीत्यर्थः ४७

॥६१॥

श्लोकाः ३७—४७

यात्राबलिविधानंचसर्ववार्षिकपर्वसु ॥ वैदिकीतांत्रिकीदीक्षामदीयव्रतधारणम् ३७ ममार्चास्थापनेश्रद्धास्वतःसंहत्यचोद्यमः ॥ उद्यानोपवनाक्रीडपुरमंदिरकर्माणि ३८ संमार्जनोपलेपाभ्यांसेकमंडलवर्तनैः ॥ गृहशुश्रूषणंमह्यंदासवद्यदमायया ३९ अमानित्वमदंभत्वंकृतस्यापरिकीर्तनम् ॥ अपिदीपावलोकंमेनोपयुंज्यान्निवेदितम् ४० यद्यदिष्टतमंलोकेयच्चातिप्रियमात्मनः ॥ तत्तन्निवेदयेन्मह्यंतदानंत्यायकल्पते ४१ सूर्योऽग्निर्ब्राह्मणोगावोवैष्णवःखंमरुज्जलम् ॥ भूरात्मासर्वभूतानिभद्रपूजापदानिमे ४२ सूर्येतुविद्ययात्रय्याहविषाग्नौयजेतमाम् ॥ आतिथ्येनतुविप्राग्र्येगोष्वंगयवसादिना ४३ वैष्णवेबंधुसत्कृत्याहृदिखेध्याननिष्ठया ॥ वायौमुख्यधियातोयेद्रव्यैस्तोयपुरस्कृतैः ४४ स्थंडिलेमंत्रहृदयैर्भोगैरात्मानमात्मनि ॥ क्षेत्रज्ञंसर्वभूतेषुसमत्वेनयजेतमाम् ४५ धिष्ण्येष्वेष्वितिमद्रूपंशंखचक्रगदांबुजैः॥युक्तंचतुर्भुजंशांतंध्यायन्नर्चेत्समाहितः ४६ इष्टापूर्तेनमामेवंयोयजेतसमाहितः ॥ लभतेमयिसद्भक्तिंमत्स्मृतिःसाधुसेवया ४७

चूर्णिका

पर्वसु यात्राबलिविधानम् मद्व्रतधारणं ३७ मत्प्रतिमास्थापने श्रद्धा ३८ संमार्जनादिनामद्गृहसेवनम् ३९ कृतस्य अकीर्तनम् ४० मन्निवेदितं न ग्राह्यं भक्त्या तु ग्राह्यं किंच यत् यत् आत्मनः प्रियम् तत् तत् मह्यं निवेदयेदिति ४१ अथ पूजास्थानान्याह सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् भूरात्मा सर्वभूतानि भद्रपूजापदानि मे ४२ सूर्ये त्रय्या विद्यया मां यजेत् अग्नौ हविषा द्विजे आतिथ्येन गोषु तृणादिना ४३ वैष्णवे बंधुवत् संमानेन हृदाकाशे ध्यानेन वायौ प्राणदृष्ट्या तोये तर्पणादिना ४४ भूमौ मंत्रन्यासैःदेहे भोगैः सर्वभूतेषु समत्वेनेति ४५ एषु स्थानेषु मद्रूपं शंखादियुतं चतुर्भुजं ध्यात्वा अर्चेत् ४६ किंच इष्टापूर्तकर्मणा एवं यः मां यजेत सः भक्तिं लभते ४७

॥६१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ज्ञानभक्तिमार्गावुक्तौतत्रज्ञानमार्गादपिभक्तिमार्गः श्रेष्ठइत्याह । प्रायेणेति । सत्संगेनयोभक्तियोगस्तेनविनोपायः संसारतरणेनविद्यते । सत्संगेनेत्यत्रहेतुमाह । हियस्मात्सतामहंप्रायणंप्रकृष्टमयनमाश्रयः अतः सत्संगोमय्यंतरंगइत्यर्थः ४८ इदानींसांख्ययोगादीनिससाधनांतराणिसव्यपेक्षाणिसव्यभिचारीणि (चभवंति) सत्संगस्तुस्वतंत्रएवसमर्थः फलाव्यभिचारीचेतिवर्णयितुमाह । अथेति एतद्वक्ष्यमाणंपरमंगुह्यंअतःशृण्वित्यर्थः ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांएकादशोऽध्यायः ॥ ११ ॥ ॥ ७ ॥ ॥ द्वादशेसाधुसंगस्यमहिमावर्णितःपुरा ॥ कर्मानुष्ठानतत्त्यागव्यवस्थाचततःपरम् ॥ १ ॥ नरोधयतिनवशीकरोति । योगआसनप्राणायामादिः । सांख्यंतत्त्वानांविवेकः । धर्मः सामान्यतोऽहिंसादिः स्वाध्यायोवेदजपः । तपःकृच्छ्रादि । त्यागः संन्यासः । इष्टंचपूर्तंचतत्रेष्टंअग्निहोत्रादि पूर्तंकूपारामादिनिर्माणम् । दक्षिणाशब्देनसामान्यतोदानंलक्ष्यते १ व्रतानिएकादश्युपवासादीनि । यज्ञोदेवपूजा । छंदांसिरहस्यमंत्राः अवरुंधेवशीकरोति २ यातुधानाराक्षसाः ३ ४ त्वाष्ट्रोवृत्रः(कयाधुनाम्नीदानवीतस्याअपत्यं) कायाधवःप्रह्लादः ५ ऋक्षोजांबवान् । गृध्रोजटायुः । वणिक्पथस्तुलाधारः । व्याधोधर्मव्याधः । यज्ञपत्न्योदीक्षितभार्याः ६ तेषांसत्संगव्यतिरिक्तसाधनांतराभावमाह । तइति । नअधीताःश्रुतिगणायैस्ते । तदर्थंचनउपासितामहत्तमायैस्ते । अव्रतातप्ततपसः नव्रतानियेषांनतप्तानितपांसियैस्तेचते । तथासत्संगादितिसाद्भिः संगोनाममय्यैवसंगइत्यभिप्रेत्योक्तम् । यद्वा स्वसंगस्यापिसत्संगत्वंविवक्ष्यते । स्वस्यापिसत्त्वात् । यद्वा मदीयसंगादित्यर्थः ७

॥६२॥

श्लोकाः ४८/७

प्रायेणभक्तियोगेनसत्संगेनविनोद्धव ॥ नोपायोविद्यतेसम्यक्प्रायणंहिसतामहम् ४८ अथैतत्परमंगुह्यंशृण्वतोयदुनंदन ॥ सुगोप्यमपिवक्ष्यामित्वंमेभृत्यःसुहृत्सखा ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेएकादशोध्यायः ११ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ नरोधयतिमांयोगोनसांख्यंधर्मएवच ॥ नस्वाध्यायस्तपस्त्यागोनेष्टापूर्तंनदक्षिणा १ व्रतानियज्ञश्छंदांसितीर्थानिनियमायमाः ॥ यथावरुंधेसत्संगःसर्वसंगापहोहिमाम् २ सत्संगेनहिदैतेयायातुधानाःखगामृगाः ॥ गंधर्वाप्सरसोनागाःसिद्धाश्चारणगुह्यकाः ३ विद्याधरामनुष्येषुवैश्याःशूद्राःस्त्रियोंत्यजाः ॥ रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगेऽनघ ४ बहवोमत्पदंप्राप्तास्त्वाष्ट्रकायाधवादयः ॥ वृषपर्वाबलिर्बाणोमयश्चाथविभीषणः ५ सुग्रीवोहनुमानृक्षोगजोगृध्रोवणिक्पथः ॥ व्याधःकुब्जाव्रजेगोप्योयज्ञपत्न्यस्तथाऽपरे ६ तेनाधीतश्रुतिगणानोपासितमहत्तमाः ॥ अव्रतातप्ततपसोसत्संगान्मामुपगताः ७

चूर्णिका

हे उद्धव भक्तियोगं विना संसारतरणे नान्य उपायोस्ति ४८ अथैतत्परमं गुह्यं शृण्वतो यदुनंदन सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ४९ ॥ ॥ इत्येकादशे एकादशः ॥ ११ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ हे उद्धव मां अष्टांगयोगः सांख्यं धर्मः इत्यादि तथा न वशीकरोति यथा सत्संगः वशीकरोति १ २ अहो सत्संगेन दैत्याः राक्षसाः मृगखगगंधर्वादयः ३ विद्याधराः तथा नृषु वैश्यशूद्रस्त्रियोंऽत्यजाः एते रजस्तमःप्रकृतयः तत्तद्युगे मत्पदं बहवः प्राप्ताः किंच वृत्रः प्रह्लादः वृषपर्वा बलिः बाणः मयः विभीषणः सुग्रीवः हनुमान् जांबवान् जटायुः गजः तुलाधारः व्याधः कुब्जा गोप्यः यज्ञपत्न्यः ४ ५ ६ एते सर्वे नोपासितमहत्तमाः सत्संगादेवमां प्राप्ताः ७ ॥६२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रवृत्रादीनांभवतुनामकथंचित्साधनांतरम् । गोपीप्रभृतीनांतुनान्यदस्तीत्याह । केवलेनेति । सत्संगलब्धेनकेवलेनैवभावेनप्रीत्या । नगायमलार्जुनादयः यद्वा तदानींतन-(तत्रत्य-)-सर्वतरुगुल्मादीनांभगवतिभावोस्तीतिगम्यते । तदुक्तंभगवतैव । "अहोअमीदेववरामरार्चितंपादांबुजंतेसुमनःफलार्हणम् । नमंत्युपादायशिखाभिरात्मनस्तमोपहत्यैतरुजन्मयत्कृत"मित्यादि । नागाः कालियादयः । सिद्धाःकृतार्थाः संतः ईयुः प्रापुः ८ स्वप्राप्तेर्दुर्लभतामाह । यमिति । योगादिभिः कृतप्रयत्नोपियंनप्राप्नुयात् तंमामीयुरितिपूर्वेणान्वयः अत्रचप्रथमंयागोप्यः पश्चादयेवाश्रीकृष्णेनसहसंगतास्तेसंतस्तत्संगोन्येषांसत्संगस्तेनचतेषांभक्तिरितिज्ञातव्यम् ९ गोपीनांभावंप्रपंचयति रामेणेतिचतुर्भिः । श्वाफल्किनाअक्रूरेणमयि (बलरामेणसह) प्रणीतेसतिमत्तोन्यंसुखाय नदद्दृशुः कुतः वियोगेनतीव्रोदुःसहआधिर्यासांताः अत्रहेतुः । मयिविगाढेनअतिदृढेनभावेनप्रेम्णाअनुरक्तानिसंसक्तानिचित्तानियासांताः १० तीव्राधित्वंव्यनक्ति । तास्ताइति । मयासहयाएवक्षपाः रात्रयः क्षणार्धवन्नीतास्ताएवपुनर्मयाहीनास्तासांकल्पसमा बभूवुः कथंभूतास्ताः ताः वाचामगोचराइत्यर्थः ११ किंच । एवंतीव्राधयस्तामोहमिषेणसमाधिंप्राप्ताइत्याह । ताइति । मयिअनुषंगेणआसक्त्याबद्धाधियोयाभिस्ताः स्वमात्मानंस्वदेहं अदःदूरस्थं इदंसन्निहितं च नाविदन् यद्वा स्वं पतिपुत्रादि ममतास्पदं आत्मानं अहंकारास्पदंअदःपरलोकं इदं इमंलोकंनाविदन्निति यथा मुनयः समाधौ नामरूपेनविदुस्तद्वत् । किंतु अब्धितोयेनद्यइवमयिप्रविष्टाइत्यर्थः १२ एवंताअमलाः केवलं मत्कामाः अस्वरूपविदःस्वरूपंतुनजानंति । तथापिसत्संगात्जारं ब्रह्म जारबुद्धिवेद्यमपिब्रह्मस्वरूपमेवमांप्रापुरित्यर्थः १३ यस्मादेवंभूतोमद्भजनप्रभावः तस्मात्त्वंचोदनांश्रुतिंप्रतिचोदनांस्मृतिंच यद्वा विधिंचनिषेधंचउत्सृज्यमांशरणंयाहिमयैवअकुतोभयःस्याःभव (मद्भक्त्यैवविधिनिषेधत्यागभयाज्जन्ममरणभयाच्चमुक्तोभवसीत्यर्थः) १४ १५

श्लोकाः ८/१५

केवलेनहिभावेनगोप्योगावोनगामृगाः ॥ येन्येमूढधियोनागाःसिद्धामामीयुरंजसा ८ यन्नयोगेनसांख्येनदानव्रततपोध्वरैः ॥ व्याख्यास्वाध्यायसंन्यासैःप्राप्नुयाद्यत्नवानपि ९ रामेणसार्धंमथुरांप्रणीतेश्वाफल्किनामय्यनुरक्तचित्ताः ॥ विगाढभावेननमेवियोगतीव्राधयोऽन्यंदद्दृशुःसुखाय १० तास्ताःक्षपाःप्रेष्ठतमेननीतामयैववृंदावनगोचरेण ॥ क्षणार्धवत्ताःपुनरंगतासांहीनामयाकल्पसमाबभूवुः ११ तानाविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदस्तथेदम् ॥ यथासमाधौमुनयोऽब्धितोयेनद्यःप्रविष्टाइवनामरूपे १२ मत्कामारमणंजारमस्वरूपविदोऽबलाः ॥ ब्रह्ममांपरमंप्रापुःसंगाच्छतसहस्रशः १३ तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनाम् ॥ प्रवृत्तंचनिवृत्तंचश्रोतव्यंश्रुतमेवच १४ मामेकमेवशरणमात्मानंसर्वदेहिनाम् ॥ याहिसर्वात्मभावेनमयास्याह्यकुतोभयः १५

चूर्णिका

किंच तत्र गोप्यः गावः नगाः मृगाः नागाः एते केवलभावेन ८ यत्नवानपि योगसांख्यादिभिः मां न प्राप्नुयात् तं मां प्रापुः ९ अथ गोपीनां भावं प्रपंचयति अक्रूरेण मथुरां मयि प्रणीते सति गोप्यः सुखाप्तये मत्तः अन्यं न दद्दृशुः १० किंच मया कृष्णेन तास्ताः क्षपाः क्षणार्धवन्नीताः ताः पुनः मया हीनाः तासां कल्पसमा बभूवुः ११ तथा ताः गोप्यः मयि आसक्तधियः सत्यः तंदेहं इदं विश्वं च नाविदन् यथा मुनयः समाधौ नामरूपे न विदुः तद्वत् १२ एवं ताः गोप्यः जारं मां ब्रह्म सत्संगादेव प्रापुः १३ अतः हे उद्धव त्वं श्रुतिं स्मृतिं च हित्वा सर्वात्मभावेन मां शरणं याहि १४ ततः मयैव निर्भयः भव १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पूर्वंतावन्मयोदितेष्ववहितः स्वधर्मेष्वित्यादिनाकर्मकर्तव्यमित्युक्तं इदानींतुसर्वंत्यक्त्वामांशरणंयाहीत्युच्यते तत्रकिमात्मनःकर्तृत्वाद्यस्तिनास्तिवेत्यात्मस्थः आत्मविषयःसंशयोनानिवर्तते । यद्वा कर्म कार्यंत्याज्यंवेत्यात्मस्थः हृदयस्थः संशयोननिवर्ततइतिपृच्छति संशयइति । येनसंशयेन १६ उत्तरं सएषइत्यष्टभिः । अयंभावः । ईश्वरस्तावत्स्वमायावशात्प्रपंचात्मनाभाति । तत्प्रपंचाध्यासा च्चजीवानामनाद्यविद्ययाकर्तृत्वादि । ततोविधिप्रतिषेधाधिकारः । तदानींसत्त्वशुद्ध्यर्थंकर्माणिकुर्वित्युक्तं । सत्त्वेचशुद्धेपुनःकर्मजाड्यपरिहारायभक्तिविक्षेपकंकर्मादरंपरित्यज्यदृढविश्वासेनभजेत्युक्त म् । जातायांतुविद्यायांनकिंचित्कर्तव्यमस्तीति । तत्रतावदीश्वराद्बागादींद्रियद्वाराजीवसंसृतिकारणभूतंप्रपंचोद्गममाह । सार्धैश्चतुर्भिः । सएषः अपरोक्षः जीवयतीतिजीवः परमेश्वरः । अपरोक्षत्वे हेतुः विवरेषु आधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्यसः तामेवाभिव्यक्तिमाह घोषेणेति घोषेणपराख्येननादवताप्राणेनसहगुहांआधारचक्रंप्रविष्टःसन्मनोमयंसूक्ष्मंरूपंपश्यंत्याख्यंमध्यमाख्यं च मणिपूरकचक्रेविशुद्धिचक्रेचउपेत्यप्राप्यवक्त्रेमात्राह्रस्वादिःस्वरउदात्तादिः वर्णः अकारादिरित्येवंवैखर्याख्यः स्थविष्ठः अतिस्थूलोनानावेदशाखात्मकोभवति । तथाचश्रुतिः "चत्वारिवाक्परिमि तापदानितानिविदुर्ब्राह्मणायेमनीषिणः । गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंती"ति अभियुक्तश्लोकश्च । " यासामित्रावरुणसदनादुच्चरंतीत्रिषष्टिवर्णानंतःप्रकटकरणैःप्राणसंगात्प्रसूते । तांपश्यंतींप्रथमसुदितांमध्यमांबुद्धिसंस्थांवाचंवक्त्रेकरणविशदांवैखरींचप्रपद्ये"इति १७ अव्यक्तस्यसतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टांतः । यथेति । यथाग्निःखेऊष्माअव्यक्तोष्मरूपः दारुणिअधिकं मिथ्यमानः अनिलसहायःसन् अणुःसूक्ष्मविस्फुलिंगादिरूपोभवति । पुनःप्रकृष्टोजातोहविषासंवर्धते । तथैवेयंवाणीममाभिव्यक्तिः १८ उक्तांवाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तिष्वातिदिशति । एवंग दिः गदनंभाषणंमे व्यक्तिरित्युपसंहारः । कर्महस्तयोर्वृत्तिः । गतिः पादयोः । विसर्गःपायूपस्थयोः । इतिकर्मेंद्रियाणां । घ्राणोऽवघ्राणः रसोरसनं । दृक्दर्शनं । स्पर्शःस्पर्शनं । श्रुतिःश्रवणमितिज्ञानें द्रियाणां । संकल्पोमनसः विज्ञानंबुद्धिचित्तयोः अभिमानोऽहंकारस्य सूत्रंप्रधानस्य । सत्त्वरजस्तमसांविकरोधिदैवादिस्त्रिविधः प्रपंचःमेव्यक्तिरितिपूर्वेणान्वयः १९

॥६४॥

श्लोकाः १६/१९

॥ उद्धवउवाच ॥ संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर ॥ ननिवर्ततआत्मस्थोयेनभ्राम्यतिमेमनः १६ ॥ श्रीभगवानुवाच ॥ सएषजीवोविवरप्रसूतिः प्राणेनघोषेणगुहांप्रविष्टः ॥ मनोमयंसूक्ष्ममुपेत्यरूपंमात्रास्वरोवर्णइतिस्थविष्ठः १७ यथानलःखेऽनिलबंधुरुष्माबलेनदारुण्यधिमथ्यमानः ॥ अणुः प्रजातोहविषासमिध्यतेतथैवमेव्यक्तिरियंहिवाणी ॥ १८ एवंगदिःकर्मगतिर्विसर्गौघ्राणोरसोदृक्स्पर्शःश्रुतिश्च ॥ संकल्पविज्ञानमथाभिमानःसूत्रंरजः सत्वतमोविकारः १९

चूर्णिका

॥ उद्धव उवाच ॥ हे कृष्ण तव वाचं शृण्वतः मे हृदिस्थः संशयो न निवर्तते येन मे मनः भ्राम्यति अतस्तं छिंधि १६ ॥ श्रीभगवानुवाच ॥ ईशः तावत् मायया प्रपंचात्मना भाति तत्प्रपंचाध्यासात् च जीवानां अविद्यया कर्तृत्वादि ततः विधिनिषेधाधिकारः तदा चित्तशुद्ध्यर्थं कर्माणि कुरु इत्युक्तम् चित्तेशुद्धे कर्मादरं हित्वा मां भजेत्युक्तं इत्युत तत्र तावदीश्वरात्प्रपंचोद्गममाह सः अपरोक्षः ईश्वरः आधारादिचक्रेषु अभिव्यक्तः सन् आदौ पराख्येन नादवता प्राणेन सह अधारचक्रं प्रविष्टः ततः मनोमयं पश्यंत्याख्यं मणिपूरचक्रे प्रविश्य ततः विशुद्धिचक्रे मध्यमाख्यं रूपं प्राप्य मात्रा स्वरो वर्ण इति नानावेदशाखात्मको भवति १७ अत्र दृष्टांतः यथा अग्निः खे अव्यक्तोष्मरूपो वर्तते सः काष्ठे मथितश्चेत् सूक्ष्मरूपो भवति पुनः हविषा संवर्धते तथैव इयं वाणी ममाभिव्यक्तिः १८ एवं सर्वोपि प्रपंचः मे व्यक्तिरिति १९

॥६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२॥

तस्मादीश्वराभिव्यक्तिरूपःप्रपंचोनेश्वराद्भिन्नोस्तीत्याह अयमिति अयंजीवईश्वरः आदावव्यक्तएकएववयसाकालेनविश्लिष्टाविभक्तावागादींद्रियरूपाःशक्तयोयस्य । यद्वा विशेषेणश्लिष्टाआलिंगिता मायाशक्तिर्येनसः । बहुप्रकारइवभाति । यतःसएवआद्यः त्रिवृत् त्रिगुणाश्रयः । अब्जयोनिः लोकपद्मस्यकारणभूतः एकस्यबहुधाभानेदृष्टांतः । योनिंक्षेत्रंप्रतिपद्यप्राप्यबीजानियद्वादिति २० तस्मात्तन्मायाविलसितत्वात्तदाश्रयमिदंजगन्नततःपृथगितिसदृष्टांतमाह । यस्मिन्निति । तंतुवितानेसंस्थास्थितिर्यस्यसः पटोयथा तथा यस्मिन्निदं विश्वमोतंदीर्घतंतुषुपटइव । प्रोतंतिर्यक्तंतुष्विव । एवंभूतंसमष्टिव्यष्ट्यात्मकंविश्वमविद्ययात्मन्यध्यस्तंवृक्षरूपंजीवस्यकर्तृत्वादिसंसारहेतुः अतस्तद्विवेकज्ञानेनकर्मादिसर्वंत्याज्यमित्युक्तमित्याशयेनाह । यएषइतिसार्धैस्त्रिभिः । पुराणः । अनादिः । कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफलेभोगापवर्गौकर्मतत्फलेवाप्रसूतेजनयाति २१ वृक्षरूपकं प्रपंचयतिद्वेइति । द्वेपुण्यपापेअस्यबीजेसचशतमूलः । शतंअपरिमितावासनामूलानियस्य । त्रयोगुणानालानिप्रकांडायस्यपंचभूतानिस्कंधायस्य । पंचरसाःशब्दादिविषयास्तेषां प्रसूतिर्यस्मात् । दशचएकाचशाखाइंद्रियाणियस्य । द्वयोः सुपर्णयोःजीवपरमात्मनोर्नीडंयस्मिंस्त्रीणिवल्कलानित्वचः वातपित्तश्लेष्माणोयस्य । द्वेसुखदुःखेफलेयस्यसः अर्कंप्रविष्टः सूर्यमंडलपर्यंतं व्याप्तः तन्निर्भिद्यगतस्यसंसरणाभावात् २२ तत्फलभोक्तॄनाह । गृध्यंतिअभिकांक्षंतइतिगृध्राःकामिनः । ग्रामेचरागृहस्थाः अस्यवृक्षस्यैकंफलंदुःखमदंतिपरिणामतः स्वर्गादेरपिदुःखरूपत्वात् । हंसाविवेकिनोअरण्यवासाः संन्यासिनएकंफलंसुखमदंति । एकंपरमात्मानं मायामयमेवं बहुरूपंइज्यैः (पूज्यैः) गुरुभिः कृत्वायोवेदसवेदतत्वार्थंवेद २३ त्वं चैवंज्ञात्वाकृतकृत्यः सर्वसाधनंत्यजत्याह । एवमिति । एकांतभक्त्याशितेनतीक्ष्णेन ज्ञानकुठारेण स्वतंत्रभावोवा द्वयोः जीवोपाधिंत्रिगुणात्मकंलिंगशरीरंविवृश्च्यछित्त्वापरमात्मानं संपद्यप्राप्यअथाखिलसाधनंत्यजेति २४ ॥ ॥ इति श्रीभागवतेमहापुराणे एकादशस्कंधेटीकायांद्वादशोध्यायः १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

॥६५॥ श्लोकाः २०/२४

अयंहिजीवस्त्रिवृदब्जयोनिरव्यक्तएकोवयसासआद्यः ॥ विश्लिष्टशक्तिर्बहुधेवभातिबीजानियोनिंप्रतिपद्ययद्वत् २० यस्मिन्निदंप्रोतमशेषमोतंपटो यथातंतुवितानसंस्थः ॥ यएषसंसारतरुःपुराणःकर्मात्मकःपुष्पफलेप्रसूते २१ द्वेअस्यबीजेशतमूलस्त्रिनालःपंचस्कंधःपंचरसप्रसूतिः ॥ दशैकशाखोद्विसुपर्णनीडस्त्रिवल्कलोद्विफलोऽर्कंप्रविष्टः २२ अदंतिचैकंफलमस्यगृध्राग्रामेचराएकमरण्यवासाः ॥ हंसायएकंबहुरूपमिज्यैर्मायामयंवेदसवेदवेदम् २३ एवंगुरूपासनयैकभक्त्याविद्याकुठारेणशितेनधीरः ॥ विवृश्च्यजीवाशयमप्रमत्तःसंपद्यचात्मानमथत्यजास्त्रम् २४ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेद्वादशोध्यायः १२ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

किंच अयं ईश्वरः आदौ अव्यक्तरूपः एक एव ततः कालेन विभक्तेंद्रियादिशक्तिरूपः बहुप्रकार इव भाति यथा क्षेत्रं प्राप्य बीजानि २० एवं भूतः संसारवृक्षः प्रवृत्तिस्वभावः भोगापवर्गौ जनयति २१ अस्य पुण्यपापे बीजे अपरिमितवासनामूलः त्रिगुणकांडः प्रपंचभूतस्कंधः शब्दादिविषयप्रसूतिः एकादशेंद्रियशाखः द्विसुपर्णः सूर्यमंडलपर्यंतं व्याप्तो वर्तते २२ एवंभूतवृक्षस्य एकं दुःखफलम् गृहस्थाः अदंति तथा अन्यत् सुखफलं संन्यासिनः अदंति एवं बहुरूपं ईश्वरं गुरुभिः कृत्वा यः वेद सः वेदार्थं वेत्ति २३ हे उद्धव एवं गुरूपासनया भक्त्या शितेन ज्ञानकुठारेण अहंकारं छित्वा परमात्मानं प्राप्य साधनं त्यजेति २४ इत्येकादशे द्वादशः १२ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशेथसत्त्वस्यवृद्ध्याविद्योदयक्रमः । हंसेतिहासतश्चित्तगुणविश्लेषवर्णनं । विद्याकुठारेणजीवाशयंसंवृश्च्यसाधनंत्यजेदुक्तं । ननु तत्रतमआदिगुणत्रयवृत्तिप्रतिबंधेसतिकथं विद्योत्पत्तिरित्याशंक्यतान्नि
वृत्त्याविद्योत्पत्तिप्रकारमाह । सत्त्वमितिसप्तभिः । तत्रयद्यानंदादिवदात्मधर्मागुणाःस्युस्तर्हितत्स्वरूपत्वात्तेषां निवृत्तिर्नस्यान्नत्वेतदस्तीत्याह । बुद्धेःप्रकृतेरेवगुणानत्वात्मन इति । अतःसत्त्वेनसत्त्ववृत्याऽन्य
तमौहन्यात्रजस्तमोवृत्तीर्जयेदित्यर्थः सत्त्वंचसत्यदयादिवृत्तिरूपमुपशमात्मकेनसत्त्वेनैवहन्यात् १ ननु गुणत्रयवृत्तीनांपरस्परोपमर्दनरूपत्वात्कथंसत्त्ववृत्त्यैवेतरवृत्तयोनियमेनहंतव्यास्तत्राह । सत्त्वा
दिति मद्भक्तिलक्षयतियोधर्मः सभक्तिरूपएववा । सत्त्वमेवकथंवर्धेततत्राह । सात्त्विकानांपदार्थानामुपासयासेवयासत्त्वंवृद्धंभवतीत्यर्थः २ सचधर्मोरजस्तमसीहन्यात् । कुतः । नविद्यतेउत्तमोयस्मात्स
सर्वोत्तमः । यतः । सत्त्ववृद्धिः सत्त्वस्यवृद्धिर्यस्मिन्कारणेसः । अतएवतत्कार्योधर्मप्रतिबंधोपिनास्तीत्याह । तस्मिन्नुभयस्मिन् हतेतन्मूलस्तेरजस्तमसीरागद्वेषादिनाप्रमादालस्यादिनाचमूलंयस्य
सः ३ सात्विकोपासनयासत्त्वंवर्धतइत्युक्तं तानेवसत्त्ववृद्धिहेतून्दर्शयितुंसामान्यतोगुणत्रयवृद्धिहेतूनाह । आगमः शास्त्रं अपःआपः क्वचिदागमोर्थइतिपाठः ४ एषुसात्विकादिनिर्णयमाह । एषामेवमध्येय
द्यद्वृद्धाःशास्त्रज्ञाः प्रचक्षते प्रशंसंति तत्तत्सात्विकम् यन्निंदंतितत्तामसंयत्तुतैर्वृद्धैरुपेक्षितंनस्तुतंनापिनिंदितं तद्राजसं ५ सात्विकान्येवेति निवृत्तिशास्त्राण्येवसेवेत नप्रवृत्तिपाषंडशास्त्राणिराजसता
मसानि । तीर्थापएव नगंधोदकसुराद्याः । प्रजाजनाः निवृत्तानेवजनान् नप्रवृत्तदुराचारान् विविक्तदेशं नरथ्याद्यूतादिदेशान् । कालंब्राह्ममुहूर्तादिकंध्यानादौ नप्रदोषनिशीथादीन् । कर्मचनित्यं नका
म्याभिचारादीनि । जन्मवैष्णवशैवदीक्षालक्षणं नशाक्तक्षुद्रदीक्षारूपम् । ध्यानंश्रीविष्णोः (श्रीशंकरस्यवा) नकामिनीविद्विषां । मंत्रंप्रणवादिकं नकाम्यक्षुद्रान् । संस्कारंआत्मनः शोधकंनतुके
वलंदेहगृहादीनां । ननु ज्ञानं महावाक्यश्रवणादेवोत्पद्यते । किंतत्र सत्त्ववृद्ध्याधर्मेणवा । तत्राह । यावत्स्मृतिः आत्मापारोक्ष्यंयावच्चदेहद्वयतत्कारणभूतगुणापोहः । तावत्पर्यंतं ज्ञानंभवतीत्यर्थःअ
न्यथातुनैतादृशं ६ ननुगुणव्यतिकराज्जातोदेहःकथंस्वाश्रयभूतान्गुणान्स्वतएवोत्पन्नयाविद्ययापोह्यस्वयमप्युपरमेत् । तत्राह । वेणूनां संघर्षणाज्जातोऽग्निर्यथास्वतएवोत्पन्नाभिर्ज्वालाभिस्तद्वनंसर्वं
दग्ध्वास्वयंशाम्यति एवंदेहोपितक्रियःतस्याग्नेरिवक्रियाव्यापारोयस्यसः (व्यत्ययःक्षोभः) ७

श्लोकाः १/७

॥ श्रीभगवानुवाच ॥ सत्त्वंरजस्तमइतिगुणाबुद्धेर्नचात्मनः ॥ सत्त्वेनान्यतमौहन्यात्सत्त्वंसत्त्वेनचैवहि १ सत्त्वाद्धर्मोभवेद्वृद्धात्पुंसोमद्भक्तिलक्षणः ॥ सा
त्विकोपासयासत्त्वंततोधर्मःप्रवर्तते २ धर्मोरजस्तमोहन्यात्सत्त्ववृद्धिरनुत्तमः ॥ आशुनश्यतितन्मूलोह्यधर्मउभयेहते ३ आगमोपःप्रजादेशःकालःकर्म
चजन्मच ॥ ध्यानंमंत्रोथसंस्कारोदशैतेगुणहेतवः ४ तत्तत्सात्त्विकमेवैषांयद्यद्वृद्धाःप्रचक्षते ॥ निंदंतितामसंतत्तद्राजसंतदुपेक्षितम् ५ सात्त्विकान्येवसेवे
तपुमान्सत्त्वविवृद्धये ॥ ततोधर्मस्ततोज्ञानंयावत्स्मृतिरपोहनम् ६ वेणुसंघर्षजोवह्निर्दग्ध्वाशाम्यतितद्वनम् ॥ एवंगुणव्यत्ययजोदेहःशाम्यतितत्क्रियः ७

चूर्णिका ॥ श्रीभगवानुवाच ॥ हे उद्धव सत्त्वादिगुणाः प्रकृतेः संति नात्मनः अतः सत्त्ववृद्ध्या रजस्तमौ हन्यात् सत्त्वं तुसत्त्वेनैव हन्यात् १ ननु सत्त्ववृद्ध्या इतरवृत्तयः कथं हं
तव्यास्तत्राह वृद्धात् सत्त्वात् भक्तिलक्षणःधर्मः भवेत् सत्त्वं तु सात्त्विकपदार्थसेवया वर्धते ततो धर्मः प्रवर्तते २ स च धर्मः रजस्तमसी हन्यात् तन्नाशे अधर्मः नश्यति
३ किंच आगमोऽपः प्रजादेशः कालः कर्म च जन्म च ध्यानं मंत्रोथ संस्कारो दशैते गुणहेतवः४एषु यत् यत् वृद्धाः प्रशंसंति तत् तत् सात्विकं यत् निंदंति तत्तामसं
यत्नस्तुवंति न निंदंति तद्राजसं ज्ञेयम् ५ सत्त्ववृद्धये सात्त्विकानि सेवेत ततो धर्मः ततो ज्ञानं भवति६ननु गुणेभ्यो जातो देहः तान् गुणान् अपोह्य कथं स्वयं उपरमे
तत्राह यथा वेणुसंघर्षजः वह्निः स्वतः उत्पन्नज्वालाभिः तद्वनं सर्वं दग्ध्वा पश्चात् स्वयं शाम्यति एवं देहोपि ७ ॥६६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ए. नतु।नियतेंद्रियतयासात्विकसेवाया।मियानस्तिपुरुषार्थः तथापि राजसादीन्विषयान् दुःखमितिजानंतोपि कथंसेवंते अजाययानिर्लज्जाहंतुमानीताअपितद्वत् ८ मिथ्याभिनिवेशेनभुंजतइतिसहेतुकमाह । अ० ॥१३॥
अहमितित्रिभिः । प्रमत्तस्यविवेकशून्यस्यदेहादावहमितिमिथ्याबुद्धिः हृदियथावदुत्सर्पति । ततोहंबुद्धेश्चवैकारिकंसत्वप्रधानमपिमनःप्रतिघोरंदुःखात्मकंरजउत्सर्पतिमनोव्याप्नोतीत्यर्थः ९ इदमेवं भोग्य
टीका मितिसविकल्पकः संकल्पः स्यात् । ततश्चअहोरूपमहोभावइतिगुणध्यानादुर्धरःकामःस्यात् १० ततोविषयान्भोक्तुंकर्माणिकरोति । दुःखैकफलानिसंपश्यन्जानन्नपि ११ एवंचेन्नकस्यापिदुःख
निवृत्तिः स्यादित्याशंक्याह । यदपियद्यपिरजस्तमोभ्यांविक्षिप्तधीः मूढधीश्चतथापिविद्वान्विवेकीपुनर्मनोनिरुंधन्नसज्जते १२ विषयदोषदृष्ट्यापिमनोनिरोधाशक्तौसुखंतन्निरोधोपायमाह । अप्रम
त्तइति । अनिर्विण्णः अनलसः यथाकालंत्रिषवणंमयिपरमानंदरूपेऽर्पयन्समादध्यात् १३ विषयैःसंग्रथितस्यमनसस्तद्वियोगेनेश्वरनिष्ठत्वमसंभावितंमन्यमानंप्रतितन्निरूपणायेतिहासमुपक्षिपति एता
॥६७॥ वानिति । यथावन्मय्यावेश्यतेइत्येतावानित्यर्थः १४ मच्छिष्यैरित्युक्तेतेषामतिज्यायसामनेनरूपेणानिरूपणासंभवात्पृच्छति । यदेति । तंकालंतदेतद्रूपंचवेदितुमिच्छामितदेतत्कथयेति १५ मानसाः
पुत्राः सूक्ष्मांदुर्ज्ञेयांऐकांतिकींगतिंपरांकाष्ठां १६

॥ उद्धवउवाच ॥ विदंतिमर्त्याःप्रायेणविषयान्पदमापदाम् ॥ तथापिभुंजतेकृष्णतत्कथंश्वखराजवत् ८ ॥ श्रीभगवानुवाच ॥ अहमित्यन्यथाबुद्धिःप्रमत्त श्लोकाः
स्ययथाहृदि ॥ उत्सर्पतिरजोघोरंततोवैकारिकंमनः ९ रजोयुक्तस्यमनसःसंकल्पःसविकल्पकः ॥ ततःकामोगुणध्यानाद्दुःसहःस्याद्धिदुर्मतेः १० करोति
कामवशगःकर्माण्यविजितेंद्रियः ॥ दुःखोदर्काणिसंपश्यन्रजोवेगविमोहितः ११ रजस्तमोभ्यांयदपिविद्वान्विक्षिप्तधीःपुनः ॥ अतंद्रितोमनोयुंजन्दो ८/१६
षदृष्टिर्नसज्जते १२ अप्रमत्तोनियुंजीतमनोमय्यर्पयञ्छनैः ॥ अनिर्विण्णोयथाकालंजितश्वासोजितासनः १३ एतावान्योगआदिष्टोमच्छिष्यैःसनकादि
भिः ॥ सर्वतोमनआकृष्यमय्यद्धावेश्यतेयथा १४ ॥ उद्धवउवाच ॥ यदात्वंसनकादिभ्योयेनरूपेणकेशव ॥ योगमादिष्टवानेतद्रूपमिच्छामिवेदितुम् ॥
१५ ॥ श्रीभगवानुवाच ॥ पुत्राहिरण्यगर्भस्यमानसाःसनकादयः ॥ पप्रच्छुःपितरंसूक्ष्मांयोगस्यैकांतिकींगतिम् १६

चूर्णिका ॥ उद्धवउवाच ॥ हे कृष्ण मर्त्याः विषयान् दुःखमिति ज्ञात्वा श्वखराजवत् पुनः तान् सेवंते तत्कथम् मिथ्याभिनिवेशेन भुंजते इति सहेतुकमाह ८ ॥ श्रीभगवा
नुवाच ॥ हेउद्धव मत्तस्य पुंसः देहादौ अहमिति मिथ्या बुद्धिः हृदि उपसर्पति ततः मनः प्रति रजो व्याप्नोति ९ ततः सविकल्पः संकल्पः स्यात् ततः कामः १० ततः
कामवशगः कर्माणि करोति ११ एवं चेत् न कस्यापि दुःखनिवृत्तिरित्याशंक्याह यद्यपि रजस्तमोभ्यां विक्षिप्तधीः तथापि विवेकी मनो निरुंधन् तत्र न सज्जते १२
किं च मनोनिरोधे सुखोपायमाह पुमान् जितश्वासः जितासनः आनंदरूपे मयि मनः अर्पयन् समादध्यात् १३ किं च सर्वतो मन आकृष्य मयि आवेश्यते एता ॥६७॥
वान् योगः मच्छिष्यैः सनकादिभिः आदिष्टः १४ ॥ उद्धव उवाच ॥ हे कृष्ण यदा त्वं सनकादिभ्यः यद्रूपेण योगं आदिष्टवान् तद्रूपं ज्ञातुमिच्छामि १५ ॥ श्री
भगवानुवाच ॥ एकदा सनकादयः योगस्य सूक्ष्मां गतिं ब्रह्माणं पप्रच्छुः १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदेवाह । गुणेष्विति । विषयेषुस्वभावतोरागादिवशाच्चेतः प्रविशति ते चानुभूताविषयावासनारूपेणचेतसिप्रविशंति । अतितितीर्षोः विषयानतिक्रमितुमिच्छोः (कथमन्योन्यसंत्यागः विषयेभ्यश्चे तसश्चेतसश्चविषयाणांपृथक्करणमित्यर्थः) १७ एवमिति । महान्देवोपिस्वयंभूरपिभूतानांस्रष्टापिध्यायमानोविचारयन्नपिप्रश्नस्यबीजंयदज्ञानादयं प्रश्नस्तन्नाविंदत । यतः । कर्मविक्षिप्तधीः १८ प्रश्न स्यपारमुत्तरभभिप्रायोवातस्यतितीर्षयाजिज्ञासया हंसरूपेणेतियथाहंसोनीरंक्षीरंचपृथक्कर्तुंशक्तः एवमहंगुणांश्चेतश्चेतिद्योतयितुंहंसरूपेणगतोस्मीति १९ २० इत्यहं मुनिभिःपृष्टइतिपृथग्वाक्यं । य दवोचमितिचपृथक् । अतोस्मच्छब्दावृत्तिरदोषः तेभ्योयदवोचंतन्मेवचनं निबोध २१ देहादिविविक्तात्मज्ञानेसतितन्निष्ठस्यरागाद्यसंभवात्स्वयमेवविषयचेतसोर्विश्लेषोभवतीतिवक्तुंप्रश्नखंडनमिषे णैवतावदात्मानात्मविवेकमाह । वस्तुनइतित्रिभिः । किमात्मनोयं प्रश्नः । तदुपाधेर्भूतसंघातस्यवा । यद्यात्मनस्तर्हितस्यवस्तुनःपरमार्थरूपस्यअनानात्वेसतिहेविप्रावोयुष्माभिः कृतः ईदृशःबहुषु निर्धारणरूपः (प्रश्नः) कथंघटेत । वक्तुरुत्तरदातुर्वामेममकआश्रयः अविशेषेआत्मनिकंजातिगुणादिविशेषमाश्रित्योत्तरंवक्ष्यामीत्यर्थः २२ भूतसंघविषयत्वेपिअयंवः (कोभवानिति) प्रश्नःवाचारंभः वाङ्मात्रेणारब्धः यतोऽनर्थकः । कुतः । भूतेषुदेवमनुष्यादिदेहेषु पंचभूतात्मकेषु अतः समानेषु अभिन्नेषु पुनर्वस्तुतश्चपरमकारणात्मनाअभिन्नेषु । "वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमि"ति श्रुतेः २३ तत्रपंचात्मकत्वंप्रत्यक्षादिसिद्धमेवेतिपरमकारणाभेदमेवोपपादयति मनसेति । अनआदिभिर्यद्यद्गृह्यतेतत्तदहमेवेत्यर्थः अंजसातत्त्वविचारेणएतेनैवसर्वात्मकोहामिस्यंजसाप्युत्तरमुक्तंभवति २४

श्लोकाः १७/२४

॥ सनकादयऊचुः ॥ गुणेष्वाविशतेचेतोगुणाश्चेतसिचप्रभो ॥ कथमन्योन्यसंत्यागोमुमुक्षोरतितितीर्षोः १७ ॥ श्रीभगवानुवाच ॥ एवंपृष्टोमहादेवःस्व यंभूर्भूतभावनः ॥ ध्यायमानःप्रश्नबीजंनाभ्यपद्यतकर्मधीः १८ समामचिंतयद्देवःप्रश्नपारतितीर्षया ॥ तस्याहंहंसरूपेणसकाशमगमंतदा १९ दृष्ट्वामां तउपव्रज्यकृत्वापादाभिवंदनम् ॥ ब्रह्माणमग्रतःकृत्वापप्रच्छुःकोभवानिति २० इत्यहंमुनिभिःपृष्टस्तत्त्वजिज्ञासुभिस्तदा ॥ यदवोचमहंतेभ्यस्तदुद्धवनि बोधमे २१ वस्तुनोयद्यनानात्वेआत्मनःप्रश्नईदृशः ॥ कथंघटेतवोविप्रावक्तुर्वामेकआश्रयः २२ पंचात्मकेषुभूतेषुसमानेषुचवस्तुतः ॥ कोभवानितिवः प्रश्नोवाचारंभोह्यनर्थकः २३ मनसावचसादृष्ट्याचगृह्यतेऽन्यैरपींद्रियैः ॥ अहमेवनमत्तोन्यदितिबुध्यध्वमंजसा २४

चूर्णिका

॥ सनकादय ऊचुः ॥ हे ब्रह्मन् विषयेषु रागतः चित्तं विशति ते च चित्ते विशंति एवं सति अन्योन्यसंत्यागः कथं स्यात् १७ ॥ श्रीकृष्ण उवाच ॥ एवं पृष्टः ब्रह्मा ध्यायमानः सन् प्रश्नबीजं नाविंदत् १८ ततः सः मां अचिंतयत् तदा अहं हंसरूपेण तत्समीपं प्राप्तः १९ ततः ते मां दृष्ट्वा ब्रह्माणमग्रतः कृत्वा मां को भवान् इति पप्रच्छुः २० एवं तैः पृष्टः अहं यदवोचं तत् शृणु २१ हे विप्राः युष्माभिः कृतः प्रश्नः किं आत्मविषयकः देहविषयको वा यदि आत्मविषयकः तर्हि आत्मनः एकत्वात् बहुषु निर्धारणरूपोयं प्रश्नः कथं घटेत किं च अविशेषे आत्मनि कं जात्यादिविशेषमाश्रित्योत्तरं वक्ष्यामि २२ देहविषयत्वेपि अयं वः प्रश्नः अन र्थकः कुतः सर्वेषां देहानां पंचभूतात्मकत्वात् पुनश्च परमकारणात्मना अभिन्नत्वात् २३ तत्र परमकारणाभेदमाह मनआदिभिः इंद्रियैः यत् गृह्यते तत् अहमेव एतेन सर्वात्मकोऽहमित्युक्तं भवति २४ ॥६८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंप्रश्नखंडनमिषेणैवात्मस्वरूपंसामान्यतोनिरूप्य ब्रह्मणापिदुष्परिहरंयत्पृष्टंतत्रोत्तरमाह । गुणेष्वित्यादिना यावदध्यायसमाप्ति । अयमभिप्रायः । यदिकर्तृत्वभोक्तृत्वादिरूपतयाविषयैः संग्रथितंचित्तं बुद्ध्यादिशब्दवाच्यमेवजीवस्यस्वरूपंभवेत् । ततस्तद्वियोगोनघटेत । तस्यतुस्वरूपमहं ब्रह्मैव । चित्ताध्यासेनतुतत्स्वभावतयाविषयैः संग्रथितं । अतःस्वस्यब्रह्मत्वभावनयाविषयाणां च मिथ्यात्वानुसंधानेन सर्वतोनिर्विषयंभगवंतंभजतोभवत्येवपरिपूर्णावस्थानमिति । हेप्रजाः पुत्रकाः सत्यं गुणेषुचेतआविशति गुणाश्चचेतसि । एवंगुणाश्चेतश्चोभयंग्रथितंयंदात्मनोब्रह्मस्वरूपस्यजीवस्यदेहः अध्यस्तउपाधिः नतुस्वरूपम् २५ तस्मादभीक्ष्णंपुनःपुनर्गुणसेवयातत्संस्कारेण गुणेष्वाविशच्चित्तं । तेपुनर्वासनारूपेणाचित्तेप्रकर्षेणभवंतिसंतीतितथातेगुणाश्चेतश्चएवंयदुभयंतन्मद्रूपःसन्त्यजेत् २६ ननु जाग्रदाद्यवस्थावतः कथं कूटस्थत्वरूपता (कथं वागुणादित्यागः) तत्राह । जाग्रज्जागरःस्वप्नःसुषुप्तंचेतिबुद्धेरेतावृत्तयः ताश्चनस्वाभाविकाः किंतु"सत्त्वाज्जागरणंविद्याद्रजसास्वप्नमादिशेत् । प्रस्वापंतमसाजंतोस्तुरीयंत्रिषुसंततमि"तिवक्ष्यमाणक्रमेणगुणतएवजीवस्तुविलक्षणः तदवस्थारहितएवविनिश्चितः कुतः तासांसाक्षित्वेन २७ ननु तर्हिकथमहंजागर्मीत्यादिप्रतीतिस्तत्राह । यर्हीति । यर्हियस्मात्सम्यक्सृतिःसरणमनयेतिसंसृतिर्बुद्धिः तयाबंधोयमात्मनोगुणवृत्तीर्ददाति । तस्मान्मयितुर्येअवस्थात्रयसाक्षिणिस्थितः सन्निमं संसृतिबंधंजह्यात् तत्तदागुणचेतसांगुणानांचेतसश्चान्योन्यंत्यागोभवति २८ कथंसंसृत्याबंधः कथंचतंजह्यात् तदाह अहंकारेणकृतंबंधंआत्मनःअर्थविपर्ययंआनंदाद्यावरणेनानर्थहेतुंविद्वान्जानन्सन्निर्विद्य दुःखमेतदितिज्ञात्वा तुर्येस्थितोभूत्वासंसारचिंतांसंसारोबुद्धिस्तत्रचिंतां अभिमानंतत्कृतांभोगचिंतांचत्यजेदिति २९ यावदेवंनत्यजेत्तावत्तस्यकर्मज्ञानादिसर्वंव्यर्थमित्याह । यावदिति । यद्यपिजागर्तिकर्मादिषु तथापिस्वपन् स्वप्नान् पश्यन्निवभवति । यतोऽज्ञः असम्यग्दर्शी । अज्ञजागरणस्यस्वप्नत्वेदृष्टांतः(स्वप्नेजागरणंयथेति) ३०

श्लोकाः २५—३०

गुणेष्वाविशतेचेतोगुणाश्चेतसिचप्रजाः ॥ जीवस्यदेहउभयंगुणाश्चेतोयदात्मनः २५ गुणेषुचाविशच्चित्तमभिक्ष्णंगुणसेवया ॥ गुणाश्चचित्तप्रभवामद्रूपउभयं त्यजेत् २६ जाग्रत्स्वप्नःसुषुप्तंचगुणतोबुद्धिवृत्तयः ॥ तासांविलक्षणोजीवःसाक्षित्वेनविनिश्चितः २७ यर्हिसंसृतिबंधोयमात्मनोगुणवृत्तिदः ॥ मयितुर्येस्थितोजह्यात्त्यागस्तद्गुणचेतसाम् २८ अहंकारकृतंबंधमात्मनोर्थविपर्ययम् ॥ विद्वान्निर्विद्यसंसारचिंतांतुर्येस्थितस्त्यजेत् २९ यावन्नानार्थधीःपुंसोननिवर्तेतयुक्तिभिः ॥ जागर्त्यपिस्वपन्नज्ञःस्वप्नेजागरणंयथा ३०

चूर्णिका

हे पुत्रकाः गुणेष्वाविशते चेतः गुणाश्चेतसि इदं सत्यम् एवं गुणाश्चेतश्चोभयं ग्रथितम् ब्रह्मरूपजीवस्य देहः अध्यस्तोपाधिः न स्वरूपं २५ अतः पुनःपुनर्गुणसेवया मिथः गुणचेतसोः प्रवेशः भवति एवं यत् उभयं तत् मद्रूपः सन् त्यजेत् २६ ननु जाग्रदाद्यवस्थावतः कुतस्तद्रूपता तत्राह जाग्रत्स्वप्नसुषुप्तयः गुणतो बुद्धेरेव वृत्तयः जीवस्तु तद्रहितः यतः तत्साक्षित्वेन निश्चितः २७ तर्हि कथमहं जागर्मीति प्रतीतिः तत्राह यतः बुद्ध्या बंधोयं जीवस्य गुणवृत्तीर्ददाति अतः तुर्ये मयि स्थित्वा इमं बंधं त्यजेत् तदा गुणचेतसोर्वियोगो भवति २८ तथा च आत्मनः अहंकारकृतं बंधं अनर्थहेतुं विद्वान् तुर्ये मयि स्थित्वा अभिमानं त्यजेत् २९ पुंसः नानाधीः यावत् न निवर्तेत तावत् जागर्त्यपि सुप्त एव ३०

१ मदात्मन इति पाठः० मु० पुस्तकेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ननु कथंवेदप्रामितवर्णाश्रमकर्मादिनानाधीर्निवर्तेत तत्राह । असत्त्वादिति । भावानांदेहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणिचास्यात्मनोमृषाअविद्यावद्विषयो वेदइति भावः ('तथाचस्मृतिः त्रैगुण्यविषयावेदा'इति) ३१ युक्तिभिरित्युक्तं ताएवयुक्तीराह । यइति । अर्थान्स्थूलान् । देहादीन् समस्तकरणैश्चक्षुरादिभिर्भुंक्ते कथंभूतान् अनुक्षणधर्मिणः क्षणिक बाल्यतारुण्यादि धर्मवतः यश्चस्वप्नेहृदिजागरदृष्टसदृशान् वासनामयान् भुंक्ते यश्चसुषुप्तेतान् सर्वानुपसंहरति स एकः कुतस्त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा। ननु जाग्रदवस्थांसर्वेंद्रियाणिपश्यंतिस्वप्नंमनः सुषुप्तिंतत्संस्कारशेषाबुद्धिः। कथमात्मातद्रष्टा तत्राह । इंद्रियेशः। ननु इंद्रियेशाअपिविश्वतैजसप्राज्ञाभिन्नाः। न । कुतः । स्मृत्यामतिसंधानेनसर्वावस्थास्वन्वयात्। यः स्वप्नानद्राक्षंपश्चानंतरंनाकिंचिदवेदिषंसएव एतर्हि जागर्मीति । उपाधिभेदेनविश्वादिव्यवहारइति भावः । एतेनबाल्युवाद्यवस्थास्वपिप्रतिसंधानेनात्मैक्यंद्रष्टव्यम् ३२ ततः किमतआह । एवमिति । गुणतोयाएतामनसऋव्यवस्थाएता मदविद्ययामयिकृतानतत्त्वतः संतीतिनिश्चितआत्मस्वरूपोर्थोयैस्तेयूयंअखिलशयानामाधिंआधीयंतेस्मिन्नित्याधिरहंकारः तंसंच्छिद्यहार्दंहृदिस्थितंमामांभजत। केनसंच्छिद्य तदाह अनुमानैः सदुक्तिभिः सतामुपदेशैः श्रुतिभिश्चतीक्ष्णेनज्ञानखड्गेनच ३३ अनुमानानिदर्शयाति । ईक्षेतेति इदंजगत् विभ्रमंईक्षेत तत्रहेतवः मनोविजृंभितत्वात्दृश्यत्वात् विनाशित्वाच्चस्वप्नवत् । अतिचंचलत्वाच्चअलातचक्रवत् (अलातचक्रंनामउल्मूकभ्रमणजन्यश्चक्राकारोभ्रमः) ननु भ्रमोपिनिर्विषयः कथंस्यात् तत्राह । विज्ञानमिति । निगमनं तस्मात्रिधायोयंगुणपारिणामकृतोविकल्पोभेदः स माया-(-स्वप्न) इति ३४ तस्मात्ततोदृश्याद्दृष्टिंप्रतिनिवर्त्यनिजसुखानुभवोभवेत् । तत्रैश्चल्यार्थंनिवृत्ततृष्णस्तूष्णींनिरीहश्चभवेत् । मनोवाक्कायव्यापाररहितइत्यर्थः ननु देहवतः सर्वथाद्वैतदृष्टिप्रतिनिवर्तनायोगात्पुनःसंसारः स्यादेव तत्राह । संदृश्यतइति क्वच क्वचिदावश्यकाहारादिषुयद्यपीदंसंदृश्यते तथापिपूर्वमवस्तुबुद्ध्या यत्त्यक्तं तत्पुनर्मोहाय नभवेदेव किंतु देहपातपर्यंतंस्मृतिरिव स्मृतिः संस्कारमात्रेणावभासोभवेदित्यर्थः ३५

॥७०॥

श्लोकाः ३१/३५

असत्त्वादात्मनोन्येषांभावानांतत्कृताभिदा ॥ गतयोहेतवश्चास्यमृषास्वप्नदृशोयथा ३१ योजागरेबहिरनुक्षणधर्मिणोर्थान्भुंक्तेसमस्तकरणैर्हृदितत्सदृक्षान् ॥ स्वप्नेसुषुप्तउपसंहरतेसएकःस्मृत्यन्वयात्रिगुणवृत्तिदृगिंद्रियेशः ३२ एवंविमृश्यगुणतोमनसस्त्र्यवस्थामन्माययामयिकृताइतिनिश्चितार्थाः ॥ संच्छिद्यहार्दमनुमानसदुक्तितीक्ष्णज्ञानासिनाभजतमाऽखिलसंशयाधिम् ३३ ईक्षेतविभ्रममिदंमनसोविलासंदृष्टंविनष्टमतिलोलमलातचक्रम् ॥ विज्ञानमेकमुरुधेवविभातिमायास्वप्नस्त्रिधागुणविसर्गकृतोविकल्पः ३४ दृष्टिंततःप्रतिनिवर्त्यनिवृत्ततृष्णस्तूष्णींभवेन्निजसुखानुभवोनिरीहः ॥ संदृश्यतेक्वचयदीदमवस्तुबुद्ध्यात्यक्तंभ्रमायनभवेत्स्मृतिरानिपातात् ३५

चूर्णिका

ननु नानाधीः कथं निवर्तेत तत्राह आत्मनः देहादिकृतो भेदः गतयः हेतवः च मृषा ३१ किं च यः जागरे विषयान् भुंक्ते तानेव वासनामयान् स्वप्नेपि भुंक्ते सुषुप्तौ तु तानुपसंहरति सः एकः अवस्थात्रयद्रष्टा ३२ एवं विमृश्य अहंकारं संच्छिद्य हृदि स्थितं मां भजत ३३ किं च इदं सर्वं दृष्टं मायेति ज्ञात्वा दृश्यात् दृष्टिं निवर्त्य स्वसुखानुभवः भवेत् ३४ ३५ ॥७०॥

१ दृष्टत्वादितिवापाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवोपपादयति देहमिति । आसनादुत्थितं उत्थायतत्रैवावस्थितं (वा) ततः क्वचिदपेतंनिर्गतंपुनस्तत्रैवोपेतंवादेहमपिनानुसंधत्तेकुतोन्यत् । यतः येनदेहेनस्वरूपमध्यगमत् । ज्ञातवान् । तंदेहं यतः कारणादितिवा । परिकृतंपरिहितंवस्त्रंगतंस्थितंवायथानवेत्तितद्वत् ३६ ननु च यःपरिपाल्यमानोपिमुमूर्षति तंचेन्नपश्यतितर्हिपतेदेव नेत्याह । देहोपीति । देहोदैववशेनगच्छन् स्वारंभकंकर्मयावदस्तितावत्पर्यंतंप्रतिसमीक्षतएवजीवत्येव । सासुःप्राणेंद्रियसहितः । ननु तर्हितस्मिन् कदाचिदासज्जेतापि नेत्याह । तमिति । स्वाप्नंस्वप्नतुल्यंअधिरूढःप्राप्तःसमाधिपर्यंतोयोगोयेनअतएवप्रतिबुद्धंज्ञातंपरमार्थवस्तुयेनसः । तथाचश्रुतिः।"तस्यतावदेवचिरंयावन्नविमोक्ष्यतेअथसंपत्स्यत"इति ३७ उक्तार्थेतेषांविश्वासार्थंस्वस्वरूपमाह । मयेति । सांख्यमात्मानात्मविवेकः योगःसमाधिस्तयोर्गुह्यंरहस्यम् । यज्ञंविष्णुं (मामां) "यज्ञोवैविष्णु"रितिश्रुतेः युष्मद्धर्मविवक्षयेत्यनेन (निवृत्ति-)-धर्माअप्युपदिष्टाइति ज्ञेयम् । अतएवयत्तेनहंसरूपेणब्रह्मणेभ्यात्थमाधवेत्यनुवादोभविष्यति ३८ ऋतंप्रमीयमाणोधर्मः (वेदादिः) सत्यंअनुष्ठीयमानोधर्मो-(-यागादिः) तेजःप्रभावः एतेषांपरमयनम् ३९ किंच मामिति (साम्यासंगादयोगुणामांभजंति) कथंभूताः ! अगुणाःगुणपरिणामरूपानभवंति किंतु नित्याइत्यर्थः (अतएवनिर्गुणम्) ४० मेमया अगृणतमांतुष्टुवुः ४१ प्रत्येयायप्रत्यागतोस्मि ४२ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांत्रयोदशोऽध्यायः १३ ॥ ७ ॥ चतुर्दशेपरंश्रेयोभक्तिरेवनचेतरत् ॥ इत्येतद्वर्ण्यतेध्यानयोगश्चसहसाधनैः ॥ १ ॥ एवंतावद्भगवताभक्त्यामोक्षइत्युक्तं अन्येत्वन्यानिसाधनानिवदंति । तत्रविशेषनिर्धारणायपृच्छति । श्रेयांसिश्रेयःसाधनानिकिंविकल्पेनप्राधान्यंउताहोकिंवाएकस्यैवमुख्यता १

श्लोकाः

देहंच नश्वरमवस्थितमुत्थितंवासिद्धोनपश्यतियतोध्यगमत्स्वरूपम् ॥ दैवादपेतमुतदैववशादुपेतंवासोयथापरिकृतंमदिरामदांधः ३६ देहोपिदैववशगः खलुकर्मयावत्स्वारंभकंप्रतिसमीक्षतएवसासुः ॥ तंसप्रपंचमधिरूढसमाधियोगःस्वाप्नंपुनर्नभजतेप्रतिबुद्धवस्तुः ३७ मयैतदुक्तंवोविप्रागुह्यंयत्सांख्ययोगयोः॥जानीतमागतंयज्ञंयुष्मद्धर्मविवक्षया ३८ अहंयोगस्यसांख्यस्यसत्यस्यर्तस्यतेजसः॥ परायणंद्विजश्रेष्ठाःश्रियःकीर्तेर्दमस्यच ३९ मांभजंतिगुणाःसर्वेनिर्गुणंनिरपेक्षकम् ॥ सुहृदंप्रियमात्मानंसाम्यासंगादयोऽगुणाः ४० इतिमेछिन्नसंदेहामुनयःसनकादयः ॥ सभाजयित्वापरयाभक्त्याऽगृणतसंस्तवैः ४१ तैरहंपूजितःसम्यक्संस्तुतःपरमर्षिभिः ॥ प्रत्येयायस्वकंधामपश्यतःपरमेष्ठिनः ४२ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेत्रयोदशोध्यायः १३ ॥ ॥ ७ ॥ ॥ उद्धवउवाच ॥ वदंतिकृष्णश्रेयांसिबहूनिब्रह्मवादिनः ॥ तेषांविकल्पप्राधान्यमुताहोएकमुख्यता १

३६/१

चूर्णिका

एतदेवोपपादयति एवं सिद्धः पुमान् देहमपि स्थितं गतमित्यादि नानुसंधत्ते मदिरामदांधः वासो यथा ३६ एवं चेत् देहः पतेत् नेत्याह देहोपि दैववशगः यावत्स्वारंभकं कर्म तावत् जीवत्येव एवं प्रतिबुद्धवस्तुः पुमान् स्वप्नदेहवत् पुनः तस्मिन् नासज्जते ३७ हे विप्राः मया एतत् सांख्ययोगयोः गुह्यं उक्तं वः धर्मान् वक्तुं यज्ञमूर्तिं आगतं मां जानीत ३८ किं च अहं योगादीनां परमयनं ३९ तथा निरपेक्षं मां सर्वे गुणाः भजंति ४० एवं मत्तः छिन्नसंदेहाः मुनयः मां सत्कृत्य तुष्टुवुः ४१ तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ४२ इत्येकादशे त्रयोदशः १३ ॥ ॥ ७ ॥ ॥ उद्धव उवाच ॥ हे कृष्ण ब्रह्मवादिनः बहूनि श्रेयांसि वदंति तत्र सर्वेषां प्राधान्यं वा विकल्पेन अथवा एकस्यैव मुख्यता १

१ अष्टांगःइत्यपि पाठभेदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकमुख्यतापक्षोत्थानेकारणं भवतोति । अनपेक्षितः नअपेक्षितंअपेक्षायास्मिन् सः ।अहेतुकः । अयमर्थः भवतायोभक्तियोगउक्तः अन्येच ये श्रेयःसाधनानिवदंति तेषांकिंसाक्षात्फलसाधनत्वेन प्राधान्यमेवसर्वेषाम् । उतांगांगित्वम् । प्राधान्येपिकिंविकल्पेनसर्वेषांतुल्यफलत्वं यद्वा कश्चिदस्तिविशेषइति २ तत्रभक्तिरेवमहाफलत्वेनमुख्या अन्यानि तु स्वस्वप्रकृत्यनुसारेण पुष्पस्थानीयस्वर्गादिफलबुद्धिभिः प्राणिभिः प्राधान्येनपरिकल्पितानि क्षुल्लकफलानीतिविवेक्तुं प्रकृत्यनुसारेण बहुधावेदार्थप्रतिपत्तिमाह कालेनेतिसप्तभिः । " मदात्मकः मय्येवात्माचित्तंयस्यसः ३ भृग्वादयः भृगुश्चमरीचिरत्र्यंगिरसौपुलस्त्यःपुलहः क्रतुरित्येतेचसप्तब्रह्माणः प्रजापतयः तेचतेमहर्षयश्च (यद्वा ब्रह्मवेदंअगृह्णन्नित्यन्वयः) ४ ५ किंदेवाः क्रमस्वेददौर्गंध्यादिराहित्येन किंदेवाः मनुष्यावेति संदेहास्पदभूता द्वीपांतरमनुष्याः एवंकिंनराः किंचिन्नराइव मुखतः शरीरतोवा किंपुरुषाः किंचित्पुरुषाइव वानरादयः । प्रकृतयोवासनाबह्व्यो (बहुविधाः) कुतः रजःसत्त्वतमांसि भुवः जन्मस्थानानियासांताः ६ भूतानिदेवासुरमनुष्यादीनिचित्राचाचः वेदार्थव्याख्यानविषयाः ७ एवमित्युक्तोपसंहारः केषांचिदध्ययनादिशून्यानामप्युपदेशपारंपर्येण अपरेपाषंडमतयः वेदविरुद्धार्थमतयः ८ तत्प्रकृतीनांमायागुणमूलत्वान्मायामोहितधियः अनेकांतंनानाविधम् ९ तदेवाह । धर्ममितिसार्धेन । धर्मंकर्ममीमांसकाः । तदुक्तम् । "मोक्षार्थीनप्रवर्तेततत्रकाम्यानिषिद्धयोः । नित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासये"त्यादि । यशः काव्यालंकारकृतः । यथाहुः"यावत्कीर्तिर्मनुष्यस्यपुण्यालोकेषुगीयते । तावद्वर्षसहस्राणिस्वर्गलोकेमहीयत"इति । कामं वात्स्यायनादयः। सत्यं शमं दमं चयोगशास्त्रकृतः । अन्येदृष्टार्थवादिनोदंडनीतिकृतः। वैप्रसिद्धंऐश्वर्यमेवस्वार्थंपुरुषार्थंवदंति अतः सामाद्युपायाएवश्रेयःसाधनमितितेषांमतम् । तथैवत्यागंभोजनंचलोकायतिकाः । यज्ञोदेवतानांपूजनम् । (यज्ञश्च)तपश्चदानंच (व्रत्)१०

श्लोकाः २/१०

भवतोदाहृतःस्वामिन्भक्तियोगोऽनपेक्षितः ॥ निरस्यसर्वतःसंगंयेनत्वय्याविशेन्मनः २ ॥ श्रीभगवानुवाच ॥ कालेननष्टाप्रलयेवाणीयंवेदसंज्ञिता ॥ मयादौब्रह्मणेप्रोक्ताधर्मोयस्यांमदात्मकः ३ तेनप्रोक्ताचपुत्रायमनवेपूर्वजायसा ॥ ततोभृग्वादयोऽगृह्णन्सप्तब्रह्ममहर्षयः ४ तेभ्यःपितृभ्यस्तत्पुत्रादेवदानवगुह्यकाः ॥ मनुष्याःसिद्धगंधर्वाःसविद्याधरचारणाः ५ किंदेवाःकिंनरानागारक्षःकिंपुरुषादयः ॥ बह्व्यस्तेषांप्रकृतयोरजःसत्त्वतमोभुवः ६ याभिर्भूतानिभिद्यंतेभूतानांमतयस्तथा ॥ यथाप्रकृतिसर्वेषांचित्रावाचःस्रवंतिहि ७ एवंप्रकृतिवैचित्र्याद्भिद्यंतेमतयोनृणाम् ॥ पारंपर्येणकेषांचित्पाषंडमतयोपरे ८ मन्मायामोहितधियःपुरुषाःपुरुषर्षभ ॥ श्रेयोवदंत्यनेकांतंयथाकर्मयथारुचि ९ धर्ममेकेयशश्चान्येकामंसत्यंदमंशमम् ॥ अन्येवदंतिस्वार्थंवैऐश्वर्यंत्यागभोजनम् ॥ केचिद्यज्ञतपोदानंव्रतानिनियमान्यमान् १०

चूर्णिका

त्वया तु अहैतुकः भक्तियोगः उक्तः २ ॥ श्रीभगवानुवाच ॥ हे उद्धव इयं वेदलक्षणा वाणी कालेन नष्टा सा आदौ मया ब्रह्मणे प्रोक्ता तेन स्वपुत्राय मनवे उक्ता ३ ततः भृग्वादयः सप्त जगृहुः ४ तेभ्यः तत्पुत्राः देवदैत्यसिद्धगंधर्वकिन्नरादयः अगृह्णन् ५ एते रजःसत्त्वतमःप्रकृतयः ६ ७ एवं प्रकृतिवैचित्र्यात् नृणां मतयः भिद्यंते केषांचित् अविदुषांउपदेशेन भिद्यंते अपरे पाखंडमतयः ८ एते सर्वे मन्मायामोहितधियः संतः नानाविधं श्रेयः वदंति ९ तदेवाह मीमांसकाः कर्म काव्यालंकारकृतः यशः केचिद्यज्ञतपोदानं व्रतानि नियमान् यमान् १० ॥७२॥

१ तात्पर्यमितियावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषांतुच्छफलत्वमाह । आद्यंतवंतइति । एषांलोकाः एतैः साध्यानिफलानि । तमोनिष्ठाः मोहावसानाः भोगकालेप्यसूयादिभिः शुचार्पिताः व्याप्ताः ११ भक्तेर्मुख्यत्वमाह । मयीतियावत्समाप्ति । हेसभ्य मयापरमानंदरूपेण आत्मनास्वरूपत्वेनस्फुरता १२ किंच अन्येषां तत्तल्लोकादिपरिच्छिन्नंसुखंभक्तस्यतुपरिपूर्णमित्याह । अकिंचनस्येति १३ परिपूर्णतामेवाह । नपारमेष्ठ्यमिंति । रसाधिपत्यं पातालादिस्वाम्यंअपुनर्भवंमोक्षमपि । मद्विनामांहित्वाअन्यन्नेच्छंति । अहमेवतस्यप्रेष्ठइत्यर्थः १४ ममापिसएवप्रेष्ठइत्याह । नतथेतिद्वाभ्याम् । आत्मयोनिःब्रह्मापुत्रोपि । शंकरः मत्स्वरूपभूतोपि । संकर्षणः भ्रातापि । श्रीर्भार्यापि । आत्मामूर्तिरपि यथा भक्तइति वक्तव्येअतिहर्षेणाह । भवानिति १५ पूयेय मदंतर्वर्तिब्रह्मांडानिपवित्रीकुर्यामितिभावेनेत्यर्थः १६ किंच मद्भक्तानांसुखमेतावदेवंभूतमितिवाकोवक्तुंसमर्थः यतस्तत्स्वसंवेद्यं निरुपममित्याह । निष्किंचनाइति महांतः निरहंमानाः अनालब्धधियः अस्पृष्टचित्ताः निष्किंचनत्वादीनांयथेष्टंहेतुहेतुमद्भावः एवंभूतामदीयाः यत्सुखं जुषंतिसेवंते तत्सुखंतएवंविदुः लभंते नान्ये । कुतः नैरपेक्ष्यं नास्तिअपेक्षणयिंयेषांते निरपेक्षाः तैरेवलभ्यंनतुमोक्षापेक्षैरपीत्यर्थः । यद्वा एवंभूताः संतोयेममममामित्यर्थः । जुषंते प्रीणंति तएवयन्नैरपेक्ष्यंसुखंतद्विदुः नान्यइत्यन्वयः १७ अपिचआस्तांतावदुत्तमभक्तकथा । यतः प्राकृतोपिभक्तः कृतार्थएवेत्याह । बाध्यमानइतिद्वाभ्याम् । विषयैराकृष्यमाणोपिप्रगल्भयासमर्थया १८ पाकाद्यर्थं प्रज्वालितोग्निर्यथाकाष्ठानिभस्मीकरोति तथा रागादिनापिकथंचिन्मद्विषयासतीभक्तिः समस्तपापनाशिनीति । भगवानपिस्वभक्तिमहिमाश्चर्येणसंबोधयाति ! अहोउद्धवविस्मयंशृण्विति १९

श्लोकाः ११—१९

आद्यंतवंतएवैषांलोकाःकर्मविनिर्मिताः ॥ दुःखोदर्कास्तमोनिष्ठाःक्षुद्रानंदाःशुचार्पिताः ११ मय्यर्पितात्मनःसभ्यनिरपेक्षस्यसर्वतः ॥ मयात्मनासुखंयत्तत्कुतःस्याद्विषयात्मनाम् १२ अकिंचनस्यशांतस्यदांतस्यसमचेतसः ॥ मयासंतुष्टमनसःसर्वाःसुखमयादिशः १३ नपारमेष्ठ्यंनमहेंद्रधिष्ण्यंनसार्वभौमंनरसाधिपत्यम् ॥ नयोगसिद्धीरपुनर्भवंवामय्यर्पितात्मेच्छतिमद्विनान्यत् १४ नतथामेप्रियतमआत्मयोनिर्नशंकरः ॥ नचसंकर्षणोनश्रीर्नैवात्माचयथाभवान् १५ निरपेक्षंमुनिंशांतंनिर्वैरंसमदर्शिनम् ॥ अनुव्रजाम्यहंनित्यंपूयेयेत्यंघ्रिरेणुभिः १६ निष्किंचनामय्यनुरक्तचेतसःशांतामहांतोखिलजीववत्सलाः ॥ कामैरनालब्धधियोजुषंतियत्तन्नैरपेक्ष्यंनविदुःसुखंमम १७ बाध्यमानोपिमद्भक्तोविषयैरजितेंद्रियः ॥ प्रायःप्रगल्भयाभक्त्याविषयैर्नाभिभूयते १८ यथाग्निःसुसमिद्धार्चिःकरोत्येधांसिभस्मसात् ॥ तथामद्विषयाभक्तिरुद्धवैनांसिकृत्स्नशः १९

चूर्णिका

इति परं एतैः साध्यानि स्वर्गादिफलानि दुःखोदर्काणि अतः तुच्छान्येव ११ अथ भक्तेः मुख्यत्वमाह हे उद्धव मयि अर्पितात्मनः निरपेक्षस्य पुंसः यत् सुखं तत् विषयात्मनां कुतः स्यात् १२ किं च एवं मया संतुष्टमनसः पुंसः सर्वाः सुखमयाः दिशः एवं मय्यर्पितात्मा पुमान् १३ पारमेष्ठ्यं इदं पदं सार्वभौमं मोक्षमपि नेच्छति अहमेव तस्य प्रियः १४ हे उद्धव न तथा मे प्रियतम आत्मयोनिर्न शंकरः न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् १५ एवं भूतं निरपेक्षं भक्तं मदंतर्वर्तिब्रह्मांडानि अस्य भक्तस्य अंघ्रिरेणुभिः पवित्रीकुर्यामिति भावेन अहं अनुव्रजामि १६ किं च एवं भूताः भक्ताः कामैः अस्पृष्टचित्ताः ये ते नैरपेक्ष्यं मे सुखं लभंते १७ किं च प्राकृतोपि मद्भक्तः विषयैः आकृष्यमाणोपि समर्थया भक्त्या तैर्विषयैर्नाभिभूयते १८ किं च हे उद्धव यथा प्रदीप्तः अग्निः काष्ठानि भस्मसात्करोति तथा मद्विषया भक्तिः एनांसि १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अतएवंभूतंश्रेयोनान्यदस्तीत्याह । नसाधयतीतिद्वाभ्याम् २० श्रद्धयायाभक्तिस्तयासंभवाज्जातिदोषादपीत्यर्थः २१ भक्त्यभावेन्यत्साधनंव्यर्थमित्याह द्वाभ्याम् । धर्मइति २२ रोमहर्षादिकंविना कथंभक्तिर्गम्यते । भक्त्याचविना कथमाशयः शुद्ध्येदिति २३ किंच भक्तिः स्वाशयंशोधयतीतिकिंवक्तव्यं यतोगद्गदवागादिलक्षणो मद्भक्तियुक्तोलोकंसर्वंपुनातीत्याह । वागिति २४ अपिचभक्त्यैवात्मशुद्धिर्नान्यतइतिसदृष्टांतमाह । यथेति यथाग्निनाध्मातंतापितमेव सुवर्णंअंतर्मलंजहाति नक्षालनादिभिः स्वंनिजंरूपंचभजते । कर्मानुशयंकर्मवासनाम् । मांभजतेमद्रूपतामापद्यते २५ ननु "ब्रह्मविदाप्नोतिपरं तमेवविदित्वातिमृत्युमेती" त्यादिश्रुतिभ्योज्ञानादेवाविद्यानिवृत्त्यात्मप्राप्तिरवगम्यते कुतोभक्तियोगेनेत्युच्यते तत्राह । यथायथेति । आत्माचित्तंपरिमृज्यतेशोध्यते । मत्पुण्यकथाश्रवणैरभिधानैश्चभक्तेरेवावांतरव्यापारोज्ञानंनपृथगित्यर्थः २६ किंच ज्ञानंनामचित्तस्यमदाकारपरिणामः सचमांभजतः स्वभावतएवभवतिनचयत्नांतरमपेक्षतइतिसदृष्टांतमाह । विषयानिति २७ यस्मादन्यत्साधनंतत्फलंचस्वप्नमनोरथवदसदभिध्यानमात्रंतस्मात्तद्विहायमय्येवमनः समाहितंकुर्वितिप्रकरणार्थमुपसंहरति । तस्मादिति । मद्भावभावितंमद्भावेनमद्भजनेनैवशोधितम् २८ विशेषतोवात्स्यायनाद्युक्तकाममार्गाःपरित्याज्याइत्याह । स्त्रीणामिति । आत्मवान्धीरः सन् क्षेमेनिर्भयेदेशोविविक्तेविजने २९ एतदुपपादयति । नतथेति । अस्यपुंसः तत्संगिसंगतः क्लेशोभवेत् यथाचबंधोयोषित्संगतः तथान्यप्रसंगतोनभवेदिति ३०

॥७४॥

श्लोकाः २०/३०

नसाधयतिमांयोगोनसांख्यंधर्मउद्धव ॥ नस्वाध्यायस्तपस्त्यागोयथाभक्तिर्ममोर्जिता २० भक्त्याहमेकयाग्राह्यःश्रद्धयात्माप्रियःसताम् ॥ भक्तिःपुनातिमन्निष्ठाश्वपाकानपिसंभवात् २१ धर्मःसत्यदयोपेतोविद्यावातपसान्विता ॥ मद्भक्त्यापेतमात्मानंनसम्यक्प्रपुनातिहि २२ कथंविनारोमहर्षंद्रवताचेतसाविना ॥ विनानंदाश्रुकलयाशुद्ध्येद्भक्त्याविनाशयः २३ वाग्गद्गदाद्रवतेयस्यचित्तंरुदत्यभीक्ष्णंहसतिक्वचिच्च ॥ विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनंपुनाति २४ यथाग्निनाहेममलंजहातिध्मातंपुनःसंभजतेचरूपम् ॥ आत्माचकर्मानुशयंविधूयमद्भक्तियोगेनभजत्यथोमाम् २५ यथायथात्मापरिमृज्यतेसौमत्पुण्यगाथाश्रवणाभिधानैः । तथातथापश्यतिवस्तुसूक्ष्मंचक्षुर्यथैवांजनसंप्रयुक्तम् २६ विषयान्ध्यायतश्चित्तंविषयेषुविषज्जते ॥ मामनुस्मरतश्चित्तंमय्येवप्रविलीयते २७ तस्मादसदभिध्यानंयथास्वप्नमनोरथम् ॥ हित्वामयिसमाधत्स्वमनोमद्भावभावितम् २८ स्त्रीणांस्त्रीसंगिनांसंगंत्यक्त्वादूरतआत्मवान् क्षेमेविविक्तआसीनश्चिंतयेन्मामतंद्रितः २९ नतथास्यभवेत्क्लेशोबंधश्चान्यप्रसंगतः ॥ योषित्संगाद्यथापुंसोयथातत्संगिसंगतः ३०

चूर्णिका

अपि च यथा भक्तिः मां वशीकरोति तथा सांख्यधर्मयोगादयः न २० अहं एकभक्त्यैव ग्राह्यः मन्निष्ठा भक्तिः श्वपाकानपि पुनाति २१ सत्यदयायुतोपि धर्मः भक्तिहीनं नरं न संपुनाति २२ रोमहर्षादिकं विना कथं भक्तिः तया विना कथं आशयः शुध्येत् २३ यस्य वाक् गद्गदा यस्य चित्तं द्रवते क्वचित् रुदति हसति नृत्यते इत्यादि एवं मद्भक्तः भुवनं पुनाति २४ किंच यथा अग्निना तापितं सुवर्णं मलं हित्वा स्वं रूपं भजते एवं आत्मा भक्तियोगेन कर्मवासनां हित्वा मत्स्वरूपमाप्नोति २५ अपिच चित्तं यथा यथा कथाश्रवणादिभिः शोध्यते तथा तथा सूक्ष्मं रूपं पश्यति २६ किंच विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते एवं मांस्मरतश्चित्तं मय्येवप्रविलीयते २७ २८ तस्मात् अन्यसाधनं मिथ्येति ज्ञात्वा मयि मनः समाधत्स्व २९ किंच स्त्रीणां तत्संगिनां च संगं हित्वा विविक्ते स्थित्वा मां चिंतयेत् यथा स्त्रीतत्संगिसंगतः बंधो भवेत् तथा नान्यसंगतः ३०

॥७४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मांचिंतयेदित्युक्तंतत्प्रकारंपृच्छति यथेतिध्यानांगप्रश्नः यादृशमितिध्येयविशेषणप्रश्नः यदात्मकमितियस्यैतानिविशेषणानितत्स्वरूपप्रश्नः। एतन्मेध्यानं मेवक्तुमर्हसीतिपाठः। तत्रायमर्थः मुमुक्षुस्त्वांयथा ध्यायेत्तन्मेवक्तुमर्हसीतिजिज्ञासोः कथनाय मेपुनरेतत्त्वद्दास्यमेवपुरुषार्थः । नतुध्यानेनकृत्यमस्तीति । तदुक्तंत्वयोपभुक्तस्रग्गंधइत्यादि त्वंवक्तुमर्हसीतिपाठस्तुसुगमः ३१ तत्रध्यानांगत्वेनासनप्राणायामप्रकारमाह । समइतिचतुर्भिः समे नात्युच्छ्रिते नातिनीचे आसने कंबलादौ समकायः सम्यग्यथासुखमासीनःइति नास्तिस्वस्तिकादिनियमइत्युक्तंनासाग्रनिरीक्षणंचचित्तस्थैर्याय । "अंतर्लक्ष्यो बहिर्दृष्टिःस्थिरचित्तःसुसंयत"इतियोगशास्त्रोक्तेः ३२ विपर्ययेणरेचकपूरककुंभकक्रमेणापि । यद्वा वामनाड्यापूरितंदक्षिणयात्यजेत् । तयावापूरितंवामयेत्येवंविपर्ययेण । यथोक्तंयोगे । "इडयापूरितंवायुंत्यजेत्पिंगलयाततः । पिंगलापूरितंवायुमिडयाचपरित्यजेत्"इति । निर्जितेंद्रियइतिप्रत्याहारउक्तः ३३ प्राणायामोद्विविधः सगर्भोअगर्भश्चेति । तत्रश्रेष्ठत्वात्। प्रणवगर्भमाह । हृदीतिद्वाभ्याम् । मूलाधारादारभ्यअविच्छिन्नंसंततंघंटानादतुल्यमोंकारंहृदिसंस्थितंप्राणेनउदीर्यउर्ध्वंद्वादशांतपर्यंतंनीत्वाकथंबिसोर्णवत्कमलनालतंतुवत् । तत्रमात्रातीतेस्वरंपंचदशांबिंदुंसंवेशयेत् । अथपुनरित्यस्यतंचाबिंदुशिरस्कंकुर्यादित्यर्थः यद्वा मूलाधारादारभ्यमूर्धांतपर्यंतंबिसतंतुवत्सूक्ष्ममविच्छिन्नंसंततंहृदिमनसिप्राणेनोदीर्याभिव्यज्यअथपुनस्तत्रोंकारेघंटानादतुल्यंस्वरंउदात्तंनादंस्थिरीकुर्यादिति ३४ मासादर्वाक्जितानिलोभवति ३५ एवंध्यानांगमुक्तं यादृशमित्यस्योत्तरंवा । ध्येयपीठमाह । हृत्पुंडरीकमितिसार्धेन अंतस्थंदेहांतर्वर्ति । ऊर्ध्वनालमधोमुखंमुकुलितंचकदलीपुष्पसंकाशंयदस्ति तद्विपरीतंध्यात्वेत्यर्थः ३६ न्यसेत्चिंतयेत् सविशेषणंध्यानमाह । वह्निमध्यइतिषड्भिः । ध्यानमंगलंध्यानस्यशुभंविषयम् ३७ समंअनुरूपावयवंदीर्घाश्चारवोभुजायस्मिन्सुचारुअतिरम्यम् ३८ समानयोः कर्णयोर्विन्यस्तेस्फुरतीमकराकारेकुंडलेयस्मिन्तत्श्रीवत्सश्रियोर्निकेतनंवक्षसिदक्षिणवामवस्ताभ्यांयुक्तमित्यर्थः ३९

श्लोकाः ३१—३९

॥ उद्धवउवाच ॥ यथात्वामरविंदाक्षयादृशंवायदात्मकम् ॥ ध्यायेन्मुमुक्षुरेतन्मेध्यानंमेवक्तुमर्हसि ३१ ॥ श्रीभगवानुवाच ॥ समआसनआसीनःसमकायोयथासुखम् ॥ हस्तावुत्संगआधायस्वनासाग्रकृतेक्षणः ३२ प्राणस्यशोधयेन्मार्गंपूरकुंभकरेचकैः॥ विपर्ययेणापिशनैरभ्यसेन्निर्जितेंद्रियः ३३ हृद्यविच्छिन्नमोंकारंघंटानादंबिसोर्णवत् ॥ प्राणेनोदीर्यतत्राथपुनःसंवेशयेत्स्वरम् ३४ एवंप्रणवसंयुक्तंप्राणमेवसमभ्यसेत् ॥ दशकृत्वस्त्रिषवणंमासादर्वाग्जितानिलः ३५ हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखम् ॥ ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रंसकर्णिकम् ३६ कर्णिकायांन्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरम् ॥ वह्निमध्येस्मरेद्रूपंममैतद्ध्यानमंगलम् ३७ समंप्रशांतंसुमुखंदीर्घचारुचतुर्भुजम् ॥ सुचारुसुंदरग्रीवंसुकपोलंशुचिस्मितम् ३८ समानकर्णविन्यस्तस्फुरन्मकरकुंडलम् ॥ हेमांबरंघनश्यामंश्रीवत्सश्रीनिकेतनम् ३९

चूर्णिका

॥ उद्धव उवाच ॥ हे कृष्ण मुमुक्षुः त्वां यथा ध्यायेत् तद्वद ३१ श्रीभगवानुवाच ॥ सम आसने आसीनः हस्तौ उत्संगे आधाय नासाग्रदृष्टिः पुमान् पूरककुंभकरेचकैः प्राणमार्गं शोधयेत् ३२ ३३ ३४ एवं प्रणवयुक्तं प्राणं दिनेदिने त्रिषवणं दशकृत्वः अभ्यस्य मासादर्वाक् जितानिलो भवति ३५ तथा अधोमुखं हृत्कमलं ऊर्ध्वमुखं ध्यात्वा ३६ तत्कर्णिकायां सोमाद्यंतर्गतवह्निमंडले ममरूपं चतुर्भुजं शांतं सुकपोलं हेमांबरं घनःश्यामं शंखचक्रादियुक्तं कौस्तुभकिरीटाद्युपेतं सुकुमारं स्मृत्वा सर्वांगेषु मनो दधत् एवं ध्यायेत् ३७ ३८ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

४० द्युमद्भिः किरीटादिभिः आसमंताद्युतंअलंकृतंप्रसादेनशोभनंमुखंईक्षणंचयस्मिन्तत् ४१ सुकुमारंअतिकोमलंसविशेषणंध्यानमुपसंहराति । प्रकर्षेणनयेत्सर्वतः सर्वांगयुक्ते ४२ यादृशमित्यस्यो त्तरत्वेनसविशेषणमुक्त्वायदात्मकमित्यस्योत्तरतयाशनैर्निर्विशेषगत्यागेनध्यानमेवसमाधिपर्यंतमाह । तदितित्रिभिः । एकत्रांगेअन्यान्यंगानिनाचिंतयेत् । एकत्रेतियदुक्तंतदेवांगंदर्शयति सुस्मितमिति ४३ व्योम्निसर्वकारणरूपे । तच्चकारणत्वमपित्यक्त्वामदारोहः मयिशुद्धेब्रह्मण्यारूढः सन्नकिंचित्ध्यातृध्येयविभागमपिचिंतयेत् ४४ मामेवसर्वात्मनिविचष्टेआत्मानंचसर्वात्मनिमयिसंयुतंविचष्टे ज्योतिषिसंयुक्तंज्योतिरिवेत्यन्वयः ४५ एवंभूतसमाधिपर्यंतध्यानस्यफलमाह । ध्यानेनेति । मनोयुंजतः समादधतः द्रव्यज्ञानक्रियाभ्रमः अधिभूताधिदैवाध्यात्मरूपः दृश्यद्रष्टृदर्शनरूपोवाभ्रमः निर्वाणं शांतिंसम्यग्यास्यतीति ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांचतुर्दशोऽध्यायः १४ ॥ ॥७॥ ॥ श्रीः ॥ ततःपंचदशेप्रोक्तासिद्धयोधारणानुगाः । श्रीविष्णुपदसंप्राप्तावं तरायतयामृताः ॥ १ ॥ एवंमनोयुंजतोयोगिनःअंतराविर्भवंत्यः सिद्धयोप्यंतरायप्रायाएव । अतस्ताःपरिहृत्यपरमेश्वरपरएवभवेदितिवक्तुंसिद्धीराह । जितेंद्रियस्येति । युक्तस्यस्थिरचित्तस्य १ स्विदितिवितर्के कास्वित्किंनाम । कथंस्वित्कीदृशीवा । धारणाश्चकतीतिप्रश्नांतरेवाशब्दः । त्वमेवैतज्जानासि नान्यइत्याशयेनाह । योगिनामिति २

||७६||

श्लोकाः ४०/२

शंखचक्रगदापद्मवनमालाविभूषितम् ॥ नूपुरैर्विलसत्पादंकौस्तुभप्रभयान्वितम् ४० द्युमत्किरीटकटककटिसूत्रांगदायुतम् ॥ सर्वांगसुंदरंहृद्यंप्रसादसुमु खेक्षणम् ४१ सुकुमारमभिध्यायेत्सर्वांगेषुमनोदधत् ॥ इंद्रियाणींद्रियार्थेभ्योमनसाकृष्यतन्मनः ॥ बुद्ध्यासारथिनाधीरःप्रणयेन्मयिसर्वतः ४२ तत्सर्व व्यापकंचित्तमाकृष्यैकत्रधारयेत् ॥ नान्यानिचिंतयेद्भूयःसुस्मितंभावयेन्मुखम् ४३ तत्रलब्धपदंचित्तंआकृष्यव्योम्निधारयेत् ॥ तच्चत्यक्त्वामदारोहोन किंचिदपिचिंतयेत् ४४ एवंसमाहितमतिर्मामेवात्मानमात्मनि ॥ विचष्टेमयिसर्वात्मन्ज्योतिर्ज्योतिषिसंयुतम् ४५ ध्यानेनेत्थंसुतीव्रेणयुंजतोयोगिनो मनः ॥ संयास्यत्याशुनिर्वाणंद्रव्यज्ञानक्रियाभ्रमः ४६ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेचतुर्दशोऽध्यायः १४ ॥ ॥ ७ ॥ ॥ ॥ श्रीभगवानुवाच ॥ जितेंद्रियस्ययुक्तस्यजितश्वासस्ययोगिनः ॥ मयिधारयतश्चेतउपतिष्ठंतिसिद्धयः १ ॥ उद्धवउवाच ॥ कयाधारणयाकास्वित्कथं वासिद्धिरच्युत ॥ कतिवासिद्धयोब्रूहियोगिनांसिद्धिदोभवान् २

चूर्णिका

४०४१४२ ४३ किंच विषयेभ्यः इंद्रियाणि मनसा आकृष्य तन्मनः बुद्ध्या आकृष्य सर्वांगयुक्ते मयि नीत्वा तत्सर्वं व्यापकं मनः आकृष्य एकत्र धृत्वा सुस्मितं मुखं भावयेत् तत्र स्थिरं सत् आकृष्य सर्वकारणरूपे धृत्वा तच्च कारणं हित्वा ध्यातृध्येयविभागमपि न चिंतयेत् ४४ एवं समाहितमतिः मां आत्मनि आत्मानं मयि पश्यति ज्योतिर्ज्योतिषि युक्तमिव ४५ ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ४६ ॥ इत्येकादशे चतुर्दशः ॥ १४ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ हे उद्धव जितेंद्रियस्य योगिनः सिद्धयः स्वमेव उपतिष्ठंति १ ॥ उद्धव उवाच ॥ हे अच्युत कया धारणया किंनामाकीदृशी वा सि द्धिः प्राप्यते सिद्धयः धारणाश्च कति संति तत्सर्वं ब्रूहि यतः त्वमेवैतज्जानासि नान्यः २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारणाश्चाष्टादशेत्यनुषंगः । योगपारगैरितित्रिकालज्ञत्वादिक्षुद्रसिद्धीरन्येपिजानंतीतिभावः । अहमेवप्रधानंमुख्यः स्वभावतआश्रयोयासांताः । मत्सारूप्यंप्राप्तेषुकिंचिन्न्यूनाभवंतीतिभावः । गुणहेतवः सर्वोत्कर्षहेतुकाः ३ ताःस्वरूपेणोपदिशति । अणिमेतिसार्धपंचभिः । अणिमामहिमालघिमाचमूर्तेर्देहस्यतिस्रःसिद्धयः । प्राप्तिर्नामसर्वप्राणिनामिंद्रियैःसहतत्तदाधिष्ठातृदेवतारूपेणसंबंधरूपा सिद्धिरित्यर्थः । श्रुतेषुपारलौकिकेषु दृष्टेषु दर्शनयोग्येष्वपिसर्वेष्वपिभूविवरादिपिहितेष्वपिप्रकाश्यंभोगदर्शनसामर्थ्यरूपासिद्धिः । शक्तीनांमायातदंशभूतानांप्रेरणं तत्रेश्वरेमायायाअन्येषुतदंशानांप्रेरणंईशितानामसिद्धिः ४ विषयभोगेष्वसंगोवशितासिद्धिः यत्कामः यद्यत्सुखंकामयतेतत्तदवस्यति तस्यतस्यसीमानंप्राप्नोतीति सिद्धिः । औत्पत्तिकाः स्वाभाविकानिरतिशयाश्चेत्यर्थः ५ गुणहेतुसिद्धीराह । अनूर्मिमत्त्वंक्षुत्पिपासादिराहित्यं । दूरेश्रवणंदर्शनंचेतिद्वेसिद्धी । मनोजवःमनोवेगेनदेहगतिः (कामरूपं) कामितरूपप्राप्तिः । परकाये (प्रवेशनं) प्रवेशः ६ स्वेच्छामृत्युः । अप्सरोभिःसहदेवानांयाः क्रीडास्तासामनुदर्शनंप्राप्तिःसंकल्पानुरूपप्राप्तिः अप्रतिहताआसमंताद्गतिर्यस्याःसाआज्ञाचतादृशी ७ क्षुद्रसिद्धीश्च पंचाह । त्रिकालज्ञत्वमिति । अद्वंद्वंशीतोष्णाद्यनभिभवः । अग्न्यादीनांसंस्तभनं ८ तत्तद्धारणादिभिः सह (प्रोक्ताः) विशषतोनिरूपयातिययेति यावत्समाप्ति (यथायादृशी) ९ भूतसूक्ष्मोपाधौमयितन्मात्रंभूतसूक्ष्माकारं । सः तन्मात्रोपासकः ममममदीयमणिमानं १० ज्ञानशक्तिमहत्तत्वोपाधौचमयियथासंस्थंमहत्तत्वाकारम् भूतानांचेति आकाशादिभूतोपाधावमयिमनोधारयन्तत्तद्रूपमहिमानंप्राप्नोतीत्यर्थः ११

श्लोका ३/११

॥ श्रीभगवानुवाच ॥ सिद्धयोष्टादशप्रोक्ताधारणायोगपारगैः ॥ तासामष्टौमत्प्रधानादशैवगुणहेतवः ३ अणिमामहिमामूर्तेर्लघिमाप्राप्तिरिंद्रियैः ॥ प्राकाश्यंश्रुतदृष्टेषुशक्तिप्रेरणमीशिता ४ गुणेष्वसंगोवशितायत्कामस्तदवस्यति ॥ एतामेसिद्धयःसोम्यअष्टावौत्पत्तिकामताः ५ अनूर्मिमत्त्वंदेहेस्मिन् दूरश्रवणदर्शनम् ॥ मनोजवःकामरूपंपरकायप्रवेशनम् ६ स्वच्छंदमृत्युर्देवानांसहक्रीडानुदर्शनम् ॥ यथासंकल्पसंसिद्धिराज्ञाऽप्रतिहतागतिः ७ त्रिकालज्ञत्वमद्वंद्वंपरचित्ताद्यभिज्ञता ॥ अग्न्यर्कांबुविषादीनांप्रतिष्टंभोऽपराजयः ८ एताश्चोद्देशतःप्रोक्तायोगधारणसिद्धयः ॥ ययाधारणयायास्याद्यथावास्यान्निबोधमे ९ भूतसूक्ष्मात्मनिमयितन्मात्रंधारयन्मनः ॥ अणिमानमवाप्नोतितन्मात्रोपासकोमम १० महत्यात्मन्मयिपरेयथासंस्थंमनोदधत् ॥ महिमानमवाप्नोतिभूतानांचपृथक्पृथक् ११

चूर्णिका ॥७७॥

श्रीभगवानुवाच ॥ हे उद्धव योगपारगैः सिद्धयः अष्टादश प्रोक्ताः धारणाश्च अष्टादश तासांमध्ये मत्प्रधानाः अष्टौ अन्याः सत्त्वोत्कर्षहेतुकाः ३ ताश्चाह अणिमा प्रथमा महिमा द्वितीया लघिमा तृतीया एताः देहस्यस्युः प्राप्तिः चतुर्थी प्राकाश्यं पंचमी ईशिता षष्ठी वशिता सप्तमी प्राकाम्यं अष्टमी एताः अष्टसिद्धयः मे स्वाभाविक्यः ४ ५ ६ अन्या आह देहे अनूर्मिमत्वं प्रथमा दूरश्रवणं द्वितीया दूरदर्शनं तृतीया मनोजवः चतुर्थी कामितरूपप्राप्तिः पंचमी परकायप्रवेशः षष्ठी स्वेच्छयामृत्युः सप्तमी देवानां अप्सरोभिः सहक्रीडानुदर्शनं अष्टमी संकल्पानुरूपप्राप्तिः नवमी ७ अकुंठिताज्ञा दशमी अथक्षुद्रसिद्धीराह त्रिकालज्ञत्वं प्रथमा अद्वंद्वं द्वितीया परचित्तज्ञानं तृतीया अग्न्यर्कांबुविषादीनांस्तंभनं चतुर्थी अपराजयः पंचमी ययाधरणया या स्यात्तां धारणां शृणु ८ ९ भूतसूक्ष्मोपाधौमयिमनः धारयन् अणिमानमाप्नोति १० किंच ज्ञानशक्तिरूपमहत्तत्वोपाधौ मयि महत्तत्वाकारं तथा आकाशादिभूतोपाधौ च मयि मनो धारयन् तत्तद्भूतमहिमानं प्राप्नोति ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥७८॥ ॥१५॥

वाय्वादिभूतानांयेपरमाणवस्तन्मयेतदुपाधौमयिचित्तंरंजयन् योगीकालसूक्ष्मतांकालपरमाणूपाधिरूपतां इतिलघुत्वंविकरणे । तदुक्तं । "सकालःपरमाणुर्वैयोभुंक्तेपरमाणुता"मिति १२ वैकारिकाहंकारोपाधौमयिअखिलंएकाग्रं । आत्मत्वमधिष्ठातृत्वं (तांप्राप्तिंसिद्धिं) अत्रहेतुः मन्मनाः मयिमनोधारणप्रभावादेवंभवति । नात्रातीवहेतुरनुसंधेयइतिभावः । एवंमद्धारणानुभावेनमद्योग-(-वैभव)-प्राप्स्यइतिद्रष्टव्यं १३ क्रियाशक्तिप्रधानंमहत्तत्त्वमेवसूत्रंतदुपाधौमयि । समेपारमेष्ठ्यंचसर्वोत्कृष्टं प्राकाश्यंविंदते । कथंभूतस्याव्यक्ताज्जन्मयस्यसूत्रस्यतदुपाधेर्ममेत्यर्थः १४ त्र्यधीश्वरेत्रिगुणमायानियंतरिअतएवकालविग्रहे आकलयितृरूपेअंतर्यामिणि । ईशित्वंविशिनष्टि । क्षेत्रज्ञानांजीवानां क्षेत्राणांतदुपाधीनांचोदनंप्रेरणंनतुविश्वसृष्ट्यादिकर्तृत्वलक्षणमित्यर्थः १५ तुरीयाख्ये "विराड्हिरण्यगर्भश्चकारणंचेत्युपाधयः । ईशस्ययत्त्रिभिर्हीनंतुरीयंसत्पदंविदु"रित्येवंलक्षणे । "ऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियः । ज्ञानवैराग्ययोश्चैवषण्णांभगइतींगना । तद्वतिभगवच्छब्दशब्दिते २६ यत्रपरमानंदरूपेसर्वोपिकामस्तदंशभूतोऽवसीयतेसमाप्यते (तंप्राप्नोति) १७ अतःपरंगुणहेतुकाःसिद्धीराहशुद्धेसत्वात्मकेश्वेततांशुद्धरूपतां १८ आकाशात्मायः प्राणःसमष्टिरूपस्तद्रूपेमयिमनसाघोषंनादंचिंतयेत् । असौहंसोजीवस्तत्रआकाशेउपलब्धाज्ञातासन्तत्रस्थाविचित्रावाचःशृणोति । यद्वातत्राकाशेउपलब्धाअभिव्यक्ताः या (भूतानां) वाचस्तादूरतःशृणोतीति १९ त्वष्टाआदित्यःतस्मिन्नूपरिच्छिन्नेचक्षुःसंयोज्यतंचचक्षुषिसंयोज्यतत्रोभयसंयोगेमांध्यायन्विश्वं दूरतः पश्यति २०

श्लोकाः १२/२०

परमाणुमयेचित्तंभूतानांमयिरंजयन् ॥ कालसूक्ष्मार्थतांयोगीलघिमानमवाप्नुयात् १२ धारयन्मय्यहंतत्त्वेमनोवैकारिकेऽखिलम् ॥ सर्वेंद्रियाणामात्मत्वं प्राप्तिंप्राप्नोतिमन्मनाः १३ महत्यात्मनियःसूत्रेधारयेन्मयिमानसम् ॥ प्राकाश्यंपारमेष्ठ्यंमेविंदतेऽव्यक्तजन्मनः १४ विष्णौत्र्यधीश्वरेचित्तंधारयेत्कालविग्रहे ॥ सईशित्वमवाप्नोतिक्षेत्रज्ञक्षेत्रचोदनम् १५ नारायणेतुरीयाख्येभगवच्छब्दशब्दिते ॥ मनोमय्यादधन्योगीमद्धर्मावशितामियात् १६ निर्गुणेब्रह्मणिमयिधारयन्विशदंमनः ॥ परमानंदमाप्नोतियत्रकामोवसीयते १७ श्वेतद्वीपपतौचित्तंशुद्धेधर्ममयेमयि ॥ धारयञ्छ्वेततांयातिषडूर्मिरहितोनरः १८ मय्याकाशात्मनिप्राणेमनसाघोषमुद्वहेत् ॥ तत्रोपलब्धाभूतानांहंसोवाचःशृणोत्यसौ १९ चक्षुस्त्वष्टरिसंयोज्यत्वष्टारमपिचक्षुषि ॥ मांतत्रमनसाध्यायन्विश्वंपश्यतिसूक्ष्मदृक् २०

चूर्णिका

॥७८॥

तथा वाय्वादिभूतपरमाणुमये मयि चित्तं रंजयन् लघिमानं प्राप्नोति १२ किंच वैकारिकाहंकारोपाधौ मयि एकाग्रं चित्तं धारयन् इंद्रियाधिष्ठातृत्वं प्राप्नुयात् १३ किं सूत्रोपाधौमयियः मानसंधारयेत् सः मेसर्वोत्कृष्टं प्राकाश्यं विंदते १४ यःत्रिगुणमायानियंतरि विष्णौचित्तं धारयेत् १५ सः विश्वसृष्ट्यादिकर्तृत्वलक्षणं ईशित्वं प्राप्नोति यः तुर्याख्ये भगवच्छब्दवाच्येनारायणे मयि मनो धारयेत् सः वशितां इयात् १६ यः निर्गुणे ब्रह्मणि मयि मनः धारयन् परमानंदं प्राप्नोति १७ अथ गुणहेतुकाः सिद्धीराह श्वेतद्वीपपतौ मयिचित्तं धारयन् शुद्धरूपतां याति १८ आकाशात् प्राणरूपे मयि मनसानादं चिंतयन् असौ जीवः स्वयं ज्ञाता सन् आकाशस्थानां भूतानां वाचः शृणोति १९ किंच त्वष्टरि आदित्ये चक्षुः तंच चक्षुषि संयोज्य तत्र मनसा मां ध्यायन् विश्वं दूरतः पश्यति २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मनोदेहंचतदनुवर्तिनावायुनासहमयिसुसंयोज्ययामद्धारणाक्रियतेतस्याःप्रभावेनयत्रमनोयातितत्रात्मादेहोयातीत्यर्थः । यद्वा मनःकर्तृ आत्मानंवायुनासहदेहंचमयिसुसंयोज्य यत्रयातितदनुतत्रदेहोयाती ति २१ मनउपादायउपादानकारणं कृत्वा यद्यद्देवादिरूपंभवितुमिच्छतितत्तन्मनोरूपंमनसोभीष्टं रूपंयोगीभवेत् कुतः यतोमद्योगबलंयोहमचिंत्यशक्तिर्नानाकारस्तस्मिन्मयिमनसोयोगोधारणातस्यबलं प्रभावःसएवाश्रयःकारणं२२ यत्रप्रविविक्षति तत्रात्मानंचिंतयेत् । ततः । पिंडंस्वदेहंहित्वाप्राणः प्राणप्रधानलिंगशरीरोपाधिः वायुभूतः बाह्यवायौभूतः प्रविष्टः तेनमार्गेणेत्यर्थः । षडंघ्रिवत् भृंगोयथापुष्पां तरमनायासेनप्रविशति तद्वत् २३पिंडांहित्वेत्युक्तंतत्प्रकारं कथयन्स्वच्छंदमृत्युमाह । पाष्ण्यापार्ष्णिनागुदंनिरुद्ध्य प्राणंप्राणोपाधिमात्मानंब्रह्मरंध्रेणमूर्धद्वारेण । ब्रह्मेत्युपलक्षणंब्रह्मवाअन्यद्वा अपेक्षितं स्थानंमनसानीत्वा २४ मत्स्थंमन्मूर्तिरूपंशुद्धसत्त्वंचिंतयेत् । तदासत्त्ववृत्तयः सत्त्वांशभूताः २५ यदाप्यकालेपि । यथावेतिपाठेयथावायेनकेनापिप्रकारेणबुद्ध्यासंकल्पयेत्तत्तथायथावत्प्राप्नोतीत्य र्थः । यद्वा यथासंकल्पयेत् यथावामत्परः मयिविश्वासवान्भवतितथातदनुरूपंप्राप्नोतीत्यर्थः । किंकुर्वन्सत्येसत्यसंकल्पेमयिमनोयुंजन् २६ मदितिपृथक्पदंममेत्यर्थः ईशितुः सर्वनियंतुः वशितुःस्व तंत्रस्यममभावं प्राप्तः २७ एतागुणहेतवः(-उक्ताः) अतःपरं क्षुद्राः धारणाविदइतित्रिकालज्ञेश्वरधारणासूचिता । त्रैकालिकीत्रिकालवस्तुविषयास्वजन्ममृत्युभ्यांउपबृंहितातत्सहिता (स्वजन्ममरणे चवेत्तीत्यर्थः) अनयैवपरचित्ताद्यभिज्ञतापिव्याख्याता २८ (गुणवृत्तिषुद्वंद्वरूपासुउदासीनेअसंगे) २९ (मांआत्मतयायोधारयेत्सचित्तंपश्यति) ३०

श्लोकाः २१/३०

मनोमयिसुसंयोज्यदेहंतदनुवायुना ॥ मद्धारणानुभावेनतत्रात्मायत्रवैमनः २१ यदामनउपादाययद्यद्रूपंबुभूषति ॥ तत्तद्भवेन्मनोरूपंमद्योगबलमाश्रयः २२ परकायंविशेत्सिद्धआत्मानंतत्रभावयेत् ॥ पिंडंहित्वाविशेत्प्राणोवायुभूतःषडंघ्रिवत् २३ पाष्ण्यापीड्यगुदंप्राणंहृदुरःकंठमूर्धसु ॥ आरोप्यब्रह्मरंध्रेणब्रह्मनीत्वोत्सृजेत्तनुम् २४ विहरिष्यन्सुराक्रीडेमत्स्थंसत्त्वंविभावयेत् ॥ विमानेनोपतिष्ठंतिसत्त्ववृत्तीःसुरस्त्रियः २५ यथासंकल्पयेद्बुद्ध्यायदावामत्परः पुमान् ॥ मयिसत्येमनोयुंजंस्तथातत्समुपाश्नुते २६ योवैमद्भावमापन्नईशितुर्वशितुःपुमान् ॥ कुतश्चिन्नविहन्येततस्यचाज्ञायथामम २७ मद्भक्त्यास त्वशुद्धस्ययोगिनोधारणाविदः ॥ तस्यत्रैकालिकीबुद्धिर्जन्ममृत्यूपबृंहिता २८ "[१]उदासीनेमयिपरेप्रकृतेर्गुणवृत्तिषु ॥ चिंतयेद्धारयेच्चेतोद्वंद्वैर्नैवाभिभूयते २९ सर्वभूतहृदिस्थंमामात्मानंसर्वसाक्षिणम् ॥ धारयेदात्मनश्चित्तंपरेषांपरिपश्यति" ३०

चूर्णिका

किंच मनोदेहं च तदनुवर्तिना वायुना सह मयि संयोज्य या मद्धारणा क्रियते तस्याः प्रभावेण यत्र मनो याति तत्र देहो याति २१ यः योगी मनः उपादानकारणं कृत्वा यत् यत् देवादिरूपं भवितुमिच्छति तत्तन्मनसोभीष्टरूपं सः भवेत् २२ किंच यत्र परकाये प्रविविक्षति तत्र परमात्मानं चिंतयेत् ततः स्वदेहं हित्वा वायुभूतः सन् भृंगवत् प्रविशेत् २३ अथ स्वच्छंदमृत्युमाह पार्ष्णिना गुदं निरुद्ध्य प्राणोपाधिमात्मानं हृदुरःकंठमूर्धसु आरोप्य मूर्धद्वारेण ब्रह्म इष्टस्थानं वा मनसा नीत्वा तनुं उत्सृजेत् २४ ततः सुराक्रीडे क्रीडन् शुद्धं सत्त्वं चिंतयेत् तदा सुरस्त्रियः विमानेन उपतिष्ठंति २५ किंच मत्परः पुमान् सत्यसंकल्पेमयि मनो युंजन् यदा यथा वा बुद्ध्या संकल्पयेत् तत्तथा प्राप्नोति २६ यः पुमान् मम स्वभावं प्राप्तः तस्य आज्ञा च कुतश्चिन्न विहन्यते यथा मम २७ किंच मद्भक्त्या शुद्धसत्त्वस्य योगिनः त्रिकालवस्तुविषया स्वजन्ममृत्युयुता बुद्धिर्जायते २८ २९ ३० ॥७९॥

१ नहीदं उदासीनइत्यादि श्लोकद्वयं मुम्बापु० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अग्न्यादिसर्वोपघातशून्योभगवानित्येवंभूतयोगमयंमुनेर्वपुः तैर्नाभिभूयते अत्रहेतुः । मद्योगेति । मद्योगेन यादसामुदकंयथाभिघातकंनभवति तथातस्यवपुषोऽग्न्यादयइत्यर्थः अनयैवाद्वंद्वतापिव्याख्याता ३१ मद्विभूतीर्ममावतारान्ध्वजादिभिःसह ३२ उपसंहरति । उपासकस्येति । एवंपृथग्धारणाभिः ३३ यद्वा किंनानाधारणाप्रयासेनएकदैवसर्वाः सिद्धयोभवंतीत्याह । जितेंद्रियस्येति । मद्धारणांनारायणेतुरीयाख्येइत्यत्रोक्तांयासुदुर्लभास्यात् सा का नकाचिदित्यर्थः ३४ यद्यप्येवंतथापिनप्राथ्यीइत्याह । अंतरायानिति (एताः सिद्धीरंतरायान् विघ्नान् । यतस्ताः कालक्षपणहेतवः) ३५ तस्मादहैतुकीयमेवधारणाकार्यानान्याः काम्याइत्याह । जन्मेति । जन्मनैव (देवादीनां) काश्चित्सिद्धयोभवंतियथायादसांजलचरत्वंपक्ष्यादीनांखेचरत्वादि । तदुक्तंपातंजले । "जन्मौषधितपोमंत्रयोगजाः सिद्धय" इति । योगेनमद्धारणामित्युक्तेनयोगगतिंमत्सालोक्यादिरूपाम् ३६ कुतइत्यतआह । सर्वासामित्यर्धेन । प्रभुत्वोपपादनंहेतुः कारणं पतिः पालयिता । किंच । नकेवलं सिद्धीनामेवप्रभुः अपितुमोक्षादीनामपीत्याह । अहमिति । योगोमोक्षः सांख्यंतत्साधनंज्ञानंतत्साधनंधर्मस्तस्यतदुपदेष्टॄणांब्रह्मादीनांच ३७ कुतस्तत्राह । अहमिति । सर्वदेहिनांजीवानामात्मायतः अंतर्यामी । "एषतआत्माअंतर्याम्यमृत" इति श्रुतेः । तर्हिकिमंतर्वर्तित्वात्परिच्छिन्नः न । बाह्यश्चव्यापकइत्यर्थः । तत्रहेतुः अनावृतः एतत्सदृष्टांतमाह । भूतेषुचतुर्विधेषुभौतिकेषुमहाभूतानियथाबहिश्चांतश्चभवंतिअयमपितथेत्यर्थः ३८ ॥ ॥ इतिश्रीभागवतमहापुराणेएकादशस्कंधेटीकायांसिद्धिकथनंनामपंचदशोऽध्यायः १५ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥

॥८०॥

श्लोकाः ३१/३८

अग्न्यादिभिर्नहन्येतमुनेर्योगमयंवपुः ॥ मद्योगश्रांतचित्तस्ययादसामुदकंयथा ३१ मद्विभूतीरभिध्यायंच्छ्रीवत्सास्त्रविभूषिताः ॥ ध्वजातपत्रव्यजनैः सभवेदपराजितः ३२ उपासकस्यमामेवंयोगधारणयामुनेः ॥ सिद्धयःपूर्वकथिताउपतिष्ठंत्यशेषतः ३३ जितेंद्रियस्यदांतस्यजितश्वासात्मनोमुनेः ॥ मद्धारणांधारयतःकासासिद्धिःसुदुर्लभा ३४ अंतरायान्वदंत्येतायुंजतोयोगमुत्तमम् ॥ मयासंपद्यमानस्यकालक्षपणहेतवः ३५ जन्मौषधितपोमंत्रैर्यावतीरिहासिद्धयः ॥ योगेनाप्नोतिताःसर्वानान्यैर्योगगतिंव्रजेत् ३६ सर्वासामपिसिद्धीनांहेतुःपतिरहंप्रभुः ॥ अहंयोगस्यसांख्यस्यधर्मस्यब्रह्मवादिनाम् ३७ अहमात्मांऽतरोबाह्योऽनावृतःसर्वदेहिनाम् ॥ यथाभूतानिभूतेषुबहिरंतःस्वयंतथा ३८ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेसिद्धिकथनंनामपंचदशोऽध्यायः १५ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ७ ॥

चूर्णिका

किंच मद्योगश्रांतचितस्य मुनेः योगमयं वपुःअग्न्यादिभिर्न हन्येत यथा यादसां उदकं घातकं न भवति तद्वत् ३१ अपिच श्रीवत्सादिभूषितान् ममावतारान् ध्यायन् सः अपराजितो भवेत् ३२ एवं योगधारणया मां उपासकस्य मुनेः पूर्वोक्ताः सर्वसिद्धयः उपतिष्ठंति ३३ जितेंद्रियस्य जितश्वासस्य मुनेः कासिद्धिर्दुर्लभास्ति कापि न ३४ यद्यपि एवं तथापि न प्राथ्यी इत्याह योगं युंजतः पुंसः एताः अंतरायान् वदंति तस्मात् अहैतुकी इयमेवधारणा कार्या नान्याः काम्या इत्याह ३५ जन्मौषधितपोमंत्रैः यावतीः सिद्धयः ताः योगेन प्राप्नोति परं योगगतिं अन्यैर्न व्रजेत् ३६ कुत इत्यत आह सर्वासां सिद्धीनां हेतुः पतिश्च किंच अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां च प्रभुः ३७ अहमा त्मांतरो बाह्योनावृतः सर्वदेहिनाम् यथा भूतानि भूतेषु बहिरंतः स्वयं तथा ३८ ॥ इत्येकादशे पंचदशोध्यायः १५ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

षोडशेतुहरेराविर्भावयुक्ताविभूतयः ॥ ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः ॥ १ ॥ अंतश्चित्तेनयद्ध्यानमशक्यमकृतात्मनाम् । अतस्तद्योग्यतापत्त्यैविभूत्यादिनिरूपणम् १ एवंतावन्नवाध्याययाम
ष्टप्रश्नानिरूपिताः । ब्रह्मत्वसंभवेतावत्सप्तमादिचतुष्टये २ बंधमुक्त्योस्तुनिर्धारेसद्भक्तयोश्चततःपरम् । द्वादशेनंतरंकर्मकृतित्यागव्यवस्थितौ ३ हंसेतिहासतोयोगनिष्ठायांचत्रयोदशे । श्रेयःसाधननिर्धा
रेध्यानेचैवचतुर्दशे । धारणासिद्धिभेदेचप्रसंगेनानिरंतरे ४ उद्धवप्रश्नतोदत्तमुत्तरंहरिणोचितम् ५ षोडशेभूतिविस्तारेद्वयोर्वर्णाश्रमव्रते । ज्ञानादिनिर्णयेत्रातोयमादीनांचानिर्णये ६ योगत्रयाधिकारेतु
विंशेचतदनंतरे । तत्त्वसंख्याविवादेचपुंप्रकृत्योर्विवेचने ७ जन्ममृत्युप्रकारेचद्वाविंशेदत्तमुत्तरम् । परापराधसहनेचतुर्भिस्तदनंतरैः ८, सप्तविंशेक्रियायोगप्रश्नेतदुपवर्णितम् । अष्टाविंशेततःप्रोक्ताज्ञा
नयोगोपसंहृतिः ९ संसारासंभवप्रश्नेतन्मध्येदत्तमुत्तरम् । तदशक्त्यापुनःप्रश्नेभक्तियोगोपसंहृतिः १० एवंप्रश्नोत्तराण्यत्रक्रमेणैतानिविंशतिः ११ “ अहमात्मांतरोबाह्योऽनावृतःसर्वदेहिनाम् यथाभूता
निभूतेषुबहिरंतःस्वयंतथे”त्युक्तम् । तत्रभूतानियथाक्वचित्केनचिद्गुणविशेषेणोद्रिक्तानिवर्तंते । क्वचित्सामान्यरूपेणैवतथात्वमपिकथंवर्तसइति विभूतीःप्रष्टुंप्रथमंतावदुक्तमेवसर्वात्मकत्वमनुवदति । त्वं
ब्रह्मेति । अपावृतंनिरावरणम् । स्वतंत्रंवा । अतएवसर्वेषामपित्राणंरक्षणंस्थितिर्जीवनम् । त्राणस्थितिसाहितौअप्ययोद्भवौयस्मात्सत्वंउपादानकारणमित्यर्थः १ अत्रसदाचारंप्रमाणमाह । याथातथ्ये
नयथार्थत्वेनसर्वभूतकारणंत्वांब्राह्मणावेदतात्पर्यार्थविदः २ एवंकारणत्वेनसर्वात्मत्वमनूद्यविभूतीःपृच्छति । येष्विति । उपासीनाःसेवमानाः संतः ३ दुर्ज्ञेयमाह गूढः । अस्फुटः भूतानांप्राणिनांमध्ये
(चरासि) अत्रहेतुः भूतानामात्माअंतर्यामी । अत्रापिहेतुः हेभूतभावनेति । तेत्वया ४ ताएवसाकल्येनपृच्छति । हेमहाविभूते याःकाश्चिद्भूम्यादिषुतोविभूतयः रसायांरसातलेअनुभाविताास्त्वयैवके
चिच्छक्तिविशेषेणयोजिताः । तीर्थानांपदंचस्थानंतदंघ्रिपद्मंच (हेतीर्थपदेतिसंबोधनंवा) ५ नरावतारभूतार्जुनप्रश्नसंवादित्वात्तवायंप्रश्नः साधीयानितितावदनुमोदते । एवमितित्रिभिः । प्रश्नंप्रष्टव्यं सप
त्नैर्योद्धुमिच्छता विनशनेकुरुक्षेत्रे ६ युयुत्सोर्विभूतिप्रश्नेकःप्रसंगस्तत्राह । ज्ञात्वेति अहंहंताअयंहतइतिलौकिकःप्राकृतमतिःसन् (ततोज्ञातिवधान्निवृत्तः) ७ सचयदाततोनिवृत्तस्तदामयाप्रतिबोधितः
सन् यथात्वमभिभाषसे एवंसंग्राममुखेमा मभ्यभाषत । तद्वदेव तवापिकथयिष्यामीतिभावः ८

॥८१॥

श्लोकाः $\frac{1}{8}$

॥ उद्धवउवाच ॥ त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतम् ॥ सर्वेषामपिभावानांत्राणस्थित्यप्ययोद्भवः १ उच्चावचेषुभूतेषुदुर्ज्ञेयमकृतात्मभिः ॥ उपासते
त्वांभगवन्याथातथ्येनब्राह्मणाः २ येषुयेषुचभावेषुभक्त्यात्वांपरमर्षयः॥ उपासीनाःप्रपद्यंतेसंसिद्धिंतद्वदस्वमे ३ गूढश्चरसिभूतात्माभूतानांभूतभावन॥
नत्वांपश्यंतिभूतानिपश्यंतंमोहितानिते ४ याःकाश्चभूमौदिविवैरसायांविभूतयोदिक्षुमहाविभूते॥ तामह्यमाख्याह्यनुभावितास्तेनमामितेतीर्थपदांघ्रिपद्मम्
५ ॥ श्रीभगवानुवाच ॥ एवमेतदहंपृष्टःप्रश्नंप्रश्नविदांवर ॥ युयुत्सुनाविनशनेसपत्नैरर्जुनेनवै ६ ज्ञात्वाज्ञातिवधंगर्ह्यमधर्मंराज्यहेतुकम् ॥ ततोनिवृत्तो
हंताहंहतोयमितिलौकिकः ७ सतदापुरुषव्याघ्रोयुक्त्यामेप्रतिबोधितः ॥ अभ्यभाषतमामेवंयथात्वंरणमूर्धनि ८

चूर्णिका

॥ उद्धव उवाच ॥ हे कृष्ण त्वं परमं साक्षात् सर्वभावानां उपादानकारणम् १ एवंभूतं त्वां ज्ञानिनः उपासते २ येषु येषु भावेषु त्वां परमर्षयः सेवमानाः संतः संसि
द्धिं प्रपद्यंते तद्वदस्व ३ किंच त्वं भूतानां मध्ये गूढः चरसि तथापि पश्यंतं त्वां मोहितानि भूतानि न पश्यंति ४ अथ हेमहाविभूते भूमौ दिवि पाताले याः काश्चि
त्ते विभूतयः संति ताः मे कथय ते अंघ्रिपद्मंनमामि ५ ॥ श्रीभगवानुवाच ॥ हे उद्धव एवं अर्जुनेन कुरुक्षेत्रे अहं पुरा पृष्टः अर्जुनस्य विभूतिप्रश्ने कः प्रसंगस्तत्रा
ह ६ राज्यहेतुकं ज्ञातिवधं गर्ह्यं ज्ञात्वा ततो निवृत्तः हंताहं हतोयमिति ७ तदा अर्जुनः युक्त्या मया बोधितः सन् रणमुखे मां एवं अभाषत ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

ताःविभूतीःकथयति । अहमिति । अस्मच्छब्दसमानाधिकरणाः प्रथमांताद्वितीयांताश्चसर्वाविभूतयः । ताश्चोपासनार्थंकथ्यंते । षष्ठीतुक्वचिन्निर्धारणेसंबंधेक्वचिद्यथायोग्यंद्रष्टव्या । ततश्चामीषांभूताना मात्मेति सुहृदिति ईश्वरइति च सामान्येनाहमुपास्यइत्यर्थः । एवंसर्वत्रतेषांस्थित्युद्भवाप्ययः तद्धेतुरित्यर्थः ९ विशेषतोविभूतीराह । कलयतांवशीकुर्वतांमध्ये(कालः) गुणानांमध्येसाम्यंसमता । गुणानांसत्त्वादीनांसाम्यमव्याकृतंवा गुणिनिधर्मिणिऔत्पत्तिकःस्वाभाविकोयोगुणःसोहं १० सूत्रंप्रथमकार्यम् । महान् महत्तत्वम् । सूक्ष्मोपाधित्वात् दुर्ज्ञेयत्वाच्चजीवस्यसूक्ष्मत्वम् । ''बुद्धेर्गुणेनात्मगुणेनचैवमाराग्रमात्रोह्यवरोपिदृष्ट''इति श्रुतेः ११ वेदानांसंबंधीतेषामध्यापकः । (त्रिवृन्मात्रात्रयात्मकः) । पदानित्रिपदागायत्रीत्यर्थः १२ (विष्णुरुपेंद्रः) १३ हविर्धानीकामदुघाधेनुः १४ १५ नक्षत्रौषधीनांप्रभुंसोमम् यक्षरक्षसांप्रभुम् १६ यादसांप्रभुम् । तपतांतापवतांद्युमतांदीप्तिमतांचमध्ये १७ संयमतांदंडयतामित्यर्थः १८ शृंगिणांद्रंष्ट्रिणांचमध्ये (मृगेंद्रःसिंहः) तेषांप्रभुर्वा (आश्रमाणांमध्ये) तुर्यःसंन्यासः । प्रथमोब्राह्मणः १९ स्रोतसांप्रवाहाणांच । सरसांस्थिरोदकाशयानाम् २०

श्लोकाः ९/२०

अहमात्मोद्धवामीषांभूतानांसुहृदीश्वरः ॥ अहंसर्वाणिभूतानितेषांस्थित्युद्भवाप्ययः ९ अहंगतिर्गतिमतांकालःकालयतामहम् ॥ गुणानांचाप्यहंसाम्यं गुणिन्यौत्पत्तिकोगुणः १० गुणिनामप्यहंसूत्रंमहतांचमहानहम् ॥ सूक्ष्माणामप्यहंजीवोदुर्जयानामहंमनः ११ हिरण्यगर्भोवेदानांमंत्राणांप्रणवस्त्रिवृत् ॥ अक्षराणामकारोस्मिपदानिच्छंदसामहम् १२ इंद्रोऽहंसर्वदेवानांवसूनामस्मिहव्यवाट् ॥ आदित्यानामहंविष्णूरुद्राणांनीललोहितः १३ ब्रह्मर्षीणांभृगुरहंराजर्षीणामहंमनुः ॥ देवर्षीणांनारदोहंहविर्धान्यस्मिधेनुषु १४ सिद्धेश्वराणांकपिलःसुपर्णोहंपतत्रिणाम् ॥ प्रजापतीनांदक्षोहंपितॄणामहमर्यमा १५ मांविद्धयुद्धवदैत्यानांप्रह्रादमसुरेश्वरम् ॥ सोमंनक्षत्रौषधीनांधनेशंयक्षरक्षसाम् १६ ऐरावतंगजेंद्राणांयादसांवरुणंप्रभुम् ॥ तपतांद्युमतांसूर्यं मनुष्याणांचभूपतिम् १७ उच्चैःश्रवास्तुरंगाणांधातूनामस्मिकांचनम् ॥ यमःसंयमतांचाहंसर्पाणामस्मिवासुकिः १८ नागेंद्राणामनंतोहंमृगेंद्रःशृंगिदंष्ट्रिणाम् ॥ आश्रमाणामहंतुर्योवर्णानांप्रथमोऽनघ १९ तीर्थानांस्रोतसांगंगासमुद्रःसरसामहम् ॥ आयुधानांधनुरहंत्रिपुरघ्नोधनुष्मताम् २०

चूर्णिका

विभूतीः कथयति हेउद्धव एषां भूतानां आत्मा ईश्वरः अहं इति विद्धि तथा सर्वभूतानि अहं तेषां स्थित्यादिहेतुः अहम् ९ गतिमतां गतिः अहम् वशीकुर्वतां कालः अहं १० गुणिनां सूत्रं अहं महतां महत्तत्वमहम् सूक्ष्माणां जीवः अहम् दुर्जयानां मनः अहम् ११ वेदानां अध्यापकः हिरण्यगर्भः अहम् मंत्राणां त्रिवृत् प्रणवः अहम् अक्षराणां अकारः अहं छंदसां गायत्री अहं १२ देवानां इंद्रः अहं वसूनां हव्यवाट् अहं आदित्यानां विष्णुः अहं रुद्राणां नीललोहितः अहं १३ ब्रह्मर्षीणांभृगुः अहं राजर्षीणां मनुः अहं देवर्षीणां नारदःअहं धेनुषु कामधेनुः अहं १४ सिद्धेश्वराणां कपिलः अहं पक्षिणां गरुडः अहं प्रजापतीनां दक्षः अहं पितॄणां अर्यमा अहं १५ दैत्यानांप्रह्लादः अहं नक्षत्रौषधीनां सोमः अहं यक्षरक्षसां कुबेरः अहं १६ गजानां ऐरावतः अहं यादसां वरुणं मां विद्धि द्युमतां सूर्यःअहं १७ नृणां नृपः अहं अश्वानां उच्चैःश्रवसं विद्धि धातूनांकांचनं अहं दंडयतांयमः अहं सर्पाणांवासुकिः अहं १८ नागेंद्राणां शेषः अहं शृंगिदंष्ट्रिणां सिंहः अहं आश्रमाणां सन्यासः अहं वर्णानांविप्रः अहं १९ तीर्थानां गंगा अहं सरसां समुद्रः अहं आयुधानां धनुः अहं धनुष्मतां त्रिपुरारिः अहं २०

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

धिष्ण्यानांनिवासस्थानानाम् । गहनानांदुर्गमाणाम् २१ ब्रह्मिष्ठानांवेदार्थनिष्ठाथाम् । सेनान्यानांसेनाप्रवर्तकानाम् । अग्रण्यांजन्माग्रप्रवर्तकानांअजोब्रह्मा २२ शुचीनांशोधकानामपिमार्जनतक्षणघर्षणादीनांमध्येवाय्वादिरूपःशोधकोहं २३ योगानांयोगांगानांमध्येआत्मसंरोधः समाधिरहम् । मंत्रोनीतिः । कौशलानांविवेकादिनैपुण्यानांमध्ये आन्वीक्षिकीआत्मानात्मविवेकविद्या । आख्यात्यन्यथाख्यातिशून्यख्यात्यसत्ख्यात्यनिर्वचनीयख्यातिवादिनांएवमिदंएवंवेतियोदुरंतोविकल्पः सोहम् २४ (शतरूपास्वायंभुवस्यमनोःपत्नी । नारायणोनरसखः) कुमारः सनत्कुमारः २५ संन्यासोभूताभयदानम् । क्षेमाणामभयस्थानानांमध्येअबहिर्मतिरंतर्निष्ठा । सूनृतप्रियवचनंमौनंच नहिप्रियभाषणेमौनेचपुरुषस्याभिप्रायोज्ञायते । अजःप्रजापतिः । यस्यदेहार्धाभ्यांमिथुनमभूत् सएवमुख्यंमिथुनम् । "अर्धोह्वाएषआत्मनोयत्पत्नी"तिश्रुतेः २६ अनिमिषांअप्रमत्तानां मधुमाधवौचैत्रवैशाखौ वसंतइत्यर्थः । अभिजित् उत्तराषाढाचतुर्थपादः श्रवणस्यपंचदशांशश्च । तथाचश्रुतिः । "अभिजिन्नामनक्षत्रंउपरिष्टादुत्तराषाढानांअधस्ताच्छ्रोणाया"इत्यादिः २७ कृतंकृतयुगम् । देवलःअसितश्च । व्यासानांवेदविभागकर्तॄणां । कवीनांविदुषांकाव्यः शुक्रः आत्मवान् ज्ञानी २८ भगवतां "उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिम् । वेत्तिविद्यामविद्यांचसवाच्योभगवानिति"त्येवंलक्षणानां (वासुदेवोहम् । भागवतेषुत्वमुद्धवोहं) २९

श्लोकाः २१—२९

धिष्ण्यानामस्म्यहंमेरुर्गहनानांहिमालयः ॥ वनस्पतीनामश्वत्थओषधीनामहंयवः २१ पुरोधसांवसिष्ठोहंब्रह्मिष्ठानांबृहस्पतिः ॥ स्कंदोहंसर्वसेनान्यामग्रण्यांभगवानजः २२ यज्ञानांब्रह्मयज्ञोहंव्रतानामविहिंसनम् ॥ वाय्वग्न्यर्कांबुनामात्माशुचीनामप्यहंशुचिः २३ योगानामात्मसंरोधोमंत्रोस्मि विजिगीषताम् ॥ आन्वीक्षिकीकौशलानांविकल्पःख्यातिवादिनाम् २४ स्त्रीणांतुशतरूपाहंपुंसांस्वायंभुवोमनुः ॥ नारायणोमुनीनांचकुमारोब्रह्मचारिणाम् २५ धर्माणामस्मिसंन्यासःक्षेमाणामबहिर्मतिः ॥ गुह्यानांसूनृतंमौनंमिथुनानामजस्त्वहम् २६ संवत्सरोस्म्यनिमिषामृतूनांमधुमाधवौ ॥ मासानांमार्गशीर्षोऽहंनक्षत्राणांतथाभिजित् २७ अहंयुगानांचकृतंधीराणांदेवलोऽसितः ॥ द्वैपायनोस्मिव्यासानांकवीनांकाव्यआत्मवान् २८ वासुदेवोभगवतांत्वंतुभागवतेष्वहम् ॥ किंपुरुषाणांहनुमान्विद्याध्राणांसुदर्शनः २९

चूर्णिका

निवासस्थानानांमेरुः अहं दुर्गमानांहिमालयः अहं वृक्षाणांअश्वत्थः अहं धान्यानांयवः अहं २१ पुरोधसां वसिष्ठःअहं २२ ब्रह्मिष्ठानांबृहस्पतिः अहं चमूपतीनां स्कंदः अहं सन्मार्गप्रवर्तकानां ब्रह्मा अहं यज्ञानां ब्रह्मयज्ञः अहं व्रतानां अविहिंसा अहं शुचीनांमार्जनं अहं तक्षणादीनां मध्ये वाय्वादिरूपः शोधकः अहं २३ योगानांसमाधिः अहं विजिगीषतांनीतिः अहं विवेकादिनिपुणानां आन्विक्षिकी अहं ख्यातिवादिनां विकल्पः अहं २४ स्त्रीणां शतरूपा अहं पुंसां स्वायंभुवो मनुः अहं मुनीनां नारायणः अहं ब्रह्मचारिणां कुमारः अहं २५ धर्माणां सन्यासः अहं निर्भयस्थानानां अंतर्निष्ठा अहं गुह्यानांप्रियवचनं मौनंच अहं मिथुनानांप्रजापतिः अहं २६ अनिमिषां वत्सरः अहं ऋतूनां वसंतः अहं मासानां मार्गशीर्षः अहं ऋक्षाणां अभिजित् अहं २७ युगानांकृतं अहं धीराणां देवलः असितश्च अहं व्यासानां द्वैपायनः अहं कवीनां भृगुः अहं २८ भगवतां वासुदेवः अहं भक्तेषु त्वं अहं किंपुरुषाणां हनुमान् अहं विद्याधराणां सुदर्शनः अहं २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(पद्मरागोलोहितमणिः) सुपेशसांसुंदराणां । दर्भजातीनांकाशदूर्वादीनां । हविष्षु चरुपुरोडाशादिषु घृतेषु वा ३० लक्ष्मीः धनादिसंपत् (छलग्रहोद्यूतम्) ३१ बलवतांओजः सहश्च । सात्त्वतांभागवतानांभक्त्याकृतंकर्माहमित्यर्थः । तेषामेव नवव्यूहार्चनेवासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्रीववराहनृसिंहब्रह्माणइति यानवमूर्तयस्तासांमध्येवासुदेवाख्याहम् ३२ गंधर्वाणांविश्वावसुः अप्सरसांपूर्वचित्तिः । गंधमात्रंअविकृतम् ३३ परमोमधुरः (तेजिष्ठानांतिजीयसांविभावसुः सूर्योऽग्निर्वा) परःपराख्यःशब्दः ३४ अर्जुनः पार्थः । भूतानांप्राणिनांप्रतिसंक्रमःप्रलयः ३५ गत्यादयःपंचकर्मेंद्रियव्यापाराः स्पर्शादयोज्ञानेंद्रियव्यापाराः तत्रलक्षणंदर्शनं । सर्वेंद्रियाणांइंद्रियंतत्तदर्थग्रहणशक्तिरप्यहम् ३६ तदेवंतत्रतत्रनिर्धारणेनतत्तत्संबंधेनचविशेषतोविभूतीर्निरूप्येदानींसामान्यतः सर्वाअपिनिरूपयति पृथिवीतिसार्धद्वयेन । पृथिव्यादिशब्दैस्तत्तन्मात्राणिविवक्षितानि । अहंअहंकारः । महान्महत्तत्त्वं । एताः सप्तप्रकृतिविकृतयः । विकारः पंचभूतानि एकादशेंद्रियाणि चेत्येवंषोडशसंख्याकः । पुरुषोजीवःअव्यक्तंमूलप्रकृतिः । एवंपंचविंशतितत्त्वानि । तदुक्तं । "मूलप्रकृतिरविकृतिर्महदाद्याःप्रकृतिविकृतयःसप्त । षोडशकश्चविकारोनप्रकृतिर्नविकृतिःपुरुष"इति । किंच रजःसत्त्वंतमइति प्रकृतेर्गुणाश्चपरंब्रह्मचतत्सर्वमहमेव ३७ । एतत्संख्यानं एतेषांपरिगणनं एतेषांलक्षणतोज्ञानं च तत्फलंतत्त्वनिश्चयश्चाहमेव । एतदेवसंक्षिप्याह । मयेति जीवेश्वररूपो द्विविधोयोभावः यश्चगुणगुणिरूपः यश्चक्षेत्रज्ञक्षेत्ररूपः ससर्वोपिअहंतेनमयाविनामद्व्यतिरेकेणनास्ति (क्वचिदपिभावोनविद्यते) अहमेवसर्वमित्यर्थः ३८ ननुसामान्यतः किमेवंसंक्षिप्य कथयसि । पूर्ववन्निर्धारणसंबंधाभ्यांविशेषतः कथयेतिचेत् । तत्राह । संख्यानं पृथिव्यादिपरमाणूनां कालेनमहतातदपिमयैवक्रियतेकृत्वाचवक्तुंशक्यते । तथामेविभूतीनांसंख्याननकर्तुंशक्यते । कुतइत्यतआह । सृजतोंऽडानीति । यदामयासृज्यमानानां ब्रह्मांडानामेवतावत्संख्यानास्तितदातद्गतानां विभूतीनांकुतःसंख्येत्यर्थः ३९

श्लोकाः ३०-३९

रत्नानांपद्मरागोस्मिपद्मकोशःसुपेशसाम् ॥ कुशोस्मिदर्भजातीनांगव्यमाज्यंहविष्ष्वहम् ३० व्यवसायिनामहंलक्ष्मीःकितवानांछलग्रहः ॥ तितिक्षास्मि तितिक्षूणांसत्त्वंसत्त्ववतामहम् ३१ ओजःसहोबलवतांकर्माहंविद्धिसात्त्वताम् ॥ सात्त्वतांनवमूर्तीनामादिमूर्तिरहंपरा ३२ विश्वावसुःपूर्वचित्तिर्गंधर्वाप्सरसामहम् ॥ भूधराणामहंस्थैर्यंगंधमात्रमहंभुवः ३३ अपांरसश्चपरमस्तेजिष्ठानांविभावसुः ॥ प्रभासूर्येंदुताराणांशब्दोहंनभसःपरः ३४ ब्रह्मण्यानांबलिरहंवीराणामहमर्जुनः ॥ भूतानांस्थितिरुत्पत्तिरहंवैप्रतिसंक्रमः ३५गत्युक्त्युत्सर्गोपादानमानंदस्पर्शलक्षणम् ॥ आस्वादश्रुत्यवघ्राणमहंसर्वेंद्रियेंद्रियम् ३६ पृथिवीवायुराकाशमापोज्योतिरहंमहान् ॥ विकारःपुरुषोऽव्यक्तंरजःसत्त्वंतमःपरम् ३७ अहमेतत्प्रसंख्यानंज्ञानंतत्त्वविनिश्चयः ॥ मयेश्वरेण जीवेनगुणेनगुणिनाविना । सर्वात्मनापिसर्वेणनभावोविद्यतेक्वचित् ३८संख्यानंपरमाणूनांकालेनक्रियतेमया ॥ नतथामेविभूतीनांसृजतोंऽडानिकोटिशः ३९

चूर्णिका

रत्नानां पद्मरागः अहं सुंदराणां पद्मकोशः अहं दर्भाणां कुशः अहं हविष्षुगोघृतम् अहं ३० व्यवसायिनां संपत् अहं कितवानां छलग्रहः अहं तितिक्षूणां तितिक्षा अहं ३१ सत्त्ववतां सत्त्वं अहं बलवतां ओजः अहं सहश्च अहं सात्त्ववतांभक्तिकृतं कर्म अहं नवव्यूहमूर्तीनां वासुदेवः अहं ३२ गंधर्वाणां विश्वावसुः अहं अप्सरसां पूर्वचित्तिः अहं भूधराणांस्थैर्यं अहं भुवःगंधः अहं ३३ अपारसःअहंतेजिष्ठानांवह्निः अहं सूर्येंदुताराणांप्रभा अहं नभसःशब्दः अहं ३४ब्रह्मण्यानांबलिः अहं वीराणांअर्जुनः अहं भूतानांस्थित्यादि अहं ३५ सर्वेंद्रियाणां तत्तदर्थग्रहणशक्तिः अहं पंचविंशतितत्त्वानि त्रयो गुणाः अहं ३६ ३७ ब्रह्म च एतत् सर्वं अहमेव मद्विना किंचिदपि न ३८ हे उद्धव परमाणूनां संख्यानं मया कालेन क्रियते परंतु मेविभूतीनां संख्यानं न ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तथापिविशेषतएवसर्वाअपिसंक्षेपतः कथयामीत्याह तेजःप्रभावः । श्रीःसंपत् । सौभगं मनोनयनाह्लादकत्वं भगं भाग्यं वीर्यं बलं अंशको विभूतिः ४० उपसंहरति एताइति । एतेचविभूतिभेदामयिचित्ता
वतारायकथिताः अतोनात्रातीवाभिनिवेशःकर्तव्यइत्याह । मनोविकाराएव नतुपरमार्थाः । यथाकिंचित्खपुष्पादिवाङ्मात्रेणाभिधीयतेतत्तुल्याः ४१ तस्माद्वागादीन्नियच्छ । आत्मानंबुद्धिं । आत्मना
सत्त्वसंपन्नयातयैवनियच्छ । अध्वनेसंसारमार्गाय ४२ असंयमनेदोषमाह । यइति । असयच्छन् नसंयच्छति ४३ परिसमाप्यतेकृतकृत्योभवतीत्यर्थः ४४ ॥ ॥ इतिश्रीभागवते महापुराणे एकादश
स्कंधेटीकायांषोडशोऽध्यायः १६ ॥ ॥ छ ॥ ॥ ततःसप्तदशेपृष्टेस्वधर्मेभक्तिलक्षणे । हंसोक्तंधर्ममन्वाहब्रह्मचारिगृहस्थयोः ॥१॥ कर्माहंविद्धिसात्वतामित्यत्रभक्त्याकृतंकर्ममोक्षस्यसाधनंमद्विभूतिरि
त्युक्तं । भक्तिसाधनत्वंचकर्मणां'मयोदितेष्ववहितःस्वधर्मेष्वि'त्यादिनातत्रतत्रोक्तं ।नचकर्मानुष्ठातृणांनियमेनभक्तिर्दृश्यतेअतः पृच्छति यस्त्वयेतिसप्तभिः पूर्वंकल्पादौत्वद्भक्तिलक्षणः । त्वज्ज्ञापकस्तत्सा
धनमित्यर्थः वर्णाश्रमहीनानामपिद्विपदांनराणां १ यथायेनप्रकारेणानुष्ठीयमानेनस्वधर्मेण २ ननु संप्रदायादेवज्ञास्यतेकिंपुनर्वर्णनेन तत्राह । पुरेति । परमकं परमश्चासौकंसुखरूपश्चतं । यत्यं । हंस
रूपेणधर्मोप्युक्तएव । नतुयोगमात्रं''जानीतमागतंयज्ञंयुष्मद्धर्मविवक्षये''त्युक्तत्वात् ३प्रागनुशासितोपिनभवितानभविष्यति४अत्रहेतुमाह । वक्तेतिद्वाभ्यां ।तेत्वत्तोन्यः । कलावेदाद्याः ५(विनष्टंधर्मं) ६

श्लोकाः ४०/६

तेजःश्रीःकीर्तिरैश्वर्यंह्रीस्त्यागःसौभगंभगः ॥ वीर्यंतितिक्षाविज्ञानंयत्रयत्रसमेंशकः ४० एतास्तेकीर्तिताःसर्वाःसंक्षेपेणविभूतयः ॥ मनोविकाराएवै
तेयथावाचाभिधीयते ४१ वाचंयच्छमनोयच्छप्राणंयच्छेंद्रियाणिच ॥ आत्मानमात्मनायच्छनभूयःकल्पसेऽध्वने ४२ योवैवाङ्मनसीसम्यगसंयच्छ
न्धियायतिः॥तस्यव्रततपोदानंस्रवत्यामघटांबुवत् ४३ तस्माद्वाचोमनःप्राणान्नियच्छेन्मत्परायणः॥ मद्भक्तियुक्तयाबुद्ध्याततःपरिसमाप्यते ४४ ॥ ॥ इ
तिश्रीभागवतेमहापुराणेएकादशस्कंधेषोडशोऽध्यायः १६ ॥ ॥ छ ॥ ॥ उद्धवउवाच ॥ यस्त्वयाऽभिहितःपूर्वंधर्मस्त्वद्भक्तिलक्षणः ॥ व
र्णाश्रमाचारवतांसर्वेषांद्विपदामपि १ यथानुष्ठीयमानेनत्वयिभक्तिर्नृणांभवेत् ॥ स्वधर्मेणारविंदाक्षतन्ममाख्यातुमर्हसि २ पुराकिलमहाबाहोधर्मंपर
मकंप्रभो ॥ यत्तेनहंसरूपेणब्रह्मणेऽभ्यात्थमाधव ३ सइदानींसुमहताकालेनामित्रकर्शन ॥ नप्रायोभवितामर्त्यलोकेप्रागनुशासितः ४ वक्ताकर्ताऽवि
तानान्योधर्मस्याच्युततेभुवि ॥ सभायामपिवैरिंच्यांयत्रमूर्तिधराःकलाः ५ कर्त्रावित्राप्रवक्त्राचभवतामधुसूदन ॥ त्यक्तेमहीतलेदेवविनष्टंकःप्रवक्ष्यति ६

चूर्णिका

किंच यत्र यत्र तेजः श्रीः कीर्तिः ऐश्वर्यं त्यागः सौभगं भाग्यं वीर्यं क्षमा विज्ञानं वर्तते सः सः मे विभूतिः ४० एवं एता विभूतयः ते कथिताः एताः सर्वाः परमार्थाः न किंतु
मनोविकाराः तथापि चित्तावताराय कल्पिताः४१ हे उद्धव तस्मात् वाङ्मनःप्राणादीन् बुद्ध्या बुद्धिं च नियच्छ एवं कृते भूयः संसाराय न कल्पसे४२ यः वाङ्मनसी न
नियच्छति तस्य व्रततपोज्ञानं आमघटांबुवत् स्रवति ४३ तस्मात् मनोवचःप्राणान्नियच्छेत् मत्परायणः मद्भक्तियुक्तया बुद्ध्या ततःपरिसमाप्यते ४४ ॥ इत्येकादशे षोडशो
ध्यायः १६ ॥ ॥ छ ॥ ॥ उद्धव उवाच ॥ हे कृष्ण त्वया कल्पादौ पूर्वंभक्तिसाधनरूपो धर्मः उक्तः १ तेन यथावत् अनुष्ठीयमानेन स्वधर्मेण त्वयि नृणां
भक्तिर्भवेत् तद्वद २ किं च पुरा हंसरूपेण त्वं ब्रह्मणे परं धर्मं आत्थ ३ सः इदानीं महाकालेन नष्टः सः मर्त्यलोके प्रायो न भविष्यति ४ यतः भुवि त्वत्तोऽन्यः ध
र्मस्य वक्ता कर्ता अविता च नास्ति ५ किंच त्वया महीतले त्यक्ते सति विनष्टं धर्मं कः प्रवक्ष्यति ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्तस्मात्नः अस्माकंमनुष्याणांमध्येयथायस्यविधीयेत ७ ८ धर्म्यः धर्मादनपेतः कुतः नैश्रेयसकरःभक्तिजनकः मेमत्तः तंधर्मंनिबोध ९ तत्रादौमदुपासनालक्षणएवमुख्योधर्मआसीत् आचारलक्ष णस्तुपश्चात्प्रवृत्तः सचैवमनुष्ठितोभक्तिहेतुरितिवर्णयितुमाह । आदाविति । कल्पादौयत्कृतयुगंतस्मिन् तेचतदामामुपासतएवकेवलं नान्यत्प्रकुर्वंतीतित्रक्तुंकृतयुगनामनिरुक्तिमाह । कृतकृत्याइति जा त्याजन्मनैव १० किंच । विधायकाभावादपितदानीं नान्यत्कर्मास्तीति आह । वेदइति । धर्मश्चमनोविषयोऽहमेव वृषरूपधृक् चतुष्पात् न क्रियाविषयोयज्ञादिः । अतस्तपोनिष्ठाः"मनसश्चेंद्रिया णांचस्वैकाग्र्यंपरमं तप"इति वचनादेकाग्रतयाहंसंमांशुद्धंध्यायंतीत्यर्थः ११ पश्चात्त्रेतायुगप्रवेशेमेवैराजरूपस्य प्राणान्निमित्तात् हृदयात्सकाशात् (त्रयीऋग्यजुःसामरूपा) तस्यास्त्रय्याः सका शात् हौत्राध्वर्यवौद्गात्रैः त्रिवृद्रूपः "यज्ञोवै विष्णुरि"तिश्रुतेः १२ वर्णानामाश्रमाणांचधर्मान्वक्तुंतेषामुत्पत्तिमाह । विप्रेतिद्वाभ्यां । आत्माचारः स्वधर्मएवलक्षणं ज्ञापकोयेषां १३ममवैराजरूपस्यहृदः वक्ष सोधस्तात् । ब्रह्मचर्यमिति नैष्ठिकाभिप्रायं १४ तेषामधिकारिविशेषेणस्वभावानाह । वर्णानामितिपंचभिः जन्मस्थानानुसारिण्यः । नीचैरित्यव्ययं । अतोयमर्थः नीचैर्मंदाभिर्जन्मभूमिभिर्नीचामंदाः । उत्त माभिरुत्तमाः । नीचैर्नीचाश्चोत्तमोत्तमाश्च स्वभावस्यअन्यथाप्रवीतिस्त्वौपाधिकी । यथाजलस्यवह्न्यातपयोगादौष्ण्यं १५ तपआलोचनं १६ तेजः प्रतापः १७ १८ एतैरेवाश्रमस्वभावाअपिज्ञेयाः १९

श्लोकाः ७/१९

तत्त्वंनःसर्वधर्मज्ञधर्मस्त्वद्भक्तिलक्षणः ॥ यथायस्यविधीयेततथावर्णयमेप्रभो ७ ॥श्रीशुकउवाच ॥ इत्थंस्वभृत्यमुख्येनपृष्टःसभगवान्हरिः ॥ प्रीतःक्षेमाय मर्त्यानांधर्मानाहसनातनान् ८ ॥ श्रीभगवानुवाच ॥ धर्म्यएषतवप्रश्नोनैश्रेयसकरोनृणाम् ॥ वर्णाश्रमाचारवतांतमुद्धवनिबोधमे ९ आदौकृतयुगेव र्णोनृणांहंसइतिस्मृतः ॥ कृतकृत्याःप्रजाजात्यातस्मात्कृतयुगंविदुः १० वेदःप्रणवएवाग्रेधर्मोहंवृषरूपधृक् ॥ उपासतेतपोनिष्ठाहंसंमांमुक्तकिल्बिषाः ११ त्रेतामुखेमहाभागप्राणान्मेहृदयात्त्रयी ॥ विद्याप्रादुरभूत्तस्याअहमासंत्रिवृन्मखः १२ विप्रक्षत्रियविट्शूद्रामुखबाहूरुपादजाः ॥ वैराजात्पुरुषाजा तायआत्माचारलक्षणाः १३ गृहाश्रमोजघनतोब्रह्मचर्यंहृदोमम ॥ वक्षस्थलाद्वनेवासोन्यासःशीर्षणिसंस्थितः १४ वर्णानामाश्रमाणांचजन्मभूम्यनु सारिणीः ॥ आसन्प्रकृतयोनृणांनीचैर्नीचोत्तमोत्तमाः १५ शमोदमस्तपःशौचंसंतोषःक्षांतिरार्जवम् ॥ मद्भक्तिश्चदयासत्त्वंब्रह्मप्रकृतयस्त्विमाः १६ ते जोबलंधृतिःशौर्यंतितिक्षौदार्यमुद्यमः ॥ स्थैर्यंब्रह्मण्यमैश्वर्यंक्षत्रप्रकृतयस्त्विमाः १७ आस्तिक्यंदाननिष्ठाचअदंभोब्रह्मसेवनम् ॥ अतुष्टिरर्थोपचयेवैश्यप्र कृतयस्त्विमाः १८ शुश्रूषणंद्विजगवांदेवानांचाप्यमायया ॥ तत्रलब्धेनसंतोषःशूद्रप्रकृतयस्त्विमाः १९

चूर्णिका

तस्मात् स धर्मः यथा यस्य विधीयते तथा वर्णय ७ ८॥ श्रीभगवानुवाच॥ हे उद्धव एषः तव प्रश्नः धर्म्यः अतः वर्णाश्रमाचारवतां धर्मं निबोध ९ आदौ कृतयुगे नृणां वर्णः हंस इति तत्र प्रजाः कृतकृत्याः तस्मात् कृतयुगमिति १० तथा वेदः प्रणवएवासीत् तत्र तपोनिष्ठाः प्रजाः मां उपासते ११ ततः त्रेतामुखे मे हृदयात् त्रयी विद्या प्रादुरभूत् तस्याः सकाशात् अहं यज्ञः आसम् १२ ततः मम मुखबाहूरुपादेभ्यः विप्रादिवर्णाः जाताः १३ ततः गृहाश्रमः जघनतो जातः हृदयात् ब्रह्मचर्यम् वक्षसः वने वासः शीर्ष्णः १४ न्यासः एषां वर्णादीनां जन्मस्थानानुसारिण्यः प्रकृतयः आसन् १५ तत्र शमदमतपःशौचसंतोषक्षमार्जवमद्भक्तिदयासत्यानि एताः ब्रह्मप्रकृतयः १६ तेजःबलं शौर्यं ब्रह्मण्यता ऐश्वर्यं इमाः क्षत्रियस्य प्रकृतयः १७ आस्तिक्यंअदंभः ब्रह्मसेवा द्रव्यैः अतुष्टिः इमाः वैश्यस्य प्रकृतयः १८ द्विजगोदेवसेवा यथालब्धेन संतोषः एताः शूद्रस्य प्रकृतयः १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. ए. तद्वाह्यानांस्त्रभावानाह। अशोचमिति। शुष्कविग्रहः। निर्मूलकलहः तर्षः तृष्णा २० तत्रतावत्सर्वसाधारणंधर्ममाह। अहिंसेति वर्णग्रहणमुपलक्षणार्थं । वर्णविशेषधर्मान्गृहस्थप्रकरणेवक्ष्यति २१ प्रथमंताव अ०
दाश्रमेषुब्रह्मचारिणोधर्मावर्ण्यंते। सचद्विविधः। उपकुर्वाणकोनैष्ठिकश्च। तत्राद्यस्यधर्मानाह द्वितीयमितिनवभिः द्विजः त्रैवर्णिकः आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं जन्मप्राप्य।
हूतआहूतोगुरुणाब्रह्मवेदमधीयीत चकारात्तदर्थंचविचारयेत् २२ किंचमेखलादीन् कुशांश्चदधत् तत्राक्षशब्देनाक्षमाला कथंभूतः जटिलः अनभ्यंगादिनाजातजटः । तथा अधौतदद्वासोरक्तपीठः ।
टीका दंताश्चवासश्चदद्वासांसि नधौतानि तानियस्य अधौतदद्वासाः सचासावरक्तपीठश्चेति विग्रहः । नगैरिकादिनारक्तंपीठमासनंयस्यसः २३ जपश्चउच्चारोमूत्रपुरीषोत्सर्गश्चजपोच्चारंतस्मिन् । वाग्यतः ॥१७॥
मौनीभवेत् २४ रेतोबुद्धिपूर्वकंनावकिरेत् । नोत्सृजेत् । ब्रह्मव्रतधरःअगृहस्थः स्वयमेवकथंचिदवकीर्णेऽवगाह्यस्नात्वाकृतप्राणायामः त्रिपदींगायत्रींजपेत् २५ संध्येचद्वे यतवाक्जपन्उपासीत ।
॥८७॥ मध्याह्नेसंध्यानिमित्तंमौनंनास्तीति द्विवचनं २६ (मनुष्यबुद्ध्यानासूयेतसमत्सरंनपश्येत्) २७ अन्यदपियत्संप्राप्तंतन्निवेदयेत् । तेनानुज्ञातंतुसंयतः सन्नुपयुंजीतभुंजीतेत्यर्थः २८ यानशय्यासनस्थानैः
यांतं पृष्ठतोयानेननिद्राणमप्रमत्ततयासमीपशयनेन विश्रांतं पादसंवाहनादिभिः समीपासनेन आसीनं कृतांजलिःनियोगप्रतीक्षयानातिदूरेस्थानेन (कृतांजलिरुपासीतेत्यर्थः) २९एवंभूतंवृत्तंयस्यसः ३०

अशौचमनृतंस्तेयंनास्तिक्यंशुष्कविग्रहः ॥ कामःक्रोधश्चतर्षश्चस्वभावोंतेवसायिनाम् २० अहिंसासत्यमस्तेयमकामक्रोधलोभता ॥ भूतप्रियहिते श्लोकाः
हाचधर्मोयंसार्ववर्णिकः २१ द्वितीयंप्राप्यानुपूर्व्याज्जन्मोपनयनंद्विजः ॥ वसन्गुरुकुलेदांतोब्रह्माधीयीतचाहूतः २२ मेखलाजिनदंडाक्षब्रह्मसूत्रकमंडलून्॥
जटिलोधौतदद्वासोरक्तपीठःकुशान्दधत् २३ स्नानभोजनहोमेषुजपोच्चारेचवाग्यतः ॥ नच्छिंद्यान्नखरोमाणिकक्षोपस्थगतान्यपि २४ रेतोनावकिरेज्जातु २०
ब्रह्मव्रतधरःस्वयम् ॥ अवकीर्णेवगाह्याप्सुयतासुस्त्रिपदींजपेत् २५ अग्न्यर्काचार्यगोविप्रगुरुवृद्धसुराञ्छुचिः ॥ समाहितउपासीतसंध्येचयतवाग्जपन् ३०
२६ आचार्यंमांविजानीयान्नावमन्येतकर्हिचित् ॥ नमर्त्यबुद्ध्यासूयेतसर्वदेवमयोगुरुः २७ सायंप्रातरुपानीयभैक्ष्यंतस्मैनिवदयेत् ॥ यच्चान्यदप्यनुज्ञा
तमुपयुंजीतसंयतः २८ शुश्रूषमाणआचार्यंसदोपासीतनीचवत् ॥ यानशय्यासनस्थानैर्नातिदूरेकृतांजलिः २९ एवंवृत्तोगुरुकुलेवसेद्भोगविवर्जितः ॥
विद्यासमाप्यतेयावद्बिभ्रद्व्रतमखंडितम् ३०

चूर्णिका अशौचं अनृतम् स्तेयं नास्तिक्यं कामक्रोधतर्षाः अंतेवसायिनां स्वभावः २० अहिंसा सत्यम् अचौर्यम् कामक्रोधादि अयं धर्मः सर्वसाधारणः २१ अथ उपकुर्वा
णब्रह्मचारिणो धर्ममाह द्विजः व्रताख्यं द्वितीयं जन्म प्राप्य गुरुकुले स्थित्वा वेदं अधीयीत २२ तथा मेखलाजिनदंडब्रह्मसूत्रकमंडलुकुशान् जटाश्च दधत् २३ स्नान
जपहोमभोजनेषु मूत्रपुरीषोत्सर्गयोश्च मौनं धारयेत् नखरोमाणि न छिंद्यात् २४ बुद्धिपूर्वं रेतो नावकिरेत् रेतसः पाते सति स्नात्वा गायत्रीं जपेत् २५ अग्न्यर्काचार्यादी ॥८७॥
न् उपासीत वाचं नियम्य द्वेसंध्ये उपासीत २६ आचार्यं मां ज्ञात्वा नावमन्येत २७ तथा भैक्ष्यं सायं प्रातः आनीय गुरवे निवेद्य तदाज्ञया भुंजीत आचार्यं सदा
उपासीत २८ यानशय्यादिषु नातिदूरे चरेत् २९ एवं गुरुकुले विद्यासमाप्तिपर्यंतं वसेत् ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवमुपकुर्वाणस्यधर्मानुक्त्वानैष्ठिकस्य विशेषधर्मानाह । यदीतिषड्भिः । असौब्रह्मचारीच्छंदसांलोकंमहर्लोकं ततोब्रह्मलोकं चारोक्ष्यन् आरोढुमिच्छेदित्यर्थः यद्वा छंदसांलोकमितिब्रह्मलोकविशेषणं यत्रमूर्तिधराः कलाइत्युक्तत्वात् । तर्हिबृहद्व्रतः सन्बृहत्नैष्ठिकं व्रतं यस्यसः विन्यसेत् अधिकस्वाध्यायार्थं अधीतनिष्क्रयार्थं (वा समर्थयेत् तदधीनं कुर्यादित्यर्थः) ३१ ब्रह्मवर्चः वेदाभ्यासजं तेजस्तद्वान् ३२ तस्यैव वनस्थयतिसाधारणधर्मानाह । स्त्रीणामिति निरीक्षणं भावगर्भं । क्ष्वेलनं परिहासः । एवमादिकं मिथुनीभूतानग्रतस्त्यजेत् नपश्येदित्यर्थः ३३ तस्यैवसर्वाश्रमसाधारणंधर्ममाह । शौचमितिद्वाभ्यां (आर्जवंऋजुभावः सामंजस्यं) ३४ ३५ निष्कामनैष्ठिकस्यतुमोक्षफलमाह । एवमिति । अमलः निष्कामश्चेत्दग्धंकर्माशयोंऽतःकरणंयस्य । तथाभूतःसन्मद्भक्तोभवति ३६ उपकुर्वाणस्यसमावर्तनप्रकारमाह । अथेति अनंतरंद्वितीयाश्रमंप्रावेक्ष्यन्प्रवेष्टुमिच्छन्यथायथावद्विचारितवेदार्थः स्नायात्अभ्यंगादिकंकृत्वासमावर्तेतेत्यर्थः ३७ तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयावाह । गृहमिति । सकामश्चेद्गृहं अंतःकरणशुद्ध्यादिकामश्चेद्वनंप्रविशेत् । शुद्धांतःकरणः सन् सचद्विजोत्तमोब्राह्मणश्चेत्प्रव्रजेदित्यर्थः यद्वा आश्रमादाश्रमांतरंगच्छेत् । अन्यथाअनाश्रमीनतिष्ठेत् प्रतिलोमंवानाचरेदित्यर्थः अमत्परइति वाच्छेदः स्वभक्तस्याश्रमनियमाभावस्यवक्ष्यमाणत्वात् ३८ विवाहनियमपूर्वकवर्णधर्मैःसहगृहस्थधर्मानाह । गृहार्थीति । सदृशींसवर्णांअजुगुप्सितांकुलतोलक्षणतश्चानिंदिताम् । कामतस्तुयामन्यामुद्वहेत् तांसवर्णामनुतस्याअनंतरंतत्रापिवर्णक्रमेणोद्वहेदित्यर्थः "तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमम् । ब्राह्मणक्षत्रियविशांभार्याःस्वाःशूद्रजन्मन"इति स्मृतेः ३९ इज्यादयस्त्रैवर्णिकानामावश्यकाधर्माः प्रतिग्रहादित्रयंतु वृत्तिः साचब्राह्मणस्यैव ४०

श्लोकाः ३१/४०

यद्यसौछंदसांलोकमारोक्ष्यन्ब्रह्मविष्टपम् ॥ गुरवेविन्यसेद्देहंस्वाध्यायार्थंबृहद्व्रतः ३१ अग्नौगुरावात्मनिचसर्वभूतेषुमांपरम् ॥ अपृथग्धीरुपासीतब्रह्मवर्चस्व्यकल्मषः ३२ स्त्रीणांनिरीक्षणस्पर्शसंलापक्ष्वेलनादिकम् ॥ प्राणिनोमिथुनीभूतानगृहस्थोऽग्रतस्त्यजेत् ३३ शौचमाचमनंस्नानंसंध्योपासनमार्जवम् ॥ तीर्थसेवाजपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनम् ३४ सर्वाश्रमप्रयुक्तोयंनियमःकुलनंदन ॥ मद्भावःसर्वभूतेषुमनोवाक्कायसंयमः ३५ एवंबृहद्व्रतधरोब्राह्मणोग्निरिवज्वलन् ॥ मद्भक्तस्तीव्रतपसादग्धकर्माशयोमलः ३६ अथानंतरमावेक्ष्यन्यथाजिज्ञासितागमः ॥ गुरवेदक्षिणांदत्त्वास्नायाद्गुर्वनुमोदितः ३७ गृहंवनंचोपविशेत्प्रव्रजेद्वाद्विजोत्तमः ॥ आश्रमादाश्रमंगच्छेन्नान्यथामत्परश्चरेत् ३८ गृहार्थीसदृशींभार्यामुद्वहेदजुगुप्सिताम् ॥ यवीयसींतुवयसातांसवर्णामनुक्रमात् ३९ इज्याध्ययनदानानिसर्वेषांचद्विजन्मनाम् ॥ प्रतिग्रहोध्यापनंचब्राह्मणस्यैवयाजनम् ४०

चूर्णिका

अथ नैष्ठिकब्रह्मचारिणः धर्मानाह यदि असौ ब्रह्मलोकं आरोढुमिच्छति तर्हि गुरवे दक्षिणार्थं देहं विन्यस्य ३१ अग्निगुर्वादिषु मां सेवेत ३२ तथा स्त्रीणां निरीक्षणादिमिथुनीभूतांश्च प्राणिनः त्यजेत् ३३ तथा शौचं आचमनं स्नानं तीर्थसेवादि कुर्यात् अस्पृश्याभक्ष्यादि त्यजेत् ३४ सर्वभूतेषु मद्भावः कार्यः अयं सर्वाश्रमप्रयुक्तो नियमः ३५ एवं बृहद्व्रतधरः अग्निरिव ज्वलन् मद्भक्तो भवति ३६ अथ पुनः उपकुर्वाणस्यधर्मानाह एवं वेदार्थं विचार्य गुरवे दक्षिणां दत्त्वासमावर्तेत ३७ ततः गृहं वनं वा उपविशेत् प्रव्रजेत् वा परं आश्रमं विना नचरेत् ३८ गृहार्थी चेत् योग्यां सवर्णां भार्यां क्रमात् उद्वहेत् ३९ ॥ अथतद्धर्मानाह ॥ त्रिवर्णानां यजनाध्ययनदानानि विहितानि प्रतिग्रहाध्यापनयाजनानि तु ब्राह्मणस्यैव ४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्रापिमुख्यांमुख्येतमांचान्यांवृत्तिमाह । प्रतिग्रहमिति । तयोर्याजनाध्यापनयोरपिकार्पण्यादिदोषंपश्यन् शिलैःस्वामित्यक्तैः क्षेत्रपतितैः कणिशैः४१एवंचवृत्तिकार्श्यंब्राह्मणेनसोढव्यमित्याह । ब्राह्मण
स्येति (क्षुद्रकामायाल्पसुखाय)४२उंच्छवृत्तिर्नामविपणादिपतितकणोपादानम् । तां शिलवृत्त्यैकीकृत्यतयातुष्टचित्तस्यमोक्षफलमाह । शिलोंच्छेति । महांतंआतिथ्यादिलक्षणं (भागवतरूपंवा)४३ ए
वमधमस्यमहत्पलमुक्त्वासधनानामप्याहात्रिभिः समुद्धरंतिदारिद्र्यादुत्तारयंति विप्रइत्युपलक्षणम् मत्परायणंकमपि ४४ राज्ञस्त्वावश्यकमेतदित्याह सर्वाइति ४५ ४६ सीदन्नितित्रिभिः । पण्यैर्विक्रेयैर्हीनैं
तुसुरालवणाद्यैः तत्राप्यापदाक्रांतश्चेत् खड्गेनक्षत्रियवृत्त्यावा । यद्यपिगौतमो'ऽनंतरांवृत्तिमातिष्ठेदि'तिस्मरणात्खड्गधारणंपण्यविक्रयाच्छ्रेष्ठंमन्यतेतथापिहिंसातोवाणिग्वृत्तिरेवश्रेष्ठेतिभगवतोमतं ।
नतुश्ववृत्त्यानीचसेवया ४७ तत्राप्यापदिमृगययाविप्ररूपेणवाअध्यापनादिना ४८ कारवःप्रतिलोमजविशेषाबुरुडादयःतेषांवृत्तिंकटादिक्रियां । आपदुत्तीर्णस्तुनानुकल्पेनवर्तेतेत्याह । कृच्छ्रादिति
(कर्मणामुख्येन) ४९ तदेवंवृत्तिव्यवस्थामुक्त्वापुनर्गृहस्थस्यावश्यकान् पंचयज्ञानाह । वेदाध्यायोब्रह्मयज्ञः तेनऋषीन् । स्वधाकारेणपितॄन् । स्वाहाकारेणदेवान् । बलिहरणेनभूतानिं । अन्नाद्यैरन्नो
दकादिभिः मनुष्यानितिज्ञातव्यम् । यथोदयंविभवानुसारतः । तेष्वीश्वरदृष्टिंविधत्ते मद्रूपाणीति ५० आवश्यकंधर्ममुक्त्वाशक्त्यनुसारंधर्ममाह । यदृच्छयाउद्यमंविना । उपार्जितेनवाशुक्लेनस्ववृ
त्त्यालब्धेनशुद्धेनधनेनवाभृत्यान् पोष्यान् ५१

श्लोकाः ४१/५१

प्रतिग्रहंमन्यमानस्तपस्तेजोयशोनुदम् ॥ अन्याभ्यामेवजीवेताशिलैर्वादोषदृक्तयोः ४१ ब्राह्मणस्यतुदेहोयंक्षुद्रकामायनेष्यते ॥ कृच्छ्रायतपसेचेहप्रे
त्यानंतसुखायच ४२ शिलोंच्छवृत्त्यापरितुष्टचित्तोधर्मंमहांतंविरजंजुषाणः ॥ मय्यर्पितात्मागृहएवतिष्ठन्नातिप्रसक्तःसमुपैतिशांतिम् ४३ समुद्धरंति
येविप्रंसीदंतंमत्परायणम् ॥ तानुद्धरिष्येनचिरादापद्भ्योनौरिवार्णवात् ४४ सर्वाःसमुद्धरेद्राजापितेवव्यसनात्प्रजाः ॥ आत्मानमात्मनाधीरोयथागजप
तिर्गजान् ४५ एवंविधोनरपतिर्विमानेनार्कवर्चसा ॥ विधूयेहाशुभंकृत्स्नमिंद्रेणसहमोदते ४६ सीदन्विप्रोवणिग्वृत्त्यापण्यैरेवापदंतरेत् ॥ खड्गेनवा
ऽऽपदाक्रांतोनश्ववृत्त्याकथंचन ४७ वैश्यवृत्त्यातुराजन्योजीवेन्मृगययापदि ॥ चरेद्वाविप्ररूपेणनश्ववृत्त्याकथंचन ४८ शूद्रवृत्तिंभजेद्वैश्यःशूद्रःकारुकट
क्रियाम् ॥ कृच्छ्रान्मुक्तोऽनुगर्ह्येणवृत्तिंलिप्सेतकर्मणा ४९ वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयम् ॥ देवर्षिपितृभूतानिमद्रूपाण्यन्वहंयजेत् ५०
यदृच्छयोपपन्नेनशुक्लेनोपार्जितेनवा ॥ धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ५१

चूर्णिका

तत्र प्रतिग्रहे दोषं मन्यमानश्चेत् अन्याभ्यां जीवेत तयोरपि दोषदृष्टिश्चेत् शिलवृत्त्या जीवेत् ४१ हे उद्धव अयं ब्रह्मदेहः भोगार्थं न इष्टः इह तु कृच्छ्राद्यर्थं प्रेत्य
सुखार्थं इष्टः ४२ एवं शिलोंच्छवृत्त्या तुष्टचित्तः धर्मं जुषाणः गेहस्थितः नातिसक्तश्चेत् मोक्षं उपैति ४३ किं च मत्परं सीदंतं विप्रं ये उद्धरंति तान् आपद्भ्यः अह
मुद्धरिष्ये ४४ अथ राज्ञः आवश्यकमिदमित्याह राजा सर्वप्रजाः दुःखदुद्धृत्याआत्मना आत्मनं उद्धरेत् ४५ एवंविधो नृपः अत्र अशुभं हित्वा इंद्रेण सह मोदते
४६ अथ आपद्वृत्तीराह सीदन् विप्रः वैश्यवृत्त्या खड्गेन वा आपदं तरेत् परं तु श्ववृत्त्या न ४७ राजा तु वैश्यवृत्त्या अध्यापनादिना वा जीवेत नश्ववृत्त्या ४८ तथा वै
श्यः शूद्रवृत्तिं भजेत् शूद्रस्तुबुरुडादिवृत्तिं भजेत् एवं कृच्छ्रान्मुक्तस्तु गर्ह्यकर्मणा नजीवेत ४९ किं च पंचमहायज्ञैः तत्तद्देवताः यजेत् ५० तथा यदृच्छयाप्राप्त
शुद्धधनेन पोष्यान् अपीडयन् यज्ञान् कुर्यात् ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहस्थस्यापिनिवृत्तिनिष्ठामेवाह । कुटुंबेष्विति त्रिभिः । नप्रमाद्येत् ईश्वरनिष्ठायांप्रमत्तोनभवेत् । ननु दृष्टादृष्टार्थकर्मासक्तस्यकथंमप्रमादः विचारेणेत्याह । विपश्चिदिति (अदृष्टंस्वर्गादि) ५२ तत्रापिदृष्टेष्वासक्तेरधिकत्वात्तेषांनश्वरत्वंप्रपंचयति । पुत्रादीनामेकत्रसंगमः पांथानांप्रपायांसंगमइव । तत्रहेतुः अनुदेहं प्रतिदेहं एतेवियंतिनश्यंति । निद्रावर्तीस्वप्नोनिद्रापायेयथा ५३ अतिथिवदुदासीनः ५४ अस्याप्याश्रमविकल्पमाह । कर्मभिरिति । गृहाश्रमएवतिष्ठेत् । यदिपुत्रवान् तर्हिप्रव्रजेद्वा ५५ गृहाद्यासंगेदोषमाह । यस्त्वितित्रिभिः ५६ बंधमेवाभिनयेनदर्शयति । अहोइति । बालाआत्मजायस्याःसा । आत्मजाश्चमांविनाअनाथाःसंतः कथंजीविष्यंतीति ५७ गृहेयआशयोवासनातेनआसर्वतः क्षिप्तंहृदयंयस्यसः अंधंतमःअतितामसीयोनिं ५८ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांसप्तदशोऽध्यायः १७ ॥ ॥ ७ ॥ ॥ अष्टादशेऽवदद्धर्मंवनस्थयतिगोचरम् ॥ अधिकारविशेषेणविशेषंवार्पितद्व्रतम् ॥ १ ॥ क्रमप्राप्तान्वनस्थधर्मानाह । वनमिति । आयुषस्तृतीयंभागंपंचसप्ततिवर्षपर्यंतं । ततःपरंक्षीणेंद्रियस्येषाद्विरागेपिसंन्यासाधिकारःस्यादितिभावः १ वसीत परिदधीत २ (मलमनभ्यंगादिना) दतः दंतान् नधावेत् नशोधयेत् । त्रिकालमप्सुमज्जेत् मुसलवत्स्नायात् । स्थंडिलेशयः भूमिशायी ३ तप्येतपंचाग्नीन्सूर्येणसहचतुर्दिशमग्नींन्नियायात्मानंतापयेदित्यर्थः । आसारषाट्आसारंधारासंपातंसहतइतितथा । अभ्रावकाशंनामव्रतंचरेत् । जलेआकंठमग्नः उदकवासंनामव्रतंचरेत् ४

श्लोकाः ५२/४

कुटुंबेषुनसज्जेतनप्रमाद्येत्कुटुंब्यपि ॥ विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत् ५२ पुत्रदाराप्तबंधूनांसंगमःपांथसंगमः ॥ अनुदेहंवियंत्येतेस्वप्नोनिद्रानुगोयथा ५३ इत्थंपरिमृशन्मुक्तोगृहेष्वतिथिवद्वसन् ॥ नगृहैरनुबध्येतनिर्ममोनिरहंकृतः ५४ कर्मभिर्गृहमेधीयैरिष्ट्वामामेवभक्तिमान् ॥ तिष्ठेद्वनंवोपविशेत्प्रजावान्वापरिव्रजेत् ५५ यस्त्वासक्तमतिर्गेहेपुत्रवित्तेषणातुरः ॥ स्त्रैणःकृपणधीर्मूढोममाहमितिबध्यते ५६ अहोमेपितरौवृद्धौभार्याबालात्मजात्मजाः ॥ अनाथामामृतेदीनाःकथंजीवंतिदुःखिताः ५७ एवंगृहाशयाक्षिप्तहृदयोमूढधीरयम् ॥ अतृप्तस्ताननुध्यायन्मृतोंऽधंविशतेतमः ५८ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेसप्तदशोध्यायः १७ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ वनंविविक्षुःपुत्रेषुभार्यांन्यस्यसहैववा ॥ वनएववसेच्छांतस्तृतीयंभागमायुषः १ कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिंप्रकल्पयेत् ॥ वसीतवल्कलंवासस्तृणपर्णाजिनानिच २ केशरोमनखश्मश्रुमलानिबिभृयाद्दतः ॥ नधावेदप्सुमज्जेतत्रिकालंस्थंडिलेशयः ३ ग्रीष्मेतप्येतपंचाग्नीन्वर्षास्वासारषाड्जले ॥ आकंठमग्नःशिशिरएवंवृत्तस्तपश्चरेत् ४

चूर्णिका ॥९०॥

तथा कुटुंबेषु न सज्जेत दृष्टादृष्टं नश्वरं पश्ये ५२ पुत्रादिबंधूनां संगमः पांथसंगम इव जानीयात् ५३ एवं विचार्य गृहेषु वसन् तैर्न बध्यते ५४ एवं कर्मभिः मां इष्ट्वा तिष्ठेत् वनं वा विशेत् प्रजावान्वापरिव्रजेत् ५५ यस्तु गेहे सक्तमतिः सः ममाहमिति बध्यते ५६ अहो मे पितरौ वृद्धौ भार्या बालात्मजात्मजाः एवं मां ऋते कथं जीवंतीति ५७ एवं गृहाशयाक्षिप्तहृदयो मूढधीरयम् अतृप्तस्ताननुध्यायन् मृतोंधं विशते तमः ५८ इत्येकादशे सप्तदशः १७ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ अथ वानप्रस्थधर्मानाह वनं विविक्षुः पुत्रेषु भार्यां न्यस्य गृहीत्वा वा वने पंचसप्तति वर्षपर्यंतं आयुस्तृतीयं भागं वसेत् १ तत्र शुद्धकंदादिभिर्वृत्तिं कल्पयेत् तथा वल्कलादिपरिधाय २ केशरोमनखादि धृत्वा दतः न धावेत् त्रिकालं स्नात्वा भूमौ शयीत ३ ग्रीष्मे पंचाग्नितापं सहेत् वर्षासु असारषाट् शिशिरे उदके आकंठमग्नो भूत्वा तपश्चरेत् ४

CC-0. In Public Domain. Digitization by eGangotri

टीका

उलूखलेनवाऽश्मनावाकुट्टयतीकंडयतितितथा दंताएवोलूखलंयस्यसतथावा ५ संचिनुयादाहरेत् । अन्यदाकालांतरेआहृतंकालांतरेनाददीत । "लब्धेनवेनवेऽन्नाद्येपुराणंतुपरित्यजे" दितिनारदोक्तेः (वृत्तिकारणंजीविकासाधनं) ६ कालचोदितान्आग्रयणादीन् ७ किंच । अग्निहोत्रमिति । मुनेश्चनैगमैर्वेदवादिभिः (आम्नातानिविहितानि) ८ अस्यतपोनिष्णातस्यफलमाह । एवमिति । धमनीभिः शिराभिः संततःव्याप्तः यावज्जीवकृतेनतपसाशुष्कमांसइत्यर्थः । ऋषिलोकात्महर्लोकादिक्रमेण । अयंभावः । अंतःकरणशुद्धिभक्तिद्वारात्रैवतावन्मुच्यंते । प्रतिबंधकबाहुल्यत्वेऽनेनक्रमेणमुच्यतइति ९ तंसकामंनिंदति यस्त्वेतदिति । निश्रेयसंमोक्षफलंअल्पीयसेआविरिंच्यादत्यल्पमेवतस्मै १० एवंयावज्जीवंवर्तमानस्यमोक्षः तृतीयभागावसानेतुमंदविरागस्यापिसंन्यासाधिकारः । यदिततोऽर्वागेवस्वधर्माशक्तोभवेत् । तदापिसम्यगविरक्तोविरक्तोवा तत्राविरक्तस्यकृत्यमाह । यदेति । जातोवेपथुः कंपोदेहेयस्यसः ११ विरक्तंप्रत्याह । यदेति १२ तत्रादौकृत्यमाह । इष्ट्वेति । यथोपदेशंश्राद्धाष्टकपूर्वकंप्राजापत्येष्ट्यायांइष्ट्वास्वप्राणेआत्मनि (आवेश्यसमारोप्य) १३ संन्यासेविघ्नाभवंतितानविगणय्यसंन्यसेदेवेत्याशयेनाह । विप्रस्येति । केनाभिप्रायेणकुर्वंतितमाह । अयमिति । परंपरमंब्रह्म १४ एवंप्रव्रजितस्यधर्मानाह । बिभृयाच्चेदिति । परंकौपीनादन्यत् वासोयदिधारयितुमिच्छतितर्हि कौपीन (संज्ञंवस्त्र-)-माच्छाद्यतेयावताकटिवेष्टनेन तावन्मात्रंधारयेदित्यर्थः त्यक्तंप्रैषोच्चारात्पूर्वमेवअतोन्यत् किंचिदपिनबिभृयात्दंडपात्राभ्यामित्यावश्यकजलपात्रादेरुपलक्षणम् १५ मनःपूतंमनसासम्यग्विचार्ययच्छुद्धंतदाचरेत् १६

श्लोकाः ५/१६

अग्निपक्वंसमश्नीयात्कालपक्वमथापिवा ॥ उलूखलाश्मकुट्टोवादंतोलूखलएववा ५ स्वयंसंचिनुयात्सर्वमात्मनोवृत्तिकारणम् ॥ देशकालबलाभिज्ञोनाददी
तान्यदाहृतम् ६ वन्यैश्चरुपुरोडाशान्निर्वपन्कालचोदितान् ॥ नतुश्रौतेनपशुनामांयजेतवनाश्रमी ७ अग्निहोत्रंचदर्शश्चपूर्णमासश्चपूर्ववत् ॥ चातुर्मा
स्यानिचमुनेराम्नातानिचनैगमैः ८ एवंचीर्णेनतपसामुनिर्धमनिसंततः ॥ मांतपोमयमाराध्यऋषिलोकादुपैतिमाम् ९ यस्त्वेतत्कृच्छ्रतश्चीर्णंतपोनिश्रे
यसंमहत् ॥ कामायाल्पीयसेयुंज्याद्बालिशःकोऽपरस्ततः १० यदासौनियमेऽकल्पोजरयाजातवेपथुः ॥ आत्मन्यग्नीन्समारोप्यमच्चित्तोग्निंसमाविशेत्
११ तदाधर्मविपाकेषुलोकेषुनिरयात्मसु ॥ विरागोजायतेसम्यग्न्यस्ताग्निःप्रव्रजेत्ततः १२ इष्ट्वायथोपदेशंमांदत्त्वासर्वस्वमृत्विजे ॥ अग्नीन्स्वप्राणआ
वेश्यनिरपेक्षःपरिव्रजेत् १३ विप्रस्यवैसंन्यसतोदेवादारादिरूपिणः ॥ विघ्नान्कुर्वंत्ययंह्यस्मानाक्रम्यसमियात्परम् १४ बिभृयाच्चेन्मुनिर्वासःकौपीना
च्छादनंपरम् ॥ त्यक्तंनदंडपात्राभ्यामन्यत्किंचिदनापदि १५ दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंपिबेज्जलम् ॥ सत्यपूतांवदेद्वाचंमनःपूतंसमाचरेत् १६

चूर्णिका

किंचअग्निपक्वं कालपक्वं वा अश्नीयात् ५ सर्वं देहवृत्तिकारणं स्वयमाहरेत् कालांतरे आहृतं कालांतरे न गृह्णीयात् ६ किं च वन्यैश्चरुपुरोडाशैः नित्यानि आग्रयणादीनिकुर्यात् श्रौतेन पशुना न यजेत ७ तथा अग्निहोत्रादि कुर्यात् ८ एवं तपसा मां आराध्य महर्लोकादिक्रमेण मां उपैति ९ एवं चीर्णं तपः तुच्छकामाय यः युंज्यात् सः अज्ञः १० अथ यदा असौ स्वनियमे अकल्पः तदा आत्मनि अग्नीनारोप्य मच्चित्तः वह्निं विशेत् ११ यदा सर्वलोकेषु विरागो जायते १२ तदा यथोपदेशं मां इष्ट्वा ऋत्विजे सर्वं दत्त्वा स्वप्राणे अग्नीनावेश्य प्रव्रजेत् १३ एवं संन्यसतः दारादिरूपिणः देवाः विघ्नान् कुर्वंति १४ अथ यतिधर्मानाह यतिः वासः यदि बिभृयात् तर्हि कौपीनाच्छादन मात्रं धारयेत् अनापदि दंडपात्रं विना किमपि न धारयेत् १५ तथा दृष्टिपूतं पादं न्यसेत् वस्त्रपूतं जलं पिबेत् सत्यां वाचं वदेत् मनसा विचार्य यत् शुद्धं तदाचरेत् १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मौनंवाचोदंडः । अनीहाकाम्यकर्मत्यागोदेहस्य । प्राणायामश्चेतसः । एतेअंतर्धृतायोदंडायस्यनसंतिअंगहेउद्धव । अंगेधृतवेणुभिर्नसयतिरिति १७ चतुर्ष्विति ब्राह्मणेष्वेववृत्तिभेदेनचतुर्विधेषुपूर्व पूर्वासंभवेवाविगर्ह्यान्अभिशस्तपतितान्असंक्लृप्तान् । अत्रायंलाभोभविष्यतीतिपूर्वमनुद्दिष्टान् १८ वहिर्ग्रामात् पावितंप्रोक्षणादिभिःशोधितंविभज्यविष्णुब्रह्मार्कभूतेभ्यः अशेषमित्यधिकाहरणंनिरस्त म् । याचितमितिपाठेमाधुकरेणयाचितंअन्नंचेत्तर्हिविभज्यभुंजीत । नत्वयाचितादिभैक्षचतुष्टयमित्यर्थः । "माधुकरेतुनैवेद्यंभैक्ष्येनान्येषुविद्यते । नैवेद्यकंक्षिपेदप्सुत्रितयंभौतिकंबहि"रितिस्मृतेः । यद्वा तदानींकेनापियाचितंचेत्तन्मध्येतस्मैकिंचिद्विभज्यदत्त्वेत्यर्थः १९ किंच । एकश्चरेदिति । आत्मन्येवक्रीडाकौतुकंयस्यसः आत्मन्येवरतः संतुष्टः । आत्मवान्धीरः २० विविक्तंविजनंक्षेमं निर्भयंशरणंस्थानंयस्यसः मयिभावेनविमलआशयोयस्यसः २१ वंधंमोक्षंचकेनबंधः केनमोक्षइति तावाह । बंधइति २२ (यस्मादेवंभूतौवंधमोक्षौतस्मान्मद्भावेनमांस्मरन् पुरादिकंप्रविशन् महींचरे दित्यन्वयः) २३ पुराणिहट्टादिमंति ग्रामास्तद्रहिताः व्रजागोष्ठानितान् सार्थान् यात्रिकजनसमूहान् २४ कुतः शिलवृत्त्याप्राप्तेनवदीयेनांधसाअन्नेनशुद्धसत्त्वःसन्निवृत्तमोहः संसिद्ध्यति मुच्यते २५ ननु मिष्टान्नंविहायकथंशिलान्ने प्रवृत्तिः स्यादतआह । नेति । एतदृश्यमानंमिष्टान्नादिवस्तुतयानपश्येत् । यतोविनश्यति । अतःइहामुत्रचलोकेअसक्तचित्तः सन् चिकीर्षितात्तदर्थकृत्याद्विरमेत् २६ ननु तथापियावद्विनाशंसुखहेतुत्वाच्चिंतयतः कुतोविरागःस्यात्तत्राह । यदेतदिति एतज्जगन्ममतास्पदंमनोवाक्प्राणैः संहतंसहितंअहंकारास्पदंशरीरंचसर्वंतज्जन्यंसुखंचआत्मनिमायामात्रमिति तर्केणस्वप्नादिदृष्टांतेनत्यक्त्वा स्वस्थः आत्मनिष्ठः सन् न पुनः पुनस्ततस्मरेत् नचिंतयेत् २७

श्लोकाः १७/२७

मौनानीहानिलायामादंडावाग्देहचेतसाम् ॥ नह्येतेयस्यसंत्यंगवेणुभिर्नभवेद्यतिः १७ चतुर्षुभिक्षांवर्णेषुविगर्ह्यान्वर्जयंश्चरेत् ॥ सप्तागारानसंक्लृप्तांस्तु ष्येल्लब्धेनतावता १८ बहिर्जलाशयंगत्वातत्रोपस्पृश्यवाग्यतः ॥ विभज्यपावितंशेषंभुंजीताशेषमाहृतम् १९ एकश्चरेन्महीमेतांनिःसंगःसंयतेंद्रियः ॥ आत्मक्रीडआत्मरतआत्मवान्समदर्शनः २० विविक्तक्षेमशरणोमद्भावविमलाशयः ॥ आत्मानंचिंतयेदेकमभेदेनमयामुनिः २१ अन्वीक्षेतात्मनोबंधंमो क्षंचज्ञाननिष्ठया ॥ बंधइंद्रियविक्षेपोमोक्षएषांचसंयमः २२ तस्मान्नियम्यषड्वर्गंमद्भावेनचरेन्मुनिः ॥ विरक्तःक्षुल्लककामेभ्योलब्ध्वात्मनिसुखंमहत् २३ पुरग्रामव्रजान्सार्थान्भिक्षार्थंप्रविशंश्चरेत् ॥ पुण्यदेशसरिच्छैलवनाश्रमवतींमहीम् २४ वानप्रस्थाश्रमपदेष्वभीक्ष्णंभैक्षमाचरेत् ॥ संसिध्यत्याश्वसंमो हःशुद्धसत्त्वःशिलांधसा २५ नैतद्वस्तुतयापश्येद्दृश्यमानंविनश्यति ॥ असक्तचित्तोविरमेदिहामुत्रचिकीर्षितात् २६ यदेतदात्मनिजगन्मनोवाक्कायसंहत म् ॥ सर्वंमायेतितर्केणस्वस्थस्त्यक्त्वानतत्स्मरेत् २७

चूर्णिका

तथा मौनं अनीहा प्राणायामः एते वाग्देहचेतसां दंडाः यस्य न संति सः वेणुभिः यतिर्न भवेत् १७ तथा भिक्षां ब्राह्मणेषु वृत्तिभेदेन चतुर्विधेषु सप्तगृहान् चरेत् १८ ततो जलाशयं गत्वा मौनं धृत्वा अन्नं देवादिभ्यः विभज्य भुंजीत १९ एतां महीं एकः आत्मरतः सन् चरेत् २० तथा एकांते स्थित्वा मया अभेदेन आत्मानं चिं तयेत् २१ तथा आत्मनः बंधमोक्षौ च चिंतयेत् २२ तस्मात् षडिंद्रियवर्गं नियम्य विरक्तः सन् चरेत् २३ पुरग्रामादिषु भिक्षार्थं प्रविश्य पुण्यदेशादियुतां महीं चरेत् २४ पुनःपुनः वानप्रस्थेषु भैक्ष्यं चरेत् २५ इदं दृश्यं मिथ्येति ज्ञात्वा इहामुत्र कृत्याद्विरमेत् २६ तथा इदं विश्वं स्वशरीरं च मायेति त्यक्त्वा तत् न स्मरेत् २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंचवहूदकादिधर्मानुक्त्वापरमहंसधर्मानाह । ज्ञाननिष्ठइतिसार्धैर्दशभिः वहिर्विरक्तोमुमुक्षुःसन् योज्ञाननिष्ठोमोक्षेप्यनपेक्षोमद्भक्तोवा सलिंगान्त्रिदंडादिसहितानाश्रमान् । धर्मान् त्यक्त्वातदासक्तियथा चितंधर्मंचरेदित्यर्थः । नपुनरत्यंतत्यागएवविवक्षितः पुनर्धर्मविधानात् अक्रियत्वस्योत्तराध्यायेवक्ष्यमाणत्वाच्च तर्हिपूर्वस्मात्कोविशेषःतमाह । अविधिगोचरः विधिकिंकरोनस्यात् इति एत देवस्फुटीकरिष्यति । ''शौचमाचमनंस्नानंनतुचोदनयाचरेत्''इत्यादिना २८ कथंचरेत्तदाह । बुधःविवेकवानपि । वालवन्मानावमानशून्यः । कुशलोनिपुणोपिजडवत् फलानुसंधानाभावेन वि द्वान्पंडितोपिउन्मत्तवत् लोकरंजनाभावेन । नैगमःवेदार्थनिष्ठोपि गोचर्यां अनियताचारमिव २९ वेदवादरतः कर्मकांडवादनिष्ठः पाखंडी श्रुतिस्मृतिविरुद्धधर्मानुष्ठानवान् हैतुकःकेवलतर्कनिष्ठः शुष्कवादेनिष्प्रयोजनगोष्ठ्यांयोविवादस्तस्मिन् ३० अतिवादान्दुरुक्तानि ३१ आत्मदृष्ट्यातावद्वैरकारणंनास्तीत्युक्तम् । एकएवेति देहदृष्ट्यापिनास्तीत्याह । भूतानिदेहाअपिकारणरूपेणैका त्मकानि ३२ (उभयंलाभालाभौ) दैवतंत्रितंदैवाधीनंयतः ३३ अलंतर्हिभिक्षाप्रयत्नेनापि तत्राह । आहारमात्रार्थंसमीहेतैव । यतः तस्यप्राणधारणंयुक्तंसम्यगुपपन्नम् । कथम् । तेनप्राणधारणे नतत्त्वंविचार्यते । किंतेनापि तदाह । तद्विज्ञायेति ३४ तर्हिकिंमिष्टान्नादिकमग्राह्यमेव । केनैवमुक्तमित्याह । यदृच्छयेति ३५ यथाऽहमीश्वरोलीलयाचरामितथाज्ञानीज्ञाननिष्ठः अनासक्तःकुर्यात् नतु विधिकिंकरत्वेन तस्यज्ञाननिष्ठाविरोधादित्यर्थः ३६ कुतोविधिकिंकरत्वाभावस्तस्यतत्राह । नहितस्यविकल्पाख्याभेदप्रतीतिः । नन्वस्तिसा । सत्यं । याचासीत्सापिमद्विषययावीक्षयाज्ञानेनहता । ननु नहतापुनर्दृश्यमानत्वात् । तत्राह । आदेहांतात्क्वचित्कदाचित्वाधितैवख्यातिर्भवति ३७

॥९३॥ अ० ॥१८॥

श्लोकाः २८ — ३७

ज्ञाननिष्ठोविरक्तोवामद्भक्तोवाऽनपेक्षकः ॥ सलिंगानाश्रमांस्त्यक्त्वाचरेदविधिगोचरः २८ बुधोबालकवत्क्रीडेत्कुशलोजडवच्चरेत् ॥ वदेदुन्मत्तवद्विद्वान्गो चर्यांनैगमश्चरेत् २९ वेदवादरतोनस्यान्नपाषंडीनहैतुकः ॥ शुष्कवादविवादेनकंचित्पक्षंसमाश्रयेत् ३० नोद्विजेतजनाद्धीरोजनंचोद्वेजयेन्नतु ॥ अति वादांस्तितिक्षेतनावमन्येतकंचन ३१ देहमुद्दिश्यपशुवद्वैरंकुर्यान्नकेनचित् ॥ एकएवपरोह्यात्माभूतेष्वात्मन्यवस्थितः ॥ यथेंदुरुदपात्रेषुभूतान्येकात्मका निवा ३२ अलब्ध्वानविषीदेतकालेकालेऽशनंक्वचित् ॥ लब्ध्वानहृष्येन्मतिमानुभयंदैवतंत्रितम् ३३ आहारार्थंसमीहेतयुक्तंतत्प्राणधारणम् ॥ तत्त्वंवि मृश्यतेतेनतद्विज्ञायविमुच्यते ३४ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरम् ॥ तथावासस्तथाशय्यांप्राप्तंप्राप्तंभजेन्मुनिः ३५ शौचमाचमनंस्नानंनतुचोदन याचरेत् ॥ अन्यांश्चनियमाञ्ज्ञानीयथाहंलीलयेश्वरः ३६ नहितस्यविकल्पाख्यायाचमद्वीक्षयाहता ॥ आदेहांतात्क्वचित्ख्यातिस्ततःसंपद्यतेमया ३७

चूर्णिका

अथ परमहंसधर्ममाह ज्ञाननिष्ठः यतिः अविधिगोचरश्चरेत् २८ बुधः सन् बालकवत् क्रीडेत् ज्ञानी सन् मत्तवत् चरेत् २९ वेदवादरतः न स्यात् पाखंडी न स्यात् कंचन पक्षं नाश्रयेत् ३० जनात् नोद्विजेत् कमपिनोद्वेजयेत् कंचन देहं उद्दिश्य वैरं न कुर्यात् ३१ यतः सर्वभूतेषु आत्मा एक एव स्थितः यथाइंदुर्घटादिषु ३२ ३३ भिक्षां आहारार्थं समीहेत तया प्राणधारणं भवति तेन तत्वविचारः तद्विज्ञाय मुच्यते ३४ किंच यदृच्छया प्राप्तं अन्नादि वासः शय्यां भजेत् ३५ शौचाचमनादिवि धिं किंकरत्वेन नाचरेत् ३६ एवंभूतस्यापिभेदः प्रतीतिः आदेहांतात् दग्धपटवत् भाति ततः मया संपद्यते ३७

॥९३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंविरक्तस्यापरोक्षज्ञानवतः संन्यासंतद्धर्मांश्चोक्त्वाकेवलवैराग्यवंतंविविदिषुंप्रत्याह । दुःखोदर्केष्विति । नजिज्ञासितोमद्धर्मोमत्प्राप्तिसाधनंयेनसः ३८ मामेवमद्दृष्ट्यैवगुरुंपरिचरेत् । ततःपरमेकश्चरेत् । इत्यादिधर्मैर्वर्तेतेतिभावः ३९ अनधिकारिणः संन्यासंनिंदतिद्वाभ्यां । यस्त्विति । प्रचंडोत्यासक्तइंद्रियसारथिर्बुद्धिर्यस्यसः ४० सुरान्यष्टव्यान्देवान्स्वात्मानंचआत्मस्थंमांचनिह्नुतेप्रतारयति । निह्नवफलमाह अस्मादिति । (अस्माल्लोकसुखादमुष्माच्चपारलौकिकात्) ४१ चतुर्णांप्रधानधर्मानाह भिक्षोरिति । (वनौकसोवानप्रस्थस्यतपः पंचाग्निसहनादि । इज्यादर्शपूर्णमासादि । द्विजस्यब्रह्मचारिणः) ४२ अन्यधर्मान्कांश्चिद्गृहस्थेप्यतिदिशति । ब्रह्मचर्यमिति । शौचंरागादिराहित्यं । तस्यब्रह्मचर्यप्रकारमाह ऋतौगंतुरिति ४३ एवंभूतवर्णाश्रमधर्मफलमाह । इतिमामिति । दृढांमद्भक्तिंविंदते । (सर्वेषुभूतेषुअहंभगवानितिभावोयस्यसः) ४४ ततःकिमतआह । भक्त्येति । महेश्वरत्वेहेतुः । सर्वोत्पत्त्यप्ययंसर्वस्योत्पत्त्यप्ययौयस्मात् । अतएवतत्कारणंमांब्रह्मरूपंवैकुंठनिवासिनं यद्वा ब्रह्मणोवेदस्यकारणंमांउपयातिसामीप्येनप्राप्नोति ४५ ततश्चासौमुक्तएवेत्याह इतिएवंभूतेनस्वधर्मेणनिर्णिक्तंशुद्धंसत्त्वंचित्तंयस्यसः । अतएवविज्ञातामममगतिरैश्वर्यंयेन ४६ उक्तमर्थंसंक्षिप्याह । (वर्णेति ।) यएषआचारलक्षणः पितृलोकप्राप्तिफलः सएवमद्भक्तियुतः मयिसमर्पणेनकृतः ४७ प्रकरणार्थमुपसंहरति । एतच्चतेऽभिहितंयथाभक्तोभूत्वामांपरंसंप्राप्नुयादिति ४८ । इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायामष्टादशोऽध्यायः १८ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः ३८–४८

दुःखोदर्केषुकामेषुजातनिर्वेदआत्मवान् ॥ अजिज्ञासितमद्धर्मोगुरुंमुनिमुपाव्रजेत् ३८ तावत्परिचरेद्भक्तःश्रद्धावाननसूयकः ॥ यावद्ब्रह्मविजानीयान्मामेवगुरुमादृतः ३९ यस्त्वसंयतषड्वर्गःप्रचंडेंद्रियसारथिः ॥ ज्ञानवैराग्यरहितस्त्रिदंडमुपजीवति ४० सुरानात्मानमात्मस्थंनिह्नुतेमांचधर्महा ॥ अविपक्वकषायोस्मादमुष्माच्चविहीयते ४१ भिक्षोर्धर्मःशमोऽहिंसातपइज्यावनौकसः ॥ गृहिणोभूतरक्षेज्याद्विजस्याचार्यसेवनम् ४२ ब्रह्मचर्यंतपःशौचंसंतोषोभूतसौहृदम् ॥ गृहस्थस्यऋतौगंतुःसर्वेषांमदुपासनम् ४३ इतिमांयःस्वधर्मेणभजेन्नित्यमनन्यभाक् ॥ सर्वभूतेषुमद्भावोमद्भक्तिंविंदतेऽचिरात् ४४ भक्त्योद्धवानपायिन्यासर्वलोकमहेश्वरम् ॥ सर्वोत्पत्त्यप्ययंब्रह्मकारणंमोपयातिसः ४५ इतिस्वधर्मनिर्णिक्तसत्त्वोनिर्ज्ञातमद्गतिः ॥ ज्ञानविज्ञानसंपन्नोविरक्तःसमुपैतिमाम् ४६ वर्णाश्रमवतांधर्मएषआचारलक्षणः ॥ सएवमद्भक्तियुतोनिःश्रेयसकरःपरः ४७ एतत्तेऽभिहितंसाधोभवान्पृच्छतियच्चमाम् ॥ यथास्वधर्मसंयुक्तोभक्तोमांसमियात्परम् ४८ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेऽष्टादशोध्यायः १८ ॥ ॥ ७ ॥ ॥ ७ ॥

चूर्णिका

अथ विविदिषुं यतिं प्रत्याह कामेषु जातविरागः यतिः गुरुमुपाव्रजेत् ३८ ततः यावत् ब्रम्ह जानीयात् तावत् गुरुं भजेत् ३९ यस्तु षड्वर्गं न नियम्य ज्ञानादिरहितः सन् त्रिदंडं उपजीव्य ४० देवादीन् निह्नुते सः अस्मात् अमुष्मात् च नश्यति ४१ चतुर्णांच मुख्यधर्मानाह भिक्षोर्धर्मः शमोहिंसा तप इज्या वनौकसः गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनम् ४२ गृहस्थधर्मः माह ब्रह्मचर्यं तपः भूतसौहृदं संतोष इति सर्वेषां मदुपासनम् ४३ एवं मां यः भजति सः शीघ्रं मद्भक्तिं विंदते ४४ एवंभूतः भक्तः भक्त्या ब्रम्हकारणं मां याति ४५ किंच स्वधर्मेण शुद्धसत्वः ज्ञातमद्गतिः पुमान् शीघ्रं मां उपैति ४६ हे उद्धव अयं धर्मः मद्भक्तियुक्तश्चेत् मोक्षकरो भवति ४७ एतत्तेभिहितं साधो भवान् पृच्छति यच्च माम् तथा स्वधर्मसंयुक्तो भक्तो मां समियात्परम् ४८ ॥ इत्येकादशेऽष्टादशः १८ ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानादेर्निर्णयःपूर्वक्रतोह्याश्रमधर्मतः । एकोनविंशतितमेज्ञानादेर्योगउच्यते ॥ १ ॥ तदेवंतर्केतोबाधितोपिदेहादिप्रपंचोयावदपरोक्षानुभवेनदिङ्मोहादिरिव नलीयते तावत्तत्त्वज्ञानाभ्यासः (१ आव श्यकस्त-)-तोमुक्तिरित्युक्तं आदेहांतात्कचित्ख्यातिस्ततः संपद्यतेमयेत्यादिना । यस्यत्वपरोक्षानुभवेनप्रपंचोलीनप्रायस्तस्यनकिंचित्कृत्यमस्तीत्याह । यइति । विद्यानुभवस्तत्पर्यंतेनश्रुतेनसंपन्नः अतएवात्मवान्प्राप्तात्मतत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान्नभवति । अनकारपाठे प्राक्श्रुत्यनुकूलतर्केणनिर्णीतार्थइत्यर्थः सइदंद्वैतंतन्निवृत्तिसाधनंचमयिमायामात्रमितिज्ञानंचतत्साधनंचसं न्यसेत् । अयमेवविद्वत्संन्यासोनाम १ अत्रहेतुमाह । ज्ञानिनस्त्विवतियस्मादहमेवतस्येष्टः अपेक्षितः स्वार्थः फलंहेतुस्तत्साधनंचसंमतः स्वर्गोभ्युदयश्च अपवर्गः संसारनिवृत्तिः अतस्तस्यनप्राप्यंकृ त्यंवाकिंचिदस्तीत्यर्थः २ अत्रविद्वदनुभवंप्रमाणयति । ज्ञानेति । (पदंचरणकमलं) यथोक्तज्ञानिनमभिनंदति । ज्ञानीति । यतोसौज्ञानेनमांधारयाति ३ तस्यज्ञानंस्तौति तपइति । अलमत्यर्थंज्ञान स्यकलयालेशेन ४ ज्ञानेनसहितंभेत्यर्थं यथाभवतितथाज्ञात्वाततसंपन्नःसन्मामेवभज । अन्यत्सर्वंत्यजेत्यर्थः ५ तस्यप्रत्ययार्थंपूर्वेषांवृत्तमाह । ज्ञानेति । संसिद्धिंमामेवप्राप्ताः (आत्मनिप्रतीचि) ६ तदेवज्ञानंसंक्षेपतउपदिशति । त्वयीति । त्रिविधः आध्यात्मिकादिःविकारोदेहादिःसमाया । नतुपरमार्थः । यत् यस्मात् अंतरामध्यएवापतति रज्जौसर्पमालादिवत् । नाद्यपवर्गयोः नत्वादावंते चास्ति । अतः यत् यदाअस्यविकारस्यामीजन्मादयः स्युः तदातस्यतवाधिष्ठानभूतस्याकिं नकिंचिदित्यर्थः । ननुतस्यापि (विकारस्यापि) वस्तुतोनसंति । तस्यासत्त्वादित्याह आद्यंतयोरिति अस तःसर्पादेः आद्यंतयोर्यदस्तिरज्ज्वादितदेवमध्येपि नतुसर्पादि । तद्वदयंविकारोनास्तीत्यर्थःयद्वाआद्यंतयोर्यदस्तितन्मध्येप्यस्त्येवनतस्यजन्मादयः संतिअतस्त्वंनिर्विकारंब्रह्मेति ७

श्लोकाः १-७

॥ श्रीभगवानुवाच ॥ योविद्याश्रुतसंपन्नआत्मवान्नानुमानिकः ॥ मायामात्रमिदंज्ञात्वाज्ञानंचमयिसंन्यसेत् १ ज्ञानिनस्त्वहमेवेष्टःस्वार्थोहेतुश्चसंमतः ॥ स्वर्गश्चैवापवर्गश्चनान्योर्थोमदृतेप्रियः २ ज्ञानविज्ञानसंबद्धाःपदंश्रेष्ठंविदुर्मम ॥ ज्ञानीप्रियतमोऽतोमेज्ञानेनासौबिभर्तिमाम् ३ तपस्तीर्थंजपोदानंपवि त्राणीतराणिच ॥ नालंकुर्वंतितांसिद्धिंयाज्ञानकलयाकृता ४ तस्माज्ज्ञानेनसहितंज्ञात्वास्वात्मानमुद्धव ॥ ज्ञानविज्ञानसंपन्नोभजमांभक्तिभावितः ५ ज्ञानविज्ञानयज्ञेनमामिष्ट्वात्मानमात्मनि ॥ सर्वयज्ञपतिंमांवैसंसिद्धिंमुनयोऽगमन् ६ त्वय्युद्धवाश्रयतियस्त्रिविधोविकारोमायांतराऽपततिनाद्यपवर्गयोर्य त् ॥ जन्मादयोस्ययदमीतवतस्यकिंस्युराद्यंतयोर्यदसतोऽस्तितदेवमध्ये ७

चूर्णिका

॥ श्रीभगवानुवाच ॥ यःअनुभवपर्यंतज्ञानेन संपन्नः सः इदं द्वैतं मयि मायामात्रं ज्ञात्वा ज्ञानसाधनं संन्यसेत् १ अयं विद्वत्संन्यासः ज्ञानिनस्तु अहमेवेष्टः मदृते नान्यत् स्वर्गादि २ ये तु ज्ञानविज्ञानसिद्धाः ते मम पदं विदुः किंच ज्ञानी यतः मां बिभर्ति अतः सः मे प्रियतमः ३ तस्य ज्ञानं स्तौति हे उद्धव ज्ञानलेशेन या सिद्धिः स्यात् सा तपस्तीर्थादिभिर्न ४ तस्मात् ज्ञानपर्यंतं यथा तथा स्वात्मानं ज्ञात्वा तत्संपन्नः सन् मामेव भज ५ किंच पूर्वे मुनयः ज्ञानविज्ञानयज्ञेन मां इष्ट्वा मामेव प्राप्ताः ६ हे उद्धव अयं आध्यात्मिकादिविकारः सः त्वयि माया न परमार्थः यतः आद्यंतयोर्न अतः जन्मादयः देहस्यैव अतः त्वं निर्विकारं ब्रह्मेति ७

॥९५॥

१ तत्पर्यंतमिति पाठो मु०पु० पुस्तके. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानादेर्विशेषंजिज्ञासुः पृच्छति । ज्ञानमिति । विशुद्धमेतत् । ज्ञानंविपुलंनिश्चितं यथाभवतितथाकथयेति । महद्भिर्ब्रह्मादिभिर्विमृग्यं ८ महद्भिर्मृग्यत्वमभिनयेनाह । तापत्रयेणाभितोहतस्य । अतः सं
तप्यमानस्यअंघ्रिद्वंद्वमेवातपत्रंतस्मान्नकेवलमातपत्रात् किंतुअमृतमिवाभितोवर्षतियत्तस्मात् ९ अतिकृपामुत्पादयन्नाह । दष्टमिति । अस्मिन्बिलेसंसारकूपेपतितंतत्रचकालसर्पेणदष्टं । एवमपिक्षुद्रसुखे
ष्वेवउरुस्तर्षस्तृष्णायस्यतं । दह्यमानःकथंसमुद्धरणीयइतिचेत्तत्राह । आपवर्ग्यैः अपवर्गबोधकैःवागमृतैरासिंच १० तद्विश्वासार्थंविद्वत्सभायांनिर्णीतमर्थंवक्ष्यामीत्याह इत्थमिति ११ १२ज्ञानादिभिरुपबृं
हितान्तत्सहितानित्यर्थः १३ तत्रज्ञानंकथयति । नवेति प्रकृतिपुरुषमहदहंकारपंचतन्मात्राणिएकादशेंद्रियाणिपंचभूतानित्रयोगुणाःएतान्भावानष्टाविंशतितत्त्वानिभूतेषुब्रह्मादिस्थावरांतेषुकार्येषुअनु
गतानियेनज्ञानेनेक्षेतेति । अथएष्वपिभावेषुएकंपरमात्मतत्त्वंअनुगतंयेनेक्षेत कार्यकारणात्मकंजगत्पश्यन्परमकारणात्मकमेवैतन्नतुततःपृथगितियेनपश्येत्तज्ज्ञानमित्यर्थः १४ विज्ञानमाह । एतदेवे
तिश्लोकार्धेन । यत्यदायेनैकेनानुगतानेकात्मकान्भावान्पूर्वमैक्षततान्तथापूर्ववन्नेक्षेतकिंतुतदेकंपरमकारणंब्रह्मैवतदाएतदेवविज्ञानमुच्यते । एतदुक्तंभवति । परोक्षज्ञानेनअपरोक्षभ्रमस्यदिङ्मोहादि
ष्विवनिवृत्त्यभावात्तदात्मकंजगत्पश्यन्नप्यात्मनःपृथक्सदितिमन्यतेअपरोक्षज्ञानेतुबाधितमेवदग्धपटवत्जीवन्मुक्तःसंस्कारशेषंपश्यति । ततःपरंनपश्यति । अतःपरोक्षापरोक्षज्ञानेज्ञानविज्ञानशब्दाभ्या
मुच्येतेइतिएकेनसर्वकार्याणामनुगतिंकार्याणांकारणात्पृथगसत्वंचोपपादयतिसार्धेन । तत्रचयदिनकदाचिदनीदृशंजगदित्यादिमतेनैतेषांभावानामुत्पत्त्यादयोनस्युस्तर्हिकारणस्यैकस्याभावादेकात्मता
मिथ्यात्वंचनस्यात्अतस्तेषामुत्पत्त्यादीन्साधयति स्थितीति । त्रिगुणात्मनांसावयवानामित्यर्थःविमताभावाउत्पत्त्यादिमंतःसावयवत्वात्घटादिवत् पश्येत् १५

॥ उद्धवउवाच ॥ ज्ञानंविशुद्धंविपुलंयथैतद्वैराग्यविज्ञानयुतंपुराणम् ॥ आख्याहिविश्वेश्वरविश्वमूर्तेत्वद्भक्तियोगंचमहद्विमृग्यम् ८ तापत्रयेणाभिहतस्य श्लोकाः
घोरेसंतप्यमानस्यभवाध्वनीश ॥ पश्यामिनान्यच्छरणंतवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ९ दष्टंजनंसंपतितंबिलेस्मिन्कालाहिनाक्षुद्रसुखोरुतर्षम् ॥ स
सुद्धरैनंकृपयापवर्ग्यैर्वचोभिरासिंचमहानुभाव १० ॥ श्रीभगवानुवाच ॥ इत्थमेतत्पुराराजाभीष्मंधर्मभृतांवरम् ॥ अजातशत्रुःपप्रच्छसर्वेषांनोऽनुशृ ८/१५
ण्वताम् ११ निवृत्तेभारतेयुद्धेसुहृन्निधनविह्वलः ॥ श्रुत्वाधर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत १२ तानहंतेऽभिधास्यामिदेवव्रतमुखाच्छ्रुतान् ॥ ज्ञान
वैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् १३ नवैकादशपंचत्रीन्भावान्भूतेषुयेनवै ॥ ईक्षेतार्थैकमप्येषुतज्ज्ञानंममनिश्चितम् १४ एतदेवहिविज्ञानंनतथैके
नयेनयत् ॥ स्थित्युत्पत्त्यप्ययान्पश्येद्भावानांत्रिगुणात्मनाम् १५

चूर्णिका ॥ उद्धव उवाच ॥ हे कृष्ण शुद्धं ज्ञानं वैराग्ययुतं भक्तियोगं च कथय ८ अत्र संसारे त्रिविधतापेन तप्तजनस्य ते अंघ्रिद्वंद्वात् अन्यत् शरणं न पश्यामि ९ अतोत्र सं
सारकूपे पतितं कालसर्पेण दष्टं जनं कृपया वागमृतैः सिंच उद्धर १० ॥ श्रीभगवानुवाच ॥ हे उद्धव एवं युधिष्ठिरः पुरा भीष्मं पप्रच्छ ११ भारते युद्धे निवृत्ते ॥९६॥
सति सुहृन्निधनविह्वलःसन् बहुधर्मान् श्रुत्वा मोक्षधर्मान् अपृच्छत् १२ तान् ज्ञानादियुक्तान् अहं अभिधास्यामि १३ तदेव ज्ञानमाह प्रकृत्यादिअष्टाविंशतितत्त्वानि
कार्येषु अनुगतानि तथा तत्त्वेषु अनुगतं एकं तत्त्वं तथा इदं जगत् परमकारणात्मकमेव इदं त्रयं येन पश्यति तत् ज्ञानम् १४ विज्ञानमाह यदा एकेन येन अनुगते
न एकात्मकान् भावान् पूर्वं ऐक्षत तान् तथा पूर्ववन्नेक्षेत किंतु तदेकं परमकारणं ब्रह्मैव तदेव विज्ञानम् तथा भावानांउत्पत्त्यादीन् पश्येत् १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ततआदावुत्पत्तौअंतेपरिणामांतरापत्तौचकारणत्वेनमध्येचाश्रयत्वेनकारणंसृज्यात्सृज्यंकार्यात्कार्यांतरंप्रतियदन्वियात्अनुगच्छेत् तत्प्रतिसंक्रामेतेषांलयेचयदवशिष्येततदेवसदितिपश्येदित्यर्थः १६
वैराग्यमाह । श्रुतिरितिद्वाभ्यां । श्रुतिः"नेहनानास्तिकिंचने"त्यादिः । प्रत्यक्षंपटादिकार्यंतंत्वादिव्यतिरेकेणनदृश्यते (चैतन्यव्यतिरेकेणचनकिंचिदृश्यतेइति) ऐतिह्यंतु महाजनप्रसिद्धिः । अनुमानं
तुविमतंमिथ्यादृश्यत्वात्शुक्तिरजतवत्इत्यादि । एवंप्रमाणचतुष्टयं । एतेष्वनवस्थानात्एतैर्बाधितत्वात्सएवंसर्वानुगतंसत्यमात्मतत्त्वंपश्यन् विकल्पस्यचमिथ्यात्वात्ततोविरज्यतेविरक्तोभवतीत्यर्थः
१७ ननुचवेदोक्तस्वर्गादिसुखाशयानविरज्येतेत्यत्राह । कर्मणामिति । आविरिंच्यात्ब्रह्मलोकपर्यंतंअदृष्टमपिसुखममंगलं (मत्सरादिदोषयुक्तं) । दुःखरूपंनश्वरंचपश्येत् १८ भक्तियोगंसकारणमा
ह । भक्तियोगः पूर्वमुक्तएवतथापितस्मिन्प्रीतिंप्राप्नुवतेतुभ्यंपुनश्चकथयिष्यामि १९ श्रद्धाश्रवणादरः शश्वदितिसर्वत्रानुषज्जते । मदनुकीर्तनंश्रवणानंतरंमत्कथाव्याख्यानमित्यर्थः २० २१ अंगचेष्टा
लौकिकीक्रिया । वचसालौकिकेनापिमद्गुणानामीरणंकथनं २२ मदर्थेमद्भजनार्थंतद्विरोधिनोऽर्थस्यपरित्यागः । भोगस्यतत्साधनस्यचंदनादेः सुखस्यपुत्रोपलालनादेः (मदर्थेर्थपरित्यागः) । इष्टा
दिवैदिकंयत्कर्मतदपिमदर्थंकृतंभक्तेःकारणमित्यर्थः २३ (एवंधर्मैरात्मानंनिवेदयंतितच्छीलानां) भक्तिः प्रेमलक्षणासंजायते । अस्यभक्तस्यान्यः कोर्थः साध्यरूपः साधनरूपोवाऽवशिष्यते सर्वो
पिततएवभवतीत्यर्थः २४ (तदेवाह) । तत्रकिंबहुनाचित्तमेवांतर्बहिर्निष्ठमर्थानर्थयोःकारणमित्याह यदात्मनीतिद्वाभ्याम् । यदाआत्मनिमयिईश्वरेचित्तमर्पितंतदाधर्मादीन्प्राप्नोत्येव २५ एतदेवव्यतिरे
केणद्रढयति । यत्यदातच्चित्तंविकल्पेदेहगेहादावर्पितंसत्परिधावतितदाधिकंरजस्वलंअसन्निष्ठंचभवतिततश्चविपर्ययंअधर्मादिकंविद्धि २६

॥९७॥

श्लोकाः १६—२६

आदावंतेचमध्येचसृज्यात्सृज्यंयदन्वियात् ॥ पुनस्तत्प्रतिसंक्रामेयाच्छिष्येततदेवसत् १६ श्रुतिःप्रत्यक्षमैतिह्यमनुमानंचतुष्टयम् ॥ प्रमाणेष्वनवस्थाना
द्विकल्पात्सविरज्यते १७ कर्मणांपरिणामित्वादाविरिंच्यादमंगलम् ॥ विपश्चिन्नश्वरंपश्येदहष्टमपिदृष्टवत् १८ भक्तियोगःपुरैवोक्तःप्रीयमाणायतेनघ ॥
पुनश्चकथयिष्यामिमद्भक्तेःकारणंपरम् १९ श्रद्धामृतकथायांमेशश्वन्मदनुकीर्तनम् ॥ परिनिष्ठाचपूजायांस्तुतिभिःस्तवनंमम २० आदरःपरिचर्यायां
सर्वांगैरभिवंदनम् ॥ मद्भक्तपूजाऽभ्यधिकासर्वभूतेषुमन्मतिः २१ मदर्थेष्वंगचेष्टाचवचसामद्गुणेरणम् ॥ मय्यर्पणंचमनसःसर्वकामविवर्जनम् २२ मदर्थे
ऽर्थपरित्यागोभोगस्यचसुखस्यच ॥ इष्टंदत्तंहुतंजप्तंमदर्थंयद्व्रतंतपः २३ एवंधर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् ॥ मयिसंजायतेभक्तिःकोऽन्योर्थो
ऽस्यावशिष्यते २४ यदात्मन्यर्पितंचित्तंशांतंसत्त्वोपबृंहितम् ॥ धर्मंज्ञानंसवैराग्यमैश्वर्यंचाभिपद्यते २५ यदर्पितंतद्विकल्पइंद्रियैःपरिधावति ॥ रज
स्वलंचासन्निष्ठंचित्तंविद्धिविपर्ययम् २६

चूर्णिका

तथा आदौ अंते मध्येकार्यांतरं यत् अन्वियात् पुनः पुनः प्रलये यत अवशिष्येत् तत् सत् इति पश्येत् १६ १७ वैराग्यमाह विद्वान् ब्रह्मलोकपर्यंतमदृष्टमपि सुखं नश्व
रं पश्येत् १८ हे उद्धव भक्तियोगस्तु पुरैवोक्तः पुनश्च भक्तेः कारणं वक्ष्यामि १९ मे कथायां श्रद्धा मत्कीर्तनं मत्स्तवनं २० मे नमनम् मद्भक्तपूजा सर्वत्र मन्मतिः
२१ मनसः मयि अर्पणम् २२ इष्टदानादि सर्वं कर्म मदर्थं कार्यम् १३ एवं धर्मैः आत्मनिवेदिनां मयि भक्तिः संजायते २४ किंच यदा चित्तं आत्मनि अर्पितंभवति
तदा पुमान् धर्मादीन् प्राप्नोति २५ यदा चित्तं देहादौ अर्पितं सत् धावति तदा असन्निष्ठं भवति ततः अधर्मादिकं विद्धि २६

॥९७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

स्वाभिप्रेतान्धर्मादीन्व्याचष्टे । धर्मोमद्भक्तिकृत्यः सएवप्रोक्तः प्रकृष्टउक्तः शास्त्रेषु २७ धर्मादीनांमहाजनप्रसिद्धानामन्यथाव्याख्यातत्वात्यमादिष्वपिसंख्यातः स्वरूपतोवाकिंचिद्वैलक्षण्यंस्यादितिसं
भावनयातद्विशेषंजिज्ञासुःपृच्छति यमइतिपंचभिः २८ इष्टंअभ्यर्हितंधनंचकिम् २९ परेतिविद्यादीनांविशेषणं श्रीमंडनम् ३० ३१ प्रश्नान्पृष्टानर्थान्विपरीतानशमादीन् ३२ यमानियमानाह । अ
हिंसेतित्रिभिः । अस्तेयं मनसापि परस्वाग्रहणम् । असंचयो विषयासंकल्पः (आस्तिक्यं धर्मेविश्वासः) ३३ शौचंबाह्यमाभ्यंतरंचेतिद्वयं अतोद्वादशनियमाः श्रद्धा धर्मादरः ३४ उभयोः श्लोकयोर्यंस्मृता
स्तेयमानियमाश्च । यद्वा उभयोः प्रवृत्तनिवृत्तयोः । मुमुक्षोर्यमामुख्याः सकामस्यनियमामुख्याः स्मृताइत्यर्थः । तत्रहेतुमाह । हियस्मादुपासिताः सेविताः संतः पुंसांप्रवृत्तानांनिवृत्तानांचयथाकामं
कामानुसारेणमोक्षमभ्युदयंचदुहंतीति ३५ मुमुक्षोरुपादेयान्शमादीन् हेयान्दुःखादीन्महाजनप्रसिद्धेभ्योविलक्षणानाह । शमइत्यादिना यावत्समाप्ति । एतेनैवतद्विपरीताअशमादयोप्युन्नेयाः शमोम
न्निष्ठताबुद्धेः नतुशांतिमात्रम् । दमइंद्रियसंयमः नचोरादिदमनम् । तितिक्षा विहितदुःखस्यसंमर्षः सहनं नभारादेः । जिह्वोपस्थयोर्जयोवेगधारणंधृतिर्नत्वनुद्वेगमात्रम् ३६

॥९८॥

श्लोकाः २७/३६

धर्मोमद्भक्तिकृत्प्रोक्तोज्ञानंचैकात्म्यदर्शनम् ॥ गुणेष्वसंगोवैराग्यमैश्वर्यंचाणिमादयः २७ ॥ उद्धवउवाच ॥ यमःकतिविधःप्रोक्तोनियमोवाऽरिकर्शन ॥
कःशमःकोदमःकृष्णकातितिक्षाधृतिःप्रभो २८ किंदानंकिंतपःशौर्यंकिंसत्यमृतमुच्यते ॥ कस्त्यागःकिंधनंचेष्टंकोयज्ञःकाचदक्षिणा २९ पुंसःकिंस्विद्बलं
ब्रह्मन्भगोलाभश्चकेशव ॥ काविद्याह्रीःपराकाश्रीःकिंसुखंदुःखमेवच ३० कःपंडितःकश्चमूर्खःकःपंथाउत्पथश्चकः ॥ कःस्वर्गोनरकःकःस्वित्कोबंधुरुत
किंगृहम् ३१ कआढ्यःकोदरिद्रोवाकृपणःकःकईश्वरः ॥ एतान्प्रश्नान्ममब्रूहिविपरीतांश्चसत्पते ३२ ॥ श्रीभगवानुवाच ॥ अहिंसासत्यमस्तेयमसंगोह्री
रसंचयः ॥ आस्तिक्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाऽभयम् ३३ शौचंजपस्तपोहोमःश्रद्धाऽऽतिथ्यंमदर्चनम् ॥ तीर्थाटनंपरार्थेहातुष्टिराचार्यसेवनम् ३४ एते
यमाःसनियमाउभयोर्द्वादशस्मृताः ॥ पुंसामुपासितास्तातयथाकामंदुहंतिहि ३५ शमोमन्निष्ठताबुद्धेर्दमइंद्रियसंयमः ॥ तितिक्षादुःखसंमर्षोजिह्वो
पस्थजयोधृतिः ३६

चूर्णिका

किंच मद्भक्तिकृत् यः सः धर्मः एकात्म्यदर्शनं यत् तत् ज्ञानं विषयेष्वसंगः इदं वैराग्यम् २७ ॥ उद्धव उवाच ॥ हे कृष्ण यमनियमौ कतिविधौ प्रोक्तौ शमः कःतथा
दमः कः तितिक्षा का धृतिः का दानं किं तपः किं शौर्यं किं सत्यं किं ऋतं किं त्यागः कः इष्टं धनं किं यज्ञः कः दक्षिणा का बलं किं भगः कः लाभः कः विद्या का
ह्रीः का श्रीः का सुखं किं दुःखं किं पंडितः कः मूर्खः कः पंथाः कः उत्पथः कः स्वर्गः कः नरकः कः बंधुः कः गृहं किं आढ्यः कः दरिद्रः कः कृपणः कः ईश्वरः कः एतान्
प्रश्नान् मम ब्रूहि २८ २९ ३० ३१ ३२ ॥ श्रीभगवानुवाच ॥ अहिंसा सत्यम् अचौर्यं असंगः ह्रीः असंचयः आस्तिक्यम् ब्रह्मचर्यम् मौनं स्थैर्यम् क्षमा अभयम् एते ॥९८॥
द्वादश यमाः ३३ शौचं द्विविधं जपः तपः होमः श्रद्धा आतिथ्यम् मदर्चनम् तीर्थाटनम् परार्थेहा तुष्टिः गुरुसेवा एते द्वादश नियमाः ३४ एतेउपासिताः संतः पुंसां
यथाकामं दुहंति ३५ बुद्धेर्मन्निष्ठता शमो ज्ञेयः इंद्रियसंयमो दमः दुःखसहनं तितिक्षा जिह्वोपस्थवेगधारणं धृतिः ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दंडोभूतद्रोहः तस्यत्यागोदानम् । नधनार्पणम् । कामत्यागोभोगोपेक्षातपःनकृच्छ्रादिः । स्वभावोवासनातस्यजयः प्रतिबंधः शौर्यं नाविक्रांतिः । समंब्रह्मतस्यदर्शनंआलोचनंसत्याविषयत्वात्सत्यं नयथार्थभाषणम् ३७ अन्यच्च । ऋतंसूनृतासत्याप्रियाचवाक्एवंचऋतसत्ययोः स्फुटएवविवेकः । क्रमप्राप्तंत्यागंव्याख्यातुमादौततोर्थभेदेनशौचंव्याचष्टे । तस्यापिमलत्यागरूपत्वेनत्यागादभेदप्रतीतेः कर्मसुअसंगमः अनासक्तिः शौचं त्यागस्तुसंन्यासइतितयोर्भेदइत्यर्थः ३८ नृणांइष्टंधनंधर्मः नपश्वादिसाधारणम् । भगवत्तमः परमेश्वरोऽहमेवयज्ञः मद्बुद्ध्यायज्ञोनुष्ठेयोनक्रियाबुद्ध्येत्यर्थः । यज्ञार्थंदानंदक्षिणासाचज्ञानोपदेशः नहिरण्यादिदानम् । तेनहियज्ञरूपोविष्णुः प्राप्यते दुर्दमदमनंबलंतच्चमनोदमनहेतुत्वात्प्राणायामइति ३९ लाभंव्याचिख्यासुः प्रथमंभगंततोभेदेनव्याचष्टे । लोकेतयोरभेदप्रसिद्धेः । भगोभाग्यंतच्चमेऐश्वरोभावोमदीयंऐश्वर्यादिषाड्गुण्यमित्यर्थः । उत्तमोलाभस्तुमद्भक्तिः नपुत्रादिः विद्याचात्मनिप्रतीतस्यभेदस्यबाधः नज्ञानमात्रम् । अकर्मसुजुगुप्साहेयत्वदर्शनंह्रीः नतुलज्जामात्रम् ४० गुणाएवश्रीर्नकिरीटादि । दुःखसुखयोरत्ययः अतिक्रमः अननुसंधानंसुखं नभोगः विषयभोगापेक्षैवदुःखं नाग्निदाहादि । बंधान्मोक्षंद्वयंवायोवेत्तिसपंडितः नविद्वन्मात्रम् ४१ अहंबुद्धिरित्युपलक्षणं देहगेहादिष्वहंममेत्यभिमानवान्मूर्खइत्यर्थः मन्निगमः मांनितरांगमयतिप्रापयतियोनिवृत्तिमार्गः सतुपंथाः सन्मार्गः नकंटकादिशून्यः । चित्तविक्षेपः प्रवृत्तिमार्गउत्पथः कुमार्गः नतुचोराद्याकुलः । सत्त्वगुणस्योदयः उद्रेकः स्वर्गः नेंद्रादिलोकः ४२ तमसउन्नाहउद्रेकः सनरकः नतामिस्रादिः गुरुरेवबंधुः नभ्रात्रादिः । सचाहमेव । यथाह जगद्गुरुः । "एकएवपरोबंधुर्विषमेसमुपस्थिते । गुरुःसकलधर्मात्मायत्राकिंचनगोहरि"रिति । ससाधनंभोगायतनंगृहंतच्चमानुष्यंमानुषरूपंशरीरमेव नहर्म्यादि । गुणैः संपन्नआढ्यउच्यते नधनी ४३ असंतुष्टोयः सदरिद्रः ननिःस्वः । यःअजितेंद्रियः सकृपणःनदीनः । विषयेष्वनासक्तधीर्यः सईशः स्वतंत्रः नराजादिः । गुणसंगः गुणेषुसंगोयस्यसः विपर्ययः अनीशः एतच्चाशमादिविपर्ययोपलक्षणम् ४४

श्लोकाः ३७—४४

दंडन्यासःपरंदानंकामत्यागस्तपःस्मृतम् ॥ स्वभावविजयःशौर्यंसत्यंचसमदर्शनम् ३७ ऋतंचसूनृतावाणीकविभिःपरिकीर्तिता ॥ कर्मस्वसंगमःशौचं त्यागःसंन्यासउच्यते ३८ धर्मइष्टंधनंनृणांयज्ञोहंभगवत्तमः ॥ दक्षिणाज्ञानसंदेशःप्राणायामःपरंबलम् ३९ भगोमऐश्वरोभावोलाभोमद्भक्तिरुत्तमः ॥ विद्यात्मनिभिदाबाधोजुगुप्साह्रीरकर्मसु ४० श्रीर्गुणानैरपेक्ष्याद्याःसुखंदुःखसुखात्ययः ॥ दुःखंकामसुखापेक्षापंडितोबंधमोक्षवित् ४१ मूर्खोदेहाद्यहंबुद्धिःपंथा मन्निगमःस्मृतः ॥ उत्पथश्चित्तविक्षेपःस्वर्गःसत्त्वगुणोदयः ४२ नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे ॥ गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४३ दरिद्रोयस्त्वसंतुष्टःकृपणोयोऽजितेंद्रियः ॥ गुणेष्वसक्तधीरीशोगुणसंगोविपर्ययः ४४

चूर्णिका

भूतद्रोहत्यागः दानं कामत्यागः तपः वासनाजयः शौर्यम् सर्वत्र ब्रह्मदर्शनं ३७ सत्यम् प्रियवाक् ऋतं कर्मस्वनासक्तिः शौचं संन्यासःत्यागः ३८ धर्मः इष्टं धनम् अहमेव यज्ञः ज्ञानोपदेशः दक्षिणा प्राणायामः बलं ३९ मदीयं ऐश्वर्यादि षाड्गुण्यं भगः मद्भक्तिः लाभः आत्मनि भेदबाधः विद्या अकर्मसु हेयत्वदर्शनं ह्रीः ४० नैरपेक्ष्यादिगुणाः श्रीः दुःखसुखत्यागः सुखं कामसुखेच्छा दुःखं बंधमोक्षवित्पंडितः ४१ देहाद्यहंबुद्धिः मूर्खः मत्प्रापकः मार्गः प्रवृत्तिमार्गः उत्पथः सत्त्वगुणोदयः स्वर्गः ४२तमसआधिक्यं नरकः गुरुरेवाहं बंधुः नृशरीरं गृहं गुणाढ्यः आढ्यः ४३ असंतुष्टः दरिद्रः अजितेंद्रियः कृपणः विषयेष्वनासक्तः ईशः तेषु आसक्तः अनीशः ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपसंहरति । एतइति । साधुमोक्षोपयोगितया । एतच्चसर्वंगुणदोषयोर्विवेकायोद्धवेनपृष्टमिति तयोः संक्षेपतोलक्षणमाह । किंबहुनावर्णितेन ४५ गुणदोषयोर्दृशिर्दर्शनंदोषः गुणस्तुतदुभयवर्जितस्वभाव इति ४६ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायामेकोनविंशोऽध्यायः १९ ॥ ॥ ७ ॥ ॥ विंशेयोगत्रयंप्रोक्तंभक्तिज्ञानक्रियात्मकम् । गुणदोषव्यवस्थार्थमधिकारिविभागतः ॥ १ ॥ "गुणदोषदृशिर्दोषोगुणस्तूभयवर्जित"इत्युक्तम् । तदाक्षिपति विधिश्चेतिपंचभिः । विधिश्चप्रतिषेधश्चेश्वरस्य तवनिगमआज्ञारूपोवेदः सचविधेयानांप्रतिषेध्यानांचकर्मणांगुणदोषंचपुण्यपापफलरूपमवेक्षते १ उत्तमाधमभावेनतदधिकारिणांवर्णानामाश्रमाणांचविकल्पंभेदंचगुणदोषरूपमवेक्षते । प्रतिलोमानुलोमजंचगुणंदोषंचतथैवावेक्षते । प्रतिलोमजाउत्तमवर्णासुस्त्रीषुहीनवर्णेभ्यः पुरुषेभ्योजाताः सूतवैदेहकादयः । अनुलोमजास्तूत्तमवर्णेभ्योहीनवर्णासुस्त्रीषुजातामूर्धावसिक्ताम्बष्ठादयः । तेषांच"असत्संतस्तुविज्ञेयाःप्रतिलोमानुलोमजा"इतिगुणदोषौ । द्रव्यादीन्कर्मार्हतानर्हताभ्यां स्वर्गंनरकंच तत्फलतयागुणदोषरूपमेवावेक्षते । एतच्चोत्तराध्यायेप्रपंचयिष्यते २ तथापिप्रस्तुतेकिमायातमतआह । गुणदोषेति । गुणदोषदृशिर्दोषइतितयोर्निराकृतत्वात् गुणदोषभिदादृष्टिमंतरेणतांविना (इदंविहितंइदनिषिद्धंइति) निषेधविधिलक्षणंकर्मकांडगतं तववचः कथं । तच्चवचोंतरेणनृणांनिश्रेयसंकथंस्यात् । तत्रापि (चित्तशुद्ध्यर्थंतस्यावश्यकत्वात् यद्वा) श्रोतव्योमंतव्यइत्यादिसाधनविधेः "नानुध्यायाद्बहूनूशब्दान्वाचोविग्लापनंहितदि"त्यादिनिषेधस्यचावश्यकत्वादितिभावः यद्वा गुणदोषभिदादृष्टिमंतरेणनिषेधविधिलक्षणं तववचोविनेतिसामानाधिकरण्यमेवास्तु । यद्वा गुणदोषभिदादृष्टिमंतरेणनिषेधविलक्षणमपिवचः कथंनुतत्त्वमस्यादिवाक्यवन्निश्रेयसकरंस्यात् सर्वस्यवेदस्यतत्परत्वांगीकारादित्यर्थः ३ ननु पितरोदेवाः (ऋषयः) चसर्वज्ञाः प्रत्यक्षतोदृष्ट्वामनुष्येभ्यः कथयिष्यंति नेत्याह । पित्रादीनांसर्वेषांतवत्वद्वाक्यरूपोवेदएवतुश्रेयःश्रेष्ठं चक्षुः प्रमापकं क्व अनुपलब्धेर्थेमोक्षेर्थेस्वर्गादौच तथासाध्यसाधनयोः इदमस्यसाध्यंइदमस्यसाधनंइत्यत्रापि । तदेवंगुणदोषदृष्ट्यभावेनिश्रेयसंनघटेत ४ किंच । शास्त्रेणैवविहितांभेददृष्टिंतस्मिन्नेवविषयेशास्त्रंकथंनिवर्तयेदित्याह । तेनिगमात् त्वदाज्ञारूपाद्वेदादेव नहिस्वतः । यस्मादर्थप्राप्तत्वेननिवर्तेत (भिदायाअपवादश्च निराकरणंनिगमेनैवोति) इस्फुटं भ्रमस्तंनिवर्तयेति शेषः ५

श्लोकाः ४६/५

एतउद्धववतेप्रश्नाःसर्वेसाधुनिरूपिताः ॥ किंवर्णितेनबहुनालक्षणंगुणदोषयोः ४५ गुणदोषदृशिर्दोषोगुणस्तूभयवर्जितः ४६ ॥ इतिश्रीभागवतेमहापुराणे एकादशस्कंधेएकोनविंशतितमोध्यायः १९ ॥ ७ ॥ उद्धवउवाच ॥ विधिश्चप्रतिषेधश्चनिगमोहीश्वरस्यते ॥ अवेक्षतेरविंदाक्षगुणदोषंचकर्मणाम् १ वर्णाश्रमविकल्पंचप्रतिलोमानुलोमजम् ॥ द्रव्यदेशवयःकालान्स्वर्गंनरकमेवच २ गुणदोषभिदादृष्टिमंतरेणवचस्तव ॥ निश्रेयसंकथंनृणांनिषेधविधिलक्षणम् ३ पितृदेवमनुष्याणांवेदश्चक्षुस्तवेश्वर ॥ श्रेयस्त्वनुपलब्धेर्थेसाध्यसाधनयोरपि ४ गुणदोषभिदादृष्टिर्निगमात्तेनहिस्वतः ॥ निगमेनापवादश्चभिदायाइतिहभ्रमः ५

चूर्णिका

एते उद्धव ते प्रश्नाः सर्वे साधु निरूपिताः किं वर्णितेन बहुना लक्षणं गुणदोषयोः ४५ गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ४६ इत्येकादशेएकोनविंशः १९॥ ७ ॥ ॥ उद्धव उवाच ॥ हे कृष्ण विधिः प्रतिषेधश्च तव आज्ञारूपो वेदः कर्मणां गुणदोषं अवेक्षते १ तथा वर्णाश्रमाणां भेदंगुणदोषरूपं अवेक्षते किंच प्रतिलोमानुलोमजम् द्रव्यदेशवयःकालस्वर्गनरकांश्च गुणदोषरूपान् अवेक्षते २ एवं सति गुणदोषभिदादृष्टिं विना ते वचः निःश्रेयसपरं कथं स्यात् ३ तथा पितृदेवादीनां मोक्षस्वर्गादौ त्वद्वाक्यरूपो वेद एव प्रमापकं चक्षुः तदेवं पुनः गुणदोषदृष्ट्यभावे साध्यसाधनयोः निःश्रेयसं न घटेत ४ किंचशास्त्रेणैव विहितां भेददृष्टिं तदेवशास्त्रं कथं निवर्तयेत् अत्र भ्रमो भवति तं निवर्तय ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विषयाभेदेप्यधिकारिभेदेनाविरोधंवक्तुंप्रथमंयोगत्रयमाह । योगाइतियोगाउपायाब्रह्मकर्मदेवताकांडैः प्रोक्ताः । कर्मचनिष्कामम् । श्रेयोविधित्सयामोक्षसाधनेच्छयाअन्यउपायोनास्तीतिकाम्यकर्मादिकंव्यावर्तयति । तथाचोत्तराध्यायेस्फुटीकरिष्यति यएतानित्यादिना ६ तेष्वधिकारिभेदमाह । निर्विण्णानामितिद्वाभ्यां इहएषांमध्ये कर्मसुनिर्विण्णानांदुःखबुद्ध्यातत्फलेषुविरक्तानांअतएवन्यासिनांफलसाधनभूतकर्मत्यागिनांज्ञानयोगःसिद्धिदइत्युत्तरेणान्वयः । अनिर्विण्णानांदुःखबुद्धिशून्यानांअतःकामिनांतत्फलेष्वपिसक्तानामित्यर्थः ७ यदृच्छयाकेनापिभाग्योदयेन ८ तत्रकाम्यकर्मसुप्रवर्तमानस्यसर्वात्मनाविधिप्रतिषेधाधिकारइत्युत्तराध्यायेवक्ष्यति । निष्कामकर्मयोगाधिकारिणस्तुयथाशक्ति । सचज्ञानभक्तियोगाधिकारात्प्रागेव तदधिकृतयोस्तुस्वल्पः ताभ्यांसिद्धानांतुनकिंचिदिति । सावधिकर्मयोगमाह । तावदितिनवभिः । कर्माणिनित्यनैमित्तिकानि । यावतायावत् ९ कर्मयोगिनोज्ञानभक्तिभूमिकारोहप्रकारमाह । स्वधर्मस्थइति । अनाशीः कामः अफलकामः । अन्यान्निषिद्धंकाम्यंच । नरकयानंहिस्वाद्धेधैवविहितातिक्रमाद्वानिषिद्धाचरणाद्वा । अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाचनरकंनयाति । अफलकामत्वान्नस्वर्गमपीत्यर्थः १० किंतु । अस्मिन्लोकेअस्मिन्नेवदेहेअनघः निषिद्धत्यागी (स्वधर्मस्थोविहितकारी अतः शुचिः निवृत्तरागादिमलः । यदृच्छयेतिकेवलज्ञानादपिभक्तिर्दुर्लभेतिद्योतयति ११ अनेनप्रकारेणज्ञानभक्तिसाधनत्वान्नरदेहंस्तौतिस्वर्गिणोपीति । निरायिणइतिदृष्टांतत्वेनोक्तंनिरयिणोयथेत्यर्थः । ज्ञानभक्तिभ्यांज्ञानभक्त्योः (साधकम् ।) तदुभयंतुस्वर्गिनारकिदेहं (असाधकं) १२ अतोनरः स्वर्गतिंनकांक्षेत् । नारकीमितिदृष्टांतः । यद्वा स्वर्गनरकसाधनकर्माणिनकुर्यादित्यर्थः । (नेमामिति ।) अस्यापि[1]श्रेष्ठत्वात्पुनरपिमनुष्यएवभवेयमित्यपिनकांक्षेत । यतोदेहावेशादेहासक्त्याप्रमाद्यतिस्वार्थेऽवधानशून्योभवति १३ अपितुएतद्देहंसाधकमितिविद्वान्तचार्थसिद्धिदमपिमर्त्यं (नश्वरं) ज्ञात्वाअप्रमत्तः अनलसः सन्मृत्योः पूर्वमेवमोक्षायघटेतयत्नंकुर्यात् १४

श्लोका ६–१४

॥ श्रीभगवानुवाच ॥ योगास्त्रयोमयाप्रोक्तानृणांश्रेयोविधित्सया ॥ ज्ञानंकर्मचभक्तिश्चनोपायोन्योस्तिकुत्रचित् ६ निर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसु ॥ तेष्वनिर्विण्णचित्तानांकर्मयोगस्तुकामिनाम् ७ यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान् ॥ ननिर्विण्णोनातिसक्तोभक्तियोगोस्यसिद्धिदः ८ तावत्कर्माणिकुर्वीतननिर्विद्येतयावता ॥ मत्कथाश्रवणादौवाश्रद्धायावन्नजायते ९ स्वधर्मस्थोयजन्यज्ञैरनाशीःकामउद्धव ॥ नयातिस्वर्गनरकौयद्यन्यन्नसमाचरेत् १० अस्मिँल्लोकेवर्तमानःस्वधर्मस्थोऽनघःशुचिः ॥ ज्ञानंविशुद्धमाप्नोतिमद्भक्तिंवायदृच्छया ११ स्वर्गिणोप्येतमिच्छंतिलोकंनिरयिणस्तथा ॥ साधकंज्ञानभक्तिभ्यामुभयंतदसाधकम् १२ ननरःस्वर्गतिंकांक्षेन्नारकींवाविचक्षणः ॥ नेमंलोकंचकांक्षेतदेहावेशात्प्रमाद्यति १३ एतद्विद्वान्पुरामृत्योरभवायघटेतसः ॥ अप्रमत्तइदंज्ञात्वामर्त्यमप्यर्थसिद्धिदम् १४

चूर्णिका

॥ श्रीभगवानुवाच ॥ हे उद्धव योगाः त्रयः मया प्रोक्ताः ६ तत्र विरक्तानांज्ञानयोगः सिद्धिदःकामिनां कर्मयोगः ७ यस्तु विरक्तः नातिसक्तश्च तस्य भक्तियोग इति ८ हे उद्धव यावत् वैराग्यं अथवा मत्कथाश्रवणादौ श्रद्धा न जाता तावत् कर्माणि कुर्यात् ९ एवं स्वधर्मस्थः निष्कामः सन् निषिद्धं यदि नाचरेत् तर्हि स्वर्गनरकौ न याति १० किंतु अत्रैव लोके ज्ञानं भक्तिं वा आप्नोति ११ १२ स्वर्गिणोपि एनं नृदेहं इच्छंति अतो नरः स्वर्गतिं इमं लोकं च नेच्छेत् १३ किंच इदं शरीरं अर्थसाधकं मर्त्यं च ज्ञात्वा मृत्योः पूर्वं मोक्षार्थं यतेत १४

[1], अस्यातिश्रेष्ठत्वादितिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अप्रमत्तः मुक्तसंगः सुखंप्राप्नोतीत्यत्रदृष्टांतः । छिद्यमानामिति । यमैः यमवन्निर्दयैः पुरुषैः कृतंनीडंयस्मिंस्तं स्वकेतंस्वस्याश्रयंअलंपटः अनासक्तः १५ दार्ष्टांतिकमाह । अहोरात्रैश्छिद्यमानमायुर्बुद्ध्वाभयेनवेपथुः कंपोयस्यसः (परंब्रह्म) १६ एवमप्रयतमानंप्रमत्तंनिंदति । नृदेहंप्लवंनावंप्राप्येत्यध्याहारः योभवाब्धिंनतरेत्सआत्महा । तत्रहेतवः । आद्यंसर्वफलानांमूलंएतदुपार्जितकर्मभिःसर्वप्राप्तेः । किंच । सुदुर्लभंउद्यमकोटिभिरपिप्राप्तुमशक्यंतथापिसुलभंयदृच्छयालब्धत्वात् । तच्चसुकल्पंपट्टुतरं किंचगुरुः संश्रितमात्रएवकर्णधारोनेतायस्यतम् । मयाचस्मृतमात्रेणानुकूलेनप्रेरितम् १७ एवंतावदविरक्तस्यवैराग्यद्वाराज्ञान[१]शक्तिसाधकंकर्मयोगमुक्त्वेदानींतस्म्याद्विरक्तस्यज्ञानयोगंतस्यचज्ञानप्राप्तेः पूर्वंकिंचित्कृत्यंवर्जनीयंचाह । सार्धैर्नवभिः । यदात्वारंभेषुकर्मसुनिर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फलेषुविरक्तश्चतदासंयतेंद्रियःसन्नात्मनोभ्यासेनआत्मविषयवृत्तिसंतत्याअचलंयथाभवतितथामनोधारयेत् १८ तत्रप्रथममेवात्यंतधारणासंभवात् तत्स्वभावनुसारेणवशीकरणमेवाह । यर्हिआशुभ्राम्यत्परिभ्रमदनवस्थितंभवतितदाअनुरोधेनांकिंचिदपेक्षापूरणद्वारेण १९ ननु तर्हियथापूर्वमेवस्यात्तत्राह । मनोगगिंतुनाविसृजेत् । नोपेक्षेत । किंतुअप्रमत्तःसन्लक्षयेदित्यर्थः २० अनुरोधमार्गंसदृष्टांतंस्तौति एषः अनुवृत्तिमार्गेणमनसः संग्रहः परमोयोगः तत्साधनत्वात्उपचारेणस्तुतिः । यथा अदांतस्यदमनायिस्यअर्वतः अश्वस्यहृदयज्ञत्वंस्वाभिप्रायेणगतिमन्विच्छन्अपेक्षमाणोऽश्वधारकः प्रथमंकिंचित्तद्गतिमनुवर्ततेतदाचरश्मिनातंधृत्वैवगच्छतिनतूपेक्षते तद्वदित्यर्थः २१ एवमीषद्वशीकृतस्यमनसोत्यंतनैश्चल्योपायानाह । सांख्येनेतित्रिभिः सांख्येनतत्त्वविवेकेनसर्वभावानांमहदादिदेहांतानांअनुलोमतः प्रकृत्यादिक्रमेणभवंप्रतिलोमतः पृथिव्यादिक्रमेणाप्ययंचानुध्यायेत् । प्रसीदतिनिश्चलंभवति २२

श्लोकाः १९–२२

छिद्यमानंयमैरेतैःकृतनीडंवनस्पतिम् ॥ खगःस्वकेतमुत्सृज्यक्षेमंयातिह्यलंपटः १५ अहोरात्रैश्छिद्यमानंबुद्ध्वायुर्भयवेपथुः ॥ मुक्तसंगःपरंबुद्ध्वानिरीहउपशाम्यति १६ नृदेहमाद्यंसुलभंसुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारम् ॥ मयानुकूलेननभस्वतेरितंपुमान्भवाब्धिंनतरेत्सआत्महा १७ यदारंभेषुनिर्विण्णोविरक्तःसंयतेंद्रियः ॥ अभ्यासेनात्मनोयोगीधारयेदचलंमनः १८ धार्यमाणंमनोयर्हिभ्राम्यदाश्वनवस्थितम् ॥ अतंद्रितोनुरोधेनमार्गेणात्मवशंनयेत् १९ मनोगतिंनविसृजेजितप्राणोजितेंद्रियः ॥ सत्त्वसंपन्नयाबुद्ध्यामनआत्मवशंनयेत् २० एषवैपरमोयोगोमनसःसंग्रहःस्मृतः ॥ हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतोमुहुः २१ सांख्येनसर्वभावानांप्रतिलोमानुलोमतः ॥ भवाप्ययावनुध्यायेन्मनोयावत्प्रसीदति २२

चूर्णिका

अत्र दृष्टांतः यथा खगः छिंद्यमानं वृक्षं हित्वा अन्यत्र याति १५एवं अहोरात्रैः छिंद्यमानं स्वायुर्बुध्वा संगं हित्वा निरीहः सन् उपशाम्यति १६ एवं यः न यतेत तं निंदति एवं नृदेहं नावं गुरुकर्णधारं प्राप्य यः भवाब्धिं न तरेत् सः आत्महा १७ अथ ज्ञानी कर्मसु विरक्तः सन् अचलं यथा तथा मनः धारयेत् १८ धार्यमाणमपिमनः परिभ्रमत् सत् चंचलं भवेच्चेत्तर्हि तदपेक्षापूरणद्वारेण स्ववशं नयेत् १९ किंच जितप्राणः मनोगतिं नोपेक्षेत किंतु स्वस्थः सन् तद्गतिं लक्षयेत् २० अयं मनसो निग्रहः परो योगः स्मृतः अत्र दृष्टांतः यथा अश्वधारकः प्रथमं किंचित्तद्गतिं अनुवर्तते तदा च रश्मिना तं धृत्वैव गच्छति न तु उपेक्षते तद्वत् २१किंच तत्वविवेकेन महदादिदेहांतानां क्रमोत्क्रमः ततः जन्मनाशौ यावत् मनः प्रसीदति तावत् अनुध्यायेत् २२

---

१ भक्तिसाधकमितिपाठः । २ अन्वनुध्यायेदितिपाठभेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

।निर्विण्णस्येतिततश्चागमापायिषुतेष्ववधिभूतात्मदर्शनात्तदविवेकापन्नसंसारेनिर्विण्णस्यअतोविरक्तस्यततश्चउक्तवेदिनः गुरूपदिष्टार्थालोचकस्यततोगुरुपदिष्टस्यैवाचिंतितस्यपुनःपुनरनुचिंतयादौरात्म्यं देहाद्यभिमानत्यंजाति २३ किंच। यमादिभिर्योगमार्गैः आन्वीक्षिक्यापदार्थद्वयशोधनेनममार्चनध्यानादिभिर्वा वाशब्देनास्यपक्षस्यस्वातंत्र्यंदर्शयाति। एतैरुपायैर्योग्यं (प्राप्यं) परमात्मानंप्रतिमनः स्मरेत्ना न्यैःअतोन्यमुपायंनकुर्यादित्यर्थः २४ ननु पापापत्तौप्रायश्चित्तंकार्यमेव तत्राह। यदीति । योगेनज्ञानाभ्यासेनैव ।एतच्चभक्तस्यापिनामकीर्तनाद्युपलक्षणार्थम् । नान्यत्कृच्छ्रादि २५ ननु नित्यनैमित्तिकं कर्मसत्त्वशोधकत्वाद्गुणः । हिंसादिकंत्वशुद्धिहेतुत्वाद्दोषः । तत्रचतन्निवर्तकत्वात्कृच्छ्रादिप्रायश्चित्तंगुणइतिविधिप्रतिषेधाभ्यामुक्तत्वात्प्रायश्चित्तंविनायोगेनैवकथंपापंदहेत्तत्राह । स्वेस्वेइतिसार्धेन । स एवगुणः नेतरः। तदुपपादयति । यस्मात्विधिप्रतिषेधाभ्यांअनेनगुणदोषविधानेनकर्मणांनियमः संकोचः कृतः । कुतइत्यतआह । जात्याउत्पत्त्यैवाशुद्धानाम् । सच (नियमः) प्राप्तानांसंगानां त्याजनेच्छयाकृतः । जपंभावः । पुरुषस्याशुद्धिर्नामनप्रवृत्तेरन्यास्ति। स्वभाविकप्रवृत्त्यैवतस्यमलिनत्वात् (अतस्तन्निवृत्तिरेवगुणः) साचसर्वतः सहसाकर्तुंनशक्यते । अतइदंनकर्तव्यंइदमेवकर्त व्यमित्येवंस्वाभाविकप्रवृत्तिसंकोचद्वारेणानिवृत्तिरेवाक्रियते । तथाचनप्रवृत्तिपरोवेदस्तथोत्तराध्यायेवक्ष्यामः उत्पत्त्यैवहिकामेष्वित्यादिना। अतोयोगिनः स्वाभाविकप्रवृत्त्यभावान्नप्रायश्चित्तादिविधिगोच रतेति (तत्रापिकदाचित्प्रमादेनप्रवृत्तिश्चेत्तन्निवर्तकोयोगस्तस्यतद्विरोधित्वादित्यर्थः) २६ भक्त्यधिकारिणोभक्तियोगमाह । जातश्रद्धइतिनवभिः । मत्कथासुजातश्रद्धः अतएवान्येषुकर्मसुउद्विग्नःन तुतत्फलेषुविरक्तः तदाह । वेदेति । यद्यपिवेद तथापितत्परित्यागेअनीश्वरः अशक्तः २७ एवंभूतोयः श्रद्धालुः भक्त्यैवसर्वंभविष्यतीतिदृढनिश्चयःसन् ततस्तदनंतरंमांप्रीत्याभजेत् । विषयांस्तुसेव मानोपितेषुप्रीतिंनकुर्यादित्याह गर्हयन्निति २८ कथंभजेतांकिंवाततोभवतितदाह। प्रोक्तेनेतिद्वाभ्याम् । "श्रद्धामृतकथायांमेशश्वन्मदनुकीर्तनामि" त्यादिनातत्रतत्रउक्तेनमामामसकृन्नित्यंभजतोहृदय्याह द्गताः कामानश्यंति २९

॥१०३॥

श्लोकाः २३—२९

निर्विण्णस्यविरक्तस्यपुरुषस्योक्तवेदिनः ॥ मनस्त्यजतिदौरात्म्यंचिंतितस्यानुचिंतया २३ यमादिभिर्योगपथैरान्वीक्षिक्याचविद्यया ॥ ममार्चोपासना भिर्वानान्यैर्योग्यंस्मरेन्मनः २४ यदिकुर्यात्प्रमादेनयोगीकर्मविगर्हितम् ॥ योगेनैवदहेदंहोनान्यत्तत्रकदाचन २५ स्वेस्वेऽधिकारेयानिष्ठासगुणःपरिकी र्तितः ॥ कर्मणांजात्यशुद्धानामनेननियमःकृतः ॥ गुणदोषविधानेनसंगानांत्याजनेच्छया २६ जातश्रद्धोमत्कथासुनिर्विण्णःसर्वकर्मसु ॥ वेददुःखात्म कान्कामान्परित्यागेप्यनीश्वरः २७ ततोभजेतमांप्रीतःश्रद्धालुर्दृढनिश्चयः ॥ जुषमाणश्चतान्कामान्दुःखोदर्कांश्चगर्हयन् २८ प्रोक्तेनभक्तियोगेनभजतो माऽसकृन्मुनेः ॥ कामाहृदय्यानश्यंतिसर्वेमयिहृदिस्थिते २९

चूर्णिका

एवं विरक्तस्य पुंसः मनः अभिमानं त्यजति २३ किं च यमादिभिर्योगमार्गैः ममार्चोपासनाभिर्वा योग्यं मनः परमात्मानं स्मरेत् नान्यैः अतोन्यन्न कुर्यात् २४यदियोगी प्रमादेन निषिद्धं कर्म कुर्यात् तर्हि योगेनैव अंहः दहेत् २५ ननु प्रायश्चित्तं विना योगेनैव कथं पापं दहेत्तत्राह स्वेस्वेऽधिकारे या स्थितिः स गुण उक्तः अनेन जात्यशुद्धानां कर्मणां संकोचः कृतः कुतः गुणदोषविधानेनसंगानां त्याजनेच्छया अतो योगिनः स्वाभाविकप्रवृत्त्यभावात् प्रायश्चित्तादिविधिगोचरतानेति २६ २७ अथ भक्तियोगमाह मत्कथासु श्रद्धावान् भक्तः दुःखात्मकान् कामान् वेद परंतु तत्त्यागे अनीशश्चेत्तर्हि तान् जुषन् प्रीतः सन् मां भजेत् तेषु प्रीतिं न कुर्यात् २८ एवं भक्तियोगेन भजतः पुंसः हृदय्याः कामाः नश्यंति २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ए. हृदयमेवग्रंथिरहंकारस्तत्पूर्वकाश्चसर्वेसंशयाअसंभावनादयः कर्माण्यनारब्धफलानिसंसारहेतुभूतानि ३० तदेवंव्यवस्थयाअधिकारत्रयमुक्तं तत्रचभक्तेरन्यानिरपेक्षत्वादन्यस्यचतत्सापक्षेत्वाद्भक्तियोगएवश्रे अ०
ष्ठइत्युपसंहरति । तस्मादितित्रिभिः । मदात्मनः मयिअत्माचित्तंयस्यतस्यश्रेयःश्रेयःसाधनम् ३१ तत्रहेतुः । यत्कर्मभिरित्यादि । इतरैरपितीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भाव्यंसत्त्वशुद्ध्यादितत्सर्वं
अंजसाऽनायासेनैव (यदिवांच्छतितर्हि) स्वर्गमपवर्गमद्धामवैकुंठंचलभतेएव (यदीत्यनेन) वांच्छातुनास्तीतिदर्शितम् ३२ ३३तदेवाह । नाकिंचिदिति । धीराधीमंतः यतोममएकांतिनः मय्येवप्री
टीका तियुक्ताः (अतः स्वर्गादिकिंचिन्नवांच्छंति) अपुनर्भवंआत्यंतिकमपिकैवल्यंमयादत्तमपिनगृह्णंति किंवक्तव्यंनवांच्छंतीत्यर्थः ३४ तदुपपादयति । नैरपेक्ष्यमेवपरंउत्कृष्टंअनल्पकंमहत्निश्रेयसंफलंत ॥२०॥
त्साधनंचप्राहुः मे (मम) भक्तिः निराशिषः प्रार्थनाशून्यस्य।निरपेक्षस्यप्रार्थनाकारणभूतापेक्षारहितस्यपुंसोभवेत्। यद्वा मेनिरपेक्षस्ययाभक्तिः सानिराशिषोभवेदित्यर्थः ३५ अनेनचप्रकारेणासि
द्धानांनगुणदोषाइतिविरोधपरिहारमुपसंहरति। नमयीति गुणदोषैर्विहितप्रतिषिद्धैरुद्भवोयेषांतेगुणाः पुण्यपापादयः साधूनांनिरस्तरागादीनांअतःसमचित्तानांअतएवबुद्धेः परमीश्वरंप्राप्तानां ३६ काम्य
॥१०४॥ कर्मनिष्ठांनिंदिष्यन्नेतान्मुक्तिमार्गानुपसंहरति एवामिति मेपथः मत्प्राप्त्युपायान्येअनुतिष्ठंतितेक्षेमंकालमायादिरहितंममलोकंविंदंतियत्परमंब्रह्मतच्चविदुः ३७ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कं
धेटीकायांविंशोध्यायः २० ॥ ॥ ७ ॥ ॥

भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः ॥ क्षीयंतेचास्यकर्माणिमयिदृष्टेऽखिलात्मनि ३० तस्मान्मद्भक्तियुक्तस्ययोगिनोवैमदात्मनः ॥ नज्ञानंनचवैराग्यं श्लोकाः
प्रायःश्रेयोभवेदिति ३१ यत्कर्मभिर्यत्तपसाज्ञानवैराग्यतश्चयत् ॥ योगेनदानधर्मेणश्रेयोभिरितरैरपि ३२ सर्वंमद्भक्तियोगेनमद्भक्तोलभतेंऽजसा ॥ स्वर्गा
पवर्गंमद्धामकथंचिद्यदिवांच्छति ३३ नकिंचित्साधवोधीराभक्ताह्येकांतिनोमम ॥ वांच्छंत्यपिमयादत्तंकैवल्यमपुनर्भवम् ३४ नैरपेक्ष्यंपरंप्राहुर्निश्रेयस ३०/३७
मनल्पकम् ॥ तस्मान्निराशिषोभक्तिर्निरपेक्षस्यमेभवेत् ३५ नमय्येकांतभक्तानांगुणदोषोद्भवागुणाः ॥ साधूनांसमचित्तानांबुद्धेःपरमुपेयुषाम् ३६ एवमे
तान्मयादिष्टाननुतिष्ठंतिमेपथः ॥ क्षेमंविंदंतिमत्स्थानंयद्ब्रह्मपरमंविदुः ३७ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेविंशतितमोध्यायः २० ॥

चूर्णिका हृदयग्रंथिः भिद्यते सर्वसंशयाः छिद्यंते सर्वकर्माणि क्षीयंते ३० अतः मद्भक्तियुक्तस्य पुंसः ज्ञानवैराग्यादिभिः प्रायः न श्रेयःसाधनं भवेत् ३१ किंच कर्मतपआदिभिर्यत् भाव्य ॥१०४॥
चित्तशुद्ध्यादि ३२ तत्सर्वं भक्तियोगेन मद्भक्तः लभते तथा यदि वांच्छति तर्हि स्वर्गापवर्गं आप्नोति ३३ ये तु साधवः मया दत्तमपि मोक्षं न वांछंति ३४ यतः नैरपेक्ष्यं
परं श्रेयः प्राहुः तस्मान्निराशिषः भक्तस्य भक्तिर्भवेत् ३५ हे उद्धव मयि एकांतभक्तानां परं प्राप्तानां गुणदोषोद्भवाः गुणाः पुण्यपापादयः न भवंति ३६ एवमेतान्
मयादिष्टाननुतिष्ठंति मे पथः क्षेमं विंदंति मत्स्थानं यद्ब्रह्म परमं विदुः ३७ इत्येकादशे विंशः २० ॥ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयतिश्रीपरानंदःपरमात्मानृकेसरी । यत्कृपालवलेशेनश्रीधरःसत्कृतिःकृती ॥ १ ॥ ईक्षंतामिच्छयासंतःक्षमंतांममसाहसम् । मयाहिस्वीयबोधायकृतमेतद्यथामति ॥ २ ॥ एकविंशेक्रियाज्ञानभक्तिष्वनधिकारिणाम् । कामिनांद्रव्यदेशादिगुणदोषाःप्रपंचिताः ॥ ३ ॥ तदेवंगुणदोषव्यवस्थार्थयोगत्रयमुक्तंतत्रचज्ञानभक्तिसिद्धानांनकौचिद्गुणदोषौ । साधकानांतुप्रथमतोनिवृत्तकर्मनिष्ठानांयथाशक्तिनित्यनैमित्तिकंकर्मसत्त्वशोधकत्वाद्गुणः । तदकरणंनिषिद्धकरणंचतन्मलीमसत्वाद्दोषः । तन्निवर्तकत्वाच्चप्रायश्चित्तंगुणः विशुद्धसत्त्वानांतुज्ञाननिष्ठानांज्ञानाभ्यासएवसिद्धिहेतुत्वाद्गुणः भक्तिनिष्ठानांपुनःश्रवणकीर्तनादिभक्तिरेवगुणः तद्विरुद्धंसर्वमुभयेषांदोषइत्युक्तम् । इदानींयेतुनासिद्धानापिसाधकाः किंतुकेवलंकाम्यकर्मप्रधानास्तेषांसकलगुणदोषान्प्रपंचयिष्यन्आदौतानतिबहिर्मुखान्निंदति । यएतानिति। मत्पथः मदुक्तमार्गान् । क्षुद्रान् तुच्छान् चलैरस्थिरैः । प्राणैर्देहवायुभिरिंद्रियैर्वातुषंतः सेवमानाभवंतितेसंसरंति । निखिलगुणदोषभाक्त्वेननानायोनीः प्राप्नुवंतीत्यर्थः १ ननु तैरेवकर्मभिःकेचिद्गुणदोषभाजः केचिन्नेतिकुतोवैषम्यं नह्यग्निनाकेचित्तप्यंतेकेचिन्नेतिसंभवति (कुतोवाकाम्यकर्मणांविधानंस्वर्गकामोयजेतेत्यादि) तत्राह । स्वेस्वइति । अधिकारिभेदेनकल्पितौगुणदोषौनवस्तुनिष्ठौ । (तथाप्रवृत्तिसंकोचार्थमेवविधानंच) इतिभावः २ तदेवाह । शुद्ध्यशुद्धीइति । (वक्ष्यमाणरीत्यासमानेष्वपिवस्तुषुद्रव्यस्यभूम्यादेः शुद्ध्यादिविधानं) विचिकित्सार्थंसंशयार्थंइदंयोग्यमयोग्यंवेत्यादिसंदेहद्वारास्वाभाविकप्रवृत्तिप्रतिबंधार्थमित्यर्थः । तत्रशुद्ध्यशुद्धीयोग्यत्वायोग्यत्वे । गुणदोषौतन्निमित्तोपादेयत्वानुपादेयत्वे । शुभाशुभौतन्निमित्तावर्थानर्थौ ३ (किंच) । तत्रशुद्ध्यशुद्धीधर्मार्थंशुद्धेनधर्मः अशुद्धेनाधर्मः (इत्यपूर्वमपितत्प्रयोजनमित्यर्थः तत्रापि) गुणदोषौव्यवहारार्थं अशुद्धावपिराजादीनांव्यवहारदर्शनादिकमुपादेयंनान्यादिति । (तत्रच) शुभाशुभौयात्रार्थंदोषत्वेप्यापत्सुशरीरनिर्वाहमात्रोपादाने नपापं अधिकोपादानेपापमिति । (एवंधर्मव्यवहारयात्रासिद्ध्यर्थं) मयामन्वादिरूपेणधर्मरूपांधुरंभारंउद्वहतांकर्मजडानामित्यर्थः (अयंशुद्ध्यादिरूपआचारोदर्शितः) ४ शुद्ध्यशुद्धीप्रपंचयिष्यन् । वेदोक्तत्वेनतदभिनिवेशोमाभूदितिसमानेष्वपिवस्तुषु इतियदुक्तंतत्प्रपंचयति भूमीतित्रिभिः (आब्रह्मस्थिरचराणां) भूतानांप्राणिनां(भूम्यादयः) धारयंतीतिधातवः कारणानिशारीराःशरीरारंभकाः । देहतः साम्यमुक्तम् । जीवतोप्याह । आत्मसंयुताहति ५ धातुषुदेहेषुनामरूपाणिवर्णाश्रमादीनि । कल्पनायाः प्रयोजनमाह । एतेषांप्राणिनांस्वार्थसिद्धयेप्रवृत्तिनियमद्वाराधर्मादिपुरुषार्थसिद्धये । (अन्यथारागप्राप्तायाः प्रवृत्तेर्नियमोनस्यात्नापिधर्मादिसिध्येदित्यर्थः) ६

श्लोकाः १–६

श्रीभगवानुवाच ॥ यएतान्मत्पथोहित्वाभक्तिज्ञानक्रियात्मकान् ॥ क्षुद्रान्कामांश्चलैःप्राणैर्जुषंतःसंसरंतिते १ स्वेस्वेधिकारेयानिष्ठासगुणःपरिकीर्तितः ॥ विपर्ययस्तुदोषःस्यादुभयोरेषनिश्चयः २ शुद्ध्यशुद्धीविधीयेतेसमानेष्वपिवस्तुषु ॥ द्रव्यस्यविचिकित्सार्थंगुणदोषौशुभाशुभौ ३ धर्मार्थंव्यवहारार्थंयात्रार्थमितिचानघ ॥ दर्शितोयंमयाचारोधर्ममुद्वहतांधुरम् ४ भूम्यंब्वग्न्यनिलाकाशाभूतानांपचधातवः ॥ आब्रह्मस्थावरादीनांशारीराआत्मसंयुताः ५ वेदेननामरूपाणिविषमाणिसमेष्वपि ॥ धातुषूद्धवकल्प्यंतएतेषांस्वार्थसिद्धये ६

चूर्णिका ॥ श्रीभगवानुवाच ॥ हेउद्धव ये एतान् त्रीन् योगान् हित्वा इंद्रियैः कामान् जुषंति ते गुणदोषभाक्त्वेन नाना योनीः प्राप्नुवंति १ एतौ गुणदोषौ तु अधिकारभेदेन कल्पितौ न वस्तुनिष्ठौ २ तदेवाह समानेषुवस्तुषु द्रव्यस्यविचिकित्सार्थं शुद्ध्यशुद्ध्यादि विधीयते ३ तत्र धर्मार्थं शुद्ध्यशुद्धी व्यवहारार्थं गुणदोषौ यात्रार्थं शुभाशुभौ अयं आचारः कर्मजडानां मन्वादिरूपेण मया दर्शितः ४ समानेष्वपि वस्तुषु इति यदुक्तं तत्प्रपंचयति ब्रह्मादिस्थावरांतेषु देहात्मत्वेन एकरूपेष्वपि ५ वेदेन विषमाणि नामरूपाणि धर्मादिसिद्धये कल्प्यंते ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ए. न केवलंदेहेष्वेदअपितुदेशकालादिभावानामपि । आदिशब्देनानुपादेयानांफलनिमित्ताधिकारिणांग्रहणम् । वस्तूनामुपादेयानांव्रीह्यादीनामपि ममया (कर्मणां) नियमार्थप्रवृत्तिसंकोचार्थमित्यर्थः ७एवं अ०
गुणदोषविषयंपरिशोध्य तयोः शुद्ध्यशुद्धिमूलत्वाच्छुद्ध्यशुद्धीप्रपंचयति अकृष्णसारइत्यष्टभिः । देशानांमध्येऽअकृष्णसारःकृष्णमृगरहितोशुचिः तत्रापिअब्रह्मण्यः ब्राह्मणभक्तिशून्योऽत्यंतमशुचिः
टीका क्रष्णसारोपिकृष्णेनमृगेणसारःश्रेष्ठोऽपिअसौवीरःकीकटः सुवीराःसत्पुरुषाः तद्वान् सौवीरःतादृशोनभवतिसकीकटतुल्यः । अर्थात्सौवीरःकीकटोपिशुचिः । तदुक्तं । "सर्वेपुण्यतमोदेशः सत्पात्रंयत्र ॥२१॥
लभ्यत"इति ; यद्वा असौवीरोदेशोऽशुचिः तथाकीकटोअंगवंगकलिंगादिरशुचिः असंस्कृतःसंमार्जनादिशून्यः म्लेच्छबहुलोवाईरणंऊषरं । एकवद्भावः । तत् अशुचि । तदन्यः शुचिः ८ कालस्यशुद्ध्य
शुद्धीदर्शयति । कर्मण्यइति द्रव्यतः द्रव्यसंपत्त्यास्वतोवापूर्वाह्लादिर्यः कर्मण्यः कर्मार्हःसकालस्तस्मिन्कर्मणिगुणवान् शुद्धइत्यर्थः । यतः यस्मिन् द्रव्यालाभेनवाराष्ट्रविप्लवादिनावाकर्मनिवर्तते यश्चसू
॥१०६॥ तकादौदशाहादिलक्षणोऽकर्मकः कर्मानर्हः स्मृतः सकालो दोषः अशुद्धइत्यर्थः ९ वस्तुशब्दोपात्तानांद्रव्याणांशुद्ध्यशुद्धीदर्शयति । द्रव्यस्येतिचतुर्भिः द्रव्येण तोयादिनाशुद्धिः मूत्रादिनात्वशु
द्धिः । वचनेन शुद्धमशुद्धंचेतिसंदेहेशुद्धमित्येवंरूपेणब्राह्मणवचनेनशुद्धिः विपरीतेनाशुद्धिः संस्कारेणप्रोक्षणादिनापुष्पादेःशुद्धिःअवघ्राणादिनात्वशुद्धिःकालेन"कालेमेघोदकंग्राह्यंवर्ज्यंतुत्र्यहमेवहि ।
अकालेदशरात्रंस्यात्ततःशुद्धिर्विधीयते" । दशाहादिनानवोदकादेःशुद्धिः विपरीतेनाशुद्धिः पर्युषितान्नादेरशुद्धिः । अंत्यजाद्युपहतानां तडागाद्युदकानां महत्त्वाल्पत्वाभ्यां शुद्ध्यशुद्धी १०शक्त्याशक्त्ये
ति । सूर्योपरागादौअन्नादेःशक्तान्प्रत्यशुद्धिः अशक्तान्प्रतिशुद्धिः । (बालवृद्धातुरान्) बुद्ध्यापुत्रजन्मादौदशाहाद्बहिर्ज्ञानेनशुद्धिः अंतर्ज्ञानेनाशुद्धिः । समृद्ध्याजीर्णमलवस्त्रादेः समृद्धंप्रत्य
शुद्धिः दरिद्रं प्रतिशुद्धिः । तत्रापिविशेषमाह । यदिति । एतेचद्रव्यवचनादयोद्रव्याशुद्धिद्वाराआत्मनेयदघंकुर्वंति तद्देशावस्थानुसारतएवयथायथावत्कुर्वंतिनसर्वतः तथाहि ।निर्भयएवदेशेकुर्वंति न तु
चौराद्याकुले । तथारोगादिव्यतिरिक्तयुवाद्यवस्थायामेवकुर्वंति न तु बाल्यरोगाद्यवस्थायामिति । तथाचस्मृतिः । "देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनं । उपपत्तिमवस्थांचज्ञात्वाशौचंप्रक
ल्पये"दिति ११ द्रव्यादिभिर्द्रव्यस्यशुद्धिरित्युक्तं तत्रवचनादिशुद्धिरेकरूपैव । द्रव्यशुद्धिस्तुबहुरूपेति तांप्रपंचयति धान्येति । दारुलौकिकं ग्रहचमसादिच । अस्थि गजदंतादि । रसास्तैलघृतादयः
तैजसाः सुवर्णादयः तेषांपार्थिवानांचरथ्याकर्दमघटेष्टकादीनांयथायथंकालादिभिः युतायुतैर्मिलितैः केवलैश्चशुद्धिः तत्रापिकांत्यजाद्युपघाततारतम्येनदेशकालावस्थाद्यनुसारेणचएतैरन्यैश्च
युतायुतैः (शुद्धिः) मिलितैःकेवलैः कालस्यपुनर्ग्रहणंयुतत्वप्रदर्शनार्थं १२

देशकालादिभावानांवस्तूनांममसत्तम ॥ गुणदोषौविधीयेतेनियमार्थंहिकर्मणाम् ७ अकृष्णसारोदेशानामब्रह्मण्योऽशुचिर्भवेत् ॥ कृष्णसारोप्यसौवीरःकी श्लोकाः
कटोऽसंस्कृतेरिणम् ८ कर्मण्योगुणवान्कालोद्रव्यतःस्वतएववा ॥ यतोनिवर्ततेकर्मसदोषोऽकर्मकःस्मृतः ९द्रव्यस्यशुद्ध्यशुद्धीचद्रव्येणवचनेनच ॥ सं ७
स्कारेणाथकालेनमहत्त्वाल्पतयाथवा १० शक्त्याऽशक्त्याऽथवाबुद्ध्यासमृद्ध्याचयदात्मने ॥ अघंकुर्वंतिहियथादेशावस्थानुसारतः ११ धान्यदार्वस्थितं १२
तूनांरसतैजसचर्मणाम् ॥ कालवाय्वग्निमृत्तोयैःपार्थिवानांयुतायुतैः १२

चूर्णिका तथा देशकालादीनां कर्मणां संकोचार्थं गुणदोषौ विधीयेते ७ तदेवाह देशानां मध्ये कृष्णमृगरहितः देशः अशुचिः कीकटोपि कृष्णमृगयुतश्चेच्छुचिः ८ ॥१०६॥
कालस्तु द्रव्यसपत्त्यायुतः शुभः तद्रहितः सूतकादिः अशुभः ९ द्रव्यस्य शुद्ध्यशुद्धी तु द्रव्यवचनादिना ज्ञेये १० एते द्रव्यवचनादयः यत् आत्मने अघं कु
र्वंति तत् देशावस्थानुसारतएव ११ किंच धान्यदार्वादीनां शुद्धिस्तु कालवाय्वादिना ज्ञेया १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. ए. अस्पृश्यस्पर्शेशुद्धिमुक्त्वालेपविषयेप्याह । यत्पीठपात्रवस्त्रादियेनतक्षणक्षाराम्लोदकादिनागंधंचलेपंचव्यपोहतित्यजति स्वगतंचमलंत्यक्त्वाप्रकृतिंस्वमेवरूपंभजतेतस्यतच्छौचंशोधकं । यावतातक्षणा अ०
दिनाव्यपोहतितावत्प्रमाणं स्वरूपतआवृत्तितोवातत्कर्तव्यमिष्यते १३ एवंतावद्द्रव्यशुद्धिरुक्ता । इदानींकर्तृशुद्धिमाह । स्नानेति । तपः कृच्छ्रादि अवस्थाकौमारादिः वीर्यंशक्तिः संस्कारउपनयना
दिः कर्मसंध्योपासनादिदीक्षालक्षणं । आत्मनः साहंकारस्यकर्तुः एतैःस्नानादिभिर्यथायथंतत्कार्यानुसारिणीशुद्धिः।इयंचशुद्धिर्नव्यवहारार्थाकिंतुविहितकर्मार्थेत्याह । शुद्धइति । द्विजइत्युपलक्षणंशूद्रादेर
टीका पि १४ मंत्रशुद्धिमाह । सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्यशुद्धिः । कर्मशुद्धिमाह । ईश्वरार्पणं कर्मणः शुद्धिः धर्मोद्यर्थंशुद्ध्यशुद्धीप्रपंचतःप्रदर्श्योपसंहरति धर्मइति । देशकालद्रव्यकर्तृमंत्रकर्मभिः ष ॥२१॥
ड्भिः शुद्धैर्धर्मः संपद्यते । एतेषांयोविपर्ययः सोऽधर्मः विपर्ययहेतुकोऽधर्मइत्यर्थः १५ अयंचगुणदोषविभागोनवास्तवइत्याह । क्वचिदिति । आपदिप्रतिग्रहोगुणोप्यनापदिनिषिद्धत्वाद्दोषः परधर्मः
॥१०७॥ परस्यगुणोपिस्वस्यदोषः । दोषोपिकुटुंबत्यागादिर्विरक्तादेर्नदोषः अपितुविधिबलेनगुणः एवंयोयं गुणदोषयोरेकस्मिन्नेवार्थेनियमः गुणदोषार्थवायोनियमः नियामकंशास्त्रंसतयोर्भेदमेवबाधते ।
(तस्यतन्निवृत्तावेवतात्पर्यात्) १६ दोषस्यक्वचिद्दोषत्वाभावेगुणत्वेचोदाहरणंदर्शयति । समानस्यैकस्यैवकर्मणःसुरापानादेराचरणंअपतितानांपतनहेतुरपिजात्याकर्मणावापतितानांपुनःपातकंअ
धिकारभ्रंशकंनभवतिपूर्वमेवपतितत्वात् । अतोत्रदोषस्यापिदोपतानास्तीत्यर्थः । तथासंगोपियोयतेर्दोषःसगृहस्थस्यौत्पत्तिकःपूर्वस्वीकृतोनदोषः अपितुगुणः "ऋतौभार्यामुपेयादि"त्यादिविधानात् । उभ
यत्रदृष्टांतःपूर्वमेवाधःशयानोयथानपततीति १७ अतोगुणदोषनियमविधीनांप्रवृत्तिसंकोचद्वारानिवृत्तावेवतात्पर्यमित्यभिप्रेत्याह ।यतोयतइति (यतोयतोदेशकालादेरशुद्धात्। एषशुद्धैर्देशकालादिभिः सं
पन्नः क्षेमः अभीष्टकृत् । शोकमोहरूपंयद्भयमनिष्टंतदपहंतिच) १८ यथाश्रुतप्रवृत्तिपरत्वंवेदस्यनिराकर्तुंप्रवृत्तिमार्गस्यानर्थहेतुतांदर्शयति । विषयेष्वितिचतुर्भिः ।(गुणाध्यासात्गुणबुद्ध्याचिंतना
त्ततस्तेषु) संगआसक्तिः । तत्रतेषुविषयेषु । येनप्रतिहन्यतेकामस्तेनसहकामादेवकलिः कलहोविवादः १९ दुर्विषहस्तीव्रःतंक्रोधं (अनुलक्ष्य) तमः संमोहः (व्यापिन्यपि) चेतनाकार्याकार्य
स्मृतिः द्रुतंशीघ्रम् २०

अमेध्यलिप्तंयद्येनगंधलेपंव्यपोहति ॥ भजतेप्रकृतिंतस्यतच्छौचंतावदिष्यते १३ स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः ॥ मत्स्मृत्याचात्मनः श्लोकाः
शौचंशुद्धःकर्माचरेद्द्विजः १४ मंत्रस्यचपरिज्ञानंकर्मशुद्धिर्मदर्पणम् ॥ धर्मःसंपद्यतेषड्भिरधर्मस्तुविपर्ययः १५ क्वचिद्गुणोपिदोषःस्याद्दोषोपिविधिनागुणः
॥ गुणदोषार्थनियमस्तद्भिदामेवबाधते १६ समानकर्माचरणंपतितानांनपातकम् ॥ औत्पत्तिकोगुणःसंगोनशयानःपतत्यधः १७ यतोयतोनिवर्तेतविमुच्येत १३
ततस्ततः ॥ एषधर्मोनृणांक्षेमःशोकमोहभयापहः १८ विषयेषुगुणाध्यासात्पुंसःसंगस्ततोभवेत् ॥ संगात्तत्रभवेत्कामःकामादेवकलिर्नृणाम् १९ कलेर्दु २०
र्विषहःक्रोधस्तमस्तमनुवर्तते ॥ तमसाग्रस्यतेपुंसश्चेतनाव्यापिनीद्रुतम् २०

चूर्णिका किंच अमेध्यलिप्तं यत् तत् येन तक्षणादिना गंधं लेपं त्यजति तत् तस्य शौचं १३ कर्ता तु स्नानदानादिना मत्स्मृत्या च देहं विशोध्य कर्म आचरेत् १४ किं च
सद्गुरुमुखात् यथावत् ज्ञानं मंत्रशुद्धिः मदर्पणं कर्मशुद्धिः १५ क्वचिद्गुणोपि दोषः स्यात् दोषोपि विधिना गुणः एवं योयं गुणदोषयोः एकस्मिन्नर्थे नियमः सः तयोर्भे ॥१०७॥
दमेव बाधते १६ अतः गुणदोषनियमविधीनां प्रवृत्तिसंकोचद्वारा निवृत्तावेव तात्पर्यमिति अभिप्रेत्याह १७ यतः यतः निवर्तेत ततः ततः विमुच्येत अयं धर्मः नृणां
क्षेमकरः १८ अथ प्रवृत्तिमार्गस्य अनर्थतामाह पुंसः विषयेषु गुणाध्यासात् संगः ततःकामः ततः कलिः १९ ततः क्रोधः ततः मोहः तेन पुंसः स्मृतिः ग्रस्यते २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

शून्यायकल्पतेअसत्तुल्योभवतीत्यर्थः स्वार्थविभ्रंशः पुरुषार्थहानिः मूर्च्छितस्य-(-तुल्य-)-मृततुल्यस्यच २१ तत्तुल्यत्वं प्रपंचयति । विषयेति । व्यर्थं वृक्षजीविकयेवयोजीवन्वर्तते समूर्च्छिततुल्यः अतएवयोभस्त्रेव श्वसन्वर्तते समृततुल्यः अतःस्वार्थनाशइत्यर्थः (भस्त्राचर्मप्रसेविका) २२ ननुप्रवृत्तस्यस्वर्गादिफलश्रवणात् कुतः स्वार्थविभ्रंशः तत्राह फलश्रुतिरिति इयंफलश्रुतिः नश्रेयः परमपुरुषार्थपरानभवतीत्यर्थः किंत (श्रेयोविवक्षयापरंरोचनं)। बहिर्मुखानां नृणांमोक्षविवक्षयाअवांतरफलैः कर्मसुरुच्युत्पादनमात्रमित्यर्थः यथाभैषज्येऔषधेरोचनं रुच्युत्पादनं गुडशर्करादि । तथाहि ।"पिबनिंबंप्रदास्यामिखलुतेखंडलड्डुकान् । पित्रैवमुक्तः पिबतिनफलंतावदेवतु"(अत्रयथालड्डुकप्राप्तिर्नफलंमुख्यं किंतुनिंबपानादारोग्यं एवं स्वर्गादिनकर्मणः फलंमुख्यम् । किंतुचित्तशुद्ध्यामोक्षइतिभावः) २३ ननु कर्मकांडेमोक्षस्यनामापिनश्रूयतेकुतएवंव्याख्यायतेयथाश्रुतस्यार्थस्याघटनादित्याह । उत्पत्त्येतिद्वाभ्याम् । उत्पत्त्यास्वभावतएवकामेषुपश्वादिषुप्राणेषुआयुरिंद्रियबलवीर्यादिषुस्वजनेषुपुत्रादिषुअनर्थहेतुषुपरिपाकतोदुःखहेतुषु २४ अतस्तान्स्वार्थंपरमसुखमविदुषः अतो नतान् प्रह्वीभूतान्वेदोयद्बोधयतितदेवश्रेयइतिविश्वसितानित्यर्थः । तानेवंभूतान् वृजिनाध्वनिकामवर्त्मनिदेवादियोनिषुभ्राम्यतः ततः पुनः तमः वृक्षादियोनिंविशतःपशुकामइतिआयुरिंद्रियादिकामइतिपुत्रादिकामइतिच (वेदः)स्वयंबुधः सन् ।कथंपुनस्तेष्वेवकामेषुयुंज्यात्प्रवर्तयेत्तथासत्यनाप्तः स्यादितिभावः २५ कथंतर्हिकर्ममीमांसकाः (वेदस्य) फलपरतांवदंति तत्राह । एवमिति । व्यवसितंवेदस्याभिप्रायंकुसुमितांअवांतरफलप्ररोचनयारमणीयांफलश्रुतिंपरमफलश्रुतिंवदंति (तदेवमुख्यंफलंजानंतीत्यर्थः)। कुतस्तेकुबुद्धयस्तदाह । हियस्माद्वेदज्ञाव्यासादयस्तथानवदंति २६ कुबुद्धितांप्रपंचयतिकामिनइतिअष्टभिः । कामित्वात्कृपणादीनाः ततोलुब्धास्तृष्णाकुलाः ततः पुष्पेष्ववांतरफलेषुपरमफलबुद्धयः अतएवअग्निमुग्धाः अग्निसाध्यकर्माभिनिवेशेनलुप्तविवेकाः ततश्चधूमकांताः धूमताधूममार्गांतेयेषांतेस्वंलोकंआत्मतत्वम् । तथाचश्रुतिः । "कश्चिद्वाअस्माल्लोकात्प्रेत्यआत्मानंवेदअयमहमस्मीतिकश्चित्स्वंलोकंनप्रतिजानातिअग्निमुग्धोहवैधूमतांव"इति २७

श्लोकाः २१/२७

तयाचरहितःसाधोजंतुःशून्यायकल्पते ॥ ततोस्यस्वार्थविभ्रंशोमूर्छितस्यमृतस्यच २१ विषयाभिनिवेशेननात्मानंवेदनापरम् ॥ वृक्षजीविकयाजीवन्व्यर्थंभस्त्रेवयःश्वसन् २२ फलश्रुतिरियंनृणांनश्रेयोरोचनंपरम् ॥ श्रेयोविवक्षयाप्रोक्तायथाभैषज्यरोचनम् २३ उत्पत्त्यैवहिकामेषुप्राणेषुस्वजनेषुच॥ आसक्तमनसोमर्त्याआत्मनोऽनर्थहेतुषु २४ नतानविदुषःस्वार्थंभ्राम्यतोवृजिनाध्वनि ॥ कथंयुंज्यात्पुनस्तेषुतांस्तमोविशतोबुधः २५ एवंव्यवसितंकेचिदविज्ञायकुबुद्धयः ॥ फलश्रुतिंकुसुमितांनवेदज्ञावदंतिहि २६ कामिनःकृपणालुब्धाःपुष्पेषुफलबुद्धयः ॥ अग्निमुग्धाधूमतांताःस्वंलोकंनविदंतिते २७

चूर्णिका

तया रहितः जंतुः असत्तुल्यो भवति एवं सति पुरुषार्थहानिः स्यात् २१ ततश्च अयंपुमान् भस्त्रेव श्वसन् आत्मानं अपरं च न वेद २२ हे उद्धव इयं फलश्रुतिः नृणां श्रेयो न किं तु भैषज्यरोचनवत् रुच्युत्पादिका २३ एवं न चेत्तर्हि बुधो वेदःउत्पत्त्यैव अनर्थहेतुषु कामस्वजनादिषु सक्तमनस्कान् मर्त्यान् नानायोनिषु भ्रमतः तान् पुनः काम्यकर्मसु कथं युंज्यात् एवं सति वेदः अनाप्त एव स्यात् २४ २५एवं वेदाभिप्रायं अज्ञात्वा केचित्कुबुद्धयः फलश्रुतिं सत्यां वदंति २६ ते कामिनः धूमतांताः संतः आत्मतत्वं न विदंति २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

कोसौस्वलोकस्तमाह । नेति । हृदिस्थंआत्मानंमांस्वलोकं ननु हृदिस्थंअहंकारास्पदंजानंत्येव । सत्यं परमात्मानंतुनजानंतीत्याह । यइदंजगत् । यद्व्यतिरिक्तंजगन्नास्तीत्यर्थः । कुतः । (यतश्चोत्पद्यते) । यतइदंजगज्जातंतंकुतोनजानंति । हियस्मात्उक्थंकर्मैवशस्त्रंशंसनीयंकथनीयंपशुहिंसासाधनंवायेषांते । अतः केवलंअसुतृपः प्राणतर्पणपराः नीहारंतमः तेनव्याप्तानिचक्षूंषियेषांते यथासंनिहितमपिनजानंतितद्वत् । तथाचश्रुतिः"नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूव । नीहारेणप्रावृताजल्प्याचासुतृपउक्थशासश्चरंती"ति २८ वेदतात्पर्याज्ञानाच्चान्यान्यजंतीत्याह । तेपरोक्षमस्फुटंमेमतमविज्ञायदेवतादीन्यजंतइत्युत्तरेणान्वयः । स्वमतमेवाह । हिंसायांमांसभक्षणार्थंचतत्फलार्थंयदिरागःस्यात्तर्हियज्ञएवेत्यभ्यनुज्ञानद्वारापरिसंख्ययं नत्वावश्यकत्वेनचोदनेत्येवंरूपं(अविज्ञानेरागेचहेतुः विषयात्मकाः विषयाभिनिविष्टचेतसः) यद्यपिनित्यनैमित्तिकयोः कामविशेषानुसंबंधोनास्तितथापि"कर्मणापितृलोक"इतिश्रुतेः सामान्यतः पितृलोककामनास्त्येव अंतःकरणशुद्धिकामनाचेतिभावः तदुक्तं । "नाकामस्यक्रियाकाचिद्दृश्यतेचेहकर्हिचित् । यद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टित"मिति२९अज्ञत्वादेव हिंसायांविहारोयेषांते । (आलब्धैर्हतैः । देवान्इंद्रादीन् पित्रादींश्चक्रमात्सत्त्वरजस्तमोजुषः) ३० किंच । तेअतिमंदबुद्धयइत्याह । स्वप्नोपममिति । अमुंपरलोकं आशिषश्चास्मिल्लोकेसंकल्प्यनतुनिश्चित्यविघ्नबाहुल्यात् । (अर्थान्द्रव्याणि) त्यजंतिकर्मसुविनियोजयंति । यथा कश्चित् वणिक् दुस्तरसमुद्रादिलंघनेनबहुधनार्जनेच्छयासिद्धंधनंत्यजन्उभयभ्रष्टोभवतितद्वदित्यर्थः ३१ अतो (रजःसत्त्वतमोनिष्ठास्ते) रजःसत्त्वतमोजुषः स्वानुरूपानिंद्रादीनेवोपासते नतुमांगुणातीतम् यद्यपींद्रादीनामपिमदंशत्वान्मदुपासनमेवतत् तथापियथावन्नोपासते । भेददर्शित्वादित्यर्थः ३२ हृदिसंकल्प्येत्युक्तं तमेवसंकल्पं दर्शयति इष्ट्वेति । तस्यभोगस्यांतेमहाशाला महागृहाः संपन्नाइत्यर्थः ३३ ततः किमित्यतआह । एवमिति । अतोमत्प्रवणत्वाभावान्नित्यं संसारिणोभवंतीत्यर्थः (व्याक्षिप्तमनसां प्रक्षुब्धचेतसाम्) ३४

श्लोकाः २८/३४

नतेमामंगजानंतिहृदिस्थंयइदंयतः ॥ उक्थशस्त्राह्यसुतृपोयथानीहारचक्षुषः २८ तेमेमतमविज्ञायपरोक्षंविषयात्मकाः ॥ हिंसायांयदिरागःस्याद्यज्ञएव नचोदना २९ हिंसाविहाराह्यालब्धैःपशुभिःस्वसुखेच्छया ॥ यजंतेदेवतायज्ञैःपितृन्भूतपतीन्खलाः ३० स्वप्नोपमममुंलोकमसंतंश्रवणप्रियम् ॥ आशिषोहृदिसंकल्प्यत्यजंत्यर्थान्यथावणिक् ३१ रजःसत्त्वतमोनिष्ठारजःसत्त्वतमोजुषः ॥ उपासतेइंद्रमुख्यान्देवादीन्नयथैवमाम् ३२ इष्ट्वेहदेवतायज्ञैर्गत्वारंस्यामहेदिवि ॥ तस्यांतइहभूयास्मोमहाशालामहाकुलाः ३३ एवंपुष्पितयावाचाव्याक्षिप्तमनसांनृणाम् ॥ मानिनांचातिस्तब्धानांमद्वार्तापिनरोचते ३४

चूर्णिका

तदेवाह हे उद्धव ते पुरुषाः हृदिस्थंमां न जानंति यथा तमोव्याप्तचक्षुषः न जानंति तद्वत् २८ किं च एवंभूताः ये ते मन्मतं न ज्ञात्वा हिंसाविहाराः संतः पशुभिः स्वर्गसुखेच्छया यज्ञैः पितृभूतपतीन् यजंते २९ ३० ३१ अतः ते रजःसत्वतमोनिष्ठाः हृदि आशिषः संकल्प्य इंद्रादीन् यजंते न तु माम् ३२ किं च अत्र लोके यज्ञैः देवताः इष्ट्वा दिवि गत्वा रंस्यामहे तदंते अत्र महागृहस्थाः भूयाः स्म ३३ एवं पुष्पितवाचा चंचलमनसां नृणां मद्वार्तापि न रोचते ३४

CC-0. In Public Domain. Digitization by eGangotri

तदेवंवेदानांप्रवृत्तिपरत्वंनिराकृत्यप्रकृतंनिवृत्तिपरत्वमेवोपसंहरति । वेदाइति (इमे) कर्मब्रह्मदेवताकांडविषयाअपिवेदाः ब्रह्मात्मविषयाएवब्रह्मैवात्मा नसंसारीत्येतत्पराः (ब्रह्मण्येवसमन्वयादित्यर्थः) तत्परत्वाप्रतीतौच "फलश्रुतिरियंनृणांनश्रेयोरोचनंपरम् । श्रेयोविवक्षयाप्रोक्तंयथाभैषज्यरोचन"मित्युक्तमेवकारणमनुस्मारयति । परोक्षेति। ऋषयोमंत्राः तदुक्तमृषिणेतिप्रयोगात् । तद्द्रष्टारोवा । तत्किमिति । यतः परोक्षमेवममचप्रियम् । अयंभावः । शुद्धांतःकरणैरेतद्बोद्धव्यंनान्यैरनधिकारिभिः (अतोरोचनेनकर्मकार्यंते अन्यथा) मृषाकर्मत्यागेनप्रभ्रंशप्रसंगादिति ३५ ननु वेदज्ञाअपिजैमिन्यादयः किमितितथानवर्णयंतीत्याशंक्य (स्वंविना) वेदंतदर्थवानकोपिवेदेत्याशयेनाह शब्दब्रह्मेतियावत्समाप्ति । स्वरूपतोर्थतश्चदुर्विज्ञेयंतच्चसूक्ष्मंस्थूलंचेतिद्विविधं । तत्रसूक्ष्मंतावत्स्वरूपतोदुर्बोधमित्याह । प्राणेंद्रियमनोमयम् । प्रथमंप्राणमयंपराख्यंततोमनोमयंपश्यंत्याख्यंततइंद्रियमयंमध्यमाख्यंतस्यवाग्व्यंजकत्वेनवागिंद्रियप्रधानत्वात् । किंच । अनंतपारंसमष्टिप्राणादिमयस्यनिर्विशेषस्यचतस्यकालतोदेशतश्चापरिच्छेदात् । अर्थतोपिदुर्विज्ञेयत्वमाह । गंभीरंनिगूढार्थं (परोक्षत्वात्) अतोदुर्विगाह्यंमतिप्रवेशानर्हं । तथाचश्रुतिः । "चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः । गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंती"ति । अयमर्थः वाचःशब्दब्रह्मणःपरिमितानिगणितानि । पद्यतेज्ञायतेपरंतत्त्वंएभिरितिपदानिरूपाणि चत्वारि । तानिचत्वार्यपियेमनीषिणोंतर्दृष्टयः तेविदुःनान्ये यतोगुहायांदेहमध्येत्रीणिनिहितानिनेंगयंतिस्वरूपंनप्रकाशयंति । अतःकेवलंवाचः तुरीयंचतुर्थभागंवैखरीरूपं (स्थानप्रयत्नाभ्यांस्पष्टं) मनुष्याःप्राणिनोवदंति । तमपिवदंत्येव नतुतत्त्वतोजानंति ३६ तत्रमनीषिभिरेवज्ञेयंसूक्ष्मंरूपंदर्शयति । मयेति । मयांतर्यामिणोपबृंहितमधिष्ठितंअंतस्थत्वेप्यपरिच्छेदमाह भूम्नेति अधिष्ठातृत्वेप्यविकारित्वमाह । ब्रह्मणेति । अविकृतस्यापिनियंतृत्वंघटयति । अनंतशक्तिना । भूतेषुसर्वप्राणिषुघोषरूपेणनादरूपेणलक्ष्यतेमनीषिभिः । अंतःसूक्ष्मत्वेनदर्शनेदृष्टांतः बिसेषु (मृणालेषु) ऊर्णातंतुरिवेति ३७ ततोवैखर्याख्यायाबृहत्यावाचःउत्पत्तिप्रकारंसदृष्टांतमाह । यथेतित्रिभिः । हृदयात्सकाशात्मुखात् द्वारात् ऊर्णांतंतुंउद्वमतेबहिःप्रकटयति । दार्ष्टांतिकेदर्शयति । आकाशादिति । प्राणस्तदुपाधिर्हिरण्यगर्भरूपः प्रभुर्भगवान् तेनरूपेणच्छंदोमयोवेदमूर्तिःस्वतस्त्वमृतमयः घोषवान् नादोपादानवान् मनसानिमित्तभूतेन निमित्ततामेवदर्शयति । स्पर्शादीन् वर्णान्रूपयतीतिस्पर्शरूपीतेन । स्पर्शग्रहणं (स्वरादीनां) उपलक्षणंआकाशात् हृदयाकाशात् बृहतींस्थूलांसृजतीतितृतीयेनान्वयः । बृहतीशब्दव्याख्यानायविशेषणानि । सहस्रपदवींबहुमार्गांतदेवाह । ॐकारात् (हृद्गतसूक्ष्मध्वनेः) उरःकंठादिसंगेनव्यंजितैः स्पर्शादिभिर्भूषितां ॐकारश्चात्रहृद्गतःसूक्ष्मोभिप्रेतःनत्वकारादिवर्णरूपःतस्यव्यंग्यकोटित्वात् । तत्रस्पर्शाःकादिपंचवर्गाः स्वराअकारादयःषोडश । ऊष्माणःशषसहाः अंतस्थायरलवाः ३८ ३९

श्लोकाः

वेदाब्रह्मात्मविषयास्त्रिकांडविषयाइमे ॥ परोक्षवादाऋषयःपरोक्षंममचप्रियम् ३५ शब्दब्रह्मसुदुर्बोधंप्राणेंद्रियमनोमयम् ॥ अनंतपारंगंभीरंदुर्विगाह्यं समुद्रवत् ३६ मयोपबृंहितंभूम्नाब्रह्मणानंतशक्तिना ॥ भूतेषुघोषरूपेणाबिसेषूर्णेवलक्ष्यते ३७ यथोर्णनाभिर्हृदयादूर्णामुद्वमतेमुखात् ॥ आकाशाद्घोषवान्प्राणोमनसास्पर्शरूपिणा ३८ छंदोमयोमृतमयःसहस्रपदवींप्रभुः ॥ ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम् ३९

३५/३९

चूर्णिका अथ हे उद्धव वेदास्तु ब्रह्मात्मविषयाः ऋषयस्तुपरोक्षवादाः परोक्षं च मम प्रियम् ३५ ननु जैमिन्यादयः किमिति तथा न वर्णयंतीत्यत आह एवं भूतं शब्दब्रह्मसुदुर्बोधं मया अधिष्ठितम् भूतेषु नादरूपेण मनीषिभिः लक्ष्यते ३६ ३७ तस्मात् वैखर्या उत्पत्तिमाह यथा उर्णनाभिः मुखात् उर्णा उद्वमते एवं भगवान् वेदमूर्तिः सन् सहस्रपदवीं हृद्गतात् सूक्ष्मात् ओंकारात् उरःकंठादिसंगेन व्यंजितैः स्पर्शादिभिर्भूषितां छंदोभिः उपलक्षितां वैखरीं हृदयात् प्रभुः सृजति ३८ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविचित्राभिर्लौकिकवैदिकभाषाभिर्वितताम् (गायत्र्यपेक्षयाचतुरक्षराधिकाउष्णिक् । एवंरीत्या) यथोत्तरंचत्वार्यक्षराणिउत्तराण्यधिकानियेषांतैश्छंदोभिरुपलक्षितांएवमनंतपारांवाचंसृजतिस्वयमेवाक्षिपतेउपसंहरति ४० तेषुकतिचिच्छंदांसिदर्शयति । गायत्रीति तत्रचतुर्विंशत्यक्षरागायत्री (अष्टाविंशत्यक्षराउष्णिक् । एवं चतुरक्षरवृद्ध्याऽनुष्टुबादयःअतिच्छंदःशक्वर्याद्यधिकंचच्छंदोस्तीत्यर्थः । तथा) ततश्चतुरक्षरवृद्ध्योष्णिगादिच्छंदांसिअत्यष्टिरतिजगतीअतिविराट्चेत्यर्थःएतैःछंदोभिरुपलक्षितामितिपूर्वेणैवान्वयः अतोबृहत्यपिसाकल्येस्वरूपतोदुर्ज्ञेयाइत्युक्तम् ४१ (एवंवैखर्याःसाकल्येनस्वरूपतोदुर्ज्ञेयत्वंदर्शितं) अर्थतोपिदुर्ज्ञेयत्वमाह । किमिति । कर्मकांडेविधिवाक्यैःकिंविधत्तेदेवताकांडेमंत्रवाक्यैःकिमाचष्टेअभिधत्तेप्रकाशयति । ज्ञानकांडेचाकिमनूद्यानिषेधार्थंविकल्पयेत्निषेधार्थं इत्येवमस्या (वाचो) हृदयंतात्पर्यंमत्मत्तोन्यःकश्चित् (जैमिन्यादि-) रपिनवेद ४२नतु तर्हित्वंमत्कृपयाकथयओमितिकथयति मामिति । मामेवयज्ञरूपंविधत्तेमामेवतत्तद्देवतारूपमभिधत्तेनमत्तःपृथक् । यच्चाकाशादिप्रपंचजातं "तस्माद्वाएतस्मादात्मनआकाशःसंभूत" इत्यादिनाविकल्प्यापोह्यतेनिषिध्यतेतदप्यहमेवनमत्तःपृथगस्तिकुतइत्यपेक्षायांसर्ववेदार्थं संक्षेपतः कथयति । एतावानेवसर्वेषांवेदानां अर्थः तमेवाह । शब्दोवेदः मांपरमार्थरूपं (आस्थाय) आश्रित्यभिदांमायामात्रमित्यनूद्य "नेहनानास्तिकिंचने" तिप्रतिषिध्य प्रसीदति निवृत्तव्यापारोभवति । अयंभावः । यथाह्यंकुरेयोरसः सएवतद्विस्तारभूतासुकांडशाखास्वपि तथैवप्रणवस्ययोअर्थः परमेश्वरः सएवतद्विस्तारभूतानांसर्ववेदकांडशाखानामपि संगच्छते नान्यइति । "नित्यमुक्तः स्वतः सर्ववेदकृत् सर्ववेदवित् । स्वपरज्ञानदातायस्तंवंदेगुरुमीश्वरम्" ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांएकविंशोऽध्यायः २१ ॥ ॥ ७ ॥ ॥ द्वाविंशेतत्त्वसंख्यानामविरोधविधोच्यते । पुंप्रकृत्योर्विवेकश्चजन्ममृत्युविधादिच । तदेवं (वेद) वेदांतानांप्रवृत्तिपरत्वंनिराकृत्यमोक्षपरत्वंनिर्णीतं । संतिचमोक्षपरत्वेपितदवांतरविवादाः तथाहि । केचित्तत्त्वसंख्यासुविवदंते तत्रापिचबाह्यार्थसदसत्त्वे । आत्मतत्त्वेप्येकत्वनानात्वादिषु । तत्र किंसत्यमितिजिज्ञासयापृच्छति कतीति ऋषिभिरागमेषु बहुधासंख्यातानि तेषुकतियुक्तानीत्यर्थः । भगवन्मतानुवादपूर्वकंबहुधासंख्यानंप्रपंचयति नवेतित्रिभिः त्वंतावदष्टाविंशतितत्त्वान्यात्थ तानिच वयं शुश्रुमश्रुतवंतः (नवेत्यादिसंहत्याष्टाविंशतिर्भवंति) १

विचित्रभाषाविततांच्छंदोभिश्चतुरुत्तरैः ॥ अनंतपारांबृहतींसृजत्याक्षिपतेस्वयम् ४० गायत्र्युष्णिगनुष्टुप्चबृहतीपंक्तिरेवच ॥ त्रिष्टुब्जगत्यतिच्छंदो ह्यत्यष्ट्यतिजगद्विराट् ४१ किंविधत्तेकिमाचष्टेकिमनूद्यविकल्पयेत् ॥ इत्यस्याहृदयंलोकेनान्योमद्वेदकश्चन ४२ मांविधत्तेऽभिधत्तेमांविकल्प्याऽपोह्यते ह्यहम् ॥ एतावान्सर्ववेदार्थःशब्दआस्थायमांभिदाम् ॥ मायामात्रमनूद्यांतेप्रतिषिध्यप्रसीदति ४३ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभगवदुद्धवसंवादेएकविंशोऽध्यायः २१ ॥ ॥ ७ ॥ ॥ उद्धवउवाच ॥ कतितत्त्वानिविश्वेशसंख्यातान्यृषिभिःप्रभो ॥ नवैकादशपंचत्रीण्यात्थत्वमितिशुश्रुम १

श्लोकाः ४०/१

चूर्णिका

४० ४१ उपसंहरति च किंच वेदः किं विधत्ते किं प्रकाशयति किं अनूद्य विकल्पयेत् एवं वेदहृदयं मत्तोन्यः कश्चिदपि न वेद ननु तर्हि मत्कृपया कथय ओमिति कथयति ४२ हे उद्धव वेदःमां विधत्ते मां अभिधत्ते विकल्प्यापोह्यतेत्वहं एतावान् सर्ववेदार्थः तमाह मां अश्रित्य भिदां मायामात्रमित्यनूद्य नेह नाना अस्ति किंच नेति प्रतिषिध्य निवृत्तव्यापारो भवतीति ४३ ॥ ॥ इत्येकादशेएकविंशः ।२१ ॥ ॥ ७ ॥ ॥ उद्धवउवाच ॥ ॥ हे विश्वेश ऋषिभिः कतितत्त्वानि संख्यातानि त्वं तु अष्टाविंशति तत्त्वानि आत्थ १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

२ एतावतीनां (संख्यानां) भावएतावत्त्वं । नानात्वमित्यर्थः यद्विवक्षया यत्प्रयोजनमभिप्रेत्य गायंति । हेआयुष्मन् नित्यमूर्ते । आयुर्नित्यत्वमस्तियस्यतत्संबोधनं ३ विवक्षाभेदेनतावत्सर्वंयुक्तमेव । माययाचकिंनामनयुक्तमित्याह । युक्तंचेति । यथाब्राह्मणाऋषयोभाषंते तद्युक्तंच । युक्तितो ग्राह्यं नतुवस्तुतः । यस्मात्संतिसर्वत्रांतर्भूतानिसर्वाणितत्त्वानि । किंच । मायामिति । असत्त्वेपिमायाश्रयत्वाद्घटतएवेत्यर्थः । उद्गृह्यस्वीकृत्य । नहिमरीचिजलपरिमाणादिविवादोकिंचिदघटितामिवभवति ४ ननु यदिसर्वमपियुक्तं कुतोविवादः यदिवामायैवावलंबनं कुतोहेतुं प्रतिविवादस्तत्राह । नैतदिति । हेतुं प्रतिचविवदमानानां मदीयादुरतिक्रमाः शक्तयः अंतःकरणवृत्तिविशेषरूपेणपरिणताः (सत्त्वाद्याः) एवहेतुरित्यर्थः ५ तासांविवादहेतुत्वमुपपादयति यासामिति । यासांव्यतिकरातक्षोभात्वदतांपदंविषयः विकल्पोभेदः आसीत् (अंतःकरणवृत्तिविकल्पोभेदआसीत्) अंतःकरणवृत्तिविकल्पोवातन्मूलभूतः एतदेवव्यतिरेकेणद्रढयति । शमदमयोर्द्वैद्वैक्यं । तस्मिन्प्राप्तेविकल्पोप्येतिलीयते तंचविकल्पमनुवादः शाम्यतीति ६ संतिसर्वत्रेत्युक्तं तत्प्रपंचयति। परस्परेतिद्वाभ्यां अन्योन्यस्मिन्ननुप्रवेशाद्वक्तुर्यथाविवक्षितंतथापूर्वंकारणं अपरं कार्यं तद्भावस्तेनकार्यकारणभावेनप्रसंख्यानं (संख्याभेदः) संभवति यद्वा पूर्वाअल्पसंख्याअपराऽधिकसंख्यातयोर्भावः पौर्वापर्यं तेनप्रसंख्यानं गणनं ७ अनुप्रवेशंदर्शयति । एकस्मिन्नपीति । पूर्वस्मिन्कारणभूतेतत्त्वेकार्यतत्त्वानिसूक्ष्मरूपेणप्रविष्टानि मृदि घटवत् । अपरस्मिन्कार्यतत्त्वेकारणतत्त्वानिअनुगतत्वेनप्रविष्टानिघटेमृद्वत् ८ अविरोधमुपसंहरति । अतोऽमीषांतत्त्वानांपौर्वापर्यंतत्तत्कारणकार्यत्वंतत्प्रसंख्यानंचन्यूनाधिकमभीप्सतांवादिनांमध्ये यथा (यथा) विवक्षयायद्वक्तृ यस्यमुखंप्रवर्तते तत्सर्वंविविक्तं निश्चितंवयंगृह्णीमः उक्तन्यायेनसर्वत्रयुक्तेः संभवात् ९ ॥११२॥

श्लोकाः २—९

केचित्षड्विंशतिंप्राहुरपरेपंचविंशतिम् ॥ सप्तैकेनवषट्केचिच्चत्वार्येकादशापरे २ केचित्सप्तदशप्राहुःषोडशैकेत्रयोदश ॥ एतावत्त्वंहिसंख्यानामृषयोयद्विवक्षया ॥ गायंतिपृथगायुष्मन्निदंनोवक्तुमर्हसि ३ ॥ श्रीभगवानुवाच ॥ युक्तंचसंतिसर्वत्रभाषंतेब्राह्मणायथा ॥ मायांमदीयामुद्गृह्यवदतांकिंनुदुर्घटम् ४ नैतदेवंतथात्थत्त्वंयदहंवच्मितत्तथा ॥ एवंविवदतांहेतुंशक्तयोमेदुरत्ययाः ५ यासांव्यतिकरादासीद्विकल्पोवदतांपदम् ॥ प्राप्तेशमदमेप्येतिवादस्तमनुशाम्यति ६ परस्परानुप्रवेशात्तत्त्वानांपुरुषर्षभ ॥ पौर्वापर्यप्रसंख्यानंयथावक्तुर्विवक्षितम् ७ एकस्मिन्नपिदृश्यंतेप्रविष्टानीतराणिच ॥ पूर्वस्मिन्वापरस्मिन्वातत्त्वेतत्त्वानिसर्वशः ८ पौर्वापर्यमतोऽमीषांप्रसंख्यानमभीप्सताम् ॥ यथाविविक्तंयद्वक्त्रंगृह्णीमोयुक्तिसंभवात् ९

चूर्णिका

केचित् षड्विंशतिः आहुः अपरे पंचविंशतिः एके सप्त केचित् षष्ठ अन्ये नव केचित् चत्वारि केचित् एकादश २ केचित् सप्तदश एके षोडश अन्ये त्रयोदश एवं तत्त्वानां नानात्वं यद्विवक्षया गायंति तद्वद ३ ॥ श्रीभगवानुवाच ॥ हे उद्धव यथा ब्राह्मणाः भाषंते तथा युक्तयः संति ४ हे विप्र यथा त्वं आत्थ तथा अहं वच्मि तत् तथैव एवं हेतुं विवदतां मे शक्तय एव हेतुः५ किंच यासां शक्तीनां क्षोभात् वदतां विषयो भेदः आसीत् सः भेदः शमे दमे प्राप्ते सति लीयते ततो वादः शाम्यति६हे उद्धव तत्त्वानां परस्परानुप्रवेशात् वक्तुर्विवक्षया संख्यानं भवति ७ एकस्मिन्नपि तत्त्वे अन्यतत्त्वानि प्रविष्टानि दृश्यंते तथा कार्यतत्त्वे कारणतत्त्वानि च प्रविष्टानि दृश्यंते८ अतः एषां तत्त्वानां न्यूनाधिकभावं इच्छतां वादिनां मध्ये यथा विवक्षया यस्य मुखं प्रवर्तते तत्सर्वं वयं गृण्हीमः ९ ॥११२॥

१ 'युक्तयःसंतिसर्वत्रे'ति पाठः क्वचित् दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु कार्यकारणतत्त्वानांपृथक्त्वापृथक्त्वविवक्षयाभवतुनामसंख्याभेदः जीवेश्वरयोस्तुकथंभेदाभेदविवक्षयाषड्विंशतिपंचविंशतिपक्षौ प्रवृत्तावतआह । अनादीति स्वतोनसंभवति । अन्यतस्तुसंभवात्स्वतःसर्वज्ञः परमेश्वरोज्ञानदोऽन्योभवितव्यइतिषड्विंशतिपक्षाभिप्रायइत्यर्थः १० कथंतर्हिपंचविंशतिपक्षस्तत्राह । पुरुषेति । वैलक्षण्यं विसदृशत्वंनास्तिद्वयोरपिचिद्रूपत्वात् । अतस्तयोरत्यंतमन्यत्वकल्पनापार्थाव्यर्था । एवं (वस्तुतोभेदाभावात्) पंचविंशतिपक्षप्रवृत्तिः नन्वेवमपीश्वरप्रसादलभ्यज्ञानस्य पृथक्त्वात्पक्षद्वयमपिनघटतेतआह ज्ञानंचेति सत्त्वगुणवृत्तित्वात्तदंतर्भूतमित्यर्थः (षड्विंशतिपक्षस्तुऔपाधिकभेदविवक्षयेत्यर्थः ननु ज्ञानकृतंवैलक्षण्यमितिचेन्न । ज्ञानं हिप्रकृतेर्गुणः) ११ ननुज्ञानंजीवधर्मः कथंप्रकृतेर्गुणः स्यादतआह प्रकृतिरितिगणसाम्यंहि प्रकृतिः । अतस्तद्विशेषरूपागुणास्तस्याएवनत्वात्मनोजीवस्य । अकर्तृत्वादस्यस्थित्यादिहेतुभूतगुणाश्रयत्वानुपपत्तेः १२ अतःसत्त्वंसत्त्वमयं ज्ञानं प्रकृतेर्गुणइतिपूर्वेणैवसंबंधः । ननु तन्निवर्त्यंकर्मचअज्ञानं च तत्त्वांतरं स्यात् । न । रजसोवृत्तिः (कर्मरजोरूपं) अज्ञानंचतमसः । अतःकर्माज्ञानयोरजस्तमोद्वाराप्रकृतावेवांतर्भावइति भावः । तथापिकालस्वभावयोस्तत्त्वांतरतास्यात् । न । गुणानांव्यतिकरःक्षोभोयस्मात्सईश्वरएवकालोनाम । स्वभावोनामसूत्रंमहत्तत्त्वमेव । तस्यसर्वशक्तिमत्त्वात् । तदेवंज्ञानादीनांयथायथमंतर्भावात् नपक्षद्वयेपितत्त्ववृद्धिः एतच्चपक्षांतरेष्वपिज्ञेयं १३ स्वमतेतुगुणानामागमापायित्वात्प्रकृतेर्भेदोविवक्षितः अतोगुणास्त्रीणितत्त्वानि (वक्ष्यमाणानि) पंचविंशतिश्चेतिस्वमताभिप्रायइत्यर्थः) एवंत्रीणितत्त्वानिप्रदर्श्यापराणिपंचविंशतितत्त्वानिपूर्वोक्तपक्षद्वयसाधारणानिदर्शयति । पुरुषइतिसार्धद्वाभ्यां व्यक्तंमहत्तत्त्वंनभआदीनितन्मात्राणि मेमया १४ एकादशदर्शयति । श्रोत्रमिति । दर्शनंचक्षुः । ज्ञानशक्तयः ज्ञानेंद्रियाणिपंच । वागादिपाय्वंतानिद्वंद्वैक्येनोक्तानिचत्वारिअंघ्रिश्चेतिकर्मांगिकर्मेंद्रियाणिपंच । उभयंउभयात्मकंमनः अंगहेउद्धव । एवमेतान्येकादश १५ पंचदर्शयति । शब्दइति । शब्दादीनिविषयतयापरिणतानि पंचमहाभूतानि । ननुगत्यादिभिस्तत्त्वाधिक्यंपक्षत्रयेपिस्यान्नेत्याह । गतिश्चउक्तिश्चउत्सर्गौचशिल्पंच । तानिकर्मायतनानांकर्मेंद्रियाणां सिद्धयः फलानि तत्रोत्सर्गौपायूपस्थफले । शिल्पं करस्य ॥ अतोनतत्त्वांतराणीत्यर्थः १६

श्लोकाः १०–१६

अनाद्यविद्यायुक्तस्यपुरुषस्यात्मवेदनम् ॥ स्वतोनसंभवादन्यस्तत्त्वज्ञोज्ञानदोभवेत् १० पुरुषेश्वरयोरत्रनवैलक्षण्यमण्वपि ॥ तदन्यकल्पनाऽपार्थाज्ञानं
चप्रकृतेर्गुणः ११ प्रकृतिर्गुणसाम्यंवैप्रकृतेर्नात्मनोगुणाः ॥ सत्त्वंरजस्तमइतिस्थित्युत्पत्त्यंतहेतवः १२ सत्त्वंज्ञानंरजःकर्मतमोऽज्ञानमिहोच्यते ॥ गुण
व्यतिकरःकालःस्वभावःसूत्रमेवच १३ पुरुषःप्रकृतिर्व्यक्तमहंकारोनभोऽनिलः ॥ ज्योतिरापःक्षितिरितितत्त्वान्युक्तानिमेनव १४ श्रोत्रंत्वग्दर्शनंघ्राणोजि
ह्वेतिज्ञानशक्तयः ॥ वाक्पाण्युपस्थपाय्वंघ्रिःकर्माण्यंगोभयंमनः १५शब्दःस्पर्शोरसोगंधोरूपंचेत्यर्थजातयः ॥ गत्युक्त्युत्सर्गशिल्पानिकर्मायतनसिद्धयः १६

चूर्णिका

ननु जीवेश्वरयोः भेदाभेदविवक्षया षड्विंशतिपंचविंशतिपक्षौ कथंप्रवृत्तौ अतआह तत्रअविद्यायुक्तजीवस्य ज्ञानं स्वतो नसंभवति अतः ज्ञानदः अन्यो भवेत् १० एवं भेदेन षड्विंशतिः पक्षः प्रवृत्तः अथपंचविंशतिपक्षमाह पुरुषेश्वरयोः विसदृशत्वं नास्ति ११ १२ अतः तयोरभेदात्पंचविंशतिपक्षः प्रवृत्तः ननु ज्ञानाज्ञानकर्मकालस्वभावानां पृथक्त्वात् पक्षयोः तयोः तत्त्वाधिक्यं स्यात् नेत्याह ज्ञानादीनां यथायथंस्वस्वकारणे अंतर्भावात् नतत्त्वाधिक्यं १३ तत्र तत्त्वानि दर्शयति प्रकृतिपुरुष महदहंकाराः चत्वारि भूतानि पंच इंद्रियाणि दश मनः एकं विषयाः पंच एतानि उभयपक्षसाधारणानि स्वमते तु एतानिपंचविंशतिः गुणा त्रयः एवं अष्टाविंशति तत्त्वानि १४१५१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवं मतत्रयेतत्त्वसंख्याभेदंनिरूप्ययद्विवक्षयागायंतीतियत्पृष्टंतत्तन्मततात्पर्यंदर्शयति । सर्गादाविति । कार्याणिषोडशविकाराः (उक्तश्रोत्रादयः) कारणानिमहदादीन्युक्तानिसप्त । तद्रूपिणी सती प्रकृतिः अस्यविश्वस्यसर्गादौगुणैः सृज्यत्वाद्यवस्थाधत्ते । उपादानकारणरूपत्वात् । पुरुषस्तुअव्यक्तः अपरिणामीनिमित्तभूतः केवलमीक्षते अतः परिणामिन्याः प्रकृतेः (प्रकाशकः) पुरुषो भिन्नइति १७ तत्त्वैरारब्धस्यकार्यस्य तदंतर्भावंप्रत्याह व्यक्तादय इति । व्यक्तादयः महदादयः प्रकृतेरुत्पन्नायेधातवो (धारका-)-स्तेविकुर्वाणाः पुरुषेक्षणेनलब्धवीर्याः संहताःअंडंसृजंति तदाप्रकृतेर्बलात्तामाश्रित्येत्यर्थः १८ एवं स्वमतमुपसंहृत्यमतांतरेष्वपि (संतिसर्वत्रेति) सामान्यतोनिरूपितांघटनां विशेषतः सतात्पर्यांदर्शयति । सप्तैवेति (तत्रसप्तसुधातुषुमध्येखादयोऽर्थाद्दृश्याःपंच) जानातीतिज्ञानं द्रष्टाजीवएकः उभयोर्द्रष्टृदृश्ययोराधारआत्माचेतिसप्त । तत्रप्रकृत्यादीनां कारणत्वेनखादिष्वंतर्भावः । उत्तरेषांअंतर्भावार्थमाह । ततस्तेभ्यः सप्तभ्यो देहेंद्रियासवः सर्वं कार्याणिजायंते (देहादयइति) १९ षडितिमतेपि भौतिकस्य भूतांतर्भावंजीवस्यचपरमात्मांतर्भावमाह । तैर्युक्तइति (तैर्भूतैर्युक्तःपरःपुमान्परमात्माइदंभौतिकं) २० आत्मनासहचत्वारितत्त्वानीति तत्रान्नंपृथिवी अंतर्भावार्थमाह तैरिति अवयविनः कार्यस्य (जन्म) २१ भूतानिचमात्राणिचइंद्रियाणिचपंच । एकेनमनसासह । आत्मासप्तदशः २२ आत्मैवसंकल्पयन्मनउच्यते । त्रयोदशपक्षेभूतानितन्मात्रैरेकीकृतानिपंचैव इंद्रियाणितत्प्रकाशकानिपंचैव । मनश्चैकमिंद्रियाधिष्ठातृ । आत्माचद्विविधः एवंत्रयोदश २३ एकादशपक्षेपंचभूतानिपंचेंद्रियाणिजीवमनसोरात्मांतर्भावेनैतान्येवैकादश नवपक्षेऽष्टौप्रकृतयःपुरुषश्च विकाराणांप्रकृतिष्वंतर्भावः २४ उपसंहरति । इतीति । इतिएभिः प्रकारैः प्रकृतिपुरुषभेदज्ञापनायेत्यर्थः २५

श्लोकाः १७/२५

सर्गादौप्रकृतिर्ह्यस्यकार्यकारणरूपिणी ॥ सत्त्वादिभिर्गुणैर्धत्तेपुरुषोऽव्यक्तईक्षते १७ व्यक्तादयोविकुर्वाणाधातवःपुरुषेक्षया ॥ लब्धवीर्याःसृजंत्यंडंसंहताः प्रकृतेर्बलात् १८ सप्तैवधातवइतितत्रार्थाःपंचखादयः ॥ ज्ञानमात्मोभयाधारस्ततोदेहेंद्रियासवः १९ षडित्यत्रापिभूतानिपंचषष्ठःपरःपुमान् ॥ तैर्युक्तआत्मसंभूतैःसृष्ट्वेदंसमुपाविशत् २० चत्वार्येवेतितत्रापितेजआपोऽन्नमात्मनः ॥ जातानितैरिदंजातंजन्मावयविनःखलु २१ संख्यानेसप्तदशकेभूतमात्रेंद्रियाणि च ॥ पंचपंचैकमनसाआत्मासप्तदशःस्मृतः २२ तद्वत्षोडशसंख्यानेआत्मैवमनउच्यते ॥ भूतेंद्रियाणिपंचैवमनआत्मात्रयोदश २३ एकादशत्वमात्मासौ महाभूतेंद्रियाणिच ॥ अष्टप्रकृतयश्चैवपुरुषश्चनवेत्यथ २४ इतिनानाप्रसंख्यानंतत्वानामृषिभिःकृतम् ॥ सर्वंन्याय्यंयुक्तिमत्त्वाद्विदुषांकिमशोभनम् २५

चूर्णिका

१७ एतानि तत्त्वानि पुरुषेक्षया वीर्यं लब्ध्वा प्रकृतिबलात् एकीभूय अंडं सृजंति इति १८ अथ मतांतराण्याह तत्रसप्तपक्षे भूतानि पंच जीवेश्वरौ द्वौ एवं सप्त तत्र प्रकृत्यादीनां कारणत्वेन खादिष्वंतर्भावः इतरेषां अंतर्भावमाह तेभ्यः सप्तभ्यः देहेंद्रियासवः जायंते एवं सर्वत्र ऊह्यम् १९ षट् पक्षे भूतानि पंच ईश्वरः एकः एवं षट् अन्येषां अंतर्भावः २० चतुःपक्षे तेजः एकं आपः द्वितीयं पृथिवी तृतीयं आत्मा चतुर्थं अन्येषां अंतर्भावः २१ सप्तदशपक्षे भूतानि पंच विषयाः पंच इंद्रियाणि पंच मनः एकं आत्मा एकः एवं सप्तदश २२ षोडशपक्षेपूर्वोक्तानि पंचदश मन आत्मनोरैक्यं एकं एवं षोडश त्रयोदशपक्षे भूतानि पंच इंद्रियाणि पंच मनः एकं जीवेश्वरौ द्वौ एवं त्रयोदश २३ एकादशपक्षेभूतानि पंच इंद्रियाणि पंच मनोजीवयोरेकत्वात् एकं एवं एकादश नवपक्षे भूतानि पंच प्रकृतिमहदहंकाराः त्रयः पुरुषः एकः एवं नव २४ एवंऋषिभिः कृतसंख्यानं युक्तिमत्त्वात् सर्वं न्याय्यम् २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥११९॥ ननुप्रकृतेःसत्वादयःगुणाः नत्वात्मनइतितयोर्भेदाप्रतीतेः कथं ज्ञातुं शक्यतइत्युद्धवस्तत्रपृच्छति। प्रकृतिरिति। आत्मनाजडाजडस्वभावेनविलक्षणौ। अन्योन्यापाश्रयात्परस्परपरिहारेणप्रतीतेरित्यर्थः। अन्योन्यापाश्रयत्वमेवाह (तथापितयोर्भिदानदृश्यते । तदेवव्यनक्ति) प्रकृतौतत्कार्ये देहे। प्रकृतिश्चात्मनि। तेनाविनातस्याअप्रतीतेः। अहमित्यभेदप्रतीतेर्नदेहात्मनोर्भेदोलक्ष्यते (तत्कथं) इत्यर्थः२६ एवंहृदिवर्तमानं संशयंनयेनयुक्त्यानैपुणं प्रावीण्यंयेषांतैः २८ अर्हसीत्युक्तंतत्रहेतुमाह ।त्वत्तइति हियस्मात्वत्तः त्वत्प्रसादादेव । अत्रज्ञानेप्रमोषोभ्रंशः तेशक्तितःमायातः । ननुस्वप्रकाशस्यात्मनः कथं ज्ञानप्रमोषः ज्ञानदानेतत्प्रमोषेवाममर्मांकप्रयोजनं तत्राह त्वमेवेति २७ विकाराविकाराभ्यांनानात्वैकत्वाभ्यांसापेक्षनिरपेक्षत्वाभ्यांप्रकाशाप्रकाशाभ्यांचात्यंतभेदंवक्तुमाह। प्रकृतिः पुरुषश्चेति। विकल्पोऽत्यंतभेदएव कुतइत्यपेक्षायां प्रकृतिशब्दोपात्तस्यदेहादिसंघातस्यविकारित्वंतावद्दर्शयति। एषइतिद्वाभ्यां । एषसर्गः सृज्यतइति सर्गोदेहादिसंघातः वैकारिकः विकारवान् । अत्रहेतुः गुणव्यतिकरात्मकः गुणक्षोभतः २९ नानात्वमाह ममेति ।विकल्पंभेदंतद्बुद्धीश्च अनेकधात्वं प्रपंचयति। वैकारिकः अनेकविकारवानपि । स्थूलेन मार्गेणतावत्त्रिविधः त्रैविध्यमाह । अध्यात्ममित्येकरूपं ३० तानिरूपाणिदर्शयति। दृक्अध्यात्मं। रूपंअधिभूतं । अत्ररंध्रेचक्षुर्गोलकेप्रविष्टंआर्कंवपुरंशोऽधिदैवमिति सापेक्षताप्रकारमाह परस्परमिति। चक्षुषारूपंज्ञायते तदन्यथाऽनुपपत्त्याचक्षुःतत्प्रवृत्त्यन्यथानुपपत्त्या। तदधिष्ठात्रीदेवता। ततश्चक्षुषः प्रवृत्तिः ततोरूपज्ञानमिति । एवमेतत्त्रयंपरस्परंसिध्यति। अत्ररंध्रइतिविशेषणव्यावर्त्यमाह । दृष्टांतोपयोगितयायस्तुखेआकाशेअर्कोवर्ततेमंडलात्मा सतुस्वतःसिध्यतिचक्षुर्विषयत्वेपिप्रतियोग्यपेक्षाभावमात्रेणस्वतइत्युक्तं। इदानीमात्मनोविकारित्वाद्यभावेनभेदमाह । यद्यस्मादात्माएषामध्यात्मादीनामाद्यः कारणं अतएकरूपः अभिन्नश्च । तस्मादेभ्योऽपरोभिन्नः स्वप्रकाशत्वादपीत्याह । स्वयानुभूत्यास्वतःसिद्धप्रकाशेनअखिलानांसिद्धीनां सिद्धिः। परस्परप्रकाशकानामपिप्रकाशकः सर्वेषामपिसामान्यतश्चित्प्रकाशविषयत्वादतएवतस्य स्वप्रकाशत्वंसिद्धं ३१

श्लोकाः २६/३१

॥ उद्धवउवाच ॥ प्रकृतिःपुरुषश्चोभौयद्यप्यात्मविलक्षणौ ॥ अन्योन्यापाश्रयात्कृष्णदृश्यतेनाभिदातयोः ॥ प्रकृतौलक्ष्यतेह्यात्माप्रकृतिश्चतथात्मनि २६ एवंमेपुंडरीकाक्षमहांतंसंशयंहृदि ॥ छेत्तुमर्हसिसर्वज्ञवचोभिर्नयनैपुणैः २७ त्वत्तोज्ञानंहिजीवानांप्रमोषस्तेत्रशक्तितः ॥ त्वमेवह्यात्ममायाया गतिंवेत्थनचापरः २८ ॥ श्रीभगवानुवाच ॥ प्रकृतिःपुरुषश्चेतिविकल्पःपुरुषर्षभ ॥ एषवैकारिकःसर्गोगुणव्यतिकरात्मकः २९ ममांगमायागुणमय्यनेकधाविकल्पबुद्धीश्चगुणैर्विधत्ते ॥ वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ३० दृग्रूपमार्कंवपुरत्ररंध्रेपरस्परंसिध्यतियःस्वतःखे ॥ आत्मा यदेषामपरोयमाद्यःस्वयानुभूत्याऽखिलसिद्धिसिद्धिः ३१

चूर्णिका

॥ उद्धव उवाच ॥ हेकृष्ण प्रकृतिः पुरुषश्च इमौजडाजडस्वभावेन विलक्षणौ स्तः तयोर्भेदो न दृश्यते तदेवाह प्रकृतौ आत्मा तस्मिन् प्रकृतिश्च लक्ष्यते अतः भेदो न २६ एवं मे संशयं छिंधि यतः त्वमेव स्वमायागतिं वेत्थ २७ २८ ॥ श्रीभगवानुवाच ॥ हे उद्धव प्रकृतिः पुरुषश्चेति भेदः अत्यंत एव २९ कुत इत्यपेक्षायां प्रकृतिशब्दोक्तदेहादिसंगस्य विकारित्वं दर्शयति एषः देहादिसंघः विकारवान् यतः गुणक्षोभकृतः नानात्वमाह इयं मे प्रकृतिः अनेकधा विकल्पभेदबुद्धीः गुणैर्विधत्ते अनेकत्वमाह अयं देहादिसंघः आध्यात्मादिरूपेणत्रिधा ३० तानि रूपाणि दर्शयति दृक् अध्यात्मम् रूपं अधिभूतम् गोलके प्रविष्टोऽर्कांशः अधिदैवं एतत् त्रयं परस्परं सिध्यति यद्यस्मादात्माअध्यात्मादीनांकारणम् ३१ ॥११९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चक्षुषिदर्शितंत्रैविध्यं इंद्रियांतरेष्वप्यतिदिशति । एवमिति । यथाचक्षुरेवं त्वगाद्यपीत्यर्थः त्वक्स्पर्शोवायुरिति । श्रवणंशब्दोदिश इति । जिह्वारसोवरुणइति । नासागंधोश्विनाविति । चित्तेनयुक्तं चित्तमपीत्यर्थः अंतःकरणांतरमपि तत्रचित्तं चेतयितव्यंवासुदेवइति । मनोमंतव्यंचंद्रइति । बुद्धिर्बोद्धव्यंब्रह्मेति । अहंकारोहंकर्तव्यं रुद्रइत्येवं त्रिविधमित्यर्थः ननुपुनरपि वैलक्षण्यमात्रमेवोक्तं । त्रिविधप्रपंचव्यतिरिक्तात्मप्राप्तिस्तुकुतः स्यात् । अहंकारनिवृत्त्यातत्कृतत्रिविधविकल्पनिवृत्त्यैवेत्याशयेनाह । योसौअहंअहंकारः तमेवाह । गुणक्षोभंकरोतीति तथा ततः परमेश्वरात्कालाद्वा निमित्तात् प्रधानंमूलंउपादानं यस्यतस्मात् महतः प्रसूतोविकारः ३२ सत्रिवृत् त्रिविधः मोहमयस्यविकल्पस्यहेतुः त्रिवृत्त्वमेवाह । वैकारिकइति (ऐंद्रियस्तैजसः) सकुतोनिवर्तते । आत्माज्ञाने नविलसितत्वात्तज्ज्ञानेनेत्याशयेनाह । आत्मापरिज्ञानमयइति । ननुकथं मोहमयत्वंविकल्पस्याहंकारस्यवाकैश्चित्सत्यत्वांगीकारात्तत्राह । विवादइति । अयंभिदार्थनिष्ठोविवादोह्यात्मापरिज्ञानमयइत्यन्वयः यद्वा विवादः सर्वोपि भिदार्थनिष्ठ एव नतुवस्तुमात्रनिष्ठः अतःपरस्परंयुक्तिभिरेवभेदस्यनिराकृतत्वान्मोहमयत्वंसिद्धमिति । ननु यद्यहंकारोविकल्पश्चनास्तिअलंतर्हितन्निवृत्तिप्रयासेनतत्राह । व्यर्थोपीति । अर्थरहितोपिस्वरूपभूतान्मत्तोवहिर्मुखानांनैवोपरमेत् । प्रत्युततत्कृतैःकर्मभिरुच्चनीचदेहेषुतेसंसरंतीति ३३ तत्रपृच्छति । त्वत्तइति (परावृत्तधियोवहिर्मुखाः यथा येनप्रकारेण तत् तं प्रकारं) व्यापकस्यात्मनोदेहाद्देहांतरगमनंअकर्तुःकर्माणिनित्यस्यचजन्ममरणादीनिकथमितिभावः ३४ एतद्विद्वांसोनसंति हिप्रस्मान्माययावंचिताः मोहिताः ३५ लिंगशरीराध्यासेनसर्वंघटतइत्युत्तरमाह । मनइति । प्रधानत्वेनपंचभिरितिनिर्देशोऽन्येषामप्युपलक्षणार्थः देहाद्देहांतरंप्रतियातिततोन्यएवात्मातन्मनोऽनुवर्ततेअहंकारेणानुगच्छति ६ ननुमनसोपिपूर्वदेहवियोगोदेहांतरयोगश्चकथंभवतीतिचेत्, स्मृतिवियोगयोगाभ्यामितिवक्तुंतयोःकारणमाह । ध्यायादिति । कर्मतंत्रत्वात् । कर्मोपस्थापितान् दृष्टान्वाअनुश्रुतान् वेदोक्तान् वाअनुध्यायत् । अथअनंतरंध्यायमानेषु उद्यत्आविर्भवत् पूर्वविषयेषुचसीदत्लीनंभवति । तदनंतरंतस्यस्मृतिः पूर्वापरानुसंधानंनश्यति ३७

श्लोकाः ३२—३७

एवंत्वगादिश्रवणादिचक्षुर्जिह्वादिनासादिचचित्तयुक्तम् ॥ योसौगुणक्षोभकृतोविकारःप्रधानमूलान्महतःप्रसूतः ३२ अहंत्रिवृन्मोहविकल्पहेतुर्वैकारिकस्तामसऐंद्रियश्च ॥ आत्मापरिज्ञानमयोविवादोह्यस्तीतिनास्तीतिभिदार्थनिष्ठः ॥ व्यर्थोपिनैवोपरमेतपुंसांमत्तःपरावृत्तधियांस्वलोकात् ३३ ॥ उद्धव उवाच ॥ त्वत्तःपरावृत्तधियःस्वकृतैःकर्मभिःप्रभो ॥ उच्चावचान्यथादेहान्गृह्णंतिविसृजंतिच ३४ तन्ममाख्याहिगोविंददुर्विभाव्यमनात्मभिः ॥ नह्येतत्प्रायशोलोकेविद्वांसःसंतिवंचिताः ३५ ॥ श्रीभगवानुवाच ॥ मनःकर्ममयंनृणामिंद्रियैःपंचभिर्युतम् ॥ लोकाल्लोकंप्रयात्यन्यआत्मातदनुवर्तते ३६ ध्यायन्मनोनुविषयान्दृष्टान्वानुश्रुतानथ ॥ उद्यत्सीदत्कर्मतंत्रंस्मृतिस्तदनुशाम्यति ३७

चूर्णिका

एवं त्वगाद्यन्येंद्रियेष्वपि अथात्मनः विकारित्वाद्यभावेन भेदमाह यतः आत्मा येषां अध्यात्मादीनां कारणं इत्यादि ननु पुनरपि वैलक्षण्यमेवोक्तम् परंतु प्रपंचान्नात्मप्राप्तिः कुतः स्यात् सा तु अहंकारनिवृत्त्या भवति सः अहंकारस्तु मोहविकल्पहेतुः किंच आत्मज्ञानविलसितत्वात् तज्ज्ञाने तन्निवृत्तिः भेदनिवृत्तिश्च भवति ३२ ३३ ॥ उद्धव उवाच ॥ हे कृष्ण आत्मनःदेहांतरगमनमकर्तुः कर्माणिच नित्यस्य जन्ममरणादिकंचकथंतद्वद ३४ ३५ ॥ श्रीभगवानुवाच ॥ हे उद्धव कर्ममयं नृणां मनः देहात् देहांतरं याति तदनु आत्मा अहंकारेण गच्छति ३६ ततः तन्मनः विषयान् ध्यायन् तेषु च आविर्भवत् पूर्वदेहविषयेषु च लीनं भवति तदनुजीवस्य पूर्वापरानुसंधानं नश्यति ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ततः किमतआह । विषयेति । कर्मोपस्थापितदेवादिदेहेष्वत्यंताभिनिवेशेनात्मानंपूर्वदेहंपुनर्मनोनस्मरेदितियत् सैवयातनादेहाभिनिवेशेनभयशोकादेर्देवादिदेहाभिनिवेशेनवाहर्षतर्षादेर्हेतोःपूर्वदेहेअत्यंतविस्मृतिः अहंकारनिवृत्तिस्तदभिमानिनोजंतोर्जीवस्यमृत्युरुच्यतेनतुदेहवन्नाशः ३८ जन्मतुविषयस्यदेहस्यआत्मतयास्त्रीकृतिंअभिमानंग्रहुः नतुदेहवदुत्पत्तिं । नचपुत्रादिदेहवत्प्रीत्यतिशयमात्रेणाकिंतुसर्वभावेनअभेदेन । अभिमानमात्रेणोत्पत्तिमरणेदृष्टांतद्वयंयथास्वप्नश्चमनोरथश्चेत्यर्थः ३९ दृष्टांतौविवृणोति स्वप्नमिति।तत्रवर्तमानेस्वप्नादौपूर्वंचातिअपूर्वमिवेतिचान्वयः (चकारोप्यर्थः) पूर्वसिद्धमप्यात्मानंअपूर्वंअद्यजातमिवपश्यतीत्यर्थः ४० उपसंहराति । इंद्रियाणामयनं (आश्रयो) यन्मनस्तस्यदेहांतराभिनिवेशेनयासृष्टिः उत्पत्तिःतयावस्तुनिआत्मनितदभिमानेनेदंत्रैविध्यंउत्तममध्यमनीचत्वंअसदेवभातीत्यन्वयः । एवंभूतआत्मावाह्याभ्यंतरभेदहेतुश्चभवतिबाह्यविषयान् (स्त्रगादीन्) आभ्यंतरान् सुखादींश्चपश्यतीत्यर्थः यथाजनोजीवःस्वप्नेबहूनसतोजनान् देहान् कुर्वन् पश्यन् बहुरूपोभातितद्वत् । यद्वा इदंत्रैविध्यंअध्यात्मादिरूपंभाति असज्जनकृत्दुष्टपुत्रोत्पादकःजनःपितास्वयंसमोपिपुत्राभिमानतस्तदरिमित्रादिषुयथाभेदहेतुर्भवतितद्वदितिअन्यत्समानम् ४१ तदेवंलोकप्रसिद्धौजन्ममृत्यूनिरूप्यसूक्ष्मावपृष्टावपितौवैराग्यायनिरूपयति । नित्यदाप्रतिक्षणंभूतानिशरीराणिउत्पद्यंतेनश्यंति कालस्यातिसूक्ष्मत्वात् तत्कृतंभवनमभवनंचाविवेकिभिर्नलक्ष्यते ४२ सतोर्जन्ममरणयोरज्ञानेकारणमेतद्भवेत् सत्त्वमेवतयोः कुतइत्याशंक्यानुमानेनसाधयति । अर्चिषांपरिणामादिभिः । स्रोतसांगत्यादिभिः । फलानांरूपादिभिर्यथावस्थाविशेषाःकृताः कालेनेतिपूर्वस्यानुषंगः आदिशब्देनतेजोबलकामकौशलादीनामुपादानं । विमतं प्रतिक्षणोत्पत्तिविनाशवत् अवस्थाभेदवत्त्वात्दीपज्वालादिवत् इत्यनुमानं ४३ कथंतर्हिप्रत्यभिज्ञातद्वदेवसादृश्यावलंबिनीत्याह । सोयमिति । सादृश्यादेवार्चिषां यथासोयंदीप इतिप्रत्यभिज्ञा । यथास्रोतसांप्रवाहजलानांतदिदंजलमिति (सादृश्यादेवप्रत्यभिज्ञा) तथासोयं पुमानिति धीर्गीश्चमृषा । नृणांबहूनां शरीरिणांमृषाव्यर्थमायुर्येषामविवेकिनांतेषां भवति ४४

श्लोकाः ३८ ४४

विषयाभिनिवेशेननात्मानंयत्स्मरेत्पुनः ॥ जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ३८ जन्मत्वात्मतयापुंसःसर्वभावेनभूरिद ॥ विषयस्वीकृतिंप्राहुर्यथास्वप्नमनोरथः ३९ स्वप्नंमनोरथंचेत्थंप्राक्तनंनस्मरत्यसौ ॥ तत्रपूर्वमिवात्मानमपूर्वंचानुपश्यति ४० इंद्रियायनसृष्ट्येदंत्रैविध्यंभातिवस्तुनि ॥ बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ४१ नित्यदाह्यंगभूतानिभवंतिनभवंतिच ॥ कालेनालक्ष्यवेगेनसूक्ष्मत्वात्तन्नदृश्यते ४२ यथार्चिषांस्रोतसांचफलानांवावनस्पतेः ॥ तथैवसर्वभूतानांवयोऽवस्थादयःकृताः ४३ सोयंदीपोर्चिषांयद्वत्स्रोतसांतदिदंजलम् ॥ सोयंपुमानितिनृणांमृषागीर्धीर्मृषायुषाम् ४४

चूर्णिका

ततश्चआत्मनः पूर्वदेहे अत्यंतविस्मृतिः सैवमृतिरित्युच्यते ३८ जन्म तु देहस्य आत्मतया अभिमानं प्राहुः किं च शरीराणि प्रतिक्षणं उत्पद्यंते नश्यंति च तत्सूक्ष्मत्वात् न दृश्यते ३९ ४० ४१ ४२ किं च अर्चिषां स्रोतसां फलानां च अवस्थाः यथा कालेन कृताः तथा भूतानां वयोवस्थाः कालकृताः ज्ञेयाः ४३ ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥११८॥

ननु कथं देहाध्यासतः पुंसः कर्मजन्ममरणानिसंति नान्यस्येतिव्यवस्था। नहिघटतेघटस्यपुरुषभेदेनसत्त्वमसत्त्वंचेति। न। अज्ञस्यापिवस्तुतः तदभावादित्याह। मास्वस्यनैवात्मनः कर्मणाबीजभूते नसोपि अज्ञोपि पुमान् जायते म्रियतेच। किंतुअयं भ्रांत्या अजन्मापिजायतइव अमरोपिम्रियतइव यथामहाभूततेजोरूपोग्निराकल्पांतमवस्थितोपिदारुयोगवियोगाभ्यांजन्मनाशौप्राप्नोति तद्वत् ४५ सिद्धवत्कृत्योक्तावयोऽवस्थाः प्रपंचयति। निषेकोजठरेप्रवेशः गर्भस्तन्मध्येवृद्धिः। जन्मप्रसिद्धं। बाल्यं आपंचमाब्दात्। कौमारं आषोडशाब्दात्। ततोयौवनमापंचचत्वारिंशतः। ततोवयोमध्यंआषष्ठिवर्षात् (तदुपरिजरा। तदुपरिमृत्युः) ४६ देहसंबंधाज्जन्ममरणादीनीत्युपपादितमर्थमुपसंहरति। एताइति। हिस्फुटं अन्यस्य देहस्यतनूः अवस्थाःगुणसंगात्प्रकृत्यविवेकात् (उपादत्तेआत्मतयास्वीकरोति) कश्चित्परमेश्वरानुगृहीतोक्वचित्कर्यचिज्जहातिअवस्थावतोदेहस्य द्रष्टासावस्थावान्नभवतिविवेकज्ञानेन (क्वचिदितितस्यविरलत्वंदर्शितं) ४७ ननु तदानीं मूर्च्छितत्वेनजन्ममरणवान्देहोनदृश्यतेतत्राह। आत्मन इति पितृदेहस्यौर्ध्वदैहिकंकुर्वताप्ययदर्शनात्। पुत्रदेहस्यचजातकर्मणिजन्मदर्शनात्। आत्मनःस्वदेहस्यापिभवाप्ययौअनुमेयौ (यथास्वदेहोमरणधर्मादेहत्वात् पितृदेहवत्। स्वदेहोजन्मवान् देहत्वात्पुत्रदेहवदिति) एवं चदृश्यत्वेसतिभवाप्ययवतां वस्तूनांदेहानां अभिज्ञो द्रष्टाऽद्वयलक्षणःभवाप्ययधर्मकोनभवति ४८ एतदेवदृष्टांतेनस्पष्टयति। तरोरिति। तरुशब्देनोद्भिज्जमात्रस्योपलक्षणं किंतु (तरोः) फलपाकांतस्यव्रीह्यादेरित्यर्थः। बीजाज्जन्मोत्पत्तिविपाकात्फलपाकात्संयमंनाशंचविद्वान् सतरोर्द्रष्टाततःपृथक् एवंतनोर्द्रष्टाततःपृथक्। यद्वा तरोरेवांत्यःपरिणामोविपाकस्ततःसंयमम् ४९ अविवेकिनःसंसारंप्रपंचयति। प्रकृतेरितिपंचभिः। तत्त्वेनतत्त्वतःअविविच्य। तत्स्वदृष्ट्वाचस्पर्शेषुविषयेषुसंमूढइतिवा ५० (ततस्तदनुसारेण) गुणभेदेनात्रिविधंतत्रापितत्तारतम्येनैकैकत्रद्विविधंसंसारमाह सत्वेति (कर्मभिर्भ्रामितोऋष्यादीन्याति) ५१ नन्वकर्तुरात्मनःकुतः कर्मभिर्भ्रमणंतत्राह। नृत्यतोगायतोजनान् पश्यन्ताननुकरोतितद्वतस्वरतालादिगतिंशृंगारकरुणादिरसंचयथामनस्यनुवर्तयतीत्यर्थः एवमनुकार्यतेगुणैर्बलादित्यर्थः अनेनदृष्टांतेनदृश्यधर्मोद्रष्टरिस्फुरतीतिदर्शितम् ५२

श्लोकाः ४५ / ५२

मास्वस्यकर्मबीजेनजायतेसोप्ययंपुमान् ॥ म्रियतेचामरोभ्रांत्यायथाग्निर्दारुसंयुतः ४५ निषेकगर्भजन्मानिबाल्यकौमारयौवनम् ॥ वयोमध्यंजरामृत्युरित्यवस्थास्तनोर्नव ४६ एतामनोरथमयीर्ह्यन्यस्योच्चावचास्तनूः ॥ गुणसंगादुपादत्तेक्वचित्कश्चिज्जहातिच ४७ आत्मनःपितृपुत्राभ्यामनुमेयौ भवाप्ययौ ॥ नभवाप्ययवस्तूनामभिज्ञोऽद्वयलक्षणः ४८ तरोर्बीजविपाकाभ्यांयोविद्वाञ्जन्मसंयमौ। तरोर्विलक्षणोद्रष्टाएवंद्रष्टातनोःपृथक् ४९ प्रकृतेरेवमात्मानमविविच्याबुधःपुमान् ॥ तत्त्वेनस्पर्शसंमूढःसंसारंप्रतिपद्यते ५० सत्त्वसंगादृषीन्देवान्रजसाऽसुरमानुषान् ॥ तमसाभूततिर्यक्त्वंभ्रामितोयातिकर्मभिः ५१ नृत्यतोगायतःपश्यन्यथैवानुकरोतितान् ॥ एवंबुद्धिगुणान्पश्यन्ननीहोप्यनुकार्यते ५२

चूर्णिका ॥११८॥

किं च आत्मा कर्मणा बीजभूते न न जायतेन म्रियते किं तु इयं भ्रांतिः ४४ यथा अग्निः आकल्पं स्थितोपि दारुयोगवियोगाभ्यां जन्मनाशौ प्राप्नोति तद्वत् ४५ किं च निषेकगर्भादिनवावस्थाः देहस्य संति ४६ एताः कश्चित् गृह्णाति कश्चित् ईशानुग्रहात् त्यजति ४७ किं च आत्मनः पितृपुत्राभ्यां जन्मनाशौ अनुमेयौ ४८ जन्मनाशवतां वस्तूनां यःद्रष्टा सः तद्धर्मको न भवति यथा तरोः बीजविपाकाभ्यां जन्मनाशौ विद्वान् भिन्नः तथा तनोर्द्रष्टा पृथक् ४९ अथ यः प्रकृतेः भिन्नं आत्मानं ज्ञात्वा विषयेषु मूढः स्यात् सः संसारं प्राप्नोति ५० ततः सत्वादिसंगाद्देवादियोनीर्याति ५१ ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपाधिधर्माश्चोपहितेऽवभासंतेइत्यत्रदृष्टांतमाह । यथांभसेति। तीरस्थास्तरवोधावंतइवदृश्यंते जलेप्रतिबिंबिता वा चंचलाइवेतिविषयग्राहकेणमनसापरिकल्पिताएवतेपुलावण्यादयोगुणाःनवस्तुतःसंति
अतोमनोनिबंधनएवसंसारइत्यभिप्रेत्यग्राहकगुणाग्राह्येवभासंतइत्यत्रदृष्टांतमाह । चक्षुषेति ५३ भोगस्यापिमिथ्यात्वेदृष्टांतद्वयमाह यथेति यथाएताप्रसिद्धामनोरथधियःस्वप्नदृष्टाश्चधियोमृषाएवमा
त्मनोविषयानुभवः संसारोमृषा (मनोरथरूपाधीर्यस्यतस्य । स्वप्नदृष्टश्चविषयोयथा) ५४ ननु यदिमृषातर्हिकिंतन्निवृत्तिश्रमेणतत्राह । अर्थेहीति । अर्थेसत्यत्वेअस्यआत्मनः ५५ अतोभोगो
द्यमोनकर्तव्यइत्याह । तस्मादिति (आत्माग्रहणनिर्भातंस्वस्वरूपाज्ञानविलसितम्) ५६ दुःखप्रतीकारोद्यममपिपरित्यज्यपरमेश्वरनिष्ठेनैवभाव्यमित्याह क्षिप्तइतिद्वाभ्याम् । क्षिप्तआक्षिप्तःनुन्नइतिवा ।
प्रलब्धउपहसितः (असूयितस्तिरस्कृतः । परिहापितस्त्याजितः) ५७ निष्ठितःनिष्ठीवनाविषयीकृतः । मूत्रितःमूत्रेणार्द्रीकृतः । प्रकंपितः परमेश्वरनिष्ठातःप्रच्यावितोपि कृच्छ्रगतःकष्टंप्राप्तोपि ५८
॥११९॥ एवंत्वदुक्तंयथाऽनुबुध्येयं (जानीय) तथानःसर्वान् प्रतिवद ५९ त्वद्धर्मनिरतान्विना विदुषामपिअसद्भिःकृतमतिक्रमंअपराधंसुतरांदुःसहंमन्ये इत्यन्वयःप्रकृतिःस्वभावः ६० निरस्यसर्वसंदेहानेकीकृत्य
सुदर्शनम् । प्रकाशितरहस्यंतंभजामिगुरुमीश्वरम् ॥ १ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांद्वाविंशोऽध्यायः २२ ॥ ॥ ७ ॥ ॥ त्रयोविंशेतिरस्कारसहनोपायईर्यते ॥
भिक्षुगीतप्रकारेणमनसःसंयमोधिया ॥ १ ॥ दुर्जनोपद्रवोनूनंदुःसहोपिमहीयसाम् ॥ अतश्चतुर्भिरध्यायैःसहनोपायवर्णनम् ॥ २ ॥ तत्रतावदस्मिन्नध्यायेभिक्षुगीतयामनोविजयःउत्तरस्मिन्प्रकृति
पुरुषविवेकः तदुत्तरस्मिन् गुणवृत्तिविजयः । ततःपरस्मिन्नैलगीतयाविषयसंगत्यागेनसत्संगइति क्रमेणउपायाभगवतावर्ण्यंते । आशंसितःप्रार्थितः भृत्यस्यवचःसत्कुर्वन्तंभृत्यंप्रतिआबभाषे १

श्लोकाः ५३/१

यथांभसाप्रचलतातरवोपिचलाइव ॥ चक्षुषाभ्राम्यमाणेनदृश्यतेभ्राम्यतीवभूः ५३ यथामनोरथधियोविषयानुभवोमृषा ॥ स्वप्नदृष्टश्चदाशार्हतथासं
सारआत्मनः ५४ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ॥ ध्यायतोविषयानस्यस्वप्नेऽनर्थागमोयथा ५५ तस्मादुद्धवमाभुंक्ष्वविषयानसदिंद्रियैः ॥ आ
त्माग्रहणनिर्भातंपश्यवैकल्पिकंभ्रमम् ५६ क्षिप्तोऽवमानितोऽसद्भिःप्रलब्धोऽसूयितोऽथवा ॥ ताडितःसंनिरुद्धोवावृत्त्यावापरिहापितः ५७ निष्ठितोमूत्रि
तोवाज्ञैर्बहुधैवंप्रकंपितः ॥ श्रेयस्कामःकृच्छ्रगतआत्मनात्मानमुद्धरेत् ५८ ॥ उद्धवउवाच ॥ यथैवमनुबुध्येयंवदनोवदतांवर ॥ सुदुःसहमिमंमन्यआत्म
न्यसदतिक्रमम् ५९ विदुषामपिविश्वात्मन्प्रकृतिर्हिबलीयसी ॥ ऋतेत्वद्धर्मनिरताञ्छांतांस्तेचरणालयान् ६० ॥ ॥ इतिश्रीभागवतेमहापुराणेएका
दशस्कंधेद्वाविंशोऽध्यायः २२ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ सएवमाशंसितउद्धवेनभागवतमुख्येनदशार्हवर्यः ॥ सभाजयन्भृत्यवचोमु
कुंदस्तमाबभाषेश्रवणीयवीर्यः १

चूर्णिका

५३ तथा मनोरथस्वप्नधियः मृषा तथा आत्मनः संसारोपि मिथ्यैव ५५ अत्र प्रपंचे कोप्यर्थो नास्ति तथापि संसारः जीवस्य न निवर्तते स्वप्ने यथा अनर्थाप्तिः ॥११९॥
५६ तस्मात् हे उद्धव विषयान् माभुंक्ष्व इदं सर्वं भ्रमं पश्य किं च केनचित् क्षिप्तः अवमानितः ताडितः निष्ठितः मूत्रितः५७एवं बहुधा प्रकंपितोपि पुमान् आत्मना
आत्मानं उद्धरेत् ५८ ॥ उद्धव उवाच ॥ हेकृष्ण आत्मनि विदुषामपि असदतिक्रमंदुःसहं मन्ये अतः यथा एवं अनुबुध्येयं तथा वद ५९ ६० ॥ ॥ इत्येकादशे
द्वाविंशः २२ ॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ सः कृष्णः एवं उद्धवेन प्रार्थितः सन् तद्वचः सत्कृत्य बभाषे १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२३॥

॥१२०॥

तत्रतावदंगीकारतस्तद्वचःसंपूजयतिद्वाभ्याम् । हेबार्हस्पत्यबृहस्पतेःशिष्यअत्रलोकेससाधुर्नास्ति । योदुर्जनोक्तैर्भिन्नंक्षुभितंमनःशमयितुमीश्वरःस्यात् २ कुतइत्यतआह । नेति । यथामर्मस्थाः मर्मस्वेवनित्यंस्थिताः परुषोक्तिरूपाइषवस्तुदंतिव्यथयंतितथाइतरेबाणानतुदंतिअतस्तैस्तथानतप्यतइत्यर्थः ३ तथापिमयावक्ष्यमाणैरुपायैःसर्वंसोढुंशक्यमित्यभिप्रायेणेतिहासंप्रस्तौति । महद्यथाभवतितथापुण्यमितिहासंगाथांगायंति ४ (दुर्जनैःपरिभूतेनतिरस्कृतेननिजकर्मणांविपाकंस्मरतागीतामितिहासम्) ५ सतुभिक्षुः पूर्वंधनाढ्यःकृच्छ्रार्जितस्यधनस्यनाशेसंतप्यमानोनिर्विण्णःसन्प्रव्रज्याभिक्षामटन् दुर्जनैरुपद्रुतः प्रस्तुतोपयोगिनींगाथामगायतेतिवक्तुंतस्यचरितमाह । अवंतिष्वित्यादिना । अवंतिषुमालवेषु । वार्ताकृषिवाणिज्यादिरूपावृत्तिर्यस्य । कदर्यश्चस्मृतावुक्तः । "आत्मानंधर्मकृत्यंचपुत्रदारांश्चपीडयन् । देवतातिथिभृत्यांश्चसकदर्यइतिस्मृत"इति ६ तस्ययेज्ञातयोबांधवाः अतिथयोऽध्वनीनाश्चतेनवाङ्मात्रेणापिनार्चिताः (किमुधनादिना) तथाशून्यावसथेधर्मकर्महीनेगृहेदेहेवा (कालेपर्वादौआत्मापिकामैःस्रक्चंदनादिभिरनर्चितः नार्चितइत्यर्थः) ७ (अतस्तस्यपुत्रादयस्तस्मैद्रुह्यंते । दाराद्याअपिविषण्णाः संतस्तस्यप्रियंनाचरन्) ८ यक्षाणांवित्तमिवकेवलंरक्षणीयंवित्तंयस्य (तस्यधर्मकामाभ्यांविहीनस्यअतएवोभयलोकतोभ्रष्टस्य) पंचभागिनःपंचयज्ञदेवताः तस्मैचुक्रुधुः ९ तेषामवध्यानमनादरः तेनविस्रस्तोविशीर्णःपुण्यस्यस्कंधः अर्थलाभमात्रहेतुभूतोऽशोयस्यतस्यबह्वायासैःकृष्यादिभिः केवलंश्रमोयस्मिन्सः (अर्थोपिनाशमगमत्) १० कुतोनिधनमगच्छत्तदाह ज्ञायतइति (ज्ञातयोदायादाः । दस्यवश्चोराः) दैवतो गृहदाहादिना । कालतः निखातंधान्यादि । नृणांपार्थिवानांद्वंद्वैक्यंतस्मात् (ब्रह्मबंधोर्द्विजाधमस्यतस्य) ११

श्लोकाः २/११

॥ श्रीभगवानुवाच ॥ बार्हस्पत्यनसोस्त्यत्रसाधुर्वैदुर्जनेरितैः ॥ दुरुक्तैर्भिन्नमात्मानंयःसमाधातुमीश्वरः २ नतथातप्यतेविद्धःपुमान्बाणैरमर्मगैः ॥ यथातुदंतिमर्मस्थाह्यसतांपरुषेषवः ३ कथयंतिमहत्पुण्यमितिहासमिहोद्धव ॥ तमहंवर्णयिष्यामिनिबोधसुसमाहितः ४ केनचिद्भिक्षुणागीतंपराभूतेनदुर्जनैः ॥ स्मरताधृतियुक्तेनविपाकंनिजकर्मणाम् ५ अवंतिषुद्विजःकश्चिदासीदाढ्यतमःश्रिया ॥ वार्तावृत्तिःकदर्यस्तुकामीलुब्धोतिकोपनः ६ ज्ञातयोऽतिथयस्तस्यवाङ्मात्रेणापिनार्चिताः ॥ शून्यावसथआत्मापिकालेकामैरनर्चितः ७ दुःशीलस्यकदर्यस्यद्रुह्यंतेपुत्रबांधवाः ॥ दारादुहितरोभृत्याविषण्णानाचरन्प्रियम् ८ तस्यैवंयक्षवित्तस्यच्युतस्योभयलोकतः ॥ धर्मकामविहीनस्यचुक्रुधुःपंचभागिनः ९ तदवध्यानविस्रस्तपुण्यस्कंधस्यभूरिद ॥ अर्थोप्यगच्छन्निधनंबह्वायासपरिश्रमः १० ज्ञातयोजगृहुःकिंचिद्दस्यवःकिंचिदुद्धव ॥ दैवतःकालतःकिंचिद्ब्रह्मबंधोर्नृपार्थिवात् ११

चूर्णिका ॥१२०॥

॥ श्रीभगवानुवाच ॥ हे उद्धव अत्र लोके सः साधुः नास्ति यः दुर्जनोक्तैः क्षुभितं मनः शमयितुं ईशः स्यात् २ किं च पुमान् बाणैः विद्धः तथा न तप्यते यथा निष्ठुरवाचा तुदति ३ अत्र पुण्यं इतिहासं गायंति ४ तं दुर्जनैः परिभूतेन केनचिद्भिक्षुणा गीतं शृणु ५ हे उद्धव मालवदेशेषु कश्चित् कदर्यो द्विजः श्रीमान् आसीत् ६ तेन ज्ञातयः अतिथयश्च वाचापि नार्चिताः तथा काले देहोपि कामैर्नार्चितः ७ तस्य कदर्यस्य पुत्रबांधवादयः खिन्नाः भूत्वा तत्प्रियं नाचरन् ८ एवं धर्मादिविहीनस्य तस्य पंचयज्ञदेवताश्चुक्रुधुःततः तस्य अर्थः नाशं अगात् १० तदाह तद्धनं ज्ञातयः दस्यवश्च किंचित् जगृहुः किंचित् गृहदाहादिना नष्टम् किंचित् राज्ञा नरैश्च हृतम् ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.ए. १२ नष्टारायोऽर्थायस्य (तस्यनष्टरायः) तपस्विनःसंतप्तस्य १३ मेमयाआत्मादेहःवृथैवानुतापितः तदेव प्रपंचयति (नधर्मायनापिकामायभोगाय) यस्यईदृशोऽर्थायासस्तेनमया १४ नरका अ० २३

टीका यचसत्यप्यर्थेधर्माननुष्ठानात् १५(अद्भुतंरूपंअसाधारणमपिसौंदर्यं) श्वित्रःश्वेतकुष्ठम् १६ सिद्धेप्यर्थेतस्योत्कर्षःसंवर्धनं तत्रनाशोपभोगयोर्द्वंद्वैक्यंनाशेउपभोगेचेत्यर्थः (व्ययःकुटुंबपोषणादिना । ना शश्चोरादिभिः । उपभोगःस्वयम्) साधनोत्कर्षयोरायासः (रक्षणेआयासः) ततस्त्रासश्चिंताच (व्ययोपभोगयोश्चिंता) नाशेभ्रमः १७ किंच । अर्थप्राप्त्यर्थाः स्तेयादयःषडनर्थाः । प्राप्तेऽर्थेस्मयादयः षट् व्यसनानिच स्त्रीद्यूतमद्यविषयाणित्रीणि (एवंनव) १८ (अर्थोधनंमूलंयेषांते) १९ भेदवैरस्पर्धाःप्रपंचयतिद्वाभ्याम् । भिद्यंतेस्नेहंत्यजंति । कथंभूताः । एकास्निग्धाः एके एकप्राणा-(-इव एकरूपाः) तेचतेआस्निग्धाअतिप्रियाश्चेत्यर्थः (एवंभूताअपिभिद्यंते) कुतः । काकिणिनापुंस्त्वमार्षंविंशतिवराटिकाःकाकिणीतया २० संरब्धाः क्षुभिताःस्पृधःस्पर्धमानाः (घ्नंतिअसूंश्चत्यजंति)

॥१२१॥ २१ इहतावदर्थनिष्ठानामेतेऽनर्थाः (उक्ताः) परलोकेप्यनर्थएवतेषामित्याह । लब्ध्वेतित्रिभिः । मानुष्यंजन्म । तत्तत्रापिद्विजाग्र्यतांब्राह्मण्यं स्वार्थंघ्नंतिआत्महितंनकुर्वंतियेते (लुब्धायांति) २२ अमरप्रार्थ्यतांदर्शयन्नाह । स्वर्गेति । लोकंदेहंअनुषज्जेतआसक्तिंकुर्यात् २३

श्लोकाः सएवंद्रविणेनष्टेधर्मकामाविवर्जितः ॥ उपेक्षितश्चस्वजनैश्चिंतामापदुरत्ययाम् १२ तस्यैवंध्यायतोदीर्घंनष्टरायस्तपस्विनः ॥ खिद्यतोबाष्पकंठस्यनिर्वेदः सुमहानभूत् १३ सचाहेदमहोकष्टंवृथात्मामेनुतापितः ॥ नधर्मायनकामाययस्यार्थायासईदृशः १४ प्रायेणार्थाःकदर्याणांनसुखायकदाचन ॥ इहचा १२/२३ त्मोपतापायमृतस्यनरकायुच १५ यशोयशस्विनांशुद्धंश्लाघ्यायेगुणिनांगुणाः ॥ लोभःस्वल्पोपितान्हंतिश्वित्रोरूपमिवाद्भुतम् १६ अर्थस्यसाधनेसिद्ध उत्कर्षेरक्षणेव्यये ॥ नाशोपभोगआयासस्त्रासश्चिंताभ्रमोनृणाम् १७ स्तेयंहिंसाऽनृतंदंभःकामःक्रोधःस्मयोमदः ॥ भेदोवैरमविश्वासःसंस्पर्धाव्यसना निच १८ एतेपंचदशानर्थाह्यर्थमूलामतान्नृणाम् ॥ तस्मादनर्थमर्थाख्यंश्रेयोर्थीदूरतस्त्यजेत् १९ भिद्यंतेभ्रातरोदाराःपितरःसुहृदस्तथा ॥ एकास्निग्धाः काकिणिनासद्यःसर्वेऽरयःकृताः २० अर्थेनाल्पीयसाह्येतेसंरब्धादीप्तमन्यवः ॥ त्यजंत्यसून्स्पृधोघ्नंतिसहसोत्सृज्यसौहृदम् २१ लब्ध्वाजन्मामरप्रार्थ्यंमानु ष्यंतद्द्विजाग्र्यताम् ॥ तदनादृत्ययेस्वार्थंघ्नंतियांत्यशुभांगतिम् २२ स्वर्गापवर्गयोर्द्वारंप्राप्यलोकमिमंपुमान् ॥ द्रविणेकोऽनुषज्जेतमर्त्योऽनर्थस्यधामनि २३

चूर्णिका एवं नष्टे द्रविणे सति सः स्वजनैरुपेक्षितः सन् चिंतां आप १२ एवं द्रव्यनाशात् संततस्य तस्य निर्वेदः अभूत् १३ स च कष्टं आह अहो वृथा मया देहस्तापि तः १४ किंच प्रायः कदर्याणां अर्थाः न सुखाय भवंति किं तु इह तापाय प्रेत्य च नरकाय भवंति १५ किं च स्वल्पोपि लोभः सद्गुणान् हंति श्वित्रः रूपमिव १६ अर्थस्य साधनादौ आयासादिकं भवति १७ तथा स्तेयहिंसादिस्त्रीद्यूतमद्यव्यसनानि च अर्थहेतोर्भवंति १८ अतः श्रेयोर्थी अर्थं दूरतः त्यजेत् १९ किं च भ्रात्रादयः ॥१२१॥ सर्वे स्नेहं हित्वा काकिणिनाप्यर्थेन सद्यः अरयो भवंति २० तथा अल्पार्थेन सौहृदं हित्वा मिथः त्यजंति घ्नंतिच २१ एवं अर्थनिष्ठानां अत्र अनर्थानुक्त्वा अमुत्रापि अनर्थानाह अत्र देवप्रार्थ्यं विप्रदेहं प्राप्य तमनादृत्य ये स्वार्थं घ्नंति ते दुर्गतिं यांति २२ अतः एवंभूतं शरीरं प्राप्य द्रविणे कः अनुसज्जेत २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ऋषयोमनुष्ययज्ञब्रह्मयज्ञयोर्देवताः देवपितृभूतानीतरेषां । ज्ञातयः सगोत्राः बंधवोविवाहादिनासंबद्धाः तान्अन्यांश्चभागिनः भागार्हान् । आत्मानंचअसंविभज्यअन्नादिभिरसंतर्प्य (यक्षवित्तः यक्षस्यवित्तमिवरक्षणीयमात्रंवित्तंयस्यसः) २४ एवंविमृश्यानुतप्यमानआह । व्यर्थयाअर्थेहयाप्रमत्तस्यमेवित्तादिकंव्यर्थंगतमितिशेषः येनवित्तादिनाकुशलाविवेकिनः सिध्यंति संसारान्मुच्यंते जरठोवृद्धोहं २५ अन्यमपिस्वसदृशंशोचाति । कस्मादेवमनर्थंविद्वानपिसंक्लिश्यति । कारणंसंभावयतिकस्यचिदिति २६ ननु नायंमोहितः क्लिश्यति किंतु धनादिभिर्भोगादिविवित्सयाऽतआह किंधनैरिति (धनदैःधनिकैर्यनमानादिभिः कामैर्भोगैः कामदैर्दारादिभिः) उतपुनरपि (कर्मभिःसकामानुष्ठानैःयतोमृत्युनाग्रस्यमानस्य) २७ इदानींसंपन्नविवेकःसन्हृष्यन्नाह । नूनमितित्रिभिः येनप्रीतेनआत्मनः प्लवरूपोनिर्वेदश्चभवतिसहरिर्मेनूनंप्रीतइति २८ अंगंशोषयिष्येतपसा यद्वा विषयालयंनेष्यामि । यदिस्यात्कालावशेषःतर्ह्यात्मन्येवासिद्धःतुष्टःसन् अखिलेस्वार्थेधर्मादिसाधनेअप्रमत्तःसन् (तेनकालावशेषेण) २९ (तत्रकायशोषणे) अनुमोदेरन्अनुगृह्णंतु । ननु देवैरनुमोदितोपिजरठोऽल्पेनकालेनाकिंसाधयिष्यसि तत्राह मुहूर्तेनेति (खट्वांगोनामराजा) ३० अभिप्रेत्यनिश्चित्यआवंत्योऽवंतिदेशभवः हृदयग्रंथीन् अहंकारममकारान् भिक्षुर्यतिः ३१ असंगआसक्तिशून्यः अलक्षितः श्रैष्ठ्यमद्योतयन् ३२ प्रवयसंवृद्धंअवधूतंमलिनं (धूल्यादिभिः) हे भद्र परिभूतिभिस्तिरस्कारैः (पर्यभवन्अवमेनिरे) ३३ परिभवानेवदर्शयति । केचिदितिसप्तभिः (कमंडलुरूपंपात्रं पीठमासनं अक्षसूत्रं जपमालां) ३४

॥१२२॥

देवर्षिपितृभूतानिज्ञातीन्बंधूंश्चभागिनः ॥ असंविभज्यचात्मानंयक्षवित्तःपतत्यधः २४ व्यर्थयार्थेहयावित्तंप्रमत्तस्यवयोबलम् ॥ कुशलायेनासिद्ध्यंतिजरठःकिंनुसाधये २५ कस्मात्संक्लिश्यतेविद्वान्व्यर्थयाऽर्थेहयाऽसकृत् ॥ कस्यचिन्माययानूनंलोकोयंसुविमोहितः २६ किंधनैर्धनदैर्वाकिंकामैर्वाकामदैरुत ॥ मृत्युनाग्रस्यमानस्यकर्मभिर्वोतजन्मदैः २७ नूनंमेभगवान्प्रीतःसर्वदेवमयोहरिः ॥ येननीतोदशामेतांनिर्वेदश्चात्मनःप्लवः २८ सोहंकालावशेषेणशोषयिष्येऽगमात्मनः ॥ अप्रमत्तोऽखिलेस्वार्थेयदिस्यात्सिद्धआत्मनि २९ तत्रमामनुमोदेरन्देवास्त्रिभुवनेश्वराः ॥ मुहूर्तेनब्रह्मलोकंखट्वांगःसमसाधयत् ३० ॥ श्रीभगवानुवाच ॥ इत्यभिप्रेत्यमनसाह्यावंत्योद्विजसत्तमः ॥ उन्मुच्यहृदयग्रंथीन्शांतोभिक्षुरभून्मुनिः ३१ सचचारमहीमेतांसंयतात्मेंद्रियानिलः ॥ भिक्षार्थंनगरग्रामानसंगोलक्षितोऽविशत् ३२ तंवैप्रवयसंभिक्षुमवधूतमसज्जनाः ॥ दृष्ट्वापर्यभवन्भद्रबह्वीभिःपरिभूतिभिः ३३ केचित्त्रिवेणुंजगृहुरेकेपात्रंकमंडलुम् ॥ पीठंचैकेऽक्षसूत्रंचकंथांचीराणिकेचन ३४

श्लोकाः २४/३४

चूर्णिका

तथा देवर्ष्यादीन् यः न ददाति सः अधः पतति २४ द्रव्येहया मत्तस्य मे वयोबलादि व्यर्थं गतम् अतः परं जरठोहं किं नु साधये २५ एवं विद्वानपि अर्थेहया क्लिश्यते अतः अयं लोकः कस्यचिन्मायया मोहितोऽस्ति २६ अपि च मृत्युना ग्रस्यमानस्य पुंसः धनादिभिः कर्मभिर्वा किम् २७ मम तु अद्य हरिस्तुष्टः यतः एवं दशां प्राप्तोऽहं २८ सोहं कालावशेषश्चेत्तर्हि आत्मनि तुष्टः सन् कालशेषेण स्वांगं शोषयिष्ये २९ तत्र देवाः मां अनुगृह्णंतु ननु त्वं जरठः स्वल्पकालेन किं साधयिष्यसि तत्राह खट्वांगः मुहूर्तेन ब्रह्मलोकं असाधयत् ३० ॥ श्रीभगवानुवाच ॥ सः कदर्यः एवं निश्चित्य अहं ममतां हित्वा भिक्षुः भूत्वा ३१ एतां महीं चचार भिक्षार्थं नगरादिषु अलक्षितो विवेश ३२ तं भिक्षुं दुर्जनाः पर्यभवन् ३३ तदाह केचित् त्रिवेणुं जगृहुः एके कमंडलुं जगृहुः एके कंथां जगृहुः केचिच्चीराणिजगृहुः ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२३॥ ॥२३॥

(केचित्तानिदंडपात्रादीनिप्रदाय पुनराददुः केचिद्दर्शितानि जिघृक्षुंवंचयित्वा) भोभगवन्गृहाणेतिदर्शितानि संतिप्रदायपुनश्चआददुः ३५ अन्नेमूत्रयंति मूर्धनिचष्ठीवंति थूत्कारेणश्लेष्माणं प्रक्षिपंति ३६ ३७ क्षिपंतिनिंदंति । निंदामेवाह एषधर्मध्वजः त्रिदंडलिंगोपजीवी । शठोलोकवंचकः । तदेवाहुः क्षीणवित्तइति ३८ महासारः अतिबलाढ्यः (तिरस्कृतोपिधृतिमान्मेरुरिवनचलति) ३९ (इतिक्षिपंति । एकेविहसंतिउपहसंति) दुर्वातयंति (दुर्वातंकुर्वंति) तदुपर्यधोवायुंमुंचंतीत्यर्थः बबंधुः शृंखलैः रुरुधुः कारागृहादिषु द्विजंशुकसारिकादि (पक्षिणं) यथाबध्नंतिपंजरेरुंधंतिच)४०भौतिकंदुर्जनादिकृतंदैहिकंजरादिनिमित्तंदैविकंशीतोष्णादिप्रभवंएवंदिष्टंदैवप्राप्तं (अबुध्यतअन्वभवत्) ४१धर्मोत्पातयद्भिः परिभूतोपिसात्विकींधृतिमास्थायस्वधर्मएवास्थितः इमांवक्ष्यमाणांगाथांअगायत । सात्विकीधृतिश्च । "धृत्यायया धारयतेमनःप्राणेंद्रियक्रियाः । योगेनाव्यभिचारिण्याधृतिःसापार्थसात्विकी"तिस्मृतेः ४२ तामेवाष्टादशश्लोकींगाथामाह । नायमिति । नचात्मा (देहः कूटस्थोवा) नापिग्रहादयः किंतु मनःपरंकेवलंसुखदुःखयोःकारणं (आमनंतिश्रुतयो) वदंति । "मनसाह्येवपश्यतिमनसाशृणोती"त्याद्याः ४३ परिवर्तनप्रकारमेवाह । मनइत्यादिना । गुणान्गुणवृत्तीः सृजतिततश्चतेभ्योगुणेभ्यः शुक्लानिसात्विकानिकृष्णानितामसानिलोहितानिराजसानिसवर्णास्तत्तत्कर्मानुरूपाः सृतयोदेवतिर्यङ्नरादिगतयः ४४

श्लोकाः ३५/४४

प्रदायचपुनस्तानिदर्शितान्याददुर्मुनेः ॥ अन्नंचभैक्ष्यसंपन्नंभुंजानस्यसरित्तटे ३५ मूत्रयंतिचपापिष्ठाःष्ठीवंत्यस्यचमूर्धनि ॥ यतवाचंवाचयंतिताडयंतिनवक्तिचेत् ३६ तर्जयंत्यपरेवाग्भिःस्तेनोयमितिवादिनः ॥ बध्नंतिरज्ज्वातंकेचिद्बध्यतांबध्यतामिति ३७ क्षिपंत्येकेवजानंतएषधर्मध्वजःशठः ॥ क्षीणवित्तइमांवृत्तिमग्रहीत्स्वजनोज्झितः ३८ अहोएषमहासारोधृतिमान्गिरिराडिव ॥ मौनेनसाधयत्यर्थंबकवद्दृढनिश्चयः ३९ इत्येकेविहसंत्येनमेकेदुर्वातयंतिच ॥ तंबबंधुर्निरुरुधुर्यथाक्रीडनकंद्विजम् ४० एवंसभौतिकंदुःखंदैविकंदैहिकंचयत् ॥ भोक्तव्यमात्मनोदिष्टंप्राप्तंप्राप्तमबुध्यत ४१ परिभूतइमांगाथामगायतनराधमैः ॥ पातयद्भिःस्वधर्मस्थोधृतिमास्थायसात्विकीम् ४२ ॥ द्विजउवाच ॥ नायंजनोमेसुखदुःखहेतुर्नदेवतात्माग्रहकर्मकालाः ॥ मनःपरंकारणमामनंतिसंसारचक्रंपरिवर्तयेद्यत् ४३ मनोगुणान्वैसृजतेबलीयस्ततश्चकर्माणिविलक्षणानि ॥ शुक्लानिकृष्णान्यथलोहितानितेभ्यःसवर्णाःसृतयोभवंति ४४

चूर्णिका

पुनस्तानि प्रदाय पुनः जगृहुः ३५ ततः भुंजानस्य अन्ने केचित् पापिष्ठाः मूत्रयंति मूर्धनि ष्ठीवंति ३६ यतवाचं वाचयंति न वक्ति चेत्ताडयंति केचित् रज्ज्वा बध्नंति ३७ एके क्षिपंति अयं क्षीणवित्तः इमां वृत्तिं जगृहे ३८ अहो एषः अतिबली सन् मौनेन बकवत् अर्थं साधयाति ३९ इत्युक्त्वा दुर्वातयंति तं च बबंधुः निरुरुधुश्च ४० एवं सः प्राप्तं प्राप्तं दुःखं भोक्तव्यं आत्मनः दिष्टं अबुध्यत ४१ ततः परिभूतः सन् धृतिं धृत्वा इमां गाथां अगायत ४२॥ द्विज उवाच ॥ अयं जनः तथा देवतात्माग्रहकर्मकालाः मे सुखदुःखहेतुर्न सुखदुःखयोः कारणं मन एव आमनंति ४३ एवं केवलं भूतं मनः गुणवृत्तीः सृजति ताभ्यः सात्विकादिकर्माणि भवंति तेभ्यः देवादिसृतयः भवंति ४४ ॥१२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका तर्हिमनसएवसंसारः स्यान्नात्मनः इत्याशंक्याह । अनीहइति । अयमर्थः अविद्ययायो (मनोऽ) ध्यासस्तेनेयमात्मनः संसृतिः नतुस्वतः यतस्तद्रहितस्येश्वरस्यसानास्ति । किंतु तद्वतोजीवस्यैवेति तदेतदाह । मनसा (समीहता) समीहमानेननियंतृत्वेनसहवर्तमानोप्यात्मापरमात्माअनीहः तत्क्रियासंगरहितः यतोहिरण्मयः विद्याशक्तिप्रधानः (कुतः) यतोमत्सखः ममजीवस्यसखानियंताअतः उत्उच्चैः अतिरोहितज्ञानेनाविचष्टेकेवलंपश्यतीतात्पर्यः । असौपुनरयंजीवः स्वलिंगंस्वस्मिन्आत्मनिलिंगयतिद्योतयतिसंसारमितितथातन्मनः परिगृह्यआत्मत्वेनस्वीकृत्य (तस्य) मनसोगुणैः कर्मभिः संगतः संबद्धः गुणानांसंगाद्वाकामान्विषयान्जुषन्निबद्धइति ४५ अतोमनोनिग्रहेकृतेसर्वंकृतंस्यात्तंविनातुसर्वंव्यर्थमित्याह । दानमितिद्वाभ्याम् । स्वधर्मोनित्यनैमित्तिकलक्षणः सद्व्रतानिएकादश्युपवासादीनि । अन्यानिचयावंतिकर्माणि (श्रवणादीनिनिष्कामानि) सकामान्यपि एतेसर्वेउपायामनोनिग्रहलक्षणोअंतोनिष्ठाफलंयेषांतेतथा । ननु ज्ञानांगत्वंतेषांप्रसिद्धं तत्राह । मनसः समाधिर्निग्रहएवपरोयोगः ज्ञानम् ४६ यस्यमनःप्रशांतंकामक्रोधादिवृत्तिरहितंअतएवसमाहितंभवतितस्यकिंकृत्यमस्तिवदेतिपरंप्रत्युपदिशन्निवस्वयमेवाह । असंयतंविक्षिप्तंचेत् । यद्वा विनश्यत्आलस्यादिनालीयमानंचेद्भवेत्तर्हिएभिर्दानादिभिः किमपरंप्रयोजनंस्यात् । नकिंचिदित्यर्थः ४७ नन्वितरेंद्रियजयेसुखेनमनोजयःस्यात् नेत्याह मनोवशइति । देवाइंद्रियाणितदधिष्ठातारोवा भीष्मोयोगिनामपिभयंकरः मनोलक्षणोदेवः । कुतः । सहसोबलादपिबलिनोऽपिवासहीयान् । बलीयान् । अतस्तंयोवशवर्तिनंकुर्यात्सएवदेवदेवः सर्वेंद्रियजेताभवति नान्यः । तथाचश्रुतिः । "मनोवशेसर्वमिदंबभूवनान्यस्यमनोवशमान्वियात् । भीष्मोहिदेवःसहसःसहीयानि"ति४८अतः असह्यारागादयोवेगायस्यतंअतएवअरुंतुदंअरुर्मर्म (विवेकलक्षणं) तत्तुदतिव्यथयतिनाशयतीतिअरुंतुदस्तं तत्नेतिच्छेदः तंनविजित्यअजित्वा तत्ततःयेकेचित्मर्त्यैः कैश्चनअसद्विग्रहंशुष्कवैरंकुर्वंतितत्रचानुकूलप्रतिकूलादीन्अन्यान्मित्रादीन्कुर्वंतिमन्यंतेतेमूढाइत्यर्थः ४९ ततश्चतेऽनेनप्रकारेणसंसारेभ्रमंतीत्याह देहमिति । मनोमात्रपरिकल्पितमिमंस्वदेहमहमितिपुत्रादिदेहंचममेतिस्वीकृत्यतमसिसंसारे ५०

श्लोकाः ४५—५०

अनीहआत्मामनसासमीहताहिरण्मयोमत्सखउद्विचष्टे ॥ मनःस्वलिंगंपरिगृह्यकामाञ्जुषन्निबद्धोगुणसंगतोऽसौ ४५ दानंस्वधर्मोनियमोयमश्चश्रुतंचकर्माणिचसद्व्रतानि ॥ सर्वेमनोनिग्रहलक्षणांताःपरोहियोगोमनसःसमाधिः ४६ समाहितंयस्यमनःप्रशांतंदानादिभिःकिंवदतस्यकृत्यम् ॥ असंयतंयस्यमनोविनश्यद्दानादिभिश्चेदपरंकिमेभिः ४७ मनोवशेन्येह्यभवंश्चदेवामनश्चनान्यस्यवशंसमेति ॥ भीष्मोहिदेवःसहसःसहीयान्युंज्याद्वशेतंसहिदेवदेवः ४८ तंदुर्जयंशत्रुमसह्यवेगमरुंतुदंतन्नविजित्यकेचित् ॥ कुर्वंत्यसद्विग्रहमत्रमर्त्यैर्मित्राण्युदासीनरिपून्विमूढाः ४९ देहंमनोमात्रमिमंगृहीत्वाममाहमित्यंधधियोमनुष्याः ॥ एषोहमन्योयमितिभ्रमेणदुरंतपारेतमसिभ्रमंति ५०

चूर्णिका ततश्च इयं संसृतिः अविद्यया मनोध्यासेन जीवस्य भवति न स्वतः यतः तद्रहितस्येश्वरस्य सा नास्ति अतो जीवस्य बंधः नेश्वरस्येति ४५ किं च दानस्वधर्मादयः सर्वे उपायाः मनोनिग्रहार्थं परो योगस्तु मनोनियमनमेव ४६ यस्य मनः शांतं तस्य दानादिना किं वद यस्य मनः असंयतं तस्य दानादिभिः किंस्यात् न किंचित् ४७ किं च मनोवशे देवाः भवंति तत् अन्यस्य वशं नायाति यः मनो नियच्छेत् सः देवदेवः ४८ तत् मनः अविजित्य केचित् असद्विग्रहं कुर्वंति ते मूढाः ४९ किं च मनोमात्रं इदं देहं गृहीत्वा तत्र ममाहमिति ये बुद्धिं कुर्वंति ते संसारे भ्रमंति ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा. ए. टीका

तदेवंमनसएवसुखदुःखहेतुत्वमुपपाद्येदानीं (पूर्वोक्तानां) जनादीनांषण्णामकारणत्वंप्रपंचयति जनस्त्वितिषड्भिःअत्र च अस्मिन्नपिपक्षेआत्मनः (स्वस्वरूपस्य) किम् । नाकिंचित्सुखदुःखकर्मत्वं तत्कर्तृत्वंचेत्यर्थः । कुतइत्यतआह । हिनिश्चितं (तत्कर्तृत्वादि) भौमयोर्भूविकारयोः (जनस्यस्वस्यच) देहयोरेव । नत्वात्मनः अमूर्तस्याक्रियस्यचहननादिपुकर्मत्वकर्तृत्वानुपपत्तेः तथापिदुःखमात्मपर्यवसाय्येवेतिचेत् । एवमपिपरमात्मनश्चोभयत्राप्येकत्वान्नकोपाविषयोस्तीतिस्वदृष्टांतेनदर्शयति । जिह्वामिति । (यथाजिह्वादंताश्चस्वस्यैव एवमात्मपरदेहयोः स्वयमेकएवेति कस्यकर्मत्वकर्तृत्वे) ५१ यदिदेवताहेतुरस्तुमामतत्रापिपक्षेआत्मनः किम् । यतोविकारयोर्विक्रियमाणयोर्दैवतयोस्तत् । हस्तेनमुखेनिहतेतेनवाहस्तेदष्टेतदभिमानिनोर्वह्नींद्रयोरेवतत् । नत्वविक्रियस्यानहंकारस्यचात्मनः (देवतानांविकारत्वमहंकारोत्पन्नत्वात् ।) देवतानांसर्वदेहेष्वभेदात्नकोपविषयोस्तीतिस्वदेहदृष्टांतमाह । यत्यदाअंगंदेवताधिष्ठानंहस्तमुखादि । अतएवपूर्वत्रदेवतानांधिष्ठानरूपभूविकारदंतोदाहरणं युक्तम् ५२ आत्मनः सुखदुःखाद्याकारः परिणामः अतः सएवहेतुर्यदिस्यात् । तत्रतस्मिन्पक्षेअन्यतः किम् । नाकिंचिदन्यतोभवतियस्मैकुप्येदित्यर्थः । यतोनिजएवस्वभावः सः । नत्वन्यस्य । नन्वात्मनस्तथापरिणामोऽन्यनिमित्ततोभवतिअतोस्तिकोपविषयइतिचेत्तत्राह । नहीति ।आत्मनोन्यत्आत्मव्यतिरिक्तंनास्त्येव ।यदिस्यात्अस्तीतिप्रतीयेततर्हितन्मृषैव (मृगजलवदविचारितरमणीयंअधिष्ठानानतिरेकात्) अतः कस्माद्धेतोः क्रुध्येत्यतोनिमित्तनास्तिनापिसुखंदुःखंचेत्यर्थः ५३ ग्रहपक्षेप्यजस्यात्मनः किं । यतः जन्यतइतिजनोदेहस्तस्यैवजन्मलग्नापेक्षयाद्वादशाष्टमादिराशिस्थास्तेसुखदुःखयोर्निमित्तंभवंति (अजस्यजन्मशून्यत्वान्ननिमित्तं) किंच अंतरिक्षस्थैर्ग्रहैःतत्रस्थस्यग्रहस्यैवपादार्धादिदृष्ट्यादिभेदैः पीडांवदंतिदैवज्ञाः नतुतद्दृष्ट्यगोचरस्य । एवंग्रहगतैवपीडातल्लग्नोत्पन्नेदेहेतस्याभिमानात्पुरुषस्यभवतिनतुवस्तुतः । यतः पुरुषस्ततोलग्नाद्ग्रहाद्देहाच्चान्यः अतः कस्मैक्रुध्येत् ५४ कर्महेतुश्चेदस्तुअयमसत्योपगमः कर्मैवनास्तिकुतस्तस्यहेतुत्वमिति । तदाह । हियस्मात्तत्कर्मएकस्यैवजडाजडत्वेसतिस्यात्जडत्वाद्विकारित्वोपपत्तेः अजडत्वाच्चहिताहितानुसंधानतः। प्रवृत्तिसंभवात् तत्तुनसंभवतिविरोधात्। देहस्तुअचित्जडएव। अतस्तस्यप्रवृत्तिर्नसंभवतिपुरुषस्तुसुपर्णः शुद्धज्ञानस्वरूपः अतः कस्मैक्रुध्येत्। यतःसुखदुःखयोर्मूलभूतंकर्मैवनास्तीति ५५

जनस्तुहेतुःसुखदुःखयोश्चेत्किमात्मनश्चात्रहिभौमयोस्तत् ॥ जिह्वांक्वचित्संदशतिस्वदद्भिस्तद्वेदनायांकतमायकुप्येत् ५१ दुःखस्यहेतुर्यदिदेवतास्तु किमात्मनस्तत्रविकारयोस्तत् ॥ यदंगमंगेननिहन्यतेक्वचित्क्रुध्येतकस्मैपुरुषःस्वदेहे ५२ आत्मायदिस्यात्सुखदुःखहेतुःकिमन्यतस्तत्रनिजस्वभावः ॥ नह्यात्मनोन्यद्यदितन्मृषास्यात्क्रुध्येतकस्मान्नसुखंनदुःखम् ५३ ग्रहानिमित्तंसुखदुःखयोश्चेत्किमात्मनोऽजस्यजनस्यतेवै ॥ ग्रहैर्ग्रहस्यैववदंतिपीडांक्रुध्येतकस्मैपुरुषस्ततोन्यः ५४ कर्मास्तुहेतुःसुखदुःखयोश्चेत्किमात्मनस्तद्धिजडाजडत्वे ॥ देहस्त्वचित्पुरुषोयंसुपर्णःक्रुध्येतकस्मैनहिकर्ममूलम् ५५

चूर्णिका

किं च सुखदुःखहेतुः जनश्चेत्तर्हि आत्मनः किं तद्धिभूविकारदेहयोः यथा क्वचित् स्वदद्भिः जिह्वां दशति तद्वेदनायां कस्मै कुप्येत् ५१ किं च दुःखहेतुः देवतायदि तथापि आत्मनः किं तर्हितद्दुःखंदेवयोरेव यदा अंगं अगनहन्यते तदा कस्मैकुध्येत ५२ यदि सुखदुःखहेतुः आत्मा तथापि अन्यतः किम् यतःअयं निजस्वभावः अतः आत्मना विना किमपि न यद्यस्ति तर्हि तन्मृषा अतकस्मै क्रुध्येत ५३ किं च सुखदुःखनिमित्तं ग्रहाश्चेत्तर्हि किमात्मनः तत् देहस्यैव यथाग्रहैः ग्रहस्यैव पीडां वदंति ५४ किं च सुखदुःखहेतुः कर्म चेत् अस्तु तथाप्यात्मनः किम् तर्हि देहस्य स्यात् तस्यापि न संभवति यतः सः अचिज्जडः अतः कर्मैव नास्ति तस्मात् कस्मै कुध्येत ५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१२६॥

तत्रकालपक्षेपिआत्मनः किंपतोसावात्माकालात्मकएव। ब्रह्मांशत्वात् स्वांशस्यस्वतः पीडानास्तीत्यत्रदृष्टांतः। नाग्नेर्हेतौः तदंशस्यज्वालादेस्तापोदाहतोनाशोऽस्ति। तत्रोपाधिभूतकाष्ठांशदाहान्ना
शःस्यादितिदृष्टांतांतरमाह। हिमस्यतित् शैत्यंतदंशस्यतुपारकणस्यनाशकंनस्यात् इत्यर्थः। किंच। आस्तामंशत्वम्। वस्तुतःपरएवायंनचपरस्यद्वंद्वंसुखदुःखादिकंअस्तीति ५६ तदेवंपदेतेहेत
वःप्रसिद्धानिरस्ताः यदिकश्चिद्धेत्वंतरंउद्भावयेत्तदपियंतुमहिमापेक्षायांनसंभवतीत्याह। नकेनचिदिति। (अस्यात्मनःकेनचिद्धेतुनासुखदुःखादिद्वंद्वसंबंधोनस्यात्) नन्वपरोक्षोसौकथमपह्नूय
तेतत्राह। यथेति संसृतिमविद्यमानामेवरूपयतिप्रकाशयतीतितथातस्याहमःअहंकारस्ययथाद्वंद्वसंबंधः स्यात् ननथापरतःप्रकृतेःपरस्यात्मनः किंतु अहंकारनिमित्तोसौ नवास्तवइत्यर्थः एवंप्रबुद्धो
विवेकीयःसभूतैःकृत्वानबिभेति ५७ अतोऽहमप्येतयापरमात्मनिष्ठयातरिष्यामीत्याह। एतामिति सआस्थायेतिपाठेसोहमित्यन्वयः। नन्वियंनिष्ठैवकथंभवेत्तदाह। मुकुंदेति ५८ प्रस्तावेनसहगाथा
र्थंसंक्षेपतोदर्शयतिद्वाभ्याम्। इत्थंनष्टद्रविणोनिर्विचगतक्लमः (गतसंतापः) संन्यस्यगांपर्यटन् असद्भिर्निराकृतोपिस्वधर्मादकंपितःसन् मुनिरमूंगाथांआहअगायतेत्यन्वयः ५९ सुखदुःखप्रदोनम
नसोन्यः यतःमित्रोदासीनारिपवःसर्वोपिसंसारः तमसःअज्ञानतः आत्मनोमनसोविभ्रममात्रःकृतः नतुतात्विकइत्यर्थः ६० उक्तंद्वंद्वसहनोपायमुपसंहरति। तस्मादिति (मय्यभिनिवेशितयाबुद्ध्यामनोनि
ग्रहइतियत्एतावान्योगसंग्रहः द्वंद्वसहनस्योपायसंग्रहः) ६१ मनोनिग्रहाशक्तोप्येतच्छ्रवणादिनिष्ठस्तत्फलंप्राप्नोतीत्याह। यइति। द्वंद्वैःसुखदुःखादिभिः ६२ भिक्षुगीतमिषंकृत्वाभक्तचित्तगतंहरिः।
मोहंनिघ्नन्निवाभातिपरमानंदरूपतः॥ १॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांत्रयोविंशतितमोऽध्यायः॥ २३॥ ॥ ७॥ ॥

श्लोकाः ५६—६२

कालस्तुहेतुःसुखदुःखयोश्चेत्किमात्मनस्तत्रतदात्मकोसौ ॥ नाग्नेर्हितापोनहिमस्यतत्स्यात्क्रुध्येतकस्मैनपरस्यद्वंद्वम् ५६ नकेनचित्क्वापिकथंचनास्य
द्वंद्वोपरागःपरतःपरस्य ॥ यथाहमःसंसृतिरूपिणःस्यादेवंप्रबुद्धोनबिभेतिभूतैः ५७ एतांसमास्थायपरात्मनिष्ठामध्यासितांपूर्वतमैर्महर्षिभिः ॥ अहंत
रिष्यामिदुरंतपारंतमोमुकुंदांघ्रिनिषेवयैव ५८ ॥ श्रीभगवानुवाच ॥ निर्विद्यनष्टद्रविणोगतक्लमःप्रव्रज्यगांपर्यटमानइत्थम् ॥ निराकृतोऽसद्भिरपिस्वध
र्मादकंपितोऽमूंमुनिराहगाथाम् ५९ सुखदुःखप्रदोनान्यःपुरुषस्यात्मविभ्रमः ॥ मित्रोदासीनरिपवःसंसारस्तमसःकृतः ६० तस्मात्सर्वात्मनातातनि
गृहाणमनोधिया ॥ मय्यावेशितयायुक्तएतावान्योगसंग्रहः ६१ यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमाहितः ॥ धारयेच्छ्रावयेच्छृण्वन्द्वंद्वैर्नैवाभिभूयते
६२ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेभिक्षुगीतानामत्रयोविंशोध्यायः २३ ॥ ॥ छ ॥ ॥ छ ॥

चूर्णिका ॥१२६॥

किंच सुखदुःखहेतुः कालश्चेत्तर्हि आत्मनः किम् तदात्मक एव सः अतः कस्मै क्रुध्येत ५६ किं च अहंकारस्य यथा द्वंद्वसंबंधः स्यात् तथा परस्य आत्मनः न
एवं प्रबुद्धो यः सः भूतैर्न बिभेति ५७ एतां ऋषिभिः अध्यासितां आत्मनिष्ठां आस्थाय मुकुंदांघ्रिसेवया तमः तरिष्यामि ५८ ॥ श्रीभगवानुवाच ॥ हे उद्धव एवं
सः कदर्यः प्रव्रज्य दुष्टैः तिरस्कृतोपि अमूं गाथां आह ५९ पुरुषस्य सुखदुःखदः नान्योस्ति तथा मित्रोदासीनरिपवः न एवं सर्वोपि संसारः मनोविभ्रममात्रकृतः न ता
त्विकः ६० तस्मात् हे उद्धव सर्वात्मना मनः नियच्छ मयि स्थापितबुद्ध्या युक्तः भव अयमेवयोगसंग्रहः आदिष्टः ६१ यएतां भिक्षुणा गीतां ब्रह्मनिष्ठां समाहितः
धारयन् श्रावयन् शृण्वन् द्वंद्वैर्नैवाभिभूयते ६२ इत्येकादशे त्रयोविंशः २३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चतुर्विंशेतुसांख्येनमनोमोहोनिवार्यते । आत्मनःसर्वभावानांआगमापायचिंतया ॥ १ ॥ स्वपदद्वंद्वभक्तानामद्वंद्वत्वायसंयमम् । चित्तस्योक्त्वापुनःसांख्यज्ञानमत्राहतत्कृते ॥ २ ॥ अद्वितीयात्परमात्मनोमाययाप्रकृतिपुरुषद्वारासर्वंद्वैतमुदेतिपुनस्तत्रैवलीयतइत्यनुसंदधानस्यपुंसोद्वंद्वभ्रमोनिवर्ततइतिवक्तुंसांख्यंप्रस्तौति । अथेति । पूर्वैःकपिलादिभिः विनिश्चितम् । वैकल्पिकंविकल्पोभेदस्तन्निमित्तभ्रमम् सुखदुःखादिरूपम् १ अथोशब्दः कार्त्स्न्ये । ज्ञानंद्रष्टातेनदृश्यः कृत्स्नोऽर्थश्चअविकल्पितम् एकमेव ।(विकल्पशून्यंब्रह्मैवासीत्) ब्रह्मण्येवलीनमासीदित्यर्थः । कदेत्यपेक्षायामाह अयुगेयुगेभ्यः पूर्वंप्रलयइत्यर्थः तथाआदौयत्कृतयुगंतस्मिंश्च (सर्वेषामपिब्रह्मानुभूत्याभेदास्फूर्तेः) अन्यदापियदाविवेकनिपुणाजनाभवंतितदापितेषांचभेदास्फूर्तेः २ तद्बृहत्ब्रह्मवाङ्मनोगोचरंयथाभवतितथामायादृश्यंफलंतत्प्रकाशको (द्रष्टा) तद्रूपेणमायाविलासरूपेणवाद्विधाभूत् ३ तयोर्द्विधाभूतयोरंशयोर्मध्येउभयात्मिकाकार्यकारणरूपिणी (प्रकृतिःसैवार्थोदृश्यइत्यभिधीयते । ज्ञानंद्रष्टासतुपुरुषोऽभिधीयते) ४ मयापरमेश्वरेण (पुरुषस्यजीवस्यानुमतेनचप्रक्षोभ्यमाणायाःगुणाः) अभवन् अभिव्यक्तावभूवुः । जीवादृष्टप्रयुक्तत्वात्सृष्टेःपुरुषानुमतत्वंयुक्तं । यद्वा स्वस्यैवप्रकृतीक्षणरूपा या पुरुषावस्था तदनुमतेन तद्द्वारेणेत्यर्थः ("तदैक्षते"त्यादिश्रुतेः) ५ (तेभ्योगुणेभ्यः) सूत्रंक्रियाशक्तिमान्प्रथमोविकारः ततोमहान् ज्ञानशक्तिः नन्वयंमहानेवप्रथमोविकारः प्रसिद्धः (प्रकृतेर्महानितिश्रुते-)-स्तत्राह । सचज्ञानक्रियागर्भत्वात्सूत्रेणसंयुतः नपृथक् । एकमेवतत्त्वंक्रियाज्ञानशक्तिभ्यांद्विधोच्यतइत्यर्थः । (ततोमहतः) विमोहनः जीवस्यभ्रमहेतुः सजातः ६ (त्रिवृत्त्रिधा) यतस्तन्मात्रादीनांकारणम् । मनःशब्देनदेवानामप्युपलक्षणं । (तत्रतामसात्तन्मात्राणितैजसादिंद्रियाणि । वैकारिकान्मनोऽधिदेवताश्च) चिदचिन्मयः चिदाभासव्याप्तत्वादुभयग्रंथिरूपइतिजीवोपाधित्वंदर्शितं । यद्यपि"तस्माद्वाएतस्मादात्मनआकाशः संभूत"इत्यादिश्रुते"रन्नमयंहिसौम्यमन"इत्यादिश्रुतेश्चप्रथमंभूतानिजायंते । तेभ्योऽपंचीकृतेभ्यः (प्राणादिक्रमेणसमष्ट्यात्मकंलिंगशरीरंपंचीकृतेभ्यश्च) ब्रह्मांडंतस्मिन्वैराजस्तदंतर्यामीलीलाविग्रहःक्षीराब्धिशायीश्रीनारायणः तन्नाभिपद्मेचवैराजस्यभोगविग्रहश्चतुराननः ततोयथावसरंअन्येषांजीवानामाविर्भावइतिप्रक्रिया । तथापिचित्ताभिव्यक्तिपूर्वकोऽहंकारः ततोभूतेंद्रियादिव्यवहारः इत्येतावतामहदादिक्रमेणसृष्टिरुच्यते । तथोक्तं । "मुख्योहविस्फुलिंगाद्यैःसृष्टिर्याचोदितान्यथा । उपायः सोवतारायनास्तिभेदः कथंचने"ति ७

श्लोकाः १—७

॥ श्रीभगवानुवाच ॥ अथतेसंप्रवक्ष्यामिसांख्यंपूर्वैर्विनिश्चितम् ॥ यद्विज्ञायपुमानसद्योजह्याद्वैकल्पिकंभ्रमम् १ आसीज्ज्ञानमथोअर्थएकमेवाविकल्पितम् ॥ यदाविवेकनिपुणाआदौकृतयुगेऽयुगे २ तन्मायाफलरूपेणकेवलंनिर्विकल्पितम् ॥ वाङ्मनोगोचरंसत्यंद्विधासमभवद्बृहत् ३ तयोरेकतरोह्यर्थः प्रकृतिःसोभयात्मिका ॥ ज्ञानंत्वन्यतमोभावःपुरुषःसोभिधीयते ४ तमोरजःसत्त्वमितिप्रकृतेरभवन्गुणाः ॥ मयाप्रक्षोभ्यमाणायाःपुरुषानुमतेनच ५ तेभ्यःसमभवत्सूत्रंमहान्सूत्रेणसंयुतः ॥ ततोविकुर्वतोजातोयोहंकारोविमोहनः ६ वैकारिकस्तैजसश्चतामसश्चेत्यहंत्रिवृत् ॥ तन्मात्रेंद्रियमनसांकारणंचिदचिन्मयः ७

चूर्णिका

॥ श्रीभगवानुवाच ॥ अथ ते संप्रवक्ष्यामि सांख्यं पूर्वविनिश्चितम् यज्ज्ञात्वा पुमान् भेदभ्रमं जह्यात् १ हे उद्धव प्रलये तथा आद्ये कृतयुगे कृत्स्नोपि अर्थः द्रष्टा च इदं एकमेव ब्रह्मणि लीनं आसीत् २ तद्ब्रह्म ततः द्विधाभूत् ३ तयोर्मध्येएकतरः अर्थः सा प्रकृतिः अन्यतमो भावः पुरुषः ४ ततः प्रकृतेः त्रयो गुणाः अभवन् ५ तेभ्यः सूत्रं अभवत् ततो महान् तस्मात् वैकारिकः तैजसः तामसः इति तन्मात्रेंद्रियमनसांकारणं त्रिविधः अहंकारो जातः ६ ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१२८॥

तस्मात्त्रिविधात्त्रिविधप्रपंचोत्पत्तिंदर्शयति । अर्थइति । तन्मात्रिकाच्छब्दादितन्मात्रकारणात्तामसात्तद्द्वाराऽर्थोमहाभूतरूपोजज्ञेबभूव । भूतानामावरणस्वभावत्वात् (तामसजन्यत्वंयुक्तं) इंद्रियाणि दशतैजद्राजसात् । तेषांप्रवृत्तिस्वभावत्वात् । वैकृतात्सात्विकात्देवताः"दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाःचंद्रश्चे"त्येकादशचशब्दान्मनश्चतेषांप्रकाशस्वभावत्वात् ८ (सर्वेसंहत्यकारिणःमिश्री भूताभावास्तत्त्वानि) ममवैराजांतर्यामिणः ९ सलिलेसंस्थितिर्यस्यतत्सलिलसंस्थितितस्मिन्सलिलसंस्थितावंडेश्रीनारायणरूपोलीलाविग्रहेणसमभवंस्थितइत्यर्थः । विश्वाख्यंलोककारणभूतं तत्र चात्मभूः चतुराननरूपभोगविग्रहेणपुनःवैराजएतस्मिन्नाविर्भूतइत्यर्थः १० रजसायुक्तोमदनुग्रहात्तपसाकृत्वाऽसृजत् । भूः अतलादिसहिता । भुवः अंतरिक्षलोकः । स्वः स्वर्गः महर्लोकादेरप्युप लक्षणं (एवंत्रिधालोकान्) ११ लोकसृष्टिप्रयोजनमाह । देवानामितिसार्धेन । ओकोनिवासः । पदंस्थानं (भुवर्लोकआसीत् ।) त्रितयात् (लोकत्रया-)-त्परंमहर्लोकादि । भूमेरधः अतलादि १२ एवंव्यवस्थायांकारणमाहसार्धेन । त्रिलोक्यांपातालादिसहितायां (गुणत्रयात्मकानांकर्मणांसर्वागतयः संति) १३ योगादितारतम्येनयथोत्तरंमहर्लोकादयोगतयः । (भक्तियोगस्यतुगतिः) मद्ग तिर्वैकुंठलोकः १४ तत्रतुमद्गतिव्यतिरेकेणेतरगतयश्चंचलाइत्याह । वैराग्यार्थम् । मयाकालशक्तिनाधात्रापरमेश्वरेणकर्मफलप्रदेनहेतुभूतेन (एतस्मिन्) गुणप्रवाहेसंसारेउन्मज्जतिआसत्यलोकमुत्त मांगतिंप्राप्नोति । पुनर्निमज्जतिआस्थावरंनीचांगतिंप्राप्नोति १५ सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपत्यर्थत्वात्तत्प्रतिपादनायकारणेनकार्यव्याप्तिमाह । अणुरिति । उभयेनसंयुक्तोव्याप्तः तदाह प्रकृ त्येति । (तत्रबृहन्महान् । अणुः सूक्ष्मतरः । वृहन्महत्तरइत्यर्थः) १६

श्लोकाः ८/१६

अर्थस्तन्मात्रिकाज्जज्ञेतामसादिंद्रियाणिच ॥ तैजसाद्देवताआसन्नेकादशचवैकृतात् ८ मयासंचोदिताभावाःसर्वेसंहत्यकारिणः ॥ अंडमुत्पादयामासुर्मे मायतनमुत्तमम् ९ तस्मिन्नहंसमभवमंडेसलिलसंस्थितौ ॥ ममनाभ्यामभूत्पद्मंविश्वाख्यंतत्रचात्मभूः १० सोऽसृजत्तपसायुक्तोरजसामदनुग्रहात् ॥ लोकान्सपालान्विश्वात्माभूर्भुवःस्वरितित्रिधा ११ देवानामोकआसीत्स्वर्भूतानांचभुवःपदम् ॥ मर्त्यादीनांचभूर्लोकःसिद्धानांत्रितयात्परम् १२ अधो ऽसुराणांनागानांभूमेरोकोऽसृजत्प्रभुः ॥ त्रिलोक्यांगतयःसर्वाःकर्मणांत्रिगुणात्मनाम् १३ योगस्यतपसश्चैवन्यासस्यगतयोऽमलाः ॥ महर्जनस्तपः सत्यंभक्तियोगस्यमद्गतिः १४ मयाकालात्मनाधात्राकर्मयुक्तमिदंजगत् ॥ गुणप्रवाहएतस्मिन्नुन्मज्जतिनिमज्जति १५ अणुर्बृहत्कृशःस्थूलोयोयोभावः प्रसिद्ध्यति ॥ सर्वोप्युभयसंयुक्तःप्रकृत्यापुरुषेणच १६

चूर्णिका

ततः तामसाहंकरात् भूतानि राजसात् इंद्रियाणि सात्विकात् देवता अभवन्ततः एतेभावाः ८ मया प्रेरिताः संतः एकत्र मिलित्वा मत्स्थानं अंडं उत्पादयामासुः ९ ततः तस्मिन् जलस्थे अंडे अहं स्थितः ततः मम नाभ्यां पद्मं जातं तत्रब्रह्मा जातः १० सःरजसा युक्तः सन् मदनुग्रहात् त्रीन् लोकान् भूरादीन् सपालान् ससर्ज ११ तत्र देवानां स्वर्लोकः वास स्थानं भूतानां अंतरिक्षं वासस्थानं मर्त्यानां भूर्लोकः वासस्थानं सिद्धानां महर्लोकादिवासस्थानं १२ भूमेः अधः अतलादि असुरादीनां वासस्थानं ब्रह्मा असृजत् एवं त्रिगुणात्मककर्मणां सर्वगतयः त्रिलोक्यामेव १३ योगतपआदीनां महर्लोकादिगतयः भक्तियोगस्य तु गतिः वैकुंठः १४ वैकुंठं विना सर्वाः गतयः चलाः इत्याह कालात्मना मया हेतुभूतेन इदं जगत् संसारे उन्मज्जति निमज्जति १५ यो यो भावः सर्वोपि सः प्रकृतिपुरुषयुक्तोस्ति १६

१ 'स्वभावत्त्वादि'तिमु॰मु॰पुस्तकपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

इदानीं कार्यस्य कारणात्मतां दर्शयति। यस्य कार्यस्य य आदिः कारणं अंतो लयस्थानं च तस्य मध्यं मध्यावस्थापि स एव वै प्रसिद्धं मृत्सुवर्णादिषु। अत एवाव्यभिचारित्वात् स एव सन् सत्यः नेतरः अलं तर्हि मिथ्याभूत कार्यं दृष्टत्वात्तत्राह। विकार इति। तैजसाः कटककुंडलादयः पार्थिवा घटशरावादयश्च यथेति (यथाऽव्यवहारार्थास्तथा) १७ नन्वेवं तर्हि स्वकार्यं प्रति महदादीनामप्याद्यंतरूपत्वात् सत्त्वं स्यात्तत्राह। यदिति। यद्रूपमुपादाय उपादानकारणतया स्वीकृत्य पूर्वः कारणरूपो महदादिर्भावः परं अहंकारादिकं भावं विकुरुते सृजति यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति तद्वत्। स एव सन्निति पूर्वस्यानुषंगः। कथं तर्हि मृत्तिकेत्येव सत्यमित्यादिश्रुतिस्तत्राह। आदिरिति। यत् यदा यस्यादिरंतश्च विवक्ष्यते तदा तत्सत्यमित्यभिधीयते श्रुत्या। परमकारणस्यात्मनः सत्यत्वविवक्षयेत्यर्थः। (यथा पिंडघटादेः परमकारणं मृदेव सत्या तथा महदहंकारादेः परमकारणं ब्रह्मैव सत्यं इति भावः) १८ ननु तथापि प्रकृतिपुरुषकालानामकार्यभूतानां भिन्नत्वात्कथमद्वितीयता तत्राह। प्रकृतिरिति। अस्य सतः कार्यस्योपादानं या प्रकृतिः प्रसिद्धा यश्च तस्या आधारः अधिष्ठाता परः पुरुषो यश्च गुणक्षोभेणाभिव्यंजकः कालस्तत् त्रितयं ब्रह्मरूपोऽहमेव। न तु पृथक्। प्रकृतेः शक्तित्वात् पुरुषकालयोरवस्थारूपत्वात् १९ एतावत्कालत्रयेप्यव्यभिचारित्वात् ब्रह्मैव सत्यमिति वक्तुं तस्य सृष्टिकारणत्वेनादौ सत्त्वमुक्त्वा मध्येपि तस्यैव सत्त्वमुपपाद्यांतेपि अवधित्वेन सत्त्वं दर्शयिष्यन् सर्गप्रवाहरूपायाः स्थितेरवधिमाह। सर्ग इति महान् बहुलः पौर्वापर्येण पितृपुत्रादिरूपेण नित्यशः अविच्छेदेन प्रवर्तते। किमर्थं तदाह। गुणेषु देहेषु विविधतया सृज्यत इति गुणविसर्गो जीवः तदर्थः तद्भोगप्रयोजनः। किंपर्यंतं प्रवर्तते तदाह। यावत्स्थितेरंतः। सोपि किमवधिकस्तत्राह। यावदीक्षणम्। (तदैक्षतेति श्रुत्युक्तं) परमेश्वरस्येक्षणं यावत्तावत् (प्रलयावधिस्ततः पुनः सृष्टिरित्यर्थः) २० प्रलयं निरूपयति। विराट् ब्रह्मांडं मया कालात्मना साद्यमानो व्याप्यमानः लोकानामहरहः कल्पाः सृष्टिप्रलयास्ते विविधाः कल्प्यंते यस्मिन्। तान्वा स्वस्मिन् विकल्पयतीति तथा। स तथाभूतोपि पंचत्वरूपाय विशेषाय विभागाय कल्पते योग्यो भवति। यः पंचानां भूतानामैक्यरूपः स तेषां पृथग्भावापत्त्या नश्यतीत्यर्थः २१ तत्र "तस्माद्वा एतस्मादात्मन आकाशः संभूतः आकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योन्नं अन्नाद्रेतः रेतसः पुरुष" इति श्रुत्युक्तसृष्टिक्रमप्रातिलोम्येन प्रलयमाह। अन्न इति। मर्त्यं शरीरं येनोपचितं तस्मिन्नन्ने शतवर्षायामनावृष्ट्यां क्षीणे सति तत्रैव लीयत इत्यर्थः। अन्नं धानासु बीजमात्रावशेषं भवतीत्यर्थः। धाना भूमौ उप्तान प्ररोहंतीत्यर्थः। भूमिर्गंधे संवर्तयादित्यशोषितां संकर्षणमुखाग्निना दग्धा च सती भूतसूक्ष्मरूपगंधमात्रावशेषा भवति २२

श्लोकाः १७—२२

यस्तु यस्यादिरंतश्च स वै मध्यं च तस्य सन्॥ विकारो व्यवहारार्थो यथा तैजसपार्थिवाः १७ यदुपादाय पूर्वस्तु भावो विकुरुते परम्॥ आदिरंतो यदा यस्य तत्सत्यमभिधीयते १८ प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः॥ सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहम् १९ सर्गः प्रवर्तते तावत्पौर्वापर्येण नित्यशः॥ महान् गुणविसर्गार्थः स्थित्यंतो यावदीक्षणम् २० विराण्मयासाद्यमानो लोककल्पविकल्पकः॥ पंचत्वाय विशेषाय कल्पते भुवनैः सह २१ अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते॥ धाना भूमौ प्रलीयंते भूमिर्गंधे प्रलीयते २२

चूर्णिका

यस्य यः आदिः अंतश्च तस्य मध्यं स एव अतः स एव सन् सर्वो विकारः व्यवहारार्थः यथा कटकादयः १७ पूर्वो भावः यदुपादानं स्वीकृत्य अपरं कार्यं सृजति आदिरंतो यदा यस्य तत्सत्यं एकमेव ब्रह्म उच्यते १८ किं च अस्य उपादानं माया आधारः पुरुषः गुणक्षोभेण अभिव्यंजकः कालः एतत्त्रयं ब्रह्मरूपोऽहमेव १९ किं च अयं महान् सर्गः यावत् परमेश्वरस्य ईक्षणं तावत् पितृपुत्रादिरूपेणानित्यशः वर्तते २० अथ प्रलयमाह इदं मया कालात्मना ब्रह्मांडं व्याप्यमानं सत् भुवनैः सह प्रलयाय कल्पते तत्प्रकारमाह २१ शरीरं अन्ने लीयते अन्नं धानासु लीयते ताः भूमौ लीयंते सा गंधे लीयते २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(अप्सु) गंधः शतवर्षया वृष्ट्या प्लाव्यमानोल्लीयते । एवमेवापश्च ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवंति सरसोपि तस्मिञ्ज्योतिषि लीयते ज्योतिश्च वायुनाभिभूयमानं रूपमात्रंसत्तस्मिल्लीयते२३वायु श्चकालप्रेरितेनांबरेणग्रस्तः स्पर्शमात्रःसन्तस्मिन् (अंबरे) अंबरंचभूतादिनाऽहंकारेणग्रस्यमानंशब्दतन्मात्रेलीयते । तदेवंतामसाहंकारकार्यस्यशब्दपर्यंतंलयमुक्त्वा राजसाहंकारकार्यस्याप्याह । इंद्रियाणिस्वयोनिर्ष्विति । स्वप्रवर्तकदेवतासुइंद्रियाणांलयः तेषांप्रवृत्तिस्वभावत्वात्प्रवृत्तेश्चदेवताधीनत्वात्तासुलयइतिवाचोयुक्तिः । वस्तुतस्तुस्वकारणेराजसाहंकारएवलयोभिप्रेतः २४ योनिरि त्युद्देश्यगतत्वात्एकत्वमविवक्षितम् । (हेसौम्य) योनयोदेवतामनसिकुतः ईश्वरेनियंतरि''मनोवशेऽन्येअभवंश्चदेवा''इत्युक्तत्वात् । इंद्रियलयोक्तएवात्रात्रूप्यभिप्रायः । मनश्चदेवताभिःसहवैकारिके ऽहंकारइत्यर्थः तामसाहंकारकार्यावशेषितस्यशब्दस्यलयमाह । शब्दोभूतादितामसाहंकारंअप्येति । तस्मिल्लीयतइत्यर्थः । भूतादिरित्युपलक्षणं त्रिविधोप्यहंकारोमहति जडांशंविहायज्ञानक्रियाश क्तिमात्ररूपोभवति । कथंभूतः प्रभुः समर्थः सर्वजगन्मोहकत्वात् २५ सचमहान्स्वकारणेषुगुणेषुज्ञानक्रियाशक्तिमत्त्वात् (अतिशयेनगुणवान्) गुणवत्तमः । तादृग्भावंविहायगुणमात्ररूपोभवति ते (गुणाः) अव्यक्तेप्रकृतौ । साम्यावस्थांगच्छंतीत्यर्थः । तदव्यक्तंकालेकालाधीनत्वात्तेनैकीभूयावतिष्ठते । (कथंभूते)। अव्ययेउपरतवृत्तौ २६ मायामयेमायाप्रवर्तकेज्ञानमयेवाअतएवजी वयतीतिजीवस्तस्मिन्महापुरुषे अयंभावः विश्वस्रष्टुर्महापुरुषस्योपकरणरूपः कालोवृत्त्यंशेनसृज्यश्चअतस्तदात्मनावतिष्ठतइति । तदुक्तंसप्तमे । ''कालंचरंतंसृजतीशआश्रयंप्रधानंपुंभ्यांनरदेवसत्यकृ दि''ति । दशमेच । ''योयंकालस्तस्यतेव्यक्तबंधोचेष्टामाहुश्चेष्टतेयेनविश्वम् । निमिषादिर्वत्सरांतोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्ये''इति । जीवआत्मनिप्रकृतेर्लीनत्वात्प्रतियोग्यभावात्परिपूर्णसद्रूपे णावतिष्ठते । आत्मात्वात्मस्थएवनान्यत्रलीयते । यतः केवलोनिरुपाधिः अत्रहेतुः विकल्पापायाभ्यांविश्वोत्पत्तिलयाभ्यांलक्ष्यतेअधिष्ठानत्वेनावाधित्वेनचेतितथासः २७ अस्यकथनस्यप्रस्तुतोपयो गमाह । एवमिति । मनसः कथंभेदनिमित्तोभ्रमः स्यात् । जातोवाकथंहृदितिष्ठेदिति २८

श्लोकाः २३/२८

अप्सुप्रलीयतेगंधआपश्चस्वगुणेरसे ॥ लीयतेज्योतिषिरसोज्योतीरूपेप्रलीयते २३ रूपंवायौसचस्पर्शेलीयतेसोपिचांबरे ॥ अंबरंशब्दतन्मात्रइंद्रियाणि स्वयोनिषु २४ योनिर्वैकारिकेसौम्यलीयतेमनसीश्वरे ॥ शब्दोभूतादिमप्येतिभूतादिर्महतिप्रभुः २५ सलीयतेमहान्स्वेषुगुणेषुगुणवत्तमः ॥ तेव्यक्तेसंप्र लीयंतेतत्कालेलीयतेऽव्यये २६ कालोमायामयेजीवेजीवआत्मनिमय्यजे ॥ आत्माकेवलआत्मस्थोविकल्पापायलक्षणः २७ एवमन्वीक्षमाणस्यकथंवै कल्पिकोभ्रमः ॥ मनसोहृदितिष्ठेतव्योम्नीवार्कोदयेतमः २८

चूर्णिका

सः अप्सु लीयते ताः रसे लीयंते सः ज्योतिषि लीयते तत् रूपे लीयते २३ तत् वायौ लीयते सः स्पर्शेलीयते सः अंबरे लीयते तत् शब्दे लीयते इंद्रियाणि राजसाहंकारे लीयंते २४ देवताःमनश्चसात्विकाहंकारे लीयते अब्दःअहंकारे लीयते सः महति लीयते २५ महान्गुणेषुलीयते गुणाःप्रकृतौ लीयंते सा कालेन एकीभूय तिष्ठति २६ कालः मायाप्रवर्तके महापुरुषे सः मयि आत्मनि आत्मा तु आत्मस्थ एव नान्यत्र लीयते २७ एवं विचार्यमाणस्य पुंसः मनसि वैकल्पिको भ्रमःकथं तिष्ठेत् यथा व्योम्नि अर्कोदये तमः २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपसंहरति एवमिति (आत्माकर्ताऽकर्तावेत्यादिसंशयरूपग्रंथेः छेदकः प्रतिलोमानुलोमाभ्यांप्रलयोत्पत्तिक्रमाभ्यांकथितः) २९॥प्रत्यक्षमिवयेनेदंदर्शितंतत्त्वमात्मनः। सांख्यप्रख्यानतस्तस्मैहरयेगुरवे नमः ॥ १ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेचतुर्विंशोऽध्यायः २४ ॥ ॥ ७ ॥ ॥ पंचविंशेस्वनैर्गुण्यप्रतिपत्त्यैनिरूप्यते । चित्तप्रभावसत्त्वादिगुणवृत्तिरनेकधा ॥१॥ प्रकृतिपुरुषज्ञानवतोपि यावत्प्रयत्नविशेषेणगुणत्रयवृत्तिजयोनस्यात्तावद्द्वंद्वोपरमः अतस्तज्जयोपायकथनायगुणवृत्तिनिरूपणार्थमाह । गुणानामिति । सहमिश्रीभूय वर्तमानाः सामिश्राःनसमिश्राअसमिश्रास्तेषांविभक्तानां गुणानांमध्येयेनगुणेनयथायादृशोभवेत्तदिदंकथयतोमत्तोनिबोधेत्यर्थः १तत्रसत्त्ववृत्तीराह शमइति । शमोमनोनिग्रहः दमोबाह्येंद्रियनिग्रहःतितिक्षासहिष्णुत्वंईक्षाविवेकः । तपः स्वधर्मवर्तित्वम् । स्मृतिः पूर्वापरानुसंधानम्। तुष्टिर्यथालाभसंतोषः। त्यागो व्ययशीलत्वं अस्पृहा वैराग्यंश्रद्धा आस्तिक्यम्। ह्रीः अनुचिते कर्मणिलज्जा।दयादानं"दयदानगतिरक्षणेष्वि"तिस्मरणात्। आदिशब्देनआर्जव विनयादि। स्वनिर्वृतिः आत्मरामः २ रजसोवृत्तीराह । कामोऽभिलाषः।ईहा व्यापारः। मदो दर्पः। तृष्णा लाभेसत्यप्यसंतोषः। स्तंभोगर्वः। आशीर्धनाद्यभिलाषेण देवतादिप्रार्थनम्। भिदाअहमन्यइतिभेदबुद्धिः । सुखंविषयभोगः । मदोत्साहः मदेनयुद्धाद्यभिनिवेशः । यशःप्रीतिः स्तुतिप्रियता । हास्यमुपहासः । वीर्यंप्रभावाविष्कारः । बलेनोद्यमः । न्यायेनोद्यमस्तुसात्त्विकएव ३ तमोवृत्तीराह । क्रोधइति । क्रोधोऽमर्षेणेनहस्तनिष्पीडनादि । लोभोव्ययपराङ्मुखता ।(अनृतमशास्त्रीयंप्रमाणमितिभाषणम् हिंसाद्रोहः याञ्चाप्रार्थना। दंभोधर्मध्वजित्वं। क्लमः श्रमः। कलिः कलहः । शोकोऽनुशोचनम्। मोहोभ्रमः। विषादोदुःखम्। आर्तिर्दैन्यम् । निद्रातंद्रा। आशाइदंमेभविष्यतीतिअन्वीक्षा । भीर्भयम् । अनुद्यमोजाड्यम् ४ अनुपूर्वशः क्रमेण । एताः श्लोकत्रयोक्ताः । वर्णितप्रायाः अन्याअप्यूह्याइतिभावः। (संनिपातंमिश्रणम्) ५

॥१३१॥

श्लोकाः २९/५

एवंसांख्यविधिःप्रोक्तःसंशयग्रंथिभेदनः ॥ प्रतिलोमानुलोमाभ्यांपरावरदृशामया २९ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेचतुर्विंशतितमोऽध्यायः २४ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ गुणानामसमिश्राणांपुमान्येनयथाभवेत् ॥ तन्मेपुरुषवर्येदमुपधारयशंसतः १ शमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृतिः ॥ तुष्टिस्त्यागोऽस्पृहाश्रद्धाह्रीर्दयादिःस्वनिर्वृतिः २ कामईहामदस्तृष्णास्तंभआशीर्भिदासुखम् ॥ मदोत्साहोयशःप्रीतिर्हास्यंवीर्यंबलोद्यमः ३ क्रोधोलोभोऽनृतंहिंसायाञ्चादंभःक्लमःकलिः ॥ शोकमोहौविषादार्तीनिद्राशाभीरनुद्यमः ४ सत्त्वस्यरजसश्चैतास्तमसश्चानुपूर्वशः ॥ वृत्तयोवर्णितप्रायाःसंनिपातमथोशृणु ५

चूर्णिका

एष[1] सांख्यविधिः प्रोक्तः संशयग्रंथिभेदनः प्रतिलोमानुलोमाभ्यां परावरदृशा मया २९ ॥ ॥ इत्येकादशे चतुर्विंशतितमः ॥ २४ ॥ ॥ ७ ॥ ॥ ॥ श्रीभगवानुवाच ॥ ॥ हे उद्धव विभक्तानां गुणानां मध्ये पुमान् येन गुणेन यादृशो भवेत् तन्निबोध १ तत्र सत्त्ववृत्तीराह शमः दमः तितिक्षा विवेकः तपः सत्यं दया स्मृतिः तुष्टिः त्यागः अस्पृहा श्रद्धा ह्रीः दानं इत्यादि २ रजोवृत्तीराह अभिलाषःव्यापारः ईहा मदः तृष्णा गर्वः आशीः भेदःसुखं भेद बुद्धिः मदोत्साहः यशःप्रीतिः हास्यं वीर्यं बलोद्यमः इत्यादि ३ अथतमोवृत्तीराह क्रोधः लोभः अनृतं हिंसा याच्ञा दंभः क्लमः कलहः शोकमोहौ दुःखं दैन्यंच निद्रा आशा भीः अनुद्यमः ४ एताः गुणवृत्तयो वर्णिताः सन्निपातमथोशृणु ५

॥१३१॥

१ 'एषसांख्यविधिःप्रोक्त'इति मु॰ मु॰ पाठभेदः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विभक्तानांवृत्तयोवर्णिताः मिश्राणामाह । सन्निपातइतित्रिभिः अहंममेतिममतानुषक्तसवृत्तिसामानाधिकरण्यदर्शनात्संनिपातजत्वम् । अहंशांतः कामीक्रोधीत्यादि तथाममपुत्रः शांतः कामीक्रोधीत्यादि । तथाममशांतिरस्ति कामःक्रोधश्चेत्यादिद्रष्टव्यम् । एतत्पूर्वकः सर्वोव्यवहारश्चसंनिपातकार्यमित्याह । व्यवहारइति । अत्रहेतुः मनश्चमात्राणिचशब्दादीनिइंद्रियाणिचअसवश्चतैः । मनआदीनांसात्त्विकतामसराजसत्वात्तैर्व्यवहारःसांनिपातजइतिभावः ६ असौपुरुषोयदाधर्मादिषुपरिनिष्ठितोभवतितदाअयंत्रिषुधर्मादिषुनिष्ठारूपः संनिकर्षःसंनिपातकार्यंधर्मादीनांसत्त्वतमोरजःकार्यत्वात् ।विषयतःसंनिपातजत्वमुक्त्वाफलतश्चतथात्वमाह । श्रद्धारतिधनानि सत्त्वरजस्तमोमयानिआवहतीतितथा ७ धर्मनिष्ठायामेवसन्निपातंदर्शयाति । प्रवृत्तिलक्षणेकाम्येधर्मेयदापुंसोनिष्ठाभवतितथापुमान्यदागृहाश्रमएवसक्तःतिष्ठेत् । अनुपश्चात्स्वधर्मेचनित्यनैमित्तिकेतिष्ठेत् । तदासापिसमितिः सन्निपातः । हियस्माद्गुणानांतेधर्माः । काम्यधर्मेगृहासक्तिस्वधर्मारजस्तमःसत्त्वमयाइत्यर्थः ८ तदेवंमिश्रामिश्रगुणवृत्तीः प्रदर्श्येदानींपुमान्येनयथाभवेदितियदुक्तंतदर्शयाति । पुरुषमितित्रिभिः ९ १० हिंसांशत्रुमरणादिकमाशास्ययोभजेत्तंतामसंविद्यात् । एतैर्गुणैरेवंभूतोभवतीतितात्पर्यार्थः ११ ननु तवापिगुणवशेनकर्तृत्वाविशेषात् । केनविशेषेणत्वंसेव्योजीवश्चसेवकइतिनियमः यतोमांभजेतेतिवारंवारमुच्यतेतत्राह । सत्त्वमिति । जीवस्यैव न मे कुतः यतः चित्तजाः जीवोपाधौचित्तेऽभिव्यज्यंते । अतोयैः सएवबध्यते । कीदृशः भूतानांदेहरूपाणांअन्येषांचमध्येसज्जमानोनिबध्यते । अहंत्वनासज्जमानोगुणनियंतृत्वेनसृष्ट्यादिकर्तापिनित्यमुक्तःअतोमहान्विशेषइतिभावः । यद्वा भूतानामपंचीकृतानांयत्कार्यभूतंचित्तं "अन्नमयंहिसौम्यमन" इतिश्रुतेः तत्प्रभवाः अतोभूतोपहितस्यजीवस्यैवेतिअन्यत्समानम् १२ तदेवंमिश्रामिश्रगुणकार्याणिप्रदर्श्येदानीमेकैकगुणोद्रेककार्याणिदर्शयाति सप्तदशभिः । यदा (सत्त्वमुद्रिक्तंकर्तृ) इतरौगुणौ (रजस्तमसीकर्मभूतेजयेत्अभिभवेत्भास्वरंप्रकाशकंविशदंस्वच्छंशिवंशांतंइतिशिवस्वविशदत्वभास्वरत्वानांयथाक्रमंसुखधर्मज्ञानहेतुत्वात्तदातैर्युज्यतेआदिशब्दाच्छमदमादिभिश्च १३

श्लोकाः

संनिपातस्त्वहमितिममेत्युद्धवयामतिः ॥ व्यवहारःसंनिपातोमनोमात्रेंद्रियासुभिः ६ धर्मेचार्थेचकामेचयदासौपरिनिष्ठितः ॥ गुणानांसन्निकर्षोयंश्रद्धारतिधनावहः ७ प्रवृत्तिलक्षणेनिष्ठापुमान्यर्हिगृहाश्रमे ॥ स्वधर्मेचानुतिष्ठेतगुणानांसमितिर्हिसा ८ पुरुषंसत्त्वसंयुक्तमनुमीयाच्छमादिभिः ॥ कामादिभीरजोयुक्तंक्रोधाद्यैस्तमसायुतम् ९ यदाभजतिमांभक्त्यानिरपेक्षःस्वकर्मभिः ॥ तंसत्त्वप्रकृतिंविद्यात्पुरुषंस्त्रियमेववा १० यदाआशिषआशास्य मांभजेतस्वकर्मभिः ॥ तंरजःप्रकृतिंविद्याद्धिंसामाशास्यतामसम् ११ सत्त्वंरजस्तमइतिगुणाजीवस्यनैवमे ॥ चित्तजायैस्तुभूतानांसज्जमानोनिबध्यते १२ यदेतरौजयेत्सत्त्वंभास्वरंविशदंशिवम् ॥ तदासुखेनयुज्येतधर्मज्ञानादिभिःपुमान् १३

६
—
१३

चूर्णिका

हेउद्धव अहंममेतियाधीः अयं सन्निपातो ज्ञेयः किं च मन आदिभिःयो व्यवहारः सोपि सन्निपातः ६ अपि च असौ पुमान् धर्मार्थकामेषु यदा स्थितो भवति तदा अयं त्रिषु निष्ठारूपः सन्निपातोज्ञेयः ७ किं च यदा काम्यधर्मे पुंसः निष्ठा भवति तथा गृहे एव सक्तः सन् स्वधर्मे तिष्ठेत् सोपि सन्निपातः ८ अथ केवलसत्त्वयुक्तं पुरुषं शमादिभिः अनुमीयात् रजोयुक्तं कामादिभिः अनुमीयात् तमोयुक्तं क्रोधाद्यैः अनुमीयात् ९ किं च पुमान् निरपेक्षः सन् यदा मां भजति तं पुरुषं स्त्रियं वा सत्त्वप्रकृतिं विद्यात् १० यदा आशिषः आशास्य मां भजेत् तं रजःप्रकृतिं विद्यात् यदा हिंसां उद्दिश्य मां यः भजेत् तं तमःप्रकृतिं विद्यात् ११ हे उद्धव एते गुणाः त्रयः जीवस्यैव मे न अतस्तैः स एव बध्यते नाहम् १२ किं च यदा सत्त्वगुणः इतरौ जयेत् तदा पुमान् सुखादिभिर्युज्येत १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तमश्चसत्त्वंचकर्मभूतंरजःकर्तृ । संगंसंगहेतुः भिदाभेदहेतुः बलंप्रवृत्तिस्वभावंयतएतादृशंरजः अतो (दुःखादिभिर्युज्येतत्र) संगहेतुत्वाद्यशसाश्रियाचयुज्येत तत्कामः पुमान्भवतीत्यर्थः भिदाहेतुत्वाद्दुःखेनयुज्येत ।"द्वितीयाद्वैभयंभवती"तिश्रुतेः । बलहेतुत्वात्कर्मणायुज्येत १४ यदारजः सत्त्वंचकर्मभूतंतमःकर्तृ जयेत् मूढंविवेकभ्रंशकं लयंआवरणात्मकं जडंअनुद्यमात्मकं अतोमूढत्वाच्छोकमोहहिंसाभिः लयत्वान्निद्रयाजडत्वादुद्यमाभावेनकेवलमाशयायुज्येतेतिद्रष्टव्यम् । जनइतिपाठेलयात्मकत्वमेवनिद्राशयोर्हेतुः १५ किंच । यदाचित्तंप्रसीदेतस्वच्छंभवेत् । निर्वृतिरुपरतिः (असंगंविरक्तं) तत्तदामत्पदंमदुपलब्धिस्थानंसत्त्वमुद्रिक्तंविद्धि । (अभयं कथंजीविष्यामीत्यादिभयराहित्यम्) १६ यदापुनः क्रिययाविकुर्वन्विकारंप्राप्नुवन् आधीर्भवतिआसमंताद्विक्षिप्ताधीर्यस्यसः । चेतसांबुद्धींद्रियाणांअनिवृत्तिः अनुपरतिः (प्रवृत्तिः) गात्राणिकर्मेंद्रियाणितेषामस्वास्थ्यंविकाराधिक्यंमनोभ्रांतंचंचलं एतैः तदारजउत्कटंनिशामयजानीहि १७ यदासीदत्तिरोभवत् चेतसोग्रहणेचिदाकारपरिणामेअक्षमंसाच्चित्तंविलीयेत । मनोपिसंकल्पात्मकंनष्टंलीनंभवेत् तमोऽज्ञानंग्लानिर्विषादश्चभवतितत्तदातमउत्कटंउपधारयविद्धि १८ किंच । एधमानइति । इंद्रियाण्येवनिवृत्तिप्रवृत्तिमोहस्वभावानिदेवासुररक्षःसंज्ञानि । यद्वा प्रसंगादाधिदैविकानांगुणानांउत्कर्षकार्याण्युक्तानीतिज्ञेयं (असुराणांराजसानाम्) १९ गुणोत्कर्षतोऽवस्थाभेदंदर्शयति । सत्त्वादिति । प्रसंगात्त्रिगुणावस्थामाह । तुरीयंचतुर्थमवस्थांतरंनामत्रिषुजागरणादिषुसंततंएकरूपमेव । (अवस्थात्रयसाक्षिभूत -)- मात्मतत्त्वमेवेत्यर्थः २० गुणोत्कर्षद्वारेणतत्तत्कर्मफलनिष्ठांप्रदर्शयति । उपर्युपरीति । ब्राह्मणावेदार्थानुष्ठानाभियुक्ता आब्रह्मणइतिपाठेब्रह्मलोकमभिव्याप्येत्यर्थः । आमुख्यात् स्थावरमाभिव्याप्या-(-धोऽधोगच्छंति) अंतरचारिणोमनुष्याएवभवंति । (तत्रापिगुणतारतम्याद्गतितारतम्यमूह्यम्) २१

श्लोकाः १४/२१

यदाजयेत्तमःसत्त्वंरजःसंगंभिदामलम् ॥ तदादुःखेनयुज्येतकर्मणायशसाश्रिया १४ यदाजयेद्रजःसत्त्वंतमोमूढंलयंजडम् ॥ युज्येतशोकमोहाभ्यांनिद्रयाहिंसयाऽऽशया १५ यदाचित्तंप्रसीदेतइंद्रियाणांचनिर्वृतिः ॥ देहेऽभयंमनोऽसंगंतत्सत्त्वंविद्धिमत्पदम् १६ विकुर्वन्क्रिययावाऽऽधीरनिर्वृत्तिश्चचेतसाम्॥ गात्रास्वास्थ्यंमनोभ्रांतंरजएतैर्निशामय १७ सीदच्चित्तंविलीयेतचेतसोग्रहणेऽक्षमम् ॥ मनोनष्टंतमोग्लानिस्तमस्तदुपधारय १८ एधमानेगुणेसत्त्वेदेवानांबलमेधते ॥ असुराणांचरजसितमस्युद्धवरक्षसाम् १९ सत्त्वाज्जागरणंविद्याद्रजसास्वप्नमादिशेत् ॥ प्रस्वापंतमसाजंतोस्तुरीयंत्रिषुसंततम् २० उपर्युपरिगच्छंतिसत्त्वेनब्राह्मणाजनाः ॥ तमसाऽधोऽधआमुख्याद्रजसांऽतरचारिणः २१

चूर्णिका

अपि च यदा रजः इतरौ जयेत् तदा पुमान् शोकहिंसादिभिर्युज्येत १४ किंच यदा तमः इतरौ जयेत् तदा पुमान् शोकहिंसादिभिर्युज्यते १५ किंच यदा चित्तप्रसन्नताइंद्रियोपरतिः मनः निःसंगं भवेत् तदा सत्त्वं उद्रिक्तं विद्धि १६ किंच यदा कर्मणा विक्षिप्तधीः इंद्रियाणां अस्वास्थ्यं मनो भ्रांतं भवेत् तदा उत्कटं रजः विद्धि १७ किंच यदा चित्तं सीदत् विलीयेत मनोपि नष्टं खेदश्च भवेत् तदा उत्कटं तमः विद्धि १८ किं च सत्त्वोद्रेके देवबलं वर्धते तथा रजसउद्रेकेदैत्यानां बलं वर्धते तथा तमसउद्रेके रक्षसां बलं वर्धते अथ गुणेभ्यः अवस्थाभेदमाह १९ सत्त्वात् जंतोः जागृतिंविद्यात् रजसा स्वप्नं विद्यात् तमसा निद्रां विद्यात् त्रिषु एकरूपं यत्तुरीयं तत् तत्त्वं विद्यात् २० किं च ब्राह्मणाः सत्त्वेन उपरि गच्छंति तमसा तु अधः अधः गच्छंति रजसा मनुष्याएव भवंति २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

टीका

देहादुत्क्रांतिकालीनगुणोत्कर्षफलमाह । सत्त्वेवृद्धेसतिप्रलीनामृताः रजोलयारजसिप्रवृद्धेसतिलयोयेषांते । एवंतमोलयाइत्यपि । निर्गुणाइत्यत्रतुलयशब्दानुपादानाज्जीवंतोपिनिर्गुणाएकांतभक्तियोगेनमन्निष्ठाश्चेन्मामेवयांतीत्यर्थः २२ इदानींगुणोत्कर्षकृतमेवतत्तत्फलसाधनकर्मत्रैविध्यमाह । मदर्पणंमत्प्रीत्युद्देशेनकृतंनिष्फलं (फलसंकल्परहितंकेवलंदासभावेनैवकृतंयन्निजंकर्म) नित्यादितत्सात्विकम् । फलंसंकल्प्यतेयस्मिन्तत् । हिंसाप्रायंहिंसोद्देशेनकृतंहिंसाबहुलंचआदिशब्दाद्दंभमात्सर्यादिकृतंच २३ इदानींसगुणनिर्गुणभेदेनज्ञानादीनांचातुर्विध्यमाह । कैवल्यंदेहादिव्यतिरिक्तात्मविषयम् । वैकल्पिकंदेहादिविषयंयत्तद्रजः राजसम् । प्राकृतंबालमूढादिज्ञानसदृशम् । मन्निष्ठंपरमेश्वरविषयम् २४ वनंविविक्तत्वात्सात्विकोवासः । भगवन्निकेतनंतुसाक्षात्तदाविर्भावान्निर्गुणंस्थानम् २५ कारकः कर्ताअसंगीअनासक्तः । रागांधः अत्यभिनिवेशवान् । स्मृतिविभ्रष्टः अनुसंधानशून्यः । मदपाश्रयोमदेकशरणः सहिनिरहंकारत्वान्निर्गुणः २६ (आध्यात्मिकीआत्मज्ञानविषयेत्यर्थः) अधर्मेधर्मइतियाश्रद्धा २७ पथ्यंहितंपूतंशुद्धम् । अनायस्तंअनायासतः प्राप्तम् । आहार्यंभक्ष्यभोज्यादि । इंद्रियाणांप्रेष्ठंभोगकालेसुखदंकट्वम्ललवणादि । आर्तिदाशुचिदैन्यकरमशुद्धंच । चशब्दान्मन्निवेदितंनिर्गुणमित्यभिप्रेतम् २८ आत्मोत्थंसुखम् (आत्मोत्थमितित्वंपदार्थविषयत्वेन) मदपाश्रयमितितत्पदार्थविषयत्वेनसुखंज्ञानवदेवद्रष्टव्यम् २९

श्लोकाः २२–२९

सत्त्वेप्रलीनाःस्वर्यांतिनरलोकंरजोलयाः ॥ तमोलयास्तुनिरयंयांतिमामेवनिर्गुणाः २२ मदर्पणंनिष्फलंवासात्त्विकंनिजकर्मतत् ॥ राजसंफलसंकल्पंहिंसाप्रायादितामसम् २३ कैवल्यंसात्त्विकंज्ञानंरजोवैकल्पिकंतुयत् ॥ प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतम् २४ वनंतुसात्त्विकोवासोग्रामोराजसउच्यते ॥ तामसंद्यूतसदनंमन्निकेतंतुनिर्गुणम् २५ सात्त्विकःकारकोऽसंगीरागांधोराजसःस्मृतः ॥ तामसःस्मृतिविभ्रष्टोनिर्गुणोमदपाश्रयः २६ सात्त्विक्याध्यात्मिकीश्रद्धाकर्मश्रद्धातुराजसी ॥ तामस्यधर्मेयाश्रद्धामत्सेवायांतुनिर्गुणा २७ पथ्यंपूतमनायस्तमाहार्यंसात्त्विकंस्मृतम् ॥ राजसंचेंद्रियप्रेष्ठंतामसंचार्तिदाशुचि २८ सात्त्विकंसुखमात्मोत्थंविषयोत्थंतुराजसम् ॥ तामसंमोहदैन्योत्थंनिर्गुणंमदपाश्रयम् २९

चूर्णिका

किं च सत्वे मृताः स्वर्यांति रजसि मृताः नृलोकंयांति तमसिमृताःनिरयं यांति निर्गुणाः मामेव यांति २२ किं च दास्यत्वेन कृतं कर्म सात्विकम् संकल्प्य कृतं राजसम् हिंसोद्देशेन कृतं तामसं ज्ञेयम् २३ किंच आत्मविषयकं ज्ञानं सात्विकं वैकल्पिकं यत् ज्ञानंयत् राजसम् प्राकृतंयत् ज्ञानं तत्तामसम् २४ मन्निष्ठं ज्ञानं निर्गुणं ज्ञेयम् वनं तु सात्विको वासः ग्रामवासः राजसः द्यूतगृहवासः तामसः मद्गृहवासः निर्गुणः २५ असंगी कर्ता सात्विकः रागांधः राजसः अनुसंधानशून्यः तामसः मदेकशरणः निर्गुणः २६ अध्यात्मिकी श्रद्धा सात्विकी कर्मश्रद्धा राजसी अधर्मश्रद्धा तामसी मत्सेवायां श्रद्धा निर्गुणा २७ किं च पथ्यं पूतं यद्भक्ष्यादि तत्सात्विकम् इंद्रियप्रियं यत् तद्राजसम् आर्तिदाशुचि तामसम् २८ किं च आत्मोत्थं सुखं सात्विकं विषयोत्थं राजसम् मोहदैन्योत्थं तामसम् मदाश्रयंनिर्गुणं २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२५॥

उक्तंसंसारहेतुभूतत्रैगुण्यमुपसंहरतिद्वाभ्याम् । द्रव्यंपथ्यपूतमित्यादि । देशोवनग्रामादिः । फलंसात्विकंसुखमित्यादि । कालः 'यदाभजेतमांभक्त्यायदेतरौजयेदित्यादि'नायोऽर्थादुक्तः ज्ञानंकै
वल्यंसात्विकंज्ञानमित्यादि । कर्ममदर्पणमित्यादि । कारकः सात्विकःकारकोऽसंगीत्यादि । श्रद्धासात्विक्याध्यात्मिकीत्यादि । अवस्था"सत्वाज्जागरण"मित्यादि । आकृतिःउपर्युपरिगच्छंतीत्यादि
नोक्तादेवत्यादिरूपा । निष्ठासत्त्वेप्रलीनाः स्वर्यातीत्यादिनोक्तःस्वर्गादिः । एवंसर्वोप्ययंभावः त्रैगुण्यस्त्रिगुणात्मकः ३० नकेवलंएषएवकिंतुयावंतःपुरुषाव्यक्ताभ्यांधिष्ठिताः । अधिष्ठितास्तेसर्वेभावा
गुणमयाएव । तत्प्रपंचः दृष्टमिति ३१ इदानीमुक्तत्रैगुण्यस्यसंसारहेतुत्वमनुवदंस्तन्निर्जयान्मोक्षइत्याह । एताइतिसार्धेन । येननिर्जिताः सपश्चादविक्षिप्तेनभक्तियोगेनमन्निष्ठःसन्मद्भावायमोक्षायप्रप
द्यतेयोग्योभवति ३२ तस्माद्विवेकिनामिदमेवयुक्तमित्याह तस्मादिति । ज्ञानविज्ञानयोः (परोक्षापरोक्षज्ञानयोः) संभवोयस्मिंस्तमिमंनरदेहम् ३३ भजनप्रकारमाह । निःसंगइतिसार्धेन । सत्त्वसंसे
॥१३५॥ वया"सात्विकान्येवसेवेतपुमान्सत्त्वविवृद्धये"इतिप्रागुक्तया ३४ नैरपेक्ष्येणउपशमात्मकेनसत्त्वेनैव । एवंसतिमांप्राप्नोतीत्याह । संपद्यतइति । जीवंजीवत्वकारणंलिंगशरीरम् ३५ मांप्राप्तस्यनपुनः सं
सारइत्याह । जीवइति । नबहिर्विषयभोगेननांतरस्तत्स्मरणेन ३६ गुणकृतामुरुसंसरणप्रथामजितपुण्यकथाकथनादिभिः । धुनुतभक्तिरसेनविवेकिनोनहिपुनःसुलभंजनुरीदृशम् ॥ १ ॥ ॥ इति
श्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांपंचविंशतितमोऽध्यायः २५ ॥ ॥छ॥ ॥ षड्विंशेयोगनिष्ठायाविघातोदुष्टसंगतः। साधुसंगेनतन्निष्ठापराकाष्ठेतिवर्ण्यते ॥ १॥ योगिनोयोगविभ्रंशः
सगतःसंभवेदिति ॥ सर्वथातन्निवृत्त्यर्थमैलगीतांवितन्यते॥२॥"निःसंगोमांभजेद्विद्वानप्रमत्तोजितेंद्रिय"इत्युक्तम्। तत्रविपक्षेऽनर्थंकथयिष्यन् जीवन्मुक्तस्यापितर्हिसंगोदुर्वारइत्यनर्थःस्यादित्याशंक्योक्ता
नुवादपूर्वकंपरिहरतिसार्धाभ्याम् । मल्लक्षणंमत्स्वरूपंलक्ष्यतेयेनतमिमंनरदेहंलब्ध्वामद्धर्मेभक्तिलक्षणेआस्थितःसन्नात्मस्थंआत्मन्येवानियंतृत्वेनास्थितंपरमानंदरूपमात्मानंमांसमुपैतिसम्यक्प्राप्नोति १

श्लोकाः

द्रव्यंदेशःफलंकालोज्ञानंकर्मचकारकः ॥ श्रद्धाऽवस्थाऽऽकृतिर्निष्ठात्रैगुण्यःसर्वएवहि ३० सर्वेगुणमयाभावाःपुरुषाव्यक्तधिष्ठिताः ॥ दृष्टंश्रुतमनुध्यातंबु
द्ध्यावापुरुषर्षभ ३१ एताःसंसृतयःपुंसोगुणकर्मनिबंधनाः ॥ येनैतेनिर्जिताःसौम्यगुणाजीवेनचित्तजाः ॥ भक्तियोगेनमन्निष्ठोमद्भावायप्रपद्यते ३२ तस्मा
द्देहमिमंलब्ध्वाज्ञानविज्ञानसंभवम् ॥ गुणसंगंविनिर्धूयमांभजंतिविचक्षणाः ३३ निःसंगोमांभजेद्विद्वानप्रमत्तोजितेंद्रियः ॥ रजस्तमश्चाभिजये ३०/१
त्सत्त्वसंसेवयामुनिः ३४ सत्त्वंचाभिजयेद्युक्तोनैरपेक्ष्येणशांतधीः ॥ संपद्यतेगुणैर्मुक्तोजीवोजीवंविहायमाम् ३५ जीवोजीवेननिर्मुक्तोगुणैश्चाशयसंभवैः ॥
मय्येवब्रह्मणापूर्णोनबहिर्नांतरश्चरेत् ३६ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपंचविंशतितमोध्यायः ॥ २५ ॥ ॥ छ ॥ ॥ छ ॥
॥ श्रीभगवानुवाच ॥ मल्लक्षणमिमंकायंलब्ध्वामद्धर्मआस्थितः ॥ आनंदंपरमात्मानमात्मस्थंसमुपैतिमाम् १

चूर्णिका द्रव्यदेशफलकालादिसर्वोभावः त्रिगुणात्मक एव न केवलं एष एव ३० किंतु यावंतः पुरुषाव्यक्ताधिष्ठिताःदृष्टश्रुतादिभावाः ते सर्वे त्रिगुणात्मका एव ३१ एताः गुणक
र्मनिबंधनाः संसृतयः येन जिताः सः भक्तियोगेन मन्निष्ठः सन् मोक्षयोग्यो भवति३२तस्मात् इमं नृदेहं लब्ध्वा विषयसंगं विनिर्धूय विवेकिनः मां भजंतु ३३ किं च
निःसंगः विद्वान् मां भजेत् तथासत्त्वसंसेवया त्रिगुणान् जयेत् ३४ ३५ एवंभूतो यः सः लिंगशरीरं हित्वा मां प्राप्नोति तथा मय्येव ब्रह्मणा पूर्णः सन् बहिर्विषयभो ॥१३५॥
गेन अंतः तत्स्मरणेन न चलेत् इति ॥ ३६ ॥ ॥ इत्येकादशेपंचविंशः २५ ॥ ॥ छ ॥ ॥ श्रीभगवानुवाच ॥ हेउद्धव पुमान् इमं नृदेहं लब्ध्वाभक्ति
लक्षणधर्मे स्थितः सन् वर्तेत तर्हि मां प्राप्नोति १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

नचैवंभूतस्यविषयसंगोनामास्तीत्याह गुणमय्येति। गुणमयीयाजीवयोनिःजीवोपाधिः तयाविमुक्तःगुणेषु वर्तमानोपि तैर्नयुज्यते संगंनप्राप्नोति अत्रहेतुः अवस्तुभिःनन्ववस्तुभिरप्यन्येयुज्यमानादृश्यंतेत त्राह अवस्तुत्वेनदृश्यमानेषु २ तथापिसंगंवर्जयेदित्याह । संगमिति। असतांलक्षणमाह । शिश्नोदरेतर्पयंतीतिशिश्नोदरतृपस्तेषां। क्वचित् कदाचिदपि (नकुर्यात्) आस्तांतावद्बहूनांसंगः किंतु तस्यै कस्यापि (असतो) अनुगः अनुवर्ती । अंधमनुगच्छतियोंधस्तद्वत् ३ अत्रेतिहासमाह ऐलःपुरूरवाः सम्राट्चक्रवर्ती । बृहत्श्रवःकीर्तिर्यस्यसः । उर्वशीविरहात्प्रथमंमुह्यन् पश्चात्कुरुक्षेत्रेतांसमाग म्यगंधर्वदत्तेनाग्निनादेवानिष्ट्वापुनरुर्वशीलोकंप्राप्यशोकसंयमेशोकापगमेसतिततोनिर्विण्णःसन्निमांगाथामगायतेति नवमस्कंधानुसारेणद्रष्टव्यम् ४ प्राक्तनींमोहादवस्थामाह । त्यक्त्वेति आत्मानंराजानं त्यक्त्वाअथवाशय्यायामात्मानंत्यक्त्वाव्रजतीम् (उन्मत्तवत् मद्यपावत्) घोरेतिष्ठेति । "हयेजायेमनसातिष्ठघोरेवचांसिमिश्राकृणवावहैनु । ननौमंत्राअनुदितासएतेमयस्करन्परतरेचनाह"न्नित्येवंमंत्रै र्विलपन् (तामनुजगामविक्लवोविह्वलः) ५ वैक्लव्येकारणमाहकामानिति (क्षुल्लकान् क्षुद्रान् भोगाननुजुषन्नपिअतृप्तःअलंबुद्धिरहितः) वर्षाणांयामिनीरात्रीःयांतीर्नवेदनाप्यायांतीरागामिनीःउर्व श्याआकृष्टाचेतनायस्यसः ६ तस्यगंधर्वलोकंप्राप्तस्यबहुकालंउर्वशीसंभोगानंतरंनिर्विण्णस्यगाथामाहाष्टादशभिः तत्राष्टाभिःअनुतापःप्रपंच्यते अहोइति। यतोमयाइमेअहोरात्ररूपाआयुःखंडानस्मृताः (का मेनकश्मलंमालिनंचेतोयस्यतस्यमोहेनाविरहोनाशः) ७ तदेवाह नाहमिति । अभिनिर्मुक्तः मयिरममाणेअस्तंगतः अभ्युदितोवासूर्यइति (नवेदाहं) अमुयाउर्वश्यावांचितः बतखेदे । उतअपि । वर्ष पूगानामपिगतान्यहानिनवेदेति ८ येनसंमोहेनआत्मादेहः क्रीडामृगवत् (कृतः) अधीनः (कृतइत्यर्थः) ९ ननु प्रणयकुपितायाअनुनयार्थमधीनतायुक्तैव । सत्यम् । नत्वत्रतदस्तीत्याह । सप रिच्छदंराज्यादिसहितंईश्वरंचक्रवर्तिनंआत्मानंतृणमिवत्यक्त्वा यांतीमपियोहं (अन्वगमं) अनुगतोस्मि १०

श्लोकाः २/१०

गुणमय्याजीवयोन्याविमुक्तोज्ञाननिष्ठया ॥ गुणेषुमायामात्रेषुदृश्यमानेष्ववस्तुतः ॥ वर्तमानोपिनपुमान्युज्यतेऽवस्तुभिर्गुणैः २ संगंनकुर्यादसतांशि श्नोदरतृपांक्वचित् ॥ तस्यानुगस्तमस्यंधेपतत्यंधानुगांधवत् ३ ऐलःसम्राडिमांगाथामगायतबृहच्छ्रवाः ॥ उर्वशीविरहान्मुह्यन्निर्विण्णःशोकसंयमे ४ त्यक्त्वात्मानंव्रजंतींतांनग्नउन्मत्तवन्नृपः ॥ विलपन्नन्वगाज्जायेघोरेतिष्ठेतिविक्लवः ५ कामानतृप्तोऽनुजुषन्क्षुल्लकान्वर्षयामिनीः ॥ नवेदयांतीर्नायांतीरुर्वश्या कृष्टचेतनः ६ ॥ ऐलउवाच ॥ अहोमेमोहविस्तारःकामकश्मलचेतसः ॥ देव्यागृहीतकंठस्यनायुःखंडाइमेस्मृताः ७ नाहंवेदाभिनिर्मुक्तःसूर्योवाभ्युदितो ऽमुया ॥ मुषितोवर्षपूगानांबताहानिगतान्युत ८ अहोमेआत्मसंमोहोयेनात्मायोषितांकृतः ॥ क्रीडामृगश्चक्रवर्तीनरदेवशिखामणिः ९ सपरिच्छदमा त्मानंहित्वातृणमिवेश्वरम् ॥ यांतींस्त्रियंचान्वगमंनग्नउन्मत्तवद्रुदन् १०

चूर्णिका

किं च गुणमयी या जीवयोनिः तया विनिर्मुक्तः पुमान् गुणेषु वर्तमानोपि तैः संगंनाप्नोति २ तथापि असतां संगं न कुर्यात् यतः तदनुगः अंधे तमसि पतति अंधानु गोंधवत् ३ अत्रेतिहासमाह ऐलः सम्राट् उर्वशीवियोगात् मुह्यन् आत्मानं हित्वा यांतीं तां हे जाये हे घोरे तिष्ठ तिष्ठेति विक्लवो भूत्वा विलपन् कामान् जुषन् गतागतरा त्रीः अजानन् कदाचित् निर्विण्णः सन् इमां गाथां अगायत् ४ ५ ६ ॥ ऐलउवाच ॥ अहो तया गृहीतकंठस्य मे मोहविस्तारं पश्यत यतो मया इमे दिनरात्रिरूपाः आयुःखंडाः न स्मृताः ७ किं च अनया वंचितः सन् अहं सूर्यास्तोदयौ न वेद ८ अहो मे आत्मसंमोहः येन मोहेन अयं चक्रवर्ती मद्देहः क्रीडामृगवत् स्त्र्यधीनः कृतः ९ किं च चक्रवर्तिनं मां तृणमिव हित्वा यांतीं तां नग्नः उन्मत्तवत् रुदन् अनु अगमम् १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

॥१३७॥ किंच ममप्रभावाद्यनुभावोवृथैवेत्याह । कुतस्तस्यमेतेजःप्रभावः खरोयथापादाभ्यांताडितोपिखरीमनुगच्छतितद्वत् ११ एवंभूतस्यसर्वसाधनंव्यर्थमित्याह । किमिति (विद्ययाज्ञानेन) त्यागेनसंन्यासेन (श्रुतेनशास्त्राभ्यासेन) विविक्तेनएकांतसेवया । मौनेनवाङ्नियमेन १२ अनुतप्तः सन्नात्मानंनिंदतिद्वाभ्यां स्वार्थस्येति । अकोविदंअज्ञातारंगोखरवद्गौरिवखरइवेति १३ अधरासवंसेवमानस्यआत्मभूर्मनासिजः पुनः पुनरुद्भवन् १४ एवमष्टभिर्निर्वेदोनिरूपितः । इदानींतस्यविवेकमाहदशभिः । पुंश्चल्येति । अयंभावः कर्मभिर्देवानिष्ठ्ापिदुःखमेवप्राप्तोस्मिअतःपरमेश्वरमेवभजेयमिति १५ परमेश्वरप्रसादविनादेवैरुपदिष्टादपिवेदवाक्यान्मोहोननिवर्ततेइत्याह । बोधितस्यापीति । देव्याउर्वश्यासूक्तवाक्येनयथार्थवचनेन । "पुरूरवोमामृथामाप्रतप्तोमात्वावृकासोअशिवासउक्षन् । नवैस्त्रैणानिसख्यानिसंतिसालावृकाणांहृदयान्येते"त्यनेन १६ पूर्वंपुंश्चल्यापहृतंचित्तंइत्यादिनातस्याअपकारोअनुस्मृतःइदानींममैवायमपराधइत्याह । किमेतयेति । नःअस्माकंकामिनांएतयाकिमपकृतं नकिंचिदपि । यथा रज्जुस्वरूपाविदुषोरज्जुद्रष्टुः पुंसःतस्यांसर्पकल्पनयाखिद्यतोपिरज्ज्वाकिमपिनापकृतं । तद्वत् यद्यस्माद्योहमेवंभूतः सएवाजितेंद्रियत्वादपराधीत्यर्थः (वाशब्दइवार्थे) १७ ननु तथापिसौगंध्यप्रेमादिगुणैः संमोहमूलमित्याशंक्य तेपिस्वमतिपरिकल्पिताएवेत्याहचतुर्भिः । क्वायमिति । मलीमसः अतिमलिनः । सुमनसांकुसुमानामिवगंधसौकुमार्यादिसौमनस्यम् । शोभनमनोभाववा (अध्यासोभ्रमः) १८ ममत्वमपितास्मिन्परिकल्पितमेवेत्याह (पित्रोरिति । स्वंकायः) पित्रोःकिं जनकत्वात् । नुवितर्के । भार्यायावाभोगप्रदत्वात् । अत्रानुपयुक्तमप्येतन्न्यायतुल्यत्वादुक्तमिदम् । स्वामिनोवाअधीनत्वात् । अग्नेर्वाअंत्येष्टयांतदाहुतित्वात् श्वगृध्रयोर्वाभक्षत्वात् । किंवाआत्मनः तत्कृतशुभाशुभभागित्वात् । सुहृदांवा उपकारित्वात् । एवंयोननिश्चीयते १९

श्लोकाः ११/१९

कुतस्तस्यानुभावःस्यात्तेजईशित्वमेववा ॥ योऽन्वगच्छंस्त्रियंयांतींखरवत्पादताडितः ११ किंविद्ययाकिंतपसाकिंत्यागेनश्रुतेनवा ॥ किंविविक्तेनमौनेनस्त्रीभिर्यस्यमनोहृतम् १२ स्वार्थस्याकोविदंधिङ्मांमूर्खंपंडितमानिनम् ॥ योहमीश्वरतांप्राप्यस्त्रीभिर्गोखरवज्जितः १३ सेवतोवर्षपूगान्मेउर्वश्याअधरासवम् ॥ नतृप्यत्यात्मभूःकामोवह्निराहुतिभिर्यथा १४ पुंश्चल्यापहृतंचित्तंकोन्वन्योमोचितुंप्रभुः ॥ आत्मारामेश्वरमृतेभगवंतमधोक्षजम् १५ बोधितस्यापिदेव्यामेसूक्तवाक्येनदुर्मतेः ॥ मनोगतोमहामोहोनापयात्यजितात्मनः १६ किमेतयानोऽपकृतंरज्ज्वावासर्पचेतसः ॥ रज्जुस्वरूपाविदुषोयोहंयदजितेंद्रियः १७ क्वायंमलीमसःकायोदौर्गंध्याद्यात्मकोऽशुचिः ॥ क्वगुणाःसौमनस्याद्याह्यध्यासोऽविद्ययाकृतः १८ पित्रोःकिंस्वंनुभार्यायाःस्वामिनोग्नेःश्वगृध्रयोः ॥ किमात्मनःकिंसुहृदामितियोनावसीयते १९

चूर्णिका

॥१३७॥ किं च योऽहं खरवत् पादताडितोपि तां अन्वगमम् ११ एवंविधस्य मे प्रभावः तेजः ईशत्वं वा कुतः स्यात् किंच यस्य मनः स्त्रीभिः हृतम् तस्य विद्यातपःसंन्यासादिभिः किम् १२ किं च योऽहं ईश्वरत्वं प्राप्य स्त्रीभिः गोखरवज्जितःअतःस्वार्थे अज्ञं मां धिक् १३ अहो कष्टं तस्याः अधरासवं बहुकालं सेवतः कामः नाद्यापि तृप्यति १४ पुंश्चल्या हृतं मे चित्तं हरिं ऋते कोन्यो मोचयितुं शक्तोस्ति १५ किं च उर्वश्या यथार्थवचनेन बोधितस्यापि मे मनोगतमोहः न गच्छति १६ अतः कामिनां अस्माकं किमेतयापकृतम् अतोहमेवापराधी अस्मि १७ किं च अयमतिमलिनकायः क्व तत्र सौमनस्यादिगुणाः क्व परंतु तत्र अध्यासः अविद्याकृतः १८ तत्र ममत्वमपि परिकल्पितमित्याह अयं देहः पित्रोः किंवा स्त्रियः वा स्वामिनः अग्नेर्वा गृध्रयोर्वा एवं यः न निश्चीयते १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका तुच्छाक्रमिविड्भस्मलक्षणानिष्ठाअंतोयस्यतस्मिन्कायेकलेवरेप्रियत्वेनगृहीते (विषज्जते) विषंगमेवाह अहो इति (सुभद्रंसुमंगलं) सुनसंशोभननासिकम् २० अतोगुणारोपेणरममाणामादृशाःक्रमि समाइत्याह । त्वगादीनांसंहतौसंघातेदेहेविण्मूत्रादिसंहतौरमतांक्रमीणामस्माकंवा (कियान्भेदः) २१ यद्यप्येवंबीभत्सिताएवस्त्रियः अथापिनोपसज्जेत अवलोकनादिनासंगंनकुर्यात् । अर्थविद्विवेकी । अत्रहेतुःविषयेति २२ ननु क्वचिन्निमीलितनयनादेरपिमनःक्षोभोदृश्यते । सत्यम् । सोपिपूर्वदर्शनादिकंविनानभवतीत्याह अदृष्टादिति । भावात्पदार्थात् भावोमनःक्षोभः। अतःप्राणान् इंद्रियाणिअसं प्रयुंजतः नियच्छतः विषयेंद्रियसंयोगमकुर्वतइत्यर्थः स्तिमितंनिश्चलंसत् २३ इंद्रियैःकृत्वा (षड्वर्गःमनइंद्रियसमूहः) अविस्रब्धःअविश्वसनीयः मादृशांअविवेकिनाम् २४ फलितमाह द्वाभ्यां एवमि ॥२६॥
ति । नृपेषुदेवेषुचदीव्यतीतितथा (आत्मनिवुद्धौआत्मानंत्वंपदार्थंमांमद्रूपंतत्पदार्थाभिन्नमित्यर्थः) २५ उक्तिभिर्हितोपदेशैः (मनोव्यासंगंमनसिविषयव्यासंगमित्यर्थः) २६ तीर्थदेवादिसंगादपि
॥१३८॥ सत्संगः श्रेयानितिदर्शयति (संतइत्यादिभिः) तत्रसतांलक्षणमाह (अनपेक्षाइत्यादि) संतइति अत्रविशेषणाष्टकस्ययथेष्टंहेतुहेतुमद्भावः २७ नवतेषूपदेशापेक्षा अपितुकेवलतत्संनिधिरेवतारयती त्याह । तेष्विति सप्तभिः । ताःकथाः २८ श्रवणादिभिरेवमत्पराः श्रद्दधानाश्चसंतोभक्तिंविंदंति २९ (आनंदानुभवएवआत्मामूर्तिर्यस्यतस्मिन्मयिभक्तिलब्धवतः किमवशिष्यते नकिमपि) ३०

श्लोकाः २०/३० तस्मिन्कलेवरेऽमेध्येतुच्छनिष्ठेविषज्जते ॥ अहोसुभद्रंसुनसंसुस्मितंचमुखंस्त्रियाः २० त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ ॥ विण्मूत्रपूयेरमतांक्रमी णांकियदंतरम् २१ अथापिनोपसज्जेतस्त्रीषुस्त्रैणेषुचार्थवित् ॥ विषयेंद्रियसंयोगान्मनःक्षुभ्यतिनान्यदा २२ अदृष्टादश्रुताद्भावान्नभावउपजायते ॥ असंप्रयुंजतःप्राणाञ्शाम्यतिस्तिमितंमनः २३ तस्मात्संगोनकर्तव्यःस्त्रीषुस्त्रैणेषुचेंद्रियैः ॥ विदुषांचाप्यविस्रब्धःषड्वर्गःकिमुमादृशाम् २४ ॥ श्रीभग वानुवाच ॥ एवंप्रगायन्नृपदेवदेवःसउर्वशीलोकमथोविहाय ॥ आत्मानमात्मन्यवगम्यमांवैउपारमज्ज्ञानविधूतमोहः २५ ततोदुःसंगमुत्सृज्यसत्सु सज्जेतबुद्धिमान् ॥ संतएतस्यछिंदंतिमनोव्यासंगमुक्तिभिः २६ संतोऽनपेक्षामच्चित्ताःप्रशांताःसमदर्शिनः ॥ निर्ममानिरहंकारानिर्द्वंद्वानिष्परिग्रहाः २७ तेषुनित्यंमहाभागमहाभागेषुमत्कथाः ॥ संभवंतिहितानृणांजुषतांप्रपुनंत्यघम् २८ तायेशृण्वंतिगायंतिह्यनुमोदंतिचादृताः ॥ मत्पराःश्रद्दधानाश्चभक्तिं विंदंतितेमयि २९ भक्तिंलब्धवतःसाधोःकिमन्यदवशिष्यते ॥ मय्यनंतगुणेब्रह्मण्यानंदानुभवात्मनि ३०

चूर्णिका तत्र अमेध्ये विषज्जते तदाह अहो सुभद्रं सुनसं सुस्मितंच मुखं स्त्रियः इति २० परंतु त्वङ्मांसरुधिरादिविशिष्टेदेहे रमतां पुंसां कृमीणां च कियदंतरम् २१ अतः स्त्री षु स्त्रैणेषु च संगं न कुर्यात् यतः विषयेंद्रियसंयोगात् मनः क्षुभ्यति २२ किं च अदृष्टाश्रुतपदार्थात् मनःक्षोभः न जायते इंद्रियाणि नियच्छतः पुंसः स्थिरं सत् मनः ॥१३८॥
शाम्यति २३ अतःस्त्रीषु स्त्रैणेषु इंद्रियैः संगो न कार्यः यतः षड्वर्गः विदुषामपि अविश्रब्धः मादृशां किं वक्तव्यम् २४ ॥ श्रीभगवानुवाच ॥ एवं स राजा गायन् सन् उर्वशीलोकं हित्वा आत्मनि मां प्राप्य उपारमत् २५अतः दुःसंगं हित्वा सत्सु सज्जेत संतः एतस्य व्यासंगं छिंदंति २६ सतां लक्षणमाह मच्चित्ताः समदर्शिनाः निरहं काराः एवंभूताः संतः इति २७ तेषु मत्कथाः नित्यं संभवंति ताः जुषतां अघं प्रपुनंति २८ ताये शृण्वंति गायंति तेमयि भक्तिं विंदंति २९ मयि भक्तिं लब्ध वतः साधोः किमपि नावशिष्यते ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विभावसुंअग्निं (उपश्रयमाणस्य) सेवमानस्य (शीतादि) अप्येतिनश्यतितथाकर्मजाड्यंआगामिसंसारभयंतन्मूलमज्ञानंचनश्यतीत्यर्थः ३१ निमज्ज्योन्मज्जतांउच्चावचयोनीर्गच्छतांपरमायनं परमाश्रयः ३२ किंच । यथाप्राणिनामन्नमेवप्राणोजीवनम् । अहमेवयथाशरणम् । धर्मएवयथाप्रेत्यपरलोकेवित्तंतथासंतएवअर्वाक्संसारपाताद्बिभ्यतः पुंसः अरणंशरणम् ३३ किंच । संतश्चक्षूंषि सगुणनिर्गुणज्ञानानि । अर्कःपुनःसम्यगुत्थितः बहिरेवतदप्येकमेवचक्षुरित्यर्थः (विषयदर्शनलक्षणमित्यर्थः) ३४ अध्यायार्थमुपसंहरति । वैतसेनइति । सुद्युम्नभावेनोमावनंप्रविष्टस्ययस्यवीता (विगता) सेनास्त्रीभावंप्राप्तायस्य (सवीतसेनः) तस्यपुत्रोवैतसेनः पुरूरवाः एवमुक्तप्रकारेणोर्वश्यालोकात्स्थानात्अवलोकनाद्वानिस्पृहः । ततोपिसत्संगादपिहेतोर्मुक्तसंगःसन्नात्मारामोभूत्वायथेष्टंचचारेति ३५ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांपुरूरवोगीतंनामषड्विंशोऽध्यायः २६ ॥ ॥ ७ ॥ ॥ सप्तविंशेक्रियायोगःसचश्चित्तप्रसादकः ॥ सर्वकामाप्तिहेतुश्चसांगःप्रोक्तःसमासतः ॥ १ ॥ रागाद्याकुलचित्तानांकुतोऽसंगादिसंभवः । इतिकृष्णार्चनंभद्रमनुस्मृत्यानुपृच्छति ॥ २ ॥ क्रियायोगमितिभवतस्तवाराधनरूपंभवदाराधनादिरूपम् । यस्मादिति कारणाधिष्ठानादिप्रश्नः । सर्वकारकाणांनिमित्तत्वस्याविशिष्टत्वात् । यथेतिकस्मिन्नधिष्ठानादौकेनप्रकारेणेतिप्रश्नः । येधिकारिणः । सात्वताभक्ताः १ अस्यपुनर्विशेषतः प्रश्नेकारणमाह चतुर्भिः । एतत्त्वदर्चनंनिश्रेयसकरंवदंति । अंगिरसःसुतोबृहस्पतिः २ निस्सृतंत्वयोपदिष्टमित्यर्थः देव्यैपार्वत्यै ३ सर्ववर्णानांत्रैवर्णिकानाम् ४

श्लोकाः ३१ / ४

यथोपश्रयमाणस्यभगवंतंविभावसुम् ॥ शीतंभयंतमोप्येतिसाधून्संसेवतस्तथा ३१ निमज्ज्योन्मज्जतांघोरेभवाब्धौपरमायनं॥संतोब्रह्मविदःशांतानौर्दृढेवाप्सुमज्जताम् ३२ अन्नंहिप्राणिनांप्राणआर्तानांशरणंत्वहम् ॥ धर्मोवित्तंनृणांप्रेत्यसंतोर्वाग्बिभ्यतोऽरणम् ३३ संतोदिशंतिचक्षूंषिबहिरर्कःसमुत्थितः ॥ देवताबांधवाःसंतःसंतआत्माऽहमेवच ३४ वैतसेनस्ततोप्येवमुर्वश्यालोकनिस्पृहः ॥ मुक्तसंगोमहीमेतामात्मारामश्चचारह ३५ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेपुरूरवोगीतंनामषड्विंशोध्यायः ॥ २६ ॥ ॥ ७ ॥ ॥ उद्धवउवाच ॥ क्रियायोगंसमाचक्ष्वभवदाराधनंप्रभो ॥ यस्मात्त्वांयेयथार्चंतिसात्त्वताःसात्त्वतर्षभ १ एतद्वदंतिमुनयोमुहुर्निश्रेयसंनृणाम् ॥ नारदोभगवान्व्यासआचार्योंगिरसःसुतः २ निःसृतंतेमुखांभोजाद्यदाहभगवानजः ॥ पुत्रेभ्योभृगुमुख्येभ्योदेव्यैचभगवान्भवः ३ एतद्वैसर्ववर्णानामाश्रमाणांचसंमतम् ॥ श्रेयसामुत्तमंमन्येस्त्रीशूद्राणांचमानद ४

चूर्णिका

यथा अग्निं श्रितस्य शीतंभयंतमश्च नश्यति तथा साधून् सेवतः पुंसः कर्मादिजाड्यं आगामिसंसारभयं तन्मूलमज्ञानं च नश्यति ३१ किं च अत्र घोरे भवाब्धौ उच्चनीचयोनीर्गच्छतां परमाश्रयः संत एव अप्सु मज्जतां नौरिव ३२ किं च प्राणिनांप्राणाः अन्नं आर्तानां शरणमहं नृणां प्रेत्य धर्मः वित्तं यथा तथासंसारपातात् बिभ्यतः पुंसः शरणं संत इति ३३ किंच संतो दिशंति चक्षूंषि बहिरर्कःसमुत्थितः देवता बांधवाः संतः संत आत्माहमेव च ३४ वैतसेनस्ततोप्येवमुर्वश्यालोकनिस्पृहः मुक्तसंगोमहीमेतामात्मारामश्चचारह ३५ ॥ इत्येकादशेषड्विंशोऽध्यायः ॥ २६ ॥ ॥ ७ ॥ ॥ उद्धव उवाच ॥ हे कृष्ण क्रियायोगं समाचक्ष्व भवदाराधनं प्रभो यस्मात्त्वां ये यथार्चंति सात्वताः पुरुषर्षभ १ किं च एतदेव नृणां निःश्रेयसमिति नारदादयः वदंति २ तथा त्वयापि ब्रह्मणे उपदिष्टम् सः स्वपुत्रेभ्यः भृग्वादिभ्यः आह तथा भवः देव्यै आह ३ किं च एतत् वर्णानां आश्रमाणां स्त्रीशूद्राणां च उत्तमं श्रेयःसाधनं मन्ये अतः इदं मे ब्रूहि ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

विश्वेश्वराये (ब्रह्मादय-)-स्तेषामीश्वरः ५ कर्मकांडस्यपूजाविधानस्य । नास्त्यंतोग्रंथतः पारंचानुष्ठानतोयस्यतस्य ६ वैदिकएवमंत्रःवैदिकान्येवांगानिचयस्मिन्पुरुषसूक्तादौसवैदिकः एवंतांत्रिकोपि । मिश्रोऽष्टाक्षरादिर्मखः पूजा ७ यदात्रैवर्णिकोयजेत् तदाविशेषमाह । यदा गर्भाष्टमैकादशद्वादशाब्दादिकाले स्वनिगमेनस्वाधिकारप्रवृत्तेनवेदेनोक्तंद्विजत्वं उपनयनम् ८ अर्चायांप्रतिमादौ (द्विजेविप्रे) ९ स्नानेविशेषमाह । उभयैर्वैदिकैस्तांत्रिकैश्चमंत्रैः (आदिनागोमयादिग्रहः) १० किंच । संध्योपासनादीनिकर्माणि आचोदितानिसाकल्येनयस्ययानिर्विहितानितैःसहमेपूजांकुर्यात् नतुतानिपरित्यजेदित्यर्थः । सम्यक्परमेश्वरविषयएवसंकल्पोयस्यससम्यक्संकल्पः तथाभूतः सन्कर्मपावनीं कर्मबंधनिर्हारिणीम् ११ अर्चाभेदानाहसार्धेन । शैलीशिलामयी । लौहीसुवर्णादिमयी । लेप्यामृदादिमयी । हृदिपूजायांमनोमयी (मणिमयीरत्नमयी) १२ प्रकर्षेणतिष्ठत्यस्यामितिप्रतिष्ठाप्रतिमैवद्विविधा) जीवस्यभगवतोमंदिरम् । यद्वाप्रतिष्ठयाकलान्यासेनभगवन्मंदिरंभवति । प्रतिमाभेदेनविशेषमाहसार्धेन । उद्वासोविसर्जनम् १३ अस्थिरायामर्चनेविकल्पः । शालग्रामे नकुर्यात् । सैकत्यांकुर्यात्अन्यत्रकुर्याद्वानवेति (उद्वा सादिद्वयंव्यवस्थितम्) अविलेप्यायांमृन्मयलेख्यव्यतिरिक्तायाम् । अन्यत्रविलेप्यायांलेख्यायांच (स्नानस्थाने) परिमार्जनमेव १४ इदानींसकामनिष्कामभेदेनविशेषमाह । द्रव्यैरिति प्रकर्षेणसिद्धैः सुशोभनैः-(-द्रव्यैः प्रतिमादिषुमद्यागोमदर्चनम् । सकामस्यमुख्यःकल्पआवश्यकइत्यर्थः) अमायिनोनिष्कामस्यभक्तस्यतुयथालब्धैः यत्रचंदनादिसर्वथानलभ्यतेतत्रहृदिभावेनभावनया । यद्वा हृदिचेत्मद्यागः तदाभावेनमनोमयैर्द्रव्यैरित्यर्थः १५

॥१४०॥

श्लोकाः ५/१६

एतत्कमलपत्राक्षकर्मबंधविमोचनम् ॥ भक्तायचानुरक्तायब्रूहिविश्वेश्वरेश्वर ५ ॥ श्रीभगवानुवाच ॥ नह्यंतोऽनंतपारस्यकर्मकांडस्यचोद्धव ॥ संक्षिप्तंवर्णयिष्यामियथावदनुपूर्वशः ६ वैदिकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः ॥ त्रयाणामीप्सितेनैवविधिनामांसमर्चयेत् ७ यदास्वनिगमेनोक्तंद्विजत्वं प्राप्यपूरुषः ॥ यथायजेतमांभक्त्याश्रद्धयातन्निबोधमे ८ अर्चायांस्थंडिलेऽग्नौवासूर्येवाप्सुहृदिद्विजे ॥ द्रव्येणभक्तियुक्तोऽर्चेत्स्वगुरुंमाममायया ९ पूर्वं स्नानंप्रकुर्वीतधौतदंतोऽङ्गशुद्धये ॥ उभयैरपिचस्नानंमंत्रैर्मृद्ग्रहणादिना १० संध्योपास्त्यादिकर्माणिवेदेनाचोदितानिमे ॥ पूजांतैःकल्पयेत्सम्यक्संकल्पः कर्मपावनीम् ११ शैलीदारुमयीलौहीलेप्यालेख्याचसैकती ॥ मनोमयीमणिमयीप्रतिमाष्टविधास्मृता १२ चलाचलेतिद्विविधाप्रतिष्ठाजीवमंदिरम् ॥ उद्वासावाहनेनस्तःस्थिरायामुद्धवार्चने १३ अस्थिरायांविकल्पःस्यात्स्थंडिलेतुभवेद्द्वयम् ॥ स्नपनंत्वविलेप्यायामन्यत्रपरिमार्जनम् १४ द्रव्यैःप्रसिद्धैर्मद्यागःप्रतिमादिष्वमायिनः ॥ भक्तस्यचयथालब्धैर्हृदिभावेनचैवहि १५

चूर्णिका

५ ॥ श्रीभगवानुवाच ॥ हे उद्धव कर्मकांडस्य अंतो नास्ति तथापि संक्षिप्तं वर्णयिष्यामि ६ तत्र मे पूजाविधिः वैदिकः तांत्रिकः मिश्र इति त्रिधा तेषु इष्टेन मां पूजयेत् ७ तदाह अथ पुरुषः द्विजत्वं प्राप्य यथा यजेत तथा शृणु ८ प्रतिमाभूम्यग्निसूर्यजलहृदयद्विजेषु मां अर्चेत् ९ आदौ दंतान् संशोध्य स्नानं कृत्वा ततः मृदादिस्नानं कुर्यात् १० ततः संध्यादिकर्माणि कृत्वा ततःसंकल्प्य मां पूजयेत् ११ अर्चाभेदमाह शैली दारुमयी लौही लेप्या लेख्या च सैकती मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ तत्र प्रतिमा चलाचलेति द्विधा तत्र स्थिरायां आवाहनविसर्जने न स्तः १३ चलायां विकल्पः भूमौ तु द्वयमपि लेप्यायां लेख्यायां च मार्जनं अन्यत्र स्नानं १४ १५ ॥१४०॥

१ चंदनादिमयीइतिमु०मु०पुस्तकपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अधिष्ठानभेदेनप्रधानोपचारमाहसार्धेन । स्नानेति । (अर्चायांप्रतिमायां)तत्त्वविन्यासः यथास्थानमंगप्रधानदेवतानांतत्तन्मंत्रैःस्थापनम् १६ अभ्यर्हणंउपस्थानार्घादि । सलिलादिभिस्तर्पणादि
नायजनम् । सर्वत्रसाधारणमाह । श्रद्धयेति १७ (भूर्यपिस्वर्णालंकाराद्यपि । तत्रगंधादितोषायनेतिकिंपुनर्वक्तव्यम्) १८ एवमधिकारादिव्यवस्थामुक्त्वेदानींपूजाप्रकारमाह । शुचिरिति । संभृ
ताः संभाराः पूजासाधनानियेनसः प्रागग्रैर्दर्भैः । यद्वा प्रागेवसंभृतसंभारःसन् आसीनः नत्वासीनःसन् पश्चात्तत्संभारार्थंवारंवारमुत्तिष्ठेदित्यर्थः । प्राङ्मुखउदङ्मुखोवाआसीनः अर्चायांतुस्थिरायांसं
मुखः अर्चाभिमुखउपविष्टः सन् १९ अनंतरंगुर्वादिनमस्कारपूर्वकंयथोपदेशंस्वस्मिन्कृतन्यासः कृतन्यासांकृतोमूलमंत्रन्यासोयस्यांतांममार्चांआमृजेत्निर्माल्याद्यपकर्षणादिनाशोधयेत् । कलशं
पूर्णकुंभम् । प्रोक्षणीयंप्रोक्षणार्थोदकपात्रं उपसाधयेत् । चंदनपुष्पादिभिः संस्कुर्यात् (यथावत्यथाविधि) २० तदाद्भिः प्रोक्षणीयाद्भिः देवयजनंदेवपूजास्थानम् पाद्याद्यर्थंत्रीणिपात्राणिकलशोदकैः
पूरितानितैस्तैः प्रसिद्धैर्द्रव्यैः साधयेत् । तत्रपाद्यादिद्रव्याणि । "पाद्येश्यामाकदूर्वाब्जविष्णुक्रांतादिविश्पते । गंधपुष्पाक्षतयवकुशाग्रातिलसर्षपाः । दूर्वाचेतिक्रमादर्घ्येद्रव्याष्टकमुदीरितम् । जाती
लवंगकंकोलैर्मतमाचमनीयकमि"त्यादि (पादार्थंजलंपाद्यम् । एवमर्घ्यादि) २१ तानिचत्रीणिपात्राणियथाक्रमंहृदयादिमंत्रैः (नमइत्याद्यैः) गायत्र्याचसर्वाण्यभिमंत्रयेत् । तदनंतरांपिंडेदेहेवाय्व
ग्निसंशुद्धेइतिकोष्ठगतेनवायुनाशोषितेआधारगतेनाग्निनादग्धेपुनर्ललाटस्थचंडमंडलामृतमयेजातेतस्मिन्हृत्पद्मस्थांपरांश्रेष्ठांजीवकलांश्रीनारायणमूर्तिंध्यायेत् । कथंभूतांनादांतेसिद्धभाविताम् । प्रणव
स्याकारोकारमकारबिंदुनादाः पंचांशाः तत्रनादांतेसिद्धैर्ध्याताम् । तथाचश्रुतिः । "योवेदादौस्वरःप्रोक्तोवेदांतेचप्रतिष्ठितः । तस्यप्रकृतिलीनस्ययःपरःसमहेश्वर"इति २२ तयाआत्मभूतयास्वेनै
वभावेनचिंतितयाअमृतमयेपिंडेदीपेनप्रभयागृहमिवव्याप्तेसतितस्मिन्नेवादौमानसैरुपचारैःसंपूज्यतन्मयःसन्अर्चादिष्वावाह्य स्थापनमुद्रयास्थापयित्वा (प्रपूजयेत्) २३

श्लोकाः १६–२३

स्नानालंकरणंप्रेष्ठमर्चायामेवतूद्धव ॥ स्थंडिलेतत्त्वविन्यासोवह्नावाज्यप्लुतंहविः १६ सूर्येचाभ्यर्हणंप्रेष्ठंसलिलेसलिलादिभिः ॥ श्रद्धयोपहृतंप्रेष्ठंभक्तेनम
मवार्यपि १७ भूर्यप्यभक्तोपहृतंनमेतोषायकल्पते ॥ गंधोधूपःसुमनसोदीपोऽन्नाद्यंचकिंपुनः १८ शुचिःसंभृतसंभारःप्राग्दर्भैःकल्पितासनः ॥ आ
सीनःप्रागुदग्वार्चेदर्चायांत्वथसंमुखः १९ कृतन्यासःकृतन्यासांमदर्चांपाणिनामृजेत् ॥ कलशंप्रोक्षणीयंचयथावदुपसादयेत् २० तदद्भिर्देवयजनंद्रव्या
ण्यात्मानमेवच ॥ प्रोक्ष्यपात्राणित्रीण्यद्भिस्तैस्तैर्द्रव्यैश्चसाधयेत् ॥ पाद्यार्घ्याचमनीयार्थंत्रीणिपात्राणिदेशिकः २१ हृदाशीर्ष्णाचशिखयागायत्र्याचा
भिमंत्रयेत् ॥ पिंडेवाय्वग्निसंशुद्धेहृत्पद्मस्थांपरांमम ॥ अण्वींजीवकलांध्यायेन्नादांतेसिद्धभाविताम् २२ तयात्मभूतयापिंडेव्याप्तेसंपूज्यतन्मयः ॥
आवाह्यार्चादिषुस्थाप्यन्यस्तांगंमांप्रपूजयेत् २३

चूर्णिका

किं च प्रतिमायां स्नानादिकारणं मे प्रियं भूमौ तत्त्वन्यासः वह्नौ हविः १६ सूर्ये उपस्थानादि जले तर्पणादिनायजनम् १७ किंच श्रद्धया भक्तेन दत्तं वार्यपि मे प्रियम्
अभक्तेनदत्तं भूर्यपि मे तोषाय न स्यात् १८ अथ कर्ता शुचिः सन् कुशासने उपविश्य प्रागुदङ्मुखः संमुखो वा १९ कृतन्यासः सन् कृतन्यासां प्रतिमां संशोध्य
कलशादिपात्राणि निधाय चंदनाक्षतादिभिः संपूज्य २० तदद्भिर्द्रव्याणि प्रोक्ष्य ततः पाद्यार्घ्याचमनीयार्थपात्रत्रयं आसाद्य २१ हृच्छीर्षशिखामंत्रैः क्रमेणाभिमंत्र्य ततः
सर्वाणि गायत्र्या अभिमंत्रयेत् २२ ततः भूतशुद्ध्यादि कृत्वा स्वदेहे हृत्पद्मस्थां श्रीनारायणमूर्त्तिं ध्यात्वा तां मानसोपचारैः संपूज्य ततः प्रतिमादिषु तां स्थाप्य पूजयेत् २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका कथंपूजयेत्तदाह । पाद्येतिद्वाभ्याम् । धर्मादिभिर्नवभिः (शक्तिभिश्च) ममासनंकल्पयित्वा तत्रपद्मंचकल्पयित्वोभाभ्यांवेदतंत्राभ्यां उभयसिद्धये मह्यंपाद्यादीनुपचारान्प्रकल्पयेदित्यन्वयः (तत्रपाद्यं पादयोः अर्हणमर्घ्यंहस्तयोः) उपस्पर्शमाचमनीयंमुखे २४ उभयासिद्धयेवेदतंत्रोक्तभुक्तिमुक्तिप्राप्तये । अयमर्थः । धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्यआग्नेय्यादिचतुष्कोणेषुपादाः अधर्मादीनि पूर्वादिदिक्षुक्रमेणचत्वारिगात्राणि । त्रयोगुणाः पट्टिकाः तत्रपूर्वादिक्रमेणमध्येचविमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वीसत्येशानानुग्रहेतिनवशक्तयः । एवंयथोपदेशंधर्मादिभिर्नवभिश्चशक्तिभिरासनंक ल्पयित्वेतिकर्णिकायाः केसरैस्तत्रस्थसूर्यादिमंडलैश्चोज्ज्वलमित्यर्थः २५ आयुधादिपूजामाह । सुदर्शनमितित्रिभिः । तत्रन्यस्तांगमित्यंगावरणपूजासूचिता । आसनेनैवशक्त्यावरणमप्युक्तम् । ततः सुदर्शनादिमुसलांतानिआयुधान्यष्टदिक्षु कौस्तुभमालाश्रीवत्सानुरसि २६ नंदादीन्पार्षदानष्टदिक्षु गरुडंपुरतः २७ दुर्गादीन्कोणेषु गुरुंवामतः सुरानिंद्रादिलोकपालान्पूर्वादिदिक्षुएवमेतान्दे

॥१४२॥ वस्याभिमुखान्प्रोक्षणादिभिरर्घ्यादिभिः पूजयेदित्यर्थः २८ पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तं तानेवगुणविधिभिः प्रपंचयति चंदनेतिषड्भिः २९ मंत्रानाह । स्वर्णघर्मानुवाकः परिवेदनमित्यादिः । महापुरुषविद्या"जितंतेपुंडरीकाक्षनमस्तेविश्वभावन । सुब्रह्मण्यनमस्तेस्तुमहापुरुषपूर्वजेति"ति । पौरुषंसूक्तंसहस्रशीर्षेत्यादि । नीराजनादीनिसामानि"इंद्रंनरोनेमधिताहवंत"इत्यस्यामृचिगीतानिआ दिशब्देनरोहिण्यादीनि ३० वस्त्राद्युपचारेषुअलंकारलक्षणंगुणंविधत्ते । वस्त्रेति । पत्राणिकपोलवक्षस्तलादिषुलिखिताः पत्रभंग्यः (यद्वा पत्रस्रजस्तुलस्यादिमालाः) मद्भक्तश्चेत्सप्रेमयथाभवतितथा (यथो चितंअनुकल्पेनापि) ३१ यथोचितमलंकुर्वीतेत्युक्तार्थेसर्वसाधारणंश्रद्धालक्षणंविधत्ते पाद्यमिति ३२ नैवेद्येवैभवलक्षणंगुणंविधत्ते । गुडपायसेति । शष्कुल्यस्तैलपक्वविशेषाः आपूपंअपूपानांमंडकादी नांसमूहः । सूपाद्व्यंजनादि । सतिविभवेइतिशेषः ३३

पाद्योपस्पर्शार्हणादीनुपचारान्पकल्पयेत् ॥ धर्मादिभिश्चनवभिःकल्पयित्वासनंमम २४ पद्ममष्टदलंतत्रकर्णिकाकेसरोज्ज्वलम् ॥ उभाभ्यांवेदतंत्राभ्यांमह्यंतूभयसिद्धये २५ सुदर्शनंपाञ्चजन्यंगदासीषुधनुर्हलान् ॥ मुसलंकौस्तुभंमालांश्रीवत्संचानुपूजयेत् २६ नंदंसुनंदंगरुडंप्रचंडंचंडमेवच ॥ महाबलंबलंचैवकुमुदंकुमुदेक्षणम् २७ दुर्गांविनायकंव्यासंविष्वक्सेनंगुरुंसुरान् ॥ स्वेस्वेस्थानेत्वभिमुखान्पूजयेत्प्रोक्षणादिभिः २८ चंदनोशीरकर्पूरकुंकुमागुरुवासितैः ॥ सलिलैःस्नापयेन्मंत्रैर्नित्यदाविभवेसति २९ स्वर्णघर्मानुवाकेनमहापुरुषविद्यया ॥ पौरुषेणापिसूक्तेनसामभीराजनादिभिः ३० वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः ॥ अलंकुर्वीतसप्रेममद्भक्तोमांयथोचितम् ३१ पाद्यमाचमनीयंचगंधंसुमनसोऽक्षतान् ॥ धूपदीपोपहार्याणिदद्यान्मे श्रद्धयाऽर्चकः ३२ गुडपायससर्पींषिशष्कुल्यापूपमोदकान् ॥ संयावदधिसूपांश्चनैवेद्यंसतिकल्पयेत् ३३

श्लोकाः २४/३३

चूर्णिका तदाह पाद्याद्युपचारान् प्रकल्प्य धर्मादिनवभिः मदासनं कल्पयित्वा २४ तत्र अष्टदलपद्मं प्रकल्प्य २५तत्र सुदर्शनाद्यायुधानि २६ तथा नंदसुनंदगरुडादिपार्षदान् २७ तथा दुर्गागणेशव्यासविष्वक्सेनगुरुलोकपालान् प्रतिमासंमुखान्स्वेस्वे स्थाने निधाय पूजयेत् २८ ततः चंदनोशीरादिवासितैर्जलैः मां विभवे सति स्नापयेत् २९ तथा स्वर्णघर्मानुवाकमहापुरुषविद्यापुरुषसूक्तादिमंत्रैः स्नापयेत्तथा वस्त्रोपवीताभरणादिना मां अलंकुर्वीत पाद्यं आचमनीयं गंधपुष्पाक्षतादि मे दद्यात् तथा गुडपायस सर्पींषिशष्कुल्यापूपमोदकान् संयावदधिसूपांश्च नैवेद्यं सति कल्पयेत् ३० ३१ ३२ ३३ ॥१४२॥

१ पूर्वजेतिपाठःमु०मु०पुस्तकेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कालभेदेनगुणंविधत्ते । अभ्यंगेति । अभिषेचनंपंचामृतादिस्नपनम् । अन्नाद्येति । अन्नंभोज्यंआद्यशब्दाद्भक्ष्यम् । पर्वण्येकादश्यादौअन्वहंप्रत्यहंवाविभवेसतीति ३४ फलभूयस्त्वार्थिनोऽग्नावपि पूजाप्रकारमाह । विधिनास्वगृह्योक्तप्रकारेणमेखलादिभिरुपलक्षितेविहितेनिर्मिते।तदुक्तम् "विस्तारोच्छ्रायतस्तिस्रोमेखलाश्चतुरंगुलाः । हस्तमात्राभवेद्गर्तःसयोनिर्वेदिकातथे"त्यादि । उदितंप्रज्वलितंअग्निंपरितः समूहेत्एकत्रमेलयेत् ३५ दर्भैः परिस्तीर्य परितःप्रोक्षयेत् । अन्वाधाय अन्वाधानसंज्ञकं व्याहृतिभिः समित्प्रक्षेपादिरूपंकर्मकृत्वाअग्नेरुत्तरतोद्रव्याणिहोमोपयोगीन्यासाद्यनिधायप्रोक्षण्या प्रोक्षणीपात्रोदकेनप्रोक्ष्याग्नौ मांध्यायेत् ३६ शंखादिभिरुल्लसंतः शोभमानाश्चत्वारोभुजायस्यतम् ३७ स्फुरंतिकिरीटादीनियस्यतम् ३८ हविषाघृतेनअभिघृतानिसंसिक्तानिदारूणिशुष्कसमिधः प्रास्य (अयंतइध्मइत्यादिना) प्रक्षिप्यआघारौतत्संज्ञकौभागौएवमाज्यभागौच (चक्षुः संज्ञौच) दत्त्वातदर्थाहुतीर्हुत्वेत्यर्थः । तत्राघारौप्रजापतयेस्वाहाइंद्रायस्वाहेतिचोत्तरदक्षिणपरिधिसंधिमारभ्याग्निमध्यादापरिध्यंतंघृतक्षरणरूपौ । आज्यभागौअग्नयेस्वाहासोमायस्वाहेत्येवंहोमरूपौ ३९ मूलमंत्रेणाष्टाक्षरेण । तथाषोडशऋचोयस्मिंस्तेनपुरुषसूक्तेनचअवदानतःप्रत्यृचमाहुतिग्रहणेनेत्यर्थः पूरुषसूक्तेनाराधनपक्षेसएवमूलमंत्रः तेनैवप्रत्यृचमवदानतोहोमइति । मंत्रैः स्वाहांतैर्नाममंत्रैर्यथान्यायंपूजाक्रमेणैवअग्नयेस्विष्टकृतेस्वाहेत्येवंस्विष्टकृतंचजुहुयात् ४० ततोवह्निस्थंभगवंतमभ्यर्च्याथनमस्कृत्यपार्षदेभ्योनंदादिभ्योऽष्टसुदिक्षुबलिंहरेत् । ततः पूजास्थानमागत्यदेवस्याग्रेसमुपविश्ययथाशक्तिमूलमंत्रंजपेत् ४१ ततउभयत्रभगवतोभोजनसमाप्तिंध्यात्वाआचमनंदत्त्वाउच्छेषंविष्वक्सेनायकल्पयित्वातदनुज्ञयापश्चात्स्वयंभुंजीत । ततः सुरभिमत्सुगंधवत्तांबूलाद्यंमुखवासंदत्त्वाऽथपुनरपिअर्हयेत्पुष्पांजलिनापूजयेत् ४२

श्लोकाः ३४/४२

अभ्यंगोन्मर्दनादर्शदंतधावोभिषेचनम् ॥ अन्नाद्यगीतनृत्यानिपर्वणिस्युरुतान्वहम् ३४ विधिनाविहितेकुंडेमेखलागर्तवेदिभिः ॥ अग्निमाधायपरितः समूहेत्पाणिनोदितम् ३५ परिस्तीर्याथपर्युक्षेदन्वाधाययथाविधि ॥ प्रोक्षण्यासाद्यद्रव्याणिप्रोक्ष्याग्नौभावयेतमाम् ३६ तप्तजांबूनदप्रख्यंशंखचक्रगदांबुजैः ॥ लसच्चतुर्भुजंशांतंपद्मकिंजल्कवाससम् ३७ स्फुरत्किरीटकटककटिसूत्रवरांगदम् ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभंवनमालिनम् ३८ ध्यायन्नभ्यर्च्यदारूणिहविषाभिघृतानिच ॥ प्रास्याज्यभागावाघारौदत्त्वाचाज्यप्लुतंहविः ३९ जुहुयान्मूलमंत्रेणषोडशर्चाऽवदानतः ॥ धर्मादिभ्योयथान्यायंमंत्रैःस्विष्टकृतंबुधः ४० अभ्यर्च्याथनमस्कृत्यपार्षदेभ्योबलिंहरेत् ॥ मूलमंत्रंजपेद्ब्रह्मस्मरन्नारायणात्मकम् ४१ दत्त्वाचमनमुच्छेषंविष्वक्सेनायकल्पयेत् ॥ मुखवासंसुरभिमत्तांबूलाद्यमथार्हयेत् ४२

चूर्णिका

तथा अभ्यंगादिगीतनृत्यादि च उत्सवे नित्यं कुर्यात् ३४ अग्नावपि पूजाप्रकारमाह विधिना कुंडं निर्माय तत्राग्निं स्थाप्य अन्वाधाय परिसमूहनादि कृत्वा तत्र मां ध्यायेत् ३५ ३६ तदाह शंखाद्युपलक्षितचतुर्भुजं किरीटादियुतं श्रीवत्सकौस्तुभादिभिर्युतं एवं भूतं मां ध्यायन् सन् अभ्यर्च्य समिधः अग्नौ प्रास्य आज्यभागावाघारौ च हुत्वा ३७ ३८ ३९ ततः मूलमंत्रेण पुरुषसूक्तेनच प्रत्यृचं हुत्वा धर्मादिभ्यश्च नाममंत्रैर्हुत्वा स्विष्टकृतं कुर्यात् ४० ततः वह्निस्थं मां पूज्य नत्वा ततः पार्षदेभ्यो बलिं दत्वा देवाग्रे मूलमंत्रं जपेत् ४१ ततः आचमनं दत्त्वा शेषं विष्वक्सेनाय प्रकल्प्य तांबूलं दत्वा पुष्पांजलिं दद्यात् ४२

१ आसनंदत्त्वाइतिपाठभेदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अभिनयन्स्वस्मिन्नाविष्कुर्वन्क्षाणिकःवैयग्र्यंपरित्यज्य लब्धावसरोभवेत् ४३ स्तवस्तोत्राणांभेदंदर्शयति पौराणैः प्राकृतैरिति ४४ कथंप्रणमेदित्यपेक्षायामाह । शिरइति । बाहुभ्यांदक्षिणोत्तरा
भ्यांपरस्परंममदक्षिणोत्तरौपादौगृहीत्वा यद्वा पृष्ठतः परस्परंनिबद्धाभ्यांबाहुभ्यांकृतापराधइवप्रपन्नमित्यादिविज्ञप्तिपुरःसरंप्रणमेत् (मृत्युरेवग्रहोनक्रोयत्रंतादृशादर्णवात्संसाराब्धेः) ४५ ततः
शेषाग्रहणपूर्वकंवैकल्पिकोद्वासनप्रकारमाह । इतिअनयैवप्रार्थनयाशेषांनिर्माल्यंमयादत्तांविभाव्यशिरस्याधायधृत्वायद्युद्वासनीयंतर्हिप्रतिमायांन्यस्तंज्योतिस्तत्पुनरपिहृत्पद्मस्थज्योतिष्येवोद्वासयेत्
४६ एतेष्वधिष्ठानेषुकिंमुख्यमित्यपेक्षायामाह । अर्चादिष्विति । यदायत्रश्रद्धातदातत्रनत्वधिष्ठानमुख्यामुख्यत्वम् । कुतः । यतः सर्वभूतेष्विति ४७ (एवंक्रियायोगस्यमार्गैः) उभयतः इहामुत्रच
४८ समर्थंप्रत्याह । मदर्चामितित्रिभिः । पुष्पोद्यानानिच कारयेत्पूजायात्रोत्सवाश्रितान् पूजाप्रत्यहं (क्रियमाणा) यात्राविशिष्टपर्वणिबहुलजनसमागमः । उत्सवोवसंतादिमहोत्सवः तदाश्रिता
न् (तद्योगक्षेमार्थमवलंबितान्) क्षेत्रादीनांविशेषणमेतत् ४९ पूजायात्रोत्सवाश्रितानित्यस्यविवरणं पूजादीनामिति । प्रवाहार्थंसंततानुवृत्त्यर्थंक्षेत्रादीन्दत्त्वामत्सार्ष्टितांमत्समानैश्वर्यम् ५० प्रति
ष्ठादीनांव्यस्तसमस्तानांफलमाह प्रतिष्ठयेति । मत्साम्यतांमयासाम्यमित्यर्थः ५१ सकामंप्रतिफलमुक्तम् । अहैतुकंभक्तंप्रत्याह । मामेवेति । अहैतुकभक्तियोगः कथंभवति तत्राह भक्तियोगमिति
५२ दातुः फलमुक्तम् । अपहर्तारंनिंदति । यइति । विड्भुग्विष्ठाभोजीकृमिः ५३

॥१४४॥ ॥२७॥

श्लोकाः ४३—५३

उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम ॥ मत्कथाःश्रावयन्शृण्वन्मुहूर्तंक्षणिकोभवेत् ४३ स्तवैरुच्चावचैःस्तोत्रैःपौराणैःप्राकृतैरपि ॥ स्तुत्वाप्रसीदभगव
न्नितिवंदेतदंडवत् ४४ शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परम् ॥ प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ४५ इतिशेषांमयादत्तांशिरस्याधायसा
दरम् ॥ उद्वासयेच्चेदुद्वास्यंज्योतिर्ज्योतिषितत्पुनः ४६ अर्चादिषुयदायत्रश्रद्धामांतत्रचार्चयेत् ॥ सर्वभूतेष्वात्मनिचसर्वात्माहमवस्थितः ४७ एवंक्रियायो
गपथैःपुमान्वैदिकतांत्रिकैः ॥ अर्चन्नुभयतःसिद्धिंमत्तोविंदत्यभीप्सिताम् ४८ मदर्चांसंप्रतिष्ठाप्यमंदिरंकारयेद्दृढम् ॥ पुष्पोद्यानानिरम्याणिपूजायात्रोत्स
वाश्रितान् ४९ पूजादीनांप्रवाहार्थंमहापर्वस्वथान्वहम् ॥ क्षेत्रापणपुरग्रामान्दत्त्वामत्सार्ष्टितामियात् ५० प्रतिष्ठयासार्वभौमंसद्मनाभुवनत्रयम् ॥ पू
जादिनाब्रह्मलोकंत्रिभिर्मत्साम्यतामियात् ५१ मामेवनैरपेक्ष्येणभक्तियोगेनविंदति ॥ भक्तियोगंसलभतएवंयःपूजयेतमाम् ५२ यःस्वदत्तांपरैर्दत्तांहरे
तसुरविप्रयोः ॥ वृत्तिंसजायतेविड्भुग्वर्षाणामयुतायुतम् ५३

चूर्णिका

ततः मत्कथाश्रवणादि कृत्वा स्वस्थो भवेत् ४३ ततो मां स्तोत्रैः स्तुत्वा प्रसीद भगवन्निति वदन् मम पादौ बाहुभ्यां गृहीत्वा मत्पादयोः शिरः कृत्वा प्रपन्नं पाहि
मामीश भीतं मृत्युग्रहार्णवात् इत्युक्त्वा नमेत् ४४ ४५ ततः निर्माल्यं शिरसि धृत्वा विसर्जयेत् ४६ किंच उक्तासु प्रतिमासु यत्र श्रद्धा तत्र मां अर्चयेत् यतः सर्वत्राहं
स्थितः ४७ एवं यः अर्चेत् सः इहामुत्र सिद्धिं प्राप्नोति ४८ किं च हे उद्धव यः मंदिरं कृत्वा तत्र मूर्तिं स्थाप्य तत्र पुष्पोद्यानादि करोति ४९ तथा पूजादीनां प्रवा
हार्थे क्षेत्रापणपुरग्रामान् ददाति सः मत्सार्ष्टितां इयात् ५० किंच फलमाह प्रतिष्ठया सार्वभौमं दानेन भुवनत्रयं पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ५१ किं
च एवं यः निष्कामत्वेनमां यजेत् सः भक्तियोगं लब्ध्वा मां विंदति ५२ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्रयोः वृत्तिं स जायते विट्भुक् वर्षाणामयुतायुतम् ५३

॥१४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

कर्तुर्यत्फलंतदेवान्येषामित्याह कर्तुरिति । सारथेः सहकारिणः हेतोः प्रयोजकस्य । अनुमोदितुश्चप्रेत्यतत्फलमित्यन्वयः । कुतः । कर्मणामितेभागिनः भागार्हाः तत्रापिविशेषमाह । भूयसिकर्मणिसारथ्यादौभूयः अधिकंफलमिति ५४ पयःपत्रादिमात्रेणपूजितोयःपरंपदम् । भागेवदिशतिप्रीतःसकृष्णःशरणंमम ॥ १ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांसप्तविंशोध्यायः २७॥ ॥ ७ ॥ अष्टाविंशेतुयःपूर्वविस्तरेणोपवर्णितः । ज्ञानयोगःपुनश्चासौसमाहृत्यनिरूप्यते ॥ १ ॥ इदानींमतिविस्तरेणोक्तंज्ञानयोगंसंक्षेपेणवक्तुंतावदाह ॥ परेषांस्वभावान्शांतघोरादीन्कर्माणिच ॥ (गुणभेदतोविविधानि । नगर्हयेत्नानिंदेत्) तत्रहेतुः विश्वमिति (अयंभावः सर्वमपीदंप्रकृतिपुरुषात्मकत्वादेकात्मकमेवतत्रप्रकृत्यात्मकस्यद्वैतस्यमिथ्यात्वात् अवशिष्टस्याधिष्ठानस्यप्रत्यगभिन्नत्वात्तत्प्रशंसादेर्विषयोनभवतीति) १ (ननुद्वैतस्यमिथ्यात्वात्प्रशंसादौकोदोषइत्याशंक्य) विपक्षेदोषमाह परेति । स्वार्थात्ज्ञाननिष्ठालक्षणात् । असतिमिथ्याभूतद्वैतेऽभिनिवेशात् २ भ्रंशमेवदृष्टांततोदर्शयति । तैजसेराजसाहंकारकार्येइंद्रियगणेआपन्नेअभिभूतेसतिपिंडस्थोजीवः केवलंमनोमात्रेणमायांस्वप्नरूपांप्राप्नोतितततोमनसिलीनेसतिनष्टचेतनः सन्मृत्युंवामृत्युतुल्यांवासुषुप्तिंप्राप्नोतियथातद्वदेवनानार्थदृक् द्वैताभिनिवेशीविक्षेपंलयंचप्राप्नोतीतियथाप्राज्ञसंपर्कात्विश्वस्यभोगलक्षणोभ्रंशएवमनात्मसंपर्कादात्मनोपिस्वरूपभ्रंशइतिभावः ३ द्वैतासत्यतयास्तुतिनिंदयोर्निर्विषयत्वंप्रपंचयति । सार्धैः षड्भिः किंभद्रमिति (अवस्तुनोद्वैतस्यमध्येस्वप्नमध्येइव) किंभद्रंकिंवाऽभद्रं कियदितिकियद्भद्रंकियद्वाऽभद्रमित्यर्थः । अवस्तुत्वमेवाह । वाचेतिबाह्येंद्रियोपलक्षणम् । वाचाउदितंउक्तंचक्षुरादिभिश्चदृश्यंतदनृतमिति ४ नन्वेवंसतिदेहादिभावानामप्यसत्त्वात्कथंभयहेतुत्वं तत्रदृष्टांतमाह । छायाप्रतिबिंबं प्रत्याह्वयःप्रतिध्वनिः आभासः शुक्तिरजतादिः एतेयथाऽसंतोप्यर्थकारिणोभवंति आमृत्युतोमृत्युमभिव्याप्य । यद्वामृत्युर्लयः यावन्नैवलीयंतेतावत्पर्यंतमित्यर्थः ५ ननु सृष्ट्यादिश्रुतिभिरेव द्वैतं निरूपितं तत्कथमसत्यंस्यात्तत्राह आत्मैवेतिसार्धद्वाभ्यां । त्रायतेपाल्यते त्रातिपालयति ६

॥१४५॥

श्लोकाः ५४/६

कर्तुश्चसारथेर्हेतोरनुमोदितुरेवच ॥ कर्मणांभागिनःप्रेत्यभूयोभूयसितत्फलम् ५४॥इतिश्रीभागवतेमहापुराणेएकादशस्कंधेसप्तविंशोध्यायः २७ ॥ ७॥ ॥ श्रीभगवानुवाच ॥ परस्वभावकर्माणिनप्रशंसेन्नगर्हयेत् ॥ विश्वमेकात्मकंपश्यन्प्रकृत्यापुरुषेणच १ परस्वभावकर्माणियःप्रशंसतिनिंदति ॥ सआशुभ्रश्यतेस्वार्थादसत्यभिनिवेशतः २ तैजसेनिद्रयापन्नेपिंडस्थोनष्टचेतनः॥ मायांप्राप्नोतिमृत्युंवातद्वन्नानार्थदृक्पुमान् ३ किंभद्रंकिमभद्रंवाद्वैतस्यावस्तुनःकियत् ॥ वाचोदितंतदनृतंमनसाध्यातमेवच ४ छायाप्रत्याह्वयाभासाह्यसंतोप्यर्थकारिणः ॥ एवंदेहादयोभावायच्छंत्यामृत्युतोभयम् ५ आत्मैवतदिदंविश्वंसृज्यतेसृजतिप्रभुः ॥ त्रायतेत्रातिविश्वात्माह्रियतेहरतीश्वरः ६

चूर्णिका

कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च कर्मणां भागिनः प्रेत्य भूयो भूयसि तत्फलम् ५४ ॥ ॥ इत्येकादशे सप्तविंशः २७ ॥ ॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ परस्वभावकर्माणि न प्रशंसेन्नगर्हयेत् विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च १ किंच यः पुमान् परस्वभावकर्माणि प्रशंसति निंदति च सः स्वार्थात् भ्रश्यति २ तदाह यथा इंद्रियगणे निद्रापन्ने सति जीवः स्वप्नरूपां मायामाप्नोति तद्वत् ३ द्वैताभिनिवेशी पुमान् स्वरूपभ्रंशंप्राप्नोति ।किंच अवस्तुनः द्वैतस्य मध्ये भद्रमभद्रं वा किम् इदं सर्वं अनृतम् ४ तर्हि देहादीनां भयहेतुत्वं कथं तत्राह यथा प्रतिबिंबप्रतिध्वन्याभासाः मिथ्यापि अर्थकारिणो भवंति एवं देहादिभावः आमृत्युभयं यच्छति ५ किं च इदं विश्वं ईश्वर एव सृज्यते सृजति प्रभुः त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(तस्मात्कारणात्) अन्यस्मात्स्रज्यादिव्यतिरिक्तात् (निर्लेपादात्मनोऽन्योभावः द्वैतरूपः) त्रिविधाआध्यात्मिकादिरूपा भातिःप्रतीतिः (आत्मनिअधिष्ठाने) ७ ननु कथं निर्मूलाप्रतीयते तत्राह इदमित्य धेन (माययाऽनिर्वचनीययाकृतमितिस्वप्नवत्प्रतीयतेइत्यर्थः (एतत्) ज्ञानविज्ञानयोर्नैपुणं निष्ठांविद्वान् सूर्यवत्समोभूत्वा ८ एतन्निष्ठाप्राप्त्युपायमाह । प्रत्यक्षेणेति । यदाद्यंतवत्तद्द्वैतंतदसदितिज्ञा त्वानिःसंगोविचरेत् । आद्यंतवत्त्वेप्रमाणानिप्रत्यक्षादीनि । तत्रप्रत्यक्षेणघटादि । अनुमानेनसावयवत्वेनदृश्यं पृथिव्यादि । निगमेनाप्रत्यक्षंआकाशादि । आत्मसंविदास्वानुभवेन । सर्वंदृश्यमाद्यं तवदसच्चेति ज्ञात्वेति निःसंगस्तदासक्तिशून्यः (तत्रनिगमोनेहनानास्तिकिंचनेत्यादिः) ९ ननुयद्यात्मसंविदासर्वंदृश्यमसदित्युच्यतेतर्ह्यात्मास्वप्रकाशोदेहादिद्वैतं च जडमित्युक्तं स्यात् । तथाचसं सारप्रतिभासोनघटेतेतिचोदयति नैवेति । अनात्मस्वदृशोर्जडाजडयोः । अत्रहेतुः । द्रष्टृदृश्ययोरिति । नात्मनः संसारः स्वप्रकाशत्वात्नापिदृश्यस्यजडत्वादित्यर्थः । तर्हिमाभूद्द्वयोरपि तत्राह । उप लभ्यतइति (तस्मात्सकस्यस्यात् १० एतत्प्रपंचयति आत्मेति । अव्ययत्वादिपंचविशेषणैर्नाशादिरागादिपुण्यापुण्याज्ञानपरिछेदानामसंभवंदर्शयति । हेतुहेतुमत्त्वंतुयथेष्टं । अचिज्जडः । अयंभा वः यथैवाग्निदारुणोर्भेदेनानुपलंभेपिदारुप्रकाश्यमेव अग्निश्चप्रकाशकः । तथादेहात्मनोरपीतिनसंसृतिस्तयोरन्यतरस्यापिघटतइति ११ सत्यंतथाप्युभयोरेवमविवेकएवसंसारालंबनमित्याह पंचभिः यावदि ति । सन्निकर्षणंसंबंधः नन्वसंगस्यकुतः संबधस्तत्राह । अविवेकिनइति अज्ञानकृतइत्यर्थः । ननुस्वप्रकाशस्यकथमज्ञानतः संसारस्तत्राह अपार्थोपिमिथ्याभूतोपिकेवलंफलवान्फलंस्फूर्तिः । नतुत त्त्वतोस्तीत्यर्थः (एवमज्ञानस्यविवेकएवविरोधीनतुस्वयंप्रकाशोप्यात्मा । अहमज्ञइत्यनुभवादितिभावः) १२ नन्वसतोदेहादेः कुतः संसारस्फूर्तिहेतुत्वमपितत्राह । अर्थेह्यविद्यमानेपीति । अस्यात्मनः १३ ननुकथंचिज्जानतोविषयस्फूर्तिर्जीवन्मुक्तस्यापिदुर्वारेत्यनिर्मोक्षप्रसंगःस्यात्तत्राह । यथाहीति । प्रस्वापः स्वप्नः बहूननर्थान्विभर्तिपुष्णातीतितथा (प्रतिबुद्धस्यप्रस्वापादुत्थितस्य) १४

श्लोकाः ७/१४

तस्मान्नह्यात्मनोन्यस्मादन्योभावोनिरूपितः ॥ निरूपितेयंत्रिविधानिर्मूलाभातिरात्मनि ७ इदंगुणमयंविद्धित्रिविधंमाययाकृतम् ॥ एतद्विद्वान्मदु दितंज्ञानविज्ञाननैपुणम् ॥ ननिंदतिनचस्तौतिलोकेचरतिसूर्यवत् ८ प्रत्यक्षेणानुमानेननिगमेनात्मसंविदा ॥ आद्यंतवदसज्ज्ञात्वानिःसंगोविचरेदिह ९ ॥ उद्धवउवाच ॥ नैवात्मनोनदेहस्यसंसृतिर्द्रष्टृदृश्ययोः ॥ अनात्मस्वदृशोरीशकस्यस्यादुपलभ्यते १० आत्माऽव्ययोऽगुणःशुद्धःस्वयंज्योतिरनावृतः ॥ अग्निवद्दारुवदचिद्देहःकस्येहसंसृतिः ११ ॥ श्रीभगवानुवाच ॥ यावद्देहेंद्रियप्राणैरात्मनःसन्निकर्षणम् ॥ संसारःफलवांस्तावदपार्थोप्यविवेकिनः १२ अर्थेह्यविद्यमानेपिसंसृतिर्ननिवर्तते ॥ ध्यायतोविषयानस्यस्वप्नेऽनर्थागमोयथा १३ यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृत् ॥ सएवप्रतिबुद्धस्यनवै मोहायकल्पते १४

चूर्णिका

अतः आत्मनः अन्यत् किमपि नास्ति ७ इदं दृश्यं तु मायाकृतं विद्धि एतत् मदुक्तं विद्वान् किमपि न निंदतिन च स्तौति लोके समः सन् सूर्यवत् चरति ८ अतः प्रत्यक्षानुमानादिभिः इदं आद्यंतवत् ज्ञात्वा निःसंगः विचरेत् ९ ॥ उद्धवउवाच ॥ हे ईश इयं संसृतिः नात्मनः न देहस्य यतः तयोः चिज्जडत्वात् माभूत् द्वयोरपि उपलभ्यते तत्राह १० तर्हि इयं कस्य स्यात् तद्वद ११ ॥ श्रीकृष्णउवाच ॥ हे सखे आत्मनः यावत् देहादिसंबंधः तावत् मिथ्यापिसंसारः स्फुरति १२ किंच अर्थे ह्यविद्यमानेपि संसृतिर्नगच्छति स्वप्ने अनर्थागमवत् १३ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अहंकारलक्षणोदेहादिसन्निकर्षएवसंसारालंबनमित्यन्वयव्यतिरेकाभ्यांदर्शयति। शोकेतिसुषुप्त्यादौतेषामदर्शनादहंसुखीतिवच्चैतन्दंसुखीतिप्रतीत्यभावाच्चदृश्यत्वाच्चसुखादीनांकृशत्वादिवत्द्रष्टृधर्मत्वानु
पपत्तेरितिभावःउक्तंच"सुप्तेहमिनदृश्यंते सुखदोषप्रवृत्तयः। अतस्तस्यैवसंसारोनमेसंसृतिसाक्षिणः" १५ननु यद्यहंकारस्यसंसारस्तर्हिमुक्तिरपितस्यैवेतिमुक्तावहंकारावशेषःप्रसज्येत तत्राह देहेति देहादि
ष्वभिमानोयस्यसः आत्मैवतेषामंतर्हितोजीवः अतएवगुणकर्ममयीमूर्तिर्यस्यसः। एवं चसूक्ष्मोपाधिभिर्बहुधेवसूत्रादिशब्दैर्गतिः संसारेपरमेश्वराधीनः सर्वतोधावतिअतोनायं दोष इतिभावः १६ त
देवमहंकारेणकृतं बंधमुपपाद्येदानीं ज्ञानेनतन्निवृत्तौमुक्तिरित्याह। अमूलमिति। वस्तुतोमूलशून्यं अज्ञानतस्तुबहुभीरूपैरूपितं प्रकाशितं ऐंद्रजालिकतुल्यमितिवा। किंतत्तदाह। मनइति मनआ
दीनांद्वंद्वः। यद्वा मनआदिषुक्रियतइतिकर्मअहंकरणं गुरूपासनयानिशितेनज्ञानखड्गेन छित्त्वा १७ तदेवज्ञानंस्वरूपसाधनफलैर्निरूपयति। ज्ञानमिति। विवेकोज्ञानं। साधनान्याह। नि
गमोवेदः तपः स्वधर्मः प्रत्यक्षं स्वानुभवः ऐतिह्यमुपदेशः अनुमानंतर्कः। फलमाह। आद्यंतयोर्यदस्यजगतःमध्येपितदेवकेवलं नतुजगदिति। किंतत्। कालः कलयतिप्रकाशयातियः
तथाहेतुः कारणं च यत्तेदव। एतदुक्तंभवति। यदस्यविश्वस्य उपादानं कारणंनिमित्तं प्रकाशकं च ब्रह्मतदात्मकमेवैतत्नततः पृथगित्येवंनिश्चयफलकोनिगमादिसाधनैर्जायतेयोविवेकःतज्ज्ञान
मिति १८तत्रनानाभेदव्यवहारालंबनस्यापिविश्वस्यकारणमात्रात्मकत्वंसदृष्टांतमाह। यथेति। स्वकृतं सुष्टुकुंडलादिरूपेणाविरचितंयद्धिरण्यंकीदृशं हिरण्मयस्यकुंडलादेरुत्पत्तेःपुरस्तात्नाशाच्चपश्चात्य
दस्ति (तदेवमध्ये) कटकंकुंडलमित्यादिनाव्यपदेशैर्व्यवहार्यमाणमपियथातद्वदस्यविश्वस्यकारणभूतोहमेवनानाव्यवहारालंबनंनतुमत्तः पृथग्विश्वमिति १९ तदेवंकार्यस्यकारणमात्रात्मकतामुक्त्वा
प्रकाश्यस्यप्रकाशात्मकतामाह। विज्ञानमिति। त्रियवस्थं यकारस्यपृथक्पाठश्छंदोनुरोधेन। जाग्रदादित्र्यवस्थंयद्विज्ञानंमनः तदवस्थाकारणभूतंचयद्गुणत्रयंयच्चकारणकार्यकर्तृ। कारणमध्यात्मं
कार्यमाधिभूतंकर्तृअधिदैवंएवंगुणत्रयकार्यभूतंत्रिविधंजगत्एतद्येनतुर्येणसामान्यज्ञानमात्रेणसमन्वयेनभवतियेनानुगतंप्रकाशतइत्यर्थः"तमेवभांतमनुभातिसर्वं यस्यभासासर्वमिदंविभाती"ति। तथा
"चक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रंमनसोयेमनोयन्मनोनवेदे"त्यादिश्रुतेः। ननु विशेषज्ञानव्यतिरेकेणनतुर्यंनामोपलभामहेतत्राह व्यतिरेकतश्चेति। समाध्यादौयदास्तितदेवसत्यमिति २०

॥१५७॥

श्लोकाः

शोकहर्षभयक्रोधलोभमोहस्पृहादयः॥ अहंकारस्यदृश्यंतेजन्ममृत्युश्चनात्मनः १५ देहेंद्रियप्राणमनोभिमानोजीवोंऽतरात्मागुणकर्ममूर्तिः॥ सूत्रंमहा
नित्युरुधेवगीतःसंसारआधावतिकर्मतंत्रः १६ अमूलमेतद्बहुरूपरूपितंमनोवचःप्राणशरीरकर्म॥ ज्ञानासिनोपासनयाशितेनाच्छित्त्वामुनिर्गांविच
रत्यतृष्णः १७ ज्ञानंविवेकोनिगमस्तपश्चप्रत्यक्षमैतिह्यमथानुमानम्॥ आद्यंतयोरस्ययदेवकेवलंकालश्चहेतुश्चतदेवमध्ये १८ यथाहिरण्यंस्वकृतंपु
रस्तात्पश्चाच्चसर्वस्यहिरण्मयस्य॥ तदेवमध्येव्यवहार्यमाणंनानापदेशैरहमस्यतद्वत् १९ विज्ञानमेतत्त्रियवस्थमंगगुणत्रयंकारणकार्यकर्तृ॥ सम
न्वयेनव्यतिरेकतश्चयेनैवतुर्येणतदेवसत्यम् २०

१९/२०

चूर्णिका

किंच अहंकारलक्षणदेहादिसंबंध एव संसारालंबनं इत्याह तद्यथा शोकहर्षादयः जन्ममृती च अहंकारस्य नात्मनः१५ अथ संसारनिवृत्त्या मुक्तिमाह हे उद्धव इदं
अहंकारकृतं संसारादि ज्ञानासिना छित्त्वाऽतृष्णः सन् मुनिः विचरति १६ १७ तदेवज्ञानमाह यदस्य कारणं प्रकाशकं च ब्रह्म तदात्मकमेवेदं विश्वं इत्येवं
वेद तप आदिसाधनैर्जायते यो विवेकः तज्ज्ञानमिति १८ अत्र दृष्टांतः यथा सुवर्णं मध्ये कटकादिना विकार्यमाणमपि आद्यंतयोरस्ति तदेव सत्यम् १९ अस्य कार
णभूतः अहमेव न मत्तः पृथग्विश्वमिति किं च गुणात्मकं जगत् इदं येन तुर्येण व्याप्तं सत् प्रकाशते तदेव सत्यं ब्रह्मेति २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एवंकालत्रयेप्यव्यभिचारिणः सत्यत्वमुक्त्वाव्यभिचारिणस्त्वसत्यतामाह । नयदिति । मध्येचतन्नपृथगस्तिकिंतुव्यपदेशमात्रम् । कुतः । यतः । यद्यत्परेणअन्येनभूतंजातंप्रसिद्धंप्रकाशितंचतत्तदेवकारण प्रकाशकमात्रंस्यान्नपृथगितिमेमनीषाबुद्धिः "वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यम्" । "सर्वंखल्विदंब्रह्म"त्यादिश्रुतेः । कारणप्रकाशकव्यतिरेकेणचकार्यस्यप्रकाश्यस्यचानुपलंभादितिभावः २१ एवंसामान्यतः कार्यप्रकाश्ययोः कारणप्रकाशकाभ्यामभेदमुपपाद्यप्रस्तुतंतदुभयविवेकपूर्वकंप्रपंचस्यब्रह्माभेदंचाह । अविद्यमानइति । योयंवैकारिकः विकारसमूहः सएष (सृष्टेः) प्रागविद्यमानोराज ससर्गः (सृष्टिकाले) रजोद्वारेणब्रह्मकार्यभूतइत्यर्थः । अवभासतेपिब्रह्मप्रकाश्यश्चेत्यर्थः ब्रह्मतुस्वयंस्वतःसिद्धंनतुकार्यमित्यर्थः ज्योतिश्चप्रकाशकमित्यर्थः । अतः कारणात्इंद्रियाणिचअर्थास्तन्मात्रा णिचआत्मामनश्चदेवानामप्युपलक्षणं विकाराः । पंचभूतानिएवंचित्रंविचित्रःप्रपंचोब्रह्मैवविभातीति २२ उपसंहरति । एवंनिगमतपःप्रत्यक्षैतिह्यानुमानैः स्फुटंयथाभवतितथाब्रह्मविवेकहेतुभिः त थापरस्यदेहादेरपवादेनआत्मत्वनिरासेन । कीदृशेन । विशारदेननिपुणेनगुरुणानिमित्तभूतेनेतिवा आत्मविषयंसंदेहंछित्वास्वानंदतुष्टः सन्नखिलेभ्यः कामुकेभ्यः इंद्रियादिभ्यउपारमेतनिःसंगोभवे त् २३ परापवादंप्रपंचयति । नेति । वपुरात्मानभवतिपार्थिवत्वात्घटवत् तथाइंद्रियाणितदधिष्ठातारोदेवाअसुर्मनः धिषणाबुद्धिः सत्त्वंचित्तंअहंकृतिरित्येतेआत्मानभवंति । कुतः अन्नमात्रंअन्नो पष्टभ्यत्वात् शरीरवत् । वायुः जलंहुताशस्तेजःखंक्षितिरितिपंचभूतानि अर्थाः शब्दादयः साम्यं प्रकृतिश्चनात्माजडत्वात्घटवदिति । यद्वा हिशब्देनानुमानांतराणिसूचितानितद्यथाइंद्रियाण्यात्मा नभवंतिकारणत्वात्मनोवत् । प्राणश्चवायुत्वात्बाह्यवायुवत्इति २४ एवंविवेकज्ञानवतोमुक्तस्यनेंद्रियादिकृतोगुणदोषसंबंधइत्याह । समाहितैरिति । यत्सुविविक्तधाम्नः ममसुष्ठुविविक्तंधामस्वरूपं येनतस्य (समाहितैरेकाग्रीकृतैःकरणैः श्रोत्रमनआदिभिः कोगुणः उतअथवाविषयदर्शनेनविक्षिप्यमाणैस्तैः किंदूषणंनकिमपि । गुणात्मभिः गुणाः सत्त्वादयः शब्दादयोवातदात्मभिस्तन्मयैरि तियावत्) प्रकाशकस्यप्रकाश्यगुणदोषानभवंतीतिदृष्टांतेनोक्तं (घनैरिति) २५ असंगब्रह्मत्वेनावस्थितस्यनकेपिगुणदोषाइत्याकाशदृष्टांतेनाप्याह । यथेति । वाय्वादीनांशोषणदहनक्लेदनरजो धूसरत्वादिभिर्गतागतैरागमापायिभिः ऋतुगुणैः शीतोष्णादिभिर्वाअहंमतेरहंकारात्परंअक्षरंसंसृतिहेतुभिर्नयुज्यते । यद्वा अहंकारस्यसंसृतिहेतुभिरिति २६

॥१४८॥

श्लोकाः २१—२६

नयत्पुरस्तादुतयन्नपश्चान्मध्येचतन्नव्यपदेशमात्रम् ॥ भूतंप्रसिद्धंचपरेणयद्यत्तदेवतत्स्यादितिमेमनीषा २१ अविद्यमानोप्यवभासतेयोवैकारिकोराजस सर्गएषः ॥ ब्रह्मस्वयंज्योतिरतोविभातिब्रह्मेंद्रियार्थात्मविकारचित्रम् २२ एवंस्फुटंब्रह्मविवेकहेतुभिःपरापवादेनविशारदेन ॥ छित्वात्मसंदेहमुपार मेतस्वानंदतुष्टोखिलकामुकेभ्यः २३ नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वायुजलंहुताशः ॥ मनोऽन्नमात्रंधिषणाचसत्त्वमहंकृतिःखंक्षितिरर्थसाम्यम् २४ समाहितैःकःकरणैर्गुणात्मभिर्गुणोभवेन्मत्सुविविक्तधाम्नः ॥ विक्षिप्यमाणैरुतकिंनुदूषणंघनैरुपेतैर्विगतैरवेःकिम् २५ यथानभोवाय्वनलांबुभूगुणैर्ग तागतैर्वर्तुगुणैर्नसज्जते ॥ तथाक्षरंसत्त्वरजस्तमोमलैरहंमतेःसंसृतिहेतुभिःपरम् २६

चूर्णिका

किं च इदं विश्वं ब्रह्म कार्यभूतत्वात् ब्रह्मैव भाति ब्रह्म तु स्वतःसिद्धम् २१ २२ एवं देहादेः आत्मतत्वनिरासेन आत्मविषयं संदेहं छित्वा स्वानंदतुष्टः सन् इंद्रियादिभ्यो निःसंगो भवेत् २३ अथ निरासमाह वपुः आत्मा न पार्थिवत्वात् इंद्रियाण्यपि नात्मा अन्नोपष्टभ्यत्वात् तथा भूतमात्रादयोपिनात्मा जडत्वात् २४ एवं मे स्वरूपं विचारयतः पुंसः समाहितेंद्रियैर्गुणैः कः गुणः उत विक्षिप्यमाणैर्दूषणं किं स्यात् रवेर्यथागतागतैर्मेघैः न किमपि तथा २५ किं दूषणं च यथा नभः भूतानां रजो धूसरत्वादिभिः गतागतैर्गुणैर्न सज्जते तथा रजआदिमलैर्ब्रह्मेति २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवमात्मा न विक्रियते इत्युक्तं नन्वेतदनुपपन्नंबद्धावस्थायाः त्यज्यमानत्वात् मुक्तावस्थायांश्चगृह्यमाणत्वात् । नहिव्रीहयोऽवघातेनव्रीहिभावत्यागतस्तंडुलीभावेनगृह्यमाणानविक्रियंते तत्राह पूर्वमि ति । बंधावस्थायांगुणैः कर्मभिश्चचित्रंअज्ञानंअज्ञानकार्यदेहेंद्रियादिलक्षणंआत्मन्यध्यासेना।विविक्तंगृहीतमासीत् तदेवपुनर्ज्ञानेनविनिवर्तते आत्मा।तुनकेना।पिरूपेणगृह्यते नापित्यज्यते अयंभावः मुक्तेः क्रियाफलत्वेतावदात्मनोविकारः तस्यास्त्व।रोपिताज्ञानमात्रनिवृत्तिरूपत्वान्नात्मसंस्पर्शित्वंबंधमोक्षयोरतोनविकारइति ३३ एतदेवदृष्टांतेनस्पष्टयति यथेति । ननुसत्पूर्वमेवविद्यमानंघटादिपुनार्वेधत्ते करोतितथमेयासमीक्षाआत्मविद्या ३४ आत्मनोनिर्विकारतांप्रपंचयति (एषइति) एषइत्यनेनअपरोक्षतयानित्यप्राप्तस्यआत्मनः प्राप्तिंवारयति । स्वयंज्योतिरिति अज्ञानमलापकर्षणलक्षणांविक्रि तिंवारयति । अजइत्युत्पत्तिंवारयति । अप्रमेयइतिज्ञानलक्षणातिशयाधानेनसंस्कारम् । महानुभूतिरितिदेशकालपरिच्छेदाभावेनास्तित्ववृद्धिविपरिणामापक्षयनाशान् । स्वयंज्योतिष्ट्वादौहेतुः सक लानुभूतिरिति । एकोऽद्वितीयइति विकारहेतोरन्यस्याभावान्नकोपिविकारइति दर्शयति (तत्राप्येकइत्यनेनसजातीयाभावः अद्वितीयइत्यनेनविजातीयाभावः) ननु श्रुतिविषयस्यकथंज्योतिष्ट्वा दितत्राह । वचसांविरामेअगोचरत्वेननिवृत्तौसत्यां । तथाचश्रुतिः । "यतोवाचोनिवर्ततेअप्राप्यमनसासहे"ति । तत्रहेतुः येनेषितारोपिताः तथाचश्रुतिः "केनेषितंपततिप्रेषितंमनःकेनप्राणः प्रथमः प्रैतियुक्तः । केनेषितांवाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्ति" । "श्रोत्रस्यश्रोत्रंमनसोमनोयद्वाचोहवाचंप्राणस्यप्राणंचक्षुषश्चक्षुरि"ति ३५ अद्वितीयत्वंप्रतिपादयितुंभेदस्यावास्तवत्वमाह एता वानिति । केवलेअभिन्नेआत्मन्आत्मनिविकल्पइतियत् एतावान् सर्वोपिआत्मनोमनसः संमोहः भ्रमः यतःस्वमात्मानमृतेविनायस्यविकल्पस्यावलंबः आश्रयोनास्ति । रजतभ्रमस्येवशुक्तिंविना । "नेहनानास्तिकिंचन । इंद्रोमायाभिःपुरुरूपईयतेयुक्ताह्यस्यहरयःशतादशे"त्यादिश्रुतेरित्यर्थः ३६ केचित्पुनःप्रत्यक्षादिप्रतीतस्य(प्रतीत्या) प्रपंचस्यबाधायोगात्वेदांतानांचकर्तृत्वर्थकर्तृप्रतिपादनपरत्वे नार्थवादत्वात्द्वैतंसत्यमितिमन्यंते । तन्मतमनूद्यदूषयति । यदिति । नामाकृतिभिःग्राह्यनामरूपोपकल्पितंपचवर्णंपंचभूतात्मकंद्वयंद्वैतंयत्तदबाधितमितिपंडितमानिनांअत्रवयमेवपंडिताइत्यभिमानव तांवेदांतेव्यर्थवादइतिप्रतीतिः नतत्त्वविदांयतःव्यर्थेनापिविनाप्यर्थेनसाप्रतीतिः । तथाहि नतावद्विध्येकवाक्यत्वंवेदांतानामस्तियतोऽर्थवादत्वंस्यात् । नचग्राह्यत्वात्पंचवर्णात्मकत्वात्कर्तृभो क्तृपरमानंदात्मप्रतिपादनंकर्मविधिशेषतांभजते । नचाबाधितत्वंद्वैतस्य । नामरूपात्मकत्वात् । ग्राह्यत्वात्पंचवर्णात्मकत्वात् स्वप्नवदित्याद्यनुमानैर्वाचारंभणादिश्रुतिभिश्चबाधितत्वादिति ३७

श्लोकाः ३३—३७

पूर्वंगृहीतंगुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग ॥ निवर्ततेतत्पुनरीक्षयैवनगृह्यतेनापिविसृज्यआत्मा ३३ यथाहिभानोरुदयोनृचक्षुषांतमोवि हन्यान्नतुसद्विधत्ते ॥ एवंसमीक्षानिपुणासतीमेहन्यात्तमिस्रंपुरुषस्यबुद्धेः ३४ एषस्वयंज्योतिरजोऽप्रमेयोमहानुभूतिःसकलानुभूतिः ॥ एकोऽद्विती योवचसांविरामेयेनेषितावागसवश्चरंति ३५ एतावानात्मसंमोहोयद्विकल्पस्तुकेवले ॥ आत्मन्नृतेस्वमात्मानमवलंबोनयस्यहि ३६ यन्नामाकृतिभि र्ग्राह्यंपंचवर्णमबाधितम् ॥ व्यर्थेनाप्यर्थवादोयंद्वयंपंडितमानिनाम् ३७

चूर्णिका

किं च इदं देहादि आत्मनि अध्यासेन स्वीकृतम् आसीत् तदेव ज्ञानेन निवर्तते आत्मा तु न केनापि रूपेण गृह्यते त्यज्यते च अतो नात्मनोविकारः ३३ अत्र दृष्टांतः यथा सूर्योदयः तमः हन्यात् नतु सद्विधत्ते एवं आत्मविद्या पुरुषबुद्धेः अज्ञानं हन्यात् ३४ किं च एषः आत्मा निर्विकारः येन प्रेरिताः वागादयः चरंति ३५ अथ एवं एकरूपे आत्मनि यो विकल्पः सः मनसोपि भ्रम एव ३६ किं च यन्नामाकृतिभिर्ग्राह्यं द्वैतं तत् मिथ्या ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तवदसम्यग्ज्ञानीनयथेष्टमाचरेदित्याह तथापीतिद्वाभ्यां । गुणेषुविषयेषुरजोरागः । मनसः कषाय इति उपायांतरेणदुर्निरासतामाह. २७ एतदेवदृष्टांतेनोपपादयति यथेति । नृणामामयोरोगः
असाधुअसम्यग्यथाभवतितथाअपक्वकषायकर्म अदग्धाः कषायारागादयः तन्मूलानिकर्माणियस्मिंस्तत् अतएवसर्वसंगंसर्वेषुपुत्रादिषुसज्जमानंअतः कुयोगिनं असम्यग्ज्ञानिनंविध्यतिभ्रंशयति २८
टीका ननु कथंचिद्विषयसंगेयदियोगभ्रंशःस्यात् अलंतर्हियोगमार्गेणसापायेनतत्राह .। कुयोगिनइति । मनुष्यभूतैर्बंधुशिष्यादिरूपैस्त्रिदशोपसृष्टैः (सुर-) प्रेरितैः- तथाचश्रुतिः"यस्मात्तदेषांनप्रियं ॥२८॥
यदेतन्मनुष्याविदु"रिति । भूयोजन्मांतरे । नतुकर्मतंत्रंकर्मविस्तारं २९ ननु विदुषामपिसर्वथाकर्मदुष्परिहरमितिपुनः संसारःस्यात्तत्राह करोतीति । विदुषोऽन्योसौजंतुर्देहीभोजनादिकर्म
करोति । क्रियतेविक्रियतेच । (कर्मवत्कर्मणेतिकर्मकर्तरिप्रयोगः) तेनकर्मणापुष्ट्याद्यपिप्राप्नोतीत्यर्थः । केनापिसंस्कारादिनाचोदितः सन् । आनिपातान्मरणपर्यंतंकरोति विद्वांस्तुप्रकृतौ
॥१४९॥ देहेस्थितोपितत्रकर्मणिनविक्रियते । निरहंकारित्वात् । हर्षविषादादिभिः संसारंनप्राप्नोति ३० किंच आस्तांतावद्दैहिककर्मभिर्विकारशंका यतोदेहमप्यसौनपश्यतीत्याह । तिष्ठंतमिति । उक्षंतं
मूत्रयंतम् । स्वभावमाप्तमन्यदपिदर्शनस्पर्शनादिईहमानंकुर्वंतंआत्मानंदेहम् ३१ नन्विंद्रियवतः सर्वथाकथमदर्शनंसंभवतितत्राह । यदिस्मेति । यद्यपिअसंतांबहिर्मुखानांइंद्रियाणांअर्थंपश्यति
तथापिनानात्वान्मिथ्या स्वप्नवदित्यनुमानेनविरुद्धंबाधितंसत् अन्यत् आत्मव्यतिरिक्तंमनीषीवस्तुतयानमन्यतेस्वापादुत्थायमनुष्यसंस्कारमात्रेणस्वाप्नंविषयंस्फुरंतंअतएवस्वयमेवतिरोभवंतंयथा (मि
थ्येतिपश्यति) तद्वत् ३२

तथापिसंगःपरिवर्जनीयोगुणेषुमायारचितेषुतावत् ॥ मद्भक्तियोगेनदृढेनयावद्रजोनिरस्येतमनःकषायः २७ यथामयोऽसाधुचिकित्सितोनृणांपुनःपुनः श्लोकाः
संतुदतिप्ररोहन् ॥ एवंमनोऽपक्वकषायकर्मकुयोगिनंविध्यतिसर्वसंगम् २८ कुयोगिनोयेविहितांतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ॥ तेप्राक्तनाभ्यासबले
नभूयोयुंजंतियोगंनतुकर्मतंत्रम् २९ करोतिकर्मक्रियतेचजंतुःकेनाप्यसौचोदितआनिपातात् ॥ नतत्रविद्वान्प्रकृतौस्थितोपिनिवृत्ततृष्णःस्वसुखानुभू २७/३२
त्या ३० तिष्ठंतमासीनमुतव्रजंतंशयानमुक्षंतमदंतमन्नम् ॥ स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्नवेद ३१ यदिस्मपश्यत्यसदिंद्रियार्थं
नानानुमानेनविरुद्धमन्यत् ॥ नमन्यतेवस्तुतयामनीषीस्वाप्नंयथोत्थायतिरोदधानम् ३२

चूर्णिका तथापि यावत् मद्भक्तियोगेन मनःकषायो रागः निरस्येत तावद्विषयसंगो वर्ज्यः २७ अत्र दृष्टांतः यथा रोगः अचिकित्सितः सन् वर्धते एवं सर्वसंगं मनः अविवे
किनं भ्रंशयति २८ किं च ये अपक्वयोगिनः ते विघ्नैर्विहता अपि पूर्वाभ्यासबलेन जन्मांतरे योगं युंजंति न कर्मतंत्रम् २९ अथ च असौ जंतुः केनापि प्रेरितः सन् ॥१४९॥
कर्म आमृत्यु कला क्रियते च विद्वांस्तु देहे स्थितोपि संसारं नाप्नोति निरभिमानत्वात् ३० एवंभूतो यः तिष्ठंतमासीनमित्यादि विशिष्टं देहमपि न वेद ३१ यद्य
पि विषयादिकं पश्यति तथापि तत्सत्यंनमन्यते ३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तदेवंज्ञानयोगंसपरिकरंनिरूप्येदानींतन्निष्ठस्यविघ्नप्रतीकारमाह । योगिनइतित्रिभिः । योगंयुंजतःकायोदेहःयद्यंतरैवोत्पन्नैरूपसर्गैःरोगाद्युपद्रवैरभिभूयतेतत्रायंविधिः प्रतीकारः ३८ योगधारणयासो
मसूर्यादिधारणयाकांश्चित्संतापशैत्यादीन्आसनैर्वायुधारणाश्रितैः वातादिरोगान् । तपोमंत्रौषधैःपापग्रहसर्पादिकृतान् ३९ ममानुध्यानादिभिः कामादीन् योगेश्वरानुवृत्त्यादंभमानादीन्हन्यात् ४०
अन्येतुदेहासिद्ध्यर्थमेवैतत्सर्वंकुर्वंतितद्दूषयति । केचिदिति । केचित्पुनरेतैरन्यैश्चोपायैर्देहमेवसुकल्पंजरारोगादिरहितंवयसितारुण्येस्थिरंचकृत्वांपरकायप्रवेशादिसिद्ध्येतत्तद्धारणारूपंयोगंयुंजंतिनतुज्ञा
ननिष्ठारूपं ४१ कुशलैःप्राज्ञैराद्दत्यआदरणीयंनभवति । वनस्पतिवदात्मास्थायी । शरीरंतुफलवन्नश्वरमित्यर्थः ४२ ननुक्वचित्समाध्यंगत्वेनापिप्राणायामादियोगेक्रियमाणेजरारोगाद्यभावोदृश्य
ते । सत्यं । तथापिसमाधिपुत्सृज्य नतत्रसज्जेतेत्याह । योगमिति । तत्तांदेहसिद्धिंनश्रद्दध्यान्नविश्वसेत् (अहमेवपरोयस्य)४३ तदेवंविघ्नप्रतीकारैर्योगंकुर्यादित्युक्तं । मच्छरणस्यतुनविघ्नशंकापीत्याह
॥१५१॥ योगचर्यामिति । विचरन् आचरन् स्वसुखेअनुभूरनुभूतिर्यस्यसः । स्पृहामूलाहिविघ्नाः साचमदपाश्रयस्यनिवर्तंते । अतोंऽतरायैरविहतः स्वानंदपूर्णोभवतीति (अहमेवआश्रयोयस्यसम
दपाश्रयः) ४४ समाहृत्यस्वयोगंतुसमस्तोपनिषद्रसम् ॥ सख्येमुख्यतमांभक्तिमुक्तौपुनरुपादिशत् ॥ १ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेटीकायांअष्टाविंशोध्यायः २८ ॥ ॥ ७ ॥
ऊनत्रिंशेतुयःपूर्वविस्तरेणनिरूपितः ॥ भक्तियोगस्तमेवाहस्वभक्तायसमासतः ॥ १ ॥ अतिक्लेशमिवालक्ष्ययोगेसंगैकसंपादि ॥ सुखोपायंपुनःकृष्णमुद्धवःपरिपृच्छति ॥ २ ॥ (सुदुष्करामिति)
अनात्मनः अवशीकृतमनसः अंजसाअप्रयासतोयथासिद्ध्येत्तत्तथाअंजसासुबोधंयथावथामेब्रूहि १

श्लोकाः

योगिनोऽपक्वयोगस्ययुंजतःकायउत्थितैः ॥ उपसर्गैर्विहन्येततत्रायंविहितोविधिः ३८ योगधारणयाकांश्चिदासनैर्धारणान्वितैः ॥ तपोमंत्रौषधैःकांश्चि
दुपसर्गान्विनिर्दहेत् ३९ कांश्चिन्ममानुध्यानेननामसंकीर्तनादिभिः ॥ योगेश्वरानुवृत्त्यावाहन्यादशुभदाञ्छनैः ४० केचिद्देहमिमंधीराःसुकल्पंवयसि
स्थिरम् ॥ विधायविविधोपायैरथयुंजंतिसिद्धये ४१ नहितत्कुशलादृत्यंतदायासोह्यपार्थकः ॥ अंतवत्त्वाच्छरीरस्यफलस्येववनस्पतेः ४२ योगंनिषे ३८/१
वतोनित्यंकायश्चेत्कल्पतामियात् ॥ तच्छ्रद्दध्यान्नमतिमान्योगमुत्सृज्यमत्परः ४३ योगचर्यामिमांयोगीविचरन्मदपाश्रयः ॥ नांतरायैर्विहन्येतानिः
स्पृहःस्वसुखानुभूः ४४ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेअष्टाविंशोध्यायः ॥ २८ ॥ ॥ ७ ॥ ॥ उद्धवउवाच ॥ सुदुष्करा
मिमांमन्येयोगचर्यामनात्मनः ॥ यथांजसापुमान्सिद्ध्येत्तन्मेब्रूह्यंजसाऽच्युत १

चूर्णिका

एवं योगनिष्ठस्य विघ्नप्रतीकारमाह एवं योगं युंजतः पुंसः कायः यदि विघ्नैर्विहन्येत ३८ तर्हि योगधारणा तप आदि तान् दहेत् ३९ तत्र कांश्चिन्मद्ध्यानेन नामकीर्त
नादिना वा दहेत् ४० केचित् धीरा एवं उपायैः देहं सुकल्पं कृत्वा सिद्धये युंजंति तेषां श्रमो व्यर्थ एव देहस्यांतवत्त्वात् ४१ ४२ किंच योगं सेवतः पुंसः कायः ॥१५१॥
समर्थश्चेत् तर्हि योगं हित्वा सिद्धिं न विश्वसेत् ४३ योगचर्यामिमां योगी विचरन् मदपाश्रयः नांतरायैर्विहन्येत निस्पृहः स्वसुखानुभूः ४४॥ ॥ इत्येकादशेऽष्टाविंशो
ऽध्यायः २८ ॥ ॥ ७ ॥ ॥ उद्धवउवाच ॥ सुदुष्करामिमां मन्ये योगचर्यामनात्मनः यथांऽजसा पुमान् सिद्ध्येत्तन्मे ब्रूह्यंजसाच्युत १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुदुष्करतांप्रपंचयति प्रायशइति । मनोयुंजंतःनिगृह्णंतंविषीदंतिक्लिश्यंति कुतःअसमाधानात्अनिग्रहात्कथंचिन्मनसोनिग्रहेचकार्शिताः श्रांताः संतः २ यस्मादेवंकेचनाविषीदंति अथातएवयेहंसाः सारासारविवेकचतुरास्तेतुआनंददुघंसमस्तानंदपरिपूरकंतवपदांबुजमेवसुखंयथाभवतितथानुनिश्चितंश्रयेरन्सेवंते अमीतुत्वन्मायायाविहताः । के । येयोगकर्मभिः मानिनः संतोनश्रयंते। यद्वा अमीत्वद्भक्ताः त्वन्माययानविहताः अतएव (हेविश्वेश्वर) तेयोगकर्मभिः कृत्वा मानिनोनभवंति । अन्येतु त्वन्माययामोहिताः संतोवयंयोगज्ञाः वयंकर्मकुशलाइतिकेवलंगर्विताभवंति । नतुमुच्यंतेइत्यर्थः ३ त्वद्भक्तास्तुत्वत्प्रसादेनकृतार्थाभवंतीति नातिचित्रमित्याह । किमिति । अनन्यशरणेषुदासेषुतवात्मसात्त्वंतदधीनत्वंयत्यथा नंदगोपीबलिप्रभृतिषुएतत्किंचित्रंनाश्चर्यमित्यर्थः यतोयोभवान्श्रीरामरूपेणमृगैर्वानरैः सह साहित्यंसख्यमितियावत्अरोचयत्प्रीत्याकृतवान् कथंभूतः ईश्वराणांब्रह्मादीनांश्रीमंतियानिकिरीटानितेषांतटान्यग्राणितैः पीडितंनिघृष्टंपादपीठं (आसनं) यस्य स्वयं (सः तैः शिरसानमस्कृतइत्यर्थः) तथाभूतोपिसन् ४ अतस्त्वांपरित्यज्यकोनामान्यत्संश्रयेदित्याह । तंत्वेति । तमेवंभूतंत्वांकोनुविसृजेत्नभजेत्कथंभूतः स्वकृतवित् । बलिप्रह्लादादिषुत्वयाकृतमनुग्रहंजानन् । यद्वा स्वस्मिन्नेवांतर्यामितयाकृतमुपकारंविद्वान् तदेवाह । अखिलात्मदयितेश्वरम् । अखिलस्यजगतः आत्मानंचेतयितारंआत्मत्वादेवदयितंप्रेष्ठंसुसेव्यंईश्वरत्वादेवभजनीयंकिंचआश्रितानांसर्वार्थदं तत्किंफलोद्देशेनाहंसेव्यः । नहिनाहि । किमप्यनिरुक्तंत्वद्व्यतिरिक्तंस्वर्गादित्वयादत्तमपिकोवाभजेत्सेवेत । कथंभूतंतत् । यत्केवलंभूत्यैइंद्रियभोगायअनुअनंतरमेवत्वाद्विस्मृतयेभवति यद्वा त्वद्व्यतिरिक्तंकिमपिदेवतांतरंधर्मज्ञानादिसाधनंवाभूत्यैऐश्वर्यायसंसारस्यविस्मृतयेमोक्षायवाकोभजेत्नकोपि । ननुतत्तत्साधनंविनाभोगमोक्षादिफलंकथंस्यात्तत्राह । किंवेति । तदुक्तं " यावैसाधनसंपत्तिःपुरुषार्थचतुष्टये । तयाविनातदाप्नोतिनारायणपदाश्रय"इति ५ आस्तामन्यभजनवार्ता । त्वत्कृतोपकारस्यत्वय्यात्मनिवेदनेनैवनिष्कृतिर्नान्यथेत्याह । नैवेति । अपचितिंप्रत्युपकारंआनृण्यमितियावत् कवयोब्रह्मविदोपिनैवप्राप्नुवंति यतस्त्वत्कृतमुपकारंस्मरंतः ऋद्धमुदः उपचितपरमानंदाः उपकारमेवाह । योभवान्बहिराचार्यवपुषागुरुरूपेणअंतश्चचैत्यवपुषाअंतर्यामिरूपेणअशुभंविषयवासनांविधुन्वन्निरस्यन्स्वगतिंनिजंरूपंप्रकटयति तस्यतव ६

प्रायशःपुंडरीकाक्षयुंजंतोयोगिनोमनः ॥ विषीदंत्यसमाधानान्मनोनिग्रहकार्शिताः २ अथातआनंददुघंपदांबुजंहंसाःश्रयेरन्नरविंदलोचन ॥ सुखंनुविश्वेश्वरयोगकर्मभिस्त्वन्माययामीविहतानमानिनः ३ किंचित्रमच्युततवैतदशेषबंधोदासेष्वनन्यशरणेषुयदात्मसात्त्वम् ॥ योऽरोचयत्सहमृगैः स्वयमीश्वराणांश्रीमत्किरीटतटपीडितपादपीठः ४ तंत्वाऽखिलात्मदयितेश्वरमाश्रितानांसर्वार्थदंस्वकृतविद्विसृजेतकोनु ॥ कोवाभजेत्किमपिविस्मृतयेऽनुभूत्यैकिंवाभवेन्नतवपादरजोजुषांनः ५ नैवोपयंत्यपचितिंकवयस्तवेशब्रह्मायुषापिकृतमृद्धमुदःस्मरंतः ॥ योंऽतर्बहिस्तनुभृतामशुभंविधुन्वन्नाचार्यचैत्यवपुषास्वगतिंव्यनक्ति ६

श्लोकाः २/६

चूर्णिका हेकृष्ण मनो युंजतो योगिनः तदनिग्रहात् प्रायः क्लिश्यंति २ अतः ज्ञानिनः तेपादांबुजं सेवंते ३ किं च अहो हे अच्युत दासेषु तव यत् अधीनत्वम् इदं नाश्चर्यम् यतः त्वं सर्ववंद्योपि वानरैः सह सख्यं कृतवान् ४ एवंभूतं त्वां कःनभजेत् ५ हे कृष्ण त्वत्कृतं उपकारं स्मरंतः कवयोपि ब्रह्मायुषापि अनृण्यंनाप्नुवंति यः त्वं बहिः गुरुरूपेण अंतः अंतर्यामिरूपेण नृणां विषयवासनां निरस्य स्वं रूपं प्रगटयसि इत्युपकारः अतः भक्तियोगं ब्रूहि ६

१ 'विलुठित'मितिपाठभेदः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ईश्वरेश्वरत्वेहेतुः जगत्क्रीडनकंक्रीडोपकरणंयस्यसः। ननु जगत्सृष्ट्यादिनाब्रह्मेशादयः क्रीडंति तत्राह। स्वशक्तिभिः सत्त्वादिभिः गृहीतंमूर्तित्रयंयेनसः। सप्रेमप्रेमसहितंमनोहरंस्मितंयस्यसः। सप्रे
मयथातथाजगादेतिवा ७ हंतेतिसहर्षसंबोधनम्। सुमंगलान्सुखरूपान्। मृत्युंसंसारंदुर्जयमन्यैरुपायैः ८ धर्मानेवाह। कुर्यादितित्रयोदशभिः। संस्मरन्शनकैरसंरभतः कुर्यात् तदाह मयीति।
मयिअर्पितेमनश्चित्तेसंकल्पविकल्पानुसंधानात्मकेयेन। अतएवमद्धर्मेष्वेवात्ममनसोरतिर्यस्यसः। (आत्माचित्तम्) ९ पुण्यदेशलक्षणं मद्भक्तैरिति। देवादिषुयेमद्भक्ताः नारदप्रह्लादादयः तेषांआच
रितानिकर्माणिचाश्रयेत् (तच्चरित्राणिसेवेतेत्यर्थः) १० (पृथगेकशः) सत्रेणसंभूयवा (महाराजविभूतिभिः छत्रचामरशिबिकादिभिः) ११ अंतरंगांभक्तिमाह मामितित्रिभिः। सर्वभूतेष्वात्म
निचात्मानमीश्वरंस्थितंमामेवेक्षेत। ननु कथमेकस्यसर्वेषुवृत्तिस्तत्राह। बहिरंतः पूर्णमित्यर्थः। तत्कुतः अपावृतंअनावरणम्। तदपिकुतः यथा खं असंगत्वादित्यर्थः १२ हेमहाद्युतेअतिप्राज्ञ
इत्यनेनप्रकारेणकेवलंज्ञानंज्ञानरूपांदृष्टिमाश्रितःसन्सर्वाणिभूतानिमद्भावेनमन्यमानः सभाजयन् (पूजयन्) पंडितोमतः इत्युत्तरेणान्वयः १३ ननूत्तमाधममध्यमेष्वेकरूपेणसभाजनमपांडित्यमे
वस्यात्पूज्यपूजाव्यतिक्रमादिदोषापत्तेरित्याशंक्यतामेवज्ञानदृष्टिंप्रपंचयति। ब्राह्मणइति। विषमेष्वपिसमदृक्समंमामेवपश्यन्। वैषम्यमेव चतुर्धा दर्शयति। ब्राह्मणेपुल्कसेइतिजातितोवैषम्यम्।
पुल्कसोऽत्यजजातिविशेषः। स्तेने ब्रह्मस्वहारिणि ब्रह्मण्येब्राह्मणेभ्योदातरिचेतिकर्मतः। अर्केविस्फुलिंगकेइतिगुणतः। अक्रूरेशांतेऽक्रूरेइतिस्वभावतः १४ नरेष्वीश्वरदृष्टिंकुर्वतः सद्यः फलविशेषमा
ह। नरेष्विति समोत्तमहीनेषु स्पर्धादयः स्वस्मिन्नहंकारश्चहिनिश्चयेनवियंतिनश्यंति। (अत्रस्पर्धाद्वेषः असूयागुणासहनम्) १५

॥ श्रीशुकउवाच ॥ इत्युद्धवेनात्यनुरक्तचेतसापृष्टोजगत्क्रीडनकःस्वशक्तिभिः ॥ गृहीतमूर्तित्रयईश्वरेश्वरोजगादसप्रेममनोहरस्मितः ७ श्रीभगवा
नुवाच ॥ हंततेवर्णयिष्यामिममधर्मान्सुमंगलान् ॥ यान्श्रद्धयाऽऽचरन्मर्त्योमृत्युंजयतिदुर्जयम् ८ कुर्यात्सर्वाणिकर्माणिमदर्थंशनकैःस्मरन् ॥ मय्य
र्पितमनश्चित्तोमद्धर्मात्ममनोरतिः ९ देशान्पुण्यान्संश्रयेतमद्भक्तैःसाधुभिःश्रितान् ॥ देवासुरमनुष्येषुमद्भक्ताचरितानिच १० पृथक्सत्रेणवामह्यंपर्व
यात्रामहोत्सवान् ॥ कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ११ मामेवसर्वभूतेषुबहिरंतरपावृतम् ॥ इक्षेतात्मनिचात्मानंयथाखममलाशयः १२ इ
तिसर्वाणिभूतानिमद्भावेनमहाद्युते ॥ सभाजयन्मन्यमानोज्ञानंकेवलमाश्रितः १३ ब्राह्मणेपुल्कसेस्तेनेब्रह्मण्येर्केस्फुलिंगके ॥ अक्रूरेक्रूरकेचैवसमदृक्पं
डितोमतः १४ नरेष्वभीक्ष्णंमद्भावंपुंसोभावयतोऽचिरात् ॥ स्पर्धाऽसूयातिरस्काराःसाहंकारावियंतिहि १५

॥ श्रीशुकउवाच ॥ एवंउद्धवेन पृष्टः श्रीकृष्णः प्रहस्य जगाद ७ श्रीकृष्णउवाच हे उद्धव ते मद्धर्मान् वक्ष्यामि यान् आचरन् मर्त्यः मृत्युं जयति ८ तानेवाह
हे सखे पुमान् मां स्मृत्वा मदर्थं सर्वकर्माणि कुर्यात् ९ तथा पुण्यान् देशान् मद्भक्ताचरितानि च आश्रयेत् १० किं च मेपर्वयात्रामहोत्सवान् स्वयं अन्यैर्वाकार
येत् ११ तथा सर्वभूतेषुस्वात्मनि च स्थितं मामेवेक्षेत १२ तथा सर्वभूतानि मद्भावेन सत्कृत्य १३ ब्राह्मणे पुल्कसे ब्रह्मण्ये स्तेने अर्के विस्फुलिंगके अक्रूरे क्रूरे च यः
समदृक् सःपंडितो मे मतः १४ एवं नृपु ईश्वरदृष्टिं कुर्वतः पुंसः साहंकाराः स्पर्धादयः नश्यंति १५

CC-0. In Public Domain. Digitization by eGangotri

अतोऽतर्यामीश्वरदृष्ट्यासर्वान्प्रणमेदित्याह । विसृज्येति । स्मयमानान्हसतः स्वान्सखीन् । तथादैहिकींदृशंअहमुत्तमः सतुनीचइतिदृष्टिम् । तयादृशायात्रीडालज्जातांचविसृज्यश्वचांडालादीनाभिव्याप्यप्रणमेत् १६ एवंपंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाहद्वाभ्यां यावदिति (मद्भावोभगवद्भावः एवंसमदृष्ट्या) १७ तस्यएवंकुर्वतः पुंसः सर्वंब्रह्मात्मकमेवभवति । कुतः । आत्ममनीषयासर्वत्रेश्वरदृष्ट्यायाविद्यातया अतः परितोब्रह्मैवपश्यन्सर्वतः क्रियामात्रादुपरमेत् १८ किमयमेवोपायः अस्तिवाऽन्योपीत्यपेक्षायांसंतिबहवः समीचीनस्त्वयमेवेत्याह अयंहीति १९ भगवद्धर्मलक्षणोपायस्यसमीचीनत्वमेवोपपादयति नह्यंगेति द्वाभ्याम् । अंगहेउद्धवअनाशिषोनिष्कामस्यमद्धर्मस्योपक्रमेसतिअण्वपिईषदपिवैगुण्यादिभिर्नाशोनास्त्येव यतोमयैवनिर्गुणत्वादयंधर्मःसम्यग्व्यवसितोनिश्चितः नतुमन्वादिमुखेनकथंचित् २० किंच योयइति । अयमर्थः । किंवक्तव्यंमद्धर्मस्यनध्वंसइति यतोलौकिकोपियोयोनिरर्थः व्यर्थः आयासः सोपिमयिपरेनिष्फलायचेत्कल्प्यतेनिष्कामतयाऽर्प्यतेचेत्तर्हिधर्मएवस्यात्निरर्थायासेदृष्टांतः । यथाभयशोकादेर्हेतोः पलायनाक्रंदनादिक्लेशस्तद्वत् २१ अतोमद्भजनमेवबुद्धेर्मनीषायाश्चफलमित्याह । एषेति । तामेवदर्शयति । सत्यममृतंचमामां अनृतेनासत्येनविनाशिनामनुष्यदेहेन इहास्मिन्नेव जन्मनिप्राप्नोतीति यत्सैववुद्धिर्मनीषाचेति । बुद्धिर्विवेकः । मनीषाचातुर्यं २२ महाप्रकरणार्थमुपसंहरति । एषइतिद्वाभ्याम् (संक्षेपविस्तराभ्यांब्रह्मज्ञानस्यसंग्रहः कथितः) २३ २४ किंच आस्तां तावत्ज्ञानम् । एतदनुसंधानकथनपठनश्रवणपराणामप्येतदेवफलंभवतीत्याहचतुर्भिः सुविविक्तमिति मयासुविविक्तंदत्तोत्तरंएतत्आख्यानमपियोधारयेत्अनुसंदध्यात्सब्रह्मगुह्यंवेदेपिरहस्यम् २५

श्लोकाः १६—२५

विसृज्यस्मयमानान्स्वान्दृशंव्रीडांचदैहिकीम् ॥ प्रणमेद्दंडवद्भूमावाश्वचंडालगोखरान् १६ यावत्सर्वेषुभूतेषुमद्भावोनोपजायते ॥ तावदेवमुपासीतवाङ्मनःकायवृत्तिभिः १७ सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया ॥ परिपश्यन्नुपरमेत्सर्वतोमुक्तसंशयः १८ अयंहिसर्वकल्पानांसध्रीचीनोमतोमम ॥ मद्भावःसर्वभूतेषुमनोवाक्कायवृत्तिभिः १९ नह्यंगोपक्रमेध्वंसोमद्धर्मस्योद्धवाण्वपि ॥ मयाव्यवसितःसम्यङ्निर्गुणत्वादनाशिषः २० योयोमयिपरेधर्मःकल्प्यतेनिष्फलायचेत् ॥ तदायासोनिरर्थःस्याद्भयादेरिवसत्तम२१ एषाबुद्धिमतांबुद्धिर्मनीषाचमनीषिणाम्॥यत्सत्यमनृतेनेहमर्त्येनाप्नोतिमाऽमृतम् २२ एषतेऽभिहितःकृत्स्नोब्रह्मवादस्यसंग्रहः ॥ समासव्यासविधिनादेवानामपिदुर्गमः २३ अभीक्ष्णशस्तेगदितंज्ञानंमन्निष्ठयुक्तिमत् ॥ एतद्विज्ञायमुच्येतपुरुषोनष्टसंशयः २४ सुविविक्तंतवप्रश्नंमयैतदपिधारयेत् ॥ सनातनंब्रह्मगुह्यंपरंब्रह्माधिगच्छति २५

चूर्णिका

किं च हसतः स्वान् तथा देहे अहं उच्चः अन्यः नीचः इति व्रीडां च हित्वा आश्वचांडालगोखरं भूमौ दंडवत् प्रणमेत् १६ एवं यावत्सर्वभूतेषु मद्भावः नोपजायते तावन्मां उपासीत १७ एवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवति १८ किं च सर्वोपायमध्ये अयमेव श्रेष्ठः उपायः तमाह सर्वभूतेषु मनआदिवृत्तिभिर्मद्भाव इति १९ हे उद्धव एवं निष्काममद्धर्मस्य वैगुण्यादिभिर्नाशो नास्त्येव यतो मया सम्यक् धर्मः निश्चितः २० किंच लौकिकोपि यः व्यर्थः आयासः सः मयि अर्पितश्चेत् धर्म एव स्यात् किं पुनर्वक्तव्यम् मद्धर्मस्य न ध्वंस इति २१ किंच अत्र जन्मनि मर्त्यदेहेन अमृतंप्राप्नोतीति यत् एषा बुद्धिमतां बुद्धिश्चातुर्यं च २२ हेउद्धव एवं ब्रह्मवादस्य संग्रहः समासव्यासतः सर्वोपि ते उक्तः २३ एवं ते उक्तं ज्ञानं विज्ञाय पुमान् मुच्यते २४ किंच एतत् ज्ञानं यः अनुसंदध्यात् सः ब्रह्म अधिगच्छति २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेमयायआश्रितआसीत् । सतवसंनिधानेनैवविद्रावितः । भ्रमवंतिकिंनुबाधायसमर्थाभवंतिकिं हेअजाद्यब्रह्मणोपिजनक ३७ किंच यद्यपितवसंनिधानादेवगतः तथाप्यनुकंपिनाभवताविज्ञानमयः प्रदी
पः मत्यर्पितः स्वमाययाऽपहृतः पुनः समर्पितः अतोयः तवकृतज्ञः त्वयाकृतमनुग्रहंजानातिसकोनामत्वदीयंपादमूलंहित्वाऽन्यच्छरणंसमीयादाश्रयेत् ३८ किंच । दाशार्हादिषुत्वयायः स्वमाययास्ने
हपाशः प्रसारितः सत्वयैवात्मतत्त्वज्ञानशस्त्रेणवृक्णः छिन्नः ३९ एवंयद्यपित्वयाबहुकृतंतथाप्येतावत्प्रार्थयेइत्याह । नमोस्त्विति । अनुशाधिअनुशिक्षय । अनुशासनीयमाह । यथेति । मुक्तावप्य
नपायिनी ४० तदुक्तमंगीकृत्यतथापिमयादिष्टोलोकसंग्रहार्थमेतावत्कुर्वित्याह । गच्छेति । आदिष्टोनियुक्तः ४१ स्नानादेः पूर्वमेवमत्पादतीर्थोदकभूतायाअलकनंदायागंगायाईक्षया । वसानः परि
दधानः ४२ द्वंद्वमात्राणांशीतोष्णादिविषयाणाम् । सुशीलः आर्जवादिस्वभावः ४३ तेत्वयात्रिविक्तंसुविचारितम् । तिस्रस्त्रिगुणात्मिकागतीरतिक्रम्य ४४ हरिमेधसासंसारंहरतिताहशीमेधायस्य
तेनश्रीकृष्णेनअद्वंद्वपरोपिसुखदुःखविनिर्मुक्तोपिअपक्रमेनिर्गमनसमये ४५

श्लोकाः ३७ ४६

॥ उद्धवउवाच ॥ विद्रावितोमोहमहांधकारोयआश्रितोमेतवसंनिधानात् ॥ विभावसोःकिंनुसमीपगस्यशीतंतमोभीःप्रभवंत्यजाद्य ३७ प्रत्यर्पि
तोमेभवतानुकंपिनाभृत्यायविज्ञानमयःप्रदीपः ॥ हित्वाकृतज्ञस्तवपादमूलंकोन्यत्समीयाच्छरणंत्वदीयम् ३८ वृक्णश्चमेसुदृढःस्नेहपाशोदाशार्ह
वृष्ण्यंधकसात्वतेषु ॥ प्रसारितःसृष्टिविवृद्धयेत्वयास्वमाययाह्यात्मसुबोधहेतिना ३९ नमोस्तुतेमहायोगिन्प्रपन्नमनुशाधिमाम् ॥ यथात्वच्चरणांभो
जेरतिःस्यादनपायिनी ४० ॥ श्रीभगवानुवाच ॥ गच्छोद्धवमयादिष्टोबदर्याख्यंममाश्रमम् ॥ तत्रमत्पादतीर्थोदेस्नानोपस्पर्शनैःशुचिः ४१ ईक्षयालक
नंदायाविधूताशेषकल्मषः ॥ वसानोवल्कलान्यंगवन्यभुक्सुखनिस्पृहः ४२ तितिक्षुर्द्वंद्वमात्राणांसुशीलःसंयतेंद्रियः ॥ शांतःसमाहितधियाज्ञानविज्ञा
नसंयुतः ४३ मत्तोनुशिक्षितंयत्तेविविक्तमनुभावयन् ॥ मय्यावेशितवाक्चित्तोमद्धर्मनिरतोभव ॥अतिव्रज्यगतीस्तिस्रोमामेष्यसिततःपरम् ४४॥श्रीशुकउ
वाच ॥ सएवमुक्तोहरिमेधसोद्धवःप्रदक्षिणंतंपरिसृत्यपादयोः ॥ शिरोनिधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्यपक्रमे ४५

चूर्णिका

उद्धव उवाच ॥ हे कृष्ण मे मोहमहांधकारः यः आसीत् सः तव सन्निधानेनैव गतः ३७ तथा त्वया दयालुना दासाय मे विज्ञानमयो दीपः अर्पितः अतः कृतज्ञः पु
मान् ते चरणं हित्वा कः अन्यच्छरणं इयात् ३८ किंच यः यादवेषु स्नेहपाशः प्रसारितः सोऽपि त्वया तत्त्वज्ञानशस्त्रेण छिन्नः ३९ अतः ते नमोस्तु प्रपन्नं मां
यथा त्वच्चरणारविंदे रतिः स्यात् तथा शिक्षय ४० ॥ ॥ श्रीभगवानुवाच ॥ ॥ हे उद्धव मदाज्ञया त्वं बदर्याश्रमं गच्छ ४१ तत्र मे पादतीर्थोदे स्नानादिना त
था अलकनंदादर्शनेन निष्पापः सन् वल्कलानि वसित्वा ४२ द्वंद्वसहः ज्ञानविज्ञानयुतः सन् मदनुशिक्षितं ज्ञात्वा ४३ मयि वाक्चेतसी स्थाप्य मद्धर्मरतो भव ततः त्रि
गुणात्मकगतीः अतिक्रम्य मां एष्यसि ४४ ॥ श्रीशुकउवाच ॥ एवं हरिणा उक्तः उद्धवः तं कृष्णं परिक्रम्य प्रणम्य पादयोः शिरो निधाय अश्रुकलाभिः तंन्यषिंचत् ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुपुष्कलंयथाभवतितथाब्रह्मदायस्यब्रह्मददातीतितथा (ब्रह्मदाय-)-स्तस्यज्ञानोपदेशःआत्मना (स्वयमेव) २६समधीयीतउच्चैःपठेत्। परमंशुचिअन्येषामपिशोधकम्। पूयेतशुध्येत २७ २८तत्सम्यग्ज्ञा नानुत्पत्तौपुनरुपदेक्ष्यामीत्याशयेनपृच्छति अपीति (हेसखे) अपिकिम् २९ उपधारितमाकलय्याह । नैतदिति । शठायवंचकाय ३० शूद्राणांयोषितांचयदिभक्तिः स्यात्तर्हिब्रूयात् ३१ एतज्ज्ञाने नपुमान्कृतार्थोभवतीत्याह । नैतद्विज्ञायेति । तत्रदृष्टांतमाह । पीत्वेति । पीयूषंस्वादु ३२ ननु संतिवहूनिज्ञेयानि । तत्तत्फलसाधनानि । सत्यंसंतितान्यभक्तानाम् । भक्तस्यतुसर्वमहमेवअतोमदे कशरणोभवेत्याह । ज्ञानइति । ज्ञानादौयावान्धर्मादिलक्षणश्चतुर्विधोर्थः तावान्सर्वोपितेऽहमेव । तत्रज्ञानेमोक्षः । कर्मण्यिविहितेधर्मः । कर्मण्येवस्वाभाविकेतुकामः । योगेत्वणिमादिसिद्धयः । वार्ता यांकृष्यादावर्थः दंडधारणंदंडनीतिस्तत्रैश्वर्यमिति तत्रसिद्ध्यैश्वर्ययोरपिकामांतर्गतत्वात्चातुर्विध्यम् ३३ कुतइत्यतआह । मर्त्यइति । यदात्यक्तसमस्तकर्मासन्मेनिवेदितात्माभवति । तदाऽसौमे विचिकीर्षितः विशिष्टःकर्तुमिष्टोभवति । ततश्चअमृतत्वंमोक्षंप्रतिपद्यमानोमयाआत्मभूयायमदैक्यायमत्समानैश्वर्यायेतियावत्कल्पतेयोग्योभवति । वैध्रुवम् ३४ आदर्शितोयोगमार्गोयस्मैसः ३५ प्रणये नात्वघूर्णक्षुभितंचित्तंधैर्येणविष्टभ्यबहुमन्यमानः आत्मानंकृतार्थंमन्यमानः ३६

श्लोकाः २६/३६

यएतन्ममभक्तेषुसंप्रदद्यात्सुपुष्कलम् ॥ तस्याहंब्रह्मदायस्यददाम्यात्मानमात्मना २६ यएतत्समधीयीतपवित्रंपरमंशुचि ॥ सपूयेताहरहर्मांज्ञान दीपेनदर्शयन् २७ यएतच्छ्रद्धयानित्यमव्यग्रःशृणुयान्नरः ॥ मयिभक्तिंपरांकुर्वन्कर्मभिर्नसबद्ध्यते २८ अप्युद्धवत्वयाब्रह्मसखेसमुपधारितम् ॥ अपि तेविगतोमोहःशोकश्चासौमनोभवः २९ नैतत्त्वयादांभिकायनास्तिकायशठायच ॥ अशुश्रूषोरभक्तायदुर्विनीतायदीयताम् ३० एतैर्दोषैर्विहीनाय ब्रह्मण्यायप्रियायच ॥ साधवेशुचयेब्रूयाद्भक्तिःस्याच्छूद्रयोषिताम् ३१ नैतद्विज्ञायजिज्ञासोर्ज्ञातव्यमवशिष्यते ॥ पीत्वापीयूषममृतंपातव्यंनावशि ष्यते ३२ ज्ञानेकर्मणियोगेचवार्तायांदंडधारणे ॥ यावानर्थोनृणांताततावांस्तेहंचतुर्विधः ३३ मर्त्योयदात्यक्तसमस्तकर्मानिवेदितात्माविचिकीर्षितोमे ॥ तदाऽमृतत्वंप्रतिपद्यमानोमयात्मभूयायचकल्पतेवै ३४ ॥ श्रीशुकउवाच ॥ सएवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचोनिशम्य ॥ बद्धांजलिःप्रीत्यु परुद्धकंठोनकिंचिदूचेऽश्रुपरिप्लुताक्षः ३५ विष्टभ्यचित्तंप्रणयावघूर्णंधैर्येणराजन्बहुमन्यमानः ॥ कृतांजलिःप्राहयदुप्रवीरंशीर्ष्णास्पृशंस्तच्चरणारविंदम् ३६

चूर्णिका

अथ यः एतत् मद्भक्तेषु प्रदद्यात् तस्य अहं आत्मानं ददामि २६ किंच यः एतत् शुचि ज्ञानं पठेत् सः शुद्ध्येत २७ यः एतत् नित्यं शृणुयात् सः कर्मभिर्न वद्ध्यते २८ हे उद्धव त्वया ब्रह्म समवधारितं किं ते मोहः शोकश्च गतः किं २९ हे सखे एतत् त्वया दांभिकाय नास्तिकाय शठाय अभक्ताय च न दीयताम् ३० एतैर्दोषैर्ही नाय ब्रह्मण्याय प्रियाय साधवे ब्रूयात् भक्तिश्चेत् शूद्राणां स्त्रीणां च ब्रूयात् ३१ इदंज्ञानं ज्ञात्वा जिज्ञासोः ज्ञातव्यं न अवशिष्यते यथा अमृतं पीत्वा पातव्यं नावशिष्यते तद्वत् ३२ हे उद्धव ज्ञानादौ यावान् धर्मादिलक्षणोर्थः तावान् सर्वोपि तेऽहमेव ३३ कुतः यदा मर्त्यः त्यक्तसर्वकर्मा सन् मेनिवेदितात्माभवति तदा असौ मे विचिकी र्षितो भवति ततः मोक्षं प्रतिपद्यमानः मत्समानैश्वर्याय योग्यो भवति ३४ ॥ श्रीशुकउवाच ॥ हे राजन् एवं सःउद्धवः दर्शितयोगमार्गः सन् कृष्णवचः श्रुत्वा बद्धांजलिः रुद्धकंठः सन् ३५ चित्तं धैर्येण विष्टभ्य तच्चरणारविंदं शीर्ष्णा स्पृशन् प्राह ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 किंच । दुस्त्यजः स्नेहोयस्मिंस्तेन वियोगात्कातरोभीतः अतएवतंपरिहातुमशक्रुवन्आतुरोविह्वलः सन्कृच्छ्रंकष्टंययौप्राप ततश्चभर्तृपादुकेतेनैवकृपयादत्तेमूर्ध्निबिभ्रत्अतिनिर्बंधरूपयातदाज्ञयातंपुनः
पुनर्नमस्कृत्यययौ अत्रच 'पृष्ठतोऽन्वगमंभर्तुःपादविश्लेषणाक्षम'इत्यादितृतीयस्कंधोपक्रमानुसारेणबदरिकाश्रमंगच्छन्भगवतःप्रभासयात्रामुपश्रुत्यशनैः पृष्ठतोगतःसन्उपसंहृतनिजकुलंभगवंतमेकांते
टीका दृष्ट्वातत्कालप्राप्तेनमैत्रेयेणसहपुनः कृपयाभगवतोपदिष्टंतत्त्वमाकलय्यतदाज्ञातोययाविति द्रष्टव्यम् ४६ विशालांबदरिकाश्रमंगतः सन्हरेर्गतिमगात्कथं भूतांतेनैवजगदेकबंधुनायथोपदिष्टाम् । "तदा
मृतत्वंप्रतिपद्यमानोमयात्मभूयायचकल्पतेवै" ।"अतिव्रज्यगतीस्तिस्रोमामेष्यसिततःपरामि"त्येवमुक्तप्रकाराम् ४७ आनंदसमुद्रोभगवद्भक्तिमार्गःतस्मिन्संभृतमेकीकृतमेतद्यःसच्छ्रद्धयाआसेव्यईषदपिसे
वित्वावर्ततेसविमुच्यतेइतिकिंवक्तव्यंतत्संगेनजगदपिविमुच्यतइत्यर्थः ४८ एवंक्तोपदेशंजगद्गुरुंप्रणमति । भवभयमिति । भवः संसारः भयंजरारोगादिनिमित्तंतदुभयंनिवृत्तानांप्रवृत्तानांचभृत्यवर्गा
॥१५७॥ णांयथायोग्यमपहर्तुंयोऽमृतद्वयमुपजह्रेउपहृतवान्उद्धृतवान्तदेवाह । वेदसारमेकंकिंतत्ज्ञानविज्ञानरूपंचतत्सारं (उदधिसंबंधितः) श्रेष्ठंचभृंगवत्भृंगोयथापुष्पमकोपयन्नेवामृतमुपहरतितथास्वयं
स्वकृतवेदानुसारेण । उदधितश्चैकंतच्चोभयंयथापथंभृत्यवर्गानपाययत्तंनतोस्मीति ४९ येनानुकंपितंविश्वमुद्धवप्रश्ननिर्णयैः । तंवंदेपरमानंदंनंदनंदनरूपिणम् १ ॥ इतिश्रीभागवतेमहापुराणेएका
दशस्कंधेटीकायामेकोनत्रिंशोऽध्यायः २९ ॥ ॥ ७ ॥ ॥ त्रिंशेतुप्रागुपक्षिप्तमौसलच्छलतोहरिः ॥ स्वधामगंतुमन्विच्छन्संजहारनिजंकुलम् ॥ १ ॥ विरागायपुराघोरमुपक्षिप्तंहिमौ
सलम् ॥ कथावसानेतत्रैवविशेषंपरिपृच्छति ॥ २ ॥ ततइतित्रिभिः १ ब्रह्मशापोपसृष्टेकुलेसति । अयंभावः । भगवतिनहिशापः प्रभवति । यादवत्वानुकरणाच्चसोपिकिंचिन्मान्यः अतः किमकरो
दिति तदेतदुक्तं कथमत्यजदिति । सर्वनेत्राणामितिसर्वेंद्रियोपलक्षणम् २

सुदुस्त्यजस्नेहवियोगकातरोनशक्नुवंस्तंपरिहातुमातुरः ॥ कृच्छ्रंययौमूर्धनिभर्तृपादुकेबिभ्रन्नमस्कृत्यययौपुनःपुनः ४६ ततस्तमंतर्हृदिसंनिवेश्यगतो
महाभागवतोविशालाम् ॥ यथोपदिष्टांजगदेकबंधुनातपःसमास्थायहरेरगाद्गतिम् ४७ यएतदानंदसमुद्रसंभृतंज्ञानामृतंभागवतायभाषितम् ॥ कृष्णे ४६
नयोगेश्वरसेवितांघ्रिणासच्छ्रद्धयासेव्यजगद्विमुच्यते ४८ भवभयमपहर्तुंज्ञानविज्ञानसारंनिगमकृदुपजह्रेभृंगवद्वेदसारम् ॥ अमृतमुदधितश्चापाय २
यद्भृत्यवर्गान्पुरुषऋषभमाद्यंविष्णुसंज्ञंनतोस्मि ४९ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेएकोनत्रिंशोध्यायः ॥ २९ ॥ ७ ॥ राजोवाच ॥ ततो
महाभागवतउद्धवेनिर्गतेवनम् ॥ द्वारवत्यांकिमकरोद्भगवान्भूतभावनः १ ब्रह्मशापोपसृष्टेचस्वकुलेयादवर्षभः ॥ प्रेयसींसर्वनेत्राणांतनुंसकथमत्यजत् २

चूर्णिका ततः कृष्णवियोगकातरः सन् तत्पादुके मूर्ध्नि धृत्वा पुनःपुनर्नत्वा ययौ ४६ ततः कृष्णं हृदि स्थाप्य बदर्याश्रमं गत्वा तपः कृत्वा हरेर्गतिं अगात् ४७ यः इदं श्री
कृष्णेन भागवताय उक्तं ज्ञानामृतं आसेव्य वर्तते सः मुच्यत इति किं वक्तव्यम् तत्संगात् जगदपि मुच्यते ४८ किं च ईश्वरः स्वदासानां भवभयं हंतुं भृंग
वत् अमृतद्वयं उपजह्रे तत्र एकं अमृतं ज्ञानविज्ञानरूपं द्वितीयं उदधिजन्यं तदुभयं भृत्यवर्गान् अपाययत् तं कृष्णसंज्ञं नतोस्मि ४९ ॥ ॥ इत्येकादशे एकोन
त्रिंशः २९ ॥ ॥ ७ ॥ ॥ राजोवाच ॥ ततो महाभागवते उद्धवे निर्गते वनम् द्वारवत्यां किमकरोद्भगवान् भूतभावनः १ किंच ब्रह्मशापोपसंसृष्टे
स्वकुले सति कृष्णः सर्वनेत्राणां प्रियां तनुं कथमत्यजत् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥३०॥

तत्प्रपंचयति । प्रत्याकृष्टुमिति । यस्मिन्रूपेलग्नंनयनंपरावर्तयितुमबलानशेकुः । यच्चकर्णरंध्रेणप्रविष्टंसत्सतामात्मनिलग्नं ततोनसरतिननिर्गच्छति (किंतुतत्र) विलिखितमिवतिष्ठति । यस्यश्रीः शोभासंकीर्त्यमानाकवीनांवाचांरतिमुल्लासविशेषंजनयति । तेषांमानंजगत्पूज्यतांजनयतीतिकिंनुवक्तव्यम् । यच्चविष्णोरूपंजिष्णोरर्जुनस्यरथेस्थितंदृष्ट्वायुधिमृतास्तत्साम्यंसारूप्यंईयुः प्राप्तास्तत्के नरूपेणात्यजादित्यन्वयः ३ दिविसूर्यपरिवेषादीन्भुविभूकंपादीनंतरिक्षेतग्दाहादीन्महोत्पातान्स्वयमेवोत्पादितत्वादन्यैर्दुष्प्रतीकारान् (सुधर्मायांतत्सभायामासीनान्) ४ यमस्यकेतवोध्वजाइवमृत्युसू चकाइत्यर्थः । नोऽस्माभिः ५ प्रत्यक्पश्चिमवाहिनी ६ अभिषिच्यस्नात्वा ७ ब्राह्मणांश्च तैः कृतशांतिकाः संतोवयंगवादिभिः पूजयिष्यामः ८ विधिः प्रकारः मंगलायनंच । किंच देवद्विजगवांपूजा

॥१५८॥ भवउद्भवहेतुः देवलोकेपरमउद्भवोभविष्यतीतिभावः ९ मधुद्विषः कृष्णस्यवाक्यमाकर्ण्य तथेत्यभिनंचसमुद्रमुत्तीर्यप्रभासंप्रययुः १० (आदिष्टंउपदिष्टं) सर्वश्रेयोपबृंहितंअत्रसंधिरार्षः भगवताऽनुक्तैर पिसर्वैः श्रेयोभिः सहितंचक्रुः ११ पीयतइतिपानंमहच्चतत्पानंचमैरेयकंमदिराविशेषंमधुसुरसम् । दिष्टेनदैवेनविभ्रंशिताधियः नह्यन्यथातस्मिन्स्थानेतदुचितामितिभावः यस्यद्रवैरसैः १२ कृष्णमाया विमूढानामितिमुख्योहेतुः । संघर्षः कलहः १३

श्लोकाः ३/१३

प्रत्याक्रष्टुंनयनमबलायत्रलग्नंनशेकुःकर्णाविष्टंनसरतिततोयत्सतामात्मलग्नम् ॥ यच्छ्रीर्वाचांजनयतिरतिंकिंनुमानंकवीनांदृष्ट्वाजिष्णोर्युधिरथगतंयच्चत त्साम्यमीयुः ३ ॥ ऋषिरुवाच ॥ दिविभुव्यंतरिक्षेचमहोत्पातान्समुत्थितान् ॥ दृष्ट्वासीनान्सुधर्मायांकृष्णःप्राहयदूनिदम् ४ ॥ श्रीभगवानुवाच ॥ एतेघोरामहोत्पाताद्वार्वत्यांयमकेतवः ॥ मुहूर्तमपिनस्थेयमत्रनोयदुपुंगवाः ५ स्त्रियोबालाश्चवृद्धाश्चशंखोद्धारंव्रजंत्वितः ॥ वयंप्रभासंयास्यामोयत्रप्रत्य क्सरस्वती ६ तत्राभिषिच्यशुचयउपोष्यसुसमाहिताः ॥ देवताःपूजयिष्यामःस्नपनालेपनार्हणैः ७ ब्राह्मणांस्तुमहाभागान्कृतस्वस्त्ययनावयम् ॥ गो भूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ८ विधिरेषह्यरिष्टघ्नोमंगलायनमुत्तमम् ॥ देवद्विजगवांपूजाभूतेषुपरमोभवः ९ इतिसर्वेसमाकर्ण्ययदुवृद्धामधुद्विषः॥ तथेतिनौभिरुत्तीर्यप्रभासंप्रययूरथैः १० तस्मिन्भगवतादिष्टंयदुदेवेनयादवाः ॥ चक्रुःपरमयाभक्त्यासर्वश्रेयोपबृंहितम् ११ ततस्तस्मिन्महापानंपपु मैरेयकंमधु ॥ दिष्टविभ्रंशितधियोयद्द्रवैर्भ्रश्यतेमतिः १२ महापानाभिमत्तानांवीराणांदृप्तचेतसाम् ॥ कृष्णमायाविमूढानांसंघर्षःसुमहानभूत् १३

चूर्णिका

तदाह यत्र तनौ लग्नं नेत्रं स्त्रियः परावर्तयितुं न शेकुः तथा अर्जुनरथस्थं कृष्णं दृष्ट्वा युधि मृतास्ते तत्साम्यं प्राप्ताः तत् केन रूपेण अत्यजत् ३ ॥ ऋषिरुवाच॥ हे नृप ततः दिवि भुव्यंतरिक्षे उत्पातान् दृष्ट्वा कृष्णः यदूनाह ४ ॥ श्रीकृष्ण उवाच ॥ ॥ हेयदुश्रेष्ठाः अत्र घोराः उत्पाताः दृश्यंते अतः अस्माभिः अत्र मुहूर्त मपि न स्थेयम् ५ तस्मात् स्त्रीवृद्धाः बालाः इतः शंखोद्धारं यांतु वयं तु यत्र प्रत्यक् सरस्वती तत् प्रभासं यास्यामः ६ तत्र स्नात्वा उपोष्य शुद्धाः संतः देवताः स्नानादिना ब्राह्मणांश्च गोभूहिरण्यादिभिः पूजयिष्यामः ७ ८ अयं विधिः अरिष्टघ्नोस्ति किं च इदं मंगलायतनमस्ति ९ एवं कृष्णवचः श्रुत्वा यदवो नौभिः अब्धिं उत्तीर्य रथैः प्रभासं ययुः १० तत्र भगवदुक्तं सर्वं श्रेयःसाधनं चक्रुः ११ ततः तत्र मैरेयकं मद्यं पीत्वा दैवभ्रंशितधियः बभूवुः १२ ततः मद्यपानमत्तानां कृष्ण मायाविमूढानां तेषां कलहः अभूत् १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

समुद्रस्यवेलायांततोयुयुधुश्च (आततायिनोवधोद्यताः । तोमरैर्ऋष्टिभिश्च) १४ पतंत्यइतस्ततश्चलंत्यः पताकायेषुतैरथादिभिर्मिथः समेत्यन्यहनन्न्यघ्नन्नित्यर्थः । दद्भिर्दंतैरिव १५ मिथः समेत्येत्य स्यप्रपंचः प्रद्युम्नेतिचतुर्भिः गदौश्रीकृष्णस्यभ्रातैकःपुत्रश्चापरः तौ । सुमित्रश्चसुरथश्चसुमित्रासुरथौ दैर्घ्यमार्षं । असुरथनामावाकश्चित् १६ मदांधेनमदतमसाबलात्कारिताः (मदरूपोंऽधकारः संजातोयेषुवा) १७ दाशार्हादयो (मध्वंताविसर्जनादयश्चेति) नवतत्तद्वंश्याः अर्बुदामाथुराः शूरसेनाश्चतत्तद्देशीयाः १८ भ्रातृभिश्चेतिभ्रात्रादिशब्दानांसप्रतियोगिवाचित्वाद्भ्रातरोमातुलाइत्यादिज्ञेयंमित्रैश्चमित्राणिच (अयुध्यन् ।) अहनन्हतवंतः १९ धन्वसुधनुःषु । जग्हुः जगृहुः (एरकानिर्ग्रंथितृणविशेषान्) २० भृताधृता -(- स्ताएरकावज्रतुल्याः) परिघालोहदंडाः । तंचश्रीकृष्णमपि २१ प्रत्यनीकंप्रतिपक्षं (आपन्नाः प्राप्ताः) २२ एरकामुष्टिरूपौपरिघौउद्यम्य २३ (ब्रह्मशापेनउपसृष्टानां उपद्रुतानांतत्रहेतुः कृष्णमायायाआवृतंमोहितंअंतःकरणंयेषां) स्पर्धानिमित्तः क्रोधः

॥१५९॥ कुलंक्षयंनिन्ये वेणुसंघर्षजोवह्निर्वेणुवनमेवयथा २४ २५

श्लोकाः १४/२५

युयुधुःक्रोधसंरब्धावेलायामाततायिनः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १४ पतत्पताकैरथकुंजरादिभिःखरोष्ट्रगोभिर्महिषैर्नरैरपि ॥ मिथः
समेत्याश्वतरैःसुदुर्मदान्यहञ्छरैर्दद्भिरिवद्विपावने १५ प्रद्युम्नसांबौयुधिरूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्रामजितौसुदारुणौगदौसुमि
त्रासुरथौसमीयतुः १६ अन्येचयेवैनिशठोल्मुकादयःसहस्रचिच्छतजिद्भानुमुख्याः ॥ अन्योन्यमासाद्यमदांधकारिताजघ्नुर्मुकुंदेनविमोहिताभृशम् १७
दाशार्हवृष्ण्यंधकभोजसात्वतामध्वर्बुदामाथुरशूरसेनाः ॥ विसर्जनाःकुकुराःकुंतयश्चमिथस्ततस्तेथविसृज्यसौहृदम् १८ पुत्राअयुध्यन्पितृभिर्भ्रातृभि
श्चस्वस्रीयदौहित्रपितृव्यमातुलैः ॥ मित्राणिमित्रैःसुहृदःसुहृद्भिर्ज्ञातींस्त्वहनञ्ज्ञातयएवमूढाः १९ शरेषुहीयमानेषुभज्यमानेषुधन्वसु ॥ शस्त्रेषुक्षीयमा
णेषुमुष्टिभिर्जह्रुरेरकाः २० तावज्रकल्पाह्यभवन्परिघामुष्टिनाभृताः ॥ जघ्नुर्द्विषस्तेकृष्णेनवार्यमाणास्तुतंचते २१ प्रत्यनीकंमन्यमानाबलभद्रंचमोहि
ताः ॥ हंतुंकृतधियोराजन्नापन्नाआततायिनः २२ अथतावपिसंक्रुद्धावुद्यम्यकुरुनंदन ॥ एरकामुष्टिपरिघौचरंतौजघ्नतुर्युधि २३ ब्रह्मशापोपसृष्टा
नांकृष्णमायावृतात्मनाम् ॥ स्पर्धाक्रोधःक्षयंनिन्येवैणवोऽग्निर्यथावनम् २४ एवंनष्टेषुसर्वेषुकुलेषुस्वेषुकेशवः ॥ अवतारितोभुवोभारइतिमेनेऽवशेषितः २५

चूर्णिका

ततः ते आततायिनः संतः धनुरसिभल्लगदादिभिः युयुधुः १४ चलत्पताकैः रथकुंजरादिभिः खरोष्ट्रादिभिश्च मिथः मिलित्वा शरैः न्यघ्नन् वनेगजाः दंतैरिवेति १५ तत्प्रपंचयति युधि प्रद्युम्नसांबौ अक्रूरभोजौ अनिरुद्धसात्यकी सुभद्रसंग्रामजितौ गदौ सुमित्रसुरथौ १६ अन्ये च ये निशठोल्मुकादयः सहस्रजिच्छतजित् भानुमुख्याः एते मिथः मिलित्वा जघ्नुः १७ ततः दाशार्हादयः अर्बुदशूरसेनादयश्च एते सौहृदं हित्वा जघ्नुः १८ पुत्राः पितृभिः अयुध्यन् भ्रातरो भ्रातृभिरित्यादि मित्राणि मित्रैः एवं सर्वे न्यघ्नन् १९ एवं शरधनुःशस्त्रेषु नष्टेषु एरकाः जगृहुः २० ताः वज्रकल्पा अभवन् ततस्तैस्तैस्ते कृष्णेन वार्यमाणा अपि तमेव बलरामं च जघ्नुः २१ २२ अथ तावपि क्रुद्धौ एरकामुष्टिरूपौ परिघौ उद्यम्य तान् जघ्नतुः २३ ततः तेषां स्पर्द्धानिमित्तो यः क्रोधो जातः सः कुलं क्षयं निन्ये वैणवोग्निर्यथा वनम् २४ एवं सर्वेषु नष्टेषु कृष्णः भुवो भारो गतः इति मेने २५ ॥१५९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

पौरुषंयोगंपरमपुरुषध्यानलक्षणम् । तमेवाह । संयोज्येति (आत्मनिपरमात्मानि) मानुष्यंलोकंभूलोकंमनुष्यरूपतांवा २६ धरोपस्थेभूतले २७ भ्राजिष्णुरूपम् विभ्रदिति २८ तदेवानुवर्णय ति श्रीवत्सांकमितिचतुर्भिः २९ सुंदरस्मितंवक्त्राब्जंयस्मिंस्तत् पुंडरीकवदभिरामेसुंदरेअक्षिणीयस्मिंस्तत् ३० ३१ वनमालयापरीतान्यंगानियस्मिंस्तत् निजायुधैश्चपरीतांगम् । पंकजारुणंवामंपादं दक्षिणेऊरौकृत्वा आसीनं (एतादृशं) रूपंबिभ्रत् इतिपूर्वेणान्वयः ३२ (मुसलस्यावेशेषभूतोयोऽयःखंडोलोहशकलं तेनकृतइषुर्येनसः) जरानामकश्चिल्लुब्धकोमृगयुः । मृगस्यास्यमिवाकारोय स्यतंचरणम् ३३ ३४ ३५ (असाधुअसत्) ३६ (मामां) ३७ ब्रह्मशापकृतमेतन्नतवापराधइतिचेदत्तआह । यस्यतवात्मयोगरचितंस्वाधीनमायारचितंविरिंच्यः अस्यतनयारुद्रादयश्चयेचा न्येगिरांपतयोवेदद्रष्टारः तेपि नविदुः तस्यतेऽचिंत्यमायस्यएतद्ब्रह्मशापादिअंजसाअसद्गतयः पापयोनयोवयंकिंगृणीमः कथंवर्णयामः अतस्तदास्तांआशुमांजहीतिभावः ३८

श्लोकाः २६/३८

रामःसमुद्रवेलायांयोगमास्थायपौरुषम् ॥ तत्याजलोकंमानुष्यंसंयोज्यात्मानमात्मनि २६ रामनिर्याणमालोक्यभगवान्देवकीसुतः ॥ निषसादधरो पस्थेतूष्णीमासाद्यपिप्पलम् २७ बिभ्रच्चतुर्भुजंरूपंभ्राजिष्णुप्रभयास्वया ॥ दिशोवितिमिराःकुर्वन्विधूमइवपावकः २८ श्रीवत्सांकंघनश्यामंतप्तहाट कवर्चसा ॥ कौशेयांबरयुग्मेनपरिवीतंसुमंगलम् २९ सुंदरस्मितवक्त्राब्जंनीलकुंतलमंडितम् ॥ पुंडरीकाभिरामाक्षंस्फुरन्मकरकुंडलम् ३० कटिसूत्रब्र ह्मसूत्रकिरीटकटकांगदैः ॥ हारनूपुरमुद्राभिःकौस्तुभेनविराजितम् ३१ वनमालापरीतांगंमूर्तिमद्भिर्निजायुधैः ॥ कृत्वोरौदक्षिणेपादमासीनंपंकजारुण म् ३२ मुसलावशेषायःखंडकृतेषुर्लुब्धकोजरा ॥ मृगास्याकारंतच्चरणंविव्याधमृगशंकया ३३ चतुर्भुजंतंपुरुषंदृष्ट्वासकृतकिल्बिषः ॥ भीतःपपातशिर सापादयोरसुरद्विषः ३४ अजानताकृतमिदंपापेनमधुसूदन ॥ क्षंतुमर्हसिपापस्यउत्तमश्लोकमेऽनघ ३५ यस्यानुस्मरणंनृणामज्ञातध्वांतनाशनम् ॥ वदंतितस्यतेविष्णोमयाऽसाधुकृतंप्रभो ३६ तन्माशुजहिवैकुंठपाप्मानंमृगलुब्धकम् ॥ यथापुनरहंत्वेवंनकुर्यांसदतिक्रमम् ३७ यस्यात्मयोगरचितंन विदुर्विरिंच्योरुद्रादयोऽस्यतनयाःपतयोगिरांये ॥ त्वन्माययापिहितदृष्टयएतदंजःकिंतस्यतेवयमसद्गतयोगृणीमः ३८

चूर्णिका

ततो रामः अब्धितीरे पौरुषं योगं आस्थाय आत्मनि आत्मानं संयोज्य भूलोकं जहौ २६ एवं रामनिर्याणं दृष्ट्वा कृष्णः भूतले पिप्पलमासाद्य २७ चतुर्भुजं रूपं श्री वत्सांकं घनश्यामं पीतांबरयुतं नीलकुंतलमंडितं स्फुरन्मकरकुंडलं कटिसूत्रादिभिर्विराजितं कौस्तुभयुतं वनमालया स्वायुधैश्चयुतं रूपं धृत्वा दक्षिणे ऊरौ वामपादपं कजारुणं कृत्वा आसीनः २८ २९ ३० ३१ ३२ ततः मुशलावशेषायःखंडकृतेषुर्जरानामलुब्धकः मृगास्याकारं तच्चरणं मृगशंकया विव्याध ३३ ततः समी पमागत्य चतुर्भुजं तं दृष्ट्वा कृतापराधः भीतः सन् तच्चरणयोः पतित्वा आह ३४ हे कृष्ण अजानता मया इदं कृतं तत्क्षंतुमर्हसि ३५ किं च हे कृष्ण यस्य ते स्मरणं नृणां पापापहं एवं भूतस्य तव मया असाधु कृतं ३६ अतः पाप्मानं मां जहि एवं कृते पुनः अहं सदतिक्रमं न कुर्यां ३७ किं च हे कृष्ण यस्य ते माया चरितं ब्रह्मादयो न विदुः एवंभूतं त्वां पापिष्ठा वयं कथं वर्णयामः अतो मां जहि ३८

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हेजरेमाभैः भयंत्यज इयंमदिच्छैव त्वयाकृता) ३९ इच्छाशरीरिणेत्यस्यायंभावः शुद्धसत्त्वमयींनिजां (श्री-)- मूर्तिंअंतर्धाय तत्प्रतिकृत्यैवविडंबनमात्रामिति । एतदेवस्फुटीकरिष्यति देवादयो
ब्रह्ममुख्या इत्यादिना ४० (दारुकनामासारथिः तुलसिकायाआमोदोयस्मिंस्तंवायुमाघ्रायतेनतांपदवींज्ञात्वा) ४१ तंपतिंतत्रदृष्ट्वा तस्यपादयोर्निपपात (तिग्मद्युभिः तीक्ष्णद्युतिभिः) ४२ उदी
क्षतः ऊर्ध्वमीक्षमाणस्यसूतस्यसतः ४४ ४५ निर्याणंयोगमार्गेण । मद्दशामितिइच्छाशरीराभिप्रायेण ४६ ४७ (परिग्रहंस्त्रीबालादिम् । अस्माकंपितरौचादाय) अवितारक्ष्यमाणाः इंद्रप्रस्थंग
मिष्यथेतिब्रूहीति पूर्वेणान्वयः ४८ (त्वंतुभागवतंधर्मंआस्थाय) मन्मायारचनामेतांविज्ञायेति निजश्रीमूर्तेरंतर्हितत्वात्वृथाशोकंमाकुर्वित्यर्थः ४९ कुलस्यविनष्टत्वाद्दुर्मनाः ५० इतिश्रीभागवतेमहापु
राणेएकादशस्कंधेटीकायांमौसलेत्रिंशत्तमोऽध्यायः ३० ॥

॥१६१॥ श्लोका ३९—५०

॥ श्रीभगवानुवाच ॥ माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे ॥ याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदम् ३९ इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा ॥ त्रिः
परिक्रम्यतंनत्वाविमानेनादिवंययौ ४० दारुकःकृष्णपदवीमन्विच्छन्नधिगम्यताम् ॥ वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ ४१ तंतत्रतिग्मद्युभिरायु
धैर्वृतंह्यश्वत्थमूलेकृतकेतनंपतिम् ॥ स्नेहप्लुतात्मानिपपातपादयोरथादवप्लुत्यसबाष्पलोचनः ४२ अपश्यतस्तेचरणांबुजंप्रभोदृष्टिर्विनष्टातमसिप्रविष्टा ॥
दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रनष्टे ४३ इतिब्रुवतिसूतेवैरथोगरुडलांच्छनः ॥ खमुत्पपातराजेंद्रसाश्वध्वजउदीक्षतः ४४ तमन्वगच्छन्
दिव्यानिविष्णुप्रहरणानिच ॥ तेनातिविस्मितात्मानंसूतमाहजनार्दनः ४५ गच्छद्वारवतींसूतज्ञातीनांनिधनंमिथः ॥ संकर्षणस्यनिर्याणंबंधुभ्योब्रूहिमद्द
शाम् ४६ द्वारकायांचनस्थेयंभवद्भिश्वसबंधुभिः ॥ मयात्यक्तांयदुपुरींसमुद्रःप्लावयिष्यति ४७ स्वंस्वंपरिग्रहंसर्वेआदायपितरौचनः ॥ अर्जुनेनाविताः
सर्वेइंद्रप्रस्थंगमिष्यथ ४८ त्वंतुमद्धर्ममास्थायज्ञाननिष्ठउपेक्षकः ॥ मन्मायारचनामेतांविज्ञायोपशमंव्रज ४९ इत्युक्तस्तंपरिक्रम्यनमस्कृत्यपुनःपुनः ॥
तत्पादौशीर्ष्ण्युपाधायदुर्मनाःप्रययौपुरीम् ॥ ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेमौसलेत्रिंशत्तमोऽध्यायः ३० ॥ ॥ छ ॥

चूर्णिका

॥ श्रीभगवानुवाच ॥ हे जरे त्वं माभैः उत्तिष्ठ अयं कामः मयैव कृतः मदाज्ञया त्वं स्वर्गं याहि ३९ एवं कृष्णेनादिष्टः सः तं परिक्रम्य नत्वा विमानेन दिवं ययौ
४० एतर्हि दारुकः कृष्णमार्गमन्विच्छन् तुलसिकामोदंवायुमाघ्राय तन्मार्गं ज्ञात्वाभिमुखं ययौ ४१ तत्र आयुधैः वृतं अश्वत्थमूले कृतासनं कृष्णं दृष्ट्वा बाष्पलो
चनः सन् दारुकः रथादुत्तार्य तत्पादयोः पपात आह च ४१हे प्रभो ते चरणांबुजं अपश्यतः मे दृष्टिः तमसि प्रविष्टा अतः अहं दिशः न जाने शांतिं न लेभे
४३ एवं सूते ब्रुवति सति साश्वध्वजो रथः खं उत्पपात ४४ तमनु आयुधानि अगच्छन्.तेन विस्मितं सूतं कृष्णः आह ४५ हे दारुक त्वं द्वारकां गत्वा ज्ञातीनां
मिथो निधनं संकर्षणस्य निर्याणं मद्दशां च बंधुभ्यो ब्रूहि ४६द्वारकायां च न स्थेयं भवद्भिः स्वस्वबंधुभिः मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ४७ अतः सर्वे ॥१६१॥
स्वस्वपरिग्रहं नः पितरौ च गृहीत्वा अर्जुनेनाविताः संतः इंद्रप्रस्थं गमिष्यथ ४८ हे सूत त्वं तु ज्ञाननिष्ठः सन् मन्मायारचनां एतां विज्ञाय उपशमं व्रज ४९
इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीम् ५० ॥ ॥ इत्येकादशे त्रिंशः ॥ ३० ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰ ए॰ अ॰ ३१

टीका ॥३१॥

एकत्रिंशेस्वकंधामजगामभगवानितः ॥ तमेवानुययुःप्रीत्यावसुदेवादयस्ततः ॥ १ ॥ देवान्यदून्विधायादौभूयोदेवान्विधायच ॥ श्रीकृष्णःस्वेच्छयाधामस्वतन्वैवसमाविशत् ॥ २ ॥ मुनयः सनकादयः
प्रजेश्वरामरीच्यादयः १ द्विजागरुडलोकवासिनः पक्षिणः मैत्रेयादयोवा २ भगवतोनिर्याणंद्रष्टुकामाः संतः परमोत्सुकाः तत्रागमन् । तेषामौत्सुक्यकृतंमहोत्सवमाह सार्धेन गायंतश्चेति ३ ४ वि
भूतीरिंद्रादींश्ववीक्ष्यपद्मनेत्रेन्यमीलयदित्यत्रायंभावः । पूर्वंब्रह्मादिभिः "सलोकाल्लोकपालान्नःपाहि वैकुंठकिंकरान्" इतिप्रार्थितत्वात्इदानींचस्वंस्वंलोकंप्रतिनेतुमागतत्वात्बहुषुचतेषुदाक्षिण्याद्वंचयितुं
समाधिमिवकुर्वन्नेत्रेन्यमीलयदिति ५ योगिनामिवस्वच्छंदमृत्युभ्रमंवारयाति लोकाभिरामामिति । अयमर्थः । योगिनोहिस्वच्छंदमृत्यवः स्वतनुमाग्नेय्यायोगधारणयादग्ध्वा लोकांतरंप्रविशंति ।
भगवांस्तु नतथा । किंतु अदग्ध्वैवस्वतनुसहितएवस्वकंधामवैकुंठाख्यमविशत् । तत्रहेतुः । लोकानामभिरामः अभितोरमणंस्थितिर्यस्यांताम् । जगदाश्रयत्वेनजगतोपिदाहप्रसंगादित्यर्थः । किंच
॥१६२॥ धारणायाध्यानस्यचमंगलंशोभनंविषयम् । इतरथातयोर्निर्विषयत्वंस्यात् । दृश्यतेचाद्याप्युपासकानांतथैव तद्रूपसाक्षात्कारफलप्राप्तिश्चेतिभावः । इच्छाशरीराभिप्रायेणवायथाश्रुतमेवास्तु । तत्रा
पितुलोकाभिरामामित्यादिविशेषणानामानर्थक्यप्रसंगात् (दग्ध्वेवेति) वस्तुतस्तुतदेतदप्यदग्ध्वातिरोधायनिर्गतइत्येवसांप्रतम् ६ तदा (तु) स्वंस्वमेवलोकमागमिष्यतीतिसंभ्रमेणदेवादिकृतः
सर्वतोदुंदुभिनादपुष्पवृष्ट्यादिमहोत्सवोभवदित्याह । दिवीति । भूमेः सकाशात्श्रीकृष्णमनुययुः ७ तदाश्रीकृष्णेंऽतर्हितेसतिकुतोगतइतिवितर्कयंतोपिब्रह्ममुख्यादेवादयः स्वधामनिविशंतंश्रीकृष्णं
नददृशुः तत्रहेतुः अविज्ञातगतिमिति । क्वचित् क्वचित् ददृशुश्च । ततोऽतिविस्मिताबभूवुरित्यर्थः ८

श्लोकाः

॥ श्रीशुकउवाच ॥ अथतत्रागमद्ब्रह्माभवान्याचसमंभवः ॥ महेंद्रप्रमुखादेवामुनयःसप्रजेश्वराः १ पितरःसिद्धगंधर्वाविद्याधरमहोरगाः ॥ चारणायक्षरक्षां
सिकिंनराप्सरसोद्विजाः २ द्रष्टुकामाभगवतोनिर्याणंपरमोत्सुकाः ॥ गायंतश्चगृणंतश्चशौरेःकर्माणिजन्मच ३ ववृषुःपुष्पवर्षाणिविमानावलिभिर्नभः ॥
कुर्वंतःसंकुलंराजन्भक्त्यापरमयायुताः ४ भगवान्पितामहंवीक्ष्यविभूतीरात्मनोविभुः ॥ संयोज्यात्मनिचात्मानंपद्मनेत्रेन्यमीलयत् ५ लोकाभिरामां १
स्वतनुंधारणाध्यानमंगलाम् ॥ योगधारणयाग्नेय्याऽदग्ध्वाधामाविशत्स्वकम् ६ दिविदुंदुभयोनेदुःपेतुःसुमनसश्चखात् ॥ सत्यंधर्मोधृतिर्भूमेःकीर्तिःश्री ८
श्चानुतंययुः ७ देवादयोब्रह्ममुख्यानविशंतंस्वधामनि ॥ अविज्ञातगतिंकृष्णंददृशुश्चातिविस्मिताः ८

चूर्णिका ॥ श्रीशुकउवाच ॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः महेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः १ तथा पितृगंधर्वविद्याधरोरगचारणयक्षरक्षःकिन्नराप्सरोद्विजाः २ एते
सर्वे भगवन्निर्याणं द्रष्टुं शौरेः जन्मकर्माणि गीयंतः प्राप्ताः संतः विमानावलिभिः नभः संकुलीकृत्य पुष्पवर्षाणि ववृषुः ३ ४ अथ श्रीकृष्णः ब्रह्माणं इंद्रादींश्च ॥१६२॥
वीक्ष्य आत्मनि आत्मानं संयोज्य पद्मनेत्रे न्यमीलयत् ५ किं च लोकाभिरामां स्वतनुं आग्नेय्या योगधारणया अदग्ध्वैव स्वं धाम विवेश ६ तदा दिवि दुंदुभयः
नेदुः स्वात्पुष्पाणि पेतुः ततः तदनु सत्यधर्मधृतिकीर्तिश्रियः भूमेः ययुः ७ ततः ब्रह्मादयः स्वधामनि विशंतं कृष्णं अदृष्ट्वा विस्मिता आसन् ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अविज्ञातगतित्वंदृष्टांतेनस्पष्टयति । सौदामिन्यागतिर्यथामर्त्यैर्नैलक्ष्यतेतथाभूमंडलंहित्वागच्छतः श्रीकृष्णस्यगतिर्देवैरपिनलक्ष्यते किंतुतत्पार्षदैरेवेत्यर्थः ९ १० अभिप्रायापरिज्ञानतःप्रथमंक्लिष्टंदृष्टां तेनस्पष्टमुक्तेहहृष्टंदृष्ट्वापुनस्तमेवार्थंप्रपंचयति राजन्निति त्रिभिः । परस्यसर्वकारणस्यतनुभृत्सुयादवादिषुजननाप्ययेहाः आविर्भावतिरोभावचेष्टाःमाययाऽनुकरणमात्रमवेहि नटोयथाऽविकृतएव नाना रूपैर्जन्मादीन् विडंबयति तद्वत् । आस्तांतावद्यादवादिषुजन्मादिशंका यावद्विश्वसर्गनिरोधादिष्वप्यसावविकृतएवास्तइत्याह । सृष्ट्वेति । आत्मनास्वयमेवेदंजगत्सृष्ट्वांतर्यामित्वेनानुविश्यात्ममहिम्नैवा स्ते ११ नपुनरन्यथामंतव्यम् । यतोऽस्मिन्नेवावतारेतत्प्रभावोनिरतिशयोदृष्टइत्याह । मर्त्येनेति । यमेनस्वलोकंप्रतिनीतंगुरुसुतंमर्त्येन (मनुष्याकारेण) तेनैवशरीरेणआनयत्आनीतवान् । शर
॥१६३॥ णदः शरणागतरक्षकः । त्वांचब्रह्मास्त्रदग्धं (निरतिशयकर्मणा) योरक्षितवान् । यश्चअंतकानामप्यंतकंईशंश्रीरुद्रंबाणसंग्रामेजितवान् । मृगयुंलुब्धकंसदेहंयः स्वः स्वर्गंअनयत्निन्ये असौस्वाव नेस्वरक्षणेअनीशः असमर्थः किम् १२ ननु यदिसमर्थस्तर्हिकंचित्कालमत्रैवतेनवपुषाकिंनातिष्ठत् तत्राह । तथापीति । यद्यपिउक्तप्रकारेणाशेषस्यजगतः चराचरस्यास्थित्यादिष्वनन्यहेतुर्निरपेक्षमे वकारणंस्वयम् । यद्यस्मादशेषशक्तिधृक् । तथापियादवान्संहृत्यनिजंवपुः अत्रशेषितंअवशेषितंप्रणेतुंकर्तुंनैच्छत् । किंतुस्वमेवलोकमनयत् । तत्रहेतुः । मर्त्येनदेहेनकिं नकिंचित्कार्यमिति स्वस्थाना मात्मनिष्ठानांदिव्यांगतिमेवप्रकृष्टांदर्शयन्अन्यथातेपिदिव्यांगतिमनादृत्ययोगबलेनदेहसिद्धिंविधायात्रैवरंतुंयतेरन् तन्माभूदित्येतदर्थमितिभावः १३ यएतामुक्तप्रकारांपदवींगतिं (प्रयतोयतचित्तः) १४ तदेवंभगवतास्वलोकंगच्छतावसुदेवादीनामपितत्प्राप्तयेयउपायश्चिंतितआसीत् तमाह दारुकइत्यादिना (कृष्णात्विच्युतोवियुक्तः) १५ १६

श्लोकाः ९/१६

सौदामिन्यायथाकाशेयांत्याहित्वाभ्रमंडलम् ॥ गतिर्नलक्ष्यतेमर्त्यैस्तथाकृष्णस्यदैवतैः ९ ब्रह्मरुद्रादयस्तेतुदृष्ट्वायोगगतिंहरेः ॥ विस्मितास्तांप्रशंसं तःस्वंस्वंलोकंययुस्तदा १० राजन्परस्यतनुभृज्जननाप्ययेहामायाविडंबनमवेहियथानटस्य ॥ सृष्ट्वात्मनेदमनुविश्यविहृत्यचांतेसंहृत्यचात्ममहिमो परतःसआस्ते ११ मर्त्येनयोगुरुसुतंयमलोकनीतंत्वांचानयच्छरणदःपरमास्त्रदग्धम् ॥ जिग्येऽतकांतकमपीशमसावनीशःकिंस्वावनेस्वरनयन्मृगयुं सदेहम् १२ तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुंवपुरत्रशेषितंमर्त्येनकिंस्वस्थगतिंप्रदर्शयन् १३ यएतांप्रातरु त्थायकृष्णस्यपदवींपराम् ॥ प्रयतःकीर्तयेद्भक्त्यातामेवाप्नोत्यनुत्तमाम् १४ दारुकोद्वारकामेत्यवसुदेवोग्रसेनयोः ॥ पतित्वाचरणावस्रैर्न्यषिंचत्कृष्ण विच्युतः १५ कथयामासनिधनंवृष्णीनांकृत्स्नशोनृप ॥ तच्छ्रुत्वोद्विग्नहृदयाजनाःशोकविमूर्छिताः १६

चूर्णिका

अत्र दृष्टांतः यथा सौदामिन्याः गतिर्मर्त्यैर्न लक्ष्यते तथा कृष्णस्य दैवतैः ९ ततो ब्रह्मादयः हरेः योगगतिं दृष्ट्वा तां प्रशस्य स्वं स्वं लोकं ययुः १० हे नृप ईशस्य इयं जननादीहा एतत् मायाविडंबनं विद्धि यः इदं स्वयं सृष्ट्वा परिपाल्य संहृत्य स्वमहिम्ना उपरतः आस्ते ११ किं च यः मर्त्येन यमलोकगतं गुरुसुतं आनीय तथा अस्त्रदग्धं त्वां च ररक्ष तथा रुद्रं बाणयुद्धे जित्वा लुब्धकं स्वर्गं निन्ये सः स्वरक्षणे असमर्थः किम् इत्यादि १२ यः एतांकृष्णपदवीं प्रातरुत्थाय कीर्तयेत्सः तद्गतिं प्राप्नोति १३ १४ अथ दारुकः द्वारकां एत्य वसुदेवोग्रसेनपादयोः पतित्वा अस्रैः न्यषिंचत् १५ तथा वृष्णीनां नाशं कथयामास तच्छ्रुत्वा जनाः शोकमूर्छिताःजाताः १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥३१॥

१७ रामकृष्णौसुतावपश्यंतः १८ १९ २० सदुक्तिभिः सत्योऽवितथाउक्तयोयेषुतैः । " नाहंप्रकाशसर्वस्ययोगमायासमावृतः । मूढोयंनाभिजानातिलोकोमामजमव्यय"मित्यादिभिः (भगवद्गीताइतिप्रसिद्धैश्च) २१ नष्टगोत्राणांनष्टसंततीनांसांपरायिकंपिंडोदकादिकार्यम् २२ २३ (अशेषाशुभहरंअज्ञानतत्कार्यहरम् । सर्वमंगलेषुसर्वसुखविशेषेषुपरमानंदलक्षणंपरंमंगलंसर्वमंगलमंगलं एतादृशोभगवान्) २४ २५ (तवपितामहाधर्मादयोमहापथंस्वर्गपदवीम्) २६ आदितआरभ्यश्रीकृष्णचरितकीर्तनस्यफलमाह यएतदितिद्वाभ्याम् २७ शंतमानिपरममंगलानि । परमहंसगतौश्रीकृष्णे २८ एवमेकादशस्कंधभावार्थस्यप्रदीपिका । स्वाज्ञानध्वांतभीतेनश्रीधरेणप्रकाशिता ॥ १ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेश्रीधरस्वामिविरचितायांभावार्थदीपिकायांएकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ ७ ॥ ॥ (व्याख्यानेश्रीधरकृतेदृश्यतेयद्वचोधिकम् । तन्मेमहेश्वरस्यात्रक्षंतव्यंसाहसंबुधैः) ॥ १ ॥ समाप्तोयमेकादशःस्कंधः ।

॥१६४॥

श्लोकाः १७/२८

तत्रस्मत्वरिताजग्मुःकृष्णविश्लेषविह्वलाः ॥ व्यसवःशेरतेयत्रज्ञातयोघ्नंतआननम् १७ देवकीरोहिणीचैववसुदेवस्तथासुतौ ॥ रामकृष्णावपश्यंतःशोकार्ताविजहुःस्मृतिम् १८ प्राणांश्चविजहुस्तत्रभगवद्विरहातुराः ॥ उपगुह्यपतींस्तातचितामारुरुहुःस्त्रियः १९ रामपत्न्यश्चतद्देहमुपगुह्याग्निमाविशन् ॥ वसुदेवपत्न्यस्तद्गात्रंप्रद्युम्नादीन्हरेःस्नुषाः ॥ कृष्णपत्न्योऽविशन्नग्निंरुक्मिण्याद्यास्तदात्मिकाः २० अर्जुनःप्रेयसःसख्युःकृष्णस्यविरहातुरः ॥ आत्मानंसांत्वयामासकृष्णगीतैःसदुक्तिभिः २१ बंधूनांनष्टगोत्राणामर्जुनःसांपरायिकम् ॥ हतानांकारयामासयथावदनुपूर्वशः २२ द्वारकांहरिणात्यक्तांसमुद्रोऽप्लावयत्क्षणात् ॥ वर्जयित्वामहाराजश्रीमद्भगवदालयम् २३ नित्यंसंनिहितस्तत्रभगवान्मधुसूदनः ॥ स्मृत्याऽशेषाशुभहरंसर्वमंगलमंगलम् २४ स्त्रीबालवृद्धानादायहतशेषान्धनंजयः ॥ इंद्रप्रस्थंसमावेश्यवज्रंतत्राभ्यषेचयत् २५ श्रुत्वासुहृद्वधंराजन्नर्जुनात्तेपितामहाः ॥ त्वांचवंशधरंकृत्वाजग्मुःसर्वेमहापथम् २६ यएतद्देवदेवस्यविष्णोःकर्माणिजन्मच ॥ कीर्तयेच्छ्रद्धयामर्त्यःसर्वपापैःप्रमुच्यते २७ इत्थंहरेर्भगवतोरुचिरावतारवीर्याणिबाल्यचरितानिचशंतमानि ॥ अन्यत्रचेहचश्रुतानिगृणन्मनुष्योभक्तिंपरांपरमहंसगतौलभेत ॥ २८ ॥ ॥ इतिश्रीभागवतेमहापुराणेएकादशस्कंधेमौसलकथनंनामएकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ अनेनभगवान्श्रीकृष्णःप्रीयताम् ॥ ॥ इत्येकादशस्कंधः ॥ ॥ ७ ॥ ॥ ६ ॥

चूर्णिका

ततः आननं घ्नंतः संतः यत्र ज्ञातयः शेरते तत्र जग्मुः १७ ततः देवकी रोहिणी वसुदेवः एते सुतौ अपश्यंतः संतः शोकार्ताः भूत्वा प्राणान् जहुः १८ स्त्रियः स्वपतीन् आलिंग्य चितां आरुरुहुः १९ रामपत्न्यः तद्देहं आलिंग्य अग्निं विविशुः तथा वसुदेवपत्न्यः हरेः स्नुषाश्च कृष्णपत्न्यः रुक्मिण्याद्याः अग्निमविशन् २० ततः अर्जुनः कृष्णवियोगातुरः सन् आत्मानं कृष्णगीतैः सांत्वयामास २१ ततः अर्जुनः हतानां बंधूनां सांपरायिकं कारयामास २२ ततः हरिणा त्यक्तां द्वारकां समुद्रः भगवदालयं वर्जयित्वा तदैव आप्लावयत् २३ यत्र मधुसूदनः नित्यं संनिहितः सर्वमंगलमंगलः वर्तते २४ अथ धनंजयः हतशेषान् स्त्रीबालवृद्धानादाय इंद्रप्रस्थं स्थाप्य तत्र वज्रं अभ्यषेचयत् २५ हे राजन् ते पितामहाः सुहृद्वधं श्रुत्वा त्वां वंशधरं कृत्वा सर्वे महापथं जग्मुः २६ यः विष्णोः एतानि कर्माणि जन्म च कीर्तयेत् सः सर्वपापैः प्रमुच्यते २७ इत्थं हरेर्भगवतोरुचिरावतारवीर्याणि बालचरितानि च शंतमानि अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत २८ इत्येकादशे एकत्रिंशोध्यायः ॥ ३१ ॥

॥१६४॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति सटीकसचूर्णिकश्रीमद्भागवत--एकादशस्कंधः समाप्तः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ सटीकसचूर्णिकश्रीमद्भागवत—द्वादशस्कंधप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

श्रीगणपतयेनमः ॥ ॥ जयंतिश्रीपरानंदकृपापांगलसदृशः ॥ यानित्यमनुवर्तंतेसंपदोविगताहशः ॥ १ ॥ उक्तस्त्रयोदशाध्यायैर्द्वादशेत्वाश्रयःसतः ॥ अधिष्ठानावधित्वाभ्यामाश्रयश्चेश्वरःसतः ॥२॥
उक्तोलयावाधित्वेनप्राकृतात्यांतिकेलये ॥ अधिष्ठानतयाचोक्तोमहापुरुषवर्णने ॥ ३ ॥ तत्रादौषड्भिरध्यायैःशुकःप्राहपरिक्षिते ॥ शेषैस्तत्रखिलान्याहसूतःपृष्टोथसात्रिभिः ॥ ४ ॥ स्वाश्रयश्रवणेकार्योन
विलंबोमनीषिणा ॥ इत्येतत्कालवैषम्यंचतुर्भिस्तावदुच्यते ॥ ५॥ तत्रतुप्रथमेभाविमागधान्वयभूमिपान् ॥ कलिप्रभावतःप्राहसंकरादिमलीमसान् ॥ ६ ॥ एवंभूतेसोमवंशेमुकुंदस्वैरक्रीडावर्णिताव्यासँ
जेन ॥ वंशोभावीवर्ण्यंतेकृष्णभक्तिमुक्तामुक्त्यैवर्त्मनास्तीतिवक्तुम् ॥ ७ ॥ तदेवंवैस्वतमनुवंशेसोमवंशप्रस्तावेनश्रीकृष्णावतारचरितानिसप्रपंचमनुवर्णितानि । अथेदानींभावीसोमवंशः कलौविजातीय
संकरादिमलीमसोविराग यद्द्वाराश्रीकृष्णैकभक्तिनिगमनायानुवर्ण्यते । तत्रतुसोमवंशशाखासुचिरकालानुवर्तित यामागधवंशोनुक्रम्यते तत्रपुरोर्वंशेउपरिचरोवसुः तस्यबृहद्रथःतस्य जरासंधः । तस्य
सहदेवःपुत्रोभूदित्युक्तं नवमस्कंधे । तत्रैवसहदेवान्मार्जारिःततःश्रुतश्रवाःइत्यादयोरिपुंजयांताविंशतिर्भाविनोराजानोनिरूपिताः । तत्रराजापृच्छति स्वधामेति १ तदुपरितनवंशंसंकरादिदोषैः
प्रपंचयति योंत्यइति रिपुंजयएवपुरंजयः (बार्हद्रथोबृहद्रथवंशजः) स्वामिनंपुरंजयंहत्वास्वपुत्रंप्रद्योतसंज्ञंराजानंकारिष्याति (यत्) यस्य (प्रद्योतस्य) पालकोनामसुतोभाविष्याति २ ३ (इमे
प्रद्योतादिनंदिवर्धनांताःपंच) प्रद्योतनाः प्रद्योतसंज्ञाः (अष्टात्रिंशदाधिकंशतंवर्षाणि) ४ (क्षेत्रधर्मजःक्षेत्रधर्मेणजातः) ५ (नजाताःशत्रवोयस्यसः) ६ (एतेदशशिशुनागसंज्ञाः) ७ ८

॥ १ ॥

॥ राजोवाच ॥ स्वधामानुगतेकृष्णेयदुवंशविभूषणे ॥ कस्यवंशोऽभवत्पृथ्व्यामेतदाचक्ष्वमेमुने १ ॥ श्रीशुकउवाच ॥ योंत्यःपुरंजयोनामभविष्योबा
र्हद्रथः ॥ तस्यामात्यस्तुशुनकोहत्वास्वामिनमात्मजम् २ प्रद्योतसंज्ञंराजानंकर्तायत्पालकःसुतः ॥ विशाखयूपस्तत्पुत्रोभविताराजकस्ततः ३ नंदिवर्ध
नस्तत्पुत्रःपंचप्रद्योतनाइमे ॥ अष्टत्रिंशोत्तरशतंभोक्ष्यंतिपृथिवींनृपाः ४ शिशुनागस्ततोभाव्यःकाकवर्णस्तुतत्सुतः ॥ क्षेमधर्मातस्यसुतःक्षेत्रज्ञःक्षेत्रध
र्मजः ५ विधिसारः सुतस्तस्याजातशत्रुर्भविष्यति ॥ दर्भकस्तत्सुतोभावीदर्भकस्याजयःस्मृतः ६ नंदवर्धनआजेयोमहानंदिःसुतस्ततः ॥ शिशुनागाद
शैवैतेषष्ट्युत्तरशतत्रयम् ७ समाभोक्ष्यंतिपृथिवींकुरुश्रेष्ठकलौनृपाः ॥ महानंदिसुतोराजन्शूद्रागर्भोद्भवोबली ८

श्लोकाः १/८

चूर्णिका

श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यै नमः ॥ श्रीमत्कुलदेवतायै नमः ॥ अथ द्वादशस्कंधचूर्णिका ॥ राजोवाच ॥ कृष्णे स्वधामानुगते सति पृथ्व्यां कस्य वंशः अ
भवत् तद्वद १ ॥ श्रीशुकउवाच ॥ बृहद्रथवंशीयाः भाव्याः श्रुतश्रवा इत्यादयः रिपुंजयांताः नवमे निरूपिताः तत्र योंऽत्यः रिपुंजयः स एव पुरंजयः तस्य अमा
त्यः शुनकः सः स्वामिनं रिपुंजयं हत्वा स्वसुतं प्रद्योतसंज्ञं राजानं करिष्यति २ तस्मात् पालकः तस्मात् विशाखयूपः तस्मात्राजकः ३ तस्य नंदिवर्धनः एते प्रद्योतसंज्ञाः
पंच नृपाः अष्टत्रिंशोत्तरशतंभूमिंभोक्ष्यंति ४ ततःभावी शिशुनागः तस्य काकवर्णः तस्य क्षेमधर्मा तस्य क्षेत्रज्ञः ५ तस्य विधिसारः तस्य अजातशत्रुः तस्य दर्भकः
तस्य अजयः ६ तस्य नंदिवर्धनः तस्य महानंदी एते दशनृपाः षष्ट्युत्तरशतत्रयं वर्षाणि भुवं भोक्ष्यंति ७ महानंदिसुतः शूद्रीगर्भोद्भवः नंदनामा भावी ८

१ श्रीमत्परानंदरूपस्यभगवतः कृपायुक्तेनापांगेनलसंत्योदृशोदृष्टयः जयंति । यादृष्टीः नित्यंदृशोज्ञानस्यसंपदोऽनुवर्तंते सेवंते । किंभूताः संपदः । अविगताअवियुक्ताः २ आश्रयोदशमलक्षणम् ३ सतः
प्रपंचस्य ४ सतःसाधोराश्रयभूतश्च ५ अथोसएवेतिपाठांतरम् ६ बारहद्रथइत्यपिपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंदोनामकश्चिन्महापद्मसंख्यायाःसेनायाधनस्यवापतिर्भविष्यति । अतएवमहापद्मइत्यपितस्यनाम ९ एकमेवच्छत्रंराजचिह्नंयस्यांतांपृथिवींशासिष्यतिपालयिष्यति । क्षत्रविनाशकरणेदृष्टांतःभार्गवः परशुरामइव १० समाःसंवत्सरान् ११ नवनंदान् । नंदंचतत्पुत्रांश्चेत्येवंनव । प्रपन्नान् विश्वस्तान् विख्यातान्वाद्विजः कौटिल्यवात्स्यायनादिपर्यायश्चाणक्यः उद्धरिष्यतिउन्मूलयिष्यति । मौर्याः मौर्यसंज्ञा (हीनजातयः)१२ कथंभोक्ष्यंतितदाह । सएवेति । चंद्रगुप्तंमौर्यंप्रथमम् १३ (सुयशसः सुतः संगताख्यः) १४ तेषां (मौर्याणां) मध्यमोदशरथः पराशरादिभिरुक्तोऽत्राप्यनुसंधेयः । तेनसहमौर्यादश । सप्तत्रिंशच्छतोत्तरंसप्तत्रिंशदुत्तरंशतंसमाः १५ १६ १७ बृहद्रथस्यसेनापतिः पुष्पमित्रोनामस्वामिनंहत्वाराज्यंकरिष्यति । सचशुंगानांप्रथमः । ततोग्निमित्रादयोनवेत्येवंशुंगादश वर्षशताधि कंद्वादशाधिकंवर्षशतम् १८ कथंकाण्वान् यास्यतितदाह । शुंगमिति । परस्त्रीकामिनंदेवभूतिनामानंशुंगंहत्वातदमात्योवसुदेवनामाकण्वोराज्यंकरिष्यति १९

महापद्मपतिःकश्चिन्नंदःक्षत्रविनाशकृत् ॥ ततोनृपाभविष्यंतिशूद्रप्रायास्त्वधार्मिकाः ९ सएकच्छत्रांपृथिवीमनुल्लंघितशासनः ॥ शासिष्यतिमहापद्मो द्वितीयइवभार्गवः १० तस्यचाष्टौभविष्यंतिसुमाल्यप्रमुखाःसुताः ॥ यइमांभोक्ष्यंतिमहींराजानःस्मशतंसमाः ११ नवनंदान्द्विजःकश्चित्प्रपन्नानुद्धरिष्यति ॥ तेषामभावेजगतींमौर्याभोक्ष्यंतिवैकलौ १२ सएवचंद्रगुप्तंवैद्विजोराज्येभिषेक्ष्यति ॥ तत्सुतोवारिसारस्तुततश्चाशोकवर्धनः १३ सुयशाभवितातस्यसंगतःसुयशःसुतः ॥ शालिशूकःसुतस्तस्यसोमशर्माभविष्यति १४ शतधन्वाततस्तस्यभवितातुबृहद्रथः ॥ मौर्याह्येतेदशनृपाःसप्तत्रिंशच्छतोत्तरम् १५ समाभोक्ष्यंतिपृथिवींकलौकुरुकुलोद्वह ॥ (हत्वाबृहद्रथंमौर्यंतस्यसेनापतिःकलौ ॥ पुष्पमित्रस्तुशुंगाद्यःस्वयंराज्यंकरिष्यति१) ॥ अग्निमित्रस्ततस्तस्मात्सुज्येष्ठोथभविष्यति १६ वसुमित्रोभद्रकश्चपुलिंदोभवितासुतः ॥ ततोघोषःसुतस्तस्माद्वज्रमित्रोभविष्यति १७ ततोभागवतस्तस्माद्देवभूतिरितिश्रुतः॥ शुंगादशैतेभोक्ष्यंतिभूमिंवर्षशताधिकम् १८ ततःकाण्वानियंभूमिर्यास्यत्यल्पगुणान्नृप ॥ शुंगंहत्वादेवभूतिंकण्वोऽमात्यस्तुकामिनम् १९

श्लोकाः ९—१९

चूर्णिका

ततः परंअधार्मिकाः शूद्रप्रायाः नृपाः भविष्यंति ९सः नंदः एकच्छत्रां पृथ्वीं पालयिष्यति १० तस्य सुमाल्यप्रमुखाः अष्टौ सुताः शतं वर्षाणि महीं भोक्ष्यंति ११ ततःएतान् नव नंदान् कश्चित् चाणक्यः द्विजः उन्मूलयिष्यति ततः मौर्यसंज्ञाः नृपाः इमांपृथ्वीं शतंवर्षाणि भोक्ष्यंति १२ सः द्विजः मौर्यप्रथमं चंद्रगुप्तंराज्येऽभिषेक्ष्यति तस्य पुत्रः वारिसारःतस्य अशोकवर्धनः १३तस्य सुयशाः तस्य संगतःतस्य शालिशूकः तस्य सोमशर्मा १४तस्य शतधन्वा तस्य बृहद्रथः तथा पराशराद्युक्तोदशरथश्च एवं एते दश सप्तत्रिंशच्छतोत्तरंवर्षाणिभुवंकलौभोक्ष्यंति बृहद्रथस्यसेनापतिः पुष्पमित्रः सः स्वामिनं हत्वा राज्यं करिष्यति सः शुंगप्रथमः तस्य अग्निमित्रः तस्य सुज्येष्ठः तस्य वसुमित्रःतस्य भद्रकः तस्य पुलिंदः १५ १६ तस्य घोषः तस्य वज्रमित्रः तस्य भागवतः तस्य देवभूतिः १७ एते दश शुंगाः कलौ द्वादशाधिकंशतं वर्षाणि भूमिं भोक्ष्यंति १८ ततः शुंगं देवभूतिंहत्वा तदमात्यः कण्वोवसुदेवः राज्यंकरिष्यति १९ ॥ २ ॥

१ पंचमइतिमु॰मु॰पुस्तकेपाठोदृश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.द्वा. टीका

काण्वानांचतुर्थः सुशर्माज्ञेयः २० इमेवसुदेवादयः काण्वायनाः (कण्ववंशभवाः) वर्षाणांत्रीणिशतानिपंचचत्वारिंशद्वर्षाणिचभूमिंक्षोक्ष्यंति २१ काण्वानामंतिमंसुशर्माणंहत्वाबली (बलिहिकः-)-नामातद्भृत्योगांभोक्ष्यति २२(तस्यबलिनोभ्राता) २३ २४ हालेयः(हलान्वयः अनिष्टकर्माख्यः) २५ यत्रयेषुबहुसंज्ञेषुअष्टसुचरमः शिवस्वातिनामा (प्रसिद्धो) भविता (भविष्यतितस्यशिवस्वातेर्गोमतीस्त्रीतत्पुत्रः) २६ (एतेबलिहिकप्रभृतयोवटकांताश्चतुर्दशततोन्येबहुसंज्ञाः शिवस्वात्यंतानव । ततः पुरीमदादयः सप्तएवंत्रिंशन्नृपतयः) २७ २८ आवभृत्याः अवभृतिर्नगरीतत्रत्याराजानः २९ ३० एतेआभीरादयोमौनव्यतिरिक्ताः पंचषष्टिनृपाएकोनशताधिकंवर्षसहस्रंपृथिवींभोक्ष्यंति । ततः पूर्वोक्ताएवैकादशमौनात्रीण्यब्दशतानिक्षितिंभोक्ष्यंति ३१

अ० ॥ १ ॥

॥ ३ ॥ श्लोकाः २०/३१

स्वयंकरिष्यतेराज्यंवसुदेवोमहामतिः ॥ तस्यपुत्रस्तुभूमित्रस्तस्यनारायणःसुतः २० काण्वायनाइमेभूमिंचत्वारिंशच्चपंचच ॥ शतानित्रीणिभोक्ष्यंतिवर्षाणांचकलौयुगे २१ हत्वाकाण्वंसुशर्माणंतद्भृत्योवृषलोबली ॥ गांभोक्ष्यत्यांध्रजातियःकंचित्कालमसत्तमः २२ कृष्णनामाथतद्भ्राताभवितापृथिवीपतिः ॥ श्रीशांतकर्णस्तत्पुत्रःपौर्णमासस्तुतत्सुतः २३ लंबोदरस्तुतत्पुत्रस्तस्माच्चिबिलकोनृपः ॥ मेघस्वातिश्चिबिलिकादटमानस्तुतस्यच २४ आनिष्टकर्माहालेयस्तलकस्तस्यचात्मजः ॥ पुरीषभोरुस्तत्पुत्रस्ततोराजासुनंदनः २५ चकोरोवटकोयत्रशिवस्वातिररिंदम ॥ तस्यापिगोमतीपुत्रःपुरीमान्भविताततः २६ मेदशिराःशिवस्कंदोयज्ञश्रीस्तत्सुतस्ततः ॥ विजयस्तत्सुतोभाव्यश्चंद्रविज्ञःसुलोमधिः २७ एतेत्रिंशन्नृपतयश्चत्वार्यब्दशतानिच ॥ षट्पंचाशच्चपृथिवींभोक्ष्यंतिकुरुनंदन २८ सप्ताभीराआवभृत्यादशगर्दभिनोनृपाः ॥ कंकाःषोडशभूपालाभविष्यंतिचलोलुपाः २९ ततोष्टौयवनाभाव्याश्चतुर्दशतुरुष्कराः ॥ भूयोदशगुरुंडाश्चमौनाएकादशैवतु ३० एतेभोक्ष्यंतिपृथिवींदशवर्षशतानिच ॥ नवाधिकांचनवतिंमौनाएकादशक्षितिम् ३१

चूर्णिका

तस्य भूमित्रः तस्य नारायणः तस्य सुशर्मा एते २० चत्वारः काण्वायनाः कलौ चत्वारिंशच्चपंच चत्रीणिशतानि चवर्षाणिभुवंभोक्ष्यंति २१ ततः काण्वं सुशर्माणंहत्वा तद्भृत्यः आंध्रजातीयःशूद्रःकंचित्कालंगांभोक्ष्यति २२ ततः तद्भ्राताकृष्णनामाभूपः भविष्यति तस्यश्रीशांतकर्णः तस्य पौर्णमासः २३ तस्य लंबोदरः तस्य विकलः तस्य मेघस्वातिः तस्य अटमानः २४ तस्य अनिष्टकर्मा तस्य हालेयः तस्य तलकः तस्य पुरीषभीरुः तस्य सुनंदनः २५ तस्य चकोरः तस्य बहुसंज्ञकाः अष्ट पुत्राः नवमः शिवस्वातिरिति तस्य गोमती ततः पुरीमान् २६ तस्य मेदशिराः तस्य शिवस्कंदः तस्य यज्ञश्रीः तस्य विजयः तस्य चंद्रविज्ञः तस्य लोमधिः २७ एतेत्रिंशत्राजानः कलौचत्वार्यब्दशतानिचषट्पंचाशच्च वर्षाणिभूमिंभोक्ष्यंति २८ तस्य आभीराः सप्त ततः गर्दभिनः नृपाः दश कंकाः षोडश भविष्यंति २९ ततः यवनाः अष्टौ ततः रुष्कराः चतुर्दश ततः गुरुंडाः दश ततः मौनाः एकादश एते सर्वे मौनव्यतिरिक्ताः पंचषष्टिनृपाः एकोनशताधिकंवर्षसहस्रंवर्षाणिकलौ भुवंभोक्ष्यंति ३० मौनाः भूपास्तुत्रीण्यब्दशतानि वर्षाणि भमिं भोक्ष्यंति ३१ ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

तैः संस्थितेतेंतुमौनेषुमृतेषुकिलिकिलायांपुर्यांनृपतयोभविष्यंतीत्युत्तरेणान्वयः ३२ (एतेभूतनंदादयोनृपतयः वर्षशतं) अधिकानिचषड्वर्षाणि ३ तेषांभूतनंदादीनांयथायथंबाह्लिकास्तन्नामानस्त्रयोदशसुताभविष्यंति । पुष्पमित्रोनामान्योराजन्यः अस्यचदुर्मित्रोनामपुत्रः ३४ तथाआंध्राः कोशलाः वैदूरपतयः निषधाश्चएतेचतत्तद्देशनामाभिः प्रख्याताः तुल्यकालाः खंडमंडलेषुभूपाः ततएवतेभ्योबाह्लिकेभ्यएवभाव्याः भविष्यंति ३५ ततश्चमागधानांतुराजाविश्वस्फूर्जिर्नामभविता । सचपूर्वोक्तात् पुरंजयात् अपरः पुरंजयइतिप्रसिद्धः सन् वर्णान् ब्राह्मणादीन् पुलिंदयदुमद्रकसंज्ञान् म्लेच्छप्रायान् करिष्यति । अपरानितिपाठेअन्यान् पुलिंदादिसंज्ञान् वर्णान् करिष्यतीत्यर्थः ३६ सचैवंकृत्वाअब्रह्मभूयिष्ठाअत्रैवर्ण्यप्रचुराः सतीः प्रजाः स्थापयिष्यतिपालयिष्यति । सचपद्मवत्यांपुरिस्थित्वाअनुगंगांगंगाद्वारमारभ्यप्रयागपर्यंतंगुप्तांपालितांमेदिनींभोक्ष्यति ३७ तदनंतरंचसौराष्ट्रादिदेशवर्तिनः (शूद्रा) द्विजाश्चव्रात्याउपनयनरहिताअतएवशूद्रप्राया (जनाधिपा) भविष्यंति ३८ अब्रह्मवर्चसः वेदाचारशून्याः ३९ इमेचम्लेच्छप्रायाभूभृतस्तुल्यकालाः (एककालवर्तिनो) भविष्यंति । किंच । एतेसर्वेअधर्मानृतपराअधर्मेअनृतेचपरिनिष्ठिताः । फल्गुदाः अल्पदातारः ४० उदितास्तमितप्रायाहर्षशोकादिबहुला (इतिभावः । राज्येऽल्पकालावस्थायिनइतिवा) ४१

भोक्ष्यंत्यब्दशतान्यंगत्रीणितैःसंस्थितेततः ॥ किलिकिलायांनृपतयोभूतनंदोऽप्यवंगिरिः ३२ शिशुनंदिश्चतद्भ्रातायशोनंदिःप्रवीरकः ॥ इत्येतेवैवर्षशतंभविष्यंत्याधिकानिषट् ३३ तेषांत्रयोदशसुताभवितारश्चबाह्लिकाः ॥ पुष्पमित्रोथराजन्योदुर्मित्रोस्यतथैवच ३४ एककालाइमेभूपाःसप्तांध्राःसप्तकौशलाः ॥ वैदूरपतयोभाव्यानैषधास्ततएवहि ३५ मागधानांतुभविताविश्वस्फूर्जिःपुरंजयः करिष्यतिपरोवर्णान्पुलिंदयदुमद्रकान् ३६ प्रजाश्चाब्रह्मभूयिष्ठाःस्थापयिष्यतिदुर्मतिः ॥ वीर्यवान्क्षत्रमुत्साद्यपद्मवत्यांसवैपुरि ॥ अनुगंगामाप्रयागंगुप्तांभोक्ष्यतिमेदिनीम् ३७ सौराष्ट्रावंत्याभीराश्चशूद्राश्चार्बुदमालवाः ॥ व्रात्याद्विजाभविष्यंतिशूद्रप्रायाजनाधिपाः ३८ सिंधोस्तटंचंद्रभागांकौंतींकाश्मीरमंडलम् ॥ भोक्ष्यंतिशूद्राव्रात्याद्याम्लेच्छाश्चाब्रह्मवर्चसः ३९ तुल्यकालाइमेराजन्म्लेच्छप्रायाश्चभूभृतः ॥ एतेऽधर्मानृतपराःफल्गुदास्तीव्रमन्यवः ४० स्त्रीबालगोद्विजघ्नाश्चपरदारधनादृताः ॥ उदितास्तमितप्रायाअल्पसत्त्वाल्पकायुषः ४१

श्लोकाः ३२/४१

चूर्णिका मौनेषुमृतेषुकिलकिलायांपुर्यांभूतनंदः अवंगिरिः शिशुनंदिः तद्भ्राता यशोनंदिः प्रवीरकः एतेराजानः षडधिकंवर्षशतं वर्षाणिभविष्यंति ३१ ३२ तेषां भूतनंदादीनां यथायथं सुताः त्रयोदश बाह्लीकनामानः भविष्यंति ३३ अथ कश्चित् पुष्पमित्रः नृपः भविष्यति तस्य दुर्मित्रः ३४ तथा आंध्राः सप्त कौशलाः सप्त वैदूरपतयः निषधाश्च एते एककालाः मांडलिकाः राजानः बाह्लिकेभ्यः एव भविष्यंति ३५ ततः मागधानां विश्वस्फूर्जिर्भविता सः विप्रादिवर्णान् पुलिंदयदुमद्रकसंज्ञान् म्लेंछप्रायान् करिष्यति ३६ स च असतीः प्रजाः पालयिष्यति सः क्षत्रं उत्साद्य पद्मवत्यां पुरि वसन् गंगाद्वारमारभ्य प्रयागपर्यंतं भूमिं भोक्ष्यति ३७ ततःसौराष्ट्राः आवंत्या आभीराः शूरा अर्बुदमालवाः द्विजाः व्रतहीनाः शूद्रप्रायाः नृपाश्च भविष्यंति ३८ एते सर्वे म्लेच्छप्रायाः नृपाश्च सिंधोस्तटं चंद्रभागां कौंतीं काश्मीरमंडलं रामकालं भोक्ष्यंति ३९ एवं एते सर्वे अधर्मानृतपराः फल्गुदाः तीव्रमन्यवः ४० स्त्रीबालगोद्विजघ्नाः परदारधनादृताः अल्पायुषः अल्पसत्त्वाः ४१ ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

असंस्कृतागर्भाधानादिसंस्काररहिताः प्रजाभक्षयिष्यंतिधनापहारादिनापीडयिष्यंति (यतोरजसातमसावृताः अतएवराजन्यरूपिणोम्लेंच्छाः) ४२ किंचतन्नाथास्तेनाथायेषांतेजनपदादेशवार्तिनोमनुष्याः तच्छीलाचारवादिनः तेषामिवशीलमाचारोवादश्चतद्वंतः ४३ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांप्रथमोध्यायः ॥ १ ॥ द्वितीयेतुकलेर्दोषवृद्धौकल्क्यवतारतः ॥ अधर्मिष्टेजनेनष्टे पुनःकृतयुगागमः ॥ १ ॥ कलिधर्मान् प्रपंचयति । ततश्चेत्यादिना (दिनेदिनेकलियुगरूपकालेनधर्मादयोनंक्ष्यंतिक्षयंयास्यंति) १ यदिकलौनृणांवित्तमस्तितर्ह्येवतेषांजन्मादयोवंद्याअन्यथानिंद्याइत्यर्थः अयमेवधर्मः अयमेवन्यायोनीतिरितितयोर्व्यवस्थापांवलमेव (हेतुः नतुशास्त्रम्) २ दांपत्येदंपतिभावेअभिरुचिः (अन्योन्यस्नेहो) हेतुः । नकुलगोत्रादि । व्यावहारिकक्रयविक्रयादिविषये (मायैवसाधनम्) स्त्रीत्वेपुंस्त्वेचतयोः श्रैष्ठ्येअभिरतिः कौशलमेवहेतुर्नकुलमाचारोवा ३ आश्रमाणांख्यातौज्ञानेलिंगमेवदंडाजिनादिकंहेतुर्नत्वाचारविशेषः । अन्योन्यापत्तिकारणंआश्रमादाश्रमांतरप्राप्तौचकारणं यद्वा वहूदकहंसादीनांअन्योन्यापत्तौनमस्कारव्यवहारे (लिंगमेव) कारणं (नतुधर्मज्ञानादिविशेषः) अवृत्त्या (वृत्तिराहित्येन) मुद्रार्पणादि (द्रव्य-)·दानासामर्थ्येनेत्यर्थः न्यायदौर्बल्यंपराजयः । चापलंवचः वहुभाषणं (हेतुः नतुविद्वद्भावः) ४ असाधुत्वेचौर्याद्यभियोगे (अनाढ्यतादारिद्र्यम् । स्वीकारः त्वंममजायेतिस्वीकरणमेवनतुग्रहणम्) प्रसाधनं (शरीरशुद्धिः) अलंकारोवा ५ दूरेवर्तमानंवार्ययनंजलाशयःतीर्थं नतुगुर्वादि (लावण्यंसौभाग्यं नतुभर्तृशुश्रूषादि स्वस्यकुटुंबस्यवाउदरभरणं) स्वार्थः पुरुषार्थः (नतुधर्मादिलक्षणः । धाष्टर्यंप्रागल्भ्यं) ६ (कुटुंबपालनमेवदाक्ष्यंअप्रमत्तता । यशोर्थेकीर्त्यै । ब्राह्मणादीनांमध्येयोबलवान् सनृपः नतुपरंपरागतः) ७

॥ ५ ॥

श्लोकाः ४२ / ७

असंस्कृताःक्रियाहीनारजसातमसावृताः ॥ प्रजास्तेभक्षयिष्यंतिम्लेंच्छाराजन्यरूपिणः ४२ तन्नाथास्तेजनपदास्तच्छीलाचारवादिनः ॥ अन्योन्यतोराजतश्चक्षयंयास्यंतिपीडिताः ४३ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेप्रथमोऽध्यायः ॥ १ ॥ ॥ श्रीशुकउवाच ॥ ॥ ततश्चानुदिनंधर्मःसत्यंशौचंक्षमादया ॥ कालेनबलिनाराजन्नंक्ष्यत्यायुर्बलंस्मृतिः १ वित्तमेवकलौनॄणांजन्माचारगुणोदयः ॥ धर्मन्यायव्यवस्थायांकारणंबलमेवहि २ दांपत्येऽभिरुचिर्हेतुर्मायैवव्यवहारिके ॥ स्त्रीत्वेपुंस्त्वेचाभिरतिर्विप्रत्वेसूत्रमेवहि ३ लिंगमेवाश्रमख्यातावन्योन्यापत्तिकारणम् ॥ अवृत्त्यान्यायदौर्बल्यंपांडित्येचापलंवचः ४ अनाढ्यतैवासाधुत्वेसाधुत्वेदंभएवतु ॥ स्वीकारएवचोद्वाहेस्नानमेवप्रसाधनम् ५ दूरेवार्ययनंतीर्थंलावण्यंकेशधारणम् ॥ उदरंभरतास्वार्थःसत्यत्वेधाष्टर्यमेवहि ६ दाक्ष्यंकुटुंबभरणंयशोर्थेधर्मसेवनम् ॥ एवंप्रजाभिर्दुष्टाभिराकीर्णेक्षितिमंडले ७

चूर्णिका

संस्कारहीनाः रजस्तमोव्याप्ताःसंतः प्रजाः भक्षयिष्यंति ४२ तन्नाथास्तेजनपदाःस्तच्छीलाचारवादिनः अन्योन्यतो राजतश्च क्षयं यास्यंति पीडिताः ४३ ॥ इतिद्वादशे प्रथमः १ ॥ ॥ छ ॥ ॥ श्रीशुक उवाच ॥ ततश्चानुदिनंधर्मः सत्यं शौचं दया क्षमा कालेन बलिना राजन्नंक्ष्यत्यायुर्बलं स्मृतिः १ कलिधर्मानाह कलौ वित्तमेव नृणां जन्माचारगुणोदयः धर्मन्यायव्यवस्थायां बलमेवकारणम् २ दांपत्ये अभिरुचिरेव हेतुः क्रयविक्रयादिव्यवहारे कपटं हेतुः विप्रत्वे सूत्रधारणं हेतुः३ आश्रमाणां ज्ञाने चिह्नमेव कारणम् नतत्वविचारः पांडित्ये बहुभाषणं हेतुः ४ असाधुत्वे अनाढ्यतैव साधुत्वे दंभ एव हेतुः उद्वाहे स्वीकार एव हेतुः स्नानमेव अलंकार हेतुः ५ दूरे वर्तमानः जलाशयः स एव तीर्थं न तु गुर्वादिः लावण्ये केशधारणं उदरंभरता पुरुषार्थः सत्यत्वे धार्ष्ट्यमेव ६ कुटुंबभरणं दाक्ष्यम् यशोर्थे धर्मसेवनम् एवं दुष्टाभिः प्रजाभिः क्षितौव्याप्तायां ७

॥ ५ ॥

१ धर्मन्याययोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥ ६ ॥

(दस्यूनांचोराणांधर्मइवधर्मआचारोयेषांतैः) ८ आच्छिन्नाअपहृतादाराद्रविणानिचयासांताः (क्षौद्रंमधु । अष्टिर्बीजं) ९ (अन्योन्यतः परस्परवैरादिना नंक्ष्यंति) १० ११ क्षीयमाणेष्वित्यादीनांइत्थंकलौगतप्रायइतिपंचमेनान्वयः । क्षीयमाणेषुअल्पप्रमाणेषु (वेदपथरूपेधर्मेनष्टेसति) १२ (पाषंडबहुलेवेदबाह्येधर्मेप्रवृत्ते) दस्युप्रायेषुचोरतुल्येषु । चौर्यानृतवृथाहिंसाद्या नानावृत्तयोयेषांतेषु १३ च्छागप्रायासुप्रमाणतःक्षीरतश्चअजातुल्यासु (आश्रमेषुब्रह्मचर्यादिषुगृहप्रायेषुविषयासक्तेष्वित्यर्थः । बंधुषुभ्रातृषुयौनप्रायेषुदायादांतरतुल्येषु । योनिसंबंधमात्रंबंधुत्वं नतुस्नेहयुक्तमित्यर्थः) १४ अणुप्रायासुअत्यल्पासु । स्थास्नुषुवृक्षेषु । विद्युत्प्रायेषुताडिद्बहुलेषु । शून्यप्रायेषुधर्मादिरहितेषुसद्मसुगृहेषु १५ जनेषुखरधर्मिणिदुःसहचेष्टितेकलौगतप्रायेसमाप्तप्राये १६ (धर्मत्राणाये ति) एतत्प्रपंचयतिचतुर्भिः । चराचरगुरोः ईश्वरस्यैवधर्मत्राणेहेतुभूतंगुरुत्वेश्वरत्वयोरुपपादनम् । अखिलस्यविश्वस्यात्मनः कारणस्येति । एवंभूतस्यविष्णोःजन्म साधूनांधर्मत्राणाय । धर्मत्राणप्रयोजनमाह । कर्मापनुत्तयेमोक्षाय १७ शंभलग्रामेषुमुख्यस्यप्रधानस्यनाम्नाविष्णुयशसोब्राह्मणस्यभवनेगृहे १८ धर्मत्राणप्रकारमाह । अश्वमिति । असाधवोदम्यंतेयेनतमश्वं (देवदत्तंदेवैः प्रेषितं) आरुह्यअसिनादस्यून् कोटिशोनिहनिष्यतीत्युत्तरेणान्वयः । असाधुदमनइतिपाठेकल्किविशेषणम् । अणिमाद्यष्टैश्वर्याणिगुणाश्चसत्यसंकल्पादयस्तैरन्वितः १९

श्लोकाः ८ १९

ब्रह्मविट्क्षत्रशूद्राणांयोबलीभवितानृपः ॥ प्रजाहिलुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मभिः ८ आच्छिन्नदारद्रविणायास्यंतिगिरिकाननम् ॥ शाकमूलामिषक्षौद्रफलपुष्पाष्टिभोजनाः ९ अनावृष्ट्याचनंक्ष्यंतिदुर्भिक्षकरपीडिताः ॥ शीतवातातपप्रावृड्हिमैरन्योन्यतःप्रजाः १० क्षुत्तृड्भ्यांव्याधिभिश्चैवसंतापेनच चिंतया ॥ त्रिंशद्विंशतिवर्षाणिपरमायुःकलौनृणाम् ११ क्षीयमाणेषुदेहेषुदेहिनांकलिदोषतः ॥ वर्णाश्रमवतांधर्मेनष्टेवेदपथेनृणाम् १२ पाषंडप्रचुरेधर्मेदस्युप्रायेषुराजसु ॥ चौर्यानृतवृथाहिंसानानावृत्तिषुवैनृषु १३ शूद्रप्रायेषुवर्णेषुच्छागप्रायासुधेनुषु ॥ गृहप्रायेष्वाश्रमेषुयौनप्रायेषुबंधुषु १४ अणुप्रायास्वोषधीषुशमीप्रायेषुस्थास्नुषु ॥ विद्युत्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु १५ इत्थंकलौगतप्रायेजनेषुखरधर्मिणि ॥ धर्मत्राणायसत्त्वेनभगवानवतरिष्यति १६ चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः ॥ धर्मत्राणायसाधूनांजन्मकर्मापनुत्तये १७ शंभलग्राममुख्यस्यब्राह्मणस्यमहात्मनः ॥ भवनेविष्णुयशसःकल्किःप्रादुर्भविष्यति १८ अश्वमाशुगमारुह्यदेवदत्तंजगत्पतिः ॥ असिनाऽसाधुदमनमष्टैश्वर्यगुणान्वितः १९

चूर्णिका ॥ ६ ॥

ब्रह्मविट्क्षत्रशूद्राणां मध्ये यः बलिः सः नृपो भविता किं च लुब्धैः निर्घृणैः दस्युधर्मभिः राजन्यैः ८ अपहृतदारद्रविणाः प्रजाः गिरिकाननं यास्यंति ९ शाकमूलमांसमधुफलपुष्पभोजनाः प्रजाः अनावृष्ट्या दुर्भिक्षकरैः शीतवातातपादिभिः क्षुत्तृड्व्याधिभिः संतापेन च पीडिताः सत्यः नंक्ष्यंति १० कलौ त्रिंशद्विंशति वा वर्षाणि नृणांपरमायुः ११ एवं नृणां क्षीणेषु देहेषु वर्णाश्रमिणां धर्मे वेदपथे नष्टे १२ पाखंडप्राये धर्मे चोरप्रायेषु राजसु चौर्यानृतहिंसादिप्रायेषु नृषु १३ शूद्रप्रायेषु वर्णेषु छागप्रायासु गोषु गृहप्रायेषु आश्रमेषु यौनप्रायेषु बंधुषु १४ अणुप्रायासु ओषधीषु शमीप्रायेषु वृक्षेषु विद्युत्प्रायेषु मेघेषु धर्महीनेषु गृहेषु सत्सु इत्थं कलौ गतप्राये धर्मत्राणाय शंभलग्राममुख्यस्यविष्णुयशसः विप्रस्य गृहे कल्किः भगवान् प्रादुर्भविष्यति १६ १७ १८ सः आशुगं अश्वं आरुह्य १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

असाधुदमनत्वस्यप्रपंचः । आशुनाशीघ्रगामिनातेनहयेनक्षोण्यांविचरन् । नृपलिंगच्छदः राजवेषप्रच्छन्नान् २० ततश्चपुनः कृतयुगप्रवृत्तिंवक्तुमाह । अथेतिसार्धाभ्याम् । अथतेषांपौरजानपदानां (पुरवासिनांदेशवासिनांच) मनांसिविशदानि (निर्मलानिप्रसन्नानि) भविष्यंतितत्रहेतुः वासुदेवस्यांगरागेणचंदनादिनायोतिपुण्यगंधोऽनिलस्तंस्पृशंतीतितथातेषाम् २१ (तेषांपौरादीनां प्रजाविसर्गः संतानोत्पत्तिः) स्थविष्ठः स्थूलः बहुलइत्यर्थः २२ कृतयुगप्रवृत्तिमाह । यदावतीर्णइति । प्रजानांसूतिः प्रसूतिः २३ तदवतारकालोपलक्षणमाह । यदाचंद्रश्चेति । तिष्यः पुष्यःअयमर्थः चंद्रसूर्यबृहस्पतीनां यदा पुष्यनक्षेत्रयोगस्तदातत्कृतयुगं भविष्यतीति यद्यपि । चप्रतिद्वादशाब्दंकर्कराशौबृहस्पतौवर्तमानेद्वित्रास्वमावास्यासुतेषांत्रयाणामपिपुष्येयोगः संभवति तथापितेषांसहप्रवेशोऽत्रविवक्षितः समेष्यंतीतिवचनात् । अतोनातिप्रसंगः २४ एवंनवमस्कंधमारभ्यानुक्रांतंवैवस्वतमनोर्वंशद्वयंनिगमयति । येतीताइति । उद्देशतः संक्षेपतः २५ कलियुगावांतरविशेषंवक्तुमाह । आरभ्येत्यादिना । वर्षसहस्रंपंचदशोत्तरंशतंचेतिकयापिविवक्षयाऽवांतरसंख्येयम् । वस्तुतः परिक्षिन्नंदयोरंतरंद्वाभ्यामूनंवर्षाणांसार्धसहस्रंभवति । यतः परिक्षित्समकालंमागधंमार्जारिमारभ्यारिपुंजयांताविंशतिराजानः सहस्रवत्सरंभोक्ष्यंतीत्युक्तंनवमस्कंधे । येन्बृहद्रथभूपालाभाव्याः साहस्रवत्सरामिति । ततः परंचप्रद्योतनाअष्टत्रिंशोत्तरंशतं शिशुनागाश्चषष्ट्युत्तरशतत्रयंभोक्ष्यंतिपृथिवीमित्यत्रैवोक्तत्वात् २६ कलेःप्रवृत्तिवृद्धिंचनिरूपयितुं कालज्ञानोपलक्षणमाह । सप्तर्षीणांत्विति । अयमर्थः प्रागग्रशकटाकारंतारासप्तकंसप्तर्षिमंडलं तत्रकिंचिदुन्नतायाईषायाअग्रस्थानीयोमरीचिः । ततः पश्चादानम्रयुगंधराकारोवसिष्ठः सभार्यः ततः पश्चादीषदुन्नतेषामूलस्थानीयोऽगिराः । ततः पश्चाच्चतुरस्रताराचतुष्केईशानदिग्भागेऽत्रिः ततोदक्षिणतः पुलस्त्यः पुलस्त्यात्पश्चिमतः पुलहः तत उत्तरतःक्रतुः । एवंस्थितेतेषांमध्येयौपूर्वौउदयसमयेप्रथममुदितौ दृश्येते पुलहक्रतुसंज्ञौतयोस्तुमध्येतयोःपूर्वयोस्तुमध्येयत्समंदक्षिणोत्तररेखायां समदेशावस्थितंअश्विन्यादिषुयदन्यतमंनक्षत्रं (नभसि) दृश्यते २७ तेन (नक्षत्रेण) तथैवयुक्ता (ऋषयो) नृणामब्दशतंतिष्ठंति । तेचद्विजास्त्वदीयेकालेऽधुनामघाआश्रिताः (मघासु) वर्ततेइत्यर्थः २८

श्लोकाः २०—२८

विचरन्नाशुनाक्षोण्यांहयेनाप्रतिमद्युतिः ॥ नृपलिंगच्छदोदस्यून्कोटिशोनिहनिष्यति २० अथतेषांभविष्यंतिमनांसिविशदानिवै ॥ वासुदेवांगरागातिपुण्यगंधानिलस्पृशाम् ॥ पौरजानपदानांवैहतेष्वखिलदस्युषु २१ तेषांप्रजाविसर्गश्चस्थविष्ठःसंभविष्यति ॥ वासुदेवेभगवतिसत्त्वमूर्तौहृदिस्थिते २२ यदावतीर्णोभगवान्कल्किर्धर्मपतिर्हरिः ॥ कृतंभविष्यतितदाप्रजासूतिश्चसात्त्विकी २३ यदाचंद्रश्चसूर्यश्चतथातिष्यबृहस्पती ॥ एकराशौसमेष्यंतितदाभवतितत्कृतम् २४ येऽतीतावर्तमानायेभविष्यंतिचपार्थिवाः ॥ तेतउद्देशतःप्रोक्तावंशीयाःसोमसूर्ययोः २५ आरभ्यभवतोजन्मयावन्नंदाभिषेचनम् ॥ एतद्वर्षसहस्रंतुशतंपंचदशोत्तरम् २६ सप्तर्षीणांतुयौपूर्वौदृश्येतेउदितौदिवि ॥ तयोस्तुमध्येनक्षत्रंदृश्यतेयत्समंनिशि २७ तेनैवऋषयोयुक्तास्तिष्ठंत्यब्दशतंनृणाम् ॥ तेत्वदीयेद्विजाःकालेअधुनाचाश्रितामघाः २८

चूर्णिका

भूमौ विचरन् नृपलिंगच्छदो दस्यून् कोटिशो निहनिष्यति २० अथ सर्वेषां मनांसि विशदानि भविष्यंति २१ प्रजाविसर्गः स्थूलो भविष्यति २२ यदा कल्किः हरिः भविता तदा कृतयुगं सात्विकी प्रजाप्रसूतिश्च भविष्यति २३ किंच यदा चंद्रसूर्यबृहस्पतीनां पुष्यर्क्षे समकाले एव प्रवेशः तदैव कृतयुगप्रवृत्तिः स्यात् २४ हे राजन् अतीताः वर्तमानाः भाव्याः ये नृपाः ते संक्षेपतः प्रोक्ताः २५ किंच तव जन्मन आरभ्य नंदाभिषेकावधिवर्षसहस्रंपंचदशोत्तरंशतंवर्षाणि भवंति २६हे राजन् देवर्षयः सप्त एकस्मिन् ऋक्षे शतं समाः तिष्ठंति तेअधुना मघासु विचरंति २७ २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तेषुमघासुवर्तमानेषुसत्सुयदाविष्णोर्भानुः भातीतिभानुः शुद्धसत्त्वात्मकोदेहः ।दिवंवैकुंठंगतः तदा (इमंलोकंप्रति) कलियुगमविशत् (प्रविष्टं) यत्यास्मिन्युगेजनः पापेरमतइतिकलियुगस्यलक्षणं २९
ननु श्रीकृष्णेपृथिव्यांवर्तमानेऽपिसंध्यास्वरूपेणकलिः प्रविष्टएवासीत् । सत्यं । तथातावत्तस्यपराक्रमोनाभवदित्याह । यावदिति (पृथिवींस्पृशन्नास्तेतावत्) पराक्रांतुंअभिभवितुं ३० अतोयथोक्तए
वकलिप्रवेशकालइत्याह यदादेवर्षयइति । द्वादशाब्दशतात्मकइतिदिव्येनमानेन (मानवमानेनतुद्वात्रिंशत्सहस्राधिकचतुर्लक्षाब्दात्मकः) संध्यांशाभ्यांसहयोद्वादशाब्दशतात्मकः सकलिस्तदा (वर्ष
शतात्मिकां) संध्यामतिक्रम्यप्रविष्टइत्यर्थः ३१ कलेः प्रवेशकालमुक्त्वातस्यवृद्धिकालमाह । (यदामघाभ्यः पूर्वाषाढांयास्यंति ।) तदाप्रद्योतनात्प्रभृतिनंदपर्यंतंवृद्धिंगच्छन् (तदा) नंदात्प्रभृतिकलिर
तिवृद्धिंगमिष्यतीत्यर्थः ३२ ननु कलेर्यदालिंगमुपलब्धंतदैवप्रविष्टइतियुक्तंततःपूर्वमेवप्रवेशस्ततःपरंवृद्धिरित्यत्रकिंप्रमाणंतत्राह । यस्मिन्निति । तस्मिन्नहनितदैवप्रतिपन्नंप्रविष्टमितिज्ञातं । पुराविदः
पूर्वज्ञातारः ३३ कलेरनंतरंकृतयुगप्रवेशमाह । दिव्याब्दानामिति । चतुर्थेकलौप्रवेशनाब्दपारिमितेनांशेनापिसहातीतेसतीत्यर्थः कृतयुगप्रवेशचिह्नमाह । यदानृणांमनआत्मप्रकाशकंभविष्यति तदेति
३४ राजवंशोक्तांस्थितिंब्राह्मणादिवंशेष्वप्यतिदिशति । इतीति । (इतिशब्दः समाप्तिवचनः) यथायाभिरुच्चनीचावस्थाभिः (संख्यायतेज्ञायतेतथाविप्रादीनां) तास्ताअवस्था (ज्ञातव्याः) वं
शाइतिचपाठः ३५ एतत्कीर्तनस्यवैराग्योपयोगितामाह । एतेषामिति । नामैवलिङ्गंज्ञापकंयेषांतेषांयतः कथामात्रेणैवावशिष्टानांकीर्तिरेवास्थिता नतु राज्यंपुत्रादयोवा ३६ कलावुत्सन्नानांराजवं
शादीनांपुनःप्रवृत्तिप्रकारमाह । देवापिः सोमवंशजः । मरुः सूर्यवंशजः। कलापग्रामोनाम्नयोगिनामावासः प्रसिद्धः (तत्रवर्तेते) ३७ (प्रथयिष्यतः प्रख्यातंकरिष्यतः प्रवर्तयिष्यतइत्यर्थः ।) ३८
प्रतिचतुर्युगंइममेवप्रकारंदर्शयति कृतमिति ३९

श्लोकाः २९/३९

विष्णोर्भगवतोभानुःकृष्णाख्योसौदिवंगतः ॥ तदाऽविशत्कलिर्लोकंपापेयद्रमतेजनः २९ यावत्सपादपद्माभ्यांस्पृशन्नास्तेरमापतिः ॥ तावत्कलिर्वैपृथिवीं
पराक्रांतुंनचाशकत् ३० यदादेवर्षयःसप्तमघासुविचरंतिहि ॥ तदाप्रवृत्तस्तुकलिर्द्वादशाब्दशतात्मकः ३१ यदामघाभ्योयास्यंतिपूर्वाषाढांमहर्षयः ॥
तदानंदात्प्रभृत्येषकलिर्वृद्धिंगमिष्यति ३२ यस्मिन्कृष्णोदिवंयातस्तस्मिन्नेवतदाहनि ॥ प्रतिपन्नंकलियुगमितिप्राहुःपुराविदः ३३ दिव्याब्दानांसहस्रां
तेचतुर्थेतुपुनःकृतम् ॥ भविष्यतियदानृणांमनआत्मप्रकाशकम् ३४ इत्येषमानवोवंशोयथासंख्यायतेभुवि ॥ तथाविट्शूद्रविप्राणांतास्ताज्ञेयायुगेयुगे
३५ एतेषांनामलिंगानांपुरुषाणांमहात्मनाम् ॥ कथामात्रावशिष्टानांकीर्तिरेवस्थिताभुवि ३६ देवापिःशंतनोर्भ्रातामरुश्चेक्ष्वाकुवंशजः ॥ कलापग्राम
आसातेमहायोगबलान्वितौ ३७ ताविहैत्यकलेरंतेवासुदेवानुशिक्षितौ ॥ वर्णाश्रमयुतंधर्मंपूर्ववत्प्रथयिष्यतः ३८ कृतंत्रेताद्वापरंचकलिश्चेतिचतुर्युगम् ॥
अनेनक्रमयोगेनभुविप्राणिषुवर्तते ३९

चूर्णिका

तदा कलिः प्रवृत्तः यदालोकः योपरमते यदा च महर्षयः पूर्वाषाढां यास्यंति तदा कलिः वृद्धिं प्राप्स्यति किंच यदहनि श्रीकृष्णः दिवंयातः तदैव प्रविष्टं कलिमिति पूर्वे प्राहुः
२९ ३० ३१ ३२ ३३ कलौ गते सति पुनः कृतं भविष्यति तदा मनः आत्मप्रकाशकं स्यात् ३४ एवं मानवो वंशः तथा विट्शूद्रविप्राणां च वंशःकथितः ३५ एतेषां
पुरुषाणां महात्मनां कीर्तिरेव भुवि स्थिता ३६ किंच पूर्वोक्तौ देवापिमरुतौ कलेरंते इह इत्यधर्मं प्रथयिष्यतः ३७ ३८ एवं क्रमेण चतुर्युगंभुवि प्राणिषु वर्तते ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा०द्वा० एतेषांनामलिंगानामित्यादियदुक्तंतत्प्रपंचयति राजन्निति पंचभिः । (तथापरेअनुक्ताअपियेएतेअंते इमांभूमिं) ४० ममत्वंकृत्वेत्यनेनैवसूचितांभूतद्रोहप्रवृत्तिंनिंदति कृमीति । राजनाम्नः राजेति अ० ३
नामयस्यतस्यापिदेहस्यअंतेकृमयोविष्ठाभस्मेतिवासंज्ञाभविष्यति । (श्वादिभिर्भक्षितस्यविष्ठा दग्धस्यभस्म अन्यथाकृमय इत्यर्थः) । तत्कृतेताहृशदेहार्थंयोभूतध्रुक्भूतेभ्योद्रुह्यतिसकिंस्वार्थं (स्वहित
टीका मित्यर्थः) वेदअपितुनवेद । कुतइत्यपेक्षायांहेतुत्वेनभूतद्रोहंविशिनष्टि । यतोभूतद्रोहान्निरयोभवतीति ४१ ममत्वप्रकारंप्रपंचयाति । कथमिति । सेयमखंडाभूः मेपूर्वजैः (पुरुषैः) धृतासतीइदानीं ॥ ३ ॥
मत्पूर्वाचसतीमत्पुत्रादेः कथंस्यादित्येवं (चिंतयंतः) ४२ (महींममतयादेहंचाहंभावेनगृहीत्वाअंते) उभौमहीकायौ अदर्शनंमृत्युं (गताः । तेजोबन्नमयंतेजसोऽपामन्नस्यचविकारं) ४३ उपसं
हरति येयेइति । तेसर्वेचकथासुश्रूयमाणासुकथामात्राःकृताः । (सर्वात्मनातेषांवार्तैवश्रूयेतनतुस्वरूपं हृश्यत इति कालेनकृतमित्यर्थः ।)४४ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांद्वितीयोऽ
॥ ९ ॥ ध्यायः २ ॥ ॥ ७ ॥ ॥ तृतीयेभूमिगीतैश्चराज्यदोषादिवर्ण्यते । कलौचदोषभूयिष्ठेदोषहंत्रीहरेर्नतिः ॥१॥ देहेहंतांभूमौचममतांकुर्वंत्यतोऽबुधाइत्युक्तं । तदेवभूमिगीतैः प्रपंचयाति
हृष्ट्वेत्यादिना । आत्मनिपृथिव्यांजयेव्यग्रान्उद्युक्तान् । हासप्रकारमाह । अहो इति मामां । (क्रीडनकाः क्रीडोपकरणभूताः) १ येनकामेनफेनोपमेपिंडेदेहेविश्रंभिताविश्वासंनीतायेतेषांन
रेंद्राणांसएषकामोभिलाषोमोघो (निरर्थक-)- एवस्यात् २ काममेवदर्शयतिद्वाभ्यां । पूर्वमिति । इंद्रियार्थलंपटस्य नराज्यप्राप्तिःस्यादितिप्रथममिंद्रियषड्वर्गंनिर्जित्यराजमंत्रिणोजेष्यामः
वशीकरिष्यामः । (षड्वर्गशब्दोत्रमनःषष्ठेंद्रियपरएवयुक्तः षड्वर्गसंधिविग्रहादिलक्षणंवाअस्यनिर्जयोनामोत्कर्षः ।) सचिवाअमात्याः करींद्राहस्तिपाः तांश्चजेष्यामः । कंटकान्प्रतिपक्षान्अस्य
अपास्यअथकंटकानितिवापाठः ३

राजन्नेतेमयाप्रोक्तानरदेवास्तथापरे ॥ भूमौममत्वंकृत्वांतेहित्वेमांनिधनंगताः ४० कृमिविड्भस्मसंज्ञांतेराजनाम्नोपियस्यच ॥ भूतध्रुक्तत्कृतेस्वार्थं श्लोकाः
किंवेदनिरयोयतः ४१ कथंसेयमखंडाभूःपूर्वैर्मेपुरुषैर्धृता ॥ मत्पुत्रस्यचपौत्रस्यमत्पूर्वावंशजस्यवा ४२ तेजोबन्नमयंकायंगृहीत्वात्मतयाऽबुधाः ॥
महींममतयाचोभौहित्वांतेऽदर्शनंगताः ४३ येयेभूपतयोराजन्भुंजंतिभुवमोजसा ॥ कालेनतेकृताःसर्वेकथामात्राःकथासुच ४४ ॥ ॥ इतिश्रीमद्भा ४०/३
गवतेमहापुराणेद्वादशस्कंधेद्वितीयोऽध्यायः ॥ २ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ दृष्ट्वात्मनिजयेव्यग्रान्नृपान्हसतिभूरियम् ॥ अहोमांवि
जिगीषंतिमृत्योःक्रीडनकान्नृपाः १ कामएषनरेंद्राणांमोघःस्याद्विदुषामपि ॥ येनफेनोपमेपिंडेयेऽतिविश्रंभितान्नृपाः २ पूर्वंनिर्जित्यषड्वर्गंजेष्यामोराजमं
त्रिणः ॥ ततःसचिवपौराप्तकरींद्रानस्यकंटकान् ३

चूर्णिका हे राजन् एवं ये मया प्रोक्ताः नृपाः अपरे च ते सर्वे भूमौ ममतां कृत्वा नाशं गताः ४० ४१ ४२ ४३ ये ये भूपतयो राजन् भुंजंति भुवमोजसा ते सर्वे
कालेन कथामात्रावशिष्टाः कृताः ४४ ॥ ॥ इति द्वादशे द्वितीयः ॥ २ ॥ ॥ ७ ॥ ॥ श्रीशुकउवाच ॥ ॥ अथ स्वजयेव्यग्रान् नृपान् दृष्ट्वा इयं ॥ ९ ॥
भूः हसति अहो एते मृत्योः क्रीडनकाः नृपाः मां विजिगीषंति १ येन कामेन फेनोपमे देहे विश्वस्ताः तेषां एषः कामः मोघ एवस्यात् २ तमेवाह पूर्वं इंद्रि
यषड्वर्गं निर्जित्य राजमंत्रिणः वशीकरिष्यामः ततः सचिवपौरादीन् ।जित्वा पृथ्वीं जेष्यामः ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(सागरमेखलांसमुद्रवेष्टितामित्यर्थः । इत्येवंकेचिदाशाबद्धहृदयाः समीपवर्तिनमपिमृत्युंनपश्यंति) ४ एवंकेचिदाशाबद्धाएवपुनः (ओजसापराक्रमेण) मांजित्वाप्यतितृष्णयाऽब्धिंविशंति (द्वीपांतरंजेतुमित्यर्थः) तदेवमिंद्रियजयेनयेराज्यंसाधयितुमिच्छंतितेतिमंदाइत्याह । कियदिति (आत्मजयस्यमनोमुख्येंद्रियजयस्यएतद्भूजयादिकंकियत्फलंस्यात्यतआत्मजयेफलंमुक्तिरुक्ता) ५ (अतः) अंतकंनपश्यंतीत्युक्तंतदेवाह । यामिति । कुरूद्वहेतिभूमिगीतंकथयन्शुकः संबोधयति कुलोद्वहइतिवापाठः सुगमः (मनवोमनुपुत्राश्चयांमांविसृज्ययथागतंगतास्तांअबुद्धयइंद्रियजयादिपरमप्रयत्नवंतः संतोजेष्यंतीति) ६ अबुद्धयइत्युक्तंतत्प्रपंचयति । मत्कृतइति । (राज्येममतयाबद्धंचेतोयेषांतेषामसतांपित्रादीनांपरस्परंकलहोमदर्थंजायतइति) ७ (हेमूढममैवेयंनतवेतिवदंतः) ८ रामोनामकश्चिद्राजा । यद्वा दाशरथिरेवलोकदृष्ट्यानिर्दिष्टः (धुंधुहाधुंधुमारः)९ १० लोकान्रावयतिरोदयतीतिलोकरावणः ११ (महेश्वराः महांतोनियंतारः सर्वान्शत्रून्जितवंतः नतुशत्रुभिर्जिताः क्वचित्) १२ मयिउच्चैर्ममतांकृत्वायेअवर्तंत ते (अकृतार्थाएवसंतः) कालेनकथावशेषाः कृताः । विभोइतिसंबोधनं (शुककर्तृकं) कुरूद्वहेतिवत् १३ राजवंशानुकथनस्यतात्पर्यमाह । कथाइमाइति । (लोकेषुयशोवितायविस्तृत्यपरेयुषांपरलोकंगतानांमहीयसांमहत्तमानांमन्वादीनांइमाःकथास्तेकथिताः किमर्थंकथिताइतितत्राह) विज्ञानंविषयासारताज्ञानंततोवैराग्यंतयोर्विवक्षया । कथंभूताः वचोविभूतीः वचसांविभूतयः । वाग्विलासमात्ररूपाः नतुपारमार्थ्यंमृतानांतेषांपरमार्थयुक्तंकथनंनभवतीत्यर्थः ("वाचोविग्लापनंहितादि"तिश्रुतेः) १४

॥१०॥

श्लोकाः ४/१४

एवंक्रमेणजेष्यामःपृथ्वींसागरमेखलाम् ॥ इत्याशाबद्धहृदयानपश्यंत्यंतिकेंऽतकम् ४ समुद्रावरणांजित्वामांविशंत्यब्धिमोजसा ॥ कियदात्मजयस्यैतन्मुक्तिरात्मजयेफलम् ५ यांविसृज्यैवमनवस्तत्सुताश्चकुरूद्वह ॥ गतायथागतंयुद्धेतांमांजेष्यंत्यबुद्धयः ६ मत्कृतेपितृपुत्राणांभ्रातृणांचापिविग्रहः ॥ जायतेह्यसतांराज्येममताबद्धचेतसाम् ७ ममैवेयंमहीकृत्स्नानतेमूढेतिवादिनः ॥ स्पर्धमानामिथोघ्नंतिम्रियंतेमत्कृतेनृपाः ८ पृथुःपुरूरवागाधिर्नहुषोभरतोर्जुनः ॥ मांधातासगरोरामःखट्वांगोधुंधुहारघुः ९ तृणबिंदुर्ययातिश्चशर्यातिःशंतनुर्गयः ॥ भगीरथःकुवलयाश्वःककुत्स्थोनैषधोनृगः १० हिरण्यकशिपुर्वृत्रोरावणोलोकरावणः ॥ नमुचिःशंबरोभौमोहिरण्याक्षोथतारकः ११ अन्येचबहवोदैत्याराजानोयेमहेश्वराः ॥ सर्वेसर्वविदःशूराःसर्वेसर्वजितोऽजिताः १२ ममतांमय्यवर्तंतकृत्वोच्चैर्मर्त्यधर्मिणः ॥ कथावशेषाःकालेनह्यकृतार्थाःकृताविभो १३ कथाइमास्तेकथितामहीयसांवितायलोकेषुयशःपरेयुषाम् ॥ विज्ञानवैराग्यविवक्षयाविभोवचोविभूतीर्नतुपारमार्थ्यम् १४

चूर्णिका

इत्याशाबद्धहृदया नपश्यंत्यंतिकेंऽतकम्४ एवं केचित् पुनर्मां जित्वा अतितृष्णया अब्धिं विशंति ५ यां मां विसृज्य मनवः तत्सुताश्च गताः तां मां अज्ञाः नृपाः जेष्यंति ६ मत्कृते पितृपुत्राणां भ्रातृणां च विग्रहः भवति ७ किं च इयं मही ममैव तव न इति वादिनः नृपाः मिथः घ्नंति म्रियंते च ८ अहो पृथुः पुरूरवाः गाधिः नहुषः भरतः अर्जुनः मांधाता सगरः रामः खट्वांगः धुंधुहा रघुः तृणबिंदुः ययातिः शंतनुः शर्यातिः गयः भगीरथः कुवलयाश्वः ककुत्स्थः नैषधः नृगः हिरण्यकशिपुः वृत्रः रावणः नमुचिः शंबरः भौमः हिरण्याक्षः तारकः एते अन्ये च सर्वे मयि ममतां कृत्वा अवर्तंत ९ १० ११ १२ १३ ते सर्वे कालेन कथावशेषाःकृताः हे राजन् एषां कथाः ज्ञानवैराग्यविवक्षया ते कथिताः एताः वाग्विलासमात्ररूपाः नतु परमार्थकथनम् १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्तर्हिपुरुषाणामुपादेयः परमार्थस्तमाह यस्त्विति (उत्तमश्लोकस्यहरेर्गुणानुवादोभीक्ष्णंसंकीर्त्यते ।) नित्यंप्रत्यहंतत्राप्यभीक्ष्णं १५ कलिदोषोपचयेसतिभक्तेरसंभवंमन्यमानःपृच्छति । केनोपाये
नेति । विधमिष्यंतिनाशयिष्यंतियथा यथावत् (उपचितान्‌ऋद्धिंप्राप्तान् ।) १६ कलियुगेकःपरमोधर्मइतिबुभुत्सयापृच्छति । युगानीति । ब्रूहीत्यनुषंगः आत्यंतिकप्रलयजिज्ञासयापुनः पृच्छति ।
प्रलयकल्पयोःसंहारास्थितिकालयोः । नचायंबहिर्मुखः प्रश्नइत्याह कालस्येति (कालस्येश्वररूपत्वात्तद्गतिरूपंयुगादिकंश्रोतव्यमित्यर्थः) १७ तत्रयुगधर्मांस्तावदाह । कृतइति । तज्जनैःतत्कालीनैर्ज
नैःदानंअरागद्वेषतयाअभयदानंतदेवप्रथमस्कंधेशौचशब्देनोक्तम् । विभोःसंपूर्णस्यधर्मस्य १८ तदानींतनान्‌जनानाह । संतुष्टाइतिमैत्राभूतमैत्रीयुक्ताः (शांताः स्वस्थचित्ताःदांताजितेंद्रियाः । आत्म
न्यारामोनतुविषयेषुयेषां । समदृशः रागद्वेषरहितबुद्धयः) श्रमणाआत्माभ्यासवंतः (एतादृशाः प्रायेण) १९ (प्रतिपक्षभूतैरनृतादिभिःसत्यादीनांचतुर्थांशोहीयते) २० ब्रह्मोत्तराब्राह्मणाधिकाः
नलंपटाविषयलुब्धानभवंति । त्रैवर्गिकाधर्मार्थकामपराः त्रयीवृद्धा ऋगादिषुनिपुणाः २१ (अनृतेनसत्यं हिंसयादया असंतोषेणतपः विग्रहेणदानमितियथायोग्यंयोज्यं) हिंसातुष्ट्यनृतद्वेषैरित्ययंक्रमो
नाविवक्षितः। धर्मस्यतपआदिषुअर्धंह्रसतिक्षीयतेअधर्मस्यलक्षणैःचिह्नैः पादैरित्यर्थः २२ यशस्विनःकीर्तिप्रियाः (महाशालाः यज्ञकर्तारइत्यर्थः स्वशाखाध्ययनेतत्पराः। आढ्या धनिनः)क्षत्राद्विजोत्तमाः
क्षत्रियब्राह्मणप्रधानाः २३ कलौधर्मपादानांतुर्यांशश्चतुर्थांशः अवशिष्यमाणः (अधर्महेतुभिःशनैः क्षीयमाणः अंतेसोपिविनंक्ष्यति) २४ (दुर्भगादरिद्राः) शूद्रदासोत्तराः शूद्रकैवर्तादिप्रधानाः २५

श्लोकाः १५/२५

यस्तूत्तमश्लोकगुणानुवादःसंगीयतेभीक्ष्णममंगलघ्नः ॥ तमेवनित्यंशृणुयादभीक्ष्णंकृष्णेऽमलांभक्तिमभीप्समानः १५ ॥ राजोवाच ॥ केनोपायेनभग
वन्कलेर्दोषान्कलौजनाः ॥ विधमिष्यंत्युपचितांस्तन्मेब्रूहिमहामुने १६ युगानियुगधर्मांश्चमानंप्रलयकल्पयोः ॥ कालस्येश्वररूपस्यगतिंविष्णोर्म
हात्मनः १७ ॥ श्रीशुकउवाच ॥ कृतेप्रवर्ततेधर्मश्चतुष्पात्तज्जनैर्धृतः ॥ सत्यंदयातपोदानमितिपादाविभोर्नृप १८ संतुष्टाःकरुणामैत्राःशांतादांतास्ति
तिक्षवः ॥ आत्मारामाःसमदृशःप्रायशःश्रमणाजनाः १९ त्रेतायांधर्मपादानांतुर्यांशोहीयतेशनैः ॥ अधर्मपादैरनृतहिंसाऽसंतोषविग्रहैः २० तदाक्रियात
पोनिष्ठानातिहिंस्रानलंपटाः ॥ त्रैवर्गिकास्त्रयीवृद्धावर्णाब्रह्मोत्तरानृप २१ तपःसत्यदयादानेष्वर्धंह्रसतिद्वापरे ॥ हिंसाऽतुष्ट्यनृतद्वेषैर्धर्मस्याधर्मलक्षणैः
२२ यशस्विनोमहाशालाःस्वाध्यायाध्ययनेरताः ॥ आढ्याःकुटुंबिनोहृष्टावर्णाःक्षत्रद्विजोत्तमाः २३ कलौतुधर्महेतूनांतुर्यांशोधर्महेतुभिः ॥ एधमानैः
क्षीयमाणोह्यंतेसोपिविनंक्ष्यति २४ तस्मिन्लुब्धादुराचारानिर्दयाःशुष्कवैरिणः ॥ दुर्भगाभूरितर्षाश्चशूद्रदासोत्तराःप्रजाः २५

चूर्णिका

अतः कृष्णे भक्तिमिच्छुः पुरुषः तद्गुणानुवादं नित्यं शृणुयात् १५ ॥ राजोवाच ॥ हे भगवन् जनाः कलिदोषान् केनोपायेन नाशयिष्यंति तद्ब्रूहि तथा युगानि तद्धर्मा
न् प्रलयकल्पयोः मानं च वद १६ १७ ॥ श्रीशुकउवाच ॥ कृते धर्मः चतुष्पात् प्रवर्तते तत्र जनाः संतुष्टाः आत्मारामाः १८ १९ त्रेतायां धर्मपादानां तुर्यांशः
अनृतहिंसाऽसंतोषविग्रहरूपाधर्मपादैः शनैः हीयते तदा क्रियातपोनिष्ठाः नातिहिंस्राः प्रजाः २० २१ ततः द्वापरे धर्मपादार्धं अधर्मपादैः ह्रसति तत्र जनाः
स्वाध्यायाध्ययने रताः हृष्टाः आढ्याः वर्तंते २२ २३ कलौ तु धर्मपादानां तुर्यांशः अवशिष्यते सोपि अंते नंक्ष्यति २४ तदाचप्रजाः दुराचाराः निर्दयाः दुर्भगाः
शूद्रदासोत्तराः भविष्यंति २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

युगानांएवंभूतवैषम्ये कारणमाह । सत्त्वमितिपंचभिः (पुरुषेसत्त्वादयोयेदृश्यंतेतेकालेनसंचोदिताआत्मनिमनसिपरिवर्तंतेपर्यायेणवर्तंते २६ मनश्चबुद्धिश्चेंद्रियाणिचसत्त्वेयदाप्रभवंतिअतिशयेनवर्तंते २७ (हेबुद्धिमन्) यदाकर्मादिषुभाक्तिःप्रीतिस्तदारजोवृत्तिप्रधानंत्रेतायुगमितिजानीहि २८ (यदालाभादयः) काम्यानांकर्मणांचविषयेप्रीतिर्यदा (मनसिप्रीति-)-स्तत् तदारजस्तमःप्रधानंद्वापरं जानहीतिपूर्वेणानुषंगः २९ विषादनंदुःखं (यदामायादयोदृश्यंतेतदासकलिस्तामसस्तमोवृत्तिमान्) ३० कलिदोषान्प्रपंचयाति यस्मादित्यादिना । यस्मात्कलेर्हेतोःक्षुद्रदृशः मंदमतयः । क्षुद्र भाग्याः अल्पभाग्याः (दीनाइत्यर्थः) महाशनाःवह्वाहाराः । वित्तहीनाअपिकामिनश्च स्वैरिण्यःपुंश्चल्यः । असतीरसत्यः (पातिव्रत्यहीनाः) ३१ दस्यव-(-श्चोराः) उत्कृष्टाः प्रचुरायेषुते (प्र जाभक्षाःप्रजानांलुंटाकाइत्यर्थः शिश्नोदरः परपराः परदारधनलंपटाइत्यर्थः) ३२ अव्रताविहिताचारशून्याः । अशौचाः शौचशून्याश्चबटवोब्रह्मचारिणोभविष्यंति । कुटुंबिनोगृहस्थाःस्वयं (भिक्षवः) भिक्षाटनपराभविष्यंति नतुभिक्षांदास्यंतीत्यर्थः तपस्विनोवनस्थाः वनंहित्वाग्रामवासाभविष्यंति । न्यासिनोयतयः अतिधनादिलोलुपाभविष्यंति ३३ पुनरपिस्त्रीणांस्वभावानाह । ह्रस्वकायाइति । कटुकभाषिण्यः अप्रियवादिन्यः । चौर्यंचमायाकपटंचउरुचसाहसं (अविवेको) यासांताः ३४ (क्षुद्रानीचाः) किंच किराटावणिजः (संतः) पणयिष्यंतिक्रयविक्रयादिव्यव हारंप्रवर्तयिष्यंति (कूटंकपटंतत्करणशीलाः) किंच । सर्वेजनाअनापद्यपिजुगुप्सितांनिंदितांवार्तांवृत्तिंसाधुमंस्यंते ३५

॥१२॥

श्लोकाः २६—३५

सत्त्वंरजस्तमइतिदृश्यंतेपुरुषेगुणाः ॥ कालसंचोदितास्तेवैपरिवर्तंतआत्मनि २६ प्रभवंतियदासत्त्वेमनोबुद्धींद्रियाणिच ॥ तदाकृतयुगंविद्यात्ज्ञानेतप सियद्रुचिः २७ यदाकर्मसुकाम्येषुभक्तिर्भवतिदेहिनाम् ॥ तदात्रेतारजोवृत्तिरितिजानीहिबुद्धिमन् २८ यदालोभस्त्वसंतोषोमानोदंभोथमत्सरः ॥ कर्म णांचापिकाम्यानांद्वापरंतद्रजस्तमः २९ यदामायाऽनृतंतंद्रानिद्राहिंसाविषादनम् ॥ शोकोमोहोभयंदैन्यंसकलिस्तामसःस्मृतः ३० यस्मात्क्षुद्रदृशो मर्त्याःक्षुद्रभाग्यामहाशनाः ॥ कामिनोवित्तहीनाश्चस्वैरिण्यश्चस्त्रियोऽसतीः ३१ दस्यूत्कृष्टाजनपदावेदाःपाषंडदूषिताः ॥ राजानश्चप्रजाभक्षाःशिश्नो दरपराद्विजाः ३२ अव्रताबटवोऽशौचाभिक्षवश्चकुटुंबिनः ॥ तपस्विनोग्रामवासान्यासिनोह्यर्थलोलुपाः ३३ ह्रस्वकायामहाहाराभूर्यपत्यागतह्रियः ॥ शश्वत्कटुकभाषिण्यश्चौर्यमायोरुसाहसाः ३४ पणयिष्यंतिवैक्षुद्राःकिराटाःकूटकारिणः॥ अनापद्यपिमंस्यंतेवार्तांसाधुजुगुप्सिताम् ३५

चूर्णिका

२६ एवं युगवैषम्ये हेतुमाह यदा मनोबुद्धींद्रियाणि सत्वे वर्तंते तदा कृतयुगं प्रवृत्तं विद्यात् २७ यदा काम्यकर्मसु नृणां प्रीतिः तदा राजसं त्रेतायुगं विद्यात् २८ यदा लोभः असंतोषः काम्यकर्मसुप्रीतिश्च तदा द्वापारंविद्यात् २९ यदा मायानृतं तंद्रा निद्रा हिंसा दुःखं शोकः मोहः भयं दैन्यं तदा तामसः कलिः स्मृतः यद्धेतोः मर्त्याः क्षुद्रभाग्याः मंदमतयः निर्द्रव्याः बह्वाहाराः पुंश्चल्यः स्त्रियश्च भविष्यंति ३० ३१ चोराधिकाः देशाः पाखंडदूषिताः वेदाः प्रजाभक्षाः नृपाः शिश्नो दरपराः द्विजाः ३२ ब्रह्मचारिणः विहिताचारशून्याः गृहस्थाः भिक्षाटनपराः वनस्थाः ग्रामवासाः यतयः द्रव्यलोलुपाः भविष्यंति ३३ किंच स्त्रियः ह्रस्वदेहाः महाहाराः कटुभाषिण्यः चौर्यमायोरुसाहसाः भविष्यंति ३४ वैश्याः कूटव्यवहारं कूटकारिणः प्रवर्तयिष्यंति सर्वेजनाः अनापद्यपिनिंदितांवृत्तिंसाधुमंस्यंते ३५

॥१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वोत्तममपि पतिंद्रव्यहानभृत्याःत्यक्ष्यंति । पतयश्चविपन्नंरोगादिभिर्व्यापाराक्षमं कौलं कुलपरंपरायातमपित्यक्ष्यंति अपयस्विनीर्दुग्धदोहागाश्चत्यक्ष्यंति एवंप्रायशः कृतघ्नाएवेत्यर्थः३६ सौरतंसुरतनिमित्तंसौहृदंयेषांतेअतएवननांदरोत्रभार्याभगिन्यः । श्यालाभार्याभ्रातरःतैः संवादोमंत्रालोचनं (नतुभ्रात्रादिभि -)- येषांते । ननंदुरितिवापाठः ३७ (तपोवेषोजटादिधारणंतेनोपजीवंतितथाभूताः । अधर्मज्ञाधर्मनिर्णयमजानानाअपितन्निर्णयंवक्ष्यंति)३८ (वृष्ट्यभावेनचोरादिभयेनचपीडिताः) ३९ (व्यवायः स्त्रीसुखं । अतिदारिद्र्यवशात् वासोन्नादिभिर्हीनाः अतएवपिशाचवत्संदर्शोदर्शनंयेषांते) पिशाचसंदर्शाःपिशाचसदृशाः ४० काकिणिकेविंशतिवराटकमात्रेप्यर्थेविषयभूतेविगृह्यवैरंकृत्वा (त्यक्तंसौहृदंसुहृद्भावोयैस्ते) ४१ (स्थविरौवृद्धावपिपितरावपिपुत्राः । पुत्रांश्चसर्वार्थकुशलानपिपितरः) ४२ महांतमनर्थमाहद्वाभ्यां कलाविति । त्रिलोकनाथैरवनतंनमस्कृतंपादपद्मंयस्यतंनयक्ष्यंतिनयाजंयिष्यंति । पाषंडैर्विभिन्नंअन्यथाकृतंचेतोयेषांते ४३ विवशोभ्रांतचित्तःज्वरादिनाऽस्वस्थचित्तआतुरः । गृणन्सन् विमुक्ताः कर्मरूपाअर्गलाः प्रतिबंधायस्यसः ४४ तदेवंकलिदोषान् प्रपंच्य प्रस्तुतंतन्निस्तारोपायमाह । पुंसामितिषड्भिः द्रव्यदेशात्माभिः संभवोयेषांतान् चित्तस्थः चित्तेस्फुरितः ४५

श्लोकाः ३६—४५

पतिंत्यक्ष्यंतिनिर्द्रव्यंभृत्याअप्यखिलोत्तमम् ॥ भृत्यंविपन्नंपतयःकौलंगाश्चापयस्विनीः ३६ पितृभ्रातृसुहृज्ज्ञातीन्हित्वासौरतसौहृदाः ॥ ननांदृश्यालसंवादादीनाःस्त्रैणाःकलौनराः ३७ शूद्राःप्रतिग्रहिष्यंतितपोवेषोपजीविनः ॥ धर्मंवक्ष्यंत्यधर्मज्ञाअधिरुह्योत्तमासनम् ३८ नित्यमुद्विग्नमनसोदुर्भिक्षकरकर्शिताः ॥ निरन्नेभूतलेराजन्ननावृष्टिभयातुराः ३९ वासोन्नपानशयनव्यवायस्नानभूषणैः ॥ हीनाःपिशाचसंदर्शाभविष्यंतिकलौप्रजाः ४० कलौकाकिणिकेप्यर्थेविगृह्यत्यक्तसौहृदाः ॥ त्यक्ष्यंतिहिप्रियान्प्राणान्हनिष्यंतिस्वकानपि ४१ नरक्षिष्यंतिमनुजाःस्थविरौपितरावपि ॥ पुत्रान्सर्वार्थकुशलान्क्षुद्राःशिश्नोदरंभराः ४२ कलौनराजञ्जगतांगुरुंपरंत्रिलोकनाथानतपादपंकजम् ॥ प्रायेणमर्त्याभगवंतमच्युतंयक्ष्यंतिपाषंडविभिन्नचेतसः ४३ यन्नामधेयंम्रियमाणआतुरःपतन्स्खलन्वाविवशोगृणन्पुमान् ॥ विमुक्तकर्मार्गलउत्तमांगतिंप्राप्नोतियक्ष्यंतिनतंकलौजनाः ४४ पुंसांकलिकृतान्दोषान्द्रव्यदेशात्मसंभवान् ॥ सर्वान्हरतिचित्तस्थोभगवान्पुरुषोत्तमः ४५

चूर्णिका

निर्द्रव्यं पतिं भृत्याः त्यक्ष्यंति विपन्नंभृत्यंपतयः त्यक्ष्यंति ३६ पितृभ्रात्रादीन् हित्वा सौरतसौहृदाः ननंदृश्यालसंवादाः स्त्रैणाःनराः भविष्यंति ३७ शूद्राः प्रतिग्रहीष्यंति अधर्मज्ञाः धर्मंवक्ष्यंति किं च कलौ निरन्ने भूतले सति अनावृष्टिभयातुराः वासोन्नपानशयनव्यवायस्नानभूषणैः हीनाः प्रजाः भविष्यंति ३८ ३९ ४० किं च काकिणिकेप्यर्थे वैरं कृत्वा प्राणान् त्यक्ष्यंति पितरः पुत्रान् पुत्राः पितॄन् न रक्ष्यंति ४१ ४२ हे राजन् कलौ पाखंडविभिन्नचेतसः मर्त्याः प्रायेण अच्युतं न यक्ष्यंति ४३ अहो म्रियमाणः आतुरः विवशः यन्नाम गृणन् विमुक्तकर्मार्गलः सन् उत्तमां गतिं प्राप्नोति तं न यक्ष्यंति ४४ अथ कलिदोषनिस्तारोपायमाह पुंसां चित्ते स्फुरितः भगवान् कलिकृतदोषान् हरति ४५

१ नपूजयिष्यंतीतिवापाठः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(हृदिस्थितोजन्मायुतसंबंधिपापंधुनोति) ४६ अयमेवोपायोनान्यइतिसदृष्टांतमाह । यथेति। धातुजंताम्रादिसंश्लेषजातम्। हेम्नोदुर्वर्णंमालिन्यम् । तत्रस्थितोवह्निरेवहरतिनतुतोयादि। एवं योगिनामपिविष्णुरेवनतुयोगादिकमित्यर्थः ४७ एतदेवविवृणोति विद्येति। विद्यादेवतोपासना। मैत्रीहिताचरणं । अंतरात्माचित्तं ४८ ४९ आत्मभावंस्वस्वरूपं ५० इदानींकालिंस्तौतिद्वाभ्यां। कलेर्दोषनिधेरिति ५१ तत्सर्वंहरिकीर्तनादेवकलौभवति उक्तंच "ध्यायन्कृतेयजन्यज्ञैस्त्रेतायांद्वापरेर्चयन्। यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवं" ५२ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांतृतीयोध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ चतुर्थेचचतुर्धोक्तालयानैमित्तिकादयः। तत्रसंसारनिस्तारोहरिकीर्त्यैवंवर्ण्यते ॥ १ ॥ कलिदोषनिवर्तकंहरिनामसंकीर्तनादिकंसएवचकलौपरमोधर्म इति (केनोपायेनेत्यादि) प्रश्नद्वयस्योत्तरमुक्तं। यच्चान्यत्पृष्टंप्रलयकल्पयोर्मानंब्रूहीति तदिदानींतृतीयस्कंधोक्तकालमानानुवादपूर्वकंनिरूपयति कालइति। 'सकालःपरमाणुर्वैयोभुंक्तेपरमाणुता'मित्यादिनाकालः कथितः। "चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमं। संख्यातानिसहस्राणिद्विगुणानिशतानिचे"तियुगमानंचकथितं (कल्पलयौशृणुस्थितिप्रलयमानंशृण्वित्यर्थः) १ तत्रकल्पमानमाह चतुर्युगेति (हेविशांपते) यत्रचतुर्दशमनवः क्रमेणभवंति २

श्लोकाः ४६/२

श्रुतःसंकीर्तितोध्यातःपूजितश्चादृतोपिवा ॥ नृणांधुनोतिभगवान्हृत्स्थोजन्मायुताशुभम् ४६ यथाहेम्निस्थितोवह्निर्दुर्वर्णंहंतिधातुजम् ॥ एवमात्मगतो विष्णुर्योगिनामशुभाशयम् ४७ विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजाप्यैः ॥ नात्यंतशुद्धिंलभतेऽतरात्मायथाहृदिस्थेभगवत्यनंते ४८ तस्मात्सर्वात्मनाराजन्हृदिस्थंकुरुकेशवम् ॥ म्रियमाणोह्यवहितस्ततोयासिपरांगतिम् ४९ म्रियमाणैरभिध्येयोभगवान्परमेश्वरः ॥ आत्मभावंनयत्यंग सर्वात्मासर्वसंश्रयः ५० कलेर्दोषनिधेराजन्नास्तिह्येकोमहान्गुणः ॥ कीर्तनादेवकृष्णस्यमुक्तबंधःपरंव्रजेत् ५१ कृतेयद्ध्यायतोविष्णुंत्रेतायांयजतोमखैः ॥ द्वापरेपरिचर्यायांकलौतद्धरिकीर्तनात् ५२ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥
॥ श्रीशुकउवाच ॥ कालस्तेपरमाण्वादिर्द्विपरार्धावधिर्नृप ॥ कथितोयुगमानंचशृणुकल्पलयावपि १ चतुर्युगसहस्रंचब्रह्मणोदिनमुच्यते ॥ सकल्पोयत्रमनवश्चतुर्दशविशांपते २

चूर्णिका

किंच श्रुतः संकीर्तितो ध्यातः पूजितश्चादृतोपि वा नृणां धुनोति भवान् हृत्स्थो जन्मायुताशुभम् ४६ ४७ अपि च भगवति अनंते हृदिस्थे सति अंतरात्मा यथा शुद्धिं लभते तथा विद्यातपआदिभिः न ४८ हे राजन् तस्मात्केशवं हृदिस्थं कुरु ४९ ५० कलेर्दोषनिधेराजन्अस्तिह्येको महान् गुणः कीर्तनादेव कृष्णस्य मुक्तबंधः परं व्रजेत् ५१ कृते यद्ध्यायतो विष्णुं त्रेतायां यजतोमखैः द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ५२ ॥ ॥ इति द्वादशे तृतीयः ३ ॥ ॥ ७ ॥
॥ श्रीशुक उवाच ॥ हे नृप परमाण्वादिः द्विपरार्धांतः कालः ते कथितः युगमानं च कथितम् १ अथ कल्पलयौ शृणु चतुर्युगसहस्रं ब्रह्मणः दिनं सः कल्पः यत्र मनवः चतुर्दश भवंति २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रलयस्तुचतुर्विधः नैमित्तिकः प्राकृतिकः आत्यंतिको नित्यश्चेति । तत्रनैमित्तिकंप्रलयंमानसहितमाह तदंतइतिद्वाभ्यां । (तस्यकल्पस्यांते) तावाञ्चतुर्युगसहस्रप्रमाणः संचब्राह्मीरात्रिः (उक्ता । यत्ररात्रौकल्पंतेयुज्यंते) ३ नैमित्तिकत्वंदर्शयति । यत्रयदाविश्वसृक्श्रीनारायणः विश्वमात्मसात्कृत्य स्वस्मिन्उपसंहृत्यशेते । आत्मभूर्ब्रह्माचतस्मिन् शेते (अतः) तयोरभेदविव क्षयावाब्रह्मणएवअनंतासनत्वमुक्तं । (अनंतः शेषआसनंशय्यायस्य) । ब्रह्मणोनिद्रांनिमित्तीकृत्यप्रवर्तमानोलोकत्रयप्रलयोनैमित्तिकइत्यर्थः ४ प्राकृतिकंप्रलयमाहद्वाभ्यां । द्विपरार्धेतुब्रह्मणआ युषिसप्तप्रकृतयः महदहंकारौपंचतन्मात्राणि ५ संघातः महदादिकार्यभूतः (आंडकोशोब्रह्मांडं) । प्रकृतीनांतत्कार्यब्रह्मांडस्यचलयात्प्राकृतिकइत्यर्थः । विघातेविघातकारणेउपसादिते (प्राप्ते) सति ६ तदेवाह पर्जन्यइत्यादिना । बुद्धींद्रियादिरूपेणेत्यतःप्राक्तनेनग्रंथेन । (निरन्नेअन्नाभावेसतिभक्ष्यमाणाः सत्यः क्षयंयास्यंति) ७ सामुद्रादिकंसर्वरसंरविःपिबतेआकर्षति । (सांवर्तकः प्रलयकालीनः) ८ (शेषस्यमुखादुत्थितः) अनिलवेगोत्थः वायुवेगादुद्भूतः (सर्वतोवृद्धइत्यर्थः) । आनिलवेगोवाइतिपाठेअनिलेनवेगोयस्यसः वाः रविणारश्मिभिः पीतमुदकंचदहतीत्यर्थः अ निलवेगोवैइतितुपाठःसुगमः । भूविवरान्पातालादीन्शून्यान्रविणादैहिकरसाकर्षणात्प्राणिरहितान् (दहति) ९ शिखाभिर्ज्वालाभिः १० किंचिदधिकंवर्षाणांशतंसांवर्तकः प्रलयहेतुः परो वायुर्वातितदारजसावृतंखं (आकाशं) धूम्रंभवति ११ रभसस्वनैः तीव्रगर्जितैः (नदंतिगर्जंतितदा) ब्रह्मांडविवरमध्यगतं (भस्मसाद्भूतं) विश्वंएकोदकंएकार्णवोदकंव्याप्तंभवति १२

॥१५॥

श्लोकाः ३/१२

तदंतेप्रलयस्तावान्ब्राह्मीरात्रिरुदाहृता ॥ त्रयोलोकाइमेयत्रकल्पंतेप्रलयायहि ३ एषनैमित्तिकःप्रोक्तःप्रलयोयत्रविश्वसृक् ॥ शेतेऽनंतासनोविश्वमात्म सात्कृत्यचात्मभूः ४ द्विपरार्धेत्वतिक्रांतेब्रह्मणःपरमेष्ठिनः ॥ तदाप्रकृतयःसप्तकल्पंतेप्रलयायवै ५ एषप्राकृतिकोराजन्प्रलयोयत्रलीयते ॥ आंडको शस्तुसंघातोविघातउपसादिते ६ पर्जन्यःशतवर्षाणिभूमौराजन्नवर्षति ॥ तदानिरन्नेह्यन्योन्यंभक्ष्यमाणाःक्षुधाऽर्दिताः ॥ क्षयंयास्यंतिशनकैःकालेनो पद्रुताःप्रजाः ७ सामुद्रंदैहिकंभौमंरसंसांवर्तकोरविः ॥ रश्मिभिःपिबतेघोरैःसर्वंनैवविमुंचति ८ ततःसांवर्तकोवह्निःसंकर्षणमुखोत्थितः ॥ दहत्यनिलवे गोत्थःशून्यान्भूविवरानथ ९उपर्यधःसमंताच्चशिखाभिर्वह्निसूर्ययोः ॥ दह्यमानंविभात्यंडंदग्धगोमयपिंडवत् १० ततःप्रचंडःपवनोवर्षाणामधिकंशतम् ॥ परःसांवर्तकोवातिधूम्रंखंरजसावृतम् ११ ततोमेघकुलान्यंगचित्रवर्णान्यनेकशः॥शतंवर्षाणिवर्षंतिनदंतिरभसस्वनैः॥ततएकोदकंविश्वंब्रह्मांडविवरांतरम् १२

चूर्णिका

तदंते तावान् प्रलयः सा ब्राह्मी रात्रिः यत्र त्रयो लोकाः प्रलयाय कल्पंते ३ एष नेमित्तिकः प्रलयः प्रोक्तः यत्र अनंतासनः नारायणः विश्वं संहृत्य शेते ब्रह्मा च त स्मिन् शेतेइति४अथ प्राकृतिकं प्रलयमाह ब्रह्मणः द्विपरार्धे आयुषि गते सति महदहंकारपंचतन्मात्ररूपाः सप्तप्रकृतयः प्रलयायकल्पंते एषः प्राकृतिकः प्रलयः यत्र अंड कोशः लीयते ५ ६ तदा पर्जन्यः शतं वर्षाणि भूमौ न वर्षति तेन निरन्नेसति क्षुधार्दिताः प्रजाः अन्योन्यं भक्ष्यमाणाः सत्यः क्षयं यास्यंति ७ ततः सांवर्तको रविः सर्वंरसं रश्मिभिः आकर्षति नैव मुंचति ८ ततः संकर्षणमुखोत्पन्नः अग्निः भूविवरान् दहति ९ उपर्यधः समंताच्च शिखाभिः वह्निसूर्ययोः दह्यमानं विभात्यंडं दग्ध गोमयपिंडवत् १० ततः संवर्तको वायुः वर्षाणां अधिकं शतं वाति ११ ततः नृपमेघकुलानि वर्षशतं वर्षंति ततः एकोदकं विश्वं भवति १२

१ सैवेत्यपिपाठः क. पु. वर्तते.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

॥१६॥ उदप्लवेउदकेनाप्लावितेसतिप्रलयत्वायअब्भावाय (कल्पते । अप्सुलीयतेइत्यर्थः) १३ अथतेजोऽग्निः अपांगुणंरसंग्रसते । अतोनीरसास्ताआपः तेजसिलीयंते । तद्रहितंरूपरहितं १४ वायोर्गुणं स्पर्शंखमाकाशः ।) १५ भूतादिस्तामसोहंकारः (तमनुभूतादिंप्रति । तैजसश्चाहंकारइंद्रियाणिग्रसते । वैकारिकस्तुदेवान्अधिदैवतानि) । गुणैर्वृत्तिभिः सह १६ अव्याकृतंप्रधानं १७ तस्यतु लयोनास्तीत्याह । नतस्येति । कालावयवैरहोरात्रादिभिः (परिणामादयो) गुणाभावविकाराः (तस्यअव्याकृतस्यनसंति । तत्र) परिणामोविपरिणामः । अव्यक्तंअस्तित्वविकारशून्यं । नित्यं सर्वदैकरूपंह्रासवृद्धिरहितमित्यर्थः । अव्ययंअपक्षयशून्यं । (अनादिजन्मशून्यं । अनंतंनाशशून्यं ।) सर्वत्रहेतुः कारणमिति १८ किंच । वागादिगोचरस्यसविशेषस्यविकाराभवंतिइदंतुनतथे त्याह । नयत्रेतिद्वाभ्यां । लोककल्पः लोकरूपः संनिवेशोरचनाविशेषः नास्ति १९ स्वप्नजाग्रत् । स्वप्नजागरावस्थायुक्तं । सुषुप्तवत्इंद्रिया (-द्य-) भावात् । शून्यसादृश्येहेतुः । अप्रतर्क्यं । नपुनः शून्यमेवेत्याह । तदिति २० उपसंहरति लयइति शक्तयः सत्वादयः (कालविद्रुताः कालेनसमाप्तजीवनावधयः । अतएवविवशाः कालाधीनाः) २१ । आत्यंतिकंलयमाह । बुद्धींद्रियेतिद्वादश भिः। आत्यंतिकलयो (नाम) मोक्षः सचब्रह्मज्ञानेनसर्वप्रपंचलयात्मकः । नचप्रपंचस्यात्मवत्सत्यत्वेलयः संभवतीतिज्ञानरूपाद्ब्रह्मणः पृथग्भूतस्य तस्यासत्त्वमुपपादयति । बुद्धिश्चइंद्रियाणिचअ र्थाश्च (विषया) इत्येवंग्राहककरणग्राह्यरूपेण (तदाश्रयं) तेषांबुद्ध्यादीनां (आश्रयभूतंज्ञानमेवभाति) ब्रह्मैवप्रकाशते (नपृथक्) बुद्ध्यादि तत्रहेतुमाह दृश्यत्वाव्यतिरेकाभ्यामिति । अतोय दाद्यंतवत्तदवस्तुअत्रैवंप्रयोगः विमतंसन्नभवति । दृश्यत्वात्कारणाव्यतिरेकात्आद्यंतवत्वाच्च । रज्जुसर्पादिवादिति २२

श्लोकाः १३/२२

तदाभूमेर्गंधगुणंग्रसंत्यापउदप्लवे ॥ ग्रस्तगंधातुपृथिवीप्रलयत्वायकल्पते १३ अपांरसमथोतेजस्तालीयंतेथनीरसाः ॥ ग्रसतेतेजसोरूपंवायुस्तद्रहितं तदा १४ लीयतेचानिलेतेजोवायोःखंग्रसतेगुणम् ॥ सवैविशतिखंराजंस्ततश्चनभसोगुणम् १५ शब्दंग्रसतिभूतादिर्नभस्तमनुलीयते ॥ तैजसश्चेंद्रि याण्यंगदेवान्वैकारिकोगुणैः १६ महान्ग्रसत्यहंकारंगुणाःसत्वादयश्चतम् ॥ ग्रसतेऽव्याकृतंराजन्गुणान्कालेनचोदितम् १७ नतस्यकालावयवैःपरिणा मादयोगुणाः ॥ अनाद्यनंतमव्यक्तंनित्यंकारणमव्ययम् १८ नयत्रवाचोनमनोनसत्त्वंतमोरजोवामहदादयोमी ॥ नप्राणबुद्धींद्रियदेवतावानसन्निवेशः खलुलोककल्पः १९ नस्वप्नजाग्रन्नचतत्सुषुप्तंनखंजलंभूरनिलोग्निरर्कः ॥ सुषुप्तवच्छून्यवदप्रतर्क्यंतन्मूलभूतंपदमामनंति २० लयःप्राकृतिकोह्येष पुरुषाव्यक्तयोर्यदा ॥ शक्तयःसंप्रलीयंतेविवशाःकालविद्रुताः २१ बुद्धींद्रियार्थरूपेणज्ञानंभातितदाश्रयम् ॥ दृश्यत्वाव्यतिरेकाभ्यामाद्यंतवदवस्तुयत् २२

चूर्णिका

॥१६॥ तदाच भूमेः गंधं गुणं आपः ग्रसंति ग्रस्तगंधा भूः नश्यति १३ ततः तेजः अपांरसं ग्रसते ताः आपः तेजसि लीयंते वायुः तेजसोरूपं ग्रसते तत्तेजः वायौ लीयते वायोः गुणं स्पर्शं खं ग्रसते सः वायुः खे लीयते १४ तामसोहंकारः शब्दं ग्रसति १५ सात्विकः अहंकारः देवान् ग्रसति राजसः अहंकारःइंद्रियाणि ग्रसति महान् अहं कारं ग्रसति महांतं त्रयो गुणाः ग्रसंते गुणान् प्रधानं ग्रसति सैव प्रकृतिः सा नित्या एषः प्राकृतिको लयः १६ १७ १८ १९ २० २१ आत्यंतिकं लयमाह ब्रह्मज्ञानेन सर्वप्रपंचप्रलयो भवति एषः आत्यंतिकोलयः मोक्ष इत्युच्यते २२

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

तत्राव्यतिरेकंदृष्टांतेनप्रपंचयति दीपइति । दीपचक्षुरूपाणांतेजोविशेषाणांयथातेजसोनव्यतिरेकः तथाधीः कर्त्री । खानि (श्रोत्रादीनि) करणानि । मात्राविषयाःऋतात्ब्रह्मणः पृथग्नस्युःब्रह्मकार्यत्वात् । नन्वेवंकार्यकारणयोरभेदेकार्यासत्वेकारणस्याप्यसत्त्वंप्रसज्येत तत्राह अन्यतमादिति (अन्यतमं) कार्यादत्यंतव्यतिरिक्तंतस्मात्ब्रह्मणः । प्रपंचाद्ब्रह्मणोस्तिव्यतिरेकः प्रपंचस्यतुततोनास्तिव्यतिरेकइत्यर्थः २३ यदातुबुद्धेरसत्त्वंतदातदवस्थानांसुतरामसत्वमित्याशयेनाह । बुद्धेरिति । ननु विश्वतैजसप्राज्ञानांएताअवस्थानबुद्धेरित्याशंक्याह । मायामात्रमिति । इदंविश्वतैजसप्राज्ञरूपं (प्रत्यगात्मनिकूटस्थस्वरूपेयन्नानात्वंतन्मायैव । नतुवास्तवमित्यर्थः) २४ आद्यंतवत्वादित्यस्यहेतोरासिद्धिमाशंक्य सावयवत्वेनसाधयति यथेति (भवंतिउत्पद्यंते । नभवंतिनश्यंति) अवयवीति । यत्सावयवंतदाद्यंतवत् । घटादिवदित्यर्थः अतउदयाप्ययात्आद्यंतवत्त्वात्विश्वंसन्नभवतीत्यर्थः । यद्वा पृथगेवागमापायित्वाद्विश्वंमिथ्या । ब्रह्मतुतदवधित्वात्सत्यमित्यनेनसाध्यते । दृष्टांतस्तुपूर्वोक्तएव । यथाजलधराव्योम्नीति दृष्टांतस्त्वागमापायितदवधित्वमात्रे नतुमिथ्यात्वे (जलधराणामपिव्यावहारिकसत्यत्वादिति) २५ अन्यतमाद्दतादितिप्रतिज्ञातंकारणस्यसत्यत्वमुपपादयति सत्यंहीति । अवयवःकारणंप्रोक्तः "वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्य"मित्यादिश्रुतिभिः । अत्रयुक्तिमपिदर्शयति । विनेति । अंगहेराजन् हियस्मात् अर्थेनअवयविनाविनापृथगेवअवयवाः प्रतीयेरन् । यथा पटस्यावयवास्तंतवः पटात्पृथक्प्रतीयंते (नतुपटस्ततंतुभ्यः) तद्वदिति २६ ननु कार्याभावेकारणत्वंब्रह्मणः कुतोघटेत । सत्यं । तदपिनातीवसत्यमित्याह यदिति । सामान्यंकारणं विशेषःकार्यं तद्रूपेणअन्योन्यापाश्रयात् परस्परापेक्षत्वेनानिरूपणासहत्वादित्यर्थः । अतःकारणत्वंअवधित्वंव्यापकत्वमित्यादिकमपि । यत्परोपक्षत्वादाद्यंतवत् तत्सर्वमवस्त्वित्यर्थः । यद्वा तत्रैवहेत्वंतरमेतत् । यदुपलभ्येतसभ्रमःसामान्यविशेषरूपत्वात् स्वप्नवत् । अन्योन्यापाश्रयादितीदमपिहेत्वंतरंगुणगुणिविशेषणविशेष्यव्याप्यव्यापकत्वादिरूपेणपरस्पराधीनसिद्धत्वात् । तथाभूतस्वप्नवदिति । निगमनंअतोयदाद्यंतवत् तत्सर्वमवस्त्विति २७ तदेवमनेकैर्हेतुभिःप्रपंचस्यासत्त्वंप्रसाधितम् । तत्रशंका । ननु प्रपंचस्यापिप्रकाशमानत्वादात्मवत्सत्त्वांकिंनस्यादितितत्राह । विकारइति । ख्यायमानः प्रकाशमानोपिविकारः प्रपंचःप्रत्यगात्मप्रकाशंविनाऽणुमात्रोपिनानिरूप्योस्ति । तंविनानिरूप्यः स्याच्चेत्तर्हिसोपिचित्समः स्यात्चिद्रूपेणात्मनासमः स्वप्रकाशोभवेत् । तथा चसतिसोप्यात्मवत्स्यात् । एकरूपः स्यादित्यर्थः २८ कुतइत्यतआह । नहीति (सत्यस्यब्रह्मणः) ननु सत्यस्याप्यात्मनोजीवब्रह्मरूपंनानात्वमस्त्येवतत्राह । यद्येवंनानात्वंमन्यतेतर्हिअविद्वान् (अज्ञएव) कथंतर्हितयोर्भेदव्यवहारः (स)उपाधिकृतइत्याह । नानात्वमिति । छिद्रयोर्घटाकाशमहाकाशयोरिवेतिपरिच्छेदापरिच्छेदेदृष्टांतः । ज्योतिषोःआकाशजलस्थसूर्ययोरिवेतिउपाधिकृतविकारसदसद्भावे । वातयोर्बाह्यशरीरस्थवाय्वोरिवेतिक्रियाभेदे २९

॥१७॥

श्लोकाः २३—२९

दीपश्चक्षुश्चरूपंचज्योतिषोनपृथग्भवेत् ॥ एवंधीःखानिमात्राश्चनस्युरन्यतमादृतात् २३ बुद्धेर्जागरणंस्वप्नःसुषुप्तिरितिचोच्यते ॥ मायामात्रमिदंराजन्नानात्वंप्रत्यगात्मनि २४ यथाजलधराव्योम्निभवंतिनभवंतिच ॥ ब्रह्मणीदंतथाविश्वमवयव्युदयाप्ययात् २५ सत्यंह्यवयवःप्रोक्तःसर्वावयविनामिह ॥ विनार्थेनप्रतीयेरन्पटस्येवांगतंतवः २६ यत्सामान्यविशेषाभ्यामुपलभ्येतसभ्रमः ॥ अन्योन्यापाश्रयात्सर्वमाद्यंतवदवस्तुयत् २७ विकारःख्यायमानोपिप्रत्यगात्मानमंतरा ॥ ननिरूप्योस्त्यणुरपिस्याच्चेच्चित्समआत्मवत् २८ नहिसत्यस्यनानात्वमविद्वान्यदिमन्यते ॥ नानात्वंछिद्रयोर्यद्वज्ज्योतिषोर्वातयोरिव २९

॥१७॥

चूर्णिका २३ २४ २५ २६ २७ २८ २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

ब्रह्मणएवप्रपंचव्यवहारालंबनत्वंदृष्टांतेनस्पष्टयति । यथेति । क्रियाभिस्तत्तद्रचनाभेदैर्बहुधाकटककुंडलादिरूपेण (समीयतेसंज्ञायते । एवं) लौकिकवैदिकैर्वचोभिःजनैरहंकारोपहितैः ३० नन्वहंकारस्यकथंब्रह्मस्वरूपावरणेनभेदव्यवहारहेतुत्वम् । तस्यस्वकारणभूतब्रह्मावरकत्वासंभवात्आवरणेवास्वस्यापिप्रकाशासंभवादित्याशंक्य सदृष्टांतमाह । यथेति । अर्करश्मयएवमेघरूपेणपरिणताव र्षंति । "अग्नौप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठति । आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजा"इत्यादिवचनात् । तस्मादर्कप्रभवःअर्केणैवदर्शितः प्रकाशितश्च (चक्षुषः) तमो (भवति) स्वरूपभूतार्कदर्शनप्रतिबंधकोभवति । अहंअहंकारः ब्रह्मगुणः ब्रह्मकार्यभूतःतदीक्षितः तेनैवप्रकाशितश्चआत्मनोजीवस्यआत्मबंधनःब्रह्मस्वरूपदर्शनप्रतिबंधकोभवति ३१ अतएवाहंकारनाशेस्वरूपदर्शनंभवतीतितेनैवदृष्टांतेनाह घनइति । (स्वरूपंस्वस्यप्रकाशकं) आत्मनउपाधिःजिज्ञासयाविचारेण (यदानश्यति) तर्हितदाअनुस्मरेत्ब्रह्माहमितिपश्यतीत्यर्थः ३२ सोयमात्यंतिकःप्रलयइत्युपसंहरति ।

॥१८॥ यदैवमिति । विवेकहेतिनाज्ञानशस्त्रेण (मायापरिणामरूपं) अहंकरणमेवआत्मबंधनंछित्त्वाअच्युतंपरिपूर्णआत्मानमनुभवति (साक्षात्करोति) इतितथा (-भूतोऽवतिष्ठतेतंतादृशावस्थानरूपंअसंप्रज्ञातसमाधिमितियावत्आत्यंतिकंसंप्लवंप्रलयमाहुः) ३३ नित्यप्रलयमाह नित्यदेति (सूक्ष्मंनित्यप्रलयादिकंजानंतीतितथा) ३४ कुतइत्यतआह । कालेति। परिणामिनांनदीप्रवाहप्रदीपज्वालादीनां (उत्पत्तिगतिसंभूतार्योः) उच्चनीचावस्थाः (नैरंतर्येणपरिदृश्यमाना) स्ताःकालरूपस्रोतसोवेगेनआशुह्रियमाणस्यदेहादेर्दृश्यमानास्तद्वदेवनित्यदाजन्मप्रलयहेतवोभवंति (तत्र) देहःप्रतिक्षणंप्रध्वंसीप्रतिक्षणमवस्थाभेदस्यविद्यमानत्वात्प्रदीपदीपवदित्यनुमानं ३५ यदिप्रतिक्षणंअवस्थाभवंतितर्हिकिंनदृश्यंतेअतोहेतुरसिद्धइत्याशंक्याह । अनाद्यंतवताकालेनजायमानाअवस्थाः । (स्थूलदर्शिभिर्नैव) लक्ष्यंते । आकाशेगच्छतांज्योतिषांचंद्रादीनांगमनावस्थाविशेषायथानैवलक्ष्यंतेतद्वत् । अतोयथातेषांप्रदेशांतरप्राप्त्याप्रतिक्षणंगत्यवस्थाःकल्प्यंते । तद्वदत्रापिबाल्यतारुण्यादिदर्शनेनमध्यवर्तिन्यो (निरंतरा) अवस्थाउत्पत्तिप्रलयरूपाःकल्प्यंतइतिनहेतुरसिद्धइत्यर्थः ३६ उपसंहरति नित्यइति ३७

श्लोकाः ३०—३७

यथाहिरण्यंबहुधासमीयतेनृभिःक्रियाभिर्व्यवहारवर्त्मसु ॥ एवंवचोभिर्भगवानधोक्षजोव्याख्यायतेलौकिकवैदिकैर्जनैः ३० यथाघनोर्कप्रभवोऽर्कदर्शितोह्यर्कांशभूतस्यचचक्षुषस्तमः ॥ एवंत्वहंब्रह्मगुणस्तदीक्षितोब्रह्मांशकस्यात्मनआत्मबंधनः ३१ घनोयदार्कप्रभवोविदीर्यतेचक्षुःस्वरूपंरविमीक्षते तदा ॥ यदाह्यहंकारउपाधिरात्मनोजिज्ञासयानश्यतितर्ह्यनुस्मरेत् ३२ यदैवमेतेनविवेकहेतिनामायामयाहंकरणात्मबंधनम् ॥ छित्त्वाच्युतात्मानुभवोवतिष्ठतेतमाहुरात्यंतिकमंगसंप्लवम् ३३ नित्यदासर्वभूतानांब्रह्मादीनांपरंतप ॥ उत्पत्तिप्रलयावेकेसूक्ष्मज्ञाःसंप्रचक्षते ३४ कालस्रोतोजवेनाशुह्रियमाणस्यनित्यदा ॥ परिणामिनामवस्थास्ताजन्मप्रलयहेतवः ३५ अनाद्यंतवतानेनकालेनेश्वरमूर्तिना ॥ अवस्थानैवदृश्यंतेवियतिज्योतिषामिव ३६ नित्योनैमित्तिकश्चैवतथाप्राकृतिकोलयः ॥ आत्यंतिकश्चकथितःकालस्यगतिरीदृशी ३७

चूर्णिका

३० ३१ ३२ ३३ नित्यप्रलयमाह नित्यदा सर्वभूतानां ब्रह्मादीनांपरंतप उत्पत्तिप्रलयावेके सूक्ष्मज्ञाः संप्रचक्षते ३४ कुत इत्यत आह कालरूपस्रोतसो वेगेन नदीप्रवाहदीपज्वालादीनां याउच्चावचावस्थास्ताः यथा स्पष्टतया न दृश्यंते तद्वद्देहादेरपि इति नित्यप्रलयः एवं चतुर्विधो लयः ते कथितः ३५ ३६ ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

पुराणार्थमुपसंहरति । एताइति । लीलाविषयाःकथाः (समासतःसंक्षेपतः समस्ताइतिपाठेसंक्षिप्ताः ।) अजोब्रह्मापिकात्स्न्येन (साकल्येन) अभिधातुंनेशः ३८ ननु यदिसाकल्ये नाभिधातुंनशक्यंतेतर्हिंकिंतदभिधानेन तत्राह संसारेति विविधं दुखमेवदवोदावानलस्तेनार्दितस्यपीडितस्य । (संसारसिंधुस्तुसर्वोपिदुःखरूपएवस्वस्मिन्निमग्नस्यदाहंहर्तुंनकथमपिक्षमः प्रत्युतदुस्तरश्च) अतः (तं) उत्तितीर्षोःपुंसःभगवतोयालीलास्तासांकथास्तासांरसस्तन्निषेवणमंतरेणान्यःप्लुवउत्तरणसाधनंनभवेत् । उपायांतरासंभवात्तत्कथाश्रवणमेवयथाशक्तिनिषेव्यमित्यर्थः ३९ श्रोतुरादरार्थायसंप्रदायप्रवृत्तिमाह । पुराणसंहितामितित्रिभिः । (सनारदोव्यासायप्राह)। ४० सवैबादरायणः (व्यासः) प्रीतःसन्मह्यमिमांसंहितांप्राहेतिपूर्वेणान्वयः ४१ असौसूत इति पुरतःस्थितमंगुल्यानिर्दिश्याह (नैमिषालयेनैमिषारण्यस्थाने ४२ इतिद्वादशेटीकायांचतुर्थोध्यायः ४ ॥ ७ ॥ ॥ पंचमेतुसमासेनपरब्रह्मोपदेशतः । राज्ञस्तक्षकसंदंशान्मृत्युभीतिनिवारणं॥१॥ एतत्पुराणंशृण्वन्नभयंप्राप्नोतीत्यभिप्रेत्यपुराणार्थमनुस्मारयति अत्रेति (अयंभावः । जगत्कर्ताब्रह्मापियस्यप्रसादजः प्रसादोत्ररजोवृत्तिर्हर्षः । ततोजातत्वात्तत्परतंत्रः । सर्वसंहर्तारुद्रश्चयस्यक्रोधसंभवोनतुस्वतंत्रःसविश्वस्यात्मानियंताभगवानत्रापिवर्ण्यते । अतएवंभूतंभगवंतंशृण्वतःकुतोन्यस्माद्भयशंकेति १ त्वंपुनःकृतार्थएवेतिअनुस्मारयति त्वंत्विति (मरिष्यामीति) पशुबुद्धिमविवेकं । (संधिरार्षः) यस्मात्त्वंननंक्ष्यासि । कुतइत्यतआह । नजातइति । यथादेहःप्रागभूतएवाद्यजातोनंक्ष्यतिच । नचैवंत्वंपूर्वंनाभूःनचाद्यजातोसिअतोननंक्ष्यासि २

श्लोकाः ३८/२

एताःकुरुश्रेष्ठजगद्विधातुर्नारायणस्याखिलसत्त्वधाम्न ॥ लीलाकथास्तेकथितासमासतःकार्त्स्न्येननाजोप्यभिधातुमीशः ३८ संसारसिंधुमतिदुस्तरमुत्तितीर्षोर्नान्यःप्लवोभगवतःपुरुषोत्तमस्य ॥ लीलाकथारसनिषेवणमंतरेणपुंसोभवेद्विविधदुःखदवार्दितस्य ३९ पुराणसंहितामेतामृषिर्नारायणोऽव्ययः नारदायपुराप्राहकृष्णद्वैपायनायसः ४० सवैमह्यंमहाराजभगवान्बादरायणः ॥ इमांभागवतींप्रीतःसंहितांवेदसंमिताम् ४१ एतांवक्ष्यत्यसौसूतऋषिभ्यो नैमिषालये ॥ दीर्घसत्रेकुरुश्रेष्ठसंपृष्टःशौनकादिभिः ४२ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेचतुर्थोध्यायः ४ ॥ ॥ ७ ॥ ॥
॥ श्रीशुकउवाच ॥ अत्रानुवर्ण्यतेभीक्ष्णंविश्वात्माभगवान्हरिः ॥ यस्यप्रसादजोब्रह्मारुद्रःक्रोधसमुद्भवः १ त्वंतुराजन्मरिष्येतिपशुबुद्धिमिमांजहि ॥ नजातःप्रागभूतोद्यदेहवत्त्वंननंक्ष्यसि २

चूर्णिका

हे राजन् नारायणस्यलीलाकथाः संक्षेपेण ते कथिताः कात्स्न्येन वक्तुं अजोपि नेशः ३८ किं च संसारसिंधुंतर्त्तुमिच्छोः पुंसः हरिलीलाकथारससेवनं विना अन्यः प्लवो न ३९ हे नृप एतां संहितां ऋषिर्नारायणः नारदाय प्राह सः व्यासायप्राह ४० व्यासः मह्यं जगौ इमां वेदतुल्यां संहितां ४१ असौ सूतः नैमिषारण्ये ऋषिभ्यः वक्ष्यति श्रोतुः आदरदार्ढ्याय इयं संप्रदायप्रवृत्तिरुक्ता ४२ ॥ ॥ इति द्वादशे चतुर्थः ४ ॥॥ ॥ ७ ॥ ॥ श्रीशुक उवाच ॥ अत्रानुवर्ण्यतेभीक्ष्णंविश्वात्मा भगवान् हरिः यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः १ एवंभूतं हरिंशृण्वतः कुतोन्यस्मात् भयंशंका हे नृप त्वं तु कृतार्थोसि अतः अहं मरिष्ये इति इमां पशुबुद्धिं त्वं जहि यथा देहः प्राक् अभूतः एव अद्य जातः सः नंक्ष्यति २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

न नु बीजादंकुरवत् स्वस्मात् पुत्ररूपेणस्वयमेवभवति। यथाह श्रुतिः। "अंगादंगात्संभवसिहृदयादभिजायसे। आत्मावैपुत्रनामासिसजीवशरदःशतामि"ति। ततः पुनरंकुराद्बीजमिवपौत्ररूपेणापिस्वयमेवभवति 'पितापुत्रेणपितृमान् योनियोना'वितिश्रुतेः। अतस्तेषुनश्यत्सुकथंननंक्ष्यामीतिचेत्तत्राह। नभविष्यसीति। भूत्वा (जन्मप्राप्यततः) पुत्रपौत्रादिरूपवान्बीजांकुरवन्नभविष्यसि। यस्माद्देहादेर्व्यतिरिक्तस्त्वम्। यथाऽनलः काष्ठात्। देहाद्देहोजायते नात्मेतिभावः ३ जन्मादीनांदेहधर्मत्वंदृष्टांतेनप्रपंचयति। स्वप्नेयथाआत्मनः शिरश्छेदंस्वयंपश्यति। एवंजागरणेपियस्माद्देहस्य पंचत्वादि (-मरणादि-)कं पश्यति (पित्रादिदृष्टांतेनानिश्चिनोति) ततःस्वप्नवदेवआत्मनइदंभ्रममात्रं। वस्तुतश्चात्माजोऽमरश्चेत्यर्थः तदुक्तम्। "आत्मनःपितृपुत्राभ्यामनुमेयौभवाप्ययौ। नभवाप्ययवस्तूनामभिज्ञोद्वयलक्षण"इत्यादि ४ यस्माद्देहोपाधिकोयमात्मनोजन्मादिसंसारभ्रमःतस्मादुपाधिनिवृत्तौमुच्यतइतिसदृष्टांतमाह। घटइति। यथा पुरा घटोपाधेः पूर्वमिवपुनः घटेभिन्नेतदंतर्वर्त्यवकाशआकाशएवस्याद्यथा। एवंदेहेपुनर्मृतेतत्त्वज्ञानेनलीनेसति (जीवोब्रह्मसंपद्यते'ब्रह्मविद्ब्रह्मैवभवती'तिश्रुतेः) ५ ज्ञानेनलयंसंभावयितुंमायाकृतमात्मनोदेहाद्युपाधिसंबंधप्रकारमाह। मनइति। मनः (कर्तृ) आत्मनोदेहादीन् सृजति। तच्चमनःमायासृजति। ततोमायाद्युपाधिसमुदायात् जीवस्यसंसृतिःनस्वतः ६ यस्मादुपाधिनिबंधनोजीवस्यसंसारोतस्तन्नाशेजीवत्वंगच्छतीति एतदेवसदृष्टांतमाहसार्धेन। स्नेहेति (अधिष्ठानंतैलाद्याधारभूतःपात्रविशेषः। यावत्स्नेहादितावत्कालम्)दीपस्य ज्योतिषः दीपत्वंज्वालारूपःपरिणामः(ईयतेदृश्यतेइत्यर्थः) तत्रतैलस्थानीयंकर्मतदधिष्ठानस्थानीयंमनः वर्तिस्थानीयोदेहः। अग्निसंयोगस्थानीयश्चैतन्याध्यासः दीपस्थानीयः संसारइति योज्यं। ततोदेहकृतःदेहेनानिर्मित. देहनिबंधन (इत्यर्थः) यद्वा देहकृतोमनसोनत्वात्मनः ७ अतोदीपवत्संसारएवनश्यीत नत्वात्मावह्निवदित्याह नेति। नतुतत्रप्रतीयमानआत्मा। कुतइत्यतआह। यइतिव्यक्ताव्यक्तयोः स्थूलसूक्ष्मदेहयोःपरः अन्यः। यतः स्वयंज्योतिः। परत्वंप्रपंचया ति आकाशइवेति। आधारोदेहादेःप्रपंचस्य। ध्रुवोनिर्विकारः। नास्त्यंतउपमाचयस्यसोऽनंतोपमः। ततोविभुः ८

॥२०॥

श्लोकाः ३/८

नभविष्यसिभूत्वात्वंपुत्रपौत्रादिरूपवान् ॥ बीजांकुरवद्देहादेर्व्यतिरिक्तोयथाऽनलः ३ स्वप्नेयथाशिरश्छेदंपंचत्वाद्यात्मनःस्वयम् ॥ यस्मात्पश्यतिदेहस्यततआत्माह्यजोऽमरः ४ घटेभिन्नेयथाकाशआकाशःस्याद्यथापुरा ॥ एवंदेहेमृतेजीवोब्रह्मसंपद्यतेपुनः ५ मनःसृजतिवैदेहान्गुणान्कर्माणिचात्मनः ॥ तन्मनःसृजतेमाया ततोजीवस्यसंसृतिः ६ स्नेहाधिष्ठानवर्त्यग्निसंयोगोयावदीयते ॥ ततोदीपस्यदीपत्वमेवंदेहकृतोभवः ॥ रजःसत्त्वतमोवृत्त्याजायतेथविनश्यति ७ नतत्रात्मास्वयंज्योतिर्योव्यक्ताव्यक्तयोःपरः ॥ आकाशइवचाधारोध्रुवोऽनंतोपमस्ततः ८

चूर्णिका

न चैवं त्वं पूर्वं नाभूः नचाद्यजातोसि अतो न नंक्ष्यसि ननु बीजांकुरवत् स्वस्मात्पुत्ररूपेण स्वयमेवभवति ततःपुनः अंकुरात् बीजमिव पौत्ररूपेणापिस्वयमेव भवति अतः तेषुनश्यत्सु कथं न नंक्ष्यामीति चेत् तत्राह हे राजन् त्वंतुपुत्रपौत्रादिरूपवान् बीजांकुरवत् नभविष्यसि यतः देहादेः भिन्नः त्वं यथा अग्निः काष्ठात् भिन्नः एवं च देहात् देहोजायते नात्मेति अतोभिन्नः ३ किं च यथा स्वप्ने स्वशिरश्छेदं स्वयं पश्यति एवं जागरणेपि यस्माद्देहस्य पंचत्वादिकं पश्यति तथा आत्मनः इदं भ्रममात्रम् वस्तुतः आत्मा अजरामरः ४ किंच यथा घटे भिन्ने घटाकाशः महाकाशः स्यात् एवं देहे तत्त्वज्ञानेन लीने सति जीवःपुनः ब्रह्म संपद्यते ५ मनदेहादीन् सृजति तत्प्रति मायासृजति ततः मायाद्युपाधिसमुदायात् जीवस्य ससारः न वस्तुतः ६ ७ ८

१ भवाप्ययवतांवस्तूनाम भिज्ञोद्रष्टानद्वयलक्षणःभवाप्ययवान्नेत्यर्थः। २ ज्योतिरिवेतिवापाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतस्त्वमेवंचिंतयेत्याह । एवमिति । आत्मस्थंदेहाद्युपाधिस्थितं (आत्मनैवस्वयमेव) अनुमानगर्भिण्याद्रष्टृदृश्यान्वयव्यतिरेकयुक्तया (वासुदेवानुस्मरणयुक्तयाबुद्ध्या) आमृशविचारय ९ एवं
चसतित्वांतक्षकोनदहेदित्याह । चोदितइति । तत्रहेतवः मृत्यवइति । मृत्युहेतवः (मृत्यूनांसंसारदुःखानां मृत्युंविनाशकंईश्वरं परमात्मानं नोपधक्ष्यंति) १० विमर्शप्रकारंदर्शयन्तक्षकादर्शनंदर्श
यतिद्वाभ्यां अहामिति । योहंसः (परंधाम) ब्रह्मैवयत् (परंपदं) ब्रह्मतदहमेवेतिसमीक्षन् (अखंडंभावयन्) तत्राहंब्रह्मेतिभावनयाजीवस्यशोकादिनिवृत्तिः । ब्रह्माहमितिभावनयाचब्रह्मणः पारो
क्ष्यनिवृत्तिर्भवतीतिव्यवहारोदार्शितः । निष्कलेनिरुपाधौआत्मनिब्रह्मणि (आत्मानंप्रतीचम्) ११ विषयुक्तैराननैर्दशंतंग्रसंतंतक्षकंलेलिहानंसर्पं यद्वा लेलिहानंजिह्वाभिरोष्ठप्रांतंभृशंलिहंतम् ।
आत्मनः पृथक् (नद्रक्ष्यासि) १२ हरेश्चेष्टांआत्मात्वं यथांपृष्टवान् तदेतत्तेकथितं (मया) शिष्यस्यकृतार्थतापरीक्षणायपृच्छति किमिति ॥ १३ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटी
कायांप्रमाणलक्षणंनामपंचमोऽध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ पष्ठेपरिक्षितोमोक्षःसर्पहोमादितत्सुतात् ॥ वेदशाखाविभागोक्तौत्रिवेदीव्यासवर्णनम् ॥ १ ॥ एतत्पुराणंनिशम्यानिखिलात्माहरि
स्तंपश्यतिनिखिलंवात्मानिपश्यतीतितथातेनअतःसमेन (रागद्वेषरहितेनमुनिनाकथितं) नतेनअवनतेनमूर्ध्नातत्पादपद्ममुपसृत्यतस्यपादौशिरासिनिधायेत्यर्थः १ सिद्धःकृतार्थोस्मि । यतःअनुगृही
तोस्मि । अनुग्रहमेवाह । यत्यस्मात् श्रावितः चशब्दात्तत्प्राप्तिसाधनं (भक्तिज्ञानवैराग्यलक्षणं) चश्रावितम् २ करुणात्मतामभिनंदतिद्वाभ्यां नात्यद्भुतमिति ३

एवमात्मानमात्मस्थमात्मनैवामृशप्रभो ॥ बुद्ध्यानुमानगर्भिण्यावासुदेवानुचिंतया ९ चोदितोविप्रवाक्येननत्वांधक्ष्यतितक्षकः ॥ मृत्यवोनोपधक्ष्यंति
मृत्युनांमृत्युमीश्वरम् १० अहंब्रह्मपरंधामब्रह्माहंपरमंपदम् ॥ एवंसमीक्षन्नात्मानमात्मन्याधायनिष्कले ११ दशंतंतक्षकंपादेलेलिहानंविषाननैः ॥
नद्रक्ष्यसिशरीरंचविश्वंचपृथगात्मनः १२ एतत्तेकथितंतातयथात्मापृष्टवान्नृप ॥ हरेर्विश्वात्मनश्चेष्टांकिंभूयःश्रोतुमिच्छसि ॥ १३ ॥ ॥ इतिश्रीभागव
तेमहापुराणेद्वादशस्कंधेप्रमाणलक्षणंनामपंचमोध्यायः ॥ ५ ॥ ॥ ७ ॥ ॥ सूतउवाच ॥ एतन्निशम्यमुनिनाभिहितंपरिक्षित्व्यासात्मजे
नानिखिलात्मदृशासमेन । तत्पादपद्ममुपसृत्यनतेनमूर्ध्नाबद्धांजलिस्तमिदमाहसविष्णुरातः १ राजोवाच ॥ सिद्धोस्म्यनुगृहीतोस्मिभवताकरुणात्मना ॥
श्रावितोयच्चमेसाक्षादनादिनिधनोहरिः २ नात्यद्भुतमहंमन्येमहतामच्युतात्मनाम् ॥ अज्ञेषुतापतप्तेषुभूतेषुयदनुग्रहः ३

चूर्णिका

हे प्रभो एवं अनुमानगर्भिण्या बुद्ध्या वासुदेवानुचिंतया ९ देहाद्युपाधिस्थं स्वप्रकाशं आत्मानं आत्मनैव विचारय एवं कृते विप्रनोदितः तक्षकः त्वां न धक्ष्यति १०
अपि च योऽहं स ब्रह्मैव यत् ब्रह्म तत् अहमेव एवं समीक्षन् निरुपाधौ आत्मनि आत्मानं आधाय पादेविषाननैः दशंतं तक्षकं शरीरं विश्वं च आत्मनः पृथक्
न द्रक्ष्यसि ११ १२ एतत् ते कथितं तात यथात्मापृष्टवान्नृप हरेर्विश्वात्मनश्चेष्टां किंभूयः श्रोतुमिच्छसि १३ ॥ ॥ इति द्वादशे पंचमः ५ ॥ ॥ ७ ॥
॥ सूत उवाच ॥ ॥ एवं राजा परीक्षित् शुकोक्तं निशम्य तत्पादपद्मं उपसृत्य बद्धांजलिः सन् इदं आह १ ॥ राजोवाच ॥ हे मुने अहं भवताऽनुगृहीतः कृतार्थो
ऽस्मि यतः मे हरिः श्रावितः २ किंच मत्तुल्येषु अज्ञेषु अनुग्रह इति यत् तत् अच्युतात्मनां वः नाद्भुतं मन्ये ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

अश्रौष्मश्रुतवंतः । भवतःसकाशात् ४ सिद्धोस्मीत्युक्तं तदेवाविष्करोति भगवन्निति । यतस्त्वयादर्शितंब्रह्मप्रविष्टः । कथंभूतं अभयंयतोनिर्वाणंकैवल्यरूपं ५ किंभूयः श्रोतुमिच्छसीति यदुक्तं तत्र सिद्धोहंनकिंचिच्छ्रोतुमिच्छामिकेवलंअनुज्ञांदेहीत्याह । अनुजानीहीति । वाचमित्युपलक्षणंसर्वेंद्रियाणां । वाचंनियम्यकिंकरिष्यसितदाह मुक्ताः कामाशयाःतत् (विषय-)-वासनायेनतच्चेतः अधोक्षजेप्रवेश्यअसून्विसृजामि ६ ननु किंप्राणत्यागेनकंचित कालंज्ञाननिष्ठोभवेतिचेत्तत्राह । अज्ञानंचेति । चकारात्तत्संस्काराश्च । (ज्ञानंशास्त्रोत्थंतत्पूर्वकंयत्विज्ञानमनुभवस्तत्रयानिष्ठानितरांस्थितिस्तया) तच्चत्वत्कृपयैवेत्याह । भवतेति ७ (तमनुज्ञाप्यतस्मैअनुज्ञांदत्त्वेत्यर्थः । भिक्षुभिस्तत्रत्यैः साकंसह) ८ आत्मनाबुद्ध्याआत्मानंमनःआत्मनिप्रत्यक्प्रकाशेसमाधायपरमात्मानंदध्यौ । अस्पंदासुः लीनप्राणःयथातरुः स्थाणुः ९ तमेवविशिनष्टि (गंगातीरे) प्राक्कूलेप्रागग्रेबर्हिषिदर्भे (निःसंगत्वेहेतुः छिन्नसंशयः) १० तदेवंब्रह्मभूतेतस्मिन् तक्षकागमनादिकंपिष्टपेषणमिवाभवदितिदर्शयति तक्षकइतित्रिभिः । हेविप्राः (प्रहितःशापद्वाराप्रेरितइत्यर्थः नृपंहंतुकामोगच्छन् कश्यपंदृष्टवान्) ११ तंविषचिकित्सयापरीक्षिद्रक्षणेनद्रव्यार्जनायागच्छंतंतत्रस्वालीढवटवृक्षस्य भस्मीभूतस्यपुनरंकुरादिक्रमेणोत्थापनाद्विषहारिणंतदपेक्षितद्रविणैः संतर्प्य ततोनिवर्त्यद्विजरूपेणतिरोहितःसन् (नृपं) अदशत् १२ तच्चपुत्रकृत्यमिवजातमित्याह ब्रह्मभूतस्येति (अहिस्तक्षकस्तस्यगरलमेवाग्निस्तेन) १३

श्लोकाः ४/१३

पुराणसंहितामेतामश्रौष्मभवतोवयम् ॥ यस्यांखलूत्तमश्लोकोभगवाननुवर्ण्यते ४ भगवंस्तक्षकादिभ्योमृत्युभ्योनबिभेम्यहम् ॥ प्रविष्टोब्रह्मनिर्वाणमभयंदर्शितंत्वया ५ अनुजानीहिमांब्रह्मन्वाचंयच्छाम्यधोक्षजे ॥ मुक्तकामाशयंचेतःप्रवेश्यविसृजाम्यसून् ६ अज्ञानंचनिरस्तंमेज्ञानविज्ञाननिष्ठया ॥ भवतादर्शितंक्षेमंपरंभगवतःपदम् ७ ॥ सूतउवाच ॥ इत्युक्तस्तमनुज्ञाप्यभगवान्बादरायणिः ॥ जगामभिक्षुभिःसाकंनरदेवेनपूजितः ८ परीक्षिदपिराजर्षिरात्मन्यात्मानमात्मना ॥ समाधायपरंदध्यावस्पंदासुर्यथातरुः ९ प्राक्कूलेबर्हिष्यासीनोगंगाकूलउदङ्मुखः ॥ ब्रह्मभूतोमहायोगीनिःसंगश्छिन्नसंशयः १० तक्षकःप्रहितोविप्राःक्रुद्धेनद्विजसूनुना ॥ हंतुकामोनृपंगच्छन्ददर्शपथिकश्यपम् ११ तंतर्पयित्वाद्रविणैर्निवर्त्यविषहारिणम् ॥ द्विजरूपप्रतिच्छन्नःकामरूपोऽदशन्नृपम् १२ ब्रह्मभूतस्यराजर्षेर्देहोऽहिगरलाग्निना ॥ बभूवभस्मसात्सद्यःपश्यतांसर्वदेहिनाम् १३

चूर्णिका

किंच एतां पुराणसंहितां त्वत्तः वयं श्रुतवंतः यस्यां उत्तमश्लोको वर्ण्यते ४ हे भगवन् त्वया दर्शितं ब्रह्म प्रविष्टोऽहम् अतः तक्षकादिमृत्युभ्यः न बिभेमि ५ हे ब्रह्मन् अहं इंद्रियाणि नियम्य मुक्तकामाशयं चेतः अधोक्षजे प्रवेश्य प्राणान् विसृजामि मां अनुज्ञां देहि ६ किं च त्वया भगवतः क्षेमं पदं दर्शितम् अतएव मे अज्ञानं ज्ञानविज्ञाननिष्ठया निरस्तम् ७ ॥ ॥ सूत उवाच ॥ ॥ एवमुक्तः शुकः तं अनुज्ञाप्य राज्ञा पूजितः सन् भिक्षुभिः सार्धं जगाम ८ परीक्षिदपि आत्मनि बुद्ध्या मनः समाधाय परमात्मानं दध्यौ ९ प्राक्कूले बर्हिष्यासीनो गंगाकूल उदङ्मुखः ब्रह्मभूतो महायोगी निःसंगश्छिन्नसंशयः बभूव १० तदा हे विप्राः क्रुद्धेन द्विजपुत्रेणप्रेरितः तक्षकः नृपं हंतुकामः गच्छन् पथि विषहारिणं कश्यपं ददर्श ११ द्रव्यैः तं च द्रव्यैः संतर्प्य निवर्त्य च द्विजरूपच्छन्नः सन् नृपं अदशत् १२ तदा ब्रह्मभूतस्य राज्ञः देहः विषाग्निना भस्मसात् बभूव १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥२३॥

तत्रक्षणंसर्वेषांदुखंचततःपरमुत्सवंचाह द्वाभ्यां हाहाकारइति १४ १५ प्रासंगिकमाह जनमेजयइत्यादि । सर्पाभिचारसत्रेद्विजैःसहवर्तमानः यथावदाजुहाव (आह्वयातिस्म) जुहावेतिवा । सर्व
सर्पाह्वानेकारणमाह संक्रुद्धइति १६ (समिद्धाग्नौप्रदीप्तज्वलने । भयेनसंविग्नःकंपमानःइंद्रंशरणंययौ)१७ (द्विजान्ऋत्विजः) १८ कस्मात्तक्षकोनदह्येतेत्युक्ताःसंतोद्विजाऊचुः तमिति (हेराजेंद्र
गोपायतिरक्षति) तेनइंद्रेण । असौसर्पः १९ ऋत्विजःप्रतिप्राह । हेविप्राः सहेंद्रः इंद्रसहितः (तक्षकः) किमिति (अग्नौ) नपात्यतेइति २० तद्राज्ञोवचः श्रुत्वा आजुहुवुः । साक्षेपमाह्वानंदर्शयति
तक्षकेति । इहाग्नावाशुपतस्व । मरुत्वतामरुद्गणवताइंद्रेणसह (मरुत्वतेतिविशेषणेनशक्रसहायभूतान्मरुतोपिपातयितुमैच्छन्नितिदर्शितं) २१ (ब्रह्मोदितैः) ब्राह्मणैरुक्तैराक्षेपैः परुषवाक्यैः (स
तक्षकः तक्षकसहितः प्रचालितस्तदासंभ्रांतमतिर्बभूव) २२ तंतक्षकं (पतंतंदृष्ट्वा) अंगिरसः पुत्रोबृहस्पतिःप्राह २३ (हेनरेंद्र । अथअतःकारणात्वैनिश्चयेनअजरामरोयम्) २४ भवतुनामाजरामरः
तथापि (विषहारिणोनिवर्तनेन) पितृमारकं (महापराधिनं) धक्ष्याम्येवेतिचेत्तत्राह । जीवितमिति । गतिः परलोकः । अतोदुर्मरणनिमित्तापिदुर्गतिरनेनकृतेत्यपिनशंकनीयमित्यर्थः २५

हाहाकारोमहानासीद्भुविखेदिक्षुसर्वतः ॥ विस्मिताह्यभवन्सर्वेदेवासुरनरादयः १४ देवदुंदुभयोनेदुर्गंधर्वाप्सरसोजगुः ॥ ववृषुःपुष्पवर्षाणिविबुधाःसाधुवा
दिनः १५ जनमेजयःस्वपितरंश्रुत्वातक्षकभक्षितम् ॥ यथाजुहावसंक्रुद्धोनागान्सत्रेसहद्विजैः १६ सर्पसत्रेसमिद्धाग्नौदह्यमानान्महोरगान् ॥ दृष्ट्वेंद्रंभयसं
विग्नस्तक्षकःशरणंययौ १७ अपश्यंस्तक्षकंतत्रराजापारिक्षितोद्विजान् । उवाचतक्षकःकस्मान्नदह्येतोरगाधमः १८ तंगोपायतिराजेंद्रशक्रःशरणमागतम् ॥
तेनसंस्तंभितःशक्रस्तस्मान्नाग्नौपतत्यसौ १९ पारिक्षितइतिश्रुत्वाप्राहर्त्विजउदारधीः ॥ सहेंद्रस्तक्षकोविप्रानाग्नौकिमितिपात्यते २० तच्छ्रुत्वाजुहुवुर्विप्राः
सहेंद्रंतक्षकंमखे ॥ तक्षकाशुपतस्वेहसहेंद्रेणमरुत्वता २१ इतिब्रह्मोदिताक्षेपैःस्थानादिंद्रःप्रचालितः ॥ बभूवसंभ्रांतमतिःसविमानःसतक्षकः २२
तंपतंतंविमानेनसहतक्षकमंबरात् । विलोक्यांगिरसःप्राहराजानंतंबृहस्पतिः २३ नैषत्वयामनुष्येंद्रवधमर्हतिसर्पराट् ॥ अनेनपीतममृतमथवाअजरा
मरः २४ जीवितंमरणंजंतोर्गतिःस्वेनैवकर्मणा ॥ राजंस्ततोन्योनान्यस्यप्रदातासुखदुःखयोः २५

श्लोकाः १४/२५

चूर्णिका ॥२३॥

तदा सर्वत्र महान् हाहाकारः आसीत् सर्वे देवाद्याः विस्मिताः अभवन् १४ देवदुंदुभयो नेदुर्गंधर्वाप्सरसो जगुः ववृषुः पुष्पववर्षाणि विबुधाः साधुवादिनः १५ अथ
जनमेजयः तक्षकभक्षितं स्वपितरं श्रुत्वा क्रुद्धः सन् द्विजैः सह सर्पान् सत्रे आजुहाव १६ तस्मिन् सत्रे दह्यमानान् महोरगान् दृष्ट्वा भीतस्तक्षकः इंद्रं शरणं ययौ
१७ तदा राजा तक्षकं अपश्यन् द्विजानाह हे द्विजाः तक्षकः कस्मात् नदह्यते १८ तेऊचुः हे नृप तं इंद्रः रक्षति अतः अग्नौ न पतति १९ एवं वचः श्रुत्वा नृपः ऋत्विजः
आह हे द्विजाः सेंद्रः तक्षकः अग्नौ किमिति नपात्यते २० ततः विप्राः राजवचः श्रुत्वा अत्र मखे सेंद्रं तक्षकं जुहुवुः तक्षकाशुपतस्वेह सहेंद्रेण मरुत्वता २१ इतिब्राह्म
णोक्तैः परुषवाक्यैः सविमानः सतक्षकः इंद्रः स्थानात् प्रचलितो बभूव २२ अंबरात्पतंतं इंद्रं विलोक्य बृहस्पतिः राजानं प्राह २३ हेराजन् अयं सर्पराट् वधं नार्है
ति यतः अनेन अमृतं पीतं वा अजरामरोऽस्ति २४ किं च जंतोर्जीवितं मरणं परलोकगतिः स्वकर्मणैव भवति अतः सुखदुःखप्रदाता अन्यस्य अन्यः न २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आ.द्वा. कथमन्यः सुखदुःखप्रदातान्योनास्तिसर्पादीनामुपलभ्यमानत्वादिनिचेत्तत्राह । सर्पादिनाजंतुः पंचत्वंमृत्युंऋच्छतिप्राप्नोतीतियत्तत्आरब्धंकर्मैवभुंक्ते । स्वकर्मप्रयुक्ताएवसर्पादयोनतुतेस्वतंत्राइति अ०
भावः २६ संस्थीयेतसमाप्यतां (इत्यर्थः) । आभिचारिकंहिंसाफलं । (एकस्यापराधेनबहुजंतुनाशोनन्याय्यइतिभावेनाह । सर्पाइति । नन्वेकः पापानिकुरुतेफलंभुंक्तेमहाजनइतियुक्तमेतदितिचे
टीका दस्तुजनैः) दिष्टंप्राचीनंकर्म (भुज्यतेहि) अतः सर्पाहष्टप्रयुक्तस्यतवाप्ययंनापराधइतिभावः २७ वाक्पतिंबृहस्पतिम् २८ ननु कथंविदुषामप्येवंसंमोहः । यतोब्रह्मकोपात्पारीक्षितोमृत्युः । जनमेजय
कोपात्सर्पाणामित्यादितत्राह । सैषेति । तस्यामहत्वंदर्शयति । अलक्षणा नलक्ष्यतइत्यलक्षणाअप्रतर्क्येत्यर्थः । कासावित्यतआह ययाऽस्यविष्णोरेवआत्मभूताआत्मांशभूताः प्राणिनःगुणवृत्तिभिः ॥ ६ ॥
क्रोधादिभिः सहभूतेषुदेहेषुमुह्यंति । बाध्यबाधकतांव्रजंतीत्यर्थः । ननु शास्त्रश्रवणादिनाबाधितयातयाकुतोमोहःस्यात्तत्राह । अबाधयाबाधितुमशक्यया २९ कथं तर्हिमायातत्कार्यनिवृत्तिरि
॥२४॥ त्याशंक्यश्रीविष्णुस्वरूपनिरूपणपूर्वकंतद्भजनात्सर्वानर्थनिवृत्तिरितिशास्त्रार्थमुपसंहरति । नयत्रेतिपंचभिः । दंभीति (या) मायाकपटवानयंपुमानित्येवंभूतायांबुद्धावसकृदुल्लिख्यमानायामायेत्यर्थः ।
साआत्मवादेक्रियमाणेआत्मवादिभिर्यत्राभया (निर्भया) नविराजितानप्रकाशिताकिंतुभीतेवस्वकार्यंमोहादिकंअकुर्वतीकथंचिद्वर्ततइतिप्रतिपादितेत्यर्थः । तदुक्तं । "तस्मैनमोभगवतेवासुदेवायधी
महि । यन्माययादुर्जययामांब्रुवंतिजगद्गुरुं । विलज्जमानयायस्यस्थातुमीक्षापथेऽमुया । विमोहिताविकत्थंतेममाहमितिदुर्धिय" इति । किं च । यत्यस्मिन् (आत्मवादे) तदाश्रयोमायाश्रयोविविधोवा
दोपिनास्ति । विशेषविषयत्वाद्विवादानां । तस्यचविशेषातीतत्वादितिभावः । संकल्पविकल्पाः वृत्तयोयस्यतन्मनोपियत्रनास्ति । संकल्पविकल्पानामपिविशेषविषयत्वात् ३० किंच सृज्यंकर्मसृजता
कारकवर्गेणसहउभयोः सृज्यस्रष्ट्रोः परंसाध्यंश्रेयः फलमपिअतस्त्रिभिः सृज्यस्रष्टृफलैरन्वितोजीवश्चअहंकारात्मकोयत्रनास्तिअतएवउत्सादितौनिरस्तौबाध्यबाधकौयस्मिन्तदेतत्स्वयंआत्मस्वरूप
मित्यर्थः । तत्तस्मिन् (स्वरूपे) उर्मीन्अहंकारादीन् निषिध्य (मुनिः) विरमेतविशेषेणक्रीडेदित्यर्थः ३१

सर्पचोराग्निविद्युद्भ्यःक्षुत्तृड्व्याध्यादिभिर्नृप ॥ पंचत्वमृच्छतेजंतुर्भुंक्तेप्रारब्धकर्मतत् २६ तस्मात्सत्रमिदंराजन्संस्थीयेताभिचारिकम् ॥ सर्पाअनागसो श्लोकाः
दग्धाजनैर्दिष्टंहिभुज्यते २७ इत्युक्तःसतथेत्याहमहर्षेर्मानयन्वचः ॥ सर्पसत्रादुपरतःपूजयामासवाक्पतिम् २८ सैषाविष्णोर्महामायाऽबाधयाऽलक्षणा
यया ॥ मुह्यंत्यस्यैवात्मभूताभूतेषुगुणवृत्तिभिः २९ नयत्रदंभीत्यभयाविराजितमायात्मवादेसकृदात्मवादिभिः ॥ नयद्विवादोविविधस्तदाश्रयोमनश्चसं २६
कल्पविकल्पवृत्तियत् ३० नयत्रसृज्यंसृजतोभयोःपरंश्रेयश्चजीवस्त्रिभिरन्वितस्त्वहम् ॥ तदेतदुत्सादितबाध्यबाधकंनिषिध्यचोर्मीन्विरमेत्स्वयंमुनिः ३१ ३१

चूर्णिका सर्पचोरादिभिः जंतुः मृत्युं प्राप्नोतीति यत् तदारब्धं कर्मैव भुंक्ते २६ इति हेतोः इदं अभिचारिकं सत्रं समाप्यताम् हे नृप अनागसः सर्पाः दग्धाः तदपिजनैः
दिष्टं भुज्यते अतः सर्पादृष्टप्रयुक्तस्यतवाप्ययंनापराधः २७ एवमुक्तः नृपः सर्पसत्रात् उपरतः सन् बृहस्पतिं पूजयामास २८ ननु कथं विदुषामपि एवं मोहः यतो
ब्रह्मकोपाद्राज्ञः मृत्युःजनमेजयात् सर्पाणां इत्यादितत्राह सैषा विष्णोः महामाया अनया प्राणिनः बाध्यबाधकतांव्रजंति २९ ३० कथं तर्हि मायानिवृत्तिः ईश्वरभजना ॥२४॥
दित्याह यत्र स्वरूपे इयंमाया अभया नप्रकाशिता तत्परं पदं आमनंति ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

यतस्तद्वैष्णवंपदमामनंतीत्याह । परमिति यदेतत्तदेवपरंवैष्णवंपदंस्वरूपं आमनंति । के । अतत् आत्मव्यतिरिक्तं (नेतिनेतीति) उत्सिसृक्षवः त्यक्तुमिच्छवः । यतः अनन्यसौहृदाः नास्तिअन्य
स्मिन् (आत्मव्यतिरिक्ते) सौहृदंयेषांते । कुतः । दौरात्म्यंदेहाद्यहंभावंविसृज्य देहेअहंकाराभावात् अन्यत्रसौहृदंनास्तिअतस्त्यक्तुमिच्छवइत्यर्थः । अत्रविद्वदनुभवमपिप्रमाणयति । हृदोपगुह्याध्या
नादिना । ततः समाहितैरवसितंनिश्चितं यद्वा अवसितंअववद्धंआत्मत्तयागृहीतमित्यर्थः ३२ एवंभूतावधिकारिणोदर्शयति । तएतदिति । देहजमहमिति । गेहजंममेति ३३ तत्प्राप्त्युपायमाह ।' अति
॥२५॥ वादानिति । अतिवादान् (दुष्टभाषणानि) । इति ३४ शास्त्रसमाप्तौगुरुंप्रणमति । नमइति । कृष्णायव्यासाय (यस्यचरणकमलध्यानात्) अध्यगांअधिगतवानस्मि (एतत्प्रतिपाद्यमर्थंप्राप्तवा
नस्मीत्यर्थः) ३५ इमांसंहितामध्यगामित्युक्तं । तत्रपुराणसंहिताविभागंविशेषतोबुभुत्सुर्वेदविभागमपिप्रसंगात्पृथक्पृच्छति पैलादिभिरिति । हेसौम्य (वेदानामाचार्यैर्व्याख्यातृभिः तत्तत्कल्पप्रण
यननिपुणैः व्यस्ताविभक्ताः चकरात्पुराणसंहिताच) ३६ तत्रप्रथमंवेदाविर्भावप्रकारमाह । समाहितात्मनइत्यष्टभिः (हेविप्राः) ब्रह्मणोहृदियआकाशस्तस्मान्नादोभूत् । यः कर्णपुटपिधानेनश्रोत्रवृ
त्तिनिरोधात्अस्मदादिष्वपिविभाव्यतेवितर्क्यते ३७ प्रसंगान्नादोपासकानांमोक्षफलमाह । यस्यनादस्यउपासनयाआत्मनोमलंधूत्वाअपोह्य । कथंभूतंमलंतमाह । द्रव्यमधिभूतंक्रियाअध्यात्मंकारकम
धिदैवंएवंत्रिधाभूताआख्यायस्योतितथातंद्वैत -(- प्रपंचरूपमित्यर्थः । अपुनर्भवंमोक्षं) ३८ (ततोनादात्) त्रिवृत्त्रिमात्रः कंठोष्ठादिभिरुच्चार्यमाणस्योंकारस्याक्षरसमाम्नायांतर्भावात् । सूक्ष्मत्वमातं
विशिनष्टि । अव्यक्तः प्रभवोयस्यसः । तदेवाह । स्वराट् । स्वतएवहृदिप्रकाशमानः । तमेवकार्येणलक्षयति । यत्तदिति । नपुंसकत्वंलिंगशब्दविशेषणत्वात् (ब्रह्मणो) लिंगंगमकं ३९

श्लोकाः ३२/३९

परंपदंवैष्णवमामनंतितद्यन्नेतिनेतीत्यतदुत्सिसृक्षवः ॥ विसृज्यदौरात्म्यमनन्यसौहृदाहृदोपगुह्यावसितंसमाहितैः ३२ तएतदधिगच्छंतिविष्णोर्य
त्परमंपदम् ॥ अहंममेतिदौर्जन्यंनयेषांदेहगेहजम् ३३ अतिवादांस्तितिक्षेतनावमन्येतकंचन ॥ नचेमंदेहमाश्रित्यवैरंकुर्वीतकेनचित् ३४ नमो
भगवतेतस्मैकृष्णायाकुंठमेधसे ॥ यत्पदांबुरुहध्यानात्संहितामध्यगामिमाम् ३५ ॥ ॥ श्रीशौनकउवाच ॥ ॥ पैलादिभिर्व्यासशिष्यैर्वेदाचार्यैर्म
हात्मभिः ॥ वेदाश्चकतिधाव्यस्ताएतत्सौम्याभिधेहिनः ३६ ॥ ॥ सूतउवाच ॥ ॥ समाहितात्मनोविप्राब्रह्मणःपरमेष्ठिनः ॥ हृद्याकाशादभून्नादोवृ
त्तिरोधाद्विभाव्यते ३७ यदुपासनयाब्रह्मन्योगिनोमलमात्मनः ॥ द्रव्यक्रियाकारकाख्यंधूत्वायांत्यपुनर्भवम् ३८ ततोऽभूत्त्रिवृदोंकारोयोऽव्यक्तप्रभ
वःस्वराट् ॥ यत्तल्लिंगंभगवतोब्रह्मणःपरमात्मनः ३९

चूर्णिका

३२ येषामहं ममेति दौर्जन्यनास्ति ते एतत्पदं अधिगच्छंति ३३ तत्पदप्राप्त्युपायमाह अतिवादांस्तितिक्षेतनावमन्येत कंचन न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित्
३४ शास्त्रांते गुरुं प्रणमति सूतः यत्पदांबुरुहध्यानात् इमां संहितां प्राप्तोऽस्मि तस्मै व्यासाय नमः ३५ ॥ शौनकउवाच ॥ व्यासशिष्यैः पैलादिभिः वेदाः कतिधा व्य
स्ताः तद्ब्रूहि ३६ ॥ सूतउवाच ॥ आदौ ब्रह्मणः हृदयाकाशात् नादः अभूत् ३७ ३८ तस्मात् त्रिवृदोंकारः येन बृहती वैखरीवाक् व्यज्यते तस्य त्रयो वर्णाः आसन् ३९

१ एतदितिपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोसौपरात्मा तमाह । शृणोतीति (यः) इमंस्फोटं (स्फुटतिवर्णसमाम्नायोयस्मात्तं) अव्यक्तमोंकारं (शृणोति) ननुजीवएवतं शृणोतु नेत्याह । सुप्तश्रोत्रे । कर्णपिधानादिनाअवृत्तिकेपिश्रोत्रेसति जीवस्तुकरणाधीनज्ञानत्वात् नतदाश्रोता । तदुपलब्धिस्तुतस्यपरमात्मद्वारिकैवेतिभावः । ईश्वरस्तुनैवं (करणाधीनः) । यतः शून्यदृक्शून्येपींद्रियवर्गेदृक्ज्ञानंयस्य । तथाहि । सुप्तोयदाशब्दं श्रुत्वाप्रबुध्यतेनतदाजीवःश्रोता विलीनेंद्रियत्वात् । अतोयस्तदाशब्दंश्रुत्वा जीवंप्रबोधयतिसयथापरमात्मैवतद्वदितिकोसावोंकारस्तंविशिनष्टिसार्धेनयेनवाक्वृहतीव्यज्यतेयस्यचहृदयाकाशेआत्मनः सकाशाद्व्यक्तिराभिव्यक्तिः ४० किंच । स्वधाम्नो (ब्रह्मणः) स्वस्याश्रयः कारणंयद्ब्रह्मतस्य (वाचकः साक्षात्) । किंच । परमात्मांशभूतसमस्तदेवतावाचकोपीत्याशयेनाह । सइति (सओंकारः) सर्वमंत्राणांउपनिषद्रहस्यं । सूक्ष्मंरूपमित्यर्थः । तत्रहेतुः वेदानांबीजंकारणंबीजत्वेप्यविकारितामाह । सनातनंसदैकरूपंतस्यब्रह्मरूपत्वात् ४१ इदानींततः सर्वप्रपंचोत्पत्तिप्रकारमाह । तस्यहीति । त्रयः त्रित्वसंख्यायुक्ताभावायैरकारोकारमकारैर्धार्यंते । तत्कारणत्वात् । तानेवाह । गुणाः सत्त्वादयः नामानिऋग्यजुःसामानि । अर्थाभूर्भुवःस्वर्लोकाः । वृत्तयोजाग्रदाद्याः (तथाचोक्तं । त्रयींतिस्रोवृत्तीस्त्रिभुवनमथोत्रीनपिसुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृतीत्यादि) ४२ ततस्तेभ्योवर्णेभ्यः अक्षराणांसमाम्नायंसमाहारं । तमेवाह । अंतस्थायरलवाःऊष्माणःशषसहाः । स्वराअकाराद्याः । स्पर्शाःकादयः । ह्रस्वदीर्घादयश्च (एकमात्रोह्रस्वःद्विमात्रोदीर्घः) आदिशब्दाज्जिह्वामूलीयादयस्तएवलक्षणंस्वरूपंयस्यतम् ४३ विभुश्चतुर्मुखस्वरूपोभगवान् (तेनअक्षरसमाम्नायेनवेदान्) असृजदितिपूर्वस्यैवानुषंगः । चातुर्होत्रविवक्षया । चत्वारोहोत्रोपलक्षिताऋत्विजश्चतुर्होतारस्तैरनुष्ठेयं हौत्राध्वर्यवादिकंकर्मचातुर्होत्रं (दर्शपूर्णमासादि) तद्विवक्षया ४४ तान् वेदान् पुत्रान् मरीच्यादीन् । ब्रह्मकोविदान् वेदोच्चारणादिनिपुणान् (तेपुत्राःधर्मोपदेष्टारःधर्मस्यप्रवर्तकाइत्यर्थः । समादिशन्अध्यापयामासुः) ४५ एवं (तेवेदाः) चतुर्युगेषु (तत्तच्छिष्यैःपरंपरया) प्राप्ताःद्वापरादौद्वापरमादिर्यस्यतदंत्यांशलक्षणस्यकालस्यतस्मिन् द्वापरांतेवेदविभागप्रसिद्धेः शंतनुसमकालंव्यासावतारप्रसिद्धेश्च । व्यस्ताविभक्ताः ४६ तत्रहेतुः । क्षीणायुषोजनान् (मेधाधारणावतीधीःसादुष्टायेषांतान् एवंसर्वथाक्षीणसत्त्वान् वीक्ष्यव्यस्यन् विभक्तवंतः) तर्हिपुरुषबुद्धिप्रभवत्वात् अनादरणीयत्वंस्यादित्याशंक्याह । हृदिस्थेति ४७

श्लोकाः ४०—४७

शृणोतियइमंस्फोटंसुप्तश्रोत्रेचशून्यदृक् ॥ येनवाग्व्यज्यतेयस्यव्यक्तिराकाशआत्मनः ४० स्वधाम्नोब्रह्मणःसाक्षाद्वाचकःपरमात्मनः ॥ ससर्वमंत्रोपनिषद्वेदबीजंसनातनम् ४१ तस्यह्यासंस्त्रयोवर्णाअकाराद्याभृगूद्वह ॥ धार्यंतेयैस्त्रयोभावागुणनामार्थवृत्तयः ४२ ततोक्षरसमाम्नायमसृजद्भगवानजः ॥ अंतस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ४३ तेनासौचतुरोवेदांश्चतुर्भिर्वदनैर्विभुः ॥ सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया ४४ पुत्रानध्यापयत्तांस्तुब्रह्मर्षीन्ब्रह्मकोविदान् ॥ तेतुधर्मोपदेष्टारःस्वपुत्रेभ्यःसमादिशन् ४५ तेपरंपरयाप्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥ चतुर्युगेष्वथव्यस्ताद्वापरादौमहर्षिभिः ४६ क्षीणायुषःक्षीणसत्त्वान्दुर्मेधान्वीक्ष्यकालतः ॥ वेदान्ब्रह्मर्षयोव्यस्यन्हृदिस्थाच्युतनोदिताः ४७

चूर्णिका

४० ४१ ४२तेभ्यः अक्षरसमुदायं अंतस्थोष्मादिं असृजत् ४३ तेन समुदायेन ब्रह्मा चतुर्मुखैः चातुर्होत्रविवक्षया चतुरो वेदानसृजत् ४४ ततः ब्रह्मा स्वपुत्रान् मरीच्यादीन् प्रति वेदान् अध्यापयत् ते च स्वपुत्रेभ्यः समादिशन् ४५ एवं चतुर्युगेषु वेदाः तच्छिष्यैः परंपरया प्राप्ताः ४६ ततः क्षीणायुषः मंदबुद्धीन् जनान् वीक्ष्य ते वेदाः द्वापरांते महर्षिभिः विभक्ताः ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

एवंसामान्यतोवेदविभागक्रममुक्त्वावैवस्वतमन्वंतरेविशेषतोनिरूपयितुमाह अस्मिन्नपीति ४८ अंशोमायातस्यांशःसत्त्वंतस्यकलयाअंशेनअवतीर्णःसन् (वेदराशिंचतुर्विधंचक्रे) ४९ चातुर्विध्यमेवाह ऋगिति । ऋगादिचतुर्विधमंत्राणांराशीन् वर्गशःतत्तत्प्रकरणभेदैरुद्धृत्ययथाऽनेकविधमणिराशेःमणिगणाःपद्मरागादयःविविच्य (परीक्ष्य) उद्ध्रियंतेतद्वदुद्धृत्यतैर्मंत्रैश्चतस्रःऋगादिसंहिताश्चक्रे ५० तासांसंहितानांमध्येएकैकां ५१ (प्रायेण) ऋक्समुदायरूपत्वात् बह्वृचाख्यां । नितरांप्रश्लेषेणगद्यमानत्वान्निगदाख्यम् ५२ च्छंदस्सुगीयमानत्वाच्छंदोगाख्यांसंहितां (साम्नांसामसंबंधिनीं) ५३ तत्रऋग्वेदेशाखाविभागमाह पैलइति । स्वसंहितांद्वेधाविभज्यइंद्रप्रमितयेबाष्कलायचऊचे ५४ सबाष्कलोपिस्वसंहितांचतुर्धाविभज्य बोध्यादिभ्य -(- श्चतुर्भ्यः) शिष्येभ्यःआह हेभार्गव (आत्मवान् मनोनिग्रहवान्) इंद्रप्रमतिरपिस्वांसंहितांमांडूकेयं स्वसुतं अध्यापयामास ५५ तस्यमांडूकेयस्यशिष्योवेदमित्रः (सौभरिप्रभृतिभ्यऊचिवान्) ५६ तत्सुतःमांडूकेयसुतःशाकल्योवात्स्यादिषुचपंचस्वधात् तानध्यापयामासेत्यर्थः ५७ (जातूकर्णाख्यश्च) तच्छिष्यस्तस्यशाकल्यस्यशिष्यः स्वसंहितांत्रेधाविभज्य चतुर्थंवैदिकपदार्थव्याख्यानरूपंनिरुक्तंचकृत्वाबलाकादिभ्यश्चतुर्भ्योददौ ५८

श्लोकाः ४८ ५८

अस्मिन्नप्यंतरेब्रह्मन्भगवान्लोकभावनः ॥ ब्रह्मेशाद्यैर्लोकपालैर्याचितोधर्मगुप्तये ४८ पराशरात्सत्यवत्यामंशांशकलयाविभुः ॥ अवतीर्णोमहाभागोवेदंचक्रेचतुर्विधम् ४९ ऋगथर्वयजुःसाम्नांराशीनुद्धृत्यवर्गशः ॥ चतस्रःसंहिताश्चक्रेमंत्रैर्मणिगणाइव ५० तासांसचतुरःशिष्यानुपाहूयमहामतिः ॥ एकैकांसंहितांब्रह्मन्नेकैकस्मैददौविभुः ५१ पैलायसंहितामाद्यांबह्वृचाख्यामुवाचह ॥ वैशंपायनसंज्ञायनिगदाख्यंयजुर्गणम् ५२ साम्नांजैमिनयेप्राहतथाच्छंदोगसंहिताम् ॥ अथर्वांगिरसींनामस्वशिष्यायसुमंतवे ५३ पैलःस्वांसंहितामूचइंद्रप्रमितयेमुनिः ॥ बाष्कलायचसोप्याहशिष्येभ्यःसंहितांस्वकाम् ५४ चतुर्धाव्यस्यबोध्याययाज्ञवल्क्यायभार्गव ॥ पाराशरायाग्निमात्रेइंद्रप्रमितिरात्मवान् ५५ अध्यापयत्संहितांस्वांमांडूकेयमृषिंकविम् ॥ तस्याशिष्योवेदमित्रःसौभर्यादिभ्यऊचिवान् ५६ शाकल्यस्तत्सुतस्तांतुपंचधाव्यस्यसंहिताम् ॥ वात्स्यमुद्गलशालीयगोखल्यशिशिरेष्वधात् ५७ जातूकर्णश्चतच्छिष्यःसनिरुक्तांस्वसंहिताम् ॥ बलाकपैजवैतालविरजेभ्योददौमुनिः ५८

चूर्णिका

अथ अस्मिन् मन्वंतरे ब्रह्मेशानादिभिः धर्मगुप्तये प्रार्थितः भगवान् पराशरात् सत्यवत्यां अंशेन अवतीर्णः सन् चतुर्विधंवेदंचक्रे ४८ ४९ चातुर्विध्यमेवाह ऋगादिमंत्राणां राशीन् तत्तत्प्रकरणभेदैः उद्धृत्य तैर्मंत्रैः चतस्रः संहिताः चक्रे ५० ततो व्यासः चतुरः शिष्यानाहूय तेभ्यः ताः ददौ ५१ पैलाय ऋक्संहितां ददौ वैशंपायनाय निगदाख्यां यजुःसंहितां ददौ ५२ जैमिनये छंदोगाख्यां सामसंहिता ददौ सुमंतवे अथर्ववेदस्य अथर्वांगिरसीं नाम संहितां ददौ ५३ तत्र पैलः स्व संहितां द्वेधा विभज्य इंद्रप्रमितये बाष्कलाय च आह ५४ सः बाष्कलः स्वां संहितां चतुर्धा व्यस्य बोध्ययाज्ञवल्क्यपराशराग्निमित्रेभ्यः चतुर्भ्यः प्राह ५५ इंद्रप्रमितिः स्वां संहितां स्वसुतं मांडूकेयमध्यापयामास वेदमित्रः सौभर्यादिभ्यः तां ऊचिवान् ५६ मांडूकेयसुतः शाकल्यः तां पंचधा व्यस्य वात्स्यमुद्गलशालीयगोखल्याशिशिरान् प्राह ५७ शाकल्यशिष्यः जातूकर्णः स्वसंहितां त्रेधा विभज्य निरुक्तं चतुर्थं कृत्वा बलाकपैजवैतालविरजेभ्यः ददौ ५८

CC-0. In Public Domain. Digitization by eGangotri

टीका

बाष्कलिः पूर्वोक्तस्यबाष्कलस्यपुत्रः प्रतिशाखाभ्यःउक्तसर्वशाखाभ्यः (उद्धृत्यवालखिल्याख्यांसंहितांचक्रे) बालायन्यादयस्तांदधुरधीतवंतः ५९ ऋक्शाखोपसंहारपूर्वकंतच्छ्रवणफलमाह । बहूचाइति । एतच्छंदसांएतेषां छंदसां (व्यासंविभागं) ६० यजुर्वेदेतैत्तिरीयशाखोत्पत्तिप्रस्तावमाह । वैशंपायनशिष्याइत्यादिना । चरकनामनिरुक्तिमाह । यदितियच्चस्मात् । ब्रह्महत्यारूपमंहःक्षपयतीतितथातत्स्वगुरोरनुष्ठेयंव्रतं (चेरुः) तच्चरणाच्चरकाइत्यर्थः (चरकसंज्ञकाअध्वर्यवोयज्ञकर्मनिपुणाः वैशंपायनस्यशिष्याअभवन्) ६१ तच्छिष्यः वैशंपायनशिष्यः (अहोभगवन्) अल्पसाराणांएतेषांचारितेन (व्रताचरणेन) कियत् (प्रयोजनंस्यात्) सुदुश्चरमप्यहंचरिष्यामीति ६२ विप्राणामवमंत्राअवज्ञाकर्त्रा (शिष्येणालं । इतोयाहि ।) मत्तोऽधीतंआशुत्यजेति ६३ देवरातसुतोयाज्ञवल्क्यः (छर्दित्वावमित्वा) ६४ छर्दितस्यादानंविप्ररूपेणानुचितमितितित्तिराः पक्षिविशेषाभूत्वा (तल्लोलुपतयायजुर्गणग्रहणेच्छावत्त्वेनतानियजूंषि) आददुः । ततश्चतैत्तिरीयाइतिप्रसिद्धाः सुपेशलाअतिरम्याः बहुवचनमत्रांतरभेदविवक्षया ६५ काण्वमाध्यंदिनादिशाखाप्रसंगमाह । याज्ञवल्क्यइत्यादिना । गुरोर्वैशंपायनस्यव्यासेनविभज्यानुक्तत्वादविद्यमानानिअपिअधिकानिगवेषयन्मृगयमूसूपतस्थे । सम्यक्तुष्टाव । ईश्वरंऋगादिवेदानां । तथाचश्रुतिः । "ऋग्भिःपूर्वाह्णेदिविदेवईयतेयजुर्वेदेतिष्ठतिमध्येअह्नः । सामवेदेनास्तमयेमहीयतेवेदैरशून्यास्त्रिभिरेतिसूर्य"इति ६६

॥२८॥

श्लोकाः ५९ — ६६

बाष्कलिःप्रतिशाखाभ्योवालखिल्याख्यसंहिताम् ॥ चक्रेवालायनिर्भज्यःकासारश्चैवतांदधुः ५९ बहूचाःसंहिताह्येताएभिर्ब्रह्मर्षिभिर्धृताः ॥ श्रुत्वैतच्छंदसांव्यासंसर्वपापैःप्रमुच्यते ६० वैशंपायनशिष्यावैचरकाध्वर्यवोऽभवन् ॥ यच्चेरुर्ब्रह्महत्यांहःक्षपणंस्वगुरोर्व्रतम् ६१ याज्ञवल्क्यश्चतच्छिष्यआहाहोभगवन्कियत् ॥ चरितेनाल्पसाराणांचरिष्येऽहंसुदुश्चरम् ६२ इत्युक्तोगुरुरप्याहकुपितोयाह्यलंत्वया ॥ विप्रावमंत्राशिष्येणमदधीतंत्यजाश्विति ६३ देवरातसुतःसोपिछर्दित्वायजुषांगणम् ॥ ततोगतोथमुनयोददृशुस्तान्यजुर्गणान् ६४ यजूंषितित्तिराभूत्वातल्लोलुपतयाऽऽददुः ॥ तैत्तिरीयाइतियजुःशाखाआसन्सुपेशलाः ६५ याज्ञवल्क्यस्ततोब्रह्मन्छंदांस्यधिगवेषयन् ॥ गुरोरविद्यमानानिसूपतस्थेऽर्कमीश्वरम् ६६

चूर्णिका

ततः पूर्वोक्तबाष्कलस्य पुत्रः बाष्कलिः सर्वशाखाभ्यः वालखिल्याख्यसंहितां चक्रे तां वालायन्यादयः विभज्य द्वौ द्वौ अधीतवंतः काशारश्च एताः बह्वचाः संहिताः एभिः ऋषिभिः धृताः एषां छंदसां विभागं श्रुत्वा सर्वपापैः प्रमुच्यते ५९ ६० यजुर्वेदे तैत्तिरीयशाखोत्पत्तिप्रसंगमाह अथ वैशंपायनस्य शिष्याः चरकाध्वर्यवः अभवन् यतः स्वगुरोः ब्रह्महत्यानाशनं व्रतं चेरुः अतः चरका इति नाम ६१ किंच तच्छिष्यः याज्ञवल्क्यः आह हे वैशंपायन एतेषां चरितेन कियत् सुदुश्चरमपि अहं चरिष्यामि ६२ एवमुक्तोगुरुः कुपितः सन् आह हे शिष्य मदधीतंत्यक्त्वा याहि त्वया अलम् ६३ ततः याज्ञवल्क्यः यजुर्गणं छर्दित्वा गतः ६४ तत् छर्दितं दृष्ट्वा मुनयः तित्तिराः भूत्वा तत् छर्दितं आददुः ततो हेतोः तैत्तिरीयाः यजुःशाखाः आसन् ६५ अथ याज्ञवल्क्यः गुरोः अलब्धवेदः सन् सूर्यं उपतस्थे ६६

॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमोभगवतेतुभ्यंआदित्याययोभगवानेकएवेमांलोकयात्रामनुवहतीत्यन्वयः । तदेवदर्शयति । अखिलजगतामात्मस्वरूपेणांतर्हृदयेषुकालस्वरूपेणचबाहिरपिवर्तमानइति । अखिलजगतामित्यस्यप्र
पंचः । चतुर्विधेति (अंडजादिभेदेनचतुर्विधत्वं) हृदयांतर्वर्तित्वेपिजीववत्तेनोपाधिनाअव्यवधीयमानःअनाच्छाद्यमानः (बहिरपिआकाशवत्) कालस्वरूपेणचेत्यस्यप्रपंचः क्षणेति । क्षणालवाद
योयेऽवयवास्तैरुपचिताः, संवत्सरास्तेषांगणेनप्रत्यब्दमपामादानंशोषणंविसर्गोवृष्टिः ताभ्यां (एवं) अनेनगायत्रीप्रथमपादोक्तावरेण्यतादर्शिता ६७ (अथ) द्वितीयपादार्थानुवर्णनेनस्तौति यदु
हेति । हेविबुधर्षभ हेसवितः यदस्यदेभगवतस्तवमंडलंतपतितत्समभिधीमहिसम्यगाभिमुख्येनध्यायेम । पुनस्तस्यैवसंबोधनं । यत्यहंत्रिषवणंवैदिककर्ममार्गेणस्तुवतांभक्तानांयान्यखिलानिदुरितानित
त्फलानिचवृजिनानिदुःखानितेषांबीजमज्ञानंचतेषामवभर्जन विनाशक हेतपनेति ६८ (अथ) तृतीयपादार्थवर्णनेनस्तौति यइहेति (यो) भवान्स्थावरजंगमसमूहानांस्वाश्रयाणांजीवानांमनइंद्रि
यप्राणगणान् अनात्मनोजडान् स्वयमात्मैवांतर्यामीसन् प्रचोदयति प्रवर्तयति ६९ तृतीयपादमेवमंडलस्थ-(-भगवत् -)- परतयाव्याचक्षाणः स्तौति यएवेति । यएकएवभगवान् अतिकरालवदनोयों
ऽधकारसंज्ञोऽजगरग्रहस्तेनगिलितंअतएवमृतकमिवविचेतनं (इमंलोकंअनुदिनमनुसवनम्) स्वधर्माख्यंपदात्मावस्थानं प्रत्यक्प्रवणत्वंतदेवश्रेयस्तस्मिन् प्रवर्तयति । (किंकृत्वा । तादृशंलोकम
वलोक्यद्रवीभूतचित्तवृत्त्यापरमकारुणिकईक्षयैवोत्थाप्य) किंच । योभवान् अवनिपतिरिव (असाधूनांप्रमत्तानांआयुःक्षपणेनभयमुदीरयन्) अटतिगच्छति ७० आशापालै -(- दिक्पालैः-)- इं
द्रादिभिः कमलकोशयुक्तैस्तत्तुल्यैर्वाअंजालिभिरुपहृतार्हणः दत्तार्घः ७१ यतएवंभूतस्त्वंअथअतः हृत्फुर्द अयातयामानिअन्यैर्यथावदविज्ञातानियजूंषितत्कामोहंउपसरामिभजामि ७२ एवंस्तुतः प्रसा
दितश्च (सहारिर्वाजिरूपधरः हयरूपंगृहीत्वेत्यर्थः) ७३

॥ याज्ञवल्क्यउवाच ॥ ॥ ओंनमोभगवतेआदित्यायाखिलजगतामात्मस्वरूपेणकालस्वरूपेणचचतुर्विधभूतनिकायानांब्रह्मादिस्तंबपर्यंतानामंत
र्हृदयेषुबहिरपिचाकाशइवोपाधिनाऽव्यवधीयमानोभगवानेकएवक्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमांलोकयात्रामनुव
हति ६७ यदुहवावविबुधर्षभसवितरदस्तपत्यनुसवनमहरहराम्नायविधिनोपतिष्ठमानानामखिलदुरितवृजिनबीजावभर्जनभगवतःसमभिधीमहि
तपनमंडलम् ६८ यइहवावस्थिरचरनिकराणांनिजनिकेतनानांमनइंद्रियासुगणाननात्मनःस्वयमात्मांतर्यामीप्रचोदयति ६९ यएवेमंलोकमति
करालवदनांधकारसंज्ञाजगरग्रहगिलितंमृतकमिवविचेतनमवलोक्यानुकंपयापरमकारुणिकईक्षयैवोत्थाप्याहरहरनुसवनंश्रेयसिस्वधर्माख्यात्मावस्थाने
प्रवर्तयत्यवनिपतिरिवासाधूनांभयमुदीरयन्नटति ७० परितआशापालैस्तत्रतत्रकमलकोशांजलिभिरुपहृतार्हणः ७१ अथहभगवंस्तवचरणयुगलं
त्रिभुवनगुरुभिर्वंदितमहमयातयामयजुःकामउपसरामीति ७२ ॥ ॥ सूतउवाच ॥ ॥ एवंस्तुतःसभगवान्वाजिरूपधरोहरिः ॥ यजूंष्ययातया
मानिमुनयेऽदात्प्रसादितः ७३

श्लोकाः ६७/७३

चूर्णिका हे भगवन् ते आदित्याय नमो नमः यः त्वं एक एव इमां लोकयात्रां अनुवहसि ६७ ६८ ६९ ७० ७१ हे भगवन् त्रिभुवनगुरुभिः वंदितं तव चरणकंजयुग्मं अन्यै
र्यथावदविज्ञातं यजुष्कामोहं भजामि ७२ ॥ सूतउवाच ॥ एवं स्तुतः वाजिरूपधरः सूर्यः यजूंषि मुनये प्रादात् ७३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पंचदशशाखाः याः शतैरपरिमितैर्यजुर्भिरकरोत् ताजगृहुः अधीतवंतः सतैरिपाठे (सएवार्थः) सएषयाज्ञवल्क्यः तैर्यजुर्भिरकरोदिति । रविणाअश्वरूपेणवाजेभ्यः केशरेभ्यः दाजेनवेगेनवासंन्यस्ताः (सम्यक्) त्यक्ताः शाखाः वासजन्योवाजसनीसंज्ञास्ताःशाखाइतिवा ७४ सामशाखाविभागमाह । जैमिनेरिति । तत्सुतः सुमंतुसुतः ताभ्यांपुत्रपौत्राभ्यांक्रमेणैकैकांमाह ७५ तच्छिष्यः जैमिनेः शिष्यः महान् अतिमेधावी । (सामवेदलक्षणस्यतरोः) सहस्रंसंहिताख्पंभेदंचक्रे । ततस्तदनंतरंसाम्नांसंहिताभेदम् ७६ सुकर्मणः शिष्यौ एकः कौशल्यः (कोशलजातः) हिरण्यनाभः । पौष्यंजिर्नामैकस्तौजगृहतुः । आवंत्यश्चान्यः तस्यैवाशिष्यः सोपिजग्राह ७७ पौष्यंज्यावंत्ययोरपिचकाराद्धिरण्यनाभस्यापिपंचशतानिशिष्याआसंस्तेतावतीः शाखायथायथंजगृहुः तान् उदीच्यान् सतः कालतः कांश्चित्प्राच्यांश्चप्रचक्षतइत्यर्थः । यथोक्तंवैष्णवे । “ उदीच्याः सामगाः शिष्यास्तस्यपंचशतंस्मृताः । हिरण्यनाभात्तावत्यः संहितायैर्द्विजोत्तमैः । गृहीतास्तेपिचोच्यंतेपंडितैः प्राच्यसामगा”इति ७८ पुनरप्येतेपांत्रयाणांसुकर्मणः शिष्याणां शिष्यांतरैः शाखाबाहुल्यंदर्शयति लौगाक्षिरितिद्वाभ्याम् ७९ कृतोनामहिरण्यनाभस्यशिष्यः स्वाशिष्येभ्यः ऊचे । शेषाअन्याअपिप्रसिद्धाः शाखास्ताआवंत्यः स्वशिष्येभ्यऊचेइति ॥ ८० ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांषष्ठोऽध्यायः ॥ ६ ॥ ॥ ७ ॥ ॥ सप्तमेऽथर्ववेविस्तारःपुराणव्यसनंततः । पुराणलक्षणादीनिफलंभागवतश्रुतेः ॥ १ ॥ क्रमप्राप्तमथर्ववेदविभागमाह अथर्वविदिति (अथर्ववेदस्यवेत्तासुमंतुः) शिष्यंकवंधनामानं स्वकांस्वकीयांसंहितां सोपिशिष्योपितांद्विधाविभज्य । तदुक्तं वैष्णवे । “ अथर्ववेदंसमुनिः सुमंतुरमितद्युतिः । शिष्यमध्यापयामासकवंधंसोपितंद्विधा । कृत्वातुवेददर्शायतथापथ्यायदत्तवा”निति १

यजुर्भिरकरोच्छाखादशपंचशतैर्विभुः ॥ जगृहुर्वाजसंन्यस्ताःकाण्वमाध्यंदिनादयः ७४ जैमिनेःसामगस्यासीत्सुमंतुस्तनयोमुनिः ॥ सुन्वांस्तुतत्सुतस्ताभ्यामेकैकांप्राहसंहिताम् ७५ सुकर्माचापितच्छिष्यःसामवेदतरोर्महान् ॥ सहस्रंसंहिताभेदंचक्रेसाम्नांततोद्विजः ७६ हिरण्यनाभःकौशल्यःपौष्यंजिश्चसुकर्मणः ॥ शिष्यौजगृहतुश्चान्यआवंत्योब्रह्मवित्तमः ७७ उदीच्याःसामगाःशिष्याआसन्पंचशतानिवै ॥ पौष्यंज्यावंत्ययोश्चापितांश्चप्राच्यान्प्रचक्षते ७८ लौगाक्षिर्मांगलिःकुल्यःकुशीदःकुक्षिरेवच ॥ पौष्यंजिशिष्याजगृहुःसंहितांतेशतंशतम् ७९ कृतोहिरण्यनाभस्यचतुर्विंशतिसंहिताः ॥ शिष्यऊचेस्वशिष्येभ्यःशेषाआवंत्यआत्मवान् ८० ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेवेदशाखाप्रणयनंनामषष्ठोऽध्यायः ६ ॥ ॥ ७ ॥

॥ सूतउवाच ॥ अथर्ववित्सुमंतुश्चशिष्यमध्यापयत्स्वकाम् ॥ संहितांसोपिपथ्यायवेददर्शायचोक्तवान् १

चूर्णिका ततो याज्ञवल्क्यः तैर्यजुर्भिः पंचदश शाखाः अकरोत् ताः वाजसन्यः शाखाः काण्वमाध्यंदिनाः जगृहुः ७४ सामशाखाविभागमाह जैमिनेः सुतः सुमंतुः तस्य सुतः सुन्वान् ताभ्यांएकैकां संहितां प्राह ७५ जैमिनिशिष्यः सुकर्मापि सामवेदस्य सहस्रं संहिताभेदं चक्रे ७६ ततः सुकर्मणः शिष्याः त्रयः हिरण्यनाभः प्रथमः पौष्यंजिः द्वितीयः आवंत्य तृतीयः एते ताः संहिताः जगृहुः ७७ तेषां शिष्याः पंचशतानिआसन् ते तावतीः शाखाः यथायथं जगृहुः ततः पौष्यंजिशिष्याः पंच ७८ लौगाक्षिः प्रथमः मांगलिः द्वितीयः कुल्यः तृतीयः कुशीदः चतुर्थः कुक्षिः पंचमः एते प्रत्येकं शतं शतं संहिताः जगृहुः ७९ हिरण्यनाभस्य अन्यः कृतनामा शिष्यः चतुर्विंशतिसंहिताः स्वशिष्येभ्यः ऊचे आवंत्यः शेषाः संहिताः शिष्येभ्यः आह ८० ॥ ॥ इति द्वादशे षष्ठः ६ ॥ ॥ ७ ॥ ॥ सूत उवाच ॥ अथाथर्ववेदविभागमाह सुमंतुः कवंधनामानं शिष्यं स्वसंहितां प्राह सोपि तां द्वेधा विभज्य पथ्याय वेददर्शाय च दत्तवान् १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा.द्वा. तत्रवेददर्शःस्वसंहितांचतुर्धाविभज्यचतुरः शिष्यानध्यापयामास । पथ्यश्च (स्वसंहितां)त्रिधाविभज्यत्रीनितिसार्धेनाह शौक्कायनिरिति (हेब्रह्मन्अथर्ववित्अथर्वशाखायावेत्ता)२ अंगिरसः (अंगिरो अ०
गोत्रेविद्यमानस्य) शुनकस्यशिष्यो बभ्रुः सैंधवायनश्च । तदुक्तं " शुनकस्तुद्विधाकृत्वाददावेकांतुबभ्रवे । द्वितीयांसंहितांप्रादात्सैंधवायनसंज्ञिने"इति । अधीयेतांअधीतवंतौ सावर्णिरित्या
टीका द्याः सैंधवायनादीनांशिष्याः ३ नक्षत्रकल्पः शांतिकल्पश्चेतिद्वौ । तदुक्तं । " नक्षत्रकल्पोवेदानांसंहितानांतथैवच । चतुर्थःस्यादांगिरसःशांतिकल्पश्चपंचम" इति (अतः शांतिरितिना
मैकदेशग्रहणं । नक्षत्रकल्पादीनांकर्तारस्तत्तन्नामभिरुच्यंते (आथर्वणाचार्याः पाठतोर्थतश्चाथर्ववेदप्रवर्तकाइत्यर्थः) ४ (पौराणिकाः पुराणाचार्याः) ५ मत्पितुर्मुखादितिप्रथमंव्यासः षट्सं ॥७॥
हिताः कृत्वामत्पित्रेरोमहर्षणायप्रादात् । तस्यचमुखादेतेत्रय्यारुण्यादयः एकैकांसंहितामधीयंत (अधीतवंतः) । एतेषांषण्णांशिष्योहं ताः सर्वाः समधीतवान् ६ रामशिष्योयोऽकृतव्रणःएवंचत्वा
॥३१॥ रोवयं । (व्यासपुत्राच्छ्रीशुकात्) मूलसंहिताइत्यनेन ततः संहिताबाहुल्यंसूचितम् ७ शुकपरिक्षित्संवादेनिरूपितमपि पुराणलक्षणंतद्भेदकथनायदर्शयति पुराणेति ८ अस्यविश्वस्य "अत्रसर्गो
विसर्गश्चस्थानंपोषणमूतयः । मन्वंतरेशानुकथानिरोधोमुक्तिराश्रय "इत्यत्रोक्तेस्थानपोषणेवृत्तिरक्षाशब्दाभ्यामुच्येते । अंतराणिमन्वंतराणि । "वंशोवंश्यानुचरितंचेतीशानुकथाः । संस्थानिरो
धः" अनेनैवात्यंतिकलयरूपामुक्तिरप्युक्ता । हेतुशब्देनजीवाश्रयवासनाशब्दवाच्याऊतयोगृहीताः ९

शौक्कायनिर्ब्रह्मवलिर्मोदोषःपिप्पलायनिः ॥ वेददर्शस्यशिष्यास्तेपथ्यशिष्यानथोशृणु ॥ कुमुदःशुनकोब्रह्मन्जाबालिश्चाप्यथर्ववित् २ बभ्रुःशिष्यो श्लोकाः
थांगिरसःसैंधवायनएवच ॥ अधीयेतांसंहितेद्वेसावर्ण्याद्यास्तथापरे ३ नक्षत्रकल्पःशांतिश्चकश्यपांगिरसादयः । एतेआथर्वणाचार्याःशृणुपौराणिकान्मुने
४ त्रय्यारुणिःकश्यपश्चसावर्णिरकृतव्रणः ॥ वैशंपायनहारीतौषड्वैपौराणिकाइमे ५ अधीयंतव्यासशिष्यात्संहितांमत्पितुर्मुखात् ॥ एकैकामहमेतेषां २/९
शिष्यःसर्वाःसमध्यगाम् ६ कश्यपोहंचसावर्णीरामशिष्योकृतव्रणः ॥ अधीमहिव्यासशिष्याच्चतस्रोमूलसंहिताः ७ पुराणलक्षणंब्रह्मन्ब्रह्मर्षिभि
र्निरूपितम् ॥ शृणुष्वबुद्धिमाश्रित्यवेदशास्त्रानुसारतः ८ सर्गोऽस्याथविसर्गश्चवृत्तिरक्षांतराणिच ॥ वंशोवंश्यानुचरितंसंस्थाहेतुरपाश्रयः ९

चूर्णिका वेददर्शशिष्याः चत्वारःशौल्कायनिः प्रथमः ब्रह्मवलिः द्वितीयः मोदोषः तृतीयः पिप्पलायनिः चतुर्थः एभ्यः चतस्रः संहिताः ददौ अथ पथ्यः त्रिभ्यः शिष्येभ्यः कुमु
दशुनकजाबालिभ्यः स्वसंहितां त्रेधा विभज्य प्रादात् शुनकः स्वशिष्याभ्यां बभ्रुसैंधवायनाभ्यांसंहिते द्वे प्राह तौ सावर्ण्यादिभ्यः ऊचतुः २ अथ पौराणिकान् शृणु ३
४ आदौ व्यासः षट्पुराणसंहिताः कृत्वा मत्पित्रे रोमहर्षणाय ददौ तन्मुखात् त्रय्यारुणिः प्रथमः कश्यपः द्वितीयः सावर्णिः तृतीयः अकृतव्रणः चतुर्थः वैशंपायनः
पंचमः हारीतः षष्ठः इमे षट् पौराणिकाः संहिताः षट् अधीयंत एषां षण्णां शिष्यः अहं ताः सर्वाः अधीतवान् ५ ६ कश्यपः प्रथमः अहं द्वितीयः सावर्णिः तृतीयः ॥३१॥
अकृतव्रणः चतुर्थः एते वयं व्यासशिष्यात् मूलसंहिताः अधीमहि ७ हे शौनक अथ पुराणलक्षणं शृणु ८ सर्गः प्रथमलक्षणं विसर्गः द्वितीयं वृत्तिः तृतीयं रक्षा चतुर्थं
मन्वतरं पंचमं वंशः षष्ठः वंश्यानुचरितं सप्तमं संस्था अष्टमं हेतुः नवमं आश्रयः दशमं एतानिदशपुराणलक्षणानि ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

दशभिरेतैर्लक्षणैरर्थैर्युक्तंमहापुराणंविदुः । केचित्पंचविधं"सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच । वंश्यानुचरितंचेतिपुराणंपंचलक्षणमि"ति (पंचलक्षणप्रकारोपेतंविदुः) महत्पुराणंअल्पंचेतिव्यवस्थया । यत्रदशापिलक्षणानिपृथग्निरूप्यंतेतन्महापुराणं । यत्रत्वन्येषांपंचस्वेवांतर्भावस्यविवक्षातदल्पमितिव्यवस्थयेत्यर्थः १० सर्गादिलक्षणानिव्याचष्टे । अव्याकृतेत्यादिना । अव्याकृतस्यप्रधानस्यगुणानांक्षोभात्योमहान्तस्माच्चत्रिवृदहंकारः तस्माद्भूतमात्राणांसूक्ष्माणांइंद्रियाणांचतदर्थानांस्थूलानांतद्देवतानांचसंभवः सर्गः कारणसृष्टिः सर्गइत्यर्थः उच्यतइतियथापेक्षंउत्तरत्राप्यनुषंगः ११ विसर्गंव्याचष्टे । पुरुषेणेश्वरेणानुगृहीतानांएतेषांमहदादीनांपूर्वकर्मवासनाप्रधानोऽयंसमाहारः कार्यभूतश्चराचरप्राणिरूपोबीजाद्बीजमिवप्रवाहापन्नोविसर्गउच्यतइत्यर्थः १२ चराणांभूतानांसामान्यतोऽचराणिचकाराच्चराणिच (कामात्) वृत्तिः तत्रतुनृणांस्वेन भावेनकामाच्चोदनयापिवायानियतावृत्तिर्जीविकाकृतासावृत्तिरुच्यतइत्यर्थः १३ तिर्यङ्मर्त्यर्षिदेवेषुयेअच्युतावतारास्तेषामीहालीलासाविश्वस्य (अनुयोग्या) रक्षोच्यतइत्यर्थः । (यतोयुगेयुगे) यैरवतारैरितिसमासान्निष्कृष्यकथंचित्संबंधः । त्रयीद्विषो (वेदद्रुहो) दैत्याः (हन्यंते) १४ षड्विधंमन्वंतरमुच्यते षड्विधत्वमेवाह । मनुरिति । मन्वादयः षडेतेवर्गाःस्वस्वाधिकारेणयदाप्रवर्ततेतन्मन्वंतरमित्यर्थः १५ वंशमाह राज्ञामिति ब्रह्मणःसकाशात्प्रसूतिर्येषांशुद्धानामित्यर्थः । तेषामन्वयोवंशः कथंभूतः (त्रैकालिकः भूतभविष्यद्वर्तमानविषयः । वंशेभवावंश्याः) तेषांवृत्तं येचतद्वंशधरा (राजानः) तेषांचवृत्तंवंश्यानुचरितमुच्यते १६ अस्यविश्वस्यस्वभावतोमायातोनिष्पन्नस्य यद्वा मायातोयश्चतुर्विधोलयः (सासंस्था) इति १७ अस्यजगतः सर्गादेःहेतुर्निमित्तंजीवः सोत्रहेतुरुच्यतइत्यर्थः । तस्यानिमित्ततामाह । अविद्ययाकर्मकारकः कर्मकर्ता । जीवादृष्टप्रयुक्तत्वाद्विश्वसर्गादेः सतुतत्रहेतुरित्यर्थः । नन्वनुशयीनिमित्तमितिकेचित् । अव्याकृतमित्यपरेतत्राह । यमिति (जीवमेव) चैतन्यप्राधान्येनानुशयिनं । उपाधिप्राधान्यविवक्षयाअव्याकृतं (प्राहुः) १८ अपाश्रयमाह व्यतिरेकेति । जाग्रदादिष्ववस्थासुजीवतयावर्ततइतिजीववृत्तयोविश्वतैजसप्राज्ञास्तेपुमायामयेषुसाक्षितयान्वयः । समाध्यादौचव्यतिरेकोयस्यतद्ब्रह्मसंसारप्रतीतिबाधयोरधिष्ठानावधिभूतमपाश्रयउच्यतइत्यर्थः १९

॥३२॥

श्लोकाः १० / १९

दशभिर्लक्षणैर्युक्तंपुराणंतद्विदोविदुः ॥ केचित्पंचविधंब्रह्मन्महदल्पव्यवस्थया १० अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहमः ॥ भूतसूक्ष्मेंद्रियार्थानांसंभवःसर्गउच्यते ११ पुरुषानुगृहीतानामेतेषांवासनामयः ॥ विसर्गोयंसमाहारोबीजाद्बीजंचराचरम् १२ वृत्तिर्भूतानिभूतानांचराणामचराणिच ॥ कृतास्वेननृणांतत्रकामाच्चोदनयापिवा १३ रक्षाच्युतावतारेहाविश्वस्यानुयुगेयुगे ॥ तिर्यङ्मर्त्यर्षिदेवेषुहन्यंतेयैस्त्रयीद्विषः १४ मन्वंतरंमनुर्देवामनुपुत्राःसुरेश्वरः ॥ ऋषयोंऽशावतारश्चहरेःषड्विधमुच्यते १५ राज्ञांब्रह्मप्रसूतानांवंशस्त्रैकालिकोन्वयः ॥ वंश्यानुचरितंतेषांवृत्तंवंशधराश्चये १६ नैमित्तिकःप्राकृतिकोनित्यआत्यंतिकोलयः ॥ संस्थेतिकविभिःप्रोक्ताचतुर्धास्यस्वभावतः १७ हेतुर्जीवोस्यसर्गादेरविद्याकर्मकारकः ॥ यंचानुशयिनंप्राहुरव्याकृतमुतापरे १८ व्यतिरेकान्वयौयस्यजाग्रत्स्वप्नसुषुप्तिषु ॥ मायामयेषुतद्ब्रह्मजीववृत्तिष्वपाश्रयः १९

चूर्णिका

एभिर्दशलक्षणैः युक्तं महापुराणं पंचलक्षणं अल्पमिति १० एषां अर्थमाह महदादीनां कारणानां सृष्टिः सर्गइत्युच्यते ११ चराचरप्राणिसर्गो विसर्गः १२ ईश्वरेण भूतानां विहिता या जीविका सा वृत्तिः १३ भगवतः या अवतारलीला सा रक्षा १४ मन्वंतरं मनुर्देवा इत्यादिषु षड्विधं मन्वंतरम् १५ शुद्धराज्ञां प्रसूतिः वंशः तद्वंशजानां वृत्तं वंश्यानुचरितं १६ चतुर्विधः प्रलयः संस्था १७ अस्य जगतः सर्गादेः निमित्तं यो जीवः सोऽत्र हेतुः ज्ञेयः १८ जाग्रदाद्यवस्थासु यस्य व्यतिरेकान्वयः तत् ब्रह्म आश्रय इत्युच्यते १९

॥३२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदेवसदृष्टांतंप्रपंचयति । पदार्थेषुघटादिषुद्रव्यंमृदादियथायुतंअन्वितंअयुतंच (व्यतिरिक्तं) वहिरप्यवस्थानात् । रूपनामसुचसन्मात्रंसत्तामात्रंयथा । यद्वा रूपनामात्मकेषुपदार्थेषुतन्मात्रंभूतसूक्ष्मात्मकंद्रव्यं यथायुतायुतंएवंबीजंगर्भाधानंआदिर्यासांपंचतामृत्युःअंतोयासांतासुदेहावस्थासुनवस्वपिअधिष्ठानत्वेनसाक्षित्वेनचयुतमयुतंचयत्तदपाश्रयइति (अवस्थानामभावेपिविद्यतइत्ययुतत्वंतद्भावेपितत्रसाक्षित्वेनविद्यतइतियुतत्वम्) २० एवंदशापिलक्षणानिव्याख्यायदशमस्यविशुद्ध्यर्थंनवानामिहलक्षणंवर्णयंतिमहात्मानइतियदुक्तंतदाह विरमेतेति । यदासर्गादीनांमायामयत्वानुसंधानेन (जाग्रदादिलक्षणंवृत्तित्रयंहित्वा) वामदेवादेरिवस्वयमेवचित्तंविरमेत । इहैवानुष्ठितेनयोगेनवादेवहूत्यादिवत् । तदाविक्षेपाभावादात्मानंवेद । तदाचाविद्यानिवृत्तेरीहायाः संसाररूपायानिवर्ततेइत्यर्थः २१ पुराणविभागप्रस्तावेनतल्लक्षणादिप्रासंगिकमुक्त्वाप्रस्तुतमाह । एवंविधैर्लक्षणैर्लक्ष्याणि (क्षुल्लकानिअल्पानि) २२ (तानिनिर्दिशति ब्राह्ममिति तत्रभागवतमितिनिर्देशोदेवीभागवतपरः नैतत्परः अस्याष्टादशबहिर्भूतत्वात् । कृतवान्भारतंयस्त्वमित्यनेनभारताख्यानोत्तरमेतत्कृत्युपदेशात्भारतस्यत्वष्टादशपुराणोत्तरंकृतत्वात् । अस्यभागवतस्यकरणोत्तरंव्यासस्यकृतकृत्यत्वेनपुराणांतरासंभवाच्च) २३ त्रिषट्अष्टादश २४ उपसंहरति ब्रह्मन्निति । मुनेर्व्यासस्यशिष्यादीनांच (शाखाप्रणयनंसम्यगाख्यातं) ब्रह्मतेजोब्रह्मवर्चसंतद्विवर्धनंश्रोतॄणामितिशेषः ॥ २५ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटेकायांसप्तमोऽध्यायः ॥ ७ ॥ ॥ ७ ॥ ॥ अष्टमेतुतपश्चर्यामार्कंडेयस्यमोहकैः । कामादिभिरसंमोहोनरनारायणस्तुतिः १ पुराणविभागप्रसंगेनपुराणकर्तुर्मार्कंडेयस्यचरितप्रश्नमाह (चरितंप्रस्तुतंतत्रशौनकः सूतंपृच्छति) सूतेति । त्वमेववक्तुंयोग्यइत्याह तमसिसंसारेभ्रमतांपारदर्शनः तन्निवर्तकः १ वक्तव्यमाह आहुरिति । उर्वरितः अवशिष्टः । येनकल्पांतेन (ग्रस्तंसंहृतं) एतत्कथंघटतइत्येकः प्रश्नः २

श्लोकाः २०/२

पदार्थेषुयथाद्रव्यंतन्मात्रंरूपनामसु ॥ बीजादिपंचतांतासुह्यवस्थासुयुतायुतम् २० विरमेतयदाचित्तंहित्वावृत्तित्रयंस्वयम् ॥ योगेनवातदात्मानंवेदेहायानिवर्तते २१ एवंलक्षणलक्ष्याणिपुराणानिपुराविदः ॥ मुनयोष्टादशप्राहुःक्षुल्लकामनिहांतिच २२ ब्राह्मंपाद्मंवैष्णवंचशैवंलैंगंसगारुडम् ॥ नारदीयंभागवतमाग्नेयंस्कंदसंज्ञितम् २३ भविष्यंब्रह्मवैवर्तमार्कंडेयंसवामनम् ॥ वाराहंमात्स्यंकौर्मंचब्रह्मांडाख्यमितित्रिषट् २४ ब्रह्मन्निदंसमाख्यातंशाखाप्रणयनंमुनेः ॥ शिष्यशिष्यप्रशिष्याणांब्रह्मतेजोविवर्धनम् २५ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेवेदशाखाप्रणयनंनामसप्तमोध्यायः ७ ॥ शौनकउवाच ॥ सूतजीवचिरंसाधोवदनोवदतांवर ॥ तमस्यपारेभ्रमतांनृणांत्वंपारदर्शनः १ आहुश्चिरायुषमृषिंमृकंडतनयंजनाः ॥ यःकल्पांतेउर्वरितोयेनग्रस्तमिदंजगत् २

चूर्णिका

२० २१ एवं लक्षणलक्ष्याणि पुराणानि अष्टादश मुनयः प्राहुः २२ तानि ब्राह्मं प्रथमं पाद्मं द्वितीयं वैष्णवं तृतीयं शैवं चतुर्थं लैंगं पंचमं गारुडं षष्ठं नारदीयंसप्तमं भागवतं अष्टमं आग्नेयं नवमं स्कांदं दशमं २३ भविष्यं एकादशं ब्रह्मवैवर्तं द्वादशं मार्कंडेयं त्रयोदशं वामनं चतुर्दशं वाराहं पंचदशं मात्स्यं षोडशं कौर्मं सप्तदशम् ब्रह्मांडमिति अष्टादशं २४ ब्रह्मन्निदं समाख्यातं शाखाप्रणयनं मुनेः शिष्यशिष्यप्रशिष्याणां ब्रह्मतेजोविवर्धनम् २५ ॥ इति द्वादशे सप्तमोऽध्यायः ७ ॥ ॥ ७ ॥
॥ शौनक उवाच ॥ हे सूत त्वं चिरं जीव यतः संसारे भ्रमतां नृणां त्वं तन्निवर्तकः असि १ पुराणविभागप्रसंगात् तत्कर्तुः मार्कंडेयस्य चरितं पृच्छति शौनकः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

प्रलयाभावादप्येतन्नघटतइत्याह सवाइति । यतो (असौ) भार्गवर्षभः (अतोस्माकंकुलेउत्पन्नः) कोपिप्राकृतिकोनैमित्तिकोवा (संप्लुवः प्रलयः) २ अन्यदप्यघटितामिवेत्याह । एकएवेति । तोकंबालकम् ४ कौतूहलंऔत्सुक्यं (नोऽस्माकं) तंसंशयं । नकेवलंत्वंमहायोगी । किंतुपुराणेष्वपिज्ञातृत्वेनसंमतः५ प्रश्नमभिनंदति हेमहर्षेअयंप्रश्नः। तत्रहेतुः। नारायणकथेति । यत्रप्रश्नविषये ६ तत्रमार्कंडेयस्तपसाभगवंतमाराध्यमायाप्रदर्शनंवव्रे । ततश्चतेनैवभगवन्माययासप्तकल्पादृष्टाः नान्यैरित्युत्तरंवक्तुंआदितआरभ्यतस्यचरितमाह । प्राप्तेत्यादिना । मार्कंडेयोमृत्युंजिग्येइतिपंचमश्लोके नान्वयः । मध्यमग्रंथेनतस्यधर्मः कथ्यते । प्राप्तोद्विजातिसंस्कारउपनयनाख्योयेनसः । पितुः सकाशात्गर्भाधानादिक्रमात् । (ततः) छंदांसिवेदान् ७ बृहद्व्रतधरः नैष्ठिकब्रह्मचारी सन् ८ नियमर्द्धयेधर्मवृद्धये । (अक्षसूत्रंजपमालातत्सहितम् । संध्याद्वये) अग्न्यादिषुपंचसुहरिमर्चयन् (तत्रात्मनिस्वहृदये) ९ भैक्ष्यंगुर्वर्थमाहृत्यतेनानुज्ञातश्चेत्तर्हिबुभुजेनोचेत्सकृत्कदाचिदुपोपितोभवति १० अयुतायुतंबहूनिवर्षाणीत्यर्थः) ११ तेनमृत्युंजयेन १२ ध्वस्ताःक्लेशारागादयोयस्यतेनअंतरात्मनाप्रत्याहृतमनसा १३ १४

॥३४॥ ॥८॥

श्लोकाः $\frac{३}{१४}$

सवाअस्मत्कुलोत्पन्नःकल्पेऽस्मिन्भार्गवर्षभः ॥ नैवाधुनापिभूतानांसंप्लवःकोपिजायते २ एकए वार्णवेभ्राम्यन्ददर्शपुरुषंकिल ॥ वटपत्रपुटेतोकंशयानंत्वेकमद्भुतम् ४ एषनःसंशयोभूयान्सूतकौतूहलंयतः ॥ तंनश्छिधिमहायोगिन्पुराणेष्वपिसंमतः ५ सूतउवाच ॥ प्रश्नस्त्वयामहर्षेयंकृतोलोकभ्रमापहः नारायणकथायत्रगीताकलिमलापहा ६ प्राप्तद्विजातिसंस्कारोमार्कंडेयःपितुःक्रमात ॥ छंदांस्यधीत्यधर्मेणतपःस्वाध्यायसंयुतः ७ बृहद्व्रतधरःशांतो जटिलोवल्कलांबरः ॥ बिभ्रत्कमंडलुंदंडमुपवीतंसमेखलम् ८ कृष्णाजिनंसाक्षसूत्रंकुशांश्चनियमर्द्धये ॥ अग्न्यर्कगुरुविप्रात्मस्वर्चयन्संध्ययोर्हरिम् ९ सायंप्रातःस्वगुरवेभैक्ष्यमाहृत्यवाग्यतः ॥ बुभुजेगुर्वनुज्ञातःसकृन्नोचेदुपोषितः १० एवंतपःस्वाध्यायपरोवर्षाणामयुतायुतम् ॥ आराधयन्हृषीकेशंजिग्येमृत्युंसुदुर्जयम् ११ ब्रह्माभृगुर्भवोदक्षोब्रह्मपुत्राश्चयेपरे ॥ नृदेवपितृभूतानितेनासन्नतिविस्मिताः १२ इत्थंबृहद्व्रतधरस्तपःस्वाध्यायसंयमैः ॥ दध्यावधोक्षजंयोगीध्वस्तक्लेशांतरात्मना १३ तस्यैवंयुंजतश्चित्तंमहायोगेनयोगिनः ॥ व्यतीयायमहान्कालोमन्वंतरषडात्मकः १४

चूर्णिका

सर्वे जनाः मार्कंडेयं चिरायुषं आहुः यः कल्पांते उर्वरितः येन कल्पांतेन इदं जगत् ग्रस्तं इदं कथं जातम् ३ किंच अधुना भूतानां कोपि प्रलयो नास्ति एवंसति अस्मिन् कल्पे सः अस्मत्कुलोत्पन्नःभार्गवर्षभः इति च कथम् किंच एक एव अर्णवे भ्राम्यत् वटपत्रपुटे शयानं बालकं ददर्श इदमपि अघटितम् ४ एवं तद्विषये नः संशयोस्ति तं छिंधि ५ सूतउवाच हे शौनक अयं प्रश्नः लोकभ्रमापहः त्वया कृतः यत्र नारायणकथा गीयते ६ अथ प्राप्तद्विजातिसंस्कारः मार्कंडेयः छंदांसि अधीत्य ७ नैष्ठिकब्रह्मचारी जटिलःकमंडलुं दंडं उपवीतं मेखलां चबिभ्रत् ८ अग्न्यर्कगुरुविप्रात्मसु हरिं अर्चयन् तपःस्वाध्यायपरः भैक्ष्यमाहृत्य गुरवे निवेद्य तदनुज्ञया स्वयं भुंजन् नोचेत् उपोषितः सन् १० वर्षाणामयुतायुतं हृषीकेशंआराधयन् दुर्जयं मृत्युं जिग्ये ११ तत्तपसा ब्रह्माद्याः विस्मिताः आसन् एवं योगेन चित्तं युंजतः तस्य मन्वंतरषडात्मकः कालः व्यतीयाय १२ १३ १४

॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यतपोनिष्ठामितिहासेनवर्णयति । एतदित्यादिना ।(पुरंदरः शक्रः) अस्मिन् सप्तमेमन्वंतरेतपसामत्पदंग्रहीष्यतीतिविशंकितः (तद्विघातनंतस्यतपसोविघ्नम्). १५ मुनयेमुनिंभ्रंशायितुं (गंधर्वादीन्रजस्तोकं) रजसः तोकंअतिप्रियंअपत्यंलोभः मदश्चतौ (प्रेषयामास) १६(तेगंधर्वादयः) १७ तदाश्रमपदंप्रविष्टावायुर्ववाविततृतीयेनान्वयः पुण्यैर्द्रुमैर्लताभिश्चांचितंपूजितं । पुण्यद्विजानांऋषीणांकुलैः(समूहैः) संकीर्णं । पुण्याअमलाजलाशयायस्मिन्(तत्) १८ मत्तभ्रमराणांसंगीतंयस्मिन् मत्तकोकिलानांकूजितं (पंचमस्वरो) यास्मिन्मत्ताबर्हिणएवनटास्तेषामाटोपः । नृत्यसंभ्रमोयस्मिन् मत्तद्विजानां (हृष्ट)- पक्षिणांकुलैराकुलंव्याप्तम् १९ एवंभूतंतदाश्रमपदंप्रविष्टः सन्वायुर्मलयानिलोववौप्रससार (स्मरं) उत्तंभयन्उद्दीपयन् तत्रवृक्षेषुप्रवेशान्मांद्यंहिमनिर्झरकणानामादानात् शैत्यं पुष्पपरिष्वंगात् (वायोः) सौगंध्यं (इतिगुणत्रयं) चोक्तं २० किंच । उद्यंश्चंद्रोयस्मिंस्तन्निशावक्त्रंरजनीमुखंयस्मिन्सः (कुसुमाकरोवसंतः) प्रवालस्तबकानां (कोमलकिसलयगुच्छानां) आलयः श्रेणयोयेषुतैः गुप्यंतिविटपैः संश्लिष्यंतीतिगोपाद्रुमालताश्चतेषांजालैः समूहैः उपलक्षितआसीत् आविर्बभूवेत्यर्थः २१ किंच तदागीतवादित्रयूथिकैः गायकादिसमुदायिभिः गंधर्वैः अन्वीयमानो (अनुगम्यमानः) तथास्वःस्त्रियोप्सरसः तासांयूथस्यपतिः आत्तंचापमिषुश्चयेनसः (एतादृशः) स्मरश्चतत्राहृश्यत २२ (अग्निंहुत्वातत्समीपआसीनं) दुराधर्षमभिभवितुमशक्यं २३ २४ शोषणमोहनसंदीपनतापनोन्मादनाख्यानिपंचमुखानियस्यतदस्त्रंसंदधे । तदैवमधुर्वसंतः रजस्तोकश्च (रागः) पुंस्त्वमार्षंअन्येचेंद्रभृत्या (मलयानिलादयः) तस्यमनोव्यकंपयन् २५ किंचवायुर्मलयानिलः पुंजिकस्थल्याः (अप्सरोविशेषस्य) तत्सूक्ष्मंवासोजहार (परिहितवसनमुत्क्षिप्तवान्स्तनयोर्भारात्उद्विग्नोभीतश्चलितोवामध्योयस्याः) २६

श्लोकाः १५—२६

एतत्पुरंदरोज्ञात्वासप्तमेस्मिन्किलांतरे ॥ तपोविशंकितोब्रह्मन्नारेभेतद्विघातनम् १५ गंधर्वाप्सरसःकामंवसंतमलयानिलौ ॥ मुनयेप्रेषयामास रजस्तोकमदौतथा १६ तेवैतदाश्रमंजग्मुर्हिमाद्रेःपार्श्वउत्तरे ॥ पुष्पभद्रानदीयत्रचित्राख्याचशिलाविभो १७ तदाश्रमपदंपुण्यंपुण्यद्रुमलतांचितम् ॥ पुण्यद्विजकुलाकीर्णंपुण्यामलजलाशयम् १८ मत्तभ्रमरसंगीतंमत्तकोकिलकूजितम् ॥ मत्तबर्हिनटाटोपंमत्तद्विजकुलाकुलम् १९ वायुःप्रविष्टआदाय हिमनिर्झरसीकरान् ॥ सुमनोभिःपरिष्वक्तोववाउत्तंभयन्स्मरम् २० उद्यच्चंद्रनिशावक्त्रःप्रवालस्तबकालिभिः ॥ गोपद्रुमलताजालैस्तत्रासीत्कुसुमाकरः २१अन्वीयमानोगंधर्वगीतवादित्रयूथिकैः ॥ अदृश्यतात्तचापेषुःस्वःस्त्रीयूथपतिःस्मरः २२ हुत्वाग्निंसमुपासीनंददृशुःशक्रकिंकराः ॥ मीलिताक्षंदुराधर्षंमूर्तिमंतमिवानलम् २३ ननृतुस्तस्यपुरतःस्त्रियोथोगायकाजगुः ॥ मृदंगवीणापणवैर्वाद्यंचक्रुर्मनोरमम् २४ संदधेऽस्त्रंस्वधनुषिकामःपंचमुखंतदा ॥ मधुर्मनोरजस्तोकइंद्रभृत्याव्यकंपयन् २५ क्रीडंत्याःपुंजिकस्थल्याःकंदुकैःस्तनगौरवात् ॥ भृशमुद्विग्नमध्यायाःकेशविस्रंसितस्रजः २६

चूर्णिका एतत् ज्ञात्वा इंद्रः सप्तमे मन्वंतरे मत्पदं ग्रहीष्यतीति शंकितः सन् तत्तपोनाशाय गंधर्वाप्सरसः कामं वसंतं मलयानिलं लोभमदौ च मुनये प्रेषयामास १५ १६ तेवैतदाश्रमं जग्मुः हिमाद्रेः पार्श्वे उत्तरे पुष्पभद्रा नदी यत्र चित्राख्या च शिला विभो १७ तदाश्रमपदं पुण्यं पुण्यद्रुमलतान्वितम् मत्तद्विजकुलाकुलं १९ एवंभूतं आश्रमं ते इंद्रकिंकराः गत्वा तत्रासीनं अग्निमिव दुर्धर्षं ऋषिं दृष्ट्वा तस्य पुरतःस्त्रियः ननृतुः गायकाः जगुः २० २१ २२ २३२४कामः धनुषि अस्त्रं संदधे २५ तदैव क्रीडंत्याः पुंजिकस्थल्याः कंदुकं अनुभ्रमद्दृष्टेः तस्याः सूक्ष्मं वासः वायुर्जहार २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(अनुकंदुकंकंदुकोत्पतनानुसारंचलंत्याः) २७ (तंमार्कंडेयं । स्वजितंस्वेनजितप्रायं) तत्रमार्कंडेयेसर्वंतेषांकर्ममोघंव्यर्थं (अभवत्) अनीशस्यनिर्देवस्य २८ मुनेरपकुर्वंतः प्रतिकूलमाचरंतः (त स्यतेजसा । अहिंसर्पं ।) हेमुने (शौनक) २९ अहमअहंकारस्यभावंविकारं (नागात्नप्राप्तः) ३० निस्तेजसंम्लानवदनंस्वराट्इंद्रः ३१ नरनारायणरूपोहरिः (आविरासीत् । नरेणयुक्तो नारायणोनरनारायणः) ३२ तावनुवर्णयतिद्वाभ्यां । ताविति रौरवंकृष्णाजिनंवल्कलंचाबरंययोस्तौ । पवित्रेपाण्योर्ययोस्तौ । त्रिवृत् । त्रिगुणंनवतंतुकमितिवा । त्रिवृद्भिः पवमानमित्यादौनव केप्रयोगात् (नवतंतुमयं) उपवीतकादीन्दधानौ ३३ (कमलाक्षाणांमालां) वेदंदर्भमुष्टिं । (जंतुमार्जनंचामरविशेषं ।) किंचसाक्षात्तपएवतौ । तत्रहेतुः तपत्तडिद्वर्णदेदीप्यमानविद्युत्संकाशं यत्पिशंग रोचिः तेनरूपिणौमूर्तिमंतौ । तादृक्तेजोयुक्तमूर्तिभ्यांतपोमयत्वेनप्रकाशमानावित्यर्थः । प्रांशूउन्नतौ ३४ उच्चैर्महताआदरेण ३५ तयोः संदर्शनेनयआनंदस्तेननिवृत्ताउपशांताआत्मेंद्रियाश यादेहेंद्रियम नांसियस्यसः नसेहे नाशक्नोत् ३६(प्रह्वोनम्रः औत्सुक्यात्प्रीत्यतिशयादितिभावः) आश्लिषन्निवआलिंगयन्निव । (नमोनमइतिबभाषे) ३७ आसनंसमर्प्यपादयोरवनिज्यपादौप्रक्षा ल्यअर्हणेनअ र्घेण (अनुलेपेनचंदनेन) ३८ पादाभ्यांपादौ (उद्दिश्य) आनम्यगरिष्ठौपूज्यतमौतौभति ३९

॥३६॥

श्लोकाः २७ ३९

इतस्ततोभ्रमद्दृष्टेश्चलंत्याअनुकंदुकम् ॥ वायुर्जहारतद्वासःसूक्ष्मंत्रुटितमेखलम् २७ विससर्जतदाबाणंमत्वातंस्वजितंस्मरः ॥ सर्वंतत्राभवन्मोघमनीशस्यय थोद्यमः २८ तइत्थमपकुर्वंतोमुनेस्तत्तेजसामुने ॥ दह्यमानानिवव्रृतुःप्रबोध्याहिमिवार्भकाः २९ इतींद्रानुचरैर्ब्रह्मन्धर्षितोपिमहामुनिः ॥ यन्नागाद हमोभावंनतच्चित्रंमहत्सुहि ३० दृष्ट्वानिस्तेजसंकामंसगणंभगवान्स्वराट् ॥ श्रुत्वानुभावंब्रह्मर्षेर्विस्मयंसमगात्परम् ३१ तस्यैवंयुंजतश्चित्तंतपःस्वाध्या यसंयमैः ॥ अनुग्रहायाविरासीन्नरनारायणोहरिः ३२ तौशुक्लकृष्णौनवकंजलोचनौचतुर्भुजौरौरववल्कलांबरौ ॥ पवित्रपाणीउपवीतकंत्रिवृत्कमंडलुं दंडमृजुंचवैणवम् ३३ पद्माक्षमालामुतजंतुमार्जनंवेदंचसाक्षात्तपएवरूपिणौ ॥ तपत्तडिद्वर्णपिशंगरोचिषाप्रांशूदधानौविबुधर्षभार्चितौ ३४ तेवैभगव तोरूपेनरनारायणावृषी ॥ दृष्ट्वोत्थायादरेणोच्चैर्ननामांगेनदंडवत् ३५ सतत्संदर्शनानंदनिर्वृत्तात्मेंद्रियाशयः ॥ हृष्टरोमाश्रुपूर्णाक्षोनसेहेताउदीक्षितुम् ॥ ३६ उत्थायप्रांजलिःप्रह्वऔत्सुक्यादाश्लिषन्निव ॥ नमोनमइतीशानौबभाषेगद्गदाक्षरः ३७ तयोरासनमादायपादयोरवनिज्यच ॥ अर्हणेनानुलेपेनधू पमाल्यैरपूजयत् ३८ सुखमासनआसीनौप्रसादाभिमुखौमुनिः ॥ पुनरानम्यपादाभ्यांगरिष्ठाविदमब्रवीत् ३९

चूर्णिका

२७ तदा स्मरः मुनौ बाणं विससर्ज तत्र इदं सर्वंव्यर्थं अभवत् २८ ततःऋषितेजसा दह्यमानाः कामाद्याः निववृतुः २९ ततः इंद्रः सगणं कामं निस्तेजसं दृष्ट्वा ऋषेः अनुभावं श्रुत्वा विस्मयं प्राप ३० ३१ एवं तपआदिभिः चित्तं युंजतः तस्य अनुग्रहाय नरनारायणो हरिः आविरासीत् ३२ तौ शुक्लकृष्णौचतुर्भजौ कंजनेत्रौ रौरववल्कलांबरौ साक्षात्तपोरूपिणौ नरनारायणौ ऋषी दृष्ट्वा उत्थायतौ दंडवत् ननाम ३३ ३४ ३५ तद्दर्शनात् प्रहृष्टरोमा ऋषिः अश्रुपूर्णाक्षः सन् उत्थाय ३६ प्रांजलिः गद्गदाक्षरः तौ नमो नम इति बभाषे ३७ ततः तयोःआसनं दत्त्वा पादौ प्रक्षाल्य तौ अपूजयत् ३८ पुनः पादौ प्रणम्य इदमब्रवीत् ३९

॥३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अंतर्यामिणस्तस्यैवप्राणादिप्रवर्तकत्वादात्मनस्तत्स्तुतावस्वातंत्र्यंपश्यन्नाह । किमिति । हेविभोतवत्वांकिमहंवर्णये कथंस्तौमि यत् येनत्वयैवउदीरितः प्रेरितोअसुः प्राणः संस्पंदतेप्रवर्तते । तमनुच
वागादयः स्पंदंति । अत्रहेतुः वैअन्वयव्यतिरेकाभ्यांश्रोत्रस्यश्रोत्रमित्यादिश्रुतिभिश्चतत्प्रसिद्धमित्यर्थः । नकेवलंप्राकृतानांतनुभृतांकिंतुअजशर्वयोश्चअतःस्वस्यममापितथैवएवंयद्यपिन (क्वचिदपि)
कस्यापिस्वातंत्र्यंअथापिदारुयंत्रवत्त्वत्प्रवर्तितैरपिवागादिभिर्भजतांपुंसांभवबंधुः आत्मबंधुरसिनतुपित्रादिवद्देहमात्रबंधुः अहोकृपालुतातवेत्यर्थः ४० ननुकथंआवांप्राणादिप्रवर्तकौधर्मपुत्रत्वादावयो
रितिचेत्तत्राह । मूर्तीइति । हेभगवन्भगवतस्तवइमेमूर्तीत्रिलोक्याः क्षेमायपालनायतापविरमायदुःखनिवृत्त्यैमृत्युजित्यैमोक्षायवनतुत्वंकस्यापिपुत्रः (- असी -) त्यर्थः । अत्रदृष्टांतः यथेदंविश्वमवितुं
अन्यास्तनूर्मत्स्यकूर्मादिलक्षणानानाअनेकप्रकाराविभर्षितद्वत् । नकेवलंपालनादिमात्रंतवकर्मकिंतुसृष्टिलयावपीत्याह । सृष्ट्वेति । तत्राप्यन्यनिरपेक्षत्वेदृष्टांतः । ऊर्णनाभिरिवेति ४१ यस्मादेवंभूत
स्त्वंतस्मात्तवांघ्रिमूलंभजामीत्याह । तस्येति । तस्यावितुःपालकस्यस्थावरजंगमाना -(- मीशितु-)- रीश्वरस्य । भजामीतितृतीयश्लोकस्यानुषंगः । कथंभूतमंघ्रिमूलं । यत्स्थंयत्रस्थितं (पुरुषं) कर्म
गुणकालानांरजोमलः अन्येचपूर्वोक्तास्तापादयोनस्पृशंति । रुजइतिवापाठः । यतः वेदोहृदयेयेषांतेवेदतात्पर्यविदोमुनयः यदेवस्तुवंतिनितरां (दंडवत्) तदाप्त्यैनमंति (यजंतिपूजंतिच) तत्प्रा
प्तयएवस्तवनादिकुर्वंति ४२ यतोऽन्यः पुरुषार्थोनास्तीत्याह । नान्यमिति । (हेईशतवआनंदमूर्तेः) अंघ्र्युपनयात्श्रीमच्चरणप्राप्तेः अन्यंक्षेमं (कुशलं) नविद्मः परितः सर्वेष्वपिलोकेषुभीर्यस्यतस्य
जनस्य । तदेवाह । द्विपराध्यं (द्विपरार्धस्थायिसत्यलोकाख्यं) धिष्ण्यंस्थानंयस्यसः ब्रह्मापिते (तव) कालस्यत्वद्भ्रूविजृंभरूपात्कालात्अलंबिभेति । अतः किमुतवक्तव्यंतेनब्रह्मणाकृतानां
भौतिकानांप्राणिनांभयमिति ४३ यस्मादेवंतत्तस्मात्तवपादमूलंभजामि । कथंभूतस्यकृतधियः सत्यज्ञानस्वरूपस्य । यद्वा सत्याधीर्यस्ययस्मिन्वातस्य । आत्मगुरोः जीवनियंतुः अतःकारणात्
परस्य । किंकृत्वा । आत्मच्छदिस्वात्मावरकंअपार्थंचनिष्फलं असच्चतुच्छंअंत्यंचनश्वरंइदंदेहादिहित्वादेहादिभजनंत्यक्त्वा असच्चेत्कथंप्रतीयतेतत्राह अभिज्ञमात्रंनह्यत्यंतमसत् (खपुष्पतुल्यं) किंत्वा
त्ममात्रंनततःपृथगस्ति (रज्जुसर्पवत्) इत्यर्थः । नन्वपवर्गायभवतुमद्भजनं । फलांतरार्थंत्वन्यभजनंकार्यमेवतत्राह । तर्हीति । यदित्वांभजातिपुरुषः तर्हितेत्वत्तएवसर्वंमनीषितमर्थांविंदेतेति ४४

श्लोकाः ४०—४४

॥ मार्कंडेयउवाच ॥ किंवर्णयेतवविभोयदुदीरितोऽसुःसंस्पंदतेतमनुवाङ्मनइंद्रियाणि ॥ स्पंदंतिवैतनुभृतामजशर्वयोश्चस्वस्याप्यथापिभजतामसिभावबं
धुः ४० मूर्तीइमेभगवतोभगवंस्त्रिलोक्याःक्षेमायतापविरमायचमृत्युजित्यै ॥ नानाबिभर्ष्यवितुमन्यतनूर्यथेदंसृष्ट्वापुनर्ग्रससिसर्वमिवोर्णनाभिः ४१ तस्या
वितुःस्थिरचरेशितुरंघ्रिमूलंयत्स्थंनकर्मगुणकालरजःस्पृशंति ॥ यद्वैस्तुवंतिनिनमंतियजंत्यभीक्ष्णंध्यायंतिवेदहृदयामुनयस्तदाप्त्यै ४२ नान्यंतवांघ्र्युपन
यादपवर्गमूर्तेःक्षेमंजनस्यपरितोभियईशविद्मः ॥ ब्रह्माबिभेत्यलमतोद्विपरार्ध्यधिष्ण्यःकालस्यतेकिमुततत्कृतभौतिकानाम् ४३ तद्वैभजाम्यृतधियस्तवपा
दमूलंहित्वेदमात्मच्छदिचात्मगुरोःपरस्य ॥ देहाद्यपार्थमसदंत्यमभिज्ञमात्रंविंदेततेतर्हिसर्वमनीषितार्थम् ४४ .

चूर्णिका ॥३७॥

हे विभो त्वां अहं कथं स्तौमि यतः त्वयैवप्रेरिताः प्राणेंद्रियादयः चलंति अतः न कस्यापि स्वातंत्र्यम् ४० हे भगवन् त्वं इमे मूर्ती त्रिलोक्याः क्षेमाय बिभर्षि तथा
अन्यतनूश्च एवंभूताय नारायणाय ऋषये नमोस्तु किंच कपटेंद्रियमार्गैः भ्रमद्धीः पुरुषः स्वेंद्रियादिपुसंतमपि त्वां नवेद एवंभूतं महापुरुषं त्वां वंदे ४१ ४२ ४३ ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥८॥

ननु ब्रह्मरुद्रावपिममैवमूर्तींअतोमामेवकिमत्यंतमाद्रियसे । तत्राह सत्त्वमिति । यदपियद्यपितवैवमाययाकृताएतालीलास्त्वयैवधृतास्तथापियासत्त्वमयीसैवप्रशांत्यैमोक्षाय (नान्येराजसीतामसीच) न केवलमस्यप्रशांत्यभावमात्रमन्यभजनेकिंत्वनिष्टंच (किंचिदन्यथात्वे)भवेदित्याहव्यसनेति ४५ तदेवसदाचारेणद्रढयति । तस्मादिति । हेभगवन्तवशुक्लांतनुंश्रीनारायणाख्यांअथतावकानांचशुक्लांतनुंनराख्यांयत्‌यस्मात्सात्वताःसत्त्वमेवपुरुषस्याधीश्वरस्यरूपमुशंतिमन्यंते । नत्वन्यत्रजस्तमश्चेति । अत्रहेतुः । यतःसत्त्वात्‌लोकोवैकुंठाख्यःलोकत्वेसत्यप्यभयंच । भोगेसत्यप्यात्मसुखंच ४६ अतस्तंप्रणमति ।तस्मैनमइति । हंसायशुद्धाय । संयतगिरेनियतवाचे । अथचनिगमेश्वराय । वेदमार्गप्रवर्तकाय ४७ वेदार्थसंप्रदायप्रवर्तनेहेतुत्वंवदन्स्तौति यमिति । वितथाक्षपथैः कपटेंद्रियमार्गैर्भ्रमद्धीः विक्षिप्तबुद्धिः पुमान्स्वेंद्रियादिषुनियंतृत्वेनसंतमपियंत्वांनवेद । दृक्पथेषुविषयेषु बुद्धिविक्षेपेहेतुः तन्माययातस्यतवैवमाययाआवृताआत्मनिष्ठामतिर्यस्यसः सउसोपिआद्यएवपूर्वमज्ञातैवअखिलगुरोस्तवत्वत्प्रवर्तितंवेदमुपसाद्यप्राप्यतंत्वांसाक्षाद्वेद ४८ वेदेनैवत्वज्ज्ञानमित्युपपादयन्प्रणमति । यस्यतवदर्शनंनिगमेभवति । कथंभूतंआत्मनस्तवरहोरहस्यंतस्यप्रकाशकम् । अन्यथादुर्ज्ञेयतामाह । अजपराब्रह्ममुख्याः कवयोपिसांख्ययोगादिभिर्यतमानायत्रत्वयिमुह्यंति । कुतइत्यतआह । सर्वेषांसांख्यादिवादिनांयेवादाः तेषांविषयाभेदादयस्तेषांप्रतिरूपंतत्तदनुसारिशीलंस्वभावोयस्यतं । कुतः । आत्मनादेहादिसंघातेननिगूढोबोधोयस्यतंएवंभूतंमहापुरुषंत्वांवंदे ॥ ४९ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांअष्टमोऽध्यायः ॥ ८ ॥ ॥ ७ ॥ ॥ नवमेभगवन्मायादिदृक्षोर्दर्शनंमुहुः ॥ मायाशिशोर्लयाब्धौचमुनेर्निर्वेशनिर्गमौ ॥ १ ॥ भगवतः परितोषपूर्वकंतदपेक्षितवरदानंकथयितुमाहसंस्तुतइत्यादिना १ आत्मसमाधिनाचित्तैकाग्र्येण । (अनपायिन्याअविच्छिन्नया । तपआदिभिश्चासिद्धोसि) २ (तवनैष्ठिकब्रह्मचर्यव्रताचरणेन) वयंतेपरितुष्टाः स्मेतिबहुवचनंसर्वदेवाभिप्रायेण । वरदेशादित्येकवचनंद्वयोरैक्याभिप्रायेणप्रतीच्छगृहाण ३

॥३८॥

श्लोकाः ४९/३

सत्त्वंरजस्तमइतीशतवात्मबंधोमायामयाःस्थितिलयोदयहेतवोस्य ॥ लीलाधृतायदपिसत्त्वमयीप्रशांत्यैनान्येनृणांव्यसनमोहभियश्चयाभ्याम् ४५
तस्मात्तवेहभगवन्नथतावकानांशुक्लांतनुंस्वदयितांकुशलाभजंति ॥ यत्सात्वताःपुरुषरूपमुशंतिसत्त्वंलोकोयतोऽभयमुतात्मसुखंचनान्यत् ४६ तस्मैनमो
भगवतेपुरुषायभूम्नेविश्वायविश्वगुरवेपरदेवतायै ॥ नारायणायऋषयेचनरोत्तमायहंसायसंयतगिरेनिगमेश्वराय ४७ यंवैनवेदवितथाक्षपथैर्भ्रमद्धीःसंतं
स्वखेष्वसुषुहृद्यपिदृक्पथेषु ॥ तन्माययावृतमतिःसउएवसाक्षादाद्यस्तवेऽखिलगुरोरुपसाद्यवेदम् ४८ यद्दर्शनंनिगमआत्मरहःप्रकाशंमुह्यंतियत्रकवयोऽज
परायतंतः ॥ तंसर्ववादविषयप्रतिरूपशीलंवंदेमहापुरुषमात्मनिगूढबोधम् ४९ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेअष्टमोऽध्यायः ॥ ८ ॥
॥ सूतउवाच ॥ संस्तुतोभगवानित्थंमार्कंडेयेनधीमता ॥ नारायणोनरसखःप्रीतआहभृगूद्वह १ ॥ श्रीभगवानुवाच ॥ भोभोब्रह्मर्षिवर्यासिसिद्धआ
त्मसमाधिना ॥ मयिभक्त्यानपायिन्यातपःस्वाध्यायसंयमैः २ वयंतेपरितुष्टाःस्मत्वद्बृहद्व्रतचर्यया ॥ वरंप्रतीच्छभद्रंतेवरदेशादभीप्सितम् ३ ॥

॥३८॥

चूर्णिका

४५ ४६ ४७ ४८ ४९ ॥ इति द्वादशे अष्टमः ॥ ८ ॥ ॥ ७ ॥ ॥ सूत उवाच ॥ इत्थं मार्कंडेयेन संस्तुतः नरसखः नारायणः प्रीतः सन् भृगूद्वहं आह १ भो भो ब्रह्मर्षिवर्य त्वं तप आदिभिः सिद्धोसि २ वयं ते तुष्टाःस्म ते भद्रमस्तु ईप्सितं वरं वरय ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका वरेणच्छंदयतात्वयाजितंउत्कर्षोदर्शितः । ममतुवराकांक्षानास्तीत्याह । वरेणेति (भवान्समदृश्यतेतियत् । एतावतादर्शनमात्रेणवरेणालं दर्शनेनैवकृतकृत्योस्मीत्यर्थः) ४ यस्यतवश्रीमत्पादाब्जदर्शनंमनसापिगृहीत्वा (ध्यानमात्रेण) प्राप्यकृतार्थाअजादयोभवंति सभवान्मेऽक्षगोचरः (चक्षुरादींद्रियविषयो) जातोस्तिकिमतःपरंवरेणेत्यर्थः (कथंभूतेनमनसायोगपक्केनयोगस्यपरिपाकंप्राप्तेन) ५ ईक्षेद्रष्टुमिच्छामीत्यर्थः लोकपालैर्ब्रह्मादिभिः सहितोयंलोकोजनः ययासद्भिदांसतिवस्तुनिभेदं (ययामाययाजानीतेइति) ६ तथेतिद्रक्ष्यसीति (उक्त्वेत्यर्थः) सईश्वरः स्मयन् (दुर्घटैकविधायिनींदुरत्ययामहोमायामयंदिदृक्षतीतिमंदंहसन्) प्रागात् (सस्मयमिति -)- पाठांतरेक्रियाविशेषणं ७ तमेवार्थं (मायांदर्शयिष्यतीति) तद्दर्शनरूपं । अग्न्यादिमूर्तिषु (अष्टसु किंबहुनासर्वत्रचहरिंचिंतयन्) ८भावद्रव्यैः मनोमयैर्द्रव्यैः(अपूजयत्) क्वचित्कदाचित्प्रेमप्रसरसंप्लुतः प्रेमोद्रेकंप्राप्तः ९ मायादर्शनमाह । तस्येत्यादिना (हेमुनेहेब्रह्मन्इतिसंबोधनद्वयंअवधानार्थंपुष्पभद्रायास्तटसमीपेआसीनस्यसतः संध्यासमयेवायुरुत्पन्नः) १० तंवायुमनुवलाहकामेघाअभवन्आविर्बभूवुः । तेचताडिद्भिः सहिताउच्चैः स्वनंतोगर्जंतः अक्षोरथांगंतद्वत्स्थविष्ठाः अभितोवर्षधारामुमुचुः ११ चतुर्दिक्षुवर्तमानाः समुद्राः समीरवेगेनोर्मयः (कल्लोला-)-स्तैर्भूमंडलं (समंततो) ग्रसंतःउग्रानक्रा (ग्राहा) येषु महाभयाआवर्ता (अंभसांभ्रमा) येषुगभीरोघोषोयेषुतेचतेचतेच १२ आत्मनासहजरायुजादिचतुर्विधंजगदंतर्बहिश्चउपतापितं (पीडितं) वीक्ष्यक्ष्मांजलाप्लुतांवीक्ष्यमुनिः समत्रसत्भयंप्राप । केनोपतापितं । अद्भिः कथंभूताभिः अतिद्युभिः अतिक्रांताद्यौः (नभः स्वर्गोवा) याभिस्ताभिः खरैश्चसूर्यरश्मिभिर्वायुभिर्वेतिशेषः । शतहृदाभिः विद्युद्भिः । दीर्घत्वमार्षंछंदोनुसारेण १३

॥३९॥

ऋषिरुवाच ॥ जितंतेदेवदेवेशप्रपन्नार्तिहराच्युत ॥ वरेणैतावतालंनोयद्भवान्समदृश्यत ४ गृहीत्वाऽजादयोयस्यश्रीमत्पादाब्जदर्शनम् ॥ मनसायोगपक्केनसभवान्मेक्षगोचरः ५ अथाप्यंबुजपत्राक्षपुण्यश्लोकशिखामणे ॥ ईक्षेमायांययालोकःसपालोवेदसद्भिदाम् ६ ॥ सूतउवाच ॥ इतीडितोऽर्चितःकाममृषिणाभगवान्मुने ॥ तथेतिसस्मयंप्रागाद्बदर्याश्रममीश्वरः ७ तमेवचिंतयन्नर्थमृषिःस्वाश्रमएववसः ॥ वसन्नग्न्यर्कसोमांबुभूवायुवियदात्मसु ८ ध्यायन्सर्वत्रचहरिंभावद्रव्यैरपूजयत् ॥ क्वचित्पूजांविसस्मारप्रेमप्रसरसंप्लुतः ९ तस्यैकदाभृगुश्रेष्ठपुष्पभद्रातटेमुने ॥ उपासीनस्यसंध्यायांब्रह्मन्वायुरभून्महान् १० तंचंडशब्दंसमुदीरयंतंबलाहकाअन्वभवन्करालाः ॥ अक्षस्थविष्ठामुमुचुस्तडिद्भिःस्वनंतउच्चैरभिवर्षधाराः ११ ततोव्यदृश्यंतचतुःसमुद्राःसमंततःक्ष्मातलमाग्रसंतः ॥ समीरवेगोर्मिभिरुग्रनक्रमहाभयावर्तगभीरघोषाः १२ अंतर्बहिश्चाद्भिरतिद्युभिःखरैःशतह्रदाभीरुपतापितंजगत् ॥ चतुर्विधंवीक्ष्यसहात्मनामुनिर्जलाप्लुतांक्ष्मांविमनाःसमत्रसत् १३

श्लोकाः ४/१३

चूर्णिका मार्कंडेय उवाच हे अच्युत यत् ते दर्शनं जातं एतावता वरेण अलम् ४ ५ अथापि हे पुण्यश्लोकशिखामणे त्वन्मायां द्रष्टुमिच्छामि ६ सूत उवाच ईश्वरः तथेत्युक्त्वा बदर्याश्रमं अगात् ७ ततः ऋषिः तमेवार्थं चिंतयन् स्वाश्रमे एव वसन् ८ सर्वत्र हरिं ध्यायन् मनोमयैः द्रव्यैः तं अपूजयत् कदाचित्प्रेमोद्रेकं प्राप्तः सन् पूजां विसस्मार ९ हे शौनक एकदा तस्य उपासीनस्य सतः संध्यायां महान् वायुः अभूत् १० तमनु मेघाः तडिद्भिः गर्जंतः आविर्बभूवुः वर्षधाराश्च मुमुचुः ११ ततः चतुःसमुद्राः क्ष्मातलं ग्रसंतः व्यदृश्यंत १२ ततः आत्मना सह चतुर्विधं जगत् भीतं तथा जलाप्लुतां क्ष्मां च वीक्ष्य मुनिः समत्रसत् १३

१ द्रक्ष्ये० पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(उद्वीक्षतः उद्वीक्षमाणस्यसतः ऊर्मिभिर्भीषयतीतितथा) प्रभंजनेन (वायुना) आघूर्णितंप्रकंपितंवाः उदकंयस्मिन्सः (वर्षद्भिर्मेघैरासमंतात्पूर्यमाणः द्वीपादिभिः समंसहक्ष्मां) अप्यधात्छा
दयामास १४ सक्ष्मांतरिक्षंभूम्यंतरिक्षस्थप्राणिसहितंसदिवंस्वर्गस्थदेवसहितंभगणाज्योतिर्गणास्तैः सहितं (दिग्भिश्चसहआप्लुतंअप्सुमग्नं) जटाविक्षिप्यविकीर्य १५ (क्षुधातृषाचपरीतोवीचिनभ
स्वतातरंगयुक्तवायुनाहतस्ताडितः) परिश्रमेणइषितः गतः व्याप्तइत्यर्थः इषुसर्पणइत्यस्मात् (निष्ठाअपारेतमसिपतितः तत्रभ्रमन्सन्दिशः खंपृथ्वींचनवेद । तमसाजलेनचव्याप्तत्वात्) १६
(महावर्तेमहतिजलभ्रमे। तरलैरूर्मिभिः यादोभिर्जलजंतुभिः) अन्योन्यघातिभिः तद्भक्षणायपरस्परंयुध्यद्भिः १७ (अर्दितः पीडितःमृत्युमवाप्नोतिमृत्युंप्राप्तइतिस्वंपश्यति)१८ विष्णुमायाकृतात्मनइति
(मायावृतत्वात्) सतथादृष्टवानित्यर्थः १९ (सद्विजोमार्कंडेयस्तस्मिन्महार्णवेभ्रमन्भुवः) ककुदिउन्नतप्रदेशेन्यग्रोधपोतंकोमलंवटं २० तस्येशानदिग्-(-गत-) शाखायांशिशुमपि २१ श्री
मत्रम्यंवदनपंकजंयस्यतम् । कंबुवत्त्रिरेखावृताग्रीवायस्य। तम् । महोरस्कंविशालवक्षसम् । सुनासंशोभनानासायस्यतम्। सुंदरेभ्रुवौयस्यतम् २२ श्वासैरेजंतः कंपमानाअलकास्तैराभातं
शोभितम्। कंबुवत्अंतर्वलयेनश्रीः (शोभा) ययोस्तौतयोः कर्णयोःदाडिमपुष्पेयस्यतम्। (यद्वा कंबुश्रीकर्णयोरधोभागेलंबमानौदाडिमपुष्पाकारौआभरणविशेषौयस्येत्यर्थः) विद्रुमतुल्याध
रभासाईषत्शोणायितंसुधातुल्यंस्मितंयस्यतम् २३ पद्मगर्भवत्आईषत्अरुणौअपांगौनेत्रप्रांतौयस्यतम्। हृद्यो (मनोहरो) हासोयस्मिन्तदवलोकनंयस्यतम्। श्वासैरेजंत्यश्चलंत्योवलयस्तिर्यग्भिन्न
रेखास्ताभिः (तिसृभिः) संविग्नाचंचलानिम्नागभीरानाभिर्यस्मिंस्ततद्दलवदश्वत्थपत्रसंकाशमुदरंयस्यतम् २४

॥४०॥

श्लोकाः १४/२४

तस्यैवमुद्वीक्षतऊर्मिभीषणःप्रभंजनाघूर्णितवार्महार्णवः ॥ आपूर्यमाणोवर्षद्भिरंबुदैःक्ष्मामप्यधाद्द्वीपवर्षाद्रिभिःसमम् १४ सक्ष्मांतरिक्षंसदिवंसभागणं
त्रैलोक्यमासीत्सहदिग्भिराप्लुतम् ॥ सएकएवोर्वरितोमहामुनिर्बभ्रामविक्षिप्यजटाजडांधवत् १५ क्षुत्तृट्परीतोमकरैस्तिमिंगिलैरुपद्रुतोवीचिनभस्वता
हतः ॥ तमस्यपारेपतितोभ्रमन्दिशोनवेदखंगांचपरिश्रमेषितः १६ क्वचिद्गतोमहावर्तेतरलैस्ताडितःक्वचित् ॥ यादोभिर्भक्ष्यतेक्वापिस्वयमन्योन्यघा
तिभिः १७ क्वचिच्छोकंक्वचिन्मोहंक्वचिद्दुःखंसुखंभयम् ॥ क्वचिन्मृत्युमवाप्नोतिव्याध्यादिभिरुतार्दितः १८ अयुतायुतवर्षाणांसहस्राणिशतानिच ॥
व्यतीयुर्भ्रमतस्तस्मिन्विष्णुमायावृतात्मनः १९ सकदाचिद्भ्रमंस्तस्मिन्पृथिव्याःककुदिद्विजः ॥ न्यग्रोधपोतंददृशेफलपल्लवशोभितम् २० प्रागुत्तर
स्यांशाखायांतस्यापिददृशेशिशुम् ॥ शयानंपर्णपुटकेग्रसंतंप्रभयातमः २१ महामरकतश्यामंश्रीमद्वदनपंकजम् ॥ कंबुग्रीवंमहोरस्कंसुनासंसुंदरभ्रुवम्
२२ श्वासैजदलकाभातंकंबुश्रीकर्णदाडिमम् ॥ विद्रुमाधरभासेषच्छोणायितसुधास्मितम् २३ पद्मगर्भारुणापांगंहृद्यहासावलोकनम् ॥ श्वासैजद्व
लिसंविग्ननिम्ननाभिदलोदरम् २४

चूर्णिका ॥४०॥

१४ततः सर्वं त्रैलोक्यं जलाप्लुतं आसीत् स एक एव उर्वरितः जटाः विकीर्य जडांधवत् बभ्राम १५ क्वचित् सः ऋषिः मकरादिभिः उपद्रुतः तरंगैस्ताडितः यादोभिः भ
क्षितःक्वचित् शोकं क्वचित् मोहं सुखं दुःखं मृत्युं आप्नोति १६ १७ १८ एवं तत्र भ्रमतः तस्य अयुतायुतवर्षाणि व्यतीयुः १९ सः कदाचित् तत्र भ्रमन् पृथिव्याःउच्च
देशे न्यग्रोधपोतं ददर्श २० तस्य ईशानादिक्शाखापत्रपुटे शयानं कंबुग्रीवं मरकतश्यामं हस्ताभ्यां चरणांगुष्ठं मुखे निधाय चुंबंतं बालं मुकुंदं वीक्ष्य २१ २२ २३ २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका ॥ ९ ॥

चारवः अंगुलपोपयोस्ताभ्यां । उन्नयिआकृष्यधयंतंपिबंतम् २५ हृत्पद्मंचविलोचनांबुजेचप्रोत्फुल्लानितानियस्यसः। अद्भुतभावआश्चर्यरूपत्वं (आश्चर्यरूपाचेष्टावा) तेनशंकितः सन्नपिप्रष्टुंतंपुरःप्रससार समीपंगतवान् २६ अदः इदंजगत्यथापुराप्रलयात्पूर्वं (तथा) न्यस्तं (कृत्स्नंददर्श) दृष्ट्वाचअतीवविस्मितः सन्अमुह्यत् २७ कृत्स्नशोदर्शनंप्रपंचयति । खमित्यादिना (रोदसीद्यावापृथिव्यौभगणान् ज्योतिर्लोकस्थानूचंद्रादीन् । वर्षैर्भारतादिभिः सहितान्जंबुद्वीपादीन्) ककुभोदिशः पुराणि (नगराणि) आकरांश्च (खनीः) खेटानूकर्षकग्रामान् । व्रजान्गोकुलानि । आश्रमांश्चवर्णांश्चते षांवृत्तीश्चेत्यर्थः २८ (भौतिकानिभूतकार्याणिघटादीनि) नानायुगानिकल्पांश्चकल्पयतितैर्वाकल्प्यते (मयिते) इतितथातंकालंच । सदिवपरमार्थइवेत्यवभासितंतेनैव (अन्यच्चयत्किंचिद्व्यव हारकारणंदानोपादानादिव्यवहारयोग्यंतत्सर्वमद्राक्षीत्) २९ (पुष्पवहांपुष्पभद्राख्यां । यत्रऋषीनरनारायणौ। शिशोः श्वसितात्श्वासेनबहिर्निरस्तः) ३० वटंच (ककुदिउच्चभागेप्ररू ढंवीक्ष्य) तोकं (बालं) चवीक्ष्यतस्य (तोकस्य) प्रेम्णासुधातुल्यस्मितयुक्तेनअपांगनिरीक्षणेननिरीक्षितः सन् ३१ अथ (कृत्स्नं) तंबालकमधोक्षजंपरिष्वक्तुमभ्ययादितिद्वयोरन्वयः कथंभू तंनेत्राभ्यां (चक्षुरिंद्रियद्वारा) हृदिधिष्ठितम् (अतिसंक्लिष्टः अतिसंक्लेशयुक्तः) ३२ तावत्परिष्वंगलाभात्पूर्वमेवऋषेस्तस्यअंतर्हितोबभूव (अदृश्योभूदित्यर्थः) तदुद्यमवैफल्येदृष्टांतः । अनीशोनि दैवः तेननिर्मिताईहाक्रीडा (यथादैवहीनेनरचितोव्यापारविशेषो) यथेत्यर्थः ३३ (तं) अंतर्हितंभगवंतमनुवटो (न्यग्रोधः) सलिलंलोकस्यसंप्लवश्चतिरोधायिअंतर्हितः सच (ऋषिः पूर्ववत्) स्वाश्रमेएवस्थितइति ॥ ३४ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांनवमोऽध्यायः ॥ ९ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥ ॥ ७ ॥ ॥

॥४१॥

श्लोकाः २५—३४

चार्वंगुलिभ्यांपाणिभ्यामुन्नीयचरणांबुजम् ॥ मुखेनिधायविप्रेंद्रोधयंतंवीक्ष्यविस्मितः २५ तद्दर्शनाद्वीतपरिश्रमोमुदाप्रोत्फुल्लहृत्पद्मविलोचनांबुजः ॥
प्रहृष्टरोमाद्भुतभावशंकितःप्रष्टुंपरस्तंप्रससारबालकम् २६ तावच्छिशोर्वैश्वसितेनभार्गवःसोंतःशरीरंमशकोयथाविशत् ॥ तत्राप्यदोन्यस्तमचष्टकृत्स्नशो
यथापुराऽमुह्यदतीवविस्मितः २७ खंरोदसीभगणानद्रिसागरान्द्वीपान्सवर्षान्ककुभःसुरासुरान् ॥ वनानिदेशान्सरितःपुराकरान्खेटान्व्रजानाश्रम
वर्णवृत्तयः २८ महांतिभूतान्यथभौतिकान्यसौकालंचनानायुगकल्पकल्पनम् ॥ यत्किंचिदन्यद्व्यवहारकारणंददर्शविश्वंसदिवावभासितम् २९ हिमा
लयंपुष्पवहांचतांनदींनिजाश्रमंयत्रऋषीअपश्यत् ॥ विश्वंविपश्यन्श्वसिताच्छिशोर्वैबहिर्निरस्तोन्यपतल्लयाब्धौ ३० तस्मिन्पृथिव्याःककुदिप्ररूढं
वटंचतत्पर्णपुटेशयानम् ॥ तोकंचतत्प्रेमसुधास्मितेनानिरीक्षितोऽपांगनिरीक्षणेन ३१ अथतंबालकंवीक्ष्यनेत्राभ्यांधिष्ठितंहृदि ॥ अभ्ययादतिसंक्लिष्टः
परिष्वक्तुमधोक्षजम् ३२ तावत्सभगवान्साक्षाद्योगाधीशोगुहाशयः ॥ अंतर्दधेऋषेःसद्योयथेहाऽनीशनिर्मिता ३३ तमन्वथवटोब्रह्मन्सलिलंलोकसं
प्लवः ॥ तिरोधायिक्षणात्सोपिस्वाश्रमेपूर्ववत्स्थितः ॥ ३४ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेमायादर्शनंनामनवमोऽध्यायः ॥ ९ ॥

चूर्णिका

२५ तद्दर्शनात् गतश्रमः प्रहृष्टरोमा मार्कंडेयः तं बालं प्रष्टुं पुरः प्रससार २६ तावत् शिशोः श्वसितेन मशक इव तदंतः अविशत् तदुदरे गतः सन् पु र्ववत्सर्वं ब्रह्मांडं स्वाश्रमं च दृष्ट्वा विस्मितः आस २७ २८ २९ एतर्ह्येव शिशोः श्वासात् बहिर्निर्गतः सन् लयाब्धौ अपतत् ३० पुनः पृथिव्याः ककुदि वटं तत्प र्णपुटे शयानं तोकं च वीक्ष्य तेन निरीक्षितः सन् तं अधोक्षजं परिष्वक्तुं अभ्यगात् ३१ ३२ तावत् भगवान् अंतर्दधे तमनु वटः सलिलं लोकसंप्लवः सद्यः तिरोधा यि स च स्वाश्रमे पूर्ववत् स्थितः ३२ ३३ ३४ ॥ इति द्वादशे नवमः ॥ ९ ॥

॥४१॥

भा.द्वा. दशमेशिवआगत्यमुनेस्तुष्टोवरानदात् ॥ तेनसाकमतिप्रीत्यासमाभाष्यसभाजयन् ॥ १ ॥ (नारायणेनविनिर्मितंप्रदर्शितम्) १ (प्रपन्नानांशरणंगतानामभयदं) ज्ञानकाशया ज्ञानवत्प्रकाशमान अ०
यात्वद्भजनंविनाविद्वांसोपियस्यतवमायया‌ज्ञानिनोवयमित्यहंकारेणमुह्यंति (किमुतवयं) इत्यर्थः २ श्रीनारायणएवस्वमायादर्शनेनश्रांतंश्रीशिवरूपेणसांत्वयामास तदाह 'तमेवमित्यादिना ' रु
टीका द्राण्याभवान्या (सहवृषेणनभसिपर्यटन्) निभृतात्मानंसमाहितचित्तम् ३ (अनंतरमुमापितंवीक्ष्यहेभगवन्इमंविप्रं) निभृतानिश्चलाआत्मेंद्रियाशयादेहेंद्रियमनांसियस्यतम् ४ निभृतंनिश्चलंउदकंझषव्रा ॥१०॥
वो (मीनसमूह-)-श्चयस्मिन्तंसंसिद्धिंफलंसाक्षात्कुरुप्रकटीकुरु । यतोभवान्सिद्धदः ५ आशिषः अभ्युदयलक्षणाः उतनिश्चितं (अप्युतअपिस्विन्) अत्रहेतुः । भक्तिमिति ६ (हेभवानिअथापि
इच्छायाअभावेपि) संवदिष्यामः संवादंकरिष्यामः (हियस्मात्) ७ सात्वतांसाधूनां (भक्तानां) गतिः तद्गतित्वेहेतुः ईशानइति ८ रुद्धाःधियोअंतःकरणस्यवृत्तयोयेनसः ९ (तत्समाहि
॥४२॥ तत्वमभिज्ञायतस्यगुहाकाशंहृदयाकाशंयोगमाययाप्राविशत्) १० नकेवलंबहिरेव (स्थितः किंतुपरमकृपया) आत्मन्यपि (अंतरंगेप्राप्तइतितं) शिवंविचक्ष्य (दृष्ट्वाहृदि) विस्मितः । कथंप्राप्तम् ।
सहसाअकस्मादेवहृदिभातम् । कथंभूतम् । तडिद्वत्पिशंगाजटाधारयतीतितथातम् । त्रीण्यक्षीणियस्यतम् ११

॥ सूतउवाच ॥ सएवमनुभूदयेदंनारायणविनिर्मितम् ॥ वैभवंयोगमायायास्तमेवशरणंययौ १ ॥ मार्कंडेयउवाच ॥ प्रपन्नोस्म्यंघ्रिमूलंतेप्रपन्नाभयदंहरे ॥ श्लोकाः
यन्माययापिविबुधामुह्यंतिज्ञानकाशया २ ॥ सूतवाच ॥ तमेवंनिभृतात्मानंवृषेणदिविपर्यटन् ॥ रुद्राण्याभगवान्रुद्रोददर्शस्वगणैर्वृतः ३ अथोमात
मृषिंवीक्ष्यगिरिशंसमभाषत ॥ पश्येमंभगवन्विप्रंनिभृतात्मेंद्रियाशयम् ४ निभृतोदझषव्रातोवातापायेयथार्णवः ॥ कुर्वस्यतपसःसाक्षात्संसिद्धिंसिद्धिदोभ १/११
वान् ५ ॥ श्रीभगवानुवाच ॥ नैवेच्छत्याशिषःक्वापिब्रह्मर्षिर्मोक्षमप्युत ॥ भक्तिंपरांभगवतिलब्धवान्पुरुषेऽव्यये ६ अथापिसंवदिष्यामोभवान्येतेन
साधुना ॥ अयंहिपरमोलाभोनृणांसाधुसमागमः ७ ॥ सूतउवाच ॥ इत्युक्त्वातमुपेयायभगवान्सात्त्वतांगतिः ॥ ईशानःसर्वविद्यानामीश्वरःसर्वदेहि
नाम् ८ तयोरागमनंसाक्षादीशयोर्जगदात्मनोः ॥ नवेदरुद्धधीवृत्तिरात्मानंविश्वमेवच ९ भगवांस्तदभिज्ञायगिरिशोयोगमायया ॥ आविशत्तद्गुहाकाशं
वायुश्छिद्रमिवेश्वरः १० आत्मन्यपिशिवंप्राप्तंतडित्पिंगजटाधरम् ॥ त्र्यक्षंदशभुजंप्रांशुमुद्यंतमिवभास्करम् ११

चूर्णिका ॥ सूत उवाच ॥ स ऋषिः एवं नारायणनिर्मितं योगमायावैभवं अनुभूय तमेव शरणं ययौ १ मार्कंडेय उवाच हे हरे ते अंघ्रिमूलं प्रपन्नाभयप्रदं प्रपन्नोस्मि २ ॥ सूत
उवाच ॥ एकदा रुद्रः रुद्राण्या स्वगणैश्च वृतः वृषेण दिवि पर्यटन् तं ऋषिं ददर्श अथ उमा तं ऋषिं मार्कंडेयं वीक्ष्य शिवं अभाषत हे शिव एनं तपस्विनं विप्रं पश्य
पश्य ४ भवान् सिद्धिदः अस्य तपसः सिद्धिं कुरु ५ ॥ शिव उवाच ॥ हे देवि अयं ऋषिः भगवति परां भक्तिं प्राप्तः अतः आशिषः मोक्षमपि नेच्छति ६ अथापि ॥४२॥
नः साधुसमागमः परो लाभः एतेन संवदिष्यामः ७ इत्युक्त्वा तत्समीपं ययौ ८ तदा ऋषिः रुद्धेंद्रियः सन् तयोः आगमनं न वेद ९ तत् ज्ञात्वा शिवः तद्गुहाकाशं
अविशत् १० तदा मुनिः आत्मनि प्राप्तं त्र्यक्षं दशभुजं व्याघ्रचर्मांबरं शिवं वीक्ष्य ऋषिः विस्मितः अभूत् ११

टीका

(व्याघ्राजिनमेवअंबरंयस्यतं) शूलादिभिःसहअक्षमालादीन्विभ्राणमित्यन्वयः अक्षमालादीनांद्वंद्वैक्यं (पुंस्त्वमार्षं) १२ विस्मयपूर्वकंबहिर्दर्शनमाह । किमिदमिति । सोमयागतंउमयासहा गतं (इत्यर्थः सगणंप्रमथादिभिः सहितं) रुद्रंददृशे (अपश्यत्) १३ ततोननाम १४ (आत्मानुभावेननिजानंदानुभूत्यैवपूर्णाः कामायस्य) पूर्णकामत्वमेवव्यनक्ति । येनेति । येनत्वयाजगत् निर्वृतं (सुखसंपन्नं) भवति (यस्यानंदस्यमात्रयाजगतउपजीविकेत्यर्थः) १५ निर्गुणत्वेनत्रिगुणत्वेनचनमस्करोति । नमः शिवायनिर्गुणाय । सत्त्वायसत्त्वाधिष्ठात्रे । अतएवप्रमृडयतिसुखय तीतितथा । तस्मै १६ १७ नः अस्मत्तः । त्रयोब्रह्मविष्णुमहेश्वराः । यत्येभ्यः (अमृतंमोक्षं) तेवयम् १८ वरदानादिनाभवत्सेवैवास्माभिः क्रियतेनत्वनुग्रहः जगद्वंद्यत्वाद्भवतामितिलोकसंग्रहार्थं ब्राह्मणान्स्तौति । ब्राह्मणाइत्यादिना । येसाधवः सदाचाराः शांतामत्सरादिरहिताः निःसंगाः निष्कामाः (एकांतभक्ताः एकनिष्ठभक्तियुक्ताः । समंपश्यंतिसर्वत्रेतिसमदर्शिनः) १९ नकेवलं तएव । किंच । अहंचेत्यादि २० पूज्यतमत्वेहेत्वंतरमाह । नेति (अजेब्रह्मणि । आत्मनः परस्यचभेदं) अण्वपिअणुमात्रमपिनचक्षतेनपश्यंतितत्तस्मात्एवंभूतान्युष्मान्ईमहिभजेम २१ (अम्मया निजलरूपाणि । चेतनयाउज्झिताविसृष्टामृच्छिलादिविकारादेवानभवंति) २२

॥४३॥

व्याघ्रचर्मांबरंशूलधनुरिष्वसिचर्मभिः ॥ अक्षमालाडमरुककपालंपरशुंसह ॥ बिभ्राणंसहसाभातंविचक्ष्यहृदिविस्मितः १२ किमिदंकुतएवेतिसमाधेर्वि रतोमुनिः ॥ नेत्रेउन्मील्यददृशेसगणंसोमयागतम् १३ रुद्रंत्रिलोकैकगुरुंननामशिरसामुनिः ॥ तस्मैसपर्यांव्यदधात्सगणायसहोमया ॥ स्वागतासनपा द्यार्घ्यगंधस्रग्धूपदीपकैः १४ आहत्वात्मानुभावेनपूर्णकामस्यतेविभो ॥ करवामकिमीशानयेनेदंनिर्वृतंजगत् १५ नमःशिवायशांतायसत्त्वायप्रमृडा यच ॥ रजोजुषेप्यघोरायनमस्तुभ्यंतमोजुषे १६ ॥ सूतउवाच ॥ एवंस्तुतःसभगवानादिदेवःसतांगतिः ॥ परितुष्टःप्रसन्नात्माप्रहसंस्तमभाषत १७ ॥ श्रीभगवानुवाच ॥ वरंवृणीष्वनःकामंवरदेशावयंत्रयः ॥ अमोघंदर्शनंयेषांमर्त्योयद्विंदतेऽमृतम् १८ ब्राह्मणाःसाधवःशांतानिःसंगाभूतवत्सलाः ॥ एकांतभक्ताअस्मासुनिर्वैराःसमदर्शिनः १९ सलोकालोकपालास्तान्वंदंत्यर्चंत्युपासते ॥ अहंचभगवान्ब्रह्मास्वयंचहरिरीश्वरः २० नतेमय्यच्युतेऽजेच भिदामण्वपिचक्षते ॥ नात्मनश्चजनस्यापितद्युष्मान्वयमीमहि २१ नह्यम्मयानितीर्थानिनदेवाश्चेतनोज्झिताः ॥ तेपुनंत्युरुकालेनयूयंदर्शनमात्रतः २२

श्लोकाः १२—२२

चूर्णिका

१२ किमिदं कुतएवेति समाधेः विरतः सन् नेत्रे उन्मील्य उमया गणैश्च युतं शिवं दृष्ट्वा ननाम १३ १४ ततः तस्मै सपर्यां व्यधात् पूर्णकामस्य ते किं करवाम इत्याह १५ ततःते शिवाय शांताय सत्त्वाय नम इति अस्तौत् १६ ॥ ॥ सूत उवाच ॥ ॥ एवं स्तुतः शिवः तुष्टःसन् तं ऋषिं आह १७ ॥ शिव उवाच ॥ हे ऋषे कामं वरं वृणीष्व १८ एवं उक्त्वा ब्राह्मणान् स्तौति हे मुने ये ब्राह्मणाः साधवः अस्मासु एकांतभक्ताः निर्वैराश्च तान् लोकपालाःअहं ब्रह्मा हरिश्च एते वंदंति अर्चंति उपासते १९ २० एवं भूताः ये साधवः ते मयि अच्युते अजे च भेदं न पश्यंति अतः युष्मान् भजेम २१ न ह्यम्मयानि तीर्थानि न वेदाश्चेतनो ज्झिताः ते पुनंत्युरुकालेन यूयं दर्शनमात्रतः २२

१ कपालासिधनुःसहेत्यपि पाठः।

टीका ब्राह्मणेभ्योब्राह्मणान् (नमस्कुर्मः) आत्मसमाधानंचित्तैकाग्र्यंतपआलोचनम् । स्वाध्यायः अध्ययनं संयमः वागादिनियमः तैः २३ किंच । श्रवणादित्यादि (महापातकिनोपिकर्मतः अंत्यजाश्चा पिजातितः वः युष्माकंश्रवणमात्रेणदर्शनमात्रेणवा) २४ चंद्रोललामंभूषणंयस्यतस्यधर्मरहस्ययुक्तअमृतास्पदंवचः कर्णाभ्यांपिबन्नातृप्यत् । अलमितिनामन्यत । कर्णयोरमृतायनमितिवान्वयः २५ (सऋषिः भ्रामितः संचालितः कर्शितः कृशतांनीतः) शिवस्यवागेवामृतंतेनध्वस्तः क्लेशपुंजोयस्यसः २६ इयं (ईश्वर-)-लीलादुर्विभाव्याअवितर्क्या । यत्यया (चर्यया) ईशितव्यानिस्व नियम्यानियानि भूतानि(मादृशानि) तानिजगदीश्वरा (अपि) स्वयंनमंतिस्तुवंतिचेति २७ अथवालोकसंग्रहमात्रमेतदित्याह । धर्ममिति । प्रवक्तारोपियत्स्वयंदेहिनांधर्मग्राहयितुमाचरंति (कुर्वंतमनु मोदंतेक्रियमाणंधर्मंस्तुवंतिच । तत्तुलोकान्धर्मंग्राहयितुंप्रवर्ततेनतुस्वयंकर्तुमित्यर्थः) २८ नन्वेतत्स्वप्रभावतिरस्कारकंकथंमथाक्रियते तत्राह । नेति । एतावतालोकसंग्रहमात्रेण (कृतैः) तैर्नमना दिभिः कथंभूतैः स्वमायामयीवृत्तिः (प्रवृत्तिः) येषुतैः (तादृशैः) भगवतोमायिनस्तवअनुभावः (प्रभावोमहिमेतियावत्) नदुष्येतयतः । प्रसिद्धस्यमायिनः कुहकंकपटंयथातथैतानिनमनादीनि । अ तस्तस्ययथाकुहकैःनानुभावोनदुष्यतितद्वत् । प्रदुष्येतेतिपाठेनकारस्यदृष्टांतेनुषंगः २९ मायाचेष्टितंप्रपंचयाति सृष्ट्वेवाति(योभगवान्मनसैवेदंविश्वंसृष्ट्वावस्तुतः कुर्वंतोगुणाएवतथाप्यनुप्रवेशात्तैरात्माकर्तृ वद्भाति) स्वप्नदृग्यथेत्यविद्याचेष्टिते दृष्टांतः ३० त्रिगुणत्वेपिनजीववत्तैरभिभूताय । किंतु गुणानामात्मनेनियंत्रे ३१ वरंवृणीष्वेति यदुक्तं तत्राह कमिति । वरं (श्रेष्ठं) दर्शनंयस्यतस्मात्त्वत्तः प रं (अन्यं) कं (पुरुषंतु) वरंवृणे (याचे) यस्यतवदर्शनात् अवलोकनात् पूर्णकामःसर्वानंदसंदोहरूपः (अतः) सत्यकामःयथेच्छंप्राप्तसर्वानंदः ३२ ॥१०॥

॥४४॥

श्लोकाः २३—३२

ब्राह्मणेभ्योनमस्यामोयेऽस्मद्रूपंत्रयीमयम् ॥ बिभ्रत्यात्मसमाधानतपःस्वाध्यायसंयमैः २३ श्रवणाद्दर्शनाद्वापिमहापातकिनोपिवः ॥ शुध्येरन्नंत्यजाश्चा पिकिमुसंभाषणादिभिः २४ ॥ सूतउवाच ॥ इतिचंद्रललामस्यधर्मगुह्योपबृंहितम् ॥ वचोमृतायनमृषिर्नातृप्यत्कर्णयोःपिबन् २५ सचिरंमाययावि ष्णोर्भ्रामितःकर्शितोभृशम् ॥ शिववागमृतध्वस्तक्लेशपुंजस्तमब्रवीत् २६ ॥ ऋषिरुवाच ॥ अहोईश्वरचर्येयंदुर्विभाव्याशरीरिणाम् ॥ यन्नमंतीशि तव्यानिस्तुवंतिजगदीश्वराः २७ धर्मंग्राहयितुंप्रायःप्रवक्तारश्चदेहिनाम् ॥ आचरंत्यनुमोदंतेक्रियमाणंस्तुवंतिच २८ नैतावताभगवतःस्वमायामयवृ त्तिभिः ॥ नदुष्येतानुभावस्तैर्मायिनःकुहकंयथा २९ सृष्ट्वेदंमनसाविश्वमात्मनानुप्रविश्ययः ॥ गुणैःकुर्वद्भिराभातिकर्तेवस्वप्नदृग्यथा ३० तस्मैनमो भगवतेत्रिगुणायगुणात्मने ॥ केवलायाद्वितीयायगुरवेब्रह्ममूर्तये ३१ कंवृणेनुपरंभूमन्वरंत्वद्वरदर्शनात् ॥ यद्दर्शनात्पूर्णकामःसत्यकामःपुमान्भवेत् ३२

चूर्णिका अत एव ब्राह्मणेभ्यो नमस्यामः २३ किं च येषां श्रवणात् दर्शनात् पातकिनोपि शुध्येरन् तेषां संभाषणादिभिः शुध्यंतीति पुनः किं वक्तव्यं २४ ॥ सूत उवाच ॥ एवं शिववचः शृण्वन् अपि ऋषिः नातृप्यत् २५ सः विष्णोः मायया कर्शितः शिववागमृतेन क्लेशहीनः सन् तं उवाच २६ अहो इयं ईश्वरचर्या दुर्विभाव्या यतः ईश्वरा अपि ईशितव्यानि भूतानि नमंति स्तुवंति २७ इदं सर्वलोकसंग्रहमात्रेण एतावता भगवतः तव प्रभावः न दुष्येत मायिनः कुहकं यथा २८ २९ हे ईश्वर एवं भूताय तुभ्यं गुरवे नमोस्तु ३० ३१ किं च हे ईश वरदर्शनात् त्वत्तः परं कं नु वरं वृणे ३२ ॥४४॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(पूर्णान्समग्रान् कामानभिवर्षतीतितथातस्मात् । तत्परेषुभागवतेषु । तथातद्वदेवतदभेदात्त्वय्यपि) ३३ वरदानायस्वयमेवप्रवृत्तः शर्वयाउमयाचाभिनंदितःअनुमोदितःसन्नाह ३४ (हेमहर्षे तव) कामोयंसर्वोपि (अस्तु) अन्यच्चयत् पुण्यंयशइत्यादि (आकल्पांतात्) ब्रह्मवर्चस्विनस्तेभूयादित्युत्तरेणान्वयः । यतस्त्वमधोक्षजेभक्तिमान् (असि) यद्वा अधोक्षजेभक्तिमान् (भूयाइति) ३५ (हेब्रह्मन्तेतवत्रैकालिकंभूतभविष्यद्वर्तमानकालसंबंधिज्ञानंतेस्तु । विषयवैराग्ययुक्तंविज्ञानंआत्मानुभवः) ३६ तस्यकर्मतपआदिअमुनापुरानुभूतंयद्भगवन्मायावैभवंतच्चकथयन् (अगात्) ३७ अवाप्तोमहायोगमहिमायेनसः (भार्गवोत्तमोमार्कंडेयः एकांततांगतः अव्यभिचारिणींनिष्ठांप्राप्तः) ३८ एतन्मार्कंडेयस्यचरितंतेनानुभूतंचभगवन्मायावैभवंतेऽनुवर्णितम् ३९ नन्वेवमप्यस्मत्कुलोत्पन्नस्यास्यसप्तकल्पायुष्ट्वंवृद्धैरुच्यमानंविरुद्धमेवतत्राह । एतन्मार्कंडेयेनानुभूतंभगवन्मायावैभवंनानाकल्परूपंकादाचित्कंईश्वरेच्छयातस्यैवाकस्मिकंनतुसर्वसाधारणंएतत्केचित् अनादिबहुकालंआवर्तितंदेवयुगसहस्रद्वयमानेनपुनःपुनःपरिवर्तितंप्रचक्षते । केते । नृणांसंसृतिंसर्गप्रलयादिलक्षणांआत्मनोभगवतोमायेत्येवमविद्वांसः । विद्वांसस्तुमायाशिशोःश्वासोच्छ्वासाभ्यांसप्तकृत्वःतदुदरप्रवेशनिर्गमतः सप्तकल्पत्वंतत्क्षणमात्रेणेतिवदंति अतोनविरोधइत्यर्थः ४० (हेभृगुवर्यचक्रपाणेर्मुकुंदस्यानुभावेनसामर्थ्येनभाविनंसंवर्धितंएतन्मार्कंडेयचरितंवर्णितंयः) संशृणुयात् उइतिहर्षे (उत) संश्रावयेत् यौतावुभौतयोःकर्मवासनाकृतासंसृतिर्नभवेदिति ४१ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांदशमोऽध्यायः ॥ १० ॥

श्लोकाः ३३—४१

वरमेकंवृणेथापिपूर्णकामाभिवर्षणात् ॥भगवत्यच्युतांभक्तिंतत्परेषुतथात्वयि ३३ ॥ सूतउवाच ॥ इत्यर्चितोऽभिष्टुतश्चमुनिनासूक्तयागिरा ॥ तमाह भगवान्शर्वःशर्वयाचाभिनंदितः ३४ कामस्तेऽयंमहर्षेस्तुभक्तिमांस्त्वमधोक्षजे ॥ आकल्पांताद्यशःपुण्यमजरामरतातथा ३५ ज्ञानंत्रैकालिकंब्रह्मन् विज्ञानंचविरक्तिमत् ॥ ब्रह्मवर्चस्विनोभूयात्पुराणाचार्यतास्तुते ३६ ॥ सूतउवाच ॥ एवंवरान्समुनयेदत्त्वाऽगात्त्र्यक्षईश्वरः ॥ देव्यैतत्कर्मकथयन्ननुभूतंपुराऽमुना ३७ सोप्यवाप्तमहायोगमहिमाभार्गवोत्तमः॥ विचरत्यधुनाप्यद्धाहरावेकांततांगतः ३८ अनुवर्णितमेतत्तेमार्कंडेयस्यधीमतः ॥ अनुभूतंभगवतोमायावैभवमद्भुतम् ३९ एतत्केचिदविद्वांसोमायासंसृतिमात्मनः ॥अनाद्यावर्तितंनृणांकादाचित्कंप्रचक्षते ४० यएवमेतद्भृगुवर्यवर्णितंरथांगपाणेरनुभावभावितम् ॥ संश्रावयेत्संशृणुयादुतावुभौतयोर्नकर्माशयसंसृतिर्भवेत् ४१ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेदशमोध्यायः १० ॥

चूर्णिका ॥४५॥

अथापि भगवति त्वयि साधुषु च स्थिरां भक्तिं इमं वरं वृणे ३३ सूत उवाच एवं स्तुतः शर्वः ऋषिं आह ३४ हे मुने[1] अयं ते कामः अस्तु आकल्पांतं यशः तथा अजरामरता त्रैकालिकं ज्ञानं वैराग्यं विज्ञानं पुराणाचार्यता च ते अस्तु ३५ ३६ सूत उवाच एवं वरान् दत्त्वा तत्कर्म देव्यै कथयन् शिवः अगात् ३७ ततः ऋषिः हरौ एकांततां गतः सन् अधुनापि विचरति ३८ हे शौनक एतत् मार्कंडेयस्य चरितं ते अनुवर्णितं ३९ एतत् यः शृणुयात् श्रावयेत् तयोः संसृतिः न भवेत् ४० ४१ ॥ इति द्वादशे दशमः ॥ १० ॥ ॥ छ ॥ ॥ छ ॥

१ मुनेःइ॰ वा॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एकादशेतुपूजार्थंमहापुरुषवर्णनम् । रवेर्व्यूहस्यचाख्यानंप्रतिमासंपृथक्पृथक् ॥ १ ॥ येनामर्त्यत्वमापन्नोमर्त्योऽसौभार्गवोत्तमः । तंपृच्छतिक्रियायोगंसांगोपागादिकल्पितम् ॥ २ ॥ अथेति । हे भागवत । यतोभगवान्समस्ततंत्रराद्धांते (सर्वशास्त्रसिद्धांते यत्तत्त्वंतद्वेत्तीति) तत्त्ववित् रहस्यज्ञ (यद्वा भागवतंभगवद्विषयंतत्त्वंअतोबहुवित्तमंभवंतम्) १ प्रष्टव्यमाह । तांत्रिकाइति । परिचर्यायां उपासनायांविषयेकेवलस्य चैतन्यघनस्य । अंगानिपादादीनिउपांगानिगरुडादीनि । आयुधानिसुदर्शनादीनि । आकल्पाः (अलंकाराः) कौस्तुभादयः । तेषांद्वंद्वैक्यंतत् यथाकल्पयंति । यैश्च तत्त्वैःकल्पयंति । तन्नो -(- ऽस्मान्प्रतिवर्णयेति) २ ३ गुरूपदेशगम्यत्वादहश्यार्थस्यतन्नमस्कारपूर्वकमाह नमस्कृत्वेति । विभूतीःविराड्विग्रहाद्याः ४ अंगादिकल्पनांभूरादिभिर्दर्शयितुंप्रथमंताव यथाकल्पयंतीतिप्रश्नस्यवैराजरूपेणेत्युत्तरंवक्तुंविराड्विग्रहमाह । मायाद्यैःप्रकृतिसूत्रमहदहंकारपंचतन्मात्रैर्नवभिस्तत्त्वैःविकाराएकादशेंद्रियाणिपंचमहाभूतानिचेतिषोडशतन्मयोविराट्प्रसिद्धोनिर्मितः । यत्रविराजिसचित्केचेतनाधिष्ठिते भुवनत्रयंदृश्यते । अनेनांगादिकल्पनासौलभ्यंदर्शितम् ५ एतद्वैपौरुषंरूपंपुरुषस्यवैराजस्य (इदं) रूपमेव । ईश्वरेणाधिष्ठितत्वात्तदभेदविवक्षयातस्यरूपमुच्यते अंगकल्पनामाह । भूःपादावित्यादित्रिभिः । भूराद्यनुवादेनभगवत्पादादिभावनाविधीयते । (द्यौःस्वर्गः) ६ प्रजननंमेढ्रम् । अपानः पायुः ७ (उत्तरोष्ठोलज्जा । अधरोष्ठोलोभः । भ्रमः भ्रांतिः स्मयोदर्पविशेषः पुरुषस्यविराजो मूर्धजाः केशाः) ८ अनुक्तमन्यदप्येवमूह्यमित्याह । यावानयंव्यष्टिःपुरुषःयावत्यास्वमानतःसप्तवितस्तिमितयासंस्थयाअवयवसंनिवेशेनमितः (असौ महान्समष्टिरूपोपिपुरुषः तावान्स्वमानेनतावन्मितलोकसंस्थया) परिमितः ९

॥४६॥

श्लोकाः १—९

॥ शौनकउवाच ॥ अथेममर्थंपृच्छामोभवंतंबहुवित्तमम् ॥ समस्ततंत्रराद्धांतेभवान्भागवततत्त्ववित् १ तांत्रिकाःपरिचर्यायांकेवलस्यश्रियःपतेः ॥ अंगोपांगायुधाकल्पंकल्पयंतियथैवयैः २ तन्नोवर्णयभद्रंतेक्रियायोगंबुभुत्सताम् ॥ येनक्रियानैपुणेनमर्त्योयायादमर्त्यताम् ३ ॥ सूतउवाच ॥ नमस्कृत्वागुरून्वक्ष्येविभूतीर्वैष्णवीरपि ॥ याःप्रोक्तावेदतंत्राभ्यामाचार्यैःपद्मजादिभिः ४ मायाद्यैर्नवभिस्तत्त्वैःसविकारमयोविराट् ॥ निर्मितोदृश्यतेयत्रसचित्केभुवनत्रयम् ५ एतद्वैपौरुषंरूपंभूःपादौद्यौःशिरोनभः ॥ नाभिःसूर्योऽक्षिणीनासेवायुःकर्णौदिशःप्रभोः ६ प्रजापतिःप्रजननमपानोमृत्युरीशितुः ॥ तद्बाहवोलोकपालामनश्चंद्रोभ्रुवौयमः ७ लज्जोत्तरोऽधरोलोभोदंताज्योत्स्नास्मयोभ्रमः ॥ रोमाणिभूरुहाभूम्नोमेघाःपुरुषमूर्धजाः ८ यावानयंवैपुरुषो यावत्यासंस्थयामितः ॥ तावानसावपिमहान्पुरुषोलोकसंस्थया ९

चूर्णिका

शौनक उवाच हे सूत अथ भवंतं इममेव अर्थं पृच्छामः १ यथा तांत्रिकाःश्रियः पतेः उपासनायां विषये अंगोपांगायुधाकल्पं यथायैस्तत्त्वैः कल्पयंति २ तत् नो वर्णय ते भद्रमस्तु ३ ॥ सूत उवाच ॥ गुरून्नमस्कृत्य वैष्णवीः विभूतीःवक्ष्ये४ मायाद्यैः नवभिस्तत्वैः षोडश विकारात्मको विराट् निर्मितः यत्र इदं त्रिभुवनं दृश्यते ५ एतत् पौरुषं रूपं विद्यात् अस्यांगकल्पनामाह भूः पादौ द्यौः शिरः नभःनाभिः सूर्यः अक्षिणी वायुः नासे दिशः कर्णौ ६ प्रजापतिः मेढ्रम् मृत्युः गुदम् लोकपालाः बाहवः चंद्रो मनः यमः भ्रुवौ ७ लज्जा उत्तरोष्ठः लोभः अधरोष्ठःज्योत्स्ना दंताः भ्रमः हास्यं वृक्षाः रोमाणि मेघाः केशाः ८ यावान् अयं सप्तवितस्तिमितः पुमान् तावान् असौ प्रोक्तः ९

॥४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

टीका

भूषणादीन्याह । कौस्तुभमित्यादिना (अजोविष्णुः) स्वात्मज्योतिः शुद्धंजीवचैतन्यं (कौस्तुभाख्यंबिभर्ति) यातस्यकौस्तुभस्यप्रभातामेव (वक्षसा) श्रीवत्संबिभर्ति १० (छंदोमयंवेदस्वरूपं) त्रिवृत्स्वरांत्रिमात्रंप्रणवम् ११ पारमेष्ठ्यंपदंब्रह्मलोकं (मौलिंकिरीटम्) १२ अव्याकृतंप्रधानंयत्अधिष्ठितः अधिष्ठाय स्थितः तंदासनभूतंपद्मंसत्त्वंसत्त्वगुणः १३ मुख्यतत्त्वंप्राणतत्त्वं'प्राणोवैमुख्य'इतिश्रुतेः । दरवरंशंखं १४ (नभोनिभंआकाशवन्नीलवर्णंनभस्तत्त्वंआकाशाख्यंतत्त्वंअसिंखड्गं । तमोमयंतमोगुणस्वरूपंचर्मदधत् । कर्ममयंकर्मरूपामिषुधिंतूणीरं) १५ (अस्यविष्णोः स्यंदनंरथं) आकूतीः क्रियाशक्तियुक्तंमनः (इत्यर्थः) अस्यरथस्यआभिव्यक्तिंबहिरभिव्यक्तंरूपं (तन्मात्राणिशब्दादीनि) मुद्रयाधृतयाअर्थक्रियात्मतांवरदाभयदादिरूपत्वंबिभर्ति । तत्तन्मुद्रयातथाभावयेदित्यर्थः १६ मंडलंदेवयजनंदेवपूजाभूमिंसूर्यमंडलत्वेनभावयेदित्यर्थः अंतर्वह्निमंडलंवा । दीक्षासंस्कारआत्मनः (यादीक्षासआत्मनः संस्कारः स्यात्) गुरुकृतांमंत्रदीक्षामेवआत्मनस्तत्पूजायोग्यतांभावयेदित्यर्थः । परिचर्येति । भगवतस्तांपरिचर्यांस्वस्यसकलपापक्षयायइतिएवं (रूपां) भावयेदित्यर्थः १७ पूर्वमासनपद्ममुक्तं । इदानींकरस्थंपद्ममाह । भगवानितिभगशब्दस्यार्थोऐश्वर्यादिषाड्गुण्यं (तद्रूपंलीलाकमलंउद्वहन् । अभजत्अंगीकृतवान् । संधिरार्षः १८ हेद्विजाः एकवचनांतोत्रापाठः । अकुतोभयंकैवल्यंधामगृहंसमभजत् । यद्वा वैकुंठस्थविशेषणंअकुतोभयंद्धामेति ।त्रिवृत्ऋग्यजुःसामरूपोवेदः । " सुपर्णोसिगरुत्मांस्त्रिवृतेशिर " इत्यादिमंत्रलिंगात् । यज्ञंयज्ञरूपंपुरुषंविष्णुं (" यज्ञोवैविष्णुरि"तिश्रुतेः १९

श्लोकाः १० / १९

कौस्तुभव्यपदेशेनस्वात्मज्योतिर्बिभर्त्यजः ॥ तत्प्रभाव्यापिनीसाक्षाच्छ्रीवत्समुरसाविभुः १० स्वमायांवनमालाख्यांनानागुणमयींदधत् ॥ वासश्छंदोमयंपीतंब्रह्मसूत्रंत्रिवृत्स्वरम् ११ बिभर्तिसांख्यंयोगंचदेवोमकरकुंडले ॥ मौलिंपदंपारमेष्ठ्यंसर्वलोकाभयंकरम् १२ अव्याकृतमनंताख्यमासनंयदाधिष्ठितः ॥ धर्मज्ञानादिभिर्युक्तंसत्त्वंपद्ममिहोच्यते १३ ओजःसहोबलयुतंमुख्यतत्त्वंगदांदधत् ॥ अपांतत्त्वंदरवरंतेजस्तत्त्वंसुदर्शनम् १४ नभोनिभंनभस्तत्त्वमसिंचर्मतमोमयम् ॥ कालरूपंधनुःशार्ङ्गंतथाकर्ममयेषुधिम् १५ इंद्रियाणिशरानाहुराकूतीरस्यस्यंदनम् ॥ तन्मात्राण्यस्याभिव्यक्तिंमुद्रयार्थक्रियात्मताम् १६ मंडलंदेवयजनंदीक्षासंस्कारआत्मनः ॥ परिचर्याभगवतआत्मनोदुरितक्षयः १७ भगवान्भगशब्दार्थंलीलाकमलमुद्वहन् ॥ धर्मंयशश्चभगवांश्चामरव्यजनेभजत् १८ आतपत्रंतुवैकुंठंद्विजाधामाकुतोभयम् ॥ त्रिवृद्वेदःसुपर्णाख्योयज्ञंवहतिपूरुषम् १९

चूर्णिका किंच कौस्तुभमिषेण भगवान् शुद्धचैतन्यं बिभर्ति १० कौस्तुभप्रभामेव श्रीवत्सं बिभर्ति स्वमायां वनमालां बिभर्ति छंदोमयं पीतवासः बिभर्ति ११ प्रणवरूपं ब्रह्मसूत्रं बिभर्ति सांख्ययोगरूपे कुंडले बिभर्ति १२ ब्रह्मलोकं मुकुटं बिभर्ति प्रधानं शेषाख्यमासनं बिभर्ति १३ प्राणतत्त्वंगदां बिभर्ति अपांतत्त्वंशंखं बिभर्ति तेजस्तत्त्वं सुदर्शनं बिभर्ति १४ नभस्तत्त्वं असिं बिभर्ति तमोमयं चर्म बिभर्ति कालरूपं धनुः बिभर्ति कर्ममयं इषुधिं बिभर्ति १५ इंद्रियाणि शरान् बिभर्ति क्रियायुक्तं मनः रथं बिभर्ति शब्दादीन् रथाभिव्यक्तिं बिभर्ति १६ षड्गुणैश्वर्यलीलापद्मं बिभर्ति धर्मयशसी चामरव्यजने बिभर्ति १७ १८ छत्रं वैकुंठं बिभर्ति वेदत्रयरूपं गरुडं वाहनं बिभर्ति १९

१ अंतःस्थमिति पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनपायिनीहरेः शक्तिः तत्रहेतुः । साक्षादात्मनः (स्व-)-स्वरूपस्यचिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः (विष्वक्सेनः) तंत्रमूर्तिः पंचरात्राद्यागमरूपः । येणिमादयोष्टौगुणास्तेहरेर्द्वारपालानंदादयः २० तस्यैवचतुर्व्यूहोपासनामाह । वासुदेवादिशब्दैः पुरुषः श्रीनारायणएवस्वयंमूर्तिभेदैरुपास्यइतिअभिधीयते २१ तस्यैवाध्यात्मनिचतुर्धोपासनामाह । सएवभगवान्विश्वादिशब्दैः वृत्तिभिर्जाग्रदाद्यवस्थाभिःपरिभाव्यतेउपास्यते । तद्वृत्त्युपाधीनाह । अर्थोबाह्याः इंद्रियंमनःआशयस्तदुभयसंस्कारयुक्तमज्ञानम् । ज्ञानंत्रितयसाक्षितैः २२ उक्तचतुर्व्यूहद्वयोपासनापिपूर्वोक्तमंगाद्युपासनामाह । अंगेति ।(अंगानिपादादीनि । उपांगानिगरुडादीनि । आयुधानिसुदर्शनादीनिआकल्पाःकौस्तुभादयस्तैःअंगादिभिरुपलक्षितोभगवान्हरिर्वासुदेवादिचतुर्मूर्तिःसन्)विश्वादिचतुष्टयंबिभर्तिस्म । विश्वादिभावेपितन्नियंतुस्तस्यनजीवत्वमित्याह । विश्वादिचतुष्टयंबिभ्रदपिभगवानीश्वरएवेति २३ तस्यैवब्रह्मादित्रिमूर्तितामाह । द्विजऋषभेति (हेद्विजर्षभ) सएषएवभगवान् । ब्रह्मयोनिः वेदस्यकारणम् (ब्रह्मयोनिर्ज्ञापकंवायस्य) इत्यादिहेतुत्रयं । वस्तुतोभेदाभावेपिएतज्जगत्स्वगतमाययासृजतिहरतिपातीतिकृत्वाआख्ययाब्रह्मादिरूपयाअनावृताक्षः अनाच्छन्नज्ञानोपिविवृतइवभिन्नइवनिरुक्तः शास्त्रेषु । नतुभिन्नः । अत्रविद्वदनुभवंप्रमाणयति । यतस्तत्परैरात्मत्वेनैवलभ्यतइति २४ यस्येदमुपासनमुक्तंतंश्रीकृष्णंप्रार्थयते (हे) कृष्णसखअर्जुनस्यसखे (हे) वृष्णिश्रेष्ठ । अवनिध्रुहोयेराजन्यास्तेषांवंशस्यदहन । अनपवर्गअक्षीणंवीर्यंयस्य (तत्संबोधनं) गोपवनितानांव्रजाः समूहाः भृत्यानारदादयस्तैर्गीतंतीर्थभूतंश्रवः कीर्तिर्यस्य (तत्संबोधनं) श्रवणमेवमंगलंयस्य २५ एतज्जपमात्रस्यापिब्रह्मज्ञानंफलमित्याह यइति । कल्येउषःकाले । यस्तच्चित्तः प्रयतः शुचिश्चसन्जप्त्वागुहाशयंहृदिस्थंब्रह्मपश्यति २६

श्लोकाः २०/२६

अनपायिनीभगवतीश्रीःसाक्षादात्मनोहरेः ॥ विष्वक्सेनस्तंत्रमूर्तिर्विदितःपार्षदाधिपः ॥ नंदादयोष्टौद्वाःस्थाश्चतेऽणिमाद्याहरेर्गुणाः २० वासुदेवःसंकर्षणःप्रद्युम्नःपुरुषःस्वयम् ॥ अनिरुद्धइतिब्रह्मन्मूर्तिव्यूहोभिधीयते २१ सविश्वस्तैजसःप्राज्ञस्तुरीयइतिवृत्तिभिः ॥ अर्थेंद्रियाशयज्ञानैर्भगवान्परिभाव्यते २२ अंगोपांगायुधाकल्पैर्भगवांस्तच्चतुष्टयम् ॥ बिभर्तिस्मचतुर्मूर्तिर्भगवान्हरिरीश्वरः २३ द्विजऋषभसएषब्रह्मयोनिःस्वयंदृक्स्वमहिमपरिपूर्णोमाययाचस्वयैतत् ॥ सृजतिहरतिपातीत्याख्ययाऽनावृताक्षोविवृतइवनिरुक्तस्तत्परैरात्मलभ्यः २४ श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंदगोपवनिताव्रजभृत्यगीततीर्थश्रवःश्रवणमंगलपाहिभृत्यान् २५ यइदंकल्यउत्थायमहापुरुषलक्षणम् । तच्चित्तःप्रयतोजप्त्वाब्रह्मवेदगुहाशयम् २६

चूर्णिका

भगवच्छक्तिं श्रियं बिभर्ति पंचरात्राद्यागमनं विष्वक्सेनं अणिमाद्याः गुणाः अष्ट तेद्वारपालाः २० वासुदेवः संकर्षणः प्रद्युम्नः अनिरुद्धः इति मूर्तिव्यूहः ज्ञेयः २१ स एव चतुर्मूर्तिः ईश्वरः विश्वतैजसप्राज्ञतुरीय इति वृत्तिभिःपरिभाव्यते २२ २३ एवंभूतः हरिः स्वमायया इदं सृजति हरति पाति अतः तं प्रार्थयते २४ हे गोविंद हे अर्जुनसखे नः भृत्यान् पाहि २५ इदं यः पठेत् सः हृदिस्थं ब्रह्म पश्यति २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

मंडलंदेवयजनमित्युक्त्या बुद्धिमागतः मूर्तिव्यूहप्रसंगेन रविव्यूहोत्रपृच्छयते । शुक इति । पंचमस्कंधे (परीक्षिते) यदाह तथान्येचऋषयोगंधर्वाअप्सरसोनागाग्रामण्योयातुधानादेवाइत्येकैकशो गणाः सप्तेत्यादिना । सौरः सूर्यसंबंधीसप्तपरिमाणमस्येतिसप्तकोगणः २७ तेषांसप्तानांअधीश्वरैस्तत्तत्पतिभिः तत्तन्मासाधिकृतसूर्यैर्वा (संयुक्तानां । सूर्यात्मनोहरेः सूर्यस्वरूपस्यविष्णोः) व्यूहं विभागं (नःब्रूहि) २८ तत्रतावत्व्यूहंनिरूपयितुंप्रथमंसूर्यस्वरूपमाह । (सर्वदेहिनामात्मनः)अनाद्यविद्ययामायया । अयंसूर्यः लोकतंत्रः लोकयात्राप्रवर्तको (निर्मितः परिवर्तते) २९ अतस्तस्य क्रियाभेदोपाधिकमेवनानात्वंनस्वतइत्याह एकएवेति । 'सूर्यआत्माजगतस्तस्थुषश्चे' तिश्रुतेः । जगदात्माआदिकृत्सृष्टिकर्ताहरिरेवसूर्यः । सचसर्वासांवेदोक्तक्रियाणांमूलंसन्नुतेनोपाधिनाबहुधोक्तः ३० कालरूपधारिणोहरेर्द्वादशादित्यरूपभेदंक्रियोपाधिकंदर्शयितुंप्रथमंसर्वकर्मप्रवृत्तयेमायाकृतंनवधाभेदमाह । काल इति । कालः प्रातरादिः । देशःसमादिः । क्रियाअनुष्ठानम् । कर्ता ब्राह्मणादिः।करणं स्रुगादि । कार्यंयागादि । आगमः मंत्रादिः । द्रव्यंव्रीह्यादि । फलंस्वर्गादि ३१ तत्रचकालरूपधारीभगवान्पृथक्चरतिमध्वादिषुचैत्रादिषुलोकतंत्रायलोकयात्रानिर्वाहाय ३२ तानेवगणानाह धातेतिद्वादशभिः धातासूर्यः। कृतस्थलीअप्सराः हेतिः राक्षसः वासुकिर्नागः रथकृत्यक्षः । पुलस्त्यःऋषिः । तुंबुरुर्गंधर्वः । मधुमासंचैत्रंनयंतिअनुवर्तयंति ३३ (अर्यमासूर्यः) अथौजायक्षः। प्रहेतिःराक्षसः। नारदोगंधर्वः । कच्छनीरोनागः । माधववैशाखं ३४ मित्रः सूर्यः । पौरुषेयोराक्षसः । रथस्वनोयक्षः (हहागंधर्वः) शुक्रमासंज्येष्ठं (नयंति) ३५

॥ शौनकउवाच ॥ शुकोयदाहभगवान्विष्णुरातायशृण्वते ॥ सौरोगणोमासिमासिनानावसतिसप्तकः २७ तेषांनामानिकर्माणिसंयुक्तानामधीश्वरैः ॥ ब्रूहिनःश्रद्दधानानांव्यूहंसूर्यात्मनोहरेः २८ सूतउवाच ॥ अनाद्यविद्ययाविष्णोरात्मनःसर्वदेहिनाम् ॥ निर्मितोलोकतंत्रोयंलोकेषुपरिवर्तते २९ एकएवहिलोकानांसूर्यआत्मादिकृद्धरिः ॥ सर्ववेदक्रियामूलमृषिभिर्बहुधोदितः ३० कालोदेशःक्रियाकर्ताकरणंकार्यमागमः ॥ द्रव्यंफलमितिब्रह्मन्नवधोक्तोऽजयाहरिः ३१ मध्वादिषुद्वादशसुभगवान्कालरूपधृक् ॥ लोकतंत्रायचरतिपृथग्द्वादशभिर्गणैः ३२ धाताकृतस्थलीहेतिर्वासुकीरथकृन्मुने ॥ पुलस्त्यस्तुंबुरुरितिमधुमासंनयंत्यमी ३३ अर्यमापुलहोथौजाःप्रहेतिःपुंजिकस्थली ॥ नारदःकच्छनीरश्चनयंत्येतेस्ममाधवम् ३४ मित्रोऽत्रिःपौरुषेयोथतक्षकोमेनकाहहाः ॥ रथस्वनइतिह्येतेशुक्रमासंनयंत्यमी ३५

श्लोकाः २७ – ३५

चूर्णिका

॥ शौनक उवाच ॥ शुकः विष्णुराताय सौरोगणःप्रतिमासिमासि नानासप्तकः वसतीति यत्आह २७ तेषांनामानि कर्माणिच नः ब्रूहि २८ ॥ सूत उवाच ॥ एकएव सूर्यः भगवद्रूपी मध्वादिषु मासेषु लोकतंत्राय द्वादशभिर्गणैः चरति २९ ३० ३१ ३२ तदेवाह धातासूर्यः कृतस्थलीअप्सराः हेतिः राक्षसः वासुकिः नागः रथकृयक्षः पुलस्त्यः ऋषिः तुंबुरुः गंधर्वः एते चैत्रं नयंति ३३ अर्यमा सूर्यः पुंजिकस्थलीअप्सराः प्रहेतिः राक्षसः कच्छनीरः नागःअथौजाः यक्षः पुलहः ऋषिः नारदः गंधर्वः एते वैशाखं नयंति ३४ मित्रः सूर्यः मेनका अप्सराः पौरुषेयः राक्षसः तक्षकः नागः रथसेनः यक्षः अत्रिः ऋषिः हाहाः गंधर्वः एते ज्येष्ठं नयंति ३५

१ सप्तकः सप्तानांगणइ० पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

वरुणः सूर्यः। सहजन्योयक्षः (हुहूर्गंधर्वः) शुक्रोनागः। चित्रस्वनोराक्षसः। शुचिमासंआषाढम् ३६ इंद्रः सूर्यः। विश्वावसुर्गंधर्वः। श्रोतायक्षः। एलापत्रोनागः। वर्योराक्षसः इतिस्वयमेवव्याख्यातं। नभोमासंश्रावणम् ३७ विवस्वान्सूर्यः उग्रसेनोगंधर्वः। व्याघ्रोराक्षसः। आसारणोयक्षः। शंखपालोनागः। नभस्याख्यंभाद्रपदम् ३८ (पूषासूर्यः) धनंजयोनागः। वातोराक्षसः। सुषेणोगंधर्वः। सुरुचिर्यक्षः। तपोमासंमाघम्। मासक्रमातिलंघनंकौर्मोक्तादित्यानुक्रमानुसारेण। वैष्णवेतुमासक्रमेणैवोक्तिः। क्वचिन्नामव्यत्ययस्तुकल्पभेदेनेतिज्ञेयम् ३९ ऋतुर्यक्षः वर्चाराक्षसः। पर्जन्यः सूर्यः। सेनजित्अप्सराः। विश्वोगंधर्वः। ऐरावतोनागः तपस्याख्यंफाल्गुनम् ४० अंशुःसूर्यः अंशइतिवापाठः। तार्क्ष्योयक्षः। ऋतसेनोगंधर्वः। विद्युच्छत्रुः राक्षसः। महाशंखोनागः। सहोमासंमार्गशीर्षं ४१ भगः सूर्यः। स्फूर्जोराक्षसः। अरिष्टनेमिर्गंधर्वः। ऊर्णोयक्षः। आयुर्ऋषिः। कर्कोटकोनागः ४२ त्वष्टासूर्यः। ऋचीकतनयोजमदग्निर्ऋषिः। कंबलोनागः। ब्रह्मापेतोराक्षसः। शतजित्यक्षः। धृतराष्ट्रोगंधर्वः। इषंभराः आश्विनपालकाः ४३

श्लोकाः ३६/४३

वसिष्ठोवरुणोरंभासहजन्यस्तथाहुहूः ॥ शुक्रश्चित्रस्वनश्चैवशुचिमासंनयंत्यमी ३६ इंद्रोविश्वावसुःश्रोताएलापत्रस्तथांगिराः ॥ प्रम्लोचाराक्षसोवर्योनभोमासंनयंत्यमी ३७ विवस्वानुग्रसेनश्चव्याघ्रआसारणोभृगुः ॥ अनुम्लोचाशंखपालोनभस्याख्यंनयंत्यमी ३८ पूषाधनंजयोवातःसुषेणःसुरुचिस्तथा ॥ घृताचीगौतमश्चेतितपोमासंनयंत्यमी ३९ ऋतुर्वर्चाभरद्वाजःपर्जन्यःसेनजित्तथा ॥ विश्वऐरावतश्चैवतपस्याख्यंनयंत्यमी ४० अथांशुःकश्यपस्तार्क्ष्यऋतसेनस्तथोर्वशी ॥ विद्युच्छत्रुर्महाशंखःसहोमासंनयंत्यमी ४१ भगःस्फूर्जोऽरिष्टनेमिरूर्णआयुश्चपंचमः ॥ कर्कोटकःपूर्वचित्तिःपुष्यमासंनयंत्यमी ४२त्वष्टाऋचीकतनयःकंबलश्चतिलोत्तमा ॥ ब्रह्मापेतोथशतजिद्धृतराष्ट्रइषंभराः ४३

चूर्णिका

वरुणः सूर्यः रंभा अप्सराः चित्रस्वनः राक्षसः शुक्रः नागः सहजन्यः यक्षः वासिष्ठः ऋषिः हूहूः गंधर्वः एते आषाढंनयंति ३६ इंद्रः सूर्यः प्रम्लोचा अप्सराः वर्यः राक्षसः एलापत्रः नागः श्रोता यक्षः अंगिराः ऋषिः विश्वावसुः गंधर्वः एते श्रावणं नयंति ३७ विवस्वान् सूर्यः अनुम्लोचा अप्सराः व्याघ्रः राक्षसः शंखपालः नागः आसारणः यक्षः भृगुः ऋषिः उग्रसेनः गंधर्वः एतेभाद्रपदं नयंति ३८ पूषा सूर्यः घृताची अप्सराः वातः राक्षसः धनंजयः नागः सुरुचिः यक्षः गौतमः ऋषिः सुषेणः गंधर्वः एतेमाघं नयंति ३९ पर्जन्यः सूर्यः सेनाजित् अप्सराः वर्चाः राक्षसः ऐरावतः नागः ऋतुः यक्षः भरद्वाजः ऋषिः विश्वः गंधर्वः एते फाल्गुनं नयंति ४० अंशुः सूर्यः उर्वशी अप्सराः विद्युच्छत्रुः राक्षसः महाशंखः नागः तार्क्ष्यः यक्षः कश्यपः ऋषिः ऋतसेनः गंधर्वः एते मार्गशीर्षं नयंति ४१ भगः सूर्यः पूर्वचित्तिः अप्सराः स्फूर्जः राक्षसः कर्कोटको नागः ऊर्णः यक्षः आयुः ऋषिः अरिष्टनेमिः गंधर्वः एते पौषं नयंति ४२ त्वष्टा सूर्यः तिलोत्तमा अप्सराः ब्रह्मापेतः राक्षसः कंबलः नागः शतजित् यक्षः जमदग्निः ऋषिः धृतराष्ट्रः गंधर्वः एते आश्विनंनयंति ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुरादित्यः । अश्वतरोनागःसूर्यवर्चागंधर्वः । सत्यजित्यक्षः । मखापेतोराक्षसः । ऊर्जमासंकार्तिकं एतेचादित्यादयः कौर्मेविभज्योक्ताः । "धातार्यमाचमित्रश्चवरुणश्चेंद्रएवच । विवस्वानथपू
षाचपर्जन्यश्चांशुरेवच । भगस्त्वष्टाचविष्णुश्चआदित्याद्वादशस्मृताः १ पुलस्त्यः पुलहश्चात्रिर्वसिष्ठोथांगिराभृगुः । गौतमोथभरद्वाजःकश्यपःक्रतुरेवच । जमदग्निःकौशिकश्चमुनयोब्रह्मवादिनः २
रथकृचौऽरिष्टनेमिग्रामणीश्चरथस्वनः । रथचित्रःस्वनःश्रोताअरुणःसेनजित्तथा । तार्क्ष्यश्चारिष्टनेमिश्चऋतजित्सत्यजित्तथा । एतेयक्षाःसमुद्दिष्टाराक्षसानपिवच्मिवः ३ अथहेतिःप्रहेतिश्चपौरुषेयो
वधस्तथा । वर्योव्याघ्रस्तथापश्चवायुर्विद्युद्दिवाकरः । ब्रह्मापेतश्चविप्रेंद्रयज्ञापेतश्चराक्षसाः ४ वासुकिःकच्छनीरश्चतक्षकःसर्पपुंगवः । एलापत्रःशंखपालःस्तथैरावतसंज्ञितः । धनंजयो
महापद्मस्तथाकर्कोटकोद्विजाः । कंबलोश्वतरश्चैववहंत्येवयथाक्रमं ५ तुंबुरुर्नारदोहाहाहूहूर्विश्वावसुस्तथा । उग्रसेनोवसुरुचिर्विश्वावसुरथापरः । चित्रसेनस्तथोर्णायुर्धृतराष्ट्रोद्विजोत्तमाः । सूर्यवर्चा
द्वादशेतिगंधर्वागायतांवराः ६ कृतस्थल्यप्सरोवर्यातथान्यापुंजिकस्थली । मेनकासहजन्याचप्रम्लोचाचद्विजोत्तमाः । अनुम्लोचाघृताचीचविश्वाचीचोर्वशीतथा । अन्याचपूर्वचित्तिःस्यादन्याचैवतिलो
त्तमा । रंभाचेतिद्विजश्रेष्ठास्तथैवाप्सरसःस्मृताः ७ इति ४४ (उपसंहरन्नेवैतत्कथनप्रयोजनमाह एताइति । प्रतिदिनंसंध्याद्वयेस्मरतांनृणामंहःपापं) ४५ एतेषांपृथक्कर्माणिनिरूपयति द्वादश
स्वपीतित्रिभिः । असौदेवःसूर्यः । षड्भिर्गंधर्वादिभिः अस्यजनस्यसमंताचरन्शुभांमतिंतनुते । गायत्र्यर्थोनेनसूचितः ४६ तल्लिंगैःसूर्यप्रकाशकैः (सामभिः ऋग्भिर्यजुर्भिश्च) ४७ उन्नह्यंतिदृढं
बध्नंति । ग्रामण्योयक्षाः । नैर्ऋताराक्षसाः ४८ किंच । वालखिल्याइति । एतेप्रतिमासंतएवस्तुवंति (नतुभिन्नाः) विभुंसूर्यं ४९ व्यूह्यविभज्य ॥ ५० ॥ ॥ इतिश्रीभागवतेमहापुराणे
द्वादशस्कंधेटीकायांएकादशोध्यायः ॥ ११ ॥ ॥ ७ ॥

विष्णुरश्वतरोरंभासूर्यवर्चाश्चसत्यजित् ॥ विश्वामित्रोमखापेतऊर्जमासंनयंत्यमी ४४ एताभगवतोविष्णोरादित्यस्यविभूतयः ॥ स्मरतांसंध्ययोर्नॄ
णांहरंत्यंहोदिनेदिने ४५ द्वादशस्वपिमासेषुदेवोसौषड्भिरस्यवै ॥ चरन्समंतात्तनुतेपरत्रेहचसन्मतिम् ४६ सामर्ग्यजुर्भिस्तल्लिंगैरृषयःसंस्तुवंत्यमुम् ॥
गंधर्वास्तंप्रगायंतिनृत्यंत्यप्सरसोऽग्रतः ४७ उन्नह्यंतिरथंनागाग्रामण्योरथयोजकाः ॥ चोदयंतिरथंपृष्ठेनैर्ऋताबलशालिनः ४८ वालखिल्याःसहस्राणि
षष्टिर्ब्रह्मर्षयोऽमलाः ॥ पुरतोभिमुखायांतिस्तुवंतिश्रुतिभिर्विभुम् ४९ एवंह्यनादिनिधनोभगवान्हरिरीश्वरः ॥ कल्पेकल्पेस्वमात्मानंव्यूह्यलोकान
वत्यजः ५० ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेएकादशोध्यायः ॥ ११ ॥

चूर्णिका

विष्णुः सूर्यः रंभा अप्सराः मखापेतः राक्षसः अश्वतरः नागः सत्यजित् यक्षः विश्वामित्रः ऋषिः सूर्यवर्चाः गंधर्वः एते कार्त्तिकं अनुवर्तयंति ४४ एताः आदित्य
विभूतयः स्मरतां पापं हरंति ४५ असौ सूर्यः मासेषु चरन् जनस्य शुभां मतिं तनुते ४६ एनं सूर्यं वेदैः ऋषयः स्तुवंति गंधर्वाः गायंति अप्सरसः पुरतः नृत्यंति ४७
नागाः रथबंधनरज्जवः यक्षाः रथं योजयंति राक्षसाः पृष्ठतः रथं नोदयंति ४८ षष्टिसहस्राणि वालखिल्याः पुरतः अभिमुखं स्तुवंति ४९ एवं ह्यनादिनिधनो भग
वान् हरिरीश्वरः कल्पे कल्पे स्वमात्मानं व्यूह्य लोकानवत्यजः ५० ॥ इति द्वादशे एकादशः ११ ॥ ॥ छ ॥ ॥ ॥ छ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

द्वादशेतुपुराणोक्तसर्वार्थानुक्रमःकृतः। प्रथमस्कंधमारभ्यप्राधान्येनसमासतः॥ १ ॥ तदेवमस्मिन्पुराणोक्तानर्थान्संक्षेपतोवर्णयिष्यन्धर्मादीन्प्रणमति । नमइति । महतेहरिभक्तिलक्षणाय । ब्राह्मणेभ्यो ब्राह्मणान् । सनातनान् धर्मानित्युपलक्षणंपुराणोक्तार्थानाम् १ (नराणांपुरुषोचितम् । पुरुषेतिभावप्रधानोनिर्देशः) पुरुषत्वेउचितंश्रवणादियोग्यम् २ एतत्प्रपंचयति अत्रेति । भगवान् ऐश्वर्यादिषड्गुणः साक्षात्संकीर्तितइतिदेवताकांडार्थः ३ ब्रह्मकांडार्थमाह । अत्रब्रह्मेति । गुह्यंनिर्गुणम् । प्रभवाप्ययम् । प्रभवत्यस्मादितिप्रभवम् । अप्येत्यस्मिन्नित्यप्ययंतच्चतच्च । अनेनाश्रयशब्दार्थोदर्शितः । विज्ञानसंयुतंअपरोक्षज्ञानपर्यंतंज्ञानंतदुपाख्यानं तत् ज्ञानंउपाख्यायतेप्रकाश्यतेयेनतत् । ज्ञानसाधनमित्यर्थः ४ कर्मकांडार्थमाह । भक्तियोगश्चसाध्यसाधनरूपः। तदाश्रयंभक्तियोगेननिष्पादितं (वैराग्यम्) एवंसामान्यतःकांडत्रयार्थंनिरूप्येदानींद्वादशस्कंधप्रकरणार्थाननुक्रामति । पारिक्षितमुपाख्यानंपरिक्षिज्जन्मादि । तत्प्रस्तावायनारदाख्यानंच ५ (विप्रशापाद्धेतोःप्रायोपवेपशोनिरशनमुपवेशनम्) ब्रह्मर्षेर्ब्राह्मणोत्तमस्येतिप्रथमस्कंधार्थः ६ उत्क्रांतिरर्चिरादिगतिः (नारदस्यब्रह्मणश्चसंवादः । अवताराणामनुगीतं) प्राधानिकःप्रधानकार्यविराड्रूपःसर्गःअग्रतःआदितः महदादिक्रमेणेत्यर्थः । इतिद्वितीयस्कंधार्थः ७ (ततोविदुरमैत्रेययोः संवादः) महापुरुषस्यसंस्थितिः प्रलयेतूष्णीमवस्थानम् ८ प्राकृतिकःप्रकृतिभवोगुणक्षोभरूपः । वैकृतिकामहदादयः । चकाराद्विकाराश्रये । तयोस्तेषांचसर्गः ९ गतिःस्वरूपम् । उद्धरणे उद्धारणे १०

॥५२॥

श्लोकाः १-१०

॥ सूतउवाच ॥ नमोधर्मायमहतेनमःकृष्णायवेधसे ॥ ब्राह्मणेभ्योनमस्कृत्यधर्मान्वक्ष्येसनातनान् १ एतद्वःकथितंविप्राविष्णोश्चरितमद्भुतम् ॥ भवद्भिर्यदहंपृष्टोनराणांपुरुषोचितम् २ अत्रसंकीर्तितःसाक्षात्सर्वपापहरोहरिः ॥ नारायणोहृषीकेशोभगवान्सात्वतांपतिः ३ अत्रब्रह्मपरंगुह्यंजगतःप्रभवाप्ययम् ॥ ज्ञानंचतदुपाख्यानंप्रोक्तंविज्ञानसंयुतम् ४ भक्तियोगःसमाख्यातोवैराग्यंचतदाश्रयम् ॥ पारिक्षितमुपाख्यानंनारदाख्यानमेवच ५ प्रायोपवेशोराजर्षेर्विप्रशापात्परीक्षितः ॥ शुकस्यचैवब्रह्मर्षेःसंवादश्चपरीक्षितः ६ योगधारणयोत्क्रांतिःसंवादोनारदाजयोः ॥ अवतारानुगीतंचसर्गःप्राधानिकोऽग्रतः ७ विदुरोद्धवसंवादःक्षत्तृमैत्रेययोस्ततः ॥ पुराणसंहिताप्रश्नोमहापुरुषसंस्थितिः ८ ततःप्राकृतिकाःसर्गाःसप्तवैकृतिकाश्चये ॥ ततोब्रह्मांडसंभूतिर्वैराजःपुरुषोयतः ९ कालस्यस्थूलसूक्ष्मस्यगतिःपद्मसमुद्भवः ॥ भुवउद्धरणेऽम्भोधौहिरण्याक्षवधोयथा १०

चूर्णिका

॥ सूत उवाच ॥ नमो धर्माय महते नमः कृष्णाय वेधसे ब्राह्मणेभ्यो नमस्कृत्य धर्मान् वक्ष्ये सनातनात् १ हेविप्राः भवद्भिः यत्पृष्टं विष्णोः अद्भुतं चरितं तत् कथितम् २ अत्र पुराणे सर्वपापहरो हरिः कीर्तितः ३ तथा परं ब्रह्म विज्ञानसहितं ज्ञानं तत्साधनं च कथितम् ४ तथा भक्तियोगः वैराग्यं च उक्तम् ५ अथ प्रथमस्कंधे पारीक्षितं आख्यानं ततः नारदाख्यानम् राजर्षेः प्रायोपवेशः शुकपरीक्षित्संवादः इति प्रथमस्कंधे उक्तम् ६ योगधारणया उत्क्रांतिः नारदाजयोः संवादः अवतारानुगीतम् प्राधानिकः सर्गः इति द्वितीयस्कंधे उक्तम् ७ विदुरोद्धवसंवादः विदुरमैत्रेयसंवादः पुराणसंहिताप्रश्नः महापुरुषसंस्थितिः ८ प्राकृतिकः सर्गः वैकृतिकश्च ब्रह्मांडसंभवः ९ कालगतिः पद्मोत्पत्तिः वराहावतारः हिरण्याक्षवधः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भा.द्वा. (ऊर्ध्वस्रोतसांतिर्यक्स्रोतसांअवाक्स्रोतसांचसर्गइत्यर्थः) अर्धाभ्यांनारीचनरश्चतस्यसर्गः (यतोर्धनारीनरात् । शतरूपाचमनोःपत्नी । यास्त्रीणांमध्येआद्याप्रकृतिःप्रथमास्त्रीत्यर्थः) ११ संतानोध अ०
र्मपत्नीनामितिनवब्रह्मसमुत्पत्तिरित्यस्यानंतरंद्रष्टव्यं (प्रजापतेःकर्दमस्यचसंतानःनवब्रह्मर्षिपत्नीरूपःकलादिसंज्ञकः) १२ १३ इतितृतीयार्थः । चतुर्थस्कंधार्थमाह । नवब्रह्मणांमरीच्यादीनांसमुत्प
टीका त्तिःसंतानः (प्राचीनबर्हिषोनारदस्यचसंवादः) १४ पंचमस्कंधार्थमाह । ततःप्रैयव्रतंप्रियव्रतस्यचरितम् १५ द्वीपाद्युपवर्णनंप्रथमंसंक्षेपतःततोद्वीपादीनांयेगिरयोनद्यश्चतेषामुपवर्णनम् । पातालन ॥१२॥
रकादीनांचस्थितिः । अनेनैवनरकनिवर्तकमजामिलोपाख्यानंगृहीतंततःप्राचीनम् १६ षष्ठार्थमाह । दक्षजन्मेति (प्रचेतोभ्योदक्षस्यजन्म । तत्पुत्रीणांदक्षकन्यानांयतोयत्रसंततौदेवादयआसन्) १७
(त्वाष्ट्रस्यवृत्रस्य) सप्तमार्थमाह । पुत्रयोश्चेति (हेद्विजाः) १८ अष्टमार्थमाह । मन्वंतरानुचरितामिति । क्वचित्कस्यचिदनुक्तिःव्युत्क्रमोक्तिश्चभक्तिरसानुकूलत्वेनोतिद्रष्टव्यम् १९ २० नवमार्थमाह ।
॥५३॥ राजवंशेति (तद्वंशःइक्ष्वाकुवंशः सुद्युम्नस्योपाख्यानम् । शशादाद्याःकथिताःसौकन्यंसुकन्यायाश्चरितम्) २१ २२ २३

ऊर्ध्वतिर्यगवाक्सर्गोरुद्रसर्गस्तथैवच ॥ अर्धनारीनरस्याथयतःस्वायंभुवोमनुः ११ शतरूपाचयास्त्रीणामाद्याप्रकृतिरुत्तमा ॥ संतानोधर्मपत्नी श्लोकाः
नांकर्दमस्यप्रजापतेः १२ अवतारोभगवतःकपिलस्यमहात्मनः ॥ देवहूत्याश्चसंवादःकपिलेनचधीमता १३ नवब्रह्मसमुत्पत्तिर्दक्षयज्ञविनाशनम् ॥
ध्रुवस्यचरितंपश्चात्पृथोःप्राचीनबर्हिषः १४ नारदस्यचसंवादस्ततःप्रैयव्रतंद्विजाः ॥ नाभेस्ततोनुचरितमृषभस्यभरतस्यच १५ ततोद्वीपसमुद्राद्रिवर्ष ११/२३
नद्युपवर्णनम् ॥ ज्योतिश्चक्रस्यसंस्थानंपातालनरकस्थितिः १६ दक्षजन्मप्रचेतोभ्यस्तत्पुत्रीणांचसंततिः ॥ यतोदेवासुरनरास्तिर्यङ्मृगखगादयः १७
त्वाष्ट्रस्यजन्मनिधनंपुत्रयोश्चदितेर्द्विजाः ॥ दैत्येश्वरस्यचरितंप्रह्लादस्यमहात्मनः १८ मन्वंतरानुचरितंगजेंद्रस्यविमोक्षणम् ॥ मन्वंतरावताराश्चविष्णो
र्हयशिरादयः १९ कौर्म्यंमात्स्यंनारसिंहंवामनंचजगत्पतेः ॥ क्षीरोदमथनंतद्वदमृतार्थेदिवौकसाम् २० देवासुरमहायुद्धंराजवंशानुकीर्तनम् ॥ इक्ष्वा
कुजन्मतद्वंशःसुद्युम्नस्यमहात्मनः २१ इलोपाख्यानमत्रोक्तंतारोपाख्यानमेवच ॥ सूर्यवंशानुकथनंशशादाद्यानृगादयः २२ सौकन्यंचाथशर्यातेःककुत्स्थ
स्यचधीमतः ॥ खट्वांगस्यचमांधातुःसौभरेःसगरस्यच २३

चूर्णिका उर्ध्वतिर्यगादिसर्गः रुद्रसर्गः स्वायंभुवमनोः उत्पत्तिः ११ १२ कापिलावतारः तेन देवहूत्यासंवादः इतितृतीयस्कंधे उक्तम् १३ मरीच्यादीनां उत्पत्तिः धर्मपत्नीनां
वंशः दक्षयज्ञनाशः ध्रुवस्य पृथोः प्राचीनबर्हिषश्च चरितानि प्राचीनबर्हिनारदयोः संवादः इति चतुर्थस्कंधे उक्तम् १४ प्रियव्रताख्यानं नाभेः ऋषभस्य भरतस्य च
चरितम् १५ द्वीपसमुद्रादिवर्णनम् ज्योतिश्चक्रपातालनरकाणां स्थितिः इति पंचमस्कंधे उक्तम् १६ प्रचेतोभ्यः दक्षजन्म तत्कन्यावंशः १७ वृत्रस्य जन्मनिधनम्
इति षष्ठ स्कंधे उक्तम् दितिपुत्रनाशः प्रह्लादचरितम् इति सप्तमस्कंधेउक्तम् १८ मन्वंतरानुचरितम् गजेंद्रमोक्षणम् मन्वंतरावतारः १९ कूर्ममत्स्यवामननारसिं ॥५३॥
हाद्यवतारः क्षीरोदमथनम् देवासुरयुद्धम् इति अष्टमस्कंधे उक्तम् २० राजवंशकीर्तनं इक्ष्वाकुजन्म सुद्युम्नजन्म २१ इलोपाख्यानम् तारोपाख्यानम् सूर्यवंशकथनं
२२ सुकन्याख्यानं शर्यातेः खट्वांगस्य मांधातुः सौरभेः सगरस्यचआख्यानम् २३

CC-0. In Public Domain. Digitization by eGangotri

टीका

२४ सोमवंशादिभूतस्यऐलस्यचारितम् २५ (दौष्यंतेर्दुष्यंतसुतस्यभरतस्य । तथा) तत्सुतस्यशंतनुपुत्रस्यभीष्मस्य २६ २७ दशमार्थमाह । तस्यकर्माणीति । पूतनायाअसवः (प्राणास्तत्)-स
हितम्पयतत्पयसःपानम् (शिशोःसकाशात्शकटस्योच्चाटनम् २८ निष्पेषःसंचूर्णनम्) सहभ्रातुःससखस्य (तथाप्रलंबस्यसंक्षयः) २९ (पारिसर्पतःप्रसरतः । महाहेरजगरात्) ३० ३१ यज्ञा
भिषेकं यज्ञःपूजाअभिषेकश्चतयोर्द्वंद्वैक्यम् (शक्रस्यसुरभेरितिकर्तरिषष्ठ्यौ । कृष्णस्येतिकर्मणिषष्ठी । यद्वा स्त्रीभिःसहकृष्णस्यक्रीडेत्यन्वयः) ३२ (केशिनश्चवधः) ३३ (कृष्णकर्तृकंमथुरालोकनं
गजस्यकुवलयापीडस्य) ३४ ३५ ३६ (कुशस्थल्यांद्वारकायाम् । सुधर्मायाःसभायाः) ३७ द्विषतःशत्रून् प्रमथ्य ३८ येचशंबरादयस्तेषांमाहात्म्यंप्रभावःवधश्च ३९

श्लोकाः २४/३९

॥५४॥ रामस्यकोशलेंद्रस्यचरितंकिल्बिषापहम् ॥ निमेरंगपरित्यागोजनकानांचसंभवः २४ रामस्यभार्गवेंद्रस्यनिःक्षत्रीकरणंभुवः ॥ ऐलस्यसोमवंशस्यययाते
र्नहुषस्यच २५ दौष्यंतेर्भरतस्यापिशंतनोस्तत्सुतस्यच ॥ ययातेर्ज्येष्ठपुत्रस्ययदोर्वंशोऽनुकीर्तितः २६ यत्रावतीर्णोभगवान्कृष्णाख्योजगदीश्वरः ॥
वसुदेवगृहेजन्मततोवृद्धिश्चगोकुले २७ तस्यकर्माण्यपाराणिकीर्तितान्यसुरद्विषः ॥ पूतनासुपयःपानंशकटोच्चाटनंशिशोः २८ तृणावर्तस्यनिष्पेषस्त
थैवबकवत्सयोः ॥ धेनुकस्यसहभ्रातुःप्रलंबस्यचसंक्षयः २९ गोपानांचपरित्राणंदावाग्नेःपरिसर्पतः ॥ दमनंकालियस्याहेर्महाहेर्नंदमोक्षणम् ३० व्रतच
र्यातुकन्यानांयत्रतुष्टोऽच्युतोव्रतैः ॥ प्रसादोयज्ञपत्नीभ्योविप्राणांचानुतापनम् ३१ गोवर्धनोद्धारणंचशक्रस्यसुरभेरथ ॥ यज्ञाभिषेकंकृष्णस्यस्त्रीभिः
क्रीडाचरात्रिषु ३२ शंखचूडस्यदुर्बुद्धेर्वधोऽरिष्टस्यकेशिनः ॥ अक्रूरागमनंपश्चात्प्रस्थानंरामकृष्णयोः ३३ व्रजस्त्रीणांविलापश्चमथुरालोकनंततः ॥
गजमुष्टिकचाणूरकंसादीनांचयोवधः ३४ मृतस्यानयनंसूनोःपुनःसांदीपिनेर्गुरोः ॥ मथुरायांनिवसतायदुचक्रस्ययत्प्रियम् ३५ कृतमुद्धवरामाभ्यांयु
तेनहरिणाद्विजाः ॥ जरासंधसमानीतसैन्यस्यबहुशोवधः ३६ घातनंयवनेंद्रस्यकुशस्थल्यांनिवेशनम् ॥ आदानंपारिजातस्यसुधर्मायाःसुरालयात् ३७
रुक्मिण्याहरणंयुद्धेप्रमथ्यद्विषतोहरेः ॥ हरस्यजृंभणंयुद्धेबाणस्यभुजकृंतनम् ॥ प्राग्ज्योतिषपतिंहत्वाकन्यानांहरणंचयत् ३८ चैद्यपौंड्रकशाल्वानां
दंतवक्रस्यदुर्मतेः ॥ शंबरोद्विविदःपीठोमुरःपंचजनादयः ३९

चूर्णिका

श्रीरामचरितं निमेः अंगपरित्यागः २४ परशुरामकथा ऐलस्य ययातेः २५ भरतस्य शंतनोः भीष्मस्य च चरितम् यदुवंशः २६ संक्षेपतः कृष्णजन्मादि इति नवम
स्कंधे उक्तं २७ पूतनावधः शकटोच्चाटनं २८ तृणावर्तवधः बकवत्सधेनुकप्रलंबानां क्षयः २९ दावाग्नेः गोपत्राणं कालियदमनं अहेः नंदमोचनम् ३० कन्या
व्रतं यज्ञपत्नीप्रसादः ३१ गोवर्धनोद्धारणं स्त्रीभिः क्रीडा ३२ शंखचूडारिष्टकेशिवधः अक्रूरागमनं मथुरागमनं ३३ स्त्रीणां विलापः गजमुष्टिकचाणूरकंसादीनां
वधः ३४ गुरोः मृतपुत्रानयनं जरासंधसैन्यवधः ३५ ३६ कालयवनघातः द्वारकानिवेशनं पारिजातसुधर्मयोरादानं ३७ रुक्मिण्या हरणं हरस्य जृंभणम् बाणभुज
च्छेदनं भौमवधः कन्याहरणम् ३८ चैद्यपौंड्रकशाल्वदंतवक्रशंबरद्विविदपीठमुरपंचजनादीनां घातः ३९ ॥५४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(पांडवान् निमित्तक्रित्यकृतभारावतरणम्) ४० एकादशार्थमाह विप्रशापेति ४१ धर्मविनिर्णयःवर्णाश्रमधर्मनिश्चयःमर्त्यपरित्यागःमनुष्यत्वस्यांतर्धानम् ४२ द्वादशार्थमाह । युगेति । युगलक्षणंतदनुरूपावृत्तिश्चेत्यर्थः त्रिविधा । प्राकृतिकी । नैमित्तिकी । नित्याचेति ४३ (विष्णुदत्तस्यपरीक्षितः । ऋषेर्व्यासस्य ।] व्यासकर्तृकमित्यर्थः) ऋषेर्वेदव्यासस्येतिवा (महापुरुषस्याविन्यासःअंगोपांगादिस्थितिविशेषः) सूर्यस्यचविन्यासइत्यर्थः ४४ इतिचे।क्तमितिचकारादन्यदपि । वःयुष्माभिरिहयत्पृष्टोस्मितदुक्तमिति । किमेवंनानार्थकथनेनतत्राह । लीलेति । सर्वशः तत्तदर्थकीर्तनद्वारेणेत्यर्थः४५ तत्कीर्तनेनापिकिमित्यपेक्षायांतत्फलमाहद्वाभ्यां पतितःकूपादिषु । स्खलितःसोपानादिषु । आर्तःदुखितःक्षुत्वाक्षुतंकृत्वाविवशोपि (हरयेनमइत्युच्चैर्ब्रुवन्) ४६ संकीर्त्यमानः यद्वा श्रुतोऽनुभावोयस्यसपुंसांचित्तंप्रविश्यनिःशेषंदुःखंविधुनोतीति । हीतिसतामनुभवंप्रमाणयति (यथार्कस्तमोविधुनोति) अर्कोपिगिरिगुहादिध्वांतंननिवर्तयतीत्यपरितोषात् दृष्टांतांतरमाह अतिवातोऽभ्र-(-मेघ-)-मिवेति ४७ हरिकीर्तनमेवमहाफलंतद्व्यतिरिक्तंसर्वंमिथ्यालापमात्रमितिप्रपंचयति मृषागिरइतिचतुर्भिः (ताः) मृषागिरःमिथ्यावाचः असतीःअसत्याः । असतांकथायासुताः । यत् यासु (गीर्षु अधोक्षजोनकथ्यते) उत्तमश्लोकस्ययशोनुगीतमितियत् तदेवसत्यम् । तदेवहिमंगलंहइतिहर्षेभगवद्गुणानामुदयोयस्मात्तत् ४८ नवंनवंयथाभवतितथारुचिरंरुचिप्रदम् । महानुत्सवोयस्मात् ४९

श्लो० ४०—४९

माहात्म्यंचवधस्तेषांवाराणस्याश्चदाहनम् ॥ भारावतरणंभूमेर्निमित्तीकृत्यपांडवान् ४० विप्रशापापदेशेनसंहारःस्वकुलस्यच ॥ उद्धवस्यचसंवादो
वासुदेवस्यचाद्भुतः ४१ यत्रात्मविद्याह्यखिलाप्रोक्ताधर्मविनिर्णयः ॥ ततोमर्त्यपरित्यागआत्मयोगानुभावतः ४२ युगलक्षणवृत्तिश्चकलौनृणामुपप्लवः ॥
चतुर्विधश्चप्रलयउत्पत्तिस्त्रिविधातथा ४३ देहत्यागश्चराजर्षेर्विष्णुदत्तस्यधीमतः ॥ शाखाप्रणयनमृषेर्मार्कंडेयस्यसत्कथाः ॥ महापुरुषविन्यासःसूर्य
स्यजगदात्मनः ४४ इतिचोक्तंद्विजश्रेष्ठायत्पृष्टोहमिहास्मिवः ॥ लीलावतारकर्माणिकीर्तितानीहसर्वशः ४५ पतितःस्खलितोवार्तःक्षुत्वावाविवशो
ब्रुवन् ॥ हरयेनमइत्युच्चैर्मुच्यतेसर्वपातकात् ४६ संकीर्त्यमानोभगवाननंतःश्रुतानुभावोव्यसनंहिपुंसाम् ॥ प्रविश्यचित्तंविधुनोत्यशेषंयथातमोर्को
भ्रमिवातिवातः ४७ मृषागिरस्ताह्यसतीरसत्कथानकथ्यतेयद्भगवानधोक्षजः ॥ तदेवसत्यंतदुहैवमंगलंतदेवपुण्यंभगवद्गुणोदयम् ४८ तदेवरम्यंरुचि
रंनवंनवंतदेवशश्वन्मनसोमहोत्सवम् ॥ तदेवशोकार्णवशोषणंनृणांयदुत्तमश्लोकगुणोनुगीयते ४९

चूर्णिका वाराणसीदहनं पांडवान् निमित्तीकृत्य भुवो भारहरणम् ४० इति दशमस्कंधे उक्तं विप्रशापापदेशेन स्वकुलनाशःभगवदुद्धवसंवादः मर्त्यपरित्यागः ४१ ४२ इति एकादशस्कंधे उक्तं युगलक्षणं कलौ नृणां नाशः राजर्षेः देहत्यागः शाखाविभागः मार्कंडेयकथा महापुरुषस्य सूर्यस्य च विन्यासः इति द्वादशस्कंधे उक्तं ४३ ४४ हे विप्राः यत्पृष्टं तत् कथितं किं च हरेः लीलावतारकर्माणि कीर्तितानि ४५ एतत्कीर्तनेन किमित्यत आह पतितः स्खलितः आर्तः क्षुत्वा वा विवशोपि हरये नम इत्युच्चैर्ब्रुवन् सर्वपातकात्मुच्यते ४६ एवं कीर्त्यमानः भगवान् पुंसां चित्तं प्रविश्य दुःखं धुनोति ४७ हरिकीर्तनादन्यत् सर्वं मिथ्यालापमात्रं इति प्रपंचयति यासु गीर्षु भगवत्कथा न तागिरः असत्यः ३८ किं च यासु कथासु भगवद्यशः अनुगीयते इति यत्तदेव सत्यं रम्यं शोकार्णवशोषणं ज्ञेयम् ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

चित्राणिपदानियस्मिन्ताद्दशमपि (यद्वचःकर्तृ) जगत्पवित्रयतीतितथातत् हरेर्यशः (कर्म) नप्रगृणीतनवर्णयेत् । तद्वचःध्वांक्षतीर्थंकाकतुल्य- (-कामुक-) -नराणांरतिस्थानम् । नतुहंसैर्ज्ञानिभिःसेवितम् । तत्रहेतुः । यत्रेति ५० सवाग्विसर्गः सएववाचः प्रयोगःजनताघविप्लवःजनसमूहाघस्य (विप्लवो) नाशोयद्यस्मात्तान्येवान्यैःकीर्त्यमानानि (ताद्दशोभवति । कुतः। अबद्धवत्यपियस्मिन्वाग्विसर्गेअनंतस्यनामानिवक्तरिसति) शृण्वंति । श्रोतरिसतिगायंति । नोचेत्स्वयमेवगृणंति ५१ इदानींज्ञानकर्मादरादपिभगवत्कीर्तनादिष्वेवआदरःकर्तव्यइत्याह त्रिभिःनैष्कर्म्य(निष्कर्म) ब्रह्मतत्प्रकाशकंयत् ज्ञानंयतोनिरंजनंउपाधिनिवर्तकंतदप्यच्युतभक्तिवर्जितंचेत् नशोभते । नापरोक्षपर्यंतंभवतीत्यर्थः । ईश्वरेनचेदर्पितंतर्हियदनुत्तमंसर्वोत्तममपिकर्मतदपिपुनः कुतःशोभते । यतःशश्वत्साधनकालेफलकालेचअभद्रंदुःखात्मकम् ५२ किंच । (यशइति) वर्णाश्रमाचारादिषुयःपरोमहान् परिश्रमःसयशोयुक्तायांश्रियामेव (यशसिलक्ष्म्यांच । तेन) कीर्तिःसंपत्तिश्चकेवलंनतुपरःपुरुषार्थइत्यर्थः (तत्रश्रुतंशास्त्रंहरेः) गुणानुवादादिभिस्तुश्रीधरपादपद्मयोरविस्मृतिर्भवति ५३ ततःकिमतआह । अविस्मृतिरिति क्षिणोतिनाशयति (अभद्राणिविषयानुरागादिलक्षणानि । शमंशांतिं । सत्त्वस्यांतःकरणस्य । विज्ञानमात्मानुभवः तत्पर्यंतंवैराग्ययुक्तंज्ञानंचतनोति) ५४ अथेदानींश्रोतॄनात्मानंचाभिनंदन्नाह । यूयमितिद्वाभ्याम् । हेद्विजाग्र्यायद्यस्माद्यूयंआत्मन्यंतःकरणेश्रीनारायणंआविवेश्यशश्वद्भजत । संभावनायांलोट्। अतोभूरिभागाः बहुपुण्याः (महद्दैवंयुष्माकमित्यर्थः) कथंभूतंअखिलात्मभूतम् । सर्वांतर्यामिणम् । अतएवदेवंसर्वोपास्यम् । अदेवंनदेवोन्योयस्यकुतः । ईशंयद्वायस्माद्यूयंभूरिभागाः तपआदिसंपन्नाः ततोनारायणंभजतेतिविधिः (सर्वेश्वरम् । कथंभूतायूयंअजस्रोनिरंतरोभावोभावनायेषां) ५५ (अहंचधन्यः यतआत्मतत्त्वंसंस्मारितः यत्मेमया (पुरावादरायणिमुखात्) श्रुतम् । (क्व प्रायोपवेशइति) ५६

॥५६॥

श्लोकाः ५०/५६

नयद्वचश्चित्रपदंहरेर्यशोजगत्पवित्रंप्रगृणीतकर्हिचित् ॥ तद्ध्वांक्षतीर्थंनतुहंससेवितंयत्राच्युतस्तत्रहिसाधवोऽमलाः ५० सवाग्विसर्गोजनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनंतस्ययशोंकितानियच्छृण्वंतिगायंतिगृणंतिसाधवः ५१ नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनम् ॥ कुतःपुनःशश्वदभद्रमीश्वरेनह्यर्पितंकर्मयदप्यनुत्तमम् ५२ यशःश्रियामेवपरिश्रमःपरोवर्णाश्रमाचारतपःश्रुतादिषु ॥ अविस्मृतिःश्रीधरपादपद्मयोर्गुणानुवादश्रवणादिभिर्हरेः ५३ अविस्मृतिःकृष्णपदारविंदयोःक्षिणोत्यभद्राणिशमंतनोतिच ॥ सत्त्वस्यशुद्धिंपरमात्मभक्तिंज्ञानंचविज्ञानविरागयुक्तम् ५४ यूयंद्विजाग्र्याबतभूरिभागायच्छश्वदात्मन्यखिलात्मभूतम् ॥ नारायणंदेवमदेवमीशमजस्रभावाभजताविवेश्य ५५ अहंचसंस्मारितआत्मतत्त्वंश्रुतंपुरामेपरमर्षिवक्त्रात् ॥ प्रायोपवेशेनृपतेःपरीक्षितःसदस्यृषीणांमहतांचशृण्वताम् ५६

चूर्णिका

अपि च यद्वचः हरेः यशः नोच्चारयेत् तत् ध्वांक्षतीर्थम् ज्ञेयं ५० किं च ब्रह्मप्रकाशकं यत् ज्ञानं तदपि भक्तिहीनं चेन्न शोभते कुतः पुनः अभद्रं कृष्णपदारविंदयोः ५१ ५२ ५३ अविस्मृतिः अभद्राणि धुनोति चित्तशुद्धिं भक्तिं विज्ञानविरागयुक्तं ज्ञानं च तनोति ५४ हे द्विजाग्र्याः यूयं भूरिभागाः अतः मनसि हरिं स्थाप्य तं भजत ५५ अहमपि धन्यः यतः आत्मतत्त्वं स्मारितः ५६ ॥५६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

एतत्पुराणकीर्तनादिफलंप्रपंचयितुमाह । एतद्वइत्यष्टभिः (हेविप्राः एतत्पुराणलक्षणंवासुदेवस्यमाहात्म्यंयुष्माकंकथितम् । तच्चाकिंचिदित्याह । कथनीयंउरुमहत्अपरिमितंकर्मयस्यतस्य । किंचिद्वावेपिसर्वाशुभविनाशनम्) ५७ (नित्यं) यामं (वा) क्षगं (नाडीद्वयंवा) चेत्यर्थःसआत्मानमेवसाक्षात्पुनातिनतुस्नानादिनेवदेहमात्रम् ५८ (आयुष्यवान्आयुष्मान्) ५९ (भयात्संसारात्) ६० (अत्रकीर्तितायेदेवादयस्तेपिश्रवणादिकुर्वतः कामान्यच्छंति । नृपाः प्रियव्रतादयः) ६१ ऋगाद्यधीत्यद्विजोमधुकुल्यादियदनुविंदतेतत्फलमेतां (पुराणसंहितां) पठित्वाऽनुविंदते (भोद्विजा) इति (कुल्याल्पाकृत्रिमासरित्) ६२ किंचप्रोक्तमिति ६३ राजन्यउदधिमेखलांपृथ्वीं संविरार्षः ६४ अस्यपुराणस्यैवंप्रभावातिरेकेकारणमाह । कलिमलानांसंहतिंसमूहंकालयतिनाशयतीतितथा । इतरत्रशास्त्रांतरे (अभीक्ष्णंनगीयते इहतुभागवताख्येशास्त्रेप्रतिपदंशक्त्यातात्पर्येणवापरिपठितोस्तिहरिः) ६५ शास्त्रप्रतिपादितंभगवंतंनमस्करोति तमितिद्वाभ्यां (अजंजन्मरहितंअनंतंनाशरहितंआत्मनस्तत्त्वंनिरुपाधिस्वरूपं) जगदुदयस्थितिसंहारात्मानोरजआदयः शक्तयोयस्यतम् । (अजादिभिः) द्युपतिभिर्देवैरपिर्दुरवसितः (अनिश्चितः) अज्ञातः स्तवःस्तोत्रंयस्यतं (अतः केवलंनतोस्मि) ६६

श्लोकाः ५७—६६

एतद्वःकथितंविप्राःकथनीयोरुकर्मणः ॥ माहात्म्यंवासुदेवस्यसर्वाशुभविनाशनम् ५७ यएवंश्रावयेन्नित्यंयामंक्षणमनन्यधीः ॥श्रद्धावान्योनुशृणुयात्पुनात्यात्मानमेवसः ५८ द्वादश्यामेकादश्यांवाशृण्वन्नायुष्यवान्भवेत् ॥ पठत्यनश्नन्प्रयतस्ततोभवत्यपातकी ५९ पुष्करेमथुरायांचद्वारवत्यांयतात्मवान् ॥ उपोष्यसंहितामेतांपठित्वामुच्यतेभयात् ६० देवतामुनयःसिद्धाःपितरोमनवोनृपाः ॥ यच्छंतिकामान्बहुलाञ्शृण्वतोयेत्रकीर्तिताः ६१ ऋचोयजूंषिसामानिद्विजोधीत्यानुविंदते ॥ मधुकुल्याघृतकुल्यापयःकुल्याश्चतत्फलम् ६२ पुराणसंहितामेतामधीत्यप्रयतोद्विजाः ॥ प्रोक्तंभगवतायत्तुतत्पदंपरमंव्रजेत् ६३ विप्रोधीत्याप्नुयात्प्रज्ञांराजन्योदधिमेखलाम् ॥ वैश्योनिधिपतित्वंचशूद्रःशुध्येतपातकात् ६४ कलिमलसंहतिकालनोखिलेशोहरिरितरत्रनगीयतेह्यभीक्ष्णम् ॥ इहतुपुनर्भगवानशेषमूर्तिःपरिपठितोऽनुपदंकथाप्रसंगैः ६५ तमहमजमनंतमात्मतत्त्वंजगदुदयस्थितिसंयमात्मशक्तिम् ॥ द्युपतिभिरजशक्रशंकराद्यैर्दुरवसितस्तवमच्युतंनतोस्मि ६६

चूर्णिका ॥५७॥

एवं वासुदेवमाहात्म्यं अशुभनाशकं वः उक्तं ५७ एवं यः इदं लक्षणं श्रद्धावान् शृणुयात् श्रावयेत् सः आत्मानं पुनाति ५८ एकादश्यां द्वादश्यां वा शृण्वन् दीर्घायुः स्यात् अनश्नन् पठेत् सः अपापी स्यात् ५९ पुष्करे मथुरायां द्वार्वत्यां उपोष्य इमां संहितां पठित्वा भयात् मुच्यते ६० इदं शृण्वतः गृणतः पुंसः देवमुनिसिद्धपितृमनुनृपाः कामान् यच्छंति ६१ ऋगादिवेदान् अधीत्य मधुकुल्यादि यत् विंदते तत्फलं एतत्पाठात्प्राप्नोति ६२ किंच इमां संहितां अधीत्य नरः भगवत्पदं व्रजेत् ६३ विप्रोधीत्याप्नुयात् प्रज्ञां राजन्योदधिमेखलाम् वैश्यो निधिपतित्वं च शूद्रः शुध्येत पातकात् ६४ कलिमलौघनाशकः हरिः अन्यत्र अभीक्ष्णं न गीयते इह तु कथाप्रसंगैः प्रतिपदं पठितः ६५ तं अनंतं अजशक्रशिवाद्यैः अज्ञातस्तोत्रं अच्युतं नतोऽस्मि ६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

उपचिताभिरुद्रिक्ताभिः नवशक्तिभिः प्रकृतिपुरुषमहदहंकारतन्मात्ररूपाभिः स्वेआत्मन्येवोपरचितम् (स्वरूपभूतेब्रह्मण्येवप्रकाशितं) स्थिरंजंगमंचालयोयस्यतस्मैभगवते (उपलब्धिःस्वानुभ
तिस्तन्मात्रंधामस्वरूपंयस्यतस्मै) ६७ श्रीगुरुंनमस्करोति स्वसुखेनैवनिभृतंपूर्णंचेतोयस्य (सः) (तेन स्वसुखेन) एवव्युदस्तो (निरस्तः) अन्यस्मिन्भावोयस्यतथाभूतस्तदेकानि
ष्ठइत्यर्थः । (एवं) भूतोपिअजितस्यरुचिराभिर्लीलाभिः आकृष्टः सारः स्वसुखगतंस्थैर्यंयस्यसः (तदीयंअजितसंबंधि) तत्त्वदीपंपरमार्थप्रकाशकं (पुराणं) श्रीभागवतंयोव्यतनुत (तेनअ
खिलवृजिनघ्नं) तं (व्याससूनुं) नतोस्मीति ६८ ॥ ॥ इतिश्रीभागवतेमहापुराणेद्वादशस्कंधेटीकायांद्वादशोऽध्यायः ॥ १२ ॥ ॥ ७ ॥ ॥ सर्वपुराणसंख्यादीनुपवर्णयिष्यन्तत्प्र
तिपाद्यंदेवंप्रणमति यमिति (ब्रह्मादयोयंदिव्यैः) स्तवैर्वेदैश्चस्तुन्वंति स्तुवंति । उपनिषच्छब्दस्य (भागुरिमतानुसारंटाबंतत्वं) अकारांतयैवाछंदोनुरोधेन (अंगादिसहितैः वेदैर्यंगायंतिच)
॥५८॥ ध्यानेनावस्थितंनिश्चलंतद्गतं (ध्येयगतं) यन्मनः तेन (यं पश्यंतिअनुभवंति) यस्यांतं (देशतः कालतोवापरिच्छेदं) नविदुः सुरासुरगणाः (तस्मैदेवाय नमइति) १ क्षीरोदमथनादौदुर्ज्ञेयत्वमे
वप्रदर्शयितुं कूर्मावतारमनुस्मारयन्नाशिषः प्रार्थयते । पृष्ठेभ्राम्यन्अमंदो (अनल्पो) मंदरगिरिः गरिष्ठो (यो) मंदरगिरिस्तस्यग्रावाणः (प्रस्तराः) तेषामग्राणि तैः कंडूयनात् तेनसुखेननिद्रालो
र्निद्राशीलस्य (कूर्माकृतेर्भगवतः श्वासरूपाअनिलायुष्मान्पांतु । कथंभूताः) येषांश्वासानिलानांसंस्कारास्तेषांकलाश्चलेशास्तदनुवर्तनवशात् (अतंद्रितंनिरंतरंयत्) जलनिधेरंभसांयातायातं (ती
रंप्रतिगतागतंतदद्यापि) नविश्राम्याति (नोपशमंगच्छति) ननु जलधिक्षोभादेवतत् ननु (श्वास) संस्कारवशादित्यत्राह । वेलानिभेनेति । वेलाक्षोभस्तस्यनिभेनमिषेण २ पुराणानांसंख्यास्ता
सांसंभूतिंसमाहारंचअस्य (महापुराणस्य) श्रीभागवतस्यवाच्योविषयःप्रयोजनंचदानंचतस्यपाठादेश्चमाहात्म्यंचानिबोधत (शृणुत) ३

श्लोकाः ६७/३

उपचितनवशक्तिभिःस्वआत्मन्युपरचितस्थिरजंगमालयाय ॥ भगवतउपलब्धिमात्रधाम्नेसुरऋषभायनमःसनातनाय ६७ स्वसुखनिभृतचेतास्त
द्व्युदस्तान्यभावोप्यजितरुचिरलीलाकृष्टसारस्तदीयम् ॥ व्यतनुतकृपयायस्तत्त्वदीपंपुराणंतमखिलवृजिनघ्नंव्याससूनुंनतोस्मि ६८ इतिश्रीभाग
वतेमहापुराणेद्वादशस्कंधेद्वादशोध्यायः १२ ॥ ॥ सूतउवाच ॥ यंब्रह्मावरुणेंद्ररुद्रमरुतःस्तुन्वंतिदिव्यैःस्तवैर्वेदैःसांगपदक्रमोपनिषदैर्गायंति
यंसामगाः ॥ ध्यानावस्थिततद्गतेनमनसापश्यंतियंयोगिनोयस्यांतंनविदुःसुरासुरगणादेवायतस्मैनमः १ पृष्ठेभ्राम्यदमंदमंदरगिरिग्रावाग्रकंडूयनान्नि
द्रालोःकमठाकृतेर्भगवतःश्वासानिलाःपांतुवः ॥ यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनांभसांयातायातमतंद्रितंजलनिधेर्नाद्यापिविश्राम्यति २
पुराणसंख्यासंभूतिमस्यवाच्यप्रयोजने ॥ दानंदानस्यमाहात्म्यंपाठादेश्चनिबोधत ३

चूर्णिका

किं च सुरर्षभाय सनातनाय नवशक्तिभिः ६७ आत्मनिराचितस्थिरजंगमालयाय हरये नमोऽस्तु गुरुं प्रणमति स्वसुखनिभृतचेताः अजितलीलाकृष्टसारः यः त
त्वदीपं पुराणं कृपया व्यतनुत तं व्याससूनुं आखिलवृजिनघ्नं शुकं नतोऽस्मि ६८ इति द्वादशे द्वादशः १२ ॥ सूत उवाच ॥ यं ब्रह्मावरुणेंद्ररुद्रमरुतः स्तुन्वंतिदिव्यैस्तवै
र्वेदैःसांगपदक्रमोपनिषदैर्गायंतियंसामगाः ॥ ध्यानावस्थिततद्गतेनमनसापश्यंतियंयोगिनोयस्यांतंनविदुःसुरासुरगणादेवायतस्मैनमः १ किं च पृष्ठेभ्राम्यदमंदमंदरगिरिग्रा ॥५८॥
वाग्रकंडूयनान्निद्रालोःकमठाकृतेर्भगवतःश्वासानिलाःपांतुवः यत्संस्कारकला० २ अथपुराणसंख्यासमूहं अस्य विषयप्रयोजने च दानं पाठादेर्माहात्म्यं च शृणुत ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका

(पंचोनाषष्टिः संख्यायस्यतथाभूतं । पंचपंचाशत्सहस्रसंख्याकमित्यर्थः) त्रयोविंशत्त्रयोविंशतिः । शैवकंशिवपुराणंचतुर्विंशतिसहस्रसंख्याकम् ४ (दशाष्टौचअष्टादशेत्यर्थः । मार्कंडंमार्कंडेयं नवसहस्राणि) वाह्नंतु अग्निपुराणंदशपंचसहस्राणिचत्वारिशतानि च ५ ६ स्कांदंशताधिकाशीतिसहस्रम् ७(आख्यातंकथितम्) सौपर्णंगरुडपुराणंएकोनविंशंएकोनविंशतिः ८ महाभारतंत्वितिहासः रामायणंचऋषिप्रोक्तंकाव्यं (नतुपुराणांतर्गतं) अतः पुराणानामष्टादशानांसंदोहःसमूहः (एवं) चतुर्लक्षसंख्याकएव । इदानीमस्यवाच्यप्रयोजनादीनदर्शयितुमाहतत्रेत्यादिना (तत्रेदं श्रीमद्भागवतंमहापुराणमष्टादशसाहस्रमिष्यते) ९ (इदंभगवतानारायणेनब्रह्मणेसम्यक्प्रकाशितम्) १० (अस्यविषयादिकंदर्शयतिद्वाभ्यां आदीति । सर्वत्रवैराग्यकथनेनसंयुतं) हरिलीलाकथानांव्रातसमूहः सएवामृतंतेनानंदिताः संतः सुराश्च (सल्लक्षणसुरावा) येनतत् ११ (सर्वेषांवेदांतानांसारार्थोयत्रताहशम् । ब्रह्म शुद्धस्तत्पदार्थः आत्माशुद्धस्त्वंपदार्थः तदेकत्वलक्षणंयदाद्वितीयंवस्तु) तन्निष्ठंतद्विषयं (वैराग्यभक्तियुक्तंजीवब्रह्मैक्यवस्तुअस्याविषयइत्यर्थः । कैवल्यंनित्यानंदरूपाभागवतीगतिःतदेवैकंप्रयोजनमस्येति) १२ (अस्यदानादिकमाह) प्रोष्ठपद्यांभाद्रपद्यांहेमसिंहसमन्वितं स्वर्णसिंहासनारूढं (परमांभागवतीम्) १३ (सतांगणेसाधूनांसदसि) १४ (हियस्मात्सर्ववेदांतसारभूतंअतः) तद्रसएवामृतंतेनतृप्तस्यनिर्वृतस्य १५

॥५९॥

ब्राह्मंदशसहस्राणिपाद्मंपंचोनषष्टिच ॥ श्रीवैष्णवंत्रयोविंशच्चतुर्विंशतिशैवकम् ४ दशाष्टौश्रीभागवतंनारदंपंचविंशतिः । मार्कंडंनववाह्नंचदशपंचचतुःशतम् ५ चतुर्दशभविष्यंस्यात्तथापंचशतानिच ॥ दशाष्टौब्रह्मवैवर्तंलैंगमेकादशैवतु ६ चतुर्विंशतिवाराहमेकाशीतिसहस्रकम् ॥ स्कांदंशतंतथाचैकंवामनंदशकीर्तितम् ७ कौर्मंसप्तदशाख्यातंमात्स्यंतत्तुचतुर्दश ॥ एकोनविंशत्सौपर्णंब्रह्मांडंद्वादशैवतु ८ एवंपुराणसंदोहश्चतुर्लक्षमुदाहृतः ॥ तत्राष्टादशसाहस्रंश्रीभागवतमिष्यते ९ इदंभगवतापूर्वंब्रह्मणेनाभिपंकजे ॥ स्थितायभवभीतायकारुण्यात्संप्रकाशितम् १० आदिमध्यावसानेषुवैराग्याख्यानसंयुतम् ॥ हरिलीलाकथाव्रातामृतानंदितसत्सुरम् ११ सर्ववेदांतसारंयद्ब्रह्मात्मैकत्वलक्षणम् । वस्त्वद्वितीयंतन्निष्ठंकैवल्यैकप्रयोजनम् १२ प्रौष्ठपद्यांपौर्णमास्यांहेमसिंहसमन्वितम् ॥ ददातियोभागवतंसयातिपरमांगतिम् १३ राजंतेतावदन्यानिपुराणानिसतांगणे । यावन्नदृश्यतेसाक्षाच्छ्रीमद्भागवतंपरम् १४ सर्ववेदांतसारंहिश्रीभागवतमिष्यते । तद्रसामृततृप्तस्यनान्यत्रस्याद्रतिःक्वचित् १५

श्लोकाः ४/१९

चूर्णिका

अथ ब्राह्मं दशसहस्राणि पाद्मं पंचोनषष्टिसहस्रं वैष्णवं त्रयोविंशत्सहस्रकं शैवं चतुर्विंशत्सहस्रकं ४ श्रीभागवतं अष्टादशसहस्रकं नारदीयं पंचविंशतिसहस्रं मार्कंडेयं नवसहस्रं वाह्नं पंचदशसहस्राणि चत्वारिशतानिच ५ भविष्यं चतुर्दशसहस्राणि पंचशतानिच ब्रह्मवैवर्तं अष्टादशसहस्रं लैंगं एकादशसहस्रं ६ वाराहं चतुर्विंशतिसहस्रं स्कांदं शताधिकैकाशीतिसहस्रं वामनं दशसहस्रं ७ कौर्मं सप्तदशसहस्रं मात्स्यं चतुर्दशसहस्रं गारुडं एकोनविंशतिसहस्रं ब्रह्मांडं द्वादशसहस्रं ८ एवं पुराणसंदोहः चतुर्लक्षः उक्तःतत्र इदं भागवतं अष्टादशसाहस्रं इष्यते ९ इदं श्रीभागवतं पुराणं पुरा भगवता नाभिपद्मे स्थिताय ब्रह्मणे कृपया प्रकाशितम् १० किं च इदं आदिमध्यांतेषु वैराग्याख्यानयुतं ११ सर्ववेदांतसारं ब्रह्मात्मैकत्वलक्षणं कैवल्यैकप्रयोजनं ईदृशं पुराणं १२ प्रौष्ठपद्यां पौर्णमास्यां हेमसिंहसमन्वितम् ददाति यो भागवतं स याति परमां गतिम् १३ किं च यावद्भागवतं नैव श्रूयते तावत् अन्यपुराणानि सतांगणे राजंते १४ इदं सर्ववेदांतसारं हि तद्रसामृततृप्तस्य नान्यत्र रतिः स्यात् १५

॥५९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

टीका ॥१३॥ ॥६०॥

(निम्नगानांनदीनांगंगाजाह्नवी) १६ (अनुत्तमाअत्युत्तमाहेद्विजाः) १७ पारमहंस्यंपरमहंसैःप्राप्यंनैष्कर्म्यंसर्वकर्मोपरमः । भक्त्यातच्छ्रवणादिपरोविमुच्येत १८ श्रीभागवतसंप्रदायप्रवर्तकरू
पेण- (-भागवतप्रकाशक-) -भगवद्ध्यानलक्षणमंगलमाचरति कस्माइति (येनभगवता) पुराकल्पादौकस्मै (काय) ब्रह्मणेअतुलः असमः (असाधारणइत्यर्थः) अयंश्रीभागवतरूपः (ज्ञानप्र
दीपः ज्ञानस्यप्रकाशकः प्रदीपः) तद्रूपेणब्रह्मरूपेणनारदायचतद्रूपिणानारदरूपिणाकृष्णायद्वैपायनायतदात्मनाव्यासरूपेणयोगींद्रायशुकाय (अथ) तदात्मनाशुकरूपेण (भगवद्रातायपरीक्षिते
कृपयाविभासितः तद्योगींद्ररूपंव्यासरूपंनारदरूपंब्रह्मरूपं) तत्परंसत्यश्रीनारायणाख्यंतत्त्वंधीमहि) ध्यायेमइतिगायत्र्यैवयथोपक्रममुपसंहरन्गायत्र्याख्याब्रह्मविद्येयमितिदर्शयतिस्म १९ तमेवदे
वतारूपेणगुरुरूपेणचप्रणमति । नमइतिद्वाभ्यां (कस्मैब्रह्मणे । सर्वनामत्वमार्षं । मुमुक्षवेकृपयेदं) व्याचचक्षे व्याख्यातवान् २० २१ २२ २३ ॥ भावार्थदीपिकामेतांभगवद्भक्तवत्सलां । श्रीपरानं
दपादाब्जभृंगःश्रीश्रीधरोऽकरोत् ॥ १ ॥ स्वबालचपलालापैःस्वलीलापरिकीर्तनैः ॥ प्रीयतांपरमानंदनृहरिःसद्गुरुःस्वयम् ॥ २ ॥ श्रीपरानंदसंप्रीत्यैगुह्यंभागवतंमया ॥ विवृतंतन्मतेनेदंनतुमन्म
तिवैभवात् ॥३॥ क्वेदंनानानिगूढार्थंश्रीमद्भागवतंक्वनु ॥ मंदबुद्धिरहंकृष्णप्रेमकिंकिंनकारयेत् ॥ ४ ॥ इतिश्रीभागवतेमहापुराणेभावार्थदीपिकायांश्रीधरस्वामिविरचितायांद्वादशस्कंधेत्रयोदशोऽध्यायः १३
(श्रीधरस्वामिभिर्यन्नव्याख्यातंसुगमत्वतः ॥ तत्स्पष्टीकृतवान्बालबोधायात्रमहेश्वरः) ॥ १ ॥ समाप्तोयंद्वादशस्कंधः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्लोकाः १६–२३

निम्नगानांयथागंगादेवानामच्युतोयथा ॥ वैष्णवानांयथाशंभुःपुराणानामिदंतथा १६ क्षेत्राणांचैवसर्वेषांयथाकाशीह्यनुत्तमा ॥ तथापुराणव्रातानांश्रीम
द्भागवतंद्विजाः १७ श्रीमद्भागवतंपुराणममलंयद्वैष्णवानांप्रियंयस्मिन्पारमहंस्यमेकममलंज्ञानंपरंगीयते ॥ यत्रज्ञानविरागभक्तिसहितंनैष्कर्म्यमाविष्कृतं
तच्छृण्वन्विपठन्विचारणपरोभक्त्याविमुच्येन्नरः १८ कस्मैयेनविभासितोयमतुलोज्ञानप्रदीपःपुरातद्रूपेणचनारदायमुनयेकृष्णायतद्रूपिणा ॥ योगींद्रा
यतदात्मनाथभगवद्रातायकारुण्यतस्तच्छुद्धंविमलंविशोकममृतंसत्यंपरंधीमहि १९ नमस्तस्मैभगवतेवासुदेवायसाक्षिणे ॥ यइदंकृपयाकस्मैव्याचचक्षे
मुमुक्षवे २० योगींद्रायनमस्तस्मैशुकायब्रह्मरूपिणे ॥ संसारसर्पदष्टंयोविष्णुरातममूमुचत् २१ भवेभवेयथाभक्तिःपादयोस्तवजायते ॥ तथाकुरुष्वयोगे
शनाथस्त्वंमेयतःप्रभो २२ नामसंकीर्तनंयस्यसर्वपापप्रणाशनम् ॥ प्रणामोदुःखशमनस्तंनमामिहरिंपरम् २३ ॥ ॥ इतिश्रीभागवतेमहापुराणेअष्टाद
शसाहस्र्यांसंहितायांवैयासिक्यांद्वादशस्कंधेत्रयोदशोऽध्यायः १३ ॥ ॥ समाप्तोयंद्वादशःस्कंधः ॥ ॥ जयतिश्रीः ॥ ॥ ७ ॥

चूर्णिका ॥६०॥

नदीनां यथा गंगा श्रेष्ठा देवानां यथा अच्युतःश्रेष्ठः १६ वैष्णवानां यथा शंभुः श्रेष्ठः क्षेत्राणां यथा काशी श्रेष्ठा तथा पुराणव्रातानां इदं श्रेष्ठं श्रीमद्भागवतं १७ इदं वैष्णवानां प्रियं यत्र पारमहंस्यं ज्ञानंगीयते तत् शृण्वन् पठन् भक्त्या विचारणपरः नरः विमुच्येत१८अयं श्रीभागवतरूपः प्रदीपः कल्पादौ ब्रह्मणे येन प्रकाशितः तद्रूपेण नारदाय तद्रूपेण व्यासाय तद्रूपेण शुकाय तद्रूपेण राज्ञे परीक्षिते च प्रकाशितः तत् सत्यंविशोकं श्रीनारायणाख्यं तत्वं धीमहि १९ नमस्तस्मै भगवते वासुदेवाय साक्षिणे य इदं कृपया कस्मै व्याचचक्षेमुमुक्षवे, २० योगींद्राय नमस्तस्मै शुकाय ब्रह्मरूपिणे संसारसर्पदष्टं यो विष्णुरातममूमुचत् २१ भवे भवे यथाशक्तिः पादयोस्तव जायते तथा कुरुष्व योगेश नाथस्त्वं मेयतः प्रभो २२ नामसंकीर्तनंयस्य सर्वपापप्रणाशनं प्रणामोदुःखशमनस्तं नमामि हरिं परम् २३ इतिश्रीमद्भागवतद्वादशस्कंधे चूर्णिकायां त्रयोदशोऽध्यायः १३ श्रीकृष्णार्पणमस्तु ॥ शुभंभवतु ॥ ॥ समाप्तेयं ॥ भागवत चूर्णिका ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७॥

१ पि० नर्तितैरितिवापाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुते तेन तस्य भाषणे भीतोरण्ये एकनिष्टतया मन्त्रमजपत् । एवं गतेषु केषु चिद्दिनेषु श्रद्धायिते तस्मिश्चेतसि नाभवत्तेषां फटायितकरवालकराणां वीराणा कारणम् । एवं व्यर्थव्यापारास्तेऽमात्यं गत्वा तत्तपस्तं निवेदयांचक्रुः । एवंसिद्धे तस्मिन्श्रीधरमस्कारिणि तत्तेजःपरीक्षाचिकीर्षणतत्परं राजानं ज्ञापयामास 'गन्तव्यंश्रीधरतेजोदर्शनार्थं' मित्येवमाज्ञापितो राजा गजस्कन्धारूढः तेन वीरबलामात्येन वीरैश्च सार्धं तद्दर्शनार्थं गमनमकरोत् । गते च तत्समीपे करिणि स साक्षान्नृसिंहप्रसन्नप्रसादितं तं दृष्ट्वाऽग्रेभवितुमेकेनापि पदा चलितुं नाशक्नोत् । तदामात्यं राज्ञा न्यवेदि किमिदं कथं न चलतीतो हस्तीत्युक्तः स स्वकीयनृसिंहदेवताप्रभावं भावयामास च स्वकीयब्राह्मणजातिश्रैष्ठ्यमपि । एवंप्रकारेण सिद्धसाधुत्वेन श्रीधरेण श्रीनृसिंहप्रेरणयेयं भागवतभावार्थदीपिका नाम टीका प्राटीकि । स्वतोऽज्ञानिना तेन यत्र न ज्ञातं भावबोधनं तत्र साक्षान्नृसिंहोदेवः अयंभावइतिप्रारम्भारम्भेण श्लोकभावार्थं जनानबोधि ।

एवं भावार्थदीपिकया टीकया मुद्रितमेतच्छ्रीमद्भागवतमनेकवारमतः तस्याः पूजनीयत्वात्तयैव साकमाञ्चिकीर्षूणामस्माकममरकोशादिटीकाकारपण्डितमहेश्वरकृतबालबोधिन्याटीकापूरणिकया टिप्पण्या सहितमुक्तपण्डितहस्तलिखितं गोमान्तकेष्वेतद्गृहेषु एतत्प्रपौत्रत एव लब्धमस्मानेकं पुस्तकम् । तत्र श्रीमता पण्डितेन मध्येमध्ये लिखिता टिप्पणी अस्माभिर्मुद्रणसमये ( ) एताच्चिह्नेन द्योतिता पुस्तकेषु द्रष्टव्या । एतत्पुस्तकमनेन १७२६ तमे शके लिखित्वा पूर्णतामानायितम् ।

एवं केवलं टीकयाटिप्पण्यापि साकमङ्कितेन पौराणिकानां सप्ताहकथ्यमानसंक्षेपकथाप्रसङ्गेषु चूर्णिकापेक्षा तथैव स्थिता भवेद्तोऽस्माभिस्तामपि दूरीकर्तुं प्रत्येकश्लोकभावार्थज्ञानार्थं तत्तच्छ्लोकाङ्केनाङ्किता च सर्वा चूर्णिका टीकावदेव प्रत्येकं पत्रे मुद्रिता । अत्र मुद्रणाकालेऽशुद्धादिदोषापाकरणेन पित्रेउपाख्यैः कृष्णशास्त्रिभिर्मय्युपकारितमिति नांशेनापीत्युपकर्तुं शक्तोहं प्रार्थये ।

एवंरीत्येदं प्रथमत एव मुद्रणमतः कुत्राचिन्महेश्वरटिप्पण्यादिषु दृष्टिदोषेण नाङ्कितेषु तथैवान्यत्रकुत्रचिदशुद्धस्थलेषु क्षन्तव्यं सुधीभिः । तत्र विशेषतोमहेश्वरपक्षलक्षायितैर्गोमान्तप्रान्तातवर्तिनीभिःपण्डितततिभिः। इत्यलं बहुलेखनपल्लवितेनेत्यशेषमतिमङ्गलम् ।

मुम्बय्यां—तपस्यस्यासितदशम्यां शनैश्चरवारे । १८११ तमे शालिवाहनशाके ।

गोपाळनारायणजनताप्रेरितः
वैराजक्षेत्रनिवासी ऐनापुरेउपाख्य-
श्रीबाळाचार्यात्मज उद्धवाचार्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीः ।

अथ श्रीमद्भागवतस्योपोद्घातविषयकप्रस्ताववर्णनम् ।

अथ सकलगुणगणनिकाषायितानां कषायितदुर्मार्गवर्तिमनसां मानसनिवासितश्रीमन्नारायणानां निखिलविद्यापारावारीणपारंगतानां पुरः प्राञ्जलिः प्रस्तूयते स्तोकं श्रीमद्भागवतप्रस्तावस्तत्रास्तु भवतां भवतां सावधानं मानसम्—

अथ कलिकालाकलितमलाप्रलयाय कमलाकमलासनशूलिपुरःसरैरमरवरैरादरेण प्रसादितो दितिसुतबलभराक्रान्तार्तिनि धरणितले तद्दुःखखेदापवारणाय चिरसमयसमाचीर्णतपस्यायां सत्यां सत्यवत्यां पराशरादवतीर्णः षड्गुणैश्वर्यसंपन्नः श्रीमन्नारायणः व्यासत्वेनास्यां पृथिव्यामास। तदा च समुत्सन्नसमुद्धृतनिगमागमोऽल्पमतिमनुजानुकम्पया तं चतुर्धा व्यभजत् । पुनश्चतुर्विंशतिधैकशतधा सहस्रधा द्वादशधा च तदर्थनिर्णयाय ब्रह्मसूत्राणि समन्वयाद्यन्वयनिदर्शनानि प्रदर्शयामास । उक्तं स्कान्दे— **गौतमस्य ऋषेः शापाज्ज्ञानेत्वज्ञानतां गते । शरण्यं शरणं जग्मुर्नारायणमनामयम् ॥ तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः । अवतीर्णो महायोगी सत्यवत्यां पराशरात् ॥ उत्सन्नान्भगवान्वेदानुज्जहार हरिः स्वयम् । चतुर्धा व्यभजत्तांश्च चतुर्विंशतिधा पुनः । शतधा चैकधा चैव तथैव च सहस्रधा ॥ कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये । चकार ब्रह्मसूत्राणि येषां सूत्रार्थमञ्जसा ॥** इति । तत्राप्यनधिकारिणां जनानामपवर्गायाष्टादशपुराणान्युपपुराणानि वेदार्थपरिबृंहितैरुपनिबद्धानि संग्राहयामास । तानि च- ब्राह्मं १ पाद्मं २ वैष्णवं ३ शैवं ४ श्रीमद्भागवतं ५ नारदीयं ६ मार्कण्डेयम् ७ आग्नेयं ८ भाविष्यं ९ ब्रह्मवैवर्तम् १० लैङ्गं ११ वाराहं १२ स्कान्दं १३ वामनं १४ कौर्मं १५ मात्स्यं १६ सौपर्णं १७ ब्रह्माण्डं १८ इति। एवमेतेषामष्टादशपुराणानांमूर्धायितं श्रीमद्भागवतं यच्चात्रत्यसंसारसागरनिमज्जनोन्मज्जनजर्जरितशरीराणां प्राणिनां तरणिरणायितं निर्णीयते। यत्र च श्रीमन्नारायणस्य भक्त्यातिशयसेवनधर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां च सम्यगर्थनिर्गमो मन्वन्तरकथाभिर्वंशानुकीर्तनाभिश्च समासादितः । किं बहुनास्य माहात्म्योक्तेन यस्य श्लोकस्य वा श्लोकार्धस्य उत श्लोकपादस्याहोस्विदेकस्यापि शब्दस्याध्ययनाध्यापनपठनपाठनश्रवणश्रावणादिभिर्नराणां पूर्वानन्तजनिसम्पादितपापशतमप्याकस्मिकमेकस्मिन्काले भस्मसाद्भवति ॥ तथाहि— पद्मपुराणे उत्तरखण्डे— **सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा ॥ यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् ॥ २५ ॥ ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसंमितः ॥ परिक्षिच्छुकसंवादः शृणु भागवतं हि तत् ॥ २६ ॥ तावत्संसारचक्रेऽस्मिन्भ्रमतेऽज्ञानतः पुमान् ॥ यावत्कर्णागता नास्ति शुकशास्त्रकथा क्षणम् ॥ २७ ॥** किंचिदग्रे तत्रैव— **अश्वमेधसहस्राणि वाजपेयशतानि च ॥ शुकशास्त्रकथायाश्च कलां नार्हन्ति षोडशीम् ॥ २७॥** ततः— **श्लोकार्धं श्लोकपादं वा नित्यं भागवतोद्भवम् । पठस्व स्वमुखेनैव यदीच्छसि परां गतिम् ॥** स्कान्दे मार्कण्डेयभगीरथसंवादे— **नित्यं भागवतं यस्तु पुराणं पठते नरः । प्रत्यक्षरं भवत्तेस्य कपिलादानजं फलम् ॥** गारुडे पाद्मेच— **अर्थोऽयं ब्रह्मसूत्राणां भारतार्थविनिर्णयः । गायत्रीभाष्यरूपोसौ वेदार्थपरिबृंहितः ॥** इत्यादि सर्वत्र प्राचीनार्वाचीनग्रन्थेषु श्रीमद्भागवतमहामहिमालं महीयते ।

ननु शुकाय प्रोक्तं शुकप्रोक्तमिति देवीभागवतमेवास्तु इति चेन्न। 'राज्ञा पृष्टं शुकेनोक्तं श्रीमद्भागवतं पर'मिति बृहन्नारदीयपुरुषोत्तममाहात्म्यद्वितीयाध्यायवचोविरोधात्। तत्रापि 'शुकमध्यापयामास'इतिवचनेन चतुर्थीसमासेपीष्टासिद्धिः । तत्र चोपसंहारे 'गृहे तस्य सदा हरि'रित्युक्तेश्च। परं चात्र चतुर्थीसमासापत्तिरपि न प्रकृतिविकृतिभावाभावेन 'रन्धनायस्थाली' इत्यादौ चतुर्थीसमासस्याप्राप्तेः । अतएव 'चतुर्थी तदर्थार्थे'इत्यत्र रक्षितग्रहणं चरितार्थम्। ध्वनितंचेदं 'अश्वघासादयस्तु षष्ठीसमासा' इतिवदद्भिर्भाष्यकृद्भिः पस्पशाह्निके 'धर्माय नियम' इत्यत्र भाष्यप्रदीपोद्योते च । अस्य श्रीमद्भागवतस्य वचनप्रमाणग्राहकाः १ शंकराचार्याणां ग्रन्थात्प्राक्तनकालीननिम्बार्कभाष्यम् २ श्रीमन्मध्वाचार्यचरणकृतब्रह्मसूत्रभाष्यम्। ३ तत्त्वप्रकाशिका । ४ तात्पर्यचन्द्रिका ५ दिनत्रयमीमांसा ६ सदाचारस्मृतिव्याख्यानानि ७ स्मृतिकौस्तुभः । ८ स्मृत्यर्थसागरः। ९ निर्णयरत्नम् । १० विद्यारण्यस्वामिकृतजीवन्मुक्तिप्रकरणम् । ११ हेमाद्रिकृतव्रतखण्डम् । दानखण्डम् । १२ भट्टोजीदीक्षितकृताह्निकम् १३ निर्णयसिन्धुः १४ नागोजीभट्टकृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्निकप्रकरणम् । गुरोरनृतइत्यत्रशेखरः रामायणव्याख्यानं सप्तशतीव्याख्यानंच । १९ शंकराचार्यकृतं विष्णुसहस्रनामभाष्यं । पद्मपुराणीयवासुदेवसहस्रनामभाष्यं च । एवं कति वदामः। एतेन च बोपदेवकृतमितिवदन्तः केचनाधुनिका अपि परास्ताः । बोपदेवकालस्तु हेमाद्रिसमकालीनत्वात् शालिवाहनशकस्य त्रयोदशशतकादर्वाचीनः । तथा चास्य भागवतस्य बोपदेवकृतं 'परमहंसप्रिया'नाम व्याख्यानमपि वरीवर्ति तथैतत्कथानुसंधानेन मुक्ताफलहरिलीलाख्यौ निबन्धावपि लिखितौ । सारमप्युद्धृतं मुकुटनामकं तदादौ च—श्रीमद्भागवतस्यानुक्रमणी रमणीकृता । विदुषा बोपदेवेन भिषक्केशवसूनुना ॥ हरिलीलायांच । श्रीमद्भागवतस्कन्धाध्यायार्थादि निरूप्यते । विदुषा बोपदवेन मन्त्रिहेमाद्रितुष्टये ॥ उक्तं च रामानन्दमिश्रादिभिः शंकराचार्यसमयादुत्तरशतद्वये बोपदेवोभूदिति । प्राकृतज्ञानेश्वरकृतगीताटीकान्तिमपद्येन १ २७२ शकः संपद्यते हेमाद्रेः । ततः प्राचीना हनुमच्चित्सुखादीनां टीका अपि श्रीमद्भागवतस्य समुल्लसन्ति । सिद्धान्तदर्पणे—बोपदेवकृतत्वे च बोपदेवपुराभवैः । कथं टीकाः कृताः संस्युर्हनुमच्चित्सुखादिभिः ॥ इत्याद्यन्यत्र भागवतभूषणसिद्धान्तदर्पणाद्यनेकेषु ग्रन्थेषु विस्तरो द्रष्टव्यः। नच न व्यासकृतेषु प्राचीनेषु च ग्रन्थान्तरेषु भागवतवत् पदलालित्यं दृढबन्धाश्च चाच्यम् । छान्दोग्यैतरेयाद्युपनिषत्सु वैष्णवादिपुराणेषु भारते सनत्सुजातीयाख्यानगीतादिभागेषु हरिवंशीयपुष्करप्रादुर्भावे अन्यत्रवाल्मीकीयसुन्दरकाण्डादौ च संदर्शनात् । नन्वेवमपि भागवतस्याष्टादशसहस्रसंख्याकत्वमिदं ततो न्यूनमिति चेत् विजयध्वजीसंमतं ग्रहाण । देवीभागवतमपि षोडशसहस्रात्किंचिदधिकम् । इदानीन्तनं भारतमपि अशीतिसहस्रतोऽपि न्यूनम् ।

नन्वेवमपि अष्टादशोत्तरं व्यासो भारतं कृतवान्प्रभुः । भारतोत्तरमेतत्तु चक्रे भागवतं मुनिः ॥ इत्येवं प्रथमस्कन्धोक्तेरेतस्याष्टादशान्तर्भावः कथम् । मैवं वोचः । अष्टादशान्तर्गतस्य भागवतस्य ये लक्षणसंख्ये मात्स्यादौ कथ्येते ताभ्यामेतच्छुकभाषितमेव तदन्तर्गतं नान्यत् । मात्स्ये— यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः । वृत्रासुरवधोपेतं तद्भागवतमिष्यते ॥ इ०। स्कान्देच— ग्रन्थोष्टादशसाहस्रो द्वादशस्कन्धसंमितः । हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्याश्च समारम्भस्तद्वै भागवतं विदुः ॥ इति। वाराहे परिक्षितः शापकथनप्रसङ्गे वराहदेवभाषणे-तत्र जग्मुर्महाभागा मुनयः संशितव्रताः । शुकश्च व्यासतनयो महाभागवतो मुनिः ॥ संहितां श्रावयामास राज्ञे भागवतीं शुभाम् इत्यादि ॥ ब्रह्माण्डेपि—शुकवागमृताब्धीन्दुः परीक्षित्स्वान्तगं तमः ॥ निरस्यन् दिद्युते विप्र श्रीमद्भागवताख्यया॥ इत्यादि सर्वत्र पुराणेषु भारतादावपि कृतेष्वस्य लक्षणानां माहिम्न उल्लेखात्। नन्वस्मच्छङ्का सुस्थैवेति चेदेतैर्वचनप्रामाण्यैरष्टादशोत्तरमित्यत्राष्टादशग्रन्थसमूहे उत्तरम् तदन्तर्गतमष्टादशतमं भारतं नामेतिहासः अनन्तरं भागवतं नाम पुराणं कृतवानिति तदर्थः । एवमष्टादशपुराणानि एकोनविंशतितमो भारतेतिहासः । अथवा कालविवक्षात्र नास्ति पौर्वापर्यकथनं त्वसुरादिमोहार्थमेव । एतेन मार्कण्डेयादावपि भगवन्भारताख्यानं व्यासेनोक्तं महात्मना ॥ पूर्णमस्त्यमलैः शब्दैर्नानाशास्त्रसमुच्चयैः ॥ इत्याद्युक्तत्वात् । आग्नेयेऽपि ' गीतासारं प्रवक्ष्यामि ' इत्युक्त्वा दैवी ह्येषा गुणमयी'त्यादि भारतगीतापद्योक्तत्वात् भारतानन्तरकृतत्वेनाष्टादशस्वनन्तर्भावादयः शङ्कापङ्काः क्षारक्षालिताः संपन्नाः । एतेन सर्वेषामप्यपवादा वातेन तूलवदाकाशे बिन्दुशो गताः ।

एवं श्रीमत्कृष्णद्वैपायनकृतश्रीमद्भागवतेऽनेकाः शतशः टीकाः प्रकटीकृताः समुल्लसन्ति तेष्वन्यतरेयं श्रीमद्भागवतभावार्थदीपिकानाम्नी श्रीमच्छ्रीधरेण मस्करिणा समस्कारि। अयं श्रीधरश्च किंकालिक इति न ज्ञायते परंतु अमरसिंहादर्वाक्कालिकः कमलाकरभट्टतश्च प्राक्कालिकः इतिज्ञायते परमे कमित्रमिलितेयमाख्यायिका-अस्ति च दिल्लीवल्लभोऽकबरनाम्ना प्रसिद्धो यवनराट्।सचैकदा विप्राग्विनिन्दितुंप्रवृत्तः स्वाश्रितं वीरबलनामानं ब्राह्मणमाहूय पृष्टवान् भो अत्र सर्वत्र पृथिव्यां का वा श्रेष्ठतमा जातिरिति तदैव तेनामात्येनास्माकं ब्राह्मणजातिरेवोत्तमेत्यवोचि। तदा निरुत्तरः स यवनराट् एतन्न्यूननिदानशोधनतत्पर एकस्मिन्दिने स्वकीयसौधस्थानाश्रित एतं श्रीधरं कनोजब्राह्मणं पात्राभावात् एकस्यामुपानहि तैलमन्यस्यां घृतं ग्राहयन्तं दृष्ट्वा जग्राह। तस्मिन्नेव काले स्वामात्यं वीरबलनामानमामंत्र्येनं ब्राह्मणबन्धुं दर्शयामासावादीच्च किमेवमेव भवतामुच्चैस्तराब्राह्मणजातिरिति बन्धयामासैतेने प्रबन्धेन दृष्टे श्रुते ब्राह्मणे भाषणे च धीरमवादि तेनामात्येनैवमपि तस्याचरणे तत्तेजस्तथा न ज्ञातुं शक्यते। एवमाभाष्य राजानं स अमात्यः पण्येकेतारं तं श्रीधरं भृत्येनामन्त्र्य भोब्राह्मणापसद किमिदमस्मदीया जातिः कलङ्किता त्वयेपान स्थिततैलवृतग्राहकेणेत्येवमसमायाक्रोश्यापि तत्र समीपस्थितमेकं सन्तमासाद्य तेन तं नृसिंहमन्त्रोपदेशमकारि च एकां नृसिंहप्रतिकृतिं लेखयित्वा प्रतिकृतिं प्रदर्श्य मन्त्रो मन्त्रितव्यइति तमाज्ञाप्य समीपस्थितान् कांश्चिद्वीरानप्येवमाज्ञापित तरवारिधारिभिभवद्भिरस्य सामाप्येन भावनायं यदि चायमस्याः प्रतिकृतेरन्यद्द्रक्ष्यति तदैवैतस्य शिरश्छेदो विधातव्यश्च । एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुते तेन तस्य भाषणे भीतोरण्ये एकनिष्टतया मन्त्रमजपत् । एवं गतेषु केषु चिद्दिनेषु श्रद्धायिते तस्मिश्चेतसि नाभवत्तेषां फटायितकरवालकराणां वीराणा कारणम् । एवं व्यर्थव्यापारास्तेऽमात्यं गत्वा तत्सपरस्तं निवेदयांचक्रुः । एवंसिद्धे तस्मिन्श्रीधरमस्कारिणि तत्तेजःपरीक्षाचिकीर्षणतत्परं राजानं ज्ञापयामास 'गन्तव्यंश्रीधरतेजोदर्शनार्थं' मित्येवमाज्ञापितो राजा गजस्कन्धारूढः तेन वीरवलामात्येन वीरैश्च सार्धं तद्दर्शनार्थं गमनमकरोत् । गते च तत्समीपे करिणि स साक्षान्नृसिंहप्रसन्नप्रसादितं तं दृष्ट्वाऽग्रेभवितुमेकेनापि पदा चलितुं नाशक्नोत् । तदामात्यं राज्ञा न्यवेदि किमिदं कथं न चलतीतो हस्तीत्युक्तः स स्वकीयनृसिंहदेवताप्रभावं भावयामास च स्वकीयब्राह्मणजातिश्रैष्ठ्यमपि । एवंप्रकारेण सिद्धसाधुत्वेन श्रीधरेण श्रीनृसिंहप्रेरणयेयं भागवतभावार्थदीपिका नाम टीका प्राटीकि । स्वतोऽज्ञानिना तेन यत्र न ज्ञातं भावबोधनं तत्र साक्षान्नृसिंहोदेवः अयंभावइतिप्रारम्भारम्भेण श्लोकभावार्थं जनानबोधि ।

एवं भावार्थदीपिकया टीकया मुद्रितमेतच्छ्रीमद्भागवतमनेकवारमतः तस्याः पूजनीयत्वात्तयैव साकमाञ्चिकीर्षूणामस्माकममरकोशादिटीकाकारपण्डितमहेश्वरकृतबालबोधिन्याटीकापूरणिकया टिप्पण्या सहितमुक्तपण्डितहस्तलिखितं गोमान्तकेष्वेतद्गृहेषु एतत्प्रपौत्रत एव लब्धमस्मानेकं पुस्तकम् । तत्र श्रीमता पण्डितेन मध्येमध्ये लिखिता टिप्पणी अस्माभिर्मुद्रणसमये ( ) एतच्चिह्नेन द्योतिता पुस्तकेषु द्रष्टव्या । एतत्पुस्तकमनेन १७२६ तमे शके लिखित्वा पूर्णतामानायितम् ।

एवं केवलं टीकयाटिप्पण्यापि साकमङ्कितेन पौराणिकानां सप्ताहकथ्यमानसंक्षेपकथाप्रसङ्गेषु चूर्णिकापेक्षा तथैव स्थिता भवेदतोऽस्माभिस्तामपि दूरीकर्तुं प्रत्येकश्लोकभावार्थज्ञानार्थं तत्तच्छ्लोकाङ्केनाङ्किता च सर्वा चूर्णिका टीकावदेव प्रत्येकं पत्रे मुद्रिता । अत्र मुद्रणाकालेऽशुद्धादिदोषापाकरणेन पित्रेउपाख्यैः कृष्णशास्त्रिभिर्मय्युपकारितमिति नांशेनापीत्युपकर्तुं शक्तोहं प्रार्थये ।

एवंरीत्येदं प्रथमत एव मुद्रणमतः कुत्रचिन्महेश्वरटिप्पण्यादिषु दृष्टिदोषेण नाङ्कितेषु तथैवान्यत्रकुत्रचिदशुद्धस्थलेषु क्षन्तव्यं सुधीभिः । तत्र विशेषतोमहेश्वरपक्षलक्षायितैर्गोमान्तप्रान्तातवर्तिनीभिःपण्डिततातिभिः । इत्यलं बहुलेखनपल्लवितेनेत्यशेषमतिमङ्गलम् ।

गोपाळनारायणजनताप्रेरितः

वैराजक्षेत्रनिवासी ऐनापुरेउपाख्य-
श्रीबाळाचार्यात्मज उद्धवाचार्यः ।

मुम्बय्यां—तपस्यस्यासितदशम्यां शनैश्चरवारे । १८११ तमे शालिवाहनशाके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रीस तयार.

खालीं लिहिलेले ग्रन्थ चांगल्या जाड कागदावर मोठ्या सुन्दर टायपानीं आह्मीं छापिलेले विक्रीस तयार आहेत. प्रत्येक ग्रन्थाच्या दरएक अध्यायापूर्वी उत्कृष्ट चित्रें दिलीं आहेत, व प्रत्येक पृष्ठाखालीं कठीण शब्दांचे अर्थ दिले आहेत.

संस्कृत.

वाल्मीकि रामायण, सटीक .... रु. १२ ०
सुन्दरकाण्ड, वाल्मीकिरामायण १ ०
रामायणमाहात्म्य ० ८
श्रीमद्विष्णुपुराण सटीक ३ ०
पौषमासमाहात्म्य ० ६
माघमासमाहात्म्य ० १०
फाल्गुनमासमाहात्म्य. ० ८
मार्गशीर्षमासमाहात्म्य ० ६
ज्येष्ठमासमाहात्म्य ० ६
आषाढमासमाहात्म्य ० ६
श्रावणमासमाहात्म्य ० ८
कार्तिकमासमाहात्म्य...................... ० ८
मलमासमाहात्म्य. ० ६
मेघदूत ० ४
समासचन्द्रिका............................. ० १
समासचक्र ० १
शब्दरूपावली ० १
भावशतकम् टिप्पणीसहितम् ० ४
अमरसार (संस्कृत इंग्रेजी आणि इंग्रेजी संस्कृत कोश) १ ०

संस्कृत.

धातुरूपावली .... रु. ० ३
ग्रन्थरत्नमाला(मासिक पुस्तक)वर्षाची वर्ग.४ ०
श्रीभानुदत्तस्य-रसतरङ्गिणी टिप्पणीसमेता० १०
श्रीनागनाथस्य-भावशतकं टिप्पणीसहितं ० ४
शङ्कराचार्यस्य-सुन्दरलहरी टिप्पणीयुता. ० ४
अध्यात्मप्रदीपिका पाठान्तरैः समेता.... ० ६
भागवतचम्पूः टिप्पणीसमेता १ ८
कटाक्षशतकम् टिप्पणीयुतम् ० ४
कामाक्षिस्तुतिशतकम्....................... ० ४
कृष्णामृततरङ्गिका सटीका................. ० ६
प्रश्नोत्तररत्नमाला सटीका ० ४
प्रशस्तिकाशिका ० ६
रघुनाथविजयचम्पूः ० ८
विष्णुसहस्रनाम शङ्कराचार्यकृत् भाष्यास० ० ८
हलायुधस्य कविरहस्यम्..................... ० ८
शुकविरचितं निर्वाणाष्टकम्................. ० २
भार्गवचम्पूः टिप्पणीसमेता ० ८
श्रीनिवासचम्पूः टिप्पणीसमेता १ ४
सुभाषितरत्नाकर २ ०
आर्याशतकं टिप्पणीयुतम् ० ३

संस्कृत.

अम्बाष्टकं सटीकम्.................. रु. ० २
नृसिंहपुराणं टिप्पणीयुतम्..................... २ ८
चौरपञ्चाशिका ० २
सिद्धांतचंद्रिका सटीका.... .. .. ० ६
कलिविडंबनं. ० २
भार्गवचम्पूः ० ८
विष्णुसहस्रनाम .... ० १॥
विष्णुसहस्रनामावली ० २
सूर्यसहस्रनामावली........................... ० २
देवीसहस्रनामावली ० २
गणेशसहस्रनामावली ० २
शिवसहस्रनामावली ० २

प्राकृत.

एकनाथी भागवत ४ ८
जैमिनी अश्वमेध ३ ८
संतलीलामृत १ १२
नाथलीलामृत. २ ०
पांडवप्रताप.............................. ३ ०
भक्तविजय.............................. २ ८

प्राकृत.

रामविजय .... रु. १ ६
हरिविजय १ ६
काशीखंड. २ ८
दासबोध. १ १२
कथासारामृत २ ०
शिवलीलामृत. ० ८
शनिमाहात्म्य ० २
व्यङ्कटेशस्तोत्र ० १
सिंहासनबत्तिशी ० ३
उपयुक्त सर्वसङ्ग्रह (छापत आहे)

याखेरीज आमुचे बुकडीपोंत मराठी, इङ्ग्रजी, संस्कृत, गुजराथी, हिन्दुस्थानी, शालोपयोगी इत्यादि सर्व प्रकारचीं पुस्तकें माफक दरानें मिळतील.

गोपाळ नारायण आणि कंपनी,
बुकसेलर्स, मुंबई.

कालिकादेवी रोड, घर नंबर १६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Published by GOPAL NARAYEN & Co, Booksellers and Publishers, 16 Kalbadavee Road, BOMBAY.

हा ग्रन्थ गोपाळ नारायण कंपनी, बुकसेलर्स, मुंबई, ह्यानीं छापून प्रसिद्ध केला.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Published by GOPAL NARAYEN & Co, Booksellers and Publishers, 16 Kalbadavee Road, BOMBAY.

हा ग्रन्थ गोपाळ नारायण कंपनी, बुकसेलर्स, मुंबई, ह्यानीं छापून प्रसिद्ध केला.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विक्रीस तयार.

खालीं लिहिलेले ग्रन्थ चांगल्या जाड कागदावर मोठया सुन्दर टायपानीं आह्मीं छापिलेले विक्रीस तयार आहेत, प्रत्येक ग्रन्थाच्या दरएक अध्यायापूर्वीं उत्कृष्ट चित्रें दिलीं आहेत, व प्रत्येक पृष्ठाखालीं कठीण शब्दांचे अर्थ दिले आहेत.

संस्कृत.

वाल्मीकि रामायण, सटीक .... रु.	१२	०
सुन्दरकाण्ड, वाल्मीकिरामायण	१	०
रामायणमाहात्म्य	०	८
श्रीमद्विष्णुपुराण सटीक	३	०
पौषमासमाहात्म्य	०	६
माघमासमाहात्म्य	०	१०
फाल्गुनमासमाहात्म्य.	०	८
मार्गशीर्षमासमाहात्म्य	०	६
ज्येष्ठमासमाहात्म्य	०	६
आषाढमासमाहात्म्य	०	६
श्रावणमासमाहात्म्य	०	८
कार्तिकमासमाहात्म्य........................	०	८
मलमासमाहात्म्य.	०	६
मेघदूत	०	४
समासचन्द्रिका............................	०	१
समासचक्र.................................	०	१
शब्दरूपावली	०	१
भावशतकम् टिप्पणीसहितम्	०	४
अमरसार (संस्कृत इंग्रेजी आणि इंग्रेजी संस्कृत कोश)........................	१	०

संस्कृत.

धातुरूपावली .... रु.	०	३
ग्रन्थरत्नमाला(मासिक पुस्तक)वर्षाची वर्ग.	४	०
श्रीभानुदत्तस्य-रसतरङ्गिणी टिप्पणीसमेता	०	१०
श्रीनागनाथस्य-भावशतकं टिप्पणीसहितं	०	४
शङ्कराचार्यस्य-सुन्दरलहरी टिप्पणीयुता.	०	४
अध्यात्मप्रदीपिका पाठान्तरैः समेता....	०	६
भागवतचम्पूः टिप्पणीसमेता	१	८
कटाक्षशतकम् टिप्पणीयुतम्	०	४
कामाक्षिस्तुतिशतकम्..........................	०	४
कृष्णामृततरङ्गिका सटीका..................	०	६
प्रश्नोत्तररत्नमाला सटीका	०	४
प्रशस्तिकाशिका	०	६
रघुनाथविजयचम्पूः	०	८
विष्णुसहस्रनाम शङ्कराचार्यकृत् भाष्यास०	०	८
हलायुधस्य कविरहस्यम्.....................	०	८
शुकविरचितं निर्वाणाष्टकम्	०	२
भार्गवचम्पूः टिप्पणीसमेता	०	८
श्रीनिवासचम्पूः टिप्पणीसमेता	१	४
सुभाषितरत्नाकर	२	०
आर्याशतकं टिप्पणीयुतम्		

संस्कृत.

अम्बाष्टकं सटीकम्.................. रु.	०	२
नृसिंहपुराणं टिप्पणीयुतम्.................	२	८
चौरपञ्चाशिका	०	२
सिद्धांतचंद्रिका सटीका....	०	६
कलिविडंबनं.	०	२
भार्गवचम्पूः	०	८
विष्णुसहस्रनाम	०	१॥
विष्णुसहस्रनामावली	०	२
सूर्यसहस्रनामावली..........................	०	२
देवीसहस्रनामावली	०	२
गणेशसहस्रनामावली	०	२
शिवसहस्रनामावली	०	२

प्राकृत.

एकनाथी भागवत	४	८
जैमिनी अश्वमेध	३	८
संतलीलामृत	१	१२
ना...		
प...		

प्राकृत.

रामविजय .... रु.	१	६
हरिविजय	१	६
काशीखंड.	३	८
दासबोध.	१	१२
कथासारामृत	२	०
शिवलीलामृत.	०	८
शनिमाहात्म्य	०	२
व्यङ्कटेशस्तोत्र	०	१
सिंहासनबत्तिशी	०	३
उपयुक्त सर्वसङ्ग्रह (छापत आहे)		

याखेरीज आमुचे बुकडीपोंत मराठी, इङ्ग्रजी, संस्कृत, गुजराथी, हिन्दुस्थानी, शालोपयोगी इत्यादि सर्व प्रकारचीं पुस्तकें माफक दरानें मिळतील.

गोपाळ नारायण आणि कंपनी,

बुकसेलर्स, मुंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu